CC-0. In Public Domain. Digitization by eGangotri




Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ श्रीस्कान्दे महापुराणे पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्यं प्रारभ्यते ॥ (५-१) ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri








Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri








Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri








Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri








Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ श्रीस्कान्दे महापुराणे पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्यं प्रारभ्यते ॥ (१) ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





॥ श्रीगणेशाय नमः ॥ श्रीजगदंबायै नमः ॥ ॥ अथावन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्यं प्रारभ्यते ॥ ॥ व्यास उवाच ॥ ॥ स्रष्टारोऽपि प्रजानां प्रबलभवभयाद्यं नमस्यंति देवा यो ह्यव्यक्ते प्रविष्टः प्रविहितमनसां ध्यानयुक्तात्मनां च ॥ लोकानामादिदेवः स जयतु भगवाञ्छ्रीमहाकालनामा बिभ्राणः सोमलेखामहिवलययुतं व्यक्तलिंगं कपालम् ॥ १ ॥ ॥ उमोवाच ॥ ॥ पृथिव्यां यानि तीर्थानि पुण्याश्च सरितस्तथा॥ कथ्यंतां तानि यत्नेन श्रद्धा येषु प्रजायते ॥ २ ॥ ॥ ईश्वर उवाच ॥ ॥ अस्ति लोकेषु विख्याता गंगा त्रिपथगा नदी ॥ सेविता देवगन्धर्वैर्मुनिभिश्च निषेविता ॥ ३ ॥ तपनस्य सुता देवी यमुना लोकपावनी ॥ पितॄणां वल्लभा देवी महापातकनाशिनी ॥ ४ ॥ चन्द्रभागा वितस्ता च नर्मदाऽमरकण्टके ॥ कुरुक्षेत्रं गया देवि प्रभासं नैमिषं तथा ॥ ५ ॥ केदारं पुष्करं चैव तथा कायावरोहणम् ॥ तथा पुण्यतमं देवि महाकालवनं शुभम् ॥ ६ ॥ यत्रास्ते श्रीमहाकालः पापेन्धनहुताशनः ॥ क्षेत्रं योजनपर्यंतं ब्रह्महत्यादिनाशनम् ॥ ७ ॥ भुक्तिदं मुक्तिदं क्षेत्रं कलिकल्मषनाशनम् ॥ प्रलयेऽप्यक्षयं देवि दुष्प्रापं त्रिदशैरपि ॥ ८ ॥ ॥ उमोवाच ॥ ॥ प्रभावः कथ्यतां देव क्षेत्रस्यास्य महेश्वर ॥ यानि तीर्थानि विद्यन्ते यानि लिंगानि संति वै ॥ ९ ॥ तान्यहं श्रोतुमिच्छामि परं कौतूहलं हि मे ॥ १० ॥ ॥ महादेव उवाच ॥ ॥ शृणु देवि प्रयत्नेन प्रभावं पापनाशनम् ॥ क्षेत्रमाद्यं महादेवि सर्वपापप्रणाशनम् ॥ ११ ॥ श्रीमेरोः संनिधाने च शिखरं रत्नचिह्नितम् ॥ अनेकाश्चर्यनिलयं बहुपादपसंकुलम् ॥ १२ ॥ विचित्रधातुभिश्चित्रं स्वच्छस्फटिकवेदिकम् ॥ विचित्रवर्णशोभाढ्यमृषिसंघनिनादितम् ॥ १३ ॥ मृगनागेन्द्रसंयुक्तं गजयूथसमाकुलम् ॥ निर्झरांबुप्रपातोत्थशीकराकरसंकुलम् ॥ १४ ॥ वाताहततरुव्रातप्रसूनास्थानचित्रितम् ॥ मृगनाभिवरामोदवासिताशेषकाननम् ॥ १५ ॥ लतागृहरतिस्थानं सिद्धविद्याधराश्रयम् ॥ प्रवीणकिन्नरव्रातमधुरध्वनिनादितम् ॥ १६ ॥ तस्मिन्वने महारम्ये शोभिताशेषभूमिकम् ॥ वैराजंनाम भवनं ब्रह्मणः परमेष्ठिनः ॥ १७ ॥ तत्र दिव्यांगनागीतमधुरध्वनिनादिता ॥ पारिजाततरुच्छन्नमंजरीदामशोभिता ॥ ॥ १८ ॥ बहुवाद्यसमुन्नद्धमहास्वननिनादिता ॥ लयतालयुतानेकगीतवादित्रनादिता ॥ १९ ॥ विन्यस्ता कोटिभिः स्तंभैर्निर्मलादर्शशोभिता ॥ लयतालयुतानेकमहाकौतुकसंयुता ॥ २० ॥ अप्सरोनृत्यविन्यासविलासोल्लासशोभिता ॥ सभा कांतिमतीनाम देवानां हर्षदायिका ॥ २१ ॥ ऋषिसंघसमाकीर्णा मुनिवृन्दनिषेविता ॥ द्विजातिवेदशब्देन नादिताऽऽनंददायिका ॥ २२ ॥ तस्यां निविष्टं वागीशं शंकराराधने रतम् ॥ सनत्कुमारं ब्रह्मर्षिं ब्रह्मणो मानसं सुतम् ॥ २३ ॥ मुनिमध्यात्समुत्थाय कृष्णद्वैपायनो मुनिः ॥ पराशरसुतो व्यासः प्रणिपत्य यथाविधि ॥ २४ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतांजलिपुटो भूत्वा भवभक्त्यानुभावितः ॥ पप्रच्छ परया तुष्टया हर्षितांगरुहाननः ॥ २५ ॥ माहाकालस्य महात्म्यं प्राणिनां मोहनाशनम् ॥ ॥ व्यास उवाच ॥ ॥ महाकालवनं कस्मात्प्रोच्यते सर्वतो वरम् ॥ २६ ॥ भगवन्क्षेत्रमाहात्म्यं महाकालस्य कथ्यताम् ॥ कथं गुह्यवनं प्रोक्तं पीठत्वमूषरं तथा ॥ २७ ॥ फलं यथात्र वसतां मृतानां च गतिर्यथा ॥ स्नानेन यद्भवेत्पुण्यं दानेनापि च यत्फलम् ॥ २८ ॥ कथमेतत्स्मशानं च क्षेत्रं प्रोक्तं यथा तथा ॥ पृष्टं मे शंकरे भक्त्या ब्रूहि त्वं शास्त्रकोविद ॥ २९ ॥ ॥ सनत्कुमार उवाच ॥ ॥ क्षीयते पातकं यत्र तेनेदं क्षेत्रमुच्यते ॥ यस्मात्स्थानं च मातॄणां पीठं तेनैव कथ्यते ॥ ३० ॥ मृताः पुनर्न जायंते तेनेदमूषरं स्मृतम् ॥ गुह्यमेतत्प्रियं नित्यं क्षेत्रं शंभोर्महात्मनः ॥३१॥ यस्मादिष्टं हि भूतानां स्मशानमतिवल्लभम् ॥ महाकालवनं यच्च तथा चैवाविमुक्तिकम् ॥ ३२ ॥ एकाम्रकं भद्रकालं करवीरवनमेव च ॥ कोलागिरिस्तथा काशी प्रयागममरेश्वरम् ॥ ३३ ॥ भरथं चैव केदारं दिव्यं रुद्रमहालयम् ॥ दिव्यस्मशानान्येतानि रुद्रस्येष्टानि नित्यशः ॥ ॥ ३४ ॥ रमते भगवानेषु सिद्धक्षेत्रेषु सर्वदा ॥ पृथिव्यां नैमिषं तीर्थमुत्तमं तीर्थपुष्करम् ॥ ३५ ॥ त्रयाणामपि लोकानां कुरुक्षेत्रं प्रशस्यते ॥ कुरुक्षेत्राद्दशगुणा पुण्या वाराणसी मता ॥ ३६ ॥ तस्या दशगुणं व्यास महाकालवनोत्तमम् ॥ प्रभासाद्यानि तीर्थानि पृथिव्यामिह यानि तु ॥ ३७ ॥प्रभासमुत्तमं तीर्थं क्षेत्रमाद्यं पिनाकिनः ॥ श्रीशैलमुत्तमं तीर्थं देवदारुवनं तथा ॥ ३८ ॥ तस्मादप्युत्तमं व्यास पुण्या वाराणसी मता॥तस्माद्दशगुणं प्रोक्तं सर्वतीर्थोत्तमं यतः॥३९॥महाकालवनं गुह्यं सिद्धक्षेत्रं तथोषरम् ॥ किंचिद्गुह्यान्यथान्यानि स्मशानान्यूषराणि च ॥४०॥ सर्वतस्तु समाख्यातं महाकालवनं मुने ॥ स्मशानमूषरं क्षेत्रं पीठं तु वनमेव च ॥४१॥ पंचैकत्र न लभ्यंते महाकालपुराद्दते ॥४२॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये महाकालवनप्रशंसावर्णनंनाम प्रथमोऽध्यायः ॥ १ ॥ ॥ सनत्कुमार उवाच ॥ ॥ पुरा त्वेकार्णवे प्राप्ते नष्टे स्थावरजंगमे ॥ नाग्निर्न वायुरादित्यो न भूमिर्न दिशो नभः ॥१॥ न नक्षत्राणि न ज्योतिर्न द्यौर्नैवदुर्ग्रहास्तथा ॥ न देवासुरगंधर्वाः पिशाचोरगराक्षसाः ॥ २ ॥ सरांसि नैव गिरयो नापगा नाब्धयस्तथा ॥ सर्वमेव तमोभूतं न प्राज्ञायत किंचन ॥ ३ ॥ तदैको हि महाकालो लोकानुग्रहकारणात् ॥ तस्थौ स्थानान्यशेषाणि काष्ठास्वालोकयन्प्रभुः ॥ ४ ॥ सृष्ट्यर्थं स महाकालः करे कामं प्रतिष्ठितम् ॥ दक्षिणस्य तु तर्जन्यां स ममंथाविशोपितम् ॥५॥ कललं बुद्बुदं भूत्वा तीव्रवेगविवर्द्धितम् ॥ जज्ञे तदंडं सुदृढं सुष्ठु वृत्तं हिरण्मयम् ॥६॥

१ तस्य च–इ० पा० । २ यथास्य क्षेत्रस्य–इ० पा० । ३ शास्त्रसंमतम्–इ० पा० । ४ सिद्धम्–इ० पा० । ५ नो ह्रदास्तथा–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



करेण ताडित तद्धि बभूव द्विदलं महत् ॥ अधःखंडं स्मृता भूमिरूर्ध्वं द्यौस्तारकान्वितम् ॥ ७ ॥ मध्येऽभवत्तदा ब्रह्मा पंचवक्त्रश्चतुर्भुजः ॥
महेश्वरोऽनुमान्यैव तमयोजदनंतरम् ॥ ८ ॥ कुरु सृष्टिं महाबाहो विचित्रां मदनुग्रहात् ॥ इत्युक्त्वांतर्हितः क्वापि देवो ब्रह्मा न जग्मिवान् ॥ ९ ॥
प्रेर्यमाणोऽपि वै स्रष्टुं ब्रह्मा देवमचिंतयत् ॥ ब्रह्मणा ध्यायमानश्च ज्ञानार्थं भगवान्भवः ॥ १० ॥ ब्रह्मणस्तपसा हृष्टः प्रादाद्वेदं षडंगकम् ॥
लब्धे वेदेऽपि न चिरात्सृष्टिं कर्तुं शशाक सः ॥११॥ तपसाऽतिष्ठदा[1] भूयः समाराधयितुं भवम् ॥ नापश्यत्स यदा देवं तदा तुष्टाव भावितः ॥ १२ ॥
॥ ब्रह्मोवाच ॥ ॥ नमः शिवायामलसत्त्वचेतसे गुणत्रयातीतविसारितेजसे ॥ षडंगवेदस्य ममापि वेधसे परस्वरूपानुभवाय चक्षुषे ॥ १३ ॥ नमोऽ
स्तु ते सृष्टिविधौ रजोजुषे जगत्स्थितौ सत्त्वमधिष्ठिताय ते ॥ विनाशहेतौ तमसा महीयसे शिवाय निर्वाणसुखप्रदायिने ॥१४॥ अशेषभूतप्रकृतेः परा
य वै परात्मरूपाय नमः शिवाय वै ॥ नृबुद्ध्यहंकारमनोविधायिने भर्त्रे च षड्विंशकरूपकाय वै ॥ १५ ॥ भूतोयवह्न्यम्बरवायुचंद्रसूर्यात्मरूपाभिरिदं
तनूभिः ॥ व्याप्तं जगद्यस्य नमोऽस्तु तस्मै भूतं भविष्यमथ वर्तमानम् ॥ १६ ॥ यानीह तेजांसि जगंति यानि भूतानि भव्यान्यथ कारणानि ॥
भवंति सृष्टौ विलयं विनाशे व्रजंति यस्यात्मनि तं नमामि ॥ १७ ॥ ॥ सनत्कुमार उवाच ॥ ॥ एवं संस्तुवतो व्यास ब्रह्मणो भगवान्परः ॥ अन्त
र्हित उवाचेदं ब्रह्मन्संयाच्यतां वरः ॥ १८ ॥ स वव्रे मनसा पुत्रं भवं गौरवकारणात् ॥ विज्ञायांतर्गतं तस्य परमेश उवाच तम् ॥ १९ ॥ यस्मान्मां
मनसा पुत्रं चतुर्मुख समीहसे ॥ कस्मिंश्चित्कारणे तस्मादहं छेत्स्यामि ते शिरः ॥ २० ॥ अयाच्यं याचितं यस्मान्ममांशो नीललोहितः ॥ रुद्रो
भविष्यति सुतः स च ते हिंस्यति प्रभाम् ॥ २१ ॥ अन्यद्यस्मात्स्मृतो भक्त्या त्वयाहं पितृभावतः ॥ परब्रह्मस्वरूपेण जिज्ञासा मम या कृता ॥
॥ २२ ॥ तस्माद्ब्रह्मेति लोकेऽत्र नाम ख्यातं भविष्यति ॥ पितामहत्वं तेनापि पितामहस्ततो ह्यसि ॥ २३ ॥ लब्ध्वा शापवरावेवं पुत्रसृष्टिं चकार
सः ॥ स्वतेजोजनितं वह्निं जुह्वतः स्वेदमावहत् ॥२४॥ समिद्युक्तेन हस्तेन ललाटं मार्जतोऽभवत् ॥ स्विन्नभ्रष्टस्ततो रक्तबिंदुरेको विभावसौ ॥२५॥
स नीललोहितोऽभूद्वै स च रुद्रो भवाज्ञया ॥ तदनन्तरमासाद्य उत्ततार सुतोंऽतिकात् ॥ २६ ॥ पंचवक्त्रो दशभुजः शूलचापासिशक्तिमान् ॥ त्रिपंच
नयनो रौद्रो व्यालयज्ञोपवीतकः ॥ २७ ॥ सेन्दुः कपर्दं बिभ्राणः सिंहचर्मांबरंधरः ॥ जातमेवं स दृष्ट्वा तु ब्रह्मा नामाकरोत्तदा ॥ २८ ॥ नील
लोहितनामेति भव रुद्र पिनाकधृक् ॥ ततः प्रववृते सृष्टिः स्रष्टुर्लोकपितामहात् ॥ २९ ॥ सप्तादौ मानसाञ्जज्ञे सनकादींस्ततोऽपरान् ॥ मरीचि



१ आ–इत्युपसर्गः–'छन्दोवत्पुराणानि भवन्ति' इति वृद्धसंमतम् । अत एव "छन्दसि परेऽपि" इत्यनुशासनेन–आङुपसर्गस्य परतोऽपि प्रयोगः । आतिष्ठत्–इति प्रयोगो बोद्धव्यः । २ पुरः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दक्षप्रभृतीन्मन्वादींश्च प्रजासृजः ॥ ३० ॥ अष्टभेदान्सुरान्कृत्वा तिर्यग्योनिं च पंचधा ॥ मनुष्यानेकभेदांश्च सृष्टिमेवं ससर्ज ह ॥ ३१ ॥ सृष्टिः सुरादिका जाता कृत्वा ब्रह्माणमप्यधः ॥ प्रणम्याथ सिषेवुस्ते केवलं नीललोहितम् ॥ ३२ ॥ ततो ब्रह्माऽवदद्रुद्रमपूज्यो हि त्वया कृतः ॥ स्वतेजसा भवान्पूज्यो यतो याहि हिमालयम् ॥३३॥ तं नीललोहितः प्रोचे भवता नार्चितो ह्यहम् ॥ ततो जगाम रुद्रोऽसौ स यत्र भगवान्भवः ॥३४॥ ततो ब्रह्माऽभवन्मूढो रजसा चोपबृंहितः ॥ तताप तेजसा सृष्टिं मन्यमानो मया कृताम् ॥ ३५ ॥ मत्तुल्यो नास्ति वै देवो येन सृष्टिः प्रवर्द्धिता ॥ सदेवासुरगन्धर्वा पशुपक्षिमृगाकुला ॥ ३६ ॥ एवं मूढः स पंचास्यो विरिंच्योऽभवद्दर्पितः ॥ प्राग्वक्रं सुस्वरं तस्य सामवेदप्रवर्तकम् ॥ ३७ ॥ द्वितीयं वदनं तस्य ऋग्वेदस्य प्रवर्तकम् ॥ यजुर्वेदधरं चान्यदथर्वाख्यं चतुर्थकम् ॥ ३८ ॥ सांगोपांगेतिहासांश्च सरहस्यान्ससंग्रहान् ॥ वेदानधीते वक्रेण पंचमेनोपचक्षुषा ॥ ॥ ३९ ॥ तस्याऽसुराः सुराः सर्वे वक्रस्याद्भुततेजसः ॥ तेजसा न प्रकाशंते दीपः सूर्योदये यथा ॥ ४० ॥ सपुत्रा अपि सोद्वेगा बभूवुर्नष्टचेतसः ॥ नाभिगन्तुं न च द्रष्टुं चिरं तेजोऽपसर्पितुम् ॥ ४१ ॥ अभिभूतमिवात्मानं मन्यमाना अविद्विषः ॥ सर्वे ते मन्त्रयामासुर्देवा वै हितमात्मनः ॥ ४२ ॥ गच्छाम शरणं देवं निस्तेजा ब्रह्मतेजसा ॥ किं तु तस्य न जानीमः स्थानं यत्र व्यवस्थितः ॥ ४३ ॥ तं भीममत्र द्रक्ष्यामो भक्त्या नान्येन केनचित् ॥ एवं संमन्त्र्य ते देवाः कृतांजलिपुटास्तदा ॥ चक्रुः स्तोत्रं महेशस्य परया स्वरसंपदा ॥ ४४ ॥ ॥ देवा ऊचुः ॥ नमस्ते देवदेवेश महेश्वर नमोनमः ॥ ४५ ॥ न विद्मः परमं मूढा महिमानं तवातुलम् ॥ यद्योगेन परं ब्रह्म भूतानां त्वं सनातनः ॥ ४६ ॥ प्रतिष्ठा सर्वभूतानां हेतुः सर्वस्य सर्जने ॥ बिभर्षि चैव नेत्रस्थान्सोमसूर्यविभावसून् ॥ ४७ ॥ नामसंकीर्तनादेव मुच्यन्ते जंतवोऽशुभात् ॥ पृथिव्यबग्निचन्द्रार्कव्योमवायूपलक्षणाः ॥ ४८ ॥ मूर्तयस्ते महादेव व्याप्तमाभिरशेषतः ॥ रजःसत्त्वतमोभावैर्भ्राम्यमाणं त्वया जगत् ॥ ४९ ॥ नावबुध्यति सर्वेश सर्वमूर्तिधरो यतः ॥ ब्रह्मादीनां सुरेशानां संमोहनविमोहनम् ॥ त्वं करोषि युगावर्तकाले काले च दुःसहम् ॥ ५० ॥ ॥ सनत्कुमार उवाच ॥ ॥ प्रत्यक्षं दर्शनं दत्त्वा देवानामनुकंपया ॥ प्रसन्नवदनो भूत्वा देवैश्चापि नमस्कृतः ॥ ५१ ॥ वासयन्मोहनाम्ना तु सह देवैर्महेश्वरः ॥५२॥ एवं संस्तूयमानोऽसौ देवर्षिपितृमानवैः ॥ अन्तर्हित उवाचेदं देवा ब्रूत यथेप्सितम् ॥ ५३ ॥ ॥ देवा ऊचुः ॥ ॥ प्रत्यक्षं दर्शनं स्थाणो प्रार्थयाम सदा तव ॥ त्वया कारुण्यतोऽस्माकं वरश्चापि प्रदीयताम् ॥ ५४ ॥ यदस्माकं महद्वीर्यं तेजश्चैव पराक्रमम् ॥ तत्सर्वं ब्रह्मणा ग्रस्तं पंच

१ प्रविष्टः—इ०पा०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



मास्यस्य तेजसा ॥ ५५ ॥ विनेशुः सर्वतेजांसि त्वत्प्रसादात्पुनः प्रभो ॥ जायते तद्यथापूर्वं तथा कुरु महेश्वर ॥ ५६ ॥ ॥ सनत्कुमार उवाच ॥ ॥ प्रत्यक्षमेत्य वै पश्चाच्चलितः शर्व एव हि ॥ जगाम तत्र यत्रासौ रजोऽहंकारमूर्त्तिमान् ॥ देवाः स्तुवंतो देवेशं परिवार्य उपाविशन् ॥ ॥ ५७ ॥ ब्रह्मा तमागतं देवं नाजानात्तमसा वृतः ॥ सूर्यकोटिसहस्राणां तेजसा रंजयञ्जगत् ॥ ५८ ॥ तदाऽदृश्यत विश्वात्मा विश्वसृग्विश्वभावनः ॥ स पितामहमासीनं सकले देवमण्डले ॥ ५९ ॥ तेजसाभिभवन्रुद्रस्तेन मत्तोऽग्रतः स्थितः ॥ रुद्रतेजोभिभूतं च ब्रह्मवक्त्रं न राजते ॥ ६० ॥ रात्रौ प्रकाशकिरणश्चंद्रः सूर्योदये यथा ॥ सगर्वोथात्मजं दृष्ट्वा रुद्रदेवं सनातनम् ॥ ६१ ॥ अवन्दत करेणैव प्राह वै सस्मितं वचः ॥ प्रत्युवाच विरूपाक्षो ब्रह्माणं तं हसन्निव ॥ ६२ ॥ यतो न वेद परमं देवं तत्तेजसावृतः ॥ ततोऽट्टहासं भगवान्मुमोच शशिशेखरः ॥ ६३ ॥ पश्यतां सर्वदेवानां शृण्वतां वाचमुक्तवान् ॥ तेनाट्टहासशब्देन मोहयित्वा पितामहम् ॥ ६४ ॥ तेजोराशिशशांकाभः शशांकार्काग्निलोचनः ॥ वामांगुष्ठनखाग्रेण ब्रह्मणः पञ्चमं शिरः ॥ ६५ ॥ चकर्त कदलीगर्भं नरः कररुहैरिव ॥ छिद्यमानं च तद्वक्त्रं बुबुधे न पितामहः ॥ ६६ ॥ रुद्रस्य तेजसा तस्मान्मोहितो न नतिं गतः ॥ छिन्नं तस्य शिरः पश्चाद्रुद्रहस्ते स्थितं तदा ॥ ६७ ॥ अपश्यद्दैवतैः सार्धं रौद्रमतिभयाज्ज्वलत् ॥ महेश्वरकरांतस्थनखे वक्त्रं विराजते ॥ ६८ ॥ ग्रहमण्डलमध्यस्थो द्वितीय इव चन्द्रमाः ॥ उत्क्षिप्य तत्कपालेन ननर्त शशिशेखरः ॥ ६९ ॥ शिखरस्थेन सूर्येण कैलास इव पर्वतः ॥ छिन्ने वक्त्रे ततो देवा हृष्टपुष्टा वृषध्वजम् ॥ तुष्टुवुर्विविधैः स्तोत्रैर्देवदेवं कपालिनम् ॥ ७० ॥ ॥ देवा ऊचुः ॥ ॥ नमः कपालिने नित्यं महाकालाय शंखिने ॥ ७१ ॥ ऐश्वर्यज्ञानयुक्ताय सर्वभोगप्रदायिने ॥ नमो दर्पविनाशाय सर्वदेवमयाय च ॥ ७२ ॥ कालसंहारकर्ता त्वं महाकालस्ततो ह्यसि ॥ भक्तानां दुःखशमनो दुःखांतस्तेन रोचसे ॥ ७३ ॥ शंकरोप्याशु भक्तानां तेन त्वं शंकरः स्मृतः ॥ छित्त्वा ब्रह्मशिरो यस्मात्कपालं च बिभर्षि च ॥७४॥ तेन देव कपाली त्वं स्तुतो ह्यसि प्रसीद नः ॥ एवं स्तुतः प्रसन्नात्मा देवानुत्थाप्य शंकरः ॥७५॥ कृपानिधिः स भगवांस्तत्रैवांतरधीयत ॥ शशिशकलमयूखैर्भासितं यत्कपर्दं द्रवति गगनगंगातोयवीचीविचेयम् ॥ सितविधृतकपालो मालया[१] रुद्रपार्श्वे स जयति जितवेधा ऊर्जितः प्राज्यतेजाः ॥७६॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये ब्रह्मशिरश्छेदवर्णनं नाम द्वितीयोऽध्यायः ॥ २ ॥छ॥ ॥ सनत्कुमार उवाच ॥ ॥ छिन्ने वक्त्रे ततो ब्रह्मा क्रोधेन तमसा वृतः ॥ ललाटे स्वेदमुत्पन्नं गृहीत्वाऽताडय



१ मालया—मालया उपलक्षितः—इत्यर्थः । मालाधारी--इति यावत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्भुवि ॥ १ ॥ तत्स्वेदात्कुंडली जज्ञे सधनुः समहेषुधिः ॥ सहस्रकवचो वीरः किं करोमीत्युवाच ह ॥ २ ॥ तमुवाच विरिंचिस्तु दर्शयन्रुद्रमोजसा ॥ वध्यतामेष दुर्बुद्धिर्जायते न यथा पुनः ॥ ३ ॥ ब्रह्मणो वचनं श्रुत्वा धनुरुद्यम्य पृष्ठतः ॥ स प्रतस्थे महेशस्य बाणहस्तोऽतिरोषभृत् ॥ ४ ॥ स दृष्ट्वा पुरुषं चोग्रमगमद्गिरिस्मितो भवः ॥ दिव्यबाणधनुर्हस्तं वेगविक्रांतगामिनम् ॥ ५ ॥ मया न वध्योऽतिबलः सखा विष्णोर्भविष्यति ॥ अनुग्राह्यो ह्यहं तेन सख्यार्थं तपसि स्थितः ॥ ६ ॥ चिंतयन्नित्थमीशोऽपि विष्णोराश्रममभ्यगात् ॥ हुंकारध्वनिना ब्रह्मन्मोहयित्वा ततो नरम् ॥ ७ ॥ प्रपात्य च तदा हृष्टः क्रीडां कुर्वञ्जगत्स्थितौ ॥ यत्र नारायणः श्रीमांस्तपस्तेपे प्रतापवान् ॥ ८ ॥ अदृश्यः सर्वभूतानां विश्वात्मा विश्वसृग्विभुः ॥ तत्र प्राप्तो विरूपाक्षो ददर्श मधुसूदनम् ॥ ९ ॥ एकांगुष्ठस्थितं भूमौ तपोऽत्यंतमनातुरम् ॥ युगांतार्कसहस्रस्य तेजसा वृतमद्भुतम् ॥ १० ॥ पुण्याधारसमायुक्तं पुराणपुरुषोत्तमम् ॥ दृष्ट्वा नारायणं देवं भिक्षां देहीत्युवाच ह ॥ ११ ॥ कपालं दर्शयित्वाग्रे ज्वलज्ज्वलनसोत्कटम् ॥ कपालपाणिं संप्रेक्ष्य रुद्रं विष्णुरचिंतयत् ॥ १२ ॥ कोऽन्यो योग्यो भवेद्भिक्षुर्भिक्षादानस्य सांप्रतम् ॥ योग्योऽयमिति संकल्प्य दक्षिणं भुजमर्पयत् ॥ १३ ॥ तं विभेदांतर्गतज्ञः शूलेन शशिशेखरः ॥ ततः प्रवाह उत्पन्नः शोणितस्य विभोर्भुजात् ॥ १४ ॥ जांबूनदरसाकारा वह्निज्वालेव निर्मला ॥ निष्पपात कपालांते शंभुना संप्रतीच्छिता ॥ १५ ॥ ऋज्वी वेगवती शिप्रा दीधितीवांबरे रवेः ॥ पंचाशद्योजना दीर्घा विस्तारे दशयोजना ॥ १६ ॥ दिव्यं वर्षसहस्रं सा समुवाह हरेर्भुजात् ॥ कियंतं कालमीशो हि भिक्षां जग्राह भावितः ॥ १७ ॥ दत्तां नारायणेनाथ सत्पात्रे पात्र उत्तमे ॥ ततो नारायणः प्राह हरं परमिदं वचः ॥ १८ ॥ संपूर्णं तव पात्रं हि ततो वै परमेश्वरः ॥ सतोयांबुदनिर्घोषं श्रुत्वा वाक्यं हरेर्हरः ॥ १९ ॥ शशिसूर्याग्निनयनः शशिशेखरशोभितः ॥ कपाले दृष्टिमावेश्य त्रिनेत्रैश्च जनार्दनम् ॥ २० ॥ अंगुल्या घटयन्प्राह कपालं चातिपूरितम् ॥ श्रुत्वा हरिरिदं वाक्यं रक्तधारां समाहरत् ॥ २१ ॥ पार्श्वतोथ हरेरीशः स्वांगुल्या रुधिरं तदा ॥ दिव्यं वर्षसहस्रं च दृष्टिपातं[2] ममंथ वै ॥ २२ ॥ मथ्यमाने ततो रक्ते कललं बुद्बुदं क्रमात् ॥ बभूव च ततः पश्चात्किरीटी सशरासनः ॥ २३ ॥ सहस्रबाहू रक्ताक्षो धनुर्ज्यां संस्पृशन्मुहुः ॥ बभूव तूणीरगलो वृषस्कंधोंऽगुलित्रवान् ॥ २४ ॥ पुरुषोऽर्जुनसंकाशः कपाले संप्रकाशयन् ॥ तं दृष्ट्वा भगवान्विष्णुः प्राह रुद्रमिदं वचः ॥ २५ ॥ कपाले भगवन्कोऽयं प्रादुर्भूतोऽभवन्नरः ॥ उक्तिं श्रुत्वा हरेरीशस्तमुवाच हरे शृणु ॥ २६ ॥ नरो नामेति पुरुषः परमास्त्रविदांवरः ॥ यस्त्वयोक्तो नर इति नरस्तस्माद्भविष्यति ॥ २७ ॥ नरनारायणौ चोभौ युगे ख्यातौ भविष्यतः ॥ संग्रामे देवकार्येषु लोकानां परिपालने ॥ २८ ॥ एष नारायण सखा नरस्तव

१ शंभुवाक्यम्—इ० पा० । २ दृष्टिपातं दृष्टिं पातयित्वा पातयित्वा—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





भविष्यति ॥ तव एकाकिनः संख्ये तपसश्च महामुनिः ॥ २९ ॥ विज्ञानस्य परीक्षार्थे तेजो लोके भविष्यति ॥ तेजोधिकमिदं दिव्यं ब्रह्मणः पंचमं शिरः ॥ ३० ॥ तेजसा ब्रह्मणो दीप्तो भुजस्य तव शोणितात् ॥ मम दृष्टिनिपाताच्च त्रीणि तेजांसि यान्यतः ॥ ३१ ॥ तत्संयोगात्समुत्पन्नः शत्रूनुद्वेजयिष्यति ॥ अवध्या ये भविष्यंति दुर्जयास्तव चापरे ॥ ३२ ॥ शक्रस्य चामरारीणां तेषामेव भयंकरः ॥ एवमुक्तवतः शंभोर्विस्मितस्तस्य तेजसा ॥ ३३ ॥ हरिरपि स तत्रैव तुष्टाव हरकेशवौ ॥ नमो हर हरे तुभ्यं नमः शंकर विष्णवे ॥ ३४ ॥ नमस्ते शूलहस्ताय नमस्ते खड्गपाणये ॥ नमोनमस्ते मेध्याय हृषीकेश नमोऽस्तु ते ॥ ३५ ॥ नमोऽस्तु वाचां पतये श्रीधराय नमोनमः ॥ एवं स्तुवन्तं तं भक्त्या कृतांजलिपुटं नरम् ॥ ३६ ॥ तथैवांजलिसंबद्धं गृहीत्वाशु करद्वयम् ॥ उद्धृत्याथ कपालात्तु पुनर्वचनमब्रवीत् ॥ ३७ ॥ य एव पुरुषो रौद्रो ब्रह्मणः स्वेदसंभवः ॥ मम हुंकारशब्देन मोहनिद्रामुपागतः ॥ ३८ ॥ निबोध तं च त्वरितमित्युक्त्वांतर्हितो हरः ॥ नारायणस्य प्रत्यक्षं बोधयित्वा द्रुतं हि तम् ॥ ३९ ॥ वामपादेन हत्वा च समुत्तस्थौ नरो रुषा ॥ तयोर्युद्धं समभवत्स्वेदरक्तजयोर्महत् ॥ ४० ॥ विस्फारितधनुःशब्दैर्नादिताशेषभूतलम् ॥ कवचं स्वेदजस्यैकं रक्तजस्य तथा भुजौ ॥४१॥ एवं समेन वै युद्धं दिव्यं जातं तु भूतले ॥ त्रिवर्षोनानि वर्षाणां शतानि दश सुद्विज॥४२॥ युध्यतोः समतीतानि स्वेदरक्तजयोर्मुने ॥ रक्तजो द्विभुजो दृष्ट्वा कवचैकेन स्वेदजम् ॥ ४३ ॥ बिभेद बाणवेगेन ब्रह्मणस्तं नरं परम् ॥ ससंभ्रममुवाचेदं ब्रह्माणं मधुसूदनः ॥ ४४ ॥ मन्नरेणोच्छ्रितो ब्रह्मंस्त्वदीयो विनिपातितः ॥ श्रुत्वा तदाकुलो ब्रह्मा बभाषे मधुसूदनम् ॥ ४५ ॥ हरेऽन्यजन्मनि नरो मदीयो यदि हीयते ॥ तेन तुष्टेन संप्रोक्तं हरिणैवं भविष्यति ॥ ४६ ॥ कृत्वा तयो रणमपि निवार्य तावुवाच ह ॥ अथान्यजन्मनि नरो मदीयो भविता कलौ ॥ ४७ ॥ ततो महारणे जाते तत्राहं योजयामि तम् ॥ विष्णुनाथ समाहूय महेश्वरसुरेश्वरौ ॥ ४८ ॥ उक्ताविमौ नरौ रुद्रौ पालनीयौ स्वशक्तितः ॥ स्वेदजातासृग्जातौ तु स्वकीयांशौ धरातले ॥ स्वांशभूतौ द्वापरांते नियोज्यौ भूतले त्वया ॥ ४९ ॥ ततोऽब्रवीत्तदा विष्णुं सुरेशो दुःखितं वचः ॥ ५० ॥ अस्मिन्मन्वंतरे देव त्रेतायुगं तदा यदा ॥ त्वद्रूपेणेह महता सूर्यपुत्रहितार्थिना ॥ वालीनाम महाबाहुः सुग्रीवार्थे निपातितः ॥ ५१ ॥ तेन दुःखेन तत्तोऽहं नाहं गृह्णामि ते नरम् ॥ अगृह्णमानं देवेशं कारणांतरवादिनम् ॥ ५२ ॥ विष्णुः प्रोवाच मघवन्भुवो भारावतारणे ॥ अवतारं करिष्यामि मर्त्यलोकेऽप्यहं विभो ॥ ५३ ॥ ततो हृष्टोऽभवच्छक्रो विष्णुवाक्येन तेन वै ॥ प्रतिगृह्य नरं हृष्टः सत्य



१ अपिरत्रायार्थे । अपि सः अथ सः–नरः–तत्रैव हरकेशवौ तुष्टाव । २ त्रेताभावितशंकरे–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मस्तु वचस्तव ॥ ५४ ॥ इत्युक्त्वा तु रवीन्द्रौ स प्रेषयित्वा च तौ पुनः ॥ गत्वा च पुण्डरीकाक्षो ब्रह्माणं ब्रह्मवेश्मनि ॥ ५५ ॥ कृतं जुगुप्सितं कर्म ब्रह्मन्नीशं जिघांसता ॥ यत्त्वया देवदेवेश पुमान्कोपेन भाषितः ॥ ५६ ॥ शुद्ध्यर्थमस्य पापस्य प्रायश्चित्तं परं कुरु ॥ गृह्णन्वह्नित्रयं ब्रह्मन्नग्निं होत्रमुपास्व ह ॥ ५७ ॥ एको वै गार्हपत्योऽस्तु द्वितीयाहवनीयकः ॥ दक्षिणाग्निस्तृतीयस्तु त्रिकुण्डेषु प्रकल्पय ॥ ५८ ॥ वर्तुले तर्पयात्मानं मामथो धनुषाकृतौ ॥ चतुष्कोणे हरं देवमृग्यजुःसामनामभिः ॥ ५९ ॥ हुत्वा त्वग्निं च तपसा हरमेवार्च्य तत्क्षणात् ॥ दिव्यं वर्षसहस्रं तु हुत्वाग्निं सिद्धिमाप्स्यसि ॥ ६० ॥ प्रायश्चित्तविशुद्धात्मा प्रतिपद्य महेश्वरम् ॥ ततो निष्कल्मषो भूत्वा विषादस्ते गमिष्यति ॥ ६१ ॥ इत्येवमुक्त्वा हरिरुग्रतेजा गतः स्वकीयं निलयं महात्मा ॥ ब्रह्मापि चित्तं तपसे निधाय समादधे सर्वमथाच्युतोक्तम् ॥६२॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखण्डेऽवंतीक्षेत्रमाहात्म्ये ब्रह्मणः प्रायश्चित्तवर्णनंनाम तृतीयोऽध्यायः ॥ ३ ॥छ॥ ॥ व्यास उवाच ॥ ॥ योऽसौ कपाल उत्पन्नो नरोनाम धनुर्धरः॥किमेवं सोऽधुना जात उत्पत्तौ विश्वकर्मणः॥१॥ कथं रुद्रेण जनितः प्रभुणा बुद्धिपूर्वकम्॥ विष्णुना वा भगवता ब्रह्मणा भावभेदतः ॥२॥ केनकस्मात्समुत्पन्नः शंकराच्युतब्रह्मणाम् ॥ ब्रह्मा हिरण्यगर्भो यो यो जातश्च चतुर्मुखः ॥ ३ ॥ अद्भुतं पंचमं वक्त्रं कथं तस्याप्युपस्थितम् ॥ स तस्थौ भगवान्ब्रह्मा कथं रुद्रे मनोऽदधत् ॥ ४ ॥ मूढात्मना नरो येन हंतुं स प्रहितो हरम् ॥ ५ ॥ ॥ सनत्कुमार उवाच ॥ ॥ महेश्वरहरी एतौद्वावेव सति तिष्ठतः ॥ तयोरविदितं नास्ति सिद्धासिद्धं महात्मनोः ॥ ६ ॥ ब्रह्मणः पंचमं वक्त्रं यत्तदासीन्महात्मनः ॥ तस्यैव मानसः सोऽग्निः शिरसा तेन वै धृतः ॥ ७ ॥ यो नरो ब्रह्मणः प्रोक्तः सोऽप्यग्निस्तस्य मानसः ॥ दधार तं महादेवः कृत्वांगुल्यंतरांतरे ॥ ८ ॥ पूर्वं दृष्ट्वा समुत्पत्तिमेवं तस्य महान्नरः ॥ तस्मात्कपालमंगुल्यां घट्टमानमजायत ॥ ९ ॥ स तं हत्वा शरेणाजौ ब्रह्मणो निहितं रजः ॥ मुमोह रजसा सत्त्वं यदृच्छाकृत्प्रभुर्यतः ॥ १० ॥ ॥ व्यास उवाच ॥ ॥ कथमग्निः समुत्पन्नो योग्निः सर्वेण धारितः ॥ विस्तरेण तदाचक्ष्व भगवन्मुनिवंदित ॥ ११ ॥ ॥ ॥ सनत्कुमार उवाच ॥ ॥ अव्यक्तादीन्ससर्जादावंडं हि तदजायत ॥ जज्ञे सौवर्णवर्णाभो ब्रह्मा लोकपितामहः ॥ १२ ॥ स्वयंभूः स तपस्तप्त्वा दिव्यं वर्षशतं महत् ॥ स तपःस्थो व्याजहार भूर्भुवःस्वरिति श्रुतीः ॥ १३ ॥ श्रुतियोगात्तु मनसः पश्चादग्निरजायत ॥ अधोमुखः पपाताग्निः पृथिवीं निर्दहन्यदा ॥ १४ ॥ पाणिभ्यां ब्रह्मणा सोग्निर्भूमेरूर्ध्वं निवेशितः ॥ ततो दक्षिणहस्तेन वेद्यामग्निः प्रणीयते ॥ १५ ॥ पुरापतन्नधोज्वालऊर्ध्वज्वालो यदा धृतः ॥ उत्तानश्च कृतो यस्माद्ब्रह्मणा निर्मितो मिथः ॥ १६ ॥ ज्वालाभिः प्रज्वलन्नूर्ध्वं सर्वशब्दस्फुलिंगवान् ॥ हिरण्यवर्ण

१ अग्निहोत्रस्तृतीयस्तु–इ० पा० । २ द्वावेव संनिधिष्ठितौ–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

ब्रह्माणं तदोवाचाग्निरुत्कटः ॥ १७ ॥ किमर्थं तु त्वया देव भूमिभक्षं निवारितम् ॥ बुभुक्षयाहमाविष्ट आहारो मे प्रदीयताम्[1] ॥ १८ ॥ एव मुक्तोऽग्नये ब्रह्मा स्वरोमाणि जुहाव सः ॥ कृशश्चखाद अग्निस्तु सर्वरोमाणि ब्रह्मणः ॥ १९ ॥ अब्रवीच्च न मे तृप्तिर्न च मे देहनिर्वृतिः ॥ त्वचं जुहाव ब्रह्मा च चखादाग्निस्त्वचं तदा ॥ २० ॥ अब्रवीत्तं तदा वह्निस्तृप्तिर्नास्ति ममेति हि ॥ जुहाव स्वानि मांसानि त्वचोत्कृत्य प्रजापतिः ॥ २१ ॥ अब्रवीच्च न मे तृप्तिर्न च मे देहनिर्वृतिः ॥ जुहाव ब्रह्मा चास्थीनि तान्यश्नात्स बुभुक्षितः ॥ २२ ॥ ततो धात्रा हुताशाय कृतो देहो विधातुकः ॥ तमदेहमथो दृष्ट्वा ब्रह्माणमवदच्च सः ॥ २३ ॥ अहो ब्रह्मन्न मे तृप्तिर्न च मे देहनिर्वृतिः ॥ क्रुद्धेण ब्रह्मणा सोऽग्निर्हुंकारेण द्विधा कृतः ॥ २४ ॥ आहतू रुदतावग्नी आहारार्थं प्रजापतिम् ॥ हुंकारेण पुनर्ब्रह्मा द्विधैकैकं चकार वै ॥ २५ ॥ त्रयस्तेषां रुदंतिस्म[2] रुदन्ह्येको ह्यसंवृतः ॥ क्रुद्धेन ब्रह्मणा व्यास हुंकारेणैव ताडितः ॥ २६ ॥ रोरूयमाणे चाग्नौ तु पुनर्ब्रह्मा कृपान्वितः ॥ प्राह कामाभिभूतानां भुंक्ष्व त्वं देहधातुकम् ॥ २७ ॥ स कालस्तस्य[3] कामस्य सा वृत्तिः संप्रकल्पिता ॥ अकाराग्निं सन्निविष्टं दृष्ट्वा मनसि मानसः ॥ २८ ॥ हुंकाराग्निः प्रजज्वाल किमेतदिति चाब्रवीत् ॥ ब्रह्मा तमाह त्वमपि यथेष्टां वृत्तिमाश्रय ॥ २९ ॥ देवमध्ये बहिर्वापि मुनीनामाश्रमेषु च ॥ इत्येवमुक्तस्तेनाशु वृत्तिमेतामरोचयत् ॥ ३० ॥ अहमेवं प्रदास्यामि पुनः पुनरुवाच ह ॥ यस्मादेष द्वितीयोग्निर्हुंकारात्सम जायत ॥ ३१ ॥ साभिमानोऽपमानो वा हुंकारो यत्र कथ्यते ॥ सा च वृत्तिर्ममादेशाद्बुभुक्षाशांतये तव ॥ ३२ ॥ इकाराग्निं समाहूय ब्रह्मा वचनमब्रवीत् ॥ भवतोग्ने त्वियं वृत्तिरन्नं भुक्तं दहेरिति ॥ ३३ ॥ उकाराग्निं समाहूय ब्रह्मा वचनमब्रवीत् ॥ यत्पृथिव्यां गुरुध्यानं भगवंस्तत्समाश्रय ॥ ३४ ॥ अहं च ते विधास्यामि स्थानमाहारमेव च ॥ इत्युक्तः स तु तेनाग्निर्यत्पृथिव्यां शिलाचयः ॥ ३५ ॥ यतोऽग्निर्व्यास तेनोक्तो गिरौ दुर्गे महामुने ॥ उकाराग्निः स चाप्येष समुद्रे वडवामुखः ॥ ३६ ॥ सोऽपि भिन्नः समाहूतो ब्रह्मणा स्थानलिप्सया ॥ त्वं चक्षुः सर्वलोकस्य ब्रह्मा वचनमब्रवीत् ॥ ३७ ॥ तस्मात्त्वं संस्कृतां वाणीं द्विजातीनां प्रकाशय ॥ दैवी पुण्या हि पापांश्च आयुष्यं हंत्यसंस्कृता ॥ ३८ ॥ तस्माद्द्विजातेर्विज्ञेया वाणी पुण्या प्रकाशिता ॥ वाक्च माता द्विजातीनां मुखे सा संप्रतिष्ठिता ॥ ३९ ॥ अनृताक्षरविन्यासादमंगल्या ह्यसंस्कृता ॥ वक्तारं हंत्यतो ह्यग्निः सदा संस्कृतकृद्द्विजः ॥ ४० ॥ आहूय भूयोऽकाराग्निं प्रजापतिरचक्षुषम् ॥ वाग्वेदवाणीमवदत्सोपि संमीलितेक्षणः ॥ ४१ ॥ ब्रह्माणमाह



१ विधीयताम्—इ०पा० । २ रुदतौ--नुमभाव आर्षः—रुदन्तौ । २ काललब्धकामस्य--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वह्निस्तु वाचोहं मुखमस्मि हे ॥ स्थानं मम प्रयच्छस्व सर्वतेजोवरं परम् ॥ ४२ ॥ ब्रह्मा तमाह यस्मात्त्वं तेजःस्थानं समीहसे ॥ तस्मात्तेजोमयं यत्ते रविस्थानं भविष्यति ॥४३॥ यस्मात्तेजः प्रपश्यंति चक्षुर्भवति दुर्बलम् ॥ तस्मात्तत्तेजसा युक्तं पश्येदनिमिषं क्वचित् ॥ ४४ ॥ इकारमथ संभिन्नमग्निमाह पितामहः ॥ सौम्यदृष्ट्या तु ब्रह्माणं समुदीक्ष्मुपागतम् ॥ ४५ ॥ यस्माच्छीघ्रं महासत्त्व सौम्यदृष्टिरिहागतः ॥ तस्माद्दास्याम्यहं स्थानं सर्वभूतमनोरमम् ॥ ४६ ॥ संशीतात्मा शीतरश्मिश्चंद्रमास्त्वं भविष्यसि ॥ सर्वतेजोधिको दिव्यः सौम्यः परमभासुरः ॥ ४७ ॥ तरुस्थः सर्वतेजांसि तेजसाऽभिभविष्यसि ॥ इत्युक्त्वा तं विसृज्याथ उकाराग्निमथाह्वयत् ॥ ४८ ॥ इहैहीतीति शिरसि समादाय न्यवेशयत् ॥ तत्रस्थं पंचमं वक्त्रं ऊर्ध्वमेतत्प्रजायते ॥ ४९ ॥ स एवं रूपवानग्निरुकाराग्निः प्रतिष्ठितः ॥ तस्मादग्निश्च सूर्यश्च एकमेतौ विनिर्दिशेत् ॥ ५० ॥ भवाग्निरूपं परमं ब्रह्माणमिदमब्रवीत् ॥ ममापि रुचिरं स्थानं प्रयच्छस्व यथा स्वयम् ॥ ५१ ॥ ब्रह्मा तमाह कतमं स्थानं ते रोचतेऽनल ॥ अग्निस्तं प्रत्युवाचेदं स्थानं कथय मे परम् ॥ ५२ ॥ स्थानं नैवास्ति ते भव्यं ततो ह्येवं भविष्यति ॥ अत्र ते स्थातुमिच्छास्ति यदि संस्थास्यते त्विह ॥ ५३ ॥ लोके नित्यं समाचार लोकसंस्थितिहेतुकः ॥ संभवार्थमिहास त्वं निजसत्त्वपराक्रमः ॥ ५४ ॥ यदिह त्वं महाज्वालाभाभिः कलितशोभनः ॥ प्राप्स्यसे सर्वजंतूनां भासुरत्वमनुत्तमम् ॥ न ह्येष धर्मश्चैवाद्यो मायामोहितकाम्यया ॥५५॥ इत्युक्ते ब्रह्मणा सोऽग्निः प्रजज्वाल सहस्रशः ॥ अनंतज्वालाभिततो नानावर्णादिभिः श्रितः ॥ ५६ ॥ अकारेकार ऊकारो ब्रह्मा तमथ दृष्टवान् ॥ नैवासौ शाम्यतां याति वह्निर्भूयो व्यवर्धत ॥ ५७ ॥ व्याप्तं भवाग्निना सर्वं तिर्यगूर्ध्वमधस्तथा ॥ ज्वालाभिरुपरि क्षिप्तं दृष्ट्वात्मानं समंततः ॥ ५८ ॥ चिंतयंतं तु ब्रह्माणं भीतं चैव विशेषतः ॥ शिरस्यंजलिमाधाय तुष्टावाथ प्रणम्य तम् ॥ ५९ ॥ तेजोनिधिं च सर्वेशं ज्ञातुमिच्छन्प्रजापतिः ॥ निरुक्तसूक्तराहस्यैर्ऋग्यजुःसामभाषितैः ॥ ६० ॥ ॥ ब्रह्मोवाच ॥ ॥ सप्ततेजो नमस्तेऽस्तु परस्य परमात्मने ॥ अद्भुतानां प्रतिश्रोत्रे तेजसां निधये नमः ॥ ६१ ॥ बीजं यो विश्वभावानां संमोहनविमोहनम् ॥ अंधकारो युगावर्तकाले काले च दुःसह ॥ ६२ ॥ ऊर्ध्ववक्त्र नमस्तेस्तु सत्त्वात्मक धरात्मक ॥ ज्वलज्ज्वालोत्पन्नजल जलजेश जलेचर ॥ ६३ ॥ जलजोत्फुल्लपत्राक्ष जलदेव हुताशन ॥ कृष्णकांते कृष्णमार्ग स्वर्गमार्गप्रदायक ॥ ६४ ॥ यज्ञाहुतिसमाचार यज्ञरूप नमोनमः॥ स्वर्णगर्भ शमीगर्भ जय देव सनातन ॥ ६५ ॥ तमोहार महाहार स्वाहाप्रिय तमोहर ॥ प्रदीप्तरोचिर्देवेश चित्रभानो नमोस्तु ते ॥ ६६ ॥ वैश्वानरानलोदग्र ऊर्ध्वपावक सर्वग ॥

१ इकाराग्निम्–इ० पा० । २ रुद्रमेतौ–इ० पा० । ३ यज्ञदेव–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 विभावसो महाभाग कृष्णवर्त्मन्नमोनमः ॥ ६७ ॥ ॥ सनत्कुमार उवाच ॥ ॥ एवं स्तुतस्तदा सोऽग्निर्विरंचिमब्रवीद्वचः॥ तुष्टोऽहं भवतो ब्रह्मन्भ।वकर्म 
 प्रसिध्यति[1] ॥ ६८ ॥ एवमुक्तस्तदा ब्रह्मा नमस्कृत्याब्रवीत्पुनः॥ ज्ञातुमिच्छाम्यहं देव को हि त्वं भगवानिति ॥ ६९ ॥ अब्रवीत्सोऽथ ब्रह्माणं पुरुष 
स्त्वं प्रजापतिः ॥ अज्ञेयं परमं रूपं तेन योग्येन पश्य मे ॥ ७० ॥ अथापश्यत्स दिव्येन भगवंतं सनातनम् ॥ सर्वज्ञं विधिकर्तारमीश्वरं सदसत्प 
रम् ॥ ७१ ॥ ज्वलनं गगनं भूमिं दृश्यादृश्यं परं पदम् ॥ भूतं भव्यं भविष्यं च जगत्स्थावरजंगमम् ॥ सदैव कुरुते देवो भुंक्ते सर्वं यतः प्रभुः ॥
॥ ७२ ॥ अतिसंभूतिभव्येन स्तोत्रेणाथ प्रजापतिः ॥ तुष्टाव देवं प्रकृतं पुराणमजमव्ययम् ॥ ७३ ॥ ततोऽतिरक्तवर्णं च दृष्ट्वा देवः प्रजापतिः ॥
विश्वतोबाहुचरणं विश्वतोऽग्निशिरोमुखम् ॥७४॥ व्यक्ताव्यक्तप्रणेतारं प्रणमञ्छिरसा स्वयम् ॥ पश्यतेऽथ नमस्तेऽस्तु तुभ्यं विश्वभवात्मने ॥ ७५ ॥
पृथिवी वायुराकाशं यच्चान्यद्भुवनत्रयम् ॥ लोकालोकेश्वरं चैव जगत्स्थावरजंगमम् ॥ ७६ ॥ तत्त्वसर्गं भूतसर्गं भावसर्गं तथैव च ॥ ब्रह्मतेजोमया
त्मानं संपश्यंश्चक्षुषा स्वतः ॥ ७७ ॥ यत्किंचिद्वस्तुजातं हि तत्सर्वमचरं चरम् ॥ एवं स्तुतः स तु तदा अनादिर्भगवान्प्रभुः ॥ ७८ ॥ अथेशः प्राह
ब्रह्माणं त्वया दृष्टं यथातथम् ॥ सृजेदानीं प्रजाः सर्वाः स च त्वं विनयान्वितः ॥ ७९ ॥ कर्ताहमनुकर्ता त्वं लोकानां स्थितिकारणे ॥ कुरुष्वैत
त्तथा भाव्यं मया पूर्वं विनिर्मितम् ॥ ८० ॥ इत्युक्तो देवदेवेन ब्रह्मा वचनमब्रवीत् ॥ नमस्तेऽस्तु महादेव भव शर्व नमोऽस्तु ते ॥ ८१ ॥ त्वत्प्र
सादात्प्रजासर्गं कुर्वतो मे महेश्वर ॥ सखायं प्राप्तुमिच्छामि त्वया दत्तं जगत्पते ॥८२॥ ॥ महेश्वर उवाच ॥ ॥ ध्यायतः पुत्रकामस्य स्रष्टु
कामस्य ते यतः ॥ कल्पितं भविता देव मदुत्पत्तिं यदीप्स्यसि ॥ ८३ ॥ पुत्रत्वं प्राप्य हीशस्ते छेत्स्यामि पंचमं शिरः ॥ तत्र चोत्पादयिष्यामि
नरनारायणावुभौ ॥ ८४ ॥ ॥ ब्रह्मोवाच ॥ ॥ कथं नारायणो देवस्तपसा मन्यते स नः ॥ कीर्तयस्व सखा धन्यः स नः पूज्यो भविष्यति ॥
॥ ८५ ॥ अथापश्यत्ततो ब्रह्मा तेजसा हरिमच्युतम् ॥ तं सर्वगमनं गम्यं शिवं नारायणात्मकम् ॥ ८६ ॥ महेश्वरस्य तेजोर्ध्वं संतं नारायणं
प्रभुम् ॥ चकार व्याहरन्नार्तं श्रीरूपं शक्तिसाम्यतः ॥ ८७ ॥ अंगुल्या संस्पृशन्देवो ब्रह्माणमब्रवीद्वचः ॥ ब्रह्मंस्ते परमं धाम ऋषिर्नारायणानुगः ॥
॥ ८८ ॥ भविता लोकरक्षार्थं श्रेष्ठः सर्वधनुष्मताम् ॥ नारायण महावीर्य शक्तिरेषा मदीयिका ॥ ८९ ॥ इत्युक्त्वा भगवान्देवस्तमग्निं पाणिनाऽ 
ग्रहीत् ॥ दक्षहस्तांगुलिनखमध्यस्थं समर्चाकरत् ॥ ९० ॥ इति सत्कृत्य सततं नरं चैव महेश्वरः ॥ ब्रह्मणो दर्शयित्वाथ तत्रैवांतरधीयत ॥ ९१ ॥

१ प्रसिध्यतु--इ०पा० । २ प्रजापतिः त्वं पुरुषः--जीवकोटिप्रविष्टः आसि अतस्तव परमं रूपम्--अज्ञेयम्--इत्येवं संबंधो बोद्धव्यः । ३ दीर्घाभाव आर्षः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाब्रवीत्ततो ब्रह्मा अग्निं तं तु युगक्षये ॥ स्पृशन्दक्षिणवामाभ्यां सांत्वयन्निव तं गिरा ॥ ९२ ॥ भृगुश्चैवांगिराः पुत्रौ भवितारौ न संशयः ॥ अत्रैव मम भवतां वंशे विख्यातकर्मणौ[1] ॥ ९३ ॥ द्विधा संभज्य तेनाग्निं सृष्टेर्यज्ञो भविष्यति ॥ भवंतौ तिष्ठतस्तत्र पृथिव्यां दानमाश्रितौ ॥ ९४ ॥ ब्रह्मणाऽग्नी समेतौ तु ब्रह्माणमनुनोदितौ ॥ तस्मादेवं विधातव्यौ निर्मथ्य विधिपूर्वकम् ॥ ९५ ॥ अतोऽश्वत्थे शमीगर्भे संयोगस्तत्र पच्यते ॥ भार्गवांगिरसश्चैव द्विविधो देव उच्यते ॥ ९६ ॥ तस्मात्सुतहितः श्रेष्ठश्चतुर्थ इति कथ्यते ॥ एवं व्यास समुत्पन्नो नरोऽसौ पूर्वजन्मनि ॥ ९७ ॥ एवं तु ब्रह्मणो वक्त्रं पञ्चमं समपद्यत ॥ ९८ ॥ एतद्यो बुध्यते देव तेजःसर्गमनुत्तमम् ॥ ब्रह्मणो याति सालोक्यं शांतो दांतो जितेन्द्रियः ॥ ९९ ॥ एतद्योग्निसमुद्भवं पशुपतेर्माहात्म्यसंसूचकं वह्नेः साधुमतिः शृणोति सततं यः श्रद्धया भावितम्॥ यो व्यास द्विजदेवताप्रमुखतः संश्रावयेद्भक्तितः सोऽत्यर्थभवभावितः शिवपुरे संपूज्यते दैवतैः ॥ १०० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये वैश्वानरोत्पत्ति वर्णनंनाम चतुर्थोऽध्यायः ॥ ४ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ युद्धे निवारिते तत्र रक्तस्वेदजयोः पुरा ॥ किं कृतं ब्रह्मणा तत्र प्रायश्चित्तं च कर्मणाम् ॥ १ ॥ जनार्दनेन किं कर्म शंकरेण च यन्मुने ॥ एतत्सर्वं समाख्याहि प्रसीद वदतांवर ॥ २ ॥ ॥ सनत्कुमार उवाच ॥ ॥ ब्रह्मा जुह्वन्नग्निहोत्रं वनौषधिफलच्छदैः ॥ शस्तैः कुशसमिद्भिश्च यथोक्तं हरिणा पुरा ॥ ३ ॥ बदर्याश्रममासाद्य नरनारायणावृषी ॥ तेपतुस्तौ तपश्चोग्रं हितार्थं सर्वदेहिनाम् ॥ ४ ॥ कपालपाणिर्देवेशः पर्यटन्वसुधामिमाम् ॥ कुशस्थलीं समासाद्य प्रविष्टस्तद्वनोत्तमम् ॥ ५ ॥ नानाद्रुमलताकीर्णं नानापुष्पोपशोभितम् ॥ नानापक्षिरवाकीर्णं नानामृगसमाकुलम् ॥ ६ ॥ द्रुमपुष्पभरामोदवासितं यत्सुवायुना ॥ बुद्धिपूर्वमिव न्यस्तैः फलपुष्पैः सुपूजितम् ॥ ७ ॥ नानागंधरसाढयैश्च पक्वापक्वफलोद्भवैः ॥ फलैः सुवर्णरूपाढयैरासमन्तान्मनोरमैः ॥ ८ ॥ जीर्णपत्रतृणादीनि शुष्ककाष्ठफलानि च ॥ बहिः क्षिपंति जातानि मरुतोनुग्रहाणि च ॥ ९ ॥ नानापुष्पसमूहानां गन्धमादाय मारुतः ॥ शीतलो वाति तं भूमिदेशं यत्र विवेश सः ॥ १० ॥ हरितस्निग्धनिच्छिद्रैः पर्णैरच्छिद्रकोटरैः ॥ वृक्षैरनेकसंख्यैश्च भूषितं शिरसान्वितैः ॥ ११ ॥ अरोगिदर्शनीयैश्च सुवृत्तैः क्वचिदुद्धतैः ॥ कुटुम्बैरिव विप्राणां सिद्धिर्वै भाति सर्वतः ॥ १२ ॥ शोभनैर्वायुसंकीर्णैरंकुरैः प्रावृता द्रुमाः ॥ कुलीनैरिव निच्छिद्रैः स्वगुणैः प्रावृता नराः ॥ १३ ॥ पवनोद्धूतशिखरैः स्पर्शयंति परस्परम् ॥ आरात्पवनतोऽन्योन्यस्पृष्टशाखावतंसकाः ॥ १४ ॥ नागवृक्षाः क्वचित्पुष्पैर्भ्रमरालीनकेसरैः ॥ नयनैरिव शोभंते धवलैः कृष्णतारकैः ॥ १५ ॥ पुष्पसन्नद्धशिखराः कर्णिकारद्रुमाः क्वचित् ॥ युग्मयुग्मविवाहे च शोभंते साधु दंपती ॥ १६ ॥

[1] दीर्घाभाव आर्षः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सुपुष्पविभवाटोपैः सिन्दुवारस्य पंक्तयः ॥ मूर्तिमत्य इवाभांति पूजिता वनदेवताः ॥ १७ ॥ क्वचित्क्वचित्कुन्दलताः सुपुष्पाभरणो
ज्ज्वलाः ॥ दिक्षुदिक्षु प्रशोभन्ते बालचन्द्रा इवोद्यताः ॥ १८ ॥ अतिविद्रुमशोभाढ्या कासंत्यो यूथिकालताः ॥ पुष्पिताः पुष्पविटपान्वीज
यंत्य इवोत्थिताः ॥ १९ ॥ शालार्जुनाः क्वचिद्भांति वनोद्देशेषु पुष्पिताः ॥ धौतकौशेयवासोभिः प्रावृताः पुरुषोत्तमाः ॥ २० ॥ अतिमुक्तं तु
वल्लीभिः पुष्पितास्तु द्रुमास्तथा ॥ उपगूढा विराजन्ते नारीभिरिव सुप्रियाः ॥ २१ ॥ चूताश्च तिलकाश्चैव मञ्जरीभिः करैरिव ॥ वायुप्रत्ताभिरन्यो
न्यं ढौकन्तीव हि सज्जनान् ॥ २२ ॥ परस्परं च संयुक्तैस्तिलकाशोकपल्लवैः ॥ हस्तैर्हस्तान्स्पृशंतीव सुहृदश्चित्तसंगताः ॥ २३ ॥ फलपुष्पनगा
नम्राः पेशलेनेव सज्जनाः ॥ अन्योन्यमर्पयंतीव सपुष्पाणि फलानि च ॥ २४ ॥ मारुताश्लिष्टसंतुष्टैः पादपाः शालिवारिभिः ॥ आर्याः समागता
लोके प्रीतिदाय इव स्थिताः ॥ २५ ॥ पुष्पाणामिव वेगेन स्वशोभार्थं व्रजंति वै ॥ समसन्नाहमासाद्य पुरुषाः स्पर्धयेव हि ॥ २६ ॥ पुष्पशोभाभ
रनतैः शिखरैः कंपसंयुतैः ॥ नृत्यन्ति पक्षिणो मत्ता युक्ताः शोभनशेखरैः ॥ २७ ॥ भृंगाः पवनविक्षिप्तामृतवल्लीलताश्रिताः ॥ सवल्लिकाः प्रनृ
त्यन्ति मानवा इव सप्रियाः ॥ २८ ॥ पुष्पाभिः कुन्दवल्लीभिः पादपाः क्वचिदावृताः ॥ भाति तारागणैश्चित्रैः शरदीव नभस्तलम् ॥ २९ ॥ द्रुमा
णामप्यथाग्रेषु पुष्पिता माधवी लता ॥ शिखरा इव शोभन्ते रचिता बुद्धिपूर्वकम् ॥३०॥ हरिताः कांचनच्छायाः फलिताः पुष्पिता द्रुमाः॥ सौहृदं
दर्शयन्तीव नराः साधुसमागमे ॥ ३१ ॥ पुष्पकिंजल्कबहुलाः किंजल्कबहुलोदराः ॥ किंजल्कमत्तमधुपा विशदा इव शारिकाः ॥ ३२ ॥ शिरीष
पुष्पसंकाशाः शुका मिथुनतः क्वचित्॥ कीर्तयंति गिरश्चित्राः पूजिता ब्राह्मणा यथा ॥ ३३ ॥ संयुक्ताः सहचारिण्या मयूराश्चित्रबर्हिणः ॥ वनां
तरे व्यतिष्ठंत एकांत इव संस्थिताः ॥ ३४ ॥ कूजंति पत्रिसंघाता नानाद्भुतविराविणः ॥ कुर्वंति रमणीय हि रमणीयतरं वनम् ॥ ३५ ॥ नाना
मृगगणाकीर्णं नित्यं समुदितांडजम् ॥ तद्वनं नंदनसमं मनोदृष्टिविवर्धनम् ॥ ३६ ॥ कपालपाणिर्भगवांस्तथारूपं व नोत्तमम् ॥ ददर्श शंकरो
दृष्ट्या सौम्यया नंदनोपमम् ॥ ३७ ॥ ता वृक्षपंक्तयः सर्वा दृष्ट्वा रुद्रं समागतम् ॥ निवेद्य शंभवे भक्त्या मुमुचुः पुष्पसंपदम् ॥ ३८ ॥ पुष्पप्रति
ग्रहं कृत्वा पादपानां महेश्वरः ॥ वरं वृणीध्वं भद्रं वः पादपानित्युवाच सः ॥ ३९ ॥ एवमुक्ते भगवता तरवो निरवग्रहाः ॥ ऊचुः प्रांजलयः सर्वे ॥ ७ ॥
नमस्कृत्य महेश्वरम् ॥ ४० ॥ वरं ददासि देवेश प्रसन्न जनवत्सल ॥ इहैव भगवन्नित्य वने सन्निहितो भव ॥ ४१ ॥ एष नः परमः कामो

१ फुल्लपुष्पनगाः—इ०पा० । २ संचरन्ति—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवदेव नमोऽस्तु ते ॥ त्वं चेद्रंसँसि देवेश वनेऽस्मिन्विश्वभावन ॥ ४२ ॥ सर्वात्मना प्रपन्ना वै याचामहे वरोत्तमम् ॥ किमन्यवरकोटीभिरेष नो दीयतां वरः ॥ ४३ ॥ इत्युक्तः पादपैः सर्वैः शरणागतवत्सलः ॥ वरं ददौ पादपेभ्यः प्रोच्यमानं मया शृणु ॥ ४४ ॥ ॥ महेश्वर उवाच ॥ ॥ बाढं मे मनसा वासो नित्यमत्र वनोत्तमे ॥ वरं ददामि भूयो वो न वृथा दर्शनं मम ॥ ४५ ॥ नाग्निर्न वायुर्न जलं न सूर्यकिरणातपः ॥ न विद्युदशनिः शीतं रुजं वो जनयिष्यति ॥ ४६ ॥ नित्यं पुष्पवरोपेता नित्यं सुस्थिरयौवनाः ॥ कामगाः कामरूपाश्च कामरूपफलप्रदाः ॥ ४७ ॥ कामसंदर्शनाः पुंसां तपःसंध्याज्वलद्दृशाम् ॥ श्रिया परमया युक्ता मत्प्रसादाद्भविष्यथ ॥ ४८ ॥ एवं स वरदः शंभुरनुजग्राह पादपान् ॥ स्थित्वा वर्षसहस्रं तु कपालं चाक्षिपद्भुवि ॥ ४९ ॥ क्षितिं निपतता तेन कंपते स्म रसातलम् ॥ विवशास्तत्यजुर्वेलां सागराः क्षुभितोर्मयः ॥ ५० ॥ शक्राशनिहतानीव व्याघ्रव्यालान्वितानि च ॥ शिखराणि व्यशीर्यंत पर्वतानां सहस्रशः ॥ ५१ ॥ देवसिद्धविमानानि गंधर्वनगराणि च ॥ प्रस्फुरन्ति विनिष्पेतुर्विनिनेशुर्धरातले ॥ ५२ ॥ कपोतमेषाश्चात्यंतं पुनः संघातदर्शनाः ॥ ज्योतिर्ग्रहाश्छादयंतो बभूवुस्तीर्णभास्कराः ॥ ५३ ॥ महता तस्य शब्देन जडांधबधिरं कृतम् ॥ बभूव व्याकुलं सर्वं त्रैलोक्यं सचराचरम् ॥ ५४ ॥ सुरासुराणां सर्वेषां शरीराणि मनांसि च ॥ अवसेदुश्चकंपुश्च किमेतदिति जज्ञिरे ॥ ५५ ॥ धैर्यमालंब्य सर्वेऽपि समागम्येंद्रपूर्वकाः ॥ ब्रह्मलोकं समासाद्य ब्रह्माणमिदमूचिरे ॥ ५६ ॥ किं निमित्तं तु भगवन्ने तदुत्पातदर्शने ॥ त्रैलोक्यं कंपितं येन संयुक्तं कालकर्मणा ॥ ५७ ॥ जातं कल्पावसानं च भिन्नमर्यादसागरम् ॥ चत्वारो दिग्गजाः किं नु बभूवुरचलाश्चलाः ॥ ५८ ॥ धरा समाधृता कस्मात्सप्तसागरवारिणा ॥ उत्पत्तिर्नास्ति सर्वस्य भगवन्न प्रयोजनम् ॥ ५९ ॥ यादृशोऽयं श्रुतः शब्दो न भूतो नापि विश्रुतः ॥ त्रैलोक्यमाकुलं येन चक्रे रौद्रेण भूयसा ॥ ६० ॥ एवमुक्तोऽब्रवीद्ब्रह्मा परमेशानुभावितः ॥ तत्प्रसादात्प्रतिज्ञानी ज्ञात्वा रुद्रमुपस्थितम् ॥ ६१ ॥ यत्पृष्टं मरुतः सर्वे शृणुध्वं तत्र कारणम् ॥ निश्चयेनात्र विज्ञेयं श्रद्दधानैर्यथाविधि ॥ ६२ ॥ मुखं छित्त्वा नखाग्रेण मद्देहात्पंचमं शिरः ॥ कपालपाणिर्भगवान्विष्णोराश्रममभ्यगात् ॥ ६३ ॥ ययाचे पात्रमादाय भिक्षां नारायणं प्रभुम् ॥ उत्पपात मुनिस्तत्र नरोनाम धनुर्धरः ॥ ६४ ॥ ततः कुशस्थलीमेत्य भगवांस्तद्वनोत्तमम् ॥ विवेश तरुमार्गेण पुष्पामोदाभिनंदितः ॥ ६५ ॥ अनुगृह्याथ भगवान्वनं तत्सर्वगांडजम् ॥ जगतोऽनुग्रहार्थाय तत्र वासमरोचयत ॥ ६६ ॥ तत्कपालं करस्थं

१ रमसि इ० पा०। २ आर्षं परस्मैपदम्। अनुदात्तेत्त्वलक्षणस्यात्मनेपदस्यानित्यत्वेन परस्मैपदम्। ३ कृतम्--इ० पा०। ४ प्रतिज्ञानी--कार्यतत्त्ववेत्ता--इत्यर्थः। ५ प्रति--इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



यन्न्यस्तं भगवता क्षितौ ॥ तेनैषा कम्पिता भूमिः कृतं त्रैलोक्यमाकुलम् ॥ ६७ ॥ तद्द्रक्ष्यथ विरूपाक्षं प्रपद्यत मया सह ॥ आराध्यमानो भगवान्प्रदास्यति वरं हि वः ॥ ६८ ॥ इत्युक्त्वा भगवान्ब्रह्मा सह तैर्देवदानवैः ॥ जगाम तद्वनोद्देशं यत्रास्ते वृषभध्वजः ॥ ६९ ॥ प्रहृष्टमनसः सर्वे कोकिलालापलापिताम् ॥ पुष्पोच्चयो[1]क्षितां सीमां विविशुः शंकरेप्सवः ॥ ७० ॥ संप्राप्तं सर्वमेतैस्तद्वनं नंदनसंमितम् ॥ सुवल्लीगृहशोभाढ्यं सुदृढं शुशुभे तदा ॥ ७१ ॥ दृष्ट्वा तद्वनमुत्तमं तनुभृतामाह्लादकं चेतसां नानासत्फलपुष्पपादपवनैरासेवितं सर्वतः ॥ तस्मिन्बर्हिणहंससारसकुले मंडूकमत्स्यैर्युते द्रक्ष्यामो हरमत्र चेतसि सुराः प्रापुर्मुदं ते तदा ॥ ७२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये देवागमनवर्णनंनाम पंचमोऽध्यायः ॥५॥ ॥ सनत्कुमार उवाच ॥ ॥ प्रविश्याथ वनं देवाः सर्वपुष्पोपशोभितम् ॥ इह देवोऽत्र देवोऽत्र विविशुस्ते दिदृक्षवः ॥ १ ॥ अद्भुतस्य वनस्यांते न ते ददृशिरे सुराः ॥ विचिन्वंतो महादेवं देवैर्बहुविलोकितः ॥२॥ तमुवाच स भद्रं वै द्रक्ष्यध्वं न तपो विना ॥ विचिन्वन्तो विरूपाक्षं नैनं पश्यत शंकरम् ॥ ३ ॥ स युक्तं हृदये स्मृत्वा ब्रह्मा देवांस्ततोऽब्रवीत् ॥ त्रिविधो दर्शनोपायस्तस्य देवस्य सर्वदा ॥ ४ ॥ श्रद्धाज्ञानेन तपसा योगेनैव निगद्यते ॥ सकलं निष्कलं चापि देवाः पश्यंति योगिनः ॥ ५ ॥ तपस्विनस्तु सकलं ज्ञानिनो निष्कलं परम् ॥ समुत्पन्नेऽपि विज्ञाने मंदश्रद्धो न पश्यति ॥ ६ ॥ भक्त्या परमयोपेताः परं पश्यंति योगिनः ॥ द्रष्टव्यो निर्विकारोऽसौ प्रधानपुरुषेश्वरः ॥ ७ ॥ नादीक्षितैरतो देवाः शैवीं दीक्षां प्रपद्यत ॥ कर्मणा मनसा वाचा नित्ययुक्ता महेश्वरे ॥ ८ ॥ तपश्चरत भद्रं वो रुद्राराधनतत्पराः ॥ शिवदीक्षां प्रपन्नानां भक्तानां च तपस्विनाम् ॥ ९ ॥ सर्वकालं विजानाति दातव्यं दर्शनं मया ॥ ब्रह्मणो वचनं श्रुत्वा हितमेव यदुक्तवान् ॥ १० ॥ शिवेक्षाविष्टमतयो ब्रह्माणमिदमब्रुवन् ॥ मार्गेण विधिना चैव शिवदीक्षासु तत्पराः ॥ ११ ॥ प्रयच्छ ब्रह्मन्सर्वेषां दीक्षां नः शिवतोषदाम् ॥ श्रुत्वेति वचनं ब्रह्मा प्रत्युवाच विचारितम् ॥ १२ ॥ संदिदीक्षयिषुः क्षिप्रममराञ्छिवदीक्षया ॥ शिवयज्ञार्थसंभारानानयध्वमलं सुराः ॥ १३ ॥ वेदी प्रकल्प्यतामत्र यष्टव्योऽष्टतनुः शिवः ॥ पद्मयोनेर्वचः श्रुत्वा चक्रुः सर्वमतः सुराः ॥ १४ ॥ विनीतवेषाः प्रणता अनेनसस्तमन्वगुः ॥ शिवप्रसादसंप्राप्त्यै पुष्करज्ञान[3]मीरितम् ॥ १५ ॥ यज्ञं चकार विधिना वेधाश्चन्द्रार्धधारिणः[4] ॥ पद्मयोनिः पुरस्कृत्य तदा दीक्षां प्रयोगतः ॥१६॥ अनुग्रहेण देवांस्तानकारयत भावतः ॥ ततो व्रतानां प्रवरं व्रतं दिव्यं महाप्रभुः ॥१७॥ तेभ्यो ददौ देवताभ्यः स तदप्यविरोधवित् ॥

१ पुष्पोच्चयांजलिं कृत्वा-इ० पा० । २ जननीं कारणेश्वरे-इ०पा० । ३ पुष्करज्ञानमीरितम्–पुष्करज्ञाननामानम्–इत्यर्थ इति भाति । सर्वपुस्तकेष्वयमेव पाठः । ४ चन्द्रार्धधारिणः--शंकरस्य--शंकरमुद्दिश्य--इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पच्यते शिवशालायां[1] महापाशुपतं व्रतम् ॥१८॥ शैवं यथोदितं यच्च आगमाचारचेष्टितम् ॥ शिवाराधनमुख्यानां मुनीनां तीव्रतेजसाम् ॥१९॥ सर्वानु
ग्राहकः शंभुः सर्वदेवैः प्रकल्पितम् ॥ तदेवं प्रार्थितं बुद्ध्या व्रतं रौद्रं शिवं समम्[2] ॥ २० ॥ तत्तेभ्यो विस्मयं त्यक्त्वा प्रायच्छत्कनकांडजः ॥ कामिकं
भस्मनामाढ्यं सर्वदा कीर्तितं शुभम् ॥ २१ ॥ पापघ्नं दुःखशमनं पुष्टिश्रीबलवर्धनम् ॥ सिद्धिदं कीर्तिकृत्कांतं कलिकल्मषमोक्षणम्॥२२॥तस्मात्सर्वप्रय
त्नेन भस्मस्नानं समाहिताः ॥ कुर्वंतो मानवा दांता दीक्षिताः संयतेंद्रियाः ॥ २३ ॥ सर्वे कमंडलुधराः सर्वे रुद्राक्षधारिणः ॥ अनिष्टदर्शनालाप
संगत्या परिवर्जिताः ॥ २४ ॥ एवं व्रतधराः सर्वे वने तस्मिन्महेश्वरम् ॥ आराधयंस्तमीशानं व्रतेनैव उमाधवम् ॥ २५ ॥ भक्त्या परमया युक्ता
विधिना परमेण च ॥ कालेन महता ध्यानादेवं ज्ञात्वा मनोगतम् ॥ २६ ॥ रुद्रध्यानाग्निनिर्दग्धकल्मषाश्च श्रियान्विताः ॥ तदा हत्वाऽसुरं
शंभुः प्रत्यक्षो भगवानभूत् ॥ २७ ॥ ॥ सनत्कुमार उवाच ॥ ॥ ब्रह्मदत्तं वरं देवाः सर्वे शर्वानुभाविताः ॥ समचीकरन्प्रत्युक्ता ब्रह्मापीशानभा
वितः ॥ २८ ॥ गते वर्षसहस्रे स दिव्ये देवेश्वरेश्वरः ॥ जातानुकंपो देवानां दीपो दर्शनमेयिवान् ॥ २९ ॥ गणैर्नानाविधैः सार्धं नानाभूषणभूषितैः॥
सुदर्पोद्धृतदर्पघ्नैर्घोरैर्घोरविघातिभिः ॥ ३० ॥ कामरूपैरकामैश्च सर्वकामसमन्वितैः ॥ करींद्रकरटाटोपपाटनैः सिंहदेहिभिः ॥ ३१ ॥ अणिमादि
गुणैर्दिव्यैर्योगैश्वर्यादिनामभिः ॥ व्यालोलकेशरशनादंष्ट्राकटकटोद्भवैः ॥ ३२ ॥ व्याघ्रव्यालानने रौद्रैः काककंकवटैस्तथा ॥ ३३ ॥ अरूपैः समरू
पैश्च सुरूपैर्बहुरूपकैः ॥ एकद्वित्रिशिरोभिश्च बहुशीर्षैरशीर्षकैः ॥ ३४ ॥ एकद्वित्रिशिखैश्चैव नानारूपविराजितैः ॥ बहुनेत्रैरनेत्रैश्च एकद्वित्रिविलो
चनैः ॥ ३५ ॥ एककर्णैर्द्विकर्णैश्च बहुकर्णैर्विकर्णकैः ॥ एकद्वित्रिसुनासैश्च बहुनासैरनासिकैः ॥ ३६ ॥ एकजंघैर्द्विजंघैश्च बहुजंघैरजंघकैः ॥ एक
पादैर्द्विपादैश्च बहुपादैरपादकैः ॥ ३७ ॥ गौरश्यामैः श्यामगौरैरसितैः कर्बुरैस्तथा ॥ भुजंगहारवलयैः कृतयज्ञोपवीतकैः ॥ ३८ ॥ शूलासिपट्टिश
धरैर्भुशुंडीपरिघायुधैः ॥ चक्रक्रकचकोदंडकांडदंडास्त्रपाणिभिः[3] ॥ ३९ ॥ गदामुद्गरपाषाणमुशलायुधहस्तकैः ॥ वज्रशक्त्यशनिप्रासकुंतकर्तृक
धारिभिः ॥ ४० ॥ भंभाभेरीर्वादयद्भिर्वीणापणववेणुकान् ॥ मृदंगविमलाढक्काकाहलानकदुंदुभीन् ॥ ४१ ॥ हुडंकाशृंगिकाद्यानि नानावाद्यानि
वादकैः ॥ एवं नानाविधै रौद्रैर्भीमैर्भीमपराक्रमैः ॥ ४२ ॥ गणेश्वरैः सुदुर्द्धर्षैर्वृतः सूर्यो ग्रहैरिव ॥ आविर्भूतो महादेवः स्वगणैः परिवारितः ॥ तं पश्य
तां तदा व्यास ब्रह्मादीनां दिवौकसाम् ॥ ४३ ॥ अथ ब्रह्मादयो देवा दृष्ट्वाग्रे गणनायकम् ॥ तेजसाध्यासितास्तस्य बभूवुर्भ्रांतचेतसः ॥ ४४ ॥ ततो

१ शिवशाखायाम्--इ० पा० । २ संमताः--इ० पा० । ३ चक्रक्रकचकोदण्डशास्त्रास्त्रकृतपाणिभिः--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ऽवलंब्य ते धैर्यं दृष्ट्वा देवं यथाविधि ॥ षडंगवेदयोगेन हृष्टचित्तवपुर्धराः ॥ ४५ ॥ शिरोगतैरंजलिभिः पादेभ्यश्च महीं गतैः ॥ तुष्टुवुः सृष्टिसंहार स्थितिकर्तारमीश्वरम् ॥ ४६ ॥ ॥ देवा ऊचुः ॥ ॥ नमः शिवाय शांताय सगणाय सनंदिने ॥ वृषासनाय सौम्याय शूलशक्तिधराय ते ॥४७॥ नमो दिक्चर्मवस्त्राय शुचये तीव्रतेजसे ॥ ब्रह्मणे ब्रह्मदेहाय ब्रह्मणा योजिताय च ॥ ४८ ॥ नमोंधकविनाशाय परेशाय नमोनमः ॥ रुद्राय पंच वक्राय सर्वरोगापहारिणे ॥ ४९ ॥ गिरिशाय सुरेशाय ईशानाय नमोनमः ॥ भीमोग्रादिस्वरूपाय विजयाय नमोनमः ॥ ५० ॥ सुरासुराधिपतये यतीनां पतये नमः ॥ चंडाय चंडदंडाय वरखट्वांगदंडिने ॥ ५१ ॥ विरूपाक्षशुभाख्याय विश्वरूपाय वै नमः ॥ शांताय च मनोज्ञाय त्रिनेत्राय नमोनमः ॥ ५२ ॥ वेधसे विश्वरूपाय दैत्यसंहारिणे नमः ॥ भक्तानुकंपिनेऽत्यर्थं रुद्रज्ञानपराय च ॥ ५३ ॥ विरूपाय सुरूपाय रूपाणां शतधारिणे ॥ पंचास्याय शुभास्याय चन्द्रास्याय नमोनमः ॥ ५४ ॥ वरदाय वराहाय सुकूर्माय नमोनमः ॥ ५५ ॥ त्रिनेत्र त्राणमस्माकं त्रिपुरघ्न विधीयताम् ॥ वाङ्मनःकायभावैस्त्वां प्रपन्नानां महेश्वर ॥ ५६ ॥ ॥ सनत्कुमार उवाच ॥ ॥ एवं स्तुतस्तदा देवैर्विरिंच्याद्यैस्तथा हरः ॥ शरीराणि विलोक्येशः कृशान्यथ दिवौकसाम् ॥ ५७ ॥ दिव्यप्रतापधारेण त्रिवेधेनांतरात्मना ॥ ५८ ॥ आराधनां समीक्ष्याह ब्रह्मादीनां सुरेश्वरः ॥ साधुसाधु महाभागाः शश्वद्व्रतमुपासितम् ॥ ५९ ॥ दिव्येनानेन विधिना भृशमाराधितो ह्यहम् ॥ भवद्भिः श्र द्धयात्यर्थं मम दर्शनकांक्षया ॥ ६० ॥ व्रतस्था मां हि पश्यंति मानुषा देवता अपि ॥ यदि यच्च प्रयच्छामि कांश्चिद्वो हि वराञ्छुभान् ॥ ६१ ॥ एकैकशो द्वित्रिशो वा समस्तेभ्यः समेन वः ॥ सर्वकामप्रसिद्ध्यर्थं दास्याम्येनं वरं हि वः ॥ ६२ ॥ हिताय भवतां चाहमागामुज्जयिनीं प्रति ॥ क्षिप्तं कपालं च मया किं पुनर्भद्रमस्तु वः ॥ ६३ ॥ ॥ देवा ऊचुः ॥ ॥ किं कृतं हितमस्माकं कपालं क्षिपता त्वया ॥ ६४ ॥ किमर्थं कंपिता भूमिस्त्रैलोक्यं व्याकुलीकृतम् ॥ नैतन्निरर्थकं देव कथ्यतामत्र कारणम् ॥ ६५ ॥ ॥ महादेव उवाच ॥ ॥ युष्मद्धितार्थमेतद्वै भयं विनिहितं कृतम् ॥ देवतानां तु रक्षार्थं श्रूयतामत्र कारणम् ॥ ६६ ॥ असुरो द्रोहणोनाम बलवान्योगमायिकः ॥ अवस्थितस्त्ववष्टभ्य रसातलतला श्रयम् ॥ ६७ ॥ तस्य दैत्यस्य बलिनो दैत्याः परपुरंजयाः ॥ युष्मान्ज्ञात्वा तपःस्थांश्चाप्यभ्यगुर्बहवो हि ते ॥ ६८ ॥ सेंद्रान्निहंतुमिच्छंतो माया



१ सुरेशाय--इ० पा० । २ हितम्--इ० पा० । ३ असुरेन्द्रो हयोनाम--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रच्छन्नचारकाः ॥ पुरीं कनकशृंगाढ्यामेनामधिकुशस्थलीम् ॥ समुद्ययुः सुरान्हंतुमुद्यता उंद्यतायुधाः ॥ ६९ ॥ तेषां कपालपातेन भूमिनिष्कं
पनेन च ॥ शब्देन चातिघोरेण देहात्प्राणा विनिर्ययुः ॥ ७० ॥ लोकस्थितिविनाशार्थं तेषामासीत्समुद्यमः ॥ राज्यैश्वर्येण दर्पिष्ठास्तेन ते निहता
मया ॥ ७१ ॥ ॥ देवा ऊचुः ॥ ॥ विश्वस्तानां पुनश्चैवमेव चानुग्रहः कृतः ॥ देवानुग्रहकर्ता त्वं गुणस्मृतिनिषेवितः ॥ ७२ ॥ दिव्यदृष्टि
भिरत्यर्थं यशोऽर्थं भीम नंदिताः ॥ इत्युक्त्वा प्रणतान्देवानुत्थाप्योचे पुनर्भवः ॥ ७३ ॥ ॥ शिव उवाच ॥ ॥ परिचर्याभिसंयुक्तं
नित्यमुग्रनिषेवितम् ॥ ध्यानसाधननिष्पन्नं यदन्येषां न विद्यते ॥ ७४ ॥ मनोवाक्कायभावेन दुष्करं दुश्चरं तपः ॥ अनेन तपसा युक्ताः कष्टेन
दुःसहेन च ॥ ७५ ॥ महता तनुसाध्येन बहुकालार्जितेन वः ॥ समंतादभिवर्धेतां युष्मत्तेजस्तपोऽपि च ॥ ७६ ॥ ॥ सनत्कुमार उवाच ॥ ॥
इत्युक्ता देवदेवेन देवा ब्रह्मपुरोगमाः ॥ ऊचुरुन्नाम्य वक्त्राणि स्थिता जानुभिरीश्वरम् ॥ ७७ ॥ ॥ देवा ऊचुः ॥ ॥ प्राणदस्त्वं कारणस्त्वं तपसां
देव दृश्यसे ॥ तदस्माकं प्रवृत्तानां मानुषाणां वरप्रद ॥ ७८ ॥ रक्षां कुरुष्व देवेश भक्तानामभयंकर ॥ ७९ ॥ ॥ ईश्वर उवाच ॥ ॥ यत्नेन
विधिना दत्तं सुव्यक्तं दर्शनं हि वः ॥ सुदुर्लभान्यपि पुनर्दास्यामि वो वरान्बहून् ॥ ८० ॥ एवमुक्ते भगवता ब्रह्मा वचनमब्रवीत् ॥ देवानामग्रतः
स्थित्वा श्रुतशब्दोद्भवं भवम् ॥ ८१ ॥ प्राप्ता वयं च भगवन्सुपर्याप्तो महावरः ॥ जायतां नः सदैश्वर्यं वासस्थानमथाक्षयम् ॥ ८२ ॥
॥ ॥ शिव उवाच ॥ ॥ लोकेऽस्मिन्मम ये भक्ता मया विनिहताश्च ये ॥ नैवं ते दुर्गतिं यांति लभंते सुमतिं पराम् ॥ ८३ ॥ सार्धं तत्र
जटाजूटैः शिरोभिः शूलपाणयः ॥ भांति मद्वामपार्श्वस्था इमे ते दारुणा गणाः ॥ ८४ ॥ येषां विनिग्रहार्थाय युष्मत्संबोधनाय च ॥ सविकारं मया
क्षिप्तं कपालं धरणीतले ॥८५॥ कृतो मेऽनुग्रहस्तेषां भक्तानां भक्तिमिच्छताम् ॥ वनेऽस्मिन्नित्यवासो मे वृक्षैरभ्यर्थितस्य च ॥ ८६ ॥ महाकालवने
देवा आगतस्य ममानघाः ॥ तपस्यतां च भवतां महाकालवनं ततः ॥ ८७ ॥ नामद्वययुतं गुह्यं लोके ख्यातं भविष्यति ॥ गुह्यं वनं श्मशानं च
क्षेत्राणां प्रवरं महत् ॥८८॥ कपालव्रतचर्या च मया ह्येषा प्रकीर्तिता ॥ कपालपात्रे भुंजानः कपालव्रतभूषणः ॥८९॥ कपालपाणिः संतुष्टो भिक्षा
व्रतसमन्वितः ॥ श्मशाननिलयो रौद्रो व्रतोन्मत्तविमूढधीः॥९०॥ नंदितः सर्वभूतेषु प्रियाप्रियसमः सदा ॥ भस्मभूषितसर्वांगो ज्ञानी चैव विशेषतः
॥९१॥ जितेंद्रियोऽसर्वसंगो मृद्भस्मोदकसंग्रही ॥ नित्ययुक्तः सदा व्यापी जापी जितवरासनः ॥ ९२ ॥ पुण्यतीर्थाश्रमोपेतः स्वरे देवे समाहितः ॥

१ उत्कृतायुधाः–इ० पा० । २ कस्मिंश्चित्पुस्तके तु–पाठव्यत्यास एवं दृश्यते–"शब्देन चातिघोरेण भूमिनिष्कंपनेन च । तेषां कपालपातेन देहात्प्राणा विनिर्ययुः ॥"इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लोकातीतं परं ज्ञानं महापाशुपतं व्रतम् ॥ ९३ ॥ कपालव्रतमास्थाय पुरा चीर्णं मया स्वयम् ॥ कपालं परमं गुह्यं पवित्रं पापनाशनम् ॥ ९४ ॥
कपालव्रतमेतद्धि दुर्धरं परमाद्भुतम् ॥ अत्यंतमुत्कटं रौद्रमघोरं लोमहर्षणम् ॥ ९५ ॥ महाव्रतं द्विषन्मोहात्पापेनैव स्थितो नरः ॥ न मुच्यते स
पापेन जन्मकोटिशतैरपि ॥ ९६ ॥ महापाशुपतं तस्मान्न हन्यान्न च दूषयेत् ॥ एतस्मिन्निहते तस्मात्कोटिर्भवति घातिता ॥ ९७ ॥ एवं महा
व्रतं यस्तु भोजयेच्छ्रद्धयान्वितः ॥ तस्य भुक्ता भवेत्कोटिर्विप्राणां वेदपाठिनाम् ॥ ९८ ॥ कपालपूरणीं भिक्षां यतीनां यः प्रयच्छति ॥ विमुक्तः सर्व
पापेभ्यो नासौ दुर्गतिमाप्नुयात् ॥ ९९ ॥ कपाले भोजनं श्रेष्ठं मार्गोऽयं ब्रह्मसंभवः ॥ वदंति लोके वेदेषु पूजितं देवदानवैः ॥ १०० ॥ धारयिष्यंति
ये विप्राः कपालं भूतमोहनम् ॥ मम तुल्यास्तु ते ब्रह्मन्विचरंति महीतले ॥ १ ॥ जपैकनिरता धीराः कपालकृतभूषणाः ॥ महापाशुपता लोके
रुद्राः संसारतारकाः ॥ २ ॥ धर्माधर्मविमुक्ताश्च कृत्याकृत्यविवर्जिताः ॥ दीक्षया ज्ञानयोगेन प्राणिनस्तारयंति[1] ते ॥ ३ ॥ यानि तीर्थानि लोकेऽ
स्मिन्यज्ञकोटिशतानि च ॥ विशुद्धस्य विज्ञानस्य कलां नार्हंति षोडशीम् ॥ ४ ॥ यथाहं सर्वदेवानां संपूज्यो वै पितामह ॥ तथैव सर्वयोगेभ्यः
संपूज्योऽयं महाव्रती ॥ ५ ॥ संसारबन्धमोक्षार्थं शिवगुह्यमिदं व्रतम् ॥ यदेतत्सर्वधर्मेण अपुनर्भवकारणम् ॥ ६ ॥ कपालव्रतमादाय यस्त्यजेदजिते
न्द्रियः ॥ रौरवं स प्रयात्याशु प्रणीतो यमकिंकरैः ॥ ७ ॥ आलापयति भावेन न तु कर्म करोति यः ॥ सरागचित्तः शृंगारी न च धर्मप्रियंकरः
॥ ८ ॥ एकत्र भोजी मिष्टाशी कैतवेन प्रियस्तथा ॥ कुग्रामनगरे वासी कृषिवाणिज्यसेवकः ॥ ९ ॥ इत्यादिदुष्टदोषश्च तस्य संभाषणादपि ॥
नरो नरकगामी स्याद्यतो मद्व्रतदूषकः ॥ ११० ॥ दृष्ट्वा च शिष्टम[2]थ वै महाव्रतधरो नरः ॥ न स्पृशेदंगमंगेन स्पृष्ट्वा स्नायात्तु चांबुभिः ॥ ११ ॥
एवं च सर्वमाख्यातं कपालस्य च मोक्षणम् ॥ यथा मयात्र निक्षिप्तमज्ञानेन हतं स्वयम् ॥ १२ ॥ ॥ सनत्कुमार उवाच ॥ ॥ एवमुक्त्वा स भग
वान्ब्रह्माद्यैरमरैः सह ॥ क्षेत्रं निवासयामास यथावत्कथयामि ते ॥१३॥ आद्यमेतत्स्मशानं च पठ्यते मुनिसत्तमैः ॥ महाकालवनं व्यास यत्र सन्नि
हितो हरः ॥१४॥ अनुग्रहस्य भुवनं भूमिभागो न संशयः ॥ अनुग्रहार्थं भूतानां क्षेत्रांतर्मृत्युधर्मिणाम् ॥१५॥ सुवर्णवज्रपर्यंकवेदिका च महीकृता ॥
विचित्रकुसुमा रत्नैः कारिता सर्वशोभना ॥१६॥ स्वर्णवज्रांकिततला श्रेष्ठा हरितशाद्वला ॥ त्रिंशं[3]च्चत्वारिंशपूर्णाः कलशाः कोणसंस्थिताः ॥ १७ ॥ 
द्वाराणि तत्र चत्वारि प्र[4]वर्णानि तपंति च ॥ कुम्भाः शोभंति तत्रस्थाः उदिता भास्करा इव ॥१८॥ रमते तत्र भगवान्वनानामुत्तमे वने ॥ सनंदिदे

१ प्राणिनोनुग्रहंति ते—इ० पा० । २ शिष्टम्—अन्यं कंचिदपि सदाचारसंपन्नमपि सज्जनं दृष्ट्वा—इत्यर्थः । ३ त्रिंशच्चत्वारि संपूर्णाः कलशाः शोणसंस्थिताः—इ० पा० । ४ अवर्गाणि—इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

वगणपः कालदंडादिसंयुतः ॥१९॥ एतत्कृतयुगे सर्वं प्रत्यक्षं दृश्यते वने ॥ त्रेतायां धर्मनिरतास्तापसा ब्रह्मचारिणः ॥१२०॥ द्वापरे धर्मशीला ये श्रुतविज्ञानशालिनः ॥ कलौ तु शुद्धविज्ञानशालिनः शंकरं हरम् ॥२१॥ तपोधिकाः प्रपश्यंति देवदेवं महेश्वरम् ॥ महाकालवने नित्यं शूलपट्टिशधारिणम् ॥ ॥ २२ ॥ एतत्ते तथ्यमाख्यातं लोकानुग्रहकारकम् ॥ सहितानुक्रमेणात्र मन्त्रैश्च विधिपूर्वकम् ॥ २३ ॥ समर्चयंति ये विप्रा भक्त्या शंभुमहापदम् ॥ वसंतीह समीपं ते महाकालानुभाविताः ॥ २४ ॥ पठति य इह लोके तस्य संस्थानमेतत्प्रथितगुणगणौघैरर्चितं दोषहं तत् ॥ शुभमतिरभिषिक्तः सोऽमरैरर्च्यमानो व्रजति हरपुरं यः संशृणोत्येकचित्तः ॥१२५॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचमे आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये कपालमोक्षणवर्णनंनाम षष्ठोऽध्यायः ॥ ६ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ भगवन्केन विधिना महाकालवने नरैः ॥ रुद्रलोकमभीप्सद्भिर्वस्तव्यं क्षेत्रवासिभिः ॥ १ ॥ किं मनुष्यैरुत स्त्रीभिः सिद्ध्यर्थं ह्याश्रमान्वितैः॥ वसद्भिः किमनुष्ठेयमेतत्सर्वं ब्रवीहि नः ॥ २ ॥ नरैः स्त्रीभिश्च वस्तव्यं वर्णैश्चाश्रमवासिभिः ॥ स्वधर्माचारनिरतैर्दंभमोहविवर्जितैः ॥ ३ ॥ कर्मणा मनसा वाचा रुद्रभक्तैर्यतेन्द्रियैः ॥ अनुश्रुतिभिरक्षुद्रैः सर्वभूतहिते रतैः ॥ किं कुर्वाणैर्नरैः कर्म रुद्रभक्तिं ब्रवीहि नः ॥४॥ ॥ सनत्कुमार उवाच ॥ ॥ त्रिविधा कथिता ह्यत्र मनोवाक्कायसंभवा ॥ लौकिकी वैदिकी चान्या भवेदाध्यात्मिकी तथा ॥ ५ ॥ ध्यानधारणया बुद्ध्या रुद्राणां स्मरणं हि तत् ॥ रुद्रभक्तिकरी चैषा मानसी भक्तिरुच्यते ॥ ६ ॥ व्रतोपवासनियमैर्यतेन्द्रियनिरोधिभिः ॥ कायिका भक्ती रुद्रस्य ज्ञानध्यानस्य धर्मिणाम् ॥ ७ ॥ गोघृतक्षीरदधिभिर्गंधरक्तकुशोदकैः ॥ गन्धमाल्यैश्च विविधैर्धातुभिश्चोपपादिता ॥ ८ ॥ घृतगुग्गुलधूपैश्च कृष्णागरुसुगंधिभिः ॥ भूषणैर्हेमरत्नानां चित्राभिः स्रग्भिरेव च ॥ ९ ॥ वासप्रविसरास्तोत्रैः पताकाव्यजनोच्छ्रितैः ॥ नृत्यवादित्रगीतैश्च सर्वप्रत्युपहारकैः ॥ १० ॥ भक्ष्यभोज्यानुपानैश्च यावत्पूजाक्षतैर्नरैः ॥ महेश्वरं पुरस्कृत्य भक्तिः सा लौकिकी मता ॥ ११ ॥ वेदमन्त्रहविर्यागैर्या क्रिया वैदिकी मता ॥ १२ ॥ दर्शे च पूर्णमास्यां वा कर्तव्यं चाग्निहोत्रकम् ॥ प्राशनं दक्षिणादानं पुरोडाशश्च सत्क्रिया ॥ १३ ॥ इष्टवृत्तिः सोमपानं याज्ञिकं सर्वकर्म च ॥ ऋग्यजुःसामजाप्यानि संहिताध्ययनानि च ॥१४॥ क्रियते रुद्रमुद्दिश्य सा भक्तिर्वैदिकी स्मृता ॥ अग्निभूम्यनिलाकाशनिशाकरदिवाकरान् ॥ १५ ॥ समुद्दिश्य कृतं कर्म तत्सर्वं दैविकं भवेत् ॥ आध्यात्मिकी तु द्विविधा रुद्रभक्तिः स्थिता मुने ॥ १६ ॥ सांख्याख्या यौगिकी चान्या विभागं तत्र मे शृणु ॥ चतुर्विंशतितत्त्वानि प्रधानादीनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



संख्यया ॥ १७ ॥ अचेतनानि योज्यानि पुरुषः पञ्चविंशकः ॥ चेतनः पुरुषो भोक्ता न कार्यं तस्य कर्मणः ॥ १८ ॥ रुद्रः षड्विंशकः कर्ता सर्व
ज्ञश्चेतनः प्रभुः ॥ अजन्मा नित्यमव्यक्तमधिष्ठाता प्रयोजकः ॥ १९ ॥ पुरुषो नित्यव्यक्तः स्यात्कारणं च महेश्वरः ॥ तत्त्वसर्गं भवेत्सर्गं भूतसर्गं
च तत्त्वतः ॥ २० ॥ संख्यया परिसर्गाय प्रधानं च गुणात्मकम् ॥ साधर्म्यमात्मनैश्वर्यं प्रधानं वै विधर्मि च ॥ २१ ॥ कारणं तच्च रुद्रस्य काम्य
त्वमिदमुच्यते ॥ सर्वत्र कर्तृता रुद्रे पुरुषे चाप्यकर्तृता ॥ २२ ॥ अचैतन्यं प्रधाने च तच्च तत्त्वमिदं स्मृतम् ॥ तत्त्वांतरेण मुच्यंते कार्यं कारणमेव
च ॥ २३ ॥ प्रयोजने च वैजात्यं ज्ञात्वा तत्त्वमसंख्यया ॥ संख्यास्तीत्युच्यते प्राज्ञै रुद्रतत्त्वार्थचिंतकैः ॥ २४ ॥ इति तस्य तत्त्वभावं तत्त्वसंख्या
च तत्त्वतः ॥ रुद्रतत्त्वाधिकं चापि ज्ञानतत्त्वं विदुर्बुधाः ॥ २५ ॥ सांख्ये कृता भक्तिरेषा सद्भिराध्यात्मिकी मता ॥ योगिनामपि मे भक्त्या
शृणु भक्तिं महासुर ॥ २६ ॥ प्राणायामपरो नित्यं ध्यायते नियतेंद्रियः ॥ धारणां हृदये धृत्वा ध्यायते यो महेश्वरम् ॥ २७ ॥ हृत्कञ्जकर्णिका
सीनं पञ्चवक्त्रं त्रिलोचनम् ॥ शशांकज्योतिजठरं व्यालवृत्तकटीतटम् ॥ २८ ॥ श्वेतं दशभुजं भद्रं वरदाभयहस्तकम् ॥ योगजा मानसी व्यास
रुद्रभक्तिः परा स्मृता ॥ २९ ॥ य एव भक्तिमान्रुद्रे रुद्रभक्तः स उच्यते ॥ विधिं तु शृणु मे व्यास यः स्मृतः क्षेत्रवासिनाम् ॥ ३० ॥ स्वयं
रुद्रेण विहितो ब्रह्मादीनां समागमे ॥ कथितो विस्तरात्पूर्वं सर्वेषां तत्र सन्निधौ ॥३१॥ निर्ममा निरहंकारा निःसंगा निष्परिग्रहाः ॥ बंधुवर्गेण निः
स्नेहाः समलोष्टाश्मकांचनाः ॥ ३२ ॥ भूतानां कर्मभिर्नित्यं त्रिविधैरभयप्रदाः ॥ सांख्ययोगविधिज्ञाश्च धर्मज्ञाश्छिन्नसंशयाः ॥ ३३ ॥ यजंतो विवि
धैर्यज्ञैर्ये विप्राः क्षेत्रवासिनः ॥ महाकालवने तेषां मृतानां यत्फलं शृणु ॥ ३४ ॥ व्रजंत्येव सुदुष्प्राप्यं ब्रह्मसायुज्यमक्षयम् ॥ संप्राप्य न पुन
र्जन्म लभंते मोक्षमव्ययम् ॥ ३५ ॥ पुनरावर्तनं हित्वा विधिं माहेश्वरं स्थिताः ॥ पुनरावृत्तिरन्येषां प्रपंचाश्रमवासिनाम् ॥ ३६ ॥ गार्हस्थ्यं
विधिमासाद्य षट्कमनिरताः सदा ॥ जुह्वते विधिना सम्यङ्मंत्रस्तोत्रैर्नियंत्रिताः ॥ ३७ ॥ अधिकं फलमायांति सर्वदुःखविवर्जिताः ॥ सर्व
लोकेषु चान्यत्र गतिस्तस्य न हन्यते ॥ ३८ ॥ दिव्येनैश्वर्ययोगेन स्वारूढः स्वपरिग्रहः ॥ बहुसूर्यप्रकाशेन विमानेन सुवर्चसा ॥ ३९ ॥ वृतः
स्त्रीणां सहस्रैश्च स्वच्छंदगमनालयः ॥ विचरत्यविचार्यैव सर्वलोकान्दिवौकसाम् ॥ ४० ॥ स्पृहणीयतमः पुंसां सर्ववर्णोत्तमो धनी ॥ स्वर्गाच्च्युतः ॥ ११ ॥
प्रजायेत कुले महति रूपवान् ॥ ४१ ॥ धर्मज्ञो रुद्रभक्तश्च सर्वविद्यार्थपारगः ॥ तथैव ब्रह्मचर्येण गुरुशुश्रूषणेन च ॥ ४२ ॥ वेदाध्ययनसंयुक्तो
भैक्षवृत्तिर्जितेंद्रियः ॥ नित्यं सत्यव्रते युक्तः स्वधर्मे च प्रमोदवान् ॥ ४३ ॥ मृतः काले समृद्धेन सर्वभोगावलंबिना ॥ सूर्येणेव द्वितीयेन विमानेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विचारितः ॥ ४४ ॥ गुह्यकोनाम रुद्रस्य गणः परमसंमतः ॥ अप्रमेयबलैश्वर्यो देवदानवपूजितः ॥ ४५ ॥ तेषां च समतां याति तुल्यैश्वर्यसमन्वितः ॥ देवदानवमर्त्येषु स च पूज्यतमो भवेत् ॥ ४६ ॥ वर्षकोटिसहस्राणि वर्षकोटिशतानि च ॥ एवमैश्वर्यसंयुक्तो रुद्रलोके महीयते ॥ ४७ ॥ वसित्वासौ विभूत्या वै यदा च च्यवते नरः ॥ रुद्रलोकाच्च्युतो भूमौ वसते नात्र संशयः ॥ ४८ ॥ महाकालवने क्षेत्रे ब्रह्मचर्याश्रमे स्थितः ॥ महेश्वरपरो नित्यं वसेद्वाऽथ म्रियेत वा ॥ ४९ ॥ मृतोऽसौ याति दिव्ये वै विमाने सूर्यवर्चसि ॥ पूर्णचंद्रप्रकाशो वै शशिवत्प्रियदर्शनः ॥ ५० ॥ रुद्रलोकं समासाद्य गुह्यकैः सह मोदते ॥ ऐश्वर्यं च महद्भुंक्ते सर्वस्य जगतः प्रभुः ॥ ५१ ॥ भुक्त्वा युगसहस्राणि रुद्रलोके महीयते ॥ प्रच्युतस्तु पुनस्तस्माद्रुद्रलोकात्क्रमेण तु ॥ ५२ ॥ नित्यं प्रमुदितस्तत्र भुक्त्वा लोकमनामयम् ॥ द्विजानां साधने नित्यं कुले महति जायते ॥ ५३ ॥ मानवेषु च धर्मेषु वसेद्भूयांश्च रूपवान् ॥ स्पृहणीयवपुः स्त्रीणां महाभोगपतिर्भवेत् ॥ ५४ ॥ वानप्रस्थसमाचारो वनौषधिविवर्जितः ॥ शीर्णपर्णसमाहारः फलपुष्पांबुभोजनः ॥ ५५ ॥ कणाशनोऽश्मकुट्टो वा दंतोलूखलकोऽथ वा ॥ येन केनाप्युपायेन जीर्णवल्कलधारकः ॥ ५६ ॥ जटी त्रिषवणस्नायी मुक्तकेशः सुदंडवान् ॥ जलशायी पंचतपा वर्षास्वभ्रावकाशकः ॥ ५७ ॥ कीटकंटकपाषाणभूम्यां तु शयनं तथा ॥ स्थानं वीरासनरतः संविभागी दृढव्रतः ॥ ५८ ॥ अरण्यौषधिभोक्ता च सर्वभूताभयप्रदः ॥ नित्यं धर्मपरो मौनी जितक्रोधो जितेंद्रियः ॥ ५९ ॥ रुद्रभक्तः क्षेत्रवासी महाकालवने मुनिः ॥ सर्वसंगपरित्यागी स्वारामो विगतस्पृहः ॥ ६० ॥ यश्चात्र वसते व्यास शृणु तस्य हि या गतिः ॥ तरुणार्कप्रदीप्तेन वेदिकास्तंभशोभिना ॥ ६१ ॥ रुद्रभक्तो विमानेन याति कामप्रचारिणा ॥ विराजमानो नभसि द्वितीय इव चंद्रमाः ॥ ६२ ॥ गीतवादित्रशब्देन संवृतोऽप्सरसां गणैः ॥ वर्षकोटिशतं साग्रं रुद्रलोके महीयते ॥ ६३ ॥ रुद्रलोकाच्च्युतश्चापि विष्णुलोके महीयते ॥ विष्णुलोकात्परिभ्रष्टो ब्रह्मलोकं स गच्छति ॥ ६४ ॥ तस्मादपि च्युतः स्थानाद्द्वीपेषु स हि जायते ॥ स्वर्गेषु च तथान्येषु भोगान्भुंक्ते यथेच्छया ॥ ६५ ॥ भुक्तैश्वर्यो नरस्तेषु मर्त्यामर्त्येषु जायते ॥ राजा वा राजतुल्यो वा जायते धनवान्सुखी ॥ सुरूपः सुभगः कांतः कीर्तिमान्रुद्रभावितः ॥ ६६ ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वा क्षेत्रवासिनः ॥ स्वधर्मनिरता व्यास स्वभृत्याचारजीविनः ॥ ६७ ॥ सर्वात्मना रुद्रभक्ता भूतानुग्रहकारिणः ॥ महाकालवने क्षेत्रे ये वसंति मुमुक्षवः ॥ ६८ ॥ मृतास्ते रुद्रभवनं विमानैर्यांति शोभनैः ॥ अप्सरोगणसंयुक्तैः कामगैः कामरूपिभिः ॥ ६९ ॥ अथवा संविदग्नौ च शरीरं विजुहोति यः ॥ रुद्रध्यायी महासत्त्वः स रुद्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



भवने वसेत् ॥ ७० ॥ रुद्रलोकोऽक्षयस्तेषां शाश्वतो गुह्यकैः सह ॥ सर्वलोकोत्तमो रम्यो भवतीष्टार्थसाधकः ॥ ७१ ॥ ये त्यजंति महाकाले प्राणान नशनैर्नराः ॥ तेषामप्यक्षयो व्यास रुद्रलोको महात्मनाम् ॥ ७२ ॥ सांख्याः स्तुवंति ते रुद्रं सर्वदुःखविवर्जिताः ॥ सर्वामरयुतं देवं नंदिदेवगणै र्युतम् ॥ अनाशकमृताः शूद्रा महाकालवने नराः ॥ ७३ ॥ सिंहयुक्तैस्तु ते यांति विमानैरर्कसन्निभैः ॥ ७४ ॥ नानावर्णसुवर्णाढ्यैर्हृष्टगंधाधिवा सितैः ॥ अनौपम्यगुणै रम्यैरप्सरोगीतवादिभिः ॥ ७५ ॥ पताकाध्वजविन्यस्तैर्नानाघंटानिनादितैः ॥ सुप्रभैर्गुणसंपन्नैर्मयूरवरचारिभिः ॥ ७६ ॥ रुद्रलोके नरा धीराः सर्वे चानशनैर्मृताः ॥ तत्रोषित्वा चिरं कालं भोगान्भुक्त्वा यथेप्सितान् ॥ धनी विप्रकुले भोगी जायते मर्त्यमागतः ॥ ७७ ॥ करीषं साधयेद्यस्तु महाकालवने नरः ॥ सर्वभोगविनिर्मुक्तो रुद्रलोकं स गच्छति ॥ ७८ ॥ रुद्रलोके वसेत्तावद्यावत्कल्पक्षयो भवेत् ॥ ७९ ॥ तत्र भुक्त्वा महाभोगानिह जातो महीपतिः ॥ पृथिव्याः सकलायाश्च रूपवान्सुभगो भवेत् ॥ ८० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये महाकालवनवासविधिवर्णनंनाम सप्तमोऽध्यायः ॥ ७ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ आचारः परमो धर्मः सर्वधर्मपरायणः ॥ स्वधर्मनिरताश्चैव जितक्रोधा जितेंद्रियाः ॥ १ ॥ रुद्रलोकं व्रजंतीह नात्र चित्रा मतिर्मम ॥ असंशयं च गच्छंति लोकानन्यान्छशिप्रभैः ॥ २ ॥ विनापि क्षेत्रवासेन तथैव नियमेन च ॥ स्त्रियो म्लेच्छाश्च शूद्राश्च पशवः पक्षिणो मृगाः ॥ ३ ॥ मूका जडांधबधि रास्तपोनियमवर्जिताः ॥ एषां तु का गतिश्चेत्ते महाकालवने मृताः ॥ ४ ॥ ॥ सनत्कुमार उवाच ॥ ॥ स्त्रियो म्लेच्छाश्च मूढाश्च पशवः पक्षिणो मृगाः ॥ कालेनैव मृता व्यास रुद्रलोकं व्रजंति ते ॥ ५ ॥ शरीरैर्दिव्यरूपैश्च सर्वभोगसमन्विताः ॥ रमंते शंभुना सार्धं स्मशाने प्रेतसंकुले ॥ ६ ॥ निर्भर्त्सिता[3] पुरा देवी कालीति पार्वतीति च ॥ तदा सा कुपिता देवी कटके शंकरं प्रति ॥७॥ एवं हि कलहो जातः शिवगौर्योर्हि यत्र तु ॥ देवस्तत्र समुद्भूतो नाम्ना कलकलेश्वरः ॥ ८ ॥ कृतमग्रे तदा कुंडं नाम्ना कलहनाशनम् ॥ स्नाने तत्र कृते व्यास जाताऽकलहिनी प्रिया ॥ ९ ॥ तस्मिंस्तीर्थे नरः स्नात्वा पूजयित्वा महेश्वरम् ॥ उपोष्य रजनीमेकां कुलानां तारयेच्छतम् ॥१०॥ तत्र यच्छति यो दानं त्रुटिमात्रं च चंदनम् ॥ आत्मना तारि तास्तेन दश पूर्वे दशापरे ॥ ११ ॥ भूमिदानं च यस्तत्र प्रदास्यति नरो मुने ॥ अपि गोचर्ममात्रेण सर्वभूम्यधिपो भवेत् ॥ १२ ॥ गामेकां रक्ति कामेकां भूमेरप्येकमंगुलम् ॥ यः प्रदास्यति भक्त्या हि स वै राजा भविष्यति ॥ १३ ॥ धेनुमश्वांस्तिलान्वस्त्रं भाजनं ताम्रदोहनम् ॥

१ नरः--इ०पा० । २ प्रथमः--इ०पा० । ३ शंकरेण--इति शेषः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपानहश्च च्छत्रं च तथा च श्रेष्ठपादुके ॥ १४ ॥ ये प्रदास्यंति विप्रेभ्यस्तेषां लोकाः सदाऽक्षयाः ॥ तस्य दक्षिणपार्श्वे तु पृष्ठे मात्राख्य देवताः ॥ १५ ॥ सा तत्र सर्वलोकानां देवी दुरितहारिणी ॥ सर्वतीर्थं तु विज्ञेयं मणिकर्णिकमुत्तमम् ॥ १६ ॥ तस्मिन्स्नात्वा तु यः पश्येत्पृष्ठमातर आदरात्॥ स मुक्तः सर्वपापेभ्यः सिद्धिमाप्नोति वांछिताम् ॥ १७ ॥ तासां तु दर्शनं कृत्वा मार्गे गमनमाचरेत् ॥ न भयं तस्य चोरेभ्यो रक्षोभूतभयं तथा ॥ १८ ॥ स्वदेशे परदेशे वा पर्वतेष्वटवीषु च ॥ न समुद्रे भयं तस्य तथा वै दुष्टभावना ॥ १९ ॥ ग्रहपीडासु सर्वासु तथा राजभयादिकम् ॥ बस्तं वा यदि वा मेषं महिषं चापि घातयेत् ॥ २० ॥ देवीमुद्दिश्य यो विप्र सोऽभीष्टफलमश्नुते ॥ आश्विनस्य सिताष्टम्यामर्धरात्रिगते नरः ॥ ॥ २१ ॥ यः स्नाति पुरतो देव्याः स सिद्धिं लभते पराम् ॥ मृतपुत्रा च या नारी कुण्डे स्नात्वा सभर्तृका ॥ २२ ॥ स्नाति वै फलकुम्भेन अग्रे देव्या विधानतः ॥ स्नात्वा नान्यमुखं पश्येत्कुम्भस्नानेन वै मुने ॥ २३ ॥ तस्य संजायते पुत्रो यथा देवः षडाननः ॥ पृष्ठे मातुः परं पुण्यं तीर्थमप्सरसां शुभम् ॥ २४ ॥ रूपसौभाग्यसंपन्नस्तत्र स्नातो भवेन्नरः ॥ उर्वश्या वै पुरा व्यास तीर्थ यास्य प्रभावतः ॥ २५ ॥ भर्ता पुरूरवा लब्ध ऐलेयोऽसौ[1] महीपतिः ॥ इति कौतूहलं श्रुत्वा व्यासो वचनमब्रवीत् ॥ २६ ॥ ॥ व्यास उवाच ॥ ॥ कथमप्सरसां तीर्थं तत्र जातं महामुने ॥ कारणेन यथा तेन यस्मिन्काले प्रतिष्ठितम् ॥ तथा तन्मे सविस्तारं सरहस्यं प्रकीर्तय ॥ २७ ॥ कथ पुरूरवाश्चासौ भार्यास्तस्य वराप्सराः ॥ उर्वशीनाम का सा तु केन जाता वरांगना ॥ सर्वमेतद्यथावृत्तं वद कौतूहलं हि मे ॥ २८ ॥ ॥ सनत्कुमार उवाच ॥ ॥ नरनारायणौ पूर्वं यत्र वै तेपतुस्तपः ॥ २९ ॥ बदरिकाश्रमस्थौ तौ तेनेन्द्रो भयमागतः ॥ सर्वाश्चाप्सरसो ह्यद्या रूपयौवनदर्पिताः ॥ ३० ॥ आदिष्टा या मघवता विघ्नार्थे च समागताः ॥ तौ दृष्ट्वाप्सरसस्तत्र रमन्तीर्मदविह्वलाः ॥ ३१ ॥ विघ्नार्थमिह आयातास्तदा देवौ जजल्पतुः ॥ अस्माकं न स्त्रियः संति तेन वै विघ्नकारणम् ॥ ३२ ॥ एवं संजल्प्य च नरो नारायणमुवाच ह ॥ करिष्याम्यहमेकां वै आसां तु रूपतोऽधिकाम् ॥ ३३ ॥ मंजर्या सहकारस्य स्त्रीमूरुभ्यां चकार ह ॥ रूपेणाप्रतिमां लोके सर्वाभरणभूषिताम् ॥ ३४ ॥ उत्थितां प्रमदां दृष्ट्वा ज्वलनाभां वरांगनाम् ॥ गत्वा शशंसुस्ताः शक्रं न तौ लोभयितुं क्षमाः ॥ ३५ ॥ शक्रस्तासां वचः श्रुत्वा गत्वा देवावुवाच ह ॥ प्रणामावनतो भूत्वा कृत्वा शिरसि चांजलिम् ॥ ३६ ॥ अहमर्थी स्त्रियाश्चास्याः प्रसादः क्रियतामिति ॥ ततस्तां ददतुर्देवाविंद्राय परमेश्वरौ ॥ ३७ ॥ अस्मद्वचनसामर्थ्याद्गृहाणेमां त्वमुर्वशीम् ॥ ऊरुभ्यां जनिता

१ लोके योऽसौ—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

यस्मान्नरेणेयं वरांगना ॥ ३८ ॥ मंजर्या सहकारस्य तेनेयमुर्वशी स्मृता ॥ पुरंदरो गृहीत्वा तामुर्वशीं परमांगनाम् ॥ ३९ ॥ गत्वा स्वर्गमथाहूय चित्रांगदमुवाच ह ॥ शिक्षाऽस्याः क्रियतां चित्र यथा नृत्ये विचक्षणा ॥ ४० ॥ क्रियतामचिरादेषा यत्नमास्थाय शोभनम् ॥ एवमुक्ते तु शक्रेण कृता तेन विचक्षणा ॥ वरं प्रवीणा सा जाता नृत्ये गीते च कोविदा ॥ ४१ ॥ एवं सा न्यवसत्तत्र सुरसद्मनि सुन्दरी ॥ गते बहुतिथे काले तत्रागात्स नरेश्वरः ॥ ४२ ॥ इलस्य पुत्रो धर्मात्मा नाम्ना चैव पुरूरवाः ॥ इन्द्रस्यार्द्धासनगतो नृत्यं पश्यति तत्र ह ॥ ४३ ॥ नृत्यन्तीं वासवस्याग्रे उर्वशीं वीक्ष्य कामुकः ॥ हृतचित्तस्तया राजा न किंचित्प्रत्यपद्यत ॥ ४४ ॥ धैर्यं चित्ते समावेश्य मुहूर्तं पर्यवस्थितः ॥ उर्वशी च तदा तेन दर्शनाद्धृतमानसा ॥ ४५ ॥ तत्प्रदेशाद्विनिष्क्रम्य कामार्ता चातिविह्वला ॥ भूमौ सा पतिता बाला उच्छ्रिताद्रंगमण्डलात् ॥ ४६ ॥ अथात्मानं च संवेद्य उत्थिता भूमिमण्डलात् ॥ दृष्ट्वा सा राजसिंहेन मन्मथेन प्रपीडिता ॥ ४७ ॥ गतः पुरूरवा भूमिं तामेव मनसा स्मरन् ॥ स्मरन्ती राजशार्दूलं गता साप्युर्वशी गृहम् ॥ ४८ ॥ चित्रांगदगृहे गत्वा दूतं साथ चकार ह ॥ चित्रांगदेन सा नीता रात्रौ यत्र पुरूरवाः ॥ ४९ ॥ उर्वश्या रहितः स्वर्गः शून्योऽप्यासीदिवौकसाम् ॥ रात्रावेव च सा तेन आनीता त्रिदिवं पुनः ॥ ५० ॥ तया विरहितः सोऽपि शून्यचित्तः परिभ्रमन् ॥ उन्मत्ततां गतो व्यास षष्टिवर्षाणि पार्थिवः ॥५१॥ परिभ्रमन्स तीर्थानि महाकालवनं गतः ॥ गंधर्वेणोर्वशी स्वर्गे नीता सा परमाप्सराः ॥ ५२ ॥ नापि शेते न वा स्नाति हे राजन्निति जल्पति ॥ तावदप्सरसः सर्वास्ताः प्राप्ता यत्र चोर्वशी ॥ ५३ ॥ रंभा च मेनका चैव प्रम्लोचा पुंजिकस्थली ॥ जलपूर्णाश्रुपूर्णा च वसंता चंद्रिका तथा ॥ ५४ ॥ सूर्यदत्ता विशालाक्षी चंद्रा चन्द्रप्रभा तथा ॥ आगत्य तास्तु सहिता उर्वशीं वाक्यमब्रुवन् ॥ ५५ ॥ किं रोदिषि वरारोहे मर्त्यहेतोः सुलोचने ॥ तद्वाक्यमुर्वशी तासां श्रुत्वा वचनमब्रवीत् ॥ ५६ ॥ सौख्यं षण्ढो न जानाति संगात्स्त्रीपुंसयोर्हि यत् ॥ अनयोपमया ज्ञेयं तस्यार्थे कृतनिश्चया ॥ ५७ ॥ श्रुत्वा चेति वचस्तस्यास्ताः संमंत्र्य समाहिताः ॥ अविदिते च देवानां महाकालवने गताः ॥ ५८ ॥ नृपं च ददृशुस्तत्र वृक्षच्छायानिषेवितम् ॥ दृष्ट्वा चाथ नृपं सर्वा भृशं जाताः सुविह्वलाः ॥ ५९ ॥ दृष्ट्वा तथाविधाः सर्वाः कामार्ताः सुरयोषितः ॥ मूढचित्ताः प्रहस्यैवमुर्वशी वाक्यमब्रवीत् ॥६०॥ ॥ उर्वश्युवाच ॥ ॥ अयं स पुरुषव्याघ्रो विना येनाहमीदृशी ॥ ऐलः पुरूरवानाम विख्यातो जगतीपतिः ॥ ६१ ॥ एवं ब्रुवन्त्यां वै तस्यामुर्वश्यामप्सरोगणः ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मौनीभूतश्चिरं[1] तस्थौ लज्जयानतकन्धरः ॥ ६२ ॥ एतस्मिन्नन्तरे प्रायाद्भगवांस्तत्र नारदः ॥ दृष्ट्वा तथागताः सर्वा उर्वश्या सहितं नृपम् ॥ ६३ ॥ संप्रेक्ष्य च ततः प्राह किं यूयमिह निःस्वनाः ॥ त्यक्त्वा तथाविधं रम्यमिन्द्रस्यालयमुत्तमम् ॥ ६४ ॥ वरं च व्रियतां शीघ्रं वियोगो न भविष्यति ॥ माहात्म्यं चास्य तीर्थस्य कथयामास नारदः ॥ ६५ ॥ अस्मिन्हि दुर्भगा तीर्थे स्नात्वा स्त्री पुरुषोऽपि वा ॥ सौभाग्यं लभते सम्यक्सर्वभोगांस्तथोत्तमान् ॥ ६६ ॥ आत्मानं तोलयेद्यस्तु तिलैर्वा लवणेन वा ॥ शर्कराभिश्च बह्वीभिर्वित्तशाठ्यविवर्जितः ॥ ६७ ॥ गुडेन मधुना वापि देवीमुद्दिश्य पार्वतीम् ॥ लवणेन स्वरूपाढ्यस्तिलैः सर्वांगशोभनः ॥ ६८ ॥ द्रव्यवृद्धिः शर्करया गुडेनांगेषु पूर्णता ॥ मधुना चैव सौभाग्यं तीर्थस्यास्य प्रभावतः ॥ ६९ ॥ द्वादशैव तु युग्मानि देव्या देवस्य भोजयेत् ॥ कूर्पीं नखरिणीं दद्यात्ताटंकं कैतकांजनम्[2] ॥ ७० ॥ वेत्रजां कंचुकीं चैव वस्त्रे कौसुंभके तथा ॥ श्वेतानुलेपनं पुंसां स्त्रीणां दद्याच्च कुंकुमम् ॥ ७१ ॥ आषाढे श्रावणे वापि मासि भाद्रपदे तथा ॥ शुक्लाश्विनतृतीयायामुत्तमं व्रतमाचरेत् ॥ ७२ ॥ उत्तमा जायते नारी यथा देवी उमा तथा ॥ उमामहेश्वरौ कार्यौ सौवर्णौ च स्वशक्तितः ॥ ७३ ॥ धार्यौ नार्या हि तौ देवौ स्वयं तुलावरोहणे ॥ फलानि चैव देयानि शाकानि विविधानि च ॥ ७४ ॥ तत्र दत्तं हुतं जप्तं सर्वं कोटिगुणं भवेत् ॥ एवं या कुरुते तत्र तीर्थे नारी समाहिता ॥ ७५ ॥ गन्धर्वाप्सरसां लोके मृता याति न संशयः ॥ अत्र तीर्थे च द्वे लिंगे पूजिते देवदानवैः ॥ ७६ ॥ दृष्ट्वा ते परमां सिद्धिं प्राप्नुतो दंपती तदा ॥ कार्तिक्यां तु विशेषेण कृत्वा तत्र प्रजागरम् ॥ संपूज्य गंधपुष्पैश्च रुद्रलोकमवाप्नुयात् ॥ ७७ ॥ यथा देव्याः स्वरूपेण वियोगो नैव दृश्यते ॥ तथा तयोर्वियोगश्च दृश्यते न कदाचन ॥ ७८ ॥ एवं कृत्वाथ तां विप्र सर्वाश्च त्रिदिवं गताः ॥ उक्तमप्सरसां तीर्थं तीर्थांतरमथोच्यते ॥ ७९ ॥ दक्षिणे पृष्ठदेव्या वै माहिषं कुण्डमुच्यते ॥ महिषो दानवः पूर्वं निहतो गणनायकैः ॥ ८० ॥ तत्र तीर्थे नरः स्नात्वा मातॄः संपूज्य यत्नतः ॥ प्रेतरक्षःपिशाचानां[3] पीडया स विमुच्यते ॥ ८१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्येऽप्सरःकुण्डमाहात्म्यवर्णनंनामाष्टमोऽध्यायः ॥ ८ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ कथं तन्माहिषं कुण्डं मातॄणामाकृतिः[4] कथम् ॥ रुद्रस्यैव कथं क्षेत्रे महिषो दानवो हतः ॥१॥ ॥ सनत्कुमार उवाच ॥ ॥ कपालखंडमादाय महादेवोऽप्यतिप्रभम् ॥ ब्रह्मतेजोमयं दिव्यं ज्वलंतमिव चार्चिषा ॥२॥ क्रीडमानो जगन्नाथो मोहयामास वै सुरान् ॥ निमेषात्स इमं लोकं योगात्मा योगलीलया ॥३॥ प्राप्य पुण्य

१ मौनिभूत्वा–इ० पा० । २ कनकाञ्जनम्–इ० पा० । ३ प्रेतभूतपिशाचानाम्–इ० पा० । ४ आवृतिः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

तमं क्षेत्रं यत्रातिष्ठन्महाप्रभुः ॥ तत्र तत्र महद्दिव्यं कपालं देवताधिपः ॥ ४ ॥ स्थापयामास दीप्तार्चिर्गणानामग्रतः प्रभुः ॥ त्वत्स्थापितमथो दृष्ट्वा
गताः सर्वे महौजसः ॥ ५ ॥ विनदत्सु महानादं नादयंतो दिशो दश ॥ क्षोभार्णवाशनिप्रख्यं नभो येन विदीर्यते ॥ ६ ॥ तेन शब्देन घोरेण
दानवो देवकंटकः ॥ हालाहल इति ख्यातो देशं तमभिधावितः ॥ ७ ॥ अमृष्यमाणः क्रोधार्तो दुरात्मा दुर्जयः सुरैः ॥ ब्रह्मदत्तवरश्चैव माहिषं
वपुरास्थितः ॥ ८ ॥ दैत्यैः परिवृतो घोरैः कोटिभिश्चोद्यतायुधैः ॥ तमायांतं तु सक्रोधं महिषं देवकंटकम् ॥ ९ ॥ समावेक्ष्याह वै देवो गणान्सर्वा
न्पिनाकधृक् ॥ मायावी गणपा दैत्यस्त्रैलोक्यस्यापि कंटकः ॥ १० ॥ आयाति त्वरितो यूयं तस्मादेनं विनिघ्नथ ॥ कपालस्य गतिं सर्व आश्रिता
गणनायकाः ॥ ११ ॥ ततो देवगणा दृष्ट्वा तमायांतं महासुरम् ॥ गर्जमानं महानादं भ्रममाणं महाभुजम् ॥ १२ ॥ बिभिदुः शूलसंघातैरसिभि
र्मुसलैस्तथा ॥ संमुह्य शरजालेन ततो भूमौ न्यपातयन् ॥ १३ ॥ हते तस्मिन्महादेवो देवान्प्रोवाच वै तदा ॥ अहो दर्पातिमूढः स दर्पेण निधनं
गतः ॥ १४ ॥ एतस्मिन्नंतरे व्यास तत्कपालात्सुभैरवाः ॥ दीप्तास्या मातरः सर्वाः प्रचंडास्त्रा महाबलाः ॥ १५ ॥ अभ्यधावंस्तमुद्देशं महादेवं निवे
द्य वै ॥ दैत्यं ता भक्षयंति स्म भित्त्वा भित्त्वा महाबलाः ॥ १६ ॥ कपालमातरस्तस्मात्ख्याताः क्षेत्रे महाबलाः ॥ महाकपालस्तस्माद्वै तादृशः परि
कीर्तितः ॥ १७ ॥ स्थापितस्य कपालस्य भित्त्वा समभवत्पुरा ॥ ख्यातं शिवतडागं च सर्वपापप्रणाशनम् ॥ १८ ॥ तदद्यापि महद्दिव्यं सरस्तत्र
प्रकाशते ॥ त्रिषु लोकेषु विख्यातं गणगंधर्वसेवितम् ॥ १९ ॥ पात्रस्थमुद्धृतं वापि शीतोष्णं क्वथितं जलम् ॥ रौद्रं सरः पुनातीहाश्वमेधावभृथो
यथा ॥ २० ॥ प्रागाद्ब्रह्मापि तं देशं देवतानां शतैर्वृतः ॥ स्वर्गलोकस्य निःश्रेणी कीर्तिता ब्रह्मणा स्वयम् ॥ २१ ॥ अत्र त्यजंति ये प्राणान्रुद्र
लोकं व्रजंति ते ॥ धन्या व्यास नरा मर्त्ये महाकालवने स्थिताः ॥ २२ ॥ रौद्रे सरसि ये स्नांति जलं वापि पिबंति ये ॥ स्वधर्माचारनिरताः
पश्यंतीशानमीश्वरम् ॥ २३ ॥ इति स्वर्गगता देवाः स्पृहां कुर्वंति नित्यशः ॥ २४ ॥ इदं शुभं दिव्यमधर्मनाशनं महाकपालं सुरदैत्यपूजितम् ॥
महाप्रभं पापहरं सनातनं सुरेशलोकादपि दुर्लभं सदा ॥ २५ ॥ तपोरतैः सिद्धगणैरभिष्टुतं यथा नभःस्थं दिननाथमंडलम् ॥ य एकचित्तः
शृणुयात्प्रसादतस्त्रिविष्टपं गच्छति सोऽभिनंदितः ॥२६॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डेऽवन्तीक्षेत्र
माहात्म्ये महिषकुण्डरुद्रसरोमाहात्म्यवर्णनंनाम नवमोऽध्यायः ॥ ९ ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ अथातः संप्रवक्ष्यामि तीर्थं त्रैलोक्य
विश्रुतम् ॥ स्वयंभूतं महेशस्य विख्यातं कुटुंबिकेश्वरम् ॥ १ ॥ मुच्यते सर्वपापैस्तु सप्तजन्मकृतैरपि ॥ शुचिः पश्यति यो देवं कृत्वा श्राद्धं यथा



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विधि ॥ २ ॥ सर्वांल्लोकानतिक्रम्य शिवलोकं स गच्छति ॥ यस्तु सर्वाणि शाकानि कन्दानि विविधानि च ॥ ३ ॥ तीरे तस्य प्रयच्छेत स प्राप्नोति परां गतिम् ॥ पौषे प्रतिपदि सिते अष्टम्यां वा समाहितः ॥ ४ ॥ एकेनैवोपवासेन अश्वमेधफलं लभेत् ॥ आश्विन्यां पौर्णमास्यां च शुचिः पश्यति मानवः ॥ ५ ॥ पट्टबंधं महेशस्य स विपाप्मा दिवं व्रजेत् ॥ चैत्रे मासि सिते पक्षे पञ्चम्यां समुपोषितः ॥ ६ ॥ कर्पूरं कुंकुमं चैव मृगनाभि सचन्दनम् ॥ निवेदयंति देवाय नैवेद्यं घृतपायसम् ॥ ७ ॥ स्वरूपं चैव विप्रेन्द्र सभार्यं भोजयेद्द्विजम् ॥ रुद्रलोकमवाप्नोति यावदिंद्राश्चतुर्दश ॥ ८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये कुटुम्बिकेश्वरमाहात्म्यवर्णनंनाम दशमोऽध्यायः ॥ १० ॥ ॥ छ ॥ ॥ अथातः संप्रवक्ष्यामि तीर्थं विद्याधरस्य तु ॥ तत्र स्नात्वा शुचिर्भूत्वा विद्याधरपतिर्भवेत् ॥ १ ॥ ॥ व्यास उवाच ॥ ॥ कथं तीर्थमिदं क्षेत्रे जातमत्र महामुने ॥ प्रसादाद्ब्रूहि मे ब्रह्मञ्छ्रोतुमिच्छामि सांप्रतम् ॥ २ ॥ ॥ सनत्कुमार उवाच ॥ ॥ विद्याधरपतिः कश्चिदासीद्रूपधरः पुरा ॥ ग्रथिता पारिजातस्य माला तेन मनोरमा ॥ ३ ॥ गृहीत्वा च स तां मालां गतो वासववेश्मनि ॥ नृत्यंती वासवस्याग्रे दृष्टा तेन च मेनका ॥ ४ ॥ दत्ता तस्यै तदा तेन सा माला नृत्यमाश्रितः ॥ सा मेनका स्तुताऽस्थाने मालया मोहिता भवत् ॥ ५ ॥ कोपाविष्टेन शक्रेण शप्तो विद्याधरस्तदा ॥ पृथिव्यां गच्छ पापिष्ठ नृत्यभंगस्त्वया कृतः ॥ ६ ॥ विद्याधरपदं त्यक्त्वा मम शापाच्च सांप्रतम् ॥ एवमुक्तस्तु शक्रेण [1]वाक्यं विद्याधरोऽब्रवीत् ॥ ७ ॥ अजानता मया नाथ अपराधः कृतोऽधुना ॥ अनुग्रहमतो देव कुरु मे त्वं प्रसादतः ॥ ८ ॥ एवमुक्तः स शक्रो वै विद्याधरमुवाच ह ॥ गच्छावंतीं त्वमद्यैव यत्रास्ते गांगटी गुहा ॥९॥ तस्याश्चोत्तरभागे तु विद्यते तीर्थमुत्तमम् ॥ ख्यातं तत्त्रिषु लोकेषु नाम्ना विद्याधरं शुभम् ॥ १० ॥ भक्त्या तत्र कृते स्नाने विद्याधरपतिर्भवेत् ॥ अतस्त्वमपि तत्रैव कुरु स्नानं प्रयत्नतः ॥११॥ एवमुक्तः स शक्रेण आगतोऽवंतिमंडले ॥ स्नानं कृत्वा च तेनैव तीर्थे तस्मिन्मनोरमे ॥ १२ ॥ प्रभावात्तस्य तीर्थस्य पुनः प्राप्तं पदं स्वकम् ॥ एवं व्यास समाख्यातं तीर्थं विद्याधरं शुभम् ॥१३॥ तत्र पुष्पाणि यो दद्याच्चंदनं च विलेपनम् ॥ लभेत्समस्तभोगान्स इह लोके परत्र च ॥१४॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडेऽवन्तीक्षेत्रमाहात्म्ये विद्याधरतीर्थमाहात्म्यवर्णनंनामैकादशोऽध्यायः ॥११॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ उत्तरे तु प्रवक्ष्यामि [3]मर्कटेश्वरमुत्तमम् ॥ तत्र तीर्थं च विख्यातं सर्वकामप्रदायकम् ॥ १ ॥ तस्मिंस्तीर्थे

---

१ वायुन्धरोऽब्रवीत्—इ० पा० । २ विद्याधरपतिर्भवेत्--इ०पा० । ३ कर्कटेश्वरम्--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





नरः स्नात्वा गोशतस्य फलं लभेत् ॥ विस्फोटानां प्रशांत्यर्थं बालानां चैव कारणे ॥२ ॥ मापेन मापितान्कृत्वा मसूरांस्तत्र कुट्टयेत् ॥ शीतलायाः प्रभावेन बालाः संतु निरामयाः ॥ ३ ॥ ये पश्यंति नरा भक्त्या शीतलां दुरितापहाम् ॥ न तेषां दुष्कृतं किंचिन्न दारिद्र्यं द्विजोत्तम ॥ ४ ॥ न च रोगभयं तेषां ग्रहपीडा तथैव च ॥५॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये शीतलामाहात्म्यवर्णनंनाम द्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ स्वर्गद्वारे नरः स्नात्वा दृष्ट्वा देवं च भैरवम् ॥ श्राद्धं तत्रैव कुर्वीत पितॄनुद्दिश्य भक्तितः ॥ १ ॥ पितॄंश्च स नरो व्यास तारयेदात्मना सह ॥ स्वर्गद्वारेण योऽभ्येति रुद्रस्य परमं पदम् ॥ २ ॥ भैरवस्याग्रतो देवी पूर्वे तिष्ठति चांबिका ॥ तां तु दृष्ट्वा नरः स्त्री वा मुच्यते सर्वपातकैः ॥ ३ ॥ महानवम्यां पुरुषः कृत्वा बस्तमयं बलिम् ॥ महिषं वा सुरां मांसं मालां बिल्वमयीं शुभाम् ॥ भक्त्या निवेद्य देव्यै तु सर्वां सिद्धिमवाप्नुयात् ॥ ४ ॥ तत्र स्नात्वा नरो भक्त्या पूजां कृत्वा महेश्वरे ॥ स्वर्गद्वारेण सोऽभ्येति रुद्रस्य भवनं द्विज ॥ ५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये स्वर्गद्वारमाहात्म्यवर्णनंनाम त्रयोदशोध्यायः ॥ १३ ॥ ॥छ॥ ॥ सनत्कुमार उवाच ॥ ॥ स्नात्वा चतुःसमुद्रे तु पश्येद्राजस्थलं शिवम् ॥ यस्य दर्शनमात्रेण पुत्रवाञ्जायते नरः ॥ १ ॥ समुद्राः संति चत्वारः क्षारक्षीरदधीक्षवः ॥ समीपे तस्य देवस्य सुद्युम्नेन प्रतिष्ठिताः ॥ २ ॥ ॥ व्यास उवाच ॥ ॥ राजस्थलसमीपे तु समुद्राः केन हेतुना ॥ कथय त्वं मुनिश्रेष्ठ सुद्युम्नेन प्रतिष्ठिताः ॥ ३ ॥ लक्षयोजनपर्यंतं जंबुद्वीपं सुशोभनम् ॥ मर्यादायां स्थापितोऽयं समुद्रः क्षारसंज्ञितः ॥४॥ शाकद्वीपे द्विलक्षे तु क्षीराब्धिः संप्रतिष्ठितः ॥ दध्यब्धिस्तु कुशद्वीपे चतुर्लक्षः प्रतिष्ठितः ॥ शाल्मले त्विक्षुजलधिर्ह्यष्टलक्षः प्रतिष्ठितः ॥ ५ ॥ चत्वारस्ते समाख्याताः समुद्रा भूमिमंडले ॥ राजस्थलसमीपे तु कथमेकत्र संगताः ॥ ६ ॥ ॥ सनत्कुमार उवाच ॥ ॥ सुद्युम्नो नाम राजासीत्पुरा कल्पे सुधार्मिकः ॥ तस्य पत्नी वरारोहा नाम्ना ख्याता सुदर्शना ॥ ७ ॥ मुनिं दाल्भ्यं च सा दृष्ट्वा पप्रच्छ सुतकाम्यया ॥ भगवन्केन दानेन स्नानेन विधिनाऽथवा ॥ ८ ॥ सर्वलक्षणसंपूर्णः पुत्रो लभ्यो मया कथम् ॥ एतदाख्याहि विप्रर्षे याथातथ्यं सविस्तरम् ॥ ॥ ९ ॥ ॥ दाल्भ्य उवाच ॥ ॥ विहितास्ते पुरा पुत्र्यब्धयः पुत्रेप्सयोत्तमाः ॥ स्वयंभुवेन देवेन ब्रह्मणा लोककारिणा ॥ १० ॥ तेषु राज्ञा कृते स्नाने तव पुत्रो भविष्यति ॥ शंकराराधने पुत्रि तस्मात्प्रेरय वल्लभम् ॥ ११ ॥ दाल्भ्यस्यैव तु वाक्येन विचित्राख्यानकेन च ॥ प्रस्थापयामास पतिं शंकराराधने द्रुतम् ॥ १२ ॥ स गत्वा तोषयामास शंकरं गंधमादने ॥ संतुष्टः शंकरः प्राह शशिसूर्याग्निलोचनः ॥१३॥ अवंतीं गच्छ राजेंद्र पुत्रं



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राप्स्यसि शोभनम् ॥ मच्छासनाज्जलधयो गमिष्यंति कुशस्थलीम् ॥ १४ ॥ मेरुरूपे स्थले राजन्समीपे शंकरस्य च ॥ द्रक्ष्यसि त्वं नरश्रेष्ठ जलधींस्तत्र संगतान् ॥ अभ्यर्थितास्त्वया तत्र स्थास्यंति कलया सदा ॥ १५ ॥ एवमुक्त्वा महादेवो जगामादर्शनं विभुः ॥ सुद्युम्नो भार्यया सार्धमाजगाम कुशस्थलीम् ॥ १६ ॥ आगतस्तु कुशस्थल्यां समुद्रांश्च ददर्श ह ॥ तांस्तु दृष्ट्वा नमश्चक्रे राजस्थलसमीपतः ॥ १७ ॥ ते वै दृष्ट्वा च सुद्युम्नं प्रणतं भक्तवत्सलम् ॥ प्रोचुर्वारिधयः सर्वे वरं वरय सुव्रत ॥१८॥ स वव्रे मनसा पुत्रं सर्वलक्षणसंयुतम् ॥ उवाच च पुना राजा यावत्तिष्ठति मेदिनी ॥ तावदत्रैव स्थातव्यं राजस्थलसमीपतः ॥ १९ ॥ ॥ समुद्रा ऊचुः ॥ ॥ तावत्स्थास्यामहेऽत्रैव यावत्कल्पावसानकम् ॥ २० ॥ भविष्यति च ते पुत्रः सर्वलक्षणसंयुतः ॥ अत्र ते स्नानमात्रेण तस्मात्स्नानं समाचर ॥ २१ ॥ स्थले चात्र शुभे राजन्स्थास्यामः कलया सह ॥ एवं व्यास समुद्रास्तु सुद्युम्नेनावतारिताः ॥ २२ ॥ कुरुते तेषु यो यात्रां तस्य पुण्यफलं शृणु ॥ स्नानं कृत्वा महापुण्ये समुद्रे क्षारसंज्ञके ॥ ॥ २३ ॥ कुर्याच्छ्राद्धं ततो व्यास पितॄणां भक्तितत्परः ॥ पूजयेच्च महादेवं स्थलस्थं पार्वतीपतिम् ॥ २४ ॥ मंडकांश्च ततो दद्याद्ब्राह्मणे वेदपारगे ॥ पात्रं ताम्रमयं कार्यं लवणेन प्रपूरितम् ॥ २५ ॥ सहिरण्यं च दातव्यं ब्राह्मणे वेदपारगे ॥ सप्तधान्यसमायुक्तं वेणुजं वस्त्रवेष्टितम् ॥ २६ ॥ सदक्षिणं फलैर्युक्तमर्घ्यं दद्यात्प्रयत्नतः ॥ क्षीराब्धिं च ततो गत्वा स्नानं कुर्याच्च पूर्ववत् ॥ २७ ॥ क्षीरं तत्र प्रदातव्यं ताम्रपात्रेण पूरितम् ॥ दध्यब्धौ च तथा कृत्वा दद्याद्दध्योदनं शुभम् ॥ २८ ॥ इक्ष्वब्धौ च तथा कृत्वा दद्याद्विप्रे गुडं शुभम् ॥ यात्रां कृत्वा तु वै व्यास गां च दद्यात्पयस्विनीम् ॥ २९ ॥ एवं यः कुरुते यात्रां राजस्थलसमीपतः ॥ भव्यां हि लभते लक्ष्मीं पुत्रांश्चापि मनोरमान् ॥ ३० ॥ मृते स्वर्गमवाप्नोति यावदिंद्राश्चतुर्दश ॥ तावत्स्वर्गफलं भुक्त्वा पश्चान्मोक्षं प्रयास्यति ॥ ३१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये राजस्थलेश्वरसमीपे चतुःसमुद्रमाहात्म्यवर्णनंनाम चतुर्दशोऽध्यायः ॥ १४ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु व्यास महातीर्थं नाम्ना शंकरवापिका ॥ क्रीडमानेन देवेन निर्मितं तीर्थमुत्तमम् ॥ १ ॥ प्रक्षितं देवदेवेन कपालक्षालनं जलम् ॥ वापीगतं कृतं यस्मादतः शंकरवापिका ॥ २ ॥ अर्काष्टम्यां नरः स्नात्वा दिशासु विदिशासु च ॥ पूर्वादिक्रमतो यावद्वापीमध्ये तथैव च ॥ ३ ॥ हविष्यान्नयुतान्व्यास दद्याच्च करकान्नवान् ॥ शाकमूलांश्च विप्रेभ्यस्तस्य पुण्यफलं शृणु ॥ ४ ॥ परत्र चेह ये लोकाः सर्वभावसमन्विताः ॥ तत्रतत्र समायाति भुनक्त्यैश्वर्यमुत्तमम् ॥ ॥ ५ ॥ ये नराः कीर्तयिष्यंति माहात्म्यमतिभाविकाः ॥ रुद्रलोकेऽपि ते पूज्यास्तेभ्योऽपि सततं नमः ॥ ६ ॥ ॥ सनत्कुमार उवाच ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ततो[1] वै देवदेवेशः पिनाकी वृषभध्वजः ॥ तुष्टाव प्रयतो भूत्वा देवदेवं दिवाकरम् ॥ ७ ॥ आजगाम दिवानाथः संतुष्टः प्राह शंकरम् ॥ ८ ॥
॥ ॥ सूर्य उवाच ॥ ॥ वरं वरय भूतेश वरदोऽस्मि ददामि ते ॥ तमाह वरदश्चेत्त्वं याच्यमानं कुरुष्व मे ॥ ९ ॥ अंशेन स्थीयतामत्र हितार्थं
सर्वदेहिनाम् ॥ अवतीर्णो रविस्तत्र श्रुत्वा माहेश्वरं वचः ॥ १० ॥ ततो देवाधिदेवस्य शंकरस्य महौजसः ॥ वाक्येन भास्करस्तत्र ययौ ख्यातिं
महाद्युतिः ॥ ११ ॥ शंकरादित्यनामेति लोकानुग्रहकारकः[2] ॥ देवा दैत्याश्च गंधर्वा विस्मिताः सह किन्नरैः ॥ १२ ॥ अहो धन्यमिदं स्थानं
यत्रास्ते त्रिपुरांतकः ॥ भास्करोऽपि च तत्रस्थस्तीर्थमध्ये च वर्तते ॥ १३ ॥ ततस्तुष्टाश्च ते सर्वे ब्रह्माद्याः सुरसत्तमाः ॥ देवेशं पूजयामासुरादित्यं
शंकरं तथा ॥१४॥ मूर्तिमंतश्च ते देवा अवतीर्य च शोभनम् ॥ स्थापयित्वाऽब्रवीद्वाक्यं येऽत्र स्नास्यंति मानवाः ॥१५॥ न दुःखं जायते तेषां जरामरण
शोकजम् ॥ सर्वयज्ञेषु यत्पुण्यं सर्वदानेषु यत्फलम् ॥ तस्माच्चैवाधिकं ह्यत्र शंकरादित्यदर्शनात् ॥१६॥ व्याधयो नाधयश्चैव दारिद्र्यं न कदाचन ॥
ऐश्वर्यं चातुलं तेषां जायते भुवि सर्वदा ॥१७॥ न रोगो न च दारिद्र्यं वियोगो न च बन्धुभिः ॥ जायते मुनिशार्दूल शंकरादित्यदर्शनात् ॥१८॥
इत्येवं देवदेवेन पुरा वै शूलपाणिना ॥ शंकरादित्यनाम्ना च स्थापितं परमं पदम् ॥ १९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां
पंचम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये शंकरादित्यमाहात्म्यवर्णनंनाम पञ्चदशोऽध्यायः ॥ १५ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ अथान्यत्सं
प्रवक्ष्यामि तीर्थानां तीर्थमुत्तमम् ॥ स्थापितं परमं तीर्थं स्वनाम्ना मुनिसत्तम ॥ १ ॥ एकदा समये व्यास कपालक्षालनाय वै ॥ शीर्षोदकं गृहीत्वा
तु कपालेन महेश्वरः ॥ २ ॥ प्रक्षाल्य चाक्षिपद्भूमौ तत्र तीर्थमनुत्तमम् ॥ नाम्ना गन्धवती पुण्या नदी त्रैलोक्यविश्रुता ॥३॥ ब्रह्मणो रुधिरेणाशु परि
पूर्णाभवत्क्षणात् ॥ तस्यां स्नानं सदा शस्तं स्वयं देवेन भाषितम् ॥ ४ ॥ श्राद्धं च तर्पणं कृत्वा तत्सर्वं चाक्षयं भवेत् ॥ वायुभूतास्तु पितरस्तस्यास्ती
रे तु दक्षिणे ॥ ५ ॥ तिष्ठंति मुनिशार्दूल चिंतयंति स्वगोत्रजम् ॥ आगमिष्यति पुत्रोऽद्य नप्ता वा संतताविह ॥ ६ ॥ संयावं,पायसं वापि श्यामाकं
सनिवारकम् ॥ सक्तुक्षौद्रतिलैर्युक्तं पिण्डं दास्यति वै कदा ॥ ७ ॥ तेन पिंडप्रदानेन तृप्तिर्भवति चाक्षया ॥ यस्तु स्नात्वा च वै पिंडं दद्याद्वै चंद्र
पर्वणि ॥ ८ ॥ पितरौ द्वादशाब्दानि तृप्तिं यास्यंति तस्य वै ॥ येऽत्रागत्य सुविद्वांसो मानवा वा तथा द्विजाः ॥ ९ ॥ पितॄन्संतर्पयिष्यंति स्वर्गस्ते

१ 'ततः' इत्यनेन–शंकरेण शंकरवापिकातीर्थनिर्माणानन्तरम्–आदित्यप्रार्थनां कृत्वा शंकरादित्यस्थापनं कृतमिति–शंकरवापिका–शङ्करादित्यवृत्तान्तप्रसङ्गोऽयं प्रचलति–तत्र–'अर्काष्टम्याम्' इत्यनेन–शंकरवापिकास्नानविधिफलवर्णनं तत्प्रसंगेन कृतम्–ततः परं शंकरादित्यवृत्तान्तप्रसंगस्यारंभोऽत एव–पुनः 'सनत्कुमार उवाच' इति प्रसंगान्तरारम्भे उक्तिः । २ लोकानां शान्तिकारकः–इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षां सदाऽक्षयः ॥ तत्र यद्दीयते दानं त्रुटिमात्रं तु कांचनम् ॥ १० ॥ अक्षयं तस्य तत्प्रोक्तं ब्रह्मणा वै स्वयंभुवा ॥ गंगाद्वारे प्रयागे च कुरुक्षेत्रेऽथ
पुष्करे ॥ ११ ॥ वाराणस्यां गयायां च सा न तृप्तिर्भविष्यति ॥ तुष्टाश्च पितरो नृणां दास्यंति कांक्षितान्वरान् ॥ १२ ॥ यो यमुद्दिश्य वै काममिह
श्राद्धं करिष्यति ॥ तस्य तज्जायते सर्वं मृतस्य परमा गतिः ॥ १३ ॥ नवमी अष्टमी चैव अमावास्याथ पूर्णिमा ॥ सर्वाण्येतानि वै व्यास रवेः
संक्रम एव च ॥ १४ ॥ ब्रह्मेंद्ररुद्रदेवांश्च सूर्याग्निब्रह्मदैवतान् ॥ विश्वेदेवान्सगन्धर्वान्यक्षांश्च मनुजान्पशून् ॥ १५ ॥ सरीसृपान्पितृगणान्यच्चान्यद्भुवि
संस्थितम् ॥ श्राद्धं वै श्रद्धया कुर्वन्प्रीणयत्यखिलं जगत् ॥ १६ ॥ मासिमास्यसिते पक्षे पंचदश्यां द्विजोत्तम ॥ इन्दुक्षये यदा मैत्रं विशाखां चैव
रोहिणीम् ॥ १७ ॥ श्राद्धे पितृगणास्तृप्तिं प्रयांति पितरोऽर्जिताम् ॥ वासवाजैकपादर्क्षे पितॄणां तृप्तिमिच्छता ॥ १८ ॥ भक्त्या श्राद्धं प्रकर्तव्यं पित
रस्तेन तर्पिताः ॥ अपि धन्याः कुले जाता अस्माकं [1]मतिशालिनः ॥ १९ ॥ ये कुर्वंति च वै श्राद्धं पिंडान्ये निर्वपंति च ॥ तेन पिंडप्रदानेन
तृप्तिर्नो भविताऽक्षया ॥ २० ॥ इहैत्य वै पुण्यजलेषु सम्यक्स्नात्वा नरस्तांस्तु लभेत कामान् ॥ यान्प्राप्य च प्रेतगणैः समेतः स मोदते देववृ
तोऽथ सिद्धः ॥ २१ ॥ चित्तं च वित्तं च नृणां च शुद्धं शस्तश्च कालः कथितो विधिश्च ॥ पात्रं यथोक्तं परमा च भक्तिर्नृणां प्रयच्छंति हि वांछि
तानि ॥ २२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये नीलगन्धवतीप्रभाववर्णनंनाम
षोडशोऽध्यायः ॥ १६ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ दशाश्वमेधिके स्नात्वा दृष्ट्वा देवं महेश्वरम् ॥ दशानामश्वमेधानां फलं प्राप्नोति मान
वः ॥ १ ॥ मनुना मानवेन्द्रेण राज्ञा चैव ययातिना ॥ रघुणोशनसा चैव लोमशेन महर्षिणा ॥ २ ॥ अत्रिणा भृगुणा व्यास दत्तात्रेयेण धीमता ॥
पुरूरवसा पुण्येन नहुषेण नलेन च ॥ ३ ॥ अत्र स्नानेन संप्राप्तं दशाश्वमेधिकं फलम् ॥ संप्राप्ते द्वापरस्यांते राज्ञा बाष्कलिना तथा ॥ ४ ॥ दशा
नामश्वमेधानां फलं प्राप्तं द्विजोत्तम ॥ कृष्णवर्णं तथा लिंगं पूजितं भक्तितः सदा ॥ ५ ॥ दृष्ट्वा स्पृष्ट्वा च तं देवं प्रागुक्तं लभते फलम् ॥ चैत्रे मासि
सिताष्टम्यां देवं संपूज्य भक्तितः ॥ ६ ॥ अश्वं दद्याच्च विप्राय सुरूपं च गुणान्वितम् ॥ यावंति तस्य रोमाणि गण्यंते संख्यया द्विज ॥ ७ ॥ ताव
द्वर्षसहस्राणि [2]शिवलोके महीयते ॥ शिवलोकात्परिभ्रष्टः सार्वभौमो भवेद्भुवि ॥ ८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम
आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये दशाश्वमेधमाहात्म्यवर्णनंनाम सप्तदशोऽध्यायः ॥ १७ ॥छ॥ ॥ सनत्कुमार उवाच ॥ ॥ एकानंशां नमस्कृत्य

१ प्रतिमाश्च ये–इ० पा० । २ स्वर्गलोके–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



देवीं त्रैलोक्यविश्रुताम् ॥ पूजां कृत्वा विधानेन सर्वसिद्धिफलं लभेत् ॥ १ ॥ अणिमादिगुणान्सर्वान्गुटिकासिद्धिमंजनम् ॥ खड्गं च
पादुके चैव बिलवासं रसायनम् ॥ सर्वं तुष्टा प्रयच्छेत नात्र कार्या विचारणा ॥ २ ॥ सुरामांसोपहारैश्च भक्ष्यभोज्यैश्च पूजिता ॥ सर्वा
न्कामान्नृणां देवी तुष्टा दद्याच्च सर्वदा ॥ ३ ॥ महानवम्यां यो देवीं महिषेण प्रपूजयेत् ॥ मेषेण वा यथालाभं सर्वान्कामानवाप्नुया
त् ॥ ४ ॥ ॥ व्यास उवाच ॥ ॥ कथं देवी समुत्पन्ना एकानंशेति विश्रुता ॥ तत्सर्वं श्रोतुमिच्छामि सर्वपापप्रणाशिनी[1] ॥ ५ ॥
॥ ॥ सनत्कुमार उवाच ॥ ॥ पुरा कृतयुगस्यादौ ब्रह्मा लोकपितामहः ॥ निशां सस्मार भगवान्स्वां तनूं पूर्वसंभवाम् ॥ ६ ॥ ततो भगवती
रात्रिरुपतस्थे पितामहम् ॥ तां विविक्ते समालोक्य ब्रह्मोवाच विभावरीम् ॥ ७ ॥ ॥ ब्रह्मोवाच ॥ ॥ विभावरि महामाये विबुधानामुपस्थितम् ॥
यत्कर्तव्यं त्वया देवि शृणु चार्थस्य निश्चयम् ॥ ८ ॥ तारकोनाम दैत्येंद्रः सुरशत्रुरनिर्जितः ॥ तस्य भयेन वै देवास्त्रस्ताः सर्वे दिवौकसः ॥ ९ ॥
तस्माद्भद्रे महेशो वै जनयिष्यति चेद्वरम् ॥ सुतं स भविता तस्य तारकस्यांतकः किल ॥ १० ॥ शंकरस्याभवत्पत्नी सती दक्षसुता तु या ॥ सा
पितुः कुपिता भद्रे कस्मिंश्चित्कारणांतरे ॥ ११ ॥ भवित्री हिमशैलस्य दुहिता लोकपावनी[2] ॥ विरहेण हरस्तस्या मत्वा शून्यं जगत्त्रयम् ॥ १२ ॥
अतपद्धिमशैलस्य कंदरे सिद्धसेविते ॥ प्रतीक्षमाणस्तज्जन्म किंचित्कालं वसिष्यति[3] ॥ १३ ॥ तस्मात्सुतप्ततपसोर्भविता यो महाप्रभुः ॥
स भविष्यति दैत्यस्य तारकस्य निवारकः ॥ १४ ॥ जातमात्रा तु सा देवी स्वल्पसंज्ञैव भामिनी ॥ विरहोत्कंठिता गाढं हरसंगमलालसा
॥ १५ ॥ तयोः सुतप्ततपसोः संयोगः स्यात्सुयुक्तयोः[4] ॥ पार्वतीहरयोस्तस्मात्सुरतं शक्तिकारणम् ॥ १६ ॥ भवेत्तत्र सुराणां च कार्यार्थे विघ्नमाचर ॥
विघ्नं त्वया विधातव्यं यथा ताभ्यां तथा शृणु ॥ १७ ॥ गर्भस्थानेऽथ तां मातः[5] स्वेन रूपेण रंजय ॥ ततो रहसि शर्वस्तां बिभ्रदानंदपूर्वकम् ॥१८॥
हासयिष्यति[6] कालीति ततः सा कुपिता सती ॥ प्रयास्यति तपः कर्तुं ततः सा तपसा युता ॥ १९ ॥ जनयिष्यति यं शर्वादिंदुवज्ज्योतिमंड
लम् ॥ स भविष्यति हंता वै सुरारीणां न संशयः ॥ २० ॥ त्वयापि दानवा देवि हंतव्या लोकदुर्जयाः ॥ यावच्च न सती देहे संक्रांतगुणसंचया
॥ २१ ॥ तत्संगमेन तावत्त्वं दैत्यान्हंतुं भविष्यसि ॥ एवं कृते त्वया देवि तपः काली करिष्यति ॥ २२ ॥ समाप्तनियमा सा च यदा गौरी
भविष्यति ॥ तदा तवापि सारूप्यं शैलजा संप्रदास्यति ॥ २३ ॥ ततस्तवापि सहजा सैकानंशा भविष्यति ॥ रूपांशेन च संयुक्ता त्वमुमाख्या



१ सर्वपापप्रणाशिनी—देव्या विशेषणमिदम्। २ लोकभाविनी--इ० पा०। ३ भविष्यति--इ० पा०। ४ सुगुप्तयोः--इ० पा०। ५ देवीम्—इ० पा०। ६ भर्त्सयिष्यति—इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भविष्यसि ॥ २४ ॥ एकानंशेति लोकस्त्वां वरदे पूजयिष्यति ॥ भेदैर्बहुविधाकारैः सर्वगां कामसाधनीम् ॥ २५ ॥ ॐकारवक्त्रा गायत्री त्वमेव ब्रह्मवादिनी ॥ आक्रांतरुचिराकारा राज्ञां चाहवशालिनी ॥२६॥ विशां त्वं कमलादेवी शूद्राणां जननी स्वयम् ॥ ज्ञानिनां ज्ञेयरूपा त्वं त्वं गतिः सर्वदेहिनाम् ॥ २७ ॥ त्वं च कीर्तिमतां कीर्तिस्त्वं भूतिः सर्वदेहिनाम् ॥ रतिदा रक्तचित्तानां प्रीतिस्त्वं स्नेहवर्तिनाम्॥ २८ ॥ त्वं कांतिः कृतभूषाणां त्वं शांतिर्दुष्टकर्मणाम् ॥ त्वं च भ्रांतिरबोधानां त्वं कीर्तिः क्रमयाजिनाम् ॥ २९ ॥ महावेला समुद्राणां विलासस्त्वं विलासिनाम् ॥ संभूतिस्त्वं पदार्थानां स्थितिस्त्वं लोकशालिनाम् ॥ ३० ॥ इत्यनेकविधैर्देवि रूपैर्लोकेषु चर्चिता ॥ ये त्वां पश्यंति वरदे पूजयिष्यंति चापि ये ॥ कामान्प्स्यंति ते सर्वे नियतं नात्र संशयः ॥ ३१ ॥ इत्येवं सा समुत्पन्ना ब्रह्मणा संस्तुता सती ॥ एकानंशा महादेवी ध्यातव्या सापि भक्तितः ॥३२॥

इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्य एकानंशामाहात्म्यवर्णनंनामाष्टादशोऽध्यायः ॥ १८ ॥ ॥ छ ॥

॥ सनत्कुमार उवाच ॥ ॥ अथातः संप्रवक्ष्यामि हरसिद्धिं सुसिद्धिदाम् ॥ पार्वत्या हरणे यत्र सिद्धिः प्राप्ता हरेण च ॥ १ ॥ बलिनौ दानवौ जातौ नाम्ना चण्डप्रचंडकौ ॥ उत्त्वाय त्रिदिवं सर्वं गिरिं कैलासमागतौ ॥ २ ॥ दृष्ट्वा तत्र गिरीशं तु उद्यताक्षाक्षहस्तकम् ॥ नागेशं शशिखट्वांगं गृहीत्वा दक्षिणे करे ॥ ३ ॥ देविदेवीति जल्पंतं दासस्तेऽस्मीतिवादिनम् ॥ यावदेकं तु फलकं तावद्द्यूतं प्रवर्तताम् ॥ ४ ॥ रागीभूते तदा देवे तौ प्राप्तौ देवकंटकौ ॥ उत्सादिताः शिवगणा नंदिना प्रतिषेधितौ ॥ ५ ॥ ततस्ताभ्यां तदा नंदी शूलाभ्यां प्रविदारितः ॥ समं सव्यदक्षिणं वै सुस्राव रुधिरं बहु ॥ ६ ॥ नंदिनं ताडितं दृष्ट्वा तदा शिलादनंदनम् ॥ ध्याता हरेण सा देवी प्रणता साऽग्रतः स्थिता ॥ ७ ॥ वध्यतां तौ महादैत्यौ वधामीति वचोऽब्रवीत् ॥ गृहीत्वा मुद्गरं घोरमतिक्रोधादताडयत् ॥ ८ ॥ यदा तया हतौ दृष्टौ दानवौ बलगर्वितौ ॥ हरस्तामाह हे चंडि संहृतौ दुष्टदानवौ ॥ ९ ॥ हरसिद्धिरतो लोके नाम्ना ख्यातिं गमिष्यसि ॥ ततः प्रभृति सा देवी हरसिद्धिप्रदायिनी ॥ हरसिद्धिरिति ख्याता महाकाले बभूव ह ॥ १० ॥ यः पश्येत्परया भक्त्या हरसिद्धिं नरोत्तमः ॥ सोऽक्षयाँल्लभते कामान्मृतः शिवपुरं व्रजेत् ॥ ११ ॥ आदिसिद्धिं महादेवीं नित्यां व्योमस्वरूपिणीम् ॥ हरसिद्धिं प्रपश्येद्यः सोऽभीष्टं लभते फलम् ॥ १२ ॥ यः स्मरेद्धर

१ मुनीनाम्—इ० पा० । २ मूर्तिः—इ० पा० । ३ उत्थाय त्रिपुरम्—इ० पा० । ४ उद्यताक्षाक्षहस्तकम्—उद्यतानि अक्षाणि अक्षाकाराणि चिह्नानि येषु ते च तेऽक्षाश्च—उद्यताक्षास्ते हस्ते यस्य तम्—उद्यताक्षाक्षहस्तकम् । ५ द्यूते पणीकरणार्थमेतेषां निजवित्तभूतानां नागेशशशिखट्वांगानामेव मे पण इति पार्वत्यै प्रत्यक्षदर्शनार्थं धारणं बोद्धव्यम् । ६ ताभ्याम्—इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सिद्धीति मंत्रं च चतुरक्षरम् ॥ न वैरिणो भयं तस्य दारिद्र्यं नैव जायते ॥ १३ ॥ नरो महानवम्यां यो हरसिद्धिं प्रपूजयेत् ॥ महिषं च बलिं दद्यात्स भवेद्भूपतिर्भुवि ॥ १४ ॥ नवम्यां पूजिता देवी हरसिद्धिर्हरप्रिया ॥ तुष्टा नृणां सदा व्यास ददात्यनवमं फलम् ॥ १५ ॥ सा पुण्या सा पवित्रा च सर्वत्र सुखदायिनी ॥ स्मृता संपूजिता दृष्टा धनपुत्रसुखप्रदा ॥ १६ ॥ महानवम्यां ये व्यास हन्यंते महिषादयः ॥ सर्वे ते स्वर्गतिं यांति घ्नतां पापं न विद्यते ॥ १७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडेऽवन्तीक्षेत्रमाहात्म्ये हरसिद्धिमाहात्म्यवर्णनंनामैकोनविंशोऽध्यायः ॥ १९ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ मासमेकं नरो भक्त्या पश्येद्वा वटयक्षिणीम् ॥ पूजयेत्स्वर्णपुष्पैश्च तस्य सिद्धिर्न हीयते ॥ १ ॥ इति वटयक्षिणीमाहात्म्यम् ॥ पिशाचके नरः स्नात्वा चतुर्दश्यां विशेषतः ॥ तिलान्ददाति यो भक्त्या न पिशाचः प्रजायते ॥ २ ॥ यं समुद्दिश्य यद्दत्तं तदक्षयतरं भवेत् ॥ तत्कुलं हि पिशाचत्वान्मुच्यते नात्र संशयः ॥ ३ ॥ यस्य नाम्ना नरः स्नाति पिशाचत्वात्स मुच्यते ॥ कुंभान्वा करकान्वापि योऽत्र दद्यात्समंडकान् ॥ ४ ॥ तस्य वै शाश्वती मुक्तिः कुले प्रेतो न जायते ॥ शिप्रागुंफेश्वरं[2] दृष्ट्वा रुद्रभक्तो जितेंद्रियः ॥ ५ ॥ मुच्यते सर्वपापेभ्यः कंचुकेन फणी यथा ॥ स्नात्वागस्त्येश्वरं पश्येद्योऽतिभक्त्या च मानवः ॥ ६ ॥ त्यक्त्वा यमगृहं व्यास रुद्रलोकं स गच्छति ॥ शिप्रायां यो नरः स्नात्वा पश्येड्ढुंढेश्वरं शिवम् ॥ ७ ॥ सोऽश्वमेधफलं व्यास लभते नात्र संशयः ॥ देवेनात्र पुरा व्यास वादितो डमरुर्यतः ॥ ८ ॥ देवस्तेन समाख्यातो नाम्ना डमरुकेश्वरः ॥ भक्त्या पश्येन्नरो यस्तु देवं डमरुकेश्वरम् ॥ ९ ॥ नैव व्याधिभयं तस्य मृतः शिवपुरं व्रजेत् ॥ अनादिकल्पेश्वरं यस्तु भक्त्या पश्यति मानवः ॥ १० ॥ राज्यं स लभते स्वर्गं यथा देवः पुरंदरः ॥ देवानामप्यसौ व्यास स्पर्धनीयः सदा भवेत् ॥ ११ ॥ कल्पकोटिशतं साग्रं भोगयुक्तस्तु मोदते ॥ पश्येत्सिद्धेश्वरं यस्तु वीरभद्रं च चंडिकाम् ॥ ॥ १२ ॥ सोत्रैव लभते सिद्धिं जयं सर्वत्र मानवः ॥ स्वर्णजालेश्वरं दृष्ट्वा स्नातस्तीर्थे त्रिविष्टपे ॥ १३ ॥ स्वर्णेन पूजयेद्देवं सर्वपापैः प्रमुच्यते ॥ स्नात्वा पश्येन्नरो भक्त्या यः कर्कोटेश्वरं शिवम् ॥ १४ ॥ सर्पतो न भयं तस्य दारिद्र्यं नैव जायते ॥ यः पश्येत्परया भक्त्या महामायां सनातनीम् ॥ ॥ १५ ॥ विष्णुमायाविनिर्मुक्तः स याति परमं पदम् ॥ अर्चयेत्परया भक्त्या यः कपालेश्वरं नरः ॥ १६ ॥ स मुच्येत महापापैर्यद्यपि ब्रह्महा



१ वाममार्गिणामयमाचारः प्रक्षिप्तः प्रतिभाति—शुद्धवैदिकमार्गानुयायिनां तु नायमाचारः—श्रुतौ जीवहिंसाया निषिद्धत्वात् । घृतपायसादिबलिस्तु प्रशस्तः । २ शिप्रागुहेश्वरम्--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवेत् ॥ स्वर्गद्वारे नरः स्नात्वा दृष्ट्वा देवं च भैरवम् ॥ १७ ॥ दर्शनात्तस्य देवस्य शतयज्ञफलं भवेत् ॥ १८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये चतुर्दशतीर्थयात्रावर्णनंनाम विंशोऽध्यायः ॥ २० ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ अथान्यत्संप्रवक्ष्यामि देवं त्रिदशपूजितम् ॥ हनुमत्केश्वरंनाम भुक्तिमुक्तिफलप्रदम् ॥ १ ॥ शैवे[1] सरसि यः स्नात्वा पश्येद्धनुमत्केश्वरम् ॥ कल्पकोटिसहस्राणि वायुलोके स मोदते ॥ २ ॥ ॥ व्यास उवाच ॥ ॥ हनुमत्केश्वरो यस्तु ह्युक्तः पूर्वं त्वयाऽनघ ॥ कथां कथय ह्येतस्य वृत्तपूर्वां सनातनीम् ॥ ३ ॥ ॥ सनत्कुमार उवाच ॥ ॥ त्रैलोक्यकण्टकः पूर्वं रावणोनाम राक्षसः ॥ विष्णुना रामरूपेण लंकायां विनिपातितः ॥ ४ ॥ घातयित्वा तु तं दुष्टं सीतामादाय जानकीम् ॥ वानरैः सह ऋक्षैश्च नगरीं स्वामुपागतः ॥ ५ ॥ तत्र राज्यमनुप्राप्य ऋषिभिः परिवारितः ॥ कथावसाने रामेण ह्यगस्त्यो मुनिसत्तमः ॥ ६ ॥ पप्रच्छ च द्वयोर्वीर्यं शंभुवातजयोस्तदा ॥ तदा दाशरथिं प्राह अगस्तिर्मुनिसत्तमः ॥ ७ ॥ अनौपम्यो यथा देवो युद्धे शौर्ये महेश्वरः ॥ ज्ञेयो वायुसुतस्तद्वत्सत्यमेतद्ब्रवीमि ते ॥ ८ ॥ एतच्छ्रुत्वाथ हनुमान्यद्धरेणोपमा मम ॥ कृता मुनिवरेणेह प्रत्यक्षं राघवस्य ह ॥ ९ ॥ गमिष्ये नगरीं लंकां लिंगमेकं प्रयाचितुम् ॥ राक्षसेन्द्रं महाभागं विभीषणमकल्मषम् ॥ १० ॥ ततो गतः स लंकायां विभीषणमुवाच ह ॥ देहि मे त्वं महाभाग लिंगमेकं च शोभनम् ॥ ११ ॥ उक्तं च राक्षसेन्द्रेण गृहाणैतद्यथारुचि ॥ एतानि षट् च लिंगानि रावणस्थापितानि वै ॥ १२ ॥ त्रैलोक्यविजयात्पूर्वं मम भ्रात्रा महात्मना ॥ एतेषु यदभीष्टं ते लिंगं कथय सुव्रत ॥ तत्प्रयच्छामि तेऽद्यैव सत्यमेतत्प्लवंगम ॥ १३ ॥ ततो जग्राह हनुमाँल्लिंगं मौक्तिकसंनिभम् ॥ यदेतद्दृश्यते वीर तत्प्रयच्छ ममानघ ॥ ॥ १४ ॥ श्रुत्वा हनुमतो वाक्यमथोवाच विभीषणः ॥ दत्तमेतन्महावीर लिंगं यद्धृतवानसि[2] ॥ १५ ॥ श्रूयते हि पुरावृत्तं लिंगमेतद्धनेश्वरः ॥ रुद्रभक्त्या समायुक्तस्त्रिकालमप्यपूजयत् ॥ १६ ॥ रावणेन यदा बद्धस्तदानीं हि धनेश्वरः ॥ लिंगस्यास्य प्रभावेन विमुक्तः समपद्यत ॥ १७ ॥ प्रसादात्तस्य लिंगस्य धनेशो धनरक्षकः ॥ गृहीत्वा तन्महालिंगं स्वस्थो जातोऽथ वानरः ॥ १८ ॥ ॥ सनत्कुमार उवाच ॥ ॥ गृहीत्वा तु ततो लिंगं प्रस्थितो विमलेंऽबरे ॥ सप्तमे दिवसे चैव संप्राप्तोऽवंतिकां पुरीम् ॥ १९ ॥ तत्र रुद्रसरस्तीरे स्थाप्य स्नानमथाकरोत् ॥ महाकालस्य पूजार्थं गमनं प्रत्यचिंतयत् ॥ २० ॥ उद्धर्तुकामस्तल्लिंगमुद्धर्तुं न शशाक सः ॥ २१ ॥ ततो व्यवस्थितो देवः प्राह तं वायुनन्दनम् ॥ अस्मिन्क्षेत्रे

१ रुद्रसागरापरपर्याये रुद्रसरसि—इत्यर्थः । २ वृतवानसि—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



हनूमन्मां त्वन्नाम्नैव प्रतिष्ठापय ॥ २२ ॥ हनुमत्केश्वरं चाथ लोके ख्यातं भविष्यति ॥ शैलवच्चोन्नतं लिंगं स्थापितं वायुसूनुना ॥ २३ ॥ शनौ
पश्येन्नरो यस्तु हनुमत्केश्वरं शिवम् ॥ तस्य शत्रुभयं नास्ति संग्रामे जयमाप्नुयात् ॥ २४ ॥ न च चौरभयं तस्य न दारिद्र्यं न दुर्गतिः ॥ तैलाभि
षेकं यः कुर्याद्धनुमत्केश्वरे शिवे ॥२५॥ तस्य रोगाः प्रलीयन्ते ग्रहपीडा न जायते ॥ ये द्रक्ष्यंति नराः भक्त्या तेषां मोक्षो भविष्यति ॥२६॥ इति
श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये हनुमत्केश्वरमाहात्म्यवर्णनंनामैकविंशोऽध्यायः ॥२१॥
॥ छ ॥ ॥ श्रीसनत्कुमार उवाच ॥ ॥ यमेश्वरं तु यः पश्येत्स्नापयित्वा तिलांभसा ॥ कुंकुमेन समालिप्य पूजयेदुत्पलैस्ततः ॥ १ ॥ दहेत्कृष्णागरुं
धूपं दापयेत्तिलतण्डुलान् ॥ य एवमर्चयेद्देवमीश्वरं शूलहस्तकम् ॥ २ ॥ यत्र कुत्र मृतस्यापि यमः पितृसमो भवेत् ॥ ३ ॥ ॥ इति यमेश्वरमाहा
त्म्यम् ॥ ॥ सनत्कुमार उवाच ॥ ॥ कथयामि परं व्यास तीर्थं तीर्थेषु चोत्तमम् ॥ नाम्ना रुद्रसरः प्रोक्तं त्रिषु लोकेषु विश्रुतम् ॥ ४ ॥ तत्र
स्नात्वा शुचिर्भूत्वा पश्येत्कोटेश्वरं शिवम् ॥ मुच्यते सर्वपापेभ्यो रुद्रलोकं स गच्छति ॥ ५ ॥ श्राद्धं तत्रैव कृत्वा तु शृणु यत्फलमाप्नुयात् ॥ दशा
नामश्वमेधानां वाजपेयशतस्य च॥६॥फलं कोटिगुणं व्यास लभते नात्र संशयः॥पितॄनुद्दिश्य यत्किंचित्कोटितीर्थे प्रदीयते॥७॥तत्सर्वं कोटिगुणितं
जायते नात्र संशयः॥कोटितीर्थे नरः स्नात्वा ध्यायेद्यः परमाक्षरम्॥८॥ मुच्यते सर्वपापेभ्यो निर्मोकेन यथोरगः ॥ प्रातरुत्थाय यो विप्र तत्र स्नानं करोति
वै॥९॥दृष्ट्वा देवं महाकालं गोसहस्रफलं लभेत्॥कोटितीर्थे नरः स्नात्वा सप्तरात्रोषितः शुचिः ॥१०॥ चांद्रायणसहस्रस्य फलं प्राप्नोति मानवः ॥ जागरं
तत्र कुर्याद्यो ह्यनंतफलमश्नुते ॥ ११ ॥ गन्धपुष्पार्चनं कृत्वा महास्नपनपूर्वकम् ॥ य एवं नयते रात्रिं सोपवासो जितेंद्रियः ॥ १२ ॥ लभते
सर्वकामित्वं यत्सुरैरपि दुर्लभम् ॥ कार्तिक्यामथ वैशाख्यां देवं तत्र प्रपूजयेत् ॥ १३ ॥ गंधपुष्पैश्च कालीनैस्तथा वस्त्रैः सुशोभनैः ॥ कर्पूरं कुंकुमं
चैव श्रीखण्डमगरुं तथा ॥ १४ ॥ समभागानि कृत्वा तु शिलापृष्ठे च पेषयेत् ॥ अनुलिप्य महाकालं रुद्रस्यानुचरो भवेत् ॥ १५ ॥ इति
श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये रुद्रसरोमाहात्म्यवर्णनंनाम द्वाविंशोऽध्यायः ॥
॥ २२ ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ अथ यात्रां प्रवक्ष्यामि महाकालस्य यत्नतः ॥ शिवां श्रेयस्करीं पुण्यां पुण्यलोकप्रदायिनीम् ॥
॥ १ ॥ स्नात्वा सरसि रुद्रस्य दृष्ट्वा कोटेश्वरं शिवम् ॥ नमस्कृत्य ततो गच्छेन्महाकालं सनातनम् ॥ २ ॥ गन्धैः पुष्पैर्नमस्कारैः संपूज्य त्रिद

१ अक्षराधिक्यमार्षम् । २ अत्र कस्मिंश्चित्पुस्तकेऽध्यायसमाप्तिर्दृश्यते । केषुचित्पुस्तकेषु नास्ति । ३ रुद्रेश्वरं प्रोक्तम्—इ० पा० । रुद्रेश्वरो देवश्च रुद्रसरस्तीर एवास्ति । ४ कालीनैः—ऋतुकालोद्भवैः । धूपैश्च—इ० पा० ।
५ कोटीश्वरम्—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शेश्वरम् ॥ प्रणिपत्य ततो गच्छेद्देवं कपालमोचनम् ॥ ३ ॥ तत्रैव देवदेवेशः कपालं न्यस्तवान्क्षितौ ॥ कपाले तत्क्षणान्यस्ते तत्राभूल्लिंगमुत्तमम् ॥ ॥ ४ ॥ कपालमोचनंनाम सर्वपापप्रणाशनम् ॥ तत्र वै स्नपनं कुर्यादाज्यपलशतेन वै ॥ ५ ॥ तदर्धार्धेन पादेन वित्तशाठ्यविवर्जितः ॥ काले पूर्णे स विप्रेन्द्र शिवलोके महीयते ॥ ६ ॥ नमस्कृत्य ततो गच्छेत्कपिलेश्वरमुत्तमम् ॥ दर्शनादस्य देवस्य मुच्यते ब्रह्महत्यया ॥ ७ ॥ हनुमत्केश्वरं देवं ततो गच्छेत्समाहितः ॥ ऐश्वर्यमतुलं व्यास दर्शनादस्य जायते ॥ ८ ॥ ततो गच्छेन्महादेवं पैप्पलाख्यं सनातनम् ॥ यस्य दर्शनमात्रेण मुक्तिः स्याद्द्विजसत्तम ॥ ९ ॥ स्वप्नेश्वरं ततो गच्छेद्भक्तिश्रद्धासमन्वितः ॥ दर्शनादस्य देवस्य दुःस्वप्नं[३] च विनश्यति ॥ १० ॥ ततो गच्छेन्महादेवमीशानं विश्वतोमुखम् ॥ यस्य दर्शनमात्रेण विश्वस्यैव पतिर्भवेत् ॥ ११ ॥ सोमेश्वरं ततो गच्छेज्जितक्रोधो जितेंद्रियः ॥ कुष्ठरोगादिदोषेभ्यो दर्शनादस्य मुच्यते ॥ १२ ॥ वैश्वानरेश्वरं व्यास ततो गच्छेत्समाहितः ॥ तस्य वृद्धिः सदा लोके जायते तस्य दर्शनात् ॥ १३ ॥ बीजपूरकहस्तं तु लकुलीशं ततो व्रजेत् ॥ रुद्रत्वं दर्शनात्तस्य[५] जायते नात्र संशयः ॥ १४ ॥ ततो गच्छेन्महादेवं गणेश्वरमुत्तमम् ॥ यस्य दर्शनमात्रेण जायंते सर्वसिद्धयः ॥१५॥ अभ्यर्थितः सदा देवैः पूजितः सिद्धिकारणात् ॥ तेनाभ्यर्थितेश्वरोऽयं[६] विख्यातो विघ्ननायकः ॥१६॥ वयोवृद्धं ततो गच्छेन्महाकालं सनातनम् ॥ न रोगो न जरा व्याधिर्दर्शनान्नात्र संशयः ॥ १७ ॥ विघ्ननाशं ततो गच्छेत्प्राणीशं बलमुत्तमम् ॥ स्नानं घटशतैस्तस्य कुर्याद्भक्त्या समाहितः ॥ १८ ॥ तस्य चैव कृते स्नाने लभ्यंते सर्वसिद्धयः ॥ स्वर्गश्चापि सदा व्यास दर्शनादस्य जायते ॥ १९ ॥ तनयं तमनूल्लंघ्य दंडपाणिं ततो व्रजेत् ॥ यस्य दर्शनमात्रेण यमलोको न दृश्यते ॥ २० ॥ पुष्पदन्तं ततो गच्छेद्भक्तिश्रद्धासमन्वितः ॥ यस्य दर्शनमात्रेण मुच्यते सर्वपातकैः ॥ २१ ॥ गुह्यं चैव महाकालं ततो गच्छेत्समाहितः ॥ यस्य दर्शनमात्रेण गुह्यपापैः प्रमुच्यते ॥ २२ ॥ ततो गच्छेत्समाधिस्थो दुर्वासेश्वरमुत्तमम् ॥ यस्य दर्शनमात्रेण कृतकृत्यो नरो भवेत् ॥ २३ ॥ श्वासावरोधनं कृत्वा दुर्वाससः समीपतः ॥ गौरीं गत्वा महादुर्गां त्यजेच्छ्वासमनंतरम् ॥ २४ ॥ तत्रोच्छ्वासो विमोक्तव्यस्तामभ्यर्च्य तु सर्वथा ॥ कालेश्वरं ततो गच्छेद्देवदेवं महेश्वरम् ॥ २५ ॥ यस्य दर्शनमात्रेण यमलोकं न पश्यति ॥ विधीशं च ततो गच्छेद्देवदेवं महेश्वरम् ॥ २६ ॥ यस्य दर्शनमात्रेण बधिरत्वं न जायते ॥ कीर्तये

१ कपालेश्वरम्–इ० पा० । २ एव–इ० पा० । ३ नश्यति क्षणात्–इ० पा० । ४ श्रद्धाभक्तिजितेन्द्रियः–इ० पा० । ५ अस्य–इ० पा० । ६ तेनाभ्यर्थितशरोऽयम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





दात्मनो नाम स्थानं गोत्रं च तस्य वै ॥ २७ ॥ न कीर्तयेद्यदा नाम सा यात्रा विफलीभवेत् ॥ देवस्याग्रे ततो व्यास उपविश्य समाहितः ॥
॥ २८ ॥ भक्तियुक्तस्ततो ब्रूयान्नमस्कृत्वा पुनःपुनः ॥ मया समर्पिता यात्रा त्वत्प्रसादान्महेश्वर ॥ २९ ॥ संसारसागराद्घोरान्मामुद्धर जगत्पते ॥
अनेन विधिना यस्तु महाकालं प्रदक्षयेत् ॥ ३० ॥ प्रदक्षिणीकृता तेन सप्तद्वीपा वसुंधरा ॥ गोलक्षं द्विजलक्षाय दत्त्वा यल्लभते फलम् ॥ ३१ ॥
तत्फलं देवदेवस्य सकृद्दत्त्वा प्रदक्षिणम् ॥ भक्त्या परमया युक्तो महाकालं प्रदक्षयेत् ॥ ३२ ॥ पदेपदे यज्ञफलमिति मे शंकरोऽब्रवीत् ॥ षष्टिकोटि
सहस्राणि षष्टिकोटिशतानि च ॥ ३३ ॥ पूजितानि भवंत्यत्र यात्रेश्वरसमर्चनात् ॥ य एवं कुरुते यात्रां शिवध्यानपरायणः ॥ ३४ ॥ सहस्रद
क्षिणां दद्यात्तस्य पुण्यफलं शृणु ॥ सप्तजन्मकृतात्पापान्मुच्यते नात्र संशयः ॥ ३५ ॥ एवं यात्रां समाप्याथ गत्वा निजगृहं नरः ॥ यात्रादैवत
संख्यान्वै षड्विंशतिद्विजोत्तमान् ॥ ३६ ॥ भोजयेच्छिवभक्तांश्च शिवध्यानपरायणान् ॥ सवस्त्रां दक्षिणां दत्त्वा प्राप्यानुज्ञां विसर्जयेत् ॥ ३७ ॥
यात्राक्रमेण चैकैकं द्वारांतरमनुव्रजेत् ॥ धर्मोपदेशके पश्चात्सर्वोपस्करसंयुताम् ॥ ३८ ॥ धेनुं पयस्विनीं दद्याद्वित्तशाठ्यविवर्जितः ॥ भुञ्जीताथ
स्वयं व्यास सर्वभृत्यसमन्वितः ॥ ३९ ॥ दीनानाथदरिद्रांधविकलाद्यांश्च भोजयेत् ॥ यदत्र फलमुद्दिष्टं तद्वदामि शृणुष्व मे ॥ ४० ॥ कुलानां शत
मुद्धृत्य मातापित्रोः समाहितः ॥ कल्पकोटिसहस्राणि शिवलोके स मोदते ॥ ४१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां
पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये महाकालेश्वरयात्रामाहात्म्यवर्णनंनाम त्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥
वाल्मीकेश्वरमित्याख्यं यस्तु देवं प्रपूजयेत् ॥ मौनी ध्यानपरो भूत्वा स कवित्वमवाप्नुयात् ॥ १ ॥ ॥ व्यास उवाच ॥ ॥ कथमत्र समुत्पन्नः
कोऽसौ वाल्मीकेश्वरः प्रभुः ॥ यस्य दर्शनमात्रेण कवित्वमुपजायते ॥ २ ॥ ॥ सनत्कुमार उवाच ॥ ॥ आसीद्व्यास पुरा विप्रः सुमतिर्भृगु
वंशजः ॥ रूपयौवनसंपन्ना तस्य भार्याथ कौशिकी ॥ ३ ॥ तस्य पुत्रः समुत्पन्नो ह्यग्निशर्मेति नामतः ॥ स पित्रा प्रोच्यमानोऽपि वेदाभ्यासं न
मन्यते ॥ ४ ॥ ततो बहुतिथे काले अनावृष्टिरजायत ॥ तस्यां विपद्गतः सोऽथ दक्षिणामाश्रितो दिशम् ॥ ५ ॥ ततोऽसौ सुमतिर्विप्रः सभार्यःस
सुतस्तथा ॥ विदेशं काननं प्रातः कृत्वा चाश्रममाश्रितः ॥ ६ ॥ आभीरैर्दस्युभिः सार्धं संगोऽभूदग्निशर्मणः ॥ आगच्छति पथा तेन यस्तं हंति स ॥ २० ॥
पापकृत् ॥ ७ ॥ स्मृतिर्नष्टा गता वेदा गतं गोत्रं गता श्रुतिः ॥ कस्मिंश्चिदथ काले तु तीर्थयात्राप्रसंगतः ॥ ८ ॥ सप्तर्षयः पथा तेन सुव्रताः समुप

१ प्रदक्षयेत--प्रदक्षिणीकुर्यात्--इत्यर्थः। २ अक्षराधिक्यं छान्दसम्। ३ व्यास--इ०पा०। ४ विदिशम्--इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थिताः ॥ अग्निशर्माथ तान्दृष्ट्वा हन्तुकामोऽब्रवीदिदम् ॥ ९ ॥ वस्त्राणीमानि मुच्यध्वं छत्रिकोपानहौ तथा ॥ हन्तव्या हि मया यूयं गन्तारो यमसादने ॥ १० ॥ तस्य तद्वचनं श्रुत्वा अत्रिर्वचनमब्रवीत् ॥ अस्मत्पीडनजं पापं कथं ते हृदि वर्तते ॥ वयं तपस्विनो भूत्वा तीर्थयात्राकृतोद्यमाः ॥ ११ ॥ ॥ अग्निशर्मोवाच ॥ ॥ ममास्ति माताथ पिता सुतो भार्या गरीयसी ॥ पोषयामि सदा तांस्तु एतन्मे हृदि संस्थितम् ॥ १२ ॥ ॥ अत्रिरुवाच ॥ ॥ पित्रादीनाशु पृच्छस्व स्वकर्मोपार्जितं प्रति ॥ यद्युष्मदर्थं क्रियते पापं तत्कस्य कथ्यताम् ॥१३॥ यदि ते कथयंति स्म मा मृषा प्राणिनो वधीः ॥ १४ ॥ ॥ अग्निशर्मोवाच ॥ ॥ न कदाचिन्मया ते तु संपृष्टा ईदृशं वचः॥ युष्माकं वचसा मेऽद्य प्रतिबोधः प्रवर्तते ॥ १५ ॥ गत्वा पृच्छामि तान्सर्वान्कस्य भावश्च कीदृशः ॥ यूयमत्रैव तिष्ठध्वं यावदागमनं मम ॥ १६ ॥ इत्युक्त्वा ताञ्जगामाशु पितरं स्वमुवाच ह ॥ धर्मस्य प्रतिघातेन प्राणिनां पीडनेन च ॥ १७ ॥ सुमहद्दृश्यते पापं कस्य तत्कथ्यतां मम ॥ पिता प्राह तथा माता नापुण्यमावयोरिह ॥ १८ ॥ त्वं जानासि यत्कुरुषे कृतं भाव्यं पुनस्त्वया ॥ तयोस्तद्वचनं श्रुत्वा भार्या वचनमब्रवीत् ॥ १९ ॥ तयाप्युक्तं न मे पापं पापमेतत्तवैव हि ॥ तद्वाक्यमब्रवीत्पुत्रं बालोऽहमिति सोऽब्रवीत् ॥ २० ॥ तज्ज्ञात्वा हृदयं तेषां चेष्टितं चैव तत्त्वतः ॥ नष्टोऽहमिति मन्वानः शरणं मे तपस्विनः ॥ ॥ २१ ॥ क्षिप्त्वाथ लगुडं कृष्णं येन वै जंतवो हताः॥ प्रकीर्य केशांस्त्वरित ऋषीणामग्रतः स्थितः ॥ २२ ॥ प्रणम्य दंडपातेन ततो वचनमब्रवीत् ॥ न मे माता न च पिता न भार्या न च मे सुतः ॥ २३ ॥ सर्वैस्तैः परिमुक्तोऽहं भवतां शरणं गतः ॥ सुष्ठूपदेशदानान्मां नरकात्त्रातुमर्हथ ॥ २४ ॥ एवं तं वादिनं दृष्ट्वा ऋषयोऽत्रिमथाब्रुवन् ॥ भवतो वचनादस्य प्रतिबोधः समागतः ॥ २५ ॥ भवताऽयमनुग्राह्यः शिष्यो भवतु ते मुने ॥ तथेत्युक्त्वाथ तान्प्राह चाग्निं ध्यानं समाचर ॥ २६ ॥ अनेन ध्यानयोगेन महांमंत्रजपेन[1] च ॥ अनेकदुस्तरात्युग्रपापकृज्जनघातकः॥ संस्थितो वृक्षमूले त्वं परां सिद्धिं गमिष्यसि ॥ २७ ॥ इत्युक्त्वा ते ययुः सर्वे संकामं[2] सोऽपि तत्र वै ॥ तद्ध्यानस्थोऽभवद्योगी वत्सराणि त्रयोदश ॥ २८ ॥ तस्योपर्यभवत्तत्र वल्मीकोऽविचलस्य च ॥ निवृत्तास्तु पथा तेन मुनयस्तत्र शुश्रुवुः ॥ २९ ॥ उदीरितं ध्वनिं तेन वल्मीके विस्मयान्विताः ॥ ततः खनित्वा वल्मीकं काष्ठीभूतोरुशंकुभिः ॥३०॥ तं दृष्ट्वोत्थापयामासुर्मुनयो नयसंयुतम् ॥ नमश्चक्रेऽथ तान्सर्वान्स वि[3]ो मुनिपुंगवान् ॥३१॥ तान्प्राह प्रणतो भूत्वा तपसा दीप्ततेजसः ॥ प्रसादाद्भवतामद्य ज्ञानं लब्धं मया शुभम् ॥ ३२ ॥ दीनोऽहमुद्धृतः सर्वैर्मग्नोऽहं पापकर्दमे ॥ श्रुत्वा

१ महांमंत्रजपेन--राममहामंत्रजपेन--इति पुराणांतराद्बोध्यम् । तत्र हि व्यत्यस्ताक्षररामंत्रजपेन वाल्मीकेः सिद्धिरुक्ता । २ सकामम्--यथेच्छम्--इत्यर्थः । गंतव्यमार्गेण--इति शेषः । ३ मुनिः--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तस्येति ते वाक्यमूचुः परमधार्मिकाः ॥ ३३ ॥ वल्मीकेऽस्मिन्स्थितः पुत्र यतस्त्वमेकचित्ततः ॥ वाल्मीकिरिति ते नाम भुवि ख्यातं भवि
ष्यति ॥ ३४ ॥ इत्युक्त्वा मुनयो जग्मुः स्वां दिशां तपसान्विताः ॥ गतेषु मुनिमुख्येषु वाल्मीकिस्तपतां वरः ॥ कुशस्थल्यामथागम्य समाराध्य
महेश्वरम् ॥ ३५ ॥ तस्मात्कवित्वमासाद्य चक्रे काव्यं मनोरमम् ॥ रामायणं च यत्प्राहुः कथां सुप्रथमस्थिताम् ॥ ३६ ॥ ततः प्रभृति देवेशो
वाल्मीकेश्वरसंज्ञकः ॥ ख्यातोऽवंत्यां ततो व्यास नृणां कवित्वदायकः ॥ ३७ ॥ इति ते कथितं लिंगं वाल्मीकेश्वरमुत्तमम् ॥ यस्य दर्शनमात्रे
ण कवित्वमुपपद्यते[1] ॥ ३८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवंतीक्षेत्रमाहात्म्य वाल्मीकेश्वरमाहात्म्य
वर्णनं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शुंक्रेश्वरं[2] समभ्यर्च्य सितपुष्पैर्विलेपनैः ॥ प्रणिपत्य ततो भक्त्या
रुद्रलोके महीयते ॥ १ ॥ भीमेश्वरं नरो दृष्ट्वा भक्त्या संपूज्य यत्नतः ॥ न भयं लभते व्यास रणे रात्रौ जलेऽनले ॥ २ ॥ गर्गेश्वरं स्नापयित्वा
तिलतैलेन मानवः ॥ बिल्वपत्रैस्तु संपूज्य धर्मवृद्धिमवाप्नुयात् ॥ ३ ॥ उपोषितश्चतुर्दश्यां तिलप्रस्थतिलांभसा ॥ स्नापयित्वा तिलैरिष्ट्वा सदा
सौख्यमवाप्नुयात् ॥ ४ ॥ गोसहस्रं नरो दत्त्वा भावं कृत्वा विशेषतः ॥ भवबंधविनिर्मुक्तो रुद्रलोकं स गच्छति ॥ ५ ॥ कामेश्वरं समभ्यर्च्य
कुंकुमादिविलेपनैः ॥ कामिकेन विमानेन याति स्वर्गं न संशयः ॥ ६ ॥ चूडामणिं नमस्कृत्य नवम्यां कार्तिके सिते ॥ न वियोनिं नरो याति
धर्मबुद्धिः स जायते ॥ ७ ॥ चंडीश्वरं समभ्यर्च्य कृष्णाष्टम्यामुपोषितः ॥ निर्माल्योल्लंघनोत्थेन न शोकेनापि लिप्यते ॥ ८ ॥ इत्यादितीर्थानि[3]
महेश्वरस्य पुण्यानि सर्वाणि नरोऽभिगम्य ॥ विशुद्धचित्तो भुवि भावितात्मा प्रयाति शंभोर्भुवनं[4] सुरम्यम् ॥ ९ ॥ इति श्रीस्कांदे महापुराण एकाशी
तिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये शुक्रेश्वरभीमेश्वरगर्गेश्वरकामेश्वरचूडामणीश्वरचण्डीश्वरादितीर्थमाहात्म्यवर्णनं
नाम पञ्चविंशोऽध्यायः ॥ २५ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ गुह्यस्थाने पवित्राणि कीर्तितानि त्वया मुने ॥ प्रमाणं
कथयस्वाद्य महाकालवनस्य मे ॥ १ ॥ ॥ सनत्कुमार उवाच ॥ ॥ यथाश्रुतं मया पूर्वं गदतो ब्रह्मणः स्वयम् ॥ तत्तेऽहं संप्रव
क्ष्यामि शृणु त्वं गदतो मम ॥ २ ॥ योजनस्यैव पर्यंतं चतुर्दिक्षूपशोभितम् ॥ सौवर्णैस्तोरणैश्चैव मुक्तादामविलंबिभिः ॥ ३ ॥
द्वाराणि तत्र शोभंते कांचनैः कलशैः स्थितैः ॥ सितपद्ममुखैर्द्वारैरनेकमणिमंडितैः ॥ ४ ॥ महेश्वरप्रयुक्ताश्च द्वाराध्यक्षा महाबलाः ॥

१ उपजायते--इ० पा० । २ शुक्रेश्वरम्--इ० पा० । ३ कचित्पुस्तके तु--अस्यार्धस्य व्यत्ययेन पाठो दृश्यते । यथा--'इत्यादितीर्थानि नरोऽभिगम्य पुण्यानि सर्वाणि महेश्वरस्य'--इति । ४ भवनम्--इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वारेषु तेषु शोभंते लोकानुग्रहकारकाः ॥ ५ ॥ पिंगलेशः स्थितः पूर्वे बालरूपो विभावसुः ॥ तीर्थस्याभिमुखो गौरो गुरुर्गणैरथानुगः ॥ ॥ ६ ॥ दक्षिणेऽपि महायोगी कायावरोहणेश्वरः ॥ बिल्वेशः पश्चिमे द्वारे क्षेत्रस्याभिमुखः स्थितः ॥ ७ ॥ नियुक्तो वै महेशेन वारुणीं दिश मास्थितः ॥ उत्तरां दिशमाश्रित्य स्थितश्चैवोत्तरेश्वरः ॥ ८ ॥ साधकः सर्वकार्याणामादिष्टः शंकरेण सः ॥ मानवा ये वसंत्यत्र क्षेत्रमध्ये सुधा मिकाः ॥ ९ ॥ मृता रुद्रपुरं यांति विमानैः सार्वकामिकैः ॥ कृष्णपक्षे चतुर्दश्यामथ वार्केन्दुसंगमे ॥ १० ॥ पंचेशानीं नमस्कृत्य प्रतिलोमानु लोमतः ॥ उपोषितो दिनैकेन ध्यायमानो महेश्वरम् ॥ ११ ॥ मुच्यते सर्वपापैस्तु बहुजन्मकृतैरपि ॥ एवं च विप्र यो यात्रां पंचेशानीं समार भेत् ॥ १२ ॥ अनेनैव स्वदेहेन रुद्रलोकं स गच्छति ॥ पंचेशानीमथान्यां ते सुखेन क्रियते यथा ॥ १३ ॥ तथा शृणु प्रवक्ष्यामि सर्वपापप्रणा शिनीम् ॥ प्रातः स्नात्वा रुद्रसरस्येकादश्यां समाहितः ॥ १४ ॥ श्राद्धं कृत्वा महाकालं नत्वा चेशानमीश्वरम् ॥ पिंगलेशं ततः प्राप्य स्नात्वा श्राद्धं समाचरेत् ॥ १५ ॥ उपगम्य ततो देवं गणेशं पिंगलेश्वरम् ॥ गन्धैः पुष्पैश्च धूपैश्च तमभ्यर्च्य निवर्तयेत् ॥ १६ ॥ महाकालेश्वरं प्राप्य भूयः स्नातो जितेंद्रियः ॥ अर्चयेद्देवदेवेशं स्वयंभुवं सनातनम् ॥ १७ ॥ ईशाने गमयेद्रात्रिं कृत्वा वै नक्तभोजनम् ॥ ध्यायमानो महेशानं भूमौ विन्यस्य विग्रहम् ॥ १८ ॥ द्वादश्यां पूर्ववत्सर्वं प्रातः स्नात्वा व्रजेन्नरः ॥ कायावरोहणं गत्वा पिंगलेश्वरवद्यजेत् ॥ १९ ॥ त्रयोदश्यामथाप्येवं बिल्वेशं पश्चिमेऽर्चयेत् ॥ चतुर्दश्यां तथा सौम्ये पूजयेदुत्तरेश्वरम् ॥ २० ॥ अमावास्यां शुचिः स्नातो महाकालेश्वरं यजेत् ॥ गन्धैः पुष्पैश्च धूपैश्च नैवेद्यैर्विविधैस्तथा ॥ २१ ॥ गीतनृत्यादिकं कृत्वा प्रणिपत्य क्षमापयेत् ॥ यात्रां कृत्वा तु पूर्वोक्तां ततो निजगृहं व्रजेत् ॥ २२ ॥ ब्राह्मणान्भोजये त्पश्च शिवभक्तिपरायणान् ॥ प्रणम्य देवतारूपान्महाकालोषितान्द्विजान् ॥ २३ ॥ पूजयित्वा हिरण्येन सूक्ष्मवस्त्रगुणैर्नवैः ॥ रथं पिंगलके दद्या द्गजं कायावरोहणे ॥ २४ ॥ दत्त्वा बिल्वेश्वरे चाश्वं वृषं दत्त्वा तु चोत्तरे ॥ धेनुं दत्त्वा महाकाले सर्वोपस्करसंयुतम् ॥ २५ ॥ य एवं कुरुते व्यास तस्य पुण्यफलं शृणु ॥ २६ ॥ पितृकैर्मातृकैः सार्धं कुलैः स दिवि मोदते ॥ अप्सरोगीतनृत्याद्यैर्विमानैः सार्वकामिकैः ॥ २७ ॥ ॥ इति पंचे शानीयात्रामाहात्म्यम् ॥ ॥ यस्तु प्रदक्षिणां कुर्यान्नियमेन कुशस्थलीम् ॥ प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा ॥ २८ ॥ यस्तु पद्मावतीं पश्ये दर्चयेत्पंकजैर्नरः ॥ दत्त्वा धूपं सनैवेद्यं मृतो ब्रह्मपुरं व्रजेत् ॥ २९ ॥ स्वर्णशृंगाटिकां व्यास कुसुमैः स्वर्णसंनिभैः ॥ समभ्यर्च्य महाभक्त्या स

१ नाम्ना कायावरोहणः--इ०पा०। २ अर्केंदुसंगमे--अमावास्यायाम्--इत्यर्थः। ३ नाम नरः--इ०पा०। ४ स्वयंभूतम्--इ०पा०। ५ स्वर्णसंभवैः--इ०पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

याति शिवमन्दिरम् ॥ ३० ॥ अवन्तिनीं तु यः पश्येद्देवीं त्रैलोक्यविश्रुताम् ॥ कामिकेन विमानेन याति पौरंदरं पुरम् ॥ ३१ ॥ अर्चयेत्पंकजै र्भक्त्या यो देवीममरावतीम् ॥ अमरैः सह संहृष्टो मोदते दिवि सर्वदा ॥ ३२ ॥ देवीमुज्जयनीं भक्त्या यः पश्यति समाहितः ॥ सर्वैश्वर्यसमायुक्तो रुद्रलोके महीयते ॥ ३३ ॥ विशालां चैव यः पश्येद्रुद्रभक्त्या समाहितः ॥ मुच्यते त्रिविधैः पापैर्नात्र कार्या विचारणा ॥ ३४ ॥ ॥ इति श्रीकल्पसप्तकमहिमा ॥ ॥ शृणु व्यास महातीर्थं पुरा यद्ब्रह्मणार्चितम् ॥ अक्रूरेश्वरमित्याख्यं यत्र सिद्धः पितामहः ॥ ३५ ॥ तत्र देवार्चनं कृत्वा कृष्णाष्टम्यामुपोषितः ॥ जितेंद्रियः शुचिर्दांतो रुद्रलोकमवाप्नुयात् ॥ ३६ ॥ न वदेत्केनचित्सार्धं नरः प्रातर्गृहे स्थितः ॥ दृष्ट्वाऽक्रूरेश्वरं देवं हेमदानफलं लभेत् ॥३७॥ ॥ इत्यक्रूरेश्वरमाहात्म्यम् ॥ ॥ यस्तु पश्यति ब्रह्माणं शुचिः स्नातो जितेंद्रियः ॥ मुच्यते पातकाद्घोराद्ब्रह्मलोकं मृतो व्रजेत् ॥ ३८ ॥ पद्मासनस्थितो[1] ब्रह्मा ध्यायमानः परं पदम् ॥ वसिष्ठाद्यैर्मुनिवरैर्विज्ञप्तः कर्मसंभवान् ॥ ३९ ॥ ॥ ऋषय ऊचुः ॥ ॥ आदित्या मरुतः साध्यास्तथा चैवाश्विनावुभौ ॥ पितरो ये च लोकानां पूज्यंते भुवि मानवैः ॥ ४० ॥ ग्रहार्कतारका यक्षा दिग्गजाश्च्यानलानिलाः ॥ अमी देवा वयं सर्वे त्वदंशाः परिपठ्यते ॥ ४१ ॥ कथं ध्यायसि देवेश एतत्सर्वं ब्रवीहि नः ॥ ४२ ॥ ॥ ब्रह्मोवाच ॥ ॥ द्वे विद्ये तत्त्वरूपे[3] ये परा चैवापरा तथा ॥ ते द्वे च मम रूपे द्वे नित्ये मूर्तात्मिके मम ॥ ४३ ॥ ॥ ऋषय ऊचुः ॥ ॥ पितामह कथं विद्मो भवंतं परमं विभुम् ॥ येनास्माकं परा सिद्धिर्जायते तव दर्शनात् ॥ ४४ ॥ ॥ ब्रह्मोवाच ॥ ॥ माहेश्वरं परं क्षेत्रं कुशस्थलीतिशब्दितम् ॥ यज्ञार्थिना[4] मया देवः श्रीकंठः पार्वतीपतिः ॥ ४५ ॥ याचितस्तेन देवेन उक्तोऽहं परमेष्ठिना ॥ समंताद्योजनं साग्रं क्षेत्रमेतत्पैतामहः ॥ ४६ ॥ मया दत्तं तव विभो महाकालवनादृते ॥ वारितः[6] स मया तत्र वने गुप्तो हि रोषतः ॥ कपर्दिना च तत्रोक्तो यास्यामो न तवांतिकम् ॥ ४७ ॥ आरब्धो वै ततो यज्ञो नारायणपरिग्रहात् ॥ ज्ञातस्तथापि मे यज्ञो देवदेवेन शंभुना ॥ ४८ ॥ यज्ञवाटं कपर्दीशस्ततो भिक्षार्थमागतः ॥ याज्ञिकैः सोऽथ तत्रोक्तो मात्र तिष्ठ जुगुप्सितः ॥ ४९ ॥ कपर्दिना च ते तत्र उक्ता यास्याम्यहं पुनः ॥ एवमुक्त्वा कपालं स भूमौ संस्थाप्य तत्र हि ॥ ५० ॥ स्नातुं नदीं ययौ शिप्रां कपर्दी परमेश्वरः ॥ उक्तं तस्मिन्गते शिप्रां कपर्दिनि द्विजातिभिः ॥ ५१ ॥ कथं हि क्रियते होमः कपाले सदसि स्थिते ॥ अकपालानि शौचानि पुरा प्रोक्तं

१ ब्रह्मासनस्थितः--इ०पा० । २ इति–इति शेषः । परिपठ्यते–अर्थाद्वेदेषु "इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ॥ एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः॥" इत्यादिषु । ३ ज्ञेये मम स्वरूपेण–इ० पा० । ४ अस्ति--इति वाक्यपरिपूर्तिः कर्तव्या । ५ तत्र इति शेषः । ६ वारितेन मया तत्र वनगुप्तो हि रोषितः--इ० पा० । ७ अंतिकात्--इ०पा० ॥

CC-0. In Public Domain. Digitization by eGangotri

मनीषिभिः ॥ ५२ ॥ तत्कपालं सदस्येन उक्षिप्तं पाणिना स्वयम् ॥ तस्मिन्क्षिप्तेऽभवच्चान्यत्पुनः क्षिप्तेऽभवत्पुनः ॥ ५३ ॥ एवं नांतं कपालानां प्राप्य ते मुनिसत्तमाः ॥ रुद्रं कपर्दिनं मत्वा शरणं तं समागताः ॥ ५४ ॥ ततः स दर्शनं प्रादाद्भक्त्या तुष्टो महेश्वरः ॥ कपालपाणिर्भगवान्माप्तुवा च ततः प्रभुः ॥ ५५ ॥ वरं वरय भो ब्रह्मन्यत्ते मनसि वर्तते ॥ नास्त्यदेयं मया तुभ्यं सर्वं दास्यामि तत्त्वतः ॥५६॥ ब्रह्मोत्तरमिदं स्थानं मया दत्तं चतुर्मुख ॥ कारयस्त्र यथाकामं यथावर्णचतुष्टयम् ॥ ५७ ॥ एवं वदंतं वरदमीशानं परमेश्वरम् ॥ तथेति चोक्त्वा सदसि न मयाऽन्यो वरो वृतः ॥ ॥ ५८ ॥ उज्जयिनीति वै नाम कुशस्थलयां निवेशितम् ॥ कुंडं मंदाकिनी तत्र मया कृतमनंतरम् ॥ ५९ ॥ तत्र विप्राः कृते स्नाने सर्वपापैः प्रमुच्यते ॥ तस्यां संस्थापयेद्दिक्षु चतुरोऽर्थघटाञ्छुभान् ॥ ६० ॥ सतिलांस्तान्सवस्त्रांश्च सफलान्मंडकैः सह ॥ कार्तिक्यामथ माघ्यां च चातुर्विद्ये प्रदापयेत् ॥ ६१ ॥ प्रथमं च ऋग्वेदाय यजुर्वेदाय दक्षिणम् ॥ पश्चिमं सामवेदाय अथर्वणे तथोत्तरम् ॥ ६२ ॥ वेदानुद्दिश्य चाप्येवं प्रीयतां मे पितामहः ॥ कृते चैवं हि यत्पुण्यं तच्छृणुध्वं समाहिताः ॥ ६३ ॥ सर्वतीर्थेषु यत्पुण्यं मंदाकिन्यां तथा भवेत् ॥ सहस्रगुणितं स्नानं जाप्यं लक्षगुणं भवेत् ॥ ६४ ॥ दानं कोटिगुणं ज्ञेयं मंदाकिन्यां न संशयः ॥ कौमुदे मासि संप्राप्ते गोदानं तत्र कारयेत् ॥ ६५ ॥ घृतधेनुं च कार्तिक्यां माघ्यां तिलमयीं तथा ॥ जलधेनुं तु वैशाख्यां दत्त्वा मुच्येत पातकैः ॥ ६६ ॥ वाचिकं मानसं पापं कर्मजं यच्च दुष्कृतम् ॥ विनश्येत्किल्बिषं सर्वं मंदाकिन्यास्तु दर्शनात् ॥ ६७ ॥ मंदाकिनीसमं तीर्थं पृथिव्यां नैव दृश्यते ॥ यस्य दर्शनमात्रेण ब्रह्मलोके स मोदते ॥ ६८ ॥ मंदाकिन्यां तु यः स्नानं कृत्वा श्राद्धं प्रदास्यति ॥ दर्शे च पूर्णिमायां वा पितृलोके स मोदते ॥ ॥ ६९ ॥ पितामहं तु यो भक्त्या नित्यं पश्यति मानवः ॥ अश्वमेधसहस्रेण राजसूयशतेन च ॥ ७० ॥ युज्यते नात्र संदेहः सत्यमेतत्तपोधनाः ॥ ततो मन्वंतरेऽतीते प्राप्ते वैवस्वते पुनः ॥ ७१ ॥ तेनैवोन्मत्तवेषेण ऊर्ध्वशेषो महेश्वरः ॥ प्रविष्टो ब्रह्मणः सत्रे दृष्टस्तैर्द्विजसत्तमैः ॥ ७२ ॥ ते ब्राह्मणाः शपंति स्म निन्दां कुर्वंति चापरे ॥ अपरे पांशुभिः शिश्नं घ्नंति तस्याशपन्द्विजाः ॥ ७३ ॥ लोष्टैर्लगुडकैश्चान्ये घ्नंति तं बलगर्विताः ॥ जटामुकुटकं केचिद्धृत्वा कर्षंति चापरे ॥ ७४ ॥ पृच्छंति व्रतचर्यां वै केन व्रतं च दर्शितम् ॥ अत्र चैव स्त्रियः संति कथमेतत्त्वया कृतम् ॥ ७५ ॥ ब्रह्मणा चेदृशी चर्या विष्णुना वा कृता स्वयम् ॥ गिरिशेनापि देवेन केनेदं दुष्कृतं कृतम् ॥ ७६ ॥ मा विडम्बय

१ तथा वर्गचतुष्टयम्–इ०पा०। २ मंदाकिनी–मंदाकिनीत्याख्यम्। ३ न संशयः–इ० पा०। ४ उर्ध्वशेपः–ऊर्ध्वकृतशिश्नः–इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



देवेशं वध्यो हि नस्त्वमद्य वै ॥ एवं तैर्हन्यमानस्तु ब्राह्मणैस्तत्र शंकरः ॥ ७७ ॥ स्मितं कृत्वाऽब्रवीत्सर्वान्ब्राह्मणान्परमेश्वरः ॥ किं यूयं मामभि
हथ ह्युन्मत्तं नष्टचेतसम् ॥ ७८ ॥ यूयं कारुणिकाः सर्वे मैत्रभावे व्यवस्थिताः ॥ तमेवं वादिनं देवं जाल्मरूपधरं हरम् ॥ ७९ ॥ मायया तस्य
देवस्य मोहितास्ते द्विजातयः ॥ पुनः कपर्दिनं जघ्नुः पाणिपादेन वै द्विजाः ॥ ८० ॥ ताडचमानस्तु तैर्विप्रैः परं कोपमुपागमत् ॥ ततो देवेन
ते शप्ता यूयं वेदविवर्जिताः ॥ ८१ ॥ ऊर्ध्वजूटाः सलगुडाः परदारोपजीविनः ॥ रता द्यूते च वेश्यायां पितृमातृविवर्जिताः ॥ ८२ ॥ न पुत्रे पितृ
वित्तं च विद्या वापि भविष्यति ॥ शेषो मम हतो यैश्च ते सर्वेंद्रियवर्जिताः ॥ ८३ ॥ रौद्रां भिक्षां तु भिक्षंतः परपिंडोपजीविनः ॥ आत्मानं वर्ण
यिष्यंति धनधान्यविवर्जिताः ॥ ८४ ॥ यैश्च तत्र कृता विप्रैर्हन्यमाने कृपा मयि ॥ तेषां धनं च पुत्राश्च दासीदासादयश्च वै ॥८५॥ कुलोत्पन्नाश्च
वै नार्यो भविष्यंति वरान्मम ॥ एवं शापं वरं दत्त्वा गतोंऽतर्धानमीश्वरः ॥ ८६ ॥ ततो द्विजा गते देवे मत्वा तं शंकरं विभुम् ॥ अन्वेषयंतो
यत्नेन महाकालवनं गताः ॥ ८७ ॥ स्नात्वा सरसि रुद्रस्य जपंतः शतरुद्रियम् ॥ जाप्यावसाने तान्देवोऽशरीरिण्या गिराऽब्रवीत् ॥ ८८ ॥ अनृतं
न मया प्रोक्तं स्वैरेष्वपि[1] कुतः सुखम् ॥ भूयोऽप्यनुग्रहं विप्रा युष्माकं करवाण्यहम् ॥ ८९ ॥ शांता दांताश्च ये विप्रा भक्तिमंतो मयि स्थिताः ॥
न तेषां छिद्यते वंशो न धनं न च संततिः ॥ ९० ॥ अग्निहोत्ररता ये च भक्तिमंतो जनार्दने ॥ पूजयंति च ब्रह्माणं तेजोराशिं दिवाकरम् ॥९१॥
नाशुभं विद्यते तेषां येषां साम्ये स्थिता मतिः ॥ एतावदुक्त्वा देवेशस्तूष्णीमासीज्जगत्प्रभुः ॥ ९२ ॥ एवं शापं वरं लब्ध्वा देवदेवान्महेश्वरात् ॥
आजग्मुः सहिताः सर्वे यत्र देवः पितामहः ॥ ९३ ॥ विरंचिमथ ते जाप्यैस्तोषयन्तोऽग्रतः स्थिताः ॥ तुष्टस्तानब्रवीद्ब्रह्मा मत्तोऽपि व्रियतां
वरः ॥ ९४ ॥ ब्रह्मणस्तेन वाक्येन तुष्टाः सर्वे द्विजोत्तमाः ॥ को वरो याच्यतां विप्राः परितुष्टे पितामहे ॥ ९५ ॥ एके तत्राब्रुवन्विप्रा वेदान्वै वृण
वामहै ॥ ततोऽन्ये च धनं धान्यं व्रियतामविशंकितैः ॥ ९६ ॥ अन्ये प्राहुः किमस्माकं धनैस्तुष्टे पितामहे ॥ अग्निहोत्राणि वेदाश्च शास्त्राणि
विविधानि च ॥ ९७ ॥ शांता आढयाश्च लोकाश्च वरदानाद्भवंतु नः ॥ एवं प्रजल्पतां तत्र विप्राणां कोप आविशत् ॥ ९८ ॥ परस्परं वरार्थेऽथ
युद्धं कर्तुं समुद्यताः ॥ युध्यंते सायुधाः केचित्केचित्तत्रोपसर्पकाः[2] ॥ ९९ ॥ केचिद्विप्रा उदासीनाः केचिद्वै मौनमास्थिताः ॥ दृष्ट्वैवं भगवान्प्राह ॥ २३ ॥
विप्रान्युद्धं प्रकुर्वतः ॥ १०० ॥ यस्मात्कुमंत्रिता विप्राः शालाया बाह्यसंस्थिते ॥ तस्मादामूलतो विप्रा गुल्मे युद्धोपसर्पकाः ॥ १ ॥ उदासीनस्तु

१ वैरेष्वपि–इ०पा० । २ उपसर्पकाः–पलायनपराः–इत्यर्थोऽत्र बोध्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यो गुल्मो वृत्तिहीनो भविष्यति ॥ वेदास्तस्य भवेयुर्वै यस्त्वस्ति मौनसंस्थितः ॥ २ ॥ तृतीयः सायुधो गुल्मो योद्धुकामस्तु यः स्थितः ॥ परदारेषु वेश्यायां द्यूते चौर्ये सदा रतः ॥३॥ चतुर्विधः स वै विप्रो वृत्तिहीनो भविष्यति ॥ एवमुक्त्वा ययौ ब्रह्मा वैराजं भवनोत्तमम् ॥ ४ ॥ एवं मे परमं क्षेत्रं मुनयोऽवंतिमंडले ॥ यां देवनगरीं लोके प्रवदन्तीह मानवाः ॥ ५ ॥ तस्यां तु ये द्विजाः शांता वसंति क्षेत्रवासिन॥ न तेषां दुर्लभं किंचिन्मम लोके भविष्यति ॥ ६ ॥ कोलामुखे कुरुक्षेत्रे नैमिषे पुष्करेषु च ॥ वाराणस्यां प्रभासे च तथा बदरिकाश्रमे ॥ ७ ॥ गंगाद्वारे प्रयागे च गंगासागरसंगमे ॥ रुद्रकोट्यां विरूपाक्षे मित्रस्यापि तथा वने ॥ ८ ॥ तीर्थेष्वेतेषु क्षेत्रेषु या सिद्धिर्द्वादशाब्दिका ॥ प्राप्यते मानवैर्लोके सा मासेनेह लभ्यते उज्जयिन्यां न संदेहो ब्रह्मचर्ये मनो यदि ॥ ९ ॥ तीर्थानां प्रवरं तीर्थं क्षेत्राणामपि चोत्तमम् ॥ सदाभिरुचितं मह्यमेतद्वै मुनिसत्तमाः ॥ १10 ॥ मंदाकिन्यास्तु माहात्म्यं क्षेत्रस्योत्पत्तिरुत्तमा ॥ भूयः किमन्यदिच्छास्ति श्रोतुं वै द्विजसत्तमाः ॥ ११ ॥ ॥ सनत्कुमार उवाच ॥ ॥ एतत्ते ब्रह्मणो वाक्यं श्रुत्वा व्यास तथाविधम् ॥ वसिष्ठाद्याश्च मुनयः परं ध्यानमथो गताः ॥ १२ ॥ ध्यात्वा तु सुचिरं कालं तत्र वासे मनो दधुः ॥ साग्निहोत्राः सपत्नीका गताश्चावंतिमंडले ॥ १३ ॥ महाकालवनं दृष्ट्वा शिप्रां चैव महानदीम् ॥ श्मशानमूषरं चैव नदीं गन्धवतीं तथा ॥ १४ ॥ कोटितीर्थमुपस्पृश्य चक्रुर्वासं च तत्र वै ॥ स्मृत्वा तद्ब्रह्मणो वाक्यं रुचिस्तेषां तदाऽभवत् ॥ १५ ॥ अरुन्धत्या वसिष्ठश्च गमनं प्रति नोदितः ॥ उवाच तां महात्मासौ स्वां भार्यां मुनिसत्तमाः ॥ १६ ॥ महाकालः सरिच्छिप्रा गतिश्चैव सुनिर्मला ॥ उज्जयिन्यां विशालाक्षि वासः कस्य न रोचते ॥ १७ ॥ स्नानं कृत्वा नरो यस्तु महानद्यां हि दुर्लभम् ॥ महाकालं नमस्कृत्य नरो मृत्युं न शोचयेत् ॥ १८ ॥ मृतः कीटः पतंगो वा रुद्रस्यानुचरो भवेत् ॥ यत्रैषा श्रूयते मुक्तिः कथं सा त्यजते मया ॥ १९ ॥ एवं प्रजल्प्याथ मुनिप्रधानस्तत्रैव वासं सहसा चकार ॥ वनस्य व्युष्टिं परिकीर्तयंस्तु स्थितः सहैवात्र मुनिप्रधानैः ॥ १२० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये मंदाकिनीक्षेत्रमाहात्म्यवर्णनंनाम षड्विंशोऽध्यायः ॥ २६ ॥ ॥छ॥ ॥ सनत्कुमार उवाच ॥ ॥ योऽवंत्यामंकपादाख्ये पश्येद्रामजना

१ तृतीयः—इत्यस्य 'मौनसंस्थितः' इति पूर्वेण सम्बन्धः । २ विप्रः—जात्यभिप्रायेणैकवचनम—चतुर्विधा ये विप्रास्ते वृत्तिहीना भविष्यति—इति योजना ज्ञेया । ३ एव—इ० पा० । ४ अभिरुचिरम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



र्दनौ ॥ ययोर्दर्शनमात्रेण यमलोकं न पश्यति ॥ १ ॥ ॥ व्यास उवाच ॥ ॥ कथं तावंकपादाख्ये यातावत्र महामुने ॥ न पश्येद्यमलोकं स यद्यपि
ब्रह्महा भवेत् ॥ २ ॥ ॥ सनत्कुमार उवाच ॥ ॥ भारावतारणार्थाय देवौ रामजनार्दनौ ॥ अवतीर्णौ यदोर्वंशे दिव्यरूपौ महाद्युती ॥ ३ ॥
कंसं हत्वा सचाणूरमुग्रसेनं नराधिपम् ॥ अभिषिच्य स्वयं राज्ये यदुसिंह उवाच तम् ॥ ४ ॥ किं कार्यं ते मया ब्रूहि कर्तव्यं ते सुते हते ॥
एवमुक्तः स राजा वां उग्रसेनोऽब्रवीदिदम् ॥ ५ ॥ सर्वं संपत्स्यते कृष्ण भवतो हि न दुर्लभम् ॥ विज्ञाताखिलविज्ञानौ भवितारावुभावपि ॥ ६ ॥
गच्छेतमुज्जयिन्यां वै कृतविद्यौ भविष्यथः॥ ततः सांदीपनिं विप्रं जग्मतू रामकेशवौ॥७॥कण्ठस्थांश्चक्रतुर्वेदानाचारमखिलं च तौ॥ सरहस्यं धनुर्वेदं
ससंहारं तथैव च ॥८॥ अहोरात्रैश्चतुःषष्ट्या तदद्भुतमभूद्द्विज ॥ सांदीपनिरसंभाव्यं तयोः कर्मातिमानुषम् ॥ ९ ॥ विचिंत्य तौ तदा मेने प्राप्तौ चंद्र
दिवाकरौ ॥ ततः किंचित्स नोवाच स्नातुं तीर्थमथाययौ ॥१०॥ शिष्यैस्तु सहितो विप्रो महाकालवनेऽविशत् ॥ शिष्यैः सह प्रविष्टौ द्वौ तदा तौ रामके
शवौ ॥११॥ वन्दमानौ महाकालं स तं केशवमब्रवीत् ॥ त्वया नाथेन देवानां मानुष्यत्वे हि[3] तिष्ठता ॥ १२ ॥ सुखमासीच्च साधूनामज्ञानानां च सर्वदा ॥
जने पीडाकरा ये तु सदा वा बलदर्पिताः ॥१३॥ युवाभ्यां ते हताः सर्वे कंसप्रमुखतो नृपाः ॥ मुनिसिद्धसुरादीनां स्थितिः कार्या त्वयाऽनघ ॥१४॥ करि
ष्यामि तमित्युक्त्वा स नमस्य ततो ययौ ॥ दृष्ट्वा सांदीपनिं शिष्या ऊचुरेवं दिनेदिने ॥ १५ ॥ कस्य न श्रद्दधे तेषां वचस्त्वत्यद्भुतं यतः ॥ स्वयं
ययौ ततो द्रष्टुमाश्चर्यं शिष्यभाषितम् ॥ १६ ॥ ततस्तत्रोत्थितः शब्दः संश्लेषे च तथा तयोः॥ तावागतौ गृहं तत्र गुरुर्वचनमब्रवीत् ॥ १७ ॥ न वै
ज्ञातौ मया वीरौ यदुवृष्णिकुलोद्भवौ ॥ ततः सांदीपनिं कृष्णः कृतकृत्योऽब्रवीद्वचः ॥ १८ ॥ गुर्वर्थं किं ददामीति सह रामेण हर्षितः ॥ तच्छ्रुत्वा
वचनं हृद्यं गुरुः प्रोवाच हर्षितः ॥ १९ ॥ पुत्रमिच्छाम्यहं त्वत्तो यो मृतो लवणांभसि ॥ पुत्र एको हि मे जातः स चापि तिमिना हृतः ॥ २० ॥
प्रभासे तीर्थयात्रायां त्वमेव तमिहानय ॥ तथेति चाब्रवीत्कृष्णो रामस्यानुमते गतः ॥ २१ ॥ तं समुद्र उवाचेदं दैत्यः पंचजनो महान् ॥ तिमि
रूपेण तं बालं ग्रस्तवान्मयि संस्थितः ॥ २२ ॥ ततः पंचजनं हत्वा ग्राहरूपं महाबलम् ॥ तन्मध्यस्थं च जग्राह शंखं ग्रस्तो हि यः पुरा
॥ २३ ॥ जलेश्वरगृहात्तेन ग्राहेणातीव लीलया ॥ तस्योदरे यदा बालं नाप्तवांस्तु जनार्दनः ॥ २४ ॥ यमालयगतं मत्वा तदा वरुणमब्रवीत् ॥



१ अनेनैकेनैव श्लोकेन प्रश्नद्वयमत्र व्यासस्य सनत्कुमारं प्रति—तौ रामजनार्दनावत्र कथं यातावित्येकः प्रश्नः, यद्यपि ब्रह्महा भवेत्तथापि—केवलं रामजनार्दनदर्शनेन--कथं यमलोकं नैव पश्येत् । अत्र कीदृशं तद्दर्शनमाहात्म्यं तत्कथय--इति द्वितीयः प्रश्नः । २ वै—उग्रसेनः—इति पदच्छेदः । ३ मानुष्यत्वेन--इ० पा० । ४ तेषाम—शिष्याणां मध्ये कस्य—कस्यापि—इति योजना ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भगवन्यादसामीश रथो मे दीयतां महान् ॥ २५ ॥ पुराजिरे हता दैत्या दानवा बलदर्पिताः ॥ मया येन रथेनाद्य मह्यं स दीयतां रथः ॥ २६ ॥ न्यासभूतो रथो यस्ते विधृतो निहतारिणा ॥ मया धर्मं पुरस्कृत्य स दीयतामपांपते ॥ २७ ॥ येनाहवे प्रेतराजं जित्वा पश्यामि बालकम् ॥ एतच्छ्रुत्वा प्रहृष्टात्मा ज्ञात्वा कार्यार्थिनं हरिम् ॥ ददौ तु रथमक्षोभ्यं रणे तस्मै सुरासुरैः ॥ २८ ॥ ततो हरिः समालोक्य रथं रत्नपरिष्कृतम् ॥ द्वीपिचर्मपरीधानं वैयाघ्रपरिवारितम् ॥ २९ ॥ नानाचित्रविचित्रांगं गरुडध्वजराजितम् ॥ संयुक्तं शैब्यसुग्रीवपुष्पदंतबलाहकैः ॥ ३० ॥ अजेयं देवदेवेंद्रदानवासुरराक्षसैः ॥ अनेकायुधसंपूर्णं मणिविद्रुमभूषितम् ॥३१॥ सहस्रसूर्यप्रतिमं चारुवक्रचतुर्युगम् ॥ किंकिणीशतशोभाढ्यं घंटाचामरचं द्रिकम् ॥ ३२ ॥ संवर्ताकारविषमं खगेंद्रवरकेतनम् ॥ दृष्ट्वा कृष्णः सरामस्तु मुमुदे वीतविस्मयात् ॥ ३३ ॥ प्रदक्षिणमुपाकृत्य देवताभ्यः प्रणम्य च ॥ आरुरोह रथं विष्णुर्विमानं साग्रयोजनम् ॥ ३४ ॥ ततो जगाम त्वरितो जनार्दनो जगन्निवासो यमलोकमाश्रिताम् ॥ दिशं सहस्रैः किरणै र्वृतां पुरीं दध्मौ च शंखं परिगृह्य चाच्युतः ॥ ३५ ॥ तत्र प्रध्मापयामास शंखं शार्ङ्गधनुर्धरः ॥ तेन शब्देन वित्रस्ताः कृतांतालयवासिनः ॥ ३६ ॥ नरकांतर्गता मर्त्याः पापाचारपरायणाः ॥ सुखमापुः प्रसन्नाश्च वह्नयः कृष्णदर्शनात् ॥ ३७ ॥ शस्त्राणि कुंठतां प्रापुर्यंत्राणि विविधानि च ॥ विदीर्णानि तदा चासुर्देवदेवस्य दर्शनात् ॥ ३८ ॥ असिपत्रवनंनाम शीर्णपर्णमजायत ॥ रौरवंनाम नरकमभैरवमभूत्तदा ॥ ३९ ॥ अभैरवं भैरवाख्यं कुंभीपाकमवाचिकम् ॥ शृंगाटं शृंगसदृशं लोहसूच्यप्यसूचिका ॥ ४० ॥ दुस्तरा सुतरा जाता नदी वैतरणी नृणाम् ॥ नरकांते तदा जाते गते विश्वेश्वरे विभौ ॥ ४१ ॥ पापक्षयात्ततः सर्वे ते मुक्ता नारका नराः ॥ पदमव्ययमासाद्य दृष्ट्वा विष्णुं तमोऽपहम् ॥ ४२ ॥ विमानेषु सहस्रेषु ह्यारूढास्ते समंततः ॥ समीक्ष्य पुंडरीकाक्षं मुक्तास्ते सर्वपातकात् ॥ ४३ ॥ ततः शून्यं मुने जातं सर्वं निरयमंडलम् ॥ दर्शनात्तस्य देवस्य विष्णोर्विश्वस्वरूपिणः ॥ ४४ ॥ ततो दूताः कृतांतस्य कृष्णं च युद्धकारिणम् ॥ वारयामासुरत्युग्रा विशंतं नरकान्प्रति ॥ ४५ ॥ ॥ ॥ किंकरा ऊचुः ॥ ॥ मा वीरानेन मार्गेण रथमानय मानवन् ॥ प्रयांत्यधोगतिं पापात्परस्त्रीस्वापहारकाः ॥ ४६ ॥ यमादिष्टा नराः पापा येऽमोच्या वर्षकोटिभिः ॥ दृष्ट्वा त एव सद्यस्त्वां गताः स्वर्गमपावृताः ॥ ४७ ॥ एतच्छ्रुत्वा वचस्तेषां कृपया पीडितो भृशम् ॥ पुनः प्रोवाच मधुहा मोक्षायाहमुपागतः ॥ ४८ ॥ सर्वेषां स्वर्गदाताहं यमलोकनिवारकः ॥ अंजसा यमराड्दूता यमायाख्यात मे वचः ॥ ४९ ॥ एतच्छ्रुत्वा

१ खड्गधनुर्धरः--इ० पा० । २ अव्यग्राः--इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वचो दूताः सत्वरा यममागताः ॥ सर्वमाचक्षिरे वृत्तं यथा नारकमोक्षणम् ॥ ५० ॥ ततो यमो रुषाविष्टः प्राह तान्यमकिंकरान् ॥ यः कश्चिदा
गतो मर्त्यो मर्यादाभेदकृन्नरः ॥ ५१ ॥ तं गत्वा वारयध्वं वै गृहीत्वानीयतामिति ॥ अयं नरांतको यातु किंकरः सह किंकरैः ॥ ५२ ॥ एवमुक्तो
यमेनाथ किंकरः स नरांतकः ॥ गत्वा तं वारयामास वाग्भिरुग्राभिरच्युतम् ॥ ५३ ॥ यदा न वारितस्तस्थौ तदा क्रुद्धो नरांतकः ॥ तदा शरैरती
वोग्रैस्ताडितस्तेन केशवः ॥ ५४ ॥ बलदेवोपि समरे ताडितो विविधैः शरैः ॥ तावुभौ ताडितौ घोरैः समंताद्यमकिंकरैः ॥ ५५ ॥ आदाय
धनुषी दिव्ये जघ्नतुर्यमकिंकरान् ॥ बाणैरनेकसाहस्रैः क्रुद्धौ रामजनार्दनौ ॥ ५६ ॥ नरांतकोऽपि समरे बलेन बलिनार्दितः ॥ पपात गदया भिन्नो
मूर्ध्नि निर्यातलोचनः ॥ ५७ ॥ ततो नरांतके वीरे पतिते यमकिंकरे ॥ किंकराणामभूत्सैन्यमार्तं रणपराङ्मुखम् ॥ ५८ ॥ रामकृष्णाभ्यां ते दूता
हन्यमाना भयातुराः ॥ यमाय कथयामासुर्नरांतकस्तु पातितः ॥ ५९ ॥ ततो यमो ययौ क्रुद्धः समंतात्किंकरैर्वृतः ॥ प्राह ततो यमः क्रुद्धो नो
जितोहं पुरा परैः ॥ ६० ॥ ततो वादित्रनिर्घोषैस्तुमुलानकगोमुखैः[1] ॥ नानाडमरुकैश्चैव चित्रगुप्तैश्च गच्छति ॥ ६१ ॥ देवा विद्याधराः सिद्धा दृष्ट्वा
यांतं महाबलम् ॥ कृतांतस्य रणेऽक्षोभ्यं कामपालं जगत्पतिम् ॥ ६२ ॥ ततस्ते किंकराः सर्वे चित्रगुप्तेन नोदिताः ॥ रथमावृत्य बाणौघैः प्रविव्यधुः
समंततः ॥ ६३ ॥ बलं च केशवं संख्ये जघ्नतुस्ताबुभावपि ॥ रणे च विविधैर्बाणैश्चित्रगुप्तस्य पश्यतः ॥ ६४ ॥ विदार्य च सहस्राणि किंकराणां
समंततः ॥ कृतांतानीकिनीमध्ये कृतांत इव केशवः ॥ चचार रणदुर्धर्षः कामपालेन पालितः ॥ ६५ ॥ ततश्चित्रगुप्तो रणे किंकराद्यं विदीर्णं
निरीक्ष्यार्तनादं चकार ॥ ६६ ॥ शरैः पंचभिः कृष्णमायांतमाजौ जघानाष्टभिर्वक्त्रदेशे स भिन्नः[2] ॥ शरार्तो रथोपस्थ आसीत्तदार्तस्तमालोक्य
भिन्नं रणे नष्टसंज्ञम् ॥ ६७ ॥ रथं स्वं समादाय यातः कृतांतस्ततश्चित्रगुप्ते शरार्ते प्रसुप्ते ॥ रणे कीर्तिलुप्ते भयक्षोभयुक्तः स्वसैन्यैश्च युक्तो भयार्तो
निषण्णः ॥ ६८ ॥ प्रधानाश्च भग्ना विचित्राश्च भग्नास्ततश्चित्रगुप्तं निशम्याथ भग्नम् ॥ स कालस्तमायांतमालोक्य दूराद्धर सैन्यमादाय देवारि
शत्रुम् ॥ ६९ ॥ विनाशाय युध्यद्युगांते[3] प्रजानां यथा वाडवो ज्वालवृद्धः प्रवृत्तः ॥ तमायांतमालोक्य कालं करालं शरैरावृणोदंतकं कालकल्पैः
॥ ७० ॥ स कालः करालं समादाय दंडं मुमोचाच्युते पश्यतां देवतानाम् ॥ ततः कालदंडः प्रजानां विनाशो हरेः संनिकाशं समभ्याजगाम
॥ ७१ ॥ ततो देवगंधर्वयक्षा मुनींद्राः परं विस्मयं प्रापुरावीक्ष्य रामम् ॥ ज्वलंतं च जग्राह कालस्य दंडं स रामो वरं लीलयाऽनंतमूर्तिः ॥ ७२ ॥

१ मुरजानकगोमुखैः--इ०पा० । २ प्रभिन्ने--इ०पा० । ३ युध्यत्-अयुध्यत्-अडभावः परस्मैपदं चार्षं ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृहीते बलेनाहवे कालदंडे मोक्तुकामे पुनः कालनाशाय वै ॥ तूर्णमभ्येत्य तत्रांतरे पद्मजस्तं रणे वारयामास कृष्णं तदा ॥ ७३ ॥ मा मुंचे त्यब्रवीद्वेधाः कालं कालायुधं बल ॥ त्वया बलवता वीर चराचरधरा धरा ॥ ७४ ॥ धार्यते शिरसा देव संसारे नास्ति ते समः ॥ त्वया विश्वपति र्विष्णुरुत्संगेन सदोह्यते ॥७५॥ कोऽन्योऽस्ति त्वत्समो राम यो जगद्दहने क्षमः॥ जगत्स्रष्टा जगद्भोक्ता जगद्धर्ता जगत्पतिः ॥७६॥ पाल्यते यत्त्वया सो पि विष्णुर्विश्वैकनायकः ॥ कस्ते स्तुतिकरोऽस्तीह को गुणान्वेत्तुमर्हति ॥ ७७ ॥ ततो वयं त्वदंकस्थविष्णुनाभिभवा यतः ॥ इत्युक्त्वा बलदेवं च वासुदेवं पुनर्वचः ॥ ७८ ॥ उवाच चतुरास्यस्तु स्तुतिपूर्व वृतः सुरैः ॥ कृष्णकृष्ण करालस्य कालस्यास्य कृपां कुरु ॥ ७९ ॥ यतो भवंतमायांतं विष्णुं विश्वैकनायकम् ॥ वेत्ति नायं जगन्नाथं नरकार्णवतारकम् ॥ ८० ॥ त्वया वै भगवन्पूर्वं यमः संस्थापितः पदे ॥ नृणां दुष्कृतकर्तॄणां नर काय यमः प्रभो ॥ ८१ ॥ तस्मादस्य जगन्नाथ क्षम्यतां पुरुषोत्तम ॥ विभो कृपां कुरुष्वास्य ब्रूहि यत्ते विवक्षितम् ॥ ८२ ॥ एतच्छ्रुत्व ऽब्रवी त्कृष्णो धातः शृणु गुरोर्मम ॥ सांदीपनेः समानीतः सुतस्तेनागताविह ॥ ८३ ॥ समर्प्यतां गुरुश्रेष्ठ श्रेष्ठाय गुरुदक्षिणा ॥ आवाभ्य वै प्रतिज्ञाता तस्मात्सा पाल्यतां विभो ॥ ८४ ॥ एतत्पितामहः श्रुत्वा यमं समरनिर्जितम् ॥ समाहूयाब्रवीद्विष्णुर्यद्ब्रवीति कुरुष्व तत् ॥ ८५ ॥ तच्छ्रुत्वा धर्म राजस्तु विरंचिमिदमब्रवीत् ॥ भगवन्विश्वकृल्लोके नैष मार्गस्त्वया कृतः ॥ ८६ ॥ यमलोकमनुप्राप्य कायहीनः शरीरवान् ॥ यत्कायरहितो याति नैतदत्र प्रपद्यते ॥ ८७ ॥ तच्छ्रुत्वा हि पुनर्ब्रह्मा विश्वस्यास्य विभुः स्वयम् ॥ विश्वकृद्विश्वहृद्यस्माद्यदिच्छति करोतु तत् ॥ ८८ ॥ तस्मा दर्पय पुत्रं त्वं मुनेः सांदीपनेश्च यः ॥ नरके यं पुनः कृत्वा तं चानय महामते ॥ ८९ ॥ तच्छ्रुत्वा धर्मराजस्तु पुत्रं सांदीपनेस्तथा ॥ ससर्ज बाल रूपं च तदात्मानं तदुद्भवम् ॥ ९० ॥ अर्पयामास कृष्णस्य बालं रूपसमन्वितम् ॥ स सर्वदेवतानां च तदद्भुतमिवाभवत् ॥ ९१ ॥ ततः प्राप्य गुरोः पुत्रं प्रभुः प्रीतः प्रजापतिम् ॥ प्राह प्राप्तो मया ब्रह्मन्स्वरूपो द्विजदारकः ॥ ९२ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अद्यप्रभृति लोकेश देशे मच्चरणां किते ॥ अवंत्यामंकपादाख्ये मृता नेक्षंति ते यमम् ॥ ९३ ॥ महाकालपुरे देवमाद्यं वै पुरुषोत्तमम् ॥ विश्वरूपं च गोविंदं शंखोद्धारं च केश वम् ॥ ९४ ॥ ये पश्यंति कुशस्थल्यामेतेषां मूर्तिपंचकम् ॥ ते नरा न गमिष्यंति विरंचे निरयं क्वचित् ॥ ९५ ॥ तथैवागमनादत्र मम रामस्य ना रकाः ॥ विमुक्तास्ते त्वघाद्घोरात्प्राप्नुवंत्वखिला दिवम् ॥ ९६ ॥ इत्युक्ते वचने वेधाः प्रोवाच प्रीतिमान्हरिम् ॥ यत्त्वयोक्तं वचः कृष्ण तदस्तु सकलं सदा ॥ ९७ ॥ ये च त्वामादिपुरुषं प्रथमं पुरुषोत्तमम् ॥ प्रणम्य पश्चाद्द्रक्ष्यंति स्नात्वा शिवसरस्यपि ॥ ९८ ॥ अघोज्वालं महाकालं सोऽश्वमेध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

फलं लभेत् ॥ एवमुक्तो हरिः पुत्रमादाय बलिना सह ॥ ९९ ॥ संमान्य वेधसं कालं समारोहद्रथं ततः ॥ शंखमापूरयामास कृतकार्यो जनार्दनः ॥ १०० ॥ मोक्षाय निरयस्थानां नृणां वै पापकर्मणाम् ॥ ततस्ते शंखशब्देन स्मरणेनाच्युतस्य च ॥ १ ॥ दिव्यान्विमानानारुह्य दिवमेवाखिला गताः ॥ शून्यं तन्मंडलं जातं नारायणसमागमे ॥ २ ॥ कालोऽपि दंडमासाद्य बलदेवात्पुनः पुरम् ॥ प्रविवेश ततो धाता तत्रैवांतरधीयत ॥ ३ ॥ कृष्णोपि बलवान्धीरः प्राप्त उज्जयिनीं पुरीम् ॥ बलदेवसहायस्तु सत्वरेणाशुगामिना ॥ ४ ॥ ततः सांदीपनेः पुत्रमर्पयामास केशिहा ॥ गुरवे यत्प्रतिज्ञातं स तस्मादनृणोऽभवत् ॥ ५ ॥ एवं सांदीपनिः पुत्रं दृष्ट्वा च पुनरागतम् ॥ नागरास्तत्र राजा च विस्मयं परमं ययुः ॥ ६ ॥ तौ वीरावर्चयामासुर्मत्वा देवोत्तमोत्तमौ ॥ सांदीपनिरुवाचेदं तौ च रामजनार्दनौ ॥ ७ ॥ इह स्थास्यति वां कीर्तिर्यावदाभूतसंप्लवम् ॥ स्थाने मदीय एतस्मिंस्तिष्ठंतौ यदुनंदनौ ॥८॥ न विज्ञातौ मया वीरौ यदुवृष्णिकुलोद्भवौ ॥ नरनारायणौ देवौ देवकार्यार्थमागतौ ॥९॥ नाल्पमृत्युर्भवेत्तस्य न व्याधिर्न च दुर्गतिः ॥ प्राप्य ह्यत्र च यः स्नाति स्वर्गलोके स मोदते ॥११०॥ शंखिनं विश्वरूपं च गोविंदं चक्रिणं तथा ॥ चत्वारि विष्णुक्षेत्राणि अंकपादस्तु पंचमः ॥ ११ ॥ एषां यात्रां प्रवक्ष्यामि यथा कार्या मनीषिभिः ॥ मंदाकिन्यां कृतस्नानो दृष्ट्वा रामजनार्दनौ ॥ १२ ॥ शंखोद्धारे ततः स्नात्वा प्रपश्येद्धलकेशवौ ॥ स्नानं कृत्वा ततः कुंडे गोविंदं च समर्चयेत् ॥ १३ ॥ चक्रिणं च ततो दृष्ट्वा देवदेवं च शंखिनम् ॥ अंकपादौ ततो दृष्ट्वा विश्वरूपं ततो व्रजेत् ॥ १४ ॥ तस्याग्रतः करीकुंडे स्नानं कृत्वा यथाविधि ॥ पुनस्तेन प्रकारेण प्रपश्येद्धलकेशवौ ॥ १५ ॥ स्नानं कृत्वा ततः कुंडे गोविंदं च समर्चयेत् ॥ तथैव चक्रिहलिनौ दृष्ट्वा तं केशवं व्रजेत् ॥ १६ ॥ शिप्रांभसि नरः स्नात्वा भक्त्या संपूज्य केशवम् ॥ परावृत्यांकपादे तु तां रात्रिं गमयेच्छुचिः ॥ १७ ॥ प्रातर्वै भोजयेत्तत्र पंच विप्रांश्च सुव्रतान् ॥ गोदक्षिणां शंखिने तु विश्वरूपाय वै हयम् ॥ १८ ॥ गोविंदाय गजं दद्यात्सर्वं दद्याच्च केशवे ॥ उपोष्य द्वादशीं विप्र योंऽकपादं समर्चयेत् ॥ १९ ॥ गंधपुष्पैश्च धूपैश्च नैवेद्यैर्विविधैस्तथा ॥ श्राद्धं यः कुरुते सर्वं तस्य पुण्यफलं शृणु ॥ १२० ॥ कुलानां शतमुद्धृत्य विमानैः सर्वकामिकैः ॥ गीतनृत्यादिभोगैश्च वैकुंठे सुचिरं वसेत् ॥ २१ ॥ पुनर्लोकमिमं प्राप्य पवित्रे जायते कुले ॥ प्राप्नोत्यनंतसंतानं विष्णुलोकं पुनर्व्रजेत् ॥१२२॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखण्डेऽवंतीक्षेत्रमाहात्म्येंऽकपादमाहात्म्यवर्णनंनाम सप्तविंशोऽध्यायः ॥२७॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ अथान्यं संप्रवक्ष्यामि देवं

१ अपृच्छद्वेधसं देवम्--इ०पा० । २ तन्मंडलम्--यमलोकः--इत्यर्थः । ३ वीरः--इ० पा० । १ केशवौ--इ०पा० ।



CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रैलोक्यविश्रुतम् ॥ चंद्रादित्यमिति ख्यातं चंद्रादित्यार्चितं पुरा ॥१॥ यस्तं समर्चयेद्देवं सुरासुरनमस्कृतम् ॥ गंधपुष्पैस्तथा धूपैर्नैवेद्यैर्विविधैस्तथा[1] ॥ २ ॥ चंद्रादित्यादिसालोक्यं प्रयाति सर्वकामिकम् ॥ विमानैः सूर्यसंकाशैर्यावच्चंद्रदिवाकरौ ॥ ३ ॥ ॥ इति चन्द्रादित्यमाहात्म्यम् ॥ ॥ सनत्कुमार उवाच ॥ ॥ करभेशं ततो गच्छेद्देवदेवं महेश्वरम् ॥ यस्य दर्शनमात्रेण कुयोनौ नैव जायते ॥ ४ ॥ ॥ व्यास उवाच ॥ ॥ करभेशमहं देवं श्रोतुमिच्छामि तत्त्वतः ॥ कथं देवः समुत्पन्नः करभेशेतिसंज्ञितः ॥ ५ ॥ ॥ सनत्कुमार उवाच ॥ ॥ पुरा देवगणैः सार्धं देवदेवो महेश्वरः ॥ वनेऽस्मिन्क्रीडयामास परमाह्लादसंयुतः ॥ ६ ॥ क्रीडन्बहुतिथे काले शंकरः करभोऽभवत् ॥ ज्ञायते च स नो देवैः शंकरः करभाकृतिः ॥ ७ ॥ अन्वेषयंति ते देवास्ततो विस्मयसंयुताः ॥ न पश्यंति यदा तत्र तं देवं शूलपाणिनम् ॥ ८ ॥ देवैः पृष्टस्ततो ब्रह्मा क्वास्ति देवो महेश्वरः ॥ ध्यात्वाथ ब्रह्मणा दृष्टो गुप्तो योगप्रभुर्हरः ॥ ९ ॥ देवैः सार्धं ततो ब्रह्मा पप्रच्छ गणनायकम् ॥ न दृष्टः शंकरोऽस्माभिर्गतः कुत्र विनायक ॥ १० ॥ कथयस्व नमस्तुभ्यं दास्यामो लड्डुकान्विभो ॥ एवमुक्तस्तदा हृष्टः प्रोवाच गणनायकः ॥ ११ ॥ करभोऽयं महादेवो दृश्यते विबुधोत्तमाः ॥ श्रुत्वा चैवं वचो देवाः प्रहृष्टाः करभं ययुः ॥ १२ ॥ ज्ञातोऽस्माभिर्महादेव जल्पंत इति ते स्वयम् ॥ गत्वा चैव ततः सर्वे चतुर्दिक्षु स्थिताः स्वयम् ॥१३॥ विचिंत्येति कथं ज्ञातः शंकरो विस्मयं गतः ॥ त्यक्त्वाथ कारभं रूपं देवदेवो महेश्वरः ॥ १४ ॥ लिंगमुत्पादयामास दिव्यं यत्करभेश्वरम् ॥ ते दृष्ट्वाऽथ सुराः सर्वे साष्टांगप्रणतिस्थिताः ॥ १५ ॥ ततःप्रभृति विख्यातः शंकरः करभेश्वरः ॥ कोटितीर्थादुत्तरस्मिन्स्थापयामास विघ्नपम् ॥ १६ ॥ स्वनाम्ना प्रथितं चक्रे करभं चातिपूजितम् ॥ स्नात्वा तत्र शुचिर्भूत्वा यस्तमर्चयते शिवम् ॥ १७ ॥ गंधपुष्पैश्च नैवेद्यैः शृणु तेषां च यत्फलम् ॥ सर्वमेधेषु यत्पुण्यं सर्वदानेषु यत्फलम् ॥ १८ ॥ ततोऽधिकं स लभते नात्र कार्या विचारणा ॥ महाकालं ततो गच्छन्संपूर्णं फलमाप्नुयात् ॥ १९ ॥ ततः प्रसिद्धो लोकेऽस्मिन्नृद्धिदः करभेश्वरः ॥ २० ॥ ॥ इति करभेश्वरमाहात्म्यम् ॥ ॥ ७ ॥ ॥ ॥ सनत्कुमार उवाच ॥ ॥ लड्डुकैश्च ततो देवैर्विघ्ननाथः समर्चितः ॥ तदाप्रभृति विख्यातो विघ्नेशो लड्डुकप्रियः ॥ २१ ॥ यः समर्चयते भक्त्या तस्य विघ्नो न जायते ॥ तस्मै ददाति संतुष्टः सर्वान्कामान्विनायकः ॥ २२ ॥ निराहारश्चतुर्थ्यां[2] च स्नात्वा शिप्रां[3] विशेषतः ॥ रक्तांबरधरो भूत्वा रक्तपुष्पैर्विनायकम् ॥ २३ ॥ रक्तचंदनतोयेन मंत्रैः स्नपनपूर्वकम् ॥ चंदनेनापि रक्तेन तं विलेप्य प्रपूजयेत् ॥ २४ ॥ धूपं दद्यात्तथा

१ अपि–इ० पा० । २ नक्ताहारः–इ० पा० । ३ शिप्राम्–शिप्रायाम्–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

दिव्यं सुगंधं लड्डुकप्रिये ॥ नैवेद्ये लड्डुका देया आज्यखंडपरिप्लुताः ॥ २५ ॥ न तस्य जायते व्याधिर्भयं विघ्नं कदाचन ॥ लभते च सदाभीष्टं मृतः शिवपुरं व्रजेत् ॥ २६ ॥ अवतीर्णः पुनर्लोके जायते वसुधाधिपः ॥ मतिमान्पुत्रवाञ्छूरो नात्र कार्या विचारणा ॥ २७ ॥ ॥ इति गणेशमाहात्म्यम् ॥ ॥ सनत्कुमार उवाच ॥ ॥ कुसुमेशं सुरद्वारे सुरासुरनमस्कृतम् ॥ श्रद्धया पूजयेद्यस्तु शिवलोके स मोदते ॥ २८ ॥ जयेश्वरं तु यः पश्येद्देवदेवं महेश्वरम् ॥ जयी स्यात्सर्वकार्येषु शिवलोकं स गच्छति ॥ २९ ॥ शिवद्वारे शिवं लिंगमर्चयेन्मानवो यदि ॥ त्रिदिवं याति यानेन गाणपत्यं च विंदति ॥ ३० ॥ अथान्यं संप्रवक्ष्यामि मार्कंडेश्वरमुत्तमम् ॥ मार्कंडेयो मुनिर्यत्र तप्तवान्सुमहत्तपः ॥ ३१ ॥ दृष्ट्वा तं शंकरं देवं वाजपेयफलं लभेत् ॥ सर्वपापविशुद्धात्मा चिरायुर्जायते नरः ॥ ३२ ॥ शृणु व्यास महास्थानं यस्यां पुर्यामनुत्तमम् ॥ यत्र तिष्ठति सा देवी ब्रह्माणी हंसवाहिनी ॥ ३३ ॥ भक्तानां पूरयेदाशां पुत्रवत्परिपालयेत् ॥ यथा माता तथा देवी दृष्टा शांतिपरैरपि ॥ ३४ ॥ अर्चिता ब्रह्मणा सा तु स्तुता देवी सुरोत्तमैः ॥ अर्चयेद्गंधपुष्पैश्च नैवेद्यैः सर्वसिद्धिदाम् ॥ अपि या ब्रह्मणः पूर्वमभूदेव सुसिद्धिदा ॥ ३५ ॥ यः स्नात्वा ब्रह्मसरसि पश्येद्ब्रह्मेश्वरं शिवम् ॥ भवबंधविनिर्मुक्तो ब्रह्मलोके स मोदते ॥ ३६ ॥ अथान्यां संप्रवक्ष्यामि यज्ञवापीमनुत्तमाम् ॥ यत्र वै ब्रह्मणा पूर्वमिष्टो यज्ञः सदक्षिणः ॥ ३७ ॥ यज्ञार्थं यत्कृतं कुंडं यज्ञवापी च सा स्मृता ॥ पशुश्च पतितो यस्मात्तस्मात्पशुपतिः स्मृतः ॥ ३८ ॥ तस्यां स्नात्वा शुचिर्भूत्वा पश्येत्पशुपतिं तु यः ॥ उद्धरेत्स पितॄन्व्यास पशुयोनिगतानपि ॥ ३९ ॥ सुवर्णमणिमुक्ताद्यैर्विमानैः सर्वकामगैः ॥ याति रुद्रपुरं दिव्यं यत्र देवो महेश्वरः ॥ ४० ॥ रूपकुंडे नरः स्नात्वा सुरूपो जायते नरः ॥ स्वर्गे स देवगंधर्वैः स्पृहणीयवपुर्भवेत् ॥ ४१ ॥ कुंडे स्नात्वाप्यनंगे यः शुचिर्भूत्वा समाहितः ॥ पश्येच्च देवदेवेशमनंगेनार्चितं पुरा ॥ कामं स लभतेऽभीष्टं मृतो याति शिवालयम् ॥ ४२ ॥ आषाढे तु सिताष्टम्यां जागरं यस्तु कारयेत् ॥ केदारे यत्फलं प्रोक्तं तत्समानमवाप्नुयात् ॥ ४३ ॥ करीकुंडे नरः स्नात्वा विश्वरूपं तु योऽर्चयेत् ॥ मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ ४४ ॥ अजागंधे नरः स्नात्वा दृष्ट्वा ब्रह्मेश्वरं शिवम् ॥ ब्रह्महत्यासमं पापं तत्क्षणात्संव्यपोहति ॥ ४५ ॥ चक्रतीर्थे नरः स्नात्वा चक्रस्वामिनमर्चयेत् ॥ जायते स नरो व्यास चक्रवर्ती सदा भुवि ॥ ४६ ॥ सिद्धेश्वरं यदा पश्येत्स्नात्वा सुविधिपूर्वकम् ॥ कामिकेन विमानेन रुद्रलोकं स गच्छति ॥ ४७ ॥ ॥ इति यज्ञवापीमाहात्म्यम् ॥ ॥ सोमवत्यां नरः स्नात्वा यः सोमेश्वरमर्चयेत् ॥ सोमवन्निर्मलो भूत्वा सोमलोके समोदते ॥ ४८ ॥ ॥ व्यास उवाच ॥ ॥ तीर्थं सोमवतीनाम लिंगं सोमेश्वरं तथा ॥ अभूदेतत्कथं नाम श्रोतुमिच्छामि तत्त्वतः ॥ ४९ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ सनत्कुमार उवाच ॥ ॥ शृणु व्यास यथोत्पन्नं सोमतीर्थं सुशोभनम् ॥ सोमेश्वरं यथा लिंगमेतत्सत्यं वदामि ते ॥५०॥ यो देवो भगवान्सोमो लोकस्याप्यायनं परम् ॥ आसीत्तस्य पुरा व्यास पिता विप्रो महातपाः ॥ ५१ ॥ अवन्त्यां च महाभागो योऽत्रिर्नामा तपोनिधिः ॥ वर्षाणां त्रीणि दिव्यानि सहस्राणि तपो महत् ॥ ५२ ॥ ऊर्ध्वबाहुः स वै तेपे ब्रह्मध्यानपरायणः ॥ ऊर्ध्वं गतं ततो व्यास ब्राह्यं तेजो महात्मनः ॥ ५३ ॥ नेत्राभ्यां तेन सुस्राव भासयच्च दिशो दश ॥ तेजस्तत्सहसा दृष्ट्वा दिशो दशोद्धतं स्वतः ॥ ५४ ॥ दिशश्च तद्यदा व्यास सर्वा धर्तुं न चाशकन् ॥ असुस्रवत्तदा दिग्भ्यस्तद्धि तेजोतिदुःसहम् ॥ ५५ ॥ लोकांश्च भासयत्सर्वान्धरण्यां वै पपात ह ॥ सोमो जातस्ततस्तेन शीतांशुश्च[1] जनप्रियः ॥ ५६ ॥ वारि सोमात्समुत्पन्नं व्यास तेनैव तेजसा ॥ प्रविष्टा सा[2] नदीं शिप्राममृतेनातिपूरिता ॥ ५७ ॥ ततः[3] सोमवती शिप्रा विख्याता सर्वसिद्धिदा ॥ सोमयुक्तां नदीं शिप्रां दृष्ट्वा पापं व्यपोहति ॥ ५८ ॥ ख्याता च त्रिषु लोकेषु पापिनां पुण्यदायिनी ॥ ब्रह्महा वा सुरापो वा स्तेयी वा गुरुतल्पगः ॥ ५९ ॥ चत्वारोऽप्यत्र पापेन मुच्यंते दर्शनाद्ध्रुवम् ॥ अमासोमौ यदा युक्तौ सोमवत्यां तदा मुने ॥ ६० ॥ स्नानं दानं च यो धीमाञ्जपं होमं समाचरेत् ॥ अक्षयं तस्य तत्सर्वं यावच्चंद्रदिवाकरौ ॥ ६१ ॥ तिलोदकप्रदानेन पिंडदानेन कारिता ॥ अकाले कालिकी तृप्तिः पितणां च यतो मता ॥ ६२ ॥ सर्वत्र दुर्लभा सि[4]प्रा सोमं सोमग्रहस्तथा ॥ सोमेश्वरः सोमवारः सकाराः पंच दुर्लभाः ॥ ६३ ॥ शिप्रासोमजलं व्यास कोटितीर्थफलप्रदम् ॥ अमासोमसमायोगे पितृतीर्थसमं स्मृतम् ॥ ६४ ॥ अमायां सोमवारश्चेद्व्यतीपातो यदा भवेत् ॥ शतगुणं गयायास्तु सोमवत्यां प्रकीर्तितम् ॥ ६५ ॥ एवं सोमवतीतीर्थं जातमत्र महामुने ॥ सोमं दृष्ट्वाथ पतितं क्षितौ ब्रह्मा जगद्गुरुः ॥ ६६ ॥ रथे तं स्थापयामास लोकानां हितकाम्यया ॥ स[5] तु वेदमयो व्यास धर्माक्षः सत्यसंग्रहः ॥ ६७ ॥ युक्तो वाजिसहस्रेण ब्रह्मणा प्रेरितस्तदा ॥ दृष्ट्वा सोमं ततो देवा रथे तं ब्रह्मणा युतम् ॥ ६८ ॥ तुष्टुवुः सर्वभावेन हृष्टाः सर्वे समाहिताः ॥ तस्य संस्तूयमानस्य तेजः सोमस्य भास्वरम् ॥ ६९ ॥ आप्यायमानं त्रीँल्लोकान्पपात धरणीतले ॥ ब्रह्मा तेन रथेनाथ सागरांतां वसुन्धराम् ॥ ७० ॥ त्रिःसप्तकृत्वोऽतिशयाच्चकाराङ्घ्रिप्रदक्षिणम् ॥ तस्य तत्पतितं तेजो व्यास सोमस्य शीतलम् ॥ ७१॥ तदेवौषधयो दिव्या जाता भुवि सुनिर्मलाः ॥

१ शीतांशुश्च—इ० पा० । २ यद्वारि सोमात्समुत्पन्नं सा—नदी—जातेति—पूर्वपरामर्शः । ३ ततः---ततः प्रभृति--इत्यर्थः । ४ सिप्रा--इत्यत्र शिप्रा 'शब्दे' शकारस्य तालव्यत्वेऽपि सकारपंचकगणनानुगुण्येन--दंत्यादिः—'सिप्रा'--इति पाठो मूलकृतात्राङ्गीकृतः—इति सुधीभिरवधेयम् । ५ स तु—सः रथः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



याभिर्धार्यो ह्ययं लोकः प्रजाश्चैव चतुर्विधाः ॥ ७२ ॥ तुष्टोऽथ भगवान्सोमो जगतेः सर्वदा मुने ॥ दशवर्षसहस्राणि तेपेऽतिदुःसहं तपः ॥ ७३ ॥
ततस्तस्मै ददौ वाक्यं ब्रह्मा लोकपितामहः ॥ बीजौषधानि विप्राणां सोमो राजा बभूव ह ॥ ७४ ॥ सप्तविंशतिं सोमाय दाक्षायणीर्महाव्रताः ॥
पत्नीः प्राचेतसो दक्षो ददौ नक्षत्रसंज्ञकाः ॥ ७५ ॥ स तत्प्राप्य महद्राज्यं सोमो भार्यायुतस्तदा ॥ समारेभे राजसूयं सहस्रशतदक्षिणम् ॥ ७६ ॥
होता च भगवानत्रिरध्वर्युर्भगवान्भृगुः ॥ हिरण्यगर्भश्चोद्गाता ब्रह्मा ब्रह्मत्वमेयिवान् ॥ ७७ ॥ सदस्यो भगवान्विष्णुः सनकादिमुखैर्युतः ॥
ददौ स दक्षिणां सोमस्त्रीँल्लोकान्सुसमाहितः ॥ ७८ ॥ सिनीवाली कुहूश्चैव धृतिः पुष्टिः प्रभा वसुः ॥ कीर्तिर्धृतिश्च लक्ष्मीस्तं देव्यो दिव्याः सिषेविरे
॥ ७९ ॥ प्राप्यावभृथमव्यग्रः सर्वदेवर्षिपूजितः ॥ अतीव राजते चन्द्रो दशधा भासयन्दिशः ॥ ८० ॥ तस्य तत्प्राप्य दुष्प्राप्यमैश्वर्यमृषिसं
स्कृतम् ॥ विबभ्राम मतिर्व्यास विनयाद्यमपास्य च ॥ ८१ ॥ बृहस्पतेस्तदा भार्यां तारानाम्नीं यशस्विनीम् ॥ जहार तमसा साध्वीमवमान्यां
गिरःसुतम् ॥ ८२ ॥ वाच्यमानस्तदा सोमो देवैर्देवर्षिभिस्तथा ॥ नैव व्यसर्जयत्तारां तस्मा आंगिरसाय च ॥ ८३ ॥ बृहस्पतेस्ततः पक्षं
शक्रो जग्राह कोपतः ॥ स हि शिष्यो महातेजा गुरोः पूर्वं बृहस्पतेः ॥ ८४ ॥ ततो युद्धमभूत्तत्र सुघोरं शक्रसोमयोः ॥ देवानां दानवानां च व्यास
त्रासकरं महत् ॥ ८५ ॥ सर्वे भीतास्ततो देवा ब्रह्माणं शरणं गताः ॥ अग्रतो ब्रह्मणो युद्धं कथितं शक्रसोमयोः ॥ ८६ ॥ देवानां वचनं श्रुत्वा सार्द्धं
देवैः पितामहः ॥ आगत्य युद्धभूमिं सोऽवारयद्देवदानवान् ॥ ८७ ॥ वारितास्ते स्थितास्तत्र युद्धं त्यक्त्वा सुरासुराः ॥ तारामादाय स तदा ददा
वांगिरसे द्विजे ॥ ८८ ॥ तामंतःप्रसवां दृष्ट्वा प्राह भार्यां बृहस्पतिः ॥ मदीयायां न ते योन्यां गर्भो धार्यः कथंचन ॥ ८९ ॥ उत्ससर्ज ततस्तारा
कुमारं देवरूपिणम् ॥ इषीकास्त्रं समासाद्य ज्वलंतमिव पावकम् ॥ ९० ॥ स तेजो जातमात्रोऽपि देवानामाक्षिपच्छिशुः ॥ ततः संशयमापन्ना
ऊचुस्तारां दिवौकसः ॥ ९१ ॥ कस्यायं ब्रूहि सुभगे सोमस्याथ बृहस्पतेः ॥ नाचचक्ष तु देवानां वेधाः पप्रच्छ तां पुनः ॥ ९२ ॥ यदत्र सत्यं
तद्ब्रूहि तारे कस्य सुतो ह्ययम् ॥ सा प्रांजलिरुवाचेदं ब्रह्माणं वरदं विभुम् ॥ ९३ ॥ सोमस्येति रहः सोऽयं कुमारो देवसंनिभः ॥ सोमस्य तं
सुतं ज्ञात्वा परिष्वज्य पितामहः ॥ ९४ ॥ बुध इत्यकरोन्नाम तस्य पुत्रस्य वै तदा ॥ परदारापहाराच्च यत्पापं तेन दुःसहम् ॥ ९५ ॥ तेन
सोमोऽभवत्कुष्ठी क्षयरोगयुतस्तदा ॥ ततो राज्ये स्वकं पुत्रं स्थापयित्वा यथाविधि ॥ ९६ ॥ अवन्तीमाजगामाशु सोमो देवदिदृक्षया ॥

१ वृतः—इ० पा० । २ याच्यमानः—इति पाठश्चेदपि समीचीनः । परं सर्वेषु पुस्तकेषु मूलस्थ एव पाठो वर्तते । वाच्यमानः—निन्द्यमानः । ३ आंगिरसे—आंगिरसाय—इति चतुर्थ्यर्थे सप्तमी ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सोमाहे सोमवत्यां च अमायोगे जितेंद्रियः ॥ ९७ ॥ स्नात्वा संपूजयामास सोमः सोमेश्वरं ततः ॥ तस्य भक्त्या च सन्तुष्टः प्राह सोमं महेश्वरः ॥ ९८ ॥ मत्प्रसादाद्वपुः कांतं तव सोम भविष्यति ॥ सोमेश्वरमिति ख्यातं[1] भुक्तिप्रदायकम् ॥ ९९ ॥ एवं व्यास तु[2] तत्तीर्थं लिंगं चैवाति दुर्लभम् ॥ कथितं तथ्यभावेन मया तुष्टेन सांप्रतम् ॥ १०० ॥ श्रावणं प्राप्य यो मासं सोमनाथं जितेंद्रियः ॥ नित्यं पश्येन्नरो व्यास तस्य पुण्यफलं शृणु ॥ १०१ ॥ सौराष्ट्रे सोमनाथस्य पूजायाः प्रत्यहं फलम् ॥ लभते स नरो व्यास नात्र कार्या विचारणा ॥ १०२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये सोमवतीतीर्थमाहात्म्यवर्णनंनामाष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ तीर्थस्याऽनरकस्यास्य माहात्म्यं शृणु सांप्रतम् ॥ तीर्थे चानरके स्नात्वा दृष्ट्वा देवं महेश्वरम् ॥ न पश्येन्नरकं क्वापि यद्यपि ब्रह्महा भवेत् ॥ १ ॥ ॥ व्यास उवाच ॥ ॥ कियंतो नरकास्तात कस्मिन्स्थाने प्रतिष्ठिताः॥ पतन्ति केन पापेन पापिनस्तेषु दुःखिताः ॥ २ ॥ तत्कथं प्राणिनस्तत्र गच्छन्ति पापकारिणः ॥ एतत्सर्वं समाख्याहि यदि तुष्टोऽसि मे प्रभो ॥ ३ ॥ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणुष्व नरकान्व्यास यावन्तो यत्र संस्थिताः ॥ न लभ्यंते[3] यथा चैते सत्यमेतद्ददामि ते ॥ ४ ॥ पातालनिलयाः सर्वे विख्याता दुःखदाः सदा ॥ पुण्यप्लावेन ते सर्वे तिर्यग्यांति स्वकर्मभिः ॥ ५ ॥ रौरवः सूकरो रौद्रस्तालो[4] विनशकस्तथा ॥ तप्तकुम्भस्तु तप्तायो महाज्वालस्तथैव च ॥ ६ ॥ कुंभीपाकः क्रकचनस्तथा देवातिदारुणः ॥ कृमिभुक्तिश्च रक्ताख्यो लालाभक्षश्च गंडकः ॥ ७ ॥ अधोमुखश्चास्थिभंगो यंत्रपीडनकस्तथा ॥ संदंशो रुधिरांगश्च श्वभोज्यश्च कुभोजनः ॥ ८ ॥ इत्येवमादयः सर्वे नरका भृशदारुणाः ॥ यमस्य विषये संतिस्तुता हि भयदायिनः ॥९॥ पतंति पुरुषास्तेषु पापकर्मरताश्च ये ॥ पतिताश्च प्रपच्यंते[5] नराः कर्मानुरूपतः ॥१०॥ यातनाभिर्विचित्राभी रौद्रकर्मक्षयाद्वशम् ॥ सुगाढं हस्तयोर्बद्धास्तप्तशृंखलया नराः ॥ ११ ॥ महावृक्षाग्रशृंगेषु लंब्यंते यमकिंकरैः ॥ शोचंतः स्वानि कर्माणि तूष्णीं तिष्ठंति निश्चलाः ॥ १२ ॥ अग्निवर्णैः शंकुभिश्च लोहदंडैः सकंटकैः॥ हन्यंते किंकरैर्घोरैः समंतात्पापकारिणः ॥ १३ ॥ तत्तत्क्षणात्प्रदीप्तेन वह्निना च विशेषतः ॥ समंततः प्रक्षिप्यंते कृत्ताश्च जर्जरीकृताः ॥ १४ ॥ कूटसाक्षी तथाऽसम्यक्पक्षपातेन यो वदेत् ॥ यश्चान्यदनृतं ब्रूयात्स नरो याति रौरवम् ॥ १५ ॥ सुरापो ब्रह्महा हर्ता सुवर्णस्य च सूचकः ॥ प्रयांति नरकांश्चैव तैः संसर्गमुपैति यः ॥ १६ ॥ भ्रूणहा गुरुहंता च गोघ्नश्च

१ इदं तीर्थं च भविष्यति—इत्यध्याहृत्य संबंधनीयम् । २ वरं तीर्थम्--इ०पा० । ३ न लभन्ते यथा वै तु--इ०पा० । ४ वालः—इ०पा० । ५ पच्यंते--इ०पा० ।

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मुनिसत्तम ॥ यांत्येते नरकं रौद्रं ये च विश्वासघातकाः ॥ १७ ॥ तप्तलोष्ठेषु पच्यंते यस्तु भक्तं परित्यजेत् ॥ स्नुषां सुतां च यो गच्छेन्महा
ज्वाले स पात्यते ॥ १८ ॥ कुंभीपाके प्रयात्येव पादैरूर्ध्वैरधोमुखः ॥ करोति कर्म वै नित्यं यश्च गां प्रतिषेधयेत् ॥ १९ ॥ स्वामिद्रोही च यो
रौद्रस्तप्तकुंभे स पात्यते ॥ देवदूषयिता यश्च वेदविक्रयिकस्तथा ॥ २० ॥ परस्त्रीगामिनो ये च यांति क्रकचने तु ते ॥ चौरोऽतिदारुणे याति
मर्यादाभेदकस्तथा ॥ २१ ॥ देवद्विजपितृद्वेष्टा रत्नदूषयिता च यः ॥ स याति कृमिभक्षे वै रक्ताख्ये च पतंति ते ॥ २२ ॥ पितृदेवगुरूणां च
सपर्यां न करोति यः ॥ लालाभक्षे स यात्युग्रे कूटकर्म करोति यः ॥ २३ ॥ अंत्यजेभ्यो ग्रहीता च नरके यात्यधोमुखे ॥ अस्थिभंगे प्रयात्येव
एको मिष्टान्नभुङ्नरः ॥ २४ ॥ कृतघ्नः पिशुनः क्रूरः कूटमानी विडंबकः ॥ यंत्रपीडनके यांति परगुह्यप्रकाशकः ॥ २५ ॥ लाक्षामांसरसानां च
तिलानां रसकस्य च ॥ विक्रयी ब्राह्मणो याति श्वदंशे नात्र संशयः ॥ २६ ॥ मधुहा ग्रामहंता च याति वैतरणीं नरः ॥ वर्णाश्रमविरुद्धं च कर्म
कुर्वंति ये नराः ॥ २७ ॥ कर्मणा मनसा वाचा महानद्यां प्रयांति ते ॥ गुरूणामवमंता च शास्त्रदूषयिता च यः ॥ २८ ॥ असिपत्रे प्रयात्येव तथा
पर्वविलंघकः ॥ धनयौवनमत्ता ये मर्यादाभेदिनो नराः ॥ २९ ॥ ते यांति नरके घोरे कृष्णसूत्रेऽतिदारुणे ॥ असंस्कृतश्च यो विप्रो वृषलीं सेवते
तु वै ॥ ३० ॥ वृषलीमिथुनो यश्च पततस्तावुभावपि ॥ उच्छिष्टा ये स्पृशंतीह गावोऽग्निं जननीं द्विजान् ॥ ३१ ॥ ते पच्यंते कुभोज्ये च मित्र
द्वेषी विशेषतः ॥ पंक्तिभेदे दिवास्वप्ने ये न[1]रोऽब्रह्मचारिणः ॥ ३२ ॥ पुत्रैरध्यापिता ये वै ते पतंति श्वभोजने ॥ एते चान्ये च नरकाः शतशोऽ
थ सहस्रशः ॥ ३३ ॥ तत्र दुष्कृतकर्माणः पच्यंते यातनागताः ॥ नृणां स्वर्गाश्च यावंतस्तावंतो निरयास्तथा ॥ ३४ ॥ पापं कृत्वा तु बहुलं
प्रायश्चित्तपराङ्मुखाः ॥ कृते पापे च वै तापो यस्य पुंसः प्रजायते ॥ ३५ ॥ प्रायश्चित्तं तु तस्यैकं शिवसंस्मरणं परम् ॥ तं[2]स्मादहर्निशं शं[4]भुं
संस्मरन्पुरुषोत्तमः ॥ ३६ ॥ न याति नरकं शुद्धः संक्षीणाखिलपातकः ॥ कार्तिकस्यासिते पक्षे कृष्णा या च चतुर्दशी ॥ तस्यां दीपः प्रदातव्यो
देवदेवस्य चाग्रतः ॥ ३७ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये नरकऽकथनं
नामैकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ दीपेऽस्मिन्यत्फलं चा[3]स्ति विधिना येन दीयते ॥ तत्सर्वं ब्रूहि मे
तात दीपोत्पत्तिं च शोभनाम् ॥ १ ॥ ॥ सनत्कुमार उवाच ॥ ॥ पुरा कृतयुगे व्यास पार्वतीं शंकरोऽग्रतः ॥ अभिप्रयाचितुं यातस्त ॥ २९ ॥

१ नृशब्दस्य प्रथमाबहुवचनमिदम् । २ शम्भोर्नामस्मरेणैव केवलं भक्तिभावतः—इ० पा० । ३ दत्ते—इ० पा० । ४ शंभुः—इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

यापि सोऽभियाचितः ॥ २ ॥ ॥ पार्वत्युवाच ॥ ॥ शरीरे कृष्णता शंभो ममास्ति रूपहारिणी ॥ तस्माद्याचे भृशं शंभो प्रसीद दिव्य लोचन ॥ ३ ॥ भवेन वर्णिता सा वै अतीव शोभना मम ॥ लोचने पक्ष्ममालायाः शोभसेऽतितरां सदा ॥ ४ ॥ सिताब्जसंस्थितो भृंगो यथा शोभयते च तम् ॥ तया तथा याचितोसौ धूर्जटिर्वृषभासनः ॥ ५ ॥ विरूपरूपकर्तासि न शृणोषि वचो यदा ॥ तदा त्वहं सवैराग्या चरेयं दुष्करं तपः ॥ ६ ॥ भवस्तयेति चोक्तस्तु तस्या वै पाणिमग्रहीत् ॥ कदाचिच्छंकरो देवो रतिं याचितवान्प्रियाम् ॥ ७ ॥ रतिं दत्तवती सा तु जहास नाम कीर्तयन् ॥ सुदुःखिताऽभवत्सा तु पराङ्मुखी विहाय तम् ॥ ८ ॥ उवाच रोषसंयुक्ता संस्मृत्य देवभाषितम् ॥ तपोवनं व्रजाम्यद्य सुगौरत्वोपलब्धये ॥ ९ ॥ सुवर्णरूपरूपा च यदा पुनर्भवामि च ॥ तदा तव सानुरागा भवामि चैव नान्यथा ॥ १० ॥ इतीदमेव जल्पंती जगाम विंध्यपर्वतम् ॥ हरः शुशोच ततस्तां क्व गता सा विहाय माम् ॥ ११ ॥ स्मरंस्तदेव चेष्टितं तदेव पूर्वभाषितम् ॥ तदैव मे वृथा मतिर्मुदा यदा न मानिता ॥ १२ ॥ यतो मया हिमाद्रिजा समस्तलोकसुन्दरी ॥ पुरैव नाभिनंदिता गता विहाय मामिति ॥ १३ ॥ इतीदमेव सोऽवदद्गतस्त्वदर्शनं ततः ॥ प्रियावियोगमीदृशं गुरुं न सोढुमुत्सहे ॥ १४ ॥ ततो जगद्धि संकुलं महाभयेन संयुतम् ॥ सुरासुरा महर्षयः परं विषादमभ्ययुः ॥ १५ ॥ विहाय मंदिराणि ते परं विषादमागताः ॥ हरस्तुतिं परां च ते प्रचक्रुरद्भुतोपमाः ॥ १६ ॥ ॥ सनत्कुमार उवाच ॥ ॥ न दृश्यते यदा देवो रुद्रो बालेन्दुशेखरः ॥ नष्टालोकं जगत्सर्वं कांतारमभवत्तदा ॥ १७ ॥ त्रीणि नेत्राणि रुद्रस्य यतः सूर्येंदुवह्नयः ॥ गते रुद्रे न ते भांति जगत्यस्मिंश्चराचरे ॥ १८ ॥ ततस्तमसि दुस्तारे संभूते लोमहर्षणे ॥ अन्योन्यं हि न पश्यंति सुरासुरास्तमोवृताः ॥ १९ ॥ एषा बुद्धिस्ततस्तेषामुत्पन्ना कार्यसिद्धये ॥ यया बुद्ध्या जगन्नाथो ज्ञायते पार्वतीपतिः ॥ २० ॥ न ह्यालोको विना तेन शशिसूर्याग्निचक्षुषा ॥ परस्परं ब्रुवंति स्म दुःखितास्ते विसंज्ञया ॥ २१ ॥ हे देव हे मुने सिद्धे हे ऋषे हे निशाचर ॥ हे दैत्य हे दनुश्रेष्ठ हे मनुष्यनिदेशक ॥ २२ ॥ गतोऽसि कां दिशं तात को वा लब्धस्त्वया विभो ॥ क्वचिद्विश्रामभूमिस्ते क्वचिदालंबनेऽपि वा ॥ २३ ॥ पाथेयमस्ति किंचित्ते दिशि किं वाथ कुत्रचित् ॥ प्रकाशं वाहनं छत्रमशनं शयनं गृहम् ॥ २४ ॥ क्वचिद्वासि कथं तोयमथवा चित्तनिर्वृतिः ॥ बन्धुः पुत्रोऽसि वा तात वृक्षच्छाया सुशीतला ॥ २५ ॥ एवंप्रकारं करुणं समाभाष्य परस्परम् ॥ भूयश्चिन्तापराः सर्वे देवाश्चेंद्रपुरोगमाः ॥ २६ ॥ भूमेर्विवरमाश्रित्य प्राणिनो

१ परिहासोक्तिरियम् । नेत्रपक्ष्ममालावत्त्वं कृष्णवर्णासि–इति, सितकमले भृंगवत्कृष्णवर्णासीति । २ नाम–'कालि'इति सोपहासं कृष्णवर्णत्वसूचकं नाम–इत्यर्थः । ३ भवः–इ० पा० । ४ प्रयासदुःखम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





ये वसंत्यपि ॥ रसातले च दैतेयाः संस्थिताः पन्नगाश्च ये ॥ २७ ॥ न तेषां विद्यते सूर्यो नेन्दुर्नान्ये महाग्रहाः ॥ नाग्निर्देवमुखं विद्युन्नैव तारकको
टयः ॥ २८ ॥ केनालोकेन पश्यंति समानि विषमाणि च ॥ नरकस्था नरा लोके न पश्यंत्यन्यलोकगाः ॥ २९ ॥ विचरन्तः समं को वा मनो
रथशतप्रदः ॥ तृष्णांभःक्षुधितान्नं च श्रांतानामथ वाहनम् ॥ ३० ॥ समे शय्या जले नौश्च रोगे सत्परिचारकः ॥ श्रेष्ठौषधीभिः सन्मंत्रैः
संपदो व्याधिसंकटे ॥ ३१ ॥ सुहृद्विदेशे च्छायोष्णे निर्धूमः शिशिरे शिखी ॥ महाभये परित्राणं प्रकाशश्च महानिशि ॥ ३२ ॥ सर्वदश्चैत्र सर्वेषां
मनोरथशतप्रदः ॥ एक एव भवान्द्योतस्त्वां च जानीमहे वयम् ॥ ३३ ॥ ब्रुवंत इति ते व्यास शुश्रुवुर्मधुरां गिरम् ॥ श्रुतपूर्वा तमोमध्याद्विष्णोर
तुलकर्मणः ॥ ३४ ॥ न जानंति स्थितः कुत्र भाषते केशवो विभुः ॥ शृणुध्वमिति मे वाक्यं सर्वे चैव समाहिताः ॥ ३५ ॥ दानमेकं सदा सम्य
क्चिंतामणिसमं स्मृतम् ॥ सर्वेषामेव दानानां दीपदानं प्रशस्यते ॥ ३६ ॥ तच्च देयंमतः सर्वैः शृणुध्वं तत्त्वतो भृशम् ॥ मया रसातले पूर्वं नागा
नामनुकंपया ॥ ३७ ॥ उत्पादितो दीपवरो येन ध्वस्तमिदं तमः ॥ एवंभूतस्तु वायूनामप्रधृष्यो महाप्रभः ॥३८॥ निष्कंपो निर्मलो हृद्यः सुस्थिरो
भास्करप्रभः ॥ नात्युष्णो नातिशीतश्च देव्या योगसमुद्भवः ॥ तेन दीपप्रकाशेन गोकर्णो निर्वृतिं ययौ ॥ ३९ ॥ नागाः शेषादयः सर्वे नोद्यमानाश्च
संघशः ॥ दीपादीपसहस्राणि ददुस्ते वै शिवाग्रतः ॥ ४० ॥ पर्वतेषु समुद्रेषु वनेषूपवनेषु च ॥ नदीतीरेषु सर्वत्र दीपान्प्रज्वाल्य रेमिरे ॥ ४१ ॥
भुंजानाः पञ्च मूलानि दिव्यानि क्षीरसंयुतम् ॥ परमान्नं च मांसानि मकरंदं घृतौदनम् ॥ ४२ ॥ चन्द्रशालिभवं भक्तं तांबूलं सप्तधा गतम् ॥
मद्यमष्टप्रकारं तु भार्यापीतावशेषकम् ॥ ४३ ॥ शयनेषु महार्हेषु हृद्यासु वनराजिषु ॥ वृक्षमूलेषु सर्वेषु वनच्छायोपशोभिषु ॥ ४४ ॥ रमन्ते स्म
च ते सर्वे ह्युद्रेष्टंतः परस्परम् ॥ कामतन्त्रोपदिष्टैस्तु शास्त्रैश्च चुंबनादिभिः ॥ ४५ ॥ सूर्यतापभयान्मुक्ताश्चंद्ररश्मिभयाच्च ते ॥ विमुक्ताश्च भयाद्घो
रात्पिपीलिकोद्भवात्तथा ॥ ४६ ॥ सूर्यतापेन दाहः स्याच्छीतं चंद्रमरीचिभिः ॥ मयूरनकुलाद्यैश्च पिपीलीमरणाद्भयम् ॥ ४७ ॥ सौवर्णान्दीपका
न्कृत्वा द्विजेभ्यस्ते ददुः पुनः ॥ तेन पातालमाश्रित्य कृत्वा भोगवतीं पुरीम् ॥ ४८ ॥ वसंति सुखिनस्तत्र स्वर्गादष्टगुणैः सुखैः ॥ एवमंधं तमो
देवाः पातालाद्दीपतो गतम् ॥ ४९ ॥ एतद्गुह्यं मया ख्यातं भवतां चानुकम्पया ॥ दीपदानमतो यूयं कुरुध्वं सुसमाहिताः ॥ ५० ॥ दीपाग्निना
विना नैव तमोदारु प्रदह्यते ॥ नारायणपरा देवा निशम्याथ समाहिताः ॥ ५१ ॥ पप्रच्छुस्ते पुनः सर्वे हृष्टा दामोदरं विभुम् ॥ ब्रूहि नोग्निं जग



१ तच्च यूयमतः सर्वे शृणुध्वं तत्त्वतो भृशम्--इ० पा० । २ एवं गते तु--इ० पा० । ३ सुकरः--इ० पा० । ४ दिव्ययोगसमुद्भवः--इ० पा० । ५ गोकर्णा निर्वृतिं ययुः--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्नाथ स दीपो येन जायते ॥ ५२ ॥ घोरे तमसि वै मग्ना नाग्निं जानीमहे वयम् ॥ देवानां मानसो वह्निरथ कृष्णेन कीर्तितः ॥ ५३ ॥ तेन दीपं प्रतिज्वाल्य देवाः शिवपरायणाः ॥ ददुस्ते शिवमुद्दिश्य सर्वाभीष्टफलप्रदम् ॥ ५४ ॥ दत्ते दीपे ततो देवैर्दृष्टो हृष्टो महेश्वरः ॥ तिमिरं तद्गतं चापि जगद्येन जडीकृतम् ॥ ५५ ॥ ततो देवाः सुखं प्रापुः स्वर्गे सेन्द्रपुरोगमाः ॥ राज्यं भोगान्वितं प्राप्य सार्धं स्त्रीभिश्च रेमिरे ॥ ५६ ॥ दीपदानफलं ज्ञात्वा दैतेयाश्चापि विस्मिताः ॥ तथैव तत्फलं ज्ञात्वा व्यास यक्षाश्च विस्मिताः ॥ ५७ ॥ पूजयित्वा महादेवं पुष्पैश्च निर्मलैर्जलैः ॥ ददुर्दीपसहस्राणि सर्वे शिवपरायणाः ॥ ५८ ॥ स्वस्थाने चाभवन्सर्वे दीपदानाच्च शोभनाः ॥ स्वेच्छया भुंजते भोगान्बन्धुभृत्यादिसंयुताः ॥ ५९ ॥ निराहारास्ततो व्यास पिशाचा वै निराश्रयाः ॥ दीपदानफलं ज्ञात्वा सर्वे तेऽतीव विस्मिताः ॥ ६० ॥ चंडालादग्निमानीय ददुर्दीपं शिवे रताः ॥ दीपदानफलं ते वै पुत्रदारसमन्विताः ॥ ६१ ॥ लीढमन्नं गतरसं पूति पर्युषितं तथा ॥ उच्छिष्टं सूतिकास्पृष्टं न मेध्यं चातिलंवितम् ॥ ६२ ॥ भुंजानास्ते सदा हृष्टा रमंते दुष्टभूमिषु ॥ विद्याधरास्तथा मर्त्याः सिद्धाश्च शिवमानसाः ॥ ६३ ॥ दीपदानफलं ज्ञात्वा ददुर्दीपं शिवाग्रतः ॥ दीपदानात्ततः सर्वे सर्वभोगसमन्विताः ॥ ६४ ॥ स्थानेषु मुदितास्तेषु रमंते सुखिनस्तदा ॥ तिमिरं तद्गतं चैव व्यास लोकेषु दीपतः ॥ ६५ ॥ ततो घोरं स्थितं सम्यक्प्रेतलोकेषु सर्वदा ॥ प्रेतलोकं तदा दृष्ट्वा घोरेण तमसा वृताः ॥ ६६ ॥ दामोदरं जगन्नाथमूचुः सर्वे सुरोत्तमाः ॥ घोरं चैव तमो हत्वा प्रसन्नास्ते सदा विभो ॥ ६७ ॥ गंधर्वाश्च तथा यक्षाः सिद्धा विद्याधरोरगाः ॥ वयं चैव तथा मर्त्याः सर्वभोगैश्च संयुताः ॥ ॥ ६८ ॥ स्थानेषु च सदा ह्येषु सुखिनश्च रमामहे ॥ प्रेतलोके नरा ये वै घोरेण तमसा वृताः ॥ ६९ ॥ वसंति च जगन्नाथ वर्तंते तेऽतिदुःखिताः ॥ यैर्नो कृतं हि तत्कर्म कृष्णालं पापमोहितैः ॥ ७० ॥ न तेषां विद्यते किंचिद्यत्प्रकाशं करोति च ॥ घोरे तमसि ते मग्नास्तत्र नार्केन्दुवह्नयः ॥ ७१ ॥ न सहायो न जायेयं नालंबो न च देशिकाः ॥ न वाहनं न शय्या च केवलं तु महत्तमः ॥ ७२ ॥ तत्राष्टाविंशतिः ख्याता घोरा नरककोटयः ॥ तमोमयाश्च ताः सर्वाः पापिनां भयदाः सदा ॥ ७३ ॥ सुखं तत्र कथं कृष्ण लभंते दुःखिता नराः ॥ दारिद्र्यदुःखरोगैश्च मायामोहैश्च सर्वदा ॥ ७४ ॥ ॥ सनत्कुमार उवाच ॥ ॥ इति श्रुत्वा तु देवानां प्रार्थनां गरुडध्वजः ॥ उवाच वचनं हृद्यं मनोरथफलप्रदम् ॥७५॥ शृणुध्वं त्रिदशाः सर्वे यत्प्रवक्ष्यामि वो वचः॥७६॥ अवंत्यां वर्तते तीर्थं सद्यः पापहरं परम् ॥

१ नष्टो दृष्टः—इ० पा० । २ रमंते सुखिनो भृशम्—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



अनरकाख्यं महापुण्यं सर्वतीर्थोत्तमोत्तमम् ॥ ७७ ॥ कार्तिकस्यासिते पक्षे चतुर्दश्यां समाहितः ॥ तत्र स्नात्वा नरो यस्तु यमध्यानपरायणः
॥ ७८ ॥ संगृह्य वै तिलान्कृष्णान्पितृभक्तो जितेंद्रियः ॥ दक्षिणाभिमुखो भूत्वा मध्याह्ने सुरसत्तमाः ॥ ७९ ॥ अपसव्यं तथा कृत्वा मंत्रैः संतर्प
येद्यमम् ॥ यमाय धर्मराजाय मृत्यवे चांतकाय च ॥ ८० ॥ वैवस्वताय कालाय दक्षाय मनवे तथा ॥ कृष्णाय कृष्णगुप्ताय प्रेतलोकपराय च
॥ ८१ ॥ हरये रविपुत्राय कालिंदीसोदराय च ॥ तथा वै श्राद्धदेवाय पितृणां पतये तथा ॥ ८२ ॥ मंत्रैरेभिर्नमःप्रोक्तैरोंकाराद्यैः सुशोभनैः ॥
जलांजलिं सदर्भं वै दद्याच्च तिलसंयुतम् ॥ ८३ ॥ संतर्पयेद्यमं देवं तिलपात्रं समाहितः ॥ प्राज्ञो विप्राय वै दद्याद्वित्तशाठ्यविवर्जितः ॥ ८४ ॥
अनेन विधिना यस्तु संतर्पयेद्यमं विभुम् ॥ पितरस्तस्य मुच्यंते निरये ये गता अपि ॥ ८५ ॥ रात्रिं तत्राथ संप्राप्य मानवः कामसंयुतः ॥
नमः पितृभ्यः प्रेतेभ्यो नमो धर्माय विष्णवे ॥ ८६ ॥ नमः सूर्याय रुद्राय कालांतपतये नमः ॥ एभिर्मंत्रैर्यमे दीपं यो दद्याद्धृतपूरितम् ॥ ८७ ॥
कार्तिकं हि समग्रं तु वर्धते तस्य संपदः ॥ संपूर्णे कार्तिके चैव दीपोद्यापनमाचरेत् ॥ ८८ ॥ दिवाकराह्नेऽस्तमिते च सूर्ये दीपस्य वर्त्तिं पुरुष
प्रमाणाम् ॥ यूपाकृतौ दारुमये करोति यथा च धीमान्यमभक्तिचित्तः ॥८९॥ निक्षिप्य भूमावथ हस्तमात्रं मूर्ध्नि द्विहस्ताष्टदलान्वितस्य ॥ धार्याश्च
ततः शुभपट्टिकाश्च च्छिद्रेण युक्ताश्चतुरंगुलेन ॥ ९० ॥ तत्कर्णिकायां तु महाप्रकाशो देयो हि दीपः परया च भक्त्या ॥ उदङ्मुखान्दीपवरांस्त
थाष्टौ दलेषु तस्या घृतपूर्यमाणाः ॥ ९१ ॥ अनंगलग्नं धवलं च वस्त्रं नवं सुरक्तं ह्यथवा सुशुक्लम् ॥ वर्त्यां प्रदेयं च स्वके च दद्यात्स्निग्धे त्व
खण्डे सुसमे प्रशस्ते ॥ ९२ ॥ तच्छालिपिष्टोपरि संनिधाय यथा न निर्याति न कंपते च ॥ सर्वं प्रकुर्यात्त्रिगुणप्रमाणं मध्यस्थितस्तस्य च
दीपराजः ॥ ९३ ॥ दलेषु शोभार्थमतीव कुर्यान्मनोरथप्रत्युपलब्धये च ॥ घंटाष्टकं लंबितपुष्पदाम सवस्त्रशोभान्वितमत्र कार्यम् ॥ ९४ ॥
संलिप्य भूमिं त्वथ गोमयेन पुनः सुगंधेन जलेन लिप्त्वा ॥ कुर्याद्विचित्रं त्वथ मंडले च दलाष्टकं वै कमलं च रम्यम् ॥ ९५ ॥ ततो जलं
शीतलमानयित्वा आपूर्य चाष्टौ कलशांस्तु रम्यान् ॥ निधाय मूर्ध्नि क्रमशो हि धीमान्फलानि मूलानि तथेक्षुकानि ॥ ९६ ॥ मध्वाज्ययुक्ता
दधिदुग्धपूर्णा नैर्ऋत्यकोणादथ दक्षिणांतम् ॥ धर्माय दद्यादथ शंकराय दामोदरायाप्यथ वेधसे च ॥९७॥ प्रजापतिभ्यः क्रमशो हि भक्त्या प्रेते
भ्य इंद्राय तथा पितृभ्यः ॥ होमादिपात्रं तिलचूर्णमेव दद्याद्द्विजानां च सदक्षिणं च ॥ ९८ ॥ गावो हिरण्यं रजतं च वस्त्रं फलानि मूलानि यवाश्च ॥ ३१ ॥

१ कार्तिकस्य सिते पक्षे–इ०पा० । २ नमः–इ०पा० । ३ कान्तारपतये–इ०पा० । ४ दीपान्दद्याद्विजातये–इ०पा० । ५ वर्त्यै–इ०पा० । ६ विद्वान्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धान्यम् ॥ गृहं रथं कुंजरमश्वमेव मनोज्ञमन्यं हृदयप्रियं यत् ॥ ९९ ॥ विद्याधिकेभ्यो द्विजसत्तमेभ्यः पौराणिकेभ्यश्च तथा द्विजेभ्यः ॥ एकैकस्तु प्रीणनमत्र कुर्याद्दीपैर्दलस्थैश्च यमादिकानाम् ॥ १०० ॥ धर्माय देयस्त्वथ मध्यदीप आज्ञां च लब्ध्वा व्रतदेशिकस्य ॥ नृत्येन गीतेन सुशोभनेन युक्तं सुवाद्येन च कारयेच्च ॥ १ ॥ एतत्समग्रं विधिवच्च कुर्यात्स्वशक्तिमादौ स्वधनं समीक्ष्य ॥ आहूय विप्रान्छुभभावयुक्तान्वदेच्च धीमान्परया च भक्त्या ॥ २ ॥ दीपान्समग्रान्नव वर्जयित्वा सर्वं नयेयुः स्थितमत्र विप्राः ॥ प्रदक्षिणीकृत्य विसृज्य विप्रांस्ततो भवेद्वै स च नक्तभोजी ॥ ३ ॥ एवंकृते नागलोकाद्विशिष्टं सुखं भवेत्प्रेतलोके स्थितानाम् ॥ ४ ॥ एवं ह्यनरके व्यास दीपदानं करोति यः ॥ तस्यैव यत्फलं प्रोक्तं तदिहैकमनाः शृणु ॥ ५ ॥ विमानैः कामिकैर्दिव्यैरप्सरोगणसेवितैः ॥ उह्यमानो दिवं याति यावच्चंद्रदिवाकरौ ॥ १०६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्येऽनरकेश्वरदीपदानमाहात्म्यवर्णनंनाम त्रिंशोऽध्यायः ॥ ३० ॥ ॥ छ ॥ ॥ ॥ ॥ सनत्कुमार उवाच ॥ ॥ अथान्यत्संप्रवक्ष्यामि केदारेश्वरमुत्तमम् ॥ प्रवरं सर्वतीर्थानां त्रिषु लोकेषु विश्रुतम् ॥ १ ॥ तत्र स्नात्वा शुचिर्भूत्वा यः पश्यति महेश्वरम् ॥ केदारे यत्फलं प्रोक्तं तदत्रापि लभेन्नरः ॥ २ ॥ सर्वपापविनिर्मुक्तः स्वकीयकुलसंयुतः ॥ विमानेनार्कवर्णेन शिवलोके स मोदते ॥ ३ ॥ जटाशृंगे नरः स्नात्वा शुचिर्भूत्वा जितेंद्रियः ॥ दृष्ट्वा जटेश्वरं देवं ततः पापाद्विमुच्यते ॥ ४ ॥ महातपनमादौ च कृत्वा गच्छेच्छिवं प्रति ॥ मातृकं पितृकं चैव कुलानां तारयेच्छतम् ॥ ५ ॥ इंद्रतीर्थे नरः स्नात्वा दृष्ट्वा चंद्रेश्वरं शिवम् ॥ विमुक्तः सर्वपापेभ्यः शक्रलोके महीयते ॥ ६ ॥ कुंडेश्वरं तु यः पश्येच्छिवध्यानपरायणः ॥ लभते स नरो व्यास शिवदीक्षाफलं शिवम् ॥ ७ ॥ गोपतीर्थे नरः स्नात्वा दृष्ट्वा गोपेश्वरं शिवम् ॥ शिवलोकं नरो याति ह्यमृतादमरो यथा ॥ ८ ॥ स्नात्वा तु चिपिटातीर्थे शिवं देवं प्रणम्य च ॥ तिर्यग्योनिं नरो नैव प्रयाति मुनिपुंगव ॥ ९ ॥ विजये च नरः स्नात्वा आनंदेश्वरपूजनात् ॥ विमुक्तः सर्वपापेभ्यः स्वर्लोके[1] विजयी भवेत् ॥ १० ॥ अथान्यं संप्रवक्ष्यामि कुशस्थल्यां विनिर्मितम् ॥ देवं रामेश्वरं व्यास भुक्तिमुक्तिप्रदायकम् ॥ ११ ॥ चित्रकूटात्पुरा रामो मैथिल्या लक्ष्मणेन च ॥ समन्वितः समागत्य पप्रच्छ मुनिसत्तमम्[2] ॥ १२ ॥ ॥ राम उवाच ॥ ॥ कानि तीर्थानि पुण्यानि किं वा क्षेत्रं महामुने ॥ यत्र गत्वा न चाप्नोति वियोगं सह बांधवैः ॥ १३ ॥ अनेन वनवासेन मरणेन पितुः प्रभो ॥ भरतस्य वियोगेन प्रतप्येऽहं त्रिभिर्मुने ॥ १४ ॥ तद्वाक्यं राघवे

१ शिवलोके–इ० पा० । २ मुनिसत्तमम्–नारदम्–इत्यर्थः–प्रसङ्गात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



णोक्तं श्रुत्वा विप्रर्षभस्तदा ॥ ध्यात्वा तु सुचिरं कालमिदं वचनमब्रवीत् ॥ १५ ॥ साधु पृष्टं त्वया वीर रघूणां वंशवर्धन ॥ मम पित्रा कृतं क्षेत्रं
प्रयाच्य शिवमादरात् ॥ १६ ॥ अवंतीविषये राम पुरी तस्मिन्कुशस्थली ॥ उज्जयिनीति वै नाम्ना ख्यातिं लोके गता विभो ॥ १७ ॥ तस्यां
गत्वा दशरथं पिंडदानेन तर्पय ॥ सुरासुरगुरुस्तत्र महाकालो व्यवस्थितः ॥ १८ ॥ देवः स वै सदा राजन्वांछितार्थफलप्रदः ॥ दृष्टे तस्मिञ्जग
न्नाथे वियोगो नैव जायते ॥ १९ ॥ तत्र गच्छंति ये विप्रा राजा चैव महाबलः ॥ लभंते परमं स्थानं यत्र देवो महेश्वरः ॥ २० ॥ तीर्थानामपि
तत्तीर्थं प्रविष्टोऽवंतिमंडले ॥ आजगाम ततोवंतीं सा शिप्रा यत्र पुण्यदा ॥ २१ ॥ तस्यां स्नात्वा ततो रामस्तर्पयामास पूर्वजान् ॥ महाकालं यदा
द्रष्टुं प्रतस्थे रघुनंदनः॥२२॥ वाण्या ततोऽशरीरिण्या देवदेवेन भाषितम् ॥ भोभो राघव भद्रं ते स्वनाम्ना स्थापयस्व माम् ॥२३॥ अत्र स्थानं मया
दत्तं मा विचारय राघव ॥ ततो हृष्टमना रामो लक्ष्मणं वाक्यमब्रवीत् ॥ २४ ॥ अनुगृहीताः सौमित्रे देवदेवेन शंभुना ॥ तस्मात्स्थापय तीर्थेऽस्मिँ
ल्लिंगं रामेश्वरं शुभम् ॥ २५ ॥ वाक्यं तल्लक्ष्मणः श्रुत्वा स्थापयामास शंकरम् ॥ दृष्ट्वा देवं पुरा रामो लक्ष्मणं वाक्यमब्रवीत् ॥ २६ ॥ एहि लक्ष्मण
शीघ्रं त्वं शिप्राया जलमानय ॥ करिष्यामि यतोऽत्राहं देवस्य स्नपनं शुभम् ॥ २७ ॥ लक्ष्मणस्त्वब्रवीद्वाक्यं सीतया किं करिष्यसि ॥ राम नाहं
सर्वकालं दासभावं करोमि ते ॥ २८ ॥ इयं च पुष्टा सुदृढा पीवरा च ममाग्रतः ॥ वद राघव सत्येन अनया किं करिष्यसि ॥ २९ ॥ श्रुत्वा
रामो हि तद्वाक्यं लक्ष्मणेन प्रभाषितम् ॥ विमना राघवस्तस्थौ सीता चापि वरानना ॥ ३० ॥ यदुक्तं लक्ष्मणेनाथ तच्च सीता चकार ह ॥
स्नात्वा भुक्त्वा च तौ वीरौ महाकालमुपागतौ ॥ ३१ ॥ नीत्वा विभावरीं तत्र गमनाय मनो दधे ॥ उत्तिष्ठ वत्स सौमित्रे व्रजामो दक्षिणां दिशम्॥
॥ ३२ ॥ सौमित्रिरब्रवीद्वाक्यं नाहं गन्ता कथंचन ॥ व्रज त्वमनया सार्धं भार्यया कमलेक्षण ॥ ३३ ॥ नाहमग्रे वनं यामि न वायोध्यां कथं
चन ॥ एवं ब्रुवाणं सौमित्रिमुवाच रघुनंदनः ॥ ३४ ॥ कथं पूर्वमयोध्याया निर्गतोऽसि मया सह ॥ वने वसाम्यहं राम नव वर्षाणि पंच च
॥ ३५ ॥ प्रसादः क्रियतां मह्यं नय मामपि राघव ॥ इदानीं त्वमर्धपथे कथं स्थातासि शत्रुहन् ॥ ३६ ॥ लक्ष्मणस्त्वब्रवीद्राम नाहं गन्ता वनं
पुनः ॥ लक्ष्मणं विकृतं ज्ञात्वा रामो वचनमब्रवीत् ॥ ३७ ॥ मा माऽनुव्रज सौमित्रे ह्येको यास्यामि काननम् ॥ द्वितीयापि त्वियं सीता उक्तो
रामेण लक्ष्मणः ॥ ३८ ॥ धनुः संगृह्य विमना उत्तस्थौ लक्ष्मणस्तदा ॥ प्राप्तौ प्राकारमर्यादां क्षेत्रसीमां परंतपौ ॥ ३९ ॥ क्षेत्रसीमां समुल्लंघ्य रामो



१ स्थापय स्वयम्--इ०पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लक्ष्मणमब्रवीत् ॥ ४० ॥ निवर्तयस्व सौमित्रे समर्पय च मे धनुः ॥ रामवाक्यमुपश्रुत्य सीतां वै लक्ष्मणोऽब्रवीत् ॥ ४१ ॥ किमर्थं हि परित्यक्तः कोऽपराधः कृतो मया ॥ रामेण हि परित्यक्तः प्राणांस्त्यक्ष्याम्यसंशयम् ॥ ४२ ॥ रामं ततोऽब्रवीत्सीता किमर्थं लक्ष्मणस्त्वया ॥ देव संत्यज्यते वीरः सुमित्रानंदिवर्धनः ॥ ४३ ॥ राघवस्त्वब्रवीत्सीतां नाहं त्यक्ष्यामि लक्ष्मणम् ॥ न कदाचिदपि स्वप्ने लक्ष्मणसदृशं प्रियम् ॥ ४४ ॥ श्रुतपूर्वं तु सुश्रोणि क्षेत्रस्यास्य विचेष्टितम् ॥ अस्मिन्क्षेत्रे न सौभ्रात्रं सर्वो हि स्वार्थतत्परः ॥ ४५ ॥ परस्परं न मन्यंते स्वार्थनिष्ठैकहेतवः ॥ न शृण्वंति पितुः पुत्राः पुत्राणां वा तथा पिता ॥ ४६ ॥ न च शिष्यो गुरोर्वाक्यं गुरुर्वा शिष्यकर्म च ॥ अर्थानुबंधिनी प्रीतिर्न कश्चित्कस्यचित्प्रियः ॥४७॥ एवमुक्त्वा ययौ रामो लक्ष्मणो जानकी तथा ॥ लिंगं तत्र प्रतिष्ठाप्य स्वनाम्ना रघुनंदनः ॥४८॥ रामतीर्थे नरः स्नात्वा दृष्ट्वा रामेश्वरं शिवम् ॥ विमुक्तः सर्वपापेभ्यः शिवलोकं स गच्छति ॥४९॥ ॥ इति रामेश्वरमाहात्म्यम् ॥ ॥ सनत्कुमार उवाच ॥ ॥ तीर्थे सौभाग्यके स्नात्वा दृष्ट्वा सौभाग्यमीश्वरम् ॥ सर्वपापविनिर्मुक्तः सौभाग्यं परमं लभेत् ॥ ५० ॥ घृततीर्थे नरः स्नात्वा घृतेन स्नापयेच्छिवम् ॥ घृतमग्नावथो हुत्वा रुद्रलोके महीयते ॥५१॥ देवीं योगीश्वरीं पूज्य सुरासुरनमस्कृताम् ॥ सर्वपापविनिर्मुक्तः परं योगमवाप्नुयात् ॥५२॥ शंखावर्ते नरः स्नात्वा सर्वपापविवर्जितः ॥ धनधान्यसमायुक्तो जायते निर्मले कुले ॥ ५३ ॥ सुधोदके[1] चतुर्दश्यां मुक्त्यर्थं स्नापयेन्नरः॥शिवं सुधेश्वरं[2] दृष्ट्वा ततो मोक्षगतिर्भवेत् ॥५४॥ तथान्यत्संप्रवक्ष्यामि तीर्थं त्रैलोक्यविश्रुतम् ॥ किंपुनेति[3] च विख्यातं ब्रह्महत्याविमोचनम् ॥५५॥ पूर्वं त्रेतायुगे व्यास सुनेत्रोनाम वै द्विजः ॥ तस्य पुत्रः समुत्पन्नो विश्वावसुरिति स्मृतः ॥५६॥ यवक्रीतस्य शापेन स्वपिता तेन घातितः ॥ ब्रह्महत्यान्वितो व्यास तीर्थात्तीर्थं परिभ्रमन् ॥५७॥ तीर्थे किंपुनके स्नात्वा धारातीर्थे गतो द्विजः ॥ ततः कपिलधारायां चिंतयत्यात्मना स्वयम् ॥ ५८ ॥ कथं मे पतिता धारा अनृता वा श्रुतिस्तथा ॥ एवं ह्यचिंतयत्सोऽथ पुनरायादवंतिकाम् ॥ ५९ ॥ अत्र तीर्थे पुनः स्नाति यावद्वाणीं ततोऽशृणोत् ॥ किं पुनर्ध्यायसि ब्रह्मन्येन जातो द्विजोत्तमः ॥ ६० ॥ न तेऽस्ति ब्रह्महत्या वै तीर्थस्नानेन नाशिता ॥ गच्छ शीघ्रं गृहं विप्र पापहीनो यथासुखम् ॥ ६१ ॥ ॥ इति किंपुनामाहात्म्यम् ॥ ॥ ॥ ॥ सनत्कुमार उवाच ॥ ॥ पुनरन्यत्प्रवक्ष्यामि पत्तनेश्वरमुत्तमम् ॥ तत्र स्थित्वा महेशेन पुनः पत्तनमीक्षितम् ॥ ६२ ॥ पत्तनेश्वर इत्याख्यो देवदेवो महेश्वरः ॥ यस्तु गंधैश्च पुष्पैश्च धूपैर्दीपैर्मनोरमैः ॥ ६३ ॥ भावयुक्तो नरो व्यास पूजयेद्विधिवत्सदा ॥ यथावत्तिष्ठते लिंगं वंश

१ शुद्धोदके--इ० पा० । २ शुद्धेश्वरम्--इ० पा० । ३ तीर्थनाम--'किंपुनकम्' इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

च्छेदो न जायते ॥ ६४ ॥ हंसयुक्तेन यानेन शिवलोकं स गच्छति ॥ तथान्यत्संप्रवक्ष्यामि तीर्थं त्रैलोक्यविश्रुतम् ॥ ६५ ॥ दुर्धर्षमिति विख्यातं ब्रह्महत्याविमोचनम् ॥ पुरा दिवाकरो व्यास चक्रे दुर्धर्षनामतः ॥ ६६ ॥ तीर्थमासीन्नदीतीरे विख्यातं सूर्यसंस्कृतम् ॥ तेजःपुंजं भवेल्लिंगं गणगंधर्वपूजितम् ॥ ६७ ॥ सप्तम्यामथवाष्टम्यां संक्रांतौ रविवासरे ॥ तत्र स्नात्वा शुचिर्भूत्वा दिनमेकमुपोषितः ॥ ६८ ॥ दृष्ट्वा महेश्वरं तत्र शिप्राकूले व्यवस्थितम् ॥ पूजयित्वा तु भावेन यत्फलं तच्छृणुष्व मे ॥ ६९ ॥ पितृमातृकुलं सर्वं समुद्धृत्य शिवं व्रजेत् ॥ तत्र यच्छति यो दानं गोहेमादि विशेषतः ॥ ७० ॥ तावत्तदक्षयं लोके यावच्चंद्रदिवाकरौ ॥ तथान्यत्संप्रवक्ष्यामि गोपींद्रं तीर्थमुत्तमम् ॥ ७१ ॥ गौतमेन पुरा यत्र इन्द्रः शापाद्भगीकृतः ॥ भगव्रीडायुतः शक्रः प्रविश्य वनमुत्तमम् ॥ ७२ ॥ अतोषयत्तदोग्रेण तपसा शंकरं पुरा ॥ तुष्टेन शंभुना विप्र ये भगास्तच्छरीरगाः ॥ ॥ ७३ ॥ गोसहस्रीकृतास्तेन गोपींद्रस्तेन कथ्यते ॥ तत्र स्नात्वा दिवं याति शक्रतुल्यपराक्रमः ॥ ७४ ॥ ये मृतास्ते पुनर्जन्म नाप्नुवंति महीतले ॥ गंगातीर्थे नरः स्नात्वा पुण्यमाप्नोति पुष्कलम् ॥ ७५ ॥ ज्येष्ठशुक्लदशम्यां तु गंगायां फलमादिशेत् ॥ स्नात्वा पुष्पकरंडे च दृष्ट्वा पुष्पकरण्डकम् ॥ ७६ ॥ पुष्पकेन विमानेन प्रयातो दिवि मोदते ॥ नरकादुद्धरत्याशु नरः स्नात्वोत्तरेश्वरे॥७७॥ इष्टभोगसमापन्नो याति स्वर्गं न संशयः ॥ भूतेश्वरे नरः स्नात्वा भूतेश्वरमथार्चयेत् ॥ ७८ ॥ गंधपुष्पादिनैवेद्यैर्मृतो रुद्रपुरं व्रजेत् ॥ शिप्रायां तु नरः स्नात्वा कैलासं तु नमस्यति ॥ ७९ ॥ सूर्याऽऽहतं तमो यद्वत्तद्वत्पापं प्रणश्यति ॥ अंबालिकां च यः पश्येत्समाधिनियमेन च ॥ ८० ॥ स मुक्तः सर्वपापेभ्यः कंचुकेन फणी यथा ॥ घण्टेश्वरं प्रवक्ष्यामि यत्सुरैरपि पूजितम् ॥ ८१ ॥ यत्र कूपोदकं पीत्वा सौभाग्यमतुलं लभेत् ॥ अर्चयेद्यस्तु देवेशं गंधपुष्पैरनुक्रमात् ॥ ८२ ॥ शिवलोके वसेत्तावद्यावदिंद्राश्चतुर्दश ॥ पुण्येश्वरं तु यः पश्येच्छुचिः स्नातो जितेन्द्रियः ॥ ८३ ॥ स गाणपत्यमाप्नोति यत्सुरैरपि दुर्लभम् ॥ लंपेश्वरे[१] नरः स्नात्वा समभ्यर्च्य महेश्वरम् ॥८४॥ न याति नरकं मर्त्यः स्वर्गलोके महीयते॥तथान्यत्[२]संप्रवक्ष्यामि यत्सुरैरपि दुर्लभम् ॥८५॥ पूजितं ब्रह्मणा पूर्वं स्थविराख्यं विनायकम् ॥ तत्र स्नात्वा शुचिर्भूत्वा पूजयेद्यो विनायकम्॥८६॥गंधैर्धूपैश्च नैवेद्यैर्भक्ष्यैर्भोज्यैः फलं शृणु ॥ समीहिता भवेत्सिद्धिर्मृतः शिवपुरं व्रजेत् ॥८७॥ नवनद्याः समीपे तु पार्वतीं पूजयेद्बुधः ॥ गंधपुष्पैश्च[३] धूपैश्च सौभाग्यमतुलं लभेत् ॥८८॥ कामोदके नरः स्नात्वा दृष्ट्वा

१ लंपेश्वरे–इ० पा० । २ अन्यत्–इति नपुंसकं सर्वत्र तीर्थविशेषणत्वेनैव बोध्यम् । यद्यदेवनाम तत्तदेव तीर्थनामेति । यथात्र--अन्यत्—इत्यस्य–स्थविराख्यं विनायकम्–इत्यनेन सम्बन्धः–स्थविरविनायकाख्यं तीर्थमित्यर्थः । एवं पूर्वत्र परत्रापि च बोद्धव्यम् । ३ गंधैः पुष्पैश्च धूपैश्च--इ०पा० ।



CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामं रतिप्रियम् ॥ स्वर्गे च देवगंधर्वस्पृहणीयवपुर्भवेत् ॥८९॥ प्रयागे तु नरः स्नात्वा प्रयागेशं तु पश्यति ॥ सर्वलोकानतिक्रम्य शिवलोके महीयते ॥ ९० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये सौभाग्येश्वरादिनानातीर्थमाहात्म्यवर्णनंनामैकत्रिंशोऽध्यायः ॥ ३१ ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ अथान्यत्संप्रवक्ष्यामि नरादित्यं दिवाकरम् ॥ यस्य दर्शनमात्रेण सर्वरोगैर्विमुच्यते ॥ १ ॥ स्थापनां ते प्रवक्ष्यामि नरादित्यस्य यादृशी ॥ युद्धे निवारिते तस्मिन्नक्तस्वेदजयोः पुरा ॥ २ ॥ नरनारायणौ देवाववतीर्णौ धरातले ॥ कुंत्यां देव्यां च देवक्यां मथुरायामजायताम् ॥ ३ ॥ एवं तौ वर्तितौ लोके कांतौ वृद्धिं परां गतौ ॥ अन्यस्मात्कारणात्कृष्णोऽन्यस्माज्जातो धनंजयः ॥ ४ ॥ कंसादीन्दानवान्सर्वान्निजघान रणे हि सः ॥ स्वर्गं गतस्ततः पार्थो वासवादस्त्रसिद्धये ॥ ५ ॥ कृतास्त्रेण तु वीरेण देवराजस्य दक्षिणा ॥ संस्तुता देवराजस्तु ययाचे[1] तां हि दक्षिणाम् ॥ ६ ॥ निवातकवचा ह्युग्रा हिरण्यपुरवासिनः ॥ वध्यंतामर्जुन क्षिप्रमेषा मे गुरुदक्षिणा ॥ ७॥ अर्जुनेन प्रतिज्ञातो वधस्तेषां दुरात्मनाम् ॥ ऐंद्रं स[2] रथमास्थाय गृहीत्वा सशरं धनुः ॥ ८ ॥ निहत्य तांस्ततः पार्थः कृत्वा कर्म सुदुष्करम् ॥ प्रीतिमुत्पादयामास सर्वेषां च दिवौकसाम् ॥ ९ ॥ कृतकार्यं तदा शक्रस्त्वर्जुनं वाक्यमब्रवीत् ॥ यत्तेऽभिरुचिरं वीर मृत्युलोके सुदुर्लभम् ॥ १० ॥ मनसा कांक्षितं पार्थ वरं त्वं वरयोत्तमम् ॥ स वव्रे प्रतिमे द्वे तु येऽर्चिते ब्रह्मणा स्वयम् ॥ ११ ॥ ब्रह्मणा प्रीतियुक्तेन दक्षाय प्रतिपादिते ॥ दक्षेणापि युगं साग्रं पूजिते तिमिरापहे ॥ १२ ॥ सुराणामसुराणां च विग्रहे समुपस्थिते ॥ दानवैर्निर्जितः शक्रो हतराज्यो वनं गतः ॥ १३ ॥ तपश्चचार दुर्धर्षमेकपादः शतक्रतुः ॥ दिव्यवर्षसहस्रं तु धिषणस्तं ददर्श ह ॥ १४ ॥ दृष्ट्वा तु देवराजं तं बृहस्पतिरुवाच ह ॥ हित्वा त्रिदिवमायातः कथं शक्र त्विदं वनम् ॥ १५ ॥ एकाकिना वनस्थेन न साध्याः शत्रवस्त्वया ॥ ज्ञात्वैवं देवराज त्वं शीघ्रं दक्षाश्रमं व्रज ॥ १६ ॥ पूजार्थे ब्रह्मणा दत्ते पारिजातसमुद्भवे ॥ चकार विश्वकर्मा ये ते[3] याचस्व प्रजापतिम् ॥ १७ ॥ शत्रूणां च क्षयो भावी प्रसादादर्चयोस्तयोः ॥ गुरोस्तु तेन वाक्येन हृष्टो देवः शतक्रतुः ॥१८॥ जगाम सत्वरस्तत्र यत्र दक्षः प्रजापतिः ॥ विनयावनतो भूत्वा ययाचे प्रतिमे शुभे ॥ ददौ तस्मै ततो दक्षः शक्राय प्रतिमे शुभे ॥ १९ ॥ पूजिते प्रतिमे व्यास शक्रेण शरदां शतम् ॥ तयोस्तु तेजसा सर्वे विनाशं दानवा गताः ॥ २० ॥ प्रतिमे चोचतुः शक्रं वरयस्व वरोत्तमम् ॥ भक्त्यानया परं तुष्टावावां जानीहि वासव ॥ २१ ॥ वरं वव्रे तदा शक्रः प्रसन्नात्मा द्विजो

१ आर्षं परस्मैपदम् । २ रथं समास्थाय--इ०पा० । ३ ते--अर्चे--इति शेषः। प्रतिमे--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



त्तम ॥ अस्माकं प्रतिपक्षा ये दानवाः पापचेतसः ॥ २२ ॥ सर्वे ते नाशमृच्छंतु वर एष मतो मम ॥ युवां पूजितुमिच्छामि यावदिंद्रो भवाम्य
हम् ॥ २३ ॥ तथेति चोक्ता प्रतिमे ते नाकं प्रति जग्मतुः ॥ तत्तु याचे ह्यवश्यार्थे वरार्थे प्रतिमाद्वयम् ॥ २४ ॥ ॥ इंद्र उवाच ॥ ॥ साधु
पार्थ पुनः साधु यत्रेत्थं प्रतितिष्ठतः ॥ इमे च प्रतिमे पार्थ शंकरेण महात्मना ॥ २५ ॥ सुरक्तैः शतपत्रैश्च पूजिते ब्रह्मणो दिनम् ॥
त्रैलोक्यपालनार्थाय पूजिते विष्णुना पुरा ॥ २६ ॥ नीलोत्पलैः सुगंधैश्च सहस्रपरिवत्सरान् ॥ ततः प्रजापतिः सृष्टिं कर्तुकामः समा
हितः ॥ २७ ॥ पूजयामास प्रतिमे पद्मै रक्तोत्पलैः शुभैः ॥ त्वमेव हि कथं पार्थ मृत्युलोके नयिष्यति ॥ २८ ॥ एताभ्यां रहितः
स्वर्गो मृत्युतुल्यो[1] भविष्यति ॥ अदातुकामं देवेंद्रं प्रणिपत्य तमर्जुनः ॥ २९ ॥ उवाच नाहमर्थ्यस्मिन्वरेणानेन वै प्रभो ॥ ततः शक्रः
पुनः पार्थमुवाच सुनिपुंगव ॥ ३० ॥ गृहीत्वा त्वमिमे वीर कुशस्थल्यां निवेशय ॥ शिप्राया उत्तरे तीरे केशवार्कं तु केशवः ॥ ३१ ॥ प्रति
तिष्ठति वै यत्र सर्वपापप्रणाशनः ॥ संस्थापयस्व वै तत्र सर्वपापप्रणाशने ॥ भविष्यति तदा यात्रा आषाढी चाथ कौमुदी ॥ ३२ ॥ आगमि
ष्याम्यहं तत्र सहितोऽप्सरसां गणैः ॥ मरुतश्चागमिष्यंति मेघाश्चैव सविद्युतः ॥ ३३ ॥ मेघखण्डे समुद्भूते मयि तत्र प्रवर्षति ॥ प्रवदिष्यंति वै
लोकाः प्राप्तो देवः पुरंदरः ॥ ३४ ॥ भास्करं च नमस्कृत्य ब्रह्माद्यैः पूजितं विभुम् ॥ प्रतियामि तु बीभत्सो[2] पुनरेव यथागतम् ॥ ३५ ॥ एवं
मूर्तिद्वयं व्यास दत्त्वा पार्थाय वासवः ॥ भूर्लोकं प्रेषयामास सूतेन सह पांडवम् ॥ ३६ ॥ नारदो द्वारकायां तु कृष्णस्याह्वानकारणात् ॥ देव
राजस्य तद्वाक्यं सरहस्यं च केशवम् ॥ ३७ ॥ श्रावयामास विप्रेंद्र एहि कृष्ण कुशस्थलीम् ॥ अर्चे हि पारिजातस्य विश्वकर्मसुकारिते ॥ ३८ ॥
इंद्रेणाथ प्रदत्ते वै ते तुभ्यं पांडवाय च ॥ श्रुत्वा शौरिस्तु[3] तद्वाक्यं प्रतस्थेऽवंतिनीं पुरीम् ॥ ३९ ॥ अवातरच्च आकाशात्तमालिंग्य च पांडवम् ॥
प्रीतः प्रोवाच वचनं परिष्वज्य च फाल्गुनम् ॥ ४० ॥ जन्म मे सफलं जातं प्रीतिर्मे जनितार्जुन[4] ॥ यतो मे प्रीतिरतुला क्रियतां कार्यमुत्तमम् ॥
॥ ४१ ॥ इत्युक्त्वा तौ तदा व्यास समायातौ कुशस्थलीम् ॥ पार्थं प्राह तदा कृष्णः सुसंपूर्णमनोरथः ॥ ४२ ॥ गत्वार्जुन दिशं प्राचीं मूर्तिमेकां
निवेशय ॥ पूर्वाह्णे हि शुभं लग्नं भविष्यति मनोरमम् ॥ ४३ ॥ अहमप्युत्तरां यामि स्थापनार्थं नदीं मुने ॥ मम शंखस्य नादेन प्रतितिष्ठ
रविं प्रभुम्[5] ॥ ४४ ॥ पूर्वां गत्वा ततः पार्थ शुभं स्थानं व्यलोकयत् ॥ व्यास संस्थापयामास दिननाथं च सुस्थिरम् ॥ ४५ ॥ अर्कं देवं स्थाप

१ तृणतुल्यः--इ॰पा॰। २ वीभत्सो--हे अर्जुन--इत्यर्थः। ३ शौरे--इ॰पा॰। ४ अनया--इ॰ पा॰। ५ शुभम्--इ॰ पा॰।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यामि यावद्दध्यौ च पांडवः ॥ तावत्स[1] चाब्रवीदेनं स्थानं कारय शोभनम् ॥ ४६ ॥ कथयामास पार्थाय तेजसा तेन दुःसहम् ॥ सव्यसाची ततो भीतो दृष्ट्वार्चां तां प्रजल्पतीम् ॥ ४७ ॥ तेजस्त्वसहमानो वै देवं वचनमब्रवीत् ॥ क्व देव त्वां स्थां[2]पयामि किं स्थानं तव रोचते ॥ ४८ ॥ सौम्यरूपः सुदर्शश्च प्रजाभ्यो भव गोपते ॥ दिवि संस्थाश्च ये देवा नागाः पातालसंश्रयाः ॥ ४९ ॥ भुविस्था मानवाः पूता भवंतु तव दर्शनात् ॥ सोऽर्जुनमब्रवीद्देवो मा भैस्त्वं मम दर्शनात् ॥ ५० ॥ दक्षिणेन करेणाथ ह्यभं[3]येनाभयप्रदः ॥ समाश्वास्याथ तं शांतं सौम्यमूर्तिर्बभूव ह ॥ ५१ ॥ प्रभाकरेण देवेन निजं तेजः प्रदर्शितम् ॥ ततः सूर्योऽब्रवीत्स्थानमेतद्देवाचलं मम ॥ ५२ ॥ प्राप्ते लग्ने च हरिणा शंखश्चापूरितो महान् ॥ नरेण च स वै सूर्यः स्थापितोऽमरसंस्तुतः ॥ ५३ ॥ ॥ अर्जुन उवाच ॥ ॥ जयति किरणमाली भासुरः श्रांत[4]सप्तिः सकलभुवनधामा प्राग्दिगंताट्टहासः ॥ भवति विगतपापं कीर्तनादेव यस्य प्रचुरकलुषदोषैर्ग्रस्तमंगं नराणाम् ॥ ५४ ॥ ब्रह्माद्यैर्मुनिभिरभिष्टुतं पतंगं कः स्तोतुं कविरभिवांछते प्रकामम् ॥ स्तोष्येहं तदपि सुविस्तरात्सुबुद्धे किं दीपो ज्वलति हि नोदिते शशांके ॥ ५५ ॥ शास्त्रार्थकामनिपुणैर्मुनिभिः स्तुतस्य किं वस्तु यन्न रचितं विविधैः प्रयोगैः ॥ द्वैपायनप्रभृतिभिर्मुनिभिः पुराणैरापीतसारमिह भाति जगत्समस्तम् ॥ ५६ ॥ कामं तथाप्यहमतीव विचार्य बुद्ध्या भानोस्त्रिलोकगुरुपूजितपादयुग्मम् ॥ वृत्तैः स्फुटार्थमधुराक्षरसंधियुक्तैस्त्वां वै विचित्रगतिभिः परिकीर्तयिष्ये ॥ ५७ ॥ तावज्जगद्भवति निश्चलमेव सर्वं तावत्क्रियाश्च विविधा न च यांति सिद्धिम् ॥ यावच्च नाथ कं[5]मलामलमंडल त्वमुत्तिष्ठसे व्यपनयन्किरणैस्तमांसि ॥ ५८ ॥ तावन्न भांति शिखराणि महीरुहाणां गुच्छैस्तु फुल्लवनमीलितलोचनानि ॥ सुप्तानि बोधयसि षट्चरणाकुलानि यावन्न भाभिरमलाभिरनुत्तमाभिः ॥ ५९ ॥ उद्यंतमंबरतले सुरसिद्धसंघाः सब्रह्मदैत्यमुनिकिन्नरनागयक्षाः ॥ त्वामर्चयंति विबुधाः प्रणतैः शिरोभिश्चश्चत्किरीटमणिभाभिरनुत्तमाभिः ॥ ६० ॥ अस्तं गते त्वयि जगद्भवति प्रसुप्तं भूयस्त्वयि प्रतपति प्रतिबोधमेति ॥ एवं सदा वरद लोकहितार्थहेतोरेकस्त्वमेव भगवंस्तिमिरस्य हंता ॥ ६१ ॥ उत्साहशक्तिनयशौर्यसमन्वितानां सेवाप्रयोगरचनाविधितत्पराणाम् ॥ कार्याणि यत्र फलदानि भवंति पुंसां हेतुस्त्वभक्तिरिह नाथ तवेति नूनम् ॥ ६२ ॥ यत्संयुगेषु रथकुञ्जरकुन्तशक्तिनाराचचक्रशरतोमरभीमखड्गैः ॥ क्षिप्रं नराः समुपयांति विजित्य शत्रून्सर्वं सदा प्रणतवत्सल चेष्टितं ते ॥ ६३ ॥ कांतारदुर्गविषमेष्वपि वर्तमाना ऋक्षेभसिंहबहुकण्टकतस्करेषु ॥ तृष्णान्विताश्च बहुशोकविमूढचित्तास्त्वत्कीर्तनाद्धि गतमृत्यु

१ सः--अर्चारूपी--अर्कः--इत्यर्थः । २ प्रमुंचामि--इ० पा० । ३ ह्यभयं दत्तवांस्तदा--इ० पा० । ४ शांतरश्मिः----इ० पा० । ५ उदयाचलमंडले--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





भया भवंति ॥ ६४ ॥ तेजोराशिस्त्वमिह शरणं सर्वतो दुःखितानां त्वत्तुल्योऽन्यो जगति सकले नास्ति कश्चिद्दयालुः ॥ त्वय्येकस्मिन्भवति सकला भक्तिरन्विष्यमाणा त्वामासाद्य प्रभवति कुतो व्याधिदुःखं नराणाम् ॥ ६५ ॥ कः कुष्ठाभिहतः क चारिभिरथो को व्याधिभिः पीडितः के पंग्वंधजडाः क शीर्णचरणः को वा विपन्नक्रियः ॥ इत्येवं प्रसमीक्ष्य देव कृपया दोषात्परित्रायसे कस्यान्यस्य परोपकारनिरता चेष्टा यथैषा तव ॥ ६६ ॥ धर्मः परत्र किल तिष्ठति सेवितोऽसौ कालांतरेण विबुधा वरदा भवंति ॥ त्वं सेवितः प्रणतवत्सल भूतिकामैः सद्यः प्रयच्छसि फलं यदभीप्सितं तैः ॥ ६७ ॥ विभ्रांतकांतहरिणीसदृशेक्षणाभिः कांतोरुहारमणिकुण्डलमेखलाभिः ॥ तेषां भवंति भवनानि विलासिनीभिर्येषां नृणां त्वमसि वै वरदः प्रसन्नः ॥ ६८ ॥ यैस्त्वं नरैः सकृदपि प्रणतः कथंचिद्ध्यातोऽथवा भुवननाथ तथांतकाले ॥ निष्कल्मषा जगति दुष्कृतिनो भवंति ते निर्मलाः सुकृतिनो गतिमाप्नुवंति ॥ ६९ ॥ ये त्वां कुतर्कमतिभिर्न नमंति भक्त्या रोमांचकंचुकशताकुलितैः शरीरैः ॥ ते निर्धनाः परगृहेष्ववभूतमन्नं क्षुत्क्षामकण्ठवदनाः परितर्कयंति ॥ ७० ॥ उदधिजलतरंगक्षोभलोलाक्षियुग्मैः सफणिमणिमयूखोद्भासितैर्लेलिहद्भिः ॥ प्रणिपतितशिरोभिर्नागमुख्यैरजस्रं श्रुतिभिरनुपमाभिः स्तूयसे पुष्कलाभिः ॥ ७१ ॥ तव सुरवर गच्छतोऽनुसरंति त्रिदशनदीकमलोद्भृतानि वातैः ॥ कनककमलरेणुपिंजरितानि भ्रमरकुलानि पतंग चामराणि ॥ ७२ ॥ तत्त्वंध्यानं[1] जलनिधिनिवहे स्थित्वा स्थित्वा चरणनिवहैः ॥ आजीवार्थं प्रतपसि भगवन्कस्ते तुल्यस्त्रिभुवनसमये ॥ ७३ ॥ उदयाद्रिनितंबसंस्थितस्य ह्युदयेष्वस्तमयेषु चावृतस्य ॥ किरणास्तपनीयसप्रभास्ते विलसन्तस्तडितो विडंबयंति ॥ ७४ ॥ यथायथा व्रजति रथस्तवांबरे विपाटयन्घनतिमिरौघसंचयान् ॥ तथातथा क्षुभितमहानिलांसृतं[2] प्रतीयते मुहुरिव दुन्दुभिर्यथा ॥ ७५ ॥ चारुपद्मविनिमीलितेक्षणां चक्रवाककलहंसमेखलाम् ॥ कामिनीमिव रतिश्रमालसां तां विबोधयसि पद्मिनीं करैः ॥ ७६ ॥ नीललोलमतिकान्तमुत्पलं भृंगतुंगचरणाकुलीकृतम् ॥ त्वत्प्रभाभिरनुरागरंजितं पद्मरागमिव शोभते भृशम् ॥ ७७ ॥ स्फुरच्छशांकहारनिर्मलं खग त्वदंकेष्वचंचलम् ॥ विभात्यतीव कांतमंबरं समं बृहच्चैकपाटलम् ॥ ७८ ॥ हरिति[3] च तावन्मुहिर्निषेवितमस्यशुभं[4] भवति च यावदेव किरणैस्तव पूजिततरम् ॥ ऋषिभिर्मुनिभिरुदारधीभिः शाश्वतमार्गपरैर्वरद न शक्यते तव गुणस्तुतिराश्रयितुम् ॥ ७९ ॥ त्वं विष्णुस्त्वं शशांकस्त्वमसुरमथनः षण्मुखस्त्वं धनेशस्त्वं कालस्त्वं च धाता

१ तत्त्वज्ञानम्--इ० पा० । २ क्षुभितमहानिलासृतम्--क्षुब्धवायुसंसरणम्--इत्यर्थः । ३ हरिति--दिशि--इत्यर्थः । ४ मुहिः--मोहः--इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षितिधरमलयापाश्रयस्त्वं हुताशः ॥ ॐकारस्त्वं द्विजानां त्वमिह जलनिधिस्त्वं शरस्त्वं च रुद्रस्त्वं मुख्यस्त्वं पयोदो व्रतयमनियमास्त्वं जगत्सर्वमेव ॥ ८० ॥ त्वमनिंद्य गोपते त्रिपुरमथन मन्मथदाहकरस्त्वमसुरभीमदर्पहा पाहि माम् ॥ त्रिदशाधिपकमलवराननस्त्वमिह देवगुरुर्भगवांस्त्रिभुवनमण्डलेऽस्ति कतमस्तव तुल्यगुणः ॥ ८१ ॥ आदित्य भास्कर दिवाकर सप्तसप्ते मार्तंड सूर्य हरिदश्वपते च भानो ॥ अश्रांतवाहन खंरूप[1] गभस्तिमालिंस्त्वां लोकनाथ शरणं प्रतिपद्यतेऽसौ[2] ॥ ८२ ॥ प्राग्दिग्वधूतिलकभासुरकर्णपूर मंदाकिनीदयितनाथ जगत्प्रदीप ॥ हेमाद्रितापन नभस्तलहाररत्न सन्ध्यांगनावदनराग नमोनमस्ते ॥ ८३ ॥ ब्रह्मैव सत्य शुभमंगल लोकनाथ व्योमांगणेश मुनिसंस्तुत विश्वमूर्ते ॥ आर्तस्य शोकहर किंकरपालकश्च त्वं मे प्रसीद भगवञ्छरणागतस्य ॥ ८४ ॥ कृत्वांजलिं शिरसि पंकजकुड्मलाभं यत्संस्तुतस्त्वमिह देव मयाद्य भक्त्या ॥ तेन प्रभो भव ममोपरि सौम्यमूर्तिर्धर्मे मतिं कुरु सदा श्रियमूर्जितां च ॥ ८५ ॥ नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे ॥ त्रयीमयाय त्रिगुणात्मधारणे विरंचिनारायणशंकरात्मने ॥ ८६ ॥ ॥ सूर्य उवाच ॥ ॥ तुष्टोहमधुना पार्थ स्तोत्रेणानेन सुव्रत ॥ वरं दास्यामि यत्नेन यत्ते मनसि वर्तते ॥ ८७ ॥ मद्दर्शनं हि विफलं न कदाचित्प्रजायते ॥ शूराणां च विशेषेण ह्यदेयं नास्ति यत्नतः ॥ ८८ ॥ ॥ ॥ अर्जुन उवाच ॥ ॥ एष एव वरो मह्यं वराणामुत्तमोत्तमः ॥ अत्र संनिहितो देव सर्वकालं भव प्रभो ॥ ८९ ॥ ये च त्वां मानवा भक्त्या स्तोष्यंति प्रणताः सदा ॥ तेषां धनं च धान्यं च पुत्रदारादिकं वसु ॥९० ॥ मनसश्चेप्सितं सर्वं दातव्यं हि वरो मम ॥ सनत्कुमार उवाच ॥ आदित्योऽस्मै वरं दत्त्वा ह्युवाच वचनं शुभम् ॥ ९१ ॥ यस्त्वत्कृतेन स्तोत्रेण मां स्तोष्यति नरोत्तमः ॥ श्रिया न विच्युतिस्तस्य भवेदेष वरो मम ॥ ९२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये नरादित्यमाहात्म्येऽर्जुनस्तुतिवर्णनंनाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ नारायणोऽपि संस्थाप्य शंखं दध्मौ प्रयत्नतः ॥ तुष्टाव प्रयतो भूत्वा स्तोत्रेणानेन भास्करम् ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ आदित्यं भास्करं भानुं रविं सूर्यं दिवाकरम् ॥ दिवाकरं दिवानाथं तपनं तपतां वरम् ॥ २ ॥ वरेण्यं वरदं विष्णुमनघं वासवानुजम् ॥ बलवीर्यं सहस्रांशुं सहस्रकिरणद्युतिम् ॥ ३ ॥ मयूखमालिनं विश्वं मार्तंडं चंडरोचिषम् ॥ सदागतिं सुभास्वंतं सप्तसप्तिं सुखोदयम् ॥ ४ ॥ देवदेवमहिर्बुध्न्यं धाम्नां निधिमनुत्तमम् ॥ तपोब्रह्ममयालोकं लोकपालमपांपतिम् ॥ ५ ॥ जगत्प्रबोधजनकं

---

१ खरूप--खं रूपयतीति खरूपः--आकाशप्रकाशक--इत्यर्थः । २ असौ--अहम्--इति विनयाद्विप्रकृष्टनिर्देशः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





जगद्बीजं जगत्प्रभुम् ॥ अर्कं निःश्रेयसपरं कारणं श्रेयसां परम् ॥ ६ ॥ इनं प्रभाविणं पुण्यं पतंगं पतगेश्वरम् ॥ दातारं वांछितार्थानां दृष्टादृष्ट
फलप्रदम् ॥ ७ ॥ गृहं गृहकरं हंसं हरिदश्वं हुताशनम् ॥ मंगल्यं मंगलं मेध्यं ध्रुवं धर्मप्रबोधनम् ॥ ८ ॥ भवसंभावित भावं
भूतभव्यभवात्मकम् ॥ दुर्गमं दुर्गतिहरं हरनेत्रं त्रयीमयम् ॥ ९ ॥ त्रैलोक्यतिलकं तीर्थं तरणिं सर्वतोमुखम् ॥ तेजोराशिं सुनिर्वाणं विश्वेशं
धाम सांप्रतम् ॥ १० ॥ कल्पं कल्पानलं कालं कालचक्रं क्रतुप्रियम् ॥ भूषणं मरुतं सूर्यं मणिरत्नं सुलोचनम् ॥ ११ ॥ त्वष्टारं विष्टरं विश्वं
सदसत्कर्मसाक्षिकम् ॥ सवितारं सहस्राक्षं प्रजापालमधोक्षजम् ॥ १२ ॥ ब्रह्माणं वासरारंभे रक्तवर्णं महाद्युतिम् ॥ शुक्लं मध्यंदिने रुद्रं श्यामं विष्णुं
दिनक्षये ॥ १३ ॥ नाम्नामष्टशतं दिव्यं विष्णुना समुदाहृतम् ॥ य इदं प्रयतो भूत्वा पठेद्भक्त्या समाहितः ॥ १४ ॥ न तस्य विपदः क्वापि
सर्वत्रापि शुभा गतिः ॥ धनधान्यसुखावाप्तिः पुत्रलाभश्च जायते ॥ १५ ॥ तेजः प्रज्ञां परं लाभं ज्ञानं च लभते गतिम् ॥ एतत्स्तुत्वा जगन्नाथो
जगामादर्शनं ततः ॥ १६ ॥ केशवार्कमुखं दृष्ट्वा पद्मरागसमप्रभम् ॥ विमुक्तः सर्वपापेभ्यः सूर्यलोके महीयते ॥ १७ ॥ केशवार्कसमीपे तु रेणुतीर्थं
प्रचक्षते ॥ तद्दृष्ट्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ १८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽ
वन्तीक्षेत्रमाहात्म्ये केशवादित्यमाहात्म्यवर्णनंनाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ तीर्थमन्यत्तथा वक्ष्ये
शक्तिभेदमिति स्मृतम् ॥ स्कंदस्य च जटाभद्रं चक्रे यत्र पुरा शिवः ॥ १ ॥ तारकं च तथा दैत्यं हत्वा यत्र सुरद्विषम् ॥ शक्तिं स्कंदः स्वयं क्रुद्धो
निश्चिक्षेप महीतले ॥ २ ॥ ॥ व्यास उवाच ॥ ॥ भगवन्ब्रूहि यत्नेन संशयो मे महामुने ॥ कथं स्कंदः समुत्पन्न एतदिच्छामि वेदितुम् ॥ ३ ॥
॥ ॥ सनत्कुमार उवाच ॥ ॥ पुरा देवासुरे युद्धे निर्जिता दानवैः सुराः ॥ दिवं त्यक्त्वा दिशो याताः शक्राद्या भयविह्वलाः ॥ ४ ॥ तत्र तु देव
राजेन तपसोग्रेण वै मुने ॥ आराधितो महादेवस्त्र्यंबकस्त्रिपुरांतकः ॥ ५ ॥ ततस्तुष्टो महादेवः शक्रस्याभिमुखः स्थितः ॥ उवाच वचनं श्लक्ष्णं
वरमिष्टं ददामि ते ॥ ६ ॥ ॥ शक्र उवाच ॥ ॥ यदि तुष्टोऽसि भगवन्कारुण्यान्मम शंकर ॥ महासेनापतिं देव प्रयच्छँ परमेश्वर ॥ ७ ॥ ॥
॥ ॥ हर उवाच ॥ ॥ उत्पादयामि देवेंद्र स्ववीर्यादूर्जितं सुतम् ॥ सेनान्यां च महासेनं सुराणां भयहारकम् ॥ ८ ॥ ॥ सनत्कुमार उवाच ॥ ॥



१ जगद्गुरुम्--इ० पा० । २ ज्ञानं बुद्धिं च--इ०पा० । ३ दशाश्वमेधे तु--इ०पा० । ४ प्रकीर्तितम्--इ० पा० । ५ जराभद्रम्--इ० पा० । ६ मे देव--इ० पा० । ७ प्रयच्छस्वामरेश्वर--इ०पा० ।
८ असुराणां भयंकरम्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्युक्त्वांतर्दधे देवः सर्वभूतपतिर्हरः ॥ सुतचिंतापरो देवो जगाम च हिमालयम् ॥ ९ ॥ देवदारुवने तस्थौ ज्ञानध्यानपरोऽभवत् ॥ ब्रह्मादयोऽपि
यं देवं योगिनो ध्यानचिंतकाः ॥ १० ॥ ध्यायंति नियतात्मनः प्राणायामपरा मुने ॥ लिंगमूर्तिश्च यो नित्यं पूज्यते सर्वजंतुभिः ॥ ११ ॥
स ध्यायति किमर्थं तन्न विद्मः परमार्थिनः ॥ वं ध्यानपरे देवे देवी हिमवतो गृहे ॥ १२ ॥ मध्ये वयसि वर्तंती यासीद्दाक्षायणी सती ॥
पितुर्गेहे निजो देहो यया योगाद्विसर्जितः ॥ १३ ॥ निमंत्रितो न मे भर्ता इति कोपं चकार या ॥ तां देवीं हिमवान्पूर्वं श्रुत्वा देवर्षिनारदात् ॥
॥ १४ ॥ भवभार्या भवित्रीति नान्यं वरमचिंतयत् ॥ तपस्यति च रुद्राय सा सखीभ्यां समन्विता ॥ १५ ॥ कथं हि शंकरो देवो मम भर्ता
भविष्यति ॥ यावदे[1]वं गतो देवो देवी हिमवतः सुता ॥ १६ ॥ ततः समागता देवाः कृत्वाग्रे बलसूदनम् ॥ जग्मुर्ब्रह्मसदः पुण्यं द्रष्टुं ब्रह्माणम
व्ययम् ॥ १७ ॥ ते सुरास्तत्स्तुतिं कृत्वा वाक्यमेतत्समैरयन् ॥ शरणं भव देवानां दानवैर्विजितात्मनाम् ॥ १८ ॥ ततोऽवोचत्सुरान्ब्रह्मा ज्ञातं कार्यं
समाहितम् ॥ नैतच्छंभोर्विना वीर्यात्कार्यसिद्धिर्भविष्यति ॥ १९ ॥ तथा यतध्वं देवेशं यथा वांछति पार्वतीम् ॥ इत्युक्त्वांतर्दधे ब्रह्मा स्वप्ने लब्धं
धनं यथा ॥ २० ॥ ततो मेरुं समागत्य पुनर्मंत्रं प्रचक्रिरे ॥ तेषामाहेद्दशं शक्रस्तुष्टः शंभुः पुरा मम ॥ २१ ॥ प्रतिपन्नं च देवेन स्वांगात्सेना
पतिं प्रति ॥ तस्मादेवं गते कार्ये कारणं मकरध्वजः ॥ २२ ॥ इति संचिंत्य देवेशः काममाहूय सत्वरम् ॥ उवाच वचनं हृद्यं देवाना
मनुकंपया ॥ २३ ॥ यथा देवो भजेद्देवीं तथा काम विधीयताम् ॥ कारणं महदेतद्धि देवानां समुपस्थितम् ॥ २४ ॥ कामो वाक्यं हरेः
श्रुत्वा प्रहस्येदमुवाच ह ॥ करिष्ये सर्वमेवं हि सखा मे चेद्भवेन्म[3]धुः ॥ २५ ॥ तस्मिन्क्षणेऽथ शक्रेण कामवाक्यादनंतरम् ॥ समादिष्टो
मधुः क्षिप्रं कामस्यानुचरो भव ॥ २६ ॥ लब्ध्वा कामो मधुं मित्रं प्रतस्थे भार्यया सह ॥ कृत्वा सज्यं धनुर्बाणं पौष्पं पाणौ समाहितः ॥ २७ ॥
यत्र देवाधिदेवेशो देवदारुवने स्थितः ॥ नन्दीश्वरः प्रतीहारः कृतध्यानोऽवतिष्ठति ॥ २८ ॥ चूतवृक्षाश्रितः कामो यावद्बाणं सुमोहनम् ॥ संदधात्यं
तरे चास्मिन्देवी प्राप भवाश्रमम् ॥ २९ ॥ त्यक्तध्यानव्रतो देवो हृष्टश्चाह्लादचेतनः ॥ ततो विलोकयामास दिशः सर्वाः प्रयत्नतः ॥ ३० ॥ चूतवृ
क्षाश्रितं काममपश्यच्च रुषान्वितः ॥ भस्मीकृतस्तृतीयाक्ष्णा वह्निज्वाला[4]वता ततः ॥ ३१ ॥ देवोऽप्यन्तर्दधे तस्मात्स्थानादाशु गणैः सह ॥

१ यावत्--देवः शंकरः--एवंगतः--समाधिध्यानयोगस्थः--किं च देवी--हिमवतः सुता च--एवंगता--तपसे कृतनिश्चया--इति--तावत्--इत्यध्याहृत्याग्रेतनं तत इत्यादि वाक्यं योजनीयम्। २ एवम्--इ० पा०।
३ मधुः--वसंतः--इत्यर्थः। ४ वह्निज्वालावलीढकः--इ०पा०।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पार्वती विस्मिता साध्वी लज्जिता दुःखिताऽभवत् ॥ ३२ ॥ हिमवांस्तां समुत्थाप्य निनायाशु निजं गृहम् ॥ गते देवे च देव्यां च कामपत्नी सुदुः
खिता ॥ ३३ ॥ भस्मीकृतं पतिं दृष्ट्वा विललाप सुदुःखिता ॥ दृष्ट्वा रतिं सुदुःखार्तां वागुवाचाशरीरिणी ॥३४॥ आश्वासयंतीं कृपया सखीमिव सुदुः
खिताम् ॥ मा रोदीस्त्वं शुभापांगि तव भर्ता करिष्यति ॥३५॥ सर्वकार्याण्यनंगोपि मित्रकार्यं विधानतः ॥ यदा चायं महादेवः परिणेष्यति पार्वतीम्
॥ ३६ ॥ ततः शंभोरनुध्यानादुत्थास्यति न संशयः ॥ द्वापरांते यदा कृष्णो द्वारकायां निवत्स्यति ॥ ३७ ॥ तत्पुत्रो भविता देही प्रद्युम्नोनाम
ते पतिः ॥ इत्युक्ता साऽजहाच्छोकमाकाशाज्जातया गिरा ॥ ३८ ॥ अचिंतयत्तदा देवी उमापि हिमवद्गृहे ॥ कामस्य दहनं तेजः शंभोर्यत्तदनुत्तमम्
॥ ३९ ॥ कथं भर्त्ता भवेद्देवः कामस्योत्थापनं कथम् ॥ नैतत्तपो विना कार्यं क्वचित्कस्यापि सिध्यति ॥ ४० ॥ एवं संचिंतयित्वाथ सखीभिः
सहिता ततः ॥ तपश्चकार सुमहत्पित्रादेशाच्छुभव्रता ॥ ४१ ॥ वर्षास्वभ्रावकाशस्था हेमंते जलशायिनी ॥ ग्रीष्मे पंचाग्नितप्तांगी तपस्युग्रे समा
स्थिता ॥ ४२ ॥ तां दृष्ट्वा तपसोपेतां ब्रह्मचारिवया हरः ॥ आजगामाश्रमं देव्याः कृतातिथ्योऽब्रवीदिदम् ॥ ४३ ॥ कृशमध्ये कृशापांगि किमर्थं
नवयौवने ॥ तपः करोषि कल्याणि कस्यार्थे कारणं वद ॥ ४४ ॥ उवाच चोत्तरं सा वै सत्यं च मधुरं तथा ॥ बटो तपःसमारंभः क्रियते शंकरा
प्तये ॥ ४५ ॥ विचार्य च हरः श्रुत्वाऽनंदयत्कार्यमात्मनः ॥ उमाभक्तिपरीक्षार्थं शिवं वाचा निनिन्द वै ॥ ४६ ॥ तस्य तद्वचनं श्रुत्वा न
सेहे सा गिरेः सुता ॥ गंतुकामामुमां मत्वा तस्मात्स्थानान्महेश्वरः ॥ स्वं वपुर्दर्शयामास त्रिनेत्रं शूलपाणिनम् ॥ ४७ ॥ लज्जिताभूद्भवानीशं
दृष्ट्वा तस्थावधोमुखी ॥ विजयाथाह योगीन्द्रं प्रार्थ्या चाभिजने त्वियम् ॥ पार्वतीहरणार्थाय यत्नं च प्रकरोम्यहम् ॥ ४८ ॥ इत्युक्त्वांतर्दधे
देवो देव्यागाच्च पितुर्गृहम् ॥ देवीलाभाय सप्तर्षीन्सस्मार स्मरशासनः ॥ ४९ ॥ प्रणेमुस्तेप्यथागम्य संस्मृताः परमेश्वरम् ॥ ऊचुश्च प्रांज
लिपुटाः कुर्म किं शाधि नो भृशम् ॥ ५० ॥ ततोऽब्रवीन्मुनीनीशः समस्तांश्च गिरेर्गृहम् ॥ गत्वा तथा कुरुध्वं मे पार्वती स्याद्यथा प्रिया ॥
॥ ५१ ॥ तथेति ते प्रतिज्ञाय संकेतं शंभुना समम् ॥ कृत्वा जग्मुः सपत्नीका गिरींद्रस्य निवेशनम् ॥ ५२ ॥ दत्तार्घा भूधरेंद्रेण कृतासन
परिग्रहाः ॥ ऊचुरद्रिमुमां यच्छ शंकरायार्थिने प्रियाम् ॥ ५३ ॥ दत्तेत्युक्ता गिरींद्रेण निरूप्योद्वाहवासरम् ॥ लब्धवानुज्ञां समायाता



१. भविष्यति–इ॰पा॰ । २ उत्क्राम्यति–इ॰पा॰ । ३ ब्रह्मचारी च यो हरः–इ॰ पा॰ । ४ विजयानाम तत्सखी । ५ अभिजने–जन्मभूमौ पित्रादिजने–इत्यर्थः । यत्र पूर्वजैरुषितं सोऽभिजनः । तात्स्थ्यात्ताच्छद्व्यमित्यभिजनस्थे पित्रादावित्यर्थोत्र वोद्धव्यः–एतत्प्राप्त्यर्थमेतस्याः पिता याचनीय इति भावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्रास्ते स महेश्वरः ॥ ५४ ॥ ऊचुस्ते शंकरं सर्वे दत्ता हिमवता शिवा ॥ कृतकार्याश्च सर्वेऽपि वव्रजुस्ते यथागतम् ॥ ५५ ॥ चक्रुर्विवाहसामग्रीं ब्रह्मेन्द्रादिसुरास्तदा ॥ वृषासनो जगामाथ नंदीशप्रमुखैर्गणैः ॥ ५६ ॥ शंखदुंदुभिनादैश्च ब्रह्माद्यैरमरैः सह ॥ प्राप्यागेंद्रालयं हीशः कृतकौतुकमंगलः ॥ ५७ ॥ विवाहोमां विधानेन जगाम स्वालयं पुनः ॥ तत्रैकांतरतिर्देवो यावत्तिष्ठति कामवान् ॥ ५८ ॥ तावत्त्रस्तैः सुरैरग्निः प्रेषितोऽगान्महेश्वरम् ॥ अग्नौ तत्र गते देवो रतिं कृत्वा महेश्वरः ॥ ५९ ॥ निचिक्षेप मुखे वह्नेः स्वरेतो व्रीडितो भृशम् ॥ रेतसा तेन तप्तोऽग्निर्गंगातोये निक्षिप्तवान् ॥ ६० ॥ हररेतोऽग्निनोद्गीर्णं गंगामध्ये पपात ह ॥ तया तु स्वतटे न्यस्तं दग्धया रुद्ररेतसा[1] ॥ ६१ ॥ सप्तर्षीणां च षट्पत्न्यः स्नानार्थं जाह्नवीं ययुः ॥ शीतार्तास्ताः कृतस्नाना दृष्ट्वा तेजस्तटे ज्वलत् ॥ ६२ ॥ मत्वाग्निमिति ताः सर्वास्तपंति स्म यथेच्छया ॥ तपंतीनां च वै तासां तद्बीजसंभवं मुने ॥ ६३ ॥ षडाननं समारूढं श्रोणिद्वारेण सत्वरम् ॥ यदान्योन्यमुत्पतितुं शक्ता नाग्निपुरोगमात्[2] ॥ ६४ ॥ चिंतां जग्मुस्तदा सर्वा मुनित्रासात्ततो भयात् ॥ ततश्च तपसो वीर्यान्निष्कृष्य स्वोदरात्ततः ॥ ६५ ॥ षड्भिरेकत्वमापद्य श्वेतपर्वतमस्तके ॥ मध्ये शराणां वै कृत्य[3] निक्षिप्तं वीर्यमुत्तमम् ॥ ६६ ॥ शुक्लायां प्रतिपद्यासीद्द्वितीयायां समीकृतः ॥ तृतीयायां च साकारः सर्वलक्षणलक्षितः ॥ ६७ ॥ चतुर्थ्यां परिपूर्णांगः षण्मुखो द्वादशेक्षणः ॥ अलंकृतस्तु पंचम्यां षष्ठ्यां च स समुत्थितः ॥ ६८ ॥ तेजसा श्वेतताम्रेण ततापस जगत्त्रयम् ॥ जातमित्थं समाकर्ण्य सर्वे शक्रमुखाः सुराः ॥ ६९ ॥ समागत्यास्य संस्कारं ब्रह्मा चक्रे यथाविधि ॥ तुष्टेन पार्वतीशेन शक्तिर्दत्ता दृढा शुभा ॥ ७० ॥ ततो गौर्या मयूरश्च वाहने परिकल्पितः ॥ छागश्चैवाग्निना दत्तः कुक्कुटं[4] सरितां पतिः ॥ ७१ ॥ शूलेन कृत्तिकाभिश्च वर्धितः पुत्रकाम्यया ॥ ततस्तु प्राप्तसंस्कारो ब्रह्माद्यैरभिनंदितः ॥ ७२ ॥ शक्तिहस्तोऽभिषिक्तस्तु देवसेनासमावृतः ॥ वित्ताधिपेन साह्येन[5] पावकिः षण्मुखोऽशतः ॥ ७३ ॥ गांगेयः कार्तिकेयश्च गुहः स्कंद उमासुतः ॥ देवसेनापतिः स्वामी सेनानीश्च शिखिध्वजः ॥ ७४ ॥ कुमारः शक्तिधारी च तस्य नामानि षोडश ॥ यः पठेन्मानवो भक्त्या बाधा तस्य न जायते ॥ ७५ ॥ एवं जातो महासेनो दानवानां क्षयंकरः ॥ कुशस्थल्यां समानीतः शंभुना स्थानकारणात् ॥ ७६ ॥ अभिषिक्तः स तेनासौ भद्रितः स जटाः पुरा ॥ तेन भद्रजटंनाम देवतीर्थं च कथ्यते ॥ ७७ ॥ कृताभिषेकं लब्धास्त्रं महासेनं महेश्वरः ॥ तमुवाच समधुरं सर्वदेवसमागमे ॥ ७८ ॥ रक्षा कार्या त्वया पुत्र सामरस्य शतक्रतोः ॥ देवानां बाधकाः सर्वे

१ तस्य तेजसा--इ० पा० । २ अग्निपुरोगमात्--अग्निपुरोभागात्--इत्यर्थः । ३ आर्षो ल्यप् । ४ दत्तवान्--इति शेषः ५ अस्य--अभिषिक्तः--इति पूर्वेण संबन्धः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





निहंतव्याः सुरद्विपः ॥ ७९ ॥ इत्थं महोत्सवे जाते हृत्तप्रमथसागरे ॥ मातरोऽन्वागताः सर्वाः पातालतलसंस्थिताः ॥ ८० ॥ तासामाहारसंज्ञा भिश्चक्रे नामानि शंकरः ॥ यानि तानि प्रवक्ष्यामि शृणु त्वं मुनिपुंगव ॥८१॥ वटभोजनकामा या ज्ञेयास्ता वटमातरः ॥ भुञ्जते चर्पटान्यास्तु ता वै चर्पटमातरः ॥८२॥ क्रीडार्थं शंभुना चाथ प्राता याः पौलभोजने ॥ षण्णवतिमातरः सत्याः सर्वास्ताः पौलमातरः ॥८३॥ सर्वासां दर्शनं पुण्यं ग्रहभूतविनाशनम् ॥ प्रयततः सदा देव्यो द्रष्टव्या मानवैर्मुने ॥८४॥ लब्ध्वा शक्तिं महासेनो देवसेनो महाव्रतः ॥ जघान दानवेंद्रं तं तारकं तरसा तदा ॥ ८५ ॥ दत्त्वा राज्यं तथेंद्राय स्फीतं निहतकंटकम् ॥ कुशस्थलीं समागम्य तत्र वासं समाचरत्[1] ॥८६॥ एवं निहत्य दैत्येंद्रं स गांगेयो महाबलः ॥ शक्तिं शिप्राजले मुक्त्वा पातालं च बिभेद सा ॥८७॥ ततो भोगवती व्यास शक्तिभेदेन निर्गता ॥ वंदिता सर्वदेवैश्च मुनिभिश्च तपोधनैः॥८८॥ पृथिव्यां यानि तीर्थानि समुद्रादिगतानि च ॥ शक्तिभेदे तु न्यस्तानि शतकोटिसहस्रशः ॥ ८९ ॥ अतोऽतिपुण्यं त्रैलोक्ये कोटितीर्थमुदाहृतम् ॥ ब्रह्मणा स्थापितस्तत्र कोटितीर्थेश्वरः शिवः ॥ ९० ॥ कोटितीर्थे नरः स्नात्वा दृष्ट्वा कोटीश्वरं शिवम् ॥ मुच्यते सर्वपापेभ्यो निर्मोकादिव पन्नगः ॥ ॥ ९१ ॥ श्राद्धं करोति यस्तत्र पितृभक्तो नरो मुने ॥ दशानामश्वमेधानां प्राप्नोति सकलं फलम् ॥ ९२ ॥ पितॄनुद्दिश्य यत्किञ्चित्कोटितीर्थे प्रदीयते ॥ तत्सर्वं[2] कोटिगुणितं जायते नात्र संशयः ॥ ९३ ॥ तत्र तीर्थे नरो यस्तु गां ददाति पयस्विनीम् ॥ सर्वलोकानतिक्रम्य स गच्छेत्परमां गतिम् ॥ ९४ ॥ यावन्त्यंगेषु रोमाणि तत्प्रसूतिकुलेषु च ॥ तावद्युगसहस्राणि शिवलोके महीयते ॥ ९५ ॥ पौर्णमास्याममावास्यां पश्येच्छक्तिधरं तु यः ॥ नापुत्रो नाधनो रोगी सप्तजन्मसु जायते ॥ ९६ ॥ जलप्रवेशं यः कुर्यात्तत्र[3] तीर्थे नरोत्तमः ॥ सोऽक्षयं लभते लोकं यावच्चन्द्रदिवाकरौ ॥ ९७ ॥ वृषोत्सर्गं तु यः कुर्यात्पितृभक्तो नरो मुने ॥ सोऽक्षयं लभते स्थानं यत्सुरैरपि दुर्लभम् ॥ ९८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये शक्तिभेदतीर्थमाहात्म्यवर्णनंनाम चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ ॥छ॥ ॥ ॥ सनत्कुमार उवाच ॥ ॥ स्वर्णक्षुरे नरः स्नात्वा दृष्ट्वा देवं महेश्वरम् ॥ कपिलाशतदानस्य फलमप्यधिकं भवेत् ॥ १ ॥ वाप्यां पितामहस्यापि यः स्नायाद्विजितेंद्रियः ॥ हंसयुक्तेन यानेन ब्रह्मलोकं स गच्छति ॥ २ ॥ तैलाभिधानमातॄणां रात्रौ यच्छति यो बलिम् ॥ तस्य सिद्धिर्भवेत्सद्यो मृतः शिवपुरं व्रजेत् ॥ ३ ॥ विष्णुवाप्यां नरः स्नात्वा चैत्रे वा फाल्गुनेऽथवा ॥ जागरं यस्तु कुर्वीत सोपवासो जितेन्द्रियः ॥ मुच्यते सर्व

१ सार्धमाचरत्—इ०पा० । २ तत्तत्सहस्रगुणितम्—इ०पा० । ३ पितृभक्तः—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पापेभ्यो विष्णुलोकं स गच्छति ॥ ४ ॥ अभयेश्वरदेवस्य भक्त्या नियतमानसः ॥ पूंजाबन्धमथो दृष्ट्वा रुद्रलोकं स गच्छति ॥ ५ ॥ लोके तु जायते दाता सार्वभौमो महीपतिः ॥ यस्त्वगस्त्येश्वरं गच्छेदेकचित्तो नरो मुने ॥ ६ ॥ दृष्ट्वागस्त्येश्वरं देवं सोपवासो जितेंद्रियः ॥ अगस्त्योदयवेलायां मुच्यते सर्वपातकैः ॥ ७ ॥ कृत्वागस्त्यं च सौवर्णं रौप्यं वाथ स्वशक्तितः ॥ पञ्चरत्नसमायुक्तं वस्त्रेण च समन्वितम् ॥८॥ तत्कालीनैः फलैः पुष्पैः पूजनीयो विधानतः ॥ विधानं तस्य वक्ष्यामि चातुर्वर्ण्ये द्विजोत्तम ॥ ९ ॥ सप्तधान्यानि मुख्यानि तावन्त्येव फलानि च ॥ एकं धान्यं फलं चैकमग्रे त्याज्यं भवेन्मुने ॥ १० ॥ यावद्वै सप्त वर्षाणि व्रतमेवं समाचरेत् ॥ ११ ॥ ॥ अर्घ्यमन्त्रः ॥ ॥ काशपुष्पप्रतीकाश वह्निमारुतसंभव ॥ मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते ॥ १२ ॥ दत्तेऽर्घे यत्फलं व्यास तद्वै ह्येकमनाः शृणु ॥ पुत्रवान्धनवांश्चैव जायते नात्र संशयः ॥ १३ ॥ मृतः स्वर्गमवाप्नोति संपन्ने जायते कुले ॥ मर्त्यलोकं पुनः प्राप्य महायोगीश्वरो भवेत् ॥ १४ ॥ यश्चैतच्छृणुयान्नित्यं पठेद्वा सुसमाहितः ॥ सर्वपापविनिर्मुक्तो मुनिलोके स मोदते ॥ १५ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्येऽगस्त्येश्वरमाहात्म्यवर्णनंनाम पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ महाकालं किमर्थं तु किं वा शिवपदं स्मृतम् ॥ कोटीश्वरं किमर्थं तु पावकं तत्किमुच्यते ॥ १ ॥ नरदीपं किमर्थं तु द्वितीया वटमातरः ॥ अभयेश्वरं किमर्थं तु शंखोद्धारणमेव च ॥ २ ॥ शूलेश्वरं किमर्थं तु किमोंकारस्तु कथ्यते ॥ धूतपापं किमर्थं तु किमंगारेश्वरं तथा ॥ ३ ॥ पुरी चोज्जयिनी दिव्या सप्तकल्पा कथं स्मृता ॥ कथयस्व मुनिश्रेष्ठ तस्या नामानि यानि च ॥ ४ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु व्यास यथा ख्याता पुरी दिव्या कुशस्थली ॥ नामतः कर्मतः श्रेष्ठा सप्तकल्पानुवासिनी ॥ ५ ॥ प्राक्कल्पे स्वर्णशृंगाख्या द्वितीये तु कुशस्थली ॥ तृतीयेऽवंतिका प्रोक्ता चतुर्थे त्वमरावती ॥ ६ ॥ विख्याता पञ्चमे कल्पे पुरी चूडामणीति च ॥ षष्ठे पद्मावती ज्ञेया सप्तमे चोज्जयिनी पुरी ॥ ७ ॥ पुनरंते तु कल्पस्य स्वर्णशृङ्गादिका स्मृता ॥ एतानि सप्त नामानि प्रातरुत्थाय यः पठेत् ॥ ८ ॥ सप्तजन्मकृतात्पापान्मुच्यते नात्र संशयः ॥ उज्जयिन्यां पुरा राजा बभूव किलचांधकः ॥ ९ ॥ तस्य पुत्रो महावीर्यो नाम्ना कनकदानवः ॥ युद्धार्थं स महावीर्यः शक्रं युद्धे समाह्वयत् ॥ १० ॥ क्रोधादिंद्रेण संग्रामे युध्यमानो निपातितः ॥ निहत्य दानवं शक्रो भयादंधासुरस्य तु ॥ ११ ॥ जगाम शंकरान्वेषी कैलासं शंकरालयम् ॥ दृष्ट्वा प्रणम्य देवेशं चंद्रार्धकृत

१ पञ्चवंचम्--इ० पा० । २ वंशोद्धारणम्--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



शेखरम् ॥ १२ ॥ भीतो विज्ञापयामास स चाश्वाकुललोचनः ॥ अभयं देहि मे देव दानवादंधकाच्च वै ॥ १३ ॥ शक्रस्येत्थं वचः श्रुत्वा शरणा
गतवत्सलः ॥ ददावभयमेवासौ मा भैस्त्वमंधकाद्धि वै ॥ १४ ॥ कृत्वा रूपं महादेवो विश्वरूपं सुभैरवम् ॥ सर्पैर्ललद्भिरत्युग्रैस्तीक्ष्णदंष्ट्रैर्विषोल्बणैः
॥ १५ ॥ पातालोदररूपैश्च भैरवारावनादिभिः ॥ भुजैरनेकसाहस्रैर्बहुशस्त्रधृतैस्तथा ॥ १६ ॥ सिंहचर्मपरीधानं व्याघ्रत्वगुत्तरीयकम् ॥ गजाजिन
कृताटोपं चंद्राग्निरविलोचनम् ॥ १७ ॥ महामहीध्रतुल्याभ्यां जंघाभ्यां भूषितं सदा ॥ क्षोभयंश्चालयन्सर्वान्पातालस्य तलावधि ॥ १८ ॥ ईदृ
ग्रूपं विधायेशो दनुदैत्यभयावहम् ॥ अवातरन्महीं भीमः पादेनैकेन शंकरः ॥ १९ ॥ तत्रैव हि ह्रदो जातः सर्वदैवतवंदितः ॥ ख्यातं शिवपदं तद्धि
यत्पदाऽऽक्रांतवान्विभुः ॥ २० ॥ पापानां च पुरा कोटिः पादांगुष्ठेन दारिता ॥ कोटितीर्थमतः ख्यातं सर्वपापप्रणाशनम् ॥ २१ ॥ अगस्त्येन
तथा कोटिस्तीर्थानामवधारिता ॥ अतोऽपीदं शुभं लोके कोटितीर्थं सदा स्मृतम् ॥ २२ ॥ दृष्ट्वा तु त्रिदशाः सर्वे स्नाता वै हितकाम्यया ॥ महा
कालकृतं रूपं महाकालस्ततः स्मृतः ॥ २३ ॥ अंधासुरोऽपि दनुजः पुत्रं श्रुत्वा हतं युधि ॥ क्रोधेन तमसाविष्टो रणतूर्याण्यवादयत् ॥ २४ ॥
ससैन्यो निर्गतः प्राप्तो यत्र ते त्रिदशाः स्थिताः ॥ महत्या सेनया सार्धं रथवारणयुक्तया ॥ २५ ॥ तदैव दानवान्वीक्ष्य महाहवकृतोद्यमान् ॥
वेपंतस्ते सुसंनद्धाः शंभुं शरणमाययुः ॥ २६ ॥ मा भैरिति महाकालो देवानुक्त्वा त्रिलोचनः ॥ गृहीत्वा शूलमातिष्ठद्दंष्ट्रादंष्ट्राधरो रुषा ॥ २७ ॥
कोपयुक्ते विरूपाक्षे ज्वालाभिः पूरितं नभः ॥ अंधकेनाथ रुष्टेन शरकोटिस्तु दुःसहा ॥ २८ ॥ मुक्ता जगाम देवानां ननाश शलभाकृति ॥
विस्फुलिंगार्चिषं वह्निं मुंचमानः पिनाकधृक् ॥ २९ ॥ शतशः शकलीचक्रे तं च बाणैरताडयत् ॥ अंधकोऽपि हि युद्धस्थः शिथिलः शिथिला
युधः ॥ ३० ॥ निरुद्धः शंभुना बाणैरलिभिः पंकजं यथा ॥ तस्य सैन्यं प्रविद्धं च तद्गणैर्युधि योधिभिः ॥ ३१ ॥ योधवरैर्हता दिव्यैः स्थाणु
सान्निध्यमाश्रितैः ॥ ततोऽधकेन सैन्यं स्वं भिन्नं दृष्ट्वा तथा सुरैः ॥ ३२ ॥ आत्मानं च महेशेन विद्धं च बाणकोटिभिः ॥ विदलीकृतदेहोऽसौ भय
माश्रित्य वै गतः ॥ ३३ ॥ चकार तामसीं मायां मायाशतविशारदः ॥ तयांतर्हितदेवेशो जगाम दिशमुत्तराम् ॥ ३४ ॥ शंभुर्भीतिभरं बिभ्रद्बभ्राम
भुवि भिन्नहृत् ॥ यस्मिन्मार्गे गतो देवस्तेन दैत्यो जगाम ह ॥ ३५ ॥ वदन्न दृश्यते क्वासौ गतो दुष्टः पुनःपुनः ॥ उवाच चांधकः शब्दं तथोवा
च महेश्वरः ॥ ३६ ॥ तत्र तीर्थमथोत्पन्नं वागंधकमभिश्रुतम् ॥ तत्र स्नात्वा शुचिर्भूत्वा यो वै दद्यात्सशर्करम् ॥ ३७ ॥ नवम्यां मार्गशीर्षस्य शुक्ला

१ भयादंधासुरस्य च–इ॰ पा॰ । २ पातालतलवासिनः–इ॰पा॰ । ३ सैन्यम्–इति शेषः । ४ च वहुधा–इ॰ पा॰ । ५ भ्रांतिभरम्–इ॰ पा॰ ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यां श्रद्धयान्वितः ॥ अक्षयं तद्भवेद्दत्तं दाता शिवपुरं व्रजेत् ॥ ३८ ॥ पितॄनुद्दिश्य यत्किंचिद्दीयते भक्तितः शिवे ॥ तृप्तास्तिष्ठंति ते तावद्यावदाभूत संप्लवम् ॥ ३९ ॥ तमसा च्छादिता देवाः संबभूवुः समाकुलाः ॥ संभ्रांतमनसः सर्वे न किंचिदपि मेनिरे ॥ ४० ॥ एतस्मिन्नंतरे व्यास नरादित्यः स्वतेजसा ॥ उत्तस्थौ नररूपेण कुर्वन्वितिमिरा दिशः ॥ ४१ ॥ नष्टे तमसि दैत्येपि प्रकाशे प्रकटे सति ॥ देवा मुदमवापुस्ते दृष्ट्वा नरं विलोचनैः ॥ ४२ ॥ स्तुवंतो विविधैः स्तोत्रैर्नररूपं दिवाकरम् ॥ उत्तस्थौ नररूपेण दीप्तो यस्माद्दिवाकरः ॥ ४३ ॥ तेनास्य नाम ते चक्रुर्नरदीप इतीश्वराः[1] ॥ यः पश्यति नरो भक्त्या नरदीपं दिवाकरम् ॥ ४४ ॥ मुच्यते सर्वपापेभ्यो यद्यपि ब्रह्महा भवेत् ॥ षष्ठ्यामर्कदिने विप्र सप्तम्यामुपवासयेत् ॥ ४५ ॥ दिनच्छिद्रेथ संक्रांतौ ग्रहणे विषुवत्यथ ॥ कुंडे स्नात्वा शुचिर्भूत्वा जपन्नियतमानसः ॥ ४६ ॥ नरदीपं नरः पश्येत्स्तोत्रवादित्रमंगलैः ॥ गंधैर्धूपैस्तथा दीपैर्नैवेद्यैः पूजयेत्तथा ॥ ४७ ॥ गीतं वाद्यं पुरस्कृत्य प्रणम्याष्टांगमेव च ॥ प्रातर्मध्यापराह्णे वा कृत्वार्कस्य प्रदक्षिणाम् ॥ ४८ ॥ स मुक्तः सर्वपापैस्तु सप्तजन्मकृतैरपि ॥ सूर्यकोटिप्रतीकाशैर्विमानैः सार्वकामिकैः ॥४९॥ सूर्यलोकं प्रयात्याशु यत्सुरैरपि दुर्लभम् ॥ शक्रात्प्राप्य पुरा यस्माद्धातुरत्र प्रतिष्ठितः ॥ ५० ॥ नरेणैव प्रसादेन नरदीपस्ततो ह्ययम् ॥ तदैवास्य पुरा व्यास यात्रा शक्रेण निर्मिता ॥ ५१ ॥ आगमिष्याम्यहं पार्थ सार्धं देवैः समाहितः[3] ॥ ज्येष्ठे सिते द्वितीयायां नरदीपे तु सर्वदा ॥५२॥ तत्राहमागतो ज्ञेयो लोके देवस्य वर्षणात् ॥ ततोऽनंतरमागत्य देवा ये त्रिदशालयात् ॥ ५३ ॥ दृष्ट्वा देवं तथारूढं नरदीपं सुदीपितम् ॥ कृत्वा यात्रां च ते यांति देवयानैरितस्ततः ॥ ५४ ॥ यः पश्येन्मानवो भक्त्या नरदीपं रथस्थितम् ॥ सर्वपापविनिर्मुक्तः सूर्यलोके महीयते ॥ ५५ ॥ रथयात्रामथो वक्ष्ये नरदीपस्य या मुने ॥ तां कृत्वा चैव यत्पुण्यं मुनिभिः परिकीर्तितम् ॥ ५६ ॥ ज्येष्ठे सिते द्वितीयायां रथस्थो हि दिवाकरः ॥ कुशस्थल्यां द्विजैः श्रेष्ठैर्बाहुक्षेपैः प्रणीयते ॥ ५७ ॥ उत्तरां दिशमायांतं यः पश्यति दिवस्पतिम् ॥ अग्निष्टोमस्य यज्ञस्य लभते सोऽखिलं फलम् ॥५८॥ निवृत्य केशवार्काद्यो रथं पश्यति मानवः ॥ शुंडीरस्वामिनो[2] यात्रा कृता तेन न संशयः ॥ ५९ ॥ रथमाकर्षते यस्तु रज्ज्वाकर्षेण वै मुने ॥ कुलमुद्धरते सोऽपि पूर्वान्पितृपितामहान् ॥ ६० ॥ दक्षिणाभिमुखं यांतं नरदीपं द्विजोत्तम ॥ ये संयताः प्रपश्यंति ते यांति च त्रिविष्टपम् ॥ ६१ ॥ सूत्रेण वेष्टयेत्क्षेत्रं रथं देवमथापि वा ॥ सर्वान्कामानवाप्नोति कृतपुण्यश्च जायते ॥ ६२ ॥ प्रदक्षिणां तु सूर्यस्य भक्त्या कुर्वंति ये नराः ॥ प्रदक्षिणीकृता तैस्तु सप्तद्वीपा वसुंधरा ॥ ६३ ॥ प्रातरु

१ ईश्वराः—देवाः—इत्यर्थः । २ कार्त्तिकेयस्वामिनः—इत्यर्थः । ३ समाहिताः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





रथय योभक्त्या मौनी याति दिवाकरम् ॥ दृष्ट्वा तु पूर्वद्वारेण नमस्कृत्य द्विजोत्तम ॥ ६४ ॥ प्रविश्य दक्षिणेनैव रथचक्रं प्रपूजयेत् ॥ तेन द्वारेण निष्क्रम्य प्रणिपत्य व्रजेत्ततः ॥६५॥ पश्चिमं द्वारमाश्रित्य रथस्थं सूर्यमर्चयेत् ॥ चामरं च वितानं च घंटादीनि निवेदयेत् ॥६६॥ पूर्वद्वारे तु गौर्दे या तथाश्वश्चैव दक्षिणे ॥ पश्चिमे च गजः प्रोक्त उत्तरे रथएव च ॥६७॥ कुर्यादेवं तु यो यात्रां नरदीपस्य मानवः॥ सर्वान्कामानवाप्नोति कृतपुण्यश्च जायते ॥६८॥ गोसूर्यशिवशक्राणां स्वर्लोकं लभते शुभम् ॥ प्रदक्षिणा महामेरोः कृता तेन भवेन्मुने ॥६९॥ दद्याद्गवां सहस्रं यो व्यतीपातशते नरः॥ अश्वानां च सहस्रेण यद्यायात्तत्फलं लभेत् ॥७०॥ नरदीपे रथारूढे वपनं कारयेत्तु यः॥ श्रिया न विच्युतिस्तस्य सूर्यलोके महीयते॥७१॥ सूर्यस्य पुरतो वाप्यां मासं नित्यं सरस्वती॥ यस्तामालोकते मर्त्यो दुःस्वप्नं तस्य नश्यति॥७२॥ भक्त्या योऽनुदिनं व्यास नरदीपं प्रपश्यति॥ उत्तमं स्थानमासाद्य पुत्रपौत्रसमन्वितः॥७३॥ प्रक्रीड्य बंधुभिः सार्धं मृतः सूर्यपुरं व्रजेत्॥ प्रनष्टे तिमिरे विप्र जाते सर्वत्र सुप्रभे ॥७४॥ हतेंऽधके महेशेन शूलेन त्रिशिखेन वै ॥ प्रहृष्टाश्च सुराः सर्वे ब्रह्मेंद्रप्रमुखास्तदा ॥७५॥ शंखं दध्मौ तदा विष्णुः सुराणां हितकाम्यया ॥ तत्र तीर्थमथोत्पन्नं शंखोद्धारणसंज्ञकम् ॥७६॥ तत्र संनिहितो विष्णुर्लिंगं चैव चतुर्मुखम् ॥ अनाद्यं चैव विप्रेंद्र लिंगस्यैव समीपतः ॥७७॥ देवस्य दक्षिणे भागे शूलेनाधिष्ठितः स्थितः ॥ चतुर्दश्यां तथाष्टम्यां ये पश्यंति जितेंद्रियाः ॥ ७८ ॥ ते क्षीणाशेषपापौघाः प्राप्स्यंति परमां गतिम् ॥ योगिनीनां बलिं यस्तु यथावत्संप्रदास्यति ॥ ७९ ॥ भूतप्रेतपिशाचाद्यैर्नासौ केनापि बाध्यते ॥ द्वादशीं समुपोष्यैव स्नात्वा देवं जनार्दनम् ॥ ८० ॥ यः पश्येच्छंखिनं देवं सोऽच्युतं स्थानमाप्नुयात् ॥ ८१ ॥ यः स्थूलसूक्ष्मप्रकटप्रकाशो यः सर्वभूतो न च सर्वभूतः ॥ विश्व यतश्चैव हि विश्वहेतुर्नमोस्तु तस्मै पुरुषोत्तमाय ॥ ८२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडेऽवन्तीक्षेत्रमाहात्म्ये नरदीपमाहात्म्यवर्णनंनाम षट्त्रिंशोऽध्यायः ॥३६॥ ॥ छ ॥ सनत्कुमार उवाच ॥ ॥ भिन्नेंऽधके त्रिशूलेन ध्वनी रुद्रस्य निर्गतः ॥ तत्रोंकारः समुत्पन्नो देवदेवो महेश्वरः ॥ १ ॥ तत्र स्नात्वा शुचिर्भूत्वा समाधिनियमेन च ॥ दृष्ट्वोंकारं महादेवं मुच्यते सर्वपातकैः ॥ २ ॥ हत्वांधके त्रिशूलश्च भोगवत्या जले ययौ ॥ दृष्ट्वा शूलं सुतेजस्कं हाटको विस्मयं गतः ॥ पप्रच्छ केन कार्येण भवानिह समागतः ॥ ३ ॥ कथयामास शूलोसौ शंकरेणाहमीरितः ॥ अंधकस्य वधार्थाय पापवृत्तेः सुदुर्मतेः ॥ ४ ॥ भित्त्वा तमहमायातो भोगवत्या जले शुभे ॥ गमिष्यामि पुनस्तत्र यत्र तिष्ठति शंकरः ॥ ५ ॥ शूलोक्तं वचनं श्रुत्वा परमेशदि

१ प्रजया--इ० पा० । २ सर्वविभ्रमः--इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृक्षया ॥ हाटकः शूलमार्गेण निर्जगाम जवेन सः ॥ बहुवक्रसमाकीर्णं सुप्रभं सुमनोरमम् ॥ ६ ॥ तं दृष्ट्वा त्रिदशाः सर्वे शूलेशं हाटकेश्वरम् ॥ प्रणम्य हृष्टरोमाणो यथा प्रोत्फुल्लपंकजम् ॥ ७ ॥ तुष्टुवुर्विविधैः स्तोत्रैर्ब्रह्मविष्णुपुरोगमाः ॥ हाटकेश्वरनामासीत्पाताले यो व्यवस्थितः ॥ ८ ॥ निर्गतः शूलमार्गेण तेन शूलेश्वरः स्मृतः ॥ धूतपापं च यत्तीर्थं देवदेवस्य चोत्तरे ॥ ९ ॥ तत्र पापः स दैत्येंद्रो धूतः शूलेन वीर्यवान् ॥ तेन तीर्थमिदं व्यास धूतपापं निगद्यते ॥ १० ॥ अष्टम्यां वा पौर्णमास्यां चतुर्दश्यां शनौ तथा ॥ उपोष्य रजनीमेकां शिवभक्तो जितेंद्रियः ॥ ११ ॥ धूतपापं तु यः पश्येद्देवदेवं महेश्वरम् ॥ विमुक्तः सर्वपापैः स सप्तजन्मकृतैरपि ॥१२॥ कुलानां शतमुद्धृत्य शिवलोकं च गच्छति ॥ [1]कृताभिषेकं यः पश्येत्पौषे मासि स वै [2]नरः ॥ १३ ॥ शूलेश्वरप्रभावेन मुच्यते ब्रह्महत्यया ॥ विमानानां सहस्रेण मृतो याति परं पदम् ॥ १४ ॥ इति चांधकशूलोयं यावद्भोगवतीं गतः ॥ तावत्समुत्थिता घोरा असुरा रुधिरोद्भवाः ॥ १५ ॥ खड्गहस्ता महावीर्या अनेकशतसंख्यया ॥ चतुर्दिक्षु स्थितैर्घोरैर्हन्यमानो महेश्वरः ॥ सिंहनादं मुमोचाथ पीडितस्तैर्दुरात्मभिः ॥ १६ ॥ सिंहनादेन ते पापा मूर्छिताः पतिता भुवि ॥ पुनः समुत्थिता जग्मुर्देवदेवं महेश्वरम् ॥ वित्रस्ताश्च ततो देवा ब्रह्मविष्णुपुरोगमाः ॥ १७ ॥ असाध्यांस्तांस्तथा मत्वा मंत्रं कृत्वा हितैषिणः ॥ ततो देवा विचार्याथ स्त्रीं सृजाम इति स्वयम् ॥ १८ ॥ इत्युक्त्वोत्पादयामास ब्रह्मा हंसासनां शुभाम् ॥ चतुर्वक्त्रां चतुर्हस्तां ब्रह्माणीं रूपधारिणीम् ॥ १९ ॥ कुमारश्चैव कौमारीं मयूरवरवाहनाम् ॥ रक्तमाल्यांबरधरां [3]शक्तिकुक्कुटधारिणीम् ॥ २० ॥ पुनः कुमारः कौमारीं पक्षींद्रवरवाहनाम् ॥ कृष्णां [4]करालदशनां धर्मराजस्य वाहनीम् ॥ २१ ॥ दैत्यदेहप्रमथनीं दंडमुद्गरधारिणीम् ॥ ललाटलोचनां नीलां कपालकरभूषिताम् ॥ २२ ॥ सिंहाजिनधरां कृष्णां सर्वभूषणभूषिताम् ॥ कर्त्रीहस्तां खड्गहस्तां खेटखट्वांगधारिणीम् ॥ चर्मास्थिकेशवपुषं चामुंडामसृजत्प्रभुः ॥ २३ ॥ वटस्य निकटे पूर्वं निर्मिता लोकमातरः ॥ ततो लोके सुविख्याताः प्रत्यक्षा वटमातरः ॥ २४ ॥ तत्र स्नात्वा शुचिर्भूत्वा मातृः पश्यति यो नरः ॥ स मुक्तः सर्वपापेभ्यो मातृलोके महीयते ॥ २५ ॥ सिंहनादोऽपि देवेन कृतो यत्र महामुने ॥ तत्र सिंहेश्वरो देवः सर्वदुष्कृतनाशनः ॥ २६ ॥ दर्शनात्तस्य देवस्य सिंहवत्स बली भवेत् ॥ सिंहनादे कृते यत्र जातं कण्टकितं वपुः ॥ २७ ॥ तत्र कण्टेश्वरो देवो भक्तानां सर्वदः सदा ॥ तत्र तीर्थे नरः स्नात्वा दृष्ट्वा कण्टेश्वरं शिवम् ॥ २८ ॥ ग्रहभूतपिशाचेभ्यो न भयं प्राप्नुयात्क्वचित् ॥ ततस्ता मातरः सर्वा आदिष्टास्तु हरेण वै ॥ २९ ॥ अन्धासु

१ घृताभिषेकम्–इ० पा० २ किंनरः–इ० पा० । ३ शशिकुर्कुटधारिणीम्–इ०पा० । ४ करालवदनाम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



रस्य रौद्रस्य पिबध्वं रुधिरं द्रुतम् ॥ एतस्मिन्नन्तरे व्यास प्रज्वलज्ज्वलनोपमः ॥ ३० ॥ अभयं शक्र मा भैस्त्वं यत्रोवाचेति शंकरः ॥ तत्र लिंगं समुद्भूतमभयेश्वरमुत्तमम् ॥ ३१ ॥ वंदितं देवगंधर्वैः सिद्धविद्याधरोरगैः ॥ तत्र स्नात्वा शुचिर्भूत्वा सोपवासो जितेन्द्रियः ॥ ३२ ॥ अर्चये देवदेवेशमश्वमेधफलं लभेत् ॥ भूतप्रेतपिशाचेभ्यो भयं तस्य न विद्यते ॥ ३३ ॥ सिंहयुक्तेन यानेन शिवलोकं स गच्छति ॥ अन्धकस्य तु या माया रक्तासुरसमुद्भवा ॥ ३४ ॥ मातृभिर्युध्यमानाभिः क्षयमाशु जगाम सा ॥ देव्यः पिबन्त्यो रक्तौघं दैतेयतनुतश्च्युतम् ॥ ३५ ॥ षट्तृप्तिं परमां जग्मुर्न तु तृप्ता ललाटजा ॥ हतमायः शिष्टकस्तु भिन्नशूलतनुच्छदः ॥ ३६ ॥ उत्तराभिमुखं शूलमंधकोऽकर्षयद्बली ॥ संनिरुद्धो महादेहो वारितो गणपेन सः ॥ ३७ ॥ महाविनायकः ख्यातस्तस्माल्लोकेऽभवन्मुने ॥ दर्शनात्तस्य देवस्य न विघ्नैः पीड्यते नरः ॥ ३८ ॥ मासेमासे चतुर्थ्यां यो गणेशं पूजयेद्विज ॥ न तस्य विघ्नं जायेत इह लोके परत्र च ॥ ३९ ॥ स्वेदबिंदुरथो तस्य ललाटादपतद्भुवि ॥ तस्मादंगारको जातो रक्तमाल्यानुलेपनः ॥ ४० ॥ आवन्त्ये विषये जातो लोहितांगो धरासुतः ॥ अंगारकस्तु रक्ताक्षो महादेवसुतस्तथा ॥ ४१ ॥ नामभिर्ब्रह्मणा स्तुत्वा ग्रहमध्येऽधिरोपितः ॥ तत्र तीर्थमथोत्पन्नमंगारेश्वरमुत्तमम् ॥ ४२ ॥ ब्रह्मणा स्थापितं लिंगं गणगंधर्वसेवितम् ॥ शुचिस्तत्र च यः स्नाति नरो ह्यंगारवासरे ॥ ४३ ॥ दृष्ट्वांगारेश्वरं सोथ मुच्यते सर्वपातकैः ॥ चतुर्थ्यां मंगलदिने नक्तं चार्घ्यं निवेदयेत् ॥ ४४ ॥ यावत्पूर्णाश्चतस्रः स्युस्तावत्कार्याः प्रयत्नतः ॥ पञ्च वै करकाः कार्यास्ताम्रपात्रेण संयुताः ॥ ४५ ॥ गुडपीठमयाः कार्या रक्तवस्त्रसमन्विताः ॥ रक्तचंदनसंयुक्ता रक्तपुष्पैश्च पूजिताः ॥ ४६ ॥ तिलतण्डुलसंपूर्णमेकं तत्रैव कारयेत् ॥ द्वितीयं लड्डुकैश्चैव तृतीयं पयसा तथा ॥ ४७ ॥ उत्तरीभिश्चतुर्थं च पञ्चमं मूलकैस्तथा ॥ कृत्वा ह्येवं विधानेन मंत्रेणार्घ्यं निवेदयेत् ॥ ४८ ॥ कुजाय लोहितांगाय ग्रहमध्यस्थिताय च ॥ कार्तिकेयानुरूपाय सुरूपाय नमो नमः ॥४९॥ शिवललाटसंभूत धरणीगर्भसम्भव ॥ रूपार्थं त्वां प्रपन्नोस्मि गृहाणार्घ्यं नमोऽस्तु ते ॥५०॥ ज्वलितांगारवर्णाभ स्निग्धविद्रुमभासुर ॥ पुत्रार्थी त्वां प्रपन्नोस्मि गृहाणार्घ्यं धरात्मज ॥ ५१ ॥ आवन्त्यमण्डले जातो धरण्यां च शिवेन वै ॥ [6] पुत्रं देहि धनं देहि यशो देहि नमोऽस्तु ते ॥ ५२ ॥ एवं संपूजितो भौमश्चतुर्थ्यां मुनिसत्तम ॥ भुक्त्वा भोगांस्तथा पुत्रान्प्राप्य वै क्षितिमंडले ॥ ५३ ॥ मृतः स्वर्गमवाप्नोति

१ बहु--इ०पा० । २ स्रुतम्--इ०पा० । ३ महेशस्य--इ० पा० । ४ उत्तर्तीभिः--इ० पा० । ५ रूपार्थी--इ० पा० । ६ धनं देहि यशो देहि रूपं देहि नमोऽस्तु ते--इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यावदिन्द्राश्चतुर्दश ॥ ९४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्येऽङ्गारकीचतुर्थी
व्रतमाहात्म्यवर्णनंनाम सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ नास्ति शेषं यदा रक्तं पीयमानं च रक्षसः ॥ चामुं
डायास्ततो रक्तमभूदास्यं च भासुरम् ॥१॥ कृष्णं कृतांतकल्पांतं करालदशनाधरम् ॥ प्रज्वलत्यंधके शांतं ज्वलत्केसरलोचनम् ॥२॥ घोरघर्घरनि
र्घोषस्फीतफेत्कारविस्वरम् ॥ ताक्ष्र्यपक्षकृतापीडं तीक्ष्णदंष्ट्रांकुरोज्ज्वलम् ॥३॥ तस्मिन्मुखे कपालाग्रं निधाय रुषितानना ॥ अपिबद्रुधिरं चंडी चण्ड
दोर्दंडमंडिता ॥ ४ ॥ तया पिबंत्या दैत्येंद्रः शरीरे कृशतां गतः ॥ क्षयं निन्येऽथ संक्षीणक्षुद्रक्षुभितवीक्षणः ॥ ५ ॥ इत्थं निर्वीर्यदेहोऽसौ बभूवांध
कदानवः ॥ सर्वां संहृत्य मायां यो बलं क्षीणमथाकरोत् ॥ ६ ॥ तीव्रं भयं समासाद्य प्राणत्राणपरायणः ॥ दृष्ट्वा नान्यां गतिं लोके दैत्यस्तुष्टाव
शंकरम् ॥ ७ ॥ कृतांजलिपुटो भूत्वा रोमांचितशरीरकः ॥ सात्त्विकं भावमापन्नस्त्यक्त्वा चैव रजस्तमः ॥ ८ ॥ लोकानां कारणं देवं विबुधाधि
पतिं प्रभुम् ॥ शश्वद्बुद्ध्यान्वितो भक्त्या निर्मलेनांतरात्मना ॥ ९ ॥ श्लाघ्यं शिवं च तुष्टाव देवं चंद्रार्धशेखरम् ॥ १० ॥ ॥ अंधक उवाच ॥ ॥
कृत्स्नस्य योऽस्य जगतः सचराचरस्य कर्ता कृतस्य च तथा सुखदुःखदाता ॥ संसारहेतुरपि यः पुनरंतकाले तं शंकरं शरणदं शरणं व्रजामि ॥११॥
यं योगिनो विगतमोहतमोरजस्का भक्त्यैकतानमनसो विनिवृत्तकामाः ॥ ध्यायंति येऽखिलधियोऽमितदिव्यभूतिं तं शंकरं शरणदं शरणं व्रजामि
॥ १२ ॥ यश्चंद्रखंडममलं विलसन्मयूखं बद्ध्वा सदा सुरसरिच्छिरसा[2] बिभर्ति ॥ यस्यार्धदेहमभजद्गिरिराजपुत्री तं शंकरं शरणदं शरणं व्रजामि ॥
॥ १३ ॥ यः सिद्धचारणनिषेवितपादपद्मो गंगां महोर्मिविषमां गगनात्पतंतीम् ॥ मूर्ध्ना दधे स्रजमिव त्रिजगत्पुनंतीं तं शकरं शरणदं शरणं व्रजा
मि ॥ १४ ॥ कैलासशैलशिखरं प्रविकंप्यमानं कैलासशृंगसदृशेन दशाननेन ॥ यः पादपद्मपरिपीडनसेव्यमानस्तं शंकरं शरणदं शरणं व्रजामि
॥ १५ ॥ दक्षाध्वरे च नयने च तथा भगस्य पूष्णस्तथा दशनपंक्तिमशातयद्यः ॥ व्यष्टंभयत्कुलिशहस्तमथेंद्रमीशं तं शंकरं शरणदं शरणं व्रजामि
॥१६॥ येनासकृद्दितिसुताश्च दनोः सुताश्च विद्याधरोरगगणाश्च वरैः समग्रैः ॥ संयोजिता मुनिवराः फलमूलभक्षास्तं शंकरं शरणदं शरणं व्रजामि
॥ १७ ॥ एवं कृतेपि विपयेष्वपि सक्तभावा ज्ञानेन च श्रुतगुणैरपि तेन युक्ताः ॥ यं संश्रिताः सुखभुजः पुरुषा भवंति तं शंकरं शरणदं शरणं व्रजा
मि ॥ १८ ॥ ब्रह्मेंद्रविष्णुमरुतां च सषण्मुखानां योऽदाद्वरान्सुबहुशो भगवान्महेशः ॥ सूतं च मृत्युवदनात्पुनरुज्जहार तं शंकरं शरणदं शरणं

१ सानुक्षीणम्—इ० पा० । २ सुरसरिच्छिरसा—सुरसरिद्युक्तेन शिरसा—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





व्रजामि ॥ १९ ॥ आराधितस्तु तपसा हिमवन्निकुंजे धूम्रव्रतेन तपसा च परैरगम्यः ॥ संजीवनीं समददाद्भृगवे महात्मा तं शंकरं शरणदं शरणं व्रजामि ॥२०॥ क्रीडार्थमेव भगवान्भुवनानि सप्त नानानदीविहगपादपमंडितानि ॥ सब्रह्मकानि ससृजे सुकृताभिधानि तं शंकरं शरणदं शरणं व्रजामि ॥ २१ ॥ यः सव्यपाणिकमलाग्रनखेन देवस्तत्पंचमं प्रसभमेव करालरंध्रम् ॥ ब्राह्मं शिरस्तरणिपद्मनिभं[1] चकर्त तं शंकरं शरणदं शरणं व्रजामि ॥ २२ ॥ ये त्वां सुरोत्तमगुरुं पुरुषा विमूढा जानंति नास्य जगतः सचराचरस्य ॥ ऐश्वर्यमानविगमेऽनुशयेन[2] पश्चात्ते यातनामनुभवंति यथाहमेव ॥ २३ ॥ यः पठेत्स्तुतिमिमां[3] शुचिकर्मा[4] यः शृणोति सततं शिवभक्तः ॥ विप्रसंसदि सदा शुभकर्मा स प्रयाति शिवलोकमखंडम् ॥ २४ ॥ ॥ सनत्कुमार उवाच ॥ ॥ तस्यैवं स्तुवतो देवः शूलपाणिर्वृषध्वजः ॥ पूर्णे वर्षशतस्यांते प्रीतः प्रोवाच शंकरः ॥ २५ ॥ पुत्र तुष्टोऽस्मि भद्रं ते जातस्त्वं निर्मलोऽधुना ॥ दिव्यं ददामि ते चक्षुः पश्य मां विगतज्वरः ॥ २६ ॥ यच्च ते मनसा वापि किंचिच्च कांक्षितं फलम् ॥ तत्तत्सर्वं प्रदास्यामि ब्रूहि दानवसत्तम ॥ २७ ॥ ॥ दानव उवाच ॥ ॥ ब्राह्म्यं वैष्णवमैंद्रं वा पदमावृत्तिलक्षणम् ॥ विदितं मम तत्सर्वं मनागपि न कांक्षये ॥ २८ ॥ यदि तुष्टोऽसि देवेश गाणपत्यं ददस्व मे ॥ सविशेषं विशुद्धं च तदक्षय्यं च सर्वदा ॥ २९ ॥ ॥ महादेव उवाच ॥ ॥ अमरो जरया त्यक्तः सर्वदुःखविवर्जितः ॥ भविष्यसि गणाध्यक्षः सर्वलोकनमस्कृतः ॥ ३० ॥ कामरूपो महायोगी महासत्त्वो महाबलः ॥ अणिमादिगुणैर्युक्तः प्रियश्च मम सर्वदा ॥ ३१ ॥ ॥ सनत्कुमार उवाच ॥ ॥ ततश्च सोंऽधकः श्रीमान्वराँल्लब्ध्वा सुदुर्लभान् ॥ महादेवगणो भूत्वा तत्रैवांतरधीयत ॥ ३२ ॥ गतेंऽधके ततो देव्यो ब्रह्माण्याद्याः समागताः ॥ स देवो यत्र भगवानंधकस्य वरप्रदः ॥ ३३ ॥ तास्तुष्टुवुर्महादेवमथ तुष्टो महेश्वरः ॥ चामुंडा च महेशेन समाश्वस्ता शिवाऽभवत् ॥ ३४ ॥ शंकरं प्रणतं दृष्ट्वा तासामग्रे व्यवस्थितम् ॥ ब्रह्मादयोऽपि ते दृष्टास्तुष्टुवुर्विविधैः स्तवैः ॥ ३५ ॥ प्रशांतास्ता यदा दृष्टाः शंभुना रुधिराशनाः ॥ तदा वोचदिदं वाक्यं तासां स्थित्यर्थमुत्तमम् ॥ ३६ ॥ आवंत्ये विषये सर्वा यस्माज्जाता महाबलाः ॥ आवंत्यमातरस्तस्मात्ख्याता लोके भविष्यथ ॥ ॥ ३७ ॥ अवंत्यां प्रीतिसंपन्नाः सर्वपापप्रणाशिनीः[5] ॥ स्थिरा वसंत्यो लोकानां वरदाश्च भविष्यथ ॥ ३८ ॥ श्रावणस्य तु मासस्य अमावास्यां समाहिताः ॥ ये द्रक्ष्यंति सदा भक्त्या[6] तेषां लोका महोदयाः ॥ ३९ ॥ अपुत्रो लभते पुत्रान्धनार्थी लभते धनम् ॥ रूपवान्सुभगो भोगी सर्वशास्त्र



१ तरणिपद्मम्—सूर्यविकासि कमलम्—इत्यर्थः । २ अनुशयेन—पश्चात्तापेन—इत्यर्थः । ३ स्तवमिदम्—इ०पा० । ४ शुभकर्मा—इ०पा० । ५ अपि—इ० पा० । ६ प्रथमार्थे द्वितीया आर्षी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशारदः ॥ ४० ॥ हंसयुक्तेन यानेन पितृलोके महीयते ॥ पुरीमिमां च रक्षध्वं कल्पेकल्पे क्रमेण तु ॥ ४१ ॥ एवमुक्त्वा तु देवेशो गतः कैलास पर्वतम् ॥ स्तूयमानो गणै रौद्रैर्दैत्यामरगणेश्वरैः ॥ ४२ ॥ असुरसुरगणानां नायकस्यानुकीर्तिं कथयति कथनीयां श्रद्धया यः शृणोति ॥ सकल सुखनिधानं रुद्रलोकं स कांतं सुरगणदनुनाथैरर्चितं यात्यनंतम् ॥ ४३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडेऽवन्तीक्षेत्रमाहात्म्येऽन्धकवृत्तांतवर्णनंनामाष्टात्रिंशोऽध्यायः ॥ ३८ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ भगवन्क्षेत्रमाहात्म्यं कथितं च यथातथम् ॥ तीर्थानामुत्तमं तीर्थं पुण्यानां पुण्यवर्धनम् ॥ १ ॥ कति संत्यत्र तीर्थानि लिंगानि च तथा कति ॥ कथयस्व प्रसादेन पृच्छतो मम सांप्रतम् ॥ २ ॥ ॥ सनत्कुमार उवाच ॥ ॥ षष्टिकोटिसहस्राणि षष्टिकोटिशतानि च ॥ महाकालवने व्यास लिंगसंख्या न विद्यते ॥ ३ ॥ अकामो वा सकामो वा जायते योऽत्र मानवः ॥ महाकालवने रम्ये शिवलोके महीयते ॥ ४ ॥ कृतकामानि तीर्थानि प्रासादायतनानि च ॥ तेषु स्नात्वा शुचिर्भूत्वा शिवलोके महीयते ॥ ५ ॥ पुण्यानि सर्वतीर्थानि सिद्धिक्षेत्राणि सर्वतः ॥ तेषां मुख्यतमं विद्धि क्षेत्रं तीर्थं तथोत्तमम् ॥ ॥ ६ ॥ यः शृणोति महाभक्त्या स याति परमां गतिम् ॥ ७ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्य खण्डेऽवन्तीक्षेत्रमाहात्म्ये महाकालवनमाहात्म्यवर्णनंनामैकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ भगवन्भवता सर्वं भवभीतिविनाशकम् ॥ ईश्वरस्थानमाख्यातं समंतात्साग्रयोजनम् ॥ १ ॥ यत्र क्षेत्रे मृता मर्त्याः सदाचारास्तथोत्तमाः ॥ विमानस्थाः पुरे नूनमैश्वरे ते वसंति च ॥ २ ॥ यत्र कीटपतंगाद्या मृता यांति परां गतिम् ॥ किं तीर्थं पुण्यमन्यच्च महाकालवनादृते ॥ ३ ॥ तस्माद्ब्रूहि ममैकं तु प्रश्नं तथ्येन सांप्रतम् ॥ कथं कनकशृंगेति ख्याता ह्येषा पुरा मुने ॥ ४ ॥ कुशस्थली कथं नाम तथावंती कथं स्मृता ॥ पद्मावती कथं साधो कथमुज्जयिनी तथा ॥ ५ ॥ नाम्नां हेतुमथो तेषां ब्रूहि त्वं मुनिसत्तम ॥ ६ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु व्यास प्रवक्ष्यामि यथा पूर्वं विरंचिना ॥ कथितं वामदेवाय गौरकल्पे पुरातने ॥ ७ ॥ महेशेन भगवता विधिश्चैवात्र हेतुतः ॥ पृष्टस्तु स्वश्च्युतानां च कुतो निवसतां सुखम् ॥ ८ ॥ स्वर्गप्राप्तिश्च भवति स्वेच्छाचारविहारिणाम् ॥ कोऽतिपुण्यतमः श्रेष्ठः प्रदेशः पापहारकः ॥ ९ ॥ कुतो निवर्तितं चित्तं जायते वसतां क्वचित् ॥ वसतामपि लोके शमैहिकं पारलौकिकम् ॥ एतन्मे भगवन्ब्रूहि हितार्थं सर्वदेहिनाम् ॥ ॥ १० ॥ ॥ सनत्कुमार उवाच ॥ ॥ एवमादौ पुरा कल्पे प्रोक्तः श्रेष्ठः स शंभुना ॥ ११ ॥ प्रोवाच पार्वतीकांतं प्रभुः प्रीतः पितामहः ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



भगवन्सर्वकर्ता त्वं सर्वदर्शी सदाशिवः ॥ १२ ॥ अजानन्निव त्वं सर्वं मां पृच्छसि सनातन ॥ यत्र कल्पांतको वह्निरधिज्वालः प्रतिष्ठितः ॥
॥ १३ ॥ त्वमेव च महाकालः सर्वं वै ज्ञायते त्वया ॥ नाथ ये मानवास्तत्र सदाचारास्तथा परे ॥ १४ ॥ निवसंति न ते मर्त्याः सुरास्ते वै[२] न
संशयः ॥ लभंते च पुनः स्वर्गं मृता वै कालपर्यये ॥ १५ ॥ वर्तते च पुरी तत्र रम्यहर्म्या सुशोभना ॥ यस्यां भांति विचित्राणि हर्म्याणि
विविधानि च ॥ १६ ॥ स्वर्णशृङ्गाश्च प्रासादा विहिता विश्वकर्मणा ॥ देवाः संति सदा तत्र तीर्थानि विविधानि च ॥ १७ ॥ पूर्वकल्पे स्थितोऽहं
च यत्र त्वं केशवस्तथा ॥ तामेव च पुरीं द्रष्टुं सर्वे लोका ह्यवंतिकाम् ॥ १८ ॥ तथा देवर्षयः सिद्धा यक्षकिंनरदानवाः ॥ आजग्मुः स्थाणुना सार्धं
वेधसा ब्रह्मयोनिना ॥ १९ ॥ तथैव च वरा नार्यो देवानामतिवल्लभाः ॥ समापेतुः सहस्राणि द्रष्टुमत्यद्भुतां पुरीम् ॥ २० ॥ आगत्य च यदा देवः
सह देवैर्महेश्वरः ॥ वीक्षते नगरीं रम्यामपश्यदावृतां तथा ॥ २१ ॥ प्रासादैः स्वर्णशृंगाढ्यैर्मणिरत्नविभूषितैः ॥ विश्वरूपो हि भगवान्राजा विश्वैक
नायकः ॥ २२ ॥ तत्रास्ते शोभने दिव्ये प्रासादे मणिभूषिते ॥ सेव्यमानः सुरैः सिद्धैर्मुनिविद्याधरोरगैः ॥ २३ ॥ ततो महेशश्च पितामहश्च
समेत्य तं विश्वपतिं ननंदतुः ॥ समर्चितौ तेन यथार्हमादरात्सहानुगावागमनं त्वपृच्छत् ॥ २४ ॥ किमागतौ वा त्रिदिवान्महीतलं सहानुगावांश
यकश्च कथ्यताम् ॥ ततस्तु तावूचतुरब्जजेश्वरौ भवान्हरे यत्र च तत्र नौ रतिः ॥ २५ ॥ त्वया विना नैव सुरालये सुखं महीतले वाथ रसातलेऽ
स्ति नः ॥ कदा त्वया कांचनशेखरा पुरी निवेशिता वेश्मवती विचित्रिता ॥ २६ ॥ ॥ हरिरुवाच ॥ ॥ त्वदर्थमेवेश विशेषशालिनी सृष्टा
हि वै सर्वगुणाकरा मया ॥ प्रयच्छ विश्वेश्वर चावयोरिह स्थानं च तीर्थं प्रलयेऽक्षयं च ॥ २७ ॥ ददाम्यभीष्टं युवयोरिहालयं प्रजापते ह्युत्तरतस्तव
स्थितिः ॥ महेश्वर त्वं व्रज दक्षिणालयं स्थानं सुदत्तं युवयोः सुशोभनम् ॥ २८ ॥ महाकालो ह्यधोज्वालो जगदात्मा प्रभुः स्थितः ॥ गणैरनेक
साहस्रैरावृतः परमेश्वरः ॥ २९ ॥ क्रीडार्थं नगरी सृष्टा सर्वभूतहितैषिणा ॥ मयाद्य युवयोर्दत्ता विहायाऽचलमात्मनः ॥ ३० ॥ भवद्भ्यां हेमशृं
गेति यस्माच्च समुदीरिता ॥ पुरी कनकशृंगेति लोके ख्याता भविष्यति ॥ ३१ ॥ एवं कनकशृङ्गेति प्रथमं नाम कथ्यते ॥ ३२ ॥ जपंतश्च ॥ ४३ ॥

१ लोकं त्वम्–इ० पा० । २ न च मानुषाः–इ० पा० । ३ अपि वल्लभाः–इ०पा० । ४ रमेशश्च–इ० पा० । ५ ईश कजेश–इ० पा० । ६ हि–इ०पा० । ७ शेषपुरी निषेविता–इ०पा० । ८ सदा–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थिता यत्र ब्रह्मविष्णुमहेश्वराः ॥ नित्यं रमंति भक्तानां सर्वाभीष्टफलप्रदाः ॥ ३३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहि
तायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये कनकशृङ्गाभिधानवृत्तांतवर्णनंनाम चत्वारिंशोऽध्यायः ॥ ४० ॥ ॥ छ ॥ ॥ सनत्कुमार
उवाच ॥ ॥ शृणु व्यास यथेयं तु प्रोच्यते हि कुशस्थली ॥ कल्पे तत्पुरुषे पूर्वं वेदविद्भिर्मनीषिभिः ॥ १ ॥ वेधसा सृजितं विश्वं दैत्यदानवरा
क्षसम् ॥ अन्योन्यमदसंमत्तमन्योन्यद्वेषि वै रणे ॥ २ ॥ देवाश्च दानवाः संख्ये नित्यं स्पर्धासमन्विताः ॥ मनुष्या मनुजैः सार्धं सिद्धविद्याधरैः
सह ॥ ३ ॥ चारणाः किंनरैः सार्धमेवं ते द्वेषतत्पराः ॥ युद्धं कुर्वंति सततमविस्पष्टार्थया गिरा ॥ ४ ॥ सर्वे चैव च बलिनो दुर्बलैर्मनुजैः सह ॥
पशवः पशुभिः सार्धं पक्षिणः सह पक्षिभिः ॥ ५ ॥ एवमन्योन्यमन्यैश्च निर्मर्यादमिदं जगत ॥ दृष्ट्वा विश्वस्य कर्तारं विष्णुं विश्वेश्वरं परम् ॥ ६ ॥
व्रजामि शरणं देवं शरणार्त्तिहरं हरिम् ॥ एवं मनसि संधाय दध्यौ ध्यानेन माधवम् ॥ ७ ॥ ततो ध्यातो महायोगी विश्वरूपधरो हरिः ॥ लोहद
ण्डधरः श्रीमानिदमाह पितामहम् ॥ ८ ॥ ब्रह्मन्ध्यातस्त्वया सम्यग्ध्यानयोगेन पश्य माम् ॥ समायांतं तथा ध्यातं जगतां[1] पातुमुद्यतम् ॥ ९ ॥
ततो धाता निशम्यैतत्त्यक्त्वा ध्यानमवेक्ष्य तम् ॥ समुत्थायैकमनसा नमश्चक्रेऽर्चयत्पुनः ॥ १० ॥ पाद्येनाचमनीयेन मधुपर्केण केशवम् ॥ पूज
यित्वा पुनर्वाक्यमुवाचाच्युतमब्जजः ॥ ११ ॥ ॥ ब्रह्मोवाच ॥ ॥ देवदेव जगन्नाथ जगत्सृष्टमिदं त्वया ॥ ऋते त्वया जगद्विष्णो[2] नैवावस्थातु
मर्हति ॥ १२ ॥ शास्ता त्वमस्य विश्वस्य विशुद्धस्य च नापरः ॥ त्वत्तोस्तीदं जगत्सर्वं तस्मात्त्वमनुशासय ॥ १३ ॥ देवदानवगंधर्वाः सयक्षो
रगराक्षसाः ॥ त्वामृते पुण्डरीकाक्षं व्यापिताशेषविग्रहाः[3] ॥ परस्परं विनिघ्नंति तांश्च त्वं रक्षितुं क्षमः ॥ १४ ॥ त्वमस्य विश्वस्य चराचरस्य स्थितेः
सदा प्राणभृदात्मरूपिणी ॥ १५ ॥ त्वया धृतं सर्वमिदं जगद्वै यतस्ततोऽसि त्वमुपेन्द्रसंज्ञः ॥ प्रवेशनं व्याप्तमिदं स्वधाम यत्[4]त्वमुच्यसे विष्णुरतो
मुनीन्द्रैः ॥ १६ ॥ निवासितं विश्वमिदं त्वयाद्य वासश्च[5] धातोरिति वासुदेवः ॥ तवानुगं विश्वमिदं विभुस्त्वमशेषविश्वस्य विभासि राजा ॥ १७ ॥
सेनानुरूपं जगदेव यस्मादतः स्मृतस्त्वं किल विश्वसेनः ॥ विलेखनादस्य चराचरस्य कृतेश्च धातोस्त्वमतोऽसि कृष्णः ॥ १८ ॥ जितं त्वया देव
जगत्त्रयं यज्जितेश्च[6] धातोस्त्वमतोऽसि जिष्णुः ॥ तस्मात्समस्तग्रहलोकपालं जगद्विभो पालय सर्वकालम् ॥१९॥ त्वमस्य सर्वस्य भवादिराजस्त

१ जगतां पातुम्—जगंति पातुम्—इत्यर्थः । २ महाविष्णो—इ० पा० । ३ व्यापिताशेषविग्रह—इ० पा० । ४ यत्—यस्मात्कारणात् इत्यर्थः । ५ वासश्च धातोः—'वस निवासे' इति धातोः—इत्यर्थः ।
६ जितेः—'जि जये' इति धातोः । आर्षत्वात् क्तिवनुबन्धस्य गुणाभावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

वास्तु भद्रासनमद्वितीयम् ॥ प्रदक्षिणावर्तनकस्तु शंखः करस्थितः शोभति पूरुषस्य ॥ २० ॥ सुदर्शनं नाम तवास्ति चक्रमतो हि गीतः कविभि
स्तु चक्री ॥ ध्वजोऽस्ति ते देव सुपर्णसेवितस्तथा सुपर्णश्च तवास्ति वाहनम् ॥२१॥ तुरंगमाः संतु तवारिसंहरे तथा हृषीकेश सुदन्तदन्तिनः॥ कि
रीटनिष्कांगदकर्णपूरकेयूरहारोत्तमहेमसूत्रैः ॥ २२ ॥ विचित्रवस्त्रोत्तमरक्तमाल्यैर्विभूषितस्त्वं भव भीमसेनः ॥ श्रिया कदाचिच्च न मुच्यते भवान्भवं
ति ते नित्यमनंतसंपदः ॥ २३ ॥ तवानुगा भक्तिरिहास्तु वै सती[1] मुकुन्द भक्ते त्वमतः प्रसीद मे[2] ॥ २४ ॥ ॥ सनत्कुमार उवाच ॥ ॥ स एव
मुक्तस्तु पुरो दिवौकसां विभुः प्रसन्नस्त्विदमब्रवीद्धरिः ॥ विरिंचें[3] मे दर्शय तस्य मंडलं त्वया विमुक्तं[5] च सदाशिवं विभो ॥ २५ ॥ स्थिरं स्थितो
यत्र जगत्करोम्यहं ततो विरिंचिः[4] कुशमुष्टिमाददे ॥ पवित्रदेशस्य निदर्शनाय जगाम पुण्यं च्यवनाश्रमं तदा ॥ २६ ॥ ततः स्थलीमुच्चतरामवाप्य
पितामहः केशवमाह चादरात् ॥ त्वदुद्भवं चात्र पवित्रमंडलं त्वया विमुक्तं च सदा शिवं विभो ॥ २७ ॥ त्वमेव विष्णुर्विबुधार्चितः
सदा स्मृतो मुनींद्रैः स च विष्टरश्रवाः ॥ निषीद विश्वेश कुशै[6]स्थलं यदा तदाश्रितो माधवमासरूपवान् ॥ २८ ॥ कुशस्थलीं संस्थित
एव देव इत्थं विधात्रा पुरुषोत्तमः स्तुतः ॥ स्थलीं कुशैरास्तरितामुपाविशत्कुशस्थलीं देवमुनीन्द्रसेविताम् ॥ २९ ॥ समंततो योजनसं
ख्ययावृतां ततो विधाता पुरुषोत्तमस्तथा ॥ कुशस्थलीति प्रथितं जगत्त्रये प्रचक्रतुर्नाम च तावुभावपि ॥ ३० ॥ तत्र विश्वपतिः
श्रीमान्विश्वेशो विश्वकृद्विभुः ॥ विश्वं शशास विश्वात्मा सर्वविश्वस्य नायकः ॥ ३१ ॥ एवं कुशस्थली ख्याता हेमशृङ्गेति या
पुरा ॥ स्तीर्णा कुशैर्यतो धात्रा कुशस्थली ततः स्मृता ॥ ३२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम
आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये व्याससनत्कुमारसंवादे कुशस्थलीनामहेतुकथावर्णनंनामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥ ॥ छ ॥
॥ ॥ सनत्कुमार उवाच ॥ ॥ पुरा चैशानकल्पे तु स्मृतावंती यथा पुरी ॥ तथा शृणु सुरैः पूर्वं दैत्यसैन्यपराजितैः ॥ १ ॥ आश्रितं मेरुशिखरं
वनकंदरगुहावृतम् ॥ तत्र गत्वा द्विजश्रेष्ठ मंत्रं च चक्रुरुद्यताः ॥ २ ॥ अन्योन्यं च समासाद्य समभ्यर्च्य परस्परम् ॥ जग्मुः सर्वे सुरगणा यत्र ब्रह्मा
प्रजापतिः ॥ ३ ॥ निवेदयांचक्रिरे सर्वं[7] तत्रागमनकारणम् ॥ तेषां तद्वचनं श्रुत्वा देवानां स प्रजेश्वरः ॥४॥ जगाम त्रिदशैः साकं देवदेवं महेश्वरम् ॥ 

१ सताम्--इ०पा० । २ मे--मयि भक्ते--इति पूर्वेण सम्बंधौचित्येन सतम्यर्थे षष्ठी । ३ अकारांतोऽप्ययं 'विरिंच' शब्दः । ४ इकारांतोऽप्ययम् । ५ स च--त्वम्--इति शेषः । ६ कुशैः कुशेश्वरम्--०पा० । ७ अक्षराधिक्यमार्षम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स चापि ह्यगमत्तत्र वैकुंठं धाम यत्र वै ॥ ५ ॥ ऋद्धिसिद्धिप्रदं नित्यं मुनिचारणसेवितम् ॥ किन्नरैर्गीयमानं च अप्सरोगणसेवितम् ॥ ६ ॥ ऋषिभिर्भार्गवादिभिर्देवर्षिनारदोत्तमैः ॥ सिद्धगंधर्वमुख्यैश्च कुमारैः सनकादिभिः ॥ ७ ॥ प्रजापतिगणाकीर्णं मानवैश्च चतुर्दशैः ॥ वसुभिर्विश्वे देवैश्च पितॄणामुत्तमैर्गणैः ॥ ८ ॥ संसेव्यं च सदाचारैः पुण्यवद्भिर्जनैस्तथा ॥ दिव्यं दिव्यैश्च प्रासादैर्दिव्यपादपशोभितम् ॥ ९ ॥ मणिरत्नैश्च सोपानै र्दिव्यं सरसशोभितम् ॥ हंसकारंडवाकीर्णं मणिभाभिः सुभास्वरम् ॥ १० ॥ षडूर्मिरहितं स्थानं यत्र तिष्ठन्ति पक्षिणः ॥ तत्र गत्वा सुराः सर्वे वासु देवदिदृक्षया ॥ स्तुतिमारेभिरे कर्तुं देवदेवजगत्पतेः ॥ ११ ॥ ॥ देवा ऊचुः ॥ ॥ नमोऽनंताय बृहते कूर्माय वै नमोनमः ॥ १२ ॥ नृसिंहरूपायोग्राय नमो वाराहरूपिणे ॥ राघवाय च रामाय ब्रह्मणेऽनंतशक्तये ॥ १३ ॥ वासुदेवाय शांताय यदूनां पतये नमः ॥ नमो बुद्धाय शुद्धाय कल्कये म्लेच्छनाशिने ॥ १४ ॥ इति स्तवाभियुक्तानां वागुवाचाशरीरिणी ॥ शृणुध्वं भोः सुराः सर्वे भूत्वा चैकाग्रमानसाः ॥ १५ ॥ महाकालवने रम्ये ब्रह्मर्षिगणसेविते ॥ तत्र पुण्या पुरी ह्येका सर्वकामफलप्रदा ॥ १६ ॥ नाम्ना कुशस्थली रम्या सिद्धगंधर्वसेविता ॥ कल्पादौ कल्पमध्ये वा यत्र संनिहितो हरः ॥ १७ ॥ कल्पक्षये क्षयं यांति स्थावराणि चराणि च ॥ तीर्थानि चैव सर्वाणि पुण्यान्यायतनानि च ॥ १८ ॥ सरितः सागराः सर्वे सरांस्युपवनानि च ॥ औषधीर्वृक्षवल्लीश्च यंत्रं मंत्रं शुभाशुभम् ॥ १९ ॥ ज्योतींषि चंद्रसूर्यौ च सर्वं विष्णुमयं जगत् ॥ तेषां बीजं च पुण्यं च जीवकर्माशयं तथा ॥ २० ॥ सर्वमादाय भगवाञ्छंकरस्तत्र तिष्ठति ॥ सर्वतीर्थमयी गंगा सर्वदेवमयो हरिः ॥ २१ ॥ सर्वयज्ञमयो वेदः सर्वधर्ममयी दया ॥ रेवा च सरितां श्रेष्ठा भुवि पुण्यकृताधिका ॥ २२ ॥ तस्माद्धितकरं क्षेत्रं कुरूणां वै सुरोत्तमाः ॥ तस्माद्दशगुणं मन्ये प्रयागं तीर्थमुत्तमम् ॥ २३ ॥ तस्माद्दशगुणा काशी काश्या दशगुणा गया ॥ ततो दशगुणा प्रोक्ता कुशस्थली च पुण्यदा ॥ २४ ॥ उपरागसहस्राणि व्यतिपातायुतानि च ॥ अमालक्षं तु एतस्याः कलां नार्हंति षोडशीम् ॥ २५ ॥ लक्षमिंदुक्षये दानं सहस्रं चायनद्वये ॥ व्यतीपाते च कोटिः स्याद्रा कायां च ह्यनंतकम् ॥ २६ ॥ तस्माद्धितकरा देवा पुरी ह्येषा कुशस्थली ॥ अनंताऽनंतसंख्यातं दानं किंचित्कृतं नरैः ॥ २७ ॥ तत्सर्वं भोः सुर श्रेष्ठाः सर्वं तच्चाक्षयं भवेत् ॥ तस्मात्सर्वप्रयत्नेन यूयं यात हि मा चिरम् ॥ २८ ॥ क्षीणपुण्या भवंतो वै बाधंते तेन वः सुराः ॥ महाकालवने रम्ये पुरी ह्येषा कुशस्थली ॥ २९ ॥ तत्र गत्वा भवंतो वै स्नानदानादिकं भुवि ॥ आचरध्वं सुविधिना पुण्यात्स्वर्गमवाप्स्यथ ॥ ३० ॥

१ द्वादश्याम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





एतच्छ्रुत्वा वचस्तस्या वाण्याश्चाकाशगं तदा ॥ प्रणम्य शिरसा तस्यै ब्रह्मेशानपुरोगमाः ॥ ३१ ॥ पुनर्जग्मुः सुराः सर्वे यत्र माहेश्वरं वनम् ॥ पुरीं चैव द्विजश्रेष्ठ सर्वकामफलप्रदाम् ॥ ३२ ॥ चातुर्वर्ण्यसमाकीर्णामृषिगंधर्वसेविताम् ॥ पुण्यवद्भिर्जनैः पूर्णां सिद्धचारणसेविताम् ॥ ३३ ॥ दरिद्रो न जडो मूर्खो न रोगी न च मत्सरी ॥ न व्याधितो नापकारी जनः क्वचित्प्रदृश्यते ॥ ३४ ॥ दांताः शांताः सुशीलाश्च जरारोगविवर्जिताः ॥ स्वधर्मनिरता नित्यं सदाचारातिथिप्रियाः ॥ ३५ ॥ नरा यत्र निवसंति नार्यश्चैव पतिव्रताः ॥ महोत्सवाः सुगीतानि हव्यं कव्यं गृहेगृहे ॥ ३६ ॥ ईदृशीं च पुरीं दृष्ट्वा देवा हर्षं परं गताः ॥ तत्र तीर्थं समाख्यातं नाम्ना पैशाचमोचनम् ॥ ३७ ॥ पुण्यवद्भिः सदा सेव्यं सर्वतीर्थनिषेवितम् ॥ तस्मिन्स्नात्वा च जप्त्वा च हुत्वा दत्त्वा च देवताः ॥ ३८ ॥ पुण्यं चाथाक्षयं लब्ध्वा पुनर्याताः सुरालयम् ॥ जित्वाऽसुरान्महादुद्यान्स्थानं प्राप्ताः स्वकंस्वकम् ॥ ३९ ॥ येऽस्यां[1] कुर्युर्महाभागाः स्नानं दानं तथार्चनम् ॥ हवनं तर्पणं पितॄंस्तत्सर्वं स्याद्ध्यनंतकम् ॥ ४० ॥ तस्मात्सर्वप्रयत्नेन एतत्कार्यं सदा बुधैः॥ देवतीर्थौषधीबीजभूतानां चैव पालनम् ॥ ४१ ॥ कल्पेकल्पे च यस्यां वै तेनावंती[2] पुरी स्मृता ॥ अद्यप्रभृति पुरी ह्येषा नाम्नावंती कुशस्थली ॥ ४२ ॥ इत्युक्त्वा वै तदा देवाः स्वधाम परमं गताः ॥ तदारभ्य द्विजश्रेष्ठ ह्यवंती भुवि विश्रुता ॥ ४३ ॥ य एतां सुकथां दिव्यां पुण्यां च पापहारिणीम् ॥ शृणुयाच्छ्रावयेद्यो वै सर्वपापैः स मुच्यते ॥ ४४ ॥ अपुत्रो लभते पुत्रमधनो धनमाप्नुयात् ॥ वाजपेयसहस्राणां राजसूयशताधिकम् ॥ ४५ ॥ पुण्यं लब्ध्वा नरो नित्यं शिवलोके महीयते ॥ ४६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्येऽवंत्यभिधानकथावर्णनंनाम द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ एकस्मिन्नंतरे व्यास यथोज्जयनी स्मृता पुरी ॥ तथाहं संप्रवक्ष्यामि शृणुष्व त्वं समाहितः ॥ १ ॥ त्रिपुराख्यो महादैत्यः सर्वदैत्यजनेश्वरः ॥ तपस्तेपे सुदुर्धर्षं ब्रह्मणस्तुष्टिकारणात् ॥ २ ॥ आतपे चाग्निसेवां वै प्रावृषि मेघडंबरम् ॥ दमयित्वा तदात्मानं शीतकाले जलाशये ॥ ३ ॥ शीर्णपत्रजलाहारो वायुभक्षी निराश्रयः ॥ गायत्रीव्रतमास्थाय त्यक्तसर्वपरिग्रहः ॥४॥ एवं वर्षसहस्रं तु तपस्तप्तं[3] सुदुश्चरम् ॥ पूर्णे वर्षसहस्रे तु ब्रह्मा प्रीततमोऽब्रवीत् ॥ ५ ॥ व्रियतां भोऽसुरश्रेष्ठ वरं मत्तोभिवांछितम् ॥ तत्सर्वं सांप्रतं लोके वरं तुभ्यं ददामि वै ॥ ६ ॥ एवमुक्तः स विधिना दैत्यस्त्रिपुरसंज्ञितः ॥ उवाच वचनं सद्यो ब्रह्माणं संशितव्रतम् ॥ ७ ॥ ॥ त्रिपुर उवाच ॥ ॥ यदि तुष्टमना ब्रह्मन्वरं मे दातुमिच्छसि ॥ देवदानवगंधर्वपिशाचो

१ अस्याम्—अवन्त्याम्—इत्यर्थः । २ अवन्ती—'अव' धातोः पालनार्थत्वात्—'अवति--पालयति--देवतीर्थौषधीबीजभूतानि—इत्यवंती'—इति व्युत्पत्तेः । ३ तपित्वा तु--इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रगराक्षसैः ॥ अवध्योऽहं सदा भूयां वरमेतद्वृणोम्यहम् ॥ ८ ॥ ॥ ब्रह्मोवाच ॥ ॥ एवं भवतु भो वत्स विचरस्वाकुतोभयः ॥ इत्युक्त्वा सहसा ब्रह्मा तत्रैवांतरधीयत ॥९॥ तदारभ्य महादैत्यो देवानां कदनं महत् ॥ चकार कोपपूर्णो वै पूर्ववैरमनुस्मरन् ॥ १० ॥ वासयित्वा यत्र तत्र त्रिपुराणि चराणि च ॥ अत्र वासकृतः सर्वे वर्णाश्रमपरा जनाः ॥ ११ ॥ तेषां वै कदनं चक्रे नानोपायेन पापधीः ॥ तस्मिन्पुरे दुष्टवासे ब्राह्मणा वेदपारगाः ॥ १२ ॥ न जुहुयुश्चाग्निहोत्रं सोमपानं न कर्हिचित् ॥ कुतश्चित्सुकृतं कर्म जनाः कुर्वंति नो मुने ॥ १३ ॥ स्वाहाकारस्वधाकारवषट्कारविवर्जिताः ॥ नोत्सवो दृश्यते गेहे कस्यचिद्भुवि विस्तृतः ॥ १४ ॥ देवतायतनं नास्ति तथा नो शिवपूजनम् ॥ नास्ति यज्ञो न दानानि न गोब्राह्मणपूजनम् ॥ ॥ १५ ॥ सदाचारजनो नास्ति दया मानवविवर्जिता ॥ न दानी नोपकारी च तपस्वी नैव दृश्यते ॥ १६ ॥ एवं व्यास पुरे तस्मिन्नष्टप्रायमिदं जगत् ॥ प्रजानां ब्राह्मणा मूलं वेदमूला हि ब्राह्मणाः ॥ १७ ॥ वेदमूलपरा यज्ञा यज्ञमूला हि देवताः ॥ तस्माद्व्यास हतं सर्वं कृतं तेन दुरात्मना ॥ ॥ १८ ॥ तेन देवगणाः सर्वे हतप्राया हतौजसः ॥ विचरंति यथा मर्त्या भुवि तेन पराजिताः ॥ १९ ॥ अन्योन्यकृतसंधाना मंत्रं कृत्वा समाहिताः ॥ जग्मुस्ते तत्र यत्रास्ते प्रजापतिरकल्मषः ॥ २० ॥ त्रिदशाः कथयामासुरात्मव्यसनकारणम् ॥ तज्ज्ञात्वा सहसोत्थाय ब्रह्मा लोकपितामहः ॥ २१ ॥ जगाम त्रिदशैः सार्धं महाकालवनोत्तमम् ॥ यत्रास्ते सततं देव उमया सहितः शिवः ॥ २२ ॥ यत्रावंती पुरी दिव्या सर्वतीर्थनिषेविता ॥ तत्रागत्य सुरैः साकं स्वयंभूश्चतुराननः ॥२३॥ स्नानं दानं जपं होमं कृत्वा रुद्रसरे तदा ॥ पूजयित्वा महाकालं ब्रह्मा वचनमब्रवीत् ॥२४॥ ॥ ॥ ब्रह्मोवाच ॥ ॥ देवदेव महादेव भक्तानामभयंकर ॥ श्रूयतां भोः सुरश्रेष्ठ देवकार्यमनुत्तमम् ॥२५॥ त्रिपुरोनाम दैत्येंद्रो देवानां कदनं महत् ॥ करोति सततं दैत्यो देव[1]ब्राह्मणनिंदकः ॥२६॥ वासयित्वा पुरस्तिस्रो विस्तीर्णा विचरत्यथ ॥ तत्र स्थितानि भूतानि नाशं यांति दुरात्मना ॥२७॥ एवं कृत्वा प्रजाः सर्वाः क्षयं नीताश्चराचराः ॥ उद्वासितानि द्वीपानि ग्रामाश्च नगराणि च ॥२८॥ ऋषीणामाश्रमाः सर्वे यतीनामायतनानि च ॥ एवं कृत्वा सुराः सर्वे भ्रष्टराज्याः पराजिताः ॥ २९ ॥ विचरंति यथा मर्त्यास्त्रिपुरेण दुरात्मना ॥ मत्तो लब्धवरो नित्यं व्रजत्येवाकुतोभयः ॥ ॥ ३० ॥ तस्मात्सर्वप्रयत्नेन वधस्तस्य विचिंत्यताम् ॥ ३१ ॥ इति श्रुत्वा वचस्तस्य ब्रह्मणः संशितात्मनः ॥ चिरं ध्यात्वा महादेवो ब्रह्माणं तमुवाच ह ॥ ३२ ॥ ॥ महादेव उवाच ॥ ॥ श्रूयतां भोः सुरश्रेष्ठा ब्रह्मशक्रपुरोगमाः ॥ जयोपायं करिष्यामि दैत्यस्यास्य दुरात्मनः ॥३३॥

१ वेदब्राह्मणनिंदकः--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





तपश्चरत यूयं वा आत्मनो जयकांक्षिणः ॥ अवंत्यां यद्धुतं दत्तं तत्सर्वं चाक्षयं भवेत् ॥ ३४ ॥ इत्युक्त्वा सर्वदेवानां तत्रैवांतर्हितः
शिवः ॥ गत्वा स्मशाननिलये भूतप्रेतनिषेविते ॥ ३५ ॥ जयार्थं तस्य दैत्यस्य त्रिपुरस्य दुरात्मनः ॥ उपासांचक्रिरे तत्र चामुण्डायाः सुरेश्वराः॥
॥ ३६ ॥ महिषैश्च महामेध्यैः पशुपुष्पार्घतर्पणैः ॥ बलिभिर्विविधैर्दानैर्धूपदीपाग्नितर्पणैः ॥ पूजयित्वा तदा देवीं तामीडे वृषभध्वजः ॥ ३७ ॥
दुर्गां भगवतीं भद्रां दुर्गसंसारतारणीम् ॥ त्रिपुरांतकारिणीं कृत्यां चंडमुंडवधोद्यमाम् ॥ ३८ ॥ दैत्यमेदोमदोन्मत्तां रक्ताख्यां रक्तदंति
काम् ॥ रक्तांबरधरां धीरां रक्तपुष्पावतीं सतीम् ॥ ३९ ॥ महिषवाहिनीं श्यामां यक्षासनपरिग्रहाम् ॥ द्वीपिचर्मपरीधानां शुष्कमांसाति
भैरवाम् ॥ ४० ॥ पूजयित्वा प्रसन्नात्मा ध्यानमास्थाय संस्थितः ॥ तदा भगवती भद्रा ययेदं धार्यते जगत् ॥ प्रसन्नवदना
भूत्वा प्रत्यक्षं प्राह चंडिका ॥ ४१ ॥ ॥ देव्युवाच ॥ ॥ व्रियतां भोः सुरश्रेष्ठ वरं मत्तोऽभिवांछितम् ॥ सर्वं त्वयोक्तं यच्छामि
जगतामुपकारकम् ॥ ४२ ॥ ॥ श्रीहर उवाच ॥ ॥ यदि तुष्टासि वै देवि देहि मे वरमुत्तमम् ॥ येन हन्मि महादैत्यं त्रिपुरं देवकंटक
म् ॥ ४३ ॥ ॥ श्रीदेव्युवाच ॥ ॥ जय ह्येनं महादेव गृहाण पाशुपतं परम् ॥ मया दत्तं सुरश्रेष्ठ दैत्यनाशकरं परम् ॥ ४४ ॥ महापाशुपतं शस्त्रं
करे कृत्वा च शंकरः ॥ ४५ ॥ उज्जहार तदा शंभुर्दैत्यनाशाय सत्वरः ॥ महाडंबरिको भूत्वा सर्वप्राणिभयंकरः ॥ ४६ ॥ स्तुतिं कृत्वा ययौ वाग्भिः
पृष्ठतोऽनुययुः सुराः ॥ शरेणैकेन वै रुद्रो जघान तं महासुरम् ॥ ४७ ॥ मायिनं तं त्रिधा भित्त्वा मायायुद्धेन शंकरः ॥ पुनरागात्पुरीमेतामवंतीम
मरसेविताम् ॥ ४८ ॥ जयाशिषा प्रयुंजाना ऋषयः सिद्धचारणाः ॥ तुष्टुवुश्च तदा देवा जयशब्देन हर्षिताः ॥ ४९ ॥ अप्सरा ननृतुस्तत्र गंधर्वा
ललितं जगुः ॥ ववौ तदा पुण्यतमो वायुः सुखप्रदो नृणाम् ॥५०॥ जयशब्दस्तदा जातः प्राणिनां च गृहे गृहे ॥ जज्वलुश्चाग्नयः शांताः शांता दिग्ज
नितस्वनाः ॥ ५१ ॥ प्रवर्तंते तदा यज्ञा महोत्सवसदक्षिणाः ॥ देवाः प्रपेदिरे स्थानं स्वकीयं पुनराहृतम् ॥ ५२ ॥ उज्जितो दानवो यस्मात्त्रैलोक्ये
स्थापितं यशः ॥ तस्मात्सर्वैः सुरश्रेष्ठैर्ऋषिभिः सनकादिभिः ॥ ५३ ॥ कृतं नाम ह्यवंत्या वा उज्जयिनी पापनाशिनी ॥ अवंती च पुरा प्रोक्ता
सर्वकामवरप्रदा ॥ ५४ ॥ अद्यप्रभृति पुरी व्यास उज्जयिनी समाश्रिताः ॥ येऽस्यां च स्नानदानादि भुवि कुर्वंति मानवाः ॥ ५५ ॥ न तेषां दुष्कृतं ॥ ४६ ॥

१ वै—आत्मनः—इति पदच्छेदः । २ गत्वा स्मशाननिलयं भूतप्रेतनिषेवितम्—इ० पा० । ३ धूपदीपाग्निहोत्रकैः—इ० पा० । ४ तं हरम्—इ० पा० । ५ ददामि सर्वं त्वयोक्तम्--इ०पा० । ६ आहृतम् , आहतम्—इ० च पा० । ७ त्रैलोक्यं स्थापितं यतः—इ० पा० । ८ शौनकादिभिः--इ० पा० । ९ शाश्वतं पापनाशनम्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचिद्देहे तिष्ठति पापजम् ॥ ५६ ॥ विद्यार्थी गिरीशं धनार्थी धनेशं सुतार्थी सुतेशं दिनेशं सुखार्थी ॥ धियोर्थी गणेशं प्रियार्थी वसेद्वै गिरां ग्राह्य मानी जनश्चोज्जयिन्याम् ॥ ५७ ॥ य एतस्यां महाभाग सदा वसति मानवः ॥ भुक्त्वा कामान्मनोऽभीष्टान्मृतः शिवपुरं व्रजेत् ॥ ५८ ॥ तत्रैव वसते नित्यं कल्पकोटिशताधिकम् ॥ ५९ ॥ य एतां वै कथां पुण्यां पठते शृणुतेऽथ वा ॥ मुच्यते सर्वपापेभ्यो गोसहस्रफलं लभेत् ॥ ६० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्य उज्जयिन्यभिधानकथनंनाम त्रिचत्वारिंशो ऽध्यायः ॥ ४३ ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ अथातः संप्रवक्ष्यामि पद्मावती यथाऽभवत् ॥ शृणुष्व चाहतो व्यास बहुपुण्यकृतां कथाम् ॥ १ ॥ एकदा सर्वरत्नानां हानिर्जाता दुरात्मभिः॥ धर्मग्लानिर्निरोधश्च जातो वै दुष्टदानवैः ॥ २ ॥ तदा सुरासुरैः सर्वैर्मिलित्वा मथितोऽबुधिः ॥ मेरुर्वंशोदधिः[1] पात्रं रज्जुर्वासुकिपन्नगः ॥ ३ ॥ कूर्मपृष्ठे विधिं कृत्वा रत्नानि दुदुहुस्तदा ॥ आदौ लक्ष्मीर्विनिर्याता कृष्णाय प्रतिपादिता ॥ ॥ ४ ॥ तेन कृत्वा विषादोऽभूद्देवदानवयोस्तदा ॥ एतस्मिन्नंतरे प्राप्तो नारदो देवदर्शनः॥ ५ ॥ वारितः कलहस्तेन देवदैत्यसमुद्भवः ॥ महाकालवने साऽस्तु पद्मा सिंधुसमुद्भवा ॥ ६ ॥ सागरांते च रत्नानि तिष्ठंति विविधानि च ॥ तानि सर्वाणि चादाय भवतां वै ददाम्यहम् ॥ ७ ॥ मथ्यतामुदधिः शीघ्रं नात्र कार्या विचारणा ॥ पुनस्ते तूद्यमं चक्रुरमृतार्थं सुरासुराः ॥ ८ ॥ मथ्यमानेऽबुधौ तेषां मणिः प्राप्तश्च कौस्तुभः ॥ परिजाततरुः पश्चात्सुरा जाता ततः परम् ॥ ९ ॥ धन्वंतरिरथोत्पन्नश्चंद्रो जातोऽपि वै ततः ॥ कामधेनुस्ततो जाता गजरत्नं ततः परम् ॥ १० ॥ उच्चैःश्रवा हयश्रेष्ठः सुधा रंभा ततस्ततः ॥ ततः परं च सारंगं धनुः सर्वास्त्रसंभवम् ॥ ११ ॥ पांचजन्यस्तथा शंखः करे तिष्ठति मुरद्विषः ॥ निधिरेष महापद्मो विषं हालाहलं ततः ॥ १२ ॥ चतुर्दशापि रत्नानि प्राप्तानि[2] विविधानि च ॥ समादाय गतास्तत्र यत्र माहेश्वरं वनम् ॥ १३ ॥ गत्वा ते च समासीना मंत्रं चक्रुः[3] परस्परम् ॥ अहंपूर्वमहंपूर्वमिति ते समयंत्रिताः ॥ १४ ॥ कोलाहलस्तथोत्पन्नो नारदः पुनरभ्यगात् ॥ तेषां कलिमलं दृष्ट्वा विष्णुमाराधयस्ततः ॥ १५ ॥ मोहनीरूपमास्थाय नारीभूत्वाभ्यगाद्धरिः ॥ अतिरूपवती तन्वी तामालोक्य महासुराः ॥ १६ ॥ विह्वलांगाश्च ते सर्वे कामबाणवशंगताः ॥ एतस्मिन्नंतरे तेषां सुरां प्रादात्सुरेश्वरः ॥ १७ ॥ हस्तलाघवयोगेन देवानाममृतं ददौ ॥ एतस्मिन्नंतरे व्यास राहुस्तद्रूपधारकः ॥ १८ ॥ तेषामंतरगो भूत्वा पपौ चामृतमुत्तमम् ॥ तज्ज्ञात्वा च द्रुतं विष्णुः शिरश्चक्रेण चाच्छिनत् ॥१९॥ सुधास्पर्शप्रसंगेन न ममार

१ वंश उदधिः—इति पदच्छेदः । सन्धिरार्षः । २ समायाता—इ० पा० । ३ हि उद्यताः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सुरस्तदा ॥ राहुः केतुरिति ख्यातौ क्षेत्रेऽस्मिन्मुनिसत्तम ॥ २० ॥ राहुकायात्समुद्भूतं बहु सुस्राव शोणितम् ॥ तस्मिन्क्षेत्रे महत्तीर्थं जातं तद्दोष
नाशनम् ॥ २१ ॥ तत्र स्नात्वा शुचिर्भूत्वा राहोर्दर्शनतत्पराः ॥ न तेषां जायते किंचिद्राहुपीडा कदाचन ॥ २२ ॥ वांछितार्थमवाप्नोति गोसहस्र
फलं भवेत् ॥ ततस्तानि च रत्नानि महाकालवने सुराः॥ २३ ॥ विभज्य भागांस्ते सर्वे प्राप्य रत्नभुजोऽभवन् ॥ मणिं पद्मां धनुः शंखं विष्णवे नार
दो ददौ ॥ २४ ॥ सूर्याय च ददौ ह्यश्वं सप्तास्यं चाब्धिसंभवम् ॥ ऐरावतं गजश्रेष्ठं वासवाय समर्पयत् ॥ २५ ॥ पीयूषं दिविषद्गणान्ददौ चंद्रं
च शंभवे ॥ पारिजातं तरुश्रेष्ठं रंभां चैव वरांगनाम् ॥ २६ ॥ इंद्रक्रीडावने रम्ये नंदने च समर्पयत् ॥ ऋषीणां समदाद्धेनुं कामदोग्ध्रीं यज्ञसिद्धये
॥ २७ ॥ निधिरेष महापद्मः कुबेरभवनं गतः ॥ यत्तद्धालाहलं प्रोक्तं विषं केनापि नाहृतम् ॥ २८ ॥ यतोयतः प्रसरति प्रलयं यांति जंतवः ॥
दधार तद्विषं शंभुर्जगतां हितकाम्यया ॥ २९ ॥ तदाप्रभृति महादेवो नीलकंठ इति स्मृतः ॥ रत्नकुंडे नरः स्नात्वा नीलग्रीवं च पश्यति ॥ ३० ॥
मुक्त्वा स सर्वपापेभ्यः सर्वरत्नभुजो[2] भवेत् ॥ शताश्वमेधिकं पुण्यं लब्ध्वा शिवपुरं व्रजेत् ॥ ३१ ॥ तदादाय सुराः सर्वे ब्रह्मविष्णुपुरोगमाः ॥
ऊचुश्च ते तदा व्यास हर्षनिर्भरमानसाः ॥ ३२ ॥ उज्जयिनीं समासाद्य जाता रत्नभुजो वयम् ॥ पद्मायाश्च निवासेन यस्मात्सर्वसुखावहा ॥ ३३ ॥
तस्मात्सर्वेषु कालेषु पद्मा वसतु निश्चला ॥ अद्यप्रभृति पूरेषा पद्मावतीति च स्मृता ॥ ३४ ॥ य एतस्यां महाभागाः स्नानं दानं तथार्चनम् ॥
तर्पणं चैव देवानां पितॄणां च विशेषतः[3] ॥ ३५ ॥ न तेषां दुष्कृतं किंचिन्न दारिद्र्यं न दुर्गतिः ॥ शतं कुलानि सर्वाणि तारयेन्निरयात्तदा ॥ ३६ ॥
धनार्थी चैव पुत्रार्थी विद्यार्थी बहुकामुकः ॥ यत्र कुत्र स्थितो भूत्वा पद्मावतीति च स्मरेत् ॥ ३७ ॥ सर्वान्कामानवाप्नोति शिवः साक्षाद्भवेन्नरः ॥
एतद्व्यास फलं नाम्नः किं चिरं सेवनेन वै ॥ ३८ ॥ ये शृण्वंति कथां पुण्यां ये श्रावयंति नित्यशः ॥ न तेषां पातकं किंचिदश्वमेधफलं लभेत् ॥
॥ ३९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडेऽवन्तीक्षेत्रमाहात्म्ये पद्मावतीनामकथावर्णनंनाम चतुश्चत्वारिं
शोऽध्यायः ॥ ४४ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणुष्वावहितो व्यास कथां पापहरां पराम् ॥ एषा कुमुद्वती जाता यथा पद्मावती पुरी ॥
तथाहं संप्रवक्ष्यामि यथा मे लोमशोऽब्रवीत् ॥ १ ॥ ॥ लोमश उवाच ॥ ॥ शृणु वत्स मया दृष्टा बहुपुण्यतमा पुरी ॥ एकदा तीर्थयात्रायां गतो
ऽहं वै कुशस्थलीम् ॥ गुह्याद्गुह्यतरं स्थानं यत्र संनिहितो हरः ॥ २ ॥ यस्य दर्शनमात्रेण ब्रह्महत्यां व्यपोहति ॥ यत्र तत्र स्थिता विप्रा ब्रह्मघोषम



१ अक्षराधिक्यमार्षम् । २ अकारान्तोऽयं कप्रत्ययान्तः । ३ करिष्यन्ति—इत्यध्याहारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुर्वंत ॥ ३ ॥ यज्ञांश्चैव तथा चित्रानृत्विजोदारकर्मणः ॥ ऋषयश्च महाभागाः प्रकुर्वंति समाहिताः ॥ ४ ॥ ऋषिपत्न्यस्तथा साध्व्यः परिचर्यां प्रकुर्वते ॥ दश विष्णुसमाः ख्यातास्तत्रैव निवसंति ते ॥ ५ ॥ रुद्रा ह्येकादश प्रोक्ता द्वादशार्कास्तथैव च ॥ अष्टौ च वसवः ख्याता विश्वेदेवास्त्रयोदश ॥ ६ ॥ अष्टौ च दिग्गजाश्चैव मनवश्च चतुर्दश ॥ मरुद्गणाश्च ते सर्वे तत्रैवेंद्रपुरोगमाः ॥ ७ ॥ गंधर्वाप्सरसश्चैव किंनरोरगराक्षसाः ॥ सिद्धास्तपस्विनो वत्स तत्रैव समुपस्थिताः ॥८॥ अष्टौ वै भैरवाः ख्याताश्चत्वारः पवनात्मजाः ॥ विनायकाश्च षट् प्रोक्ता देव्यश्च चतुर्विंशतिः ॥ ॥ ९ ॥ एते देवगणाः प्रोक्ता रौद्राश्चैव तथा गणाः ॥ ब्रह्मा वेदविदां श्रेष्ठो मरिचिकश्यपादयः ॥ १० ॥ दक्षः प्रजापतिश्रेष्ठो दितिर्वै देवमातरः ॥ सुरभीप्रमुखा गावः स्थावराणि चराणि च ॥ ११ ॥ तीर्थानि यानि सर्वाणि नद्यः प्रस्रवणानि च ॥ क्षेत्राणि चैव सर्वाणि भुवि पुण्यतमानि वै ॥ १२ ॥ सप्त पुर्यस्त्रयो ग्रामा नवारण्या नवोषराः ॥ चतुर्दशानि गुह्यानि मुक्तिद्वाराणि भूतले ॥ १३ ॥ समुद्राश्चैव चत्वारो रत्नानि विविधानि च ॥ सती पतिव्रताः साध्व्यस्तथा ब्रह्मर्षयोऽमलाः ॥ राजर्षयस्तथा शांता ब्राह्मणा वेदपारगाः ॥ १४ ॥ वेदाः पुराणस्मृतयो गाथा गीतिप्रहेलिकाः ॥ उपासांचक्रिरे तस्य देवदेवेडुमापतेः ॥ १५ ॥ तस्य दर्शनमात्रेण जातोऽहं विज्वरोऽमलः ॥ दीर्घायुर्दीर्घतपसा जरारोगविवर्जितः ॥१६॥ स्नातोऽहं सर्वतीर्थेषु शुचिर्भूत्वा समाहितः ॥ प्रसन्नमानसो जातः सर्वपापपराङ्मुखः ॥ १७ ॥ दृष्ट्वा पद्मावतीं शुद्धां सर्वकामवरप्रदाम् ॥ न यत्र दृश्यते कश्चिच्छोकरोगपरो जनः ॥ १८ ॥ न दुःखी न च दारिद्रो न मूर्खो नाजितेंद्रियः ॥ परस्परविरोधी न नृतिर्यक्षु च दृश्यते ॥ १९ ॥ अन्योन्यं सर्वमित्राणि अन्योन्यं चोपकारिणः ॥ सर्वे दांताश्च शांताश्च सर्वे विद्योपदेशिनः ॥ २० ॥ उद्यानानि च रम्याणि वनान्युपवनानि च ॥ हर्म्याणि च सुशुभ्राणि श्रेणीबद्धानि भांति वै ॥ २१ ॥ नानारत्नसमाकीर्णैर्हेमकुंभैः सुशोभनैः ॥ विराजंते विचित्राणि गीतवाद्यमहोत्सवैः ॥२२ ॥ सदैव वसते यत्र उमया सह शंकरः ॥ चंद्रचूडः कृत्तिवासाश्चिताभस्मांगलेपनः ॥ २३ ॥ चंद्रज्योत्स्नाकलापूर्णमरीचिभिः सदा बभौ ॥ यत्र नो कृष्णपक्षोऽभून्नामावास्या न वै तमः ॥ २४ ॥ सदैव पुष्पिता श्यामा बाल्यरूपवती यथा ॥ हर्म्यपृष्ठे गवाक्षे च द्वाराजिरगृहांतरे ॥ २५ ॥ गिरिगह्वरकुंजेषु गुहाध्वांतांतरेषु च ॥ आश्रमेषु च रम्येषु वनेपूपवनेषु च ॥ २६ ॥ गृहदीर्घिकासु रम्यासु शालामालासु सर्वतः ॥ चंद्रज्योत्स्नासमा

१ ऋत्विजः—उदारकर्मणः—इति पदच्छेदः । सन्धिरार्षः । उदारकर्मणः—इति दीर्घाभावोऽप्यार्षः । उदारकर्माणः—सशास्त्रकर्मानुष्ठानपराः—इत्यर्थः । २ दश विष्णुसमाः—विष्णोर्दशावताराः—इत्यर्थः । ३ शुचिभिः संमताः—इ० पा० । ४ देवदेवेडुमापतेः—देवदेवेट् चासावुमापतिश्च तस्य । ५ शुभ्राम्-इ० पा० । ६ विद्योपजीविनः—इ० पा० । ७ श्यामा—षोडशवार्षिकी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पूर्णा दृश्यंते धवला दिशः ॥ २७ ॥ कुमुद्वतीप्रफुल्लानि विराजंते सरांसि च ॥ ज्योतिर्गणसमाकीर्णं शरदीव नभःस्थलम् ॥ २८ ॥ नद्यः सरांसि सर्वाणि वापीकूपसुपल्वलाः ॥ कुमुद्वत्या समाकीर्णा आसीच्चांद्रमसी मही ॥ २९ ॥ यस्मात्सर्वेषु कालेषु प्रफुल्ला च कुमुद्वती ॥ तस्मात्पद्मावती ह्येषा जाता कुमुद्वती पुरी ॥ ३० ॥ कुमुद्वत्यां नरा ये तु श्राद्धं कुर्युः समाहिताः ॥ न तेषां पितरः स्वर्गाच्च्यवंते हि कदाचन ॥ ३१ ॥ अक्षयं लभते श्राद्धं पितॄणां दत्तमक्षयम् ॥ स्नानं दानं तथा होमो देवताराधनं तथा ॥ ३२ ॥ यत्किंचित्क्रियते कर्म तत्सर्वं चाक्षयं भवेत् ॥ एवं कुमुद्वती जाता पुरी व्यास सनातनी ॥ ३३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये कुमुद्वतीप्रभावकथनंनाम पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ अमरावती यथा जाता पुरी ह्येषा कुशस्थली ॥ शृणु व्यास महाभाग यथा ब्रह्माब्रवीत्सुरान् ॥ १ ॥ तथाहं संप्रवक्ष्यामि विस्तरेण तपोधन ॥ एकदा ब्रह्मणादिष्टः प्रजार्थमृषिसत्तमः ॥ २ ॥ मारीचः कश्यपस्तेपे तपः परमदुष्करम्[2] ॥ महाकालवने रम्ये दिव्ये स हि महानृषिः ॥ ३ ॥ शीर्णपत्रानिलाहारो वायुभक्षी जितेन्द्रियः ॥ पूर्णे वर्षसहस्रे तु वागुवाचाशरीरिणी ॥ ४ ॥ श्रूयतां भो द्विजश्रेष्ठ मम वाक्यमनुत्तमम् ॥ यस्मात्तपसि तपस्तीव्रं फलमुद्दिश्य सुव्रत ॥ ५ ॥ तस्मात्ते संततिस्तात यावच्चंद्रदिवाकरौ ॥ तावत्तिष्ठतु मेदिन्यां यशसा पुत्रपौत्रकैः ॥ ६ ॥ अदितिस्ते सती भार्या त्वया सहाचरत्तपः ॥ तस्मात्सर्वेषु कालेषु छायाभूता यशस्विनी ॥७॥ भविष्यंति सुताः सर्वे विष्णुश्चेंद्रपुरोगमाः ॥ अमरा निर्जरा देवा दिवि ख्याताः सदैव हि ॥ ८ ॥ त्वं चापि च ऋषिश्रेष्ठः प्रजापतिरकल्मषः ॥ भविष्यसि न संदेहो मम वाक्याद्विजोत्तम ॥ ९ ॥ इत्युक्त्वा च पुनर्देवी तत्रैवांतरधीयत ॥ तदारभ्य पुरीं व्यास कुशस्थलीमनुत्तमाम्[3] ॥ १० ॥ कश्यपः सह दाक्षिण्या[4] साग्निकः समुपाश्रितः ॥ प्रजापि ववृधे तस्मात्सदेवासुरमानुषा ॥ ११ ॥ मरीचेः कश्यपो जज्ञे ततः सर्वं प्रतिष्ठितम् ॥ सुधापानकृतो देवाः शश्वत्तेनामराः कृताः ॥ १२ ॥ नंदनं चापि तत्रैव महाकालवनोत्तमे ॥ कामधेनुः समाख्याता मनोरथवरप्रदा ॥ १३ ॥ सा सिषेवे सदा तत्र महाकालं महेश्वरम् ॥ पारिजाततरुश्रेष्ठस्तथा चाम्लानपंकजम् ॥ १४ ॥ बिंदुसरः समाख्यातं मानसं सर उत्तमम् ॥ हंससारससमाकीर्णं सुरसिद्धनिषेवितम् ॥ १५ ॥ मुक्तामणिगणाकीर्णं[5] रत्नशोभनशोभितम् ॥ निधिरेष महापद्मः कह्लारकुमुदोज्ज्वलः ॥ १६ ॥ यानि यानि च दिव्यानि संति ब्रह्मांडगोलके ॥ तानि सर्वाणि तिष्ठंति



१ महाप्राज्ञ--इ०पा० । २ परमदुश्चरम्--इ०पा० । ३ पुण्याः--इ० पा० । ४ दाक्षिण्या--दाक्षायण्या--अदित्या सह--इत्यर्थः । ५ मुक्तामणिगणासिक्तम्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महाकालवने शुभे ॥ १७ ॥ तेनतेनात्मयोगेन मानवाश्चात्र संस्थिताः ॥ तदाहारास्तदाचारास्तद्रूपास्तत्पराक्रमाः ॥ १८ ॥ अन्योन्यं च समाकीर्णाः सर्वे चामरसंनिभाः ॥ विचरंति यथा देवाः पुरीमेतां जना भुवि ॥ १९ ॥ अमरांगनासमा नार्यः सदैव स्थिरयौवनाः ॥ ईदृशी च पुरी दृष्टा भुवि व्यास सनातनी ॥ २० ॥ देवदानवगन्धर्वैः किन्नरोरगराक्षसैः ॥ भुक्तिमुक्तिप्रदा नित्या बहुकालफलप्रदा ॥ २१ ॥ अमराणां कटकं ह्यत्र तस्माज्जातामरावती ॥ य एतस्यां महाभागाः प्रसंगेन समागताः ॥ २२ ॥ स्नानदानादिकं कृत्वा पश्यंत्येव महेश्वरम् ॥ न तेषां दुर्लभं किञ्चित्पुत्रतो धनतोऽपि वा ॥ २३ ॥ सर्वभोगानवाप्नोति मृतः शिवपुरं व्रजेत् ॥ पठनाच्छ्रवणाद्वापि शतरुद्रियफलं लभेत् ॥ २४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्येऽमरावतीनामकथनंनाम षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु व्यास महाभाग पुरी ह्येषामरावती ॥ विशाला च समाख्याता सर्वलोकेषु गीयते ॥ १ ॥ तथाहं संप्रवक्ष्यामि ब्रह्मणा कथितं पुरा ॥ गुह्याद्गुह्यतरं क्षेत्रं सर्वपापप्रणाशनम् ॥ २ ॥ उमया सहितो देव एक एवाचरद्वने ॥ ततो भूतगणाः सर्वे पश्चात्सर्वे सुरासुराः ॥ ३ ॥ विष्णुर्दशाकृतिर्यत्र देव्यो वै लोकमातरः ॥ विनायकाश्च वैतालाः कूष्मांडा भैरवादयः ॥ ४ ॥ कल्पोद्भेदाश्च लिंगाश्च चतुराशीतिसंख्यकाः ॥ क्षेत्राणि क्षेत्रपालाश्च ऋद्धिः सिद्धिस्तथैव च ॥ ५ ॥ पितरो लोकपालाश्च सिद्धाः सिद्धिप्रदाश्च ये ॥ ऋषयश्च महाभागा ऋषिपत्न्योऽमलाशयाः ॥ ६ ॥ किंनरा देवगन्धर्वा ह्यप्सराश्च वरांगनाः ॥ मरुद्गणाश्च ये सर्वे साधकानां गणाश्च ये ॥ ७ ॥ यक्षा गुह्यकसंघाश्च पिशाचोरगराक्षसाः ॥ स्थावरा जंगमाः सर्वे ध्यानं मानसमाश्रिताः ॥ ८ ॥ उपासांचक्रिरे तत्र देवदेवमुमापतिम् ॥ तान्दृष्ट्वा सा तदा देवी पार्वती गिरिजा तदा ॥ उवाच श्लक्ष्णया वाचा शंकरं जगदाश्रयम् ॥ ९ ॥ ॥ पार्वत्युवाच ॥ ॥ देवदेव जगन्नाथ जगदाधारतत्पर ॥ पश्य एतान्महाभागान्ध्यायमानांस्तवाश्रितान् ॥ १० ॥ नानुपेक्ष्यांश्च तान्सर्वान्वातवर्षातपार्दितान् ॥ कल्पय त्वं महाभाग एतेषामात्मनो हितम् ॥ ११ ॥ यथायोग्यं वासनार्थं स्थानं परमशोभनम् ॥ पुरीं कल्पय मे नाथ वासार्थं सर्वकामदाम् ॥ १२ ॥ एषा मे वासना स्वामिन्भवतां यदि रोचते ॥ इति श्रुत्वा वचस्तस्याः पार्वत्याः परमेश्वरः ॥ कल्पयामास पुरीं रम्यां सर्वभूतमनोरमाम् ॥ १३ ॥ आत्मनोपि हितां पुण्यां शंभुः सर्वात्मना तदा ॥ बहुयोजनविस्तीर्णां दिव्यां दिव्यजनप्रियाम् ॥ १४ ॥ दिव्याभिप्रायसंयुक्तां दिव्यस्थानमनोरमाम् ॥ दिव्यसर्ग

१ पुरी ह्येषा--इ० पा० । २ जगदाधार जगत्प्रभो--इ० पा० । ३ ध्यानस्थान्कलमाश्रितान्--इ० पा० । ४ आत्मनोपमिताम्--इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



गुणोपेतां विशालां विरजां शुभाम् ॥ १५ ॥ क्रयविक्रयसंपन्नहट्टाट्टालकचत्वराम् ॥ बहुहर्म्यगृहाकीर्णां सौधपंक्तिविराजिताम् ॥ १६ ॥
स्फाटिकाभित्तिरचितां वैडूर्यमणिभूमिकाम् ॥ प्रवालस्तंभप्रवरां हेमाभरणसंभराम्[1] ॥ १७ ॥ आरक्तमणिदेहल्यां द्वारशाखाभिमंडिताम् ॥ जांबून
दकपाटाढ्यां वज्रार्गलसुसंस्कृताम् ॥ १८ ॥ मणिरत्नसमाभूमिद्वाराजिरगृहांतराम् ॥ घोषजालातिरम्यां च मुक्तादामविलंबिनीम् ॥ १९ ॥ हेमस्तं
भध्वजोपेताः पताकाश्च गृहेगृहे ॥ कलशाश्च विराजंते मणिहेमाचिता गृहे ॥ २० ॥ वापीकूपतडागानि सरांसि विमलानि च ॥ पद्मकिंजल्कगंधी
नि[2] जलयंत्रोपशोभिताम् ॥ २१ ॥ हंसकारंडवाकीर्णां शिखंडिगणशोभिताम् ॥ जलयंत्रकृताधारां गृहवापीवनाकराम् ॥ २२ ॥ क्वचिन्नृत्यंति
मयूराः क्वचित्कूजंति कोकिलाः ॥ भ्रमरावलीढपुष्पाढ्यस्तबका वनराजयः ॥२३॥ नरनारीगणाकीर्णा वर्णाश्रमनिषेविताम् ॥ हर्म्यांतरागता नार्यो
विलोकनपरा बभुः ॥ २४ ॥ चंद्रमालाकृतश्रेणी[3]तोरणानीव च शोभते ॥ एवं व्यास पुरी रम्या आत्मयोगेन वासिता ॥ २५ ॥ यत्रालकापुरी
रम्या कुबेरभवनांकिता ॥ धवला पुण्यजनैः कीर्णा पक्षिभिश्चोपशोभिता ॥ २६ ॥ तत्र भोगवती दिव्या वरुणालय उत्तमः ॥ नागकन्याभिरुग्राभि
र्नागपत्नीभिः संकुला ॥ २७ ॥ संयमनीपुरी श्रेष्ठा धर्मराजेन पालिता ॥ सदाचारजनैः पूर्णा कृता कृतविचक्षणैः ॥ २८ ॥ देवतानां पुरी रम्या
वासवेनाभिरक्षिता ॥ पुण्यस्त्रीणां गणाकीर्णा किन्नरोद्गीतमंडिता ॥ २९ ॥ एवंविधानि रम्याणि पुरा बहुतराणि च ॥ बहुविस्तीर्णमानानि शुभ्रा
ण्यतितराणि च ॥ ३० ॥ क्वचिद्रंभाकृतद्वारा यवांकुरघटाः शुभाः ॥ क्वचिद्गायन्ति गन्धर्वाः क्वचिन्नृत्यंति नर्तकाः ॥ ३१ ॥ क्वचिद्बालाः पठंति
स्म वेदाध्ययनका द्विजाः ॥ क्वचिद्यज्ञान्यजंति स्म यजमानाः सऋत्विजः ॥३२॥ क्वचिच्चावभृथस्नाताः क्वचिद्दानान्यकुर्वत ॥ क्वचित्क्वचित्तूपनयनं
विवाहाग्निपरिग्रहम् ॥ ३३ ॥ क्वचिदारामपूर्तं वै क्वचिद्यात्रावधारणम् ॥ वापीकूपतडागानां तथैव विधिपूर्वकम् ॥ ३४ ॥ क्वचित्कथाप्रसंगांश्च
परिशंसंति वाचकाः ॥ क्वचिद्गाथाः प्रकुर्वंति कवयः पुर उत्तमे ॥ ३५ ॥ क्वचिन्मल्ला नियुध्यंते नटा नाट्यपराः क्वचित् ॥ तडागानि विराजंते
मणिसोपानपंक्तिभिः ॥ ३६ ॥ चंचलाश्चपला बालाः श्यामाः षोडशवार्षिकाः ॥ वारिहारपरास्तत्र मणिहेमघटोत्कटाः ॥ ३७ ॥ एवं व्यास पुरी
रम्या निर्मिता योगमायया ॥ शंभुना सर्वपापघ्नी प्रियाप्रियचिकीर्षया ॥३८॥ विशाला बहुविस्तीर्णा पुण्या पुण्यजनाश्रया ॥ तस्मात्सर्वेषु कालेषु



१ हेमाभरणसंभवाम्–इ० पा० । २ पद्मकिञ्जल्कगन्धीनि-- इदं 'सरांसि' इत्यस्य-विशेषणम्–'जलयंत्रोपशोभिताम्'–इत्यारभ्य–'वनाकराम्'इत्यंतानि पुनः पुरीविशेषणानि । ३ पंक्तिशः स्थितानां-नारीणां चन्द्रवन्मुखानि दृष्ट्वोत्प्रेक्षते–सा पुरी हर्म्यांतरागतविलोकनपरनारीमुखैश्चन्द्रमालाकृतपंक्तिविराजितहर्म्यद्वारेवातिशोभते–इति । इति यथाकथंचिदर्थोऽत्रोन्नेयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वलोकेषु गीयते ॥ ३९ ॥ विशालेति समाख्याता पुरी रम्या सनातनी ॥ यत्र तत्र स्थितो वापि सर्वावस्थां गतोऽपि वा ॥ ४० ॥ विशालेति वदेन्नित्यं शिवलोके महीयते ॥ ईदृशी न पुरी व्यास भुवि ब्रह्मांडगोलके ॥ ४१ ॥ विशालासदृशी चान्या भुक्तिमुक्तिप्रदा नृणाम् ॥ पितॄनुद्दिश्य कुर्वंति श्राद्धं काले नरा यदि ॥ ४२ ॥ तदक्षयं भवेत्तेषां पितृकल्पे च गीयते ॥ स्नानदानादिकं यैस्तु[1] विशालायां प्रसंगतः ॥ ४३ ॥ यत्र कुत्र गतास्ते वै मृता यांति शिवालयम् ॥ धन्याः पुण्यतमा लोके प्रीतिर्येषां सदाचला ॥ ४४ ॥ विशालायां फलं शश्वच्छेषः शक्तो न वर्णितुम् ॥ कथाश्रवणमात्रेण वाच्यमानेन तत्क्षणात् ॥ महापापोद्भवात्पापान्मुच्यते नात्र संशयः ॥ ४५ ॥ एवं व्यास पुरी जाता विशाला च कुशस्थली ॥ प्रतिकल्पा यथा जाता तथा मे शृणु भाषतः ॥ ४६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्र माहात्म्ये विशालाभिधानकथनंनाम सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणुष्वावहितो व्यास स्थितिमेकाग्रमानसः ॥ मया व्यासमुखात्प्राप्ता कल्पभेदे कथा शुभा ॥ १ ॥ गुह्याद्गुह्यतरा श्रेष्ठा न देया यस्य कस्यचित् ॥ नास्तिकाय कृतघ्नाय नाशिष्याय कदाचन ॥ ॥ २ ॥ एषा पुण्यतमा व्यास कथा पापहरा परा ॥ यस्याः श्रवणमात्रेण[2] कल्पदोषो न बाधते ॥ ३ ॥ प्रमाणं कल्पपर्यंतं ब्रह्मणः परमेष्ठिनः ॥ मन्वंतरेषु सर्वेषु कल्पकल्पांतरेषु च ॥ ४ ॥ यावत्संख्यापरिमिता तावती शृणु सत्तम ॥ अहोरात्रं च भजते सूर्यो मानुषदैवतम् ॥ ५ ॥ तामुपादाय गणनां शृणु संख्यां द्विजोत्तम ॥ निमेषैः पंचदशभिः काष्ठा त्रिंशत्तु ताः कला ॥ ६ ॥ त्रिंशत्कला मुहूर्तस्तु त्रिंशता तैर्मनीषिणः ॥ अहोरात्र मिति प्राहुश्चंद्रादित्यगतिस्तदा ॥७॥ रविर्गतिविशेषेण सन्ध्यायां याति नित्यशः ॥ तदहस्तु मनुष्याणां रात्रिश्चैव तु तादृशी ॥ ८ ॥ पक्षौ मासा ऋतुश्चाब्दमयने च प्रकीर्तिते ॥ पितणां चैव देवानां ब्रह्मणश्च यथातथम् ॥ ९ ॥ यावत्संख्या समाख्याता आयुरंतश्च तादृशः ॥ अहोरात्राः पंच दश पक्ष इत्यभिशब्दितः ॥ १० ॥ पक्षौ द्वौ तौ कृतौ मासौ मासौ द्वावृतुरुच्यते ॥ अयनं चर्तुभिस्त्रिभिरब्दं द्वे अयने स्मृतम् ॥ ११ ॥ दक्षिणं चोत्तरं चैव संख्यातत्त्वविशारदैः ॥ मानेनानेन यो मासः पक्षद्वयसमन्वितः ॥ १२ ॥ पितॄणां तदहोरात्रमिति कालविदो विदुः ॥ शुक्ल पक्षस्त्वहस्तेषां कृष्णपक्षस्तु शर्वरी ॥ १३ ॥ कृष्णपक्षे त्विह श्राद्धं पितणां वर्तते द्विज ॥ मानुषेण तु मानेन यो वै संवत्सरः स्मृतः ॥ १४ ॥ देवानां तदहोरात्रं दिवा चैवोत्तरायणम् ॥ दक्षिणायनं स्मृता रात्रिः प्राज्ञैस्तत्त्वार्थकोविदैः ॥ १५ ॥ दिव्यमब्दं शतगुणं

१ कृतम्—इति शेषः । २ सर्वेष्वेतेषु नित्यशः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



दिव्यमब्दसहस्रकम् ॥ मुनिभिश्चैव तत्त्वज्ञैरहोरात्रं मनोः स्मृतम् ॥ १६ ॥ अहोरात्रं दशगुणं मानवः पक्ष उच्यते ॥ पक्षाद्दशगुणो मासो
मासा द्वादशभिर्गुणैः ॥ १७ ॥ ऋतुर्मनूनां संप्रोक्तः प्राज्ञैस्तत्त्वार्थदर्शिभिः ॥ षड्भिस्तैर्वर्षं संप्रोक्तं तेन संख्या निबध्यते ॥ १८ ॥ चत्वार्येव
सहस्राणि वर्षाणां तु कृतं युगम् ॥ तावती तु भवेत्संध्या संध्यांशश्च तथाविधः ॥ १९ ॥ त्रीणि वर्षसहस्राणि त्रेता तत्परिमाणतः ॥ तस्याश्च
त्रिशती संध्या संध्यांशश्च तथा परः ॥ २० ॥ तथा वर्षसहस्रे द्वे द्वापरं परिकीर्तितम् ॥ तस्य च द्विशती संध्या संध्यांशश्च तथा
परः ॥ २१ ॥ कलिर्वर्षसहस्रं तु संख्या चोक्ता मनीषिभिः ॥ तस्य चैकशती संध्या संध्यांशश्च तथाविधः ॥ २२ ॥ (४८०० कृतं, ३६००
त्रेता, २४०० द्वापरम्, १२०० कलिः ) एषा द्वादशसाहस्री युगसंख्या प्रकीर्तिता ॥ दिव्येनानेन मानेन युगसंख्यां निबोध मे ॥ २३ ॥ ससर्ज स
पुनस्तात जगत्सर्वमिदं ततः ॥ कृतं त्रेता द्वापरं च कलिश्चैव चतुर्युगम् ॥ २४ ॥ युगं तदेकसप्तत्या गुणितं द्विजसत्तम ॥ मन्वंतरमिति प्रोक्तं
संख्यानार्थविशारदैः ॥ २५ ॥ अयनं चापि तत्प्रोक्तं द्वेऽयने दक्षिणोत्तरे ॥ मनुः प्रलीयते ह्यत्र संप्राप्ते जगतः प्रभौ ॥ २६ ॥ ततोऽपरो मनुः
कालमेतावन्तं भवेत्पुनः ॥ समतीते तु राजेंद्र प्रोक्तः संवत्सरस्य वै ॥ २७ ॥ तदेव चायनं प्रोक्तं मुनिना तत्त्वदर्शिना ॥ ब्रह्मणस्तदहः प्रोक्तं कल्प
श्चेति स उच्यते ॥ २८ ॥ सहस्रयुगपर्यंतं सा निशा प्रोच्यते बुधैः ॥ निमज्जत्यत्र चोर्वी सा सशैलवनकानना ॥ २९ ॥ तस्मिन्युगसहस्रे तु पूर्णे
वै[१] द्विजसत्तम ॥ ब्राह्मे दिवसपर्यंते कल्पो निःशेष उच्यते ॥ ३० ॥ युगानि सप्ततिं तानि साग्राणि कथितानि ते ॥ कृतत्रेतादियुक्तानि मनोरंतर
मुच्यते ॥ ३१ ॥ चतुर्दशैते मनवः कथिताः कीर्तिवर्धनाः ॥ वेदेषु सपुराणेषु सर्वेषु प्रभविष्णवः ॥ ३२ ॥ प्रजानां पतयो व्यास धन्यमेषां प्रकीर्त
नम् ॥ ३३ ॥ मन्वंतरेषु संहाराः संहारांतेषु संभवाः ॥ न शक्यमंतस्तेषां वै वक्तुं वर्षशतैरपि ॥ ३४ ॥ विसर्गश्च प्रजानां वै संहारस्य च भारत ॥
मन्वंतरेषु संहारः श्रूयते भरतर्षभ ॥ ३५ ॥ यत्र तिष्ठंति वै देवाः सर्वे सप्तर्षिभिः सह ॥ तपसा ब्रह्मचर्येण श्रुतेन च समन्विताः ॥ ३६ ॥ पूर्णे
युगसहस्रे तु कल्पो निःशेष उच्यते ॥ तत्र सर्वाणि भूतानि दग्धान्यादित्यरश्मिभिः ॥ ३७ ॥ ब्रह्माणमग्रतः कृत्वा सहादित्यैर्गणैर्द्विज ॥
प्रविशंति सुरश्रेष्ठं हरिं नारायणं प्रभुम् ॥ ३८ ॥ स स्रष्टा सर्वभूतानां कल्पांते तु पुनःपुनः ॥ अव्यक्तः शाश्वतो देवस्तस्य सर्वमिदं जगत् ॥ ३९ ॥ ॥ ५० ॥
स एव विद्यते व्यास महेशा[२] सह संयुतः ॥ महाकालवने वासं चकार जगदीश्वरः ॥ ४० ॥ प्रलयोऽन बाधते व्यास महाकालवनोत्तमे ॥ कल्पे

१ भरतसत्तम—इ०पाठान्तरम्, तन्मृग्यम् कः संवादप्रसंग इति । उचितस्तु मूलस्य एव पाठः । २ महेशा—महेश्वरेण--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कल्पे च वै रम्या पुरी ह्येषा कुशस्थली ॥ ४१ ॥ निरामया निरातंका निर्विकारा युगेयुगे ॥ मार्कंडेयोपदिष्टानि कल्पानि संभवंति च ॥ ४२ ॥ अत्रैव च वने रम्ये ब्रह्मा लोकपितामहः ॥ प्रजानां पतयो ये ते दक्षः प्राचेतसस्तथा ॥ ४३ ॥ मरीचिः कश्यपो रुद्रो येऽन्ये भृग्वादयस्तथा ॥ कल्पादौ ससृजे लोकांश्चराचरान्यथा तथा ॥ ४४ ॥ एवमादौ पुरा व्यास कल्पं कल्पायते तदा ॥ वाराहवामनविष्णुपितॄणां वै तथैव च ॥४५॥ कल्पभेदाः समाख्याता महाकालवने शुभे ॥ चतुराशीतिकल्पानि संजातानि द्विजोत्तम ॥ ४६ ॥ तावंति योगलिंगानि वने तिष्ठन्ति सत्तम॥ पुनर्जाताः पुनः र्नष्टा महीसागरपर्वताः ॥४७॥ पुनःपुनर्भविष्यंति पुरी ह्येषाऽचला स्मृता ॥ तस्मात्सर्वेषु कालेषु सर्वलोकेषु गीयते ॥४८॥ प्रतिकल्पेति विख्याता भुवि व्यास भविष्यति ॥ येऽस्यां वै मानवा दांताः स्नानदानादिकं तथा ॥ ४९ ॥ जपं होमं तथा श्राद्धं पितॄनुद्दिश्य देवताः ॥ न तेषां पुनरावृत्तिः कोटिकल्पशतैरपि ॥ ५० ॥ प्रतिकल्पामनुप्राप्य दृष्ट्वा देवं महेश्वरम् ॥ वैशाखे पौर्णमास्यां वै स्नापयंत्येकवासरम् ॥ ५१ ॥ प्रसंगतो रजःक्लांतः शिप्रांभसि च मानवाः ॥ न तेषां दुष्कृतं किंचिद्विष्णुलोके वसंति ते ॥५२॥ मन्वंतरसहस्रेषु काशिवासेषु यत्फलम् ॥ तत्फलं प्राप्नुयाज्जंतुः प्रतिकल्पं क्षणादपि ॥ ५३ ॥ प्रतिकल्पे च कल्पांते सैवासीच्च पुरी शुभा ॥ तस्मात्सर्वजनैः ख्याता प्रतिकल्पा द्विजोत्तम ॥ ५४ ॥ ये चैतस्या[१] महाभागाः प्रीतिं कुर्वंति मानवाः ॥ न तेषां कल्पभेदोऽयं स्वप्नवज्जायते क्षणात् ॥ ५५ ॥ यः शृणोति कथां पुण्यां प्रतिकल्पोद्भवां शुभाम् ॥ श्रावयेद्वा प्रयत्नेन ब्रह्महत्यां व्यपोहति ॥ ५६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये प्रतिकल्पाभिधानकथनंनामाष्टाचत्वारिंशोऽध्यायः ॥ ४८ ॥ ॥ सनत्कुमार उवाच ॥ ॥ एवं व्यास पुरी रम्या नामभूता सनातनी ॥ युगेयुगे यथा जाता तथा ख्याता मयाऽनघ ॥ १ ॥ ॥ व्यास उवाच ॥ ॥ भूयोऽहं[२] श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ॥ शिप्रायाश्च कथां पुण्यां पवित्रां पापहारिणीम् ॥ २ ॥ सुन्दरं कुंडमाख्यातं पिशाचमोचनं तथा ॥ नीलगंगा इति प्रोक्ता कर्कराजमतः परम् ॥ ३ ॥ पुष्कराणि च सर्वाणि गयातीर्थमनुत्तमम् ॥ गोमतीकुण्डमाख्यातं नाम्ना धर्मसरस्तथा ॥ ४ ॥ ख्यातं संगमजं तीर्थं शनेर्जन्मकथां शुभाम् ॥ च्यवनाश्रमे च या वार्ता तथा नागालये शुभे ॥ ५ ॥ पुरुषोत्तममहिमानं काले केन कथं भवेत् ॥ एतद्वेदितुमिच्छामि यत्ते मनसि वर्तते ॥ ६ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु व्यास महाभाग कथां पापहरां पराम् ॥ यस्मिन्काले यदा जाता महाकालवने शुभे ॥ ७ ॥ नास्ति वत्स महीपृष्ठे

१ कुर्वंति—इति क्रियापदमध्याहर्तव्यम् । २ भूयस्तु—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

शिप्रायाः सदृशी नदी ॥ यस्यास्तीरे क्षणान्मुक्तिः किं चिरात्सेवनेन वै ॥ ८ ॥ वैकुण्ठे जायते शिप्रा ज्वरघ्नी च सुरालये ॥ महाद्वारे च पापघ्नी पातालेऽमृतसंभवा ॥ ९ ॥ वाराहकल्पे वै प्रोक्ता विष्णुदेहेति नामतः ॥ शिप्रावंत्यां समाख्याता कामधेनुसमुद्भवा ॥ १० ॥ ॥ व्यास उवाच ॥ ॥ विचित्रमिदमाख्यातं भवता ऋषिसत्तम ॥ वक्तुमर्हसि शिप्रायाः समासेन कथां शुभाम् ॥ ११ ॥ ॥ सनत्कुमार उवाच ॥ ॥ ब्राह्मं कपालमादाय भिक्षार्थं संचरन्महीम् ॥ महादेवो विशुद्धात्मा सर्वलोकेषु सर्वतः ॥१२॥ अप्राप्तभिक्षो भिक्षार्थी वैकुण्ठमगमद्विभुः ॥ गतश्चातिथ्यवेलायां भ्रममाणो यतस्ततः॥१३॥लोकनिंदापरः क्रुद्धः क्षुधितो बहुवासरैः॥ भिक्षां देहीति भो ब्रह्मन्क्षुधितोऽहं समाहितः ॥१४॥ कपालं च करे कृत्वा इत्युवाच पुनः पुनः ॥ गृह्यतां हर भिक्षां ते ददामीति हरिस्तदा ॥१५॥ इत्युक्त्वा करमुद्यम्य तर्जन्यंगुलिमादधत् ॥ तदा रुद्रः समाध्मातस्त्रिशूलेनाहनद्रुषा ॥१६॥ तदांगुलिसमुद्भूतं बहु सुस्राव शोणितम् ॥ तेनाशु पात्रं तत्पूर्णं शंकरस्य करे स्थितम् ॥१७॥ तदा उद्वेलिता सा वै धारा जाता समंततः ॥ तत्र स्थाने समुद्भूता शिप्राऽसृग्धारसंभवा ॥ १८ ॥ वैकुंठे चाभवत्सद्यो नदी त्रैलोक्यपावनी ॥ एवं शिप्रा सरिच्छ्रेष्ठा त्रिषु लोकेषु विश्रुता ॥ १९ ॥ ज्वरघ्नी च यथा प्रोक्ता तथा व्यास ब्रवीम्यहम् ॥ यदा बाणासुरो दैत्यः कृष्णेन सह संयुगे ॥ २० ॥ योधयामास दैत्येंद्रो ह्यनिरुद्धप्रहेलनः ॥ सहस्रबाहुभिर्वीरो नानाप्रहरणोद्यतः ॥ २१ ॥ तस्मात्क्रुद्धो वासुदेवश्चक्रमादाय सत्वरः ॥ चिच्छेद बाहुसाहस्रं क्षुरप्रेणाशुगामिना ॥ २२ ॥ स तदा भग्नसंकल्पश्छिन्नदोश्च व्रणार्दितः ॥ पराङ्मुखपरो भूत्वा शंकरं शरणं ययौ ॥ २३ ॥ तदागतं महादैत्यं समीपे भयविह्वलम् ॥ विलोक्य कृपयाविष्टो गते संग्राममूर्धनि ॥ २४ ॥ छित्त्वा बाहुसहस्रं वै दैत्यराजस्य चाहवे ॥ क्रुद्धः कृष्णो महाबाहुः परसेनांतको वरः ॥ २५ ॥ स्थितो यत्राचलो व्यास तत्रागतो महेश्वरः ॥ वारयामास कृष्णं वै शरौघैश्च समाकिरन् ॥२६॥ अन्योन्यं च समासाद्य कृत्वा युद्धं तु दारुणम् ॥ शस्त्रास्त्रैश्च महाघोरैः सर्वप्राणिभयंकरैः ॥ २७ ॥ वैष्णवास्त्रं तदा कृष्णः संदधे हरजिघांसया ॥ पाशुपतं च नामास्त्रं सर्वसंहारकारकम् ॥ २८ ॥ संदधे वै तदा शंभुः कृष्णप्राणहरोत्सुकः ॥ हाहाकारस्तदा जातः सर्वलोकेषु श्रूयते ॥ २९ ॥ मोहनास्त्रं पुनः कृष्णः शिवोपरि मुमोच ह ॥ तेनास्त्रेण तदा शंभुर्मोहितो देवमायया ॥ ३० ॥ जृंभमाणः स्थितः संख्ये किंचित्कालं मुहुर्मुहुः ॥ लब्धसंज्ञः पुनर्जातो यदा रुद्रो महाहवे ॥ ३१ ॥ तदा क्रोधाभिभूतेन कृतो माहेश्वरो ज्वरः ॥ ललाटफलकात्सद्यो वीरभद्रो महाबलः ॥ ३२ ॥ त्रिनेत्रस्त्रिशिरा ह्रस्वस्त्रिपादो बर्कराकृतिः ॥ क्षुद्रो जटिलभस्मांगो महाव्याधिर्दुरत्ययः ॥ ३३ ॥ कृष्णसेनां समासाद्य महादेवेन प्रेरितः ॥ प्राणिनां कदनं चक्रे सर्वेषां कृष्णसंगिनाम् ॥ ३४ ॥ परा



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ङ्मुख्यपरा भग्ना ज्वराभिघातपीडिता ॥ बभूव सहसा व्यास सेना कृष्णेन पालिता ॥३५॥ तथाभूतां समालोक्य जृंभमाणां रुजार्दिताम् ॥ स्व सेनां भग्नसंकल्पां माहेशज्वरपीडिताम् ॥ ३६ ॥ ससर्ज वैष्णवं तापं कृष्णः परमकोपनः॥ तेन सह वैष्णवेन माहेश्वरेण ज्वरेण च ॥ ३७ ॥ अन्यो न्यमभवद्युद्धं घोरं घोरतरं महत् ॥ संग्रामं बहुलं कृत्वा भग्नो माहेश्वरो ज्वरः ॥३८॥ सर्वलोकेषु गत्वा वै न शांतिं प्रतिजग्मिवान् ॥ महाकालव ने रम्ये प्रातस्तेनाभिपीडितः ॥ ३९ ॥ निमग्नोऽथ वै शिप्रायां ततः शांतिं परां ययौ ॥ दृष्ट्वा माहेश्वरं शांतं ज्वरं परमकोपनम् ॥ ४० ॥ वैष्णवो ऽपि समासाद्य तस्यां मज्जनमाचरत् ॥ तस्याः प्रभावसन्नष्टौ ज्वरौ हरिहरोद्भवौ ॥ ४१ ॥ तस्मात्सर्वेषु कालेषु ज्वरघ्नी साऽभवत्क्षणात् ॥ ज्वरा भिभूतास्तां प्राप्य जनाः परमदुःखिताः ॥ ४२ ॥ निमज्जंति च शिप्रायां व्यासोषसि समाहिताः ॥ न तेषां बाधते पीडा ज्वरोद्भूता कदाचन ॥ ॥ ४३ ॥ सत्यमुक्तं तदा व्यास ब्रह्महरिहरेण च ॥४४॥ ये शृण्वंति कथां दिव्यां नराश्चैकाग्रमानसाः ॥ न तेषां जायते किंचिज्ज्वरसंतापजं भयम् ॥ ॥ ४५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखंडेऽवन्तीक्षेत्रमाहात्म्ये शिप्राया माहात्म्ये ज्वरानुग्रहोनामैकोन पंचाशत्तमोऽध्यायः ॥४९॥ ॥ सनत्कुमार उवाच ॥ ॥ पापनाशिनी विख्याता यथा शिप्रा पयस्विनी ॥ तथाहं संप्रवक्ष्यामि समासेन परंतप॥१॥ पुरा कृतयुगे व्यास दमनोनाम वै नृपः ॥ कीकटेषु समाख्यातो राजा परमकोपनः ॥२॥ उत्पथी सर्वधर्माणां गोब्राह्मणविनिंदकः ॥ सुरापी हेम हारी मत्सरी गुरुतल्पगः ॥ ३ ॥ प्रजासर्वस्वहर्ता च परदाराभिमर्शकः ॥ धूर्तको[2] धूर्तसंगी च पिशुनस्तस्कराकृतिः ॥४॥ गोग्रहः पुरभेदी[3] च बंदी बंदिजनप्रियः ॥ कुत्सितः कोपपूर्णश्च वेदशास्त्रविवर्जितः ॥५ ॥ साधुसंगपरित्यागी दुष्टो दुष्टजनप्रियः ॥ कुलांगनापरित्यागी पण्यस्त्रीवृषलीपतिः ॥ ६ ॥ धर्मनिंदाकरो नित्यमधर्मे रमते मतिः ॥ न हूयंते न पूज्यंते न श्रूयंते कथा बुधैः ॥ ७ ॥ वेदा यज्ञाश्च देवानां मूर्तिः पद्मां च ताड्यते ॥ एवं दुष्टतरो राजा न भूतो न भविष्यति ॥ ८ ॥ स एकदा वने घोरे मृगयावनगोचरः ॥ इतस्ततो भ्रममाणो व्याधैः परिवृतः खलः ॥ ९ ॥ न लब्ध्वा खेटकं किंचित्क्षुधार्तस्तृपितः खलः ॥ एकाकी विगतोऽसंगो महाकालवनांतिके ॥ १० ॥ रात्रिः समागता तत्र घोरा घोरनि षेविता ॥ वृक्षमूलमुपावृत्य शयनार्थी क्षुधार्दितः ॥ ११ ॥ तत्राश्वं विटपे बद्ध्वा स्वयमेव न्यषीदत ॥ तदैव काले वृक्षाद्वै सर्पः पपात मस्तके ॥१२॥ किमिदं कुत आश्चर्यं कृत्वा हस्तेन वारितः ॥ तेन वारयिता राजा दष्टोंऽगुष्ठे तदाऽहिना ॥ १३ ॥ दष्टमात्रे च नृपतिर्व्यथितः क्षितिमागतः ॥

१ लोकेषु–इ० पा० । २ द्यूतको द्यूतसंगी च–इ० पा० । ३ पुरे पट्टे च–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

कियत्काले व्यथाविष्टो मुमोह क्षीणमंगलः ॥ १४॥ एतत्क्षणात्प्रेतभूतो घोरे नरकसंचये ॥ यमदूतैस्ताडयमानो विविधास्त्रैः स्वकर्मजैः ॥ १५ ॥ हर्षिताश्च गणाः सर्वे यमराजस्य किंकराः ॥ बद्ध्वा पाशैश्च तं निन्युः पापिष्ठं यममंदिरे ॥ १६ ॥ एतस्मिन्नंतरे व्यास क्रव्यादैः खादितं शवम् ॥ किंचिच्छेषतरं प्रातर्वायसेनाभिलक्षितम् ॥ १७ ॥ तत्र गत्वानयन्मांसं तुंडेन वियदुद्गतः ॥ ततोऽन्यैर्वायसैर्भग्नो भ्राम्यमाण इतस्ततः ॥ १८ ॥ तत्राटतो हि यत्रास्ते दिव्या शिप्रा पयस्विनी ॥ किंचित्कर्मविपाकेन वायसास्यगतं पलम् ॥ १९ ॥ पतितं वै जले तस्याः शिप्रायास्तस्य[२] कायजम् ॥ तेन पुण्यप्रभावेन शिवोऽजायत तत्क्षणात् ॥ २० ॥ त्रिनेत्रोथ जटाजूटी व्याघ्रांबरपरीवृतः ॥ शूलहस्तो वृषारूढो भालचंद्रो ह्युमापतिः ॥ २१ ॥ इत्याश्चर्यमयं रूपं दृष्ट्वा दूताश्च धर्षिताः ॥ तद्गणैस्ताडिता भग्ना धर्मराज्ञे शशंसिरे ॥ २२ ॥ श्रूयतां भो महाराज धर्मराज नमोस्तु ते[३] ॥ दूतानां यद्वचो रम्यं बह्वाश्चर्यमयं परम् ॥२३॥ कीकटाधिमतिर्मंदः पापिष्ठो वृषलीपतिः ॥ दमनोनाम राजाभूत्समस्ते क्षितिमंडले ॥२४॥ यानि कानि च पापानि ब्रह्महत्यासमानि च ॥ तानि सर्वाणि तेनापि कृतानि भुवि सत्तम ॥ २५ ॥ मर्यादाभेदको मूढो वर्णाश्रमसुधर्मिणाम् ॥ कुसंगी द्यूतकोन्मादी बहुव्यंगभरः खलः ॥ २६ ॥ यमदंडपरः पापी अस्माकं हर्षवर्धनः ॥ स कथं शिवरूपी स्यात्किमाश्चर्यमतः परम् ॥ २७ ॥ यावंतः पतिताः पूर्वे पापिनः सर्व एव हि ॥ कृष्णेन तारिताः सर्वे ब्रह्मपुत्रार्थिना तदा ॥ २८ ॥ तदाप्रभृति सर्वाणि कुंडानि नरकस्य वै ॥ शुष्काणि चैव दृश्यंते ग्रीष्मांते वै ह्रदा यथा॥२९॥न चैवार्तरवं किंचिच्छ्रूयते तव मंदिरे ॥ अस्माकं जीवनं नास्ति किमुपायं वदस्व नः ॥३०॥ एक एवागतो लोके वृत्तिदो नो यमाधिप ॥ सोऽपि शिवत्वमापन्नः कस्मान्नो जीव्यते कथम् ॥ ३१ ॥ धर्मराजस्तदाश्रुत्य किंकराणां परं वचः ॥ चिरं ध्यात्वा स्वकानूचे देशकालोचितं वचः ॥ ३२ ॥ ॥ धर्मराज उवाच ॥ ॥ श्रूयतां भो गणाः सर्वैः श्रुतिरेकाग्रमानसैः ॥ येन पुण्यप्रभावेन पापिष्ठः शिवतां गतः ॥ ३३ ॥ भुवि पुण्यतमे देशे महाकालवने शुभे ॥ शिप्रानाम सरिच्छ्रेष्ठा सर्वपापहरा परा ॥ ३४ ॥ येषां शिप्रोदकस्पर्शो जायते भुवि किंकराः ॥ न तेषां पातकं किंचिन्मृतः शिवपुरं व्रजेत् ॥ ३५ ॥ मनसा वपुषा वाचा पापानि विविधानि च ॥ तत्क्षणात्प्रलयं यांति शिप्रासरिन्निषेवणात् ॥ ३६ ॥ शिप्राशिप्रेति यो ब्रूते यत्र कुत्रापि मानवः ॥ स एव शिवतां याति न जाने स्नानजं फलम् ॥३७॥ यत्र कीटपतंगाश्च शिप्रावारिचराश्च ये ॥ मृताः शिवपुरं यान्ति शिप्रानीरनिषेवणात् ॥ ३८ ॥ कृत्वान्यत्र महापापं येऽन्ते शिप्रातटं श्रिताः ॥ महापा

१ निर्भरम्--इ० पा० । २ तस्य—दमनभूपस्य—इत्यर्थः । ३ करोमि ते--इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तकिनोऽप्येते मृता यांति शिवालयम् ॥ ३९ ॥ माधवे मासि संप्राप्ते निमज्जंति नरोत्तमाः ॥ न तेषां निरयं किंचिच्छिवरूपाश्चरंति ते ॥ ४० ॥
वायसेनाहृतं मांसं तस्य राज्ञः कृतागसः ॥ शिप्रागाधजले क्षिप्तं का तत्र परिदेवना ॥ ४१ ॥ वापीकूपतडागादि अधिका[1]धिकसत्फलम् ॥
तस्माद्दशगुणं पुण्यं नदीषु उपजायते ॥ ४२ ॥ तस्माद्दशगुणा तापी गोदा पुण्या ततोधिका ॥ तस्माद्दशगुणा रेवा गंगा पुण्या ततोऽधिका ॥
तस्माद्दशगुणा शिप्रा पवित्रा पापनाशिनी ॥ ४३ ॥ दमनस्य शरीरस्य मांसं शिप्रासमागतम् ॥ तेन पुण्यप्रभावेन शिवरूपधरोऽभ
वत् ॥ ४४ ॥ ईदृशा च नदी रम्या अवन्त्यां भुवि वर्तते ॥ वांछंति देवताः सर्वास्तस्या दुर्लभदर्शनम् ॥ ४५ ॥ धर्मराजवचः श्रुत्वा गणा विस्मय
मागताः ॥ मनसा च निरातंकाः शिप्रां शरणमागताः ॥ ४६ ॥ ॥ सनत्कुमार उवाच ॥ ॥ तदाप्रभृति विख्याता शिप्रेयं पापनाशिनी ॥
गीयते च पुराणेषु यस्या माहात्म्यमुत्तमम् ॥ ४७ ॥ दमनस्य च निर्मुक्तिः शिप्रामाहात्म्यमुत्तमम् ॥ यमदूतानां संवादं श्रुत्वा मुक्तिर्न संशयः ॥
॥ ४८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये शिप्रामाहात्म्ये पञ्चाशत्तमो
ऽध्यायः ॥ ५० ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु व्यास महाबुद्धे शिप्रामाहात्म्यमुत्तमम् ॥ यथाऽमृतभवा ख्याता पाताले नागसंमते ॥ १ ॥
एकदा रुद्रो भिक्षार्थं नागलोके बुभुक्षितः ॥ करे कपालमादाय भोगवत्यां समागतः ॥ २ ॥ भिक्षां देहि वचो दीनं वाचयित्वा गृहेगृहे ॥ भिक्षा
केनापि नो दत्ता क्षुधितस्य च धूर्जटेः ॥ ३ ॥ तदा क्रोधाभिरक्ताक्षः शूलपाणिः क्षुधार्दितः ॥ भ्रामयित्वा पुरीं सर्वां शनैर्बहिर्विनिर्ययौ ॥ ४ ॥
एकविंशतिकुण्डानि पीयूषस्य द्विजोत्तम ॥ यत्र तिष्ठंति सर्वाणि नागलोकस्य रक्षणे ॥ ५ ॥ तत्र गत्वा स भगवाञ्छंभुः सर्वात्मसंभवः ॥ अपिब
न्नेत्रमार्गेण तृतीयेन च शंकरः ॥ ६ ॥ रिक्तानि पीयूषकुण्डानि कृत्वा तत्रैव सोत्थितः ॥ कंपितश्च तदा लोको नागानां सर्वतोमु
खम् ॥ ७ ॥ कस्येदं कर्म किं जातं सुधा यस्मादितो गता ॥ इत्युक्त्वा चैव ते सर्वे नागा वासुकिपुरोगमाः ॥ ८ ॥ महदतिक्रमणे
शंकाः पुरात्ते निर्ययुर्बहिः ॥ किं कुर्वा[2]म क्व गच्छाम कस्येदं हेलनं कृतम् ॥ ९ ॥ येनास्माकं कोपितेन हृतं चामृतमुत्तमम् ॥
अस्माकं जीवनं तस्मात्कथं जीवाम पन्नगाः ॥ १० ॥ इत्युक्त्वा पन्नगाः सर्वे सस्त्रीबालपरिग्रहाः ॥ हरिं च जग्मुः शरणं
मनसा परिशंकिताः ॥ ११ ॥ तेषामनुग्रहार्थाय वाग्उवाचाशरीरिणी ॥ श्रूयतामुरगाः सर्वे युष्माभिर्देवहेलन[3]म् ॥ १२ ॥ भिक्षा

१ अधिकामफलं स्मृतम्--इ०पा० । २ आर्षः प्रयोगः । करवाम--इत्यपेक्षितम् । ३ कृतम्--इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



र्थमागतः शम्भुः क्षुधार्तश्च गृहेगृहे ॥ विदित्वातिथिवेलायां कपालकरभिक्षुकः ॥ १३ ॥ दत्ता न भिक्षा केनापि भोगवत्यां पिनकिनः ॥ तदा बहिर्गतो नाथः क्षुधितो धर्मविग्रहः ॥ १४ ॥ तेन नष्टा सुधा सर्वा कुंडांते पन्नगोत्तमाः ॥ यूयं प्रयात पातालान्महाकालवनोत्तमे ॥ १५ ॥ तत्रैका वै सरिच्छ्रेष्ठा शिप्रानामेति विश्रुता ॥ त्रैलोक्यपावनी ह्येषा सर्वकामफलप्रदा ॥ १६ ॥ यस्या दर्शनमात्रेण सर्वपापक्षयो भवेत् ॥ तत्र गत्वा भवद्भिश्च स्नानं कार्यं यथाविधि ॥ १७ ॥ भजनं देवदेवस्य ततः पूजां करिष्यथ ॥ भजनाद्देवदेवस्य शिप्रासलिलमज्जनात् ॥ १८ ॥ भविष्यति ततः सद्यः सुधा लोके पुरेव[1] वः ॥ इति संभाष्य तान्नागांस्तत्रैवांतरधीयत ॥ १९ ॥ वाणीं व्यास तदा दिव्यां सहसा लोकसाक्षिणीम् ॥ श्रुत्वा देवेरितां वाणीं तथेत्युक्त्वा च पन्नगाः ॥ २० ॥ स्त्रीबालवृद्धसहिता महाकालवनं ययुः ॥ तत्र गत्वा ददृशुस्ते नदीं त्रैलोक्यवंदिताम् ॥ २१ ॥ सर्वत्र कुसुमाकीर्णां तरुच्छायाभिराश्रिताम् ॥ हंसकारंडवाकीर्णां मणिमुक्ताप्रवालकाम् ॥ ॥ २२ ॥ मणिसोपानरचितां पद्मखंडैश्च मंडिताम् ॥ सायं प्रातः स्थिता विप्राः संध्योपासनतत्पराः ॥ २३ ॥ ऋषयश्च महाभागा भृग्वंगिरसमुख्यकाः ॥ गंधर्वाश्चैव तत्रैव देवर्षिनारदादयः ॥ २४ ॥ वसवश्च तथादित्या ह्यश्विनौ मरुतस्तथा ॥ रुद्राः साध्याश्च देवाश्च पितरो विमलाशयाः ॥ ॥ २५ ॥ उपासते च शिप्रां वै संध्यावेलां समाहिताः ॥ ऋषिपत्न्यो महाभागा देवकन्याप्सरोगणाः ॥ २६ ॥ पतिव्रता महाभागास्तत्रैव पतिभिः सह ॥ उपासंते सदाचारा वर्णाश्रमपुरोगमाः ॥ २७ ॥ राजर्षयः समासीना निर्वाणपदवीं गताः ॥ सिद्धा योगेश्वराः शांतास्तापसाः शंसितव्रताः ॥ ॥ २८ ॥ नानादेशोद्भवा लोका यात्रिणः समुपागताः ॥ शिप्राकूले समासीना नरनारीसमन्विताः ॥ २९ ॥ कुर्वते तत्र धर्माणि महादानानि सर्वशः ॥ एवंविधां समालोक्य व्यास त्रैलोक्यवंदिताम् ॥ ३० ॥ नदीं सुधामयीं सर्वा नागाः परमहर्षिताः ॥ स्नानदानादिकं कृत्वा महादेवमुपासिरे ॥ ३१ ॥ वेदोक्तविधिना सर्वे भक्त्या पन्नगसत्तमाः ॥ पंचांगपूर्वकं स्नानं यक्षकर्दमलेपनम् ॥ ३२ ॥ अम्लानपंकजां मालां नानापुष्पाक्षतैस्तथा ॥ वासःस्रगनुलेपाद्यैश्चन्दनैर्गंधधूपकैः ॥ ३३ ॥ दीपदानादिनैवेद्यैस्तांबूलमथ दक्षिणाः ॥ कर्पूरार्तिकराः सर्वे महादेवमुपागताः ॥ स्तुतिमारेभिरे कर्तुं सुधाकामास्तदोरगाः ॥ ३४ ॥ ॥ सर्पा उचुः ॥ ॥ नमोऽनंताय बृहते सर्वदेव नमोनमः ॥ चंद्रमौले नमस्तेऽस्तु कपर्दिन्परमात्मने ॥ ॥ ५३ ॥
वृषध्वज नमस्तेऽस्तु त्रिशूलवरधारिणे ॥ ३५ ॥ त्र्यम्बकाय नमस्तेऽस्तु जटामुकुटधारिणे ॥ शेषहार नमस्तेस्तु चिताभस्मांगधारिणे ॥ ३६ ॥

१ पुरेव–पूर्ववत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत्तिवास नमस्तेऽस्तु गिरीशाय नमोनमः ॥ त्रिपुरघ्न नमस्तेस्तु स्मरांतक नमोऽस्तु ते ॥ ३७ ॥ मृगव्याध नमस्तेऽस्तु घस्मराय नमोनमः ॥ शंकरात्मन्नमस्तेस्तु सर्वकामफलप्रद ॥ ३८ ॥ सर्वसाक्षिन्नमस्तेऽस्तु सर्वभूताशयाकृते ॥ सर्वाधार नमस्तेऽस्तु सर्वशक्तिधराय च ॥ ३९ ॥ सर्वभोग नमस्तेऽस्तु सर्वबीजसमुद्भव ॥ दिव्यहास नमस्तेऽस्तु नमोऽमृतस्रवाय च ॥ ४० ॥ काम्यकाम नमस्तेस्तु सर्वकामवरप्रद ॥ नमः शिवाय शांताय पशूनां पतये नमः ॥ ४१ ॥ नमो मृडाय दांताय शांतरूपाय वै नमः ॥ ४२ ॥ एवं प्रसादितो नागैर्भगवान्वृषभध्वजः ॥ प्रसन्नवदनो भूत्वा प्रत्यक्षः प्राह पन्नगान् ॥ ४३ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ शृणुध्वमुरगाः सर्वे वचस्तथ्यं वदामि वः ॥ नागलोके पुरा नित्यं भिक्षार्थं चागतोस्म्यहम् ॥ ४४ ॥ गृहेगृहे भोगवत्यां व्यचरत्क्षुधितो भृशम् ॥ कपालं च करे कृत्वा धृत्वा कंथां सुचीरकाम् ॥ ४५ ॥ अप्राप्तभिक्षो भिक्षार्थी पुनरागां ततो गृहम् ॥ तेन पापप्रसंगेन सुधा नष्टा च वः स्थलात् ॥ ४६ ॥ किंचित्पुण्यप्रसंगेन महाकालवनोत्तमे ॥ यूयं प्राप्ता महाभागा हित्वा नागालयोत्तमम् ॥ ४७ ॥ आबालवृद्धैः सस्त्रीभिर्दृष्टा शिप्रा सरिद्वरा ॥ यस्या दर्शनमात्रेण सुनिष्पापोऽस्म्यहं पुरा ॥ ४८ ॥ शिप्रायां स्नानजं पुण्यं वक्तुं शक्तो न कीदृशम् ॥ दर्शनाज्जायते शंभुस्तत्क्षणाद्भुवि पन्नगाः ॥ ४९ ॥ यस्मात्स्नानं कृतं सर्वैः शिप्रायां पन्नगोत्तमैः ॥ तेन पुण्यप्रभावेन सुधास्तु वो गृहेगृहे ॥ ५० ॥ नीत्वा शिप्रोदकं पुण्यं कुण्डेषु परिषिञ्चत ॥ तेनैतानि च कुण्डानि अमृतान्येकविंशतिः ॥ ५१ ॥ संपूर्णानि भविष्यंति स्थिराणि पन्नगोत्तमाः ॥ तथेत्युक्त्वा च ते सर्वे धृत्वा शिप्रोदकं करैः ॥ ५२ ॥ गतास्ते वै स्वकं लोकं नमस्कृत्वा महेश्वरम् ॥ ततः प्रभृति सा शिप्रा नागलोकेऽमृतोद्भवा ॥ ५३ ॥ सर्वलोकेषु विख्याता व्यास शिप्राऽमृतोद्भवा ॥ ये तु तस्यां प्रकुर्वंति नराः स्नानादिकं भुवि ॥ ५४ ॥ न तेषां दुष्कृतं किंचिन्नापदो न च दुर्गतिः ॥ न वियोगो भवेत्तेषां पुत्रदारादिकैः कदा ॥ ५५ ॥ न च मित्राणि दुष्यंति न रोगो न दरिद्रता ॥ कथां पापहरां पुण्यां सर्वकामवरप्रदाम् ॥ पठनाच्छ्रवणाद्वापि गोसहस्रफलं लभेत् ॥ ५६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये शिप्रामाहात्म्येऽमृतोद्भवानामकथावर्णनंनामैकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥ ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शिप्रा च सर्वतः पुण्या पवित्रा पापहारिणी ॥ अवंत्यां भूयः शृणु महाभाग शिप्रामाहात्म्यमुत्तमम् ॥ यस्य श्रवणमात्रेण हयमेधफलं भवेत् ॥ १ ॥

१ लभेत्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



च विशेषेण शिप्रा चोत्तरवाहिनी ॥ २ ॥ तथापि तत्समुत्पत्तिं विस्तराद्वदतो मम ॥ यथा वाराहतनया विष्णुदेहोद्भवा शिवा ॥ शृणु व्यास महापुण्यां कथां पौराणिकीं शुभाम् ॥ ३ ॥ पुरा महासुरो जातो हिरण्याक्षो महाबलः ॥ ४ ॥ स चेमां सकलां पृथ्वीं वशीकृत्वा चकार ह ॥ राज्यं च सार्वभौमानां दानवैश्च दुरात्मभिः ॥ ५ ॥ जित्वा च सकलाँल्लोकान्सुरानिंद्रपुरोगमान् ॥ दिक्पालान्वसुपालांश्च तिरस्कृत्यासुराधिपः ॥ ६ ॥ स सर्वान्सर्वलोकेभ्यः स्वयमेवाधितिष्ठति ॥ स्वर्गान्निराकृताः सर्वे तेन देवगणा भुवि ॥ ७ ॥ विचरंति यथा मर्त्या भ्रष्टराज्याः पराजिताः ॥ अलब्धशरणाः सर्वे ब्रह्माणं शरणं ययुः ॥ ८ ॥ तत्र गत्वा नमस्कृत्य दैत्यकृत्यं न्यवेदयन् ॥ भगवन्किमिदं कार्यं भवता परमेष्ठिना ॥ ॥ ९ ॥ येन देवगणाः सर्वे नष्टप्रायाश्च तत्क्षणात् ॥ हिरण्याक्षेण दैत्येन हृतं स्वर्गमकण्टकम् ॥ १० ॥ यज्ञभागांश्च वै सर्वानुपाश्नाति पृथक्पृथक्[2] ॥ केनोपायेन जीवाम कथं तिष्ठाम भूतले ॥ ११ ॥ इति विक्लवितं तेषां देवानां स पितामहः ॥ उवाच वचनं रम्यं तत्कालसमयोचितम् ॥ १२ ॥ ॥ ॥ ब्रह्मोवाच ॥ ॥ शृणुध्वं भोः सुरश्रेष्ठा यूयं सर्वे समाहिताः ॥ पुरायं पार्षदश्रेष्ठो द्वारपालः समाहितः ॥ १३ ॥ वैकुण्ठभवने रम्ये विष्णोरतुलतेजसः ॥ जयोनाम महाबाहुर्विजयेन समन्वितः ॥ १४ ॥ द्वावेव सचिवौ दांतौ विष्णुवेषधरावुभौ ॥ आत्तयष्टी च विक्रांतौ द्वारे संतिष्ठतः सदा ॥ ॥१५॥ एकदा वै मुनिश्रेष्ठ ब्रह्मणो मानसात्मजाः ॥ स्वैरं चरंतो लोकानां विष्णोर्भवनमागताः ॥१६॥ सनकादयो महाभागा भगवद्दर्शनलालसाः ॥ ताभ्यां निवारिताः सर्वे पेतुर्वै धरणीतले ॥ १७ ॥ मुमुहुश्च तदा व्यास कुमारा भृशदुःखिताः ॥ ततोऽगात्स महाबाहुर्भगवान्कमलेक्षणः ॥ १८ ॥ ददर्श सहसा विष्णुः कुमारान्भुवि दुःखितान् ॥ उत्थाप्यांकं समारोप्य सस्वजे मधुसूदनः ॥ १९ ॥ मूर्ध्नि चाघ्राय बाहुभ्यां परिष्वज्य ह्युवाच ह ॥ कस्माद्वः कश्मलमिदं केनापि दुःखिता भृशम् ॥ २० ॥ सर्वं तत्कारणं बाला ब्रूत नो धर्मवित्तमाः ॥ २१ ॥ ॥ कुमारा ऊचुः ॥ ॥ श्रूयतां भो महाराज अस्माकं दुःखमीदृशम् ॥ येन प्राप्ता वयं ब्रह्मन्दशामेतां शृणुष्व ह ॥ २२ ॥ आयाता भ्रातरो ह्येते चत्वारो लोकपर्यटाः[3] ॥ दर्शनार्थं रमानाथ साभिलाषाः शुचार्दिताः ॥ २३ ॥ निवारिताश्च सहसा ताभ्यां[4] वै द्वारपालनात् ॥ तेनैवेयं दशा प्राप्ता भवता परिपालिताः ॥ २४ ॥ ॥ ॥ भगवानुवाच ॥ ॥ अतः प्रभृति स्थानेस्मिन्स्थितिर्नास्ति च शाश्वती ॥ एतयोरासुरी योनिः प्राप्स्यते यन्ममाहितौ ॥ २५ ॥ सद्यः प्राप्तौ तदा व्यास आसुरीं योनिमेव तौ ॥ जयविजयनामाख्यौ दुष्टभावसमाश्रितौ ॥ २६ ॥ जन्मांतरसहस्रेण तपोदानसमाधिभिः ॥ नराणां

१ पापहरान्–इ० पा० । २ यजमानाश्च ते सर्वेऽप्युपद्रुताः पृथक्पृथक्–इ० पा० । ३ लोकपर्यटाः—लोकान् पर्यटन्तीति लोकपर्यटाः । ४ द्वारपालबलोत्कटैः–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षीणपापानां कृष्णे भक्तिः प्रजायते ॥ २७ ॥ दुष्टभावेन सद्यो वै जन्मभिर्जायते त्रिभिः ॥ भविष्यति च तस्माद्वो विष्णुभक्तिः परा स्मृता ॥२८॥ जन्मजन्मांतरे जातौ तामसीं योनिमुद्धतौ ॥ हिरण्यकशिपुश्चैव हिरण्याक्षो महाबलः ॥ २९ ॥ तथैव कुंभकर्णाख्यो रावणो लोकरावणः ॥ दंतवक्रः शिशुपालश्च जन्मत्रयमिति स्मृतम् ॥ ३० ॥ योऽसौ महाबलो दैत्यो हिरण्याक्ष इति स्मृतः ॥ दुष्टभावसमापन्नो देवब्राह्मणनिंदकः ॥ ॥ ३१ ॥ जित्वा च सकलान्देवान्स्वयमेवाधितिष्ठति ॥ ३२ ॥ स्वर्गान्निराकृताः सर्वे भ्रष्टराज्याः पराजिताः ॥ विचरंति यथा मर्त्यास्तेन देवगणा भुवि ॥ ३३ ॥ स्वधाकारो वषट्कारः स्वाहाकारो न दृश्यते ॥ देवपूजार्चनं नास्ति ब्राह्मणानां विशेषतः ॥ ३४ ॥ नैव तीर्थं प्रकाशेत पुण्यान्यायतनानि च ॥ आश्रमेषु च सर्वेषु ऋषीणां च महात्मनाम् ॥ ३५ ॥ उद्वृत्तं च प्रकुर्वंति दुष्टदैत्याः[१]प्रहारिणः ॥ वर्णाश्रमवतां धर्माः स्त्रीणां चैव सुशीलता ॥ ३६ ॥ उच्छिन्ना हि तदा जातास्तस्मिन्राज्ञि दुरात्मनि ॥ दुष्टाचारा दुरात्मानो मायिनो बहुमानिनः ॥ ३७ ॥ पाखंडिनोऽपराक्रांताः सर्वे धर्मबहिर्मुखाः ॥ पशुधर्मरताः सर्वे सर्वे ब्रह्मेतिशंसिनः ॥ ३८ ॥ बहुम्लेच्छा बहुक्लेशा बह्वाबाधावनी कृता ॥ को वेदः का स्मृतिः पुण्या को यज्ञः का च दक्षिणा ॥ ३९ ॥ तमीभूतं जगत्सर्वं दृश्यते वसुधातले ॥ एवं व्यास यदा जातं दुष्टं सर्वं जगत्त्रयम् ॥ ४० ॥ यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ॥ अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥ ४१ ॥ इति ज्ञात्वा महाविष्णुर्वाराहं वपुरात्मवान् ॥ दधार लीलया दिव्यं श्वेतद्वीपोपमं शुभम् ॥ ४२ ॥ यूपदंष्ट्रो हविर्गंधो बीजौषधितनूरुहः ॥ वेदपादः शुचिर्दंडी जिह्वाग्निस्तालुकाहुतिः ॥ ४३ ॥ अंतरास्यरुचादार्ढो यज्ञकायः सुदक्षिणः ॥ उद्गानघुर्घुरोन्नादो विहार ऋत्विजाकृतिः ॥ ४४ ॥ हौत्रश्वासपरो दक्षसदस्यावयवः स्मृतः ॥ पुंच्छकर्माशनो नित्यं यजमानसुमानदः ॥ ४५ ॥ वेदिपल्वलसंस्तारो ब्रह्माध्वर्युर्वनाकरः ॥ लोककल्पो लोकसाक्षी परावरवहः शुचिः ॥ ४६ ॥ आद्यः पुरुष ईशानः पुरुहूतः पुरुष्टुतः ॥ तेनासौ निहतो दैत्यो हिरण्याक्षो दुरासदः ॥ ४७ ॥ संग्रामान्सुबहून्कृत्वा बहुकष्टेन विष्णुना ॥ दैत्येन पीडिता पृथ्वी रसातलतलंगता ॥ ४८ ॥ उद्धृता च वराहेण दंष्ट्रया चंद्ररेखया ॥ हतास्ते दानवाः सर्वे शेषाः पातालमाययुः ॥ ४९ ॥ ववुः पुण्यास्तथा वाताः सुप्रभोऽभूद्दिवाकरः ॥ जज्वलुश्चाग्नयः शांताः शांता दिग्जनितस्वनाः ॥ ५० ॥ सरितो मार्गवाहिन्यः सागराः प्रकृतिं गतः ॥ दृष्ट्वा देवोखिलं व्यास प्रसन्नात्मा बभूव ह ॥ ५१ ॥ वाराहमूर्तिर्भगवान्सर्वकामफलप्रदः ॥ आनंदनिर्भरो देवो हतदैत्यो वरप्रदः[२] ॥ ५२ ॥ तस्यापि हृदयाज्जाता

१ दुष्टकर्माशनः–इ० पा० । २ आनंदिजनसंपूर्णः सर्वानन्दवरप्रदः–इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



नदी ह्येषा सनातनी ॥ आनंदजलसंपूर्णा सर्वानंदवरप्रदा ॥५३॥ बहुयोजनविस्तारा बहुला कामचारिणी ॥ पद्माकरसमाकीर्णा हंसकारण्डसंकुला ॥५४॥ सरला तरलच्छाया यक्षगंधर्वसेविता ॥ किन्नरीगीयमाना च गीयमाना खगालिभिः ॥५५॥ अप्सरोभिर्नृत्यमाना स्तूयमाना महर्षिभिः॥ हूयमाना हुताग्निभी राजर्षिभिः समाश्रिता ॥ ५६ ॥ तुंगस्तनभराक्रांतयोषिद्भिः क्रीडितान्तरा ॥ क्वचित्करिवरांदोले रम्यमाणा विराजिता ॥५७॥ वेदविद्भिर्द्विजैः सेव्या ऋषिभिस्संशितात्मभिः ॥ सर्वदा सर्वकाले च सिद्धैः सिद्धिप्रदा नृणाम् ॥ ५८ ॥ महाकालवने रम्ये रम्या पद्मावती पुरी ॥ सुन्दरं कुण्डमपरं रम्यं प्राचीनकं शुभम् ॥ ५९ ॥ यत्र स्नात्वा नरा यांति शिवलोकं सनातनम् ॥ यत्र [1]नीला परा व्यास शिप्रा वै लोकपावनी ॥ ६० ॥ वाराहेण कृतं सर्वं दुष्टदैत्यनिबर्हणम् ॥ तेन देवा निरातंकाः कृता वाराहमूर्तिना ॥ ६१ ॥ कृतप्रांजलयः सर्वे देवा इंद्रपुरोगमाः ॥ स्तुतिं कृत्वा महाविष्णोः सततं पुरतः स्थिताः ॥ ६२ ॥ देवदेव जगन्नाथ पुण्यश्रवणकीर्तन ॥ किं दानं किं तपः पुण्यं किं तीर्थं का च देवता ॥ ६३ ॥ येन पुण्यप्रभावेन पुनः स्वर्गो ह्यवाप्स्यते ॥ एतन्निश्चित्य नो ब्रूहि सर्वं गुह्यतरं विभो ॥ ६४ ॥ ॥ विष्णुरुवाच ॥ ॥ शृणुध्वं भोः सुराः सर्वे युष्माकं सिद्धिकारणम् ॥ गुह्याद्गुह्यतरं पुण्यं महाकालवनं शुभम् ॥ ६५ ॥ मम देहोद्भवा शिप्रा यत्र लीना पयस्विनी ॥ [2]नीलगंगा सरिच्छ्रेष्ठा यत्र प्राची सरस्वती ॥ ६६ ॥ पुष्करं च गयातीर्थं पुरुषोत्तमसरः शुभम् ॥ तत्रैव गच्छत क्षिप्रं पुनर्लोकानवाप्स्यथ ॥ ६७ ॥ इति श्रुत्वा परं वाक्यं देवदेवजगद्गुरोः ॥ तत्र देवगणाः सर्वे ब्रह्मशक्रपुरोगमाः ॥ ६८ ॥ महाकालवने रम्ये यत्र शिप्रा सरिद्वरा ॥ स्नानदानादिकं कृत्वा श्राद्धं कृत्वा यथोचितम् ॥ ६९ ॥ तेन पुण्यप्रभावेन स्वकाँल्लोकान्गताः सुराः ॥ एवं व्यास समाख्याता शिप्रा वै लोकपावनी ॥ ७० ॥ जातं सरो वराहस्य विष्णोरतुलतेजसः ॥ यस्य दर्शनमात्रेण ब्रह्महत्यां व्यपोहति ॥ ७१ ॥ अत्र स्नात्वा पयः पीत्वा श्राद्धं कृत्वा यथोचितम् ॥ पयस्विनीं च गां दत्त्वा विष्णुलोके महीयते ॥ ७२ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये शिप्रामाहात्म्यवर्णनंनाम द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ पृथिव्यां यानि तीर्थानि तानि सर्वाणि सुव्रत ॥ अवंत्यां सुन्दरे तीर्थे तिष्ठंति सर्वदा भुवि ॥ १ ॥ ॥ व्यास उवाच ॥ ॥ किमिदं सुन्दरं कुण्डं कदाकालेऽभवत्क्षितौ ॥ निर्मितं केन को देवः किं वा तस्य फलं स्मृतम् ॥ २ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु पुण्यतमे क्षेत्रे सुन्दराख्यं [3]यदा



१ लीना–इ०पा० । २ लीनगंगा–इ०पा० । ३ तया–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽभवत् ॥ सर्वपापप्रशमनं वांछितार्थफलप्रदम् ॥ ३ ॥ यस्य श्रवणमात्रेण ब्रह्महत्या व्यपोहति ॥ अश्वमेधादिकं पुण्यं वाजपेयश
ताधिकम् ॥ ४ ॥ पुरा कल्पक्षये व्यास नष्टकल्पा च मेदिनी ॥ प्रचण्डवातवर्षाभ्यां घूर्णितो मेरुपर्वतः ॥ ५ ॥ तदात्र पतितं
व्यास वैकुण्ठशिखरोत्तमम् ॥ महाकालवने घोरे गुह्ये चाव्ययके ध्रुवे ॥ ६ ॥ तत्क्षणात्पतिते शृंगे कुण्डं जातं सुनिश्चितम् ॥
रत्नसोपानमच्छोदं मुक्तासैकतपूरितम् ॥ ७ ॥ जांबूनदकरारोहं हेमपद्मविराजितम् ॥ कल्पद्रुमकृतच्छायं चिंतामणिसमुच्छ्रितम् ॥ ८ ॥
हंसकारंडवाकीर्णं चक्रवाकोपशोभितम्[1] ॥ बीजौषधिगणाकीर्णं सर्वतत्त्वाभिसंयुतम् ॥ ९ ॥ कल्पक्षये न क्षीयंते यानि तत्त्वानि सर्वशः ॥
तानि तत्र प्रतिष्ठंति मूर्तिमंति पराणि च ॥ १० ॥ वेदशास्त्रपुराणानि गाथागीतिक्षराक्षराः ॥ ॐकारश्च वषट्कारो गायत्री त्रिपदा परा ॥
॥ ११ ॥ कलाः काष्ठा मुहूर्ताश्च लवत्रुटिपलं घटिः ॥ अहर्निशश्च यामाश्च पक्षमासावृतुस्तथा ॥ १२ ॥ संवत्सरयुगाश्चैव कुण्डे तिष्ठंति
मूर्तितः ॥ देवा यक्षाश्च नागाश्च गुह्यकाः किन्नरास्तथा ॥ १३ ॥ गंधर्वाप्सरसो यक्षाः सिद्धाः किंपुरुषास्तथा ॥ उपासांचक्रिरे तस्य
कल्पदोषभयातुराः ॥ १४ ॥ ब्रह्मा रुद्रश्च कालश्च लोकपाला महौजसः ॥ केचिद्ध्यानपराः सिद्धास्तापसाः शंसितव्रताः ॥ १५ ॥
तिष्ठंति बहुयुगं व्यास यावत्कल्पः समाप्यते ॥ सुदर्शनसमाकारं पूरितं चामृतांबुभिः ॥ १६ ॥ [2]दिव्यपादपसंयुक्तं पारिजातगुणान्वितम् ॥
दिव्यस्त्रीस्नानगंधोदैर्वासितोद्गारिसौरभम् ॥ १७ ॥ क्वचिन्मयूरा नृत्यंति क्वचित्कूजंति कोकिलाः ॥ क्वचित्केकारवाः क्वापि मेघघोषसमाकुलम् ॥
॥ १८ ॥ सुन्दरं सुन्दराकारं सुन्दरं तेन चोच्यते ॥ बहुपुण्यकरं व्यास सर्वपापहरं परम् ॥ १९ ॥ यत्र संनिहितो विष्णुः शिवः शक्त्या युतो
वशी ॥ उपासांचक्रिरे शश्वत्सर्वकालेषु सर्वदा ॥ २० ॥ [3]पक्षार्धं पक्षमेकं च सुन्दरकुण्डे नरो वसेत् ॥ वैकुण्ठे नियतं वासो यावत्कल्पशतं
भवेत् ॥ २१ ॥ पक्षिकीटपतंगाश्च मृता यांति शिवालयम् ॥ किं पुनर्मानवा लोके स्नानपूताश्च तत्र वै ॥ २२ ॥ ये ददति तिलान्धेनुं गजवा
जिरथावनीः॥दासीर्दासान्सुवर्णं च रत्नानि विविधानि च ॥२३॥ शय्यादानविमानानि दानानि विविधानि च ॥ न तेषां दानजं वेद्मि कीदृग्व्यास
फलं भवेत् ॥ २४ ॥ भूयः शृणु परं व्यास सुन्दरकुण्डफलं स्मृतम् ॥ एकदा बहुपापेन पतितः पापयोनिषु ॥ २५ ॥ पिशाचो मोक्षमापन्नः शिव
रूपधरो गतः ॥ पिशाचमोचने स्नात्वा दृष्ट्वा देवं महेश्वरम् ॥ २६ ॥ मुच्यते सर्वपापेभ्यो यद्यपि ब्रह्महा भवेत् ॥ २७ ॥ ॥ व्यास उवाच ॥ ॥

१ महर्षिगणसेवितम्--इ० पा० । २ दिव्याभिप्रायसंयुक्तम्--इ०पा० । ३ क्षणार्धं क्षणमेकं च--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



कोऽसौ पिशाच इति ख्यातः किं तेन दुष्कृतं कृतम् ॥ येन पापप्रसंगेन पिशाचत्वमुपागतः ॥ २८ ॥ कथं तीर्थप्रसंगोऽस्य जातो वै द्विज सत्तम ॥ एतद्वेदितुमिच्छामि त्वत्तो ब्रह्मविदांवर ॥ २९ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु व्यास महाख्यानं तीर्थमाहात्म्यमुत्तमम् ॥ यस्य श्रवणमात्रेण सर्वपापक्षयो भवेत् ॥३०॥ ब्राह्मणो देवलो नाम दाक्षिणात्यो द्विजाधमः ॥ सदा पापरतो लोभी कूटसाक्षी च लंपटः ॥ ३१ ॥ गुरुद्रोही कितवो धूर्तो गुरुहा गुरुतल्पगः ॥ हेमहारी सुरापी च ब्रह्महा स्वामिद्रोहकः ॥ ३२ ॥ अभक्ष्यभक्षकश्चैव वेदशास्त्रविवर्जितः ॥ अनेकजन्मार्जितपापी सर्वधर्मबहिष्कृतः ॥३३॥ विश्वासघातको मानी चोरसंगरतः खलः ॥ देशांतरगतो मंदश्चौरकार्यार्थसाधकः ॥ ३४ ॥ बहवो निहता मार्गे पापाचारेण जंतवः ॥ मगधे स गतो दुष्टः प्रसंगात्पापकारिणाम् ॥३५॥ तत्रैको ब्राह्मणो दांतो वेदवेदांगपारगः ॥ साग्निकः शुद्धस त्वस्थो ब्रह्मकर्मरतः सदा ॥ ३६ ॥ श्वशुरगृहे स्थिता भार्या तामादाय यशस्विनीम् ॥ चलितो यानमारुह्य तेन पापेन घातितः ॥ ३७ ॥ तस्य स्त्री च वरारोहा रूपलावण्यशालिनी ॥ पतिव्रता महाभागा दृढचित्ता शुचिस्मिता ॥ ३८ ॥ हते भर्तरि दुःखार्ता पतिविरहकातरा ॥ वने घोरे परिभ्रष्टा काष्ठान्यादाय भामिनी ॥ ३९ ॥ आरुरोह चितां दीप्तां पतिना हृष्टमानसा ॥ स च दुष्टतरः सर्वं तस्य विप्रस्य जीवनम् ॥ ४० ॥ गृहीत्वा चलितो मार्गे गृहीतो राजकिंकरैः ॥ बंधयित्वा च तैः सर्वैस्तेन वित्तेन वै सह ॥ नीतोऽसौ राजभवनं निवेदितो राजसंनिधौ ॥४१॥ पातितो वै गले बद्ध्वा रज्जुना वृक्षकोटरे ॥ चांडालैर्घृष्टितो भूमावितस्ततः श्वपाकिभिः ॥ ४२ ॥ तेन कर्मविपाकेन रौरवं नरकं गतः ॥ षष्टिवर्षसहस्राणि विष्ठायां कृमितां गतः ॥ ४३ ॥ ततोऽन्यं नरकं प्राप्तो यमशासनकारकैः ॥ असिपत्रवनं घोरमायसं तप्तसायकम् ॥ ४४ ॥ मुद्गरैस्ताड्यमानो हि शृंखलाभिश्च किंकरैः ॥ कुंभीपाकगतो रौति वैतरण्यां सुपीडितः ॥ ४५ ॥ एवं बहुविधान्कुण्डान्भुक्त्वा पापी नवान्नवान् ॥ ततः प्रेतत्वमापन्नो युगानां पंचसप्ततिम् ॥ ४६ ॥ महाकायो महारावो महोदरः सूचीमुखः ॥ क्षुत्तृड्भ्यां च पराक्रांतो मरुदेशं समाश्रितः ॥ ४७ ॥ ततः कष्टतरां प्राप्य पैशाचीं तनुमाश्रितः ॥ कुटिलो दुष्टभावश्च दुष्टचारी दिगंबरः ॥ ४८ ॥ विण्मूत्रदूषितोच्छिष्टपूतिपर्युष्टभोजनः ॥ श्मशानोच्छिष्टभोजी च कृत्तिवासा विलोचनः ॥ ४९ ॥ भग्नवापीतडागे च शुष्कवृक्षे निरूदके ॥ प्राकारपरिखागारे शून्यागारे नदीतटे ॥ ५० ॥ निवासो रोचते तस्य सर्वदा सर्वसंधिषु ॥ एवं बहुयुगे याते महाकालवने गतः ॥ ५१ ॥ यत्र माहेश्वरं लिंगं सुन्दरं कुंडमुत्तमम् ॥ तत्रोषितत्वमात्रेण सिंहेन विनि



१ अद्भुतम–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पातितः ॥ ९२ ॥ घातयित्वा च तं पापं जलार्थी कुंडमाविशत् ॥ दंष्ट्रांतरगतं चास्थ्यपतत्तस्य मुखाज्जले ॥ ९३ ॥ तेन पुण्यप्रभावेन सर्वपापं क्षयं गतम् ॥ मृतमात्रे च लिंगं तन्नेत्रांतरगतं तदा ॥ ९४ ॥ हित्वा पैशाचकं देहं ज्योतिस्तल्लिंगमाविशत् ॥ तदारभ्य परं व्यास तीर्थं पैशाचमोचनम् ॥ ९५ ॥ पिशाचमोचनेशेति देवः ख्यातिं ततो गतः ॥ तावद्गर्जंति पापानि मदोन्मत्तगजा यथा ॥ ९६ ॥ यावन्नायाति शिप्रायास्तीर्थे पैशाचमोचने ॥ पिशाचमोचने स्नात्वा शुचिर्भूत्वा समाहितः ॥ ९७ ॥ पिशाचमोचनं देवं पूजयित्वा यथाविधि ॥ सर्वपापविशुद्धात्मा जायते नात्र संशयः ॥ ९८ ॥ पिशाचमोचने व्यास महादानानि कारयेत् ॥ न तस्य पुनरावृत्तिः शिवलोकात्कदाचन ॥ ९९ ॥ पिशाचमोचनकथां पवित्रां पापहारिणीम् ॥ यः पठेच्छृणुयाच्चैव हयमेधफलं लभेत् ॥ १०० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये सुन्दरकुंडपिशाचमोचनतीर्थमाहात्म्यवर्णनंनाम त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥ ॥ व्यास उवाच ॥ ॥ भूयस्तु श्रोतुमिच्छामि त्वत्तो ब्रह्मविदांवर ॥ नीलगंगा कदा ब्रह्मञ्छिप्राकुंडे समागता ॥ १ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु व्यास महातीर्थं सर्वतीर्थफलप्रदम् ॥ नीलगंगां नरः स्नात्वा संगमेश्वरमर्चयेत् ॥ २ ॥ दुःसंगसंभवा दोषा न भवंति कदाचन ॥ एकदा ब्रह्मलोके वै गंगा त्रिपथगा नदी ॥ ३ ॥ गता पुनंती त्रींल्लोकान्नीलवासा शुचार्दिता ॥ भगवन्किमिदं जातं पातकं मे कृतं पुरा ॥ ४ ॥ दुष्टाचारापराधेन येनेमां प्रापिता दशाम् ॥ सर्वलोकेषु यत्किंचिज्जनानां पातकं भुवि ॥ ५ ॥ तत्सर्वं तिष्ठति मयि सर्वेषामपि देहिनाम् ॥ तेनाहं वै भराक्रांता नो शक्या चलितुं धराम् ॥ ६ ॥ नीलभासा विवर्णा च सर्वधर्मबहिर्मुखा ॥ यत्किंचित्क्रियते कर्म शुभं वा यदि वाऽशुभम् ॥७॥ मयि त्यक्त्वा पुनंतीह जंतवः सर्वशोऽमलाः ॥ तिष्ठंति पुण्यलोकेषु भुक्तिमुक्तिप्रदेषु च ॥ ८ ॥ अस्माकं च महत्कष्टं जातं धातः परं मलम् ॥ न हि शर्म न वै शांतिर्न निद्रा न च निर्वृतिः ॥ ९ ॥ न लोके च स्थितिर्मेद्य पापिष्ठायाः सनातनी ॥ दुष्टसंगोद्भवैर्दोषैः प्लाविताहं जगद्गुरो ॥१०॥ किं करोमि क्व गच्छामि येन शांतिर्भवेन्मम ॥ किं तपः किं च दानं मे किं तीर्थं किं च साधनम् ॥ ११ ॥ येनाहं पापलिप्तांगी पुनः प्रकृतिमाप्नुयाम् ॥ एवं ज्ञात्वा महायोगिन्यथा योग्यं तथा कुरु ॥ १२ ॥ ॥ ब्रह्मोवाच ॥ ॥ श्रूयतां भोः सरिच्छ्रेष्ठे कारणं पापनाशनम् ॥ महाकालवने रम्ये पुरी ह्येषाऽमरावती ॥ १३ ॥ तत्र शिप्रा सरिच्छ्रेष्ठा वर्तते भुवि पावनी ॥ तस्या दर्शनमात्रेण सर्वपापक्षयो भवेत् ॥ १४ ॥ तत्र गच्छ महाभागे सद्यश्चात्म

१ शुचौ–इ० पा० । २ नीलगंगा–इ० नीलभासा–इ०, च पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



विशुद्धये ॥ ब्रह्मणेति समाख्यातं श्रुत्वा गंगा सरिद्वरा ॥ १५ ॥ तमभिज्ञाय संप्राप्ता महाकालवनं शुभम् ॥ पुष्करस्याग्निभागे च यत्र देवो
मरुत्सुतः ॥ १६ ॥ विंध्यस्य चोत्तरे भागे अंजन्याश्रममुत्तमम् ॥ सा पुत्रेण तपस्तेपे पवित्रा ब्रह्मचारिणी ॥ १७ ॥ पतिव्रताभिः सर्वाभिः
पतिभिर्ब्रह्मचारिभिः ॥ देवांगनाभिर्बहुभिः क्रीडद्भिर्बालकुंजरैः ॥ १८ ॥ सरसीफुल्लकल्हारैर्मत्तालिकुलनादितैः ॥ निर्वैरजंतुभिः सेव्यं ब्रह्मर्षिगणसे
वितम् ॥ १९ ॥ मनोह्लादकरं पुण्यं पवित्रं पापनाशनम् ॥ तत्र प्रवेशमात्रेण नीलवासाः सरिद्वरा ॥ २० ॥ शुक्लवासा[1]ऽभवत्सद्यो नष्टपापमला
ऽशुभा ॥ शरच्चंद्रनिभाकारा धूतपापा पयस्विनी ॥ २१ ॥ तत्रैव चाश्रमं चक्रे मनःसंहर्षकारणम् ॥ तत्प्रभृति समाख्यातं सर्वलोकेषु पुण्यदम् ॥
॥ २२ ॥ नीलगंगेति वै व्यास तीर्थं किल्बिषनाशनम् ॥ अस्मिंस्तीर्थे नरः स्नात्वा हनुमंतमथार्चयेत् ॥ २३ ॥ तस्य सिद्धिः करगता भविष्यति
न संशयः ॥ आश्विने मासि संप्राप्ते कृष्णपक्षे समाहितः ॥२४॥ दर्शे पितॄन्समुद्दिश्य श्राद्धं कुर्यान्महालयम् ॥ तारितं च कुलं सर्वं तेनात्मैकोत्तरं
शतम् ॥ २५ ॥ समगोत्रेषु ये जाताः पूर्वजा निरयवासिनः ॥ ते सर्वे सद्गतिं यांति तेषां लोकाः सनातनाः ॥ २६ ॥ स्नात्वा तिलांजलिं दद्यात्पितॄ
नुद्दिश्य तत्परः ॥ अक्षया जायते तृप्तिः स्वर्गलोके महीयते ॥ २७ ॥ भोजयेद्ब्राह्मणान्सप्त श्राद्धं कृत्वा तु पायसैः ॥ अक्षयं लभते श्राद्ध
मश्वमेधफलं भवेत् ॥ २८ ॥ तीर्थं पुण्यतरं व्यास शृणु चान्यद्वदामि ते ॥ दुग्धकुंडमिति ख्यातं त्रिषु लोकेषु विश्रुतम् ॥ २९ ॥ सर्व
पापहरं पुण्यं सर्वकामवरप्रदम् ॥ पुरा दुग्धधरा देवी पृथुना धर्ममूर्तिना ॥ ३० ॥ दुग्धं सर्वं हविर्भाव्यं सर्वेषां जीवनप्रदम् ॥ दत्तं निधाय
कुंडेस्मिंस्तेन दुग्धसरः स्मृतम् ॥ ३१ ॥ कुंडे स्नात्वा पयः पीत्वा दत्त्वा गां च पयस्विनीम् ॥ सर्वबाधाविनिर्मुक्तो धनधान्यसमन्वितः ॥
॥ ३२ ॥ जायते सर्वकालेषु मृतः स्वर्गपुरं व्रजेत् ॥ ततः पुष्करमासाद्य स्नानदानादिकं चरेत् ॥ ३३ ॥ सर्वपापविशुद्धात्मा पुष्करस्य[2] फलं
लभेत् ॥ ३४॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये नीलगंगामाहात्म्यवर्णनंनाम
चतुःपंचाशत्तमोऽध्यायः ॥ ५४ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ कोऽसौ विंध्यगिरिर्ब्रह्मन्कदा काले समागतः ॥ महाकालवने
रम्ये केन वा प्रेषितः पुरा ॥ १ ॥ ॥ सनत्कुमार उवाच ॥ ॥ पुरा रेवाजलैर्व्यास प्लावितेयं वसुंधरा ॥ तदा सर्वसुरैरेवमगस्तिर्मुनिसत्त
मः ॥ २ ॥ आराधितो महाभागो धरणीत्राणकारणात् ॥ तदागत्य गिरौ रम्ये विंध्ये स मुनिसत्तमः ॥ ३ ॥ एकाग्रमानसो भूत्वा भवानीं विंध्य

१ आर्षमावन्तत्वम् । २ पुष्करस्य--पुष्करतीर्थस्य--पौण्डरीकयज्ञस्य--वा--इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वासिनीम् ॥ आराधयामास तदा तां च देवीं वरेप्सया ॥ ४ ॥ कंसविद्रावणकरीमसुराणां क्षयंकरीम् ॥ भारावतारगीं पुण्यां बलदेवानुजां शुभाम् ॥ ५ ॥ यशोदागर्भसंभूतां चाणूरबलमर्दिनीम् ॥ विद्युदाभां नभःस्थां च कृष्णां कृष्णाहिमर्दिनीम् ॥६॥ जननीं देवसेनस्य कवीनां वाचमीश्वरीम् ॥ गायत्रीं द्विजमुख्यानां व्याहृतिश्छंदसां वराम् ॥ ७ ॥ सहस्राक्षीं तथेंद्रस्यं ऋषेश्चारुंधतीं पराम् ॥ गवां कामदुघां श्यामां लतां मधुतमप्रियाम् ॥८॥ अदितिं सर्वमातॄणां पार्वतीं सर्वयोषिताम् ॥ ज्योत्स्नां चांद्रमसीं बालां सर्वकामवरप्रदाम् ॥ ९ ॥ शारदीमृतुवेलायां वृंदावनचरीं वराम् ॥ मायिनां वैष्णवीं मायां सर्वदैत्यविमोहिनीम् ॥ १० ॥ लक्ष्मीं च श्रीमतामिष्टां यक्षिणीं धनदार्चिताम् ॥ महोदधीप्सितां वेलां राज्ञां च राजसंपदम् ॥ ॥११॥ वेदिकां यज्ञशालानां हविराहवनीं शुभाम् ॥ दक्षिणां सर्वदीक्षाणां सर्वकामफलप्रदाम् ॥१२॥ एवं स्तुता तदा देवी प्रत्यक्षा विंध्यवासिनी ॥ प्राह प्रसादसुमुखी ऋषीणां प्रवरं ह्यृषिम् ॥ १३ ॥ व्रियतां भो द्विजश्रेष्ठ यदस्मत्तोऽभिवांछितम् ॥ यदीप्सिता त्वया वत्स स्तुतिर्मे शुचिना कृता ॥ ॥ १४ ॥ ॥ अगस्तिरुवाच ॥ ॥ यदि मातर्वरो देयो देवानामुपकारिणि ॥ रेवेयं वर्द्धिता लोके सर्वलोकभयप्रदा ॥१५॥ तयेदं प्लावितं विश्वं तस्यास्तु ग्रहणं कुरु ॥ इति सा प्रार्थिता तेन तदा काले महर्षिणा ॥ १६ ॥ आगात्साध्वी तदा व्यास महाकालवनं शुभम् ॥ सांत्वपूर्वं वचस्तथ्यमगस्तिमिदमब्रवीत् ॥ १७ ॥ वारयिष्ये परां देवीं वर्धमानां द्रुतं ह्यृषे ॥ तावत्कालं न चोत्तिष्ठेद्विंध्यो नाम महागिरिः ॥ १८ ॥ यावत्रिकूटे द्वारे त्वं स्थास्यसि ऋषिसत्तम ॥ देवकार्योद्यतो नित्यं दक्षिणां दिशमुत्तमाम् ॥१९॥ कुशस्थली महापुण्या पवित्रा पापहारिणी ॥ पुरी ह्येषा मुनिश्रेष्ठ त्रिषु लोकेषु विश्रुता ॥ तत्रैवाहं चिरं कालं मातृभिर्निवसामि वै ॥ २० ॥ तत्रापि त्वं सदा सिद्धक्षेत्राधिपत्यमाप्नुयाः ॥ मत्सरो निर्मलं पुण्यं विमलोदं च विश्रुतम् ॥ २१ ॥ यत्र पुण्यवतां वासो देव्यस्तिष्ठंति कोटिशः ॥ तस्मिंस्तीर्थे नराः स्नात्वा शुचीभूय समाहिताः ॥ २२ ॥ यजंति चैव मां भक्त्या धूपदीपाग्नितर्पणैः ॥ क्षीरखंडाज्यभोज्यैश्च भोजयेद्विधिवद्विजान् ॥२३॥ न तेषां दुर्लभं किंचित्त्रिषु लोकेषु विद्यते ॥ धनधान्यधरैश्वर्यपुत्रदारादिसंपदाम् ॥ २४ ॥ प्राप्यंते विविधा भोगा देवानामपि दुर्लभाः ॥ शत्रुतो न भयं तेषां दस्युभ्यो वा न राजतः ॥ २५ ॥ न शस्त्रानलतोयौघात्कदाचित्संभविष्यति ॥ दीर्घायुर्बुद्धिमाँल्लोके उषित्वा शाश्वतीः समाः ॥ २६ ॥ सर्वपापविशुद्धात्मा मृतः शिवपुरं व्रजेत् ॥ एवं व्यास पुरीं प्राप्य रम्यां चोज्जयिनीं शुभाम् ॥ २७॥ समाश्रिता तदा देवी सततं विंध्यवासिनी ॥ तस्मिंस्तीर्थे नरः स्नात्वा सर्वपापैः प्रमुच्यते ॥ २८ ॥ स्त्रियो वा रजो

१ कंसविद्रावणकरीम्—इत्यारभ्य—सर्वकामफलप्रदाम्-इत्यन्तं--देव्याः स्तोत्रम् । तत्र 'वन्दे' इति क्रियापदमध्याहृत्यान्वयपूर्तिर्बोद्धव्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





दोषार्ता वंध्याः काकबकादिकाः॥दुर्भगाः शीलहीनाश्च सर्वकामविवर्जिताः॥२९॥ विमलोदेऽपि ताः स्नात्वा दृष्ट्वा वै विंध्यवासिनीम्॥ मुच्यंते सर्वदोषैस्ता नात्र कार्या विचारणा ॥ ३० ॥ अपुत्राः प्राप्नुयुः पुत्रान्कन्या वीरपतिं वरम् ॥ प्राप्यते सर्वसौभाग्यं सर्वकामवरप्रदम् ॥ ३१ ॥ विद्यावाञ्जायते विप्रः क्षत्रियो विजयी भवेत् ॥ वैश्यश्च बहुलाभाढ्यः शूद्रः सुखमथाश्नुते ॥ ३२ ॥ कथां पुण्यवतीमेतां सर्वकामवरप्रदाम् ॥ पठन्वाप्यथवा शृण्वन्गोसहस्रफलं लभेत् ॥ ३३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये विंध्यवासिनीविमलोदतीर्थमाहात्म्यवर्णनंनाम पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ तीर्थमन्यतरं व्यास क्षातासंगमसंभवम् ॥ यत्र तु स्नानमात्रेण महापापैः प्रमुच्यते ॥ १ ॥ अमा वै शनिवारेण यदायाति समाहितः ॥ पितॄनुद्दिश्य यः कुर्याच्छ्राद्धं चैव तिलोदकम् ॥ २ ॥ पश्येच्छनैश्चरं देवं स्थावरं लिंगमुत्तमम् ॥ तस्य शानैश्चरी पीडा न भवेत्तु कदाचन ॥ ३ ॥ ॥ व्यास उवाच ॥ ॥ महातीर्थं समाख्यातं महाकालवने शुभे ॥ भूयस्तु श्रोतुमिच्छामि विस्तरेण तपोधन ॥४॥ ॥ सनत्कुमार उवाच ॥ ॥ श्रूयतां भो द्विजश्रेष्ठ कथा पौराणिकी शुभा ॥ यस्याः श्रवणमात्रेण महापापक्षयो भवेत् ॥५॥ रेवा चर्मण्वती क्षाता तिस्रो नद्यः पुराऽनघ ॥ जातास्त्रैलोक्यपावन्यो भुवि चामरकंटकात् ॥ ६ ॥ पुण्याः पुण्यजला रम्याः पवित्राः पापहारकाः ॥ पुनंत्यः सर्वलोकानां स्नानात्पानात्तथापगाः॥ ७ ॥ एकदोपवने रम्ये मांधातृक्षेत्र उत्तमे ॥ मिथो रमंति संहृष्टाः परस्परजिगीषया ॥ ८ ॥ किंचिद्दोषप्रसंगेन मिथो भेदो ह्यजायत ॥ रेवासंगं परित्यक्ता भित्त्वा विंध्यगिरिं वरम् ॥ ९ ॥ महाकालवने रम्ये समायाता सरिद्वरा ॥ यत्र शिप्रा महापुण्या पुरी ह्येषाऽमरावती ॥ १० ॥ सर्वतीर्थवरं श्रेष्ठं नाम्ना रुद्रसरः स्मृतम् ॥ भुक्तिमुक्तिप्रदंनित्यं सिद्धर्षिगणसेवितम् ॥ ११ ॥ तत्रागत्य पुरा क्षाता शिप्रासंगं समाश्रिता ॥ तत्र तीर्थं परं जातं क्षातासंगमसंज्ञितम् ॥ यत्र धूतरजा जातः सद्यः प्रोक्तो विभावसुः ॥ १२ ॥ ॥ व्यास उवाच ॥ ॥ कथं सूर्यस्त्वया प्रोक्तो विरजो ह्यभवत्पुरा ॥ एतद्वेदितुमिच्छामि त्वत्तो ब्रह्मविदांवर ॥ १३ ॥ ॥ ॥ सनत्कुमार उवाच ॥ ॥ पुरानुसूर्यां सावित्रीं त्वष्टा स्वतनयां ददौ ॥ १४ ॥ पतिधर्मरता नित्यं सिषेवे लोकचक्षुषे ॥ तस्यां वै मिथुनं जज्ञे लोकसाक्षिविभावसोः ॥ १५ ॥ यमो वैवस्वतो जातो यमुना लोकपावनी ॥ ततस्त्वष्टाऽब्रवीच्छायां स्वकीयां सूनृतां गिरम् ॥ १६ ॥ मिथुनं मे तवोत्संगे धृतं त्वं परिपालय ॥ तावदेवमिह च्छाये यावत्पितुर्गृहेचरी ॥ १७ ॥ रविभक्तिरता नित्यं चर त्वं मम वेश्मनि ॥ नो वाच्याहं



१ अल्पद्भुतम्—इ० पा० । २ 'क्षाता'—क्षातानाम्नी नदी । ३ विभावसुः—सूर्यः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कदा च्छाये पितुर्वेश्मगता रवेः ॥ १८ ॥ एवं सा समयं कृत्वा सावित्री ह्यगमत्तदा ॥ पितुर्वेश्मगता बाला सवितुर्भयविह्वला ॥ १९ ॥ पित्र
निवारिता सद्यो वडवारूपधारिणी ॥ विचचार वने रम्ये बहुलोदकशाड्वले ॥ २० ॥ एकदा याचिता तेन वैवस्वतेन बुभुक्षता ॥ नोदत्तं वै
तया दत्तं याचमानाय तत्क्षणात् ॥ २१ ॥ तदा पदा हता तेन च्छाया तं च शशाप ह ॥ यतस्त्वं मे पदाघातं कृतवान्बालभावनात् ॥
॥ २२ ॥ तस्मात्त्वं च पदा खंजो भविष्यसि न संशयः ॥ एवं शप्तो रुजाक्रांतो विललाप शुचार्दितः ॥ २३ ॥ एतस्मिन्नंतरे
व्यास परिभूय वसुंधराम् ॥ भावयन्सकलाँल्लोकान्ग्रहचारी विभावसुः ॥ २४ ॥ दृष्ट्वा च तनयं पंगुमित्युवाच विभावसुः ॥ किमिदं
वत्स ते कष्टं कुतः प्राप्तं त्वयाऽनघ ॥ २५ ॥ इति पृष्टो यदा तेन सवित्रा लोकभास्वता ॥ उवाच गद्गदां वाचं यमः संयमिनीपतिः ॥ २६ ॥
प्रातराशाय मे नाथ याचितं मातुरंतिकात् ॥ नो दत्तं भोजनं क्षिप्रं बालभावेन ताडिता ॥ २७ ॥ पादौ मे गलितौ सद्यो मातुः शापपराभवौ ॥
तच्छ्रुत्वा मोहमापन्नो रविर्ध्यानपरायणः ॥ २८ ॥ विचित्रमिदमाख्यातं मातुः शापस्य कारणम् ॥ एवं ध्यात्वा चिरं कालं ज्ञातवान्नविरंशुमान् ॥
॥ २९ ॥ नेयं सा रुचिरापांगी त्वाष्ट्री लोकस्य पावनी ॥ केयं वा कुत आयाता[1] कासि त्वं च शुचिस्मिते ॥ ३० ॥ ॥ छायोवाच ॥ ॥
नानुसूर्या महाराज छाया तस्याः स्वसंभवा ॥ गता वै सा पितुर्गेहे वारिताहं तयाऽनघ ॥ ३१ ॥ सवित्रे नैव वक्तव्यं छाये किंचित्कथंचन ॥
एष मे समयो नाथ तेनाहं मौनमास्थिता ॥ ३२ ॥ तच्छ्रुत्वा भगवांस्त्वष्टुः समीपं रोषमास्थितः ॥ जगाम सहसा भानुर्बहुरोषसमन्वितः ॥
॥ ३३ ॥ तं दृष्ट्वा सहसोत्थाय त्वष्टा लोकपितामहः ॥ पाद्यार्घ्याचमनीयं च मधुपर्कैरपूजयत् ॥ ३४ ॥ नत्वा पादौ परिक्रम्य बहुमानपुरः
सरम् ॥ उवाच मधुरया वाचा प्रियं ते करवाम किम् ॥ ३५ ॥ ॥ रविरुवाच ॥ ॥ क्व सानुसूर्या सावित्री ममानुप्रियकारिणी ॥ आगता ते गृहं
तात मम मार्गानुमोदिनी ॥ ३६ ॥ ॥ त्वष्टोवाच ॥ ॥ न जानीमो वयं तात प्रिया मे क्व गता सुता ॥ इत्युक्ते वचने त्वष्ट्रा रविर्दुश्चिंतमानसः
॥ ३७ ॥ किं करोमि क्व गच्छामि क्व च प्रियतरा मम ॥ इति संभाषमाणे तु त्वष्टा वाक्यमथाब्रवीत् ॥ ३८ ॥ तव तेजःपरिभ्रष्टा भग्ना
क्वापि गताबला ॥ यदि ते वल्लभा भार्या तेजस्त्वं परिशामय ॥ ३९ ॥ ॥ सूर्य उवाच ॥ ॥ यद्येवं दुस्सहं तेजो मम पूर्वपितामह ॥ तदा ते
रोचते सम्यग्यथा स्याद्वै तथा कुरु ॥ ४० ॥ इति सूर्यवचः श्रुत्वा शाणं[3] कृत्वा सुदर्शनम् ॥ घृष्टितः क्षुरधारेण लघीयान्निर्मलोऽभवत् ॥ ४१ ॥

१ अत्र–एवं मनसि विचार्य–तां पप्रच्छ–इत्यध्याहृत्य–पूर्वापरसंगतिवार्थ्यौ । २ का त्वं वद शुचिस्मिते–इ० पा० । ३ श्रोणम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तस्य घृष्टितमात्रेण त्वष्टा चक्रे विवस्वतः ॥ शार्णं सुदर्शनं चक्रं सैकता मणिजातयः ॥ ४२ ॥ तदा त्वष्टाऽब्रवीद्वाक्यं मधुरं सूर्यसंनिधौ ॥ महाकाल
वने रम्ये वडवारूपधारिणी ॥ ४३ ॥ गृह्यतां भोः सुरश्रेष्ठ शीघ्रं गच्छतु शाङ्वले ॥ यत्र शिप्रा सरिच्छ्रेष्ठा यत्र क्षाता समागता ॥ ४४ ॥ उभयोः
संगमो यत्र तत्र मुक्तिर्न संशयः ॥ तत्र तां सुभगां पत्नीं प्राप्स्यसि त्वं न संशयः ॥ ४५ ॥ इति तस्य वचः श्रुत्वा सविता सर्वतापनः ॥ तत्रा
गमद्वनं यत्र महाकालस्य पावनम् ॥ ४६ ॥ क्षातासंगमसंयुक्ता यत्र शिप्रा पयस्विनी ॥ तत्र भुक्तिश्च मुक्तिश्च धनधान्यसमागमः ॥ ४७ ॥
तत्रागत्य प्रियां भार्यां वडवारूपधारिणीम् ॥ ददर्श तां पुनः श्यामां हरिरूपधरो हरिः ॥ ४८ ॥ नासिकाघ्राणमात्रेण यत्र जातौ सुतावुभौ ॥ दर्श
नीयौ सुनृम्णांगौ भिषजौ तौ दिवौकसाम् ॥ ४९ ॥ छाया च सुषुवे तत्र मिथुनं द्विजसत्तम ॥ तापीं शनैश्चरं चैव सर्वलोकप्रतापनम् ॥५०॥ शनि
योगे यदामा वै जायते सर्वकामदा ॥ तदा स्नानं च दानं च श्राद्धं चैव तु कारयेत् ॥ ५१ ॥ तस्य हस्तगता लक्ष्मीर्जायते सर्वदा भुवि ॥ क्षाता
संगमे नरः स्नात्वा दानं दत्त्वा च शक्तितः ॥ ५२ ॥ स्थावरेशं समभ्यर्च्य तस्य पापक्षयो भवेत् ॥ सौरिः शनैश्चरो मंदः कृष्णोऽनंतोऽतको
यमः ॥ ५३ ॥ पिंगश्छायासुतो बभ्रुः स्थावरः पिप्पलायनः ॥ एतानि शनिनामानि प्रातःकाले पठेन्नरः ॥ ५४ ॥ तस्य शानैश्चरी पीडा न भवेत्तु
कदाचन ॥ यमधर्मोऽपि चात्रैव तपस्तेपे सुदुस्तरम् ॥ ५५ ॥ यज्ञकुण्डोत्तरे भागे यत्र तिष्ठति मारुतिः ॥ धर्मसरेति विख्यातं नाम्ना
तत्तीर्थमुत्तमम् ॥ ५६ ॥ यत्र सिद्धिं परां प्राप्तस्तपसा पवनात्मजः ॥ तस्मिंस्तीर्थे नरः स्नात्वा दत्त्वा वै कांस्यभाजनम् ॥ ५७ ॥ सवासोमणिमु
क्ताभिः कांचनालंकृतं वरम् ॥ ब्राह्मणेभ्यः स्वलंकृत्य वेदविद्भ्यश्च सादरम् ॥ ५८ ॥ मातृलोकं समुत्तीर्णो ब्रह्मलोके महीयते ॥ श्रावणे मास्युभे
पक्षे एकादश्यां तु यो नरः ॥ ५९ ॥ धर्मतीर्थे सदाचारी स्नानदानादिकाः क्रियाः ॥ करोति सततं तस्य विष्णुलोकः सनातनः ॥ ६० ॥ च्यव
नाश्रमे नरः स्नात्वा च्यवनेश्वरं विलोकयेत् ॥ यत्र सिद्धिंगतौ पुण्यावश्विनौ भिषजां वरौ ॥ ६१ ॥ च्यवनस्य प्रसादेन देवपंक्तिमवापतुः ॥ च्यव
नेन पुरा दृष्टिः प्राप्ता वै देवभेषजात् ॥ ६२ ॥ तस्मिंस्तीर्थे द्विजश्रेष्ठ दिव्यदृष्टिर्भवेन्नरः ॥ अत्रैव प्राप्तवान्सूर्यः साग्निहोत्राश्रमं परम् ॥ ६३ ॥ अनु
सूर्यां महाभागां सावित्रीं लोकविश्रुताम् ॥ सूर्यलोकं समासाद्य बुभुजे विपुलां श्रियम् ॥ ६४ ॥ तस्माद्व्यास परं तीर्थं क्षातासंगमसंज्ञितम् ॥
सर्वपापहरं पुण्यं सर्वकामवरप्रदम् ॥ ६५ ॥ य एतां तु कथां पुण्यां शृणोति भुवि भक्तितः ॥ पठेद्वा प्रातरुत्थाय तस्य पुण्यफलं शृणु ॥ ६६ ॥

१ श्रोणम्--इत्येव पा० । २ जाताऽश्विनावुभौ--इ० पा० । ३ उभे पक्षे--उभयोः पक्षयोः--जात्येकवचनम् ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कपिलागोसहस्रेण फलं भवति पर्वणि ॥ तत्फलं समवाप्नोति नात्र कार्या विचारणा ॥ ६७ ॥ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसा
हस्र्यां संहितायां पंचम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये क्षातासंगममाहात्म्यवर्णनंनाम षट्पंचाशत्तमोऽध्यायः ॥ ५६ ॥ ॥ छ ॥ ॥ सन
त्कुमार उवाच ॥ ॥ शृणु व्यास प्रवक्ष्यामि तीर्थमेकमतः परम् ॥ तीर्थानामुत्तमं तीर्थं गयानामेति नामतः ॥ १ ॥ तत्र[1] स्नात्वा नरो नित्यं
मुच्यते च ऋणत्रयात् ॥ देवान्पितॄन्समभ्यर्च्य विष्णुलोकं स गच्छति ॥ २ ॥ ॥ व्यास उवाच ॥ ॥ कीकटेषु गया पुण्या नदी पुण्या पुनः
पुना ॥ च्यवनस्याश्रमः पुण्यः पुण्यो राजगिरिस्तथा ॥ ३ ॥ स कथं विदितो देशे महाकालवने शुभे ॥ एतद्वेदितुमिच्छामि विस्तरेण तपोधन ॥
॥ ४ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु व्यास कथां पुण्यां पवित्रां पापहारिणीम् ॥ यस्याः श्रवणमात्रेण पितरो यांति सद्गतिम् ॥ ५ ॥
पुरा कृतयुगे पुण्ये युगादिदेवनामतः ॥ राजासीत्स तु धर्मात्मा पुण्यश्रवणकीर्तनः ॥ ६ ॥ तस्य पालयतः सम्यक्प्रजाः पुत्रानिवौरसान् ॥ बभूवुः
सर्वसंपन्ना वर्धमानाः समंततः ॥ ७ ॥ धर्मश्चतुष्पदो नित्यं यस्मिन्राज्ञि प्रशासति ॥ कालवर्षी च पर्जन्य ऋतवः स्वांगचारिणः ॥ ८ ॥ बहुस
स्यफला पृथ्वी गावश्च बहुदुग्धदाः ॥ वेदवादरता विप्राः क्षत्रिया बाहुशालिनः ॥ ९ ॥ वैश्या धनपरा नित्यं शूद्राः शुश्रूषणे रताः ॥ वर्णाश्रमरताः
सर्वे सर्वे धर्मोपदेशकाः ॥ १० ॥ श्रुतिस्मृतिपरो धर्मो हृष्टपुष्टजनाकरः ॥ नाधिव्याध्यभिभूतश्च लक्ष्यते कोऽपि मानवः ॥ ११ ॥ दुःशीला
दुर्भगा नारी विधवा नैव लक्ष्यते ॥ बहुपुत्राऽल्पपुत्रा च मृतपुत्रा न वंध्यका ॥१२॥ रूपशीलगुणोपेता पतिव्रतपरायणा ॥ नो मार्गः कंटसंकीर्णो
दस्युदोषैश्च दूषितः ॥ १३ ॥ हूयतां भुज्यतां शश्वद्दीयतां च गृहेगृहे ॥ दयादानतपोहोमजपयज्ञक्रियापराः ॥ १४ ॥ जनाः सर्वत्र दृश्यंते सर्वधर्म
परायणाः ॥ चतुष्पादचरो धर्मो ह्यधर्मोऽपादविग्रहः ॥ १५ ॥ एवं राजा स धर्मात्मा युगादिदेवसंज्ञितः ॥ येनेयं पालिता पृथ्वी धर्मेण वर्धिताः
प्रजाः ॥ १६ ॥ अवंत्यां च पुरा[3] व्यास यज्ञकोटिं समाचरत् ॥ तस्मिन्कालेतिविक्रांतस्तुहुंडोनाम दानवः ॥ १७ ॥ तेन सर्वं वशं नीतं चरा
चरमिदं जगत् ॥ घोरं तप्त्वा तपः पुण्यं ब्रह्मलब्धवरः खलः ॥ १८ ॥ नैव देवा न यज्ञाश्च वेदमार्गविवर्जिताः ॥ देवतापूजनं नास्ति स्वधा
स्वाहा न दृश्यते ॥ १९ ॥ उत्सन्नो धर्ममार्गोऽयं शाश्वतो वै दुरात्मना ॥ नष्टप्रायाः सुरास्तेन कृताः सर्वे द्विजोत्तमाः ॥२०॥ ब्रह्माणं शरणं जग्मुः
पितृभिः सह साधुभिः ॥ किं कुर्मो वा क गच्छाम तुहुंडेन पराजिताः ॥ २१ ॥ इति श्रुत्वा वचस्तेषां ब्रह्मा लोकपितामहः ॥ समुत्थाय ततः

१ यत्र-इ०पा० । २ तीर्थानामुत्तमं तीर्थं पुण्यो राजगिरिस्तथा--इ०पा० । ३ तदा--इ०पा० । ४ दुरासदः--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

सर्वैर्विष्णुलोकं जगाम ह ॥ २२ ॥ तत्र गत्वा समाराध्य विष्णुं देवगणैः सह ॥ स्तुतिं पुरुषसूक्तेन विष्णोरतुलतेजसः ॥ २३ ॥ प्रचक्रुः सर्व एवैते ह्यात्मनोभ्युदयाय च ॥ तदा तेषां शमिच्छन्ती वाग्उवाचाशरीरिणी ॥ २४ ॥ श्रूयतां भोः सुरश्रेष्ठा भवतां श्रेय उत्तमम् ॥ यूयं यात क्षि[१] क्षिप्रं महाकालवनं प्रति ॥ २५ ॥ गुह्याद्गुह्यतरं पुण्यं पवित्रं पापनाशनम् ॥ नो यत्र मायिनां माया प्रकाशयति भूतले ॥ २६ ॥ सर्वतीर्थमयं तीर्थं कोटितीर्थवरप्रदम् ॥ यत्र शिप्रा सरिच्छ्रेष्ठा सर्वकामफलप्रदा ॥ २७ ॥ दैत्यांतकारिणी दिव्या महाकाली कुलेश्वरी ॥ कोटिकोटिगणाकीर्णा मातॄणां शक्तिवर्धिनी ॥ २८ ॥ यत्र गया महापुण्या फल्गुश्चैव महानदी ॥ पुरुषोत्तमगिरिश्रेष्ठो यत्र बुद्धगया स्मृता ॥ २९ ॥ तथैवाद्यगया ख्याता त्रिषु लोकेषु विश्रुता ॥ विष्णोः षोडशपदीतीर्थं गदाधरविनिर्मितम् ॥ ३० ॥ सर्वपापहरा पुण्या यत्र प्राची सरस्वती ॥ महासुरनदी प्रोक्ता यत्र तिष्ठति पुण्यदा ॥ ३१ ॥ न्यग्रोधश्चाक्षयो नित्यः पुरा प्रोक्तो महर्षिणा ॥ तत्रैव सा शिला प्रोक्ता प्रेतमोक्षकरी शुभा ॥ ३२ ॥ तत्रैव संति ताः सर्वा देवताः पितृकल्पजाः ॥ सर्वाक्षरमयोंकारः सर्वदेवमयो हरिः ॥ ३३ ॥ सर्वतीर्थमया देवा गयातीर्थमनुत्तमम् ॥ शीघ्रं गच्छत तत्रैव परां सिद्धिमवाप्स्यथ ॥ ३४ ॥ यत्र प्रविष्टमात्रेण पितरो निरयस्थिताः ॥ ते सर्वे स्वर्गमायांति ब्रह्मभूयाय कल्पते ॥ ३५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये गयातीर्थमाहात्म्ये गयातीर्थप्रशंसावर्णनं नाम सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ विचित्रमिदमाख्यातं गयामाहात्म्यमुत्तमम् ॥ भगवन्भवता सर्वं विदितं विश्वमूर्तिना ॥ १ ॥ तत्सर्वं श्रोतुमिच्छामि श्राद्धस्य फलमुत्तमम् ॥ क्षेत्रस्य च द्विजश्रेष्ठ विस्तरेण तपोधन ॥ २ ॥ कियंतः पितरो नित्यं तृप्ता यांति सुरालयम् ॥ केषां के पितरः प्रोक्ताः किमुद्देश्याः पुराऽनघ ॥ ३ ॥ ॥ सनत्कुमार उवाच ॥ ॥ धन्योऽसि कृतकृत्योऽसि यस्य ते नैष्ठिकी मतिः ॥ तथापि शृणु वै वत्स श्राद्धस्य विधिमुत्तमम् ॥ ४ ॥ श्राद्धे प्रकल्पिता लोकाः श्राद्धे धर्मः प्रतिष्ठितः ॥ श्राद्धे यज्ञा हि तिष्ठंति सर्वकर्मफलप्रदाः ॥ ५ ॥ श्रद्धया दीयते किंचिद्दैवं ब्रह्माग्नितर्पणम् ॥ श्राद्धं तु तद्विजानीयात्पुरा प्रोक्तं महर्षिणा ॥ ६ ॥ मनुष्या ऋषयः सर्वे सुरसिद्धाश्च राक्षसाः ॥ गंधर्वाः किन्नरा नागा ब्रह्मेशानसुरेश्वराः ॥ ७ ॥ त्रीन्पितॄंश्च समुद्दिश्य श्राद्धं दद्युः समाहिताः ॥ प्राप्नुवन्त्यखिलान्कामान्सर्वान्व्यास मनोगतान् ॥ ८ ॥ एवं परंपरामार्गं प्रवर्तंते सनातनम् ॥ तथापि पितरो ह्येते समाख्यात 

१ यूयं च गच्छत क्षिप्रम्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमा भुवि ॥ ९ ॥ तत्सर्वं संप्रवक्ष्यामि यथा श्रुतं तथा शृणु ॥ त एते पितरो देवा देवाश्च पितरस्तथा ॥ १० ॥ अन्योन्यं पितरो ह्येते देवाः
पितृगणैः सह ॥ मार्कंडेन पुरा पृष्टं प्रश्नमेतद्द्विजोत्तम ॥ ११ ॥ निबोध त्वं मतं सर्वं यदुक्तं तत्समाहितः ॥ यावंतस्ते पितृगणास्तस्मिँल्लोके च ये
गताः ॥ १२ ॥ ॥ सनत्कुमार उवाच ॥ ॥ सप्तैते यजतां श्रेष्ठाः सर्वे पितृगणाः स्मृताः ॥ चत्वारो मूर्तिमंतो वै त्रयस्तेषां च मूर्तयः ॥
॥ १३ ॥ तेषां लोकं विसर्गं च कीर्तयिष्यामि तच्छृणु ॥ प्रभावं त्वं महत्त्वं च विस्तरेण तपोधन ॥ १४ ॥ धर्ममूर्तिधरास्तेषां तपो ये परमं
गताः ॥ तेषां नामानि लोकांश्च कीर्तयिष्यामि तच्छृणु ॥ १५ ॥ लोकाः सनातना नाम यत्र तिष्ठंति भास्वराः ॥ अमूर्तयः पितृगणास्ते वै पुत्राः
प्रजापतेः ॥ १६ ॥ विराजस्य द्विजश्रेष्ठ वैराजा इति नः श्रुतम् ॥ यजन्ते तान्देवगणा विधिदृष्टेन कर्मणा ॥ १७ ॥ एते वै योगविभ्रष्टा लोका
न्प्राप्य सनातनान् ॥ पुनर्युगसहस्रांते जायंते ब्रह्मवादिनः ॥ १८ ॥ ते प्राप्य तां स्मृतिं भूयः सांख्ययोगमनुत्तमम् ॥ यांति योगगतिं सिद्धाः
पुनरावृत्तिदुर्लभाम् ॥ १९ ॥ एते स्युः पितरस्तात योगिनां योगवर्धनाः ॥ आप्याययन्ति ये पूर्वं सोमं योगबलेन वै ॥ २० ॥ तस्माच्छ्राद्धानि
देयानि योगिनां द्विजसत्तम ॥ एष वै प्रथमः कल्पः सोमपानामनुत्तमः ॥ २१ ॥ एतेषां मानसी कन्या मेनानाम महागिरेः ॥ पत्नी हिमवतः
श्रेष्ठा यस्यां मैनाक उच्यते ॥ २२ ॥ मैनाकस्य सुतः श्रीमान्क्रौंचोनाम महागिरिः ॥ अग्निष्वात्ताः पितृगणास्तत्र तिष्ठंति भास्वराः ॥ २३ ॥
याम्यां बर्हिषदश्चासन्यमाश्च पश्चिमां दिशम् ॥ सोमपाश्चोत्तरां प्राप्ता दिशं धनदपालिताम् ॥ २४ ॥ अमूर्तिमंतावाकाशे कव्यवाडनलौ क्षितौ ॥
॥ २५ ॥ यक्षरक्षःपिशाचाश्च यजंते भावितात्मनः ॥ साध्या देवान्यजन्ति स्म विश्वेदेवा ऋषींस्तथा ॥ २६ ॥ मानवाः श्राद्धदेवं च ऋषयो ब्रह्म
सनातनम् ॥ एवं परंपराप्राप्तः श्राद्धधर्मः सनातनः ॥ २७ ॥ देवकार्यात्परं कार्यं पितृकार्यं विशिष्यते ॥ भरद्वाजात्मजाः सप्त श्राद्धधर्मपराय
णाः ॥ २८ ॥ जातिस्मरत्वमापन्ना निर्वाणपदवीं गताः॥ गुरोश्च दोग्ध्रीं गां हत्वा सप्तैते वै द्विजाधमाः ॥ २९ ॥ पितॄनुद्दिश्य ते सर्वे भक्षयंतः क्षुधा
र्दिताः ॥ तेन पुण्यप्रभावेन योगभ्रष्टा दिवंगताः ॥ ३० ॥ सप्त जातिस्मरास्ते वै योगयुक्ता बभूविरे[1] ॥ तस्माच्छ्राद्धं परं प्रोक्तं सूरिभिः परमात्मभिः[2]
॥ ३१ ॥ श्राद्धे प्रतिष्ठिता लोकाः श्राद्धे योगः परंतप ॥ एवं ते पितरः प्रोक्ताः श्राद्धस्य च विधिं शृणु ॥ ३२ ॥ ब्रह्मचर्यरतो दांतो न क्रोधी न च
मत्सरी ॥ शौचाचारपरो धीरः शास्त्रदृष्टिर्जितेंद्रियः ॥ ३३ ॥ एवं यः कुरुते श्राद्धं तीर्थे चैव विशेषतः ॥ ततोऽधिकतरा प्रोक्ता तृप्तिर्व्यास क्षयेऽ

१ आर्षमात्मनेपदम् । २ परमात्मभिः—शुद्धचित्तैः—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





हनि ॥ ३४ ॥ वृद्धिश्राद्धे तथा प्रोक्ता महालये शताधिका ॥ ततो दशगुणा प्रोक्ता प्रयागे द्विजसत्तम ॥ ३५ ॥ प्रयागाद्दशगुणा तृप्तिः कुरुक्षेत्रे च सत्तम ॥ कुरुक्षेत्रात्ततो व्यास दशाधिका गया स्मृता ॥ ३६ ॥ ततो दशाधिका व्यास महाकालवने शुभे ॥ अवंत्यां सर्वतः पुण्यं गयातीर्थे च सर्वदा ॥ ३७ ॥ येषां निरयमापन्नाः पितरो जन्मजन्मनि ॥ तेषामुद्धरणार्थाय तीर्थमेतत्सुदुर्लभम् ॥३८॥ सकृत्स्मरणमात्रेण पितॄणां दत्तमक्षयम् ॥ ये नरा रणमध्यस्थाः पितृवंशविवर्जिताः ॥ ३९ ॥ गर्भपाते मृता ये च नामगोत्रच्युतास्तथा ॥ स्वगोत्रे परगोत्रे वा आत्मघातमृताः परे ॥ ४० ॥ तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयताम् ॥ उद्बंधनमृता ये च विषशस्त्रैर्मृताश्च ये ॥ ४१ ॥ दंष्ट्रिभिर्व्यंगतो वापि दौर्ब्राह्मण्ये मृताश्च ये ॥ तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते ॥ ४२ ॥ अग्निदग्धाश्च ये जीवा नाग्निदग्धास्तथा परे ॥ ४३ ॥ विद्युद्घातेन ये केचिन्मुद्गराभिहताः परे ॥ तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते ॥ ४४ ॥ रौरवे चांधतामिस्रे कालसूत्रे च ये गताः ॥ अनेकयातनासंस्थाः प्रेतलोके च ये गताः ॥ ४५ ॥ असिपत्रवने घोरे कुंभीपाके च ये गताः ॥ पशुयोनिगता ये च पक्षिकीटसरीसृपाः ॥ तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते ॥ ४६ ॥ उदकेषु मृता ये च नारीसूतीमृतास्तथा ॥ ४७ ॥ अश्वसूकरकृमिदंष्ट्रिश्वशृंगिशकटाहताः ॥ तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते ॥ ४८ ॥ अष्टशल्यैर्भग्नदंष्ट्राश्च शस्त्रास्त्रैर्व्याघ्राहिगजभूमिपैः ॥ शलभैर्वृश्चिकैर्दंष्ट्रिचोरैर्ये चापि घातिताः ॥ तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते ॥ ४९ ॥ अष्टशल्यैर्मृता ये च शौचाचारविवर्जिताः ॥ विषूचिकामृता ये च ये चातीसारतो मृताः ॥ तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते ॥ ५० ॥ शाकिन्यादिग्रहग्रस्तजलमध्ये च ये मृताः ॥ अस्पृश्यस्पर्शसंस्पृष्टाः पापा अपत्यवर्जिताः ॥ तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते ॥ ५१ ॥ जन्मांतरसहस्राणि भ्रमंति स्वेन कर्मणा ॥ मानुषं दुर्लभं येषां तेभ्यः श्राद्धं विधीयताम् ॥५२॥ येऽन्यजन्मन्यबांधवा येऽन्यजन्मनि बांधवाः॥ येऽन्यजन्मनि संबद्धा मित्रामित्रे तथा परे ॥ तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते ॥ ५३ ॥ पितृवंशे मृता ये च मातृवंशे तथैव च ॥ गुरुश्वशुरबंधूनां ये चान्ये बांधवा मृताः ॥ तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते ॥ ५४ ॥ ये मे कुले लुप्तपिंडाः पुत्रदारादिवर्जिताः ॥ क्रियालोपगता ये च तेभ्यः श्राद्धं विधीयते ॥ ५५ ॥ पंगुकुब्जा विरूपाश्च आमगर्भाश्च ये मृताः॥ ज्ञाताऽज्ञाताः कुले ये च तेभ्यः श्राद्धं विधीयते ॥ ५६ ॥ आब्रह्मभुवनाद्ये च अन्यैर्दुर्मरणैर्मृताः॥तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते ॥५७॥ तृषार्ताः क्षुधिताश्चैव हापिताश्चैव ये मृताः॥ प्रेतयोनिं गताश्चैव म्लेच्छयोनिं गताश्च ये ॥ तेषा

१ अत्र च्छंदोवैकल्यमार्षत्वान्न दोषाय ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुद्धरणार्थाय अत्र श्राद्धं विधीयते ॥ ५८ ॥ एवं श्राद्धविधिं व्यास तस्मिंस्तीर्थे समाचरेत् ॥ ऋणत्रयविनिर्मुक्तो वांछितार्थं लभेत सः ॥ गयायां
च समासाद्य सुरा इंद्रपुरोगमाः ॥ चक्रुश्च विधिवत्सर्वे यदुक्तं देवभाषया ॥ ५९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम
आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये गयामाहात्म्ये श्राद्धविधिवर्णनंनामाष्टापञ्चाशत्तमोऽध्यायः ॥ ५८ ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥
ततः सुरगणाः सर्वे धूतपापाः समाहिताः ॥ पुनर्योगबलं प्राप्य स्वाधिकारं ययुः पुरा ॥ १ ॥ एवं व्यास गयातीर्थं कुमुद्वत्यां सुनिश्चित
म् ॥ गयायां यानि तीर्थानि पुण्यान्यायतनानि च ॥ २ ॥ तत्तीर्थेषु नरः स्नात्वा तत्तत्तीर्थफलं भवेत् ॥ तथैव च गयाक्षेत्रं गयाश्राद्ध
फलप्रदम् ॥ ३ ॥ फल्गुश्च सरितां श्रेष्ठा तथैव फलदायिनी ॥ आदिगया बुद्धगया तथा विष्णुपदी स्मृता ॥ ४ ॥ गयाकोष्ठस्तथा प्रोक्तो गदाध
रपदानि च ॥ वेदिका षोडशी प्रोक्ता तथैव चाक्षयो वटः ॥ ५ ॥ प्रेतमुक्तिकरी नित्यं शिला चोक्ता तथैव च ॥ अच्छोदा निम्नगा प्रोक्ता पितृणां
चाश्रमोत्तमः ॥ ६ ॥ देवानां दानवानां च यक्षकिन्नररक्षसाम् ॥ पन्नगानां च सर्वेषां तथैवाश्रम उत्तमः ॥७॥ एतत्स्थानेषु सर्वेषु स्नानदानादिकाः
क्रियाः ॥ श्राद्धं च विधिवद्देयं तत्तत्तीर्थफलं लभेत् ॥८॥ गयायां पितृरूपेण स्वयमेव जनार्दनः ॥ तं ध्यात्वा पुंडरीकाक्षं मुच्यते च ऋणत्रयात् ॥
॥ ९ ॥ एवं व्यास गयातीर्थं पुरावन्त्यां प्रतिष्ठितम् ॥ पश्चात्तु कैकटे जातं यत्र संनिहितोऽसुरः[१] ॥ १० ॥ तदारभ्य द्विजश्रेष्ठ गया तत्र प्रतिष्ठिता ॥
गदाधरपदाघातैर्महासुरो निपातितः ॥ ११ ॥ तत्पदे च महिमानं जनार्दनसमर्पितम् ॥ १२ ॥ पंचक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः ॥ यत्र तत्र
करिष्यामि पितृणां दत्तमक्षयम् ॥ सर्वदा सर्वकालेषु गयाश्राद्धं विधीयते ॥ १३ ॥ संवत्सरे परं व्यास दिनमेकं प्रतिष्ठितम् ॥ कन्यास्थे च दिवा
नाथे हस्तनक्षत्रसंयुते ॥ महालयेति तत्प्रोक्तं पितणां दत्तमक्षयम् ॥१४॥ सर्वदा सर्वकालेषु गयाश्राद्धं विधीयते ॥१५॥ संवत्सरे परं व्यास दिनमेकं
प्रतिष्ठितम् ॥ अन्वष्टकायां कुर्वंति मातृणां श्राद्धमुत्तमम् ॥ १६ ॥ अक्षय्या जायते तृप्तिः पितृणां कल्पसंख्यया ॥ एवं व्यास पुरी रम्या स्नानदा
नादिकर्मसु ॥ १७ ॥ भूयस्तु संप्रवक्ष्यामि माहात्म्यं परमाद्भुतम् ॥ तच्छृणुष्व मयाख्यातं पवित्रं पापनाशनम् ॥ १८ ॥ सप्तर्षीणां च या
भार्या ऋषिपत्न्यः पतिव्रताः ॥ स्वाहादोषपरिभ्रष्टा दूषिताः पावकेन च ॥ १९ ॥ ऋषिभिश्च परित्यक्ता बभ्रमुश्च वनाद्वनम् ॥ एवं बहुतिथे काले
नारदो देवदर्शनः ॥ २० ॥ तासां च प्रियमन्विच्छन्समायातो वनांतरे ॥ ताभिश्च सत्कृतो नित्यं समासीनो धृतव्रतः ॥ २१ ॥ उवाच श्लक्ष्णया

१ असुरः—गयासुरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





वाचा देशकालोचितं वचः ॥ किमिदं विकृतं जातं भवतीनां पराभवः ॥ २२ ॥ कस्माच्च ऋषिभिस्त्यक्ता लोकमातरः पतिव्रताः ॥ २३ ॥
॥ ॥ ऋषिपत्न्य ऊचुः ॥ ॥ न जानीमो वयं तात येन दोषेण तापसैः ॥ विमुक्ताः साग्निकैः क्षिप्रं कार्तिकेयप्रसंगतः ॥ २४ ॥ लोकापवा
दजं किंचिज्जातं दिष्टवशादघम् ॥ किं कुर्मो वा क्व गच्छामः किं तपः का च देवता ॥ २५ ॥ यस्याराधनपुण्येन पतिसांनिध्यमाप्नुयुः ॥ एतन्नि
श्चित्य भो ब्रह्मन्ब्रूहि त्वं वेद तत्त्वतः ॥२६॥ इति पृष्टस्तदा ताभिर्ऋषिपत्नीभिर्नारदः ॥ उवाच सुचिरं ध्यात्वा तासां स शर्महेतवे ॥२७॥ ॥ नारद
उवाच ॥ ॥ श्रूयतां भोस्तपःश्रेष्ठा भवतीनां च कारणम् ॥ महाकालवने रम्ये गयातीर्थमनुत्तमम् ॥ २८ ॥ तत्रैव चाक्षयो नाम न्यग्रोधः शाखिनां
वरः ॥ तत्रागमनमात्रेण धूतदोषा भविष्यथ ॥ २९ ॥ सर्वदोषहरं तीर्थं सर्वकामवरप्रदम् ॥ सर्वसौख्यकरं पुण्यं तत्र गच्छत मा
चिरम् ॥ ३० ॥ नारदस्य वचः श्रुत्वा ऋषिपत्न्यः सुचोदिताः ॥ महाकालवने व्यास इच्छंत्यः प्रियमात्मनः ॥ ३१ ॥ आंजग्मु
स्तद्वनं तत्र यत्र तीर्थं गयाभिधम् ॥ तत्र गत्वा शुचीभूय स्नानदानादिकाः क्रियाः ॥ ३२ ॥ कृतास्ताभिश्च पुण्याभिर्नभस्यस्यासिते
तरे ॥ पंञ्चम्यामृषिसंज्ञायां ताभिः सुचरितं व्रतम् ॥ ३३ ॥ उपोष्य चैकरात्रं तु जागरं चैव योगतः ॥ कृतमात्रे व्रते व्यास धूतपापा बभुः क्षणात् ॥
॥ ३४ ॥ भर्तृकोपपरिभ्रष्टाः सद्यः प्राप्ता गृहाश्रमम् ॥ ऋषिभिः साग्निकं दत्तं पूर्ववद्द्विजसत्तम॥३५॥ तदाप्रभृति लोकेस्मिन्पंचमी ऋषिसंज्ञिता ॥
ये नराश्चाथ नार्यो यास्तां कुर्वन्ति तु भक्तितः ॥३६॥ नीवाराहारकं कृत्वा शुचीभूय समाहिताः ॥३७॥ न तेषां जायते किंचिदापद्दुःखं कदाचन ॥
दुर्भगत्वं च नारीणां न वियोगश्च मातृभिः ॥ ३८ ॥ पुत्रतो धनतो वापि कदाचित्संभविष्यति ॥ एवं व्यास समाख्यातं यत्त्वया परिपृ
च्छितम् ॥ ३९ ॥ अवंत्यामीदृशं तीर्थं वर्तते भुवि सत्तम ॥ तादृशं पुण्यदं किंचिन्नास्ति ब्रह्मांडगोलके ॥ ४० ॥ अस्मिंस्तीर्थे नरः कश्चिन्महा
दानानि चेच्चरेत् ॥ अक्षयाणि भवंत्यस्य विष्णुलोके महीयते ॥ ४१ ॥ यो वै नियमवान्भूत्वा कथामेतां शृणोति वा ॥ पठेच्च सततं व्यास हय
मेधफलं लभेत् ॥ ४२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये गयातीर्थमाहात्म्य
वर्णनंनामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ पुरुषोत्तमं परं तीर्थं त्वया प्रोक्तं पुरानघ ॥ माहात्म्यं तस्य
तीर्थस्य विस्तराद्वद मे प्रभो ॥ ःएतत्तु श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ॥ १ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणुष्व भो द्विजश्रेष्ठ कथां



१ आजग्मुस्तास्तदा तत्र--इ० पा० । २ नभस्यस्य--भाद्रपदस्य--असितेतरे--शुक्लपक्षे--इत्यर्थः । ३ गयायामृषिपत्नीभिः पञ्चम्यां सुव्रतं कृतम्--इ०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पापहरां पराम् ॥ २ ॥ यस्याः श्रवणमात्रेण महापापक्षयो भवेत् ॥ पुराकल्पेषु वै ब्रह्मन्वैकुण्ठे विमले शुभे ॥ ३ ॥ समासीनो रमानाथः पार्षदैः
सनकादिभिः ॥ महर्षिभिः सदाचारैः पितामहपुरोगमैः ॥ ४ ॥ ऋद्धिसिद्धिगुणोपेतैस्तत्त्वैस्तैर्महदादिभिः ॥ गणगंधर्वसंघैश्च सेव्यमानः समं
ततः ॥ ५ ॥ किन्नरोद्गानसन्मानैर्नृत्यद्भिरप्सरोगणैः ॥ चिंतामणिगृहोद्गारललितांगणभूमिषु ॥ ६ ॥ कल्पद्रुमकृतच्छाय आसीनो हि मुरुद्विषः ॥
धर्मवादरताः सर्वे ब्रह्ममार्गसुनिश्चिताः ॥७॥ तेषां मध्ये परा[1] भाषा ह्यपृच्छत्कमलापतिम् ॥ ८ ॥ ॥ लक्ष्मीरुवाच ॥ ॥ पुण्यकानां विधिं नाथ
श्रोतुमिच्छामि तत्त्वतः ॥ सर्वज्ञोसि महाप्राज्ञ वाच्यतां यदि रोचते ॥ ९ ॥ ॥ श्रीभगवानुवाच ॥ ॥ दानं स्नानं तपः । श्राद्धं सदा[3] शस्तं हि
शोभने ॥ तथापि विधिना प्राप्तं तत्सर्वं चाक्षयं भवेत् ॥ १० ॥ देशे काले पर्वणि च तीर्थे चायतने पदे ॥ दानं स्नानं तपः श्राद्धं मुनिभिः
परिकीर्तितम् ॥ ११ ॥ पूर्णमास्याममावास्यां संक्रांतौ ग्रहणे तथा ॥ वैधृतौ च व्यतीपाते दानवृद्धिः परा स्मृता ॥ १२ ॥ गंगायां भास्करक्षेत्रे
कुरुक्षेत्रे च पुष्करे ॥ गोदावर्यां गयायां च तीर्थे चामरकंटके ॥ १३ ॥ अवंत्यां च हुतं दत्तं तत्सर्वं चाक्षयं भवेत् ॥ तस्मात्सर्वप्रयत्नेन पर्वे[2] तीर्थं
समाचरेत् ॥ १४ ॥ कुचैलो दुर्भगो मूर्खो जडो रोगसमन्वितः ॥ तीर्थपर्वपरिभ्रष्टो नरो भवति निश्चितम् ॥ १५ ॥ के योगाः सुकृ
तानां च कर्तव्याश्च विशेषतः ॥ १६ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ साधु पृष्टः प्रिये प्रश्नः पुण्यकानां त्वयाऽनघे ॥ मलमासे समा
याते ये नरा व्रतवर्जिताः ॥ जन्मजन्मनि दारिद्र्यं तेषां भवति शोभने ॥ १७ ॥ ॥ श्रीरुक्मिण्युवाच ॥ ॥ कीदृशो हि मलो मासः
केन योगेन जायते ॥ कदा काले समायाति एतन्नो वद विस्तरात् ॥ १८ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ युक्तमुक्तं त्वया देवि
प्रश्नः कालेऽयमीदृशः ॥ देवतापितृकार्याणि विधिना हि मलिम्लुचे ॥ १९ ॥ क्षौरं मौंजी विवाहश्च व्रतोपवासकं तथा ॥ विशेषेण
गृहस्थानां वर्ज्यं मुनिवरोत्तमैः ॥ २० ॥ संवत्सरत्रयांते च मासोऽयमधिगच्छति ॥ असंक्रमे रवेरस्मिंस्तस्मादधिकमासकः ॥ २१ ॥
अधिमासाधिपत्योऽहं सदैव[3] पुरुषोत्तमः ॥ ममाभिधानं तीर्थं च महाकालवने शुभम् ॥ २२ ॥ पुरुषोत्तमाख्यं मे धाम सदैवात्र प्रति
ष्ठति ॥ तस्मात्सर्वप्रयत्नेन गंतव्यं हि त्वया सह ॥ २३ ॥ महाकालवने तत्र यत्र तीर्थं ममाभिधम् ॥ प्राणिनो ये समायांति मज्जनार्थं
प्रिये ध्रुवम् ॥ २४ ॥ तेषामिह ममादेयं न कदापि भविष्यति ॥ धनधान्यकलत्रादिपुत्रसौख्यं सदैव हि ॥ २५ ॥ असंक्रांतेऽपि संप्राप्ते मासु

१ परा भाषा—परावाणीरूपा—इत्यर्थः। २ 'पर्वन्' शब्दस्याकारान्तत्वमार्षम्। ३ सदा वै—इ०पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

दिश्य व्रतं चरेत् ॥ अधिमासाधिपत्योऽहं सदा वै पुरुषोत्तमः ॥ २६ ॥ स्नानं दानं जपो होमः स्वाध्यायः पितृतर्पणम् ॥ देवतार्चा च मध्याह्ने ये कुर्वंति नरोत्तमाः ॥ २७ ॥ अक्षयं च भवेत्सर्वं तेषां वै कमले ध्रुवम् ॥ मलमासो गतः शून्यो येषां देवि प्रमादतः ॥ २८ ॥ दारिद्र्यं च सदा तेषां शोकरोगविवर्धनम् ॥ अधिमासे समायाते अवंत्यां व्रतमाचरेत् ॥ २९ ॥ तेषां ददाम्यहं प्रीत्या त्वामेव च न संशयः ॥ स्वल्पं दानमलं कार्यं यत्किंचिदिह यत्कृतम् ॥ तत्सर्वं मत्प्रसादेन ह्यनंतं प्रियदर्शने ॥ ३० ॥ ॥ श्रीरुवाच ॥ ॥ ईदृशो हि त्वया प्रोक्तो ह्यधिमासस्य सुव्रत ॥ ३१ ॥ महिमा ह्यपि लोकानां सर्वकामवरप्रदः ॥ अधिमासव्रतं पुण्यं कथयस्व प्रसादतः ॥ ३२ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ असंक्रांतो यदा मासः प्राप्यते मानवैः प्रिये ॥ महोत्सवस्तदा कार्य आत्मनो हितकांक्षिभिः ॥ ३३ ॥ कृष्णपक्षे चतुर्दश्यां नवम्यां वा सुरेश्वरि ॥ अष्टम्यां चाथ कर्तव्यं व्रतं शोकविनाशनम् ॥ ३४ ॥ यथालाभोपहारेण मासे चापि मलिम्लुचे ॥ पुण्याहे प्रातरुत्थाय कृत्वा पौर्वाह्णिकीं क्रियाम् ॥ ३५ ॥ गृहीत्वा नियमं पश्चाद्वासुदेवं हृदि स्मरन् ॥ उपवासं च नक्तं च एकभुक्तं च मानिनि ॥ ३६ ॥ एकस्य निश्चयं कृत्वा ततो विप्रान्निमंत्रयेत् ॥ सपत्नीकान्सदाचारान्कुलीनान्ज्ञातिसंभवान् ॥ ३७ ॥ ततो मध्याह्नसमये लक्ष्मीयुक्तं सनातनम् ॥ स्थापयेदव्रणे कुंभे वेदमंत्रैर्द्विजातिभिः ॥ ३८ ॥ पूजयेत्परया भक्त्या गोत्रिभिः सपितामहम् ॥ गंधतोयेन संस्थाप्य पंचामृतैस्तथैव च ॥ ३९ ॥ मिष्टान्नैर्नवभिश्चैव नैवेद्यैर्धूपदीपकैः ॥ आच्छादनैश्च वस्त्रैश्च पीतकौशेयकैस्तथा ॥ ४० ॥ घंटामृदंगनिर्ह्रादैर्घोषध्वनिसमन्वितैः ॥ आरार्तिकं व्रती कुर्यात्कर्पूरागरुचंदनैः ॥ ४१ ॥ अलाभे तूल्मुकैश्चापि फलस्यानंत्यहेतवे ॥ ताम्रपात्रस्थिते तोये चंदनाक्षतपुष्पकैः ॥ ४२ ॥ अर्घ्यं दद्यात्सपत्नीकः प्रहृष्टेनांतरात्मना ॥ पंचरत्नैः समायुक्तैर्जानुनी कृत्य भूतले ॥ समादाय च पाणिभ्यां सर्वभक्तिसमन्वितः ॥ ४३ ॥ अर्घ्यमन्त्रः ॥ कृपावन्सर्वभूतेषु जगदानंदकारक ॥ गृहाणार्घ्यमिमं देव संपूर्णफलदो भव ॥ ४४ ॥ प्रार्थनामंत्रः ॥ स्वयंभुवे नमस्तुभ्यं ब्रह्मणेऽमिततेजसे ॥ नमोस्तु ते श्रियानंद ब्रह्मानंद कृपाकर ॥ ४५ ॥ एवं संप्रार्थ्य गोविंदं पूजयेद्ब्राह्मणान्स्वयम् ॥ सपत्नीकाञ्छुचीन्स्नातांल्लँक्ष्मीनारायणौ स्मरन् ॥ ४६ ॥ पूजयित्वा विधानेन भोजयेद्घृतपायसैः ॥ ४७ ॥ भोजयित्वा विधानेन सपत्नीकं यथोचितम् ॥ विद्याविनयसंपन्नं तथा पत्न्या समन्वितम् ॥ ४८ ॥ पूजयित्वा यथाशक्त्या वस्त्रालंकारकुंकुमैः ॥ गोस्तन्याम्रकपित्थैश्च खर्जूरैः कदलीफलैः ॥ ४९ ॥ पनसैर्नारिकेलैश्च नारंगैर्दाडिमैस्तथा ॥ घृतप



१त्वया–इ०पा०। २ परिस्थाप्य–इ०पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्वान्नगोधूमैः शुभैः सोमालिकैर्वटैः ॥ ५० ॥ शर्कराघृतपूरैश्च कर्णिकैः खंडमंडकैः ॥ उर्वारुकर्कटीशाकैः शृंगबेरैः समूलकैः ॥ ५१ ॥ अन्यैश्च विविधैः शाकैराम्रैः पक्कैः पृथक्पृथक् ॥ भक्ष्यभोज्यलेह्यपेयकंदकानि विशेषतः ॥ ५२ ॥ सुवासितान्गोरसांश्च परिवेष्य मृदु ब्रुवन् ॥ इदं स्वादु रसं भोज्यं भवदर्थे प्रकल्पितम् ॥ ५३ ॥ याच्यतां रोचते यच्च यन्मया पाचितं प्रभो ॥ धन्योस्म्यनुगृहीतोस्मि कृतं सार्थं च मंदिरम् ॥ ५४ ॥ विसर्जयेत्ततो विप्रान्दत्त्वा तांबूलदक्षिणाः ॥ चतुर्भिर्मिलितैर्देवि तांबूलं मम वल्लभम् ॥ ५५ ॥ यो ददाति द्विजश्रेष्ठे स भवेत्सुभगो नरः ॥ सुभगा च सदाचारा वल्लभा स्वजने सदा ॥ ५६ ॥ पुत्रसौभाग्ययुक्ता च तांबूलैर्जायते प्रिये ॥ पत्रैस्तु केशवः प्रीतः पूगैरीशः सहोमया ॥ ५७ ॥ चूर्णके नानलः प्रीतः खदिरेण तु मन्मथः ॥ चतुर्भिर्विश्वरूपोऽसौ यः पुष्णाति जगत्त्रयम् ॥ ५८ ॥ परितोष्य सपत्नीकान्हस्ते दत्त्वा च मोदकान् ॥ आसीमांतमनुव्रज्य भुंजीत सह बंधुभिः ॥५९॥ असंक्रांते व्रतं नारी या करोतीह सुप्रिये ॥ दारिद्र्यं पुत्रशोकं च वैधव्यं नाप्नुयात्क्वचित् ॥६०॥ नरो वा यदि वा नारी यः कुर्याच्च मलिम्लुचे ॥ स सर्वसुखभोक्ता च भवेन्नास्त्येव संशयः ॥ ६१ ॥ मलिम्लुचे प्राप्य न पूजितो यैर्नारायणोऽहं परयेह भक्त्या ॥ कथं भवेयुः सुखपुत्रसंपत्सुहृत्सुभार्याः सुगुणैरुपेताः ॥६२॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडेऽवन्तीक्षेत्रमाहात्म्ये पुरुषोत्तममाहात्म्ये दानादिमाहात्म्यवर्णनंनाम षष्टितमोऽध्यायः ॥ ६० ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ अधिमासं समासाद्य योऽन्यत्र स्थितिमात्मनः ॥ करोति स नरो मूर्खो महाकालवनादृते ॥ १ ॥ अधिमासे नरो व्यास तीर्थे पुरुषोत्तमाभिधे ॥ स्नात्वा दत्त्वा च दानानि तेषां लोकाः सनातनाः ॥ २ ॥ पुरुषोत्तमं समभ्यर्च्य रमालालितपादकम् ॥ तथैव च उमां देवीं शंकरेण च पूजयेत् ॥ ३ ॥ वांछितार्थशतं प्राप्य विष्णुलोके महीयते ॥ भाद्रपदे सिते पक्षे एकादश्यां समाहितः ॥ उपोष्य विधिवद्व्यास रात्रौ जागरणं चरेत् ॥ ४ ॥ विष्णोश्च पूजनं कार्यं जलयात्रा तथैव च ॥ पुरुषोत्तमसरे नित्यं तस्य पुण्यफलं शृणु ॥ ५ ॥ पुत्रदारधनं सम्यगायुरारोग्यसंपदः ॥ न तेषां दुर्लभं किंचित्त्रिषु लोकेषु विद्यते ॥६॥ तस्य पूर्वतरे भागे जटेश्वरमहेश्वरः ॥ तिष्ठति तापसस्तीरे यत्र राजा भगीरथः ॥ ७ ॥ तपस्तप्त्वा परं लेभे पुण्यं पुण्यवतां वरः ॥ गंगां भूतलमानीय सर्वलोकसुखाय वै ॥ ८ ॥ तस्य तीर्थे[1] नरः स्नात्वा तिलधेनुं प्रदापयेत् ॥ सर्वयज्ञफलं प्राप्य पुत्रवाञ्जायते नरः ॥ ९ ॥ तस्येशानतरे भागे रामो भार्गवसत्तमः ॥ तपस्तेपे सुधर्मात्मा आत्मकायविशुद्धये ॥ १० ॥ कौशिकी च सरिच्छ्रेष्ठा सर्वतीर्थ

१ तीरे--इ०पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





वरप्रदा॥ तत्र स्नात्वा नरो जातिहत्यादोषविवर्जितः ॥११॥ रामेश्वरं समालोक्य धूतपापो भवेन्नरः॥१२॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये पुरुषोत्तमेश्वरमाहात्म्येऽधिमासस्नानदानादिमाहात्म्यवर्णनंनामैकषष्टितमोऽध्यायः ॥६१॥ ॥ व्यास उवाच ॥ गोमतीकुण्डं त्वया प्रोक्तं पुरा ब्रह्मन्सनातनम् ॥ कस्मिन्काले कदा जातं तन्नो वद सुविस्तरात् ॥ १ ॥ ॥ सनत्कुमार उवाच ॥ शृणुष्वभो महाप्राज्ञ कथां पापहरां पराम् ॥ गोमतीकुण्डोद्भवां पुण्यां पुरा रुद्रेण भाषिताम् ॥ २ ॥ नैमिषे च समासीना ऋषयः शौनकादयः ॥ कथयंति कथां पुण्यां सर्वतीर्थोद्भवां शुभाम् ॥ ३ ॥ तस्मिन्नवसरे पुण्ये काशीमाहात्म्यमुत्तमम् ॥ कथितं नारदेनैव पवित्रं पापहारकम् ॥ ४ ॥ ऊषरः पुण्य पापानां धन्या वाराणसी पुरी ॥ ध्रुवं लभंते मोक्षं च समं चंडालपंडिताः ॥ ५ ॥ असीवरुणयोर्मध्ये पंचक्रोशी महाफलम् ॥ अमरा मरणमिच्छन्ति का कथा इतरे जनाः ॥ ६ ॥ इति स्मृत्वा तदा व्यास स्वयंभूः प्रत्यभाषत ॥ शृण्वतां सर्वदेवानामृषीणां च परंतप ॥ ७ ॥ नदी न गोमतीतुल्या कृष्णतुल्या न देवता ॥ सर्वपातालभूमध्ये न द्वारकासमा पुरी ॥ ८ ॥ इति ते निश्चयं ज्ञात्वा ऋषयः शौनकादयः ॥ यत्र तत्र स्थिताः सर्वे प्रातःसंध्यामुपासितुम् ॥ ९ ॥ तत्रैव गोमतीतीरे चक्रुस्ते वै धृतव्रताः ॥ सांदीपनोऽपि तत्रैव प्रातःसंध्यां समाचरत् ॥ १० ॥ एवं बहुतिथे काले चरतस्तस्य वै व्रतम्॥ सांदीपनस्य वै व्यास ह्यवंतीपुरवासिनः॥११॥ तस्यैव कामपूर्त्यर्थं विद्यार्थिनौ रामजनार्दनौ ॥ समायातौ सुकुमारांगौ सततं ब्रह्मचारिणौ ॥ १२ ॥ निवासं चक्रतुस्तस्य गुरोर्गेहे परंतप ॥ तस्य पाठयतः सम्यग्विद्यां सर्वश्रुतीः परम् ॥ १३ ॥ उषस्युषसि तत्रैव दृश्यते न तदा गुरुः ॥ विद्योपदेशकालोऽयं क्व गतो नौ गुरुर्वरः ॥ १४ ॥ इति पृष्टे तयोरेवं[1] गुरुपत्नी ह्युवाच ह ॥ सदैव कुरुते वत्स प्रातःसंध्याह्युपासनम् ॥ १५ ॥ तत्रैव याति वै नित्यं गुरुस्ते स्नानकारणात् ॥ गोमती वै सरिच्छ्रेष्ठा द्वारकायां च पावनी ॥१६॥ इति श्रुत्वा तदा कृष्णो रामेण सहसंयुतः ॥ किं कर्तव्यमिहास्माभिरात्मनो हितमुत्तमम् ॥ १७ ॥ गुरोरागमनं कांक्षे अत्रैव स्थितिकांक्षया ॥ एतस्मिन्नेव काले तु सांदीपनिरगाद्गृहम् ॥ १८ ॥ तत उत्थाय तौ वीरौ गुरोरावंदनं ततः ॥ प्रश्रयावनतौ कृत्वा ह्यब्रूतां वचनं गुरुम् ॥ १९ ॥ श्रूयतां भो महायोगिन्नस्माकं वासकारणम् ॥ विद्यार्थिनाविह प्राप्तौ युष्माकं च गृहोत्तमे ॥ २० ॥ प्रातःकाले च ते ब्रह्मन्समयो नास्ति नौ प्रभो ॥[2]एतच्छ्रुत्वा वचस्तस्य कृष्णस्य च बलस्य च ॥ २१ ॥ उवाच भगवान्व्यास आत्मनो व्रतकारणम् ॥ अस्माकं परमं वत्स व्रतं वै शाश्वतं मतम् ॥ २२ ॥ गोमतीस्नानं कर्तव्यं



१ तयोः—ताभ्याम्—इत्यर्थः । तृतीयार्थे षष्ठी । २ भगवान्—सांदीपनिः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रातःकाले सदा बुधैः ॥ तत्रैवोपासनं पुण्यं संध्याया इति निश्चितम् ॥ २३ ॥ इति निश्चित्य युष्माभिर्यद्योग्यं क्रियतां तथा ॥ तच्छ्रुत्वा भगवा न्विष्णुर्मायामानुषरूपवान् ॥ २४ ॥ गोमत्याराधनं चक्रे कुशस्थल्यां द्विजोत्तम ॥ यत्र शिवेश्वरो देवो यज्ञकुण्डमनुत्तमम् ॥ २५ ॥ कंथडेश्वरस्यो त्तरे भागे गोमती सा समागता ॥ पातालतलमाभेद्य सरस्वत्या सहागता ॥ २६ ॥ प्रातरुत्थाय ते सर्वे गोमतीं सरितां वराम् ॥ ददृशुः सुचिरापांगीं व्यास स्वाश्रमगामिनीम् ॥ २७ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अत्रैव चागता ब्रह्मन्गोमती सरितांवरा ॥ स्नानदानादिकं सर्वमत्रैव स मुपासय ॥ २८ ॥ गोमत्यत्र समालीना यज्ञकुण्डे सरस्वती ॥ तदाप्रभृति लोकेऽस्मिन्गोमतीकुण्डमुच्यते ॥ २९ ॥ सर्वेषामपि लोकानां मार्गोऽ त्रैव च विद्यते ॥ तस्माद्व्यास महापुण्यं भुवि तीर्थमनुत्तमम् ॥ ३० ॥ गोमतीकुण्डमाख्यातं सर्वपापप्रणाशनम् ॥ भाद्रे मास्यसिताऽष्टम्यां कृष्ण जन्मसमुद्भवम् ॥ ३१ ॥ तत्र स्नात्वा नरो नित्यं रात्रौ जागरणं चरेत् ॥ उपोष्य विधिवद्व्यास सशिष्यं व्यासमर्चयेत् ॥ ३२ ॥ वैष्णवांश्च नरांश्चैव कृष्णजन्मोत्सुकान्वरान् ॥ नानासुगंधपुष्पाद्यैर्वस्त्रालंकारसंयुतैः ॥ ३३ ॥ गोब्राह्मणानां पूजाश्च क्रियंते यैः समाहितैः ॥ न तेषां दुर्लभं किंचित्सर्वलोकेषु विद्यते ॥ ३४ ॥ गोमतीस्नानजातपुण्याद्वासुदेवसमागमात् ॥ मनोरथफलप्राप्तिर्जायते नाऽत्र संशयः ॥ ३५ ॥ तथा चैत्रसिते पक्षे यावच्चैकादशी भवेत् ॥ तद्दिने च नरः स्नात्वा गोमत्यां च विशेषतः ॥ ३६ ॥ रात्रौ जागरणं कृत्वा विष्णुपूजां तथैव च ॥ आमलकीं ततो गत्वा प्रदक्षिणात्पदेपदे ॥ ३७ ॥ गोसहस्रफलं तेषां प्राप्यते नाऽत्र संशयः ॥ ये शृण्वंति कथां पुण्यां पवित्रां पापहारिणीम् ॥ ३८ ॥ सर्वपापवि निर्मुक्ता विष्णुलोकं प्रयांति ते ॥ ३९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये गोमतीतीर्थकुण्डमाहात्म्यवर्णनंनाम द्विषष्टितमोऽध्यायः ॥ ६२ ॥ ॥ सनत्कुमार उवाच ॥ ॥ कंथडेश्वर इति ख्यातं तत्र तीर्थमनुत्तमम् ॥ तत्र तीर्थे नरः स्नात्वा दृष्ट्वा देवं महेश्वरम् ॥ १ ॥ मुच्यते सर्वपापेभ्यः शुचिः प्रयतमानसः ॥ विमानशतसंयुक्तः शिवलोके महीयते ॥ २ ॥ भुवि पुण्यतमं तीर्थं सर्वपापहरं परम् ॥ खगर्तासंगमो यत्र गंगेश्वरसमीपतः ॥ ३ ॥ महापापहरं पुण्यं महापुण्यफलप्रदम् ॥ आकाशात्पतिता यत्र गंगा त्रैलोक्य पावनी ॥ ४ ॥ विधृता शिरसि सद्यो महादेवेन शंभुना ॥ तस्मिंस्तीर्थे नरः स्नात्वा गंगेशमवलोकयेत् ॥ ५ ॥ गंगास्नानफलं प्राप्य विष्णु लोके महीयते ॥ [3]वीरेश्वरमनुप्राप्य तस्मिंस्तीर्थे नरो वसेत् ॥ ६ ॥ सर्वपापविशुद्धात्मा वीरलोकमवाप्नुयात् ॥ तीर्थमन्यन्महापुण्यं भुवि ख्यातं

१ समानीता–इ०पा० । २ स्वगर्तासंगमः–इ० पा० । ३ विश्वेश्वरम्–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





महर्षिभिः ॥ ७ ॥ वामनकुण्डेति विख्यातं त्रिषु लोकेषु विश्रुतम् ॥ यस्य दर्शनमात्रेण ब्रह्महत्यां व्यपोहति ॥ ८ ॥ मनोरथशतं प्राप्य पश्चाद्विष्णु
पुरं व्रजेत् ॥ ॥ व्यास उवाच ॥ ॥ कदा काले समुत्पन्नं वामनाख्यं पुराऽनघ ॥ ९ ॥ तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ॥
॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणुष्व भो द्विजश्रेष्ठ कथां पापहरां पराम् ॥ १० ॥ यस्य श्रवणमात्रेण सर्वपापात्प्रमुच्यते ॥ दैत्येंद्रस्तु पुरा
प्रोक्तो विष्णुभक्तिपरायणः ॥ ११ ॥ प्रह्लाद इति विख्यातः सर्वधर्मभृतां वरः ॥ आचारविजितो धर्मः सत्येन विजिता रमा ॥ १२ ॥ धैर्येण च
धृता लोकाः क्षमया विधृता मही ॥ गांभीर्येणाऽर्णवा दिव्याः शौर्येण शत्रुणां गणाः ॥ १३ ॥ प्रश्रयेणाभ्यागताश्च जितास्तेन महात्मना ॥
दक्षिणाभिर्जितो यज्ञो हविषा हव्यवाहनः ॥ १४ ॥ शौचाऽऽचारविशुद्धात्मा तपसा च हताऽशुभः ॥ दानमानजिता विप्रा भोजनाच्छादना
दिभिः ॥ १५ ॥ संस्कारेण जितं जन्म दमेनाऽऽत्मा सनातनः ॥ प्राणायामजितो वायुर्योगध्यानजितो हरिः ॥ १६ ॥ ईदृशश्च महायोगी सत्यधर्म
परायणः ॥ प्रह्लादेन समो धीरो न भूतो न भविष्यति ॥ १७ ॥ तस्य पौत्रः सदाचारी बलिरित्यभिधीयते ॥ तस्य पालयतः सम्यक्प्रजाः
सम्यग्विवर्धिताः ॥ १८ ॥ नाल्पायुर्न जडो मूर्खो न रोगी न च मत्सरी ॥ अपुत्रो द्रव्यहीनश्च कोऽपि नाऽस्ति महीतले ॥ १९ ॥
महाराजो महीपालो यज्वा विपुलदक्षिणः ॥ सप्तद्वीपवती तेन पालिता वसुधा सदा ॥ २० ॥ एकदा च समासीने सभामध्ये वरासने ॥ जय
शब्दे वर्तमाने गंधर्वा ललितं जगुः ॥ २१ ॥ वाद्यमानेषु वाद्येषु ननृतुश्चाऽप्सरोगणाः ॥ कथायां कथ्यमानायां शुभायां च विचक्षणैः ॥ २२ ॥
सूता वैतालिकाः सिद्धाश्चारणाश्च बहुश्रुताः ॥ ऋषयश्च समायातास्तत्रैव द्विजसत्तम ॥ २३ ॥ सुन्दोपसुन्दतुहुंडाद्या महिषासुरकोल्बणाः ॥
शुम्भनिशुम्भधूम्राक्षकालकेयाश्च दानवाः ॥ २४ ॥ कालनेमिश्च विक्रांतो दौर्हृदो मूषको यमः ॥ निकुम्भः कुम्भविशठो ह्यन्धकश्च महाबलः ॥
॥ २५ ॥ शंखो जलंधरो रौद्रो वातापी च बलाधिकः ॥ सर्वजिद्विश्वहंता च कामचारी हलायुधः ॥ २६ ॥ एते चाऽन्ये च बहवो दनुवंशवि
वर्धनाः ॥ उपासांचक्रिरे तत्र बलिराजमकल्मषम् ॥ २७ ॥ सिद्धा नागाश्च यक्षाश्च किन्नराः किंपुरुषास्तथा ॥ खेचरा भूचरा बाला राक्षसाश्चैव
दारुणाः ॥ २८ ॥ एते चाऽन्ये च बहवो राजानं पर्युपासत ॥ तत्र सभा महादिव्या शुशुभे च द्विजोत्तम ॥ २९ ॥ ग्रहैरुज्ज्वलितैः कीर्णा शरदीव
नभःस्थलम् ॥ तत्सभायां समासीनो रराज बलिराट् तथा ॥ ३० ॥ मरुद्भिरिव संवीतो वासवो दिवि देवतैः ॥ एकदा च सभामध्ये नारदो देवद

१ सर्वधर्मविदां वरः—इ०पा० । २ आर्षो दीर्घाभावः । शत्रूणाम्—इत्युचितम् ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्शनः ॥ ३१ ॥ आगतस्तेषु सर्वेषु दानवेषु स्थितेषु च ॥ दृष्ट्वा तमागतं सर्वे ह्युत्तस्थुर्दितिनंदनाः ॥ ३२ ॥ ववन्दिरे सर्वशस्तु बलिना[1] किंनरोत्त
मम् ॥ सत्कृत्य चासनं दत्त्वा पप्रच्छ कुशलं नृपः ॥ ३३ ॥ कृत्वाऽऽतिथ्यं समासीनो नारदः प्राह सत्तमः ॥ मेघगंभीरया वाचा बलिं प्रहर्षिस
त्तमः ॥ ३४ ॥ ॥ नारद उवाच ॥ ॥ श्रूयतां दितिजश्रेष्ठ गतोऽहं वृषमंदिरे[2] ॥ तत्र देवसभा रम्या दिव्याऽभिप्रायसंयुता ॥ तत्र देवाः सगं
धर्वाः पुरंदरपुरोगमाः ॥ ३५ ॥ समासीनाः कथां पुण्यां कथयंति परस्परम् ॥ तत्र दैत्यकथां[3] शुभ्रां मया ख्यातां न सेहिरे ॥ ३६ ॥ हिरण्यक
शिपुर्दैत्यः पुराऽऽसीच्च प्रजापतिः ॥ त्रैलोक्यविजयी नेता येनेयं वसुधा जिता ॥ ३७ ॥ सर्वलोकं वशीकृत्य बुभुजे च वसुन्धराम् ॥ अतीव
तेजःसंपन्नो महाबलपराक्रमः ॥ ३८ ॥ वशी सर्वत्रगः कामी नृसिंहेन निपातितः ॥ बलिं कियद्बलं लोके नारद त्वं प्रशंससि ॥ ३९ ॥ इति मां
धर्षयित्वा च बिडौजा लोकसंग्रही ॥ बहुधा वादयन्वादान्कटुकान्दानवोत्तम ॥ ४० ॥ तस्मात्त्वं दानवश्रेष्ठ पितृपर्यागतां महीम् ॥ विजित्य
सार्वभौमत्वं लभस्व वसुधाधिप ॥ ४१ ॥ कियद्बलधृता नूनं देवाश्च दनुजोत्तम ॥ पलायनपरा दांताः सदैव रणभीरवः ॥ ४२ ॥ मम वाक्यपरो
भूत्वा त्रैलोक्याधिपतिर्भव ॥ नारदस्य वचः श्रुत्वा बलिर्वैरोचनिस्तदा ॥ ४३ ॥ चकार कोपमतुलं त्रैलोक्यविजये द्विज ॥ मंत्रयित्वाऽसु
रान्सर्वान्सर्वदैत्यजनेश्वरः ॥ ४४ ॥ संग्राममकरोत्तीव्रं वासवेन बलीयसा ॥ जित्वा च सकलान्देवान्वशीचक्रे सवासवान् ॥ ४५ ॥ सर्वलोके
श्वरो जातो बलिर्वैरोचनोऽसुरः ॥ हताधिकारास्त्रिदशा भ्रष्टराज्याः पराजिताः ॥ ४६ ॥ विचरंति यथा मर्त्यास्तेन देवगणा भुवि ॥
किंचित्कालं समासाद्य ब्रह्माणं शरणं ययुः ॥ ४७ ॥ भो ब्रह्मन्बलिना भ्रष्टा देवलोकात्परंतप ॥ किं कुर्मः क्व च गच्छामः कमुपा
यं चरामहे ॥ ४८ ॥ ॥ ब्रह्मोवाच ॥ ॥ श्रूयतां भोः सुरश्रेष्ठा युष्माकं साधनं परम् ॥ यूयं यात पुरीं रम्यां पद्मावतीमम
रोत्तमाः ॥ ४९ ॥ तत्र तीर्थवरं श्रेष्ठं नाम्ना चोत्तरमानसम् ॥ यत्राऽष्टसिद्धिदा ख्याता महासिद्धिप्रदा नृणाम् ॥ ५० ॥ निधयश्च नवैवापि
तत्र तिष्ठंति सत्तम ॥ तस्यैव दक्षिणे भागे विष्णुतीर्थमनुत्तमम् ॥५१॥ तत्र स्नात्वा नरः पश्येत्सिद्धेश्वरीं सुसिद्धिदाम् ॥ ऋद्धिसिद्धिपरो भूत्वा विष्णु
लोके महीयते ॥ ५२ ॥ आश्विनस्य सिते पक्षे दशम्यां दिवसे तथा ॥ अष्टसिद्धिशमीदेशे गणेश्वरं प्रपूजयेत् ॥ ५३ ॥ विजयी सर्वलोकेषु जाय
ते नाऽत्र संशयः ॥ शमीमूलस्थितं नित्यमृद्धिसिद्धिवरप्रदम् ॥ ५४ ॥ पूजयेद्वै नरो नित्यं गणेशं सर्वकामदम् ॥ सर्वकामवरं लब्ध्वा पुत्रवान्ध

१ बलिना–सह–इत्यर्थः । २ वृषमन्दिरे–इंद्रगृहे–इत्यर्थः । 'वासवो वृत्रहा वृषा'–इत्यमरः । ३ दैत्यकथाम्–दैत्यानां कथाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नवान्भवेत् ॥ ५५ ॥ तस्मात्सर्वप्रयत्नेन महाकालवनं व्रजेत् ॥ यत्र विष्णुसरस्तीर्थं तत्र गच्छत माचिरम् ॥ ५६ ॥ उपासनां सुरश्रेष्ठा विष्णोरतु
लतेजसः ॥ कुरुध्वं सर्वभीतिभ्यस्त्राता स स्यात्सुरोत्तमाः ॥ ५७ ॥ इति श्रुत्वा वचस्तस्य ब्रह्मणः शंसितात्मनः ॥ महाकालवने प्राप्ता देवास्ते
कार्यसाधकाः ॥ ५८ ॥ अत्राऽऽगत्य शुचीभूय स्नानदानादिकर्मभिः ॥ उपासांचक्रिरे सिद्धा विष्णुभक्तिपरायणाः ॥ ५९ ॥ ब्रह्माणमथ ते सर्वे
पप्रच्छुर्विधिमादरात् ॥ उपासनाया देवस्य देवाः शक्रपुरोगमाः ॥ ६० ॥ ॥ देवा ऊचुः ॥ ॥ ब्रह्मन्केन प्रकारेण विष्णुभक्तिः परा भवेत् ॥ तत्सर्वं श्रोतु
मिच्छामस्त्वत्तो ब्रह्मविदां वर ॥ ६१ ॥ ॥ ब्रह्मोवाच ॥ ॥ श्रूयतां भोः सुरश्रेष्ठा विष्णुभक्तिमनुत्तमाम् ॥ शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजम्
॥ ६२ ॥ प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशांतये ॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ॥ ६३ ॥ येषामिंदीवरश्यामो हृदयस्थो जनार्दनः ॥ अ
भीप्सितार्थसिद्ध्यर्थं पूज्यते यः सुरैरपि ॥ ६४ ॥ सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥ कल्पादौ सृष्टिकामेन प्रेरितोहं च शौरिणा ॥ ६५ ॥ न
शक्तो वै प्रजाः कर्तुं विष्णुध्यानपरायणः ॥ एतस्मिन्नंतरे सद्यो मार्कंडेयो महाऋषिः ॥ ६६ ॥ सर्वसिद्धेश्वरो दांतो दीर्घायुर्विजितेंद्रियः ॥ मया दृष्टो
ऽथ गत्वा तं तदाहं समुपस्थितः ॥ ततः प्रफुल्लनयनौ सत्कृत्य चेतरेतरम् ॥ ६७ ॥ पृच्छमानौ परं स्वास्थ्यं सुखासीनौ सुरोत्तमाः ॥ तदा
मया स पृष्टो वै मार्कण्डेयो महामुनिः ॥ ६८ ॥ भगवन्केन प्रकारेण प्रजा मेऽनामया भवेत् ॥ तत्सर्वं श्रोतुमिच्छामि भगवन्मुनिवंदित ॥ ६९ ॥
॥ श्रीमार्कंडेय उवाच ॥ ॥ विष्णुभक्तिः परा नित्या सर्वार्तिदुःखनाशिनी ॥ सर्वपापहरा पुण्या सर्वसुखप्रदायिनी ॥ ७० ॥ एषा ब्राह्मी महाविद्या
न देया यस्य कस्यचित् ॥ कृतघ्नाय ह्यशिष्याय नास्तिकायानृताय च ॥ ७१ ॥ ईर्ष्यकाय च रूक्षाय कामिकाय कदाचन ॥ तद्भूतं सर्वं विघ्नंति
यत्तद्धर्मं सनातनम् ॥ ७२ ॥ एतद्गुह्यतमं शास्त्रं सर्वपापप्रणाशनम् ॥ पवित्रं च पवित्राणां पावनानां च पावनम् ॥७३॥ विष्णोर्नामसहस्रं च विष्णु
भक्तिकरं शुभम् ॥ सर्वसिद्धिकरं नृणां भुक्तिमुक्तिप्रदं शुभम् ॥ ७४ ॥ ॐ अस्य श्रीविष्णुसहस्रनामस्तोत्रमंत्रस्य मार्कंडेय ऋषिः विष्णुर्देवता
अनुष्टुप्छंदः सर्वकामावाप्त्यर्थे जपे विनियोगः ॥ अथ ध्यानम् ॥ सजलजलदनीलं दर्शितोदारशीलं करतलधृतशैलं वेणुवाद्ये रसालम् ॥ व्रजजन ॥ ६६ ॥
कुलपालं कामिनीकेलिलोलं तरुणतुलसिमालं नौमि गोपालबालम् ॥ ७५ ॥ ॐविश्वं विष्णुर्हृषीकेशः सर्वात्मा सर्वभावनः ॥ सर्वगः शर्वरीनाथो
भूतग्रामाऽऽशयाशयः ॥ ७६ ॥ अनादिनिधनो देवः सर्वज्ञः सर्वसंभवः ॥ सर्वव्यापी जगद्धाता सर्वशक्तिधरोऽनघः ॥७७॥ जगद्बीजं जगत्स्रष्टा जग

१ सर्वपापक्षयो भवेत्--इ०पा० । २ पूजितो यः सुराऽसुरैः--इ० पा० । ३ रुष्टाय-इ० पा० । ४ ते-इत्यध्याहार्यम्-ते-कृतघ्नादयः-इत्यर्थः । ५ भूतभावनभूतेशः-इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दीशो जगत्पतिः ॥ जगद्गुरुर्जगन्नाथो जगद्धाता जगन्मयः ॥७८॥ सर्वाऽऽकृतिधरः सर्वविश्वरूपी जनार्दनः ॥ अजन्मा शाश्वतो नित्यो विश्वाधारो विभुः प्रभुः ॥ ७९ ॥ बहुरूपैकरूपश्च सर्वरूपधरो हरः ॥ कालाग्निप्रभवो वायुः प्रलयांतकरोऽक्ष[1]यः ॥ ८० ॥ महार्णवो महामेघो जलबुद्बुदसंभवः ॥ संस्कृतो विकृतो मत्स्यो महामत्स्यस्तिमिंगिलः ॥ ८१ ॥ अनंतो वासुकिः शेषो वराहो धरणीधरः ॥ पयःक्षीरविवेकाढ्यो हंसो हैमगि[2]रिस्थितः ॥ ८२ ॥ हयग्रीवो विशालाक्षो हयकर्णो हयाकृतिः ॥ मंथनो रत्नहारी च कूर्मो धरधराधरः ॥ ८३ ॥ विनिद्रो निद्रितो नंदी सुनंदो नंदनप्रियः ॥ नाभिनालमृणाली च स्वयंभूश्चतुराननः ॥ ८४ ॥ प्रजापतिपरो दक्षः सृष्टिकर्ता प्रजाकरः ॥ मरीचिः कश्यपो दक्ष[3]ः सुरासुरगुरुः कविः ॥ ८५ ॥ वामनो वाममा[4]र्गी च वामकर्मा बृहद्वपुः ॥ त्रैलोक्यक्रमणो दीपो बलियज्ञविनाशनः ॥ ८६ ॥ यज्ञहर्ता यज्ञकर्ता यज्ञेशो यज्ञ[5]भुग्विभुः ॥ सहस्रांशुर्भगो भानुर्विवस्वान्रविरंशुमान् ॥ ८७ ॥ तिग्मतेजाश्चाल्पतेजाः कर्मसाक्षी मनुर्यमः ॥ देवराजः सुरपतिर्दानवारिः शचीपतिः ॥ ८८ ॥ अ[6]ग्निर्वायुसखो वह्निर्वरुणो यादसां पतिः ॥ नैर्ऋतो ना[7]दनोऽनादी रक्षयक्षोधनाधिपः ॥ ८९ ॥ कुबेरो वित्तवान्वेगो वसुपालो विलासकृत् ॥ अमृतस्रवणः सोमः सोमपानकरः सुधीः ॥ ९० ॥ सर्वौषधिकरः श्रीमान्निशाकरदिवाकरः ॥ विषारिर्विषहर्ता च विषकंठधरो गिरिः ॥ ९१ ॥ नीलकंठो वृषी रुद्रो भालचंद्रो ह्युमापतिः ॥ शिवः शांतो वशी वीरो ध्यानी मानी च मानदः ॥ ९२ ॥ कृमिकीटो मृगव्याधो मृगहा मृगल[8]ाञ्छनः ॥ बटुको भैरवो बालः कपाली दंडविग्रहः ॥ ९३ ॥ स्मशानवासी मांसाशी दुष्टनाशी वरांतकृत् ॥ योगिनीत्रासको योगी ध्यानस्थो ध्यानवासनः ॥ ९४ ॥ सेनानीः सेनद[9]ः स्कंदो महाकालो गणाधिपः ॥ आदिदेवो गणपतिर्विघ्नहा विघ्ननाशनः ॥ ९५ ॥ ऋद्धिसिद्धिप्रदो दंती भालचन्द्रो गजाननः ॥ नृसिंह उग्रदंष्ट्रश्च नखी दानवनाशकृत् ॥ ९६ ॥ प्रह्लादपोषकर्ता च सर्वदैत्यजनेश्वरः ॥ शलभः सागरः साक्षी कल्पद्रुमविकल्पकः ॥ ९७ ॥ हेमदो हेमभागी च हिमकर्ता हिमाचलः ॥ भूधरो भूमिदो मेरुः कैलासशिखरो गिरिः ॥ ९८ ॥ लोकालोकांतरो लोकीविलोकी भुवनेश्वरः ॥ दिक्पालो दिक्पतिर्दिव्यो दिव्यकायो जितेंद्रियः ॥ ९९ ॥ विरूपो रूपवान्रागी नृत्यगीतविशारदः ॥ हाहा हूहूश्चित्ररथो देवर्षिर्नारदः सखा ॥ १०० ॥ विश्वेदेवाः साध्यदेवा धृताशीश्च चलोऽचलः ॥ कपिलो जलपको वादी दत्तो हैहयसंघराट् ॥ १ ॥ वसिष्ठो वामदेवश्च

---

१ ऋतुः--इ०पा० । २ हैमगिरासनः--इ०पा० । ३ वत्सः--इ० पा० । ४ वाममार्गी--इ० पा० । ५ यज्ञकृत्--इ०पा० । ६ रविः--इ० पा० । ७ नारदः--इ० पा० । ८ मृगवत्सलः--इ०पा० । ९ सेनहा--इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सप्तर्षिप्रवरो भृगुः ॥ जामदग्न्यो महावीरः क्षत्रियांऽतकरो ह्यृषिः ॥ २ ॥ हिरण्यकशिपुश्चैव हिरण्याक्षो हरप्रियः ॥ अगस्तिः पुलहो दक्षः पौलस्त्यो रावणो घटः ॥३॥ देवारिस्तापसस्तापी विभीषणहरिप्रियः ॥ तेजस्वी तेजदस्तेजी ईशो राजपतिः प्रभुः ॥ ४ ॥ दाशरथी राघवो रामो रघुवंशविवर्धनः॥सीतापतिः पतिः श्रीमान्ब्रह्मण्यो भक्तवत्सलः॥५॥ सन्नद्धः कवची खड्गी चीरवासा दिगंबरः ॥ किरीटी कुंडली चापी शंखचक्री गदाधरः ॥६॥कौसल्यानंदनोदारो भूमिशायी गुहप्रियः ॥ सौमित्रो भरतो बालः शत्रुघ्नो भरताऽग्रजः ॥ ७ ॥ लक्ष्मणः परवीरघ्नः स्त्रीसहायः कपीश्वरः ॥ हनुमानृक्षराजश्च सुग्रीवो वालिनाशनः ॥ ८ ॥ दूतप्रियो दूतकारी ह्यंगदो गदतां वरः ॥ वनध्वंसी वनी वेगो वानरध्वजलांगुली ॥ ९ ॥ रविदंष्ट्री च लंकाहा हाहाकारो वरप्रदः ॥ भवसेतुर्महासेतुर्बद्धसेतू रमेश्वरः ॥ ११० ॥ जानकीवल्लभः कामी किरीटी कुण्डली खगी ॥ पुण्डरीकविशालाक्षो महाबाहुर्घनाकृतिः ॥ ११ ॥ चंचलश्चपलः कामी वामी वामांगवत्सलः ॥ स्त्रीप्रियः स्त्रीपरः स्त्रैणः स्त्रियो वामांगवासकः ॥ १२ ॥ जितवैरी जितकामो जितक्रोधो जितेंद्रियः ॥ शांतो दांतो दयारामो ह्येकस्त्रीव्रतधारकः ॥ १३ ॥ सात्त्विकः सत्त्वसंस्थानो मदहा क्रोधहा खरः ॥ बहुराक्षससंवीतः सर्वराक्षसनाशकृत् ॥ १४ ॥ रावणारी रणक्षुद्रदशमस्तकच्छेदकः ॥ राज्यकारी यज्ञकारी दाता भोक्ता तपोधनः ॥ १५ ॥ अयोध्याधिपतिः कांतो वैकुंठोऽकुंठविग्रहः ॥ सत्यव्रतो व्रती शूरस्तपी सत्यफलप्रदः ॥ १६ ॥ सर्वसाक्षीः सर्वगश्च सर्वप्राणहरोऽव्ययः ॥ प्राणश्चाथाप्यपानश्च व्यानोदानः समानतः ॥ १७ ॥ नागः कृकलः कूर्मश्च देवदत्तो धनंजयः ॥ सर्वप्राणविदो व्यापी योगधारकधारकः ॥१८॥ तत्त्ववित्तत्त्वदस्तत्त्वी सर्वतत्त्वविशारदः ॥ ध्यानस्थो ध्यानशाली च मनस्वी योगवित्तमः ॥ १९ ॥ ब्रह्मज्ञो ब्रह्मदो ब्रह्मज्ञाता च ब्रह्मसंभवः ॥ अध्यात्मविद्विदो दीपो ज्योतीरूपो निरंजनः ॥ १२० ॥ ज्ञानदोऽज्ञानहा ज्ञानी गुरुः शिष्योपदेशकः ॥ सुशिष्यः शिक्षितः शाली शिष्यशिक्षाविशारदः ॥ २१ ॥ मंत्रदो मंत्रहा मंत्री तंत्री तन्त्रजनप्रियः ॥ सन्मंत्रो मन्त्रविन्मन्त्री यन्त्रमन्त्रैकभंजनः ॥ २२ ॥ मारणो मोहनो मोही स्तंभोच्चाटनकृत्खलः ॥ बहुमायो विमायश्च महामायाविमोहकः ॥ २३ ॥ मोक्षदो बंधको बंदी ह्याकर्षणविकर्षणः ॥ ह्रींकारो बीजरूपी च क्लींकारः कीलकाधिपः ॥ ॥ २४ ॥ सौंकारः शक्तिमाञ्च्छक्तिः सर्वशक्तिधरो धरः ॥ अकारोकार ओंकारश्छंदोगायत्रसम्भवः ॥ २५ ॥ वेदो वेदविदो वेदी वेदाऽध्यायी सदाशिवः ॥ ऋग्यजुःसामाथर्वेशः सामगानकरोऽकरी ॥ २६ ॥ त्रिपदो बहुपादी च शतपथः सर्वतोमुखः ॥ प्राकृतः संस्कृतो योगी गीतग्रंथप्रहे



१ तामसः–इ०पा० । २ परः–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लिकः ॥ २७ ॥ सगुणो विगुणश्छंदो निःसंगो विगुणो गुणी ॥ निर्गुणो गुणवान्संगी कर्मी धर्मी च कर्मदः[1] ॥ २८ ॥ निष्कर्मा कामकामी च निःसंगः संगवर्जितः ॥ निर्लोभो निरहंकारी निष्किंचनजनप्रियः ॥ २९ ॥ सर्वसंगकरो रागी सर्वत्यागी बहिश्चरः ॥ एकपादो द्विपादश्च बहुपादोऽल्पपादकः ॥ १३० ॥ द्विपदस्त्रिपदोऽपादी विपादी पदसंग्रहः ॥ खेचरो भूचरो भ्रामी भृंगकीटमधुप्रियः ॥ ३१ ॥ ऋतुः संवत्सरो मासो गणितार्को ह्यहर्निशः ॥ कृतं त्रेता कलिश्चैव द्वापरश्चतुराकृतिः ॥ ३२ ॥ दिवाकालकरः[2] कालः कुलधर्मः सनातनः ॥ कला काष्ठा कला नाड्यो यामः पक्षः सितासितः ॥ ३३ ॥ युगो युगन्धरो योग्यो युगधर्मप्रवर्तकः ॥ कुलाचारः कुलकरः कुलदैवकरः कुली ॥ ३४ ॥ चतुराऽऽश्रमचारी च गृहस्थो ह्यतिथिप्रियः ॥ वनस्थो वनचारी च वानप्रस्थाऽऽश्रमोऽश्रमी ॥ ३५ ॥ वटुको ब्रह्मचारी च शिखासूत्री कमण्डली ॥ त्रिजटी ध्यानवान्ध्यानी बद्रिकाश्रमवासकृत् ॥ ३६ ॥ हेमाद्रिप्रभवो हैमो हेमराशिर्हिमाकरः ॥ महाप्रस्थानको विप्रो विरागी रागवान्गृही ॥ ३७ ॥ नरनारायणोऽनागो[3] केदारोदारविग्रहः ॥ गंगाद्वारतपःसारस्तपोवनतपोनिधिः ॥ ३८ ॥ निधिरेष महापद्मः पद्माकरश्रियालयः ॥ पद्मनाभः परीतात्मा परिव्राट्पुरुषोत्तमः ॥ ३९ ॥ परानंदः पुराणश्च सम्राड्राजविराजकः ॥ चक्रस्थश्चक्रपालस्थश्चक्रवर्ती नराधिपः ॥१४०॥ आयुर्वेदविदो वैद्यो धन्वंतरिश्च रोगहा ॥ औषधीबीजसंभूतो रोगी रोगविनाशकृत् ॥ ४१ ॥ चेतनश्चेतकोऽचिंत्यश्चित्तचिंताविनाशकृत् ॥ अतींद्रियः सुखस्पर्शश्चरचारी विहंगमः ॥ ४२ ॥ गरुडः पक्षिराजश्च चाक्षुषो विनतात्मजः ॥ विष्णुयानविमानस्थो मनोमयतुरंगमः ॥ ४३ ॥ बहुवृष्टिकरो वर्षी ऐरावणविरावणः ॥ उच्चैःश्रवाऽरुणो गामी हरिदश्वो हरिप्रियः ॥४४॥ प्रावृषो मेघमाली च गजरत्नपुरंदरः ॥ वसुदो वसुधारश्च निद्रालुः पन्नगाशनः ॥ ४५ ॥ शेषशायी जलेशायी व्यासः सत्यवतीसुतः ॥ वेदव्यासकरो वाग्ग्मी बहुशाखाविकल्पकः ॥ ४६ ॥ स्मृतिः पुराणधर्मार्थी परावरविचक्षणः ॥ सहस्रशीर्षा सहस्राक्षः सहस्रवदनोज्वलः ॥ ४७ ॥ सहस्रबाहुः सहस्रांशुः सहस्रकिरणो नरः ॥ बहुशीर्षैकशीर्षश्च त्रिशिरा विशिराः शिरी ॥ ४८ ॥ जटिलो भस्मरागी च दिव्यांबरधरः शुचिः ॥ अणुरूपो बृहद्रूपो विरूपो विकराकृतिः ॥ ४९ ॥ समुद्रमाथको माथी सर्वरत्नहरो हरिः ॥ वज्रवैडूर्यको वज्री चिंतामणिमहामणिः ॥१५०॥ अनिर्मूल्यो महामूल्यो निर्मूल्यः सुरभिः सुखी ॥ पिता माता शिशुर्बंधुर्धाता त्वष्टार्यमा यमः ॥ ५१ ॥ अंतःस्थो बाह्यकारी च बहिःस्थो वै बहिश्चरः ॥ पावनः पावकः

१ कर्दमः—इ० पा० । २ देशकालकरः—इ० पा० । ३ नागी—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पाकी सर्वभक्षी हुताशनः ॥ ९२ ॥ भगवान्भगहा भागी भवभंजो भयंकरः ॥ कायस्थः कार्यकारी च कार्यकर्ता करप्रदः ॥ ९३ ॥ एकधर्मा
द्विधर्मा च सुखी दूत्योपजीवकः ॥ बालकस्तारकस्त्राता कालो मूषकभक्षकः ॥ ९४ ॥ संजीवनो जीवकर्ता सजीवो जीवसंभवः ॥ षड्विंशको महा
विष्णुः सर्वव्यापी महेश्वरः ॥ ९५ ॥ दिव्यांगदो मुक्तमाली श्रीवत्सो मकरध्वजः ॥ श्याममूर्तिर्घनश्यामः पीतवासाः शुभाननः ॥ ९६ ॥ चीरवासा
विवासाश्च भूतदानववल्लभः ॥ अमृतोऽमृतभागी च मोहिनीरूपधारकः ॥ ९७ ॥ दिव्यदृष्टिः समदृष्टिर्देवदानववंचकः ॥ कबंधः केतुकारी च
स्वर्भानुश्चंद्रतापनः ॥ ९८ ॥ ग्रहराजो ग्रही ग्राहः सर्वग्रहविमोचकः ॥ दानमानजपो होमः सानुकूलः शुभग्रहः ॥ ९९ ॥ विघ्नकर्ताऽपहर्ता च
विघ्ननाशो विनायकः ॥ अपकारोपकारी च सर्वसिद्धिफलप्रदः ॥ १६० ॥ सेवकः सामदानी च भेदी दंडी च मत्सरी ॥ दयावान्दानशीलश्च दानी
यज्वा प्रतिग्रही ॥ ६१ ॥ हविरग्निश्चरुस्थाली समिधश्चानिलो यमः ॥ होतोद्गाता शुचिः कुण्डः सामगो वैकृतिः सवः ॥ ६२ ॥ द्रव्यं
पात्राणि संकल्पो मुशलो ह्यरणिः कुशः ॥ दीक्षितो मंडपो वेदिर्यजमानः पशुः क्रतुः ॥ ६३ ॥ दक्षिणा स्वस्तिमान्स्वस्ति ह्याशीर्वादः
शुभप्रदः ॥ आदिवृक्षो महावृक्षो देववृक्षो वनस्पतिः ॥ ६४ ॥ प्रयागो वेणुमान्वेणी न्यग्रोधश्चाऽक्षयो वटः ॥ सुतीर्थस्तीर्थकारी च
तीर्थराजो व्रती व्रतः ॥ ६५ ॥ वृत्तिदाता पृथुः पुत्रो दोग्धा गौर्वत्स एव च ॥ क्षीरं क्षीरवहः क्षीरी क्षीरभागविभागवित् ॥ ६६ ॥
राज्यभागविदो भागी सर्वभागविकल्पकः ॥ वाहनो वाहको वेगी पादचारी तपश्चरः ॥ ६७ ॥ गोपनो गोपको गोपी गोपकन्याविहारकृत् ॥
वासुदेवो विशालाक्षः कृष्णो गोपीजनप्रियः ॥ ६८ ॥ देवकीनंदनो नंदी नंदगोपगृहाऽऽश्रमी ॥ यशोदानंदनो दामी दामोदर उलूखली ॥ ६९ ॥
पूतनारिः पदाकारी लीलाशकटभंजकः ॥ नवनीतप्रियो वाग्मी वत्सपालकबालकः ॥ १७० ॥ वत्सरूपधरो वत्सी वत्सहा धेनुकांतकृत् ॥ बका
रिर्वनवासी च वनक्रीडाविशारदः ॥ ७१ ॥ कृष्णवर्णाऽऽकृतिः कांतो वेणुवेत्रविधारकः ॥ गोपमोक्षकरो मोक्षो यमुनापुलिनेचरः ॥ ७२ ॥
मायावत्सकरो मायी ब्रह्ममायापमोहकः ॥ आत्मसारविहारज्ञो गोपदारकदारकः ॥ ७३ ॥ गोचारी गोपतिर्गोपो गोवर्धनधरो बली ॥ इन्द्रद्युम्नो
मखध्वंसी वृष्टिहा गोपरक्षकः ॥ ७४ ॥ सुरभित्राणकर्ता च दावपानकरः कली ॥ कालीयमर्दनः[1] काली यमुनाह्रदविहारकः ॥ ७५ ॥ संक
र्षणो बलश्लाघ्यो बलदेवो हलायुधः ॥ लांगली मुसली चक्री रामो रोहिणिनंदनः ॥ ७६ ॥ यमुनाकर्षणोद्धारो नीलवासा हलो हली ॥ रेवती



१ कालीयदमनः—इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

रमणो लोलो बहुमानकरः परः ॥ ७७ ॥ धेनुकारिर्महावीरो गोपकन्याविदूषकः ॥ कामभानहरः कामी गोपीवासोऽपतस्करः ॥ ७८ ॥ वेणुवादी
च नादी च नृत्यगीतविशारदः ॥ गोपीमोहकरो गानी रासको रजनीचरः ॥ ७९ ॥ दिव्यमाली विमाली च वनमालाविभूषितः ॥ कैटभारिश्च
कंसारिर्मधुहा मधुसूदनः ॥१८०॥ चाणूरमर्दनो मल्लो मुष्टी मुष्टिकनाशकृत् ॥ मुरहा मोदको मोदी मदघ्नो नरकांतकृत् ॥८१॥ विद्याध्यायी भूमि
शायी सुदामा सुसखा सुखी ॥ सकलो विकलो वैद्यः कलितो वै कलानिधिः ॥ ८२ ॥ विद्याशाली विशाली च पितृमातृविमोक्षकः ॥ रुक्मिणी
रमणो रम्यः कालिंदीपतिः शंखहा ॥८३॥ पांचजन्यो महापद्मो बहुनायकनायकः ॥ धुंधुमारो निकुंभघ्नः शंबरांतो रतिप्रियः ॥८४॥ प्रद्युम्नश्चानिरुद्धश्च
सात्वतां पतिरर्जुनः ॥ फाल्गुनश्च गुडाकेशः सव्यसाची धनंजयः ॥ ८५ ॥ किरीटी च धनुष्पाणिर्धनुर्वेदविशारदः ॥ शिखंडी सात्यकिः शैब्यो
भीमो भीमपराक्रमः ॥ ८६ ॥ पांचालश्चाभिमन्युश्च सौभद्रो द्रौपदीपतिः ॥ युधिष्ठिरो धर्मराजः सत्यवादी शुचिव्रतः ॥ ८७ ॥ नकुलः सहदेव
श्च कर्णो दुर्योधनो घृणी ॥ गांगेयोऽथ गदापाणिर्भीष्मो भागीरथीसुतः ॥ ८८ ॥ प्रज्ञाचक्षुर्धृतराष्ट्रो भारद्वाजोथ गौतमः ॥ अश्वत्थामा विकर्णश्च
जह्नुर्युद्धविशारदः ॥८९॥ सीमंतिको गदी गाल्वो विश्वामित्रो दुरासदः ॥ दुर्वासा दुर्विनीतश्च मार्कंडेयो महामुनिः ॥१९०॥ लोमशो निर्मलोऽलो
मी दीर्घायुश्च चिरोऽचिरी ॥ पुनर्जीवी मृतो भावी भूतो भव्यो भविष्यकः ॥ ९१ ॥ त्रिकालोऽथ त्रिलिंगश्च त्रिनेत्रस्त्रिपदीपतिः[1] ॥ यादवो याज्ञव
ल्क्यश्च यदुवंशविवर्धनः ॥ ९२ ॥ शल्यक्रीडी विक्रीडश्च यादवांतकरः कलिः ॥ सदयो हृदयो दायो दायदो दायभाग्दयी ॥ ९३ ॥ महोदधि
र्महीपृष्ठो नीलपर्वतवासकृत् ॥ एकवर्णो विवर्णश्च सर्ववर्णबहिश्चरः ॥ ९४ ॥ यज्ञनिंदी वेदनिंदी वेदबाह्यो बलो बलिः ॥ बौद्धारिर्बाधको बाधो
जगन्नाथो जगत्पतिः ॥ ९५ ॥ भक्तिर्भागवतो भागी विभक्तो भगवत्प्रियः ॥ त्रिग्रामोऽथ नवारण्यो गुह्योपनिषदासनः ॥ ९६ ॥ शा
लिग्रामः शिलायुक्तो विशालो गंडकाश्रयः ॥ श्रुतदेवः श्रुतः श्रावी श्रुतबोधः श्रुतश्रवाः ॥ ९७ ॥ कल्किः कालकलः कल्को दुष्टम्लेच्छविनाश
कृत् ॥ कुंकुमी धवलो धीरः क्षमाकरो वृषाकपिः ॥९८॥ किंकरः किन्नरः कण्वः केकी किंपुरुषाधिपः ॥ एकरोमा विरोमा च बहुरोमा बृहत्कविः ॥
॥ ९९ ॥ वज्रप्रहरणो वज्री वृत्रघ्नो वासवानुजः ॥ बहुतीर्थकरस्तीर्थः सर्वतीर्थजनेश्वरः ॥ २०० ॥ व्यतीपातोपरागश्च दानवृद्धिकरः शुभः ॥ असं
ख्येयोऽप्रमेयश्च संख्याकारो विसंख्यकः ॥ १ ॥ मिहिकोत्तारकस्तारो बालचंद्रः सुधाकरः ॥ किंवर्णः कीदृशः किञ्चित्किंस्वभावः किमाश्रयः ॥२॥

१ त्रिनदीपतिः-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





निर्लोकश्च निराकारी बह्वाकारैककारकः ॥ दौहित्रः पुत्रिकः पौत्रो नप्ता वंशधरो धरः ॥ ३ ॥ द्रवीभूतो दयालुश्च सर्वसिद्धिप्रदो मणिः ॥
॥ ४ ॥ आधारोऽपि विधारश्च धरासूनुः सुमंगलः ॥ मंगलो मंगलाकारो मांगल्यः सर्वमंगलः ॥ ५ ॥ नाम्नां सहस्रनामेदं विष्णोरतुलतेजसः ॥
सर्वसिद्धिकरं काम्यं पुण्यं हरिहरात्मकम् ॥ ६ ॥ यः पठेत्प्रातरुत्थाय शुचिर्भूत्वा समाहितः ॥ यश्चेदं शृणुयान्नित्यं नरो निश्चलमानसः ॥ ७ ॥
त्रिसंध्यं श्रद्धया युक्तः सर्वपापैः प्रमुच्यते ॥ नंदते पुत्रपौत्रैश्च दारैर्भृत्यैश्च पूजितः ॥ ८ ॥ प्राप्नुते विपुलां लक्ष्मीं मुच्यते सर्वसंकटात् ॥ सर्वान्का
मानवाप्नोति लभते विपुलं यशः ॥ ९ ॥ विद्यावाञ्जायते विप्रः क्षत्रियो विजयी भवेत् ॥ वैश्यश्च धनलाभाढ्यः शूद्रः सुखमवाप्नुयात् ॥ २१० ॥
रणे[1] घोरे विवादे च व्यापारे पारतंत्रके ॥ विजयी जयमाप्नोति सर्वदा सर्वकर्मसु ॥ ११ ॥ एकधा दशधा चैव शतधा च सहस्रधा ॥ पठते हि
नरो नित्यं तथैव फलमश्नुते ॥ १२ ॥ पुत्रार्थी प्राप्नुते पुत्रान्धनार्थी धनमव्ययम्[2] ॥ मोक्षार्थी प्राप्नुते मोक्षं धर्मार्थी धर्मसंचयम् ॥ १३ ॥ कन्यार्थी
प्राप्नुते कन्यां दुर्लभां यत्सुरैरपि ॥ ज्ञानार्थी जायते ज्ञानी योगी योगेषु युज्यते ॥ १४ ॥ महोत्पातेषु घोरेषु दुर्भिक्षे राजविग्रहे ॥ महामारीसमुद्भूते
दारिद्र्ये दुःखपीडिते ॥ १५ ॥ अरण्ये प्रांतरे वाऽपि दावाग्निपरिवारिते[3] ॥ सिंहव्याघ्राभिभूतेऽपि वने हस्तिसमाकुले ॥ १६ ॥ राज्ञा क्रुद्धेन
चाज्ञप्ते दस्युभिः सह संगमे ॥ विद्युत्पातेषु घोरेषु स्मर्तव्यं हि सदा नरैः ॥ १७ ॥ ग्रहपीडासु चोग्रासु वधबन्धगतावपि ॥ महार्णवे महानद्यां
पोतस्थेषु न चापदः ॥ १८ ॥ रोगग्रस्तो विवर्णश्च गतकेशनखत्वचः ॥ पठनाच्छ्रवणाद्वापि दिव्यकाया भवंति ते ॥ १९ ॥ तुलसीवनसंस्थाने
सरोद्वीपे सुरालये ॥ बद्रिकाश्रमे शुभे देशे गंगाद्वारे तपोवने ॥ २२० ॥ मधुवने प्रयागे च द्वारकायां समाहितः ॥ महाकालवने सिद्धे
नियताः सर्वकामिकाः ॥ २१ ॥ ये पठंति शतावर्तं भक्तिमंतो जितेंद्रियाः ॥ ते सिद्धाः सिद्धिदा लोके विचरंति महीतले ॥ २२ ॥
अन्योन्यभेदभेदानां मैत्रीकरणमुत्तमम् ॥ मोहनं मोहनानां च पवित्रं पापनाशनम् ॥ २३ ॥ बालग्रहविनाशाय शांतीकरणमुत्तमम् ॥
दुर्वृत्तानां च पापानां बुद्धिनाशकरं परम् ॥ २४ ॥ पतद्गर्भा च वंध्या च स्राविणी काकवन्ध्यका ॥ अनायासेन सततं पुत्रमेव प्रसूयते ॥
॥ २५ ॥ पयःपुष्कलदा गावो बहुधान्यफला कृषिः ॥ स्वामिधर्मपरा भृत्या नारी पतिव्रता[4] भवेत् ॥ २६ ॥ अकालमृत्युनाशाय तथा
दुःस्वप्नदर्शने ॥ शांतिकर्मणि सर्वत्र स्मर्तव्यं च सदा नरैः ॥ २७ ॥ यः पठत्यन्वहं मर्त्यः शुचिष्मान्विष्णुसन्निधौ ॥ एकाकी च जिता

१ रणे—इ०पा० । २ अक्षयम्—इ०पा० । ३ दावाग्निपरिपीडिते—इ०पा० । ४ धर्मवती—इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हारो जितक्रोधो जितेंद्रियः ॥ २८ ॥ गरुडारोहसंपन्नः पीतवासाश्चतुर्भुजः ॥ वाञ्छितं प्राप्य लोकेऽस्मिन्विष्णुलोके स गच्छति ॥ २९ ॥ एकतः सकला विद्या एकतः सकलं तपः ॥ एकतः सकलो धर्मो नाम विष्णोस्तथैकतः ॥ २३० ॥ यो हि नामसहस्रेण स्तोतुमिच्छति वै द्विजः॥ सोऽयमेकेन श्लोकेन स्तुत एव न संशयः ॥ ३१ ॥ सहस्राक्षः सहस्रपात्सहस्रवदनोज्ज्वलः ॥ सहस्रनामानंताक्षः सहस्रबाहुर्नमोस्तु ते ॥ ३२ ॥ विष्णोर्नामसहस्रं वै पुराणं वेदसम्मतम् ॥ पठितव्यं सदा भक्तैः सर्वमंगलमंगलम् ॥ ३३ ॥ इति स्तवाभियुक्तानां देवानां तत्र वै द्विज ॥ प्रत्यक्षं प्राह भगवान्वरदो वरदार्चितः ॥ ३४ ॥ ॥ श्रीभगवानुवाच ॥ ॥ व्रियतां भोः सुराः सर्वैर्वरोऽस्मत्तोभिवांछितः ॥ तत्सर्वं संप्रदास्यामि नाऽत्र कार्या विचारणा ॥ ३५ ॥ ॥ देवा ऊचुः ॥ ॥ वरदोऽसि यदा विष्णो वरमेतं ददस्व नः ॥ अदितेर्गर्भसंभूतः शक्रस्याऽप्यनुजो भव ॥ ३६ ॥ इति संप्रार्थितो देवैर्ब्रह्मशक्रपुरोगमैः ॥ तथेत्युक्त्वा च भगवांस्तत्रैवांऽतरधीयत ॥ ३७ ॥ ततः कतिपये काले भगवानदितिनंदनः ॥ विष्णुरूपधरोऽनंतो वामनत्वाच्च वामनः ॥ ३८ ॥ बलिर्वैरोचनो व्यास वाजिमेधशतेन च ॥ ईजे द्विजवरश्रेष्ठ इंद्रराज्यजिहीर्षया ॥३९॥ ऋत्विजं कश्यपं कृत्वा होतारं भृगुसत्तमम् ॥ ब्रह्मा तत्राभवच्चैव स्वयमेव पितामहः ॥ २४० ॥ अध्वर्युर्भगवानत्रिर्बभूव मुनिसत्तमः ॥ उद्गाता नारदश्चैव वसिष्ठश्च सभासदः ॥ ४१ ॥ ये यत्र विहिताः सर्वे तत्र तत्र मुनीश्वराः ॥ बलिस्तत्राऽभवद्व्यास दीक्षितो राजसत्तमः ॥ ४२ ॥ एवं प्रवर्तमानेषु यज्ञेषु मुनिसत्तम ॥ हूयतां भुज्यतां चैव दीयतां धीयतां तथा ॥ ४३ ॥ इति वाचः शुभास्तत्र श्रूयंते च द्विजोत्तम ॥ तस्मिन्काले सुचित्रेषु वामनोऽगाच्छुचिस्मितः ॥ ४४ ॥ पठमानो मुखाग्रेण चातुर्वेदिकमंत्रकान् ॥ द्वारे तिष्ठति राजेंद्र॰ वामनो द्विजसत्तमः ॥ ४५ ॥ प्रतिहारेण वै व्यास सर्वं राज्ञे निवेदितम् ॥ उत्थाय च महाराजो बलिर्वैरोचनिस्तदा ॥ ४६ ॥ अर्घ्यमादाय तत्सर्वं जगाम स्वैः सभासदैः ॥ पूजयित्वा यथान्यायं वामनं लोकभावनम् ॥ ४७ ॥ आनयित्वा सभामध्ये दत्त्वाऽऽसनपरिग्रहम् ॥ कुतस्त्वागमनं ब्रह्मन्किं तेऽभीष्टं ददामि वै ॥ ४८ ॥ ॥ ॥ वामन उवाच ॥ ॥ राजराजाखिला सृष्टिर्ब्रह्मणः परमेष्ठिनः ॥ ततोऽहमागतो भूमन्यज्ञं चैव दिदृक्षया ॥ ४९ ॥ वरुणस्य च यज्ञो वै दृष्टो मे वै पुरानघ ॥ यक्षाधिपतेर्नूनं च यज्ञं वै दृष्टवानहम् ॥ २५० ॥ धर्मस्याऽपि च यज्ञो मे प्रजापतेश्च सत्तम ॥ वायोर्यज्ञो महाराज दृष्टो मे विधिपूर्वकः ॥ ५१ ॥ राजर्षीणां च ये यज्ञा दृष्टास्तेऽपि महाव्रत ॥ यादृशं वै महाराज यज्ञं ते दृष्टवानहम् ॥ ५२ ॥ ईदृशो राज

१ अभूत्–इति शेषः । २ सुचित्रेषु–विविधकर्मयोगविशेषेषु–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





राजेंद्र न भूतो न भविष्यति ॥ तस्मादिहागतो राजन्याचनार्थं तवाऽनघ ॥ ५३ ॥ ॥ बलिरुवाच ॥ ॥ याचस्व त्वं द्विजश्रेष्ठ किं तेऽभीष्टं ददाम्य
हम् ॥५४॥ ॥ वामन उवाच ॥ ॥ देहि मे राजराजेंद्र पदानि त्रीणि मेदिनीम् ॥ वासार्थं रोचते तेऽद्य यदि पार्थिवसत्तम ॥५५॥ ॥ बलिरुवाच॥ ॥
किमिदं याचितं विप्र स्वल्पं ते नहि ते परम् ॥ गजवाजिरथाः क्षोणी रत्नानि विविधानि च ॥ ५६ ॥ दासदासीर्वरारोहाः स्त्रियो नाना वसूनि च ॥
द्रव्याणि वाससी शुभ्रे याचस्व त्वं द्विजोत्तम ॥५७॥ पात्रोऽसि कृतकृत्योऽसि वेदवेदांगपारग ॥५८॥ ॥ वामन उवाच ॥ ॥ न मे किंचित्स्पृहा राज
न्विद्यते भुवि मानद ॥ देहि त्वं त्रिपदां भूमिं यदि श्रद्धाऽस्ति तेऽधुना ॥ ५९ ॥ इत्युक्ते वामनेनाथ बलिर्वचनमब्रवीत् ॥ गृहाण त्रिपदां भूमिं
वासस्यार्थं हि मानद ॥ २६० ॥ इत्युक्त्वा स च राजर्षिर्ददौ भूमिं द्विजाय वै ॥ वारितोऽपि तदा व्यास भृगुणा दैवनोदितः ॥ ६१ ॥ दत्तमात्रे जले
सद्यो ब्रह्माण्डं चाक्रमद्धरिः ॥ सार्धपादद्वयं जाता सशैलवनकानना ॥ ६२ ॥ वसुधेयं तदा व्यास बलिना चार्पितं वसु ॥ जित्वाऽसुरगणान्त्सर्वा
न्राज्यं दत्त्वा शतक्रतोः ॥ ६३ ॥ पश्चात्कुमुद्वतीं प्राप्तो विष्णुर्वामनरूपधृक् ॥ ६४ ॥ ऋद्धिसिद्ध्याश्रमे पुण्ये तीर्थं कृत्वाऽऽत्मसंभवम् ॥ निवासम
करोद्व्यास तत्रैव स सुरोत्तमः ॥ ६५ ॥ वामनेन कृतं तीर्थं वामनं कुण्डमुच्यते ॥ भाद्रे मासि सिते पक्षे द्वादशी श्रवणान्विता ॥ ६६ ॥ वामन
द्वादशी प्रोक्ता हत्याकोटिविनाशिनी ॥ अस्मिंस्तीर्थे नरः स्नात्वा ह्युपोष्यैकादशीं यदा ॥ ६७ ॥ रात्रौ जागरणं कुर्याद्ब्रह्मभूयाय कल्पते ॥
द्वादश्यां वै विशेषेण महादानानि कुर्वते ॥ ६८ ॥ न तेषां दुर्लभं किंचित्त्रिषु लोकेषु विद्यते ॥ एवं वै वामनं तीर्थं पुरा प्रोक्तं महर्षिणा ॥
॥ ६९ ॥ सर्वपापहरं पुण्यं सर्वकामवरप्रदम् ॥ प्राप्यते तेन सर्वं हि नाऽत्र कार्या विचारणा ॥ २७० ॥ इति श्रीस्कांदे महापुराण एकाशीति
साहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये वामनकुण्डमहिमविष्णुसहस्रनामकथनंनाम त्रिषष्टितमोऽध्यायः ॥ ६३ ॥ ॥ छ ॥
॥ ॥ सनत्कुमार उवाच ॥ ॥ अतः परं प्रवक्ष्यामि वीरेश्वरमथो शृणु ॥ तस्मिंस्तीर्थे नरः स्नात्वा वीरलोकमवाप्नुयात् ॥ १ ॥ नागानां
प्रवरं तीर्थं सर्वकामवरप्रदम् ॥ कालभैरवमित्याख्यं तच्च तीर्थं परं स्मृतम् ॥ २ ॥ यस्य दर्शनमात्रेण सर्वदुःखातिगो भवेत् ॥ ३ ॥ ॥ व्यास
उवाच ॥ ॥ कस्मिन्काले हि विख्यातं कालभैरवसंज्ञितम् ॥ तीर्थं मुनिवरश्रेष्ठ एतद्विस्तरतो वद ॥ ४ ॥ ॥ सनत्कुमार उवाच ॥ ॥ पुराऽ
यं भैरवो योगी योगिनीत्रासकारकः ॥ कालचक्रकृताः कृत्या योगिनीनां गणास्तदा ॥ ५ ॥ तासां कालीति विख्याता योगिनी परमोत्तमा ॥
तयायं पालितो नित्यं पुत्रवद्भैरवोऽमलः ॥ ६ ॥ तेनैते च विनिर्धूता दोषोत्पाताश्च सत्तम ॥ त्रिविधा भुवि विख्याताः सर्वविघ्नकराः पराः ॥ ७ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालकृत्यास्तदा तेन अंशिताः परमात्मना॥महामारी पूतना कृत्या शकुनी रेवती खला॥८॥कोटरी तामसी माया नवैता मातृकाःस्मृताः॥दुष्टदोषवहा दुष्टाः सर्वप्राणिभयंकराः ॥९॥ वशीचक्रे स धर्मात्मा सर्वकामवरप्रदाः ॥ शिप्रातीरे स्थितो नित्यं कूले चोत्तरतः शुभे ॥१०॥ ऊषरस्य परे पूर्वे सोऽपि तिष्ठति सर्वदा ॥ आषाढस्य सिते पक्षे रविवारे समाहितः ॥११॥ नवमीं चाऽष्टमीं प्राप्य चतुर्दश्यां विशेषतः ॥ पूजां कुर्वंति ये केचिन्नरा निश्चलमानसाः ॥ १२ ॥ विवाहे पुत्रजनने मांगल्ये च शुभे परम् ॥ पत्रपुष्पार्घगंधैश्च नैवेद्यैर्विविधैस्तथा ॥ १३ ॥ तांबूलवासगंधाद्यैः पूजयेद्रुद्ररूपिणम् ॥ विप्राणां भोजनैर्होमैस्तर्पयेत्सततं विभुम् ॥ १४ ॥ एतत्परमकल्याणमेतत्परममंगलम् ॥ नत्वा स्तुत्वा च तं देवं सर्वकामार्थसिद्धये ॥ ॥ १५ ॥ सकलकलुषहारी धूर्तदुष्टांऽतकारी सुचिरचरितचारी मुंडमौंजीप्रचारी ॥ करकलितकपाली कुण्डली दंडपाणिः स भवतु सुखकारी भैरवो भावहारी ॥ १६ ॥ विविधरासविलासविलासितं नववधूरवधूतपराक्रमम् ॥ मदविघूर्णितगोष्पदगोष्पदं भवपदं सततं सततं स्मरे ॥ १७ ॥ अमलकमलनेत्रं चारुचंद्रावतंसं सकलगुणगरिष्ठं कामिनीकामरूपम् ॥ परिहृतपरितापं डाकिनीनाशहेतुं भज जन शिवरूपं भैरवं भूतनाथम् ॥ ॥ १८ ॥ सबलबलविघातं क्षेत्रपालैकपालं विकटकटिकरालं ह्यट्टहासं विशालम् ॥ करगतकरवालं नागयज्ञोपवीतं भज जन शिवरूपं भैरवं भूतनाथम् ॥ १९ ॥ भवभयपरिहारं[1] योगिनीत्रासकारं सकलसुरगणेशं चारुचंद्रार्कनेत्रम् ॥ मुकुटरुचिरभालं मुक्तमालं विशालं भज जन शिवरूपं भैरवं भूतनाथम् ॥ २० ॥ चतुर्भुजं शंखगदाधराऽऽयुधं पीतांबरं सांद्रपयोदसौभगम् ॥ श्रीवत्सलक्ष्मं गलशोभिकौस्तुभं शीलप्रदं शंकररक्षणं भजे ॥ २१ ॥ लोकाऽभिरामं भुवनाभिरामं[2] प्रियाभिरामं यशसाभिरामम् ॥ कीर्त्याभिरामं तपसाऽभिरामं तं भूतनाथं शरणं प्रपद्ये ॥ २२ ॥ आद्यं ब्रह्म सनातनं शुचिपरं सिद्धिप्रदं कामदं सेव्यं भक्तिसमन्वितं हरिहरैः सृष्ट्यासहं साधुभिः ॥ योग्यं योगविचारितं युगधरं योग्याननं योगिनं वंदेहं सकलं कलंकरहितं सत्सेवितं भैरवम् ॥ २३ ॥ भैरवाष्टकमिदं पुण्यं प्रातःकाले पठेन्नरः ॥ दुःस्वप्ननाशनं तस्य वांछितार्थफलं भवेत् ॥ २४ ॥ राजद्वारे विवादे च संग्रामे संकटे तथा ॥ राज्ञा क्रुद्धेन चाऽऽज्ञप्ते शत्रुबंधगते तथा ॥ २५ ॥ दारिद्र्यदुःखनाशाय पठितव्यं समाहितैः ॥ न तेषां जायते किंचिद्दुर्लभं भुवि वांछितम् ॥२६॥ ॥ इति भैरवाष्टकम् ॥ ॥ अस्मिंस्तीर्थे प्रकर्तव्यं स्नानदानादिकं नरैः॥संसारभयभीतैश्च पूजितो

१ योगिनीत्रासहारकः--इ० पा० । २ वचलाभिरामम्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

भैरवो वरः ॥ तस्मात्सर्वप्रयत्नेन कर्तव्यं तीर्थमुत्तमम् ॥ २७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे ऽवन्तीक्षेत्रमाहात्म्ये कालभैरवतीर्थयात्रावर्णनंनाम चतुःषष्टितमोऽध्यायः ॥ ६४ ॥ ॥ व्यास उवाच ॥ ॥ नागतीर्थं त्वया ब्रह्मन्पुरा प्रोक्तं यशस्विना ॥ तस्य तीर्थवरस्याऽपि महिमानं च सत्तम ॥ १ ॥ भूयस्तु श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ॥ कियत्काले समाख्यातमेतद्विस्त रतो वद ॥ २ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु ब्रह्मन्प्रवक्ष्यामि तवाऽग्रे नागतीर्थजाम् ॥ कथां पुण्यतमां तुभ्यं भुवि पापहरां पराम् ॥ ३ ॥ यस्याः श्रवणमात्रेण शापमुक्तो भवेन्नरः ॥ पुरा नागाः परिभ्रष्टा मातुः शापात्परंतप ॥ ४ ॥ जनमेजयेन दग्धास्ते मोक्षिता ह्यास्तिकेन च ॥ पप्रच्छुस्ते द्विजश्रेष्ठ जरत्कार्वात्मजं तदा ॥ ५ ॥ ॥ नागा ऊचुः ॥ ॥ ब्रह्मंस्तव प्रसादेन मोक्षिता हव्यवाहनात् ॥ जनमेजयस्य यज्ञे स्मिन्देवराजस्य संनिधौ ॥ ६ ॥ अस्माकं भूतिमन्विच्छन्वासस्यार्थं परंतप ॥ यस्मिन्स्थाने सदा ब्रह्मन्निवासो जायतेऽभयः ॥ ७ ॥ ॥ आस्तीक उवाच ॥ ॥ श्रूयतां मातुलश्रेष्ठा युष्माकं हितमुत्तमम् ॥ महाकालवने रम्ये या वै कुशस्थली स्मृता ॥ ८ ॥ तस्या हि दक्षिणे भागे पूर्वतीर्थं सना तनम् ॥ नागालयं पुरा प्रोक्तं यत्र सन्निहितो हरिः ॥ ९ ॥ योगनिद्रां समासाद्य शेते ब्रह्म सनातनम् ॥ शेषशायीति विख्यातः सर्वलोकेषु गीयते ॥ १० ॥ कल्पदोषो न तत्रैव बाधते सर्वदेहिनाम् ॥ बकदाल्भ्य ऋषिस्तत्र तपस्तेपे धृतव्रतः ॥ १० ॥ लोमशश्च महातेजास्तत्रैव प्रतितिष्ठति ॥ दीर्घायुष्ट्वं समापन्नो मार्कंडेयो महामुनिः ॥ १२ ॥ न वर्तते कालचक्रं महाकालप्रतापतः ॥ कपिलः सिद्धिमापन्नो यत्र तीर्थवरोत्तमे ॥१३॥ हरि श्चंद्रो विमुक्तोऽभूद्दग्धचण्डालयोनितः॥सप्तर्षिप्रवरा ये ते निर्वाणपदवीं गताः ॥१४॥ एतस्मात्कारणात्सर्वैस्तत्र विश्रम्यतां सदा ॥ मातुः शापोद्भवो दोषो युष्माकं नैव बाधते ॥ १५ ॥ एतत्ते वचनं श्रुत्वा महर्षेरास्तिकस्य च ॥ आगच्छंस्तत्र ते शीघ्रं वासार्थं पन्नगोत्तमाः ॥ १६ ॥ एलापत्रः कंबलश्च कर्कोटकधनंजयौ ॥ वासुकिः पन्नगश्रेष्ठस्तक्षको नील एव च ॥ १७ ॥ पद्मकश्चार्बुदश्चैव नागास्ते सर्व एव हि ॥ अत्रागत्य स्वस्वस्थानानि चक्रुस्ते सुचिरव्रताः ॥ १८ ॥ तत्र रम्याणि तीर्थानि जातानि परमाणि च ॥ नवानि चक्रुः कुंडानि तीर्थभूतानि सत्तम ॥ १९ ॥ महापुण्यप्रदा न्याहुर्महापापहराणि च ॥ यत्र सिद्धाश्च गंधर्वा ऋषयः संशितव्रताः ॥ २० ॥ अप्सरोगणसंघैश्च सेव्यंते च सदा वरैः ॥ यत्र शेषो महानागः पुरा प्रोक्तो महर्षिणा ॥ २१ ॥ शेषशायी ह्ययं विष्णुर्भगवान्कमलेक्षणः ॥ तत्र सर्वाणि तीर्थानि तिष्ठंति भुवि सर्वदा ॥ २२ ॥ श्वेतद्वीपेतिवि ख्याता मणिविक्रांतभूमिका ॥ यत्र पुण्याश्च वै वृक्षाः पुष्पिताश्चैव सर्वशः ॥ २३ ॥ हंसकारंडकाकादिपिककोकिलसारसाः ॥ पद्मखंडगणास्तत्र



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नृत्यंति च शि[1]खंडिनः ॥ २४ ॥ निधिरेष महापद्मो नीलोत्पलसुगंधिना ॥ वासितो वायुना शुभ्रः किन्नरोद्गारनादितः ॥ २५ ॥ यत्र सुसंस्कृता नार्यो विहरंति सुरांगनाः॥नागकन्याभी रम्याभिर्मंडितं परमाद्भुतम् ॥२६॥ यत्र स्नात्वा नरो याति वैकुंठं धाम शोभनम् ॥ शेषशायी हरिर्यत्र शेते हि च रमापतिः ॥ २७॥ तत्र रमासरोनाम तीर्थं परमशोभनम् ॥ यत्र स्नात्वा नरो नित्यं श्रीमान्भवति नाऽन्यथा ॥२८॥ एवं व्यास परं स्थानं सर्वपापहरं परम् ॥ अत्रैव च परं तीर्थं बलेराश्रममद्भुतम् ॥ २९ ॥ अत्र स्नानादिकं कार्यं यत्र संनिहितो हरिः ॥ सर्वपापविशुद्धात्मा नरो भवति तत्क्षणात् ॥ ३० ॥ कियत्प्रमाणमात्रां च ये ददति वसुंधराम् ॥ तनूरुहाणि यावन्ति तावत्कालसुसंख्यया ॥ ३१ ॥ अक्षय्या लभ्यते वृद्धिस्तेषां लोकाः सनातनाः ॥ श्रावणे मासि दर्शे च पंचम्यां सोमवासरे ॥ ३२ ॥ नागानां पूजनं कार्यं श्राद्धं दर्शे विधीयते ॥ अक्षयं जायते श्राद्धं वांछितार्थं भवेत्ततः ॥ ३३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये तीर्थयात्रायां नागतीर्थमहिमवर्णनंनाम पंचषष्टितमोऽध्यायः ॥ ६५ ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ भूयः शृणु परं व्यास तीर्थानामुत्तमं वरम् ॥ तत्तीर्थं सर्वपापघ्नं नृसिंहस्य महात्मनः ॥ १ ॥ यस्य दर्शनमात्रेण सर्वपापं समुत्तरेत् ॥ दैत्यराजः समाख्यातो हिरण्यकशिपुः पुरा ॥ २ ॥ तेनेयं वसुधा सर्वा संप्राप्ता च दुरात्मना ॥ दुष्टदैत्यबलैर्व्याप्ता भाराक्रांता शुचार्दिता ॥ ३ ॥ गौर्भूत्वाऽश्रुमुखी दे[2]वैर्ब्रह्माणं शरणं ययौ ॥ भाराक्रांतां धरां दृष्ट्वा ब्रह्मा लोकपितामहः ॥ ४ ॥ उवाच श्लक्ष्णया वाचा तस्याः श्रमं व्यपोहितुम् ॥ श्रूयतां भोऽवने पुण्ये भवत्या उपकारकम् ॥ ५ ॥ वचो वदामि ते तथ्यं देशकालोचितं तथा ॥ पुराऽनेन तपश्चीर्णं दुष्करं सर्वदेहिनाम् ॥ ६ ॥ गायत्र्युपासना तेन कृता सुनियतात्मना ॥ मया[3] चास्य वरो दत्तः प्रीतियुक्तेन चेतसा ॥ ७ ॥ न दिवा न तथा रात्रौ नांतरिक्षे न भूतले ॥ नातिशुष्केण चार्द्रेण न चास्त्रशस्त्रघातनैः ॥ ८ ॥ न देवासुरगंधर्वैर्न यक्षोरगकिन्नरैः ॥ पिशाचैर्गुह्यकाद्यैश्च राक्षसैर्न कदाचन ॥ ९ ॥ मानवैः पक्षिजातैश्च न मे मृत्युर्भवेदिति ॥ एककरतलाघातैः सकुलबलवाहनम् ॥ १०॥ मारयिष्यति मां वीरः स मे मृत्युर्भविष्यति ॥ तथेत्युक्त्वाऽतिहृष्टात्मा तमहं च तदाऽवने ॥११॥ आगमं चैव लोकं स्वं स दैत्यो घोरशासनः ॥ बभूव सर्वलोकानां शास्ता चातुलविक्रमः ॥ १२ ॥ तस्यैवाऽधिकृता लोके बभूवुर्विगतज्वराः ॥ त्रैलोक्यं बुभुजे नित्यं सर्वदैत्यजनेश्वरः ॥ १३ ॥ तस्माद्यूयं वनं यात महाकालं महेशितुः ॥ तत्र तीर्थं महच्चासीत्सर्वतीर्थवरोत्तमम् ॥ १४ ॥ संगमेश्वरस्य दक्षिणे कर्क

१ रमन्ति च–इ०पा० । २ खिन्ना–इ०पा० । ३ ब्रह्मणा च–इ०पा० । ४ ब्रह्मा लोकपितामहः–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



राजोत्तरे तथा ॥ शिप्रातीरे शुभे देशे पूर्वं वैकुण्ठसन्निभम् ॥ १५ ॥ नृसिंहाख्यं परं धाम तस्य तीर्थं प्रतिष्ठितम् ॥ तत्र गत्वा सुरश्रेष्ठाः स्नानदानादिकाः क्रियाः ॥ १६ ॥ कुरुत सत्वरं सर्वे पुनर्लोकानवाप्स्यथ ॥ ते तस्य वचनं श्रुत्वा देवा इन्द्रपुरोगमाः ॥ १७ ॥ महाकालवनं प्राप्ता यत्र शिप्रा पयस्विनी ॥ नृसिंहतीर्थोपकूले उषित्वा शाश्वतीः समाः ॥ १८ ॥ स्नानदानादिकं कृत्वा नृसिंहस्याऽर्चनं तथा ॥ एवं कृत्वा विधानेन परां सिद्धिमितो गताः ॥ १९ ॥ नृसिंहस्य स्वरूपेण हतो दानवपुंगवः ॥ सभामध्ये तदा व्यास हरिणाऽमित्रघातिना ॥ २० ॥ करेणैकप्रहारेण हिरण्यकशिपुर्हतः ॥ ततः सुरगणाः सर्वे स्वाधिकारान्ययुस्तदा ॥ २१ ॥ तदारभ्य सुराः सर्वे मध्याह्नोपासनं सदा ॥ प्रकुर्वंति च तत्रैव यत्र तीर्थे हरिः परम् ॥ २२ ॥ एवं तीर्थं परं व्यास अवंत्यां विद्यते भुवि ॥ अस्मिंस्तीर्थे द्विजश्रेष्ठ स्नानदानादिकाः क्रियाः ॥ २३ ॥ ये कुर्वंति नराः पुण्यास्ते यांति परमां गतिम् ॥ सर्वदा सर्वकालेषु पुण्यदं तीर्थमुत्तमम् ॥ २४ ॥ कदाचिन्नृसिंहतिथिं प्राप्य चैव चतुर्दशीम् ॥ स्नानं कृत्वाऽर्चनं तस्य नृसिंहस्य च धीमतः ॥ २५ ॥ नृसिंहेश्वरदेवेशं पूजयेद्यः समाहितः ॥ तस्य हस्तगता लक्ष्मीर्भविष्यति न संशयः ॥ २६ ॥ ततोऽगस्त्येश्वरं[1] देवं यः पश्येत्सुसमाहितः ॥ तस्य व्यास क्षितौ किंचिद्दुर्लभं नैव दृश्यते ॥ २७ ॥ यत्र सिद्धिं परां प्राप्तो हनुमान्पवनात्मजः ॥ ब्रह्मचारी सदाचारो यतिः सर्वार्थसाधकः ॥ २८ ॥ तिष्ठति परदैवज्ञः सर्वकामार्थसिद्धये ॥ यस्मिन्वटे पुरा तप्तं तपः परमदुश्चरम् ॥ २९ ॥ मित्रावरुणपुत्रेण सिद्धिहेतोस्तपस्विना ॥ बोधी न्यग्रोध इत्याख्यो ह्यगस्तिवट एव च ॥ ३० ॥ नरो नारीसमायुक्तः सावित्रीव्रतमाचरेत् ॥ सौभाग्यं लभते नित्यं सावित्र्याश्च परंतप ॥ ३१ ॥ यस्मिंस्तीर्थे नरः स्नात्वा दत्त्वा दानं च सौभगम् ॥ अष्टसौभाग्यसंपूर्णं वंशपात्रं सवासकम् ॥ ॥ ३२ ॥ सप्तधान्यसमोपेतं पंचरत्नपरिष्कृतम् ॥ सौगंध्यादीनि माल्यानि मौलिसूत्रसमायुतम् ॥ ३३ ॥ सावित्रीं हाटकीं कृत्वा यथाशक्ति परंतप ॥ यो वै ददाति विप्राय वेदवेदांगधीमते ॥ ३४ ॥ लभते विपुलां लक्ष्मीं बहुभोगकरीं शुभाम् ॥ भुक्त्वा वै विविधान्भोगान्पुनः स्वर्गमवाप्नुयात् ॥ ३५ ॥ सावित्रीव्रतकृन्नारी जायते पतिवल्लभा ॥ पतिव्रता महाभागा विधवा न कदाचन ॥ ३६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये नृसिंहतीर्थमहिमवर्णनंनाम षट्षष्टितमोऽध्यायः ॥ ६६ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु व्यास परं तीर्थं भुवि विख्यातमुत्तमम् ॥ कुटुम्बेश्वरेतिविख्यातो नाम्ना चैव महेश्वरः ॥ १ ॥ तस्य तीर्थं



[1] हास्तिपकं पुण्यम्–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वरं तीर्थं सर्वतीर्थफलप्रदम् ॥ यस्मिंस्तीर्थे नरः स्नात्वा कुटुम्बी जायते ध्रुवम् ॥ २ ॥ कुटुम्बार्थं तपस्तेपे पुरा दक्षः प्रजापतिः ॥ नारदेन पुरा व्यास पुत्रषष्टिर्विवासिता ॥ ३ ॥ प्रजाकामः स धर्मात्मा सुचिरं व्रतमाचरत् ॥ सपत्नीको महातेजा निराहारो जितेन्द्रियः ॥ ४ ॥ अस्मिंस्तीर्थे शुचिः स्नातो जपन्ब्रह्म सनातनम् ॥ वर्षाणामयुतं व्यास तपस्तेपे सुदारुणम् ॥ ५ ॥ तेन तीर्थप्रसादेन लभेत्स बहुलां प्रजाम् ॥ प्रजापतिरिति ख्यातो जातो दक्षः प्रतापवान् ॥ ६ ॥ ब्रह्माऽपि तत्र वै पश्चात्तपः कृत्वा सुदुष्करम् ॥ निष्कलंकमलं रूपं प्राप्तवांस्तत्क्षणाद्विधिः ॥ ७ ॥ महादेवोऽपि तत्रैव प्राप्तवान्ब्रह्मणः पदम् ॥ चतुर्मुखधरं लिंगं दृश्यतेऽद्यापि सत्तम ॥ ८ ॥ भद्रपीठधरा देवी भद्रकालीति विश्रुता ॥ तत्रैव च सदा व्यास क्रीडतिस्म धृतव्रता ॥ ९ ॥ द्वारे तिष्ठति तत्रैव भैरवः क्षेत्रपालकः ॥ पादेन खंजतां यातः पुरा दैत्यवरार्दितः ॥ १० ॥ पुत्रवत्पालितो देव्या सदा तिष्ठति तत्स्थले ॥ ये ते देवगणाः सर्वे तस्मिंस्तीर्थे प्रतिष्ठिताः ॥ ११ ॥ ऋषयोऽपि महाभागाः सदा पर्वणिपर्वणि ॥ आयांति चैव संध्यार्थं बहुपुत्रप्रदे सरे ॥ १२ ॥ अस्मिंस्तीर्थे सदाचाराः स्नानं कुर्वन्ति ये नराः ॥ न तेषां दुर्लभं किंचिज्जायते जन्मजन्मनि ॥ १३ ॥ महाबाधासु घोरासु महामारीषु तत्परैः ॥ हवनं क्रियते नित्यं सर्षपै राजिकैर्यवैः ॥ १४ ॥ पायसैर्विविधैर्भोगैस्तेषां दोषो न जायते ॥ दुर्भिक्षे राज्यभ्रंशे च संग्रामे भृशदारुणे ॥ १५ ॥ पूजयेत्क्षेत्रपालं च सर्वाऽऽपदि समाहितः ॥ सर्वदुःखविनिर्मुक्तो जायते नाऽत्र संशयः ॥ १६ ॥ स्नात्वा कुटुंबके तीर्थे पूजयित्वा महेश्वरम् ॥ दानं कूष्मांडकं दद्याद्ब्राह्मणाय तपस्विने ॥१७॥ सौवर्णमणिमुक्ताभिर्वासोऽलंकारसंयुतम् ॥ धनधान्यसमायुक्तः कुटुंबी जायते नरः ॥ १८ ॥ फाल्गुने च सिते पक्षे या वै चतुर्दशी भवेत् ॥ त्रयोदशीयुता व्यास शिवरात्रिस्तथोच्यते ॥ १९ ॥ तद्दिने च नरः स्नात्वा रात्रौ जागरणं चरेत् ॥ बिल्वोदकेन गंधेन बहुपुष्पफलैस्तथा ॥ २० ॥ धूपैर्दीपैश्च नैवेद्यैर्वासोऽलंकारकादिभिः ॥ पूजयेद्यो नरो भक्त्या गिरीशं सगणं परम् ॥ २१ ॥ तस्य पापं क्षयं याति शिवलोके महीयते ॥ द्वादशैकादशीपुण्यं लभते भुवि मानवः ॥ २२ ॥ अश्वमेधफलं तस्य जागरे च क्षणेक्षणे ॥ ततस्तु प्रातरुत्थाय स्नानदानादिकाः क्रियाः ॥ २३ ॥ कृत्वा तु विधिवद्व्यास शिवपूजाऽर्चनं तथा ॥ विप्रांश्च भोजयेत्सत्त तस्य पुण्यफलं शृणु ॥ २४ ॥ कपिलानां सवत्सानां सहस्राणि चतुर्दश ॥ वाजपेयसहस्रस्य फलं प्राप्नोति नान्यथा ॥ २५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्र

१ नित्यम्–इ० पा० । २ भवति–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





माहात्म्ये कुटुंबेश्वरमाहात्म्यवर्णनंनाम सप्तषष्टितमोऽध्यायः ॥ ६७ ॥ ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु व्यास महापुण्यं तीर्थं परमशोभनम् ॥ देवप्रयागमाख्यातं सर्वपापप्रणाशनम् ॥ १ ॥ देवानां च परं स्थानं यत्र तीर्थं परंतप ॥ सोमतीर्थोत्तरे भागे प्रयागस्य च दक्षिणे ॥ २ ॥ शिप्रायाः पूर्वभागे च तत्र तीर्थं प्रतिष्ठितम् ॥ तत्र तीर्थे नरः स्नात्वा पश्येच्चैव सुरोत्तमम् ॥ ३ ॥ देवं माधवमित्याख्यं भुवि सर्वफलप्रदम् ॥ ददाति तस्य देवेंद्रो वांछितार्थं जगत्पतिः ॥ ४ ॥ आनंदभैरवस्तत्र सर्वदेवनमस्कृतः ॥ यस्य दर्शनमात्रेण सर्वपापक्षयो भवेत् ॥ ॥ ५ ॥ न तस्य जायते व्यास यातना भैरवी कदा ॥ स्वर्गद्वारे सदा व्यास जायते निर्भयः पुमान् ॥ ६ ॥ ज्येष्ठे मासे सिते पक्षे दशम्यां बुध हस्तयोः ॥ गरानन्दे व्यतीपाते कन्याचन्द्रे वृषे रवौ ॥ दशाला जायते वत्स गंगाजन्म परं शुचि ॥७॥ तद्दिने च नरः स्नात्वा सर्वतीर्थफलं लभेत्॥ अखण्डं च परं तीर्थं शृणु व्यास ह्यतः परम् ॥८॥ यस्य श्रवणमात्रेण व्रतभंगो न जायते ॥ एक एव पुरा ब्रह्मन्ब्राह्मणो ब्रह्मवित्तमः॥९॥धर्मशर्मेति विख्यातः सदाचाररतः शुचिः ॥ बहुव्रतधरो दांतो वेदवेदांगपारगः॥१०॥किंचिद्दोषप्रसंगेन व्रतपूर्तिर्न चाभवत् ॥ एवं बहुतिथे काले नारदो देवदर्शनः ॥११॥ तस्य गेहागतो ब्रह्मन्नातिथ्यार्थं महातपाः ॥ तदोत्थाय द्विजो नित्यं बहुमानपुरःसरम् ॥१२॥ सत्कृत्य नारदं भूमन्विधिदृष्टेन कर्मणा ॥ पूजयित्वा द्विजश्रेष्ठः पप्रच्छ मुनिसत्तम ॥ १३ ॥ भगवन्भवता सर्वं विदितं ज्ञानचक्षुषा ॥ अस्माकं च परं दोषः किंचिज्जातः पुराऽनघ ॥ १४ ॥ येन पापप्रसंगेन व्रतभंगोऽभवद्ध्रुवम् ॥ कारणं ब्रूहि मे नाथ किं दोषोऽत्र तु गण्यते ॥ १५ ॥ ॥ नारद उवाच ॥ ॥ श्रूयतां भो द्विजश्रेष्ठ भवद्भिश्च पुराकृतम् ॥ महाराष्ट्रे सुविख्यातो ब्राह्मणो धनसंचकः ॥ १६ ॥ ब्रह्मदत्तेत्यसौ विप्रो वेदब्राह्मणनिंदकः ॥ धनलोभी पराक्रांतः सर्वधर्मबहिर्मुखः ॥ ॥ १७ ॥ नास्तिको देवतीर्थेषु परद्रव्यापहारकः ॥ परस्त्रीषु रतो नित्यं द्यूतवादी च तस्करः ॥ १८ ॥ एवमायुःपरिक्षीणो धनहीनोऽभवत्तदा ॥ इतस्ततोऽभ्रमद्भ्रष्टो नदीतीरे सुविह्वलः ॥ १९ ॥ गतश्चौर्यप्रसंगेन यात्रिकैः सह संगतः ॥ किंचित्कालेषु दुःशीलो मृतिं प्राप्तो रुजार्दितः ॥ २० ॥ नीतः संयमिनीं विप्रस्तत्कालं यमकिंकरैः ॥ यमराजपुरं प्राप्तो बहुपापकरो द्विजः ॥२१॥ दृष्टोऽसौ धर्मराजेन तदा पापपरायणः॥निरीक्ष्य सहसोवाच धर्मपूर्वमिदं वचः ॥२२॥ शृणुध्वं किंकराः सर्वे यूयमेकाग्रमानसाः ॥ अनेनाचरितं सर्वं दुष्कर्म सर्वकिल्बिषम् ॥ २३ ॥ गोदातीरे मृतः पापी तत्र नःकारणं न हि॥तिस्रःकोटयोऽर्धकोटिश्च यानि तीर्थान्यहर्निशम् ॥२४॥ आयांति गौतमीतीरे सिंहस्थेऽपि बृहस्पतौ ॥ तेषां तु वायुसंस्पर्शो



१ महेश्वरम्--इ० पा० । २ चौरक्रियाचारी--इ० पा० ३ किंकरान्धर्मदेवता--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जातोस्यांते कलेवरे ॥ २५ ॥ तेन पुण्यप्रभावेन नोऽस्माकं कारणं क्वचित् ॥ आज्ञो भवद्भिर्नैवायं मुच्यतां भोः पुरःसराः ॥ २६ ॥ एवं तैर्मो
चितो विप्रः पुनर्ब्रह्मगतिं गतः ॥ तेन पापप्रसंगेन व्रतभंगी गतो भुवि ॥ २७ ॥ ॥ ब्राह्मण उवाच ॥ ॥ ब्रह्मन्केन प्रकारेण सर्वपापक्षयो
भवेत् ॥ किं तपः किं च दानं च किं तीर्थव्रतसेवनम् ॥ २८ ॥ येन पुण्यप्रभावेन व्रतभंगो न जायते ॥ २९ ॥ ॥ नारद उवाच ॥ ॥ शृणु
द्विजवरश्रेष्ठ महाकालवनं स्मृतम् ॥ यत्र रुद्रसरः प्रोक्तमृषिणा तत्त्वदर्शिना ॥ ३० ॥ कोटिकोटिसुतीर्थानि वर्तंते द्विजसत्तम ॥ कोटितीर्थेति
विख्यातं तस्माद्द्विज सनातनम् ॥ ३१ ॥ तत्तीर्थस्योत्तरे भागे सुतीर्थं सर्वकामदम् ॥ नाम्नाऽखंडसरः ख्यातमखंडेश्वरसन्निधौ ॥ ३२ ॥ यस्य
दर्शनमात्रेण सर्वयज्ञफलं लभेत् ॥ तस्माद्द्वि सर्वथा वत्स गच्छ त्वं तत्र मा चिरम् ॥ ३३ ॥ इति तस्य वचः श्रुत्वा स द्विजोऽगात्कुमुद्वतीम् ॥
स्नात्वाऽखण्डसरे व्यास दृष्ट्वा देवं महेश्वरम् ॥ ३४ ॥ सद्यः पुण्यवतां लोकान्प्राप्तो वै द्विजसत्तमः ॥ एवं व्यास महातीर्थमखंडेश्वरमुत्तमम् ॥ ३५ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्येऽखंडेश्वरमहिमवर्णनंनामाष्टषष्टितमोऽध्या
यः ॥ ६८ ॥ ॥ सनत्कुमार उवाच ॥ ॥ भूयः शृणु परं तीर्थं सर्वतीर्थफलप्रदम् ॥ कीर्तितं ब्रह्मणा पूर्वं मार्कंडेयस्य पृच्छतः ॥ १ ॥ शृणु वत्स
महीपृष्ठे शिप्रा दिव्यतरा नदी ॥ तस्यास्तीरे वरं तीर्थं कर्कराजेतिविश्रुतम् ॥ २ ॥ यस्य दर्शनमात्रेण महापापक्षयो भवेत् ॥ विकारा मानसाः सर्वे
चंद्रो मानससंभवः॥३॥ तस्य स्थानेग तो भानुर्याम्यायनकरः परः॥ ऋतुत्रयं समाख्यातं विधूम्रार्चिस्तदुच्यते ॥४॥ तत्र मृताः प्रवर्तंते योगिनोऽपि
परंतप॥चातुर्मास्ये हरौ सुप्ते ये नरा व्रतवर्जिताः ॥५॥ न तेषां सद्गतिर्वत्स सत्यमेव ब्रवीमि ते ॥ चातुर्मास्ये मृता ये च ये मृता दक्षिणायने ॥ ६ ॥
तेषामुद्धरणार्थाय तीर्थमेतद्विनिर्मितम् ॥ कर्कराजइतिख्यातं सर्वलोकेषु गीयते ॥ ७ ॥ ॥ मार्कण्डेय उवाच ॥ ॥ भगवन्भवता सर्वं निर्मितं
विश्वमूर्तिना ॥ चराचरमिदं विश्वं जगत्सर्वं जगत्पते ॥ ८ ॥ चातुर्मास्ये हरौ सुप्ते धर्माऽऽचारविधिः स्मृतः ॥ तदहं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां
वर ॥ ९ ॥ ॥ ब्रह्मोवाच ॥ ॥ शृणु वत्स परं पुण्यं चातुर्मास्यफलं शुभम् ॥ यच्छ्रुत्वा भारते खण्डे नृणां मुक्तिर्न दुर्लभा ॥ १० ॥ मुक्तिप्रदोऽयं
भगवान्संसारोत्तारकारणः ॥ यस्य स्मरणमात्रेण सर्वपापक्षयो भवेत् ॥ ११ ॥ मानुष्यं दुर्लभं लोके तत्राऽपि च कुलीनता ॥ तत्राऽपि संयमित्वं
च तत्र सत्संगमः शुभः ॥ १२ ॥ सत्संगमो न यत्राऽस्ति विष्णुभक्तिर्व्रतानि न ॥ चातुर्मास्ये विशेषेण विष्णुव्रतकरः शुभः ॥ १३ ॥ चातुर्मास्ये
ऽव्रती यस्तु तस्य पुण्यं निरर्थकम् ॥ सर्वतीर्थानि दानानि पुण्यान्यायतनानि च ॥ १४ ॥ विष्णुमाश्रित्य तिष्ठंति चातुर्मास्ये समागते ॥ स विष्णु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



राश्रितो नित्यं कर्कराजं सुतीर्थकम् ॥ १५ ॥ सुपुष्टेन च देहेन जीवितं तस्य शोभनम् ॥ चातुर्मास्ये समायाते हरिर्येनाऽर्चितस्तदा ॥ १६ ॥ कृतार्थास्तस्य विबुधा यावज्जीवं वरप्रदाः ॥ संप्राप्य मानुषं देहं चातुर्मास्ये पराङ्मुखः ॥ १७ ॥ तस्य पापशतान्याहुर्देहस्थानि न संशयः ॥ मानुष्यं दुर्लभं लोके हरिभक्तिश्च दुर्लभा ॥ १८ ॥ चातुर्मास्ये विशेषेण सुप्ते देवे जनार्दने ॥ चातुर्मास्ये नरः स्नात्वा कर्कराजे द्विजोत्तम ॥ ॥ १९ ॥ सर्वक्रतुफलं प्राप्य देववद्दिवि मोदते ॥ विशेषेण तु तत्स्नानं कर्कस्थेऽपि दिवाकरे ॥ २० ॥ दुर्लभं सर्वजंतूनां ससुरासुरमानुषम् ॥ देहशुद्धिं विधायाऽऽदौ मुक्तिमार्गमवाप्नुयात् ॥२१॥ तत्राऽपि निर्झरे कूपे तडागे वा सरस्यपि ॥ तस्मात्तदधिकं पुण्यं समाख्यातं सुरासुरैः ॥ तेषु यः स्नाति वै नित्यं तस्य पापक्षयो भवेत् ॥ २२ ॥ तस्मान्नद्यधिका पुण्या समाख्याता सुरासुरैः ॥ पुष्करे च प्रयागे च यत्र क्वाऽपि महाजले ॥ २३ ॥ चातुर्मास्ये तु यः स्नाति पुण्यसंख्या ततोऽधिका ॥ रेवायां भास्करे क्षेत्रे प्राच्यां सागरसंगमे ॥ २४ ॥ एकाहमपि यः स्नाति चातुर्मास्ये न दुःखभाक् ॥ दिनत्रयं च यः स्नाति नर्मदायां समाहितः ॥२५॥ सुप्ते देवे जगन्नाथे पापं याति सहस्रधा ॥ पक्षमेकं तु यः स्नाति गोदावर्यां दिनोदये ॥ २६ ॥ स भित्त्वा कर्मजं देहं याति विष्णोः सलोकताम् ॥ अवंत्यां कर्कराजे तु साक्षाद्विष्णुर्भवेन्नरः ॥ क्षणमेकं क्षणार्धं वा चातुर्मास्येऽतिलंघयेत् ॥ २७ ॥ तिलोदकेनामलसंयुतेन बिल्वोदकेनापि च मज्जयेद्यः ॥ न तस्य जानामि फलाधिकं वै किं तस्य कीदृङ्मुनिभिः प्रणीतम्[1] ॥ २८ ॥ गंगां स्मरति यो नित्यमुदपानसमीपतः ॥ तद्गांगेयजलं जातं तेन स्नानं समाचरेत् ॥ २९ ॥ गंगाऽपि देवदेवस्य चरणांऽगुष्ठवाहिनी ॥ पापहा सा सदा प्रोक्ता चातुर्मास्ये विशेषतः ॥ ३० ॥ चातुर्मास्ये जलगतो देवो नारायणो भवेत् ॥ सर्वतीर्थाऽधिकं स्नानं विष्णुतेजोंऽशसंगतम् ॥ ॥ ३१ ॥ स्नानं दशविधं कार्यं विष्णुनाम्ना महाफलम् ॥ सुप्ते देवे विशेषेण नरो देवत्वमाप्नुयात् ॥ ३२ ॥ विना स्नानं तु यत्कर्म पुण्यकार्यमयं शुभम् ॥ क्रियते विफलं ब्रह्मंस्तद्गृह्णन्ति हि राक्षसाः ॥ ३३ ॥ स्नानेन सत्यमाप्नोति सत्ये धर्मः सनातनः ॥ धर्मान्मोक्षपथं प्राप्य पुनर्नैवावसीदति ॥ ॥ ३४ ॥ ये चाध्यात्मविदः पुण्या ये च वेदांतपारगाः ॥ सर्वदानप्रदाने च तेषां स्नानेन शुध्यति ॥ ३५ ॥ कृतस्नानस्य हि हरिर्देहमाश्रित्य तिष्ठति ॥ सर्वक्रियाफलं येषु संपूर्णफलदं भवेत् ॥ ३६ ॥ सर्वपापविनाशाय देवतातोषणाय च ॥ चातुर्मास्ये जलस्नानं सर्वपापक्षयावहम् ॥ ३७ ॥ निशायां चैव न स्नायात्संध्यायां ग्रहणं विना ॥ उष्णोदकेन न स्नायाद्रात्रौ शुद्धिर्न जायते ॥ ३८ ॥ भानुसंदर्शनाच्छुद्धिर्विहिता सर्वकर्मसु ॥ चातु

१ प्रदिष्टम्—इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्मास्ये विशेषेण जलशुद्धिस्तु भाविनी ॥ ३९ ॥ अशक्त्यां तु शरीरस्य भस्मस्नानेन शुध्यति ॥ मंत्रस्नानेन विप्रेंद्र विष्णुपादोदकेन वा ॥ ४० ॥ नारायणाऽग्रतः स्नानं क्षेत्र तीर्थे नदीषु च ॥ विशेषतोऽपि शिप्रायां तीर्थे कर्काभिधे वरे ॥ ४१ ॥ यश्च स्नाति नरो नित्यं स याति वैष्णवं पदम्॥ तस्मात्त्वं भार्गवश्रेष्ठ तत्र गच्छस्व मा चिरम् ॥ ४२ ॥ पृथिव्यां यानि तीर्थानि पुण्यान्यायतनानि च ॥ तानि सर्वाणि तिष्ठंति कर्कराजजले सदा ॥ ४३ ॥ कर्कस्थे च दिवानाथे स्नानं कुर्वंति ये नरा ॥ न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥ ४४ ॥ चातुर्मास्यं समासाद्य तत्रैव निवसाम्यहम् ॥ नास्ति रेवासमा पुण्या नदी ब्रह्मांडभूतले ॥ ४५ ॥ महेशान्नाऽपरो देवो मुक्तिदो न जनार्दनात् ॥ उज्जयिनीसमा नास्ति पुरी कामवरप्रदा ॥ ४६ ॥ कर्कराजसमं तीर्थं नास्ति वत्स महीतले ॥ यस्य दर्शनमात्रेण मुक्तिभागी भवेन्नरः ॥ ४७ ॥ एवं व्यास समाख्यातं ब्रह्मणा भार्गवाय च ॥ तस्मात्सर्वप्रयत्नेन महाकालवनं व्रज ॥ ४८ ॥ अस्माकं चाऽपि तत्रैव स्थानं परमशोभनम् ॥ चातुर्मास्ये हरौ सुप्ते यावद्यायात्प्रबोधिनी ॥ ४९ ॥ तावत्कालं हि तत्रैव मुक्तिरेव न संशयः ॥ चातुर्मास्ये हरौ सुप्ते जहाति चेत्कलेवरम् ॥ ५० ॥ यमलोके चिरं वासो जायते नाऽत्र संशयः ॥ तस्मात्तुलसिकाभागे शालिग्रामे सुरालये ॥ ५१ ॥ आत्मानं हि पणीकृत्य तत्रैव संनियोजयेत् ॥ यावत्प्रबोधिनी चैति द्वादशी द्विजसत्तम ॥५२॥ पश्चाद्धृतसुवर्णेन मोचयित्वा स्वकं नयेत् ॥ चातुर्मास्योद्भवं दोषं बाधते न च मानवम् ॥५३॥ यस्य शिप्रोदके स्नानं कर्कराजेऽनुजायते ॥ एवं व्यास वरं तीर्थं सर्वतीर्थफलप्रदम् ॥ ५४ ॥ पृथिव्यां यानि तीर्थानि सरितः सागराश्च ये ॥ ते सर्वे च समायांति चातुर्मास्ये द्विजोत्तम ॥ ५५ ॥ तस्माच्च तद्वरं तीर्थं कर्कराज इति स्मृतम् ॥ ५६ ॥ य एतां वै कथां पुण्यां शृण्वंति श्रावयंति च ॥ न तेषां जायते दोषश्चातुर्मास्योद्भवः कदा ॥ ५७ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये कर्कराजतीर्थमहिमवर्णनंनामैकोनसप्ततितमोऽध्यायः ॥ ६९ ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ मेरोश्च दक्षिणे भागे दुग्धकुण्डोत्तरे तथा ॥ ऋषभः पर्वतश्रेष्ठो देवगन्धर्वसेवितः ॥ १ ॥ यत्र देवांगना रम्याः क्रीडन्ति सततं द्विज ॥ तत्र रम्यसरोनाम तिष्ठते सर्वकामदम् ॥ २ ॥ तत्र तीर्थे नरः स्नात्वा सुभगो जायते ध्रुवम् ॥ देवैश्च क्रीडते नित्यं भुवि विख्यातकः परम् ॥ ३ ॥ भाद्रपदसिताष्टमी मैत्रर्क्षेण समन्विता ॥ तद्दिनेऽत्र समागम्य स्नानदानादिकाः क्रियाः ॥ ४ ॥ करोति सततं व्यास तेषां लोकाः सनातनाः ॥ मेरोश्चेशानके तीर्थं दिव्यं परम

१ अमरावतीसमा–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



शोभनम् ॥५॥ बिन्दुसरेति विख्यातं सर्वकामवरप्रदम् ॥ गंगा सरस्वती पुण्या शरयूश्च पयस्विनी ॥६॥ एताः सरिद्वरा यातास्तत्र सत्यवतीसुत ॥ ये सिद्धा ये च साध्याश्च तपस्विनो धृतव्रताः॥७॥उपासांचक्रिरे तत्र तस्य तीर्थस्य सर्वदा ॥ तस्मिंस्तीर्थे नरः स्नात्वा सर्वार्थान्प्राप्नुते ध्रुवम् ॥८॥ भाद्रपदे च शुक्ला वै चतुर्थी या प्रकीर्तिता॥सिद्धा सा सर्वदा प्रोक्ता यत्र जातो गणाधिपः॥९॥मनःकामेश्वरः ख्यातः सर्वकामवरप्रदः॥ तस्य तीर्थे नरः स्नात्वा दृष्ट्वा देवं गणेश्वरम्॥ मनोरथशतं प्राप्य कामचारी भवेन्नरः ॥१०॥ ॥ व्यास उवाच ॥ ॥ अस्मिन्क्षेत्रे शुभे ब्रह्मन्महाकालवनोत्तमे ॥११॥ तीर्थानि कतिसंख्यानि देवतायतनानि च ॥ यानि कानि च ख्यातानि तानि नो वद विस्तरात् ॥ १२ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु व्यास ऋषिश्रेष्ठ कथां पापहरां पराम् ॥ अवन्त्यां[१] यानि तीर्थानि लिंगानि च महामुने ॥ १३ ॥ तानि वर्णयितुं शक्तः स्वयंभूश्चतुराननः ॥ वर्षाणामयुतैः षड्भिर्न च वक्तुं कथंचन ॥ १४ ॥ यावंतो मेघमालानां बिंदवो हि स्रवंति च ॥ धरित्र्यां तृणसंख्या वै पृथिव्यां सिकतास्तथा ॥१५॥ नभसो ज्योतिषां संख्यां वक्तुं कोऽपि न शक्नुते ॥ न हि तीर्थलिङ्गसंख्याः संत्यवंत्यां तपोधन ॥१६॥ अंतरिक्षे च मेदिन्यां तीर्थभूता पुरी त्वियम् ॥ वापीकूपतडागादिप्रस्रवोद्धरणानि च ॥ १७ ॥ नद्यः सरांसि खाताश्च तीर्थभूतं हि सर्वशः ॥ तथापि देवयात्रायां प्रसंगेन निबोध मे ॥ १८ ॥ यानि कानि च मुख्यानि तानि तुभ्यं वदाम्यहम् ॥ यज्ज्ञात्वा मोक्ष्यसे नित्यं पूर्वाऽऽचीर्णशुभाशुभैः ॥ १९ ॥ प्रातरुत्थाय यो नित्यं शुचिः प्रयतमानसः ॥ विष्णुस्मरणसंपन्नः सर्वकामक्रियादिकम् ॥ २० ॥ कृत्वा वै सर्वगंधादितिलाक्षतसमन्वितः ॥ स्नात्वा रुद्रसरे तात तथैव च व्रतं चरेत् ॥ २१ ॥ ऊर्जमाधवयोश्चैव वैशाखाऽऽषाढयोस्तथा ॥ शिवरात्र्यां विशेषेण देवयात्रा प्रशस्यते ॥२२॥ यस्य देवस्य यत्तीर्थं यस्य देवस्य संनिधौ ॥ तत्राभिषेकः कार्यो वै देवतायाश्च पूजनम् ॥२३॥ विधिवच्चाचरेद्यस्तु स सर्वं फलमश्नुते ॥ तस्मात्सर्वप्रयत्नेन देवयात्रां समाचरेत् ॥ २४ ॥ ॥ व्यास उवाच ॥ ॥ ब्रह्मन्केन प्रकारेण देवयात्रां चरेन्नरः॥ तत्सर्वं श्रोतुमिच्छामि विस्तरेण तपोधन ॥२५॥ ॥ सनत्कुमार उवाच ॥॥ शृणु व्यास परं गुह्यं प्रवक्ष्यामि यथाश्रुतम् ॥ उमामहेश्वरसंवादं देवयात्रादिकर्मसु ॥२६॥ ॥ उमोवाच ॥ ॥ प्रभावः कथ्यतां देव क्षेत्रस्याऽस्य महेश्वर ॥ यानि तीर्थानि विद्यंते यानि लिंगानि संति वै ॥ तान्यादितो मे भूमंस्त्वं वदस्व वदतां वर ॥ २७ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रयत्नेन प्रभावं पापनाशनम् ॥ २८ ॥ क्षेत्रमाद्यं महादेवि ममातीव प्रियं सदा ॥ यत्र शिप्रा महापुण्या दिव्या नवनदी प्रिया ॥ २९ ॥ नीलगंगासंगमं च तथा गंधवती नदी॥



१ उज्जयिन्यां च तीर्थानि यानि सन्ति महामुने--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतस्रो मे प्रिया नद्यः कुशुद्रत्यां हि सुव्रते ॥ ३० ॥ ईश्वराश्चतुराशीतिस्तथाऽष्टौ संति भैरवाः ॥ एकादश तथा रुद्रा आदित्या द्वादश स्मृताः ॥ ३१ ॥ षड्वै विनायकाश्चाऽत्र देव्यश्च चतुर्विंशतिः ॥ यतोहमागतो भद्रे महाकालवनोत्तमे ॥ ३२ ॥ विष्णुब्रह्मादयः सर्वे ह्यत्रैव निहिताः शुभे ॥ देवैर्व्याप्तमिदं क्षेत्रं देवि योजनमायतम् ॥ ३३ ॥ दश विष्णुः समाख्यातास्तेषां नामानि मे शृणु ॥ वासुदेवो ह्यनंतश्च बलरामो जनार्दनः ॥ ३४ ॥ नारायणो हृषीकेशो वाराहो धरणीधरः ॥ विष्णुर्वामनरूपेण शेषशायी श्रियालयः ॥ ३५ ॥ दशैते वैष्णवाः प्रोक्ताः सर्वपापहराः पराः ॥३६॥ ॥ उमोवाच ॥ ॥ भगवञ्छ्रोतुमिच्छामि देवानामनुपूर्वतः ॥ महाकालवने रम्ये ये वसंति सुरेश्वराः ॥ ३७ ॥ विनायका भैरवा देव्यो ये संति पवनात्मजाः ॥ रुद्रादित्यास्तथा चाऽन्ये तेषां नामानि मे वद ॥ ३८ ॥ ॥ ईश्वर उवाच ॥ ॥ ऋद्धिदः सिद्धिदो नित्यं कामदो वै गणाधिपः॥ विघ्नहा च प्रमोदी च चतुर्थीव्रतकप्रियः॥३९॥ षडेते वै समाख्याता विघ्ननाशकराः पराः॥ उमा चंडीश्वरी गौरी ऋद्धिसिद्धिप्रदा नृणाम् ॥४०॥ वटयक्षिणी वीरभद्रा इत्येताश्चाष्ट मातरः॥४१॥ महामाया सती ख्याता कपालमातृका तथा ॥ अंबिका शीतला चैव एकानंशा च सिद्धिदा॥४२॥ ब्रह्माणी पार्वती चैव योगिनी योगशालिनी ॥ कौमारी भगवती चैव षट्कृत्तिकास्तथैव च ॥ ४३ ॥ चर्पटामातृकाः ख्याता वटमातर एव च ॥ सरस्वती तथा ख्याता महालक्ष्मीश्च वै स्मृता ॥ ४४ ॥ योगिनीमातृका ख्याताश्चतुषष्टिस्ततः स्मृताः ॥ कालिका च महाकाली चामुण्डा ब्रह्मचारिणी ॥ ४५ ॥ वैष्णवी च समाख्याता वाराही विंध्यवासिनी ॥ अंबा अंबालिका चैव चतुर्विंशतिकाः पराः ॥ ४६ ॥ हनूमान्ब्रह्मचारी च कुमारश्च महाबली ॥ चत्वारो वै समाख्याता मया ते पवनात्मजाः ॥ ४७ ॥ दंडपाणिश्च विक्रांतो महाभैरवसिताऽसिताः ॥ बटुको बालको नंदी षट्पञ्चाशतिकोऽपरः ॥ ४८ ॥ कालभैरवश्च विख्यातः क्षेत्रपालस्तथाष्टमः ॥ अष्टैव भैरवाः ख्याता महापापहराः पराः ॥ कपर्दी च कपाली च कलानाथो वृषासनः ॥ ४९ ॥ त्र्यंबकः शूलपाणिश्च चीरवासा दिगम्बरः ॥ गिरिशः कामचारी च सर्वः सर्वांगभूषणः ॥ ५० ॥ रुद्राश्चैकादश प्रोक्ताः शत्रुपक्षविनाशनाः ॥ अरुणः सूर्यो वेदांगो भानुरिन्द्रो रविरंशुमान् ॥ ५१ ॥ सुवर्णरेताऽहःकर्ता मित्रो विष्णुः सनातनः ॥ इत्येते द्वादशाऽऽदित्याः सर्वरोगहराः पराः ॥ ५२ ॥ अगस्त्येश्वरमुख्यानां लिंगानां चतुराशिनाम् ॥ हिमाचलसुते नित्यं नामानि गदतः शृणु ॥ ५३ ॥ अगस्त्येश्वर आख्यातो गुहेश्वरस्ततः परम् ॥ ढुंढेश्वरस्ततः प्रोक्तो डमरुकेश्वरश्च भामिनि ॥ ५४ ॥ अनादिकल्पेश्वरः शंभुः स्वर्णजालेश्वरः परः ॥

१ हरसिद्धिप्रदा नृणाम्-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



त्रिविष्टपेश्वरो देवः कपालेश्वरसंज्ञकः ॥ ५५ ॥ कर्कोटकेश्वरः शंभुः सिद्धेश्वरस्ततः परम् ॥ स्वर्गद्वारेश्वरो रुद्रो लोकपालेश्वरोऽपरः ॥ ५६ ॥
कामेश्वर इति ख्यातः कुटुम्बेश्वरस्ततः परम् ॥ इन्द्रद्युम्नेश्वरः ख्यात ईशानेशस्ततः परम् ॥ ५७ ॥ अप्सरेश्वरइतिख्यातः कल्कलेश्वर एव च ॥
नागचंडेश्वरो देवो दिवापापहरोऽपरः ॥ ५८ ॥ प्रतिहारेश्वरश्चैव कुक्कुटेशस्ततः परम् ॥ मेघनादेश्वरः पुण्यो महाकालेश्वरः परः ॥ ५९ ॥
मुक्तेश्वरः समाख्यातः सोमेश्वरस्ततः परम् ॥ अनरकेश्वरो देवो जटेश्वरस्ततः परम् ॥ ६० ॥ रामेश्वरो महादेवश्च्यवनेशस्ततः परम् ॥ अखंडेशः
समाख्यातः पत्तनेशस्ततः स्मृतः ॥ ६१ ॥ आनंदेशस्ततः प्रोक्तः कंथडेशस्ततः परम् ॥ इन्द्रेश्वर इति ख्यातो मार्कंडेशस्ततः परः ॥ ६२ ॥ शिवे
श्वर इति प्रोक्तः कुसुमेशस्ततः परम् ॥ अक्रूरेश इति ख्यातः कुण्डेश्वरस्ततः परम् ॥ ६३ ॥ लुम्पेश्वरः समाख्यातो गंगेश्वरस्ततः परम् ॥ शूले
श्वरेति विख्यात ओंकारेशस्ततः स्मृतः ॥ ६४ ॥ कंटकेशो महारुद्रः सिंहेश्वरस्ततः परम् ॥ रेवंतेश्वरः परो देवो घंटेश्वरपुरःसरः ॥ ६५ ॥ प्रया
गेश्वरो महादेवः सिद्धेश्वरस्ततः परम् ॥ मातंगेश्वरः परो देवः सौभाग्येशस्ततो वरः ॥ ६६ ॥ रूपेश्वरेति विख्यातो ब्रह्मेश्वरस्ततः परम् ॥ जल्पेश्वर
स्ततो देवः केदारेश्वर एव च ॥ ६७ ॥ पिशाचेश्वरशंभुश्च संगमेशस्ततः परः ॥ दुर्धर्षेशश्च विख्यातश्चंडादित्येश्वरस्ततः ॥ ६८ ॥ करभेश्वरः परः प्रोक्तो
राजस्थलेश्वरः शिवः ॥ वडलेश्वरस्ततः प्रोक्तो ह्यरुणेशस्ततः स्मृतः ॥ ६९ ॥ पुष्पदंतेश्वरो देवो ह्यविमुक्तेश्वरस्ततः ॥ हनुमंतेश्वरो देवो विश्वेश्वर
स्ततः परम् ॥ ७० ॥ स्वप्नेश्वर इति ख्यातः सिद्धेश्वरस्ततः परः ॥ नीलकंठेश्वरो देवः स्थावरेशस्ततः परम् ॥ ७१ ॥ कामेश्वर इति प्रोक्तः
प्रतिहारेश्वरस्ततः ॥ पशुपतीश्वरः प्रोक्तो विश्वेश्वरस्ततः परः ॥ स्वर्णजालेश्वरः प्रोक्तो मनःकामेश्वरस्ततः ॥ ७२ ॥ दुर्वासेश्वरना
मासौ नागचंडेश्वरस्ततः ॥ खर्परेशश्च विख्यातो ब्रह्मेश्वरस्ततः परम् ॥ ७३ ॥ पातालेश्वर आख्यातो गुप्तेश्वरस्ततः परः ॥ कपिले
श्वर इत्याख्यो योगयोगेश्वरः परः ॥ ७४ ॥ भीमेश्वरेति विख्यातो धनुःसहस्राभिधः परः ॥ अग्नीश्वरः परः प्रोक्तो देवेश्वरस्ततः परः ॥ ७५ ॥
द्वादशार्कः समाख्यातो दशाश्वमेधिकेश्वरः ॥ गदाधरेश्वरः ख्यातो वैजनाथेति शंभुराट् ॥ ७६ ॥ सोमनाथेश्वरः ख्यातो घुष्मेश्वरस्ततः परः
भीमशंकर इत्याख्यो घंटेश्वरस्ततः परः ॥ ७७ ॥ ऊषरेश्वरसंज्ञश्च चन्द्रादित्येश्वरः परः ॥ केशवार्कः समाख्यातः शक्तिभेदेश्वरः परः ॥ ७८ ॥
रामेश्वरः परो देवो वाल्मीकेश्वरशंकरः ॥ ज्वालेश्वरः शिवः प्रोक्तो ह्यभयेशस्ततः परः ॥ ७९ ॥ विघ्नहस्तेश्वरः प्रोक्तश्चंचलेशस्ततः परः ॥ पुरुषो

१ महालयेशस्ततः परम्—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तमेति विख्यातो वीरेश्वरस्ततः परः ॥ ८० ॥ कर्णेश्वरश्च विख्यातः पृथुकेशस्ततः परम् ॥ आनंदेशश्च विख्यातः कोटेश्वरस्ततः परः ॥ ८१ ॥
अविमुक्तेश्वरः प्रोक्तो हनुमत्केश्वरः परः ॥ विमलेश्वरेति विख्यातश्चंद्रेश्वरस्ततः परः ॥ ८२ ॥ बिंदुकेशश्च विख्यातो वालुकेश्वरसंज्ञकः ॥ बृहस्पती
श्वरो देवो ह्यसंख्यातेश्वरस्ततः ॥ ८३ ॥ यानि कानि च तीर्थानि तानि लिंगानि सत्तम ॥ तिष्ठंति तत्र पूज्यानि तानि वंद्यानि सर्वशः ॥ ८४ ॥
चत्वारो विदिताः सर्वे द्वारपाला महात्मभिः ॥ पिंगलेश्वरेति च ख्यातः पूर्वद्वारे द्विजोत्तम ॥ ८५ ॥ दक्षिणे च तथा द्वारे कायावरोहणेश्वरः ॥
बिल्वकेश्वरेति विख्यातः पश्चिमद्वारमाश्रितः ॥ ८६ ॥ दर्दुरेश्वरस्ततः प्रोक्तो द्वारे चोत्तरसंज्ञिके ॥ एते चाऽन्ये च बहवो लिंगाख्यास्त्रिभुवनेश्वराः
॥ ८७ ॥ महाकालवने रम्ये समाख्याता हि पावनाः ॥ षष्टिकोटिसहस्राणि षष्टिकोटिशतानि च ॥ ८८ ॥ महाकालवने व्यास लिंगसंख्या
न विद्यते ॥ तथाऽपि च प्राधान्येन मयाऽत्र परिकीर्तिताः ॥ ८९ ॥ यस्य देवस्य यत्तीर्थं तन्नाम्ना परिकीर्तितम् ॥ स्नात्वा दत्त्वा च तद्दानं तत्तीर्थ
स्य फलं लभेत् ॥ ९० ॥ तथा नवग्रहाः पुण्याः समाख्याताः पुराऽनघ ॥ तेषां नामानि पुण्यानि तीर्थानि च तथा शृणु ॥ ९१ ॥ नरादित्य
इति ख्यातः सोमेश्वरस्ततः परः ॥ मंगलेश्वरः समाख्यातो बुधेश्वरस्ततः परम् ॥ ९२ ॥ बृहस्पतीश्वरः प्रोक्तस्तथा शुक्रेश्वरः शिवः ॥ स्थावरेश्वरो
महादेवः समाख्यातो मुनीश्वरैः ॥ ९३ ॥ राहुकेतू समाख्यातौ तेषां तीर्थानि सत्तम ॥ तत्तीर्थेषु नरः स्नात्वा सर्वपापैः प्रमुच्यते ॥ ९४ ॥
ग्रहा राज्यं प्रयच्छंति ग्रहा राज्यं हरंति च ॥ ग्रहैस्तु व्यापितं सर्वं त्रैलोक्यं सचराचरम् ॥ ९५ ॥ ग्रहतीर्थे नरः स्नात्वा ग्रहाणामर्चनं चरेत् ॥ न
तस्य ग्रहपीडा वै बाधते हि कदाचन ॥ ९६ ॥ एवं व्यास समाख्याता मया देवाश्च तीर्थकाः ॥ यात्रा पुण्यतरा श्रेष्ठा पवित्रा पापनाशिनी
॥ ९७ ॥ ग्रहपीडासु चोग्रासु दारिद्र्ये घोरसंकटे ॥ तेषामुद्धरणार्थाय देवयात्रा प्रकीर्तिता ॥ ९८ ॥ क्षेत्रस्यांतर्गृहीं नित्यं ये कुर्वंति नरोत्तमाः ॥
न तेषां दुर्लभं किंचित्रिषु लोकेषु विद्यते ॥ ९९ ॥ अपुत्रो लभते पुत्रं निर्धनो धनमाप्नुयात् ॥ विद्यावाञ्जायते विप्रः क्षत्रियो विजयी भवेत्
॥ १०० ॥ अक्षया संततिस्तस्य शिवलोके महीयते ॥ १०१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे
ऽवन्तीक्षेत्रमाहात्म्ये देवयात्रांऽतर्गृहीसर्वतीर्थयात्राऽनुक्रमणिकादिकथनंनाम सप्ततितमोऽध्यायः ॥ ७० ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ भगव
न्भवता सर्वं कथितं देवमूर्तिना ॥ अवंतीतीर्थमाहात्म्यं पवित्रं वेदसंमितम् ॥ १ ॥ भूयस्तु श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ॥ महाकालवने रम्ये

१ असंख्यातानि–इ० पा० । २ उत्तरेश्वरः–इ० पा० । ३ पार्वति–इ० पा० । ४ यात्राम्–इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





अवंत्यां भुवि सत्तम ॥ तीर्थानि कतिसंख्यानि विद्यंते ह्यत्र सुव्रत ॥ २ ॥ ॥ सनत्कुमार उवाच ॥ ॥ श्रूयतां भो द्विजश्रेष्ठ कथां पापहरां पराम् ॥ ॥३॥उमामहेश्वरसंवादं नारदस्य च धीमतः ॥ नारदेन पुरा पृष्टं प्रश्नमेतद्द्विजोत्तम ॥ ४ ॥ ॥ नारद उवाच ॥ ॥ भगवञ्छ्रोतुमिच्छामि महाकाल वने शुभे ॥ तीर्थानि यानि वर्तंते तानि नो वद विस्तरात् ॥ ५ ॥ इति पृष्टस्तदा विप्र नारदेन पुराऽनघ ॥ उवाच श्लक्ष्णया वाचा उमया सहितो हरः ॥ ६ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ शृणुष्व भो ऋषिश्रेष्ठ महाकालवने शुभे ॥ तीर्थानि यानि तिष्ठंति तानि वक्ष्यामि सुव्रत ॥ ७ ॥ पुष्कराद्यानि तीर्थानि यानि कानि महीतले ॥ तानि सर्वाणि वर्तंते महाकालवनोत्तमे ॥ ८ ॥ असंख्यातसहस्राणि कोटिकोटीनि सत्तम ॥ रुद्रसरे निमज्जंति कोटितीर्थं तथोच्यते ॥ ९ ॥ नीहारकणिकावृष्टिं गिरौ वर्षंति किन्नराः ॥ हेमंते चैव दृश्यंते तीर्थे पैशाचमोचने ॥ १० ॥ न हि संख्यां विजानामि तीर्थानां भुवि सत्तम ॥ कियन्ति संति तीर्थानि लिंगानि च तथैव च ॥ ११ ॥ तथाऽपि च प्राधान्येन कथयिष्यामि सत्तम ॥ संवत्सरस्य यावंति अहानि च द्विजोत्तम ॥ १२ ॥ तावंति प्रापणीयानि प्रसिद्धानि परंतप ॥ वत्सरे परिपूर्णे च जायतेऽवंतियात्रिका ॥ १३ ॥ विधिवत्कुरुते यस्तु साक्षाच्छंभुर्भवेच्च सः ॥ मन्वंतरसहस्रेषु काशीवासे च यत्फलम् ॥ १४ ॥ तत्फलं जायतेऽवंत्यां वैशाखे पंचभिर्दिनैः ॥ अवंती यात्रा कर्तव्या प्रयत्नेन मुमुक्षुणा ॥ १५ ॥ माघेऽपि विशेषेण ह्यवंतीस्नानमाचरेत् ॥ यो हि वैशाखमासाद्य अवंत्यां व्यास मानवः ॥ १६ ॥ संवत्सरव्रती स्नातस्तीर्थेतीर्थे यथाविधि ॥ दत्त्वा दानानि सर्वाणि समूलं फलमश्नुते ॥ १७ ॥ भुक्त्वा भोगान्सुविपुलाञ्छिवलोके महीयते ॥१८॥ माहात्म्यमेतच्छिवभक्तिवर्द्धनं यशस्करं पुण्यविवर्द्धनं च ॥ यः श्रावयेद्वा शृणुयाच्च भक्त्या कुलं समुद्धृत्य हरेः पदं व्रजेत् ॥ १९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखंडेऽवन्तीक्षेत्रमाहात्म्ये व्याससनत्कुमारसंवादेऽवन्तीक्षेत्रमाहात्म्यवर्णनंनामैक सप्ततितमोऽध्यायः ॥ ७१ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

१ तत्र–इ०पा०। २ तस्मादवंती कर्तव्या–इ० पा०।



॥ इति श्रीस्कांदे महापुराणे पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्यं प्रथमं सम्पूर्णम् ॥ (५–१) ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना
स्वकीये "श्रीवेङ्कटेश्वर" ( स्टीम् ) मुद्रणालये मुद्रितम् ।
संवत् १९६५, शके १८३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥इति श्रीस्कान्दे महापुराणे पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्यं प्रथमं संपूर्णम् (५-१)॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ श्रीस्कांदे महापुराणे पञ्चम आवन्त्यखंडेऽवंतीस्थचतुरशीतिलिंगमाहात्म्यं द्वितीयं प्रारभ्यते ॥ (५–२) ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





॥ श्रीगणेशाय नमः ॥ श्रीमहाकालाय नमः ॥ ॥ अथावन्त्यखण्डेऽवन्तीस्थचतुरशीतिलिङ्गमाहात्म्यं प्रारभ्यते ॥ ॥ उमोवाच ॥ ॥ पृथिव्यां यानि तीर्थानि पुण्याश्च सरितस्तथा ॥ कथ्यंतां तानि यत्नेन श्राद्धं येषु प्रदीयते ॥ १ ॥ ॥ ईश्वर उवाच ॥ ॥ अस्ति लोकेषु विख्याता गंगा त्रिपथगामिनी ॥ सेविता देवगंधर्वैर्मुनिभिश्च निषेविता ॥ २ ॥ तपनस्य सुता देवी यमुना लोकपावनी ॥ पितॄणां वल्लभा देवि महापातकहारिणी ॥ ३ ॥ चंद्रभागा वितस्ता च नर्मदाऽमरकंटके ॥ कुरुक्षेत्रं गया देवि प्रभासं नैमिषं तथा ॥४॥ केदारं पुष्करं चैव तथा कायावरोहणम् ॥ तथा पुण्यतमं देवि महाकालवनं शुभम् ॥ ५ ॥ यत्रास्ते श्रीमहाकालः पापेंधनहुताशनः ॥ क्षेत्रं योजनपर्यंतं ब्रह्महत्याविनाशनम् ॥ ६ ॥ भुक्तिदं मुक्तिदं क्षेत्रं कलिकल्मषनाशनम् ॥ प्रलयेऽप्यक्षयं देवि दुष्प्राप्यं त्रिदशैरपि ॥ ७ ॥ ॥ उमोवाच ॥ ॥ प्रभावः कथ्यतां देव क्षेत्रस्यास्य महेश्वर ॥ ८ ॥ यानि तीर्थानि वंद्यानि यानि लिंगानि संति वै ॥ तान्यहं श्रोतुमिच्छामि परं कौतूहलं हि मे ॥ ९ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रयत्नेन प्रभावं पापनाशनम् ॥ क्षेत्रमाद्यं महादेवि ममातीव प्रियं सदा ॥ १० ॥ यत्रास्ति च महापुण्या सर्वपापहरा परा ॥ तथा गंधवती पुण्या दिव्या नवनदी प्रिया ॥ ११ ॥ नीलगंगा चतुर्थी तु श्रेष्ठा नद्यः प्रकीर्तिताः ॥ आसां तु संगमे स्नात्वा श्राद्धं यः कुरुते नरः ॥ १२ ॥ गंगायास्त्रिगुणं देवि चतुर्वर्गफलप्रदम् ॥ क्षेत्रं योजनपर्यंतमवंत्या विद्धि सुव्रते ॥ १३ ॥ सिद्धलिंगानि तिष्ठंति भुक्तिमुक्तिकराणि च ॥ ईश्वराश्चतुराशीतिस्तथाष्टौ संति भैरवाः ॥ १४ ॥ एकादश तथा रुद्रा आदित्या द्वादश स्मृताः ॥ षड्वै विनायकाश्चात्र चतुर्विंशतिमातरः ॥ १५ ॥ यदाहं गतवांस्तत्र महाकालवने शुभे ॥ ब्रह्मविष्ण्वादयः सर्वे तत्राजग्मुर्मुदान्विताः ॥ १६ ॥ एभिर्व्याप्तं क्षेत्रमिदं देवि योजनमायतम् ॥ दशस्थानगतो विष्णुः सर्वपापप्रणाशनः ॥ १७ ॥ एतन्नामानि योऽधीते प्रभाते भक्तितः पुमान् ॥ विमुक्तः सर्वपापैस्तु रुद्रलोकं स गच्छति ॥ १८ ॥ ॥ उमोवाच ॥ ॥ चतुराशीतिलिंगानि त्वयोक्तानीह यानि तु ॥ तानि विस्तरतो ब्रूहि सर्वपापहराणि तु ॥ १९ ॥ ॥ हर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि तेषां नामानि यानि च ॥ ख्यातं पृथिव्यां प्रथममगस्त्येश्वरमुत्तमम् ॥ यस्य दर्शनमात्रेण कृतकृत्यो नरो भवेत् ॥ २० ॥ ॥ ॥ उमोवाच ॥ ॥ अगस्त्येश्वरनामेह कथं लब्धमनेन वै ॥ कस्मिन्स्थाने कथं जातं विस्तराद्वक्तुमर्हसि ॥ २१ ॥ ॥ हर उवाच ॥ ॥ शृणु देवि महाभागे कथामस्य पुरातनीम् ॥ सर्वपापप्रशमनीं समीहितफलप्रदाम् ॥२२॥ पुराऽसुरैर्जिता देवा निरुत्साहाश्च ते ततः ॥ भागाश्चैषां हृताः सर्वे निराशाः पितरः कृताः ॥ भ्रष्टैश्वर्यास्तदा देवि चेरुर्देवा महीतले ॥ २३ ॥ ततः कदाचित्ते दीना दीप्तमादित्यवर्चसम् ॥ ददृशुस्तेजसा युक्तम



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गस्त्यं विपुलव्रतम् ॥ २४ ॥ अभिवाद्य ततो देवा दृष्ट्वा तं तेजसा वृतम् ॥ इदमूचुर्महात्मानमगस्त्यं लोकविश्रुतम् ॥ २५ ॥ दानवैर्निर्जिता युद्धे
सर्वे स्वर्गाच्च पातिताः ॥ ततस्त्वं नो भयात्तीव्रात्त्रायस्व मुनिपुंगव ॥ २६ ॥ इत्युक्तः स तदा देवैरगस्त्यः कुपितोऽभवत् ॥ प्रजज्वाल च तेजस्वी
कालाग्निरिव संक्षये ॥ २७ ॥ तदा दीप्तांशुजालेन निर्दग्धा दानवास्तथा ॥ अंतरिक्षान्महादेवि पतिताश्च सहस्रशः ॥ २८ ॥ दह्यमानास्ततो दैत्या
स्तस्यागस्त्यस्य तेजसा ॥ ऋषेश्च दानवाः सर्वे पातालं वव्रजुर्भयात् ॥ २९ ॥ ततोऽगस्त्यो महात्मा वै तान्हत्वा शोकमूर्छितः ॥ बभूवातिशयं
चासौ चिंतयोद्विग्नमानसः ॥ ३० ॥ कृतं घोरं महत्पापं हता यद्दानवा मया ॥ अहिंसा परमो धर्मो मनुना कथ्यते यतः ॥ किं करोमि क्व गच्छामि
कथं शुध्येय चाप्यहम् ॥ ३१ ॥ एवं चिंतयतस्तस्य समागच्छत्पितामहः ॥ प्रोवाच स मुनिं तत्र कस्मात्त्वं शोकविह्वलः ॥ ३२ ॥ लक्ष्यसे मुनिशा
र्दूल कारणं कथ्यतां त्वरम् ॥ स ब्रह्माणं नमस्कृत्य कथयामास पृच्छतः ॥ ३३ ॥ देवदेव जगन्नाथ दाहोंतर्मानसं मम ॥ ब्रह्महत्या समायाता
यन्मया दानवा हताः ॥ ३४ ॥ ममोपायं समाचक्ष्व प्रसादात्सुरसत्तम ॥ बहुकालार्जितं देव गतं मे संक्षयं तपः ॥ ३५ ॥ प्रोवाचेदं सुरश्रेष्ठः शृणु
त्वं यत्नतः परम् ॥ उपायं सर्वपापस्य क्षयो येन भवेद्ध्रुवम् ॥ ३६ ॥ महाकालवने दिव्ये यक्षगंधर्वसेविते ॥ उत्तरे वटयक्षिण्या यत्तल्लिंगमनुत्तमम्
॥ ३७ ॥ पिशाचस्यापि तीर्थस्य भागे दक्षिणतः स्थितम् ॥ तं समाराध्यतः सर्वं पापं नाशमवाप्नुयात् ॥ ३८ ॥ आराधय शुभं लिंगं सर्वपापप्रणा
शनम् ॥ बाढं प्रोवाच धर्मात्मा महाकालवनं ययौ ॥३९॥ तस्मिन्स लिंगे देवेशि समाराधनतत्परः ॥ बभूवाहर्निशं भक्त्या तद्ध्यानैकरतो मुनिः
॥ ४० ॥ अहं तुष्टस्तदा देवि मुनेस्तस्य महात्मनः ॥ ४१ ॥ प्रोक्तं मया महाभाग मुने शृणु समाहितः ॥ वरं वरय विप्रेंद्र यत्ते मनसि वर्त्तते
॥ ४२ ॥ तुष्टोऽहमनया भक्त्या तपसा दुष्करेण तु ॥ लिंगस्यास्य प्रभावेण जातस्त्वं निर्मलोऽधुना ॥४३॥ प्रणष्टा ब्रह्महत्या ते दानवोत्था मुनी
श्वर ॥ मदीयं वचनं श्रुत्वा तेनोक्तं वरवर्णिनि ॥ ४४ ॥ यदि देव प्रसन्नस्त्वं शरणागतवत्सलः ॥ त्वदंघ्रियुगले भूयान्मम भक्तिर्महेश्वर ॥ ४५ ॥
तपस्यथ तथा धर्मे न मे विघ्नो भवेदिति ॥ तस्य तद्वचनं श्रुत्वा कुंभयोनेर्महात्मनः ॥ मया प्रोक्तं विशालाक्षि मुने एवं भविष्यति ॥ ४६ ॥
यस्त्वया पूजितो देवो ब्रह्महत्याविनाशनः ॥ त्वन्नाम्ना त्रिषु लोकेषु सोऽयं ख्यातो भविष्यति ॥ ४७ ॥ अगस्त्येश्वरदेवोपि विख्यातो भुवनत्रये ॥
एवमुक्तो मया देवि स विप्रस्तत्र संस्थितः ॥ कृपया तस्य लिंगस्य पंचमुद्राविभूषितः ॥ ४८ ॥ ये नरास्तन्महालिंगं निरीक्षिष्यंति भक्तितः ॥
सर्वपापविनिर्मुक्ताः सर्वकामैरलंकृताः॥४९॥भविष्यंति महात्मानः पुत्रैश्वर्यसमन्विताः॥ अंतकाले च मां यांति विमानैः सर्वकामदैः ॥५०॥ स्तुता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



गंधर्वमुख्यैश्च रुद्रलोके च शाश्वते ॥ येऽर्चयंति सदा देवमगस्त्येश्वरसंज्ञकम् ॥ ५१ ॥ कृतपुण्या नरा मर्त्यास्ते यांति परमं पदम् ॥ संस्मृते देवदे
वेशे नराणां कोटिजन्मजम्॥५२॥ अशुभं क्षयमाप्नोति कस्तं न प्रणमेच्छिवम्॥यः प्रणम्य नरो भक्त्या देवं तं च निषेवते॥५३॥ मुच्यते ब्रह्महत्यादिपा
तकैर्नरकप्रदैः ॥ ५४ ॥ राजसूयशतेनैव यत्पुण्यं च भविष्यति ॥ तत्पुण्यमधिकं देवि दर्शनाच्च भविष्यति ॥ ५५ ॥ किं तीर्थैर्विविधैः स्नानैः किं
दानैर्विविधैः कृतैः ॥ ते प्राप्स्यंति फलं सर्वे मत्प्रसादान्न संशयः ॥५६॥ अष्टम्यां च चतुर्दश्यां दिने सोमस्य शक्तितः ॥ यः करिष्यति लिंगस्य पूज
भक्तिसमन्वितः ॥ कुलानां तारयत्येव मातृकं पितृकं शतम् ॥५७॥ ये च पश्यंति पुरुषा भावहीनाः प्रसंगतः ॥ न ते पश्यंति संसारे नरकं वै कदा
चन ॥ ५८ ॥ एतत्ते कथितं देवि लिंगमाहात्म्यमुत्तमम् ॥ प्रथमं कथितं लोके द्वितीयं शृणु यत्नतः॥ ५९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसा
हस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिंगमाहात्म्येऽगस्त्येश्वरमाहात्म्यवर्णनंनाम प्रथमोऽध्यायः ॥ १ ॥ ॥ छ ॥ ॥ श्रीरुद्र उवाच ॥ ॥
शृणु गुहेश्वरं लिंगं द्वितीयं पापनाशनम् ॥ यस्य दर्शनमात्रेण जायते सिद्धिरुत्तमा ॥ १ ॥ पुरा राथंतरे कल्पे देवदारुवने शुभे ॥ ऋषिर्मंकणकोना
म वेदवेदांगपारगः ॥ योगाभ्यासरतो नित्यं शांतिदांतिसमास्थितिः ॥ २ ॥ सिद्धिकामस्तपस्तेपे कथं सिद्धो भवाम्यहम् ॥ रक्तमयविकारोयं कथं
यास्यति संक्षयम् ॥ ३ ॥ इति संचिंत्य हृदये प्रारब्धं तप उत्तमम् ॥ बहून्यब्दसहस्राणि तस्यातीतानि पार्वति ॥ ४ ॥ कस्मिंश्चिदथ काले तु
विद्धस्य पर्वतात्मजे ॥ कराच्छाकरसो जातः कुशाग्रेण तदैव हि ॥ ५ ॥ स च दृष्ट्वा तदाश्चर्यं विस्मयं परमं गतः ॥ मेने सिद्धिं परां प्राप्तां सगर्वो
वाक्यमब्रवीत् ॥ ६ ॥ अहो तपःप्रभावोऽयं प्राप्ता सिद्धिर्मयाद्य वै ॥ मत्तुल्यो नास्ति वै विप्रो येन सिद्धिः समागता ॥ ७ ॥ शरीरं कुत्सितं चेदं
मलमूत्रेण संयुतम् ॥ मज्जस्नायुवसापृक्तमांसशोणितपूरितम् ॥ हर्षेण महता युक्तः स ननर्त्त द्विजस्तथा ॥ ८ ॥ एतस्मिन्नृत्यति विप्रे जगत्स्थावर
जंगमम् ॥ अनृत्यद्रागसंयुक्तं प्रभावात्तस्य वै मुनेः ॥ ९ ॥ न स्वाध्यायो वषट्कारः कर्मकांडो न च क्वचित् ॥ १० ॥ एतस्मिन्नंतरे देवा ब्रह्मविष्णु
पुरःसराः ॥ मामूचुर्विस्मिताः सर्वे नाथ नृत्यं तदा कुरु ॥ ११ ॥ ऋषौ मंकणके देव नृत्यति नृत्यति सर्वतः ॥ सदेवासुरमानुष्यं सर्वं लोक
त्रयं विभो ॥ १२ ॥ चलिताः पर्वताः स्थानात्क्षुभिता मेघपंक्तयः ॥ शिखराणि विशीर्यंते धरणी पीडिता भृशम् ॥ १३ ॥ स्रोतोमात्रा महानद्यो
ग्रहा उन्मार्गतः स्थिताः ॥ १४ ॥ त्रैलोक्यं व्याकुलीभूतं यावन्नायाति संक्षयम् ॥ तावन्निवारयस्वैनं नान्यः शक्तो विना त्वया ॥ १५ ॥ तेषां तद्वचनं
श्रुत्वा त्रिदशानां यशस्विनि ॥ प्रतिज्ञातं मयात्यर्थं गत्वा तस्य समीपतः ॥ १६ ॥ द्विजरूपं समास्थाय मया पृष्टो द्विजोत्तमः ॥ किमर्थं नृत्यसि



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मन्कस्मात्ते हर्ष आगतः ॥ १७ ॥ विरुद्धमृषिधर्माणां कामरागेण नर्त्तनम् ॥ गीतं च नर्त्तनं चैव युवतीजनवल्लभम् ॥ १८ ॥ ब्राह्मणस्य तपो भ्रंशः सदाचारस्य सत्तम ॥ इति मत्वा द्विजश्रेष्ठ किमर्थं नृत्यसे भृशम् ॥ १९ ॥ ॥ ऋषिरुवाच ॥ ॥ किं न पश्यसि भो ब्रह्मन्कराच्छाकरसं च्युतम् ॥ अत एव हि मे नृत्यं सिद्धोऽहं नात्र संशयः ॥ २० ॥ तस्य तद्वचनं श्रुत्वा हासोऽतीव मया कृतः ॥ अंगुष्ठस्ताडितः स्वीयोंगुल्यग्रेण च पार्वति ॥ २१ ॥ ततो विनिर्गतं भस्म तत्क्षणाद्धिमपांडुरम् ॥ हासेनोक्तो विशालाक्षि सगर्वो ब्राह्मणो मया ॥ २२ ॥ पश्य मेंऽगुष्ठतो ब्रह्मन्भूरि भस्म विनिर्गतम् ॥ न नृत्येहं न मे हर्षस्तथापि मुनिसत्तम ॥ २३ ॥ तदृष्ट्वा महदाश्चर्यं लज्जितो द्विजसत्तमः ॥ धैर्यं च तादृशं दृष्ट्वा विस्मयं परमं गतः ॥ २४ ॥ अब्रवीत्प्रांजलिर्भूत्वा विस्मितेनांतरात्मना ॥ नान्यं देवमहं मन्ये त्वां मुक्त्वा वृषभध्वजम् ॥ २५ ॥ नान्यस्य विद्यते शक्ति रीदृशी भुवनत्रये ॥ तस्मात्क्षमस्व देवेश मयाज्ञानादनुष्ठितम् ॥ २६ ॥ तपःक्षयकरं कर्म विरुद्धं नर्त्तनं सताम् ॥ बहुकालार्जितं पुण्यं तपसा दुष्क रेण तु ॥ तद्गतं सहसा देव मदीयं नर्त्तनेन तु ॥ २७ ॥ तस्य तद्वचनं श्रुत्वा मयोक्तो द्विजसत्तमः ॥ वरं वरय भद्रं ते तुष्टोऽहं द्विजसत्तम ॥ २८ ॥ ज्ञानेनानेन विप्रेंद्र कं ते कामं करोम्यहम् ॥२९॥ ॥ ऋषिरुवाच ॥ ॥ यदि देव प्रसन्नस्त्वं शरणागतवत्सल ॥ यथा न स्यात्तपोहानिस्तथा नीतिर्वि धीयताम् ॥३०॥ मया प्रोक्तं प्रसन्नेन तस्य विप्रस्य पार्वति ॥ तपस्ते वर्द्धतां विप्र महाकालवनं व्रज ॥३१॥ तत्रास्ते सर्वदा पुण्या सप्तकल्पोद्भवा गुहा॥ पिशाचेश्वरदेवस्य उत्तरेण व्यवस्थिता ॥ ३२ ॥ तत्र द्रक्ष्यसि यल्लिंगं सप्तकल्पोद्भवं शुभम् ॥ तस्य दर्शनमात्रेण तपस्ते वृद्धिमेष्यति ॥३३॥ काम क्रोधोद्भवं पापं लोभमोहसमन्वितम् ॥ ईर्ष्यामत्सरजं चैव नाशं याति च किल्बिषम् ॥३४॥ मदीयं वचनं श्रुत्वा स विप्रो वेदपारगः ॥ श्रुत्वा च नियमं देवि मदुक्तं स ततो द्विजः ॥ ३५ ॥ निःसृतो नियतो भूत्वा नमस्कृत्य पुनःपुनः ॥ आजगाम गुहा यत्र महाकालवनोत्तमे ॥ ३६ ॥ ददर्श तत्र तल्लिंगं तपसो वर्द्धनं परम् ॥ द्वादशादित्यसंकाशो जातो वै लिंगदर्शनात् ॥३७॥ एतस्मिन्नंतरे देवि देवैरुक्तं नभस्तले ॥ गोप्यं लिंगं गुहोत्थं तु दृष्टं मंकणकेन तु ॥३८॥ सिद्धिः प्राप्ता द्विजेनैव दर्शनेन सुदुर्लभा ॥ तस्माद्गुहेश्वरो देवि भविष्यति महीतले ॥३९॥ भक्त्या परमयोपेता ये द्रक्ष्यंति गुहेश्वरम् ॥ न तेषां जायते विघ्नो धर्मस्य तपसस्तथा ॥ ४० ॥ अष्टम्यां वा चतुर्दश्यां दर्शनं यः करिष्यति ॥ ब्रह्मलोकं गमिष्यंति पितरस्तस्य देहिनः ॥ ४१ ॥ अत्रागत्य प्रयत्नेन दर्शनं यः करिष्यति ॥ उद्धरिष्यति चात्मानं पुरुषानेकविंशतिम् ॥ ४२ ॥ कृत्वा पापसहस्राणि दर्शनं यः करिष्यति ॥ स याति परमं स्थानं यत्र देवो महेश्वरः ॥ ४३ ॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः ॥ दर्शनात्तस्य लिंगस्य सर्वं यास्यति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



संक्षयम् ॥ ४४ ॥ यत्किंचिदशुभं कर्म जन्मकोटिशतार्जितम् ॥ क्षयं यास्यति तत्सर्वं स्पर्शमात्रेण नान्यथा ॥ ४५ ॥ महापातकयुक्ता हि देहिनो ये महीतले ॥ तेऽपि लिंगं समासाद्य मुच्यंते सर्वपातकैः ॥ ४६ ॥ इत्युक्त्वा स द्विजो देवि दिव्यो मंकणको मुनिः ॥ कृत्वाश्रमपदं पुण्यं तत्रैव तपसि स्थितः ॥ ४७ ॥ एष वै कथितो देवि प्रभावः पापनाशनः ॥ श्रवणात्कीर्त्तनाद्वापि सर्वपापैः प्रमुच्यते ॥ ४८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्ये गुहेश्वरमाहात्म्यवर्णनंनाम द्वितीयोऽध्यायः ॥ २ ॥ ॥ श्रीरुद्र उवाच ॥ ॥ ढुंढेश्वरं तृतीयं तु सुखस्वर्गफलप्रदम् ॥ सर्वपापहरं लिंगं नृणां दुष्कृतनाशनम् ॥ १ ॥ ढुंढश्चासीत्पुरा देवि कैलासे गणनायकः ॥ स च कामी दुराचारो व्यसनोपहतेन्द्रियः ॥ २ ॥ गतोऽसौ शक्रलोकं तु कौतुकार्थं यदृच्छया ॥ यत्र नृत्यति सा रंभा शक्रस्याग्रे विवृण्वती ॥ ॥ ३ ॥ भावान्बहुविधान्रम्यान्दृष्टिहस्तादिकाञ्छुभान्॥ सूचीविद्धादिकरणान्पताकादिकहस्तकान् ॥ नृत्यं हस्तादिसंयुक्तं लयतालानुगं तथा ॥४॥ शक्रोऽपि त्रिदशैः सार्द्धं तन्मुखासक्तलोचनः ॥ बभूव हृष्टचेता वै हृषितांगरुहाननः ॥ ५ ॥ एतस्मिन्नंतरे देवि ढुंढस्तद्दलितेन तु ॥ कामरागवशे नैव भाव्यर्थेन च मोहितः ॥ ६ ॥ तेन रंगरता रंभा पुष्पगुच्छेन ताडिता ॥ स शप्तो वासवेनैव दृष्ट्वाऽन्यायं गणस्य तु ॥ ७ ॥ पत त्वं मानुषं लोकं रंगभंगस्त्वया कृतः ॥ इति शप्तो गणो देवि शक्रेणामिततेजसा ॥ ८ ॥ पतितो मानुषे लोके विसंज्ञो विह्वलेन्द्रियः ॥ कादिग्भूतो हतोत्साहो विललाप पुनःपुनः ॥ ९ ॥ अहोऽन्यायफलं प्राप्तं मया मोहादनुष्ठितम् ॥ तस्मान्नीतिर्विधातव्या पुरुषेण विजानता ॥ १० ॥ न्यायमार्गं समाश्रित्य येन सिद्धिर्भवेन्मम ॥ ११ ॥ इत्युक्त्वा स तपस्तेपे महेंद्रे पर्वतोत्तमे ॥ श्रीशैले मलये विंध्ये पारियात्रे यमालये ॥ १२ ॥ नो सिद्धोऽसौ यदा देवि तदा गंगामहत्तटम् ॥ यमुनां चंद्रभागां च वितस्तां नर्मदां नदीम् ॥ १३ ॥ गोदावरीं भीमरथीं कौशिकीं शारदां शिवाम् ॥ चर्मण्वतीं समासाद्य स्नात्वा त्यक्तक्रियोऽभवत् ॥ १४ ॥ तीर्थं व्यर्थं तपो व्यर्थं तीर्थयात्राफलं यतः ॥ न प्राप्तं च मयाभीष्टमटता कर्मभूमिषु ॥ १५ ॥ एतस्मिन्नंतरे देवि वागुवाचाशरीरिणी ॥ आश्वासयंती गणपं महाकालवने व्रज ॥ १६ ॥ प्रयागाद्यानि तीर्थानि पृथिव्यां यानि संति वै ॥ सदा सिद्धिकरं तेषां महाकालं विशिष्यते ॥ १७ ॥ तत्रास्ते सुमहापुण्यं लिंगं सर्वार्थसाधकम् ॥ पिशाचेश्वरसांनिध्ये तमाराधय सत्वरम् ॥ १८ ॥ प्रसादात्तस्य लिंगस्य पुनर्यास्यसि शांकरम् ॥ लोकं तेजस्विनां गम्यं दुर्लभं पापिनां सदा ॥ १९ ॥ इति श्रुत्वा ततो वाणीमाकाशस्थां गणस्तदा ॥ आजगाम मुदा युक्तो महाकालवनो



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तमे ॥ २० ॥ ददर्श तत्र तल्लिंगं सर्वसंपत्करं शुभम् ॥ पूजयामास देवेशं भक्त्या परमया युतः ॥ २१ ॥ लिंगमध्यात्ततो वाणी निःसृता पर्व तात्मजे ॥ अहो तुष्टोस्मि ते वत्स किं कामं प्रददाम्यहम् ॥ २२ ॥ ॥ ढुंढ उवाच ॥ ॥ यदि तुष्टोऽसि देवेश शरणागतवत्सल ॥ त्वत्पादपंकजे भूयाद्भक्तिर्मेऽविचला सदा ॥ २३ ॥ वरमेनं प्रयच्छाशु यदि तुष्टो महेश्वरः ॥ २४ ॥ ये च त्वां मानवा देव पश्यंति परमेश्वर ॥ पापात्सद्यो विनि र्मुक्तास्ते भवंतु महीतले ॥ २५ ॥ ढुंढस्य भाषितं श्रुत्वा लिंगेनोक्तं यशस्विनि ॥ ये च मां पूजयिष्यंति श्रद्धया परया पुनः॥ ते भविष्यंति सततं सदा पातकवर्जिताः ॥ २६ ॥ लप्स्यंति ते परान्कामान्भविष्यंति गणोत्तमाः॥ पूज्याः सर्वेषु लोकेषु सर्वालंकारभूषिताः ॥२७॥ एवं लब्धवरो ढुंढः प्रांजलिः पुनरब्रवीत् ॥ मन्नाम्ना प्रथितं लिंगं संभूयाद्भुवने सदा ॥ २८ ॥ एवमस्त्विति लिंगेन प्रोक्तं तुष्टेन पार्वति ॥ तदाप्रभृति विख्यातो देवो ढुंढे श्वरः परः ॥ २९ ॥ यस्य दर्शनमात्रेण सदा सिद्धिर्भवेन्नृणाम् ॥ ३० ॥ भक्त्या ये पूजयिष्यंति देवं ढुंढेश्वरं परम् ॥ आजन्मप्रभवं पापं तेषां यास्य ति तत्क्षणात् ॥३१॥ स एव सुकृती लोके स एव मम वल्लभः॥ यः पश्यति नरो भक्त्या लिंगं ढुंढेश्वरं परम् ॥ ३२ ॥ राजसूयशतेनैव यत्पुण्यं च भविष्यति ॥ ततो भविष्यत्यधिकं ढुंढेश्वरनिरीक्षणात्॥३३॥ मानसं वाचिकं वापि कायिकं गुह्यसंभवम् ॥ प्रकाशं वाऽप्रकाशं च प्रसंगादपि यत्कृ तम् ॥ तत्सर्वं यास्यति क्षिप्रं ढुंढेश्वरस्य दर्शनात् ॥३४॥ इत्युक्तस्तु मया देवि स ढुंढो गणनायकः ॥ कृतो लिंगस्य माहात्म्याद्गतो लोके मदीयके ॥ रेजे च गणपैः सार्द्धं ममाभीष्टतरोऽभवत् ॥३५॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ श्रवणात्कीर्त्तनाद्वापि मम लोके महीयते ॥३६॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिंगमाहात्म्ये ढुंढेश्वरमाहात्म्यवर्णनंनाम तृतीयोऽध्यायः ॥३॥

॥ श्रीमहादेव उवाच ॥ ख्यातोऽवंत्यां चतुर्थोऽसौ देवो डमरुकेश्वरः॥ दृष्टे यस्मिन्जगन्नाथे याति पापं च संक्षयम् ॥१॥ पुरा वैवस्वते कल्पे रुरुर्नाम महासुरः ॥ तस्य पुत्रो महाबाहुर्वज्रोनाम महाबलः ॥ बभूव स महाकायस्तीक्ष्णदंष्ट्रो भयंकरः ॥ २ ॥ तेन देवाः स्वाधिकाराच्चालितास्त्रिदशाल यात् ॥ ३ ॥ ततो नीतं धनं तेषां ब्रह्माणं ते ततो ययुः ॥ ब्रह्मापि भयसंविग्नो बभूवाकुलितेंद्रियः ॥ ४ ॥ ज्ञात्वावध्यं सुरैः सार्धं सर्वैः सोऽथ महा बलः ॥ तेषु नष्टेषु[1] ये विप्रा यज्वानोऽथ तपस्विनः ॥ ताञ्जघान स दुष्टात्मा ये चान्ये धर्मचारिणः ॥ ५ ॥ निःस्वाध्यायवषट्कारं तदासीद्धरणीत लम्॥ नष्टयज्ञोत्सवं देवि हाहाभूतमचेतनम् ॥ ६ ॥ ततः प्रव्यथिता देवास्तथा सर्वे महर्षयः ॥ समेत्यामंत्रयन्मंत्रं वधार्थं तस्य दुर्मतेः ॥ ७ ॥ ततः

१ नष्टेषु--युद्धात् पलाय्य अदर्शनं गतेषु--इत्यर्थः । णश् अदर्शने धातुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





कायोऽभवत्सद्यः सर्वेषां पुरतस्तदा ॥ तेषां चिंतयतां देवि तेजःपुंजेन चावृतः ॥ ८ ॥ तस्मात्कृत्या समुत्पन्ना दिव्या कमललोचना ॥ द्योतयंती दिशः सर्वाः स्वतेजोभिः समंततः ॥ ९ ॥ साब्रवीत्रिदशान्सर्वान्कस्मात्सृष्टा ह्यहं सुराः ॥ यत्कर्त्तव्यं मया कर्म तच्छीघ्रं संनिवेद्यताम् ॥ १० ॥ ततस्तु त्रिदशाः सर्वे श्रुत्वा तस्याः शुभा गिरः ॥ आचख्युः सकलं तस्यै तदा वज्रस्य चेष्टितम् ॥ ११ ॥ श्रुत्वा जहास सा देवी साट्टहासं मुहुर्मुहुः ॥ तस्या हसंत्या निःसस्रुः कन्याः कमललोचनाः ॥ १२ ॥ पाशांकुशधरा रौद्रा ज्वालामालावृताननाः ॥ फेत्कारेण च संनादैश्चालयंत्यश्चराचरम् ॥ १३ ॥ गताः सर्वा महादेवि यत्र वज्रो महासुरः ॥ युद्धं तु तुमुलं जातं ताभिस्तस्य भयावहम् ॥ १४ ॥ शस्त्रास्त्रैर्बहुधा मुक्तैर्व्याप्तं चैव दिगंतरम् ॥ संनद्धाखिलसैन्यास्ते युयुधुः समरे भृशम् ॥ १५ ॥ ततः प्रववृते युद्धं तया देव्या सुरद्विषाम् ॥ ततो मातृगणं क्रुद्धं मर्दयन्तं महासुरान् ॥ पराङ्मुखं बलं दृष्ट्वा वज्रो मायामथासृजत् ॥ १६ ॥ तामसींनाम दुःसाध्यां यया मुह्यंति कन्यकाः ॥ १७ ॥ तमोभूते ततस्तस्मिन्सा देवी भयविह्वला ॥ ताभिः सार्द्धं समायाता महाकालवनोत्तमम् ॥ १८ ॥ कपालवान्हरो यत्र लिंगाकारेण संस्थितः ॥ ज्ञात्वा मातृगणं नष्टं ततो मायाप्रभावतः ॥ १९ ॥ वज्रोऽपि त्रिदशाञ्ज्ञात्वा देव्या सार्द्धमथोषितान् ॥ आजगाम तमुद्देशं स्वसैन्यपरिवारितः ॥ २० ॥ महाकालवने दिव्ये रथकोटिशतैर्वृतः॥ समंताच्च वनं देवि तत्क्रुद्धो वाक्यमब्रवीत् ॥२१॥ अद्य देवान्हनिष्यामि तया साकं सुदुष्टया ॥ कन्याभिः सह या नष्टा तमोमायाबलेन तु ॥ २२ ॥ एतस्मिन्नंतरे काले नारदो मुनिसत्तमः ॥ सोत्सुकस्तु समायातो मंदरे चारुकंदरे ॥ २३ ॥ कथयामास देवानां वज्राद्देवपराभवम् ॥ २४ ॥ महाकालवने देव ताडितास्त्रिदशाः प्रभो ॥ वज्रेण रुरुपुत्रेण तस्मात्त्राहि महेश्वर ॥ २५ ॥ नारदस्य वचः श्रुत्वा ततोऽहं परमेश्वरि ॥ मंदरादागतस्तूर्णं कृत्वा रूपं सुभैरवम् ॥ २६ ॥ सर्पैर्लसद्भिरत्युग्रैर्भीषणैर्गणसंवृतः ॥ अग्रे दृष्टं महत्सैन्यं दानवानां भयावहम् ॥ २७ ॥ महाकालवनं रुद्धं समंतादसुरेण तु ॥ वज्रेण रुरुपुत्रेण दुःसहेन यशस्विनि ॥ २८ ॥ तदागत्य मया ताड्य रौद्रं डमरुकं तथा ॥ मोहितं सहसा सैन्यं वज्रस्यैव दुरात्मनः ॥ २९ ॥ डमरुकस्य नादेन ह्युत्थितं लिंगमुत्तमम् ॥ विदार्य वसुधां देवि ज्वालामालाकुलं तदा ॥ ३० ॥ तस्य लिंगस्य च तदा महाज्वाला विनिर्गता ॥ एकदेशाद्वरारोहे ब्रह्मांडव्यापिनी तथा ॥ ३१ ॥ लिंगस्यान्यप्रदेशात्तु वायुः समभवन्महान् ॥ ३२ ॥ 
तेजोज्वालासमूहेन वातेन प्रेरितेन च ॥ सह चक्रेण तत्सैन्यं दग्धं भस्मत्वमागतम् ॥ ३३ ॥ ततो देवगणाः सर्वे हर्षनिर्भरमानसाः ॥ नमश्चक्रुर्हते तस्मिन्रुरुपुत्रे महाबले ॥ ३४ ॥ अस्य देवस्य माहात्म्याद्दग्धो वज्रो महाबलः ॥ ससैन्योभूत्ततस्तस्मादेष डमरुकेश्वरः ॥ ख्यातिं यास्यति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकेस्मिन्सर्वकामफलप्रदः ॥ ३५ ॥ डमरुकस्य तु नादेन जातो यस्मान्महीतले ॥ अतः पूज्यवरो देवो भविष्यति न संशयः ॥ ३६ ॥ दृष्ट्वा ये पूजयिष्यंति देवं डमरुकेश्वरम् ॥ ते सर्वे दुःखनिर्मुक्ता भविष्यंति गतज्वराः ॥ ३७ ॥ चांद्रायणानां विधिवच्छतानामथ यत्फलम् ॥ तत्फलं समवाप्नोति डमरुकेश्वरपूजनात् ॥ ३८ ॥ अस्मिन्स्थाने स्थितं लिंगं भक्त्या डमरुकेश्वरम् ॥ प्रसंगादपि पश्यंति ह्यपि पापपरा नराः ॥ ३९ ॥ तेऽप्यवश्यं तु यास्यंति रुद्रलोकं सनातनम् ॥ भक्ताः स्तोष्यंति ये लिंगं ख्यातं डमरुकेश्वरम् ॥४०॥ मानसैः पातकैर्मुक्ता यास्यंति परमं पदम् ॥ अश्वमेधसहस्रं तु वाजपेयशतं भवेत् ॥ गोसहस्रफलं चात्र दृष्ट्वा प्राप्स्यंति मानवाः ॥ ४१ ॥ यो याति संगरे धीरो दृष्ट्वा डमरुकेश्वरम् ॥ जयेद्रिपूनथांते स रुद्रलोके महीयते ॥ ४२ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ स्तुतस्तु कीर्तितश्चैव सर्वाभीष्टफलप्रदः ॥ ४३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये डमरुकेश्वरमाहात्म्यवर्णनंनाम चतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॥ ॥ श्रीरुद्र उवाच ॥ ॥ अनादिकल्पेश्वरं देवं पंचमं विद्धि पार्वति ॥ सर्वपापहरं नित्यमनादिर्गीयते सदा ॥ १ ॥ कल्पस्यादौ पुरा देवि लिंगमेतद्विनिर्गतम् ॥ यदा नाग्निर्न चादित्यो न भूमिर्न दिशो न खम् ॥ २ ॥ न वायुर्न जलं चैव न द्यौर्न न्दुर्ग्रहा न च ॥ न देवासुरगंधर्वा न पिशाचा न राक्षसाः ॥ ३ ॥ अतो लिंगात्समुद्भूतं जगत्स्थावरजंगमम् ॥ कालेन च लयं याति लिंगेऽस्मिन्पर्वतात्मजे ॥ ४ ॥ अस्माल्लिंगात्समुद्भूता वंशा देवर्षिपैतृकाः ॥ मन्वंतराणि वंशानि वंश्यानुचरितं च यत् ॥ ५ ॥ यावत्यः सृष्टयश्चैव यावंतः प्रलयास्तथा ॥ समुद्राः पर्वताश्चैव निम्नगाः काननानि च ॥ ६ ॥ भूर्लोकाद्याश्च ये लोकाः पातालाः सप्त ये स्मृताः ॥ गतिस्तथार्कसोमादिग्रहर्क्षज्योतिषामपि ॥ ७ ॥ दृश्यादृश्यं च तत्सर्वमतो लिंगाद्वरानने ॥ अनादिकारणं यत्तदव्यक्ताख्यं महर्षयः ॥ यदाहुः पुरुषं सूक्ष्मं नित्यं सदसदात्मकम् ॥ ८ ॥ ध्रुवमक्षयमजरममेयं नान्यसंश्रयम् ॥ गंधरूपरसैर्हीनं शब्दस्पर्शविवर्जितम् ॥ ९ ॥ अनाद्यंतं जगद्योनिं त्रिगुणप्रभवाव्ययम् ॥ असादृश्यमविज्ञेयं लिंगं प्रोक्तं महर्षिभिः ॥ १० ॥ प्रलयस्यांते तेनेदं दिव्यमासीदशेषतः ॥ ११ ॥ अहमुर्व्यां प्रबुद्धस्तु जगदादिरनादिमान् ॥ सर्वहेतुरचिंत्यात्मा परः कोऽप्यपरक्रियः ॥ १२ ॥ प्रकृतिं पुरुषं चैव प्रदर्श्याशु जगत्पतिः ॥ क्षोभयामास योगेन परेण परमेश्वरः ॥ १३ ॥ यथा संनिधिमात्रेण गंधः क्षोभाय जायते ॥ मनसो नोपकर्तृत्वात्तथासौ परमेश्वरः ॥ अनादिः कथ्यते देवो जगत्कारणतत्परम् ॥१४॥ प्रधानं क्षोभ्यमाणं तु तेन लिंगेन पार्वति ॥ जायते भुवनाधारो ब्रह्मांड इति विश्रुतः ॥ १५ ॥ यस्मिन्नंडे जगत्सर्वं सदेवासुरमानुषम् ॥ उत्पन्नं च विलीनं च य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



स्यांतोऽपि न लभ्यते ॥१६॥ स एव क्षोभकः पूर्वं स क्षोभ्यः पृथिवीपतिः ॥ स संकोचविकासाभ्यां प्रधानत्वे व्यवस्थितः ॥ १७ ॥ उत्पन्नः स जगन्नाथो निर्गुणोऽपि रजोगुणः ॥ भुंजन्प्रवर्तते सर्गं ब्रह्मत्वं समुपागतः ॥ १८ ॥ ब्रह्मत्वे सृजते लोकांस्ततः सत्त्वातिरेकतः ॥ विष्णुत्वमेत्य धर्मेण करोति परिपालनम् ॥ १९ ॥ ततस्तमोगुणोद्भिन्नो रुद्रत्वेनाखिलं जगत् ॥ उपसंहृत्य वै शेते त्रैलोक्यं त्रिगुणोऽगुणः ॥ २० ॥ यथा प्राग्व्यापकः क्षेत्री पालको लावकस्तथा ॥ स संज्ञा याति तद्वच्च ब्रह्मविष्णुत्वरुद्रताः ॥ २१ ॥ ब्रह्मत्वे सृजते लोकान्रुद्रत्वे संहरत्यपि ॥ विष्णुत्वे पाति तान्सर्वांस्तिस्रोऽवस्थाः स्मृताः सदा ॥ २२ ॥ रजो ब्रह्मा तमो रुद्रः सत्त्वं विष्णुर्जगत्पतिः ॥ एत एव त्रयो वेदा एत एव त्रयो नराः ॥ २३ ॥ कल्पे कल्पे ह्यनादिस्तु गीयते त्रिदशैः सदा ॥ पितृभिश्च गणैः सिद्धैरतोऽनादिकल्पेश्वरः ॥ २४ ॥ नाम प्राप्तं विशालाक्षि महाकालवनं सदा ॥ यदा जातो विवादस्तु ब्रह्मणः केशवस्य च ॥ २५ ॥ अहं ज्यायानहं ज्यायान्कल्पादौ सृष्टिकारणात् ॥ दिव्या समुत्थिता वाणी निरालंबा तदांबरात् ॥ ॥ २६ ॥ महाकालवने लिंगं कल्पेश्वरेति संज्ञकम् ॥ तस्यादिमथवांतं च यः पश्यति स च प्रभुः ॥ भविष्यति न संदेहो न वादः क्रियतामिति ॥ २७ ॥ ततो देवि गतो ब्रह्मा ऊर्द्ध्वलोकमनंतकम् ॥ अधोलोकं गतो विष्णुस्तेन वाक्येन सत्वरम् ॥ २८ ॥ नादिर्दृष्टो न चांतश्च ब्रह्मणा केशवेन तु ॥ तदा तौ विस्मयापन्नौ तुष्टुवाते परस्परम् ॥ २९ ॥ वेदोक्तसूक्तैर्विविधैरभिनंद्य पुरःस्थितौ ॥ नादिरस्ति न चांतश्च न च कल्पोऽत्र दृश्यते ॥ ३० ॥ तस्मादनादिकल्पोऽयमद्यप्रभृति भूतले ॥ ख्यातिं यास्यति नाम्ना च महाकालवनोत्तमे ॥ ३१ ॥ पञ्चपातकसंयुक्तो यो मर्त्यो दुष्टमानसः ॥ सोऽपि गच्छेच्छिवं दृष्ट्वानादिकल्पेश्वरं शिवम् ॥ ३२ ॥ शिवमस्तु सदा तेषां येषां त्वं दर्शनं गतः ॥ ते धन्या मानुषे लोके ये त्वां शरणमागताः ॥ ३३ ॥ सर्वतीर्थाभिषेकैस्तु यत्पुण्यं प्राप्यते नरैः ॥ तत्सर्वमधिकं देव लभ्यते तव दर्शनात् ॥ ३४ ॥ तावत्पतंति संसारे सुखदुःखसमाकुले ॥ तावन्न दृश्यते देव संसारार्णवतारकः ॥ ३५ ॥ यदा पापक्षयः पुंसां तदा त्वद्दर्शनं भवेत् ॥ ३६ ॥ ब्रह्महा वा सुरापो वा स्तेयी च गुरुतल्पगः ॥ तत्संसर्गी नरो यस्तु महाकिल्बिषकारकः ॥ सोऽपि याति परं स्थानं पुनरावृत्तिवर्जितम् ॥ ३७ ॥ यत्फलं चाश्वमेधेन राजसूयेन यत्फलम् ॥ तत्फलं समवाप्नोति तव देव समर्चनात् ॥ ३८ ॥ ते नराः पशवो लोके तेषां जन्म निरर्थकम् ॥ यैर्न दृष्टो महादेवोऽनादिकल्पेश्वरः शिवः ॥ ३९ ॥ इत्युक्त्वा केशवो देवो ब्रह्मा चैव वरानने ॥ वामे दक्षिणभागे च तस्य लिंगस्य संस्थितौ ॥ ४० ॥ एष ते कथितो



१ आर्षं छंदोवैकल्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवि प्रभावः पापनाशनः ॥ यस्य श्रवणमात्रेण लभ्यते परमं पदम् ॥ ४१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे चतुरशीतिलिंगमाहात्म्येऽनादिकल्पेश्वरमाहात्म्यवर्णनंनाम पंचमोऽध्यायः ॥ ५ ॥ ॥ छ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ स्वर्णज्वालेश्वरं षष्ठं विद्धि चात्र यशस्विनि ॥ यस्य दर्शनमात्रेण धनवानिह जायते ॥ १ ॥ पुरा सार्द्धं त्वया देवि क्रीडतो मम मंदिरे ॥ जातं वर्षशतं दिव्यं सुरतैकरसस्य च ॥ २ ॥ देवैः सर्वैस्ततो वह्निः प्रेरितो मम संनिधौ ॥ ततो वह्निः समायातस्त्रैलोक्यार्थे यशस्विनि ॥ ॥ ३ ॥ ततो वह्निमुखे क्षिप्तं वीर्यं स्वं क्रीडता मया ॥ दह्यमानस्तदा तेन गंगां वह्निर्जगाम ह ॥ ४ ॥ तत्र गत्वा प्रचिक्षेप वीर्यमग्निः सुदुर्द्धरम् ॥ तथापि दह्यते वह्निर्वीर्यशेषेण पार्वति ॥ ५ ॥ जातं रम्यं ततो दिव्यं वीर्यशेषेण कांचनम् ॥ ज्वलंतं चातितापेन दुःसहं दुर्द्धरं प्रिये ॥ ६ ॥ अग्नेरपत्यं प्रथमं दृष्ट्वोत्पन्नं तु पार्वति ॥ लोभाभिभूता असुराः सुरा गन्धर्वकिन्नराः ॥ ॥ ७ ॥ यक्षाः साध्याः पिशाचाश्च मनुष्या राक्षसाः खगाः ॥ अभ्यधावन्सुसंरब्धास्ते सुवर्णजिघृक्षवः ॥ ८ ॥ सुवर्णार्थे महान्नादो ममेदमिति जल्पताम् ॥ अज्ञानात्संगरश्चैव संजातः प्राणहारकः ॥ ९ ॥ अथावरणमुख्यानि नानाप्रहरणानि च ॥ प्रगृह्याभ्यनदन्नादैर्देवैः सार्द्धं यशस्विनि ॥ १० ॥ असुरा असुरैः सार्द्धं मनुष्या मानुषैः सह ॥ गन्धर्वाः सह गन्धर्वैः किंनरैः सह किंनराः ॥ ॥ ११ ॥ भूतैः सार्द्धं च भूतानि राक्षसैः सह राक्षसाः ॥ वेतालैः सह वेताला युद्धं चक्रुः सुदारुणम् ॥ १२ ॥ पुत्रस्तु पितरं द्वेष्टि पिता पुत्रं तथैव च ॥ हंति भार्या स्वभर्त्तारं भर्ता च स्वां प्रियां तथा ॥ १३ ॥ मातरं स्वसुतो हंति माता पुत्रं हिनस्ति च ॥ ततो वैरविनिबंधः संजातः स्वर्णकारणात् ॥ १४ ॥ सुराणामसुराणां च सर्वं घोरतरं महत् ॥ प्रासाश्च विपुलास्तीक्ष्णा न्यपतंत सहस्रशः ॥ तोमराश्च सुतीक्ष्णाग्राः शस्त्राणि विविधानि च ॥ १५ ॥ सुवर्णार्थे महादेवि वमंतो रुधिरं बहु ॥ १६ ॥ असिशक्तिगदाऋष्टयो निपेतुर्धरणीतले ॥ छिन्नानि पट्टिशैश्चैव शिरांसि युधि दारुणैः ॥ १७ ॥ रुधिरेणावलिप्तांगा निहताश्च परस्परम् ॥ अद्रीणामिव कूटानि धातुयुक्तानि शेरते ॥ १८ ॥ हाहाकारः समभवद्भयकृच्च सहस्रशः ॥ अन्योन्यं छिंदतां शस्त्रैः सुवर्णस्य च कारणात् ॥ १९ ॥ परिघैरायसैः पाशैर्वज्रकल्पैश्च मुष्टिभिः ॥ निघ्नतां समरेऽन्योन्यं शब्दो दिवमिवास्पृशत् ॥ २० ॥ छिंधिभिंधि प्रधाव त्वं पातयाधिसरेति च ॥ अश्रूयन्त महाघोराः शब्दास्तत्र समंततः ॥ २१ ॥ एवं तु तुमुले युद्धे वर्त्तमाने महाभये ॥ कंपिता धरणी देवि देवास्त्रस्ताः सत्रासवाः ॥ २२ ॥ क्षुभ्यंति स्म समुद्राश्च चेलुश्च धरणीधराः ॥ तस्यार्थे पीडितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





सर्वं सदेवासुरमानुषम् ॥ २३ ॥ ऋषयो वालखिल्याद्या देवाः शक्रपुरोगमाः ॥ बृहस्पतिं पुरस्कृत्य ब्रह्मलोकं गताः स्त्रियः ॥ २४ ॥ सोच्छ्वासा कथयामासुर्जर्जरीकृतमस्तकाः ॥ वृत्तांतं विस्तरात्सर्वं लोकत्रयविनाशनम् ॥ २५ ॥ तच्छ्रुत्वा वचनं तेषां ब्रह्मा लोकपितामहः ॥ चिंतयित्वा च तैः सार्द्धमाजगाम ममांतिकम् ॥ २६ ॥ मया पृष्टास्तु ते सर्वे केनैते जर्जरीकृताः ॥ शस्त्रास्त्रैः पीडिताः केन कस्माद्वो भयमागतम् ॥ २७ ॥ कश्चासौ दानवो दुष्टो येन वै पीडिता भृशम् ॥ तत्सर्वं कथितं देवि ममाग्रे भयविह्वलैः ॥ २८ ॥ ते मामूचुस्तदा देवा ब्रह्माद्या भयकारणम् ॥ २९ ॥ लोभात्सर्वे विनष्टाः स्म सुवर्णस्य च कारणात् ॥ पीडितं च जगत्सर्वं सदेवासुरमानुषम् ॥ ३० ॥ इति तेषां वचः श्रुत्वा मया ज्ञातं वरानने ॥ तस्यार्थे कलहो घोरः संजातो हि परस्परम् ॥ ३१ ॥ लोकत्रयविनाशश्च सहसा येन वै कृतः ॥ यमुद्दिश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकम् ॥ ३२ ॥ ब्रह्महा वह्निपुत्रस्तु यमुद्दिश्य मृतो जनः ॥ शरीरं शबलं चैव सविकारं भविष्यति ॥ ३३ ॥ धातवो हि भविष्यंति तस्य देहे न संशयः ॥ लक्ष्यते दुःखमतुलं छेददाहादिवर्षणम् ॥ ३४ ॥ एतस्मिन्नंतरे वह्निर्दृष्ट्वा पुत्रस्य चेष्टितम् ॥ ज्ञात्वा क्रोधं मदीयं तु भीतो वै पुत्रकारणात् ॥ ३५ ॥ आजगाम सुवर्णेन सार्द्धं देवि ममांतिकम् ॥ प्रसादितोऽहं पुत्रार्थे वह्निना हि वरानने ॥ ३६ ॥ रक्षणीयस्त्वया देव पुत्रोयं तव शंकर ॥ भाण्डागारे स्वकीये तु क्रियतां परमेश्वर ॥ ३७ ॥ त्वयि तुष्टे महादेव प्राप्योऽयं नात्र संशयः ॥ इच्छया दीयतां देवि यस्य कस्य जनस्य च ॥ ३८ ॥ इति तस्य वचः श्रुत्वा पितृदेवसुखस्य च ॥ तथेति च प्रतिज्ञातं मया लोभाद्यशस्विनि ॥ ३९ ॥ स्नेहान्मया वह्निपुत्र उत्संगे च कृतस्तदा ॥ स्नेहार्द्रे चुंबितो मूर्ध्नि परिष्वक्तः पुनःपुनः ॥ ४० ॥ ददामि ते महाभाग वरं वरय शोभनम् ॥ परितुष्टोऽस्मि वै कामं यथेष्टं समवाप्नुहि ॥ ४१ ॥ अहमाज्ञापयामि त्वां श्रेयश्चैवमवाप्स्यसि ॥ ममाभीष्टकरं स्थानं विद्यते पृथिवीतले ॥ ४२ ॥ अक्षयं प्रलये पुत्र महाकालवनं शुभम् ॥ तत्रैव विद्यते लिंगं कर्कोटकस्य दक्षिणे ॥ ४३ ॥ महापापहरं पुत्र दर्शनाद्दीप्तिदायकम् ॥ तस्य दर्शनमात्रेण कृतकृत्यो भविष्यसि ॥ ४४ ॥ पुण्यश्चैव पवित्रेण दुर्लभश्च भविष्यति ॥ अकुलीनः कुलीनस्तु समलो निर्मलो नरः ॥ ४५ ॥ विरूपो रूपवांश्चैव त्वत्प्रसादाद्भविष्यति ॥ दानानि परिपूर्णानि व्रतानि नियमास्तथा ॥ ४६ ॥ यज्ञाश्चैवोपवासाश्च तीर्थं पिंडादिकं त्वया ॥ सुसंपूर्णा भविष्यंति तव दानेन सुव्रत ॥ ४७ ॥ सर्वेषां चैव रत्नानामाधिपत्यं करिष्यसि ॥ प्रियाभीष्टो हि देवानां लोकानां च भविष्यसि ॥४८॥ इत्युक्तोऽसौ महादेवि दिव्यरूपो वरानने ॥ ज्वालामालावृतः पुण्यो निर्मलो हि बभूव ह ॥४९॥ लिंगेनोक्तः सुवर्णस्तु दिष्ट्यादिष्ट्येति कांचनम् ॥ अद्यप्रभृति नाम्ना वै ख्यातिं यास्यसि भूतले ॥ ५० ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थातव्यं मत्समीपे तु वह्निपुत्र त्वया सदा ॥ अक्षया भविता कीर्त्तिस्त्वदीया भुवनत्रये ॥ ५१ ॥ इत्युक्तो देवि लिंगेन वह्निपुत्रोऽतिनिर्मलः ॥
ज्वालावृततनुर्जातः सूर्यकोटिसमप्रभः ॥ ५२ ॥ दीप्तिर्लब्धा सुवर्णेन ज्वालामालाकुला तदा ॥ अतो देवि सुविख्यातः स्वर्णज्वालेश्वरः शिवः
॥ ५३ ॥ यस्तमर्चयते भक्त्या स्वर्णज्वालेश्वरं शिवम् ॥ तस्य संजायते देवि विजयो राज्यमूर्जितम् ॥ ऐश्वर्यं दानशक्तिश्च पुत्रपौत्रमनंतकम् ॥
॥ ५४ ॥ ज्ञानतोऽज्ञानतो वापि यत्पापं कुरुते नरः ॥ तत्क्षालयति देहोत्थं दर्शनान्नात्र संशयः ॥ ५५ ॥ यत्फलं पिंडदानेन गयायां लभते
नरः ॥ तत्फलं द्विगुणं प्रोक्तं पूजया नात्र संशयः ॥ ५६ ॥ गायत्र्याः शतसाहस्रैः सम्यग्जप्तैश्च यत्फलम् ॥ तत्फलं समवाप्नोति स्वर्णज्वालेश्वरस्तुतेः
॥ ५७ ॥ यत्पुण्यं सर्वदानेन दत्तेन विधिपूर्वकम् ॥ तत्फलं समवाप्नोति कीर्त्तनान्नात्र संशयः ॥ ५८ ॥ पूजयंति चतुर्दश्यां स्वर्णज्वालेश्वरं तु ये ॥
पूज्यंते ते सदा लक्ष्म्या पूरयंत्या मनोरथान् ॥ ५९ ॥ रक्षितं त्रिदशैर्देवि गणैर्नानाविधैस्तथा ॥ लिंगं कश्चिन्न जानाति मम मायाविमोहितः
॥ ६० ॥ मम प्रसादात्तद्देवि दृश्यते लिंगमुत्तमम् ॥ एतत्ते कथितं सम्यगन्यच्छृणु वरानने ॥ ६१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां
संहितायां पंचम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये स्वर्णज्वालेश्वरमाहात्म्यवर्णनंनाम षष्ठोऽध्यायः ॥ ६ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ त्रिवि
ष्टपेश्वरं देवि सप्तमं पर्वतात्मजे ॥ यस्य दर्शनमात्रेण लभ्यते तत्त्रिविष्टपम् ॥ १ ॥ पुरा वाराहकल्पे तु देवर्षिर्नारदोऽमलः ॥ त्रिविष्टपं गतो देवि द्रष्टु
कामः शतक्रतुम् ॥ २ ॥ तत्रोद्यानवने रम्ये कल्पवृक्षैर्विराजिते ॥ सर्वत्र कुसुमामोदसुखस्पर्शानिलाकुले ॥ ३ ॥ वीणावेणुरवैर्घुष्टे देवगंधर्वसेविते ॥
वज्रेंद्रनीलवैदूर्यचंद्रकांतादिदीपिते ॥ ४ ॥ ब्रह्मलोकादिभिर्लोकैरनौपम्यगुणे शुभे ॥ ददर्श तत्र देवेशमुपविष्टं शतक्रतुम् ॥ स्तूयमानं मुदा देवैः सि
द्धचारणकिन्नरैः ॥ ५ ॥ पृष्टस्तु नारदो देवि वासवेन महामुनिः ॥ कथयामास माहात्म्यं महाकालवनस्य च ॥ ६ ॥ महाकालवनं रम्यं सदानंदकरं
शुभम् ॥ सेव्यं पुण्यं पवित्रं च तीर्थानामुत्तमोत्तमम् ॥ ७ ॥ पुण्यं पश्यंति ये लोका महाकालवनं शुभम् ॥ ब्रह्महत्यादिकं पापं तेषां नश्यति निश्चि
तम् ॥ ८ ॥ स्वयं तिष्ठति देवोऽत्र सर्वभूतगणैर्वृतः ॥ तस्मात्तत्तीर्थमुख्यानां प्रवरं कथ्यते बुधैः ॥ ९ ॥ पृथिव्यां नैमिषं पुण्यं सर्वपापप्रणाशनम् ॥
तस्माद्दशगुणं प्रोक्तं पुष्करं तीर्थमुत्तमम् ॥ १० ॥ ततो दशगुणं प्रोक्तं प्रयागं सर्वकामिकम् ॥ तस्माद्दशगुणं प्रोक्तं विख्यातममरेश्वरम् ॥ ११ ॥
तस्माद्दशगुणं देवि कुरुक्षेत्रं विशिष्यते ॥ कुरुक्षे
प्राची सरस्वती पुण्या तस्माद्दशगुणा स्मृता ॥ तस्माद्दशगुणं प्रोक्तं गयाकूपं विशिष्यते ॥ १२ ॥ तस्माद्दशगुणं देवि कुरुक्षेत्रं विशिष्यते ॥ कुरुक्षे
त्राद्दशगुणा पुण्या वाराणसी तथा ॥ १३ ॥ तस्या दशगुणं श्रेष्ठं महाकालं विशिष्यते ॥ महाकालवनं शक्र किल त्रैलोक्यभूषणम् ॥ १४ ॥ षष्टि



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

कोटिसहस्राणि षष्टिकोटिशतानि च ॥ लिंगानि तत्र विद्यंते भुक्तिमुक्तिकराणि च ॥ १५ ॥ शक्त्यो नव कोट्यस्तु तस्मिन्क्षेत्रे वसंति हि ॥ १६ ॥
कृमिकीटपतंगाश्च मृता यत्र ततः क्रतौ ॥ यांति दिव्यैर्विमानैश्च रुद्रलोकं सनातनम् ॥ माहात्म्यमद्भुतं श्रुत्वा नारदात्सुरसत्तमः ॥ १७ ॥ सर्वदेव
गणैः सार्द्धमाजगाम त्वरान्वितः ॥ वासवः श्रीमहाकालवनं हर्षसमन्वितः ॥ १८ ॥ दृष्ट्वा तथाविधं रम्यं महाकालवनं शुभम् ॥ त्रिविष्टपादप्यधि
कं प्रलयेऽप्यक्षयं स्मृतम् ॥१९॥ विचित्राणि च हर्म्याणि कांचनानि शुभानि च ॥ प्रासादाः शतशो भौममणिविद्रुमभूषिताः ॥ २०॥ वज्रेंद्रनीलर
चिताः शुद्धस्फटिकसंनिभाः ॥ तोरणानि विचित्राणि माणिक्यरचितानि च ॥ दृष्ट्वा तथाविधं रम्यं महाकालवनोत्तमम् ॥ २१ ॥ नारदं प्रशशं
सुस्ते सर्वे देवा मुदान्विताः ॥ देवर्षीणां महाप्राज्ञां येनेयं कथिता कथा ॥२२॥ न कैलासं गमिष्यामो न च मेरुं तथाविधम् ॥ न मंदरं गमिष्यामो
न यास्यामस्त्रिविष्टपम् ॥ २३ ॥ एषामरावती श्रेष्ठा ह्येषा भोगवती शुभा ॥ एषा पैतामहो लोको विष्णुलोकस्तथैव च ॥ २४ ॥ एतस्मिन्नंतरे
देवि शून्यं जातं त्रिविष्टपम् ॥ ज्ञात्वा शून्यमथात्मानं चिंतयित्वा पुनःपुनः ॥ गमनाय मतिं चक्रे कृत्वा देहमथात्मनः ॥ २५ ॥ त्यक्त्वा मां
त्रिदशाः सर्वे महाकालवनं गताः॥अहं तत्रैव यास्यामि यत्र ते त्रिदशा गताः ॥२६॥ इत्युक्त्वा तत्क्षणं प्राप्तो महाकालवनोत्तमे ॥ कौतुकात्सोऽथ वै
श्रेष्ठं तीर्थं तत्रापि भूतले ॥ ददर्श रमणीयं तैर्देवैः परिवृतं तदा ॥ २७ ॥ एतस्मिन्नेव काले तु वागुवाचाशरीरिणी ॥ भोभोस्त्रिविष्टपात्रैव स्वनाम्ना
स्थापयस्व माम् ॥ कर्कोटकस्य पूर्वे तु महामायाश्च[2] दक्षिणे ॥२८॥ इत्युक्तो देवदेवेन हृष्टस्तद्गतचेतसा ॥ स्वनाम्ना स्थापयामास देवं त्रिविष्टपेश्वरम्
॥ २९ ॥ पूजयित्वा शुभैः पुष्पैरुवाचेदं वरानने ॥ अद्यप्रभृति भूर्लोको नाम्ना ख्यातिं गमिष्यति ॥ ३० ॥ ये त्वां पश्यंति यत्नेन अपि दुष्कृत
कारिणः ॥ ते यास्यंति परं स्थानं दिव्यालंकारभूषिताः ॥ ३१ ॥ अष्टम्यां च चतुर्दश्यां संक्रांतौ वा विशेषतः ॥ यः करिष्यति पूजां च भक्तियुक्तो
हि मानवः ॥ ३२ ॥ विमानवरमास्थाय कामगं रत्नभूषितम् ॥ उदितादित्यसंकाशं मत्समीपे वसिष्यति ॥ ३३ ॥ किं दानैर्विविधैर्दत्तैः किं
यज्ञैर्विविधैः कृतैः ॥ ते प्राप्स्यंति फलं सर्वं ये त्वां द्रक्ष्यंति भक्तितः ॥ ३४ ॥ यंयं काममभिध्याय पूजयिष्यंति मानवाः ॥ तत्तन्मनोरथप्राप्तिर्भ
विष्यति न संशयः ॥ ३५ ॥ त्रिदशैश्च पुनः प्रोक्तं दृष्ट्वा मल्लिंगमुत्तमम् ॥ त्रिविष्टपेन धन्येन स्थापितं देवमीश्वरम् ॥ ३६ ॥ पूजयिष्यंति ये 
धन्या देवं त्रिविष्टपेश्वरम् ॥ तेषां वासोऽक्षयो दिव्यो भविष्यति त्रिविष्टपे ॥ ३७ ॥ इत्युक्त्वा पूजयामास भूयो लिंगं त्रिविष्टपम् ॥ सार्द्धं त्रिवि

१ संबाधनमिदम्। २ महामायाः–महामायायाः–एक–'या' लोपश्छान्दसश्छन्दोनुरोधेन।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धूपेनैव पुनः स्थानं स्वकं गतः ॥ ३८ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ श्रवणात्कीर्त्तनाद्वापि स्वर्गलोकोऽक्षयो भवेत् ॥ ३९ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये त्रिविष्टपेश्वरमाहात्म्यवर्णनंनाम सप्तमो
ऽध्यायः ॥ ७ ॥ ॥ श्रीरुद्र उवाच ॥ ॥ कपालेश्वरसंज्ञं च ह्यष्टमं विद्धि पार्वति ॥ यस्य दर्शनमात्रेण ब्रह्महत्या प्रणश्यति ॥ १ ॥ पुरा वैवस्वते
कल्पे त्रेताकाले समागते ॥ महाकालवने दिव्ये यज्ञे पैतामहे प्रिये ॥ २ ॥ उपविष्टेषु विप्रेषु हूयमाने हुताशने ॥ वेषं कापालिकं कृत्वा गतोऽहं तत्र
संसदि ॥ ३ ॥ जीर्णकंथावृतो देवि मुंडः खट्वांगधारकः ॥ चिताभस्मविलिप्तांगो विकृतो विकृताननः ॥ कपालं च करे कृत्वा कपालकृतभूषणः
॥ ४ ॥ ब्राह्मणाश्च ततः क्रुद्धा दृष्ट्वा मां जालरूपिणम् ॥ कपालधारिणं सर्वे धिक्छब्दैश्च जगर्हिरे ॥ ५ ॥ असकृत्पापपापेति गच्छगच्छ
विडंबिताः ॥ कथं च होमः क्रियते प्राप्ते कापालिके पुरः ॥ ६ ॥ अकपालानि शौचानि इति वेदेषु गीयते ॥ यज्ञवेदिर्न तेहां तु मनुष्यास्थि
धरस्य वै ॥ ७ ॥ मया प्रोक्तास्तु ते विप्राः श्रूयतां द्विजसत्तमाः ॥ यूयं कारुणिकाः सर्वे परदुःखेन दुःखिताः ॥ ८ ॥ कर्त्तव्या च दया सद्भिः
सर्वदा सर्वदेहिनाम् ॥ सर्वेषामेव जंतूनां मित्रं ब्राह्मण उच्यते ॥ ९ ॥ अहं कापालिको विप्रो भस्मभूषितविग्रहः ॥ कापालव्रतमास्थाय चरामि
पृथिवीतले ॥ १० ॥ आराधयामि सततं महादेवं जगत्पतिम् ॥ ब्रह्महत्याविनाशाय व्रतं द्वादशवार्षिकम् ॥ ११ ॥ अघघ्नं विश्रुतं लोके प्रारब्धं
हि मया द्विजाः ॥ प्रायश्चित्तनिमित्तं तु शुद्धो यास्यामि सद्गतिम् ॥ १२ ॥ मदीयं वचनं श्रुत्वा तैः प्रोक्तं द्विजसत्तमैः ॥ अतीव पापिष्ठतरो
यो ह्येवं भाषसेऽधम ॥ १३ ॥ कपालैर्भूषितो निंद्यो विशेषेण तु विग्रहः ॥ नाकारितो महादेवो दक्षयज्ञमहोत्सवे ॥ १४ ॥ यस्मिन्यज्ञे समायाता
आदित्या वसवस्तथा ॥ विश्वेदेवाश्च मरुतो गंधर्वाः किंनरास्तथा ॥ १५ ॥ ब्रह्मा विष्णुः सहस्राक्षो वरुणो वायुरेव च ॥ धनदः सागरा नद्यः
सरांसि सकलानि च ॥ १६ ॥ सुपर्णा गिरयो नागाः सर्वे चाकारिताः क्रतौ ॥ सानुगास्ते सभार्याश्च ब्राह्मणा वेदपारगाः ॥ १७ ॥ ब्रह्मर्षयो महा
भागास्तथा देवर्षयोऽमलाः ॥ एवमुक्त्वा महादेवं मानुषास्थिविभूषितम् ॥ १८ ॥ अपवित्रमिति ज्ञात्वा कथं त्वं वक्तुमर्हसि ॥ प्रवेशो दीयतां
मह्यं विशेषेणासि ब्रह्महा ॥ १९ ॥ इत्युक्तोऽहं यदा विप्रैर्मया प्रोक्तं वचस्तदा ॥ प्रतीक्ष्यतां मुहूर्तं तु भुक्त्वा यास्याम्यहं पुनः ॥ २० ॥ इत्युक्ते
वचने देवि ताडितोऽहं भृशं तदा ॥ लोष्टैर्लगुडकैः पादैर्मुष्टिभिश्च पुनःपुनः ॥ २१ ॥ अथ प्रहस्य तत्क्षिप्त्वा तां वेदिं दर्भसंस्तृताम् ॥
कपालदीपवन्नष्टो न ज्ञातोऽहं द्विजोत्तमैः ॥ २२ ॥ मयि नष्टे कपालं तत्क्षिप्तं मंडपबाह्यतः ॥ अथान्यत्तत्र संजातं तादृग्रूपं यशस्वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





नि ॥ २३ ॥ एवं शतसहस्राणि प्रयुतान्यर्बुदानि च ॥ तत्र क्षिप्तानि जातानि ततस्ते विस्मयान्विताः ॥ २४ ॥ अथाहुर्ज्ञानिनः सर्वे नेदमन्यस्य चेष्टितम् ॥ ऋते देवान्महादेवाद्गंगाचंद्रार्द्धशेखरात् ॥ २५ ॥ ततोऽहं विविधैः स्तोत्रैः स्तुतो विप्रैः पृथक्पृथक् ॥ होमं चक्रुश्च ते वह्नौ मंत्रैश्च शतरुद्रियैः ॥ २६ ॥ अहं तुष्टस्तदा देवि द्विजानामनुकंपया ॥ व्रियतां ब्राह्मणाः सर्वे वरं यन्मनसेप्सितम् ॥ २७ ॥ तदा ते ब्राह्मणाः प्रोचुर्यदज्ञानाद्वधस्तव ॥ कृतस्तेन कृतास्माभिर्ब्रह्महत्या जगत्प्रभो ॥ २८ ॥ ब्रह्महत्याविनाशाय प्रसादं कुरु नः प्रभो ॥ वरयामो वरं ह्येनं नान्यं वरमभीप्सितम् ॥ २९ ॥ द्विजानां च तदा तेषामग्रे कथितवानिदम् ॥ यत्र राशिः कपालानां भवद्भिर्विहितो भुवि ॥ ३० ॥ अनादिलिंगं तत्रासी च्छन्नं कालविपर्यये ॥ पश्यंतु विप्रास्तल्लिंगं ब्रह्महत्याविमोचनम् ॥ ३१ ॥ कृता मयापि विप्रेंद्रा ब्रह्महत्या स्वयं पुरा ॥ छिंदता ब्रह्मणः शीर्षं पञ्चमं तेजसोत्कटम् ॥ ३२ ॥ ब्रह्महत्या ततो जाता ममातीव सुदुःसहा ॥ कपालं च करे लग्नं तथा चातीव दुःसहम् ॥ ३३ ॥ दह्यमानस्ततश्चाहं व्याप्तो वै ब्रह्महत्यया ॥ नाशाय सत्वरं तस्याः स्वार्थयात्रामहं गतः ॥ ३४ ॥ गतः सर्वेषु तीर्थेषु नैव मुक्तस्तु हत्यया ॥ ततो दुःखी सुसंतप्तो नैव लेभे सुखं क्वचित् ॥ ३५ ॥ एतस्मिन्नंतरे दैवी वागुवाचाशरीरिणी ॥ गच्छावन्तीं स्वयं नाथ किमर्थं खिद्यते वृथा ॥ ३६ ॥ महाकालवनं पुण्यं त्वया नाथ विनिर्मितम् ॥ कपालकरसंस्थानं रुद्रमद्भुतदर्शनम् ॥ न जानासि कथं क्षेत्रं महापातकनाशनम् ॥ ३७ ॥ तस्मिन्क्षेत्रे महल्लिंगं गजरूपस्य संनिधौ ॥ विद्यते पश्य देवेश ब्रह्महत्या प्रणश्यति ॥ ३८ ॥ ततोऽहमागतस्तूर्णं वाक्यं श्रुत्वा तदोत्तमम् ॥ महल्लिंगं मया दृष्टं कपालकरसंस्थितम् ॥ ३९ ॥ मम हस्तात्तदा विप्राः कपालमपतद्भुवि ॥ कपालेश्वरदेवोऽयमिति नाम मया कृतम् ॥ ४० ॥ पश्यंतु विप्रास्तं देवं कपालेश्वरसंज्ञकम् ॥ यस्य दर्शनमात्रेण निष्कलंका भविष्यथ ॥ ४१ ॥ लिंगं दृष्टं तदा तैस्तु कपालैर्बहुभिर्वृतम् ॥ कृतार्थास्ते तदा जातास्तस्य लिंगस्य दर्शनात् ॥ ४२ ॥ अतोऽसौ भुवि विख्यातः कपालेश्वरसंज्ञकः ॥ येऽर्चयन्ति महादेवि कपालेश्वरसंज्ञकम् ॥ ४३ ॥ कृतपुण्या नरा देवि ते यांति परमं पदम् ॥ कृत्वापि पातकं घोरं ब्रह्महत्यादिकं नरः ॥ ४४ ॥ तत्पापं विलयं याति लिंगस्यास्य च दर्शनात् ॥ कर्मणा मनसा वाचा यत्पापं समुपार्जितम् ॥ तत्क्षपयति देवोऽयं चतुर्दश्यां समर्चितः ॥ ४५ ॥ प्रसंगादपि ये पूजां करिष्यंति वरानने ॥ तेऽपि कामानवाप्स्यंति यांश्च कांश्चित्सुदुर्लभान् ॥ ऐश्वर्यं धर्ममतुलं दीर्घमायुररोगताम् ॥ ४६ ॥ निःसपत्नत्वमतुलं यच्चान्यत्तदवाप्नुयात् ॥ अतीव पापिनो ये च क्रूरकर्मरता नराः ॥ ४७ ॥ विपाप्मानो भविष्यंति गणेशाश्च मम प्रिये ॥ नियमेन प्रपश्यंति ये देवं वत्सरं प्रिये ॥ ते पश्यंति तनुं त्यक्त्वा मदीयं भवनं



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रियम् ॥ ४८ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ कपालेश्वरदेवस्य स्वर्गद्वारेश्वरं शृणु ॥ ४९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुर शीतिलिंगमाहात्म्ये कपालेश्वरमाहात्म्यवर्णनंनामाष्टमोऽध्यायः ॥ ८ ॥ ॥ श्रीरुद्र उवाच ॥ ॥ स्वर्गद्वारेश्वरं लिंगं नवमं विद्धि पार्वति ॥ सर्वपापहरं देवि स्वर्गमोक्षफलप्रदम् ॥ १ ॥ यदा देवि समायाताः कैलासे पर्वतोत्तमे ॥ अश्विन्याद्या भगिन्यस्तास्त्वां दृष्ट्वा विस्मयान्विताः ॥ २ ॥ निमंत्रिता वयं यज्ञे सकांताः सपरिग्रहाः ॥ स्नेहेन देवि तातेन बहुमानपुरःसरम् ॥ ३ ॥ कच्चित्स्मृता विशालाक्षि किं वा तातस्य विस्मृतिः ॥ कारणं किं समुद्दिश्य तातेन न निमंत्रिता ॥ ४ ॥ तासां तद्वचनं श्रुत्वा अवमानात्तदा त्वया ॥ प्राणा मुक्तास्तु योगेन पुरतस्तासु पार्वति ॥५॥ अथ ताः शोकसंतप्ता गता यत्र प्रजापतिः॥ आचख्युः सकलं वृत्तं दक्षस्याग्रे यथातथम् ॥६॥ तच्छ्रुत्वा दारुणं वाक्यं दक्षो नोवाच किंचन ॥७॥ मया दृष्ट्वा यदा देवि भूमौ पंचत्वमागता ॥ यज्ञप्रध्वंसनार्थाय तदा वै प्रेरिता गणाः॥ ॥८॥ ते गत्वाथ गणा रौद्राः शतशोऽथ सहस्रशः ॥ विरूपा भीषणा रौद्रा नानाशस्त्रा महाबलाः ॥ मुमुचुः शरवर्षाणि कुर्वंतो भैरवान्रवान् ॥ ९ ॥ ततो देवगणाः सर्वे वसवः सह भास्करैः ॥ विश्वेदेवाश्च साध्याश्च धनुर्हस्ता महाबलाः ॥१०॥ युद्धाय च विनिष्क्रांता मुमुचुः सायकान्सितान् ॥ ते समेत्याथ युयुधुः प्रमथा विबुधैः सह ॥ मुमुचुः शरवर्षाणि वारिधारा यथा घनाः ॥ ११ ॥ तेषां मध्ये गणो नाम वीरभद्रो महाबलः ॥ स शक्रं ताडयामास शूलेन हृदये तथा ॥ १२ ॥ स तु तेन प्रहारेण विसंज्ञो निषसाद ह ॥ अथ मुष्ट्या हतः कुम्भे नाग ऐरावतस्तथा ॥१३॥ स हतः सहसा तेन गजेंद्रो भैरवान्रवान् ॥ विनदन्भयमास्थाय यज्ञवाटमुपाद्रवत् ॥ १४ ॥ एतस्मिन्नंतरे देवाः कृतास्तेन पराङ्मुखाः ॥ ततस्ते शरणं जग्मुर्विष्णुं विश्वैकनायकम् ॥ १५ ॥ ततः कोपसमाविष्टो विष्णुर्दृष्ट्वा दिवालयान् ॥ गणैर्विद्रावितान्सर्वान्मुमोचाशु सुदर्शनम् ॥ १६ ॥ तदापतत्तु वेगेन चक्रं विष्णोः सुदर्शनम् ॥ प्रसार्य वक्रं सहसा ह्युदरस्थं चकार ह ॥ १७ ॥ तस्मिंश्चक्रे तदा ग्रस्ते ह्यमोघे दैत्यसूदने ॥ क्रुद्धो नारायणो देवि वीरभद्रमुपाद्रवत ॥ १८ ॥ गृहीत्वा पादयोर्भूमौ निजघानातिदूरतः ॥ हन्यमानस्याथ भूमौ गदया च सुदर्शनम् ॥ १९ ॥ रुधिरोद्गारसंयुक्तं वक्त्रात्तच्च विनिर्गतम् ॥ मत्तो लब्धवरो देवि वीरभद्रो गणोत्तमः ॥ न तु पंचत्वमापन्नो गदया ताडितोऽपि सः ॥ २० ॥ ततस्तु प्रमथाः सर्वे विष्णुवीर्यबलार्दिताः ॥ कृच्छ्रेण सहसा प्राप्ता यत्राहं देवि संस्थितः ॥ २१ ॥ मां दृष्ट्वा शूलहस्तं तु विष्णुश्चांतरधीयत ॥ इंद्रोऽपि त्रिदशैः सार्द्धं पितृभिर्ब्राह्मणैः सह ॥ २२ ॥ मत्तस्त्रासपरीतात्मा ततश्चादर्शनं गतः ॥ एवं विध्वंसिते यज्ञे नष्टो देवगणो यदा ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





मया निरूपितो देवि स्वर्गद्वारे गणस्तदा ॥ प्रवेशो नैव दातव्यस्त्रिदशानां गणेश्वर ॥ २४ ॥ द्वारावरोधः कर्त्तव्यो यत्नतः शासनान्मम ॥ यः
कोपि दृश्यते देवः स हंतव्यो न संशयः ॥ २५ ॥ उद्वसश्च ततो जातः स्वर्गो देवा विनिर्जिताः ॥२६॥ स्वर्गद्वारे निरुद्धे तु शक्राद्या भयविह्वलाः॥
ब्रह्मलोकं गता देवा मंत्रयित्वा पुनःपुनः ॥ २७ ॥ तस्याग्रे कथितं सर्वं स्वर्गद्वारावरोधनम् ॥ महेश्वरगणैर्व्याप्तं स्वर्गद्वारं पितामह ॥ २८॥
प्रवेशो दुर्लभो जातः कृते द्वारावरोधने ॥ केनोपायेन यास्यामः स्वर्गलोकं तथाविधम् ॥ २९ ॥ नास्माकं जायते प्रीतिर्विना स्वर्गं पितामह ॥
॥ ३० ॥ इति तेषां वचः श्रुत्वा प्रोक्तं तु ब्रह्मणा तदा ॥ आराध्यः शंकरो देवो महादेवो जगत्पतिः ॥ ३१ ॥ स्तुत्यो वंद्यो नमस्कार्यः सृष्टि
संहारकारकः ॥ दुर्लभस्तु सुराः स्वर्गो विना तस्य प्रसादतः ॥ ३२ ॥ गोप्ता स्रष्टा समर्थश्च स चास्माकं परा गतिः ॥ स एवाराधनीयस्तु स च
पूज्यतमो मतः ॥ ३३ ॥ तस्मात्सर्वप्रयत्नेन गम्यतां शरणं शिवः ॥ उपायं कथयिष्यामि श्रूयतां सावधानतः ॥ ३४ ॥ त्रिदशैः सहितः शक्र तूर्णं
गच्छ ममाज्ञया ॥ महाकालवने रम्ये कपालेश्वरपूर्वतः ॥ ३५ ॥ स्वर्गद्वार परं लिंगं विद्यते तत्तु वासव ॥ लोकानामनुकंपार्थं महादेवेन
निर्मितम् ॥ तमाराधयत क्षिप्रं स वः कामं प्रदास्यति ॥ ३६ ॥ ब्रह्मणो वचनं श्रुत्वा त्रिदशा मुदिता भृशम् ॥ समायाता महादेवि महाकालवनं
तदा ॥ ३७ ॥ स्वर्गद्वारप्रदं पुण्यं ददृशुर्लिंगमुत्तमम् ॥ तस्य दर्शनमात्रेण स्वर्गद्वारमपावृतम् ॥ ३८ ॥ स्वर्गलोकं गताः सर्वे यथापूर्वं यशस्विनि ॥
निःशंकांस्त्रिदशान्दृष्ट्वा विज्ञप्तोहं गणैस्तदा ॥ ३९ ॥ मयाज्ञप्ताश्च ते सर्वे निवर्त्तध्वं गणोत्तमाः ॥ स्वयमेव प्रतिज्ञातं कथं मिथ्या भविष्यति ॥
॥ ४० ॥ स्वर्गद्वारप्रदो देवो दृष्टो देवैर्न संशयः ॥ महाकालवने रम्ये कथितो हि विरंचिना ॥ ४१ ॥ स्वर्गद्वारं गताः सद्यः शक्राद्यास्त्रिदशा
गणाः ॥ अतः प्रभृति विख्यातः स्वर्गद्वारेश्वरः शिवः ॥ ४२ ॥ ख्यातिं यास्यति भूलोके स्वर्गलोकप्रदायकः ॥ ४३ ॥ ये पश्यंति नरा लोके
स्वर्गद्वारेश्वरं शिवम् ॥ ते यांति स्वर्गलोकं हि स्वर्गद्वारेश्वरार्चनात् ॥ ४४ ॥ स्वर्गद्वारेश्वरं देवं ये पश्यंति प्रसंगतः ॥ न तेषां भयमस्तीति कल्प
कोटिशतैरपि ॥ ४५ ॥ अश्वमेधसहस्रेण यत्पुण्यं समुदाहृतम् ॥ तत्पुण्यमधिकं देवि स्वर्गद्वारेश्वरार्चनात् ॥ ४६ ॥ जन्मांतरसहस्रेण यत्पापं पूर्व
संचितम् ॥ यत्पापं विलयं यांति लिंगस्यास्य च कीर्त्तनात् ॥ ४७ ॥ अष्टम्यां वा चतुर्दश्यामथवा चंद्रवासरे ॥ ये पश्यंति नरा भक्त्या
स्वर्गद्वारेश्वरं शिवम् ॥ ते देवि मे शरीरं तु प्रविष्टास्त्वपुनर्भवाः ॥ ४८ ॥ दशकोटिसहस्राणि तस्मिँल्लिंगे तु पूजिते ॥ पूजितानि भवं
तीह लिंगान्यंतःस्थितानि तु ॥ ४९ ॥ स्पर्शनात्तस्य लिंगस्य कीर्त्तनाद्यजनात्तथा ॥ सुखेन स्वर्गमायांति यथा कामानवा



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रुयात् ॥ ५० ॥ अकामा वा सकामा वा ये पश्यंति दिने दिने ॥ तेऽपि पुण्या महाभागाः स्वर्गलोकं प्रयांति वै ॥ ५१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये स्वर्गद्वारेश्वरमाहात्म्यवर्णनंनाम नवमोऽध्यायः ॥ ९ ॥ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ कर्कोटेश्वरसंज्ञं च दशमं विद्धि पार्वति ॥ यस्य दर्शनमात्रेण विषैर्नैवाभिभूयते ॥ १ ॥ मात्रा च भुजगाः शप्ताः स्ववचोभंगकारणात् ॥ मद्वचो न कृतं यस्माद्भवद्भिः पापकर्मणि ॥ २ ॥ वह्निर्हि धक्ष्यते युष्मान्सत्रे जन्मेजयस्य हि ॥ श्रुत्वा शापं ततो मातुर्मृत्युभीताश्च पन्नगाः ॥ ३ ॥ गताः सर्वे यथास्थानं जीवनार्थं यशस्विनि ॥ हिमशैलं गतः शेषस्तपः कर्तुं ततः प्रिये ॥ ४ ॥ सर्पश्च कंबलोनाम लोकं पैतामहं गतः ॥ शंखचूडोऽथ नागेंद्रो मणिपूरं गतस्ततः ॥ ५ ॥ यमुनांभसि संलीनः कालियो भयविह्वलः ॥ ६ ॥ एवं ते सर्पराजानो नागाः सुस्मितशोभने ॥ कुरुक्षेत्रे गताः सर्वे तपश्चर्तुं यशस्विनि ॥ धृतराष्ट्रस्तथा नागः प्रयागमगमत्प्रिये ॥ ७ ॥ एलापत्रस्तु नागेंद्रो ब्रह्मलोकं जगामह ॥ प्रणम्य तमथोवाच मातुरुत्संगसंस्थिताः ॥ ८ ॥ मात्रा शप्ता वयं देव क्रुद्धया तव संनिधौ ॥ सा कथं शापकाले तु भवता न निवारिता ॥ ९ ॥ ॥ ब्रह्मोवाच ॥ ॥ निषिद्धा नैव ते माता भाविकर्मबलान्मम ॥ सर्पसत्रो हि भविता राज्ञो जन्मेजयस्य च ॥ १० ॥ त्वं च वत्स ममादेशान्महाकालवनं व्रज ॥ शांत्यर्थं सर्वनागानां भक्त्या युक्तस्तु सत्वरम् ॥ ११ ॥ समाराधय देवेशं महामायासमीपतः ॥ भविता तत्र ते सिद्धिर्देवदेवप्रसादतः ॥ १२ ॥ तत्र गत्वाथ कर्कोटः स्वयं देवि समाहितः ॥ देवमाराधयामास महामायापुरःस्थितः ॥ तस्य तुष्टोथ देवेशो वरं प्रादाद्यशस्विनि ॥ १३ ॥ ये दंदशूकाः क्रूराश्च पापाचारा विषोल्बणाः ॥ तेषां विनाशो भविता न तु ये धर्मचारिणः ॥ १४ ॥ भक्त्या तवाद्य तुष्टोस्मि त्वं मे सायुज्यतां व्रज ॥ देवे तत्र विलीनोथ नागः कर्कोटकः प्रिये ॥ १५ ॥ कर्कोटकेश्वरः ख्यातस्ततो देवो महेश्वरः ॥ तस्य दर्शनमात्रेण व्याधयो यांति संक्षयम् ॥ १६ ॥ यस्तं पूजयते देवं भक्त्या युक्तो हि मानवः ॥ ऐश्वर्यं जायते तस्य कुलानां तारयेच्छतम् ॥ १७ ॥ व्याधितो व्याधितो मुक्तो दुःखी दुःखात्प्रमुच्यते ॥ दर्शनात्तु भवेत्सद्यः सर्वपातकवर्जितः ॥ १८ ॥ नियमेन प्रपश्यंति ये च कर्कोटकेश्वरम् ॥ ते सर्वकामानाप्स्यंति वसंत्यंते च मत्पुरे ॥ १९ ॥ पंचम्यां च चतुर्दश्यां ये पश्यंति रवेर्दिने ॥ न तेषां तु कुले सर्पाः पीडां कुर्वंति कर्हिचित् ॥ २० ॥ या नारी दुर्भगा सापि सौभाग्यं लभते सदा ॥ गुर्विणी लभते पुत्रमरोगं कुलभूषणम् ॥ शिशुग्रहाश्च नश्यंति नापमृत्युभयं भवेत् ॥ २१ ॥ यंयं काममभिध्यायेन्मनसा भक्तिमान्नरः ॥ तंतं दुर्लभमाप्नोति कर्कोटेश्वरदर्शनात् ॥ २२ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ कर्कोटेश्वरदेवस्य शृणु सिद्धेश्वरं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





परम् ॥२३॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्ये कर्कोटेश्वरमाहात्म्यवर्णनंनाम दशमोऽध्यायः ॥ १० ॥ ॥ श्रीमहादेव उवाच ॥ ॥ लिंगमेकादशं विद्धि देवि सिद्धेश्वरं शुभम् ॥ वीरभद्रसमीपे तु सर्वसिद्धिप्रदायकम् ॥१॥ देव दारुवने पूर्वं विप्रा योगसमन्विताः ॥ स्पर्द्धया सिद्धिलब्ध्यर्थं तपोऽकुर्वंत संयताः॥२॥ शाकाहारा निराहाराः पर्णाहारास्तथापरे ॥ दंतोलूखलिनः केचिदश्मकुट्टास्तथा परे ॥ ३ ॥ केचिद्वीरासनरता धूम्रपानरताः परे ॥ पादैरूर्ध्वैरधोवक्त्रैः केचिदभ्रावकाशिकाः ॥ ४ ॥ कृच्छ्रचांद्रायणादीनि कुर्वन्त्यन्ये समाहिताः ॥ न चापि परमा प्राप्ता सिद्धिर्वर्षशतैरपि ॥ ५ ॥ दुःखार्त्ताश्चिंतयामासुः कथं सिद्धिर्भविष्यति ॥ तपसा दुष्करेणैव सिद्धिर्नै वात्र लभ्यते ॥ ६ ॥ व्यर्था श्रुतिस्तथा जाता या गीता मुनिभिः पुरा ॥ तपसा लभ्यते सर्वं तपोमूलमिदं जगत् ॥ ७ ॥ अंजनं गुटिका चैव पादुकागमनं तथा ॥ खड्गसिद्धिर्बिले वासश्चिंतामणिरपेक्षितम् ॥ ८ ॥ एवं तेऽचिंतयन्सिद्धाः परमामर्षपूरिताः ॥ उत्सार्य तत्तपोधर्मं नास्तिक्यं भावमागताः ॥ ९ ॥ एतस्मिन्नेव काले तु वागुवाचाशरीरिणी ॥ आश्वासयंती तान्सिद्धान्माता पुत्रमिवौरसम् ॥ १० ॥ माऽवमन्यध्व मार्यां हि श्रुतिर्व्यर्था महीतले ॥ तपो न निंद्यं धर्मो वा श्रूयतामत्र कारणम् ॥ ११ ॥ भविता भवतां सिद्धिरत्र नैव तपोधनाः ॥ स्पर्द्धया सिद्धिकामैश्च तपस्तद्धि कृतं वृथा ॥ १२ ॥ कामाच्च तपसो हानिरहंकाराच्च विस्मयः ॥ क्रोधाल्लोभात्तथा मोहाज्जायते नात्र संशयः ॥ ॥ १३ ॥ स्पर्द्धया रहितो यस्तु कामक्रोधविवर्जितः ॥ करोति कर्म भावेन स तपःफलमश्नुते ॥ १४ ॥ वासनावासितो यस्तु एकचित्तः समाहितः ॥ आस्तिकः श्रद्दधानश्च स तपःफलमश्नुते ॥ १५ ॥ मातृवत्परदाराणि परद्रव्याणि लोष्टवत् ॥ यः पश्यति नरो नित्यं स तपः फलमश्नुते ॥ १६ ॥ ईदृशे पुरुषे विप्रास्तपःसिद्धिश्च दृश्यते ॥ भवंतः स्पर्द्धया चैव कृतवंतश्च दुष्करम् ॥१७॥ तस्माद्वर्षसहस्रेण नैव सिद्धिर्भविष्यति ॥ यदि मद्वचनं कार्यं निर्विकल्पेन चेतसा ॥ १८ ॥ महाकालवनं गत्वा यूयं सर्वे समाहिताः ॥ आराधयध्वं देवेशं सदा सिद्धिप्रदायकम् ॥ १९ ॥ दर्शनात्तस्य देवस्य लभ्यते सिद्धिरुत्तमा ॥ सनकादयोऽपि ये देवमासाद्य योगतत्पराः ॥ पूजयित्वापि भावेन संसिद्धिं परमां गताः ॥ २० ॥ राज्ञा वसुमता पूर्वं खड्गसिद्धिः सुदुर्लभा ॥ प्राप्ता दर्शनमात्रेण लिंगस्यास्य प्रभावतः ॥२१॥ पादुकागमनं लब्धं हैहयेन महात्मना ॥ कृतवीरात्मजे नैव वाहानां च सहस्रकम् ॥ २२ ॥ अदृश्यकरणं चैव प्राप्तं चानूरुणा पुरा ॥ स्वर्णसिद्धिश्च सिद्धेन पादलेपो रसायनम् ॥ अंजनं च तथा लब्धं लिंगस्यास्य च दर्शनात् ॥ २३ ॥ आकाशवचनं श्रुत्वा ते सिद्धा विस्मयान्विताः ॥ समायाता मुदा युक्ता महाकालवनोत्तमे ॥ २४ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वसिद्धिप्रदं चैव ददृशुर्लिंगमुत्तमम् ॥ दर्शनात्तस्य लिंगस्य संसिद्धिं परमां गताः ॥ २५ ॥ ततःप्रभृति विख्यातो देवैः सिद्धेश्वरः परः ॥ ये पश्यंति नरा देवि देवं सिद्धेश्वरं परम् ॥ न तेषां दुर्लभा सिद्धिर्भविष्यति महीतले ॥ २६ ॥ सिद्धेश्वरं गमिष्यंति भावहीनाः प्रसंगतः ॥ संसिद्धास्ते भविष्यंति नियता नात्र संशयः ॥ २७ ॥ महापातकसंयुक्तो यस्तु सिद्धेश्वरं स्मरेत् ॥ संसिद्धस्तु भवेन्नूनं ज्ञानैश्वर्यसमन्वितः ॥ २८ ॥ नियमेन तु यः पश्येदेवं सिद्धेश्वरं परम् ॥ षण्मासाज्जायते सिद्धिर्वांछिता या भवेद्धृदि ॥ २९ ॥ अष्टम्यां च चतुर्दश्यां कृष्णपक्षे विशेषतः ॥ सिद्धेश्वरं तु यः पश्येत्स पश्येन्मम मंदिरम् ॥ ३० ॥ अपुत्रो लभते पुत्रं निर्धनस्तु धनं लभेत् ॥ विद्यार्थी लभते विद्यां भार्यार्थी लभते स्त्रियम् ॥ ॥ ३१ ॥ संक्रांतौ सोमवारे च ग्रहणे चैव योऽर्चयेत् ॥ कुलानां शतमुद्धृत्य पैतृकं स्वाधिकं प्रिये ॥ मोदते मम लोके च यावदिंद्राश्चतुर्दश ॥३२॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ सिद्धेश्वरस्य देवस्य लोकपालेश्वरं शृणु ॥ ३३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिंगमाहात्म्ये सिद्धेश्वरमाहात्म्यवर्णनंनामैकादशोऽध्यायः ॥ ११ ॥ ॥ छ ॥ ॥ श्रीहर उवाच ॥ द्वादशं विद्धि देवेशि लोकपालेश्वरं शिवम् ॥ यस्य दर्शनमात्रेण सर्वपापैः प्रमुच्यते ॥ १ ॥ पुरा दैत्यगणा देवि प्रादुर्भूताः सहस्रशः ॥ हिरण्यकशिपोर्वक्षःस्थलादतिपराक्रमाः ॥ २ ॥ तैरियं वसुधा व्याप्ता सशैलवनकानना ॥ विध्वस्ताः स्वाश्रमाः सर्वे यज्ञा विध्वंसितास्तथा ॥ ३ ॥ ब्राह्मणा भक्षिताश्चैव वेदवेदांगपारगाः ॥ पूरितान्यग्निकुण्डानि पांसुना मधुना तथा ॥ ४ ॥ विध्वस्ताः कलशाः सर्वे मृद्भांडादि च चूर्णितम् ॥ निःस्वाध्यायवषट्कारा स्वधास्वाहाविवर्जिता ॥ ५ ॥ कृता च धरणी देवि नष्टयज्ञोत्सवाभवत् ॥ लोकपालास्ततो भीता माधवं शरणं गताः ॥ ६ ॥ ऊचुः प्रांजलयः सर्वे क्षुधार्ता दुःखिताः कृताः ॥ वयं ग्लानिं गता देव यज्ञभागं विना कृताः ॥ ७ ॥ वयं त्रातास्त्वया पूर्वं नमुचेर्वृषपर्वणः ॥ हिरण्यकशिपो रौद्रान्नरकाच्च मुरोस्तथा ॥ ८ ॥ तथा रक्ष सुरश्रेष्ठ भयं नः समुपस्थितम् ॥ ९ ॥ तेषां तद्वचनं श्रुत्वा शंखचक्रगदाधरः ॥ जगाम स ततो दैत्याः प्रविष्टा वरुणालयम् ॥१०॥ ते निष्क्रम्य ततो रात्रौ निघ्नंति द्विजसत्तमान् ॥ तापसान्दीक्षितान्देवि धर्मव्रतपरायणान् ॥ ११ ॥ अथ स्वर्गं गताः कांते जितः शक्रो मरुत्पतिः ॥ तथैव दक्षिणामाशां धर्मराजो जितस्ततः ॥ १२ ॥ गत्वाथ पश्चिमामाशां जलराजो विनिर्जितः ॥ उत्तरे धनदो देवि तैर्दैत्यैः स विनिर्जितः ॥ १३ ॥ ततस्ते व्याकुला जाता विष्णुं शरणमागताः ॥ उपायः कथितो देवि देवेभ्यो विष्णुना तदा ॥ १४ ॥ महाकालवनं गत्वा देवा भक्त्या समाहिताः ॥ आराधयत सर्वेशं शंकरं लोकशंकरम्॥१५॥भवतां भविता सिद्धिस्तत्र तस्य प्रसादतः॥१६॥इति तस्य वचः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





श्रुत्वा कृष्णस्यामिततेजसः ॥ प्रस्थिता लोकपालास्ते महाकालवने शुभे ॥ १७ ॥ तावत्तत्रैव संरुद्धा दैत्यैः शस्त्रधरैस्तदा ॥ भूयो नष्टाश्च संप्राप्ता यत्र देवो जनार्दनः ॥ १८ ॥ कथयामासुरत्युग्रं यथा रुद्धं जगत्त्रयम् ॥ नारायणेन ते प्रोक्ता लोकपालाः पुनःपुनः ॥ १९ ॥ यूयं व्रतधरा भूत्वा कपालैश्च विभूषिताः ॥ खट्वांगधारिणः शांताः पंचमुद्राविभूषिताः ॥ २० ॥ भस्मभूषितसर्वांगाः क्षुद्रघंटाविराजिताः ॥ महाव्रतधरा भूत्वा महाकालवनोत्तमम् ॥ गच्छध्वं ब्रह्मणा सार्द्धं पादबद्धैश्च नूपुरैः ॥ २१ ॥ अथ ते लोकपालाश्च श्रुत्वा कृष्णस्य भाषितम् ॥ समायाता महादेवि कृत्वा कापालिकं वपुः ॥ २२ ॥ तत्र दृष्टं महल्लिंगं तेजसां राशिमद्भुतम् ॥ स्तुतं च विविधैः स्तोत्रैर्लोकपालैः पुनःपुनः ॥ २३ ॥ ततस्तु तस्य लिंगस्य वह्निज्वाला विनिःसृता ॥ यया ते दानवाः सर्वे दग्धा भस्मत्वमागताः ॥ २४ ॥ ज्ञात्वा लिंगस्य माहात्म्यं नाम चक्रुः समाहिताः ॥ सेवितं लोकपालैस्तु लिंगं तेजोमयं परम् ॥ २५ ॥ लोकपालेश्वरोनाम ख्यातिं यास्यति भूतले ॥ इत्युक्त्वा त्रिदशाः सर्वे लोकपालैः समावृताः ॥ स्वस्वस्थानं गता दिव्यं यथापूर्वं मुदान्विताः ॥ २६ ॥ ये पश्यंति नरा देवि लोकपालेश्वरं शिवम् ॥ समृद्धिभिः सुसंपन्ना भवेयुर्जन्मजन्मसु ॥ ॥ २७ ॥ न दारिद्र्यं न च व्याधिर्नाकालमरणं तथा ॥ ऐश्वर्यं चातुलं तेषां जायते दर्शनात्सदा ॥ २८ ॥ यो यमुद्दिश्य वै कामं दर्शनं तु करिष्यति ॥ तस्य तज्जायते सर्वं मृतस्य परमा गतिः ॥ २९ ॥ अश्वमेधस्य यज्ञस्य सम्यगिष्टस्य यत्फलम् ॥ तत्फलं लभते देवि लोकपालेश्वरार्चनात् ॥ ३० ॥ प्रसंगेनापि यः पश्येल्लोकपालेश्वरं शिवम् ॥ मोदते स्वर्गलोके स लोकपालैः समं सदा ॥ ३१ ॥ संक्रांतौ सोमवारे च चतुर्दश्यां विशेषतः ॥ ये पश्यंति नरा भक्त्या ह्यष्टम्यामयनद्वये ॥३२॥ ते दुर्द्धर्षा भवंतीह शत्रूणां संगरे तथा ॥ मृता यांति विमानेन शक्रलोकं सुदुर्लभम् ॥ ३३ ॥ क्रमेण वारुणं लोकं धनदस्य यथासुखम् ॥ पुनः पैतामहं यांति लोकं देवैः सुदुर्लभम् ॥ ३४ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ दुर्लभः परमो गुह्यं कामेश्वरमथो शृणु ॥ ३५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये लोकपालेश्वरमाहात्म्यवर्णनंनाम द्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥ ॥ हर उवाच ॥ ॥ विद्धि कामेश्वरं देवि तत्र लिंगं त्रयोदशम् ॥ यस्य दर्शनमात्रेण सौभाग्यं जायते शुभम् ॥ १ ॥ ब्रह्मणो ध्यायमानस्य प्रजाकामस्य पार्वति ॥ उत्पन्नोऽर्कप्रभाकारो लावण्यनिचयो महान् ॥ अलंकारावृतः कांतो दिव्यमंडनमंडितः ॥ २ ॥ तं दृष्ट्वा परमं दिव्यं कांतं सौभाग्यशोभितम् ॥ अप्रतर्क्यमविज्ञेयं ब्रह्मा प्रोवाच तं तदा ॥ ३ ॥ को भवान्किंनिमित्तं तु इह वा किमुपागतः ॥ वद त्वं मन्मथाकार कंदर्प इव लक्ष्यसे ॥ ४ ॥ ब्रह्मणो वचनं श्रुत्वा प्रोक्तं



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेनैव सादरम् ॥ अहं ते सृष्टिकामस्य भावेन विहितोंशकः ॥ प्रजापते महाभाग किं करोमि दिशस्व माम् ॥ ५ ॥ ॥ ब्रह्मोवाच ॥ ॥ मया तु ष्टिकामेन ये प्रजापतयः कृताः ॥ न ते शक्ताः प्रजाः स्रष्टुं कामैते सुखमाप्नुयुः ॥ ६ ॥ त्वमग्रणीः प्रजासर्गे त्वदधीनमिदं जगत् ॥ कुरु सृष्टिं विचित्रां च कंदर्प मम शासनात् ॥७॥ इत्युक्तो ब्रह्मणा देवि जगामादर्शनं स्मरः ॥ क्रुद्धेन ब्रह्मणा शप्तो विनाशं यास्यसि ध्रुवम् ॥८॥ मद्वचो न कृतं यस्माद्भवनेत्रोद्भवाग्निना ॥ तच्छ्रुत्वा दारुणं शापं कंदर्पो भयविह्वलः ॥ ब्रह्माणं प्रणतो भूत्वा प्रह्वः प्रांजलिरब्रवीत् ॥ ९ ॥ प्रसीद देवदेवेश अनन्यगतिके मयि ॥ नहि निर्भरतां यांति प्रभूणामाश्रिते रुषः ॥ १० ॥ ॥ ब्रह्मोवाच ॥ ॥ यस्मात्ते भक्तिरतुला ममोपरि महामते ॥ तस्मात्स्थानानि दत्तानि तव द्वादश संख्यया ॥ ११ ॥ कामिनीनां कटाक्षेषु केशपाशेषु चैव हि ॥ जघनस्तननाभौ तु दोर्मूलेऽधरपल्लवे ॥ १२ ॥ वसंते कोकिलालापे ज्योत्स्नायां जलदागमे ॥ कामार्थे च मया दत्तौ सबलौ मधुमाधवौ ॥ १३ ॥ स्त्रियोऽमृतमया धन्याः संसारे सारकारणम् ॥ रतेश्चैव निधानानि संतानार्थं विनिर्मिताः ॥ १४ ॥ एताभिर्वरनारीभिर्जगदेवं वशीकृतम् ॥ स्त्रीभिरासक्तमनसः कुतः पुंसो मनस्विता ॥ १५ ॥ कुतश्चापि स्ववशता स्त्रीगौरवगतस्य च ॥ स्त्रिय एव विनाशाय पूर्वेषाममरद्विषाम् ॥ १६ ॥ स्त्रिय एव हि देवानामिंद्रादीनां भयाश्रयाः ॥ नारीभिर्लब्धवृत्तेश्च पुरुषस्यापि सर्वतः ॥ १७ ॥ पराभवः प्रभवति विवशत्वं च भीषणम् ॥ स्त्रीभिराजितचित्तस्य सुलभो विपदोदयः ॥ १८ ॥ इत्युक्तो मन्मथो भद्रे ब्रह्मणा च विसर्जितः ॥ दत्त्वा वै पुष्पकं चापं तथा वै बाणपंचकम् ॥ १९ ॥ रतिप्रीतिसमायुक्तो झषकेतुर्मनोभवः ॥ विडंबयति लोकांस्त्रीन्ससहायो धनुर्धरः ॥ २० ॥ पंडितांस्तापसान्वीरान्सुधियश्च जितेंद्रियान् ॥ काले कुशलभावज्ञान्देवान्पितृगणांस्तथा ॥ २१ ॥ भूतप्रेतपिशाचांश्च यक्षगंधर्वकिंनरान् ॥ कृमिकीटपतंगांश्च भूतग्रामं चतुर्विधम् ॥ २२ ॥ ममार्थे च कृतो यत्नश्चिंतयित्वा पुनःपुनः ॥ दुःसाध्यः शंकरो देवः श्रूयते भुवनत्रये ॥ तस्य देवस्य कः शक्तः क्षोभणार्थं मया विना ॥ २३ ॥ इत्युक्त्वा तु समायातो यत्राहं तपसि स्थितः ॥ रत्या युतः स गर्वेण सख्याऽयं मधुनाश्रितः ॥ ॥ २४ ॥ दृष्टवान्मां तदा कामः पिंजकूटजटासटम् ॥ किंचिन्निमित्ततोऽनिद्रं भोगींद्रकृतभूषणम् ॥ २५ ॥ प्रेक्षमाणमृजुस्थानं नासावंशाग्रलोचनम् ॥ ततोऽवमरकाकारमालंब्याश्रयमात्रकम् ॥ २६ ॥ प्रविष्टः कररंध्रेण मदनो हृदये मम ॥ रत्यर्थं कामतत्तेन संस्मृता भवती मया ॥२७॥

१ अवमरकोनामातिसूक्ष्मो जन्तुविशेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





समाधेर्भावना दिव्या लक्ष्यप्रत्यक्षरूपिणी ॥ गता मम विमलता तत्क्षणादेव पार्वति ॥ २८ ॥ उन्मत्ततां गतोऽहं वै विकृतिं मदनात्मिकाम् ॥
निराकृतं मया देवि धैर्यमालंब्य यत्नतः ॥ २९ ॥ दृष्टो मयात्महृदये मन्मथोऽपथ्यकारकः ॥ देहस्थं निर्दहिष्यामि प्रत्याहारप्रयोगतः ॥ ३० ॥
अमानुषीं व्रजेद्योनिं योगिनं प्रविशेद्यदि ॥ बाह्याग्नौ धारणां कृत्वा देहसंस्थे विनिर्दहेत् ॥ ३१ ॥ एतस्मिन्नंतरे सोऽपि संततो मदनो भृशम् ॥
इच्छाशरीरो दुर्ज्ञेयो निःसृतो व्यसनात्मकः ॥ ३२ ॥ सहकारतरोर्मूले भूत्वा मधुसखस्तदा ॥ मुमोच मोहनंनाम मार्गणं मकरध्वजः ॥ ३३ ॥
स चापि हृदये प्राप्तो मदीये लीलया शरः ॥ ततोहं कुपितो देवि नेत्रं कृत्वा तृतीयकम् ॥ ३४ ॥ तन्नेत्रविस्फुलिंगेन क्रोशतां नाकवासिनाम् ॥
गमितो भस्मसात्तूर्णं कंदर्पः कामिदर्पकः ॥ ३५ ॥ तस्मिन्दग्धे ततः कामे रतिः शोकपरायणा ॥ विललाप सुदुःखार्त्ता पतिभक्तिपरायणा ॥
॥ ३६ ॥ हा नाथ हा मम प्राण हा स्वामिन्किं जहासि माम् ॥ पतिव्रतां पतिप्राणां कस्मान्मां त्यजसि प्रभो ॥ ३७ ॥ एवं च विलपंतीं तां वागुवा
चाशरीरिणी ॥ मा त्वं रुद विशालाक्षि पुनरेष पतिस्तव ॥ प्रसादाद्देवदेवस्य उत्थास्यति शिवस्य च ॥ ३८ ॥ प्रार्थितोऽहं ततो देवि तस्मिन्नवसरे
प्रिये ॥ एष कामस्त्वया दग्धः क्रोधेन परमेश्वर ॥ ३९ ॥ येनानेन प्रभो नष्टा सृष्टिर्वै धरणीतले ॥ कृपां विधेहि देवेश दीनायै देहि मे पतिम् ॥
॥ ४० ॥ ततोऽहमब्रुवं देवि तां रतिं दीनभाषिणीम् ॥ अनेन मदनेनाद्य कृतं तरलितं मनः ॥ ४१ ॥ ततो दग्धं मयास्यांगं जीवये त्वत्प्रसादतः॥
अंगं दग्धं मयास्याद्य तृतीयनेत्रवह्निना ॥ ४२ ॥ तस्मादनंग एवैष प्रजासु विचरिष्यति ॥ अनंगोऽपि यदावंत्यां लिंगं संसेवयिष्यति ॥ ४३ ॥
देवानामनुकंपार्थमनंगोऽसौ कृतो मया ॥ त्रिदशैश्च समादिष्टः कामोऽवंत्यां जगाम ह ॥ ४४ ॥ तत्र गत्वा ह्यनंगोऽपि भक्तिभावसमन्वितः ॥
ददर्श परमं लिंगं समीहितफलप्रदम् ॥ ४५ ॥ प्रोक्तं तुष्टेन लिंगेन काम काममवाप्स्यसि ॥ अनंगोऽपि समर्थस्त्वं भविष्यसि न संशयः ॥ ४६ ॥
जन्म प्राप्स्यति रुक्मिण्या गर्भे कृष्णस्य संगमात ॥ भविता विश्रुतो लोके नाम्ना शंबरसूदनः ॥ ४७ ॥ अनंगेन त्वया यस्मान्मनसा तोषि
तोऽपि सन् ॥ तस्मात्ख्यातिं गमिष्यामि त्वन्नाम्ना काम सर्वदा ॥ ४८ ॥ ये त्वां पश्यंति कंदर्पं भक्त्या परमया युताः ॥ प्राप्नुवंति गतिं नित्यं ते
सदानंददायिकाम् ॥ ४९ ॥ दीर्घायुषो भविष्यंति रूपं तेषां भविष्यति ॥ कुलं चनिर्मलं तेषां ये त्वां पश्यंति मन्मथ ॥ ५० ॥ ऐश्वर्यं परमान्भोगा
न्स्त्रियो दिव्यकलान्विताः ॥ अरोगा संततिस्तेषां भविष्यति न संशयः ॥ ५१ ॥ चैत्रशुक्लत्रयोदश्यां ये मां पश्यंति भक्तितः ॥ देवलोकं
समासाद्य मोदिष्यंति हि ते नराः ॥ ५२ ॥ यक्षा गणेश्वराः सिद्धाः सिद्धगंधर्वसेविताः ॥ रुद्रलोकं गमिष्यंति विमानैः सर्वकामिकैः ॥ ५३ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्युक्तः कामदेवोपि लिंगेन परमेश्वरि ॥ तत्राश्रमपदं चक्रे तस्य लिंगस्य संनिधौ ॥५४॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ कामेश्वरस्य शृण्वग्रे कुटुंबेश्वरवैभवम् ॥ ५५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये कामेश्वरमाहात्म्यवर्णनंनाम त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ कुटुंबेश्वरसंज्ञं तु देवं विद्धि चतुर्दशम् ॥ यस्य दर्शनमात्रेण गोत्रवृद्धिश्च जायते ॥ १ ॥ यदा देवासुरैः पूर्वं मथितः क्षीरसागरः ॥ तदा च निर्गतं देवि दुर्द्धरं दुःसहं विषम् ॥ २ ॥ कालकूटमयं रौद्रं विषं ज्वालाविभीषणम् ॥ दह्यते च जगत्तेन सदेवासुरमानुषम् ॥ ३ ॥ ततो देवगणाः सर्वे सासुरा यक्षराक्षसाः ॥ विषज्वालातिभीताश्च मामेव शरणं गताः ॥ ४ ॥ स्तुतोहं विविधैः स्तोत्रैरिदमुक्तं वरानने ॥ अमृतार्थे कृतो यत्नः संप्राप्तं मरणं विभो ॥ ५ ॥ अन्यथा चिंतितं कार्यं दैवेन कृतमन्यथा ॥ अतिमथितुमारब्धे लोभाद्वै क्षीरसागरम् ॥६॥ उत्पन्नं कालकूटं तु येन दग्धं चराचरम् ॥ ततोऽस्माकं भयं जातं कालकूटोद्भवं प्रभो ॥ ॥७॥ रक्षां कुरु जगन्नाथ शरणागतवत्सल ॥ हितार्थं सर्वलोकानां यथा न प्रलयो भवेत् ॥ ८ ॥ मया तेषां वचः श्रुत्वा त्रिदशानां यशस्विनि ॥ मायूरं रूपमास्थाय देवानामनुकंपया ॥ कंठे धृतं महारौद्रं कालकूटाह्वयं तदा ॥ ९॥ त्वं भीता सहसा नंष्टा[1] रूपं दृष्ट्वा तु मामकम् ॥ विषवृक्षमसेव्यं तु ततोऽहं दुःखितोऽभवम् ॥१०॥ नदीसंघसमायुक्ता गंगा दृष्टा च पार्श्वतः ॥ सा च प्रोक्ता मया देवि सादरं स्तुतिपूर्वकम् ॥ ११ ॥ कालकूटविषं गंगे वेगान्नय महोदधिम् ॥ नान्या शक्ता समानेतुं त्वां विना लोकपावनि ॥ १२ ॥ ॥ गंगोवाच ॥ ॥ नास्ति मे भगवञ्छक्तिर्विवोढुं च जगत्पते ॥ रौद्ररूपी च दुःसेव्यो दहत्येव न संशयः ॥ १३ ॥ ततस्तु यमुना प्रोक्ता न समर्था सरस्वती ॥ अन्याश्च विविधा नद्यो मयाहूताः पृथक्पृथक् ॥ १४ ॥ अशक्तास्ताः समानेतुं कालकूटाह्वयं विषम् ॥ तदाहूता मया देवि शिप्रा ब्रह्मसमुद्भवा ॥ १५ ॥ शिप्रे पुत्रि ममादेशान्महाकालवनं व्रज ॥ गृहीत्वा कालकूटं तु पुरः कामेश्वरस्य हि ॥१६॥ विद्यते परमं लिंगं तस्मिँल्लिंगे नियोजय ॥ मया प्रोक्ता तदा प्राह ब्रह्मणः परमा कला ॥ १७ ॥ एषास्मि प्रस्थिता देव तव वाक्यादसंशयम् ॥ दुःस्पर्शः कालकूटोऽयं नूनं मां भक्षयिष्यति ॥ १८ ॥ असेव्याहं भविष्यामि दुष्टसंपर्कयोगतः ॥ ततो मया पुनः प्रोक्ता शिप्रा पातकनाशिनी ॥ १९ ॥ यानि तीर्थानि भूलोके पाताले यानि संति वै ॥ स्वर्गलोके ह्यंतरिक्षे पुण्यानि चारुहासिनि ॥ २९ ॥ तानि सर्वाणि सेवार्थमागत्य मम वाक्यतः ॥ आज्ञां तव करिष्यंति गच्छ पुत्रि ममाज्ञया ॥ २१ ॥ एवमुक्ता तदा शिप्रा

१ नष्टा—अदर्शनं गता—पलायितेत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



गृहीत्वा कालकूटकम् ॥ समायाता वरारोहे यत्र लिंगमनुत्तमम् ॥ २२ ॥ तद्विषं कालकूटाह्वं निक्षिप्तं लिंगमूर्द्धनि ॥ विषलिंगस्ततो जातो दृष्टो
मृत्युप्रदायकः ॥ २३ ॥ पशुः पक्षी नरो वापि यो हि पश्यति तं शिवम् ॥ म्रियते स तदा देवि तस्य देवस्य दर्शनात् ॥ २४ ॥ तीर्थयात्रां ततः
कर्त्तुं तत्रायातास्तपोधनाः ॥ तं च देवं ततो दृष्ट्वा मृताः सर्वे च तत्क्षणात् ॥ २५ ॥ ततो हाहाकृतं देवि त्रैलोक्यं सचराचरम् ॥ हाहाकारं महच्छ्रुत्वा
मया ते द्विजसत्तमाः ॥ संजीविताश्च वै सर्वे दृष्टिपातेन पार्वति ॥ २६ ॥ तुष्टुवुः प्रणता विप्रा मामतो विविधैः स्तवैः ॥ मया प्रोक्तास्तु ते विप्रा
वृणुध्वं वरमुत्तमम् ॥ २७ ॥ तैरुक्तं प्रणतैर्देवि लोकानां च हितार्थतः ॥ संम्रियंते प्रजा देव लिंगेनानेन शंकर ॥ २८ ॥ ताः संरक्ष जगन्नाथ ह्येषोऽ
स्माकं वरः प्रभो ॥ प्रतिज्ञातं मया देवि लोकानामनुकंपया ॥ २९ ॥ क्षेमारोग्यकरं लिंगं भविष्यति न संशयः ॥ कायावरोहणाद्विप्राः स्वयमत्रा
गमिष्यति ॥ ३० ॥ लकुलीशस्तदा चायं देवः स्पृश्यो भविष्यति ॥ वृद्धिकारी कुटुम्बस्य भविष्यति न संशयः ॥३१॥ कुटुंबेश्वर इति नाम्ना लोके
ख्यातिं गमिष्यति ॥ इत्युक्तास्ते मया विप्रास्तत्रैव तपसि स्थिताः ॥ ३२ ॥ लकुलीशोऽथ तल्लिंगमारुरोह ममाज्ञया ॥ जनयन्विस्मयं लोके कीर्तिं
जनपदे तथा ॥ ३३ ॥ कुटुम्बेश्वरसंज्ञं तु ये पश्यंति यशस्विनि ॥ तेषां कुले तु वृद्धिः स्यात्कुटुंबस्य न संशयः ॥ ३४ ॥ आश्विनासितपंचम्यां दर्श
नं यः करिष्यति ॥ बहुपुत्रो बहुधनो भविष्यति न संशयः ॥ ३५ ॥ महतीं श्रियमाप्नोति रोगैश्चापि प्रमुच्यते ॥ सर्वकामसमृद्धोऽसौ मम लोके
स मोदते ॥३६ ॥ दर्शनं ये करिष्यंति स्पर्शनं यजनं तथा ॥ ते सर्वे कामसंपूर्णाः प्रयांति मम मंदिरम् ॥ ३७ ॥ समीपे तु सरिच्छिप्रा वापीकूपेन
संयुता ॥ यस्या दर्शनमात्रेण नरः पापात्प्रमुच्यते ॥३८॥ सोमवारेर्कवारे च स्नात्वा तस्यां समाहितः॥अष्टम्यां वा चतुर्दश्यां यः पश्येत्कुटुंबेश्वरम् ॥
॥ ३९ ॥ राजसूयसहस्रस्य वाजपेयशतस्य च ॥ फलं स लभते देवि सत्यमेतन्मयोदितम् ॥ ४० ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥
कुटुंबेश्वरदेवस्य त्विंद्रद्युम्नेश्वरं शृणु ॥ ४१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्ये
कुटुंबेश्वरमाहात्म्यवर्णनंनाम चतुर्दशोऽध्यायः ॥१४॥छ॥ ॥ श्रीमहादेव उवाच ॥ ॥ इंद्रद्युम्नेश्वरं विद्धि शिवं पंचदशं प्रिये ॥ यस्य दर्शनमात्रेण यशः
कीर्तिश्च जायते ॥ १ ॥ आसीद्राजा पुरा देवि इंद्रद्युम्नो महीपतिः ॥ येनेयं रक्षिता पृथ्वी पिता पुत्रमिवौरसम् ॥ २ ॥ दृष्ट्वा सोऽथ बहून्यज्ञान्भूमौ
प्रचुरदक्षिणान् ॥ गतः स्वर्गं महात्मा वै सर्वकाम फलप्रदम् ॥ ३ ॥ स चाथ प्रच्युतः स्वर्गान्नष्टकीर्तिर्यदा क्षितौ ॥ पपात भूमौ सहसा गतपुण्यो नरा
धिपः ॥ पतितश्चिंतयामास भृशं शोकपरिप्लुतः ॥ ४ ॥ कृतस्य कर्मणस्त्वत्र भुज्यते यत्फलं दिवि ॥ न चान्यत्क्रियते तद्यद्भूतलस्थेन भुज्यते ॥५॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सोऽत्र दोषो मतस्तस्यामतस्तत्पतनं च यत् ॥ पतनात्तु महद्दुःखं परितापश्च जायते ॥६॥ स्वर्गभाजो भवंतीह यावत्कीर्तिश्च जायते ॥ दिवं स्पृशति भूमिं च शब्दः पुण्यस्य कर्मणः॥ यावत्स शब्दो भवति तावत्पुरुष उच्यते ॥७॥ अकीर्त्तिः कीर्त्यते यस्य लोके भूतस्य कस्यचित्॥ स पतत्यधमाँल्लोकान्यावच्छब्दोऽस्य कीर्त्तितः ॥ ८ ॥ तस्मात्कल्याणवृत्तः स्यादन्यथा पतनं भुवि ॥ विधाय वृत्तं पापिष्ठं[1] कीर्तिमेवाभिवर्द्धयेत् ॥ ९ ॥ अत्यंतं श्लाघयाम्यत्र कीर्त्तिं स्वर्गकरां पराम् ॥ देवैरपि हि सा कीर्तिः कांक्ष्यते परमा यतः ॥ १० ॥ यावत्कीर्त्तिर्मनुष्याणां वर्त्तते भुवि चाक्षया ॥ तेजः पुंजेन युक्तानि शरीराणि भवंति हि ॥ ११ ॥ न स्वेदो न च दौर्गंध्यं पुरीषं मूत्रमेव वा ॥ तेषां निर्वचनं[2] राजा विधाता च त्रिविष्टपे ॥ उह्यंते ते विमानैश्च नानाभरणभूषिताः ॥ १२ ॥ एवं विमृश्य नृपतिरिंद्रद्युम्नो वरानने ॥ स्वर्गकामो जगामाथ हिमवंतं नगोत्तमम् ॥ १३ ॥ यत्र तेपे तपस्तीव्रं मार्कंडेयो महामुनिः ॥ दृष्ट्वा प्रणम्य शिरसा साष्टांगं च पुनःपुनः ॥ पप्रच्छ विनयोपेतस्तमृषिं शंसितव्रतम् ॥ १४ ॥ विदितास्तव धर्मज्ञ देवदानवराक्षसाः ॥ राजवंशाश्च विविधा ऋषिवंशाश्च शाश्वताः ॥ १५ ॥ न तेऽस्त्यविदितं किञ्चिदस्मिँल्लोके द्विजोत्तम ॥ एतदिच्छाम्यहं श्रोतुं तत्त्वेन कथ्यतां त्वया ॥ कथं कीर्त्तिर्ध्रुवा लोके जायते किंतपःफलात् ॥ १६ ॥ ॥ मार्कण्डेय उवाच ॥ ॥ हंत ते कथयिष्यामि यतः कीर्तिं समीहसे ॥ यावत्कीर्तिर्भूमिसंस्था तावद्वस सुरैः सह ॥ तद्गच्छ शीघ्रं धर्मज्ञ महाकालवनोत्तमम् ॥ १७ ॥ कैल्कलेश्वरदेवस्य[3] समीपे वामभागतः ॥ लिंगं पापहरं तत्र समाराधय यत्नतः ॥ १८ ॥ तस्याभ्यर्चनमात्रेण लप्स्यसे कीर्तिमुत्तमाम् ॥ स्वर्गं सनातनं चैव यत्सुरैरपि दुर्लभम् ॥ ॥ १९ ॥ गत्वा स पूजयामास तल्लिंगं कीर्तितं त्विदम् ॥ ततो देवाः सगन्धर्वाः प्रशस्य च मुदान्विताः ॥ २० ॥ अन्तरिक्षे विमानस्थाः प्रोचुर्वाचं नराधिपम् ॥ त्वत्कीर्त्तिर्निर्मला जाता लिंगस्यास्य समर्चनात् ॥ २१ ॥ अद्यप्रभृति राजेंद्र लिंगं त्वन्नाम नामतः ॥ ख्यातिं यास्यति लोकेऽस्मिन्निंद्रद्युम्नेति निश्चितम् ॥ २२ ॥ इन्द्रद्युम्नेश्वरं देवं पूजयिष्यंति ये नराः ॥ सर्वपापविनिर्मुक्ता विमानैः सर्वकामिकैः ॥ २३ ॥ स्वर्गं यास्यंति ते हृष्टाः स्तूयमानाः सुरर्षिभिः ॥ किंचिच्च दुर्लभं लोके तेषां नैव भविष्यति ॥ २४ ॥ दर्शनं ये करिष्यंति लोभाद्वापि प्रसंगतः ॥ तेषां कीर्ति

१ एतेन—अतिपापिष्ठस्य—स्वर्गप्राप्तिरेव भवति—इति विश्रम्य—पापकर्मण्येव प्रवृत्तिर्नानेन विधीयते—अपि तु कीर्तिप्रशंसामात्र एव तात्पर्यम्। स्वर्गप्रापिका कीर्तिस्तु—पुण्यकर्मैकलभ्यैव। अत्र श्लोके—'पापिष्ठं कर्म विधायापि कीर्तिमेवाभिवर्द्धयेत्—' इत्युक्त्या—काक्वर्थमनुसंधाय—किं पुनः पुण्यकरं कर्म विधाय—कीर्तिमभिवर्धयेत्—इति वक्तव्यमिति भावार्थः—इत्यनुसंधेयं सुधीभिः। २ निर्वचनम्—उदाहरणम्—इत्यर्थः। ३ कालकालेश्वरदेवसमीपे—इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





र्यशः पुण्यं धर्मश्चैवं भविष्यति ॥ २५ ॥ न स्वर्गात्पतनं तेषां यावदिंद्राश्चतुर्दश ॥ ये च पूजां करिष्यंति चतुर्दश्यां विशेषतः ॥ ते कुलं तारयिष्यंति मातृकं पैतृकं सदा ॥ २६ ॥ इत्युक्त्वा त्रिदशाः सर्वे लिंगं संपूज्य यत्नतः ॥ इंद्रद्युम्नेन सहिताः पुनः स्वर्गं गताः प्रिये ॥ २७ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ इन्द्रद्युम्नेशदेवस्य श्रूयतामपरः प्रिये ॥ २८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिंगमाहात्म्य इन्द्रद्युम्नेश्वरमाहात्म्यवर्णनंनाम पंचदशोऽध्यायः ॥ १५ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ईशानेश्वरसंज्ञं तु षोडशं विद्धि पार्वति ॥ यस्य दर्शनमात्रेण ऐश्वर्य्यं जायते नृणाम् ॥ १ ॥ तुहुंडेन पुरा देवि सर्वे ह्युपद्रुताः सुराः ॥ ऋषयश्च महाभागा यक्षगन्धर्वकिन्नराः ॥ २ ॥ नंदनाख्यं वनं सर्वं तदधीनमभूत्किल ॥ ऐरावणं द्विपेन्द्रं च जित्वा द्वारि समादधत् ॥ ३ ॥ उच्चैःश्रवससंज्ञं तु हृतवान्दानवेश्वरः ॥ देवांगनानां सर्वासां विध्वंसं कर्तुमुद्यतः ॥ ४ ॥ स्वर्गमार्गः खिलीभूतस्तद्भयेन ह्यभूत्सति ॥ हृताधिकारा देवाश्च मंत्रं समुपचक्रमुः ॥ ५ ॥ तस्मिन्काले च कालज्ञो नारदोऽथ महामुनिः ॥ आजगाम महातेजा भ्रममाणश्च मंत्रिभिः ॥ ६ ॥ देवैर्नमस्कृतः सोऽथ पूजितश्च यथाविधि ॥ निवेदितं यथावृत्तं तुहुण्डस्य विचेष्टितम् ॥ ७ ॥ पप्रच्छुरथ ते मंत्रं नारदं मुनिसत्तमम् ॥ कथयस्व महाबुद्धे सर्वं जानासि सर्व्वतः ॥ ८ ॥ ईदृक्काले समा[illegible]ते किं कर्त्तव्यं महामुने ॥ नाज्ञातं त्रिषु लोकेषु किंचिद्देवर्षिसत्तम ॥ ९ ॥ मुहूर्तं ध्यानमालंब्य किंचिन्मील्य च लोचने ॥ उपायं कथ[illegible]ास सर्वदुःखविनाशनम् ॥ १० ॥ महाकालवने रम्ये शीघ्रं गच्छंतु विह्वलाः ॥ इन्द्रद्युम्नेश्वरस्यैव पश्चाद्भागे व्यवस्थिताः ॥ सेवध्वं परमं लिंगमीशानेश्वरसंज्ञकम् ॥ ११ ॥ पुरा चेशानकल्पे तु ईशानेन सुखेन हि ॥ मुनिना श्रोत्रियेणैव वेदाभ्यासरतेन वै ॥ उत्तमांगपदं लब्धं शंकरस्य च मूर्द्धनि ॥ १२ ॥ तस्याराधनमात्रेण मनोऽभीष्टं हि लभ्यते ॥ १३ ॥ नारदस्य वचः श्रुत्वा देवा मुदितमानसाः ॥ जग्मुर्यत्र महल्लिंगं स्तुतिं सर्वेऽप्यकुर्वत ॥ १४ ॥ ईशानेशान ईशान तत्पुरुष नमोऽस्तु ते ॥ नमो वाम महाघोर सद्योमुख नमोनमः ॥ ॥ १५ ॥ त्र्यक्ष भर्ग महादेव उमाकांत नमोनमः ॥ नमः शिव नमो भीम नमः सर्व नमोनमः ॥ १६ ॥ नमः शंभो नमो रुद्र विरूपाक्ष नमोनमः ॥ त्वया देव प्रजाः सर्वाः सदेवासुरमानुषाः ॥ १७ ॥ स्थावराणि च भूतानि जंगमानि चराणि च ॥ ब्रह्म वेदाश्च वेद्यं च त्वया सृष्टं महेश्वर ॥ १८ ॥ शिरस्ते गगनं देवा नेत्रे शशिदिवाकरौ ॥ निःश्वासः पवनश्चापि तेजोऽग्निश्च तवाच्युतः ॥ १९ ॥ बाहवस्ते दिशः सर्वाः कुक्षिश्चैव महार्णवः ॥ उरू ते पर्वता देव चरणौ पृथिवी मता ॥ २० ॥ इंद्रसोमाग्निवरुणा देवासुरमहोरगाः ॥ प्रह्वास्त्वामनुतिष्ठंति स्तुवंतो



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विविधैः स्तवैः ॥ २१ ॥ त्वया व्याप्तानि भूतानि सर्वाणि भुवनेश्वर ॥ त्वयि तुष्टे जगत्तुष्टं त्वयि क्रुद्धे महद्भयम् ॥ २२ ॥ भयानामपनेतासि त्वमेकः शत्रुसूदनः ॥ असुराणां समर्थानां विनाशश्च त्वया कृतः ॥ २३ ॥ न च विक्रमणैर्देव निर्वाणमगमत्परम् ॥ त्वं हि कर्त्ता विकर्त्ता च भूतानामिह सर्वशः ॥ २४ ॥ आराधयित्वा सर्वे ते नमस्यंति च सर्वशः ॥ एतस्मिन्नंतरे देवि लिंगमध्यात्समुत्थिता ॥ २५ ॥ धूमावृता महाज्वाला यया दग्धः स दानवः ॥ तुहुण्डो मुंडपुत्रस्तु ससैन्यपरिवारितः ॥ २६ ॥ स्वाधिकारांश्च संप्रापुर्लिंगस्यास्य प्रभावतः ॥ सुरैश्चाख्या समादिष्टा लिंगस्यास्यैव हर्षितैः ॥ २७ ॥ ऐश्वर्यशीलमस्यास्तीत्यस्माकं च विनिश्चितम् ॥ ईशान इति विख्यातस्त्रैलोक्ये च भविष्यति ॥ २८ ॥ ईशानेश्वरसंज्ञं तु ये समाराधयंति च ॥ कीर्तिर्लक्ष्मीर्ध्रुवा तेषां सिद्धिः प्रीतिर्भविष्यति ॥ २९ ॥ पूज्यमानः सदा देवैर्गंधर्वाप्सरसांगणैः ॥ स्वर्गलोकं गमिष्यंति विमानैरुज्ज्वलैर्मुदा ॥ ३० ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राः स्त्रियः कुमारिकाः ॥ यथाभिलषितान्कामानाप्नुवंति न संशयः ॥३१॥ यः करोति नरः सम्यग्दर्शनं नियमस्थितः ॥ न कुत्र तस्य हानिः स्याद्यावज्जन्मशतं भवेत् ॥ ३२ ॥ सर्वदा सर्वकार्येषु ते समर्था यशस्विनि ॥ ईशानेश्वरसंज्ञं तु ये पश्यंति दिनेदिने ॥ ३३ ॥ एवं ते कथितो देवि प्रभावः पापनाशनः ॥ ईशानेश्वरदेवस्य श्रूयतामप्सरेश्वरः ॥ ३४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्य ईशानेश्वरमाहात्म्यवर्णनंनाम षोडशोऽध्यायः ॥ १६ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ देवं सप्तदशं विद्धि विख्यातमप्सरेश्वरम् ॥ यस्य दर्शनमात्रेण लोकोऽभीष्टानवाप्नुयात् ॥ १ ॥ नंदनाख्ये वने देवि सर्वकामसमन्विते ॥ सिद्धचारणगंधर्वकिंनरोद्गीतनादिते ॥ २ ॥ शुककोकिलचक्राह्वचकोरकुररावृते ॥ दिव्यलोकोपमस्थाने त्रिविष्टपविभूषणे ॥ ३ ॥ तत्रोपविष्टो वृत्रारिः सुरज्येष्ठश्च सेवितः ॥ ननर्त्त रंभा तस्याग्रे नृत्यभावान्विवृण्वती ॥ ४ ॥ ततोन्यचित्ता संजाता किंचित्स्मृत्वा प्रमादतः ॥ लयतालविहीना च दृष्टा वै वासवेन सा ॥ ५ ॥ चुकोप च सुरश्रेष्ठस्तस्याः शापं ददौ किल ॥ विस्मृतिर्मानुषं कर्म न दिव्यं क्वापि दृश्यते ॥ तस्मात्तु मानुषे लोके गच्छ त्वं निष्प्रभा सती ॥ ६ ॥ अथेंद्रकोपसंक्षोभात्पतिता भुवि साप्सराः॥ निश्चेष्टा विकलीभूता रुदती विस्वरं बहु ॥ ७ ॥ करुणं विलपंती च किं मया दुष्कृतं कृतम् ॥ निर्मलं न तपस्तप्तं कथं नाराधितः सुरः ॥ ८ ॥ अथाप्सरोगणः सर्वः सखीगणसमन्वितः ॥ रंभा यत्रैव पतिता समायातो वरानने ॥ तस्याः शोकाग्निदाहेन संतप्तोऽप्सरसां गणः ॥ ९ ॥ सुसुप्ता पद्मिनी साभ्रे यथा नैव विराजते ॥ तथा शापेन विध्वस्ता रंभा नो राजते सदा ॥ १० ॥ सखीगणैः परिवृता रंभा दृष्टा वरानने ॥ देवर्षिणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





नारदेन विस्मितेनांतरात्मना ॥ ११ ॥ कस्मादप्सरसः सद्यो दृश्यंते शोकविह्वलाः ॥ कस्माच्च करुणं रंभा रोदित्येषा मुहुर्मुहुः ॥ ॥ १२ ॥ पप्रच्छ च समागत्य कस्मादप्सरसो वराः ॥ विषण्णवदना दीनाः कथ्यतां मम सादरम् ॥ १३ ॥ वृत्तांतं कथयामासुस्ताश्च तस्मै पुरातनम् ॥ श्रुत्वा च नारदस्तत्र ध्यानासक्तोऽभवन्मुनिः ॥ १४ ॥ उपायं कथयामास हितं तासां प्रयत्नतः ॥ गच्छंत्वप्सरसः सर्वा महाकालवनोत्तमे ॥ १५ ॥ आराधयध्वं देवेशं लिंगं सर्वार्थसाधकम् ॥ पृच्छादेव्यास्तु पुरतः पुरा कल्पे प्रपूजितम् ॥ १६ ॥ उर्वश्या मम वाक्येन भर्त्ता प्राप्तः पुरूरवाः ॥ नारदस्य वचः श्रुत्वा समाजग्मुर्गणास्तथा ॥ १७ ॥ महाकालवने रम्ये लिंगाराधनकाम्यया ॥ ततस्तुष्टः स्वयं रुद्रस्तासां भक्त्या वरं ददौ ॥ १८ ॥ रंभे प्राप्स्यसि सौभाग्यं स्वर्गलोकं यशस्विनि ॥ भविष्यसि महाभागे जिष्णोस्त्वं वल्लभा ध्रुवम् ॥ १९ ॥ तस्मात्त्रिविष्टपं गच्छ संघेनानेन पूजिता ॥ आराधितोऽप्सरोभिश्च पुरा स्वर्गार्थकाम्यया ॥ अतोप्सरेश्वरः ख्यातो ययौ ख्यातिं जगत्त्रये ॥ २० ॥ ये समाराधयिष्यंति भक्त्या चाप्सरसेश्वरम् ॥ ते सर्वकामसंपूर्णा भविष्यंति युगेयुगे ॥ २१ ॥ प्रेरयिष्यंति ये लोके दर्शनार्थं यशस्विनि ॥ स्थानभ्रंशो वियोगश्च तेषां स्वप्ने न जायते ॥ २२ ॥ किं दानैः किं तपोभिश्च किं यज्ञैर्बहुदक्षिणैः ॥ स्पर्शनाल्लभते राज्यं स्वर्गं मोक्षं क्रमेण तु ॥ २३ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ अप्सरेश्वरदेवस्य श्रूयतां कलकलेश्वरः ॥ २४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्येऽप्सरेश्वरमाहात्म्यवर्णनंनाम सप्तदशोऽध्यायः ॥ १७ ॥ ॥ छ ॥ ॥ ॥ श्रीशिव उवाच ॥ ॥ देवमष्टादशं विद्धि ख्यातं कलकलेश्वरम् ॥ यस्य दर्शनमात्रेण कलहो नैव जायते ॥ १ ॥ सर्वदुःखोपशमनं सर्वपापप्रमोचनम् ॥ व्याधिसर्पाग्निचौराणां शमनं वांछितप्रदम् ॥ २ ॥ मम देवि त्वया सार्द्धं कलहः समपद्यत ॥ पुरा विस्तरतो वच्मि शृण्वेकाग्रमनाः शुभे ॥ ३ ॥ यदा त्वं हिमशैलस्य दुहिता वरवर्णिनि ॥ तदा विवाहितं कांते यथोक्तविधिना मया ॥ ४ ॥ विनिवृत्ते विवाहे च त्वया सार्द्धं वरानने ॥ महाकालीति नाम्ना वै वर्णेनापि च तादृशी ॥ ५ ॥ नीलोत्पलनिभप्रख्या नीलकुंचितमूर्द्धजा ॥ अप्येकस्मिंस्तदा त्वं हि मातॄणां मंडपे शुभे ॥ मध्ये समुपविष्टासि कृष्णांजनसमप्रभा ॥ ६ ॥ कालि सुंदरि मत्पार्श्वे वल्लभे त्वमुपाविश ॥ शरीरे मम तन्वंगि सिते भास्यसितद्युतिः ॥ ७ ॥ भुजंगीवासिता शुभ्रे संश्लिष्टा चंदने तरौ ॥ रजनीवासिते पक्षे दृष्टिदोषहरासि मे ॥ ८ ॥ इत्युक्तासि मया देवि गिरिजे चारुहासिनि ॥ तदा



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रोक्तं त्वया वाक्यं मामुद्दिश्य सगद्गदम् ॥ ९ ॥ यदा त्वया मदर्थे हि प्रेरिता वेदपारगाः ॥ सप्तर्षयो महाभागाः किंकृते[1] न तदात्थ[2] माम् ॥ १० ॥
तदात्वया मदर्थेऽपि प्रार्थितो जनको मम ॥ हिमाद्रिराजो यत्नेन किं काली न तदात्थ माम् ॥ ११ ॥ यदाप्युक्तं त्वया दैन्यान्मदर्थे गच्छ नारद ॥
प्रार्थ्यतां पार्वती शीघ्रं किं काली न तदात्थ माम् ॥ १२ ॥ सत्येयं लौकिकी गाथा न वृथा परिजायते ॥ स्वकृतेन जनः सर्वो जाड्येन परि
भूयते ॥ १३ ॥ अवश्यमर्थी प्राप्नोति खंडनां तुंडमुंडनाम् ॥ तपोतिदीर्घचारैतयत्त्वां प्रार्थितवत्यहम् ॥ १४ ॥ तस्या मे नियतस्त्वेष ह्यवमानः
पदेपदे ॥ नैवास्मि कुटिला रौद्रा विषमा न च धूर्जटे ॥ १५ ॥ नाकुलीना वृथाचारा न दुष्टा न समत्सरा ॥ सविषस्त्वं यतः ख्यातो व्यक्तं दोषा
कराश्रयः ॥१६॥ अकुलीनो वृथाचारो मात्सर्येणाश्रितः सदा ॥ नाहं मुष्णामि नयने तत्र हंता त्वमेव च ॥१७॥ आदित्यस्त्वां विजानातु भगवा
न्द्वादशात्मकः ॥ मया नोत्पाटिता दंताः कस्यापि निरपत्रप ॥१८॥ पूषा देवो विजानाति द्वादशात्मा दिवाकरः॥मूर्ध्नि शूलं तव यतः स्वैर्दोषैर्मास
धिक्षिपः ॥१९॥ यत्तु मामाह कृष्णेति महाकालेतिविश्रुतः॥ इत्यथापि प्रवादोऽयं प्रवरः ख्यामि ते हर ॥२०॥ निदर्शनार्थं न द्वेषाच्छ्रुत्वा तं क्षंतुमर्ह
सि ॥ विरूपो यावदादर्शे नात्मनः पश्यते मुखम्॥२१॥मन्यते तावदात्मानमन्येभ्यो रूपवत्तमम् ॥ यदा तु मुखमादर्शे विकृतं सोऽभिवीक्षते॥२२॥
तदेतरं विजानाति ह्यात्मानं नेतरं जनम् ॥ सत्यधर्मच्युतात्पुंसः क्षुद्रादाशीविषादिव ॥ २३ ॥ स नास्तिकोप्युद्विजते जनः किं पुनरास्तिकः ॥ इत्यु
क्तोऽहं त्वया देवि मया कोलाहलः कृतः ॥ २४ ॥ अनात्मज्ञासि गिरिजे मृडे पंडितमानिनि ॥ सत्यं सर्वैरवयवैः स्तुतोऽपि सदृशः पितुः ॥२५॥
काठिन्यं कष्टमभ्येति धातुभ्यो बहुघातिता ॥ कुटिलत्वं च सर्वेभ्योऽसेव्यत्वं च हिमादिव ॥२६॥ इत्युक्ताऽसि मया देवि पुनः प्रोक्तं त्वया वचः ॥
तथापि दुष्टसंसर्गात्संक्रांतं सर्वमेव हि ॥२७॥ व्यालेभ्योऽनेकजिह्वत्वं भस्मतः स्नेहवर्जनम् ॥ हृत्कालुष्यं शशांकाद्वै दुर्बोधत्वं वृषादपि॥२८॥श्मशा
नवासाद्भीरुत्वं नग्नत्वं च न लज्जया ॥ निर्घृणत्वं कपालाच्च दया ते विगता चिरम् ॥ २९ ॥ एवं तदाभवद्रौद्रः कलहो भयकृच्छुभे ॥ एवं प्रवृत्ते
तु तदा कंपितं भुवनत्रयम् ॥ ३० ॥ भीताश्च देवगंधर्वा यक्षगंधर्वराक्षसाः ॥ तस्मात्कोलाहलो भूमिं भित्त्वा लिंगमभूत्तदा ॥ ३१ ॥ लिंगमध्या
त्समुत्पन्ना वाणी सुखकरी शुभा ॥ आश्वासयंती देवान्वै त्रैलोक्यं सचराचरम् ॥ ३२ ॥ नामास्य चक्रुर्देवेशास्तदा कलकलेश्वरम् ॥ स्वरनामा
सौ ततोऽभूच्छङ्करो भुवि विश्रुतः ॥ ३३ ॥ यस्तमर्चयते भक्त्या देवं कलकलेश्वरम्॥ न राक्षसाः पिशाचाश्च न भूता न विनायकाः ॥ विघ्नं कुर्युर्व

१ किंकृते–किमर्थम्–इति यावत् । २ आत्थ–अब्रवीः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





रारोहे कलहो न भवेद्गृहे ॥ ३४ ॥ सुशीला गृहिणी तस्य सुरूपा सुभगा प्रिये ॥ बहुपुत्रा बहुधना जायते दर्शनात्तथा ॥ ३५ ॥ ये पश्यंति चतुर्दश्यां देवं कलकलेश्वरम् ॥ न दुःखं न जरा व्याधिर्नाकालमरणं तथा ॥ ३६ ॥ न च शत्रुभयं तेषां जायते गिरिपुत्रके ॥ लोकोऽक्षयो भवेद्देवि यावदिंद्राश्चतुर्दश ॥ ३७॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ यस्य श्रवणमात्रेण क्षेममत्र परत्र च ॥ ३८ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्ये कलकलेश्वरमाहात्म्यवर्णनंनामाष्टादशोऽध्यायः ॥ १८ ॥छ॥ ॥ ईश्वर उवाच ॥ ॥ एकोनविंशतितमं नागचंडेश्वरं प्रिये ॥ निर्माल्यलंघनात्पापान्मुच्यते यस्य दर्शनात्॥१॥ तस्य प्रभावं सुभगं कथयाम्यथ विस्तरात्॥ शृण्वेकाग्रमना देवि सर्वपापप्रणाशनम् ॥ २ ॥ पुरा देवर्षिगंधर्वाश्चारणा गुह्यकास्तथा ॥ उपविष्टाः सुधर्मायां कथयंतः शुभां कथाम् ॥ ३ ॥ एतस्मिन्नंतरे शक्रो देवर्षिं नारदं मुनिम् ॥ पप्रच्छ सादरं देवि समायातं शुचिव्रतम् ॥ ४ ॥ दृष्ट्वा विनयसंपन्नं ब्रह्मचर्यपरायणम् ॥ मेखलाजिनकौपीनं वीणादण्डविभूषितम् ॥५॥ त्वया दृष्टमिदं सर्वं त्रैलोक्यं भूर्भुवादिकम् ॥ उत्पाद्यमानमुत्पन्नं प्रलयश्च सहस्रशः ॥६॥ त्वत्तुल्यो नास्ति लोकेऽस्मिन्मुक्त्वैकं परमेष्ठिनम् ॥ जगत्कारणमव्यक्तं नित्यं सदसदात्मकम् ॥ ७ ॥ योगेन तपसा भक्त्या यत्त्वया परितोषितः ॥ त्रैलोक्यमभिजानासि तत्सर्वं सर्वतः स्फुटम् ॥ ८ ॥ अतोऽहं प्रष्टुमिच्छामि कथ्यतां मम निश्चयम् ॥ पृथिव्यां प्रवरं क्षेत्रं पावनं भुक्तिमुक्तिदम् ॥ ९ ॥ एवं श्रुत्वा तदा ध्यात्वा चिंतयामास नारदः ॥ चिंतयित्वा चिरं कालमिदं वचनमब्रवीत् ॥१०॥ देवराज स्मृतं पुण्यं क्षेत्रराजमनुत्तमम् ॥ क्षेत्राणामुत्तमं क्षेत्रं प्रयागं च प्रशस्यते ॥ ११ ॥ तस्माद्दशगुणं क्षेत्रं महाकालस्य कथ्यते ॥ भुक्तिदं मुक्तिदं तच्च दर्शनादपि वासव ॥ १२ ॥ एतच्छ्रुत्वा सहस्राक्षो वर्णयित्वा च तं मुनिम् ॥ सर्वैर्देवगणैः सार्द्धं विमानस्थस्त्वरान्वितः ॥ १३ ॥ अंतरिक्षस्थितो जिष्णुरद्राक्षीच्च सुरैः सह ॥ क्षेत्रं लिंगैः समाकीर्णमंगुलस्यांतरं न हि ॥ १४ ॥ षष्टिकोटिसहस्राणि षष्टिकोटिशतानि च ॥ महाकालवने रम्ये निर्माल्यं लंघ्यते कथम् ॥ १५ ॥ निर्माल्यलंघनाद्दोषो महान्भवति निश्चितम् ॥ इत्यालोच्य पुनर्देवि जग्मुः स्वर्गं मनोरमाः ॥ १६ ॥ निर्माल्यदोषभीतास्ते क्षेत्रे न विविशुः सुराः ॥ एतस्मिन्नंतरे देवि विमानस्था गणोत्तमाः ॥ १७ ॥ गणैर्नानाविधैः सेव्यैर्गीयमानश्च किंनरैः ॥ चारणैः स्तूयमानस्तु स्वर्गलोकं व्रजन्सुरैः ॥ १८ ॥ प्रफुल्लनयनैर्दृष्टः कोऽयं धन्यो महातपाः ॥ तेजसा दीप्यमानोयमप्सरोभिश्च सेव्यते ॥ १९ ॥ पप्रच्छुरमराः सर्वे कोऽयं रुद्रनिभो गणः ॥ याति कुत्र महाबाहो हृष्टात्मा प्रहसन्मुखः ॥ २० ॥ पृष्टस्तदा सुरैः सर्वैर्विस्मयाविष्टमानसैः ॥ कस्त्वं पुरुषशार्दूल किं त्वया सुकृतं कृतम् ॥ २१ ॥ देवानां पुरतो देवि



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निःशेषं कथितं तदा ॥ महाकालो महादेवः पूजितो भक्तितः स्तुतः ॥ २२ ॥ हृष्टेन तेन मे दत्तं गणत्वं यत्सुदुर्लभम् ॥ नाम दत्तं च सुभगं नाग
चंड इति ध्रुवम् ॥ २३ ॥ पप्रच्छुरमरास्तच्च सादरं गणसत्तम ॥ नागचंड त्वया तत्र निर्माल्यं पतितं त्वथ ॥ २४ ॥ महाकालवने पुण्ये लंघितं
चरता त्वया ॥ संचारो नास्ति तत्रैव लिंगसंकीर्णता यतः ॥ २५ ॥ उपायस्तेन कथितो देवानां पुरतस्तदा ॥ तत्र तिष्ठति देवेशालिंगं
सर्वफलप्रदम् ॥ २६ ॥ ईशानेश्वरदेवस्य तिष्ठतीशानभागतः ॥ तस्य दर्शनमात्रेण न स गच्छति दुष्कृतम् ॥ २७ ॥ निर्माल्यलंघनोद्भूतं
यत्पापं जायते महत् ॥ तत्सर्वं नाशमायाति तस्य लिंगस्य दर्शनात् ॥ २८ ॥ ततो देवगणाः सर्वे महाकालवने पुनः ॥ समायाता
महाभागा महाकालश्च पूजितः ॥ २९ ॥ यथा लिंगं च तद्दृष्टं सर्वदोषक्षयंकरम् ॥ तस्य दर्शनमात्रेण निर्माल्यलंघनादिभिः ॥
दोषो नष्टः सुराणां च ततो नामास्य चक्रिरे ॥ ३० ॥ अस्माकं तेन कथितं नागचंडेन धीमता ॥ नागचंडेश्वराख्यानमतो लोके भविष्यति ॥
॥ ३१ ॥ कृत्वास्य नाम ते देवा जग्मुः स्वर्गेहमुत्तमम् ॥ पूजयिष्यंति ये केचिन्नागचंडेश्वरं शिवम् ॥ निर्माल्यलंघनोद्भूतं तेषां नश्यति पातकम् ॥
॥ ३२ ॥ नागचंडेश्वरं देवं ये पश्यंति दिनेदिने ॥ अज्ञानाज्ज्ञानतः पापं तेषां नश्यति नान्यथा ॥ ३३ ॥ आह्लादं निर्वृतिं स्वास्थ्यमा
रोग्यं चारुरूपताम् ॥ सप्त जन्मान्यवाप्नोति दर्शनेन न संशयः ॥ ३४ ॥ प्राप्नोत्यभिमतान्कामान्देवानामपि दुर्लभान् ॥ कीर्त्तनान्नात्र संदेहो
नागचंडेश्वरस्य च ॥ ३५ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ नागचंडेश्वरस्यैव प्रतीहारेश्वरं शृणु ॥ ३६ ॥ इति श्रीस्कांदे महापुराण
एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये नागचंडेश्वरमाहात्म्यवर्णनंनामैकोनविंशोऽध्यायः ॥ १९ ॥ छ ॥
॥ ॥ ईश्वर उवाच ॥ ॥ प्रतीहारेश्वरं देवि विद्धि विंशतिमं प्रिये ॥ यस्य दर्शनमात्रेण धनवानिह जायते ॥ १ ॥ दक्षकोपात्त्वं च देवि पुरा
प्राणैर्विसर्जितैः ॥ हिमाचले तथा जाता मया प्राप्ता पुनः प्रिये ॥ २ ॥ प्रारब्धा च मया देवि त्वया सार्द्धं रतिस्तदा ॥ दिव्यं वर्षशतं जातं
साग्रं देवि प्रमोदतः ॥ अनुरागवशाच्चैव मन्मथेन प्रपीडिता ॥ ३ ॥ महारतिं समीक्ष्याथ देवाः संक्षुब्धमानसाः ॥ चक्रुर्मंत्रं यथाकालं वासवाद्या
यथोचितम् ॥ ४ ॥ दिव्यं वर्षशतं रुद्रो गौर्या सह सदा रतिम् ॥ कुर्वंस्तिष्ठति देवोऽसौ मंदरे चारुकंदरे ॥ ५ ॥ अनयोर्बीजसंपत्योः पुत्रो यो हि
भवेत्तदा ॥ विनश्येत्तेन त्रैलोक्यमखिलं च न संशयः ॥ ६ ॥ तस्य तेजोपि नो वोढुं समर्था निश्चितं वयम् ॥ तस्मात्तत्क्रियतां कर्म रतिर्येनो
पशाम्यति ॥ ७ ॥ उपायं दृष्टवांस्तत्र देवानां गुरुरग्रणीः ॥ बृहस्पतिर्महातेजा वेदशास्त्रार्थपारगः ॥ ८ ॥ गच्छंतु त्रिदशाः सर्वे शिवस्य तु समी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





पतः ॥ स्वयं विज्ञाप्यतां देवस्तत्कर्म न करिष्यति ॥ ९ ॥ इति निश्चित्य ते देवि जग्मुः शीघ्रं सुरास्तदा ॥ मंदराद्रेः शुभे द्वारि स्थितास्ते विस्मयान्विताः ॥ १० ॥ गणानामधिपो नंदी द्वारि तिष्ठति यत्नतः ॥ त्वया सार्द्धमहं देवि कुर्वंस्तिष्ठामि तां रतिम् ॥ ११ ॥ अथ प्रवेशो देवानां दुष्करो मम पार्श्वतः ॥ तदा चिंतयमानाश्च तत्र तिष्ठंति ते सुराः ॥ १२ ॥ अग्निना तद्विदितं वाक्यमुक्तं तेषां पुरः शुभम् ॥ हंसरूपं समास्थाय यास्यामि शिवसन्निधौ ॥ १३ ॥ वंचयित्वा प्रतीहारं कृतं तेन तथैव च ॥ हंसरूपेण कथितं कर्णे मम शुचिस्मिते ॥ १४ ॥ इन्द्राद्या अमरा देवा द्वारि तिष्ठंति संयताः ॥ श्रुत्वा तस्य च तद्वाक्यं ततोऽहं द्वारमागतः ॥ १५ ॥ ततश्च तैः कृतो मह्यं प्रणामश्च यथाक्रमम् ॥ मया दृष्टाश्च ते देवा युष्माकं किं करोम्यहम् ॥ १६ ॥ तैरुक्तं त्यज्यतां चैव संभोगस्तु सुदारुणः ॥ तथा मया कृतं देवि गतास्ते त्रिदिवं पुनः ॥ १७ ॥ ततः शप्तो मया नंदी भूलोकं गच्छ सत्वरम् ॥ ततः शापपरिभ्रष्टः पृथिव्यां पतितस्तदा ॥ १८ ॥ सोच्छ्वासहृदयो दीनो दुःखव्याकुललोचनः ॥ विलपंश्च तथा नंदी विलुठञ्छोकतो भुवि ॥ १९ ॥ वंचितश्चाग्निना बाढं वासवेन विशेषतः ॥ किं मया दुष्कृतं कर्म कृतं किंचित्पुरातनम् ॥ २० ॥ स दृष्टो लोकपालैस्तु तामवस्थां गतो गणः ॥ पृष्टश्च तैः कुतो नंदिन्विलापं कुरुषे महत् ॥ २१ ॥ सर्वं निवेदितं तेन तेषामग्रे च नंदिना ॥ उपायः कथितस्तैश्च महाकालवनं ततः ॥ २२ ॥ ततश्च वचनं श्रुत्वा नंदी रोमांचकंचुकः ॥ महाकालवने देवि जगाम स तदा गणः ॥ पूजयामास विधिवद्धृत्वा कपालिकीं तनुम् ॥ २३ ॥ अशरीरसमुत्पन्ना वाणी लिंगात्तदा प्रिये ॥ संजाता शापमोक्षस्ते प्रतीहार सुभक्तितः ॥ पूजितोऽसौ महाभक्त्या प्रतीहारेण नंदिना ॥ २४ ॥ तदाप्रभृति लोकेस्मिन्प्रतीहारेश्वरेश्वरः ॥ मया ते कथितो देवि प्रतीहारेश्वरस्य च ॥ प्रभावः सर्वलोकानामत्यभीष्टफलप्रदः ॥ २५ ॥ पूजयिष्यंति ये भक्त्या प्रतीहारेश्वरं शिवम् ॥ स्थानभ्रंशो वियोगश्च तेषां स्वप्नेऽपि नो भवेत् ॥ २६ ॥ सप्तजन्मकृतं पापं स्वल्पं वा यदि वा बहु ॥ तत्सर्वं नाशमायाति प्रतीहारेश्वरार्चनात् ॥ २७ ॥ मनसा ये स्मरिष्यंति प्रतीहारेश्वरं शिवम् ॥ एवं तस्य कुलं सर्वं याति स्वर्गं न संशयः ॥ २८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये प्रतीहारेश्वरमाहात्म्यवर्णनंनाम विंशोऽध्यायः ॥ २० ॥छ॥ ॥ ईश्वर उवाच ॥ ॥ एकविंशतिकं विद्धि कुक्कुटेश्वरसंज्ञकम् ॥ यस्य दर्शनमात्रेण तिर्यग्योनिर्न लभ्यते ॥१॥ कौशिकोनाम राजाभूत्कुक्कुटो जायते सदा ॥ दृश्यते[1] वासरे भागे सर्वाभरणभूषितः ॥२॥ व्याप्ता च



१ केवलं दिवसभाग एव दृश्यते–रात्रौ न दृश्यते–तत्र–हेतुः–पूर्वकर्मप्रभावेन–इत्यग्रिमेण संबंधः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृथिवी तेन सशैलवनकानना ॥ पूर्वकर्मप्रभावेन प्राप्तं राज्यमकण्टकम् ॥ ३ ॥ विशालानाम विख्याता भार्या तस्य महीपतेः ॥ रूपलावण्यसंयुक्ता चतुःषष्टिकलान्विता ॥४॥ तया चकार सहितः स राज्यं राजसत्तमः ॥ सा वल्लभापि नृपतेः प्राणेभ्योऽपि गरीयसी ॥ ५ ॥ तया सार्द्धं कदाचिच्च सुरतं नास्ति पार्वति ॥ संतप्ता सर्वदा सा च रत्यभावाद्बभूव ह ॥ ६ ॥ एवं गच्छति काले तु सह राज्ञा स्मरातुरा ॥ सर्वसत्त्वरुतज्ञा सा विशाला विपुलेक्षणा ॥ ददर्श कीटमिथुनमनंगकलहातुरम् ॥ ७ ॥ प्रसादयंस्तथा कीटः स्वां प्रियां च मुहुर्मुहुः ॥ दासोऽस्मि तव कांतेऽहं रूपसौभाग्य सुन्दरि ॥ ८ ॥ भजस्व मां यथाकाममनंगशरपीडितम् ॥ शिरसा प्रणतेनैव रचितस्ते मयांजलिः ॥ ९ ॥ न त्वया सदृशी लोके कामिनी विद्यते क्वचित् ॥ सुवर्णवर्णसदृशी मद्भक्ता चारुहासिनी ॥ १० ॥ कुतो वा मयि दीने त्वं क्रुद्धेव प्रियवादिनि ॥ किमर्थं वद कल्याणि सरोषव दना स्थिता ॥ ११ ॥ सा तमाह प्रकोपाच्च किमालपसि मां वृथा ॥ त्वया मोदकचूर्णं तु मां विहाय मनोरमाम् ॥ प्रदत्तं कामलुब्धेन अन्यस्यै कीटकाधम ॥ १२ ॥ नाहमेवं करिष्यामि कीटः प्राह पुनःपुनः ॥ स्पृशामि पादौ सत्येन प्रणतस्य प्रसीद मे ॥ १३ ॥ इति तद्वचनं श्रुत्वा सा प्रसन्नाभवत्तदा ॥ आत्मानमर्पयामास कामनाय पिपीलिका ॥ १४ ॥ दृष्ट्वा तन्महदाश्चर्यं सा राज्ञी विललाप ह ॥ धिग्राज्यं धिक्च मे रूपं धिक्च यौवनमद्य मे ॥ न कामिताहं कांतेन मरिष्यामि न संशयः ॥ १५ ॥ एवं विलप्य बहुधा विनिःश्वस्य पुनःपुनः ॥ उन्मत्तेव विशालाक्षी गालव स्याश्रमं गता ॥ १६ ॥ दृष्ट्वा तमृषिमासीनं तपोयोनिं दृढव्रतम् ॥ उवाच प्रणतांगी सा शोकसंतप्तमानसा ॥ १७ ॥ एकोऽयं संशयो ब्रह्मन्हृदये परिवर्त्तते ॥ वश्योऽपि हि च मे भर्त्ता रूपलावण्यवानपि ॥ न जाने कारणं किं तु संगमो नोपजायते ॥ १८ ॥ यो गत्वा प्रमदाराज्यं जित्वा सर्वाः पुरा रणे ॥ आजहार शुभास्तासां मध्यादष्टौ वरांगनाः ॥ नैव कामयते तासु किमेतदिति सुव्रत ॥ १९ ॥ वाजिनो वारणाश्चैव धनधान्यमनं तकम् ॥ वर्त्तते हि जनः सर्वो ममाज्ञां पालयन्क्षितौ ॥ २० ॥ केन कर्मविपाकेन ममेदं यौवनं दृढम् ॥ व्यर्थं जातं द्विजश्रेष्ठ रतिं न कुरुते नृपः ॥ ॥ २१ ॥ दृश्यते वासरे भागे रात्रौ चैव न दृश्यते ॥ इहजन्मकृतं चैतदाहोस्वित्पारलौकिकम् ॥ २२ ॥ दुष्कृतावर्जनं ब्रह्मन्ममेदं वक्तुमर्हसि ॥ तस्यास्तद्वचनं श्रुत्वा गालवो वाक्यमब्रवीत् ॥ २३ ॥ शृणु पुत्रि पुरावृत्तं बालभावेन यत्कृतम् ॥ अनेन राज्ञा धर्मज्ञे रात्रौ येन न दृश्यते ॥ २४ ॥ विदूरथस्य तनयस्तव भर्ता स निश्चितम् ॥ मांसाहारी दोषरतिर्विषयासक्तमानसः ॥ २५ ॥ कुक्कुटानां च मांसेन प्रीतिस्तस्य तदाऽभवत् ॥ बहवः कुक्कुटास्तेन भक्षिता राजसूनुना ॥ २६ ॥ एवं भक्षयतस्तस्य बहुशो वत्सरा गताः ॥ कालेन महता राज्ञा ताम्रचूडेन मंत्रिणः ॥ पृष्टाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

किं कारणं नात्र समायांति हि कुक्कुटाः ॥ २७ ॥ अथ केनापि कथितं कुक्कुटानां च भक्षणम् ॥ विदूरथस्य पुत्रेण कौशिकेन दुरात्मना ॥ भक्षिताः कुक्कुटाः सर्वे विना कारणतो नृप ॥ २८ ॥ ताम्रचूडोऽथ संक्रुद्धो ददौ शापं दुरात्मने ॥ कौशिकाय क्षयो रोगो भविष्यति भयावहः ॥ ॥ २९ ॥ तदाप्रभृत्यभूत्क्षीणो राजपुत्रो दिनेदिने ॥ औषधैरधिकोऽभ्येति व्याधिना पीडितो भृशम् ॥ ३० ॥ अथ केनापि कामेन वामदेवाश्रमं गतः ॥ क्षयरोगाभिभूतोऽसौ मरणोत्सुकमानसः ॥ पप्रच्छ वामदेवं स नमस्कृत्य पुनःपुनः ॥३१॥ भगवन्केन पापेन क्षीयतेऽहर्निशं वपुः ॥ मदीयं पोष्यमाणं हि मांसेन विविधेन च ॥ ३२ ॥ वामदेवोऽथ तं प्राह कुक्कुटा भक्षितास्त्वया ॥ ताम्रचूडेन शप्तोऽसि कुक्कुटानां नृपेण हि ॥ ३३ ॥ तमेव शरणं गच्छ स उपायं वदिष्यति ॥ ततः स ताम्रचूडस्याभ्यर्णमागान्नृपात्मजः ॥ ३४ ॥ दृष्ट्वा च ताम्रचूडं तं महाभक्त्या कृतांजलिः ॥ प्रोवाच प्रणतो भूत्वा पाहि मां शरणागतम्॥३५॥अज्ञानाद्भक्षिता देव कुक्कुटाः पुष्टिकारणात् ॥ क्षंतुमर्हसि देवेश ममागः कृपणस्य च ॥३६॥ प्रोवाच ताम्रचूडोऽथ यस्मात्प्रार्थयसे नृप ॥ तस्मात्ते वासरे प्राप्ते पुरुषत्वं भविष्यति॥३७॥शास्ता गोप्ता च लोकानां राजा दंडधरः प्रभुः॥कुक्कुटो भविता रात्रौ सर्वभोगविवर्जितः ॥३८॥ अतो न दृश्यते पुत्रि तिर्यग्भावं समाश्रितः॥३९॥इति तस्य वचः श्रुत्वा गालवस्य महात्मनः ॥ सा संपूज्य विशालाक्षी गालवं मुनिसत्तमम् ॥ पप्रच्छ परया भक्त्या शापांतो हि कथं भवेत् ॥ ४० ॥ गालवः कथयामास ध्यानेनालोक्य यत्नतः ॥ ४१ ॥ महाकालवने लिंगं पक्षियोनिविमोचनम् ॥ ज्वालेश्वरस्य देवस्य पूर्वभागे व्यवस्थितम् ॥ तस्य दर्शनमात्रेण शापस्यांतो भविष्यति ॥ ४२ ॥ सा प्रणम्य मुनिश्रेष्ठमाजगाम त्वरान्विता ॥ यत्रास्ते नृपशार्दूलो विध्यन्बहुविधान्मृगान् ॥ ४३ ॥ प्रफुल्लनयनाभ्यां सा दृष्टा लोलेक्षणा प्रिया ॥ आह्लादिता बहुविधैः कोमलैर्वचनामृतैः ॥ ४४ ॥ ततस्तेन तदा राज्ञा प्रोक्ता सा मृगलोचना ॥ इदानीं किं मया कांते कार्यं भवति कथ्यताम् ॥ ४५ ॥ तया प्रोक्तं महाराज गम्यतेऽद्य मया सह ॥ महाकालवने पुण्ये सर्वदुष्कृतनाशने ॥ ४६ ॥ तस्यास्तद्वचनं श्रुत्वा त्वरमाणो मुदान्वितः ॥ तया नीतोऽथ नृपतिर्लिंगस्यास्य समीपतः ॥ ४७ ॥ पूजयित्वाथ तल्लिंगं पक्षियोनिविमोचनम् ॥ तत्रैव च स्थितो राजा प्रियया सह पार्वति ॥ ४८ ॥ तस्यां रात्रौ न संजातः कुक्कुटो यादृशः सदा ॥ शिवप्रसादादभवद्दिव्यरूपी मनोहरः ॥ ४९ ॥ रूपेण निर्जितः कामस्तेनाप्रतिमतेजसा ॥ ततो विस्मयमापन्नश्चिंतयामास पार्थिवः ॥ कोऽयं प्रभावो येनाहं शापान्मुक्तः सुदुस्तरात् ॥ ५० ॥ प्रियां पप्रच्छ नृपतिः पूर्णेन्दुवदनां भृशम् ॥ कथं शापाद्विमुक्तोऽहं केन पुण्येन कर्मणा ॥ ५१ ॥ अथ सा कथयामास वृत्तांतं विस्तरान्मुदा ॥ गालवेन हि यत्प्रोक्तं यत्किंचिच्छापमोक्षणम् ॥५२॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजञ्छापाद्विमुक्तोऽसि लिंगस्यास्य प्रभावतः ॥ पुनः प्रसाद्य तल्लिंगं भुक्त्वा भोगांश्चिरं भुवि ॥ ९३ ॥ तया सार्द्धं ययौ राजा स्वर्गं सुरगणैः स्तु
तः ॥ तदाप्रभृति तल्लिंगं कुक्कुटेश्वरसंज्ञकम् ॥ ९४ ॥ विख्यातं देवि लोकेऽस्मिन्सर्वकामफलप्रदम् ॥ तत्र ये पूजयिष्यंति कुक्कुटेश्वरसंज्ञकम् ॥
तिर्यग्योनिं न यास्यंति न वियोगो भविष्यति ॥ ९५ ॥ न चापि नरकावाप्तिर्न दुःखं न जरा भयम् ॥ नाकाले मरणं नृणां न च कष्टं भवि
ष्यति ॥ ९६ ॥ रूपसौभाग्यसंपन्ना भविष्यंति युगेयुगे ॥ चतुर्दश्यां प्रपश्यंति लिंगं ये कुक्कुटेश्वरम् ॥ तेषां कुले च ये केचित्पितरो निरयस्थिताः ॥
॥ ९७ ॥ तिर्यग्योनिगता ये च पशुयोनिं तु ये गताः ॥ वृक्षत्वमथवा प्राप्तास्तेषां मोक्षो भविष्यति ॥ ९८ ॥ इति श्रीस्कांदे महापुराण
एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये कुक्कुटेश्वरमाहात्म्यवर्णनंनामैकविंशोऽध्यायः ॥ २१ ॥ छ ॥ ॥
॥ श्रीविश्वनाथ उवाच ॥ ॥ द्वाविंशतितमं विद्धि कर्कटेश्वरसंज्ञकम् ॥ यस्य दर्शनमात्रेण तिर्यग्योनिर्न दृश्यते ॥ १ ॥ आसीत्पुरा बृहत्कल्पे धर्म
मूर्तिर्जनाधिपः ॥ सुहृच्छक्रस्य निहता येन दैत्याः सहस्रशः ॥ २ ॥ सोमसूर्यादयो यस्य तेजसा निष्प्रभाः कृताः ॥ प्रजाश्च पालिता येन निहत्य
समरे द्विषः ॥ ३ ॥ यथेच्छारूपधारी च संग्रामेष्वपराजितः ॥ तस्य भानुमतीनाम भार्या त्रैलोक्यसुंदरी ॥ ४ ॥ राज्ञस्तस्याग्रमहिषी प्राणेभ्योऽपि
गरीयसी ॥ दशनारीसहस्राणां मध्ये श्रीरिव राजिता ॥ ५ ॥ नृपो नृपसहस्रेण न कदाचित्प्रमुच्यते ॥ कदाचिदेकांतगतः पप्रच्छ स्वपुरोहितम् ॥
विस्मयेनावृतमना वशिष्ठमृषिसत्तमम् ॥ ६ ॥ भगवन्केन धर्मेण मम लक्ष्मीरनुत्तमा ॥ कस्माच्च विपुलं तेजो दुःसहं मम दृश्यते ॥ ७ ॥
॥ ॥ वशिष्ठ उवाच ॥ ॥ पुरा त्वमवनीपाऽऽसीः शूद्रजातिसमुद्भवः ॥ बहुदोषसमाविष्टो दुष्टया भार्ययाऽनया ॥ ८ ॥ निवसन्दुष्टहृदयो
वर्षाणि सुबहून्यपि ॥ महाक्रोधाभिभूतात्मा सदा निष्ठुरजल्पकः ॥ ९ ॥ सदा ब्रह्मस्वहारी त्वं सदा वेदविनिंदकः ॥ सदा चासूयको राजन्सदा
विश्वासघातकः ॥ १० ॥ अथ पंचत्वमापन्नः काले नरकमाप्तवान् ॥ ताम्रभ्राष्ट्रे परं दग्धो दशवर्षाणि पंच च ॥ ११ ॥ रौरवे कुम्भिपाके च
महारौरवसंज्ञके ॥ सूक्ष्माणि तिलमात्राणि कृत्वा खंडान्यनेकशः ॥ १२ ॥ मूषायां धमितो राजन्नसिपत्रे च दारितः ॥ शेषपातकशुद्ध्यर्थं धरायां
मवतारितः॥१३॥ विधाय कार्कटं रूपं यमेन त्वयि पार्थिव ॥ शिवस्य सरो विख्यातं महाकालवनोत्तमे॥१४॥ दत्तं जप्तं कृतं यच्च हुतं देवार्चनादि
यत्॥ सर्वं तदक्षयं कर्म तस्मिन्सरसि विश्रुतम् ॥१५॥ निक्षिप्तस्त्वं तदा तेन भाविपुण्येन कर्मणा॥ तत्र स्थितस्त्वं भूपाल वर्षाणां पंचकं तथा॥१६॥
कदाचित्तीरभूम्यां त्वं गतः संक्रीडितुं शनैः ॥ समीक्ष्य तत्र काकेन धृत्वा चंचुपुटेन च ॥१७॥ आकाशमार्गं चोड्डीनः स त्वया ताडितो भृशम् ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



त्वत्तीक्ष्णपातैश्चरणैस्ताडितो व्यथितस्तदा ॥ १८ ॥ मुक्तस्त्वं चंचुपुटतो वायसेनाकुलेन तु ॥ स्वर्गद्वारस्य पूर्वे तु देव्यगारे सुपुण्यदे ॥ १९ ॥ शिव
स्य क्षितस्त्वं शीघ्रं चञ्च्वाक्षेपप्रपीडितः ॥ मृतोऽसि संनिधौ तत्र देवस्य परमेष्ठिनः॥२०॥ विमुच्य देहं तज्जीर्णं यावत्तं कार्कटं पुरा॥ तत्क्षणाद्दिव्य
देहश्च दिव्याभरणभूषितः ॥ २१ ॥ तस्य लिंगस्य माहात्म्याद्भूत्वा विद्याधरेश्वरः ॥ कामगेन विमानेन पूज्यमानो गणेश्वरैः ॥२२॥ स्वर्गे व्रजंस्त्वं
संपृष्टः सुरसंघैश्च सादरम् ॥ कोयं महात्मा मुदितो याति दिव्यपथोंऽबरात् ॥ २३ ॥ ततो रुद्रगणैः सर्वं सुराणां कथितं पुरा ॥ वृत्तांतं विस्तरात्सर्वं
कार्कटत्वविमोचनम् ॥ २४ ॥ तस्य लिंगस्य देवेशाः प्रभावोऽयमुपस्थितः ॥ देवैः प्रोक्तं च सहसा लिंगस्यास्य प्रभावतः ॥२५॥ कार्कटीयोनि
मुक्तस्य प्राप्तं स्वर्गसुखं यतः ॥ कर्कटेश्वरनामायमतो लोके भविष्यति ॥ २६ ॥ तदाप्रभृति देवोऽयं कर्कटेश्वरसंज्ञकः ॥ त्वया स्वर्गे महाभोगा
भुक्ता राजन्यथेच्छया ॥ २७ ॥ आगतोऽसि पुनर्भूमौ लब्धं राज्यमकंटकम् ॥ तस्य लिंगस्य माहात्म्याज्जातं सर्वं तवाधुना ॥ २८ ॥ तस्मा
त्पार्थिव भूयस्त्वं लिंगमाराधय द्रुतम् ॥ जातिस्मरत्वमापन्नो वशिष्ठवचनात्तदा ॥ २९ ॥ पूर्वं कर्म स्मृतं तेन स्वकीयं पार्थिवेन तु ॥ पुनर्गत्वा च
तल्लिंगं पूजयामास यत्नतः ॥ ३० ॥ तस्मिँल्लिंगे लयं प्राप्तः स्वशरीरेण पार्वति ॥ येऽर्चयंति सदा भक्त्या कर्कटेश्वरसंज्ञकम्॥ भुक्त्वा भोगांश्चिरं भूमौ
ते यांति परमां गतिम् ॥ ३१ ॥ नियमेन प्रपश्यंति ये देवं कर्कटेश्वरम् ॥ अष्टम्यां वा चतुर्दश्यां तेषां पुण्यफलं शृणु ॥ ३२ ॥ सूर्यदीप्तिप्रतीकाशै
र्विमानैः सार्वकामिकैः ॥ मृता मम पुरं यांति त्रिसप्तकुलसंयुताः ॥ ३३ ॥ तत्र दिव्यैर्महाभोगैः स्त्रीसहस्रैर्मनोरमैः ॥ कल्पकोटिशतैर्देवि सेव्यमाना
वसंति हि ॥ ३४ ॥ तदंते विष्णुभवने तावत्कालं च संति हि ॥ वैष्णवैर्विविधैर्भोगैः स्त्रीसहस्रैस्तु सेविताः ॥ ३५ ॥ विष्णुलोकाद्ब्रह्मलोकं संप्राप्य
मुदिताः पुनः ॥ भोगान्नानाविधान्भुक्त्वा ततो यांति परं पदम् ॥ ३६ ॥ दशाश्वमेधैर्यत्पुण्यं तत्फलं तीर्थयात्रया ॥ कर्कटेश्वरदेवस्य मेघनादेश्वरं
शृणु ॥ ३७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्ये कर्कटेश्वरमाहात्म्यवर्णनं
नाम द्वाविंशोऽध्यायः ॥ २२ ॥ ॥ श्रीहर उवाच ॥ ॥ मेघनादेश्वरं देवि त्रयोविंशतिमं शृणु ॥ यस्य दर्शनमात्रेण प्राप्यंते सर्वसिद्धयः ॥१॥
राजमूला महादेवि योगक्षेमाः सुवृष्टयः॥ प्रजाश्च व्याधयश्चैव मरणं च भयानि च ॥२॥ राजा कृतं तथा त्रेता द्वापरश्च तथा कलिः ॥ राजमूलानि
सर्वाणि राजा धर्मस्य कारणम् ॥ ३ ॥ राजा बभूव लोकेऽस्मिन्मदांधोनाम पार्वति ॥ अहंकारावृतो दुष्टो देवब्राह्मणकंटकः ॥ ४ ॥ कलि
द्वापरयोः संधौ तस्य दोषाच्च भामिनि ॥ अनावृष्टिरभूद्घोरा लोके द्वादशवार्षिकी ॥ ५ ॥ न ववर्ष सहस्राक्षः प्रतिलोमोऽभवत्प्रभुः ॥ नादृश्यन्ता



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पि रात्र्यंते कुत एवाभ्रजातयः ॥ ६ ॥ नद्यः संक्षिप्ततोयौघाः क्वचिदंतर्हितास्तदा ॥ निवृत्तयज्ञस्वाध्याया निर्वषट्कारमंगलाः ॥ ७ ॥ उच्छिन्नकृषि गोरक्षा निवृत्तविपणास्तथा ॥ अस्थिकंकालसंकीर्णा हाहाभूतनराकुलाः ॥ ८ ॥ शून्यभूयिष्ठनगरा दग्धग्रामनिवेशिनः ॥ गोजाश्वमहिषैर्हीना भक्ष्यमाणाः परस्परम् ॥ ९ ॥ आश्रमान्संपरित्यज्य पर्यधावन्नितस्ततः ॥ ब्राह्मणा दुःखबहुला मृता नष्टाश्च पार्वति ॥ १० ॥ सृष्टिरुन्मूलिता सर्वा जंगमा स्थावराखिला ॥ एतस्मिन्नंतरे देवाः शक्राद्या भयविह्वलाः ॥ ११ ॥ शरण्यं शरणं जग्मुर्देवदेवं जनार्दनम् ॥ क्षीरोदस्योत्तरे कूले श्वेतद्वीपं मनोरमम् ॥ १२ ॥ ब्रह्मलोकादिभिर्लोकैरनौपम्यगुणं शुभम् ॥ सदानंदकरं शांतं सूर्यकोटिसमप्रभम् ॥ १३ ॥ स्वेच्छाकल्पितवि न्यासप्रासादशयनासनम् ॥ वज्रेंद्रनीलवैडूर्यचंद्रकांतादिदीपितम् ॥ १४ ॥ जरामृत्युभयोपेतसर्वव्याधिविवर्जितम् ॥ तस्मिन्द्वीपे ततो देवि सूर्य कोटिसमप्रभम् ॥ साष्टांगां प्रणतिं कृत्वा ते देवाः स्तुतिमब्रुवन् ॥ १५ ॥ भवान्ब्रह्मा च रुद्रश्च महेंद्रो देवसत्तमः ॥ स्वान्कर्त्ता विकर्त्ता च लोकानां प्रभवोऽव्ययः ॥ १६ ॥ एवं च सत्यं परमं तपश्च परमं तथा ॥ पवित्रं परमं मार्गं यज्ञस्त्वं परमः प्रभो ॥ १७ ॥ परं हौत्रं परं धाम त्वामाहुः पुरुषं परम् ॥ एवं स्तुतस्तदा तैस्तु देवदेवो वरानने ॥ १८ ॥ प्राह देवांस्ततः कृष्णः किं करोम्यद्य वः सुराः ॥ विज्ञप्तस्तैर्हरिर्देवो ह्यनावृष्ट्या प्रपीडितैः ॥ १९ ॥ उपायः कथ्यतां देव तुष्टिः पुष्टिर्यथा भवेत् ॥ ध्यानेन चिंतयित्वा च कथयामास केशवः ॥ २० ॥ गच्छध्वं त्रिदशाः सर्वे महाकालवने शुभे ॥ लिंगं वृष्टिकरं तत्र पुरा मेघैः प्रतिष्ठितम् ॥ २१ ॥ मेघा वृष्टिकराः सर्वे तस्मिँल्लिंगे च संति वै ॥ तस्य लिंग स्य माहात्म्याद्वृष्टिरेव भविष्यति ॥ २२ ॥ प्रतीहारेश्वराद्देवादीशाने विद्यते सुराः ॥ तस्य तद्वचनं श्रुत्वा वासुदेवस्य पार्वति ॥२३॥ महाकालवने प्राप्ता यत्रास्ते लिंगमुत्तमम् ॥ तुष्टुवुः परया भक्त्या दृष्ट्वा देवं मनोरमम् ॥ २४ ॥ नमस्तेऽस्तु महेशाय नमोऽनंताय मालिने ॥ नमस्तेज समूर्त्ताय नमः सौंदर्यशालिने ॥ २५ ॥ नमो योगाय वेदाय नमः पिंगजटाय ते ॥ अनंतज्ञानदेहाय नम ईश्वरमूर्त्तये ॥ २६ ॥ नमः शुभ्राट्ट हासाय नमस्तेऽस्तु शिखंडिने ॥ शंकराय नमस्तेऽस्तु नमस्तेस्तु पिनाकिने ॥ २७ ॥ नमोंऽतकाय भव्याय त्र्यंबकायास्तु ते नमः ॥ नमस्ते बहुरूपाय नमस्तेऽचिंत्यमूर्त्तये ॥ २८ ॥ नमो योगशरीराय नमस्ते सर्व सर्वदा ॥ नष्टं देव जगत्सर्वमनावृष्ट्या प्रपीडितम् ॥ २९ ॥ सुवृष्ट्या देवदेवेश पाहि नः शरणागतान् ॥ एतस्मिन्नंतरे मेघा पार्वणांगारवर्चसः ॥ ३० ॥ लिंगमध्यात्समुत्तस्थुर्वादयंतो नभस्तलम् ॥ अन्योन्यवेगाभिहता ववृषुर्भूतले तदा ॥ ३१ ॥ जातं विनिष्प्रभं सर्वं न प्राज्ञायत किंचन ॥ तिमिरौघपरिक्षिप्ता रेजुश्चाथ दिशो दश ॥ ३२ ॥ ते तस्य देवदेवस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



माहात्म्येन प्रतोषिताः ॥ देवाः प्रीतिं परां जग्मुः सर्वेऽमृतमिवोत्तमाः ॥ ३३ ॥ ततस्तमः संहरंतो विनेशुश्च बलाहकाः ॥ प्रववुः शीतला वाताः प्रशांताश्च दिशो दश ॥ ३४ ॥ शुद्धप्रभाणि ज्योतींषि सोमं चक्रुः प्रदक्षिणाम् ॥ अविग्रहं ग्रहाश्चक्रुः प्रशांताश्चापि सिन्धवः ॥ ३५ ॥ महर्षयो विशोकाश्च गंधर्वाश्च कलं जगुः ॥ अभूत्सृष्टिः पुनः सर्वा लिंगस्यास्य प्रभावतः ॥ ३६ ॥ सुरैः संपूज्य भक्त्या ते चक्रुर्नाम यथार्थतः ॥ अस्य लिंगस्य माहात्म्यं दृष्ट्वा प्रीताः सुरा बहु ॥ ३७ ॥ मेघनादेश्वरं नाम भविष्यत्यस्य सर्वतः ॥ मेघनादेश्वराख्यानं मया ते कथितं प्रिये ॥ ३८ ॥ भविष्यंति नरा भूमौ कृतार्थास्तत्प्रभावतः ॥ दर्शनादस्य लिंगस्य कामवृष्टिर्भविष्यति ॥ ३९ ॥ कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥ कुर्वंल्लिंगस्य स्नपनं रुद्रलोके महीयते ॥ ४० ॥ प्रभावः पठ्यते यत्र मेघनादस्य पार्वति ॥ अतिवृष्टिश्चैव ततो भविष्यति च भूतले ॥ ४१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये मेघनादेश्वरमाहात्म्यवर्णनंनाम त्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ छ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ महालयं महाभागे चतुर्विंशतिकं शुभम् ॥ ब्रह्मादिस्तंबपर्यंतं त्रैलोक्यं सचराचरम् ॥ १ ॥ उत्पादितं धृतं व्याप्तं त्वया देव मया श्रुतम् ॥ त्वयैकेन विशुद्धेन सर्वगेन महात्मना ॥ २ ॥ अत्यर्थं मुनयः सर्वे मुदिता मौनिनोऽव्ययाः ॥ वदंति कारणं चास्य त्रैलोक्यस्य महेश्वर ॥ ३ ॥ त्वया सर्वमिदं सृष्टं त्रैलोक्यं भूर्भुवादिकम् ॥ उत्पाद्यमानमुत्पन्नं प्रलीयच्च सहस्रशः ॥ ४ ॥ देवदानवगंधर्वमुनिचारणभोगिनाम् ॥ उत्पत्तिस्थितिसंहारास्त्वया दृष्टा मुहुर्मुहुः ॥ ५ ॥ जगच्चराचरं देव कुत्र स्थित्वासृजस्यलम् ॥ लीलया संहरस्येतत्प्रसादाद्वक्तुमर्हसि ॥ ६ ॥ कोऽसौ महालयो रौद्रग्रहरूपी व्यवस्थितः ॥ यस्मिन्धृतं त्वया सर्वं त्रैलोक्यं भूर्भुवादिकम् ॥ ॥ ७ ॥ इति पृष्टस्त्वया देवि मया ते कथितं पुरा ॥ इदानीं कथयिष्यामि शृणुष्वैकाग्रमानसा ॥ ८ ॥ पृथिव्यादीनि भूतानि महाकालवने प्रिये ॥ धृतानि प्रलयस्यांते एकोद्देशे महालये ॥ ९ ॥ ब्रह्मलोकादिभिर्लोकैरनौपम्यगुणं शुभम् ॥ स्थानं महालयं तत्र ममानंदकरं परम् ॥ १० ॥ परं ब्रह्ममयं लिंगं तत्र तिष्ठति सर्वदा ॥ तस्य लिंगस्य मध्ये तु धृतं कृत्स्नं चराचरम् ॥ ११ ॥ तत्र ब्रह्मादयो देवा विष्णुस्तत्रैव संस्थितः ॥ लिंगस्याभ्यंतरे देवि सर्वमेवाधितिष्ठति ॥ तस्माल्लिंगात्समुत्पन्नो महानात्मा महामतिः ॥ १२ ॥ भूतादिश्चाप्यहंकारो विष्णुः शंभुश्च पार्वति ॥ बुद्धिः प्रज्ञा धृतिः ख्यातिः स्मृतिर्लज्जा सरस्वती ॥ १३ ॥ सर्वतःपाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ॥ सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १४ ॥ अस्मा

१ अत्र–पुरा–इत्यध्याहृत्य–दूरान्वयीदं वाक्यम्–'इति पृष्टस्त्वया देवि'--इत्यष्टमश्लोकपर्यंतमनुसंबद्धम्।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्भूतानि लिंगानि महाभूतानि पञ्च वै ॥ पृथिवी वायुराकाशमापो ज्योतिः प्रलीयते ॥ १५ ॥ स्थलमापस्तथाकाशं जन्म चापि चतुर्विधम् ॥ अण्ड
जोद्भिज्जं च सस्वेदं जरायुजमथापि वा ॥ १६ ॥ चतुर्द्धा जन्मचिह्नं यल्लिंगेस्मिन्नेव लक्ष्यते ॥ तपः कर्म च पुण्यं च व्रतं दानं तथैव च ॥ १७ ॥
रजःसत्त्वं तमोभावस्तस्माल्लिंगाच्च जायते ॥ तस्मिंस्तच्छ्रूयते सत्यं ज्योतिर्ब्रह्म सनातनम् ॥ १८ ॥ अव्यक्तकारणं सूक्ष्मं यत्तत्सदसदात्मकम् ॥
यस्मात्पितामहो जज्ञे प्रभुरेकः प्रजापतिः ॥ १९ ॥ विश्वेदेवास्तथादित्या वसवोऽथाश्विनावपि ॥ यक्षाः साध्याः पिशाचाश्च गुह्यकाः पितर
स्तथा ॥ २० ॥ आपो द्यौः पृथिवी वायुरंतरिक्षं दिशस्तथा ॥ संवत्सरर्तवो मासाः पक्षाहोरात्रयस्तथा ॥ २१ ॥ यच्चान्यदपि तत्सर्वं संभूतं लोक
साक्षिकम् ॥ यदिदं दृश्यते किंचित्तस्यांते च प्रलीयते ॥ २२ ॥ अतो महालयोनाम विख्यातो भुवनत्रये ॥ मुक्तीश्वरस्य देवस्य दक्षिणे संव्यव
स्थितः ॥ २३ ॥ यः पूजयति तल्लिंगं रुद्रमूर्त्या महालयम् ॥ त्रैलोक्यविजयी नित्यं कीर्त्तिमान्स नरो भवेत् ॥ २४ ॥ महालयेश्वरे पुण्ये पूजिते
परमेश्वरे ॥ भक्त्या परमया चैव सर्वे देवाः सुपूजिताः ॥ भवंतीह महाभागे यतस्तैरपि पूज्यते ॥ २५ ॥ इति श्रीस्कान्दे महापुराण एका
शीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये महालयेश्वरमाहात्म्यवर्णनंनाम चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ छ ॥
॥ ॥ श्रीहर उवाच ॥ ॥ पंचविंशतिकं देवं विद्धि मुक्तीश्वरं प्रिये ॥ यस्य दर्शनमात्रेण मुक्तिर्भवति पार्वति ॥ १ ॥ पुरा राथंतरे कल्पे बभूव
द्विजसत्तमः ॥ मुक्तिर्नाम महाभागे संशितात्मा जितेंद्रियः ॥ २ ॥ महाकालसमीपे तु मुक्तिलिंगमनुत्तमम् ॥ महाकालवने रम्ये तत्रास्ते योगत
त्परः ॥ ३ ॥ ततस्तेपे जिताहारो वत्सराणि त्रयोदश ॥ कदाचित्सोऽभिषेकाय आजगाम महानदीम् ॥ ४ ॥ शिप्रां विप्रप्रियां पुण्यां महापातकना
शिनीम् ॥ तत्र स्नात्वा जपन्विप्रो ददर्शायांतमग्रतः ॥ ५ ॥ व्याधं महाधनुष्पाणिं रक्तनेत्रं सुभीषणम् ॥ वदंतं हन्तुकामं वै वल्कलानां जिघृक्षया ॥
॥ ६ ॥ तं दृष्ट्वा क्षुभितो विप्रो ब्रह्मघ्नस्य भयादिति ॥ ध्यायन्नारायणं देवं तस्थौ तत्रैव स द्विजः ॥ ७ ॥ तं दृष्ट्वांतर्गतहरिर्व्याधो भीत इवाग्रतः ॥
विहाय सशरं चापं ततो वचनमब्रवीत् ॥ ८ ॥ ॥ व्याध उवाच ॥ ॥ हंतुमिच्छुरहं ब्रह्मन्भगवन्तमिहागतः ॥ इदानीं स्वगता बुद्धिस्त्वां
दृष्ट्वैव महाप्रभम् ॥ ९ ॥ ब्राह्मणानां सहस्राणि स्त्रीणामयुतशस्तथा ॥ निहतानि मया ब्रह्मन्वृत्तिहेतोः कुटुंबिना ॥ १० ॥ न च मे व्यथितं चित्तं
कदाचिदपि जायते ॥ इदानीं तप्तुमिच्छामि तपोऽहं त्वत्समीपतः ॥ ११ ॥ उपदेशप्रदानेन प्रसादं कर्तुमर्हसि ॥ एवमुक्तो ह्यसौ विप्रो नोत्तरं प्रत्यप
द्यत ॥ १२ ॥ ब्रह्महा पापकर्मेति मत्वा ब्राह्मणपुंगवः ॥ अनुक्तोऽपि स धर्मस्तु व्याधस्तत्रैव तस्थिवान् ॥ १३ ॥ स्नात्वा सद्यः समायातो मुक्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





लिंगसमीपतः ॥ द्विजेन सहितो देवि दृष्ट्वा देवं सनातनम् ॥ १४ ॥ तत्क्षणाद्दिव्यदेहस्तु तस्मिँल्लिंगे लयं गतः ॥ दृष्ट्वा तन्महदाश्चर्यं मुक्तिर्विप्रो
निजांतरे ॥ चिंतयामास सहसा मुक्तिः प्राप्ता वरानने ॥ १५ ॥ व्याधेन पापयुक्तेन समाधिरहितेन च ॥ मया पुनः समाचीर्णं तपः परम
दुष्करम् ॥ १६ ॥ न प्राप्ता परमा मूर्त्तिर्मुक्तिर्नैव च लभ्यते ॥ एवं स चिंतयित्वाथ वैराग्याद्ब्राह्मणर्षभः ॥ अन्तर्जलगतो भूत्वा चचार
विपुलं तपः ॥ १७ ॥ कस्यचित्त्वथ कालस्य तां नदीमगमत्किल ॥ व्याघ्रो बुभुक्षितः साध्वि तं विहंतुं समुद्यतः ॥ १८ ॥ अंतर्जलचरं विप्रं याव
द्व्याघ्रो जिघृक्षति ॥ नमो नारायणायेति तावद्वाक्यं द्विजोऽब्रवीत् ॥ १९ ॥ व्याघ्रेणापि श्रुतो मंत्रोऽजहात्प्राणांश्च तत्क्षणात् ॥ दिव्यांबरधरो
देवि दिव्याभरणभूषितः ॥ दिव्यालंकारशोभाढ्यः पुरुषश्चाभवच्छुभः ॥ २० ॥ सोऽब्रवीद्यामि तं देशं यत्र विष्णुः सनातनः ॥ त्वत्प्रसादा
द्द्विजश्रेष्ठ मुक्त्वा शापान्निरामयः ॥ २१ ॥ इत्युक्ते ब्राह्मणः प्राह कोऽसि त्वं पुरुषर्षभ ॥ सोऽब्रवीदस्मि राजेंद्र प्रतापी पूर्वजन्मनि ॥ २२ ॥
दीर्घबाहुरिति ख्यातः सर्वधर्मविशारदः ॥ अहं जानामि वेदांश्च शास्त्राणि विविधानि च ॥ २३ ॥ शुभाशुभमहं वेद्मि सर्वज्ञोऽहं
महीतले ॥ ब्राह्मणैर्नैव मे कार्यं किं वस्तु ब्राह्मणा इति ॥ २४ ॥ तस्यैकस्मिन्दिने विप्राः सर्वे क्रोधसमन्विताः ॥ ददुः शापं दुराधर्षं क्रूरो व्याघ्रो
भविष्यति ॥ २५ ॥ अपमानेन विप्राणां मांसाहारी भयावहः ॥ संजातोऽस्मि द्विजश्रेष्ठ पश्य कालविपर्यये ॥ २६ ॥ इत्युक्तोऽहं पुरा तैस्तु ब्राह्म
णैर्वेदपारगैः ॥ दुर्धर्षोऽयं मया प्राप्तो ब्रह्मशापो द्विजर्षभ ॥ २७ ॥ ततस्ते ब्राह्मणाः सर्वे प्रणिपत्य मया मुने ॥ प्रसादिता भृशं विप्र तदा गद्गद
या गिरा ॥ २८ ॥ जानामि तेजो विप्राणां महाभाग्यं च धीमताम् ॥ अपेयः सागरः क्रोधात्कृतो यैर्लवणोदकः ॥ २९ ॥ तथैव दीप्ततपसां मुनीनां
भावितात्मनाम् ॥ येषां क्रोधाग्निरद्यापि कण्डके नोपशाम्यति ॥ ३० ॥ ब्राह्मणानां परीभावाद्वातापिश्च दुरात्मवान् ॥ अगस्तिमृषिमासाद्य जीर्णः
क्रूरो महासुरः ॥ ३१ ॥ सर्वभक्षः कृतो वह्निर्भृगुणा कारणांतरे ॥ गौतमेन पुरा शक्रः स सहस्रभगः कृतः ॥ ३२ ॥ दशधा केशवो जज्ञे ब्रह्मशा
पात्सुदुस्तरात् ॥ प्रसन्नैर्वालखिल्यैश्च पक्षींद्रो गरुडः कृतः ॥ ३३ ॥ अश्विनौ देवभिषजौ च्यवनेन महात्मना ॥ विष्टंभयित्वा कुलिशं कृतौ तौ
सोमपायिनौ ॥ ३४ ॥ कार्त्तवीर्यार्जुनेनैव बाहूनां च सहस्रकम् ॥ दत्तात्रेयप्रसादेन प्राप्तं परमदुर्लभम् ॥ ३५ ॥ पुरा सेंद्रा वशिष्ठेन रक्षितास्त्रि ॥ ९९ ॥
दिवौकसः ॥ ब्राह्मणप्रभवं सौख्यं कीर्तिरायुर्यशो बलम् ॥ ३६ ॥ लोकालोकेश्वराश्चैव सर्वे ब्राह्मणपूर्वकाः ॥ एते हि सोमराजान ईश्वराः सुख

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुःखयोः ॥ ३७ ॥ भस्मीकुर्युर्जगदिदं क्रुद्धाः प्रत्यक्षदर्शनाः ॥ प्रभावा बहवश्चापि श्रूयंते ब्रह्मवादिनाम् ॥ ३८ ॥ क्रोधश्च विपुलः सद्यः सद्यः प्रत्यकारकः ॥ अहं कोपाद्द्विजेंद्राणां गतो निरययातनाम् ॥ ३९ ॥ नित्यं क्रोधाच्छ्रियं रक्षेद्धनं रक्षेत्समत्सरात् ॥ विद्यां मानापमानाभ्यामात्मानं तु प्रमादतः ॥४०॥ मयाऽज्ञानात्कृतं पापं राजगर्वेण दैवतः ॥ क्षंतुमर्हथ विप्रेंद्रा भवतः शरणागतम् ॥४१॥ अथ तुष्टा द्विजाः सर्वे त ऊचुर्मामिदं मुदा॥ षष्ठान्नकालिकस्तेऽग्रे यदा स्थास्यति कश्चन ॥ ४२ ॥ मांसभोक्ता च भविता कश्चित्कालं नराधिप ॥ यदा शिप्रांतरे पुण्ये स्नातस्तु द्विजसत्तमः ॥ ॥ ४३ ॥ अंतर्जलगतेनोक्तो नमो नारायणेति च ॥ जिघृक्षुर्व्याघ्ररूपेण तदा मुक्तो भविष्यसि ॥ ४४ ॥ एवं स भवता प्रोक्तो नमो नारायणेति च ॥ मंत्रः श्रुतो मया त्वत्तस्तस्येयं व्युष्टिरागता ॥ ४५ ॥ जातोऽहं दिव्यदेहस्तु प्रसादात्तव सुव्रत ॥ स कृतार्थोऽस्मि संजातो भगवन्दर्शनात्तव ॥ ४६ ॥ वरं च गृह्यतां मत्तो यश्च ते संशयो हृदि ॥ तं च ब्रूहि द्विजश्रेष्ठ सर्वं संपादयामि ते ॥ ४७ ॥ तवोपदेशदानेन आनृण्यं गंतुमुत्सहे ॥ ४८ ॥ इति तस्य वचः श्रुत्वा दिव्यदेहस्य स द्विजः ॥ प्रोवाच परया तुष्ट्या प्रफुल्लमुखपंकजः ॥ ४९ ॥ अद्य मे सफलं ज्ञानमद्य मे सफलं तपः ॥ अद्य मे सफला जिह्वा सफलं चक्षुरद्य मे ॥ ५० ॥ श्रुतं देवेन संप्रोक्तं ज्ञात्वा पश्यंति देहिनः ॥ प्राक्छरीरगतं तेऽद्य व्याघ्ररूपं तपोत्तम ॥ ५१ ॥ तेजोमयं शरीरं तु ब्रह्मरूपं सनातनम् ॥ यदि त्वहमनुग्राह्यो यद्येवं कर्तुमर्हसि ॥ ५२ ॥ कारणं श्रोतुमिच्छामि हृदि मे वर्त्तते चिरम् ॥ कथं मुक्तिर्महाभाग मुक्तिकामेन यत्नतः ॥५३॥ योगाभ्यासरतेनापि वत्सरांश्च त्रयोदश ॥ न लब्धा परमाश्चर्यं तपसा दुष्करेण तु ॥५४॥ व्याधेनापि भृशं तेन प्राप्ता मुक्तिः क्षणेन तु ॥ अत्र मे संशयो जातः को हेतुः कथ्यतां भृशम् ॥ ५५ ॥ तस्य तद्वचनं श्रुत्वा ततो वचनमब्रवीत् ॥ कथयामि परं गुह्यं रहस्यं मुक्तिलक्षणम् ॥ ५६ ॥ महादेवमुपास्याशु मुने मुक्तिः[2] सुदुर्लभा ॥ पुरातनैस्तु विद्वद्भिरिदमुक्तं महात्मभिः ॥ ५७ ॥ शृणुष्वैकमना विप्र कुरु यत्नं यथार्थतः ॥ मन्नियोगाद्द्विजश्रेष्ठ ततो मुक्तिमवाप्स्यसि ॥ ५८ ॥ शप्तोऽहं तैर्यदा विप्रैस्तदा मे तोषिता भृशम् ॥ ममानुकंपया प्रोक्तं मुक्तिस्ते भविता नृप ॥ ५९ ॥ मुक्तिकामो महाकाले मुक्तिर्ब्राह्मणसत्तमः ॥ विद्यते तपसा युक्तः स ते प्रश्नं करिष्यति ॥ ६० ॥ मुक्तीश्वरं तदा लिंगं तस्याग्रे कथयिष्यसि ॥ तवापि तस्य मुक्तेश्च मुक्तिरेवं भविष्यति ॥ ६१ ॥ पूर्वं हि चिह्नितं कर्म देहिनो[3] न विमुंचति ॥ धात्रा

१ दूषितां गरुडाननः—इति पुस्तकद्वये पाठान्तरम्। २ लभ्यते—इति शेषः। ३. द्वितीयाबहुवचनमिदम्—देहिनः प्रति—इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





विधिरयं दृष्टो बहुधा कर्म भिश्च यः ॥ ६२ ॥ इति तस्य वचः श्रुत्वा स विप्रो ब्रह्मवित्तमः ॥ अंतर्जलात्समुत्थाय ततो वचनमब्र वीत् ॥ ६३ ॥ दिष्ट्या त्वमागतो भूप दिष्ट्या ते संगतं मया ॥ ईदृशा दुर्लभा लोके नरा मुक्तिप्रदर्शकाः ॥ ६४ ॥ इत्युक्त्वा नृपविप्रौ तौ मुक्तिलिंगं समा गतौ ॥ दर्शनार्थं विशालाक्षि दृष्ट्वा देवं सनातनम् ॥ ६५ ॥ तत्क्षणात्सशरीरौ तौ तस्मिँल्लिंगे लयं गतौ ॥ ईदृशोऽयं मया देविमहिमा कथितस्तव ॥ ६६ ॥ अस्य लिंगस्य संस्पर्शान्मुक्तिर्भवति नान्यथा ॥ येऽर्चयंति सदा भक्त्या मुक्तिलिंगं सनातनम् ॥ अपि पापसमायुक्तः स याति परमां गतिम् ॥ ६७ ॥ रे मूढाः किं तपोभिश्च किं दानैर्नियमैश्च किम् ॥ कुरुध्वं मुक्तिलिंगस्य दर्शनं मुक्तिदायकम् ॥ ६८ ॥ न मां विदुर्देवगणा नासुरा न महर्षयः ॥ परं रूपं विशालाक्षि यदश्मद्युति निर्मलम् ॥ ६९ ॥ न मे वेत्ति परं रूपं स्वयं साक्षात्प्रजापतिः ॥ न विष्णुस्त्रिदशश्रेष्ठाः कुतोन्ये मुनयः प्रिये ॥ ७० ॥ यदेतद्दृश्यते तेजो लिंगरूपं यशस्विनि ॥ एतदेव शुकाद्या हि ध्यायंति त्रिदशा अमी ॥ ७१ ॥ अनेकजन्मसंशुद्धा योगिनोऽनुग्रहान्मम ॥ प्रविशंतु तनुं देवि मदीयां मुक्तिदायिकाम् ॥ ७२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिंगमाहात्म्ये मुक्तीश्वरमाहात्म्यवर्णनंनाम पंचविंशतित मोऽध्यायः ॥ २५ ॥छ॥ ॥ ईश्वर उवाच ॥ ॥ विद्धि षड्विंशकं देवि देवं सोमेश्वरं परम् ॥ यस्य दर्शनमात्रेण निष्कलंको नरो भवेत् ॥ १ ॥ अत्रिर्नाम महाभागो ब्रह्मणो मानसः सुतः ॥ प्रजापतिरभूद्देवि कल्पे वाराहसंज्ञके ॥ २ ॥ तस्य पुत्रोऽभवत्सोमो दक्षोथ मातृभागतः ॥ सप्तविंश तिर्याः कन्या दाक्षायण्यः प्रकीर्त्तिताः ॥ ३ ॥ सोमपत्न्यो हि मंतव्यास्तासां श्रेष्ठा तु रोहिणी ॥ तामेव भजते सोमो नेतरा इति शुश्रुम ॥ ॥ ४ ॥ इतराः प्रोचुरागत्य दक्षस्याग्रे यथातथम् ॥ दक्षोऽथ स तदागत्य तमुवाच स नाकरोत् ॥ ५ ॥ यदा न वारितस्तस्थौ दक्षः क्रुद्धस्तदा प्रिये ॥ शशाप सोमं संक्रुद्धः शीघ्रमंतर्हितो भव ॥ ६ ॥ एवं शप्तस्तु सोमो वै तदा ह्यंतर्हितोऽभवत् ॥ शशाप सोमो दक्षं तु भवानपि भविष्यति ॥ ॥ ७ ॥ अनेकत्वं[२] विहायैतज्जलदेहं सनातनम् ॥ अतः प्राचेतसो दक्षो ब्रह्मपुत्रोऽपि गीयते ॥ ८ ॥ एवमंतर्हितः सोमो गतो वै दक्षशापतः ॥ देवाश्च नागा यक्षाश्च गंधर्वाः पितृभिः सह ॥ वैराजं ब्रह्मसदनं ब्रह्माणं समुपस्थिताः ॥ ९ ॥ तस्याग्रे कथयामासुर्नमस्कृत्य पुनःपुनः ॥ भगवन्सर्वभूता नामादिकर्त्ता स्वयंभुवः ॥ १० ॥ स्रष्टा च हव्यकव्यानां पाहि नः शरणागतान् ॥ देवानां वचनं श्रुत्वा ज्ञात्वा देवः प्रजापतिः ॥ ११ ॥ आश्वा

१ ततः--इति पा० । २ अनेकत्वं विहायैतत्--एतदेकरूपतामपरित्यज्य--अनेनैव देहेन इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सयामास सुरान्सुश्लिष्टैर्वचनांबुभिः ॥ अवश्यं त्रिदशास्तेन प्राप्तव्यं कर्मणः फलम् ॥ १२ ॥ शापांतं भगवान्देवो विष्णुरेव करिष्यति ॥ एतच्छ्रु त्वा ततो देवा वाक्यं पंकजजन्मनः ॥ शरण्यं शरणं विष्णुमुपतस्थुर्गतव्यथाः ॥ १३ ॥ ब्रह्मणा सहिता देवि स्तुतिं चक्रुः समाहिताः ॥ नमस्ते देवदेवेश नमस्ते विश्वभावन ॥ नमस्तेऽस्तु हृषीकेश महापुरुषपूर्वज ॥ १४ ॥ नारायण जगन्नाथ देवास्त्वां शरणं गताः ॥ त्वं हि नः परमो ध्येय स्त्वं हि नः परमो गुरुः ॥ १५ ॥ त्वं हि नः परमो देवो ब्रह्मादीनां सुरोत्तम ॥ अंतर्धानं गतः सोमो दक्षशापाज्जनार्दन ॥ १६ ॥ विना सोमेन चौषध्यो नष्टा देव महीतले ॥ तेषां तद्वचनं श्रुत्वा विष्णुर्वचनमब्रवीत् ॥ १७ ॥ भयं त्यजध्वममरा अभयं वो ददाम्यहम् ॥ नष्टं चंद्रमसं शीघ्र मानयिष्याम्यसंशयम् ॥ १८ ॥ एवमुक्त्वा तु भगवान्विसृज्य त्रिदशेश्वरान् ॥ सोमं सस्मार सहसा शंखचक्रगदाधरः ॥ १९ ॥ यदा स्मृतो न चाभ्येति तदा क्रुद्धो जनार्दनः ॥ पुराणपुरुषो देवो ब्रह्माणमिदमब्रवीत् ॥ २० ॥ देवैरसुरसंघैश्च मथ्यतां कलशोदधिः ॥ भविष्यति पुनश्चंद्रो मथ्य माने महोदधौ ॥ २१ ॥ अमृतं तत्र लप्स्यध्वं रत्नानि विविधानि च ॥ तस्य तद्वचनं श्रुत्वा वासुदेवस्य पार्वति ॥ २२ ॥ मंथानं मंदरं कृत्वा नेत्रं कृत्वा च वासुकिम् ॥ देवा मथितुमारब्धाः समुद्रं निधिमंभसाम् ॥ २३ ॥ सोमार्थे च पुरा देवि तथैवासुरदानवाः ॥ एतैर्मुखमुपाश्लिष्टो नाग राजो महेर्ष्यया ॥ २४ ॥ विबुधाः सहिताः सर्वे यतः पुच्छं ततः स्थिताः ॥ अतो वै भगवान्देवो यतो नारायणस्ततः ॥ २५ ॥ शिरस्युद्यम्य नाग स्य पुनः पुनरवाक्षिपत् ॥ उदधौ मथ्यमाने वै महाञ्छब्दो बभूव ह ॥ २६ ॥ तत्र नानाजलचरा विनिष्पिष्टा महाद्रिणा ॥ विलयं समुपाजग्मुः शतशोथ सहस्रशः ॥ २७ ॥ तस्मिंस्तु मथिते देवि प्रयत्नात्केशवस्य च ॥ प्रसन्नात्मा समुत्पन्नः सोमः शीतांशुरुज्ज्वलः ॥ २८ ॥ तमेव देवा मनुजाः पितरश्च यशस्विनि ॥ उपजीवंति वृक्षाश्च तथैवौषधयो विधुम् ॥ २९ ॥ समुत्पन्नमथो दृष्ट्वा भगवान्प्राह केशवः ॥ पालयेमाः प्रजाश्चंद्र त्वं ज्येष्ठो जगतो भव ॥ ३० ॥ इत्युक्तो वासुदेवेन प्रजाः पालयितुं शशी ॥ पूर्वं सोमोपि यो नष्टः प्रविष्टो गहनं वनम् ॥ ३१ ॥ तस्याग्रे नारदः सर्वं कथयामास सत्वरम् ॥ देवर्षेर्वचनं श्रुत्वा नारदस्य महात्मनः ॥ ३२ ॥ पीडितो दक्षशापेन सोमोऽप्यंतर्हितस्तदा ॥ जगाम शरणं देवि ब्रह्माणं परमेष्ठिनम् ॥ ३३ ॥ तत्र गत्वा यथाशापं कथयामास गद्गदः ॥ पूर्वचंद्रवचः श्रुत्वा ब्रह्मा वचनमब्रवीत् ॥ ३४ ॥ अयं मे प्रथमः पुत्रः पीडितः शशिना भृशम् ॥ नवेनोदधिजातेन किं मया क्रियते पुनः ॥ ३५ ॥ विष्णुना च बलं दत्तमस्मै चंद्रमसे दृढम् ॥ तस्माद्यास्यामि तत्राहं यत्र देवो जनार्दनः ॥ ३६ ॥ तं दृष्ट्वा मधुहंतारं ब्रह्मा विष्णुमुवाचह ॥ त्वदादेशाज्जगन्नाथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

एष चंद्रः कृतो मया ॥ ३७ ॥ स चायं पीडितो देव शशांकेन नवेन वै ॥ इत्युक्तो ब्रह्मणा देवि वासुदेवो जगत्पतिः ॥ वृत्तांतं कथयामास ब्रह्माग्रे च पुनःपुनः ॥ ३८ ॥ ब्रह्मापि पूर्वचंद्रार्थे विष्णुं लोकनमस्कृतम् ॥ तुष्टाव प्रणतो भूत्वा प्रांजलिः प्रणतः स्थितः ॥ ३९ ॥ नमः कृष्ण नमो विष्णो नमो जिष्णो नमोनमः ॥ नमो वामन गोविंद नमोऽनंत नमोऽच्युत ॥४०॥ जयस्व गोविंद महानुभाव जयस्व विष्णो जय पद्मनाभ ॥ जयस्व सर्वाद्य गदाधरेश जयस्व विश्वेश्वर विश्वमूर्ते ॥ ४१ ॥ एवं स्तुतस्तदा देवि ब्रह्मणा लोककारिणा ॥ समीपस्थं समालोक्य सोमं वचनम ब्रवीत् ॥ ४२ ॥ गच्छ सोम ममादेशान्महाकालवनोत्तमे ॥ उत्तरे मुक्तिलिंगस्य लिंगं कांतिकरं परम् ॥ तमाराधय यत्नेन स ते देहं प्रदास्यति ॥ ॥ ४३ ॥ इत्युक्तो वासुदेवेन ब्रह्मणा च पुनःपुनः ॥ आजगाम महादेवि महाकालवनोत्तमे ॥ लिंगं दृष्ट्वा च तुष्टाव स्तोत्रेणानेन सुव्रते ॥ ४४ ॥ ॥ ॥ चंद्र उवाच ॥ ॥ नमो देवाधिदेवाय त्रिनेत्राय महात्मने ॥ रक्तपिंगलनेत्राय जटामुकुटधारिणे ॥ ४५ ॥ भूतवेतालजुष्टाय महादेवाय शूलिने ॥ भीमाट्टहासयुक्ताय कपर्दिस्थाणवे नमः ॥ ४६ ॥ पूष्णो दंतविनाशाय तथांधकविनाशिने ॥ कैलासवरवासाय सर्वदेवाय ते नमः ॥ ॥ ४७ ॥ विकरालोर्द्ध्वकेशाय भैरवाय नमोनमः ॥ अग्निज्वालाकरालाय कलिधर्मविवासिने ॥ ४८ ॥ तथा दारुवनध्वंसकारिणे तिग्मशूलिने ॥ कृतकंकणभोगींद्रकंठसूत्राय शूलिने ॥ ४९ ॥ प्रचंडदंडहस्ताय वडवाग्निमुखाय च ॥ वेदांतवेद्याय नमो यज्ञमूर्त्ते नमोनमः ॥ ५० ॥ दक्षयज्ञविनाशाय जगद्भयकराय च ॥ विश्वेश्वराय देवाय स्थूलसूक्ष्माय शंभवे ॥ कपर्दिने करालाय सर्वदेवाय ते नमः ॥ ५१ ॥ एवं स्तुतस्तदा देवि चंद्रेणांतर्हितेन च ॥ लिंगरूपी महादेवस्तुष्टो वाक्यमथाब्रवीत् ॥ ५२ ॥ स्तोत्रेणानेन तुष्टोऽस्मि ब्रूहि सोम किमिच्छसि ॥ यत्तेभिलषितं सर्वं तत्कर्त्तास्मि न संशयः ॥ ५३ ॥ ॥ सोम उवाच ॥ ॥ यदि त्वहमनुग्राह्यो यदि तुष्टोऽसि मे प्रभो ॥ कांत्या दीप्त्या तथा मूर्त्या तथा रूपेण च प्रभो ॥ ॥ ५४ ॥ स्वपदं कर्त्तुमिच्छामि त्वत्प्रसादान्महेश्वर ॥ एवमस्त्विति लिंगेन तत्क्षणाद्रजनीचर ॥ ५५ ॥ द्विजराजेन तत्प्राप्तं लिंगस्यास्य प्रसादतः ॥ सोमेनाराधितो यस्माद्देवदेवो महेश्वरि ॥ ५६ ॥ तेन सोमेश्वरोनाम विख्यातो भुवनत्रये ॥ येऽर्चयंति महादेवि देवं सोमेश्वरं परम् ॥ ५७ ॥ कृतपुण्या नरा मर्त्यास्ते यांति परमं पदम् ॥ यः पश्यति नरो भक्त्या लिंगं सोमेश्वरं प्रिये ॥ ५८ ॥ विमुक्तो जन्मदुःखाद्यैर्लीयते मयि मानवः ॥ ते नराः पशवो लोके किं तेषां जीविते फलम् ॥ ५९ ॥ यैश्च सोमेश्वरो देवो न दृष्टो न च पूजितः ॥ संसारेऽस्मिन्महाघोरे जन्मरोगभयाकुले ॥ ६० ॥ एकः सोमेश्वरः पूज्यः कुष्ठरोगविनाशनः ॥ स एव सुकृती लोके कुलं तेनाभ्यलंकृतम् ॥ ६१ ॥ आधारः सर्वलोकानां येन सोमेश्वरो ॥१०१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽर्चितः ॥ सकृदभ्यर्च्य सोमेशं बिल्वपत्रेण मानवः ॥ मुक्तो भोगी निरांतको मम लोके वसेच्चिरम् ॥ ६२ ॥ कांचनैः कुसुमैर्देवि लिंगं सोमेश्वरं प्रिये ॥ पूजयंति नरा भक्त्या ते यांति परमां गतिम् ॥ ६३ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ सोमेश्वरस्य देवस्य शृणुष्वानरकेश्वरम् ॥ ६४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्ये सोमेश्वरमाहात्म्यवर्णनं नाम षड्विंशोऽध्यायः ॥ २६ ॥ ॥ छ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ सप्तविंशतिमं देव्यनरकेश्वरसंज्ञकम् ॥ यस्य दर्शनमात्रेण स्वप्नेपि नरकः कुतः ॥ १ ॥ पुरा कलियुगे देवि कल्पे वाराहसंज्ञके ॥ कलुषं कालमासाद्य सत्ये च प्रलयं गते ॥ २ ॥ निर्मर्यादा निराधारा निरौका नास्तिका जनाः ॥ वर्णाश्रमाश्च संजाता वंचयंति परस्परम् ॥ ३ ॥ नार्चयंति सुरान्विप्राः कर्म कुर्वंति कुत्सितम् ॥ लोभमोहपरा भूत्वा कामासक्ताश्च मानवाः ॥ ४ ॥ वैरबद्धाश्च संजाताः परस्परवधे रताः ॥ निवृत्तयज्ञस्वाध्यायपिंडोदकविवर्जिताः ॥ ५ ॥ ब्राह्मणाः सर्वभक्ष्याश्च मृषावादपरायणाः ॥ भूयिष्ठं कूटमानैश्च पण्यं विक्रीणते तदा ॥ ६ ॥ दृश्यंते षोडशे वर्षे नराः पलितिनः प्रिये ॥ आयुःक्षयो मनुष्याणां क्षिप्रमेव प्रपद्यते ॥ ७ ॥ एवंविधाः समुद्भूता नरा नार्यश्च पातकैः ॥ नरकेषु प्रपद्यंते क्रमात्पापानुसारतः ॥ ८ ॥ कुठारैर्भिन्नमूर्द्धानः क्रकचैः पाटिताः परे ॥ अग्निवर्णैश्च संदंशैरुत्पाटितविलोचनाः ॥ ९ ॥ भिन्नाश्चायोमयैस्तीक्ष्णैरग्नितप्तैश्च कीलकैः ॥ पीड्यंते शैलशिखरैश्चूर्ण्यंते क्रूरभूधरैः ॥ १० ॥ क्षिप्यंते तप्तकुण्डेषु दह्यंते वह्निराशिषु ॥ अमेध्येऽधोमुखाश्चान्ये मर्दिता दंडपाणिना ॥ ११ ॥ लौहैश्च शृङ्खलैर्बद्धा ह्यधोवक्त्रैश्च लंबितैः ॥ अंतरिक्षे परिक्षेपात्क्रंदंतोऽतीव दुःखिताः ॥१२॥ कृमिभिर्भ्रमरैस्तीक्ष्णैर्दंशैश्च मशकैस्तथा ॥ लोहतुंडैश्च विहगैर्निर्दयैर्भक्षिता नराः॥१३॥ केचित्कृत्ताः प्रधावंति तोयार्थं च तृषातुराः ॥ स्वमूत्रं पायिताश्चंडैः क्षुभिताश्चापि घातनैः ॥ १४ ॥ यैश्चांगैः पतितं कर्म क्रियते पुरुषैर्भुवि ॥ तेषां तान्येव चांगानि शोध्यंते यातनागतैः ॥ १५ ॥ ये पश्यंति गुरुं देवान्ब्राह्मणान्क्रुद्धचक्षुषा ॥ दुष्टेन परदारांश्च वीक्षंते लोचनेन ये ॥ तेषां नेत्राणि भिद्यंते कृष्यंते लोहशंकुभिः ॥ १६ ॥ श्रवणौ च प्रपूर्यंते लौहेन शंकुना ततः ॥ पुनश्च शस्त्रैः कृष्यंते पुनस्तप्तैश्च कीलकैः ॥ १७ ॥ लौहैर्वैगान्निखन्यंते यैः श्रुतं गुरुनिंदनम् ॥ मित्राणां देवतानां च साध्वीनामथवा क्व चित् ॥ १८ ॥ शतशः पाट्यते जिह्वा वह्निवर्णैरयोमुखैः ॥ शंकुभिस्तीक्ष्णसूक्ष्माग्रैः पूर्यंते चानिलैः पुनः ॥ १९ ॥ तद्वक्त्राणि बहून्वारान्येपवादरता नराः ॥ ये गुरुं मातरं वापि पारुष्येण वदंति वै ॥ २० ॥

१ शृणुष्व मनरकेश्वरम्--इ० पा० । अनरकेश्वर--इति नाम तु--आश्विनकृष्णचतुर्दश्यां--नरकचतुर्दशीत्याख्यायां--निमिराज्ञा दृष्टत्वेन पूजितत्वेन च प्रसिद्धिमागतं नरकनिवारणसामर्थ्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ये निघ्नंति दुराचाराः सुरार्थायोपकल्पिते ॥ आरामे पुष्पपत्राणि तेषामंगानि कृंतति ॥ २१ ॥ यैरप्यालिंगिता नारी परस्य च दुरात्मभिः ॥ तेषा मयोमयी नारी वह्निवर्णा तु वक्षसि ॥ २२ ॥ स्थाप्यते वध्यते चापि प्रचंडैर्यमकिंकरैः ॥ नार्यश्च पुरुषैस्तैस्तैरालिंग्यंते ह्ययोमयैः ॥ २३ ॥ तदा लोहमये गेहे ज्वलितानलसंस्तरे ॥ निक्षिप्यंते नरैः सार्द्धमासाद्य कालसंक्षयम् ॥ २४ ॥ यावती वेदना देहे इह लोके प्रदृश्यते ॥ नराणामंगपीडा वै तस्माच्छतगुणा भवेत् ॥ २५ ॥ काकैश्च वृश्चिकैर्गृध्रैर्भक्ष्यंतेऽप्यपरे नराः ॥ दह्यमाना विलपंति भ्रातस्तातेति चाकुलाः ॥ वदंत्यसकृदुद्विग्ना न च शांतिं लभंति वै ॥ २६ ॥ दुःखानि ते प्राप्नुवंति यान्यसह्यानि पार्वति ॥ एवं ते यातनादुःखं प्राप्नुवंति सुनिश्चितम् ॥ निमिर्नाम महाभागो यममार्गं ददर्श ह ॥ २७ ॥ रौद्रं भयानकं दुर्गं पूरितं पापकर्मभिः ॥ तमसा संवृतं चैव केशशैवालशाद्वलम् ॥ २८ ॥ संपृक्तं पापकृद्दंहैर्मांसशोणितकर्दमैः ॥ वह्निज्वालेन दीप्तेन समंतात्परिवारितम् ॥ २९ ॥ अधोमुखैश्च कर्कोटैर्गृध्रैश्च समभिद्रुतम् ॥ सूचीमुखैस्तथा प्रेतैर्विंध्यशैलोपमैर्वृतम् ॥ ॥ ३० ॥ वृक्षे रुधिरमांसैश्च छिन्नबाहूरुपाणिभिः ॥ निकृत्तोदरहस्तैश्च तत्रतत्र प्रचारितैः ॥ ३१ ॥ वृतं कुणपदुर्गंधैरशिवं भोगवर्जितम् ॥ असिपत्रवनं चैव समंतात्परिवारितम् ॥ ३२ ॥ करंभवालुकाकीर्णमायसीश्च शिलाः पृथक् ॥ ददर्श चापि देहोत्थयातनां पापकर्मणाम् ॥ ३३ ॥ स तं दुर्गंधमालक्ष्य पुरुषं तमुवाच ह ॥ कियदध्वानमस्माभिर्गंतव्यमिदमब्रवीत् ॥ ३४ ॥ देशोऽयं कश्च देवानामेतदिच्छामि वेदितुम् ॥ इत्युक्तो यमदूतस्तु दण्डहस्तोऽग्निसप्रभः ॥ पुरतो दर्शयन्मार्गमित एहीत्युवाच ह ॥ ३५ ॥ भूयः स राजा तं प्राह किंकरं विनयान्वितः ॥ भो याम्यपुरुषाचक्ष्व किं मया दुष्कृतं कृतम् ॥ ३६ ॥ येनेदं व्यसनं प्राप्तं मया च धार्मिकेण हि ॥ निमिर्नामाहं विख्यातो जनकानामहं कुले ॥ ३७ ॥ जातो विदेहविषये सम्यग्मनुजपालकः ॥ चातुर्वर्ण्यं च धर्मस्थं कृत्वा संरक्षितं मया ॥ ३८ ॥ धर्मप्रधानकल्पेन मनुनात्र यथा पुरा ॥ यज्ञैर्मयेष्टं बहुभिर्धर्मतः पालिता मही ॥ ३९ ॥ नोत्सृष्टश्चैव संग्रामो नातिथिर्विमुखोऽभवत् ॥ कृता स्पृहा च न मया परस्त्रीविभवादिषु ॥ ४० ॥ सोऽहं कथमिमं प्राप्तो नरकं भृशदारुणम् ॥ इति पृष्टस्तदा तेन निमिना यमकिंकरः ॥ उवाच प्रणतो भूत्वा क्रूरोऽपि प्रश्रितं वचः ॥ ४१ ॥ ॥ पुरुष उवाच ॥ ॥ महाराज यथात्थ त्वं तथैतन्नात्र संशयः ॥ किन्तु स्वल्पं कृतं पापं भवंतं स्मारयामि तत् ॥ ४२ ॥ उक्ता या दक्षिणा श्राद्धे न दत्ता सा त्वया नृप ॥ प्रमादाद्विस्मृता चैव तस्येदं कर्मणः फलम् ॥ ४३ ॥ एतावदेव ते पापं नान्यत्किंचन विद्यते ॥ वैदेहागच्छ पुण्यानामुपभोगाय पार्थिव ॥ ४४ ॥ एवं श्रुत्वा तु राजर्षिर्निमिर्दूतमथाब्रवीत् ॥ यास्यामि देवानुचर यत्र मां त्वं



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हि नेष्यसि ॥ ४५ ॥ किंचित्पृच्छामि ते तत्त्वं यथावद्वक्तुमर्हसि ॥ वज्रतुंडास्त्वमी काकाः पुंसां नयनहारिणः ॥ ४६ ॥ पुनः पुनश्च नेत्राणि तद्वत्तेषां भवंति हि ॥ किं कृतं कर्म दूतेंद्र कथयैतज्जुगुप्सितम् ॥ ४७ ॥ हरंत्येषां तथा जिह्वां जायमानां पुनर्नवाम् ॥ करपत्रेण पाट्यंते कस्मादेते सुदुःखिताः ॥ ४८ ॥ किमेते नष्टचित्ताश्च तुद्यंतेऽहर्निशं नराः ॥ एताश्चान्याश्च दृश्यंते यातनाः पापकर्मिणाम् ॥ कियत्कालं भविष्यंति तन्ममोद्देशतो वद ॥ ४९ ॥ ॥ पुरुष उवाच ॥ ॥ यन्मां पृच्छसि भूपाल पापकर्मफलोदयम् ॥ तत्तेहं संप्रवक्ष्यामि संक्षेपेण यथातथम् ॥ ५० ॥ पुण्यापुण्ये हि पुरुषः पर्यायेण समश्नुते ॥ भुंजतश्च क्षयं याति पुण्यं पापमथापि वा ॥ ५१ ॥ न तु भोगादृते पुण्यं पापं कर्म च मानवः ॥ परित्यजति राजेंद्र सत्यमेतदुदाहृतम् ॥ ५२ ॥ एवमेते महापापा यातनाभिरहर्निशम् ॥ क्षपयंति महाघोरं नरकांतरवर्त्तिनः ॥ ५३ ॥ देवत्वेऽथ मनुष्यत्वे तिर्यक्त्वेऽथ शुभाशुभम् ॥ पुण्यपापोद्भवं भुंक्ते सुखदुःखं न संशयः ॥ ५४ ॥ एतदुद्देशतो राजन्भवता कथितं मया ॥ स्वकर्मफलमोक्षाणां पुण्यानां पापिनां तथा ॥ ५५ ॥ तदेह्यन्यत्र गच्छावि यथा दृष्टं त्वयाधुना ॥ ततस्तमग्रतः कृत्वा स राजा गंतुमुद्यतः ॥ ५६ ॥ तदा हि सर्वैरुद्घुष्टं यातनास्थायिभिर्नृभिः ॥ प्रसादं कुरु भूपेति तिष्ठ तावन्मुहूर्त्तकम् ॥ त्वदंगसंगी पवनो देहान्ह्लादयते हि नः ॥ ५७ ॥ परितापं च गात्रेभ्यः पीडाबाधाश्च कृत्स्नशः ॥ अपहंति नरव्याघ्र कृपां कुरु महीपते ॥ ५८ ॥ एतच्छ्रुत्वा वचस्तेषां तं याम्यपुरुषं नृपः ॥ पप्रच्छ कथमेतेषामाह्लादो मयि तिष्ठति ॥५९ ॥ किं मया कर्म तत्पुण्यं मर्त्यलोके महत्कृतम् ॥ प्रह्लादजननी दृष्टिर्यस्येयं तदुदीर्यताम् ॥ ६० ॥ ॥ पुरुष उवाच ॥ ॥ त्वया दृष्टो महाकाले विख्यातोऽनरकेश्वरः[1] ॥ आश्विनस्य चतुर्दश्यां तस्येदं फलमीदृशम् ॥ ६१ ॥ ततस्तद्गात्रसंसर्गी पवनो ह्लाददायकः ॥ पापकर्मकृतां राजन्यातना न प्रबाधते ॥ ६२ ॥ ॥ राजोवाच ॥ ॥ यदि मत्संनिधाने सा यातना न प्रबाधते ॥ ततो भद्रमुखात्राहं स्थास्ये स्थाणुरिवाचलः ॥ ६३ ॥ ॥ पुरुष उवाच ॥ ॥ एहि राजेंद्र गच्छावो निजपुण्यसमार्जितान् ॥ भुंक्ष्व भोगान्न यास्येतां यातनां पापकर्मणाम् ॥ ॥ ६४ ॥ ॥ राजोवाच ॥ ॥ न स्वर्गे ब्रह्मलोके वा तत्सुखं प्राप्यते नरैः ॥ यदार्त्तजंतुं निर्वाणमानेतुमिति मे मतिः ॥ ६५ ॥ तस्मान्न तावद्यास्यामि यावदेते सुदुःखिताः ॥ मत्संनिधानात्सुखिनो भवंतु नरकौकसः ॥ ६६ ॥ प्राप्स्यंते ते यदि सुखं बहवो दुःखिते मयि ॥ किं तु प्राप्तं मया सर्वं तस्मात्त्वं व्रज मा चिरम् ॥ ६७ ॥ ॥ पुरुष उवाच ॥ ॥ एष धर्मश्च शक्रश्च त्वां नेतुं समुपागतौ ॥ अवश्यमस्माद्गंतव्यं

१ मनकेश्वरः—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





तस्मात्पार्थिव गम्यताम् ॥ ६८ ॥ एतस्मिन्नंतरे धर्मः शक्रेण सहितोऽब्रवीत् ॥ निमे परमधर्मज्ञ प्रीता देवगणास्तव ॥ ६९ ॥ एह्येहि पुरुषव्याघ्र कृतमेतावता प्रभो ॥ सिद्धिः प्राप्ता त्वया राजँल्लोकाश्चाप्यक्षयान्विताः ॥ ७० ॥ न च मन्युस्त्वया कार्यः शृणु मे वचनं विभो ॥ अवश्यं नरकस्तावद्द्रष्टव्यः सर्वराजभिः ॥ ७१ ॥ नयामि त्वामहं स्वर्गं त्वया सम्यगुपासितः ॥ विमानवरमारुह्य विमलं चाद्य गम्यताम् ॥ ७२ ॥ ॥ ॥ निमिरुवाच ॥ ॥ नरके मानवा धर्म पीड्यंतेऽत्र सहस्रशः ॥ त्राहीति वार्त्तां क्रंदंतो मामतो न व्रजाम्यहम् ॥ ७३ ॥ ॥ इन्द्र उवाच ॥ ॥ कर्मणा नरके प्राप्तिरेषां च पापकर्मणाम् ॥ स्वर्गे त्वयापि गंतव्यं नृप पुण्येन कर्मणा ॥ ७४ ॥ ॥ राजोवाच ॥ ॥ परिजानासि धर्मज्ञ त्वं वा शक्र शचीपते ॥ विशिष्टं मम किं पुण्यं शुभं तद्वक्तुमर्हसि ॥ ७५ ॥ ॥ धर्म उवाच ॥ ॥ आश्विनस्य तु मासस्य कृष्णपक्षे चतुर्दशी ॥ तस्यां त्वया महाबाहो महाकालवनोत्तमे ॥ दृष्टो देवः सुविख्यातः स्वर्गदोऽनरकेश्वरः ॥ ७६ ॥ तद्विशिष्टं च ते पुण्यं तस्य संख्या न विद्यते ॥ स्वकर्मोपार्जितं पुण्यं भुंक्ष्व राजन्यथासुखम् ॥ एते नारकिकाः सर्वे क्षपयंतु स्वकर्मजाम् ॥ ॥ ७७ ॥ ॥ राजोवाच ॥ ॥ कथं स्पृहां करिष्यंति सत्संगेषु च मानवाः ॥ यदि मत्संनिधावेषामुत्कर्षो नोपजायते ॥ ७८ ॥ तस्माद्यत्सुकृतं किंचिद्विशिष्टतरमस्ति वै ॥ तेन मुच्यंतु नरकात्पापिनो यातनागताः ॥ ७९ ॥ ॥ धर्म उवाच ॥ ॥ राजंस्त्वया कृतं पूर्वेऽनरकेश्वरदर्शनम् ॥ तदुत्पन्नस्य पुण्यस्य कलामेभ्यः प्रयच्छ वै ॥ ८० ॥ तत्पुण्यस्य प्रभावेण मोक्ष्यंते नरकादिमे ॥ तथा कृते ततस्तेन विमुक्ता नरकाच्च ते ॥ ८१ ॥ ततोऽब्रवीद्धर्मराजो निमिं शक्रसमन्वितः ॥ एवं श्रेष्ठतरं स्थानं त्वया प्राप्तं महीपते ॥ ८२ ॥ एतांश्च नारकान्पश्य विमुक्तान्पापकर्मणः ॥ ततोऽपतत्पुष्पवृष्टिस्तस्योपरि महीपतेः ॥ ८३ ॥ विमानं चाधिरोप्यैनं स्वर्लोकमनयद्धरिः ॥ येये तत्राभवन्पापा यातनाभ्यः परिच्युताः ॥ ८४ ॥ प्रभावात्तस्य देवस्य स्वर्गलोकं गताः प्रिये ॥ अतो देवः सुविख्यातः स देवोऽनरकेश्वरः ॥ ८५ ॥ स्तुतो देवगणैः सर्वैर्नरकादवतारकः ॥ जातः स एव सुकृती कुलं तेनैव पावितम् ॥८६॥ यः पश्यति नरो नित्यं देवं चानरकेश्वरम् ॥ येऽर्चयंति नरा भक्त्या देवं चानरकेश्वरम् ॥ तेषां विलीयते पापं पूर्वजन्मशतोद्भवम् ॥ ८७ ॥ येनुमोदंति देवस्य दर्शनं पर्वतात्मजे ॥ तेऽपि पापविनिर्मुक्ताः प्रयांति मम मंदिरे ॥ ८८ ॥ समतीतं भविष्यच्च कुलानामयुतं नरः ॥ मम लोकं नयत्याशु तस्य लिंगस्य दर्शनात् ॥ ८९ ॥ शिवयोगसमायुक्ता कृष्णा

१ यातनाम्-इति शेषः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

या च चतुर्दशी ॥ सा प्रोक्ता वल्लभा तस्य सर्वपापप्रणाशिनी ॥ ९० ॥ ये चायांति नरास्तस्यां देवं चानरकेश्वरम् ॥ उपोष्य पापैर्मुच्यंते ते नराः शतजन्मजैः ॥ ९१ ॥ कर्मणा मनसा वाचा यत्पापं समुपार्जितम् ॥ तत्क्षालयति देवोसौ तिथौ तस्यां समर्चितः ॥ ९२ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ जटेश्वरस्य देवस्य शृणु माहात्म्यमुत्तमम् ॥९३॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिंगमाहात्म्येऽनरकेश्वरमाहात्म्यवर्णनंनाम सप्तविंशोऽध्यायः ॥ २७ ॥छ॥ ॥ श्रीदेवदेव उवाच ॥ ॥ अष्टाविंशतिकं विद्धि विख्यातं च जटेश्वरम् ॥ यस्य दर्शनमात्रेण मुक्तो भवति मानवः ॥ १ ॥ पुरा राथंतरे कल्पे वीरधन्वा महीपतिः ॥ धर्मात्मा च यशस्वी च बभूव भुवि विश्रुतः ॥ २ ॥ स कदाचिद्वनं गत्वा मृगहेतोर्वरानने ॥ व्यापादयन्मृगगणान्धनुषा क्रोधविह्वलः ॥ ३ ॥ जगाम तत्र यत्रासन्भ्रातरः पंच सुव्रताः ॥ संवर्त्तस्य सुता देवि मृगरूपेण संस्थिताः ॥ ४ ॥ ते कदाचिद्वने पंच दृष्ट्वा हरिणपोतकान् ॥ श्वसतो जातमात्रांश्च कौतूहलसमन्विताः ॥ ५ ॥ एकैकं जगृहुस्तत्र मृतास्ते त्वतिदुःखिताः ॥ ततः सर्वे च ते पंच ययुर्वै पितुरंतिकम् ॥ ६ ॥ प्रायश्चित्तं समीहंतः संवर्त्तं सांसदैर्वृतम् ॥ ऊचुस्ते वचनं चेदं मृगहिंसाश्रितं तदा ॥ ७ ॥ जातमात्रा मृगाः पंच अस्माभिर्निहताः प्रभो ॥ अकामतस्ततोऽस्माकं प्रायश्चित्तं विधीयताम् ॥ ८ ॥ ऊचे स शुद्धिमाप्नोति प्रायश्चित्ते कृते सति ॥ अनधीत्य धर्मशास्त्रं प्रायश्चित्तं ददाति यः ॥ प्रायश्चित्ती भवेत्पूतः किल्बिषं दातरि व्रजेत् ॥ ९ ॥ धर्मशास्त्रसमारूढा वेदखड्गधरा द्विजाः ॥ क्रीडार्थमपि यद्ब्रूयुः स धर्मः परमः स्मृतः ॥ १० ॥ ब्रह्मच्छिद्रं जपच्छिद्रं यच्छिद्रं यज्ञकर्मणि ॥ अच्छिद्रं जायते सर्वं ब्राह्मणैरुपपादितम् ॥ ११ ॥ अच्छिद्रमिति यद्वाक्यं वदंति क्षितिदेवताः ॥ प्रणश्यत्यखिलं पापमग्निष्टोमफलं भवेत् ॥ १२ ॥ इत्येवं वदति श्रेष्ठे संवर्त्ते द्विजसत्तमे ॥ समागताश्च मुनयो भृग्वत्र्यंगिरसादयः ॥ १३ ॥ तेषामर्थे यथावृत्तं कथयामासुरेव ते ॥ संवर्त्तस्य सुता दीना भक्तिनम्राः पुनःपुनः ॥ १४ ॥ तेऽप्यूचुर्धर्मशास्त्राणि विहितानि यथार्थतः ॥ प्रायश्चित्तं यथोदिष्टं देशकालविभागतः ॥ १५ ॥ अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः ॥ प्रायश्चित्तार्द्धमर्हंति स्त्रियो वै व्याधितस्य च ॥ १६ ॥ देशं कालं वयः शक्तिं पापं चावेक्ष्य यत्नतः ॥ प्रायश्चित्तं प्रकल्प्यं स्यादिति धर्मो व्यवस्थितः ॥ १७ ॥ इदानीं मृगचर्माणि परिधाय धृतव्रताः ॥ चरध्वं पंच वर्षाणि ततः शुद्धा भविष्यथ ॥ ॥ १८ ॥ एवमुक्तास्तु ते बाला मृगधर्मोपजीविनः ॥ वनं विविशुरव्यग्रा ध्यायंतो ब्रह्म शाश्वतम् ॥१९॥ ततो वर्षे ह्यतिक्रांते वीरधन्वा महीपतिः ॥

१ मनकेश्वरमाहात्म्यवर्णनंनाम—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

तत्राजगाम यस्मिंस्ते चरंति मृगरूपिणः ॥ २० ॥ ते चाप्येकतरोर्मूले मृगधर्मोपजीविनः ॥ जपंतः संस्थितास्ते हि राज्ञा दृष्टा मृगा इति ॥ २१ ॥ मत्वा विद्धास्तु नाराचैर्मृतास्ते ब्रह्मवादिनः ॥ तान्दृष्ट्वा च मृताञ्राजा ब्राह्मणान्संशितव्रतान् ॥ भयेन वेपमानस्तु देवराताश्रमं ययौ ॥ २२ ॥ तत्रापृच्छद्ब्रह्मवध्या मम जाता महामुने ॥ आमूलांतं वधांतस्य कथयित्वा नराधिपः ॥ २३ ॥ भृशं शोकपरीतात्मा रुरोद भृशदुःखितः ॥ स ऋषिर्देवकल्पस्तु रुदंतं नृपसत्तमम् ॥ २४ ॥ उवाच मा भैर्नृपते अपनेष्यामि पातकम् ॥ पाताले सुतलाख्ये तु निमज्जंती यथा धरा ॥ २५ ॥ उद्धृता देवदेवेन विष्णुना क्रोडमूर्त्तिना ॥ तद्वद्भवंतं राजेंद्र ब्रह्महत्यापरिप्लुतम् ॥ उद्धरिष्यति देवोऽसौ स्वयमेव जनार्दनः ॥ २६ ॥ एवमुक्तस्ततो राजा दुरितो वाक्यमब्रवीत् ॥ २७ ॥ किमनेन द्विजेनैव निष्प्रभेण दुरात्मना ॥ उद्धर्तुं नैव शक्नोति स्वयमेव द्विजाधमः ॥ २८ ॥ इत्युक्त्वा कोपरक्ताक्षः खड्गेनैव जघान तम् ॥ मृतं दृष्ट्वा द्विजं राजा क्रोधेन कलुषीकृतः ॥ २९ ॥ तस्मिन्नेव वने देवि पापसंघेन मोहितः ॥ जघान कपिलां दोग्ध्रीं सवत्सां गालवस्य च ॥ ३० ॥ क्षुधार्त्तश्च तृषार्त्तश्च बाल्यान्मोहाच्च साहसात् ॥ क्रूरा बुद्धिः समभवज्जटीभूतं च पातकम् ॥ ३१ ॥ जटीभूतेन पापेन बभ्राम गहने वने ॥ स कदाचित्तुरंगेण हृतो दूरं महद्वनम् ॥ ३२ ॥ व्याघ्रसिंहगजाकीर्णं मृगशंबरसेवितम् ॥ एकाकी तत्र राजासावश्वं मुक्त्वा तरोरधः ॥ ३३ ॥ कुशोपरि तदा तत्र सुष्वाप च स निर्भयम् ॥ तत्र व्याधाः समचरन्दृष्ट्वा सुप्तं च निर्भयम् ॥ ॥ ३४ ॥ ते गतास्त्वरिता व्याधाः स्वभर्तुः कथनाय वै ॥ स्वामिना तेन निर्दिष्टा निग्रहीतुं प्रचक्रमुः ॥ ३५ ॥ तावद्राज्ञः शरीरात्तु श्वेता[1]ऽऽभरणभूषिता ॥ उत्थाय चक्रमादाय तया म्लेच्छाश्च पातिताः ॥ ३६ ॥ दस्यून्निहत्य सा देवी तत्रैवादर्शनं गता ॥ ३७ ॥ अथ राजा तया मुक्तः प्रतिबुद्धोऽथ तत्क्षणात् ॥ म्लेच्छांश्च निहतान्दृष्ट्वा चिंतयामास पार्थिवः ॥ ३८ ॥ गोवध्या ब्रह्मवध्या च वने ह्यस्मिन्सुदारुणा ॥ कथं मया नृशंसेन प्राप्ता पापपरंपरा ॥ ३९ ॥ एवं स चिंतयित्वाथ निःश्वस्य च पुनःपुनः ॥ तमेवाश्वं समारुह्य वामदेवाश्रमं ययौ ॥ ४० ॥ मुनिना वामदेवेन दृष्टो राजा तथाविधः ॥ जटीभूतेन पापेन पीडितो दुःखितस्तदा ॥ ४१ ॥ ॥ वामदेव उवाच ॥ ॥ अयं स पुरुषव्याघ्रो वीरधन्वा महीपतिः ॥ सोमवंशसमुत्पन्नो दशां कष्टां समागतः ॥ ४२ ॥ उद्धरिष्यामि राजानमेनं पुरुषसत्तमम् ॥ इत्यालोच्य तदा विप्रो वामदेवो महातपाः ॥ प्रत्युवाच महीपालं वीरधन्वानमातुरम् ॥ ४३ ॥ भोभो राजन्महीपाल वीरधन्वेति विश्रुतः ॥ विद्‌

१ देवी—इति शेषः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रथस्य तनयो विख्यातो भुवनत्रये ॥ ४४ ॥ प्राग्भवे व्याधरूपेण निहिथा विपिने मृगान् ॥ दृढं जागरणं रात्रावामलक्यास्तरोरधः ॥ ४५ ॥
फाल्गुनामलपक्षे त्वामलक्येकादशी शुभा ॥ पुष्यर्क्षयोगिनी तस्यां जामदग्न्यप्रदक्षिणा ॥ ४६ ॥ पूजा लोकैः कृता दृष्टा विस्मयेन त्वया पुरा ॥
अकामादुपवासोऽभूत्तस्यां जागरणं पुनः ॥ ४७ ॥ तत्प्रभावादभू राजा महाबलपराक्रमः ॥ तया संरक्षितो राजन्म्लेच्छवर्गाद्वनेऽधुना ॥ ४८ ॥
निहताः शत्रवः सर्वे तयैव शुभमाप्स्यसि ॥ पूर्वकर्मविपाकेन ब्रह्महत्या समागता ॥ ४९ ॥ ज्ञाता तपःप्रभावेन मया योगबलेन च ॥ जटीभूतं
शरीरं ते पापसंघेन पार्थिव ॥ ५० ॥ इदानीं पालयिष्यामि शृणु मे वचनं परम् ॥ ५१ ॥ इत्युक्तो वामदेवेन मुनिना स महीपतिः ॥ प्रणम्य प्रयतो
भूत्वा पप्रच्छ च पुनःपुनः ॥५२॥ कथं यास्यंति मे हत्या गोब्राह्मणसमुद्भवाः ॥ उपदेशप्रदानेन प्रसादं कर्तुमर्हसि ॥५३॥ तस्य तद्वचनं श्रुत्वा वाम
देवो महामुनिः ॥ कथयामास माहात्म्यं लिंगस्यास्य यशस्विनि ॥ ५४ ॥ महाकालवनं गच्छ महाराज ममाज्ञया ॥ तत्रास्ते देवदेवोऽपि जगद्व्यापी
जटेश्वरः ॥ ५५ ॥ पापसंघप्रहर्त्ता च सर्ववेदेषु पठ्यते ॥ देवस्यानरकेशस्य उत्तरे स व्यवस्थितः ॥५६॥ तस्य तद्वचनं श्रुत्वा वामदेवस्य पार्थिवः ॥
आजगाम त्वरायुक्तो महाकालवनोत्तमे ॥५७॥ तत्र दृष्ट्वा जगद्वंद्यं देवदेवं जटेश्वरम् ॥ स्तुतिं चकार राजेंद्रो भक्त्या परमया पुनः ॥५८॥ शिवाय
ते नमो नित्यं विश्वकाय नमोनमः ॥ नमो दिव्याय गुह्याय गूढव्रतशरीरिणे ॥५९॥ नमो जटाय रामाय माययाक्रांतकारिणे ॥ नमोस्तु बहुरूपाय
नमो नीलाभरूपिणे ॥ ६० ॥ नमो भोगाय धूम्राय नमोऽस्तु गगनात्मने ॥ नमो वह्निसमूहाय नमस्ते निर्मलाकर ॥ ६१ ॥ नमो महांधका
रार्क नमस्ते शत्रुघातिने ॥ नमः संसारपाराय दिव्यरूपशरीरिणे ॥ नमः कनकवर्णाय नमो मोहितमोहिने ॥ ६२ ॥ नमः सुरूपाय सुरार्चिताय
नमो विरूपाय प्रकृतेः पराय ॥ नमोनमो रूपनिराश्रयाय श्यामासुरूपाय नमोनमस्ते ॥ ६३ ॥ इति स्तुतस्तदा देवि महादेवो महेश्वरः ॥
जटावेष्टितसर्वांगो लिंगमध्याच्च निस्सृतः ॥ ६४ ॥ भस्मचर्चितसर्वांगो भोगिभोगांगदोज्ज्वलः ॥ हिमराशिनिभाकारो राजताचलनिर्मलः ॥ ६५ ॥
मुक्तालतानिभाभिस्तु जटाभिर्भूषितो विभुः ॥ कपिलाभिः करालाभिर्विकटाभिश्च वेष्टितः ॥ ६६ ॥ भोगींद्रफणबद्धाभिः सितपीतादिभिस्तथा ॥
नदीरूपाभिरूताभिः शोभितोऽसौ जटेश्वरः ॥ ६७ ॥ राजानं प्रत्युवाचेदं वचनं पर्वतात्मजे ॥ स्तोत्रेणानेन राजेंद्र तुष्टोऽहं तोषितस्त्वया ॥
॥ ६८ ॥ जटीभूतं च ते पापं गतं मद्दर्शनेन वै ॥ तस्मात्स्थानं परं गच्छ मदीयं शाश्वतं मुदा ॥ ६९ ॥ इत्युक्तो देवदेवेन वीरधन्वा
महीपतिः ॥ जगाम परमं स्थानं दाहप्रलयवर्जितम् ॥ ७० ॥ कामगेन विमानेन स्तूयमानो गणैः प्रिये ॥ पापसंघेन मुक्तोऽसौ जटीभू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





तेशदर्शनात् ॥ ७१ ॥ लिंगश्चातः समाख्यातो नाम्ना देवो जटेश्वरः ॥ जटेश्वरं वरारोहे ये पश्यंति सुभक्तितः ॥ तेषां पापं जटीभूतं तत्क्षणादेव नश्यति ॥ ७२ ॥ येऽर्चयंति सदा देवि देवदेवं जटेश्वरम् ॥ तेषां बलं प्रभावश्च सौभाग्यं च भविष्यति ॥ ७३ ॥ येप्यन्ये देवगन्धर्वा यक्षराक्षस मानवाः ॥ लिंगं च पूजयिष्यंति विधिवद्भक्तिभावतः ॥ ७४ ॥ तेऽपि कामानवाप्स्यन्ति यांश्च कांश्च सुदुर्लभान् ॥ ऐश्वर्यं धर्ममतुलं दीर्घमायुररोगताम् ॥ ७५ ॥ निःसपत्नत्वमतुलं यच्चान्यत्तदवाप्नुयात् ॥ पापिनः क्रूरकर्माणो येऽपि लिंगं समाश्रिताः ॥ तेपि पापविनिर्मुक्ता भविष्यंति गतज्वराः ॥ ७६ ॥ जटेश्वरं प्रपश्यंति भक्त्या ये च दिनेदिने ॥ ते धर्मधनसौभाग्यैर्भविष्यंति समन्विताः ॥ ७७ ॥ व्याधितो व्याधिना मुक्तो दुःखी दुःखात्प्रमुच्यते ॥ दर्शनात्तु भवेत्सद्यः सर्वपातकवर्जितः ॥ ७८ ॥ जटेश्वरस्य माहात्म्यं ये पठिष्यंति पार्वति ॥ श्रोष्यंति येऽपि मद्भक्त्या प्रयताः श्रद्धयान्विताः ॥ ७९ ॥ ते सर्वकामानाप्स्यंति गतिमंते च मत्पुरे ॥ या नारी दुर्भगा सापि सौभाग्यं लभते सदा ॥ ८० ॥ गुर्विणी लभते पुत्रमरोगं श्रुतिभूषणम् ॥ शिशुग्रहाश्च नश्यंति नापमृत्युभयं भवेत् ॥ ८१ ॥ मांगल्यमिदमायुष्यं धर्मकामाश्रयं महत् ॥ दुःस्वप्नजं भयं घोरं पापजं याति संक्षयम् ॥ ८२ ॥ दुर्भुक्तं दुर्जनस्पर्शं यच्चाल्पायुःकरं भवेत् ॥ लिंगाख्यानकथां श्रुत्वा विनश्यति न संशयः ॥ ८३ ॥ श्राद्धेषु यः पठेदेतां जटेश्वरकथां शुभाम् ॥ तदक्षयं भवेच्छ्राद्धं पितॄणां प्रीतिवर्द्धनम् ॥ ८४ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ जटेश्वरस्य देवस्य शृणु रामेश्वरं शिवम् ॥ ८५ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये जटेश्वरमाहात्म्यवर्णनंनामाष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ श्रीहर उवाच ॥ ॥ एकोनत्रिंशतं विद्धि देवं रामेश्वरं प्रिये ॥ यस्य दर्शनमात्रेण मुच्यते ब्रह्महत्यया ॥ १ ॥ पुरा त्रेतायुगे देवि रामः शस्त्रभृतां वरः ॥ शूरः सर्वगुणोपेतः पितृभक्तो बभूव ह ॥ २ ॥ रेणुकागर्भसंभूतः स्वयं रामो बभूव ह ॥ विष्णुरेवावतीर्णोऽसौ भृगोः शापात्सुदुस्तरात् ॥ ३ ॥ स कदाचिन्नियुक्तोऽसौ मुनिना जमदग्निना ॥ शिरश्छिन्धीत्युवाचेदं मातुस्ते विपुलं सुत ॥ ४ ॥ स पितुर्वचनं श्रुत्वा भ्रातॄणां मातुरेव च ॥ शिरांसि चिच्छिदे रामो जमदग्निर्वरं ददौ ॥ ५ ॥ सर्वेषां पृथिवीशानां त्वमजेयो भविष्यसि ॥ सर्वक्षयकरो भावी न चिरादेव भार्गव ॥ ६ ॥ गृहाण परशुं पुत्र वह्निज्वालोद्भवं दृढम् ॥ अनेन शितशस्त्रेण ततः ख्यातो भविष्यति ॥ ७ ॥ अथ केनापि कालेन कार्त्तवीर्यार्जुनो नृपः ॥ हैहयानां कुले जातः सहस्रबाहुविश्रुतः ॥ ८ ॥ जघान जमदग्निं तु कामधेनुकृते कुधीः ॥ पितरं निहतं दृष्ट्वा रामः क्रुद्धोऽब्रवीदिदम् ॥ ९ ॥ अथ पश्यंतु मे वीर्यं त्रयो लोकाः सनातनम् ॥ स च पश्यतु दुर्बुद्धिर्ब्रह्महा कृतवी



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्यजः ॥ १० ॥ मत्पिता निहतो येन सत्कर्मनिरतः सदा ॥ तस्य बाहुसहस्रं तु छेत्स्यामीह न संशयः ॥ ११ ॥ इत्युक्त्वा क्रोधरक्ताक्षः कार्त्तवीर्यार्जुनं भुवि ॥ धर्षयित्वा यथाकामं क्रोशमानं पुनःपुनः ॥ १२ ॥ कृत्स्नं बाहुसहस्रं च चिच्छेद भृगुनंदनः ॥ परश्वधेन तीक्ष्णेन ज्ञातिभिः सहितं तदा ॥ १३ ॥ रथस्थं पातयामास जघान नृपतिं प्रिये ॥ त्रिःसप्तकृत्वः पृथिवी तेन निःक्षत्रिया कृता ॥ १४ ॥ कृत्वा निःक्षत्रियां चैव भार्गवः स महाबलः ॥ सर्वपापविनाशाय वाजिमेधेन चेष्टवान् ॥ १५ ॥ तस्मिन्यज्ञे महादाने दक्षिणां भृगुनंदनः ॥ मारीचाय ददौ प्रीतः कश्यपाय वसुन्धराम् ॥ १६ ॥ वारुणांस्तुरगाञ्छुभ्रान्रथं च रथिनां वरः ॥ हिरण्यमक्षयं धेनूर्गजेंद्रांश्च महामतिः ॥ १७ ॥ तदा तस्मिन्महायज्ञे वाजिमेधे महायशाः ॥ तथापि न गता हत्या ह्यनेकप्राणिसंभवा ॥ १८ ॥ एवं किल पुराणेषु सर्वागमभिदादिषु ॥ विश्वस्तघातिनां चैव निष्कृतिः श्रूयते यथा ॥ १९ ॥ अश्वमेधेन यज्ञेन ब्रह्महत्या विनश्यति ॥ अथवा द्वादशाब्देन यद्येकाऽऽस्या[1] कृता भुवि ॥ २० ॥ मया पुनर्नृशंसेन बहवः प्राणिनो हताः ॥ विश्वस्ताश्च प्रमत्ताश्च गर्भस्थाश्च पुनःपुनः ॥ २१ ॥ स्त्रियो वृद्धाश्च बालाश्च माता चैव विशेषतः ॥ इति दुःखान्वितो रामो विषादं परमं गतः ॥ २२ ॥ चिंतयित्वा मुहूर्तं तु गतो रैवतकं गिरिम् ॥ तथा तपोऽतपद्घोरं बहून्वर्षगणान्प्रिये ॥ २३ ॥ तथापि न गता हत्या ह्यनेकप्राणिसंभवा ॥ अथ रामो जगामाथ महेन्द्रे मलये तथा ॥ २४ ॥ सह्ये हिमालये रम्ये पुण्ये बदरिकाश्रमे ॥ चरित्वा पर्वतान्सर्वान्स्नानार्थं नर्मदां ययौ ॥ २५ ॥ यमुनां चंद्रभागां च गंगां त्रिपथगामिनीम् ॥ इरावतीं वितस्तां च परां चर्मण्वतीं शुभाम् ॥ २६ ॥ विशालां कपिलां दुर्गां गंभीरां गोमतीं शिवाम् ॥ गोदावरीं दशार्णां च पुण्यां भीमरथीं तथा ॥ २७ ॥ गयां चैव कुरुक्षेत्रं नैमिषं पुष्करं तथा ॥ अट्टहासं प्रभासं च केदारममरेश्वरम् ॥ २८ ॥ कृतयात्रोऽपि दुःखार्त्तश्चिंतयामास भार्गवः ॥ न नूनं तीर्थमाहात्म्यं दृश्यते भुवि सांप्रतम् ॥ २९ ॥ न गता ब्रह्महत्या मे कृतो धर्मो निरर्थकः ॥ मिथ्या तत्कथ्यते शास्त्रे तीर्थदानादिभिः शुभैः ॥ यदि स्यात्सत्यमेतच्च नष्टं जातं कथं मम ॥ ३० ॥ एतस्मिन्नेव काले तु नारदो मुनिपुंगवः ॥ आजगाम तमुद्देशं यत्र रामो व्यवस्थितः ॥ ॥ ३१ ॥ विषण्णवदनो दीनश्चिंतयानः पुनःपुनः ॥ दृष्ट्वा तथाविधो रामः प्रत्युवाचाथ नारदम् ॥ ३२ ॥ भोभो नारद देवर्षे शृणु मे परमं वचः ॥ जननी निहता पूर्वं पितुर्वाक्याद्द्विजोत्तम ॥ ३३ ॥ पितुः पराभवाद्भूमौ भूमिपाला मया हताः ॥ गर्भा विदारिताः स्त्रीणां बाला वृद्धाश्च

१ एकास्या—एकासनेनोपवेशनम् । एकाश्या--इति पाठान्तरे—एकाश्या--एकभुक्तम्--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



घोषितः ॥ ३४ ॥ निरंतरा हता लोका विशोकेनादयालुना ॥ पश्चाद्घृणा समुत्पन्ना परलोकं ममेक्षतः ॥ ३५ ॥ यज्ञः कृतोऽश्वमेधश्च दत्तं दानमनेकधा ॥ स्नातोहं सर्वतीर्थेषु सर्वप्रस्रवणेषु च ॥३६॥ पर्वतेषु तपस्तप्तं हुतं जप्तं निरंतरम् ॥ ब्रह्महत्याविनाशार्थं किं किं नात्र मया कृतम् ॥३७॥ परं नैव गता हत्या तस्मात्सर्वं निरर्थकम् ॥ ३८ ॥ इति तस्य वचः श्रुत्वा नारदो भगवानृषिः ॥ प्रत्युवाच हितं सत्यं चिरं ध्यात्वा वचस्तदा ॥ भोभो राम किमात्मानं न स्मरस्यधुना हरिम् ॥ ३९ ॥ त्वयैव कथितं पूव ब्रह्महत्याविनाशनम् ॥ महाकालवने क्षेत्रे क्षेत्राणामुत्तमं परम् ॥ तस्मिन्क्षेत्रे महालिंगं ब्रह्महत्याविनाशनम् ॥ ४० ॥ जटेश्वरो महाभाग विद्यते सर्वसिद्धिदम् ॥ कृतावतार राम त्वं तत्र गच्छाविलंबितम् ॥ नारदस्य वचः श्रुत्वा स्मृत्वा क्षेत्रमनुत्तमम् ॥ ४१ ॥ जगाम त्वरितं देवि महाकालवने ततः ॥ लिंगमाराधयामास ततो हत्या गता क्षयम् ॥ लिंगमध्यादहं देवि प्रसन्नो निर्गतस्तदा ॥ ४२ ॥ जामदग्न्यो मया प्रोक्तः कांतकामं ददाम्यहम् ॥ स प्रोवाच ततो रामो भक्तिनम्रात्मकंधरः ॥ ॥ ४३ ॥ त्वत्पादपंकजे भूयाद्भक्तिर्मे विपुला सदा ॥ वरमेतं प्रयच्छाद्य यदि तुष्टो महेश्वर ॥ ४४ ॥ इत्युक्तोऽहं तदा तेन यथा तुष्टेन पार्वति ॥ तस्मै दत्ता मयाभीष्टा वरा कीर्त्तिकरा स्थितिः ॥ ४५ ॥ अद्यप्रभृति ते नाम्ना देवः ख्यातो भविष्यति ॥ तदा रामेश्वर इति त्रिषु लोकेषु गीयते ॥ ४६ ॥ भक्त्या ये पूजयिष्यंति देवं रामेश्वरं परम् ॥ आजन्मप्रभवं पापं तेषां नश्यति तत्क्षणात् ॥ ४७ ॥ स एव पुण्यवान्पूज्य इह लोके परत्र च ॥ यः पश्यति नरो भक्त्या देवं रामेश्वरं शिवम् ॥ ४८ ॥ येऽनुमोदंति देवस्य दर्शनं यजनं तथा ॥ तेऽपि पापविनिर्मुक्ताः प्रयांति मम मंदिरम् ॥ ॥ ४९ ॥ यच्चापि पातकं घोरं ब्रह्महत्यासहस्रकम् ॥ तत्पापं विलयं याति रामेश्वरसमर्चनात् ॥ ५० ॥ दुष्प्राप्यं यत्फलं विप्रैर्वाजपेयादिभिर्मखैः ॥ प्राप्यते तत्सुखेनैव श्रीरामेश्वरदर्शनात् ॥ ५१ ॥ ये हताभिमुखाः शूरा गोविप्रार्थे रणाजिरे ॥ गतिरभ्यधिका तेभ्यो दृष्ट्वा रामेश्वरं शिवम् ॥ ॥ ५२ ॥ जितास्तेन सदा लोका रामेणेव जगत्त्रयम् ॥ दृष्टं येन सदा भक्त्या लिंगं रामेश्वरं शिवम् ॥ ५३ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ रामेश्वरस्य देवस्य शृणु त्वं च्यवनेश्वरम् ॥ ५४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्य खण्डे चतुरशीतिलिंगमाहात्म्ये रामेश्वरमाहात्म्यवर्णनंनामैकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥ श्रीविश्वनाथ उवाच ॥ ॥ त्रिंशत्तमं विजानीहि त्वं देवि च्यवनेश्वरम् ॥ यस्य दर्शनमात्रेण स्वर्गभ्रंशो न जायते ॥ १ ॥ भृगोर्महर्षेः पुत्रश्च च्यवनोनाम पार्वति ॥ स्थाणुभूतस्तपस्तेपे निराहारो



१ "लिंगसंख्याविभेदेऽपि विशेषणविशेष्यता" इति वचनेन लिङ्गवैषम्यं न दोषायेत्यवधेयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महामुनिः ॥ २ ॥ वितस्तायास्तटे रम्ये बहुवर्षगणान्किल ॥ सवल्मीकोऽभवद्विप्रो लताभिरभिसंवृतः ॥ ३ ॥ कालेन महता देवि समा
कीर्णः पिपीलकैः ॥ तथा स संवृतो धीमान्मृत्पिंड इव सर्वशः ॥ ४ ॥ आजगाम तमुद्देशं विहर्तुं वन उत्तमे ॥ शर्यातिर्नाम धर्मात्मा
सकुटुंबो मुदान्वितः ॥ ५ ॥ तस्य स्त्रीणां सहस्राणि चत्वार्यासन्परिग्रहः ॥ एकैव तु सुता सुभ्रूः सुकन्यानाम नामतः ॥ ६ ॥ सा
सखीभिः परिवृता सर्वाभरणभूषिता ॥ सा भ्रम्यमाणा वल्मीके दृष्ट्वा भार्गवचक्षुषी ॥ ७ ॥ सा कौतुकात्कण्टकेन बुद्धिमोहवती
तदा ॥ किं नु खल्विदमित्युक्त्वा निर्बिभेदास्य लोचने ॥ ८ ॥ अभवत्स तया विद्धो नेत्रयोः परमार्तिमान् ॥ ततः शर्यातिसैन्यस्य
शकृन्मूत्रं समारुणत् ॥ ९ ॥ ततो रुद्धे शकृन्मूत्रे पर्यतप्यत पार्थिवः ॥ प्रत्युवाच ततः क्रुद्धो राजा गद्गदया गिरा ॥ १० ॥ केनापकृतमद्येह
भार्गवस्य महात्मनः ॥ तपोनित्यस्य वृद्धस्य रोषणस्य विशेषतः ॥ ११ ॥ ज्ञातं वा यदि वाज्ञातं तदिदं ब्रूत मा चिरम् ॥ तमूचुः सैनिकाः सर्वे
न विद्मोऽपकृतं वयम् ॥ १२ ॥ ततः स पृथिवीपालः साम्ना चोग्रेण च स्वयम् ॥ पर्यपृच्छत्स्ववर्गं च भूयोभूयः सुदुःखितः ॥ १३ ॥ पितरं
दुःखितं दृष्ट्वा सुकन्या तमथाब्रवीत् ॥ मया किंचिच्च वल्मीके दृष्टं सत्त्वमतिच्छवि ॥ १४ ॥ खद्योतवदभिज्ञातं तन्मया विद्धमंतिकम् ॥ एतच्छ्रु
त्वा तु शर्यातिर्वल्मीकं क्षिप्रमभ्यगात् ॥ १५ ॥ तत्रापश्यत्तपोवृद्धं वयोवृद्धं च भार्गवम् ॥ प्रार्थयामास सैन्यार्थे प्रांजलिः स महीपतिः ॥ १६ ॥
अज्ञानाद्बालया यत्तेऽपकृतं तु महीसुर ॥ इमामेव च ते कन्यां ददामि सुदृढव्रताम् ॥ १७ ॥ भार्यार्थे त्वं गृहाणेमां प्रसीद द्विजसत्तम ॥ ततो
ब्रवीन्महीपालं च्यवनो भार्गवस्तथा ॥ १८ ॥ यद्येवं प्रतिगृह्यैतां क्षमिष्यामि महीपते ॥ ददौ दुहितरं तस्मै च्यवनाय महीपतिः ॥ १९ ॥ प्रतिगृह्य
च तां कन्यां भगवान्प्रससाद ह ॥ प्राप्ते प्रसादे राजाथ ससैन्यो विषयं गतः ॥ २० ॥ सुकन्यापि पतिं लब्ध्वा तपस्विनमनिंदिता ॥ नित्यं पर्यच
रत्प्रीत्या तपसा नियमेन च ॥ २१ ॥ कस्यचित्त्वथ कालस्य नासत्यावश्विनौ प्रिये ॥ कृताभिषेकां विवृतां सुकन्यां तामपश्यताम् ॥ २२ ॥
तां दृष्ट्वा दर्शनीयांगीं देवराजसुतामिव ॥ ऊचतुः समुपद्रुत्य कस्य त्वमतिशोभने ॥ २३ ॥ सा प्रोवाच महाभागा पतिव्रतपरायणा ॥ शर्याति
तनयां चैव भार्यां च च्यवनस्य हि ॥ २४ ॥ ततोश्विनौ प्रहस्यैनामब्रूतां पुनरेव तु ॥ कस्मादेवंविधा भूत्वा जराजर्जरितं पतिम् ॥२५॥ त्वमपास्येह
कल्याणि कामभोगबहिष्कृता ॥ वृद्धं च्यवनमुत्सृज्य वरयस्वैकमावयोः ॥ २६ ॥ पत्यर्थं देवगर्भाभे मा वृथा यौवनं कृथाः ॥ एवमुक्ता सुकन्या
तु दस्रौ ताविदमब्रवीत् ॥ २७ ॥ रताहं च्यवने देवे मैवं मा पर्यशंकतम् ॥ ततोऽब्रूतां पुनस्त्वेनामावां देवभिषग्वरौ ॥ २८ ॥ युवानं रूपसंपन्नं करि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ष्यावः पतिं तव ॥ एतेन संमयेनावामामंत्रय सुमध्यमे ॥२९॥ सा तयोर्वचनं श्रुत्वा कथयामास भार्गवे ॥ तच्छ्रुत्वा च्यवनो भार्यां क्रियतामित्यभाषत ॥ ३० ॥ ऊचतू राजपुत्रीं तां पतिस्तव विशत्वपः ॥ ततोऽप्सु च्यवनः शीघ्रं रूपार्थी प्रविवेश ह ॥ ३१ ॥ अश्विनावपि तत्काले सरः प्राविशतां प्रिये ॥ ततो मुहूर्त्तादुत्तीर्णाः सर्वे ते सरसस्तदा ॥ ३२ ॥ दिव्यरूपधराः सर्वे युवानो दिव्यकुंडलाः ॥ तुल्यवेषधराश्चैव मनसः प्रीतिवर्द्धनाः ॥ ३३ ॥ तेऽब्रुवन्सहिताः सर्वे वृणीष्वान्यतमं शुभम् ॥ अस्माकमीप्सितं भद्रे पतित्वे वरवर्णिनि ॥ ३४ ॥ सा समीक्ष्य तु तान्सर्वांस्तुल्यरूपधरान्स्थितान् ॥ निश्चित्य मनसा बुद्ध्या देवी वव्रे स्वकं पतिम् ॥ ३५ ॥ लब्ध्वा तु च्यवनो भार्यां वयो रूपं तु वांछितम् ॥ हृष्टोऽब्रवीन्महातेजास्तौ नासत्याविदं वचः ॥ ३६ ॥ यदहं रूपसंपन्नो वयसा च समन्वितः ॥ कृतो भवद्भ्यां वृद्धः सन्भार्यां च प्राप्तवानिमाम् ॥ ३७ ॥ तस्माद्युवां करिष्यामि प्रीत्याहं सोमपायिनौ ॥ सत्यमेतन्न संदेहो देवराजस्य पश्यतः ॥ ३८ ॥ तच्छ्रुत्वा हृष्टमनसौ दिवं देवौ प्रजग्मतुः ॥ याजयामास सोमार्हौ नासत्यावश्विनाविति ॥ ३९ ॥ भिषजौ देवतानां हि कर्मणा तेन गर्हितौ ॥ आभ्यामर्थाय सोमं त्वं प्रदास्यसि यदि स्वयम् ॥ ४० ॥ वज्रं ते प्रहरिष्यामि घोररूपं सुदारुणम् ॥ एवमुक्तः स्मयन्निन्द्रमभिवीक्ष्य स भार्गवः ॥ बलिनं वासवं ज्ञात्वा चिंतयामास सत्वरम् ॥ ४१ ॥ देवमाराधयिष्यामि महादेवं महेश्वरम् ॥ यस्य कर्मकरः शक्रो यस्य देवा वशानुगाः ॥ यः समर्थो जगद्धाता सृष्टिसंहारकारकः ॥ ४२ ॥ इत्युक्त्वा च्यवनो देवि महाकालवनं गतः ॥ रामेश्वरस्य देवस्य लिंगमीशानतः स्थितम् ॥ श्रद्धयाराधितं तेन च्यवनेन महात्मना ॥ ४३ ॥ तस्य प्रसन्नो रुद्रस्तु स वज्रादभयं ददौ ॥ तस्य प्रहरतो बाहुं स्तंभयामास भार्गवः ॥ ४४ ॥ समाराधनतुष्टस्य लिंगस्यास्य प्रभावतः ॥ एतस्मिन्नंतरे ज्वाला निःसृता लिंगमध्यतः ॥ ४५ ॥ तया देवगणाः सर्वे दह्यमाना विचेतसः ॥ प्रोचुर्गद्गदया वाचा धूमेनांधीकृतेक्षणाः ॥ ४६ ॥ क्रियेतां सोमपावेतावश्विनौ बलसूदन ॥ देवानां वचनं श्रुत्वा च्यवनं भयपीडितः ॥ प्रत्युवाच ततः शक्रः प्रणामानतकंधरः ॥ ४७ ॥ सोमपावश्विनावेतावद्यप्रभृति भार्गव ॥ भविष्यतस्ततः सर्वमेतत्सत्यं ब्रवीमि ते ॥ ४८ ॥ मा तेऽतिथ्याभिसंरंभो भविष्यति तपोधन ॥ लिंगस्यास्य प्रभावोऽयं यदहं निष्प्रभीकृतः ॥ ४९ ॥ ततस्त्वन्नामधेयेन प्रसिद्धिर्भुवि यास्यति ॥ आराधितं यतो देवि च्यवनेन महात्मना ॥ ५० ॥ च्यवनेश्वरमेतद्धै ख्यातं त्रिभुवनेऽभवत् ॥ भक्ता ये पूजयिष्यंति देवेशं च्यवनेश्वरम् ॥ आजन्मप्रभवं पापं तेषां

१ एतेन समयेन- त्वत्पतिना सह मिलित्वा संकलनया त्रिष्वस्मासु त्वदग्रे स्थितेषु मध्ये यं त्वं पते इत्यामन्त्रयिष्यसि स ते पतिरस्त्विति प्रतिज्ञापालनेन--इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नश्यति तत्क्षणात् ॥ ९१ ॥ यः पश्यति नरो नित्यं च्यवनेश्वरसंज्ञकम् ॥ जन्मदुःखजरारोगैर्मुक्तो मुक्तिमवाप्नुयात् ॥ ९२ ॥ यंयं काममभिध्याये
न्मनसाभिमतं नरः ॥ तंतं दुर्लभमाप्नोति च्यवनेश्वरदर्शनात् ॥ ९३ ॥ नियमेन प्रपश्यंति ये देवं च्यवनेश्वरम् ॥ ते प्रयांति तनुं त्यक्त्वा मदीये
भुवने प्रिये ॥ ९४ ॥ यः शृणोति कथां पुण्यां सर्वपापहरां शुभाम् ॥ स पुण्यात्मा परं स्थानं याति दिव्यं न संशयः ॥ ९५ ॥ भक्तिहीनः
क्रियाहीनो यःपश्यति प्रसंगतः ॥ स पुण्यां गतिमाप्नोति योगिगम्यां यशस्विनि ॥ ९६ ॥ पुष्पैर्विचित्रैर्ये देवं यजंते च्यवनेश्वरम् ॥ संसारार्णवमुल्लं
घ्यते यांति परमं पदम् ॥ ९७ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ च्यवनेश्वरदेवस्य शृणु खंडेश्वरं शिवे ॥ ९८ ॥ इति श्रीस्कांदे
महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिंगमाहात्म्ये च्यवनेश्वरमाहात्म्यवर्णनंनाम त्रिंशोऽध्यायः ॥ ३० ॥
॥ छ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ एकत्रिंशत्तमं विद्धि देवं खंडेश्वरं प्रिये ॥ संपूर्णं जायते यस्य दर्शाद्दानव्रतादिकम् ॥ १ ॥ आसीत्त्रेतायुगे
देवि भद्राश्वोनाम पार्थिवः ॥ यस्य नाम्नाऽभवद्वर्षं भद्राश्वंनाम नामतः ॥ २ ॥ तस्यागस्त्यः कदाचित्तु गृहमागम्य सत्तमः ॥ उवाच सप्तरात्रं तु
वसामि भवतो गृहे ॥ ३ ॥ तं राजा शिरसा नत्वा स्वास्यतामित्यभाषत ॥ तस्य कांतिमतीनाम भार्या परमशोभना ॥ ४ ॥ तस्यास्तेजः समभव
द्द्वादशादित्यसंनिभम् ॥ सपत्नीनां शतं तस्या विद्यते वरवर्णिनि ॥ ५ ॥ ता दास्य इव कर्माणि कुर्वंत्यहरहः सदा ॥ कांतिमत्याः प्रभावेन भयोत्र
स्ताः सुलोचनाः ॥ ६ ॥ तामगस्त्यस्तथा दृष्ट्वा तन्मुखासक्तलोचनाम् ॥ एवंभूतां तथा दृष्ट्वा राज्ञीं परमशोभनाम् ॥ साधुसाधु जगन्नाथेत्यगस्त्यः
प्राह हर्षितः ॥ ७ ॥ द्वितीये देवसेप्येवं राज्ञीं दृष्ट्वा महाप्रभाम् ॥ अहो ह्यंगनया मुग्धं जगदेतच्चराचरम् ॥ ८ ॥ इत्यगस्त्यो द्वितीयेऽह्नि राज्ञीं दृष्ट्वे
त्युवाच ह ॥ तृतीयेऽह्नि च तां दृष्ट्वा पुनरेवमुवाच ह ॥ ९ ॥ अहो मूढा न जानंति लिंगमाहात्म्यमुत्तमम् ॥ महाकालवने क्षेत्रे च्यवनेशस्य
पूर्वतः ॥ १० ॥ खंडव्रतानि जायंते पूर्णानि दर्शनाद्यतः ॥ चतुर्थे दिवसे हस्तावुत्क्षिप्य पुनरब्रवीत् ॥ ११ ॥ साधुसाधु जगन्नाथ साधु भद्राश्व सुव्रत ॥
पंचमे दिवसेऽप्येवं षष्ठे चैव पुनःपुनः ॥ १२ ॥ नृत्यंतं सप्तमे दृष्ट्वा दिने पत्न्या समन्वितः ॥ प्रोवाच चैनं राजा स विस्मितेनांतरात्मना ॥
किं हर्षकारणं ब्रह्मन्येन नृत्यसमन्वितः ॥ १३ ॥ ॥ अगस्त्य उवाच ॥ ॥ अहो भूपाल मूढस्त्वं महामूर्खाश्च मंत्रिणः ॥ अहो पुरोहितो मुग्धो ये
न जानंति मे मतम् ॥ १४ ॥ ईदृशा अपि जायंते राजानो यस्य दर्शनात् ॥ एवमुक्तस्ततो राजा कृतांजलिरभाषत ॥ १५ ॥ न जानीमो वयं
ब्रह्मन्नभिप्रायं तवाधुना ॥ कथयस्व महाभाग यद्यनुग्रहकृद्भवान् ॥ १६ ॥ ॥ अगस्त्य उवाच ॥ ॥ इयं राज्ञी त्वदीयाभूद्दासी वैश्यस्य वैदिशे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



नगरे हरिदत्तस्य त्वमस्याः पतिरेव च ॥ खंडव्रतप्रभावेन जातः कर्मकरो भवान् ॥ १७ ॥ स च वैश्यो महाकाले गत्वा देवं महेश्वरम् ॥ अर्चयामास विधिवद्गंधपुष्पादिभिः शुभैः ॥ १८ ॥ अभ्यर्च्य तु गृहं यावद्गवंतौ रक्षपालकौ ॥ ततः कालेन महता मृतौ द्वावपि दंपती ॥ १९ ॥ तेन पुण्येन ते जन्म प्रियव्रतगृहेऽभवत् ॥ इयं च पत्नी ते जाता पुरा वैश्यप्रदासिका ॥ २० ॥ परकीयप्रसंगेन संजाता भूमिरुत्तमा ॥ राज्यं पत्नी सुता साधुरित्युक्तं वचनं मया ॥ २१ ॥ तस्य देवस्य माहात्म्याद्यजंतं विविधैर्मखैः ॥ पश्यामि त्वां महीपाल भूपालशतवेदितम् ॥ २२ ॥ अतः साधुपुरा प्रोक्तं मया तव महीपते ॥ २३ ॥ इति तस्य वचः श्रुत्वा कुंभयोनेर्महात्मनः ॥ महाकालवने गंतुं मतिं चक्रे महीपतिः ॥ ततः सांतःपुरः प्रायात्तेन सार्द्धं महर्षिणा ॥२४॥ अगस्त्यकथितं लिंगं ददर्श श्रद्धया पुनः ॥ पूजयामास विधिवत्पत्न्या सार्द्धं महीपतिः ॥ २५ ॥ ततस्तुष्टस्तदा देवो नृपं प्राहामितद्युतिः ॥ मनोऽभीष्टं तपस्तेस्तु भोगमैश्वर्यमेव च ॥ २६ ॥ कुलं प्रभावं सौभाग्यं दीर्घमायुररोगिताम् ॥ निःसपत्नं ततो राज्यं कृत्वा स्वर्गमवाप्स्यति ॥ २७ ॥ इत्युक्तो देवदेवेन गतोऽसौ विषयं स्वकम् ॥ निष्कंटकं ततो राज्यं कृत्वा स्वर्गं गतः प्रिये ॥ २८ ॥ अनेकजन्मचरितं खंडव्रतकदम्बकम् ॥ संपूर्णमभवद्देवि लिंगस्यास्य प्रभावतः ॥ २९ ॥ अतः खण्डेश्वरो देवो विख्यातो भुवनत्रये ॥ ये पश्यंति नरा देवि देवं खण्डेश्वरं शिवम् ॥ ३० ॥ खण्डव्रतानि पूर्णानि तेषामाशु भवंति हि ॥ तपःखण्डं व्रते खण्डं दानखंडं च यत्कृतम् ॥ तत्सर्वं पूर्णतां याति श्रीखंडेश्वरदर्शनात् ॥ ३१ ॥ दृष्ट्वा खंडेश्वरं देवं पापविघ्नैः प्रमुच्यते ॥ सप्तजन्मकृतैर्देवि मनोवाक्कायकर्मभिः ॥ ३२ ॥ दृष्ट्वा खण्डेश्वरं देवं कृतकृत्यत्वमाप्यते ॥ तस्य नश्यति दौर्भाग्यं सप्तजन्मोद्भवं प्रिये ॥ ३३ ॥ खंडेश्वरेऽर्चिते देवे सर्वे देवाः सवासवाः ॥ संतुष्टा वरदाश्चैव भवंति वरवर्णिनि ॥ ३४ ॥ देवं खंडेश्वरं ये वै यजंति श्रद्धया प्रिये ॥ पुण्यैर्नानाविधैः स्नानैः सुगन्धैश्च विशेषतः ॥ ३५ ॥ धूपदीपैर्नमस्कारैर्जपैः स्तोत्रैः पृथग्विधैः ॥ ते सर्वे कामसंपन्नाः श्रीमन्तो राज्यसंयुताः ॥ ३६ ॥ दीर्घायुषः शुभाचारा जायंते देहिनोऽमलाः ॥ अति श्रेष्ठा गतिस्तेषां विशोका नित्यमक्षयाः ॥ खंडेश्वरप्रसादेन जायंते नात्र संशयः ॥ ३७ ॥ एते च विष्णुब्रह्मेंद्रकुबेरदहनादयः ॥ परां सिद्धिं सुसंप्राप्ताः खंडेश्वरसमर्चनात् ॥ ३८ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ खंडेश्वरस्य देवस्य शृणु वै पत्तनेश्वरम् ॥ ३९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्ये खण्डेश्वरमाहात्म्यवर्णनंनामैकत्रिंशोऽध्यायः ॥ ३१ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ त्रिषु लोकेषु विख्यातं द्वात्रिंशत्तममुत्तमम् ॥ विद्धि सिद्धिप्रदं पुंसां पत्तनेश्वरमीश्वरम् ॥ १ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुराऽहं पर्वते देवि मंदरे चारुकन्दरे ॥ क्रीडन्सार्द्धं त्वया पृष्टः कदाचिद्रहसि स्थितः ॥ २ ॥ किमर्थं पर्वतं त्यक्त्वा कैलासं रमणीयकम् ॥ मुक्ता
फलशिलाशुभ्रं शङ्खचन्द्रांशुनिर्मलम् ॥ ३ ॥ सिद्धचारणगन्धर्वकिंनरोद्गीतनादितम् ॥ सदा पुष्पद्रुमच्छन्नं कदलीवनराजितम् ॥ ४ ॥ अथ
कोकिलचक्राह्वचकोरकुरराकुलम् ॥ पुण्यलोकोपमं स्थानं त्रिविष्टपविभूषणम् ॥ ५ ॥ महाकालवने शून्ये नानागुल्मलतावृते ॥ गजेंद्रगजशार्दूल
सिंहशम्बरसंकुले ॥ ६ ॥ ऋक्षवानरगोमायुजन्तुकादिविराजिते ॥ मयूरसर्पमार्जारमूषिकादिविराजिते ॥ ७ ॥ कथं वासः कृतो देव कौतूहलमिदं
मम ॥ ८ ॥ इति पृष्टस्त्वया देवि मंदरे चारुकन्दरे ॥ मया प्रोक्तं प्रसन्नेन पत्तनं च मम प्रिये ॥ ९ ॥ महाकालवनं रम्यं स्वर्गात्सुखकरं परम् ॥
स्मशानपीठसत्क्षेत्रवनोपरसमाश्रितम् ॥ १० ॥ अनौपम्यगुणं विद्धि पत्तनं पर्वतात्मजे ॥ एवं पत्तनदेवो वै न दृष्टो भुवनत्रये ॥ गीतवादित्रचा
तुर्यैः स्पर्द्धते यः सुरालयम् ॥ ११ ॥ एतस्मिन्नंतरे देवि देवर्षिर्नारदो मुनिः ॥ द्रष्टुकामः समायातो मन्दरे मां यशस्विनि ॥ १२ ॥ विनोदार्थं
मया पृष्टस्त्वत्प्रियार्थं कुतूहलात् ॥ क्व त्वया गमितः कालः कल्पसंख्यो महामुने ॥ १३ ॥ कस्मिन्नाश्रमसंस्थाने तपसः संचयः कृतः ॥ तीर्थानि
कानि भ्रांतानि क्व ते रतिरभूच्चिरम् ॥ १४ ॥ कौतुकं दृष्टपूर्वं तु वद मे मुनिसत्तम ॥ इति पृष्टो मया देवि ब्रह्मपुत्रो महामुनिः ॥ कथयामास
वृत्तांतं पत्तनस्य प्रयत्नतः ॥ १५ ॥ बहूनि संपरिक्रम्य तीर्थान्यायतनानि च ॥ पत्तनानि विचित्राणि देशाश्च नगराणि च ॥ १६ ॥ अटनार्थं
महादेव जंबूद्वीपे मनोरमे ॥ दृष्टः पत्तनराजश्च सदानंदकरः परः ॥ १७ ॥ स्वेच्छाकल्पितविन्यासः प्रासादशतकल्पितः ॥ इच्छाकामफलावाप्तिर
निर्देश्यसुखावहः ॥ १८ ॥ सर्वर्तुकुसुमामोदसुखस्पर्शानिलावृतः ॥ वीणावेणुरवैर्घुष्टो मनःप्रह्लादकारकः ॥ १९ ॥ वज्रेंद्रनीलवैडूर्यचन्द्रकांतादिदी
पितः ॥ जरामृत्युभयोपेतः सर्वव्याधिविवर्जितः ॥ २० ॥ शक्राग्नियमरक्षोब्धिवायुसोमेशसेवितः ॥ ऊर्द्ध्वाधः सप्तलोकेषु पुण्येषु निवसंति हि ॥
॥ २१ ॥ सदा प्रमुदिता देवास्तेऽपि कांक्षंति पत्तनम् ॥ तत्र शांता महात्मानो निवसंते महेश्वर ॥ २२ ॥ विद्योतितदिशो दांताः सूर्य
वैश्वानरप्रभाः ॥ दिव्यांबरधरा धीरा जटामुकुटधारिणः ॥ २३ ॥ विप्रा माहेश्वराः पुण्याः क्षत्रिया हरतत्पराः ॥ मुमुक्षवस्तपोनिष्ठा
वैश्याः शूद्राश्चिरायुषः ॥ २४ ॥ स शुभ्ररूपः स च लोहिताकृतिः स चापि पीतः स सितेतरः क्वचित् ॥ स नामधेयः स च नामवर्ज्यः सोऽदृ
श्यरूपः स च दृष्टरूपः ॥ २५ ॥ क्वचिद्रविसहस्राक्षः क्वचिदेकरविप्रभः ॥ क्वचिच्चन्द्राद्विशिष्येत क्वचिदंगुलिकांतिमान् ॥ २६ ॥ जन्म
मृत्युजरारोगैर्दुःखानि विविधानि च ॥ प्रयांति विलयं तानि प्रसन्ने पत्तनेश्वरे ॥ २७ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ पत्तनेशस्य



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





देवस्य आनंदेशमतः शृणु ॥ २८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखंडे चतुरशीतिलिंगमाहात्म्ये पत्तनेश्वर माहात्म्यवर्णनंनाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥ छ ॥ ॥ श्रीहर उवाच ॥ ॥ त्रयस्त्रिंशत्तमं देवमानंदेश्वरमीश्वरम् ॥ विद्धि पापहरं पुण्यं सर्वसंपत्करं सदा ॥ १ ॥ पुरा राथंतरे कल्पे बभूव पृथिवीपतिः ॥ अनमित्र इति ख्यातः सार्वभौमो महीतले ॥२॥ स धर्मात्मा महात्मा च पराक्रमधनो नृपः ॥ अतीत्य सर्वभूतानि बभौ भानुरिवाव्ययः ॥३॥ समः शत्रौ च पुत्रे च मित्रे च परधर्म्मवित् ॥ गिरिभद्रा गिरेः पुत्री तेनोढा वरवर्णिनी ॥४॥ अतीव वल्लभा सा च प्राणेभ्योऽपि गरीयसी ॥ आनंद इति पुत्रोऽभूत्तस्य ज्ञानरतः सुधीः ॥ ५ ॥ जातमात्रो निजोत्संगे स्थिरमुल्लाप्य वै पुनः ॥ परिष्व जति हार्देन उल्लापयति पुनःपुनः ॥ ६ ॥ स जातिस्मरणो जातो मातुरुत्संगमास्थितः ॥ जहास च तदा माता संक्षुब्धा वाक्यमब्रवीत् ॥ ७ ॥ भीतास्मि किमिदं वत्स हासो यद्वदने तव ॥ अकालबोधः संजातः किंस्वित्पश्यसि शोभनम् ॥ ८ ॥ इत्युक्तो मातरं प्राह सर्वोऽपि स्वार्थमीहते ॥ मां नेतुमिच्छति पुरो मार्जारी किं न पश्यसि ॥ अंतर्धानगता चेयं द्वितीया जातहारिणी ॥ ९ ॥ पुत्रप्रीत्या च मातस्त्वमतः स्वार्थं समीहसे ॥ उल्लाप्योल्लाप्य बहुशः परिष्वजसि मां बत ॥ १० ॥ उद्भूते बालके स्नेहात्संभ्रमात्स्त्रीजनोऽप्ययम् ॥ ततोयमागतो हासः शृणु चाप्यत्र कारणम् ॥ ॥ ११ ॥ स्वार्थे प्रसक्ता मार्जारी लोलुपा मामवेक्षते ॥ तथांतर्द्धानगा चेयं द्वितीया जातहारिणी ॥ १२ ॥ त्वं तु क्रमेणोपभोग्यं मत्तः फलम भीप्ससि ॥ न मां जानासि कोऽप्येवं न वै चोपकृतं मया ॥ १३ ॥ संगतिर्नाति बालानां पंचसप्तदिनात्मकम् ॥ तथापि स्निह्यसि प्रीत्या परिष्व जसि संततम् ॥ १४ ॥ ततेति वत्स भो भद्र इत्यलीकं ब्रवीषि माम् ॥ पुत्रस्य वचनं श्रुत्वा क्रुद्धा माताऽब्रवीदिदम् ॥ १५ ॥ नाहं त्वामुपकारार्थं वत्स प्रीत्या परिष्वजे ॥ स्वार्थो मया परित्यक्तो यस्त्वत्तो मे भविष्यति ॥ १६ ॥ इत्युक्त्वा सा तमुत्सृज्य निष्क्रांता सूतिकागृहात् ॥ जहार तत्परि त्यक्तं सा तदा जातहारिणी ॥ १७ ॥ सा हृत्वा तं तदा बालं पूर्वजातिस्मरं प्रिये ॥ हैमिन्याः शयने न्यस्यद्विक्रांतस्य महीभृतः ॥ १८ ॥ मत्वा स्वकीयं पुत्रं तु विक्रांतेन महीभृता ॥ कृतं वै नामकरणमानंद इति विश्रुतम् ॥ १९ ॥ विक्रांतस्य सुतो नीतो बोधस्य च द्विजन्मनः ॥ चैत्रनामा कृतस्तेन संस्कृतो वेदमंत्रकैः ॥ २० ॥ तृतीयं भक्षयामास बोधपुत्रं निशाचरी ॥ जातिस्मरोऽप्यथानंदः कृतोपनयनस्तदा ॥ २१ ॥ गुरुणा समनुज्ञातं क्रियतामभिवादनम् ॥ जनन्याः प्रागुपस्थानमित्युक्तो वाक्यमब्रवीत् ॥ २२ ॥ वंद्या मे कतमा माता जनित्री पालिनी च वा ॥ आनंदस्य वचः श्रुत्वा गुरुर्वचनमब्रवीत् ॥ २३ ॥ नन्वियं ते महाभाग जनित्री जनकात्मजा ॥ विक्रांतस्याग्रमहिषी हैमिनीनाम नामतः ॥ २४ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ आनंद उवाच ॥ ॥ चैत्रस्य प्रसवित्रीयं चैत्रोऽयं द्विजवेश्मनि ॥ संस्कृतो ब्राह्मणैर्मंत्रैर्गिरिभद्रासुतस्त्वहम् ॥ २५ ॥ गुरुराह ततः कस्त्वं चैत्रः को वा त्वयोच्यते ॥ ततः स कथयामास पूर्ववृत्तांतमादितः ॥ २६ ॥ ॥ गुरुरुवाच ॥ ॥ अतीव गहनं वत्स संकटं महदागतम् ॥ न वेद्मि किंचिन्मोहेन भ्रमंति मम बुद्धयः ॥ २७ ॥ ॥ आनंद उवाच ॥ ॥ मोहस्यावसरः कोऽत्र जगत्येवं व्यवस्थितः ॥ कः कस्य पुत्रो विप्रर्षे को वा कस्य न बांधवः ॥ २८ ॥ अतः संसारता हंति संसारं प्राणिनामिह ॥ महामोहहतं चेतश्चित्रमत्र कथं गुरो ॥ २९ ॥ ब्रह्मपुत्रस्य दुष्टस्य दुःसहस्य सुता भुवि ॥ जातहारिणिकानाम परिवर्त्तयते सुतान् ॥ ३० ॥ मातृद्वयं मया प्राप्तमस्मिन्नेव हि जन्मनि ॥ मातृद्वयमथो प्राप्तं जातिं संस्मरता सता ॥ ३१ ॥ सोऽहं तपः करिष्यामि चैत्र आनीयतामिति ॥ ततः सुविस्मितो राजा सभार्यः सह बंधुभिः ॥३२॥ तस्मान्निवर्त्त्य ममता मनुमेने च तं प्रति ॥ चैत्रमानीय तनयं राज्ययोग्यं चकार सः ॥ ३३ ॥ सन्मान्य ब्राह्मणं येन पुत्रबुद्ध्या स पालितः ॥ सोऽप्यानंदस्तपस्तेपे महाकालवने शुभे ॥ ३४ ॥ इंद्रेश्वरस्य देवस्य पश्चिमे लिंगमुत्तमम् ॥ भक्त्या ह्याराधयामास तपसा दुष्करेण तु ॥ ३५ ॥ तपस्यंतं ततस्तं तु देवः प्राह शुचिस्मिते ॥ किमर्थं तप्यसे वत्स तपस्तीव्रं ब्रवीमि ते ॥ ३६ ॥ मनुना भवता भाव्यं षष्ठेन व्रज तत्कुरु ॥ अलं ते तपसा तस्मिंस्ततो मुक्तिमवाप्स्यसि ॥ ३७ ॥ इत्युक्तो देवदेवेन तथेत्याह महामतिः ॥ बभूव स मनुर्देवि ब्रह्मतुल्यो महायशाः ॥ ३८ ॥ पुत्रानुत्पादयामास लिंगस्यास्य समर्चनात् ॥ कृतं नाम तदा देवैरानंदेश्वरमुत्तमम् ॥३९॥ आनंदेन यतः प्राप्ता सिद्धिर्देवि सुदुर्लभा ॥ अतो नाम भुवि ख्यातमानंदेश्वरमीक्ष्यताम् ॥४०॥ ये पश्यंति विशालाक्षि आनंदेश्वरमीश्वरम् ॥ ते पुत्रपौत्रसंपन्ना भविष्यंति महीतले ॥ ४१ ॥ येषां क्षीणं नृणां पापं कोटिजन्मशतोद्भवम् ॥ तेषां भवति सा भक्तिरानंदेश्वरदर्शनात् ॥४२॥ तदैव पुरुषो मुक्तो जन्ममृत्युजरादिभिः ॥ यदा पश्यति देवेशमानंदेश्वरसंज्ञकम् ॥ ४३ ॥ मयोक्तं मुक्तिदं नृणामानन्देश्वरदर्शनम् ॥ स्वर्गापवर्गदं देवमानंदं लिंगमुत्तमम् ॥ अत्र देवैर्विशालाक्षि पूजितं लिंगमुत्तमम् ॥ ॥ ४४ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ आनंदेश्वरदेवस्य शृणु त्वं कंथडेश्वरम् ॥ ४५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्य आनंदेश्वरमाहात्म्यवर्णनंनाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ॥ छ ॥

॥ ॥ श्रीहर उवाच ॥ ॥ चतुस्त्रिंशत्तमं विद्धि देवं वै कंथडेश्वरम् ॥ यस्य दर्शनमात्रेण सर्वपापैः प्रमुच्यते ॥ १ ॥ वितस्तायास्तटे रम्ये ब्राह्मणो निवसन्पुरा ॥ बभूव पांडवोनाम दरिद्रेणातिपीडितः ॥ २ ॥ ज्ञातिभिश्च परित्यक्तो दुष्टया भार्यया तथा ॥ कंथाप्येका स्थिता यस्य सर्वस्वप्रेम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



धारिणी ॥ ३ ॥ तेनाहं सुतकामेन तोषितो गिरिगह्वरे ॥ मयाप्युक्तं विशालाक्षि पुत्रस्तव भविष्यति ॥ ४ ॥ तस्य पुत्रः समुत्पन्नः कंथामध्यादयो
निजः ॥ शीतोष्णवारिणी कंथा तस्य पुत्रस्य साऽभवत् ॥ ५॥ स च लब्धः प्रसादेन मदीयेन वरानने ॥ रुद्रेण च वरो दत्तः कंथाया भविता पुनः
॥ ६ ॥ अथ षष्ठे गते वर्षे मौंजीबंधमचिंतयत् ॥ तदामंत्र्य मुनीन्सर्वान्प्रसाद्य च पुनःपुनः ॥ नमस्कृत्य ऋषीन्सर्वान्पूजयामास भक्तितः ॥ ७ ॥
फलैर्वित्तानुसारेण मौंजी तस्याप्यबंधत ॥ तेऽप्युक्ता मुनयः सर्वे प्रसाद्य च पुनःपुनः ॥ ८ ॥ दीयतामाशिषो ह्यस्मै पुत्राय मुनिसत्तमाः ॥ मम
पुत्रस्य पुत्रोऽयं दीर्घायुर्जायतां चिरम् ॥ ९ ॥ तूष्णींभूताः स्थिताः सर्वे तच्छ्रुत्वा नोत्तरं ददुः ॥ यदा ते नोत्तरं प्रोचुस्तदा मुनिवरः स्वयम् ॥
ध्यानेन चिंतयामास नूनमल्पायुषं सुतम् ॥ १० ॥ इति ज्ञात्वा तु संमोहमगमत्सहसा मुनिः ॥ विललाप स दुःखार्त्तः सुतस्नेहेन दुःखितः ॥ ११ ॥
॥ वाडव उवाच ॥ ॥ दत्तः स्वयं महेशेन ममाल्पायुः कथं सुतः ॥ रुद्रेण च वरो दत्तः प्रसन्नेन पुरा मम ॥ १२ ॥ मत्तुल्यवीर्यः पुत्रस्ते कंथामध्याद्भ
विष्यति ॥ जातं च दत्त्वा ह्यल्पायुं मिथ्या त्र्यक्षस्य तद्वचः ॥ १३ ॥ पितरं दुःखितं दृष्ट्वा तूष्णींभूतो मुनिस्तदा ॥ स बालः सहसा वाक्यं बभाषे
हर्षवर्द्धनम् ॥ १४ ॥ त्यजत भयमिदानीं यन्ममार्थे विषण्णा विनिहतनिजयत्नं प्रेतराजं करोमि ॥ शृणुत मम गिरं भोः सेश्वरा लोकपालाः पितृ
पतिविजयार्थं सत्प्रतिज्ञा ममैषा ॥ १५ ॥ अतिविषमतपोभिः शंकरं तोषयित्वा स्वपितुरपि च भक्त्या हन्मि मृत्योर्जयाशाम् ॥ किमतिशयविषाद
व्याकुलास्तात सर्वे सपदि पितृपतिं तं स्वे वशे स्थापयामि ॥ १६ ॥ प्रयामि रुद्रं शरणं महेश्वरं देवं वरं चाप्युमयाऽविहीनम् ॥ शृण्वंतु सर्वेमुनयः
समंतान्न मादृशे मृत्युपराभवोस्ति ॥ १७ ॥ तपोभिरुग्रैः शितिकंठपादौ प्रसाद्य मृत्युं न चिराद्विनेष्ये ॥ कंथाजवाक्यामृतलोलनेत्राः संजातरोमां
चलसत्स्वदेहाः ॥ १८ ॥ पप्रच्छुरेनं मुनयः शिशुं तं जानासि रुद्रं परमं कथं त्वम् ॥ वयं चिरं कालमुपासमानास्तपोभिरुग्रैर्व्रतसंचयैश्च ॥ १९ ॥
तथापि विद्मो न वयं महेशं ज्ञातस्त्वयासौ कथमर्भकेण ॥ ईहामहे तं किल पुत्र सम्यक्छ्रोतुं प्रहर्षाद्भुतजातरोमाः ॥ २० ॥ ज्ञातस्त्वया कुत्र कथं
महेशो महेश्वरो वै भुवनैकनाथः ॥ २१ ॥ इति तेषां वचः श्रुत्वा मुनीनां भावितात्मनाम् ॥ स बालः कथयामास वृत्तांतं पर्वतात्मजे ॥ २२ ॥
ममात्र क्रीडतः सिद्धः सिद्धिदः समुपागतः ॥ विज्ञायाल्पायुषं मां तु वात्सल्यादब्रवीदिदम् ॥ २३ ॥ गच्छ पुत्र ममादेशान्महाकालवनोत्तमे ॥ ॥११०॥
दक्षिणे चास्ति यल्लिंगमानंदेश्वरलिंगतः ॥ २४ ॥ तमाराधय शीघ्रं त्वं चिरंजीवी भविष्यसि ॥ तस्योपदेशदानेन ज्ञातं सम्यङ्महेश्वरात् ॥ २५ ॥
नान्यो देवोस्ति लोकेषु सत्यं सत्यं मुनीश्वराः ॥ तस्माद्द्यैव यास्यामि महाकालवने शुभे ॥ २६ ॥ लिंगमाराधयिष्यामि विषादस्त्यज्यता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिह ॥ तस्य तद्वचनं श्रुत्वा तेन सार्द्धं महर्षयः ॥ २७ ॥ पिता च विस्मितो देवि सर्व एव समागताः ॥ देवमाराधयामास बालः कालजिघांसया॥ २८ ॥ लिंगमध्यात्ततो वाणी निःसृता पर्वतात्मजे ॥ अहो तुष्टोस्मि ते वत्स कं कामं प्रददाम्यहम् ॥ २९ ॥ ॥ बाल उवाच ॥ ॥ यदि तुष्टोऽसि मे देव ये त्वां पश्यंति शंकर ॥ पापकंथाविनिर्मुक्तास्ते संतु चिरजीविनः ॥ ३० ॥ बालस्य भाषितं श्रुत्वा लिंगे नोक्तं यशस्विनि ॥ ये च मां पूजयिष्यंति श्रद्धया परया युताः ॥ ते भविष्यंति सततं जरामरणवर्जिताः ॥ ३१ ॥ लप्स्यंते परमान्कामान्भविष्यंति गणोत्तम ॥ पूज्याः सर्वेषु लोकेषु सर्वालंकारभूषिताः ॥ ३२ ॥ एवं लब्धवरः कंथः प्रांजलिः समुपस्थितः ॥ लिंगेनोक्तः प्रसन्नेन भूयो वरय सुव्रत ॥ ३३ ॥ वरो वै दुर्लभो लोके देवदानवगुह्यकैः ॥ मयावतारितो यस्मान्नास्त्यदेयं तवाधुना ॥ ३४ ॥ बालेनोक्तो महादेव यदि देयो वरः पुनः ॥ मन्नाम्ना देव ते ख्यातिर्भूयात्त्रिभुवने भुवि ॥ ३५ ॥ एवमस्त्विति लिंगेन प्रोक्तं तुष्टेन पार्वति ॥ तदाप्रभृति देवेशो विख्यातः कंथडेश्वरः ॥ यस्य दर्शनमात्रेण चिरायुर्जायते नरः ॥ ३६ ॥ यः समीक्षति तल्लिंगं कंथडेश्वरमीश्वरम् ॥ ३७ ॥ पापकंथाविनिर्मुक्तो मुक्तिं यास्यति गौरि सः ॥ पुण्यं यशस्यं गेयं तल्लिंगं पापप्रणाशनम् ॥ पुनाति पातकान्सर्वान्मम नामानुकीर्त्तनात् ॥ ३८ ॥ तेऽधन्याः पुरुषा लोके तेषां जन्म निरर्थकम् ॥ यैर्न दृष्टो महाकाले देवोऽसौ कंथडेश्वरः ॥ ३९ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ कंथडेश्वरदेवस्य इन्द्रेश्वरमथो शृणु ॥ ४० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये कंथडेश्वरमाहात्म्यवर्णनंनाम चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ ॥ छ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ पंचत्रिंशत्तमं देवमिंद्रेश्वरमनुत्तमम् ॥ महासिद्धिप्रदं देवि ब्रह्महत्याविनाशनम् ॥ १ ॥ आसीत्प्रजापतिस्त्वष्टा तस्य पुत्रः कुशध्वजः ॥ स्वकर्मनिरतो दांतो वासवेन निपातितः ॥ २ ॥ तस्य पुत्रं हतं श्रुत्वा त्वष्टा क्रुद्धः प्रजापतिः ॥ अवलुच्य जटामेकामिदं वचनमब्रवीत् ॥ ३ ॥ अद्य पश्यंतु मे वीर्यं त्रयो लोकाः सदेवताः ॥ स च पश्यतु दुर्बुद्धिर्ब्रह्महा पाकशासनः ॥ ४ ॥ स्वकर्मनिरतो येन मत्सुतो विनिपातितः ॥ इत्युक्त्वा कोपरक्ताक्षो जटामग्नौ जुहाव ताम् ॥ ५ ॥ ततो वृत्रः समुत्तस्थौ ज्वालामालासमाकुलः ॥ महाकायो महादंष्ट्रो भिन्नांजनचयप्रभः ॥६॥ इंद्रशत्रुरमेयात्मा त्वष्टुस्तेजोऽभिबृंहितः ॥ अहन्यहनि सोऽवर्द्धदिषुपातं महाबलम् ॥७॥ वधाय चात्मनो दृष्ट्वा वृत्रं शक्रो महासुरम् ॥ चिंतयामास सहसा किं कृतं सुकृतं भवेत् ॥ ८ ॥ एतस्मिन्नंतरे प्राप्तो वृत्रो बलवतां वरः ॥ ददर्श वासवं तत्र देवैः सार्द्धं वरानने ॥ ९ ॥ दैत्यो वृत्रो महाकायश्चक्रे संग्राममुल्बणम् ॥ नानाशस्त्रास्त्रसंक्षोभं भटसंघट्टसंकटम् ॥ १० ॥ छिन्नभिन्नतनुत्राणक्रोधरक्तधरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तलम् ॥ लूनाननाब्जप्रकरं करपल्लवदुर्गमम् ॥११॥ कबंधसंघघटनं घटितामरसैनिकम् ॥ विकीर्णाभरणस्फीतस्फुरद्योधांगभूषणम् ॥ १२ ॥ कल्लोलरुधिरोद्गारपाटलीकृतदिङ्मुखम् ॥ तस्मिन्रणे महाभीमे देवान्भित्त्वा सगुह्यकान् ॥ १३ ॥ वासवं बंधयित्वा तु स्वर्गलोकं जगाम ह ॥ राज्यं चकार निःशंको निस्सपत्नं वरानने ॥ १४ ॥ ततस्तु बद्धे देवेंद्रे बृहस्पतिरुदारधीः ॥ आजगाम तमुद्देशं यत्र बद्धः शतक्रतुः ॥ १५ ॥ दृष्ट्वा तथाविधं शक्रमाशीर्भिरभिनंद्य च ॥ बंधनान्मोचयित्वा तु प्रोवाचेदं वचस्तदा ॥ १६ ॥ अनुकूलो न कालोयं सुरेशस्य तवाधुना ॥ उद्योगः सुमहान्दृष्टः संघातश्च सुरद्विषाम् ॥ दृष्टा हि प्रवराः सर्वे मया तत्र महासुराः ॥ १७ ॥ एकैकोपि विजेतुं त्वां शक्तः स्यादिति मे मतिः ॥ न तादृक्संगमः शक्र कदाचित्सुरविद्विषाम् ॥ दृष्टो वापि श्रुतो वापि यादृशो ह्यवलोकितः ॥ १८ ॥ बृहस्पतिवचः श्रुत्वा शक्रः संभ्रममागमत् ॥ ध्यात्वा मुहूर्त्तं प्रोवाच बृहद्बुद्धेबृहस्पते ॥१९॥ किमत्र प्रतिकर्त्तव्यं वद तावद्बृहस्पते ॥ बहवो बलवंतश्च दानवाःस्वल्पकैर्दिनैः॥मत्सकाशं समेष्यंति स च वृत्रो महाबलः ॥ २० ॥ इति शक्रवचः श्रुत्वा बृहस्पतिरुवाच तम् ॥ उपायः क्रियतां तूर्णं गच्छ शक्र ममाज्ञया ॥ २१ ॥ महाकालवने रम्ये खंडेश्वरस्य दक्षिणे ॥ सर्वसंपत्करं लिंगं विद्यते तत्र वासव ॥ २२ ॥ तदाराधय यत्नेन तत्ते कामं प्रदास्यति ॥ बृहस्पतिवचः श्रुत्वा शक्रः शीघ्रतरं गतः ॥ २३ ॥ महाकालवने देवि दृष्ट्वा लिंगमनुत्तमम् ॥ स्तुतिं चकार सहसा भक्तिनम्रात्मकंधरः ॥ २४ ॥ नमो देवाधिदेवाय शंकराय वृषाय च ॥ काम्याय बहुरूपाय व्यालयज्ञोपवीतिने ॥ वरेण्याय नमो नित्यं नमस्ते सर्वकामद ॥ २५ ॥ आद्यः प्रजासृष्टिकरस्त्वमेव कालः प्रजाः संहरसि त्वमेव ॥ अपांपतिर्भूतपतिस्त्वमेव धनेश्वरस्त्वं दहनस्त्वमेव ॥ २६ ॥ चंद्रश्च सूर्यः पवनस्त्वमेव धाता विधाता परमः पुराणः ॥ जलाशयस्त्वं वरुणस्त्वमेव शैलोत्तमस्त्वं भुजगेश्वरश्च ॥ डिंडिर्महाकाल वृषस्त्वमेव विनायको गुह्यवरस्त्वमेव ॥ २७ ॥ इतीरितां स्तुतिं श्रुत्वा लिंगेनोक्तः शतक्रतुः ॥ गच्छ शक्र ममादेशान्मत्तेजोबृंहितो रणे ॥ हनिष्यसि न संदेहो वृत्रं रिपुविदारण ॥ २८ ॥ तस्य लिंगस्य माहात्म्यादपां फेनेन पार्वति ॥ जघान समरे वृत्रं पश्यतां त्रिदशद्विषाम् ॥ २९ ॥ निहत्य दानवान्पश्चाल्लीलया रणकर्कशः ॥ उवाचेन्द्रस्तदा देवान्हतो वृत्रो महारणे ॥ ३० ॥ त्रैलोक्याध्यक्षतां प्राप्ता भवंतो मत्पराक्रमात् ॥ एवमुक्तास्तु शक्रेण ते देवा विस्मयान्विताः ॥ ३१ ॥ अस्य देवस्य माहात्म्याद्धतो वृत्रो महासुरः ॥ शरीरे च स्थिताः पापा दर्शनात्संक्षयं गताः ॥ ३२ ॥ इन्द्रेणाराधितो यस्माद्देवदेवो महेश्वरः ॥ तस्मादिंद्रेश्वरोनाम ख्यातो भुवि भविष्यति ॥ ३३ ॥ दर्शनादस्य लिंगस्य पुरीमिंद्रस्य शोभनाम् ॥ पापिनोपि गमि



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्यंति सर्वपातकवर्जिताः ॥ ३४ ॥ यः पश्यति नरो नित्यं श्रीइन्द्रेश्वरसंज्ञकम् ॥ स मुक्तः पातकैः सर्वैर्दिवि मोदिष्यते चिरम् ॥ ३५ ॥ इंद्रेणारा धितं लिंगं भक्त्या यः पूजयिष्यति ॥ स याति वै परं स्थानं दिव्यकल्पचतुष्टयम् ॥ ३६ ॥ येन चेंद्रेश्वरो देवो भक्त्या सम्यक्प्रपूजितः ॥ तेन विष्णुप्रभृतयो वयं सर्वे सवासवाः ॥ मुनयो लोकपालाश्च पूजिताः स्युर्न संशयः ॥ ३७ ॥ इत्युक्तः स सुरैः शक्रो वैकुण्ठाद्यैः समंततः ॥ तैरेव सहितो देवो जगामाथ त्रिविष्टपम् ॥ ३८ ॥ इंद्रेश्वरस्य देवस्य प्रभावः कथितस्त्वयम् ॥ मार्कंडेयेश्वरं देवं शृणु पार्वति सांप्रतम् ॥ ३९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे चतुरशीतिलिंगमाहात्म्य इन्द्रेश्वरमाहात्म्यवर्णनंनाम पंचत्रिंशोऽध्यायः ॥ ३५ ॥ ॥ श्रीहर उवाच ॥ ॥ मार्कंडेयेश्वरं विद्धि षट्त्रिंशत्तममीश्वरम् ॥ यस्य दर्शनमात्रेण पुत्रवाञ्जायते नरः ॥ १ ॥ ब्रह्मवंशसमुत्पन्नो मृकण्डोनाम तापसः ॥ वेदाध्ययनसंपन्नः स चापुत्रो बभूव ह ॥ २ ॥ पुत्रार्थं चिन्तयामास कथं पुत्रो भवेदिति ॥ अपुत्रस्य कुतो लोक इति वेदेषु पठ्यते ॥ ३ ॥ तस्मात्तपः करिष्यामि येन मे तनयो भवेत् ॥ एवं संचिंत्य बहुधा स जगाम हिमालयम् ॥ ४ ॥ चकार वसतिं चापि तपसे भावितात्मवान् ॥ वायुभक्षोंबुभक्षश्च निराहारोर्ध्वपादकः ॥ ५ ॥ शाकमूलफलाहारः पर्णाश्येकद्विपर्णभुक् ॥ एवमादीनि चान्यानि तपांसि सुबहून्यपि ॥६॥ चकार स मुनिस्तत्र वर्षाणि द्वादशैव तु ॥ न तुष्टोऽहं तदा देवि तपसा दुष्करेण तु ॥७॥ ततो ज्ञात्वा मतिं तस्य विज्ञतोऽहं तदा त्वया ॥ करोत्येव तपः क्रूरं पुत्रहेतोर्मुनिर्महान् ॥८॥ तेजसा दीपयञ्छैलं शोषयन्सलिलाशयान् ॥ तपसा दुष्करेणैव क्षुभिता नाकवासिनः॥९॥ समुद्राः क्षुभिताः सर्वे चन्द्रादित्यौ तथैव च ॥ ऋषयो विस्मृतिं प्राप्ताः कंपेते चापि रोदसी ॥ अकालप्रलयो देव भविष्यति न संशयः ॥१०॥ मुनये तन्मृकण्डाय पुत्रो वै दीयतामिति॥मया प्रोक्तं वरारोहे पुत्रमिच्छत्ययोनिजम् ॥११॥ अक्षयं सुविशालाक्षि सहस्राक्षमिवापरम् ॥ चन्द्राभं चन्द्रवदनं चन्द्रवद्भुवनप्रियम् ॥१२॥ नीलोत्पलदलश्यामं नीलोत्पलदलेक्षणम् ॥ विशालचारुजघनं चारुकुण्डलमंडितम् ॥ पुत्रमिच्छति देवेशि मृकण्डोऽयं महामुनिः ॥ १३ ॥ त्वयाप्युक्तं पुनर्देवि कारुण्याद्भक्तिवत्सले ॥ न ददासि मुनेः पुत्रं तप्यतो विषमं तपः ॥ १४ ॥ फलस्य दाता तपसां कथं त्वं गीयसे बुधैः ॥ कस्त्वां नु शरणं गच्छेल्लोकानां सम्भवं भवम् ॥ १५ ॥ करोषि सर्वदैत्यानां सर्वदेवाकुलाकुलम् ॥ त्वयाहं सुचिरं देवं सत्कृता करुणाकर ॥ १६ ॥ नान्यो मामनुकम्पार्थं प्रयच्छेत्प्रवरं वरम् ॥ स त्वं सर्वजगन्नाथ प्रभुः कर्त्ता प्रशासिता ॥ १७ ॥ हेतुः स्वामी महेशानो दयालुर्भक्तवत्सलः ॥ सर्वेश्वर स्तुतोऽभीष्टं किं न विप्राय दीयते॥ १८ ॥ तपसा क्षीणपापस्य ब्रह्मत्वे भावितात्मनः ॥ अस्य पुत्रप्रदानं त्वं कुरु मद्वच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



नाच्छिव ॥ १९ ॥ मया त्वं वर्णिता देवि स्नेहाक्षरपदैः शुभैः ॥ लोलपंकजपत्राक्षि गौरि भूधरगात्रजे ॥ २० ॥ स्कंदमातः कलापूर्णचंद्रबिम्बनिभा
नने ॥ कृशोदरि विनिःस्पृष्टचामीकरनिभद्युते ॥ २१ ॥ त्वयोक्तं प्रकरिष्यामि वाक्यं द्विरदगामिनि ॥ त्वं सिद्धिः साधका साध्यं त्वं क्रिया
प्रक्रमाश्रया ॥ २२ ॥ त्वं माया श्रीर्द्युतिः श्रीमच्छ्रद्धारुचिरसंततिः ॥ कृत्वा मानं बहुविधं मयैव सह सुन्दरि ॥ २३ ॥ भ्राजसे विविधाकारा
मोहयित्वाखिलं जगत् ॥ त्वयाप्युक्तं पुनर्देवि क्रियतां तु वचो मम ॥२४॥ मुनयेऽस्मै तपःक्षीणसर्वगात्राय सांप्रतम् ॥ वरः प्रदीयतामस्मै ब्राह्मणाय
महेश्वर ॥ २५ ॥ मयाप्युक्तं विशालाक्षि श्रूयतां वचनं मम ॥ असौ गच्छतु विप्रेंद्रो महाकालवनोत्तमे ॥ २६ ॥ पत्तनेश्वरपूर्वे तु तत्रास्ते
लिंगमुत्तमम् ॥ पुत्रप्रदं विशालाक्षि महापातकनाशनम् ॥ २७ ॥ मदीयं वचनं श्रुत्वा त्वयाप्युक्तो द्विजोत्तमः ॥ महाकालवनं गच्छ पुत्रार्थमृषि
सत्तम ॥ तत्र लिंगं समाराध्य लप्स्यसे पुत्रमुत्तमम् ॥ २८ ॥ त्वया संप्रेरितो विप्रस्तथेति कृतनिश्चयः ॥ आशया परया युक्तः पुत्रकामो जगाम
सः ॥ २९ ॥ तत्र दृष्ट्वा महालिंगं पुत्रदं पापनाशनम् ॥ भक्त्या संसेवयामास तपसा दुष्करेण तु ॥ ३० ॥ अथ केनापि कालेन निःसृतोऽहं
त्वया सह॥लिंगमध्याद्वरारोहे स च प्रोक्तो द्विजोत्तमः ॥ ३१ ॥ शर्वोऽहमिति जानीहि ब्रूहि किं करवाणि ते ॥ आवां पुरा प्रसन्नौ ते ज्ञातं तव
विचेष्टितम् ॥३२॥ यमिच्छसि वरं ब्रह्मंस्तदद्य प्रददामि ते ॥ मया प्रोक्तः प्रसन्नेन मुनिः परमविस्मितः ॥ ३३ ॥ प्रह्वः प्राह सुहृदये संहृष्टो मुनि
सत्तमः ॥ अपत्यहेतोर्देवेशौ किमलभ्यं भवेन्मम ॥ ३४ ॥ मया प्रोक्तस्तदा देवि मृकण्डो मुनिसत्तमः ॥ अयोनिजस्ते तनयो मानुषो वै भवि
ष्यति ॥ ऐश्वर्यज्ञानसंपन्नो दीर्घायुः सर्ववित्सुधीः ॥ ३५ ॥ एतस्मिन्नंतरे देवि प्रादुर्भूतो महातपाः ॥ पुत्रः परमधर्मात्मा मार्कण्डेयो महामुनिः ॥
॥ ३६ ॥ स जातमात्रो धर्मात्मा तत्रैव तपसि स्थितः ॥ देवमाराधयामास स तुष्टोऽथ वरं ददौ ॥ ३७ ॥ त्वयाहं जातमात्रेण तपसा तोषितो
यतः ॥ तस्मात्ख्यातिं गमिष्यामि त्वन्नाम्ना द्विजसत्तम ॥ ३८ ॥ ये मां पश्यंति विप्रेंद्र भक्त्या परमया युताः ॥ प्राप्नुवंति गतिं नित्यं ते सदानंद
दायिनीम् ॥ ३९ ॥ प्रसंगाद्ये गमिष्यंति ते सदा दुःखवर्जिताः ॥ देवदेवं समाराध्य मोदिष्यंति हि ते नराः ॥ ४० ॥ त्र्यक्षा गणेश्वराः सिद्धाः
सिद्धगंधर्वसेविताः ॥ ते भविष्यंति सततं मम भक्ताश्च ये नराः ॥ ४१ ॥ ये मां संपूजयिष्यंति हृद्यैः पुष्पैः सुगंधिभिः ॥ दीर्घायुषो भविष्यंति
सदा दुःखविवर्जिताः ॥ ४२ ॥ इत्युक्ते तेन लिंगेन मार्कंडेयो महातपाः ॥ तपश्चचार तत्रैव महाकालवने स्थितः ॥ ४३ ॥ प्रभावः कथितो देवि



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मार्कंडेयेश्वरस्य च ॥ शिवेश्वरस्य देवस्य माहात्म्यं शृणु सांप्रतम् ॥ ४४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये मार्कंडेयेश्वरमाहात्म्यवर्णनंनाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥ ॥ छ ॥ ॥ श्रीहर उवाच ॥ ॥ सप्तत्रिंश त्तमं विद्धि शिवेश्वरमनंतकम् ॥ यस्य दर्शनमात्रेण जायंते सर्वसंपदः ॥ १ ॥ राजा रिपुंजयोनाम ब्रह्मकल्पे पुराभवत् ॥ महाकालवने रम्ये प्रजापालनतत्परः ॥ २ ॥ देवपूजां व्रतं दानं ध्यानं स्वाध्यायसत्क्रियाम् ॥ प्रजापालनकं कृत्वा न स जानाति किंचन ॥ ३ ॥ स प्रजाः पालया मास पुत्रवत्परिपालिताः ॥ प्रजास्ताः सुखसंवृद्धा जरामृत्युविवर्जिताः ॥ ४ ॥ पुत्रिणो धनधान्याढ्याः सर्वकामसमन्विताः ॥ तस्यैव तेजसा व्याप्तं महाकालपुरं प्रिये ॥ ५ ॥ एतस्मिन्नंतरे पृथ्वीं तस्मिञ्छासति पार्वति ॥ महाकालवनं देवि स्वपुरं चिह्नितं मया ॥ विना चोज्जयिनीं गंतुं न रतिं प्राप कुत्रचित् ॥ ६ ॥ तदा मया गणेशस्तु शिवसंज्ञो गणाग्रणीः ॥ चिंतितस्तत्क्षणात्प्राप्तः किं करोमीत्युवाच ह ॥ ७ ॥ मयाप्युक्तो गणेशो हि गच्छ पुत्र मम प्रियम् ॥ महाकालपुरं व्याप्तं राज्ञा रिपुञ्जयेन हि ॥ ८ ॥ इत्युक्तः स मया देवि तथेत्युक्त्वा कृतांजलिः ॥ गतोऽसौ मानुषे लोके ममाज्ञाहर्षिताननः ॥ ९ ॥ गते शिवगणे देवि संतुष्टोऽहं शुचिस्मिते ॥ युक्तिज्ञानवृतो दक्षः प्रभोर्भृत्यो हि दुर्लभः ॥ १० ॥ ततः स भिक्षु रूपेण बह्वौषधिपरिग्रहः ॥ गृहीत्वा डुंडुभिं स्कंधे वचनं चेदमब्रवीत् ॥ ११ ॥ कश्च भूतविषग्रस्तो नानादोषैः समाश्रितः ॥ कस्य को व्याधिर त्युग्रो यमहं प्रशमं नये ॥ १२ ॥ कोऽपुत्रः पुत्रवानस्तु मन्मंत्रबलमाश्रितः ॥ वैद्योऽस्मि सर्वयुक्तिज्ञः सर्वकामप्रदायकः ॥ १३ ॥ तस्य वाक्यं समाकर्ण्य कौतूहलसमन्वितः ॥ सवृद्धबालनारीको जनस्तमभिजग्मिवान् ॥ १४ ॥ तेषां स नाशयामास व्याधिं दुर्जयमप्यति ॥ ते च तस्मै सुमहतीं पूजां चक्रुः सुहर्षिताः ॥ हेमरत्नांबरधनैर्धान्यग्रामपुरादिभिः ॥ १५ ॥ एवं स न्यवसत्तत्र वर्षाणि च चतुर्दश ॥ नृपतेरंतरप्रेक्षी न चांतर मवाप सः ॥ १६ ॥ अहोऽतिदुष्करो राजा अहो लोकपरायणः ॥ अहो तेजोनिधिर्वीरो दुर्जयोऽसौ महामतिः ॥ १७ ॥ एवं स चिंतयंस्तत्र भिक्षु रूपी शिवो गणः ॥ जीर्णोद्यानलताजालगहने संवृतः स्थितः ॥ १८ ॥ अत्रांतरे तु नृपतेस्तस्य लोकव्रतस्य तु ॥ महिषी निर्जरा राज्ञः प्राणेभ्योपि गरीयसी ॥ १९ ॥ रूपेणाप्रतिमा लोके सा चापुत्रा सुतार्थिनी ॥ सपत्नीबहुला देवी श्रुत्वा भिक्षुं समाश्रिता ॥ २० ॥ सर्वकामप्रदं ज्ञात्वा नाग राणां सकौतुकम् ॥ स्वां सखीं प्रेषयामास सुनंदांनाम भामिनी ॥ २१ ॥ भिक्षोरायतयने गुप्तमंतःपुरमतंद्रिता ॥ तया चासादितो भिक्षुर्विचिंत्य

१ किं कृतन्-इ० पा० । २ वल्लभा-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



नगरं तदा ॥ उवाच चिंतापरमं भिक्षुं भिक्षासमन्वितम् ॥ २२ ॥ प्रणम्य प्रांजलिर्भूत्वा कार्यार्थं विगतव्यथा ॥ भगवन्महिषी राज्ञः प्राणेभ्योऽपि गरीयसी ॥ वंध्या पुत्रार्थिनी देवी गुप्तं त्वां [1]द्रष्टुमिच्छति ॥ २३ ॥ भवान्कृपाकरः प्रायः प्रजानामीहितप्रदः ॥ एवं श्रुत्वा शिवगणो लब्ध्वा रन्ध्र मुवाच ह ॥ २४ ॥ ॥ भिक्षुरुवाच ॥ ॥ भद्रे केयं तव मतिर्विपरीतप्रलापिनी ॥ अविज्ञातो नरपतेर्गृहमेहीति भाषसे ॥ अविज्ञातः पुरे दृष्टः साहसी पुरुषो भवेत् ॥ २५ ॥ एवं मत्वा व्रज क्षिप्रं स्वमेवांतःपुरं शुभे ॥ नाहं तत्रागमिष्यामि यावन्न नृपतेर्वचः ॥ २६ ॥ सा तु तस्य वचः श्रुत्वा भिक्षोः क्षुभितमानसा ॥ जगामान्तःपुरं तूर्णं देव्यै तच्च न्यवेदयत् ॥ २७ ॥ सखीवचस्तु सा श्रुत्वा देवी दीना उवाच ताम् ॥ सुनन्दे क उपायोस्ति राजा येन प्रवर्त्तते ॥ भिक्षोरानयने क्षिप्रं यावन्नासौ व्रजेत्क्वचित् ॥ २८ ॥ उवाच सा तां युक्त्यैवं सुनंदा युक्तभाषिणी ॥ त्वं तस्य वल्लभा राज्ञः प्राणेभ्योपि गरीयसी ॥ २९ ॥ तस्मादस्वस्थचित्तत्वं राज्ञः स्वं संप्रदर्शय ॥ हेतुना तेन राजा च वाक्यं तव करिष्यति ॥ ३० ॥ एतस्मिन्नेव काले तु देव्या दर्शनलालसः ॥ जगामांतःपुरं राजा प्रियां दीनां ददर्श ह ॥ तामपृच्छत्ततो राजा स्नेहार्द्रीकृतमानसः ॥ ३१ ॥ ॥ ॥ राजोवाच ॥ ॥ किमिदं देवि ते रूपं विमनस्केव भाषसे ॥ भग्नासि केन दुःखेन कस्यापकृतमीदृशम् ॥ ३२ ॥ नृपस्य वचनं श्रुत्वा राज्ञी वचनमब्रवीत् ॥ न पुत्रा नृप मे संति तेन मे नास्ति निर्वृतिः ॥ ३३ ॥ क्रीडनं पीडनायैव तेषां ये पुत्रवर्जिताः ॥ अपुत्रा जगतो दीना दुःखिताः पुत्रवर्जिताः ॥ अपुत्रे च गतिर्नास्ति सुतापुत्रविवर्जिते ॥ ३४ ॥ सुखिनस्ते जना लोके ये बालं पांसुभूषितम् ॥ परिष्वजंति स्वसुतम स्फुटाक्षरभाषकम् ॥ ३५ ॥ अनेन कारणेनास्मि निर्वेदं परमं गता ॥ उपायो हि मया दृष्टः पुत्रार्थे मम सांप्रतम् ॥ ३६ ॥ इह भिक्षुः समायातो देवरूपी सनातनः ॥ तस्य चाव्याहता शक्तिः श्रूयते सर्ववस्तुषु ॥ ३७ ॥ सस्त्रीबालो जनश्चात्र शरणं यस्य गच्छति ॥ तस्य भिक्षोः प्रसादेन सुतवत्यो वयं नृप ॥ भविष्यामोऽत्र संदेहो न मे मनसि वर्त्तते ॥ ३८ ॥ तस्याः से[2] वचनं श्रुत्वा जीर्णोद्यानं जगाम ह ॥ प्रियया सहितो राजा तं च भिक्षुं ददर्श ह ॥ ३९ ॥ दृष्टमात्रो नृपतिना भिक्षुर्लिंगत्वमागतः ॥ दृष्ट्वा सुमहदाश्चर्यं भक्तिनम्रो महीपतिः ॥ पूजयामास विधिवत्तल्लिंगं भिक्षु रूपकम् ॥ ४० ॥ अपुत्रोऽस्मीत्युवाचेदं धन्येयं महिषी मम ॥ देहि मे तनयं देव शिवो[3] भवान्महेश्वरः ॥ ४१ ॥ इत्युक्तो राजसिंहेन भिक्षुर्लिंगा कृतिस्तदा ॥ प्रत्युवाच महीपालं पुत्रस्ते भविता नृप ॥ ४२ ॥ ततःप्रभृति राजासौ सकलत्रो महामतिः ॥ सर्वभावेन तं देवं जगाम शरणं

१ प्रष्टुम्—इ०पा० । २ तत्—इ०पा० । ३ सुतदो भवान्महेश्वरः—इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुदा ॥ ४३ ॥ देवदेवस्य माहात्म्यात्पुत्रो जातो महाबलः ॥ धर्मात्मा च यशस्वी च सार्वभौमो गुणाधिकः ॥ ४४ ॥ अथाहं मन्दरादेवि कौतु
कात्तु समागतः ॥ लिंगाकारं गणं दृष्ट्वा राजानं सेवकं तथा ॥४५॥ योगैश्वर्येण च मया कृतं वै पुरमात्मनः ॥ नानारत्नप्रभोद्द्योतं नानासिद्धिनि
षेवितम् ॥ तच्छिवं शाश्वतं स्थानं दत्तं देवि तदा मया ॥ ४६ ॥ मार्कंडेयेश्वराद्देवादुत्तरे वरवर्णिनि ॥ तदाप्रभृति देवोऽसौ शिवेश्वर इति स्मृतः ॥
॥ ४७ ॥ येऽर्चयिष्यन्ति सततं शिवेश्वरमनुत्तमम् ॥ निर्धूतसर्वपापास्ते भविष्यंति गणोत्तमाः ॥ ४८ ॥ विदित्वाभंगुरं लोकं ये द्रक्ष्यंति शिवेश्व
रम् ॥ अन्तकाले प्रदास्यामि तेषां ज्ञानमनुत्तमम् ॥४९॥ मोक्षं सुदुर्लभं मत्वा संसारं चातिभीषणम् ॥ अपुनर्भवहेतुत्वात्संसेव्योऽसौ शिवेश्वरः ॥
॥ ५० ॥ सर्वावस्थोऽपि यो मर्त्यः संश्रयेत्तं शिवेश्वरम् ॥ स तां गतिमवाप्नोति यज्ञैर्दानैर्हि या गतिः ॥ ५१ ॥ आख्यानं प्रयतो मर्त्यो य इदं
श्रावयेच्छुचिः ॥ पठेद्वा वाचयेद्वापि स मुच्येत्सर्वकिल्बिषैः ॥ ५२ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ शिवेश्वरस्य देवस्य कुसुमेश
मतः शृणु ॥ ५३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये शिवेश्वरमा
हात्म्यवर्णनंनाम सप्तत्रिंशोऽध्यायः ॥३७॥ ॥छ॥ ॥ ईश्वर उवाच ॥ ॥ अष्टात्रिंशत्तमं विद्धि कुसुमेश्वरसंज्ञकम् ॥ देवं स्वर्गप्रदं देवि महापातकना
शनम् ॥१॥ पुरा वैवस्वते कल्पे प्राप्ते वाराहसंज्ञके ॥ प्रादुर्भूते विशालाक्षि कैलासादहमागतः ॥ २ ॥ महाकालवने रम्ये रममाणस्य पार्वति ॥ त्वया
सार्द्धं ममाक्षैश्च प्रादुरासीन्महास्वनः ॥ ३ ॥ पृष्टोऽहं च तदा श्रुत्वा शब्दं चातीव दुःसहम् ॥ शब्दोत्पत्तिर्मया देवि कथिता सा त्वदग्रतः ॥४॥ एते
गणेशाः क्रीडंति मध्ये वै वीरको गणः ॥ कुसुमैर्भूषितोऽत्यर्थं ममातीव सुवल्लभः ॥५॥ कुसुमैर्हन्यतेऽत्यर्थं पूज्यते कुसुमोत्करैः ॥ स एव वीरको देवि सदा
मे हर्षदायकः ॥६॥ नानाश्चर्यगुणाधारो गणेश्वरशतार्चितः ॥ मदीयं वचनं श्रुत्वा त्वयाप्युक्तं वरानने ॥७॥ न दृश्यते विना पुण्यैः पुत्रस्याननपंक
जम् ॥ ईदृशस्य सुतस्यापि ममोत्कण्ठा महेश्वर ॥ ८ ॥ कदाहमीदृशं पुत्रं द्रक्ष्याम्यानन्ददायकम् ॥ मया तव वचः श्रुत्वा हसित्वा च पुनःपुनः ॥
प्रोक्तं पार्वति पुत्रोऽयं प्रदत्तो वीरकोऽधुना ॥ ९ ॥ एष एव सुतस्तेऽस्तु नयनानन्ददायकः ॥ त्वया मात्रा कृतार्थस्तु वीरकः कुसुमार्चितः ॥ १० ॥
मदीयं वचनं श्रुत्वा प्रेषिता विजया त्वया ॥ दत्तो हरेण मे पुत्रो विजये शीघ्रमानय ॥ ११ ॥ विजयोवाच गणपं गणमध्ये च वर्त्तिनम् ॥ गृहि
वीरक चापल्यात्त्वया देवः प्रकोपितः ॥ किमुन्मत्तवदत्यर्थं नृत्यरागेण मोहितः ॥ १२ ॥ इत्युक्तो भयसंत्रस्तः कुसुमैर्भूषितस्तदा ॥ त्वत्समीपं समा

१ प्रवक्ष्यामि—इ० पा० । २ हृदयप्रियः—इ० पा० । ३ गणमध्येषु चर्चितम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



यातो विजयानुगतः शनैः ॥ १३ ॥ भूषितं कुसुमैर्दृष्ट्वा भयत्रस्तं च वीरकम् ॥ त्वया चाकारितो देवि गिरा मधुरवर्णया ॥१४॥ एह्येहि जातोऽसि
मे पुत्रकस्त्वं देवेन दत्तोऽधुना वीरकोसि ॥ उक्तवत्येवमंके निधायाथ तं पर्यचुम्बःकपोले कलंवादिनम् ॥ १५ ॥ मूर्धन्युपाघ्राय सम्माज्य गात्राणि
सा भूषयामास दिव्यैः स्वयं भूषणैः ॥ किंकिणीमेखलानूपुरैः सन्मणीनिष्ककेयूरहारोत्करैः सद्गुणैः ॥ १६ ॥ कोमलैः पल्लवैश्चित्रितैश्चारुभिर्दिव्य
मन्त्रोद्भवैस्तस्य शुभ्रैस्ततः ॥ भूतिमिश्चाकरोर्मिश्रसिद्धार्थकैरंगरक्षाविधींस्तस्य तुष्टा सती ॥ १७ ॥ एवमाधाय चोवक्थ कृत्वा स्रजं मूर्ध्नि गोरोच
नापत्रभंगोज्वलैः ॥ वत्स गच्छाधुना क्रीड सार्द्धं गणैरप्रमत्तो यथा बालचर्यां शनैः ॥ १८ ॥ सोऽपि[1] सिद्धयाकुले गण्डशैले मिलद्रत्नजाले बृहच्छा
लतालाकुले ॥ क्षणं फुल्लमालातमालालिमाले क्षणं वृक्षमूले विलोलालिमाले ॥ १९ ॥ क्षणं स्वल्पपंके जले पंकजाले क्षणं वृक्षखण्डे शुभे
निष्कलंके ॥ परिक्रीडते बालको वै विहारी गणेशाधिपो देवतानन्दकारी ॥ २० ॥ एवं विक्रीडतस्तस्य वीरकस्य गणस्य च ॥ संध्या तमो
मयी प्राप्ता विज्ञतोऽहं त्वया प्रिये ॥२१॥ ऐश्वर्यं दीयतामस्य मम पुत्रस्य शंकर ॥ शरीरार्द्धं गणेशत्वं लोकपालत्वमग्रतः ॥ २२ ॥ लिंगत्वमक्षयत्वं
च स्थानं दिव्यं सुदुर्लभम् ॥ वंद्यमानं यथा देव सिद्धगन्धर्वकिंनरैः ॥ ब्रह्मेन्द्रवरुणादित्यलोकपालेश्वरेश्वरैः ॥ २३ ॥ एतैरेव गणैः सार्द्धं स्तूय
मानं महात्मभिः ॥ अलंकृतो मया यस्मात्कुसुमैर्विविधैः शुभैः ॥ २४ ॥ कुसुमेश्वरसंज्ञस्तु तस्मात्ख्यातो भवत्विति ॥ मयाप्युक्तं विशालाक्षि
वीरकं दयितं मम ॥ २५ ॥ मत्प्रभावसमं दिव्यं सेवितं गणपैः सदा ॥ शृणु गन्धर्वगीतानां माधुर्यममृतोपमम् ॥ २६ ॥ पश्य किन्नरनारीणां
गायन्तीनां मनोरमम् ॥ पश्याप्सरःसमूहस्य नृत्यमेतन्निरन्तरम् ॥ २७ ॥ विद्याधरैः परिवृतः कुसुमेशो वरानने ॥ विशेषतो मया देवि प्रथमं प्रमथे
श्वरः ॥ कुसुमेश्वरतां नीतो यदा कुसुममंडितः ॥ २८ ॥ स्थानं दत्तं विशालाक्षि शिवलिंगस्य चोत्तरे ॥ वरो दत्तो बहुमतो दुष्प्राप्यस्त्रिदशैरपि
॥ २९ ॥ ये त्वां द्रक्ष्यंति गणप कुसुमेश्वरसंज्ञकम् ॥ न तेषां जायते पापं पद्मपत्रे यथा जलम् ॥ ३० ॥ कुसुमैरर्चयिष्यंति ये नराः कुसुमेश्वरम् ॥
मत्स्थानं ते समासाद्य मोदिष्यंति गतव्यथाः ॥ ३१ ॥ योऽप्येकं दिवसं मर्त्यस्त्वां पश्यति समाहितः ॥ स मुक्तः पातकैः सर्वैर्मम लोकं गमि
ष्यति ॥ ३२ ॥ यः पूजयति भावेन कुसुमैः कुसुमेश्वरम् ॥ स प्राप्स्यति परं स्थानं पुनरावृत्तिदुर्लभम् ॥ ३३ ॥ एवमादिवरैः पुष्टः कृतोयं कुसु
मेश्वरः ॥ कृतकृत्यो गणो देवि लिंगेनेश्वरतां गतः ॥ ३४ ॥ कुसुमेश्वरदेवस्य प्रभावः कथितस्त्वयम् ॥ अक्रूरेशस्य देवस्य श्रूयतां तदनन्त

१ सोऽर्पितः सिंहसंघाकुले–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रम् ॥ ३९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे कुसुमेश्वरमाहात्म्यवर्णननामाष्टात्रिंशोऽध्यायः
॥ ३८ ॥ ॥ छ ॥ ॥ हर उवाच ॥ ॥ अक्रूरेश्वरमेकोनचत्वारिंशत्तमं शृणु ॥ यस्य दर्शनमात्रेण सुबुद्धिर्जायते नृणाम् ॥ १ ॥ पुरा त्वयैव
कल्पादौ परया शक्तिरूपया ॥ कृतं कृत्स्नं वरारोहे त्रैलोक्यं सचराचरम् ॥ २ ॥ ततस्त्वं संस्तुता देवै[1]ः सकिंनरमहोरगैः ॥ प्रदक्षिणां प्रकुर्वंति
गणा नानाविधास्तु ते ॥ ३ ॥ नमस्कारं प्रकुर्वंति स्तोत्रं कुर्वंति चापरे ॥ न करोति नमस्कारमेको भृंगिरिटिस्तदा ॥ ४ ॥ क्रूरां बुद्धिं समासाद्य
गर्वेणातीव गर्वितः ॥ ५ ॥ एको देवो महादेवः स्त्रिया किमनया मम ॥ यदा नायाति ते पार्श्वं तदा प्रोक्तस्त्वया गतः ॥ ६ ॥ कस्मान्न कुरुषे पूजां
प्रदक्षिणमथो स्तुतिम् ॥ मद्भक्तो मदधीनोऽसि मम पुत्रो मया कृतः ॥ इत्थंभूतगणेश त्वं किं वै लौल्येन वर्त्तसे ॥ ७ ॥ इति भृंगिरिटिः श्रुत्वा
क्रुद्धस्त्वामाह गर्वितः ॥ नाहं पार्वति ते पुत्रः पुत्रोऽहं शंकरस्य तु ॥ ८ ॥ एष एव च मे माता एष एव च मे पिता ॥ एवं रात्रिदिनं यामि शरणं
परमेष्ठिनम् ॥९॥ त्वमप्यस्यैव शरणं ननु पार्वति संस्थिता ॥ यदि च त्वामहं वंदे तद्वंदे सकलान्गणान् ॥१०॥ इति भृंगिरिटिः श्रुत्वा वाक्यं कुपितया
त्वया ॥ तस्योक्तं प्रमथेशस्य भीरु भृंगिरिटेरिदम् ॥११॥ सुतो भूत्वा भवान्कस्माददाक्षिण्यं ब्रवीषि माम् ॥ त्वङ्मांसशोणितांत्रं च मातृकं तनयस्य
तु ॥ १२ ॥ नखदंतास्थिसंघातः शिश्नं वा[2]क्च शिरस्तथा ॥ तथैव शुक्रं गणप पैतृकं तु शरीरकम् ॥ १३ ॥ इति भृंगिरिटिः श्रुत्वा सद्यो योगबलेन
तु ॥ मांसादि त्यक्तवान्सर्वं मातृकं भागमेव हि ॥ १४ ॥ ततः प्रभृति वामोरु नखदंतास्थिनासिकः ॥ स च क्रूरां मतिं कृत्वा क्रोधसंरक्तलोचनः॥
॥ १५ ॥ त्वां परित्यज्य दुःखार्त्त आजगाम ममांतिकम् ॥ अथ त्वया तदा शप्तो गणो भृंगिरिटिः प्रिये ॥ १६ ॥ क्रूरा बुद्धिः कृता यस्मात्त्वया
कुमतिना भृशम् ॥ तस्मात्त्वं मानुषे लोके गमिष्यसि न संशयः ॥ १७ ॥ इत्युक्तस्तु त्वया देवि गणो भृंगिरिटिस्तथा ॥ पपात मानुषं लोकं
पुण्यांते सुकृती यथा ॥ १८ ॥ स गत्वा पुष्करद्वीपं तपसे भावितात्मवान् ॥ तत्रैकपादूर्द्ध्वभुजो दशपद्मान्यवस्थितः ॥ दं[3]ग्धीभूतं च तपसा जगद्वै
दुष्करेण तु ॥ १९ ॥ ततो ब्रह्मा च विष्णुश्च शक्रश्च त्रिदशैः सह ॥ वयं च चारुजघने तत्समीपं समागतः ॥ २० ॥ उपगम्य ततस्तस्य कथितं
पुरतो मया ॥ अलं क्रूरेण तपसा लोकस्योत्सादनेन वै[4] ॥ २१ ॥ त्रैलोक्यमपि निःसंज्ञं जातमेवं स्थिते त्वयि ॥ संहरस्व तपो घोरं लोकसंतापनं
महत् ॥ २२ ॥ प्रार्थ्यतां पार्वती पुत्र सा दास्यति वरं च ते ॥ अस्याः प्रसादान्मुक्तिस्ते शापाच्चैव भविष्यति ॥ २३ ॥ एवमुक्तस्तदा तेन प्रार्थिता

१ देवि–इ० पा० । २ वसा–इ० पा० । ३ दुःखीभूतम्–इ० पा० । ४ ह–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





त्वं महेश्वरि ॥ गणेन भृंगिरिटिना भक्तिनम्रेण सादरात् ॥ २४ ॥ त्वया प्रोक्तं विशालाक्षि पुत्र गच्छ ममाज्ञया ॥ महाकालवने रम्ये तत्राऽक्रूरो भविष्यसि ॥ २५ ॥ पुनः प्राप्स्यसि कैलासं सिद्धगंधर्वसेवितम् ॥ अंकपादाग्रतो लिंगं सप्तकल्पानुगं महत् ॥ यस्य दर्शनमात्रेण शुभा बुद्धिः प्रजा यते ॥ २६ ॥ कृतघ्ना नास्तिकाः क्रूरा ये च विश्वासघातकाः ॥ महापातकिनो ये च ये च शापवशं गताः ॥ दर्शनात्तस्य लिंगस्य तेऽपि स्वर्ग भुजो नराः ॥ २७ ॥ क्रूरां बुद्धिं समासाद्य कंसं हत्वा च केशिहा ॥ बलदेवेन सहितस्त्यक्त्वा तां मथुरां पुरीम् ॥ २८ ॥ महाकालवनं गत्वा तोष यित्वा महेश्वरम् ॥ अक्रूरत्वं च संप्राप्तं कीर्त्तिर्लब्धा च शाश्वती ॥ २९ ॥ त्वदीयं वचनं श्रुत्वा गणो भृंगिरिटिस्तदा ॥ तथेति प्रत्ययी जातो महा कालवनं गतः ॥ देवमाराधयामास तपसा दुष्करेण तु ॥ ३० ॥ एतस्मिन्नंतरे देवि लिंगमध्यात्त्वमुत्थिता ॥ अर्द्धांगं मामकं कृत्वा स्वकीयांगमथा र्द्धतः ॥ फणींद्रबद्धजूटार्द्धमर्द्धधम्मिल्लभूषितम् ॥ ३१ ॥ पत्रवल्लीविचित्रार्धमर्द्धचंद्रविराजितम् ॥ मुक्ताहारनिबद्धार्द्धमर्द्धं सर्पैश्च वेष्टितम् ॥ ३२ ॥ ततो भृंगिरिटिर्देवि दृष्ट्वा तन्महदद्भुतम् ॥ चिंतयामास हृदये मयाऽज्ञानादनुष्ठितम् ॥ ३३ ॥ उमा च शंकरश्चैव देहमेकं सनातनम् ॥ एका मूर्त्तिरनिर्दे श्या द्विधा भेदेन दृश्यते ॥ ३४ ॥ एवं चिंतयतस्तस्य भक्तिनम्रस्य पार्व्वति ॥ प्रोक्तं त्वया प्रसन्नाहं वरं वरय पुत्रक ॥ ३५ ॥ तेनोक्तं यदि तुष्टासि मातर्मम महेश्वरि ॥ अस्य लिंगस्य माहात्म्यात्क्रूरा बुद्धिर्गता मम ॥ ३६ ॥ अक्रूरेश्वरनामायं देवः ख्यातो भवत्विति ॥ त्वं देवि सर्वभावानामेका कारणमुच्यते ॥३७॥ त्वं मूर्ता पुण्यनिचया त्वं गतिः पुण्यसेविनाम् ॥ पिता माता सुहृद्बन्धुस्त्वमेका कारणं परम् ॥ ३८ ॥ कुरु पुण्यतमं स्थानं ब्रह्महत्यादिनाशनम् ॥ भुक्तिदं मुक्तिदं चैव वांछितार्थप्रदायकम् ॥ ३९ ॥ तथेति च त्वया प्रोक्तं गिरा मधुरया तदा ॥ यत्ते प्रियतमं वत्स तत्सर्वं प्रकरोम्यहम् ॥ ४० ॥ न मेऽस्ति दुष्करं पुत्र त्वत्कृते कनकप्रभ ॥ अस्मिन्स्थाने तु ये देवमक्रूरेश्वरसंज्ञकम् ॥ प्रसंगादपि पश्यंति अपि पापरता नराः ॥ तेऽप्यवश्यं भविष्यंति त्वत्समा नियतं गणाः ॥४१॥ भक्त्या स्तोष्यंति ये नाम लिंगस्यास्य च मानवाः ॥ मानसैः पातकैर्मुक्ता यास्यंति स्वर्गमक्षयम् ॥४२॥ स्नात्वा तु विधिवत्पूजां यः करिष्यति मानवः॥ स मुक्तः पातकैः सर्वैः प्राप्स्यते रविमंडलम् ॥४३॥ आयुरारोग्यमैश्वर्यं काममत्र हि वांछितम् ॥ गोसहस्रफलं चात्र स्पृष्ट्वा प्राप्स्यति मानवः ॥४४॥ स्नात्वा मंदाकिनीकुंडे योऽक्रूरेश्वरमीश्वरम् ॥ पूजयेद्विविधैः पुष्पैर्महापापहतोऽपि वा ॥ ४५ ॥ विमानं दिव्यमारूढो यावत्कल्पचतुष्टयम् ॥ गंधर्वैर्गीयमानस्तु सोऽपि स्वर्गं गमिष्यति ॥ ४६ ॥ इत्युक्तः स गणो देवि मत्समीपमु



१ शुद्धा–इ० पा० । २ अवश्यं ज्ञानचक्षुषा–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पागतः ॥ शापान्मुक्तस्त्वया सार्धं विस्मृतां किं वरानने ॥ ४७ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ अक्रूरेश्वरदेवस्य शृणु कुंडेश्वरं परम् ॥ ४८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्येऽक्रूरेश्वरमाहात्म्यवर्णनंनामैकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ चत्वारिंशत्तमं विद्धि कुंडेश्वरमतः शृणु ॥ यस्य दर्शनमात्रेण लभ्यते सद्गतिः परा ॥ १ ॥ विज्ञतोऽहं त्वया देवि मंदरे चारुकंदरे ॥ वीरकं द्रष्टुमिच्छामि क्व गतो मम पुत्रकः ॥ २ ॥ मया प्रोक्तं विशालाक्षि महाकालवनोत्तमे ॥ जलमध्ये स्थितस्तेपे तपः परमदारुणम् ॥३॥ मुनिभिः सहितो धीमान्भ्राजमानोंऽशुमानिव ॥ गच्छामस्तत्र तं द्रष्टुं गणैः सार्द्धं वरानने ॥ ॥ ४ ॥ मदीयं वचनं श्रुत्वा त्वयाहं प्रेरितस्तदा ॥ उत्तिष्ठ शम्भो गच्छामो वृषमारुह सत्वरम् ॥ ५ ॥ सप्रस्नवौ स्तनौ जातौ सद्यः संस्मृत्य वीरकम् ॥ मया स्मृतो वृषो देवि धर्मरूपी सनातनः ॥ ६ ॥ मदीयं चिंतितं ज्ञात्वा मम पार्श्वमुपागतः ॥ आरूढोऽहं त्वया सार्द्धं तस्मिन्नेव वृषे तदा ॥ ७ ॥ प्रस्थितस्तत्क्षणाच्छीघ्रं गणैर्नानाविधैः सह ॥ वेगात्प्रयातो वृषभस्कंधालंबितया त्वया ॥ ८ ॥ रणद्वलयबाहुभ्यां गाढमालिंगितो ह्यहम् ॥ त्वं भीता च तदा जाता यदातीव प्रणोदितः ॥ ९ ॥ वृषो मया विशालाक्षि स कृष्टो गणपैस्तदा ॥ कृष्टं च सत्वरं दृष्ट्वा प्रोक्तं च भीतया तदा ॥ १० ॥ श्रांतास्मि सांप्रतं देव वेगेनानेन भीषिता ॥ तद्विश्रमितुमिच्छामि भूधरस्य तटे विभो ॥ ११ ॥ क्षणं पश्चाद्गमिष्यामि विषमोयं गिरिर्महान् ॥ त्वदीयं वचनं श्रुत्वा बाढमुक्तं प्रिये मया ॥ १२ ॥ मुहूर्तं चारुजघने शैलपादमुपाश्रिता ॥ कुरु श्रमापनयनं यावद्वेगात्प्रयाम्यहम् ॥ ॥ १३ ॥ पंथानं त्वत्सुखं यत्र तं वयं मृगयावहे ॥ एष कुण्डो गणाध्यक्षस्त्वत्समीपे वसिष्यति ॥ त्वदाज्ञावशवर्त्ती च किंकरः स्थापितो मया ॥ ॥ १४ ॥ एवमुक्त्वा ततो देवि संस्थाप्य गणरक्षकम् ॥ आरूढोऽहं गिरेः प्रांतमुदयाद्रिं रविर्यथा ॥ १५ ॥ ततोऽवलोकितोऽत्यर्थं रमणीयो महागिरिः ॥ इदं रम्यमिदं रम्यमित्यस्मिन्वरपर्वते ॥ १६ ॥ पश्यतो मम शैलेंद्रं गताः संवत्सरा दश ॥ त्वयाथ चिंतितं देवि क्व गतस्त्रिपुरांतकः ॥ १७ ॥ नूनं न मदनातप्तां वेत्ति मां रतिवर्जिताम् ॥ मां विहाय महादेवो निर्विशंकः क्व वर्त्तते ॥ १८ ॥ हरस्य क्वापि यातस्य वैरं संस्मृत्य चित्तजः ॥ बाधते मामनंगोपि चापरोपितमार्गणः ॥ विलोकयंतीं हा दृष्ट्वा विलपंतीं पुनःपुनः ॥ १९ ॥ ततः कुण्डो गणाध्यक्षो ज्ञात्वा भावं त्वदीयकम् ॥ उत्कृष्टेन स्वरेणोक्तं मा देवि विमना भव ॥ २० ॥ आयात एष ते भर्त्ता मा चेतः कलुषं कुरु ॥ एतच्छ्रुत्वा वचस्तस्य कुण्डस्य

१ विस्मृतं किम्--इ० पा० । २ अक्रूरेश्वरलिङ्गस्य–इ० पा० । ३ भूधरेन्द्रतटेऽधुना–इ० पा० । ४ तावद्यावत्त्वां मृगयामहे–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



कमलानने ॥ २१ ॥ दुःखार्त्तया त्वया प्रोक्तः कुण्ड वेद्मि न शंकरम् ॥ क्व गतः किं च कुरुते कालं दीर्घमिमं शिवः ॥ दर्शयस्व महादेवमित्युक्तोऽसौ पुनःपुनः ॥ २२ ॥ यदा न दर्शितस्तेन कुण्डेनाहं वरानने[1] ॥ तदा शप्तस्त्वया देवि क्रुद्धया गणरक्षकः ॥ २३ ॥ गच्छ त्वं मानुषं लोकं यस्मान्न कथितो हरः ॥ एतस्मिन्नंतरे देवि प्राप्तोऽहं त्वत्समीपतः ॥ २४ ॥ पृष्टश्चाहं त्वया देवि विहाय क्व गतोऽसि माम् ॥ दुर्गमे पर्वते शून्ये तस्मात्त्यक्ष्यामि जीवितम् ॥ २५ ॥ गत्वाग्रे भूधरस्यास्य किं कृतं च त्वया विभो ॥ मया तव वचः श्रुत्वा कथितं सर्वमेव तत् ॥ २६ ॥ दुराधर्षतरः शैलः समंताद्दुरतिक्रमः ॥ त्वत्प्रियार्थं महाभागे मया मार्गोऽवलोकितः ॥ २७ ॥ येन मार्गेण विश्रब्धं गमिष्यामः सुमध्यमे ॥ अयं कुण्डो गणो देवि विषण्णो व्याकुलः कृतः ॥ २८ ॥ त्वयाप्युक्तं महादेव कुण्डः शप्तो मया गणः ॥ ममाज्ञा न कृता यस्माद्विफलं न वचो मम ॥ तस्माद्यातु ममादेशान्महाकालवनं शुभम् ॥ २९ ॥ भैरवं रूपमास्थाय यत्र त्वं चोत्तरे स्थितः ॥ तस्याग्रतः स्थितं लिंगं वर्त्तते कामदं सदा ॥ ३० ॥ तस्य दर्शनमात्रेण गणपोऽयं भविष्यति ॥ कुण्डेश्वरेति विख्यातः स देवो वै भविष्यति ॥ ३१ ॥ इत्युक्तः स त्वया देवि समासाद्य पुनःपुनः ॥ प्रस्थापितस्त्वयादेशाद्व्रज कुण्ड ममाज्ञया ॥ ३२ ॥ महाकालवनं शीघ्रं लिंगमाराध्य सत्वरम् ॥ कीर्तिस्ते भविता पुत्र त्रिषु लोकेषु शाश्वती ॥ ३३ ॥ इत्युक्तस्तत्क्षणात्प्राप्तो दृष्ट्वा लिङ्गं तु शाश्वतम्[2] ॥ उत्तरस्य[3] शिवस्याग्रे पूजयामास भक्तितः ॥ ३४ ॥ ततो देवाः सगंधर्वाः सिद्धाश्च परमर्षयः ॥ यक्षाश्चाप्सरसश्चैव समाजग्मुः सहस्रशः ॥ ३५ ॥ अथाहं तत्क्षणात्प्राप्तस्त्वया सार्द्धं गणैर्वृतः ॥ दृष्ट्वा कुण्डं गणेशं तु लिंगाराधनतत्परम् ॥ ३६ ॥ समाधिध्याननिरतं प्रोक्तमस्माभिरादरात् ॥ तुष्टा ते पार्वती पुत्र प्रार्थ्यतां वरमुत्तमम् ॥ ३७ ॥ अक्षयं तु पदं प्राप्तं त्वया लिंगस्य दर्शनात्[4] ॥ अद्यप्रभृति देवोऽयं ख्यातो भुवि भविष्यति ॥ नाम्ना कुण्डेश्वरो यस्मात्सर्वसंपत्करः सदा ॥ ३८ ॥ कुण्डेश्वरमनादिं तु भक्त्या पश्यति यो नरः ॥ सोऽश्वमेधसहस्रस्य फलं प्राप्स्यति नान्यथा ॥ ३९ ॥ तस्य दानफलं सर्वं सर्वतीर्थफलं सदा ॥ लिंगं कुण्डेश्वरं यस्तु भक्त्या संपूजयिष्यति॥४०॥दशानामश्वमेधानामग्निष्टोमशतस्य च॥स्पर्शनात्फलमाप्नोति कुण्डेश्वरस्य सर्वदा ॥४१॥प्रातः पश्यंति ये भक्त्या कृत्वा नियमपूर्वकम्॥ सिद्धिं सुकामिकीं[5] हृष्टाः संप्राप्स्यंति न संशयः ॥४२॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ कुण्डेश्वरस्य देवस्य शृणु लुंपेश्वरं[6] परम् ॥४३॥

१ वरारोहे–इ० पा० । २ सनातनम्–इ० पा० । ३ चत्वरस्य–इ० पा० । ४ दर्शनात्–इ० पा० । ५ सिद्धिमाप्स्यंति षण्मासात्कामिकीं नात्र संशयः–इ० पा० । ६ लंपेश्वरम्–इति सर्वत्र 'लुंपेश्वर' शब्दे पाठान्तरं पुस्तकद्वये दृश्यते ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्ये कुंडेश्वरमाहात्म्यवर्णनंनाम चत्वारिंशो
ऽध्यायः ॥ ४० ॥ ॥छ॥ ॥ श्रीमहादेव उवाच ॥ ॥ चत्वारिंशत्तमं सैकमीश्वरं विद्धि पार्वति ॥ लुंपेश्वरमिति ख्यातं नाम यस्य महीतले ॥ १ ॥
देशे म्लेच्छगणाकीर्णे बभूव जगतीपतिः ॥ लुंपाधिप इति ख्यातो महेंद्रसमविक्रमः ॥ २ ॥ तस्यासीद्दयिता भार्या विशालानाम नामतः ॥ सा
यौवनगुणोपेता रूपेणाप्रतिमा भुवि ॥ ३ ॥ स युद्धकामो नृपतिः पर्यपृच्छद्द्विजोत्तमान् ॥ ४ ॥ अथ केनापि कथितमाश्रमे सामगो द्विजः ॥ तेन
सार्द्धं महाबाहो युध्यस्व त्वं नृपोत्तम ॥ ५ ॥ ततः स प्रस्थितो राजा म्लेच्छैः सार्द्धं सहस्रशः ॥ तुषारैर्बर्बरैर्लुपैः पह्लवैः श्वगणैस्तथा ॥ ६ ॥
दस्युभिः संवृतः क्रूरैः क्रोधेनाकुलितेंद्रियः ॥ आजगामाश्रमं पुण्यं सामगस्य मुनेस्तदा ॥ ७ ॥ मुनिना पूजितस्तेन मधुपर्कादिविष्टरैः ॥ एतस्मि
न्नन्तरे राजा होमधेनुं ददर्श ह ॥ ८ ॥ प्रार्थयामास सहसा न दत्ता मुनिना तदा ॥ प्रमथ्य चाश्रमं तस्य होमधेनुं जहार सः ॥ वनं बभंज सकलं
तस्य विप्रस्य पश्यतः ॥ ९ ॥ काल्यमानां च गां दृष्ट्वा वत्सं चातीव दुःखितम् ॥ उवाच वचनं विप्रो मा राजन्साहसं कुरु ॥ १० ॥ एवं वदंतं
विप्रेंद्रं शरैस्तीक्ष्णैर्जघान ह ॥ लुंपः क्रोधसमाविष्टो दुष्टो दुष्टजनैर्वृतः ॥ ११ ॥ असकृत्पुत्रपुत्रेति विलपंतमनाथवत् ॥ हत्वा च सामगं विप्रं
जगाम स्वगृहं नृपः ॥ १२ ॥ एतस्मिन्नंतरे पुत्रः समित्पाणिरुपागतः ॥ दृष्ट्वा च पितरं विप्रं तदा मृत्युवशं गतम् ॥ अनागसं महात्मानं विललाप
सुदुःखितः ॥ १३ ॥ केनेदं कुत्सितं कर्म कृतं पापेन मे पिता ॥ अयुध्यमानो वृद्धः सन्हतः शरशतैः शितैः ॥ १४ ॥ विलप्यैवं सकरुणं बहुना
नाविधं तथा ॥ प्रेतकार्याणि सर्वाणि पितुश्चक्रे विधानतः ॥ १५ ॥ ददाह पितरं चाग्नौ तोयमादाय सत्वरम् ॥ तस्य लुंपाधिपस्यापि ददौ
शापं सुदारुणम् ॥ १६ ॥ स्वधर्मनिरतो विद्वान्येन मे निहतः पिता ॥ स पापात्मा दुराचारः कुष्ठरोगमवाप्नुयात् ॥ १७ ॥ एतस्मिन्नन्तरे राजा
कुष्ठरोगेण पीडितः ॥ अचंक्रमणतां प्राप्तो लुंपाधीशो वरानने ॥ १८ ॥ औषधैरधिकोऽभ्येति ब्रह्मशापप्रभावतः ॥ वैराग्यान्मर्तुकामोऽसौ काष्ठा
न्यादाय दुःखितः ॥ १९ ॥ चितां कर्तुं समारेभे समायातोऽथ नारदः ॥ पूजितो विधिना तेन दुःखितेन नृपेण हि ॥ २० ॥ अथ पप्रच्छ लुं
पोऽसौ नारदं मुनिसत्तमम् ॥ अकस्मान्मम देवर्षे कुष्ठरोगो बभूव ह ॥ तेनाहं पीडितोऽतीव न च शांतिं व्रजत्यसौ ॥ २१ ॥ औषधैर्वर्द्धते

१ उज्जयिन्यां गोमतीकुण्डोपरीदं लिंगं विद्यते । २ दरदैः—इ० पा० । ३ च गणैस्तथा—इ० पा० । ४ हत्वा त्वनागसं विप्रं जगाम स्वपुरं नृपः—इ० पा० । ५ देवि—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

कस्मादेतदाख्यातुमर्हसि ॥ न तेस्त्यविदितं किंचिदिह लोके परत्र च ॥ २२ ॥ तस्य तद्वचनं श्रुत्वा लुंपाधीशस्य नारदः ॥ कथयामास तत्सर्वं ब्रह्मशापं सुदुस्तरम् ॥ २३ ॥ ततः सभार्यो नृपतिः प्रार्थयामास नारदम् ॥ कथं मे भगवन्छापो दुस्तरो यास्यति क्षयम् ॥ २४ ॥ एवमुक्तस्तु लुम्पेन नारदो भगवानृषिः ॥ कारुण्यात्कथयामास सभार्यस्य यशस्विनि ॥ २५ ॥ महाकालवने राजँल्लिंगं कुष्ठहरं परम् ॥ सर्वसंपत्करं तत्र विद्यते पापनाशनम् ॥ २६ ॥ शिप्रायाश्च तटे रम्ये केशवार्कस्य पूर्वतः ॥ तत्र त्वं गच्छ राजेंद्र कांत्या युक्तो भविष्यसि ॥ २७ ॥ एवमुक्तस्तु लुंपोऽसौ ह्याजगाम त्वरान्वितः ॥ महाकालवनं रम्यं महर्षिगणसेवितम् ॥ २८ ॥ प्राप्तः स्वर्गोपमं भूपः शिप्रया परिशोभितम् ॥ विवेश च मुदा युक्तो दृष्ट्वा लिंगमनुत्तमम् ॥ २९ ॥ स्नात्वा शिप्राजले पुण्ये महापातकनाशने ॥ दर्शनात्तस्य लिंगस्य दिव्यरूपो बभूव ह ॥ ३० ॥ कुष्ठरोगेण मुक्तस्तु मुक्तो वै ब्रह्महत्यया ॥ कृतकृत्यो नृपो जातो दर्शनादेव पार्वति ॥ ३१ ॥ स तत्र तामुषित्वैकां रजनीं पृथिवीपतिः ॥ तापसानां परं चक्रे सत्कारं भार्यया सह ॥ ३२ ॥ ततः कृतस्वस्त्ययनस्तापसैस्तैर्महात्मभिः ॥ दिव्यज्ञानान्वितैर्दिव्यैः सूर्यवैश्वानरप्रभैः ॥ ३३ ॥ कृतं नाम तदा तस्य लिंगस्य कमलानने ॥ लुंपेनाराधितो यस्माद्देवोऽयं कुष्ठनाशनः ॥ लुम्पेश्वर इति ख्यातो भविष्यति महीतले ॥ ३४ ॥ पूजयिष्यंति ये भक्त्या लिंगं लुम्पेश्वरं परम् ॥ स्नात्वा शिप्राजले पुण्ये ते यास्यंति परं पदम् ॥ ३५ ॥ प्रार्थयिष्यंति यान्कामान्मनसा चेप्सितान्प्रियान् ॥ तानाप्स्यंति न सन्देहो लुम्पेशस्य च दर्शनात् ॥ ३६ ॥ महापापसमायुक्तो यः पश्यति समाहितः ॥ लिंगं लुम्पेश्वरं सोऽपि देवतुल्यो भविष्यति ॥ ३७ ॥ गोघ्नश्चैव कृतघ्नश्च मातृहा गुरुतल्पगः ॥ दुष्टकर्मसमाचारो भ्रातृहा पितृहा तथा ॥ ३८ ॥ लुम्पेश्वरं सकृत्पश्यन्मुच्यते सर्वकिल्बिषैः ॥ पूजितोऽपि दहेत्पापं सप्तजन्मार्जितं च यत् ॥ ३९ ॥ इत्युक्त्वा मुनयः सर्वे पूजयामासुरन्विताः ॥ कुष्ठरोगविनिर्मुक्तो राजा स्वविषयं गतः ॥ ४० ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ लुम्पेश्वरस्य देवस्य शृणु गंगेश्वरं परम् ॥ ४१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये लुंपेश्वरमाहात्म्यवर्णनंनामैकोनचत्वारिंशोऽध्यायः ॥ ४१ ॥ ॥ छ ॥ ॥ श्रीहर उवाच ॥ ॥ द्वाचत्वारिंशतं देवं गंगेश्वरमथो शृणु ॥ यस्य दर्शनमात्रेण सर्वतीर्थफलं लभेत् ॥ ध्रुवाधारं जगद्योनेः पदं नारायणस्य तु ॥ १ ॥ पदात्प्रवृत्ता या देवी गंगा त्रिपथगा नदी ॥ सा प्रविश्य सुधायोनिं सोम 

१ अस्मिँल्लोके द्विजोत्तम--इ०पा० । २ सुदुष्करम्--इ०पा० । ३ देवं तत्तुल्यो वै--इ०पा० । ४ त्रिपथगामिनी--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माधारमंभसाम् ॥ २ ॥ ततः संवर्द्धमानार्करश्मिसंगतिपावनी ॥ पपात मेरुपृष्ठे च सा चतुर्धा ततो ययौ ॥ ३ ॥ मेरुकूटतटान्तेभ्यो निपतन्ती यशस्विनी ॥ विकीर्यमाणसलिला निरालंबा पपात सा ॥ ४ ॥ मन्दरादिषु शैलेषु[1] प्रविभक्तोदका समम् ॥ तत्र सीतेति विख्याता ययौ चैत्ररथं वनम् ॥ ५ ॥ तत्प्लावयित्वा च ययावरुणोदं सरिद्वरा ॥ ६ ॥ तथैवालकनन्दाख्या दक्षिणे गन्धमादने ॥ मेरुपादवनं गत्वा नन्दने देवनन्दने ॥ ७ ॥ मानसं च महावेगात्प्लावयित्वा सरोवरम् ॥ तस्माच्च शैलराजानं रम्यं त्रिशिखरं गता ॥ ८ ॥ तस्माच्च पर्वताः सर्वे प्लावितास्तत्क्षणा[?]क्ष्ये ॥ तान्प्लावयित्वा संप्राप्ता हिमवन्तं महागिरिम् ॥ ९ ॥ मया धृता च तत्रैव जटाजूटेन पार्वति ॥ न मुक्ता च यदा[2] गंगा तदा क्रुद्धा ममोपरि ॥ १० ॥ गात्राणि प्लावयामास मदीयानि वरानने ॥ मया च रुद्धा क्रोधेन जटामध्ये यशस्विनि ॥ ११ ॥ तत्रैव सा तपश्चक्रे बहुकल्पशतानि च ॥ भगीरथेनोपवासैः स्तुत्या चाराधितो ह्यहम् ॥ १२ ॥ तदा मुक्ता मया देवि गंगा त्रिपथगामिनी ॥ महाकालमनुप्राप्ता प्लावयित्वोत्तरान्कुरून्[3] ॥ १३ ॥ समुद्रमहिषी जाता प्राणेभ्योऽपि गरीयसी ॥ नदीनामुत्तमा गंगा समुद्रेण कृता तदा ॥ स तया सहितो रेमे समुद्रः सरितांपतिः ॥ १४ ॥ ततः कदाचिद्ब्रह्माणमुपासांचक्रिरे सुराः ॥ तथार्णवो जगामाथ ब्रह्मलोकं सनातनम् ॥ गंगया सहितो देवि दर्शनार्थं महोत्सवे ॥ १५ ॥ अथ गंगा सरिच्छ्रेष्ठा समुपायात्पितामहम् ॥ तस्या वासः समुद्धूतं मारुतेन शशिप्रभम् ॥ १६ ॥ ततोऽभवन्सुरगणाः सहसाऽवाङ्मुखास्तदा ॥ महाभिषस्तु राजर्षिर्निःशंको दृष्टवान्नदीम् ॥ १७ ॥ तस्य भावं विदित्वाऽथ ब्रह्मणा स तिरस्कृतः ॥ उक्तस्तु जातो मर्त्येषु पुनर्लोकानवाप्स्यसि ॥ १८ ॥ गंगा शप्ताथ क्रुद्धेन समुद्रेण यशस्विनि ॥ मां विहायान्यसक्तासि तस्माद्यास्यसि मानुषम् ॥ १९ ॥ लोकमल्पायुषं दीना तत्र दुःखमवाप्स्यसि ॥ तं शापं दारुणं श्रुत्वा गंगा वचनमब्रवीत् ॥ २० ॥ विनापराधाच्छप्ताहं कस्माद्वै देवसंसदि ॥ पतिव्रता पतिप्राणा पतिना परमार्थतः ॥ २१ ॥ प्रमादाद्वस्त्रमुद्धूतं वायुना व्यापकेन तु ॥ प्रत्युवाच ततो ब्रह्मा तां नदीं लोकपावनीम् ॥ २२ ॥ वसूनां कारणाद्देवि शप्ता यस्मान्महानदि ॥ भाव्यर्थे तोयनिधिना तस्माच्छीघ्रं व्रजाधुना ॥ २३ ॥ महाकालवने रम्ये[4] सिद्धगंधर्वसेविते ॥ शिप्राया दक्षिणे भागे विद्यते लिंगमुत्तमम् ॥ २४ ॥ सर्वसिद्धिकरं पुण्यं सर्वपातकनाशनम् ॥ तमाराधय यत्नेन स ते दास्यति वांछितम् ॥ २५ ॥ पितामहवचः श्रुत्वा तुष्टा त्रिपथगामिनी[5] ॥ गमनं तत्र मेऽभीष्टं विद्यते यत्सखी मम ॥ शिप्रापि[6] मे प्रिया पुण्या महापातकनाशिनी ॥ २६ ॥ इति संचिंत्य मनसा दिव्या देवनदी तदा ॥ आज

१ पुत्रेषु—इति पाठे अर्थात्मेरोः पुत्रेषु—इत्यर्थः । २ मया—इ०पा० । ३ तया—इ०पा० । ४ देवि—इ०पा० । ५ त्रिपथगा नदी—इ०पा । ६ शिप्रा विप्रप्रिया—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



गाम महाकाले ह्यपश्यल्लिंगमुत्तमम् ॥ २७ ॥ पूजयामास पयसा दिव्येन विधिनां तदा ॥ दृष्ट्वा शिप्रां सखीं तत्र संश्लेषं चाभवत्तयोः ॥ २८ ॥
ततः प्रभृति संजाता सा शिप्रा पूर्ववाहिनी ॥ त्रिषु लोकेषु विख्यातो देवो गंगेश्वरः स्वयम् ॥ गंगयाराधितो यस्मात्समीहितफलप्रदः ॥ २९ ॥
संस्तुता देवगंधर्वैर्गंगा देवनदी तदा ॥ ऋषिभिर्वालखिल्याद्यैस्तथान्यैर्मुनिभिर्मुदा ॥ ३० ॥ समुद्रस्तत्र संप्राप्तो मानिता सा महानदी ॥ लिंगे
नोक्ता तदा गंगा कलया स्थीयतामिति ॥ ३१ ॥ तत्समीपे महापुण्ये यावत्तिष्ठति मेदिनी ॥ अंगीकृतं समुद्रेण यथोक्तं च तथा
स्त्विति ॥३२॥ एवमुक्त्वा गता गंगा कलया तत्र संस्थिता ॥ गंगेश्वरं तु यः पश्येत्स्नात्वा शिप्रांभसि प्रिये ॥ ३३ ॥ गोसहस्रफलं तस्य जायते
नात्र संशयः ॥ सर्वतीर्थफलं तस्य सर्वधर्मफलं तथा॥३४॥सर्वयज्ञफलं सम्यक्सर्वदानफलं तथा ॥ सर्वयोगफलं देवि प्राप्नोत्येव निरन्तरम्॥३५॥तत्र
तीर्थानि सुभगे पृथिव्यां यानि कानिचित् ॥ धर्मारण्यं फल्गुतीर्थं पुष्करं नैमिषं गया ॥ ३६ ॥ प्रयागं च कुरुक्षेत्रं केदारममरेश्वरम् ॥ चंद्रभागा
विपाशा च सरयूर्देविका कुहूः ॥ ३७ ॥ गोदावरी शतद्रुश्च बाहुदा वेत्रवत्यपि ॥ सर्वा एवात्र सरितः संगताः संति गंगया ॥ ३८ ॥ गुप्तानि
पुण्यतीर्थानि सिद्धक्षेत्राणि चैव हि ॥ तत्र सर्वाणि तिष्ठंति कलामात्रेण पार्वति ॥ ३९ ॥ एतेषां फलमाप्नोति यः पश्यति समाहितः ॥ स्नात्वा
गंगेश्वरं देवं सत्यमेतन्मयोदितम् ॥ अतः पुण्यतमं स्थानं गीयते गणवंदिते ॥४०॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ गंगेश्वरस्य देवस्य
शृण्वंगारेश्वरं परम् ॥ ४१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये गंगेश्व
रमाहात्म्यवर्णनंनाम द्वाचत्वारिंशोऽध्यायः ॥ ४२ ॥ ॥ छ ॥ ॥ श्रीशिव उवाच ॥ ॥ चत्वारिंशत्तमं विद्धि त्र्यधिकं पर्वतात्मजे ॥ यस्य
दर्शनमात्रेण जायंते सर्वसंपदः ॥ १ ॥ आदिकल्पे पुरा जातो वक्रांगो लोहितच्छविः ॥ रौद्रस्त्वंगारसदृशो मम गात्राद्वरानने ॥ मया धृतो
धरण्यां स विख्यातो भूमिपुत्रकः ॥ २ ॥ जातमात्रे सुते तस्मिन्महाकाये भयावहे ॥ कंपिता धरणी देवी देवास्त्रस्ताः सवासवाः ॥ ३ ॥ क्षोभं
गताः समुद्राश्च चेलुश्च धरणीधराः ॥ तेनैव पीडितं सर्वं सदेवासुरमानुषम् ॥ ४ ॥ ऋषयो वालखिल्याश्च देवाः शक्रपुरोगमाः ॥ बृहस्पतिं पुर
स्कृत्य ब्रह्मलोकं गताः प्रिये ॥ ५ ॥ सोच्छ्वासाः कथयामासुर्नमस्कृत्य पितामहम् ॥ वृत्तांतं विस्तरात्सर्वं लोकत्रयविनाशनम् ॥ ६ ॥ हरगात्रो
द्भवेनैव जातमात्रेण लीलया ॥ लोकत्रयं समाक्रांतं पीडितं भक्षितं तथा ॥ ७ ॥ तच्छ्रुत्वा वचनं तेषां ब्रह्मा लोकपितामहः ॥ चिंतयित्वा तु तैः

१ विविधेन च--इ०पा० । २ देवि--इ०पा० । ३ वितस्ता--इ० पा० । ४ खगर्तासंगमोपरि गंगेश्वरस्थानम् । ५ अंगारेश्वरम्--इति शेषः--प्रकरणात् । ६ समानवाः--इ०पा० । ७ साकल्यम्--इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सार्द्धमाजगाम ममांतिकम् ॥ ८ ॥ मया पृष्टास्तु ते सर्वे किमर्थं भयविह्वलाः ॥ सोच्छ्वासहृदया दीनाः कस्माद्वो भयमागतम् ॥ ९ ॥ तैः सर्वं कथितं देवि ममाग्रे भयविह्वलैः ॥ त्वदंगसंभवेनैव देवदेव जगत्पते ॥ पीडितं भक्षितं चैव सदेवासुरमानवम् ॥ १० ॥ इति तेषां वचः श्रुत्वा क्षेमार्थं कृपया मया ॥ आकारितो मत्समीपमुवाच वदतां वरः ॥ ११ ॥ आदेशो दीयतां देव किं करोमीत्युवाच सः ॥ नाकर्ष त्वं जगदिदं मया प्रोक्तः पुनःपुनः ॥ १२ ॥ ममांगाद्रजसा जातस्तेनांगारक उच्यसे ॥ लोकानां स्वस्तये नित्यं मंगलोसि मया कृतः ॥ १३ ॥ इदानीं वक्रतां यातो वक्रस्त्वं गीयसे बुधैः ॥ विज्ञप्तोऽहं तदा तेन मम वाक्यं श्रुतं यदा ॥ आहारेण विना देव कथं तृप्तिर्भविष्यति ॥ १४ ॥ तस्मान्मे देहि सुस्थानमाधिपत्यं च देहि मे ॥ शक्तिं च देहि मे शीघ्रमाहारं देहि मे प्रभो ॥ १५ ॥ तस्य तद्वचनं श्रुत्वा पुत्रोऽयं मम वल्लभः ॥ तस्माद्दास्यामि परमं स्थानमक्षयमुत्तमम् ॥ १६ ॥ इति संचिन्त्य मनसा स्मृतं स्थानं मयोत्तमम् ॥ उत्संगे च सुतं कृत्वा प्रेम्णा प्रोक्तं पुनःपुनः ॥ १७ ॥ दत्तं पुत्र मया स्थानं महाकालवनोत्तमे ॥ गंगेश्वरस्य पूर्वे तु प्रशस्यं स्थानमुत्तमम् ॥ १८ ॥ खगर्ता चैव शिप्रा च संगमस्तत्र विद्यते ॥ १९ ॥ यदा मया धृता गंगा तदा सा चन्द्रमण्डलात् ॥ प्रमादात्पतिता भूमौ महाकालवनोत्तमे ॥ २० ॥ खगर्तेति च विख्याता खाद्भ्रष्टा प्रापतत्क्षितौ ॥ अतो मयावतारस्तु सहसा तत्र वै कृतः ॥ २१ ॥ लिंगमूर्तिरहं पुत्र तिष्ठामि सुरपूजितः ॥ तत्स्थानं दुर्लभं देवैस्तस्मात्त्वं गच्छ सत्वरम् ॥ २२ ॥ पूजितोऽहं त्वया तत्र संगमे लोकपूजिते ॥ त्रिषु लोकेषु यास्यामि ख्यातिं वै तव नामतः ॥ २३ ॥ मध्ये ग्रहाणां सर्वेषामाधिपत्यं मया तव ॥ दत्तं तृतीयकं स्थानं तत्र तृप्तिर्भविष्यति ॥ २४ ॥ पूजां प्राप्स्यसि तत्रैव ग्रहमध्ये व्यवस्थितः ॥ तिथिर्दत्ता चतुर्थी ते तस्यां ये व्रततत्पराः ॥ २५ ॥ त्वामुद्दिश्य करिष्यंति पूजां शांतिं सदक्षिणाम् ॥ तेन सर्वेण ते तृप्तिर्भविष्यति न संशयः ॥ २६ ॥ वारश्चैकश्च ते दत्तो मंगलार्थं मया तव ॥ नववस्त्रपरीधानं विद्यारंभं दिने तव ॥ तैलाभ्यंगं करिष्यंति न च प्राप्स्यंति ते बलम् ॥ २७ ॥ इत्युक्तस्तु मया देवि वक्रांगो मंगलः सुतः ॥ अंगारकेति विख्यातस्तथेत्यंगीचकार सः ॥ २८ ॥ सन्तुष्टस्तेन वाक्येन मदीयेन वरानने ॥ आजगाम मुदा युक्तो महाकालवनोत्तमे ॥ २९ ॥ शिप्रायाश्च तटे रम्ये खगर्त्तासंगमांतिकम् ॥ दृष्टोऽहं लिंगरूपेण परां तुष्टिमुपागतः ॥ ३० ॥ मया चालिंगितः प्रेम्णा चुम्बितः शिरसि प्रिये ॥ वरो दत्तो विशालाक्षि वांछितं ते भविष्यति ॥ ३१ ॥ दृष्टोऽहं च त्वया पुत्र

१ लोकानां मंगलोऽसि त्वमंगारक मया कृतः--इ०पा० । २ भवेदिति--इ०पा० । ३ चोक्तम्--इ०पा० । ४ गणेश्वरस्य--इ०पा० । ५ तिष्ठामि सुरपूजितः--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





भक्त्या चाराधितस्त्वया ॥ मम वाक्यं कृतं यस्मात्तस्मात्तुष्टोऽस्मि मगल ॥ ३२ ॥ अंगारेश्वरनामाहमद्यप्रभृति पुत्रक ॥ त्रिषु लोकेषु विख्या
तो भविष्यामि न संशयः ॥ ३३ ॥ ये मां पश्यंति सततं संगमेऽत्र व्यवस्थितम् ॥ न तेषां पुनरावृत्तिर्भविष्यति महीतले ॥ ३४ ॥ ये मां संपूज
यिष्यंति ह्यंगारकदिने नराः ॥ कलौ युगे कृतार्थास्ते भविष्यंति न संशयः ॥ ३५ ॥ चतुर्थ्यां मंगलदिने ये मां पश्यंति सुव्रताः ॥ न ते यास्यंति
संसारे घोरे दुःखशताकुले ॥ ३६ ॥ अमावास्या च भौमश्च संयोगो दृश्यते यदा ॥ खगर्त्तायाश्च शिप्रायाः संगमे देवपूजिते ॥ ३७ ॥ स्नात्वा
तदा प्रपश्यंति मामत्रैव व्यवस्थितम् ॥ तेषां पुण्यफलं देवि समासाच्छृणु सांप्रतम् ॥ ३८ ॥ वाराणस्यां प्रयागे च कुरुक्षेत्रे च यत्फलम् ॥ गयायां
पुष्करे प्रोक्तं तत्पुण्यमधिकं भवेत् ॥ ३९ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ अंगारेश्वरदेवस्य श्रूयतामुत्तरेश्वरम् ॥ ४० ॥ इति श्रीस्कांदे
महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्येंऽगारकेश्वरमाहात्म्यवर्णनंनाम त्रिचत्वारिंशोऽध्यायः ॥४३॥
॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ चत्वारिंशत्तमं विद्धि चतुर्भिरधिकं परम् ॥ यस्य दर्शनमात्रेण समीहितफलं लभेत् ॥ उत्तरेशमिति ख्यातं समीहि
तफलप्रदम् ॥१॥ पुरा नियुक्ताः शक्रेण ये मेघा वृष्टिकारकाः ॥ तैः प्लावितं जगत्सर्वं सपर्वतमहीतलम् ॥२॥ एकार्णवे ततो जाते देवा भीता वरानने ॥
निःस्वाध्यायवषट्काराः स्वधास्वाहाविवर्जिताः ॥३॥ नैवाप्यायनमस्माकं विना होमेन जायते ॥ वयमाप्यायिता विप्रैर्यज्ञभागैर्यथोचितैः ॥४॥ तेषां
वयं प्रयच्छामः कामान्यज्ञादिपूजिताः ॥ नास्ति तत्सर्वमेवैतदन्योन्यमवदन्सुराः ॥ ५ ॥ दृष्ट्वा पृथ्वीं जले मग्नां ब्रह्माणं शरणं गताः ॥ कथयामासु
रेत्युग्रं नमस्कृत्य पितामहम् ॥६॥ एकार्णवा मही जाता विनष्टाः क्रतवः प्रभो ॥ निःस्वाध्यायवषट्कारं जगज्जातं पितामह ॥७॥ देवानां वचनं श्रुत्वा
ब्रह्मा लोकपितामहः ॥ मुहूर्त्तं चिंतयामास किमेतदिति विस्मितः ॥ ८ ॥ अकाले प्रलयः कस्मान्निमग्ना पृथिवी जले ॥ गता सृष्टिर्मदीया तु व्यर्थं
जातं वचो मम ॥ ९ ॥ इति संचिंत्य हृदये सस्मार बलसूदनम् ॥ स्मृतमात्रस्तु बलहा ह्याजगाम पितामहम् ॥ १० ॥ प्रोवाच वचनं श्रुत्वा नम
स्कृत्य पितामहम् ॥ स्मृतोऽहं केन कार्येण देह्याज्ञां मे पितामह ॥ ११ ॥ ब्रह्मणोक्तस्तदा शक्रः किमर्थं प्लाविता मही ॥ असंबद्धैस्त्वदीयैश्च मेघैः
किं सहसा कृतम् ॥ १२ ॥ ततः सर्वे समाहूता मेघाः शक्रेण पार्वति ॥ पितामहसमक्षं तु समायाताश्च तत्क्षणात् ॥ १३ ॥ पितामहेन शक्रेण
मर्यादा च कृता तदा ॥ गजोनाम महामेघः पूर्वस्यां दिशि निर्मितः ॥ १४ ॥ गजाकारैस्ततो मेघैः सहस्रैर्दशभिर्वृतः ॥ गवयो दक्षिणामाशां षट्

१ उद्विग्नाः इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहस्राधिपः कृतः ॥ १५ ॥ शरभः पश्चिमामाशां सहस्राधिपतिः कृतः ॥ उत्तरोनाम यो मेघो मेघैः कोटिभिरावृतः ॥ १६ ॥ उत्तरस्यां दिशि तदा प्रभुत्वे संप्रतिष्ठितः ॥ मर्यादा च कृता देवि ब्रह्मणा वासवेन तु ॥ १७ ॥ प्रावृट्काले च वर्षध्वं नक्षत्रैर्जलजैर्द्रुतम् ॥ आर्द्रादिस्वातिपर्यंतं नक्षत्रद्शकं स्मृतम् ॥ १८ ॥ ब्रह्मशक्रवचः श्रुत्वा तथेति कृतनिश्चयाः ॥ ववृषुर्नियते काले तन्नामानि भवंति हि ॥ १९ ॥ एवं व्यवस्थिते लोके मर्यादायां स्थिता घनाः ॥ ब्राह्मणा विज्वरा जातास्त्रिदशा मुदिता भृशम् ॥ २० ॥ क्रूरग्रहैरथो रुद्धास्ते मेघा वृष्टिकारकाः ॥ शनैश्चरेण भौमेन भास्करेणाथ केतुना ॥ २१ ॥ पीडिताः शरणं जग्मुर्वासवं भयविह्वलाः ॥ निवेदितं भयात्सर्वं नमस्कृत्य पुनःपुनः ॥ २२ ॥ मेघानां वचनं श्रुत्वा संत्रस्तो वासवस्तदा ॥ उवाच वचनं तेषां नाहं शक्तो निवारणे ॥ ग्रहाणामसमर्थोऽहं सर्वदैव पयोधराः ॥ २३ ॥ अहं राज्यात्परिभ्रष्टः कृतः क्रूरग्रहैः पुरा ॥ स्थापितोऽहं कदाचिच्च सुप्रसन्नैर्ग्रहैः पदे ॥ २४ ॥ मम मान्याश्च पूज्याश्च ग्रहा एवं यतोधिकाः ॥ ग्रहाः सर्वहराः प्रोक्ता इति मे वर्त्तते मतिः ॥ ॥ २५ ॥ एतस्मिन्नंतरे भूमौ संजाता शतवार्षिकी ॥ अनावृष्टिर्महारौद्रा सर्वप्राणिविनाशिनी ॥ २६ ॥ अस्थिकंकालशकला श्वेतपर्वतसन्निभा ॥ पृथिवी तत्क्षणाज्जाता विना तोयेन पार्वति ॥ २७ ॥ देवाः सर्वे पुनर्भीता ब्रह्माणं शरणं गताः ॥ ऊचुश्च प्रणताः सर्वे त्राहि नः शरणागतान् ॥ ॥२८॥ अनावृष्ट्या जगत्सर्वं पीडितं च पितामह ॥ अकाले प्रलयो जातः पुनरेव च तादृशः ॥२९॥ त्वया च वासवेनैव नियुक्ता ये पयोधराः ॥ क्रूरग्रहैरतीवोग्रैः पीडितास्ते पितामह ॥ ३० ॥ देवानां वचनं श्रुत्वा ब्रह्मा लोकपितामहः ॥ अहं बिभेमि भो देवा ग्रहैस्तैर्बलवत्तरैः ॥ ३१ ॥ सर्वं जानामि माहात्म्यं ग्रहाणां क्रूरचेतसाम् ॥ शनैश्चरेण वक्रेण भवंतः पीडिताः सदा ॥ ३२ ॥ वरुणो यादसां नाथो मंगलेन प्रपीडितः ॥ राज्यभ्रष्टस्तु बहुधा केतुना वासवः कृतः ॥ ३३ ॥ शिरश्छेदो मया प्राप्तो वक्रेण रविणा पुरा ॥ एकैकशः समर्थास्ते किं पुनः संघशस्त्वमी ॥ तस्मात्सर्वे महादेवं गच्छामः शरणं वयम् ॥ ३४ ॥ ब्रह्मणो वचनं श्रुत्वा सर्वे देवाः सवासवाः ॥ ब्रह्माणं च पुरस्कृत्य मामेव शरणं गताः ॥ ३५ ॥ उक्तोऽहं त्रिदशैः सर्वैः पाहि नः शरणागतान् ॥ त्वं नो धाता विधाता च सृष्टिसंहारकारकः ॥ ३६ ॥ क्रूरग्रहैर्महादेव रुद्धा मेघाः समंततः ॥ न कुर्वंति प्रभो वृष्टिमनावृष्टिः सुदारुणा ॥ ३७ ॥ सर्वप्राणिविनाशाय संजाता शतवार्षिकी ॥ तेषां तद्वचनं श्रुत्वा मया ज्ञातं वरानने ॥ क्रूरग्रहाणां सामर्थ्यं यथा च विदितं मम ॥ ३८ ॥ इति ज्ञात्वा महादेवि उपायश्चिंतितो मया ॥ उत्तरोनाम यो मेघो मेघैः कोटिभिरावृतः ॥ आहूतस्तत्क्षणा

१ उत्तरोनाम यो मेघैः सहस्रैः कोटिभिर्वृतः-इ० पा० । २ वयोऽधिकाः-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



त्प्राप्तः किं करोमीत्युवाच ह ॥ ३९ ॥ मया प्रोक्तो ममादेशाद्गच्छ त्वं घनसंयुतः ॥ महाकालवनं रम्यं वांछितार्थफलप्रदम् ॥ ४० ॥ गंगेश्वरस्य देवस्य दक्षिणे लिंगमुत्तमम् ॥ तमाराधय यत्नेन स ते दास्यति वांछितम् ॥ ४१ ॥ एवमुक्तो मया मेघ उत्तरो मेघसंयुतः ॥ जगाम त्वरया युक्तो महाकालवनोत्तमे ॥ ४२ ॥ दृष्ट्वा वृष्टिकरं लिंगं पूजयामास भक्तितः ॥ शिप्राजलं गृहीत्वा तु स्नात्वास्नात्वा प्रयत्नतः ॥ तावद्यावज्जलं शिप्रां पुनरेवागतं प्रिये ॥ ४३ ॥ एतस्मिन्नंतरे तस्मादुद्भूतं धूममंडलम् ॥ लिंगमध्याद्वरारोहे ज्वालामालाकुलं महत् ॥ ४४ ॥ ततो ज्वालामयं सर्वमभूदम्बरगोचरम् ॥ तस्य ज्वालासमूहेन दग्धं वै ग्रहमंडलम् ॥ ४५ ॥ सनक्षत्रपथं यावत्ततो भीता ग्रहाः प्रिये ॥ तमेव शरणं प्राप्ता धूमज्वालाकुलाननाः ॥ ४६ ॥ ततो ब्रह्मा च विष्णुश्च तद्दृष्ट्वा महदद्भुतम् ॥ देवैर्वृतः सहस्राक्षो लिंगांतिकमुपागतः ॥ ४७ ॥ तल्लिंगं सुमहाज्वालं ज्वालाभिः पूरितांबरम् ॥ दुःप्रेक्ष्यं दुर्विदं भीमं वर्द्धमानं ददर्श सः ॥ ४८ ॥ अक्ष्णोर्निमेषमात्रेण ववृधे योजनायुतम् ॥ दृष्ट्वा तु वर्द्धमानस्य लिंगस्यात्यद्भुताकृतिम् ॥ सुरेशो मोहमापन्नो विसंज्ञाश्च ग्रहास्तदा ॥ ४९ ॥ ततस्तु तस्य लिंगस्य वारिधारा विनिःसृताः ॥ एकोद्देशाद्वरारोहे धरा त्वेकार्णवीकृता ॥ ५० ॥ लिंगस्यान्यप्रदेशात्तु वायुः समभवन्महान् ॥ इतरस्मिन्प्रदेशे तु समूहस्तडितामभूत् ॥ ५१ ॥ सधूमा समभूज्ज्वाला लिंगस्यान्यप्रदेशतः ॥ ५२ ॥ एवमत्यद्भुतं दृष्ट्वा वर्द्धमानं समंततः ॥ लिङ्गमव्यक्तमुद्भूतमापूरितनभोऽन्तरम् ॥ ५३ ॥ ग्रहाश्च विह्वला जाता धूमेनाकुलितेन्द्रियाः ॥ तुष्टुवुश्च तदा लिंगं दह्यमानाः समंततः ॥ ५४ ॥ ॥ ग्रहा ऊचुः ॥ ॥ नमः सुरूपाय सुरार्चिताय नमो विरूपप्रकृतिक्रियाय ॥ नमोनमो रूपनिराश्रयाय जलस्वरूपाय नमो नमस्ते ॥ ५५ ॥ इति स्तुतो यदा देवि ग्रहैः क्रूरैस्तदा प्रिये ॥ लिंगात्प्रादुरभूत्खस्थः स्वरूपो विग्रहाकृतिः ॥ ५६ ॥ भस्मधूसरसर्वांगो भोगिभोगांगदोज्ज्वलः ॥ हिमराशिनिभाकारो रजताचलनिर्मलः ॥ उवाच चैतान्प्रणतान्ग्रहान्कंपितकन्धरान् ॥ ५७ ॥ किं वा कामं मनोऽभीष्टं भवद्भ्यो यद्ददाम्यहम् ॥ ममामोघमिदं सर्वं दर्शनं चातिदुर्लभम् ॥ ५८ ॥ भवद्भ्यो लोकतुष्ट्यर्थं दर्शनं हि ददाम्यहम् ॥ एवमुक्ता ग्रहाः सर्वे प्रोचुः प्रांजलयस्तदा ॥ ५९ ॥ यदि देयो वरो देव यदि तुष्टोऽसि शंकर ॥ कर्मारंभेषु सर्वेषु पूजाऽस्माकं यथा भवेत् ॥ तथा कुरु महादेव तेन तृप्तिर्भविष्यति ॥ ६० ॥ एवं भविष्यतीत्युक्त्वा मेघं चोत्तरमुक्तवान् ॥ तुष्टोऽस्म्यहं तु ते वत्स गृहाण वरमीप्सितम् ॥ ६१ ॥ तच्छ्रुत्वा वचनं तत्र ह्युत्तरः प्राह हर्षितः ॥ यन्मे तुष्टोऽसि भगवंस्तन्मह्यं दीयतां वरम् ॥ ६२ ॥ यदास्माकं महाबाधां कदा

१ धूमज्वालाकुलास्तदा--इ० पा० । २ दुर्भिदम्--इ० पा० । ३ विदधाम्यहम्--इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कोपि करिष्यति ॥ तदा वृष्टिर्विधातव्या त्वया देव सदा भुवि ॥ ६३ ॥ रक्षा कार्या च मेघानां रक्षणीयास्त्वया वयम् ॥ एवमस्त्विति तेनोक्तं लिंगेन नगगात्रजे ॥ ६४ ॥ अद्यप्रभृति ते नाम्ना ख्यातिं यास्यामि भूतले ॥ उत्तरेश्वरसंज्ञोऽहं भविष्यामि न संशयः ॥ ६५ ॥ ये मां संपूजयिष्यंति भक्त्या परमया युताः ॥ तेषां दास्यामि सततं वांछितार्थफलं भुवि ॥ ६६ ॥ पश्यंति प्रयता ये मां कृत्वा नियमपूर्वकम् ॥ ते यास्यंति पुरं शैवं यावत्कल्पाष्टकायुतम् ॥ ६७ ॥ आरूढाः सूर्यसंकाशैर्विमानैः सार्वकामिकैः ॥ रुद्रकन्यासमाकीर्णैर्हंससारससंयुतैः ॥ ६८ ॥ नृत्यवादित्रनिर्घुष्टैरुत्कटध्वनिनादितैः ॥ दोधूयमानैश्च नरैः स्तूयमानाः सुरासुरैः ॥ ६९ ॥ प्रसंगाद्भक्तिहीनोऽपि यो मां पश्यत्यशाठचतः ॥ ऐश्वर्य्यं तस्य दास्यामि ह्युत्तरेषु कुरुष्वथ ॥ ७० ॥ स्मरिष्यति च यो नित्यं प्रभाते चोत्तरेश्वरम् ॥ स याति परमं स्थानं दाहप्रलयवर्जितम् ॥ ७१ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ उत्तरेश्वरदेवस्य शृणु त्रिलोचनेश्वरम् ॥ ७२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्य उत्तरेश्वरमाहात्म्यवर्णनंनाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ ॥ छ ॥ ॥ श्रीदेवदेव उवाच ॥ ॥ पंचचत्वारिंकं [1]विद्धि देवं त्रिलोचनेश्वरम् ॥ यस्य दर्शनमात्रेण सर्वसिद्धिरवाप्यते ॥ १ ॥ इतिहासमिहासीद्यत्पीठे विरजसंज्ञके ॥ त्रिलोचनस्य प्रासादे मणिमाणिक्यनिर्मिते ॥ २ ॥ नानाभंगिगवाक्षाढचे रत्नसानाविवापरे ॥ देदीप्यमानसौवर्णकलशेन विराजिते ॥ ॥ ३ ॥ पार्वणेन शशांकेन खेदादिव समासिते ॥ तत्र पारावतद्वंद्वं वसत्स्वैरं कृतालयम् ॥ ४ ॥ प्रातः सायं च मध्याह्ने कुर्वन्नित्यं प्रदक्षिणम् ॥ उड्डीयमानं परितः पक्षवातैरितस्ततः ॥ ५ ॥ रजःप्रासादसंलग्नं दूरीकुर्वद्दिशो दश ॥ त्रिलोचनेति सततं नाम भक्तैरुदाहृतम् ॥ त्रिविष्टपेति च तथा तयोः कर्णातिथीभवेत् ॥ ६ ॥ चतुर्विधानि वाद्यानि शंभुप्रीतिकराण्यलम् ॥ तयोः कर्णगुहां प्राप्य प्रतिशब्दं प्रतन्वते ॥ ७ ॥ मंगलारात्रिकज्योतिस्त्रिसंध्यं पक्षिणोस्तयोः ॥ नेत्रांतं निर्विशन्नित्यं भक्तचेष्टां प्रदर्शयत् ॥ ८ ॥ प्राणयात्रां विहायापि कदाचित्स्थिरमानसौ ॥ नोड्डीय वांछितं यातः पश्यंतौ कौतुकं खगौ ॥ ९ ॥ तत्रासकृज्जनाकीर्णं प्रासादं परितोऽवनौ ॥ तंडुलादि चरंतौ तौ कुर्वंतौ च प्रदक्षिणम् ॥ १० ॥ देवदक्षिणदिग्भागे विष्णुदेहोद्भवं जलम् ॥ तृषार्त्तौ पिबतो नित्यं स्नात्वा चाजग्मतुश्च तौ ॥ ११ ॥ तयोरित्थं विचरतोस्त्रिलोचनसमीपतः ॥ अगाद्बहुतिथः कालो द्विजयोः साधुचेष्टयोः ॥ १२ ॥ अथ देवालयस्कंधे गवाक्षांतर्गतौ च तौ ॥ श्येनेन केन

१ देवि—इ० पा० । २ वसत्—अडभाव आर्षः—अवसत्—इ०पा० । ३ न्हत्—इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

चिद्दृष्टौ क्रूरदृष्ट्या सुखं स्थितौ ॥ १३ ॥ तच्च पारावतद्वंद्वं श्येनः परिजिघृक्षया ॥ अवतीर्यांबरादाशु उपविष्टः शिवालये ॥ १४ ॥ ततो विलोकयामास तदागमविनिर्गमौ ॥ केन मार्गेण विशतो दुर्गमेण पतत्रिणौ ॥ १५ ॥ केनाध्वना च निर्यातः किंकाले कुरुतश्च किम् ॥ कथं युगपदेतौ मे ग्राह्यौ स्वैरं भविष्यतः ॥ १६ ॥ दुर्बलोऽप्याकलयितुं सहसारिर्न शक्यते ॥ कारिणां च सहस्रेण वराश्वानां च लक्षतः ॥ १७ ॥ न कर्म सिद्ध्ये नृपतेर्दुर्गेणैकेन यद्भवेत् ॥ दुर्गस्थो नाभिभूयेत विपक्षः केनचित्क्वचित्॥स्वतंत्रं यदि दुर्गं स्यांद्पमार्गप्रकाशकम्[1] ॥१८॥ इति दुर्गे बलं शंसञ्छ्येनो रोषारुणेक्षणः ॥ असाध्वसौ कलरवौ वीक्ष्य यातो नभोंगणे ॥ १९ ॥ अथ पारावती दक्षा विपक्षक्षपणेक्षणम् ॥ महाबलं दुर्गबलात्प्राह पारावतं पतिम् ॥ २० ॥ ॥ कलरव्युवाच ॥ ॥ प्रिय पारावत प्राज्ञ सर्वकामसुखारव ॥ तव दृग्विषयं प्राप्तः श्येनोऽयं प्रबलो रिपुः ॥ २१ ॥ स च तद्वाक्यमाकर्ण्य पारावत्याश्च सत्पतिः ॥ पारावतीमुवाचेदं का चिंतेति तव प्रिये ॥ २२ ॥ ॥ पारावत उवाच ॥ ॥ कति नाम न संतीह सुभगे व्योमचारिणः ॥ कति देवालयाद्येषु खगा नोपवसंति हि ॥ २३ ॥ कति चैव न पश्यंति नौ सुखस्थाविह प्रिये ॥ तेभ्यो यदीह भेतव्यं कुतो नौ तत्सुखं प्रिये ॥ २४ ॥ रम त्वं च मया सार्द्धं त्यज चिंतामिमां शुभे ॥ अस्य श्येनवराकस्य गणनापि न मे हृदि ॥२५॥ इत्थं पारावतवराच्छ्रुत्वा पारावती वचः ॥ मौनमालम्ब्य संतस्थे पत्युः पादार्पितेक्षणा ॥ २६ ॥ हितवत्योपदिश्यापि प्रियं प्रियचिकीर्षया ॥ पत्न्या जोषं समास्थेयं कार्यं पत्युर्वचः सदा ॥ २७ ॥ अन्येद्युरप्यथायातः श्येनः पश्यन्स दंपती ॥ अपरिच्छिन्नया दृष्ट्या यथा मृत्युर्गतायुषम् ॥ २८ ॥ अथ मंडलगत्या स प्रासादं परितो भ्रमन् ॥ प्रोवाच प्रेयसी नाथ दृष्टो दुष्टस्त्वयाऽहितः ॥ २९ ॥ तस्या वाक्यं समाकर्ण्य पुनः कलरवोऽब्रवीत् ॥ किं करिष्यत्यसौ मुग्धे मम व्योमविहारिणः ॥ ३० ॥ दुर्गं च स्वर्गतुल्यं मे यत्र नास्त्यरितो भयम् ॥ अयं न तां गतिं वेत्ति यां वेदाहं नभोंगणे ॥ ३१ ॥ प्रडीनोड्डीनसंडीनकांडव्यांडकपाटिका ॥ स्रंसिनी मंडलवती गतयोऽष्टावुदाहृताः ॥ ३२ ॥ यथैतासु हि कौशल्यं मयि वर्त्तति च प्रिये ॥ गतिषु क्वापि कस्यापि पक्षिणो न तथांबरे ॥ सुखेन तिष्ठ का चिंता मयि जीवति ते प्रिये ॥ ३३ ॥ इति तद्वचनं श्रुत्वा आस्थिता मूकवत्सती ॥ अपरेद्युरपि श्येनस्तत्रायातः शिलातले ॥ ३४ ॥ कियदंतरमासाद्य उपविष्टोऽतिहृष्टवत् ॥ आयामांते[2] च स स्थित्वा तत्कुलायकुलस्य च ॥ ३५ ॥ पुनः श्येनो विनिर्यातः सापि कांताऽब्रवीत्पुनः ॥ प्रिय स्थानमिदं त्याज्यं दुष्टदृष्टिविदूषितम् ॥ ३६ ॥ असौ क्रूरोऽतिनिकटमुपविष्टोऽतिहृष्टवत्॥

१ स्यादपमार्गप्रकाशनम्—इ०पा०। २ आयामो दैर्घ्यम् आयामान्ते--विष्वग्विस्तारितयोर्द्वयोः करयोर्वक्षसा सह यत्परिमाणं स आयामः—तावत्परिमाणपरिमिते प्रदेशे—इत्यर्थः।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सावज्ञं स पुनः प्राह किं करिष्यत्यसौ प्रिये ॥ ३७ ॥ मृगाक्षीणां स्वभावोयं प्रायशो भीरुवृत्तयः ॥ इतरेद्युरपि प्राप्तः स च श्येनो महाबलः ॥ ॥ ३८ ॥ तयोरभिमुखं तत्र स्थितो यामद्वयावधि ॥ पुनर्विलोक्य तद्वर्त्म शीघ्रं यातो यथागतम् ॥ ३९ ॥ गतेथ शकुनौ तस्मिन्सा बभाषे विहंगमम् ॥ नाथ स्थानांतरं यावो मृत्युर्वै निकटेऽन्वगात् ॥ ४० ॥ पुनर्दृष्टे प्रणष्टः स्यादावासश्च सुखं प्रिय ॥ प्रिय यस्यास्ति पक्षस्य गतिः सर्वत्र सिद्धिदा ॥ ४१ ॥ स किं स्वदेशरागेण नाशं प्राप्नोति बुद्धिमान् ॥ सोपसर्गं निजं देशं त्यक्त्वा योन्यं तु न व्रजेत् ॥ ४२ ॥ स पंगुर्नाशमाप्नोति कूलस्थित इव द्रुमः ॥ प्रियोदितं निशम्येति स भवित्रीदशार्दितः ॥ ४३ ॥ तां वाक्यं पुनरप्याह प्रिये मा भैः खगार्दिता ॥ अपरस्मिन्नहनि च स श्येनः प्रातरेव हि ॥४४॥ तद्वारदेशमासाद्य सायं यावत्स्थितोऽचलः ॥ अस्ताचलस्य शिखरं याते भानौ गते खगे ॥ ४५ ॥ कुलायाद्वाह्यमागत्योवाच पारावती पतिम् ॥ नाथ निर्गमनस्यायं कालः कालोऽस्ति दूरतः ॥४६॥ यावत्तावद्विनिर्याहि त्यक्त्वा मामपि शंसिनीम् ॥ त्वयि जीवति दुष्प्राप्यं न किंचिज्जगतीतले ॥ ४७ ॥ पुनर्दाराः पुनः पुत्राः पुनर्वसु पुनर्गृहम् ॥ यद्यात्मा रक्षितः पुंसां दारैरपि धनैरपि ॥ ४८ ॥ तदा सर्वं हरिश्चंद्रभूपतेरिव लभ्यते ॥ अयमात्मा प्रियो बंधुरयमात्मा महद्धनम् ॥४९॥ धर्मार्थकाममोक्षाणामयमात्मार्जकः परः ॥ यावदात्मनि वै क्षेमं तावत्क्षेमं जगत्त्रये ॥५०॥ सोऽपि क्षेमः सुगतिना यशसा सह वांछयते ॥ यशोहीनं तु यत्क्षेमं तक्षेमान्निधनं वरम् ॥५१॥ तद्यशः प्राप्यते पुंभिर्नीतिमार्गप्रवर्तिभिः ॥ अतो नीतिपथं चिंत्यं नाथ स्थानादितो व्रज ॥ न व्रजिष्यसि चेत्प्रातस्ततो मां संस्मरिष्यसि ॥५२॥ इत्युक्तोऽपि स वै पत्न्या पारावत्या सुमेधया ॥ न निर्ययौ ततः स्थानाद्भवित्र्या प्रतिवारितः ॥५३॥ अथोषसि समागत्य श्येनेन बलिना तदा ॥ निर्गमद्वारमारुद्धं किंचिद्रक्ष्यवता तदा ॥ ५४ ॥ दिनानि कतिचित्तत्रातिष्ठच्छ्येनो महाबलः ॥ पारावतमुवाचेदं धिक्कां पौरुषवर्जितम् ॥ ५५ ॥ किं वा युध्यस्व दुर्बुद्धे किं वा निर्याहि मे गिरा ॥ क्षुधाक्षीणो मृतः पश्चान्निरयं पश्यसि ध्रुवम् ॥ विधिरेव हि साहाय्यं न कुर्यात्तव नोदितम् ॥ ५६ ॥ इत्थं श्येनेन स प्रोक्तः पत्न्या स सहितः खगः ॥ अयुध्यत्तेन श्येनेन स्वदुर्गद्वारमाश्रितः ॥ ५७ ॥ क्षुधितस्तृषितः सोऽथ श्येनेन बलिना धृतः ॥ चरणेन दृढेनाशु चंच्वा सापि धृता खगी ॥ ५८ ॥ तावादायोड्डयांचक्रे श्येनो व्योमनि सत्वरम् ॥ चिंतयन्भक्षणस्थानमन्यत्पक्षिविवर्जितम् ॥ ५९ ॥ अथ पत्न्या कलरवः प्रोक्तस्तत्र सुमेधया ॥ यतोऽवमानिता नाथ त्वयाहं स्त्रीति बुद्धितः ॥ ६० ॥ अतोऽवस्थामिमां प्राप्तः किं कुर्यामबला यतः ॥ अधुनापि

१ प्रातः इ०पा० । २ खगम्—इ०पा० । ३ महामतिः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

वचश्चैकं करोपि यदि मे प्रिय ॥ ६१ ॥ तदा हितं ते वक्ष्यामि कुर्वे तदविचारितम् ॥ ममैकवाक्यकरणात्स्त्रीजितो न भविष्यसि ॥ ६२ ॥ याव
दास्यं गतास्म्यस्य यावत्खस्थो न भूमिगः ॥ तावदात्मविमुक्त्यै त्वं चंच्वा पादं दृढं दश ॥ ६३ ॥ इति पत्नीवचः श्रुत्वा तथा स कृतवान्खगः ॥
स पीडितो दृढं पादे श्येनश्चीत्कृतवान्बहु ॥ ६४ ॥ तेन चीत्करणेनाथ मुक्ता सा मुखसंपुटात् ॥ पादांगुलीनां शून्यत्वे सोऽपि पारावतोऽपतत् ॥
॥ ६५ ॥ विपद्यपि च प्राज्ञैर्न संत्याज्यः क्वचिदुद्यमः ॥ क्व च चंचुपुटस्तस्य क्व च तत्पादपीडनम् ॥६६॥ क्व च द्वयोस्तथाभूतं दूरे मोक्षणमद्भुतम्॥
दुर्बलेऽप्युद्यमः श्रेयानिति शास्त्रेषु गीयते ॥ ६७ ॥ तस्माद्भाग्यानुसारेण फलत्येव सदोद्यमः ॥ प्रशंसंत्युद्यमं चातो विपद्यपि मनीषिणः ॥ ६८ ॥
अथ तौ कालयोगेन जंबूमार्गे मृतौ तदा ॥ जंबूमार्गे मृता ये वै तेषां स्वर्गः सदाऽक्षयः ॥ ६९ ॥ पुण्यशेषे तदा जातो गंधर्वतनयः शुभः ॥ मंदा
रदामतनयो नाम्ना परिमलालयः ॥ ७० ॥ अनेकविद्यानिलयः कलाकौशलभाजनम् ॥ कौमारं वपुरासाद्य शिवभक्तिपरोऽभवत् ॥ ७१ ॥
नियमं चापि जग्राह विजितेंद्रियमानसः ॥ [1]एकपत्नीव्रतं नित्यं चरिष्यामीति निश्चितम् ॥ ७२ ॥ परयोषित्समासक्तिरायुः कीर्तिं बलं सुखम् ॥
हरेत्स्वर्गगतिं चापि तस्मात्तां वर्जयेत्सुधीः ॥ ७३ ॥ अपरं चापि नियमं स शुचिष्मान्समाददे ॥ गतजन्मांतराभ्यासात्त्रिलोचनसमाश्रयात् ॥७४॥
समस्तपुण्यनिलयः समस्तार्थप्रकाशकः ॥ समस्तकामजनकं परानंदैककारणम् ॥ ७५ ॥ यावच्छरीरं निरुजं[3] यावन्नेंद्रियविप्लवः ॥ तावत्त्रिलोच
नोर्वंत्यां मंतव्यो नात्र संशयः ॥ ७६ ॥ इत्थं मंदारदामिः स काश्यां परिमलालयः ॥ नित्यं त्रिविष्टपं द्रष्टुं समागच्छेत्प्रयत्नतः ॥७७॥ पारावत्यपि
संजाता रत्नदीपस्य मंदिरे ॥ नागराजस्य पाताले नाम्ना रत्नावलीति च ॥ ७८ ॥ समस्तनागकन्यानां रूपशीलकलागुणैः ॥ एकैव रत्नभूताऽऽसीद्रत्न
दीपोरगात्मजा ॥ ७९ ॥ तस्याः सखीद्वयं चासीदेका नाम्ना प्रभावती ॥ कलावती तथान्या च नित्यं तदनुगे शुभे ॥ ८० ॥ स्वदेहादनपायिन्यौ
छायाकांती यथा तथा ॥ पूर्वे सख्यौ भवेतां हि रत्नावल्या महेश्वरि ॥ ८१ ॥ सा तु बाल्ये व्यतिक्रांते किंचिदुद्भिन्नयौवना ॥ शिवभक्तं स्व
पितरं दृष्ट्वा नियममग्रहीत् ॥ ८२ ॥ पितस्त्रिलोचनं काश्यामर्चयित्वा दिनेदिने ॥ आभ्यां सखीभ्यां सहिता मौनं त्यक्ष्यामि नान्यथा ॥
॥ ८३ ॥ एवं नागकुमारी सा सखीद्वयसमन्विता ॥ त्रिलोचनं समभ्यर्च्य गृहानहरहर्व्रजत् ॥ ८४ ॥ मां प्रत्यग्रैः सुकुसुमैः सुशुभैरि
ष्टगंधिभिः ॥ सुविचित्राणि माल्यानि परिगुंफ्यार्चयेद्विभुम् ॥ ८५ ॥ तिस्रोऽपि गीतं गायंति ललितं चैव सुस्वरम् ॥ नारीमंडलभेदेन 

१ दुर्बलेऽप्युद्यमरते बलं भाग्यं यतः श्रयेत्—इ० पा० । २ चार्याः—इ० पा० । ३ निरुजम्—ह्रस्वत्वमार्षम्—नीरुजम्—रोगरहितम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लास्यं तिस्रोऽपि कुर्वते ॥ ८६ ॥ वीणावेणुमृदंगांश्च लयतालविचक्षणाः ॥ वादयंति मुदा युक्तास्तिस्रोऽपि विरमंति वै ॥ ८७ ॥ इत्थमाराधयंतीशं तिस्रो नागकुमारिकाः ॥ विचित्रभंगीमालाभिरर्चयंत्यस्त्रिलोचनम् ॥ ८८ ॥ प्रातश्चतुर्थ्यां ताः स्नात्वा तीर्थे पिलिपिले शुभे ॥ त्रिलोचनं समर्च्याथ प्रसुप्ता रंगमण्डपे ॥ ८९ ॥ सुप्तासु तासु स शिवस्त्रिनेत्रः शशिभूषणः ॥ वामार्द्धविलसच्छक्तिर्नागयज्ञोपवीतकः ॥ ९० ॥ लिंगादेव हि निर्गत्य गंगापन्नगमेखलः ॥ प्रत्युवाच ततः कन्या विभुरुत्तिष्ठतेति सः ॥ ९१ ॥ उत्थाय ता विनिर्मथ्य लोचने श्रुतिसंगमे ॥ अंगमोटनवत्यश्च तदा निर्घूर्णितेक्षणाः ॥ ९२ ॥ यावत्पश्यंति पुरतः संभ्रमापन्नमानसाः ॥ अतर्किताऽगमस्तावत्ताभिर्दृष्टस्त्रिलोचनः ॥ ९३ ॥ ववंदिरेऽथ ता बाला ज्ञात्वा लक्ष्मभिरीश्वरम् ॥ तुष्टुवुश्च प्रहृष्टास्ताः सन्नकंठचोऽतिविक्लवम् ॥ ९४ ॥ जय शंभो जयेशान जय सर्वग सर्वद ॥ जय त्रिपुरसंहर्तर्जयांधकनिषूदन ॥ ९५ ॥ जय जालंधरहर जय कंदर्पदर्पहृत् ॥ जय त्रैलोक्यजनक जय त्रैलोक्यवंदित ॥ जय भक्तजनाधीश जय प्रमथनायक ॥ ९६ ॥ नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमोनमः ॥ त्रिलोचन नमस्तुभ्यं त्रिविष्टप नमोऽस्तु ते ॥ ९७ ॥ इत्युक्त्वा दंडवद्भूमौ प्रणिपेतुः कुमारिकाः ॥ अथोत्थाप्य कुमारीस्ताः प्रोवाच शशिभूषणः ॥ ९८ ॥ सुतो मंदारदाम्नश्च नाम्ना परिमलालयः ॥ पतिर्विद्याधरवरो भवतीनां भविष्यति ॥ ९९ ॥ चिरं विद्याधरे लोके भोगान्भुक्त्वा समंततः ॥ ततो ह्यवंतिकां प्राप्य मां ध्यात्वा सिद्धिमाप्स्यथ ॥ १०० ॥ जन्मांतरेपि मे भक्तिर्भवतीभिश्च तेन च ॥ विहिता तेन वो जन्म निर्मलं भक्तिभावितम् ॥ १०१ ॥ एतत्प्रभावतीस्तोत्रं ये पठिष्यंति मे पुरः ॥ तेभ्यः कामान्प्रदास्यामि भवतीना मयं वरः ॥ १०२ ॥ इत्युक्तवति देवेशे ताः कन्या हृष्टमानसाः ॥ प्रणम्य प्रोचुरीशानं प्रबद्धकरसंपुटाः ॥ १०३ ॥ ॥ ॥ नागकन्या ऊचुः ॥ पृच्छामो ब्रूहि नो नाथ करुणाकर शंकर ॥ जन्मांतरे कथं सेवा चतुर्भिर्भवतः कृता ॥ १०४ ॥ ततः प्राक्तनवृत्तांतमेतस्यापि कृतात्मनः ॥ अस्माकमपि चाख्याहि कृपां कुरु कृपानिधे ॥ १०५ ॥ इति श्रुत्वा प्रणयतो बालोदीरितमीप्सितम् ॥ प्रोवाच तासामपि च भवांतरविचेष्टितम् ॥ १०६ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणुध्वं नागतनयास्तिस्रोपि हि समाहिताः ॥ प्राग्भवं भवतीनां च तस्यापि कथयाम्यहम् ॥ १०७ ॥ एषा रत्नावली पूर्वमासीत्पारावती खगी ॥ स च विद्याधरवरः पतिरस्याः खगोऽभवत् ॥ १०८ ॥ प्रासादे च ममैताभ्यामुषितं सुचिरं सुखम् ॥ रजः प्रासादसंलग्नं नुन्नं पक्षानिलैः पुनः ॥ १०९ ॥ उपरिष्टादधस्ताच्च कृता भूरिप्रदक्षिणाः ॥ व्योम्नि[3] संचरमाणाभ्यां संचीर्णं च

१ भक्तिभावतः–इ० पा० । २ शुभम्–इ० पा० । ३ व्योम्ना–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ममाजिरे ॥ ११० ॥ स्नातं चतुर्नदे तीर्थे पीतं तत्रांबु चासकृत् ॥ आभ्यां कलरवाभ्यां च कृताः कलरवा मुदा ॥ १११ ॥ एताभ्यां स्थिर चित्ताभ्यां मुदिता त्वमतीव हि ॥ दृष्ट्वा हि कौतुकान्यत्र मम भक्तैः कृतान्यपि ॥ ११२ ॥ अमूभ्यां बहुशो दृष्टा मम मंगलदीपिकाः ॥ पीतं श्रुतिपुटाभ्यां च मम नामाक्षरामृतम् ॥ तिर्यग्योनिप्रभावेन न मृतौ मम संनिधौ ॥११३॥ जंबूमार्गे मृतौ यस्मात्स्वर्गप्राप्तिकरे ध्रुवम् ॥ तस्मात्पारावती ह्येषा रत्नदीपसुताऽभवत् ॥ ११४ ॥ पतिः पारावतोऽस्याश्च जातो विद्याधरांगजः ॥ एषा प्रभावती नागी नागराजस्य सद्मनि ॥ इह जन्मनि कन्यासीत्पूर्वजन्म ब्रवीमि च ॥ ११५ ॥ त्रिशिखस्योरगेंद्रस्य सुता चेयं कलावती ॥ एतस्या अपि वृत्तांतं निशामय तु वच्म्यहम् ॥ ॥ ११६ ॥ भवांतरे तृतीयेंतः कन्ये चारायणस्य च ॥ आस्तां महर्षेः शीलाढ्ये प्रेमवत्यौ परस्परम् ॥ ११७ ॥ पित्रा चारायणेनापि ताभ्यां संप्रेरितेन वै ॥ आमुष्यायणपुत्राय दत्ते नारायणाय हि ॥ ११८ ॥ अप्राप्तयौवनोरण्ये समिदाहरणाय वै ॥ गतो विधिवशाद्दष्टो दंदशूकेन कानने ॥ ११९ ॥ भवानीगौतमीनाम्न्यौ ते तु चारायणांगजे ॥ वैधव्यदुःखमापन्ने दैन्यग्रस्ते बभूवतुः ॥ १२० ॥ अत एव प्रयत्नेन परिणेता विवर्जयेत् ॥ देवतासरिदाह्वानकन्यापाणिग्रहं सुधीः ॥ १२१ ॥ अथर्षेः कस्यचिद्दैवादाश्रमे देवसंन्निभे[1] ॥ रंभाफलान्यदत्तानि मोहाज्जग्रहतुस्तदा ॥ ॥ १२२ ॥ कृत्वा नानोपवासादिव्रतानि ब्राह्मणांगजे ॥ अध्यास्य निधनं कालाच्छाखामृग्यौ बभूवतुः ॥ १२३ ॥ फलचौर्यविपाकेन वानरत्वं तयोरभूत् ॥ शीलरक्षणभावेनावंत्यां जनिमवापतुः ॥ १२४ ॥ स च नारायणो विप्रः पितृशुश्रूषणे रतः[2] ॥ दष्टोऽपि दंदशूकेन काश्यां[3] पारावतोऽभवत् ॥ १२५ ॥ एवं भवांतरे चासीदेतयोः पतिरेव सः ॥ तिसृणां भवतीनां च भावी भर्ता पुनः स वै ॥ १२६ ॥ प्रासादस्यापि पार्श्वे तु न्यग्रोधश्च महानगः ॥ तस्मिञ्छाखिनि वासाढ्ये शाखामृग्यौ बभूवतुः ॥ १२७ ॥ विष्णुदेहजले तीर्थे क्रीडया च ममज्जतुः ॥ पपतुश्चापि पानीयं तस्मिंस्तीर्थे तृषातुरे ॥ १२८ ॥ जातिस्वभावचापल्यात्क्रीडंत्यौ च प्रदक्षिणम् ॥ चक्रतुर्बहुकृत्वश्च लिंगं ददृशतुर्बहु ॥ १२९ ॥ विचरंत्यावितः स्वैरं तत्र न्यग्रोधसंनिधौ ॥ केनचिद्योगवेषेण पाशेन च नियंत्रिते ॥१३०॥ भिक्षार्थं शिक्षिते तेन न प्लुतिर्निवर्त्तनम् ॥ अथ ते क्वापि मर्कट्यौ कालधर्मवशंगते ॥ १३१ ॥ अवन्तीवासपुण्येन त्रिलोचनस्य सेवया ॥ प्रादक्षिण्यानुरूपेण जाते नागसुते अपि ॥ १३२ ॥ अधुना तं पतिं प्राप्य विद्याधरकुमारकम् ॥ निर्विश्य स्वर्गभोगांश्चावंत्यां निर्वृतिमाप्स्य ॥ १३३ ॥ यैरल्पमपि चावंत्यां कृतं

१ देवसंनिधौ–इ० पा० । २ पितृशुश्रूषणव्रतः–इ० पा० । ३ वै काश्याम्–इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्म शुभावहम् ॥ तस्य मोक्षः परीपाको निश्चितं मदनुग्रहात् ॥ त्रैलोक्येऽपि च सर्वस्मिञ्छ्रेष्ठाऽवन्तीपुरी सदा ॥ १३४ ॥ ततोऽपि लिंगमोंकारं ततोऽप्यत्र त्रिलोचनम् ॥ तिष्ठमानोऽत्र लिंगेऽहं भुक्तिं मुक्तिं ददामि वै ॥ १३५ ॥ अतः सर्वप्रयत्नेनावन्त्यां पूज्यस्त्रिलोचनः ॥ इत्युक्त्वा देवदेवेशस्तत्प्रासादांतरेऽविशत् ॥१३६॥ लिंगस्वरूपमासाद्य शुभं त्रिभुवनादपि ॥ ताश्च स्वसदनं प्राप्य तद्वृत्तांतमशेषतः ॥ स्वमातुः पुरतश्चोक्त्वा कृतकृत्या इवाभवन् ॥ १३७ ॥ एकदा माधवे मासि सह सार्थाः समागताः ॥ विद्याधरास्तथा नागा मिलिताः सपरिच्छदाः ॥ १३८ ॥ विरजस्के महाक्षेत्रे त्रिलोचनसमीपतः ॥ देवस्य वरदानाच्च पृष्ट्वान्योन्यं कुलावलिम् ॥ १३९ ॥ विद्याधराय ताः कन्या नागैस्तिस्रोऽपि कल्पिताः ॥ मंदारदामा सन्तुष्टः प्राप्य तच्च स्नुषात्रयम् ॥१४०॥ रत्नदीपैश्च नागेन्द्रः पद्मी च भुजगेश्वरः ॥ विशिखोऽपि फणींद्रश्च दृष्टा एते त्रयोऽपि च ॥ जामातरं समासाद्य शुभं परिमलालयम् ॥ १४१ ॥ अन्योऽन्यं स्वजनास्ते तु मुदा विकसितेक्षणाः ॥ विवाहोत्सवमारच्य स्वंस्वं भवनमाविशन् ॥ १४२ ॥ त्रिलोचनस्य लिंगस्य वर्णयंतोऽपि गौरवम् ॥ स च विद्याधरः श्रीमान्नागीभिर्विपुलं सुखम् ॥ भुक्त्वावन्तीं ततः प्राप्य संसेव्य च त्रिलोचनम् ॥ १४३ ॥ गायन्गीतं सुमधुरं नार्गीभिः सहितः कृती ॥ आत्मानं चातिविस्मृत्य मध्येलिंगं लयं गतः ॥ १४४ ॥ त्रिलोचनस्य महिमा कलौ देवेन गोपितः ॥ ततोल्पसत्त्वा मनुजा न तल्लिंगमुपासते ॥ १४५ ॥ त्रिलोचनकथामेतां श्रुत्वा पापान्वितोऽप्यहो ॥ विपापो जायते मर्त्यो लभते च परां गतिम् ॥ १४६ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ त्रिलोचनस्य देवस्य शृणु वीरेश्वरं परम् ॥ ॥ १४७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिंगमाहात्म्ये त्रिलोचनमाहात्म्यवर्णनंनाम पंचचत्वारिंशोऽध्यायः ॥ ४५ ॥ ॥ छ ॥ ॥ श्रीहर उवाच ॥ ॥ षट्चत्वारिंशकं देवि वीरेश्वरमथो शृणु ॥ यस्य दर्शनमात्रेण कुलवृद्धिर्भवेद्ध्रुवम् ॥ १ ॥ निशामय महा वि वीरेशाविर्भवं परम् ॥ यच्छ्रुत्वा पितरः पुण्यं प्राप्नुयुर्विपुलं शिवे ॥ २ ॥ आसीदमित्रजिन्नाम राजा परपुरंजयः ॥ धार्मिकः सत्त्वसंपन्नः प्रजारंजनतत्परः ॥ ३ ॥ यशोधनो वदान्यश्च सुधीर्ब्राह्मणदैवतः ॥ सदैवावभृथस्नातः परिक्लिन्नशिरोरुहः ॥४॥ विनीतो नीतिसंपन्नः कुशलः सर्वकर्मसु ॥ विद्याविशारदश्चाथ गुणवान्गुणिवत्सलः ॥ ५ ॥ कृतज्ञो मधुरालापः पापकर्मपराङ्मुखः ॥ सत्यवाञ्छौ

१ अवाच्यरूपम्–इ०पा० । २ देवस्य–इ०पा० । ३ अपि हि–इ०पा० । ४ अवंत्याम् 'नामदारपुरा' इत्याख्ये स्थाने–त्रिलोचनमहादेवस्थानं विद्यते । ५ सति–इ०पा० । ६ निःसपत्नोऽपि–इ०पा० । ७ विद्यादिपारगश्चाथ–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





चनिलयः सत्यवाग्विजितेंद्रियः ॥ ६ ॥ रणांगणे कृतांतस्य संख्यावांश्च सदोजिरे ॥ कामिनीकेलिकालज्ञो युवापि स्थविरप्रियः ॥ ७ ॥ धर्मार्थ धनकोशश्च समृद्धबलवाहनः ॥ सुभगश्च सुरूपश्च सुमेधाः सुप्रजाप्रियः ॥ ८ ॥ स्थैर्यधैर्यसमापन्नो देशकालविचक्षणः ॥ मान्यानां मानदो नित्यं सर्वदूषणवर्जितः ॥ ९ ॥ वासुदेवांघ्रियुगले चेतोवृत्तिं निधाय च ॥ चकार राज्यं निर्द्वंद्वं धिग्धिंगीतिविवर्जितम् ॥ १० ॥ अलंघ्यशासनः श्रीमान्विष्णुभक्तिपरायणः ॥ अभुनक्प्रवरान्भोगान्समंताद्विष्णुसंस्कृतान् ॥ ११ ॥ हरेराराधनान्युच्चैः प्रतिसौधं पदेपदे ॥ तस्य राज्ये समभवन्महाभागनिधेः शिवे ॥ १२ ॥ गोवृन्दगोपगोपालगोपीजनमनोहर ॥ गदांपाणे गुणातीत गुणाढ्य गरुडध्वज ॥ १३ ॥ केशिहन्कैटभाराते कंसारे कमलापते ॥१४॥ कृष्ण केशव कंजाक्ष कीनाशभयनाशन ॥ पुरुषोत्तम पापारे पुण्डरीकविलोचन ॥१५॥ पीतकौशेयवसन पद्मनाभ परात्पर ॥ जनार्दन जगन्नाथ जाह्नवीजलजन्मभूः ॥१६॥ जन्मिनां जन्महरण जंजंपूकौघनाशन ॥ श्रीवत्सवक्षः श्रीकंठ श्रीकर श्रेयसांनिधे ॥ १७ ॥ श्रीरंग शार्ङ्गकोदंड शौरे शीतांशुलोचन॥दैत्यारे दानवाराते दामोदर दुरंतक ॥१८॥ देवकीहृदयानंद दंदशूकेश्वरेशय ॥ विष्णो वैकुण्ठनिलय बाणारे विष्टरश्रवः ॥१९॥ विष्वक्सेन विभो वीर वनमालिन्बलिप्रिय ॥ त्रिविक्रम त्रिलोकेश चक्रपाणे चतुर्भुज ॥२०॥ इत्यादीनि पवित्राणि नामानि प्रतिमंदिरे ॥ स्त्रीवृद्धबालगोपालवदनोदीरितानि तु ॥ २१ ॥ श्रूयंते यत्र कुत्रापि रम्याणि मधुविद्विषः ॥ सुरम्यकाननान्येव विलोक्यंते गृहेगृहे ॥ ॥ २२ ॥ विचित्राणि चरित्राणि गीयंते च गृहेगृहे ॥ सौधभित्तिषु दृश्यंते चित्राणि कृत्रिमाणि च ॥ २३ ॥ ऋते हरिकथायास्तु नान्या वार्त्ता निशम्यते ॥ हरिणा नैव वध्यंते हरिणा मांसधारिणः ॥ २४ ॥ तस्य राज्ञो भयाद्व्याधैररण्ये सुखचारिणः ॥ न मत्स्या नैव च बका वराहाश्च न केनचित् ॥ २५ ॥ हन्यंते क्वापि तद्भीत्या मत्स्यमांसाशिनाऽपि वै ॥ अपुत्रा न नरास्तस्य राष्ट्रेऽमित्रजितः क्वचित् ॥ २६ ॥ स्तनपानं न कुर्वंति संप्राप्य हरिवासरम् ॥ पशवोऽपि तृणाहारं परित्यज्य हरेर्दिने ॥ उपोषणपरा जाता अन्येषां का कथा नृणाम् ॥ २७ ॥ महामहोत्सवः सर्वैः पुरौकोभिर्वितन्यते ॥ अस्मिन्प्रशासति भुवं संप्राप्ते हरिवासरे ॥ २८ ॥ यो विष्णुभक्तिरहितः प्राणैरपि धनैरपि ॥ स एव दण्ड्यो भुंक्ते यो राज्ञोऽमित्रजितः क्षितौ ॥ २९ ॥ अन्त्यजा अपि तद्राष्ट्रे शंखचक्रांकधारिणः ॥ संप्राप्य वैष्णवीं दीक्षां दीक्षिता इति

१ धिग्धिगीतिविवर्जितम्—'अपालनप्रयुक्तप्रजाक्ृतराजधिक्कारवर्जितम्' 'अतिवृष्टिरनावृष्टिर्मूषका नकुलाः खगाः । प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः ॥' इत्युक्तलक्षणेत्युपद्रववर्जितं च—इत्यर्थः । २ विष्णुसंस्कृतान्--लक्ष्मीपतिविष्णुवत्सम्यगुपकल्पितान्—इत्यर्थः । ३ गदाधार--इ०पा० । ४ जंजपूकौघः--पापौघः--इत्यर्थः । ५ जायन्ते—इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्थिताः ॥ ३० ॥ शुभानि यानि कर्माणि क्रियंतेऽनुदिनं जनैः ॥ वासुदेवे समर्प्यंते तानि तैरफलेप्सुभिः ॥ ३१ ॥ विना मुकुंदगोविंदपरमानंदमच्युतम् ॥ नान्यो ज्प्येत नम्येत सभाज्येत जनः क्वचित् ॥ कृष्ण एव परो बंधुस्तस्यासीदवनीपतेः ॥३२॥ एवं तस्मिन्महीपाले राज्ये सम्यक्प्रशासति ॥ एकदा नारदः श्रीमांस्तं दिदृक्षुः समाययौ ॥ ३३ ॥ राज्ञा समर्चितः सोऽथ मधुपर्कविधानतः ॥ नारदो वर्णयामास तममित्रजितं नृपम् ॥ ३४ ॥ ॥ श्रीनारद उवाच ॥ ॥ धन्योऽसि कृतकृत्योऽसि मान्योऽप्यसि दिवौकसाम् ॥ सर्वभूतेषु गोविंदं परिपश्यन्विशांपते ॥ ३५ ॥ यो वेदपुरुषो विष्णुर्यो यज्ञपुरुषो हरिः ॥ योंऽतरात्मास्य जगतः कर्त्ता हर्तावित्ता विभुः ॥ ३६ ॥ तन्मयं पश्यतो विश्वं तव भूपालसत्तम ॥ दर्शनं प्राप्य शुभदं शुचित्वमगमं परम् ॥ ३७ ॥ एषं एव हि सारोऽत्र संसारे क्षणभंगुरे ॥ कमलाकांतपादाब्जभक्तिभावोऽखिलप्रदः ॥ ३८ ॥ परित्यज्य हि यः सर्वं विष्णुमेकं सदा भजेत् ॥ सुमेधसं भजंते तं पदार्थाः सर्व एव हि ॥ ३९ ॥ हृषीकेशे हृषीकाणि यस्य स्थैर्यं गतान्यहो ॥ स एव स्थैर्यमाप्नोति ब्रह्मांडेऽतीव चंचले ॥ ४० ॥ यौवनं धनमायुष्यं जलं पद्मदले यथा ॥ अतीव चंचलं ज्ञात्वाऽच्युतमेव सदाश्रयेत् ॥ ४१ ॥ वाचि चेतसि कर्णेऽथ यस्य देवो जनार्दनः ॥ स एव सर्वदा वंद्यो नररूपी जनार्दनः ॥ निर्व्याजप्रणिधानेन शीलयित्वा श्रियःपतिम् ॥ ४२ ॥ पुरुषोत्तमतां को न प्राप्तस्त्वमिव भूतले ॥ अनया विष्णुभक्त्या ते संतुष्टेंद्रियमानसः ॥ उपकर्तुमना ब्रूयां तन्निशामय भूपते ॥ ४३ ॥ मालाविद्याधरसुता नाम्ना मलयगंधिनी ॥ क्रीडंती पितुराक्रोडे हृता कंकालकेतुना ॥ ४४ ॥ कपालकेतुपुत्रेण दानवेन बलीयसा ॥ आगामिन्यां तृतीयायां तस्याः पाणिग्रहः किल ॥ ४५ ॥ पाताले चंपकावत्यां नगर्यां सास्ति सांप्रतम् ॥ हाटकेशात्समागच्छंस्तयाऽहं साश्रुनेत्रया ॥ ॥ ४६ ॥ दृष्टः प्रणम्य विज्ञप्तो यथा तच्च निशामय ॥ ब्रह्मचारिन्मुनिश्रेष्ठ गंधमादनशैलतः ॥ ४७ ॥ बालक्रीडनकासक्तां मां जह्रे त्रस्तमानसाम् ॥ कंकालकेतुर्दुर्वृत्तस्तस्य नास्ति च घातकः ॥ ४८ ॥ स स्वत्रिशूलघातेन म्रियते नान्यथा रणे ॥ जगत्पर्याकुलीकृत्य निद्रात्यथ विनिर्भयः ॥ ४९ ॥ यदि कोपि कृतज्ञो मां हत्वेमं दुष्टदानवम् ॥ मद्दत्तेन त्रिशूलेन नयेद्भद्रं च वै कृतम् ॥ ५० ॥ यद्यत्रोपचिकीर्षुस्त्वं रक्ष मां दुष्टदानवात् ॥ ममापि हि वरो दत्तो भगवत्योमया पुरा ॥ विष्णुभक्तो युवा धीमान्पुत्रि त्वां परिणेष्यति ॥ ५१ ॥ आतृतीयातिथि यथा तद्वाक्यं तथ्यतां व्रजेत् ॥ तथा निमित्तमात्रं त्वं भव यत्नं समाचर ॥ ५२ ॥ इति तद्वचनाद्राजन्विष्णुभक्तिपरायणम् ॥ युवानं चापि धीमन्तं त्वामनुप्राप्त

१ एकः—इ० पा० । २ कमलाकान्तपादाब्जभक्तियोगः—इ०पा० । ३ यदि कोऽपि कृतज्ञः इमं दुष्टदानवं मद्दत्तेन त्रिशूलेन हत्वा मां नयेत्—तेन इति शेषः तेन वै भद्रं कृतं स्यादिति शेषः—इत्यन्वयसंगतिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

वानहम् ॥५३॥ तद्गच्छ कार्यसिद्ध्यै त्वं हत्वा तं दुष्टदानवम् ॥ आनयाशु महाबाहो शुभां मलयगंधिनीम् ॥५४॥ सा तु विद्याधरी बाला विलोक्य त्वां नरेश्वर ॥ अवश्यमेव तच्छूलं दास्यतीति विनिश्चितम् ॥ पार्वतीवचनाद्दुष्टं घातयिष्यस्यसंशयम् ॥ ५५ ॥ इति नारदवाक्यं स निशम्यामित्रजिन्नृपः ॥ अनल्पोत्कलिको जातो विद्याधरसुतां प्रति॥उपायं चापि पप्रच्छ गंतुं वै चंपकावतीम् ॥५६॥ नारदेन पुनः प्रोक्तः स राजा गिरिराजजे ॥ तूर्णमर्णवमासाद्य पूर्णिमादिवसे नृप ॥५७॥भवान्द्रक्ष्यति पोतस्थकल्पवृक्षरथास्थिताम् ॥ तत्र दिव्यांगनां कांचिद्दिव्यपर्यंकसुस्थिताम् ॥ वीणामादाय गायंतीं गाथामत्यंतसुस्वरम् ॥५८॥ यत्कर्म विहितं येन शुभं वाप्यथवाऽशुभम् ॥ स एव भुंक्ते तत्तथ्यं विधिस्तत्र नियंत्रितः ॥५९॥ गाथामिमां तु संगीय सरथा समहीरुहा ॥ सपर्यंका क्षणादेव मध्येसिंधुं प्रवेक्ष्यति ॥६०॥ भवानप्यविशंकं च ततः पोतान्महार्णवे ॥ तमनुव्रजतु क्षिप्रं यज्ञवाराहसत्त्मवान् ॥ ६१ ॥ ततो द्रक्ष्यसि पाताले नगरीं चंपकावतीम् ॥ महामनोहरां राजन्सनाथां बालया तया ॥ ६२ ॥ इत्युक्त्वांतर्हितो देवि स चतुर्मुखनंदनः ॥ राजाप्यर्णवमासाद्य यथोक्तं परिलक्ष्य च ॥ ६३ ॥ विवेशांतःसमुद्रं च नगरीमाससाद ताम् ॥ सापि विद्याधरी बाला नेत्रयोः प्राघुणीकृता ॥ ६४ ॥ तेन राज्ञा त्रिजगतीसौंदर्यश्रीरिवैकिका ॥ पाताले देवतेयं वा मम नेत्रोत्सवाय किम् ॥ ६५ ॥ निरमायि ममोद्देशात्स्रष्टृसृष्टिविलक्षणा ॥ कुहूराहुभयद्वेषात्कांतिश्चांद्रमसी किमु ॥ ६६ ॥ योषिद्रूपं समाश्रित्य तिष्ठत्यत्राकुतोभया ॥ इत्थं क्षणं च निर्वर्ण्य स राजाऽगच्छदंतिकम् ॥ ६७ ॥ सा विलोक्याथ तं बालं नितरां मधुराकृतिम् ॥ विशालोरःस्थलतलप्रलंबतुलसीस्रजम् ॥ ६८ ॥ शंखचक्रांकसुभगभुजद्वयविराजितम् ॥ हरिनामाक्षरसुधासुधौतरदनावलिम् ॥ ६९ ॥ भवानीभक्तिबीजोत्थभूरुहं पुरुषाकृतिम् ॥ अनेनात्र कृतं कस्य भवनं मधुराकृति ॥ ७० ॥ इति पर्याकुलीकृत्य चक्षुषी च मुहुर्मुहुः ॥ कंकालकेतुर्दुर्वृत्तस्त्ववध्यः परहेतिभिः ॥७१॥ तावद्द्रुतं समातिष्ठ शस्त्रागारेऽत्र गह्वरे ॥ न मे कन्याव्रतं भग्नं सामर्थ्याच्चण्डिकावरात् ॥७२॥ आगामिन्यां तृतीयायां परश्वः पाणिपीडनम् ॥ स चिकीर्षति दुष्टात्मा गतायुर्मम शापतः ॥७३॥ मा तद्भीतिं कुरु युवंस्त्वत्कार्यं भविताचिरात् ॥ विद्याधर्येति चोक्तः स शस्त्रागारे निगूढवत् ॥ ७४ ॥ स्थिरो वीरो महाबाहुर्दानवागमनेक्षणः ॥ ७५ ॥ अथ सायं समायातो दानवो भीषणाकृतिः ॥ त्रिशूलं कलयन्पाणौ मृत्योरपि भयावहम् ॥ ७६ ॥ आगत्य दानवो रौद्रः प्रलयांबुदनिस्वनः ॥ विद्याधरीं जगादेति मदाघूर्णितलोचनः ॥ ७७ ॥ गृहाणेमानि रत्नानि दिव्यानि वरवर्णिनि ॥ कन्या त्वं हि परश्वस्ते पाणिग्राहो भविष्यति ॥ ७८ ॥ 

१ गिरिपुत्रिके–इ०पा० । २ रुचिराकृतिम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दासीनामयुतं प्रातर्दास्यामि तव सुंदरि ॥ आसुरीणां सुरीणां च दानवीनां मनोहरम् ॥ ७९ ॥ गन्धर्वीणां किंनरीणां सततं परिचारिकाः ॥ विद्याधरीणां नागीनां यक्षीणां च शतानि षट् ॥ ८० ॥ राक्षसीनां शतान्यष्टौ शतमप्सरसां वरम् ॥ एतास्ते परिचारिण्यो भविष्यंत्यमलाशये ॥ ॥ ८१ ॥ यावत्संपत्तिसंभारो दिक्पालानां गृहेषु वै ॥ मत्परिग्रहतां प्राप्तौ तावतस्त्वं महेश्वरी ॥ ८२ ॥ दिव्यान्भोगान्मया सार्द्धं भोक्ष्यसे मत्परिग्रहात् ॥ कदा परश्वो भविता यस्मिन्वैवाहिको विधिः ॥ ८३ ॥ त्वदंगसंगसंस्पर्शसुखस्वादातिमेदुरः ॥ परां निर्वृतिमाप्स्यामि परश्वो निकटं यदि ॥ ॥ ८४ ॥ मनोरथाश्चिरं यावद्ये मे हृदि समेधिताः ॥ तान्कृतार्थीकरिष्यामि परश्वस्तव संगमात् ॥ ८५ ॥ जित्वा देवान्रणे सर्वानिंद्रादीन्मृगलोचने ॥ त्रैलोक्यैश्वर्यसंपत्तेस्त्वां करिष्यामि चेश्वरीम् ॥८६॥ आधायांके त्रिशूलं च सुष्वापेति प्रलप्य सः॥ नरमांसस्य स्वादेन प्रमत्तो वीतसाध्वसः॥ ॥ ८७ ॥ वरं स्मरंती सा गौर्या विद्याधरकुमारिका ॥ विज्ञाय तं प्रमत्तं च प्रसुप्तं चातिनिर्भयम् ॥ आहूय तं नरवरं वरं सर्वांगसुंदरम् ॥ ८८ ॥ विष्णुभक्तिकृतत्राणं प्राणनाथेति जल्प्य च ॥ शूलं तदंकादादाय ददौ तस्मै च सुंदरी ॥८९॥ तमादाय त्रिशूलं च स तदामित्रजिन्नृपः ॥ संस्मरंश्चक्रिणं चित्ते जगद्रक्षामणिं हरिम् ॥ ९० ॥ जगादोत्तिष्ठ रे दुष्ट कन्यादूषणलालस ॥ युध्यस्व च मया सार्द्धं न सुप्तं हन्म्यहं रिपुम् ॥ ९१ ॥ इति संश्रुत्य संप्रातः कस्य दृष्टोद्य चांतकः ॥ क आयुषाद्य संत्यक्तो यः प्राप्तो मम गोचरम् ॥९२॥ मम प्रचंडदोर्दंडकंडूकंडूयनक्षमः ॥ माल्यो[1] नरोऽयं भविता किं त्रिशूलेन सुंदरि ॥ ९३ ॥ मा भैर्मे कौतुकं पश्य भक्षोयं मम सांप्रतम् ॥ कालेन मत्तो भीतेन स्वयमेवोपढौकितः ॥ ९४ ॥ इत्युक्त्वा मुष्टिघातेन तेनोच्चैर्दंडसूनुना ॥ हृदये निहतो राजा शिलातिकठिने द्रुतम् ॥ ९५ ॥ स चक्रिणा कृतत्राणः पीडां नाल्पीयसीमपि ॥ विवेद कठिनोरस्कः करस्तस्य[2] प्रपीडितः ॥ ९६ ॥ अथ कोपवता राज्ञा हतो वक्त्रे चपेटया ॥ आघूर्णितशिरा भूमौ पतित्वा पुनरुत्थितः ॥ उवाच च वचो धैर्यमवष्टभ्य महाबली ॥ ९७ ॥ ॥ दानव उवाच ॥ ॥ ज्ञातं तत्त्वं मनुष्योसि नृरूपेण चतुर्भुजः ॥ ततस्त्वं छिद्रमासाद्य हंतुं मां दानवांतक ॥ ॥९८॥ एवंविधो हि मधुभिद्यदि त्वं बलवानसि॥ विहायैतन्महच्छूलं युध्यस्व स्वायुधैर्मया॥ ९९॥ त्वया कपटरूपेण बलिना कैटभादयः॥ न बलेन हताः संख्ये हता एव च्छलेन [illegible] ॥१००॥ [illegible] मनयस्त्वं नृवामनतां[3] दधत् ॥ नृ[illegible]त्वेन भवता हिरण्यकशिपुर्हतः ॥१॥ तथा जटिलरूपेण लंकेशो विनिपातितः॥ गोपालवेषमालंब्य कंसाद्या घातितास्त्वया ॥ स्त्रीभूय चाहरस्त्वं हि विप्रतार्यासुरान्सुधाम् ॥२॥ यादोरू[illegible]ण भवता शंखाद्या

१ माल्यः—पुष्पवत्कोमलतया निष्प्रयासमर्दनीयः—इत्यर्थः । २ तस्य दैत्यस्य—इत्यर्थः । ३ नृवामनरूपधृक्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





निहता इह ॥ मायाविना त्वयाऽन्याः सर्वमर्मज्ञ माधव ॥ ३ ॥ न त्वत्तोऽहं बिभेम्यद्य सद्यः पातः शरीरिणाम् ॥ वरं तव श्रये मृत्युं बलेनापि छलेन वा ॥ ४ ॥ न त्यक्ष्यसि त्रिशूलं त्वं न त्वां योत्स्याम्यहं रणे ॥ अवश्यमेव मर्त्तव्यं मया प्रातः शरीरिणा ॥ ५ ॥ इयं विद्याधरी कन्या न मया दूषिता सती ॥ साक्षाच्छ्रीरिव मंतव्या तवार्थं रक्षिता मया ॥ ६ ॥ इत्युक्त्वा वामदोर्दंडप्रहारेणापि निष्ठुरम् ॥ निजघान दनोः सूनुस्तं शिलोच्चयघातिना ॥ ७ ॥ नृपतिस्त्वथ संधार्य विषह्य रणमूर्द्धनि ॥ जघानाशु तदा क्रूरं त्रिशूलेनाथ वक्षसि ॥[१] ८ ॥ तत्प्रहारान्महाबाहुः पंचत्वमगमत्क्षणात् ॥ लक्ष्यीचकार तद्वक्त्रे त्रिशूलं तोलयन्करे ॥ ९ ॥ पश्यतोऽस्य महाबाहोः स च प्राणाञ्जहौ क्षणात् ॥ इत्थं कंकालकेतुं स निहत्य सुरकंपनम् ॥११०॥ विद्याधरीं प्रपश्यंतीं प्राह हृष्टतनूरुहः ॥ नारदस्य मुनेर्वाक्यात्तव सुश्रोणि वांछितम् ॥ ११ ॥ कृतं मया कृतज्ञे किं करवाण्यधुना वद ॥ श्रुत्वेति तस्य सा वाक्यं प्राह गंभीरचेतसा ॥ १२ ॥ ॥ मलयगंधिन्युवाच ॥ ॥ अत्युदारमते वीर निजप्राणैः पणीकृताम् ॥ किं मां पृच्छसि युवतीं कुलकन्यामदूषिताम् ॥ १३ ॥ इति ब्रुवंत्यां कन्यायां पुनः स्वैरचरो मुनिः ॥ अतर्कितागमः प्राप्तो नारदो देवलोकतः ॥ ॥ १४ ॥ ततस्तुष्टुवतुस्तौ तु तं दृष्ट्वा मुनिसत्तमम् ॥ कृतप्रणामौ मुनिना प्रतिज्ञाप्रापिताशिषौ ॥ १५ ॥ पाणिग्रहेण विधिनाऽभिषिक्तौ नारदेन तु ॥ जग्मतुर्नारदादिष्टवर्त्मना कृतमंगलौ ॥ १६ ॥ तया मलयगंधिन्या वृतः सोऽमित्रजिन्नृपः ॥ पुरीं चोज्जयिनीं प्राप्य पौरैर्विहितमंगलाम् ॥ ॥ १७ ॥ तद्वीक्षणादपि नरो नारकीं नैव जातुचित् ॥ गतिं प्राप्नोति मेधावी तां पुरीमविशन्नृपः ॥ १८ ॥ यस्यां पुर्यां प्रवेशं न लभन्ते वासवादयः ॥ कैवल्यजयजैत्र्यां हि तां पुरीमविशन्नृपः ॥ १९ ॥ सापि विद्याधर्यवंतीं समृद्धां वीक्ष्य दूरतः ॥ निनिंद स्वर्गलोकं च पातालनगरीमपि ॥ १२० ॥ प्राप्यामित्रजितं कांतं तथा हृष्टा न सा वधूः ॥ यथा दृष्ट्वाप्यहोऽवंतीं परमानंददायिनीम् ॥ २१ ॥ सा कृतार्थामिवात्मानं मन्यमाना मनस्विनी ॥ तेन पत्योज्जयिन्यां च परां निर्वृतिमाप सा ॥ २२ ॥ सोऽप्यमित्रजिदासाद्य पत्नीं मलयगंधिनीम् ॥ धर्मप्रधानं संसेव्य कामं प्रापोत्तमं सुखम् ॥ २३ ॥ सा पतिं विष्णुभजने रतं प्रोवाच भामिनी ॥ २४ ॥ ॥ राज्ञ्युवाच ॥ ॥ भूपाभीष्टतृतीयायां चरिष्यामि महाव्रतम् ॥ ॥ राजोवाच ॥ ॥ देव्यभीष्टतृतीयायां व्रतं कीदृग्भवेद्वद ॥२५॥ इति राज्ञोदिता राज्ञी प्रवक्तुमुपचक्रमे ॥ इतिकर्त्तव्यतां तस्य व्रतस्य सविधानकाम् ॥ २६ ॥ ॥ राज्ञ्युवाच ॥ ॥ पुरा देवर्षिणा चेदं व्रतं लक्ष्म्यै प्रतिश्रुतम् ॥ तया प्राप्तास्तु सकलाः कामाः स्वर्गापवर्गदाः ॥ २७ ॥ 

१ जीवन्तीम्—इ० पा० । २ अवसत्—इ० पा० । ३ अवसत्—इ० पा० । ४ परमानन्दकेतनम्—इ०, परमानन्दकौतुकम्—इ० च पा० । ५ आययौ—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मार्गशीर्षतृतीयायां शुक्लायां कलशोपरि ॥ ताम्रपात्रं निधायैव तंदुलैः परिपूरितम् ॥ २८॥ अच्छिद्रं च नवीनं च रजनीरागरंजितम् ॥ वासः पात्रोपरि न्यस्य सूक्ष्मात्सूक्ष्मतरं परम् ॥ २९ ॥ तस्योपरि शुभं पद्मं रविरश्मिप्रकाशितम् ॥ तत्कर्णिकाया उपरि चतुःस्वर्णविनिर्मितम् ॥ विधिं संपूजयेद्भक्त्या रक्तमाल्यांबरादिभिः ॥ १३० ॥ पुष्पैः सुगंधैः कर्पूरकस्तूर्यादिभिरर्चयेत् ॥ रात्रौ जागरणं कार्यं विप्राणां परमोत्सवैः ॥३१॥ होमः कार्यो महाभक्त्या सहस्रपरिसंख्यया ॥ नवप्रसूतां कपिलां दद्याच्च सुपयस्विनीम् ॥ ३२ ॥ दद्यादाचार्यवर्याय सालंकारां सदक्षिणाम् ॥ उपोष्य दंपती भक्त्या नवांबरविभूषितौ ॥ ३३ ॥ प्रातः स्नात्वा चतुर्थ्यां च संपूज्याचार्यमादितः ॥ वस्त्रैराभरणैर्माल्यैर्दक्षिणाभिर्मुदान्वितः ॥ सोपस्करां च तां मूर्तिमाचार्याय प्रदापयेत् ॥ ३४ ॥ मंत्रः ॥ नमो विश्वविधानज्ञे विद्ये विविधकारिणि ॥ सुतं च शंकरं देहि तुष्टा ह्यस्माद्व्रतोत्तमात् ॥ ३५ ॥ सहस्रं भोजयित्वाथ द्विजानां भक्तिपूर्वकम् ॥ भुक्तशेषेण चान्नेन कुर्याद्वै पारणं ततः ॥ ३६ ॥ इत्थमेतद्व्रतं नाथ चिकीर्षामि त्वदाज्ञया ॥ कुरु चैतत्प्रियं मह्यमभीष्टफललब्धये ॥ ३७ ॥ इति भूपालवर्येण श्रुत्वा संहृष्टचेतसा ॥ तदा व्रतं समाचीर्णं सांतर्वत्नी बभूव ह ॥ ३८ ॥ तयाथ प्रार्थिता गौरी गर्भिण्या भक्तितोषिता ॥ पुत्रं देहि महामाये साक्षाद्विष्णवंशसंभवम् ॥ ३९ ॥ जातमात्रो व्रजेत्स्वर्गं पुनरायाति चात्र वै ॥ भक्तः सदाशिवेऽत्यर्थं प्रसिद्धः सर्वभूतले ॥ विनैव स्तन्यपानेन षोडशाब्दाकृतिः क्षणात् ॥ १४० ॥ एवंभूतः सुतो गौरि यथा स्यान्मे तथा कुरु ॥ मृडान्यापि तथेत्युक्ता राज्ञी भक्त्यातितुष्टया ॥ ४१ ॥ अथ कालेन तनयं मूलर्क्षे साऽप्यजीजनत् ॥ हितैरमात्यैरथ सा विज्ञप्तारिष्टसंस्थिता ॥ ४२ ॥ देवि राजार्थिनी त्वं तु त्यज दुष्टर्क्षजं सुतम् ॥ सा मंत्रिवाक्यमाकर्ण्य केवलं पतिदेवता ॥ ४३ ॥ अत्याक्षीत्तं तथा प्राप्तं तनयं नयकोविदा ॥ धात्रिकां तु समाहूय प्राहेदं सा नृपांगना ॥ ४४ ॥ पंचमुद्रे महापीठे विकटानाम मातृका ॥ तदग्रे स्थापयित्वामुं बालं धात्रि त्विदं वद ॥ ४५ ॥ गौरि दत्तः शिशुरसौ तवाग्रे विनिवेदितः ॥ राज्ञ्या पत्युः प्रियैषिण्या मंत्रिविज्ञप्तितुन्नया ॥ ४६ ॥ सापि राज्ञ्युदितं श्रुत्वा बालं शिशुशशिप्रभम् ॥ विकटायाः पुरोभागे संस्थाप्य गृहमागता ॥ ४७ ॥ अथ सा विकटा देवी समाहूय च योगिनीः ॥ उवाच नयत क्षिप्रं शिशुं मातृगणाग्रतः ॥ ४८ ॥ तासामाज्ञां च कुरुत रक्षतामुं प्रयत्नतः ॥ योगिन्यो विकटावाक्यात्खेचर्यस्तत्क्षणेन तम् ॥ ४९ ॥ निन्युर्गगनमार्गेण ब्राह्म्याद्या यत्र मातरः ॥ प्रणम्य योगिनीवृन्दं तं शिशुं सूर्यवर्चसम् ॥ १५० ॥ पुरो निधाय मातृणां प्रोचुश्च विकटोदितम् ॥ ब्रह्माणी वैष्णवी रौद्री वाराही नारसिंहिका ॥ कौमारी चापि



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



माहेन्द्री चामुण्डा चैव चंडिका ॥ ५१ ॥ दृष्ट्वा तं बालकं रम्यं विकटाप्रेषितं ततः ॥ पप्रच्छुर्युगपद्वाक्यं कस्ते बाल प्रमुख्यकः ॥ ५२ ॥ मातृभि श्चेति पृष्टस्तु यदा किंचिन्न वक्ति सः ॥ तदा च योगिनीचक्रं प्राह मातृगणस्त्विति ॥ ५३ ॥ राज्ययोग्यो भवत्येष महालक्षणलक्षितः ॥ पुनस्तत्रैव नेतव्यो योगिन्यस्त्वविलंबितम् ॥ ५४ ॥ पञ्चमुद्रा महादेवी तिष्ठते यत्र कामदा ॥ यस्याः संसेवनान्नृणां निर्वाणश्रीरदूरतः ॥ ५५ ॥ तत्पीठसे वनादस्य षोडशाब्दाकृतेः शिशोः ॥ सिद्धिर्भवित्री परमा रुद्रस्यानुग्रहात्परा ॥ ५६ ॥ एवं मातृगणात्सद्यो योगिनीभिः क्षणेन तु ॥ प्रापितो मातृवाक्येन पञ्चमुद्रांतिकं पुनः ॥ ५७ ॥ संप्राप्य तन्महापीठं स्वर्गलोकादिहागतः ॥ महाकालवने पुण्ये तताप विपुलं तपः ॥ ५८ ॥ तपसातीव तीव्रेण निश्चलेन्द्रियमानसः ॥ तस्य राजकुमारस्य प्रसन्नोऽभूदुमाधवः ॥ ५९ ॥ आविर्बभूव पुरतो लिंगरूपेण शंकरः ॥ उवाच च प्रसन्नोस्मि वरं ब्रूहि नृपांगज ॥ १६० ॥ सर्वज्योतिर्मयं लिंगं पुरतो दृष्टवान्स्वयम् ॥ सप्तपातालमुद्भिद्योत्थितं बृहदनुग्रहात् ॥ ६१ ॥ प्रणम्य दंडवद्भूमौ परि तुष्टाव धूर्जटिम् ॥ सूक्तैर्जन्मांतराभ्यासात्सुहृद्यो रुद्रदैवतैः ॥ वरं च प्रार्थयांचक्रे परिहृष्टतनूरुहः ॥ ६२ ॥ देवदेव महादेव यदि देयो वरो मम ॥ तदत्र भवता स्थेयं भवतापहृता सदा ॥ ६३ ॥ अस्मिँल्लिंगे स्थितः शंभो कुरु भक्तसमीहितम् ॥ विना मुद्रादिकरणं मंत्रेणापि विना विभो ॥ ॥ ६४ ॥ अस्य लिंगस्य ये भक्ता मनोवाक्कायकर्मभिः ॥ सदैवानुग्रहस्तेषु कर्त्तव्यो वर एष मे ॥ ६५ ॥ इति तद्वरमाकर्ण्य लिंगरूपोऽवदत्प्रभुः ॥ एवमस्तु यदुक्तं ते वीर वैष्णवसूनुना ॥ ६६ ॥ वीर वीरेश्वरंनाम लिंगमेतत्त्वदाख्यया ॥ अवंत्यां संप्रदास्यामि भक्तानां चिंतितान्यहो ॥ ६७ ॥ अत्र दत्तं हुतं जप्तं स्तुतमर्चितमेव च ॥ तदक्षयं भवेदत्र भक्तानां नात्र संशयः ॥ ६८ ॥ त्वं तु राज्यं परं प्राप्य सर्वभूपालदुर्लभम् ॥ भुक्त्वा भोगांश्च विपुलानंते सिद्धिमवाप्स्यसि ॥ ६९ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ वीरेश्वरस्य देवस्य नूपुरेशमथो शृणु ॥ १७० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिंगमाहात्म्ये [3]वीरेश्वरमाहात्म्यवर्णनंनाम षट्चत्वारिंशो ऽध्यायः ॥ ४६ ॥ ॥ छ ॥ ॥ श्रीदेवदेव उवाच ॥ ॥ सप्ताधिकं विजानीहि नूपुरेश्वरसंज्ञकम् ॥ यस्य दर्शनमात्रेण प्राप्यंते सर्वसिद्धयः ॥ ॥ १ ॥ पुरा राथन्तरे कल्पे नूपुरोनाम वै गणः ॥ रुद्रभक्तिपरो नित्यं पंचमुद्राविभूषितः ॥ २ ॥ स एकदा कुबेरस्य सभायां प्राप्य संस्थितः ॥

१ तात–इ०पा० । २ वरान्–इ०, अहम्–इ० च पा० । ३ इदानीं सर्वेश्वराल्यस्य कस्यचिद्गृहस्थस्य गृहस्य पुतो दक्षिणभागे--इदं स्थानमस्तीति–अवन्तीपुरास्थितपुस्तके लिखितमस्ति ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रष्टुं महोत्सवं तत्र अप्सरोभिः कृतं तदा ॥ ३ ॥ ननृतुश्चापरास्तत्र ह्युर्वशी योषितां वरा ॥ रंभा तिलोत्तमा मेना ननृतुर्हर्षसंयुताः ॥ ४ ॥ तासां नृत्यं तदा वीक्ष्य नूपुरो गणपस्तदा ॥ कामबाणार्दितो नूनं तासां मध्ये ननर्त्त ह ॥ ५ ॥ नृत्यमानस्ततो हृष्टः पुष्पगुच्छेन वक्षसि ॥ उर्वशीं ताडयामास कामबाणप्रपीडितः ॥ ६ ॥ उर्वशी तु ततः क्रुद्धा पुष्पगुच्छेन ताडिता ॥ जगाम शरणं देवं धनदं सर्वकामदम् ॥ ७ ॥ उवाच धनदस्तत्र क्रोधेनाकुलमानसः ॥ ८ ॥ यस्मात्त्वया रंगभंगः कृतः कामार्दितेन वै ॥ तस्मात्त्वं मानुषे लोके पतस्व पापपूरुष ॥ ९ ॥ कुबेरस्य च शापात्तु जगाम धरणीतलम् ॥ विललाप सुदुःखार्त्तः किं कृतं पापिना मया ॥ १० ॥ विलप्य सुभृशं सोऽथ शरणं परमेश्वरीम् ॥ जगाम मनसा देवि त्वां स[1] वै वरदायिनीम् ॥ ११ ॥ त्वं तुष्टा तु तदा जाता प्रत्यक्षा परमेश्वरी ॥ उवाच गणपं प्रीत्या भक्तिनम्रं तदा भुवि ॥ १२ ॥ गच्छ पुत्र ममादेशान्महाकालवनं शुभम् ॥ प्राची सरस्वती तत्र वाप्याकारा च विद्यते ॥ १३ ॥ तस्या दक्षिणतो वत्स विद्यते लिंगमुत्तमम् ॥ वाप्यां स्नात्वा च तल्लिंगं समाराधय भक्तितः ॥१४॥ सा प्राची स च देवेशस्त्वन्नाम्ना ख्यातिमेष्यति ॥ इत्युक्तो नूपुरो देवि[2] महाकालवनं गतः ॥ १५ ॥ त्वया च प्रेरितो देवि कीर्त्त्यर्थं तत्र गम्यताम् ॥ इत्युक्तो नूपुरो दिव्यो गणो हृष्टः कृतांजलिः ॥ १६ ॥ महाकालवनं रम्यं देवगंधर्वसेवितम् ॥ ददर्श तत्र तल्लिंगं सुरगन्धर्वसेवितम् ॥ १७ ॥ प्राची सरस्वती तत्र वाप्याकारा च संस्थिता ॥ तस्यां स्नात्वा ततो देवं पूजयामास नूपुरः ॥ १८ ॥ ततो देवः प्रसन्नात्मा प्रत्युवाचाथ नूपुरम् ॥ साधु नूपुर भद्रं ते स्वस्ति प्राप्नुहि सर्वदा ॥ ॥ १९ ॥ भविता वल्लभो देव्याः पार्वत्याः शंकरस्य च ॥ इत्युक्तस्तेन लिंगेन तत्क्षणान्नूपुरः प्रिये ॥ २० ॥ उदितादित्यसंकाशो विभावसुसमद्युतिः ॥ तेजोराशिश्च संजातो दुर्निरीक्ष्यस्त्रिविष्टपैः ॥ २१ ॥ प्रभावं तादृशं दृष्ट्वा देवैरुक्तं वरानने ॥ अहो लिंगस्य माहात्म्यं दृश्यतेत्यद्भुतं भुवि ॥ २२ ॥ प्राप्ता च कामिकी सिद्धिर्नूपुरेण च दर्शनात् ॥ अतो देवोऽद्यप्रभृति विख्यातो भूतलेऽभवत् ॥ २३ ॥ सर्वकामप्रदो नित्यं नूपुरेश्वरनामतः ॥ दर्शनं ये करिष्यंति स्नात्वा वाप्यां समाहिताः ॥ २४ ॥ नूपुरेश्वररुद्रस्य ते यांति परमं पदम् ॥ ये च पूजां करिष्यंति भक्तिभावसमन्विताः ॥ वसंति मुदिताः सर्वे यावदाभूतसंप्लवम् ॥ २५ ॥ जन्ममृत्युजरारोगदुःखानि विविधानि च ॥ प्रयांति विलयं सद्यः पूजिते नूपुरेश्वरे ॥ २६ ॥ वापी गंगासमा सा तु स्वयमेव शुभेक्षणे ॥ संगमस्तु वितस्तायां यमुनायास्तु सुव्रते ॥ प्रयागमेतज्जानीहि भूधरेंद्रांगसंभवे ॥ २७ ॥

१ सदा—इ०पा० । २ देव्या—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





सोमतीर्थं तदा देवि सर्वपातकनाशनम् ॥ तत्र स्नात्वा पुमान्देवि वाजपेयफलं लभेत् ॥ २८ ॥ कृष्णाष्टम्यां च यः स्नात्वा पूजयेन्नूपुरेश्वरम् ॥ कुलं वै तारयेत्सोपि मातृकं पितृकं शतम् ॥ २९ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ नूपुरेश्वरदेवस्य श्रूयतामभयेश्वरम् ॥ ३० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिंगमाहात्म्ये नूपुरेश्वरमाहात्म्यवर्णनंनाम सप्तचत्वारिंशो ऽध्यायः ॥ ४७ ॥ ॥ छ ॥ ॥ श्रीरुद्र उवाच ॥ ॥ अष्टाधिकं विजानीहि चत्वारिंशत्तमं प्रिये ॥ यस्य दर्शनमात्रेण न भवस्य भयं भवेत् ॥ १ ॥ कल्पावसाने प्रथमे पाद्मे पद्मनिभेक्षणे ॥ नष्टचंद्रार्कनक्षत्रे नष्टभूमित्रिविष्टपे ॥ ब्रह्मा वै चिंतयामास कथं सृष्टिर्भवेदिति ॥ २ ॥ इत्याकुलितरूपस्य तस्य नेत्रद्वयात्तदा ॥ पपाताश्रुकणः स्थूलो नेत्राद्वामान्महात्मनः ॥ ३ ॥ तस्मादश्रुकणाज्जातो हारवोनाम दानवः ॥ तीक्ष्णदंष्ट्रो महाकायो भिन्नांजनचयप्रभः ॥ ४ ॥ दक्षिणान्नयनाज्जातः कालकेलीतिविश्रुतः ॥ कृष्णदेहोऽतिदीर्घश्च महादंष्ट्रोर्ध्वरोमकः ॥ ५ ॥ करालवदनो दुष्टो यमरूपो दुरासदः ॥ कृष्णांजनचयाकारः पाशपाणिर्विभीषणः ॥ ६ ॥ तौ तु दैत्यौ समागत्य कृतसंकेतकौ तदा ॥ ब्रह्माणं हंतुमिच्छंतौ प्रमत्तावभिधावितौ ॥ ७ ॥ ततो ब्रह्मा भयाविष्टः कांदिशीकश्चचार ह ॥ ततो जलेऽतिगंभीरे सोऽपश्यदमितद्युतिम् ॥ ८ ॥ पुरुषं पीतवसनं शंखचक्रगदाधरम् ॥ तमालोक्य ततो ब्रह्मा संत्रासं परमं गतः ॥ उवाच को भवाञ्छेते निःशेषेस्मिश्चराचरे ॥ ९ ॥ तमुवाच ततो विष्णुरहमेवं जगत्पिता ॥ लोककृल्लोकसंहर्त्ता लोकस्थितिविधायकः ॥ १० ॥ इत्युक्तः पद्मजस्तेन. कृष्णेनाक्लिष्टकर्मणा ॥ प्रत्युवाच तदा ब्रह्मा स्रष्टाहं भुवनत्रये ॥ ११ ॥ मया सृष्टं जगत्सर्वं सदेवासुरमानुषम् ॥ अत्रांतरे च तौ दैत्यावायातौ बलदर्पितौ ॥ १२ ॥ भोक्तुकामौ क्षुधाविष्टौ दृष्ट्वा ब्रह्माब्रवीदिदम् ॥ कृष्णं कमलपत्राक्षं कंपिताधरपल्लवः ॥ १३ ॥ यदि त्वं कारणं किंचिदस्य लोकस्य कथ्यसे ॥ तदा तावसुरौ भीमौ हंतुमर्हसि सांप्रतम् ॥ १४ ॥ तच्छ्रुत्वा तु तदा विष्णुर्ज्ञात्वा दुःखं परस्परम् ॥ क्षणं विश्रम्यतां तावत्पश्चाद्द्वंद्वं भविष्यति ॥ १५ ॥ इत्युक्त्वा कृतसंकेतौ तौ दैत्यौ बलगर्वितौ ॥ ब्रह्मनारायणौ हंतुं धावितौ तु त्वरान्वितौ ॥ १६ ॥ ब्रह्मविष्णू तदा दृष्ट्वा दानवौ दुर्जयौ रणे ॥ संत्रासं जग्मतुस्तत्र स्वेदकंपपरिप्लुतौ ॥ १७ ॥ अन्योन्यमूचतुस्तौ हि देशकालोचितं वचः ॥ कर्तव्यं किं नु वा कार्यं मम वा तव वा भवेत् ॥ १८ ॥

१ पश्येद्वै—इ०पा० । २ अत्र अवंतीस्थपुस्तके 'डावरीमाहे'—इति लिखितमस्ति तेन नूपुरेश्वरस्थानं सूचितं बोद्धव्यम् । ३ भवस्य—संसारस्य—इत्यर्थः । ४ कलकलेति विश्रुतः—इ० पा० । ५ एषः—इ० पा० । ६ बलगर्वितौ—इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपस्थितं भयं घोरं तत्र किं कार्यमस्ति नौ ॥ आसन्नं मरणं दृष्ट्वा ब्रह्मा प्रोवाच केशवम् ॥ १९ ॥ गम्यतां कृष्ण शीघ्रं वै महाकालवनोत्तमम् ॥ प्रलयेऽप्यक्षयं प्रोक्तं तत्र रक्षा भविष्यति ॥ अहं तत्र गमिष्यामि व्रज त्वं तत्र केशव ॥ २० ॥ इत्युक्तो ब्रह्मणा कृष्णो जगाम सह तेन वै ॥ महाकालवनं प्राप्तौ न च दृष्टो महेश्वरः ॥ तत्रापि दशसाहस्रं कालः पर्यटतोस्तयोः ॥ २१ ॥ ततो ज्वालामयं दिव्यं नूपुरेश्वरदक्षिणे ॥ दृष्ट्वा तल्लिंगमाहात्म्यं ब्रह्मविष्णू ततः स्वयम् ॥ प्रार्थयांचक्रतुर्देवमभयं देहि नौ प्रभो ॥ २२ ॥ शरणं भव देवेश दानवाभ्यां प्रपीडितौ ॥ अभयं च ततो दत्तं तेन लिंगेन पार्वति ॥ २३ ॥ शुश्राव गर्जितं ताभ्यां दानवाभ्यां पितामहः ॥ प्रत्युवाच भयत्रस्तो लिंगं कंपितकंधरः ॥ २४ ॥ स एष मृत्युरस्माकमेति शीघ्रं भयावहः ॥ दीयतामभयं देव कृष्णेनोक्तं तदा प्रिये ॥ २५ ॥ भयार्त्तवचनं श्रुत्वा ब्रह्मणः केशवस्य च ॥ तौ देवौ तेन लिंगेन जठरे संनिवेशितौ ॥ २६ ॥ दृष्टं ताभ्यां जगत्सर्वं सार्कचंद्रमहीधरम् ॥ ससिद्धगंधर्वकुलं शैलताललताकुलम् ॥ २७ ॥ ससमुद्रपीठसंयुक्तं नानावर्णाश्रमोज्ज्वलम् ॥ सपातालतलं देवि सभुजंगमहीरुहम् ॥ २८ ॥ ससप्तलोकविन्यासं सदेवासुरराक्षसम् ॥ पुनस्तौ निःसृतौ तस्माज्जठराद्विस्मयान्वितौ ॥ २९ ॥ दृष्टौ भस्मीकृतौ दैत्यौ तेन लिंगेन पार्वति ॥ तुष्टुवाते परं लिंगं भक्त्या परमया युतौ ॥ ३० ॥ लिंगेनोक्तं प्रसन्नेन भवद्भ्यां किं ददाम्यहम् ॥ ममामोघमिदं देवौ दर्शनं चातिदुर्लभम् ॥ ३१ ॥ ततो ब्रह्मा च विष्णुश्च वरयामासतुर्वरम् ॥ यदि देयो वरोऽस्माकं नृणामभयदो भव ॥ ३२ ॥ ये च त्वां पूजयिष्यंति यक्ष्यंति च समाहिताः ॥ संस्मरिष्यंति सततं तेषामभयदो भव ॥ ३३ ॥ अभयेश्वरसंज्ञस्तु ख्यातो भुवि भविष्यसि ॥ ते कृतार्था भविष्यंति ये त्वां पश्यंति भक्तितः ॥ ३४ ॥ भविष्यति भयं नैव संसारपतनं तथा ॥ धनपुत्रकलत्राणां वियोगो न भविष्यति ॥ ३५ ॥ दुःखिता दुर्भगा नारी दर्शनं या करिष्यति ॥ सौभाग्यसुखसंयुक्ता भविष्यति न संशयः ॥ वीरं तु गुर्विणी कन्या पतिमाप्स्यति शोभनम् ॥ ३६ ॥ यंयं काममभिध्याय ये त्वां पश्यंति मानवाः ॥ तंतं मनोरथं सर्वं गमिष्यंति न संशयः ॥ ३७ ॥ एवं भविष्यतीत्युक्त्वा लिंगेन परमेश्वरि ॥ विसर्जितौ गतौ देवौ ब्रह्मविष्णू स्वमालयम् ॥ ३८ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ अभयेश्वरदेवस्य श्रूयतां पृथुकेश्वरम् ॥ ३९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिंगमाहात्म्येऽभयेश्वरमाहात्म्यवर्णनंनामाष्टाचत्वारिंशोऽध्यायः ॥ ४८ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु पंचाशदेकोनं देवेशं पृथुकेश्वरम् ॥ यस्य

१ जनानां स्वार्थदायकम्-इ० पा० । २ सिद्धगन्धर्वविद्याध्रैर्महाशैललताकुलम्--इ० पा० । ३ अत्र अवंतीस्थपुस्तके-'खडीकवाडामाहे दाहणीदरवाजे' इति लिखितमस्ति । तदेतदभयेश्वरलिंगस्थानं बोद्धव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



दर्शनमात्रेण सार्वभौमो नरो भवेत् ॥ १ ॥ वंशे स्वायंभुवे देवि ह्यंगो राजा बभूव ह ॥ मृत्योस्तु दुहिता तेन परिणीता सुदुर्मुखा ॥ २ ॥ वेननामा सुतो जातो नास्तिको धर्मदूषकः ॥ देवब्रह्मस्वहारी च परभार्यापहारकः ॥ ३ ॥ स च शप्तो द्विजैर्देवि तत्क्षणान्निधनं गतः ॥ तदूरोर्मथ्यमानात्तु निपेतुर्म्लेंच्छजातयः[1] ॥ ४ ॥ शरीरे मातुरंशेन कृष्णांजनचयप्रभाः ॥ पितुरंशात्समुत्पन्नो धार्मिको द्विजसत्तमैः ॥ मथितादक्षिणाद्धस्तात्पृथुः प्रथितविक्रमः ॥ ५ ॥ स विप्रैरभिषिक्तश्च तपः कृत्वा सुदुष्करम् ॥ विष्णोर्वरेण महता प्रभुत्वमगमन्नृपः ॥ ६ ॥ स च स्वाध्यायरहिता निर्वषट्कारनिर्द्धनाः ॥ हाहाभूताः प्रजा दृष्ट्वा ततोऽभूद्दुःखितो नृपः ॥ ७ ॥ स दोग्धुमैच्छत्त्रैलोक्यं सदेवासुरमानुषम् ॥ ८ ॥ एतस्मिन्नंतरे प्राप्तो नारदो मुनिसत्तमः ॥ क्रोधाविष्टं पृथुं दृष्ट्वा वाक्यं चेदमुवाच ह ॥ ९ ॥ लोकत्रयविनाशाय मा कोपं कुरु भूपते ॥ पृथ्व्यानया ग्रासितानि सस्यानि विविधानि च ॥ गिलितानि च अंन्नानि[2] विद्धयेवैतन्मतं मम ॥ १० ॥ नारदस्य च वाक्येन क्रोधं चक्रे पृथुस्तदा ॥ निर्दग्धुमैच्छत्पृथिवीं सशैलवनकाननाम् ॥ ११ ॥ मुमोच शस्त्रमाग्नेयं तेन सा धरणी तदा ॥ दह्यमाना भयार्त्ता च गौर्भूत्वा पृथुमभ्यगात् ॥ १२ ॥ सा वध्यमाना तेनैव नृपं वचनमब्रवीत् ॥ शरणं समनुप्राप्ता गौरहं नृपसत्तम ॥ १३ ॥ गौरवध्या महीपाल वत्सं कृत्वा च दुग्धि माम् ॥ १४ ॥ तस्यास्तद्वचनं श्रुत्वा दुदोह नृपसत्तमः ॥ भास्वद्रत्नानि सस्यानि कृत्वा वत्सं हिमालयम् ॥१५॥ जाताः प्रजाश्च सुमुखाः प्रवृत्तश्च महोत्सवः ॥ प्रवृत्ता यागदानादि क्रिया मंगलपूर्विकाः ॥ १६ ॥ राजाथ चिंतयामास मया पापमिदं कृतम् ॥ अवध्याश्च स्त्रियः प्रोक्ता गौरवध्या द्विजस्तथा ॥ १७ ॥ स्त्रीरूपधारिणी पृथ्वी मोहादेषा मया हता ॥ गोवधे च कृता बुद्धिरहो पापपरंपरा॥तस्माद्वह्निं प्रवेक्ष्यामि चितां कृत्वा न संशयः ॥ १८ ॥ एवं चिंतयतस्तस्य पृथोरमिततेजसः ॥ आजगाम पुनस्तत्र नारदो भगवानृषिः ॥ १९ ॥ दृष्ट्वा तथाविधं दीनं चिंतयानं पृथुं प्रिये ॥ उवाच नारदो धीमान्किमेतदिति पार्थिव ॥ २० ॥ ततः स कथयामास मया पापमिदं कृतम्॥ अवध्या स्त्री हता विप्र कृता बुद्धिश्च गोवधे ॥ २१ ॥ काँल्लोकान्नु गमिष्यामि कृत्वा कर्म सुदारुणम् ॥ मरिष्यामि न संदेहो ब्रह्महा पाँपपूरुषः[3] ॥ २२ ॥ अथ चेष्टोर्पदेशेन[4] दुःखादुद्धर मां द्विज ॥ तस्य तद्वचनं श्रुत्वा कथयामास नारदः ॥ महापापप्रशमनं लिंगमाहात्म्यमुत्तमम् ॥ २३ ॥ महाकालवने लिंगमभयेश्वरपश्चिमे ॥ महापापक्षयकरं विद्यते तत्र भूपते ॥ ॥१२९॥

१ उत्पन्नाः- इ० पा० । २ रत्नानि—इ० पा० । ३ पुरुषर्षभ--इ० पा० । ४ चेष्टोपदेशस्य दानादुद्धर—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गच्छ त्वं सहसा राजंस्तत्र पूतो भविष्यसि ॥ २४ ॥ नारदस्य वचः श्रुत्वा पृथुस्तत्र जगाम सः ॥ दृष्ट्वा लिंगं च वै रम्यं विपापस्तत्क्षणादभूत् ॥ ॥ २५ ॥ द्वादशादित्यसंकाशो बभूव पृथिवीपतिः ॥ २६ ॥ ततोऽतरिक्षगैर्देवि कृतं नाम वरानने ॥ पृथुना पूजितो यस्माद्भविष्यति महीतले ॥ अद्यप्रभृति विख्यातो देवोऽयं पृथुकेश्वरः ॥ २७ ॥ ये च द्रक्ष्यंति देवेशं पृथुकेश्वरमीश्वरम् ॥ ते सर्वकामसंपूर्णा भविष्यंति महीतले ॥ २८ ॥ अज्ञानाज्ज्ञानतो वापि यत्पापं जायते नृणाम् ॥ तत्पापं यास्यति क्षिप्रं पृथुकेश्वरदर्शनात् ॥ २९ ॥ वाचिकं मानसं वापि कायिकं गुह्यसंभवम् ॥ प्रकाशं वा कृतं पापं प्रसंगादपि यत्कृतम् ॥ तत्सर्वं यास्यति क्षिप्रं पृथुकेश्वरदर्शनात् ॥ ३० ॥ पूजयिष्यंति ये भक्त्या देवं वै पृथुकेश्वरम् ॥ राज्यं प्राप्स्यंति ते सम्यङ्नृलोके च त्रिविष्टपे ॥ ३१ ॥ भुक्त्वा राज्यं मनुष्याणां देवानां च महीतले ॥ यास्यंति परमं स्थानं ब्रह्मणः परमेष्ठिनः ॥ ३२ ॥ इत्युक्त्वा देवसंघैश्च पूजितः पृथुकेश्वरः ॥ पृथुः शशास पृथिवीं सपत्तनां सपर्वताम् ॥ ३३ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ पृथुकेश्वर देवस्य शृणु वै स्थावरेश्वरम् ॥ ३४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिंगमाहात्म्ये पृथुकेश्वरमाहात्म्यवर्णननामैकोनपंचाशत्तमोऽध्यायः ॥ ४९ ॥ ॥ छ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ शृणु देवि प्रयत्नेन पंचाशत्तममीश्वरम् ॥ यस्य दर्शनमात्रेण ग्रहबाधा न जायते ॥ १ ॥ संज्ञानाम रवेर्भार्या सा सुता विश्वकर्मणः ॥ भर्तुस्तेजोऽसहंत्याथ कदाचिच्चैव संज्ञया ॥ छायामयी चात्मनस्तु निर्मिता तरसा तया ॥ २ ॥ सा प्रोक्ता सादरेणैव स्थीयतां सूर्यसंनिधौ ॥ पृष्टयापि न वाच्यं ते मदीयं गमनं रवेः ॥ ३ ॥ इत्युक्त्वा सा तदा संज्ञा जगाम भवनं पितुः ॥ संज्ञेयमिति मन्वानो द्वितीयायां दिवस्पतिः ॥ जनयामास तनयं नामतो यः शनैश्चरः ॥ ४ ॥ तस्मिञ्जाते भयं जग्मुः सदेवासुरमानुषाः ॥ त्रैलोक्यं जातमात्रेण आक्रांतं सचराचरम् ॥ ५ ॥ इन्द्रोऽपि भयसंत्रस्तो ब्रह्माणं शरणं गतः ॥ सूर्यपुत्रस्य वृत्तांतं कथयामास गद्गदम् ॥ ६ ॥ भिन्नं तु रोहिणीचक्रं व्याप्तं नक्षत्रमंडलम् ॥ जातमात्रेण चाक्रांतं त्रैलोक्यं रविसूनुना ॥ ७ ॥ वासवस्य वचः श्रुत्वा ब्रह्मा लोकपितामहः ॥ आहूय सहसा सूर्यं वचनं चेदमब्रवीत् ॥ ८ ॥ मर्यादा क्रियतां भानो वार्यतां पुत्र औरसः ॥ आक्रांतं तेजसा तेन त्रैलोक्यं भूर्भुवादिकम् ॥ ९ ॥ ब्रह्मणो वचनं श्रुत्वा रविणा प्रोक्तमीदृशः ॥ असाध्योऽयं मम सुतो वार्यतां स्वयमेव तम् ॥ १० ॥ पश्य मे चरणौ दग्धौ दृष्टिमात्रेण लीलया ॥ ब्रह्मापि भयसंत्रस्तो जगाम मनसा हरिम् ॥ ११ ॥ सूर्यस्य वचनं श्रुत्वा हरिः प्राप्तस्तु तत्क्षणात् ॥ ब्रह्मणो वचनं

१ समागतः--इ०पा० । २ अवंतीस्थपुस्तके 'देवप्रयाग उपर' इति लिखितम् । तत्रास्य पृथुकेश्वरस्य स्थानं बोद्धव्यम् । ३ स्थावरेश्वरम्--इति शेषः--प्रकरणात् । ४ कदाचिच्च सविस्मया--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





श्रुत्वा भीतः कृष्णोऽब्रवीदिदम् ॥ १२ ॥ गम्यतां तत्र यत्रास्ते देवदेवो महेश्वरः ॥ कृष्णस्य वचनात्सर्वे ममांतिकमुपागताः ॥ १३ ॥ वृत्तांतः कथितः सर्वो रविपुत्रस्य पार्वति ॥ मया स्मृतस्तु संप्राप्तः सूर्यपुत्रस्तु तत्क्षणात् ॥ १४ ॥ अधोदृष्टिर्मया दृष्टो वक्रांगो रूपतोऽसितः ॥ स्थैर्यं कृत्वा नमस्कृत्य विज्ञप्तोऽहं शनैःशनैः ॥ १५ ॥ किमर्थं वै स्मृतो देव देह्याज्ञां मम शंकर ॥ आदेशे तव तिष्ठामि किं करोमि प्रशाधि माम् ॥ ॥ १६ ॥ इत्युक्तोऽहं तदा तेन रविपुत्रेण पार्वति ॥ मया स वारितोऽत्यर्थं मा पीडय जगत्त्रयम् ॥ १७ ॥ तेनोक्तं देहि मे स्थानं पानमाहारमेव च ॥ मया दत्तं विशालाक्षि पूजार्थं स्थानमुत्तमम् ॥ १८ ॥ मेषादिराशिसंस्थः संस्त्रिंशन्मासान्प्रपीडयं ॥ मानुषान्क्रमशो वत्स तत्र तृप्तिमवाप्स्यसि ॥ १९ ॥ अष्टमश्च चतुर्थश्च द्वितीयो जन्मसंस्थितः ॥ द्वादशराशिसंस्थोऽपि विरुद्धो भव सर्वदा ॥ २० ॥ एकादशो वा षष्ठो वा तृतीयस्थानगोथवा ॥ भव भव्यतरो नृणामतः पूजा भविष्यति ॥ २१ ॥ पंचमो नवमश्चैव उदासीनस्तु सप्तमः ॥ भव राशिगतो नित्यं मानुषे कर्मभिर्युते ॥ २२ ॥ पूजां प्राप्स्यसि चात्यर्थं ग्रहाणामधिकं सदा ॥ गतिः स्थिरा भवित्री ते वरः श्रेष्ठोभिधीयते ॥ २३ ॥ अतस्ते स्थावरं नाम भविष्यति महीतले ॥ शनैश्चरस्त्वं राशिस्थो ग्रहाणामधिको यतः ॥ २४ ॥ अतः शनैश्चरोनाम भविष्यसि सदा भुवि ॥ गजगण्डनिभाकारो मम कण्ठसमोपि च ॥ २५ ॥ वर्णतो ह्यसितोनाम भविष्यसि महीतले ॥ ग्रहमध्ये ह्यधोदृष्टिर्गतिर्मंदा भविष्यति ॥ तुष्टो ददासि राज्यं च रुष्टो वै हरसि क्षणात् ॥२६॥ देवासुरमनुष्याश्च सिद्धविद्याधरोरगाः ॥ त्वत्क्रूरदृष्टिनिहता नाशं यास्यंति नान्यथा ॥ २७ ॥ तव प्रसादात्प्राप्स्यंति मनोऽभीष्टं सुदुर्लभम् ॥ अन्यच्च ते प्रदास्यामि स्थानं गुह्यं मनोहरम् ॥ २८ ॥ मनोभीष्टकरं पुण्यं देवदानवदुर्लभम् ॥ प्रलयेऽप्यक्षयं प्रोक्तं महाकालवनं परम् ॥ २९ ॥ तत्र गच्छ ममादेशात्पृथुकेश्वरपश्चिमे ॥ विद्यते तत्र यल्लिंगं तत्ते नाम्ना भविष्यति ॥ ३० ॥ कीर्त्तिरेषा त्वदीयापि त्रैलोक्ये भविता ध्रुवम् ॥ ३१ ॥ इत्युक्तः स्थावरो देवि ममाज्ञापालकस्तदा ॥ जगाम त्वरितो रम्यं महाकालवनं शुभम् ॥ ३२ ॥ दृष्ट्वा तत्रैव तल्लिंगं स्थानं लब्धं सुशोभनम् ॥ तल्लिंगं भुवने ख्यातं नामतः स्थावरेश्वरम् ॥ ३३ ॥ शनिनोक्तं तदा देवि येऽत्र द्रक्ष्यंति भक्तितः ॥ मया प्रपूजितं लिंगं विख्यातं स्थावरेश्वरम् ॥ तेषां पीडा मदीया तु न भविष्यति कर्हिचित् ॥ ३४ ॥ मदीये च दिने यो वै नियमेन प्रपश्यति ॥ तस्याहं सकलां बाधां शमयिष्याम्यसंशयम् ॥ ३५ ॥ धक्ष्यामि सततं पीडामन्यग्रहकृतामपि ॥ मदीयं च भयं तस्य स्वप्नेऽपि न भविष्यति ॥ ३६ ॥

१ प्रसीद-इ०पा० । २ शुभम्-इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न ग्रहा न पिशाचाश्च न यक्षा न च राक्षसाः ॥ विघ्नं कुर्वंति तस्यापि मयि तुष्टे न संशयः ॥ ३७ ॥ संक्रांतौ शनिवारे च व्यतीपातेऽयने तथा ॥
ये पश्यंति नरा भक्त्या लिंगं वै स्थावरेश्वरम् ॥ भविष्यत्यक्षयस्तेषां स्थिरो वासस्त्रिविष्टपे ॥ ३८ ॥ नियमेन प्रपश्यंति मम वारेऽत्र ये नराः ॥
न तेषां दुष्कृतं किंचिद्दुष्कृतोत्था न चापदः ॥ ३९ ॥ भविष्यति न दारिद्र्यं न चैवेष्टवियोजनम् ॥ दास्यामि पुत्रकामस्य फलं पुत्रकृतं सदा ॥
॥ ४० ॥ अधनस्य धनं चैव भयार्त्तस्याभयं तथा ॥ स्वर्गं वै स्वर्गकामस्य [1]प्रयच्छामि च वांछितम् ॥ ४१ ॥ इत्युक्त्वा पूजयामास भूयो लिंगं
शनैश्चरः ॥ पूजयित्वा शुभैः पुष्पैर्भक्त्या तत्रैव संस्थितः ॥ ४२ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ स्थावरेश्वरदेवस्य शूलेश्वरमथो
शृणु ॥ ४३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये स्थावरेश्वरमाहात्म्य
वर्णनंनाम पंचाशत्तमोऽध्यायः ॥ ५० ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ एकाधिकं विजानीहि पंचाशत्तममीश्वरम् ॥ देवं शूलेश्वरं देवि सर्व
व्याधिविनाशनम् ॥ १ ॥ आद्ये कल्पे प्रवृत्ते च राज्यहेतोर्वरानने ॥ देवानां दानवानां च युद्धमासीत्सुदारुणम् ॥ दैत्यानामीश्वरे जंभे देवानां च
शचीपतौ ॥ २ ॥ ततो देवाः पराभूता दैत्या विजयिनोऽभवन् ॥ अंधको मंदरं प्राप्तो दूतं मे प्राहिणोत्तदा ॥ ३ ॥ स दूतो मामुवाचोच्चैः[2] सगर्वो
दुष्टमानसः ॥ अन्धकेनाहमादिष्टः शृणु शंकर मद्वचः ॥ ४ ॥ गौरीं मे देहि पत्न्यर्थं मंदरस्त्यज्यतामयम् ॥ एवं कृते कृतार्थस्त्वमन्यथा नास्ति
ते गतिः ॥ ५ ॥ उक्तोऽहं तेन दूतेन त्वया सह महागिरौ ॥ स्मिताननः क्षणं भूत्वा मया प्रोक्तमिदं वचः ॥ ६ ॥ गच्छ दूत ममादेशादंधकं ब्रूहि
सत्वरम् ॥ इहाभ्येत्याहवं कृत्वा जित्वेमां सुन्दरीं नय ॥ ७ ॥ इत्युक्तः प्रययौ दूतस्तेनाख्यातं वचो मम ॥ अन्धकोऽपि तदा दैत्यः समरार्थी तु
मन्दरम् ॥ सम[3]ायातः सहामात्यो बलेन चतुरंगिणा ॥ ८ ॥ मया सह ततस्तस्य घोरं युद्धमभूच्चिरम् ॥ अन्धकस्य रथो घोरश्छिन्नो भिन्नः समं
ततः ॥ ९ ॥ ततः क्रुद्धोंऽधको देवि रथात्तस्मादवप्लुतः ॥ मद्रथं बलवान्गृह्य मया सह बलोत्कटः ॥ युयुधे स महादैत्यः शूलेन ताडितो मया ॥
॥ १० ॥ मया धृतोन्तरिक्षे स शूलप्रोतो महासुरः ॥ शूलप्रोतोऽथ वै दुष्टस्तावत्स भ्रामितो मया ॥ ११ ॥ सुस्राव तस्य गात्रेभ्यः शोणितौघ
स्ततो महान् ॥ विन्दौबिन्दौ तु रक्तस्य तत्तुल्या दानवास्तथा ॥ १२ ॥ संभूताः कोटिशो देवि तैरहं पुनरर्दितः ॥ किं कर्त्तव्यमिति ध्यायन्स्थि
तोऽहं तत्र भामिनि ॥ १३ ॥ मया चोत्पादिता दुर्गा रक्तदंता सुभीषणा ॥ अन्धकस्य तदा पीतं रक्तं बहुविधं तया ॥ १४ ॥ तस्मिन्पीते ततो

१ यस्य यच्चाभिवाञ्छितम्–इ०पा० । २ अथ–इ०पा० । ३ स चायातः–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



रक्ते नोत्तस्थुर्देवि चापरे ॥ पूर्वोत्थितास्तथैवाशु निहता दानवाधिपाः ॥ तेन शूलवरेणैव तत्क्षणान्निधनं गताः ॥ १५ ॥ स मामुवाच हृष्टात्मा कृतां
जलिपुटोऽधकः ॥ त्वयि भक्तिः सदा मेस्तु दुर्लभं तव दर्शनम् ॥ १६ ॥ स्वामिना निहतश्चाहं कोऽन्यो धन्यतरो हि मत्[1] ॥ त्वच्छूलेन विनि
र्भिन्नो ह्यन्तरिक्षे ततोऽप्यहम् ॥ १७ ॥ संकल्पाक्षेपविक्षेपं कल्पकार्यप्रवर्त्तकम् ॥ सहस्रवक्त्रशिरसं त्वामहं शरणं व्रजे ॥ १८ ॥ गिरींद्रतनयानाथं
गिरींद्रशिखरालयम् ॥ महालयकृतावासं त्वामहं शरणं व्रजे ॥ १९ ॥ एवं स्तुतोऽहं दैत्येन शूलप्रोतेन सुन्दरि ॥ ततो मे करुणा जाता कृतोंधको
गणस्तदा ॥२०॥ स च शूलवरो देवि मया प्रोक्तो मुदा तदा ॥ एहि शूल हतो दैत्यस्त्वया दुष्टोंधको मृधे ॥२१॥ परितुष्टः प्रयच्छामि परमं स्थान
मुत्तमम्॥न देवैर्न च गन्धर्वैर्नापि तत्परमर्षिभिः॥२२॥संप्राप्यं मामनाराध्य तथा विध्वस्तकल्मषैः॥मामुवाच ततः शूलः प्रणम्यानतकन्धरः ॥२३॥
यदि प्रसन्नो भगवन्करुणा मयि ते यदि ॥ कथयस्व परं स्थानं मनो मे यत्र शुद्ध्यति ॥ दुष्टसंपर्कसंजातमन्यत्पातकमात्मनः ॥ २४ ॥ ततो मया
समादिष्टः करुणाश्लिष्टचेतसा ॥ महाकालवनं रम्यमतिपुण्यफलप्रदम् ॥ २५ ॥ तत्रास्मत्प्रीतिदं[2] लिंगं लोकानुग्रहकारकम् ॥ पृथुकेश्वरपूर्वेण
तदाराधय यत्नतः ॥ २६ ॥ मदीयं वचनं श्रुत्वा स जगाम त्वरान्वितः ॥ ददर्श तत्र तल्लिंगमनेकफलदायकम् ॥ २७ ॥ लिंगेन च पुनर्दृष्टः शूलः
शंकरवल्लभः ॥ संभूतोऽनेकवक्त्रस्तु हर्षाद्विस्मितमानसः ॥ २८ ॥ स्नेहात्संश्लेषितोऽत्यर्थं पृष्टस्तु कुशलं पुनः ॥ कथितं तेन शूलेन दुष्टांधक
वधं तदा[3] ॥ २९ ॥ प्रभुणा प्रेरितोऽत्यर्थं शुद्ध्यर्थं भवतोंतिके ॥ त्वद्दर्शनेन पूतोऽहं यास्यामि शिवसंनिधौ ॥ अद्यप्रभृति भूर्लोके मन्नाम्ना ख्या
तिमेष्यसि ॥ ३० ॥ ततो भविष्यत्यधिकं दर्शनात्ते वृणोम्यहम् ॥ किं तीर्थैर्विविधैः स्नातैः किं दानैर्विविधैः कृतैः ॥ ३१ ॥ ते प्राप्स्यंति फलं
सर्वं ये त्वां द्रक्ष्यंति भक्तितः ॥ ३२ ॥ यः करिष्यति ते पूजां भक्तियुक्तोऽपि मानवः ॥ अष्टम्यां वा चतुर्दश्यां दिने भौमस्य भक्तितः ॥
॥ ३३ ॥ विमानवरमास्थाय कामगं रत्नभूषितम् ॥ उदितादित्यसंकाशं स मुदा विचरिष्यति ॥ ३४ ॥ त्वन्नाम ये ग्रहीष्यंति सर्वदा भयपीडिताः ॥
व्याधिभिः पीडिता नित्यं दुःखैर्वा क्लेशिता भृशम् ॥ न भविष्यति भीस्तेषां घोरसंसारसागरे ॥ ३५ ॥ ये त्वां द्रक्ष्यंति पुरुषा भावहीनाः
प्रसंगतः ॥ न पतिष्यंति संसारे नरके चातिदारुणे ॥ ३६ ॥ इत्युक्तं तेन शूलेन लिंगमाश्लिष्य यत्नतः ॥ ३७ ॥ एष ते कथितो देवि प्रभावः

१ मत्—मत्तः—अपेक्षया—इत्यर्थः । २ अस्मत्प्रीतिदम्—इ०पा० । ३ यथा—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पापनाशनः ॥ शूलेश्वरस्य देवस्य अथोंकारेश्वरं शृणु ॥ ३८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये शूलेश्वरमाहात्म्यवर्णनंनामैकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥ ॥ छ ॥ ॥ श्रीविश्वेश्वर उवाच ॥ ॥ द्व्यधिकं देवि जानीहि पंचाशत्तममीश्वरम् ॥ ओंकारेश्वर इत्याख्या यस्यास्ति भुवनत्रये ॥ १ ॥ प्राकृते कल्पसंज्ञे तु प्रथमे प्रथमं मया ॥ वक्त्रादुत्पादितो देवि पुरुषः कपिलाकृतिः ॥ २ ॥ ततः स पुरुषो दिव्यः किं करोमीत्युपस्थितः ॥ विभजात्मानमित्युक्तो मयांतर्द्धानगोऽभवत् ॥ ३ ॥ निर्वाणस्येव दीपस्य गतिस्तस्य न लक्षिता ॥ ततस्तस्याभवच्चिंता कथमात्मा विभज्यते ॥ ४ ॥ एवं चिंतयतस्तस्य चतुर्मित्योत्थितस्ततः ॥ त्रिवर्णस्वररूपी च चतुर्वर्गफलप्रदः ॥ ५ ॥ ऋग्यजुःसामनामा च ब्रह्मविष्णुशिवात्मकः[1] ॥ व्याप्नुवन्सकलाल्लँलोकान्प्रभावैः पृथुभिस्तदा ॥ ६ ॥ ओंकार इति तस्याख्या मया दत्ता प्रसादतः ॥ तदोक्ताभिरुदाराभिर्वाणीभिः समलंकृतः ॥ ७ ॥ हृदयात्तस्य देवस्य वषट्कारः समुत्थितः ॥ छंदसां प्रवरा देवी चतुर्विंशाक्षरा परा ॥ ८ ॥ षट्कुक्षिः सा त्रिपादा च पंचशीर्षोपलक्षिता ॥ समीपवर्त्तिनी देवी पार्श्वे तत्र व्यवस्थिता ॥ ९ ॥ गायत्री मधुराभाषा सावित्री लोकविश्रुता ॥ स चोंकारो मया प्रोक्तो गायत्र्या सह पार्वति ॥ सृष्टिं कुरु ममादेशाद्विचित्रामनया सह ॥ १० ॥ इत्युक्तस्त्रिशिखो भूत्वा हिरण्यसदृशाकृतिः ॥ सृष्टिमुत्पादयामास स्वशरीरान्ममाज्ञया ॥ ११ ॥ पूर्वं देवगणाश्चैव त्रयस्त्रिंशच्च देवताः ॥ मनुष्या ऋषयश्चैव वेदप्रामाण्यतः कृताः ॥ १२ ॥ तेषां देहे प्रविष्टानां प्रादुर्भावः पुनर्भवेत् ॥ यथा सूर्यस्य सततमुदयास्तमनं भवेत् ॥ १३ ॥ संहृत्योंकारमखिलान्सदेवासुरपन्नगान्[2] ॥ कृतात्मगर्भे भगवानोंकारो जगतः प्रभुः[3] ॥ १४ ॥ ससर्ज सर्वभूतानि कल्पांते पर्वतात्मजे ॥ अव्यक्तः शाश्वतश्चैव तस्य सर्वमिदं जगत् ॥ १५ ॥ कर्त्ता चैव विकर्त्ता च संहर्ता च महांस्तु यः ॥ ओंकारपूर्वका वेदा यज्ञाश्चोंकारपूर्वकाः ॥ १६ ॥ ओंकारपूर्वकं ज्ञानं तपश्चोंकारपूर्वकम् ॥ स्वयंभूरिति विज्ञेयः स ब्रह्मा भुवनाधिपः ॥ १७ ॥ स वायुरिति विज्ञेयः सर्वज्ञः स प्रजाकरः ॥ विश्वे देवास्तथा साध्या रुद्रादित्यास्तथाश्विनौ ॥ १८ ॥ प्रजानां पतयश्चैव सप्त चैव महर्षयः ॥ वसवोऽप्सरसश्चैव गंधर्वाश्चैव राक्षसाः ॥ १९ ॥ दैत्याः पिशाचा रक्षांसि भूतानि विविधानि च ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा म्लेच्छादयो भुवि ॥ सर्वे चतुष्पदाश्चैव तिर्यग्योनिगतास्तदा ॥ २० ॥ जंगमानि च सत्त्वानि यच्चान्यजीवसंज्ञकम् ॥ कृत्वा सर्वमशेषं च ममांतिकमुपागतः ॥ २१ ॥ प्रणम्य प्रयतो भूत्वा वचनं चेदमब्रवीत् ॥ कृता सृष्टिर्मया

१ ब्रह्मविष्णुशिवांशकः—इ०पा० । २ वश्यम्—इ०पा० । ३ भूतभावनः—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



देव त्वत्प्रसादान्महेश्वर ॥२२॥ देहि मे परमं स्थानं यथा कीर्त्तिर्ध्रुवा भवेत् ॥ ओंकारस्य वचः श्रुत्वा मया प्रोक्तं वरानने ॥२३॥ ममाभीष्टकरं स्थानं नित्यमव्ययमक्षयम् ॥ महाकालवनं दिव्यं सर्वसंपत्करं शुभम् ॥२४॥ तत्र ते भविता कीर्त्तिः शाश्वती नात्र संशयः ॥ शूलेश्वरस्य देवस्य पूर्वभागे व्यवस्थितम् ॥२५॥ त्रिकल्पप्रभवं लिंगं त्वन्नाम्ना ख्यातिमेष्यति ॥ ओंकारेश्वर इत्याख्या भविष्यति जगत्त्रये ॥ २६ ॥ इत्युक्तो हि मया देवि ओंकारो हृष्टमानसः ॥ ददर्श तत्र तल्लिंगं तस्मिँल्लिंगे लयं गतः ॥२७॥ ततः प्रभृति वेदेषु ओंकारः क्रियते द्विजैः ॥ पुण्यार्थं मंगलार्थं च प्रथमं सर्ववस्तुषु ॥ ॥ २८ ॥ लयंगतो यदोंकारस्तदाप्रभृति पार्वति ॥ मयोच्यमानं लिंगस्य प्रभावातिशयं शृणु ॥ २९ ॥ यद्युगादिसहस्रेषु व्यतीपातशतेषु च ॥ अयनानां सहस्रेषु यत्पुण्यं समुदाहृतम् ॥ तत्पुण्यमधिकं देवि ॐकारेश्वरदर्शनात् ॥३०॥ चतुर्ष्वपि च वेदेषु समधीतेषु यत्फलम् ॥ ततोऽधिकं फलं प्रोक्तमोंकारेश्वरदर्शनात् ॥३१॥ ब्रह्मचर्येण यत्पुण्यं यावज्जीवं कृतेन च ॥ तत्पुण्यमधिकं प्रोक्तमोंकारेश्वरदर्शनात् ॥३२॥ करीषसाधने पुण्यं यच्च पुण्यमनाशके ॥ तत्पुण्यमधिकं देवि ॐकारेश्वरदर्शनात् ॥ ३३ ॥ पूजायां यत्फलं प्रोक्तं तस्य संख्या न विद्यते ॥ ३४ ॥ किं यज्ञैर्बहुवित्ताढ्यैः किं तपोभिः सुदुष्करैः ॥ ॐकारदर्शनादेव तत्फलं लभते यतः ॥ ३५ ॥ पूजनात्स्पर्शनाद्वापि कीर्त्तनाच्छ्रवणात्तथा ॥ ॐकारेश्वरदेवस्य नराः स्युर्मुक्तिभाजनाः ॥ ३६ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ ॐकारेश्वरदेवस्य शृणु विश्वेश्वरं परम् ॥ ३७ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्य ॐकारेश्वरमाहात्म्यवर्णनंनाम द्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥ ॥ छ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ त्रिपंचाशत्तमं विद्धि सुप्रसिद्धमथेश्वरम् ॥ परं विश्वेश्वरं ख्यातं विश्वेषु भुवनेष्वपि ॥ १ ॥ बभूव नृपतिः पूर्वं विदर्भायां विदूरथः ॥ सोन्तःपुरायुतोपेतं चक्रे राज्यमकंटकम् ॥ २ ॥ जघान तापसं सोऽथ प्रमादान्मृगयां गतः ॥ कृष्णाजिनधरं शांतं ध्यायंतं ब्रह्म शाश्वतम् ॥ ३ ॥ मृगं मत्वा महारण्ये ब्राह्मणं दैवमोहितः ॥ तेन कर्मविपाकेन देहांते रौरवं गतः ॥ ४ ॥ तत्रासौ यातना घोरां अनुभूयात्मकालतः ॥ तस्मादिहागतो मर्त्ये सर्पो विषधरोऽभवत् ॥ ५ ॥ अदशत्सोऽपि कोपेन ब्राह्मणं चरणे प्रिये ॥ लकुटेन हतः सोऽपि पंचत्वं तत्क्षणाद्गतः ॥ ६ ॥ च्युतस्तु नरकात्सिंहो द्वितीयेऽभूत्सुदारुणः ॥ राजानं भक्षयामास राजलोकैर्निपातितः ॥ ७ ॥ पुनर्व्याघ्रो बभूवासौ तृतीयेऽपि भवांतरे ॥ तीक्ष्णपादनखैर्घोरैर्घातयामास सूकरान् ॥ ८ ॥ तेनापि वैश्यो निधनं नीतः कश्चिद्वनांतरे ॥ निषादैर्निहतः सोऽपि बाणैः पंचत्वमागतः ॥ ९ ॥ चतुर्थे



१ स्थिरा मम–इ०पा० । २ त्रिकालप्रभवम्–इ०पा० । ३ सिद्धिदं हि महेश्वरम्–इ० पा० । ४ सोऽन्तःपुरशतोपेतम्–इ० पा० । ५ योगयाः–इ० पा० । ६ चरणाग्रयोः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽपि गजो जातः सिंहाद्वधमवाप्तवान् ॥ पंचमे मकरो जातः क्षारांभसि महोदधौ ॥ १० ॥ स्नातुकामामथो रामामाजघानातिपापकृत् ॥ धीवरैः कृतधिक्कारैर्बडिशैः सन्निपातितः ॥ ११ ॥ पुनः षष्ठे भवे जातः पिशाचः पिशिताशनः ॥ सिद्धमंत्रैरथोदग्रैरथर्वप्रभवैर्भृशम् ॥ १२ ॥ मंत्री मंत्रविदां श्रेष्ठो ब्राह्मणस्तं जघान ह ॥ सप्तमे स पुनर्जातो दुर्निरीक्ष्यवपुर्भृशम् ॥ १३ ॥ तीक्ष्णदंष्ट्रः करालास्यो मांसशोणितभोजनः ॥ शुष्कांगो मरुभूमीषु पापिष्ठो ब्रह्मराक्षसः ॥ १४ ॥ आक्रम्य निमिराजेन राज्ञा राक्षसशत्रुणा ॥ समारोप्य धनुः संख्ये ब्रह्मास्त्रेण निपातितः ॥१५॥ दारुणः सारमेयोऽभूदतिकृष्णोऽष्टमे भवे ॥ स शूकरखुराघातव्रणैः पंचत्वमागतः ॥ १६ ॥ नवमे जंबुको जातः श्मशाने स च मांसभुक् ॥ लौल्यात्स निधनं प्राप्तो दुःखार्त्तो दाववह्निना ॥ १७ ॥ दशमे त्वभवद्गृध्रस्तीक्ष्णतुंडो भयावहः ॥ पूतिमांसवसाहारो रोगेण निधनं गतः ॥ १८ ॥ एकादशेऽपि चंडालो गतोऽवंत्यां वरानने ॥ द्रव्यस्य हरणार्थं वै प्रविष्टो द्विजवेश्मनि ॥ १९ ॥ स दंडपाशिकेनैव प्राप्तो बद्धश्च तत्क्षणात् ॥ आनीतो हि वधार्थाय वृक्षाग्रे ह्यवलंबितः ॥ २० ॥ तत्रैव लिंगमासन्नं साध्वि शूलेश्वरोत्तरे ॥ तस्य दृष्टिपथं प्राप्तमतिविक्लवचेतसः ॥ २१ ॥ क्षणेन निधनं प्राप्तः स गतस्त्रिदशालयम् ॥ तत्र भुक्त्वा वरान्भोगानवतीर्य च भूतले ॥ २२ ॥ जातः ख्यातो विदर्भायां विश्वेशोनाम पार्थिवः ॥ जातिस्मरत्वमापन्नो लिंगदर्शनपुण्यतः ॥ २३ ॥ दुर्लभान्बुभुजे भोगान्प्राप्तं राज्यं चकार सः ॥ सोऽभिषिच्य सुतं राज्ये विनीतमतिधर्मवित् ॥ संस्मरन्पूर्ववृत्तांतं जगामावंतिकां पुरीम् ॥ २४ ॥ तत्र दृष्ट्वा महल्लिंगं दुर्दर्शमतितेजसा ॥ दिव्येन चक्षुषाऽपश्यल्लिंगमध्ये चराचरम् ॥ २५ ॥ लिंगमध्ये स्थिताः सर्वे सागराः सरितस्तथा ॥ द्वीपाश्च पर्वताश्चैव तथान्या दिव्यभूतयः ॥ २६ ॥ चंद्रमाः सह नक्षत्रैरादित्यश्चाग्निना सह ॥ धनदो वरुणश्चैव यमः शक्रो मरुत्पतिः ॥ २७ ॥ मरुतो देवगंधर्वा ऋषयश्च तपोधनाः ॥ नागा यक्षाः पिशाचाश्च राक्षसा भीमविक्रमाः ॥ २८ ॥ ब्रह्माद्या देवताश्चान्याः स्कंदो लंबोदरस्तथा॥सर्वं त्रिभुवनं देवि लिंगमध्ये विलोकितम्॥२९॥प्रभावं तस्य लिंगस्य ज्ञात्वा सम्यङ्महीपतिः॥ संयतः पूजयामास विश्वयोनिं महेश्वरम् ॥३०॥ प्रसन्नश्चाभवत्तस्य वचनं चेदमब्रवीत्॥वरं वरय भद्रं ते किमभीष्टं ददामि ते॥३१॥तेनोक्तं वचनं राज्ञा यदि तुष्टोसि मे प्रभो॥ ये त्वां पश्यंति मनुजाः श्रद्धयाऽश्रद्धयाऽथवा ॥३२॥मा भूत्तेषां प्रपतनं घोरे संसारसागरे॥विश्वेश्वरेति नाम्ना वै प्रसिद्धो भव भूतले ॥३३॥ इत्युक्ते वचने भूयो विश्वेशोऽलंकृतो गणैः॥ विमानेन सुदीप्तेन गतो लोकं मदीयकम् ॥३४॥ गणैर्नानाविधैः सार्द्धं स्तूयमानो वरानने ॥

१ अतः—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



किरीटी कुण्डली चैव मुक्ताहारविभूषितः ॥ विमानं तस्य तद्दिव्यं परिक्रम्य समंततः ॥ ३५ ॥ समहेंद्रधनाध्यक्षनानानाकनिवासिनः ॥ मुनयः सिद्धगंधर्वास्तथा चाप्सरसां गणाः ॥ ३६ ॥ नृत्येनामरनारीणां विलोकितविनोदकः ॥ युगकोटिसहस्रं तु मत्समीपे व्यवस्थितः ॥ ३७ ॥ अतो देवि भुवि ख्यातो देवो विश्वेश्वरेश्वरः ॥ दृष्ट्वा लिंगं च विश्वेशं पातकैर्विप्रमुच्यते[1] ॥ ३८ ॥ सप्तजन्मकृतैर्देही मनोवाक्कायकर्मभिः ॥ दृष्ट्वा विश्वेश्वरं लिंगं कृतकृत्यत्वमाप्यते ॥ ३९ ॥ तस्य नश्यति दौर्भाग्यमलक्ष्मीर्नाशमेति च ॥ प्राप्नोति देही कामांश्च समृद्धिं मानसीं सदा ॥ ४० ॥ दुःस्वप्नो व्याधयः क्रूरा ग्रहा भूताश्च दारुणाः ॥ प्रणश्यन्ति वरारोहे विश्वेशे पूजिते सदा ॥ ४१ ॥ ये केचिच्छ्रद्धया युक्ता लिंगमाराधयंति वै ॥ ते सर्वकाम संपन्ना जायंते च युगेयुगे ॥ ४२ ॥ अंते गतिश्च सा दिव्या जायते मत्प्रसादतः ॥ यत्र संपूज्यते लिंगं तस्मिन्देशे शुभाः क्रियाः ॥ ४३ ॥ न तत्र दुर्भिक्षभयं नापमृत्युभयं[2] क्वचित् ॥ प्रेतयोनौ च वैताला न नागा न च दंष्ट्रिणः ॥ ४४ ॥ एते च विष्णुब्रह्मेंद्रकुबेरवरुणादयः[3] ॥ लिंगार्च नेन संप्राप्ताः परां सिद्धिं महौजसः ॥ ४५ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ विश्वेश्वरस्य देवस्य कण्टेश्वरमतः शृणु ॥ ४६ ॥

इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये विश्वेश्वरमाहात्म्यवर्णनंनाम त्रिपंचाशत्तमोऽध्यायः ॥ ५३ ॥ ॥ छ ॥

॥ श्रीमहादेव उवाच ॥ ॥ चतुःपंचाशतं विद्धि देवं कंटेश्वरं प्रिये ॥ यस्य दर्शनमात्रेण कृतकृत्यो नरो भवेत् ॥ १ ॥ आद्यकल्पे पुरा देवि राजाभूत्सत्यविक्रमः ॥ स शत्रुभिर्जितः संख्ये हृतकोशोऽतिदुःखितः ॥ २ ॥ वनं जगाम गहनमेकाकी श्रमकर्शितः ॥ तत्राश्रमं ददर्शाथ वसिष्ठस्य महात्मनः ॥ ३ ॥ तेनर्षिणा वसिष्ठेन दृष्टमात्रः स भूपतिः ॥ पूजितो विष्टराद्येन राजार्हेण च सादरम् ॥ ४ ॥ ज्ञात्वा तपःप्रभावेन सूर्यवंशोद्भवं नृपम् ॥ पप्रच्छागमनं देवि कुशलं च पुनः पुनः ॥ ५ ॥ स नृपः कथयामास वसिष्ठाय सुदुःखितः ॥ राज्यं च सकलं ब्रह्मन्हृतं विद्वेषिभिर्मम ॥ ६ ॥ त्वामहं शरणं प्राप्तो दुःखैकायतनो यतः ॥ निष्कण्टकं कथं राज्यं भविष्यति पुनः प्रभो ॥ उपदेशप्रदानेन प्रसादं कर्त्तुमर्हसि ॥ ७ ॥ तस्य तद्वचनं श्रुत्वा वसिष्ठो भगवानृषिः ॥ ध्यात्वा च कथयामास बहुकौतूहलान्वितः ॥ ८ ॥ महाकालवनं भूप व्रज त्वं कार्यसिद्धये ॥ दिव्या नदी वने तत्र विश्रुता भुवनत्रये ॥ ९ ॥ तस्यास्तीरे शुभं लिंगं पृथुकेश्वर दक्षिणे ॥ द्रक्ष्यसे नृपशार्दूल तपस्यंतं च तापसम् ॥ अस्थिचर्मावशेषं तु चीरवल्कलधारिणम् ॥ १० ॥ वचनात्तस्य विप्रस्य वसिष्ठस्य महा

१ मुच्यते सदा--इ०पा० । २ नाल्पमृत्युभयम्--इ०पा० । ३ विष्णुब्रह्मेन्द्रकुबेरदहनादयः--इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्मनः ॥ जगाम सहसा राजा महाकालवनं शुभम् ॥ ११ ॥ ददर्श तापसं तत्र चिरंजीविनमव्ययम् ॥ उपवासकृतक्षामं द्वादशादित्यवर्चसम् ॥ ॥ १२ ॥ तापसेन नृपो दृष्टो मित्रोऽयं मम वल्लभः ॥ प्राप्तो राज्यपरिभ्रष्टो ज्ञात्वा वचनमब्रवीत् ॥ १३ ॥ एह्येहि नृपशार्दूल दिष्ट्या प्राप्तोऽसि मेंऽतिके ॥ इत्युक्त्वा तापसेनैव हुंकारश्च कृतस्तदा ॥ १४ ॥ तद्धुंकारात्तु पातालं भित्त्वा पंच च कन्यकाः ॥ निर्ययुः कांचनं पीठमेका तासां प्रगृह्य वै ॥ १५ ॥ भृंगारं तु गृहीत्वान्या निःसृता जलसंभृतम् ॥ पादप्रक्षालनार्थाय तृतीया समुपस्थिता ॥ १६ ॥ अन्ये द्वे व्यजने गृह्य पार्श्वाभ्यां च व्यवस्थिते ॥ ततो हुंकारमकरोत्पुनरेव महातपाः ॥ १७ ॥ तेन हुंकारशब्देन देवलोकात्समागतम् ॥ दृष्ट्वा चाप्सरसां संघं नृत्यगीतमनोहरम् ॥ १८ ॥ अनंतरं ददर्शाथ लिंगं ज्योतिष्करं परम् ॥ उत्पन्नं च जगद्यस्मिँल्लीयते सचराचरम् ॥ १९ ॥ तद्दृष्ट्वा विस्मयाविष्टो बभूव नृपसत्तमः ॥ प्रणम्य शिरसा विप्रं किमिदं द्विजसत्तम ॥ २० ॥ एवं पृष्टो नृपेणाथ स विप्रो वाक्यमब्रवीत् ॥ सप्तजन्मानि राजेंद्र त्वयाहं परितोषितः ॥ २१ ॥ अतस्ते दर्शिता माया तपसा दुष्करेण तु ॥ लिंगस्यास्य प्रभावेण पश्य मे तपसो बलम् ॥ २२ ॥ हुंकारेण कृता पृथ्वी जलपूर्णा तु तत्क्षणात् ॥ हुंकाराच्च जलं ग्रस्तं मुखादग्निरजायत ॥ २३ ॥ हुंकारात्पृथिवी सर्वा जाता वह्निमयी तदा ॥ संहृत्य तत्क्षणा द्वह्निं मुखाद्वायुर्विनिर्ययौ ॥ २४ ॥ हुंकारेण कृतं सर्वं तत्क्षणादेव पार्वति ॥ न दिशः प्रदिशो वापि न नक्षत्रग्रहास्तदा ॥ २५ ॥ ततो बभ्राम तत्रास्ति स नृपो विस्मयान्वितः ॥ चिंतयामास सहसा क्व लिंगं क्व च तापसः ॥ २६ ॥ एवं चिंतयतस्तस्य ततः शब्दो महानभूत् ॥ तस्माच्छब्दाच्च संजातं पुरं प्राकारसंवृतम् ॥ २७ ॥ सुहर्म्यकक्ष्या[1]रचितं विशालं विशुद्धजांबूनदभूषितं च ॥ दिव्यैर्जनैः सेवितमात्मविद्भिर्ददर्श राजा सहसा पुरं तत् ॥ २८ ॥ भूयोभवन्महाशब्दस्तस्मात्स्त्रीयुगलं बभौ ॥ सितवस्त्रधरा चैका[2] कृष्णवस्त्रधरा सिता ॥ २९ ॥ पुनः शब्दो बभूवाथ तस्मात्पुरुषसत्तमः ॥ द्विशिराः षण्मुखश्चैव पादैर्द्वादशभिर्युतः ॥ ३० ॥ पुनः शब्दाच्च संजज्ञे पुरुषः सप्तधा गतः ॥ संहृतं हि पुनस्तच्च दर्शयित्वा द्विजेन तु ॥ प्रोक्तमित्थं विशालाक्षि जातं कंटकितं[3] नृपम् ॥ ३१ ॥ पश्य लोकमिमं मह्यं तपसा निर्मितं नृप ॥ त्वत्प्रियार्थमयं लोको दर्शितस्ते नृपोत्तम ॥ ३२ ॥ एवमुक्तस्तदा तेन तापसेन नराधिपः ॥ विस्मयापन्नहृदयः पप्रच्छ प्रयतः सुधीः[4] ॥ ३३ ॥ भगवन्सितकृष्णे द्वे के स्त्रियौ द्विजसत्तम ॥ कोऽसौ द्वादशपाद्विप्र द्विशिराः षण्मुखः पुनः ॥ ३४ ॥ कश्चासौ पुरुषो ब्रह्मन्य एकः सप्तधाऽभवत् ॥ तस्य तद्वचनं श्रुत्वा कथयामास

१ सुहर्म्यकक्ष्यावितताम्--इ०पा० । २ पीतवस्त्रधरा चैका--इ०पा० । ३ कंटकितम्--सरोमांचहर्षम्--इ०पा० । ४ शुचिः--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तापसः ॥ ३५ ॥ एते स्त्रियौ त्वया दृष्टे सितकृष्णे नृपोत्तम ॥ ते च रात्र्यहनी प्रोक्ते ब्रह्मणा निर्मिते पुरा ॥ ३६ ॥ शीर्षद्वयं च यद्दृष्टं तेऽयने द्वे प्रकीर्तिते ॥ मुखानि यानि दृष्टानि षट् च ते ॠतवः स्मृताः ॥ पादा द्वादश ये दृष्टा मासा द्वादश ते स्मृताः ॥ ३७ ॥ यः पुमान्सप्तधा जात एकीभूतो नरेश्वर ॥ स ससुद्रस्तु विज्ञेयः सप्तधैको व्यवस्थितः ॥ ३८॥ एतत्संवत्सरं चक्रं त्वत्प्रियार्थं निदर्शितम् ॥ एवं विदित्वा राजेंद्र न शोकं कर्तुमर्हसि ॥ ३९ ॥ सर्वो विनश्वरो लोकः सदेवासुरमानुषः ॥ मया दृष्टो हि बहुशो लिंगस्यास्य प्रभावतः ॥ ४० ॥ कुरु शत्रुविनाशाय लिंगस्यास्य च दर्शनम् ॥ राज्यं निष्कण्टकं राजन्भविष्यति न संशयः ॥ ४१ ॥ एवमुक्तस्तदा राजा दृष्टवाँल्लिंगमुत्तमम् ॥ दर्शनात्तस्य लिंगस्य कण्टका ये महीभृतः ॥ विद्वेषिणो मृतास्तेऽपि श्रुतास्तेन महीभृता ॥ ४२ ॥ गतस्तं विषयं राजा चक्रवर्ती बभूव ह ॥ लिंगस्यास्य प्रभावेन राज्यं कृत्वा महाधनैः ॥ ४३ ॥ यज्ञैश्च विविधैरिष्ट्वा परं निर्वाणमाप्तवान् ॥ तापसेन श्रुतं सर्वं दृष्टं ध्यानेन तेन वै ॥ ४४ ॥ लब्धं निष्कण्टकं राज्यं लिंगस्यास्य च दर्शनात् ॥ मम मित्रेण सहसा राज्यभ्रष्टेन तेन वै ॥ ४५ ॥ अतो नाम सुविख्यातं कण्टेश्वर इति क्षितौ ॥ भविष्यति न संदेहो दर्शनाद्राज्यदायकः ॥ ४६ ॥ अद्यप्रभृति पश्यन्ति देवं कण्टेश्वरं शिवम् ॥ तेषां च कण्टकाः सद्यो विनश्यन्ति न संशयः ॥ ४७ ॥ नैमिषेय कुरुक्षेत्रे गंगाद्वारे च पुष्करे ॥ स्नानात्संसेवनाद्वापि यत्पुण्यं च भविष्यति ॥ तत्पुण्यं भविता सम्यक्छ्रीकण्टेश्वरदर्शनात् ॥ ४८ ॥ गृहिणो लिंगिनो वापि ये पश्यंति यतव्रताः ॥ देवं कण्टेश्वरं भक्त्या तेषां सिद्धिर्भविष्यति ॥ ४९ ॥ जन्मांतरसहस्रेण यत्पापं पूर्वसंचितम् ॥ तत्सर्वं यास्यति क्षिप्रं श्रीकण्टेश्वरदर्शनात् ॥ ५० ॥ दत्तं जप्तं हुतं चेष्टं तपस्तप्तं कृतं च यत् ॥ ध्यानमध्ययनं चैव सर्वं भवति चाक्षयम् ॥ ५१ ॥ एवं ब्रुवाणं तं विप्रं तापसं संशितव्रतम् ॥ लिंगेनोक्तं विशालाक्षि तुष्टेन वरपूर्वकम् ॥ ५२ ॥ जरारोगविनिर्मुक्तः सर्वशोकविवर्जितः ॥ भविष्यति गणाध्यक्षो वरदः सर्वपूजितः ॥ अवध्यश्चापि सर्वेषां योगैश्वर्यसमन्वितः ॥ ५३ ॥ एवमुक्तोऽथ लिंगेन तापसो गणतां गतः ॥ गणैः परिवृतो देवि मम पार्श्वमुपागतः ॥ ५४ ॥ अन्धकेन पुरा युद्धे सिंहनादो यदा कृतः ॥ तदा देवि मदीयं तु जातं कण्टकितं वपुः ॥ ५५ ॥ उत्पन्नं च तदा लिंगमशेषारिविनाशनम् ॥ देवानां कण्टका ये च दग्धा लिंगाग्निना यतः ॥ अतः कंटेश्वरो देवो विख्यातो भुवनत्रये ॥५६॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ कंटेश्वरस्य देवस्य शृणु सिंहेश्वरं परम् ॥ ५७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये कंटेश्वरमाहात्म्यवर्णनंनाम चतुःपञ्चाशत्तमोऽध्यायः ॥ ५४ ॥ ॥ छ ॥ ॥ छ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥  ॥ श्रीईश्वर उवाच ॥  ॥ पंचाधिकं विजानीहि पंचाशत्तममीश्वरम् ॥ सिंहेश्वरं वरारोहे महाभयविनाशनम् ॥ १ ॥ सद्यःकल्पे त्वया देवि मदर्थं हि महत्तपः ॥ कृतं नीलोत्पलापांगि भीषणं संशितव्रतम् ॥ तपसा तव रौद्रेण दग्धं हि भुवनत्रयम् ॥ २ ॥ दुष्करं हि तपो ज्ञात्वा भगवांश्चतुराननः ॥ आगत्योवाच देवेशो देवि त्वां शुभया गिरा ॥ ३ ॥ किं पुत्रि प्राप्तुकामासि किमलभ्यं ददामि ते ॥ विरम्यतामतिक्लेशात्तपसोऽस्मान्ममाज्ञया ॥ ४ ॥ त्वया च वचनं श्रुत्वा गुरोर्गौरवगर्भितम् ॥ प्रियं तथ्यं हितं तत्र वर्णनिर्णीतवांछितम् ॥ ५ ॥ प्रत्युक्तः स तदा ब्रह्मा प्रणामनम्रया त्वया ॥ तपसा दुष्करेणात्तः पतित्वे शंकरो मया ॥ ६ ॥ स मां श्यामलवर्णेति बहुशः प्रोक्तवान्भवः ॥ श्यामाहं कांचनाकारा वल्लभेन च संयुता ॥ भर्त्ता भूतपतिर्वश्यः कथं स्यादिति मे तपः ॥ ७ ॥ त्वदीयं वचनं श्रुत्वा वरार्हो[1] वरदः प्रभुः ॥ एवं भविष्यतीत्याह ब्रह्मा लोकपितामहः ॥ ८ ॥ कियता चैव कालेन वांछासिद्धिर्भविष्यति ॥ गौरीनाम्ना तु ते मूर्त्तिः कांत्या दीप्ता भविष्यति ॥ ९ ॥ एतच्छ्रुत्वा त्वया वाक्यं ब्रह्मणः परमेष्ठिनः ॥ क्रुद्धा त्वं गिरिजेऽत्यर्थं कालेऽभीष्टं भविष्यति ॥ १० ॥ क्रोधात्सिंहः समुद्भूतो वदनात्ते भयावहः ॥ विवृतास्यो महारौद्रो जटाजटिलकंधरः ॥ ११ ॥ प्रोद्भूतवल्गुलांगूलो दंष्ट्रोत्कटमुखोत्कटः ॥ तस्यास्ये पतितुं देवि व्यवसायः कृतस्त्वया ॥ १२ ॥ सोऽपि सिंहः क्षुधाविष्टस्त्वां भक्षयितुमुद्यतः ॥ नचैवासौ समर्थोऽभूद्वीक्षितुं वा तपोधिकाम् ॥ १३ ॥ स दह्यमानः सहसा तेजसा तपसा तव ॥ पराङ्मुखः समभवत्प्राणत्राणपरायणः ॥ १४ ॥ ततस्तवाभूत्करुणा सिंहं प्रति यतव्रते ॥ क्षुधितस्य त्वया तस्य क्षीरं ह्यमृतसन्निभम् ॥ १५ ॥ उत्पादितं स्तनाभ्यां तु तस्य सिंहस्य कारणात् ॥ तथापि दह्यतेऽत्यर्थं दुष्टभावं यतो गतः ॥ १६ ॥ तेनोक्तं दह्यमानेन मातर्दग्धोस्मि तेजसा ॥ त्वदीयेन दुराचारो दुष्टोहं पापविग्रहः ॥ १७ ॥ त्वामत्तुकामो दुष्टात्मा त्वयाहं जनितोऽधुना ॥ तस्माद्यास्यामि नरकं मातृहा गुरुघातकः ॥ १८ ॥ तस्य तद्वचनं श्रुत्वा दुःखितस्य सुतस्य तु ॥ ममत्वेन विशालाक्षि सिंहस्य कथितं त्वया ॥१९॥ अघघ्नं विद्यते क्षेत्रं महाकालवनं सुत॥तत्र गच्छ ममादेशाच्छीघ्रं देवविनिर्मितम्॥ २० ॥ कंटेश्वरस्य देवस्य समीपे लिंगमुत्तमम् ॥ सिंहनादात्समुत्पन्नं शंकरस्य महात्मनः ॥ २१ ॥ अंधकासुरयुद्धे वै पीडिते वासवे पुरा ॥ त्वदीयं वचनं श्रुत्वा सिंहस्त्वरितविक्रमः ॥ २२ ॥ गतो महाकालवनं दृष्टो देवोऽथ तत्क्षणात् ॥ दिव्यदेहो मृगारिस्तु जातो लिंगस्य दर्शनात् ॥ २३ ॥ ममत्वात्तस्य लिंगस्य त्वं गता तत्र पार्वति ॥ सिंहिकारूपमास्थाय शीघ्रं सिंहस्त्वया प्रिये ॥ २४ ॥ दृष्टो दिव्यशरी

१ प्रिये-इ०पा० । २ वरदे पुनः-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



रस्तु लिंगस्यास्य प्रभावतः ॥ तव तुष्टिः परा जाता दृष्ट्वा सिंहं महाद्युतिम् ॥ २५ ॥ कृतं नाम त्वया देवि लिंगस्यास्य वरानने ॥ दिव्यदेहस्तु सिंहोयं जातो लिंगस्य दर्शनात् ॥ २६ ॥ अतः सिंहेश्वरो देवो भुवि ख्यातो भविष्यति ॥ एतस्मिन्नंतरे ब्रह्मा संप्राप्तस्तत्र सुव्रते ॥ उवाच त्वां वरारोहे देवैः परिवृतस्तदा ॥२७॥ य एष सिंहः संभूतस्तव क्रोधात्सुतो यतः ॥ ततोऽसौ वाहनो देवि भविष्यति न संशयः ॥ २८ ॥ लिंगं सिंहेश्वरं भक्त्या यः पश्यति समाहितः ॥ तस्य वासोऽक्षयो दिव्यो भविष्यति त्रिविष्टपे ॥२९॥ कीर्तनान्मुच्यते पापाद्दृष्ट्वा भद्राणि पश्यति ॥ स्पर्शनादस्य लिंगस्य पुनात्यासप्तमं कुलम् ॥ ३० ॥ मनसा चिंतितान्कामांस्तांश्च प्राप्नोति पुष्कलान् ॥ तदैव पुरुषो मुक्तो जन्मदुःखजरादिभिः ॥ ३१ ॥ यदा पश्यति सिंहेशं संसारार्णवतारकम् ॥ व्यालव्याघ्रादयश्चौरास्तथा साहसिकाश्च ये ॥३२॥ तेभ्यो भयं न भवति श्रीसिंहेश्वरदर्शनात् ॥ यज्ञानां तपसां चैव दानादीनां च यत्फलम् ॥ तत्फलं जायते सम्यग्दृष्ट्वा सिंहेश्वरं शिवम् ॥ ३३ ॥ मदीयं लोकमाप्नोति सुरासुरनमस्कृतम् ॥ यः पश्यति प्रयत्नेन देवं सिंहेश्वरं तदा ॥ ३४ ॥ इत्युक्त्वासौ जगामाथ ब्रह्मा लोकं स्वकं प्रिये ॥ यद्वपुस्तव पूर्वं स्यात्कालकांतिकलंकितम् ॥ प्रभावात्तपसस्तस्य गौरत्वं प्राप्तमद्भुतम् ॥ ३५ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ सिंहेश्वरस्य देवस्य रेवंतेशमतः शृणु ॥ ३६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखंडे चतुरशीतिलिंगमाहात्म्ये सिंहेश्वरमाहात्म्यवर्णनंनाम पंचपंचाशत्तमोऽध्यायः ॥ ॥ ५५ ॥ ॥ छ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ षट्पंचाशत्तमं विद्धि रेवंतेश्वरसंज्ञकम् ॥ यस्य दर्शनमात्रेण परा सिद्धिः प्रजायते ॥ १ ॥ असहंती पुरा संज्ञा रवेस्तेजोऽतिदुःसहम् ॥ तपः कर्त्तुं गता देवि ज्ञाता सूर्येण सुव्रता ॥ २ ॥ अश्वरूपं ततः कृत्वा जगामाथोत्तरान्कुरून् ॥ ददृशे तत्र संज्ञां च वडवारूपधारिणीम् ॥ ३ ॥ गता सा सम्मुखं तस्य पृष्ठरक्षणतत्परा ॥ ततोभून्नासिकायोगस्तयोस्तत्र समेतयोः ॥ ५ ॥ नासत्यदस्रौ तनयावश्ववक्त्रौ विनिर्गतौ ॥ रेतसोंऽते च रेवंतः खड्गी चर्मी तनुत्रधृक् ॥ ६ ॥ अश्वारूढः समुद्भूतस्ततो बाणधनुर्द्धरः ॥ तेन वै जातमात्रेण अश्वारूढेन लीलया ॥ निर्जितं च जगच्चेदं सदेवासुरमानुषम् ॥ ७ ॥ ततो देवाः पराभूता ब्रह्माणं शरणं गताः ॥ प्रणम्य कथयामासुर्भयकंपितकंधराः ॥ ८ ॥ अस्माकं विभवं तेजो रविपुत्रेण नाशितम् ॥ रेवंतेन सुरेंद्रेण शृणु लोकपितामह ॥ ९ ॥ तस्य गात्रसमुद्भूतो वह्निर्धावति कालजित् ॥ ज्वलंति पादपास्तेन पतंति शिखराणि च ॥ १० ॥ सर्वतो व्याकुलीभूतं हाहाकारमचेतनम् ॥ तेनैव पीडितं सर्वं ज्वाला

१ देवदेवः–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मालासमाकुलम् ॥ ११ ॥ दशदिक्षु प्रवृत्तोऽयं समृद्धो हव्यवाहनः ॥ सर्वं किंशुकसंकाशं प्रज्वलन्निव दृश्यते ॥ १२ ॥ इति तेषां वचः श्रुत्वा ब्रह्मणोक्तं वरानने ॥ ज्ञातं मया सुरश्रेष्ठा भवतां कार्यमीदृशम् ॥ १३ ॥ भविष्यति च वस्तच्च कांक्षितं यत्सुरोत्तमाः ॥ गच्छध्वं सहसा तस्माच्छंकरं शरणं सुराः ॥ १४ ॥ ब्रह्मणो वचनं श्रुत्वा ममांतिकमुपागताः ॥ त्रिदशा भयसंत्रस्ता नत्वा मामिदमब्रुवन् ॥ १५ ॥ आदित्यतनयेनैव रेवंतेन महेश्वर ॥ दग्धं त्रिभुवनं सर्वं शरीरस्थेन वह्निना ॥ तेजसा महता चैव विक्रमेण बलेन च ॥ १६ ॥ असाध्यः किल सोऽस्माकं सर्वेषां देवसत्तम ॥ भवान्प्रभवते तस्य नान्यः शंकर कश्चन ॥ १७ ॥ त्वां प्रपद्यामहे सर्वे भयार्त्ताः शरणार्थिनः ॥ शरणं वरदं देवं त्रिदशानां महेश्वर ॥ १८ ॥ मया स्मृतः सूर्यपुत्रो रेवंतस्तत्क्षणात्प्रिये ॥ प्राप्तः प्रीतिप्रसन्नात्मा वचनं चेदमब्रवीत् ॥ १९ ॥ किं मया देव कर्त्तव्यं ब्रूहि सर्वमशेषतः ॥ ततो मया सूर्यपुत्र उत्संगे च कृतस्तदा ॥ २० ॥ स्नेहादाचुंबितो मूर्ध्नि परिष्वक्तः पुनःपुनः ॥ ददामि ते महाभाग वरं वरय सुव्रत ॥ २१ ॥ परितुष्टोस्मि ते कामं यथेष्टं काममाप्नुहि ॥ इदमाज्ञापयामि त्वां श्रेयश्चैवमवाप्स्यसि ॥ २२ ॥ ममाभीष्टं परं स्थानं विद्यते पृथिवीतले ॥ अक्षयं प्रलये पुत्र महाकालवनं शुभम् ॥ तत्र दास्यामि ते स्थानं तत्र कीर्त्तिर्भविष्यति ॥ २३ ॥ पूर्वे कंटेश्वरस्यापि स्थानं परमदुर्लभम् ॥ तत्र त्वं वस रेवंत लिंगं द्रक्ष्यसि शाश्वतम् ॥ २४ ॥ सर्वदा त्रिदशैः पूज्यो भविष्यसि न संशयः ॥ गुह्यकाधिपतिस्त्वं च स्वर्गलोके भविष्यसि ॥ २५ ॥ अश्वशालासु सर्वासु पूजनीयो भविष्यसि ॥ नृपतीनां गृहे चैव वसिष्यसि सुपूजितः ॥ २६ ॥ तेजो मदीयं तत्स्थानं लिंगाकारं सनातनम् ॥ पूजितं त्रिदशैस्तत्र संसेव्यं यत्नतस्त्वया ॥ २७ ॥ एवमुक्तो मया देवि रेवंतो रविजस्तदा ॥ जगामाकाशमाविश्य महाकालवनं क्षणात् ॥ २८ ॥ ददर्श तत्र तल्लिंगं ज्योतीरूपं सनातनम् ॥ सूर्यपुत्रस्तु रेवंतो दृष्टो लिंगेन पार्वति ॥ २९ ॥ प्रोक्तः प्रणयपूर्वेण दिष्ट्या दृष्टोऽसि सूर्यज ॥ अद्यप्रभृति ते नाम्ना ख्यातिं यास्यामि भूतले ॥ ३० ॥ स्थातव्यं मत्समीपे तु सूर्यपुत्र त्वया सदा ॥ अक्षया भविता कीर्त्तिस्त्वदीया भुवनत्रये ॥ ३१ ॥ रेवंतेश्वरसंज्ञोऽहं भविष्यामि न संशयः ॥ ये मां द्रक्ष्यंति रेवंत भक्त्या परमया युताः ॥ तेषामश्वा भविष्यंति विजयो यश ऊर्जितम् ॥ ३२ ॥ ऐश्वर्यं दानशक्तिश्च पुत्रपौत्रमनंतकम् ॥ गुह्यकानां पतिर्भूत्वा स्वर्गलोके स वत्स्यति ॥ ३३ ॥ लिंगस्य वचनं श्रुत्वा प्रोक्तं वै रविसूनुना ॥ रेवंतेन विशालाक्षि संतुष्टेनांतरात्मना ॥ ३४ ॥

१ पुनः—उ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



देहि मे ह्यचलां भक्तिं देहि मे स्थानमुत्तमम् ॥ देहि मे परमं ज्ञानं ध्रुवां कीर्तिं च देहि मे ॥ ३५ ॥ भगवन्भूतभव्येश भवबंधभयापह ॥ संस्कृतार्थोऽस्मि संजातस्तव देवस्य दर्शनात् ॥ ३६ ॥ जन्मकोटिसुसंशुद्धा ये त्वां पश्यंति देहिनः ॥ न तेषां पुनरावृत्तिर्घोरसंसारसागरे ॥ ॥ ३७ ॥ इत्युक्त्वा रविसूनुर्वै रेवंतो रविवल्लभः ॥ रेवंतेश्वरदेवस्य समीपे संव्यवस्थितः ॥ ३८ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ रेवंतेश्वरदेवस्य घंटेश्वरमथो शृणु ॥ ३९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्ग माहात्म्ये रेवंतेश्वरमाहात्म्यवर्णनंनाम षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ सप्तपंचाशतं विद्धि घंटेश्वरमथो शृणु ॥ यस्य दर्शनमात्रेण कामावाप्तिश्च जायते ॥ १ ॥ घंटोनाम गणश्रेष्ठो बभूव मम वल्लभः ॥ चाक्षुषस्य मनोः काले कौतुकार्थं यदृच्छया ॥ प्रस्थितो ब्रह्मसदनं द्रष्टुं ब्रह्माणमव्ययम् ॥ २ ॥ अथायान्तं समालोक्य गन्धर्वं गीतकोविदम् ॥ चित्रसेनं गणश्रेष्ठः पप्रच्छ कुशलं मुदा ॥ ३ ॥ मया तत्रैव गन्तव्यं सदने परमेष्ठिनः ॥ गीतैराराधयिष्यामि ब्रह्माणं जगतां पतिम् ॥ ४ ॥ चित्रसेनोऽथ तं देवि प्रत्युक्तो घंटमब्रवीत् ॥ पद्मयोनिः सुरैः सार्धं गुह्यं मन्त्रमचीकरत् ॥ ५ ॥ एतच्छ्रुत्वा गणो घंटस्तस्थौ विस्मितमानसः ॥ मूहूर्तं चिंतयामास प्रतिहारनिवारितः ॥ ६ ॥ हित्वा स्वामिनमीशानं द्रष्टुं ब्रह्माणमागतः ॥ प्रवेशोपि न लभ्येत प्रसादो दूरतः स्थितः ॥ ७ ॥ एवं चिंतयतस्तस्य साग्रः संवत्सरो गतः ॥ घंटस्य ब्रह्मणो द्वारि प्रवेशो देवि नाभवत् ॥ ८ ॥ निर्गच्छंतमथालोक्य वीणाहस्तं समुत्सुकम् ॥ नारदं स गणश्रेष्ठः पद्मयोनिं गृहोदरात् ॥ ९ ॥ प्रोक्तो घंटेन सहसा मां निवेदय नारद ॥ गणोऽहं गीततत्त्वज्ञो महादेवस्य वल्लभः ॥ १० ॥ दर्शनार्थं समायातो ब्रह्मणः परमेष्ठिनः ॥ घंटस्य वचनं श्रुत्वा प्रीतिमानभवन्मुनिः ॥ नारदः प्रत्युवाचेदं समाश्वास्य संकेतवम् ॥ ११ ॥ अहं बृहस्पतेः पार्श्वे प्रेषितोऽस्मि गणाधिप ॥ किंचित्कार्यांतरं प्रष्टुं ब्रह्मणा लोककर्तृणा ॥ आयास्यामि क्षणेनैव तावत्कालं प्रतीक्ष्यताम् ॥ १२ ॥ इत्युक्त्वा नारदो देवि मम पार्श्वमुपागतः ॥ वृत्तांतं कथयामास घंटस्य मुनिसत्तमः ॥ १३ ॥ ईदृशो दुर्लभो भृत्यो घंटेन सदृशः प्रभो ॥ यस्त्वां त्यक्त्वा गणो देव सेवायै परमेष्ठिनः ॥ स्थितः संवत्सरं साग्रं प्रवेशं न च लब्धवान् ॥ १४ ॥ तच्छ्रुत्वा वचनं तस्य नारदस्य मुनेस्तदा ॥ मया शप्तस्तु कोपेन पत घण्ट महीतले ॥ १५ ॥ मां त्यक्त्वा हि गतोन्यत्र सेवार्थं परवेश्मनि ॥ मयेत्युक्ते च वचने ब्रह्मद्वारि स्थितोऽपि सन् ॥ १६ ॥



१ विद्धि—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पतितो भूतले घंटो देवदारुवनांतिके ॥ आत्मानं पतितं दृष्ट्वा भूमौ घंटेन पार्वति ॥ १७ ॥ प्रोक्तं शोकोत्तरेणैव वचनं गद्गदाक्षरम् ॥ सेवार्थं याति योऽन्यत्र परिहृत्य स्वकं प्रभुम् ॥ १८ ॥ स याति नरकं घोरमपकीर्तिं च विंदति ॥ नारदेन मम त्वद्य वंचितस्य द्वयं गतम् ॥ यस्मात्स्वामी न मे ब्रह्मा न च देवो महेश्वरः ॥ १९ ॥ एवं विलपतस्तस्य नारदो मुनिसत्तमः ॥ आजगाम तमुद्देशं यत्र घंटो व्यवस्थितः ॥ २० ॥ देवदारुवने देवि दर्शनार्थं तपस्विनाम् ॥ घंटेन नारदो दृष्टो भीतेनाकुलचेतसा ॥ २१ ॥ अवस्थामीदृशीं कृत्वा किमन्यन्मे करिष्यति ॥ एवं तं चिंतयानं तु नारदो वाक्यमब्रवीत् ॥ २२ ॥ गणाध्यक्ष न ते कार्यो मन्युः पुण्यविनाशनः ॥ कीर्त्यर्थं पतितो घंट प्रायश्चित्तार्थमेव च ॥ २३ ॥ प्रायश्चित्तविशुद्धात्मा प्रभुं प्राप्स्यसि शंकरम् ॥ तस्माद्गच्छ ममादेशान्महाकालवनं शुभम् ॥ २४ ॥ रेवंतेश्वर[1] पूर्वे तु विद्यते लिंगमुत्तमम् ॥ सर्वसंपत्करं दिव्यं त्वन्नाम्ना ख्यातिमेष्यति ॥ २५ ॥ इत्युक्तो नारदेनैव जैगीषव्यः समागतः ॥ तेनापि कथितं सर्वं सत्यमुक्तमनेन वै ॥ २६ ॥ नारदेन गणाध्यक्ष कीर्त्तिस्ते भविताऽक्षया ॥ कश्यपेन मृकण्डेन कण्वेन जमदग्निना ॥२७॥ अत्रिणा भृगुणा देवि लोमशेन सुरर्षिणा ॥ प्रोक्तो घंटो गतः शीघ्रं महाकालवनं शुभम् ॥ २८ ॥ यत्र घंटानिनादेन युध्यतो मम संयुगे ॥ पापक्षयकरं देवि संभूतं लिंगमुत्तमम् ॥ दृष्टं तत्र गणेनैव लिंगं तेजोमयं शुभम् ॥ २९ ॥ दर्शनात्तस्य लिंगस्य भूयो घंटो गणोऽभवत् ॥ लक्ष्म्या कांत्या समायुक्तः सहस्रकिरणाकृतिः ॥ ३० ॥ घण्टोभिनंदितोऽत्यर्थं विमानैः सार्वकामिकैः ॥ मम पार्श्वं समायातो ममातीव प्रियोऽभवत् ॥ ३१ ॥ ये पश्यन्ति विशालाक्षि देवं घण्टेश्वरं शिवम् ॥ ते घण्टाभिर्नादितास्तु विमानैः सार्वकामिकैः ॥३२॥ यास्यंति सुचिरं कालं मम लोकं सनातनम् ॥ घण्टेश्वरं परं लिंगं नाख्येयं यस्य[2] कस्यचित् ॥ ३३ ॥ व्याधितो यदि वा दीनो दुःखितो वा भवेन्नरः ॥ यः पश्यति प्रसंगेन देवं घण्टेश्वरं प्रिये ॥ दीप्तकांचनवर्णाभैर्विमानैः सार्वकामिकैः ॥ ३४ ॥ गंधर्वाप्सरसां मध्ये स्वर्गे मोदति मानवः ॥ ईप्सितांल्लभते कामान्वीणावेणुविनोदितः ॥ ३५ ॥ ततः स्वर्गात्परिभ्रष्टः सर्वैश्वर्यसमन्वितः ॥ हिरण्यधान्यसंपूर्णे समृद्धे जायते कुले ॥ राजा वा राजतुल्यो वा जंबूद्वीपपतिर्भवेत् ॥ ३६ ॥ यः पूजयति देवेशं श्रद्धया परया युतः[3] ॥ स याति परमं स्थानमपुनर्भवकारणम् ॥ ३७ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ घण्टेश्वरस्य देवस्य प्रयागे

१ रेवन्तेश्वरदेवस्य पश्चिमे लिंगमुत्तमम्–इ०पा० । २ यत्र कुत्रचित्–इ० पा० । ३ पुनः–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





शमथो शृणु ॥ ३८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये घण्टेश्वर माहात्म्यवर्णनंनाम सप्तपंचाशत्तमोऽध्यायः ॥ ५७ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ प्रयागेश्वरसंज्ञं तु सर्वकामकरं परम् ॥ अष्टाधिकं विजानीहि पंचाशत्तममीश्वरम् ॥ १ ॥ आसीत्प्रथमकल्पे तु मनुः स्वायंभुवः पुरा ॥ तस्य प्रियव्रतः पुत्रो यज्वा परमधार्मिकः ॥ २ ॥ स चेष्ट्वा बहुभिर्यज्ञैः समात्तवरदक्षिणैः ॥ सप्तद्वीपेषु संप्राप्य भरतादीन्सुतान्प्रिये ॥ ३ ॥ स्वयं विशालां बदरीं गत्वा तेपे महत्तपः ॥ कालेन बहुना तत्र नारदः समुपस्थितः ॥ ४ ॥ पूजितो विष्टरार्घेण राज्ञा प्रियव्रतेन च ॥ स पृष्टः पूजयित्वा तु किमाश्चर्यं वदस्व मे ॥ ५ ॥ इत्युक्तः कथयामास नारदो मुनिसत्तमः ॥ श्वेतद्वीपे मया राजन्कन्या दृष्टा सरोवरे ॥ ६ ॥ सा च पृष्टा विशालाक्षी कस्माद्वससि निर्जने ॥ कासि भद्रे कथं वासि किं वा कार्यमिह त्वया ॥ ७ ॥ कर्त्तव्यं चारुसर्वांगि तन्ममाचक्ष्व शोभने ॥ एवमुक्ता मया सा हि मां दृष्ट्वा मीलितेक्षणम् ॥ ८ ॥ स्मृत्वा तूष्णीं स्थिता यावत्तावन्मे ज्ञानमुत्तमम् ॥ विस्मृताः सर्ववेदाश्च सर्वशास्त्राणि चैव हि ॥९॥ ततोऽहं विस्मयाविष्टश्चिंतामोहसमन्वितः ॥ तामेव शरणं गत्वा यावत्पश्यामि पार्थिव ॥१०॥ तावद्दिव्यः पुमांस्तस्याः शरीरे समदृश्यत ॥ तस्यापि पुंसो हृदये द्वितीयस्तस्य चोरसि ॥ तस्यापि हृदये चान्यस्तृतीयस्तु व्यवस्थितः ॥११॥ ततः पृष्टा मया देवी सा कुमारी कथंचन ॥ वेदा नष्टा ममाशेषा भद्रे किं ब्रूहि कारणम् ॥१२॥ ॥ कन्योवाच ॥ ॥ माताहं सर्ववेदानां सावित्रीनाम नामतः ॥ मां न जानासि येन त्वमतो वेदा हृतास्तव ॥ १३ ॥ एवमुक्ते मया पृष्टा विस्मयेन महीपते ॥ वेदानां त्वं तु माता वै कथयस्व ममानघे ॥ १४ ॥ त्वदीयहृदये देवि क एते पुरुषास्त्रयः ॥ १५ ॥ ॥ कन्योवाच ॥ ॥ य एष मच्छरीरस्थः शुभांगश्चारुशोभनः ॥ एष ऋग्वेदनामा तु यजुर्वेदो द्वितीयकः ॥ १६ ॥ सामवेदस्तृतीयस्तु त्रयो वेदा मयि स्थिताः ॥ त्रयोऽग्नयस्त्रयो देवा मच्छरीरे स्थिता द्विज ॥ १७ ॥ इत्युक्त्वा सा तदा कन्या पश्यतो मम भूपते ॥ अंतर्द्धानं गता सद्यस्ततोऽहं विस्मितोऽभवम् ॥ १८ ॥ किं करोमि क्व गच्छामि शरणं यामि कं प्रभुम् ॥ कथमाविर्भविष्यंति वेदाः शास्त्राणि सांप्रतम् ॥ १९ ॥ कामिकस्तीर्थराजस्तु प्रयागः श्रूयते श्रुतौ ॥ अहं तत्र गमिष्यामि ज्ञानं सम्यग्भविष्यति ॥ २० ॥ नष्टवेदेन रैभ्येण प्राप्ता सिद्धिरनुत्तमा ॥ सावित्री श्रूयते तत्र अक्षय्यवटसन्निधौ ॥ २१ ॥ एवं मनसि संध्याय गतोऽहं नृपसत्तम ॥ प्रयागं कामिकं तीर्थं सर्वदेवनमस्कृतम् ॥ २२ ॥ तपस्तीव्रं मया तत्र तप्तं परमदुष्करम् ॥ अथाजगाम राजेंद्र प्रयागो

१ सर्वपापहरं परम्--इ० पा० । २ विविधैः--इ०पा० । ३ संश्राय--इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मूर्त्तिमान्स्वयम् ॥ २३ ॥ उक्तोऽहं प्रणयात्तेन न मां तापय नारद ॥ ब्रह्मपुत्र प्रयागोऽहं भीषितस्तपसा तव ॥ २४ ॥ भवतः पार्श्वमायातः प्रणयेन तपोधन ॥ धन्योऽसि सर्वथा ब्रह्मंस्तपसा च विशेषतः ॥ २५ ॥ मया सार्धं त्वया ब्रह्मन्गतिः कार्याऽविकल्पतः ॥ महाकालवने रम्ये तत्र ते ज्ञानमुत्तमम् ॥ भविष्यति न संदेहो मम कीर्त्तिश्च सुस्थिरा ॥ २६ ॥ एवं हि ब्रुवतस्तस्य प्रयागस्य नृपोत्तम ॥ प्रादुर्बभूव सहसा पीतवासा जनार्दनः ॥ २७ ॥ शङ्खचक्रगदापाणिर्गरुडस्थो वियद्गतः ॥ उवाच मेघगंभीरं वाक्यं स पुरुषोत्तमः ॥ २८ ॥ एहि नारद गच्छामः प्रयागो यत्र यास्यति ॥ कृष्णस्य वचनं श्रुत्वा मया प्रोक्तो जनार्दनः ॥ २९ ॥ ज्ञानं मे देहि देवेश कथं यास्यामि तद्वनम् ॥ महाकालं जगन्नाथ श्रुतज्ञानविवर्जितः ॥ ३० ॥ इत्युक्तः श्रीधरेणाहं महाकालवनं नृप ॥ आनीतस्तत्क्षणाच्छीघ्रं प्रयागसहितस्तदा ॥ ३१ ॥ घंटेश्वरस्य पूर्वे तु नवनद्यास्तु दक्षिणे ॥ तत्र लिंगमनादिं तु ज्योतीरूपं सनातनम् ॥ ३२ ॥ प्रयागः पूजयामास पश्यतो मम भूपते ॥ लिंगेनोक्तं प्रसन्नेन किमर्थं त्वमिहागतः ॥३३॥ प्रयाग प्रयतो भूत्वा प्रसन्नोऽहं सदा तव ॥ दर्शनं च मदीयं तु विफलं न भविष्यति ॥३४॥ इत्युक्तस्तेन लिंगेन मदर्थं प्रार्थितस्तदा ॥ ज्ञानं देहि द्विजायास्मै नारदाय महात्मने ॥ ३५ ॥ नष्टा वेदाश्च शास्त्राणि सावित्र्या दर्शनात्प्रभो ॥ ३६ ॥ ततो लिंगात्समुत्तस्थौ ब्रह्मा वेदैर्वृतस्तदा ॥ षडंगैः सरहस्यैश्च पुराणैः सहितस्तदा ॥ ३७ ॥ इत्युक्तोऽहं तदा देव्या सावित्र्या नृपसत्तम ॥ लिंगस्यास्य प्रभावेण प्रयागाभ्यर्थितस्य वै ॥ ३८ ॥ प्रतिभास्यंति ते वेदा धर्मशास्त्राणि नारद ॥ इत्युक्ते वचने भूयः प्राप्ता वेदा मया नृप ॥ ३९ ॥ ज्ञानं षडंगसहितं शास्त्राणि विविधानि च ॥ लब्धज्ञानेन राजेंद्र मया प्रोक्तं वचस्तदा ॥ ४० ॥ प्रयागेनार्चितो देवो मम ज्ञानस्य कारणात् ॥ प्रयागेश्वरसंज्ञस्तु ख्यातिं लोकेषु यास्यति ॥ ४१ ॥ तदाप्रभृति तल्लिंगं तीर्थकोटिशतैर्वृतम् ॥ स्वर्गापवर्गफलदं तत्र त्वं गंतुमर्हसि ॥ ४२ ॥ किमनेनाश्वमेधेन इष्टेन नृपसत्तम ॥ अश्वमेधशतफलं जायते तस्य दर्शनात् ॥ ४३ ॥ तपसा किं सुतप्तेन कायक्लेशकरेण तु ॥ वाञ्छितं लभते सद्यः प्रयागेश्वरदर्शनात् ॥ ॥ ४४ ॥ ॥ ईश्वर उवाच ॥ ॥ नारदस्य वचः श्रुत्वा स्वायंभुवसुतो नृपः ॥ प्रियव्रतो महादेवि महाकालवनं गतः ॥ ४५ ॥ ददर्श तत्र तल्लिंगं नवनद्यास्तु दक्षिणे ॥ दर्शनात्तस्य लिंगस्य मत्समीपं समागतः ॥ ४६ ॥ मया संमानितो देवि गणानामधिपः कृतः ॥ ये पश्यंति नरा भक्त्या प्रयागेश्वरमीश्वरम् ॥ ते धन्या मानुषे लोके क्लिश्यन्त्यन्ये निरर्थकाः ॥ ४७ ॥ या गतिर्योगयुक्तस्य सत्त्वस्थस्य मनीषिणः ॥ सा गतिर्जायते

१ च प्रयागेन मा--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

सम्यक्प्रयागेश्वरदर्शनात् ॥ ४८ ॥ माघमासे समेष्यंति प्रयागेश्वरदर्शनम् ॥ कर्त्तुं ये मानुषास्तेषामश्वमेधः पदेपदे ॥ ४९ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ प्रयागेश्वरदेवस्य शृणु सिद्धेश्वरं परम् ॥ ५० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्य खंडे चतुरशीतिलिङ्गमाहात्म्ये प्रयागेश्वरमाहात्म्यवर्णनंनामाष्टपंचाशत्तमोऽध्यायः ॥ ५८ ॥ छ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ एकोनषष्टिकं विद्धि देवं सिद्धेश्वरं प्रिये ॥ यस्य दर्शनमात्रेण सिद्धिः पुंसां प्रजायते ॥ १ ॥ आसीदश्वशिरानाम राजा परमधार्मिकः ॥ सोऽश्वमेधेन यज्ञेन इष्ट्वा सब हुदक्षिणम् ॥ २ ॥ स्नातश्चावभृथे हृष्टो ब्राह्मणैः परिवारितः ॥ यावदास्ते स राजर्षिस्तावत्सिद्धोऽतिदीप्तिमान् ॥ ३ ॥ नानौषधिप्रभावज्ञो मंत्रतंत्र विशारदः ॥ आययौ कपिलः श्रीमाञ्जैगीषव्यश्च सिद्धराट् ॥ ४ ॥ तयोस्त्वरितमुत्थाय स राजाभ्यागतक्रियाम् ॥ चकार परया युक्तो मुदा वै पृथिवीपतिः ॥ ५ ॥ तावर्चितावासनस्थौ क्षमाशीलौ शुचिव्रतौ ॥ महौजसौ महाभागौ मुमुक्षू मुनिपुंगवौ ॥ ६ ॥ विद्याविनयसंपन्नौ ब्रह्मचर्यपरायणौ ॥ अनेकसृष्टिसंहारस्थितिकार्यपरायणौ ॥ ७ ॥ उदयादित्यसंकाशौ विभावसुसमद्युती ॥ तेजोराशिसमायुक्तौ दुर्निरीक्ष्यौ पृथग्जनैः ॥८॥ विनयेनोपसंगम्य प्रणिपत्याभिवाद्य च ॥ स राजा प्रांजलिर्भूत्वा प्रश्नमेनमपृच्छत ॥ ९ ॥ ॥ अश्वशिरा उवाच ॥ ॥ श्रुतं मया मुनिश्रेष्ठौ नान्यो देवो जनार्दनात् ॥ ध्यातोथ पूजितो नृणां मुक्तिदो भवबंधनात् ॥ १० ॥ संस्मृते तु हृषीकेशे नराणां कोटिजन्मजम् ॥ अशुभं क्षयमाप्नोति कथं न प्रणमेद्धरिम् ॥ ११ ॥ समाराध्य जगन्नाथं शक्राद्यास्त्रिदिवौकसः ॥ वसंति मुदिताः स्वर्गे दिव्यद्युतिसमन्विताः ॥ १२ ॥ जन्ममृत्युजरारोगैर्दुःखानि विविधानि च ॥ प्रयांति विलयं सद्यः प्रसन्ने गरुडध्वजे ॥ १३ ॥ इति पृष्टस्तदा तेन प्रार्थितेन यशस्विना ॥ ऊचतुस्तं नृपं सिद्धौ सिद्धिविज्ञानकोविदौ ॥ १४ ॥ क एष प्रोच्यते राजंस्त्वया नारायणोऽधुना ॥ आवां नारायणौ द्वौ तु त्वत्प्रत्यक्षं गतौ नृप ॥ १५ ॥ ॥ अश्वशिरा उवाच ॥ ॥ भवंतौ ब्राह्मणौ सिद्धौ तपसा दग्धकिल्बिषौ ॥ युवां नारायणौ कस्मादिति वाक्यमुवाच सः ॥ १६ ॥ शंखचक्रगदापाणिः पीतवासा जनार्द्दनः ॥ गरुडस्थो हृषीकेशः कस्तस्य सदृशो भुवि ॥ १७ ॥ तस्य राज्ञो वचः श्रुत्वा संसिद्धौ योगकोविदौ ॥ दर्शयामासतुस्तौ हि कृत्वा नारायणं वपुः ॥ १८ ॥ कपिलो मंत्रमाहात्म्यात्स्वयं विष्णुर्बभूव ह ॥ शंखचक्रगदापाणिः पीतवासाश्च तत्क्षणात् ॥ १९ ॥ जैगीषव्यश्च गरुडस्तत्क्षणात्समजायत ॥ ततः समभवत्तत्र राजवेश्मनि कौ

१ भवेत्–इ० पा० । २ अभवत्प्रिये–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुकम् ॥ २० ॥ दृष्ट्वा नारायणं देवं गरुडस्थं सनातनम् ॥ आश्चर्यं तादृशं दृष्ट्वा स राजा विस्मयान्वितः ॥ उवाच क्षाम्यतां सिद्धौ नायं विष्णुरथे दृशः ॥ २१ ॥ तस्य ब्रह्मा समुत्पन्नो नाभिपंकजमध्यतः ॥ तस्मात्तु ब्रह्मणो रुद्रः स विष्णुः परमेश्वरः ॥ २२ ॥ इति राज्ञो वचः श्रुत्वा तदा तौ सिद्धसत्तमौ ॥ चक्रतुः परमां मायां योगाचार्यौ सुमांत्रिकौ ॥ २३ ॥ कपिलः पद्मनाभस्तु पद्ममध्ये प्रजापतिः ॥ बभूव स्वयमेवात्र सहसा योगतस्तदा ॥ २४ ॥ जैगीषव्योऽथ रुद्रस्तु तस्यैवांके व्यवस्थितः ॥ ददर्श महदाश्चर्यं स राजा योगमोहितः ॥ २५ ॥ कौतुकात्प्रत्युवाचेदं भीतः कंपितकन्धरः ॥ नेत्थं भवति विश्वेशो मायैषा योगिनां तदा ॥ सर्वरूपी हरिः श्रीमान्सर्वगः सर्वदः स्मृतः ॥ २६ ॥ ततो वाक्यावसाने तु तस्य राज्ञश्च संसदि ॥ मशका मत्कुणा यूका भ्रमराः पक्षिणो मृगाः ॥ २७ ॥ अश्वा गावो हयाः सिंहा व्याघ्रा गोमहिषास्तथा ॥ अन्येपि पशवः कीटा ग्राम्यारण्याश्च सर्वशः ॥ २८ ॥ दृश्यंते राजभवने कोटिशः पर्वतात्मजे ॥ तं दृष्ट्वा भूतसंघातं राजा विस्मितमानसः ॥ २९ ॥ यावच्चिंतयते किं स्यात्तावज्ज्ञातं नृपेण हि ॥ जैगीषव्यस्य माहात्म्यं कपिलस्य महात्मनः ॥ ३० ॥ कृतांजलिपुटो भूत्वा स राजाऽश्वशिरास्तदा ॥ पप्रच्छ च द्विजौ भक्त्या किमिदं सिद्धसत्तमौ ॥ ३१ ॥ सामर्थ्यमीदृशं लब्धं कस्माद्वै तपसो बलात् ॥ अद्य मे सफलोत्पत्तिरद्य मे सफलं श्रुतम् ॥ ३२ ॥ सफला मे मनोवृत्तिर्युवयोर्दर्शनेन वै ॥ तस्य तद्वचनं श्रुत्वा कपिलो वाक्यमब्रवीत् ॥ ३३ ॥ महाकालवने राजन्विद्यते लिंगमुत्तमम् ॥ ख्यातं सिद्धेश्वरं नाम्ना सिद्धैरभ्यर्चितं सदा ॥ ३४ ॥ सौभाग्येश्वरपूर्वं तु सौभाग्यारोग्यदायकम् ॥ प्रभावात्तस्य लिंगस्य प्राप्ता सिद्धिरनुत्तमा ॥ ३५ ॥ जैगीषव्येन सिद्धेन मया वै नृपसत्तम ॥ तस्माद्व्रज महाबाहो महाकालवनं शुभम् ॥ ३६ ॥ तत्र द्रक्ष्यसि सर्वेशं[2] शंखचक्रगदाधरम् ॥ लिंगमूर्तौ स्थितं विष्णुं यस्ते सिद्धिं प्रदास्यति ॥ ३७ ॥ संसिद्धा बहवस्तत्र सनकाद्या नरेश्वर ॥ तस्य तद्वचनं श्रुत्वा कपिलस्य महात्मनः ॥ ३८ ॥ जगाम सहसा तत्र स राजाश्वशिरास्तदा ॥ ददर्श चैव तौ सिद्धौ सिद्धेश्वरसमीपतः ॥ ३९ ॥ अन्ये च बहवः सिद्धाः सिद्धनाथास्तथा परे ॥ ज्ञात्वा सिद्धेश्वरं देवं सिद्धसंघैः समर्चितम् ॥ ४० ॥ लिंगमध्ये स्थितं विष्णुं ज्ञात्वा स नृपसत्तमः ॥ पूजयामास भावेन परमेण समाधिना ॥ ४१ ॥ ततस्तुष्टोऽब्रवीद्देवो वरं वरय सुव्रत ॥ यत्तेभिलषितं सर्वमहं दास्यामि भूपते ॥ ४२ ॥ लिंगस्य वचनं श्रुत्वा नृपेणोक्तं च तच्छृणु ॥ यदि मेऽस्ति दया देव प्रसन्नोऽसि हि चेत्प्रभो ॥ ४३ ॥ यत्ते रूपं परं नाथ तद्दर्शय ममाच्युत ॥ एतदेव हि मे देव सदाभिलषितं हृदि ॥ ४४ ॥ आजन्मनो

१ तु–इ०पा०। २ देवेशम्–इ०पा०।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



जगन्नाथ कदा द्रक्ष्ये जनार्दनम् ॥ एतदिच्छाम्यहं देव वराणां प्रवरं वरम् ॥ दीयमानं त्वयाभीष्टं ख्यातं सिद्धेश्वरं क्षितौ ॥ ४५ ॥ नृपस्य वचनं श्रुत्वा लिंगेनोक्तं वरानने ॥ न मे विदुर्देवगणा नासुरा न महर्षयः ॥ ४६ ॥ परं रूपं नृपश्रेष्ठ कृष्णोऽहं लिंगतां गतः ॥ ममलोकं तु ये प्राप्ता मुनयो मंत्रभूषिताः ॥ ४७ ॥ न चैते मां विजानंति परमार्थेन पार्थिव ॥ यदेतद्दृश्यते तेजो लिंगरूपेण मामकम् ॥ ४८ ॥ एतदेव हि ब्रह्माद्या ध्यायन्ति त्रिदशास्त्वमी ॥ अतो न मे परं रूपं द्रष्टुं कश्चित्क्षमो भवेत् ॥ ४९ ॥ अनेकजन्मसंशुद्धा योगिनो मदनुग्रहात् ॥ प्रविशंति तनौ मह्यं मुक्ताः संसारबंधनैः ॥५०॥ एवं हि ब्रुवतस्तस्य सिद्धिः प्राप्ता नृपेण हि ॥ विष्णुरूपं समास्थाय तस्मिँल्लिंगे लयं गतः ॥५१॥ अतो देवि सुविख्यातं लिंगं सिद्धेश्वरं परम् ॥ ये पश्यंति नरा भक्त्या तेषां सिद्धिश्च शाश्वती ॥ ५२ ॥ अंजनं पादलेपं च पादुकासिद्धिरेव च ॥ गुटिका खड्गसिद्धिश्च महासिद्धिः सुदुर्लभा ॥ ५३ ॥ दिव्यौषधैश्च या सिद्धिर्मंत्रस्पर्शोद्भवा च या ॥ एतास्तु सिद्धयः प्रोक्ता अपरां[1] लघिमादयः ॥ ५४ ॥ धर्मार्थकाम सिद्धिश्च मोक्षसिद्धिरनुत्तमा ॥ जायते नात्र सन्देहः श्रीसिद्धेश्वरदर्शनात् ॥ ५५ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ सिद्धे श्वरस्य देवस्य मतंगेशमथो शृणु ॥ ५६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीति लिङ्गमाहात्म्ये सिद्धेश्वरमाहात्म्यवर्णनंनामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥ ॥ छ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ मतंगेश्वर संज्ञं तु षष्टिसंख्याकर्माश्वरम् ॥ विद्धि पापहरं देवि समीहितकरं सदा ॥ १ ॥ सुगतिर्नाम विप्रेन्द्रो बभूव द्वापरे युगे ॥ सत्य वादी सदा दांतो वेदाध्ययनतत्परः ॥ २ ॥ मतंगस्तस्य पुत्रोऽभूद्बाल्याद्दारुणतां गतः ॥ स बालं गर्दभं देवि तिष्ठन्तं मातुरंतिके ॥ दण्ड काष्ठेन सहसा ताडयामास चापलात् ॥ ३ ॥ तं तु तीव्राहतं दृष्ट्वा गर्दभी पुत्रगृद्धिनी ॥ उवाच मा शुचः पुत्र चंडालोऽयं न वै द्विजः ॥ ४ ॥ ब्राह्मणे दारुणं नास्ति मैत्रो ब्राह्मण उच्यते ॥ तुदन्पापाकृतिरयं बाले न कुरुते दयाम् ॥ ५ ॥ स्वकीयां भजते चाथ प्रकृतिं मानवः सदा ॥ एतच्छुत्वा मतंगस्तु दारुणं गर्दभीवचः ॥ ६ ॥ दंडकाष्ठं परित्यज्य रासभीं प्रत्यभाषत ॥ ब्रूहि रासभि कल्याणि माता मे येन दूषिता ॥ ७ ॥ कथं मां वेत्सि चंडालं यायावरकुलोद्भवम् ॥ केन जातोस्मि चंडालो ब्राह्मण्यं येन मे गतम् ॥ ८ ॥ ॥ गर्दभ्युवाच ॥ ॥ नापितेन प्रमत्तेन ब्राह्मण्यां वृषलेन हि ॥ ततस्त्वमसि चांडालो ब्राह्मण्यं तेन ते गतम् ॥ ९ ॥ एवमुक्तो मतंगस्तु पितरं वाक्यमब्रवीत् ॥ ताताश्चर्यं

१ अपाराः—इ०पा० । २ अवंतीस्थपुस्तके–'सिद्धवटपासे'–इति सिद्धेश्वरलिंगस्य स्थानं सूचितम् ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुतं मेऽद्य जातोऽहं नापितेन वै ॥ १० ॥ गर्दभ्या कथितं सम्यक्तस्मात्तप्स्ये महत्तपः ॥ एवमुक्त्वा स पितरं प्रतस्थे कृतनिश्चयः ॥११॥ स गत्वा च ततोऽरण्यमतप्यत महत्तपः ॥ ततः संतापयामास विबुधांस्तपसान्वितः ॥ १२ ॥ तं तथा तपसा युक्तमुवाच हरिवाहनः ॥ मतंग तप्यसे किं त्वं भोगानुत्सृज्य मानुषान् ॥ वरं ददामि तेऽहं तं वृणीष्व त्वं यदिच्छसि ॥ १३ ॥ ॥ मतङ्ग उवाच ॥ ॥ ब्राह्मण्यं कामयानोऽहमिदमारब्धवां स्तपः ॥ देहि मे शाश्वतं शक्र वर एष वृतो मया ॥ १४ ॥ एतच्छ्रुत्वा तु वचनं तमुवाच पुरंदरः ॥ ब्राह्मण्यं याचसे त्वं हि दुष्प्रापमकृतात्मभिः ॥ ॥ १५ ॥ नाशमेष्यसि दुर्बुद्धे तदुपारम मा चिरम् ॥ चंडालयोनौ जातेन न तत्प्राप्यं कथंचन ॥ १६ ॥ एवमुक्तो मतंगस्तु संशितात्मा यत व्रतः ॥ अतिष्ठदेकपादेन वर्षाणां शतसंख्यया ॥ १७ ॥ तमुवाच ततः शक्रः पुनरेव महायशाः ॥ ब्राह्मण्यं दुर्लभं वीर मा कृथाः साहसं वृथा ॥ १८ ॥ न हि शक्यं प्राप्तुमेवमचिरान्नाशमेष्यसि ॥ वृणु वा काममन्यं त्वं ब्राह्मणत्वं सुदुर्लभम् ॥ १९ ॥ एवमुक्तो मतंगस्तु संशितात्मा दृढव्रतः ॥ सहस्रमेकं पादेन ततोऽब्दानामवर्त्तत ॥२०॥ तदेव च पुनर्वाक्यमुवाच बलवृत्रहा ॥ चंडालायौनौ जातेन नावाप्यं ते कथंचन ॥ २१ ॥ अन्यं वरं वृणीष्व त्वं मा कृथास्तत्स्वयं श्रमम् ॥ एवमुक्तो मतंगस्तु भृशं शोकपरायणः ॥ २२ ॥ अतिष्ठत गयां गत्वा सोंगुष्ठेन शतं समाः ॥ सुदुष्करं वहन्योगं प्राणायामपरायणः ॥ २३ ॥ त्वगस्थिभूतो धर्मात्मा तताप परमं तपः ॥ तपंतं तमभिद्रुत्य परिजग्राह वासवः ॥ २४ ॥ वरा णामीश्वरो दाता सर्वभूतहिते रतः ॥ २५ ॥ ॥ शक्र उवाच ॥ ॥ मतंगब्राह्मणत्वं हि विरुद्धमिह दृश्यते ॥ ब्राह्मण्यं दुर्ल्लभं तात ह्यसतां पापशीलिनाम् ॥ २६ ॥ ब्राह्मणे सर्वभूतानां योगक्षेमः समाहितः ॥ तदुत्सृज्येह दुष्प्राप्यं ब्राह्मण्यमकृतात्मभिः ॥ २७ ॥ अन्यं वरं वृणीष्व त्वं दुर्लभोऽयं हि ते वरः ॥ २८ ॥ ॥ मतंग उवाच ॥ ॥ किं मां तुदसि दुःखार्तं मृतं मारयसे च माम् ॥ तं तु शोचामि यो लब्ध्वा ब्राह्मण्यं नानु पालयेत् ॥ २९ ॥ ब्राह्मण्यं यदि दुष्प्राप्यं त्रिभिर्वर्णैः शतक्रतो ॥ तपसा च कथं लब्धं विश्वामित्रेण भूभुजा ॥ ३० ॥ वीतहव्यश्च राजर्षिस्तपसा विप्रतां गतः ॥ तस्मात्तपः करिष्यामि निर्द्वंद्वो निष्परिग्रहः ॥३१॥ अहिंसादमसत्यस्थः कथं नार्हामि विप्रताम् ॥ दैवेन कृतमेतद्धि यद्यहं मातृदो षतः ॥ ३२ ॥ एतामवस्थां संप्राप्तो दैवयोगात्पुरंदर ॥ नूनं दैवं न शक्यं तु पौरुषेण निवर्त्तितुम् ॥ ३३ ॥ यदहं यत्नवानेवं न लभे विप्रतां विभो ॥ एवं ज्ञात्वा तु देवेश दातुमर्हसि मे वरम् ॥ ३४ ॥ यदि तेऽहमनुग्राह्यः किंचिद्वा सुकृतं मम ॥ तदुपायं हि मे शंस कथं विप्रो भवामि वै ॥ ३५ ॥

१ श्रूयते—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



यथा ममाक्षया कीर्त्तिर्भवेद्वापि पुरंदर ॥ कर्तुमर्हसि तद्देव शिरसा त्वां प्रसादये ॥ ३६ ॥ इत्युक्तो हि मतंगेन वासवो बलवृत्रहा ॥ कथ
यामास संतुष्टो लिंगमाहात्म्यमुत्तमम् ॥ ३७ ॥ ॥ इन्द्र उवाच ॥ ॥ महाकालवने लिंगं स्थापितं ब्रह्मणा पुरा ॥ दिव्यमूर्त्तिधरं दिव्यं
श्रीसिद्धेश्वरपूर्वतः ॥ ३८ ॥ तस्य दर्शनमात्रेण विप्रत्वं समवाप्स्यसि ॥ वासवस्य च वाक्येन मतंगो गतवांस्तदा ॥ ३९ ॥ महाकालवनं रम्यं
सिद्धक्षेत्रमथापरम् ॥ ददर्श तत्र तल्लिंगमशेषफलदायकम् ॥ ४० ॥ दृष्ट्वा संपूजयामास पुष्पैर्नानाविधैस्तथा ॥ पूजितः प्रत्युवाचेदं मतंगं देवसत्तमः
॥ ४१ ॥ अहो महान्सभाग्योसि यस्त्वया तोषितोऽस्म्यहम् ॥ मत्तः सर्वं समुद्भूतं ब्रह्मांडं भूर्भुवादिकम् ॥ ४२ ॥ वरदोऽस्मि वरार्हाणां
शापदोऽस्मि दुरात्मनाम् ॥ ब्राह्मण्यं मत्प्रसादाच्च अक्षयं ते भविष्यति ॥ ४३ ॥ ततोऽसौ विप्रतां यातो मतंगो लिंगदर्शनात् ॥ पुनः
पूजाप्रभावेण ब्रह्मलोकं गतो द्विजः ॥ ४४ ॥ ब्राह्मण्यं दुर्लभं लब्धं लिंगस्यास्य प्रभावतः ॥ मतंगेन वरारोहे तस्माद्देवो विगीयते[2] ॥ ४५ ॥ मतं
गेश्वरको लोके ब्रह्मलोकप्रदायकः ॥ वर्णाश्रमेषु विद्विष्टाः पाषंडवचने रताः ॥ ४६ ॥ निर्मर्यादा निराचारा निःशंकाश्चातिलोलुपाः ॥ निर्घृणाः
क्रूरकर्माणो धृष्टाः कलियुगे नराः॥दर्शनात्तस्य लिंगस्य तेऽपि यांति त्रिविष्टपम् ॥४७॥ ये विशुद्धा महाभागा ध्यानिनो मुक्तिभागिनः ॥ ते पश्यंति
कलौ देवि मतंगेश्वरमीश्वरम् ॥४८॥ ब्रह्मध्यानपरा ये च यज्ञदानक्रियारताः ॥ ते पश्यंति कलौ देवि मतंगेश्वरमीश्वरम् ॥ ४९ ॥ येऽर्चयंति महा
देवि मतंगेश्वरमीश्वरम् ॥ कृतपुण्या नरा मर्त्त्ये तेषां वासोऽक्षयो दिवि ॥५०॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ मतंगेश्वरदेवस्य शृणु सौभा
ग्यमीश्वरम् ॥ ५१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिंगमाहात्म्ये मतंगेश्वरमाहात्म्य[3]
वर्णनंनाम षष्टितमोऽध्यायः ॥ ६० ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ एकषष्टितमं विद्धि सौभाग्येश्वरमीश्वरम् ॥ यस्य दर्शनमात्रेण सौभाग्य
मतुलं लभेत् ॥ १ ॥ प्रथमे प्राकृते कल्पे राजाभूदश्ववाहनः ॥ प्राग्ज्योतिषपुरे रम्ये धर्मात्मा कीर्त्तिवर्द्धनः ॥ २ ॥ अनेकयज्ञकृत्प्राज्ञः संग्रामेष्वप
राजितः ॥ तस्य भार्या विशालाक्षि नाम्ना मदनमञ्जरी ॥ ३ ॥ काशिराजसुता सुभ्रू रूपेणातीव शोभना ॥ दक्षा सुशीला धर्मिष्ठा गृहव्यापारको
विदा ॥ ४ ॥ चतुःषष्टिकलायुक्ता सदा भर्तृहिते रता ॥ पूर्णेन्दुवदना सौम्या सदा मधुरभाषिणी ॥ ५ ॥ पूर्वकर्मवशाद्देवि दुर्भगा समजायत ॥
सा नेष्टा तस्य नृपतेर्नेत्रोद्वेगकरी सदा ॥ ६ ॥ श्रोत्रोद्वेगकरं वाक्यं तस्य राज्ञः करोति सा ॥ ददाह लोचने राज्ञस्तस्याः संदर्शनं सदा ॥ ७ ॥

:१ देवेश—इ०पा०। २ विगीयते—विशेषेण गीयते—इत्यर्थः। ३ उज्जयनीतो लब्धे पुस्तके—'व्रजभाणनी गलीमाहे' इति मतंगेश्वरस्थानं सूचितम्।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मूर्छां प्राप्नोत्यसह्यां स तस्याः स्पर्शेन भूपतिः ॥ कदा चालोकितो राजा तया प्रेम्णा वरानने ॥ दह्यमानोऽतितीव्रेण वह्निना वाक्यमब्रवीत् ॥ ॥ ८ ॥ द्वास्थैतां दुर्भगां भार्यामादाय विपिने वने ॥ परित्यजाशु नैतत्ते विचार्यं वचनं मम ॥ ९ ॥ ततो नृपस्य वचनमविचार्यमवेक्ष्य सः ॥ द्वास्थस्तत्याज तां सुभ्रूमारोप्य स्यंदनं वने ॥ १० ॥ सा च त्यक्ता वने शून्ये रुदती च मुहुर्मुहुः ॥ सस्मार तं महीपालं तममन्यत दैवतम् ॥ ॥ ११ ॥ अथ सा चारुसर्वांगी तत्रासक्तात्ममानसा ॥ निश्वासपरमा निन्ये दिनशेषं तथा निशाम् ॥ १२ ॥ निश्वसन्त्यनवद्यांगी हाहेति रुदती मुहुः ॥ मन्दभाग्येति चात्मानं निनिन्द मदिरेक्षणा ॥ १३ ॥ न विहारे न चाहारे रमणीये न तद्वने ॥ न कंन्दरेषु शैलानां सा बबन्ध तदा रतिम् ॥ त्यक्ता तेन वरारोहे निनिन्द निर्जयौवनम् ॥ १४ ॥ दुर्भगाहं क्व जातात्र दुष्टदैववशीकृता ॥ कथं प्राप्तः स मे भर्त्ता तादृशो नृपसत्तमः ॥ १५ ॥ धन्योऽयमतिपुण्योऽयं योऽयं यौवनगोचरः ॥ अन्यासामसतीनां च रमिष्यति न संशयः ॥ १६ ॥ अभीष्टा कस्यचित्कांता कांतः कस्याश्चिदीप्सितः ॥ परस्परानुरागाढ्यं दांपत्यमतिदुर्लभम् ॥ १७ ॥ ममायं वल्लभो राजा न चाहं नृपवल्लभा ॥ परस्परानुरागो हि धन्यानामेव जायते ॥ १८ ॥ यद्यद्य स महीपालो न मया संगमेष्यति ॥ तत्कामाग्निरवश्यं मां क्षपयिष्यति दुःसहः ॥ १९ ॥ रमणीयमभूद्यत्तु पुंस्कोकिलनिनादितम् ॥ हीनं हि वल्लभेनैवं दहतीवाद्य मे वनम् ॥ २० ॥ इत्थं सा मदनाविष्टा विलपन्ती पुनःपुनः ॥ ददर्श तापसं तत्र त्रिकालज्ञं दृढव्रतम् ॥ २१ ॥ मेखलाजिनकौपीनदण्डकाष्ठोपजीवनम् ॥ महौजसं महाभागं मुमुक्षुं मुनिपुंगवम् ॥२२॥ उदयादित्यसंकाशं विभावसुसमद्युतिम् ॥ तं दृष्ट्वा सहसोत्थाय सा राज्ञी दुर्मता सती ॥ २३ ॥ विनयेनोपसंगम्य प्रणिपत्याभिवाद्य च ॥ वियोगकारणं राज्ञः पप्रच्छ प्रणता सती ॥ २४ ॥ भगवन्काशिराजस्य सुताहमतिवल्लभा ॥ भगिनी शत्रुसेनस्य मातुश्चातीव वल्लभा ॥ २५ ॥ अश्ववाहनसंज्ञेन नृपेणोढा महामुने ॥ धर्मतो धर्मकल्पेन प्रजापतिसमेन तु ॥ २६ ॥ सा किमर्थं न चाभीष्टा जाताऽहं तस्य भूपतेः ॥ स चातीव ममाभीष्टो नृपतिः सर्वदा विभो ॥ ॥ २७ ॥ दुर्भगाहं कथं जाता कर्मणा केन तापस ॥ कथं भवति वश्यो मे भर्त्ता नृपतिसत्तमः ॥ सौभाग्यं च कथं मे स्यादिति सत्यं च कथ्यताम् ॥ २८ ॥ तस्यास्तद्वचनं श्रुत्वा स मुनिः संशितव्रतः ॥ ज्ञानेन कथयामास तस्या दौर्भाग्यकारणम् ॥ २९ ॥ पाणिग्रहणकाले त्वं ग्रहैः पापैर्विलोकिता ॥ भर्ता ते नृपतिः पुत्रि ग्रहैः सौम्यैर्विलोकितः ॥ ३० ॥ तेन ते वल्लभो राजा न त्वं भूपस्य वल्लभा ॥

१ न केदारेषु शैलेषु–इ० पा० । २ नवयौवनम्–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





इति तस्य वचः श्रुत्वा सा राज्ञी दीनमानसा ॥ पप्रच्छ विनयोपेता भक्तिनम्रात्मकन्धरा ॥३१॥ भगवन्केन दानेन स्नानेन नियमेन च ॥ कर्मणा
केन सौभाग्यं परमं हि कथं भवेत् ॥ ३२ ॥ इति तस्या वचः श्रुत्वा स मुनिः संशितव्रतः ॥ कथयामास माहात्म्यं सौभाग्यं येन लभ्यते ॥ ३३ ॥
महाकालवने पुत्रि लिंगं सौभाग्यदायकम् ॥ मतंगेश्वरपार्श्वे तु विद्यतेऽभीष्टदायकम् ॥ तस्य दर्शनमात्रेण सौभाग्यं समवाप्स्यसि ॥३४॥ इंद्राण्या
राधितं लिंगं पुरा सौभाग्यकारणात् ॥ सौभाग्यं परमं लब्धं नष्टः शक्रोऽपि लब्धवान् ॥ तस्माद्गच्छ ममादेशान्महाकालवनं शुभम् ॥ ३५ ॥
सौभाग्यं भविता तत्र कांतेन सह दर्शनम् ॥ पुत्रो भविष्यति शुभे तस्य लिंगस्य दर्शनात् ॥ ३६ ॥ इत्युक्ता सा तदा तेन तापसेन वरानने ॥
विद्यते यत्र तल्लिंगं महाकालवनं गता ॥ ३७ ॥ ददर्श प्रणयोपेता लिंगं सौभाग्यदायकम् ॥ दर्शनात्तस्य लिंगस्य राजा सस्मार तां प्रियाम्[1] ॥ ३८ ॥
पप्रच्छ जमदग्निं तु क्व गता मे प्रिया विभो ॥ भक्षिता विपिने विप्र सिंहव्याघ्रनिशाचरैः ॥ ३९ ॥ मया त्यक्ता नृशंसेन अहं तस्यास्तु वल्लभः ॥
एवं ब्रुवाणो नृपतिः प्रत्युक्तो जमदग्निना ॥ ४० ॥ न भक्षिता सा भूपाल सिंहव्याघ्रनिशाचरैः ॥ सा चाविप्लुतचारित्रा त्वद्भक्ता च पतिव्रता ॥
॥ ४१ ॥ महाकालवनं राजन्गता सौभाग्यकाम्यया ॥ भार्या रक्ष्या महीपाल इति सा श्रुतिरुत्तमा ॥ ४२ ॥ भार्यायां रक्ष्यमाणायां प्रजा
भवति रक्षिता ॥ आत्मा हि जायते तस्यां सा रक्ष्यातो नरेश्वर ॥४३॥ धर्महानिश्चानुदिनमभार्यस्य भवेन्नृप ॥ नित्यक्रियाया विभ्रंशः स चापि
पतनाय वै ॥ ४४ ॥ पत्न्यानुकूलया भाव्यं यथाशीलेऽपि भर्त्तरि ॥ दुःशीला दुर्भगा भार्या पोषणीया नरेश्वर ॥ ४५ ॥ इति तस्य वचः श्रुत्वा
समायातो नरेश्वरः[2] ॥ महाकालवने रम्ये ददर्श स्वां प्रियां तदा ॥ ४६ ॥ सौभाग्यालंकृतां सुभ्रूं पूजयंतीं महेश्वरम् ॥ दृष्ट्वा स्नेहेन चालिंग्य
प्रत्युवाच स तां प्रियाम् ॥ ४७ ॥ विरहेण त्वदीयेन संतप्तोऽहं वरानने ॥ अद्य मे सफलं चक्षुर्जीवितं च सुजीवितम् ॥ ४८ ॥ यत्त्वां पश्यामि
सुभगे कृतार्थोऽहं कृतस्त्वया ॥ एवं हृष्टातिहर्षेण सा[3] ददर्श तदा पतिम् ॥ उवाच च प्रसीदेति भूयो भूयो मुदान्विता ॥ ४९ ॥ ततः स राजा
रभसात्परिष्वज्याह भामिनीम् ॥ प्रिये प्रसन्न एवाहं भूयो भूयो ब्रवीमि किम् ॥ ५० ॥ ततः समागमो जातो जातः पुत्रोऽतिधार्मिकः ॥ तस्य
लिंगस्य माहात्म्यादृत्तोनाम[4] स गीयते ॥ ५१ ॥ सौभाग्यमतुलं लब्धं तया देव्या हिमात्मजे ॥ सौभाग्येश्वरसंज्ञं तु ततःप्रभृति भूतले ॥ ५२ ॥ ये ॥१४१॥
पश्यंति विशालाक्षि सौभाग्येश्वरमीश्वरम् ॥ तेषां कुले न दौर्भाग्यं जायते पर्वतात्मजे ॥ ५३ ॥ भविष्यति न दारिद्र्यं वियोगो न च बन्धुभिः ॥

१ प्रिये–इ०पा० । २ अश्ववाहनः–इ०पा० । ३ तम्–इ०पा० । ४ वृत्तोनाम–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुत्रमित्रकलत्राणां लिंगस्य च समर्चनात् ॥ ५४ ॥ नोपसर्गभयं तेषां ये पश्यंति वरानने ॥ सौभाग्येश्वरसंज्ञं तु न ग्रहादिभयं भवेत् ॥ ५५ ॥ सर्वबाधाविनिर्मुक्तो धनधान्यसमन्वितः ॥ मनुष्यो जायते देवि सौभाग्येश्वरदर्शनात् ॥ संपूज्यः सर्वलोकेषु सौभाग्यैकनिधिर्भवेत् ॥ ५६ ॥ जायते भूपतिर्लोके सार्वभौमो वरानने ॥ नापुत्रा नाधना नारी न दीना न च दुःखिता ॥ जायते दुर्भगा नैव सौभाग्येश्वरदर्शनात् ॥ ५७ ॥ न वैधव्यं न च व्याधिर्नाकालमरणं प्रिये ॥ न पुत्रभर्तृजं दुःखं जायते लिंगदर्शनात् ॥ ५८ ॥ यथा लक्ष्मीर्हरेर्नित्यं सावित्री ब्रह्मणः स्मृता ॥ रोहिणी वल्लभा चेंदोः शची शक्रस्य वल्लभा ॥ तथा सा जायते नारी सौभाग्येश्वरदर्शनात् ॥ ५९ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ सौभाग्येश्वरदेवस्य शृणु रूपेश्वरं प्रिये ॥ ६० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिंगमाहात्म्ये सौ[1]भाग्येश्वरमाहात्म्यवर्णनंनामैकषष्टितमोऽध्यायः ॥ ६१ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ द्विषष्टिकं विजानीहि देवं रूपेश्वरं प्रिये ॥ यस्य दर्शनमात्रेण रूपवाञ्जायते नरः ॥ १ ॥ पाद्मकल्पे महादेवि पद्मोनाम महीपतिः ॥ पद्मगर्भसमुद्भूतो बभूवातिपराक्रमी ॥ पृथिव्याश्चतुरंताया जातो धर्मरतो बली ॥ २ ॥ स कदाचिन्महाबाहुः प्रभूतबलवाहनः ॥ वनं जगाम गहनं हयनागशतैर्वृतः ॥ ३ ॥ बिल्वार्कखदिराकीर्णं कपित्थधवसंकुलम् ॥ मृगसिंहैर्वृतं घोरैरन्यैश्चापि वनेचरैः ॥ ४ ॥ तत्र वन्यसहस्राणि हत्वा सबलवाहनः ॥ राजा मृगप्रसंगेन वनमन्यद्विवेश सः ॥ ५ ॥ एक एवोत्तमबलः क्षुत्पिपासासमन्वितः ॥ स वनस्यांतमासाद्य महदोर[2]ण्यमासदत् ॥ ६ ॥ तच्चाप्यतीत्य नृपतिर्ददर्शाश्रममुत्तमम् ॥ मनःप्रह्लादजननं दृष्टिकांतमतीव च ॥ ७ ॥ पुष्पितैः पादपैः कीर्णमतीव सुखशाद्वलम् ॥ ततोऽगच्छन्महाबाहुरेकोऽमात्यान्विसृज्य तान् ॥ ८ ॥ नापश्यदाश्रमे तस्मिंस्तमृषिं संशितव्रतम् ॥ उवाच क इहेत्युच्चैर्वनं संनादयन्निव ॥९॥ श्रुत्वाथ तं तथा शब्दं कन्या श्रीरिव रूपिणी ॥ निश्चक्रामाश्रमात्तस्मात्तापसाकारधारिणी ॥१०॥ सा तं दृष्ट्वैव राजानं पद्मगर्भसमुद्भवम् ॥ आसनेनार्चयित्वा च पप्रच्छ नां[3]म तं तदा ॥११॥ उवाच स्मयमानाथ किं कार्यं क्रियतामिति ॥ तामब्रवीत्ततो राजा कन्यां मधुरभाषिणीम् ॥१२॥ दृष्ट्वा चैवानवद्यांगीं यथावत्प्रतिपूजितः ॥ आगतोऽहं महाभागे मुनिश्रेष्ठमुपासितुम् ॥ १३ ॥ क्व गतो भगवान्भद्रे तन्ममाचक्ष्व शोभने ॥ एवमुक्ता तु सा कन्या तेन राज्ञा तदाश्रमे ॥ हसंती प्रत्युवाचेदं वाक्यं समधुराक्षरम् ॥ १४ ॥ कन्याहं पृथिवीपाल कौमारब्रह्मचारिणः ॥ तपस्विनो धृतिमतो धर्मज्ञस्य मनस्विनः ॥ १५ ॥ सुता कण्वस्य मामेवं

१ उज्जयिनीस्थपुस्तके—'सामनोरबां घरपासे' इति लिखितमस्ति । तदेतस्य सौभाग्येश्वरलिंगस्य स्थानं बोद्धव्यम् । २ महद्वीरणमासदत्—इ० पा० । ३ पप्रच्छानामयं तदा—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





विद्धि त्वं मनुजाधिप ॥ कण्वं हि पितरं मन्ये पितरं स्वमजानती ॥ १६ ॥ तस्यास्तद्वचनं श्रुत्वा नृपेणोक्तं वरानने ॥ सुव्यक्तं राजपुत्री त्वं यथा कल्याणि भाषसे ॥ १७ ॥ भार्या मे भव सुश्रोणि ब्रूहि किं करवाणि ते ॥ सुवर्णरत्नवासांसि कुंडले परिहारके ॥ १८ ॥ आहरामि तवाद्याहं भार्या मे भव शोभने ॥ गांधर्वेण च मां भीरु विवाहेनैव सुंदरि ॥ विवाहानां च रंभोरु गांधर्वः श्रेष्ठ उच्यते ॥ १९ ॥ नृपस्य वचनं श्रुत्वा कन्या वचनमब्रवीत् ॥ मुहूर्त्तं संप्रतीक्षस्व स मां तुभ्यं प्रदास्यति ॥ २० ॥ ॥ राजोवाच ॥ ॥ इच्छामि त्वां वरारोहे भजमानमनिंदिते ॥ तदर्थं मां स्थितं विद्धि त्वया मेऽपहृतं मनः ॥ २१ ॥ आत्मनो बंधुरात्मैव गतिरात्मैव चात्मनः ॥ आत्मनैवात्मनो दानं कर्तुमर्हसि धर्मतः ॥ ॥ २२ ॥ ॥ कन्योवाच ॥ ॥ यदि धर्मपथस्त्वेष यदि चात्मा प्रभुर्मम ॥ सत्यं मे प्रतिजानीहि दत्तमात्मानमद्य मे ॥ २३ ॥ इति तस्या वचः श्रुत्वा परिणीता नृपेण हि ॥ गांधर्वेण विवाहेन कामासक्तेन पार्वति ॥ २४ ॥ कामिता सा नृपेणैव ततो गंतुं समुद्यतः ॥ एतस्मिन्नंतरे देवि कण्वश्चाश्रममभ्यगात् ॥ २५ ॥ सा कन्या पितरं दृष्ट्वा ह्रिया नोपजगाम तम् ॥ विज्ञायाथ च तां विप्रो दिव्यज्ञानो महातपाः ॥ २६ ॥ उवाच परमं क्रुद्धस्तां कन्यां काममोहिताम् ॥ त्वयापि दुष्टे रहसि मामवज्ञाय यत्कृतः ॥ २७ ॥ स्वयं स्वयंवरो मोहात्तस्मात्कृष्णा भविष्यसि ॥ कुत्सिता निर्घृणा दीना निर्लज्जा रूपवर्जिता ॥ २८ ॥ अयं ते नृपतिर्भर्त्ता दुष्टरूपो भविष्यति ॥ २९ ॥ इत्युक्ता तत्क्षणाज्जाता सा कन्या रूपवर्जिता ॥ कुरूपो नृपतिर्जातः शापात्तस्य महात्मनः ॥ ३० ॥ अथ प्रसादयामास सा कन्या पितरं तदा ॥ बालानभिज्ञा मूढाहं मन्मथेन प्रपीडिता ॥ ३१ ॥ अज्ञानाच्च कृतं पापं तात त्वं क्षंतुमर्हसि ॥ अयं महीपतिस्तात प्रत्यग्लीनो महाव्रतः ॥ ३२ ॥ न चाहं प्रार्थिता तेन मयासौ प्रार्थितो नृपः ॥ तस्मादनुग्रहं तात कर्त्तुमर्हसि चावयोः ॥ ३३ ॥ इति तस्या वचः श्रुत्वा स विप्रोऽतिकृपान्वितः ॥ उवाच स्वां दुहितरमाश्वास्यैवं पुनःपुनः ॥ ३४ ॥ नैव वागनृतं पुत्रि यावदद्य स्मराम्यहम् ॥ दैवमत्र परं मन्ये धिग्बुद्धिं धिक्पराक्रमम् ॥ ३५ ॥ अकार्यं कारितो येन बलाद्दहमनिंदिते ॥ उपदेशं प्रदास्यामि तत्त्वं कर्तुमिहार्हसि ॥ ३६ ॥ महाकालवने पुण्ये लिंगं रूपप्रदायकम् ॥ पशुपेश्वरपूर्वं तु विद्यतेऽभीष्टदायकम् ॥ ३७ ॥ तत्त्वं गच्छ त्वरायुक्ता सह भर्त्रा नृपेण हि ॥ रूपं प्राप्स्यसि दुष्प्राप्यं लिंगदर्शनमात्रतः ॥ ३८ ॥ इत्युक्ता सा तदा कन्या सह भर्त्रा गता प्रिये ॥ महाकालवने रम्ये यत्र लिंगमनुत्तमम् ॥ ३९ ॥ ददर्श परया भक्त्या स च राजा नरोत्तमः ॥ तत्क्षणाद्दिव्यदेहा सा रूपेणातिमनोहरा ॥ दिव्यवस्त्रपरीधाना दिव्यालं

१ स्वयम्–इ०पा० । २ अनन्तकम्–इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारभूषिता ॥ ४० ॥ स च राजा तथा जातः कंदर्पसदृशाकृतिः ॥ रूपेणाप्रतिमो लोके तस्य लिंगस्य दर्शनात् ॥ ४१ ॥ अतो लोकेषु विख्यातो देवो रूपेश्वरः प्रिये ॥ रूपदो धनदोऽत्यर्थं पुत्रदः स्वर्गदस्तथा ॥ ४२ ॥ स च राजा स्वकं प्राप्तो राष्ट्रं सस्यादिसंयुतम् ॥ प्रियया परया सार्द्धं चक्रे राज्यमकंटकम् ॥ ४३ ॥ राज्यं कृत्वा गतः स्वर्गं भार्यया सह पार्वति ॥ देदीप्यमानो वपुषा द्वितीय इव भास्करः ॥ ४४ ॥ विमानेन सुदीप्तेन वंद्यमानो दिवालये ॥ दर्शनात्तस्य लिंगस्य प्राप्तः पदमनामयम् ॥ ४५ ॥ ये पश्यंति विशालाक्षि देवं रूपेश्वरं शिवम् ॥ न ते रूपेण हीयंते यशसा च कुलेन च ॥ ४६ ॥ सदा रूपकरं लिंगं भुक्तिमुक्तिफलप्रदम् ॥ ये पश्यंति वरारोहे तेषां लोकाः सदाऽक्षयाः ॥ ४७ ॥ येऽर्चयंति नरा नित्यं देवं रूपेश्वरं परम् ॥ तेऽर्चिता यांति यानेन मम लोकं सनातनम् ॥ ४८ ॥ स एव सुकृती लोके कुलं तेनाप्यलंकृतम् ॥ यः पूजयति रूपेशं रूपसौभाग्यदायकम् ॥ ४९ ॥ यः पूजयति देवेशं प्रसंगादपि पार्वति ॥ धनवान्रूपवान्सोऽपि राजा भवति भूतले ॥ ५० ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ रूपेश्वरस्य देवस्य धनुःसाहस्रकं शृणु ॥ ५१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे चतुरशीतिलिंगमाहात्म्ये रूपेश्वरमाहात्म्यवर्णनंनाम द्विषष्टितमोऽध्यायः ॥ ६२ ॥ ॥ छ ॥ ॥

॥ ॥ श्रीहर उवाच ॥ ॥ धनुःसाहस्रनामानमीश्वरं शृणु पार्वति ॥ त्रिषष्टिसंख्यकं दिव्यं दर्शनात्पापनाशनम् ॥ १ ॥ विदूरथोनाम नृपः ख्यातकीर्त्तिरभूद्भुवि ॥ तस्य पुत्रद्वयं जातं सुनीतिः सुमतिस्तथा ॥ २ ॥ एकदा तु वनं यातो मृगयां स विदूरथः ॥ ददर्श गर्त्तं सुमहद्भूमेर्मुखमिवोद्गतम् ॥ ३ ॥ तं दृष्ट्वा चिंतयामास किमेतदिति पार्थिवः ॥ पातालविवरं मन्ये वडवानलसंनिभम् ॥ ४ ॥ चिंतयन्निव तत्रासौ ददर्श विजने वने ॥ ब्राह्मणं सुव्रतंनाम तपस्विनमकल्मषम् ॥ ५ ॥ स तं पप्रच्छ नृपतिः किमेतदिति भो द्विज ॥ ६ ॥ ॥ ब्राह्मण उवाच ॥ ॥ दानवः सुमहावीर्यो वसत्युग्रो रसातले ॥ कुजंभोनाम विख्यातो भिनत्ति वसुधामिमाम् ॥ ७ ॥ तमजित्वा कथं राज्यं भोक्ष्यसे वसुधाधिप ॥ तेन विध्वंसिता विप्रा रात्रौ निःसृत्य पार्थिव ॥ ८ ॥ उपद्रुतास्तथा देशा ध्वस्ताश्चैव तथाश्रमाः ॥ आप्याययति दैत्योऽयं सबली मुशलायुधः ॥ ९ ॥ यदि त्वं घातयस्येनं पातालांतरगोचरम् ॥ ततः समस्तवसुधापतिरेव भविष्यसि ॥ १० ॥ इति विप्रवचः श्रुत्वा मंत्रयामास पार्थिवः ॥ मंत्रिभिः सहितोऽमोघं श्रुत्वा मुशलमद्रिजे ॥ ११ ॥ तं मंत्रं क्रियमाणं तु सूनुभ्यां सह मंत्रिभिः ॥ तत्पार्श्व

१ प्रिये–इ० पा० । २ अत्र–उज्जयिनीस्थपुस्तके–'जनार्दनजीने पीछे'–इति रूपेश्वरस्थानं सूचितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



र्त्तिनी कन्या शुश्रावाथ मुदावती ॥ १२ ॥ ततः कतिपयाहे तु तां कन्यां जलंजेक्षणाम् ॥ जहारोपवनाद्दैत्यः कुजंभः स्वसखीवृताम् ॥ १३ ॥ एतच्छ्रुत्वा महीपालः क्रोधपर्याकुलेक्षणः ॥ उवाच पुत्रौ जानेऽहं स कुजंभो महासुरः ॥ १४ ॥ दृष्ट्वा भूमौ पुरा गर्त्ते तत्र संशयिते मयि ॥ कथितो द्विजमुख्येन मया पृष्टेन पुत्रकौ ॥ १५ ॥ स हन्यतां सोऽपहर्त्ता मुदावत्याः सुदुर्मतिः ॥ प्रस्थितौ नृपभक्त्याथ स्वसैन्यपरिवारितौ ॥ १६ ॥ तौ सुतौ तत्र संप्राप्तौ पाताले पितृशासनात् ॥ युयुधाते कुजंभेन स्वशक्त्या सेनया वृतौ ॥ १७ ॥ ततः परिघनिस्त्रिंशशक्तिशूलपरश्वधैः ॥ बाणैश्चिरतरं युद्धं तेषामासीत्सुदारुणम् ॥ १८ ॥ ततो मायाबलवता तेन दैत्येन तत्क्षणात् ॥ अमोघेनाद्वितीयेन मुशलेन वरानने ॥ १९ ॥ हतसैन्यौ रणे बद्धौ राजपुत्रौ महाबलौ ॥ २० ॥ ततः श्रुत्वा महीपालो विवर्णवदनोऽभवत् ॥ बद्धपुत्रः परामार्त्तिं जगाम गिरिपुत्रिके ॥ २१ ॥ रुरोद बहुधात्यर्थं पुत्रस्नेहेन पार्थिवः ॥ ततो विलपतस्तस्य मार्कंडेयो महामुनिः ॥ अनेकसृष्टिसंहारदृष्टकार्यपरावरः ॥ २२ ॥ उदितादित्यसंकाशः सप्तकल्पानुगो वशी ॥ आजगाम नृपाभ्याशे विलपंतं ददर्श सः ॥ राजानं कथयामास त्रिकालज्ञो महामुनिः ॥ २३ ॥ मा शुचस्त्वं महीपाल क्षत्रियोऽसि दृढव्रतः ॥ क्व शोकः क्व महीपालो दुर्जयो लोकपालवत् ॥ २४ ॥ शोकं कुपुरुषाचीर्णं त्यज त्वं राजसत्तम ॥ उद्यमं कुरु राजेंद्र कुजंभं घातयिष्यसि ॥ २५ ॥ नात्युच्चं मेरुशिखरं नातिनीचं रसातलम् ॥ व्यवसायः सखा यस्य नास्ति दूरे महोदधिः ॥ २६ ॥ महाकालवने लिंगमाराधय समाहितः ॥ रूपेश्वरस्य देवस्य पार्श्वे दक्षिणतः स्थितम् ॥ २७ ॥ धनुःसाहस्रतुल्यं तु मुशलस्य निवारणम् ॥ धनुः प्राप्स्यसि राजेंद्र कुजंभं विनिपातय ॥ २८ ॥ धनुःसाहस्रहस्तैस्तु रक्षितं योधसत्तमैः ॥ लिंगं देवासुरैर्युद्धे सहस्राक्षेण सेवितम् ॥ इंद्रेण च धनुर्लब्ध्वं जंभो वै येन पातितः ॥ २९ ॥ तस्य तद्वचनं श्रुत्वा स राजाथ विदूरथः ॥ जगाम त्वरितो देवि महाकालवनं शुभम् ॥ ३० ॥ ददर्श तत्र तल्लिंगं पूजयामास भक्तितः ॥ तस्य तुष्टस्तदा देवो ददौ दिव्यं धनुस्तदा ॥ ३१ ॥ धनुःसाहस्रतुल्यं च मुशलस्य निवारणम् ॥ धनुर्लब्ध्वा तदा राजा बद्धगोधांगुलित्रवान् ॥ जगाम धीरः पातालं तेन गर्तेन सत्वरम् ॥ ३२ ॥ ततो ज्यास्वनमत्युग्रं स चक्रे पार्थिवस्तदा ॥ येन पातालमखिलमासीदापूरितांतरम् ॥ ३३ ॥ ततो ज्यास्वनमाकर्ण्य कुजंभो दानवेश्वरः ॥ आजगामातिकोपेन स्वसैन्यपरिवारितः ॥ ३४ ॥ ततो युद्धमभूत्तस्य सह राज्ञा वरानने ॥ दिनानि त्रीणि स यदा योधितस्तेन दानवः ॥ ३५ ॥ ततः कोपपरीतात्मा मुशलायाभ्यधावत ॥ गंधैर्माल्यैस्तथा धूपैः पूज्यमानः स

१ तरलेक्षणाम् –इ०पा० । २ वारयामास–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिष्ठति ॥ ३६ ॥ यावद्गृह्णाति मुशलं तावत्सा च मुदावती ॥ पस्पर्श चंदनव्याजैरनेकैश्च पुनःपुनः ॥ ३७ ॥ ततः स गत्वा युयुधे मुसलेनासुरेश्वरः ॥ तदा मुसलपातास्ते धनुषा निष्प्रभीकृताः ॥ ३८ ॥ धनुर्ज्याघातशब्देन पतिते भूतले तदा ॥ गतो वैवस्वतं लोकं कुजंभोनाम दानवः ॥ ३९ ॥ ततोऽपतत्पुष्पवृष्टिस्तस्योपरि महीपतेः ॥ जगुर्गंधर्वपतयो देववाद्यानि सस्वनुः ॥ ४० ॥ स चापि राजा तं हत्वा पुत्रौ लब्ध्वा सुतां तदा ॥ मुदावतीं मुदा युक्तो हर्षगद्गदनिर्भरः ॥ ४१ ॥ पुत्राभ्यां सहितो देवि सुसंपूर्णमनोरथः ॥ सांतःपुरपरीवारः पुनरायाद्वरानने ॥ ४२ ॥ महाकालवने रम्ये यत्र तल्लिंगमुत्तमम् ॥ पूजयामास रत्नैश्च वस्त्रैराभरणैस्तथा ॥ ४३ ॥ ततः स पूजितो देवैः शक्रेण च पुनःपुनः ॥ अस्य लिंगस्य माहात्म्याद्धनुः प्राप्तं नृपेण वै ॥ ४४ ॥ कुजंभोऽपि हतो दैत्यो देवविद्वेषकारकः ॥ धनुःसाहस्रनामायमतः ख्यातिं गमिष्यति ॥ ४५ ॥ भक्त्या ये पूजयिष्यंति धनुःसाहस्रमीश्वरम् ॥ यास्यन्ति शत्रवस्तेषां क्षयं नैवात्र संशयः ॥ ४६ ॥ अर्चिते देवदेवेशे धनुःसाहस्रिके शिवे ॥ अर्चिताः सर्वदेवाः स्युर्वरदाश्च न संशयः ॥ ४७ ॥ प्रातर्मध्येऽपराह्णे च धनुःसाहस्रकं शिवम् ॥ ये नमन्ति नरा नित्यं न ते नरकभोगिनः ॥ ४८ ॥ तीर्थानां च यथा गंगा रक्षिता योधसत्तमैः ॥ तथायं रक्षको देवो नाम्ना धनुःसहस्रकः ॥४९॥ तत्र गंगादितीर्थानि विद्यन्ते विविधानि च ॥ सुरहस्यातिपुण्यानि सद्यः पापहराणि च ॥ ५० ॥ तेषां फलं विनिर्दिष्टं ये पश्यन्ति तु भक्तितः ॥ धनुःसाहस्रकंनाम सदा शत्रुक्षयंकरम् ॥ ५१ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ धनुःसाहस्रदेवस्य देवं पशुपतिं शृणु ॥ ५२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये धनुःसाहस्रमाहात्म्यवर्णनंनाम त्रिषष्टितमोऽध्यायः ॥ ६३ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु त्वं पशुपत्याख्यं चतुःषष्टिकमीश्वरम् ॥ यस्य दर्शनमात्रेण पशुयोनिर्न लभ्यते ॥ १ ॥ पशुपालो महादेवि बभूव भुवि विश्रुतः ॥ राजा परमधर्मिष्ठः पशूनां पालने रतः ॥२॥ दिदृक्षुः स कदाचिच्च गतस्तोयनिधिं प्रति ॥ ददर्श तंत्र पुरुषान्पंच प्राधान्यतः स्थितान् ॥ एका स्त्री मुक्तकेशा सा³ भ्रमन्ती च पुनःपुनः ॥ ३ ॥ अथ राजा भयाविष्टो विसंज्ञः समपद्यत ॥ संवेष्टितो दस्युभिस्तैस्तया नार्या विशेषतः ॥ ४ ॥ ततोन्ये समपातं च आगत्य नृपसत्तमम् ॥ संवेष्ट्य संस्थितैः सर्वैस्ततो रुद्धो महीपतिः ॥ ५ ॥ रुद्धे राजनि ते सर्वे एकीभूतास्तु दस्यवः ॥ घातिताः पशुपालेन न मृताः पुनरुत्थिताः ॥ ६ ॥ तस्य तां धृष्टतां ज्ञात्वा स्थैर्यं च नृपतेर्मृधे ॥ तस्यैव नृपतेर्देहे लीनास्ते दश दस्यवः ॥ ७ ॥ अमूर्त्ता इव ते सर्वे एकीभूतास्ततोऽभवन् ॥ तान्दृष्ट्वा

१ कुजम्भो दानवेश्वरः–इ०पा० । २ चैव–इ०पा० । ३ अभूत्–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





दुःखितो राजा पशुपालोऽभवत्क्षणात् ॥ ८ ॥ अथापश्यत्तदाऽऽयांतं नारदं मुनिपुंगवम् ॥ ब्रह्मपुत्रं तपोयुक्तं पप्रच्छ स नृपस्तदा ॥ ९ ॥ ॥ पशुपाल उवाच ॥ ॥ भगवन्ब्रह्मपुत्राद्य मया दृष्टं तु कौतुकम् ॥ अकस्मात्पुरुषाः पंच समायाता भयावहाः ॥ १० ॥ तैरहं वेष्टितो दुष्टैर्व्याकुलश्च कृतस्तदा ॥ मुष्टिभिर्हन्यमानोऽहं स्वस्थो जातो द्विज क्षणात् ॥ ११ ॥ ततोऽन्ये पुरुषाः पञ्च समायाता नियुध्य माम् ॥ हन्यतां हन्यतामेष मुक्तिकामो नृपाधमः ॥ १२ ॥ एवं तैः पीडितोऽत्यर्थं पुनर्मोहमुपागतः ॥ एतस्मिन्नन्तरे सा स्त्री मामुवाच पुनःपुनः ॥ १३ ॥ दृढो भव महाराज मा विषादं कुरु प्रभो ॥ हीनवीर्या ह्यमी चोराः समर्थस्त्वं स्थिरो भव ॥ १४ ॥ तस्या वाक्येन विप्रेंद्र मया धैर्येण संयुगे ॥ दश प्रधानपुरुषा जितास्ते न मृताः प्रभो ॥ १५ ॥ प्रलीना मच्छरीरे तु केप्यते कापि साऽबला ॥ पशुपालवचः श्रुत्वा नारदो वाक्यमब्रवीत् ॥ १६ ॥ ये त्वया पुरुषा दृष्टास्त्वयि लीना जिता मृधे ॥ बुद्धीन्द्रियाणि ते पञ्च पंच कर्मेन्द्रियाणि च ॥ भ्रमन्ती या च नारी सा त्वया दृष्टा नृपोत्तम ॥ ॥ १७ ॥ मनोरूपेण सा बुद्धिर्भ्रमत्येव हि न स्थिरा ॥ जितानि तानि पूर्वेण ब्रह्मणा लोककर्तृणा ॥ १८ ॥ सोऽपि क्रोधवशं नीत इन्द्रियैर्विषयैः प्रियैः ॥ पितामहेन स्वे[1] यज्ञे शम्भोर्भागो न कल्पितः ॥ १९ ॥ महादेवो जगन्नाथः सृष्टिसंहारकारकः ॥ इंद्रियैर्मोहितो राजन्क्रोधं चक्रे सुरान्प्रति ॥ २० ॥ सुरा विभूतयो यस्य क्रीडार्थं भुवनत्रयम् ॥ तेन भागनिमित्तार्थं चक्रे सज्यं धनुस्तदा ॥ २१ ॥ पूष्णश्च दंताः संभग्ना मोहितश्च दिवाकरः ॥ ने[3]त्रे भग्ने भगस्यापि विद्धो यज्ञो मृगाकृतिः ॥ २२ ॥ पशवश्च कृता देवा मुनयो वेदवर्जिताः ॥ ऋषीणां धर्मशास्त्राणि हृतानि विभुना तथा ॥ २३ ॥ दुर्जयानीन्द्रियाण्याहुर्मुनयो वेदपारगाः ॥ मनोरूपेण या बुद्धिः सा चातीव सुदुर्जया ॥ २४ ॥ तस्माद्राजन्महाबाहो मा विषादं वृथा कृथाः ॥ तस्य तद्वचनं श्रुत्वा नारदस्य महात्मनः ॥ पशुपालो महादेवि वक्तुं समुपचक्रमे ॥ २५ ॥ ॥ पशुपाल उवाच ॥ ॥ कथं ते भगवन्मुक्ता देवाः शक्रपुरोगमाः ॥ पशुभावाच्च ब्रह्मापि श्रोतुमिच्छामि कथ्यताम् ॥२६॥ तस्य तद्वचनं श्रुत्वा नारदः पुनरब्रवीत् ॥ पशुत्वेऽपि गता देवा ऋषिभिर्मुनिभिः सह ॥ २७ ॥ ब्रह्माणमग्रतः कृत्वा गताः शरणमीश्वरम् ॥ स्तुतिभिस्तोषितो देवो भक्तानुग्रहकारकः ॥ २८ ॥ उवाच[6] वचनं राजन्यत्[7]कर्तव्यं तदुच्यताम् ॥ २९ ॥ ॥ देवा ऊचुः ॥ ॥ वेदशास्त्राणि विज्ञानं देहि नो भव मा चिरम् ॥ देवस्त्वं पूर्ववद्देव यदि

१ स्वे यज्ञे—दक्षकर्तृके स्वोद्देश्यके—ब्रह्मोद्देश्यके यज्ञे—इत्यर्थः । २ अथ—इ०पा० । ३ करौ भग्नौ—इ०पा० । ४ वेदपारगाः—इ०पा० । ५ ब्रह्मर्षे—इ०पा० । ६ उवाच—ईश्वरः—इति शेषः । ७ यत्करोमि तदुच्यताम्—इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुष्टो महेश्वरः ॥३०॥ ॥ ईश्वर उवाच ॥ ॥ भवंतः पशवः सर्वे मया सार्द्धं च गम्यताम् ॥ महाकालवने क्षेत्रे पशुभावविमोक्षके ॥३१॥ अहं पतिर्वो भविता ततो मोक्षमवाप्स्यथ ॥ भवतामनुकंपार्थं लोकानुग्रहकारणम् ॥ लिंगरूपी भविष्यामि नाम्ना पशुपतीश्वरः ॥ ३२ ॥ अथ ते त्रिदशाः सर्वे दृष्ट्वा देवं तमीश्वरम् ॥ पशुभावविनिर्मुक्ता गता हृष्टास्त्रिविष्टपम् ॥ ब्रह्मा पशुपतिं प्राह प्रसन्नेनांतरात्मना ॥ ३३ ॥ ये त्वां पश्यन्ति देवेशं भक्त्या परमया युताः ॥ तेषां कुले पशुत्वं च ये गताः पितरः प्रभो ॥ स्वकैः कर्मविपाकैश्च तेषां मोक्षो भविष्यति ॥३४॥ अज्ञानाज्ज्ञानतो वापि यत्पापं क्रियते नरैः ॥ तत्पापं विलयं यातु तस्य देवस्य पूजनात् ॥ ३५ ॥ ते नराः पशवो लोके किं तेषां जीविते फलम् ॥ यैर्न दृष्टः पशुपतिः पशुयोनिविमोचकः ॥ ३६ ॥ कौमारे यौवने बाल्ये वार्द्धके यदुपार्जितम् ॥ तत्पापं विलयं याति दृष्ट्वा पशुपतिं शिवम् ॥ ३७ ॥ पौषमासे तु संप्राप्ते ये त्वां पश्यंति मानवाः ॥ तेषां त्वं वरदो देव सदाभीष्टकरो भवेत् ॥ ३८ ॥ सूर्यग्रहे यथा दत्तं कुरुक्षेत्रे विशेषतः ॥ पात्रे दानं सुवर्णस्य प्रोक्तमक्षय्यमव्ययम् ॥ ३९ ॥ पौषमासे दिनैकेन नराणामधिकं तथा ॥ तद्दर्शनेन देवेश भविष्यति न संशयः ॥ ४० ॥ इत्युक्त्वा भगवान्ब्रह्मा ब्रह्मलोकं गतो नृप ॥ कृतकृत्यः प्रहृष्टात्मा मुनिभिः कविभिः सह ॥ ४१ ॥ तस्मात्त्वमपि राजेंद्र यदीच्छसि परां गतिम् ॥ समाराधय तल्लिंगं पशुयोनिविमोचनम् ॥ महाकालवनं गत्वा इन्द्रेश्वरस्य दक्षिणे ॥४२॥ तस्य तद्वचनं श्रुत्वा नारदस्य महात्मनः ॥ जगाम पशुपालोऽपि महाकालवनं प्रिये ॥ दर्शनात्तस्य लिंगस्य गतोऽसौ परमां गतिम् ॥ ४३ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ पशुपत्याख्यदेवस्य शृणु ब्रह्मेश्वरं शिवम् ॥ ४४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये पशुपतीश्वरमाहात्म्यवर्णनंनाम चतुष्षष्टितमोऽध्यायः ॥ ६४ ॥ ॥ छ ॥ ॥ श्रीहर उवाच ॥ ॥ पंचषष्टिकसंख्याकं विद्धि ब्रह्मेश्वरं प्रिये ॥ यस्य दर्शनमात्रेण ब्रह्मलोको ह्यवाप्यते ॥ १ ॥ पुलोमानाम दैत्येंद्रो महाबलपराक्रमः ॥ पौलोमानां सहस्रैस्तु पूज्यमानः स तिष्ठति ॥ २ ॥ आनर्चुस्तेऽपि तं दैत्यं सुरेशं त्रिदशा इव ॥ स कदाचित्समक्षं तु दैत्यानामिदमब्रवीत् ॥ ३ ॥ अद्यापि लोकपालानामर्कंदुज्वलनांभसाम् ॥ शतक्रतोर्द्धनेशस्य यमस्य वरुणस्य च ॥ ४ ॥ यदि नाम ततः किं मे तपसा जीवितेन च ॥ सोऽहं विद्रावयिष्यामि सर्वानेव दिवौकसः ॥ ५ ॥ सर्वैरेतैः परिवृतः पौलोमैर्बलवत्तरैः ॥ इत्युक्त्वा गतवान्देवि सागरं दैत्यसंवृतः ॥ तावच्छयानं सहसा ह्यपश्यन्मधुसूदनम् ॥ ६ ॥ शारदाभ्रसमाभासं मध्येकालं

१ देवेशम्–इ० पा० । २ प्रलयम्–इ० पा० । ३ अक्षयम्–इ० पा० । ४ अत्र उज्जयिनीस्थपुस्तके–"ज्यानसापुरामाहे" इति लिखितमस्ति, तच्चैतस्य पशुपतीश्वरस्य स्थानं बोद्धव्यम् ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



यथा घनम् ॥ तमालोक्य ततो दैत्यानब्रवीदनुगांस्तथा ॥ ७ ॥ अयं स दानवगिरिवज्रो हि मधुसूदनः ॥ कीर्त्तिकांताकलाकेलिवैधव्यादेशको द्विषाम् ॥ ८ ॥ दैत्यसीमंतिनीकांतपत्रवल्लीप्रभंजकः ॥ अयमस्मज्जयवधूवैधव्यादेशकः परः ॥ ९ ॥ गतशंकः स्वपित्येकः सर्वदा कुटिलाशयः ॥ हंतव्यस्त्वरया दुष्टः कांक्षितो दर्शनं गतः ॥ १० ॥ इत्युक्त्वा स हि दैत्येंद्रः पुलोमातिरुषान्वितः ॥ अभिदुद्राव वेगेन तावदग्रे पितामहम् ॥ ददर्श नाभिकमले चिन्तयानं पुनःपुनः ॥ ११ ॥ अथ व्याकुलतां प्राप्तो ब्रह्मा दृष्ट्वा तदद्भुतम् ॥ आयांतं दैत्यसिंहानां सैन्यं रणसुदुर्जयम् ॥ ॥ १२ ॥ अथ बोधं गतः क्षिप्रं कैटभारिर्महाबलः ॥ ददर्शाग्रे पुलोमं तु स्वसैन्यपरिवारितम् ॥ १३ ॥ अजेयः संगरे धीरो ब्रह्माणमिदम ब्रवीत् ॥ १४ ॥ ॥ विष्णुरुवाच ॥ ॥ पुलोमस्य विनाशार्थमुद्योगः क्रियतामिति ॥ असौ लब्धवरो दैत्यः सहसा मां विजेष्यति ॥ १५ ॥ तस्माद्गच्छ त्वरायुक्तो महाकालवने शुभे ॥ लिंगं द्रक्ष्यसि तत्रैव सप्तकल्पोद्भवं परम् ॥ १६ ॥ उत्तरे च्यवनेशस्य शिवशक्तिसमन्वितम्[1] ॥ तस्य लिंगस्य माहात्म्याद्बलं प्राप्स्यति शाश्वतम् ॥ १७ ॥ कुण्डेश्वरकरस्पर्शकारि वारि निरंतरम् ॥ तदानय गृहीत्वा तु तेनायं वध्यतामिति ॥ १८ ॥ इति तस्य वचः श्रुत्वा ब्रह्मा लोकपितामहः ॥ आजगाम मुहूर्तेन यत्र तल्लिंगमुत्तमम् ॥ १९ ॥ स्तुतिं चकार सहसा दृष्ट्वा भक्त्या पितामहः ॥ ॥ २० ॥ ॥ ब्रह्मोवाच ॥ ॥ नमस्ते दिव्यरूपाय नमस्ते बहुरूपिणे ॥ नमोऽविषह्यवीर्याय नमो विश्वक्रियात्मने ॥ २१ ॥ नमः पिंगकपर्दाय नमः खंडेंदुधारिणे ॥ नमः कनकवर्णाय नमो वननिवासिने ॥ २२ ॥ वंदे त्वां भूतभर्त्तारं सदा शत्रुविनाशनम् ॥ रणत्कनककेयूरं धृतपूर्णेंदुमंडलम् ॥ २३ ॥ वन्दे त्वां त्रिदशाध्यक्षं विश्वाध्यक्षं महेश्वरम्[2] ॥ क्षीणसंसारदुःखौघं मुनिध्यातपदं सदा ॥ २४ ॥ वंदे त्वां सर्वदा देवं दैत्यसंघातनाशनम् ॥ टंकपट्टिशशूलाग्रधनुःखड्गगदाधरम् ॥ २५ ॥ एवं स्तुतः स भगवाँल्लिंगरूपी महेश्वरः ॥ किंचित्स्मितमुखः प्राह ब्रह्माणं लोककारणम् ॥ २६ ॥ किं तेऽभीष्टं करोम्यद्य किं ददामि पितामह ॥ कस्मात्स्तौषि मुनिश्रेष्ठ कस्मादार्तोऽसि दृश्यसे ॥ ॥ २७ ॥ इति लिंगवचः श्रुत्वा कथितं ब्रह्मणा तदा ॥ वृत्तांतं विस्तरात्सर्वं लिंगेनोक्तं तदा प्रिये ॥ २८ ॥ जलं गृहाण वाणीश शस्त्रजं शत्रुवारणम् ॥ हनिष्यसि क्षणेनैव पुलोमं सहसैन्यकम् ॥ २९ ॥ इत्युक्तः सत्वरो ब्रह्मा गतो यत्र जनार्दनः ॥ जलेन तेन तान्दैत्यान्पातयामास भूतले ॥ ३० ॥ स पुलोमा महानासीत्स्वारोचिषेंऽतरे मनौ ॥ कृष्णोऽपि ब्रह्मणा सार्द्धमाजगाम कुशस्थलीम् ॥ ३१ ॥ 

१ शिवभक्तिसमन्वित—इ० पा० । २ महेक्षणम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ददर्श तत्र तल्लिंगं नाम चक्रे जनार्दनः ॥ ब्रह्मणा संस्तुतो देवो ममानुग्रहकारणात् ॥ तस्माद्ब्रह्मेश्वरोनाम ख्यातिं लोकेषु यास्यति ॥ ३२ ॥ ये द्रक्ष्यंति नरा भक्त्या देवं ब्रह्मेश्वरं शिवम् ॥ ते ब्रह्मलोकमाक्रम्य समेष्यन्ति ममान्तिकम् ॥ ३३ ॥ यस्तु पश्येत्प्रसंगेन देवं ब्रह्मेश्वरं शिवम् ॥ कृतकृत्यः स पुरुषो न शोचेन्मरणं सदा ॥ ३४ ॥ यः पुष्करं नरो गत्वा तपो वर्षशतं चरेत् ॥ अन्यो ब्रह्मेश्वरं पश्येत्तस्य पुण्यं ततोऽधिकम् ॥ ३५ ॥ पंचपातकसंयुक्तो यो मर्त्यो दुष्टमानसः ॥ सोपि गच्छेच्छिवं स्थानं दृष्ट्वा ब्रह्मेश्वरं शिवम् ॥ ३६ ॥ चांद्रायणानां विधिवद्दशानामेव यत्फलम् ॥ तत्फलं समवाप्नोति ब्रह्मेश्वरस्य दर्शनात् ॥ ३७ ॥ इत्युक्त्वा गतवान्विष्णुर्वैकुंठं शाश्वतं प्रिये ॥ ब्रह्मलोकं जगामाथ ब्रह्मा लोकपितामहः ॥ ३८ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ ब्रह्मेश्वरस्य देवस्य जल्पेश्वरमथो शृणु ॥ ३९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्ये ब्रह्मेश्वरमाहात्म्यवर्णनंनाम पंचषष्टितमोऽध्यायः ॥६५॥ ॥छ॥ ॥ ईश्वर उवाच ॥ ॥ षट्षष्टितमकं विद्धि देवं जल्पेश्वरं प्रिये ॥ यस्य दर्शनमात्रेण महापापं शमं व्रजेत् ॥ १ ॥ जल्पोनाम महादेवि राजाभूद्भुवि विश्रुतः ॥ सदा जल्परतो नित्यं जल्पवादप्रवर्तकः ॥ २ ॥ विकल्पबहुलो नित्यं संसारगतिचिंतकः ॥ सुबाहुप्रमुखाः पंच पुत्रा जाता महाबलाः ॥३॥ तस्य राज्ञो वरारोहे मूर्ताः पंचाग्नयो यथा ॥ सुबाहुः शत्रुमर्दी च जयो विजय एव च ॥ विक्रांतः पंचमः पुत्रः सर्वे शस्त्रास्त्रपारगाः ॥४॥ पित्रा जल्पेन ते राज्ञा पृथग्राज्ये प्रतिष्ठिताः ॥ पृथक्पुत्रा हि ते सर्वे पृथग्देशाधिपाः कृताः ॥५॥ प्राच्यां सुबाहुर्नृपतिर्याम्यां वै शत्रुमर्दनः ॥ पश्चिमायां जयो राजा उत्तरे विजयो नृपः ॥ ६ ॥ मध्ये विक्रांतसंज्ञस्तु स्वपदे विनियोजितः ॥ व्यवस्थामीदृशीं कृत्वा स्वयमेव वनं ययौ ॥ ७ ॥ बभूवुर्मंत्रिणस्तेषां हिता वंशक्रमागताः ॥ बुभुजुः स्वस्वराज्यानि मंत्रिभिः सहितास्तदा ॥ ८ ॥ विक्रांतस्य च यो मंत्री विकल्पैकपरायणः ॥ तेनोक्तं विजने देशे विक्रांतस्य महीभृतः ॥ ९ ॥ यस्यैषा पृथिवी कृत्स्ना स समर्थः प्रकीर्तितः ॥ उद्यमेन पदं लब्धं वासवेन महात्मना ॥ १० ॥ त्रिदशैश्चामृतं लब्धमुद्यमेन महीपते ॥ ११ ॥ हीनोद्यमा मानवा ये क्षत्रियाश्च विशेषतः ॥ ते हास्यास्पदतां यांति हीनवीर्या दिनेदिने ॥ १२ ॥ स्नेहं च कुरुते भ्राता राज्यलुब्धोऽर्थकारणात् ॥ अर्थवीर्येण तेनैव संतोषं कुरुते नृपः ॥ १३ ॥ क्रियते न किमर्थं तु भूप मंत्रपरिग्रहः ॥ भुज्यते सकलं राज्यं मया ते मंत्रिणा बलात् ॥ १४ ॥

१ तस्य ब्रह्मेश्वरद्रष्टुः—इत्यर्थः । २ ततः—शतवर्षतपःकरात्—इत्यर्थः । ३ अत्र उज्जयिनीस्थपुस्तके—"दानदरवाज़े गौतमना घरपासे" इति लिखितमस्ति, तच्चैतस्य स्थानं बोद्धव्यम् । ४ सर्वशास्त्रार्थपारगः—इ० पा० । ५ नरा ये तु—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



परोऽपि हितवान्बन्धुर्बन्धुरप्यहितः परः ॥ अहितो देहजो व्याधिर्हितमारण्यमौषधम् ॥ १५ ॥ भूमिमेते निर्गिलंति सर्पा बिलशयानिव ॥ राजानमविरोद्धारं ब्राह्मणं चाप्रवासिनम् ॥ १६ ॥ मायया मोहितं सर्वं को वा कस्य च बांधवः ॥ उद्यमः क्रियतां तस्माद्भ्रातॄणां निग्रहे द्रुतम् ॥ १७ ॥ भ्रातृभिर्भ्रातरः सर्वे निहता राज्यकारणात् ॥ धर्मं च शाश्वतं ज्ञात्वा निहताश्चासुराः सुरैः ॥ १८ ॥ इति मंत्रिवचः श्रुत्वा स राजा विस्मयान्वितः ॥ हसित्वा प्रत्युवाचेदं ममायं शत्रुरागतः ॥ १९ ॥ ॥ विक्रान्त उवाच ॥ ॥ वयं च भ्रातरः पंच पृथिवीं कामयामहे ॥ अतुष्टाः पृथगैश्वर्यं कथं कृत्स्ना भविष्यति ॥२०॥ ज्येष्ठो भ्राता सुबाहुश्च द्वितीयः शत्रुमर्दनः ॥ जयश्च विजयश्चैव तेषां लघुरहं यतः ॥ २१ ॥ ॥ मंत्र्युवाच ॥ ॥ राज्ये स्थितं पूजयंति ज्येष्ठं पूजार्हणैर्वरैः ॥ कनिष्ठज्येष्ठता केयं राज्यं प्रार्थयतां नृणाम् ॥ २२ ॥ तथेति च प्रतिज्ञाते विक्रांतेन महीभृता ॥ स मंत्री कारयामास अभिचारविधिं तदा ॥ २३ ॥ अथर्वणेन मंत्रेण पुरोधाः प्रचकार ह ॥ ज्ञातं पुरोहितैस्तेषां तेऽपि चक्रुः समाहिताः ॥ २४ ॥ अथ कृत्या समुत्पन्ना पश्चात्कृत्याचतुष्टयम् ॥ सपुरोहितभृत्यांस्तानग्रसंस्तु समं तदा ॥ २५ ॥ ततः समस्तलोकस्य विस्मयश्चाभवन्महान् ॥ यदेककालं नेशुस्ते पृथक्पुरनिवासिनः ॥२६॥ ततः श्रुत्वा च निधनं पुत्राणां जल्पको नृपः ॥ वने वशिष्ठं पप्रच्छ किमेतद्भगवन्प्रभो ॥ २७ ॥ तेनापि कथितं सर्वं वशिष्ठेन महात्मना ॥ दिव्यज्ञानेन वृत्तांतं विकल्पं चाकरोन्नृपः ॥ २८ ॥ ॥ राजोवाच ॥ ॥ निमित्तोऽहं विनाशस्य धिग्धिग्जन्म मदीयकम् ॥ सार्द्धं त्वमात्यपुत्रैश्च मृतं ब्राह्मणपंचकम् ॥ २९ ॥ मत्तोऽन्यः कः पापरतो भविष्यति महान्भुवि ॥ यदि जन्म मदीयं स्यान्न च जातु महीतले ॥ ३० ॥ ततस्ते न विनश्येयुर्मम पुत्रपुरोहिताः ॥ धिग्राज्यं धिक्च मे जन्म भूभुजां च महाकुले ॥ ३१ ॥ कारणत्वं गतो योऽहं विनाशस्य द्विजन्मनाम् ॥ कुर्वन्तः स्वामिनस्तेऽर्थं पुत्राणां मम याजकाः ॥ नाशं ययुर्न दुष्टास्ते दुष्टोऽहं नाशकारणे ॥ ३२ ॥ इत्थमुद्विग्नहृदयः स जल्पः पृथिवीपतिः ॥ पप्रच्छ च पुनः प्रह्वो वशिष्ठं ज्ञानिनां वरम् ॥ ३३ ॥ ॥ ॥ राजोवाच ॥ ॥ भगवन्ब्रूहि मे तीर्थमवियोगकरं सदा ॥ सद्यः पापहरं विप्र लिंगं वा कथय प्रभो ॥ ३४ ॥ तस्य तद्वचनं श्रुत्वा जल्पस्य पृथिवीपतेः ॥ वशिष्ठः कथयामास दिव्यज्ञानेन पार्वति ॥ ३५ ॥ गच्छ जल्प ममादेशान्महाकालवनोत्तमम् ॥ कृत्वा निःक्षत्रियां पृथ्वीं यत्र रामस्तपस्यति ॥ तत्र लिंगमनाद्यं च कुक्कुटेश्वरपश्चिमे ॥ ३६ ॥ तदाराधय राजेंद्र जामदग्न्याश्रमे स्थितः ॥ वशिष्ठस्य वचः



१ को वा कस्य न बान्धवः—इ० पा० । २ अद्भुतम्—इ० पा० । ३ विक्रान्तः—इ० पा० । ४ कृत्स्नम्—इ० पा० । ५ महीतले—इ० पा० । ६ कुटुम्बेश्वरपश्चिमे—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्वा जल्पोऽसौ पृथिवीपतिः ॥ ३७ ॥ देवदारुवनं त्यक्त्वा महाकालवनं गतः ॥ ददर्श तत्र तल्लिंगमनाद्यं देवसंस्तुतम् ॥ पूजयामास विधिवत्परमेण समाधिना ॥ ३८ ॥ तत्र वाणी समुत्पन्ना लिंगमध्याद्वरानने ॥ न त्वं पापसमाचारो न त्वं मरणकारणम् ॥ पुत्राणां नृप विप्राणामदृष्टं तत्र कारणम् ॥ ३९ ॥ विपाकेन स्वकीयेन गता वैवस्वतं पुरम् ॥ मा शोकं कुरु राजेंद्र गहना कर्मणो गतिः ॥ ४० ॥ अनेन शुद्धभावेन तुष्टोऽहं नृपसत्तम ॥ यदभीष्टं वरं ब्रूहि तत्ते दास्यामि नान्यथा ॥४१॥ ॥ राजोवाच ॥ ॥ यदि तुष्टोऽसि मे देव यदि देयो वरो मम ॥ संसारसागरे घोरे मा भवेन्मम जन्म च ॥ ४२ ॥ अक्षयां देहि मे कीर्त्तिं नाम्ना मे विश्रुतो भुवि ॥ अयं जल्पेश्वरो देवो जल्पेनाराधितो विभुः ॥ ४३ ॥ वदंतु त्रिदशाः सर्वे एष मे दुर्लभो वरः ॥ ये त्वां पश्यंति मनुजा मन्नाम्ना ख्यातिमागतम् ॥ तेषां वियोगो मा भूयात्पुत्रतो धनतोऽपि वा ॥ ॥ ४४ ॥ न संसारभयं तेषां दस्युतो नैव राजतः ॥ न भूतग्रहरोगेभ्यो भयमस्तु कदाचन ॥ ४५ ॥ शिवमस्तु सदा तेषां येषां त्वं दर्शनं गतः ॥ ते धन्या मानुषे लोके ये त्वां शरणमागताः ॥ ४६ ॥ सर्वतीर्थाभिषेकैस्तु यत्पुण्यं प्राप्यते नरैः ॥ तत्सर्वमधिकं देव लभ्यते तव दर्शनात् ॥ ॥ ४७ ॥ तावत्पतति संसारे घोरे दुःखशताकुले[1] ॥ यावन्न दृश्यते देवः संसारार्णवतारकः ॥ ४८ ॥ यदा पापक्षयः पुंसां तदा ते दर्शनं भवेत् ॥ महता सुकृतेनैव नाल्पेन तपसा प्रभो ॥ ४९ ॥ एवं भविष्यतीत्युक्त्वा तेन लिंगेन पार्वति ॥ पश्यतां सर्वदेवानां स्वतनौ संनिवेशितः ॥ ५० ॥ तस्मिँल्लिंगे लयं प्राप्ते नृपे जल्पे वरानने ॥ देवो जल्पेश्वरः ख्यातो देवैरुक्तो महीतले ॥ भुक्तिदो मुक्तिदश्चैव सदाभीष्टकरः स्मृतः ॥ ५१ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ जल्पेश्वरस्य देवस्य शृणु केदारसंज्ञकम् ॥ ५२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये जल्पेश्वरमाहात्म्यवर्णनंनाम षट्षष्टितमोऽध्यायः ॥ ६६ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ सप्तषष्टिकसंख्याकं केदारेश्वरसंज्ञकम् ॥ देवं शृणु वरारोहे दर्शनात्पापनाशनम् ॥ १ ॥ सृष्टिकाले पुरा देवि देवा व्याप्ता हिमेन हि ॥ शीतार्त्ता विह्वलाः सर्वे ब्रह्माणं शरणं गताः ॥ २ ॥ हिमाद्रिणार्दिताः सर्वे वयं देव जगत्पते ॥ त्राहि भीतांश्चतुर्वक्त्र पितामह नमोऽस्तु ते ॥ ३ ॥ देवानां वचनं श्रुत्वा प्रोक्तं वै ब्रह्मणा प्रिये ॥ पीडिता हिमशैलेन शंकरश्वशुरेण च ॥ ४ ॥ नाहं यातुं समर्थोऽस्मि सत्यमेतन्मयोदितम् ॥ महादेव मृते देवा गतिरन्या न विद्यते ॥ ५ ॥ स एव शरणं देवः सर्वेषां नो भविष्यति ॥ तस्याज्ञया मया सर्वे पर्वता रचिताः पुरा ॥ ६ ॥ कृता सृष्टि

१ दुःखसमाकुले--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



र्विचित्रा च हिमाद्रिश्च मया कृतः ॥ असेव्यः सर्वजंतूनामधृष्यो दुर्गमो गिरिः ॥ ७॥ हिमाचलस्य तस्यैव शास्ता देवो महेश्वरः ॥ तस्माद्यास्या
महे देवा कैलासं पर्वतोत्तमम् ॥ ८ ॥ यत्र तिष्ठति विश्वात्मा देवदेवो महेश्वरः ॥ एवमुक्त्वा गतो ब्रह्मा देवैः सार्द्धं ममांतिकम् ॥ दृष्टोहं पूजित
स्तैस्तु स्तुतोऽहं विविधैःस्तवैः ॥ ९ ॥ मया संमानिता देवाश्चतुर्वक्त्रः प्रपूजितः ॥ पूजयित्वा मया पृष्टो ब्रह्मा गमनकारणम् ॥१०॥ किं कार्यं त्रिदशैः
सार्द्धमागतोऽसि पितामह ॥ कथितं ब्रह्मणा सर्वं श्रुतं सर्वं मया प्रिये ॥ ११ ॥ हिमाचलं समाहूय मर्यादा च कृता मया ॥ शैलानां राजराज
त्वे हिमाद्रिश्च प्रतिष्ठितः ॥ १२ ॥ देवानां विषयाश्चैव गंधर्वाणां तथैव च ॥ यक्षाणामथ नागानां किंनराणां तथैव च ॥ १३ ॥ विद्याधराणां
क्रीडार्थं पृथक्पृथङ्निवेशिताः ॥ रूपतो भाति शैलेंद्रः शुद्धस्फटिकसंनिभः ॥ १४ ॥ जाह्नवीनिर्झरोष्णीषः शर्वाणीजनकस्तथा ॥ १५ ॥ सर्वदेव
मयो दिव्यः सर्वतीर्थमयः कृतः ॥ सर्वाश्रमनिवासश्च सर्वामरनिषेवितः ॥ १६ ॥ एवं संस्थाप्य शैलेंद्रं लिंगमूर्त्तिरहं स्थितः ॥ विख्यातस्त्रिषु
लोकेषु केदारेश्वरनामतः ॥ १७ ॥ उदकं निर्मितं तत्र मंत्रपूर्णं मया प्रिये ॥ माहात्म्यं विविधं प्रोक्तं लिंगस्य च जलस्य च ॥ १८ ॥ योत्रा
गत्य नरो भक्त्या सम्यङ्मां पूजयिष्यति ॥ जलं योऽत्रैव गृह्णाति विधानेन वरानने ॥ तस्योदरे भविष्यामि लिंगरूपी न संशयः ॥ १९ ॥
इत्युक्ते वचने देवि सदेवासुरपन्नगाः ॥ यक्षरक्षःपिशाचाश्च भूतवैतालकिंनराः ॥ २० ॥ विद्याधरगणाश्चैव मम दर्शनलालसाः ॥
समायाता वरारोहे पीत्वा तत्र जलं शुभम् ॥ २१ ॥ दृष्टोऽहं विधिना तैस्तु लिंगमूर्त्तिगतः प्रिये ॥ मम तुल्याश्च ते जातास्त
स्मिन्नद्रिवरे स्थिताः ॥ जनलोकगतैः सिद्धैः पूज्यमाना वरानने ॥ २२ ॥ अथ कालेन बहुना श्रुत्वा माहात्म्यमुत्तमम् ॥ केदारेश्वरदेवस्य जलस्य
च विशेषतः ॥ २३ ॥ मनुष्याः समुपायातास्ते रजोबहुला यतः ॥ तमःप्राया विशालाक्षि तदाहं माहिषं वपुः ॥ २४ ॥ कृतवांस्तद्भयार्थाय न
च ते भीतिमागताः ॥ इह देवोत्र देवोऽत्र बभ्रमुस्ते दिदृक्षवः ॥ २५ ॥ न तैर्दृष्टो महादेवि यतोऽहं महिषाकृतिः ॥ स्थितोऽस्म्यलक्ष्यरूपेण ततस्ते
दीनमानसाः ॥ उद्विग्ना निश्वसन्तश्च वैराग्यं परमं गताः ॥ २६ ॥ नात्र देवो न तीर्थानि न गंगा पुण्यदायिनी ॥ न धर्मो न परो लोकः सर्वमे
तद्विडम्बनम् ॥ २७ ॥ एवं किल पुराणेषु श्रूयते सर्वदा श्रुतौ ॥ हिमालये च केदारं लिंगं मोक्षप्रदायकम् ॥ २८ ॥ एवं तु वदतां तेषां मानुषाणां ॥१४७॥
यशस्विनि ॥ आकाशादुत्थिता[१] वाणी मया प्रोक्तानुकंपया ॥ २९ ॥ अमार्गं मा वदंत्वत्र न निंद्याः श्रुतयोऽव्ययाः ॥ पुराणं नान्यथा प्रोक्तं

१ महता—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मणा लोककर्तृणा ॥ ३० ॥ ये निंदंति पुराणानि धर्मशास्त्राणि नास्तिकाः ॥ ते यांति नरकं घोरं यावदाभूतसंप्लवम् ॥ ३१ ॥ सदा देवोऽत्र केदारः स्वर्गमोक्षप्रदायकः ॥ विद्यते त्रिदशैः पूज्यः सततं नैव दृश्यते ॥ ३२ ॥ करोति पूजां हिमवान्मासानष्टौ च शाश्वतान् ॥ हिमाद्रिस्तेन पुण्येन नगेन्द्रस्तु कृतो नगैः ॥ सेव्यश्च रमणीयश्च सर्वतीर्थनमस्कृतः ॥ ३३ ॥ सर्वरत्ननिधानश्च देवानां वल्लभस्तथा ॥ ग्रीष्मे चैव वसन्ते च देवदेवोऽत्र दृश्यते ॥ ३४ ॥ नियतेनैव कालेन मानुषाणां च सर्वदा ॥ यदि बुद्धिः परा जाता सर्वदा मम दर्शने ॥ ३५ ॥ आख्यास्ये तदुपायं च श्रूयतां सावधानतः ॥ मा विकल्पोऽत्र कर्त्तव्यः सर्वान्कामानवाप्स्यथ ॥ ३६ ॥ क्षेत्राणामुत्तमं क्षेत्रं भुक्तिमुक्तिप्रदायकम् ॥ प्रलयेऽप्यक्षयं प्रोक्तं महाकालवनं नराः ॥ ३७ ॥ तत्राहं संभविष्यामि लोकानामनुकंपया ॥ लिंगरूपेण शिप्रायास्तटे पुण्ये सुशोभने ॥ ३८ ॥ सोमेश्वरस्य देवस्य पश्चिमे स्थानमुत्तमम् ॥ प्रसिद्धमुपयास्यामि केदारेश्वरनामतः ॥ ३९ ॥ सर्वदा दर्शनं तत्र मया सार्द्धं भविष्यति ॥ सर्वेषां च प्रदास्यामि सर्वान्कामान्न संशयः ॥ ४० ॥ इह यावत्फलं तस्माद्दास्यामि ह्यधिकं ततः ॥ इति ते मानवाः सर्वे श्रुत्वा वाणीं मनोरमाम् ॥ आकाशादुत्थितां दिव्यां मनःप्रह्लादकारिकाम् ॥ ४१ ॥ गता वनं महाकालं संस्मरन्तो महेश्वरम् ॥ विकल्पेन विचित्रेण सत्यमेवेति नान्यथा ॥ ४२ ॥ स्नात्वा शिप्राजले पुण्ये यावत्पश्यन्ति भास्करम् ॥ तावद्दृष्टिपथोत्पन्नं लिंगं पापप्रणाशनम् ॥ ४३ ॥ अथ ते हर्षिताः प्रोचुः केदारोऽयं न संशयः ॥ दृष्टोऽस्माकं न सन्देहो गंगा शिप्राजले स्थिता ॥ ४४ ॥ ततस्ते पूजयामासुः पुष्पैर्नानाविधैस्तथा ॥ पूजितोऽहं विशालाक्षि तेषां तुष्टो वरानने ॥ ॥ ४५ ॥ दुर्लभोऽतिवरो दत्तः कैलासे स्थानमुत्तमम् ॥ अक्षयं च पदं दत्तं पुनरावृत्तिवर्जितम् ॥ ४६ ॥ अतोऽहं त्रिदशैः प्रोक्तः केदारेश्वरनामतः ॥ प्रार्थितः परया भक्त्या लोकानामनुकंपया ॥ ४७ ॥ इहागत्य नरा ये च त्वां पश्यंति सुभक्तितः ॥ तेषां फलं त्वया देव दातव्यमधिकं यतः ॥ ४८ ॥ हिमाद्रौ हिमनाथस्य यात्रायाः प्रत्यहं[1] फलम् ॥ लभन्ते च नरा नित्यं नात्र कार्या विचारणा ॥ ४९ ॥ ब्रह्महा वा सुरापो वा स्तेयी वा गुरुतल्पगः ॥ तत्संपर्की नरो यस्तु त्वां दृष्ट्वा किल्बिषाकरः ॥ ५० ॥ सोऽपि याति परं स्थानं पुनरावृत्तिवर्जितम् ॥ चांद्रायणानां विधिवच्छतानां चैव यत्फलम् ॥ तत्फलं समवाप्नोति केदारेश्वरदर्शनात् ॥ ५१ ॥ ते नराः पशवो लोके तेषां जन्म निरर्थकम् ॥ यैर्न दृष्टो महाकाले केदारेश्वरसंज्ञकः ॥ ५२ ॥ कौमारे यौवने बाल्ये वार्द्धके यदुपार्जितम् ॥ तत्पापं संक्षयं याति केदारेश्वरदर्शनात् ॥ ५३ ॥ हिमालयकृता यात्रा

१ प्रथमम्-इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तस्याः प्रोक्तं च यत्फलम् ॥ तत्फलं समवाप्नोति केदारेश्वरदर्शनात् ॥५४॥ इत्युक्तोऽहं तदा देवि देवैः प्रणतिपूर्वकम् ॥ तथेति च मया प्रोक्तं तेऽपि देवा दिवं गताः ॥ ५५ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ केदारेश्वरदेवस्य पिशाचाख्यमतः शृणु ॥ ५६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये केदारेश्वरमाहात्म्यवर्णनंनाम सप्तषष्टितमोऽध्यायः ॥ ६७ ॥ ॥छ॥

॥ ॥ ईश्वर उवाच ॥ ॥ अष्टषष्टिकसंख्याकं पिशाचाख्यमथेश्वरम्[1] ॥ शृणु देवि प्रयत्नेन दर्शनात्पापनाशनम् ॥ १ ॥ आदौ कलियुगे देवि शूद्रो बहुधनोऽभवत् ॥ सोमोनाम सुविख्यातो[2] नास्तिको वेदनिंदकः ॥२॥ अब्रह्मण्यो नृशंसश्च कदर्यो निरपत्रपः ॥ विश्वासघातकश्चैव परस्वहरणे रतः ॥ ॥३॥ त्रिवर्गहंता चान्येषामात्मकामानुवर्त्तकः ॥ स कदाचिन्मृतो देवि कष्टेन परमेण च ॥ ४ ॥ मरुदेशे पिशाचोऽभून्नग्नो दीनो भयावहः ॥ नाशकृत्स पिशाचानां स्वपक्षोच्छेदकारकः ॥५॥ बहवो मर्द्दितास्तेन पिशाचा बलवत्तराः ॥६॥ अथ तेनैव मार्गेण कदाचिच्छाकटायनः ॥ स्वाध्यायनिरतो विद्वान्वाग्ग्मी शमपरायणः[3] ॥ ७ ॥ उदयादित्यसंकाशो विभावसुसमद्युतिः ॥ शकटेन सदा याति स पश्यन्पर्वतात्मजे ॥ ८ ॥ गतो ददर्श तं रौद्रं पिशाचं च भयावहम् ॥ स पिशाचः क्षुधाविष्टो भोक्तुकामोऽभ्यधावत ॥ ९ ॥ दृष्ट्वा तं शकटारूढं ब्राह्मणं शाकटायनम् ॥ [4]शकटस्य ध्वनिं श्रुत्वा रूपं दृष्ट्वा द्विजस्य च ॥ १० ॥ तथारूपः पिशाचस्तु कर्णाभ्यां बधिरीकृतः ॥ आत्मत्राणपरो भूत्वा नष्टः कष्टेन पार्वति ॥ तं धावंतं समालोक्य पिशाचं ब्राह्मणोऽब्रवीत् ॥ ११ ॥ पिशाच त्रस्तरूपोऽसि त्वरितश्चैव लक्ष्यसे ॥ क्व धावसि समाचक्ष्व कुतस्ते भयमागतम्[5] ॥ १२ ॥

॥ ॥ पिशाच उवाच ॥ ॥ शकटस्यास्य महतो घोषं श्रुत्वा भयंकरम् ॥ कर्णाभ्यां बधिरो जातो विसंज्ञस्तव दर्शनात् ॥ १३ ॥

॥ ॥ ब्राह्मण उवाच ॥ ॥ पिशाचानां बलिष्ठाश्च श्रूयंते ब्रह्मराक्षसाः ॥ स त्वं मां भोक्तुकामोऽसि विख्यातो ब्रह्मराक्षसः ॥ १४ ॥

॥ ॥ पिशाच उवाच ॥ ॥ पिशाचानां समर्थोऽस्मि नष्टोऽहं तव दर्शनात् ॥ दुःखं हि मृत्युः सर्वेषां जीवितं च सुदुर्ल्लभम् ॥ अतो भीतः पलायामि जीवहेतोः सुखार्थतः ॥ १५ ॥

॥ ब्राह्मण उवाच ॥ ॥ कुतः पिशाच सौख्यं ते मरणं श्रेय एव ते ॥ पैशाची कुत्सिता योनिः पापिनामेव जायते ॥ १६ ॥

॥ पिशाच उवाच ॥ ॥ सर्वत्र हि गतो जीवो भवत्येव सुखाश्रयः ॥ तस्माज्जीवितुमिच्छामि प्रसीद ब्रह्मराक्षस ॥ ॥ १७ ॥

॥ ब्राह्मण उवाच ॥ ॥ नाहं त्वां भोक्तुकामोऽस्मि ब्राह्मणोऽहं न राक्षसः ॥ सर्वभूतहितार्थाय विचरामि महीतले ॥ १८ ॥ सर्वेषां

१ अथो–इ०पा० । २ महेश्वरम्–इ०पा० । ३ सोमेशोनाम विख्यातः–इ०पा० । ४ सत्यपरायणः–इ० पा० । ५ भयं सदा–इ०, भयं मम–इ० च पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेव जंतूनां मैत्रो ब्राह्मण उच्यते ॥ मा कुरुष्व भयं मत्तो मित्रभावगतो ह्यहम् ॥ १९ ॥ तस्य तद्वचनं श्रुत्वा पिशाचः स्वस्थमानसः ॥ प्रणम्य
प्रत्युवाचेदं ब्राह्मणं शाकटायनम् ॥ २० ॥ यदि ते सर्वभूतानां दत्ता ह्यभयदक्षिणा ॥ कर्मणा मनसा वाचा मित्रभावं गतो यदि ॥ २१ ॥
पृच्छामि त्वां महाभाग संशयो हृदये स्थितः ॥ श्रुत्वानुकंपया सम्यक्तन्मे व्याख्यातुमर्हसि ॥ २२ ॥ केन कर्मविपाकेन पैशाचं याति मानवः ॥
पिशाचत्वात्कथं मुक्तिः प्राप्यते पापकर्मभिः[1] ॥२३॥ इति तस्य वचः श्रुत्वा पिशाचस्य वरानने ॥ ममत्वेनावृतस्तस्मै प्रावोचच्छाकटायनः ॥२४॥
अपहृत्य च विप्रस्वं देवस्वं च विशेषतः ॥ तेन पापेन पापिष्ठाः पिशाचत्वं प्रयांति च ॥ २५ ॥ पितरं मातरं चैव स्त्रियं बालं द्विजं तथा ॥ वंच
यित्वा हरत्यर्थं स पिशाचो भवेन्नरः ॥ २६ ॥ राजद्रव्यं गृहीत्वा तु न यजेन्न ददाति यः ॥ आत्मानमेव पुष्णाति पिशाचत्वं स गच्छति ॥ २७ ॥
विश्वासघातका ये च परदाररताश्च ये ॥ प्राप्नुवंति पिशाचत्वं तथा ये वेदनिंदकाः ॥ २८ ॥ निंदंति ये पुराणानि धर्मशास्त्राणि सर्वदा ॥ ते
भवंति पिशाचाश्च ये सदा पिशुना नराः ॥ २९ ॥ इति ते कथितं सर्वं[2] वेदप्रामाण्यतोऽधुना ॥ इदानीं कथयिष्यामि यस्त्वं जातोसि तच्छृणु ॥
॥ ३० ॥ सोमकोनाम[3] शूद्रस्त्वं परमर्म[4]प्रकाशकः ॥ विश्वासघातको जातो देवब्राह्मणदूषकः ॥ ३१ ॥ नास्तिको भिन्नमर्यादो जन्मन्यत्रापि
सत्तमे ॥ सकुलं पातयित्वात्र नरके दारुणे भृशम् ॥ ३२ ॥ पिशाचयोनिं संप्राप्तः पुनः प्राप्स्यसि रौरवम् ॥ महारौरवसंज्ञं तु क्रकचं कालसूत्रकम् ॥
यंत्रपीडनकं रौद्रं मथनं कुम्भवालुकम् ॥ ३३ ॥ इत्येवं वदतस्तस्य ब्राह्मणस्य यशस्विनि ॥ सस्मार प्राक्तनं जन्म सत्संगात्कुत्सितं स्वकम् ॥
॥ ३४ ॥ दुःखाभिभूतो निश्चेष्टो धिग्धिगित्यसकृद्ब्रुवन् ॥ पतितो भूतले देवि इदं वाक्यमथाब्रवीत् ॥ ३५ ॥ अहो केनापि पुण्येन भवता सह
दर्शनम् ॥ जातं ममाल्पपुण्यस्य दीनस्य कृपणस्य च ॥ ३६ ॥ नास्ति धर्मसमं मित्रं नास्ति धर्मसमा गतिः ॥ नास्ति धर्मसमं त्राणं स च
नास्ति मम प्रभो ॥ ३७ ॥ मग्नोऽहं दुःखजलधौ मग्नोऽहं पापकर्दमे ॥ भ्रांतोऽहमंधतमसि ततस्त्वां शरणं गतः ॥ ३८ ॥ नमस्तेऽस्तु महाभाग
किं करोमि प्रशाधि माम् ॥ तत्तपोबलनिर्दिष्टमिदं प्राप्तं मयाऽधुना ॥ ३९ ॥ एवं निगदतस्तस्य पिशाचस्य वरानने ॥ कथयामास माहात्म्यं स
विप्रः शाकटायनः ॥ ४० ॥ पृथिव्यां यानि तीर्थानि आसमुद्रगतानि वै ॥ क्षेत्राणि यानि संतीह तेषां क्षेत्रं सुपुण्यदम् ॥४१॥ महाकालवनं क्षेत्रं
प्रलयेऽप्यक्षयं गतम् ॥ लिंगं तत्र महाक्षेत्रे पिशाचत्वविनाशनम् ॥ ४२ ॥ ढुंढेश्वरस्य देवस्य दक्षिणे त्रिदशार्चितम् ॥ पैशाचं विद्यते

१ पुण्यकर्मभिः—इ० पा० । २ सत्यम्—इ० पा० । ३ लोमशोनाम शूद्रस्त्वम—इ० पा० । ४ परकर्मप्रकाशकः—इ० पा० । ५ नाम—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



भूयः पिशाचयोनिनाशनम् ॥ तस्य दर्शनमात्रेण पिशाचत्वात्प्रमोक्ष्यसे ॥ ४३ ॥ तस्य तद्वचनं श्रुत्वा स पिशाचो वरानने ॥ आजगाम त्वरायुक्तो नमस्कृत्य द्विजं तदा ॥४४॥ महाकालवने पुण्ये समीहितफलप्रदे ॥ ददर्श तत्र तल्लिंगं स्नात्वा शिप्राजले शुभे॥४५॥दर्शनात्तस्य लिंगस्य स पिशाचो वरानने ॥ तत्क्षणाद्दिव्यदेहस्तु दिव्याभरणभूषितः ॥ ४६ ॥ दिव्यं विमानमारूढो गतो लोके सनातने ॥ उद्धृत्य सकलं गोत्रं मातृकं पैतृकं तथा ॥४७॥ दृष्ट्वा तन्महदाश्चर्यं माहात्म्यातिशयं प्रिये ॥ प्रोक्तं देवैर्विमानस्थैः सिद्धैराकाशगैस्तथा ॥ ४८ ॥ पिशाचोपि गतः स्वर्गमस्य लिंगस्य दर्शनात् ॥ अतो देवः स विख्यातो भविष्यति महीतले ॥ पिशाचेश्वरसंज्ञस्तु सर्वपापप्रणाशनः ॥ ४९ ॥ ये पश्यंति नरा [1]देवि पिशाचेश्वरसंज्ञकम् ॥ तेषां हि पितरः सद्यो ये चापि निरये स्थिताः ॥ पिशाचत्वाद्विमुच्यंते स्वर्गं यांति न संशयः ॥ ५० ॥ अश्वमेधस्य यज्ञस्य सम्यगिष्टस्य यत्फलम् ॥ तत्फलं लभते सोऽपि पिशाचेश्वरदर्शनात् ॥ ५१ ॥ गयायां पिंडदानेन यत्पुण्यं समुदाहृतम् ॥ तत्पुण्यमधिकं ज्ञेयं पिशाचेश्वरदर्शनात् ॥ ५२ ॥ ये पश्यंति चतुर्दश्यां पिशाचेश्वरसंज्ञकम् ॥ प्रेतत्वं च पिशाचत्वं कुले तेषां न जायते ॥ ५३ ॥ न वियोनिं नरो याति नरकं च न पश्यति ॥ प्रसंगेनापि यः पश्येत्पिशाचेश्वरसंज्ञकम् ॥ ५४ ॥ सर्वैश्वर्यसमायुक्तः सर्वबन्धुसमन्वितः ॥ मोदते पितृलोके स पिशाचेश्वरदर्शनात् ॥ ५५ ॥ कीर्त्तनान्मुच्यते पापाद्दृष्ट्वा स्वर्गं च गच्छति ॥ स्पर्शनादस्य लिंगस्य पुनात्यासप्तमं कुलम् ॥ ५६ ॥ तदैव स नरो मुक्तः संसारनिगडादिभिः ॥ यदैव वीक्षते लिंगं पिशाचेश्वरसंज्ञकम् ॥ ५७ ॥ यज्ञानां तपसां चैव दानानां चैव यत्फलम् ॥ तत्फलं कोटिगुणितं जायते तस्य दर्शनात् ॥ ५८ ॥ यदि पश्येच्चतुर्दश्यां वैशाखे कार्त्तिके तथा ॥ तस्य पुण्यमसंख्यातं जायते नात्र संशयः ॥ ५९ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ पिशाचेश्वरदेवस्य श्रूयतां [2]संगमेश्वरम् ॥ ६० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये पिशाचेश्वरमाहात्म्यवर्णनंनामाष्टषष्टितमोऽध्यायः ॥ ६८ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ एकोनसप्ततिं देवि शृणु पार्वति यत्नतः ॥ यस्य दर्शनमात्रेण संगमो जायते सदा ॥ १ ॥ कलिंगविषये देवि सुबाहुर्नाम पार्थिवः ॥ बभूव भुवि विख्यातो यज्वा परमधार्मिकः ॥ २ ॥ तस्य पत्नी विशालाक्षी दुहिता दृढधन्वनः ॥ कांचीपुरनिवासस्य [3]क्षात्रव्रतरतस्य च ॥ ३ ॥ परस्परानुरागत्वात्परा प्रीतिरभूत्तयोः ॥ तस्य राज्ञः शिरोऽर्त्तिस्तु मध्याह्ने जायते सदा ॥ ४ ॥ आयुर्वेदविदां मुख्यैः शरीरस्य चिकित्सकैः ॥ तैः प्रणीताः



१ देवम्–इ०पा० । २ संगमेश्वरः–इ०पा० । ३ क्षेत्रव्रतरतस्य च–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रिये योगा व्यर्थावृद्धिर्दिनेदिने ॥ ५ ॥ एवं बहुतरे काले गते देवि महीपतिम् ॥ प्रत्युवाच विशालाक्षी भर्तुर्दुःखेन पीडिता ॥ ६ ॥ कथमेषां शिरोरोगे जरा ते पृथिवीपते ॥ वैद्याश्च बहवो देव नानाशास्त्रविशारदाः ॥ प्रयतंतेऽस्य नाशाय तथाप्येष न शाम्यति ॥ ७ ॥ एवं स प्रियया प्रोक्तः सुबाहुः पृथिवीपतिः ॥ प्रत्युवाच प्रियां भार्यां प्रेम्णा प्रणयवत्सलाम् ॥ ८ ॥ सुखदुःखाश्रयं देवि शरीरं सर्वदेहिनाम् ॥ पूर्वकर्मानुसारेण सुखं दुःखं च जायते ॥ ९ ॥ इति संबोधिता राज्ञी तेन राज्ञा वरानने ॥ पुनः प्रोवाच हार्देन तमेवार्थं सुदुःखिता ॥ १० ॥ यदा सा वारितात्यर्थं पृच्छत्येव पुनःपुनः ॥ तदा राजा प्रहस्यैव तां च राज्ञीमुवाच ह ॥ ११ ॥ यदि त्वं श्रोतुकामासि रोगस्यास्य समुद्भवम् ॥ कारणं तत्त्वतो देवि नाख्यास्याम्यहमत्र वै ॥ १२ ॥ महाकालवनं गत्वा सिद्धगंधर्वसेवितम् ॥ तत्र ते कथयिष्यामि यदि कौतूहलं तव ॥ १३ ॥ श्वः प्रभाते गमिष्यामि त्वया सार्द्धं शुचिस्मिते ॥ इति तस्य वचः श्रुत्वा सा राज्ञी विस्मिता स्थिता ॥ उत्सुका गमनार्थाय महाकालवनं शुभम् ॥ १४ ॥ अथ सा रजनी वृत्ता प्रभाते नृपसत्तमः ॥ प्रतस्थे भार्यया सार्द्धं सैन्येन महता वृतः ॥ १५ ॥ आजगाम क्रमेणैव महाकालवनं शुभम् ॥ आवासं विदधे धीमाञ्छिप्रातीरे नृपस्तदा ॥ १६ ॥ पातालवाहिनी तत्र गंगा त्रिपथगामिनी ॥ द्वितीया नीलगंगा च शिप्रया सह संगता ॥ १७ ॥ तासां च संगमस्तत्र तल्लिंगं संगमेश्वरम् ॥ पूजितं गंगया सार्द्धं शिप्रया नीलगंगया ॥ १८ ॥ अथ प्राप्ते सुबाहौ च सा राज्ञी विस्मयान्विता ॥ पप्रच्छ प्रणयोपेता कथ्यतामत्र कारणम् ॥ यत्त्वयोक्तं पुरा देव कथयिष्यामि तत्र वै ॥ १९ ॥ एवमुक्तः सुबाहुस्तु प्रियया पृथिवीपतिः ॥ प्रत्युवाच प्रियां प्रेम्णा प्रहस्य च पुनःपुनः ॥ २० ॥ सुखं स्वपिहि भद्रांगि श्रांता वयमनिंदिते ॥ प्रभाते कथयिष्यामि शिरोरोगस्य कारणम् ॥ २१ ॥ अथ सा रजनी वृत्ता प्रभाते नृपसत्तमः ॥ कथयामास माहात्म्यं देवस्य परमेष्ठिनः ॥ २२ ॥ अहमासं कुशूद्रस्तु सर्वदा वेदनिंदकः ॥ विश्वासघातको नित्यं त्वमप्येवं तथाविधा ॥ २३ ॥ पुत्रो जातस्तु दुःशीलो देवब्राह्मणवंचकः ॥ कुरूपः कर्कशो दुष्टः प्रकृत्या पापपूरुषः ॥ २४ ॥ अथ दीर्घेण कालेन द्वादशाब्दं भयावहा ॥ अनावृष्टिस्तु संजाता सर्वप्राणिभयंकरी ॥ २५ ॥ वियोगस्तु त्वया प्राप्तो मया सार्द्धं सुतेन च ॥ ततोऽहं दुःखसंतप्तो वैराग्यं परमं गतः ॥ २६ ॥ इच्छता निधनं सद्यो मया प्रोक्तमिदं वचः ॥ मम

१ व्यर्था यान्ति–इ०पा० । २ कथमेष शिरोरोगो जायते पृथिवीपते –इ०पा० । ३ प्रणयवत्सलः–इ०पा० । ४ पीडिताऽत्यर्थम्–इ०पा० । ५ तामुवाच सुशोभना–इ०पा० । ६ तदा–इ०पा० । ७ महाभया–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पुण्यविहीनस्य पापध्यानरतस्य च ॥२७॥ सुतेन भार्यया सार्द्धं संगमो दुर्लभः पुनः ॥ कथं स्वपिति पापिष्ठः कृत्वा पापं सुदारुणम् ॥२८॥ कुटुंबार्थे करोत्येवमेकाकी निस्तरत्यसौ ॥ धर्म एव परो बंधुर्धर्म एव परा गतिः ॥ धर्मेण साध्यते सर्वं तस्माद्धर्मं समाश्रयेत् ॥२९॥ इति चिंतयतोऽत्यर्थं मम प्राणा गताः प्रिये ॥ विविधा यातना प्राप्ता मया नरककोटिषु ॥ ३० ॥ अंतकालेऽपि धर्मस्य प्रशंसा या मया कृता ॥ मत्स्योऽहं तेन पुण्येन जातः शिप्राजले शुभे ॥ ३१ ॥ त्वं च श्येनी ततो जाता तस्मिन्नेव वनोत्तमे ॥ प्रावृट्कालेऽथ संप्राप्ते आश्लेषानुगते रवौ ॥ ३२ ॥ नदीत्रयरयेणैव निःसृतोऽहं जलात्ततः ॥ त्वया शिरसि संप्राप्तो नखैर्विद्धोऽस्मि सुंदरि ॥ ३३ ॥ आनीतोऽहं त्वया देवि संगमेश्वरसंनिधौ ॥ कैवर्तैर्निधनं प्राप्तं त्वया सार्द्धं वरानने ॥ ३४ ॥ म्रियमाणेन मे दृष्टो देवोऽसौ संगमेश्वरः ॥ शिप्रया स्नापितोऽत्यर्थं गंगया नीलगंगया ॥ ३५ ॥ तस्य दर्शनमात्रेण जातोऽहं पृथिवीपतिः ॥ कलिंगविषये देवि सर्वभूपालवंदितः ॥ ३६ ॥ सुता त्वं वल्लभा जाता कांचीपुरनिवासिनः ॥ क्षांत्रव्रतरतस्यैव सुभगा दृढधन्वनः ॥ ३७ ॥ आवां राजत्वमापन्नौ तस्य लिंगस्य दर्शनात् ॥ त्वया कररुहैर्विद्धो मारितो लगुडैश्च तैः ॥ ३८ ॥ मध्याह्ने कदनं स्मृत्वा ततो मे शिरसि व्यथा ॥ स्मरामि जातिमात्मीयामस्य देवस्य दर्शनात् ॥३९॥ एतत्ते कथितं देवि पृष्टोऽहं यत्त्वया पुरा ॥ गच्छ सुंदरि भद्रं ते यत्र ते वर्त्तते मनः ॥४०॥ स्थातव्यं च मयात्रैव सेव्योऽसौ संगमेश्वरः ॥४१॥ ततः सा निरवद्यांगी नीलोत्पलविलोचना ॥ करुणं सुस्वरं कृत्वा भर्त्तारमिदमब्रवीत् ॥ ४२ ॥ मयापि संस्मृतं देव पूर्वजन्मनि चेष्टितम् ॥ अस्य लिंगस्य माहात्म्यात्तिर्यग्योनिगतावपि ॥ ४३ ॥ प्राप्तावावां मनुष्यत्वं निर्मलेषु कुलेषु च ॥ प्राप्ता श्रीरतुला लोके प्राप्तं राज्यमकंटकम् ॥ ४४ ॥ प्राप्ता भार्या प्रियाहं ते त्वं च प्राप्तो मया नृप ॥ ख्यातोयं त्रिषु लोकेषु नामतः संगमेश्वरः ॥ ४५ ॥ अस्य देवस्य माहात्म्याद्वियोगो न भविष्यति ॥ यथा कृष्णस्य लक्ष्म्या च पार्वत्या च शिवस्य च ॥ ४६ ॥ पुनः प्रणम्य प्रणता सहसा मन्मथाकुला ॥ भर्त्ता सुबाहुर्मे भूयादन्यस्मिन्निह जन्मनि ॥ ४७ ॥ तव देव प्रसादेन यदि त्वं संगमेश्वरः ॥ ततो विलोक्य सोन्मेषं कुसुमेषुतरंगिताम् ॥ कांतां पिबन्निव दृशा प्राह तां तरलेक्षणाम् ॥ ४८ ॥ सहजेनाभिजन्येन गुणैः कांत्या विभूषिता ॥ मया प्राप्ता विशालाक्षि प्राप्तं मज्जन्मनः फलम् ॥ ४९ ॥ ततस्तां भयसंत्रस्तां कंपिताधरपल्लवाम् ॥ गृहीत्वा च करे कांतां जगामांतःपुरं निजम् ॥ ५० ॥ वदन्कंदर्पसर्पेण दष्टोऽहं दैवतोऽधुना ॥ चचार तत्र निःसारं संसारं कलयन्धिया ॥५१॥ पुरे मम वरारोहे चिरं रेमे तया सह ॥ एवं राजा प्रियां प्राप्य

१ क्षेत्रव्रतरतस्यैव—इ० पा० । २ पुरे मम—मम—शङ्करस्य—पुरे—महाकालवने—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निवेद्य च निजां कथाम् ॥ ५२ ॥ भेजे राज्यं तया सार्द्धं विस्तारितमहोत्सवः ॥ अशाश्वतमिदं ज्ञात्वा आर्थिभ्योऽपि ददौ धनम् ॥ ५३ ॥ अपूर्वत्यागिना तेन त्रैलोक्यं विस्मयं ययौ ॥ राज्यं कृत्वा चिरं कालं सभार्यो नृपसत्तमः ॥५४॥ भुक्त्वा च विपुलान्भोगांस्तस्मिँल्लिंगे लयं गतः ॥ अतो देवि सुविख्यातो देवोऽसौ संगमेश्वरः ॥ ५५ ॥ यः पश्येत्परया भक्त्या तल्लिंगं संगमेश्वरम् ॥ न वियोगो भवेत्तस्य पुत्रभ्रातृप्रियादिभिः ॥ ॥ ५६ ॥ नियमेन तु यः पश्येत्तल्लिंगं संगमेश्वरम् ॥ राजसूयसहस्रस्य फलं तस्याधिकं भवेत् ॥ ५७ ॥ गांगं च सफलं पुण्यं यामुनं नार्मदं तथा ॥ जायते चांद्रभागं च संगमेश्वरदर्शनात् ॥ ५८ ॥ यः पश्येच्छ्रावणे मासि तल्लिंगं संगमेश्वरम् ॥ कार्तिकस्वामिनो यात्रा कृता तेन न संशयः ॥ ॥ ५९ ॥ मासि चाश्वयुजे देवं यः पश्येत्संगमेश्वरम् ॥ कृतं तेन सहस्रं तु वाजपेयं वरानने ॥ ६० ॥ यः पश्येत्कार्त्तिके मासि तल्लिंगं संगमेश्वरम् ॥ राजसूयसहस्रं तु कृतं तेन न संशयः ॥ ६१ ॥ चतुरो वार्षिकान्मासान्यः पश्येत्संगमेश्वरम् ॥ स याति परमं स्थानं ममाभीष्टतरं प्रिये ॥ ६२ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ संगमेश्वरदेवस्य शृणु दुर्द्धर्षमीश्वरम् ॥ ६३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिंगमाहात्म्ये संगमेश्वरमाहात्म्यवर्णनंनामैकोनसप्ततितमोऽध्यायः ॥ ६९ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु सप्ततिकं देवं दुर्द्धरेश्वरमीश्वरम् ॥ यस्य दर्शनतो देवि नरः पापैः प्रमुच्यते ॥ १ ॥ दुर्द्धर्षोनाम राजाभून्नेपालविषये पुरा ॥ पुण्यकेतुर्यशस्वी च सत्यसंधो दृढव्रतः ॥ २ ॥ तिस्रस्तस्याभवन्भार्यास्तत्तुल्याः सुमनोहराः ॥ विहरन्स वनोद्याने वसन्ते पृथिवीपतिः ॥ ३ ॥ कदा मृगरसाविष्टो दैवाद्वै वातरंहसा ॥ तुरगेणोहितः प्राप वनं रुचिरपादपम् ॥ ४ ॥ गजेंद्रमृगशार्दूलसिंहसंबरसंकुलम् ॥ ऋक्षवानरवाराहगण्डकादिविराजितम् ॥ ५ ॥ तस्मिन्वने सुविस्तीर्णं कदलीखंडमंडितम् ॥ हंसकारंडवाकीर्णं चक्रवाकोपशोभितम् ॥ ६ ॥ ददर्श दर्पणस्वच्छं सरो नीरजराजितम् ॥ स्नातसिद्धवधूवृन्दकुचकुंकुमपिंजरम् ॥ ७ ॥ ददर्श कन्यां तत्रैव काननस्येव देवताम् ॥ स तां दृष्ट्वा सुचार्वंगीं मन्मथेन प्रपीडितः ॥ ८ ॥ चित्रन्यस्त इव क्षिप्रमभूद्विस्मयनिश्चलः ॥ सा भुजंगीव संकृष्टा मन्त्रेणेवांतिकं ययौ ॥ ९ ॥ कन्दर्पकोटिसदृशं विश्रान्तं नृपमब्रवीत ॥ सुतां मां विद्धि राजेन्द्र कल्पस्य प्राणवल्लभाम् ॥ १० ॥ तपोरतस्य शांतस्य सर्वदा ब्रह्मचारिणः ॥ मदर्थे प्रार्थ्यतां विप्र स मां तुभ्यं प्रदास्यति ॥ ११ ॥ इति तस्या वचः श्रुत्वा मन्मथेनाकुलीकृतः ॥ लज्जां त्यक्त्वा स भूपालो ययाचे विजने च ताम् ॥ १२ ॥ मम प्राणव्ययः सुभ्रूस्त्वां विना समुपस्थितः ॥

१ चतुरः कार्तिकान्मासान्—इति पाठे—कार्तिकात्—कार्तिकपर्यंतं चतुरो मासान्—इत्येवार्थो भवति । २ दर्शनमात्रेण—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



कार्याकार्यविचारो हि कस्य जीवितशांतये ॥ १३ ॥ त्यज्यते प्राप्तममृतं यदेतद्बुद्धिलाघवम् ॥ को जानीते परे लोके कस्य किं नु भविष्यति ॥ ॥ १४ ॥ भज मामनवद्यांगि तवैतद्वदनामृतम् ॥ न पाययसि चेन्मह्यं मृतं जानीहि मे प्रिये ॥ १५ ॥ स्वयं पिबामि चेद्विद्धि परलोकगतं हि माम् ॥ श्रुत्वेति चकिता तन्वी प्रोवाच विनयान्विता ॥ १६ ॥ अष्टायां मयि तातस्य विनष्टे कन्यकाफले ॥ कुलं पतति नः सर्वं तस्मादेतद्विचिन्त्यताम् ॥ १७ ॥ यदि ते परमं प्रेम ममोपरि महीपते ॥ मदर्थे प्रार्थ्यतां विप्र स मां नूनं प्रदास्यति ॥ १८ ॥ तस्यास्तद्वचनं श्रुत्वा नान्यथा मे भविष्यति ॥ ज्ञात्वा कन्यां द्विजस्यैव कल्पस्य ब्रह्मचारिणः ॥ १९ ॥ गत्वा ययाचे प्रणतः स्थितं निजतपोवने ॥ मुनीन्द्रश्चंद्रवदनां स चास्मै तां ददौ मुदा ॥ २० ॥ तत्रैव संगतो राजा मन्मथेन वशीकृतः ॥ रेमे रमणकैर्योगैर्न सस्मार निजं पुरम् ॥ २१ ॥ कदलीखण्डकुञ्जेषु रम्यासु वनराजिषु ॥ बहुलाम्रकदंबेषु राजा भेजे नवां वधूम् ॥ सिषेवे चारु सुरतं स विदग्धोऽतिमुग्धया ॥ २२ ॥ एवं हि वसतस्तस्य दुर्द्धर्षस्य वरानने ॥ आजगाम सुदुर्द्धर्षो राक्षसोऽतिभयंकरः ॥ २३ ॥ ज्वलितो विकटाकारो दंष्ट्रोत्कटकटाननः ॥ तं नृपं मोहयित्वा तु तरसा तरलेक्षणाम् ॥ जहार मन्मथाविष्टो रूपयौवनशालिनीम् ॥ २४ ॥ राजा च तां हृतां दृष्ट्वा वियोगविषमूर्छितः ॥ स्मृत्वास्मृत्वा सुचार्वंगीं विललापाकुलेन्द्रियः ॥ ॥ २५ ॥ हा प्रिये प्रेमपीयूषे प्रणयामृतदीर्घिके ॥ हा सुन्दरि विशालाक्षि क्व गता मां विहाय वै ॥ २६ ॥ पुनरिन्दुमिवानंदं कदा द्रक्ष्यामि ते मुखम् ॥ इति प्रलापमकरोत्स्मरंस्तां चारुहासिनीम् ॥ उन्मत्त इव बभ्राम तत्र तत्र स्मरातुरः ॥ २७ ॥ एवं विलपतस्तस्य दुर्द्धर्षस्य नृपस्य तु ॥ आजगाम तमुद्देशं कल्पो ब्राह्मणसत्तमः ॥ ददर्श नृपतिं तत्र भ्रमंतं भ्रमरं यथा ॥ २८ ॥ ज्ञात्वा जामातरं सम्यक्समाश्वास्य वचोऽब्रवीत् ॥ एहि दुर्द्धर्ष राजेन्द्र गहना कर्मणो गतिः ॥ क्व गतो हि महीपाल नेपालविषयस्तव ॥ २९ ॥ कुलीना रूपवत्यश्च तिस्रो भार्याः क्व वै गताः ॥ क्व ते राज्यं गतं भूप कुत्र पुत्री गता मम ॥ ३० ॥ सर्वं विनश्वरं लोके गन्धर्वनगरोपमम् ॥ अनित्यं जीवितं भूप राज्यं वै बुद्बुदोपमम् ॥ ३१ ॥ एवमाश्वासितो राजा कल्पेन च पुनःपुनः ॥ सस्मार तां सुचार्वंगीं मन्मथेन प्रपीडितः ॥ ३२ ॥ ब्रूहि मे भगवन्सम्यग्यदि तेऽस्ति दया मयि ॥ कथं राज्यं स्वकीयं स्यात्कथं मे सुहृदागमः ॥ ३३ ॥ तिस्रो भार्याः कथं विप्र पश्यामि पृथिवीतले ॥ लावण्यामृतशालिन्यस्तव पुत्र्या द्विजोत्तम ॥ कथं समागमो भूयो भविष्यति मया सह ॥ ३४ ॥ इति तस्य वचः श्रुत्वा विप्रेणोक्तं वरानने ॥ गच्छ भूपाल नेपालं महाकालं ततो व्रज ॥ ३५ ॥

१ जीवितसंशये–इ० पा० । २ विनयान्वितम्–इ० पा० । ३ निजवनोत्तमे–इ० पा० । ४ दुराधर्षः–इ०पा० । ५ ब्रह्मर्षिसत्तमः–इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मिन्क्षेत्रे तीर्थवरे लिंगं सर्वार्थसाधकम् ॥ विद्यते यत्र सूर्येण तपस्तप्तं सुदुष्करम् ॥ ३६ ॥ शिप्रायास्तु तटे रम्ये पुण्ये ब्रह्मेशपश्चिमे ॥ तस्य दर्शनमात्रेण तवाभीष्टं भविष्यति ॥ ३७ ॥ कल्पस्य वचनं श्रुत्वा सत्वरो नृपसत्तमः ॥ नेपालं च ततो गत्वा समाश्वास्य सुहृज्जनम् ॥ ३८ ॥ सांतःपुरपरीवारो महाकालवनं गतः ॥ सर्वदा सर्वसिद्धीनामाश्रयं विषयं श्रियः ॥ ३९ ॥ तत्र स्नात्वा जले पुण्ये शिप्रायाश्चाशुसिद्धिदे ॥ सूर्येणाराधितं लिंगं ददर्श नृपसत्तमः ॥ ४० ॥ पूजयामास रत्नैश्च दिव्यैर्वस्त्रैः सुभूषणैः ॥ कर्पूरेण सुगन्धेन लिंगपूजा कृता तदा ॥ ४१ ॥ मुक्ताफलैः सुतारैश्च जलधाराभिरेव च ॥ भक्त्या ननर्त्त तस्याग्रे संस्तुवन्विविधैः स्तवैः ॥ ४२ ॥ शुश्राव श्रोत्रपीयूषं गीतं देवगृहे शुभे ॥ तच्छ्रुत्वा कौतुकाविष्टो ध्वनिं श्रुत्वा मनोरमाम् ॥ प्रियामपश्यत्तत्रस्थां लावण्यललनावधिम् ॥ ४३ ॥ तां दृष्ट्वा विस्मयोत्फुल्ललोचनस्तन्मयोऽभवत् ॥ क्षिप्रं तद्दर्शनेनैव स्मरेण तरलीकृतः ॥ ४४ ॥ ज्ञात्वा मे सैव पत्नीयं दृष्टा देवप्रसादतः ॥ सापि लावण्यनलिनी राजहंसं विलोक्य तम् ॥ ४५ ॥ क्षिप्रं पुलिकिता तस्या विरराज कुचस्थली ॥ एतस्मिन्नंतरे देवि वाणी लिंगात्समुत्थिता ॥ ४६ ॥ विश्वावसोः सिद्धपतेः सुतैषा प्राणवल्लभा ॥ कल्पेन पालिता सम्यक्त्वदर्थं नृपसत्तम ॥ ४७ ॥ आनीता ते मया पत्नी हत्वा तं राक्षसाधिपम् ॥ गृहाण च मया दत्तां भुंक्ष्व राज्यमकण्टकम् ॥ ४८ ॥ इत्युक्तोऽसौ गतो देवि लब्ध्वा भार्यां प्रियां तदा ॥ सांतःपुरपरीवारो लिंगस्यास्य प्रभावतः ॥ ४९ ॥ आराधितो नरेंद्रेण दुर्द्धर्षेण महात्मना ॥ तदाप्रभृति देवोऽयं दुर्द्धर्षेश्वरसंज्ञकः ॥ त्रिषु लोकेषु विख्यातो वांछितार्थफलप्रदः ॥ ५० ॥ ये पश्यंति विशालाक्षि दुर्द्धर्षेश्वरसंज्ञकम् ॥ ते दुर्द्धर्षा भविष्यंति शत्रूणां समरे सदा ॥ ५१ ॥ संक्रांतौ रविवारे च ग्रहणे चंद्रसूर्ययोः ॥ गत्वार्चयंति ये देवि देवं दुर्द्धर्षमीश्वरम् ॥ ते प्रयांति विमानेन मदीयं स्थानमुत्तमम् ॥ ५२ ॥ पापाचारांश्च ये जीवा दुष्कर्मनिरता नराः ॥ मुच्यंते पातकात्सद्यो दुर्द्धर्षेश्वरदर्शनात् ॥ ५३ ॥ दर्शनात्स्पर्शनात्सद्यो नामसंकीर्त्तनादपि ॥ ब्रह्महत्यासहस्रं हि तत्क्षणादेव नश्यति ॥ ॥ ५४ ॥ कृतघ्नो निंदको दुष्टः पापकर्मा दुरात्मवान् ॥ परदाररतश्चौरो ब्रह्मघ्नो गुरुतल्पगः ॥ मुच्यते सर्वपापेभ्यो दुर्द्धर्षेश्वरदर्शनात् ॥ ५५ ॥ अयने विषुवे चैव संप्राप्ते सोमपर्वणि ॥ ये पश्यंति च दुर्द्धर्षं स्नात्वा शिप्राजले शुभे ॥ गंगायास्त्रिगुणं पुण्यं जायते नात्र संशयः ॥ ५६ ॥ तत्र यद्दीयते दानं तस्य संख्या न विद्यते ॥ पितरस्तोषितास्तेन आत्मा वै तोषितस्ततः ॥ ५७ ॥ कल्पकोटिसहस्रं तु मत्पुरे पूजितो वसेत् ॥

१ प्रसादतः—इ०पा० । २ पापाचारा नरा ये च चण्डकर्मरता नराः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





यदा याति च भूलोके तदासौ भूपतिर्भवेत् ॥ ५८ ॥ अधृष्यः शत्रुवर्गेण फलं प्राप्नोति चाक्षयम् ॥ पदं यत्त्रिदशैर्वंद्यं पुनरावृत्तिवर्जितम् ॥
॥ ५९ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ दुर्द्धर्षेश्वरदेवस्य प्रयागेशमतः शृणु ॥ ६० ॥ इति श्रीस्कांदे महापुराण एकाशीति
साहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिंगमाहात्म्य उमामहेश्वरसंवादे दुर्द्धर्षेश्वरमाहात्म्यवर्णनंनाम सप्ततितमोऽध्यायः ॥ ७० ॥
॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ एकसप्ततिकं विद्धि प्रयागेश्वरसंज्ञकम् ॥ अद्वितीयं विजानीहि महापातकनाशनम् ॥ १ ॥ हास्तिनेऽ
भूत्पुरे श्रीमाञ्छंतनुर्नृपसत्तमः ॥ वैवस्वतेंऽतरे कल्पे युगे द्वापरसंज्ञके ॥ २ ॥ स चाद्भुतमहावीर्यो वज्रसंहननो युवा ॥ सर्वशास्त्रेषु कुशलः कला
पुंजविचक्षणः ॥ ३ ॥ बलेन विष्णुसदृशस्तेजसा भास्करोपमः ॥ गंगामेष चचारैकः सिद्धचारणसेविताम् ॥ ४ ॥ स कदाचिन्महाबाहुः प्रभूत
बलवाहनः ॥ वनं जगाम गहनं हयनागशतैर्वृतः ॥ ५ ॥ गत्वा तत्र मृगान्व्याघ्रान्घातयामास लीलया ॥ महिषाश्ववराहांश्च विनिघ्नन्राजसत्तमः ॥
॥ ६ ॥ स कदाचिद्वने तस्मिन्ददर्श परमां स्त्रियम् ॥ जाज्वल्यमानां वपुषा साक्षात्पद्मामिवापराम् ॥ ७ ॥ तां दृष्ट्वा हृष्टरोमाभूद्विस्मितो
रूपसंपदा ॥ पिबन्निव च नेत्राभ्यां नातृप्यत नराधिपः ॥ ८ ॥ सा दृष्ट्वैव च राजानं विचरंतं महाद्युतिम् ॥ स्नेहादागतसौहार्दान्नातृप्यत
विलासिनी ॥ ९॥ तामुवाच ततो राजा सांत्वयञ्श्लक्ष्णया गिरा ॥ देवी वा दानवी त्वं च गंधर्वी यदि वाप्सराः ॥ १० ॥ यक्षी वा पन्नगी वा
त्वं मानुषी वा सुमध्यमे ॥ याचे त्वांऽभोजगर्भाभे भार्या मे भव शोभने ॥ ११ ॥ एतच्छ्रुत्वा वचो राज्ञः संस्तुतं मृदु वल्गु च ॥ अंगीकृतं तया
देवि समयं प्रार्थितो नृपः ॥ १२ ॥ वारिता विप्रिये वापि त्यजेयं त्वामसंशयम् ॥ न प्रष्टव्या त्वया राजन्कासि कस्येति सर्वथा[३] ॥ १३ ॥ एवम
स्त्विति तेनोक्तं सत्येन सुकृतेन च ॥ स तस्याः शीलवृत्तेन रूपौदार्यगुणेन च ॥ १४ ॥ उपचारेण च रहस्तुतोष जगतीपतिः ॥ दिव्यरूपा हि
सा देवी गंगा त्रिपथगा नदी ॥ १५ ॥ मानुषं विग्रहं कृत्वा श्रीमंतं वरवर्णिनि ॥ राजानं रमयामास यथा रेमे तथैव च ॥ १६ ॥ स राजा रति
सक्तत्वादुत्तमस्त्रीगुणैर्हृतः ॥ संवत्सरानृतून्मासान्न बुबोध बहून्गतान् ॥ १७ ॥ रममाणस्तया सार्द्धं यथाकामं नरेश्वरः ॥ अष्टावजनयत्पुत्रां
स्तस्याममरवर्णिनः ॥ १८ ॥ जातं जातं च सा पुत्रं क्षिपत्यंभसि मुक्तये ॥ प्रीणामि त्वामहमिति गंगास्रोतसि पावने ॥ १९ ॥ नास्य
तत्तु प्रियं राज्ञः शंतनोर्ह्यभवत्तदा ॥ नोवाच किंचित्तां देवीं त्यागाद्भीतो महीपतिः ॥ २० ॥ अथैनामष्टमे पुत्रे जाते प्रहसतीमिव ॥

१ अत्र उज्जयनीस्थपुस्तके–'गन्धर्वतीर्थपर' इति लिखितमस्ति, तदस्य दुर्द्धर्षेश्वरलिंगस्य स्थानं बोध्यम्। २ महादेवि–इ०पा०। ३ सर्वदा–इ० पा०। ४ शीललोभेन–इ० पा०।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उवाच राजा दुःखार्त्तः परीप्सन्पुत्रमात्मनः ॥ २१ ॥ मा वधीः कस्य कासीति किं विध्वंसि सुतानिति ॥ पुत्रहिंसा महत्पापं मा प्राप्सीस्तिष्ठ गर्हिते ॥ २२ ॥ ॥ गंगोवाच ॥ ॥ पुत्रकामा न ते हन्मि पुत्रं पुत्रवतांवर ॥ जीर्णस्तु मम वासोऽयं यथा मे[1] समयः कृतः ॥ २३ ॥ अहं गंगा जह्नुसुता महर्षिगणसेविता ॥ देवकार्यार्थसिद्ध्यर्थमुषित्वाहं त्वया सह ॥ २४ ॥ इमेऽष्टौ वसवो देवा महाभीमा महौजसः ॥ वशिष्ठशापदोषेण मानुषत्वमुपागताः ॥ २५ ॥ तेषामानयिता नान्यस्त्वदृते भुवि विद्यते ॥ मद्विधा मानुषी धात्री न चैवास्ति कदाचन ॥ २६ ॥ तस्मात्तज्जननीहेतोर्मानुषत्वमुपागता ॥ स्वस्ति तेऽस्तु गमिष्यामि पुत्रं पाहि महाव्रत ॥ २७ ॥ सैवमुक्त्वा तदा गङ्गा विष्णुमायाविमोहिता ॥ रुरोद मानुषं भावमाश्रिता तनुमध्यमा ॥ २८ ॥ अहो बत महत्कष्टं यदमी घातिताः सुताः ॥ मया नृशंसया मोहाज्जले क्षिप्तास्तु बालकाः ॥ २९ ॥ हा वत्सा हा सुताः पुत्रा हा तातास्तनयाः क्व वै ॥ मां विहाय गताः कुत्र हृदयं किं न दीर्यते ॥ ३० ॥ मातर्मातेति करुणं[2] ब्रुवाणाः स्वयमागताः ॥ उपगुह्ये कदा पुत्रान्वत्सवत्सेति सौहृदात् ॥ ३१ ॥ कस्य जातु प्रणीतेन पिंगेन, क्षितिरेणुना ॥ ममोत्तरीयमुत्संगं कदाङ्क मलयिष्यति ॥ ३२ ॥ अंगप्रत्यंगसंभूता मनोहृदयनंदनाः ॥ मया तु मात्रा हा वत्सा मारिता निधनं गताः ॥ ३३ ॥ काँल्लोकान्नु गमिष्यामि कृत्वा कर्म सुदारुणम् ॥ कथं पुण्या भविष्यामि पुत्रघ्नी निर्दया सती ॥ ॥ ३४ ॥ इत्येवं करुणं कृत्वा रुदित्वा च पुनःपुनः ॥ मूर्छिता पतिताप्यार्ता निश्चेष्टा धरणीतले ॥ ३५ ॥ एतस्मिन्नंतरे देवि नारदो मुनिसत्तमः ॥ तस्या विलापशब्दं तमाकर्ण्य सहसा तदा ॥ ३६ ॥ विस्मयोत्फुल्लनयनः किमेतदिति चिंतयत्[3] ॥ एषा सा जाह्नवी गंगा पावनी देववंदिता ॥ ३७ ॥ समुद्रमहिषी दिव्या पुण्या त्रिपथगा नदी ॥ मानुषं भावमाश्रित्य कस्माद्रोदिति विह्वला ॥ ३८ ॥ इत्येवं चिंतयित्वा च समीपमगमन्मुनिः ॥ गंगाया विलपन्त्याश्च ब्रह्मपुत्रस्तु नारदः ॥ उवाचोच्चैर्वियत्स्थोऽसौ देवि गंगे नमोऽस्तु ते ॥ ३९ ॥ नारदोऽहं महापुण्ये कस्माद्रोदिषि पावनि ॥ हिमाद्रिपुत्री विख्याता देवगंधर्वसेविता ॥ ४० ॥ धृता शिरसि देवेन शिवेन परमेष्ठिना ॥ ४१ ॥ नारदस्य वचः श्रुत्वा दिव्या देवनदी तथा ॥ अवलोक्य विमानस्थं प्रत्युवाच महामुनिम् ॥ ४२ ॥ मया नारद मोहेन कृतोऽधर्मो जुगुप्सितः[4] ॥ जानंत्या सुमहत्पापं सप्तपुत्रा हता मया ॥ ॥ ४३ ॥ समुद्रेण वियोगस्तु[5] संजातो मम दैवतः ॥ भार्या जाता मनुष्यस्य पुत्रा जाता हताश्च मे[6] ॥ ४४ ॥ अतो मया विलपितं मग्नया शोक

१ सः—इ० पा० । २ मधुरम्—इ० पा० । ३ चिंतयत्—अडभाव आर्षः—अचिंतयत् । ४ कृतं कर्म जुगुप्सितम्—इ० पा० । ५ शुभाः—इ० पा० । ६ मे मया—इति तृतीयार्थे षष्ठी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सागरे ॥ कथ्यतां मम देवर्षे येन पुण्या भवामि वै ॥ ४५ ॥ इति तस्या वचः श्रुत्वा नारदो मुनिसत्तमः ॥ त्रिकालवेदी शुद्धात्मा गंगां वचनमब्रवीत् ॥ ४६ ॥ ॥ नारद उवाच ॥ ॥ किं विस्मृतो जगद्वंद्ये देवानां समयः शुभः ॥ प्रतिज्ञातं त्वया देवि वसूनां मोक्षकारणे ॥ ४७ ॥ प्राप्तास्ते वसवो लोकान्प्रसादात्तव सुव्रते ॥ त्वयावतारितो देवि समुद्रः शंतनुः स्मृतः ॥ ४८ ॥ इति तस्य वचः श्रुत्वा नारदस्य महात्मनः ॥ गंगा त्रिपथगा पुण्या प्रत्युवाच महामुनिम् ॥ ४९ ॥ सत्यमुक्तं त्वया ब्रह्मन्ज्ञातं सर्वं मयाऽधुना ॥ किंतु योनिर्यतो लब्धा मानुषी तेन मोहिता ॥ ५० ॥ अपवादभयाद्भीता भवंतं शरणं गता ॥ दीयतामुपदेशो मे कथ्यतां स्थानमुत्तमम् ॥ ५१ ॥ ॥ नारद उवाच ॥ ॥ किं विस्मृतो जगद्वंद्ये देवानां समयः कृतः ॥ अपवादभयाद्भीता यदि त्वं देवि पुण्यदे ॥ मां पृच्छसि परं स्थानं शृणु त्वं वच्मि सुव्रते ॥ ५२ ॥ अवंती तु समाख्याता सप्तकल्पसनातनी ॥ तस्यां सखी त्वदीया तु शिप्रा विप्रप्रिया सदा ॥ ५३ ॥ तस्यास्तीरे शुभं लिंगं दुर्द्धर्षेश्वरदक्षिणे ॥ विद्यते त्रिदशैः पूज्यं सर्वतीर्थैश्च सेवितम् ॥ ५४ ॥ तस्य दर्शनमात्रेण कृतकृत्या भविष्यसि ॥ तस्माद्गच्छ महापुण्ये गंगे देवर्षि¹सेविते ॥ ५५ ॥ इत्युक्ता सा त्रिपथगा नारदेन महात्मना ॥ गता तत्र महापुण्या सखीं शिप्रां ददर्श ह ॥ ५६ ॥ संश्लेषं च तदा कृत्वा लिंगं दृष्ट्वा सुपावनम् ॥ पूजयामास भावेन तत्रैव च चिरं स्थिता ॥ ५७ ॥ अथ सूर्यसुता देवी यमुना पापनाशिनी ॥ तत्रायाता सुहार्द्देन यत्र गंगा व्यवस्थिता ॥ ५८ ॥ ददर्श देवी तां गंगां ध्यायंतीं शंकरं शिवम् ॥ सापि तत्रैव तिष्ठंती पूजयंती परं शिवम् ॥ ५९ ॥ अथ तेनैव कालेन प्राचीदेवी सरस्वती ॥ समायाता सुगुप्ता च गंगायमुनयोर्जले ॥ ६० ॥ एतस्मिन्नंतरे देवि शक्रं प्राह स नारदः ॥ न दृश्यते प्रयागस्तु महाकालवनं गतः ॥ ६१ ॥ गंगायमुनयोर्मध्ये यत्र गुप्ता सरस्वती ॥ प्रयागः स तु विज्ञेयः सर्वपापप्रणाशनः ॥ ६२ ॥ स सांप्रतं प्रयागस्तु महाकालवनोत्तमे ॥ केनापि कारणे नैव गतो न ज्ञायते मया ॥ ६३ ॥ इति तस्य वचः श्रुत्वा नारदस्य महात्मनः ॥ शक्रेण सहिताः सर्वे ह्यवंतीं तु समागताः ॥ ६४ ॥ स्तुवंतो विविधैः स्तोत्रैर्गंगां त्रिपथगां शुभाम् ॥ गंगे देवि नमस्तुभ्यं सर्वपापप्रणाशिनि ॥ ६५ ॥ वसूनां जननी देवि वसूनां मोक्षदायिनि ॥ त्रैलोक्यपावनी नित्यं² हरेण शिरसा धृता ॥ ६६ ॥ सेविता वालखिल्यैश्च कृष्णस्य परमा कला ॥ यमुने त्वां नमस्यामः कालिंदीं³ वरवाहिनीम् ॥ ६७ ॥ सुता त्वं पाविनी देवि मार्त्तंडस्य दिवस्पतेः ॥ शिप्रे देवि नमस्तुभ्यं ब्रह्मदेहोद्भवे शुभे ॥ ६८ ॥ प्राची त्वमेव विख्याता पुण्यदेहा



१ देवर्षिवन्दिते–इ० पा० । २ सदा–इ० पा० । ३ कलिन्दान्तरवाहिनीम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सरस्वती ॥ या प्राची कौरवक्षेत्रे पुष्करे या महालये ॥ सा त्वं शिप्रा प्रसिद्धा च सर्वपातकनाशिनी ॥ ६९ ॥ त्वं दया सर्वजंतूनां त्वं स्वर्गः शरणं नृणाम् ॥ त्वं माता सर्वजंतूनां त्वं प्राची भुवि गीयसे ॥ ७० ॥ बहुजन्मकलंकांकं दृष्ट्वा या देहिनां भुवि ॥ करोषि क्षालनं देवि सा त्वं त्रैलोक्यसंस्थिता ॥ ७१ ॥ आसां च संगमो यस्तु स प्रयागो बुधैः स्मृतः ॥ अत्रागत्य तु युष्माभिः स्थापितः स्नापितोऽधुना ॥ ७२ ॥ सोद्य प्रभृति देवोऽयं प्रयागेश्वरसंज्ञकः ॥ त्रिषु लोकेषु विख्यातः स्मरणात्पापनाशनः ॥ ७३ ॥ अत्रागत्य प्रपश्यंति ये प्रयागेश्वरं ततः ॥ ते कृतार्था भविष्यंति सर्वपातकवर्जिताः ॥ ७४ ॥ कुलं च तारितं तेषां पैतृकं मातृकं तथा ॥ गंगायास्त्रियुगं पुण्यं चतुर्वर्गफलप्रदम् ॥ जायते नात्र संदेहः प्रयागेश्वरदर्शनात् ॥ ७५ ॥ गंगायां च प्रयागे च देवदारुवने शुभे ॥ नैमिषे पुष्करे चैव श्रीशैले च त्रिपुष्करे ॥ ७६ ॥ त्र्यंबके धौतपापे च महेन्द्रे भैरवे तथा ॥ गोकर्णे च सुवर्णाख्ये रेवाकपिलसङ्गमे ॥७७॥ एतेषां दर्शनेनैव या सिद्धिर्द्वादशाब्दिका ॥ सा लभ्या मासमात्रेण प्रयागेश्वरदर्शनात् ॥ ७८ ॥ ये पश्यंति चतुर्दश्यामष्टम्यां च विशेषतः ॥ भक्त्या च नियमं कृत्वा प्रयागेश्वरसंज्ञकम् ॥ ७९ ॥ न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥ भोगदं मोक्षदं लिंगं भविष्यति महीतले ॥ ८० ॥ कलास्तिस्रो भविष्यंति लिंगेऽस्मिन्मोक्षदे शुभे ॥ गंगा च यमुना प्राची[१] सर्वपातकनाशिनी ॥ ८१ ॥ एवमुक्त्वा स्तुता गंगा यमुना च सरस्वती ॥ देवैः प्रणतिपूर्वेण गताः स्थानं स्वकं तदा ॥ ८२ ॥ देवाः प्रहृष्टाः शक्राद्याः प्रयागेश्वरसंज्ञकम् ॥ स्तुत्वा च विविधैः स्तोत्रैः पूजयित्वा दिवं गताः ॥ ८३ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ प्रयागेश्वरदेवस्य चंद्रादित्येश्वरं शृणु ॥ ८४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखंडे चतुरशीतिलिंगमाहात्म्ये उमामहेश्वरसंवादे प्रयागेश्वरमाहात्म्यवर्णनंनामैकसप्ततितमोऽध्यायः ॥ ७१ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ द्विसप्ततीश्वरं विद्धि चन्द्रादित्येश्वरं प्रिये ॥ यस्य दर्शनमात्रेण कृतकृत्यो नरो भवेत् ॥ १ ॥ शंबरेण पुरा देवि निर्जिताः संगरे सुराः ॥ नष्टा रणं परित्यज्य प्राणत्राणपरायणाः ॥ २ ॥ ग्रस्तं च राहुणा दृष्ट्वा शशांकं भयविह्वलम् ॥ विनतायाः सुतो ज्येष्ठः प्रोक्तः सूर्येण सारथिः ॥ ३ ॥ वहारुण रथं शीघ्रं यत्र युद्धं न विद्यते ॥ श्रूयते चन्द्रसूर्यौ तौ दैत्यानां बलवत्तरौ ॥ ४ ॥ राहुर्दंष्ट्राकरालस्तु स तृतीयो भयंकरः ॥ न ज्ञायते रणे चन्द्रो मृतो नष्टोऽथवा पुनः ॥ ५ ॥ स च न ज्ञायते शक्रः क्व गतो वरुणो रणे ॥ यमो न ज्ञायते कुत्र धनदस्य च का कथा ॥ ६ ॥ एवमुक्तोऽरुणो रुग्णो रविणा रणमध्यतः ॥

१ गंगा च यमुना चैव गुप्ता चैव सरस्वती–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

रथं तं प्रेरयामास यत्र युद्धं न विद्यते ॥ ७ ॥ एतस्मिन्नंतरे चन्द्रः समायातस्तु तत्क्षणात् ॥ राहुग्रहगृहीतोऽपि यत्र देवो दिवस्पतिः ॥ ८ ॥ संत्रस्तः स विलोलाक्षः क्षणमात्रमचेतनः ॥ बभूव सहसा चन्द्रो दृष्ट्वा देवं दिवाकरम् ॥ ९ ॥ शंबरेण रणे रुद्धा रुद्राश्च भयविद्रुताः ॥ जग्मुर्दिशो दश भयादसुरेन्द्रविभीषिताः ॥ १० ॥ साध्याः सर्वे भयत्रस्ता गता यत्र न दानवाः ॥ तेषु भग्नेषु देवेषु हतशिष्टेषु संगरे ॥ ११ ॥ व्यधमत्सर्वगात्राणि वर्माणि च जनक्षये ॥ पलायमानदेवानामसुरो बलवच्छरैः ॥ १२ ॥ पृष्ठतो निजघानाथ निकृत्ताश्च सहस्रशः ॥ अहं नष्टश्छलेनैव व्यग्रीभूतेऽसुरे तदा ॥ १३ ॥ आसुरं रूपमास्थाय प्राणत्राणपरायणः ॥ शीघ्रं च गम्यते तावद्यावन्नायाति शंबरः ॥ १४ ॥ इत्युक्तं निशिनाथेन भयभीतेन पार्वति ॥ चन्द्रादित्यौ क्षणान्नीतावरुणेन रथेन वै ॥ १५ ॥ यत्र देवो जगन्नाथो गरुडस्थो जनार्दनः ॥ सुरसंघातसंकेतकिंनराकीर्णकंदरे ॥ ॥ १६ ॥ मंदरे सुरनारीणां नंदने वरचन्दने ॥ दृष्ट्वा तत्र जगन्नाथं शंखचक्रगदाधरम् ॥ स्तुतिं तौ चक्रतुर्देवौ चन्द्रसूर्यौ यशस्विनि ॥ १७ ॥ नमो लोकत्रयाध्यक्ष स्वप्रभाजितभास्कर ॥ नमो विष्णो नमो जिष्णो नमस्ते कैटभांतक ॥ १८ ॥ नमः सर्वक्रियाकर्त्रे जगत्रात्रे च ते नमः ॥ नमश्चक्रायुधाधृष्य नमो दानवघातिने ॥ १९ ॥ नमः क्रमत्रयाक्रांतत्रैलोक्यांतर्हितोद्भव ॥ नमः प्रचंडदैत्येंद्रकुलकाल महाबल ॥ ॥ २० ॥ नमो नाभिह्रदोद्भूतपद्मगर्भमहाप्रभो ॥ जनिताशेषलोकेशविरंचाय महाद्युते ॥ २१ ॥ अमरारिविनाशाय महासमरशालिने ॥ नमस्ते विबुधाधीश शरणं भव नः प्रभो ॥ २२ ॥ चन्द्रसूर्यकृतं स्तोत्रं श्रुत्वा देवो जनार्दनः ॥ आश्वास्य स्तुतिपूर्वेण प्राह देवो ह्यधोक्षजः ॥ २३ ॥ ॥ ॥ विष्णुरुवाच ॥ ॥ स्वागतं चन्द्रसूर्यौ भो भवंतौ स्तुतिभाजनौ ॥ किं कारणमिह प्राप्तौ तद्ब्रूतां विगतज्वरौ ॥ २४ ॥ नारायणेनैवमुक्तौ प्रोचतुश्चंद्रभास्करौ ॥ समरे निर्जिता देवाः शंबरेण दुरात्मना ॥ २५ ॥ न ज्ञाताः क्व गतास्ते च आवां नष्टौ प्रयत्नतः ॥ अरुणेन इहानीतौ दृष्टस्त्वं देव दैवतः ॥ २६ ॥ शंबरेण जिता देवाः स च सर्वत्र दृश्यते ॥ स्थले चैव जले चैव शंबरः क्रूरपौरुषः ॥ २७ ॥ नश्यतां त्रिदशेंद्राणां पृष्ठतः शरवृष्टिभिः ॥ चिच्छेद नर१वर्माणि च्छत्राणि च धनूंषि च ॥ २८ ॥ वर्माणि च विचित्राणि मुकुटानि महांति च ॥ पृथूनि चापि चापानि चर्माणि विविधानि च ॥ २९ ॥ गजाश्च मदसंभिन्नकपोलाः कोटिशः सुराः ॥ वाजिनश्चामरापीडा रत्नपर्याणभूषणाः ॥ ३० ॥ विबुधा ध्वस्तसन्नाहा विगजा विपदातिनः ॥ विपदामाकराकारा बभूव सुरवाहिनी ॥ ३१ ॥ ततो दैत्याधिपो मानी परिवृत्तो महारणात् ॥



१देहमर्माणि–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निर्जितारिर्महातेजा ज्वालावानिव पावकः ॥ ३२ ॥ वंद्यमानो मुनिगणैः स्तूयमानो महर्षिभिः ॥ आनंदितो जयाशीर्भिः प्रवरैर्दैत्यपुंगवैः ॥ ३३ ॥ तत्र सर्वर्द्धिसंपूर्णमासनं हेमभूषणम् ॥ अध्यतिष्ठत दैत्येंद्रस्तत्र मंगलवेश्मनि ॥ तत्रोपविष्टः शुशुभे दैत्यराजो महायशाः ॥ ३४ ॥ दिव्यचंदनपुष्टांगः सुरपुष्पसमुज्वलः ॥ मुकुटाकारजुष्टांगः सितचामरवीजितः ॥ मृतोत्थितैस्तथा दैत्यैर्दैत्याधीशैरधिष्ठितः ॥ ३५ ॥ क्रतुभिर्मूर्त्तिमद्भिश्च सेव्यमानो महाबलः ॥ सर्वपुष्पोत्करयुतैर्नानाविहगनादिभिः ॥ ३६ ॥ तत्र श्रीरतुला लोके तत्र लक्ष्मीर्निरर्गला ॥ तत्र कांतिर्द्युतिः शोभा शंबरो यत्र दानवः ॥ ३७ ॥ एवं स दैत्यनृपतिः सभृत्यस्तत्र मोदते ॥ स्वयमिंद्रस्तु संजातश्चंद्रसूर्यौ कृतौ स्वकौ ॥ ३८ ॥ तयोरिति वचः श्रुत्वा स देवः पुरुषोत्तमः ॥ चिरं ध्यात्वा स्वमनसि तदावोचदिदं प्रिये ॥ ३९ ॥ चंद्रसूर्यौ मया ज्ञातं शंबरस्य विचेष्टितम् ॥ ब्रह्मणो वरदानेन भोक्तव्यं तपसः फलम् ॥ ४० ॥ शंबराय पुरा क्षिप्तं वज्रं कुलिशपाणिना ॥ हृदये निहतः सोऽपि तथापि न मृतोऽसुरः ॥ ४१ ॥ गम्यतां च मयाज्ञप्तौ महाकालवनोत्तमे ॥ चन्द्रसूर्यौ ममादेशात्तत्र सिद्धिं च लप्स्यथ ॥ ४२ ॥ तत्रानंतो महाकालो लिंगरूपो महेश्वरः ॥ तस्य चोत्तरतो देशे लिंगं कामप्रदं शिवम् ॥ ४३ ॥ तस्य दर्शनमात्रेण कृतकृत्यौ भविष्यथः ॥ तस्य ज्वालासमूहेन मरणं शंबरस्य च ॥ भविष्यति न संदेहस्तस्मात्तत्रैव गम्यताम् ॥ ४४ ॥ इत्युक्तौ वासुदेवेन चंद्रसूर्यौ यशस्विनि ॥ सत्वरं हृष्टरोमाणौ महाकालवनं गतौ ॥ ४५ ॥ तत्र दृष्ट्वा महादेवं तेजसो राशिमव्ययम् ॥ स्तुतं च विविधैः स्तोत्रैः पूजितं कुसुमैः शुभैः ॥ ४६ ॥ एतस्मिन्नंतरे वाणी लिंगमध्यात्समुत्थिता ॥ आश्वासयंती तरसा चन्द्रसूर्यौ हिमात्मजे ॥ ४७ ॥ हतः स शंबरो दैत्यो गतौ तौ चन्द्रभास्करौ ॥ दैत्यानां निर्मितौ दुष्टौ पातालांतरसंस्थितौ ॥ ४८ ॥ राहुकेतू ग्रहांते तु कृतौ समयपूर्वकौ ॥ स्थापितः स्वपदे शक्रो देवैः सह न संशयः ॥ ४९ ॥ स्वं स्वं स्थानं गताः सर्वे लोकपाला मुदा युताः ॥ कांतिप्रतापसंयुक्तौ भवन्तौ भुवनत्रये ॥ ५० ॥ गगने ग्रहनक्षत्रैः सहितौ विचरिष्यथः ॥ पूर्ववत्पुण्यपापानां साक्षिभूतौ भविष्यथः ॥ ५१ ॥ इत्युक्तौ चन्द्रसूर्यौ तु तया वाण्या वरानने ॥ सन्तुष्टौ कृतकृत्यौ तु संजातौ लिंगदर्शनात् ॥ ५२ ॥ एतस्मिन्नंतरे देवा विमानस्थाः समागताः ॥ यत्र चंद्रश्च सूर्यश्च महाकालवने शुभौ ॥ ५३ ॥ ज्ञात्वा लिंगस्य माहात्म्यं नाम चक्रुः समाहिताः ॥ सेवितं चंद्रसूर्याभ्यां लिंगं तेजोमयं परम् ॥ ५४ ॥ चन्द्रादित्येश्वरंनाम ख्यातिं यास्यति भूतले ॥ लिंगस्यास्य समुत्थेन ज्वालासंघेन शंबरः ॥ दग्धो भृत्यजनैः सार्द्धं चन्द्रसूर्यानुसेवनात् ॥ ५५ ॥ इत्युक्त्वा त्रिदशाः

१ रुद्ररूपः—इ० पा० । २ वसिष्ययः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





सर्वे समीपे सर्वतः स्थिताः ॥ स्तुवन्तो विविधैः स्तोत्रैश्चंद्रादित्येश्वरं शिवम् ॥ ५६ ॥ चन्द्रादित्यौ च तत्रस्थौ स्थितौ लिंगसमीपतः ॥ आराधयन्तौ देवेशं पदं प्राप्तौ च पूर्ववत् ॥ ५७ ॥ ये पश्यंति नरा भक्त्या चन्द्रादित्येश्वरं शिवम् ॥ ते यांति सूर्यलोकं तु चन्द्रलोकं तथैव च ॥५८॥ विमानैः सूर्यसंकाशैस्तथा चंद्रप्रभैः शुभैः ॥ यावच्चन्द्रश्च सूर्यश्च तावत्तेषां सुखं भवेत् ॥ ५९ ॥ चन्द्रसूर्योपरागे तु चंद्रादित्येश्वरं शिवम् ॥ ये पश्यंति नरा भक्त्या स्नात्वा शिप्रां च पावनीम् ॥ ६० ॥ तेषां कुलशतं यावत्पैतृकं मातृकं तथा ॥ लोके चंद्रस्य सूर्यस्य मोदते शाश्वतीः समाः ॥ ६१ ॥ अमासोमसमायोगे ये पश्यन्ति प्रसंगतः ॥ चन्द्रादित्येश्वरं देवं न ते यांति यमालयम् ॥ ६२ ॥ एष ते कथितो देवि प्रभावःपापनाशनः ॥ चन्द्रादित्येश्वरेशस्य श्रूयतां करभेश्वरम् ॥ ६३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्य उमामहेश्वरसंवादे चंद्रादित्येश्वरमाहात्म्यवर्णनंनाम द्विसप्ततितमोऽध्यायः ॥ ७२ ॥ ॥ छ ॥ ॥ श्रीहर उवाच ॥ ॥ त्रिसप्ततीश्वरं विद्धि करभेशं वरानने ॥ यस्य दर्शनमात्रेण कुयोनिर्नैव लभ्यते ॥ १ ॥ वीरकेतुरभूद्धीमानयोध्याया महीपतिः ॥ विद्याविनयसौभाग्यलावण्यामृतपूरितः ॥ २ ॥ स सम्यक्पालयामास प्रजाः पुत्रानिवौरसान् ॥ अतीतानागतज्ञानपरिनिष्ठितमानसः ॥ ३ ॥ अथैकस्मिन्दिने राजा जगाम गहनं वनम् ॥ मृगसिंहगजाकीर्णं व्याघ्रसंबरसंकुलम् ॥ ४ ॥ स तत्र विविधान्वन्यान्विव्याध परवीरहा ॥ मृगांश्च महिषांश्चैव वराहांश्च सहस्रशः ॥ ५ ॥ लोडितं तद्वनं सर्वं पशुपक्षिमृगाकुलम् ॥ रहितं श्वापदैः सर्वैः कृतं तेन महीभृता ॥ ६ ॥ यदा न श्वापदास्तस्मिन्दृश्यंते गहने वने ॥ तदा विद्धस्तु करभो बाणेनानतपर्वणा ॥ ७ ॥ स चापि करभो देवि बाणमादाय सत्वरम् ॥ विद्धोऽपि निःसृतोऽत्यर्थं राज्ञस्तस्यैव पश्यतः ॥ स च राजा बली तूर्णं ससार करभं प्रति ॥ ८ ॥ ततो निम्नस्थलं चैव स चोष्ट्रोऽद्रवदाशुगः ॥ मुहूर्त्तेन ततो देवि योजनानि बहून्यपि ॥ ९ ॥ ततः स राजा तारुण्याद्दौरसेन बलेन च ॥ ससार बाणासनधृक्ससखड्गः सहयो नृपः ॥ १० ॥ ततो नदान्नदीश्चैव पल्वलानि वनानि च ॥ अतिक्रम्यानतिक्रम्य ससारैव वनेचरम् ॥ ११ ॥ स चापि करभो देवि आसाद्यासाद्य तं नृपम् ॥ पुनरप्येति जवनो जवेन महता ततः ॥ १२ ॥ स तस्य बाणैर्बहुभिः करभो विह्वलीकृतः ॥ पृष्ठतः पार्श्वतश्चैव पुनरभ्येति चांतिकम् ॥ पुनश्च जवमास्थाय पार्श्वे चाग्रे च दृश्यते ॥ १३ ॥ अथारण्यं महारौद्रं प्रविष्टः करभ

१ हत्वा च पातकम्—इ०पा० । २ त्रियोनिर्नैव जायते—इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तदा ॥ अन्तर्धानं जगामाशु स च राजा वनेऽविशत् ॥ १४ ॥ प्रविश्य च महारण्यं तापसानामथाश्रमम् ॥ आससाद ततो राजा श्रांताश्वोपा विशत्पुनः ॥ १५ ॥ तं कार्मुककरं दृष्ट्वा श्रमार्त्तं क्षुधितं तदा ॥ समभ्येत्यर्षयस्तस्मै पूजां चक्रुर्यथाविधि ॥ १६ ॥ स पूजामृषिभिर्दत्तां प्रतिगृह्य यथाविधि ॥ अपृच्छत्तापसान्सर्वांस्तपसो वृद्धिमुत्तमाम् ॥ १७ ॥ ते तस्य राज्ञो वचनं प्रतिगृह्य तपोधनाः ॥ ऋषयो राजशार्दूलं पप्रच्छुस्त त्प्रयोजनम् ॥ १८ ॥ केन भद्र सुखार्थेन संप्राप्तोऽसि तपोवनम् ॥ पदातिर्बद्धनिस्त्रिंशो धन्वी बाणी नरेश्वर ॥ १९ ॥ एतदिच्छामहे श्रोतुं कुतः प्राप्तोऽसि मानद ॥ कस्मिन्कुले च जातस्त्वं किं नामा ब्रूहि पार्थिव ॥ २० ॥ ततः स राजा सर्वेभ्यो द्विजेभ्यः पुरुषर्षभः ॥ आचख्यौ तद्यथा न्यायं कुलं गोत्रं च तत्त्वतः ॥ २१ ॥ इक्ष्वाकूणां कुले जातो वीरकेतुर्द्विजर्षभाः ॥ चरामि मृगयूथानि निघ्नन्बाणैः सहस्रशः ॥ २२ ॥ बलेन महता युक्तः सामात्यः सपरिच्छदः ॥ यदा न लब्धो गहने मृगो वा सूकरोऽपि वा ॥ २३ ॥ महिषैश्चित्तलो वापि शशो वा शंबरो वने ॥ तदा मे करभो विद्धो बाणेनानतपर्वणा ॥ २४ ॥ स प्रणष्टः क्षणेनैव सबाणो मम पश्यतः ॥ तं द्रवंतमनुप्राप्तो वनमेतद्यदृच्छया ॥ २५ ॥ भवत्सकाशं नष्टश्रीर्हताशः श्रमकर्शितः ॥ भवतां विदितं सर्वं सर्वज्ञा हि तपोधनाः ॥ भवंतः सुमहाभागास्तस्मात्पृच्छामि संशयम् ॥ २६ ॥ क्व गतः करभो विद्धो मया बाणेन सांप्रतम् ॥ क्व च प्राप्स्यामि सहसा ब्रूत तत्सुसमाहिताः ॥ २७ ॥ ततस्तेषां समस्तानामृषीणामृषिसत्तमः ॥ ऋषभो देवि करभं स्मरन्निदमथाब्रवीत् ॥ २८ ॥ गतः स करभो भूप महाकालवने शुभे ॥ गच्छ त्वं च महाराज महाकालवने शुभे ॥ २९ ॥ यत्र देवो महा देवः कारभं रूपमास्थितः ॥ विनोदार्थं च देवानां लिंगमूर्त्तिरभूत्पुरा ॥३०॥ पश्चिमे क्षेत्रपालस्य कैलासस्य महीपते ॥ समीपे तस्य विघ्नेशो मोदक प्रियसंज्ञकः ॥ ३१ ॥ ब्रह्मणा पूजितो राजन्देवानामर्थसिद्धये ॥ स च धर्मध्वजो राजा हैहयानां कुलोद्वहः ॥ ३२ ॥ तुरगेण कदाचित्तु नीतो बदरिकाश्रमम् ॥ प्रसिद्धं त्रिषु लोकेषु नरनारायणाश्रमम् ॥ ३३ ॥ तत्र वीराजिनधरं कृशं विप्रं ददर्श ह ॥ शरीरमपि राजेंद्र न केनापि समं तदा ॥ दृष्ट्वा च हसितो विप्रस्तेन राज्ञा प्रमादतः ॥ ३४ ॥ यस्माद्धससि मां दृष्ट्वा तस्मादुष्ट्रो भविष्यसि ॥ लंबोष्ठो लंबदंतश्च विस्वरो विकृता कृतिः ॥ ३५ ॥ इत्युक्तस्तेन विप्रेण शप्तोपि नृपसत्तमः ॥ तं विप्रं प्रार्थयामास स च तुष्टोऽब्रवीदिदम् ॥ ३६ ॥ न मे वागनृता भूप कदा चिदपि विद्यते ॥ अवश्यं करभो भूत्वा पश्चान्मुक्तिमवाप्स्यसि ॥ ३७ ॥ यदा त्वं करभो जातो विद्धो वै वीरकेतुना ॥ अयोध्याधिपभूपेन

१ श्रांताश्वः-उपाविशत्-इति पदच्छेदः । सन्धिरार्षः । २ मर्कटोऽपि वा-इ० पा० । ३ सूकरः-इ० पा० । ४ यस्य-इ० पा० । ५ अन्यथा-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





गमिष्यसि शराहतः ॥ ३८ ॥ महाकालवनं दिव्यं तत्र त्वं लिंगदर्शनात् ॥ गमिष्यसि परं स्थानं यत्र देवो महेश्वरः ॥ ३९ ॥ स चेक्ष्वाकुकुलो द्भूतो वीरकेतुर्महाबलः ॥ लिंगदर्शनतो भूप चक्रवर्तित्वमाप्स्यति ॥ ४० ॥ इत्युक्तो नृप भूपालः करभत्वं समागतः ॥ स त्वयाभिहतो भूप बाणेनानतपर्वणा ॥ द्रक्ष्यसि त्वं विमानस्थं विमुक्तं लिंगदर्शनात् ॥ ४१ ॥ इत्युक्तो नृपतिस्तेन ऋषभेण द्विजेन तु ॥ आजगाम त्वरायुक्तो महाकालवनं शुभम् ॥ ४२ ॥ ददर्श तत्र तल्लिंगं पूजितं त्रिदशैः सदा ॥ एतस्मिन्नंतरे वाणी श्रुता तेन महीभृता ॥ ॥ ४३ ॥ विमानस्थेन या प्रोक्ता तूंष्ट्रेण[1] मधुरस्वरा ॥ भोभो राजेंद्र मां पश्य विमाने चोद्धृते शुभे ॥ ४४ ॥ दर्शनादस्य लिंगस्य प्राप्ता मे परमा गतिः ॥ त्वया हतोऽहं बाणेन तेनाहं त्वागतो वने ॥ समीपमस्य लिंगस्य त्वं मे बंधुः परो यतः ॥ ४५ ॥ इत्युक्त्वा स नृपं देवि वचः समधुराक्षरम् ॥ गतस्तु परमं स्थानं नित्यमव्ययमक्षयम् ॥ ४६ ॥ ततो देवगणा व्योम्नि सकिंनरमहोरगाः ॥ यक्षरा क्षसगंधर्वाः सपिशाचाप्सरोगणाः ॥४७॥ ब्रह्मेंद्रहरिमुख्याश्च विमानैर्देवि संस्थिताः ॥ आजग्मुर्मुदितास्तत्र द्रष्टुं कौतुकमानसाः ॥ ४८ ॥ विलोक्य करभं मुक्तं विमानस्थं विराजितम् ॥ लिंगदर्शनमात्रेण संस्तुतं विविधैः स्तवैः ॥ ४९ ॥ अच्छरत्नसमूहेन मुकुटेनोज्वलत्त्विषा ॥ आसंतं रविको टीनां जगदानंदकारकम् ॥ ५० ॥ नाम चक्रुस्ततो देवा दृष्ट्वा माहात्म्यमुत्तमम् ॥ दर्शनादस्य लिंगस्य मुक्तोऽयं करभो यतः ॥ ५१ ॥ तस्मा त्रिष्वपि लोकेषु विख्यातः करभेश्वरः ॥ भविष्यति न संदेहः पशुयोनिविमोचकः ॥ ५२ ॥ इत्युक्त्वा त्रिदशाः सर्वे गताः स्वं धिष्ण्यमुत्तमम् ॥ अयोध्याधिपतिर्वीरो वीरकेतुः स्वमालयम् ॥ समृद्धं निःसपत्नं च ततो राज्यं चकार सः ॥ ५३ ॥ यः पश्यति नरो देवि करभेश्वरसंज्ञकम् ॥ स प्रयात्यक्षयाँल्लोकान्पूज्यमानो गणाधिपैः ॥ ५४ ॥ यदा कालादिहायातो राजराजेश्वरो महान् ॥ पृथिव्यामेकराड्भूत्वा क्रमान्मोक्षमवाप्नुयात् ॥ ॥ ५५ ॥ न दुःखं जायते तस्य व्याधिशोकभयं तथा ॥ ये पश्यंति प्रसंगेन तल्लिंगं करभेश्वरम् ॥ ५६ ॥ सर्वमेधेषु यत्पुण्यं सर्वदानेषु यत्फलम् ॥ तत्फलं त्वधिकं देवि करभेश्वरदर्शनात् ॥ ५७ ॥ व्याधयो नोपजायंते दारिद्र्यं न कदाचन ॥ ऐश्वर्यं चातुलं तेषां जायते दर्शनात्सदा ॥ ५८ ॥ पशुयोनिगता ये च पितरो दुःखितास्तु ये ॥ तिष्ठंति चांबरे ते तु चिंतयंतः स्वगोत्रजम् ॥ ५९ ॥ आगमिष्यति नः पुत्रो नप्ता वा संतताविह ॥ कदा पश्यति देवेशं करभेश्वरमीश्वरम् ॥ तेन दर्शनमात्रेण मुक्तिर्नो भविता ध्रुवम् ॥ ६० ॥ यो यमुद्दिश्य वै कामं दर्शनं तु करिष्यति ॥ तस्य तज्जा

१ तुष्ट्रेन-इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यते सर्वं मृतस्य परमा गतिः ॥ ६१ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ करभेशस्य देवस्य शृणु राजस्थलेश्वरम् ॥ ६२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्य उमामहेश्वरसंवादे करभेश्वरमाहात्म्य वर्णनंनाम त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥ ॥ छ ॥ ॥ श्रीहर उवाच ॥ ॥ चतुःसप्ततिकं विद्धि शिवं राजस्थलेश्वरम् ॥ यस्य दर्शन मात्रेण सर्वपापैः प्रमुच्यते ॥ १ ॥ विष्णुकल्पे पुरा वृत्ते मन्वंतरमुखप्रिये ॥ अराजके महीपृष्ठे ब्रह्मा चिंतापरोऽभवत् ॥ २ ॥ न मनुष्यैर्विना देवाः समर्था लोकधारणे ॥ दानेज्याजपतो देवा भजंते पुष्टिमुत्तमाम् ॥ ३ ॥ योग्यो राजा प्रजापालः को भवेज्जनवत्सलः ॥ सोऽपश्यदथ राजर्षि स्तपस्यंतं रिपुंजयम् ॥ ४ ॥ पृथ्व्यां सर्वगुणाकीर्णं धर्मनिष्ठं महाव्रतम् ॥ तमुवाचाथ देवेशो ब्रह्मा लोकपितामहः ॥ ५ ॥ ॥ ब्रह्मोवाच ॥ ॥ रिपुंजय निबोधेदं वचनं मम पुत्रक ॥ राज्यं च पाल्यतां वत्स एककल्पेन चेतसा ॥ ६ ॥ अलं ते तपसा तात कष्टेनानेन सांप्रतम् ॥ धर्मेण विजिताः सर्वे त्वया लोका नरोत्तम ॥ ७ ॥ क्रियतामधुना लोकपालनं तु ममाज्ञया ॥ यतः परोपकारो हि फलं देहस्य देहिनः ॥ ८ ॥ न धर्म स्तादृशोऽन्योऽस्ति न चान्योऽर्थस्य साधकः ॥ निरयात्तिरपि श्रेय उपकृत्य परस्य वै ॥९॥ नापकारेण भूतानामपि स्याद्भुवनेशता ॥ सततं लोक कार्यार्थं मदाज्ञागौरवेण च ॥ पृथ्वीं समुद्रवसनां प्रजाश्चैव प्रपालय ॥ १० ॥ इत्युक्तः स तु राजर्षिर्ब्रह्मणा पर्वतात्मजे ॥ प्रोवाच प्रांजलिर्भूत्वा ब्रह्माणं तु रिपुंजयः ॥ ११ ॥ स्वभावेनाचला पृथ्वी त्वया पूर्वं विनिर्मिता ॥ विनैव पालकं ह्येषा कुत्र यास्यति मेदिनी ॥ १२ ॥ यद्यवश्यं मया पृथ्वी पालनीया पितामह ॥ देहि मे नगरीं रम्यामवन्तीं सप्तकल्पगाम् ॥१३॥ मनुष्यलोके विख्याता सकले सामरावती ॥ स्वर्गच्युतानां देवानां निवासार्थं प्रतिष्ठिता ॥ १४ ॥ मर्यादामनुवर्त्तेयुर्यदि मे नाकवासिनः ॥ अदत्ते च मया स्थाने न वासः कस्यचिद्भवेत् ॥ अनेन विधिना पृथ्वीं पालयिष्याम्यहं प्रभो ॥ १५ ॥ ॥ ब्रह्मोवाच ॥ ॥ भविष्यत्येष ते कामो यस्त्वयोक्तो नरोत्तम ॥ ये केचित्त्रिदशाः संति मद्गौरववशेन ते ॥ तवा देशं करिष्यंति सदा त्वद्वशवर्त्तिनः ॥ १६ ॥ देवनाथेति वै नाम भविष्यति च सुव्रत ॥ इत्युक्त्वांतर्दधे ब्रह्मा हंसयानं समास्थितः ॥१७॥अथ राजा प्रतिज्ञाय ब्रह्मणा भूमिपालनम् ॥ पृथ्व्यामुद्घोषयामास प्रोवाच त्रिदिवौकसाम् ॥१८॥ भवतां विहितः स्वर्गो मनुजानां च भूतलम् ॥ ये चात्र कंद रताः स्थले वा भूधरेषु च ॥ १९ ॥ ये स्थिता यांतु ते देवा मनुजानामियं धरा ॥ तच्छ्रुत्वा घोषितं तस्य राज्ञो भयनिपीडिताः ॥ त्रिदशा ब्रह्मणो

१ कालेवेदपरायणः–इ० पा० । २ सर्वस्य–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वाक्याद्रौरवात्रिदिवं गताः ॥ २० ॥ अथ प्रजाः स नृपतिर्धर्मेणावर्धयत्तदा ॥ पुत्रवत्स्नेहयुक्तेन हृदयेनातिनिर्वृताः॥२१॥प्रजास्तत्सुखसंवृद्धा जरामृत्युविवर्जिताः ॥ पुत्रिणो धनधान्याढ्याः सर्वकामसमन्विताः ॥२२॥ यौवनस्थाश्च निर्द्वंद्वाः सततं धर्मसंश्रयाः ॥ नासीत्पृथिव्यां शैलस्तु स्थलो वा द्वीप एव च ॥ २३ ॥ अकृष्टपच्या पृथिवी स्वादवद्भिः फलैर्युता ॥ देवलोक इवासीद्भूः सर्वकामगुणोज्ज्वला ॥२४॥ एवं व्रजति काले वै राज्ञि राज्यं प्रकुर्वति ॥ महामर्षपरा देवा विप्रकार्यार्थमुद्यताः ॥२५॥ प्रजानां बहुदुःखानि मुहुः कुर्वंत्यनेकशः ॥ अथानावृष्टिमकरोत्सुदीर्घां पाकशासनः ॥२६॥ तथा संह्रियमाणेषु लोकेषु नृपसत्तमः॥मेघो भूत्वा दिवं प्राप्य सुवृष्टिमकरोन्नृपः ॥२७॥ तेनैवाप्यायितो लोकः सुखी जातो यशस्विनि ॥ ततः काले तु कस्मिंश्चिद्वर्षत्पाकशासनः ॥ संवर्त्तो वारिदो भूत्वा मेघान्वै विन्यपातयत् ॥ २८ ॥ ततस्तु मारुतो भूत्वा नृपतिस्तामधारयत् ॥ ततोनलः प्रनष्टोऽभूत्सर्वतः पृथिवीतलात् ॥ २९ ॥ न यज्ञा न जपो होमो न च पक्तिरवर्त्तत ॥ लोकश्च व्याधिसंक्षुब्धस्तदाभूद्विषमे स्थितः ॥ ३० ॥ ततः स राजा तं दृष्ट्वा त्वभवद्धव्यवाहनः ॥ सोऽधारयत्प्रजाः सर्वा यज्ञांश्च त्रिदिवौकसः ॥ ३१ ॥ एतस्मिन्नंतरे देवि त्वया सार्द्धं समागतः ॥ दर्शनार्थं स्वनगरीमहं भूतगणैर्वृतः ॥ ३२ ॥ ततो देवगणाः सर्वे सकिंनरमहोरगाः ॥ सयक्षरक्षोगन्धर्वाः सिद्धविद्याधरोरगाः ॥ ३३ ॥ भूताः प्रेताः पिशाचाश्च ये चान्ये गगनेचराः ॥ चत्वारः सागराश्चैव क्षारक्षीरादिसिंधवः ॥ ३४ ॥ गंगा च यमुना सिंधुश्चंद्रभागा सरस्वती ॥ चर्मण्वती भीमरथी पुण्या गोदावरी नदी ॥ ३५ ॥ विपाशा देविका पुण्या शरयूः कौशिकी तथा ॥ गोमती धूतपापा च बाहुदा च दृषद्वती ॥ ३६ ॥ पारा वेदस्मृतिश्चैव वेत्रघ्नी नर्मदा शिवा ॥ तापी पयोष्णी निर्विन्ध्या सर्वास्तत्र समागताः ॥ ३७ ॥ पुष्करश्च प्रयागश्च प्रभासो नैमिषस्तथा ॥ पृथुतीर्थोदकश्चैव तथैवामरकंटकः ॥ ३८ ॥ गंगाद्वारः कुशावर्त्तो बिल्वको नीलपर्वतः ॥ वाराहपर्वतश्चैव तीर्थं कनखलं तथा ॥ ३९ ॥ भृगुतुंगः सुकुक्षश्चाप्य जगंधश्च पार्वति ॥ कालिंजरः सकेदारो रुद्रकोटिर्महालयः ॥ ४० ॥ स्थानानि च समस्तानि पुण्यान्यायतनानि च ॥ मेरुर्महेंद्रो मलयो मंदरो गंधमादनः ॥ ४१ ॥ मुनयो वालखिल्याश्च वेदाश्चत्वार एव च ॥ एते चान्ये च बहवः समायाता मया सह ॥ ४२ ॥ अनंतरं मया मेरुः स्थलाकारः कृतस्ततः ॥ तस्मिन्स्थले स्थितो देवि उपविष्टः सुरैर्वृतः ॥ नियुक्ताः सागराः पार्श्वे चत्वारो लवणादयः ॥ ४३ ॥ अथ व्याकुलतां प्राप्तः स च राजा रिपुंजयः ॥ स्वस्थलस्थं च मां दृष्ट्वा समायातस्तु मां प्रति ॥ ४४ ॥ तेजसा दह्यमानोऽपि मदीयेन वरानने ॥ भीतो



१ ततः-इ० पा० । २ सयक्षराक्षसाः सर्वे सिद्धसाध्यगणास्तथा ॥ विद्याधराश्च सिद्धाश्च--इति पाठान्तरं पुस्तकद्वये दृश्यते । ३ गिरिका चाचिका-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽपि तोषयामास कोऽसि देव नमोऽस्तु ते ॥ ४५ ॥ स्थलेस्मिन्नृप राजाहं मयाप्युक्तं विनोदतः ॥ चतुर्वर्गश्चतुर्मूर्त्तिश्चतुर्द्धा संस्थितो नृपः ॥ ४६ ॥ तेनाहं सर्वतो दृष्टो वाङ्मये सचराचरे ॥ अनंतरं स्तुतस्तेन भक्त्या परमया प्रिये ॥ ४७ ॥ प्रभावमतुलं दृष्ट्वा मदीयं व्यापकं परम् ॥ भक्त्या परमया देवि स च मां शरणं गतः ॥ ४८ ॥ भूयःस्तुतोऽपि तेनाहं तुष्टो वै तस्य भूपतेः ॥ तेनोक्तं यदि मे देव तुष्टस्त्वं परमेश्वर ॥ ४९ ॥ भक्तिर्मे सुदृढा भूयात्त्वयि सर्वेश शाश्वती ॥ तुष्टोहं तेन वाक्येन पुनः प्रोक्तो मया नृप ॥ ५० ॥ एवं भविष्यतीत्युक्त्वा पुनर्मा ब्रूहि पार्थिव ॥ हृदि स्थितश्च ते कामः सर्वकालं भविष्यति ॥ ५१ ॥ अधृष्यः सर्वदेवानां सर्वदा संभविष्यसि ॥ तेनाहं प्रार्थितो देवि भूयो वरमनुत्तमम् ॥ ५२ ॥ अतीव राजते देव स्थलोऽयं तव सन्निधौ ॥ मेरुरेष न संदेहो वल्लभः सर्वदा तव ॥ ५३ ॥ राजस्थलेश्वरोऽसि त्वं विख्यातो भुवनत्रये ॥ भविष्यसि यथा देव तथा त्वं कर्तुमर्हसि ॥ ५४ ॥ अत्रागत्य च यो देव भक्त्या परमया युतः ॥ यात्रां करोति भावेन पुराणोक्तविधानतः ॥ ॥ ५५ ॥ तस्य त्वया प्रदातव्यं सर्वं मनसि चिंतितम् ॥ अणिमादिगुणाः सर्वे गुटिकासिद्धिरंजनम् ॥ ५६ ॥ खड्गं च पादुकां चैव जलवासं[1] रसायनम् ॥ राजस्थलेश्वरं यस्तु भक्त्या पश्यति मानवः ॥ ५७ ॥ दशम्यां तु विशेषेण कृत्वा नियमपूर्वकम् ॥ देवानामपि देवत्वं संप्राप्नोति महेश्वरः ॥ ५८ ॥ पूजनीयस्तु त्रिदिवैर्यथा देवः पुरंदरः ॥ दृष्ट्वा राजस्थले देवं योऽत्र यात्रां करिष्यति[2] ॥ ५९ ॥ तस्य श्रीर्विजयश्चैव भव त्येव वरो मम ॥ शत्रवः संक्षयं यांतु संपद्यतां मनोरथाः ॥ ६० ॥ वृद्धिर्भवतु वंशे च दर्शनात्तव शंकर ॥ सर्वेऽत्र देवास्तिष्ठंतु मेरुरत्रैवतिष्ठतु ॥ तिष्ठंतु सागराः सर्वे तव देव समीपतः ॥ ६१ ॥ इत्युक्तोऽहं तदा तेन मया चोक्तं वरानने ॥ सुद्युम्नोनाम भूपालो यदात्रैवागमिष्यति ॥ ६२ ॥ पुत्रार्थं भार्यया सार्द्धं तदा दास्यामि वांछितम् ॥ तदा समुद्राश्चत्वारः स्थास्यन्ति सफलाः स्वयम् ॥ ६३ ॥ तस्याराधनतो भूप पुत्रं दास्यामि शोभनम् ॥ ये चात्र मानवा राजन्यात्रां कुर्वंति भक्तितः ॥ तेषां मनोरथावाप्तिर्भविष्यति न संशयः ॥ ६४ ॥ राजा रिपुंजयो भक्त्या गणाधीशः कृतो मया ॥ ६५ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ राजस्थलेश्वरेशस्य[3] श्रूयतां वडलेश्वरम् ॥ ६६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्ये राजस्थलेश्वरमाहात्म्यवर्णनंनाम चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥ ॥छ॥

॥ ईश्वर उवाच ॥ ॥ पञ्चसप्ततिकं देवं वडलेश्वरसंज्ञकम् ॥ विद्धि पापहरं देवि दर्शनात्कामदं नृणाम् ॥ १ ॥ धनदस्य सखा देवि मणि

१ विल्वासम्–इ०पा० । २ गमिष्यति–इ०पा० । ३ उज्जयिनीस्थपुस्तके–"रनछोररायनी गलीमाहे"–इति लिखितमस्ति, तदस्य स्थलेश्वरलिङ्गस्य स्थानं बोध्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



भद्रो बभूव ह ॥ ईर्ष्याप्रभावस्तत्पुत्रो वडलोनाम कोपनः ॥ २ ॥ रूपवान्सर्वदा कामी सदा मत्तो बलाधिकः ॥ कदाचित्स गतो रम्यां नलिनीं धनदस्य च ॥ ३ ॥ रत्यर्थं कामसेवार्थं गुप्तां रहसि निर्मिताम् ॥ ददर्श कुसुमैश्छन्नां वज्रवैडूर्यभूषिताम् ॥ ४ ॥ तां वै विद्रुमसंछन्नां मुक्तादामविराजिताम् ॥ सुरम्यां विपुलच्छायां स्वर्णपंकजशोभिताम् ॥ ५ ॥ कुबेरभवनाभ्याशे वल्लभां धनदस्य च ॥ आक्रीडं राजराजस्य कुबेरस्य महात्मनः ॥ ६ ॥ राक्षसैः किंनरैश्चैव गुप्तां खड्गधरैः सदा ॥ तां दृष्ट्वा परमप्रीतो बभूव वडलस्तदा ॥ ७ ॥ प्रियया सहितो रेमे स्थाने गुप्ते मनोहरे ॥ रेमे रमणकैर्योगैरनंगेन वशीकृतः ॥ ८ ॥ तत्र गुप्ता रणे शूरा राक्षसा रणकोविदाः ॥ रक्षंति शतसाहस्रं सर्वायुधपरिच्छदाः ॥ ९ ॥ ते तु दृष्ट्वैव वडलं मणिभद्रसुतं प्रिये ॥ भक्ष्यैः संपूरितमुखं दिव्यचन्दनभूषितम् ॥ १० ॥ केतकीगर्भपत्राभैर्दंतैर्दिव्यतराननम् ॥ युद्धार्थे बद्धनिस्त्रिंशं शक्तियुक्तमरिंदमम् ॥ ११ ॥ भार्यासहायमुन्मत्तं पर्यंके च स्थितं सदा ॥ रत्यर्थमागतं ज्ञात्वा अन्योन्यमभिचुक्रुशुः ॥ १२ ॥ मा वीरानेन मार्गेण सभार्यो गन्तुमर्हसि ॥ आक्रीडोऽयं कुबेरस्य धनदस्य महात्मनः ॥ १३ ॥ देवा देवर्षयो यक्षा गन्धर्वाः किंनरास्तथा ॥ आमन्त्र्य यक्षप्रवरं विहरंति रमंति च ॥ १४ ॥ नेह शक्यं विनादेशाद्विहर्तुं क्रीडितुं चिरम् ॥ भ्रात्रामात्येन सुहृदा केनापि च सुतेन च ॥ १५ ॥ येनकेनचिदन्यायादवमन्य धनेश्वरम् ॥ विहारः क्रियते दर्पात्स विनश्येदसंशयम् ॥ १६ ॥ एवं स राक्षसैर्घोरैर्वडलो विनिवारितः ॥ मा मैवमिति सक्रोधं भर्त्सयद्भिः समंततः ॥ १७ ॥ कदर्थीकृत्य तु स तान्राक्षसान्भीमविक्रमः ॥ व्यगाहत महातेजास्ते सर्वे तं न्यवारयन् ॥ १८ ॥ गृह्णीत बध्नीत निकृन्तैनं पिबाम खादाम च वृत्तहीनम् ॥ क्रुद्धा ब्रुवंतो ह्यपतन्द्रुतं ते शस्त्राणि चोद्यम्य विवृत्तनेत्राः ॥ १९ ॥ ततः स गुर्वीं यमदण्डकल्पां महागदां कांचनपट्टनद्धाम् ॥ प्रगृह्य तामभ्यपतत्तरस्वी ततोऽब्रवीत्तिष्ठत तिष्ठतेति ॥ २० ॥ ते तस्य वीर्यं च बलं च दृष्ट्वा विद्याबलं बाहुबलं तथैव ॥ न शक्नुवंतः सहितुं समेता हताः प्रवीराः सहसा निवृत्ताः ॥ २१ ॥ विदार्यमाणास्तत एव तूर्णमाकाशमास्थाय विमूढसंज्ञाः ॥ कैलासशृंगाण्यभिदुद्रुवुस्ते यक्षार्दिता रक्षपालाः प्रभग्नाः ॥ २२ ॥ स शक्रवद्दानवदैत्यसंघान्विक्रम्य जित्वा मदनाभितप्तः ॥ विगाह्य तां पुष्करिणीं समर्थः कामं स चिक्रीडति यक्षपुत्रः ॥ २३ ॥ ततस्तु ते रक्षपालाः समेत्य धनेश्वरं वै वडलेन नुन्नाः ॥ यक्षस्य धैर्यं सुबलं च संख्ये यथावदाचख्युरतीव भीताः ॥ ॥ २४ ॥ तेषां तु वचनं श्रुत्वा मणिभद्रो महायशाः ॥ शशाप पुत्रं दयितं वडलं प्रभुकारणात् ॥ २५ ॥ यस्मात्सा नलिनी रम्या सेविता वड

२ पावकः--इ०पा० । २ किंकरैः--इ०पा० । ३ स्रग्दामपूरितशिखम्--इ०पा० । ४ मदमोहितः--इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लेन तु ॥ दयिता धनदस्यापि यथा माता तथैव सा ॥२६॥ तस्मात्पुत्रो मदीयस्तु सर्वभोगविवर्जितः॥पंग्वन्धो बधिरो दीनः क्षयरोगमवाप्स्यति ॥ ॥ २७ ॥ इति शप्तस्तदा जातो वडलो भोगवर्जितः ॥ पतितो भूतले चैव तस्मिन्स्थाने गतोऽपि सन् ॥ २८ ॥ पीडितः क्षयरोगेण न शशाक विचेष्टितुम् ॥ अन्धोऽथ बधिरो जातो गुरुशापहतस्तदा ॥ २९ ॥ चिंतयामास सहसा शापमत्यद्भुतं महत् ॥ शप्तोऽहं केन सहसा जीवन्योन्यंतरं गतः ॥ ३० ॥ कथं शप्तोऽस्मि तातेन मणिभद्रेण वल्लभः ॥ पुत्रो युवा च शूरश्च शत्रुपक्षक्षयंकरः ॥ ३१ ॥ धन्योऽसौ मणिभद्रोऽपि मत्तातो येन भूतले ॥ प्रभुभक्त्या निजः पुत्रः शप्तस्त्यक्तश्च तत्क्षणात् ॥ ३२ ॥ वडलेन पुनः प्रोक्तं धन्योऽहं प्रभुकारणात् ॥ उत्सवो निधनंनाम भर्तृ पिण्डोपजीविनाम् ॥ ३३ ॥ अन्यायेन यथाकामं प्रारब्धः संचितश्चिरम् ॥ तेनाहं शापतां प्राप्तो यास्यामि नरकं ध्रुवम् ॥ ३४ ॥ एवं विलपत स्तस्य वडलस्य वरानने ॥ आजगाम तमुद्देशं मणिभद्रो महाबलः ॥ ददर्श पुत्रं पंग्वंधं क्षयरोगप्रपीडितम् ॥ ३५ ॥ निःश्वसंतं सुदुःखार्त्तं विल पंतं पुनःपुनः ॥ प्रत्युवाच सुतं यक्षो मणिभद्रोऽतिदुःखितः ॥ मया कुपित्रा हा वत्स शप्तस्त्वं प्रभुकारणात् ॥ ३६ ॥ त्वयेयं नलिनी रम्या धन दस्यातिवल्लभा ॥ सेविता कामतस्तेन प्रवरा राक्षसा हताः ॥ ३७ ॥ तस्मात्पुत्र मया शप्तो न मिथ्या स भविष्यति ॥ प्रभुर्देवः प्रभुः स्वामी प्रभुर्माता प्रभुः पिता ॥ ३८ ॥ स्वाम्यर्थे यः प्रियान्प्राणान्परित्यजति संगरे ॥ स याति परमं स्थानं ब्रह्मलोकं सनातनम् ॥ ३९ ॥ न मन्त्रसाध्यः शापोयं नौषधेन व्रतेन च ॥ नियमेन च दानेन तस्मान्मद्वचनं कुरु ॥ ४० ॥ मया श्रुतं शक्रलोके पुराणं स्कंदकीर्त्तितम् ॥ ब्रुवतो नारदस्यैव देवानां संनिधौ पुरा ॥ ४१ ॥ प्रभावो वर्णितस्तेन महाकालवनस्य च ॥ क्षेत्रे ह्यस्मिन्महालिंगं स्वर्गद्वारस्य दक्षिणे ॥ ४२ ॥ विद्यते व्याधि शमनं रूपसौभाग्यदायकम् ॥ तत्राहं त्वां च नेष्यामि विमानेनाशुगामिना ॥ ४३ ॥ इत्युक्त्वा मणिभद्रेण समानीतः सुतस्तदा ॥ यत्र देवाधि देवोऽसौ स्वर्गद्वारस्य दक्षिणे ॥ ४४ ॥ स्पर्शनात्तस्य लिंगस्य चक्षुष्मान्रूपवान्बली ॥ सुपादः श्रुतिसंयुक्तस्तत्क्षणादभवत्तदा ॥४५॥ दृष्ट्वा सुमहदाश्चर्यं मणिभद्रेण पार्वति ॥ कृतं नाम सुहृष्टेन स्वीयपुत्रस्य नामतः ॥ चक्षुष्मान्वडलो जातो लिंगस्यास्य प्रभावतः ॥ ४६ ॥ अद्यप्रभृति देवोऽयं वडले श्वरसंज्ञकः ॥ भविष्यति त्रिलोकेषु विख्यातो नेत्रदायकः ॥ ४७ ॥ पूजयिष्यंति ये देवं वडलेश्वरसंज्ञकम् ॥ लिंगं लोकेषु विख्यातं ते प्राप्स्यंति मनो रथम् ॥४८॥ दृष्टो हरति पापानि स्पृष्टो राज्यं प्रयच्छति ॥ अर्चितो भक्तिभावेन मोक्षं दद्यान्न संशयः ॥४९॥ कार्त्तिके शुक्लपक्षस्य तिथिर्वै द्वादशी

१ वडलः स्वसुतस्तदा--इ०पा० । २ स्मृतः संकीर्तितस्तथा--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





भवेत् ॥ तस्यां ये पूजयिष्यंति वडलेश्वरसंज्ञकम् ॥ ५० ॥ दानं तैः सततं दत्तं ते यांति परमं पदम् ॥ प्रयागे च प्रभासे च गंगासागरसंगमे ॥५१॥ तपस्ततं भवेत्तैस्तु ते मुक्ता नात्र संशयः ॥ गर्भवासे न जायंते सर्वसौख्यसमन्विताः ॥ ५२ ॥ गाणपत्या भविष्यंति शंकरस्य सदा प्रियाः ॥ सौभाग्यरूपसंपन्नाः पुत्रपौत्रैश्च संयुताः ॥ जायंते मानवा लोके वडलेश्वरदर्शनात् ॥ ५३ ॥ गर्भवासे महाकष्टे यस्य वासो न रोचते ॥ सोऽभ्यर्चयतु भावेन वडलेश्वरमीश्वरम् ॥ ५४ ॥ न लिंगेन विना सिद्धिर्दुर्लभं परमं पदम् ॥ गतिर्न जायते स्वर्गे यावल्लिंगं तु नार्चयेत् ॥ ५५ ॥ लिंगार्चनविहीनानां सिद्धिश्चापि सुदुर्लभा ॥ मम पुत्रेण संप्राप्तमीप्सितं लिंगतो यतः ॥ ५६ ॥ इत्युक्त्वा मणिभद्रोऽपि सुतेन सहितो ययौ ॥ यत्र देवो धनाध्यक्षः स्थानं स्वं परमं गतः ॥ ५७ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ वडलेश्वरदेवस्य श्रूयतामरुणेश्वरम् ॥ ५८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्य उमामहेश्वरसंवादे वडलेश्वरमाहात्म्यवर्णनं नाम पंचसप्ततितमोऽध्यायः ॥ ७५ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ षट्सप्ततितमं देवमरुणेश्वरसंज्ञकम् ॥ विद्धि पापहरं देवि दर्शनात्कामदं नृणाम् ॥ १ ॥ पुरा देवयुगे देवि प्रजापतिसुते शुभे ॥ आस्तां भगिन्यौ रूपेण समुपेतेऽद्भुतेऽनघे ॥ २ ॥ ते भार्ये कश्यपस्यास्तां कद्रूश्च विनता तथा ॥ प्रादात्ताभ्यां वरं प्रीतः प्रजापतिसमः पतिः ॥ ३ ॥ कश्यपो धर्मपत्नीभ्यां मुदा परमया युतः ॥ वरातिसर्गं श्रुत्वैव कश्यपादुत्तमं तु ते ॥ ४ ॥ हर्षादभ्यधिकां प्रीतिं प्रापतुः स्म वरस्त्रियौ ॥ वव्रे कद्रूः सुतान्नागान्सहस्रं तुल्यवर्चसः ॥ ५ ॥ द्वौ पुत्रौ विनता वव्रे कद्रूपुत्राधिकौ बले ॥ ओजसा तेजसा चैव विक्रमेणाधिकौ च तौ ॥ ६ ॥ तस्यै भर्त्ता वरं प्रादाद्बह्वस्यसे पुत्रकोत्तमौ ॥ एवमस्त्विति तं चाह कश्यपो विनतां तदा ॥ ७ ॥ यथा च प्रार्थितं लब्ध्वा वरं तुष्टाऽभवत्तदा ॥ कृतकृत्या तु विनता लब्ध्वा वीर्याधिकौ सुतौ ॥ ८ ॥ कद्रूश्च लब्ध्वा पुत्राणां सहस्रं तुल्यतेजसाम् ॥ धार्यौ गर्भौ प्रयत्नेन इत्युक्त्वा स महातपाः ॥ ९ ॥ ते भार्ये वरसंहृष्टे कश्यपो वनमाविशत् ॥ कालेन महता कद्रूर्नागानां सा शतीर्दश ॥ जनयामास चार्वंगी द्वे चांडे विनता तदा ॥ १० ॥ तयोरंडानि निदधुः प्रहृष्टाः परिचारिकाः ॥ सोपस्वेदेषु भांडेषु पंचवर्षशतानि च ॥ ११ ॥ ततः पंचशते काले कद्रूपुत्रा विनिर्गताः ॥ अंडाभ्यां विनतायास्तु मिथुनं न व्यदृश्यत ॥ १२ ॥ ततः पुत्रार्थिनी देवी व्रीडिता सा तपस्विनी ॥ अंडं बिभेद विनता तत्र पुत्रं ददर्श ह ॥ १३ ॥ पूर्वार्द्धकायसंपन्नमितरेणा प्रकाशितम् ॥ स पुत्रो रोषसंरब्धः शशापैनामिति



१ कुरुक्षेत्रे–इ०पा० । २ अत्र–उज्जयिनीस्थपुस्तके–"सिद्धवटमाहे" इति लिखितमस्ति–तदस्य वडलेश्वरलिंगस्य स्थानं वोध्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुतम् ॥ १४ ॥ योऽहमेवं कृतो मातस्त्वया लोभपरीतया ॥ शरीरेणासमग्रेण तस्माद्दासी भविष्यसि ॥ १५ ॥ पंचवर्षशतान्यस्या यया विस्पर्द्धसे सदा ॥ एष ते च सुतो मातर्दास्याद्वै मोक्षयिष्यति ॥ १६ ॥ यद्येनमपि मातस्त्वं मामिवांडविभेदनात् ॥ न करिष्यस्यनंगं वा पुत्रं चातितरस्विनम् ॥१७॥ प्रतिपालयितव्यस्ते जन्मकालोऽस्य धीरया ॥ विशिष्टबलमीप्संत्या पंचवर्षशतान्यतः ॥१८॥ एवं शप्त्वा ततो देवि विनतां मातरं स्वकम् ॥ अरुणो विललापाथ बाष्पशोकपरिप्लुतः ॥ १९ ॥ हाहा मया नृशंसेन माता स्वजननी स्वका ॥ शप्ता विनापराधेन कथं यास्यामि सद्गतिम् ॥ माता देहारणिः पुंसां माता दुःखसहा परा ॥२०॥ गर्भक्लेशे परं दुःखं माता जानाति यादृशम् ॥ वात्सल्यं चाधिकं मातुर्दृश्यते न तु पैतृकम् ॥ २१ ॥ गुरूणामेव सर्वेषां माता गुरुतरा स्मृता ॥ एकस्यापि सुतस्यैव न दृष्टा निष्कृतिः श्रुतौ ॥२२॥ यदि पिंडप्रदानं तु गयायां कुरुते सुतः ॥ गते पितरि पंचत्वं माता पुत्रस्य निर्वृतिः ॥ नच मातृविहीनस्य ममत्वं कुरुते पिता ॥२३॥ विकलो मातृहीनस्तु पुत्रो हि प्रोच्यते तदा ॥ यदा स वृद्धो भवति तदा भवति दुःखितः ॥ तदा शून्यं जगत्सर्वं यदा माता वियुज्यते ॥ २४ ॥ सोऽहं पापसमाचारो जातो मातृविहिंसकः ॥ मरिष्यामि न संदेहः साधयित्वा हुताशनम् ॥ २५ ॥ जातोऽहं विकलांगस्तु प्राक्कृतेनैव कर्मणा ॥ न माता कारणं यस्मात्स्वकीयं कर्म भुज्यते ॥ ॥ २६ ॥ एवं विलपतस्तस्य कश्यपस्य सुतस्य च ॥ अरुणस्य विशालाक्षि नारदः समुपागतः ॥ २७ ॥ दृष्ट्वारुणं सुदुःखार्त्तं विलपंतं पुनः पुनः ॥ प्रत्युवाच प्रसन्नात्मा नारदः प्रहसन्निव ॥ २८॥ अरुणोऽयमहो रौति कश्यपस्यात्मसंभवः ॥ विनतायाः सुतो ज्येष्ठः संभूतस्तपसां निधिः ॥ ॥ २९ ॥ उत्पादितोऽयमल्पाहैरर्द्धकायो महाबलः ॥ एनमाश्वासयिष्यामि विनतागर्भसंभवम् ॥ मोहेन विलपंतं च श्रेयो मे भविता ध्रुवम् ॥ ॥ ३० ॥ इति संचिंत्य मनसि वाक्यैर्मर्ध्वमृतोपमैः ॥ प्रत्युवाचारुणं तत्र नारदो द्विजसत्तमः ॥ ३१ ॥ तात कश्यपदायाद विनतागर्भसंभव ॥ तेजोराशे दुराधर्ष संतापं मा कृथा वृथा ॥ ३२ ॥ भाविनोऽर्था भवंतीह दुःखस्य च सुखस्य च ॥ यत्त्वया विनता शप्ता रहस्यं देवनिर्मितम् ॥ ॥ ३३ ॥ यदि तेस्ति घृणा चित्ते शप्तात्मजननी त्वया ॥ तदागच्छ ममादेशान्महाकालवनं शुभम् ॥३४॥ उत्तरे देवदेवस्य यात्रेशस्य च पुण्यदम् ॥ विद्यते त्रिदशैः पूज्यं सर्वदा सर्वदं शिवम् ॥ ३५ ॥ अरुणस्त्वेवमुक्तस्तु नारदेन महात्मना ॥ आजगाम क्षणार्द्धेन महाकालवनं शुभम् ॥ ३६ ॥ ददर्श तत्र तल्लिंगं तेजःकूटोपमं शुभम् ॥ पूजयामास विधिवत्पुष्पैर्भावसमन्वितः ॥ ३७ ॥ लिंगेनोक्तोऽरुणो देवि सारथ्यं कुरु सर्वदा ॥ सूर्यस्य

१ तम्–इ० पा० । २ स्वैरमृतोपमैः–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



भ्रमतस्तस्य त्वत्तुल्यो नास्ति सारथिः ॥ ३८ ॥ मया दत्तं तु सामर्थ्यं सूर्यस्य पुरतः सदा ॥ उदयस्तेऽरुण प्राग्वै पश्चात्सूर्य उदेष्यति ॥ ३९ ॥ त्वन्नाम्ना त्रिषु लोकेषु ख्यातोऽहमरुणेश्वरः ॥ भविष्यामि न संदेहो नृणामर्थप्रदायकः ॥ ४० ॥ ये मां पश्यंति सततं त्वन्नाम्ना चारुणेश्वरम् ॥ ते यास्यंति परं स्थानं दाहप्रलयवर्जितम् ॥ ४१ ॥ मोदिष्यंति कुलैः सार्द्धं पितृमातृसमुद्भवैः ॥ कल्पकोटिसहस्रं तु ये पश्यंति समाहिताः ॥ ४२ ॥ न दुःखं जायते तेषां ये पश्यंति रवेर्दिने ॥ संसारसागरोत्थं वै यावदिंद्राश्चतुर्दश ॥४३॥ यः पश्यति चतुर्दश्यां कृष्णायामरुणेश्वरम् ॥४४॥ स नेष्यति पितॄन्स्वर्गे नरकस्थान्न संशयः ॥ संक्रांतौ रविवारे च यः पश्येदरुणेश्वरम् ॥ शुंडीरस्वामिनो यात्रा कृता तेन न संशयः ॥४५॥ इत्युक्तस्तेन लिंगेन विनतानंदनस्तदा॥आगतः कृतकृत्यात्मा यत्र देवो दिवस्पतिः ॥४६॥ अस्य लिंगस्य माहात्म्यात्कश्यपस्यात्मसंभवः ॥ अरुणो दृश्यते ऽग्रेऽपि सूर्यस्य पुरतः सदा ॥ ४७ ॥ एषं ते कथितो देवि प्रभावः पापनाशनः ॥ अरुणेश्वरदेवस्य पुष्पवंतेश्वरं शृणु ॥ ४८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्येऽरुणेश्वरमाहात्म्यवर्णनंनाम षट्सप्ततितमोऽध्यायः ॥ ७६ ॥ छ ॥ ॥ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ सप्तसप्ततिकं देवि पुष्पदंतेश्वरं शृणु ॥ यस्य दर्शनमात्रेण गर्भवासो न जायते ॥ १ ॥ शिनिर्नाम द्विजो देवि स चापुत्रोऽभवत्पुरा ॥ पुत्रार्थं चिंतयामास स तपांसि बहूनि ह ॥ २ ॥ वायुभक्षोंऽबुभक्षश्च निराहारोर्ध्वबाहुकः ॥ शाकमूलफलाहारः पर्णाश्येकद्वि पर्णभुक् ॥ ३ ॥ एवमादीनि चान्यानि तपांसि श्रेयसे परम् ॥ एतेषां तपसां मध्ये तप एकं समाश्रये ॥ ४ ॥ परं विघ्नोपशांत्यर्थं तोषयिष्येऽहमीश्वरम् ॥ एवं संचिंत्य मनसा ऊर्ध्वबाहूर्ध्वपादकः ॥ आभ्यां न स दुरासाद्यो नापराधो भविष्यति ॥ ५ ॥ तथा चकार स मुनिर्वर्षाणां द्वादशैव हि ॥ तपस्यंतं च तं दृष्ट्वा नियमे परमे स्थितम् ॥ ६ ॥ विज्ञप्तोहं त्वया देवि मंदरे चारुकंदरे ॥ करोत्येष तपः क्रूरं पुत्रहेतोर्मुनिर्महान् ॥ ७ ॥ तेजसा दीपयञ्छैलं शोषयन्सलिलाशयान् ॥ तपसा दुष्करेणैव क्षुभिता नाकवासिनः ॥ ८ ॥ व्यालेंद्रा व्याकुलीभूता लुलिताश्चाचलेश्वराः ॥ मुनयो विस्मृतिं प्राप्ताः कंपेते चापि रोदसी ॥ ९ ॥ अयोनिजः शिनिर्विप्रः पुत्रमिच्छत्ययोनिजम् ॥ त्वं योनिर्गुणसंघानां त्वं योनिस्तपसामपि ॥ १० ॥ त्वं तपस्त्वं परं धाम शिखिचंद्रार्कलोचन ॥ सर्वेश्वर सुतोऽभीष्टः किं न विप्राय दीयते ॥ ११ ॥ सुरासुरगुरो किं न पुत्रमस्मै प्रयच्छसि ॥ तपसा क्षीणदोषस्य ब्रह्मत्वे भावितात्मनः ॥ १२ ॥ शिनेः पुत्रप्रदानं त्वं कुरु मद्वच

१ भयम्–इ०पा० । २ शुण्डीरस्वामिनः--कार्त्तिकस्वामिनः--इत्यर्थः । क्वचित्पुस्तके--कार्तिकस्वामिनः--इ० पा० । ३ तिमिर्नाम--इति पाठः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाच्छिव ॥ तपसा दुष्करेणैव गाढं क्लिष्टो महामुनिः ॥ १३ ॥ तेजांसि ज्योतिषामेव महतां च विधिस्थितः ॥ अहरत्तेजसा स्वेन तमांसीव दिवाकरः ॥ १४ ॥ त्वद्भक्तस्य च देवेश व्यर्थः कस्मात्परिश्रमः ॥ उदितेऽर्के तमांसीह न भवंति कदाचन ॥ १५ ॥ त्वत्परस्य न देवेश युक्ता दुःखविभीषिका ॥ इत्यहं प्रार्थितो देवि त्वया पर्वतपुत्रिके ॥ १६ ॥ विप्रार्थमनुकंपार्थं पुत्रार्थं च विशेषतः ॥ आकारिता मया देवि गणास्त्व द्वीरवेण तु ॥ १७ ॥ रुद्राश्च हरभक्ताश्च कूष्मांडा गगनेचराः ॥ रोमरौद्रा महानीलाः शिखावंतः सकोकिलाः ॥ १८ ॥ अन्ये च विविधाकाराः कालास्या हरिपिंगलाः ॥ जटाजूटधराश्चित्रा वीथिनक्षत्रचारिणः ॥ १९ ॥ नीलग्रीवाः कृष्णमुखाः पिंगधौतजटासटाः ॥ ज्वरो डिंडिर्महाकालो लांगुलिश्च[2] महेश्वरः ॥ २० ॥ घंटाकर्णो विशाखश्च परिशेषा गणाश्च ये ॥ वृषारूढाः कामतुल्याः कामरूपबलास्तथा ॥ २१ ॥ शूलचंद्रधराः सर्वे सर्वे तुल्यपराक्रमाः ॥ ममादेशात्समायाताः कृतांजलिपुटाः स्थिताः ॥ २२ ॥ स्तुवंतो विविधैः स्तोत्रैरूचुरेवं समाहिताः ॥ किं कर्त्तव्यमिहास्माभिरादेशो दीयतां प्रभो ॥ २३ ॥ गणानां वचनं श्रुत्वा ज्ञात्वा भक्तिं च तादृशीम् ॥ महातपःप्रभावोऽयं शिनिविप्रस्य कीर्त्तितः ॥ २४ ॥ पुत्रार्थं तप्यति तपः शिनिर्ब्राह्मणसत्तमः ॥ मद्वाक्यात्को नु विप्रस्य पुत्रत्वं संप्रदास्यति ॥ २५ ॥ तस्याहं संप्रदास्यामि सर्वान्कामान्यथेप्सितान् ॥ अमरं चाजरं पुत्रं मुनिर्वांछति सांप्रतम् ॥ २६ ॥ मद्वाक्यं क्रियतां सद्यो विप्रः क्लेशाद्विमुच्यताम् ॥ मद्भक्तस्य न संकल्पो मिथ्याभवितुमर्हति[1] ॥ २७ ॥ मदीयं वचनं श्रुत्वा सर्वे कंपितकंधराः ॥ सर्वे चावाङ्मुखा जाताः सर्वे ध्यानपरायणाः ॥ २८ ॥ न कश्चिद्भाषते किंचिन्न कश्चिद्वीक्षते तदा ॥ अथोक्तं पुष्पदंतेन रभसान्मानितेन तु ॥ २९ ॥ मम चित्तमविज्ञाय गणानामनुकंपया ॥ न यास्यंति गणा देव त्वां विहाय महीतलम् ॥ ३० ॥ इह स्थास्यंति सततं त्वत्समीपे न संशयः ॥ कथं योनिं प्रयास्यंति संप्राप्य मुदमुत्तमाम् ॥ ३१ ॥ हीनां रजोऽधिकां दीनां तमोबहुलधारिणीम् ॥ कथं स्वर्गं परित्यज्य यास्यामो नरकं परम् ॥ ३२ ॥ ब्रुवन्नेवं भ्रमेणैव[3] भाव्यर्थेन प्रणोदितः ॥ उक्तो मया विशालाक्षि पुष्पदंतो गणाग्रणीः ॥ ३३ ॥ पत त्वं मानुषे लोके यस्मान्मे विप्रियं कृतम् ॥ शप्त्वा तं पुष्पदंतं तु वीरकः प्रेरितो मया ॥ ३४ ॥ विप्रस्य पुत्रतां तूर्णं पुत्र गच्छ ममाज्ञया ॥ ततस्ते संप्रदास्यामि सर्वान्कामान्यथेप्सितान् ॥ ३५ ॥ इत्युक्तो वीरको देवि गतो विप्रस्य पुत्रताम् ॥ पुष्पदंतोऽपि करुणं विललाप सुदुःखितः ॥ ३६ ॥ पश्चात्तापेन संयुक्तो निश्वस्य च पुनःपुनः ॥ अहो तत्सफलं जन्म यदाज्ञा

१ भवेत्–इ०पा० । २ लागुडिश्च–इ०पा० । ३ क्रमेणैव–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



क्रियते नरैः ॥ ३७ ॥ प्रभूणामेकचित्तेन ते भृत्या दुर्लभाः स्मृताः ॥ तेषामर्थश्च धर्मश्च कुलं चैव च तारितम् ॥ ३८ ॥ प्रसन्नास्त्रिदशास्तेषां प्रभुभक्ताश्च ये नराः ॥ सेवाधर्मो हि गहनो योगिनामपि दुष्करः ॥ ३९ ॥ न ज्ञेयः केन तत्त्वेन दुराराध्यः प्रभुर्भवेत् ॥ एकेनाप्यपराधेन प्रकोपं कुरुते प्रभुः ॥ ४० ॥ विनश्यंत्युपकाराणि तस्मात्सेवा सुदुष्करा ॥ स्वामी सर्पश्च वह्निश्च तत्तभावं व्रजंति हि ॥ ४१ ॥ तस्माद्यत्नेन संसेव्या आत्मरक्षणतत्परैः ॥ सोऽहं भूमौ निपतितः प्रभोरादेशभंजकः ॥ ४२ ॥ कांस्तु लोकान्गमिष्यामि कलुषी भ्रूणहा इव ॥ एवं विलप्य बहुशो मामेव शरणं गतः ॥ उवाच दीनया वाचा प्रणिपत्य पुनःपुनः ॥ ४३ ॥ दीनोऽस्मि ज्ञानहीनोऽस्मि प्रणतोऽस्मि च शंकर ॥ कुरु प्रसादं देवेश अपराधं क्षमस्व मे ॥ ४४ ॥ न हि निर्वहणं यांति प्रभूणामाश्रिता रुषः ॥ प्रसीद देवदेवेश दीनस्य कृपणस्य च ॥ ४५ ॥ अपि कीटपतंगत्वं गच्छेयं तव शासनात् ॥ भक्तोहं सर्वदा देव पुत्रत्वे हि प्रतिष्ठितः ॥ ४६ ॥ इति तस्य वचः श्रुत्वा पुष्पदंतस्य पार्वति ॥ ममत्वेन तदा देवि प्रोक्तमित्थं त्वया वचः ॥ ४७ ॥ गच्छ पुत्र ममादेशान्महाकालवनं शुभम् ॥ लिंगमाराधय क्षिप्रं तत्त्वन्नाम्ना भविष्यति ॥ ४८ ॥ कीर्त्तिस्ते भविता पुत्र यावदाभूतसंप्लवम् ॥ इत्युक्ते तु त्वया देवि मयाप्युक्तं वरानने ॥४९॥ न मे मिथ्या वचः पुत्र भविष्यति कथंचन ॥ दर्शनादेव लिंगस्य ममाभीष्टो भविष्यसि ॥ ५० ॥ विमाने पुष्पपादे तु समारूढो भविष्यसि ॥ पुष्पैः संपूज्यमानस्तु पदं प्राप्स्यसि शाश्वतम् ॥ ५१ ॥ गणैः सार्द्धं मया चैव मुदितो विचरिष्यसि ॥ ममापि न रतिर्वत्स भविष्यति त्वया विना ॥ ५२ ॥ अहं तत्रागमिष्यामि महाकालवने शुभे ॥ तुष्टोऽहं सर्वदा वत्स गणानामग्रणीः कृतः ॥५३॥ अनया शुद्धया भक्त्या लोकानामुपकारकः ॥ भविष्यसि न संदेहस्तस्मिन्क्षेत्रे गतो ध्रुवम् ॥५४॥ इत्युक्तो हि मया देवि पुष्पदंतो गणाग्रणीः ॥ मानी ममाज्ञया मौनी महाकालवने शुभम् ॥ ५५ ॥ लिंगमाराधयामास दुर्वासेशादथोत्तरे ॥ लिंगेनोक्तस्तु सहसा तुष्टोऽहं गणसत्तम ॥ त्वन्नाम्ना ख्यातिमेष्यामि प्रसादस्ते कृतोऽधुना ॥ ५६ ॥ एतस्मिन्नन्तरे देवि त्वया सार्द्धमहं गतः ॥ शक्राद्यैस्त्रिदशैः सार्द्धं गणैर्नानाविधैस्तथा ॥ ५७ ॥ हृष्टस्तु पुष्पदंतोऽपि पुष्पपट्टासने शुभे ॥ पुष्पैः प्रकीर्यमाणोऽपि पुनः प्राप्तो ममांतिकम् ॥ ५८ ॥ मया संश्लेषितः स्नेहादुत्संगेऽप्यधिरोपितः ॥ स्थानं दत्तं विशालाक्षि इदमुक्तं मया तदा ॥ ५९ ॥ ये पश्यंति नरा लिंगं त्वया संपूजितं भुवि ॥ ते यास्यंति पुष्पकेण क्रीडन्तो वै त्रिविष्टपम् ॥ ६० ॥ गणाध्यक्षा भविष्यंति सर्वकामैरलंकृताः ॥ मम लोके गणाध्यक्षा यावदिंद्राश्चतुर्दश ॥ ६१ ॥ दर्शना

१ पितॄणाम्--इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्क्षीयते पापमैहिकं पूर्वकं तथा ॥ ततः प्रसादान्मे सर्वं ज्ञानं सम्यग्भविष्यति ॥ ६२ ॥ यः पूजयेच्चतुर्दश्यामष्टम्यां सोमवासरे ॥ अमरैः सह संहृष्टो मोदते दिवि सर्वदा ॥ ६३ ॥ पैतृकैर्मातृकैः सार्द्धं कुलैस्तु सप्तभिर्युतः ॥ न वदेत्केनचित्सार्द्धं नरो यः प्रातरुत्थितः ॥ ६४ ॥ पुष्पदंतेश्वरं दृष्ट्वा सोऽश्वमेधफलं लभेत् ॥ मुच्यते पातकाद्यैश्च यः शाठ्येनापि पश्यति ॥ ६५ ॥ मृतो गांधर्वलोके तु याति विद्याधरैर्वृतः ॥ न तस्य संतति च्छेदो यः पश्यति दिनेदिने ॥ नियमेन गणाध्यक्ष जायते ब्रह्मणो दिनम् ॥ ६६ ॥ ऐश्वर्यं सप्तलोकेषु भुक्त्वा भोगान्यथाक्रमम् ॥ पृथिव्यामेकरा ड्भूत्वा ममांगे संभविष्यति ॥ ६७ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ पुष्पदन्तेश्वरेशस्य अविमुक्तेश्वरं शृणु ॥ ६८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्य उमामहेश्वरसंवादे पुष्पदन्तेश्वरमाहात्म्यवर्णनंनाम सप्त सप्ततितमोऽध्यायः ॥ ७७ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ अष्टसप्ततिकं विद्धि अविमुक्तेश्वरं प्रिये ॥ यस्य दर्शनमात्रेण तीर्थयात्राफलं लभेत् ॥ १ ॥ शाकले नगरे देवि चित्रसेनो महीपतिः ॥ बभूव भुवि विख्यातो रूपवान्मन्मथाधिकः ॥ २ ॥ तस्य चन्द्रप्रभा भार्या प्राणे भ्योऽपि गरीयसी ॥ पतिव्रता धर्मशीला रूपयौवनशालिनी ॥ ३ ॥ अपुत्रस्यापि नृपतेः पुत्री जाता मनोरमा ॥ तस्या नाम तदा चक्रे पिता पार्थिवसत्तमः ॥ ४ ॥ सर्वलक्षणसंपन्ना कन्या लावण्यवत्यपि ॥ सापि जातिस्मरा देवी संस्मार च पुरातनम् ॥ ५ ॥ वैराग्याद्ब्रह्मचर्यं च चचार तनुमध्यमा ॥ कदाचिद्यौवनं प्राप्ता सा च पृष्टा नृपेण वै ॥ ६ ॥ उत्संगे च निजे कृत्वा मूर्ध्नि चाघ्राय हर्षितः ॥ पुत्रि प्रदानकालस्ते कस्मै देया वराय च ॥ ७ ॥ नृपाय नृपपुत्राय संमताय द्विजाय वा ॥ वृद्धाय बहुभार्याय ग्रामीणाय च पुत्रिणे ॥ हर्षेण चावृतो राजा पुनः पप्रच्छ तां सुताम् ॥ ८ ॥ पृष्टा च सा यदा देवी न चोवाच नृपं प्रति ॥ अधोमुखी च संजाता पुनः प्रोक्ता नृपेण तु ॥ ९ ॥ यदि मद्वचनं पुत्रि प्रतिभाति न सांप्रतम् ॥ वरणं स्वेच्छया पुत्रि कुरु तर्हि स्वयं वरम् ॥ १० ॥ इत्युक्ता सा नृपतिना पित्रा प्रोक्ता पुनःपुनः ॥ रुरोद सा वै करुणं श्रुत्वा तां कुत्सितां गतिम् ॥ ११ ॥ जहास चातिहासेन पुनः श्वासांश्च मुंचति ॥ प्रहर्षं च पुनः क्षिप्रं प्राप्य बाष्पं च मुंचति ॥ १२ ॥ तामवस्थां गतां दृष्ट्वा पुत्री मुन्मत्ततां गताम् ॥ किमेतदिति भूपालो ग्रसिता किं ग्रहेण वै ॥ १३ ॥ भूतेन वा पिशाचेन मत्सुता लक्षणैर्युता ॥ इति चिन्तापरो राजा यदा जातो यशस्विनि ॥ १४ ॥ तदा प्रोक्तस्तया पुत्र्या मा तात विमना भव ॥ नाहं ग्रस्ता ग्रहेणेह न भूतेन न रक्षसा ॥ १५ ॥ न पिशाचेन यक्षेण

१ दृष्टम्–इ० पा० । २ धर्मपत्नी–इ० पा० । ३ लावण्यवती–इति नाम–इति भाति । ४ संस्मरन्ती पुनःपुनः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तव कन्या महीपते ॥ जातिस्मराह्युत्पन्ना श्रूयतां मम जन्म च ॥ १६ ॥ प्राग्ज्योतिषे पुरे विप्रो हरस्वामी बभूव ह ॥ भार्याहं दुर्भगा जाता तस्य विप्रस्य पार्थिव ॥ १७ ॥ रूपयौवनसपन्ना तस्य नाहं प्रिया विभो ॥ सदा विद्वेषसंयुक्तो मयि निष्ठुरजल्पकः ॥ १८ ॥ नान्यस्य कस्यचिद्दृष्टा मुक्ता मां पृथिवीपते ॥ पाणिग्रहणकाले तु ग्रहैः पापैर्विलोकिता ॥ १९ ॥ अहमूढां कुलीनेन द्विजेनातिगुणेन च ॥ स चावलोकितो विप्रो ग्रहैः पुण्यैर्नराधिप ॥ २० ॥ तेन मे वल्लभो राजन्न चाहं तस्य वल्लभा ॥ स सदाचारसंयुक्तो वेदाध्ययनतत्परः ॥ २१ ॥ नान्यत्र कुरुते भावं ब्रह्मचर्यव्रते स्थितः ॥ ततोऽहं क्रोधसंयुक्ता वशीकरणलंपटा ॥ अपृच्छं प्रमदास्तात यास्त्यक्ताः पतिभिः किल ॥ २२ ॥ ताभिरुक्ता ह्यहं भूप वश्यो भर्त्ता भविष्यति ॥ अस्माकं प्रत्ययो जातस्तस्मात्त्वं कर्तुमर्हसि ॥ २३ ॥ भेषजैर्विविधैश्चूर्णैर्मंत्रैर्मोहकरैः परैः ॥ तैस्तैस्तु कृतलेपोऽपि भविता दासवत्पतिः ॥ २४ ॥ ततोऽहं त्वरिता गत्वा तासां वाक्येन भूपते ॥ चूर्णं मन्त्रं गृहीत्वा च प्राप्ता भर्तृगृहं पुनः ॥ २५ ॥ प्रदोषे पयसा युक्तश्चूर्णो भर्त्तरि योजितः ॥ ग्रीवायां च मया मन्त्रो न्यस्तः सर्वांगसंधिषु ॥ २६ ॥ यदा पीतश्च चूर्णस्तु मन्त्रेणातीव गुंठितः ॥ वशगस्तत्क्षणाज्जातो मंत्रचूर्णप्रभावतः ॥ २७ ॥ द्वारदेशे स्थितः क्रंदन्दासोऽस्मि तव शोभने ॥ त्राहि मां शरणं प्राप्तं त्वद्वशोहं च शोभने ॥ २८ ॥ तत्तस्य रुदितं ज्ञात्वा मंत्रमाहात्म्यतो नृप ॥ स्वस्थीकरणयोगेन तदा स्वस्थः कृतः पतिः ॥ २९ ॥ ततः प्रभृति कांतो मे वश्योऽभूद्वने स्थितः ॥ पंचत्वं च गता काले तथा नारकयातनाम् ॥ ३० ॥ ताम्रभ्राष्ट्रे च दग्धाहं युगानि दश पंच च ॥ सूक्ष्माणि तिलमात्राणि कृत्वा खंडान्यनेकशः ॥ छेदिता कालसूत्रेण पीडिता घ्राणयंत्रके ॥ ३१ ॥ क्वाथीभूता तप्ततैलैर्घटे दर्व्याथ लोडिता ॥ पिष्टा चैव शिलापृष्ठे कुट्टिता लोहमुद्गरैः ॥ ३२ ॥ दलिता दंतदलने दग्धाहं रौरवे भृशम् ॥ अधोमुखी विनिक्षिप्ता त्वमेध्ये पूयशोणिते ॥ ३३ ॥ यान्यापि युवती तात भर्तुर्वश्यं समाचरेत् ॥ वृथाधर्मा दुराचारा पच्यते नरके भृशम् ॥३४॥ भर्त्ता नाथो गुरुर्भर्त्ता भर्त्ता वै दैवतं परम् ॥ भर्त्ता स्वमी सुहृद्भर्त्ता भर्ता च परमं पदम् ॥ ३५ ॥ तुष्टे भर्त्तरि नारीणां तुष्टाः स्युः सर्वदेवताः ॥ विमुखे विमुखाः सर्वे तस्मात्सेव्यः सदा पतिः ॥ भस्मीभवति सा नारी यया भर्त्ता न तोषितः ॥ ३६ ॥ यस्य प्रसादात्प्राप्यंते भोगाश्च विविधाः सदा ॥ तं वश्यं कुरुते या च सा कथं सुखमाप्नुयात् ॥ ३७ ॥ तिर्यग्योनिशतं याति कृमिपक्षिशतानि च ॥ तस्मात्तत्तत्सदा कार्यं स्त्रीभिर्भर्तृवचः किल ॥ ३८ ॥ एवं पुनर्मया भुक्ता नरका भृशदारुणाः ॥ तिर्यग्योनिसहस्रं तु कर्मणा कुत्सितेन च ॥ ॥ ३९ ॥ किंचित्पातकशुद्ध्यर्थं चंडालस्य च वेश्मनि ॥ जाताहमतिरूपेण पीडिता विविधैर्व्रणैः॥४०॥सारमेयैर्वृता दीना भक्ष्यमाणा पुनःपुनः ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुष्टाहं भक्ष्यमाणापि मार्गे रुद्धा वृकैरहम् ॥ तैरहं तुद्यमानापि महाकालवनं गता ॥४१॥ दृष्टो मया महादेवो दैवतो मृगमाणया ॥ समीपे देवदेवस्य पिप्पलादेश्वरस्य च ॥ ४२ ॥ तस्य दर्शनमात्रेण गता शक्रपुरं प्रति ॥ विमानेन सुदीप्तेन किंकिणीजालमालिना ॥ दिव्यांबरधरा दिव्या दिव्यमालाविभूषणा ॥ ४३ ॥ तत्राहं पूजिता देवैः स्तुताहं चारणैस्तथा ॥ दर्शनात्तस्य लिंगस्य जाताहं तव वेश्मनि ॥ ४४ ॥ वल्लभा रूपसंपन्ना शाकले नगरे शुभे ॥ स्मृत्वा तु कुत्सितां योनिं विलापश्च कृतो मया ॥ ४५ ॥ स्मृत्वा लिंगस्य माहात्म्यं हर्षो जातस्तु तत्क्षणात् ॥ तन्मे नैव च वातूल्यं गृहीता न ग्रहेण च ॥ ४६ ॥ जाता जातिस्मरा तात ब्रह्मचर्यव्रते स्थिता ॥ अतो यास्यामि तं देवं दर्शनार्थं पुनः प्रभो ॥ यथा न भूयो मे जन्म स्याच्च संसारसागरे ॥ ४७ ॥ इति पुत्रीवचः श्रुत्वा चित्रसेनो महीपतिः ॥ सभृत्यमंत्रिसहितो महाकालवनं गतः ॥ ४८ ॥ ददर्श तत्र तल्लिंगं पूजयामास भक्तितः ॥ सापि दृष्ट्वैव तल्लिंगं तस्मिँल्लिंगे लयं गता ॥ ४९ ॥ राजा च पुत्रवाञ्जातो लिंगदर्शनतः प्रिये ॥ बभूव चक्रवर्त्ती स यथा स्वायंभुवो मनुः ॥ ५० ॥ एतस्मिन्नंतरे देवि दृष्ट्वा देवे लयं गताम् ॥ राजपुत्रीं महादेवि कृतं नाम मुदान्वितैः ॥ ५१ ॥ अविमुक्तस्य लिंगस्य दर्शनादेव तत्क्षणात् ॥ अविमुक्तेश्वरो देव इति ख्यातो भवत्विति ॥५२॥ योऽसौ काश्यां प्रसिद्धोऽस्ति देवो विश्वेश्वरः शिवः ॥ स चैवात्र सुविख्यातोऽविमुक्तेश्वरसंज्ञया ॥ ५३ ॥ वाराणसी यथा पुण्या तथावंती च मुक्तिदा ॥ तस्या दशगुणं पुण्यं श्रूयतेऽत्र विशेषतः ॥ ५४ ॥ तस्माद्विश्वेश्वरो देवः समायातः कुशस्थलीम् ॥ यत्रागत्य सुविद्वांसो मानवाः शंसितव्रताः ॥५५॥ पश्यंति परया भक्त्या ह्यविमुक्तेश्वरं शिवम् ॥ तेषां मुक्तिर्न संदेहो भविष्यति सुनिश्चला ॥ ५६ ॥ अमुक्ता नैव पश्यंति मुक्ताः पश्यंति सर्वदा ॥ ब्रह्मचर्यव्रतैः सम्यगिष्टैः सर्वमखैर्भवेत् ॥ ५७ ॥ तत्फलं प्राप्यते सम्यगविमुक्तेशदर्शनात् ॥ नैःश्रेयसी गतिः पुण्या दर्शनादेव जायते ॥ ५८ ॥ या गतिः प्राप्यते सांख्यैर्योगैर्वा या गतिर्भवेत् ॥ सा गतिः प्राप्यते सम्यगविमुक्तेशदर्शनात् ॥ ५९ ॥ जन्ममृत्युभयं हित्वा स याति परमां गतिम् ॥ यः पूजयति भावेन ह्यविमुक्तेश्वरं शिवम् ॥ ॥ ६० ॥ ब्रह्महापि च यो गच्छेदविमुक्तेश्वर यजेत् ॥ तस्य लिंगस्य माहात्म्यात्सर्व्वपापान्निवर्त्तते ॥ ६१ ॥ शाठ्येनापि च यः पश्येदविमुक्तेश्वरं शिवम् ॥ स मुंचति जरां मृत्युं जन्म चैतदशाश्वतम् ॥ ६२ ॥ स्मृतः संपूजितो भक्त्या स्तुतो वा विविधैः स्तवैः ॥ मुक्तिं ददाति देवेशो ह्यविमुक्तेश्वरः शिवः ॥ ६३ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ अविमुक्तेश्वरेशस्य हनुमत्केश्वरं शृणु ॥ ६४ ॥ इति श्रीस्कांदे महापुराण

१ वातूल्यम्—वातरोगेण चित्तभ्रमः—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्य उमामहेश्वरसंवादेऽविमुक्तेश्वरमाहात्म्यवर्णनंनामाष्टसप्तति
तमोऽध्यायः ॥ ७८ ॥ ॥ छ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ एकोनाशीतिकं विद्धि हनुमत्केश्वरं प्रिये ॥ यस्य
दर्शनमात्रेण समीहितफलं लभेत् ॥ १ ॥ प्राप्तराज्यस्य रामस्य राक्षसानां वधे कृते ॥ आगता मुनयो देवि राघवं प्रतिनंदितुम् ॥ २ ॥
रामेण पूजिताः सर्वे ह्यगस्तिप्रमुखा द्विजाः ॥ प्रहृष्टमनसो विप्रा रामं वचनमब्रुवन् ॥ ३ ॥ दिष्ट्या तु निहतो राम रावणः पुत्रपौत्रवान् ॥
दिष्ट्या विजयिनं त्वाऽद्य पश्यामः सह भार्यया ॥ ४ ॥ हनूमता च सहितं वानरेण महात्मना ॥ दिष्ट्या पवनपुत्रेण राक्षसांतकरेण च ॥ ५ ॥
चिरं जीवतु दीर्घायुर्वानरो हनुमान्सदा ॥ अंजनीगर्भसंभूतो रुद्रांशो हि धरातले ॥ ६ ॥ आखंडलोऽग्निर्भगवान्यमो वै निर्ऋतिस्तथा ॥ वरुणः
पवनश्चैव धनाध्यक्षस्तथा शिवः ॥ ब्रह्मणा सहिताश्चैव दिक्पालाः पांतु सर्वदा ॥ ७ ॥ श्रुत्वा तेषां तु वचनं मुनीनां भावितात्मनाम् ॥ विस्मयं
परमं गत्वा रामः प्रांजलिरब्रवीत् ॥ ८ ॥ किमर्थं लक्ष्मणं त्यक्त्वा वानरोऽयं प्रशंसितः ॥ कीदृशः किंप्रभावो वा किंवीर्यः किंपराक्रमः ॥ ९ ॥
अथोचुः सत्यमेवैतत्कारणं वानरोत्तमे ॥ न त्वस्य सदृशो वीर्ये विद्यते भुवनत्रये ॥ १० ॥ एष देव महाप्राज्ञो योजनानां शतं प्लुतः ॥ धर्षयित्वा
पुरीं लंकां रावणांतःपुरं गतः ॥ ११ ॥ प्रादेशमात्रप्रतिमं कृतं रूपमनेन वै ॥ दृष्टा संभाषिता सीता पृष्टा विश्वासिता तथा ॥ १२ ॥ सेनाग्रगा
मंत्रिपुत्राः किंकरा रावणात्मजाः ॥ हता हनुमता तत्र ताडिता रावणालये ॥ १३ ॥ भूयो बन्धविमुक्तेन संभाष्य तु दशाननम् ॥ लंका भस्मीकृता
तेन पातकेनेव मेदिनी ॥ १४ ॥ न कालस्य न शक्रस्य न विष्णोर्वेधसोऽपि वा ॥ श्रूयंते तानि कर्माणि यादृशानि हनूमतः ॥ १५ ॥
॥ ॥ राम उवाच ॥ ॥ एतस्य बाहुवीर्येण लंका सीता च लक्ष्मणः ॥ प्राप्तो मम जयश्चैव राज्यं मित्राणि बान्धवाः ॥ १६ ॥ सखायं वानरपति
मुक्त्वैनं हरिपुंगवम् ॥ प्रवृत्तिमपि को वेत्तुं जानक्याः शक्तिमान्भवेत् ॥ १७ ॥ वाली किमर्थमेतेन सुग्रीवप्रियकाम्यया ॥ तदा वैरे समुत्पन्ने न
दग्धस्तृणवत्कथम् ॥ १८ ॥ नायं विदितवान्मन्ये हनुमानात्मनो बलम् ॥ उपेक्षितः क्लिश्यमाने किमर्थं वानराधिपे ॥ १९ ॥ एवं ब्रुवाणं रामं तु
मुनयो वाक्यमब्रुवन् ॥ सत्यमेतद्रघुश्रेष्ठ यद्ब्रवीषि हनूमतः ॥ २० ॥ न बले विद्यते तुल्यो न गतौ न मतावपि ॥ अमोघवाक्यैः शापस्तु दत्तोऽस्य
मुनिभिः पुरा ॥ २१ ॥ न ज्ञातं हि बलं येन बलिना वालिमर्दने ॥ बाल्येऽप्यनेन यत्कर्म कृतं नाम महात्मना ॥ २२ ॥ तन्न वर्णयितुं शक्यमे

१ उज्जयनीस्थपुस्तके--"मालफलामाहे"इति लिखितमस्ति--तदेतस्य अविमुक्तेश्वरस्य स्थानं बोध्यम् ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्य तु बलं महत् ॥ यदि श्रोतुं तवेच्छास्ति निशामय वदामहे ॥ २३ ॥ असौ हि जातमात्रोऽपि बालार्क इव मूर्त्तिमान् ॥ ग्रहीतुकामो बालार्कं पुप्लुवांबरमध्यतः ॥ २४ ॥ तूर्णमाधावतो राम शक्रेण विदितात्मना ॥ हनुस्तेनास्य सहसा कुलिशेनैव ताडितः ॥ २५ ॥ ततो गिरौ पपातैष शक्रवज्राभिताडितः ॥ पततोस्य महावेगाद्वामो हनुरभज्यत ॥ अस्मिंस्तु पतिते बाले मृतकल्पेऽशनिक्षतात् ॥ २६ ॥ ततो वायुः समादाय महा कालवनं गतः ॥ लिंगमाराधयामास पुत्रार्थं पवनस्तदा ॥ २७ ॥ स्पृष्टमात्रस्तु लिंगेन समुत्तस्थौ प्लवंगमः ॥ जलसिक्तं यथा सस्यं पुनर्जीवितमाप्तवान् ॥ २८ ॥ प्राणवंतमिमं दृष्ट्वा पवनो हर्षितस्तदा ॥ प्रत्युवाच प्रसन्नात्मा पुत्रमादाय सत्वरम् ॥ २९ ॥ स्पर्शनादस्य लिंगस्य मम पुत्रः समुत्थितः ॥ हनुमत्केश्वरो देवो विख्यातोऽयं भविष्यति ॥ ३० ॥ एतस्मिन्नंतरे शक्रः समायातः सुरैर्वृतः ॥ नीलोत्पलमयीं मालां संप्रगृह्येदमब्रवीत् ॥ ३१ ॥ मत्करोत्सृष्टवज्रेण यस्मादस्य हनुर्हतः ॥ तदेष कपिशार्दूलो हनुमांस्तु भविष्यति ॥ ३२ ॥ वरुणोऽस्य वरं प्रादान्नास्य मृत्युर्भविष्यति ॥ यमो दंडादवध्यत्वमारोग्यं धनदो ददौ ॥ ३३ ॥ सूर्येण च प्रभा दत्ता पवनेन गतिर्द्रुता ॥ लिंगेन च वरो दत्तो देवानां संनिधौ तदा ॥ ३४ ॥ आयुधानां हि सर्वेषामवध्योऽयं भविष्यति ॥ अजरश्चामरश्चैव भविष्यति न संशयः ॥ ३५ ॥ अमित्रभयदो ह्येष मित्राणामभयप्रदः ॥ अजेयो भविता युद्धे लिंगेनोक्तं पुनःपुनः ॥ ३६ ॥ शत्रोर्बलोत्सादनाय राघवप्रीतये सदा ॥ कियत्कालं बलं स्वीयं न स्मरिष्यति शापतः ॥ ३७ ॥ हते तु रावणे भूयो रामस्यानुमते स्थितः ॥ विभीषणं प्रार्थयित्वा मामत्र स्थापयिष्यति ॥ ३८ ॥ ततो मां त्रिदशाः सर्वे पूजयिष्यंति भाविताः ॥ तेनैव नाम्ना विख्यातिं पुनर्यास्यामि भूतले ॥ ३९ ॥ अथ गंधवहः पुत्रं प्रगृह्य गृहमानयत् ॥ अंजनायै तदाचख्यौ वरलब्धिं च लिंगतः ॥ ४० ॥ एवं लिंगप्रभावाच्च बलवान्मारुतात्मजः ॥ स जातस्त्रिषु लोकेषु राम तस्मात्प्रशस्यते ॥ ४१ ॥ पराक्रमोत्साहमतिप्रतापैः सौशील्यमाधुर्यनयादिकैश्च ॥ गांभीर्यचातुर्यसुवीर्यधैर्यैर्हनूमतः कोऽभ्यधिकोऽस्ति लोके ॥ ४२ ॥ मंमेव विक्षोभितसागरस्य लोकान्दिधक्षोरिव पावकस्य ॥ प्रजा जिहीर्षोरिव चांतकस्य हनूमतः स्थास्यति कः पुरस्तात् ॥ ४३ ॥ एतद्वै कथितं तुभ्यं यन्मां त्वं परिपृच्छसि ॥ हनूमतोऽस्य बालस्य कर्माण्यद्भुतविक्रम ॥ ४४ ॥ दृष्टः सभाजितश्चापि राम गच्छामहे वयम् ॥ एवमुक्त्वा गताः सर्वे

१ वायुः पुत्रं समादाय–इ०पा०। २ ध्रुवा–इ० पा०। ३ स्मारयित्वा–इ०पा०। ४ ममेव–अगस्तेरिव–चुलुकीकरणादिति भावः। अगस्तिना हि सागरश्चुलुकीकरणेन विक्षोभित आसीदत एवागस्तिर्ब्रवीति ममेवेति–इत्यर्थोऽत्रानुसंधेयः। ५ कोऽप्यधिकोऽस्ति लोके–इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

मुनयोऽवंतिमण्डलम् ॥ पूजयामासुरीशानं हनुमत्केश्वरं शिवम् ॥ ४५ ॥ समर्चयंति ये भक्त्या लिंगं त्रिदशपूजितम् ॥ हनुमत्केश्वरं देवं ते कृतार्थाः कलौ युगे ॥ ४६ ॥ व्रजंत्येव सुदुष्प्राप्यं ब्रह्मसायुज्यमव्ययम् ॥ संप्राप्य तु पुनर्जन्म लभंते मोक्षमव्ययम् ॥ ४७ ॥ यः पश्यति नरो लिंगं हनुमत्केश्वरं प्रिये ॥ सोऽधिकं फलमाप्नोति सर्वदुःखविवर्जितः ॥ ४८ ॥ सर्वलोकेषु तस्यैव गतिर्न प्रतिहन्यते ॥ दिव्यैनैश्वर्ययोगेन युज्यते नात्र संशयः ॥ ४९ ॥ बालसूर्यप्रतीकाशविमानेन सुवर्चसा ॥ वृतः स्त्रीणां सहस्रैस्तु स्वच्छंदगमनागमः ॥ ५० ॥ विचरत्यविचारेण सर्वलोकान्दिवौकसाम् ॥ स्पृहणीयतमः पुंसां सर्ववर्णोत्तमोधुना ॥ ५१ ॥ स्वर्गाच्च्युतः प्रजायेत कुले महति रूपवान् ॥ धर्मज्ञो रुद्रभक्तश्च सर्वविद्यार्थपारगः ॥५२॥ राजा वा राजतुल्यो वा दर्शनादस्य जायते ॥ स्पर्शनात्परमं पुण्यं यजनात्परमं पदम् ॥५३॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ हनुमत्केश्वरेशस्य स्वप्नेश्वरमथो शृणु ॥ ५४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे चतुरशीतिलिंगमाहात्म्य उमामहेश्वरसंवादे हनुमत्केश्वरमाहात्म्यवर्णनंनामैकोनाशीतितमोऽध्यायः ॥ ७९ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ आशीतिकं विजानीहि देवं स्वप्नेश्वरं प्रिये ॥ यस्य दर्शनमात्रेण दुःस्वप्नं नश्यति ध्रुवम् ॥ १ ॥ कल्माषपादेति ख्यातो लोके[1] राजा बभूव ह ॥ इक्ष्वाकुवंशजो देवि तेजसा सूर्यवद्भुवि ॥ २ ॥ स कदाचिद्वने राजा वशिष्ठसुतमौरसम् ॥ शक्तिं परमधर्मज्ञं ददर्श विजितेंद्रियम् ॥ मार्गस्थितं तपोनिष्ठमपगच्छेति चाब्रवीत् ॥ ३ ॥ अमुंचंतं तु पंथानं तमृषिं नृपसत्तमः ॥ जघान कशया मोहात्तदा राक्षसवन्मुनिम् ॥ ४ ॥ कशाप्रहाराभिहतस्ततः स मुनिपुंगवः ॥ तं शशाप रुषाविष्टो वाशिष्ठः क्रोधमूर्छितः ॥ ५ ॥ हंसि राक्षसवद्यस्माद्राजापसद तापसम् ॥ तस्मात्त्वमद्यप्रभृति पुरुषादो भविष्यति[2]॥६॥ सततं पिशितासक्तश्चारिष्यसि महीमिमाम् ॥ स तु शप्तस्तदा तेन तत्क्षणाद्धै नृपोत्तमः ॥७॥ जगाम शरणं शक्तिं प्रसादयितुमुद्यत् ॥ यदा न तुष्टो विप्रर्षिः शक्तिः परमकोपनः ॥ प्रसाद्यमानो भूपेन तदा तेनापि भक्षितः ॥ ८ ॥ शक्तिं तं भक्षयित्वा तु वशिष्ठस्यापरान्सुतान् ॥ भक्षयामास सहसा सिंहः क्षुद्रमृगानिव ॥ ९ ॥ तदाप्रभृति संजातः पुरुषादो नृपोत्तमः ॥ रात्रौ पश्यति दुःस्वप्नान्पापसंघेन मोहितः ॥ ॥ १० ॥ दृष्ट्वा भयानकान्स्वप्नान्स राजा पर्य्यतप्यत ॥ पश्चात्तापेन संयुक्तो विललाप सुदुःखितः ॥ ११ ॥ अथाप्युक्तममात्यैश्च किं करोषि महीपते ॥ कस्मात्ते निष्प्रभा कांतिर्विवर्णो हरिणः कृशः ॥ १२ ॥ स राजा कथयामास दुःस्वप्नाननुपूर्वशः ॥ स्वप्नेऽहं सागरं शुष्कं चन्द्रं च

१ लोके–इ० पा०। २ भवति–इ० पा०। ३ उज्जयनीस्थपुस्तके–"गढपारि" इति लिखितमस्ति, तदस्य हनुमत्केश्वरस्य स्थानं बोध्यम्।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पतितं भुवि ॥ १३ ॥ उपरुद्धां च जगतीं घनेन तमसा वृताम् ॥ आत्मानं चाहमद्राक्षं मलिनं मुक्तमूर्द्धजम् ॥ १४ ॥ पतंतमद्रिशिखरात्कलुषे गोमये ह्रदे ॥ पिबन्नंजलिना तैलं हसन्निव मुहुर्मुहुः ॥ १५ ॥ तैलेनाभ्यक्तसर्वांगस्तैलमेवावगाहयन् ॥ पीठे कार्ष्णायसे चैव निषण्णोऽहमधोमुखः ॥ १६ ॥ गायंति प्रमदा रक्ता रक्तमाल्यानुलेपनाः ॥ कृष्णांबरधराश्चान्याः कृष्णमाल्यानुलेपनाः ॥ १७ ॥ ताभिराकृष्यमाणोऽपि नीतोऽहं दक्षिणां दिशम् ॥ बद्धा रज्ज्वा सुवर्णस्य लोहस्य रजतस्य च ॥ १८ ॥ पांसुकर्दमयोर्मध्ये मग्नोहं लोहयंत्रितः ॥ कपोतैस्तुद्यमानोऽहं गृध्रैः काकैश्च दारुणैः ॥ १९ ॥ सृगालैर्भक्ष्यमाणश्च स्थितो मद्गुरमस्तके ॥ ऋक्षवानरयानस्थो गतोऽहं दक्षिणां दिशम् ॥ २० ॥ नदीं निमग्नो निश्चेष्टो जलहीनां महीसमाम् ॥ दंतैर्विदारितो रात्रौ रासभेनाहमर्दितः ॥ २१ ॥ ताडितो हृदयेत्यर्थं चरणैर्वज्रसंनिभैः ॥ दृष्टिश्च हन्यतेऽत्यर्थं वेतालैर्लोहशंकुभिः ॥२२॥ करालैः कंटकैः कृष्णैः पुरुषैरुद्यतायुधैः॥स्वप्नेहं ताडितोत्यर्थमप्रमाणैः शितैः शरैः ॥२३॥ एवमेतन्मया दृष्टमिमां रात्रिं भयावहाम् ॥ संख्यां कर्तुं न शक्येत दुःस्वप्नानपरान्बहून् ॥२४॥ इमां तु दुःस्वप्नगतिं निरीक्ष्य वै ह्यनेकरूपामविचिंतितां पुरा ॥ भयं महन्मे हृदयं न शुद्ध्यति प्रगृह्य बाहू विलपाम्यनाथवत् ॥ २५ ॥ नृपस्य वचनं श्रुत्वा अमात्या भृशदुःखिताः ॥ पश्यंतो दुर्निमित्तांश्च उल्कापातादिकांस्तदा ॥ २६ ॥ सौरिसूर्यकुजाक्रांतं नगरं दृश्यतेऽधुना ॥ नागं चतुष्पदं विष्टिं किंस्तुघ्नं शकुनिं तथा ॥२७॥ करणानि न शस्यंते मुहूर्त्ता दारुणा[1]भवन् ॥ विदित्वा नृपभंगं तु देशभंगं कुलक्षयम् ॥२८॥ आश्वासयंतो राजानमिदं वचनमब्रुवन् ॥ अलं शोकेन काकुत्स्थ सत्यासत्या हि विभ्रमाः ॥२९॥ दृश्यंते भाविताः पुंसि स्वप्ने धातुवशेन हि ॥ तथा पित्रादिदेवांश्च पूजय ब्राह्मणांस्तथा ॥ ३० ॥ एभिस्ततो मोक्ष्यसे त्वं मानसादधिविभ्रमात् ॥ यस्माद्दैवोपघातानां दैवमेव हि रक्षणम् ॥३१॥ एवमाश्वासितो भूपो ह्यमात्यैर्धर्मकोविदैः ॥ तत्पापं कथयामास गुरुपुत्रवधादिकम् ॥३२॥ वशिष्ठस्य सुतो ज्येष्ठः शक्तिर्वै भक्षितो मया ॥ नृशंसेन तथामात्या एकोनं भक्षितं शतम् ॥ ३३ ॥ तेन पापेन संतप्तः कथं स्वस्थो भवामि वै ॥ एकापि ब्रह्महत्या या सापि दैवात्सुदुष्करा ॥ ३४ ॥ मया पुनर्नृशंसेन सा तथा न तु वर्जिता ॥ कांस्तु लोकान्गमिष्यामि कृत्वा कर्म सुदारुणम् ॥ राक्षसोऽहमनेनैव शरीरेण कुलांतकृत् ॥ ३५ ॥ जातः कुले रघूणां वै पापात्मा पापसंभवः ॥ सोऽहमत्र मरिष्यामि साधयित्वा हुताशनम् ॥ ३६ ॥ इति तस्य वचः श्रुत्वा सौदासस्य सुविस्मिताः ॥ अमात्या वेदतत्त्वज्ञाः सर्वशास्त्रविशारदाः ॥ ३७ ॥ अहो पापमिदं भूरि कृतं पापेन सर्वथा ॥ प्रायश्चित्तं न

१ दारुणाः अभवन्–इति पदच्छेदः । अडभावः सति तस्मिन्सन्धिर्वाऽऽर्षः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



जानीमो वशिष्ठेन विनाऽधुना ॥ ३८ ॥ तस्मादद्यैव गंतव्यमस्य भूपस्य कारणात् ॥ यत्र तिष्ठति विप्रर्षिर्वशिष्ठो भगवान्मुनिः ॥ ३९ ॥ इत्युक्त्वा सहितास्तेन तेऽमात्या भृशदुःखिताः ॥ गत्वा यत्राश्रमे विप्रो वशिष्ठो भगवानृषिः ॥ ४० ॥ अदृश्यंतीं[1] वधूं दीनां यत्राश्वासयति प्रभुः ॥ अदृश्यंती तु तं दृष्ट्वा क्रूरकर्माणमग्रतः ॥ भयसंविग्नया वाचा वशिष्ठमिदमब्रवीत् ॥ ४१ ॥ असौ मृत्युरिवोग्रेण दण्डेन बहुगर्वितः ॥ प्रगृहीतेन काष्ठेन राक्षसोऽभ्येति भीषणः ॥४२॥ तन्निवारयितुं शक्तो नान्यो वै भुवि कश्चन ॥ त्वामृतेऽद्य महाभाग सर्ववेदविदां वर ॥ ४३ ॥ त्राहि मां भगवन्पापादस्माद्दारुणदर्शनात् ॥ राक्षसोऽयमिहागत्य नूनमावां समीहते ॥ ४४ ॥ ॥ वशिष्ठ उवाच ॥ ॥ मा भैः पुत्रि न भेतव्यं राक्षसात्ते कथंचन ॥ नैतद्रक्षो भयं यस्मात्पश्यसि त्वमुपस्थितम् ॥ राजा कल्माषपादोऽयममात्यैः सहितो विभुः ॥ ४५ ॥ स एषोऽस्मिन्वनोद्देशे समायातो ममांतिकम् ॥ तमायांतमथालक्ष्य वशिष्ठो भगवानृषिः ॥ वारयामास तेजस्वी हुंकारेण नृपोत्तमम् ॥४६॥ मन्त्रपूतेन च ततः समभ्युक्ष्य च वारिणा ॥ मोक्षयामास वै भावाद्राक्षसाद्राजसत्तमम् ॥ ४७ ॥ प्रतिलभ्य ततः संज्ञामभिवाद्य कृतांजलिः ॥ उवाच नृपतिः काले वशिष्ठमृषिसत्तमम् ॥ ४८ ॥ सौदासोऽहं महाभाग दासोऽहं तव सुव्रत ॥ अस्मिन्काले यदिष्टं ते ब्रूहि किं करवाणि ते ॥ ४९ ॥ तस्य तद्वचनं श्रुत्वा नृपस्य द्विजसत्तमः ॥ ज्ञात्वा तपोबलेनैव विश्वामित्रस्य चेष्टितम् ॥ राजानं प्रत्युवाचेदं विनयावनतं तथा ॥ ५० ॥ ज्ञातमेव यथाकालं गच्छ राजन्कुशस्थलीम् ॥ महाकालसमीपे तु लिंगं दुःस्वप्ननाशनम् ॥ ५१ ॥ राजसंपत्करं दिव्यं पुत्रपौत्रविवर्द्धनम् ॥ ब्रह्महत्यासहस्राणां स्फोटनं पापनाशनम् ॥ तस्य दर्शनमात्रेण विपाप्मा च भविष्यसि ॥ ५२ ॥ दुःस्वप्नजं भयं घोरं विनंक्ष्यति न संशयः ॥ ग्रहाश्च सानुकूलास्ते भविष्यन्ति नृपोत्तम ॥५३॥ इत्युक्तो गुरुणा भूयो वशिष्ठेन महात्मना ॥ जगाम त्वरितो देवि महाकालवनं शुभम् ॥ ददर्श तत्र तल्लिंगं दुष्टदुःस्वप्ननाशनम् ॥५४॥ नष्टाः सर्वेपि दुःस्वप्नाः सुस्वप्नाश्चाभवंस्तदा ॥ राजा निष्कल्मषो भूत्वा पुनः प्राप्नोन्निजं पदम् ॥ अयोध्यायां गतो राज्यं चकार मुदितस्तदा ॥ ॥ ५५ ॥ तदाप्रभृति देवोऽयं सुस्वप्नेश्वरसंज्ञकः ॥ बभूव भुवने ख्यातः सर्वदुःस्वप्ननाशनः ॥५६॥ अष्टम्यां च चतुर्दश्यां देवं स्वप्नेश्वरं शिवम् ॥ दर्शनं ये करिष्यंति स्नात्वा शिप्राजले शुभे ॥ आजन्मप्रभवं तेषां दुःस्वप्नंच विनश्यति ॥५७॥ स एव सर्वदा पूज्य इह लोके परत्र च ॥ यः पश्यति

१ अरुन्धतीम्—इति पाठान्तरं कस्मिंश्चित्पुस्तके दृश्यते—तदुचितमिवाप्यस्ति—परं त्वग्रे—''मा भैः पुत्रि न भेतव्यम्'' वसिष्ठवाक्यमस्ति। तेन नारुन्धत्यत्र किन्त्वदृश्यन्तीनाम--वसिष्ठपुत्रस्य शक्तेः पत्नी--बोद्धव्या। तस्याः स्वभर्तृनाशजन्यशोकसंतप्तायाः समाश्वासनं वसिष्ठेन कृतमित्यप्युचितमेव प्रसगात्। ''अरुन्धतीम्'' इत्येव पाठोऽत्र चेन्मन्तव्यस्तर्ह्यग्रिमं वसिष्ठवचनं न संगतच्छेत।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नरो भक्त्या देवं स्वप्नेश्वरं शिवम् ॥ ५८ ॥ यं यं काममभिध्याय मनसाभिमतं नरः ॥ तंतं दुर्लभमाप्नोति सुस्वप्नेश्वरदर्शनात् ॥ ५९ ॥ नियमेन प्रपश्यंति देवं स्वप्नेश्वरं सदा ॥ ते प्रयांति तनुं त्यक्त्वा मदीयं भवनं प्रिये ॥ ६० ॥ भक्तिहीनः क्रियाहीनो यः पश्यति प्रसंगतः ॥ सुपुण्यां गतिमाप्नोति योगिगम्यां यशस्विनि ॥ ६१ ॥ ये च पुष्पैर्विचित्रैश्च पूजयन्ति च पर्वसु ॥ ते सर्वकामसंपन्नाः श्रीबलारोग्यसंयुताः ॥ दीर्घायुषः शुभाचारा जायन्ते देहिनोऽमलाः ॥ ६२ ॥ एते च ब्रह्मविष्ण्विन्द्रकुबेरदहनादयः ॥ सुस्वप्नं परमं प्राप्ताः श्रीस्वप्नेश्वरदर्शनात् ॥६३॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ स्वप्नेश्वरस्य देवस्य शृणु लिंगचतुष्टयम् ॥ ६४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्ड उमामहेश्वरसंवादे स्वप्नेश्वरमाहात्म्यवर्णनंनामाशीतितमोऽध्यायः ॥ ८० ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ चतुर्द्वारस्थितं देवि शृणु लिंगचतुष्टयम् ॥ यस्य दर्शनमात्रेण कृतकृत्यो नरो भवेत् ॥ १ ॥ अहं पृष्टस्त्वया देवि कौतुकाच्च वरानने ॥ अतीव रमणीयं च स्थलं दर्शय मे प्रभो ॥ २ ॥ सेवितं बहुभिः सिद्धैः पुनरावृत्तिकांक्षिभिः ॥ यद्गुह्यं च पवित्रं च प्रलयेऽप्यविनाशि यत् ॥ ३ ॥ अनन्यसदृशं दिव्यं यत्तीर्थं यत्तपोवनम् ॥ असंख्येयगुणोपेतं भुक्तिमुक्तिकरं शुभम् ॥ ४ ॥ सुवर्णशृंगाः प्रासादा हर्म्याणि विविधानि च ॥ उद्यानानि विचित्राणि मार्गाश्च विविधाः शुभाः ॥ ५ ॥ समीहितफलावाप्तिर्यत्र लभ्या सुखेन वै ॥ सिद्धचारणगन्धर्वकिंनरोद्गीतनादितम् ॥ ६ ॥ पुण्यलोकोपमस्थानं त्रिविष्टपविभूषणम् ॥ एवमभ्यर्थितो देवि मंदरे चारुकन्दरे ॥ ७ ॥ मया प्रोक्तं प्रसन्नेन स्थानं शृणु सनातनम् ॥ महाकालवनं रम्यं स्वर्गात्सुखकरं परम्[1] ॥ ८ ॥ अनौपम्यगुणोपेतं भुक्तिमुक्तिकरं शुभम् ॥ तत्समः कोऽपि धन्योऽन्यो[2] न दृष्टो भुवनत्रये ॥ ९ ॥ देवगन्धर्वसिद्धैश्च सेव्यं वै मुक्तिकांक्षिभिः ॥ विनोदार्थं मया सृष्टं त्वत्प्रियार्थं कुतूहलात् ॥ १० ॥ तिलकं सर्वतीर्थानां जंबूद्वीपे मनोरमे ॥ इच्छाकामफलावाप्तिरनायासेन लभ्यते ॥ ११ ॥ जरारोगभयैर्हीनं सर्वव्याधिविवर्जितम् ॥ शक्राग्नियमरक्षोंबुवायुसोमेशसेवितम् ॥ स्वर्गे प्रमुदिता देवास्तेऽपि कांक्षंति सर्वदा ॥ १२ ॥ असंख्येयफलं त्वत्र अक्षया च गतिः सदा ॥ यैर्न संसेवितं स्थानं वंचितास्ते नरा भुवि ॥ १३ ॥ क्षेत्रस्य च गुणान्वक्तुं देवदानवमानवैः ॥ न शक्यते प्रयत्नाच्च स्वयं यत्र स्थितो ह्यहम् ॥ १४ ॥ यत्किंचिदशुभं कर्म कृतं मानुषकर्मणा ॥ महाकालवनं प्राप्य तत्सर्वं भस्मसाद्भवेत् ॥ १५ ॥ न सा गतिः कुरुक्षेत्रे गंगाद्वारे त्रिपुष्करे ॥ या गतिर्विहिता पुंसां महाकालवने सदा ॥ १६ ॥ तिर्यग्योनिगता

१ परम्—इ० पा० । २ अन्यः प्रदेशः--इति विशेष्यमध्याहर्तव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

गत्वा महाकालवने स्थिताः ॥ तत्रैव निधनं प्राप्तास्ते यांति परमां गतिम् ॥ १७ ॥ मेरुमंदरमात्रोपि राशिः पापस्य कर्मणः ॥ महाकालवनं प्राप्य सर्वोपि व्रजति क्षयम् ॥ १८॥ श्मशानमिति चाख्यातं महाकालवनं प्रिये ॥ तत्र ब्रह्मादयो देवा नारायणपुरोगमाः ॥ १९ ॥ योगिनश्च तथा सांख्याः सिद्धाश्च सनकादयः ॥ उपासते च मां भक्त्या मद्भक्त्या मत्परायणाः ॥ २० ॥ या गतिर्योगतपसां या गतिर्यज्ञयाजिनाम् ॥ महाकालवने क्षेत्रे सा गतिर्विहिता मया ॥ २१ ॥ संहरामि च तत्रस्थस्त्रैलोक्यं सचराचरम् ॥ अतो देवि समाख्यातं महाकालवनं शुभम् ॥ २२ ॥ एवं बहुविधाञ्छ्रुत्वा गुणान्बहुविधांस्तथा ॥ देवि त्वं विस्मिता जाता गमनाय मनो दधे ॥ २३ ॥ क्षेत्रस्यालोकने चित्तं जातमुत्कंठितं तव ॥ त्वया सार्द्धं समागत्य महाकालवने शुभे ॥ २४ ॥ पश्य देवि विचित्राख्यं यन्मया कथितं तव ॥ अमरेशपुरस्पर्द्धि वर्द्धितानंदसुंदरम् ॥ वर्णितं यन्मया देवि भुक्तिमुक्तिकरं परम् ॥ २५ ॥ त्वया प्रोक्तं विशालाक्षि दृष्ट्वा क्षेत्रमनुत्तमम् ॥ अस्य स्थानस्य रक्षार्थं भक्तं गणचतुष्टयम् ॥ नियुज्यतां महादेव संतोषाय मम प्रभो ॥ २६ ॥ द्वाराणि तत्र चत्वारि क्रियंतां परमेश्वर ॥ चत्वारः कलशाश्चैव हैमाः कार्या दृढाः शुभाः ॥ २७ ॥ पूर्वादिक्रमयोगेन चतुर्वर्गो नियोज्यताम् ॥ धर्मश्चार्थश्च कामश्च मोक्षश्चैव महेश्वर ॥ २८ ॥ त्वदीयं वचनं श्रुत्वा मया देवि प्रयत्नतः ॥ अस्य क्षेत्रस्य रक्षार्थं स्मृतं गणचतुष्टयम् ॥ २९ ॥ चत्वार ईश्वरास्तेऽपि स्थापितास्तदनंतरम् ॥ पिंगलेशो धनाध्यक्षस्तथा कायावरोहणः ॥ ३० ॥ बिल्वेश्वरो गणश्रेष्ठो दुर्दर्शो गणनायकः ॥ एते मया नियुक्ता वै समर्थाः क्षेत्ररक्षणे ॥ ३१ ॥ पूर्वादिक्रमयोगेन त्वत्प्रियार्थं वरानने ॥ नियुक्तास्त्वन्मतेनैव पूर्वस्यां दिशि पिंगलः ॥ ॥ ३२ ॥ दक्षिणस्यां दिशि तथा प्रिये कायावरोहणः ॥ बिल्वेश्वरः प्रतीच्यां तु दुर्दर्शश्चोत्तरे[1] तथा ॥ ३३ ॥ मानवा ये म्रियंतेऽत्र क्षेत्रमध्ये गणोत्तमाः ॥ तेषां रक्षा परा कार्या भवद्भिर्मम शासनात् ॥३४॥ कथां शृणु प्रयत्नेन पिंगलेश्वरसंभवाम् ॥ यस्याः श्रवणमात्रेण कृतकृत्यो नरो भवेत् ॥ ॥ ३५ ॥ पिंगला कन्यका देवि कान्यकुब्जे बभूव ह ॥ सुशीला च सुवेषा च सौंदर्येणातिनिर्मिता ॥३६॥ पिता तस्या महाप्राज्ञः सर्वशास्त्रार्थतत्त्ववित् ॥ ज्ञानध्यानरतश्चैव स्वाध्यायपरिनिष्ठितः ॥ ३७॥ पिंगलोनाम विप्रेंद्रो भार्या तस्य पतिव्रता ॥ पिंगाक्षी विश्रुता लोके सा च पंचत्वमागता ॥ ३८ ॥ ततस्तेन स दुःखेन गृहस्थाश्रमनिःस्पृहः ॥ तपोवनं जगामाथ गृहीत्वा तनयां स्वकाम् ॥ ३९ ॥ ऋषिभिः सेवितं पुण्यं शाकमूलफलाशनैः ॥ स तत्र मुनिभिः सार्द्धं ध्यानयोगपरायणः ॥ ४० ॥ निवासं कृतवान्देवि पिंगलायाश्च रक्षणम् ॥ पालयामास धर्मात्मा पुत्रिकां दृढ



१ उत्तरः--इ० पा० । २ उत्तरे चोत्तरस्तथा--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योपसाम् ॥ ४१ ॥ तामेव सततं साध्वीं मन्यमानो महातपाः ॥ न पाणिं ग्राहयामास मातृहीनेति चिंतयन् ॥ ४२ ॥ विरक्तोऽपि महाभाग संसारत्सर्वधर्म्मवित् ॥ पुत्रिकां प्रेक्षयन्संम्यक्सन्यासं नाकरोद्वशी ॥ ४३ ॥ अथ संरक्षयन्बालां मातृहीनां तपस्विनीम् ॥ संयुक्तः कालधर्मेण स विप्रः स्वर्जगाम ह ॥४४॥ ततः सा पिंगला दीना हीना पित्रा सुदुःखिता ॥ विललापातुरा देवि पतिता शोकसागरे ॥ ४५ ॥ पिंगलोवाच ॥ ॥ अद्य मे च पिता दैवात्कालधर्ममुपेयिवान् ॥ मां त्यक्त्वा गतवानेको दयालुर्निःस्पृहो यथा ॥४६॥ स समः सर्वभूतेषु ममात्यंतं हिते रतः ॥ मामेकां संपरित्यज्य परलोकमितो गतः ॥ ४७ ॥ साऽहं परमदुःखार्त्ता पितृशोकेन विह्वला ॥ शरीरं धारयामीदं कृपणं व्यर्थजीवितम् ॥ ४८ ॥ ब्रह्मज्ञोपि हि तातो मे शांतो दांतो जितेंद्रियः ॥ मामेव पालयामास मातृहीनेति चिंतयन् ॥ ४९ ॥ येन संरक्षिता बाल्ये येनास्मि परिवर्धिता ॥ तेन पित्रा वियुक्ताहं न जीविष्ये कदांचन ॥ ५० ॥ नद्यां वा निपतिष्यामि समिद्धे वा हुताशने ॥ पर्वताद्वा पतिष्यामि पितृहीना निराश्रया ॥ ५१ ॥ इति शोकातुरा बाला विलपंती पुनःपुनः॥बोध्यमाना महाभागैः सदारैर्ऋषिसत्तमैः ॥५२॥ कन्यकाभी रुदंतीभिर्वयस्याभिः समंततः॥ आलिंग्यालिंग्य बहुशः पीड्यमाना सुदुःखिता ॥ आगत्य करुणाविष्टो धर्मः परहिते रतः ॥ ५३ ॥ स्थविरो ब्राह्मणो भूत्वा प्रोवाचेदं वचस्तदा ॥ अलं बाले विशालाक्षि रोदनैरतिदारुणैः ॥ न भूयः प्राप्यते तातस्तस्मान्नार्हसि शोचितुम् ॥ ५४ ॥ अनित्यं यौवनं रूपं जीवितं द्रव्यसंचयः ॥ प्रियैः सह च संवासस्तत्र शोचन्ति पंडिताः ॥ ५५ ॥ त्वया वै तत्कृतं कर्म पूर्वजन्मनि शोभने ॥ येन पित्रा वियोगः स्यादरण्ये मुनिसेविते ॥ ५६ ॥ त्वां विहाय गतः क्वापि पश्य बाले विधेर्बलम् ॥ इदं कृतमिदं कार्यमिदमन्यत्कृताकृतम् ॥ ५७ ॥ एवमीहासमासक्तं मृत्युः प्रकुरुते वशे ॥ तस्माद्दुःखं समुत्सृज्य श्रोतुमर्हसि शोभने ॥ ५८ ॥ पितृभ्यां च वियोगश्च येनाभूत्तव कर्मणा ॥ पुरा त्वं सुन्दरीनाम वेश्यारूपेण सुन्दरी ॥ ५९ ॥ नृत्यगेयादिनिपुणा वीणावेणुविचक्षणा ॥ आदिश्च पण्यनारीण्यां भूषणाच्छादनादिभिः ॥६०॥ तां दृष्ट्वा रूपसंपन्नां सुवेषां सुविभूषिताम् ॥ ब्राह्मणो गुणवान्कश्चिद्बभूव मदनातुरः ॥ ६१ ॥ तं विदित्वा तथाभूतं ब्राह्मणं मदनातुरम् ॥ समाश्वतस्रस्तेन त्वं रमिता कामिना ततः ॥ ६२ ॥ सोऽथ पापरतिर्मूढो ब्राह्मणो विषयात्मकः ॥ हतः शूद्रेण केनापि कामिना तव वेश्मनि ॥ ६३ ॥ विहाय भार्यामप्रौढां शुभां द्वादशवार्षिकीम् ॥ प्रयातो नरकं घोरं शूद्रासंपर्कदूषितः ॥६४॥ ततस्तस्य पिता विद्वान्मातातीव च दुःखिता ॥ आर्त्ता पुत्रवियोगेन शापो दत्तो भयावहः ॥ ६५ ॥ ॥ मातोवाच ॥ ॥

१ कथंचन–इ०पा० । २ सुव्रते–इ० पा० । ३ ताभ्याम्–इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



औषधादि प्रयुक्तं च वशीकर्त्तुं ममात्मजम् ॥ यदस्माकं वियोगाय वंचितो दुष्टचारिणि ॥ ६६ ॥ यस्माच्च मम पुत्रेण सा वियोगमकारयत् ॥
तेन जन्मांतरे दीना पतिहीना भवत्वसौ ॥ ६७ ॥ ॥ पितोवाच ॥ ॥ बाल्ये वयसि वर्त्तंती मातृहीना सुदुःखिता ॥ बहिष्कृता विवाहेन
पितृहीना भविष्यसि ॥ ६८ ॥ ॥ धर्म्म उवाच ॥ ॥ तस्मात्पूर्वकृतेनैव कर्मणा वरवर्णिनि ॥ इदं दुःखमनुप्राप्ता कन्यका भवती सती ॥
॥ ६९ ॥ ॥ पिंगलोवाच ॥ ॥ त्वया जन्मांतरे वृत्तं मम प्रोक्तं द्विजोत्तम ॥ तस्माद्ब्रूहि भवन्प्रश्नं पृच्छंत्या निश्चयं स्वकम् ॥ ७० ॥ इत्थं
सुघोरपापाहं पापाचारा तथाऽधमा ॥ कथं तु ब्राह्मणेनाहमुत्पन्ना ब्रह्मवादिना[3] ॥ ७१ ॥ दशसूनासमश्चक्री[1] दशचक्रिसमो ध्वजः[2] ॥ दशध्वजसमा वेश्या
दशवेश्यासमो नृपः ॥७२॥ एवं वदंति धर्मज्ञा ब्राह्मणाः संशितव्रताः ॥ तस्माद्विजोत्तमादस्मात्कथं जन्माभवन्मम ॥७३॥ ॥ ब्राह्मण उवाच ॥ ॥
पापाचारपरापि त्वं ब्राह्मणानां कुले शुभे ॥ उत्पन्ना तत्र वक्ष्यामि कारणं शृणु पिंगले ॥ ७४ ॥ ब्राह्मणो विषयासक्तः कश्चिद्वृद्धो नृपाज्ञया ॥
चौर्यं कर्म कृतं तेन वेश्यालुब्धेन सुन्दरि ॥ ७५ ॥ मुच्यतां च त्वयाप्युक्तं न चौरो नैव घातकम् ॥ यद्यनेन कृतं चौर्यं तन्मयैव कृतं भवेत् ॥
॥ ७६ ॥ ददामि वित्तमधिकं मुच्यतां द्विजसत्तमः ॥ इत्युक्त्वा गृहमानीय तेनैवं सहिता पुनः ॥ ७७ ॥ गृहं[4] च कल्पितं शुभ्रं पुष्पधूपादिवा
सितम् ॥ रमितश्च त्वया विप्रो यथासुखमनुत्तमम्[5] ॥ ७८ ॥ तस्य पुण्यस्य[6] माहात्म्याद्गता स्वर्गमनुत्तमम् ॥ समुत्पन्ना कुले पुत्री ब्राह्मणस्य
विशेषतः ॥ ७९ ॥ शापाच्चैव वियोगं त्वं प्राप्ता पुत्र्यधुना परम् ॥ ८० ॥ ॥ पिंगलोवाच ॥ ॥ पूर्वजन्मनि वेश्याहं जाता दुष्कृतकारिणी ॥
परद्रव्यपरा दुष्टा शौचाचारविवर्जिता ॥ इदानीं दुःखिता जाता पितृमातृवियोगतः ॥ ८१ ॥ पाणिग्रहणधर्मेण वर्जिता शापतः प्रभो ॥
प्रसादं कुरु मे विप्र को भवान्कथयस्व मे ॥ ८२ ॥ कथं जन्म न मे भूयात्कथं मुक्तिर्भवेन्मम ॥ भवबन्धविनिर्मुक्ता कथं यास्यामि सद्गतिम् ॥
॥ ८३ ॥ ॥ विप्र उवाच ॥ ॥ धर्मोहं द्विजरूपेण त्वां जिज्ञासुरिहागतः ॥ ममोपदेशात्तन्वंगि लिंगस्यैकस्य दर्शनात् ॥ क्षेत्रस्य च प्रसादात्त्वं
परां मुक्तिमवाप्स्यसि ॥ ८४ ॥ ॥ पिंगलोवाच ॥ ॥ कस्मिन्क्षेत्रे परा मुक्तिः कस्य लिंगस्य दर्शनात् ॥ लभ्यते सहसा धर्म एतदिच्छामि
वेदितुम् ॥ ८५ ॥ ॥ धर्म उवाच ॥ ॥ अस्ति गुप्ततमं[7] क्षेत्रं महाकालवनं शुभम् ॥ सर्वेषामेव जंतूनां हेतुर्मोक्षस्य सर्वदा ॥ ८६ ॥ तस्मिन्क्षेत्र

१ चक्री—तैलपीडनयन्त्रम् । २ ध्वजः—सुरानिष्पादनालयः । ३ तेन ब्रह्मविदा सह—इ० पा० । ४ शयनम्—इ० पा० । ५ यथाकामं तथा सुखम्—इ० पा० । ६ धर्मस्य—इ० पा० ।
७ गुह्यतमम्—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वरे पुण्ये स्थाने[1] योजनविस्तृते ॥ लिंगं मोक्षप्रदं पुत्रि पूर्वस्यां दिशि संस्थितम्[2] ॥ तस्य दर्शनमात्रेण मुक्तिमाप्स्यसि पिंगले ॥ ८७ ॥ तस्य तद्वचनं श्रुत्वा धर्मस्य च यशस्विनि ॥ जगाम पिंगला तूर्णं यत्र तल्लिंगमुत्तमम् ॥ ददर्श परया भक्त्या पस्पर्श च पुनःपुनः ॥ ८८ ॥ दर्शनात्तस्य लिंगस्य तस्मिँल्लिंगे लयं गता ॥ अत्र चावसरे देवाः प्रोचुस्तत्रैव संस्थिताः ॥ ८९ ॥ अन्यजन्मनि पापिष्ठा मुक्ता त्वं पिंगलेक्षणा ॥ ९० ॥ अतो लोकेषु विख्यातः पिंगलेश्वरसंज्ञकः ॥ भविष्यति न संदेहो महापातकनाशनः ॥ ९१ ॥ दिशि पश्यंति ये गत्वा पूर्वस्यां पिंगलेश्वरम् ॥ तेषां शतक्रतुस्तुष्टः पूजां सम्यग्विधास्यति ॥ ९२ ॥ देवा वश्या भविष्यंति स्वर्गस्तेषां न संशयः ॥ भविष्यति च वशगा नगरी चामरावती ॥ ९३ ॥ धर्मो धनेन सहितः कुले तेषां न नश्यति ॥ लोको धर्मेण चरतां वशगः संभविष्यति ॥ पितॄणामक्षया तृप्तिर्भविष्यति न संशयः ॥ ९४ ॥ अश्वमेधसहस्रेण यत्पुण्यं समुदाहृतम् ॥ तत्सर्वं भविता सम्यक्पिंगलेश्वरदर्शनात् ॥ ९५ ॥ यानि लिंगानि क्षेत्रेऽस्मिन्गोप्यानि प्रकटानि च ॥ पूजितानि भवंतीह पिंगलेश्वरदर्शनात् ॥ ९६ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ पिंगलेश्वरदेवस्य शृणु कायावरोहणम् ॥ ९७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये पिंगलेश्वरमाहात्म्यवर्णनंनामैकाशीतितमोऽध्यायः ॥ ८१ ॥ ॥ छ ॥ ॥ महादेव उवाच ॥ ॥ कायावरोहणस्यापि उत्पत्तिं शृणु पार्वति ॥ यस्याः श्रवणमात्रेण न नरः[3] कायवान्भवेत् ॥ १ ॥ ब्रह्मणः सृष्टिकामस्य मनोर्वैवस्वतेऽन्तरे ॥ दक्षस्त्वजायतांगुष्ठाद्दक्षिणात्स प्रजापतिः ॥ २ ॥ वामादजायतांगुष्ठाद्भार्या तस्य महात्मनः ॥ तस्यां पञ्चाशतं कन्याः स एवाजनयत्प्रभुः ॥ ३ ॥ ताः सर्वाश्चानवद्यांगीः कन्याः कमललोचनाः ॥ पुत्रिकाः स्थापयामास नष्टपुत्रः प्रजापतिः ॥ ४ ॥ ददौ स दश धर्माय कश्यपाय त्रयोदश ॥ दिव्येन विधिना देवि सप्तविंशतिमिंदवे ॥ ५ ॥ रोहिणी वल्लभा जाता तस्य चन्द्रस्य सर्वदा ॥ षड्विंशतिकृते चन्द्रः शप्तो दक्षेण पार्वति ॥ ६ ॥ चंद्रेणापि तथा शप्तो दक्षः प्राचेतसः कृतः ॥ अयजत्सोऽश्वमेधेन भूत्वा प्राचेतसात्मजः ॥ ७ ॥ नामंत्रितोऽहं मोहेन दक्षेण पर्वतात्मजे ॥ तत्र देवनिकायानां यज्ञभागानशेषतः ॥ ८ ॥ हव्यवाहस्तदा युक्तो वहन्मंत्रैः समीरितः ॥ त्वया दृष्टो विशालाक्षि निरालंबेऽम्बरे स्थितः ॥ ९ ॥ स्मरंत्या पूर्ववैरं तु विज्ञप्तोऽहं त्वया प्रिये ॥ त्वं देवः सर्वदेवानां गतिश्च शरणं तथा ॥ १० ॥ त्वं यज्ञस्त्वं वषट्कारो होताऽध्वर्युस्त्वमेव च ॥ त्वया विना कथं यज्ञो

१ ख्याते–इ० पा० । २ विश्रुतम्–इ० पा० । ३ स नरः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वर्त्तते सर्वदेवप ॥ ११ ॥ देवानां भागधेयानि वहत्यग्निरयं भयात् ॥ सगर्वश्चावलिप्तश्च दक्षः प्राचेतसः किल ॥ १२ ॥ अनुस्मरन्पूर्ववैरं नैव
दास्यत्यशासितः ॥ कायहीनश्च कर्त्तव्यो दक्षो वह्निस्तथैव च ॥ १३ ॥ ये च यज्ञे समानीता देवा दक्षस्य शंकर ॥ ते सर्वे कायरहिताः कार्या
स्त्रिपुरसूदन ॥ १४ ॥ एवमुक्ते त्वया देवि मयाप्युक्तं वरानने ॥ पूर्वजन्मनि दक्षोऽयं पिता तव शुचिस्मिते ॥ १५ ॥ वह्निश्चादेशकारी च देवाः
क्रीडनकाः प्रिये ॥ मदीयं वचनं श्रुत्वा कृतः क्रोधस्त्वया प्रिये ॥ १६ ॥ ललाटे भ्रुकुटीं कृत्वा प्रोच्छ्वसंत्या पुनःपुनः ॥ क्रोधात्करेण
नासाग्रं मर्दितं बहुशस्तदा ॥ १७ ॥ तस्मिन्संमर्द्यमाने तु नासाग्रे पर्वतात्मजे ॥ जाता स्त्री भ्रुकुटीवक्त्रा चतुर्दंष्ट्रा त्रिलोचना ॥ १८ ॥ बद्धगोधां
गुलित्रा च कवचाबद्धमेखला ॥ सखड्गा सधनुष्का च सतूणा सपताकिनी ॥ १९ ॥ सहस्रास्या शतभुजा सहस्रचरणोदरी ॥ प्रतिकूलैः पदैर्देवि
कंपयंती तथा भुवम् ॥ २० ॥ कृतं नाम त्वया देवि तां दृष्ट्वा च तमोमयीम् ॥ भद्रकाली च माया च सर्वलोकनमस्कृते ॥ २१ ॥ मया सृष्टस्तु
पुरुषस्तादृशो लोमहर्षणः ॥ स चापि प्रांजलिर्भूत्वा मामुवाच पुनःपुनः ॥ आज्ञापय सुरेशान किं करोमि जगत्प्रभो ॥२२॥ ततो देवि मयाज्ञतो
भावं ज्ञात्वा त्वदीयकम् ॥ कृत्वा नाम मनोज्ञं तु वीरभद्र इति स्मृतः ॥ २३ ॥ वीरभद्र ममादेशाद्भद्रकाल्या सहानया ॥ प्राचेतसात्मजं दक्षं सगर्वं
सहदैवतम् ॥ २४ ॥ विध्वंसय गणाध्यक्ष सयज्ञं सपरिग्रहम् ॥ दत्तं मया महत्सैन्यमसंख्येयगुणस्य च ॥ २५ ॥ त्वयापि भद्रकाल्यास्तु दत्तं सैन्यं
भयावहम् ॥ कपालकर्त्रिकाहस्तं मातृणां गणमक्षयम् ॥ २६ ॥ ततस्तौ तेन सैन्येन महतातिसमावृतौ ॥ जग्मतुस्तत्र यत्रास्ते दक्षः प्राचेतसो
यजन् ॥ २७ ॥ देवैः परिवृतो देवि सदस्यैर्ब्राह्मणैः सह ॥ ततो देवाः सुरुद्धास्ते तेन सैन्येन पार्वति ॥ विश्रब्धा मंत्रपूतं तु पिबंतः सोममध्वरे ॥
॥ २८ ॥ त्रिनेत्रेण त्रिशूलेन त्रिदशाधिप ईश्वरः ॥ त्रासितः सहसा शक्रो गणेनाध्वरमध्यगः ॥ २९ ॥ यमाख्येन गणेनैव यमकल्पप्रभेण च ॥
सोमपाने प्रसक्तश्च यमश्चाकर्षितोऽध्वरे॥३०॥ पाशेन वरुणो बद्धः पाशेन गणपेन तु ॥ पश्चिमाशाधिपो वीरः प्राणेन परमेश्वरि ॥३१॥ ताडितोऽ
निल एवाथ उत्तरे नरवाहनः ॥ उत्तराशाधिपो देवि निधानैः सहितोऽध्वरे ॥ वीरभद्रनियुक्तास्ते चक्रुर्युद्धं सुदारुणम् ॥ ३२ ॥ अथ युद्धं चकारो
ग्रैर्भद्रकाली भयावहा ॥ विकराली महाकाली कालिका कलशोदरी ॥ ३३ ॥ प्रज्वालज्वलनाकारा शुष्कमांसातिभैरवा ॥ एताश्चान्याश्च शतशो
नरमालाविभूषणाः ॥ ३४ ॥ कपालकर्त्रिकाहस्ता जघ्नुर्देवगणांस्तदा ॥ इति मातृगणं क्रुद्धं मर्दयंतं सुरांस्तदा ॥ दृष्ट्वाभ्युपगता देवास्तुषिता युद्धला

१ भद्रकालीति विख्याता सर्वलोकनमस्कृता–इ०पा० । २ गणेश्वराः–इ० पा० । ३ महासुरान्–इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लसाः ॥३५॥ केचिच्च चिक्षिपुः शक्तीः केचित्प्रासांस्तथापरे ॥ केचिच्च तोमरैस्तीक्ष्णैः केचित्खड्गैश्च पट्टिशैः ॥३६॥ अर्दितो मातृसंघस्तु पीडिताः प्रमथा यदा ॥ भद्रकाली तदा क्रुद्धा गदया शरवृष्टिभिः ॥ ३७ ॥ खड्गादिभिः षडर्कांशुः पीडयामास संयुगे ॥ भगस्य नेत्रे पूष्णस्तु दशनाः सूदिता मुखात् ॥ ३८ ॥ करान्दिनकरस्यैव चरणौ भास्करस्य च ॥ मुशलेन हता येऽष्टौ वसवो रणकोविदाः ॥ ३९ ॥ वमन्तो रुधिरं तेऽपि नष्टा जर्जरमस्तकाः ॥ विदेहाश्च कृता युद्धे तुषिता रणगर्विताः ॥ ४० ॥ बद्धः प्राचेतसो दक्षः पाशेन सुदृढेन च ॥ शेषाश्च त्रिदशा भीता ब्रह्माणं शरणं गताः ॥ ४१ ॥ वृत्तांतः कथितः सर्वो विस्तरेण यथा तथा ॥ आद्या ये तुषिता देवा विदेहाश्चैव ते कृताः ॥ ४२ ॥ नष्टाश्च वसवो देवाः पीडिता भास्करा रणे ॥ न ज्ञायते सहस्राक्षो न यमो न धनेश्वरः ॥ वरुणो यादसां नाथः क्व गतः परमेश्वरः ॥ ४३ ॥ भद्रकाल्या हतं सर्वं वीरभद्रगणेन च ॥ भग्नश्च यज्ञयूपो वै विध्वस्तं कलशं तदा ॥ ४४ ॥ प्रदीपिता महाशाला भग्नं वै यज्ञतोरणम् ॥ तेषां तु वचनं श्रुत्वा ब्रह्मा लोकपितामहः ॥ आजगाम कृपाविष्टो यत्राहं मन्दरे स्थितः ॥ ४५ ॥ स्तुतिं कृत्वा मदीयां तु वाक्यमुक्तमिदं तदा ॥ आद्या ये तुषिता देवा विदेहाश्चैव ते कृताः ॥ ॥ ४६ ॥ भद्रकाल्या महादेव वसवो जर्जरीकृताः ॥ पीडिता भास्करा युद्धे शेषा नष्टा दिशो गताः ॥ ४७ ॥ कायावरोहणं देव तुषितानां कथं भवेत् ॥ ब्रह्मणो वचनं श्रुत्वा मया प्रोक्तं वरानने ॥ ४८ ॥ महाकालवने क्षेत्रे गच्छन्तु तुषितास्त्वमी ॥ लकुटीशो गतो यत्र कायावरोहणाह्वम् ॥ ४९ ॥ ब्राह्मणाश्च ममादेशाच्चतुःशिष्यैः समन्विताः ॥ द्वापरे समतिक्रांते प्राप्ते कलियुगे तथा ॥ ५० ॥ तत्र कायमनुप्राप्ता मम शिष्या ममोपमाः ॥ अवसंत क्षितौ धन्या रक्षणार्थं द्विजन्मनाम् ॥ ५१ ॥ क्षेत्रस्य दक्षिणे तस्य विद्यते लिंगमुत्तमम् ॥ सर्वसंपत्करं दिव्यं सिद्धानां कायदायकम् ॥ ५२ ॥ प्रसादात्तस्य लिंगस्य कायान्प्राप्स्यंत्यमी सुराः ॥ मदीयं वचनं श्रुत्वा गतास्ते तुषिताः प्रिये ॥ ५३ ॥ मुदिता ब्रह्मणा सार्द्धं यत्र तल्लिंगमुत्तमम् ॥ प्रसादात्तस्य लिंगस्य प्राप्तं कायमनुत्तमम् ॥ ५४ ॥ पुनस्ते तादृशा जातास्तुषिता यादृशाऽभवन् ॥ अतो देवैः कृतं नाम कायावरोहणेश्वरः ॥ समीहितप्रदो नित्यं ख्यातो देवो भविष्यति ॥ ५५ ॥ ये गत्वा दक्षिणामाशां देवं कायावरोहणम् ॥ पश्यन्ति परया भक्त्या यमस्तेषां पिता भवेत् ॥ ५६ ॥ जन्मकोटिसहस्रैस्तु यत्पापं समुपार्जितम् ॥ तत्सर्वं नाशमायाति दर्शनादेव नान्यथा ॥ ५७ ॥ स्वकर्मणा गता ये च नरके पितरो गणाः ॥ दर्शनात्तस्य लिंगस्य तेषां मुक्तिर्भविष्यति ॥ ५८ ॥ ये पश्यंति प्रसंगेन देवं कायावरोहणम् ॥ न तेषां पुनरावृत्तिः

१ तत्र–इ० पा० । २ पितृत्वात्पालकः–इत्यर्थः । यमस्तैस्तपिता भवेत्–इ० पा० । ३ लिंगम्–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

कल्पकोटिशतैरपि ॥ ५९ ॥ स्पर्शनात्तस्य लिंगस्य पापिनोपि हि ये नराः ॥ ते यास्यंति परं स्थानं सर्वपापविवर्जितम् ॥ ६० ॥ शाठ्येन पूजितो देवः कायावरोहणेश्वरः ॥ ददाति राज्यं भोगांश्च स्वर्गलोकं सनातनम् ॥ ६१ ॥ द्वादश्यां ये प्रपश्यंति स्नात्वा कायावरोहणम् ॥ ते भित्त्वा ब्रह्मसदनं यास्यन्ति परमां गतिम् ॥ ६२ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ कायावरोहणेशस्य बिल्वेश्वरमथो शृणु ॥ ६३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्य उमामहेश्वरसंवादे कायावरोहणेश्वरमाहात्म्यवर्णनंनाम द्व्यशीतितमोऽध्यायः ॥ ८२ ॥ ॥ छ ॥ ॥ श्रीहर उवाच ॥ ॥ बिल्वेश्वरस्य माहात्म्यं शृणु सुन्दरि सादरम् ॥ यस्य श्रवणमात्रेण मुच्यते सर्वपातकैः ॥ १ ॥ आदिकल्पे महादेवि लोकानामनुकम्पया ॥ कल्पवृक्षास्ततो जाता ब्रह्मणो ध्यायतः पुरा ॥ २ ॥ तेषां मध्ये बिल्ववृक्षः श्रीवृक्ष इति गीयते ॥ अधस्तात्तस्य वृक्षस्य पुरुषः कांचनप्रभः ॥ ३ ॥ उपविष्टस्तदा दृष्टो ब्रह्मणा लोककर्तृणा ॥ फलानि तस्य पत्राणि विविधानि निरन्तरम् ॥ ४ ॥ भक्षयत्यतिसंहृष्टो हृद्यानि च मृदूनि च ॥ बद्धगोधांगुलित्रश्च शरी धन्वी तथैव च ॥ ५ ॥ खड्गी किरीटमाली च कुण्डली कवची तथा ॥ महोरस्को महोत्साहः सिंहसंहननो युवा ॥ ६ ॥ ब्रह्मणा च कृतं नाम बिल्व इत्यभिविश्रुतम् ॥ तमिन्द्रो वरयामास राजा त्वं भूतले भव ॥ ७ ॥ त्रिविष्टपस्य भूमिस्थः सखाभूतो मम प्रियः ॥ ददामि ते वैजयन्तीं मालामम्लानपंकजाम् ॥ ८ ॥ यस्याः प्रभावतः शस्त्रं रणे न[1] प्रभविष्यति॥सोऽब्रवीद्यदि मे वज्रमायुधं त्वं प्रयच्छसि ॥९॥ तत्स्यां पृथिव्यां राजाहं नान्यथा रोचते मम॥ततोऽहं पालयिष्यामि सत्येनेमां वसुन्धराम्॥१०॥ ॥इंद्र उवाच ॥ ॥ एवं भवतु भद्रं ते भव राजा प्रजाहितः॥स्मरणादेव वज्रस्ते करे यास्यति नान्यथा ॥११॥ स एवमुक्तस्तेजस्वी बिल्वो राजा बभूव ह ॥ कपिलोनाम धर्मात्मा वेदवेदांगपारगः ॥१२॥ सखा बभूव बिल्वस्य तस्य विप्रर्षिसत्तमः ॥ स तेन सह संगम्य सुखासीनो वरानने ॥१३॥ चक्रे कथा विचित्रार्थाः प्रीयमाणः पुनःपुनः ॥ तथा कथान्तरे वादः परस्परमभूत्तयोः ॥१४॥ दानं प्रधानं तीर्थं तु बिल्वेनोक्तं पुनःपुनः ॥ ब्रह्म[2] श्रेष्ठं तपः श्रेष्ठमित्युक्तं कपिलेन तु ॥ १५ ॥ ॥ बिल्व उवाच ॥ ॥ दानाद्राज्यं सुखं भोगा ऐश्वर्यं स्वर्गमक्षयम् ॥ प्राप्यते द्विजशार्दूल कथं ब्रह्म प्रशंससि ॥ १६ ॥ ॥ कपिल उवाच ॥ ॥ वेदाद्यज्ञाः प्रवर्त्तंते वेदादिष्टिश्च कामिका ॥ प्रवर्त्तंते क्रिया वेदाद्वेदमूलमिदं जगत् ॥ १७ ॥



१ प्रहारिष्यति रणे न वै–इ० पा० । २ व्रतम्–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ बिल्व उवाच ॥ ॥ संसारे पार्थिवाः श्रेष्ठाः समर्था लोकपालने ॥ लोकपालोपमा लोके कथं ब्रह्म प्रशंससि ॥ १८ ॥ ॥ कपिल उवाच ॥ ॥ मुख्या वै ब्राह्मणाः प्रोक्ताः शापानुग्रहकारकाः ॥ पितरः पार्थिवानां तु किं त्वं बिल्व न मन्यसे ॥ १९ ॥ एवं कौतूहले जाते कपिलो द्विजसत्तमः ॥ बिल्वेन ताडितो मूर्ध्नि वज्रेणानतपर्वणा ॥ २० ॥ वज्रेण स द्विधा छिन्नः कपिलो ब्रह्मविद्यया ॥ संधार्य स्वशरीरं तु ममांतिकमुपागतः ॥ २१ ॥ स्तुतोऽहं विविधैः स्तोत्रैः सम्यगाराधितो ह्यहम् ॥ मया दत्तमव्ययत्वं कुलिशाद्ब्राह्मणस्य तु ॥ २२ ॥ द्विजः समागतो बिल्वं पुनः सख्यमभूत्तयोः ॥ पुनस्तु तादृशो वादः संजातः पर्वतात्मजे ॥ २३ ॥ वामपादेन चाप्येनं बिल्वो विप्रमताडयत् ॥ पुनश्च वज्रमादाय जघानैनं तदा दृढम् ॥ २४ ॥ न मृतिं न व्यथां तस्य तद्वज्रमकरोत्पुनः ॥ अवध्यत्वमथो ज्ञात्वा बिल्वस्तस्य महात्मनः ॥ २५ ॥ नारायणमथाराध्य प्रार्थयामास चेप्सितम् ॥ वरदोऽस्मीति तुष्टेन विष्णुना स च मोदितः ॥ प्रोवाच प्रणतो विष्णुमिदं देवि महामनाः ॥ २६ ॥ ॥ बिल्व उवाच ॥ ॥ कपिलोनाम विप्रर्षिरवध्योऽक्षय एव च ॥ सखा मम हृषीकेश स च मामाह नित्यशः ॥ बिभेम्यहं न देवस्य राक्षसस्यासुरस्य च ॥ ॥ २७ ॥ पिशाचस्यापि यक्षस्य न चैवान्यस्य कस्यचित् ॥ बिभेमीति यथा ब्रूयां तथा त्वं कर्त्तुमर्हसि ॥ २८ ॥ एवमुक्तस्तु बिल्वेन स देवः पुरुषोत्तमः ॥ एवं भविष्यतीत्युक्त्वा कपिलस्याश्रमं गतः ॥२९॥ स प्रविश्याश्रमं देवं कपिलेन प्रपूजितः ॥ कपिलं प्रत्युवाचेदं सामपूर्वं जनार्दनः ॥ ॥ ३० ॥ भगवन्ब्राह्मणश्रेष्ठ वेदवेदांगपारग ॥ वरमेकं वृणोम्यद्य विप्रेंद्र दातुमर्हसि ॥ ३१ ॥ प्रसादितोऽहं बिल्वेन नृपेंद्रेण पुनःपुनः ॥ वरदोऽस्मीति चाप्युक्तो वरं वव्रे महामुने ॥ ३२ ॥ त्वया प्रोक्तं बिभेमीति ब्रूहि तस्मादनुग्रहात् ॥ अभीतस्त्वं तथाप्यद्य मदर्थं तु वद प्रभो ॥ ३३ ॥ कपिलस्त्वेवमुक्तो वै विष्णुना मधुरं वचः ॥ उवाच न बिभेमीति भूयोभूयो जनार्दन ॥ ३४ ॥ नाहं वक्ष्ये बिभेमीति तेनोक्तं नोच्यते मया ॥ एतच्छ्रुत्वा वचस्तस्य कपिलस्य जनार्दनः ॥ उवाच चक्रमुद्यम्य भयं विप्रस्य दर्शयन् ॥ ३५ ॥ न चेद्वक्ष्यसि भीतोऽहं चक्रं ते प्रहरामि वै ॥ ३६ ॥ ॥ ॥ कपिल उवाच ॥ ॥ किं वृथा प्रियचक्रस्य विष्णो क्लेशमिहेच्छसि ॥ नाहं चक्रस्य ते गम्यः प्रसादात्त्र्यंबकस्य हि ॥ ३७ ॥ ततः स

१ त्वया--कपिलेन--अहं बिभेमि--इति वक्तव्यम्--इति तेन बिल्वाख्येन--नृपेण अहं वृतोऽस्मि--मया तु तस्मै वरो दत्तः--अतस्त्वया अभीतेनापि--अहं बिभेमि इति तदग्रे वक्तव्यम्--इति विष्णोरभीप्सितवराभिप्रायः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

मुष्टिमादाय कुशानां कपिलस्तदा ॥ वासुदेवं समासाद्य तिष्ठतिष्ठेत्यभाषत ॥ ३८ ॥ अद्य गर्वं च दर्पं च बलं यच्च तवाद्भुतम् ॥ तत्सर्वं नाशयिष्यामि तिष्ठेदानीं जनार्दन ॥ ३९ ॥ ततो युद्धं समभवत्तुमुलं लोमहर्षणम् ॥ निमेषांतरमात्रं तु कृष्णस्य कपिलस्य च ॥ ४० ॥ दिव्यास्त्राणां कुशानां च युद्धं समभवद्दृढम् ॥ निरालंबेंऽबरे देवि देवानां भयमाविशत् ॥ ४१ ॥ एतस्मिन्नंतरे ब्रह्मा सुरैः परिवृतस्तदा ॥ आजगामातिसंतप्तः कृष्णं वचनमब्रवीत् ॥ ४२ ॥ भगवन्भूतभव्येश भवबंधभयापह ॥ हृषीकेश हृषीकेश सृष्टिसंहारकारक ॥ ४३ ॥ समाराध्य जगन्नाथ शक्राद्यास्त्रिदिवौकसः ॥ वसंति मुदिताः सर्वे सर्वकामसमन्विताः ॥ ४४ ॥ आब्रह्मस्तंबपर्यंतं त्रैलोक्यं सचराचरम् ॥ उत्पादितं धृतं व्याप्तं विष्णुना प्रभविष्णुना ॥ ४५ ॥ तेनैकेन विशुद्धेन सर्वगेन महात्मना ॥ इति स्म मुनयः सर्वे उदिता मुनिसत्तमाः ॥ ४६ ॥ वदंति कारणं चास्य त्रैलोक्यस्य जनार्दनः ॥ देवदानवदैत्यैश्च मुनिचारणपन्नगैः ॥ ४७ ॥ वरार्थिभिश्च प्रवरैः पूज्यसे गरुडध्वज ॥ किं भवानेव गोविंद वृथा युध्यसि स द्विजैः ॥ ॥ ४८ ॥ कपिलस्य च विप्रस्य हराच्छंध्वरस्य च ॥ किं न वेत्सि यथा ह्येष प्रसादात्पारमेश्वरात् ॥ ४९ ॥ अवध्यत्वमनुप्राप्तो ह्यजेयत्वं च संयुगे ॥ न चैवं त्वद्विधा देव ब्राह्मणेषु विकुर्वते ॥ ५० ॥ ब्रह्म च ब्रह्मणो मूलं त्वयैव प्राक्प्रतिश्रुतम् ॥ तस्मादाशु निवर्तस्व मत्वैनं ब्राह्मणं विभो ॥ ५१ ॥ इत्थं निशम्य देवेशो वाक्यं ब्रह्ममुखाच्च्युतम् ॥ योगेन तद्बलं ज्ञात्वा कपिलस्य तु शंकरम् ॥ ५२ ॥ जगाम परमं लोकं पूज्यमानस्त्रिविष्टपैः ॥ गते जनार्दने बिल्वो विललाप पुनःपुनः ॥ ५३ ॥ युद्धं सुदारुणं श्रुत्वा कृष्णस्य कपिलस्य च ॥ कथं जेष्यामि कपिलं कथं मे निर्वृतिर्भवेत् ॥ कस्याहं शरणं यामि को मे त्राता भविष्यति ॥ ५४ ॥ न जितः कपिलो युद्धे विष्णुना प्रभविष्णुना ॥ मया संस्पर्द्धते नित्यं कथं जेयो भविष्यति ॥ ५५ ॥ अजेया ब्राह्मणा युद्धे शापानुग्रहकारकाः ॥ भस्म कुर्युर्जगत्सर्वं सदेवासुरमानुषम् ॥ ५६ ॥ ब्राह्मं हि परमं तेजो देवैरपि दुरासदम् ॥ एवं विलपतस्तस्य वासवः समुपागतः ॥ ५७ ॥ विलपंतं कृशं बिल्वं वज्रहस्तमवेक्ष्य सः ॥ ममत्वाकृष्टहृदयः प्रत्युवाच पुरंदरः ॥५८॥ अलं शोकेन भूपाल शृणु मे वचनं परम् ॥ यदाहं पीडितो युद्धे शंबरेण दुरात्मना ॥ बलिष्ठेन सगर्वेण तदा पृष्टो मया गुरुः ॥५९॥ बृहस्पतिर्महातेजास्तेनोक्तं तु तदा नृप ॥ गच्छ शक्र ममादेशान्महाकालवनं शुभम् ॥ ६० ॥ यत्र संति सुदिव्यानि लिंगानि विविधानि च ॥ भुक्तिमुक्तिकराण्येव वांछितार्थप्रदानि च ॥६१॥ तेषां मध्ये लिंगमेकमाराधय शचीपते ॥ यस्य दर्शन



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मात्रेण रणे धृष्टो भविष्यसि ॥ तस्य तद्वचनाद्बिल्व सम्यगाराधना कृता ॥ ६२ ॥ मया लिंगस्य हर्षेण जितो वै शंबरस्तदा ॥ प्रसिद्धिं तु गतो देवः स चेंद्रेश्वरसंज्ञकः ॥ ६३ ॥ तस्मात्त्वं पश्चिमामाशां गत्वा क्षेत्रस्य तस्य वै ॥ समाराधय यत्नेन लिंगं वरुणपूजितम् ॥६४॥ तल्लिंगं त्रिषु लोकेषु त्वन्नाम्ना ख्यातिमेष्यति ॥ कपिलस्त्वत्सखा विप्रो जितोऽस्मीति वदिष्यति ॥ तस्य लिंगस्य माहात्म्यान्मित्रभावं गमिष्यति ॥ ६५ ॥ इत्युक्त्वा तु गते शक्रे देवलोकं यशस्विनि ॥ पूजयामास भावेन पुष्पैर्दिव्यैः सुगंधिभिः ॥ ६६ ॥ जगाम बिल्वो भूपालो महाकालवनं शुभम् ॥ ददर्श पश्चिमे भागे लिंगं त्रिदशपूजितम् ॥ ६७ ॥ मुक्ताफलैश्च रत्नैश्च वासोभिर्भूषणैस्तथा ॥ एतस्मिन्नंतरे चैव कपिलोऽपि समागतः ॥ ६८ ॥ ददर्श बिल्वं भूपालं पूजयंतं पुनःपुनः ॥ शरीरे तस्य बिल्वस्य मदीयं रूपमुत्तमम् ॥ दृष्ट्वा मत्वा महादेवं जितोऽस्मीति द्विजोऽब्रवीत् ॥६९॥ प्रार्थयामि त्वया सख्यमनंतं शिवसंनिधौ ॥ एवमुक्तस्तदा बिल्वः कपिलेन महात्मना ॥ ७० ॥ प्रसन्नः प्रांजलिर्भूत्वा कपिलं द्विजसत्तमम् ॥ एवं भवतु भद्रं ते कृतार्थोऽहं महात्मना ॥७१॥ सख्यं तदेव भवतु शश्वद्वदसि मन्यसे ॥ एवमन्योन्यमुक्त्वा तौ कृत्वा सख्यमनुत्तमम् ॥७२॥ चिक्रीडतुश्चिरं कालं परं हर्षमुपागतौ ॥ तस्य लिंगस्य माहात्म्याद्भूयो राज्यं चकार सः ॥ ७३ ॥ स हि मित्रेण भूपालो बिल्वो देवि मुदान्वितः ॥ तदाप्रभृति विख्यातो देवो बिल्वेश्वरः क्षितौ ॥ बिल्वेनाराधितो लोके वांछितार्थफलप्रदः ॥ ७४ ॥ ये पश्यंति विशालाक्षि देवं बिल्वेश्वरं परम् ॥ ते कृतार्था भविष्यंति सर्वपातकवर्जिताः॥७५॥येऽनुमोदंति देवस्य दर्शनं पर्वतात्मजे ॥ तेऽपि पापविनिर्मुक्ताः प्रयांति मम मंदिरे ॥७६॥ समतीतं भविष्यं च कुलानामयुतं नरः ॥ मम लोकं नयत्याशु तस्य लिंगस्य दर्शनात् ॥ ७७ ॥ प्रयांति पितरो हृष्टा मम लोके ह्यतंद्रिताः ॥ विमुक्ताः पातकैर्घोरैः कृत्वा लिंगस्य दर्शनम् ॥७८॥ कृत्वापि पातकं घोरं ब्रह्महत्यादिकं नरः ॥ तत्पापं विलयं याति श्रीबिल्वेश्वरदर्शनात् ॥ ७९ ॥ या तिथिः श्रूयते देवि कृष्णपक्षे त्रयोदशी ॥ सा प्रोक्ता वल्लभा तस्य सर्वपातकनाशिनी ॥ ८० ॥ येऽर्चयंति नरास्तस्यां देवं बिल्वेश्वरं प्रिये ॥ न तेषां पुनरावृत्तिर्घोरसंसारगह्वरे ॥ ८१ ॥ कर्मणा मनसा वाचा यत्पापं समुपार्जितम् ॥ तत्क्षालयति देवोऽसौ तिथौ तस्यां समर्चितः ॥ ८२ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ बिल्वेश्वरस्य देवस्य श्रूयतामुत्तरेश्वरम् ॥ ८३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये बिल्वेश्वरमाहात्म्यवर्णनंनाम त्र्यशीतितमोऽध्यायः ॥ ८३ ॥ ॥ छ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ उत्तरेश्वरमाहात्म्यमशेषपापनाशनम् ॥ जन्ममृत्युजराव्याधिस्फोटनं शृणु पार्वति ॥ १ ॥ अयोध्यायामतिख्यातकुलोत्पन्नश्च पार्थिवः ॥ सुधीः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 
 


परीक्षिन्नामा च मृगयामगमत्स च ॥ २ ॥ मृगमनुससाराथ मृगो दूरमपासरत् ॥ ३ ॥ तदाध्वनि जातश्रमः क्षुत्तृष्णाभिभूतः कस्मिंश्चिद्वनोद्देशे नीलवनमपश्यच्चाविवेश ॥ ४ ॥ तस्य वनखण्डस्य दक्षिणभागे सरो दृष्ट्वा साश्व एव व्यगाहत ॥ ५ ॥ अथाश्वस्थः सन्मृणालमश्वस्याग्रतो निक्षिप्य पुष्करिणीं समुपाविशत् ॥ ६ ॥ शयितस्ततः शयानो गीतमशृणोत् ॥ ७ ॥ स श्रुत्वाचिंतयन्नेह मनुष्यगतिं प्रपश्यामि ॥ ८ ॥ कस्य खल्वयं गीतशब्द इत्यवलोकयामास ॥ ९ ॥ अथापश्यत्कन्यां परमरूपदर्शनीयां पुष्पाणि विचिन्वंतीं चाथ राजा समीपे पर्यक्रामत् ॥ १० ॥ तामब्रवीद्राजा कस्यासि त्वं कन्या परमरूपदर्शनीया पुष्पाणि विचिन्वंती ॥ ११ ॥ साथ राजसमीपे गत्वेति प्रोवाच कन्यास्मीति ॥ १२ ॥ ॥ ॥ राजोवाच ॥ ॥ अर्थी तवास्मीति ॥ १३ ॥ अथोवाच कन्या ॥ समयेनाहं त्वया शक्योपालब्धुं नान्यथेति ॥ १४ ॥ तां राजा समपृच्छत्कस्ते समय इति ॥ १५ ॥ ततः कन्या तमुवाच नोदकं दर्शयितव्यमिति ॥ १६ ॥ राजा बाढमित्युक्त्वा तां समागम्य तया सहास्ते ॥ १७ ॥ तत्रैवासन्ने राजनि सेना त्वागच्छत् तया सहोपविष्टं राजानं परिवार्य चातिष्ठत् ॥ १८ ॥ सभाजितश्च राजा तथैव शिबिकया प्रायात् ॥ अथ झटिति तया सह स्वं नगरमनुप्राप्य रहसि तया सह रममाणः सन्नान्यं किंचिदपश्यदथ प्रधानोमात्यस्तस्याभ्याशचरास्ताः स्त्रियोऽभ्यपृच्छत् ॥ १९ ॥ किमत्र प्रयोजनं विद्यते इत्यब्रुवंस्ताः स्त्रियोपूर्वमेव पश्यामस्तदुदकं नात्राश्रियत इति ॥ २० ॥ अथामात्यश्च निरुदकं कारयित्वा दारुवृक्षं वृद्धपुष्पफलं शरद्युपलभ्य राजानामब्रवीत् ॥ वनमिदमनुदकं साध्वत्र रम्यतामिति ॥ २१ ॥ स तस्य वचनात्तयैव सह देव्या वनं प्राविशत् ॥ २२ ॥ सकलत्रस्तस्मिन्वने रम्ये तयैव सह रेमे ॥ २३ ॥ प्रविश्य च राजा सह प्रियया सुधाधवलसलिलपूर्णां वापीमपश्यत् ॥ २४ ॥ वापीं दर्दुरैः पूर्णां दृष्ट्वैव च तां तस्या एव तीरे तया देव्यातिष्ठत् ॥ २५ ॥ अथ तां देवीं राजाब्रवीत् ॥ शांततरं वापीसलिलमिति ॥ २६ ॥ सा च तद्वचः श्रुत्वा तीर्थवापीं न्यमज्जन्न पुनरुदमज्जत् ॥ तां मृगयमाणो राजा नापश्यत् ॥ २७ ॥ वापीं दर्दुरैः पूर्णां दृष्ट्वा आज्ञापयामास भृत्यान्सर्वदर्दुरवधः क्रियतामिति ॥ २८ ॥ यो ममार्थी स तैर्दर्दुरैरुपायनैर्मामनुतिष्ठेत् ॥ २९ ॥ अथ कश्चिन्महान्दर्दुरो दर्दुरवधे क्रियमाणे सर्वासु दिक्ष्वभ्यगात् ॥ ३० ॥ उपेत्य चैनमुवाचेदं ज्ञात्वा क्रोधवशंगतम् ॥ प्रसादं कुरु नार्हसि दर्दुराणामनपराधिनां वधं कर्तुमिति ॥ ॥ ३१ ॥ श्लोकश्चात्र भवति ॥ मा दर्दुरान्प्रभिंद्यास्त्वं कोपं संधारयाच्युत ॥ प्रक्षीयते महाधर्मो जनानां परिजानताम् ॥ ३२ ॥ तमेवं वादिनमिष्ट



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जनवियोगे शोकपरीतात्मानं स राजा प्रोवाच ॥ न हि काममप्येतन्निष्कामेन निबर्हणीया इति ॥३३॥ एतैर्दुरात्मभिर्मे ह्री भक्षिता सर्वथैव त्विमे वध्या दर्दुराः ॥ नार्हसि विद्वन्नुपरोद्धुमिति ॥ ३४ ॥ स तद्वाक्यमुपश्रुत्य व्यथितेंद्रियमनाः प्रोवाच प्रसीद राजन्नहमायुर्नाम भूपालः ॥ ३५ ॥ प्राप्ता सा मम दुहिता ॥ सा कन्या नागलोकं गता ॥ अत्रास्ते नागचूडो नागराजः ॥ स्मृता आगमिष्यति ॥ ३६ ॥ तामब्रवीद्राजा तां स्मृत्वा नीय मे दीयतामिति ॥ ३७ ॥ अथैनां स्मृत्वा राज्ञे अदात् ॥ अब्रवीच्च ॥ ३८ ॥ मयावहसितो गालवो महान्मुनिः तपसा कर्शितांगः ॥ क्षमेश्वरो दर्दुरबाल्यात्प्रकोपितः तेनाहं शप्तः यन्मामनादृत्य दर्दुरबाल्यादवहसितस्तस्माद्दर्दुरो भविष्यसि ॥ ३९ ॥ प्रसादितस्तु विप्रः प्रत्युवाच ॥ ॥ ४० ॥ अवितथोऽयं मम शापस्तस्मादन्यजन्मनि दर्दुरराजो भूत्वा त्वं हि दुहितरमिक्ष्वाकुकुलोत्पन्नाय सर्वगुणान्विताय दत्त्वा यदा यास्यसि महाकालवने तस्योत्तरदिग्भागे तदा लिंगस्य दर्शनेन मुक्तिमवाप्स्यसि ॥ ४१ ॥ दुहिता कियत्पातालं यास्यति स्मृता चागमिष्यति ॥ स्वस्ति तेऽस्तु साधयिष्यामि कार्याणि, इत्युक्त्वा दर्दुरो महाकालवनमगच्छत् ॥ ४२ ॥ तस्योत्तरे लिंगं ददर्श तस्य दर्शनादनेकमाणिक्यरचितं सिद्धगन्धर्वसेवितं विमानवरमारुह्य शक्रलोकं गतः ॥ ४३ ॥ तस्य माहात्म्यमवलोक्य देवाचार्यो बृहस्पतिर्वाक्यं जगाद ॥ ४४ ॥ अहो लिंगस्य माहात्म्यमहो लिंगस्य वैभवम् ॥ संप्राप्तो वासवं लोकं शापभ्रष्टो हि दर्दुरः ॥ ४५ ॥ आयुराख्यो हि भूपालो मुक्तो दर्दुरतां गतः ॥ ॥ ४६ ॥ इति तद्वचनं श्रुत्वा देवाचार्यस्य पार्वति ॥ देवास्ते हृष्टमनसो नाम चक्रुः समाहिताः ॥ ४७ ॥ यस्माद्दर्दुरभूपालो मुक्तो दर्दुरयोनितः ॥ दर्शनात्तस्य लिंगस्य तस्मात्ख्यातो भविष्यति ॥ ४८ ॥ उत्तरेश्वरदेवश्च शापपापप्रणोदकः ॥ इत्युक्त्वा त्रिदशैः सर्वैः पूजितो ह्युत्तरेश्वरः ॥ ॥ ४९ ॥ भुक्तिमुक्तिप्रदो देवि महापातकनाशनः ॥ क्षेत्रस्य रक्षणार्थाय नियुक्तो यो मया गणः ॥ दर्दुरो हि दुराधर्षः स चापीश्वरतां गतः ॥ ॥ ५० ॥ उत्तराशामथो गत्वा यः पश्येदुत्तरेश्वरम् ॥ स सर्वैश्वर्यसंयुक्तो याति लोकमथोत्तरम् ॥ ५१ ॥ सुभगः सर्वदा दांतः सुरूपः पुत्रवानिति ॥ नीरोगः पुण्यशीलश्च जायते सप्तजन्म च ॥ ५२ ॥ या वृद्धिस्तु कुबेरस्य शक्रस्य च यमस्य च ॥ वरुणस्य च या वृद्धिः सा वृद्धिरुत्तरोत्तरा ॥ जायते नात्र सन्देह उत्तरेश्वरदर्शनात् ॥ ५३ ॥ कृष्णपक्षे चतुर्दश्यां ये पश्यंति यशस्विनि ॥ उत्तरेश्वरसंज्ञं तु ते कृतार्थाः कलौ युगे ॥ ५४ ॥ किं दानैः किं तपोभिश्च किं यज्ञैर्बहुदक्षिणैः ॥ दर्शनाल्लभते राज्यं स्वर्गं मोक्षं क्रमेण तु ॥ ५५ ॥ आजन्म च कृतं पापं स्वल्पं वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





यदि वा बहु ॥ तत्सर्वं नाशमायाति उत्तरेश्वरदर्शनात् ॥ ५६ ॥ इत्येवं चतुराशीतिः संख्याता ईश्वरास्तव ॥ कथिता ये त्वया पृष्टा महाकालवने मया ॥ ५७ ॥ य एतेषां देवि यात्रां प्रतिलोमानुलोमतः ॥ करिष्यंति नरा भक्त्या ते यास्यंति परं पदम् ॥ ५८ ॥ यश्चापि पूजयेत्तत्र लिंगं भक्त्या तु मानवः ॥ स कुलं तारयत्येव पैतृकं मातृकं शतम् ॥ ५९ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ चतुराशीतिलिंगानां किं भूयः श्रोतुमिच्छसि ॥ ६० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्य उमामहेश्वरसंवाद उत्तरेश्वरलिंगमाहात्म्यवर्णनपूर्वकचतुरशीतिलिंगमाहात्म्यवर्णनंनाम चतुरशीतितमोऽध्यायः ॥ ८४ ॥ ॥ छ ॥ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥

इति श्रीस्कांदे महापुराणे पंचम आवन्त्यखण्डे द्वितीयमवन्तीस्थचतुरशीतिलिंगमाहात्म्यं समाप्तम् ॥ (५-२) ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना
स्वकीये "श्रीवेङ्कटेश्वर" ( स्टीम् ) मुद्रणालये मुद्रितम् ।
संवत् १९६६, शके १८३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति श्रीस्कान्दे महापुराणे पञ्चम आवन्त्यखण्डे चतुरशीतिलिंगमाहात्म्यं
द्वितीयं समाप्तम् ॥ ( ५–२ ) ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥इति श्रीस्कांदे महापुराणे पञ्चम आवन्त्यखंडेऽवंतीक्षेत्र—चतुरशीतिलिंगमाहात्म्ये समाप्ते ॥(५–१,–२)॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ श्रीस्कान्दे महापुराणे पञ्चम आवन्त्यखण्डे तृतीयं रेवाखण्डं प्रारभ्यते ॥(५-३)॥

३०—खं०५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीगणेशाय नमः ॥ ॥ ॐ नमः श्रीपुरुषोत्तमाय ॥ ॐ नमः श्रीनर्मदायै ॥ ॐ नमो हरिहरहिरण्यगर्भेभ्यो नमो व्यासवाल्मीकिशुकपराशरेभ्यो नमो गुरुगोब्राह्मणेभ्यः ॥ ॐ मज्जन्मातंगगण्डच्युतमदमदिरामोदमत्तालिमालं स्नानैः सिद्धांगनानां कुचयुगविगलत्कुंकुमासंगपिंगम् ॥ सायं प्रातर्मुनीनां कुसुमचयसमाच्छन्नतीरस्थवृक्षं पायाद्वो नर्मदाम्भः करिमकरकराक्रान्तरंहस्तरंगम् ॥ १ ॥ उभयतटपुण्यतीर्था प्रक्षालितसकललोकदुरितौघा ॥ देवमुनिमनुजवंद्या हरतु सदा नर्मदा दुरितम् ॥२॥ नाशयतु दुरितमखिलं भूतं भव्यं भवच्च भुवि भविनाम् ॥ सकलपवित्रितवसुधा पुण्यजला नर्मदा भवति ॥ ३ ॥ तटपुलिनं शिवदेवा यस्या यतयोऽपि कामयन्ते वा ॥ मुनिनिवह विहितसेवा शिवाय मम जायतां रेवा ॥ ४ ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥ देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ ५ ॥ नैमिषे पुण्यनिलये नानाऋषिनिषेविते ॥ शौनकः सत्रमासीनः सूतं पप्रच्छ विस्तरात् ॥ ६ ॥ मन्येऽहं धर्मनैपुण्यं त्वयि सूत सदार्चितम् ॥ पुण्यामृतकथावक्ता व्यासशिष्यस्त्वमेव हि ॥ ॥ ७ ॥ अतस्त्वां परिपृच्छामि धर्मतीर्थाश्रयं कवे ॥ बहूनि सन्ति तीर्थानि बहुशो मे श्रुतानि च ॥ ८ ॥ श्रुता दिव्यनदी ब्राह्मी तथा विष्णुनदी मया ॥ तृतीया न मया क्वापि श्रुता रौद्री सारिद्वरा ॥ ९ ॥ तां वेदगर्भां विख्यातां विबुधौघाभिवंदिताम् ॥ वद मे त्वं महाप्राज्ञ तीर्थपूगपरिष्कृताम् ॥ १० ॥ कं देशमाश्रिता रेवा कथं श्रीरुद्रसंभवा ॥ तत्संश्रितानि तीर्थानि यानि तानि वदस्व मे ॥ ११ ॥ ॥ सूत उवाच ॥ ॥ साधु पृष्टं कुलपते चरित्रं नर्मदाश्रितम् ॥ चित्रं पवित्रं दोषघ्नं श्रुतमुक्तं च सत्तम ॥ १२ ॥ वेदोपवेदवेदांगादीन्यभिव्यस्य पूरितः ॥ अष्टादशपुराणानां वक्ता सत्यवतीसुतः ॥ १३ ॥ तं नमस्कृत्य वक्ष्यामि पुराणानि यथाक्रमम् ॥ येषामभिव्याहरणादभिवृद्धिर्वृषायुषोः ॥ १४ ॥ श्रुतिः स्मृतिश्च विप्राणां चक्षुषी परिकीर्तिते ॥ काणस्तत्रैकया हीनो द्वाभ्यामंधः प्रकीर्तितः ॥ १५ ॥ श्रुतिस्मृतिपुराणानि विदुषां लोचनत्रयम् ॥ यस्त्रिभिर्नयनैः पश्येत्सोंऽशो माहेश्वरो मतः ॥ १६ ॥ आत्मनो वेदविद्या च ईश्वरेण विनिर्मिता ॥ शौनकीया च पौराणी धर्मशास्त्रात्मिका च या ॥ १७ ॥ तिस्रो विद्या इमा मुख्याः सर्वशास्त्रविनिर्णये ॥ पुराणं पंचमो वेद इति ब्रह्मानुशासनम् ॥ १८ ॥ यो न वेद पुराणं हि न स वेदात्र किंचन ॥ कतमः स हि धर्मोऽस्ति किं वा ज्ञानं तथाविधम् ॥ १९ ॥ अन्यद्वा तत्किमत्राह पुराणे यन्न दृश्यते ॥ वेदाः प्रतिष्ठिताः पूर्वं पुराणे नात्र

---

१ भूतं भव्यं च कालसंभूतम्–इ०पा० । २ पुण्यजनावंदिता रेवा–इ०पा० । ३ चैव–इ०पा० । ४ वृषायुषोः–धर्मस्य आयुषश्च–इत्यर्थः । ५ अत्र 'हीनः' इति शब्दो मध्यमणिन्यायेनोभयत्रान्वेतव्यः । ६ शौनकीया विद्या ऋग्विधानादिमंत्रशास्त्ररूपा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संशयः ॥ २० ॥ बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति ॥ इतिहासपुराणैश्च कृतोऽयं निश्चयः पुरा ॥ २१ ॥ आत्मा पुराणं वेदानां पृथगंगानि तानि षट् ॥ यच्च दृष्टं हि वेदेषु तद्दृष्टं स्मृतिभिः किल ॥ २२ ॥ उभाभ्यां यत्तु दृष्टं हि तत्पुराणेषु गीयते ॥ पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणः स्मृतम् ॥ २३ ॥ अनंतरं च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः ॥ पुराणमेकमेवासीदस्मिन्कल्पांतरे मुने ॥ २४ ॥ त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरम् ॥ स्मृत्वा जगाद च मुनीन्प्रति देवश्चतुर्मुखः ॥ २५ ॥ प्रवृत्तिः सर्वशास्त्राणां पुराणस्याभवत्ततः ॥ कालेनाग्रहणं[1] दृष्ट्वा पुराणस्य ततो मुनिः ॥ २६ ॥ व्यासरूपं विभुः कृत्वा संहरेत्स युगेयुगे ॥ अष्टलक्षप्रमाणे तु द्वापरेद्वापरे सदा ॥ २७ ॥ तदष्टादशधा कृत्वा भूर्लोकेस्मिन्प्रभाष्यते ॥ अद्यापि देवलोके तच्छतकोटिप्रविस्तरम् ॥ २८ ॥ तदथात्र चतुर्लक्षं संक्षेपेण निवेशितम् ॥ पुराणानि दशाष्टौ च सांप्रतं तदिहोच्यते ॥ नामतस्तानि वक्ष्यामि शृणु त्वमृषिसत्तम ॥ २९ ॥ सर्गश्च प्रतिसर्गश्च वंशो मन्वंतराणि च ॥ वंशानुचरितं चैव पुराणं पञ्चलक्षणम् ॥ ३० ॥ ब्राह्मं पुराणं तत्राद्यं संहितायां विभूषितम् ॥ श्लोकानां दशसाहस्रं नानापुण्यकथायुतम् ॥ ३१ ॥ पाद्मं च पंचपंचाशत्सहस्राणि निगद्यते ॥ तृतीयं वैष्णवंनाम त्रयोविंशतिसंख्यया ॥ ३२ ॥ चतुर्थं वायुना प्रोक्तं वायवीयमिति स्मृतम् ॥ शिवभक्तिसमायोगाच्छैवं तच्चापराख्यया ॥ ३३ ॥ चतुर्विंशतिसंख्यातं सहस्राणि तु शौनक ॥ चतुर्भिः पर्वभिः प्रोक्तं भविष्यं पंचमं तथा ॥ ३४ ॥ चतुर्दशसहस्राणि तथा पंचशतानि तत् ॥ मार्कण्डं नवसाहस्रं षष्ठं तत्परिकीर्तितम् ॥ ३५ ॥ आग्नेयं सप्तमं प्रोक्तं सहस्राणि तु षोडश ॥ अष्टमं नारदीयं तु प्रोक्तं वै पञ्चविंशतिः ॥ ३६ ॥ नवमं भगवन्नाम भागद्वयविभूषितम् ॥ तदष्टादशसाहस्रं प्रोच्यते ग्रन्थसंख्यया ॥ ३७ ॥ दशमं ब्रह्मवैवर्तं तावत्संख्यमिहोच्यते ॥ लैंगमेकादशं ज्ञेयं तथैकादशसंख्यया ॥ ३८ ॥ भागद्वयं विरचितं तल्लिंगमृषिपुंगव ॥ चतुर्विंशतिसाहस्रं वाराहं द्वादशं विदुः ॥ ३९ ॥ विभक्तं सप्तभिः[2] खण्डैः स्कांदं भाग्यवतां वर ॥ तदेकाशीतिसाहस्रं संख्यया वै निरूपितम् ॥ ४० ॥ ततस्तु वामनंनाम चतुर्दशतमं स्मृतम् ॥ संख्यया दशसाहस्रं प्रोक्तं कुलपते पुरा ॥ ४१ ॥ कौर्मं पञ्चदशं प्राहुर्भागद्वयविभूषितम् ॥ दशसप्तसहस्राणि पुरा सांख्यपते कलौ ॥ ४२ ॥ मात्स्यं मत्स्येन यत्प्रोक्तं मनवे षोडशं क्रमात् ॥ तच्चतुर्दशसाहस्रं संख्यया वदतां वर ॥४३॥ गारुडं सप्तदशमं स्मृतं चैकोनविंशतिः ॥ अष्टादशं तु

१ अग्रहणम्–प्रज्ञामान्द्यात्–इति भावः । २ अष्टभिः–इति कस्मिंश्चित्पुस्तके पाठो दृश्यते । परं नारदीयमहापुराणोक्तरीत्या--स्कान्दमहापुराणं तु सप्तखण्डात्मकमेवास्ति । स्कान्दमुपपुराणं च पंचाशत्खण्डमण्डितमस्ति । तत्त्वन्यदेव । इदं च स्कान्दं महापुराणं सप्तखण्डात्मकमेवास्ति तदेतद्विज्ञेयं सुधीभिः ।



CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्माण्डं भागद्वयविभूषितम् ॥ ४४ ॥ तच्च द्वादशसाहस्रं शतमष्टसमन्वितम् ॥ तथैवोपपुराणानि यानि चोक्तानि वेधसा ॥ ४५ ॥ इदं ब्रह्म पुराणस्य सुलभं सौरमुत्तमम् ॥ संहिताद्वयसंयुक्तं पुण्यं शिवकथाश्रयम् ॥ ४६ ॥ आद्या सनत्कुमारोक्ता द्वितीया सूर्यभाषिता ॥ सनत्कुमार नाम्ना हि तद्विख्यातं महामुने ॥ ४७ ॥ द्वितीयं नारसिंहं च पुराणे पाद्मसंज्ञिते ॥ शौकेयं हि तृतीयं तु पुराणे वैष्णवे मतम् ॥ ४८ ॥ बार्हस्पत्यं चतुर्थं च वायव्यं संमतं सदा ॥ दौर्वाससं पंचमं च स्मृतं भागवते सदा ॥ ४९ ॥ भविष्ये नारदोक्तं च सूरिभिः कथितं पुरा ॥ कापिलं मानवं चैव तथैवोशनसेरितम् ॥ ५० ॥ ब्रह्माण्डं वारुणं चाथ कालिकाद्वयमेव च ॥ माहेश्वरं तथा सांबं सौरं सर्वार्थसंचयम् ॥ ५१ ॥ पाराशरं भागवतं कौर्मं चाष्टादशं क्रमात् ॥ एतान्युपपुराणानि मयोक्तानि यथाक्रमम् ॥ ५२ ॥ पुराणसंहितामेतां यः पठेद्वा शृणोति च ॥ सोऽनंतपुण्यभागी स्यान्मृतो ब्रह्मपुरं व्रजेत् ॥ ५३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे पुराणसंहितावर्णनंनाम प्रथमोऽध्यायः ॥ १ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ नर्मदायास्तु माहात्म्यं कृष्णद्वैपायनोऽब्रवीत् ॥ तत्तेऽहं संप्रवक्ष्यामि यत्त्वया परिपृच्छितम् ॥ १ ॥ विस्तरं नर्मदायास्तु तीर्थानां मुनिसत्तम ॥ कोन्यः शक्तोस्ति वै वक्तुमृते ब्रह्माणमीश्वरम् ॥ २ ॥ एतमेव पुरा प्रश्नं पृष्टवाञ्जनमेजयः ॥ वैशंपायनसंज्ञं तु शिष्यं द्वैपायनस्य ह ॥ ३ ॥ रेवातीर्थाश्रितं पुण्यं तत्ते वक्ष्यामि शौनक ॥ पुरा पारीक्षितो राजा यज्ञदीक्षासु दीक्षितः ॥४॥ संभृते तु हविर्द्रव्ये वर्तमानेषु कर्मसु ॥ आसीनेषु द्विजाग्र्येषु हूयमाने हुताशने ॥५॥ वर्तमानासु सर्वत्र तथा धर्मकथासु च ॥ श्रूयमाणे तथा शब्दे जनैरुक्ते त्वहर्निशम् ॥६॥ यज्ञभूमौ कुलपते दीयतां भुज्यतामिति ॥ विविधांश्च विनोदान्वै कुर्वाणेषु विनोदिषु ॥ ७ ॥ एवंविधे वर्तमाने यज्ञे स्वर्गसदःसमे ॥ वैशंपायनमासीनं पप्रच्छ जनमेजयः ॥ ८ ॥ ॥ जनमेजय उवाच ॥ ॥ द्वैपायनप्रसादेन ज्ञानवानसि मे मतः ॥ वैशंपायन तस्मात्त्वां पृच्छामि ऋषिसन्निधौ ॥ ९ ॥ ब्रूहि मे त्वं पुरावृत्तं पितॄणां तीर्थसेवनम् ॥ चिरं नानाविधान्क्लेशान्प्राप्तास्त इति मे श्रुतम् ॥ १० ॥ कथं द्यूतजिताः पार्था मम पूर्वपितामहाः ॥ आसमुद्रां महीं विप्र भ्रमंतस्तीर्थलोभतः ॥११॥ केन ते सहितास्तात भूमिभागानने कशः ॥ चेरुः कथय तत्सर्वं सर्वज्ञोऽसि मतो मम ॥ १२ ॥ ॥ वैशंपायन उवाच ॥ ॥ कथयिष्यामि भूनाथ यत्पृष्टं तु त्वयाऽनघ ॥ नमस्कृत्य विरूपाक्षं वेदव्यासं महाकविम् ॥ १३ ॥ पितामहास्तु ते पंच पांडवाः सह कृष्णया ॥ उषित्वा ब्राह्मणैः सार्द्धं काम्यके वन उत्तमे ॥ १४ ॥ प्रधानोद्दालके तत्र कश्यपोऽथ महामतिः ॥ विभांडकश्च राजेंद्र गुरुश्चैव महामुनिः ॥ १५ ॥ पुलस्त्यो लोमशश्चैव तथान्ये पुत्रपौत्रिणः ॥ स्नात्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



निःशेषतीर्थेषु गतास्ते विंध्यपर्वतम् ॥ १६ ॥ ते च तत्राश्रमं पुण्यं सर्वैर्वृक्षैः समाकुलम् ॥ चंपकैः कर्णकारैश्च पुन्नागैर्नागकेसरैः ॥ १७ ॥ बकुलैः कोविदारैश्च दाडिमैरुपशोभितम् ॥ पुष्पितैरर्जुनैश्चैव बिल्वपाटलकेतकैः ॥ १८ ॥ कदंबाम्रमधूकैश्च निंबजंबीरतिंदुकैः ॥ नालिकेरैः कपित्थैश्च खर्जूरपनसैस्तथा ॥ १९ ॥ नानाद्रुमलताकीर्णं नानावल्लीभिरावृतम् ॥ सपुष्पं फलितं कांतं वनं चैत्ररथं यथा ॥ २० ॥ जलाश्रयैस्तु विपुलैः पद्मिनीखंडमंडितम् ॥ सितोत्पलैश्च संछन्नं नीलपीतैः सितारुणैः ॥२१॥ हंसकारंडवाकीर्णं चक्रवाकोपशोभितम् ॥ आडीकाकबलाकाभिः सेवितं कोकिलादिभिः ॥२२॥ सिंहैर्व्याघ्रैर्वराहैश्च गजैश्चैव महोत्कटैः ॥ महिषैश्च महाकायैः कुरंगैश्चित्रकैः शशैः ॥२३॥ गंडकैश्चैव खड्गैश्च गोमायुसुरभी युतम् ॥ सारंगैर्मल्लकैश्चैव द्विपदैश्च चतुष्पदैः ॥ २४ ॥ तथाच कोकिलाकीर्णं मनःकांतं सुशोभितम् ॥ जीवंजीवकसंघैश्च नानापक्षिसमायुतम् ॥ ॥ २५ ॥ दुःखशोकविनिर्मुक्तं सत्त्वोत्कटमनोरमम् ॥ क्षुत्तृषारहितं कांतं सर्वव्याधिविवर्जितम् ॥ २६ ॥ सिंहीस्तनं पिबंत्यत्र कुरंगाः स्नेहसंयुतम् ॥ मार्जारमूषकौ चोभाववलेहत उन्मुखौ ॥ २७ ॥ पंचास्याः पोतकेभाश्च भोगिनस्तु कलापिनः ॥ दृष्ट्वा तद्विपिनं रम्यं प्रविष्टाः पांडुनंदनाः ॥२८॥ मार्कंडं दृष्टवांस्तत्र तरुणादित्यसन्निभम् ॥ ऋषिभिः सेव्यमानं तु नानाशास्त्रविशारदैः ॥ २९ ॥ कुलीनैः सत्त्वसंपन्नैः शौचाचारसमन्वितैः ॥ धीसंगतैः क्षमायुक्तैस्त्रिसंध्यं जपतत्परैः ॥ ३० ॥ ऋग्यजुःसामविहितैर्मंत्रैर्होमपरायणैः केचित्पंचाग्निमध्यस्थाः केचिदेकांतसंस्थिताः ॥ ३१ ॥ ऊर्द्ध्वबाहुनिरालंबा आदित्यभ्रमणाः परे ॥ सायंप्रातर्भुजश्चान्ये एकाहारास्तथा परे ॥ ३२ ॥ द्वादशाहात्तथा चान्ये अन्ये मासार्द्धभोजनाः ॥ दर्शे दर्शे तथा चान्ये अन्ये शैवालभोजनाः ॥ ३३ ॥ पिण्याकमपरेऽभुंजन्केचित्पालाशभोजनाः ॥ अपरे नियताहारा वायुभक्ष्यांबुभोजनाः ॥ ३४ ॥ एवंभूतैस्तथा वृद्धैः सेव्यते मुनिपुंगवैः ॥ ततो धर्म्मसुतः श्रीमानाश्रमं तं प्रविश्य सः ॥ ३५ ॥ दृष्ट्वा मुनिवरं शांतं ध्यायमानं परं पदम् ॥ प्रादक्षिण्येन सहसा दंडवत्पतितोऽग्रतः ॥ ३६ ॥ भक्त्यानुपतितं दृष्ट्वा चिरादादाय लोचनम् ॥ को भवानित्युवाचेदं धर्मं धीमानपृच्छत ॥ ३७ ॥ तस्य तद्वचनं श्रुत्वा दारकस्तत्समीपगः ॥ आहायं धर्मराजस्ते दर्शनार्थं समागतः ॥ ३८ ॥ तच्छ्रुत्वादारकेणोक्तं वचनं प्राह सादरः ॥ एह्येहि वत्सवत्सेति किंचित्स्थानाच्चलन्मुनिः ॥ तं तु स्नेहादुपाघ्राय आसने उपवेशयत् ॥ ३९ ॥ उपविष्टे सभार्यां तु पूजां कृत्वा यथाविधि ॥ वन्यैर्धान्यैः फलैर्मूलै रसैश्चैव पृथग्विधैः ॥ ४० ॥ पांडवा ब्राह्मणैः सार्द्धं यथायोग्यं प्रपूजिताः ॥ मुहूर्त्तादथ विश्रम्य धर्मपुत्रो युधिष्ठिरः ॥ ४१ ॥

१ चिरादादाय लोचनम्--चिरेण नेत्रेण तं दृष्ट्वा--इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृच्छति स्म मुनिश्रेष्ठं कौतूहलसमन्वितः ॥ भगवन्सर्वलोकानां दीर्घायुस्त्वं मतो मम ॥ ४२ ॥ सप्तकल्पानशेषेण कथयस्व ममानघ ॥ कल्पक्षये पि लोकस्य स्थावरस्येतरस्य च ॥ ४३ ॥ न विनष्टोऽसि विप्रेंद्र कथं वा केन हेतुना ॥ गङ्गाद्याः सरितः सर्वाः ससमुद्रांताश्च या मुने ॥ ४४ ॥ तासां मध्ये स्थिताः काः स्वित्काश्चैव प्रलयं गताः ॥ का नु पुण्यजला नित्यं का नु न क्षयमागता ॥ ४५ ॥ एतत्कथय मे तात प्रसन्नेनांतरात्मना ॥ श्रोतुमिच्छाम्यशेषेण ऋषिभिः सह बांधवैः ॥ ४६ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ साधुसाधु महाप्राज्ञ धर्मपुत्र युधिष्ठिर ॥ कथयामि यथा न्यायं यत्पृच्छसि ममानघ ॥ ४७ ॥ सर्वपापहरं पुण्यं पुराणं रुद्रभाषितम् ॥ यः शृणोति नरो भक्त्या तस्य पुण्यफलं शृणु ॥ ४८ ॥ अश्वमेध सहस्रेण वाजपेयशतेन च ॥ तत्फलं समवाप्नोति राजन्नास्त्यत्र संशयः ॥ ४९ ॥ ब्रह्मघ्नश्च सुरापी च स्तेयी गोघ्नश्च यो नरः ॥ मुच्यते सर्वपापे भ्यो रुद्रस्य वचनं यथा ॥ ५० ॥ गंगा तु सरितां श्रेष्ठा तथा चैव सरस्वती ॥ कावेरी देविका चैव सिंधुः सालकुटी तथा ॥ ५१ ॥ सरयूः शतरुद्रा च मही चर्मिलया सह ॥ गोदावरी तथा पुण्या तथैव यमुना नदी ॥ ५२ ॥ पयोष्णी च शतद्रुश्च तथा धर्मनदी शुभा ॥ एताश्चान्याश्च सरितः सर्वपापहराः स्मृताः ॥ ५३ ॥ किं तु ते कारणं तात वक्ष्यामि नृपसत्तम ॥ ससमुद्राः सरितः सर्वाः कल्पेकल्पे क्षयं गताः ॥ ५४ ॥ सप्तकल्पक्षये क्षीणे न मृता तेन नर्मदा ॥ नर्मदैकैव राजेंद्र परं तिष्ठेत्सरिद्वरा ॥ ५५ ॥ तोयपूर्णा महाभाग मुनिसंघैरभिष्टुता ॥ गंगाद्याः सरितश्चान्याः कल्पेकल्पे क्षयं गताः ॥ ५६ ॥ एषा देवी पुरा दृष्टा तेन वक्ष्यामि तेऽनघ ॥ ५७ ॥ आश्चर्यभूता राजेंद्र त्रिषु लोकेषु विश्रुता ॥ ५८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखंडे रेवामाहात्म्यवर्णनन्नाम द्वितीयोऽध्यायः ॥ २ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ सप्तकल्पक्षया घोरास्त्वया दृष्टा महामुने ॥ न चापीहास्ति भगवन्दीर्घायुरिह कश्चन ॥ १ ॥ त्वया ह्येकार्णवे सुप्तः पद्मनाभः सुरारिहा ॥ दृष्टः सहस्रचरणः सहस्रनयनोदरः ॥ २ ॥ त्वं किलानुग्रहात्तस्य दह्यमाने चराचरे ॥ न क्षयं समनुप्राप्तो वरदानान्महात्मनः ॥ ॥ ३ ॥ किं त्वयाश्चर्यभूतं हि दृष्टं च भ्रमताऽनघ ॥ एतदाचक्ष्व भगवन्परं कौतूहलं हि मे ॥ ४ ॥ संप्राप्ते च महाघोरे युगस्यांते महाक्षये ॥ अनावृष्टिहते लोके पुरा वर्षशताधिके ॥ ५ ॥ औषधीनां क्षये घोरे देवदानववर्जिते ॥ निर्वीर्य्ये निर्वषट्कारे कलिना दूषिते भृशम् ॥ ६ ॥ सरित्सरस्तडागेषु पल्वलोपवनेषु च ॥ संशुष्केषु तदा ब्रह्मन्निराकारे युगक्षये ॥ ७ ॥ जनं प्राप्ते महर्ल्लोके ब्रह्म क्षत्रविशादयः ॥ ऋषयश्च महात्मानो दिव्यतेजःसमन्विताः ॥ ८ ॥ स्थितानि कानि भूतानि गतान्येव महामुने ॥ एतत्सर्वं महाभाग कथयस्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

पृथक्पृथक् ॥ ९ ॥ भूतानि कानि विप्रेंद्र कथं सिद्धिमवाप्नुयात् ॥ ब्रह्मविष्ण्विन्द्ररुद्राणां काले प्राप्ते सुदारुणे ॥ १० ॥ एवमुक्तस्ततः सोऽथ धर्मरा
जेन धीमता ॥ मार्कंडः प्रत्युवाचेदमृषिसंघैः समावृतः ॥ ११ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ शृण्वंतु ऋषयः सर्वे त्वया सह नरेश्वर ॥ महत्पु
राणं पूर्वोक्तं शंभुना वायुदैवते ॥ १२ ॥ वायोः सकाशात्स्कंदेन श्रुतमेतत्पुरातनम् ॥ वशिष्ठः श्रुतवांस्तस्मात्पराशरस्ततः परम् ॥ १३ ॥ तस्माच्च
जातूकर्ण्येन तस्माच्चैव महर्षिभिः ॥ एवं परंपराप्रोक्तं शतसंख्यैर्द्विजोत्तमैः ॥ १४ ॥ संहिता शतसाहस्री पुरोक्ता शंभुना किल ॥ आलोड्य सर्वशा
स्त्राणि वेदार्थं तत्त्वतः पुरा ॥ १५ ॥ युगरूपेण सा पश्चाच्चतुर्द्धा विनियोजिता ॥ मंदप्रज्ञानुसारेण नराणां तु महर्षिभिः ॥ १६ ॥ आराध्य पशु
भर्त्तारं मया पूर्वं महेश्वरम् ॥ पुराणं श्रुतमेतद्धि तत्ते वक्ष्याम्यशेषतः ॥ १७ ॥ यच्छ्रुत्वा मुच्यते जंतुः सर्वपापैर्नरेश्वर ॥ मानसैः कर्मजैश्चैव सप्तजन्म
सुसंचितैः ॥ १८ ॥ सप्तकल्पक्षया घोरा मया दृष्टाः पुनःपुनः ॥ प्रसादाद्देवदेवस्य विष्णोश्च परमेष्ठिनः ॥ १९ ॥ द्वादशादित्यनिर्दग्धे[1] जगत्ये
कार्णवीकृते ॥ श्रांतोऽहं विश्रमंस्तत्र तरन्बाहुभिरर्णवम् ॥ २० ॥ अथाहं सलिले राजन्नादित्यसमरूपिणम् ॥ पुरा पुरुषमद्राक्षमनादिनिधनं प्रभुम् ॥
॥ २१ ॥ शृंगं चैवाद्रिराजस्य भासयंतं दिशो दश ॥ द्वितीयोन्यो मनुर्दृष्टः पुत्रपौत्रसमन्वितः ॥ २२ ॥ अगाधे भ्रमते सोपि तमोभूते महार्णवे ॥
अविश्रमन्मुहूर्त्तं तु चक्रारूढ इव भ्रमन् ॥ २३ ॥ अथाहं भयादुद्विग्नस्तरन्बाहुभिरर्णवम् ॥ तत्रस्थोहं महामत्स्यमपश्यं मदसंयुतम् ॥ २४ ॥ ततो
ऽब्रवीत्स मां दृष्ट्वा एह्येहीति च भारत ॥ परं प्रधानः सर्वेषां मत्स्यरूपो महेश्वरः ॥ २५ ॥ ततोऽहं त्वरया गत्वा तन्मुखे मनुजेश्वर ॥ सुश्रांतो विग
तज्ञानः परं निर्वेदमागतः ॥ २६ ॥ ततोऽद्राक्षं समुद्रांते महदावर्त्तसंकुलाम् ॥ उद्यत्तरंगसलिलां फेनपुंजाट्टहासिनीम् ॥ २७ ॥ नदीं कामगमां
पुण्यां झषमीनसमाकुलाम् ॥ नद्यास्तस्यास्तु मध्यस्था प्रमदा कामरूपिणी ॥ २८ ॥ नीलोत्पलदलश्यामा महत्प्रक्षोभवाहिनी ॥ दिव्यहाटकचि
त्रांगी कनकोज्ज्वलशोभिता ॥ २९ ॥ द्वाभ्यां संगृह्य जानुभ्यां महत्पोतं व्यवस्थिता ॥ तां मनुः प्रत्युवाचेदं का त्वं दिव्यवरांगने ॥ ३० ॥ तिष्ठसे
केन कार्येण त्वमत्र सुरसुंदरि ॥ सुरासुरगणे नष्टे भ्रमसे लीलयार्णवे ॥३१॥ सरितः सागराः शैलाः क्षयं प्राप्ता ह्यनेकशः ॥ त्वमेका तु कथं साध्वि
तिष्ठसे कारणं महत् ॥ श्रोतुमिच्छाम्यहं देवि कथयस्व ह्यशेषतः ॥ ३२ ॥ ॥ अबलोवाच ॥ ॥ ईश्वरांगसमुद्भूता ह्यमृतानाम विश्रुता ॥ सरि
त्पापहरा पुण्या मामाश्रित्य भयं कुतः ॥ ३३ ॥ साहं पोतमिमं तुभ्यं गृहीत्वा ह्यागता द्विज ॥ न ह्यस्य पोतस्य क्षयो यत्र तिष्ठति शंकरः ॥३४॥

१ निर्दशानिर्वृतः–इ० पा० ।

 

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यास्तद्वचनं श्रुत्वा विस्मयोत्फुल्ललोचनः ॥ मनुना सह राजेंद्र पोतारूढो ह्यहं तदा ॥ ३५ ॥ कृतांजलिपुटो भूत्वा प्रणम्य शिरसा विभुम् ॥ व्यापिनं परमेशानमस्तौषमभयप्रदम् ॥ ३६ ॥ सद्योजाताय देवाय वामदेवाय वै नमः ॥ भवेभवे नमस्तुभ्यं भक्तिगम्याय ते नमः ॥ ॥ ३७ ॥ भूर्भुवाय नमस्तुभ्यं रामज्येष्ठाय वै नमः ॥ नमस्ते भद्र¹कालाय कलिरूपाय वै नमः ॥ ३८ ॥ अचिंत्याव्यक्तरूपाय महादेवाय धामने ॥ विद्महे देवदेवाय तन्नो रुद्र नमोनमः ॥ ३९ ॥ जगत्सृष्टिविनाशानां कारणाय नमोनमः ॥ एवं स्तुतो महादेवः पूर्वं सृष्ट्या मयाऽनघ ॥ ४० ॥ प्रसन्नोमा²ऽवदत्पश्चाद्वरं वरय सुव्रत ॥ ४१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये मार्कण्डेयधर्मराजसंवादे कल्पक्षये मार्कण्डेयकृतपोताधारोहणवृत्तान्तवर्णनंनाम तृतीयोऽध्यायः ॥ ३ ॥ ॥ छ ॥ ॥ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततोऽर्णवात्समुत्तीर्य्य त्रिकूटशिखरे स्थितम् ॥ महाकनकवर्णाभे नानावर्णशिलाचिते ॥ १ ॥ महाशृंगे समासीनं रुद्रकोटिसमन्वितम् ॥ महादेवं महात्मानमीशानमजमव्ययम् ॥ २ ॥ सर्वभूतमयं तात मनुना सह सुव्रत ॥ भूयो ववंदे चरणौ सर्व्वदेवनमस्कृतौ ॥ ३ ॥ तत्काले युगसाहस्रं सह रुद्रेण मानद ॥ तस्मिन्नेकार्णवे घोरे स्थितोऽहं कुरुनंदन ॥ ४ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ एतच्छ्रुत्वा तु मे तात परं कौतूहलं हृदि ॥ जातं तत्कथयस्वेति शृण्वतः सह बांधवैः ॥ ५ ॥ का सा पद्मपलाशाक्षी तमोभूते महार्णवे ॥ योगिवद्भ्रमते नित्यं रुद्रजां स्वां च याब्रवीत् ॥ ६ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ एतमेव मया प्रश्नं पुरा पृष्टो मनुः स्वयम् ॥ तदेव तेऽद्य वक्ष्यामि अबलायाः समुद्भवम् ॥ ७ ॥ व्यतीतायां निशायां तु ब्रह्मणः परमेष्ठिनः ॥ ततः प्रभाते विमले सृज्यमानेषु जन्तुषु ॥ ८ ॥ मनुं प्रणम्य शिरसा पृच्छाम्येतद्युधिष्ठिर ॥ केयं पद्मपलाशाक्षी श्यामा चंद्रनिभानना ॥ ९ ॥ एकार्णवे भ्रमत्येका रुद्रजाऽस्मीति वादिनी ॥ सावित्री वेदमाता च ह्यथवा सा सरस्वती ॥ १० ॥ मंदाकिनी सरिच्छ्रेष्ठा लक्ष्मीर्वा किमथो उमा ॥ कालरात्रिर्भवेत्साक्षात्प्रकृतिर्वा सुखोचिता ॥ ११ ॥ एतदाचक्ष्व भगवन्का सा ह्यमृतसंभवा ॥ चरत्येकार्णवे घोरे प्रनष्टोरगराक्षसे ॥ १२ ॥ ॥ ॥ मनुरुवाच ॥ ॥ शृणु वत्स यथान्यायमस्या वक्ष्यामि संभवम् ॥ यया रुद्रसमुद्भूता या चेयं वरवर्णिनी ॥ १३ ॥ पुरा शिवः शांततनुश्चचार विपुलं तपः ॥ हितार्थं सर्वलोकानामुमया सह शंकरः ॥ १४ ॥ ऋक्षशैलं समारुह्य तपस्तेपे सुदारुणम् ॥ अदृश्यः सर्वभूतानां सर्वभूता

१ रुद्रकालाय--इ० पा०। २ मा--माम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



त्मको वशी ॥ १५ ॥ तपतस्तस्य देवस्य स्वेदः समभवत्किल ॥ तं गिरिं प्लावयामास स स्वेदो रुद्रसंभवः ॥ १६ ॥ तस्मादासीत्समुद्भूता महा
पुण्या सरिद्वरा ॥ या सा त्वयार्णवे दृष्टा पद्मपत्रायतेक्षणा ॥ १७ ॥ स्त्रीरूपं समवस्थाय रुद्रमाराधयत्पुरा ॥ आद्ये कृतयुगे [तस्मिन्समानाम
युतं नृप ॥ १८ ॥ ततस्तुष्टो महादेव उमया सह शंकरः ॥ ब्रूहि त्वं तु महाभागे यत्ते मनसि वर्त्तते ॥ १९ ॥ ॥ सरिदुवाच ॥ ॥ प्रलये
समनुप्राप्ते नष्टे स्थावरजंगमे ॥ प्रसादात्तव देवेश अक्षयाहं भवे प्रभो ॥ २० ॥ सरित्सु सागरेष्वेव पर्वतेषु क्षयिष्वपि ॥ तव प्रसादाद्देवेश पुण्या
क्षय्या भवे प्रभो ॥ २१ ॥ पापोपपातकैर्युक्ता महापातकिनोऽपि ये ॥ मुच्यन्ते सर्वपापेभ्यो भक्त्या स्नात्वा तु शंकर ॥ २२ ॥ उत्तरे जाह्नवी देशे
महापातकनाशिनी ॥ भवामि दक्षिणे मार्गे यद्येवं सुरपूजिता ॥ २३ ॥ स्वर्गादागम्य गंगेति यथा ख्याता क्षितौ विभो ॥ तथा दक्षिणगंगेति भवेयं
त्रिदशेश्वर ॥ २४ ॥ पृथिव्यां सर्वतीर्थेषु स्नात्वा यल्लभते फलम् ॥ तत्फलं लभते मर्त्त्यो भक्त्या स्नात्वा महेश्वर ॥ २५ ॥ ब्रह्महत्यादिकं
पापं यदास्ते संचितं क्वचित् ॥ मासमात्रेण तद्देव क्षयं यात्ववगाहनात् ॥ २६ ॥ यत्फलं सर्व्ववेदेषु सर्वयज्ञेषु शंकर ॥ अवगा
हेन तत्सर्वं भवत्विति मतिर्मम ॥ २७ ॥ सर्वदानोपवासेषु सर्वतीर्थावगाहने ॥ तत्फलं मम तोयेन जायतामिति शंकर ॥ २८ ॥
मम तीरे नरा ये तु अर्च्चयंति महेश्वरम् ॥ ते गतास्तव लोकं स्युरेतदेव भवेच्छिव ॥ २९ ॥ मम कूले महेशान उमया सह दैवतैः ॥ वस नित्यं
जगन्नाथ एष एव वरो मम ॥ ३० ॥ सुकर्मा वा विकर्मा वा शांतो दांतो जितेंद्रियः ॥ मृतो जंतुर्मम जले गच्छतादमरावतीम् ॥ ३१ ॥ त्रिषु
लोकेषु विख्याता महापतकनाशिनी ॥ भवामि देवदेवेश प्रसन्नो यदि मन्यसे ॥ ३२ ॥ एतांश्चान्यान्वरान्दिव्यान्प्रार्थितो नृपसत्तम ॥ नर्म्मदया
ततः प्राह प्रसन्नो वृषवाहनः ॥ ३३ ॥ ॥ श्रीमहेश उवाच ॥ ॥ एवं भवतु कल्याणि यत्त्वयोक्तमनिन्दिते ॥ नान्या वरार्हा लोकेषु मुक्त्वा
त्वां कमलेक्षणे ॥ ३४ ॥ यदैव मम देहात्त्वं समुद्भूता वरानने ॥ तदैव सर्वपापानां मोचिनी त्वं न संशयः ॥ ३५ ॥ कल्पक्षयकरे काले काले घोरे
विशेषतः ॥ उत्तरं कूलमाश्रित्य निवसंति च ये नराः ॥ ३६ ॥ अपि कीटपतंगाश्च वृक्षगुल्मलतादयः ॥ आदेहपतनाद्देवि तेऽपि
यास्यन्ति सद्गतिम् ॥ ३७ ॥ दक्षिणं कूलमाश्रित्य ये द्विजा धर्म्मवत्सलाः ॥ आ मृत्योर्न्निवसिष्यन्ति ते गताः पितृमंदिरे ॥ ३८ ॥ अहं हि तव
वाक्येन कस्मिंश्चित्कारणांतरे ॥ त्वत्तीरे निवसिष्यामि सदैव ह्युमया समम् ॥ ३९ ॥ एवं देवि महादेवि एवमेव न संशयः ॥ ब्रह्मेन्द्रचन्द्रवरुणैः
साध्यैश्च सह विष्णुना ॥ ४० ॥ उत्तरे देवि ते कूले वसिष्यन्ति ममाज्ञया ॥ दक्षिणे पितृभिः सार्द्धं तथान्ये सुरसुन्दरि ॥ ४१ ॥ वसिष्यंति मया



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सार्द्धमेष ते वर उत्तमः ॥ गच्छगच्छ महाभागे मर्त्यान्पापाद्विमोचय ॥ ४२ ॥ सहिता ऋषिसंघैश्च तथा सिद्धसुरासुरैः ॥ एवमुक्त्वा महादेव उमया सहितो विभुः ॥ ४३ ॥ वंद्यमानोऽथ मनुना मया चादर्शनं गतः ॥ तेन चैषा महापुण्या महापातकनाशिनी ॥ ४४ ॥ कथिता पृच्छयते या ते मा ते भवतु विस्मयः ॥ एषा गंगा महापुण्या त्रिषु लोकेषु विश्रुता ॥ ४५ ॥ दशभिः पंचभिः स्रोतैः प्लावयन्ती दिशो दश ॥ शोणो महा नदश्चैव नर्मदा सुरसा कृता ॥ ४६ ॥ मंदाकिनी दशार्णा च चित्रकूटा तथैव च ॥ तमसा विदशा चैव करभा यमुना तथा ॥ ४७ ॥ चित्रोत्पला विपाशा च रंजना वालुवाहिनी ॥ ऋक्षपादप्रसूतास्ताः सर्वा वै रुद्रसंभवाः ॥ ४८ ॥ सर्वपापहराः पुण्याः सर्वमंगलदाः शिवाः ॥ इत्येतैर्ना मभिर्दिव्यैः स्तूयते वेदापारगैः ॥ ४९ ॥ पुराणज्ञैर्महाभागैराज्यपैः सोमपैस्तथा ॥ इत्येतत्सर्वमाख्यातं महाभाग्यं नरोत्तम ॥ ५० ॥ मनुनोक्तं पुरा मह्यममृतायाः समुद्भवम् ॥ पुण्यं पवित्रमतुलं रुद्रोद्गीतमिदं शुभम् ॥ ५१ ॥ ये नराः कीर्त्तयिष्यंति भक्त्या शृण्वंति येऽपि च ॥ प्रातरुत्थाय नामा नि दश पंच च भारत ॥ ५२ ॥ ते नराः सकलं पुण्यं लभिष्यंत्यवगाहजम् ॥ विमानेनार्कवर्णेन घंटाशतनिनादिना ॥ ५३ ॥ त्यक्त्वा मानुष्यकं भावं यास्यंति परमां गतिम् ॥ ५४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे नर्मदापञ्चद शनामवर्णनंनाम चतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ आश्चर्यमेतदखिलं कथितं भो द्विजोत्तम ॥ विस्मयं परमा पन्ना ऋषिसंघा मया सह ॥ १ ॥ अहो भगवती पुण्या नर्मदेयमयोनिजा ॥ रुद्रदेहाद्विनिष्क्रांता महापापक्षयंकरी ॥ २ ॥ सप्तकल्पक्षये प्राप्ते त्व येयं सह सुव्रत ॥ न मृता च महाभागा किमतः पुण्यमुत्तमम् ॥ ३ ॥ के ते कल्पाः समुद्दिष्टाः सप्त कल्पक्षयंकराः ॥ न मृता चेदियं देवी त्वं चैव ऋषिपुंगव ॥ ४ ॥ अपक्षिगणसंघाते जगत्येकार्णवीकृते ॥ कीदृग्रूपः समभवन्महादेवो युगक्षये ॥ ५ ॥ कथं संहरते विश्वं कथं चाऽस्ते महार्णवे ॥ कथं च सृजते विश्वं कथं धारयते प्रजाः ॥ ६ ॥ कीदृग्रूपा भवेद्देवी सरिदेकार्णवीकृते ॥ किमर्थं नर्मदा प्रोक्ता रेवेति च कथं स्मृता ॥ ७ ॥ अंज नेति किमर्थं वा किमर्थं सुरसेति च ॥ मंदाकिनी किमर्थं च शोणश्चेति कथं भवेत् ॥ ८ ॥ त्रिकूटेति किमर्थं वा किमर्थं वालुवाहिनी ॥ कोटि कोटयो हि तीर्थानां प्रविष्टा या महार्णवम् ॥ ९ ॥ कियत्यः सरितां कोटयो नर्मदां समुपासते ॥ यज्ञोपवीतैर्ऋषिभिर्देवताभिस्तथैव च ॥ १० ॥ विभक्तेयं किमर्थं च श्रूयते मुनिसत्तम ॥ वैष्णवीति पुराणज्ञैः किमर्थमिह चोच्यते ॥ ११ ॥ केषु स्थानेषु तीर्थेषु पूजनीया सरिद्वरा ॥ तीर्थानि च

१ अनुत्तमम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पृथग्ब्रूहि यत्र संनिहितो हरः ॥ १२ ॥ यत्प्रमाणा च सा देवी या रुद्रेण विनिर्मिता ॥ कीदृशानि च कर्माणि रुद्रेण कथितानि ते ॥ १३ ॥ कथं म्लेच्छसमाकीर्णो देशोऽयं द्विजसत्तम ॥ एतदाचक्ष्व मां ब्रह्मन्मार्कण्डेय महामते ॥ १४ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ शृण्वंतु ऋषयः सर्वे त्वं च तात युधिष्ठिर ॥ पुराणं नर्मदायां तु कथितं च त्रिशूलिना ॥ १५ ॥ वायोः सकाशाच्च मया तेनापि च महेश्वरात् ॥ अशक्यत्वान्मनुष्याणां संक्षिप्तमृषिभिः पुरा ॥ १६ ॥ मायूरं प्रथमं तात कौर्म्यं च तदनंतरम् ॥ पुरं तथा कौशिकं च मात्स्यं द्विरदमेव च ॥ १७ ॥ वाराहं यन्मया दृष्टं वैष्णवं चाष्टमं परम् ॥ न्यग्रोधाख्यमतश्चासीदाकांक्षं पुनरुत्तमम् ॥ १८ ॥ पद्मं च तामसं चैव संवर्त्तोद्वर्त्तमेव च ॥ महाप्रलयमित्याहुः पुराणे वेदचिंतकाः ॥ १९ ॥ एतत्संक्षेपतः सर्वं संक्षिप्तं तैर्महात्मभिः ॥ विभक्तं च चतुर्भागैर्ब्रह्माद्यैश्च महर्षिभिः ॥ २० ॥ तदहं संप्रवक्ष्यामि पुराणार्थविशारद ॥ सप्त [illegible]रूपा महाघोरा यैरियं न मृता सरित् ॥ २१ ॥ आजंगमं तमोभूतमप्रज्ञातमलक्षणम् ॥ नष्टचंद्रार्ककिरणमासीद्भूतविवर्जितम् ॥ ॥ २२ ॥ तमसोऽन्ते महानाम्ना पुरुषः स जगद्गुरुः ॥ चचार तस्मिन्नेकाकी व्यक्ताव्यक्तः सनातनः ॥ २३ ॥ स चोंकारमयोऽतीतो गायत्रीमसृजद्द्विजः[1] ॥ स तया सार्द्धमीशानश्चिक्रीड पुरुषो विराट् ॥ २४ ॥ स्वदेहादसृजद्विश्वं पंचभूतात्मसंज्ञितम् ॥ क्रीडन्समसृजद्विश्वं पंचभूतात्मसंज्ञितम् ॥ ॥ २५ ॥ क्रीडन्सृजद्विराट्संज्ञः[2] सबीजं च हिरण्मयम् ॥ तच्चांडमभवद्दिव्यं द्वादशादित्यसन्निभम् ॥ २६ ॥ तद्भित्त्वा पुरुषो जज्ञे चतुर्वक्त्रः पितामहः ॥ सोऽसृजद्विश्वमेवं तु सदेवासुरमानुषम् ॥ २७ ॥ सतिर्यक्पशुपक्षीकं स्वेदांडजजरायुजम् ॥ एतदंडं पुराणेषु प्रथमं परिकीर्तितम् ॥ ॥ २८ ॥ पूर्वकल्पे नृपश्रेष्ठ क्रीडंत्या परमेष्ठिना ॥ उमया सह रुद्रस्य क्रीडतश्चार्णवीकृतः ॥ २९ ॥ हर्षाज्जज्ञे शुभा कन्या उमायाः स्वेदसंभवा ॥ शर्वस्योरःस्थलाज्जज्ञे उमा कुचविमर्दनात् ॥ ३० ॥ स्वेदाद्द्विजज्ञे महती कन्या राजीवलोचना ॥ द्वितीयः संभवो यस्या रुद्रदेहाद्युधिष्ठिर ॥ ३१ ॥ सा परिभ्रमते लोकान्सदेवासुरमानवान् ॥ त्रैलोक्योन्मादजननी रूपेणाऽप्रतिमा तदा ॥ ३२ ॥ तां दृष्ट्वा देवदैत्येंद्रा मोहिता लभते कथम् ॥ मृगयंति स्म तां कन्यामितश्चेतश्च भारत ॥ ३३ ॥ हावभावविलासैश्च मोहयत्यखिलं जगत् ॥ भ्रमते दिव्यरूपा सा विद्युत्सौदामिनी यथा ॥ ३४ ॥ मेघमध्ये स्थिता भाभिः सर्वयोषिदनुत्तमा ॥ ततो रुद्रं सुराः सर्वे दैत्याश्च सह दानवैः ॥ ३५ ॥ वरयंति स्म तां कन्यां कामेनाऽऽकुलिता भृशम् ॥ ततोऽब्रवीन्महादेवो देवदानवयोर्द्वयोः ॥ ३६ ॥ बलेन तेजसा

१ द्विजः--मूलरूपादुत्पन्नो द्वितीयः पुरुषः--इत्यर्थः । २ अडभाव आर्षः--असृजत् ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चैव ह्यधिको यो भविष्यति ॥ स इमां प्राप्स्यते कन्यां नान्यथा वै सुरोत्तमाः ॥ ३७ ॥ ततो देवासुराः सर्वे कन्यां वै समुपागमन् ॥ अहमेनां ग्रहीष्यामि अहमेनामिति ब्रुवन्¹ ॥ ३८ ॥ पश्यतामेव सर्वेषां सा कन्याऽतरधीयत ॥ पुनस्तां ददृशुः सर्वे योजनांतरधिष्ठिताम् ॥ ३९ ॥ जग्मुस्ते त्वरिताः सर्वे यत्र सा समदृश्यत ॥ त्रिभिश्चतुर्भिश्च तथा योजनैर्दशभिः पुनः ॥ ४० ॥ धिष्ठितां समपश्यंस्ते सर्वे मातंगगामिनीम् ॥ योजनानां शतैर्भूयः सहस्रैश्चाप्यधिष्ठिताम् ॥ ४१ ॥ तथा शतसहस्रेण लघुत्वात्समदृश्यत ॥ अग्रतः पृष्ठतश्चैव दिशासु विदिशासु च ॥ ॥ ४२ ॥ तां पश्यंति वरारोहामेकधा बहुधा पुनः ॥ दिव्यवर्षसहस्रं तु भ्रामितास्ते तया पुरा ॥ ४३ ॥ न चाज्ञाता तु सा कन्या महादेवांगसंभवा ॥ सहोमया ततो देवो जहासोच्चैः पुनःपुनः ॥ ४४ ॥ गणास्तालकसंपातैर्नृत्यंति च मुदान्विताः ॥ अकस्माद्दृश्यते कन्या शंकरस्य समीपगा ॥ ४५ ॥ तां दृष्ट्वा विस्मयापन्ना देवा यांति पराङ्मुखाः ॥ तस्याश्चक्रे ततो नाम स्वयमेव पिनाकधृक् ॥ ४६ ॥ नर्म चैभ्यो ददे यस्मात्तत्कृतैश्चेष्टितैः पृथक् ॥ भविष्यसि वरारोहे सरिच्छ्रेष्ठा तु नर्म्मदा ॥ ४७ ॥ स्वरूपमास्थितो देवः प्राप हास्यं यतो भुवि ॥ नर्मदा तेन चोक्तेयं सुशीतलजला शिवा ॥ ४८ ॥ सप्तकल्पक्षये जाते यदुक्तं शंभुना पुरा ॥ न मृता तेन राजेंद्र नर्मदा ख्यातिमागता ॥ ४९ ॥ ततस्तामददात्कन्यां शीलवतीं सुशोभनाम् ॥ महार्णवाय देवेशः सर्वभूतपतिः प्रभुः ॥ ५० ॥ ततः सा ऋक्षशैलेंद्रात्फेनपुंजाट्टहासिनी ॥ विवेश नर्मदा देवी समुद्रं सरितां पतिम् ॥ ५१ ॥ एवं ब्राह्मे पुरा कल्पे समुद्भूतेयमीश्वरात् ॥ मात्स्ये कल्पे मया दृष्टा समाख्याता मया शृणु ॥ ५२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखण्डे रेवाखण्डे नर्मदामाहात्म्यनर्मदानामनिरुक्तिवर्णनंनाम पञ्चमोऽध्यायः ॥ ५ ॥ ॥ छ ॥ ॥ मार्कंडेय उवाच ॥ ॥ पुनर्युगांते संप्राप्ते तृतीये नृपसत्तम ॥ द्वादशार्कवपुर्भूत्वा भगवान्नीललोहितः ॥ १ ॥ सप्तद्वीपसमुद्रांतां सशैलवनकाननाम् ॥ निर्दग्धां तु महीं कृत्स्नां कालो भूत्वा महेश्वरः ॥ २ ॥ ततो महाघनो भूत्वा प्लावयामास वारिणा ॥ कृष्णं कृष्णवपुस्त्वेनां विद्युच्चंद्रायुधांकिताम् ॥ ३ ॥ प्लावयित्वा जगत्सर्व्वं तस्मिन्नेकार्णवीकृते ॥ सुष्वाप विमले तोये जगत्संक्षिप्य मायया ॥ ४ ॥ ततोऽहं भ्रममास्तु तमोभूते महार्णवे ॥ दिव्यं वर्षसहस्रं तु वायुभूते महेश्वरे ॥ ५ ॥ ओंकृत्वा देवदेवेशं येनेदं गहनीकृतम् ॥ ध्यायमानस्ततो देवं राजेंद्र विमले जले ॥ ६ ॥ तस्मिन्महार्णवे घोरे नष्टे स्थावरजंगमे ॥ मयूरं स्वर्णपत्राढ्यमपश्यंसहसा जले ॥ विचित्रचन्द्रकोपेतं नीलकंठं सुलोचनम् ॥ ७ ॥

१ ब्रुवन्—ब्रुवन्तः—इत्यपेक्षितम् प्रत्येकाभिप्रायेण चैकवचनम् ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ततो मयूरः स महार्णवांते विक्षोभयित्वा हि महारवेण ॥ चचार देवस्त्रिशिखी शिखंडी त्रैलोक्यगोप्ता स महानुभावः ॥ ८ ॥ शिवश्च रौद्रेण मयूररूपिणा विक्षोभ्यमाणे सलिलेऽपि तस्मिन् ॥ सह भ्रमंतीं च महार्णवांते सारिन्महौघां सुमहान्ददर्श ॥ ९ ॥ स तां महादेवमयूररूपो दृष्ट्वा भ्रमंतीं सहसोर्मिजालैः ॥ का त्वं शुभे शाश्वतदेहभूता क्षयं न यातासि महाक्षयांते ॥ १० ॥ देवासुरगणे नष्टे सरित्सरमहार्णवे ॥ का त्वं भ्रमसि पद्माक्षि क्व गतासि च न क्षयम् ॥ ११ ॥ ॥ नर्मदोवाच ॥ ॥ तव प्रसादाद्देवेश मृत्युर्मम न विद्यते ॥ सृज देव पुनर्विश्वं शर्वरी क्षयमागता ॥ १२ ॥ एवमुक्तो महादेवो व्यधुनोत्पक्षपंजरम् ॥ तावत्पंजरमध्यांते तस्य पक्षाद्विनिःसृताः ॥ १३ ॥ तावंतो देवदैत्येंद्राः पक्षाभ्यां तस्य जज्ञिरे ॥ तेषां मध्ये पुनः सा तु नर्मदा भ्रमते सरित् ॥ १४ ॥ ततश्चान्यो महाशैलो दृश्यते भरतर्षभ ॥ त्रिभिः कूटैः सुविस्तीर्णैः शृंगवानिव गोवृषः ॥ १५ ॥ त्रिकूटस्तु इति ख्यातः सर्वरत्नैर्विभूषितः ॥ ततस्तस्मात्त्रिकूटाच्च प्लावयंती महीं ययौ ॥ १६ ॥ त्रिकूटी तेन विख्याता पितॄणां त्रायणी परा ॥ द्वितीयाच्च ततो गङ्गा विस्तीर्णा धरणीतले ॥ १७ ॥ तृतीयं च ततः शृंगं सप्तधा खंडशो गतम् ॥ जंबूद्वीपे तु संजाताः सप्त ते कुलपर्वताः ॥ १८ ॥ चन्द्रनक्षत्रसहिता ग्रहग्रामनदीनदाः ॥ अंडजं स्वेदजं जातमुद्भिज्जं च जरायुजम् ॥ १९ ॥ एवं जगदिदं सर्व्वं मयूराद्भवत्पुरा ॥ समस्तं नरशार्दूल महादेवसमुद्भवम् ॥ २० ॥ ततो नदीः समुद्रांश्च संविभज्य पृथक्पृथक् ॥ नर्मदामाह देवेशो गच्छ त्वं दक्षिणां दिशम् ॥ २१ ॥ एवं सा दक्षिणा गंगा महापातकनाशिनी ॥ उत्तरे जाह्नवी देशे पुण्या त्वं दक्षिणे शुभा ॥ २२ ॥ यथा गंगा महापुण्या मम मस्तकसंभवा ॥ तद्विशिष्टा महाभागे त्वं चैवेति न संशयः ॥ २३ ॥ त्वया सह भविष्यामि एकेनांशेन सुव्रते ॥ महापातकयुक्तानामौषधं त्वं भविष्यसि ॥ २४ ॥ एवमुक्ता तु देवेन महापातकनाशिनी ॥ दक्षिणं दिग्विभागं तु सा जगामाऽऽशुविक्रमा ॥ २५ ॥ ऋक्षशैलेंद्रमासाद्य चंद्रमौलेरनुग्रहात् ॥ वार्यौघैः प्रस्थिता यस्मान्महादेवप्रणोदिता ॥ २६ ॥ महता चाऽपि वेगेन यस्मादेषा समुच्छ्रिता ॥ महती तेन सा प्रोक्ता महादेवान्महीपते ॥ २७ ॥ तपतस्तस्य देवस्य शूलाग्राद्दिवोऽपतन् ॥ तेनैषा शोणसंज्ञा तु दश सप्त च ताः स्मृताः ॥ २८ ॥ सर्वेषां नर्मदा पुण्या रुद्रदेहाद्विनिःसृता ॥ सर्वाभ्यश्च सरिद्भ्यश्च वरदानान्महात्मनः ॥ २९ ॥ शंकराऽनुग्रहाद्देवी महापातकनाशिनी ॥ यस्मान्महार्णवे घोरे दृश्यते महती च सा ॥ ३० ॥ सुव्यक्तांगी महाकाया महती तेन सा स्मृता ॥ तस्माद्विक्षोभ्यमाणा हि



१ सरिन्महौघाम्-महौघां सरितम्-इत्यर्थः । २ ऋषिशैलेन्द्रम्-इ० पा० । ३ संप्रोक्ता-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिग्गजैरंबुदोपमैः ॥ ३१ ॥ कलुषत्वं नयत्येव रसेन सुरसा तथा ॥ कृपां करोति सा यस्माल्लोकानामभयप्रदा ॥ ३२ ॥ संसारार्णवमग्नानां तेन चैषा कृपा स्मृता ॥ पुरा कृतयुगे पुण्ये दिव्यमन्दारभूषिता ॥ ३३ ॥ कल्पवृक्षसमाकीर्णा रोहीतकसमाकुला ॥ वहत्येषा च मंदेन तेन मंदाकिनी स्मृता ॥३४॥ भित्त्वा महार्णवं क्षिप्रं यस्माल्लोकमिहागता ॥ पूज्या सुरैश्च सिद्धैश्च तस्मादेषा महार्णवा ॥ ३५ ॥ विचित्रोत्पलसंघातैर्ऋक्ष द्विपसमाकुला ॥ ३६ ॥ भित्त्वा शैलं च विपुलं प्रयात्येवं महार्णवम् ॥ भ्रामयंती दिशः सर्वा रवेण महता पुरा ॥ ३७ ॥ प्लावयन्ती विराजंती तेन रेवा इति स्मृता ॥ भार्यापुत्रसुदुःखाव्यान्नराञ्छापैः समावृतान् ॥३८॥ विपापान्कुरुते यस्माद्विपापा तेन सा स्मृता ॥ विण्मूत्रनिचयां घोरां पांशु शोणितकर्दमाम् ॥ ३९ ॥ पाशैर्नित्यं तु संबाधां यस्मान्मोचयते भृशम् ॥ विपाशेति च सा प्रोक्ता संसारार्णवतारिणी ॥ ४० ॥ नर्मदा विम लांभा च विमलेंदुशुभानना ॥ तमीभूते महाघोरे यस्मादेषा महाप्रभा ॥ ४१ ॥ विमला तेन सा प्रोक्ता विद्वद्भिर्नृपसत्तम ॥ करैरिंदुकरप्रख्यैः सूर्यरश्मिसमप्रभा ॥ ४२ ॥ क्षरंती मोदते विश्वं करभा तेन चोच्यते ॥ यस्माद्रंजयते लोकान्दर्शनादेव भारत ॥ ४३ ॥ रंजनाद्रंजना प्रोक्ता धात्वर्थे राजसत्तम ॥ तृणवीरुधगुल्माद्यास्तिर्यंचः पक्षिणस्तथा ॥ तानुद्धूतान्नयेत्स्वर्गं तेनोक्ता वायुवाहिनी ॥ ४४ ॥ एवं यो वेत्ति नामानि निर्गमं च विशेषतः ॥ स याति पापविमुक्तो रुद्रलोकं न संशयः ॥ ४५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये सहेतुकरेवानाममाहात्म्यवर्णने मयूरकल्पसमुद्भवोनाम षष्ठोऽध्यायः ॥ ६ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ पुनरेकार्णवे घोरे नष्टे स्थावरजंगमे ॥ सलिलेनाप्लुते लोके निरालोके तमोद्भवे ॥ १ ॥ ब्रह्मैको विचरंस्तत्र तमीभूते महार्णवे ॥ दिव्य वर्षसहस्रं तु खद्योत इव रूपवान् ॥ २ ॥ शेते योजनसाहस्रमप्रमेयमनुत्तमम् ॥ द्वादशादित्यसंकाशं सहस्रचरणेक्षणम् ॥ ३ ॥ प्रसुप्तं चार्णवे घोरे ह्यपश्यत्कूर्मरूपिणम् ॥ तं दृष्ट्वा विस्मयापन्नो ब्रह्मा बोधयते शनैः ॥ ४ ॥ स्तुतिभिर्मंगलैश्चैव वेदवेदांगसंभवैः ॥ वाचस्पते विबुध्यस्व महाभूत नमोऽस्तु ते ॥ ५ ॥ तवोदरे जगत्सर्वं तिष्ठते परमेश्वर ॥ तद्विमुंच महासत्त्व यत्पूर्वं संहृतं त्वया ॥ ६ ॥ व्यतीता रजनी ब्राह्मी दिनं समनुवर्त्तते ॥ निरीक्ष्य सर्वलोकेश येन संभवते जगत् ॥ ७ ॥ स निशम्य वचस्तस्य उत्थितः परमेश्वरः ॥ समुद्गिरन्सलोकांस्त्रीन्ग्रस्तान्कल्पक्षये तदा ॥ ८ ॥ देवदानवगन्धर्वाः सयक्षोरगराक्षसाः ॥ सचंद्रार्कग्रहाः सर्व्वे शरीरात्तस्य निर्गताः ॥ ९ ॥ ततो ह्येकार्णवं सर्वं विभज्य परमेश्वरः ॥ विस्तीर्णो पलतोयौघां सरित्सरविवर्द्धिताम् ॥ १० ॥ पश्यते मेदिनीं देवः सवृक्षौषधिपल्वलाम् ॥ हिमवंतं गिरिश्रेष्ठं श्वेतं पर्वतमुत्तमम् ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



शृंगवन्तं महाशैलं ये चान्ये कुलपर्वताः ॥ जंबूद्वीपं कुशं क्रौंचं सगोमेदं सशाल्मलम् ॥ १२ ॥ पुष्करांताश्च ये द्वीपा ये च सप्त महार्णवाः ॥ लोकालोकं महाशैलं सर्वं च पुरतः स्थितम् ॥ १३ ॥ चतुःप्रकृतिसंयुक्तं जगत्स्थावरजंगमम् ॥ युगांते तु विनिष्क्रांतमपश्यत्स महेश्वरः ॥ १४ ॥ विप्रकीर्णशिलाजालामपश्यत्स वसुन्धराम् ॥ कूर्मपृष्ठोपगां देवीं महार्णवगतां प्रभुः ॥ १५ ॥ तस्मिन्विशीर्णशैलाग्रे सरित्सरोविवर्जिते ॥ नानातरंगभिन्नोद आवर्तोद्वर्त्तसंकुले ॥ १६ ॥ नानौषधिप्रज्वलिते नानोत्पलशिलातले ॥ नानाविहंगसंघुष्टां मत्स्यकूर्म्मसमाकुलाम् ॥ १७ ॥ दिव्यमायामयीं देवीमुत्कृष्टांबुदसन्निभाम् ॥ नदीमपश्यद्देवेशो ह्यनौपम्यजलाशयाम् ॥ १८ ॥ मध्ये तस्यांबुदश्यामां पीनोरुजघनस्तनीम् ॥ वस्त्रैरनुपमैर्दिव्यैर्नानाभरणभूषिताम् ॥ १९ ॥ सनूपुररवोद्दामां हारकेयूरमंडिताम् ॥ तादृशीं नर्मदां देवीं स्वयं स्त्रीरूपधारिणीम् ॥ २० ॥ योगमायामयैश्चित्रैर्भूषणैः स्वैर्विभूषिताम् ॥ अव्यक्तांगीं महाभागामपश्यत्स तु नर्मदाम् ॥ २१ ॥ अर्द्धोद्यतभुजां बालां पद्मपत्रायतेक्षणाम् ॥ स्तुवन्तीं देवदेवेशमुत्थितां तु जलात्तदा ॥ २२ ॥ विस्मयाऽऽविष्टहृदयो ह्यहमुद्वीक्ष्य तां शुभाम् ॥ स्नात्वा जले शुभे तस्याः स्तोतुमभ्युद्यतस्ततः ॥ २३ ॥ अर्चयामास संहृष्टो मन्त्रैर्वेदांगसंभवैः ॥ सृष्टं च तत्पुरा राजन्पश्येयं सचराचरम् ॥ ॥ २४ ॥ सदेवासुरगन्धर्वं सपन्नगमहोरगम् ॥ पश्याम्येषा महाभागा नैव याता क्षयं पुरा ॥ २५ ॥ महादेवप्रसादाच्च तच्छरीरसमुद्भवा ॥ भूयोभूयो मया दृष्टा कथिता ते नृपोत्तम ॥ २६ ॥ प्रादुर्भावमिमं कौर्म्यं येऽधीयन्ते द्विजोत्तमाः ॥ येऽपि शृण्वंति विद्वांसो मुच्यन्ते तेऽपि किल्बिषैः ॥ २७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये कूर्मकल्पसमुद्भवोनाम सप्तमोऽध्यायः ॥ ७ ॥ ॥ छ ॥ ॥ मार्कंडेय उवाच ॥ ॥ नष्टे लोके पुनश्चान्ये सलिलेन समावृते ॥ महार्णवस्य मध्यस्थो बाहुभ्यामतरं जलम् ॥ १ ॥ दिव्ये वर्षशते पूर्णे श्रांतोऽहं नृपसत्तम ॥ ध्यातुं समारभं देवं महदर्णवतारणम् ॥ २ ॥ ध्यायमानस्ततः काले अपश्यं पक्षिणं परम् ॥ हारकुन्देन्दुसंकाशं बकं गोक्षीरपांडुरम् ॥ ३ ॥ ततोऽहं विस्मयाविष्टस्तं बकं समुदीक्ष्य वै ॥ अस्मिन्महार्णवे घोरे कुतोऽयं पक्षिसंभवः ॥ ४ ॥ तरन्बाहुभिरश्रांतस्तं बकं प्रत्यभाषिषि ॥ पक्षिरूपं समास्थाय कस्त्वमेकार्णवीकृते ॥ ५ ॥ भ्रमसे दिव्ययोगात्मन्मोहयन्निव मां प्रभो ॥ एतत्कथय मे सर्व्वं योऽसि सोऽसि नमोऽस्तु ते ॥ ६ ॥ सोऽब्रवीन्मां महादेवो ब्रह्माऽहं विष्णुरेव च ॥ जगत्सर्वं मया वत्स संहृतं किं न बुध्यसे ॥ ७ ॥

१ इदम्—इ०पा० । २ प्रत्यभाषिषि—अहं प्रत्यवोचम्—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तव माता पिताऽहं वै विश्वस्य च महामुने ॥ कारुण्यं मम संजातं दृष्ट्वा मग्नं महार्णवे ॥ ८ ॥ पक्षिरूपं समास्थाय अतोऽत्राऽहं समागतः ॥ किम र्थमातुरो भूत्वा भ्रमसीत्थं महार्णवे ॥ ९ ॥ शीघ्रं प्रविश मत्पक्षौ येन विश्रमसे द्विज ॥ एवमुक्तस्ततस्तेन देवेनाऽहं नरेश्वर ॥ १० ॥ ततोऽहं तस्य पक्षांते प्रलीनस्तु श्रमज्जले ॥ काले युगसाहस्रांते अश्रांतोऽर्णवमध्यगः ॥ ११ ॥ ततः शृणोमि सहसा दिक्षु सर्वासु सुव्रत ॥ किंचिन्नूपुरसंमिश्रम द्भुतं शब्दमुत्तमम् ॥ १२ ॥ तदार्णवजलं सर्वं संक्षिप्तं सहसाऽभवत् ॥ किमेतदिति संचिंत्य दिशः समवलोकयम् ॥ १३ ॥ दश कन्यास्ततो दिक्षु आगताश्च महार्णवे ॥ वस्त्रालंकारसहिता दिग्भ्यो नूपुरभूषिताः ॥ १४ ॥ काचिच्चन्द्रसमाभासा काचिदादित्यसप्रभा ॥ काचिदंजनपुंजाभा काचि द्रक्तोत्पलप्रभा ॥ १५ ॥ नानारूपधरा सौम्या नानाऽऽभरणभूषिता ॥ अर्घ्यपाद्यादिभिर्माल्यैर्बकमभ्यर्च्य सुव्रताः ॥ १६ ॥ ततस्तं पर्वताकारं गुह्यं पक्षिणमव्ययम् ॥ प्रविवेश महाघोरं पर्वतो ह्यर्णवं स्वराट् ॥ १७ ॥ योजनानां सहस्राणि तावन्त्येव शतानि च ॥ त्रिंशद्योजनसाहस्रं याव द्भूमंडलं त्विति ॥ १८ ॥ ततो भूमण्डलं दिव्यं पंचरत्नसमाकुलम् ॥ दिव्यस्फटिकसोपानं रुक्मस्तंभमनोरमम् ॥ १९ ॥ योजनानां सहस्रं तु विस्तराद्द्विगुणाऽऽयतम् ॥ वापीकूपसमाकीर्णं प्रासादाट्टालकावृतम् ॥ २० ॥ कल्पवृक्षसमाकीर्णं ध्वजयष्टिविभूषितम् ॥ तस्मिन्पुरवरे रम्ये नाना रत्नोपशोभितम् ॥ २१ ॥ तथान्यच्च पुरं रम्यं पताकोज्ज्वलवेदिकम् ॥ शतयोजनविस्तीर्णं तावद्द्विगुणमायतम् ॥ २२ ॥ पुरमध्ये ततस्तस्मिन्नदी प रमशोभना ॥ महती पुण्यसलिला नानारत्नशिला तथा ॥ २३ ॥ तस्यास्तीरे मया दृष्टं तडित्सूर्यसमप्रभम् ॥ इन्द्रनीलमहानीलैश्चितं रत्नैः समंततः ॥ २४ ॥ क्वचिद्वह्निसमाकारं क्वचिदिन्द्रायुधप्रभम् ॥ क्वचिद्धूम्रं क्वचित्पीतं क्वचिद्रक्तं क्वचित्सितम् ॥ २५ ॥ नानावर्णैः समा युक्तं लिंगमद्भुतदर्शनम् ॥ ब्रह्मविष्ण्विन्द्रसाध्यैश्च समंतात्परिवारितम् ॥ २६ ॥ नन्दीश्वरगणाध्यक्षैश्चंद्रादित्यैश्च तद्वृतम् ॥ पश्यामि लिंगमीशानं महालिंगं तमेव च ॥ २७ ॥ परिवार्य ततस्तं तु प्रसुप्तान्देवदानवान् ॥ निमीलिताक्षान्पश्यामि दिव्याभरणभूषितान् ॥ ॥ २८ ॥ ततस्ताः पद्मपत्राक्ष्यो नार्य्यः परमसम्मताः ॥ नद्यास्तस्या जले स्नात्वा दिव्यपुष्पैर्मनोरमैः ॥ २९ ॥ दत्त्वाऽर्घपाद्यं विधिवल्लिंगस्य सह पक्षिणा ॥ अर्चयंतीर्वरारोहा दश ताः प्रमदोत्तमाः ॥ ३० ॥ ततस्त्वभ्यर्च्य तल्लिंगं तस्मिन्नेव पुरोत्तमे ॥ सर्वा अदर्शनं जग्मुर्विद्युतोऽभ्र गणेष्विव ॥ ३१ ॥ न चाऽसौ पक्षिराट् तस्मिन्न स्त्रियो न च देवताः ॥ तदेवैकं स्थितं लिंगमर्चयन्विस्मयान्वितः ॥ ३२ ॥ ततोहं दुःखमूढात्मा रुद्र मायेति चिंतयन् ॥ ततः कन्याः समुत्तीर्य दिव्यांबरविभूषणाः ॥ ३३ ॥ भासयंत्यो जगत्सर्व्वं विद्युतोऽभ्रगणानिव ॥ पद्मैर्हिरण्मयैर्दिव्यैरर्चयित्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



शुभाननाः ॥ ३४ ॥ विविशुस्तज्जलं क्षिप्रं समंताद्वरभूषणाः ॥ तस्मिन्पुरवरे चाऽन्ये तामेवाहं पुनःपुनः ॥ ३५ ॥ पश्यामि ह्यमरां कन्यां अर्च्चयंतीं महेश्वरम् ॥ ततोऽहं तां वरारोहामपृच्छं कमलेक्षणाम् ॥ ३६ ॥ का त्वमस्मिन्पुरे देवि वससे शिवमर्चंती ॥ ताश्चागताः स्त्रियः सर्वाः क्व गतास्ते गणेश्वराः ॥ ३७ ॥ नमोऽस्तु ते महाभागे ब्रूहि पुण्ये महेश्वरि ॥ तव प्रसादाद्विज्ञातुमेतदिच्छामि सुव्रते ॥ दयां कृत्वा महादेवि कथयस्व ममाऽनघे ॥ ३८ ॥ ॥ स्युवाच ॥ ॥ विस्मृताऽहं कथं विप्र दृष्ट्वा कल्पे पुरातने ॥ मा तेऽभूत्स्मृतिविभ्रंशः सा चाऽहं कल्पवाहिनी ॥ ३९ ॥ नर्मदानाम विख्याता रुद्रदेहाद्विनिःसृता ॥ यास्ताः कन्यास्त्वया दृष्टा ह्यर्च्चयंत्यो महेश्वरम् ॥ ४० ॥ याभिस्त्विह समानीतः पक्षिराजसमन्विताः ॥ दिशस्ता विद्धि सर्वेशाः सर्वास्त्वं मुनिसत्तम ॥ ४१ ॥ तिर्यक्पक्षिस्वरूपेण महायोगी महेश्वरः ॥ एभिः[1] शिवपुराद्विप्र आनीतः स महेश्वरः ॥४२॥ सैष देवो महादेवो लिंगमूर्त्तिर्व्यवस्थितः ॥ अर्च्यते ब्रह्मविष्ण्वद्रैः सुरासुरजगद्गुरुः ॥४३॥ लयमायाति यस्माद्धि जगत्सर्वं चराचरम् ॥ तेन लिंगमिति प्रोक्तं पुराणज्ञैर्महर्षिभिः ॥ ४४ ॥ तेन देवगणाः सर्व्वे संक्षिप्ता मायया पुरा ॥ प्रलीनाश्चैव लोकेश न दृश्यंते हि सांप्रतम् ॥ ४५ ॥ पुनर्दृश्या भविष्यंति सृजमानाः स्वयंभुवा ॥ साऽहं लिंगार्चनपरा नर्मदानाम नामतः ॥ ४६ ॥ कालं युगसहस्रस्य रुद्रस्य परिचारिका ॥ अस्य प्रसादादमरस्तथा त्वं द्विजपुंगव ॥ ४७ ॥ सत्यार्जवदयायुक्तः सिद्धोऽसि त्वं शिवार्चनात् ॥ एवमुक्त्वा तु सा देवी तत्रैवांतरधीयत ॥ ४८ ॥ ताः स्त्रियः स च देवेशो बकरूपो महेश्वरः ॥ तस्यास्तद्वचनं श्रुत्वा अवतीर्य्य महानदीम् ॥ ४९ ॥ स्नात्वा समर्चय त्वं हि विधिना मंत्रपूर्वकम् ॥ ततोऽहं सहसा तस्मात्समुत्तीर्य्य जलाशयात् ॥ ५० ॥ न च पश्यामि तल्लिंगं न च तां निम्नगां नृप ॥ तदैव लोकाः संजाताः क्षितिश्चैव सकानना ॥ ५१ ॥ ऋक्षचंद्रार्कवितत तदेव च नभस्तलम् ॥ यथापूर्वमदृष्टं तु तथैव च पुनः कृतम् ॥ नतोहं मनसा देवमपूजयं महेश्वरम् ॥ ५२ ॥ एवं बके पुरा कल्पे मया दृष्टेयमव्यया ॥ नर्मदा मर्त्यलोकस्य महापातकनाशिनी ॥५३॥ तस्माद्धर्मपरैर्विप्रैः क्षत्रशूद्रविशादिभिः ॥ सदा सेव्या महाभागा धर्म्मवृद्ध्यर्थकारिभिः ॥ ५४ ॥ येऽपि भक्त्या सकृत्तोये नर्मदाया महेश्वरम् ॥ स्नात्वाऽर्चयंति ते सर्वं पापं नाश्यंत्यसंशयम्[2] ॥ ५५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये बककल्पसमुद्भवोनामाऽष्टमोऽध्यायः ॥ ८ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ पुनर्युगांतं ते चाऽन्यं संप्रवक्ष्यामि तच्छृणु ॥ सूर्यैरादीपिते लोके जंगमे स्थावरे पुरा ॥ १ ॥ सरित्सरःसमुद्रेषु क्षयं यातेषु सर्वशः ॥

१ एभिः--पूर्वोक्तैर्वन्दीश्वरादिभिः--इत्यर्थः । २ नाश्यन्ति--नाशयन्ति--इत्यपेक्षितम् । आर्षः प्रयोगः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निर्म्मानुषवषट्कारे ह्यमर्यादगतिं गते ॥ २ ॥ नानारूपैस्ततो मेघैः शक्रायुधविराजितैः ॥ सर्वमापूरितं व्योम वार्योघैः पूरिते तदा ॥ ३ ॥ ततस्त्वेकार्णवीभूते सर्वतः सलिलावृते ॥ जगत्कृत्वोदरे सर्व्वं सुष्वाप भगवान्हरः ॥ ४ ॥ प्रकृतिं स्वामवष्टभ्य योगात्मा स प्रजापतिः ॥ शेते युगसहस्रांतं कालमाविश्य सार्णवम् ॥ ५ ॥ तत्र सुप्तं महात्मानं ब्रह्मलोकनिवासिनः ॥ भृग्वादिऋषयः सर्व्वे ये चाऽन्ये सनकादयः ॥ ६ ॥ पर्यंके विमले शुभ्रे नानास्तरणसंस्तृते ॥ शयानं ददृशुर्देवं सपत्नीकं वृषध्वजम् ॥ ७ ॥ विश्वरूपा तु सा नारी विश्वरूपो महेश्वरः ॥ गाढमालिंग्य सुप्तस्तां ददृशे चाहमव्ययम् ॥ ८ ॥ पादमूले ततस्तस्य श्यामां तां पद्मलक्षणाम् ॥ कन्यां पश्यामि सुश्रोणीं चरणौ तस्य मृद्नतीम् ॥ ९ ॥ विमलांबरसंवीतां व्यालयज्ञोपवीतिनीम् ॥ श्यामां कमलपत्राक्षीं सर्वाभरणभूषिताम् ॥ १० ॥ सकलं युगसाहस्रं नर्मदेयं विजानती ॥ प्रसुप्तं देवदेवेशमुपास्ते वरवर्णिनी ॥ ११ ॥ हृतैर्वेदैश्चतुर्भिश्च ब्रह्माऽप्येवं महेश्वरः ॥ भृग्वाद्यैर्मानसैः पुत्रैः स्तौति शंकरमव्ययम् ॥ १२ ॥ भक्त्या परमया राजंस्तत्र शंभुमनामयम् ॥ स्तुवंतस्तत्र देवेशं मंत्रैरीश्वरसंभवैः ॥ १३ ॥ अकस्मात्संप्रलीनास्ते चत्वारः श्रुतयोऽर्णवे ॥ वेदैः प्रलीनैर्भगवानज्ञानतमसा वृतः ॥ १४ ॥ प्रसुप्तं देवमीशानं बोधयन्समुपस्थितः ॥ उत्तिष्ठ हर पिंगाक्ष महादेव महेश्वर ॥ १५ ॥ मम वेदा हृताः सर्वे अतोऽहं स्तोतुमुद्यतः ॥ वेदैर्व्याप्तं जगत्सर्वं दिव्यादिव्यं चराचरम् ॥ १६ ॥ अतीतं वर्त्तमानं च स्मरामि च सृजाम्यहम् ॥ तैर्विना चाऽहमेकस्तु मूकोऽधो जडवत्सदा॥१७॥गतिर्वीर्य्यं बलोत्साहौ तैर्विना न प्रजायते॥ तैर्विना देवदेवेश नाऽहं किंचित्स्मरामि वै॥१८॥ तान्वेदान्देवदेवेश शीघ्रं मे दातुमर्हसि ॥ जडांधबधिरं सर्वं जगत्स्थावरजंगमम् ॥ १९ ॥ स्थानादि दश चत्वारि न शोभंते सुरेश्वर ॥ प्रणमाम्यल्पवीर्यत्वाद्वेदहीनः सुरेश्वर ॥ २० ॥ वेदेभ्यः सकलं जातं यत्किंचित्सचराचरम् ॥ तावच्छोभंति शास्त्राणि समस्तानि जगद्गुरो ॥ २१ ॥ यावद्वेदनिधिरयं नोपतिष्ठेत्सनातनः ॥ यथोदितेन सूर्येण तमो याति विनाशताम् ॥ २२ ॥ एवं समस्तपापानि यांति वेदस्य धारणात् ॥ वेदे रहसि यत्सूक्ष्मं यत्तद्ब्रह्म सनातनम् ॥ २३ ॥ हृदिस्थं देव जानामि गतं तद्वेदगर्जनात् ॥ वेदानुच्चरतो मेऽद्य तव शंकर चाग्रतः ॥ २४ ॥ अकस्मात्ते गता वेदा न सृजेयं विभो भुवम् ॥ तेऽपि सर्व्वे महादेव प्रविष्टाः सम्मुखार्णवम् ॥ २५ ॥ ते याच्यमाना देवेश तिष्ठंतु स्मरणे मम ॥ दुहितेयं विशालाक्षी सर्वः सर्वं विजानते ॥ २६ ॥ जायती युगसाहस्रं नान्या काचिद्भवेद्दृशी ॥ ऋषिश्चायं महाभागो मार्कंडो धीमतां वरः ॥ २७ ॥ कल्पेकल्पे

१ गतैः--इ०पा० । २ यथायोग्यं वचनं विपरिणमयितव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



महादेव त्वामयं पर्युपासते ॥ जगत्त्रयहितार्थाय चरते व्रतमुत्तमम् ॥ २८ ॥ एवमुक्तस्तु देवेशो ब्रह्मणा परमेष्ठिना ॥ उवाच श्लक्ष्णया वाचा
 नर्मदां सरितां वराम् ॥ २९ ॥ कथयस्व महाभागे ब्रह्मणस्त्वं तु पृच्छतः ॥ केन वेदा हृताः सर्वे वेधसो जगतीगुरोः ॥ ३० ॥ एवमुक्ता तु रुद्रेण
उवाच मृगलोचना ॥ ब्रह्मणो जपतो वेदांस्त्वयि सुप्ते महेश्वर ॥ ३१ ॥ भवतश्छिद्रमासाद्य घोरेऽस्मिन्सलिलावृते ॥ पूर्वकल्पसमुद्भूतावसुरौ
सुरदुर्जयौ ॥ ३२ ॥ श्रियावृत्तौ महादेव त्वया चोत्पादितौ पुरा ॥ सुरासुरसुदुर्जेयौ दानवौ मधुकैटभौ ॥ ३३ ॥ तौ वायुभूतौ सूक्ष्मौ च पठतो
ऽस्मात्पितामहात् ॥ तावाशु हृत्वा वेदांश्च प्रविष्टौ च महार्णवम् ॥ ३४ ॥ एतच्छ्रुत्वा महातेजा ह्यमृतायास्ततो वचः ॥ सस्मार स च देवेशं शंख
चक्रगदाधरम् ॥ ३५ ॥ स विवेश महाराज भूतलं ससुरोत्तमः ॥ दानवांतकरो देवः सर्वदैवतपूजितः ॥ ३६ ॥ मीनरूपधरो देवो लोडयामास
चार्णवम् ॥ वेदांश्च ददृशे तत्र पाताले निहितान्प्रभुः ॥ ३७ ॥ तौ च दैत्यौ महावीर्य्यौ दृष्टवान्मधुसूदनः ॥ महावेगौ महाबाहू सूदयामास
तेजसा ॥ ३८ ॥ वेदांस्तत्राऽपि तोयस्थानानिनाय जगद्गुरुः ॥ चतुर्वक्त्राय देवायाददाच्चक्रविभूषितः ॥ ३९ ॥ ततः प्रहृष्टो भगवान्वेदाँल्लब्ध्वा
पितामहः ॥ जनयामास निखिलं जगद्भूयश्चराचरम् ॥ ४० ॥ सा च देवी नदी पुण्या रुद्रस्य परिचारिका ॥ पावनी सर्वभूतानां प्रोवाह सलिलं
तदा ॥ ४१ ॥ तस्यास्तीरे ततो देवा ऋषयश्च तपोधनाः ॥ यजंति त्र्यंबकं देवं प्रहृष्टेनांऽतरात्मना ॥ ४२ ॥ एका मूर्त्तिर्महेशस्य कारणांतरमा
गता ॥ त्रैगुण्या कुरुते कर्म्म ब्रह्मचक्रीशरूपतः ॥ ४३ ॥ एतेषां तु पृथग्भावं ये कुर्वंति सुमोहिताः ॥ तेषां धर्म्मः कुतः सिद्धिर्जायते पाप
कर्म्मिणाम् ॥ ४४ ॥ एवमेता महानद्यस्तिस्रो रुद्रसमुद्भवाः ॥ एका एव त्रिधा भूता गङ्गा रेवा सरस्वती ॥ ४५ ॥ गङ्गा तु वैष्णवी मूर्त्तिः सर्व
पापप्रणाशिनी ॥ रुद्रदेहसमुद्भूता नर्मदा चैवमेव तु ॥ ४६ ॥ ब्राह्मी सरस्वती मूर्त्तिस्त्रिषु लोकेषु विश्रुता ॥ दिव्या कामगमा देवी वाग्विभूत्यै तु
संस्थिता ॥ ४७ ॥ नर्मदा परमा काचिन्मर्त्यमूर्त्तिकला शिवा ॥ दिव्या कामगमा देवी सर्वत्र सुरपूजिता ॥ ४८ ॥ व्यापिनी सर्वभूतानां सूक्ष्मा
त्सूक्ष्मतरा स्मृता ॥ अक्षया ह्यमृता ह्येषा स्वर्गसोपानमुत्तमा ॥ ४९ ॥ सृष्टा रुद्रेण लोकानां संसारार्णवतारिणी ॥ ५० ॥ सरिज्जलं येऽपि पिबंति
लोके मुच्यंति ते पापविशेषसंघैः ॥ व्रजंति संसारमनादिभावं त्यक्त्वा चिरं मोक्षपदं विशुद्धम् ॥ ५१ ॥ यथा गंगा तथा रेवा तथा चैव सर 
॥ १० ॥ स्वती ॥ समं पुण्यफलं प्रोक्तं स्नानदर्शनचिंतनैः ॥ ५२ ॥ वरदानान्महाभागा ह्यधिका चोच्यते बुधैः ॥ कारुण्यांतरभावेन न भृता समुपागता ॥
॥ ५३ ॥ मुच्यंते दर्शनात्तेन पातकैः स्नानमंगलैः ॥ नर्मदायां नृपश्रेष्ठ ये नमंति त्रिलोचनम् ॥ ५४ ॥ उमारुद्रांगसंभूता येन चैषा महानदी ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकान्प्रापयते स्वर्गं तेन पुण्यत्वमागता ॥ ५५ ॥ य एवमीशानवरस्य देहं विभज्य देवीमिह संशृणोति[1] ॥ स याति रुद्रं महता रवेण गंधर्व्वयक्षैरिव गीयमानः ॥ ५६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे नर्मदा माहात्म्ये नर्मदोत्पत्तितत्स्नानफलादिकथनंनाम नवमोऽध्यायः ॥ ९ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कस्मिन्कल्पे महाभागा नर्म्मदेयं द्विजोत्तम ॥ विभक्ता ऋषिभिः सर्व्वैस्तपोयुक्तैर्महात्मभिः ॥ १ ॥ एतद्विस्तरतः सर्वं ब्रूहि मे वदतां वर ॥ कल्पांते यद्भवेत्कष्टं लोकानां तत्त्व मेव च ॥ २ ॥ अतीते तु पुरा कल्पे यथेयं वर्त्ततेऽनघ ॥ अस्यांत्यस्य च कल्पस्य व्यवस्थां कथय प्रभो ॥ एवमुक्तः सभामध्ये मार्कंडो वाक्यम ब्रवीत् ॥ ३ ॥ ॥ मार्कण्डेय उवाच ॥ ॥ वक्ष्येऽहं श्रूयतां सर्वैः कथेयं पूर्वतः श्रुता ॥ ४ ॥ महत्कथेयं वैशिष्ठी कल्पादस्मात्परं तु या ॥ लोकक्षयकरो घोर आसीत्कालः सुदारुणः ॥ ५ ॥ तस्मिन्नपि महाघोरे यथेयं न मृता सती ॥ परितुष्टैर्विभक्ता च शृणुध्वं तां कथामिमाम् ॥ ६ ॥ युगांते समनुप्राप्ते पितामहदिनत्रये ॥ मानसा ब्रह्मणः पुत्राः साक्षाद्ब्रह्मेव सत्तमाः ॥ ७ ॥ सनकाद्या महात्मानो ये च वैमानिका गणाः ॥ यमेंद्र वरुणाद्याश्च लोकपाला दिनत्रये ॥ ८ ॥ कालापेक्षास्तु तिष्ठंति लोकवृत्तांततत्पराः ॥ ततः कल्पक्षये प्राप्ते तेषां ज्ञानमनुत्तमम् ॥ ९ ॥ सर्वेषां नश्यते चायुर्युगरूपाऽनुसारतः ॥ भूर्लोकं ते परित्यज्य अगमंश्च भुवं तदा ॥ १० ॥ स्वर्लोकं च महश्चैव जनश्चैव तपस्तदा ॥ आश्रयं सत्य लोकं च सर्वलोकमनुत्तमम् ॥ ११ ॥ कालं युगसहस्रांतं पुत्रपौत्रसमन्विताः ॥ सत्यलोके च तिष्ठंति यावत्संजायते जगत् ॥ १२ ॥ ब्रह्मपुत्राश्च ये केचित्कल्पादौ न भवंति ह ॥ त्रैलोक्यं ते परित्यज्य अनाधारं भवंति च ॥ १३ ॥ तैः सार्धं ये तु ते विप्रा अन्ये चापि तपोधनाः ॥ यक्षरक्षः पिशाचाश्च अन्ये वैमानिका गणाः ॥ १४ ॥ ऋषयश्च महाभागा वर्णाश्चान्ये पृथग्विधाः ॥ सीदंति भूम्यां सहिता ये चाऽन्ये तलवासिनः ॥ ॥ १५ ॥ अनावृष्टिरभूत्तत्र महती शतवार्षिकी ॥ लोकक्षयकरी रौद्रा वृक्षवीरुद्विनाशिनी ॥ १६ ॥ त्रैलोक्यसंक्षोभकरी सप्तार्णवविशोषणी ॥ ततो लोकाः क्षुधाविष्टा भ्रमंतीव दिशो दश ॥ १७ ॥ कंदैर्मूलैः फलैर्वापि वर्त्तयंते सुदुःखिताः ॥ सरितः सागराः कूपाः सेवंते पावनानि च ॥ १८ ॥ तत्राऽपि सर्वे शुष्यंति सरिद्भिः सह सागराः॥ ततो यान्यल्पसाराणि सत्त्वानि पृथिवीतले ॥ १९ ॥ तान्येवाग्रे प्रलीयंते भिन्नान्युरुजलेन[3] वै ॥ अथ संक्षीयमाणासु सरित्सु सह सागरैः ॥ २० ॥ ऋषीणां षष्टिसाहस्रं कुरुक्षेत्रनिवासिनाम् ॥ ये च वैखानसा विप्रा दन्तोलूखलिनस्तथा ॥ २१ ॥

१ संप्रसूतान्–इ०पा० । २ वायुः–इ० पा० । ३ भिन्नानि–रहितानि–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



हिमाचलगुहागुह्ये ये वसंति तपोधनाः ॥ सर्वे ते मामुपागम्य क्षुत्तृषार्त्तास्तपोधनाः ॥ २२ ॥ ऊचुः प्रांजलयः सर्वे सीदयामो महामुने ॥ सरित्सागरशैलांतं जगत्संशुष्यते द्विज ॥ २३ ॥ कुत्र यास्याम सहिता यावत्कालस्य पर्ययः ॥ दीर्घायुरसि विप्रेंद्र न मृतस्त्वं युगक्षये ॥ २४ ॥ भूतं भव्यं भविष्यच्च सर्वं तव हृदि स्थितम् ॥ तस्मात्त्वं वेत्सि सर्व्वं च कथयस्व महाव्रत ॥ २५ ॥ कीदृक्कालं महाभाग क्षपिष्यामोऽथ सुव्रत ॥ अनावृष्टिहतं सर्वं सीदते सचराचरम् ॥ २६ ॥ परित्राहि महाभाग न यथा याम संक्षयम् ॥ ततः संचिंत्य मनसा त्वरन्विप्रानथाब्रवम् ॥ २७ ॥ कुरुक्षेत्रं त्यजध्वं च पुत्रदारसमन्विताः ॥ त्यक्त्वोदीचीं दिशं सर्वे यामो याम्यामनुत्तमाम् ॥ २८ ॥ नगरग्रामघोषाढ्यां पुरपत्तनशोभिताम् ॥ गच्छामो नर्मदातीरं बहुसिद्धनिषेवितम् ॥ २९ ॥ रुद्रांगीं तां महापुण्यां सर्वपापप्रणाशिनीम् ॥ पश्यामस्तां महाभागां न्यग्रोधावारसंकुलाम् ॥ ॥ ३० ॥ तरंगावर्त्तसलिलां दर्दुरीमत्स्यसंकुलाम् ॥ नानाविहगसंघुष्टामृषिकोटिनिषेविताम् ॥ ३१ ॥ माहेश्वरैर्भागवतैः सांख्यैः सिद्धैः सुसेविताम् ॥ अनावृष्टिभयाद्भीताः कूलयोरुभयोरपि ॥ ३२ ॥ आश्रमे ह्याश्रमान्दिव्यान्कारयामो जितव्रताः ॥ एवमुक्तास्तु ते सर्वे समेतानुचरैः सह ॥ ३३ ॥ नर्म्मदातीरमासाद्य स्थिताः सर्वेऽकुतोभयाः ॥ किंचित्पूर्वमनुस्मृत्य पुरा कल्पादिभिर्भयम् ॥ ३४ ॥ प्राप्तास्तु नर्मदातीरमादावेव कलौ युगे ॥ ततो वर्षशतं पूर्णं दिव्यं रेवातटेऽवसन् ॥ ३५ ॥ षड्विंशच्च सहस्राणि वर्षाणां मानुषाणि च ॥ तत्राश्चर्यं मया दृष्टमृषीणां वसतां नृप ॥ ३६ ॥ अनावृष्टिहते लोके संशुष्के स्थावरे चरे ॥ भिन्ने युगादिकलने हाहाभूते विचेतने ॥ ३७ ॥ चातुर्वर्णे प्रलीने तु नष्टे होमबलिक्रमे ॥ निःस्वाहे निर्वषट्कारे शौचाचारविवर्जिते ॥ ३८ ॥ इयमेका सरिच्छ्रेष्ठा ऋषिकोटिनिषेविता ॥ नान्या काचित्त्रिलोकेऽपि रमणीया नरेश्वर ॥ ३९ ॥ यथेयं पुण्यसलिला इंद्रस्येवामरावती ॥ देवतायतनैः शुभ्रैराश्रमैश्च सुकल्पितैः ॥ ४० ॥ शोभते नर्मदा देवी स्वर्गे मंदाकिनी यथा ॥ यावद्वृक्षा महाशैला यावत्सागरसंभवा ॥ ४१ ॥ उभयोः कूलयोस्तावन्मंडितायतनैः शुभैः ॥ हूयद्भिरग्निहोत्रैश्च हविर्धूमसमाकुला ॥ ४२ ॥ बभूव नर्मदा देवी प्रावृट्काले शर्वरी ॥ देवतायतनैर्नैकैः पूजासंस्कारशोभिता ॥ ४३ ॥ सरिद्भिर्भ्राजते श्रेष्ठा पुरी शाक्री च भास्करी ॥ केचित्पंचाग्नितपसः केचिदप्यग्निहोत्रिणः ॥ ४४ ॥ केचिद्भ्रमकमश्नंति तपस्युग्रे व्यवस्थिताः ॥ आत्मयज्ञरताः केचिदपरे भक्तिभागिनः ॥ ४५ ॥ वैष्णवज्ञानमासाद्य केचिच्चैवं व्रतं तथा ॥ एकरात्रं द्विरात्रं च केचित्षष्ठाहभोजनाः ॥ ४६ ॥



१ दुर्दिनीम्—इ० पा० । २ परस्मैपदित्वं जुहोतेर्यङन्तस्यार्षम् । ३ इवार्थे वशब्दः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चांद्रायणविधानैश्च कृच्छ्रिणश्चातिकृच्छ्रिणः ॥ एवंविधैस्तपोभिश्च नर्मदातीरशोभितैः ॥ ४७ ॥ यजद्भिः शंकरं देवं केशवं भाति नित्यदा ॥ एकत्वे च पृथक्त्वे च यजतां च महेश्वरम् ॥ ४८ ॥ कलौ युगे महाघोरे प्राप्ताः सिद्धिमनुत्तमाम् ॥ यस्ययस्य हि या भक्तिर्विज्ञानं यस्यं यादृशम् ॥ ॥ ४९ ॥ यस्मिन्यस्मिंश्च देवे तु तांतामीशोऽददात्प्रभुः ॥ स्वभावैकतया भक्त्या तामेत्यांतःप्रलीयते ॥ ५० ॥ संसारे परिवर्त्तंते ये पृथग्भाजिनो नराः ॥ ये महावृक्षमीशानं त्यक्त्वा शाखावलंबिनः ॥ ५१ ॥ पुनरावर्त्तमानास्ते जायन्ते हि चतुर्युगे ॥ देवांते स्थावरांते च संसारे चाऽभ्रमन्क्रमात् ॥ ५२ ॥ पुनर्जन्म पुनः स्वर्गे पुनर्घोरे च रौरवे ॥ ये पुनर्देवमीशानं भवं भक्तिसुसंस्थिताः ॥ ५३ ॥ यजंति नर्मदातीरे न पुनस्ते भवंति च ॥ आदेहपतनात्केचिदुपासंतः परं गताः ॥ ५४ ॥ केचिद्द्वादशभिर्वर्षैः षड्भिरन्ये तपोधनाः ॥ त्रिभिः संवत्सरैः केचित्केचित्संवत्सरेण तु ॥ ॥ ५५ ॥ षड्भिर्मासैस्तु संसिद्धास्त्रिभिर्मासैस्तथाऽपरे ॥ मुनयो देवमाश्रित्य नर्मदां च यशस्विनीम् ॥ ५६ ॥ छित्त्वा संसारदोषांश्च अगमन्ब्रह्म शाश्वतम् ॥ एवं कलियुगे घोरे शतशोऽथ सहस्रशः ॥ ५७ ॥ नर्मदातीरमाश्रित्य मुनयो रुद्रमाविशन् ॥ ५८ ॥ ये नर्मदातीरमुपेत्य विप्राः शैवे व्रते यत्नमुपप्रपन्नाः ॥ त्रिकालमंभः प्रविगाह्य भक्त्या देवं समभ्यर्च्य शिवं व्रजन्ति ॥ ५९ ॥ ध्यानार्चनैर्जाप्यमहाव्रतैश्च नारायणं वा सततं स्मरंति ॥ ते धौतपांडुरपटा इव राजहंसाः संसारसागरजलस्य तरंति पारम् ॥ ६० ॥ सत्यं सत्यं पुनः सत्यमुत्क्षिप्य भुजमुच्यते ॥ इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ॥ ६१ ॥ यो वा हरं पूजयते जितात्मा मासं च पक्षं च वसेन्नरेन्द्र ॥ रेवां समाश्रित्य महानुभावः स देवदेवोऽथ भवेत्पिनाकी ॥ ६२ ॥ कीटाः पतंगाश्च पिपीलिकाश्च ये वै म्रियन्तेंऽभसि नर्मदायाः ॥ ते दिव्यरूपास्तु कुलप्रसूताः शतं समा धर्मपरा भवंति ॥ ६३ ॥ कालेन वृक्षाः प्रपतन्ति येऽपि महातरंगौघनिकृत्तमूलाः ॥ ते नर्मदांभोभिरपास्तपापा देदीप्यमानास्त्रिदिवं प्रयांति ॥ ६४ ॥ अकामकामाश्च तथा सकामा रेवांतमाश्रित्य म्रियंति तीरे ॥ जडांधमूकास्त्रिदिवं प्रयांति किमत्र विप्रा भवभावयुक्ताः ॥ ६५ ॥ मासोपवासैरपि शोषितांगा न तां गतिं यांति विमुक्तदेहाः ॥ म्रियंति रेवाजलपूतकायाः शिवार्चने केशवभावयुक्ताः ॥ ६६ ॥ ये नर्मदातीरमनुप्रपन्ना अभ्यर्च्ययित्वा शिवमव्ययाख्यम् ॥ नारायणं वा मनसा सुपूताः पिबंति मातुर्न पुनः स्तनं ते ॥ ६७ ॥ नीवारश्यामाकयवेंगुदाद्यैरन्यैर्मुनीन्द्रा इह वर्त्तयंति ॥ आश्रित्य कूलं त्रिदशानुगीतं ते नर्मदाया न विशंति मृत्युम् ॥ ६८ ॥ भ्रमंति ये तीरमुपेत्य देव्यास्त्रिकालदेवार्चनसत्यपूताः ॥ विण्मूत्रचर्मास्थिशिरोपधानाः कुक्षौ

१ तस्य तादृशम्—इ० पा० । २ रेवान्तम्—रेवासमीपम्—'अन्तः प्रांतेन्तिके मध्ये' इति वचनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



युवत्या न वसंति भूयः ॥ ६९ ॥ किं यज्ञदानैर्बहुभिश्च तेषां निषेवितैस्तीर्थवरैः समस्तैः ॥ रेवातटं दक्षिणमुत्तरं वा सेवंति ते रुद्रचरानुपूर्वम् ॥७०॥
॥१८६॥ ते वंचिताः पंगुजडांधभूता लोकेषु मर्त्याः पशुभिश्च तुल्याः ॥ ये नाऽऽश्रिता रुद्रशरीरभूतां सोपानपंक्तिं त्रिदिवस्य रेवाम् ॥ ७१ ॥ युगं कलिं
घोरमिमं य इच्छेद्द्रष्टुं कदाचिन्न पुनर्द्विजेंद्रः ॥ स नर्मदातीरमुपेत्य सर्वं संपूजयेत्सर्वविमुक्तसंगः ॥ ७२ ॥ विघ्नैरनेकैरतियोज्यमाना ये तीरमुज्झंति
न नर्मदायाः ॥ ते चैव सर्वस्य हितार्थभूता वंद्याश्च ते सर्वजनस्य मान्याः ॥ ७३ ॥ भृग्वत्रिगार्ग्येयवशिष्ठकंकाः शतैः समेतैर्नियतास्त्वसंख्यैः ॥
सिद्धिं परां ते हि जलप्लुतांगाः प्राप्तास्तु लोकान्मरुतां न चान्ये ॥ ७४ ॥ ज्ञानं महत्पुण्यतमं पवित्रं पठंत्यदो नित्यविशुद्धसत्त्वाः ॥ गतिं
परां यांति महानुभावा रुद्रस्य वाक्यं हि यथा प्रमाणम् ॥ ७५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम
आवन्त्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये नर्मदास्नानफलश्रुतिकथनंनाम दशमोऽध्यायः ॥ १० ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ अहो मह
त्पुण्यतमा विशिष्टा क्षयं न याता इह या युगांते ॥ तस्मात्सदा सेव्यतमा मुनीन्द्रैर्ध्यानार्चनस्नानपरायणैश्च ॥ १ ॥ यामाश्रित्य गता मोक्षमृषयो
धर्मवत्सलाः ॥ ये त्वयोक्तास्तु नियमा ऋषीणां वेदनिर्मिताः ॥ २ ॥ मोक्षावाप्तिर्भवेद्येषां नियमैश्च पृथग्विधैः ॥ दशद्वादशभिर्वाऽपि षड्भिरष्टाभिरेव
वा ॥ ३ ॥ त्रिभिस्तथा चतुर्भिर्वा वर्षैर्मासैस्तथैव च ॥ मुच्यंते कलिदोषैस्ते देवेशानसमर्चनात् ॥ ४ ॥ ब्रह्माणं वा सुरश्रेष्ठं केशवं वा जगद्गुरुम् ॥
अर्चयन्पापमखिलं जहात्येव न संशयः ॥ ५ ॥ एतद्विस्तरतः सर्वं कथयस्व ममाऽनघ ॥ यस्मिन्संसारगहने निमग्नाः सर्वजंतवः ॥ ते कथं त्रिदिवं
प्राप्ता इति मे संशयो वद ॥ ६ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ जन्मांतरैरनेकैस्तु मानुष्यमुपलभ्यते ॥ भक्तिरुत्पद्यते चाऽत्र कथं चिदपि
शंकरे ॥ ७ ॥ तीर्थदानोपवासानां यज्ञैर्देवद्विजार्चनैः ॥ अवाप्तिर्जायते पुंसां श्रद्धया परया नृप ॥ ८ ॥ तस्माच्छ्रद्धा प्रकर्त्तव्या मानवैर्धर्मवत्सलैः ॥
ईशोऽपि श्रद्धया साध्यस्तेन श्रद्धा विशिष्यते ॥९॥ अन्यथा निष्फलं सर्व्वं श्रद्धाहीनं तु भारत ॥ तस्मात्समाश्रयेद्भक्तिं रुद्रस्य परमेष्ठिनः॥ १० ॥
तेषांहि सफलं जन्म येषां भक्तिरचंचला ॥ सा चैव त्रिविधा भक्तिः सात्त्विकी राजसी तथा ॥ ११ ॥ तामसी सर्वलोकस्य त्रिविधं च फलं लभेत्॥
॥ १२ ॥ ते कर्मफलसंयोगादावर्त्तंते पुनःपुनः ॥ १२ ॥ जन्मांतरशतैस्तेषां ज्ञानिनां देवयाजिनाम् ॥ देवत्रये भवेद्भक्तिः क्षयात्पापस्य कर्म्मणः ॥१३॥ ईशा ॥१८६॥
नात्तु पुनर्मोक्षो जायते छिन्नसंशयः ॥ ये पुनर्नर्मदातीरमाश्रित्य द्विजपुंगवाः ॥ १४ ॥ त्रयीमार्गमसंदिग्धास्ते यांति परमां गतिम् ॥ एकाग्रम

१ सर्वम्—महादेवम् । २ वेदयाजिनाम्--इ० पा० । ३ वेदत्रये--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नसो ये तु शंकरं शिवमव्ययम् ॥ १५ ॥ अर्चयंतीह निरताः क्षिप्रं सिद्ध्यंति ते जनाः ॥ कालेन महता सिद्धिर्जायतेऽन्यत्र देहिनाम् ॥ १६ ॥
नर्मदायाः पुनस्तीरे क्षिप्रं सिद्धिरवाप्यते ॥ षड्भिर्वर्षैस्तु सिध्यंति ये तु सांख्यविदो जनाः ॥ १७ ॥ वैष्णवा ज्ञानसंपन्नास्तेऽपि सिद्ध्यंति चाऽग्रतः ॥
सर्वयोगविदो ये च समुद्रमिव सिंधवः ॥ १८ ॥ एकीभवंति कल्पांते योगे माहेश्वरे गताः ॥ सर्वेषामेव योगानां योगो माहेश्वरो वरः ॥ १९ ॥
तमासाद्य विमुच्यंते येऽपि स्युः पापयोनयः ॥ शिवमर्च्य नदीकूले जायंते ते न योनिषु ॥ २० ॥ गतिरेषा दुरारोहा सर्वपापक्षयंकरी ॥ मुच्यंते
मंक्षु संसाराद्देवमाश्रित्य जंतवः ॥ २१ ॥ तस्मात्स्नायी भवेन्नित्यं तथा भस्मविलेपनः ॥ नर्मदातीरमासाद्य क्षिप्रं सिद्धिमवाप्नुयात् ॥ २२ ॥
त्रिकालं पूजयेच्छांतो यो नरो लिंगमादरात् ॥ सर्वरोगविनिर्मुक्तः स याति परमां गतिम् ॥ २३ ॥ षड्भिः सिद्ध्यति मासैस्तु यद्यपि स्यात्स पाप
कृत् ॥ ये पुनः शुद्धमनसो मासैः शुध्यंति ते त्रिभिः ॥ २४ ॥ यथा दिनकरस्पृष्टं हिमं शैलाद्विशीर्यते ॥ तद्वद्विलीयते पापं स्पृष्टं भस्मकणैः शुभैः
॥ २५ ॥ सद्योजातादियुक्तेन भस्मना ये समुक्षिताः ॥ सूर्यवद्विमला भांति द्विजा रुद्रपरायणाः ॥ २६ ॥ वैनतेयभयत्रस्ता यथा नश्यंति पन्नगाः॥
तद्वत्पापानि नश्यंति भस्मनाऽभ्युक्षितानि ह ॥ २७ ॥ नर्मदातोयपूतेन भस्मनोद्धूलयंति ये ॥ सद्यस्ते पापसंघाच्च मुच्यंते नाऽत्र संशयः ॥
॥ २८ ॥ व्रतं पाशुपतं भक्त्या यथोक्तं पालयंति ये ॥ शूद्रान्नेन विहीनास्तु ते यांति परमां गतिम् ॥ २९ ॥ अमृतं ब्राह्मणस्याऽन्नं क्षत्रियान्नं पयः
स्मृतम् ॥ वैश्यान्नमन्नमेव स्याच्छूद्रान्नं रुधिरं स्मृतम् ॥ ३० ॥ शूद्रान्नरससंपुष्टा ये म्रियंते द्विजोत्तमाः ॥ ते तपोज्ञानहीनास्तु काका गृध्रा भवंति ते
॥ ३१ ॥ दुष्कृतं हि मनुष्याणामन्नमाश्रित्य तिष्ठति ॥ यो यस्यान्नं समश्नाति स तस्याश्नाति किल्बिषम् ॥ ३२ ॥ विशेषाद्यतिधर्मेण तपोलौल्यं
समाश्रिताः ॥ नरकं यान्त्यसंदिग्धमित्येवं शंकरोऽब्रवीत् ॥ ३३ ॥ ईदृग्रूपाश्च ये विप्राः पाशुपत्ये व्यवस्थिताः ॥ ते महत्पापसंघातं दहंत्येव न
संशयः ॥ ३४ ॥ विडंबेन च संयुक्ता लौलुप्येन च पीडिताः ॥ असंभाष्या असंग्राह्या इत्येवं श्रुतिनोदना ॥ ३५ ॥ मातापितृकृतैर्दोषैरन्ये केचि
त्स्वकर्मजैः ॥ नष्टा ज्ञानावलेपेन अहंकारेण चाऽपरे ॥ ३६ ॥ शांकरे प्रस्थिता धर्मे ये स्मृत्यर्थबहिष्कृताः ॥ क्लिश्यमानास्तु कालेन ते यांति परमां
गतिम् ॥ ३७ ॥ अश्रद्दधानाः पुरुषा मूर्खा दंभविवर्द्धिताः ॥ न सिद्ध्यंति दुरात्मानः कुदृष्टांतार्थकीर्तनाः ॥ ३८ ॥ महाभाग्येऽपि तीर्थस्य शांकरं
व्रतमास्थिताः ॥ वियोनिं यांत्यसंदिग्धं लौलुप्येन समन्विताः॥३९॥न तीर्थैर्न च दानैश्च दुष्कृतं हि विलुप्यते॥ अज्ञानाच्च प्रमादाच्च कृतं पापं विन

१ उक्तम्-इ० पा० । २ ते च दृष्टाश्च दह्यंते भवंत्येके न संशयः-इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





श्यति ॥ ४० ॥ एवं ज्ञात्वा तु विधिना वर्त्तितव्यं द्विजातिभिः ॥ परं ब्रह्म जपद्भिश्च वर्त्तितव्यं मुहुर्मुहुः ॥४१॥ ऊर्ध्वरूपं विरूपाक्षं योधीते रुद्रमेव च ॥ ईशानं पश्यते साक्षात्षण्मासात्संगवर्जितः ॥४२॥ संहिताया दशावृत्तीर्यः करोति सुसंयतः ॥ नर्मदातटमाश्रित्य स मुच्येत्सर्वपातकैः ॥ ४३ ॥ पुराणसंहितां वापि शैवीं वा वैष्णवीमपि ॥ यः पठेन्नर्मदातीरे शिवाग्रे स शिवात्मकः ॥ ४४ ॥ आभूतसंक्षयं यावत्स्वर्गलोके महीयते ॥ संसारव्य सनं हातुं पुरा प्रोक्तं तु नंदिना ॥ ४५ ॥ देवर्षिसिद्धगंधर्वसमवाये शिवालये ॥ नंदिगीतामिमां राजञ्छृणुष्वैकमनाः शुभाम् ॥ ४६ ॥ स्वर्गमोक्ष प्रदां पुण्यां संसारभयनाशिनीम् ॥ ४७ ॥ संसारगह्वरगुहां प्रविहातुमेतां चेदिच्छथ प्रतिपदं भवतापखिन्नाः ॥ नानाविधैर्निजकृतैर्बहुकर्मपाशैर्बद्धाः सुखाय शृणुतैकहितं मयोक्तम् ॥ ४८ ॥ शक्र वक्रगतिं मा गा मा कृथा यम यातनाम् ॥ चेतः प्रचेतः शमय लौलुप्यं त्यज वित्तप ॥ ४९ ॥ दीना नाथविशिष्टेभ्यो धनं सर्वं परित्यज ॥ यदि संसारजलधेर्वीचीप्रेंखोल्लनातुरः ॥ ५० ॥ जन्मोद्विग्नं मृतेस्त्रस्तं ग्रस्तं कामादिभिर्नरम् ॥ त्रस्तं यो न यमादिभ्यः पिनाकी पाति पावनः ॥५१॥ मा धेहि गर्वं कीनाश हास्यं यास्यसि पीडयन् ॥ प्राणिनं सर्वशरणं तद्भावि शरणं तव ॥ ५२ ॥ कालः करालको बालः को मृत्युः को यमाधमः ॥ शिवविष्णुपराणां हि नराणां किं भयं भवेत् ॥ ५३ ॥ भवभारार्तजंतूनां रेवातीरनिवासिनाम् ॥ भर्गश्च भगवांश्चैव भवभीतिविभेदनौ ॥ ५४ ॥ शिवं भज शिवं ध्याय शिवं स्तुहि शिवं यज ॥ शिवं नम वराक त्वं ज्ञानं मोक्षं यदीच्छसि ॥५५॥ पठ पंचाननं शास्त्रं मंत्रं पंचाक्षरं जप ॥ धेहि पंचात्मकं तत्त्वं यज पंचाननं परम् ॥ ५६ ॥ किं तैः कर्मगणैः शोच्यैर्नानाभावविशेषितैः ॥ यदि पंचाननः श्रीमान्सेव्यते सर्वथा शिवः ॥ ५७ ॥ किं संसारगजोन्मत्तबृंहितैर्निभृतैरपि ॥ यदि पंचाननो देवो भावगंधोपसेवितः ॥ ५८ ॥ रे मूढ किं विषादेन प्राप्य कर्मकदर्थनाम् ॥ भवानीवल्लभं भीमं जप त्वं भयनाशनम् ॥ ५९ ॥ नर्मदातीरनिलयं दुःखौघविलयंकरम् ॥ स्वर्गमोक्षप्रदं भर्गं भज मूढ सुरेश्वरम् ॥ ६० ॥ विहाय रेवां सुरसिंधुसेव्यां तत्तीरसंस्थं च हरं हरिं च ॥ उन्मत्तवद्भावविवर्जितस्त्वं क्व यासि रे मूढ दिगंतराणि ॥ ॥ ६१ ॥ भज रेवाजलं पुण्यं यज रुद्रं सनातनम् ॥ जप पंचाक्षरीं विद्यां व्रज स्थानं च वांछितम् ॥ ६२ ॥ क्लेशयित्वा निजं कायमुपायैर्बहुभि स्तु किम् ॥ भज रेवां शिवं प्राप्य सुखसाध्यं परं पदम् ॥ ६३ ॥ एवं कैलासमासाद्य नंदी स शिवसन्निधौ ॥ जगौ यल्लोकपालानां तन्मयोक्तं तवाधुना ॥ ६४ ॥ ॥ मार्कंडेय उवाच ॥ ॥ स्नानदानपरो यस्तु नित्यं धर्ममनुव्रतः ॥ नर्मदातीरमाश्रित्य मुच्यते सर्वपातकैः ॥ ६५ ॥

१ स्यातव्यं यतमानसैः–इ० पा० । २ सत्रः संसिध्यते–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विधिहीनो जपेन्नित्यं वेदान्सर्वाञ्छतं समाः ॥ मृत्युलाङ्गलजाप्येन समो योऽप्यधिको गुणैः ॥ ६६ ॥ बीजयोन्यविशुद्धस्तु यथा रुद्रं न विंदति ॥
तथा लाङ्गलमंत्रोऽपि न तिष्ठति गतायुषि ॥ ६७ ॥ गायत्रीजपसंयुक्तः संयमी ह्यधिको गुणैः॥ अग्निमीळे इषेत्वो वा अग्न आयाहि नित्यदा ॥६८॥
शन्नो देवीति कूलस्थो जपेन्मुच्येत किल्बिषैः ॥ ६९ ॥ सांगोपांगांस्तथा वेदाञ्जपन्नित्यं समाहितः ॥ न तत्फलमवाप्नोति गायत्र्या संयमी यथा
॥ ७० ॥ रुद्राध्यायं सकृज्जप्त्वा विप्रो वेदसमन्वितः ॥ मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ ७१ ॥ अन्यद्वै जप्य संस्थानं
सूक्तमारण्यकं तथा ॥ मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ ७२ ॥ यत्किंचित्क्रियते जाप्यं यच्च दानं प्रदीयते ॥ नर्म
दाजलमाश्रित्य तत्सर्वं चाक्षयं भवेत् ॥ ७३ ॥ एवंविधैर्व्रतैर्नित्यं नर्मदां ये समाश्रिताः ॥ ते मृता वैष्णवं यांति पदं वा शैवम
व्ययम् ॥ ७४ ॥ सत्यलोकं नराः केचित्सूर्यलोकं तथापरे ॥ अप्सरोगणसंवीता यावदाभूतसंप्लवम् ॥ ७५ ॥ एवं वै वर्तमाने
स्मिँल्लोके तु नृपपुंगव ॥ ऋषीणां दशकोट्यस्तु कुरुक्षेत्रनिवासिनाम् ॥ ७६ ॥ मया सह महाभाग नर्मदातटमाश्रिताः ॥
फलमूलकृताहारा अर्चयंतः स्थिताः शिवम् ॥ ७७ ॥ तच्च वर्षशतं दिव्यं कालसंख्यानुमानतः ॥ षड्विंशतिसहस्राणि तानि मानुषसंख्यया ॥
॥ ७८ ॥ ततस्तस्यामतीतायां संध्यायां नृपसत्तम ॥ शेषं मानुष्यमेकं तु काले वर्षशतं स्थितम् ॥ ७९ ॥ ततोऽभवदनावृष्टिर्लोकक्षयकरी
तदा ॥ यया यातं जगत्सर्वं क्षयं भूयो हि दारुणम् ॥ ८० ॥ ये पूर्वमिह संसिद्धा ऋषयो वेदपारगाः ॥ तेषां प्रभावाद्भगवान्ववर्ष बलवृत्रहा ॥ ८१ ॥
महती भूरिसलिला समंताद्वृष्टिराहिता ॥ ततो वृष्ट्यां तु तेषां वै वर्तनं समजायत ॥ ८२ ॥ श्यामाकेंगुदबिल्वाद्यैर्नर्मदातीरमाश्रितैः ॥ नीयते स
महान्कालो महासिद्धिमभीप्सुभिः ॥ ८३ ॥ पुनर्युगांते संप्राते किंचिच्छेषे कलौ युगे ॥ निःशेषमभवत्सर्वं शुष्कं स्थावरजंगमम् ॥ ८४ ॥
निर्वृक्षौषधगुल्मं च तृणवीरुद्विवर्जितम् ॥ अनावृष्टिहतं सर्वं भूमण्डलमभूद्भृशम् ॥ ८५ ॥ ततस्ते ऋषयः सर्वे क्षुत्तृषार्ताः सहस्रशः ॥ युगस्वभाव
माविष्टा हीनसत्त्वाभवन्नृप ॥ ८६ ॥ नष्टहोमस्वधाकारे युगांते समुपस्थिते ॥ किं कार्यं क नु यास्यामः कोऽस्माकं शरणं भवेत् ॥ ८७ ॥
तानहं प्रत्युवाचेदं मा भैष्टेति पुनःपुनः ॥ ईदृग्विधा मया दृष्टा बहवः कालपर्ययाः ॥ ८८ ॥ नर्मदातीरमाश्रित्य ते सर्वे गमिता मया ॥

१ कूलस्थः—रेवातीरस्थ—इत्यर्थः । ब्रह्मयज्ञं कुर्वन् इति यावत् । २ पातकैः—इ० पा० । ३ नर्मदाजलसंस्थितः—इ० पा० । ४ समाशते व्यतीते तु वर्षे मानुष्यके तदा—इ० पा० । ५ येन तात जगत्सृष्टं भूयो याति सङ्क्षयम्—इ० पा० । ६ चतुर्भिर्वा त्रिभिर्वापि वर्षाद्वा वृष्टिरावभौ—इ० पा० । ७ तेन सिद्धिमुपागताः—इ०पा० । ८ हीनसत्वाः—अभवन्—इति पदच्छेदः । सन्धिरार्षः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



एषा हि शरणं देवी संप्राप्ते हि युगक्षये ॥ ८९ ॥ नान्या गतिरिहास्माकं विद्यते द्विजसत्तमाः ॥ जनित्री सर्वभूतानां विशेषेण द्विजोत्तमाः ॥९०॥ पितामहा ये पितरो ये चान्ये प्रपितामहाः ॥ ते समस्ता गताः स्वर्गं समाश्रित्य महानदीम् ॥ ९१ ॥ भृग्वाद्याः सप्त ये त्वासन्मम पूर्वपितामहाः ॥ धौमृणी च महाभागा मम भार्या शुचिस्मिता ॥ मनस्वती च या माता भार्गवोऽङ्गिरसस्तथा ॥ ९२ ॥ पुलस्त्यः पुलहश्चैव वसिष्ठात्रेयकाश्यपाः ॥ तथान्ये च महाभागा नियमव्रतचारिणः ॥ अन्ये च शतसाहस्रा अत्र सिद्धिं समागताः ॥ ९३ ॥ तस्मादियं महाभागा न मोक्तव्या कदाचन ॥ नान्या काचिन्नदी शक्ता लोकत्रयफलप्रदा ॥ ९४ ॥ द्वंद्वैरनेकैर्बहुभिः क्षुत्तृषाद्यैर्महाभयैः ॥ मुच्यंते ते नराः सद्यो नर्मदातीरवासिनः ॥ ९५ ॥ तस्मात्सर्वप्रयत्नेन सेवितव्या सरिद्वरा ॥ वांछद्भिः परमं श्रेय इह लोके परत्र च ॥ ९६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे श्रीनर्मदामाहात्म्यवर्णनंनाम एकादशोऽध्यायः ॥ ११ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ एतच्छ्रुत्वा वचो राजन्संहृष्टा ऋषयोऽभवन् ॥ नर्मदां स्तोतुमारब्धाः कृतांजलिपुटा द्विजाः ॥ १ ॥ नमोऽस्तु ते पुण्यजले नमो मकरगामिनि ॥ नमस्ते पापमोचिन्यै नमो देवि वरानने ॥२॥ नमोऽस्तु ते पुण्यजलाश्रये शुभे विशुद्धसत्त्वे सुरसिद्धसेविते ॥ नमोस्तु ते तीर्थगणैर्निषेविते नमोऽस्तु रुद्रांगसमुद्भवे वरे ॥ ३ ॥ नमोऽस्तु ते देवि समुद्रगामिनि नमोस्तु ते देवि वरप्रदे शिवे ॥ नमोस्तु लोकद्वयसौख्यदायिनि ह्यनेकभूतौघसमाश्रितेऽनघे ॥ ४ ॥ सरिद्वरे पापहरे विचित्रिते गन्धर्वयक्षोरगसेवितांगे ॥ सनातनि प्राणिगणानुकंपिनि मोक्षप्रदे देवि विधेहि शं नः ॥५॥ महागजौघैर्महिषैर्वराहैः संसेविते देवि महोर्मिमाले ॥ नताः स्म सर्वे वरदे सुखप्रदे विमोचयास्मान्पशुपाशबन्धात् ॥ ६ ॥ पापैरनेकैरशुभैर्विबद्धा भ्रमंति तावन्नरकेषु मर्त्याः ॥ महानिलोद्धूततरंगभूतं यावत्त्वांभो हि न संस्पृशंति ॥ ७ ॥ अनेकदुःखौघभयार्दितानां पापैरनेकैरभिवेष्टितानाम् ॥ गतिस्त्वमंभोजसमानवक्रे द्वंद्वैरनेकैरपि संवृतानाम् ॥ ८ ॥ नद्यश्च पूता विमला भवन्ति त्वां देवि संप्राप्य न संशयोऽत्र ॥ दुःखातुराणामभयं ददासि शिष्टैरनेकैरभिपूजितासि ॥ ९ ॥ स्पृष्टं करैश्चन्द्रमसो रवेश्च तदैव दद्यात्परमं पदं तु ॥ यत्रोपलाः पुण्यजलाप्लुतास्ते शिवत्वमायांति किमत्र चित्रम् ॥ १० ॥ भ्रमंति तावन्नरकेषु मर्त्या दुःखातुराः पापपरीतदेहाः ॥ महानिलोद्धूततरंगभंगं यावत्त्वांभो न हि संश्रयंति ॥ ॥११॥ म्लेच्छाः पुलिंदास्त्वथ यातुधानाः पिबंति येंऽभस्तव देवि पुण्यम् ॥ मुक्ता भवन्तीह भयात्तु घोरान्निःसंशयं तेऽपि किमत्र चित्रम् ॥१२॥

१ देवी–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सरांसि नद्यः क्षयमभ्युपेता घोरे युगेस्मिन्हि कलौ प्रदूषिते ॥ त्वं भ्राजसे देवि जलौघपूर्णा दिवीव नक्षत्रपथे च गंगा ॥१३॥ तव प्रसादाद्वरदे वरिष्ठे कालं यथेमं परिपालयित्वा ॥ यांमोऽथ रुद्रं तव सुप्रसादाद्वयं तथा त्वं कुरु वै प्रसादम् ॥१४॥ गतिस्त्वमंबेव पितेव पुत्रांस्त्वं पाहि नो यावदिमं युगांतम् ॥ काले त्वनावृष्टिहतं सुघोरं यावत्तरामस्तव सुप्रसादात् ॥ १५ ॥ पठंति ये स्तोत्रमिदं द्विजेंद्राः शृण्वंति ये चापि नराः प्रशांताः ॥ ते यांति रुद्रं वृषसंयुतेन यानेन दिव्याम्बरभूषिताश्च ॥ १६ ॥ ये स्तोत्रमेतत्सततं पठंति स्नात्वा तु तोये खलु नर्मदायाः ॥ अन्ते हि तेषां सरिदुत्तमेयं गतिं विशुद्धामचिराद्ददाति ॥ १७ ॥ प्रातः समुत्थाय तथा शयानो यः कीर्तयेतानुदिनं स्तवं च ॥ स मुक्तपापः सुविशुद्धदेहः समाश्रयं याति महेश्वरस्य ॥ १८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे श्रीनर्मदा माहात्म्ये नर्मदास्तोत्रकथनंनाम द्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच[1] ॥ ॥ एवं भगवती पुण्या स्तुता सा मुनिपुंगवैः ॥ चिंतयामास सर्वेषां दास्यामि वरमुत्तमम् ॥ १ ॥ ततः प्रसुप्तांस्ताञ्ज्ञात्वा रात्रौ देवी जगाम ह ॥ एकैकस्य ऋषेः स्वप्ने दर्शनं चारुहासिनी ॥ ॥ २ ॥ ततोऽर्धरात्रे संप्राप्त उत्थिता जल[2]मध्यतः ॥ विमलांबरसंवीता दिव्यमालाविभूषिता ॥ ३ ॥ धृतातपत्रा सुश्रोणी पद्मरागविभूषिता ॥ जगाद माभैरिति तानेकैकं तु पृथक्पृथक् ॥ ४ ॥ वसध्वं मम पार्श्वे तु भयं त्यक्त्वा क्षुधादिजम् ॥ ५ ॥ एवमुक्त्वा तदा देवी स्वप्नांते तान्महामुनीन् ॥ जगामादर्शनं पश्चात्प्रविश्य जलमात्मिकम् ॥ ६ ॥ ततः प्रभाते मुनयो मिथ ऊचुर्मुदान्विताः ॥ तथा दृष्टा मया दृष्टा स्वप्ने देवी सुदर्शना ॥७॥ अभयं दत्तमस्माकं सिद्धिश्चाप्यचिरेण तु ॥ प्रशस्तं दर्शनं तस्या नर्मदाया न[3]संशयः ॥८॥ अथान्यदिवसे राजन्मत्स्यानां रूपमुत्तमम् ॥ पश्यंति सपरीवाराः स्वकीयाश्रमसन्निधौ ॥ ९ ॥ तान्दृष्ट्वा विस्मयाविष्टा मत्स्यांस्तत्र महर्षयः ॥ पूजयामासुरव्यग्रा हव्यकव्येन देवताः ॥ १० ॥ तान्मत्स्यसंघान्संप्राप्य महादेव्याः प्रसादतः ॥ सपुत्रदारभृत्यास्ते वर्तयन्ति पृथक्पृथक् ॥ ११ ॥ दिनेदिने तथाप्येवमाश्रमेषु[4] द्विजातयः ॥ मत्स्यानां संचयं दृष्ट्वा विस्मिताश्चाभवंस्तदा ॥ १२ ॥ मृतांस्तांस्तु सुपुष्टांगान्पाठीनांश्च विशेषतः ॥ द्वारेद्वारे चाश्रमाणां तापसानां युधिष्ठिर ॥ १३ ॥ हृष्टपुष्टास्तदा सर्वे नर्मदातीरवासिनः ॥ ऋषयस्ते भयं सर्वे तत्यजुः क्षुत्तृषोद्भवम् ॥१४॥ ते जपंतस्तपंतश्च तिष्ठंति भरतर्षभ ॥ अर्चयंति पितॄन्देवान्नर्मदातटमाश्रिताः ॥१५॥ तैर्जपद्भिस्तपद्भिश्च सततं द्विजसत्तमैः ॥ भ्राजते सा सरिच्छ्रेष्ठा ताराभिर्द्यौर्ग्रहैरिव ॥१६॥ तत्र तैर्बहुलैः शुभ्रैर्ब्राह्मणैर्वेदपारगैः ॥

१ यास्याम मोक्षम्–इ० पा० । २ रात्रावर्धातिः । ३ सा जलाशयात्–इ० पा० । ४ स्निग्धैस्तैर्मत्स्यशकलैः संसिद्धैः परितापितैः–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



नर्मदा धर्मदा पूर्वं संविभक्ता यथाक्रमम् ॥ १७ ॥ ऋषिभिर्दशकोटीभिर्नर्मदातीरवासिभिः ॥ विभक्तेयं विभक्तांगी नर्मदा शर्मदा नृणाम् ॥ १८ ॥
यंज्ञोपवीतैश्च शुभैरक्षसूत्रैश्च भारत ॥ कूलद्वये महापुण्या नर्मदोदधिगामिनी ॥१९॥ पृथगायतनैः शुभ्रैर्लिंगैर्वालुकमृन्मयैः ॥ भ्राजते या सरिच्छ्रेष्ठा
नक्षत्रैरिवं शर्वरी ॥ २० ॥ एवं त ऋषयः सर्वे तर्पयंतः सुरान्पितॄन् ॥ न्यवसन्नर्मदातीरे यावदाभूतसंप्लवम् ॥ २१ ॥ किंचिद्गते ततस्तस्मिन्घोरे वर्ष
शताधिके ॥ अर्धरात्रे तदा कन्या जलादुत्तीर्य भारत ॥ २२ ॥ विद्युत्पुंजसमाभासा व्यालयज्ञोपवीतिनी ॥ त्रिशूलाग्रकरा सौम्या तानुवाच
ऋषींस्तदा ॥ २३ ॥ आगच्छध्वं मुनिगणा विशध्वं मामयोनिजाम् ॥ समेताः पुत्रदारैश्च ततः सिद्धिमवाप्स्यथ ॥ २४ ॥ यस्ययस्य हि या
वांछा तस्य तांतां ददाम्यहम् ॥ विष्णुं ब्रह्माणमीशानमन्यं वा सुरसुत्तमम् ॥ २५ ॥ तत्र सर्वान्नयिष्यामि प्रसन्ना वरदा ह्यहम् ॥ प्राणायामपरा
भूत्वा मां विशध्वं समाहिताः ॥ २६ ॥ सह पुत्रैश्च दारैश्च त्यक्त्वाश्रमपदानि च ॥ कालक्षेपो न कर्तव्यः प्रलयोऽयमुपस्थितः ॥ २७ ॥ संहारः
सर्वभूतानां कल्पदाहः सुदारुणः ॥ एकाहमभवं पूर्वं महाघोरे जनक्षये ॥ २८ ॥ शेषा नद्यः समुद्राश्च सर्वे एव क्षयंगताः ॥ वरदानान्महेशस्य
तेनाहं न क्षयं गता ॥ २९ ॥ अमृतः शाश्वतो देवः स्थाणुरीशः सनातनः ॥ स पूजितः प्रार्थितो वा किं न दद्याद्द्विजोत्तमाः ॥ ३० ॥
एवमुक्त्वा ऋषीन्देवा प्रविवेश जलं ततः ॥ करात्तशूला सा देवी व्यालयज्ञोपवीतिनी ॥ ३१ ॥ ततस्ते तद्वचः श्रुत्वा विस्मयापन्नमानसाः ॥
अभिवंद्य च मां सर्वे क्षामयंतः पुनःपुनः ॥ ३२ ॥ क्षम्यतां नो यदुक्तं हि वसतां तव संश्रये ॥ गृहांस्त्यक्त्वा महाभागाः सशिष्याः सह बांधवाः
॥ ३३ ॥ जप्त्वा चैकाक्षरं ब्रह्म हृदि ध्यात्वा महेश्वरम् ॥ स्नात्वा च मन्त्रपूताभिरथ चाद्भिर्जितव्रताः ॥३४॥ विविशुर्नर्मदातोयं सपक्षा इव पर्वताः ॥
द्योतयंतो दिशः सर्वाः कुशहस्ताः सहाग्नयः ॥ ३५ ॥ गतेषु तेषु राजेंद्र अहमेकः स्थितस्तदा ॥ अमरेशं समासाद्य पूजयन्नर्मदां नदीम् ॥ ३६ ॥
अनुभूताः सप्तकल्पा मायूराद्या मया नृप ॥ प्रसादाद्वेधसः सर्वे रेवया सह भारत ॥३७॥ जन्मतोद्य दिनं यावन्न जानेऽस्याः पुरास्थितिम् ॥ ३८ ॥
इयं हि शांकरी शक्तिः कला शंभोरिलाह्वया ॥ नर्मदा दुरितध्वंसकारिणी भवतारिणी ॥ ३९ ॥ यदाहमपि नाभूवं पुराकल्पेषु पांडव ॥ चतुर्दशसु
कल्पेषु तेष्वियं सुखसंस्थिताः ॥४०॥ चतुर्दश पुरा कल्पा न मृता येषु नर्मदा ॥ तानहं संप्रवक्ष्यामि देवी प्राह यथा मम ॥ ४१ ॥ कापिलं प्रथमं

१ उत्तरीयैः शुभैस्तत्र चाक्षसूत्रैश्च--इ० पा० । २ पश्चिमोदधिगामिनी--इ० पा० । ३ द्यौरिवायता--इ० पा० । ४ एवं वर्षशतं यावदर्चयन्तश्च देवताः--इ० पा० । ५ मम जले सर्वे च द्विजसत्तमाः--इ० पा० । ६ गताः सर्वे वसुंधराम्--इ० पा० । ७ वै महेश्वरम्--इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्धि प्राजापत्यं द्वितीयकम् ॥ ब्राह्मं सौम्यं च सावित्रं बार्हस्पत्यं प्रभासकम् ॥ ४२ ॥ माहेंद्रमग्निकल्पं च जयंतं मारुतं तथा ॥ वैष्णवं बहुरूपं च ज्यौतिषं च चतुर्दशम् ॥ ४३ ॥ एते कल्पा मया ख्याता न मृता येषु नर्मदा ॥ मायूरं पंचदशमं कौर्मं चैवात्र षोडशम् ॥ ४४ ॥ बकं मात्स्यं च पाद्मं च वटकल्पं च भारत ॥ एकविंशतिमं चैतं वाराहं सांप्रतीनकम् ॥ ४५ ॥ इमे सप्त मया साकं रेवया परिशीलिताः ॥ एकविंशतिकल्पास्तु नर्मदायाः शिवांगतः ॥ ४६ ॥ संजातााया नृपश्रेष्ठ मया दृष्टा ह्यनेकशः ॥ कथिता नृपतिश्रेष्ठ भूयः किं कथयामि ते ॥ ४७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे नर्मदामाहात्म्य एकविंशतिकल्पकथानकवर्णनंनाम त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ ततस्त ऋषयः सर्वे महाभागास्तपोधनाः ॥ गतास्तु परमं लोकं ततः किं जातमद्भुतम् ॥ १ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततस्तेषु प्रयातेषु नर्मदातीरवासिषु ॥ बभूव रौद्रसंहारः सर्वभूतक्षयंकरः ॥ २ ॥ कैलासशिखरस्थं तु महादेवं सनातनम् ॥ ब्रह्माद्याः प्रास्तुवन्देवमृग्यजुःसामभिः शिवम् ॥ ३ ॥ संहर[1] त्वं जगद्देव सदेवासुरमानुषम् ॥ प्राप्तो युगसहस्रांतः कालः संहरणक्षमः ॥ ४ ॥ मद्रूपं तु समास्थाय त्वया चैतद्विनिर्मितम् ॥ वैष्णवीं मूर्तिमास्थाय त्वयैतत्परिपालितम् ॥ ५ ॥ एका मूर्तिस्त्रिधा जाता ब्राह्मी शैवी च वैष्णवी ॥ सृष्टिसंहाररक्षार्थं भवेदेवं महेश्वर ॥ ६ ॥ एतच्छ्रुत्वा वचस्तथ्यं विष्णोश्च परमेष्ठिनः ॥ सगणः सपरीवारः सह ताभ्यां सहोमया ॥ ७ ॥ स लोकान्विभिद्यमान्भगवान्नीललोहितः ॥ भूराद्यब्रह्मलोकांतं भित्त्वांडं परतः परम् ॥ ८ ॥ शैवं पदमजं दिव्यमाविशत्सह तैर्विभुः ॥ न तत्र वायुर्नाकाशं नाग्निस्तत्र न भूतलम् ॥९॥ यत्र संतिष्ठते देव उमया सह शंकरः ॥ न सूर्यो न ग्रहास्तत्र न ऋक्षाणि दिशस्तथा ॥१०॥ न लोकपाला न सुखं न च दुःखं नृपोत्तम ॥११॥ ब्राह्मं पदं यत्कवयो वदंति शैवं पदं यत्कवयो वदंति ॥ क्षेत्रज्ञमीशं प्रवदंति चान्ये सांख्याश्च गायंति किलादिमोक्षम् ॥ १२ ॥ यद्ब्रह्म आद्यं प्रवदंति केचिद्यं सर्वमीशानमजं पुराणम् ॥ तमेकरूपं तमनेकरूपमरूपमाद्यं परमव्ययाख्यम् ॥ १३ ॥ अवर्णमप्यर्थमनामगोत्रं तुर्यं पदं यत्कवयो वदंति ॥ ध्यानार्थविज्ञानमयं सुसूक्ष्ममात्मस्थमीशानवरं वरेण्यम् ॥१४॥ ततस्त्रयस्ते भगवन्तमीशं संप्राप्य संक्षिप्य भवंत्यथैकम्[1] ॥ पृथक्स्वरूपैस्तु पुनस्त एव जगत्समस्तं परिपालयंति ॥ १५ ॥ संहारं सर्वभूतानां रुद्रत्वे कुरुते प्रभुः ॥ विष्णुत्वे पालयेल्लोकान्ब्रह्मत्वे सृष्टिकारकः ॥ १६ ॥ प्रकृत्या सह संयुक्तः कालो भूत्वा महेश्वरः ॥ विश्वरूपा महाभागा तस्य पार्श्वे व्यवस्थिता ॥ १७ ॥ यामाहुः प्रकृतिं तज्ज्ञाः

१ संहरस्व जनान्देव देवासुरमहोरगान्–इ०पा० । १ एकं भवन्ति–एकरूपा भवन्ति–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पदार्थानां विचक्षणाः ॥ पुरुषत्वे प्रकृतित्वे च कारणं परमेश्वरः ॥ १८ ॥ तस्मादेतज्जगत्सर्वं समुद्भूतं चराचरम् ॥ तस्मिन्नेव लयं याति युगांते समुपस्थिते ॥ १९ ॥ भगलिंगांकितं सर्वं व्याप्तं वै परमेष्ठिना ॥ भगरूपो भवेद्विष्णुर्लिंगरूपो महेश्वरः ॥ २० ॥ भाति सर्वेषु लोकेषु गीयते भूर्भुवादिषु ॥ प्रविष्टः सर्वभूतेषु तेन विष्णुर्भगः स्मृतः ॥ २१ ॥ विशनाद्विष्णुरित्युक्तः सर्वदेवमयो महान् ॥ भासनाद्गमनाच्चैव भगसंज्ञा प्रकीर्तिता ॥ ॥ २२ ॥ ब्रह्मादिस्तंबपर्यंतं यस्मिन्नेति लयं जगत् ॥ एकभावं समापन्नं लिंगं तस्माद्विदुर्बुधाः ॥ २३ ॥ महादेवस्ततो देवीमाह पार्श्वे स्थितां तदा ॥ संहरस्व जगत्सर्वं मा विलंबस्व शोभने ॥ २४ ॥ त्यज सौम्यमिदं रूपं सितचन्द्रांशुनिर्मलम् ॥ रौद्रं रूपं समास्थाय संहरस्व चराचरम् ॥ २५ ॥ रौद्रैर्भूतगणैर्घोरैर्देवि त्वं परिवारिता ॥ जीवलोकमिमं सर्वं भक्षयस्वांबुजेक्षणे ॥ २६ ॥ ततोऽहं मर्दयिष्यामि प्लावयिष्ये तथा जगत् ॥ कृत्वा चैकार्णवं भूयः सुखं स्वप्स्ये त्वया सह ॥ २७ ॥ ॥ श्रीदेव्युवाच ॥ ॥ नाहं देव जगच्चैतत्संहरामि महाद्युते ॥ अंबा भूत्वा विचेष्टं न भक्षयामि भृशातुरम् ॥ २८ ॥ स्त्रीस्वभावेन कारुण्यं करोति हृदयं मम ॥ कथं वै निर्दहिष्यामि जगदेतज्जगत्पते ॥ २९ ॥ तस्मात्त्वं स्वयमेवेदं जगत्संहर शंकर ॥ अथैवमुक्तस्तां देवीं धूर्जटिर्नीललोहितः ॥ ३० ॥ क्रुद्धो निर्भर्त्सयामास हुंकारेण महेश्वरीम् ॥ ॐ हुंफट् त्वं स इत्याह कोपाविष्टैरथेक्षणैः ॥ ३१ ॥ हुंकारिता विशालाक्षी पीनोरुजघनस्थला ॥ तत्क्षणाच्चाभवद्रौद्रा कालरात्रीव भारत ॥ ३२ ॥ हुंकुर्वती महानादैर्नादयन्ती दिशो दश ॥ व्यवर्धत महारौद्रा विद्युत्सौदामिनी यथा ॥ ॥ ३३ ॥ विद्युत्संपातदुष्प्रेक्ष्या विद्युत्संघातचंचला ॥ विद्युज्ज्वालाकुला रौद्रा विद्युदग्निनिभेक्षणा ॥ ३४ ॥ मुक्तकेशी विशालाक्षी कृशग्रीवा कृशोदरी ॥ व्याघ्रचर्माम्बरधरा व्यालयज्ञोपवीतिनी ॥ ३५ ॥ वृश्चिकैरग्निपुंजाभैर्गोनसैश्च विभूषिता ॥ त्रैलोक्यं पूरयामास विस्तारेणोच्छ्रयेण च ॥ ३६ ॥ भासुरांगा तु संवृत्ता कृष्णसर्पैककुण्डला ॥ चित्रदण्डोद्यतकरा व्याघ्रचर्मोपसेविता ॥ ३७ ॥ व्यवर्धत महारौद्रा जगत्संहारकारिणी ॥ सृक्किणी लेलिहाना च क्रूरफूत्कारकारिणी ॥ ३८ ॥ व्यात्तास्या घुर्घुरारावा जगत्संक्षोभकारिणी ॥ खेलद्भूतानुगा क्रूरा निःश्वासोच्छ्वासकारिणी ॥ ३९ ॥ जाताट्टहासा दुर्नासा वह्निकुण्डसमेक्षणा ॥ प्रोद्यत्किलकिलारावा ददाह सकलं जगत् ॥ ४० ॥ दह्यमानाः

१ अक्षराधिक्यमर्थानुरोधात्सह्यम् । २ प्रददाह तदा घोरा कालरात्रिर्महाबला—इ०पा० ।

CC-0. In Public Domain. Digitization by eGangotri

सुरास्तत्र पतंति धरणीतले ॥ पतंति यक्षगन्धर्वाः सकिन्नरमहोरगाः ॥ ४१ ॥ पतंति भूतसंघाश्च हाहाहैहैविराविणः ॥ बुंबापातैः सनिर्घातै रुदितार्तस्वरैरपि ॥ ४२ ॥ व्याप्तमासीत्तदा विश्वं त्रैलोक्यं सचराचरम् ॥ संपतद्भिः पतद्भिश्च ज्वलद्भूतगणैर्मही ॥ ४३ ॥ जातैश्चटचटाशब्दैः पतद्भिर्गिरिसानुभिः ॥ तत्र रौद्रोत्सवे जाता रुद्रानंदविवर्धिनी ॥ ४४ ॥ विहिंसमाना भूतानि चर्वमाणाचरानपि ॥ तत्तद्गंधमुपादाय शिवाराव विराविणी ॥ ४५ ॥ गलच्छोणितधाराभिमुखा दिग्धकलेवरा ॥ चंडशीलाऽभवच्चण्डी जगत्संहारकर्मणि ॥ ४६ ॥ येऽपि प्राप्ता महर्लोकं भृग्वाद्याश्च महर्षयः ॥ तेऽपि नश्यंति शतशो ब्रह्मक्षत्रविशादयः ॥ ४७ ॥ देवासुरा भयत्रस्ताः सयक्षोरगराक्षसाः ॥ विशंति केपि पातालं लीयंते च गुहादिषु ॥ ४८ ॥ सा च देवी दिशः सर्वा व्याप्य मृत्युरिव स्थिता ॥ युगक्षयकरे काले देवेन विनियोजिता ॥ ४९ ॥ एकापि नवधा जाता दशधा दशधा तथा ॥ चतुःषष्टिस्वरूपा च शतरूपाट्टहासिनी ॥ ५० ॥ जज्ञे सहस्ररूपा च लक्षकोटितनुः शिवा ॥ नानारूपायुधाकारा नाना वादनचारिणी ॥ ५१ ॥ एवंरूपाऽभवद्देवी शिवस्यानुज्ञया नृप ॥ दिक्षु सर्वासु गगने विकटायुधशीलिनः ॥ ५२ ॥ रुंधंतो नश्यमानांस्ता न्गणा माहेश्वराः स्थिताः ॥ विचरंति तया सार्द्धं शूलपट्टिशपाणयः ॥ ५३ ॥ ततो मातृगणाः केचिद्विनायकगणैः सह ॥ व्यवर्धंत महारौद्रा जगत्संहारकारिणः ॥ ५४ ॥ ततस्तस्या व्यवर्धंत दंष्ट्राः कुन्देंदुसन्निभाः ॥ योजनानां सहस्राणि अयुतान्यर्बुदानि च ॥ ५५ ॥ दंष्ट्रावलिः कररुहाः क्रूरास्तीक्ष्णाश्च कर्कशाः ॥ वियद्दिशो लिखंत्येव सप्तद्वीपां वसुन्धराम् ॥ ५६ ॥ तस्या दंष्ट्राभिसंपातैश्चूर्णिता वनपर्वताः ॥ शिलासंचयसंघाता विशीर्यंते सहस्रशः ॥ ५७ ॥ हिमवान्हेमकूटश्च निषधो गंधमादनः ॥ माल्यवांश्चैव नीलश्च श्वेतश्चैव महागिरिः ॥ ५८ ॥ मेरुमध्यमिलापीठं सप्तद्वीपं च सार्णवम् ॥ लोका[1]लोकेन सहितं प्राकंपत नृपोत्तम ॥ ५९ ॥ दंष्ट्राशनिविस्पृष्टाश्च विशीर्यंते महाद्रुमाः ॥ उत्पातैश्च दिशो व्याप्ता घोररूपैः समंततः ॥ ६० ॥ तारा ग्रहगणाः सर्वे ये च वैमानिका गणाः ॥ शिवासहस्रैराकीर्णा महामातृगणैस्तथा ॥ ६१ ॥ सा चचार जगत्कृत्स्नं युगांते समुपस्थिते ॥ भ्रमद्भिश्च ब्रुवद्भिश्च क्रोशद्भिश्च समंततः ॥ ६२ ॥ प्र[2]मथद्भिर्ज्वलद्भिश्च रौद्रैर्व्याप्ता दिशो दश ॥ विस्तीर्णं शैलसंघातं विघूर्णित गिरिद्रुमम् ॥ ६३ ॥ प्रभिन्नगोपुरद्वारं केशशुष्कास्थिसंकुलम् ॥ प्रदग्धग्रामनगरं भस्मपुंजाभिसंवृतम् ॥ ६४ ॥ चिताधूमाकुलं सर्वं त्रैलोक्यं

१ प्राकंपन्त ततस्त्रस्ताः क्षुभिताश्च महार्णवाः—इ० पा० । २ धूमायद्भिः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्कां.म.पु. सचराचरम् ॥ हाहाकाराकुलं सर्वमहहस्वननिस्वनम् ॥ ६५ ॥ जगदेतदभूत्सर्वमशरण्यं निराश्रयम् ॥ ६६ ॥ इति श्रीस्कांदे महापुराण एका आवं०खं० ५
॥१९१॥ शीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये कल्पानुकथने कालरात्रिकृतजगत्संहरणवर्णनंनाम चतुर्दशोऽध्या (रेवाखं०३)
यः ॥ १४ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो मातृसहस्रैश्च रौद्रैश्च परिवारिता ॥ कालरात्रिर्जगत्सर्वं हरते दीप्तलोचना ॥ १ ॥ अ० १५
ततस्ता मातरो घोरा ब्रह्मविष्णुशिवात्मिकाः ॥ वाय्विन्द्रानलकौबेरा यमतोयेशशक्तयः ॥ २ ॥ स्कन्दक्रोडनृसिंहानां विचरंत्यो भयानकाः ॥
चक्रशूलगदाखड्गवज्रशक्त्यृष्टिपट्टिशैः ॥ ३ ॥ खट्वांगैरुल्मुकैर्दीप्तैर्व्यचरन्मातरः क्षये ॥ उमासंनोदिताः सर्वाः प्रधावंत्यो दिशो दश ॥ ४ ॥ तासां
चरणविक्षेपैर्हुंकारोद्गारनिस्वनैः ॥ त्रैलोक्यमेतत्सकलं विप्रदग्धं समंततः ॥ ५ ॥ हाहारवाक्रंदितनिस्वनैश्च प्रभिन्नरथ्यागृहगोपुरैश्च ॥ बभूव घोरा
धरणी समंतात्कपालकेशाकुलकर्बुरांगी ॥ ६ ॥ यदेतच्छतसाहस्रं जंबूद्वीपं निगद्यते ॥ सर्वमेव तदुच्छन्नं समाधृष्य नृपोत्तम ॥ ७ ॥ जंबु शाकं
कुशं क्रौंचं गोमेदं शाल्मलिस्तथा ॥ पुष्करद्वीपसहिता ये च पर्वतवासिनः ॥ ८ ॥ ते ग्रस्ता मृत्युना सर्वे भूतैर्मातृगणैस्तथा ॥ महा
सुरकपालैश्च मांसमेदोवसोत्कटैः ॥ ९ ॥ महानादपरैर्वीरैर्वारुणीगंधमोहितैः ॥ ज्वालासहस्रसंवीता विद्युज्ज्वलितकुण्डला ॥ १० ॥ रुधिरो
द्गारशोणांगी महामाया सुभीषणा ॥ पिबंती रुधिरं तत्र महामांसवसाप्रिया ॥ ११ ॥ कपालहस्ता विकटा भक्षयन्ती सुरासु
रान् ॥ नृत्यन्ती च हसन्ती च विपरीता महारवा ॥ १२ ॥ त्रैलोक्यसंत्रासकरी विद्युत्संस्फोटहासिनी ॥ सप्तद्वीपसमुद्रांतां भक्षयित्वा च मेदि
नीम् ॥ १३ ॥ ततः स्वस्थानमगमद्यत्र देवो महेश्वरः ॥ नर्मदातीरमाश्रित्यावसन्मातृगणैः सह ॥ १४ ॥ अमराणां कटे तुंगे नृत्यन्ती हसिता
नना ॥ अमरा देवताः प्रोक्ताः शरीरं कटमुच्यते ॥ १५ ॥ तैः कटैरावृतो यस्मात्पर्वतोऽयं नृपोत्तम ॥ छिन्नभिन्नास्थिनिकरैर्वसामेदोस्रविप्लुतैः ॥
॥ १६ ॥ अमरंकट इत्येवं तेन प्रोक्तो मनीषिभिः ॥ महापवित्रो लोकेषु शंभुना स विनिर्मितः ॥ १७ ॥ नित्यं सन्निहितस्तत्र शंकरो ह्युमया
सह ॥ ततोऽहं नियतस्तत्र तस्य पादाग्रसंस्थितः ॥ १८ ॥ प्रह्वः प्रणतभावेन स्तौमि तं नीललोहितम् ॥ ततस्तालकसंपातैर्गणैर्मातृगणैः सह ॥
॥ १९ ॥ संप्रनृत्यति संहृष्टो मृत्युना सह शंकरः ॥ खट्वांगैरुल्मुकैश्चैव पट्टिशैः परिघैस्तथा ॥ २० ॥ मांसमेदोवसाहस्ता हृष्टा नृत्यन्ति संघशः ॥ ॥१९१॥
॥ १७ ॥ वामना जटिला मुण्डा लंबग्रीवोष्ठमूर्द्धजाः ॥ २१ ॥ महाशिश्नोदरभुजा नृत्यन्ति च हसन्ति च ॥ विकृतैराननैर्घोरैर्भुजोल्बणमुखादिभिः ॥२२॥

१ तोमरैः–इ०पा० । २ कपालनीलाकुलकेशभीमा--इ०पा० । ३ पुष्करवासिनः–इ० पा० । ४ महाकाया–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अमरं कण्टकं चक्रुः प्राप्ते कालविपर्यये ॥ तेषां मध्ये महाघोरं जगत्सन्त्रासकारणम् ॥ २३ ॥ मृत्युं पश्यामि नृत्यन्तं तडित्पिंगलमूर्द्ध
जम् ॥ तस्य पार्श्वे स्थितां देवीं विमलांबरभूषिताम् ॥ २४ ॥ कुण्डलोद्घुष्टगंडां तां नागयज्ञोपवीतिनीम् ॥ विचित्रैरुपहारैश्च पूजयन्तीं महेश्व
रम् ॥ २५ ॥ अपश्यं नर्मदां तत्र मातरं विश्ववंदिताम् ॥ नानातरंगां सावर्तां सुवेलार्णवसंनिभाम् ॥ २६ ॥ महासरः सारित्पातैरदृश्यां दृश्यरूपि
णीम् ॥ वन्द्यमानां सुरैः सिद्धैर्मुनिसंघैश्च भारत ॥ २७ ॥ एतस्मिन्नन्तरे घोरां सप्तसप्तकसंज्ञिताम् ॥ महावीच्यौघफेनाढ्यां कुर्वन्तीं सजलं
जगत् ॥ २८ ॥ दृष्टवान्नर्मदां देवीं मृगकृष्णांबरां पुनः ॥ सधूमाशनिनिर्ह्रादैर्वहंतीं सप्तधा तदा ॥ २९ ॥ इति संहारमतुलं दृष्टवान्राजसत्तम ॥
नष्टचंद्रार्ककिरणमभूदेतच्चराचरम् ॥ ३० ॥ महोत्पातसमुद्भूतं नष्टनक्षत्रमंडलम् ॥ अलातचक्रवत्तूर्णमशेषं भ्रामयंस्ततः ॥ ३१ ॥ विमानकोटिसं
कीर्णः स किंनरमहोरगः ॥ महावातः सनिर्घातो येनाकंपच्चराचरम् ॥ ३२ ॥ रुद्रवक्त्रात्समुद्भूतः संवर्तोनाम विश्रुतः ॥ वायुः संशोषयामास वितत
न्सप्तसागरान् ॥ ३३ ॥ उद्धूलितांगः कपिलाक्षमूर्द्धजो जटाकलापैरवबद्धमूर्द्धजः ॥ महारवो दीप्तविशालशूलधृक्स पातु युष्मांश्च दिनेदिने हरः ॥
॥ ३४ ॥ शूली धनुष्मान्कवची किरीटी श्मशानभस्मोक्षितसर्वगात्रः ॥ कपालमालाकुलकण्ठनालो महाहिसूत्रैरवबद्धमौलिः ॥ ३५ ॥ स गोन
सौघैः परिवेष्टितांगो विषाग्निचन्द्रामरसिन्धुमौलिः ॥ पिनाकखट्वांगकरालपाणिः स कृत्तिवासा डमरुप्रणादः ॥ ३६ ॥ स सप्तलोकांतरनिःसृ
तात्मा महाभुजावेष्टितसर्वगात्रः ॥ नेत्रेण सूर्योदयसन्निभेन प्रवालकांकूरनिभोदरेण ॥ ३७ ॥ संध्याभ्ररक्तोत्पलपद्मरागसिन्दूरविद्युत्प्रकरारुणेन ॥
तप्तेन लिंगेन च लोचनेन चिक्रीडमानः स युगांतकाले ॥ ३८ ॥ हिरण्मयेनैव समुत्सृजन्स दण्डेन यद्वद्भगवान्समेरुः ॥ पादाग्रविक्षेपविशीर्ण
शैलः कुर्वञ्जगत्सोऽपि जगाम तत्र ॥ ३९ ॥ संहर्तुकामस्त्रिदिवं त्वशेषं प्रमुंचमानो विकृताट्टहासम् ॥ जहार सर्वं त्रिदिवं महात्मा संक्षोभयन्वै
जगदीश एकः ॥ ४० ॥ तं देवमीशानमजं वरेण्यं दृष्ट्वा जगत्संहरणं महेशम् ॥ सा कालरात्रिः सह मातृभिश्च गणाश्च सर्वे शिवमर्चयन्ति ॥४१॥
नन्दी च भृंगी च गणादयश्च तं सर्वभूतं प्रणमंति देवम् ॥ जगद्गुरं सर्वजनस्य कारणं हरं स्मरारातिमहर्निशं ते ॥ ४२ ॥ इति श्रीस्कांदे महापुराण
एकाशीतिसाहस्र्यां पंचम आवन्त्यखण्डे रेवाखंडे नर्मदामाहात्म्ये सृष्टिसंहरणसंरंभवर्णनंनाम पंचदशोऽध्यायः ॥ १५ ॥ ॥ छ ॥ ॥ श्रीमा
र्कंडेय उवाच ॥ ॥ समातृभिर्भूतगणैश्च घोरैर्वृतः समंतात्स ननर्त शूली ॥ गजेंद्रचर्मावरणे वसानः संहर्तुकामश्च जगत्समस्तम् ॥ १ ॥ महे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



श्वरः सर्वसुरेश्वराणां मन्त्रैरनेकैरवबद्धमाली ॥ मेदोवसारक्तविचर्चितांगस्त्रैलोक्यदाहे प्रणनर्त शंभुः ॥ २ ॥ स कालरात्र्या सहितो महात्मा काले
त्रिलोकीं सकलां जहार ॥ संवर्तकाख्यः सहभानुभावः शम्भुर्महात्मा जगतो वरिष्ठः ॥ ३ ॥ स विस्फुलिंगोत्करधूममिश्रं महोल्कवज्राशनिवाततु
ल्यम् ॥ ततोऽट्टहासं प्रमुमोच घोरं विवृत्य वक्त्रं वडवामुखाभम् ॥ ४ ॥ सहस्रवज्राशनिसंनिभेन तेनाट्टहासेन हरोद्गतेन ॥ आपूरितास्तत्र दिशो
दशैव संक्षोभिताः सर्वमहार्णवाश्च ॥ ५ ॥ स ब्रह्मलोकं प्रजगाम शब्दो ब्रह्मांडभांडं प्रचचाल सर्वम् ॥ किमेतदित्याकुलचेतनास्ते वित्रस्तरूपा
ऋषयो बभूवुः ॥ ६ ॥ प्रणम्य सर्वे सहसैव भीता ब्रह्माणमूचुः परमेश्वरेशम् ॥ भीताश्च सर्वे ऋषयस्ततस्ते सुरासुरैश्चैव महोरगैश्च ॥
॥ ७ ॥ विद्युत्प्रभाभासुरभीषणांगः क एष चिक्रीडति भूतलस्थः ॥ कालानलं गात्रमिदं दधानो यस्याट्टहासेन जगद्विमूढम् ॥ ८ ॥
वित्रस्तरूपं प्रबभौ क्षणेन संहर्तुमिच्छेत्किमयं त्रिलोकीम् ॥ सार्धं त्वया सप्तभिरर्णवैश्च जनस्तपःसत्यमभिप्रयाति ॥ ९ ॥ संहर्तु
कामो हि क एष देव एतत्समस्तं कथयाप्रमेय ॥ न दृष्टमेतद्विषमं कदापि जानासि तत्त्वं परमो मतो नः ॥ १० ॥ निशम्य
तद्वाक्यमथाबभाषे ब्रह्मा समाश्वास्य सुरादिसंघान् ॥ ११ ॥ ॥ श्रीब्रह्मोवाच ॥ ॥ स एष[1] कालस्त्रिदिवं त्वशेषं संहर्तुकामो
जगदक्षयात्मा ॥ पूर्णे च शेते परिवत्सराणां भविष्यतीशानविभुर्न चित्रम् ॥ १२ ॥ संवत्सरोऽयं परिवत्सरश्च उद्वत्सरो वत्सर
एष देवः ॥ दृष्टोऽप्यदृष्टः प्रहुतः प्रकाशी स्थूलश्च सूक्ष्मः परमाणुरेषः ॥ १३ ॥ नातः परं किंचिदिहास्ति लोके परापरोऽयं प्रभुरात्मवादी ॥
तुष्येत मे कालसमानरूप इत्येवमुक्त्वा भगवान्सुरेशः ॥ १४ ॥ सनत्कुमारप्रमुखैः समेतः संतोषयामास ततो यतात्मा ॥ १५ ॥ ॥ ब्रह्मो
वाच ॥ ॥ नमोऽस्तु सर्वाय सुशांतमूर्तये ह्यघोररूपाय नमोनमस्ते ॥ सर्वात्मने सर्व नमोनमस्ते महात्मने भूतपते नमस्ते ॥ १६ ॥ ओंकार
हुंकारपरिष्कृताय स्वधावषट्कार नमोनमस्ते ॥ गुणत्रयेशाय महेश्वराय ते त्रयीमयाय त्रिगुणात्मने नमः ॥ १७ ॥ त्वं शंकरस्त्वं हि महेश्वरोसि
प्रधानमग्र्यं त्वमसि प्रविष्टः ॥ त्वं विष्णुरीशः प्रपितामहश्च त्वं सप्तजिह्वस्त्वमनंतजिह्वः ॥ १८ ॥ स्रष्टासि सृष्टिश्च विभो त्वमेव विश्वस्य वेद्यं च
॥ १८ ॥ परं निधानम् ॥ आहुर्द्विजा वेदविदो वरेण्यं परात्[3]परस्त्वं परतः परोऽसि ॥ १९ ॥ सूक्ष्मातिसूक्ष्मं प्रवदन्ति यच्च वाचो निवर्तन्ति मनो यतश्च ॥ ॥१९२॥
॥ २० ॥ ॥ श्रीमहादेव उवाच ॥ ॥ त्वया स्तुतोहं विविधैश्च मंत्रैः पुष्णामि शांतिं तव पद्मयोने ॥ ईक्षस्व मां लोकमिमं ज्वलंतं वक्त्रैरनेकैः

१ महाहिसंवेष्टितसर्वगात्रः--इ०पा० । २ देवः परमेश्वरेश्वरः--इ०पा० । ३ परात्परं त्वं हि तथासि नूनम्--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसभं हरंतम् ॥ २१ ॥ एवमुक्त्वा स देवेशो देव्या सह जगत्पतिः ॥ पितामहं समाश्वास्य तत्रैवांतरधीयत ॥ २२ ॥ इदं महत्पुण्यतमं वरिष्ठं स्तोत्रं निशम्येह गतिं लभंते ॥ पापैरनेकैः परिवेष्टिता ये प्रयांति रुद्रं विमलैर्विमानैः ॥ २३ ॥ भयं च तेषां न भवेत्कदाचित्पठन्ति ये तात इदं द्विजाग्र्याः ॥ संग्रामचौराग्निवने तथाब्धौ तेषां शिवस्त्राति न संशयोऽत्र ॥ २४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये ब्रह्मकृतशिवस्तुतिवर्णनंनाम षोडशोऽध्यायः ॥ १६ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ एवं संस्तूयमानस्तु ब्रह्माद्यैर्मुनिपुंगवैः ॥ ब्रह्मलोकगतैस्तत्र संजहार जगत्प्रभुः ॥ १ ॥ स तद्भीमं महारौद्रं दक्षिणं वक्रमव्ययम् ॥ महादंष्ट्रोत्कटारावं पातालतलसन्निभम् ॥ २ ॥ विद्युज्ज्वलनपिंगाक्षं भैरवं लोमहर्षणम् ॥ महाजिह्वं महादंष्ट्रं महासर्पशिरोधरम् ॥ ३ ॥ महासुरशिरोमालं महाप्रल यकारणम् ॥ ग्रसत्समुद्रनिहितवातवारिमयं हविः ॥ ४ ॥ वडवामुखसंकाशं महादेवस्य तन्मुखम् ॥ जिह्वाग्रेण जगत्सर्वं लेलिहानमपश्यत ॥ ॥ ५ ॥ योजनानां सहस्राणि सहस्राणां शतानि च ॥ दिशो दश महाघोरा मांसमेदोवसोत्कटाः ॥ ६ ॥ तस्य दंष्ट्रा व्यवर्धंत शतशोऽथ सहस्र शः ॥ सासुरान्सुरगंधर्वान्सयक्षोरगराक्षसान् ॥ ७ ॥ तस्य दंष्ट्राग्रसंलग्नान्स ददर्श पितामहः ॥ दंतयंत्रांतसंविष्टं विचूर्णितशिरोधरम् ॥ ८ ॥ जगत्प श्यामि राजेंद्र विशंतं व्यादिते मुखे ॥ नानातरंगभंगांगा महाफेनौघसंकुलाः ॥ यथा नद्यो लयं यांति समुद्रं प्राप्य सस्वनाः ॥ ९ ॥ तथा ततं विश्वमिदं समस्तमनेकजीवार्णवदुर्विगाह्यम् ॥ विवेश रुद्रस्य मुखं विशालं ज्वलत्तदुग्रं घननादघोरम् ॥ १० ॥ ज्वालास्ततस्तस्य मुखा त्सुघोराः सविस्फुलिंगा बहुलाः सधूमाः ॥ अनेकरूपा ज्वलनप्रकाशाः प्रदीपयंतीव दिशोऽखिलाश्च ॥ ११ ॥ ततो रविज्वालसहस्रमालि बभूव वक्रं चलजिह्वदंष्ट्रम् ॥ महेश्वरस्याद्भुतरूपिणस्तदा स द्वादशात्मा प्रबभूव एकः ॥ १२ ॥ ततस्ते द्वादशादित्या रुद्रवक्राद्विनिर्गताः ॥ आश्रित्य दक्षिणामाशां निर्दहंतो वसुंधराम् ॥ १३ ॥ भौमं यज्जीवनं किंचिन्नानावृक्षतृणालयम् ॥ शुष्कं पूर्वमनावृष्ट्या संकलाकुलभूतलम् ॥ १४ ॥ तद्दीप्यमानं सहसा सूर्यैस्तै रुद्रसंभवैः ॥ धूमाकुलमभूत्सर्वं प्रणष्टग्रहतारकम् ॥ १५ ॥ जज्वाल सहसा दीप्तं भूमंडलमशेषतः ॥ ज्वालामाला कुलं सर्वमभूदेतच्चराचरम् ॥ १६ ॥ सप्तद्वीपसमुद्रेषु सरित्सु च सरस्सु च ॥ अग्निरत्ति जगत्सर्वमाज्याहुतिमिवाध्वरे ॥ १७ ॥ विशालतेजसा दीप्ता महाज्वालासमाकुलाः ॥ ददहुर्वै जगत्सर्वमादित्या रुद्रसंभवाः ॥ १८ ॥ आदित्यानां रश्मयश्च संस्पृष्टा वै परस्परम् ॥ एवं ददाह भगवांस्त्रै

१ वडवामुखे-इ० पा० । २ यच्चेगं यत्र नेंगते-इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



लोक्यं सचराचरम् ॥ १९ ॥ सप्तद्वीपप्रमाणस्तु सोऽग्निर्भूत्वा महेश्वरः ॥ सप्तद्वीपसमुद्रांतां निर्ददाह वसुंधराम् ॥ २० ॥ सुमेरुमंदरांतां च निर्दह्य वसुधां तदा ॥ भित्त्वा तु सप्तपातालं नागलोकं ततोऽदहत् ॥ २१ ॥ भूम्यधः सप्तपातालान्निर्दहंस्तारकैः सह ॥ चचाराग्निः समन्तात्तु निर्दहन्वै युधिष्ठिर ॥ २२ ॥ धम्यमान इवांगारैर्लोहराशिरिव ज्वलन् ॥ तथा तत्प्राज्वलत्सर्वं संवर्त्ताग्निप्रदीपितम् ॥ २३ ॥ निर्वृक्षा निस्तृणा भूमिर्निर्निर्झरसरःसरित् ॥ विशीर्णशैलशृंगौघा कूर्मपृष्ठोपमाऽभवत् ॥ २४ ॥ ज्वालामालाकुलं कृत्वा जगत्सर्वं चिदात्मकम् ॥ महारूपधरो रुद्रो व्यतिष्ठत महेश्वरः ॥ २५ ॥ समातृगणभूयिष्ठा सयक्षोरगराक्षसा ॥ ततो देवी महादेवं विवेश हरिलोचना ॥ २६ ॥ निर्वाणं परमापन्ना शांतेव शिखिनः शिखा ॥ जगत्सर्वं हि निर्दग्धं त्रिभिर्लोकैः सहानघ ॥ २७ ॥ रुद्रप्रसादान्मुक्त्वा मां नर्मदां चाप्ययोनिजाम् ॥ युगानामयुतं देवो मया चाद्यां बुभक्षणात् ॥ २८ ॥ पुरा ह्याराधितः शूली तेनाहमजरामरः ॥ अघमर्षणघोरं च वामदेवं च त्र्यंबकम् ॥ २९ ॥ ऋषभं त्रिसुपर्णं च दुर्गां सावित्रमेव च ॥ बृहदारण्यकं चैव बृहत्साम तथोत्तरम् ॥ ३० ॥ रौद्रीं परमगायत्रीं शिवोपनिषदं तथा ॥ यथा प्रतिरथं सूक्तं जप्त्वा मृत्युंजयं तथा ॥ ॥ ३१ ॥ सरित्सागरपर्यन्ता वसुधा भस्मसात्कृता ॥ वर्जयित्वा महाभागां नर्मदाममृतोपमाम् ॥ ३२ ॥ महेन्द्रो मलयः सह्यो हेमकूटोऽथ माल्यवान् ॥ विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः ॥ ३३ ॥ द्वादशादित्यनिर्दग्धाः शैलाः शीर्णशिलाः पृथक् ॥ भस्मीभूतास्तु दृश्यंते न नष्टा नर्मदा तदा ॥ ३४ ॥ हिमवान्हेमकूटश्च निषधो गंधमादनः ॥ माल्यवांश्च गिरिश्रेष्ठो नीलः श्वेतोऽथ शृङ्गवान् ॥ ३५ ॥ एते पर्वतराजानो देवगंधर्वसेविताः ॥ युगांताग्निविनिर्दग्धाः सर्वे शीर्णमहाशिलाः ॥ ३६ ॥ एवं मया पुरा दृष्टो युगांते सर्वसंक्षयः ॥ वर्जयित्वा महापुण्यां नर्मदां नृपसत्तम ॥ ३७ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे श्रीनर्मदामाहात्म्ये द्वादशादित्यरूपेण जगत्संहरणवर्णनंनाम सप्तदशोऽध्यायः ॥ १७ ॥छ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ निर्दग्धेऽस्मिंस्ततो लोके सूर्यैरीश्वरसंभवैः ॥ सप्तभिश्चार्णवैः शुष्कैर्द्वीपैः सप्तभिरेव च ॥१॥ ततो मुखात्तस्य घना महोल्बणा निश्चेरुरिंद्रायुधतुल्यरूपाः ॥ घोराः पयोदा जगदंधकारं कुर्वंत ईशानवरप्रयुक्ताः ॥ २ ॥ नीलोत्पलाभाः क्वचिदंजनाभा गोक्षीरकुंदेंदुनिभाश्च केचित् ॥ मयूरचंद्राकृतयस्तथाऽन्ये केचिद्विधूमानलसप्रभाश्च ॥ ३ ॥ केचि

॥ १९ ॥ ॥१९३॥

१ महादेवः स संहरन्–इ०पा० । २ सप्तलोकैः–इ०पा० । ३ रेवैका विमलोदका–इ० पा० । ४ सूर्यशुष्के जगत्यस्मिन्प्रदग्धे कालवह्निना ॥ ततो मुखान्महेशस्य निश्चेरुर्जलदाः पृथक्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्महापर्वतकल्परूपाः केचिन्महामीनकुलोपमाश्च ॥ केचिद्गजेन्द्राकृतयः सुरूपाः केचिन्महाकूटनिभाः पयोदाः ॥ ४ ॥ चलत्तरंगोर्मिसमानरूपा महापुरोधाननिभाश्च केचित् ॥ सगोपुराट्टालकसन्निकाशाः सविद्युदुल्काशनिमंडितांताः ॥ ५ ॥ समावृतांगः स बभूव देवः संवर्तकोनाम गणः स रौद्रः ॥ प्रवर्षमाणो जगदप्रमाणमेकार्णवं सर्वमिदं चकार ॥ ६ ॥ ततो महामेघविवर्द्धमानमीशानमिन्द्राशनिभिर्वृताङ्गम् ॥ ददर्श नाहं भयविह्वलाङ्गो गङ्गाजलौघैश्च समावृताङ्गः ॥ ७ ॥ गजाः पुनश्चैव पुनः पिबन्तो जगत्समन्तात्परिदह्यमानम् ॥ आपूरितं चैव जगत्समंतात्सर्वैश्च तैर्जग्मुरदर्शनं च ते ॥ ८ ॥ महार्णवाः सप्त सरांसि द्वीपा नद्योऽथ सर्वा अथ भूर्भुवश्च ॥ आपूर्यमाणाः सलिलौघजालैरेकार्णवं सर्वमिदं बभूव ॥ ९ ॥ न दृश्यते किंचिदहो चराचरे निरग्निचंद्रार्कमयेपि लोके ॥ प्रणष्टनक्षत्रतमोंधकारे प्रशांतवातास्तमितैकनीडे ॥ १० ॥ महाजलौघेस्य विशुद्धसत्त्वा स्तुतिर्मया भूप कृता तदानीम् ॥ ततोहमित्येव विचिंतयानः शरण्यमेकं क्व नु यामि शांतम् ॥ ११ ॥ स्मरामि देवं हृदि चिन्तयित्वा प्रभुं शरण्यं जलसंनिविष्टः ॥ नमामि देवं शरणं प्रपद्ये ध्यानं च तस्येतिकृतं मया च ॥ १२ ॥ ध्यात्वा ततोऽहं सलिलं ततार तस्य प्रसादादविमूढचेताः ॥ ग्लानिः श्रमश्चैव मम प्रणष्टौ देव्याः प्रसादेन नरेन्द्रपुत्र ॥ १३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे नर्मदामाहात्म्यवर्णनंनामाष्टादशोऽध्यायः ॥ १८ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततस्त्वेकार्णवे तस्मिन्मुमूर्षुरहमातुरः ॥ काकूच्छ्वासस्तरंस्तोयं बाहुभ्यां नृपसत्तम ॥ १ ॥ शृणोम्यर्णवमध्यस्थो निःशब्दस्तिमिते तदा ॥ अंभोरवमनौपम्यं दिशो दश विनादिनम् ॥ २ ॥ हंसकुंदेंदुसंकाशां हारगोक्षीरपांडुराम् ॥ नानारत्नविचित्रांगीं स्वर्णशृंगां मनोरमाम् ॥ ३ ॥ खुरैः प्रवालकमयैर्लांगूलध्वजशोभिताम् ॥ प्रलंबघोणां नर्दन्तीं खुरैरर्णवगाहिनीम् ॥ ४ ॥ गां ददर्शाहमुद्विग्नो मामेवाभिमुखीं स्थिताम् ॥ किंकिणीजालमुक्ताभिः स्वर्णघंटासमावृताम् ॥ ५ ॥ तस्याश्चरणविक्षेपैः सर्वमेकार्णवं जलम् ॥ विक्षिप्तफेनपुंजौघैर्नृत्यंतीव समंततः ॥ ६ ॥ ररास सलिलोत्क्षेपैः क्षोभयंती महार्णवम् ॥ सा मामाह महाभाग श्लक्ष्णगम्भीरया गिरा ॥ ७ ॥ मा भैषीर्वत्सवत्सेति मृत्युस्तव न विद्यते ॥ महादेवप्रसादेन न मृत्युस्ते ममापि च ॥ ८ ॥ ममाश्रयस्व लांगूलं त्वामतस्तारयाम्यहम् ॥ घोरादस्माद्भयाद्विप्र यावत्संप्लवते जगत् ॥ ९ ॥ क्षुत्तृषाप्रतिघातार्थं स्तनौ मे त्वं पिबस्व ह ॥ पयोऽमृताश्रयं दिव्यं तत्पीत्वा निर्वृतो भव ॥ १० ॥ तस्यास्तद्वचनं श्रुत्वा हर्षात्पीतो मया स्तनः ॥ न क्षुत्तृषा पीतमात्रे स्तने मह्यं तदाऽभवत् ॥ ११ ॥ दिव्यं

३ केचिन्महावर्णधरा विशालाः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



प्राणबलं जज्ञे समुद्रप्लवनक्षमम् ॥ ततस्तां प्रत्युवाचेदं का त्वमेकार्णवीकृते ॥ १२ ॥ भ्रमसे ब्रूहि तत्त्वेन विस्मयो मे महान्हृदि ॥ भ्रमतोऽत्र ममा
र्तस्य मुमूर्षोः प्रहतस्य ह ॥ १३ ॥ त्वं हि मे शरणं जाता भाग्यशेषेण सुव्रते ॥ १४ ॥ ॥ गौरुवाच ॥ ॥ किमहं विस्मृता तुभ्यं विश्वरूपा
महेश्वरी ॥ नर्मदा धर्मदा नृणां स्वर्गशर्मबलप्रदा ॥ १५ ॥ दृष्ट्वा त्वां सीदमानं तु रुद्रेणाहं विसर्जिता ॥ तं द्विजं तारयस्वार्ये मा प्राणांस्त्यजतां
जले ॥ १६ ॥ गोरूपेण विभोर्वाक्यात्त्वत्सकाशमिहागता ॥ मा मृषावचनः शंभुर्भवेदिति च सत्वरा ॥ १७ ॥ एवमुक्तस्तयाहं तु इंद्रायुधनिभं
शुभम् ॥ लांगूलमव्ययं ज्ञात्वा भुजाभ्यामवलंबितः ॥ १८ ॥ ततोऽतरं तं जलधिं लांगूलध्वजमाश्रितः ॥ असौ देवो महादेव इति मां प्रत्यभाषत
॥ १९ ॥ ततो युगसहस्रांतमहं कालं तया सह ॥ व्यचरं वै तमीभूते सर्वतः सलिलावृते ॥२०॥ महार्णवे ततस्तस्मिन्भ्रमन्गोः पुच्छमाश्रितः ॥ नि
र्वाते चांधकारे च निरालोके निरामये॥२१॥अकस्मात्सलिले तस्मिन्नतसीपुष्पसन्निभम्॥विभिन्नांजनसंकाशमाकाशमिव निर्मलम्॥२२॥ नीलोत्प
लदलश्यामं पीतवाससमव्ययम्॥किरीटेनार्कवर्णेन विद्युद्विद्योतकारिणा॥२३॥भ्राजमानेन शिरसा खमिवात्यंतरूपिणम्॥ कुंडलोद्घृष्टगह्लं तु हारोद्द्यो
तितवक्षसम् ॥२४॥ जांबूनदमयैर्दिव्यैर्भूषणैरुपशोभितम् ॥ नागोपधानशयनं सहस्रादित्यवर्चसम् ॥ २५॥ अनेकबाहूरुधरं नैकवक्त्रं मनोरमम् ॥ सुप्त
मेकार्णवे वीरं सहस्राक्षशिरोधरम् ॥ २६ ॥ जटाजूटेन महता स्फुरद्विद्युत्समार्चिषा ॥ एकार्णवं जगत्सर्वं व्याप्य देवं व्यवस्थितम् ॥२७॥ ग्रसित्वा
शंकरः सर्वं सदेवासुरमानवम् ॥ प्रपश्याम्यहमीशानं सुप्तमेकार्णवे प्रभुम् ॥ २८ ॥ सर्वव्यापिनमव्यक्तमनन्तं विश्वतोमुखम् ॥ तस्य पादतला
भ्याशे स्वर्णकेयूरमंडिताम् ॥ २९ ॥ विश्वरूपां महाभागां विश्वमायावधारिणीम् ॥ श्रीमयीं ह्रीमयीं देवीं धीमयीं वाङ्मयीं शिवाम् ॥ ३० ॥
सिद्धिं कीर्तिं रतिं ब्राह्मीं कालरात्रिमयोनिजाम् ॥ तामेवाहं तदात्यन्तमीश्वरांतिकमास्थिताम् ॥ ३१ ॥ अद्राक्षं चन्द्रवदनां धृतिं सर्वेश्वरीषु
माम् ॥ ३२ ॥ शांतं प्रसुप्तं नवहेमवर्णमुमासहायं भगवन्तमीशम् ॥ तमोवृतं पुण्यतमं वरिष्ठं प्रदक्षिणीकृत्य नमस्करोमि ॥ ३३ ॥ ततः प्रसुप्तः
सहसा विबुद्धो रात्रिक्षये देववरः स्वभावात् ॥ विक्षोभयन्बाहुभिरर्णवांभो जगत्प्रणष्टं सलिले विमृश्य ॥ ३४ ॥ किं कार्यमित्येव विचिंतयित्वा
वाराहरूपोऽभवदद्भुतांगः ॥ महाघनांभोधरतुल्यवर्चाः प्रलंबमालांबरनिष्कमाली ॥ ३५ ॥ सशंखचक्रासिधरः किरीटी सदेदवेदांगमयो महात्मा ॥
॥ २० ॥ त्रैलोक्यनिर्माणकरः पुराणो देवत्रयीरूपधरश्च कार्ये ॥ ३६ ॥ स एव रुद्रः स जगज्जहार सृष्ट्यर्थमीशः प्रपितामहोभूत् ॥ संरक्षणार्थं जगतः स

१ वत्स रेवा—इ० पा० । २ अक्षयाम्—इ० पा० । ३ इहावृतम्—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एव हरिः सुचक्रासिगदाब्जपाणिः ॥ ३७ ॥ तेषां विभागो न हि कर्तुमर्हो महात्मनामेकशरीरभाजाम् ॥ मीमांसहेत्वर्थविशेषतर्कैर्यस्तेषु कुर्यात्प्रवि भेदमज्ञः ॥ ३८ ॥ स याति घोरं नरकं क्रमेण विभागकृद्द्वेषमतिर्दुरात्मा ॥ या यस्य भक्तिः स तयैव नूनं देहं त्यजन्स्वं ह्यमृतत्वमेति ॥ ३९ ॥ संमोहयन्मूर्तिभिरत्र लोकं स्रष्टा च गोप्ता क्षयकृत्स देवः ॥ तस्मान्न मोहात्मकमाविशेत द्वेषं न कुर्यात्प्रविभिन्नमूर्तिः ॥ ४० ॥ वाराहमीशानवरोऽप्यतोऽसौ रूपं समास्थाय जगद्विधाता ॥ नष्टे त्रिलोकेऽर्णवतोयमग्ने विमार्गितोयौघमयेऽन्तरात्मा ॥ ४१ ॥ भित्त्वार्णवं तोयमथांतरस्थं विवेश पातालतलं क्षणेन ॥ जले निमग्नां धरणीं समस्तां समस्पृशत्पंकजपत्रनेत्राम् ॥ ४२ ॥ विशीर्णशैलोपलशृङ्गकूटां वसुन्धरां तां प्रलये प्रलीनाम् ॥ दंष्ट्रैकया विष्णुरतुल्यसाहसः समुद्दधार स्वयमेव देवः ॥ ४३ ॥ सा तस्य दंष्ट्राग्रविलंबितांगी कैलासशृंगाग्रगतेव ज्योत्स्ना ॥ विभ्राजते साप्यसमानमूर्तिः शशांकशृंगे च तडिद्विलग्ना ॥ ४४ ॥ तामुज्जहारार्णवतोयमग्नां करी निमग्नामिव हस्तिनीं हठात् ॥ नावं विशीर्णामिव तोयमध्यादुदीर्णसत्त्वोनुपमप्रभावः ॥ ४५ ॥ स तां समुत्तार्य महाजलौघात्समुद्रमार्यो व्यभजत्समस्तम् ॥ महार्णवेष्वेव महार्णवांभो निक्षेपयामास पुनर्नदीषु ॥ ४६ ॥ शीर्णांश्च शैलान्स चकार भूयो द्वीपान्समस्तांश्च तथार्णवांश्च ॥ शैलोपलैर्ये विचिताः समन्ताच्छिलोच्चयांस्तान्स चकार कल्पे ॥ ४७ ॥ अनेकरूपं प्रविभज्य देहं चकार देवेन्द्रगणान्समस्तान् ॥ मुखाच्च वह्निर्मनसश्च चन्द्रश्चक्षोश्च सूर्यः सहसा बभूव ॥ ४८ ॥ जज्ञेऽथ तस्येश्वरयोगमूर्तेः प्रध्यायमानस्य सुरेन्द्रसंघः॥ वेदाश्च यज्ञाश्च तथैव वर्णास्तथा हि सर्वौषधयो रसाश्च ॥ ४९ ॥ जगत्समस्तं मनसा बभूव यत्स्थावरं किंचिदिहांडजं वा ॥ जरायुजं स्वेदजमुद्भिजं वा यत्किंचिदाकीटपिपीलकाद्यम् ॥ ५० ॥ ततो विजज्ञे मनसा क्षणेन अनेकरूपाः सहसा महेश ॥ चकार यन्मूर्तिभिरव्ययात्मा अष्टाभिराविश्य पुनः स तत्र ॥ ५१ ॥ लीलां चकाराथ समृद्धतेजा अतोऽत्र मे पश्यत एव विप्राः ॥ तेषां मया दर्शनमेव सर्वं यावन्मुहूर्तात्समकारि भूप ॥ ५२ ॥ कृत्वा त्वशेषं किल लीलयैव स देवदेवो जगतां विधाता ॥ सर्वत्रदृक्सर्वग एव देवो जगाम चादर्शनमादिकर्ता ॥ ५३ ॥ यत्तन्मुहूर्तादिह नामरूपं तावत्प्रपश्यामि जगत्तथैव ॥ द्वीपैः समुद्रैरभिसंवृतं हि नक्षत्रतारादिविमानकीर्णम् ॥ ५४ ॥ वियत्पयोदग्रहचक्रचित्रं नानाविधैः प्राणिगणैर्वृतं च ॥ तां वै न पश्यामि महानुभावां गोरूपिणीं सर्वसुरेश्वरीं च ॥ ५५ ॥ क्व सांप्रतं सेति विचिंत्य राजन्विभ्रांतचित्तस्त्वभवं तदैव ॥ दिशो विभागानवलोकयान ऋते पुनस्तां कथमीश्वरांगीम् ॥ ॥ ५६ ॥ पश्यामि तामत्र पुनश्च शुभ्रां महाभ्रनीलां शुचिशुभ्रतोयाम् ॥ वृक्षैरनेकैरुपशोभितांगीं गजैस्तुरंगैर्विहगैर्वृतां च ॥ ५७ ॥ यथा पुरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





तीरमुपेत्य देव्याः समास्थितश्चाप्यमरकण्टके तु ॥ तथैव पश्यामि सुखोपविष्ट आत्मानमव्यग्रमवाप्तसौख्यम् ॥ ५८॥ तथैव पुण्या मलतोयवाहां दृष्ट्वा पुनः कल्पपरिक्षयेपि ॥ अम्बामिवार्यामनुकंपमानामक्षीणतोयां विरुजां विशोकः ॥ ५९ ॥ एवं महत्पुण्य तमं च कल्पं पठंति शृण्वन्ति च ये द्विजेंद्राः ॥ महावराहस्य महेश्वरस्य दिनेदिने ते विमला भवन्ति ॥ ६० ॥ अशुभशतसहस्रं ते विधूय प्रपन्नास्त्रिदिवममरजुष्टं सिद्धगंधर्वयुक्तम् ॥ विमलशशिनिभाभिः सर्व एवाप्सरोभिः सह विविधविलासैः स्वर्गसौख्यं लभन्ते ॥ ६१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखण्डे श्रीनर्मदामाहात्म्ये वाराहकल्पवृत्तान्तवर्णनंनामैकोनविंशो ऽध्यायः ॥ १९ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ श्रुता मे विविधा धर्माः संहारास्त्वत्प्रसादतः ॥ कृता देवेन सर्वेण ये च दृष्टास्त्वयानघ ॥ ॥ १ ॥ सांप्रतं श्रोतुमिच्छामि प्रभावं शार्ङ्गधन्वनः ॥ त्वयानुभूतं विप्रेंद्र तन्मे त्वं वक्तुमर्हसि ॥ २ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ अतः परं प्रवक्ष्यामि प्रजासंहारलक्षणम् ॥ यच्चिह्नं दृश्यते तत्र यथा कल्पो विधीयते ॥ ३ ॥ उल्कापाताः सनिर्घाता भूमिकंपस्तथैव च ॥ पतते पांशुवर्षं च निर्घोषश्चैव दारुणः ॥ ४ ॥ यक्षकिन्नरगंधर्वाः पिशाचोरगराक्षसाः ॥ सर्वे ते प्रलयं यांति युगांते समुपस्थिते ॥ ५ ॥ पर्वताः सागरा नद्यः सरांसि विविधानि च ॥ वृक्षाः शोषं समायांति वल्लीजातं तृणानि च ॥ ६ ॥ एवं हि व्याकुलीभूते सर्वौषधिजलोज्झिते ॥ काष्ठभूते तु संजाते त्रैलोक्ये सचराचरे ॥ ७ ॥ यावत्पश्यामि मध्याह्ने स्नानकाल उपस्थिते ॥ त्रैलोक्यं ज्वलनाकारं दुर्निरीक्षं दुरासदम् ॥ ८ ॥ द्वौ सूर्यौ पूर्वत स्तात पश्चिमोत्तरयोस्तथा ॥ तथैव दक्षिणे द्वौ च सूर्यौ दृष्टौ प्रतापिनौ ॥ ९ ॥ द्वौ सूर्यौ नागलोकस्थौ मध्ये द्वौ गगनस्य च ॥ इत्येते द्वादशा दित्यास्तपन्ते सर्वतो दिशम् ॥ १० ॥ पृथिवीमदहन्सर्वां सशैलवनकाननाम् ॥ नादग्धं दृश्यते किंचिद्दृते रेवां च मां तथा ॥ ११ ॥ पृथिव्यां दह्यमानायां हविर्गंधश्च जायते ॥ ततो मे शुष्यते गात्रं तृषाप्येवं दुरासदा ॥ १२ ॥ न हि विंदामि पानीयं शोषितं च दिवाकरैः ॥ यावत्कमण्डलुं वीक्षे शुष्कं तत्रापि तज्जलम् ॥ १३ ॥ ततोऽहं शोकसंतप्तो विशेषात्क्षुत्तृषार्दितः॥ उत्पपात क्षितेरूर्ध्वं पश्यमानो दिवं प्रति ॥ १४ ॥ तावत्पश्यामि गगने गृहं शृंगारभूषितम् ॥ ततस्तज्ज्ञातुकामोऽहं प्रस्थितो राजसत्तम ॥ १५ ॥ प्राकारेण विचित्रेण कपाटार्गलभूषितम् ॥ विचित्रशिखरोपेतं द्वारदेशमुपागतः ॥ १६ ॥ षडशीतिसहस्राणि योजनानां समुच्छ्रये ॥ तदर्धं तु पृथक्त्वेन कांचनं रत्नभूषितम् ॥ १७ ॥ तत्र मध्ये परां शय्यां

 

१ शकलितकलिपापा रुद्रलोकं प्रयान्ति–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पश्यामि नृपसत्तम ॥ शय्योपरि शयानं तु पुरुषं दिव्यमूर्धजम् ॥ १८ ॥ विकुंचिताग्रकेशांतं समस्तं योजनायतम् ॥ मुकुटेन विचित्रेण [1]दीप्ति कांतेन शोभितम् ॥ १९ ॥ श्यामं कमलपत्राभं सुप्रभं च सुनासिकम् ॥ सिंहास्यमायतभुजं गल्लश्मश्रुवरांकितम् ॥ २० ॥ त्रिवलीभंगसुभगं कर्ण कुण्डलभूषितम् ॥ विशालाभं सुपीनांगं पार्श्वस्वावर्तभूषितम् ॥ २१ ॥ शोभितं कटिभागेन विभक्तं जानुजंघयोः ॥ पद्मांकिततलं देवमाताम्रसुनखां गुलिम् ॥ २२ ॥ मेघनादसुगंभीरं सर्वावयवसुन्दरम् ॥ शय्यामध्यगतं देवमपश्यं पुरुषोत्तमम् ॥ २३ ॥ शंखचक्रगदापाणिं शयानं दक्षिणेन तु ॥ अक्षसूत्रोद्यतकरं सूर्यायुतसमप्रभम् ॥ २४ ॥ तं दृष्ट्वा भक्तिमान्देवं स्तोतुकामो व्यवस्थितः ॥ जयेश जय वागीश जय दिव्यांगभूषण ॥ ॥ २५ ॥ जय देवपते श्रीमन्साक्षाद्ब्रह्म सना[2]तन ॥ तव लोकाः शरीरस्थास्त्वं गतिः परमेश्वर ॥ २६ ॥ त्वदाधारा हि देवेश सर्वे लोका व्यव स्थिताः ॥ त्वं श्रेष्ठः सर्वसत्त्वानां त्वं कर्ता धरणीधरः ॥ २७ ॥ त्वं हौत्रमग्निहोत्राणां सूत्रमन्त्रस्त्वमेव च ॥ गोकर्णं भद्रकर्णं च त्वं च माहेश्वरं पदम् ॥ २८ ॥ त्वं कीर्तिः सर्वकीर्तीनां दैन्यपापप्रणाशिनी ॥ त्वं नैमिषं कुरुक्षेत्रं त्वं च विष्णुपदं परम् ॥ २९ ॥ त्वया तु लीलया देव पदा क्रांता च मेदिनी ॥ त्वया बद्धो बलिर्देव त्वयेंद्रस्य पदं कृतम् ॥ ३० ॥ त्वं कलिर्द्वापरं देव त्रेता कृतयुगं तथा ॥ प्रलंबदमनश्च त्वं स्रष्टा त्वं च विनाशकृत् ॥ ३१ ॥ त्वया वै धार्यते लोकास्त्वं काल[3]ः सर्वसंक्षयः ॥ त्वया हि देव सृष्टास्ताः सर्वा वै देवयोनयः ॥ ३२ ॥ त्वं पन्थाः सर्व लोकानां त्वं च मोक्षः परा गतिः ॥ ब्रह्मा त्वदुद्भवो देवो रजोरूपः सनातनः ॥ रुद्रः क्रोधोद्भवोऽप्येवं त्वं च सत्त्वे व्यवस्थितः ॥ ३३ ॥ [4]एतच्चराचरं देव क्रीडनार्थं त्वया कृतम् ॥ एवं संततदेहेन स्तुतो देवो मया प्रभुः ॥ ३४ ॥ भक्त्या परमया राजन्सर्वभूतपतिः प्रभुः ॥ स्तुवन्वै तत्र पश्यामि वारिपूर्णांस्ततो घटान् ॥ ३५ ॥ ततो मया विस्मृता या तृषा सा वर्द्धिता पुनः ॥ उपासर्पं ततस्तस्य पार्श्वं वै पुरुषस्य हि ॥ ३६ ॥ पानीयं पातुका मेन चिंतितं च मया पुनः ॥ नापश्यत हि मां चैष सुप्तोऽपि न च बुध्यते ॥३७॥ यस्तु पापेन संमूढः सुखं सुप्तं प्रबोधयेत् ॥ जायते तस्य पापस्य ब्रह्महत्याफलं महत् ॥३८॥ एवं संचिंत्यमाने तु द्वितीयो ह्यागतः पुमान् ॥ नेक्षते जलपते किंचिद्वामस्कन्धे मृगाजिनी ॥३९॥ जटी कमण्डलुधरो दण्डी मेखलया वृतः ॥ भस्मोन्मृदितसर्वांगो महातेजास्त्रिलोचनः ॥ ४० ॥ यावत्तं स्तोतुकामोऽहमपश्यं स्वच्छचक्षुषा ॥ तावत्सर्वांगसंभूत्या महत्या रूपसंपदा ॥ ४१ ॥ अपश्यं संवृतां नारीं सर्वाभरणभूषिताम् ॥ दृष्ट्वा तां पतितो भूमौ जयस्वेति ब्रुवंस्ततः ॥ ४२ ॥ जय रुद्रांगसंभूते जय

१ सुप्रभेण समन्वितम्--इ० पा० । २ सनातनः--इ० पा० । ३ त्वं यमस्तथा--इ० पा० । ४ अन्ये सुराश्च साध्याश्च क्रीडया चैव ते कृताः--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

ब्राह्मि सनातनि ॥ जय कौमारि माहेंद्रि वैष्णवी वारुणी तथा ॥ ४३ ॥ जयकौबेरि सावित्रि जय धात्रि वरानने ॥ तृष्णया तप्तदेहस्य रक्षां कुरु चराचरे ॥ ४४ ॥ ॥ श्रीदेव्युवाच ॥ ॥ प्रसन्ना विप्रशार्दूल तव वाक्यैः सुशोभनैः ॥ वर्त्तते मानसे यत्ते मया ज्ञातं द्विजोत्तम ॥ ४५ ॥ शृणु विप्र ममाप्यस्ति व्रतमेतत्सुदारुणम् ॥ स्त्रीलघुत्वान्मयारब्धं दुष्करं मंदमेधया ॥ ४६ ॥ यदि भावी च मे पुत्रो धर्मिष्ठो लोकविश्रुतः ॥ विप्रस्य तु स्तनं दत्त्वा पश्चाद्दास्यामि बालके ॥ ४७ ॥ स मे पुत्रः समुत्पन्नो यथोक्तो मे महामुने ॥ स्तनं पिब त्वं विप्रेंद्र यदि जीवितुमिच्छसि ॥ ४८ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ अकार्यमेतद्विप्राणां यस्त्विमं पिबते स्तनम् ॥ पुनश्चैवोपनयनं व्रतसिद्धिं न गच्छति ॥ ४९ ॥ ब्राह्मणत्वं त्रिभिर्लोकैर्दुर्लभं पद्मलोचने ॥ संस्कारैः संस्कृतो विप्रो यैश्च जायेत तच्छृणु ॥५०॥ प्रथमं चैव नारीषु संस्कारैर्बीजवापनम्॥ वीजप्रक्षेपणादेव बीजक्षेपः स उच्यते ॥ ५१ ॥ तदंते च महाभागे गर्भाधानं द्वितीयकम् ॥ पुंसवनं तृतीयं तु सीमंतं च चतुर्थकम् ॥ ५२ ॥ पंचमं जातकर्म स्यान्नाम वै षष्ठमुच्यते ॥ निष्क्रामः सप्तमश्चैव ह्यन्नप्राशनमष्टमम् ॥ ५३ ॥ नवमं वै चूडकर्म्म दशमं मौंजिबंधनम् ॥ ऐषिकं दार्विकं चैव सौमिकं भौमिकं तथा ॥ ५४ ॥ पत्नीसंयोजनं चान्यद्दैवंकर्म्म ततः परम् ॥ मानुष्यं पितृकर्म स्याद्दशमाष्टासु शोभने ॥ ५५ ॥ भूतं भव्यं तथेष्टं च पार्वणं च ततः परम् ॥५६॥ श्राद्धं श्रावण्यामाग्रयणं च चैत्राश्वयुज्यां दशपौर्णमास्याम् ॥ निरूढपशुसवनसौत्रामण्यग्निष्टोमात्यग्निष्टोमाः ॥ ५७॥ षोडशीवाजपेयातिरात्राप्तोर्यामोदशवाजपेयाः ॥ सर्वभूतेषु क्षांतिरनसूया शौचमंगलमकार्पण्यमस्पृहेति ॥ ५८ ॥ एभिरष्टचत्वारिंशद्भिः संस्कारैः संस्कृतो ब्राह्मणो भवति ॥ ५९ ॥ एवं ज्ञात्वा महाभागे न तु मां पातुमर्हसि ॥ शिशुपेयं स्तनं भद्रे कथं वै मद्विधः पिबेत् ॥ ६० ॥ ममैतद्वचनं श्रुत्वा नारी वचनमब्रवीत् ॥ ६१ ॥ यदि त्वं न पिबेः स्तन्यं पयो बालो मरिष्यति ॥ श्रूयते त्रिषु लोकेषु वेदेषु च स्मृतिष्वपि ॥ मुच्यते सर्वपापेभ्यो भ्रूणहत्या न मुंचति ॥ ६२ ॥ भवित्री तव हत्या च महाभागवतः पुनः ॥ जन्मानि च शतान्यष्टौ क्लिश्यते भ्रूणहत्यया ॥ ॥ ६३ ॥ मृतः शुनत्वं चाप्नोति वर्षाणां तु शतत्रयम् ॥ ततस्तस्य क्षये जाते काकयोनिं व्रजेत्पुनः ॥ ६४ ॥ तत्रापि च शतान्यष्टौ क्लिश्यते पापकर्मणि ॥ वराहो दश जन्मानि तदंते जायते कृमिः ॥ ६५ ॥ ततश्चारोहिणीं प्राप्य गोगजाश्वनृजन्मभाक् ॥ श्रूयते श्रुतिशास्त्रेषु वेदेषु च परंतप ॥ ॥६६॥ सर्वपापाधिकं पापं बालहत्या द्विजोत्तम ॥ बालहत्यायुतो विप्रः पच्यते नरके ध्रुवम् ॥६७॥ वर्षाणि च शतान्यष्टौ प्राप्नोति यमयातनाम् ॥

१ सतदेहं मां परिपाहि महेश्वरि–इ० पा० । २ पुंनः संस्कारमाप्नोति पातित्यं चैव गच्छति–इ०पा० । ३ दिनकर्म–इ०पा० । ४ पद्यत्रयंत्वेतद्गद्यमयम् ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मादल्पतरो दोषः पिबतो मे स्तनं तव ॥ ६८ ॥ तथैवापिबतः पापं जायते बहुवार्षिकम् ॥ क्षुधातृषाविरामस्ते पुण्यं च पिबतः स्तनम् ॥६९॥ अतो न चेतः संदिग्धं कर्तव्यमिह कर्हिचित् ॥ एहि विप्र यथाकामं बालार्थे पिब मे स्तनम् ॥ ७० ॥ ततोऽहं वचनं श्रुत्वा स्तनं पातुं समुद्यतः ॥ न च तृप्तिं विजानामि पिबतः स्तनमुत्तमम् ॥ ७१ ॥ त्रिंशद्वर्षसहस्राणि भारतैवं शतानि च ॥ ततः प्रबुद्धोत्संगेहं मायानिद्राविमोहितः ॥ ७२ ॥ निद्राविगतमोहोहं यावत्पश्यामि पांडव ॥ तावत्सुतं न पश्यामि न च तं बालकं विभो ॥ ७३ ॥ चतुरस्तांश्च वै कुंभान्पश्यामि तत्र भारत ॥ न च पश्यामि तां देवीं गता वै कुत्रचिच्च ते ॥ ७४ ॥ एवं विमृश्यमानस्य चिंतयानस्य तिष्ठतः ॥ ईषद्धसितया वाचा देवी वचनमब्रवीत् ॥ ॥ ७५ ॥ ॥ श्रीदेव्युवाच ॥ ॥ कृष्णः स पुरुषः सुप्तो द्वितीयोऽप्यागतो हरः ॥ ये चत्वारश्च ते कुंभाः समुद्रास्ते द्विजोत्तम ॥ ७६ ॥ यश्च बालस्त्वया दृष्टो ब्राह्मा लोकपितामहः ॥ अहं च पृथिवी ज्ञेया सप्तद्वीपा सर्वता ॥ ७७ ॥ या गता त्वां परित्यज्य भूतले सुप्रतिष्ठिता ॥ इमां च प्रेक्षसे विप्र नर्मदां सरितां वराम् ॥ ७८ ॥ सर्वसत्त्वोपकाराय बृहते पुण्यलक्षणा ॥ रेवानदी तु विख्याता न मृता तेन नर्मदा ॥ ७९ ॥ एवं ज्ञात्वा शमं गच्छ स्वस्थो भव महामुने ॥ इत्युक्त्वा मां तदा देवी तत्रैवान्तरधीयत ॥ ८० ॥ एवं हि शेते भगवान्सत्त्वस्थः प्रलये सदा ॥ सत्त्वरूपो महादेवो यदाधारे जगत्स्थितम् ॥ ८१ ॥ एवं मयानुभूतं तु दृष्टमाश्चर्यमुत्तमम् ॥ सर्वपापहरं पुण्यं कथितं ते नरोत्तम ॥ ८२ ॥ विष्णोश्चरितमित्युक्तं यत्त्वया परिपृच्छितम् ॥ भूय एव महाबाहो किमन्यच्छ्रोतुमिच्छसि ॥ ८३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे वाराहकल्पवृत्तान्तवर्णनंनाम विंशोऽध्यायः ॥ २० ॥ ॥छ॥ ॥ युधिष्ठिर उवाच ॥ ॥ श्रुतं मे विविधाश्चर्यं त्वत्प्रसादाद्द्विजोत्तम ॥ भूयश्च श्रोतुमिच्छामि तन्मे कथय सुव्रत ॥ १ ॥ कथमेषा नदी पुण्या सर्वनदीषु चोत्तमा ॥ नर्मदानाम विख्याता भूयो मे कथयानघ ॥ २ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ नर्मदा सरितां श्रेष्ठा सर्वपापप्रणाशिनी ॥ तारयेत्सर्वभूतानि स्थावराणि चराणि च ॥ ३ ॥ नर्मदायास्तु माहात्म्यं यत्पूर्वेण मया श्रुतम् ॥ तत्तेऽहं संप्रवक्ष्यामि शृणुष्वैकमना नृप ॥ ४ ॥ गंगा कनखले पुण्या कुरुक्षेत्रे सरस्वती ॥ ग्रामे वा यदि वारण्ये पुण्या सर्वत्र नर्मदा ॥५॥ त्रिभिः सारस्वतं तोयं सप्ताहेन तु यामुनम् ॥ सद्यः पुनाति गांगेयं दर्शनादेव नार्मदम् ॥ ६ ॥ कलिंगदेशात्पश्चार्द्धे पर्वतेऽमरकंटके ॥ पुण्या च त्रिषु लोकेषु रमणीया पदेपदे ॥ ७ ॥ तत्र देवाश्च गंधर्वा ऋषयश्च तपोधनाः ॥

१ सर्वलोकेषु विख्याता महापापप्रणाशिनी—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तपस्तप्त्वा महाराज सिद्धिं परमिकां गताः ॥ ८ ॥ तत्र स्नात्वा नरो राजन्नियमस्थो जितेंद्रियः ॥ उपोष्य रजनीमेकां कुलानां तारयेच्छतम् ॥
॥ ९ ॥ सिद्धिक्षेत्रं परं तात पर्वतो ह्यमरंकटः ॥ सर्वदेवाश्रितो यस्मादृषिभिः परिसेवितः ॥१०॥ सिद्धविद्याधरा भूतगंधर्वाः स्थानमुत्तमम् ॥ दृश्या
दृश्याश्च राजेंद्र सेवंते सिद्धिकांक्षिणः ॥ ११ ॥ अहं च परमं स्थानं ततः प्रभृति संश्रितः ॥ अत्र प्रणवरूपो वै स्थाने तिष्ठत्युमापतिः ॥ १२ ॥
श्रीकंठः सगणः सर्वभूतसंघैर्निषेवितः ॥ अस्माद्गिरिवराद्भूप वक्ष्ये तीर्थस्य विस्तरम् ॥ १३ ॥ यानि संतीह तीर्थानि पुण्यानि नृपसत्तम ॥ यानि
यानीह तीर्थानि नर्मदायास्तटद्वये ॥ १४ ॥ न तेषां विस्तरं वक्तुं शक्तो ब्रह्मापि भूपते ॥ योजनानां शतं साग्रं श्रूयते सरिदुत्तमा ॥ १५ ॥ विस्त
रेण तु राजेंद्र अर्धयोजनमायता ॥ षष्टितीर्थसहस्राणि षष्टिकोट्यस्तथैव च ॥ १६ ॥ पर्वतादुदधिं यावदुभे कूले न संशयः ॥ १७ ॥ सप्तषष्टि
सहस्राणि सप्तषष्टिशतानि च ॥ सप्तषष्टिस्तथा कोट्यो वायुस्तीर्थानि चाब्रवीत् ॥ १८ ॥ परं कृतयुगे तानि यांति प्रत्यक्षतां नृप ॥ पश्यंति मानवाः
सर्वे सततं धर्मबुद्धयः ॥ १९ ॥ यथायथा कलिर्घोरो वर्तते दारुणो नृप ॥ तथातथाल्पतां यांति हीनसत्त्वा यतो नराः ॥ २० ॥ जालेश्वरादिती
र्थानि पर्वतेस्मिन्नराधिप ॥ पितृतृप्तिप्रदान्याहुः स्वर्गमोक्षप्रदानि च ॥ २१ ॥ श्रेष्ठं दारुवनं तत्र चरुकासंगमः शुभः ॥ उत्तरे नर्मदायास्तु चरुके
श्वरमुत्तमम् ॥ २२ ॥ दारुकेश्वरतीर्थं च व्यतीपातेश्वरं तथा ॥ पातालेश्वरतीर्थं च कोटियज्ञं तथैव च ॥ २३ ॥ इति चैवोत्तरे कूले रेवाया नृपस
त्तम ॥ अमरेश्वरपार्श्वे च लिंगान्यष्टोत्तरं शतम् ॥ २४ ॥ वरुणेश्वरमुख्यानि सर्वपापहराणि च ॥ २५ ॥ मांधातृपुरपार्श्वे च सिद्धेश्वरयमेश्वरौ ॥
ॐकारात्पूर्वभागे च केदारं तीर्थमुत्तमम् ॥ २६ ॥ तत्समीपे महाराज स्वर्गद्वारमघापहम् ॥ नाम्ना ब्रह्मेश्वरं पुण्यं सप्तसारस्वतं पुरः ॥ २७ ॥ रुद्रा
ष्टकं च सावित्रं सोमतीर्थं तथैव च ॥ एतानि दक्षिणे तीरे रेवाया भरतर्षभ ॥ २८ ॥ अस्मिंस्तु पर्वते तात रुद्राणां कोटयः स्थिताः ॥ स्नानैस्तु
ष्टिर्भवेत्तेषां गंधमाल्यानुलेपनैः ॥ २९ ॥ प्रीतास्तेऽपि भवंत्यत्र रुद्रा राजन्न संशयः ॥ जपेन पापसंशुद्धिर्ध्यानेनानंत्यमश्नुते ॥ ३० ॥ दानेन भोगा
नाप्नोति इत्येवं शंकरोऽब्रवीत् ॥ पर्वतात्पश्चिमे देशे स्वयं देवो महेश्वरः ॥ स्थितः प्रणवरूपोसौ जगदादिः सनातनः ॥ ३१ ॥ तत्र स्नात्वा शुचिर्भू
॥ २३ ॥ त्वा ब्रह्मचारी जितेंद्रियः ॥ पितृकार्यं प्रकुर्वीत विधिदृष्टेन कर्मणा ॥ ३२ ॥ तिलोदकेन तत्रैव तर्पयेत्पितृदेवताः ॥ आसप्तमं कुलं तस्य स्वर्गे
मोदति पांडव ॥ ३३ ॥ आत्मना सह भोगांश्च विविधाँल्लभते सुखी ॥ षष्टिवर्षसहस्राणि क्रीडते सुरपूजितः ॥ ३४ ॥ मोदते सुचिरं कालं पितृपू
जाफलधितः ॥ ततः स्वर्गात्परिभ्रष्टो जायते विमले कुले ॥३५॥ धनवान्दानशीलश्च नीरोगो लोकपूजितः ॥ पुनः स्मरति तत्तीर्थं गमनं कुरुते



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनः ॥ ३६ ॥ द्वितीये जन्मनि भवेद्रुद्रस्यानुचरोत्कटः ॥ तथैव ब्रह्मचर्येण सोपवासो जितेंद्रियः ॥ ३७ ॥ सर्वहिंसानिवृत्तस्तु लभते फलमुत्तमम् ॥ एवं धर्मसमाचारो यस्तु प्राणान्परित्यजेत् ॥ ३८ ॥ तस्य पुण्यफलं यद्वै तन्निबोध नराधिप ॥ शतं वर्षसहस्राणि स्वर्गे मोदति पांडव ॥ ॥ ३९ ॥ अप्सरोगणसंकीर्णे दिव्यशब्दानुनादिते ॥ दिव्यगंधानुलिप्तांगो दिव्यालंकारभूषितः ॥ ४० ॥ क्रीडते दैवतैः सार्द्धं सिद्धगंधर्वसंस्तुतः ॥ ततः स्वर्गात्परिभ्रष्टो राजा भवति वीर्यवान् ॥ ४१ ॥ हस्त्यश्वरथयानैश्च धर्मज्ञः शास्त्रतत्परः ॥ गृहे स्तंभशताकीर्णे सौवर्णे रजतान्विते ॥ ४२ ॥ सप्ताष्टभूमिसुद्वारे दासीदाससमाकुले ॥ मत्तमातंगनिःश्वासैर्वाजिहेषितनादितैः ॥ ४३ ॥ क्षुभ्यते तस्य तद्द्वारमिंद्रस्य भुवनं यथा ॥ राजराजेश्वरः श्रीमान्सर्वस्त्रीजनवल्लभः ॥ ४४ ॥ तस्मिन्गृहे वसित्वा तु क्रीडाभोगसमन्वितः ॥ जीवेद्वर्षशतं साग्रं सर्वव्याधिविवर्जितः ॥ ४५ ॥ एवं तेषां भवेत्सर्वं ये मृता ह्यमरेश्वरे ॥ अग्निप्रवेशं यः कुर्याद्भक्त्या ह्यमरकंटके ॥ ४६ ॥ स मृतः स्वर्गमाप्नोति यास्यते परमां गतिम् ॥ स्नानं दानं जपो होमः शुभं वा यदि वाऽशुभम् ॥ ४७ ॥ पुराणे श्रूयते राजन्सर्वं कोटिगुणं भवेत् ॥ तस्यास्तीरे तु ये वृक्षाः पतिताः कालपर्यये ॥ ४८ ॥ नर्मदातोयसंस्पृष्टास्ते यांति परमां गतिम् ॥ अनिवृत्तिका गतिस्तस्य पवनस्यांबरे यथा ॥ ४९ ॥ पतनं कुरुते यस्तु तस्मिंस्तीर्थे नराधिप ॥ कन्यास्त्रीणि सहस्राणि पाताले भोगभागिनः ॥ ५० ॥ तिष्ठंति भवने तस्य प्रेषणे प्रार्थयंति च ॥ दिव्यभोगैः सुसंपन्नः क्रीडते कालमीप्सितम् ॥ ५१ ॥ पृथिव्यां ह्यासमुद्रायां तादृशो नैव जायते ॥ यादृशोऽयं नरश्रेष्ठ पर्वतोऽमरकंटकः ॥ ५२ ॥ तत्र तीर्थं तु विज्ञेयं पर्वतस्यानु पश्चिमे ॥ ह्रदो जालेश्वरोनाम त्रिषु लोकेषु विश्रुतः ॥ ५३ ॥ तत्र पिंडप्रदानेन संध्योपासनकेन तु ॥ पितरो द्वादशाब्दानि तर्पितास्तु भवंति वै ॥ ५४ ॥ दक्षिणे नर्मदातीरे कपिला तु महानदी ॥ सरलार्जुनसंच्छन्ना खदिरैरुपशोभिता ॥ ५५ ॥ माधवीसल्लकीभिश्च वल्लीभिश्चाप्यलंकृता ॥ श्वापदैर्गर्जमानैश्च गोमायुवानरादिभिः ॥ ५६ ॥ पक्षिजातिविशेषैश्च नित्यं प्रमुदिता नृप ॥ साग्रं कोटिशतं तत्र ऋषीणामिति शुश्रुम ॥ ५७ ॥ तपस्तप्त्वा गतं मोक्षं येषां जन्म न चागमः ॥ येन तत्र तपस्तप्तं कपिलेन महात्मना ॥ ५८ ॥ तत्र तच्चाभवत्तीर्थं पुण्यं सिद्धनिषेवितम् ॥ येन सा कापिलैस्तात सेविता ऋषिभिः पुरा ॥ ५९ ॥ तेन सा कपिलानाम गीता पापक्षयंकरी ॥ तत्र कोटिशतं साग्रं तीर्थानाममरेश्वरे ॥ ६० ॥ अहोरात्रोषितो भूत्वा मुच्यते सर्वकिल्बिषैः ॥ दानं च विधिवद्दत्त्वा यथाशक्त्या द्विजोत्तमे ॥ ६१ ॥ ईश्व

१ तीर्थे व्रजेन्नर-इ० पा० । २ जायते विमले कुले-इ० पा० । ३ दीर्घायुः-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



रानुग्रहात्सर्वं तत्र कोटिगुणं भवेत् ॥ यस्मादनक्षरं रूपं प्रणवस्येह भारत ॥ ६२ ॥ शिवस्वरूपस्य ततः कृतमात्राक्षरं भवेत् ॥ तिर्यंचः पशवश्चैव वृक्षा गुल्मलतादयः ॥६३॥ तेऽपि तत्र क्षयं याताः स्वर्गं यांति न संशयः ॥ विशल्या तत्र या प्रोक्ता तत्रैव तु महानदी ॥६४॥ स्नात्वा दत्त्वा यथा न्यायं तत्रापि सुकृती भवेत् ॥ तत्र देवगणाः सर्व्वे सकिन्नरमहोरगाः ॥ ६५ ॥ यक्षराक्षसगंधर्व्वा ऋषयश्च तपोधनाः ॥ सर्व्वे समागतास्तां वै पश्यन्ति ह्यमरेश्वरे ॥ ६६ ॥ तैश्च सर्वैः समागम्य वन्दितौ तौ शुभौ कटौ ॥ पुरा युगे[1] महाघोरे सर्वलोकभयंकरे ॥ ६७ ॥ नर्मदायाः सुतस्तत्र सशल्यो विशलीकृतः ॥ सर्वदेवैश्च ऋषिभिर्विशल्या तेन सा स्मृता ॥ ६८ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ उत्पन्ना तु कथं तात विशल्या कपिला कथम् ॥ कथं वा नर्मदापुत्रः शल्ययुक्तोऽभवन्मुने ॥ ६९ ॥ आश्चर्यभूतं लोकस्य श्रोतुमिच्छामि सुव्रत ॥ ७० ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ पुरा दाक्षायणीनाम सहिता शूलपाणिना ॥ क्रीडित्वा नर्मदातोये परया च मुदा नृप ॥७१॥ जलादुत्तीर्य सहसा वस्त्रमन्यत्समाहरत्॥ देव्यास्तु स्नानवस्त्रं तत्पीडितं लीलया नृप ॥ ७२ ॥ सहितानुचरीभिस्तु इन्द्रायुधनिभं भृशम् ॥ तस्मिन्निष्पीड्यमाने तु वारि यन्निःसृतं तदा ॥ ॥ ७३ ॥ तस्मादियं सरिज्जज्ञे कपिलाख्या महानदी ॥ संयोगादंगरागस्य वस्त्रोद्यत्कपिलं जलम् ॥ ७४[2] ॥ गलितं तेन कपिला वर्णतो नामतोऽभवत् ॥ तथा गन्धरसैर्युक्तं नानापुष्पैस्तु वासितम् ॥ ७५ ॥ नानावर्णारुणं शुभ्रं वस्त्राद्यद्वारि निःसृतम् ॥ पीड्यमानं करैः शुभ्रैस्तैस्तु पल्लवकोमलैः ॥ ७६ ॥ कपिलं जलमिश्रैस्तु तस्मादेषा सरिद्वरा ॥ कपिला चोच्यते तज्ज्ञैः पुराणार्थविशारदैः ॥ ७७ ॥ एषा वै वस्त्रसंभूता नर्मदातोयसंभवा ॥ महापुण्यतमा ज्ञेया कपिला सरिदुत्तमा ॥ ७८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये कपिलासरित्सम्भववर्णनंनामैकविंशोऽध्यायः ॥ २१ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ अतः परं प्रवक्ष्यामि सा विशल्या ह्यभूद्यथा ॥ आश्चर्यभूता लोकस्य सर्वपापक्षयंकरी[4] ॥ १ ॥ ब्रह्मणो मानसः पुत्रो मुख्यो ह्यग्निरजायत ॥ मुख्यो वह्निरितिप्रोक्त ऋषिः परमधार्म्मिकः ॥ २ ॥ तस्य स्वाहाभवत्पत्नी स्मृता दाक्षायणी तु सा ॥ तस्यां मुख्या महाराज त्रयः पुत्रास्तदाऽभवन् ॥ ३ ॥ अग्निराहवनीयस्तु दक्षिणाग्निस्तथैव च ॥ गार्हपत्यस्तृतीयस्तु त्रैलोक्यं यैश्च धार्यते ॥ ४ ॥ तथा वै गार्हपत्योग्निर्जज्ञे पुत्रद्वयं शुभम् ॥ पंञ्चकः[5] शंकुनामा च तावुभावग्निसत्तमौ ॥ ५ ॥ वसन्नग्निर्नदीतीरे समाश्रित्य महत्तपः ॥ रुद्रमाराधयामास जितात्मा सुसमाहितः ॥ ६ ॥ दशवर्षसहस्राणि चचार



१ युद्धे–इ०पा० । २ शल्योऽभूदेककल्पकः–इ०पा० । ३ तत्त्वतः–इ०पा० । ४ तथा पापक्षयंकरी–इ०पा० । ५ शर्धाकः–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विपुलं तपः ॥ तमुवाच महादेवः प्रसन्नो वृषभध्वजः ॥ ७ ॥ भोभो ब्रूहि महाभाग यत्ते मनसि वर्तते ॥ दाता ह्यहमसन्देहो यद्यपि स्यात्सुदुर्ल्ल भम् ॥ ८ ॥ ॥ अग्निरुवाच ॥ ॥ नर्मदेयं महाभागा सरितो याश्च षोडश ॥ भवन्तु मम पत्न्यस्तास्त्वत्प्रसादान्महेश्वर ॥ ९ ॥ तासु वै चिंतितान्पुत्रानग्र्यानुत्पादयाम्यहम् ॥ एष एव वरो देव दीयतां मे महेश्वर ॥ १० ॥ ॥ ईश्वर उवाच ॥ ॥ एतास्तु धिष्णिनाम्न्यो वै भवि ष्यन्ति सरिद्वराः ॥ पत्न्यस्तव विशालाक्ष्यो वेदे[1] ख्याता न संशयः ॥ ११ ॥ तासां पुत्रा भविष्यन्ति ह्यग्नयो येऽध्वरे स्मृताः ॥ धिष्ण्यानाम सुविख्याता यावदाभूतसंप्लवम् ॥ १२ ॥ एवमुक्त्वा महादेवस्तत्रैवांतरधीयत ॥ नर्मदा च सरिच्छ्रेष्ठा तस्य भार्य्या बभूव ह ॥ १३ ॥ कावेरी कृष्णवेणी च रेवा च यमुना तथा ॥ गोदावरी वितस्ता च चन्द्रभागा इरावती ॥ १४ ॥ विपाशा कौशिकी चैव सरयूः शतरुद्रिका ॥ शिप्रा सरस्वती चैव ह्लादिनी[3] पावनी तथा ॥ १५ ॥ एताः षोडश नद्यो वै भार्यार्थं संव्यवस्थिताः ॥ तदात्मानं विभज्याशु धिष्णीषु स महाद्युतिः ॥ १६ ॥ व्यभिचाराच्च भर्त्तुर्वै नर्मदाद्यासु धिष्णिषु ॥ उत्पन्नाः शुचयः पुत्राः सर्वे ते धिष्ण्यपाः स्मृताः ॥ १७ ॥ तस्याश्च नर्मदायास्तु धिष्णीन्द्रोनाम विश्रुतः ॥ बभूव पुत्रो बलवान्रूपेणाप्रतिमो नृप ॥ १८ ॥ ततो देवासुरं युद्धमभवल्लोमहर्षणम् ॥ मयतार क मित्येवं त्रिषु लोकेषु विश्रुतम् ॥ १९ ॥ तत्र दैत्यैर्महाघोरैर्मयतारपुरोगमैः ॥ ताडितास्ते सुरास्त्रस्ता विष्णुं वै शरणं ययुः ॥ २० ॥ त्रा यस्व नो हृषीकेश घोरादस्मान्महाभयात् ॥ दैत्यान्सर्वान्संहरस्व मयतारपुरोगमान् ॥ २१ ॥ एवमुक्तः स भगवान्दिशो दश व्यलोकयत् ॥ ततो भगवता दृष्टौ रणे पावकमारुतौ ॥ २२ ॥ आहूतौ विष्णुना तौ तु सकाशं जग्मतुः क्षणात् ॥ स्थितौ तौ प्रणतौ चाग्रे देवदेवस्य धीमतः ॥ ॥ २३ ॥ ततो धिष्णिः पावकेंद्रो देवेनोक्तो महात्मना ॥ निर्द्दहेमान्महाघोरान्नार्मदेय महासुरान् ॥ २४ ॥ अथैवमुक्तौ तौ देवौ रणे पावक मारुतौ ॥ दैत्यान्ददहतुः सर्व्वान्मयतारपुरोगमान् ॥ २५ ॥ दह्यमानास्तु ते सर्वे शस्त्रैरग्निं त्ववेष्टयन् ॥ दिव्यैरग्न्यर्कसंकाशैः शतशोऽथ सहस्रशः ॥ २६ ॥ तांश्चाग्निः शस्त्रनिकरैर्निर्ददाह महासुरान् ॥ ज्वालामालाकुलं सर्वं वायुनानिर्मितं तदा ॥ २७ ॥ दह्यमानास्ततो दैत्या अग्नि ज्वालासमावृताः ॥ प्रविश्य पातालतलं जले लीनाः सहस्रशः ॥ २८ ॥ ततः कुमारमग्निं तु नर्मदापुत्रमव्ययम् ॥ पूजयित्वा सुराः सर्वे जग्मुस्ते त्रिदशालयम् ॥ २९ ॥ सशल्यस्तु महातेजा रेवापुत्रो वृतोऽग्निभिः ॥ नर्मदामागतः क्षिप्रं मातरं द्रष्टुमुत्सुकः ॥ ३० ॥ तं दृष्ट्वा पुत्रमायांतं शस्त्रौ

१ लोके–इ०पा० । २ कर्णवर्णा च–इ०पा० । ३ जाह्नवी–इ०पा० । ४ भयग्रस्ता महात्मानो विष्णुमीशानमब्रुवः–इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

घेण परिक्षतम् ॥ नर्मदा पुण्यसलिला अभ्युत्थाय सुविस्मिता ॥ ३१ ॥ पर्यष्वजत बाहुभ्यां प्रस्नवापीडितस्तनी ॥ सशल्यं पुत्रमादाय कापिलं ह्रदमाविशत् ॥ ३२ ॥ प्रविष्टमात्रे तु ह्रदे कापिले पापनाशिनि ॥ सशल्यं तं विशल्यं च क्षणात्कृतवती तदा ॥३३॥ स विशल्योऽभवद्यस्मात्प्राप्य तस्याः शिवं जलम् ॥ कपिला नामतस्तेन विशल्या चोच्यते बुधैः ॥ ३४ ॥ अन्येपि तत्र ये स्नाताः शुचयस्तु समाहिताः ॥ पापशल्यैः प्रमुच्यंते मृता यांति सुरालयम् ॥ ३५ ॥ एतत्ते सर्वमाख्यातं यत्पृष्टोऽहं पुरा त्वया ॥ उत्पत्तिकारणं तात विशल्याया नरेश्वर ॥ ३६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये विशल्यासंभवोनाम द्वाविंशोऽध्यायः ॥ २२ ॥

॥ ॥ छ ॥ ॥ मार्कण्डेय उवाच ॥ ॥ तत्रैव संगमे राजन्भक्त्या परमया नृप ॥ प्राणांस्त्यजंति ये मर्त्यास्ते यांति परमां गतिम् ॥ १ ॥ संन्यस्तसर्वसंकल्पो यस्तु प्राणान्परित्यजेत् ॥ अमरेश्वरमासाद्य स स्वर्गे नियतं वसेत् ॥ २ ॥ शैलेंद्रं यः समासाद्य आत्मानं मुंचते नरः ॥ विमानेनार्कवर्णेन स गच्छेदमरावतीम् ॥ ३ ॥ नरं पतंतमालोक्य नगादमरकन्टकात् ॥ ब्रुवंत्यप्सरसः सर्वा मम भर्त्ता भवेदिति ॥ ४ ॥ समं जलं धर्मविदो वदंति सारस्वतं गांगमिति प्रबुद्धाः ॥ तस्योपरिष्टात्प्रवदंति तज्ज्ञा रेवाजलं नात्र विचारणास्ति ॥ ५ ॥ अनेकविद्याधरकिन्नराद्यैर ध्यासितं पुण्यतमाधिवासैः ॥ रेवाजलं धारयतो हि मूर्ध्ना स्थानं सुरेंद्राधिपतेः समीपे ॥ ६ ॥ नर्मदा सर्वदा सेव्या बहुनोक्तेन किं नृप ॥ यदी च्छेन्न पुनर्द्रष्टुं घोरं संसारसागरम् ॥ ७ ॥ त्रयाणामपि लोकानां महती पावनी स्मृता ॥ यत्र तत्र मृतस्यापि ध्रुवं गाणेश्वरी गतिः ॥ ८ ॥ अनेक यज्ञायतनैर्वृतांगी न ह्यत्र किंचिद्यदतीर्थमस्ति ॥ तस्यास्तु तीरे भवता यदुक्तं तपस्विनो वाप्यतपस्विनो वा ॥ ९ ॥ म्रियंति ये पापकृतो मनुष्यास्ते स्वर्गमायांति यथाऽमरेंद्राः ॥ १० ॥ एवं तु कपिला चैव विशल्या राजसत्तम ॥ ईश्वरेण पुरा सृष्टा लोकानां हितकाम्यया ॥ ११ ॥ तत्र स्नात्वा नरो राजन्सोपवासो जितेंद्रियः[१]॥ अश्वमेधस्य महतोऽसंशयं फलमाप्नुयात् ॥ १२ ॥ अनाशकं च यः कुर्यात्तस्मिंस्तीर्थे नराधिप ॥ सर्वपापविनिर्मुक्तो याति वै शिवमंदिरम् ॥ १३ ॥ पृथिव्यां सागरांतायां स्नानदानेन यत्फलम् ॥ विशल्यासंगमे स्नात्वा सकृत्तत्फलमश्नुते ॥

॥ २५ ॥ ॥ १४ ॥ एवं पुण्या पवित्रा च कथिता तव भूपते ॥ भूयो मां पृच्छसि च यत्तच्चैव कथयाम्यहम् ॥ १५ ॥ इति श्रीस्कान्दे महापुराण एका शीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे विशल्यासंगममाहात्म्यवर्णनंनाम त्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ छ ॥ ॥

१ स्वरूपभृक्–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ संगमः करनर्मदयोः पुरे मांधातृसंज्ञिते ॥ गत्वा स्नात्वा तर्पयित्वा पितॄन्विष्णुपुरं नयेत् ॥ १ ॥ मर्दयित्वा करौ पूर्वं विष्णुर्दैत्यजिघांसया ॥ चक्रं जग्राह तत्रैव स्वेदाज्जाता सरिद्वरा ॥ २ ॥ संगता रेवया तत्र स्नात्वा पापैः प्रमुच्यते ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये करनर्मदासंगममाहात्म्यवर्णनंनाम चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ॐकारात्पूर्वभागे वै संगमो लोकविश्रुतः ॥ रेवया संगता यत्र नीलगंगा नृपोत्तम ॥ १ ॥ तत्र स्नात्वा जपित्वा च कोऽर्थोऽलभ्यो भवेद्भुवि ॥ षष्टिवर्षसहस्राणि नीलकण्ठपुरे वसेत् ॥ २ ॥ तर्पयित्वा पितॄञ्छ्राद्धे तिलमिश्रैर्जलैरपि ॥ उद्धरेदात्मना सार्द्धं पुरुषानेकविंशतिम् ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये नीलगंगायाः संगममाहात्म्यवर्णनंनाम पंचविंशोऽध्यायः ॥ २५ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ जालेश्वरेपि यत्प्रोक्तं त्वया पूर्वं द्विजोत्तम ॥ तत्कथं तु भवेत्पुण्यमृषिसिद्धनिषेवितम् ॥ १ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ जालेश्वरात्परं तीर्थं न भूतं न भविष्यति ॥ तस्योत्पत्तिं कथयतः शृणु त्वं पांडुनंदन ॥ २ ॥ पुरा ऋषिगणाः सर्वे सेंद्राश्चैव मरुद्गणाः ॥ तापिता असुरैः सर्वैः क्षयं नीता ह्यनेकशः ॥ ३ ॥ बाणासुरप्रभृतिभिर्जंभशुम्भपुरोगमैः[1] ॥ वध्यमाना ह्यनेकैश्च ब्रह्माणं शरणं गताः ॥ ४ ॥ विमानैः पर्वताकारैर्हयैश्चैव गजोपमैः ॥ स्यंदनैर्नगराकारैः सिंहशार्दूलयोजितैः ॥ ५ ॥ कच्छपैर्मकरैश्चान्ये जग्मुरन्ये पदातयः ॥ प्राप्य ते परमं स्थानमशक्यं यदधार्मिकैः ॥ ६ ॥ दृष्ट्वा पद्मोद्भवं देवं सर्वलोकस्य शंकरम्[3] ॥ ते सर्वे तत्र गत्वा तु स्तुतिं[2] चक्रुः समाहिताः ॥ ७ ॥ ॥ ॥ देवा ऊचुः ॥ ॥ जयामेय जयाभेद जय संभूतिकारक ॥ पद्मयोने सुरश्रेष्ठ त्वां वयं शरणं गताः ॥ ८ ॥ तच्छ्रुत्वा तु वचो देवो देवानां भावितात्मनाम् ॥ मेघगंभीरया वाचा प्रत्युवाच पितामहः ॥ ९ ॥ किं वो ह्यागमनं देवाः सर्वेषां च विवर्णता ॥ केनावमानिताः सर्वे शीघ्रं कथयतामराः ॥ १० ॥ ॥ देवा ऊचुः ॥ ॥ बाणोनाम महावीर्य्यो दानवो बलदर्पितः ॥ तेनास्माकं हृतं सर्वं धनरत्नैर्वियोजिताः ॥ ११ ॥ देवानां वचनं श्रुत्वा ब्रह्मा लोकपितामहः ॥ चिंतयामास देवेशस्तस्य नाशाय या क्रिया ॥ १२ ॥ अवध्यो दानवः पापः सर्वेषां वै दिवौकसाम् ॥ मुक्त्वा तु शंकरं देवं न मया न च विष्णुना ॥ १३ ॥ तत्रैव सर्वे गच्छामो यत्र देवो महेश्वरः ॥ स

१ जंभशुंभनिशुंभैश्च कूष्मांडकुहकादिभिः--इ० पा० । २ स्तुतिभिः प्रणताः सुराः--इ० पा० । ३ सर्वलोकस्य शंकरम्--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





गतिश्चैव सर्वेषां विद्यतेऽन्यो न कश्चन ॥ १४ ॥ एवमुक्त्वा सुरैः सर्वैर्ब्रह्मा वेदविदांवरः ॥ ब्राह्मणैः सह विद्वद्भिर्गतो यत्र महेश्वरः ॥ १५ ॥
स्तुतिभिश्च सुपुष्टाभिस्तुष्टाव परमेश्वरम् ॥ १६ ॥ ॥ देवा ऊचुः ॥ ॥ जय त्वं देवदेवेश जयोमार्द्धशरीरधृक् ॥ वृषासन महाबाहो शशां
ककृतभूषण ॥ १७ ॥ नमः शूलाग्रहस्ताय नमः खट्वांगधारिणे ॥ जय भूतपते देव दक्षयज्ञविनाशन ॥ १८ ॥ पञ्चाक्षर नमो देव पंचभूतात्म
विग्रह ॥ पञ्चवक्त्रमयेशान वेदैस्त्वं तु प्रगीयसे ॥ १९ ॥ सृष्टिपालनसंहारांस्त्वं सदा कुरुषे नमः ॥ अष्टमूर्ते स्मरहर स्मर सत्यं यथा स्तुतः ॥ २० ॥
पञ्चात्मिका तनुर्देव ब्राह्मणैस्ते प्रगीयते ॥ सद्यो वामे तथाऽघोरे ईशे तत्पुरुषे तथा ॥ २१ ॥ हेमजाले सुविस्तीर्णे हंसवत्कूजसे हर ॥ एवं स्तुतो
मुनिगणैर्ब्रह्माद्यैश्च सुरासुरैः ॥ २२ ॥ प्रहृष्टः सुमना भूत्वा सुरसंघानुवाच ह ॥ २३ ॥ ॥ ईश्वर उवाच ॥ ॥ स्वागतं देवविप्राणां सुप्रभाताद्य
शर्वरी ॥ किं कुर्मो वदत क्षिप्रं कोन्यः सेव्यः सुरासुरैः ॥ २४ ॥ किं दुःखं को नु संतापः कुतो वो भयमागतम् ॥ कथयध्वं महाभागाः
कारणं यन्मनोगतम् ॥ २५ ॥ एवमुक्तास्तु रुद्रेण प्रत्यवोचन्सुरर्षभाः ॥ स्वान्स्वान्देहान्दर्शयंतो लज्जमाना अधोमुखाः ॥ २६ ॥ अस्ति
घोरो महावीर्यो दानवो बलदर्पितः ॥ बाणोनामेति विख्यातो यस्य तत्त्रिपुरं महत् ॥ २७ ॥ तेन वै सुतपस्तप्तं दशवर्षशतानि हि ॥ तस्य तुष्टो
ऽभवद्ब्रह्मा नियमेन दमेन च ॥ २८ ॥ पुराणि तान्यभेद्यानि ददौ कामगमानि वै ॥ आयसं राजतं चैव सौवर्णं च तथा परम् ॥ २९ ॥ त्रिपुरं
ब्रह्मणा सृष्टं भ्रमत्तत्कामगामि च ॥ तस्यैव तु बलोत्कृष्टास्त्रिपुरे दानवाः स्थिताः ॥ ३० ॥ त्रैलोक्यं सकलं देव पीडयंति महासुराः ॥ दंडपा
शासिशस्त्राणि अविकारे विकुर्वते ॥ त्रिपुरं दानवैर्जुष्टं भ्रमत्तच्चक्रसंनिभम् ॥ ३१ ॥ क्वचिद्दृश्यमदृश्यं वा मृगतृष्णैव लक्ष्यते ॥ ३२ ॥ यस्मिन्पतति
तद्दिव्यं दृतस्य त्रिपुरं महत् ॥ न तत्र ब्राह्मणा देवा गावो नैव तु जंतवः ॥ ३३ ॥ न तत्र दृश्यते किंचित्पतेद्यत्र पुरत्रयम् ॥ नद्यो ग्रामाश्च देशाश्च
बहवो भस्मसात्कृताः ॥ ३४ ॥ सुवर्णं रजतं चैव मणिमौक्तिकमेव च ॥ स्त्रीरत्नं शोभनं यच्च तत्सर्वं कर्षते बलात् ॥ ३५ ॥ न शस्त्रेण न
चास्त्रेण न दिवा निशि वा हर ॥ शक्यते देवसंघैश्च निहंतुं स कथंचन ॥ ३६ ॥ तद्दहस्व महादेव त्वं हि नः परमा गतिः ॥ एवं प्रसादं देवेश

सर्वेषां कर्तुमर्हसि ॥ ३७ ॥ येन देवाश्च गंधर्वा ऋषयश्च तपोधनाः ॥ परां धृतिं समायांति तत्प्रभो कर्तुमर्हसि ॥ ३८ ॥ ॥ ईश्वर उवाच ॥ ॥
एतत्सर्वं करिष्यामि मा विषादं गमिष्यथ ॥ अचिरेणैव कालेन कुर्यां युष्मत्सुखावहम् ॥ ३९ ॥ आश्वासयित्वा तान्देवान्सर्वानिंद्रपुरोगमान् ॥ 

१ नान्यत्त्राता भविष्यति--इ०पा० । २ लोकपितामहः--इ०पा० । ३ सुप्रभाञ्जर्जरीकृतान्--इ०पा० । ४ गिरिश--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चिंतयामास देवेशस्त्रिपुरस्य वधं प्रति ॥ ४० ॥ कथं केन प्रकारेण हंतव्यं त्रिपुरं मया ॥ तमेकं नारदं मुक्त्वा नान्योपायो विधीयते ॥ ४१ ॥ एवं संस्तभ्य चात्मानं ततो ध्यातः स नारदः ॥ तत्क्षणादेव संप्राप्तो वायुभूतो महातपाः ॥ ४२ ॥ कमंडलुधरो देवस्त्रिदंडी ज्ञानकोविदः ॥ योगपट्टाक्षसूत्रेण च्छत्रेणैव विराजितः ॥ ४३ ॥ जटाजूटाबद्धशिरा ज्वलनार्कसमप्रभः ॥ त्रिधा प्रदक्षिणीकृत्य दंडवत्पतितो भुवि ॥ ४४ ॥ कृतांजलिपुटो भूत्वा नारदो भगवान्मुनिः ॥ स्तोत्रेण महता शर्वः स्तुतो भक्त्या महामनाः ॥ ४५ ॥ ॥ नारद उवाच ॥ ॥ जय शंभो विरूपाक्ष जय देव त्रिलोचन ॥ जय शंकर ईशान रुद्रेश्वर नमोऽस्तु ते ॥ ४६ ॥ त्वं पतिस्त्वं जगत्कर्ता त्वमेव लयकृद्विभो ॥ त्वमेव जगतां नाथो दुष्टांतकनिषूदनः ॥ ४७ ॥ त्वं नः पाहि सुरेशान त्रयीमूर्ते सनातन ॥ भवमूर्ते भवारे त्वं भजतामभयो भव ॥ ४८ ॥ भवभावविनाशार्थं भव त्वां शरणं भजे ॥ किमर्थं चिंतितो देव आज्ञा मे दीयतां प्रभो ॥ ४९ ॥ कस्य संक्षोभये चित्तं को वाद्य पततु क्षितौ ॥ कमद्य कलहेनाहं योजये जय तांवर ॥ ५० ॥ नारदस्य वचः श्रुत्वा देवदेवो महेश्वरः ॥ उत्फुल्लनयनो भूत्वा इदं वचनमब्रवीत् ॥ ५१ ॥ स्वागतं ते मुनिश्रेष्ठ सदैव कलहप्रिय ॥ वीणावादनतत्त्वज्ञ ब्रह्मपुत्र सनातन ॥ ५२ ॥ गच्छ नारद शीघ्रं त्वं यत्र तत्त्रिपुरं महत् ॥ बाणस्य दानवेंद्रस्य सर्वलोकभयावहम् ॥ ५३ ॥ भर्त्तारो देवतातुल्याः स्त्रियस्तत्राप्सरः समाः ॥ तासां वै तेजसा चैव भ्रमते त्रिपुरं महत् ॥ ५४ ॥ न शक्यते कथं भेत्तुं सर्वोपायैर्द्विजोत्तम ॥ गत्वा त्वं मोहय क्षिप्रं पृथग्धर्मैरनेकधा ॥ ५५ ॥ ॥ नारद उवाच ॥ ॥ तव वाक्येन देवेश भेदयामि पुरोत्तमम् ॥ अभेद्यं बहुधोपायैर्यत्तु देवैः सवासवैः ॥ ५६ ॥ एवमुक्त्वा गतो भूप शतयोजनमायतम् ॥ बाणस्य तत्पुरश्रेष्ठमृद्धिवृद्धिसमायुतम् ॥ ५७ ॥ कृतकौतुकसंबाधं नानाधातुविचित्रितम् ॥ अनेकहर्म्यसंछन्नमनेकायतनोज्वलम् ॥ ५८ ॥ द्वारतोरणसंयुक्तं कपाटार्गलभूषितम् ॥ बहुयंत्रसमोपेतं प्राकारपरिखोज्वलम् ॥ ५९ ॥ वापीकूपतडागैश्च देवतायतनैर्युतम् ॥ हंसकारंडवाकीर्णं पद्मिनीखंडमंडितम् ॥ ६० ॥ अनेकवनशोभाढ्यं नानाविहगमंडितम् ॥ एवंगुणगणाकीर्णं बाणस्य पुरमुत्तमम् ॥ ६१ ॥ तस्य मध्ये महाकायं सप्तकक्षं सुशोभितम् ॥ बाणस्य भवनं दिव्यं सर्वं कांचनभूषितम् ॥ ६२ ॥ मौक्तिकादामशोभाढ्यं वज्रवैडूर्यभूषितम् ॥ रुक्मपट्टतलाकीर्णं रत्नभूम्या सुशोभितम् ॥ ६३ ॥ मत्तमातंगनिःश्वासैः स्यंदनैः संकुलीकृतम् ॥ हयहेषितशब्दैश्च नारीणां नूपुरस्वनैः ॥ ६४ ॥ खड्गतोमरहस्तैश्च वज्रांकुशशरायुधैः ॥ रक्षितं घोररूपैश्च दानवैर्बलदर्पितैः ॥ ६५ ॥ एवं गुणगणाकीर्णं

१ जयस्व नः–इ०पा० । २ सावयामि–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बाणस्य भवनोत्तमम् ॥ कैलासशिखरप्रख्यं महेन्द्रभवनोपमम् ॥ ६६ ॥ नारदो गगने शीघ्रमगमत्पुरसन्मुखः ॥ द्वारदेशं समासाद्य क्षत्तारं वाक्यम
ब्रवीत् ॥ ६७ ॥ भोभोः क्षत्तर्महाबुद्धे राजकार्यविशारद ॥ शीघ्रं बाणाय चाचक्ष्व नारदो द्वारि तिष्ठति ॥ ६८ ॥ स वंदयित्वा चरणौ नारदस्य त्व
रान्वितः ॥ सभामध्यगतं बाणं विज्ञप्तुमुपचक्रमे ॥ ६९ ॥ वेपमानांगयष्टिस्तु करेणापिहिताननः ॥ शृण्वतां सर्वयोधानामिदं वचनमब्रवीत् ॥
॥ ७० ॥ वंदितो देवगन्धर्वैर्यक्षकिन्नरदानवैः ॥ कलिप्रियो दुराराध्यो नारदो द्वारि तिष्ठति ॥ ७१ ॥ द्वारपालस्य तद्वाक्यं श्रुत्वा बाणस्त्वरान्वितः ॥
द्वाःस्थमाह महादैत्यः सविस्मयमिदं तदा ॥ ७२ ॥ ॥ बाण उवाच ॥ ॥ ब्रह्मपुत्रं सतेजस्कं दुःसहं दुरतिक्रमम् ॥ प्रवेशय महाभागं किमर्थं
वारितो बहिः ॥ ७३ ॥ श्रुत्वा प्रभोर्वचस्तस्य प्रावेशयदुदीरितम् ॥ गत्वा वेगेन महता नारदं गृहमागतम् ॥ ७४ ॥ दृष्ट्वा देवर्षिमायांतं नारदं
सुरपूजितम् ॥ सहसोत्थाय संहृष्टो ववंदे चरणौ मुनेः ॥ ७५ ॥ ददौ चासनमर्घ्यं च पाद्यं पूजां यथाविधि ॥ न्यवेदयच्च तद्राज्यमात्मानं बांधवैः
सह ॥ ७६ ॥ पप्रच्छ कुशलं चापि मुनिं बाणासुरः स्वयम् ॥ ७७ ॥ ॥ नारद उवाच ॥ ॥ साधुसाधु महाबाहो दनोर्वंशविवर्द्धन ॥ कोऽन्य
स्त्रिभुवने श्लाघ्यस्त्वां मुक्त्वा दनुपुंगव ॥ ७८ ॥ पूजितोऽहं दनुश्रेष्ठ धनरत्नैः सुशोभनैः ॥ राज्येन चात्मना वापि ह्येवं कः पूजयेत्परः ॥ ७९ ॥ न
मे कार्यं हि भोगेन भुंक्ष्व राज्यमनामयम् ॥ त्वद्दर्शनोत्सुकः प्राप्तो दृष्ट्वा देवं महेश्वरम् ॥ ८० ॥ भ्रमते त्रिपुरं लोके स्त्रीसतीत्वान्मया श्रुतम् ॥
तान्द्रष्टुकामः संप्राप्तस्त्वद्दारान्दानवेश्वर ॥ ८१ ॥ मन्यसे यदि मे शीघ्रं दर्शयस्व च मा चिरम् ॥ नारदस्य वचः श्रुत्वा कंचुकिं समुदीक्ष्य वै ॥
॥ ८२ ॥ अंतःपुरचरं वृद्धं दंडपाणिं गुणान्वितम् ॥ उवाच राजा हृष्टात्मा शब्देनापूरयन्दिशः ॥८३॥ नारदाय महादेवीं दर्शयस्वेह कंचुकिन् ॥
अंतःपुरचरैः सर्वैः समेतामविशंकितः ॥ ८४ ॥ नाथस्याज्ञां पुरस्कृत्य गृहीत्वा नारदं करे ॥ प्रविश्याकथयद्देव्यै नारदोऽयं समागतः ॥ ८५ ॥
दृष्ट्वा देवी मुनिश्रेष्ठं कृत्वा पादाभिवंदनम् ॥ आसनं कांचनं शुभ्रमर्घ्यपाद्यादिकं ददौ ॥ ८६ ॥ तस्यै स भगवांस्तुष्टो ह्याशीर्वादमदात्परम् ॥ नान्या
देवि त्रिलोकेपि त्वत्समा दृश्यतेऽङ्गना ॥ ८७ ॥ पतिव्रता शुभाचारा सत्यशौचसमन्विता ॥ यस्याः प्रभावात्त्रिपुरं भ्रमते चक्रवत्सदा ॥ ८८ ॥
॥ २७ ॥ तच्छ्रुत्वा वचनं देवी नारदस्य मुदान्वितम् ॥ पर्यपृच्छदृषिं भक्त्या धर्मं धर्मभृतांवरा ॥ ८९ ॥ ॥ राज्ञ्युवाच ॥ ॥ भगवन्मानुषे लोके देवास्तु
ष्यंति कैर्व्रतैः ॥ कानि दानानि दीयंते येषां च स्यान्महत्फलम् ॥ ९० ॥ उपवासाश्च ये केचित्स्त्रीधर्मे कथिता बुधैः ॥ यैः कृतैः स्वर्गमायांति

१ कस्मिंश्चित्पुस्तकद्वये–अनुपमोवाच–इति पाठो दृश्यते ।



CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुकृतिन्यः स्त्रियो यथा ॥ ९१ ॥ एतत्सर्वं महाभाग कथयस्व यथातथम् ॥ श्रोतुमिच्छाम्यहं सर्वं कथयस्वाविशंकितः ॥ ९२ ॥ ॥ नारद उवाच ॥ ॥ साधुसाधु महाभागे प्रश्नोऽयं वेदितस्त्वया ॥ यं श्रुत्वा सर्वनारीणां धर्मवृद्धिस्तु जायते ॥ ९३ ॥ उपवासैश्च दानैश्च पतिपुत्रौ वशानुगौ ॥ बांधवैः पूज्यते नित्यं यैः कृतैः कथयामि ते ॥ ९४ ॥ दुर्भगा सुभगा यैस्तु सुभगा दुर्भगा भवेत् ॥ पुत्रिणी पुत्ररहिता ह्यपुत्रा पुत्रिणी तथा ॥ ९५ ॥ भर्त्तारं लभते कन्या तथान्या भर्तृवर्जिता ॥ कृताकृतैश्च जायंते तान्निबोधस्व सुंदरि ॥ ९६ ॥ तिलधेनुं सुवर्णं च रूप्यं गा वाससी तथा ॥ पानीयं भूमिदानं च गंधधूपानुलेपनम् ॥ ९७ ॥ पादुकोपानहौ छत्रं पुण्यानि व्यजनानि च ॥ पादाभ्यंगं शिरोभ्यंगं स्नानं शय्यासनानि च ॥ ९८ ॥ एतानि ये प्रयच्छंति नोपसर्पंति ते यमम् ॥ मधु माषं पयः सर्पिर्लवणं गुडमौषधम् ॥ ९९ ॥ पानीयं भूमिदानं च शालीनिक्षुरसांस्तथा ॥ आरक्तवाससी श्लक्ष्णे दंपत्योर्ललितादिने ॥ १०० ॥ सौभाग्यं जायते चैव इह लोके परत्र च ॥ ब्राह्मणे वृत्तसंपन्ने सुरूपे च गुणान्विते ॥ १ ॥ तिथौ यस्यामिदं देयं तत्ते राज्ञि वदाम्यहम् ॥ प्रतिपत्सु च या नारी पूर्वाह्णे च शुचिव्रता ॥ २ ॥ इंधनं ब्राह्मणे दद्यात्प्रीयतां मे हुताशनः ॥ तस्या जन्मानि षड्विंशदंगप्रत्यंगसंधिषु ॥ ३ ॥ न रजो नैव संतापो जायते राजवल्लभे ॥ द्वितीयायां तु या नारी नवनीतं मुदान्विता ॥ ४ ॥ ददाति द्विजमुख्याय सुकुमारतनुर्भवेत् ॥ लवणं विप्रवर्याय तृतीयायां प्रयच्छति ॥ ५ ॥ गौरी मे प्रीयतां देवी तस्याः पुण्यफलं शृणु ॥ कौमारिका पतिं प्राप्य तेन सार्द्धमुमा यथा ॥ ६ ॥ क्रीडत्यविधवा चापि लभते सा महद्यशः ॥ नक्तं कृत्वा चतुर्थ्यां वै दद्याद्विप्राय मोदकान् ॥ ७ ॥ प्रीयतां मम देवेशो गणनाथो विनायकः ॥ तस्यास्तेन फलेनाशु सर्वकर्मसु भामिनि ॥ ८ ॥ विघ्नं न जायते क्वापि एवमाह पितामहः ॥ पञ्चमीं तु ततः प्राप्य ब्राह्मणे तिलदा तु या ॥ ९ ॥ सा भवेद्रूपसंपन्ना यथा चैव तिलोत्तमा ॥ षष्ठ्यां तु या मधूकस्य फलदा तु भवेत्सदा ॥ ११० ॥ उद्दिश्य चाग्निजं देवं ब्राह्मणे वेदपारगे ॥ तस्याः पुत्रो यथा स्कन्दो देवसंघेषु चोत्तमः ॥ ११ ॥ उत्पद्यते महाराजः सर्वलोकेषु पूजितः ॥ सप्तम्यां या द्विजश्रेष्ठं सुवर्णेन प्रपूजयेत् ॥ १२ ॥ उद्दिश्य जगतो नाथं देवदेवं दिवाकरम् ॥ तस्य पुण्यफलं यद्वै कथितं द्विजसत्तमैः ॥ १३ ॥ तत्ते राज्ञि प्रवक्ष्यामि शृणुष्वैकमनाः सति ॥ दद्रूचित्रककुष्ठानि मण्डलानि विचर्चिका ॥ १४ ॥ न भवन्तीह चांगेषु पूर्वकर्मार्जितान्यपि ॥ कृष्णां धेनुं तथाष्टम्यां या प्रयच्छति भामिनी ॥ १५ ॥ ब्राह्मणे वृत्तसंपन्ने प्रीयतां मे महेश्वरः ॥ तस्या जन्मार्जितं पापं नश्यते

१ तान्–धर्मान्–इत्यर्थः । २ अग्निजम्–कार्त्तिकेयस्वामिनम्–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



विभवान्विता ॥ १६ ॥ जायते नात्र सन्देहो यस्माद्दानमनुत्तमम् ॥ गन्धधूपं तु या नारी भक्त्या विप्राय दापयेत् ॥ १७ ॥ कात्यायनीं समु द्दिश्य नवम्यां शृणु यत्फलम् ॥ तस्या भ्राता पिता पुत्रः पतिर्वा रणमुत्तमम् ॥ १८ ॥ प्राप्यते नैव सीदन्ति तेन दानेन रक्षिताः ॥ इक्षुदंडरसं देवि दशम्यां या प्रयच्छति ॥ १९ ॥ लोकपालान्समुद्दिश्य ब्राह्मणे व्यंगवर्जिते ॥ तेन दानेन सा नित्यं सर्वलोकस्य वल्लभा ॥ १२० ॥ जायते नात्र सन्देह इत्येवं शंकरोऽब्रवीत् ॥ एकादश्यामुपोष्याथ द्वादश्यामुदकप्रदा ॥ २१ ॥ नारायणं समुद्दिश्य ब्राह्मणे विष्णुतत्परे ॥ सा सदा स्पर्श संभाषैर्द्रावयेद्द्रावयेज्जनम् ॥ २२ ॥ यस्माद्दानं महल्लोके ह्यनन्तमुदके भवेत् ॥ पादाभ्यंगं शिरोभ्यंगं काममुद्दिश्य वै द्विजे ॥ २३ ॥ ददाति च त्रयोदश्यां भक्त्या परमयांगना ॥ यस्यांयस्यां मृता जायेद्भूयो योन्यां तु जन्मनि ॥ २४ ॥ तस्यां तस्यां तु सा भर्तुर्न वियुज्येत कर्हिचित् ॥ तथा प्येवं चतुर्दश्यां दद्यात्पात्रमुपानहौ ॥ २५ ॥ ब्राह्मणे धर्ममुद्दिश्य तस्या लोका ह्यनामयाः ॥ एवं च पक्षपक्षांते श्राद्धे तर्पेद्द्विजोत्तमान् ॥ २६ ॥ अव्युच्छिन्ना सदा राज्ञि संततिर्जायते भुवि ॥ एवं ते तिथिमाहात्म्यं दानयोगेन भाषितम् ॥ २७ ॥ तथा वनस्पतीनां तु आराधनविधिं शृणु ॥ जम्बूं निम्बतरुं चैव तिंदुकं मधुकं तथा ॥२८॥ आम्रं चामलकं चैव शाल्मलिं वटपिप्पलौ ॥ शमीबिल्वामलीवृक्षं कदलीं पाटलीं तथा ॥ २९ ॥ अन्यान्पुण्यतमान्वृक्षानुपेत्य स्वर्गमाप्नुयात् ॥ १३० ॥ ॥ नारद उवाच ॥ ॥ चैत्रे मासे तु या नारी कुर्याद्व्रतमनुत्तमम् ॥ तस्य व्रतस्य चान्यानि कलां नार्हंति षोडशीम् ॥ ३१ ॥ श्रुतेन येन सुभगे दुर्भगत्वं न पश्यति ॥ यथा हिमं रविं प्राप्य विलयं याति भूतले ॥ ३२ ॥ तथा दुःखं च दौर्भाग्यं व्रतादस्माद्विलीयते ॥ मधुकाख्यां तु ललितामाराधयति येन वै ॥ ३३ ॥ विधिं तं शृणु सुभगे कथ्यमानं सुखावहम् ॥ चैत्रे शुक्लतृती यायां सुस्नाता शुद्धमानसा ॥ ३४ ॥ प्रतिमां मधुवृक्षस्य शांकरीमुमया सह ॥ कारयित्वा द्विजवरैः प्रतिष्ठाप्य यथाविधि ॥ ३५ ॥ सुगंधिकुसुमै र्धूपैस्तथा कर्पूरकुंकुमैः ॥ पूजयेद्विधिना देवं मन्त्रयुक्तेन भामिनी ॥ ३६ ॥ पादौ नमः शिवायेति मेढ्रे वै मन्मथाय च ॥ कालोदरायेत्युदरं नील कंठाय कंठकम् ॥३७॥ शिरः सर्वात्मने पूज्य उमां पश्चात्प्रपूजयेत्॥ क्षामोदरायै ह्युदरं सुकंठायै च कंठकम् ॥३८॥ शिरः सौभाग्यदायिन्यै पश्चादर्घ्यं प्रदापयेत्॥३९॥नमस्ते देवदेवेश उमावर जगत्पते॥अर्घ्येणानेन मे सर्वं दौर्भाग्यं नाशय प्रभो ॥१४०॥ इति अर्घ्यमंत्रः ॥ अर्घ्यं दत्त्वा ततः पश्चात्करकं वारिपूरितम्॥मधूकपात्रोपभृतं सहिरण्यं तु शक्तितः॥४१॥करकं वारिसंपूर्णं सौभाग्येन तु संयुतम् ॥ दत्तं तु ललिते तुभ्यं सौभाग्यादिविवर्धनम् ॥४२॥

१ तमालकं चैव–इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ इति करकदानमंत्रः ॥ ॥ मंत्रेणानेन विप्राय दद्यात्करकमुत्तमम् ॥ लवणं वर्जयेच्छुक्लां यावदन्यां तृतीयिकाम् ॥४३॥ क्षमाप्य देवीं देवेशं नक्तमद्यात्स्वयंहविः ॥ अनेन विधिना सार्धं मासि मासि ह्युपक्रमेत् ॥ ४४ ॥ फाल्गुनस्य तृतीयायां शुक्लायां तु समाप्यते ॥ वैशाखे लवणं देयं ज्येष्ठे चाज्यं प्रदीयते ॥ ४५ ॥ आषाढे मासि निष्पावाः पयो देयं तु श्रावणे ॥ मुद्गा देया नभस्ये तु शालिमाश्वयुजे तथा ॥ ४६ ॥ कार्त्तिके शर्करापात्रं करकं रससंभृतम् ॥ मार्गशीर्षे तु कार्पासं करकं घृतसंयुतम् ॥ ४७ ॥ पौषे तु कुंकुमं देयं माघे पात्रं तिलैर्भृतम् ॥ फाल्गुने मासि संप्राप्ते पात्रं मोदकसंभृतम् ॥ ४८ ॥ पश्चात्तृतीयादेयं यत्तत्पूर्वस्यां विवर्जयेत् ॥ विधानमासां[1] सर्वासां सामान्यं मनसः प्रिये ॥ ४९ ॥ प्रतिमां मधुवृक्षस्य तामेव प्रतिपूजयेत् ॥ तस्मै सर्वं तु विप्राय आचार्याय प्रदीयते ॥ १५० ॥ ततः संवत्सरस्यांते उद्यापनविधिं शृणु ॥ मधुवृक्षं ततो गत्वा बहुसंभारसंवृतः ॥ ॥ ५१ ॥ निखनेत्प्रतिमां मध्ये माधूकीं मधुकस्य च ॥ तत्रस्थं पूजयेत्सर्वमुमादेहार्द्धधारिणम् ॥ ५२ ॥ पूजोपहारैर्विपुलैः कुंकुमेन पुनःपुनः ॥ श्लक्ष्णाभिः पुष्पमालाभिः कौसुंभैः केसरेण च ॥५३॥ कौसुंभे वाससी शुभ्रे अतसीपुष्पसन्निभे ॥ परिधाप्य तां प्रतिमां दंपती रविसंख्यया[2] ॥५४॥ उपानद्युगलैश्छत्रैः कंठसूत्रैः सकंठिकैः ॥ कटकैरंगुलीयैश्च शयनीयैः शुभास्तृतैः ॥ ५५ ॥ कुंकुमेन विलिप्तांगौ बहुपुष्पैश्च पूजितौ ॥ भोजयेद्विविधैरत्नैर्मधूकावासके स्थितौ ॥ ५६ ॥ भुक्तोत्थितौ तु विश्राम्य शय्यासु च क्षमापयेत् ॥ गुरुमूलं यतः सर्वं गुरुर्ज्ञेयो महेश्वरः ॥ ५७ ॥ प्रीते गुरौ ततः सर्वं जगत्प्रीतं सुरासुरम् ॥ यद्यदिष्टतमं लोके यत्किंचिद्दयितं गृहे ॥ ५८ ॥ तत्सर्वं गुरवे देयमात्मनः श्रेय इच्छता ॥ इदं तु धनिभिर्देयमन्यैर्देयं यथोच्यते ॥ ५९ ॥ दांपत्यमेकं विधिवत्प्रतिपूज्य शुभव्रतैः ॥ द्वितीयं गुरुदांपत्यं वित्तशाठ्यं विवर्जयेत् ॥ १६० ॥ ततः क्षमापयेद्देवीं देवं च ब्राह्मणं गुरुम् ॥ यथा त्वं देवि ललिते न वियुक्तासि शंभुना ॥ ६१ ॥ तथा मे पतिपुत्राणामवियोगः प्रदीयताम् ॥ अनेन विधिना कृत्वा तृतीयां मधुसंज्ञिकाम् ॥ ६२ ॥ इन्द्राणी चेंद्रपत्नीत्वमवाप सुतमुत्तमम् ॥ सौभाग्यं सर्वलोकेषु[3] सर्वर्द्धिसुखमुत्तमम् ॥ ६३ ॥ अनेन विधिना या तु कुमारी व्रतमाचरेत् ॥ शोभनं पतिमाप्नोति यथेंद्राण्या शतक्रतुः[4] ॥ ६४ ॥ दुर्भगा सुभगत्वं च सुभगा पुत्रिणी भवेत् ॥ पुत्रिण्यक्षयमाप्नोति न शोकं पश्यति क्वचित् ॥ ६५ ॥ अनेकजन्मजनितं दौर्भाग्यं नश्यति ध्रुवम् ॥ मृता तु त्रिदिवं प्राप्य उमया सह मोदते ॥ ६६ ॥ कल्पकोटिशतं साग्रं भुक्त्वा भोगान्यथेप्सितान् ॥ पुनस्तु संभवे लोके पार्थिवं पतिमाप्नुयात् ॥ ६७ ॥ सुभगा रूपसंपन्ना पार्थिवं जनयेत्सुतम् ॥ ६८ ॥

१ मासाः--इ० पा० । २ दंपती रविसंख्यया--द्वादश ब्राह्मणमिथुनानि--इत्यर्थः । ३ त्रिषु लोकेषु--इ०पा० । ४ पतिः आप्तः--इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



एतत्ते कथितं सर्वं व्रतानामुत्तमं व्रतम् ॥ अन्यत्पृच्छस्व सुभगे वांछितं यद्धृदि स्थितम् ॥ १६९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखंडे नर्मदामाहात्म्ये मधूकतृतीयाव्रतविधानमाहात्म्यवर्णनंनाम षड्विंशोऽध्यायः ॥ २६ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ नारदस्य वचः श्रुत्वा राज्ञी वचनमब्रवीत् ॥ प्रसादं कुरु विप्रेंद्र गृह्ण दानं यथेप्सितम् ॥ १ ॥ सुवर्णमणिरत्नानि वस्त्राणि विविधानि च ॥ तत्ते दास्यामि विप्रेंद्र यच्चान्यदपि दुर्लभम् ॥ २ ॥ राज्ञ्यास्तु वचनं श्रुत्वा नारदो वाक्यमब्रवीत् ॥ अन्येषां दीयतां भद्रे ये द्विजाः क्षीणवृत्तयः ॥ ३ ॥ वयं तु सर्वसंपन्ना भक्तिग्राह्याः सदैव हि ॥ इत्युक्ता सा तदा राज्ञी वेदवेदाङ्गपारगान् ॥ ४ ॥ आहूय ब्राह्मणान्निःस्वान्दातुं समुपचक्रमे ॥ यत्किंचिन्नारदेनोक्तं दानं सौभाग्यवर्द्धनम् ॥ ५ ॥ तेन दानेन मे नित्यं प्रीयेतां हरिशंकरौ ॥ ततो राज्ञीच सा प्राह नारदं मुनिपुंगवम् ॥ ६ ॥ ॥ राज्ञ्युवाच ॥ ॥ दानं दत्तं त्वयोक्तं यद्भर्त्तृकर्म्मपरं हि तत् ॥ आजन्मजन्म मे भर्ता भवेद्बाणो द्विजोत्तम ॥ ७ ॥ नान्यो हि दैवतं तात मुक्त्वा बाणं द्विजोत्तम ॥ तेन सत्येन मे भर्त्ता जीवेच्च शरदां शतम् ॥ ८ ॥ नान्यो धर्म्मो भवेत्स्त्रीणां दैवतं हि पतिर्यथा ॥ तथापि तव वाक्येन दानं दत्तं यथाविधि ॥ ९ ॥ स्वकं कर्म करिष्यामो भर्त्तारं प्रति मानद ॥ ब्रह्मर्षे गच्छ चेदानीं त्वमाशीर्वादः प्रदीयताम् ॥ १० ॥ तथेति तामनुज्ञाप्य नारदो नृपसत्तम ॥ सर्वासां मानसं हृत्वा अन्यतः कृतमानसः॥ ११ ॥ जगामादर्शनं विप्रः पूज्यमानस्तु खेचरैः ॥ ततो गतमनस्कास्ता भर्त्तारं प्रति भारत ॥ १२ ॥ विवर्णा निष्प्रभा जाता नारदेन विमोहिताः ॥१३॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये त्रिपुरक्षोभणवर्णनंनाम सप्तविंशोऽध्यायः ॥ २७ ॥ ॥ छ ॥ ॥ मार्कंडेय उवाच ॥ ॥ एतस्मिन्नंतरे रुद्रो नर्मदातटमास्थितः ॥ क्रीडते ह्युमया सार्द्धं नारदस्तत्र चागतः॥१॥प्रणम्य देवदेवेश मुमया सह शंकरम् ॥ व्यज्ञापयत्तदा देवं यद्वृत्तं त्रिपुरे तदा ॥ २ ॥ गतोऽहं स्वामिनिर्देशाद्यत्र तद्बाणमंदिरम् ॥ दृष्ट्वा बाणं यथान्यायं गतो ह्यंतः पुरं महत् ॥ ३ ॥ तत्र भार्यासहस्राणि दृष्ट्वा बाणस्य धीमतः ॥ यथायोग्यं यथाकाममागतः क्षोभ्य तत्पुरम् ॥ ४ ॥ नारदस्य वचः श्रुत्वा साधुसा ध्विति पूयजन् ॥ चिंतयामास देवेशो भ्रमणं त्रिपुरस्य हि ॥ ५ ॥ करमुक्तं यथा चक्रं विष्णुना प्रभविष्णुना ॥ महावेगं महायामं रक्षितं तेजसा मम ॥ ६ ॥ स च मे भक्तिनिरतो बाणो लोके च विश्रुतः ॥ भारती च मया दत्ता ब्राह्मणानां विशेषतः ॥ ७ ॥ एवं स सुचिरं कालं देवदेवो महेश्वरः ॥

१ अनुपमोवाच–इ०पा० । २ प्रतिपन्नं च देवानां त्रिपुरस्य वधं प्रति–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चिंतयित्वा मुनिर्वाणं कार्यं प्रति जनेश्वरः ॥ ८ ॥ ततोऽसौ मंदरं ध्यात्वा चापे कृत्वा गुणे महीम् ॥ विष्णुं सनातनं देवं बाणे ध्यात्वा त्रिलोचनः ॥ ९ ॥ फले हुताशनं देवं ज्वलंतं सर्वतोमुखम् ॥ सुपर्णं पुंखयोर्मध्ये जवे वायुं प्रकल्प्य च ॥ १० ॥ रथं महीमयं कृत्वा धुरि तावश्विनावुभौ ॥ अक्षे सुरेश्वरं देवमग्रकील्यां धनाधिपम् ॥ ११ ॥ यमं तु दक्षिणे पार्श्वे वामे कालं सुदारुणम् ॥ आदित्यचंद्रौ चक्रे तु गंधर्वानारका[1]दिषु ॥ १२ ॥ यन्तारं च सुरज्येष्ठं वेदान्कृत्वा हयोत्तमान् ॥ खलीनादिषु चाङ्गानि रश्मींश्छंदांसि चाकरोत् ॥ १३ ॥ कृत्वा प्रतोदमोंकारं मुखग्राह्यं महेश्वरः ॥ धातारं चाग्रतः कृत्वा विधातारं च पृष्ठतः ॥ १४ ॥ मारुतात्सर्वतो दिग्भ्य ऊर्ध्वयंत्रे तथैव च ॥ महोरगपिशाचांश्च सिद्धविद्याधरांस्तथा ॥ १५ ॥ गणांश्च भूतसंघांश्च सर्व्वे सर्व्वांगसंधिषु ॥ युगमध्ये स्थितो मेरुर्युगस्याधो महागिरिः ॥ १६ ॥ सर्पा यन्त्रस्थिता घोराः शम्ये वरुणनैर्ऋतौ ॥ गायत्रीचैव सावित्री स्थिते ते रश्मिबंधने ॥ १७ ॥ सत्यं रथध्वजे शौचं दमं रक्षां समंततः ॥ रथं देवमयं कृत्वा देवदेवो महेश्वरः ॥ १८ ॥ सन्नद्धः कवची खड्गी बद्धगोधांगुलित्रवान् ॥ बद्धा परिकरं गाढं जटाजूटं नियम्य च ॥ १९ ॥ सज्जं कृत्वा धनुर्दिव्यं योजयित्वा रथोत्तमम् ॥ रथमध्ये स्थितो देवः शुशुभे च युधिष्ठिर ॥ २० ॥ धनुषः शब्दनादेनाकम्पयच्च जगत्रयम् ॥ स्थानं कृत्वा तु वैशाखं निभृतं संस्थितो हरः ॥ २१ ॥ निरीक्ष्य सुचिरं कालं कोपसंरक्तलोचनः ॥ ध्यात्वा तं परमं मंत्रमात्मानं च निरुध्य सः ॥ २२ ॥ मुमोच सहसा बाणं पुरस्य वधकांक्षया ॥ यदा त्रीणि समेतानि अंतरिक्षस्थितानि तु ॥ २३ ॥ ततः कालनिमेषार्धं दृष्ट्वैक्यं त्रिपुरस्य च ॥ त्रिपर्वणा त्रिशल्येन ततस्तान्यवसादयत् ॥ २४ ॥ ततो लोका भयत्रस्ता त्रिपुरे भरतोत्तम ॥ सर्वासुरविनाशाय कालरूपा भयावहाः ॥ २५ ॥ अट्टहासान्प्रमुंचंति कष्टरूपा नरास्तदा ॥ निमेषोन्मेषणं चैव कुर्वंति लिपिकर्मसु ॥ २६ ॥ निष्पंदनयना मर्त्याश्चित्रेष्वालिखिता इव ॥ देवायतनगा देवा रटंति प्रहसंति च ॥ स्वप्ने पश्यंति चात्मानं रक्तांबरविभूषितम् ॥ २७ ॥ रक्तमाल्योत्तमांगाश्च पतंतः कार्दमे ह्रदे ॥ पश्यंति नाम चात्मानं सतैलाभ्यंगमस्तकम् ॥ २८ ॥ पश्यंति यानमारूढं रासभैश्च नृपोत्तम ॥ संवर्त्तको महावायुर्युगांतप्रतिमो महान् ॥ २९ ॥ गृहानुन्मूलयामास वृक्षजातीननेकशः ॥ भूमिकम्पाः सनिर्घाता उल्कापाताः सहस्रशः ॥ ३० ॥ रुधिरं वर्षते देवो मिश्रितं कर्करैर्बहु ॥ अग्निकुण्डेषु विप्राणां हुतः सम्यग्घुताशनः ॥ ३१ ॥ ज्वलते धूमसंयुक्तो विस्फुलिंगकणैः सह ॥ कुंजरा विमदा जातास्तुरगाः सत्त्ववर्जिताः ॥ ३२ ॥

१ आरकादिषु—अरादिषु—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





अवादितानि वाद्यंते वादित्राणि सहस्रशः ॥ ध्वजा ह्यकंपिताः पेतुश्छत्राणि विविधानि च ॥ ३३ ॥ ज्वलंति पादपास्तत्र पर्णानि च समं ततः ॥ सर्वं तद्व्याकुलीभूतं हाहाकारसमन्वितम् ॥ ३४ ॥ उद्यानानि विचित्राणि प्रबभंज प्रभंजनः ॥ तेन संप्रेरिताः सर्वे ज्वलंति विशिखाः शिखाः ॥ ३५ ॥ वृक्षगुल्मलतावल्ल्यो गृहाणि च समंततः ॥ दिग्विभागैश्च सर्वैश्च प्रवृत्तो हव्यवाहनः ॥ ३६ ॥ सर्वं किंशुकपर्णाभं प्रज्वलच्चैव दृश्यते ॥ गृहाद्गृहं तदा गन्तुं नैव धूमेन शक्यते ॥ ३७ ॥ हरकोपाग्निनिर्दग्धाः क्रन्दंते त्रिपुरे जनाः ॥ प्रदीप्तं सर्वतो दिक्षु दह्यते त्रिपुरं परम् ॥ ३८ ॥ पतंति शिखराग्राणि विशीर्णानि सहस्रशः ॥ पावको धूमसंपृक्तो दह्यमानः समंततः ॥ ३९ ॥ नृत्यन्वै व्याप्तदिग्देशः कांतारेष्वभिधावति ॥ देवागारेषु सर्वेषु गृहेष्वट्टालकेषु च ॥ ४० ॥ प्रवृत्तो हुतभुक्तत्र पुरे कालप्रचोदितः ॥ ददाह लोकान्सर्वत्र हरकोपप्रकोपितः ॥ ४१ ॥ दहते त्रैपुरं लोकं बालवृद्धसमन्वितम् ॥ सपुरं सगृहद्वारं सवाहनवनं नृप ॥ ४२ ॥ केचिद्भोजनसक्ताश्च पानासक्तास्तथा परे ॥ अपरा नृत्यगीतेषु संसक्ता वारयोषितः ॥ ४३ ॥ अन्योन्यं च परिष्वज्य हुताशनशिखार्दिताः ॥ दह्यमाना नृपश्रेष्ठ सर्वे गच्छंत्यचेतनाः ॥ ४४ ॥ अथान्ये दानवास्तत्र दह्यंतेग्निविमोहिताः ॥ न शक्ताश्चान्यतो गन्तुं धूमेनाकुलिताननाः ॥ हंसकारंडवाकीर्णा नलिन्यो हेमपंकजाः ॥४५॥ दह्यन्ते विविधास्तत्र वाप्यः कूपाश्च भारत ॥ दृश्यन्तेऽनलदग्धानि पुरोद्यानानि दीर्घिकाः ॥ अम्लानैः पंकजैश्छन्ना विस्तीर्णा वसुयोजनाः ॥ ४६ ॥ गिरिकूटनिभास्तत्र प्रासादा रत्नशोभिताः ॥ दृश्यंतेऽनलसंदग्धा विशीर्णा धरणीतले ॥ ४७ ॥ नरस्त्रीबालवृद्धेषु दह्यमानेषु सर्वतः ॥ निर्दयं ज्वलते वह्निर्हाहाकारो महानभूत्॥ काचिच्च सुखसंसुप्ताप्र मत्तान्या नृपोत्तम ॥४८॥ क्रीडित्वा च सुविस्तीर्णशयनस्था वरांगना ॥ काचित्सुप्ता विशालाक्षी हारावलिविभूषिता ॥ धूमेनाकुलिता दीना न्यपतद्धव्यवाहने ॥ ४९ ॥ काचित्तस्मिन्पुरे दीप्ते पुत्रस्नेहानुलालसा ॥ पुत्रमालिंगते गाढं दह्यते त्रिपुरेऽग्निना ॥ ५० ॥ काचित्कनकवर्णाभा इंद्रनीलविभूषिता ॥ भर्त्तारं पतितं दृष्ट्वा पतिता तस्य चोपरि ॥ ५१ ॥ काचिदादित्यवर्णाभा प्रसुप्ता तु प्रियोपरि ॥ अग्निज्वालाहता गाढं कंठमालिंगते नृप ॥ ५२ ॥ मेघवर्णा परा नारी चलत्कनकमेखला ॥ श्वेतवस्त्रोत्तरीया तु
॥ ३० ॥ पपात धरणीतले ॥ ५३ ॥ काचित्कुंदेंदुवर्णाभा नीलरत्नविभूषिता ॥ शिरसा प्रांजलिर्भूत्वा विज्ञापयति पावकम् ॥ ५४ ॥ कस्याश्चिज्ज्वलते वस्त्रं केशाः कस्याश्च भारत ॥ ज्वलज्ज्वलनसंकाशैर्हेमभांडैस्त्रसंति च ॥ ५५ ॥ काचित्प्रभूतदुःखार्ता विललाप वरांगना ॥ भस्मीभूतं पतिं दृष्ट्वा क्रंदंती

१ शस्त्राणि विविधानि च–इ० पा० । २ त्रिपुरे हरनोदितः–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुररी यथा ॥ ५६ ॥ आलिंग्य गाढं सहसा पतिता तस्य मूर्द्धनि ॥ काचिच्च बहुदुःखार्त्ता व्यलपत्स्त्री स्ववेश्मनि ॥ ५७ ॥ भस्मसाच्च कृतं दृष्ट्वा क्रंदते कुररी यथा ॥ मातरं पितरं काचिद्दृष्ट्वा विगतचेतनम् ॥ ५८ ॥ वेपते पतिता भूमौ खेदिता वडवा यथा ॥ इतश्चेतश्च काचिच्च दह्यमाना वरांगना ॥ ५९ ॥ नापश्यद्बालमुत्संगे विपरीतमुखी स्थिता ॥ कुंभिलस्य गृहं दग्धं पतितं धरणीतले ॥६०॥ कूष्मांडस्य च धूम्रस्य कुहकस्य बकस्य च ॥ विरूपनयनस्यापि विरूपाक्षस्य चैव हि ॥ ६१ ॥ शुंभो डिंभश्च रौद्रश्च प्रह्लादश्चासुरोत्तमः ॥ दंडपाणिर्विपाणिश्च सिंहवक्रस्तथाऽनघ ॥ ॥ ६२ ॥ दुंदुभश्चैव संह्लादो डिंडिर्मुंडिस्तथैव च ॥ बाणभ्राता च बाणश्च क्रव्यादव्याघ्रवक्रकौ ॥ ६३ ॥ एवमन्येपि ये केचिद्दानवा बलदर्पिताः ॥ तेषां गृहे तथा वह्निर्ज्वलते निर्दयो नृप ॥ दह्यमानाः स्त्रियस्तात विलपंति गृहेगृहे ॥ ६४ ॥ करुणाक्षरवादिन्यो निराधारा गताः शिवम् ॥ यदि वैरं सुरारेश्च पुरुषोपरि पावक ॥ ६५ ॥ स्त्रियः किमपराध्यंति गृहपंजरकोकिलाः ॥ अनिर्दयो नृशंसस्त्वं कस्ते कोपः स्त्रियं प्रति ॥ ६६ ॥ किं त्वया न श्रुतं लोके अवध्याः सर्वथा स्त्रियः ॥ किं तु तुभ्यं गुणो ह्यस्ति दहने पवनेरितः॥ ६७ ॥ न कारुण्यं त्वया किंचिद्दाक्षिण्यं च स्त्रियं प्रति ॥ दयां म्लेच्छा हि कुर्वंति वचनं वीक्ष्य योषिताम् ॥ ६८ ॥ म्लेच्छानामपि च म्लेच्छो दुर्न्निवार्य्यो ह्यचेतनः ॥ एवं विलपमानानां स्त्रीणां तत्रैव भारत ॥ ६९ ॥ ज्वालाकलापबहुलः प्रज्वलत्येव पावकः ॥ एवं दृष्ट्वा ततो बाणो दह्यमान उवाच ह ॥ ७० ॥ अवज्ञाय विनष्टोऽहं पापात्मा हरमंजसा ॥ मया पापेन मूर्खेण ये लोका नाशिता ध्रुवम् ॥ ७१ ॥ गोब्राह्मणा हता नित्यमिह लोके परत्र च ॥ नाशितान्यन्नपानानि मठारामाश्रमास्तथा ॥ ७२ ॥ ऋषीणामाश्रमाश्चैव देवारामा गणालयाः ॥ तेन पापेन मे ध्वंसस्तपसश्च बलस्य च ॥ ७३ ॥ किं धनेन करिष्यामि राज्येणांतःपुरेण च ॥ ७४ ॥ वरं शंकरपादौ च शरणं यामि मूढधीः ॥ न माता न पिता चैव न बंधुर्नापरो जनः ॥ ७५ ॥ मुक्त्वा चैव महेशानं परमार्तिहरं परम् ॥ आत्मना च कृतं पापमात्मनैव तु भुज्यते ॥ ७६ ॥ अहं पुनः समस्तैश्च दह्यामि सह साधुभिः ॥ एवमुक्त्वा शिवं लिंगं कृत्वा तन्मस्तकोपरि ॥ ७७ ॥ निर्जगाम गृहाच्छीघ्रं पावकेनावगुंठितः ॥ स खिन्नः स्विन्नगात्रस्तु प्रस्खलंस्तु मुहुर्मुहुः ॥७८॥ हरं गद्गदया वाचा स्तुवन्वै शरणं ययौ ॥ त्वत्कोपानलनिर्दग्धो यदि वध्योस्मि शंकर ॥ ७९ ॥ त्वत्प्रसादान्महादेव मा मे लिंगं प्रणश्यतु ॥ अर्चितं मे सुरश्रेष्ठ ध्यातं भक्त्या मया विभो ॥ ८० ॥ प्राणादिष्टतमं देव तस्माद्रक्षितुमर्हसि ॥ यदि तेऽहमनुग्राह्यो वध्यो वा सुरसत्तम ॥ ८१ ॥ प्रतिजन्म महादेव त्वद्भक्तिरचलास्तु मे ॥

१ विललाप तु दुःखिता-इ० पा० । २ दिव्यम्-इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

पशुकीटपतंगेषु तिर्यग्योनिगतेषु च ॥ स्वकर्मणा महादेव त्वद्भक्तिरचलास्तु मे ॥ ८२ ॥ एवमुक्त्वा महाभागो बाणो भक्तिमतां वरः ॥ स्तोत्रेण देवदेवेशं च्छन्दयामास भारत ॥ ८३ ॥ ॥ बाण उवाच ॥ ॥ शिव शंकर सर्वहराय नमो भवभीतभयार्तिहराय नमः ॥ कुसुमायुधदेहविनाशकर प्रमदाप्रियकामक देव नमः ॥ ८४ ॥ जय पार्वतीश परमार्थसार जय विरचितभीमभुजंगहार ॥ जय निर्मलभस्मविलिप्तगात्र जय मंत्रमूल जगदेकपात्र ॥ ८५ ॥ जय विषधरकपिलजटाकलाप जय भैरवविधृतपिनाकचाप ॥ जय विषमनयनपरिमुक्तसंग जय शंकर धृत गांगतरंग ॥ ८६ ॥ जय भीमरूप खट्वांगहस्त शशिशेखर जय[1] जगतां प्रशस्त ॥ जय सुरवरेश सुरलोकसार जय सर्वसकलनिर्द्वंध सार ॥ ८७ ॥ जय कीर्त्तनीय जगतां पवित्र जय वृषांक बहुविधचरित्र ॥ जय विरचितनरकंकालमाल अघासुरदेहकंकालकाल ॥ ८८ ॥ जय नीलकंठ वरवृषभगमन जय सकललोकदुरितानुशमन ॥ जय सिद्धसुरासुरविनतचरण जय रुद्र रौद्रभवजलधितरण ॥ ८९ ॥ जय गिरिश सुरेश्वरमाननीय जय सूक्ष्मरूप संचिंतनीय ॥ जय दग्धत्रिपुर विश्वसत्त्व जय सकलशास्त्रपरमार्थतत्त्व ॥ ९० ॥ जय दुरवबोध संसारतार कलिकलुषमहार्णवघोरतार ॥ जय सुरासुरदेवगणेश नमो हयवानरसिंहगजेंद्रमुख ॥ ९१ ॥ अतिह्रस्वस्थूलसुदीर्घतम उपलब्धिर्न शक्यते ते ह्यमरैः ॥ प्रणतोऽस्मि निरंजन ते चरणौ जय सांब सुलोचनकांतिहर ॥ ९२ ॥ अप्राप्य त्वां किमत्यन्तमुच्छ्रयी न विनाशयेत् ॥ अतिप्रमाथि च तदा तपो महत्सुदारुणम् ॥ ९३ ॥ न पुत्रबांधवा दारा न समस्तः सुहृज्जनः ॥ संकटेऽभ्युपगच्छंति व्रजंतमेकगामिनम् ॥ ९४ ॥ यदेव कर्म कैवल्यं कृतं तेन शुभाशुभम् ॥ तदेव सार्थवत्तस्य भवत्यग्रे तु गच्छतः ॥ ९५ ॥ निर्द्धनस्यैव चरतो न भयं विद्यते क्वचित् ॥ धनी भयैर्न मुच्येत धनं तस्मात्त्यजाम्यहम् ॥ ९६ ॥ लुब्धाः पापानि कुर्वंति शुद्धांशा नैव मानवाः ॥ श्रुत्वा धर्मस्य सर्वस्वं श्रुत्वा चैवावधार्य तत् ॥ ॥ ९७ ॥ त्वं विष्णुस्त्वं जगन्नाथो ब्रह्मरूपः सनातनः ॥ इंद्रस्त्वं देवदेवेश सुरनाथ नमोस्तु ते ॥ ९८ ॥ त्वं क्षितिर्वरुणश्चैव पवनस्त्वं हुताशनः ॥ त्वं दीक्षा यजमानश्च आकाशं सोम एव च ॥ ९९ ॥ त्वं सूर्यस्त्वं तु वित्तेशो यमस्त्वं गुरुरेव च ॥ त्वया व्याप्तं जगत्सर्वं त्रैलोक्यं

॥ ३१ ॥ भास्वता यथा ॥ १०० ॥ एतद्बाणकृतं स्तोत्रं श्रुत्वा देवो महेश्वरः ॥ क्रोधं मुक्त्वा प्रसन्नात्मा तदा[2] वचनमब्रवीत् ॥ १०१ ॥ ॥ ईश्वर उवाच ॥ ॥ न भेतव्यं न भेतव्यमद्यप्रभृति दानव ॥ सौवर्णे भवने तिष्ठ मम पार्श्वेऽथवा पुनः ॥ १०२ ॥ पुत्रपौत्रप्रपौत्रैश्च बांधवैः सह ॥२०५॥

१ स्तोतुं समुपचक्रमे—इ० पा० । २ बाणं वीक्ष्यात्रवीद्विभुः--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भार्यया ॥ अद्यप्रभृति वत्स त्वमवध्यः सर्वशत्रुषु ॥ १०३ ॥ ॥ मार्कंडेय उवाच ॥ ॥ भूयस्तस्य वरो दत्तो देवदेवेन भारत ॥ स्वर्गे मर्त्ये च पाताले पूजितः ससुरासुरैः ॥ १०४ ॥ अक्षयश्चाव्ययश्चैव वस त्वं वै यथासुखम् ॥ ततो निवारयामास रुद्रः सप्तशिखं तदा ॥ १०५ ॥ तृतीयं रक्षितं तस्य पुरं देवेन शम्भुना ॥ ज्वालामालाकुलं चान्यत्पतितं धरणीतले ॥ १०६॥ अर्द्धेन प्रस्थितादूर्द्ध्वं तस्य ज्वाला दिवं गताः ॥ हाहाकारो महांस्तत्र ऋषिसंघैरुदीरितः॥१०७॥दैवतैश्च महाभागैः सिद्धविद्याधरादिभिः ॥ एकं तु पतितं तत्र श्रीशैले खण्डमुत्तरम् ॥१०८॥ द्वितीयं पतितं राजञ्छैले ह्यमरकण्टके ॥ प्रज्वलत्पतितं तत्र तेन ज्वालेश्वरं स्मृतम् ॥ १०९ ॥ दग्धे तु त्रिपुरे राजन्पतिते खंड उत्तमे ॥ रुद्रो देवः स्थितस्तत्र ज्वालामालानिवारकः ॥ ११० ॥ हाहाकारपराणां तु ऋषीणां रक्षणाय च ॥ स्वयंमूर्तिर्महेशान उमावृषभसंयुतः ॥ १११ ॥ मनसापि स्मरेद्यस्तु भक्त्या ह्यमरकण्टकम् ॥ चांद्रायणाधिकं पुण्यं स लभेन्नात्र संशयः ॥ ११२ ॥ अतिपुण्यो गिरिश्रेष्ठो यस्माद्भरतसत्तम ॥ अस्मान्नित्यं भवेद्राजन्सर्वपापक्षयंकरः ॥ ११३ ॥ नानाद्रुमलताकीर्णो नानापुष्पोपशोभितः ॥ नानागुल्मलताकीर्णो नानावल्लीभिरावृतः ॥ ११४ ॥ सिंहव्याघ्रसमाकीर्णो मृगयूथैरलंकृतः ॥ श्वापदानां च घोषेण नित्यं प्रमुदितोऽभवत् ॥ ११५ ॥ ब्रह्मेंद्रविष्णुप्रमुखैर्ब्रह्मरैश्च सहस्रशः ॥ सेव्यते देवदेवेशः शंकरस्तत्र पर्वते ॥११६॥ पतनं कुरुते योऽस्मिन्पर्वतेऽमरकण्टके ॥ क्रीडते क्रमशो राजन्भुवनानि चतुर्दश ॥११७॥ ऐन्द्रं वाह्नं च कौबेरं वायव्यं याम्यमेव च ॥ नैर्ऋत्यं वारुणं चैव सौम्यं सौरं तथैव च ॥ ११८ ॥ ब्राह्मं च पदमक्लिष्टं वैष्णवं तदनन्तरम् ॥ उमारुद्रं महाभाग ऐश्वरं तदनन्तरम् ॥११९॥ परं सदाशिवं शांतं सूक्ष्मं ज्योतिरतींद्रियम् ॥ तस्मिन्याति लयं धीरो विधिना नात्र संशयः ॥ १२० ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कोऽप्यत्र विधिरुद्दिष्टः पतने ऋषिसत्तम ॥ एतन्मे सर्वमाचक्ष्व संशयोऽस्ति महामुने ॥ १२१ ॥ ॥ श्रीमार्कण्डेय उवाच ॥ ॥ ॥ शृणुष्व कथयिष्यामि तं विधिं पाण्डुनन्दन ॥ यत्कृत्वा प्रथमं कर्म्म निपतेत्तदनन्तरम् ॥ १२२ ॥ कृत्वा कृच्छ्रत्रयं पूर्वं जप्त्वा लक्षं दशैव तु ॥ शाकयावकभुक्चैव शुचिस्त्रिषवणो नृप ॥ १२३ ॥ त्रिकालमर्चयेदीशं देवदेवं त्रिलोचनम् ॥ दशांशेन तु राजेंद्र होमं तत्रैव कारयेत् ॥ १२४ ॥ लक्षवारं जपेद्देवं गंधमाल्यैश्च पूजयेत् ॥ रात्रौ स्वप्ने तदा पश्येद्विमानस्थं ततः क्षिपेत् ॥ १२५ ॥ अनेनैव विधानेन आत्मानं यस्तु निक्षिपेत् ॥ स्वर्गलोकमनुप्राप्य क्रीडते त्रिदशैः सह ॥१२६॥ त्रिंशद्वर्षसहस्राणि त्रिंशत्कोट्यस्तथैव च ॥ भुक्त्वा मनोरमान्भोगांस्तदागच्छेन्महीतलम् ॥१२७॥ पृथिवीमेकच्छत्रेण भुनक्ति लोकपूजितः॥व्याधिशोकविनिर्मुक्तो जीवेच्च शरदां शतम् ॥१२८॥ ज्वालेश्वरं तु तत्तीर्थं त्रिषु लोकेषु विश्रुतम् ॥ तत्र ज्वाला नदी पार्थ प्रसृता शिवनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





मिता॥१२९॥निर्वाप्य तद्वाणपुरं रेवया सह संगता॥तत्र स्नात्वा महाराज विधिना मंत्रसंयुतः॥१३०॥तिलसंमिश्रतोयेन तर्पयेत्पितृदेवताः॥पिंडदानेन च पितॄन्पौंडरीकफलं लभेत् ॥१३१॥ अनाशकं तु यः कुर्यात्तस्मिंस्तीर्थे नराधिप ॥ मुच्यते सर्वपापेभ्यो रुद्रलोकं स गच्छति ॥१३२॥ अमराणां शतैश्चैव सेवितो ह्यमरेश्वरः ॥ तथैव ऋषिसंघैश्च तेन पुण्यतमो महान् ॥ १३३ ॥ समंताद्योजनं तीर्थं पुण्यं ह्यमरकंटकम् ॥ रुद्रकोटिसमोपेतं तेन तत्पुण्यमुत्तमम् ॥ १३४ ॥ तस्य पर्वतराजस्य यः करोति प्रदक्षिणम् ॥ प्रदक्षिणीकृता तेन पृथिवी नात्र संशयः ॥ १३५ ॥ वाचिकं मानसं चैव कायिकं त्रिविधं च यत् ॥ नश्यते पातकं सर्वमित्येवं शंकरोऽब्रवीत् ॥ १३६ ॥ अमरेश्वरपार्श्वे च तीर्थं शक्रेश्वरं नृप ॥ तपस्तप्त्वा पुरा तत्र शक्रेण स्थापितं किल ॥ १३७ ॥ कुशावर्तनाम तीर्थं ब्रह्मणा च कृतं शुभम् ॥ ब्रह्मकुंडमिति ख्यातं हंसतीर्थं तथा परम् ॥ १३८ ॥ अंबरीषस्य तीर्थं च महाकालेश्वरं तथा ॥ कावेर्याः पूर्वभागे च तीर्थं वै मातृकेश्वरम् ॥ १३९ ॥ एतानि दक्षिणे तीरे रेवाया भरतर्षभ ॥ संसेवन स्नानदानैः पापसंघहराणि च ॥ १४० ॥ भृगुतुंगे महाराज प्रसिद्धो भैरवः शिवः ॥ तस्य याम्यविभागे च तीर्थं वै चपलेश्वरम् १४१ ॥ एतौ स्थितौ दुःखहरौ रेवाया उत्तरे तटे ॥ तावभ्यर्च्य तथा नत्वा सम्यग्यात्राफलं भवेत् ॥ अदृष्टपूजितौ तौ हि नराणां विघ्नकारकौ ॥ १४२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे त्रिपुरविध्वंसने ज्वालेश्वरतीर्थामरेश्वतीर्थमाहात्म्यवर्णनंनामाष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कावेरीति च विख्याता त्रिषु लोकेषु सत्तम ॥ माहात्म्यं श्रोतुमिच्छामि तस्या मार्कंड तत्त्वतः ॥ १ ॥ कीदृशं दर्शनं तस्याः फलं स्पर्शेऽथवा विभो ॥ स्नाने जाप्येऽथवा दान उपवासे तथा मुने ॥ २ ॥ कथयस्व महाभाग कावेरीसंगमे फलम् ॥ धर्म्मः श्रुतोऽथ दृष्टो वा कथितो वा कृतोपि वा ॥ ३ ॥ अनुमोदितो वा विप्रेंद्र पुनातीति श्रुतं मया ॥ यथा धर्मप्रसंगे तु मुने धर्म्मोपि जायते ॥ ४ ॥ स्वर्गश्च नरकश्चैव इत्येवं वैदिकी श्रुतिः ॥ ५ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ साधुसाधु महाभाग यत्पृष्टोहं त्वयाऽधुना ॥ शृणुष्वैकमना भूत्वा कावेरीफलमुत्तमम् ॥ ६ ॥ अस्ति यक्षो महासत्त्वः कुबेरोनाम विश्रुतः ॥ सोऽपि तीर्थप्रभावेन राजन्यक्षाधिपोऽभवत् ॥ ७ ॥ तच्छृणुष्व विधानेन भक्त्या परमया नृप ॥ सिद्धिं प्राप्तो महाभाग कावेरीसंगमेन तु ॥ ८ ॥ कावेर्या नर्म्मदायास्तु संगमे लोकविश्रुते ॥ तत्र स्नात्वा शुचिर्भूत्वा कुबेरः सत्यविक्रमः ॥ ९ ॥ विधिवन्नियमं कृत्वा शास्त्रयुक्त्या नरोत्तम ॥ आराधयन्महादेवमेकचित्तः सनातनम् ॥ १० ॥ एकाहारो वसन्मासं तथा षष्ठाह्नकालिकः ॥ पक्षोपवासी न्यवसत्कंचित्कालं नृपोत्तम ॥ ११ ॥ मूलशाकफलैश्चान्यं कालं नयति बुद्धिमान् ॥





Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचित्कालं वसंस्तत्र तीर्थे शैवालभोजनः ॥ १२ ॥ पराकेणानयत्कालं कृच्छ्रेणापि च मानद ॥ चांद्रायणेन चाप्यन्यमन्यं वाय्वंबुभोजनः ॥ ॥ १३ ॥ एवं तत्र नरश्रेष्ठ कामरागविवर्जितः ॥ स्थितो वर्षशतं साग्रं कर्षयन्स्वं तथा वपुः ॥ १४ ॥ ततो वर्षशतस्यांते देवदेवो महेश्वरः ॥ तुष्टस्तु परया भक्त्या तमुवाच हसन्निव ॥ १५ ॥ भोभो यक्ष महासत्त्व वरं वरय सुव्रत ॥ परितुष्टोऽस्मि[1] ते भक्त्या तव दास्ये यथेप्सितम् ॥ ॥ १६ ॥ ॥ यक्ष उवाच ॥ ॥ यदि तुष्टोसि देवेश उमया सह शंकर ॥ अद्यप्रभृति सर्वेषां यक्षाणामधिपो भवे ॥ १७ ॥ अक्षयश्चाव्ययश्चैव तव भक्तिपुरस्सरः ॥ धर्मे मतिं च मे नित्यं ददस्व परमेश्वर ॥ १८ ॥ ॥ ईश्वर उवाच ॥ ॥ यत्त्वया प्रार्थितं सर्वं फलं धर्म्मस्य तत्तथा ॥ इत्ये वमुक्त्वा तं तत्र जगामादर्शनं हरः ॥ १९ ॥ सोऽपि स्नात्वा विधानेन संतर्प्य पितृदेवताः ॥ आमंत्रयित्वा तत्तीर्थं कृतार्थश्च गृहं ययौ ॥ २० ॥ पूजितस्तत्र यक्षैस्तु सोऽभिषिक्तो विधानतः ॥ चकार विपुलं तत्र राज्यमीप्सितमुत्तमम्[2] ॥ २१ ॥ तत्र चान्ये सुराः सिद्धा यक्षगंधर्वकिंनराः ॥ गणाश्चाप्सरसां तत्र ऋषयश्च तथाऽनघ ॥ २२ ॥ कावेरीसंगमं तेन सर्वपापहरं विदुः ॥ स्वर्गाणामपि सर्वेषां द्वारमेतद्युधिष्ठिर ॥ २३ ॥ ते धन्यास्ते महात्मानस्तेषां जन्म सुजीवितम् ॥ कावेरीसंगमे स्नात्वा यैर्दत्तं हि तिलोदकम् ॥ २४ ॥ दश पूर्वे परे तात मातृतः पितृतस्तथा ॥ पितरः पिताम हास्तेन उद्धृता नरकार्णवात् ॥ २५ ॥ तस्मात्सर्वप्रयत्नेन तत्र स्नायीत मानवः ॥ अर्चयेदीश्वरं देवं यदीच्छेच्छाश्वतीं गतिम् ॥ २६ ॥ कावेरीसंगमे राजन्स्नानदानार्चनं नरैः ॥ कृतं भक्त्या नरश्रेष्ठ अश्वमेधाधिकं फलम् ॥ २७ ॥ होमेन चाक्षयः स्वर्गो जपादायुर्विवर्धते ॥ ध्यानतो नित्यमा याति पदं शिवकलात्मकम् ॥ २८ ॥ अग्निप्रवेशं यः कुर्यात्तस्मिंस्तीर्थे नरेश्वर ॥ अग्निलोके वसेत्तावद्यावदाभूतसंप्लवम् ॥ २९ ॥ अनाशकं[3] तु यः कुर्यात्तस्मिंस्तीर्थे नराधिप ॥ तस्य पुण्यफलं यद्वै तच्छृणुष्व नरोत्तम ॥ ३० ॥ गंधर्वाप्सरसंकीर्णे विमाने सूर्यसन्निभे ॥ वीज्यमानो वरस्त्रीभिर्दे वतैः सह मोदते ॥ ३१ ॥ षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च ॥ क्रीडते रुद्रलोकस्थस्तदंते भुवि चागतः ॥ ३२ ॥ भोगवान्दानशीलश्च जायते पृथिवीपतिः ॥ आधिशोकविनिर्मुक्तो जीवेच्च शरदां शतम् ॥ ३३ ॥ एवंगुणगणाकीर्णा कावेरी सा सरिन्नृप ॥ त्रिषु लोकेषु विख्याता नर्मदासं गमे सदा ॥ ३४ ॥ जितवाक्कायचित्ताश्च ध्येयध्यानरतास्तथा ॥ कावेरीसंगमे तात तेऽपि मोक्षमवाप्नुयुः ॥ ३५ ॥ शृणु तेऽन्यत्प्रवक्ष्यामि आश्चर्यं नृपसत्तम ॥ त्रिषु लोकेषु का त्वन्या दृश्यते सरिता[4] समा ॥ ३६ ॥ लब्धं यैर्नर्मदातोयं ये च कुर्युः प्रदक्षिणम् ॥ ये पिबंति जलं तत्र ते पुण्या नात्र

१ परितुष्टो न संदेहस्त्वया उमया सह—इ० पा० । २ राजराज्यं च शाश्वतम्—इ० पा० । ३ अनाशकम्—निरश [illegible]—इत्यर्थः । ४ सारिता—कावेरीनद्या—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



संशयः ॥ ३७ ॥ न तेषां संततिच्छेदो दश जन्मानि पंच च ॥ तेषां पापं विलीयेत हिमं सूर्योदये यथा ॥ ३८ ॥ गंगायमुनसंगे वै यत्फलं लभते नरः ॥ तत्फलं लभते मर्त्यः कावेरीस्नानमाचरन् ॥३९॥ भौमे तु भूतजायोगे व्यतीपाते च संक्रमे ॥ राहुसोमसमायोगे तदेवाष्टगुणं स्मृतम् ॥४०॥ अशीतिश्च यवाः प्रोक्ता गंगायामुनसंगमे ॥ कावेरीनर्मदायोगे तदेवाष्टगुणं स्मृतम् ॥ ४१ ॥ गंगा षष्टिसहस्रैस्तु क्षेत्रपालैः प्रपूज्यते ॥ तदर्द्धैरन्य तीर्थानि रक्षंते नात्र संशयः ॥ ४२ ॥ अमरेश्वरे तु सरितां ये योगाः परिकीर्तिताः ॥ ते त्वशीतिसहस्रैस्तु क्षेत्रपालैस्तु रक्षिताः ॥ ४३ ॥ तथामरेश्वरे याम्ये लिंगं वै चपलेश्वरम् ॥ द्वितीयं चंडहस्ताख्यं द्वे लिंगे तीर्थरक्षके ॥ ४४ ॥ शिवेन स्थापिते पूर्वं कावेर्याद्यभिरक्षके ॥ लक्षेण रक्षिता देवी नर्मदा बहुकल्पगा ॥ ४५ ॥ धनुषां षष्ट्यभियुतैः पुरुषैरीशयोजितैः ॥ ॐकारशतसाहस्रैः पर्वतश्चाभिरक्षितः ॥ ४६ ॥ अन्यदेशकृतं पापमस्मिन्क्षेत्रे विनश्यति ॥ अस्मिंस्तीर्थे कृतं पापं वज्रलेपो भविष्यति ॥ ४७ ॥ एषा ते कथिता तात कावेरी सरितां वरा ॥ रुद्रदेहसमुत्पन्ना तेन पुण्या सरिद्वरा ॥ ४८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये कावेरीसंगममाहात्म्यवर्णनंनामैकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ नर्मदोत्तरकूले तु दारुतीर्थमनुत्तमम् ॥ यत्र सिद्धो महाभाग तपस्तप्त्वा द्विजोत्तमः ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कोऽसौ द्विजवरश्रेष्ठः सिद्धस्तत्र महामुने ॥ दारुकेति सुतः कस्य एतन्मे वक्तुमर्हसि ॥ २ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ भार्गवे विपुले वंशे धीमतो देवशर्म्मणः ॥ दारुर्नाम महाभागो वेदवेदांगपारगः ॥ ३ ॥ ब्रह्मचारी गृहस्थश्च वानप्रस्थो विधिक्रमात् ॥ यतिधर्म्मविधानेन चचार विपुलं तपः ॥४॥ ध्यायन्वै स महादेवं निराहारो युधिष्ठिर ॥ उवास तीर्थे तस्मिन्वै यावत्प्राणपरिक्षयम् ॥ ५ ॥ तस्य नाम्ना तु तत्तीर्थं त्रिषु लोकेषु विश्रुतम् ॥ तत्र स्नात्वा विधानेन अर्चयेत्पितृदेवताः ॥ ६ ॥ सत्यवादी जितक्रोधः सर्वभूतहिते रतः ॥ सर्वान्कामानवाप्नोति राजन्नत्रैव सर्वथा ॥ ७ ॥ यः कुर्यादुपवासं च सत्यशौचपरायणः ॥ सौत्रामणिफलं चास्य संभवत्यविचारितम् ॥ ८ ॥ ऋग्वेदजापी ऋग्वेदी साम वा सामपारगः ॥ यजुर्वेदी यजुर्जप्त्वा लभते फलमुत्तमम् ॥ ९ ॥ प्राणांस्त्यजति

॥ ३३ ॥ यो मर्त्यस्तस्मिंस्तीर्थे विधानतः ॥ अनिवर्त्तिका गतिस्तस्य इत्येवं शंकरोऽब्रवीत् ॥ १० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे दारुतीर्थमाहात्म्यवर्णनंनाम त्रिंशोऽध्यायः ॥ ३० ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेच्च राजेंद्र तीर्थं त्रैलोक्यविश्रुतम ॥ ब्रह्मावर्त्तमिति ख्यातं सर्वपापप्रणाशनम् ॥ १ ॥ तत्र सन्निहितो ब्रह्मा नित्यसेवी युधिष्ठिर ॥ ऊर्ध्वबाहुर्निरालंब



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चकार भ्रमणं सदा ॥ २ ॥ एकाहारवशेऽतिष्ठद्द्वादशाब्दं महाव्रती ॥ अत्र तीर्थे विधानेन चिंतयन्वै महेश्वरम् ॥ ३ ॥ तेन तत्पुण्यमाख्यातं ब्रह्मावर्त्तमिति प्रभो ॥ तत्र स्नात्वा विधानेन तर्पयेत्पितृदेवताः ॥ ४ ॥ अर्चयेद्देवमीशानं विष्णुं वा परमेश्वरम् ॥ यत्फलं सर्वयज्ञानां विधिवद्दक्षिणावताम् ॥ ५ ॥ तत्फलं समवाप्नोति तत्तीर्थस्य प्रभावतः ॥ यस्मिंस्तीर्थे तु यो देवो दानवो वा द्विजोऽथ वा ॥ ६ ॥ सिद्धस्तेनैव तन्नाम्ना ख्यातं लोके महच्च तत् ॥ न जलं न स्थलं नाम क्षेत्रं वा ह्यूषराणि च ॥ ७ ॥ पवित्रत्वं लभंत्येते पौरुषेण विना नृणाम् ॥ सामर्थ्यान्निश्चयाद्धैर्यात्सिध्यंति पुरुषा नृप ॥ ८ ॥ प्रमादात्तस्य लोभेन पतंति नरके ध्रुवम् ॥ ९ ॥ सन्निरुध्येंद्रियग्रामं यत्रयत्र वसेन्मुनिः ॥ तत्रतत्र कुरुक्षेत्रं नैमिषंपुष्कराणि च ॥ १० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे ब्रह्मावर्त्ततीर्थमाहात्म्यवर्णनं नामैकत्रिंशोऽध्यायः ॥ ३१ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ पत्रेश्वरं ततो गच्छेत्सर्वपापप्रणाशनम् ॥ यत्र सिद्धो महाभागश्चित्रसेनसुतो बली ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कोऽसौ सिद्धस्तदा ब्रह्मंस्तस्मिंस्तीर्थे महातपाः ॥ पुत्रः कस्य तु को हेतुरेतदिच्छामि वेदितुम् ॥ २ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ चित्रोनाम महातेजा इन्द्रस्य दयितः पुरा ॥ तस्य पुत्रो नृपश्रेष्ठ पत्रेश्वर इति श्रुतः ॥ ३ ॥ रूपवान्सुभगश्चैव सर्वशत्रुभयंकरः ॥ इंद्रस्य दयितोऽत्यर्थं जय इत्येव चापरः ॥ ४ ॥ स कदाचित्सभामध्ये सर्वदेवसमागमे ॥ मेनकानृत्यगीतेन मोहितः सुचिरं किल ॥ ५ ॥ तिष्ठते गतमर्यादो गतप्राण इव क्षणात् ॥ तावत्सुरपतिर्देवः शशापाथाजितेंद्रियम् ॥ ६ ॥ यस्मात्त्वं स्वर्गसंस्थोपि मर्त्यधर्ममुपेयिवान् ॥ तस्मान्मर्त्ये चिरं कालं क्षपयिष्यस्यसंशयम् ॥ ७ ॥ एवमुक्तः सुरेंद्रेण चित्रसेनसुतो युवा ॥ वेपमानः सुरश्रेष्ठं कृतांजलिरुवाच ह ॥ ८ ॥ ॥ ॥ पत्रेश्वर उवाच ॥ ॥ मया पापेन मूढेन अजितेंद्रियचेतसा ॥ प्राप्तं वै यत्फलं तस्य प्रसादं कर्त्तुमर्हसि ॥ ९ ॥ ॥ शक्र उवाच ॥ ॥ नर्मदातटमाश्रित्य द्वादशाब्दं जितेंद्रियः ॥ आराधय शिवं शांतं पुनः प्राप्स्यसि सद्गतिम् ॥ १० ॥ सत्यशौचरतानां च धर्मिष्ठानां जितात्मनाम् ॥ लोकोऽयं पापिनां नैव इति शास्त्रस्य निश्चयः ॥ ११ ॥ एवमुक्ते महाराज सहस्राक्षेण धीमता ॥ गंधर्वतनयो धीमान्प्रणम्यागात्तु भूतलम् ॥ ॥ १२ ॥ रेवाया विमले तोये ब्रह्मावर्त्तसमीपतः ॥ स्नात्वा जप्त्वा विधानेन अर्चयित्वा च शंकरम् ॥ १३ ॥ वाय्वंबुपिण्याकफलैश्च पुष्पैः पर्णैश्च मूलाशनयावकेन ॥ ततापं पंचाग्नितपोभिरुग्रैस्ततश्च तोषं समगात्स देवः ॥ १४ ॥ पिनाकपाणिं वरदं त्रिशूलिनमुमापतिं ह्यंधकनाशनं च ॥ चंद्रार्धमौलिं गजकृत्तिवाससं दृष्ट्वा पपाताग्रगतं समीक्ष्य ॥ १५ ॥ ॥ ईश्वर उवाच ॥ ॥ वरं वृणीष्व भद्रं ते वरदो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ऽहं तवानघ ॥ यमिच्छसि ददाम्यद्य नात्र कार्या विचारणा ॥ १६ ॥ ॥ पत्रेश्वर उवाच ॥ ॥ यदि तुष्टोसि देवेश यदि देयो वरो मम ॥ अत्र त्वं सततं तीर्थे मम नाम्ना भव प्रभो ॥ १७ ॥ एतच्छ्रुत्वा महादेवो हर्षगद्गदया गिरा ॥ तथेत्युक्त्वा ययौ हृष्ट उमया सह शंकरः ॥ ॥ १८ ॥ सोऽपि तत्तीर्थमाप्लुत्य गते देवे दिवं प्रति ॥ स्नात्वा जाप्यविधानेन तर्पयित्वा पितॄन्पुनः ॥ १९ ॥ स्थापयामास देवेशं तस्मिंस्तीर्थे विधानतः ॥ पत्रेश्वरं तु विख्यातं त्रिषु लोकेषु भारत ॥ २० ॥ इंद्रलोकं गतः शापान्मुक्तः सोऽपि नरेश्वर ॥ हृष्टः प्रमुदितो रम्यं जयशब्दादिमंगलैः ॥ ॥ २१ ॥ एष ते कथितः प्रश्नः पृष्टो यो वै युधिष्ठिर ॥ तत्र स्नानेन चैकेन सर्वपापैः प्रमुच्यते ॥ २२ ॥ यस्त्व र्चयेन्महादेवं तस्मिंस्तीर्थे युधिष्ठिर ॥ स्नात्वाऽभ्यर्च्य पितॄन्देवान्सोऽश्वमेधफलं लभेत् ॥ २३ ॥ मृतो वर्षशतं साग्रं क्रीडित्वा च शिवे पुरे ॥ राजा वा राजतुल्यो वा पश्चान्मर्त्त्येषु जायते ॥ ॥ २४ ॥ वेदवेदांगतत्त्वज्ञो जीवेच्च शरदः शतम् ॥ व्याधिशोकविनिर्मुक्तः पुनः स्मरति तज्जलम् ॥ २५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे पत्रेश्वरतीर्थमाहात्म्यवर्णनंनाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र अग्नितीर्थमनुत्तमम् ॥ यत्र संनिहितो ह्यग्निर्गतः कामेन मोहितः ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथं देवो जगद्धाता कामेन कलुषीकृतः ॥ कथं च नित्यदा वास एकस्थानेषु जायते ॥ २ ॥ एतत्त्वाश्चर्यमतुलं सर्वलोकेष्वनुत्तमम् ॥ कथयस्व महाभाग परं कौतूहलं मम ॥ ३ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ साधुसाधु महाप्राज्ञ पृष्टः प्रश्नस्त्वयाऽनघ ॥ कथया[1]मि यथापूर्वं श्रुतमेतन्महेश्वरात् ॥ ॥ ४ ॥ आसीत्कृतयुगे राजा नाम्ना दुर्योधनो महान् ॥ हस्त्यश्वरथसंपूर्णो मेदिनीपरिपालकः ॥५॥ रूपयौवनसंपन्नं दृष्ट्वा तं पृथिवीपतिम् ॥ दिव्योपभोगसंपन्नं प्रार्थयामास नर्मदा ॥ ६ ॥ स तु तां चकमे कन्यां त्यक्त्वाऽन्यं प्रमदाजनम् ॥ मुदा परमया युक्तो माहिष्मत्याः पतिर्नृप ॥ ७ ॥ रमते स तया सार्द्धं काले वै नृपसत्तम ॥ नर्मदा जनयामास कन्यां पद्मदलेक्षणाम् ॥ ८ ॥ अंगप्रत्यंगसंपन्ना यस्माल्लोकेषु विश्रुता ॥ तस्यां पिता च माता च चक्रतुः प्रेमबंधनम् ॥ ९ ॥ कालेनाऽतिसुदीर्घेण यौवनस्था वरांगना ॥ प्रार्थ्यमानाऽपि राजन्वै नात्मानं दातुमिच्छति ॥ १० ॥ ततोऽन्यदिवसे वह्निर्द्विजरूपो महातपाः ॥ राजानं प्रार्थयामास रहो गत्वा शनैः शनैः ॥ ११ ॥ भोभो रघुकुलश्रेष्ठ द्विजोहं मंदसंततिः ॥ दरिद्रो ह्यसहायश्च भार्यार्थे वरयामि ताम् ॥ १२ ॥ कन्या सुदर्शना नाम रूपेणाप्रतिमा भुवि ॥ तां ददस्व महाभाग वर्द्धते तव मंदिरे ॥ १३ ॥ ब्रह्मचर्येण



१ भवत्विति–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निर्विण्ण एकाकी कामपीडितः ॥ याचमानस्य मे तात प्रसादं कर्तुमर्हसि ॥ १४ ॥ ॥ राजोवाच ॥ ॥ नाहं द्रव्यविहीनस्य असवर्णस्य कर्हि
चित् ॥ दास्यामि स्वां सुतां शुभ्रां गम्यतां द्विजपुंगव ॥१५॥ एवमुक्तस्तदा वह्निः परां पीडामुपागतः ॥ न किंचिदुक्त्वा राजानं तत्रैवांतरधीयत ॥
॥ १६ ॥ गते चादर्शनं विप्रे राजा मंत्रिपुरोहितैः ॥ मंत्रयित्वाथ काले तु तुष्टो मखमुखे स्थितः ॥ १७ ॥ यजतश्च मखे भक्त्या ब्राह्मणैः सह भारत ॥
ततश्चादर्शनं वह्निः सर्वेषां पश्यतामगात् ॥ १८ ॥ विप्रा दुर्मनसो भूत्वा गता राज्ञो हि मंदिरम् ॥ वह्निनाशं विमनसो राजानमिदमब्रुवन् ॥
॥ १९ ॥ ब्राह्मणा ऊचुः ॥ दुर्योधन महाराज श्रूयतां महदद्भुतम् ॥ न श्रुतं न च दृष्टं वा कौतुकं नृपपुंगव ॥२०॥ अग्निकार्यप्रवृत्तानां सर्वेषां विधि
वन्नृप ॥ केनापि हेतुना वह्निर्दृश्यते न ज्वलत्युत ॥ २१ ॥ तच्छ्रुत्वा विप्रियं घोरं राजा विप्रमुखाच्युतम् ॥ आसनात्पतितो भूमौ छिन्नमूल इव
द्रुमः ॥ २२ ॥ आश्वस्य च मुहूर्त्तेन उन्मत्त इव संस्तदा ॥ निरीक्ष्य च दिशः सर्वा इदं वचनमब्रवीत् ॥ २३ ॥ किमेतदाश्चर्यपरमिति भोभो द्विजो
त्तमाः ॥ कथ्यतां कारणं सर्वं शास्त्रदृष्ट्या विभाव्य च ॥ २४ ॥ मम वा दुष्कृतं किंचिदुताहो भवतामिह ॥ येन नष्टोग्निशालायां हुतभुक्केन हेतु
ना ॥ २५ ॥ मंत्रच्छिद्रमथान्यद्वा नैव किंचिददक्षिणम् ॥ क्रियाहीनं कृतं वाथ केन वह्निर्न्न दृश्यते ॥ २६ ॥ अन्नहीनो दहेद्राष्ट्रं मंत्रहीनस्तु ऋत्वि
जः ॥ दातारं दक्षिणाहीनो नास्ति यज्ञसमो रिपुः ॥ २७ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ न मंत्रहीना हि वयं न च राजन्व्रतैस्तथा ॥ द्रव्येण च
न हीनस्त्वमन्यत्पापं विचिंत्यताम् ॥ २८ ॥ ॥ राजोवाच ॥ ॥ तथापि यूयं सहिता उपायं चिंतयंत्विति ॥ येन श्रेयो भवेन्नित्यमिह लोके
परत्र च ॥ २९ ॥ एवमुक्तास्ततः सर्वे ब्राह्मणाः कृतनिश्चयाः ॥ निराहाराः स्थिताः सर्व्वे यत्र नष्टो हुताशनः ॥ ३० ॥ ततः स्वप्ने महातेजा
हुतभुग्ब्राह्मणांस्तदा ॥ उवाच श्रूयतां सर्व्वैर्मम नाशस्य कारणम् ॥ ३१ ॥ प्रार्थितोऽयं मया राजा सुतां दातुं न चेच्छति ॥ तेन नष्टोऽग्निशर
णादहं भो द्विजसत्तमाः ॥ ३२ ॥ यदि मे स्वसुतां राजा ददाति परमार्चिताम् ॥ तदास्य ज्वलमानोऽहं गृहेतिष्ठामि नान्यथा ॥ ३३ ॥ तच्छ्रुत्वा
वचनं विप्रा वैश्वानरमुखोद्गतम् ॥ विस्मयोत्फुल्लनयना राजानमिदमब्रुवन् ॥ ३४ ॥ भवतो मतमाज्ञाय सर्वे गत्वाग्निमन्दिरम् ॥ निराहाराः
स्थिता रात्रौ पश्यामो जातवेदसम् ॥ ३५ ॥ तेनोक्ताः स्वसुतां चेत्तु राजा मे दातुमिच्छति ॥ ततोऽस्य भूयोऽपि गृहे ज्वलेऽहं नान्यथा द्विजाः ॥
॥ ३६ ॥ एवं ज्ञात्वा महाराज स्वसुतां दातुमर्हसि ॥ ३७ ॥ ॥ राजोवाच ॥ ॥ भवतां तस्य वा कार्यं देवस्य वचनं हृदि ॥ समयं कर्तु
मिच्छामि कन्यादाने ह्यनुत्तमम् ॥ ३८ ॥ मम संनिहितो नित्यं गृहे तिष्ठतु पावकः ॥ ददामि रुचिरापांगीं नान्यथा करवाणि वै ॥ ३९ ॥ एवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ते ब्राह्मणाः श्रुत्वा तथाग्निं प्राप्य सत्वरम् ॥ कथयित्वा विवाहेन योजयामासुराशु वै ॥ ४० ॥ सुदर्शनाया लाभेन परितुष्टो हुताशनः ॥ ज्वलते सन्निधौ नित्यं माहिष्मत्यां युधिष्ठिर ॥ ४१ ॥ ततः प्रभृति तत्तीर्थमग्नितीर्थं प्रचक्षते ॥ ये तत्र पक्षसन्धौ तु स्नानदानैस्तु भाविताः ॥ ४२ ॥ तर्पयन्ति पितन्देवांस्तेऽश्वमेधफलैर्युताः ॥ सुवर्णं ये प्रयच्छन्ति तस्मिंस्तीर्थे नराधिप ॥ ४३ ॥ पृथ्वीदानफलं तत्र जायते नात्र संशयः ॥ अनाशकं तु यः कुर्यात्तस्मिंस्तीर्थे नराधिप ॥ ४४ ॥ स मृतो ह्यग्निलोके तु क्रीडते सुरपूजितः ॥ एष ते ह्यग्नितीर्थस्य संभवः कथितो मया ॥ ४५ ॥ सर्वपापहरः पुण्यः श्रुतमात्रो नरोत्तम ॥ धन्यः पापहरो नित्यमित्येवं शंकरोऽब्रवीत् ॥ ४६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डेऽग्नितीर्थमाहात्म्यवर्णनंनाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तत्रैव तु भवेदन्यदादित्यस्य महात्मनः ॥ कीर्त्तयामि नरश्रेष्ठ यदि ते श्रवणे मतिः ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ एतदाश्चर्यमतुलं श्रुत्वा तव मुखोद्गतम् ॥ विस्मयाद्धृष्टरोमाहं जातोस्मि मुनिसत्तम ॥ २ ॥ सहस्रकिरणो देवो हर्ता कर्ता निरञ्जनः ॥ अवतारेण लोकानामुद्धर्ता नर्मदातटे ॥ ३ ॥ पुरुषाकारो भगवानुताहो तपसः फलात् ॥ कस्य गोत्रे समुत्पन्नः कस्य देवोऽभवद्वशी ॥ ४ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ कुलिकान्वयसंभूतो ब्राह्मणो भक्तिमाञ्छुचिः ॥ ईक्ष्यामीति रविं तत्र तीर्थे यात्राकृतोद्यमः ॥ ५ ॥ योजनानां शतं साग्रं निराहारो गतोदकः ॥ प्रस्थितो देवदेवेन स्वप्नांते वारितः किल ॥ ६ ॥ भोभो मुने महासत्त्व अलं ते व्रतमीदृशम् ॥ सर्वं व्याप्य स्थितं पश्य स्थावरं जंगमं च माम् ॥ ७ ॥ तपाम्यहं ततो वर्षं निगृह्णाम्युत्सृजामि च ॥ न मृतं चैव मृत्युं च यः पश्यति स पश्यति ॥ ८ ॥ वरं वरय भद्रं त्वमात्मनो यस्तवेप्सितम् ॥ ९ ॥ ॥ ब्राह्मण उवाच ॥ ॥ यदि तुष्टोसि मे देव देयो यदि वरो मम ॥ उत्तरे नर्मदाकूले सदा सन्निहितो भव ॥ १० ॥ ये भक्त्या परया देव योजनानां शते स्थिताः ॥ स्मरिष्यंति जितात्मानस्तेषां त्वं वरदो भव ॥ ११ ॥ कुब्जांधबधिरा मूका ये केचिद्विकलेन्द्रियाः ॥ तव पादौ नमस्यंति तेषां त्वं वरदो भव ॥ १२ ॥ शीर्णघ्राणा गतधियो ह्यस्थिचर्मावशेषिताः ॥ तेषां त्वं करुणां देव अचिरेण कुरुष्व ह ॥ १३ ॥ येऽपि त्वां नर्मदातोये स्नात्वा तत्र दिनेदिने ॥ अर्चयंति जगन्नाथ तेषां त्वं वरदो भव ॥ १४ ॥ प्रभाते ये स्तविष्यंति स्तवैर्वैदिकलौकिकैः ॥ अभिप्रेतं वरं देव तेषां त्वं दद भोच्युत ॥ १५ ॥ तवाग्रे वपनं देव कारयंति नरा भुवि ॥ स्वामिंस्तेषां वरो देय एष मे परमो वरः ॥ १६ ॥ एवमस्त्विति तं चोक्त्वा मुनिं

१ तीर्थम्—इति शेषः। २ अनुदात्तेत्त्वलक्षणस्यात्मनेपदित्वस्यानित्यत्वादीक्षतेः परस्मैपदित्वमत्र बोद्धव्यम्।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करुणया पुनः ॥ शतभागेन राजेंद्र स्थित्वा चादर्शनं गतः ॥ १७ ॥ तत्र तीर्थे नरो भक्त्या गत्वा स्नानं समाचरेत् ॥ तर्प्पयेत्पितृदेवांश्च सोऽग्नि ष्टोमफलं लभेत् ॥ १८ ॥ अग्निप्रवेशं यः कुर्यात्तस्मिंस्तीर्थे नराधिप ॥ द्योतयन्वै दिशः सर्वा अग्निलोकं स गच्छति ॥ १९ ॥ यस्तत्तीर्थं समा साद्य त्यजतीह कलेवरम् ॥ स गतो वारुणं लोकमित्येवं शंकरोऽब्रवीत् ॥२०॥ तत्र तीर्थे तु यः कश्चित्संन्यासेन तनुं त्यजेत् ॥ षष्टिवर्षसहस्राणि स्वर्गलोके महीयते ॥ २१ ॥ अप्सरोगणसंकीर्णे दिव्यशब्दानुनादिते ॥ उषित्वाऽऽयाति मर्त्ये वै वेदवेदांगविद्भवेत् ॥ २२ ॥ व्याधिशोकविनिर्मुक्तो धनकोटिपतिर्भवेत् ॥ पुत्रदारसमोपेतो जीवेच्च शरदः शतम् ॥ २३ ॥ प्रातरुत्थाय यस्तत्र स्मरते भास्करं तदा ॥ आजन्मजनितात्पापान्मुच्य ते नात्र संशयः ॥ २४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे रवितीर्थवर्णनंनाम चतुस्त्रिंशोऽ ध्यायः ॥ ३४ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ जलमध्ये महादेवः केन तिष्ठति हेतुना ॥ उत्तरं दक्षिणं कूलं वर्जयित्वा द्विजोत्तम ॥ ॥ १ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ एतदाख्यानमतुलं पुण्यं श्रुतिसुखावहम् ॥ पुराणे यच्छ्रुतं तात तत्ते वक्ष्याम्यशेषतः ॥ २ ॥ त्रेतायुगे महाभाग रावणो देवकण्टकः ॥ त्रैलोक्यविजयी रौद्रः सुरासुरभयंकरः ॥ ३ ॥ देवदानवगंधर्वैर्ऋषिभिश्च तपोधनैः ॥ अवध्योऽथ विमानेन याव त्पर्यटते महीम् ॥ ४ ॥ तावद्विंध्यगिरेर्मध्ये दानवो बलदर्पितः ॥ मयो नामेति विख्यातो गुहावासी तपश्चरन् ॥ ५ ॥ तस्य पार्श्वगतो रक्षो विनया दवनिंगतः ॥ पूजितो दानसन्मानैरिदं वचनमब्रवीत् ॥ ६ ॥ कस्येयं पद्मपत्राक्षी पूर्णचंद्रनिभानना ॥ किंनामधेया तपति तप उग्रं कथं विभो ॥ ॥ ७ ॥ ॥ मय उवाच ॥ ॥ दानवानां पतिः श्रेष्ठो मयोऽहं नाम नामतः ॥ भार्या तेजोवती नाम तस्यास्तु तनया शुभा ॥ ८ ॥ मन्दोदरीति विख्याता तपते भर्तृकारणात् ॥ आराधयंती भर्त्तारमुमाया दयितं शुभम् ॥ ९ ॥ तच्छ्रुत्वा वचनं तस्य रावणो मदमोहितः ॥ प्रसृतः प्रणतो भूत्वा मयं वचनमब्रवीत् ॥ १० ॥ पौलस्त्यान्वयसंजातो देवदानवदर्पहा ॥ प्रार्थयामि महाभाग सुतां त्वं दातुमर्हसि ॥ ११ ॥ ज्ञात्वा पैतामहं वृत्तं मयेनाऽपि महात्मना ॥ रावणाय सुता दत्ता पूजयित्वा विधानतः ॥ १२ ॥ गृहीत्वा तां तदा रक्षोऽभ्यर्च्यमानो निशाचरैः ॥ देवोद्याने त्रिमानैश्च क्रीडते स तया सह ॥ १३ ॥ केनचित्त्वथ कालेन रावणो लोकरावणः ॥ पुत्रं पुत्रवतां श्रेष्ठो जनयामास भारत ॥ १४ ॥ तेनैव जातमात्रेण रावो मुक्तो महात्मना ॥ संवर्त्तकस्य मेघस्य तेन लोका जडीकृताः ॥ १५ ॥ श्रुत्वा तन्नर्दितं घोरं ब्रह्मा लोकपितामहः ॥ नाम चक्रे तदा तस्य मेघनादो भविष्यति ॥ १६ ॥ एवंनामा कृतः सोऽपि परमं व्रतमास्थितः ॥ तोषयामास देवेशमुमया सह शंकरम् ॥ १७ ॥ व्रतैर्नियमदानैश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

होमजाप्यविधानतः ॥ कृच्छ्रचांद्रायणैर्नित्यं कृशं कुर्वन्कलेवरम् ॥ १८ ॥ एवमन्यदिने तात कैलासं धरणीधरम् ॥ गत्वा लिंगद्वयं गृह्य प्रस्थितो दक्षिणामुखः ॥ १९ ॥ नर्मदातटमाश्रित्य स्नातुकामो महाबलः ॥ निक्षिप्य पूजयन्देवं कृतजाप्यो नरेश्वर ॥ २० ॥ तत्रायतनवासेन स्नातो हुतहुताशनः ॥ कृतकृत्यमिवात्मानं मानयित्वा निशाचरः ॥ २१ ॥ गंतुकामः परं मार्गं लंकायां नृपसत्तम ॥ एकमुद्धरतो लिंगं प्रणतः सव्य पाणिना ॥ २२ ॥ द्वितीयं तु द्वितीयेन भक्त्या पौलस्त्यनंदनः ॥ तावदेव महालिंगं पतितं नर्मदांऽभसि ॥ २३ ॥ याहियाहीति चेत्युक्त्वा जलमध्ये प्रतिष्ठितः ॥ नमित्वा रावणिस्तस्य देवस्य परमेष्ठिनः ॥ २४ ॥ जगामाकाशमाविश्य पूज्यमानो निशाचरैः ॥ तदाप्रभृति तत्तीर्थं मेघनादेति विश्रुतम् ॥२५॥ पूर्वं तु गर्जनं नाम सर्वपापक्षयंकरम् ॥ तस्मिंस्तीर्थे तु राजेंद्र यस्तु स्नानं समाचरेत् ॥ २६ ॥ अहोरात्रोषितो भूत्वा अश्वमेधफलं लभेत् ॥ पिंडदानं तु यः कुर्यात्तस्मिंस्तीर्थे नराधिप ॥ २७ ॥ यत्फलं सत्रयज्ञेन तद्भवेन्नाऽत्र संशयः ॥ तेन द्वादशवर्षाणि पितरः संप्रतर्पिताः ॥ ॥ २८ ॥ यस्तु भोजयते विप्रं षड्रसाऽन्नेन भारत ॥ अक्षयं पुण्यमाप्नोति तत्र तीर्थे नरोत्तम ॥ २९ ॥ प्राणत्यागं तु यः कुर्याद्भावितो भावितात्मना ॥ स वसेच्छांकरे लोके यावदाभूतसंप्लवम् ॥ ३० ॥ एषा ते नरशार्दूल गर्जनोत्पत्तिरुत्तमा ॥ कथिता स्नेहबंधेन सर्वपापक्षयंकरी ॥ ॥३१॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे मेघनादतीर्थमाहात्म्यवर्णनंनाम पंचत्रिंशोऽध्यायः ॥ ॥ ३५ ॥ ॥ छ ॥ ॥ मार्कंडेय उवाच ॥ ॥ ततो गच्छेच्च राजेंद्र दारुतीर्थमनुत्तमम् ॥ दारुको यत्र संसिद्ध इंद्रस्य दयितः पुरा ॥ १ ॥ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ दारुकेण कथं तात तपश्चीर्णं पुराऽनघ ॥ विधानं श्रोतुमिच्छामि त्वत्सकाशाद्विजोत्तम ॥ २ ॥ ॥ श्रीमार्कंडेय उवाच ॥ हंत ते कथयिष्यामि विचित्रं यत्पुरातनम् ॥ वृत्तं स्वर्गसभामध्ये ऋषीणां भावितात्मनाम्॥३॥सूतो वज्रधरस्येष्टो मातलिर्नाम नामतः ॥ स पुत्रं शप्तवान्पूर्वं कस्मिंश्चित्कारणांतरे ॥ ४ ॥ शापाहतो वेपमान इन्द्रस्य चरणौ शुभौ ॥ प्रपीड्य मूर्ध्ना देवेशं विज्ञापयति भारत ॥५॥ तमुवाचाभिशप्तं चाप्यनाथं च सुरेश्वरः ॥ कर्मणा केन शापस्य घोरस्यांऽतो भविष्यति ॥६॥ नर्मदातटमाश्रित्य तोषयन्वै महेश्वरम् ॥ तिष्ठ यावद्युगस्यांतं
॥ ३६ ॥ पुनर्जन्म ह्यवाप्स्यसि॥७॥ पुनर्भूत्वा तु पूतस्त्वं दारुकोनाम विश्रुतः॥ संसेव्य परमं देवं शंखचक्रगदाधरम् ॥८॥ मानुषं भावमापन्नस्ततः सिद्धिमवा ॥२१०॥
प्स्यसि ॥ एवमुक्तस्तु देवेन सहस्राक्षेण धीमता ॥ ९॥ प्रणम्य शिरसा भूमिमागतोसौ ह्यचेतनः ॥ नर्मदातटमाश्रित्य कर्षयन्निजविग्रहम् ॥ १० ॥ व्रतोपवाससंखिन्नो जपहोमरतः सदा ॥ महादेवं महात्मानं वरदं शूलपाणिनम् ॥ ११ ॥ भक्त्या तु परया राजन्यावदाभूतसंप्लवम् ॥ अंशावतरणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विष्णोः सुतो भूत्वा महामतिः ॥ १२ ॥ तोषयन्वै जगन्नाथं ततो यातो हि सद्गतिम् ॥ १३ ॥ एष तत्संभवस्तात दारुतीर्थस्य सुव्रत॥ कथितोऽयं मया पूर्वं यथा मे शंकरोऽब्रवीत् ॥ १४ ॥ ततो युधिष्ठिरः श्रुत्वा विस्मयं परमं गतः ॥ भ्रातॄन्विलोकयामास हृष्टरोमा मुहुर्मुहुः ॥ १५ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तस्मिंस्तीर्थे नरः स्नात्वा विधिपूर्वं नरेश्वर ॥ उपास्य संध्यां देवेशमर्चयेद्यश्च शंकरम् ॥ १६ ॥ वेदाऽभ्यासं तु तत्रैव यः करोति समाहितः ॥ सोऽश्वमेधफलं राजँल्लभते नाऽत्र संशयः ॥ १७ ॥ तस्मिंस्तीर्थे तु यो भक्त्या भोजयेद्ब्राह्मणाञ्छुचिः ॥ स तु विप्रसहस्रस्य लभते फलमुत्तमम् ॥ १८ ॥ स्नानं दानं जपो होमः स्वाध्यायो देवतार्चनम् ॥ यत्कृतं शुद्धभावेन तत्सर्वं सफलं भवेत् ॥१९॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे दारुकतीर्थमाहात्म्यवर्णनंनाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥ ॥ छ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत राजेंद्र देवतीर्थमनुत्तमम् ॥ येन देवास्त्रयस्त्रिंशत्स्नात्वा सिद्धिं परां गताः ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथं तात सुराः सर्व्वे दानवैर्बलवत्तरैः ॥ निर्जितास्तत्र तीर्थे च स्नात्वा सिद्धिं परां गताः ॥ २ ॥ ॥ मार्कंडेय उवाच ॥ ॥ पुरा दैत्यगणैरुग्रैर्युद्धेऽतिबलवत्तरैः ॥ इन्द्रो देवगणैः सार्द्धं स्वराज्याच्च्यावितो नृप ॥ ३ ॥ हस्त्यश्वरथयानौघैर्मर्दयित्वा वरूथिनीम् ॥ विध्वस्ता भेजिरे मार्गं प्रहारैर्जर्जरीकृताः ॥ ४ ॥ जंभशुंभनिशुंभैश्च कूष्मांडकुहकादिभिः ॥ वेपमानार्दिताः सर्व्वे ब्रह्माणमुपतस्थिरे ॥ ५ ॥ प्रणम्य शिरसा देवं ब्रह्माणं परमेष्ठिनम् ॥ तदा विज्ञापयामासुर्देवा वह्निपुरोगमाः॥६॥पश्यपश्य महाभाग दानवैः शकलीकृताः॥ वियोजिताः पुत्रदारैस्त्वामेव शरणं गताः ॥ ७ ॥ परित्रायस्व देवेश सर्वलोकपितामह ॥ नाऽन्या गतिः सुरेशान त्वां मुक्त्वा परमेश्वर ॥ ८ ॥ ॥ ब्रह्मोवाच ॥ ॥ दानवानां विघातार्थं नर्मदातटमास्थिताः ॥ तपः कुरुध्वं स्वस्थाः स्थ तपो हि परमं बलम् ॥ ९ ॥ नाऽन्योपायो न वै मंत्रो विद्यते न च मे क्रिया ॥ विना रेवाजलं पुण्यं सर्वपापक्षयंकरम् ॥ १० ॥ दारिद्र्यव्याधिमरणबंधनव्यसनानि च ॥ एतानि चैव पापस्य फलानीति मतिर्मम ॥ ११ ॥ एवं ज्ञात्वा तत श्चैव तपः कुरुत दुष्करम् ॥ तथा चैव सुराः सर्वे देवा ह्यग्निपुरोगमाः ॥ १२ ॥ तच्छ्रुत्वा वचनं तथ्यं ब्रह्मणः परमेष्ठिनः ॥ नर्मदामागताः सर्वे देवा ह्यग्निपुरोगमाः ॥ १३ ॥ चेरुर्वै तत्र विपुलं तपः सिद्धिमवाप्नुवन् ॥ तदाप्रभृति तत्तीर्थं देवतीर्थमनुत्तमम् ॥ १४ ॥ गीयते त्रिषु लोकेषु सर्वपाप क्षयंकरम् ॥ तत्र गत्वा च यो मर्त्त्यो विधिना संयतेंद्रियः ॥१५॥ स्नानं समाचरेद्भक्त्या स लभेन्मौक्तिकं फलम् ॥ यस्तु भोजयते विप्रां स्तस्मिंस्ती र्थे नराधिप ॥ १६ ॥ स लभेन्मुख्यविप्राणां फलं साहस्रिकं नृप ॥ तत्र देवशिला रम्या महापुण्यविवर्द्धिनी ॥ १७ ॥ संन्यासेन मृता ये तु तेषां



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



स्यादक्षया गतिः ॥ अग्निप्रवेशं यः कुर्यात्तस्मिंस्तीर्थे नराधिप ॥ १८ ॥ रुद्रलोके वसेत्तावद्यावदाभूतसंप्लवम् ॥ एवं स्नानं जपो होमः स्वाध्यायो देवतार्चनम् ॥१९॥ सुकृतं दुष्कृतं वाऽपि तत्र तीर्थेऽक्षयं भवेत् ॥ एष ते विधिरुद्दिष्ट उत्पत्तिश्चैव भारत ॥२०॥ देवतीर्थस्य निखिला यथा वै शंकराच्छ्रुता ॥ पठंति ये पापहरं सर्वदुःखविमोचनम् ॥ २१ ॥ देवतीर्थस्य चारितं देवलोकं व्रजन्ति ते ॥२२॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखंडे देवतीर्थमाहात्म्यवर्णनंनाम सप्तत्रिंशोऽध्यायः ॥३७॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत राजेंद्र गुहाऽऽवासीति चोत्तमम् ॥ यत्र सिद्धो महादेवो गुहावासी समार्बुदम् ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ केन कार्येण भो तात महादेवो जगद्गुरुः ॥ गुहायामनयत्कालं सुदीर्घं द्विजसत्तम ॥ २ ॥ एतद्विस्तरतः सर्वं कथयस्व ममानघ ॥ श्रोतुमिच्छाम्यहं सर्वं परं कौतूहलं हि मे ॥ ३ ॥ ॥ मार्कंडेय उवाच ॥ ॥ साधु प्रश्नो महाराज पृष्टो यो वै त्वयोत्तमः ॥ पुराणे विस्तरो ह्यस्य न शक्यो हि मयाऽधुना ॥ ४ ॥ कथितुं वृद्धभावत्वादतीतो बहुकालिकः ॥ संक्षेपात्तेन ते तात कथयामि निबोध मे ॥ ५ ॥ पुरा कृतयुगे राजन्नासीद्दारुवनं महत् ॥ नानाद्रुमलताकीर्णं नानावल्ल्युपशोभितम् ॥ ६ ॥ सिंहव्याघ्रवराहैश्च गजैः खड्गैर्निषेवितम् ॥ बहुपक्षियुतं दिव्यं यथा चैत्ररथं वनम् ॥ ७ ॥ तत्र केचिन्महाप्राज्ञा वसंति संशितव्रताः[1] ॥ वसंति परया भक्त्या चतुराश्रमभाविताः ॥ ८ ॥ ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ॥ स्वधर्मनिरताः सर्वे वांछंतः परमं पदम् ॥ ९ ॥ तावद्वसंतसमये कस्मिंश्चित्कारणांतरे ॥ विमानस्थो महादेवो गच्छन्वै ह्युमया सह ॥ १० ॥ ददर्श तोय आवासमृक्सामयजुर्नादितम् ॥ अलक्ष्यांगतनिर्गम्यं[2] सर्वपापक्षयंकरम् ॥ ११ ॥ तं दृष्ट्वा मुदिता देवी हर्षगद्गदया गिरा ॥ पप्रच्छ देवदेवेशं शशांककृतभूषणम् ॥ १२ ॥ ॥ देव्युवाच ॥ ॥ कस्यायमाश्रमो देव वेदध्वनिनिनादितः ॥ यं दृष्ट्वा क्षुत्पिपासाद्यैः श्रमैश्च परिहीयते ॥ १३ ॥ ॥ महेश्वर उवाच ॥ ॥ किं त्वया न श्रुतं देवि महादारुवनं महत् ॥ बहुविप्रजनो यत्र गृहधर्मेण वर्त्तते ॥ १४ ॥ अत्र यः स्त्रीजनः कश्चिद्भर्तृशुश्रूषणे
॥ ३७ ॥ रतः ॥ नान्यो देवो न वै धर्मो ज्ञायते शैलनंदिनि ॥ १५ ॥ एतच्छ्रुत्वा परं वाक्यं देवदेवेन भाषितम् ॥ कौतूहलसमाविष्टा शंकरं पुनरब्रवीत् ॥
॥ १६ ॥ यत्त्वयोक्तं महादेव पतिधर्मरताःस्त्रियः ॥ तासां त्वं मदनो भूत्वा चारित्रं क्षोभय प्रभो ॥ १७ ॥ ॥ ईश्वर उवाच ॥ ॥ यत्त्वयोक्तं च ॥२११॥

१ शांसितव्रताः—इत्यपि पाठः—तदा श्लाघनीयव्रताः—इत्यर्थः । संशितव्रताः—अतितीक्ष्णव्रताः—इत्यर्थः । २ अलक्ष्यागमनिर्गम्यम्—अलक्षितगमननिर्गमनमार्गम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वचनं न हि मे रोचते प्रिये ॥ ब्राह्मणा हि महद्भूतं न चैषां विप्रियं चरेत् ॥ १८ ॥ मन्युप्रहरणा विप्राश्चक्रप्रहरणो हरिः ॥ चक्रात्क्रूरतरो मन्युस्त
स्माद्विप्रं न कोपयेत् ॥ १९ ॥ न ते देवा न ते लोका न ते नागा न चासुराः ॥ दृश्यन्ते त्रिषु लोकेषु ये तैर्दृष्टैर्न नाशिताः ॥ २० ॥ तेषां
मोक्षस्तथा स्वर्गो भूमिर्मर्त्ये फलानि च ॥ येषां तुष्टा महाभागा ब्राह्मणाः क्षितिदेवताः ॥ २१ ॥ एवं ज्ञात्वा महाभागे असद्ग्राहं परित्यज ॥ तत्र
लोके विरुद्धं वै कुप्यन्ते येन वै द्विजाः ॥ २२ ॥ ॥ देव्युवाच ॥ ॥ नाहं ते दयिता देव नाऽहं ते वशवर्त्तिनी ॥ अकृत्वाऽधश्च वै तासां
मानं सुरसुपूजितम् ॥ २३ ॥ लोकालोके महादेव अशक्यं नास्ति ते प्रभो ॥ क्रियतां मम चैवैकमेतत्कार्यं सुरोत्तम ॥ २४ ॥ एवमुक्तो महादेवो
देव्या वाक्यहिते रतः ॥ कृत्वा कापालिकं रूपं ययौ दारुवनं प्रति ॥ २५ ॥ महाहितजटाजूटं नियम्य शशिभूषणम् ॥ कण्ठत्राणं परं कृत्वा धार
यन्कर्णकुण्डले ॥ २६ ॥ व्याघ्रचर्मपरीधानो मेखलाहारभूषितः ॥ नूपुरध्वनिनिर्घोषैः कम्पयन्वै वसुन्धराम् ॥ २७ ॥ महानूर्द्ध्वजटामाली कृत्तिभ
स्मानुलेपनः ॥ कृत्वा हस्ते कपालं तु ब्रह्मणश्च महात्मनः ॥ २८ ॥ महाडमरुघोषेण कम्पयन्वै वसुन्धराम् ॥ प्रभातसमये प्राप्तो महादारुवनं
प्रति ॥ २९ ॥ तावत्पुण्यजनः सर्वपुष्पपत्रफलार्थिकः ॥ निर्गतो बहुभिः सार्द्धं पवमानः समन्ततः ॥ ३० ॥ तद्दृष्ट्वा महदाश्चर्यं रूपं देवस्य
भारत ॥ युवतीनां मनस्तासां कामेन कलुषीकृतम् ॥ ३१ ॥ शोभनं पुरुषं दृष्ट्वा सर्वा अपि वरांगनाः ॥ क्लेदभावं ततो जग्मुर्मुदा दारुवनस्त्रियः ॥
॥ ३२ ॥ विकारा बहवस्तासां देवं दृष्ट्वा महाद्भुतम् ॥ संजाता विप्रपत्नीनां तदा तासु नरोत्तम ॥ ३३ ॥ परिधानं न जानंति काश्चिद्दृष्ट्वा वरां
गनाः ॥ उत्तरीयं तथा चान्या महामोहसमन्विताः ॥ ३४ ॥ केशभारपरिभ्रष्टा काचिदेवासनोत्थिता ॥ दातुकामा तदा भैक्ष्यं चेष्टितुं नैव चाश
कत् ॥ ३५ ॥ काचिद्दृष्ट्वा महादेवं रूपयौवनगर्विता ॥ उत्संगे संस्थितं बालं विस्मृता पायितुं स्तनम् ॥ ३६ ॥ कामबाणहता चाऽन्या बाहुभ्यां
पीडच सुस्तनौ ॥ निःश्वसन्ती तदा चोष्णं न किंचित्प्रतिजल्पति ॥३७॥ एवं संक्षोभ्य तं सर्वं स्त्रीजनं परमेश्वरः ॥ जगाम तत्र वै तासां क्षोभं कृत्वा
महाद्भुतम् ॥ ३८ ॥ तावत्ते ब्राह्मणाः सर्वे भ्रमित्वा काननं महत् ॥ आगताः स्वगृहे दारान्ददृशुश्च हतौजसः ॥ ३९ ॥ यासां पूर्वतरा भक्तिः पाति
व्रत्ये पतीन्प्रति ॥ चलितास्ता विदित्वाशु निर्जग्मुर्द्विजसत्तमाः ॥ ४० ॥ संविदं परमां कृत्वा ज्ञात्वा देवं महेश्वरम् ॥ क्षोभयित्वा मनस्तासां
ततश्चादर्शनं गतम् ॥ ४१ ॥ क्रोधाविष्टो द्विजः कश्चिद्दण्डमुद्यम्य धावति ॥ कल्माषयष्टिमन्ये च तथान्ये दर्भमुष्टिकाम् ॥ ४२ ॥ इतश्चेतश्च ते सर्वे
भ्रमित्वा काननं नृप ॥ एकीभूत्वा महात्मानो व्याजह्रुश्च रुषा गिरम् ॥ ४३ ॥ यदिदं च हुतं किंचिद्बुरवस्तोषिता यदि ॥ तेन सत्येन देवस्य लिंगं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

पततु चोत्तमम् ॥४४॥ आश्रमादाश्रमं सर्वे न त्यजामो विधिक्रमात् ॥ तेन सत्येन देवस्य लिंगं पततु भूतले ॥ ४५ ॥ एवं सत्यप्रभावेन त्रिरुक्तेन द्विजन्मनाम् ॥ शिवस्य पश्यतो लिंगं पतितं धरणीतले ॥ ४६ ॥ हाहाकारो महानासील्लोकालोकेऽपि भारत ॥ देवस्य पतिते लिंगे जगतश्च महाक्षये ॥ ४७ ॥ पतमानस्य लिंगस्य शब्दोभूच्च सुदारुणः ॥ उल्कापाता दिशां दाहा भूमिकम्पाश्च दारुणाः ॥ ४८ ॥ पतंति पर्वताग्राणि शोषं यांति च सागराः॥ देवस्य पतिते लिंगे देवा विमनसोऽभवन् ॥ ४९ ॥ समेत्य सहिताः सर्वे ब्रह्माणं परमेष्ठिनम् ॥ कृतांजलिपुटाः सर्वे स्तुवन्ति विविधैः स्तवैः ॥ ५० ॥ ततस्तुष्टो जगन्नाथश्चतुर्वदनपंकजः ॥ आर्त्तान्प्राह सुरान्सर्वान्मा विषादं गमिष्यथ ॥ ५१ ॥ ब्रह्मशापाभिभूतोऽसौ देवदेवस्त्रिलोचनः ॥ तुष्टैस्तैस्तपसा युक्तैः पुनर्मोक्षं गमिष्यति ॥ ५२ ॥ एतच्छ्रुत्वा ययुर्देवा यथागतमरिंदम ॥ भावयित्वा ततः सर्वे मुनयश्चैव भारत ॥ ५३ ॥ विश्वामित्रवसिष्ठाद्या जाबालिरथ कश्यपः ॥ समेत्य सहिताः सर्वे तमूचुस्त्रिपुरांतकम् ॥५४॥ ब्रह्मतेजो हि बलवद्द्विजानां हि सुरेश्वर ॥ क्षांतियुक्तस्तपस्तप्त्वा भविष्यसि गतक्लमः ॥ ५५ ॥ यतः क्षोभादृषीणां च तदेवं लिंगमुत्तमम् ॥ पतितं ते महादेव न तत्पूज्यं भविष्यति ॥ ५६ ॥ न तच्छ्रेयोऽग्निहोत्रेण नाग्निष्टोमेन लभ्यते ॥ प्राप्नुवंति च यच्छ्रेयो मानवा लिंगपूजने ॥ ५७ ॥ देवदानवयक्षाणां गंधर्वोरगरक्षसाम् ॥ वचनेन तु विप्राणामेतत्पूज्यं भविष्यति ॥ ५८ ॥ ब्रह्मविष्णिंद्रचंद्राणामेतत्पूज्यं भविष्यति ॥ यत्फलं तव लिंगस्य इह लोके परत्र च ॥ ५९ ॥ एवमुक्तो जगन्नाथः प्रणिपत्य द्विजोत्तमान् ॥ मुदा परमया युक्तः कृतांजलिरभाषत ॥ ६० ॥ ब्राह्मणा जंगमं तीर्थं निर्जलं सार्वकामिकम् ॥ येषां वाक्योदकेनैव शुद्ध्यंति मलिनो[1] जनाः ॥ ६१ ॥ न तत्क्षेत्रं न तत्तीर्थमूषरं पुष्कराणि च ॥ ब्राह्मणे मन्युमुत्पाद्य यत्र गत्वा स शुद्ध्यति ॥ ६२ ॥ न तच्छास्त्रं यन्न विप्रप्रणीतं न तद्दानं यन्न विप्रप्रदेयम् ॥ न तत्सौख्यं यन्नविप्रप्रसादान्न तद्दुःखं यन्न विप्रप्रकोपात् ॥ ६३ ॥ पृथिव्यां यानि तीर्थानि गंगाद्याः सरितस्तथा ॥ एकस्य विप्रवाक्यस्य कलां नार्हति षोडशीम् ॥ ६४ ॥ अभिनंद्य द्विजान्सर्वाननुज्ञातो महर्षिभिः ॥ ततोऽगमत्तदा देवो नर्मदातटमुत्तमम् ॥ ६५ ॥ परमं व्रतमास्थाय गुहावासी समार्बुदम् ॥ तपश्चचार भगवाञ्जपस्नानरतः सदा ॥ ६६ ॥ समाप्ते नियमे तात स्थापयित्वा महेश्वरम् ॥ वंद्यमानः सुरैः सार्द्धं कैलासमगमत्प्रभुः ॥ ६७ ॥ नर्मदायास्तटे तेन स्थापितः परमेश्वरः ॥ तेनैव कारणेनासौ नर्मदेश्वर उच्यते ॥ ६८ ॥ योऽर्चयेन्नर्मदेशानं यतिर्वै संजितेंद्रियः ॥ स्नात्वा चैव महादेवमश्वमेधफलं लभेत् ॥ ६९ ॥ ददाति यः पितृभ्यस्तु

 

१ मलिनः—मलवन्तः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिलपुष्पकुशोदकम् ॥ त्रिःसप्तपूर्वजास्तस्य स्वर्गे मोदंति पांडव ॥ ७० ॥ यस्तु भोजयते विप्रांस्तस्मिंस्तीर्थे नराधिपः॥ पायसं घृतमिश्रं तु स लभेत्कोटिजं फलम् ॥ ७१ ॥ सुवर्णं रजतं वापि ब्राह्मणेभ्यो युधिष्ठिर ॥ ददाति तोयमध्यस्थः सोऽग्निष्टोमफलं लभेत् ॥ ७२ ॥ अष्टम्यां वा चतुर्दश्यां निराहारो वसेत्तु यः ॥ नर्मदेश्वरमासाद्य प्राप्नुयाज्जन्मनः फलम् ॥ ७३ ॥ अग्निप्रवेशं यः कुर्यात्तस्मिंस्तीर्थे नराधिप ॥ तस्य व्याधिभयं न स्यात्सप्तजन्मसु भारत ॥ ७४ ॥ अनाशकं तु यः कुर्यात्तस्मिंस्तीर्थे नराधिप ॥ अनिवर्त्तिका गतिस्तस्य रुद्रलोके भविष्यति ॥ ॥ ७५ ॥ एष ते विधिरुद्दिष्टस्तस्योत्पत्तिर्नरोत्तम ॥ पुराणे विहिता तात संज्ञा तस्य तु विस्तरात् ॥ ७६ ॥ एतं कीर्त्तयते यस्तु नर्मदेश्वरसंभवम् ॥ भक्त्या शृणोति च नरः सोऽपि स्नानफलं लभेत् ॥ ७७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवा खण्डे नर्मदामाहात्म्ये नर्मदेश्वरतीर्थमाहात्म्यवर्णनंनामाष्टात्रिंशोऽध्यायः ॥ ३८ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेच्च राजेंद्र कपिलातीर्थमुत्तमम् ॥ स्नानमात्रान्नरो भक्त्या मुच्यते सर्वकिल्बिषैः ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ आश्चर्यभूतं लोकेषु कथितं द्विज सत्तम ॥ नर्मदेश्वरमाहात्म्यं कापिलं कथयस्व मे ॥ २ ॥ यस्मिन्कालेऽथ संबन्धे उत्पन्नं तीर्थमुत्तमम् ॥ सर्वपापहरं पुण्यं तीर्थं जातं कथं प्रभो ॥ ३ ॥ ॥ मार्कंडेय उवाच ॥ ॥ शृणु वक्ष्येद्य ते राजन्कपिलातीर्थमुत्तमम् ॥ येन ते विस्मयः सर्वः श्रुत्वा गच्छति भारत ॥ ४ ॥ पुरा कृतयुगस्यादौ ब्रह्मा लोकपितामहः ॥ उत्पादयित्वा सकलं भूतग्रामं चतुर्विधम् ॥ ५ ॥ जपहोमपरो भक्त्या क्षणं ध्यात्वा च तिष्ठति ॥ ज्वलमानात्तु कपिला तावत्कुण्डात्समुत्थिता ॥६॥ अग्निज्वालोज्वलैः शृंगैस्त्रिनेत्रा सुपयस्विनी ॥ अग्निपूर्णा ह्यग्निमुखा अग्निघ्राणाग्निलोचना ॥७॥ अग्निखुरा ह्यग्निपृष्ठा अग्निसर्वांगसंस्थितिः ॥ सर्वलक्षणसंपूर्णा घंटाललितनिःस्वना ॥८॥ दृष्ट्वा तु तां महाभागां कपिलां कुण्डमध्यगाम् ॥ ब्रह्मा लोकगुरुस्तात प्रणम्येदमुवाच ह॥९॥नमस्ते कपिले पुण्ये सर्वलोकनमस्कृते ॥ मंगल्ये मंगले देवि त्रिषु लोकेष्वनूपमे ॥१०॥ त्वं लक्ष्मीस्त्वं स्मृति मेधा त्वं धृतिस्त्वं वरानने ॥ उमादेवीति विख्याता त्वं सती नात्र संशयः ॥११॥ वैष्णवी त्वं महादेवी ब्रह्माणी त्वं वरानने ॥ कुमारी त्वं महाभागे भक्तिः श्रद्धा तथैव च ॥१२॥ कालरात्रिस्तु भूतानां कुमारी परमेश्वरी ॥ त्वं लवस्त्वं त्रुटिश्चैव मुहूर्त्तं लक्षमेव च ॥१३॥ संवत्सरस्त्वं मासस्त्वं काल स्त्वं च क्षणस्तथा ॥ नास्ति किंचित्त्वया हीनं त्रैलोक्ये सचराचरे ॥ १४ ॥ एवं स्तुता तु मानेन कपिला परमेष्ठिना ॥ तमुवाच महाभागं प्रहृष्य

१ दृष्ट्रि-इ०पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





पद्मसंभवम् ॥ १९ ॥ प्रसन्ना तव वाक्येन देवदेव जगद्गुरो ॥ किं करोमि प्रियं तेऽद्य ब्रूहि सर्वं पितामह ॥ १६ ॥ ॥ ब्रह्मोवाच ॥ ॥ जग
द्धिताय जनिता मया त्वं परमेश्वरि ॥ स्वर्गान्मर्त्यं ततो याहि लोकानां हितकाम्यया ॥ १७ ॥ सर्वदेवमयी त्वं तु सर्वलोकमयी तथा ॥
विधिना ये प्रदास्यंति तेषां वासस्त्रिविष्टपे ॥ १८ ॥ एवमुक्ता ततो देवी ब्रह्माणं परमेश्वरी ॥ वंद्यमाना सुरैः सिद्धैराजगाम धरातलम् ॥ १९ ॥
॥ ॥ युधिष्ठिर उवाच ॥ ॥ यदायातेह सा तात ब्राह्मणो वचनाच्छुभा ॥ तदा देवाश्च लोकाश्च कथमंगेषु संस्थिताः ॥ २० ॥ कथं वा संस्थि
तागत्य कपिला सा द्विजोत्तम ॥ तीर्थे वा ह्युषरे क्षेत्र एतन्मे कथय द्विज ॥ २१ ॥ ॥ मार्कंडेय उवाच ॥ ॥ सा तदा ब्रह्मणा चोक्ता धात्रा
लोकस्य भारत ॥ ब्रह्मलोकाद्गता पुण्यां नर्मदां लोकपावनीम् ॥ २२ ॥ तपः कृत्वा सुविपुलं नर्मदातटमाश्रिता ॥ चचार पृथिवीं सर्वां सशैल
वनकाननाम् ॥ २३ ॥ तदाप्रभृति राजेंद्र कपिलातीर्थमुत्तमम् ॥ सर्वपापहरं ख्यातमृषिसंघैर्निषेवितम् ॥ २४ ॥ तत्तीर्थे विधिवत्स्नात्वा कपिलां
यः प्रयच्छति ॥ पृथ्वी तेन भवेद्दत्ता सशैलवनकानना ॥ २५ ॥ तां तु पश्यति यो भक्त्या दीयमानां द्विजोत्तमे ॥ तस्य वर्षशतं पापं नश्यते
नात्र संशयः ॥ २६ ॥ भूर्भुवः[1] स्वर्महश्चैव जनः सत्यं तपस्तथा ॥ ते तत्पृष्ठं समाश्रित्य स्थिता लोका नृपोत्तम ॥ २७ ॥ मुखे ह्यग्निः
स्थितो देवो दंतेषु च भुजंगमाः ॥ धाता विधाता ह्योष्ठौ च जिह्वायां तु सरस्वती ॥ २८ ॥ सहस्रकिरणौ देवौ चन्द्रादित्यौ सुलोचनौ ॥
नासिकामध्यगश्चैव मारुतो नृपसत्तम ॥ २९ ॥ ललाटे तु महादेवो ह्यश्विनौ कर्णसंस्थितौ ॥ नरनारायणौ शृंगे शृंगमध्ये पितामहः ॥ ३० ॥
कंबलेऽधिगतस्तात पाशधृग्वरुणस्तथा ॥ यमश्च भगवान्देव आश्रित्य चोदरं श्रितः ॥ ३१ ॥ खुरेषु पन्नगाश्चैवं पुच्छाग्रे सूर्यरश्मयः ॥ एवंभूतां
हि कपिलां सर्वदेवमयीं नृप ॥ ३२ ॥ ये धारयंति च गृहे धन्यास्ते नात्र संशयः ॥ प्रातरुत्थाय यस्तस्याः कुरुते तु प्रदक्षिणाम् ॥ ३३ ॥ प्रदक्षि
णा कृता तेन सशैलवनकानना ॥ कपिलापंचगव्येन यः स्नापयति शंकरम् ॥ ३४ ॥ उपवासपरो यस्तु तस्मिंस्तीर्थे नराधिप ॥ स्नात्वा ह्युक्त
विधानेन तर्पयेत्पितृदेवताः ॥ ३५ ॥ तस्य ते वंशजाः सर्वे दश पूर्वे दशापरे ॥ तृप्ता रोहंति वै स्वर्गे ध्यायंतोऽस्य मनोरथान् ॥ ३६ ॥ एष ते
॥ ३९ ॥ विधिरुदिष्टः संभवो नृपसत्तम ॥ तीर्थस्य च फलं पुण्यं किमन्यत्परिपृच्छसि ॥ ३७ ॥ धन्यं यशस्यमायुष्यं सर्वदुःखघ्नमुत्तमम् ॥ यच्छ्रुत्वा



१ भूः—इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ ३८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे श्रीनर्मदा माहात्म्ये कपिलातीर्थमाहात्म्यवर्णनंनामैकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र करं जेश्वरमुत्तमम् ॥ यत्र सिद्धो महाभागो दैत्यो लोकेषु विश्रुतः ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ योऽसौ सिद्धो महाभाग तत्र तीर्थे महातपाः ॥ कस्य पुत्रः कथं सिद्धः कस्मिन्काले वद द्विज ॥ २ ॥ ॥ मार्कंडेय उवाच ॥ ॥ पुरा कृतयुगे राजन्मानसो ब्रह्मणः सुतः ॥ वेदवेदांगतत्त्वज्ञो मरीचिर्नाम नामतः ॥ ३ ॥ तस्यापि तपसो राशेः कालेन महतानघ ॥ पुत्रोऽथ मानसो जातः साक्षाद्ब्रह्मेव चापरः ॥ ४ ॥ क्षमा दमो दया दानं सत्यं शौचमथार्जवम् ॥ मरीचेश्च गुणा ह्येते संति तस्य च भारत ॥ ५ ॥ एवं गुणगणाकीर्णं कश्यपं द्विजसत्तमम् ॥ ज्ञात्वा प्रजापतिर्दक्षो भार्यार्थे स्वसुतां ददौ ॥ ६ ॥ अदितिर्दितिर्दनुश्चैव तथाप्येवं दशापराः ॥ यासां पुत्राश्च संजाताः पौत्राश्च भरतर्षभ ॥ ७ ॥ अदितिर्जनयामास पुत्रानिन्द्र पुरोगमान् ॥ जातास्तस्य महाबाहो कश्यपस्य प्रजापतेः ॥ ८ ॥ यैस्तु लोकत्रयं व्याप्तं स्थावरं जंगमं महत् ॥ तथान्यस्य महा भागो दनोः पुत्रो व्यजायत ॥ ९ ॥ सर्वलक्षणसंपन्नः करंजो नाम नामतः ॥ बाल एव महाभाग चचार स महत्तपः ॥ १० ॥ नर्मदातटमाश्रित्य चातिघोरमनुत्तमम् ॥ दिव्यं वर्षसहस्रं च कृच्छ्रचान्द्रायणं नृप ॥ ११ ॥ शाकमूलफलाहारः स्नानहोमपरायणः ॥ ततस्तुष्टो महादेव उमया सहितः किल ॥ १२ ॥ वरेण च्छन्दयामास त्रिपुरांतकरः प्रभुः ॥ भोः करंज महासत्त्व परितुष्टोऽस्मि तेऽनघ ॥ १३ ॥ वरं वृणीष्व ते दद्मि ह्यमरत्वमृते मम ॥ १४ ॥ ॥ करंज उवाच ॥ ॥ यदि तुष्टो महादेव यदि देयो वरो मम ॥ तर्हि पुत्राश्च पौत्राश्च संतु मे धर्मवत्सलाः ॥ १५ ॥ तथेत्युक्त्वा महादेव उमया सहितस्तदा ॥ वृषारूढो गणैः सार्द्धं तत्रैवांतरधीयत ॥ १६ ॥ गते चादर्शनं देवे सोऽपि दैत्यो मुदान्वितः ॥ स्वनाम्नात्र महादेवं स्थापयित्वा ययौ गृहम् ॥ १७ ॥ तदाप्रभृति तत्तीर्थं सर्वतीर्थेष्वनुत्तमम् ॥ स्नान मात्रान्नरस्तत्र मुच्यते सर्वपातकैः ॥ १८ ॥ तत्र तीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः ॥ सोऽग्निष्टोमस्य यज्ञस्य फलं प्राप्नोत्यसंशयम् ॥ १९ ॥ अनाशकं तु यः कुर्यात्तस्मिंस्तीर्थे नराधिप ॥ अनिवर्त्या गतिस्तस्य रुद्रलोकं स गच्छति ॥ २० ॥ अथवाग्निजले प्राणान्यस्त्यजेद्धर्म नंदन ॥ अयुतद्वितयं वस्ते वर्षाणां शिवमंदिरे ॥ २१ ॥ ततश्चैव क्षये जाते जायते विमले कुले ॥ वेदवेदांगतत्त्वज्ञः सर्वशास्त्रविशारदः ॥ २२ ॥ राजा वा राजतुल्यो वा जीवेच्च शरदः शतम् ॥ पुत्रपौत्रसमोपेतः सर्वव्याधिविवर्जितः ॥ २३ ॥ एवं ते सर्वमाख्यातं पृष्टं यद्यत्त्वयाऽनघ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

तीर्थस्य तु फलं तस्य स्नानदानेषु भारत ॥ २४ ॥ एतत्पुण्यं पापहरं धन्यं दुःस्वप्ननाशनम् ॥ पठतां शृण्वतां चैव तीर्थमाहात्म्यमुत्तमम् ॥ ॥ २५ ॥ यस्तु श्रावयते श्राद्धे पठेत्पितृपरायणः ॥ अक्षयं जायते पुण्यमित्येवं शंकरोऽब्रवीत् ॥ २६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखंडे नर्मदामाहात्म्ये करञ्जेश्वरतीर्थमाहात्म्यवर्णनंनाम चत्वारिंशोऽध्यायः ॥ ४० ॥ ॥ छ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेच्च राजेन्द्र कुण्डलेश्वरमुत्तमम् ॥ यत्र सिद्धो महायक्षः कुण्डधारो नृपोत्तम ॥ १ ॥ तपः कृत्वा सुविपुलं सुरासुरभयंकरम् ॥ पौलस्त्यमंदिरे चैव चिक्रीड नृपसत्तम ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कस्मिन्युगे समुत्पन्नः कस्य पुत्रो महामतिः ॥ तपस्तप्त्वा सुविपुलं तोषितो येन शंकरः ॥ ३ ॥ एतद्विस्तरतस्तात कथयस्व ममानघ ॥ शृण्वतश्च न तृप्तिर्मे.कथामृतमनुत्तमम् ॥ ४ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ त्रेतायुगे ब्रह्मसमः पौलस्त्योनाम विश्रवाः ॥ तपः कृत्वा सुविपुलं भरद्वाजसुतोद्भवः ॥ ५ ॥ पुत्रं पौत्रगणैर्युक्तं पत्न्यां[1] भक्त्या सुतोषितः ॥ धनदं जनयामास सर्वलक्षणलक्षितम् ॥ ६ ॥ जातमात्रं तु तं ज्ञात्वा ब्रह्मा लोकपितामहः ॥ चकार नाम सुप्रीत ऋषिदेवसमन्वितः ॥ ७ ॥ यस्माद्विश्रवसो जातो मम पौत्रत्वमागतः ॥ तस्माद्वैश्रवणो नाम तव दत्तं मयाऽनघ ॥ ८ ॥ तथा त्वं सर्वदेवानां धनगोप्ता भविष्यसि ॥ चतुर्थो लोकपालानामक्षयश्चाव्ययो भुवि ॥ ९ ॥ तस्य भार्या महाराज ईश्वरीति च विश्रुता ॥ यक्षो यक्षाधिपः श्रेष्ठस्तस्य कुण्डोऽभवत्सुतः ॥ १० ॥ स च रूपं परं प्राप्य मातापित्रोरनुज्ञया ॥ तपश्चचार विपुलं नर्मदातटमाश्रितः ॥ ११ ॥ ग्रीष्मे पंचाग्निसंतप्तो वर्षासु स्थण्डिलेशयः ॥ हेमंते जलमध्यस्थो वायुभक्षः शतं समाः ॥ १२ ॥ एवं वर्षशते पूर्णे एकांगुष्ठेऽभवन्नृप ॥ अस्थिभूतः परं तात ऊर्ध्वबाहुस्ततः परम् ॥ ॥ १३ ॥ अतपच्च धृतश्वासः कुण्डलो भरतर्षभ ॥ चतुर्थे वर्षशतके तुतोष वृषवाहनः ॥ १४ ॥ वरं वृणीष्व भो वत्स यत्ते मनसि रोचते ॥ ददामि ते न संदेहस्तपसा तोषितो ह्यहम् ॥ १५ ॥ ॥ कुण्डल उवाच ॥ ॥ यक्षाधिपप्रसादेन तस्यैवानुचरः पुरे ॥ विचरामि यथाकाममवध्यः सर्वशत्रुषु ॥ १६ ॥ तथेत्युक्त्वा महादेवः सर्वलोकनमस्कृतः ॥ जगामाकाशमाविश्य कैलासं धरणीधरम् ॥ १७ ॥ गते चादर्शनं देवे सोऽपि यक्षो मुदान्वितः ॥ स्थापयामास देवेशं कुण्डलेश्वरमुत्तमम् ॥ १८ ॥ अलंकृत्वा जगन्नाथं पुष्पधूपानुलेपनैः ॥ विमानैश्चामरैश्छत्रैस्तथा वै लिंगपूरणैः ॥ १९ ॥ तर्पयित्वा द्विजान्सम्यगन्नपानादिभूषणैः ॥ प्रीणयित्वा महदेवं ततः स्वभवनं ययौ ॥ २० ॥ तदाप्रभृति तत्तीर्थं त्रिषु

 

१ पत्न्या—तृणविन्दुराजर्षिकन्यया—इत्यध्यात्मरामायणाद्बोद्धव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकेषु विश्रुतम् ॥ उत्तमं परमं पुण्यं कुण्डलेश्वरनामतः ॥ २१ ॥ तत्र तीर्थे तु यः कश्चिदुपवासपरायणः ॥ अर्चयेद्देवमीशानं सर्वपापैः प्रमुच्यते ॥ २२ ॥ सुवर्णं रजतं वापि मणिं मौक्तिकमेव च ॥ दद्याद्भोज्यं ब्राह्मणेभ्य स सुखी मोदते दिवि ॥ २३ ॥ तत्र तीर्थे तु यः स्नात्वा ऋग्यजुः सामगोऽपि वा ॥ ऋचमेकां जपित्वा तु सकलं फलमश्नुते ॥ २४ ॥ गां प्रयच्छति विप्रेभ्यस्तत्फलं शृणु पांडव ॥ यावंति तस्या रोमाणि तत्प्रसूतिकुलेषु च ॥ २५ ॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ स्वर्गे वासो भवेत्तस्य पुत्रपौत्रैः समन्वितः ॥ ॥ २६ ॥ तावन्ति वर्षाणि महानुभावः स्वर्गे वसेत्पुत्रपौत्रैश्च सार्द्धम् ॥ तत्रान्नदो याति महेशलोकमसंख्यवर्षाणि न संशयोऽत्र ॥ २७ ॥ स वै सुखी मोदते स्वर्गलोके गंधर्वसिद्धाप्सरःसंप्रगीते ॥ एवं तु ते धर्मसुत प्रभावस्तीर्थस्य सर्वः कथितश्च पार्थ॥२८॥श्रुत्वा स्तुवन्मुच्यते सर्वपापैः पुनस्त्रिलोकीमिह तत्प्रभावात् ॥ २९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखण्डे नर्मदामाहात्म्ये कुंडलेश्वरतीर्थमाहात्म्यवर्णनंनामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र पिप्पलेश्वरमुत्तमम् ॥ यत्र सिद्धो महायोगी पिप्पलादो महातपाः ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ पिप्पलादस्य चरितं श्रोतुमिच्छाम्यहं विभो ॥ माहात्म्यं तस्य तीर्थस्य यत्र सिद्धो महातपाः ॥ २ ॥ कस्य पुत्रो महाभाग किमर्थं कृतवांस्तपः ॥ एतद्विस्तरतः सर्वं कथयस्व ममानघ ॥ ३ ॥ ॥ ॥ मार्कंडेय उवाच ॥ ॥ मिथिलास्थो महाभागो वेदवेदांगपारगः ॥ याज्ञवल्क्यः पुरा तात चचार विपुलं तपः ॥ ४ ॥ तापसी तस्य भगिनी याज्ञवल्क्यस्य धीमतः ॥ सा सप्तमेपि वर्षे च वैधव्यं प्राप दैवतः ॥ ५ ॥ पूर्वकर्मविपाकेन हीनाऽभूत्पितृमातृतः ॥ नाभूत्तत्पतिपक्षेऽपि कोपीत्येकाकिनी स्थिता ॥ ६ ॥ भूमौ भ्रमंती भ्रातुः सा समीपमगमच्छनैः ॥ चचार च तपः सोऽपि परलोकसुखेप्सया ॥ ७॥ चचार सापि तत्रस्था शुश्रूषंती महत्तपः ॥ कस्मिंश्चित्समये साऽथ स्नाताहनि रजस्वला ॥ ८ ॥ अंतर्वासो धृतवती दृष्ट्वा कर्पटकं रहः ॥ याज्ञवल्क्योपि तद्रात्रौ सुप्तो यत्र सुसंवृतः ॥ ९ ॥ स्वप्नं दृष्ट्वाऽत्यजच्छुक्रं कौपीने रक्तबिंदुवत् ॥ विराजितेन तपसा सिद्धं तदनलप्रभम् ॥ १० ॥ यावत्प्रबुद्धो विप्रोसौ वीक्ष्योच्छिष्टं तदंशुकम् ॥ चिक्षेप दूरतोऽस्पृश्यं शौचं कृत्वा विधानतः ॥ ११ ॥ निषिद्धं तु निशि स्नानमिति सुष्वाप स द्विजः ॥ निशीथे सापि तद्वस्त्रं भगस्यावरणं व्यधात् ॥ १२ ॥ प्रातरन्वेषयामास मुनिर्वस्त्रमितस्ततः ॥ ततः सा ब्राह्मणी प्राह किमन्वेषयसे प्रभो ॥ केन कार्यं तव तथा वदस्व मम तत्त्वतः ॥ १३ ॥ ॥ याज्ञवल्क्य उवाच ॥ ॥ अपवित्रो मया भद्रे स्वप्नो दृष्टोऽद्य वै निशि ॥ सक्लेदं तत्र मे वस्त्रं निक्षिप्तं तन्न दृश्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ते ॥ १४ ॥ तच्छ्रुत्वा ब्राह्मणी वाक्यं भीतभीताऽवदन्नृप ॥ तद्वस्त्रं तु मया विप्र स्नात्वा ह्यंतःकृतं महत् ॥ १५ ॥ तस्यास्तद्वचनं श्रुत्वा हाहेत्युक्त्वा महामुनिः ॥ निपपात तदा भूमौ च्छिन्नमूल इव द्रुमः॥१६॥ किमेतदिति सेत्युक्त्वा ह्याकाशमिव निर्मला ॥ आश्वासयन्ती तं विप्रं प्रोवाच वचनं तदा ॥ १७ ॥ वदस्व कारणं तात गुह्याद्गुह्यतरं यदि ॥ प्रतीकारोऽस्य येनैव विमृश्य क्रियते त्वरा ॥ १८ ॥ ततः स सुचिरं ध्यात्वा लब्धवाग्वै ततः क्षणम् ॥ प्रोवाच साध्वसमना यत्तच्छृणु नरेश्वर ॥ १९ ॥ नात्र दोषोस्ति ते कश्चिन्मम चैव शुभव्रते ॥ तवोदरे तु गर्भो यस्तत्र दैवं परायणम् ॥ ॥ २० ॥ तस्य तत्त्वेन रक्षा च त्वया कार्या सदैव हि ॥ विनाशी नैव कर्त्तव्यो यावत्कालस्य पर्ययः ॥ २१ ॥ तथेति व्रीडिता साध्वी दूयमानेन चेतसा ॥ अपालयच्च तं गर्भं यावत्पुत्रो ह्यजायत ॥ २२ ॥ जातमात्रं च तं गर्भं गृहीत्वा ब्राह्मणी च सा ॥ अश्वत्थच्छायामाश्रित्य तमुत्सृज्य वचोऽब्रवीत् ॥ २३ ॥ यानि सत्त्वानि लोकेषु स्थावराणि चराणि च ॥ तानि सर्वाणि रक्षंतु त्यक्तं वै बालकं मया ॥ २४ ॥ एवमुक्त्वा गता सा तु ब्राह्मणी नृपसत्तम ॥ तथागतः स तु शिशुस्तत्र स्थित्वा मुहूर्त्तकम् ॥ २५ ॥ पाणिपादौ विनिक्षिप्य निकुंच्य नयने शुभे ॥ आस्यं तु विवृतं कृत्वा रुरोद विकृतैः स्वरैः ॥ २६ ॥ तेन शब्देन वित्रस्ताः स्थावरा जंगमाश्च ये ॥ आकंपिता महोत्पातैः सशैलवनकानना ॥२७॥ ततो ज्ञात्वा महद्भूतं क्षुधाविष्टं द्विजर्षभम् ॥ न जहाति नगश्छायां पानार्थाय ततः परम् ॥ अपिबच्च स्नुतं तस्मादमृतं चैव भारत ॥ २८ ॥ एवं स वर्द्धितस्तत्र कुमारो निजचेतसि ॥ चिंतयामास विश्रब्धः किं मम ग्रहगोचरम् ॥२९॥ ततः क्रूरसमाचारः क्रूरं दृष्ट्वा निरीक्षितः ॥ पपात सहसा भूमौ शनैश्चारी शनैश्चरः ॥३०॥ उवाच च भयत्रस्तः कृतांजलिपुटस्तदा ॥ किं मयापकृतं विप्र पिप्पलाद महामुने ॥३१॥ चरन्वै गगनाग्रेन पातितो धरणीतले॥ सौरिणा ह्येवमुक्तस्तु पिप्पलादो महामुनिः ॥ ३२ ॥ क्रोधरूपोऽब्रवीद्वाक्यं तच्छृणुष्व नराधिप ॥ पितृमातृविहीनस्य मम बालस्य दुर्मते ॥ पीडां करोषि कस्मात्त्वं सौरे ब्रूहि ह्यशेषतः ॥ ३३ ॥ ॥ शनैश्चर उवाच ॥ ॥ क्रूरस्वभावः सहजो मम दृष्टिस्तथेदृशी ॥ मुंचस्व मां तथा कर्त्ता[1] यद्ब्रवीषि न संशयः ॥ ३४ ॥ ॥ पिप्पलाद उवाच ॥ ॥ अद्यप्रभृति बालानां वर्षादाषोडशाद्ग्रह ॥ पीडा त्वया न कर्त्तव्या एष ते समयः कृतः ॥ ३५ ॥ एवमस्त्विति चोक्त्वा स जगाम पुनरागतः ॥ देवमार्गं शनैश्चारी प्रणम्य ऋषिसत्तमम् ॥ ॥ ३६ ॥ गते चादर्शनं तत्र सोऽपि बालो महाग्रहः ॥ विचिंतयन्वै पितरं क्रोधेन कलुषीकृतः ॥ ३७ ॥ आग्नेयीं धारणां ध्यात्वा जन

१ कर्ता–करिष्यामि–इत्यर्थः । लुटो रूपमिदम् ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यामासपावकम् ॥ कृत्यामंत्रैर्जुहावाग्नौ कृत्या वै संभवत्विति ॥ ३८ ॥ तावज्झटिति सा कन्या ज्वालामालाविभूषिता ॥ हुतभुक्सदृशाकारा किं करोमीति चाब्रवीत् ॥ ३९ ॥ शोषयामि समुद्रान्किं चूर्णयामि च पर्वतान् ॥ अवनिं वेष्टयामीति पातये किं नभस्तलम् ॥ ४० ॥ कस्य मूर्ध्नि पतिष्यामि घातयामि च कं द्विज ॥ शीघ्रमादिश्यतां कार्यं मा मे कालात्ययो भवेत् ॥ ४१ ॥ तस्यास्तद्वचनं श्रुत्वा पिप्पलादो महातपाः ॥ क्रोधसंरक्तनयन इदं वचनमब्रवीत् ॥ ४२ ॥ महता क्रोधवेगेन मया त्वं चिंतिता शुभे ॥ पिता मे याज्ञवल्क्यश्च तस्य त्वं पत मा चिरम् ॥ ४३ ॥ एवमुक्त्वाऽगमच्छीघ्रं स्फोटयन्ती नभस्तलम् ॥ मिथिलास्थो महाप्राज्ञस्तपस्तेपे महामनाः ॥ ४४ ॥ यावत्पश्यति दिग्भागं ज्वलनार्कसमप्रभम् ॥ याज्ञवल्क्यो महातेजा महद्भूतमुपस्थितम् ॥ ४५ ॥ तद्दृष्ट्वा सहसायांतं भीतभीतो महामुनिः ॥ अनुयुक्तोऽथ भूतेन जनकं नृपतिं ययौ ॥ ४६ ॥ शरण्यं[1] मामनुप्राप्तं विद्धि त्वं नृपसत्तम ॥ महद्भूतभयाद्रक्ष यदि शक्नोषि पार्थिव ॥ ४७ ॥ ब्रह्मतेजोभवं भूतमनिवार्यं दुरासदम् ॥ न च शक्नोम्यहं त्रातुं राजा वचनमब्रवीत् ॥ ४८ ॥ ततश्चान्यं नृपश्रेष्ठं शरणार्थी महातपाः ॥ जगाम तेन मुक्तोऽसौ चेन्द्रस्य सदनं भयात् ॥४९॥ देवराज नमस्तेऽस्तु महाभूतभयान्नृप ॥ कम्पमानोऽब्रवीद्विप्रो रक्षस्वेति पुनःपुनः ॥ ५० ॥ तस्य तद्वचनं श्रुत्वा देवराजोऽब्रवीदिदम् ॥ न शक्नोमि परित्रातुं ब्रह्मकोपादहं मुने ॥ ५१ ॥ ततः स ब्रह्मभवनं ब्राह्मणो ब्रह्मवित्तमः ॥ जगाम विष्णुलोकं च तेनापीत्युक्त एव सः ॥ ५२ ॥ ततः स मुनिरुद्विग्नो निराशो जीविते नृप ॥ अनुगम्यमानो भूतेन अगच्छच्छंकरालयम् ॥ ५३ ॥ तस्य योगबलोपेतो महादेवस्य पांडव ॥ नखमांसांतरे गुप्तो यथा देवो न पश्यति ॥ ५४ ॥ तदंते चागमद्भूतं ज्वलनार्कसमप्रभम् ॥ मुंचमुंचेति पुरुषं देवदेवं महेश्वरम् ॥ ५५ ॥ एवमुक्तो महादेवस्तेन भूतेन भारत ॥ योगींद्रं दर्शयामास नखमांसांतरे तदा ॥ ५६ ॥ संस्थाप्य भूतं भूतेशः परमापद्गतं मुनिम् ॥ उवाच मा भैस्त्वं विप्र निर्गच्छस्व महामुने ॥५७॥ ततः सुसूक्ष्मदेहस्थं भूतं दृष्ट्वाब्रवीदिदम् ॥ किमस्य त्वं महाभूत करिष्यसि वदस्व मे ॥ ५८ ॥ ॥ कृत्योवाच ॥ ॥ क्रोधाविष्टेन देवेश पिप्पलादेन चिंतिता ॥ अस्य देहं हनिष्यामि हिंसार्थं विद्धि मां प्रभो ॥ ५९ ॥ एतच्छ्रुत्वा महादेवो भूतस्य वदनाच्च्युतम् ॥ कटिस्थं याज्ञवल्क्यं च मंत्रयामास मंत्रवित् ॥ ६० ॥ योगीश्वरेति विप्रस्य कृत्वा नाम युधिष्ठिर ॥ विसर्जयित्वा देवेशस्तत्रैवांतरधीयत ॥ ६१ ॥ प्रेषयित्वा तु तं भूतं पिप्पलादोपि दुर्मनाः ॥ पितृमातृसमुद्विग्नो नर्मदातटमाश्रितः ॥ ६२ ॥ एकांगुष्ठो निराहारो वर्षादाषोडशान्नृप ॥ तोषयामास देवेशमुमया

१ शरण्यम्—शरणे साधुम्—रक्षणकर्तारम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सह शंकरम् ॥ ६३ ॥ ततस्तत्तपसा तुष्टः शंकरो वाक्यमब्रवीत् ॥ ६४ ॥ ॥ ईश्वर उवाच ॥ ॥ परितुष्टोऽस्मि ते विप्र तपसानेन सुव्रत ॥ वरं वृणीष्व ते दद्मि मनसा चेप्सितं शुभम् ॥ ६५ ॥ ॥ पिप्पलाद उवाच ॥ ॥ यदि मे भगवांस्तुष्टो यदि देयो वरो मम ॥ अत्र संनिहितो देव तीर्थे भव महेश्वर ॥ ६६ ॥ एवमुक्तस्तथेत्युक्त्वा पिप्पलादं महामुनिम् ॥ जगामादर्शनं देवो भूतसंघसमन्वितः ॥ ६७ ॥ पिप्पलादो गते देवे स्नात्वा तत्र महांभसि ॥ स्थापयित्वा महादेवं जगामोत्तरपर्वतम् ॥ ६८ ॥ तत्र तीर्थे नरो भक्त्या स्नात्वा मंत्रयुतं नृप ॥ तर्पयित्वा पितॄन्देवान्पूजयेच्च महेश्वरम् ॥ ६९ ॥ अश्वमेधस्य यज्ञस्य फलं प्राप्नोत्यनुत्तमम् ॥ मृतो रुद्रपुरं याति नात्र कार्या विचारणा ॥ ७० ॥ अथ यो भोजयेद्विप्रान्पितॄनुद्दिश्य भारत ॥ तस्य ते द्वादशाब्दानि मोदंते दिवि तर्पिताः ॥ ७१ ॥ संन्यासेन तु यः कश्चित्तत्र तीर्थे तनुं त्यजेत् ॥ अनिवर्त्तिका गतिस्तस्य रुद्रलोकात्कदाचन ॥ ७२ ॥ एतत्सर्वं समाख्यातं यत्पृष्टं हि त्वयाऽनघ ॥ माहात्म्यं पिप्पलादस्य तीर्थस्योत्पत्तिरेव च ॥ ७३ ॥ एतत्पुण्यं पापहरं धन्यं दुःस्वप्ननाशनम् ॥ पठतां शृण्वतां चैव सर्वपापक्षयो भवेत् ॥ ७४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये पिप्पलादतीर्थमाहात्म्यवर्णनंनाम द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥ ॥ छ ॥ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र विमलेश्वरमुत्तमम् ॥ तत्र देवशिला रम्या स्वयं देवैर्विनिर्मिता ॥ १ ॥ तत्र स्नात्वा तु यो भक्त्या ब्राह्मणान्पूजयेन्नृप ॥ स्वल्पेनापि हि दानेन तस्य चांतो न विद्यते ॥२॥ ॥ युधिष्ठिर उवाच ॥ ॥ कानि दानानि विप्रेंद्र शस्तानि धरणीतले ॥ यानि दत्त्वा नरो भक्त्या मुच्यते सर्वपातकैः ॥ ३ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ सुवर्णं रजतं ताम्रं मणिमौक्तिकमेव च ॥ भूमिदानं च गोदानं मोचयत्यशुभान्नरम् ॥ ४ ॥ तत्र तीर्थे तु यः कश्चित्कुरुते प्राणसंक्षयम् ॥ रुद्रलोके वसेत्तावद्यावदाभूतसंप्लवम् ॥ ५ ॥ ततः पुष्करिणीं गच्छेत्सर्वपापक्षयंकरीम् ॥ तत्र स्नात्वार्चयेद्देवं तेजोराशिं दिवाकरम् ॥६॥ ऋचमेकां जपेत्साम्नः सामवेदफलं लभेत् ॥ यजुर्वेदस्य जपनादृग्वेदस्य तथैव च ॥ ७॥ अक्षरं वा जपेन्मंत्रं ध्यायमानो दिवाकरम् ॥ आदित्यहृदयं जप्त्वा मुच्यते सर्वकिल्बिषैः ॥८॥ तत्र तीर्थे तु यः स्नात्वा विधिना जयेद्द्विजान् ॥ तस्य कोटिगुणं पुण्यं जायते नात्र संशयः ॥ ९ ॥ अनाशकेनाग्निगत्या जले वा देहपातनात् ॥ तस्मिंस्तीर्थे मृतो यस्तु स याति परमां गतिम् ॥ १० ॥ ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा नृपसत्तम ॥ विहितं कर्म कुर्वाणः स गच्छेत्परमां गतिम् ॥ ११ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ व्याधिं सत्त्वक्षयं मोहं ज्ञात्वा वर्णा द्विजोत्तम ॥ पापेभ्यो विप्रमुच्यंते केन तत्साधनं वद ॥१२॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तिलो



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दकी तिलस्नायी कामक्रोधविवर्जितः ॥ ब्राह्मणोऽनशनैः प्राणांस्त्यजल्लँभति सद्गतिम् ॥१३॥ संग्रामे सद्गतिं तात क्षत्रियो निधने लभेत् ॥ तदभा वान्महाप्राज्ञ सेवमानो लभेदिति ॥ १४ ॥ व्याधिग्रहगृहीतो वा वृद्धो वा विकलेंद्रियः ॥ आत्मानं दाहयित्वाग्नौ विधिना सद्गतिं लभेत् ॥ १५ ॥ वैश्योपि हि त्यजन्प्राणानेवं वै शुभभाग्भवेत् ॥ जले वा शुद्धभावेन त्यक्त्वा प्राणाञ्छिवो भवेत् ॥१६॥ शूद्रोऽपि द्विजशुश्रूषुस्तोषयित्वा महेश्वरम् ॥ विमुच्य नान्यथा पापः पतते नरके ध्रुवम् ॥ १७ ॥ अथवा प्रणवाशक्तो द्विजेभ्यो गुरवे तथा ॥ पंचाग्नौ शोषयेद्देहमापृच्छ्य द्विजसत्तमान् ॥ ॥ १८ ॥ शांतदांतजितक्रोधाञ्छास्त्रयुक्तान्विचक्षणान् ॥ तेषां चैवोपदेशेन करीषाग्निं प्रसाधयेत् ॥ १९ ॥ एवं वर्णायथात्वेन मूढाहंकारमोहिताः ॥ पतंति नरके घोरे यथांधो गिरिगह्वरे ॥२०॥ ये शास्त्रविधिमुत्सृज्य वर्त्तंते कामचारतः ॥ कृमियोनिं प्रपद्यंते तेषां पिंडो न च क्रिया ॥ ॥२१॥ श्रुतिस्मृत्युदितं धर्मं त्यक्त्वा यथेच्छाचार सेविनः ॥ अष्टाविंशतिर्वै कोट्यो नरकाणां युधिष्ठिर ॥२२॥ प्रत्येकं वा पतंत्येते मग्ना नरकसागरे ॥ दुर्ल्लभं मानुषं जन्म बहुधर्मार्जितं नृप ॥ २३ ॥ तल्लब्ध्वा मदमात्सर्यं यो वै त्यजति मानवः ॥ संनियम्य सदात्मानं ज्ञानचक्षुर्नरो हि सः ॥ २४ ॥ अज्ञानतिमिरांधस्य ज्ञानांजनशलाकया ॥ २५ ॥ यस्य नोन्मीलितं चक्षुर्ज्ञेयो जात्यंध एव सः ॥ एतत्ते कथितं सर्व्वं यत्पृष्टं नृपसत्तम ॥ २६ ॥ तथानिष्टतराणां हि रुद्रस्य वचनं यथा ॥ नर्मदा सरितां श्रेष्ठा रुद्रदेहाद्विनिःसृता ॥ २७ ॥ तारयेत्सर्वभूतानि स्थावराणि चराणि च ॥ सर्वदेवाधिदेवेन ईश्वरेण महात्मना ॥ २८ ॥ लोकानां च हितार्थाय महापुण्यावतारिता ॥ मानसं वाचिकं पापं स्नानान्नश्यति कर्मजम् ॥ २९ ॥ रुद्रदेहाद्विनिष्क्रांता तेन पुण्यतमा हि सा ॥ प्रातरुत्थाय यो नित्यं भूमिमाक्रम्य भक्तितः ॥ ३० ॥ एतन्मंत्रं जपेत्तात स्नानस्य लभते फलम् ॥ नमः पुण्यजले देवि नमः सागरगामिनि ॥ ३१ ॥ नमोस्तु पापनिर्मोचे नमो देवि वरानने ॥ ३२ ॥ नमोस्तु ते ऋषिवरसंघसेविते नमोऽस्तु ते त्रिनयनदेहनिःसृते ॥ नमोऽस्तु ते सुकृतवतां सदा वरे नमोऽस्तु ते सततपवित्रपावनि ॥ ३३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे विमलेश्वरतीर्थमाहात्म्यवर्णनंनाम त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तीर्थानां परमं तीर्थं तच्छृणुष्व नराधिप ॥ रेवाया दक्षिणे कूले निर्मितं शूलपाणिना ॥ १ ॥ मोक्षार्थं मानवेंद्राणां निर्मितं नृपसत्तम ॥ ॥ युधिष्ठिर उवाच ॥ ॥ श्रुता मे विविधा धर्मास्तीर्थानि विविधानि च ॥ दानधर्माः समस्ताश्च त्वत्प्रसादाद्द्विजोत्तम ॥ २ ॥ अन्यच्च

१ मूढाः—अहंकारमोहिताः—इति पदच्छेदः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



श्रोतुमिच्छामि संसारश्छिद्यते यथा ॥ पुनरागमनं नास्ति मोक्षप्राप्तिर्भवेद्यथा ॥ ३ ॥ एतदाख्याहि मे सर्वं प्रसादाद्द्विजसत्तम ॥ ४ ॥ ॥ ॥ मार्कंडेय उवाच ॥ ॥ शृणुष्वैकमना भूत्वा तीर्थात्तीर्थांतरं महत् ॥ श्रुते यस्य प्रभावे तु मुच्यते चाब्दिकादघात् ॥ ५ ॥ वाचिकैर्मानसैर्वापि शारीरैश्च विशेषतः ॥ कीर्त्तनात्तस्य तीर्थस्य मुच्यते सर्वपातकैः ॥ ६ ॥ पंचक्रोशप्रमाणं तु तच्च तीर्थं महीपते ॥ भुक्तिमुक्तिप्रदं दिव्यं प्राणिनां पापकर्मिणाम् ॥ ७ ॥ रेवाया दक्षिणे कूले पर्वतो भृगुसंज्ञितः ॥ तस्य मूर्ध्नि च तत्तीर्थं स्थापितं चैव शंभुना॥८॥शूलभेदेति विख्यातं त्रिषु लोकेषु भूपते ॥तत्र स्थिताश्च ये वृक्षास्तीर्थाच्चैव चतुर्दिशम्॥९॥पतिता निलयं यांति रुद्रस्य नात्र संशयः॥ मृतास्तत्रैव ये केचिज्जन्तवो भुवि पक्षिणः ॥ १० ॥ ते यांति परमं लोकं तत्र तीर्थे न संशयः ॥ पातालान्निःसृता गंगा भोगवतीतिसंज्ञिता ॥११॥ निष्कांता शूलभेदाच्च सर्वपापक्षयंकरी ॥ या सा गीर्वाणनाम्न्यन्या वहेत्पुण्या महानदी ॥ १२ ॥ पतिता कुण्डमध्ये तु यत्र भिन्नं त्रिशूलिना ॥ शंभुना च पुरा तात उत्पाद्य च सरस्वती ॥ १३ ॥ सा तत्र पतिता राजन्प्राचीनाघविमोचिनी ॥ भास्वत्या त्रितयं यत्र शिला गीर्वाणसंज्ञिता ॥ १४ ॥ तत्र तीर्थे च तत्तीर्थं न भूतं न भविष्यति ॥ केदारं च प्रयागं च कुरुक्षेत्रं गया तथा ॥ १५ ॥ अन्यानि च सुतीर्थानि कलां नार्हंति षोडशीम् ॥ पंच स्थानानि तीर्थानि पृथग्भूतानि यानि च ॥ १६ ॥ वक्ष्यामि च समासेन एकैकं च पृथक्पृथक् ॥ गया नाभ्यां यथा पुण्या चक्रतीर्थं च तत्समम् ॥ १७ ॥ धर्मारण्ये यथा कूपं शूलभेदं च तत्समम् ॥ ब्रह्मयूपं यथा पुण्यं देवनद्यास्तथैव च ॥ १८ ॥ यथा गयाशिरः पुण्यं सुराणां च यथा शिला ॥ यथा च पुष्करं स्थानं मार्कंडह्रद एव च ॥ १९॥ दत्त्वा पिंडोदकं तत्र पितॄणां च तथाक्षयम् ॥ यस्तत्र कुरुते श्राद्धं तोयं पिबति नित्यशः ॥ मुच्यते सर्वपापैस्तु उरगः कंचुकैरिव ॥ अनिंद्यान्पूजयेद्विप्रान्दंभक्रोधविवर्जितान् ॥ २० ॥ त्रयोदशदिनं दानं त्रयोदशगुणं भवेत् ॥ अभ्यर्चितं सुरं दृष्ट्वा गणनाथं गजाननम् ॥ २१ ॥ सर्व्वे विघ्ना विनश्यंति दृष्ट्वा कम्बलक्षेत्रपम् ॥२२॥ पूजयेत्परया भक्त्या शूलपाणिं महेश्वरम् ॥ ॥ २३ ॥ देवस्य पूर्वभागे तु उमा पूज्या प्रयत्नतः ॥ मार्कंडेशं ततो भक्त्या पूजयेद्गुहवासिनम् ॥ २४ ॥ मुच्यंते पातकैः सर्व्वैरज्ञानज्ञानसंचितैः ॥ गुहामध्ये प्रविष्टस्तु जपेत्सूक्तं तु त्र्यक्षरम् ॥ २५ ॥ नीलपर्वतजं पुण्यं षष्ठांशेन लभेत सः ॥ त्रिनरास्तत्र तिष्ठन्ति सादित्यमरुतैः सह ॥ २६ ॥ सर्वदेवमयं स्थानं कोटिलिंगमनुत्तमम् ॥ यथा नदीनदाः सर्वे सागरे यांति संक्षयम् ॥ २७ ॥ तथा पापानि नश्यंति शूलभेदस्य दर्शनात् ॥

१ स्वयं देवेन–इ० पा० । २ वचनं यथा–इ० पा० । ३ उत्पाद्य–उत्पन्ना भूत्वा–इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्यक्षो दृश्यतेऽद्यापि प्रत्ययो ह्यवनीपते ॥ २८ ॥ विस्फुलिंगा लिंगमध्ये स्पंदंते स्नानयोगतः ॥ द्वितीयः प्रत्ययस्तत्र तैलबिंदुर्न्न सर्पति ॥ ॥ २९ ॥ एवं हि प्रत्ययस्तत्र शूलभेदप्रभावजः ॥ यः स्मरेच्छूलभेदं तु त्रिकालं नित्यमेव च ॥ ३० ॥ स पूतश्च भवेत्साक्षात्सबाह्याभ्यंतरो नृप ॥ न कस्यचिन्मया ख्यातं पृष्टोऽहं त्रिदशैरपि ॥ ३१ ॥ गुह्याद्गुह्यतरं तीर्थं सदा गोप्यं कृतं मया ॥ सर्वपापहरं पुण्यं सर्वदोषघ्नमुत्तमम् ॥ ३२ ॥ सर्वतीर्थमयं तीर्थं शूलभेदं जनेश्वर ॥ श्रुते यस्य प्रभावे तु मुच्यते सर्वपातकैः ॥ ३३ ॥ शूलभेदं मया तात संक्षेपात्कथितं तव ॥ यः शृणोति नरो भक्त्या मुच्यते सर्वपातकैः ॥ ३४ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे शूलभेद प्रशंसावर्णनंनाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ एष एव पुरा प्रश्नः परिपृष्टो महेश्वरम् ॥ राज्ञा चोत्तानपादेन ऋषिदेवसमागमे ॥ १ ॥ ॥ उतानपाद उवाच ॥ ॥ इदं तीर्थं महापुण्यं सर्वदेवमयं परम् ॥ गुह्याद्गुह्यतरं स्थानं न दृष्टं न श्रुतं हर ॥२॥शूलभेदं कथं जातं केनैवोत्पादितं पुरा ॥ माहात्म्यं तस्य तीर्थस्य विस्तराच्छंस मे प्रभो ॥ ३ ॥ ॥ ईश्वर उवाच ॥ ॥ आसीत्पुरा महावीर्यो दानवो बलदर्पितः ॥ मर्त्त्ये न तादृशः कश्चिद्विक्रमेण बलेन वा ॥ ४ ॥ सूनुर्ब्रह्मसुतस्याऽयमंधकोनाम दुर्मदः ॥ निजस्थाने वसन्पापः कुर्वन्राज्य मकण्टकम् ॥ ५ ॥ हृष्टपुष्टो वसन्मर्त्त्ये स सुरैर्नाभिभूयते ॥ भवनं तस्य पापस्य वह्नेरुपवनं यथा ॥ ६ ॥ एतस्मिन्नंधकः काले चिंतयामास भारत ॥ तोषयामि महादेवं येन सानुग्रहो भवेत् ॥ ७ ॥ प्रार्थयामि वरं दिव्यं यो मे मनसि वर्त्तते ॥ परं स निश्चयं कृत्वा सोंऽधको निर्गतो गृहात् ॥ ८ ॥ रेवातटं समासाद्य दानवस्तपसि स्थितः ॥ उग्रं तपश्चचाराऽसौ दारुणं लोमहर्षणम् ॥ ९ ॥ दिव्यं वर्षसहस्रं स निराहारोऽ भवत्ततः ॥ द्वितीयं तु सहस्रं स न्यवसद्वारिभोजनः ॥१०॥ तृतीयं तु सहस्रं स धूमपानरतोऽभवत् ॥ चतुर्थं वर्षसाहस्रं योगाभ्यासेन संस्थितः ॥ ॥ ११ ॥ कोपीह नेदृशं चक्रे तपः परमदारुणम् ॥ अस्थिचर्माऽवशेषोऽसौ यावत्तिष्ठति भारत ॥ १२ ॥ तस्य मूर्ध्नि ततो राजन्धूमवर्त्तिर्विनिः सृता ॥ देवलोकमतीत्याऽसौ कैलासं व्याप्य संस्थिता ॥ १३ ॥ तावद्देवसमीपस्था उमा वचनमब्रवीत ॥ कोऽस्त्ययं मानुषे लोके तपसोग्रेण संस्थितः ॥ १४ ॥ चतुर्वर्षसहस्राणि व्यतीयुः परमेश्वर ॥ न केनाऽपीदृशं तप्तं तपो दृष्टं श्रुतं तथा ॥ १५ ॥ अवज्ञां कुरुषे देव किमत्र निय माऽन्विते ॥ सर्वस्य दत्से शीघ्रं त्वमल्पेन तपसा विभो ॥ १६ ॥ नाक्षक्रीडां करिष्येऽद्य त्वया सह महेश्वर ॥ यावन्नोत्थाप्यते ह्येष दानवो भक्तवत्सल ॥ १७ ॥ ॥ ईश्वर उवाच ॥ ॥ साधुसाधु महादेवि सर्वलक्षणलक्षिते ॥ अहं तं न विजानामि क्लिश्यंतं दानवेश्वरम् ॥ १८ ॥ योग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



भ्यासे स्थितो भद्रे ध्यायंस्तत्परमं पदम् ॥ तत्रागच्छ मया सार्द्धं यत्र तप्यत्यसौ तपः ॥ १९ ॥ उमया सहितो देवो गतस्तत्र महेश्वरः ॥ अस्थि
चर्मावशेषस्तु दृष्टो देवेन शम्भुना ॥ २० ॥ प्रत्युवाच प्रसन्नोऽसौ देवदेवो महेश्वरः ॥ भोभोः कष्टं कृतं भीमं दारुणं लोमहर्षणम् ॥ २१ ॥ ईदृशं
च तपो घोरं कस्माद्वत्स त्वया कृतम् ॥ वरं दास्याम्यहं वत्स यस्ते मनसि वर्त्तते ॥ २२ ॥ ॥ अंधक उवाच ॥ ॥ यदि तुष्टोऽसि मे देव वरदो
यदि शंकर ॥ सुरान्सर्वान्विजेष्यामि त्वत्प्रसादान्महेश्वर ॥ २३ ॥ ॥ ईश्वर उवाच ॥ ॥ स्वप्नेऽपि त्रिदशाः सर्व्वे न योद्धव्याः कदाचन ॥
असंभाव्यं न वक्तव्यं मनसो यन्न रोचते ॥ २४ ॥ अन्यं किमपि याचस्व यस्ते मनसि वर्त्तते ॥ स्वर्गे वा यदि वा मर्त्ये पातालेषु च संस्थि
तान् ॥ २५ ॥ मर्त्त्येषु विविधान्भोगान्भोक्ष्यसि त्वं यथेप्सितान् ॥ कुरु निष्कण्टकं राज्यं स्वर्गे देवपतिर्यथा ॥ २६ ॥ देवस्य वचनं श्रुत्वा
सोंऽधको विमनाः स्थितः ॥ वृथा क्लेशश्च मे जातो न किंचित्साधितं मया ॥ २७ ॥ निश्वासं परमं मुक्त्वा निपपात धरातले ॥ मूलच्छिन्नो
यथा वृक्षो निरुच्छ्वासस्तदाभवत् ॥ २८ ॥ मूर्च्छापन्नं ततो दृष्ट्वा देवी वचनमब्रवीत् ॥ यं कामं कामयत्येष तमस्मै देहि शंकर ॥ २९ ॥ भक्तानुपेक्ष
माणस्य तवाकीर्त्तिर्भविष्यति ॥ ३० ॥ ॥ ईश्वर उवाच ॥ ॥ ॥ यदि दास्ये वरं देवि इच्छाभूतं कदाचन ॥ ततो न मंस्यते विष्णुं न
ब्रह्माणं न मामपि ॥ ३१ ॥ उच्चत्वमाप्तो देवेशिअ न्यानपि सुरासुरान् ॥ ३२ ॥ ॥ देव्युवाच ॥ ॥ कमप्युपायमाश्रित्य उत्थापय महे
श्वर ॥ विष्णुवर्जं सुरान्सर्वाञ्जयस्वेति वरं वद ॥ ३३ ॥ ॥ ईश्वर उवाच ॥ ॥ उपायः शोभनो देवि यो मे मनसि वर्त्तते ॥ तमेवास्मै प्रदा
स्यामि यस्त्वया कथितो वरः ॥ ३४ ॥ ततोऽमृतेन संसिक्तः स्वस्थोऽभूत्तत्क्षणादयम् ॥ तथा पुनर्नवो जातः सर्वाऽवयवशोभितः ॥ ३५ ॥ शृणु
ष्वैकमना भूत्वा गृहाण वरमुत्तमम् ॥ विष्णुवर्जं प्रदास्यामि यत्तवाभिमतं प्रियम् ॥ ३६ ॥ सर्वं च सफलं तुभ्यं मा धर्मस्तेऽन्यथा भवेत् ॥ ददा
मीति वरं तुभ्यं मन्यसे यदि चासुर ॥ ३७ ॥ विष्णुवर्जं सुरान्सर्वाञ्जेष्यसि त्वं च मां विना ॥ ३८ ॥ ॥ अन्धक उवाच ॥ ॥ भवत्वेव
मिति प्राह बलमास्थाय केवलम् ॥ विष्णुवर्जं विजेष्येहं स्वबलेन महेश्वर ॥ ३९ ॥ कृतार्थोऽहं हि संजात इत्युक्त्वा[1] प्रणतिं गतः ॥ गच्छ देवोमया
सार्द्धं कैलासशिखरं वरम् ॥ ४० ॥ वृषपुंगवमारुह्य देवोसावुमया सह ॥ वरं दत्त्वा स तस्यैवं तत्रैवांतरधीयत ॥ ४१ ॥ इति श्रीस्कांदे महापुराण
॥ ४४ ॥ एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे अंधकवरप्रदानवर्णनंनाम पंचचत्वारिंशोऽध्यायः ॥ ४५ ॥ ॥ छ ॥ ॥

१ इत्युक्त्वा—इत्यव्याहारः।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ स दानवो वरं लब्ध्वा जगाम स्वपुरं प्रति ॥ ददर्श स्वपुरं राजञ्च्छोभितं चित्रचत्वरैः ॥ १ ॥ उद्यानैश्चैव विविधैः कदलीखंडमंडितैः ॥ पनसैर्बकुलैश्चैवाम्रातैराम्रैश्च चंपकैः ॥ २ ॥ अशोकैर्नालिकेरैश्च मातुलिंगैः सदाडिमैः ॥ नानावृक्षैश्च शोभाढ्यं तडागैरुपशोभितम् ॥ ३ ॥ देवतायतनैर्दिव्यैर्ध्वजमालासुशोभितैः ॥ वेदाध्ययननिर्घोषैर्मंगलाद्यैर्विनादितम् ॥ ४ ॥ प्राविशद्भवने दिव्ये कांचने रुक्ममालिनि ॥ अपश्यत्स सुतान्भार्याममात्यान्दासभृत्यकान् ॥ ५ ॥ ततो जयप्रदान्सर्वान्नितश्चेतश्च धावतः ॥ हृच्छोभां च प्रकुर्वाणान्वैजयंतीभिरुच्चकैः ॥ ६ ॥ केचित्तोरणमाबद्ध्य केचित्पुष्पाण्यवाकिरन् ॥ मातुलिंगकराश्चान्ये धावंति ह्यंधकं प्रति ॥ ७ ॥ पुरे जनाश्च दृश्यंते भाजनैरन्नपूरितैः ॥ पूर्णहस्ताः प्रदृश्यंते तत्रैव बहवो जनाः ॥ ८ ॥ साक्षतैर्भाजनैस्तत्र शतसाहस्रयोषितः ॥ मंत्रान्पठंति विप्राश्च मंगलान्यपि योषितः ॥ ॥ ९ ॥ अमात्याश्चैव भृत्याश्च गजांश्चाढौकयंति च ॥ वर्धापयंति ते सर्वे येःकेचित्पुरवासिनः ॥ १० ॥ हृष्टस्तुष्टोऽवसत्तत्र सचिवैः सह सोंऽधकः ॥ ददर्श स जगत्सर्वं तुरंगांश्च पदातिकान् ॥ ११ ॥ तथैव विविधान्कोशांस्तत्र कांचनपूरितान् ॥ महिषीर्गा वृषांश्चैवापश्यच्छत्राण्यनेकधा ॥ १२ ॥ स एवमंधकस्तत्र कियंतं कालमावसत् ॥ हृष्टस्तुष्टो वसन्मर्त्ये स सुरैर्नाभ्यभूयत ॥ १३ ॥ वरं लब्धं तु तं ज्ञात्वा शंकिताः स्वर्गवासिनः ॥ एकीभूताश्च ते सर्वे वासवं शरणं गताः ॥ १४ ॥ ॥ शक्र उवाच ॥ ॥ कथमागमनं वोऽत्र सर्वेषामपि नाकिनाम् ॥ कस्माद्वो भयमुत्पन्नमागताः शरणं कथम् ॥ १५ ॥ ततस्ते ह्यमराः सर्वे शक्रमेतद्वचोऽब्रुवन् ॥ १६ ॥ ॥ देवा ऊचुः ॥ ॥ सुरनाथांधकोनाम दैत्यः शंभुवरोर्जितः ॥ अजेयः सर्वदेवानां किं नु कार्यमतः परम् ॥ १७ ॥ तत्त्वं चिंतय देवेश क उपायो विधीयताम् ॥ इत्थं वदन्ति ते देवाः शक्राग्रे मन्त्रणोद्यताः ॥ १८ ॥ मन्त्रयन्ति च यावद्वै तावच्चारमुखेरितम् ॥ ज्ञात्वा तत्र स देवौघं दानवो निर्गतो गृहात् ॥ १९ ॥ एकाकी स्यंदनाऽऽरूढ आयुधैर्बहुभिर्वृतः ॥ दुर्गमं मेरुपृष्ठं स लीलयैव गतो नृप ॥ २० ॥ स्वर्णप्राकारसंयुक्तं शोभितं विविधाश्रमैः ॥ दुर्गमंःशत्रुवर्गस्य तदा पार्थिवसत्तम ॥ २१ ॥ प्रविवेशाऽऽसुरस्तत्र लीलया स्वगृहे यथा ॥ वृत्रहा भयमापन्नः स्वकीयं चासनं ददौ ॥ २२ ॥ उपविष्टोंऽधकस्तत्र शक्रस्यैवाऽऽसने शुभे ॥ आस्थानं कलयामास सर्वतस्त्रिदशावृतम् ॥ २३ ॥ ॥ शक्र उवाच ॥ किं तवाऽऽगमनं चाऽत्र किं कार्यं कथयस्व मे ॥ यदस्मदीयं वित्तं हि तत्ते दास्यामिःदानव ॥ २४ ॥ ॥ अंधक उवाच ॥ ॥ नाऽहं वै कामयेकोशं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न गजांश्च सुरेश्वर ॥ स्वकीयं दर्शयस्वाऽद्य स्वर्गशृंगारभूषितम् ॥ २५ ॥ ऐरावतं महानागं तं चैवोच्चैःश्रवोहयम् ॥ उर्वश्यादीनि रत्नानि मम दर्शय
गोपते[1] ॥ २६ ॥ पारिजातकपुष्पाणि वृक्षजातीननेकशः ॥ वादित्राणि च सर्वाणि दर्शयस्व शचीपते ॥ २७ ॥ तस्य तद्वचनं श्रुत्वा शक्रश्चिंति
तवानिदम् ॥ योऽसुं निहंति पाप्मानं न तं पश्यामि कर्हिचित् ॥ २८ ॥ नास्ति रक्षाप्रदः कश्चित्स्वर्गलोकस्य दुःखिनः ॥ भयत्रस्तो ददावन्यद्वादि
त्राद्यप्सरोगणैः ॥ २९ ॥ रंगभूमावुपाविश्य कारयामास तांडवम् ॥ उपविष्टाः सुराः सर्वे यममारुतकिन्नराः ॥ ३० ॥ उर्वश्याद्या अप्सरसो गीतवा
दित्रयोगतः ॥ ननृतुः पुरतस्तस्य सर्वा एकैकशो नृप ॥ ३१ ॥ न व्यश्राम्यत तच्चित्तं दृष्ट्वा चाप्सरसस्तदा ॥ शचीं प्रति मनस्तस्य सकाममभव
न्नृप ॥ ३२ ॥ गृहीत्वा शक्रभार्यां स प्रस्थितः स्वपुरं प्रति ॥ ततः प्रववृते युद्धमंधकस्य सुरैः सह ॥ ३३ ॥ तेन देवागणाः सर्व्वे ध्वस्ताः पार्थिवस
त्तम ॥ संग्रामे विविधैः शस्त्रैश्चक्रवज्रादिभिर्घनैः ॥ ३४ ॥ संतापिताः सुराः सर्व्वे क्षयं नीता ह्यनेकशः ॥ सर्व्वेऽपि मरुतस्तेन भग्नाः संग्राममूर्द्धनि
॥ ३५ ॥ यथा सिंहोगजान्सर्वान्विचित्य विचरेद्वनम् ॥ तद्वदेकेन ते देवा जिताः सर्वे पराङ्मुखाः ॥ ३६ ॥ बालोऽधिपो यथा ग्रामे स्वेच्छया पीड
येज्जनान् ॥ स्वैरमाक्रम्य गृह्णाति कोशवासांसि चाऽसकृत् ॥ ३७ ॥ गतं न पश्यत्यात्मानं प्रजासंतापनेन च ॥ गृहीत्वा शक्रभार्यां स गतो वै
दानवोत्तमः ॥ ३८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे शूलभेदमाहात्म्ये शचीहरण
वर्णनंनाम षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ गीर्वाणाश्च ततः सर्वे ब्रह्माणं शरणं गताः ॥ गजैर्गि
रिवराकारैर्हयैश्चैव गजोपमैः ॥ १ ॥ स्यंदनैर्नगराकारैः सिंहशार्दूलयोजितैः ॥ कच्छपैर्महिषैश्चान्यैर्मकरैश्च तथाऽपरे ॥ २ ॥ ब्रह्मलोकमनुप्राप्ता
देवाः शक्रपुरोगमाः॥ दृष्ट्वा पद्मोद्भवं देवं साष्टांगं प्रणताः सुराः ॥ ३ ॥ ॥ देवा ऊचुः ॥ ॥ जय देव जगद्वंद्य जय संसृतिकारक ॥ पद्मयोने सुर
श्रेष्ठ त्वामेव शरणं गताः ॥ ४ ॥ सोद्वेगं भाषितं श्रुत्वा देवानां भावितात्मनाम् ॥ मेघगंभीरया वाचा देवराजमुवाच ह ॥ ५ ॥ किमत्राऽऽगमनं
देवाः सर्वेषां वै विवर्णता ॥ केनापमानिताः सर्वे शीघ्रं मे कथ्यतां स्वयम् ॥ ६ ॥ ॥ देवा ऊचुः ॥ ॥ अंधकाख्यो महादैत्यो बलवान्पद्मसंभव ॥
॥ ४५ ॥ तेन देवगणाः सर्वे धनरत्नैर्वियोजिताः ॥ ७ ॥ हत्वा देवगणांस्तावदसिचक्रपरश्विधैः ॥ गृहीत्वा शक्रभार्यां स दानवोऽपि गतो बलात् ॥ ८ ॥
देवानां वचनं श्रुत्वा ब्रह्मा लोकपितामहः ॥ चिंतयामास राजेंद्र वधार्थं दानवस्य ह ॥ ९ ॥ अवध्यो दानवः पापः सर्वेषां वो दिवौकसाम् ॥

१ गोपते—स्वर्गपते—इत्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स त्राता सर्वजगतां नान्यो विद्येत कुत्रचित् ॥ १० ॥ एवमुक्ताः सुराः सर्व्वे ब्रह्मणा तदनंतरम् ॥ ब्रह्माणं ते पुरस्कृत्य गता यत्र स केशवः॥ तुष्टुवु र्विविधैः स्तोत्रैर्ब्रह्माद्याश्चक्रपाणिनम् ॥ ११ ॥ ॥ देवा ऊचुः ॥ ॥ जय त्वं देवदेवेश लक्ष्म्या वक्षस्थलाऽऽश्रितः ॥ असुरक्षय देवेश वयं ते शरणं गताः ॥ १२ ॥ स्तूयमानः सुरैः सर्वैर्ब्रह्माद्यैश्च जनार्दनः ॥ संप्रहृष्टमना भूत्वा सुरसंघमुवाच ह ॥ १३ ॥ ॥ श्रीवासुदेव उवाच ॥ ॥ स्वागतं देवविप्राणां सुप्रभाताऽद्य शर्वरी ॥ किं कार्यं प्रोच्यतां क्षिप्रं कस्य रुष्टा दिवौकसः ॥१४॥ किं दुःखं कश्च संतापः कुतो वा भयामागतम् ॥ कथयंतु महाभागाः कारणं यन्मनोगतम् ॥ १५ ॥ पराभवः कृतो येन सोऽद्य यातु यमालयम् ॥ एवमुक्तास्तु कृष्णेन कथयामासुरस्य तत् ॥ ॥ १६ ॥ दर्शयंतः स्वकान्देहाँल्लज्जमाना ह्यधोमुखाः ॥ हृतराज्या ह्यंधकेन कृता निस्तेजसः प्रभो ॥ १७ ॥ पितेव पुत्रं परिरक्ष देव जहींद्र शत्रुं सह पुत्रपौत्रैः ॥ तथेति चोक्तः कमलासनेन सुरासुरैर्वंदितपादपद्मः ॥ १८ ॥ शंखं चक्रं गदां चापं संगृह्य परमेश्वरः ॥ उत्थितो भोगपर्यंका देवानां पुरतस्तदा ॥ १९ ॥ ॥ श्रीवासुदेव उवाच ॥ ॥ पाताले यदि वा मर्त्ये नाके वा यदि तिष्ठति ॥ तं हनिष्याम्यहं पापं येन संतापिताः सुराः ॥ २० ॥ स्वं स्थानं यांतु गीर्वाणाः संतुष्टा भावितौजसः ॥ विष्णोस्तद्वचनं श्रुत्वा ब्रह्माद्यास्ते सवासवाः ॥ २१ ॥ स्वयानैस्तु हरिं नत्वा हृदि तुष्टा दिवं ययुः ॥२२॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे गीर्वाण स्वर्गमनवर्णनंनाम सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ ॥ छ ॥ ॥ उत्तानपाद उवाच ॥ ॥ कस्मिन्स्थानेऽवसद्देव सोंऽधको दैत्यपुंगवः ॥ सर्वान्देवांश्च निर्जित्य कस्मिन्स्थाने समास्थितः ॥ १ ॥ ॥ श्रीमहेश उवाच ॥ ॥ प्रविष्टो दानवो यत्र कथयामि नराधिप ॥ पाताललोकमा श्रित्य कन्याविध्वंसते तु सः ॥ २ ॥ तत्र स्थितं तं विज्ञाय चापमादाय केशवः ॥ व्यसृजद्बाणमाग्नेयं दह्यतामिति चिंतयन् ॥ ३ ॥ दह्यमानोऽ ग्निना सोऽपि वारुणास्त्रं स संदधे ॥ वारुणास्त्रेण महता आग्नेयं शमितं तदा ॥ ४ ॥ ततोऽसौ चिंतयामास केन बाणो विसर्ज्जितः ॥ कस्यैषा पौरुषी शक्तिः को यास्यति यमालयम् ॥ ५ ॥ ततोंऽधको मृधे क्रुद्धो बाणमार्गेण निर्गतः ॥ स दृष्ट्वा बाणमार्गेण चापहस्तं जनार्दनम् ॥ ६ ॥ ॥ ॥ अंधक उवाच ॥ ॥ न शर्म्म लप्स्यसे ह्यद्य मया दृष्ट्याऽभिवीक्षितः ॥ न शक्नोषि तथा गन्तुं नागः शार्दूलदर्शनात् ॥ ७ ॥ अगाच्छति यथा भक्ष्यं मार्जारस्य च मूषिकः ॥ न शक्नोषि तथा यातुं संस्थितस्त्वं ममाऽग्रतः ॥ ८ ॥ अहं त्वां प्रेषयिष्यामि यममार्गे सुदारुणे ॥ अहमन्वे षयिष्यामि किल यास्यामि ते गृहम् ॥ ९ ॥ उपनीतोऽसि कालेन संग्रामे मम केशव ॥ ये त्वया निर्ज्जिताः पूर्वं दानवा अप्यनेकशः ॥१०॥ न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



भवंति पुमांसस्ते स्त्रियस्ताश्चैव केशव ॥ परं न शस्त्रसंग्रामं करिष्यामि त्वया सह ॥ ११ ॥ वदतो दानवेंद्रस्य न चुकोप स केशवः ॥ अयुध्यमानं तं दृष्ट्वा चिंतयामास दानवः ॥ १२ ॥ द्वंद्वयुद्धं करिष्यामि निश्चित्य युयुधे नृप ॥ स कृष्णेन पदाक्षिप्तः पतितः पृथिवीतले ॥ १३ ॥ मुहूर्त्तात्स समाश्वस्य उत्थायेदं व्यचिंतयत् ॥ अशक्तो द्वंद्वयुद्धाय ततः साम प्रयुक्तवान् ॥ पाणिभ्यां संपुटं कृत्वा साष्टांगं प्रणतः शुचिः ॥ १४ ॥ अन्धक उवाच॥ ॥ जय कृष्णाय हरये विष्णवे जिष्णवे नमः ॥ हृषीकेश जगद्धात्रे अच्युताय महात्मने ॥१५॥ नमः पंकजनाभाय नमः पंकजमालिने॥ जनार्दनाय श्रीशाय श्रीपते पीतवाससे ॥ १६ ॥ गोविंदाय नमो नित्यं नमो जलधिशायिने ॥ नमः करालवक्राय नरसिंहाय नादिने ॥ १७ ॥ शार्ङ्गिणे सितवर्णाय[1] शंखचक्रगदाभृते ॥ नमो वामनरूपाय यज्ञरूपाय ते नमः ॥ १८ ॥ नमो वराहरूपाय क्रांतलोकत्रयाय च ॥ व्याप्ताशेषदिगंताय केशवाय नमोनमः ॥ १९ ॥ वासुदेव नमस्तुभ्यं नमः कैटभनाशिने ॥ लक्ष्म्यालय सुरश्रेष्ठ नमस्ते सुरनायक ॥ २० ॥ विष्णोर्देवाधिदेवस्य प्रमाणं येऽपि कुर्वते ॥ प्रजापतेर्जगद्धातुस्तेषामपि नमाम्यहम् ॥ २१ ॥ समस्तभूतदेवस्य वासुदेवस्य धीमतः ॥ प्रणामं ये प्रकुर्वंति तेषामपि नमाम्यहम् ॥ २२ ॥ तस्य यज्ञवराहस्य विष्णोरमिततेजसः ॥ प्रणामं ये प्रकुर्वंति तेषामपि नमाम्यहम् ॥ २३ ॥ गुणानां हि निधानाय नमस्तेऽस्तु पुनःपुनः ॥ कारुण्यांबुनिधे देव सर्वभक्तिप्रियाय च ॥ २४ ॥ ॥ श्रीभगवानुवाच ॥ ॥ तुष्टस्ते दानवेंद्राहं वरं वृणु यथेप्सितम् ॥ ददामि ते वरं नूनमपि त्रैलोक्यदुर्लभम् ॥ २५ ॥ ॥ अन्धक उवाच ॥ ॥ यदि तुष्टोऽसि मे देव वरं दास्यसि चेप्सितम् ॥ तदा ददस्व मे देव युद्धं परमशोभनम् ॥ त्वद्धस्तपूतो येनाहं लोकान्गंताऽस्मि शोभनान् ॥ २६ ॥ ॥ श्रीभगवानुवाच ॥ ॥ कथं ददामि ते युद्धं तोषितोऽहं त्वया पुनः ॥ न त्वां तु प्रभवेत्कोपः कथं युध्यामि तेंऽधक ॥ २७ ॥ यदि ते वर्त्तते बुद्धिर्युद्धं प्रति न संशयः ॥ ततो गच्छस्व युद्धाय देवं प्रति महेश्वरम् ॥ २८ ॥ ॥ अन्धक उवाच ॥ ॥ न तत्र सिद्ध्यते कार्यं देवं प्रति महेश्वरम् ॥ २९ ॥ ॥ ॥ ॥ श्रीभगवानुवाच ॥ ॥ पुत्र त्वं शिखरं गत्वा धूनयस्व बलेन च ॥ ३० ॥ विधूते तत्र देवेशः कोपं कर्त्ता सुदारुणम् ॥ कोपितः शंकरो रौद्रं युद्धं दास्यति दानव ॥ ३१ ॥ विष्णुवाक्यादसौ पापो गतो यत्र महेश्वरः ॥ कैलासशिखरं प्राप्य धुनोति स्म मुहुर्मुहुः ॥ ३२ ॥ धूनिते तत्र शिखरे कंपितं भुवनत्रयम् ॥ निपेतुः शिखराग्राणि कंपमानान्यनेकशः ॥ ३३ ॥ चत्वारः सागराः क्षिप्रमेकीभूता महीपते ॥ निपेतुरुल्कापाताश्च

१ सितवर्णाय–असितवर्णाय–इत्यपि परच्छेदो भवितुमर्हति ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पादपा अप्यनेकशः ॥ ३४ ॥ उमया सहितो देवो विस्मयं परमं गतः ॥ गाढमालिंग्य गिरिजा देवं वचनमब्रवीत् ॥ ३५ ॥ किमर्थं कम्पते शैलः किमर्थं कम्पते धरा ॥ किमर्थं कंपते नागो मर्त्यः पातालमेव च ॥ किं वा युगक्षयो देव तन्ममाख्यातुमर्हसि ॥ ३६ ॥ ॥ ईश्वर उवाच ॥ ॥ कस्यैषा दुर्मतिर्जाता क्षिप्तः[1] सर्पमुखे करः ॥ ललाटे च कृतं वर्म्म स यास्यति यमालयम् ॥ ३७ ॥ कैलासमाश्रितो येन सुप्तोऽहं येन बोधितः ॥ तं वधिष्ये न संदेहः सम्मुखो वा भवेद्यदि ॥ ३८ ॥ चिन्तयामास देवेशो ह्यंधकोऽयं न संशयः ॥ उपायं चिंतयामास येनाऽसौ वध्यते क्षणात् ॥ ३९ ॥ आगताश्च सुराः सर्वे ब्रह्माद्या वसुभिः सह ॥ रथं देवमयं कृत्वा सर्वलक्षणसंयुतम् ॥ ४० ॥ केचिद्देवाः स्थिताश्चक्रे केचित्तुण्डाग्रपार्श्वयोः ॥ केचिन्नाभ्यां स्थिता देवाः केचिद्धुर्येषु संस्थिताः ॥ ४१ ॥ धुरीषु निश्चलाः केचित्केचिद्यूपेषु संस्थिताः ॥ केचित्स्यंदनसंस्तंभाः केचित्स्यंदनवेष्टकाः ॥ ४२ ॥ आमलसारकेऽन्येऽपि अन्येऽपि कलशे स्थिताः ॥ रिपोर्भयंकरं दिव्यं ध्वजमालादिशोभितम् ॥ ४३ ॥ रथं देवमयं कृत्वा तमारूढो जगद्गुरुः ॥ निर्ययौ दानवो यत्र कोपाविष्टो महेश्वरः ॥ ४४ ॥ तिष्ठतिष्ठेत्युवाचाऽथ क्व प्रयास्यसि दुर्मते ॥ शरासनं करे गृह्य शरांश्चिक्षेप दानवे ॥४५॥ दानवेऽधिष्ठिते युद्धे शरैश्चिच्छेद सायकान् ॥ शरासारेण तत्रैव अंधकश्छादितस्तदा ॥ ४६ ॥ न तत्र दृश्यते सूर्यो नाकाशं न च चंद्रमाः ॥ आग्नेयमस्त्रं व्यसृजद्दानवोपि शिवं प्रति ॥ ४७ ॥ दह्यमानाः शरांगारैस्तत्रसुः सर्वदेवताः ॥ रक्षरक्ष महादेव दह्यमानांस्तु दानवात् ॥ ४८ ॥ ततो देवाधिदेवोऽसौ वारुणास्त्रमयोऽजयत् ॥ वारुणाऽस्त्रेण निमिषादाग्नेयं नाशितं तदा ॥ ४९ ॥ दानवेन तदा मुक्तं वायव्यास्त्रं रणाजिरे ॥ वारुणं च गतं तात वायव्यास्त्रविनाशितम् ॥ ५० ॥ देवो व्यसर्जयत्सार्पं क्रोधाविष्टेन चेतसा ॥ मारुतं नाशितं बाणैः सर्प्पैस्तत्र न संशयः ॥ ५१ ॥ दानवेन ततो मुक्तं गरुडास्त्रं च लीलया ॥ गारुडास्त्रं च तद्दृष्ट्वा सार्प्पं नैव व्यदृश्यत ॥ ५२ ॥ ततो देवाधिदेवेन नारसिंहं विसर्जितम् ॥ नारसिंहास्त्रबाणेन गारुडास्त्रं प्रशामितम् ॥ ५३ ॥ अस्त्रमस्त्रेण शाम्येत न बाध्येत परस्परम् ॥ महद्युद्धमभूत्तात सुरासुरभयंकरम् ॥ ५४ ॥ चक्रनालीकनाराचैस्तोमरैः खड्गमुद्गरैः ॥ वत्सदंतैस्तथा भल्लैः कर्णिकारैश्च शोभनैः ॥ ५५ ॥ एवं न शक्यते हन्तुं दानवो विविधायुधैः ॥ तदा ज्वालाकरालाश्च खड्गनाराचतोमराः ॥ ५६ ॥ वृषांकेन विमुक्तास्तु समरे दानवं प्रति ॥ न संस्पृशंति शस्त्राणि गात्रं गौडवधूरिव ॥ ५७ ॥ आयुधानि ततस्त्यक्त्वा बाहुयुद्धमुपस्थितौ ॥ करं करेण संगृह्य प्रहरन्तौ स्वमुष्टिभिः ॥ रणप्रयोगैर्युध्यन्तौ युयुधाते शिवांधकौ ॥ ५८ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ अन्धकं प्रति देवेशश्चिन्तयामास निग्रहम् ॥ हनिष्यामि न संदेहोः दुष्टात्मानं न संशयः ॥ ५९ ॥

१ केन–इत्यध्याहारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



स शिवेन यदा क्षिप्तः पतितः पृथिवीतले ॥ ऊर्ध्वबाहुरधोवक्रो दानवो नृपसत्तम ॥ ६० ॥ क्रोधाविष्टेन देवेशः संग्रामे देवशत्रुणा ॥ कक्षयोः कुहरे क्षिप्त्वा बन्धेनाऽऽक्रम्य पीडितः ॥६१॥ निस्पंदश्चा भवद्देवो मूर्च्छायुक्तो महेश्वरः ॥ मूर्च्छापन्नं तु तं ज्ञात्वा चिन्तयामास दानवः॥६२॥ हाहा कष्टं कृतं मेऽद्य दुष्कृतं पापकर्मणा ॥ किं करोमि कथं कर्म्म कस्मिन्स्थाने तु मोचये ॥ ६३ ॥ गृहीत्वा देवमुत्संगे गतः कैलासपर्वतम् ॥ शय्यायां शंकरं न्यस्य निर्ययौ दैत्यराट्ततः ॥६४॥ शय्यायां पतितो देवः प्रपेदे वेदनां ततः ॥ तावद्ददर्श चात्मानं स्वकीयभवनस्थितम् ॥६५॥ पराभवः कृतो मह्यं कथं तेन[१] दुरात्मना ॥ क्रोधावेगसमाविष्टो निर्ययौ दानवं प्रति ॥ ६६ ॥ आयसीं लगुडीं गृह्य प्रभुर्भारसहस्रजाम् ॥ दानवं च ततो दृष्ट्वा प्राक्षिपत्तस्य मूर्द्धनि ॥ ६७ ॥ खड्गेन ताडयामास दानवः प्रहसन्रणे ॥ देवेनाथस्मृतं चाऽस्त्रं कौच्छेराख्यं महाहवे ॥ ६८ ॥ दीप्यमानं समुत्सृज्य हृदये ताडितः क्षणात् ॥ ततः स ताडितस्तेन रुधिरोद्गारमुद्गमन्॥६९॥पतितोऽधोमुखो भूत्वा ततः शूलेन भेदितः ॥ पुनश्च देवदेवेन शूलेन द्विदलीकृतः॥७०॥शूलाग्रेऽसौ स्थितः पापो भ्रांतवांश्चक्रवत्तदा॥येये भूम्यां पतंति स्म तत्कायाद्रक्तबिंदवः॥७१॥तेते सर्वे समुत्तस्थुर्दानवाः शस्त्रपाणयः॥व्याकुलस्तु ततो देवो दानवेन तरस्विना॥७२॥देवेनाथ स्मृता दुर्गा चामुंडा भीषणानना॥आयाता भीषणाकारा नानायुधविराजिता ॥ ॥ ७३ ॥ महादंष्ट्रा महाकाया पिंगाक्षी लंबकर्णिका ॥ आदेशो दीयतां देव को यास्यति यमालयम् ॥ ७४ ॥ ॥ ईश्वर उवाच ॥ ॥ पिबास्य रुधिरं भद्रे यथेष्टं दानवस्य च॥ निपतद्रुधिरं भूमौ दुर्गे गृह्णीष्व मा चिरम् ॥७५ ॥ निहन्मि दानवं यावत्साहाय्यं कुरु सुन्दरि ॥ एवमुक्ता तु सा दुर्गा पपौ च रुधिरं ततः ॥७६॥ निहता दानवाः सर्वे देवेशेन सहस्रशः ॥ अन्धकोऽपि च तान्दृष्ट्वा दानवानवनिं गतान्॥ततो वाग्भिः प्रतुष्टाव देवदेवं महेश्वरम् ॥ ७७ ॥ ॥ अंधक उवाच ॥ जयस्व देवदेवेश उमार्द्धार्द्धशरीरधृक् ॥ नमस्ते देवदेवेश सर्वाय त्रिगुणात्मने ॥ ७८ ॥ वृषभासनमारूढ शशांककृतशेखर ॥ जय खट्वांगहस्ताय गंगाधर नमोऽस्तु ते ॥ ७९ ॥ नमो डमरुहस्ताय नमः कपालमालिने ॥ स्मरदेहविनाशाय महेशाय नमोऽस्तु ते ॥ ८० ॥ पूष्णो दंतनिपाताय गणनाथाय ते नमः ॥ जय स्वरूपदेहाय अरूपबहुरूपिणे ॥ ८१ ॥ उत्तमांगविनाशाय विरिंचेरपि शंकर ॥ श्मशानवासिने नित्यं नित्यं भैरवरूपिणे ॥ ८२ ॥ त्वं सर्वगोऽसि त्वं कर्त्ता त्वं हर्त्ता[२] नान्य एव च ॥ त्वं भूमिस्त्वं दिशश्चैव त्वं गुरुर्भार्गवस्तथा ॥ ८३ ॥ सौरिस्त्वं देवदेवेश भूमिपुत्रस्तथैव च ॥ ऋक्षग्रहादिकं सर्वं यद्दृश्यं तत्त्वमेव च ॥ ८४ ॥ एवं स्तुतिं तदा कृत्वा देवं प्रति स

१ केन-इ०पा० । २ हन्ता-इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दानवः ॥ संहताभ्यां तु पाणिभ्यां प्रणनाम महेश्वरम् ॥ ८५ ॥ ॥ ईश्वर उवाच ॥ ॥ साधुसाधु महासत्त्व वरं याचस्व दानव ॥ दाताऽहं याचकस्त्वं हि ददामीह यथेप्सितम् ॥ ८६ ॥ ॥ अंधक उवाच ॥ ॥ यदि तुष्टोऽसि देवेश यदि देयो वरो मम ॥ तदात्मसदृशोऽहं ते कर्त्तव्यो नाऽपरो वरः ॥ ८७ ॥ भस्मी जटी त्रिनेत्री च त्रिशूली च चतुर्भुजः ॥ व्याघ्रचर्मोत्तरीयश्च नागयज्ञोपवीतकः ॥ ८८ ॥ एतदिच्छाम्यहं सर्वं यदि तुष्टो महेश्वर ॥ ८९ ॥ ॥ ईश्वर उवाच ॥ ॥ ददामि ते वरं ह्यद्य यस्त्वया याचितोऽनघ ॥ गणेषु मे स्थितः पुत्र भृंगीशस्त्वं भविष्यसि ॥ ९० ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डेऽन्धकवधतद्वरप्रदानवर्णनंनामाष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ ॥ छ ॥ ॥ मार्कंडेय उवाच ॥ ॥ अंधकं तु निहत्याथ देवदेवो महेश्वरः ॥ उमया सहितो रुद्रः कैलासमगमन्नगम् ॥ १ ॥ आगताश्च ततो देवा ब्रह्माद्याश्च सवासवाः ॥ हृष्टास्तुष्टाश्च ते सर्वे प्रणेमुः पार्वतीपतिम् ॥ २ ॥ ॥ ईश्वर उवाच ॥ ॥ उपाविशंतु ते सर्वे ये केच न समागताः ॥ निहतो दानवो ह्येष गीर्वाणार्थे पितामह ॥ ३ ॥ रक्तेन तस्य मे शूलं निर्म्मलं नैव जायते ॥ शुभव्रततपोजप्यरतो ब्रह्मन्मया हतः ॥ ४ ॥ कर्तुमिच्छाम्यहं सम्यक्तीर्थया ां चतुर्मुख ॥ आगच्छंतु मया सार्द्धं ये यूयमिह संगताः ॥ ५ ॥ इत्युक्त्वा देवदेवेशः प्रभासं प्रति निर्ययौ ॥ प्रभासाद्यानि तीर्थानि गंगासागरमध्यतः ॥ ६ ॥ अवगाह्यापि सर्वाणि नैर्मल्यं नाभवन्नृप ॥ नर्मदायां ततो गत्वा देवो देवैः समन्वितः ॥ ७ ॥ उत्तरं दक्षिणं कूलमवागाहत्प्रियव्रतः ॥ गतस्तु दक्षिणे कूले पर्वते भृगुसंज्ञितम् ॥ ८ ॥ तत्र स्थित्वा महादेवो देवैः सह महीपते ॥ भ्रांत्वा भ्रांत्वा चिरं श्रांतो निर्विण्णो निषसाद ह ॥ ९ ॥ मनोहारि यतः स्थानं सर्वेषां वै दिवौकसाम् ॥ तीर्थं विशिष्टं तन्मत्त्वा स्थितो देवो महेश्वरः ॥ १० ॥ गिरिं विव्याध शूलेन भिन्नं तेन रसातलम् ॥ निर्मलं चाऽभवच्छूलं न लेपो दृश्यते क्वचित् ॥ ११ ॥ देवैराह्वानिता तत्र महापुण्या च भारती ॥ पर्वतान्निःसृता तत्र महापुण्या सरस्वती ॥ १२ ॥ द्वितीयः संगमस्तत्र यथा वेण्यां सितासितः ॥ तत्र ब्रह्मा स्वयं देवो ब्रह्मेशं लिंगमुत्तमम् ॥ १३ ॥ संस्थापयामास पुण्यं सर्वदुःखघ्नमुत्तमम् ॥ तस्य याम्ये दिशो भागे स्वयं देवो जनार्दनः ॥ १४ ॥ तिष्ठते च सदा तत्र विष्णुपादाग्रसंस्थिता ॥ अंभसो न भवेन्मार्गः कुंडमध्यस्थितस्य च ॥ १५ ॥ शूलाग्रेण कृता रेखा ततस्तोयं वहेन्नृप ॥ तत्तोयं च गतं तत्र यत्र रेवा महानदी ॥ १६ ॥ जललिंगं महापुण्यं चक्रतीर्थं नृपोत्तम ॥ शूलभेदे च देवेशः स्नानं कुर्याद्यथाविधि ॥ १७ ॥ आत्मानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



मन्यते शुद्धं न किंचित्कल्मषं कृतम् ॥ तस्यैवोत्तरकाष्ठायां देवदेवो जगद्गुरुः ॥ १८ ॥ आत्मना देवदेवेशः शूलपाणिः प्रतिष्ठितः ॥ सर्वतीर्थेषु तत्तीर्थं सर्वदेवमयं परम् ॥ १९ ॥ सर्वपापहरं पुण्यं सर्वदुःखघ्नमुत्तमम् ॥ तत्र तीर्थे प्रतिष्ठाप्य देवदेवं जगद्गुरुः ॥ २० ॥ रक्षापालांस्ततो मुक्त्वा शतं सार्धविनायकान् ॥ क्षेत्रपालाः शतं सार्धं तद्रक्षंति प्रयत्नतः ॥ २१ ॥ विघ्नास्तस्योपजायंते यस्तत्र स्थातुमिच्छति ॥ केचित्कुटुंबचिंतासु व्यग्राः केचित्कृषीषु च ॥ २२ ॥ केचित्सभां प्रकुर्वंति केचिद्द्रव्यार्जने रताः ॥ परोक्षवादं कुर्वंति केऽपि हिंसारताः सदा ॥ २३ ॥ परदाररताः केचित्केचिद्वृत्तिविहिंसकाः ॥ अन्ये केचिद्वदंत्येवं कथं तीर्थेषु गम्यते ॥ २४ ॥ क्षुधया पीड्यते भार्या पुत्रभृत्यादयस्तदा ॥ मोहजालेषु योज्यंते एवं देवगणैर्नराः ॥ २५ ॥ पापाचाराश्च ये मर्त्याः स्नानं तेषां न जायते ॥ संरक्षंति च तत्तीर्थं देवभृत्यगणाः सदा ॥ २६ ॥ धन्याः पुण्याश्च ये मर्त्यास्तेषां स्नानं प्रजायते ॥ सरस्वत्या भोगवत्या देवनद्या विशेषतः ॥ २७ ॥ अयं तु संगमः पुण्यो यथा वेण्यां सितासितः ॥ दृष्ट्वा तीर्थं तु ते सर्वे गीर्वाणा हृष्टचेतसः ॥ २८ ॥ देवस्य सन्निधौ भूत्वा वर्णयामासुरुत्तमम् ॥ इदं तीर्थं तु देवेश गयातीर्थेन ते समम् ॥२९॥ गुह्याद्गुह्यतमं तीर्थं न भूतं न भविष्यति ॥ शूलपाणिः समभ्यर्च्य इन्द्राद्यैरप्सरोगणैः ॥ ३० ॥ यक्षकिंनरगंधर्वैर्दिक्पालैर्लोकपैरपि ॥ नृत्यगीतैस्तथा स्तोत्रैः सर्वैश्चापि सुरासुरैः ॥ ३१ ॥ पूज्यमानो गणैः सर्वैः सिद्धैर्नागैर्महेश्वरः ॥ देवेन भेदितं तत्र शूलाग्रेण नराधिप ॥ ३२ ॥ त्रिधा यत्रेक्ष्यतेऽद्यापि ह्यावर्त्तः सुरपूरितः ॥ कुंडत्रयं नरव्याघ्र महत्कलकलान्वितम् ॥ ३३ ॥ सर्वपापक्षयकरं सर्वदुःखघ्नमुत्तमम् ॥ तत्र तीर्थे तु यः स्नाति उपवासपरायणः ॥ ३४ ॥ दीक्षामंत्रविहीनोऽपि मुच्यते चाब्दिकादघात् ॥ ये पुनर्विधिवत्स्नांति मंत्रैः पंचभिरेव च ॥ ३५ ॥ वेदोक्तैः पंचभिर्मंत्रैः सहिरण्यघटैः शुभैः ॥ अक्षरैर्दशभिश्चैव षड्भिर्वा त्रिभिरेव वा ॥ ३६ ॥ पृथग्भूतैर्द्विजातीनां तीर्थे कार्यं नराधिप ॥ ब्रह्मक्षत्रविशां वाऽपि स्त्रीशूद्राणां तथैव च ॥ ३७ ॥ पुरुषाणां त्रयीं ध्यात्वा स्नानं कुर्याद्यथाविधि ॥ दशाक्षरेण मंत्रेण ये पिबंति जलं नराः ॥ ३८ ॥ ते गच्छंति परं लोकं यत्र देवो महेश्वरः ॥ केदारे च यथा पीतं रुद्रकुंडे तथैव च ॥ ३९ ॥ पंचरेफसमायुक्तं क्षकारं सुरपूजितम् ॥ ॐकारेण समायुक्तमेतद्द्व्यं प्रकीर्तितम् ॥ ४० ॥ यस्तत्र कुरुते स्नानं विधियुक्तो जितेंद्रियः ॥ तिलमिश्रेण तोयेन तर्पयेत्पितृदेवताः ॥ ४१ ॥ कुलानां तारयेद्विंशं दशपूर्वान्दशापरान् ॥ गयादिपंचस्थानेषु यः श्राद्धं कुरुते नरः ॥ ४२ ॥ स तत्र फलमाप्नोति शूलभेदे न संशयः ॥ यस्तत्र विधिना युक्तो दद्याद्दानानि भक्तितः ॥ ४३ ॥ तदक्षयं फलं तत्र सुकृतं दुष्कृतं तथा ॥ गयाशिरो यथा पुण्यं पितृकार्येषु सर्वदा ॥ ४४ ॥ शूलभेदं तथा पुण्यं



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्नानदानादितर्पणैः ॥ भक्त्या ददाति यस्तत्र कांचनं गां महीं तिलान् ॥ ४५ ॥ आसनोपानहौ शय्यां वराश्वान्क्षत्रियस्तथा ॥ वस्त्रयुग्मं च धान्यं च गृहं पूर्णं प्रयत्नतः ॥४६॥ सयोक्त्रं लांगलं दद्यात्कृष्टां चैव वसुंधराम् ॥ दानान्येतानि यो दद्याद्ब्राह्मणे वेदपारगे ॥ ४७ ॥ श्रोत्रिये कुलसंपन्ने शुचिष्मति जितेंद्रिये ॥ श्रुताध्ययनसंपन्ने दंभहीने क्रियान्विते ॥ त्रयोदशाहःस्वेकैकं त्रयोदशगुणं भवेत् ॥ ४८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे शूलभेदोत्पत्तिमाहात्म्यवर्णनंनामैकोनपंचाशत्तमोऽध्यायः ॥ ४९ ॥ ॥ छ ॥

॥ ॥ उत्तानपाद उवाच ॥ ॥ द्विजाश्च कीदृशाः पूज्या अपूज्याः कीदृशाः स्मृताः ॥ श्राद्धे वैवाहिके कार्ये दाने चैव विशेषतः ॥ १ ॥ यदि श्रद्धा भवेद्दैवयोगाच्छ्राद्धादिके विधौ ॥ एतदाख्याहि मे देव कस्य दानं न दीयते ॥ २ ॥ ॥ ईश्वर उवाच ॥ ॥ यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः ॥ ब्राह्मणश्चानधीयानस्त्रयस्ते नामधारकाः ॥ ३ ॥ यथा षण्ढोऽफलः स्त्रीषु यथा गौर्गवि चाफला ॥ यथा चाज्ञेऽफलं दानं तथा विप्रोऽनृचोऽफलः ॥ ४ ॥ यथाऽनृणे[1] बीजमुप्त्वा वप्ता न लभते फलम् ॥ तथाऽनृचे हविर्दत्त्वा न दाता लभते फलम् ॥ ५ ॥ रोगी हीनाऽतिरिक्तांगः काणः पौनर्भवस्तथा ॥ अवकीर्णी श्यावदंतः सर्वाशी वृषलीपतिः ॥ ६ ॥ मित्रध्रुक्पिशुनः सोमविक्रयी परनिंदकः ॥ पितृमातृगुरुत्यागी नित्यं ब्राह्मणनिंदकः ॥ ७ ॥ शूद्रान्नं मंत्रसंयुक्तं यो विप्रो भक्षयेन्नृप ॥ सोऽस्पृश्यः कर्मचांडालः स्पृष्ट्वा स्नानं समाचरेत् ॥ ८ ॥ कुनखी वृषली स्तेयी वार्द्धुष्यः कुंडगोलकौ ॥ महादानरतो यश्च यश्चात्महनने रतः ॥ ९ ॥ भृतकाध्यापकः क्लीबः कन्यादूष्यभिशस्तकः ॥ एते विप्राः सदा त्याज्याः परिभाव्य[2] प्रयत्नतः ॥ १० ॥ प्रतिग्रहं गृहीत्वा तु वाणिज्यं यस्तु कारयेत् ॥ तस्य दानं न दातव्यं वृथा भवति तस्य तत् ॥ ११ ॥ श्रुताऽध्ययनसंपन्ना ये द्विजा वृत्ततत्पराः ॥ तेषां यद्दीयते दानं सर्वमक्षयतां व्रजेत् ॥ १२ ॥ दरिद्रान्भर भूपाल मा समृद्धान्कदाचन ॥ व्याधितस्यौषधं पथ्यं नीरुजस्य किमौषधैः ॥ १३ ॥ ॥ उत्तानपाद उवाच ॥ ॥ कीदृशोऽथ विधिस्तत्र तीर्थश्राद्धस्य का क्रिया ॥ दानं च दीयते यद्वत्तन्ममाख्याहि शंकर ॥ १४ ॥ ॥ ईश्वर उवाच ॥ ॥ श्राद्धं कृत्वा गृहे भक्त्या शुचिश्चाऽपि जितेंद्रियः ॥ गुरुं प्रदक्षिणीकृत्य भोज्य सीमांतके ततः ॥ १५ ॥ वाग्यतः प्रव्रजेत्तावद्यावत्सीमां न लंघयेत् ॥ शूलभेदं ततो गत्वा स्नानं कुर्याद्यथाविधि ॥ १६ ॥ पंचस्थानेषु च श्राद्धं हव्यकव्यादिभिः क्रमात् ॥ पिंडदानं च यः कुर्यात्पायसैर्मधुसर्पिषा ॥ १७ ॥ पितरस्तस्य तृप्यंति द्वादशाब्दानि पंच च ॥ अक्षतैर्बदरैर्बिल्वै

१ अनृणे—जलरहिते क्षेत्रे—इत्यर्थः । ऋणशब्दो दुर्गभूमौ जले च—इति कामुद्र जलपर्याय ऋणशब्दः । २ परिभाव्य—विचार्य—इत्यर्थः । धातूनामनेकार्थत्वात्—उक्तोऽर्थ एव प्रासंगिकः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

रिंगुदैर्मधुसर्पिषा ॥ १८ ॥ सोपि तत्फलमाप्नोति तीर्थेऽस्मिन्नाऽत्र संशयः ॥ उपानहौ च यो दद्या द्ब्राह्मणेभ्यः प्रयत्नतः ॥ १९ ॥
सोऽपि स्वर्गमवाप्नोति हयाऽऽरूढो न संशयः ॥ शय्यामश्वं च यो दद्याच्छत्रिकां वा विशेषतः ॥ २० ॥ गच्छेद्विमानमारूढः सोप्सरो
वृन्दवेष्टितः ॥ उत्तमं यो गृहं दद्यात्सप्तधान्यसमन्वितम् ॥ २१ ॥ स्वेच्छया मे वसेल्लोके कांचने भवने हि सः ॥ तिलधेनुं च यो
दद्यात्सवत्सां वस्त्रसंप्लुताम् ॥ २२ ॥ नाकपृष्ठे वसेत्तावद्यावदाभूतसंप्लवम् ॥ गृहे वा यदि वाऽरण्ये तीर्थवर्त्मनि वा नृप ॥ २३ ॥ तोयमन्नं
च यो दद्याद्यमलोकं स नेक्षते ॥ सर्वदानानि दीयन्ते तेषां फलमवाप्यते ॥ २४ ॥ उदकं चान्नदानं च दद्यादभयमेव च ॥ अन्नदानात्परं
दानं न भूतं न भविष्यति ॥ २५ ॥ कन्यादानं तु यः कुर्याद्वृषं वा यः समुत्सृजेत् ॥ तस्य वासो भवेत्तत्र यत्राऽहमिति नाऽन्यथा ॥ २६ ॥
॥ ॥ उत्तानपाद उवाच ॥ ॥ कन्यादानं कथं स्वामिन्कर्त्तव्यं धार्मिकैः सदा ॥ परिग्रहो यथा पोष्यः कन्योद्वाहस्तथैव च ॥ २७ ॥ अन्यत्पृ
च्छामि देवेश कस्य कन्या न दीयते ॥ दातव्यं कुत्र तद्देव कस्मै दत्तमथाक्षयम् ॥ २८ ॥ उत्तमं मध्यमं वाऽपि कनीयः स्यात्कथं विभो ॥
राजसं तामसं वाऽपि निःश्रेयसमथाऽपि वा ॥ २९ ॥ ॥ ईश्वर उवाच ॥ ॥ सर्वेषामेव दानानां कन्यादानं विशिष्यते ॥ यो दद्यात्परया
भक्त्याभिगम्य तनयां निजाम् ॥ ३० ॥ कुलीनाय सुरूपाय गुणज्ञाय मनीषिणे ॥ सुलग्ने सुमुहूर्ते च दद्यात्कन्यामलंकृताम् ॥ ३१ ॥ अश्वान्ना
गांश्च वासांसि योऽत्र दद्यात्स्वशक्तितः ॥ तस्य वासो भवेत्तत्र पदं यत्र निरामयम् ॥ ३२ ॥ येनाऽत्र दुहिता दत्ता प्राणेभ्योऽपि गरीयसी ॥ तेन
सर्वमिदं दत्तं त्रैलोक्यं सचराचरम् ॥३३॥ यः कन्यार्थं ततो लब्ध्वा भिक्षते चैव तद्धनम् ॥ स भवेत्कर्मचण्डालः काष्ठकीलो भवेन्मृतः ॥३४॥
गृहेऽपि तस्य योश्नीयाज्जिह्वालौल्यात्कथंचन ॥ चांद्रायणेन शुद्ध्येत तप्तकृच्छ्रेण वा पुनः ॥ ३५ ॥ ॥ उत्तानपाद उवाच ॥ ॥ वित्तं न
विद्यते यस्य कन्यैवास्ति च यद्गृहे ॥ कथं चोद्वाहनं तस्य न याञ्चां कुरुते यदि ॥ ३६ ॥ ॥ ईश्वर उवाच ॥ ॥ अवित्तेनैव कर्त्तव्यं कन्यो
द्वहनकं नृप ॥ कन्यानाम समुच्चार्य न दोषाय कदाचन ॥ ३७ ॥ अभिगम्योत्तमं दानं यच्च दानमयाचितम् ॥ भविष्यति युगस्यांतस्तस्यांतो
॥ ४९ ॥ नैव विद्यते ॥ ३८ ॥ अभिगम्योत्तमं दानं स्मृतमाहूय मध्यमम् ॥ याच्यमानं कनीयः स्याद्देहिदेहीति चाधमम् ॥ ३९ ॥ यथैवाऽश्माश्मना
बद्धो निक्षिप्तो वारिमध्यतः ॥ द्वावेतौ निधनं यातस्तद्वदन्नमपात्रके ॥ ४० ॥ असमर्थे ततो दानं न प्रदेयं कदाचन ॥ दातारं नयतेऽधस्तादा ॥२२३॥
त्मानं च विशेषतः ॥ ४१ ॥ समर्थस्तारयेद्दौ तु काष्ठं शुष्कं यथा जले ॥ यथा नौश्च तथा विद्वान्प्रापयेदपरं तटम् ॥ ४२ ॥ आहिताग्निश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृह्णाति यः शूद्राणां प्रतिग्रहम् ॥ इह जन्मनि शूद्रोऽसौ मृतः श्वा चोपजायते ॥ ४३ ॥ वृथा क्लेशश्च जायेत ब्राह्मणे ह्यग्निहोत्रिणि ॥ असत्प्रति ग्रहं कुर्वन्गुप्तं नीचस्य गर्हितम् ॥ ४४ ॥ अभोज्यः स भवेन्मर्त्त्यो दह्यते कारिषाऽग्निना ॥ कटकारो भवेत्पश्चात्सप्त जन्म न संशयः ॥ ४५ ॥ लज्जादाक्षिण्यलोभाच्च यद्दानं चोपरोधजम् ॥ भृत्येभ्यश्च तु यद्दानं तद्वृथा निष्फलं भवेत् ॥ ४६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे शूलभेदमाहात्म्ये पात्रापात्रपरीक्षादानादिनियमवर्णनंनाम पञ्चाशत्तमोऽध्यायः ॥ ५० ॥ ॥ छ ॥

॥ ॥ उत्तानपाद उवाच ॥ ॥ काले तत्क्रियते कस्मिञ्छ्राद्धं दानं तथेश्वर ॥ यात्रा तत्र प्रकर्त्तव्या तिथौ यस्यां वदाऽशु तत् ॥ १ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ पितृतीर्थं[1] यथा पुण्यं सर्वकामिकमुत्तमम् ॥ इदं तीर्थं तथा पुण्यं स्नानदानादितर्पणैः ॥ २ ॥ विशेषेण तु कुर्वीत श्राद्धं सर्वयुगादिषु ॥ मन्वन्तरादयो वत्स श्रूयंतां च चतुर्दश ॥ ३ ॥ अश्वयुक्छुक्लनवमी द्वादशी कार्त्तिकस्य च ॥ तृतीया चैत्रमासस्य तथा भाद्रप दस्य च॥४॥आषाढस्यैव दशमी माघस्यैव तु सप्तमी ॥ श्रावणस्याऽष्टमी कृष्णा तथाऽऽषाढस्य पूर्णिमा॥५॥फाल्गुनस्य त्वमावास्या पौषस्यैकादशी सिता ॥ कार्त्तिकी फाल्गुनी चैत्री ज्यैष्ठी पंचदशी तथा ॥ ६ ॥ मन्वंतरादयश्चैते अनंतफलदाः स्मृताः ॥ अयने चोत्तरे राजन्दक्षिणे श्राद्धमाचरेत् ॥७॥ कार्त्तिकी च तथा माघी वैशाखस्य तृतीयिका ॥ पौर्णमासी च चैत्रस्य ज्येष्ठस्य च विशेषतः॥८॥अष्टकासु च संक्रांतौ व्यतीपाते तथैव च ॥ श्राद्धकाला इमे सर्वे दत्तमेष्वक्षयं स्मृतम् ॥९॥ मधुमासे सिते पक्ष एकादश्यामुपोषितः ॥ निशि जागरणं कुर्याद्विष्णुपादसमीपतः ॥ १० ॥ धूपदीपादिनैवेद्यैः स्रङ्मालागुरुचन्दनैः ॥ अर्चां कुर्वंति ये विष्णोः पठेयुः प्राक्तनीं[2] कथाम् ॥ ११ ॥ ऋग्यजुःसाममन्त्रोक्तं सूक्तं जपति यो द्विजः ॥ सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥ १२ ॥ प्रातः श्राद्धं प्रकुर्वीत द्विजान्संपूज्य यत्नतः ॥ दानं दद्याद्यथाशक्ति गोहिरण्यांबरादिकम् ॥ १३ ॥ पितरस्तस्य तृप्यंति यावदाभूतसंप्लवम् ॥ श्राद्धदस्तु व्रजेत्तत्र यत्र देवो जनार्दनः ॥ १४ ॥ त्रयोदश्यां ततो गच्छेद्गुहावासिनि लिंगके ॥ दृष्ट्वा मार्कंडमीशानं मुच्यते सर्वपातकैः ॥ १५ ॥ ॥ उत्तानपाद उवाच ॥ ॥ गुहामध्ये महादेव लिंगं परमशोभितम् ॥ येन प्रतिष्ठितं देव तन्ममाख्यातुमर्हसि ॥ ॥ १६ ॥ ॥ ईश्वर उवाच ॥ ॥ त्रिषु लोकेषु विख्यातो मार्कंडेयो मुनीश्वरः ॥ दिव्यं वर्षसहस्रं स तपस्तेपे सुदारुणम् ॥ १७ ॥ गुहामध्यं प्रविष्टोऽसौ योगाभ्यासमुपाश्रितः ॥ लिंगं तु स्थापितं तेन मार्कंडेश्वरसंज्ञितम् ॥ १८ ॥ तत्र स्नात्वा च यो भक्त्या सोपवासो जितेंद्रियः ॥

१ पितृतीर्थम्--गयातीर्थम्--इत्यर्थः । २ प्राक्तनीं कथाम्--पौराणिकीं कथाम्--एतन्माहात्म्यसूचिकाम्--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





तत्र जागरणं कुर्वन्दद्याद्दीपं प्रयत्नतः ॥ १९ ॥ देवस्य स्नपनं कुर्यादमृतैः पंचभिस्तथा ॥ यथाशक्त्या समालभ्य पूजां कुर्याद्यथाविधि ॥ २० ॥
स्वशाखोत्पन्नमंत्रैश्च जपं कुर्युर्द्विजातयः ॥ सावित्र्यष्टसहस्रं तु शताष्टकमथापि वा ॥ २१ ॥ एतत्कृत्वा नृपश्रेष्ठ जन्मनः फलमाप्नुयात् ॥ चतुर्दश्यां
तु वै स्नात्वा पूजां कृत्वा यथाविधि ॥ २२ ॥ पात्रं परीक्ष्य दातव्यमात्मनः श्रेय इच्छता ॥ पितरस्तस्य तृप्यंति द्वादशाब्दान्यसंशयम् ॥ २३ ॥
दाता स गच्छते तत्र यत्र भोगाः सनातनाः ॥ गुहामध्ये प्रविष्टस्तु लोटयेच्चैव शक्तितः ॥ २४ ॥ नीले गिरौ हि यत्पुण्यं तत्समस्तं लभंति ते ॥
शूलभेदे तु यः कुर्याच्छ्राद्धं पर्वणिपर्वणि ॥ २५ ॥ विशेषाच्चैत्रमासांते[1] तस्य पुण्यफलं शृणु ॥ केदारे चैव यत्पुण्यं गंगासागरसंगमे ॥ २६ ॥
सितासिते तु यत्पुण्यमन्यतीर्थे विशेषतः ॥ अर्बुदे विद्यते पुण्यं पुण्यं चामरपर्वते ॥ २७ ॥ गयादिसर्वतीर्थानां फलमाप्नोति मानवः ॥ विधि
मंत्रसमायुक्तस्तर्पयेत्पितृदेवताः ॥ २८ ॥ कुलानां तारयेद्विंशं दशपूर्वान्दशापरान् ॥ दक्षिणस्यां ततो मूर्त्तौ शुचिर्भूत्वा समाहितः ॥ २९ ॥ न्यासं
कृत्वा तु पूर्वोक्तं प्रदद्यादष्टपुष्पिकाम् ॥ शास्त्रोक्तैरष्टभिः पुष्पैर्मानसैः शृणु तद्यथा ॥ ३० ॥ वारिजं सौम्यमाग्नेयं वायव्यं पार्थिवं पुनः ॥ वान
स्पत्यं भवेत्षष्ठं प्राजापत्यं तु सप्तमम् ॥ ३१ ॥ अष्टमं शिवपुष्पं स्यादेषां शृणु विनिर्णयम् ॥ वारिजं सलिलं ज्ञेयं सौम्यं मधुघृतं पयः ॥ ३२ ॥
आग्नेयं धूपदीपाद्यं वायव्यं चंदनादिकम् ॥ पार्थिवं कन्दमूलाद्यं वानस्पत्यं फलात्मकम् ॥ ३३ ॥ प्राजापत्यं तु पाठाद्यं शिवपुष्पं तु वासना ॥
अहिंसा प्रथमं पुष्पं पुष्पमिंद्रियनिग्रहः ॥३४॥ तृतीयं तु दया पुष्पं क्षमा पुष्पं चतुर्थकम् ॥ ध्यानपुष्पं तपः पुष्पं ज्ञानपुष्पं तु सप्तमम् ॥ ३५ ॥
सत्यं चैवाष्टमं पुष्पमेभिस्तुष्यंति देवताः ॥ भक्त्या तपस्विनः पूज्या ज्ञानिनश्च नराधिप ॥३६॥ छत्रमावरणं दद्यादुपानद्युगलं तथा ॥ तेन पूजि
तमात्रेण पूजिताः पुरुषास्त्रयः ॥ ३७ ॥ स्वर्गलोके वसेत्तावद्यावदाभूतसंप्लवम् ॥ शूलपाणेस्तु भक्त्या वै जाप्यं कुर्वंति ये नराः ॥ ३८ ॥ पंचामृतैः
पंचगव्यैर्यक्षकर्दमकुंकुमैः ॥ समालभेत देवेशं श्रीखंडागुरुचंदनैः ॥ ३९ ॥ नानाविधैश्च ये पुष्पैरर्चां कुर्वंति शूलिनः ॥ निशि जागरणं कुर्युर्दीप
दानं प्रयत्नतः ॥ ४० ॥ धूपनैवेद्यकं दद्यात्पठेत्पौराणिकीं कथाम् ॥ तत्र स्थाने स्थिता भक्त्या जपं कुर्वंति ये नराः ॥ ४१ ॥ श्रीसूक्तं पौरुषं
॥ ५० ॥ सूक्तं पावमानं वृषाकपिम् ॥ वेदोक्तैश्चैव मन्त्रैश्च रौद्रीं वा बहुरूपिणीम् ॥ ४२ ॥ ब्राह्मणान्पूजयेद्भक्त्या पूजयित्वा प्रणम्य च ॥ नानाविधैर्महा ॥२२६
भोगैः शिवलोके महीयते ॥ ४३ ॥ अग्निमीत्यादिजाप्यानि[2] ऋग्वेदी जपते तु यः ॥ रुद्रान्पुरुषसूक्तं च श्लोकाध्यायं च शुक्रियम् ॥ ४४ ॥ इषेत्वा

१ चैत्रमासांते—चैत्रकृष्णामावास्यायाम्—इत्यर्थः । २ अग्निमीत्यादिजाप्यानि—अग्निमीळे—इत्यादीनि—ऋक्संहितासूक्तानि—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिकमन्त्रौघं ज्योतिर्ब्राह्मणमेव च ॥ गायत्र्यं वै मधु चैव मंडलब्राह्मणानि च ॥ ४५ ॥ एताञ्जप्यांस्तु यो भक्त्या यजुर्वेदी जपेद्यदि ॥ देवव्रतं वामदेव्यं पुरुषर्षभमेव च ॥ ४६ ॥ बृहद्रथंतरं चैव यो जपेद्भक्तितत्परः ॥ स प्रयाति नरः स्थानं यत्र देवो महेश्वरः ॥ ४७ ॥ पादशौचं तथाऽभ्यंगं कुरुते योऽत्र भक्तितः ॥ गोदाने चैव यत्पुण्यं लभते नाऽत्र संशयः ॥ ४८ ॥ ब्राह्मणान्भोजयेत्तत्र मधुना पायसेन च ॥ एकस्मिन्भोजिते विप्रे कोटिर्भवति भोजिता ॥ ४९ ॥ सुवर्णं रजतं वस्त्रं दद्याद्भक्त्या द्विजोत्तमे ॥ तर्प्पितास्तेन देवाः स्युर्मनुष्याः पितरस्तथा ॥ ॥ ५० ॥ चंद्रसूर्यग्रहे भक्त्या स्नानं कुर्वंति ये नराः ॥ देवार्चनं ये च कुर्युर्जपं होमं विशेषतः ॥ दद्याद्दानं यथाशक्ति ब्राह्मणे वेदपारगे ॥ ॥ ५१ ॥ अश्वं रथं गजं यानं तुलापुरुषमेव च ॥ शकटं यः प्रदद्याद्वा सप्तधान्यप्रपूरितम् ॥ ५२ ॥ सयोक्त्रं लांगलं दद्याद्युवानौ तु धुरंधरौ ॥ गोभूतिलहिरण्यादि पात्रे दातव्यमर्चितम् ॥ ५३ ॥ अपात्रे विदुषा किंचिन्न देयं भूतिमिच्छता ॥ यतोऽसौ सर्वभूतानि दधाति धरणी किल ॥५४॥ ततो विप्राय सा देया सर्वसस्यौघमालिनी ॥ अथाऽन्यच्छृणु राजेंद्र गोदानस्य तु यत्फलम् ॥ ५५॥ यावद्वत्सस्य पादौ द्वौ मुखं योन्यां प्रदृश्यते॥ तावद्गौः पृथिवी ज्ञेया यावद्गर्भं न मुंचति ॥ ५६ ॥ येन केनाप्युपायेन ब्राह्मणे तां समर्प्पयेत् ॥ पृथ्वी दत्ता भवेत्तेन सशैलवनकानना ॥ ५७ ॥ तारयेन्नियतं दत्ता कुलानामेकविंशतिम् ॥ रौप्यखुरीं कांस्यदोहां सवस्त्रां च पयस्विनीम् ॥ ५८ ॥ ये प्रयच्छंति कृतिनो ग्रस्ते सूर्ये निशाकरे ॥ तेषां संख्यां न जानामि पुण्यस्याब्दशतैरपि ॥ ५९ ॥ सर्वस्याऽपि हि दानस्य संख्याऽस्तीह नराधिप ॥ चंद्रसूर्योपरागे च दानसंख्या न विद्यते ॥ ॥ ६० ॥ यत्र गौर्दृश्यते राजन्त्सर्वतीर्थानि तत्र हि ॥ तत्र पर्व विजानीयान्नाऽत्र कार्या विचारणा ॥ ६१ ॥ पुनः स्मृत्वा तु तत्तीर्थं यः कुर्याद्गमनं नरः ॥ अथवा म्रियते योऽत्र रुद्रस्याऽनुचरो भवेत् ॥ ६२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे शूलभेदे दानधर्मप्रशंसावर्णनंनामैकपंचाशत्तमोऽध्यायः ॥ ५१ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ अन्यदाख्यानकं वक्ष्ये पुरा वृत्तं नराधिप ॥ सकुटुंबो गतः स्वर्गं मुनिर्यत्र महातपाः ॥ १ ॥ ॥ उत्तानपाद उवाच ॥ ॥ कथं नाकं गतो विप्रः सकुटुंबो महानृषिः ॥ कौतुकं परमं देव कथयस्व मम प्रभो ॥ २ ॥ ॥ ईश्वर उवाच ॥ चित्रसेन इति ख्यातः काशीराजः पुराऽभवत् ॥ शूरो दाता सुधर्मात्मा सर्वकामसमृद्धिमान् ॥ ३ ॥ सा पुरी जनसंकीर्णा नाना रत्नोपशोभिता ॥ वाराणसीति विख्याता गंगातीरमुपाश्रिता ॥ ४ ॥ शरच्चंद्रप्रतीकाशा विद्वज्जनविभूषिता ॥ इन्द्रयष्टिसमाकीर्णा गोपगोकुलसंवृता ॥ ५ ॥ बहुध्वजसमाकीर्णा वेदध्वनिनिनादिता ॥ वणिग्जनैर्बहुविधैः क्रयविक्रयशा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



लिनी ॥ ६ ॥ यंत्राऽऽदानैः प्रतोलीभिरुच्चैश्चान्यैः सुशोभिता ॥ देवतायतनैर्दिव्यैराश्रमैर्गहनैर्युता ॥ ७ ॥ नानापुष्पफलै रम्या कदलीखंडमं
डिता ॥ पनसैर्बकुलैस्तालैरशोकैराम्रकैस्तथा ॥८॥ राजवृक्षकपित्थैश्च दाडिमैरुपशोभिता ॥ वेदाध्ययननिर्घोषैः पवित्रीकृतमंगला ॥ ९ ॥ तस्या
उत्तरदिग्भागे आश्रमोऽभूत्सुशोभनः ॥ तन्मंदारवनंनाम त्रिषु लोकेषु विश्रुतम् ॥ १० ॥ बहुमंदारसंयुक्तं तेन मंदारकं विदुः ॥ विप्रो दीर्घतपा
नाम सर्वदा तत्र तिष्ठति ॥ ११ ॥ तपस्तपति सोऽत्यर्थं तेन दीर्घतपाः स्मृतः ॥ स तिष्ठति सपत्नीकः ससुतः सस्नुषस्तथा ॥ १२ ॥ शुश्रूषंति
सदा तस्य पुत्राः पंच प्रयत्नतः ॥ तस्य पुत्रः कनीयांस्तु ऋक्षशृंगो[1] महातपाः ॥ १३ ॥ वेदाऽध्ययनसंपन्नो ब्रह्मचारी गुणान्वितः ॥ योगाभ्यास
रतो नित्यं कंदमूलफलाशनः ॥ १४ ॥ तिष्ठते मृगरूपेण मृगयूथचरस्तदा ॥ दिनांते च दिनांते च मातापित्रोः समीपगः ॥ १५ ॥ अभिवाद
यते नित्यं भक्तिमान्मुनिपुत्रकः ॥ पुनर्गच्छति तत्रैव कानने गिरिगह्वरे ॥ १६ ॥ क्रीडन्बालमृगैः सार्द्धं प्रत्यहं स मुनेः सुतः ॥ कदाचिद्दैवयो
गेन ऋक्षशृंगो ममार सः ॥ १७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे शूल
भेदमाहात्म्ये ऋक्षशृंगचरित्रे दीर्घतपोमुन्याख्यानवर्णनंनाम द्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥ ॥ छ ॥ ॥ उत्तानपाद उवाच ॥ ॥ आश्र
मे वसतस्तस्य स दीर्घतपसो मुनेः ॥ कनीयांस्तनयो देव कथं मृत्युमुपागतः ॥ १ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणुष्वैकमना भूत्वा कथां दिव्यां
महीपते ॥ श्रवणादेव यस्यास्तु मुच्यते सर्वकिल्बिषैः ॥ २ ॥ काशीराजो महावीर्यो महाबलपराक्रमः ॥ चित्रसेन इति ख्यातो धरण्यां स नराधिप
॥ ३ ॥ तस्य राज्ये सदा धर्मो नाऽधर्मो विद्यते क्वचित् ॥ वेदधर्म्मरतो नित्यं प्रजा धर्मेण पालयन् ॥ ४ ॥ स्वधर्मनिरतश्चैव युद्धातिथ्यप्रियः
सदा ॥ क्षत्रधर्मं समाश्रित्य भोगान्भुंक्ते स कामतः ॥५॥ कोशस्यांतो न विद्येत हस्त्यश्वरथपत्तिमान् ॥ इतिहासपुराणज्ञैः पंडितैः सह संकथाम्
॥ ६ ॥ कथयन्राजते राजा कैलास इव शंकरः ॥ एवं स पालयन्राज्यं राजा मंत्रिणमब्रवीत् ॥ ७ ॥ मृगयायां गमिष्यामि तिष्ठध्वं राज्यपालने ॥
गम्यतां सचिवैः प्रोक्ते गतोऽसौ वसुधाऽधिपः ॥८॥ अश्वारूढाश्च धावंतो राजानो मंडलाऽधिपाः ॥ छत्रैश्छत्राणि घृष्यंतोऽनुजग्मुः काननं प्रति ॥
॥ ९ ॥ रजस्तत्रोत्थितं भौमं गजवाजिपदाहतम् ॥ तेनैतच्छादितं सर्व्वं सदिङ्मार्त्तंडमंलम् ॥१०॥ न तत्र दृश्यते सूर्यो न काष्ठा न च चंद्रमाः ॥
पादपाश्चान दृश्यंते गिरिशृंगाणि सर्वतः ॥ ११ ॥ परस्परं न पश्यंति निशार्द्धे वार्षिके[2] यथा ॥ तत्राऽसौ सुमहद्यूथं मृगाणां समलक्ष्यत ॥ १२ ॥

१ शक्षश्रृंगः—इ० पा० । २ वार्षिके—वर्षाकाले—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अधावत्सहितः सर्वैः स राजा राजपुत्रकैः॥ वृंदास्फोटोऽभवत्तेषां शीघ्रं जग्मुर्दिशो दश ॥१३॥ एकमार्गगतो राजा चित्रसेनो महीपतिः ॥ एकाकी स गतस्तत्र यत्र यत्र च ते मृगाः ॥१४॥ प्रविष्टोऽसौ ततो दुर्गं काननं गिरिगह्वरम् ॥ वल्लीगुल्मसमाकीर्णं स्थितो यत्र न लक्ष्यते ॥१५॥ अदृश्यां स्तु मृगान्मत्त्वा दिशो राजा व्यलोकयत् ॥ कां दिशं नु गमिष्यामि क्व मे सैन्यसमागमः ॥ १६ ॥ एवं कष्टं गतो राजा चित्रसेनो नराधिपः ॥ वृक्षच्छायां समाश्रित्य विश्राममकरोन्नृपः ॥ १७ ॥ क्षुत्तृषार्त्तो भ्रमन्दुर्गे कानने गिरिगह्वरे ॥ ततोऽपश्यत्सरो दिव्यं पद्मिनीखंडमंडितम् ॥ ॥ १८ ॥ हंसकारंडवाऽऽकीर्णं चक्रवाकोपशोभितम् ॥ ततो दृष्ट्वा स राजेंद्रः संप्रहृष्टतनूरुहः ॥ १९ ॥ कमलानि गृहीत्वा तु ततः स्नानं समाचरत् ॥ तर्पयित्वा पितृदेवान्मनुष्यांश्च यथाविधि ॥२०॥ अच्छाद्य शतपत्रैश्च पूजयामास शंकरम्॥ ययौ पानीयममलं यथावत्स समाहितः॥२१॥ उत्तीर्य सलिलात्तीरे दृष्ट्वा वृक्षं समीपगम् ॥ उत्तीरयमधः कृत्वोपविष्टो धरणीतले ॥ २२ ॥ चिंतयन्नुपविष्टोऽसौ किमद्य प्रकरोम्यहम् ॥ तत्राऽऽसीनो ददर्शाथ वनोद्देशे मृगान्बहून् ॥२३॥ केचित्पूर्वमुखास्तत्र चापरे दक्षिणामुखाः ॥ वारुण्यमिमुखाः केचित्केचित्कौबेरदिङ्मुखाः ॥२४॥ केचिन्निद्रापराः केचिदूर्ध्वकर्णाः स्थिताः परे ॥ मृगमध्ये स्थितो योगी ऋक्षशृंगो महातपाः ॥२५॥ मृगान्दृष्ट्वा ततो राजा आहारार्थमचिंतयत् ॥ हतैः तेषु मृगं कंचिद्भक्षयामि यदृच्छया ॥ २६ ॥ स्वस्थावस्थो भविष्यामि मृगमांसस्य भक्षणात् ॥ काशीं प्रति गमिष्यामि मार्गमन्विष्य यत्नतः ॥२७॥ विचिंत्यैवं ततो राजा वृक्षमूलमुपाश्रितः॥ चापं गृह्य कराग्रेण स शरं संदधे ततः॥२८॥ विचिक्षेप शरं तत्र यत्र ते बहवो मृगाः॥ तेषां मध्ये स वै विद्ध ऋक्षशृंगो महातपाः ॥२९॥ जग्मुस्त्रस्तास्तु ते सर्वे शब्दं कृत्वा वनौकसः ॥ स ऋषिः पतितस्तत्र कृष्णकृष्णेति चाब्रवीत् ॥३०॥ हाहा कष्टं कृतं तेन येनाहं घातितोऽधुना ॥ कस्यैषा दुर्मतिर्जाता पापबुद्धेर्ममोपरि ॥ ३१ ॥ मृगमध्ये स्थितश्चाहं न कंचिदुपरोधये ॥ तां वाचं मानुषीं श्रुत्वा स राजा विस्मयान्वितः ॥ ३२ ॥ शीघ्रं गत्वा ततोऽपश्यद्ब्राह्मणं ब्रह्मतेजसा ॥ हाहा कष्टं कृतं मेऽद्य येनासौ घातितो द्विजः ॥ ३३ ॥ ॥ चित्रसेन उवाच ॥ ॥ अकामाद्घातितस्त्वं तु मृगभ्रांत्या मयाऽनघ ॥ गृहीत्वा बहुदारूणि स्वतनुं दाहयाम्यहम् ॥ ३४ ॥ दृष्टादृष्टं तु यत्किंचिन्न समं ब्रह्महत्यया ॥ अन्यथा ब्रह्महत्यायाः शुद्धिर्मे न भविष्यति ॥ ३५ ॥ ॥ ऋक्षशृंग उवाच ॥ ॥ न ते सिद्धिर्भवेत्काचिन्मयि पंचत्वमागते ॥ बह्वचो हत्या भविष्यंति विनाशे मम सांप्रतम् ॥३६॥ जननी मे पिता वृद्धो भ्रातरश्च तपस्विनः ॥ भ्रातृजाया मरिष्यंति मयि पंचत्वमागते॥३७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

एता हत्या भविष्यंति कथं शुद्धिर्भवेत्तव ॥ उपायं कथयिष्यामि तं कर्तुं यदि मन्यसे ॥ ३८ ॥ ॥ चित्रसेन उवाच ॥ ॥ उपायः
कथ्यतां मेऽद्य यस्ते मनसि वर्त्तते ॥ करिष्ये तमहं सर्वं यत्नेनापि महामुने ॥ ३९ ॥ ॥ ऋक्षशृंग उवाच ॥ ॥ पृच्छामि त्वां कथं को वा
कुतस्त्वमिह चागतः ॥ ब्रह्मक्षत्रविशां मध्ये को भवानुत शूद्रजः ॥ ४० ॥ चित्रसेन उवाच ॥ ॥ नाहं शूद्रोऽस्मि भोस्तात न वैश्यो ब्राह्मणो न
वा ॥ न चांत्यजोऽस्मि विप्रेंद्र क्षत्रियोऽस्मि महामुने ॥ ४१ ॥ धर्मज्ञश्च कृतज्ञश्च सर्वसत्त्वहिते रतः ॥ अकामात्पातकं जातं कथं शुद्धिर्भविष्यति
॥ ४२ ॥ ॥ ऋक्षशृंग उवाच ॥ ॥ मां गृहीत्वा आश्रमं गच्छ यत्र तौ पितरौ मम ॥ आवेदयस्व चात्मानं पुत्रघातिनमातुरम् ॥ ४३ ॥ ते
दृष्ट्वा मां करिष्यंति कारुण्यं च तवोपरि ॥ उपायं कथयिष्यंति येन शांतिर्भविष्यति ॥ ४४ ॥ तस्य तद्वचनं श्रुत्वा चित्रसेनो नृपोत्तम ॥
स्कंधे कृत्वा तु तं विप्रं जगामाश्रमसन्निधौ ॥ ४५ ॥ न शक्नोति यदा वोढुं विश्राम्यति पुनःपुनः ॥ तावत्पश्यति तं विप्रं मूर्छितं विकलें
द्रियम् ॥ ४६ ॥ मुमोच चित्रसेनस्तं छायायां वटभूरुहः ॥ वस्त्रं चतुर्गुणं कृत्वा चक्रे वातं मुहुर्मुहुः ॥ ४७ ॥ पश्यतस्तस्य राजेंद्र ऋक्षशृंगो
महातपाः ॥ पंचत्वमगमच्छीघ्रं ध्यानयोगेन योगवित् ॥ ४८ ॥ दाहयामास तं विप्रं विधिदृष्टेन कर्मणा ॥ स्नानं कृत्वा स शोकार्त्तो विललाप
मुहुर्मुहुः ॥ ४९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखंडे शूलभेदमाहात्म्ये ऋक्षशृंगस्वर्गगमनवर्णनं
नाम त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततश्चानंतरं राजा जगामोद्वेगमुत्तमम् ॥ कथं यामि गृहं त्वद्य वाराणस्यामहं
पुनः॥१॥ब्रह्महत्यासमाविष्टो जुहोम्यग्नौ कलेवरम्॥ अथवा तस्य वाक्येन तं गच्छाम्याश्रमं प्रति ॥२॥ कथयामि यथावृत्तं गत्वा तस्य महामुनेः ॥
एवं संचिंत्य राजासौ जगामाश्रमसन्निधौ॥३॥ऋक्षशृंगस्य चास्थीनि गृहीत्वा स नृपोत्तमः॥दृष्टिमार्गे स्थितस्तस्य महर्षेर्भावितात्मनः॥४॥दीर्घतपा
उवाच ॥ ॥ आगच्छ स्वागतं तेस्तु आसनेत्रोपविश्यताम्॥अर्घं ददाम्यहं येन मधुपर्कं सविष्टरम् ॥५॥ ॥ चित्रसेन उवाच॥ ॥अर्घस्यास्य न योग्योहं
महर्षे नास्मि भाषणे ॥ मृगमध्यस्थितो विप्रस्तव पुत्रो मया हतः ॥ ६ ॥ पुत्रघ्नं विद्धि मां विप्र तीव्रदण्डेन दंडय ॥ मृगभ्रांत्या हतो विप्र ऋक्षशृंगो
॥ ५२ ॥ महातपाः ॥७॥ इति मत्त्वा मुनिश्रेष्ठ कुरु मे त्वं यथोचितम् ॥ माता तद्वचनं श्रुत्वा गृहान्निष्क्रम्य विह्वला ॥ ८ ॥ हा हताऽस्मीत्युवाचेदं पपात
धरणीतले ॥ विललाप सुदुःखार्ता पुत्रशोकेन पीडिता ॥ ९ ॥ हा हता पुत्रपुत्रेति करुणं कुररी यथा ॥ विललापाऽतुरा माता क्व गतो मां विहाय ॥२२६॥
वै ॥ मुखं दर्शय चात्मीयं मातरं मां हि मानय ॥ १० ॥ श्रुताऽध्ययनसंपन्नं जपहोमपरायणम् ॥ आगतं त्वां गृहद्वारे कदा द्रक्ष्यामि पुत्रक ॥११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकोक्त्या श्रूयते चैतच्चंदनं किल शीतलम् ॥ पुत्रगात्रपरिष्वंगश्चन्दनादपि शीतलः ॥ १२ ॥ किं चंदनेन पीयूषबिंदुना किं किमिंदुना ॥ १३ ॥ पुत्रगात्रपरिष्वंगपात्रं गात्रं भवेद्यदि ॥ १४ ॥ परिष्वजितुमिच्छामि त्वामहं पुत्र सुप्रिय ॥ पंचत्वमनुयास्यामि त्वद्विहीनाद्य दुःखिता ॥ १५ ॥ एवं विलपती दीना पुत्रशोकेन पीडिता ॥ मूर्च्छिता विह्वला दीना निपपात महीतले ॥ १६ ॥ भार्यां च पतितां दृष्ट्वा पुत्रशोकेन पीडिताम् ॥ चुकोप स मुनिस्तत्र चित्रसेनाय भूभृते ॥ १७ ॥ ॥ दीर्घतपा उवाच ॥ ॥ याहियाहि महापाप मा मुखं दर्शयस्व मे ॥ किं त्वया घातितो विप्रो ह्यकामाच्च सुतो मम ॥ १८ ॥ ब्रह्महत्या भविष्यंति बह्वयस्ते वसुधाधिप ॥ सकुटुम्बस्य मे त्वं हि मृत्युरेष उपस्थितः ॥ १९ ॥ एवमुक्त्व ततो विप्रो विचिन्त्य च पुनःपुनः ॥ परित्यज्य तदा क्रोधं मुनिभावाज्जगाद ह ॥ २० ॥ ॥ दीर्घतपा उवाच ॥ ॥ उद्वेगं त्यज भो वत्सा दुरुक्तं गदितो मया ॥ पुत्रशोकाभिभूतेन दुःखतप्तेन मानद ॥ २१ ॥ किं करोति नरः प्राज्ञः प्रेर्यमाणः स्वकर्मभिः ॥ प्रागेव हि मनुष्याणां बुद्धिः कर्मानुसारिणी ॥ २२ ॥ अनेनैव विधानेन पंचत्वं विहितं मम ॥ हत्यास्तव भविष्यंति पूर्वमुक्ता न संशयः ॥ २३ ॥ ब्रह्मक्षत्रविशां मध्ये शूद्रचण्डालजातिषु ॥ कस्त्वं कथय सत्यं मे कस्माच्च निहतो द्विजः ॥ २४ ॥ ॥ चित्रसेन उवाच ॥ ॥ विज्ञापयामि विप्रर्षे क्षन्तव्यं ते ममोपरि ॥ नाऽहं विप्रोस्मि वै तात न वैश्यो न च शूद्रजः ॥ २५ ॥ न व्याधश्चांत्यजातो वा क्षत्रियोऽहं महामुने ॥ काशीराजो मृगान्ह न्तुमागतो वनमुत्तमम् ॥ २६ ॥ भ्रांत्या निपातितो ह्येष मृगरूपधरो मुनिः ॥ इदानीं तव पादांते संश्रितः पातकान्वितः ॥ २७ ॥ किं कर्त्तव्यं मया विप्र उपायं कथयस्व मे ॥ २८ ॥ ॥ दीर्घतपा उवाच ॥ ॥ ब्रह्महत्या न शक्येताप्येका निस्तरितुं प्रभो ॥ दशैका च कथं शक्यास्ताः शृणुष्व नरेश्वर ॥ २९ ॥ चत्वारो मे सुता राजन्त्सभार्या मातृपूर्वकाः ॥ मया सह न जीवंति ऋक्षशृंगस्य कारणे ॥ ३० ॥ उपायं शोभनं तात कथयिष्ये शृणुष्व तम् ॥ शक्नोषि यदि तं कर्तुं सुखोपायं नरेश्वर ॥ ३१ ॥ सकुटुम्बं समस्तं मां दाहयित्वाऽनले नृप ॥ अस्थीनि नर्मदातोये शूलभेदे विनिक्षिप ॥ ३२ ॥ नर्मदादक्षिणे कूले शूलभेदं हि विश्रुतम् ॥ सर्वपापहरं तीर्थं सर्वदुःखघ्नमुत्तमम् ॥ ३३ ॥ शुचिर्भूत्वा ममाऽस्थीनि तत्र तीर्थे विनिक्षिप ॥ मोक्ष्यसे सर्वपापैस्त्वं मम वाक्यान्न संशयः ॥ ३४ ॥ ॥ राजोवाच ॥ ॥ आदेशो दीयतां तात करि ष्यामि न संशयः ॥ समस्तं मेस्ति यत्किंचिद्राज्यं कोशः सुहृत्सुताः ॥ ३५ ॥ तवाऽधीनं महाविप्र प्रयच्छामि प्रसीद मे ॥ परस्परं विवदतोर्विप्र राज्ञोस्तदा नृप ॥ ३६ ॥ स्फुटित्वा हृदयं शीघ्रं मुनिभार्या मृता तदा ॥ पुत्रशोकसमाविष्टा निर्जीवा पतिता क्षितौ ॥ ३७ ॥ पुत्राश्च मातृशोकेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





सर्वे पंचत्वमागताः॥ स्नुषाश्चैव तदा सर्वा मृताश्च सह भर्तृभिः ॥ ३८ ॥ पंचत्वं च गताः सर्वे मुनिमुख्या नृपोत्तम ॥ विप्रानाह्वापयामास ये तत्रा श्रमवासिनः ॥ ३९ ॥ तेभ्यो निवेदयामास यथावृत्तं नृपोत्तमः॥ स तैस्तदाऽभ्यनुज्ञातः काष्ठान्यादाय यत्नतः ॥ ४० ॥ दाहं संचयनं चक्रे चित्रसे नो महीपतिः ॥ ऋक्षशृंगादिसर्वेषां गृहीत्वाऽस्थीनि यत्नतः॥ ४१ ॥ याम्याशां प्रस्थितो राजा पादचारी महीपते ॥ न शक्नोति यदा गन्तुं छाया माश्रित्य तिष्ठति ॥४२॥ विश्रम्य च पुनर्गच्छेद्भाराक्रांतो महीपतिः॥ सचैलं कुरुते स्नानं मुक्त्वाऽस्थीनि पदेपदे ॥४३॥ पिबेज्जलं निराहारः स गच्छ न्दक्षिणामुखः ॥ अचिरेणैव कालेन संगतो नर्मदातटम् ॥४४॥ आश्रमस्थान्द्विजान्दृष्ट्वा पप्रच्छ पृथिवीपतिः ॥ ४५ ॥ ॥ चित्रसेन उवाच ॥ ॥ कथ्यतां शूलभेदस्य मार्गं मे द्विजसत्तमाः ॥ येन यामि महाभागा स्वकार्यार्थस्य सिद्धये ॥४६॥ ॥मुनय ऊचुः॥ ॥इतः क्रोशांतरादर्वाक्तीर्थं परमशो भनम्॥नर्मदादक्षिणे कूले ततो द्रक्ष्यसि नाऽन्यथा॥४७॥ऋषिवाक्येन राजाऽसौ शीघ्रं गत्वा नरेश्वरः॥स ददर्श ततः शीघ्रं बहुद्विजसमाकुलम्॥४८॥ बहुद्रुमलताकीर्णं बहुपुष्पोपशोभितम् ॥ ऋक्षसिंहसमाकीर्णं नानाव्रतधरैः शुभैः ॥ ४९ ॥ एकपादास्थिताः केचिदपरे सूर्यदृष्टयः ॥ एकांगुष्ठ स्थिताः केचिदूर्ध्वबाहुस्थिताः परे ॥ ५० ॥ दिनैकभोजनाः केचित्केचित्कंदफलाशनाः ॥ त्रिरात्रभोजनाः केचित्पराकव्रतिनोऽपरे ॥ ५१ ॥ चांद्रायणरताः केचित्केचित्पक्षोपवासिनः ॥ मासोपवासिनः केचित्केचिदृत्वंतपारणाः ॥ ५२ ॥ योगाभ्यासरताः केचित्केचिद्ध्यायंति तत्पदम् ॥ शीर्णपर्णाशिनः केचित्केचिच्च कटुकाशनाः ॥ ५३ ॥ शैवालभोजनाः केचित्केचिन्मारुतभोजनाः ॥ गार्हस्थ्ये च स्थिताः केचित्केचिच्चैवाऽग्नि होत्रिणः ॥ ५४ ॥ एवं विधान्द्विजान्दृष्ट्वा जानुभ्यामवनिं गतः ॥ प्रणम्य शिरसा राजन्राजा वचनमब्रवीत् ॥ ५५ ॥ ॥ चित्रसेन उवाच ॥ ॥ कस्मिन्देशे च तत्तीर्थं सत्यं कथयत द्विजाः ॥ येनाऽभिवांछिता सिद्धिः सफला मे भविष्यति ॥ ५६ ॥ ॥ ऋषय ऊचुः ॥ ॥ धन्वंतरशतं गच्छ भृगुतुंगस्य मूर्द्धनि॥ कुण्डं द्रक्ष्यसि तत्पूर्णं विस्तीर्णं पयसा शिवम् ॥५७॥ तेषां तद्वचनं श्रुत्वा गतः कुण्डस्य सन्निधौ ॥ दृष्ट्वा चैव तु तत्तीर्थं भ्रांतिर्जाता नृपस्य वै ॥ ५८ ॥ ततो विस्मयमापन्नश्चिंतयन्वै मुहुर्मुहुः ॥ आकाशस्थं ददर्शाऽसौ सामिषं कुररं नृपः ॥ ५९ ॥ भ्रममाणं गृहीताहिं वध्यमानं निरामिषैः ॥ परस्परं च युयुधुः सर्वेऽप्यामिषकांक्षया ॥ ६० ॥ हतश्चंचुप्रहारेण स ततः पतितोऽभसि ॥ शूलेन शूलिना यत्र भूभागो भेदितः पुरा ॥ ६१ ॥ तत्तीर्थस्य प्रभावेण स सद्यः पुरुषोऽभवत् ॥ विमानस्थं ददर्शाऽसौ पुमांसं दिव्यरूपिणम् ॥ ६२ ॥ गन्धर्वाऽप्सरसो यक्षास्तं यांतं तुष्टुवुर्दिवि ॥ अप्सरोगीयमाने तु गते सूर्यस्य मूर्द्धनि ॥ चित्रसेनस्ततस्तस्मिन्नाश्चर्यं परमं गतः ॥ ६३ ॥ ऋषिणा कथितं यद्वत्त



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वत्तीर्थं न संशयः ॥ हृष्टरोमाऽभवद्दृष्ट्वा प्रभावं तीर्थसंभवम् ॥ ६४ ॥ ममाऽद्य दिवसो धन्यो यस्मादत्र समागतः ॥ अस्थीनि भूमौ निक्षिप्य
स्नानं कृत्वा यथाविधि ॥ ६५ ॥ तिलमिश्रेण तोयेनातर्पयत्पितृदेवताः ॥ गृह्यास्थीनि ततो राजा चिक्षेपांऽतर्जले तदा ॥ ६६ ॥ क्षणमेकं ततो
वीक्ष्य राजोर्द्ध्ववदनः स्थितः ॥ तान्ददर्श पुनः सर्वान्दिव्यरूपधराञ्छुभान् ॥ ६७ ॥ दिव्यवस्त्रैश्च संवीतान्दिव्याभरणभूषितान् ॥ विमानैर्विविधै
र्दिव्यैरप्सरोगणसेवितैः ॥ ६८ ॥ पृथग्भूतांश्च तान्सर्वान्विमानेषु व्यवस्थितान् ॥ उत्पत्तिवत्समालोक्य राजा संहर्षितोऽभवत् ॥ ६९ ॥ ऋषि
र्विमानमारूढश्चित्रसेनमथाब्रवीत् ॥ भोभोः साधो महाराज चित्रसेन महीपते ॥ ७०॥ त्वत्प्रसादान्नृपश्रेष्ठ गतिर्दिव्या ममेदृशी ॥ जातेयं यत्त्वया
कार्यं कृतं परमशोभनम् ॥ ७१ ॥ स्वसुतोऽपि न शक्नोति पितृणां कर्त्तुमीदृशम् ॥ मदीयवचनात्तातं निष्पापस्त्वं भविष्यसि ॥ ७२ ॥ फलं
प्राप्स्यसि राजेंद्र कामिकं मनसेप्सितम् ॥ आशीर्वादांस्ततो दत्त्वा चित्रसेनाय धीमते ॥ स्वर्गं जगाम ससुतस्ततो दीर्घतपा मुनिः ॥ ७३ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे दीर्घतपसःस्वर्गारोहणवर्णनंनाम चतुःपंचाशत्तमोऽध्यायः ॥
॥ ५४ ॥ ॥ छ ॥ ॥ उत्तानपाद उवाच ॥ ॥ माहात्म्यं तीर्थजं दृष्ट्वा चित्रसेनो नरेश्वरः ॥ किं चकार क्व वा वासं किमाहारो बभूव
ह ॥ १ ॥ ॥ ईश्वर उवाच ॥ ॥ भृगुतुंगं समारुह्य ऐशानीं दिशमाश्रितः ॥ तपश्चचार विपुलं कुण्डे तत्र नृपोत्तमः ॥ २ ॥ सर्वान्देवान्हृदि
ध्यात्वा ब्रह्मविष्णुमहेश्वरान् ॥ विचिक्षेप यदात्मानं प्रत्यक्षौ रुद्रकेशवौ ॥ करे गृहीत्वा राजानं रुद्रो वचनमब्रवीत् ॥ ३ ॥ ॥ ईश्वर उवाच ॥ ॥
प्राणत्यागं महाराज मा काले त्वं कृथा वृथा ॥ अद्याप्यसि युवा त्वं वै न युक्तं मरणं तव ॥ ४ ॥ स्वस्थानं गच्छ शीघ्रं त्वं भुक्त्वा भोगान्यथे
प्सितान् ॥ कुरु निष्कण्टकं राज्यं नाके शक्र इवापरः ॥ ५ ॥ ॥ चित्रसेन उवाच ॥ ॥ न राज्यं कामये देव न पुत्रान्न च बांधवान् ॥ न
भार्यां न च कोशं च न गजान्न तुरंगमान् ॥ ६ ॥ मुञ्चमुञ्च महादेव मा विघ्नः क्रियतां मम ॥ स्वर्गप्राप्तिर्ममाऽद्यैव त्वत्प्रसादान्महेश्वर ॥ ७ ॥
॥ ईश्वर उवाच ॥ ॥ यस्याऽग्रतो भवेद्ब्रह्मा विष्णुः शंभुस्तथैव च ॥ स्वर्गेण तस्य किं कार्यं स गतः किं करिष्यति॥८॥तुष्टा वयं त्रयो देवा वृणीष्व
वरमुत्तमम् ॥ यथेप्सितं महाराज सत्यमेतदसंशयम् ॥ ९ ॥ ॥ चित्रसेन उवाच ॥ ॥ यदि तुष्टास्त्रयो देवा ब्रह्मविष्णुमहेश्वराः ॥ अद्यप्रभृति
युष्माभिः स्थातव्यमिह सर्वदा ॥ १० ॥ गयाशिरो यथा पुण्यं कृतं युष्माभिरेव च ॥ तथैवेदं प्रकर्त्तव्यं शूलभेदं च पावनम् ॥११॥ यत्रयत्र स्थिता
यूयं तत्रतत्र वसाम्यहम् ॥ गणानां चैव सर्वेषामाधिपत्यमथाऽस्तु मे ॥ १२ ॥ ॥ ईश्वर उवाच ॥ ॥ अद्यप्रभृति तिष्ठामः शूलभेदे नरेश्वर ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





त्रिकालं हि त्रयो देवाः कलांशेन वसामहे ॥ १३ ॥ नंदिसंज्ञो गणाधीशो भविष्यति भवान्ध्रुवम् ॥ मत्समीपे तु भवत आदौ पूजा भविष्यति ॥ ॥ १४ ॥ प्रक्षिप्य तानि चास्थीनि यत्र दीर्घतपा ययौ ॥ सकुटुंबो विमानस्थः स्वर्गतस्त्वं तथा कुरु ॥ १५ ॥ एवं देवा वरं दत्त्वा चित्रसेनाय पार्थिव ॥ कुंडमूर्द्धनि याम्यायां त्रयो देवास्तदा स्थिताः ॥१६॥ परस्परं वदंत्येवं पुण्यतीर्थमिदं परम् ॥ यथा हि गयाशिरः पुण्यं पूर्वमेव पठ्यते ॥ तथा रेवातटे पुण्यं शूलभेदं न संशयः ॥ १७ ॥ ॥ ईश्वर उवाच ॥ ॥ इदं तीर्थं तथा पुण्यं यथा पुण्यं गयाशिरः ॥ सकृत्पिंडोदकेनैव नरो निर्मलतां व्रजेत् ॥ १८ ॥ एकं गयाशिरो मुक्त्वा सर्वतीर्थानि भूपते ॥ शूलभेदस्य तीर्थस्य कलां नार्हंति षोडशीम् ॥ १९ ॥ कुंडमुदीच्यां याम्यायां दशहस्तप्रमाणतः ॥ रौद्रवारुणकाष्ठायां प्रमाणं चैकविंशति ॥ २० ॥ एतत्प्रमाणं तत्तीर्थं पिंडदानादिकर्मसु ॥ नाधर्मनिरता दातुं लभंते दानमत्र हि ॥ २१ ॥ विष्णुस्तु पितृरूपेण ब्रह्मरूपी पितामहः ॥ प्रपितामहो रुद्रोऽभूदेवं त्रिपुरुषाः स्थिताः ॥ २२ ॥ कदा पश्यति तीर्थं वै कदा नस्तारयिष्यति ॥ इति प्रतीक्षां कुर्वंति पुत्राणां सततं नृप ॥ शूलभेदे नरः स्नात्वा दृष्ट्वा शूलधरं सकृत् ॥ २३ ॥ नापुत्रो नाधनो रोगी सप्तजन्मसु जायते ॥ एकविंशतिं पितुः पक्षे मातुश्चैवैकविंशतिम् ॥ २४ ॥ भार्यापक्षे दशैवेह कुलान्येतानि तारयेत् ॥ शूलभेदवने राजञ्छाकमूलफलैरपि ॥ ॥ २५ ॥ एकस्मिन्भोजिते विप्रे कोटिर्भवति भोजिता ॥ पंचस्थानेषु यः श्राद्धं कुरुते भक्तिमान्नरः ॥२६॥ कुलानि प्रेतभूतानि सर्वाण्यपि हि तारयेत् ॥ द्विजदेवप्रसादेन पितॄणां च प्रसादतः ॥२७॥ श्राद्धदो निवसेत्तत्र यत्र देवो महेश्वरः ॥ स्युरात्मघातिनो ये च गोब्राह्मणहनाश्च ये ॥ २८॥ दंष्ट्रिभिर्जलपाते च विद्युत्पातेषु ये मृताः ॥ न येषामग्निसंस्कारो नाशौचं नोदकक्रिया ॥ २९ ॥ तत्र तीर्थे तु यस्तेषां श्राद्धं कुर्वीत भक्तितः ॥ मोक्षावाप्तिर्भवेत्तेषां युगमेकं न संशयः ॥ ३० ॥ अज्ञानाद्यत्कृतं पापं बालभावाच्च यत्कृतम् ॥ तत्सर्वं नाशयेत्पापं स्नानमात्रेण भूपते ॥ ३१ ॥ रजकेन यथा धौतं वस्त्रं भवति निर्मलम् ॥ तथा पापोऽपि तत्तीर्थे स्नातो भवति निर्मलः ॥ ३२ ॥ संन्यासं कुरुते योऽत्र तीर्थे विधिसमन्वितम् ॥ ध्यायन्नित्यं महादेवं स गच्छेत्परमं पदम् ॥ ३३ ॥ क्रीडित्वा स यथाकामं स्वेच्छया शिवमंदिरे ॥ वेदवेदांगतत्त्वज्ञो जायतेऽसौ शुभे कुले ॥३४॥ रूपवान्सुभगश्चैव सर्वव्याधिविवर्जितः ॥ राजा वा राजपुत्रो वा धर्माऽऽचारसमन्वितः ॥ ३५ ॥ एतत्ते कथितं राजंस्तीर्थस्य फलमुत्तमम् ॥ यच्छ्रुत्वा मानवो नित्यं मुच्यते सर्वकिल्बिषैः ॥ ३६ ॥ य इदं श्रावयेन्नित्यमाख्यानं द्विजपुंगवान् ॥ श्राद्धे देवकुले वाऽपि पठेत्पर्वणि पर्वणि ॥ ३७ ॥

 

१ एकविंशति—एकविंशतिहस्तप्रमाणामित्यर्थः । २ देवमंदिरे—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गीर्वाणास्तस्य तुष्यंति मनुष्याः पितृभिः सह ॥ पठतां शृण्वतां चैव नश्यते सर्वपातकम् ॥ ३८ ॥ लिखित्वा तीर्थमाहात्म्यं ब्राह्मणेभ्यो ददाति यः ॥ जातिस्मरत्वं लभते प्राप्नोत्यभिमतं फलम् ॥ ३९ ॥ रुद्रलोके वसेत्तावद्यावदक्षरमन्वितम् ॥ ४० ॥ इति श्रीस्कांदे महापुराण एकाशीति साहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखण्डे शूलभेदमाहात्म्ये काशीराजमोक्षगमनंनाम पचपंचाशत्तमोऽध्यायः ॥ ५५ ॥ ॥ छ ॥ ॥ ॥ उत्तानपाद उवाच ॥ ॥ अन्यच्च श्रोतुमिच्छामि केन गंगाऽवतारिता ॥ रुद्रशीर्षे स्थिता देवी पुण्या कथमिहाऽऽगता ॥ १ ॥ पुण्या देवशिलानाम तस्या माहात्म्यमुत्तमम् ॥ एतदाख्याहि मे सर्वं प्रसन्नो यदि शंकर ॥ २ ॥ ॥ ईश्वर उवाच ॥ शृणुष्वैकमना भूत्वा यथा गंगाऽवतारिता ॥ देवैः सर्वैर्महाभागा सर्वलोकहिताय वै ॥ ३ ॥ अस्ति विंध्यो नगो नाम याम्याशायां महीपते ॥ गीर्वाणास्तु गताः सर्वे तस्य मूर्ध्नि नरेश्वर ॥ ४ ॥ तत्र चाह्वानिता[1] गंगा ब्रह्माद्यैरखिलैः सुरैः ॥ अभ्यर्च्येशं जगन्नाथं देवदेवं जगद्गुरुम् ॥ ५ ॥ जटामध्यस्थितां गंगां मोचयस्वेति भूतले ॥ भास्वंती सा ततो मुक्ता रुद्रेण शिरसा भुवि ॥ ६ ॥ तत्र स्थाने महापुण्या देवैरुत्पादिता स्वयम् ॥ ततो देवनदी जाता सा हिताय नृणां भुवि ॥ ७ ॥ वसंति ये तटे तस्याः स्नानं कुर्वंति भक्तितः ॥ पिबंति च जलं नित्यं न ते यांति यमालयम् ॥ ८ ॥ यत्र सा पतिता कुंडे शूलभेदे नराधिप ॥ देवनद्याः प्रतीच्यां तु तत्र प्राची सरस्वती ॥ ९ ॥ याम्यायां शूलभेदस्य तत्र तीर्थमनुत्तमम् ॥ तत्र देवशिला पुण्या स्वयं देवेन निर्मिता ॥ १० ॥ तत्र स्नात्वा तु यो भक्त्या तर्पयेत्पितृदेवताः ॥ पितरस्तस्य तृप्यंति यावदाभूतसंप्लवम् ॥ ११ ॥ तत्र स्नात्वा तु यो भक्त्या ब्राह्मणान्भोजयेन्नृप ॥ स्वल्पान्नेनापि दत्तेन तस्य चांऽतो न विद्यते ॥ १२ ॥ ॥ उत्तानपाद उवाच ॥ ॥ कानि दानानि दत्तानि शस्तानि धरणीतले ॥ यानि दत्त्वा नरो भक्त्या मुच्यते सर्वपातकैः ॥ १३ ॥ देवशिलाया माहात्म्यं स्नान दानादि जं फलम् ॥ व्रतोपवासनियमैर्यत्प्राप्यं तद्वदस्व मे ॥ १४ ॥ ॥ ईश्वर उवाच ॥ ॥ आसीत्पुरा महावीर्यश्चेदिनाथो महाबलः ॥ वीरसेन इति ख्यातो मंडलाधिपतिर्नृप ॥ १५ ॥ राष्ट्रे तस्य रिपुर्नाऽस्ति न व्याधिर्न च तस्कराः ॥ न चाधर्मोऽभवत्तत्र धर्म एव हि सर्वदा ॥ १६ ॥ सदा मुदान्वितो राजा सभार्यो बहुपुत्रकः ॥ एकासीद्दुहिता तस्य सुरूपा गिरिजा यथा ॥ १७ ॥ इष्टा सा पितृमातृभ्यां बंधुवर्गजनस्य च ॥ कृतं वैवाहिकं कर्म काले प्राप्ते यथाविधि ॥ १८ ॥ अनंतरं चेदिपतिर्द्वादशाब्दमखे स्थितः ॥ ततस्तस्यास्तु यो भर्ता स मृत्युवशमागतः ॥ १९ ॥

१ आह्वानिता—संजातमाह्वानं यस्याः सा—आह्वानिता—तारकादित्वादितच् । आहूता—इत्येवार्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





विधवां तां सुतां दृष्ट्वा राजा शोकसमन्वितः ॥ उवाच वचनं तत्र स्वभार्यां दुःखपीडिताम् ॥ २० ॥ प्रिये दुःखमिदं जातं यावज्जीवं सुदुःसहम् ॥ नैषा रक्षयितुं शक्या रूपयौवनगर्विता ॥ २१ ॥ दूषयेत कुलं क्वाऽपि कथं रक्ष्या हि बालिका ॥ नोपायो विद्यते क्वाऽपि भानुमत्याश्च रक्षणे ॥ परस्परं विवदतोः श्रुत्वा तत्कन्यकाऽब्रवीत् ॥ २२ ॥ ॥ भानुमत्युवाच ॥ ॥ न लज्जामि तवाग्रेऽहं जल्पंती तात कर्हिचित् ॥ सत्यं नोत्पद्यते दोषो मदर्थे ते नराधिप ॥ २३ ॥ अद्यप्रभृत्यहं तात धारयिष्ये न मूर्द्धजान् ॥ स्थूलवस्त्रपटार्द्धं तु धारयिष्यामि ते गृहे ॥ २४ ॥ करिष्यामि व्रतान्याशु पुराणविहितानि च ॥ आत्मानं शोषयिष्यामि तोषयिष्ये जनार्दनम् ॥ २५ ॥ ममैषा वर्त्तते बुद्धिर्यदि त्वं तात मन्यसे ॥ भानुमत्या वचः श्रुत्वा राजा संहर्षितोऽभवत् ॥ २६ ॥ तीर्थयात्रां समुद्दिश्य कोशं दत्त्वा सुपुष्कलम् ॥ विसृज्य पुरुषान्वृद्धान्कृत्वा तस्याः सुरक्षणे ॥ २७ ॥ पुरुषान्त्सायुधांश्चापि ब्राह्मणान्सपुरोहितान् ॥ दासीदासान्पदातींश्च चास्याः संरक्षणक्षमान् ॥ २८ ॥ ततः पितुर्मतेनैव गंगातीरं गता सती ॥ अवगाह्य तटे द्वे तु[1] गंगायाः स नराधिप ॥ २९ ॥ नित्यं संपूज्य सद्विप्रान्गंधमाल्यादिभूषणैः ॥ द्वादशाब्दानि सा तीरे गंगायाः समवस्थिता ॥ ३० ॥ त्यक्त्वा गंगां तदा राज्ञी गता काष्ठां तु दक्षिणाम् ॥ प्राप्ता सा सचिवैः सार्द्धं यत्र रेवा महानदी ॥ ३१ ॥ समाः पंच स्थिता तत्र ॐकारेऽमरकंटके ॥ उदग्याम्येषु तीर्थेषु तीर्थात्तीर्थं जगाम सा ॥ ३२ ॥ स्नात्वास्नात्वाऽऽपूज्य विप्रान्भक्तिपूर्वमतंद्रिता ॥ वारुणीं सा दिशं गत्वा देवनद्याश्च संगमे ॥ ३३ ॥ ददर्श चाऽऽश्रमं पुण्यं मुनिसंघैः समाकुलम् ॥ दृष्ट्वा मुनिसमूहं सा प्रणिपत्येदमब्रवीत् ॥ ३४ ॥ माहात्म्यमस्य तीर्थस्य नाम चैवाऽस्य कीदृशम् ॥ कथयंतु महाभागाः प्रसादः क्रियतां मम ॥ ३५ ॥ ॥ ऋषय ऊचुः ॥ ॥ चक्रतीर्थं तु विख्यातं चक्रं दत्तं पुरा हरेः ॥ महेश्वरेण तुष्टेन देवदेवेन शूलिना ॥ ३६ ॥ अत्र तीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः ॥ अनिवर्त्तिका गतिस्तस्य जायते नात्र संशयः ॥ ३७ ॥ द्वितीयेऽह्नि ततो गच्छेच्छूलभेदे तपस्विनि ॥ पूर्वोक्तेन विधानेन स्नानं कुर्याद्यथाविधि ॥ ३८ ॥ जन्मत्रयकृतैः पापैर्मुच्यते नात्र संशयः ॥ जलेन तिलमात्रेण प्रदद्यादंजलित्रयम् ॥ ३९ ॥ तृप्यंति पितरस्तस्य द्वादशाब्दान्यसंशयम् ॥ यः श्राद्धं कुरुते भक्त्या श्रोत्रियैर्ब्राह्मणैर्नृप ॥ ४० ॥ वार्धुष्याद्यास्तु वर्ज्यंते पितॄणां दत्तमक्षयम् ॥ अपरेह्नि ततो गच्छेत्पुण्यां देवशिलां शुभाम् ॥ ॥ ४१ ॥ वीक्ष्यते जाह्नवी पुण्या देवैरुत्पादिता पुरा ॥ स्नात्वा तत्र जलं दद्यात्तिलमिश्रं नराधिप ॥ ४२ ॥ सकृत्पिंडप्रदानेन

[1] द्वे तटे अवगाह्य--इत्यनयोक्त्या--गंगाप्रदक्षिणा कृतेति व्यज्यते ।





Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुच्यते ब्रह्महत्यया ॥ एकादश्यामुपोषित्वा पक्षयोरुभयोरपि ॥ ४३ ॥ क्षपाजागरणं कुर्यात्पठेत्पौराणिकीं कथाम् ॥ विष्णुपूजां प्रकुर्वीत पुष्पधूपनिवेदनैः ॥ ४४ ॥ प्रभाते भोजयेद्विप्रान्दानं दद्यात्स्वशक्तितः ॥ चतुर्थेऽह्नि ततो गच्छेद्यत्र प्राची सरस्वती ॥ ४५ ॥ ब्रह्मदेहाद्विनिष्क्रांता पावनार्थं शरीरिणाम् ॥ तत्र स्नात्वा नरो भक्त्या तर्पयेत्पितृदेवताः ॥ ४६ ॥ श्राद्धं कृत्वा यथान्यायमनिंद्यान्भोजयेद्द्विजान् ॥ पितरस्तस्य तृप्यंति द्वादशाब्दान्यसंशयम् ॥ ४७ ॥ सर्वदेवमयं स्थानं सर्वतीर्थमयं तथा ॥ देवकोटिसमाकीर्णं कोटिलिंगोत्तमोत्तमम् ॥ ४८ ॥ त्रिरात्रं कुरुते योऽत्र शुचिः स्नात्वा जितेंद्रियः ॥ पक्षं मासं च षण्मासमब्दमेकं कदाचन ॥ ४९ ॥ न तस्य संभवो मर्त्ये तस्य वासो भवेद्दिवि ॥ नियमस्थो विमुच्येत त्रिजन्मजनितादघात् ॥ ५० ॥ विना पुंसा तु या नारी द्वादशाब्दं शुचिव्रता ॥ तिष्ठते साऽक्षयं कालं रुद्रलोके महीयते ॥ ५१ ॥ मुनीनां वचनं श्रुत्वा मुदा परमया ययौ ॥ ततोऽवगाह्य तत्तीर्थमहर्निशमतंद्रिता ॥ ५२ ॥ दृष्ट्वा तीर्थप्रभावं तु पुनर्वचनमब्रवीत् ॥ श्रूयतां वचनं मेऽद्य ब्राह्मणाः सपुरोहिताः ॥ ५३ ॥ न त्यजामीदृशं स्थानं यावज्जीवमहर्निशम् ॥ मातापितृश्च तथा मातुः कथयध्वमिदं वचः ॥ ५४ ॥ त्वत्कन्या शूलभेदस्था नियता व्रतचारिणी ॥ एवमुक्त्वा स्थिता सा तु तत्र भानुमती नृप ॥ ५५ ॥ एकांतरोपवासस्था शनैर्मासोपवासिता ॥ देवशिलास्थिता नित्यं दध्यौ सा चक्रपाणिनम् ॥ ५६ ॥ अहर्निशं दहेद्धूपं चंदनं च सदीपकम् ॥ पादशौचं स्वयं कृत्वा स्वयं भोजयते द्विजान् ॥ द्वादशाब्दानि सा राज्ञी सुव्रता तत्र संस्थिता ॥ ५७ ॥ ॥ ईश्वर उवाच ॥ ॥ अन्यद्देवशिलायास्तु माहात्म्यं शृणु भूपते ॥ कथयामि महाबाहो सेतिहासं पुरातनम् ॥ ५८ ॥ कश्चिद्वनेचरो व्याधः शबरः सह भार्यया ॥ दुर्भिक्षपीडितस्तत्र आमिषार्थं वनं गतः ॥ ५९ ॥ नापश्यत्पक्षिणस्तत्र न मृगान्न फलानि च ॥ सरस्ततो ददर्शाऽथ पद्मिनीखण्डमंडितम् ॥ ॥ ६० ॥ दृष्ट्वा सरोवरं तत्र शबरी वाक्यमब्रवीत् ॥ कुमुदानि गृहाण त्वं दिव्यान्याहारसिद्धये ॥ ६१ ॥ देवस्य पूजनार्थं तु शूलभेदस्य यत्नतः ॥ विक्रयो भविता तत्र धर्मशीलो जनो यतः ॥ ६२ ॥ भार्याया वचनं श्रुत्वा जग्राह कुमुदानि सः ॥ उत्तीर्णस्तु तटे यावद्दृष्ट्वा

---

१ सर्वतो भयात्--इ०पा० । २ क्षपाजागरणं--क्षपायां--रात्रौ--जागरणम्--इत्यर्थः । ३ इतः प्राक्पर्यन्तं भानुमत्यास्तपःस्थितिवृत्तान्तो वर्णितः--एतदग्रेऽपि भानुमतीचारित्रमवशिष्टमेव--मध्ये च तच्चरित्रान्तर्गतं शबरीचरित्रं तावद्वर्णयितुम्--'ईश्वर उवाच--'इति--नूतनविषयारंभकप्रास्ताविकेश्वरोक्तिपूर्वकचरित्रान्तरवर्णनारंभोक्तिश्च । नैतेनेदं विषयान्तरमिति भ्रमितव्यम् ! किन्तु प्रक्रान्त एवायं विषयसंघट्टकः--तदुपयोग्येवोत्तरसंदर्भश्चास्ति । अत्र विषयान्तरत्वभ्रान्तिरिव भासते--परं सेतोऽग्रेतनप्रक्रान्तभानुमतीचरित्रसंदर्शनेन निरस्ता स्यादेवेत्यवधेयं सुधीभिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





श्रीवृक्षमग्रतः ॥ ६३ ॥ श्रीफलानि गृहीत्वा तु सुपक्वानि विशेषतः ॥ शूलभेदं स संप्राप्तो ददर्श सुबहूञ्जनान् ॥ ६४ ॥ चैत्रमासे सिते पक्षे एकादश्यां नरधिप ॥ तस्मिन्नहनि नाश्नीयुर्बाला वृद्धास्तथा स्त्रियः ॥ ६५ ॥ मण्डपं ददृशे तत्र कृतं देवशिलोपरि ॥ वस्त्रैः संवेष्टितं दिव्यं स्रङ्माल्यैरुपशोभितम् ॥६६॥ ऋषयश्चाऽऽगतास्तत्र ये चाऽऽश्रमनिवासिनः ॥ सोपवासाः सनियमाः सर्वे साग्निपरिग्रहाः ॥ ६७ ॥ देवनद्यास्तटे रम्ये मुनिसंघैः समाकुले ॥ आगच्छद्भिर्नृपश्रेष्ठ मार्गस्तत्र न लभ्यते ॥ ६८ ॥ दृष्ट्वा जनपदं तत्र तां भार्यां शबरोऽब्रवीत् ॥ गच्छ पृच्छस्व कमपि किमद्य स्नानकारणम् ॥ ६९ ॥ पर्वाणि यानि श्रूयंते किंस्वित्सूर्येन्दुसंप्लवः ॥ अयनं किं भवेदद्य किं वाऽक्षयतृतीयका ॥ ७० ॥ ततः स्वभर्तुर्वचनाच्छबरी प्रस्थिता तदा ॥ पप्रच्छ नारीं दृष्ट्वाऽग्रे दत्त्वाग्रे कमले शुभे ॥ ७१ ॥ तिथिरद्यैव का प्रोक्ता किं पर्व कथयस्व मे ॥ किमयं स्नाति लोकोऽयं किं वा स्नानस्य कारणम् ॥ ७२ ॥ ॥ नार्युवाच ॥ ॥ अद्य चैकादशी पुण्या सर्वपापक्षयंकरी ॥ उपोषिता सकृद्येन नाकप्राप्तिं करोति सा ॥ ७३ ॥ तस्यास्तद्वचनं श्रुत्वा शबरी शबराय वै ॥ कथयामास चाव्यग्रा स्त्रीवाक्यं नृपसत्तम ॥ ७४ ॥ अद्य त्वेकादशी पुण्या बालवृद्धैरुपोषिता ॥ मदनैकादशीनाम सर्वपापक्षयंकरी ॥ ७५ ॥ नियता श्रूयते तत्र राजपुत्री सुशोभना ॥ व्रतस्था नियताहारा नाम्ना भानुमती सती ॥ ७६ ॥ नैतयासदृशी काचित्त्रिषु लोकेषु विश्रुता ॥ दृश्यते सा वरारोहा ह्यवतीर्णा महीतले ॥ ७७ ॥ भार्याया वचनं श्रुत्वा शबरस्तां जगाद ह ॥ कमलानि यथालाभं दत्त्वा भुंक्ष्व हि सत्वरम् ॥ ७८ ॥ ममैषा वर्त्तते बुद्धिर्न भोक्तव्यं मया ध्रुवम् ॥ न मयोपार्जितं भद्रे पापबुद्ध्या शुभं क्वचित् ॥ ७९ ॥ ॥ शबर्युवाच ॥ ॥ न पूर्वं तु मया भुक्तं कस्मिंश्चैव तु वासरे ॥ भुक्तशेषं मया भुक्तं यावत्कालं स्मराम्यहम् ॥ ८० ॥ भार्याया निश्चयं ज्ञात्वा स्नानं कर्तुं जगाम ह ॥ अधोत्तरीयवस्त्रेण स्नानं कृत्वा तु भक्तितः ॥ ॥ ८१ ॥ सर्वान्देवान्नमस्कृत्य गतो देवशिलां प्रति ॥ तस्थौ स शंकमानोऽपि नमस्कृत्य जनार्दनम् ॥ ८२ ॥ यस्यास्तु कुमुदे दत्ते तया राज्ञ्यै निवेदितम् ॥ तद्दृष्ट्वा पद्मयुगलं तां दासीं साऽब्रवीत्तदा ॥ ८३ ॥ कुत्र पद्मद्वयं लब्धं कथ्यतामग्रतो मम ॥ शीघ्रं तत्रैव गत्वा च पद्मांनानय चापरान् ॥ ८४ ॥ धान्येन वसुना वाऽपि कमलानि समानय ॥ भानुमत्या वचः श्रुत्वा गता सा शबरं प्रति ॥ ८५ ॥ श्रीफलानि च पुष्पाणि बहून्यन्यानि देहि मे ॥ ८६ ॥ ॥ शबर्युवाच ॥ ॥ श्रीफलानि सपुष्पाणि दास्यामि च विशेषतः ॥ न लोभो न स्पृहा मेऽस्ति गत्वा राज्ञीं

१ 'वा पुंसि पद्मम्' इत्यमरात् 'पद्म' शब्दस्य पुंस्त्वमपि ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निवेदय ॥ ८७ ॥ तया च सत्वरं गत्वा यथावृत्तं निवेदितम् ॥ शबर्युक्तं पुरस्तस्याः सविस्तरपरं वचः ॥ ८८ ॥ तस्यास्तु वचनं श्रुत्वा राज्ञी तत्र स्वयं गता ॥ उवाच शबरीं प्रीत्या देहि पद्मानि मूल्यतः ॥ ८९ ॥ ॥ शबर्युवाच ॥ ॥ न मूल्यं कामये देवि फलपुष्पसमुद्भवम् ॥ श्रीफलानि च पुष्पाणि यथेष्टं मम गृह्यताम् ॥ ९० ॥ अर्चां कुरु यथान्यायं वासुदेवे जगत्पतौ ॥ ९१ ॥ ॥ राज्ञ्युवाच ॥ ॥ विना मूल्यं न गृह्णामि कमलानि तवाऽधुना ॥ धान्यस्य खारिकामेकां ददामि प्रतिगृह्यताम् ॥ ९२ ॥ दश विंशत्यथ त्रिंशच्चत्वारिंशदथाऽपि वा ॥ गृहाण वा खारिशतं दुर्भिक्षांभोधिमुत्तर ॥ ९३ ॥ वसुरत्नं सुवर्णं च अन्यत्ते यदभीप्सितम् ॥ तत्सर्वं संप्रदास्यामि कमलार्थे न संशयः ॥ ९४ ॥ ॥ शबर्युवाच ॥ ॥ नाहारं चिंतयाम्यद्य मुक्त्वा देवं वरानने ॥ देवकार्यं विना भद्रे नान्या बुद्धिः प्रवर्त्तते ॥ ९५ ॥ ॥ राज्ञ्युवाच ॥ ॥ न त्वयाऽन्नं परित्याज्यं सर्वमन्ने प्रतिष्ठितम् ॥ तस्मात्सर्वप्रयत्नेन ममान्नं प्रतिगृह्यताम् ॥ ९६ ॥ तपस्विनो महाभागा ये चाऽरण्यनिवासिनः ॥ गृहस्थद्वारि ते सर्वे याचंतेऽन्नमतंद्रिताः ॥ ९७ ॥ ॥ शबर्युवाच ॥ ॥ निषेधश्च कृतः पूर्वं सर्व्वं सत्ये प्रतिष्ठितम् ॥ सत्येन तपते सूर्यः सत्येन ज्वलतेऽनलः ॥ ९८ ॥ सत्येन तिष्ठत्युदधिर्वायुः सत्येन वाति हि ॥ सत्येन पच्यते सस्यं गावः क्षीरं स्रवंति च ॥ ९९ ॥ सत्याधारमिदं सर्वं जगत्स्थावरजंगमम् ॥ तस्मात्सर्वप्रयत्नेन सत्यं सत्येन पालयेत् ॥ १०० ॥ देवकार्यं तु मे मुक्त्वा नाऽन्या बुद्धिः प्रवर्त्तते ॥ गृहाण राज्ञि पुष्पाणि कुरु पूजां गदाभृतः ॥ १०१ ॥ श्रूयते द्विजवाक्यैस्तु न दोषो विद्यते क्वचित् ॥ कुशाः शाकं पयो मत्स्या गंधाः पुष्पाक्षता दधि ॥ मांसं शय्यासनं धानाः प्रत्याख्येया न वारि च ॥ १०२ ॥ ॥ राज्ञ्युवाच ॥ ॥ आरामोपहृतं पुष्पमारण्यं पुष्पमेव च ॥ क्रीतं प्रतिग्रहे लब्धं पुष्पमेवं चतुर्विधम् ॥ १०३ ॥ उत्तमं पुष्पमारण्यं गृहीतं स्वयमेव च ॥ मध्यमं फलमारामे त्वधमं क्रीतमेव च ॥ प्रतिग्रहेण यल्लब्धं निष्फलं तद्विदुर्बुधाः ॥ ॥ १०४ ॥ ॥ पुरोहित उवाच ॥ ॥ गृहाण राज्ञि पुष्पाणि कुरु पूजां गदाभृतः ॥ उपकारः प्रकर्त्तव्यो व्यपदेशेन कर्हिचित् ॥ १०५ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ श्रीफलानि सपद्मानि दत्तानि शबरेण[1] तु ॥ गृहीत्वा तानि राज्ञी सा पूजां चक्रे सुशोभनाम् ॥ १०६ ॥ क्षपाजागरणं चक्रे श्रुत्वा पौराणिकीं कथाम् ॥ शबरस्तु ततो भार्यामिदं वचनमब्रवीत् ॥ १०७ ॥ दीपार्थं गृह्यतां स्नेहो यथालाभेन सुन्दरि ॥ कृत्वा दीपं ततस्तौ तु कृत्वा पूजां हरेः शुभाम् ॥१०८॥ चक्रतुर्जागरं रात्रौ ध्यायन्तो धरणीधरम् ॥ ततः प्रभातसमये दृष्ट्वा स्नानोत्सुकं जनम् ॥१०९॥

१ शबरेण—तस्याः शबर्याः पत्या । तयोस्तदानीं सहधर्मचारित्वमासीदेवातः शबर्याः शबरस्य च—फलपुष्पसमर्पणे समानमेव साहाय्यं बोद्धव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

स्नाति वै शूलभेदे तु देवनद्यां तथाऽपरे ॥ सरस्वत्यां नराः केचिन्मार्कंडस्य ह्रदेऽपरे ॥ ११० ॥ चक्रतीर्थं गताश्चक्रुः स्नानं केचिद्विधानतः ॥ शुचयस्ते जनाः सर्व्वे स्नात्वा देवशिलोपरि ॥ १११ ॥ श्राद्धं चक्रुः प्रयत्नेन श्रद्धया पूतचेतसा ॥ तान्दृष्ट्वा शबरो बिल्वैः पिंडांश्चक्रे प्रयत्नतः ॥ ११२ ॥ भानुमत्या तथा भर्त्तुः पिंडनिर्वपणं कृतम् ॥ अनिंद्या भोजिता विप्रा दंभवार्धुष्यवर्जिताः ॥ ११३ ॥ हविष्यान्नैस्तथा दध्ना शर्करामधुसर्पिषा ॥ पायसेन तु गव्येन कृतान्नेन विशेषतः ॥ ११४ ॥ भोजयित्वा तथा राज्ञी ददौ दानं यथाविधि ॥ पादुकोपानहौ छत्रं शय्यां गोवृषमेव च ॥ ११५ ॥ विविधानि च दानानि हेमरत्नधनानि च ॥ चक्रतीर्थे महाराज कपिलां यः प्रयच्छति ॥ पृथ्वी तेन भवेद्दत्ता सशैलवनकानना ॥ ११६ ॥ ॥ उत्तानपाद उवाच ॥ ॥ यानियानि च दत्तानि शस्तानि जगतीपतेः ॥ तानि सर्वाणि देवेश कथयस्व प्रसादतः ॥ ॥ ११७ ॥ ॥ ईश्वर उवाच ॥ ॥ तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम् ॥ भूमिदः स्वर्गमाप्नोति दीर्घमायुर्हिरण्यदः ॥ ११८ ॥ गृहदो रोगरहितो रूप्यदो रूपवान्भवेत् ॥ वासोदश्चंद्रसालोक्यमर्कसायुज्यमश्वदः॥ ११९ ॥ वृषदस्तु श्रियं पुष्टां गोदाता च त्रिविष्टपम् ॥ यानशय्याप्रदो भार्यामैश्वर्यमभयप्रदः ॥ १२० ॥ धान्यदः शाश्वतं सौख्यं ब्रह्मदो ब्रह्म शाश्वतम् ॥ वार्यन्नपृथिवीवासस्तिलकांचनसर्पिषाम् ॥ १२१ ॥ सर्वेषामेव दानानां ब्रह्मदानं[१] विशिष्यते ॥ येनयेन हि भावेन यद्यद्दानं प्रयच्छति ॥ १२२ ॥ तेनतेन स भावेन प्राप्नोति प्रतिपूजितम् ॥ दृष्ट्वा दानानि सर्वाणि राज्ञी दत्तानि यानि च ॥ १२३ ॥ उवाच शबरो भार्यां यत्तच्छृणु नरेश्वर ॥ पुराणं पठितं भद्रे ब्राह्मणैर्वेदपारगैः ॥ १२४ ॥ श्रुतं च तन्मया सर्वं दानधर्मफलं शुभम् ॥ पूर्वजन्मार्जितं पापं स्नानदानव्रतादिभिः ॥ १२५ ॥ शरीरं दुस्त्यजं मुक्त्वा लभते गतिमुत्तमाम् ॥ संसारसागराद्भीतः सत्यं भद्रे वदामि ते ॥ १२६ ॥ अनेकानि च पापानि कृतानि बहुशो मया ॥ घातिता जंतवो भद्रे निर्दग्धाः पर्वताः सदा ॥ १२७ ॥ तेन पापेन दग्धोऽहं दारिद्र्ये न निवर्त्तते ॥ तीर्थावगाहनं पूर्वं पापेन न कृतं मया ॥ १२८ ॥ तेनाऽहं[२] दुःखितो भद्रे दारिद्र्यमनिवर्त्तकम् ॥ मातुर्गृहं प्रयाहि त्वं त्यज स्नेहं ममोपरि ॥ नगशृंगं समारुह्य मोक्तुमिच्छाम्यहं तनुम् ॥१२९॥ ॥ शबर्युवाच ॥ मात्रा पित्रा न मे कार्यं नाऽपि स्वजनबांधवैः ॥
॥ ५७ ॥ या गतिस्तव जीवेश सा ममापि भविष्यति ॥ १३० ॥ न स्त्रीणामीदृशो धर्मो विना भर्त्रा स्वजीवितम् ॥ श्रूयंते बहवो दोषा धर्मशास्त्रेष्वनेकधा ॥२३१॥
॥१३१॥ पारणं कुरु भोजेंद्र व्रतं येन न नश्यति ॥ यत्तेऽभिवांछितं किंचिद्विष्णवे कर्त्तुमर्हसि ॥१३२॥ भार्याया वचनं श्रुत्वा सुमुदेश बरस्ततः ॥

१ ब्रह्मदानम्—विद्यादानम्—इत्यर्थः । मनुस्मृतावपि—''सर्वेषामेव दानानां ब्रह्मदानं प्रशस्यते'—इत्युक्तम् । २ च प्राप्तोऽस्मि—इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृहीत्वा श्रीफलं शीघ्रं होमं कृत्वा यथाविधि ॥१३३॥ सर्वदेवान्नमस्कृत्य भुक्तोऽपि च तया सह ॥ चैत्र्यां तु विषुवं ज्ञात्वा तस्थौ तत्र दिनत्रयम्॥१३४॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे व्याधवाक्योपदेशकथनपूर्वकदानादिफलवर्णनंनाम षट्पंचाशत्त मोऽध्यायः ॥ ५६ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ भानुमती द्विजान्भोज्य बुभुजे भुक्तशेषतः ॥ भुक्त्वा सुसुखमास्थाय तदन्नं परिणाम्य च ॥ १ ॥ त्रयोदश्यां ततो गत्वा मदनाख्यतिथौ तदा ॥ मार्कंडस्य ह्रदे स्नात्वाऽऽनर्च्य देवं गुहाशयम् ॥ २ ॥ कृतोपवासनियमा स्नापयित्वा महेश्वरम् ॥ पञ्चामृतसुगन्धेन धूपदीपनिवेदनैः ॥ ३ ॥ आर्चयद्विविधैः पुष्पैर्नैवेद्यैश्च सुशोभनैः ॥ क्षपाजागरणं कृत्वा श्रुत्वा पौराणिकीं कथाम् ॥ ४ ॥ नृत्यगीतैस्तथा स्तोत्रैर्दध्यौ देवं महेश्वरम् ॥ अन्नं विस्तारितं सर्वं देवस्याऽग्रे यथाविधि ॥ ५ ॥ चातुर्वर्ण्यसुताः सर्वे भोजिताः सपरिच्छदाः ॥ चतुर्दश्यां दिनं यावत्संपूज्य वृषभध्वजम् ॥ ६ ॥ शंखवादित्रभेरीभिः पटहध्वनिनादितम् ॥ क्षपाजागरणं कृत्वा प्रभूतजनसंकुलम् ॥ ७ ॥ नृत्यगीतैस्तथा स्तोत्रैः प्रेरिता सा निशा तदा ॥ प्रभाते भोजिता विप्राः पायसैर्मधुसर्पिषा ॥ ८ ॥ दत्त्वा दानानि विप्रेभ्यः शक्त्या विप्रानुसारतः[1] ॥ अर्चयित्वा महापुष्पैः सुगन्धैर्मदनेन च ॥ ९ ॥ विचित्रैः सूक्ष्मवस्त्रैश्च देवः संपूज्य वेष्टितः ॥ स्रग्दामलंबमानैश्च बहुदीपसमुज्ज्वलैः ॥ १० ॥ पक्वान्नैर्विविधैर्भक्ष्यैः सुवृत्तैर्मोदकादिभिः ॥ ततस्ते ब्राह्मणाः सर्व्वे वेदाध्ययनतत्पराः ॥ ११ ॥ तत्पर्व कीर्त्तयांचक्रुः पद्मकं नाम नामतः ॥ आदित्यस्य दिनं त्वद्य तिथिः पञ्चदशी तथा ॥ १२ ॥ त्वाष्ट्रमेव च नक्षत्रं संक्रांतिर्विषुवन्तथा ॥ व्यतीपातस्तथा योगः करण विष्टिरेव च ॥ १३ ॥ पद्मकंनाम पर्वैतदयनादिचतुर्गुणम् ॥ अत्र दत्तं हुतं जप्तं सर्वं भवति चाऽक्षयम् ॥ १४ ॥ ते द्विजा भानुमत्याऽथ शूलभेदं गताः सह ॥ ददृशुः शबरं कुण्डे भार्यया सह संस्थितम् ॥ १५ ॥ ऐशानीं स दिशं गत्वा पर्वते भृगुमूर्द्धनि ॥ पतितुं च समारूढो भार्यया सह पार्थिव॥ ॥ १६ ॥ ॥ भानुमत्युवाच ॥ ॥ तिष्ठतिष्ठ महासत्त्व शृणुष्व वचनं मम ॥ किमर्थं त्यजसि प्राणानद्यापि च युवा भवान् ॥ १७ ॥ कः सन्तापः क उद्वेगः किं दुःखं व्याधिरेव च ॥ शिशुः संदृश्यसेऽद्यापि कारणं कथ्यतामिदम् ॥ १८ ॥ ॥ शबर उवाच ॥ ॥ कारणं नास्ति मे[2] किंचिन्न दुःखं किंचिदेव तु ॥ संसारभयभीतोऽहं नान्या बुद्धिः प्रवर्त्तते ॥ १९ ॥ दुःखेन लभ्यते यस्मान्मानुष्यं जन्म भाग्यतः ॥ मानुष्यं जन्म चासाद्य यो न धर्मं समाचरेत् ॥ २० ॥ स गच्छेन्निरयं घोरमात्मदोषेण सुन्दरि ॥ तस्मात्पतितुमिच्छामि तीर्थेऽस्मिन्पापानाशने ॥ २१ ॥

१ विप्रानुसारतः–विप्राणां विद्वत्त्वाविद्वत्त्वादिविचारानुसारेण बहुद्रव्याल्पद्रव्यदानानि दत्त्वा–इत्यर्थः । २ चास्ति मे मतिः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



राज्ञ्युवाच ॥ अद्यापि वर्त्तते कालो धर्मस्योपार्ज्जने तव ॥ कृतापकृतकर्मा वै व्रतदानैर्विशुद्ध्यति ॥ २२ ॥ अहं दास्यामि धान्यं वा वासांसि द्रविणं बहु ॥ नित्यमाचर धर्मं त्वं ध्यायन्नित्यं महेश्वरम् ॥ २३ ॥ ॥ शबर उवाच ॥ नैवाहं कामये वित्तं न धान्यं वस्त्रमेव च यो यस्यैवान्नमश्नाति स तस्याऽश्नाति किल्बिषम् ॥ २४ ॥ ॥ राज्ञ्युवाच ॥ ॥ कंदमूलफलाहारो भ्रमित्वा भैक्ष्यमुत्तमम् ॥ अवगाह्य सुतीर्थानि सर्वपापैः प्रमुच्यते ॥ २५ ॥ ततो विमुक्तपापस्तु यत्किंचित्कुरुते शुचिः ॥ कर्मणा तेन पूतस्त्वं सद्गतिं प्राप्स्यसि ध्रुवम् ॥ २६ ॥ ॥ शबर उवाच ॥ ॥ अन्नमद्य मया त्यक्तं प्राणेभ्योऽपि महत्तरम् ॥ सत्यं न लोपये देवि निश्चिताऽत्र मतिर्मम ॥ २७ ॥ प्रसादः क्रियतां देवि क्षमस्वाऽद्य जनैः सह ॥ अर्धोत्तरीयवस्त्रेण संयम्यात्मानमुद्यतः ॥ २८ ॥ भार्यया सहितो व्याधो हरिं ध्यात्वा पपात ह ॥ नगार्द्धात्पतितो यावद्गतजीवो नराधिप ॥२९॥ चूर्णीभूतौ हि तौ दृष्ट्वा कुंडस्योपरि भूमिप ॥ त्रिमुहूर्त्ते गते काले शबरो भार्यया सह ॥३० ॥ दिव्यं विमानमारूढो गतश्चानुत्तमां गतिम् ॥३१॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे व्याधस्वर्गगमनवर्णनंनाम सप्तपंचाशत्तमोऽध्यायः ॥ ५७ ॥ ॥ छ ॥ ॥ उत्तानपाद उवाच ॥ ॥ अथातो देवदेवेश भानुमत्यकरोच्च किम् ॥ एष मे संशयो देव कथयस्व प्रसादतः ॥ १ ॥ ॥ ईश्वर उवाच ॥ ॥ चिंतयित्वा मुहूर्त्तं सा गता कुंडस्य सन्निधौ ॥ दृष्ट्वा कुंडस्य माहात्म्यं राज्ञी हर्षेण पूरिता ॥ २ ॥ विप्रान्बहून्समाहूय पूजयामास तत्क्षणात् ॥ दत्त्वा तु विधिवद्दानं ब्राह्मणेभ्यो नृपात्मज ॥ ३ ॥ निश्चयं परमं कृत्वा स्थिता शांतेन चेतसा ॥ ततः संपूज्य विधिवत्पितृन्देवान्नराधिप ॥ ४ ॥ क्षपयित्वा पक्षमेकं मधुमासस्य सा स्थिता ॥ अमावास्यां[2] ततो राज्ञी गता पर्वतसन्निधौ ॥ ५ ॥ नगशृंगं समारुह्य कृत्वा मुकुलितौ करौ ॥ विज्ञाप्य ब्राह्मणान्सर्वानिदं वचनमब्रवीत् ॥ ६ ॥ मम माता पिता भ्राता ये चान्ये सखिबांधवाः ॥ क्षमापयित्वा सर्वांस्तान्वचनं मम कथ्यताम् ॥ ७ ॥ त्वत्पुत्री शूलभेदे तु तपः कृत्वा स्वशक्तितः ॥ विसृज्य चैव सात्मानं तस्मिंस्तीर्थे दिवं ययौ॥ ८ ॥ ॥ ब्राह्मणा[3] ऊचुः ॥ ॥ संदेशं कथयिष्यामस्त्वयोक्तं शोभनव्रते ॥ मातापितृभ्यां सुश्रोणि मा तेऽभूदत्र संशयः ॥ ९ ॥ ततो विसृज्य ताँल्लोकान्स्थिताः पर्वतमूर्द्धनि ॥ अर्धोत्तरीयवस्त्रेण गाढं बद्ध्वा पुनःपुनः ॥ १० ॥ ततश्चिक्षेप साऽऽत्मानमेकचित्ता नराधिप ॥ नगार्द्धे पतिता यावत्तावद्दृष्टाः सुरांगनाः ॥ ११ ॥ भोभो वत्से महाभागे भानुमत्यतितापसि ॥ दिव्यं विमानमारुह्य कैलासं

१ इत्युक्त्वा—इति शेषः । २ 'अमावस्यात्वमावस्या अमावासी त्वमावसी'--इति कोशादमावासीशब्दः—अमावास्यादिने—इत्यर्थः । ३ दिव्या ऊचुः—इ० पा० ।







Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रति गम्यताम् ॥ १२ ॥ ततः सा पश्यतां तेषां जनानां त्रिदिवं गता ॥ १३ ॥ ॥ मार्कंडेय उवाच ॥ ॥ इति ते कथितः सर्वः शूलभेदस्य विस्तरः ॥ यः श्रुतः शंकरात्पूर्वमृषिदेवसमागमे ॥ १४ ॥ य इदं पठते भक्त्या तीर्थे देवकुलेऽपि वा ॥ स मुच्यते महापापादपि जन्मशतार्जितात् ॥ ॥ १५ ॥ ब्रह्महा च सुरापी च स्तेयी च गुरुतल्पगः ॥ गोघाती स्त्रीविघाती च देवब्रह्मस्वहारकः ॥ १६ ॥ स्वामिद्रोही मित्रघाती तथा विश्वासघातकः ॥ परन्यासापहारी च परनिक्षेपलोपकः ॥ १७ ॥ रसभेदी तुलाभेदी तथा वार्द्धुषिकस्तु यः ॥ यः कन्याविघ्नकर्त्ता च तथा विक्रयकारकः ॥ १८ ॥ परभार्या भ्रातृभार्या गौः स्नुषा कन्यका तथा ॥ अभिगामी परद्वेषी तथा धर्मप्रदूषकः ॥१९॥ मुच्यंते सर्व एवैते शूलभेदप्रभावतः ॥ ॥ २० ॥ य इदं श्रावयेच्छ्राद्धे विप्राणां भुंजतां नृप ॥ मुदं प्रयांति संहृष्टाः पितरस्तस्य सर्वशः ॥ २१ ॥ यश्चेदं शृणुयाद्भक्त्या पठ्यमानं नरो वशी ॥ स मुक्तः सर्वपापेभ्यः सर्वकल्याणभाग्भवेत् ॥ २२ ॥ इदं यशस्यमायुष्यमिदं पावनमुत्तमम् ॥ पठतां शृण्वतां नृणामायुःकीर्त्तिविवर्द्धनम् ॥ ॥ २३ ॥ इति कथितमिदं ते शूलभेदस्य पुण्यं महिमं न हि मनुष्यैः श्रूयते यत्सपापैः ॥ मदनरिपुतटिन्या याम्यकूलस्थितस्य प्रबलदुरितकंदोच्छेदकुद्दालकल्पम् ॥ २४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे शूलभेदतीर्थमाहात्म्यवर्णनं नामाष्टपंचाशत्तमोऽध्यायः ॥ ५८ ॥ ॥ छ ॥ शूलभेदमाहात्म्यं समाप्तम् ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततः पुष्करिणीं गच्छेत्सर्वपापप्रणाशिनीम् ॥ श्रुते यस्याः प्रभावे तु सर्वपापैः प्रमुच्यते ॥ १ ॥ रेवाया उत्तरे कूले तीर्थं परमशोभनम् ॥ यत्राऽस्ते सर्वदा देवो वेदमूर्त्तिर्दिवाकरः ॥ २ ॥ कुरुक्षेत्रं यथा पुण्यं सार्वकामिकमुत्तमम् ॥ इदं तीर्थं तथा पुण्यं सर्वकामफलप्रदम् ॥ ३ ॥ कुरुक्षेत्रे यथा वृद्धिर्दानस्य जगतीपते ॥ पुष्करिण्यां तथा दानं वर्द्धते नाऽत्र संशयः ॥ ४ ॥ यवमेकं तु यो दद्यात्सौवर्णं मस्तके नृप ॥ पुष्करिण्यां तथा स्थानं यथा स्थानं नरे स्मृतम् ॥ ५ ॥ सूर्यग्रहे तु यः स्नात्वा दद्याद्दानं यथाविधि ॥ हस्त्यश्वरथरत्नादि गृहं गाश्च युगंधरान् ॥ ६ ॥ सुवर्णं रजतं वाऽपि ब्राह्मणेभ्यो ददाति यः ॥ त्रयोदशदिनं यावत्त्रयोदशगुणं भवेत् ॥ ७ ॥ तिलमिश्रेण तोयेन तर्प्पयेत्पितृदेवताः ॥ द्वादशाब्दे भवेत्प्रीतिस्तत्र तीर्थे महीपते ॥ ८ ॥ यस्तत्र कुरुते श्राद्धं पायसैर्मधुसर्पिषा ॥ श्राद्धदो लभते स्वर्गं पितॄणां दत्तमक्षयम् ॥ ९ ॥ अक्षतैर्बदरैर्बिल्वैरिंगुदैर्वा तिलैः सह ॥ अक्षयं फलमाप्नोति तस्मिंस्तीर्थे न संशयः ॥ १० ॥ तत्र स्नात्वा तु यो देवं पूजयेच्च दिवाकरम् ॥ आदित्यहृदयं जप्त्वा पुनरादित्यमर्चयेत् ॥ स गच्छेत्परमं लोकं त्रिदशैरपि वंदि

१मा–एतासु–इति शेषः । एतासु–परभार्यादिषु--अभिगामी मैथुनकृत् इत्यर्थः । २ महिम--नपुंसकत्वमार्षम् महिम--माहात्म्यम् । ३ श्रीभगवानुवाच--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तम् ॥ ११ ॥ ऋचमेकां जपेद्यस्तु यजुर्वा साम एव च ॥ स समग्रस्य वेदस्य फलमाप्नोति वै नृप ॥ १२ ॥ यस्त्र्यक्षरं जपेन्मंत्रं ध्यायमानो दिवाकरम् ॥ आदित्यहृदयं जप्त्वा मुच्यते सर्वपातकैः ॥ १३ ॥ यस्तत्र विधिवत्प्राणांस्त्यजते नृपसत्तम ॥ स गच्छेत्परमं स्थानं यत्र देवो दिवाकरः ॥ ॥ १४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यांसंहितायां पञ्चम आवंत्यखंडे रेवाखंडे पुष्करिण्यामादित्यतीर्थमाहात्म्यवर्णनंनामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ भूयोप्यहं प्रवक्ष्यामि आदित्येश्वरमुत्तमम् ॥ सर्वदुःखहरं पार्थ सर्वविघ्नविनाशनम् ॥ १ ॥ आयुःश्रीवर्द्धनं नित्यं पुत्रदं स्वर्गदं शिवम् ॥ यस्य तीर्थस्य चाऽन्यानि तीर्थानि कुरुनंदन ॥ २ ॥ नालभंत श्रियं नाके मर्त्ये पातालगोचरे ॥ कुरुक्षेत्रं गया गंगा नैमिषं पुष्करं तथा ॥ ३ ॥ वाराणसी च केदारं प्रयागं रुद्रनंदनम् ॥ महाकालं सहस्राक्षं शुक्लतीर्थं नृपोत्तम ॥ ४ ॥ रवितीर्थस्य सर्वाणि कलां नार्हंति षोडशीम् ॥ रवितीर्थे हि यद्वृत्तं तच्छृणुष्व नृपोत्तम ॥ ५ ॥ स्नेहात्ते कथयिष्यामि वार्द्धकेनातिपीडितः ॥ शृण्वंतु ऋषयः सर्वे तपोनिष्ठा महौजसः ॥ ६ ॥ श्रुतं मे रुद्रसान्निध्ये नंदिस्कंदगणैः सह ॥ पार्वत्या पृष्टः शंभुश्च रवितीर्थस्य यत्फलम् ॥ ७ ॥ शंभुना च यदाऽख्यातं गिरिजायाः ससंभ्रमम् ॥ तत्सर्वमेकचित्तेन रुद्रोद्गीतं श्रुतं मया ॥ ॥ ८॥तत्तेऽहं संप्रवक्ष्यामि शृणु यत्नेन पांडव॥दुर्भिक्षोपहता विप्रा नर्मदां तु समाश्रिताः॥९॥उद्दालको वशिष्ठश्च मांडव्यो गौतमस्तथा ॥ याज्ञवल्क्योऽथ गर्गश्च शांडिल्यो गालवस्तथा॥ १० ॥ नाचिकेतो विभांडश्च वालखिल्यादयस्तथा॥शातातपश्च शंखश्च जैमिनिर्गोभिलस्तथा ॥ ११ ॥जैगीषव्यः शतानीकः सर्व एव समागताः ॥ तीर्थयात्रा कृता तैस्तु नर्मदायाः समंततः ॥ १२ ॥ आदित्येश्वरमायाताः प्रसंगाद्दषिपुंगवाः ॥ वृक्षैः संच्छादितं शुभ्रं धवतिन्दुकपाटलैः ॥ १३ ॥ जंबीरैरर्जुनैः कुब्जैः शमीकेसरकिंशुकैः ॥ तस्मिंस्तीर्थे महापुण्ये सुगंधिकुसुमाकुले ॥ १४ ॥ पुन्नागनालिकेरैश्च खदिरैः कल्पपादपैः ॥ अनेकश्वापदाकीर्णं मृगमार्जारसंकुलम् ॥ १५ ॥ ऋक्षहस्तिसमाकीर्णं चित्रकैश्चोपशोभितम् ॥ प्रविष्टा ऋषयः सर्वे वने पुष्पसमाकुले ॥ १६ ॥ वनांते च स्त्रियो दृष्ट्वा रक्ता रक्तांबरान्विताः ॥ रक्तमाल्यानुशोभाढ्या रक्तचन्दनचर्चिताः ॥ १७ ॥ रक्ताभरणसंयुक्ताः पाशहस्ता भयावहाः ॥ तासां समीपगा दृष्टाः कृष्णजीमूतसन्निभाः ॥ १८ ॥ महाकाया भीमवक्त्राः पाशहस्ता भयावहाः ॥ अनावृष्ट्युपमा दृष्टा आतुराः पिंगलोचनाः ॥ १९ ॥ दीर्घजिह्वा करालास्या तीक्ष्णदंष्ट्रा दुरासदा ॥ वृद्धा नारी कुरुश्रेष्ठ दृष्टाऽन्या ऋषिपुंगवैः ॥ ॥ २० ॥ ततः समीपगा वृद्धा तस्य वृन्दस्य भारत ॥ स्वाध्यायनिरता विप्रा दृष्टास्तैः पापकर्मभिः ॥ २१ ॥ ऊचुस्ते तु समूहेन ब्राह्मणांस्त



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पसि स्थितान् ॥ अस्माकं स्वामिनः सर्वे तिष्ठन्ते तीर्थमध्यतः ॥ ते प्रस्थाप्या महाभागाः सर्वथैव त्वरान्विताः ॥ २२ ॥ तच्छ्रुत्वा वचनं तेषां सर्वे चैव त्वरान्विताः ॥ जग्मुस्ते नर्मदाकक्षं दृष्ट्वा रेवां द्विजोत्तमाः ॥ २३ ॥ ततः केचित्स्तुवंत्यन्ये जय देवि नमोऽस्तु ते ॥ २४ ॥ नमोस्तु ते सिद्धगणैर्निषेविते नमोऽस्तु ते सर्वपवित्रमंगले ॥ नमोऽस्तु ते विप्रसहस्रसेविते नमोऽस्तु रुद्रांगसमुद्भवे वरे ॥ २५ ॥ नमोस्तु ते सर्वपवित्रपावने नमोऽस्तु ते देवि वरप्रदे शिवे ॥ नमामि ते शीतजले सुखप्रदे सरिद्वरे पापहरे विचित्रिते ॥ २६ ॥ अनेकभूतौघसुसेवितांगे गन्धर्वयक्षोरगपावितांगे ॥ महागजौघैर्महिषैर्वराहैरापीयसे तोयमहोर्मिमाले ॥ २७ ॥ नमामि ते सर्ववरे सुखप्रदे विमोचयास्मानघपाशबद्धान् ॥ २८ ॥ भ्रमन्ति तावन्नरकेषु मर्त्या यावत्तवांभो नहि संश्रयन्ति ॥ स्पृष्टं करैश्चन्द्रमसो रवेश्चेत्तदेवि दद्यात्परमं पदं तु ॥ २९ ॥ अनेकसंसारभयार्दितानां पापैरनेकैरभिवेष्टितानाम् ॥ गतिस्त्वमंभोजसमानवक्त्रे द्वन्द्वैरनेकैरभिसंवृतानाम् ॥ ३० ॥ नद्यश्च पूता विमला भवन्ति त्वां देवि संप्राप्य न संशयोऽत्र ॥ दुःखातुराणामभयं ददासि शिष्टैरनेकैरभिपूजिताऽसि ॥ ३१ ॥ विण्मूत्रदेहाश्च निमग्नदेहा भ्रमन्ति तावन्नरकेषु मर्त्याः ॥ महाबलध्वस्ततरंगभंगं जलं न यावत्तव संस्पृशंति ॥ ३२ ॥ म्लेच्छाः पुलिंदास्त्वथ यातुधानाः पिबन्ति येंऽभस्तव देवि पुण्यम् ॥ तेऽपि प्रमुच्यन्ति भयाच्च घोरात्किमत्र विप्रा भवपाशभीताः ॥ ३३ ॥ सरांसि नद्यः क्षयमभ्युपेता घोरे युगेऽस्मिन्कलिनावसृष्टे ॥ त्वं भ्राजसे देवि जलौघपूर्णा दिवीव नक्षत्रपथे च गंगा ॥ ३४ ॥ तव प्रासादाद्वरदे विशिष्टे कालं यथेमं परिपालयित्वा ॥ यास्याम मोक्षं तव सुप्रसादाद्वयं यथा त्वं कुरु नः प्रसादम् ॥ ३५ ॥ त्वामाश्रिता ये शरणं गताश्च गतिस्त्वमंबेव पितेव पुत्रान् ॥ त्वत्पालिता यावदिमं सुघोरं कालं त्वनावृष्टिहतं क्षिपामः ॥ ३६ ॥ एवं स्तुता तदा देवी नर्मदा सरितां वरा ॥ प्रत्यक्षा सा परा मूर्तिर्ब्राह्मणानां युधिष्ठिर ॥ ३७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ पठंति ये स्तोत्रमिदं नरेन्द्र शृण्वंति भक्त्या परया प्रशांताः ॥ ते यांति रुद्रं वृषसंयुतेन यानेन दिव्यांबरभूषितांगाः ॥ ३८ ॥ ये स्तोत्रमेतत्सततं जपन्ति स्नात्वा च तोयेन तु नर्मदायाः ॥ तेभ्योंतकाले सरिदुत्तमेयं गतिं विशुद्धामचिराद्ददाति ॥ ३९ ॥ प्रातः समुत्थाय तथा शयानो यः कीर्तयेतानुदिनं स्तवेन्द्रम् ॥ देहक्षयं स्वे सलिले ददाति समाश्रयं तस्य महानुभाव ॥ ४० ॥ पापैर्विमुक्ता दिवि मोदमानाः संभोगिनश्चैव तु नान्यथा च ॥ ४१ ॥ प्रसन्ना नर्मदा देवी स्तोत्रेणाऽनेन भारत ॥ जलेनाप्यायितान्विप्रान्दक्षिणापथवाहिनी ॥ ४२ ॥ अमृतत्वं तु वो दद्मि योगिभिर्यन्न गम्यते ॥ दुर्लभं यत्सुरैः सर्वैर्मत्प्रसादाल्लभिष्यथ ॥ ४३ ॥ इति ते ब्राह्मणा राजल्लँब्ध्वा वरमनुत्तमम् ॥ गमिष्यंतः प्रीतचित्ता ददृशुश्चित्रमद्भुतम् ॥ ४४ ॥ ॥ श्रीमार्कंडेय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



उवाच ॥ ॥ दृष्टास्तैः पुरुषाः पार्थ नर्मदातटसंस्थिताः ॥ स्नानदेवार्चनासक्ताः पंच एव महाबलाः ॥ ४५ ॥ ते दृष्टा ब्राह्मणैः सर्व्वैर्वेदवेदांग
पारगैः ॥ संपृष्टास्तैर्महाराज यथा तदवधारय ॥ ४६ ॥ ॥ विप्रा ऊचुः ॥ ॥ वनांते स्त्रीयुगं दृष्ट्वा महारौद्रं भयावहम् ॥ वृद्धाश्च पुरुषास्तत्र
पाशहस्ता भयावहाः ॥ ४७ ॥ दुर्धर्षा दुर्न्निरीक्ष्याश्च इतश्चेतश्च चंचलाः ॥ व्याहरंतः शुभां वाचं न तत्र गतिरस्ति वै ॥ ४८ ॥ अपरस्परयोः सर्वे
निरीक्षंतः पुनःपुनः ॥ तैस्तु यद्वचनं प्रोक्तं तत्सर्वं कथ्यतामिति ॥४९ ॥ अस्माकं पुरुषाः पंच तिष्ठंति तत्र सत्तमाः ॥ ते प्रस्थाप्या महाभागाः सर्व
थैव त्वरान्विताः॥५०॥अथ ते पुरुषाः पंच श्रुत्वा वाक्यमिदं शुभम् ॥परस्परं निरीक्षंतो वदन्ति च पुनःपुनः॥५१॥क्व ते कस्य कुतो याताः किमुक्तं तै
र्भयावहैः ॥ ५२ ॥ पुरुषा ऊचुः ॥ तीर्थावगाहनं सर्वैः पूर्वदक्षिणपश्चिमैः ॥ उत्तरैश्च कृतं भक्त्या न पापं तैर्व्यपोहितम् ॥ ५३ ॥ निष्पापाश्चाथ
संजातास्तीर्थस्याऽस्य प्रभावतः ॥ शृण्वंतु ऋषयः सर्वे वह्निकालोपमा द्विजाः ॥ ५४ ॥ पातकानि च घोराणि यान्यचिंत्यानि देहिनाम् ॥
पापिष्ठेन तु चैकेन गुरुदारा निषेविता ॥५५॥ हृतं चाऽन्येन मित्रस्वं सुवर्णं च धनं तथा ॥ ब्रह्महत्या महारौद्रा कृता चाऽन्येन पातकम् ॥५६॥
सुरापानं तु चान्यस्य संजातं चाप्यकामतः ॥ गोवध्या चाप्यकामेन कृता चैकेन पापिना ॥ ५७ ॥ अकामतोऽपि सर्वेषां पातकानि नराधिप ॥
ब्राह्मणानां तु ते श्रुत्वा वाक्यं तद्विस्मयान्विताः ॥ ५८ ॥ सद्य एव तदा जाताः पापिष्ठा गतकल्मषाः ॥ तीर्थस्याऽस्य प्रभावेन नर्मदायाः प्रभा
वतः ॥ ५९ ॥ न क्वचित्पातकानां तु प्रवेशश्चाऽत्र जायते ॥ एवं संचित्य ते सर्वे पापिष्ठाश्च परस्परम् ॥ ६० ॥ चित्रभानुः स्मृतस्तैस्तु विचिंत्य
हृदये हरिम् ॥ स्नात्वा रेवाजले पुण्ये तर्पिताः पितृदेवताः ॥ ६१ ॥ नत्वा तु भास्करं देवं हृदि ध्यात्वा जनार्दनम् ॥ प्रदक्षिणं तु तं भक्त्या
ज्वलंतं जातवेदसम् ॥६२॥ पतिताः पांडवश्रेष्ठ पापोद्विग्ना महीपते ॥ सात्त्विकीं वासनां कृत्वा त्यक्त्वा रजस्तमस्तथा ॥ ६३ ॥ हतं तैः पावके
सर्व्वं रेवाया उत्तरे तटे ॥ विमानस्थास्तदा दृष्टा ब्राह्मणैस्ते युधिष्ठिर ॥ ६४ ॥ आश्चर्यमतुलं दृष्टमृषिभिर्नर्मदातटे ॥ तदाप्रभृति ते सर्वे रागद्वेष
विवर्जिताः ॥ ६५ ॥ रवितीर्थं द्विजा दृष्टाः सेवन्ते मोक्षकांक्षया ॥ तीर्थस्याऽस्य च यत्पुण्यं तच्छृणुष्व नराधिप ॥ ६६ ॥ पीडितो वृद्धभावेन
भक्त्या प्रीतो नरेश्वर ॥ उद्देशं कथयिष्यामि द्विक्रोशाभ्यंतरे स्थितः ॥ ६७ ॥ कुरुक्षेत्रं यथा पुण्यं रवितीर्थं श्रुतं मया ॥ ईश्वरेण पुरा ख्यातं
षण्मुखस्य नराधिप ॥ ६८ ॥ श्रुतं रुद्राच्च तैः सर्व्वैरहं तत्र समीपगः ॥ ॥ ईश्वर उवाच ॥ ॥ मार्त्तंडग्रहणे प्राप्ते ये व्रजंति षडानन ॥
रवितीर्थे कुरुक्षेत्रे तुल्यमेतत्फलं लभेत् ॥ ६९ ॥ स्नाने दाने तथा जप्ये होमे चैव विशेषतः॥ कुरुक्षेत्रे समं पुण्यं नाऽत्र कार्या विचारणा ॥७०॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रामे वा यदि वाऽरण्ये पुण्या सर्वत्र नर्मदा ॥ रवितीर्थे विशेषेण रेवा पुण्यफलप्रदा ॥ ७१ ॥ षष्ठ्यां सूर्यदिने भक्त्या व्यतीपाते च वै धृतौ ॥ संक्रांतौ ग्रहणेऽमायां ये व्रजंति जितेंद्रियाः ॥ ७२ ॥ कामक्रोधैर्विमुक्ताश्च रागद्वेषैस्तथैव च ॥ उपोष्य परया भक्त्या देवस्याऽग्रे नराधिप ॥ ॥ ७३ ॥ रात्रौ जागरणं कृत्वा दीपं देवस्य बोधयेत् ॥ कथां वै वैष्णवीं पार्थ वेदाभ्यसनमेव च ॥ ७४ ॥ ऋग्वेदं वा यजुर्वेदं सामवेदमथर्वणम् ॥ ऋचमेकां जपेद्यस्तु स वेदफलमाप्नुयात् ॥ ७५ ॥ गायत्र्या च चतुर्वेदफलमाप्नोति मानवः ॥ प्रभाते पूजयेद्विप्रानन्नदानहिरण्यतः ॥ ७६ ॥ भूमिदानेन वस्त्रेण अन्नदानेन शक्तितः ॥ छत्रोपानहशय्यादिगृहदानेन पाण्डव ॥ ७७ ॥ ग्रामधूर्वहदानेन गजकन्याहयेन च ॥ विद्याशकटदानेन सर्वेषामभयं भवेत् ॥ ७८ ॥ शत्रुश्च मित्रतां याति विषं चैवाऽमृतं भवेत् ॥ ग्रहा भवंति सुप्रीताः प्रीतस्तस्य दिवाकरः ॥ ७९ ॥ एतत्ते सर्वमाख्यातं रवितीर्थफलं नृप ॥ ये शृण्वंति नरा भक्त्या रवितीर्थफलं शुभम् ॥८०॥ तेऽपि पापविनिर्मुक्ता रविलोके वसंति हि ॥ गोदानेन च यत्पुण्यं यत्पुण्यं भृगुदर्शने ॥ ८१ ॥ केदार उदकं पीत्वा तत्पुण्यं जायते नृणाम् ॥ अब्दमश्वत्थसेवायां तिलपात्रप्रदो भवेत् ॥ ८२ ॥ तत्फलं समवाप्नोति आदित्येश्वरकीर्त्तनात् ॥ श्रुते यस्य प्रभावे न[१] जायते यन्नृपात्मज ॥ ८३ ॥ तत्सर्वं कथयिष्यामि भक्त्या तव महीपते ॥ पापानि च प्रलीयन्ते भिन्नपात्रे यथा जलम् ॥ ८४ ॥ तीर्थस्याऽभिमुखो नित्यं जायते नाऽत्र संशयः ॥ गुह्याद्गुह्यतरं तीर्थं कथितं तव पांडव ॥ ८५ ॥ पापिष्ठानां कृतघ्नानां स्वामिमित्रावघातिनाम् ॥ तीर्थाख्यानं शुभं तेषां गोपितव्यं सदा बुधैः ॥ ८६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे आदित्येश्वरतीर्थमाहात्म्यवर्णनंनाम षष्टितमोऽध्यायः ॥६०॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्परं पुण्यं नर्मदादक्षिणे तटे ॥ शक्रतीर्थं सुविख्यातमशेषाघविनाशनम् ॥ १ ॥ पुरा शक्रेण तत्रैव तपो वै दुरतिक्रमम् ॥ प्रारब्धं परया भक्त्या देवं प्रति महेश्वरम् ॥ २ ॥ ततः संतोषितो देव उमापतिर्नराधिप ॥ देवेंद्रत्वं वरं राज्यं दानवानां वधं ददौ ॥ ३ ॥ लब्धं शक्रेण नृपते नर्मदातीर्थभावतः॥ ततः पुण्यतमं तीर्थं संजातं वसुधातले॥४॥ कार्त्तिकस्य तु मासस्य कृष्णपक्षे त्रयोदशीम् ॥ उपोष्य वै नरो भक्त्या सर्वपापैः प्रमुच्यते ॥५॥ दुःस्वप्नसंभवैः पापैर्दुर्निमित्तसमुद्भवैः॥ ग्रहशाकिनिसंभूतैर्मुच्यते पांडुनंदन ॥६॥ शक्रेश्वरं नृपश्रेष्ठ ये प्रपश्यंति भक्तितः ॥ तेषां जन्मकृतं पापं नश्यते नाऽत्र संशयः ॥७॥ अगम्यागमने चैव अवाह्ये चैव वाहिते ॥ स्वामिमित्रविघाते यन्नश्यते नाऽत्र संशयः ॥ ८ ॥ गोप्रदानं

१ न जायते—मुक्तो भवति—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





प्रकर्तव्यं शुभं ब्राह्मणपुंगवे ॥ धुर्यं वा दापयेत्तस्मिन्सर्वांगरुचिरं नृप ॥ ९ ॥ दातव्यं परया भक्त्या स्वर्गे वासमभीप्सता ॥ एतत्ते सर्वमाख्यातं शक्रेश्वरफलं नृप ॥१०॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे शक्रेश्वरतीर्थमाहात्म्यवर्णनंनामैक षष्टितमोऽध्यायः ॥ ६१ ॥ ॥छ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र करोडीश्वरमुत्तमम् ॥ यत्र वै निहतास्तात दानवाः सपदानुगाः ॥ १ ॥ इन्द्रादिदेवैः संहृष्टैः सततं जयबुद्धिभिः ॥ तेषां ये पुत्रपौत्राश्च पूर्ववैरमनुस्मरम् ॥ २ ॥ क्रुद्धैर्देवसमूहैश्च दानवा निहता रणे ॥ तेषां शिरांसि संगृह्य सर्वे देवाः सवासवाः ॥ ३ ॥ निक्षिप्य नर्मदातोये बंधुभावमनुस्मरम् ॥ तत्र स्नात्वा सुराः सर्वे स्थापयित्वा उमापतिम् ॥४॥ इन्द्रेण सहिताः सर्वेऽपूजयँल्लोकसिद्धये ॥ हृष्टचित्ताः सुराः सर्वे जग्मुराकाशमंडलम् ॥ ५ ॥ दानवानां महाभाग सूदिता कोटिरुत्तमा ॥ तदाप्रभृति तत्तीर्थं करोडीति महीतले ॥ ६ ॥ विख्यातं तु तदा लोके पापघ्नं पांडुनंदन ॥ अष्टम्यां च चतुर्दश्यामुभौ पक्षौ च भक्तितः ॥ उपोष्य शूलिनश्चाग्रे रात्रौ कुर्वीत जागरम् ॥ ७ ॥ सत्कथापाठसंयुक्तो वेदाध्ययनसंयुतः ॥ प्रभाते विमले प्राप्ते पूजयेत्त्रिदशेश्वरम् ॥ ८ ॥ पंचामृतेन संस्नाप्य श्रीखण्डेन च गुंठयेत् ॥ शस्तैः पल्लवपुष्पैश्च पूजयेत्तु प्रयत्नतः ॥ ९ ॥ बहुरूपं जपन्मंत्रं दक्षिणाशां व्यवस्थितः ॥ यथोक्तेन विधानेन नाभिमात्रे जले क्षिपेत् ॥ १० ॥ तिलांजलिं तु प्रेताय दक्षिणाशामुपस्थितः ॥ श्राद्धं तत्रैव विप्राय कारयेद्विजितेंद्रियः ॥ ११ ॥ विषमैरग्रजातैश्च वेदाभ्यसनतत्परैः ॥ गोहिरण्येन संपूज्य तांबूलैर्भोजनैस्तथा ॥ १२ ॥ भूषणैः पादुकाभिश्च ब्राह्मणान्पांडुनंदन ॥ भवेत्कोटिगुणं तस्य नात्र कार्या विचारणा ॥ १३ ॥ तस्मिंस्तीर्थे तु यः कश्चित्त्यजेद्देहं विधानतः ॥ तस्य भवति यत्पुण्यं तच्छृणुष्व नराधिप ॥ १४ ॥ यावदस्थीनि तिष्ठंति मर्त्यस्य नर्मदाजले ॥ तावद्वसति धर्मात्मा शिवलोके सुदुर्लभे ॥ १५ ॥ ततः कालाच्च्युतस्तस्मादिह मानुषतां गतः ॥ कोटीधनपतिः श्रीमान्जायते राजपूजितः ॥ १६ ॥ सर्वधर्मसमायुक्तो मेधावी बीजपुत्रकः ॥ विख्यातो वसुधापृष्ठे दीर्घायुर्मानवो भवेत् ॥ १७ ॥ पुनः स्मरति तत्तीर्थं तत्र गत्वा नृपोत्तम ॥ करोडेश्वरमभ्यर्च्य प्राप्नोति परमां गतिम् ॥ १८ ॥ इन्द्रचन्द्रयमै रुद्रैरादित्यैर्वसुभिस्तथा ॥ विश्वेदेवैस्तथा सर्वैः स्थापितस्त्रिदशेश्वरः ॥ १९ ॥ रेवाया उत्तरे कूले लोकानां हितकाम्यया ॥ मानवो भक्तिसंयुक्तः प्रासादं कारयेत्तु यः ॥ २० ॥

१ अनुस्मरम्–अनुस्मृत्यानुस्मृत्य–इत्यर्थः दीर्घाभाव आर्षः। २ दीर्घाभाव आर्षः।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मिंस्तीर्थे नरश्रेष्ठ सद्गतिं समवाप्नुयात् ॥ न्यायोपात्तधनेनैव दारुपाषाणकेष्टकैः ॥ २१ ॥ ब्राह्मणः क्षत्रियैर्वैश्यैः शूद्रैः स्त्रीभिश्च शक्तितः ॥ तेपि यांति नरा लोके शांकरे सुरपूजिते ॥ २२ ॥ यः शृणोति सदा भक्त्या माहात्म्यं तीर्थजं नृप ॥ तस्य पापं प्रणश्येत षण्मासाभ्यंतरं च यत् ॥ २३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे करोडीश्वरतीर्थमाहात्म्यवर्णनंनाम द्विषष्टितमोऽध्यायः ॥ ६२ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्त राजेंद्र कुमारेश्वरमुत्तमम् ॥ प्रसिद्धं सर्वतीर्थानामगस्त्येश्वरसन्निधौ ॥ १ ॥ षण्मुखेन पुरा तात सर्वपातकनाशनम् ॥ आराध्य परया भक्त्या सिद्धिः प्राप्ता नराधिप ॥ २ ॥ देवसैन्याधिपो जातः सर्वशत्रुनिबर्हणः ॥ उग्रतेजा महात्माऽसौ संजातस्तीर्थसेवनात् ॥ ३ ॥ तदाप्रभृति तत्तीर्थं संजातं नर्मदातटे ॥ तत्र तीर्थे तु यो गत्वा एकचित्तो जितेंद्रियः ॥ ४ ॥ कार्त्तिकस्य चतुर्दश्यामष्टम्यां च विशेषतः ॥ स्नापयेद्गिरिजानाथं दधिदुग्धेन सर्पिषा ॥ ५ ॥ गीतं तत्र प्रकर्तव्यं पिंडदानं यथाविधि ॥ ब्राह्मणैः श्रोत्रियैः पार्थ षट्कर्मनिरतैः शुभैः ॥ ६ ॥ यत्किंचिद्दीयते तत्र अक्षयं पांडुनन्दन ॥ सर्वतीर्थमयं तीथ निर्मितं शिखिना नृप ॥ ७ ॥ एतत्ते सर्वमाख्यातं कुमारेश्वरजं फलम् ॥ कुमारदर्शनात्पुण्यं प्राप्यते पांडुनन्दन ॥ ८ ॥ मृतः स्वर्गमवाप्नोति सत्यमीश्वरभाषितम् ॥ ९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे कुमारेश्वरतीर्थमाहात्म्यवर्णनंनाम त्रिषष्टितमोऽध्यायः ॥६३॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र तीर्थं परमशोभनम् ॥ नराणां पापनाशाय अगस्त्येश्वरमुत्तमम् ॥ १ ॥ तत्र स्नात्वा नरो राजन्मुच्यते ब्रह्महत्यया ॥ कार्त्तिकस्य तु मासस्य कृष्णपक्षे चतुदशी ॥ २ ॥ घृतेन स्नापयेद्देवं समाधिस्थो जितेंद्रियः ॥ एकविंशति कुलोपेतो च्यवेदेश्वरात्पदात ॥ ३ ॥ धनं चोपानहौ छत्रं दद्याच्च घृतकंबलम् ॥ भोजनं चैव सर्वेषां सर्वं कोटिगुणं भवेत् ॥ ४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे अगस्त्येश्वरतीर्थमाहात्म्यवर्णनंनाम चतुःषष्टितमोऽध्यायः ॥ ६४ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र आनंदेश्वरमुत्तमम् ॥ रुद्रस्य परमानंदो यत्र जातो युधिष्ठिर ॥ तत्तीर्थं कथयिष्यामि सर्वपापक्षयं करम् ॥१॥ ॥ युधिष्ठिर उवाच ॥ ॥ आनंदश्चैव संजातो रुद्रस्य द्विजसत्तम ॥ कथ्यतां मे च तत्सर्वं संक्षेपात्सह बांधवैः ॥२॥

१ पाषाणकाः—पाषाणा एव स्वार्थे कन् । २ शिखिना—शिखिवाहनेन--इत्यर्थः । ३ बांधवैः सह--सहिताय-मे--इत्यर्थो बोद्धव्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ कथयामि नृपश्रेष्ठ आनंदेश्वरमुत्तमम् ॥ दानवानां वधं कृत्वा देवदेवो महेश्वरः ॥ ३ ॥ पूजितो दैवतैः सर्वैः किन्न
रैर्यक्षपन्नगैः ॥ आनंदसंयुतो देवो ननर्त वृषवाहनः॥ ४ ॥ भैरवं रूपमास्थाय गौर्या चार्द्धांगसंस्थितः ॥ भूतवेतालकंकालैर्भैरवैर्भैरवो वृतः ॥ ५ ॥
ननर्त नर्मदातीरे दक्षिणे पांडुनंदन ॥ तुष्टैर्मरुद्गणैः सर्वैः स्थापितः कमलासनः ॥ ६ ॥ तदाप्रभृति तत्तीर्थमानंदेश्वरमुच्यते ॥ अष्टम्यां च चतु
र्दश्यां पौर्णमास्यां नराधिप ॥ ७ ॥ विधिवच्चार्चयेद्देवं सुगंधेन विलेपयेत् ॥ ब्राह्मणान्पूजयेत्तत्र यथाशक्त्या युधिष्ठिर ॥ ८ ॥ गोदानं तत्र कर्त्त
व्यं वस्त्रदानं शुभावहम् ॥ वसंतस्य त्रयोदश्यां श्राद्धं तत्रैव कारयेत् ॥ ९ ॥ इंगुदैर्बदरैर्बिल्वैरक्षतैश्च जलेन वा ॥ प्रेतानां कारयेच्छ्राद्धमानंदेश्वर
उत्तमे ॥ १० ॥ आनंदित भवेयुस्ते यावदाभूतसंप्लवम् ॥ संततेर्वै न विच्छेदः सप्तजन्मसु जायते ॥ आनंदोहि भवत्तेषां प्रतिजन्मनि भारत ॥
॥ ११ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे आनंदेश्वरतीर्थमाहात्म्यवर्णनंनाम पंचषष्टित
मोऽध्यायः ॥ ६५ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र मातृतीर्थमनुत्तमम् ॥ संगमस्य समीपस्थं नर्मदादक्षिणे
तटे ॥ १ ॥ मातरस्तत्र राजेंद्र संजाता नर्मदातटे ॥ उमार्द्धनारिदेहेशो व्यालयज्ञोपवीतधृक् ॥ २ ॥ उवाच योगिनीवृंदं कष्टंकष्टमहो हर ॥ अजे
याः सर्वदेवानां त्वत्प्रसादान्महेश्वर ॥ ३ ॥ तीर्थमत्र विधानेन प्रख्यातं वसुधातले ॥ एवं भवतु योगिन्य इत्युक्त्वाऽन्तरधाच्छिवः ॥ ४ ॥
॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तत्र तीर्थे तु यो भक्त्या नवम्यां नियतः शुचिः ॥ उपोष्य परया भक्त्या पूजयेन्मातृगोचरम् ॥ ५ ॥ तस्य स्यु
र्मातरः प्रीताः प्रीतोऽयं वृषवाहनः ॥ वंध्याया मृतवत्साया अपुत्राया युधिष्ठिर ॥ ६ ॥ स्नापनं चारभेत्तत्र मंत्रशास्त्रविदुत्तमः ॥ सहिरण्येन कुंभेन
पंचरत्नफलान्वितः ॥ ७ ॥ स्नापयेत्पुत्रकामायाः कांस्यपात्रेण देशिकः ॥ पुत्रं सा लभते नारी वीर्यवंतं गुणान्वितम् ॥ ८ ॥ यो यं काममभिध्याये
त्ततः स लभते नृप ॥ मातृतीर्थात्परं तीर्थं न भूतं न भविष्यति ॥ ९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्य
खंडे रेवाखंडे मातृतीथमाहात्म्यवर्णनंनाम षट्षष्टितमोऽध्यायः ॥ ६६ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तस्यैवानंतरं तात जल
मध्ये व्यवस्थितम् ॥ लुंकेश्वरमिति ख्यातं सुरासुरनमस्कृतम् ॥ १ ॥ इदं तीर्थं महापुण्यं नानाश्चर्यं महीतले ॥ अस्य तीर्थस्य माहात्म्यमुत्पत्तिं
श‍ृणु भारत ॥ २ ॥ आसीत्पुरा महावीर्यो दानवो बलदर्पितः ॥ कालपृष्ठ इति ख्यातः सुतो ब्रह्मसुतस्य च ॥ ३ ॥ गंगातटं समाश्रित्य चचार

१ मातृगोचरम्—शंकरम्—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विपुलं तपः ॥ अधोमुखोऽपि संस्थित्वाऽपिबद्धूममहर्निशम् ॥ ४ ॥ ततश्चानंतरं देवस्तिष्ठते ह्युमया सह ॥ दृष्ट्वा तं पार्वती सा तु तपस्युग्रे व्यवस्थितम्॥ ५ ॥ पश्यपश्य महादेव धूमाशी तिष्ठते नरः ॥ प्रसीद तं कुरुष्वाऽद्य देहि शीघ्रं वरं विभो ॥ ६ ॥ ॥ ईश्वर उवाच ॥ ॥ यदुक्तं वचनं देवि न तन्मे रोचते प्रिये ॥ स्वकार्यं च सदा चिंत्यं परकार्यं विसर्जयेत् ॥ ७ ॥ मूर्खस्त्रीबालशत्रूणां यश्छंदेनाऽनुवर्त्तते ॥ व्यसने पतते घोरे सत्यमेतदुदीरितम् ॥ ८ ॥ ॥ देव्युवाच ॥ ॥ भार्ययाऽभ्यर्थितो भर्त्ता कारणं बहु भाषते ॥ लघुत्वं याति सा नारी एवं शास्त्रेषु पठ्यते ॥ ९ ॥ प्राणत्यागं करिष्यामि यदि मां त्वं न मन्यसे ॥ पार्वत्या प्रेरितो देवो गतोऽसौ दानवं प्रति ॥ १० ॥ ॥ ईश्वर उवाच ॥ ॥ किमर्थं पिबसे धूमं किमर्थं तप्यसे तपः ॥ किं दुःखं किं नु संतापो वद कार्यमभीप्सितम् ॥ ११ ॥ युवा त्वं दृश्यसेऽद्यापि वर्षविंशतिरेव च ॥ तदाचक्ष्व हि मे सर्व्वं तपसः कारणं महत् ॥ १२ ॥ ॥ दानव उवाच ॥ ॥ अचला दीयतां भक्तिर्मम स्थैर्य्यं तवोपरि ॥ अपरं वर्षसाहस्रं निर्विघ्नं मे गतं विभो ॥ ॥ १३ ॥ दिवसानां सहस्रे द्वे पूर्णे त्वत्तपसा मम ॥ १४ ॥ ॥ ईश्वर उवाच ॥ ॥ याचयाऽभीप्सितं कार्यं तुष्टोऽहं तव सुव्रत ॥ देवस्य वचनं श्रुत्वा चिंतयामास दानवः ॥ १५ ॥ किं नाकं याचयाम्यद्य किमद्य सकलां महीम् ॥ एवं संचिंतयामास कामबाणेन पीडितः ॥ १६ ॥ ॥ दानव उवाच ॥ ॥ यदि तुष्टोऽसि मे देव वरं दास्यसि मे प्रभो ॥ संग्रामैस्तु न तुष्टोऽहं बलं नास्तीति किंच न ॥ १७ ॥ यस्य मूर्द्धन्यहं देव पाणिना समुपस्पृशे ॥ देवदानवगंधर्वो भस्मसाद्यातु तत्क्षणात् ॥ १८ ॥ ॥ ईश्वर उवाच ॥ ॥ यत्त्वया चिंतितं किंचित्तत्सर्वं सफलं तव ॥ उत्तिष्ठ गच्छ शीघ्रं त्वं भवनं प्रति दानव ॥ १९ ॥ ॥ दानव उवाच ॥ ॥ स्थीयतां देवदेवेश यावज्ज्ञास्यामि ते वरम् ॥ युष्मन्मूर्ध्नि न्यसे पाणिं प्रत्ययो मे भवेद्यथा ॥ २० ॥ ततश्चानंतरं देवश्चिंतयानो महेश्वरः ॥ न स्कंदो न हरिर्ब्रह्मा यः कार्येषु क्षमोऽधुना ॥ २१ ॥ ज्ञात्वा चैवापदं प्राप्तां देवः प्रार्थयते वृषम्॥अनेन सह पापेन युध्यस्व सांप्रतं क्षणम्॥२२॥करं प्रासारयद्दैत्यो देवं मूर्ध्नि किल स्पृशेत् ॥ लांगूलेनाऽहतो दैत्यो विषण्णः पतितो भुवि॥२३॥ देवस्तु दक्षिणामाशां गतश्चैवोमया सह ॥ भयभीतो निरीक्षेत ग्रीवां भज्य पुनःपुनः ॥ २४ ॥ गते चाऽदर्शनं देवे युयुधे वृषभेण सः॥ द्वावेतौ बलिनां श्रेष्ठौ युयुधाते महाबलौ ॥ २५ ॥ प्रहारैर्वज्रसदृशैः कोपेन घटिकात्रयम् ॥ पाणिभ्यां न स्पृशेद्यो वै वृषभस्य शिरस्तथा ॥ २६ ॥ हत्वा लांगूलपातेन आगतो वृषभस्तदा ॥ उत्थितश्चाप्यसौ दैत्यो व्रजते वृषपृष्ठतः ॥ २७ ॥ वायुवेगेन संप्राप्तो यत्र देवो महेश्वरः ॥ आगतं

१ यावत्--इत्यध्याहारः । तावत्--इत्याक्षितेन--उत्तरेण वाक्येन संबंधः । २ भज्य--तं निरीक्षितुं पश्चात्परिवृत्य--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





दानवं दृष्ट्वा वृषो वचनमब्रवीत् ॥ २८ ॥ आरुह्य पृष्ठे मे देव शीघ्रमेव हि गम्यताम् ॥ आरुह्य वृषभं देवो जगाम चोमया सह ॥ २९ ॥ नाकं प्राप्तस्ततो देवो गतः शक्रस्य मंदिरम् ॥ नात्यजद्देवपृष्ठं तु दानवो बलदर्पितः ॥ ३० ॥ इंद्रलोकं परित्यज्य ब्रह्मलोकं गतस्तदा ॥ यत्रयत्र व्रजे देवो भयात्सह दिवौकसैः ॥ ३१ ॥ अपश्यत्तत्र तत्रैव पृष्ठे लग्नं तु दानवम् ॥ सर्वांल्लोकान्भ्रमित्वा तु देवो विस्मयमागतः ॥ ३२ ॥ न स्थानं विद्यते किंचिद्यत्र विश्रम्यते क्षणम् ॥ देवदानवयोस्तत्र युद्धं ज्ञात्वा सुदारुणम् ॥ ३३ ॥ हर्षितात्मा मुनिस्तत्र चिरं नृत्यति नारदः ॥ धन्योऽहमद्य मे जन्म जीवितं च सुजीवितम् ॥ ३४ ॥ महांतं च कलिं दृष्ट्वा सन्तोषः परमोऽभवत् ॥ देवदानवयोस्तत्र युद्धं त्यक्त्वा च नारदः ॥ ३५ ॥ आजगाम ततो विप्रो यत्र देवो महेश्वरः ॥ दृष्ट्वा देवोथ तं विप्रं प्रतिपूज्याऽब्रवीदिदम् ॥३६॥ भो नारद मुनिश्रेष्ठ जानीषे केशवं क्वचित् ॥ गत्वा तत्र च शीघ्रं त्वं केशवाय निवेदय ॥ ३७ ॥ ॥ नारद उवाच ॥ ॥ देवदानवसिद्धानां गंधर्वोरगरक्षसाम् ॥ सर्वेषामेव देवेशो हरते ध्रुवमापदम् ॥ ॥ ३८ ॥ असंभाव्यं न वक्तव्यं मनसाऽपि न चिंतयेत् ॥ ईदृशीं नैव बुद्ध्यामि आपदं च विभो तव ॥ ३९ ॥ ॥ ईश्वर उवाच ॥ ॥ गच्छ नारद शीघ्रं त्वं यत्र देवो जनार्दनः ॥ विदितं च त्वया सर्वं यत्कृतं दानवेन तु ॥ ४० ॥ अवध्यो दानवो ह्येष सेन्द्रैरपि मरुद्गणैः ॥ गत्वा तु केशवं देवं निवेदय महामुने ॥ ४१ ॥ ॥ नारद उवाच ॥ ॥ न तु गच्छाम्यहं देव सुप्तः क्षीरोदधौ सुखी ॥ केशवः प्रेरणे ह्येषामादेशो दीयतां प्रभो ॥४२॥ मात्रा स्वस्रा दुहित्रा वा राजानं च तथा प्रभुम् ॥ गुरुं चैवाऽदितः कृत्वा शयानं न प्रबोधयेत् ॥ ४३ ॥ ॥ ईश्वर उवाच ॥ ॥ यदि क्वचिदगारेषु वह्निरुत्पद्यते महान् ॥ निधनं यांति तत्रस्था यद्युद्ध्येरन्नसूरयः ॥ ४४ ॥ ॥ नारद उवाच ॥ ॥ शीघ्रं गच्छ महादेव आत्मानं रक्ष सुप्रभो ॥ गच्छाम्यहं न सन्देहो यत्र देवो जनार्दनः ॥ ४५ ॥ ततो नंदिमहाकालौ स्तम्भहस्तौ भयानकौ ॥ जघ्नतुर्दानवं तत्र मुद्गरा दिभिरायुधैः ॥ ४६ ॥ त्रयोऽपि च महाकायाः सप्ततालप्रमाणकाः ॥ न शमो जायते तेषां युध्यतां च परस्परम् ॥ ४७ ॥ ततश्चानंतरं विप्रोऽग च्छत्तं केशवं प्रति ॥ सुप्तं क्षीरार्णवेऽपश्यच्छेषपर्यंकसंस्थितम् ॥ ४८ ॥ लक्ष्म्या पादयुगं गृह्य ऊरूपरि निवेशितम् ॥ अप्सरोगीयमानं तु

॥ ६३ ॥ भक्त्याऽऽनम्य च केशवम् ॥ ४९ ॥ अद्य मे सफलं जन्म जीवितं च सुजीवितम् ॥ उत्थापयस्व देवेशं लक्ष्मि त्वमविशंकिता ॥ ५० ॥ नारदस्य वचः श्रुत्वा पदांगुष्ठं व्यमर्दयत् ॥ नारदस्तिष्ठते द्वारि उत्तिष्ठ मधुसूदन ॥ ५१ ॥ देवोऽपि नारदं दृष्ट्वा परं हर्षमुपागतः ॥ स्वागतं तु मुनिश्रेष्ठ सुप्र भाताऽद्य शर्वरी ॥ ५२ ॥ ॥ नारद उवाच ॥ ॥ अद्य मे सफलं देव प्रभातं तव दर्शनात् ॥ कुशलं च न देवानां शीघ्रमुत्तिष्ठ गम्यताम् ॥ ५३ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीविष्णुरुवाच ॥ ॥ ब्रह्मा चेद्रश्च रुद्रश्च ये चान्ये तु मरुद्गणाः ॥ आपदः कारणं यच्च तत्समाख्यातुमर्हसि ॥ ५४ ॥ ॥ नारद उवाच ॥ ॥ दानवेन महातीव्रं तपस्तप्तं सुदारुणम् ॥ रुद्रेण च वरो दत्तो भस्मत्वं मनसेप्सितम् ॥ ५५ ॥ वरदानबलेनैव स देवं हन्तुमर्हति ॥ ईदृशं चेष्टितं ज्ञात्वा नीतो देवोऽमरैः सह ॥ ५६ ॥ नारदस्य वचः श्रुत्वा जगाम समुनिर्हरिः ॥ दृष्ट्वा देवस्तमीशानं गच्छन्तं दिशमुत्तराम् ॥ ५७ ॥ दृष्ट्वा देवं च रुद्रोथ परिष्वज्य पुनःपुनः ॥ नमस्कृत्य जगन्नाथं देवं च मधुसूदनः ॥५८॥ ॥विष्णुरुवाच॥ ॥भयस्य कारणं देव कथ्यतां च महेश्वर ॥ देवदानवय क्षाणां प्रेषयेयं यमालयम् ॥५९॥ ललाटे च कृतो घर्म्मो युष्माकं च महेश्वर॥छित्वा शिरस्तथांगानि इंद्रियाणि न संशयः ॥६०॥ ॥ ईश्वर उवाच ॥ नास्ति सौख्यं च मूर्खेषु नास्ति सौख्यं च रोगिषु ॥ पराधीनेन सौख्यं तु स्त्रीजिते च विशेषतः ॥६१॥ स्त्रीजितेन मया विष्णो वरो दत्तस्तु दानवे ॥ यस्य मूर्ध्नि न्यसेत्पाणिं स भवेद्भस्मपुंजवत् ॥६२॥ अजेयश्चामरश्चैव मया ह्युक्तः स केशव ॥ हंतुमिच्छति मां पाप उपायस्तव विद्यते ॥६३॥ ॥विष्णुरुवाच ॥ गच्छंतु अमराः सर्वे युष्माभिः सह शंकर ॥ उपायं सर्जयाम्यद्य वधार्थं दानस्य च॥६४॥रेवायाश्च तटे तिष्ठ देव त्वममरैः सह ॥कालक्षेपो न कर्त्तव्यो गम्यतां त्वरितं प्रभो॥६५॥दक्षिणा यत्र गंगा च रेवा चैव महानदी ॥यत्रयत्र च दृश्येत प्राची चैव सरस्वती॥६६॥तत्समं च महातीर्थं न म र्त्त्ये चैव दृश्यते ॥ स्नानं ये तत्र कुर्वंति दानं चैव तु भक्तितः ॥ ६७ ॥ सप्तजन्मकृतं पापं नश्यते नात्र संशयः ॥ एतत्तीर्थं महापुण्यं सर्व पातकनाशनम् ॥ ६८ ॥ गम्यतां तत्र देवेश लुंकेशं त्वं सहामरैः ॥ विष्णोस्तु वचनादेव प्रविष्टो ह्रदमुत्तमम् ॥ ६९ ॥ रतिं सुमहतीं चक्रे सह तत्र मरुद्गणैः ॥ ततश्चानंतरं देवो मायां कृत्वा ह्यनेकधा ॥ ७० ॥ वसंतमासं संसृज्य उद्यानवनशोभितम् ॥ अशोकैर्बकुलैश्चैव ब्रह्मवृक्षैः सुशोभनैः ॥ ७१ ॥ श्रीवृक्षैश्च कपित्थैश्च शिरीषै राजचंपकैः ॥ श्रीफलैश्च ताथा तालैः कदंबोदुंबरैस्तथा ॥ ७२ ॥ अश्वत्थादिद्रुमैश्चैव नानावृक्षै रनेकशः ॥ नानापुष्पैः सुगंधाढ्यैर्भ्रमरैश्च निनादितम् ॥ ७३ ॥ तस्मिन्मध्ये महावृक्षो न्यग्रोधश्च सुशोभनः ॥ बहुपक्षिसमायुक्तः कोकिलाराव नादिनः ॥ ७४ ॥ कृष्णेन च कृतं तस्मिन्कन्यारूपं च तत्क्षणात् ॥ न तस्याः सदृशी कन्या त्रैलोक्ये सचराचरे ॥ ७५ ॥ अन्याश्च कन्यकाः सप्त सुरूपाः शुभलोचनाः ॥ दिव्यरूपधराः सर्वा दिव्याभरणभूषिताः ॥ ७६ ॥ पुमांसमभिकांक्षंत्यो यद्येकः कामयेत्स्त्रियः ॥ मौक्तिकै रत्नमाणिक्यैर्वैडूर्यैश्च सुशोभनैः ॥ ७७ ॥ कामहारैश्च वंशैश्च बद्धो हिंदोलकः कृतः ॥ आरूढाश्च महाकन्या गायांते सुस्वरं तदा ॥७८॥ मारुतः शीतलो वाति वनं स्पृष्ट्वा सुशोभनम् ॥ वातेन प्रेरितो गंधो दानवो घ्राणपीडितः ॥ ७९ ॥ ततः कुसुमगंधेन विस्मयं परमं गतः ॥ आघ्राय चेदृशं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

पुण्यं न दृष्टं न श्रुतं मया ॥ ८० ॥ वने चिंतयतः किंचिद्ध्वनि गीतं सुशोभनम् ॥ गीतस्य च ध्वनिं श्रुत्वा मोहितो मायया हरेः ॥ ८१ ॥ व्या
धस्यैव महाकूटे पतंति च यथा मृगाः ॥ कालस्पृष्टस्तथा कृष्णे पतितश्च नराधिप ॥ ८२ ॥ दृष्ट्वा कन्यां च तां दैत्यो मूर्च्छया पतितो भुवि ॥
पतितेन तु दृष्टैका कन्या वटतले स्थिता ॥ ८३ ॥ आस्यं दृष्ट्वा तु नारीणां पुनः कामेन पीडितः ॥ गृहीत्वा हेमदंडं तु तां पातयितुमिच्छति
॥ ८४ ॥ ॥ कन्योवाच ॥ ॥ मा मानुस्पर्शय त्वं हि कुमार्यहं कुलोत्तम ॥ भो मुंचमुंच मां शीघ्रं यावद्गच्छाम्यहं गृहम् ॥ ८५ ॥ ॥ दानव
उवाच ॥ ॥ अहं विवाहमिच्छामि त्वया सह सुशोभने ॥ भूपृष्ठे सकले राज्ञी भवस्येवं न संशयः ॥ ८६ ॥ ॥ कन्योवाच ॥ ॥ पिता रक्षति
कौमार्ये भर्त्ता रक्षति यौवने ॥ पुत्रो रक्षति वृद्धत्वे न स्त्री स्वातंत्र्यमर्हति ॥ ८७ ॥ न स्वातंत्र्यं ममैवास्ति उत्पन्नाहं महत्कुले ॥ याच्यस्तु मत्पिता
भ्राता मातापि हि तथैव च ॥ ८८ ॥ ॥ दानव उवाच ॥ ॥ यदि मां नेच्छसे त्वद्य स्वातंत्र्यं नावलंबसे ॥ ममापि च तदा हत्या सत्यं च
शुभलोचने ॥ ८९ ॥ ॥ कन्योवाच ॥ ॥ विश्वासो नैव कर्तव्यो यादृशे तादृशे नरे ॥ नराः स्त्रीषु विचित्राश्च लंपटाः काममोहिताः ॥ ९० ॥
परिणीय तु मां त्वं हि भुंक्ष्व भोगान्मया सह ॥ जन्मनाशो भवेत्पश्चान्न त्वं नान्यो भवेन्मम ॥ ९१ ॥ ब्राह्मणी क्षत्रिणी वैशी शूद्री यावत्तथैव
च ॥ द्वितीयो न भवेद्भर्त्ता एकाकी चेह जन्मनि ॥ ९२ ॥ ॥ दानव उवाच ॥ ॥ यत्त्वया गदितं वाक्यं तन्मया धारितं हृदि ॥ प्रत्ययं मे
कुरुष्वाऽद्य यत्ते मनसि रोचते ॥ ९३ ॥ ॥ कन्योवाच ॥ ॥ जानीष्व गोपकन्यां मां क्रीडामि सखिभिः सह ॥ अस्मत्कुलेषु यद्दिव्यं
तत्कुरुष्व यथाविधि ॥ ९४ ॥ न तद्दिव्यं कुलेऽस्माकं विषं कोशं न तत्तुला ॥ गोपान्वयेषु सर्वेषु हस्तः शिरसि दीयते ॥ ९५ ॥ कामांधेनैव
राजेंद्र निक्षितो मस्तके करः ॥ तत्क्षणाद्भस्मसाद्भूतो दग्धस्तृणचयो यथा ॥ ९६ ॥ केशवोपरि देवैस्तु पुष्पवृष्टिः शुभा कृता ॥ हृष्टाः सर्वेऽगम
न्देवाः स्वस्थानं विगतज्वराः ॥ ९७ ॥ क्षीरोदं केशवोगच्छत्कालपृष्ठे निपातिते ॥ य इदं शृणु याद्भक्त्या चरितं दानवस्य च ॥ ९८ ॥ स जयी
जायते नित्यं शंकरस्य वचो यथा ॥ एतस्मात्कारणाद्राजँल्लिंगेश्वरमिति श्रुतम् ॥ ९९ ॥ लीनं च पातकं यस्मात्स्नानमात्रेण नश्यति ॥ त्वगस्थि[1]
॥ ६४ ॥ शोणितं मांसं मेदस्नायुस्तथैव च ॥१००॥ मज्जाशुक्रगतं पापं नश्यते जन्मकोटिजम् ॥ लुंकेश्वरे महाराज तोयं पिबति भक्तितः ॥ १ ॥ त्रिभिः
प्रसृतिमात्राभिः पापं यांति सहस्रधा ॥ विशेषेण चतुर्दश्यामुभौ[2] पक्षौ तु चाष्टमी ॥ २ ॥ उपोष्य यो नरो भक्त्या पितॄणां पांडुनन्दन ॥ उद्धृता ॥२३८॥

१ त्वगस्थ्यादिगतं पापम्--इत्यर्थोऽत्र यथाकथंचिद्बोद्धव्यः प्रकरणात् । २ अस्य इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तेन ते सर्वे नारकीयाः पितामहाः ॥ ३ ॥ काकिणीं चैव यो दद्याद्ब्राह्मणे वेदपारगे ॥ तेन दानफलं सर्वं कुरुक्षेत्रादिकं च यत् ॥ ४ ॥ प्राप्तं तु नान्यथा राजञ्च्छंकरो वदते त्विदम् ॥ स्पर्शलिंगमिदं राजञ्च्छंकरेण तु निर्मितम् ॥ ५ ॥ स्पर्शमात्रे मनुष्याणां रुद्रवासोऽभिजायते ॥ तेन दानफलं सर्वं कुरुक्षेत्रादिकं च यत् ॥ ६ ॥ एतस्मात्कारणाद्राजँल्लोकपालाश्च रक्षकाः ॥ दुर्गा च रक्षणे सृष्टा चतुर्हस्तधरा शुभा ॥ ७ ॥ धनदो लोकपालेशो रक्षकश्चेश्वरस्य च ॥ रक्षति च सदा कालं ग्रहव्यापाररूपतः॥८॥पुत्रभ्रातृसमारूपैः स्वामिसंबंधरूपिभिः॥ लंकेश्वरं च राजेंद्र देवैर्नाऽप्यापि मुच्यते ॥ १०९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखंडे लुंकेश्वरतीर्थमाहात्म्यवर्णनं नाम सप्तषष्टितमोऽध्यायः ॥ ६७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ धनदस्य तु तत्तीर्थं ततो गच्छेद्युधिष्ठिर ॥ नर्मदादक्षिणे कूले सर्वपापक्षयंकरम् ॥ १ ॥ सर्वतीर्थफलं तत्र प्राप्यते नात्र संशयः ॥ चैत्रमासत्रयोदश्यां शुक्लपक्षे जितेंद्रियः ॥ २ ॥ उपोष्य परया भक्त्या रात्रौ कुर्वीत जागरम् ॥ पंचामृतेन राजेंद्र स्नापयेद्धनदं बुधः ॥ ३ ॥ दीपं घृतेन दातव्यं गीतं वाद्यं च कारयेत् ॥ प्रभाते पूजयेद्विप्रानात्मनः श्रेय इच्छति ॥ ४ ॥ प्रतिग्रहसमर्थांश्च विद्यासिद्धांतवादिनः ॥ श्रौतस्मार्त्तक्रियायुक्तान्परदारपराङ्मुखान् ॥ ५ ॥ पूजयेद्गोहिरण्येन वस्त्रोपानहभोजनैः ॥ छत्रशय्याप्रदानेन सर्वपापक्षयो भवेत् ॥६॥ त्रिजन्मजनितं पापं धनदस्य प्रभावतः ॥ स्वर्गदं दुर्विनीतानां विनीतानां च मोक्षदम् ॥ ७ ॥ अन्नदं च दरिद्राणां भवेज्जन्मनिजन्मनि ॥ कुलीनत्वं दुःखहानिः स्वभावाज्जायते नरे ॥८॥ व्याधिध्वंसो भवेत्तेषां नर्मदोदकसेवनात् ॥ धनदस्य तु यस्तीर्थे विद्यादानं प्रयच्छति ॥ ॥९॥स याति भास्करे लोके सर्वव्याधिविवर्जिते ॥ देवद्रोणीं च तत्रैव स्वशक्त्या पांडुनंदन ॥ १० ॥ ये प्रकुर्वंति भूयिष्ठां रेवाया दक्षिणे तटे ॥ ते यांति शांकरे लोके सर्वदुःखविवर्जिते ॥ ११ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे धनदतीर्थमाहात्म्यवर्णनंनामाष्टषष्टितमोऽध्यायः ॥ ६८ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र मंगलेश्वरमुत्तमम् ॥ स्थापितं भूमिपुत्रेण लोकानां हितकाम्यया ॥ १ ॥ तोषितः परया भक्त्या शंकरः शशिशेखरः ॥ चतुर्दश्यां गुरुर्देवः प्रत्यक्षो मङ्गलेश्वरः ॥ २ ॥ ब्रूहि पुत्र वरं शुभ्रन्तन्ते दास्यामि मंगल ॥ ३ ॥ ॥ मंगल उवाच ॥ ॥ प्रसादं कुरु मे शंभो प्रतिजन्मनि शंकर ॥ त्वदंगस्वेदसंभूतो ग्रहमध्ये वसाम्यहम्॥४॥ त्वत्प्रसादेन ईशान पूज्योऽहं सर्वदैवतैः ॥ कृतार्थोऽद्य संजातस्तव दर्शनभाषणात् ॥ ५ ॥ स्थानेऽस्मिन्देवदेवेश मम नाम्ना महेश्वरः ॥ एवं भवतु

१ तत्प्राप्यते--इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ते पुत्रेत्युक्त्वा चांतरधीयत ॥ ६ ॥ मंगलोऽपि महात्मा वै स्थापयित्वा महेश्वरम् ॥ आत्मयोगबलेनैव शूलिनाऽपूजयत्ततः ॥ ७ ॥ सर्व्वदुःख हरं लिंगं नाम्ना वै मंगलेश्वरम् ॥ तत्र तीर्थे तु वै राजन्ब्राह्मणान्प्रीणयेत्सुधीः ॥ ८ ॥ सपत्नीकान्नृपश्रेष्ठ चतुर्थ्यंगारके व्रते ॥ पत्नीभर्त्तारसंयुक्तं विद्वांसं श्रोत्रियं द्विजम् ॥ ९ ॥ व्रतांते चैव गोधूर्यैः शिवमुद्दिश्य दीयते ॥ प्रीयतां मे महादेवः सपत्नीको वृषध्वजः ॥ १० ॥ वस्त्रयुग्मं प्रदातव्यं लोहितं पांडुनंदन ॥ धूर्वहौ रक्तवर्णौ च शुभ्रं कृष्णं तथैव च ॥ ११ ॥ छत्रं शय्यां शुभां चैव रक्तमाल्यानुलेपनम् ॥ दातव्यं पाण्डवश्रेष्ठ विशुद्धेनांतरात्मना ॥ १२ ॥ चतुर्थ्यां तु तथाऽष्टम्यां पक्षयोः शुक्लकृष्णयोः ॥ श्राद्धं तत्रैव कर्त्तव्यं वित्तशाठ्येन वर्जितः ॥ १३ ॥ प्रेता भवंति सुप्रीता युगमेकं महीपते ॥ सपुत्रो जायते मर्त्यः प्रतिजन्म नृपोत्तम ॥ १४ ॥ तस्य तीर्थस्य भावेन सर्वांगरुचिरो नृप ॥ मंगलं भवते वंशे नाऽशुभं विद्यते क्वचित् ॥ १५ ॥ भक्त्या यः कीर्त्तयेन्नित्यं तस्य पापं व्यपोहति ॥ १६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे मंगलेश्वरतीर्थमाहात्म्यवर्णनंनामैकोनसप्ततितमोऽध्यायः ॥ ६९ ॥ ॥ छ ॥ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ रेवाया उत्तरे कूले तीर्थं परमशोभनम् ॥ रविणा निर्मितं पार्थ सर्वपापक्षयंकरम् ॥ १ ॥ स्वांशेन भास्कर स्तत्र तिष्ठते चोत्तरे तटे ॥ सर्वव्याधिहरः पुंसां नर्मदायां व्यवस्थितः ॥ २ ॥ षष्ठ्यांषष्ठ्यां नृपश्रेष्ठ ह्यष्टम्यां च चतुर्दशीम् ॥ स्नानं यः कारये न्मर्त्यः श्राद्धं प्रेतेषु भक्तितः ॥ तस्य पापक्षयः पार्थ सूर्यलोके महीयते ॥ ३ ॥ ततः स्वर्गाच्युतः सोऽपि जायते विमले कुले ॥ धनाढ्यो व्याधि निर्मुक्तो जीवेज्जन्मनिजन्मनि ॥ ४ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे रवितीर्थ माहात्म्यवर्णनंनाम सप्ततितमोऽध्यायः ॥ ७० ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ कामेश्वरं ततश्चान्यच्छृणु पांडवसत्तम ॥ सिद्धो यत्र गणाध्यक्षो गौरीपुत्रो महाबलः ॥ १ ॥ तत्र तीर्थे तु यो भक्त्या भक्तियुक्तो जितेंद्रियः ॥ पंचामृतेन संस्नाप्य धूपनैवेद्यपूजनैः ॥ २ ॥ प्रसाद्य जगतामीशं सर्वपापैः प्रमुच्यते ॥ अष्टम्यां मार्गशीर्षस्य तत्र स्नात्वा युधिष्ठिर ॥ ३ ॥ यो येन यजते तत्र स तं काममवाप्नुयात् ॥ ४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे कामेश्वरतीर्थमाहात्म्यवर्णनंनामैकसप्ततितमोऽध्यायः ॥ ॥ ७१ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र मणिनागेश्वरं शुभम् ॥ उत्तरे नर्मदाकूले सर्वपापक्षयंकरम् ॥ स्थापितं

१ पत्नीभर्तारसंयुक्तं विद्वांसं श्रोत्रियं द्विजम्–एतस्य समुदितस्यार्थस्य–विद्वद्ब्राह्मणदाम्पत्यम्–इत्यर्थः । २ येन--कामेन--इत्यध्याहारः । येन कामेन–यंयं काममभिध्याय--इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मणिनागेन लोकानां हितकाम्यया ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ आशीविषेण सर्प्पेण ईश्वरस्तोषितः कथम् ॥ क्षुद्राः सर्वस्य लोकस्य भयदा विषशालिनः ॥ २ ॥ कथ्यतां तात मे सर्वं पातकस्योपशांतिदम् ॥ मम संतापजं दुःखं दुर्योधनसमुद्भवम् ॥ ३ ॥ कर्णभीष्मोद्भवं रौद्रं दुःखं पांचालिसंभवम् ॥ तव वक्त्रांबुजौघेन प्लावितं निर्वृतिं गतः ॥ ४ ॥ श्रुत्वा तव मुखोद्गीतां कथां वै पापनाशिनीम् ॥ अयुक्तमिदमस्माकं द्विज क्लेशो न शाम्यति ॥ ५ ॥ अथवा प्राप्स्यते तात विद्यादानस्य यत्फलम् ॥ तत्फलं प्राप्यते नित्यं कथाश्रवणतो हरेः ॥ ६ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ यथायथा त्वं नृप भाषसे च तथातथा मे सुखमेति भारती ॥ शैथिल्यता वा जरयान्वितस्य त्वत्सौहृदं नश्यति नैव तात ॥ शृणुष्व तस्मात्सह बांधवैश्च कथामिमां पापहरां प्रशस्ताम् ॥ ७ ॥ कथयामि यथावृत्तमितिहासं पुरातनम् ॥ ८ ॥ कथितं पूर्वतो वृत्तैः पारंपर्येण भारत ॥ ९ ॥ द्वे भार्ये कश्यपस्यास्तां सर्वलोकेष्वनुत्तमे ॥ गरुत्मन्तं च विनताऽसूत कद्रूरहीनथ ॥ १० ॥ संतोषेण च ते तात तिष्ठतः काश्यपे गृहे ॥ कद्रूश्च विनतानाम हृष्टे च वनिते सदा ॥ ११ ॥ ताभ्यां सार्द्धं क्रीडते च कश्यपोऽपि प्रजापतिः ॥ ततस्त्वेकदिने प्राते आश्रमस्था शुभानना ॥ १२ ॥ उच्चैःश्रवं हयं दृष्ट्वा मनोवेगसमन्वितम् ॥ पश्यपस्य हि तन्वंगी हयं सर्वत्र पांडुरम् ॥ १३ ॥ धावमानमविश्रांतं जवेन मनसोपमम् ॥ तं दृष्ट्वा सहसा चाऽश्वमीर्ष्याभावेन चाब्रवीत् ॥ १४ ॥ ॥ कद्रूरुवाच ॥ ब्रूहि भद्रे सहस्रांशोरश्वः किंवर्णको भवेत ॥ अहं ब्रवीमि कृष्णोऽयं त्वं किं वदसि तद्वद ॥ १५ ॥ ॥ विनतोवाच ॥ ॥ पश्यसे ननु नेत्रैश्च कृष्णं श्वेतं न पश्यसि ॥ असत्यभाषणाद्भद्रे यमलोकं गमिष्यसि ॥ १६ ॥ ॥ सत्यानृते तु वचने पणस्तव ममैव तु ॥ सहस्रं चैव वर्षाणां दास्यहं तव मंदिरे ॥ १७ ॥ असत्या यदि मे वाणी कृष्ण उच्चैः श्रवा यदि ॥ तदाहं त्वद्गृहे दासी भवामि सर्पमातृके ॥ १८ ॥ यदि उच्चैश्रवाः श्वेतोऽहं दासी च तवैव तु ॥ एवं परस्परं द्वाभ्यां संवादोऽयं व्यवर्द्धत ॥ १९ ॥ आश्रमेषु गता बाला रात्रौ चिंतापरा स्थिता ॥ बंधुवर्गस्य कथितं समस्तं तद्विचेष्टितम् ॥ २० ॥ पुत्राणां कथितं पार्थ पणं चैव मया कृतम् ॥ हाहाकारः कृतः सर्पैः श्रुत्वा मात्रा पणं कृतम् ॥ २१ ॥ जाता दासी न संदेहः श्वेतो भास्करवाहनः ॥ उच्चैःश्रवा हयः श्वेतो न कृष्णो विद्यते क्वचित् ॥ २२ ॥ ॥ कद्रूरुवाच ॥ ॥ यथाऽहं न भवे दासी तत्कार्यं च विचिंत्यताम् ॥ विशध्वं रोमकूपेषु ह्युच्चैःश्रवहयस्य तु ॥ २३ ॥ एकं मुहूर्त्तमात्रं तु यावत्कृष्णः स दृश्यते ॥ क्षणमात्रेण चैकेन दासी सा भवते मम ॥ २४ ॥ दासीं कृत्वा तु तां तन्वीं विनतां सत्यगर्विताम् ॥ ततः स्वस्थानगाः सर्वे भविष्यथ यथासुखम् ॥ २५ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सर्पा ऊचुः ॥ ॥ यथा त्वं जननी चांब सर्वेषां भुवि पूजिता ॥ तथा साऽपि विशेषेण वंचितव्या न मातरः ॥२६॥ माता च पितृभार्या च मातृ
माता पितामही ॥ कर्मणा मनसा वाचा हितं तासां समाचरेत् ॥ २७ ॥ सा ततस्तेन वाक्येन क्रुद्धा कालानलोपमा ॥ मम वाक्यमकुर्वाणा
ये केचिद्भुवि पन्नगाः ॥ २८ ॥ हव्यवाहमुखे सर्वे ते यास्यंत्यविचारितम् ॥ मातुस्तद्वचनं श्रुत्वा सर्वे चैव भुजंगमाः ॥ २९ ॥ केचित्प्रविष्टा रोमेषु
उच्चैःश्रवहयस्य च ॥ नष्टाः केचिद्दशदिशं कद्रूशापभयात्ततः ॥ ३० ॥ केचिद्गंगाजले नष्टाः केचिन्नष्टाः सरस्वतीम् ॥ केचिन्महोदधौ लीनाः
प्रविष्टा विंध्यकंदरे ॥ ३१ ॥ आश्रित्य नर्मदातोये मणिनागोत्तमो नृप ॥ तपश्चचार विपुलमुत्तरे नर्मदातटे ॥ ३२ ॥ मातृशापभयात्पार्थ ध्यायते
कामनाशनम् ॥ अच्छेद्यमप्रतर्क्यं च विनाशोत्पत्तिवर्जितम् ॥ ३३ ॥ वायुभक्षः शतं साग्रं तदर्धं रविवीक्षकः ॥ एवं ध्यानरतस्यैव प्रत्यक्षस्त्रिपुरां
तकः ॥ ३४ ॥ साधुसाधु महाभाग सत्त्ववांस्तु भुजंगम ॥ त्वया भक्त्या गृहीतोऽहं प्रीतस्ते ह्युरगेश्वर ॥ वरं याचय मे क्षिप्रं यस्ते मनसि वर्त्तते ॥
॥ ३५ ॥ ॥ मणिनाग उवाच ॥ ॥ मातृशापभयान्नाथ क्लिष्टोऽहं नर्मदातटे ॥ त्वत्प्रसादेन मे नाथ मातृशापो भवेद्वृथा ॥ ३६ ॥ ॥ ईश्वर
उवाच ॥ ॥ हव्यवाहमुखं वत्स न प्राप्स्यसि ममाऽऽज्ञया ॥ मम लोके निवासश्च तव पुत्र भविष्यति ॥ ३७ ॥ ॥ मणिनाग उवाच ॥ ॥ अत्र
स्थाने महादेव स्थीयतामंशभागतः ॥ सहस्रांशेन भागेन स्थीयतां नर्मदाजले ॥ उपकाराय लोकानां मम नाम्नैव शंकर ॥ ३८ ॥ ॥ ईश्वर
उवाच ॥ ॥ स्थापयस्व परं लिंगमाज्ञया मम पन्नग ॥ इत्युक्त्वांतर्हितो देवो जगाम ह्युमया सह ॥३९॥ मार्कंडेय उवाच ॥ तत्र तीर्थे तु ये गत्वा
शुचि प्रयतमानसाः ॥ पंचम्यां वा चतुर्दश्यामष्टम्यां शुक्लकृष्णयोः ॥४०॥ अर्चयंति सदा पार्थ नोपसर्पंति ते यमम् ॥ दध्ना च मधुना चैव घृतेन
क्षीरयोगतः ॥ ४१ ॥ स्नापयंति विरूपाक्षमुमादेहार्धधारिणम् ॥ कामांगदहनं देवमघासुरनिषूदनम् ॥ ४२ ॥ स्नाप्यमानं च ये भक्त्वा पश्यंति परमे
श्वरम् ॥ ते यांति च परे लोके सर्वपापविवर्जिते ॥ ४३ ॥ श्राद्धं प्रेतेषु ये पार्थ चाष्टम्यां पंचमीषु च ॥ ब्राह्मणैश्च सदा योग्यै
र्वेदपाठकर्चितकैः ॥ ४४ ॥ स्वदारनिरतैः श्लक्ष्णैः परदारविवर्जितः ॥ षट्कर्मनिरतैस्तात शूद्रप्रेषणवर्जितैः ॥ ४५ ॥ खंजाश्च दर्दुराः षंढा
॥ ६६ ॥ वार्द्धुष्याश्च कृषीवलाः ॥ भिन्नवृत्तिकराः पुत्र नियोज्या न कदाचन ॥ ४६ ॥ वृषली मंदिरे यस्य महिषीं यस्तु पालयेत् ॥ ॥२४०॥
स विप्रो दूरतस्त्याज्यो व्रते श्राद्धे नराधिप ॥ ४७ ॥ काणाष्टुंटांश्च मंटांश्च वेदपाठविवर्ज्जिताः ॥ न ते पूज्या द्विजाः

१ नः–इति शेषः । २ कद्रूः–इत्यर्थः । ३ मे–मत्तः सकाशात्–इत्यर्थः । ४ टुंटाः–अव्यक्तशब्दकर्तारः–इत्यर्थः । शब्दकल्पद्रुमे-टुण्टकशब्दव्याख्यानम् । ३ मण्टाः-उन्मत्ताः-इत्यर्थः। शब्दकल्पद्रुमे–मण्टशब्दव्याख्यानम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पार्थ मणिनागेश्वरे शुभे ॥ ४८ ॥ यदीच्छेदूर्ध्वगमनमात्मनः पितृभिः सह ॥ सर्वांगरुचिरां धेनुं यो दद्यादग्रजन्मने ॥ ४९ ॥ स याति परमं लोकं यावदाभूतसंप्लवम् ॥ ततः स्वर्गाच्च्युतः सोऽपि जायते विमले कुले ॥ ५० ॥ ये पश्यंति परं भक्त्या मणिनागेश्वरं नृप ॥ न तेषां जायते वंशे पन्नगानां भयं नृप ॥ ५१ ॥ पन्नगः शंकते तेषां मणिनागप्रदर्शनात् ॥ सौपर्णरूपिणस्ते वै दृश्यन्ते नागमण्डले ॥ ५२ ॥ फलानि चैव दानानां शृणुष्वाऽथ नृपोत्तम ॥ अन्नं संस्कारसंयुक्तं ये ददंते नरोत्तमाः ॥ ५३ ॥ तोयं शय्यां तथा छत्रं कन्यां दासीं सुभाषिणीम् ॥ पात्रे देयं यतो राजन्यदीच्छेच्छ्रेय आत्मनः ॥ ५४ ॥ सुरभीणि च पुष्पाणि गन्धवस्त्राणि दापयेत् ॥ दीपं धान्यं गृहं शुभ्रं सर्वोपस्करसंयुतम् ॥५५॥ ये ददन्ते परं भक्त्या ते व्रजंति त्रिविष्टपम् ॥ मणिनागे नृपश्रेष्ठ यच्च दानं प्रदीयते ॥ ५६ ॥ तस्य दानस्य भावेन स्वर्गे वासो भवेद्ध्रुवम् ॥ पातकानि प्रलीयन्ते आमपात्रे यथा जलम् ॥ ५७ ॥ नर्मदातोयसंसिद्धं भोज्यं विप्रे ददाति यः ॥ सोऽपि पापैर्विनिर्मुक्तः क्रीडते दैवतैः सह ॥ ५८ ॥ ततः स्वर्गच्युतानां हि लक्षणं प्रवदाम्यहम् ॥ दीर्घायुषो जीवपुत्रा धनवंतः सुशोभनाः ॥ ५९ ॥ सर्वव्याधिविनिर्मुक्ताः सुतभृत्यैः समन्विताः ॥ त्यागिनो भोगसंयुक्ता धर्माख्यानरताः सदा ॥ ६० ॥ देवद्विजगुरोर्भक्तास्तीर्थसेवापरायणाः ॥ मातापितृवशा नित्यं द्रोहक्रोधविवर्जिताः ॥ ६१ ॥ एभिरेव गुणैर्युक्ता ये नराः पांडुनंदन ॥ सत्यंते स्वर्गादायाताः स्वर्गे वासं व्रजंति ते ॥ ६२ ॥ सर्वतीर्थवरं तीर्थं मणिनागं नृपोत्तम ॥ तीर्थाख्यानमिदं पुण्यं यः पठेच्छृणुयादपि ॥ ६३ ॥ सोऽपि पापैर्विनिर्मुक्तः शिवलोके महीयते ॥ न विषं क्रमते तेषां विचरंति यथेच्छया ॥ ६४ ॥ भाद्रपद्यां च यत्षष्ठ्यां पुण्यं सूर्यस्य दर्शने ॥ तत्फलं समवाप्नोति आख्यानश्रवणेन तु ॥ ६५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे मणिनागेश्वरतीर्थमाहात्म्यवर्णनंनाम द्विसप्ततितमोऽध्यायः ॥ ७२ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ नर्मदा दक्षिणे कूले तीर्थं परमशोभनम् ॥ सर्वपापहरं पाथ गोपारेश्वरमुत्तमम् ॥ गोदेहान्निःसृतं लिंगं पुण्यं भूमितले नृप ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ गोदेहान्निःसृतं कस्माल्लिंगं पापक्षयंकरम् ॥ दक्षिणे नर्मदाकूले मणिनागसमीपतः ॥ संक्षेपात्कथ्यतां विप्र गोपारेश्वरसम्भवम् ॥ २ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ कामधेनुस्तपस्तत्र पुरा पार्थ चकार ह ॥ ध्यायते परया भक्त्या देवदेवं महेश्वरम् ॥ ३ ॥ तुष्टस्तस्या जगन्नाथः कपिलाया महेश्वरः ॥ निःसृतो देहमध्यात्तु अच्छेद्यः परमेश्वरः ॥ ४ ॥ तुष्टो देवि जगन्मातः कपिले परमेश्वरि ॥ आराधनं कृतं यस्मात्त

१ अनंतरं मणिनागेश्वरतीर्थे गत्वा स्नात्वा--दानानि दत्त्वा च--इत्यर्थोऽत्राध्याहृत्य बोद्धव्यः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



द्ददाऽऽशु शुभानने ॥ ५ ॥ ॥ सुरभ्युवाच ॥ ॥ लोकानामुपकाराय सृष्टाऽहं परमेष्ठिना ॥ लोककार्याणि सर्वाणि सिद्ध्यंति मत्प्रसादतः ॥ ६ ॥
लोकाः स्वर्गं प्रयास्यन्ति मत्प्रसादेन शंकर ॥ तीर्थे त्वं भव मे शम्भो लोकानां हितकाम्यया ॥ ७ ॥ तथेति भगवानुक्त्वा तीर्थे तत्रावसन्मुदा ॥
तदाप्रभृति तत्तीर्थं विख्यातं वसुधातले ॥ स्नानेनैकेन राजेंद्र पापसंघं व्यपोहति ॥८॥ गोपारेश्वरगोदानं यस्तु भक्त्या च कारयेत् ॥ योग्ये द्विजो
त्तमे देया योग्या धेनुः सकांचना ॥ ९ ॥ सवत्सा तरुणी शुभ्रा बहुक्षीरा सवस्त्रका ॥ कृष्णपक्षे चतुर्दश्यामष्टम्यां वा प्रदापयेत् ॥ १० ॥ सर्वेषु
चैव मासेषु कार्त्तिके च विशेषतः ॥ दापयेत्परया भक्त्या द्विजे स्वाध्यायतत्परे ॥ ११ ॥ विधिना च प्रदद्याद्यो विधिना यस्तु गृह्णते ॥ तावुभौ
पुण्यकर्माणौ प्रेक्षकः पुण्यभाजनम् ॥ १२ ॥ पिंडदानं प्रकुर्याद्यः प्रेतानां भक्तिसंयुतः ॥ पिंडेनैकेन राजेंद्र प्रेता यांति परां गतिम् ॥ १३ ॥
भक्त्या प्रणामं रुद्रस्य ये कुर्वंति दिनेदिने ॥ तेषां पापं प्रलीयेत भिन्नपात्रे जलं यथा ॥ १४ ॥ तत्र तीर्थे तु यो राजन्वृषभं च समुत्सृजेत् ॥ पितर
श्चोद्धृतास्तेन शिवलोके महीयते ॥ १५ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ वृषोत्सर्गे कृते तात फलं यज्जायते नृणाम् ॥ तत्सर्वं कथयस्वाशु प्रय
त्नेन द्विजोत्तम ॥ १६ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ सर्वलक्षणसंपूर्णे वृषे चैव तु यत्फलम् ॥ तदहं संप्रवक्ष्यामि शृणुष्व धर्मनंदन[1] ॥ १७ ॥
कार्त्तिके चैव वैशाखे पूर्णिमायां नराधिप ॥ रुद्रस्य सन्निधौ भूत्वा शुचिः स्नातो जितेंद्रियः ॥ १८ ॥ वृषस्यैव समुत्सर्गं कारयेत्प्रीयतां हरः ॥
सान्निध्ये कारयेत्पुत्र चतस्रो वत्सिकाः शुभाः ॥ १९ ॥ दत्त्वा तु विप्रमुख्याय सर्वलक्षणसंयुताः ॥ प्रीयतां च महादेवो ब्रह्मा विष्णुर्महेश्वरः ॥
॥ २० ॥ वृषभे रोमसंख्या या सर्वांगेषु नराधिप ॥ तावद्वर्षप्रमाणं तु शिवलोके महीयते ॥ २१ ॥ शिवलोके वसित्वा तु यदा मर्त्येषु जाय
ते ॥ कुले महति संभूतिर्धनधान्यसमाकुले ॥ २२ ॥ नीरोगो रूपवांश्चैव विद्याढ्यः सत्यवाक्छुचिः ॥ गोपारेश्वरमाहात्म्यं मया
ख्यातं युधिष्ठिर ॥ गोदेहान्निःसृतं लिंगं नर्मदादक्षिणे तटे ॥ २३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम
आवन्त्यखण्डे रेवाखण्डे गोपारेश्वरमाहात्म्यवर्णनंनाम त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥
॥ ६७ ॥ रेवाया उत्तरे कूले तीर्थं परमशोभनम् ॥ सर्वपापहरं मर्त्ये नाम्ना वै गौतमेश्वरम् ॥ १ ॥ स्थापितं गौतमेनैव लोकानां हितकाम्यया ॥ ॥२४१॥
स्वर्गसोपानरूपं तु तीर्थं पुंसां युधिष्ठिर ॥ २ ॥ तत्र गच्छ परं भक्त्या यत्र देवो जगद्गुरुः ॥ पातकस्य विनाशार्थं स्वर्गवासप्रदस्तथा ॥ ३ ॥

१ पाण्डुनन्दन—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सौभाग्यवर्द्धनं तीर्थं जयदं दुःखनाशनम् ॥ पिंडदानेन चैकेन कुलानामुद्धरेत्त्रयम् ॥ ४ ॥ यत्किंचिद्दीयते भक्त्या स्वल्पं वा यदि वा बहु ॥ तत्सर्वं शतसाहस्रमाज्ञया गौतमस्य हि ॥ ५ ॥ तीर्थानां परमं तीर्थं स्वयं रुद्रेण भाषितम् ॥ ६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे गौतमेश्वरतीर्थमाहात्म्यवर्णनंनाम चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ नर्मदादक्षिणे कूले तीर्थं परमशोभनम् ॥ शंखचूडस्य नाम्ना वै प्रसिद्धं भूमिमंडले ॥ १ ॥ शंखचूडः स्वयं तत्र संस्थितः पांडुनंदन ॥ वैनतेयभयात्पार्थ सुखद नर्मदातटे ॥ २ ॥ तत्र तीर्थे तु यो भक्त्या शुचिर्भूत्वा समाहितः ॥ स्नापयेच्छंखचूडं तु क्षीरक्षौद्रेण सर्पिषा ॥ ३ ॥ रात्रौ जागरणं कुर्याद्दिवस्याग्रे नराधिप ॥ दधिभक्तेन संपूज्य ब्राह्मणाञ्च्छंसितव्रतान् ॥ गोप्रदाने द्विजेंद्रोऽयं सर्वपापक्षयंकरः ॥ ४ ॥ तस्मिंस्तीर्थे तु यः पार्थ सर्प्पदष्टं प्रतर्प्पयेत् ॥ स याति परमं लोकं शंकरस्य वचो यथा ॥ ५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे शंखचूडतीर्थमाहात्म्यवर्णनंनाम पंचसप्ततितमोऽध्यायः ॥ ७५ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत्तु राजेंद्र पारेश्वरमनुत्तमम् ॥ पराशरो महात्मा वै नर्मदायास्तटे शुभे ॥ १ ॥ तपश्चचार विपुलं पुत्रार्थं पांडुनंदन ॥ हिमवद्दुहिता तेन गौरी नारायणी नृप ॥ २ ॥ तोषिता परया भक्त्या नर्मदोत्तरके तटे ॥ तस्य तुष्टा महादेवी, शंकरर्द्धांगधारिणी ॥ ३ ॥ भोभो ऋषिवर श्रेष्ठ तुष्टाऽहं तव भक्तितः ॥ वरं याचय मे विप्र पराशर महामते ॥ ४ ॥ ॥ पराशर उवाच ॥ ॥ परितुष्टाऽसि मे देवि यदि देयो वरो मम ॥ देहि पुत्रं भगवति सत्यशौचगुणान्वितम् ॥ ५ ॥ वेदाभ्यसनशीलं हि सर्वशास्त्रविशारदम् ॥ तीर्थे चाऽत्र भवेद्देवि सन्निधानवरेण तु ॥ ६ ॥ लोकोपकारहेतोश्च स्थीयतां गिरिनंदिनि ॥ पराशराभिधानेन नर्मदादक्षिणे तटे ॥ ७ ॥ ॥ श्रीदेव्युवाच ॥ ॥ एवं भवतु ते विप्र तत्रैवांतरधीयत ॥ पराशरो महात्मा वै स्थापयामास पार्वतीम् ॥ ८ ॥ शंकरं स्थापयामास सुरासुरनमस्कृतम् ॥ अच्छेद्यमप्रतर्क्यं च देवानां तु दुरासदम् ॥ ९ ॥ पराशरो महात्मा वै कृतार्थो ह्यभवन्नृप ॥ १० ॥ तत्र तीर्थे तु यो भक्त्या शुचिः प्रयतमानसः ॥ स्त्र्यथवा पुरुषो वापि कामक्रोधविवर्जितः ॥ ११ ॥ माघे चैत्रेऽथ वैशाखे श्रावणे नृपनंदन ॥ मासि मार्गशिरे चैव शुक्लपक्षे तु सर्वदा ॥ १२ ॥ तत्र गत्वा शुभे स्थाने नर्मदादक्षिणे तटे ॥ १३ ॥ उपोष्य परया भक्त्या व्रतमेतत्समाचरेत् ॥ रात्रौ जागरणं कृत्वा दीपदानं स्वशक्तितः ॥ १४ ॥ गीतं नृत्यं तथा वाद्यं कामक्रोधविवर्जितः ॥ प्रभाते विमले प्राप्ते द्विजाः पूज्याः स्वशक्तितः ॥ १५ ॥ संपूज्य ब्राह्मणान्पार्थ धनदानहिरण्यतः ॥ वस्त्रेण च्छत्रदानेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

शय्याताम्बूलभोजनैः ॥ १६ ॥ प्रीणयेन्नर्मदातीरे ब्राह्मणान्छंसितव्रतान् ॥ श्राद्धं कार्यं नृपश्रेष्ठ आमैः पक्वैर्जलेन च ॥ १७ ॥ स्त्रीणां चैव तु शूद्राणामामश्राद्धं प्रशस्यते ॥ आमं चतुर्गुणं देयं ब्राह्मणानां युधिष्ठिर ॥ १८ ॥ वेदोक्तेन विधानेन द्विजाः पूज्याः प्रयत्नतः ॥ हस्तमात्रैः कुशैश्चैव तिलैश्चैवाक्षतैर्नृप ॥ १९ ॥ विप्रा उदङ्मुखाः कार्याः स्वयं वै दक्षिणामुखः ॥ दर्भेषु निक्षिपेदन्नमित्युच्चार्य द्विजाग्रतः ॥ २० ॥ प्रेता यांतु परे लोके तीर्थस्याऽस्य प्रभावतः ॥ पापं मे प्रशमं यातु एतु वृद्धिं शुभं सदा ॥ २१ ॥ वृद्धिं यातु सदा वंशो ज्ञातिवर्गो द्विजोत्तम ॥ एवमुच्चार्य विप्राय दानं देयं स्वशक्तितः ॥ २२ ॥ गोभूतिसहिरण्यादि चान्नं वस्त्रं स्वशक्तितः ॥ दातव्यं पांडवश्रेष्ठ पारेश्वरवराश्रमे ॥ २३ ॥ ये शृण्वंति परं भक्त्या मुच्यंते सर्वपातकैः ॥ २४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे पारेश्वरतीर्थमाहात्म्यवर्णनंनाम षट्सप्ततितमोऽध्यायः ॥ ७६ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ भीमेश्वरं ततो गच्छेत्सर्वपापक्षयंकरम् ॥ सेवितं ऋषिसंघैश्च भीमव्रतधरैः शुभैः ॥ १ ॥ तत्र तीर्थे तु यः स्नात्वा सोपवासो जितेंद्रियः ॥ जपेदेकाक्षरं मंत्रमूर्ध्वबाहुर्दिवाकरे ॥ २ ॥ तस्य जन्मार्जितं पापं तत्क्षणादेव नश्यति ॥ सप्तजन्मार्जितं पापं गायत्र्या नश्यते ध्रुवम् ॥३॥ दशभिर्जन्मभिर्जातं शतेन तु पुरा कृतम् ॥ सहस्रेण त्रिजन्मोत्थं गायत्री हंति किल्बिषम् ॥ ४ ॥ वैदिकं लौकिकं वापि जाप्यं जप्तं नरेश्वर ॥ तत्क्षणाद्दहते सर्वं तृणन्तु ज्वलनो यथा ॥ ५ ॥ न देवबलमाश्रित्य कदाचित्पापमाचरेत् ॥ अज्ञानान्नश्यते क्षिप्रं नोत्तरं तु कदाचन ॥ ६ ॥ तत्र तीर्थे तु यो दानं शक्तिमाश्रित्य चाचरेत् ॥ तदक्षय्यफलं सर्वं जायते पांडुनंदन ॥ ७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे भीमेश्वरतीर्थमाहात्म्यवर्णनंनाम सप्तसप्ततितमोऽध्ययः ॥७७॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र नारदेश्वरमुत्तमम् ॥ तीर्थानां परमं तीर्थं निर्मितं नारदेन तु ॥१॥ ॥ युधिष्ठिर उवाच ॥ ॥ नारदेन मुनिश्रेष्ठ कस्मात्तीर्थं विनिर्मितम् ॥ एतदाख्याहि मे सर्वं प्रसन्नो यदि सत्तम ॥२॥ श्रीमार्कंडेय उवाच ॥ ॥ परमेष्ठिसुतः पार्थ नारदो मुनिसत्तमः ॥ रेवायाश्चोत्तरे कूले तपस्तेन पुरा कृतम् ॥ ३ ॥ नवनाडीनिरोधेन काष्ठावत्यां गतेन च ॥ तोषितः पशुभर्त्ता वै नारदेन
॥ ६८ ॥ युधिष्ठिर ॥ ४ ॥ ॥ ईश्वर उवाच ॥ ॥ तुष्टोऽहं तव विप्रेंद्र योगिनाथ अयोनिज ॥ वरं प्रार्थय मे वत्स यस्ते मनसि वर्त्तते ॥ ५ ॥ ॥ नारद ॥२४२॥
उवाच ॥ ॥ त्वत्प्रसादेन मे शंभो योगश्चैव प्रसिध्यतु ॥ अचला ते भवेद्भक्तिः सर्वकालं ममैव तु ॥ ६ ॥ स्वेच्छाचारी भवे देव वेदवेदांगपारगः ॥ त्रिकालज्ञो जगन्नाथ गीतज्ञोऽहं सदा भवे ॥ ७ ॥ दिनेदिने यथा युद्धं देवदानवमानुषैः ॥ पाताले मर्त्त्यलोके वा स्वर्गे वाऽपि महेश्वर ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पश्येयं त्वत्प्रसादेन भवंतं पार्वतीं तथा ॥ तीर्थं लोकेषु विख्यातं सर्वपापक्षयंकरम् ॥ ९ ॥ ॥ ईश्वर उवाच ॥ ॥ एवं नारद सर्वं तु भविष्यति न संशयः ॥ चिंतितं मत्प्रसादेन सिद्ध्यते नात्र संशयः ॥ १० ॥ स्वेच्छाचारो भवेर्वत्स स्वर्गे पातालगोचरे ॥ मर्त्ये वा भ्रम वै योगिन्न केनाऽपि निवार्यसे ॥ ११ ॥ सप्त स्वरास्त्रयो ग्रामा मूर्च्छनाश्चैकविंशतिः ॥ ताना एकोनपंचाशत्प्रसादान्मे तव ध्रुवम् ॥ १२ ॥ मम प्रियंकरं दिव्यं नृत्य गीतं भविष्यति ॥ कलिं च पश्यसे नित्यं देवदानवकिन्नरैः ॥ १३ ॥ त्वत्तीर्थं भूतले पुण्यं मत्प्रसादाद्भविष्यति ॥ वेदवेदांगतत्त्वज्ञो ह्यशेषज्ञानकोविदः ॥ एकस्त्वमसि निःसंगो मत्प्रसादेन नारद ॥१४॥ इत्युक्त्वांतर्दधे देवो नारदस्तत्र शूलिनम् ॥ स्थापयामास राजेंद्र सर्वसत्त्वोपकारकम् ॥ ॥ १५ ॥ पृथिव्यामुत्तमं तीर्थं निर्मितं नारदेन तु ॥ तत्र तीर्थे नृपश्रेष्ठ यो गच्छेद्विजितेंद्रियः ॥ १६ ॥ मासि भाद्रपदे पार्थ कृष्णपक्षे चतुर्दशी ॥ उपोष्य परया भक्त्या रात्रौ कुर्वीत जागरम् ॥ १७ ॥ छत्रं तत्र प्रदातव्यं ब्राह्मणे शुभलक्षणे ॥ शस्त्रेण तु हता ये वै तेषां श्राद्धं प्रदापयेत् ॥ ते यांति परमं लोकं पिंडदानप्रभावतः ॥ १८ ॥ कपिला तत्र दातव्या पितॄनुद्दिश्य भारत ॥ इत्युच्चार्य द्विजे देया यांतु ते परमां गतिम् ॥ १९ ॥ अस्य श्राद्धस्य भावेन ब्राह्मणस्य प्रसादतः ॥ नर्मदातोयभावेन न्यायार्जितधनस्य च ॥ तेषां चैव प्रभावेन प्रेता यांतु परां गतिम् ॥ २० ॥ इत्युच्चार्य द्विजे देया दक्षिणा च स्वशक्तितः॥ हविष्यान्नं विशालाक्ष द्विजानां चैव दापयेत् ॥ २१ ॥ दीपं भक्त्या प्रदातव्यं नृत्यं गीतं च कारयेत् ॥ अवाप्तं तेन वै सर्व्वं यः करोतीश्वरालये ॥ २२ ॥ स याति रुद्रसान्निध्यमिति रुद्रः स्वयं जगौ ॥ विद्यादानेन चैकेन अक्षयां गतिमाप्नुयात् ॥ ॥ २३ ॥ धूर्वहास्तत्र दातव्या भूमिः सस्यवती नृप ॥ चित्रभानुं शुभैर्मंत्रैः प्रीणयेत्तत्र भक्तितः ॥ २४ ॥ आज्येन सुप्रभूतेन होमद्रव्येण भारत ॥ ये यजंति सदा भक्त्या त्रिकालं नृत्यमेव च ॥ २५ ॥ तीर्थे नारदनामाख्ये रेवायाश्चोत्तरे तटे ॥ चित्रभानुमुखा देवाः सर्वदेवमयो ऋषिः ॥ २६ ॥ ऋषिणा प्रीणिताः सर्वे तस्मात्प्रीत्यो[1] हुताशनः ॥ पूजिते हव्यवाहे तु दारिद्र्यं नैव जायते ॥ २७ ॥ धनेन विपुला प्रीतिर्जायते प्रतिजन्मनि ॥ कुलीनाश्च सुवेषाश्च सर्वकालं धनेन तु ॥ २८ ॥ प्लवो नदीनां पतिरंगनानां राजा च सद्वृत्तरतः प्रजानाम् ॥ धनं नराणामृतवस्तरूणां गतं गतं यौवनमानयंति ॥२९॥ धनदत्वं धनेशेन तस्मिंस्तीर्थे ह्युपार्जितम् ॥ यमेन च यमत्वं हि इंद्रत्वं चैव वज्रिणा ॥३०॥ अन्यैरपि महीपालैः पार्थिवत्वमुपार्जितम् ॥ नारदेश्वरमाहात्म्याद्ध्रुवो निश्चलतां गतः ॥ ३१ ॥ सर्वतीर्थवरं तीर्थं निर्मितं नारदेन तु॥ पृथिव्यां सागरांतायां रेवायाश्चोत्तरे तटे ॥

१ प्रीत्यः--प्रीणनीयः--इत्यर्थः । २ युक्ता भविष्यन्ति--इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





तद्वरं सर्वतीर्थानां महापातकनाशनम् ॥ ३२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे नारदेश्वरतीर्थमाहात्म्यवर्णनंनामाष्टसप्ततितमोऽध्यायः ॥ ७८ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र तीर्थद्वयमनुत्तमम् ॥ दधिस्कन्दं मधुस्कंदं सर्वपापक्षयंकरम् ॥ १ ॥ दधिस्कन्दे नरः स्नात्वा यस्तु दद्याद्द्विजे दधि ॥ उपतिष्ठेत्ततस्तस्य सप्तजन्मनि भारत ॥ २ ॥ न व्याधिर्न जरा तस्य न शोको नैव मत्सरः ॥ दशचंद्रशतं यावज्जायते विमले कुले ॥ ३ ॥ मधुस्कन्देऽपि मधुना मिश्रितान्यस्तिलान्ददेत् ॥ नाऽसौ वैवस्वतं देवं पश्येद्वै जन्मसप्ततिम् ॥ ४ ॥ मधुना सह संमिश्रं पिंडं यस्तु प्रदापयेत् ॥ तस्य पौत्रप्रपौत्रेभ्यो दारिद्र्यं नैव जायते ॥ ॥ ५ ॥ दधिभिः सह संमिश्रं पिंडं यस्तु प्रदापयेत् ॥ तस्मिंस्तीर्थे नरः स्नात्वा विधिवद्दक्षिणामुखः ॥ ६ ॥ पिता पितामहश्चैव तथैव प्रपितामहः ॥ द्वादशाब्दानि तुष्यंति नाऽत्र कार्या विचारणा ॥ ७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे दधिस्कन्दमधुस्कन्दतीर्थमाहात्म्यवर्णनंनामैकोनाशीतितमोऽध्यायः ॥ ७९ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र नंदिकेश्वरमुत्तमम् ॥ यत्र सिद्धो महानंदी तत्ते सर्वं वदाम्यहम् ॥ १ ॥ रेवायां पुरतः कृत्वा पुरा नंदी गणेश्वरः ॥ तपस्तपञ्जयं कुर्वंस्तीर्थात्तीर्थं जगाम ह ॥ २ ॥ दधिस्कंदं मधुस्कंदं यावत्त्यक्त्वा तु गच्छति ॥ तावत्तुष्टो महादेवो नंदिनाथमुवाच ह ॥ ३ ॥ ॥ ईश्वर उवाच ॥ ॥ भोभोः प्रसन्नो नंदीश वरं वृणु यथेप्सितम् ॥ तपसा तेन तुष्टोऽहं तीर्थयात्राकृतेन ते ॥ ४ ॥ नंदीश्वर उवाच ॥ न चाऽहं कामये वित्तं न चाऽहं कुलसंततिम् ॥ मुक्त्वा न कामये कामं तव पादांबुजात्परम् ॥ ५ ॥ कृमिकीटपतंगेषु तिर्यग्योनिं गतस्य वा ॥ जन्मजन्मांतरेऽप्यस्तु भक्तिस्त्वयि ममाऽचला ॥ ६ ॥ तथेत्युक्त्वा महादेवः परया कृपया नृप ॥ गृहीत्वा तं करे सिद्धं जगाम निलयं हरः ॥ ७ ॥ तस्मिंस्तीर्थे तु यः स्नात्वा भक्त्या त्र्यक्षं प्रपूजयेत् ॥ अग्निष्टोमस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ ८ ॥ तत्र तीर्थे तु यः स्नात्वा प्राणत्यागं करोति चेत् ॥ शिवस्याऽनुचरो भूत्वा मोदते कल्पमक्षयम् ॥ ९ ॥ ततः कालेन महता जायते विमले कुले ॥ वेदवेदांगतत्त्वज्ञो जीवेच्च शरदां शतम् ॥ १० ॥ एतत्ते कथितं तात तीर्थमाहात्म्यमुत्तमम् ॥ दुर्लभं मर्त्यसंज्ञस्य सर्वपापक्षयंकरम् ॥ ११ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे नंदिकेश्वरतीर्थमाहात्म्यवर्णनंनामाशीतितमोऽध्यायः ॥ ८० ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महाराज वरुणेश्वरमुत्तमम् ॥ यत्र सिद्धो महादेवो वरुणो नृपसत्तम ॥ १ ॥ पिण्याकशाकपर्णैश्च कृच्छ्रचांद्रायणादिभिः ॥ आराध्य गिरिजा



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाथं ततः सिद्धिं परां गतः ॥ २ ॥ तत्र तीर्थे तु यः स्नात्वा संतर्प्य पितृदेवताः ॥ पूजयेच्छंकरं भक्त्या स याति परमां गतिम् ॥ ३ ॥ कुंडिकां वर्द्धनीं वाऽपि महद्वा जलभाजनम् ॥ अन्नेन सहितं पार्थ तस्य पुण्यफलं शृणु ॥४॥ यत्फलं लभते मर्त्त्यः सत्रे द्वादशवार्षिके ॥ तत्फलं समवाप्नोति नाऽत्र कार्या विचारणा ॥ ५ ॥ सर्वेषामेव दानानामन्नदानं परं स्मृतम् ॥ सद्यः प्रीतिकरं तोयमन्नं च नृपसत्तम ॥ ६ ॥ तत्र तीर्थे मृतानां तु नराणां भावितात्मनाम् ॥ वरुणस्य पुरे वासो यावदाभूतसंप्लवम् ॥ ७ ॥ पश्चात्पूर्णे ततः काले मर्त्त्यलोके प्रजायते ॥ अन्नदानप्रदो नित्यं जीवेद्वर्षशतं नरः ॥ ८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे वरुणेश्वरतीर्थमाहात्म्यवर्णनंनामैकाशीतितमो ऽध्यायः ॥ ८१ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल वह्नितीर्थमनुत्तमम् ॥ यत्र सिद्धो महातेजास्तपः कृत्वा हुताशनः ॥ १ ॥ सर्वभक्ष्यः कृतो योऽसौ दंडके मुनिना पुरा ॥ नर्मदातटमाश्रित्य पूतो जातो हुताशनः ॥ २ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयित्वा महेश्वरम् ॥ अग्निप्रवेशं कुरुते स गच्छेदग्निसाम्यताम् ॥ ३ ॥ भक्त्या स्नात्वा तु यस्तत्र तर्प्पयेत्पितृदेवताः ॥ अग्निष्टोमस्य यज्ञस्य फलमाप्नोत्यसंशयम् ॥ ४ ॥ तस्यैवाऽनंतरं राजन्कौबेरं तीर्थमुत्तमम् ॥ कुबेरो यत्र संसिद्धो यक्षाणामधिपः पुरा ॥ ५ ॥ तत्र तीर्थे नरः स्नात्वा समभ्यर्च्य जगद्गुरुम् ॥ उमया सहितं भक्त्या सर्वपापैः प्रमुच्यते ॥ ६ ॥ तत्र तीर्थे तु यः स्नात्वा दद्याद्विप्राय कांचनम् ॥ नाभिमात्रे जले तिष्ठन्स लभेतार्बुदं फलम् ॥ ७ ॥ दधिस्कंदे मधुस्कंदे नंदीशे वरुणालये ॥ आग्नेये यत्फलं तात स्नात्वा तत्फलमाप्नुयात् ॥ ८ ॥ ते वंद्या मानुषे लोके धन्याः पूर्णमनोरथाः ॥ यैस्तु दृष्टं महापुण्यं नर्मदातीर्थपंचकम् ॥ ९ ॥ ते यांति भास्करे लोके परमे दुःखनाशने ॥ भास्करादैश्वरे लोके चैश्वरादनिवर्त्तके ॥ ॥ १० ॥ नीयते स परे लोके यावदिंद्राश्चतुर्दश ॥ ततः स्वर्गाच्च्युतो मर्त्यो राजा भवति धार्मिकः ॥ ११ ॥ सर्वरोगविनिर्मुक्तो भुनक्ति सचराचरम् ॥ विष्णुश्च देवता येषां नर्मदातीर्थसेविनाम् ॥ १२ ॥ अखंडितप्रतापास्ते जायंते नाऽत्र संशयः ॥ गंगा कनखले पुण्या कुरुक्षेत्रे सरस्वती ॥ ॥ १३ ॥ ग्रामे वा यदि वाऽरण्ये पुण्या सर्वत्र नर्मदा ॥ रेवातीरे वसेन्नित्यं रेवातोयं सदा पिबेत् ॥ १४ ॥ स स्नातः सर्वतीर्थेषु सोमपानं दिनेदिने ॥ गंगाद्याः सरितः सर्वाः समुद्राश्च सरांसि च ॥ कल्पांते संक्षयं यांति न मृता तेन नर्मदा ॥ १५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्खण्डे रेवाखण्डे दधिस्कंदादिपंचतीर्थमाहात्म्यवर्णनं नाम द्व्यशीतितमोऽध्यायः ॥ ८२ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महाराज तीर्थं परमशोभनम् ॥ ब्रह्महत्याहरं प्रोक्तं रेवातटसमाश्रयम् ॥ हनूमताभिधं ह्यत्र विद्यते लिंगमुत्तमम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





॥ युधिष्ठिर उवाच ॥ ॥ हनूमंतेश्वरं नाम कथं जातं वदस्व मे ॥ ब्रह्महत्याहरं तीर्थं रेवादक्षिणसंस्थितम् ॥ २ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ साधु साधु महाबाहो सोमवंशविभूषण ॥ गुह्याद्गुह्यतरं तीर्थं नाख्यातं कस्यचिन्मया ॥ ३ ॥ तव स्नेहात्प्रवक्ष्यामि पीडितो वार्द्धकेन तु ॥ पूर्वं जातं महद्युद्धं रामरावणयोरपि ॥ ४ ॥ पुलस्त्यो ब्रह्मणः पुत्रो विश्रवास्तस्य वै सुतः ॥ रावणस्तेन संजातो दशास्यो ब्रह्मराक्षसः ॥ ५ ॥ त्रैलोक्यविजयी भूतः प्रसादाच्छूलिनः स च ॥ गीर्वाणा विजिताः सर्वे रामस्य गृहिणी हृता ॥ ६ ॥ वारितः कुम्भकर्णेन सीतां मोचयमोचय ॥ विभीषणेन वै पापो मन्दोदर्या पुनःपुनः ॥ ७ ॥ त्वं जितः कार्त्तवीर्येण रैणुकेयेन सो॑ऽपि च ॥ स॑ रामो रामभद्रेण तस्य संख्ये कथं जयः ॥ ८ ॥ ॥ रावण उवाच ॥ ॥ वानरैश्च नरैर्ऋक्षैर्वराहैश्च निरायुधैः ॥ देवासुरसमूहैश्च न जितोऽहं कदा॑चन ॥ ९ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ सुग्रीवहनुमद्भ्यां च कुमुदेनांगदेन च ॥ एतैरन्यैः सहायैश्च रामचन्द्रेण वै जितः ॥ १० ॥ रामचन्द्रेण पौलस्त्यो हतः संख्ये महाबलः ॥ वनं भग्नं हताः शूराः प्रभंजनसुतेन च ॥ ११ ॥ रावणस्य सुतो ज॑न्ये हतश्चाक्षकुमारकः ॥ आ॑यामो रक्षसां भीमः संपिष्टो वानरेण तु ॥ १२ ॥ एवं रामायणे वृत्ते सीतामोक्षे कृते सति ॥ अयोध्यां तु गते रामे हनुमान्स महाकपिः ॥ १३ ॥ कैलासाख्यं गतः शैलं प्रणामाय महेशितुः ॥ तिष्ठतिष्ठेत्यऽसौ प्रोक्तो नंदिना वानरोत्तमः ॥ १४ ॥ ब्रह्महत्यायुतस्त्वं हि राक्षसानां वधेन हि ॥ भैरवस्य सभा नूनं नद्रष्टव्या त्वया कपे ॥ १५ ॥ ॥ हनुमानुवाच ॥ ॥ नंदिनाथ हरं पृच्छ पातकस्योपशांतिदम् ॥ पापोऽहं प्लवगो यस्मात्संजातः कारणांतरात् ॥ १६ ॥ ॥ नन्द्युवाच ॥ ॥ रुद्रदेहोद्भवा किं ते न श्रुता भूतले स्थिता ॥ श्रवणाज्जन्मजनितं द्विगुणं कीर्त्तनाद्व्रजेत् ॥ १७ ॥ त्रिंशज्जन्मार्जितं पापं न श्येद्रेवावगाहनात् ॥ तस्मात्त्वं नर्मदातीरं गत्वा चर तपो महत् ॥ १८ ॥ गन्धवाहसुतो॑ऽप्येवं नंदिनोक्तं निशम्य च ॥ प्रयातो नर्मदातीरमौर्व्यां दक्षिणसंगमम् ॥ १९ ॥ दध्यौ सुदक्षिणे देवं विरूपाक्षं त्रिशूलिनम् ॥ जटामुकुटसंयुक्तं व्यालयज्ञोपवीतिनम् ॥ २० ॥ भस्मोपचितसर्वांगं डमरुस्वरनादितम् ॥ उमार्द्धांगहरं शांतं गोनाथासनसंस्थितम् ॥ २१ ॥ वत्सरान्सुबहून्यावदुपासांचक्र ईश्वरम् ॥ तावत्तुष्टो महादेव आजगाम सहोमया ॥ २२ ॥ उवाच मधुरं

१ सः—कार्तवीर्यः । २ सः—रैणुकेयः—रामः—परशुरामः । ३ स्याम्—इति शेषः । ४ जन्ये—युद्धे । ५ आयामः—समूहः—इत्यर्थोऽत्र । ६ गंधवाहसुतः—वायुपुत्रो हनुमान् । ७ गोनाथासनसंस्थितम्—वृषारूढम् ।





Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाणीं मेघगंभीरनिस्वनाम् ॥ साधुसाध्वित्युवाचेशः कष्टं वत्स त्वया कृतम् ॥ २३ ॥ न च पूर्वं त्वया पापं कृतं रावणसंक्षये ॥ स्वामिकार्यरतस्त्वं हि सिद्धोऽसि मम दर्शनात् ॥ २४ ॥ हनुमांश्च हरं दृष्ट्वा उमार्द्धांगहरं स्थिरम् ॥ साष्टांगं प्रणतोऽवोचज्जय शंभो नमोऽस्तु ते ॥ जयांऽधकविनाशाय जय गंगाशिरोधर ॥ २५ ॥ एवं स्तुतो महादेवो वरदो वाक्यमब्रवीत् ॥ वरं प्रार्थय मे वत्स प्राणसंभवसंभव[1] ॥ २६ ॥ ॥ श्रीहनूमानुवाच ॥ ॥ ब्रह्मरक्षोवधाज्जाता मम हत्या महेश्वर ॥ न पापोऽहं भवेदेव युष्मत्संभाषणे क्षणात् ॥ २७ ॥ ॥ ईश्वर उवाच ॥ ॥ नर्मदातीर्थमाहात्म्याद्धर्मयोगप्रभावतः ॥ मन्मूर्त्तिदर्शनात्पुत्र निष्पापोऽसि न संशयः ॥ २८ ॥ अन्यञ्च ते प्रयच्छामि वरं वानरपुंगव ॥ उपकाराय लोकानां नामानि तव मारुते ॥ २९ ॥ हनूमानंजनिसुतो वायुपुत्रो महाबलः ॥ रामेष्टः फाल्गुनो गोत्रः पिंगाक्षोऽमितविक्रमः ॥ ३० ॥ उदधिक्रमणश्रेष्ठो दशग्रीवस्य दर्पहा ॥ लक्ष्मणप्राणदाता च सीताशोकनिवर्त्तनः ॥ ३१ ॥ इत्युक्त्वांतर्दधे देव उमया सह शंकरः ॥ हनूमानीश्वरं तत्र स्थापयामास भक्तितः ॥ ३२ ॥ आत्मयोगबलेनैव ब्रह्मचर्यप्रभावतः ॥ ईश्वरस्य प्रसादेन लिंगं कामप्रदं हि तत् ॥ अच्छेद्यमप्रतर्क्यं च विनाशोत्पत्तिवर्जितम् ॥ ॥ ३३ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ हनूमंतेश्वरे पुत्र प्रत्यक्षप्रत्ययं शृणु ॥ यद्वृत्तं द्वापरस्याऽऽदौ त्रेतांते पांडुनन्दन ॥ ३४ ॥ सुपर्वानाम भूपालो बभूव वसुधातले ॥ तस्य राज्ञः सदा सौख्यं नरा दीर्घायुषः सदा ॥ ३५ ॥ स पुत्रधनसंयुक्तश्चौरोपद्रववर्जितः ॥ शतबाहुर्बभूवाऽस्यः पुत्रो भीमपराक्रमः ॥३६॥ आसक्तोऽसौ सदा कालं पापधर्मैर्नरेश्वर ॥ अटाट्यत धरां सर्वां पर्वतांश्च वनानि च ॥३७॥ वधार्थं मृगयूथानामागतो विंध्यपर्वतम् ॥ तरुजातिसमाकीर्णे हस्तियूथसमाचिते ॥३८॥ सिंहचित्रकशोभाढये मृगवाराहसंकुले ॥ क्रीडित्वा स वने राजा नर्मदामानतः क्वचित् ॥ ॥ ३९ ॥ हनूमंतवने प्राप्तः शतक्रोशप्रमाणके ॥ चिंचिणीवनशोभाढये कदंबतरुसंकुले ॥ ४० ॥ नित्यं पालाशजंबीरैः करंजखदिरैस्तथा ॥ पाटलैर्बदरैर्युक्तैः शमीतिंदुकशोभितम् ॥४१॥ मृगयूथैः समाच्छन्नशिखंडिस्वरनादितम् ॥ पारावतकसंघानां समंतात्स्वरशोभितम् ॥ ४२ ॥ शरत्कालेऽरमद्राजा बहुले[2] चाऽश्विनस्य सः ॥ वनमध्यं गतोऽद्राक्षीद्भ्रमन्तं पिंगलद्विजम् ॥४३॥ पुस्तिकाकरसंस्थं च पप्रच्छ चपलं द्विजम् ॥ ४४ ॥ ॥ शतबाहुरुवाच ॥ ॥ एकाकी त्वं वने कस्माद्भ्रमसे पुस्तिकाकरः ॥ इतस्ततोऽपि संपश्यन्कथयस्व द्विजोत्तम ॥ ४५ ॥ ॥ ब्राह्मण उवाच ॥ ॥ कान्यकुब्जात्समायातः प्रेपितो राजकन्यया ॥ अस्थिक्षेपाय वै राजन्हनूमंतेश्वरे जले ॥ ४६ ॥ ॥ राजोवाच ॥ ॥ अस्थिक्षेपो जले कस्माद्धनूमंतेश्वरे द्विज ॥

---

१ प्राणसंभवसंभव–वायुपुत्र। २ बहुले–कृष्णपक्षे–इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



क्रियते केन कार्येण साश्चर्यं कथ्यतां मम ॥ ४७ ॥ सुपर्वणः सुतो यानं त्यक्त्वा भूमौ प्रणम्य च ॥ कृतांजलिपुटो भूत्वा ब्राह्मणाय नरेश्वर ॥ समस्तं कथयामास वृत्तांतं स्वं पुरातनम् ॥ ४८ ॥ ॥ ब्राह्मण उवाच ॥ ॥ शिखंडीनाम राजाऽस्ति कान्यकुब्जे प्रतापवान् ॥ अपुत्रोऽसौ महीपालः कन्या जाता मनोरथैः ॥ ४९ ॥ जातिस्मरा सुचार्वंगी नर्मदायाः प्रभावतः ॥ पित्रा च सैकदा कन्या विवाहाय प्रजल्पिता ॥ ५० ॥ अनित्ये पुत्रि संसारे कन्यादानं ददाम्यहम् ॥ श्वः कृत्यमद्य कुर्वीत पूर्वाह्णे चाऽपराह्णिकम् ॥ न हि प्रतीक्षते मृत्युः कृतं चास्य न चाकृतम् ॥ ५१ ॥ ॥ कन्योवाच ॥ ॥ इच्छेयं यत्र काले हि तत्र देया त्वया पितुः ॥ पुत्रीवाक्यादसौ राजा विस्मितो वाक्यमब्रवीत् ॥ ५२ ॥ शिखंड्युवाच ॥ ॥ कथ्यतां मे महाभागे साश्चर्यं भाषितं त्वया ॥ पितुर्वाक्येन सा बाला उत्तमा ह्यागतांतिकम् ॥ ५३ ॥ कथयामास यद्वृत्तं हनूमंतेश्वरे नृप ॥ कलापिनी ह्यहं तात युता भर्त्रावसं तदा ॥ ५४ ॥ रेवौर्व्यासंगमान्तिस्था रेवाया दक्षिणे तटे ॥ हनूमंतवने पुण्ये चिक्रीडाहं यदृच्छया ॥ ५५ ॥ भर्तृयुक्ता च संसुप्ता रजन्यां सरले नगे ॥ आगता लुब्धकास्तत्र क्षुधार्त्ता वनमुत्तमम् ॥ ५६ ॥ भर्तृयोगयुता पापैर्दृष्टाऽहं वधचिंतकैः ॥ पाशबंधं समादाय बद्धाहं स्वमिना सह ॥ ५७ ॥ ग्रीवां ते मोटयामासुः पिच्छाच्छोटनकं कृतम् ॥ हुताशनमुखे तैस्तु सह कांतेन लुब्धकैः ॥ ५८ ॥ पारिभर्ज्यावयोर्मांसं भक्षयित्वा यथेष्टतः ॥ सुप्ताः स्वस्थेंद्रिया रात्रौ सा गता शर्वरी क्षयम् ॥ ५९ ॥ प्रभाते मांसशेषं च जंबुकैर्गृध्रघातिभिः ॥ मच्छरीरोद्भवं चास्थि स्नायुमांसेन चावृतम् ॥ ६० ॥ गृहीतं घातिनैकेन चाकाशात्पतितं तदा ॥ तं मांसभक्षणं दृष्ट्वा परे पक्षिण आगताः ॥ ६१ ॥ दृष्ट्वा पक्षिसमूहं तु अस्थिखंडं व्यसर्जयत् ॥ विहगानां समस्तानां धावतां चैव पश्यताम् ॥ ६२ ॥ पतितं नर्मदातोये हनूमंतेश्वरे नृप ॥ मदीयमस्थिखंडं च पतितं नर्मदाजले ॥ ६३ ॥ तस्य तीर्थस्य पुण्येन जाताऽहं पुत्रिका तव ॥ भूपकन्या त्वहं जाता पूर्णचन्द्रनिभानना ॥ ६४ ॥ जातिस्मरा नरेंद्रस्य संजाता भवतः कुले ॥ तस्माद्विवाहं नेच्छामि मम भर्त्ता नृपोत्तम ॥ ६५ ॥ विषमे वर्त्ततेऽद्यापि शकुंतमृगजातिषु ॥ तस्यास्थिशेषं राजेंद्र तस्मिंस्तीर्थे भविष्यति ॥ ६६ ॥ तत्क्षेपणार्थं वै तात प्रेषयाऽद्य द्विजोत्तमम् ॥ एतत्ते सर्वमाख्यातं कारणं नृपसत्तम ॥ ६७ ॥ मद्भर्त्ता विषमे स्थाने शकुंतमृगजातिषु ॥ यदि प्रेषयसे तात कंचित्त्वं नर्मदातटे ॥ ६८ ॥ तस्याहं कथयिष्यामि स्थानैश्चिह्नैश्च लक्षितम् ॥ शिखंडिनाऽप्यहं तत्र ह्याहूतो ह्यवनीपते ॥ ६९ ॥ दास्यामि विंशतिग्रामान्गच्छ त्वं नर्मदातटे ॥ प्रेषणं मे प्रतिज्ञातमलक्ष्म्या पीडितेन तु ॥ ७० ॥ ॥ कन्योवाच ॥ ॥ गच्छ त्वं नर्मदां पुण्यां सर्वपापक्षयंकरीम् ॥ आग्नेय्यां सोमनाथस्य हनूमंतेश्वरः



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परः ॥ ७१ ॥ अर्द्धक्रोशेन रेवाया विस्तीर्णो वटपादपः ॥ करंजः कटहश्चैव सन्निधाने वटस्य च ॥ ७२ ॥ न्यग्रोधमूलसान्निध्ये सूक्ष्मान्यस्थीनि द्रक्ष्यसि ॥ समूह्य तानि संगृह्य गच्छ रेवां द्विजोत्तम ॥ ७३ ॥ आश्विनस्याऽसिते पक्षे त्रिपुरारेस्तु वै तिथौ ॥ स्नाप्य त्रिशूलिनं भक्त्या रात्रौ त्वं कुरु जागरम् ॥ ७४ ॥ क्षिपेः प्रभाते तानि त्वं नाभिमात्रजलस्थितः ॥ इत्युच्चार्य द्विजश्रेष्ठ विमुक्तिस्तस्य जायताम् ॥ ७५ ॥ क्षिप्त्वास्थीनि पुनः स्नानं कर्त्तव्यं त्वघनाशनम् ॥ एवं कृते तु राजेंद्र गतिस्तस्य भविष्यति ॥ ॥ ७६ ॥ कथितं कन्यया यच्च तत्सर्वं पुस्तिकाकृतम् ॥ आगतोऽहं नृपश्रेष्ठ तीर्थेऽत्र दुरितापहे ॥ ७७ ॥ सोऽभिज्ञानं ततो दृष्ट्वा नीत्वास्थीनि नरेश्वर ॥ पूर्वोक्तेन विधानन प्राक्षिपं नर्मदांभसि ॥ ७८ ॥ पुष्पवृष्टिः पपाताऽऽशु साधुसाध्विति पांडव ॥ विमानं च ततो दिव्यमागतं बर्हिणस्तदा ॥ ७९ ॥ दिव्यरूपधरो भूत्वा गतो नाके कलापवान् ॥ एवं तु प्रत्ययं दृष्ट्वा हनूमंतेश्वरे नृप ॥ ८० ॥ चकारानशनं विप्रः शतबाहुश्च भूपतिः ॥ शोषयामासतुस्तौ स्वमीश्वराराधने रतौ ॥ ८१ ॥ ध्यायंतौ तस्थतुर्देवं शतबाहुर्द्विजोत्तमौ ॥ मासार्धेन मृतो राजा शतबाहुर्महामनाः ॥ ८२ ॥ किंकणीजालशोभाढ्यं विमानं तत्र चागतम् ॥ साधु साधु नृपश्रेष्ठ विमानारोहणं कुरु ॥ ८३ ॥शतबाहुरुवाच ॥ नायामि स्वर्गमार्गाग्रं विप्रो यावन्न संस्थितः ॥ उपदेशप्रदो मह्यं गुरुरूपी द्विजोत्तमः ॥ ॥८४॥अप्सरस ऊचुः ॥ लोभावृतो ह्ययं विप्रो लोभात्पापस्य संग्रहः॥ हनूमंतेश्वरे राजन्ये मृताः सत्त्वमास्थिताः॥८५॥ते यांति शांकरे लोके सर्वपापक्षयंकरे ॥ नैव पापक्षयश्चास्य ब्राह्मणस्य नरेश्वर ॥ ८६ ॥ गृहं च गृहिणी चित्ते ब्राह्मणस्य प्रवर्त्तते ॥ शतबाहुस्ततो विप्रमुवाच विनयान्वितः ॥ ॥ ८७ ॥ त्यज मूलमनर्थस्य लोभमेनं द्विजोत्तम ॥ इत्युक्त्वा स्वर्ययौ राजा स्वर्गकन्यासमावृतः ॥ ८८ ॥ दिनैः कैश्चिद्गतो विप्रः स्वर्गं वैतालिकैर्वृतः ॥ बर्हीं च काशीराजस्य पुत्रस्तीर्थप्रभावतः ॥ ८९ ॥ आत्मानं कन्यया दत्तं पूर्वजन्म व्यचिंतयन् ॥ सा च तं प्रौढमालोक्य पितुराज्ञामवाप्य च ॥ स्वयंवरे स्वभर्त्तार लेभे साध्वी नृपात्मजम् ॥ ९० ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ एतद्वृत्तांतमभवत्तस्मिंस्तीर्थे नृपोत्तम ॥ एतस्मात्कारणान्मेध्यं तीर्थमेतत्सदा नृप ॥ ९१ ॥ अष्टम्यां वा चतुर्दश्यां सर्व्वकालं नरेश्वर ॥ विशेषाच्चाश्विने मासि कृष्णपक्षे चतुर्दशीम् ॥ ९२ ॥ स्नापयेदीश्वरं भक्त्या क्षौद्रक्षीरेण सर्पिषा ॥ दध्ना च खंडयुक्तेन कुशतोयेन वै पुनः ॥ ९३ ॥ श्रीखंडेन सुगंधेन गुंठयेच्च महेश्वरम् ॥ ततः सुगंधपुष्पैश्च बिल्वपत्रैश्च पूजयेत् ॥ ९४ ॥ मुचकुंदेन कदेन जातीकाशकुशोद्भवैः ॥ उन्मत्तमुनिपुष्पौघैः पुष्पैस्तत्कालसंभवैः ॥ ९५ ॥ अर्चयेत्परया भक्त्या हनूमंतेश्वरं शिवम् ॥ घृतेन दापयेद्दीपं तैलेन तदभावतः ॥ ९६ ॥ श्राद्धं च कारयेत्तत्र ब्राह्मणैर्वेदपारगैः ॥ सर्व्वलक्षणसंपूर्णैः कुलीनैर्गृहपालकैः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



॥ ९७ ॥ तर्प्पयेद्ब्राह्मणान्भक्त्या वसनान्नहिरण्यतः ॥ नरकस्था दिवं यांतु प्रोच्येति प्रणमेद्द्विजान् ॥ ९८ ॥ पतितान्वर्जयेद्विप्रान्वृषली यस्य गेहिनी ॥ स्ववृषं चापरित्यज्य वृषैरन्यैर्वृषायते ॥ ९९ ॥ वृषलीं तां विदुर्देवा न शूद्री वृषली भवेत ॥ ब्रह्महत्या सुरापानं गुरुदारनिषेवणम् ॥ ॥ १०० ॥ सुवर्णहरणन्यासमित्रद्रोहोद्भवं तथा ॥ नश्यते पातकं सर्वमित्येवं शंकरोऽब्रवीत् ॥ १०१ ॥ [1] ॥ श्रीमार्कंडेय उवाच ॥ ॥ वाक्प्रलापेन भो वत्स बहुनोक्तेन किं मया ॥ सर्वपातकसंयुक्तो दद्याद्दानं द्विजन्मने ॥ २ ॥ गोदानं च प्रकर्त्तव्यमस्मिंस्तीर्थे विशेषतः ॥ गोदानं हि यतः पार्थ सर्वदानाधिकं स्मृतम् ॥ ३ ॥ सर्व्वदेवमया गावः सर्वे देवास्तदात्मकाः ॥ शृंगाग्रेषु महीपाल शक्रो वसति नित्यशः ॥ ४ ॥ उरः स्कंदः शिरो ब्रह्मा ललाटे वृषभध्वजः ॥ चंद्रार्कौ लोचने देवौ जिह्वायां च सरस्वती ॥ ५ ॥ मरुद्गणाः सदा साध्या यस्या दंता नरेश्वर ॥ हुंकारे चतुरो वेदान्विद्यात्सांगपदक्रमान् ॥ ६ ॥ ऋषयो रोमकूपेषु ह्यसंख्यातास्तपस्विनः ॥ दंडहस्तो महाकायः कृष्णो महिषवाहनः ॥ ६ ॥ यमः पृष्ठस्थितो नित्यं शुभाशुभपरीक्षकः ॥ चत्वारः सागराः पुण्याः क्षीरधाराः स्तनेषु च ॥ ७ ॥ विष्णुपादोद्भवा गंगा दर्शनात्पापनाशनी ॥ प्रस्रावे संस्थिता यस्मात्तस्माद्वंद्या सदा बुधैः ॥८॥ लक्ष्मीश्च गोमये नित्यं पवित्रा सर्वमंगला ॥ गोमयालेपनं तस्मात्कर्त्तव्यं पांडुनंदन ॥ ९ ॥ गंधर्वाप्सरसो नागाः खुराग्रेषु व्यवस्थिताः ॥पृथिव्यां सागरांतायां यानि तीर्थानि भारत ॥ तानि सर्वाणि जानीयाद्गौर्गव्यं तेन पावनम् ॥११०॥ ॥ युधिष्ठिर उवाच ॥ सर्वदेवमयी धेनुर्गीर्वाणाद्यैरलंकृता ॥ एतत्कथय मे तात कस्माद्गोषु समाश्रिताः ॥ ११ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ सर्वदेवमयो विष्णुर्गावो विष्णुशरीरजाः ॥ देवास्तदुभयात्तस्मात्कलिपता विविधा जनैः ॥ १२ ॥ श्वेता वा कपिला वापि क्षीरिणी पांडुनंदन ॥ सवत्सा च सुशीला च सितवस्त्राऽवगुंठिता ॥ १३ ॥ कांस्यदोहनिका देया स्वर्णशृंगी सुभूषिता ॥ हनूमंतेश्वरस्याऽग्रे भक्त्या विप्राय दापयेत् ॥ १४ ॥ नियमस्थेन सा देया स्वर्गमानंत्यमिच्छता ॥ असमर्थाय ये दद्युर्विष्णुलोके प्रयांति ते ॥ १५ ॥ असौ लोके च्युतो राजन्भूतले द्विजमंदिरे ॥ कुशलो जायते पुत्रो गुणविद्याधनर्द्धिमान् ॥ १६ ॥ सर्वपापहरं तीर्थं हनूमंतेश्वरं नृप ॥ शृण्वन्विमुच्यते पापाद्वर्णसंकरसंभवात् ॥ १७ ॥ दूरस्थश्चिंतयन्पश्यन्मुच्यते नाऽत्र संशयः ॥ ११८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे हनूमंतेश्वरतीर्थमाहात्म्यवर्णननाम त्र्यशीतितमोऽध्यायः ॥ ८३ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ अत्रैवोदाहरंतीममितिहासं पुरातनम् ॥ कैलासे पृच्छते भक्त्या

१ वर्णसंकरकारकात्–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षण्मुखाय शिवोदितम् ॥ १ ॥ ॥ ईश्वर उवाच ॥ ॥ पूर्वं त्रेतायुगे स्कंद हतो रामेण रावणः ॥ चतुर्दश तदा कोट्यो निहता ब्रह्मरक्षसाम् ॥ ॥ २ ॥ हतेषु तेषु वै तत्र रक्षणाय दिवौकसाम् ॥ महानंदस्तदा जातस्त्रिषु लोकेषु पुत्रक ॥ ३ ॥ ततः सीतां समासाद्य समं वानरपुंगवैः ॥ रामोप्ययोध्यामायातो भरतेन कृतोत्सवः ॥ तस्मै समर्पयामास स राज्यं लक्ष्मणाग्रजः ॥ ४ ॥ तस्मिन्प्रशासति ततो राज्यं निहतकंटकम् ॥ कृतकार्योऽथ हनुमान्कैलासमगत्पुरा ॥ ५ ॥ ततो नंदी प्रतीहारो रुद्रांशमपि तं कपिम् ॥ न च संगमयामास रुद्रेणाऽघौघहारिणा ॥ ६ ॥ तेन पृष्टस्तदा नन्दी किं मया पातकं कृतम् ॥ येन रुद्रवपुः पुण्यं न पश्याम्यंबिकान्वितम् ॥ ७ ॥ ॥ नन्द्युवाच ॥ ॥ त्वयाऽवतरणं चक्रे कपींद्राऽमरहेतुना ॥ तथाऽपि हि कृतं पापमुपभोगेन शाम्यति ॥ ८ ॥ ॥ हनुमानुवाच ॥ ॥ किं मयाऽकारि तत्पापं नंदिन्देवार्थकारिणा ॥ राक्षसाश्च हता दुष्टा विप्रयज्ञाङ्गघातिनः ॥ ९ ॥ ततस्तदालापकुतूहली हरो निजांशभाजं कपिमुग्रतेजसम् ॥ उवाच द्वारांतरदत्तदृष्टिः पुरःस्थितं प्रेक्ष्य कपीश्वरं पुनः ॥ १० ॥ ॥ ईश्वर उवाच ॥ ॥ गंगा गया कपे रेवा यमुना च सरस्वती ॥ सर्वपापहरा नद्यस्तासु स्नानं समाचर ॥ ११ ॥ नर्मदादक्षिणे कूले तीर्थं परमशोभनम् ॥ सोमनाथसमीपस्थं तत्र त्वं गच्छ वानर ॥ १२ ॥ तत्र स्नात्वा महापापं गमिष्यति ममाऽऽज्ञया ॥ उत्पत्य वेगाद्धनुमाञ्छ्रीरेवादक्षिणे तटे ॥ १३ ॥ जगाम सुमहानादस्तपश्चक्रे सुदुष्करम् ॥ तस्य वै तप्यमानस्य रक्षोवधकृतं तमः ॥ १४ ॥ विलीनं पार्थ कालेन कियतेशप्रसादतः ॥ ततो देवैः समं देवस्तत्तीर्थमगमद्धरः ॥ १५ ॥ कपिमालिंगयामास वरं तस्मै प्रदत्तवान् ॥ अद्यप्रभृति ते तीर्थं भविष्यति न संशयः ॥ १६ ॥ कपितीर्थं ततो जातं तस्थौ तत्र स्वयं हरः ॥ हनूमन्तेश्वरो नाम्ना सर्वहत्याहरस्तदा ॥ १७ ॥ तत्र तीर्थे तु यः स्नात्वा भक्त्या लिंगं प्रपूजयेत् ॥ सर्वपापानि नश्यंति हरस्य वचनं यथा ॥ १८ ॥ तत्राऽस्थीनि विलीयन्ते पिंडदानेऽक्षया गतिः ॥ यत्किञ्चिद्दीयते तत्र तद्धि कोटिगुणं भवेत् ॥ १९ ॥ हनुमानप्ययोध्यायां रामं द्रष्टुमथाऽगमत् ॥ चकार कुशलप्रश्नं स्वस्वरूपं न्यवेदयत् ॥ २० ॥ ॥ श्रीराम उवाच ॥ ॥ कुर्वतो देवकार्यं ते मम कार्यं च कुर्वतः ॥ ततोऽहमपि पापीयांस्तपस्तप्स्याम्यसंशयम् ॥ २१ ॥ तत्रैव दक्षिणे कूले रेवायाः पापहारिणि ॥ चतुर्विंशतिवर्षाणि तपस्तेपेऽथ राघवः ॥ २२ ॥ ज्योतिष्मतीपुरीसंस्थः श्रीरेवास्नानमाचरन् ॥ तस्य शुश्रूषणं चक्रे लक्ष्मणोऽपि तदाज्ञया ॥ २३ ॥ स्थापयामासतुर्लिंगे तौ तदा रामलक्ष्मणौ ॥ प्रभावात्सत्यतपसो रेवातीरे महामती ॥ निष्पापतां तदा वीरौ जग्मतू रामलक्ष्मणौ ॥ २४ ॥ ततस्तदा देवपुरोगमो हरो गतो हि वै पुण्यमुनीश्वरैः सह ॥ आगत्य तीर्थं च वरं



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ददौ तदा निजां कलां तत्र विसृज्य तीर्थे ॥ २५ ॥ मुनिभिः सर्वतीर्थानां क्षिप्तं कुंभोदकं भुवि ॥ एकस्थं लिंगनामाथ कलाकुंभस्तथाऽभवत् ॥ ॥ २६ ॥ कुंभेश्वर इति ख्यातस्तदा देवगणार्चितः ॥ रामोऽपि पूजयामास तल्लिंगं देवसेवितम् ॥ २७ ॥ ततो वरं ददौ देवो रामकीर्त्यभिवृद्धये ॥ चतुर्विंशतिमे वर्षे रामो निष्पापतां गतः ॥ २८ ॥ यदा कन्यागतः पंगुर्गुरुणा सहितो भवेत् ॥ तदेव देवयात्रेयमिति देवा जगुर्मुदा ॥ २९ ॥ यथा गोदावरीतीर्थे सर्वतीर्थफलं भवेत् ॥ तथात्र रेवास्नानेन लिंगानां दर्शनैर्नृणाम् ॥ ३० ॥ करिष्यंत्यत्र ये श्राद्धं पितॄणां नर्मदातटे ॥ कुंभेश्वरसमीपस्थास्तत्फलं शृणु षण्मुख ॥ ३१ ॥ यावन्तो रोमकूपाः स्युः शरीरे सर्वदेहिनाम् ॥ तावद्वर्षप्रमाणेन पितॄणामक्षया गतिः ॥ ३२ ॥ पृथिव्यां देवताः सर्वा सर्वतीर्थानि यानि तु ॥ लभन्ते तत्फलं मर्त्या लिंगत्रयविलोकनात् ॥ ३३ ॥ अपुत्रो लभते पुत्रं निर्द्धनो धनमाप्नुयात् ॥ सरोगो मुच्यते रोगान्नात्र कार्या विचारणा ॥ ३४ ॥ सिंहराशिं गते जीवे यत्स्याद्गोदावरीफलम् ॥ तद्द्वादशगुणं स्कंद कुंभेश्वरसमीपतः ॥ ३५ ॥ ये जानंति न पश्यंति कुंभशंभुमुमापतिम् ॥ नर्मदादक्षिणे कूले तेषां जन्म निरर्थकम् ॥ ३६ ॥ यथा गोदावरीयात्रा कर्त्तव्या मुनिशासनात् ॥ चतुर्विंशतिमे वर्षे तथेयं देवभाषितम् ॥३७॥ यावच्चंद्रश्च सूर्यश्च यावद्वै दिवि तारकाः ॥ तावत्तदक्षयं दानं रेवाकुंभेश्वरांतिके ॥३८॥ महादानानि देयानि तत्र लौकैर्विचक्षणैः ॥ गोदानमत्र शंसंति सौवर्णं राजतं तथा ॥ ३९ ॥ यस्याः स्मरणमात्रेण नश्यते पापसंचयः ॥ स्नानेन किं पुनः स्कन्द ब्रह्महत्यां व्यपोहति ॥ ४० ॥ तत्र तीर्थे तु यः स्नात्वा श्राद्धं कुर्याद्युधिष्ठिर ॥ एकोत्तरं कुलशतमुद्धरेच्छिवशासनात् ॥ ४१ ॥ यानि कानि च तीर्थानि चासमुद्रसरांसि च ॥ शिवलिंगार्चनस्येह कलां नार्हंति षोडशीम् ॥ ४२ ॥ एवं देवा वरं दत्त्वा हरीश्वरपुरोगमाः ॥ स्वस्थानमगमन्पूर्वं मुक्त्वा तन्नाम चोत्तमम् ॥ ४३ ॥ तीर्थस्याऽस्य वरं दत्त्वा स रामो लक्ष्मणाग्रजः ॥ अयोध्यां प्रविवेशाऽसौ निष्पापो नर्मदाजलात् ॥ ४४ ॥ सौवर्णीं च ततः कृत्वा सीतां यज्ञं चकार सः ॥ अनुमन्त्र्य मुनींल्लोकान्देवताश्च निजं कुलम् ॥ ४५ ॥ पुरा त्रेतायुगे जातं तत्तीर्थं स्कन्दनामकम् ॥ नियमेन ततो लोकैः कर्त्तव्यं लिंगदर्शनम् ॥ ४६ ॥ तावत्पापानि देहेषु महापातकजान्यपि ॥ यावन्न प्रेक्षते जंतुस्तत्तीर्थं देवसेवितम् ॥ ४७ ॥ ते धन्यास्ते महात्मानस्तेषां जन्म सुजीवितम् ॥ ज्योतिष्मतीपुरीसंस्थं ये द्रक्ष्यंति हरं परम् ॥ ४८ ॥ तस्मान्मोहं परित्यज्य जनैर्गंतव्यमादरात् ॥

१ पंगुः-शनैश्वरः-इत्यर्थः । २ तत्र तीर्थे-इति शेषः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीर्थाऽशेषफलावाप्त्यै तीर्थं कुम्भेश्वराह्वयम् ॥ ४९ ॥ ॥ मार्कंडेय उवाच ॥ ॥ श्रुत्वेति शंभुवचसा स षडाननोऽथ नत्वा पितुः पदयुगांबुज मादरेण ॥ संप्राप्य दक्षिणतटं गिरिशस्रवन्त्याः कीशाग्र्यरामकलशाख्यशिवान्ददर्श ॥ ५० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखंडे कपितीर्थरामेश्वरलक्ष्मणेश्वरकुम्भेश्वरमाहात्म्यवर्णनंनाम चतुरशीतितमोऽध्यायः ॥ ८४ ॥ ॥ छ ॥

॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र नर्मदायाः पुरातनम् ॥ ब्रह्महत्याहरं तीर्थं वाराणस्या समं हि तत् ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ आश्चर्यं कथ्यतां ब्रह्मन्यद्वृत्तं नर्मदातटे ॥ वाराणस्या समं कस्मादेतत्कथय मे प्रभो ॥ २ ॥ निमग्नो दुःखसंसारे हृतराज्यो द्विजोत्तम ॥ युष्मद्वाणीजलस्नातो निर्दुखः सह बांधवैः ॥ ३ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ साधुसाधु महाबाहो सोमवंशविभूषण ॥ पृष्टोऽस्मि दुर्लभं तीर्थं गुह्याद्गुह्यतरं परम् ॥ ४ ॥ आदौ पितामहस्तावत्समस्तजगतः प्रभुः ॥ मनसा तस्य संजाता दशैव ऋषिपुंगवाः ॥ ५ ॥ मरीचिमत्र्यं गिरसौ पुलस्त्यं पुलहं क्रतुम् ॥ प्रचेतसं वसिष्ठं च भृगुं नारदमेव च ॥ ६ ॥ जज्ञे प्राचेतसं दक्षं महातेजाः प्रजापतिः ॥ दक्षस्याऽपि तथा जाताः पंचाशद्दुहिताः किल ॥ ७ ॥ ददौ स दश धर्माय कश्यपाय त्रयोदश ॥ तथैव स महाभागः सप्तविंशतिमिंदवे ॥ ८ ॥ रोहिणीनाम या तासामभीष्टा साऽभवद्विधोः ॥ शेषासु करुणां कृत्वा शप्तो दक्षेण चंद्रमाः ॥ ९ ॥ क्षयरोग्यभवच्चंद्रो दक्षस्यायं प्रजापतेः ॥ स च शापप्रभावेण निस्तेजाः शर्वरीपतिः ॥ १० ॥ गतः पितामहं सोमो वेपमानोऽमृतांशुमान् ॥ पद्मयोने नमस्तुभ्यं वेदगर्भ नमोऽस्तु ते ॥ शरणं त्वां प्रसन्नोस्मि पाहि मां कमलासन ॥ ११ ॥ ॥ ब्रह्मोवाच ॥ ॥ निस्तेजाः शर्वरीनाथ कलाहीनश्च दृश्यसे ॥ उद्विग्नमानसस्तात संजातः केन हेतुना ॥ ॥ १२ ॥ ॥ सोम उवाच ॥ ॥ दक्षशापेन मे ब्रह्मन्निस्तेजस्त्वं जगत्पते ॥ निर्हारश्चाऽस्य शापस्य कथ्यतां मे पितामह ॥ १३ ॥ ॥ ॥ ॥ ब्रह्मोवाच ॥ ॥ सर्वत्र सुलभा रेवा त्रिषु स्थानेषु दुर्लभा ॥ ओंकारेऽथ भृगुक्षेत्रे तथा चैवौर्वसंगमे ॥ १४ ॥ तत्र गच्छ क्षपानाथ यत्र रेवांतरं तटम् ॥ त्वरितोऽसौ गतस्तत्र यत्र रेवौर्विसंगमः ॥ १५ ॥ काष्ठावस्थःस्थितः सोमो दध्यौ त्रिपुरवैरिणम् ॥ यावद्वर्षशतं पूर्णं तावत्तुष्टो महेश्वरः ॥ १६ ॥ प्रत्यक्षः सोमराजस्य वृषासन उमापतिः ॥ साष्टांगं प्रणिपत्योच्चैर्जय शंभो नमोऽस्तु ते ॥ १७ ॥ जय शंकर पापहराय नमो जय ईश्वर ते जगदीश नमः ॥ जय वासुकिभूषणधार नमो जय शूलकपालधराय नमः ॥ १८ ॥ जय अन्धकदेहविनाश नमो जय दानववृन्द

१ निर्हारः—प्रतीकारः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वधाय नमः ॥ जय निष्कलरूप सकलाय नमो जय काल कामदहाय नमः ॥ १९ ॥ जय मेचककण्ठधराय नमो जय सूक्ष्मनिरंजनशब्द
नमः ॥ जय आदिरनादिरनंत नमो जय शंकर किंकरमीश भज[1] ॥ २० ॥ एवं स्तुतो महादेवः सोमराजेन पांडव ॥ तुष्टस्तस्य नृपश्रेष्ठ शिवया
शंकरोऽब्रवीत् ॥ ॥ ईश्वर उवाच ॥ ॥ २१ ॥ वरं प्रार्थय मे भद्र यत्ते मनसि वर्त्तते ॥ साधुसाधु महासत्त्व तुष्टोऽहं तपसा तव ॥ २२ ॥
॥ ॥ सोम उवाच ॥ ॥ दक्षशापेन दग्धोऽहं क्षीणसत्त्वो महेश्वर ॥ शापस्योपशमं देव कुरु शर्म मम प्रभो ॥ २३ ॥ ॥ ईश्वर उवाच ॥ ॥
तव भक्तिगृहीतोऽहमुमया सह तोषितः ॥ निष्पापः सोमनाथस्त्वं संजातस्तीर्थसेवनात् ॥ २४ ॥ इत्यूचे देवदेवेशः क्षणं ध्यात्वेंदुना ततः ॥
स्थापितं परमं लिंगं कामदं प्राणिनां भुवि ॥ सर्वदुःखहरं तत्तु ब्रह्महत्याविनाशनम् ॥ २५ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ सोमनाथप्रभावं मे
संक्षेपात्कथय प्रभो ॥ दुःखार्णवनिमग्नानां त्राता प्राप्तो द्विजोत्तम ॥ २६ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ शृणु तीर्थप्रभावं ते संक्षेपात्कथया
म्यहम् ॥ यद्वृत्तमुत्तरे कूले रेवाया उरिसंगमे ॥ २७ ॥ शंबरो नाम राजाभूत्तस्य पुत्रस्त्रिलोचनः ॥ त्रिलोचनसुतः कण्वः स पापर्द्धिपरोऽ
भवत् ॥ २८ ॥ वने नित्यं भ्रमन्सोऽथ मृगयूथं ददर्शह ॥ मृगयूथं हतं तत्तु त्रिलोचनसुतेन च ॥ २९ ॥ मृगरूपी द्विजो मध्ये चरते
निर्जने वने ॥ स हतस्तेन संगेन कण्वेन मुनिसत्तम ॥ ३० ॥ ब्रह्महत्यान्वितः कण्वो निस्तेजा व्यचरन्महीम् ॥ व्यचरंश्चैव संप्राप्तो
नर्मदामुरिसंगमे ॥ ३१ ॥ किंशुकाशोकबहले जंबीरपनसाकुले ॥ कदंबपाटलाकीर्णे बिल्वनारंगशोभिते ॥ ३२ ॥ चिंचिणीचंपको
पेते ह्यगस्तितरुछादिते ॥ प्रभूतभूतसंयुक्तं वनं सर्वत्र शोभितम् ॥ ३३ ॥ चित्रकैर्मृगमार्जारैर्हिंस्रैः शंबरशूकरैः ॥ शशैर्गवयसंयुक्तैः शिखंडि
खरमंडितम् ॥ ३४ ॥ प्रविष्टस्तु वने कण्वस्तृषार्त्तः श्रमपीडितः ॥ स्नातो रेवाजले पुण्ये संगमे पापनाशने ॥ ३५ ॥ अर्चितः परया भक्त्या
सोमनाथो युधिष्ठिर ॥ पपौ सुविमलं तोयं सर्वपापक्षयंकरम् ॥ ३६ ॥ फलानि च विचित्राणि चखाद सह किंकरैः ॥ सुप्तः पादपच्छायायां
श्रांतो मृगवधेन च ॥ ३७ ॥ तावत्तीर्थवरं विप्रः स्नानार्थं संगमं गतः ॥ मार्गगो ब्राह्मणो हर्षोद्युक्तस्तद्गतमानसः ॥ ३८ ॥ अबला तमुवा
॥ ७४ ॥ चेदं तिष्ठतिष्ठ द्विजोत्तम ॥ त्रस्तो निरीक्षते यावद्दिशः सर्वा नरेश्वर ॥ ३९ ॥ तावदृक्षसमारूढां स्त्रियं रक्ताम्बरावृताम् ॥ रक्तमाल्यां तदा बालां
रक्तचंदनचर्चिताम् ॥ रक्ताभरणशोभाढ्यां पाशहस्तां ददर्श ह ॥ ४० ॥ ॥ रुयुवाच ॥ ॥ संदेशं श्रूयतां विप्र यदि गच्छसि संगमे ॥ मद्भर्त्ता ॥२४८॥

[1] भज–रक्षेत्यर्थः । धातूनामनेकार्थत्वात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिष्ठते तत्र शीघ्रमेव विसर्जय ॥ ४१ ॥ एकाकिनी च ते भार्या तिष्ठते वनमध्यगा ॥ इत्याकर्ण्य गतो विप्रः संगमे सुरदुर्लभे ॥ ४२ ॥ वृक्ष च्छायान्वितः कण्वो ब्राह्मणेनाऽवलोकितः ॥ उवाच तं प्रति तदा वचनं ब्राह्मणोत्तमः ॥ ४३ ॥ ॥ ब्राह्मण उवाच ॥ ॥ वनांतरे मया दृष्टा बाला कमललोचना ॥ रक्तांबरधरा तन्वी रक्तचंदनचर्चिता ॥ ४४ ॥ रक्तमाल्या सुशोभाढ्या पाशहस्ता मृगेक्षणा ॥ वृक्षारूढावदद्वाक्यं मद्भर्त्ता प्रेष्यतामिति ॥ ४५ ॥ ॥ कण्व उवाच ॥ ॥ कस्मिन्स्थाने तु विप्रेंद्र विद्यते मृगलोचना ॥ कस्य सा केन कार्येण सर्वमेतद्वदाशु मे ॥ ४६ ॥ ॥ ब्राह्मण उवाच ॥ ॥ संगमादर्द्धक्रोशे सा उद्यानांते हि विद्यते ॥ वचनाद्ब्राह्मणस्यैषा न ज्ञाता पार्थिवेन तु ॥ ४७ ॥ तदा स कण्वभूपालः स्वकं दूतं समादिशत् ॥ ॥ कण्व उवाच ॥ ॥ गच्छ त्वं पृच्छतां तां क्वागता क्व च गमिष्यसि ॥ प्रेषितस्त्वरितो दूतो गतो नारी समीपतः ॥ ४८ ॥ वृक्षस्थां ददृशे बालामुवाच नृपसत्तम ॥ मन्नाथः पृच्छति त्वां तु काऽसि त्वं क्व गमिष्यसि ॥ ४९ ॥ ॥ कन्योवाच ॥ गुरुरात्मवतां शास्ता राजा शास्ता दुरात्मनाम् ॥ इह प्रच्छन्नपापानां शास्ता वैवस्वतो यमः ॥ ५० ॥ ब्रह्महत्या च संजाता मृगरूपधरद्विजात् ॥ मया युक्तोऽपि ते राजा मुक्तस्तीर्थप्रभावतः ॥ ५१ ॥ अर्द्धक्रोशांतरान्मध्ये ब्रह्महत्या न संविशेत् ॥ सोमनाथप्रभावोऽयं वाराणस्याः समः स्मृतः ॥ ॥ ५२ ॥ गच्छ त्वं प्रेष्यतां राजा शीघ्रमत्र न संशयः ॥ गतो भृत्यस्ततः शीघ्रं वेपमानः सुविह्वलः ॥ ५३ ॥ समस्तं कथयामास यद्वृत्तं हि पुरातनम् ॥ तस्य वाक्यादसौ राजा पतितो धरणीतले ॥ ५४ ॥ ॥ भृत्य उवाच ॥ ॥ कस्मात्त्वं शोचसे नाथ पूर्वोपात्तं शुभाशुभम् ॥ इत्याकर्ण्य वचस्तस्य राजा वचनमब्रवीत् ॥ ५५ ॥ प्राणत्यागं करिष्यामि सोमनाथसमीपतः ॥ शीघ्रमानीयतां वह्निरिंधनानि बहूनि च ॥ ५६ ॥ आनीतं तत्क्षणात्सर्वं भृत्यैस्तद्वशवर्त्तिभिः ॥ स्नानं कृत्वा शुभे तोये संगमे पापनाशने ॥ ५७ ॥ अर्चितः परया भक्त्या सोमनाथो महीभृता ॥ त्रिःप्रदक्षिणतः कृत्वा ज्वलंतं जातवेदसम् ॥ ५८ ॥ प्रविष्टः कण्वराजाऽसौ हृदि ध्यात्वा जनार्दनम् ॥ पीतांबरधरं देवं जटामुकुट धारिणम् ॥ ५९ ॥ श्रिया युक्तं सुपर्णस्थं शंखचक्रगदाधरम् ॥ मुरारिसूदनं दध्यौ सुगतिर्मे भवत्विति ॥ ६० ॥ पपात पुष्पवृष्टिस्तु साधु साधु नृपात्मज ॥ आश्चर्यमतुलं दृष्ट्वा निरीक्ष्य च परस्परम् ॥ ६१ ॥ मृतं तैः पावके भृत्यैर्हृदि ध्यात्वा गदाधरम् ॥ विमानस्थास्ततः सर्वे संजाताः पांडुनंदन ॥ ६२ ॥ निष्पापास्ते दिवं याताः सोमनाथप्रभावतः ॥ ब्राह्मणे संगमे तत्र ध्यायमाने वृषध्वजम् ॥ ६३ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ सोमनाथप्रभावोऽयं शृणुष्वैकमना विधिम् ॥ अष्टम्यां वा चतुर्दश्यां सर्वकालं रवेर्दिने ॥ ६४ ॥ विशेषाच्छुक्लपक्षे चेत्सूर्यवारेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सप्तमी ॥ उपोष्य यो नरो भक्त्या रात्रौ कुर्वीत जागरम् ॥ ६५ ॥ पंचामृतेन गव्येन स्नापयेत्परमेश्वरम् ॥ श्रीखंडेन ततो गुंव्य पुष्पधूपादिकं
ददेत् ॥ ६६ ॥ घृतेन बोधयेद्दीपं नृत्यं गीतं च कारयेत् ॥ सोमवारे तथाऽष्टम्यां प्रभाते पूजयेद्द्विजान् ॥ ६७ ॥ जितक्रोधानात्मवतः
परनिंदाविवर्जितान् ॥ सर्वांगरुचिराञ्च्छस्तान्स्वदारपरिपालकान् ॥ ६७ ॥ गायत्रीपाठमात्रांश्च विकर्मविरतान्सदा ॥ पुनर्भूर्वृषली शूद्री च
रेयुर्यस्य मंदिरे ॥ ६९ ॥ दूरतोऽसौ द्विजस्त्याज्य आत्मनः श्रेय इच्छता ॥ हीनांगाऽनतिरिक्तांगान्येषां पूर्वापरं न हि ॥ ७० ॥ व्रते श्राद्धे
तथा दाने दूरतस्तान्विवर्जयेत ॥ आयसी तरुणी तुल्या द्विजाः स्वाध्यायवर्ज्जिताः ॥ ७१ ॥ आत्मानं सह याज्येन पातयंति न संशयः ॥
शाल्मलीनावतुल्याः[1] स्युः षट्कर्मनिरता द्विजाः ॥ ७२ ॥ दातारं च तथाऽऽत्मानं तारयंति तरंति च ॥ श्राद्धं सोमेश्वरेः पार्थ यः
कुर्याद्गतमत्सरः ॥ ७३ ॥ प्रेतास्तस्य हि सुप्रीता यावदाभूतसंप्लवम् ॥ अन्नं वस्त्रं हिरण्यं च यो दद्यादग्रजन्मने ॥ ७४ ॥ स याति शांकरे
लोक इति मे सत्यभाषितम् ॥ हयं यो यच्छते तत्र संपूर्णं तरुणं सितम् ॥ ७५ ॥ रक्तं वा पीतवर्णं वा सर्वलक्षणसंयुतम् ॥ कुंकुमेन
विलिप्तांगाव[2]ग्रजन्महयावपि ॥ ७६ ॥ स्रग्दामभूषितौ कार्यौ सितवस्त्रावगुंठितौ ॥ अंघ्रिः प्रदीयतां स्कन्धे मदीये हयमारुह ॥ ७७ ॥ आरूढे
ब्राह्मणे ब्रूयाद्भास्करः प्रीयतामिति ॥ स याति शांकरं लोकं सर्व्वपापविवर्जितः ॥ ७८ ॥ उपरागे तु सोमस्य तीर्थं गत्वा जितेंद्रियः ॥ सत्यलोका
च्युतश्चाऽपि राजा भवति धार्मिकः ॥ ७९ ॥ तस्य वासः सदा राजन्न नश्यति कदाचन ॥ दीर्घायुर्जायते पुत्रो भार्या च वशवर्तिनी ॥ ८० ॥
जीवेद्वर्षशतं साग्रं सर्वदुःखविवर्जितः ॥ सोपवासो जितक्रोधो धेनुं दद्याद्द्विजन्मने ॥ ८१ ॥ सवत्सां क्षीरसंयुक्तां श्वेतवस्त्रावलोकिताम् ॥ शबलां
पीतवर्णां च धूम्रां वा नीलकर्बुराम् ॥ ८२ ॥ कपिलां वा सवत्सां च घण्टाभरणभूषिताम् ॥ रूप्यखुरां कांस्यदोहां स्वर्णशृंगीं नरेश्वर ॥ ८३ ॥
श्वेतया वर्द्धते वंशो रक्ता सौभाग्यवर्द्धिनी ॥ शबला पीतवर्णा च दुःखघ्न्यौ संप्रकीर्तिते ॥ ८४ ॥ कपिला नाशयेत्पापं सप्तजन्मसमुद्भवम् ॥ सत्य
लोकमवाप्नोति गोप्रदायी नरेश्वर ॥ ८५ ॥ पक्षांतेऽथ व्यतीपाते वैधृतौ रविसंक्रमे ॥ दिनक्षये गजच्छायां ग्रहणे भास्करस्य च ॥ ८६ ॥ ये व्रजंति
॥ ७५ ॥ महात्मानः संगमे सुरदुर्ल्लभे ॥ मृदावगुण्ठयित्वा तु चात्मानं संगमे विशेत् ॥ ८७ ॥ हृदयांतर्जले जाप्या प्राणायामोथवा नृप ॥ गायत्री वैष्णवी
चैव सौरी शैवी यदृच्छया ॥ तेऽपि पापैः प्रमुच्यंत इत्येवं शंकरोऽब्रवीत् ॥ ८८ ॥ जगतीं सोमनाथस्य यस्तु कुर्यात्प्रदक्षिणाम् ॥ प्रदक्षीणीकृता

१ शाल्मलीनावतुल्याः–नावशब्दस्य–अकारान्तत्वमार्षम् । शाल्मलीवृक्षकाष्ठनिर्मितनौकासमानाः–इत्यर्थः । २ अग्रजन्महयौ–अग्रजन्मा–ब्राह्मणो–यस्मैहयो देयः–सः–इत्यर्थः । हयश्च–अश्वः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेन सप्तद्वीपा वसुन्धरा ॥ ८९ ॥ ब्रह्महत्या सुरापानं गुरुदारनिषेवणम् ॥ भ्रूणहा स्वर्णहर्त्ता च मुच्यंते नाऽत्र संशयः ॥ ९० ॥ तीर्थाख्यानमिदं पुण्यं यः शृणोति जितेंद्रियः ॥ व्याधितो मुच्यते रोगी चारोगी सुखमाप्नुयात् ॥ ९१ ॥ यत्ते संदह्यते चेतः शृणु तन्मे युधिष्ठिर ॥ नैकापि नृप लोकेऽस्मिन्भ्रूणहत्या सुदुस्त्यजा ॥ ९२ ॥ किमु षड्विंशतिं पार्थ प्राप याः क्षणदाकरः[1] ॥ सोऽपि तीर्थमिदं प्राप्य तपस्तप्त्वा सुदुश्चरम् ॥ ९३ ॥ विमुक्तः सर्वपापेभ्यः शीतरश्मिरभूत्सुखी ॥ श्रूयते नृप पौराणी गाथा गीता महर्षिभिः ॥ ९४ ॥ लिंगं प्रतिष्ठितं ह्येकं दशभ्रूणहनं भवेत् ॥ अतो लिंगत्रयं सोमः स्थापयामास भारत ॥ ९५ ॥ रेवोरिसंगमे ह्याद्यं द्वितीयं भृगुकच्छके ॥ ततः सिद्धिं परां प्राप्य प्रभासे तु तृतीयकम् ॥ ९६ ॥ इति ते कथितं सर्वं तीर्थमाहात्म्यमुत्तमम् ॥ धर्म्यं यशस्यमायुष्यं स्वर्ग्यं संशुद्धिकृन्नृणाम् ॥ ९७ ॥ पुत्रार्थी लभते पुत्रान्निष्कामः स्वर्गमाप्नुयात् ॥ मुच्यते सर्वपापेभ्यस्तीर्थं कृत्वा परं नृप ॥ ९८ ॥ एतत्ते सर्वमाख्यातं सोमनाथस्य यत्फलम् ॥ श्रुत्वा पुत्रमवाप्नोति स्नात्वा चाऽष्टौ[2] न संशयः ॥ ९९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखंडे सोमनाथतीर्थमाहात्म्यवर्णनंनाम पंचाशीतितमोऽध्यायः ॥ ८५ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महाराज पिंगलावर्त्तमुत्तमम् ॥ संगमस्य समीपस्थं रेवाया उत्तरे तटे ॥ हव्यवाहेन राजेंद्र स्थापितः पिंगलेश्वरः ॥ १ ॥ युधिष्ठिर उवाच ॥ ॥ हव्यवाहेन भगवन्नीश्वरः स्थापितः कथम् ॥ एतदाख्याहि मे सर्वं प्रसादाद्वक्तुमर्हसि ॥ २ ॥ ॥ मार्कंडेय उवाच ॥ ॥ शंभुना रेतसा राजंस्तर्पितो हव्यवाहनः ॥ प्राप्तसौख्येन रौद्रेण गौर्याक्रीडनचेतसा ॥ ॥ ३ ॥ हव्यवाहमुखे क्षिप्तं रुद्रेणामिततेजसा ॥ रुद्रस्य रेतसा दग्धस्तीर्थयात्राकृतादरः ॥ ४ ॥ सागरांश्च नदीर्गत्वा क्रमाद्रेवां समागतः ॥ चचार परया भक्त्या ध्यानमुग्रं हुताशनः ॥ ५ ॥ वायुभक्षः शतं साग्रं यावत्तेपे हुताशनः ॥ तावत्तुष्टो महादेवो वरदो जातवेदसः ॥ संनिधौ समुपेत्याथ वचनं चेदमब्रवीत् ॥ ६ ॥ ॥ ईश्वर उवाच ॥ ॥ वरं वृणीष्व हव्याश यस्ते मनसि वर्त्तते ॥ ७ ॥ ॥ वह्निरुवाच ॥ ॥ नमस्ते सर्वलोकेश उग्रमूर्त्ते नमोस्तु ते ॥ रेतसा तव संदग्धः कुष्ठी जातो महेश्वर ॥ कृपां कुरु महादेव मम रोगं विनाशय ॥ ८ ॥ ॥ ईश्वर उवाच ॥ ॥ हव्यवाह भवारोगो मत्प्रसादाच्च सत्वरम् ॥ अत्र तीर्थे कृतस्नानः स्वरूपं प्रतिपत्स्यसे ॥ ९ ॥ इत्युक्त्वा च महादेवस्तत्रैवान्तरधीयत ॥ अनंतरं हव्यवाहः सस्नौ रेवाजले त्वरन् ॥ १० ॥ तदैव रोगनिर्मुक्तोऽभवद्दिव्यस्वरूपवान् ॥ स्थापयामास देवेशं स वह्निः पिंगलेश्वरम् ॥ ११ ॥ नाम्ना

१ क्षणदाकरः–चन्द्रः–इत्यर्थः । रोहिणीव्यतिरिक्तासु षड्विंशतिस्त्रीष्वृतुकालेऽयनभिगमनाद्याः भ्रूणहत्याः प्राप–तत्किमुवक्तव्यम् –इति भावः । २ अष्टौ पुत्रान्–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



संपूजयामास तुष्टाव स्तुतिभिर्मुदा ॥ ततो जगाम देशं स्वं देवानां हव्यवाहनः ॥ १२ ॥ हव्यवाहेन भूपैवं स्थापितः पिंगलेश्वरः ॥ जितक्रोधो हि यस्तत्र उपवासं समाचरेत् ॥ १३ ॥ अतिरात्रफलं तस्य अंते रुद्रत्वमाप्नुयात् ॥ गुणान्विताय विप्राय कपिलां तत्र भारत ॥ १४ ॥ अलंकृत्य सवत्सां च शक्त्याऽलंकारभूषिताम् ॥ यः प्रयच्छति राजेंन्द्र स गच्छेत्परमां गतिम् ॥ १५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे पिंगलेश्वरतीर्थमाहात्म्यवर्णनंनाम षडशीतितमोऽध्यायः ॥८६॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल तीर्थं परमशोभनम् ॥ स्थापितं मुनिसंघैर्यद्ब्रह्मवंशसमुद्भवैः ॥ १ ॥ ऋणमोचनमित्याख्यं रेवातटसमाश्रितम् ॥ षण्मासं मनुजो भक्त्या तर्पयन्पितृदेवताः ॥ २ ॥ देवैः पितृमनुष्यैश्च ऋणमात्मकृतं च यत् ॥ मुच्यते तत्क्षणान्मर्त्यः स्नातो वै नर्मदाजले ॥ ॥ ३ ॥ प्रत्यक्षं दुरितं तत्र दृश्यते फलरूपतः ॥ तत्र तीर्थे तु यो राजन्नेकचित्तो जितेंद्रियः ॥ ४ ॥ स्नात्वा दानं च वै दद्यादर्चयेद्गिरिजापतिम् ॥ ऋणत्रयविनिर्मुक्तो नाके दीप्यति देववत् ॥ ५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे ऋणत्रयमोचनतीर्थमाहात्म्यवर्णनंनाम सप्ताशीतितमोऽध्यायः ॥ ८७ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तस्यैवानंतरं पार्थ कापिलं तीर्थमाश्रयेत् ॥ स्थापितं कपिलेनैव सर्वपातकनाशनम् ॥ १ ॥ अष्टम्यां च सिते पक्षे चतुर्दश्यां नरेश्वर ॥ स्नापयेत्परया भक्त्या कपिलाक्षीरसर्पिषा ॥ ॥ २ ॥ श्रीखंडेन सुगंधेन गुंठयेत महेश्वरम् ॥ ततः सुगंधपुष्पैश्च श्वेतैश्च नृपसत्तम ॥ ३ ॥ येऽर्चयंति जितक्रोधा न ते यांति यमालयम् ॥ असिपत्रवनं घोरं यमचुल्ही सुदारुणा ॥ ४ ॥ दृश्यते नैव विद्वद्भिः कपिलेश्वरपूजनात् ॥ स्नात्वा रेवाजले पुण्ये भोजयेद्ब्राह्मणाञ्छुभान् ॥ ५ ॥ गोप्रदानेन वस्त्रेण तिलदानेन भारत ॥ छत्रशय्याप्रदानेन राजा भवति धार्म्मिकः ॥ ६ ॥ तीव्रतेजा विघोरश्च जीवत्पुत्रः प्रियंवदः ॥ शत्रुवर्गो न तस्य स्यात्कदाचित्पांडुनंदन ॥ ७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे कपिलेश्वरतीर्थमाहात्म्यवर्णनंनामाष्टाशीतितमोऽध्यायः ॥ ८८ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र पूतिकेश्वरमुत्तमम् ॥ नर्मदादक्षिणे कूले सर्वपापक्षयंकरम् ॥ १ ॥ स्थापितं जांबुवंतेन लोकानां तु हितार्थिना ॥ राजा प्रसेनजिन्नाम तस्यां वक्षस्थलान्मणौ ॥ २ ॥ समुत्क्षिप्ते तु तेनैव सपूतिरभवद्व्रणः ॥ तत्र तीर्थे तपस्तप्त्वा निर्व्रणः समजायत ॥ ३ ॥ तेन तत्स्थापितं लिंगं पूतिकेश्वरमुत्तमम् ॥ यस्तत्र मनुजो भक्त्या

१ अतिरात्रफलम्—अतिरात्राख्ययज्ञस्य फलम्--इत्यर्थः । २ विघोरः—शान्तरूपः—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्नायाद्भरतसत्तम ॥ ४ ॥ सर्वान्कामानवाप्नोति संपूज्य परमेश्वरम् ॥ कृष्णाष्टम्यां चतुर्दश्यां सर्वकालं नराधिप ॥ येऽर्चयंति सदा देवं ते न यांति यमालयम् ॥ ५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे पूतिकेश्वरतीर्थमाहात्म्यवर्णनंनामैकोन नवतितमोऽध्यायः ॥ ८९ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ रेवाया उत्तरे कूले वैष्णवं तीर्थमुत्तमम् ॥ जलशायीति वै नाम विख्यातं वसुधातले ॥ १ ॥ दानवानां वधं कृत्वा सुप्तस्तत्र जनार्दनः ॥ चक्रं प्रक्षालितं तत्र देवदेवेन चक्रिणा ॥ सुदर्शनं च निष्पापं रेवाजलसमाश्रयात् ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ चक्रतीर्थं समाचक्ष्व मुनिसंघैश्च वंदितम् ॥ विष्णोः प्रभावमतुलं रेवायाश्चैव यत्फलम् ॥ ३ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ साधुसाधु महाप्राज्ञ विरक्तस्त्वं युधिष्ठिर ॥ गुह्याद्गुह्यतरं तीर्थं निर्मितं चक्रिणा स्वयम् ॥ ४ ॥ तत्तेऽहं संप्रवक्ष्यामि कथां पापप्रणाशिनीम् ॥ आसीत्पुरा महादैत्यस्तालमेघ इति श्रुतः ॥ ५ ॥ तेन देवा जिताः सर्वे हृतराज्या नराधिप ॥ यज्ञभागान्स्वयं भुंक्ते अहं विष्णुर्न संशयः ॥ ६ ॥ धनदस्य हृतं चित्तं हृतः शक्रस्य वारणः ॥ इंद्राणीं वांछते पापो हयरत्नं रवेरपि ॥७॥ तालमेघभयात्पार्थ रविरुद्राः सवासवाः ॥ यमः स्कंदो जलेशोऽग्निर्वायुर्देवो धनेश्वरः ॥८॥ सवाक्पतिमहेशाश्च नष्टचित्ताः पितामहम् ॥ गता देवा ब्रह्मलोकं तत्र दृष्ट्वा पितामहम् ॥ ९ ॥ तुष्टुवुर्विविधैः स्तोत्रैर्वागीशप्रमुखाः सुराः ॥ गुणत्रयविभागाय पश्चाद्भेदमुपेयुषे ॥ १० ॥ दृष्ट्वा देवान्निरुत्साहान्विवर्णानवनीपते ॥ प्रसादाभिमुखो देवः प्रत्युवाच दिवौकसः ॥ ११ ॥ ॥ ब्रह्मोवाच ॥ ॥ स्वागतं सुरसंघस्य कान्तिर्नष्टा पुरातनी ॥ हिमक्लिष्टप्रभावेण ज्योतींषीव मुखानि वः ॥ १२ ॥ प्रशमादर्चिषामेतदनुद्गीर्णं सुरायुधम् ॥ वृत्रस्य हंतुः कुलिशं कुंठितश्रीव लक्ष्यते ॥ १३ ॥ किं चायमरिदुर्वारः पाणौ पाशः प्रचेतसः ॥ मंत्रेण हतवीर्यस्य फणिनो दैन्यमाश्रितः ॥ १४ ॥ कुबेरस्य मनःशल्यं शंसतीव पराभवम् ॥ अपविद्धगतो वायुर्भग्नशाख इव द्रुमः ॥ १५ ॥ यमोपि विलिखन्भूमिं दंडेनास्तमितत्विषा ॥ कुरुतेस्मिन्नमोघोपि निर्वाणालातलाघवम् ॥ १६ ॥ अमी च कथमादित्याः प्रतापक्षतिशीतलाः ॥ चित्रन्यस्ता इव गताः प्रकामालोकनीयताम् ॥ १७ ॥ तद्ब्रूत वत्साः किमितः प्रार्थयध्वं समागताः ॥ किमागमनकृत्यं वो ब्रूत निःसंशयं सुराः ॥ १८ ॥ मयि सृष्टिर्हि लोकानां रक्षा युष्मास्ववस्थिता ॥ ततो मंदानिलोद्धूतकमलाकरशोभिना ॥ १९ ॥ गुरुं नेत्रसहस्रेण प्रेरयामास वृत्रहा ॥ स द्विनेत्रं हरेश्चक्षुः सहस्रनयनाधिकम् ॥ २० ॥ वाचस्पतिरुवाचेदं प्रांजलिर्जलजासनम् ॥

१ अहं विष्णुर्न संशयः—इति मन्यमानः—इति शेषः । २ सः वाचस्पतिः साक्षात् हरेः द्विनयनं चक्षुः—द्रष्टा—सकलपरावरज्ञानशालित्वात्—इति भावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



युष्मद्वंशोद्भवस्तात तालमेघो महाबलः ॥ २१ ॥ उपतापयते देवान्धूमकेतुरिवोच्छ्रितः ॥ तेन देवगणाः सर्वे दुःखिता दानवेन च ॥ ॥ २२ ॥ तालमेघो दैत्यपतिः सर्वान्नो बाधते बली ॥ तस्मात्त्वां शरणं प्राप्ताः शरणं नो विधे भव ॥ २३ ॥ ततः प्रसन्नो भगवान्वेधा स्तानब्रवीद्वचः ॥ २४ ॥ ॥ ब्रह्मोवाच ॥ ॥ तालमेघेन वो मध्ये बली तेन समः सुराः ॥ विना माधवदेवेन साध्यो मे नैव दानवः ॥ २५ ॥ ततः सुरगणाः सर्वे विरिंचिप्रमुखा नृप ॥ क्षीरोदं प्रस्थिताः सर्वे दुःखितास्तेन वैरिणा ॥ २६ ॥ त्वरिताः प्रस्थिता देवाः केशवं द्रष्टुकाम्यया ॥ क्षीरोदं सागरं गत्वाऽस्तुवंस्ते जलशायिनम् ॥ २७ ॥ ॥ देवा ऊचुः ॥ ॥ जगदादिरनादिस्त्वं जगदंतोऽप्यनंतकः ॥ जगन्मूर्त्तिरमूर्त्तिस्त्वं जय गीर्वाणपूजित ॥ २८ ॥ जय क्षीरोदशयन जय लक्ष्म्या सदा वृत ॥ जय दानवनाशाय जय देवकिनंदन ॥२९॥ जय शंखगदापाणे जय चक्रधर प्रभो ॥ इति देवस्तुतिं श्रुत्वा प्रबुद्धो जलशाय्यथ ॥ ३० ॥ उवाच मधुरां वाणीं मेघगंभीरनिस्वनाम् ॥ किमर्थं बोधितो ब्रह्मन्समर्थैर्वः सुरासुरैः ॥ ॥ ३१ ॥ ॥ ब्रह्मोवाच ॥ ॥ तालमेघभयात्कृष्ण संप्राप्तास्तव मंदिरम् ॥ न वध्यः कस्यचित्पापस्तालमेघो जनार्दन ॥ ३२ ॥ त्वमेव जहि तं दुष्टं मृत्युं यास्यति नान्यथा ॥ ३३ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ स्वस्थानं गम्यतां देवाः स्वकीयां लभत प्रजाम् ॥ दुष्टात्मानं हनिष्यामि तालमेघं महाबलम् ॥ ३४ ॥ स्थानं ब्रुवंतु मे देवा वसेद्यत्र स दानवः ॥ ३५ ॥ ॥ देवा ऊचुः ॥ ॥ हिमाचलगुहायां स वसते दानवेश्वरः ॥ चतुर्विंशतिसाहस्रैः कन्याभिः परिवारितः ॥ ३६ ॥ तुरंगैः स्यंदनैः कृष्ण संख्या तस्य न विद्यते ॥ नटा नानाविधास्तत्र असंख्यात गुणा हरे ॥ ३७ ॥ द्विरदाः पर्वताकारा हयाश्च द्विरदोपमाः ॥ महाबलो वसेत्तत्र गीर्वाणभयदायकः ॥ ३८ ॥ श्रुत्वा देवो वचस्तेषां देवानामातुरात्मनाम् ॥ अचिंतयद्गरुत्मंतं शत्रुसंघविनाशनम् ॥ ३९ ॥ चक्रं करेण संगृह्य गदाचक्रधरः प्रभुः ॥ शार्ङ्गं च मुशलं सीरं करैर्गृह्य जनार्दनः ॥ ४० ॥ आरूढः पक्षिराजेंद्रं वधार्थं दानवस्य च ॥ दानवस्य पुरे पेतुरुत्पाता घोररूपिणः ॥ ४१ ॥ गोमायुर्गृध्रमध्ये तु कपोतैः सममाविशत् ॥ विना वातेन तस्यैव ध्वजदंडः पपात ह ॥ ४२ ॥ सर्पमूषकयोर्युद्धं तथा केसरिनागयोः ॥ उन्मार्गाः सरितस्तत्रावहन्रक्तविमिश्रिताः ॥ अकालतरुपुष्पाणि दृश्यंते स्म समंततः ॥ ४३ ॥ ततः प्राप्तो जगन्नाथो हिमवंतं नगेश्वरम् ॥ पांचजन्यश्च सहसा पूरितः पुरसन्निधौ ॥ ४४ ॥ तेन शब्देन महता ह्यारूढो दानवेश्वरः ॥ उवाच च तदा वाक्यं तालमेघो महाबलः ॥ ४५ ॥ ॥ तालमेघ उवाच ॥ ॥ कोऽयं मृत्युवशं

१ तथा चेत्–इति शेषः तथा चेत्–त्वमेव तं हंसि चेत्–इत्यर्थः। २ तस्य तुरङ्गस्यन्दनादेः सेनाङ्गस्य इत्यर्थः। ३ आरूढः–क्रोधाविष्टः–इत्यर्थः।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राप्तो ह्यज्ञात्वा मम विक्रमम् ॥ धुंधुमाराज्ञया ह्याशु स्वसैन्यपरिवारितः ॥ ४६ ॥ बलादानय तं बद्ध्वा ममाग्रे बाहुशालिनम् ॥ ४७ ॥
॥ ॥ धुंधुमार उवाच ॥ ॥ आनयामि न संदेहः सुरो यक्षोऽथ किन्नरः ॥ स्यंदनौघैः समायुक्तो गजवाजिभटैः सह ॥ ४८ ॥ हृष्टस्ततो जग
द्योनिः सुपर्णस्थो महाबलः ॥ गृह्यतांगृह्यतामेष इत्युक्तास्तेन किंकराः ॥ ४९ ॥ चतुर्दिक्षु प्रधावंत इतश्चेतश्च सर्वतः ॥ सुपर्णेनाऽग्निरूपेण
दग्धास्ते शलभा यथा ॥ ५० ॥ धुंधुमारोऽपि कृष्णेन शरघातेन ताडितः ॥ हतो वक्षस्थले पापो मृतावस्थो रथोपरि ॥ ५१ ॥ हाहाकारं ततः
सर्वे दानवाश्चक्रुरातुराः ॥ तालमेघस्ततः क्रुद्धो रथारूढो विनिर्गतः ॥ ददृशे केशवं पार्थ शंखचक्रगदाधरम् ॥ ५२ ॥ ॥ तालमेघ
उवाच ॥ ॥ अन्ये ते दानवाः कृष्ण ये हताः समरे त्वया ॥ हिरण्यकशिपुप्रख्या न पुमांसो हि तेऽच्युत ॥ ५३ ॥ इत्युक्त्वा दानवः पार्थ वर्षयामास
सायकैः ॥ दानवस्य शरान्मुक्तांच्छेदयामास केशवः ॥ ५४ ॥ गरुत्मानवधीत्सैन्यमवध्यं यत्सुरासुरैः ॥ कृष्णेन द्विगुणास्तस्य
प्रेषिताः स्वशिलीमुखाः ॥ ५५ ॥ द्विगुणं द्विगुणीकृत्य प्रेषयामास दानवः ॥ तानप्यष्टगुणैः कृष्णश्च्छादयामास सायकैः ॥ ५६ ॥
ततः क्रुद्धेन दैत्येन ह्याग्नेयं बाणमुत्तमम् ॥ ५७ ॥ वारुणं प्रेषयामास त्वाग्नेयं शमितं ततः ॥ वारुणेनैव वायव्यं तालमेघो व्यसर्जयत् ॥
॥ ५८ ॥ सार्पं चैव हृषीकेशो वायव्यस्य प्रशांतये ॥ नारसिंहं नृसिंहोऽपि प्रेषयामास पांडव ॥ ५९ ॥ नारसिंहं ततो
दृष्ट्वा तालमेघो महाबलः ॥ उत्तीर्य स्यंदनाच्छीघ्रं गृहीत्वा खड्गचर्मणी ॥ ६० ॥ कृष्ण त्वां प्रेषयिष्यामि यममार्गं सुदारुणम् ॥ इत्युक्त्वा
दानवः पार्थ आगतः केशवं प्रति ॥ ६१ ॥ खड्गेनाताडयद्दैत्यो गदापाणिं जनार्दनम् ॥ मंडलाग्रं ततो गृह्य केशवो हृष्टमानसः ॥ ६२ ॥
जघनोरःस्थले पार्थ तालमेघं महाहवे ॥ जनार्दनस्तदा दैत्यं दैत्यो हरिमहन्मृधे ॥ ६३ ॥ जनार्दनस्ततः क्रुद्धस्तालमेघाय भारत ॥ अमो
घं चक्रमादाय मुक्तं तस्य च मूर्द्धनि ॥ ६४ ॥ निपपात शिरस्तस्य पर्वताश्च चकंपिरे ॥ समुद्राः क्षुभिताः पार्थ नद्य उन्मार्गगामिनीः ॥ ६५ ॥
पुष्पवृष्टिं ततो देवा मुमुचुः केशवोपरि ॥ अवध्यः सुरसंघानां सूदितः केशव त्वया ॥ ६६ ॥ स्वस्थाश्चैव ततो देवास्तालमेघे निपातिते ॥ जना
र्दनोऽपि कौंतेय नर्मदातटमाश्रितः ॥ ६७ ॥ क्षीरोदां नर्मदां मत्त्वा अनन्तभुजगोपरि ॥ लक्ष्म्या समन्वितः कृष्णो निलीनश्चोत्तरे तटे ॥ ६८ ॥
चक्रं विभीषणं मर्त्यें ज्वालामालासमन्वितम् ॥ पतितं नर्मदातोये जलशायिसमीपतः ॥ ६९ ॥ निर्धूतकलमषं जातं नर्मदातोययोगतः ॥ तालमे

१ हे धुंधुमार–आज्ञया–मे–इति शेषः । हे धुंधुमार मे आज्ञया–इति योजना । २ आर्षी प्रथमार्थे द्वितीया ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



घवधोत्पन्नं यत्पापं नृपनन्दन ॥ ७० ॥ तत्सर्वं क्षालितं सद्यो नर्मदांभसि भारत ॥ तदाप्रभृति लोकेऽस्मिञ्जलशायी महीपते ॥ ७१ ॥ चक्रतीर्थं
वदन्त्यन्ये केचित्कालाघनाशनम् ॥ विख्यातं भारते वर्षे नर्मदायां महीपते ॥ ७२ ॥ तत्तीर्थस्य प्रभावोऽयं श्रूयतामवनीपते ॥ यथाऽनन्तो हि
नागानां देवानां च जनार्दनः ॥ ७३ ॥ मासानां मार्गशीर्षोऽस्ति नदीनां नर्मदा यथा ॥ मासि मार्गशिरे पार्थ ह्येकादश्यां सितेऽहनि ॥ ७४ ॥
गत्वा यो मनुजो भक्त्या कामक्रोधविवर्जितः ॥ वैष्णवीं भावनां कृत्वा जलेशं तु व्रजेत वै ॥ ७५ ॥ एकभुक्तं च नक्तं च तथैवाऽयाचितं नृप ॥
उपवासं तथा दानं ब्राह्मणानां च भोजनम् ॥ ७६ ॥ करोति च कुरुश्रेष्ठ न स याति यमालयम् ॥ यमलोकभयाद्भीता ये लोकाः पांडुनन्दन ॥
॥ ७७ ॥ ते पश्यंतु श्रियः कांतं नागपर्यंकशायिनम् ॥ गोपीजनसमावृत्तं योगनिद्रां समाश्रितम् ॥ विश्वरूपं जगन्नाथं संसारभयनाशनम् ॥७८॥
स्नापयेत्परया भक्त्या क्षौद्रक्षीरेण सर्प्पिषा ॥ खंडेन[1] तोयमिश्रेण जगद्योनिं जनार्दनम् ॥ ७९ ॥ स्नाप्यमानं च पश्यंति ये लोका गतमत्सराः ॥
ते यांति परमं लोकं सुराऽसुरनमस्कृतम् ॥ ८० ॥ घृतेन बोधयेद्दीपमथवा तैलपूरितम् ॥ रात्रौ जागरणं कृत्वा देवस्याग्रे विमत्सराः ॥ ८१ ॥
ये कथां वैष्णवीं भक्त्या शृण्वंति च नृपोत्तम ॥ ब्रह्महत्यादिपापानि नश्यन्ते नाऽत्र संशयः ॥ ८२ ॥ प्रदक्षिणंति ये मर्त्या जलशायिजगद्गु
रुम् ॥ प्रदक्षिणीकृता तैस्तु सप्तद्वीपा वसुन्धरा ॥ ८३ ॥ ततः प्रभाते विमले पितॄन्संतर्प्पयेज्जलैः ॥ श्राद्धं च ब्राह्मणैस्तत्र योग्यैः पाण्डव मानवाः ॥
॥ ८४ ॥ स्वदारनिरतैः शांतैः परदारविवर्जकैः ॥ वेदाभ्यसनशीलैश्च स्वकर्म्मनिरतैः शुभैः ॥ ८५ ॥ नित्यं यजनशीलैश्च त्रिसंध्यापरिपालकैः ॥
श्रद्धया कारयेच्छ्राद्धं यदीच्छेच्छ्रेय आत्मनः ॥ ८६ ॥ ते धन्या मानुषे लोके वंद्या हि भुवि मानवाः ॥ ये वसन्ति सदाकालं पादपद्माश्रया
हरेः ॥ ८७ ॥ जलशायं प्रपश्यन्ति प्रत्यक्षं सुरनायकम् ॥ पक्षोपवासं पाराकं व्रतं चांद्रायणं शुभम् ॥ ८८ ॥ मासोपवासमुग्रं च षष्ठान्नं पञ्चमं
व्रतम् ॥ तत्र तीर्थे तु यः कुर्यात्सोऽक्षयां गतिमाप्नुयात् ॥ ८९ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ अतः परं प्रवक्ष्यामि तिलधेनोश्च यत्फलम् ॥
यथा यस्मिन्यदा देया दाने तस्याः शुभं फलम् ॥ ९० ॥ एतत्कथांतरं पुण्यमृषेर्द्वैपायनात्पुरा ॥ श्रुतं हि नैमिषे पुण्ये नारदाद्यैरनेकधा ॥ ९१ ॥
इदं परममायुष्यं मंगल्यं कीर्त्तिवर्द्धनम् ॥ विप्राणां श्रावयन्विद्वान्फलानंत्यंसमश्नुते ॥ ९२ ॥ बहुभ्यो न प्रदेयानि गौर्गृहं शयनं स्त्रियः ॥ विभ
क्तदक्षिणा ह्येता दातारं नाप्नुवन्ति च ॥ ९३ ॥ एकमेतत्प्रदातव्यं न बहूनां युधिष्ठिर ॥ सा च विक्रयमापन्ना दहत्यासप्तमं कुलम् ॥ ९४ ॥ तिलाः

१ खण्डेन—शर्करया—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वेतास्तिलाः कृष्णास्तिला गोमूत्रसन्निभाः॥ तिलानां तु विचित्राणां धेनुं वत्सं च कारयेत् ॥९५॥ यथालाभा तु सर्वेषां चतुर्द्रोणा तु गौः स्मृता ॥ द्रोणस्य वत्सकः कार्यो बहूना वाऽपि कामतः ॥९६॥ यस्मिन्देशे तु यन्मानं विषये वा विचारितम् ॥ तेन मानेन तां कुर्वन्नक्षयं फलमश्नुते ॥९७॥ सुख पूर्वं शुचौ भूमौ पुष्पधूपाक्षतैस्तथा ॥ कर्णाभ्यां रत्ने दातव्ये दीपौ नेत्रद्वये तथा ॥९८॥ श्रीखंडमुरसि स्थाप्यं ताभ्यां चैव तु कांचनम् ॥ उर्द्धे मधु घृतं देयं कुर्यात्सर्षपरोमकम् ॥९९॥ कंबले कंबलं दद्याच्छ्रोण्यां मधु घृतं तथा ॥ यवसं पायसं दद्याद्घृतं क्षौद्रसमन्वितम् ॥ १०० ॥ स्वर्णशृंगी रूप्यशिफा रुक्मलांगूलसंयुता ॥ रत्नपृष्ठी तु दातव्या कांस्यपात्रावदोहिनी ॥ १०१ ॥ यत्स्याद्बाल्यकृतं पापं यद्वा कृतमजानता ॥ वाचा कृतं कर्मकृतं मनसा यद्विचिंतितम् ॥१०२॥ जले निष्ठीवितं चैव मुशलं वाऽपि लंघितम्॥वृषलीगमनं चैव गुरुदारनिषेवणम् ॥१०३॥ कन्याया गमनं चैव सुवर्णस्तेयमेव च ॥ सुरापानं तथा चान्यत्तिलधेनुः पुनाति हि ॥ १०४ ॥ अहोरात्रोपवासेन विधिवत्तां विसर्जयेत् ॥ या सा यमपुरे घोरे नदी वैतरणी स्मृता ॥ १०५ ॥ वालुकाऽयोऽश्मस्थला च पच्यते यत्र दुष्कृती ॥ अवीचिर्नरको यत्र यत्र यामलपर्वतौ ॥१०६॥ यत्र लोहमुखाः काका यत्र श्वानो भयंकराः ॥ असिपत्रवनं चैव यत्र सा कूटशाल्मली ॥ १०७ ॥ तान्सुखेन व्यतिक्रम्य धर्मराजालयं व्रजेत् ॥ धर्मराजस्तु तं दृष्ट्वा सूनृतं वक्ति भारत ॥१०८॥ विमानमुत्तमं योग्यं मणिरत्नविभूषितम् ॥ अत्रारुह्य नरश्रेष्ठ प्रयाहि परमां गतिम् ॥ १०९ ॥ मा च चाटु भटे देहि मैव देहि पुरोहिते ॥ मा च काणे विरूपे च न्यूनांगे न च देवले ॥ ११० ॥ अवेदविदुषे नैव ब्राह्मणे सर्वविक्रये ॥ मित्रघ्ने च कृतघ्ने च मंत्रहीने तथैव च ॥ १११ ॥ वेदांतगाय दातव्या श्रोत्रियाय कुटुंबिने ॥ वेदांतगसुते देया श्रोत्रिये गृहपालके ॥ ११२ ॥ सर्वांगरुचिरे विप्रे सद्वृत्ते च प्रियंवदे ॥ पूर्णिमायां तु माघस्य कार्त्तिक्यामथ भारत ॥ ११३ ॥ वैशाख्यां मार्गशीर्ष्यां वाऽऽषाढ्यां चैत्र्यामथाऽपि वा ॥ अयने विषुवे चैव व्यतीपाते च सर्वदा ॥ ॥ ११४ ॥ षडशीतिमुखे पुण्ये छायायां कुंजरस्य वा ॥ एष ते कथितः कल्पस्तिलधेनोर्मयाऽनघ ॥ ११५ ॥ व्रजंति वैष्णवं लोकं दत्त्वा पादं यमोपरि ॥ प्राणत्यागात्परं लोकं वैष्णवं नात्र संशयः ॥ भित्त्वाऽशु भास्करं यांति नाऽत्र कार्या विचारणा ॥ ११६ ॥ एतत्ते सर्वमाख्यातं चक्रतीर्थफलं नृप ॥ यच्छ्रुत्वा मानवो भक्त्या सर्वपापैः प्रमुच्यते ॥ ११७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे जलशायितीर्थमाहात्म्यवर्णनंनाम नवतितमोऽध्यायः ॥ ९० ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्म

१ छायायां कुंजरस्य–हस्तिच्छायापर्वणि–इत्यर्थः।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



हीपाल तीर्थ परमपावनम् ॥ चंडादित्यं नृपश्रेष्ठ स्थापितं चंडमुंडयोः ॥ १ ॥ आस्तां पुरा महादैत्यौ चंडमुंडौ सुदारुणौ ॥ नर्मदातीरमाश्रित्य चेरतुर्विपुलं तपः ॥ २ ॥ ध्यायंतौ भास्करं देवं तमोनाशं जगत्त्रये ॥ तुष्टस्तत्तपसा देवः सहस्रांशुरुवाच ह ॥ ३ ॥ साधुसाध्विति तौ पार्थ नर्मदायाः शुभे तटे ॥ वरं प्रार्थयतं वीरौ यथेष्टं चेतसेच्छितम् ॥ ४ ॥ ॥ चंडमुंडावूचतुः ॥ ॥ अजेयौ सर्वदेवानां भूयास्वावां समाहितौ ॥ सर्वरोगैः परित्यक्तौ सर्वकालं दिवाकर ॥ ५ ॥ एवमस्त्विति तौ प्राह भास्करो वारितस्करः ॥ इत्युक्त्वांतर्दधे भानुर्दैत्याभ्यां तत्र भास्करः ॥६॥ स्थापितः परया भक्त्या तं गच्छेदात्मसिद्धये ॥ गीर्वाणांश्च मनुष्यांश्च पितॄंस्तत्राऽपि तर्पयेत् ॥ ७ ॥ स वसेद्भास्करे लोके विरंचिदिवसं नृप ॥ घृतेन बोधये दीपं षष्ठ्यां स च नरेश्वर ॥ मुच्यते सर्वपापैस्तु प्रतियाति पुरं रवेः ॥८॥ उत्पत्तिं चंडभानोर्यः[1] शृणोति भरतर्षभ ॥ विजयी स सदा नूनमाधिव्याधिविवर्जितः ॥ ९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखंडे चंडादित्यतीर्थमाहात्म्यवर्णनंनामैकनवतितमोऽध्यायः ॥ ९१ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र यमहास्यमनुत्तमम् ॥ सर्वपापहरं तीर्थं नर्मदातटमाश्रितम् ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ यमहास्यं कथं जातं पृथिव्यां द्विजपुंगव ॥ एतत्सर्वं ममाख्याहि परं कौतूहलं हि मे ॥ २ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ साधुसाधु महाप्राज्ञ पृष्टोऽहं नृपनंदन ॥ स्नानार्थं नर्मदां पुण्यामागतस्ते पिता पुरा ॥ ३ ॥ रजकेन यथा धौतं वस्त्रं भवति निर्मलम् ॥ तथाऽसौ निर्मलो जातो धर्मराजो युधिष्ठिर ॥ ४ ॥ स पश्यन्निर्मलं देहं हसन्प्रोवाच विस्मितः ॥ ५ ॥ ॥ यम उवाच ॥ ॥ मत्पुरं कथमायांति मनुजाः पापबृंहिताः ॥ स्नानेनैकेन रेवायाः प्राप्यते वैष्णवं पदम् ॥ ६ ॥ समर्था ये न पश्यंति रेवां पुण्यजलां शुभाम् ॥ जात्यंधैस्ते समा ज्ञेया मृतैः पंगुभिरेव वा ॥७॥ समर्था ये न पश्यति रेवां पुण्यजलां नदीम् ॥ एतस्मात्कारणाद्राजन्हसितो लोकशासनः ॥ ८ ॥ स्थापयित्वा यमस्तत्र देवं स्वर्गं जगाम ह ॥ यमहासेश्वरे राजञ्जितक्रोधो जितेंद्रियः ॥ ९ ॥ विशेषाच्चाऽऽश्विने मासि कृष्णपक्षे चतुर्दशीम् ॥ उपोष्य परया भक्त्या सर्वपापैः प्रमुच्यते ॥ १० ॥ रात्रौ जागरणं कुर्याद्दीपं देवस्य बोधयेत् ॥ घृतेन चैव राजेंद्र शृणु तत्राऽस्ति यत्फलम् ॥ ११ ॥ मुच्यते पातकैः सर्वैरगम्यागमनोद्भवैः ॥ अभक्ष्यभक्षणोद्भूतैरपेयापेयजैरपि ॥ १२ ॥ अवाह्यवाहिते यत्स्याददोह्यादोहने यथा ॥ स्नानमात्रेण तस्यैवं यांति पापान्यनेकधा ॥ १३ ॥ यमलोकं न वीक्षेत मनुजः स कदाचन ॥ पितॄणां परमं गुह्यमिदं भूमौ नरे

[1] चंडभानोः—चंडमुंडस्थापितान्यसूर्यदेवस्य—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वर ॥ १४ ॥ ददतामक्षयं सर्वं यमहास्ये न संशयः ॥ अमावास्यां जितक्रोधो यस्तु पूजयते द्विजान् ॥ १५ ॥ हिरण्यभूमिदानेन तिलदानेन भूयसा ॥ कृष्णाजिनप्रदानेन तिलधेनुप्रदानतः ॥ १६ ॥ विधानोक्तद्विजाग्र्याय ये प्रदास्यंति भक्तितः ॥ हयं वा कुंजरं वाऽथ धूर्वहौ सीरसंयुतौ ॥ १७ ॥ कन्यां वसुमतीं गां च महिषीं वा पयस्विनीम् ॥ ददते ये नृपश्रेष्ठ नोपसर्पंति ते यमम् ॥ १८ ॥ यमोऽपि भवति प्रीतः प्रतिजन्म युधिष्ठिर ॥ यमस्य वाहो महिषो महिष्यस्तस्य मातरः ॥ १९ ॥ तासां दानप्रभावेण यमः प्रीतो भवेद्ध्रुवम् ॥ नाऽसौ यममवाप्नोति यदि पापैः समावृतः ॥ २० ॥ एतस्मात्कारणादत्र महिषीदानमुत्तमम् ॥ तस्याः शृंगे जलं कार्यं धूम्रवस्त्रानुवेष्टिता ॥२१॥ आयसस्य खुराः कार्यास्ताम्रपृष्ठाः सुभूषिताः ॥ लवणाचलं पूर्वस्यामाग्नेय्यां गुडपर्वतम् ॥ २२ ॥ कार्पासं याम्यभागं तु नवनीतं तु नैर्ऋते ॥ पश्चिमे सप्तधान्यानि वायव्ये तंडुलाः स्मृताः ॥ २३ ॥ सौम्ये तु कांचनं दद्यादीशाने घृतमेव च ॥ प्रदद्याद्यमराजो मे प्रीयतामित्युदीरयन् ॥ २४ ॥ इत्युच्चार्य द्विजस्याग्रे यमलोकं महाभयम् ॥ असिपत्रवनं घोरं यमचुल्ली सुदारुणा ॥ २५ ॥ रौद्रा वैतरणी चैव कुम्भीपाको भयावहः ॥ कालसूत्रो महाभीमस्तथा यमलपर्वतौ ॥ ॥ २६ ॥ क्रकचं तैलयंत्रं च श्वानो गृध्राः सुदारुणाः ॥ निरुच्छ्वासा महानादा भैरवो रौरवस्तथा ॥ २७ ॥ एते घोरा याम्यलोके श्रूयंते द्विज सत्तम ॥ त्वत्प्रसादेन ते सौम्यास्तीर्थस्याऽस्य प्रभावतः ॥ २८ ॥ दानस्याऽस्य प्रभावेण यमराजप्रसादतः ॥ नरकेऽहं न यास्यामि द्विज जन्मनि जन्मनि ॥ २९ ॥ यमहास्यस्य चाख्यानमिदं शृण्वंति ये नराः ॥ तेऽपि पापविनिर्मुक्ता न पश्यंति यमालयम् ॥ ३० ॥ इति श्रीस्कांदे महा पुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखंडे यमहास्यतीर्थमाहात्म्यवर्णनं नाम द्विनवतितमोऽध्यायः ॥ ९२ ॥ ॥ छ ॥ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र कल्होडीतीर्थमुत्तमम् ॥ विख्यातं भारते लोके गंगायाः पापनाशनम् ॥ १ ॥ दुर्लभं मनुजैः पार्थ रेवातटसमाश्रितम् ॥ प्राणिनां पापनाशाय ऊषरं पुष्करं तथा ॥ २ ॥ तत्तु तीर्थमिदं पुण्यमित्येवं शूलिनो वचः ॥ जाह्नवी पशु रूपेण तत्र स्नानार्थमागता ॥ ३ ॥ अतस्तद्विश्रुतं लोके कल्होडीतीर्थमुत्तमम् ॥ त्रिरात्रं कारयेत्तत्र पूर्णिमायां युधिष्ठिर ॥ ४ ॥ रजस्तमस्तथा क्रोधं दंभं मात्सर्यमेव च ॥ एतांस्त्यजति यः पार्थ तेनाप्तं मोक्षजं फलम् ॥५॥ पयसा स्नापयेद्देवं त्रिसंध्यं च त्र्यहं तथा ॥ पयो गोसंभवं सद्यः संवत्सा

१ सवत्सा जीवपुत्रिणी–इत्यनयोः पदयोः–गोसंभवम्–पयः–इत्यत्रान्वयोऽस्ति। तेन या गौः सवत्सा जीवपुत्रिणी भवेत्–तद्गोसंभवं पयः–इति यथार्थार्थो बोध्यः। मूले पदयोजना यथाकथंचिद्व्यत्यस्ता दरी दृश्यते सा चार्येति तोष्टव्यं सुधीभिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

जीवपुत्रिणी ॥ ६ ॥ कृत्वा तत्ताम्रजे पात्रे क्षौद्रेण चैव योजिते ॥ ॐ नमः श्रीशिवायेति स्नानं देवस्य कारयेत् ॥ ७ ॥ स याति त्रिदश स्थानं नाकस्त्रीभिः समावृतः ॥ यस्तत्र विधिवत्स्नात्वा दानं प्रेतेषु यच्छति ॥ ८ ॥ शुक्लां गां दापयेत्तत्र प्रीयतां मे पितामहाः ॥ ब्राह्मणे शौचसंपन्ने स्वदारनिरते सदा ॥ ९ ॥ सवत्सां वस्त्रसंयुक्तां हिरण्योपरि संस्थिताम् ॥ सत्त्वयुक्तो ददद्राजञ्च्छांभवं लोकमाप्नुयात् ॥ १० ॥ इति श्रीस्कांदे महा पुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे कल्होडीतीर्थमाहात्म्यवर्णनंनाम त्रिनवतितमोऽध्यायः ॥ ९३ ॥ ॥ छ ॥ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तस्यैवानंतरं राजन्नंदितीर्थं व्रजेच्छुभम् ॥ सर्वपापहरं पुंसां नंदिना निर्मितं पुरा ॥ १ ॥ पापौघहतजंतूनां मोक्षदं नर्मदातटे ॥ अहोरात्रोषितो भूत्वा नंदिनाथे युधिष्ठिर ॥ २ ॥ पञ्चोपचारपूजायामर्चयेन्नंदिकेश्वरम् ॥ रत्नानि चैव विप्रेभ्यो यो दद्याद्धर्म नंदन ॥ ३ ॥ स याति परमं स्थानं यत्र वासः पिनाकिनः ॥ सर्वसौख्यसमायुक्तोऽप्सरोभिः सह मोदते ॥ ४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे नंदिकेश्वरतीर्थमाहात्म्यवर्णनंनाम चतुर्नवतितमोऽध्यायः ॥ ९४ ॥ ॥ छ ॥ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र बदर्याश्रममुत्तमम् ॥ सर्वतीर्थवरं पुण्यं कथितं शंभुना पुरा ॥ १ ॥ यश्चैष भारतस्याऽर्थे तत्र सिद्धः किरीटभृत् ॥ भ्राता ते फाल्गुनो नाम विद्ध्येनं नरदैवतम् ॥ २ ॥ नरनारायणौ द्वौ तावागतौ नर्मदातटे ॥ ज्ञानं तस्यैव यो राजन्भक्तिमान्वै जनार्दने ॥ ३ ॥ समं पश्यति सर्वेषु स्थावरेषु चरेषु च ॥ ब्राह्मणं श्वपचं चैव तत्र प्रीतो जनार्दनः ॥ ४ ॥ ऐकात्म्यं पश्य कौंतेय मयि चात्मनि नांतरम् ॥ नरनारायणाभ्यां हि कृतं बदरिकाश्रमम् ॥ ५ ॥ स्थापितः शंकरस्तत्र लोकानुग्रहकारणात् ॥ त्रिमूर्त्तिस्थापितं लिंगं स्वर्ग मार्गानुमुक्तिदम् ॥ ६ ॥ तत्र गत्वा शुचिर्भूत्वा ह्येकरात्रोपवासकृत् ॥ रजस्तमस्तथा त्यक्त्वा सात्त्विकं भावमाश्रयेत् ॥ ७ ॥ रात्रौ जागरणं कृत्वा मधुमासाष्टमीदिने ॥ अथवा च चतुर्दश्यामुभौ पक्षौ च कारयेत् ॥ ८ ॥ आश्विनस्य विशेषेण कथितं तव पांडव ॥ स्नापयेत्परया भक्त्या क्षीरेण मधुना सह ॥ ९ ॥ दध्ना शर्करया युक्तं घृतेन समलंकृतम् ॥ पंचामृतमिदं पुण्यं स्नापयेद्वृषभध्वजम् ॥ १० ॥ स्नाप्यमानं शिवं भक्त्या वीक्षते यो विमत्सरः ॥ तस्य वासः शिवोपांते शक्रलोके न संशयः ॥ ११ ॥ शाठ्येनाऽपि नमस्कारः प्रयुक्तः शूलपाणिने ॥ संसारमूलबद्धाना

 

१ यः जनार्दने भक्तिमान्—तस्यैव ज्ञानं लभ्येत—नान्यस्य—इत्यन्वयानुगुणोऽर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुद्वेष्टनकरो हि यः ॥ १२ ॥ तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितम् ॥ येनोंनमः शिवायेति मंत्राभ्यासः स्थिरीकृतः ॥ १३ ॥ यः पुनः स्नाप येद्भक्त्या एकभक्तो जितेन्द्रियः ॥ तस्याऽपि यत्फलं पार्थ वक्ष्ये तल्लेशतस्तव ॥ १४ ॥ पीडितो वृद्धभावेन तव भक्त्या वदाम्यहम् ॥ ते यांति परमं स्थानं भित्त्वा भास्करमण्डलम् ॥ १५ ॥ संसारे सर्वसौख्यानां निलयास्ते भवन्ति च ॥ आश्चर्यं ज्ञातिवर्गाणां धर्माणां निलयास्तु ते ॥ ॥ १६ ॥ संपन्नाः सर्वकामैस्ते पृथिव्यां पृथिवीपते ॥ श्राद्धं तत्रैव यः कुर्यान्नर्मदोदकमिश्रितम् ॥ १७ ॥ योग्यैश्च ब्राह्मणै राजन्कुलीनैर्वेदपारगैः ॥ सुरूपैश्च सुशीलैश्च स्वदारनिरतैः शुभैः ॥ १८ ॥ आर्यदेशप्रसूतैश्च श्लक्ष्णैश्चैव सुरूपिभिः ॥ कारयेत्पिंडदानं वै भास्करे कुतपस्थिते ॥ १९ ॥ पितॄणां परमं लोकं यदीच्छेद्धर्मनन्दन ॥ वर्जयेत्तान्प्रयत्नेन काणान्दुष्टांश्च दांभिकान् ॥ २० ॥ पुरुषान्क्रूरषण्डांश्च ब्राह्मणानां च निन्दकान् ॥ एतांश्च वर्जयेद्विप्रान्यदीच्छेच्छ्रेय आत्मनः ॥ २१ ॥ तस्मात्सर्वप्रयत्नेन योग्यं विप्रं समाश्रयेत् ॥ नरकान्मोचयेत्प्रेतान्कुम्भीपाकपुरोगमान् ॥ ॥ २२ ॥ मोक्षो भवति सर्वेषां पितॄणां नृपनन्दन ॥ विप्रेभ्यः कांचनं दद्यात्प्रीयतां मे पितामहः ॥ २३ ॥ अन्नं च दापयेत्तत्र भक्त्या वस्त्रं च भारत ॥ गां वृषं मेदिनीं दद्याच्छत्रं शस्तं नृपोत्तम ॥ २४ ॥ स पुमान्स्वर्गमाप्नोति इत्येवं शंकरोऽब्रवीत् ॥ प्राणत्यागं तु यः कुर्याच्छिखिना सलिलेनवा ॥ २५ ॥ अनाशकेन वा भूयः स गच्छेच्छिवमंदिरम् ॥ नरनारायणीतीरे देवद्रोण्यां च यो नृप ॥ २६ ॥ स वसेदीश्वरस्याग्रे यावदिंद्राश्चतुर्दश ॥ पुनः स्वर्गाच्च्युतः सोऽपि राजा भवति वीर्य्यवान् ॥ २७ ॥ सर्व्वैश्वर्यगुणैर्युक्तः प्रजापालनतत्परः ॥ ततः स्मरति तत्तीर्थं पुनरेवाऽऽगमिष्यति ॥ २८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे नारायणीतीर्थमाहात्म्यवर्णनंनाम पंचनवतितमोऽध्यायः ॥ ९५ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र तीर्थं कोटीश्वरं परम् ॥ ऋषिकोटिः समायाता यत्र वै कुरुनन्दन ॥ १ ॥ कृष्णद्वैपायनस्यैव क्षेमार्थं मुनिपुंगवाः ॥ मन्त्रयित्वा द्विजैः सर्व्वैर्वेदमंगलपाठकैः ॥ २ ॥ स्थापितः शंकरस्तत्र कारणं बन्धनाशनम् ॥ संसारच्छेदकरणं प्राणिनामार्त्तिनाशनम् ॥ ३ ॥ कोटीश्वरमिति प्रोक्तं पृथिव्यां नृपनन्दन ॥ स्नापयेत्तं तु यो भक्त्या पूर्णिमायां नृपोत्तम ॥ ४ ॥ पितॄणां तर्प्पणं कृत्वा पिंडदानं यथाविधि ॥ श्रावणस्य विशेषेण पूर्णिमायां युधिष्ठिर ॥ ५ ॥ पितॄणामक्षया तृप्तिर्यावदाभूतसंप्लवम् ॥ पितॄणां परमं गुह्यं रेवातटसमाश्रितम् ॥ मोक्षदं सर्वजंतूनां निर्मितं मुनिसत्तमैः ॥ ६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे कोटीश्वरतीर्थमाहात्म्यवर्णनंनाम षण्णवतितमोऽध्यायः ॥ ९६ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

ततो गच्छेन्महीपाल व्यासतीर्थमनुत्तमम् ॥ दुर्लभं मनुजैः पुण्यमन्तारिक्षे व्यवस्थितम् ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कस्माद्वै व्यासतीर्थं तदन्तरिक्षे व्यवस्थितम् ॥ एतदाख्याहि संक्षेपात्त्यज ग्रन्थस्य विस्तरम् ॥ २ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ साधुसाधु महाबाहो धर्मवान्साधु वत्सल ॥ स्वकर्मनिरतः पार्थ तीर्थयात्राकृतादरः ॥ ३ ॥ दुर्लभं सर्वजंतूनां व्यासतीर्थं नरेश्वर ॥ पीडितो वृद्धभावेन अकल्पोऽहं नृपात्मज ॥ ४ ॥ विसंज्ञो गतवित्तस्तु संजातः स्मृतिवर्जितः ॥ गुह्याद्गुह्यतरं तीर्थं नाऽऽख्यातं कस्य चिन्मया ॥ ५ ॥ कलिस्तत्रैव राजेंद्र न विशेद्व्यासंसंश्र यात् ॥ अन्तरिक्षे तु संजातं रेवायाश्चेष्टितेन तु ॥ ६ ॥ विरिंचिर्नैव शक्नोति रेवाया गुणकीर्त्तनम् ॥ कथं ज्ञास्याम्यहं तात रेवामाहात्म्यमुत्त मम् ॥ ७ ॥ व्यासतीर्थं विशेषेण लवमात्रं ब्रवीम्यतः ॥ प्रत्यक्षः प्रत्ययो यत्र दृश्यतेऽद्य कलौ युगे ॥ ८ ॥ विहंगो गच्छते नैव भित्त्वा शूलं सुदारुणम् ॥ तस्योत्पत्तिं समासेन कथयामि नृपात्मज ॥ ९ ॥ आसीत्पूर्वं महीपाल मुनिर्मान्यः पराशरः ॥ तेनात्युग्रं तपश्चीर्णं गंगांभसि महाफलम् ॥ १० ॥ प्राणायामेन सन्तस्थौ प्रविष्टो जाह्नवीजले ॥ पूर्णे द्वादशमे वर्षे निष्क्रांतो जलमध्यतः ॥ ११ ॥ भिक्षार्थी संचरेद्ग्रामं नावा[१] यत्रैव तिष्ठति ॥ तत्र तेन परा दृष्टा बाला चैव मनोहरा ॥ १२ ॥ तां दृष्ट्वा स च कामार्त्त उवाच मधुरं तदा ॥ मां नयस्व परं पारं काऽसि त्वं मृगलोचने ॥ १३ ॥ नावारूढे नदीतीरे मम चित्तप्रमाथिनि ॥ एवमुक्ता तु सा तेन प्रणम्य ऋषिपुंगवम् ॥ ॥ १४ ॥ कथयामास चाऽऽत्मानं दृष्ट्वा तं काममोहितम् ॥ कैवर्त्तानां गृहे दासी कन्याऽहं द्विजसत्तम ॥ १५ ॥ नावासंरक्षणार्थाय आदिष्टा स्वामि ना विभो ॥ मया विज्ञापितं वृत्तमशेषं ज्ञातुमर्हसि ॥ १६ ॥ एवमुक्तस्तया सोऽथ क्षणं ध्यात्वाऽब्रवीदिदम् ॥ १७ ॥ ॥ पराशर उवाच ॥ ॥ अहं ज्ञानबलाद्भद्रे तव जानामि संभवम् ॥ कैवर्त्तपुत्रिका न त्वं राजकन्याऽसि सुन्दरि ॥ १८ ॥ कन्योवाच ॥ ॥ कः पिता कथ्यतां ब्रह्मन्कस्या वा ह्युदरोद्भवा ॥ कस्मिन्वंशे प्रसूताऽहं कैवर्त्ततनया कथम् ॥ १९ ॥ ॥ पराशर उवाच ॥ ॥ कथयामि समस्तं यत्त्वया पृष्टम शेषतः ॥ वसुर्नामेति भूपालः सोमवंशविभूषणः ॥ २० ॥ जंबूद्वीपाऽधिपो भद्रे शत्रूणां भयवर्धनः ॥ शतानि सप्त भार्याणां पुत्राणां च दशैव तु ॥ २१ ॥ धर्मेण पालयेल्लोकानीशवत्पूज्यते सदा ॥ म्लेच्छास्तस्याविधेयाश्च क्षीरद्वीपनिवासिनः ॥ २२ ॥ तेषामुत्सादनार्थाय ययावुल्लंघ्य सागरम् ॥ संयुक्तः पुत्रभृत्यैश्च पौरुषे महति स्थितैः ॥ २३ ॥ समरं तैः समारब्धं म्लेच्छैश्च वसुना सह ॥ जिता म्लेच्छाः समस्तास्ते वसुना मृग

१ नावा--नौका--इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोचने ॥ २४ ॥ करदास्ते कृतास्तेन सपुत्रबलवाहनाः ॥ प्रधाना तस्य सा राज्ञी तव माता मृगेक्षणे ॥२५॥ प्रवासस्थे महीपाले संजाता सा रजस्वला ॥ नारीणां तु सदाकालं मन्मथो ह्यधिको भवेत् ॥ २६ ॥ विशेषेण ऋतोः काले भिद्यंते कामसायकैः ॥ मन्मथेन तु संतप्ताचिंत यत्सा शुभेक्षणा ॥ २७ ॥ दूतं वै प्रेषयाम्यद्य वसुराज्ञः समीपतः ॥ आहूतः सत्वरं दूत गच्छ त्वं नृपसन्निधौ ॥ २८ ॥ ॥ दूत उवाच ॥ ॥ परतीरं गतो देवि वसुराजाऽरिशासनः ॥ तत्र गंतुमशक्येत जलयानैर्विना शुभे ॥ २९ ॥ तानि यानानि सर्वाणि गृहीतानि परे तटे ॥ दूतवाक्येन सा राज्ञी विषण्णा कामपीडिता ॥ ३० ॥ तत्सखी तामुवाचाऽथ कस्मात्त्वं परितप्यसे ॥ स्वलेखः प्रेष्यतां देवि शुकहस्ते यथा र्थतः ॥ ३१ ॥ समुद्रं लंघयित्वा तु शकुंता यांति सुन्दरि ॥ सखिवाक्येन सा राज्ञी स्वस्था जाता नराधिप ॥ ३२ ॥ व्याहृतो लेखकस्तत्र लिख लेखं ममाज्ञया ॥ त्वद्धीना सत्यभामाद्य वसो राजन्न जीवति ॥ ३३ ॥ ऋतुकालोऽद्य संजातो लिख लेखं तु लेखक ॥ लिखिते भूर्जपत्रे तु लेखे वै लेखकेन तु ॥ ३४ ॥ शुकः पंजरमध्यस्थ आनीतोऽद्वैव सन्निधौ ॥ ३५ ॥ ॥ सत्यभामोवाच ॥ ॥ नीत्वा लेखं गच्छ शीघ्रं वसुराज्ञः समीपतः ॥ शकुनिः प्रणतो भूत्वा गृहीत्वा लेखमुत्तमम् ॥ ३६ ॥ उत्पत्य सहसा राजञ्जगामाऽऽकाशमंडलम् ॥ ततः पक्षी गतः शीघ्रं वसुराजसमीपतः ॥ ३७ ॥ क्षिप्ते लेखे शुकेनैव सत्यभामाविसर्जिते ॥ वसुराज्ञा ततो लेखो गृह्य हस्तेऽवधारितः ॥ ३८ ॥ लेखार्थं चिंत यित्वा तु गृह्य वीर्यं नरेश्वरः ॥ अमोघं पुटिकां कृत्वा प्रतिलेखेन मिश्रितम् ॥ ३९ ॥ शुकस्य सोऽर्पयामास गच्छ राज्ञीसमीपतः ॥ प्रणम्य वसुराजानं बीजं गृह्योत्पपात ह ॥ ४० ॥ समुद्रोपरि संप्राप्तः शुकः श्येनेन वीक्षितः ॥ सामिषं तं शुकं ज्ञात्वा श्येनस्तमभ्यधावत ॥ ४१ ॥ हतश्चंचुप्रहारेण शुकः श्येनेन भारत ॥ मूर्च्छया तस्य तद्बीजं पतितं सागरांभसि ॥ ४२ ॥ मत्स्येन गिलितं तच्च बीजं वसुमहीपतेः ॥ कन्या मत्स्योदरे जाता तेन बीजेन सुन्दरि ॥ ४३ ॥ प्राप्तोऽसौ लुब्धकैर्मत्स्य आनीतः स्वगृहं ततः ॥ यावद्विदारितो मत्स्यस्तावद्दृष्टा त्वमुत्तमे ॥ ॥ ४४ ॥ शशिमंडलसंकाशा सूर्यतेजःसमप्रभा ॥ दृष्ट्वा त्वां हर्षिताः सर्वे कैवर्त्ता जाह्नवीतटे ॥ ४५ ॥ हर्षितास्ते गताः सर्वे प्रधानस्य[1] च मंदिरम् ॥ स्त्रीरत्नं कथयामासुर्गृहाण त्वं महाप्रभम् ॥ ४६ ॥ गृहीता तेन तन्वंगी ह्यपुत्रेण मृगेक्षणा ॥ भार्यां स्वामाह तन्वंगि पालयस्व मृगेक्षणे ॥ ४७ ॥ ततः सा चिंतयामास पराशरवचस्तदा ॥ एवमुक्त्वा तु सा तेन दत्ताऽऽत्मानं नरेश्वर ॥४८॥ उवाच साधु मे ब्रह्मन्मत्स्यगंधोऽनु वर्त्तते ॥

१ प्रधानस्य—कैवर्तमुख्यस्य—इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्कां.म.पु. ततस्तेन तु सा बाला दिव्यगंधाधिवासिता ॥ ४९ ॥ कृता योगबलेनैव ज्वालयित्वा विभावसुम् ॥ कृत्वा प्रदक्षिणं वह्निमूढा तेन रसा[1]त्तदा ॥५०॥ आवं०खं० ५
॥२५६॥ जलयानस्य मध्ये तु कामस्थानान्यसंस्पृशत् ॥ ज्ञात्वा कामोत्सुकं विप्रं भीता सा धर्मनंदन ॥ ५१ ॥ हसंती तमुवाचाऽथ देव त्वं लोक (रेवाखं०३)
सन्निधौ ॥ न लज्जसे कथं धीमन्कुर्वाणः पामरोचितम् ॥५२॥ ततस्तेन क्षणं ध्यात्वा संस्मृता हृदि तामसी ॥ आगता तामसी माया यया व्याप्तं अ० ९७
चराचरम् ॥ ५३ ॥ ततः सा विस्मिता तेन कर्मणैव तु रंजिता ॥ ब्रह्मचर्याभितप्तेन स्त्रीसौख्यं क्रीडितं तदा ॥ ५४ ॥ ततः सा तत्क्षणादेव
गर्भभारेण पीडिता ॥ प्रसूता बालकं तत्र जटिलं दंडधारिणम् ॥ ५५ ॥ कमंडलुधरं शांतं मेखलाकटिभूषितम् ॥ उत्तरीयकृतस्कंधं त्रिष्णु
मायाविवर्जितम् ॥ ५६ ॥ ततोऽपि शंकिता पार्थ दृष्ट्वा तं कलबालकम् ॥ वेपमाना ततो बाला जगाम शरणं मुनेः ॥५७॥ रक्षरक्ष मुनिश्रेष्ठ पराशर
महामते॥जातं मेऽस्त्यद्भुतं पुत्रं कौपीनवरमेखलम् ॥ दंडहस्तं जटायुक्तमुत्तरीयविभूषितम् ॥५८॥ ॥ पराशर उवाच ॥॥ मा भैषीः स्वसुते जाते कुमारी
त्वं भविष्यसि ॥ नाम्ना योजनगंधेति द्वितीयं सत्यवत्यपि ॥५९॥ शंतनुर्नाम राजा यः स ते भर्त्ता भविष्यति ॥ प्रथमा महिषी तस्य सोमवंशविभू
षणः ॥६०॥ गच्छ त्वं स्वाश्रयं शुभ्रे पूर्वरूपेण संस्थिता ॥ मा विषादं कुरुष्वाऽत्र दृष्टं ज्ञानस्य मे बलम् ॥६१॥ इत्युक्त्वा प्रययौ विप्रः सा बाला पुत्रमा
श्रिता ॥ नत्वोचे मातरं भक्त्या साष्टांगं विनयानतः ॥ ६२ ॥ क्षम्यतां मातरुक्तं मे प्रसादः क्रियतामपि ॥ ईश्वराराधने यत्नं करिष्याम्यहमंबिके
॥६३॥ ततः सा पुत्रवाक्येन विषण्णा वाक्यमब्रवीत् ॥६४॥ ॥ योजनगंधोवाच ॥ ॥ मा त्यक्त्वा गच्छ वत्साद्य मातरं मामनागसम् ॥ त्वद्वियो
गेन मे पुत्र पंचत्वं भाव्यसंशयम् ॥६५॥ नास्ति पुत्रसमः स्नेहो नास्ति भ्रातृसमं कुलम् ॥ नाऽस्ति सत्यपरो धर्मो नानृतात्पातकं परम् ॥६६॥
बालभावे मया जात आधारः किल जायसे ॥ न मे भर्त्ता न मे पुत्रः पश्य कर्मविडंबनम् ॥६७॥ ॥ व्यास उवाच ॥॥ मा विषादं कुरुष्वांतः सत्यमेत
न्मयेरितम् ॥ आपत्कालेऽस्मि ते देवि स्मर्त्तव्यः कार्यसिद्धये ॥ ६८ ॥ आपदस्तारयिष्यामि क्षम्यतां मे दुरुत्तरम् ॥ इत्युक्त्वा प्रययौ व्यासः कन्या
साऽपि गता गृहम् ॥ ६९ ॥ पराशरसुतस्तत्र विषण्णो वनमध्यतः ॥ त्रेतायुगावसाने तु द्वापरादौ नरेश्वर ॥ ७० ॥ व्यासार्थं चिंतयामासुर्देवाः
॥ ८२ ॥ शक्रपुरोगमाः ॥ आख्यातो नारदेनैव पुत्रः पराशरस्य सः ॥ ७१ ॥ कैवर्त्तपुत्रिकाजातो ज्ञानी जह्नुसुतातटे ॥ ततो नारदवाक्येन आगताः सुरस
त्तमाः ॥ ७२ ॥ रामः पितामहः शक्रो मुनिसंघैः समावृताः ॥ आ[2]स्यादिकं पृथग्दत्त्वा साधुसाध्वित्युदीरयन् ॥ ७३ ॥ पितामहेन वै बालो गर्भा ॥२५६॥

१ रसात्-प्रेमतः-इत्यर्थः ।२ आस्यादिकम्-आसनादिकम्-इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धानादिसंस्कृतः ॥ द्वीपायनो द्वीपजन्[1]मा पाराशर्यः पराशरात् ॥ ७४ ॥ कृष्णांशात्कृष्णनामायं व्यासो वेदान्व्यसिष्यति ॥ विरंचिनाऽभिषिक्तो ऽसौ मुनिसंघैः पुनःपुनः ॥ ७५ ॥ व्यासस्त्वं सर्वलोकेषु इत्युक्त्वा प्रययुः सुराः ॥ तीर्थयात्रा समारब्धा कृष्णद्वैपायनेन तु ॥ ७६ ॥ गंगावगाहिता तेन केदारश्च सपुष्करः ॥ गया च नैमिषं तीर्थं कुरुक्षेत्रं सरस्वती ॥ ७७ ॥ उज्जयिन्यां महाकालं सोमनाथं प्रभासके ॥ पृथिव्यां सागरांतायां स्नात्वा यातो महामुनिः ॥ ७८ ॥ अमृतां नर्मदां प्राप्तो रुद्रदेहोद्भवां शुभाम् ॥ साह्लादो नर्मदां दृष्ट्वा चित्तविश्रांतिमाप च ॥ ७९ ॥ तपश्चचार विपुलं नर्मदातटमाश्रितः ॥ ग्रीष्मे पंचाग्निमध्यस्थो वर्षासु स्थंडिलेशयः ॥ ८० ॥ सार्द्रवासाश्च हेमंते तिष्ठन्दध्यौ महेश्वरम् ॥ स्वांतर्हृत्कमले स्थाप्य ध्यायते परमेश्वरम् ॥ ८१ ॥ सृष्टिसंहारकर्त्तारमच्छेद्यं वरदं शुभम् ॥ नित्यं सिद्धेश्वरं लिंगं पूजयेद्ध्यानतत्परः ॥ ८२ ॥ अर्चनात्सिद्धलिंगस्य ध्यानयोगप्रभावतः ॥ प्रत्यक्षः शंकरो जातः कृष्णद्वैपायनस्य सः ॥ ८३ ॥ ॥ ईश्वर उवाच ॥ ॥ तोषितोऽहं त्वया वत्स वरं वरय शोभनम् ॥ ८४ ॥ ॥ व्यास उवाच ॥ ॥ यदि तुष्टोऽसि मे देव यदि देयो वरो मम ॥ प्रत्यक्षो नर्म्मदातीरे स्वयमेव भविष्यसि ॥ अतीतानागतज्ञोऽहं त्वत्प्रसादादुमापते ॥ ८५ ॥ ॥ ईश्वर उवाच ॥ ॥ एवं भवतु ते पुत्र मत्प्रसादादसंशयम् ॥ त्वयि भक्तिगृहीतोऽहं प्रत्यक्षो नर्मदातटे ॥ ॥ ८६ ॥ सहस्रांशार्द्धभावेन प्रत्यक्षोऽहं त्वदाश्रमे ॥ इत्युक्त्वा प्रययौ देवः कैलासं नगमुत्तमम् ॥ ८७ ॥ पत्नीसंग्रहणं जातं कृष्णद्वैपायनस्य तु ॥ शास्त्रोक्तेन विधानेन पत्नी पालयतस्तथा ॥ ८८ ॥ पुत्रो जातो ह्यपुत्रस्य पराशरसुतस्य च ॥ देवैर्वर्द्धापितः सर्वैरिंद्रपुरोगमैः ॥ ८९ ॥ पुत्रजन्मन्यथाजग्मुर्वशिष्ठाद्या मुनीश्वराः ॥ तीर्थयात्राप्रसंगेन पराशरपुरोगमाः ॥ ९० ॥ मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोंगिराः ॥ यमापस्तंबसंवर्त्ताः कात्यायनबृहस्पती ॥ ९१ ॥ एवमादिसहस्राणि लक्षकोटिशतानि च ॥ सशिष्याश्च महाभागा नर्मदातटमाश्रिताः ॥ ९२ ॥ व्यासाश्रमे शुभे रम्ये संतुष्टा आययुर्नृप ॥ दृष्ट्वा तान्सोऽपि विप्रेंद्रानभ्युत्थानकृतोद्यमः ॥ ९३ ॥ पितुः पूर्वं प्रणम्याऽदौ सर्वेषां च यथाविधि ॥ आसनानि ददौ भक्त्या पाद्यमर्घं न्यवेदयत् ॥ ९४ ॥ कृतांजलिपुटो भूत्वा वाक्यमेतदुवाच ह ॥ उद्धृतोऽहं न संदेहो युष्मत्संभाषणार्चनात् ॥ ९५ ॥ आरण्यानि च शाकानि फलान्यारण्यजानि च ॥ तानि दास्यामि युष्माकं सर्वेषां प्रीतिपूर्वकम् ॥ ९६ ॥ न्यमंत्रयत तान्सर्वान्प्रत्येकं प्रणिपत्य च ॥ ततस्ते प्रणतं दृष्ट्वा कृष्णद्वैपायनं मुनिम् ॥ ९७ ॥ वर्द्धयित्वा जयाशीर्भिरवलोक्य परस्परम् ॥ पराशरः समस्तैश्च वीक्षि

१ जन्म शब्दोऽकारान्तोऽपि कोशे दृश्यते । २ पितृपूर्वकम्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri




तो मुनिपुंगवैः ॥ ९८ ॥ उत्तरं दीयतां तात कृष्णद्वैपायनस्य च ॥ एवमुक्तस्तु तैः सर्वैर्भगवान्स पराशरः ॥ प्रोवाच स्वात्मजं
व्यासमृषीणां यच्चिकीर्षितम् ॥ ॥ ९९ ॥ श्रीपराशर उवाच ॥ ॥ नेच्छंति दक्षिणे कूले व्रतभंगभयादथ ॥ भोजनं
भोक्तुकामास्ते श्राद्धे चैव विशेषतः ॥ १०० ॥ ॥ व्यास उवाच ॥ ॥ करोमि भवतामुक्तमत्रैव स्थीयतां क्षणम् ॥ यावत्प्रसाद्य
सरितं करोमि विधिमुत्तमम् ॥ १ ॥ एवमुक्त्वा शुचिर्भूत्वा नर्मदातटमास्थितः ॥ स्तोत्रं जगाद सहसा तन्निबोध नरेश्वर ॥ २ ॥
जय भगवति देवि नमो वरदे जय पापविनाशिनि बहुफलदे ॥ जय शुंभनिशुंभकपालधरे प्रणमामि तु देवनरार्त्तिहरे ॥ ३ ॥ जय चन्द्र
दिवाकरनेत्रधरे जय पावकभूषितवक्त्रवरे ॥ जय भैरवदेहनिलीनपरे जय अंधकरक्तविशोषकरे ॥ ४ ॥ जय महिषविमर्द्दिनि शूलकरे जय
लोकसमस्तकपापहरे ॥ जय देवि पितामहरामनते जय भास्करशक्रशिरोऽवनते ॥ ५ ॥ जय षण्मुखसायुधईशनुते जय सागरगामिनि
शंभुनुते ॥ जय दुःखदरिद्रविनाशकरे जय पुत्रकलत्रविवृद्धिकरे ॥ ६ ॥ जय देवि समस्तशरीरधरे जय नाकविदर्शिनि दुःखहरे ॥ जय व्याधि
विनाशिनि मोक्षकरे जय वांछितदायिनि सिद्धवरे ॥ ७ ॥ एतद्व्यासकृतं स्तोत्रं यः पठेच्छिवसन्निधौ ॥ गृहे वा शुद्धभावेन कामक्रोधवि
वर्जितः ॥ ८ ॥ तस्य व्यासो भवेत्प्रीतः प्रीतश्च वृषवाहनः ॥ प्रीता स्यान्नर्मदा देवी सर्वपापक्षयंकरी ॥ ९ ॥ न ते यांति यमालोकं यैः स्तुता
भुवि नर्मदा ॥ पितामहोऽपि मुह्येत देवि त्वद्गुणकीर्त्तनात् ॥ १० ॥ वाक्पतिर्नैव ते वक्तुं स्वरूपं वेद नर्मदे ॥ कथं गुणानहं देवि त्वदीयाञ्ज्ञातु
मुत्सहे ॥ १११ ॥ इति ज्ञात्वा शुचिं भावं वाङ्मनःकायकर्मभिः ॥ प्रसन्ना नर्मदा देवी ततो वचनमब्रवीत् ॥ १२ ॥ सत्यवादेन तुष्टाऽहं भोभो
व्यास महामुने ॥ यदीच्छसि वरं किंचित्तं ते सर्वं ददाम्यहम् ॥ १३ ॥ ॥ व्यास उवाच ॥ ॥ यदि तुष्टासि मे देवि यदि देयो वरो मम ॥
आतिथ्यमुत्तरे कूले ऋषीणां दातुमर्हसि ॥ १४ ॥ ॥ नर्मदोवाच ॥ ॥ अयुक्तं याचितं व्यास विमार्गे यत्प्रवर्तनम् ॥ इंद्रचन्द्रयमैः शक्या
सुन्मार्गे न प्रवर्त्तितुम् ॥ १५ ॥ याचस्वान्यं वरं पुत्र यत्किंचिद्भुवि दुर्लभम् ॥ ॥ एतच्छ्रुत्वा वचो देव्या व्यासो मूर्च्छां गतस्तदा ॥ १६ ॥
वृथा क्लेशोऽद्य मे जात इति मत्वा पपात ह ॥ धरणी चलिता सर्वा सशैलवनकानना ॥ १७ ॥ मूर्च्छापन्नं ततो व्यासं दृष्ट्वा देवाः सवा
सवाः ॥ हाहाकारमुखाः सर्वे तत्राऽऽजग्मुः सहस्रशः ॥ १८ ॥ व्यासमुत्थापयामासुर्वेदव्यसनतत्परम् ॥ ब्राह्मणार्थे च संक्लिष्टो नात्महेतोः



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सरिद्वरे ॥ १९ ॥ गवार्थे ब्राह्मणार्थे च सद्यः प्राणान्परित्यजेत् ॥ एवं सा नर्मदा प्रोक्ता ब्रह्माद्यैः सुरसत्तमैः ॥ १२० ॥ सुशीतलैस्तं बहुभिश्च वातै रेवाभ्यषिंचत्स्वजलेन भीता ॥ सचेतनः सत्यवतीसुतोऽपि प्रणम्य देवान्सरितं जगाद ॥ २१ ॥ ॥ व्यास उवाच ॥ ॥ तीर्थैः समस्तैः किल सेवनाय फलं प्रदिष्टं मम मंदभाग्यात् ॥ यद्देवि पुण्या विफला ममाशा आरण्यपुष्पाणि यथा जनानाम् ॥ २२ ॥ ॥ नर्मदोवाच ॥ ॥ यतोयतो मां हि महानुभाव निनीषते चित्तमिलातलेऽत्र ॥ विंध्येन सार्द्धं तव मार्गमद्य यास्याम्यहं दंडधरस्य पृष्ठे ॥ २३ ॥ एवमुक्तो महा तेजा व्यासः सत्यवतीसुतः ॥ दक्षिणे चालयामास स्वाश्रमस्य सरिद्वराम् ॥ २४ ॥ दंडहस्तो महातेजा हुंकारमकरोन्मुनिः ॥ व्यासहुंकारभीता सा चलिता रुद्रनंदिनी ॥ २५ ॥ दंडेन दर्शयन्मार्गं देवी तत्र प्रवर्त्तिता ॥ व्यासमार्गं गता देवी दृष्टा शक्रपुरोगमैः ॥ २६ ॥ पुष्पवृष्टिं ततो देवा व्यमुंचन्त्सह किंकरैः ॥ प्रोत्फुल्लनयना जाताः पराशरमुखा द्विजाः ॥ किं कुर्मो ब्रूहि मे पुत्र कर्मणा ते स्म रंजिताः ॥ २७ ॥ ॥ व्यास उवाच ॥ ॥ तपश्च विपुलं कृत्वा दानं दत्त्वा महाफलम् ॥ एतदेव नरैः कार्यं साधूनां यत्सुखावहम् ॥ २८ ॥ यदि तुष्टा महाभागा अनुग्राह्यो ह्यहं यदि ॥ तस्मान्ममाश्रमे सर्वैः स्थीयतां नाऽत्र संशयः ॥ २९ ॥ आतिथ्यं शाकपर्णेन रेवामृतविमिश्रितम् ॥ प्रतिपन्नं समस्तैर्वः पराशर मुखैर्मम ॥ स्थातव्यं स्वाश्रमे सर्वै रेवाया उत्तरे तटे ॥ १३० ॥ ॥ मार्कंडेय उवाच ॥ ॥ स्नानतर्पणनित्यानि[1] कृतानि द्विजसत्तमैः ॥ व्यासकुंडे ततो गत्वा होमः सर्वैः प्रकल्पितः ॥ १३१ ॥ श्रीफलैर्बिल्वपत्रैश्च जुहुवुर्जातवेदसम् ॥ गौतमो भृगुर्माण्डव्यो नारदो लोमशस्तथा ॥ ॥ ३२ ॥ पराशरस्तथा शंखः कौशिकश्च्यवनो मुनिः ॥ पिप्पलादो वसिष्ठश्च नाचिकेतो महातपाः ॥ ३३ ॥ विश्वामित्रोऽप्यगस्त्यश्च उद्दालकयमौ तथा ॥ शांडिल्यो जैमिनिः कण्वो याज्ञवल्क्योशनोंगिराः ॥ ३४ ॥ शातातपो दधीचिश्च कपिलो गालवस्तथा ॥ जैगीषव्य स्तथा दक्षो भरतो मुद्गलस्तथा ॥ ३५ ॥ वात्स्यायनो महातेजाः संवर्त्तः शक्तिरेव च ॥ जातूकर्ण्यो भरद्वाजो वालखिल्यारुणिस्तथा ॥ ॥ ३६ ॥ एवमादिसहस्राणि जुह्वते जातवेदसम् ॥ अक्षमालाकरोत्कीर्णा ध्यानयोगपरायणाः ॥ ३७ ॥ एकचित्ता द्विजाः सर्वे चक्रुर्होमक्रियां तदा ॥ ततः समुत्थितं लिंगं मोक्षदं व्याधिनाशनम् ॥ ३८ ॥ अच्छेद्यं परमं देवं दृष्ट्वा व्यासस्तुतोष च ॥ पुष्पवृष्टिं ददुर्देवा आशीर्वादान्द्विजोत्तमाः ॥ ३९ ॥ साष्टांगं प्रणतो व्यासो देवं दृष्ट्वा त्रिलोचनम् ॥ ब्राह्मणान्पूजयामास शाकमूलफलेन च ॥ १४० ॥

१ नित्यानि—अकरणे प्रत्यवायकराणि—सन्ध्यावन्दनादीनि कर्माणि इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पितृपूर्वं द्विजाः सर्वे भोजिताः पांडुनन्दन ॥ आशीर्वादांस्ततः पुण्यान्दत्त्वा विप्रा ययुः पुनः ॥ ४१ ॥ तदा प्रभृति तत्तीर्थं व्यासाख्यं प्रोच्यते बुधैः ॥ ४२ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ व्यासतीर्थस्य यत्पुण्यं तत्सर्वं कथयस्व मे ॥ स्नानदानविधानं च यस्मिन्काले महाफलम् ॥ ४३ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ कथयामि समस्तं ते भ्रातृभिः सह पांडव ॥ कार्त्तिकस्य सिते पक्षे चतुर्दश्यां जितेन्द्रियः ॥ ४४ ॥ उपोष्य यो नरो भक्त्या रात्रौ कुर्वीत जागरम् ॥ स्नापयेदीश्वरं भक्त्या क्षौद्रक्षीरेण सर्प्पिषा ॥ ४५ ॥ दध्ना च खण्डयुक्तेन कुशतोयेन वै पुनः ॥ श्रीखंडेन सुगन्धेन गुंठयेत्परमेश्वरम् ॥ ४६ ॥ ततः सुगन्धकुसुमैर्बिल्वपत्रैश्च पूजयेत् ॥ मुचुकुन्देन कुन्देन कुशजातीप्रसूनकैः ॥ ४७ ॥ उन्मत्तमुनिपुष्पैश्च तथान्यैः कालसंभवैः ॥ अर्चयेत्परया भक्त्या द्वीपेश्वरमनुत्तमम् ॥ ४८ ॥ इक्षुगड्डुकदानेन तुष्यते परमेश्वरः ॥ गड्डुकाष्टकदानेन पातकं यात्यहोर्जितम् ॥ ४९ ॥ मासार्जितं च नश्येत गड्डुकाष्टशतेन च ॥ षाण्मासिकं सहस्रेण द्विगुणैरब्दिकं तथा ॥ ॥ ५० ॥ आजन्मजनितं पापमयुतेन प्रणश्यति ॥ द्विगुणैर्नश्यते व्याधिस्त्रिगुणैः स्याद्धनागमः ॥ ५१ ॥ षड्गुणैर्जायते वाग्मी सिद्धस्तद्द्विगुणैस्तथा ॥ रुद्रत्वं दशलक्षैश्च जायते नाऽत्र संशयः ॥ ५२ ॥ पौर्णमास्यां नृपश्रेष्ठ स्नानं कुर्वीत भक्तितः ॥ मन्त्रोक्तेन विधानेन सर्वपापक्षयंकरम् ॥ ५३ ॥ वारुणं च तथाग्नेयं ब्राह्मयं चैवाक्षयंकरम् ॥ देवान्पितॄन्मनुष्यांश्च विधिवत्तर्पयेद्बुधः ॥ ५४ ॥ ऋचा ऋग्वेदजं पुण्यं साम्ना सामफलं लभेत् ॥ यजुर्वेदस्य यजुषा गायत्र्या सर्वमाप्नुयात् ॥ ५५ ॥ अक्षरं च जपेन्मन्त्रं सौरं वा शिवदैवतम् ॥ अथवा वैष्णवं मन्त्रं द्वादशाक्षरसंज्ञितम् ॥ ५६ ॥ पूजयेद्ब्राह्मणान्भक्त्या सर्वलक्षणलक्षितान् ॥ स्वदारनिरतान्विप्रान्दंभलोभविवर्जितान् ॥ ५७ ॥ भिन्नवृत्तिकरान्पापान्पतितान्च्छूद्रसेवनान् ॥ शूद्रीग्रहणसंयुक्तान्वृषली यस्य मंदिरे ॥ ५८ ॥ परोक्षवादिनो दुष्टान्गुरुनिंदापरायणान् ॥ वेदद्वेषणशीलांश्च हैतुकान्बकवृत्तिकान् ॥ ५९ ॥ ईदृशान्वर्जयेच्छ्राद्धे दाने सर्वव्रतेषु च ॥ गायत्रीसारमात्रोऽपि वरं विप्रः सुयंत्रितः ॥ ६० ॥ नायंत्रितश्चतुर्वेदी सर्वाशी सर्वविक्रयी ॥ ईदृशान्पूजयेद्विप्राननन्नदानहिरण्यतः ॥ ६१ ॥ उपानहौ च वस्त्राणि शय्यां छत्रमथासनम् ॥ यो दद्याद्ब्राह्मणे भक्त्या सोऽपि स्वर्गे महीयते ॥ ६२ ॥ प्रत्यक्षा सुरभी तत्र जलधेनुस्तथाघृता ॥ तिलधेनुः प्रदातव्या महिष्यश्च तथैव च ॥ ६३ ॥ कृष्णाजिनप्रदाता यो दाता यस्तिलसर्पिषोः ॥ कन्यापुस्तकयोर्दाता सोऽक्षयं लोकमाप्नुयात् ॥ ६४ ॥ धूर्वाहौ खुरसंयुक्तौ धान्योपस्करसंयुतौ ॥ दापयेत्स्वर्गकामस्तु इति मे सत्यभाषितम् ॥ ६५ ॥ सूत्रेण वेष्टयेद्दीपमथवा जगतीं शुभाम् ॥ मंदिरं



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परया भक्त्या परमेशमथापि वा ॥ ६६ ॥ प्रदक्षिणां विधानेन यः करोत्यत्र मानवः ॥ जम्बूप्लाक्षाह्वयौ द्वीपौ शाल्मलिश्चाऽपरो नृप ॥ ॥ ६७ ॥ कुशः क्रौंचस्तथा काशः पुष्करश्चैव सप्तमः ॥ सप्तसागरपर्यंता वेष्टिता तेन भारत ॥ ६८ ॥ द्वीपेश्वरे महाराज वृषोत्सर्गं च कारयेत् ॥ वृषेणाऽरुणवर्णेन माहेशं लोकमाप्नुयात् ॥ ६९ ॥ यस्तु वै पांडुरो वक्त्रे ललाटे पादयोस्तथा ॥ लांगूले यस्तु वै शुभ्रः स वै नाकस्य दर्शकः ॥ ॥ ७० ॥ नीलोऽयमीदृशः प्रोक्तो यस्तु द्वीपेश्वरे त्यजेत् ॥ स समा रोमसंख्याता नाके वसति भारत ॥ ७१ ॥ सौरं च शांकरं लोकं वैरंचं वैष्णवं क्रमात् ॥ भुनक्ति स्वेच्छया राजन्व्यासतीर्थप्रभावतः ॥ ७२ ॥ सपत्नीकं ततो विप्रं पूजयेत्तत्र भक्तितः ॥ सितरक्तानि वस्त्राणि यो दद्यादग्रजन्मने ॥ ७३ ॥ कृत्वा प्रदक्षिणं युग्मं प्रीयतां मे जगद्गुरुः ॥ नाऽस्ति विप्रसमो बन्धुरिह लोके परत्र च ॥ ७४ ॥ यमलोके महाघोरे पततं योऽभिरक्षति ॥ इतिहासपुराणज्ञं विष्णुभक्तं जितेंद्रियम् ॥ ७५ ॥ पूजयेत्परया भक्त्या सामगं वा विशेषतः ॥ द्वीपेश्वरं च ये भक्त्या संस्मरंति गृहे स्थिताः ॥ ७६ ॥ न तेषां जायते शोको न हानिर्न च दुष्कृतम् ॥ प्रथमं पूजयेत्तत्र लिंगं सिद्धेश्वरं ततः ॥ ७७ ॥ यत्र सिद्धो महाभागो व्यासः सत्यवतीसुतः ॥ अस्यैव पूजनात्सिद्धो धारासर्पो[1] महामतिः ॥७८॥ तत्र तीर्थे तु यो राजन्प्राणत्यागं करोति च ॥ सूर्यलोकमसौ भित्त्वा प्रयाति शिवसन्निधौ ॥ ७९ ॥ समाः सहस्राणि च सप्त वै जले दशैकमग्नौ पतने च षोडश ॥ महाहवे षष्टिरशीति[2] गोग्रहे ह्यनाशके भारत चाक्षया गतिः ॥ ८० ॥ पिता पितामहश्चैव तथैव प्रपितामहः ॥ वायुभूतं निरीक्षंते ह्यागच्छंतं स्वगोत्रजम् ॥ ८१ ॥ अस्मद्गोत्रेऽस्ति कः पुत्रो यो नो दद्यात्तिलोदकम् ॥ कार्त्तिक्यां च विशेषेण वैशाख्यां वा तथैव च ॥ ८२ ॥ स्वर्गतिं च प्रयास्यामस्तत्र तीर्थोपसेवनात् ॥ एतत्ते कथितं सर्वं द्वीपेश्वरमनुत्तमम् ॥ ८३ ॥ यः पठेत्परया भक्त्या शृणुयात्तद्गतो नृप ॥ सोऽपि पापविनिर्मुक्तो मोदते शिममंदिरे ॥ ८४ ॥ ऊषरं सर्वतीर्थानां निर्मितं मुनिपुंगवैः ॥ कामप्रदं नृपश्रेष्ठ व्यासतीर्थं न संशयः ॥ ८५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे व्यासतीर्थमाहात्म्यवर्णनंनाम सप्तनवतितमोऽध्यायः ॥ ९७ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र प्रभासेश्वरमुत्तमम् ॥ विख्यातं त्रिषु लोकेषु स्वर्गसोपानमुत्तमम् ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ प्रभासं तात मे ब्रूहि कथं जातं महाफलम् ॥ स्वर्गसोपानदं दृश्यं संक्षेपात्कथयाशु मे ॥ २ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ दुर्भगा रविपत्नी च प्रभानामेति विश्रुता ॥

१ धारासर्पः--इ०पा० । २ इत्यशीति--विभक्तिलोप आर्षः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तया चाऽऽराधितः शंभुरुग्रेण तपसा पुरा ॥ ३ ॥ वायुभक्षा स्थिता वर्षं वर्षं ध्यानपरायणा ॥ ततस्तुष्टो महादेवः प्रभायाः पांडुनन्दन ॥ ४ ॥ ॥ ईश्वर उवाच ॥ ॥ कस्मात्संक्लिश्यसे बाले कथ्यतां यद्विवक्षितम् ॥ अहं हि भास्करोऽप्येको नानात्वं नैव विद्यते ॥ ५ ॥ ॥ प्रभोवाच ॥ ॥ नान्यो देवः स्त्रियः शंभो विना भर्त्रा क्वचित्प्रभो ॥ सगुणो निर्गुणो वाऽपि धनाढ्योवाप्यकिंचनः ॥ ६ ॥ प्रियो वा यदि वा द्वेष्यः स्त्रीणां भर्त्तैव दैवतम् ॥ दुर्भगत्वेन दग्धाहं सखीमध्ये सुरेश्वर ॥ भर्त्तर्यलब्धसौख्यास्मि तेन क्लिश्याम्यहं भृशम् ॥ ७ ॥ ॥ ईश्वर उवाच ॥ ॥ वल्लभा भास्करस्यैव मत्प्रसादाद्भविष्यसि ॥ ८ ॥ ॥ पार्वत्युवाच ॥ ॥ अप्रमाणं भवद्वाक्यं भास्करोऽपि करिष्यति ॥ वृथा क्लेशो भवेदस्याः प्रभायाः परमेश्वर ॥९॥ उमावाक्यान्महेशान ध्यातस्तिमिरनाशनः ॥ आगतो गगनाद्भानुर्नर्मदोत्तररोधसि ॥ १० ॥ ॥ भानुरुवाच ॥ ॥ आहूतोऽस्मि कथं देव ह्यंधासुरनिषूदन ॥ ११ ॥ ॥ ईश्वर उवाच ॥ ॥ प्रभां पालय भो भानो संतोषेण परेण हि ॥ १२ ॥ ॥ उमोवाच ॥ ॥ प्रभाया मंदिरे नित्यं स्थीयतां हिमनाशन ॥ अग्रपत्नी समस्तानां भार्याणां क्रियतां रवे ॥ १३ ॥ ॥ भानुरुवाच ॥ ॥ एवं देवि करिष्यामि तव वाक्यं वरानने ॥ एतच्छ्रुत्वा प्रभाऽऽहूता प्रत्युवाच महेश्वरम् ॥ १४ ॥ ॥ प्रभोवाच ॥ ॥ स्वांशेन स्थीयतां देव मन्मथारे उमापते ॥ एकांशः स्थाप्यतामत्र तीर्थस्योन्मीलनाय च ॥ १५ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ सर्वदेवमयं लिंगं स्थापितं तत्र पांडव ॥ प्रभासेश इति ख्यातं सर्वलोकेषु दुर्लभम् ॥ १६ ॥ अन्यानि यानि तीर्थानि काले तानि फलंति वै ॥ प्रभासेशस्तु राजेंद्र सद्यः कामफलप्रदः ॥ १७ ॥ माघ मासे सिते पक्षे सप्तम्यां च विशेषतः ॥ अश्वं यः स्पर्शयेत्तत्र यथोक्तब्राह्मणे नृप ॥ १८ ॥ इन्द्रत्वं प्राप्यते तेन भास्करस्याऽथवा पदम् ॥ स्नात्वा परमया भक्त्या दानं दद्याद्द्विजातये ॥ १९ ॥ गोप्रदाता लभेत्स्वर्गं सत्यलोकं वरेश्वर ॥ सर्वांगसुन्दरीं शुभ्रां क्षीरिणीं तरुणीं शुभाम् ॥ २० ॥ सवत्सां घण्टासंयुक्तां कांस्यपात्रावदोहिनीम् ॥ ददते ये नृपश्रेष्ठ न ते यांति यमालयम् ॥ २१ ॥ अथ यः परया भक्त्या स्नानं देवस्य कारयेत् ॥ स प्राप्नोति परं लोकं यावदाभूतसंप्लवम् ॥ २२ ॥ दौर्भाग्यं नाशमायाति स्नानमात्रेण पांडव ॥ तत्र तीर्थे तु यो भक्त्या कन्यादानं प्रयच्छति ॥ ॥ २३ ॥ ब्राह्मणाय विवाहेन दापयेत्पांडुनंदन ॥ समानवयसे देया कुलशीलधनैस्तथा ॥ २४ ॥ ये ददन्ते महाराज ह्यपि पातकसंयुताः ॥ तेषां पापानि लीयन्ते ह्युदके लवणं यथा ॥ २५ ॥ स्वामिद्रोहकृतं पापं निक्षेपस्याऽपहारिणि ॥ मित्रघ्ने च कृतघ्नेच कूटसाक्ष्यसमुद्भवम् ॥ २६ ॥

१ स्पर्शयेत्--दद्यात्--इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्ग्रामोद्यानभेदोत्थं परदारनिषेवणम् ॥ वार्द्धुषिकस्य यत्पापं यत्पापं स्तेयसंभवम् ॥ २७ ॥ कूपभेदोद्भवं यच्च बैडालव्रतधारिणः ॥ दाम्भिकं वृक्षच्छेदोत्थं विवाहस्य निषेधजम् ॥ २८ ॥ आरामस्थतरुच्छेदं[1]मगम्यागमनोद्भवम् ॥ स्वभार्यात्यजने यच्च परभार्यासमीहनात् ॥ २९ ॥ ब्रह्मस्वहरणे यच्च गरदे गोविघातिनि ॥ विद्याविक्रयणोत्थं च संसर्गाद्यच्च पातकम् ॥ ३० ॥ श्वबिडालवधाद्घोरं सर्पशूद्रो[2]द्भवं तथा ॥ भूमिहर्त्तुश्च यत्पापं भूमिहारिणि चैव हि ॥ ३१ ॥ मा ददस्वेति यत्पापं गोवह्निब्राह्मणेषु च ॥ तत्पापं याति विलयं कन्यादानेन पांडव ॥ ३२ ॥ स गत्वा भास्करं लोकं रुद्रलोके शुभे व्रजेत् ॥ क्रीडते रुद्रलोकस्थो यावदिंद्राश्चतुर्दश ॥ ३३ ॥ सर्वपापक्षये जाते शिवे भवति भावना ॥ एतद्व्रजति यस्तीर्थं प्रभासं पांडुनंदन ॥ ३४ ॥ सर्वतीर्थफलं प्राप्य सोऽश्वमेधफलं लभेत् ॥ गोप्रदानं महापुण्यं सर्वपापक्षयं परम् ॥ प्रशस्तं सर्वकालं हि चतुर्दश्यां विशेषतः ॥ ३५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे प्रभासतीर्थमाहात्म्यवर्णनं नामाष्टनवतितमोऽध्यायः ॥ ९८ ॥ ॥ छ ॥

॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल नर्मदादक्षिणे तटे ॥ स्थापितं वासु[3]कीशं तु समस्ताघौघनाशनम् ॥१॥ ॥ युधिष्ठिर उवाच ॥ कस्माच्च कारणात्तात रेवाया दक्षिणे तटे ॥ वासुकीशस्थापितो वै विस्तराद्वद मे गुरो ॥२॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ एतत्सर्वं समास्थाय[4] नृत्यं शंभुश्चकार वै ॥३॥ श्रमादजायत स्वेदो गंगातोयविमिश्रितम् ॥ पतंतमुरगोऽश्नाति हरमौलिविनिर्गतम् ॥४॥ मंदाकिनी ततः क्रुद्धा व्यालस्योपरि भारत ॥ प्राप्नुह्यजगरत्त्वं हि भुजंग क्षुद्रजंतुक ॥ ५ ॥ ॥ वासुकिरुवाच ॥ ॥ अनुग्राह्योऽस्मि ते पापो दुर्नयोऽहं हराद्दते[5] ॥ त्रैलोक्यपावनी पुण्या सरित्त्वं शुभलक्षणा ॥ ६ ॥ संसारच्छेदनकरी ह्यार्त्तानामार्त्तिनाशनी ॥ स्वर्गद्वारे स्थिता त्वं हि दयां कुरु मयीश्वरि ॥ ७ ॥ ॥ गंगोवाच ॥ कुरुष्व विपुलं विंध्यं तपस्त्वं शंकरं प्रति ॥ ततः प्राप्स्यसि स्वं स्थानं पन्नगत्वं ममाज्ञया ॥ ८ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततोसौ त्वरितो विंध्यं नागो गत्वा नगं शुभम् ॥ तपस्तप्तुं समारेभे शंकराराधनोद्यतः ॥ ९ ॥ नित्यं दध्यौ महादेवं त्र्यक्षं डमरुकोद्यतम् ॥ ततो वर्षशते पूर्णे उपरुद्धो जगद्गुरुः ॥ आगतस्तत्समीपं तु श्लक्ष्णां वाणीमुदाहरत् ॥१०॥ वरं वरय मे वत्स पन्नग त्वं कृतादर ॥ ११ ॥ ॥ वासुकिरुवाच ॥ ॥ यदि

१ आरामस्थतरुच्छेदम्—आरामस्थतरुच्छेदजम्—इत्यर्थः। २ सर्पशूद्रोद्भवम्—सर्पशूद्रवधोद्भवम्—इत्यर्थः। ३ अयं वासुकीश्वर एव नागेश्वरः प्रसिद्धः अग्रेतन ग्रंथावलोकनात्। ४ एतत्सर्वं समास्थाय—एतत्सर्वं जगद्रक्षणेन प्रतिष्ठाप्य—इत्यर्थः। ५ हराद्दते—शंकरसत्कृते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तुष्टोऽसि मे देव वरं दास्यसि शंकर ॥ प्रसादात्तव देवेश भूयान्निष्पापता मम ॥ तीर्थं किंचित्समाख्याहि सर्वपापप्रणाशनम् ॥१२॥ ॥ ईश्वर उवाच ॥
पन्नग त्वं महाबाहो रेवां गच्छ शुभंकरीम् ॥ याम्ये तस्यास्तटे पुण्ये स्नानं कुरु यथाविधि ॥ १३ ॥ इत्युक्त्वांतर्दधे देवो वासुकिस्त्वरयान्वितः ॥
रूपेणाऽजगरेणैव प्रविष्टो नर्मदाजलम् ॥ १४ ॥ मार्गेण तस्य संजातं जाह्नव्याः स्रोत उत्तमम् ॥ निर्धूतकल्मषः सर्पः संजातो नर्मदाजले ॥
॥ १५ ॥ स्थापितः शंकरस्तत्र नर्मदायां युधिष्ठिर ॥ ततो नागेश्वरं लिंगं प्रसिद्धं पापनाशनम् ॥ १६ ॥ अष्टम्यां वा चतुर्दश्यां स्नापयेन्मधुना
शिवम् ॥ विमुक्तकल्मषः सद्यो जायते नाऽत्र संशयः ॥ १७ ॥ अपुत्रा ये नराः पार्थ स्नानं कुर्वंति संगमे ॥ ते लभंते सुताञ्छ्रेष्ठान्कार्त्तवीर्योप
माञ्छुभान् ॥ १८ ॥ श्राद्धं तत्रैव यः कुर्यादुपवासपरायणः ॥ कुर्वन्प्रमोचयेत्प्रेतान्नरकान्नृपनंदन ॥१९॥ सर्पाणां च भयं वंशे ज्ञातिवर्गे न जायते ॥
निर्दोषं नंदते तस्य कुलं नागप्रसादतः ॥ २० ॥ एतत्ते सर्वमाख्यातं तव स्नेहान्नृपोत्तम ॥ २१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां
संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे नागेश्वरतीर्थमाहात्म्यवर्णनंनामैकोनशततमोऽध्यायः ॥ ९९ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय
उवाच ॥ ॥ ततो गच्छेन्महीपाल तीर्थं परमरोचनम् ॥ मार्कंडेशमिति ख्यातं नर्मदादक्षिणे तटे ॥ १ ॥ उत्तमं सर्वतीर्थानां गीर्वाणैर्वंदितं
शिवम् ॥ गुह्याद्गुह्यतरं पुत्र नाख्यातं कस्यचिन्मया ॥ २ ॥ स्थापितं तु मया पूर्वं स्वर्गसोपानसंनिभम् ॥ ज्ञानं तत्रैव मे जातं प्रसादाच्छंकरस्य
च ॥३॥ अन्यस्तत्रैव यो गत्वा द्रुपदामंतर्जले जपेत् ॥ स पातकैरशेषैश्च मुच्यते पांडुनंदन ॥ ४ ॥ वाचिकैर्मानसैश्चैव कर्मजैरपि पातकैः ॥ पिंडि
कां चाप्यवष्टभ्य याम्यामाशां च संस्थितः ॥ ५ ॥ योजयेच्छूलिनं भक्त्या द्वात्रिंशद्बहुरूपिणम् ॥ देहपाते शिवं गच्छेदिति मे निश्चयो नृप ॥
॥ ६ ॥ आज्येन बोधयेद्दीपमष्टम्यां निशि भारत ॥ स्वर्गलोकमवाप्नोति इत्येवं शंकरोऽब्रवीत् ॥ ७ ॥ श्राद्धं तत्रैव यो भक्त्या कुर्वीत नृपनंदन ॥
पितरस्तस्य तृप्यंति यावदाभूतसंप्लवम् ॥ ८ ॥ इंगुदैर्बदरैर्बिल्वैरक्षतेन जलेन वा ॥ तर्प्ययेत्तत्र यो वंश्यानाप्नुयाज्जन्मनः फलम् ॥९॥ इति श्रीस्कांदे
महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे मार्कंडेश्वरतीर्थमाहात्म्यवर्णनंनाम शततमोऽध्यायः ॥ १०० ॥
॥ ८६ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र तीर्थं परमशोभनम् ॥ उत्तरे नर्मदाकूले यज्ञवाटस्य मध्यतः ॥ १ ॥ संकर्षणमितिख्यातं
पृथिव्यां पापनाशनम् ॥ तपश्चीर्णं पुरा राजन्बलभद्रेण तत्र वै ॥ २ ॥ गीर्वाणा अपि तत्रैव संनिधौ नृपनंदन ॥ उमया सहितः शंभुः स्थितस्त ॥२६०॥
त्रैव केशवः ॥ ३ ॥ बलभद्रेण राजेंद्र प्राणिनामुपकारतः ॥ स्थापितः परया भक्त्या शंकरः पापनाशनः ॥ ४ ॥ यस्तत्र स्नाति वै भक्त्या जित

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्रोधो जितेंद्रियः ॥ एकादश्यां सिते पक्षे मधुना स्नापयेच्छिवम् ॥ ५ ॥ श्राद्धं तत्रैव यो भक्त्या पितॄणामथ दापयेत् ॥ स याति परमं स्थानं बलभद्रवचो यथा ॥ ६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे संकर्षणतीर्थमाहात्म्यवर्णनं नामैकाधिकशततमोऽध्यायः ॥ १०१ ॥ ॥ मार्कंडेय उवाच ॥ ॥ मन्मथेशं ततो गच्छेत्सर्वदेवनमस्कृतम् ॥ स्नानमात्रान्नरो राजन्यमलोकं न पश्यति ॥ १ ॥ अनपत्या या च नारी स्नायाद्वै पांडुनंदन ॥ पुत्रं सा लभते पार्थ सत्यसंधं दृढव्रतम् ॥ २ ॥ तत्र स्नात्वा नरो राजञ्छुचिः प्रयतमानसः ॥ उपोष्य रजनीमेकां गोसहस्रफलं लभेत् ॥ ३ ॥ कामिकं तीर्थराजं तु तादृशं न भविष्यति ॥ त्रिरात्रं कुरुते राजन्स गोलक्षफलं लभेत् ॥ ४ ॥ तत्र नृत्यं प्रकर्त्तव्यं तुष्यते परमेश्वरः ॥ गीतवादित्रनिर्घोषै रात्रौ जागरणेन च ॥ ५ ॥ एरंड्यां च महादेवो दृष्टो मे मन्मथेश्वरः ॥ किं[1] समर्थो यमो रुष्टो भद्रो भद्राणि पश्यति ॥६॥ कामेन स्थापितः शंभुरेतस्मात्कामदो नृप ॥ सोपानः स्वर्गमार्गस्य पृथिव्यां मन्मथेश्वरः ॥ ७ ॥ विशेषश्चात्र संध्यायां श्राद्धदाने च भारत ॥ अन्नदानेन राजेंद्र कीर्त्तितं फलमुत्तमम् ॥ ८ ॥ एतत्ते सर्वमाख्यातं तव भक्त्या तु भारत ॥ पृथिव्यां सागरांतायां प्रख्यातो मन्मथेश्वरः ॥ ९ ॥ गोदानं पांडवश्रेष्ठ त्रयोदश्यां प्रकारयेत् ॥ चैत्रे मासि सिते पक्षे तत्र गत्वा जितेंद्रियः ॥ १० ॥ रात्रौ जागरणं कृत्वा देवस्याग्रे नृपोत्तम ॥ दीपं भक्त्या घृतेनैव देवस्याग्रे निवेदयेत् ॥ ११ ॥ स्त्र्यथ वा पुरुषो वाऽपि सममेतत्फलं स्मृतम् ॥ १२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखण्डे मन्मथेश्वरतीर्थमाहात्म्यवर्णनंनाम द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल एरंडीसंगमं परम् ॥ यच्छ्रुतं वै मया राजञ्छिवस्य वदतः पुरा ॥ १ ॥ एतदेव पुरा प्रश्नं[2] गौर्या पृष्टस्तु शंकरः ॥ प्रोवाच नृपशार्दूल गुह्याद्गुह्यतरं शुभम् ॥ २ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि परं गुह्यं नाऽऽख्यातं कस्यचिन्मया ॥ रेवायाश्चोत्तरे कूले तीर्थं परमशोभनम् ॥ भ्रूणहत्याहरं देवि कामदं पुत्रवर्द्धनम् ॥ ३ ॥ ॥ पार्वत्युवाच ॥ ॥ कथयस्व महादेव तीर्थं परमशोभनम् ॥ भ्रूणहत्याहरं कस्मात्कामदं स्वर्गदर्शनम् ॥ ४ ॥ ॥ ईश्वर उवाच ॥ ॥ अत्रिर्नाम महादेवि मानसो ब्रह्मणः सुतः ॥ अग्निहोत्ररतो नित्यं देवतातिथिपूजकः ॥ ५ ॥ सोमसंस्थाश्च सप्तैव कृता विप्रेण पार्वति ॥ अनसूयेति विख्याता भार्या तस्य गुणान्विता ॥ ६ ॥ पतिव्रता पतिप्राणा पत्युः कार्यहिते रता ॥ एवं याति ततः काले न पुत्रा

१ किं समर्थः--अपि न इत्यर्थः यतः भद्रः पुण्यकृत्--भद्राणि शुभानि फलानि पश्यति। २ प्रश्नशब्दस्यात्रनपुंसकत्वम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





न च पुत्रिका ॥ ७ अपराह्णे महादेवि सुखासीनौ तु सुन्दरि ॥ वदंतौ सुखदुःखानि पूर्ववृत्तानि यानि च ॥ ८ ॥ ॥ अत्रिरुवाच ॥ ॥
सौम्ये शुभे प्रिये कांते चारुसर्वांगसुन्दरि ॥ विद्याविनयसंपन्ने पद्मपत्रनिभेक्षणे ॥ ९ ॥ पूर्णचंद्रनिभाकारे पृथुश्रोणिभरालसे ॥ न त्वया सदृशी
नारी त्रैलोक्ये सचराचरे ॥ १० ॥ रतिपुत्रफला नारी पठ्यते वेदवादिभिः ॥ पुत्रहीनस्य यत्सौख्यं तत्सौख्यं मम सुन्दरि ॥ ११ ॥ यथाऽहं
न तथा पुत्रः समर्थः सर्वकर्मसु ॥ पुन्नामनरकाद्भद्रे जातमात्रेण सुन्दरि ॥ १२ ॥ पतंतं रक्षयेद्देवि महापातकिनं यदि ॥ महाघोरे गता वापि
दुष्टकर्मपितामहाः ॥ १३ ॥ तद्धरंति सुपुत्राश्च वैतरण्यां गतानपि ॥ पुत्रेण लोकाञ्जयति पौत्रेण परमा गतिः ॥ १४ ॥ अथ पुत्रस्य पौत्रेण
प्रगच्छेद्ब्रह्म शाश्वतम् ॥ नास्ति पुत्रसमो बंधुरिह लोके परत्र च ॥ १५ ॥ अहश्च मध्यरात्रे च चिंतयानस्य सर्वदा ॥ शुष्यंति मम गात्राणि
ग्रीष्मे नद्युदकं यथा ॥ १६ ॥ ॥ अनसूयोवाच ॥ ॥ यत्त्वया शोचितं विप्र तत्सर्वं शोचयाम्यहम् ॥ तवोद्वेगकरं यच्च तन्मे दहति चेतसि
॥ १७ ॥ येन पुत्रा भविष्यंति आयुष्मंतो गुणान्विताः ॥ तत्कार्यं च समीक्षस्व येन तुष्येत्प्रजापतिः ॥ १८ ॥ ॥ अत्रिरुवाच ॥ ॥ तपस्तप्तं
मया भद्रे जातमात्रेण दुष्करम् ॥ व्रतोपवासनियमैः शाकाहारेण सुन्दरि ॥ १९ ॥ क्षीणदेहस्तु तिष्ठामि ह्यशक्तोऽहं महाव्रते ॥ तेन शोचामि
चात्मानं रहस्यं कथितं मया ॥ २० ॥ ॥ अनसूयोवाच ॥ ॥ भर्त्तुः पतिव्रता नारी रतिपुत्रविवर्धिनी ॥ त्रिवर्गसाधना सा च श्लाघ्या च
विदुषां जने ॥ २१ ॥ जपस्तपस्तीर्थयात्रा मृडेज्यामंत्रसाधनम् ॥ देवताराधनं चैव स्त्रीशूद्रपतनानि षट् ॥ २२ ॥ ईदृशं तु महादोषं स्त्रीणां तु
व्रतसाधने ॥ वदंति मुनयः सर्वे यथोक्तं वेदभाषितम् ॥ २३ ॥ अनुज्ञाता त्वया ब्रह्मंस्तपस्तप्स्यामि दुष्करम् ॥ पुत्रार्थित्वं समुद्दिश्य तोषयामि
सुरोत्तमान् ॥ २४ ॥ ॥ अत्रिरुवाच ॥ ॥ साधुसाधु महाप्राज्ञे मम संतोषकारिणि ॥ आज्ञाता त्वं मया भद्रे पुत्रार्थं तप
आश्रय ॥ २५ ॥ देवतानां मनुष्याणां पितॄणामनृणो भवे ॥ न भार्यासदृशो बंधुस्त्रिषु लोकेषु विद्यते ॥ २६ ॥ ॥ तेन देवाः
प्रशंसंति न भार्यासदृशं सुखम् ॥ सन्मुखे सन्मुखाः पुत्राः विलोमे तु पराङ्मुखाः ॥ २७ ॥ तेन भार्यां प्रशंसंति सदे
वासुरमानुषाः ॥ महाव्रते महाप्राज्ञे सत्त्ववति शुभेक्षणे ॥ २८ ॥ तपस्तपस्व शीघ्रं त्वं पुत्रार्थं तु ममाज्ञया ॥ एतद्वाक्यावसाने तु साष्टांगं प्रणताऽ
ब्रवीत् ॥ २९ ॥ त्वत्प्रसादेन विप्रेंद्र सर्वान्कामानवाप्नुयाम् ॥ हंसलीलागतिः सा च मृगाक्षी वरवर्णिनी ॥ ३० ॥ नियमस्था ततो भूत्वा संप्राप्ता
नर्मदां नदीम् ॥ शिवस्वेदोद्भवां देवीं सर्वपापप्रणाशनीम् ॥ ३१ ॥ यस्या दर्शनमात्रेण नश्यते पापसंचयः ॥ स्नानमात्रेण वै यस्या अश्वमेधफलं



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लभेत् ॥ ३२ ॥ ये पिबंति महादेवि श्रद्दधानाः पयः शुभम् ॥ सोमपानेन तत्तुल्यं नाऽत्र कार्या विचारणा ॥ ३३ ॥ ये स्मरंति दिवा रात्रौ योजनानां शतैरपि ॥ मुच्यंते सर्वपापेभ्यो रुद्रलोकं प्रयांति ते ॥ ३४ ॥ नर्मदायाः समीपे तु तावुभौ योजनद्वये ॥ न पश्यंति यमं तत्र ये मृता वरवर्णिनि ॥ ३५ ॥ ततस्तदुत्तरे कूले एरंडचाः संगमे शुभे ॥ नियमस्था विशालाक्षी शाकाहारेण सुन्दरि ॥ ३६ ॥ तोषयन्ती त्रींश्च देवाञ्छुभै स्तोत्रैर्व्रतैस्तथा ॥ ग्रीष्मेषु च महादेवि पञ्चाग्निं साधयेत्ततः ॥ ३७ ॥ वर्षाकाले चार्द्रवासाश्चरेच्चांद्रायणानि च ॥ हेमंते तु ततः प्राप्ते तोयमध्ये वसेत्सदा ॥ ३८ ॥ प्रातःस्नानं ततः संध्यां कुर्य्याद्देवर्षितर्पणम् ॥ देवानामर्चनं कृत्वा होमं कुर्याद्यथाविधि ॥ ३९ ॥ यजते वैष्णवांल्लोकान्स्नान जाप्यहुतेन च ॥ एवं वर्षशते प्राप्ते रुद्रविष्णुपितामहाः ॥ ४० ॥ संप्राप्ता द्विजरूपैस्तु ऐरंडचाः संगमे प्रिये ॥ पुरतः संस्थितास्तस्या वेदमभ्यु द्धरंति च ॥ ४१ ॥ अनसूया जपं त्यक्त्वा निरीक्ष्य तान्मुहुर्मुहुः ॥ उत्थिता सा विशालाक्षी अर्घं दत्त्वा यथाविधि ॥ ४२ ॥ अद्य मे सफलं जन्म अद्य मे सफलं तपः ॥ दर्शनेन तु विप्राणां सर्वपापैः प्रमुच्यते ॥ ४३ ॥ प्रदक्षिणं ततः कृत्वा साष्टांगं प्रणताऽब्रवीत् ॥ कन्दमूलफलं शाकं नीवा रानपि पावनान् ॥ प्रयच्छाम्यहमद्यैव मुनीनां भावितात्मनाम् ॥ ४४ ॥ ॥ विप्रा ऊचुः ॥ ॥ तपसा तु विचित्रेण तपः सत्येन सुव्रते ॥ तृप्ताः स्म सर्वकामैस्तु सुव्रते तव दर्शनात् ॥ ४५ ॥ अस्माकं कौतुकं जातं तापसेन व्रतेन यत् ॥ स्वर्गमोक्षसुतस्याऽर्थे तपस्तपसि दुष्करम् ॥ ४६ ॥ ॥ ॥ अनसूयोवाच ॥ ॥ तपसा सिध्यते स्वर्गस्तपसा परमा गतिः ॥ तपसा चार्थकामौ च तपसा गुणवान्सुतः ॥ तप एव च मे विप्राः सर्वकामफलप्रदम् ॥ ४७ ॥ ॥ विप्रा ऊचुः ॥ ॥ तन्वी श्यामा विशालाक्षी स्निग्धांगी रूपसंयुता ॥ हंसलीलागतिगमा त्वं च सर्वांगसुन्दरी ॥ ॥ ४८ ॥ किं च ते तपसा कार्यमात्मानं शोच्यसे कथम् ॥ ४९ ॥ ॥ अनसूयोवाच ॥ ॥ यदि रुद्रश्च विष्णुश्च स्वयं साक्षात्पितामहः ॥ गूढरूपधराः सर्वे तच्चिह्नमुपलक्षये ॥ ५० ॥ तस्या वाक्यावसाने तु स्वरूपं दर्शयंति ते ॥ स्वस्वरूपैः स्थिता देवाः सूर्यकोटिसमप्रभाः ॥ ५१ ॥ चतुर्भुजो महादेवि शंखचक्रगदाधरः ॥ अतसीपुष्पवर्णस्तु पीतवासा जनार्दनः ॥ ५२ ॥ गरुत्मान्वाहनं यस्य श्रिया च सहितो हरिः ॥ प्रसन्न वदनः श्रीमान्स्वयंरूपो व्यवस्थितः ॥ ५३ ॥ पीतवासा महादेवि चतुर्वदनपंकजः ॥ हंसोपरि समारूढो ह्यक्षमालाकरोद्यतः ॥ ५४ ॥ आगतो नर्मदातीरे ब्रह्मा लोकपितामहः ॥ योऽसौ सर्वजगद्व्यापी स्वयं साक्षान्महेश्वरः ॥ ५५ ॥ वृषभं तु समारूढो दशबाहुसमन्वितः ॥ भस्मांगराग शोभाढ्यः पंचवक्त्रस्त्रिलोचनः ॥ ५६ ॥ जटामुकुटसंयुक्तः कृतचंद्रार्द्धशेखरः ॥ एवंरूपधरो देवः सर्वव्यापी महेश्वरः ॥ ५७ ॥ अनसूया निरीक्ष्यै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तद्देवानां दर्शनं परम् ॥ वेपमाना ततः साध्वी सुरान्दृष्ट्वा मुहुर्मुहुः ॥ ५८ ॥ ॥ अनसूयोवाच ॥ ॥ किं व्यापारस्वरूपास्तु विष्णुरुद्रपिता
महाः ॥ एतद्वै श्रोतुमिच्छामि ह्यशेषं कथयंतु मे ॥ ५९ ॥ ॥ ब्रह्मोवाच ॥ ॥ प्रावृट्कालो ह्यहं ब्रह्मा आपश्चैव प्रकीर्त्तिताः ॥ मेघरूपो ह्यहं
प्रोक्तो वर्षयामि च भूतले ॥६०॥ अहं सर्वाणि बीजानि प्राक्संध्यासूदिते रवौ ॥ एतद्वै कारणं सर्वं रहस्यं कथितं परम् ॥६१॥ ॥ विष्णुरुवाच ॥
हेमंतश्च भवेद्विष्णुर्विश्वरूपं चराचरम् ॥ पालनाय जगत्सर्वं विष्णोर्माहात्म्यमुत्तमम् ॥ ६२ ॥ ॥ रुद्र उवाच ॥ ॥ ग्रीष्मकालो ह्यहं
प्रोक्तः सर्वभूतक्षयंकरः ॥ कर्षयामि जगत्सर्वं रुद्ररूपस्तपस्विनि ॥ ६३ ॥ एवं ब्रह्मा च विष्णुश्च रुद्रश्चैव महाव्रते ॥ त्रयो देवास्त्रयः संध्यास्त्र
यः कालास्त्रयोऽग्नयः ॥ ६४ ॥ तथा ब्रह्मा च विष्णुश्च रुद्रश्चैकात्मतां गतः ॥ वरं दद्युश्च ते भद्रे यस्त्वया मनसीप्सितम् ॥ ६५ ॥
॥ ॥ अनसूयोवाच ॥ ॥ धन्या पुण्या ह्यहं लोके श्लाघ्या वंद्या च सर्वदा ॥ ब्रह्मा विष्णुश्च रुद्रश्च प्रसन्नवदनाः शुभाः ॥ ६६ ॥ यदि तुष्टास्त्रयो
देवा दयां कृत्वा ममोपरि ॥ अस्मिंस्तीर्थे तु सांनिध्याद्वरदाः सन्तु मे सदा ॥ ६७ ॥ ॥ रुद्र उवाच ॥ ॥ एवं भवतु ते वाक्यं यत्त्वया
प्रार्थितं शुभे ॥ प्रत्यक्षा वैष्णवी माया एरण्डीनाम नामतः ॥ ६८ ॥ यस्या दर्शनमात्रेण नश्यते पापसंचयः ॥ चैत्रमासे तु संप्राप्ते अहोरात्रो
षितो भवेत् ॥ ६९ ॥ एरंड्याः संगमे स्नात्वा ब्रह्महत्यां व्यपोहति ॥ रात्रौ जागरणं कुर्यात्प्रभाते भोजयेद्द्विजान् ॥ ७० ॥ यथोक्तेन विधानेन
पिंडं दद्याद्यथाविधि ॥ प्रदक्षिणां ततो दद्याद्धिरण्यं वस्त्रमेव च ॥ ७१ ॥ रजतं च तथा गावो भूमिदानमथाऽपि वा ॥ सर्वं कोटिगुणं प्रोक्तमिति
स्वायंभुवोऽब्रवीत् ॥ ७२ ॥ ये म्रियंति नरा देवि एरंड्याः संगमे शुभे ॥ यावद्युगसहस्रं तु रुद्रलोके वसन्ति ते ॥७३॥ अहोरात्रोषितो भूत्वा जपेद्रु
द्रांश्च वैदिकान् ॥ एकादशैकसंज्ञांश्च स याति परमां गतिम् ॥ ७४ ॥ विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ॥ पुत्रार्थी लभते पुत्राँल्लभेत्का
मान्यथेप्सितान् ॥ ७५ ॥ एरंड्याः संगमे स्नात्वा रेवाया विमले जले ॥ महापातकिनो वाऽपि ते यांति परमां गतिम् ॥ ७६ ॥ ॥ अनसूयो
वाच ॥ ॥ यदितुष्टास्त्रयो देवा मम भक्तिप्रचोदिताः ॥ मम पुत्रा भवन्त्वेव हरिरुद्रपितामहाः ॥ ७७ ॥ ॥ विष्णुरुवाच ॥ ॥ पूज्या यत्पु
त्रतां यांति न कदाचिच्छ्रुतं मया ॥ शुभे ददामि पुत्रांस्ते देवतुल्यपराक्रमान् ॥ रूपवंतो गुणोपेतान्यज्विनश्च बहुश्रुतान् ॥ ७८ ॥ ॥ अनसूयो
वाच ॥ ॥ ईप्सितं तच्च दातव्यं यन्मया प्रार्थितं हरे ॥ नान्यथा चैव कर्त्तव्या मम पुत्रैषणा तु या ॥ ७९ ॥ ॥ विष्णुरुवाच ॥ ॥ पूर्वं तु
भृगुसंवादे गर्भवास उपार्जितः ॥ तस्याहं चैव पारं तु नैव पश्यामि शोभने ॥८०॥ स्मरमाणः पुरा वृत्तं चिंतयामि पुनःपुनः ॥ एवं संचिंत्य ते देवाः



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पितामहमहेश्वराः ॥ ८१ ॥ अयोनिजा भविष्यामस्तव पुत्रा वरानने ॥ योनिवासे महाप्राज्ञि देवा नैव व्रजंति च ॥ ८२ ॥ सांन्निध्यात्संगमे देवि लोकानां तु वरप्रदाः ॥ एरण्डी वैष्णवी माया प्रत्यक्षा त्वं भविष्यसि ॥ ८३ ॥ त्रयो देवाः स्थिताः पार्थ रेवाया उत्तरे तटे ॥ वरप्राप्ता तु सा देवी गता माहेन्द्रपर्वतम् ॥ ८४ ॥ क्षीणांगी शुक्लदेहा च रूक्षकेशी सुदारुणा ॥ कृतयज्ञोपवीता सा तपोनिष्ठा शुभेक्षणा ॥ ८५ ॥ शिलातलनिविष्टोऽसौ दृष्टः कांतो महायशाः ॥ हृष्टचित्तोऽभवद्देवि उत्तिष्ठोत्तिष्ठ साऽऽब्रवीत् ॥ ८६ ॥ ॥ अत्रिरुवाच ॥ ॥ साधुसाधु महाप्राज्ञे ह्यनसूये महाव्रते ॥ अचिंत्यं गालवादीनां वरं प्राप्ताऽसि दुर्लभम् ॥ ८७ ॥ ॥ अनसूयोवाच ॥ ॥ त्वत्प्रसादेन देवर्षे वरं प्राप्ताऽस्मि दुर्लभम् ॥ तेन देवाः प्रशंसन्ति सिद्धाश्च ऋषयोऽमलाः ॥ ८८ ॥ एवमुक्ता तु सा देवी हर्षेण महता युता ॥ आलोकयेत्ततः कांतं तेनाऽपि शुभदर्शना ॥ ८९ ॥ ईक्षणाच्चैव संजातं ललाटे मंडलं शुभम् ॥ नवयोजनसाहस्रं मंडलं रश्मिभिर्वृतम् ॥ ९० ॥ कदंबगोलकाकारं त्रिगुणं परिमण्डलम् ॥ तस्य मध्ये तु देवेशि पुरुषो दिव्यरूपधृक् ॥ ९१ ॥ हेमवर्णोऽमृतमयः सूर्यकोटिसमप्रभः ॥ आद्यः पुत्रोऽनुसूयायाः स्वयं साक्षात्पितामहः ॥ ९२ ॥ चन्द्रमा इति विख्यातः सोमरूपो नृपात्मज ॥ इष्टापूर्ते च संपाति कलाषोडशकेन तु ॥ ९३ ॥ प्रतिपच्च द्वितीया च तृतीया च महेश्वरि ॥ चतुर्थी पंचमी चैव अव्यया षोडशी कला ॥ ९४ ॥ चतुर्विधस्य लोकस्य सूक्ष्मो भूत्वा वरानने ॥ आप्रीणाति जगत्सर्वं त्रैलोक्यं सचराचरम् ॥ ९५ ॥ सर्वे ते ह्युपजीवंति हुतं दत्तं शशिस्थितम् ॥ वनस्पतिगते[1] सोमे धनवांश्च वरानने ॥ ९६ ॥ भुंजन्परगृहे मूढो ददेदब्दकृतं शुभम्[2] ॥ वनस्पतिगते सोमे यस्तु छिंद्याद्वनस्पतीन् ॥ तेन पापेन देवेशि नरा यांति यमालयम् ॥ ९७ ॥ वनस्पतिगते सोमे मैथुनं यो निषेवते ॥ ब्रह्महत्यासमं पापं लभते नाऽत्र संशयः ॥ ९८ ॥ वनस्पतिगते सोमे मंथानं योऽधिवाहयेत्[3] ॥ गावस्तस्य प्रणश्यंति याश्च वै पूर्वसंचिताः ॥ ९९ ॥ वनस्पतिगते सोमे ह्यध्वानं योऽधिगच्छति ॥ भवन्ति पितरस्तस्य तं मासं रेणुभोजनाः ॥ १०० ॥ अमावस्यां महादेवि यस्तु श्राद्धप्रदो भवेत् ॥ अब्दमेकं विशालाक्षि तृप्तास्तत्पितरो ध्रुवम् ॥ १०१ ॥ हिरण्यं रजतं वस्त्रं यो ददाति द्विजातिषु ॥ सर्वं लक्षगुणं देवि लभते नाऽत्र संशयः ॥ १०२ ॥

१ वनस्पतिगते सोमे--इत्यस्यार्थः--अमावास्यामांतिथिः--इति । यत्--अमावस्यायां तिथौ सोमनामकवनस्पतौ सोमदेवः पूर्णतया तिष्ठति--अत एव तस्य सोमवनस्पतेः पूर्णिमायां तिथौ सर्वाणि पत्राणि परिपूर्णानि भवन्ति । अमायां च सोमवनस्पतिर्निष्पर्णो भवति । शुक्लपक्षे प्रतिपदादितिथिषु--एकैकं--पत्राणि पूर्णिमायां यावत्समुपचयिंते--कृष्णपक्षेऽमांयावद्गलंति च--अतः--वनस्पतिगते सोमे--इत्यनेनामावास्याबोद्धव्या--इति प्रतिभाति । २ शुभम्--पुण्यम्--इत्यर्थः । ३ अधिवाहयेत्--मंथानदंडेन मंथनं कुर्यात्--इत्यर्थः । एतेन--अमायां दधिमंथनं निषिद्धमिति बोद्धव्येम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



एवं गुणविशिष्टोऽसौ सोमरूपः प्रजापतिः ॥ संजातः प्रथमः पुत्रो ह्यनसूयासुनन्दनः ॥१०३॥ द्वितीयस्तु महादेवि दुर्वासानाम नामतः ॥ सृष्टि संहारकर्त्ता च स्वयं साक्षान्महेश्वरः ॥१०४॥ ऋषिमध्यगतो देवि तपस्तपति दुष्करम् ॥ सोऽपि रुद्रत्वमायाति संप्राप्ते भूतविप्लवे॥१०५॥ इन्द्रोऽपिशप्तस्तेनैव दुर्वाससा वरानने ॥ द्वितीयस्य तु पुत्रस्य संभवः कथितो मया ॥ १०६ ॥ दत्तात्रेयस्वरूपेण भगवान्मधुसूदनः ॥ जगद्व्यापी जगन्नाथः स्वयं साक्षाज्जनार्द्दनः ॥ १०७ ॥ एते देवास्त्रयः पुत्रा अनसूयाया महेश्वरि ॥ वरदानेन ते देवा ह्यवतीर्णा महीतले ॥ १०८ ॥ पुत्रप्राप्तिकरं तीर्थं रेवायाश्चोत्तरे तटे ॥ अनसूयाकृतं पार्थ सर्वपापक्षयं परम् ॥१०९॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ आश्चर्यभूतं लोकेऽस्मिन्नर्मदायां पुरातनम् ॥ भ्रूणहत्या गता तत्र ब्राह्मणस्य नराधिप ॥११०॥ ॥ युधिष्ठिर उवाच ॥ ॥ इतिहासं द्विजश्रेष्ठ कथयस्व ममाऽनघ ॥ सर्वपापहरं लोके दुःखार्त्तस्य च कथ्यताम् ॥ १११ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ सुवर्णशिलके ग्रामे गौतमान्वयसंभवः ॥ कृषीवलो महादेवि भार्यापुत्रसमन्वितः ॥ ११२ ॥ वसते तत्र गोविंदः संजातो विपुले कुले ॥ पुत्रदारसमोपेतो गृहक्षेत्ररतः सदा ॥ ११३ ॥ शकटं पूरयित्वा तु काष्ठानामगमद्गृहम् ॥ प्रक्षिप्तानि च काष्ठानि ह्येकाकी क्षुधयाऽन्वितः ॥ ११४ ॥ रिंगमाणस्तदा पुत्रः पितुः शब्दात्समागतः ॥ न दृष्टस्तेन वै पुत्रः काष्ठैः सञ्छादितोऽवशः ॥ ॥ ११५ ॥ आगतस्त्वरितो गेहे पिपासार्त्तो नराधिप ॥ शकटं मोच्य तद्वारि सवृषं रज्जुसंयुतम् ॥ ११६ ॥ भार्या तस्यैव या दृष्टा चित्तज्ञा वशवर्त्तिनी ॥ दृष्ट्वा निपातितं पुत्रं काष्ठैर्निर्भिन्नमस्तकम् ॥११७॥ अजल्पमाना करुणं निक्षिप्तं झोलिकां शिशुम् ॥ शुश्रूषणे रता साध्वी प्रियस्य च नराधिप ॥ ११८ ॥ ततः स्नानादिकं कृत्वा भोजनाच्छयनं शुभम् ॥ पुत्रं पुत्रवतां श्रेष्ठा ह्युत्थापयति शासनैः ॥ ११९ ॥ यदा च नोत्थितः सुतः पुत्रः पंचत्वमागतः ॥ तदा सा दीनवदना रुरोद च मुमोह च ॥ १२० ॥ तच्छ्रुत्वा रुदितं शब्दं गोविंदस्त्रस्तमानसः ॥ किमेतदिति चोक्त्वा तु पतितो धरणीतले ॥ १२१ ॥ द्वावेतौ मुक्तकेशौ तु भूमौ निपतितौ नृप ॥ विलेपाते च राजेंद्र निःश्वासोच्छासितेन च ॥ १२२ ॥ कं पश्ये प्रांगणे पुत्रं दृष्ट्वा क्रीडंतमातुरम् ॥ संधारयिष्ये हृदयं स्फुटितं तव कारणे ॥ १२३ ॥ त्वज्जन्मान्तं यशो नित्यमक्षयां कुलसंततिम् ॥ दृष्ट्वा किम तृणीभूतो यास्यामि परमां गतिम् ॥ १२४ ॥ मम वृद्धस्य दीनस्य गतिस्त्वं किल पुत्रक ॥ एते मनोरथाः सर्वे चिंतिता विफला गताः ॥ १२५ ॥ इमां तु विकलां दीनां विहीनां सुतबांधवैः ॥ रुदंतीं पतितां पाहि मातरं धरणीतले ॥ १२६ ॥ पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः ॥ तेन पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा ॥ १२७ ॥ अपुत्रस्य गृहं शून्यं दिशः शून्या ह्यबांधवाः ॥ मूर्खस्य हृदयं शून्यं सर्वशून्यं दरिद्रता ॥ १२८ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मृषाऽयं वदते लोकश्चंदनं किल शीतलम् ॥ पुत्रगात्रपरिष्वंगश्चंदनादपि शीतलः ॥ १२९ ॥ श्मश्रुग्रहणक्रीडंतं धूलिधूसरिताननम् ॥ पुण्यहीना न पश्यंति निजोत्संगसमास्थितम् ॥ १३० ॥ दिगंबरं गतव्रीडं जटिलं धूलिधूसरम् ॥ पुण्यहीना न पश्यंति गंगाधरमिवात्मजम् ॥ १३१ ॥ वीणा वाद्यस्वरो लोके सुस्वरः श्रूयते किल ॥ रुदितं बालकस्यैव तस्मादाह्लादकारकम् ॥ १३२ ॥ मृगपक्षिषु काकेषु पशूनां स्वरयोनिषु ॥ पुत्रं तेषु सम स्तेषु वल्लभं ब्रुवते बुधाः ॥ १३३ ॥ मत्स्याश्वप्रकराश्चैव कूर्मग्राहादयोऽपि वा ॥ पुत्रोत्पत्तौ च हृष्यंति विपत्तौ यांति दुःखिताम् ॥ १३४ ॥ देव गंधर्वयक्षाश्च हृष्यंते पुत्रजन्मनि ॥ पंचत्वे तेऽपि शोचंति मंदभाग्योऽस्मि पुत्रक ॥ १३५ ॥ ऋषिमेलापकं चक्रे पुत्रार्थे राघवो नृप ॥ इंद्रस्थाने स्थितस्तस्य प्रोक्षते ह्यासनं यतः ॥ १३६ ॥ स्वर्गवासं सुताद्वाह्यं विद्यते न तु पांडव ॥ चक्रे दशरथस्तस्मात्पुत्रार्थं यज्ञमुत्तमम् ॥ १३७ ॥ रामो लक्ष्मणशत्रुघ्नौ भरतस्तत्र संभवात् ॥ कार्तवीर्यो जितो येन रामेणाऽमिततेजसा ॥ १३८ ॥ स रामो रामचंद्रेण अष्टवर्षेण निर्जितः ॥ एकाकिना हतो वाली प्लवगः शत्रुदुर्जयः ॥ १३९ ॥ रावणो ब्रह्मपुत्रो यस्त्रैलोक्यं यस्य शंकते ॥ हतः स रामचंद्रेण सपुत्रः सहबांधवः ॥ ॥ १४० ॥ एवं पुत्रं विना सौख्यं मर्त्यलोके न विद्यते ॥ वंशार्थे मैथुनं यस्य स्वर्गार्थे यस्य भारती ॥ १४१ ॥ मृष्टान्नं ब्राह्मणस्यार्थे स्वर्गे वासं तु यांति ते ॥ ब्रह्महत्याश्वमेधाभ्यां न परं पापपुण्ययोः ॥ १४२ ॥ पुत्रोत्पत्तिविपत्तिभ्यां न परं सुखदुःखयोः ॥ किं ब्रवीमीति भो वत्स न तु सौख्यं सुतं विना ॥ १४३ ॥ एवं बहुविधं दुःखं प्रलपित्वा पुनःपुनः ॥ जनैश्चाश्वासितो विप्रो बालं गृह्य बहिर्गतः ॥ १४४ ॥ ततः संस्कृत्य तं बालं विधिदृष्टेन कर्मणा ॥ समवेतौ तु दुःखार्त्तावागतौ स्वगृहं पुनः ॥ १४५ ॥ एवं गृहागते विप्रे रात्रिर्जाता युधिष्ठिर ॥ भूमौ प्रसुप्तो गोविंदः पुत्रशोकेन पीडितः ॥ १४६ ॥ यावन्निरीक्षते भार्या भर्त्तारं दुःखपीडितम् ॥ कृमिराशिगतं सर्वं गोविंदं समपश्यत ॥ १४७ ॥ दुःखाद्दुःखतरे मग्ना दृष्ट्वा तं पातकान्वितम् ॥ एवं दुःखनिमग्नायाः शर्वरी विगता तदा ॥ १४८ ॥ पशुपालस्तु महिषीमुक्त्वाऽरण्येगमद्गृहात् ॥ अरण्ये महिषीः सर्वा रक्षयित्वा गृहागतः ॥ १४९ ॥ विज्ञप्तः पशुपालेन गोविंदो ब्राह्मणोत्तमः ॥ यावद्भोक्ष्याम्यहं स्वामिन्महिषीस्त्वं च रक्षसे ॥ १५० ॥ ततः स त्वरितो विप्रो जगाम महिषीः प्रति ॥ न तत्र महिषीः पश्येत्पश्चात्क्षेत्राभिसन्मुखम् ॥ १५१ ॥ धावमानश्च विप्रस्तु एरंडीसंगमे गतः ॥ ततः प्रविष्टस्तु जले रेवैरंडयोस्तु संगमे ॥ १५२ ॥ तज्जलं पीतमात्रं तु त्वरया

१ येन रामेण—परशुरामेण—इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



चातितर्षितः ॥ अकामात्सलिलं पीत्वा प्रक्षाल्य नयने शुभे ॥ १५३ ॥ आजगाम ततः पश्चाद्भवनं दिवसक्षये ॥ भुक्त्वा दुःखान्वितो रात्रौ गोविंदः शयनं ययौ ॥ १५४ ॥ निद्राभिभूतः शोकेन श्रमेणैव तु खेदितः ॥ पुनस्तत्रार्धरात्रे तु तस्य भार्या युधिष्ठिर ॥ १५५ ॥ कृमिभिर्वेष्टितं गात्रं क्वचित्पश्यत्यवेष्टितम् ॥ पुनः सा विस्मयाऽविष्टा तस्य भार्या गुणान्विता ॥ उवाच दुष्कृतं तस्य साध्वसाविष्टचेतसा ॥ १५६ ॥ ॥ ॥ भार्योवाच ॥ ॥ अतीते पंचमे चाह्नि त्विंधनं क्षिपतस्तु ते ॥ गृहपश्चाद्गतो बालो ह्यज्ञानाद्घातितस्त्वया ॥ १५७ ॥ मया तत्पातकं घोरं रहस्यं न प्रकाशितम् ॥ तेन प्रच्छन्नपापेन दह्यमाना दिवानिशम् ॥ १५८ ॥ न सुखं तव गात्रस्य पश्यामि न हि चात्मनः ॥ निद्रा मम शमं याता रतिश्चैव त्वया सह ॥ १५९ ॥ श्रूयते मानवे शास्त्रे श्लोको गीतो महर्षिभिः ॥ स्मृत्वास्मृत्वा तु तं चित्ते परितापो न शाम्यति ॥ १६० ॥ कीर्त्तनान्नश्यते धर्म्मो वर्धतेऽसौ निगूहनात् ॥ इह लोके परे चैव पापस्याऽप्येवमेव च ॥ १६१ ॥ एवं संचिन्त्यमानाऽहं स्थिता रात्रौ भयातुरा ॥ कृमिराशिगतं त्वां हि कस्याऽहं कथयामि किम् ॥ १६२ ॥ पुनस्त्वं चाऽद्य मे दृष्टो भ्रूणहत्याकृमिश्रितः ॥ क्वचिद्भिंदंति ते गात्रं क्वचिन्नष्टाः समंततः ॥ १६३ ॥ एतत्संस्मृत्य संस्मृत्य विमृशामि पुनःपुनः ॥ न जाने कारणं किंचित्पृच्छंत्याः कथयस्व मे ॥१६४॥ तडागं वा सरिद्वाऽपि तीर्थं वा देवतार्चनम् ॥ यं गतोऽसि प्रभावोऽयं तस्य नाऽन्यस्य मे स्थितम् ॥ १६५ ॥ एवमुक्तस्तुविप्रोऽसौकथयामास भारत ॥ भार्याया यद्दिवा वृत्तं शंकमानोनृपोत्तम ॥ १६६ ॥ अद्याहं महिषीसार्थं एरंडीसंगमं गतः ॥ नाभिमात्रे जले गत्वा पीतवान्सलिलं बहु ॥ १६७ ॥ नान्यत्तीर्थं विजानामि सरितं सर एव वा ॥ सत्यंसत्यं पुनः सत्यं कथितं तव भामिनि ॥ १६८ ॥ एवं ज्ञात्वा तु सा सर्वमुपवासकृतक्षणा ॥ सपत्नीको गतस्तत्र संगमे वरवर्णिनि ॥ १६९ ॥ स्नात्वा तत्र जले रम्ये नत्वा देवं तु भास्करम् ॥ स्नापयामास देवेशं शंकरं चोमया सह ॥ १७० ॥ पंचगव्यघृतक्षीरैर्दधिक्षौद्रघृतैर्जलैः ॥ गंधमाल्यादिधूपैश्च नैवेद्यैश्च सुशोभनैः ॥ १७१ ॥ पूज्य त्रयीमयं लिंगं देवीं कात्यायनीं शुभाम् ॥ रात्रौ जागरणं कृत्वा पत्या सह पतिव्रता ॥ १७२ ॥ ततः प्रभाते विमले द्विजान्संपूज्य यत्नतः ॥ गोदानेन हिरण्येन वस्त्रेणान्नेन भारत ॥ १७३ ॥ गोविंदः पूजयामास स्वशक्त्या ब्राह्मणाञ्छुभान् ॥ मुक्तपापो गृहायातः स्वभार्यासहितो नृप ॥ १७४ ॥ एवं यः शृणुते भक्त्या गोविंदाख्यानमुत्तमम् ॥ पठते परया भक्त्या भ्रूणहत्या प्रणश्यति ॥ १७५ ॥ क्रीडते शांकरे लोके यावदाभूतसंप्लवम् ॥ यश्चैवाश्वयुजे मासि चैत्रे वा नृपसत्तम ॥ १७६ ॥ सप्तम्यां च सिते पक्षे सोपवासो जितेंद्रियः ॥ सात्त्विकीं वासनां कृत्वा यो वसेच्छिवमंदिरे ॥ १७७ ॥ ध्यायमानो विरूपाक्षं त्रिशूलकरसंस्थि



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तम् ॥ कंसासुरनिहंतारं शंखचक्रगदाधरम् ॥ १७८ ॥ पक्षिराजसमारूढं त्रैलोक्यवरदायकम् ॥ पितामहं ततो ध्यायेद्धंसस्थं चतुराननम् ॥ १७९ ॥ सर्गप्रदं समस्तस्य कमलाकरशोभितम् ॥ यो ह्येवं वसते तत्र त्रियमे स्थान उत्तमे ॥ १८० ततः प्रभाते विमले ह्यष्टम्यां च नराधिप ॥ ब्राह्मणान्पूजयेद्भक्त्या सर्वदोषविवर्जितान् ॥ १८१ ॥ सर्वावयवसंपूर्णान्सर्वशास्त्रविशारदान् ॥ वेदाभ्यासरतान्नित्यं स्वदारनिरतान्सदा ॥ १८२ ॥ श्राद्धे दाने व्रते योग्यान्ब्राह्मणान्पांडुनंदन ॥ प्रेतानां पूजनं तत्र देवपूर्वं समारभेत् ॥ १८३ ॥ प्रेतत्वान्मुच्यते शीघ्रमेरंडयां पिंडतर्पणैः ॥ दानानि तत्र देयानि ह्यन्नमुख्यानि सर्वदा ॥ १८४ ॥ हिरण्यभूमिकन्याश्च धूर्वाहौ शुभलक्षणौ ॥ सीरेण सहितौ पार्थ धान्यं द्रोणकसंख्यया ॥ १८५ ॥ अलंकृतां सवत्सां च क्षीरिणीं तरुणीं सिताम् ॥ रक्तां वा कृष्णवर्णां वा पाटलां कपिलां तथा ॥ १८६ ॥ कांस्यदोहनसंयुक्तां रुक्मखुरविभूषणाम् ॥ स्वर्णशृंगीं सवत्सां च ब्राह्मणायोपपादयेत् ॥ १८७ ॥ प्रीयतां मे जगन्नाथा हरकृष्णपितामहाः ॥ संसाररक्षणी देवी सुरभी मां समुद्धरेत् ॥ १८८ ॥ पुत्रार्थं याः स्त्रियः पार्थ ह्येरण्डीसंगमे नृप ॥ स्नाप्यन्ते रुद्रसूक्तैश्च चतुर्वेदोद्भवैस्तथा ॥ १८९ ॥ चतुर्भिर्ब्राह्मणैः शस्तं द्वाभ्यां योग्यैश्च कारयेत् ॥ एकेन सार्द्रकुम्भेन दांपत्यमभिषेचयेत् ॥ १९० ॥ दैवज्ञेनैव चैकेन अथवा सामगेन वा ॥ पंचरत्नसमायुक्तं कुम्भे तत्रैव कारयेत् ॥ १९१ ॥ गन्धतोयसमायुक्तं सर्व्वौषधिविमिश्रितम् ॥ आम्रपल्लवसंयुक्तमश्वत्थमधुकं तथा ॥ १९२ ॥ गुंठितं सितवस्त्रेण सितचन्दनचर्चितम् ॥ सितपुष्पैस्तु संच्छन्नं सिद्धार्थकृतमध्यमम् ॥ १९३ ॥ कांस्यपात्रे तु संस्थाप्य पुत्रार्थी देशिकोत्तमः ॥ अंगलग्नं तु यद्वस्त्रं कटकाभरणं तथा ॥ १९४ ॥ तत्सर्वं मण्डले त्याज्यं सिद्ध्यर्थं चात्मनस्तदा ॥ प्रणम्य भास्करं पश्चादाचार्यं रुद्ररूपिणम् ॥ १९५ ॥ मधुरं च ततोऽश्नीयाद्देव्या भुवन उत्तमे ॥ फलदानं च विप्राय छत्रं तांबूलमेव च ॥ १९६ ॥ उपानहौ च यानं च स भवेद्दुःखवर्जितः ॥ भास्करे क्रीडते लोके यावदाभूतसंप्लवम् ॥ १९७ ॥ दानं कोटिगुणं सर्वं शुभं वा यदि वाऽशुभम् ॥ यथा नदीनदाः सर्वे सागरे यांति संक्षयम् ॥ १९८ ॥ एवं पापानि नश्यंति ह्येरण्डीसंगमे नृणाम् ॥ समंताच्छस्त्रपातेन[१] ह्येरण्डीसंगमे नृप ॥ १९९ ॥ भ्रूणहत्यासमं पापं नश्यते शंकरोऽब्रवीत् ॥ प्राणत्यागं च यो भक्त्या जातवेदसि कारयेत् ॥ २०० ॥ अनाशकं नृपश्रेष्ठ जले वा तदनन्तरम् ॥ पंचसाहस्रिकं मानं वर्षाणां जातवेदसि ॥ २०१ ॥ जले त्रीणि सहस्राण्यनाशके षष्टिं भुञ्जते ॥ काका बकाः कपोताश्च ह्युलूकाः पशवस्तथा ॥ २०२ ॥ संगमोदकसंस्पृष्टास्ते यांति परमां गतिम् ॥

१ समंताच्छस्त्रपातेन—एरण्डीसंगमे स्थित्वा बाणादिशस्त्रं विसृष्टं सत् तत्र ... [illegible] ... पर्यन्तभूप्रदेशस्य—तीर्थत्वमेव—इति तस्य महत्त्वं सूच्यते ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वृक्षाश्च तत्पदं ज्ञात्वा यां गतिं यांति योगिनः ॥२०३॥ एरंडिका मया देवी दृष्टो मे मन्मथेश्वरः ॥ किं समर्थो यमो रुष्टो भद्रो भद्राणि पश्यति ॥ ॥ २०४ ॥ मृत्तिकां संगमोद्भूतां ये च गुण्ठंति नित्यशः ॥ भ्रूणहत्यादिपापानि नश्यंते नाऽत्र संशयः ॥ २०५ ॥ एरण्डीसंगमे मर्त्यो लुण्ठ्यमानो नराधिप ॥ सर्वपापैर्विनिर्मुक्तः पदं गच्छत्यनामयम् ॥ २०६ ॥ एरंड्याः संगमं मर्त्याः कीर्त्तयंत्याऽऽश्रमस्थिताः ॥ विमुक्तपापा जायन्ते सत्यं शंकरभाषितम् ॥ २०७ ॥ एरण्डीपादपाग्रैस्तु दृष्टैः पापं व्यपोहति ॥ २०८ ॥ तीर्थाख्यानमिदं पुण्यं ये पठिष्यन्ति मानवाः ॥ शृण्वन्ति चाऽपरे भक्त्या मुक्तपापा भवंति ते ॥ २०९ ॥ एतत्ते सर्वमाख्यातमेरण्डीसंगमं नृप ॥ भूयश्चाऽन्यत्प्रवक्ष्यामि सर्वपापक्षयंकरम् ॥ २१० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे एरण्डीसंगमतीर्थफलमाहात्म्यवर्णनंनाम त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल सौवर्णशिलमुत्तमम् ॥ प्रख्यातमुत्तरे कूले सर्वपापक्षयंकरम् ॥ १ ॥ समंताच्छतपातेन[1] मुनिसंघैः पुरा कृतम् ॥ रेवायां दुर्लभं स्थानं संगमस्य समीपतः ॥ २ ॥ विभक्तं हस्तमात्रं च पुण्यक्षेत्रं नराधिप ॥ सुवर्णशिलके स्नात्वा पूजयित्वा महेश्वरम् ॥ ३ ॥ नत्वा तु भास्करं देवं होतव्यं च हुताशने ॥ बिल्वेनाऽऽज्यविमिश्रेण बिल्वपत्रैरथाऽपि वा ॥ ४ ॥ प्रीयतां मे जगन्नाथो व्याधिर्नश्यतु मे ध्रुवम् ॥ द्विजाय कांचने दत्ते यत्फलं तच्छृणुष्व मे ॥ ५ ॥ बहुस्वर्णस्य यत्प्रोक्तं यागस्य फलमुत्तमम् ॥ तथाऽसौ लभते सर्वं कांचनं यः प्रयच्छति ॥ ६ ॥ तेन दानेन पूतात्मा मृतः स्वर्गमवाप्नुयात् ॥ रुद्रस्यानुचरस्तावद्यावदिन्द्राश्चतुर्दश ॥ ७ ॥ ततः स्वर्गावतीर्णस्तु जायते विशदे कुले ॥ धनधान्यसमोपेतः पुनः स्मरति तज्जलम् ॥ ८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे सुवर्णशिलातीर्थमाहात्म्यवर्णनंनाम चतुरधिकशततमोऽध्यायः ॥ १०४ ॥ ॥ छ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ करंजाख्यं ततो गच्छेत्सोपवासो जितेंद्रियः ॥ तत्र स्नात्वा तु राजेंद्र सर्वपापैः प्रमुच्यते ॥ १ ॥ अर्चयित्वा महादेवं दत्त्वा दानं तु भक्तितः ॥ सुवर्णं रजतं वाऽपि मणिमौक्तिकविद्रुमान् ॥ २ ॥ पादुकोपानहौ छत्रं शय्यां प्रावरणानि च ॥ कोटिकोटिगुणं
॥ ९१ ॥ सर्वं जायते नाऽत्र संशयः ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे करंजतीर्थमाहात्म्यवर्णनंनाम पंचाधिकशततमोऽध्यायः ॥ १०५ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल तीर्थं

१ शतपातेन--शतपादक्रमप्रक्षेपपरिमितप्रांतरूपम्--इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परमशोभनम् ॥ सौभाग्यकरणं दिव्यं नरनारीमनोरमम् ॥ १ ॥ तत्र या दुर्भगा नारी नरो वा नृपसत्तम ॥ स्नात्वाऽर्चयेदुमारुद्रौ सौभाग्यं तस्य जायते ॥ २ ॥ तृतीयायामहोरात्रं सोपवासो जितेंद्रियः ॥ निमंत्रयेद्द्विजं भक्त्या सपत्नीकं सुरूपिणम् ॥ ३ ॥ गन्धमाल्यैरलंकृत्य वस्त्र धूपादिवासितम् ॥ भोजयेत्पायसान्नेन कृसरेणाऽथ भक्तितः ॥ ४ ॥ भोजयित्वा यथान्यायं प्रदक्षिणमुदाहरेत् ॥ प्रीयतां मे महादेवः सपत्नीको वृषध्वजः ॥ ५ ॥ यथा ते देवदेवेश न वियोगः कदाचन ॥ ममाऽपि करुणां कृत्वा तथास्त्विवति विचिंतयेत् ॥ ६ ॥ एवं कृते ततस्तस्य यत्पुण्यं समुदाहृतम् ॥ तत्ते सर्वं प्रवक्ष्यामि यथा देवेन भाषितम् ॥ ७ ॥ दौर्भाग्यं दुर्गतिश्चैव दारिद्र्यं शोकबन्धनम् ॥ वंध्यत्वं सप्तजन्मानि जायते न युधिष्ठिर ॥ ८ ॥ ज्येष्ठमासे सिते पक्षे तृतीयायां विशेषतः ॥ तत्र गत्वा तु यो भक्त्या पंचाग्निं साधयेत्ततः ॥ ९ ॥ सोऽपि पापैरशेषैस्तु मुच्यते नाऽत्र संशयः ॥ गुग्गुलं दहते यस्तु द्विधांचित्तविवर्जितः[1] ॥ १० ॥ शरीरं भेदयेद्यस्तु गौर्याश्चैव समीपतः ॥ तस्मिन्कर्मप्रविष्टस्य[2] उत्क्रांतिर्जायते[3] यदि ॥ ११ ॥ देहपाते व्रजेत्स्वर्गमित्येवं शंकरोऽब्रवीत् ॥ सितरक्तैस्तथा पीतैर्वस्त्रैश्च विविधैः शुभैः ॥ १२ ॥ ब्राह्मणीं ब्राह्मणं चैव पूजयित्वा यथाविधि ॥ पुष्पैर्नानाविधैश्चैव गंधधूपैः सुशोभनैः ॥ १३ ॥ कण्ठसूत्रकसिंदूरैः कुंकुमेन विलेपयेत् ॥ कल्पयेत स्त्रियं गौरीं ब्राह्मणं शिवरूपिणम् ॥ १४ ॥ तेषां तद्रूपकं कृत्वा दानमुत्सृज्यते ततः ॥ कंकणं कर्णवेष्टं च कण्ठिकां मुद्रिकां तथा ॥ १५ ॥ सप्तधान्यं तथा चैव भोजनं नृपसत्तम ॥ अन्यान्यपि च दानानि तस्मिंस्तीर्थे ददाति यः ॥ १६ ॥ सर्वदानैश्च यत्पुण्यं प्राप्नुयान्नात्र संशयः ॥ सहस्रगुणितं सर्वं नात्र कार्या विचारणा ॥ १७ ॥ शंकरेण समं तस्माद्भोगं भुंक्ते ह्यनुत्तमम् ॥ सौभाग्यं तस्य विपुलं जायते नाऽत्र संशयः ॥ १८ ॥ अपुत्रो लभते पुत्रमधनो धनमाप्नुयात् ॥ राजेंद्र कामदं तीर्थं नर्मदायां व्यवस्थितम् ॥ १९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे कामदतीर्थमाहात्म्यवर्णनंनाम षडुत्तरशततमोऽध्यायः ॥ १०६ ॥ ॥ छ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत राजेंद्र भण्डारीतीर्थमुत्तमम् ॥ दरिद्रच्छेदकरणं युगान्येकोनविंशतिः ॥ १ ॥ धनदेन तपस्तप्त्वा प्रसन्ने पद्मसंभवे ॥ तत्रैव स्वल्पदानेन प्राप्तं वित्तस्य[4] रक्षणम् ॥ २ ॥ तत्र गत्वा तु यो भक्त्या स्नात्वा वित्तं प्रयच्छति ॥ तस्य वित्तपरिच्छेदो न कदाचिद्भविष्यति ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे भण्डारीतीर्थमाहात्म्यवर्णनंनाम सप्तोत्तरशततमोऽध्यायः ॥ १०७ ॥ ॥ छ ॥ ॥

१ द्विधाचित्तविवर्जितः—एकाग्रमानसः—इत्यर्थः । २ कर्मप्रविष्टस्य—कर्मारम्भकरस्य—इत्यर्थः । ३ उत्क्रान्तिः—प्राणोत्क्रमणम्—इत्यर्थः । ४ वित्तस्य रक्षणम्—वित्तेशता—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल रोहिणीतीर्थमुत्तमम् ॥ विख्यातं त्रिषु लोकेषु सर्वपापहरं परम् ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ रोहिणीतीर्थमाहात्म्यं सर्वपापप्रणाशनम् ॥ श्रोतुमिच्छामि तत्त्वेन तन्मे त्वं वक्तुमर्हसि ॥ २ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तस्मिन्नेकार्णवे घोरे नष्टे स्थावरजंगमे ॥ उदधौ च शयानस्य देवदेवस्य चक्रिणः ॥ ३ ॥ नाभौ समुत्थितं पद्मं रविमंडलसन्निभम् ॥ कर्णिकाकेसरोपेतं पत्रैश्च समलंकृतम् ॥ ४ ॥ तत्र ब्रह्मा समुत्पन्नश्चतुर्वदनपंकजः ॥ किं करोमीति देवेश आज्ञा मे दीयतां प्रभो ॥ ५ ॥ एवमुक्तस्तु देवेशः शंखचक्रगदाधरः ॥ उवाच मधुरां वाणीं तदा देवं पितामहम् ॥ ६ ॥ सरस्वत्यां महाबाहो लोकं कुरु ममाज्ञया ॥ भूतग्राममशेषस्य उत्पादनविधिक्षयम् ॥ ७ ॥ एतच्छ्रुतं तु वचनं पद्मनाभस्य भारत ॥ चिंतयामास भगवान्सप्तर्षीन्हितकाम्यया ॥ ८ ॥ क्रमात्ते चिंतिताः प्राज्ञाः पुलस्त्यः पुलहः क्रतुः ॥ प्राचेतसो वसिष्ठश्च भृगुर्नारद एव च ॥ ९ ॥ यज्ञे प्राचेतसो दक्षो महातेजाः प्रजापतिः ॥ दक्षस्यापि तथा जाताः पंचाशद्दुहितरोऽनघ ॥ १० ॥ ददौ स दश धर्माय कश्यपाय त्रयोदश ॥ तथैव स महाभागः सप्तविंशतिमिंदवे ॥ ११ ॥ रोहिणीनाम या तासां मध्ये तस्य नराधिप ॥ अनिष्टा सर्वनारीणां भर्तुश्चैव विशेषतः ॥ १२ ॥ ततः सा परमं कृत्वा वैराग्यं नृपसत्तम ॥ आगत्य नर्मदातीरे चचार विपुलं तपः ॥१३॥ एकरात्रैस्त्रिरात्रैश्च षड्द्वादशभिरेव च ॥ पक्षमासोपवासैश्च कर्शयन्ती कलेवरम् ॥ १४ ॥ आराधयन्ती सततं महिषासुरनाशिनीम् ॥ देवीं भगवतीं तात सर्वार्त्तिविनिवारणीम् ॥ १५ ॥ स्नात्वास्नात्वा जले नित्यं नर्मदायाः शुचिस्मिता ॥ ततस्तुष्टा महाभागा देवी नारायणी नृप ॥ ॥ १६ ॥ प्रसन्ना ते महाभागे व्रतेन नियमेन च ॥ एतच्छ्रुत्वा तु वचनं रोहिणी शशिनः प्रिया ॥१७॥ यथा भवामि न चिरात्तथा भवतु मानदे ॥ एवमस्त्विति सा चोक्ता भवानी भक्तवत्सला ॥ १८ ॥ स्तूयमाना मुनिगणैस्तत्रैवांतरधीयत ॥ तदाप्रभृति तत्तीर्थं रोहिणी शशिनः प्रिया ॥ ॥ १९ ॥ संजाता सर्वकालं तु वल्लभा नृपसत्तम ॥ तत्र तीर्थे तु या नारी नरो वा स्नानि भक्तितः ॥ २० ॥ वल्लभा जायते सा तु भर्तुर्वै रोहिणी यथा ॥ तत्र तीर्थे तु यः कश्चित्प्राणत्यागं करोति वै ॥ २१ ॥ सप्तजन्मानि दांपत्यवियोगो न भवेत्क्वचित् ॥ २२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखंडे रोहिणीसोमनाथतीर्थमाहात्म्यवर्णनं नामाष्टोत्तरशततमोऽध्यायः ॥ १०८ ॥ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल चक्रतीर्थमनुत्तमम् ॥ सेनापुरमितिख्यातं सर्वपापक्षयंकरम् ॥ १ ॥

१ तस्मिन्—कल्पान्तकाले—इत्यर्थः। २ विख्यातम्—इति शेषः। ३ नरश्चेन्नार्याः—इति त्वर्थादेवाक्षिप्यते।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सैनापत्याभिषेकाय देवदेवेन चक्रिणा ॥ आनीतश्च महासेनो देवैः सेंद्रपुरोगमैः ॥ २ ॥ दानवानां वधार्थाय जयाय च दिवौकसाम् ॥ भूमिदानेन विप्रेंद्रांस्तर्पयित्वा यथाविधि ॥ ३ ॥ शंखभेरीनिनादैश्च पटहानां च निस्वनैः ॥ वीणावेणुमृदंगैश्च झल्लरीस्वरमंगलैः ॥ ४ ॥ ततः कृत्वा स्वनं घोरं दानवो बलदर्पितः ॥ रुरुर्नाम विघातार्थमभिषेकस्य चागतः ॥ ५ ॥ हस्त्यश्वरथपत्त्याद्यैः पूरयन्वै दिशो दश ॥ तत्र तेन महद्युद्धं प्रवृत्तं किल भारत ॥ ६ ॥ शक्त्यृष्टिपाशमुशलैः खड्गैस्तोमरटंकनैः ॥ भल्लैः कर्णिकनाराचैः कबंधपटसंकुलैः ॥ ७ ॥ ततस्तु तां शत्रुबलस्य सेनां क्षणेन चापच्युतबाणघातैः ॥ विध्वस्तहस्त्यश्वरथान्महात्मा जग्राह चक्रं रिपुसंघनाशनः ॥ ८ ॥ ज्वलच्च चक्रं निशितं भयंकरं सुरासुराणां च सुदर्शनं रणे ॥ चकर्त दैत्यस्य शिरस्तदानीं करात्प्रमुक्तं मधुघातिनश्च तत् ॥ ९ ॥ तं दृष्ट्वा सहसा विघ्नमभिषेके षडाननः ॥ त्यक्त्वा तु तत्र संस्थानं चचार विपुलं तपः ॥ १० ॥ मुक्तं चक्रं विनाशाय हरिणा लोकधारिणा ॥ द्विदलं दानवं कृत्वा पपात विमले जले ॥ ११ ॥ तदा प्रभृति तत्तीर्थं चक्रतीर्थमिति श्रुतम् ॥ सर्वपापविनाशाय निर्मितं विश्वमूर्त्तिना ॥ १२ ॥ चक्रतीर्थे तु यः स्नात्वा पूजयेद्देवमच्युतम् ॥ पुंडरीकस्य यज्ञस्य फलमाप्नोति मानवः ॥१३॥ तत्र तीर्थे तु यः स्नात्वा पूजयेद्ब्राह्मणाञ्छुभान् ॥ शांतदांतजितक्रोधान्स लभेत्कोटिजं फलम् ॥ १४ ॥ तत्र तीर्थे तु यो भक्त्या त्यजते देहमात्मनः ॥ विष्णुलोकं मृतो याति जयशब्दादिमंगलैः ॥ १५ ॥ क्रीडयित्वा यथाकामं देवगंधर्वपूजितः ॥ इहागत्य च भूयोपि जायते विपुले कुले ॥ १६ ॥ एतत्पुण्यं पापहरं धन्यं दुःखप्रणाशनम् ॥ कथितं ते महाभाग भूयश्चान्यच्छृणुष्व मे ॥ १७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे सेनापुरे चक्रतीर्थमाहात्म्यवर्णनंनाम नवोत्तरशततमोऽध्यायः ॥ १०९ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ धौतपापं ततो गच्छेन्महापातकनाशनम् ॥ समीपे चक्रतीर्थस्य विष्णुना निर्म्मितं पुरा ॥ १ ॥ निहतैर्दानवैर्घोरैर्देवदेवो जनार्दनः॥ तत्पापस्य विनाशार्थं दानवान्तोद्भवस्य[1] च ॥२॥ तत्र तीर्थे जितक्रोधश्चचार विपुलं तपः॥ दुश्चरं मौनमास्थाय ह्यशक्यं देवदानवैः ॥ ३ ॥ स्नात्वा दत्त्वा द्विजातिभ्यो दानानि विविधानि च ॥ तत्क्षणान्मुपापस्तु गतस्तद्वैष्णवं पदम् ॥ ४ ॥ एवं युक्तस्तु यस्तत्र पापं कृत्वा सुदारुणम् ॥ स्नात्वा जप्त्वा विधानेन मुच्यते सर्वपातकैः ॥ ५ ॥ इति श्रीस्कान्दे महाणपुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे धौतपापतीर्थमाहात्म्यवर्णनंनाम दशोत्तरशततमोऽध्यायः ॥ ११० ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥

१ दानवान्तोद्भवस्य–दानववधजनितस्य–इत्यर्थः। तस्य पापविनाशार्थं दानवस्य च भारत–इ०पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



नर्मदादक्षिणे कूले तीर्थं परमशोभनम् ॥ स्कंदेन निर्मितं पूर्वं तपः कृत्वा सुदारुणम् ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ स्कंदस्य चरितं सर्वमा
जन्म द्विजसत्तम ॥ तीर्थस्य च विधिं पुण्यं कथयस्व यथार्थतः ॥ २ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ देवदेवेन वै तप्तं तपः पूर्वं युधिष्ठिर ॥ विज्ञप्तेन
सुरैः सर्वैरुमादेवी विवाहिता ॥ ३ ॥ नास्ति सेनापतिः कश्चिद्देवानां सुरसत्तम ॥ नीयंते दानवैर्घोरैः सर्वे देवाः सवासवाः ॥ ४ ॥ यथा निशा
विना चंद्रं दिवसो भास्करं विना ॥ न शोभते मुहूर्तं वै तथा सेना निनायका ॥ ५ ॥ एवं ज्ञात्वा महादेव परया दयया विभो ॥ सेनानीर्दीयतां
कश्चित्त्रिषु लोकेषु विश्रुतः ॥ ६ ॥ एतच्छुत्वा शुभं वाक्यं देवानां परमेश्वरः ॥ कामयान उमां देवीं सस्मार मनसा स्मरम् ॥ ७ ॥ तेन मूर्च्छितस
र्वांगः कामरूपो जगद्गुरुः ॥ कामयामास रुद्राणीं दिव्यं वर्षशतं किल ॥ ८ ॥ देवराजस्ततो ज्ञात्वा महामैथुनगं हरम् ॥ संमंत्र्य दैवतैः सार्द्धं
प्रैषयज्जातवेदसम् ॥ ९ ॥ तेन गत्वा महादेवः परमानंदसंस्थितः ॥ सहसा तेन दृष्टोऽसो हाहेत्युक्का समुत्थितः ॥ १० ॥ ततः क्रुद्धा महादेवी शाप
वाचमुवाच ह ॥ वेपमाना महाराज शृणु यत्ते वदाम्यहम् ॥११॥ अहं यस्मात्सुरैः सर्वैर्याचिता पुत्रजन्मनि ॥ कृता रतिश्च विफला संप्रेष्य जातवेद
सम् ॥ १२ ॥ तस्मात्सर्वे पुत्रहीना भविष्यंति न संशयः ॥ हरेणोक्तस्ततो वह्निरस्माकं बीजमावह ॥ १३ ॥ यथा भवति लोकेषु तथा त्वं कर्त्तु
मर्हसि ॥ मम तेजस्त्वया शक्यं गृहीतुं सुरसत्तम ॥ देवकार्यार्थसिद्ध्यर्थं नाऽन्यः शक्तो जगत्त्रये ॥ १४ ॥ ॥ अग्निरुवाच ॥ ॥ तेजसस्तव मे देव
का शक्तिर्धारणे विभो ॥ करोति भस्मसात्सर्वं त्रैलोक्यं सचराचरम् ॥ १५ ॥ ॥ ईश्वर उवाच ॥ ॥ उदरस्थेन बीजेन यदि ते जायते रुजा ॥ तदा
क्षिपस्व तत्तेजो गंगातोये हुताशन ॥१६॥ एवमुक्का महादेवो अमोघं बीजमुत्तमम् ॥ हव्यवाहमुखे सर्वं प्रक्षिप्यांतरधीयत ॥१७॥ गते चादर्शनं देवे
दह्यमानो हुताशनः ॥गंगातोये विनिक्षिप्य जगाम स्वंनिवेशनम्॥१८॥ असहंती तु तत्तेजो गंगाऽपि सरितां वरा ॥ शरस्तंबे विनिक्षिप्य जगामाशु
यथागतम् ॥१९॥ तत्र जातं तु तद्दृष्ट्वा सर्वे देवाः सवासवाः ॥ कृत्तिकां प्रेसयामासुः स्तन्यं पाययितुं तदा ॥२०॥ दृष्ट्वा ता आगताः सर्वा गंगागर्भं
महासतेः ॥ षण्मुखैः षण्मुखो भूत्वा पिपासुरपिबत्स्तनम् ॥ २१ ॥ जातकर्मादिसंस्कारान्वेदोक्तान्पद्मसंभवः ॥ चकार सर्वान्राजेंद्र विधिदृष्टेन
कर्मणा ॥ २२ ॥ षण्मुखात्षण्मुखो नाम कर्त्तिकेयस्तु कृत्तिकात् ॥ कुमारश्च कुमारत्वाद्गंगागर्भोऽग्निजोऽपरः ॥ २३ ॥ एवं कुमारः संभूतो

१ स्कंदेन निर्मितम् अत एव स्कन्दतीर्थम्–इति प्रसिद्धम् । २ निनायका--नायकरहिता–इत्यर्थः । 'नि' इत्यस्योपसर्गस्य अत्र अभावार्थकत्वम् । निर्नायका--इ० पा० समुचितः । छन्दोवैकल्यंत्वार्षत्वात्सह्यं स्यादेव । ३ सुराः इति शेषः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्यनधीत्य स वेदवित् ॥ शास्त्राण्यनेकानि वेद चचार विपुलं तपः ॥ २४ ॥ देवाऽरण्येषु सर्वेषु नदीषु च नदेषु च ॥ पृथिव्यां यानि तीर्थानि समुद्राद्यानि भारत ॥ २५ ॥ ततः पर्याययोगेन नर्मदातटमाश्रितः ॥ नर्मदादक्षिणे कूले चचार विपुलं तपः ॥ २६ ॥ ऋग्यजुःसामविहितं जपञ्जाप्यमहर्निशम् ॥ ध्यायमानो महादेवं शुचिर्धर्मनिसंततः ॥ २७ ॥ ततो वर्षसहस्रांते पूर्णे देवो महेश्वरः ॥ उमया सहितः काले तदा वचनमब्रवीत् ॥ २८ ॥ ॥ ईश्वर उवाच ॥ ॥ अहं ते वरदस्तात गौरी माता पिता ह्यहम् ॥ वरं वृणीष्व यच्चेष्टं त्रिषु लोकेषु दुर्लभम् ॥ २९ ॥ ॥ षण्मुख उवाच ॥ ॥ यदि तुष्टो महादेव उमया सह शंकर ॥ वृणोमि मातापितरौ नान्या गतिर्मतिर्मम ॥ ३० ॥ एतच्छ्रुत्वा शुभं वाक्यं पुत्रस्य वदनाच्च्युतम् ॥ तथेत्युक्त्वा तु स्नेहेन प्रेम्णा तं परिषस्वजे ॥ ३१ ॥ ततस्तं मूर्ध्न्युपाघ्राय ह्युमयोवाच शंकरः ॥ ३२ ॥ ॥ ईश्वर उवाच ॥ ॥ अक्षयश्चाव्ययश्चैव सेनानीस्त्वं भविष्यसि ॥ ३३ ॥ शिखी च ते वाहनं दिव्यरूपो दत्तो मया शक्तिधरस्य संख्ये ॥ सुरासुरादींश्च जयेति चोक्त्वा जगाम कैलासवरं महात्मा ॥ ३४ ॥ गते चाऽदर्शनं देवे तदा स शिखिवाहनः ॥ स्थापयित्वा महादेवं जगाम सुरसन्निधौ ॥ ३५ ॥ तदाप्रभृति तत्तीर्थं स्कन्दतीर्थमिति श्रुतम् ॥ सर्वपापहरं पुण्यं मर्त्यानां भुवि दुर्लभम् ॥ ३६ ॥ तत्र तीर्थे तु यो राजन्भक्त्या स्नात्वाऽर्चयेच्छिवम् ॥ गंधमाल्याभिषेकैश्च याज्ञिकं स लभेत्फलम् ॥ ३७ ॥ स्कन्दतीर्थे तु यः स्नात्वा पूजयेत्पितृदेवताः ॥ तिलमिश्रेण तोयेन तस्य पुण्यफलं शृणु ॥ ३८ ॥ पिंडदानेन चैकेन विधियुक्तेन भारत ॥ द्वादशाब्दानि तुष्यंति पितरो नाऽत्र संशयः ॥ ३९ ॥ तत्र तीर्थे तु राजेंद्र शुभं वा यदि वा शुभम् ॥ इह लोके परे चैव तत्सर्वं जायतेऽक्षयम् ॥ ४० ॥ तत्र तीर्थे तु यः कश्चित्प्राणत्यागं करिष्यति ॥ शास्त्रयुक्तेन विधिना स गच्छेच्छिवमंदिरम् ॥ ४१ ॥ कल्पमेकं वसित्वा तु देवगंधर्वपूजितः ॥ अत्र भारतवर्षे तु जायते विमले कुले ॥ ४२ ॥ वेदवेदांगतत्त्वज्ञः सर्वव्याधिविवर्जितः ॥ जीवेद्वर्षशतं साग्रं पुत्रपौत्रसमन्वितः ॥ ४३ ॥ इदं ते कथितं राजन्स्कंदतीर्थस्य संभवम् ॥ धन्यं यशस्यमायुष्यं सर्वदुःखघ्नमुत्तमम् ॥ सर्वपापहरं पुण्यं देवदेवेन भाषितम् ॥ ४४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे स्कंदतीर्थमाहात्म्यवर्णनंनामैकादशोत्तरशततमोऽध्यायः ॥ १११ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र तीर्थमांगिरसस्य तु ॥ उत्तरे नर्मदाकूले सर्वपापविनाशनम् ॥ १ पुरासीदंगिरानाम ब्राह्मणो वेदपारगः ॥ पुत्रहेतोर्युगस्याऽदौ चचार विपुलं तपः ॥ २ ॥ नित्यं त्रिषवणस्नायी जपन्देवं सनातनम् ॥ पूजयंश्च महादेवं कृच्छ्रचांद्रायणादिभिः ॥ ३ ॥ द्वादशाब्दे ततः पूर्णे तुतोष परमेश्वरः ॥ वरेण च्छंदयामास द्विजमां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

गिरसं वरम् ॥ ४ ॥ वव्रे स तु महादेवं पुत्रं पुत्रवतां वरम् ॥ वेदविद्याव्रतस्नातं सर्वशास्त्रविशारदम् ॥५॥ देवानां मंत्रिणं राजन्सर्वलोकेषु पूजितम् ॥ ब्रह्मलक्ष्म्याः सदावासमक्षयं चाव्ययं सुतम् ॥ ६ ॥ तथाभिलषितः पुत्रः सर्वविद्याविशारदः ॥ भविष्यति न संदेहश्चैवमुक्त्वा ययौ हरः ॥७॥ वरैरंगिरसश्चाऽपि बृहस्पतिरजायत ॥ यथाभिलषितः पुत्रो वेदवेदांगपारगः ॥ ८ ॥ जाते पुत्रेंगिरास्तत्र स्थापयामास शंकरम् ॥ हृष्टतुष्टमना भूत्वा जगामोत्तरपर्वतम् ॥ ९ ॥ तत्र चांगिरसे तीर्थे यः स्नात्वा पूजयेच्छिवम् ॥ सर्वपापविनिर्मुक्तो रुद्रलोकं स गच्छति ॥ १० ॥ अपुत्रो लभते पुत्रमधनो धनमाप्नुयात् ॥ इच्छते यश्च यं कामं स तं लभति मानवः ॥ ११ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डेऽग्निरसतीर्थमाहात्म्यवर्णनंनाम द्वादशाधिकशततमोऽध्यायः ॥ ११२ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र कोटितीर्थमनुत्तमम् ॥ ऋषिकोटिर्गता तत्र परां सिद्धिमुपागता ॥ १ ॥ तत्र तीर्थे तु यः स्नात्वा भोजयेद्ब्राह्मणाञ्छुचिः ॥ एकस्मिन्भोजिते विप्रे कोटिर्भवति भोजिता ॥ २ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्पितृदेवताः ॥ पूजिते तु महादेवे वाजपेयफलं लभेत् ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे कोटितीर्थमाहात्म्यवर्णनं नाम त्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र तीर्थं परमशोभनम् ॥ अयोनिजं महापुण्यं सर्वपापप्रणाशनम् ॥ १ ॥ अयोनिजे नरः स्नात्वा पूजयेत्परमेश्वरम् ॥ पितृदेवार्चनं कृत्वा मुच्यते सर्वकिल्बिषैः ॥ २ ॥ तत्र तीर्थे तु विधिना प्राणत्यागं करोति यः ॥ स कदाचिन्महाराज योनिद्वारं न पश्यति ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखंडे अयोनिसम्भवतीर्थमाहात्म्यवर्णनंनाम चतुर्दशाधिकशततमोऽध्यायः ॥ ११४ ॥ ॥ छ ॥ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महाराज तीर्थमांगारकं परम् ॥ रूपदं सर्वलोकानां विश्रुतं नर्मदातटे ॥ १ ॥ अंगारकेण राजेंद्र पुरा तप्तं तपः किल ॥ अर्बुदं च निखर्वं च प्रयुतं वर्षसंख्यया ॥ २ ॥ ततस्तुष्टो महादेवः परया कृपया नृप ॥ प्रत्यक्षदर्शी भगवा-
॥ १४ ॥ नुवाच क्षितिनन्दनम् ॥३॥ वरदोऽस्मि महाभाग दुर्लभं त्रिदशैरपि ॥ वरं दास्याम्यहं वत्स ब्रूहि यत्ते विवक्षितम् ॥ ४ ॥ ॥ अंगारक उवाच ॥ ॥ तव प्रसादाद्देवेश सर्वलोकमहेश्वर ॥ ग्रहमध्यगतो नित्यं विचरामि नभस्तले ॥ ५ ॥ यावद्धरांधरो लोके यावच्चंद्रदिवाकरौ ॥ नद्यो नदाः समुद्राश्च 

१ धराधरः—मेरुः । धरावरः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वरो मे चाऽक्षयो भवेत् ॥ ६ ॥ एवमस्त्विति देवेशो दत्त्वा वरमनुत्तमम् ॥ जगामाकाशमाविश्य वन्द्यमानः सुरासुरैः ॥ ७ ॥ भूमिपुत्रस्तत स्तस्मिन्स्थापयामास शंकरम् ॥ गतः सुरालये लोके ग्रहभावे निवेशितः ॥ ८ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरम् ॥ हुतहोमो जितक्रोधः सोऽश्वमेधफलं लभेत् ॥ ९ ॥ चतुर्थ्यंगारके यस्तु स्नात्वा चाभ्यर्चयेद्रहम् ॥ अंगारकं विधानेन सप्तजन्मानि भारत ॥ १० ॥ दशयोजन विस्तीर्णे मंडले रूपवान्भवेत् ॥ तत्रैव तु मृतो जंतुः कामतोऽकामतोऽपि वा ॥ रुद्रस्याऽनुचरो भूत्वा तेनैव सह मोदते ॥ ११ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे अंगारकतीर्थमाहात्म्यवर्णनंनाम पञ्चदशोत्तरशततमोऽध्यायः॥ ११५ ॥ ॥ ॥ छ ॥ ॥ मार्कंडेय उवाच ॥ ॥ पांडुतीर्थं ततो गच्छेत्सर्वपापविनाशनम् ॥ तत्र स्नात्वा नरो राजन्मुच्यते सर्वकिल्बिषैः ॥ १ ॥ तत्र तीर्थे तु यः स्नात्वा दापयेत्कांचनं शुचिः ॥ भ्रूणहत्यादिपापानि नश्यंते नाऽत्र संशयः ॥ २ ॥ पिंडोदकप्रदानेन वाजपेयफलं लभेत् ॥ पितरः पितामहाश्च नृत्यंते च प्रहर्षिताः ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे पांडुतीर्थ माहात्म्यवर्णनंनाम षोडशाधिकशततमोऽध्यायः ॥ ११६ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र पुण्यं तीर्थं त्रिलोचनम् ॥ तत्र तिष्ठति देवेशः सर्वलोकनमस्कृतः ॥ १ ॥ तत्र तीर्थे तु यः स्नात्वा भक्त्यार्च्चयति शंकरम् ॥ रुद्रस्य भवनं याति मृतो नास्त्यत्र संशयः ॥ २ ॥ कल्पक्षये ततः पूर्णे क्रीडित्वा च इहागतः ॥ आवियोगेन तिष्ठेत पूज्यमानः शतं समाः ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे त्रिलोचनतीर्थमाहात्म्यवर्णनंनाम सप्तदशोत्तरशततमोऽध्यायः ॥ ११७ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र तीर्थं परमशोभनम् ॥ इन्द्रतीर्थेतिविख्यातं नर्मदादक्षिणे तटे ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ नर्मदा दक्षिणे कूले इन्द्रतीर्थं कथं भवेत् ॥ श्रोतुमिच्छामि विप्रेंद्र ह्यादिमध्यांतविस्तरैः ॥ २ ॥ एतच्छ्रुत्वा तु वचनं धर्मपुत्रस्य धीमतः ॥ कथयामास तद्वृत्तमितिहासं पुरातनम् ॥ ३ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ विश्वासयित्वा सुचिरं धर्मशत्रुं महाबलम् ॥ वृत्रं जित्वाऽथ हत्वा तु गच्छमानं शचीपतिम् ॥ ४ ॥ निष्क्राममाणं मार्गेण ब्रह्महत्यादुरासदा ॥ अहोरात्रमविश्रांता जगाम भुवनत्रयम् ॥ ५ ॥ यतोयतो ब्रह्महणं याति यानेन शोभनम् ॥ दिशो भागं सुरैः सार्द्धं ततो हत्या न मुञ्चति ॥ ६ ॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः ॥ पातकानां गतिर्दृष्टा न तु विश्वासघाति नाम् ॥ ७ ॥ पापकर्मसुखं दृष्ट्वा स्नानदानैर्विशुध्यति ॥ नारी वा पुरुषो वाऽपि नैव विश्वासघातिनः ॥ ८ ॥ एवमादीनि चाऽन्यानि श्रुत्वा वाक्यानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



देवराट् ॥ वचनं तद्द्विवैरुक्तं विषादमगमत्परम् ॥९॥ त्यक्त्वा राज्यं सुरैः सार्धं जगाम तप उत्तमम् ॥ पुत्रदारगृहं राज्यं वसूनि विविधानि च ॥१०॥ फलान्येतानि धर्मस्य शोभयन्ति जनेश्वरम् ॥ फलं धर्मस्य भुंजेति सुहृत्स्वजनबांधवाः ॥ ११ ॥ पश्यतां सर्वमेतेषां पापमेकेन भुज्यते ॥ परं हि सुखमुत्सृज्य कर्शयन्वै कलेवरम् ॥ १२ ॥ देवराजो जगामासौतीर्थान्यायतनानि च ॥ गंगातीर्थेषु सर्वेषु यामुनेषु तथैव च ॥ १३ ॥ सारस्वतेषु सर्वेषु सामुद्रेषु पृथक्पृथक् ॥ नदीषु देवखातेषु तडागेषु सरःसु च ॥ १४ ॥ पापं न मुञ्चते सर्वे पश्चाद्देवसमागमे ॥ रेवाप्रभवतीर्थेषु कूलयोरुभयोरपि ॥ १५ ॥ पूजयन्वै महादेवं स्कंदतीर्थं समासदत् ॥ तत्र स्थित्वोपवासैश्च कृच्छ्रचांद्रायणादिभिः ॥ १६ ॥ कर्शयन्वै स्वकं देहं न लेभे शर्म वै क्वचित् ॥ ग्रीष्मे पंचाग्निमध्यस्थो वर्षासु स्थंडिलेशयः ॥ १७ ॥ आर्द्रवासास्तु हेमंते चचार विपुलं तपः ॥ एवं तु तपतस्तस्य इंद्रस्य विदितात्मनः ॥ १८ ॥ वत्सराणां सहस्राणि गतानि दश भारत ॥ ततस्त्वेकादशे प्राप्ते वर्षे तु नृपसत्तम ॥ १९ ॥ सहसा भगवान्देवस्तुतोष परमेश्वरः ॥ तथा ब्रह्मर्षयः सिद्धा ब्रह्मविष्णुपुरोगमाः ॥ २० ॥ तत्राऽऽजग्मुः सुराः सर्वे यत्र देवः शतक्रतुः ॥ दृष्ट्वा समागतान्देवानृषींश्चैव महामतिः ॥ २१ ॥ उवाच प्रणतो भूत्वा सर्वदेवपुरोहितः ॥ विदितं सर्वमेतेषां यथा वृत्रवधः कृतः ॥ २२ ॥ युष्माकं चाऽऽज्ञया पूर्वं ब्रह्मविष्णुमहेश्वराः ॥ तथाप्येवं ब्रह्महणं मत्त्वा पापस्य कारिणम् ॥ २३ ॥ भ्रमंतं सर्वतीर्थेषु ब्रह्महत्या न मुंचति ॥ न नंदति जगत्सर्वं त्रैलोक्यं सचराचरम् ॥ २४ ॥ यथा विहीनचंद्रार्कं तथा राज्यमनायकम् ॥ तस्मात्सर्वे सुरश्रेष्ठा विज्ञाप्यं मम संप्रति ॥ २५ ॥ कुर्वंतु शक्रं निर्दोषं तथा सर्वे महर्षयः ॥ बृहस्पतिमुखोद्गीर्णं श्रुत्वा तद्वचनं शुभम् ॥ २६ ॥ ततः प्रोवाच भगवान्ब्रह्मा लोकपितामहः ॥ एतत्पापं महाघोरं ब्रह्महत्यासमुद्भवम् ॥ ॥ २७ ॥ दैवतेभ्योऽथ भूतेभ्यश्चतुर्भागं क्षिपाम्यहम् ॥ एवं मुक्ताक्षिपच्चैनो जलोपरि महामतिः ॥ २८ ॥ अवगाह्य ततः पेया आपो वै नान्यथा बुधैः ॥ धरायामक्षिपद्भागं द्वितीयं पद्मसंभवः ॥ २९ ॥ अभक्ष्या तेन संजाता सदाकालं वसुंधरा ॥ तदार्धमर्द्धं नारीणां द्वितीयेऽह्नि युधिष्ठिर ॥ ॥ ३० ॥ निक्षिप्य भगवान्देवः पुनरन्यज्जगाद ह ॥ असंग्राह्या त्वसंग्राह्या तेन जाता रजस्वला ॥ ३१ ॥ चतुर्दिनानि सा प्राज्ञैः पापस्य महतो

॥ ९५ ॥ महात् ॥ चतुर्थं तु ततो भागं विभज्य परमेश्वरः ॥ ३२ ॥ कृषिगोरक्ष्यवाणिज्यैः शूद्रसेवाकरे द्विजे ॥ ततोऽभिनंदयामासुः सर्वे देवा महर्षयः ॥ ॥२६९॥

॥ ३३ ॥ देवेंद्रं वाग्भिरिष्टाभिर्नर्मदाजलसंस्थितम् ॥ वरेण च्छन्दयामास ततस्तुष्टो महेश्वरः ॥ ३४ ॥ वरं दास्यामि देवेश वरं वृणु यथेप्सि

१ महात्—माहात्म्यात्—इत्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri

तम् ॥ ३५ ॥ ॥ इंद्र उवाच ॥ ॥ यदि तुष्टोऽसि देवेश यदि देयो वरो मम ॥ अत्र संस्थापयिष्यामि सदा सन्निहितो भव ॥ ३६ ॥ एवमस्त्विति चोक्त्वा तं ब्रह्मविष्णुमहेश्वराः ॥ जग्मुराकाशमाविश्य स्तूयमाना महर्षिभिः ॥ ३७ ॥ गतेषु देवदेवेषु देवराजः शतक्रतुः ॥ स्थापयित्वा महादेवं जगाम त्रिदशालयम् ॥ ३८ ॥ इंद्रतीर्थे तु यः स्नात्वा तर्प्पयेत्पितृदेवताः ॥ महापातकयुक्तोऽपि मुच्यते सर्वपातकैः ॥ ३९ ॥ इंद्रतीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरम् ॥ सोऽश्वमेधस्य यज्ञस्य पुष्कलं फलमश्नुते ॥ ४० ॥ एतत्ते कथितं सर्वं तीर्थमाहात्म्यमुत्तमम् ॥ श्रुतमात्रेण येनैव मुच्यंते पातकैर्नराः ॥ ४१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे इंद्रतीर्थमाहात्म्यवर्णनंनामाष्टादशोत्तरशततमोऽध्यायः ॥ ११८ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र कह्लोडीतीर्थमुत्तमम् ॥ रेवायाश्चोत्तरे कूले सर्वपापविनाशनम् ॥ १ ॥ हितार्थं सर्वभूतानामृषिभिः स्थापितं पुरा ॥ तपसा तु समुद्धृत्य नर्मदायां महांभसि ॥ २ ॥ स्नात्वा तु कपिलातीर्थे कपिलां यः प्रयच्छति ॥ श्रुत्वा चाऽऽख्यानकं दिव्यं ब्राह्मणाच्छृणु यत्फलम् ॥ ३ ॥ सर्वेषामेव दानानां कपिलादानमुत्तमम् ॥ ब्राह्मणान्वेपितं पूर्वमृषिदेवसमागमे ॥ ४ ॥ सद्यः प्रसूतां कपिलां शोभनां यः प्रयच्छति ॥ सोपवासो जितक्रोधस्तस्य पुण्यफलं शृणु ॥ ५ ॥ ससमुद्रगुहा तेन सशैलवनकानना ॥ दत्ता चैव महाबाहो पृथिवी नात्र संशयः ॥ ६ ॥ वाचिकं मानसं पापं कर्मणा यत्पुरा कृतम् ॥ नश्यते कपिलां दत्त्वा सप्तजन्मार्जितं नृप ॥ ७ ॥ भूमिदानं धनं धान्यं हस्त्यश्वकनकादिकम् ॥ कपिलादानस्यैकस्य कलां नार्हति षोडशीम् ॥ ८ ॥ तत्र तीर्थे नरः स्नात्वा कपिलां यः प्रयच्छति ॥ मृतो विष्णुपुरं याति गीयमायोऽप्सरोगणैः ॥ ९ ॥ यावंति तस्या रोमाणि सवत्सायास्तु भारत ॥ तावद्वर्षसहस्राणि स स्वर्गे क्रीडते चिरम् ॥ १० ॥ ततोऽवकीर्णकालेन त्विह मानुष्यतां गतः ॥ धनधान्यसमोपेतो जायते विपुले कुले ॥ ११ ॥ वेदविद्याव्रतस्नातः सर्वशास्त्रविशारदः ॥ व्याधिशोकविनिर्मुक्तो जीवेच्च शरदां शतम् ॥ १२ ॥ एतत्ते सर्वमाख्यातं कल्होडीतीर्थमुत्तमम् ॥ यत्कृत्वा सर्वपापेभ्यो मुच्यते नाऽत्र संशयः ॥ १३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे कह्लोडीतीर्थमाहात्म्यवर्णनंनामैकोनविंशत्युत्तरशततमोऽध्यायः ॥११९॥ ॥छ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ अतः परं प्रवक्ष्यामि कम्बुकेश्वरमुत्तमम्॥ हिरण्यकशिपुर्दैत्यो दानवो बलदर्पितः॥१॥अवध्यः सर्वलोकानां त्रिषु लोकेषु विश्रुतः ॥ तस्य पुत्रो महातेजाः प्रह्लादो नाम नामतः ॥२॥ विष्णुप्रसादाद्भक्त्या

१ कापिलादानमुत्तमम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



च तस्य राज्ये प्रतिष्ठितः ॥ विरोचनस्तस्य सुतस्तस्याऽपि बलिरेव च ॥ ३ ॥ बलिपुत्रोऽभवद्बाणस्तस्मादपि च शंबरः ॥ शंबरस्याऽन्वये
जातः कंबुर्नाम महासुरः ॥ ४ ॥ ज्ञात्वा विष्णुमयं घोरं महद्भयमुपस्थितम् ॥ दानवानां विनाशाय नाऽन्यो हेतुः कदाचन ॥ ५ ॥ स त्यक्त्वा पुत्र
दारांश्च सुहृद्बंधुपरिग्रहान् ॥ चचार मौनमास्थाय तपः कंबुर्महामतिः ॥ ६ ॥ अक्षसूत्रकरो भूत्वा दंडी मुंडी च मेखली ॥ शाकयावकभक्षश्च वल्क
लाजिनसंवृतः ॥ ७ ॥ स्नात्वा नित्यं धृतिपरो नर्मदाजलमाश्रितः ॥ पूजयंस्तु महादेवमर्बुदं वर्षसंख्यया ॥ ८ ॥ ततस्तुतोष भगवान्देवदेवो महे
श्वरः ॥ उवाच दानवं काले मेघगंभीरया गिरा ॥ ९ ॥ भोभोः कंबो महाभाग तुष्टोऽहं तव सुव्रत ॥ इष्टं व्रतानां परमं मौनं सर्वार्थसाधनम् ॥ १० ॥
चरितं च त्वया लोके देवदानवदुश्चरम् ॥ वरं वृणीष्व भद्रं ते यत्ते मनसि रोचते ॥ ११ ॥ ॥ कंबुरुवाच ॥ ॥ यदि प्रसन्नो देवेश यदि देयो
वरो मम ॥ अक्षय्यश्चाऽव्ययश्चैव स्वेच्छया विचराम्यहम् ॥ १२ ॥ दैत्यदानवसंघानां संयुगेष्वपलायिता ॥ भयं चान्यन्न विद्येत मुक्त्वा देवं गदा
धरम् ॥ १३ ॥ तस्याऽहं संयुगे साध्यो येनोपायेन शंकर ॥ भवामि न सदा कालं तं वदस्व वरं मम ॥ १४ ॥ ॥ ईश्वर उवाच ॥ ॥ मम सन्नि
हितो यत्र त्वं भविष्यसि दानव ॥ तत्र विष्णुभयं नास्ति वसात्राविगतज्वरः ॥ १५ ॥ तस्य देवाधिदेवस्य वेदगर्भस्य संयुगे ॥ शंखचक्रधरस्येशा
नाऽहं सर्वे सुरासुराः ॥ १६ ॥ किं पुनर्यो द्विषत्येनं लोकालोकप्रभुं हरिम् ॥ स सुखी वर्त्तते कालं न निमेषं मतं मम ॥ १७ ॥ तस्मात्त्वं परया
भक्त्या सर्वभूतहिते रतः ॥ वसिष्यसि चिरं कालमित्युक्त्वाऽदर्शनं गतः ॥ १८ ॥ गते चाऽदर्शनं देवे तत्र तीर्थे महामतिः ॥ स्थापयामास देवेशं
शिवं शांतमनामयम् ॥ १९ ॥ तस्मिंस्तीर्थे महादेवं स्थापयित्वा दिवं गतः ॥ तदाप्रभृति तत्पार्थ कंबुतीर्थमिति श्रुतम् ॥ विख्यातं सर्वलोकेषु
महापातकनाशनम् ॥ २० ॥ कंबुतीर्थे नरः स्नात्वा विधिनाऽभ्यर्च्य भास्करम् ॥ ऋग्यजुःसाममंत्रैश्च स्तूयमानो नृपोत्तम ॥ २१ ॥ तस्य पुण्यं
समुद्दिष्टं ब्राह्मणैर्वेदपारगैः ॥ तत्सर्वं तु शृणुष्वाऽद्य ममैव गदतो नृप ॥ २२ ॥ ऋग्यजुःसामगीतेषु सांगोपांगेषु यत्फलम् ॥ तत्फलं सम
वाप्नोति गायत्रीमात्रमंत्रवित् ॥ २३ ॥ तत्र तीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः ॥ पूजयेद्देवमीशानं सोऽग्निष्टोमफलं लभेत् ॥ २४ ॥ अकामो
॥९६॥ वा सकामो वा तत्र तीर्थे कलेवरम् ॥ यस्त्यजेन्नात्र संदेहो रुद्रलोकं स गच्छति ॥ २५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहि ॥२७०॥
तायां पञ्चम आवन्त्यखण्डे रेवाखंडे कंबुकेश्वरतीर्थमाहात्म्यवर्णनंनामविंशत्युत्तरशततमोऽध्यायः ॥ १२० ॥ ॥ छ ॥ ॥ ॥

१ स्थोत्तमम्-इ०पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल चंद्रहासमतः परम् ॥ यत्र सिद्धिं परां प्राप्तः सोमराजः सुरोत्तमः ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथं सिद्धिं परां प्राप्तः सोमनाथो जगत्पतिः ॥ तत्सर्वं श्रोतुमिच्छामि कथयस्व ममाऽनघ ॥ २ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ पुरा शप्तो मुनींद्रेण दक्षेण किल भारत ॥ असेवनाद्धि दाराणां क्षयरोगी भविष्यसि ॥ ३ ॥ उद्वाहितानां पत्नीनां ये न कुर्व्वंति सेवनम् ॥ या निष्ठा जायते नॄणां तां शृणुष्व नराधिप ॥ ४ ॥ ऋतावृतौ हि नारीणां सेवनाज्जायते सुतः ॥ सुतात्स्वर्गश्च मोक्षश्च इत्येवं श्रुतिभाषितम् ॥ ५ ॥ तत्कालोचितधर्मेण वेष्टितो रौरवे पतेत् ॥ तस्यास्तद्रुधिरं पापः पिबते कालमीप्सितम् ॥ ६ ॥ ततोऽवतीर्णः कालेन यांयां योनिं प्रयास्यति ॥ तस्यांतस्यां स दुष्टात्मा दुर्भगो जायते सदा ॥ ७ ॥ नारीणां तु सदा कामोऽभ्यधिकः पारिवर्त्तते ॥ विशेषेण ऋतौ काले पीड्यते कामसायकैः ॥ ८ ॥ परिभूता हि ता भर्त्रा ध्यायंतेऽन्यं पतिं स्त्रियः ॥ ततः पुत्रः समुत्पन्नो ह्यटते कुलमुत्तमम् ॥ ९ ॥ स्वर्गस्थास्तेन पितरः पूर्वजास्ते पितामहाः ॥ पतंति जातमात्रेण कुलटस्तेन चोच्यते ॥ १० ॥ तेन कर्मविपाकेन क्षयरोग्यभवच्छशी ॥ त्यक्त्वा लोकं सुरेंद्राणां मर्त्त्यलोकमुपागतः ॥ ११ ॥ ततस्तीर्थान्यनेकानि पुण्यान्यायतनानि च ॥ भ्रमन्वै नर्मदां प्राप्तः सर्वपापप्रणाशनीम् ॥ १२ ॥ उपवासं च दानानि व्रतानि नियमांस्तथा ॥ चचार द्वादशाब्दानि ततो मुक्तः स किल्बिषैः ॥ १३ ॥ स्नापयित्वा महादेवं सर्वपातकनाशनम् ॥ जगाम प्रभया पूर्णः स च लोकमनुत्तमम् ॥ १४ ॥ येनैव स्थापितो देवः पूज्यते वर्षसंख्यया ॥ तावद्वर्षसहस्राणि रुद्रलोके स पूज्यते ॥ १५ ॥ तेन देवान्विधानोक्तान्स्थापयंति नरा भुवि ॥ अक्षयं चाव्ययं यस्मात्कालं भुंजंति मानवाः ॥ १६ ॥ सोमतीर्थे नरः स्नात्वा पूजयेद्देवमीश्वरम् ॥ स भ्राजते नरो लोके सोमवत्प्रियदर्शनः ॥ १७ ॥ चंद्रहासे तु यो गत्वा ग्रहणे चंद्रसूर्ययोः ॥ स्नानं समाचरेद्भक्त्या मुच्यते सर्वकिल्बिषैः ॥ १८ ॥ तत्र स्नानं च दानं च चंद्रहासे शुभाऽशुभम् ॥ कृतं नृपवरश्रेष्ठ सर्वं भवति चाक्षयम् ॥१९॥ ते धन्यास्ते महात्मानस्तेषां जन्म सुजीवितम् ॥ चन्द्रहासे तु ये स्नात्वा पश्यंति ग्रहणं नराः ॥ २० ॥ वाचिकं मानसं पापं कर्मजं यत्पुराकृतम् ॥ स्नानमात्रेण राजेंद्र तत्र तीर्थे प्रणश्यति ॥ २१ ॥ बहवस्तं न जानंति महामोहसमन्विताः ॥ देहस्थमिव सर्वेषां परमानंदरूपिणम् ॥ २२ ॥ पश्चिमे सागरे गत्वा सोमतीर्थे तु यत्फलम् ॥ तत्समग्रमवाप्नोति चन्द्रहासे न संशयः ॥ २३ ॥ संक्रांतौ च व्यतीपाते अयने विषुवे तथा ॥ चन्द्रहासे नरः स्नात्वा सर्वपापैः प्रमुच्यते ॥ २४ ॥ ते मूढास्ते दुराचारास्तेषां जन्म निरर्थकम् ॥ चंद्रहासं न जानंति ये रेवायां व्यवस्थितम् ॥ २५ ॥ चंद्रहासे तु यः कश्चित्सं



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



न्यासं कुरुते द्विजः ॥ अनिवर्त्तिका गतिस्तस्य सोमलोकान्न संशयः ॥ २६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम
आवन्त्यखण्डे रेवाखण्डे सोमतीर्थमाहात्म्यवर्णनंनामैकविंशत्युत्तरशततमोऽध्यायः ॥ १२१ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो
गच्छेन्महीपाल कोहनस्वेति विश्रुतम् ॥ सर्वपापहरं पुण्यं तीर्थं मृत्युविनाशनम् ॥ १ ॥ पुरा तत्र द्विजः कश्चिद्वेदवेदांगपारगः ॥ पत्नीपुत्रसुहृद्वर्गैः
स्वकर्मनिरतोऽवसत् ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ ब्राह्मणस्य तु यत्कर्म उत्पत्तिः क्षत्रियस्य तु ॥ वैश्यस्याऽपि च शूद्रस्य तत्सर्वं कथयस्व
मे ॥ ३ ॥ धर्मस्याऽर्थस्य कामस्य मोक्षस्य च परं विधिम् ॥ निखिलं ज्ञातुमिच्छामि नान्यो वेत्ता मतिर्मम ॥ ४ ॥ ॥ मार्कंडेय उवाच ॥ ॥
उत्पत्तिकारणं ब्रह्मा देवदेवः प्रकीर्त्तितः ॥ प्रथमं सर्वभूतानां चराचरजगद्गुरुः ॥ ५ ॥ द्विजातयो मुखाज्जाताः क्षत्रिया बाहुयंत्रतः ॥ ऊरुप्रदेशाद्वै
श्यास्तु शूद्राः पादेष्वथाऽभवन् ॥ ६ ॥ ततस्त्वन्ये पृथग्वर्णाः पृथग्धर्मान्समाचरन् ॥ पर्यायेण समुत्पन्ना ह्यनुलोमविलोमतः ॥ ७ ॥ तेषां धर्मं
प्रवक्ष्यामि श्रुतिस्मृत्यर्थचोदितम् ॥ येन सम्यक्कृतेनैव सर्वे यांति परां गतिम् ॥ ८ ॥ गतिर्ध्यानं विना भक्तैर्ब्राह्मणैः प्राप्यते नृप ॥ अध्याप
यन्यतो वेदान्वेदं वाऽपि यथाविधि ॥ ९ ॥ कुलजां रूपसंपन्नां सर्वलक्षणलक्षिताम् ॥ उद्वाहयेत्ततः पत्नीं गुरुणाऽनुमते तदा ॥ १० ॥ ततः स्मार्त्तं
विवाहाग्निं श्रौतं वा पूजयेत्क्रमात् ॥ प्रतिग्रहधनो भूत्वा दंभलोभविवर्जितः ॥ ११ ॥ पंचयज्ञविधानानि कारयेद्वै यथाविधि ॥ वनं गच्छेत्ततः
पश्चाद्द्वितीयाश्रमसेवनात् ॥१२॥ पुत्रेषु भार्यां निक्षिप्य सर्वसंगविवर्जितः ॥ इष्टाँल्लोकानवाप्नोति न चेह जायते पुनः ॥ १३ ॥ क्षत्रियस्तु स्थितो
राज्ये पालयित्वा वसुन्धराम् ॥ शश्वद्धर्ममनाश्चैव प्राप्नोति परमां गतिम् ॥ १४ ॥ वैश्यधर्मो न संदेहः कृषिगोरक्षणे रतः ॥ सत्यशौचसमो
पेतो गच्छते स्वर्गमुत्तमम् ॥ १५ ॥ न शूद्रस्य पृथग्धर्मो विहितः परमेष्ठिना ॥ न मन्त्रो न च संस्कारो न विद्यापरिसेवनम् ॥ १६ ॥ न शब्द
विद्यासमयो देवताभ्यर्चनानि च ॥ यथा जातेन सततं वर्त्तितव्यमहर्निशम् ॥ १७ ॥ स धर्मः सर्ववर्णानां पुरा सृष्टः स्वयंभुवा ॥ मन्त्रसंस्कारसंप
न्नास्त्रयो वर्णा द्विजातयः ॥ १८ ॥ तेषां मतमनादृत्य यदि वर्त्तेत कामतः ॥ स मृतो जायते श्वा वै गतिरूर्ध्वा न विद्यते ॥ १९ ॥ न तेषां प्रेषणं
॥ ९७ ॥ नित्यं तेषां मतमनुस्मरन् ॥ यशोभागी स्वधर्मस्थः स्वर्गभागी स जायते ॥ २० ॥ एवं गुणगणाकीर्णोऽवसद्विप्रः स भारत ॥ हनस्वेतिहन ॥२७१॥
स्वेति शृणोति वाक्यमीदृशम् ॥ २१ ॥ ततो निरीक्षते चोर्ध्वमधश्चैव दिशो दश ॥ वेपमानः स भीतश्च प्रस्खलंश्च पदेपदे ॥ २२ ॥ शृंखलायुध
हस्तैश्च पाशैश्चैव सुदारुणैः ॥ वेष्टितं महिषारूढं नरं पश्यति सन्मुखम् ॥ २३ ॥ कृष्णांजनचयप्रख्यं कृष्णांबरविभूषितम् ॥ रक्ताक्षमायतभुजं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वलक्षणलक्षितम् ॥ २४ ॥ दृष्ट्वा तं तु समायांतं निरीक्ष्यात्मानमात्मना ॥ जपञ्जाप्यं च परमं शतरुद्रीयसंस्तवम् ॥ २५ ॥ ततः प्रोवाच भगवान्यमः संयमनो महान् ॥ शृणु वाक्यमतो ब्रह्मन्यमोऽहं सर्वजन्तुषु ॥ २६ ॥ संहरस्व महाभाग रुद्रजाप्यं सुदुर्भिदम् ॥ येनाहं काल पाशैस्त्वां संयमामि गतव्यथः ॥ २७ ॥ तच्छुत्वा निष्ठुरं वाक्यं यमस्य मुखनिर्गतम् ॥ महाभयसमोपेतो ब्राह्मणः प्रपलायितः ॥ २८ ॥ तस्य मार्गे गताः सर्वे यमेन सह किंकराः ॥ तिष्ठतिष्ठेति तं विप्रमूचुस्ते सोऽप्यधावत ॥ २९ ॥ त्वरमाणः परिश्रांतो हा हतोऽहं दुरात्मभिः ॥ रक्षरक्ष महादेव शरणागतवत्सल ॥ ३० ॥ एवमुक्त्वाऽपतद्भूमौ लिंगमालिंग्य भारत ॥ गतसत्त्वः स विप्रेंद्रः समाश्रित्य सुरेश्वरम् ॥ ३१ ॥ तं दृष्ट्वा पतितं भूमौ देवदेवो महेश्वरः ॥ को हनिष्यति माभैस्त्वं हुंकारमकरोत्तदा ॥ ३२ ॥ तेन ते किंकराः सर्वे यमेन सह भारत ॥ हुं कारेण गताः सर्वे मेघा वातहता यथा ॥ ३३ ॥ तदाप्रभृति तत्तीर्थं कोहनस्वेति विश्रुतम् ॥ सर्वपापहरं पुण्यं सर्वतीर्थेष्वनुत्तमम् ॥ ३४ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरम् ॥ अग्निष्टोमस्य यज्ञस्य फलमाप्नोत्यनुत्तमम् ॥ ३५ ॥ तत्र तीर्थे तु राजेंद्र प्राणत्यागं करोति यः ॥ न पश्यति यमं देवमित्येवं शंकरोऽब्रवीत् ॥ ३६ ॥ अग्निप्रवेशं यः कुर्याज्जले वा नृपसत्तम ॥ अग्निलोके वसेत्तावद्यावत्कल्पशतत्रयम् ॥ ३७ ॥ एवं वरुणलोकेऽपि वसित्वा कालमीप्सितम् ॥ इह लोकमनुप्राप्तो महाधनपतिर्भवेत् ॥ ३८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे कोहनतीर्थमाहात्म्यवर्णनंनाम द्वाविंशत्युत्तरशततमोऽध्यायः ॥ १२२ ॥ ॥ छ ॥ ॥ ॥ ॥ मार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र कर्मदीतीर्थमुत्तमम् ॥ यत्र तिष्ठति विघ्नेशो गणनाथो महाबलः ॥ १ ॥ तत्र तीर्थे नरः स्नात्वा चतुर्थ्यां वा ह्युपोषितः ॥ विघ्नं न विद्यते तस्य सप्तजन्मनि भारत ॥ २ ॥ तत्र तीर्थे हि यत्किंचिद्दीयते नृपसत्तम ॥ तदक्षयफलं सर्वं जायते नाऽत्र संशयः ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे कर्मदेश्वरतीर्थमाहत्म्यंवर्णनंनाम त्रयो विंशत्युत्तरशततमोऽध्यायः ॥ १२३ ॥ ॥ छ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल नर्मदेश्वरमुत्तमम् ॥ तत्र तीर्थे नरः स्नात्वा मुच्यते सर्वकिल्बिषैः ॥ १ ॥ अग्निप्रवेशश्च जलेऽथवा मृत्युरनाशके ॥ अनिवर्त्तिका गतिस्तस्य यथा मे शंकरोऽब्रवीत् ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखंडे नर्मदेश्वरतीर्थमाहात्म्यवर्णनं नाम चतुर्विंशत्युत्तरशत तमोऽध्यायः॥ १२४ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल रवितीर्थमनुत्तमम् ॥ यत्र देवः सहस्रांशुस्तपस्तप्त्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



दिवं गतः ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथं देवो जगद्धाता सर्वदेवनमस्कृतः ॥ तपस्तपति देदेशस्तापसो भास्करो रविः ॥२॥ आराध्यः सर्वभू
तानां सर्वदेवैश्च पूजितः ॥ प्रत्यक्षो दृश्यते लोके सृष्टिसंहारकारकः ॥३॥ आदित्यत्वं कथं प्राप्तः कथं भास्कर उच्यते ॥ सर्वमेतत्समासेन कथयस्व
ममाऽनघ ॥ ४ ॥ ॥ मार्कंडेय उवाच ॥ ॥ महाप्रश्नो महाराज यस्त्वया परिपृच्छितः ॥ तत्सर्वं संप्रवक्ष्यामि नमस्कृत्य स्वयंभुवम् ॥ ५ ॥
आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ॥ अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ॥ ६ ॥ ततस्तेजश्च दिव्यं च तप्तपिंडमनुत्तमम् ॥ आकाशात्तु यथैवो
ल्कासृष्टिहेतोरधोमुखी ॥७॥ तत्तेजसोऽतः पुरुषः संजातः सर्वभूषितः ॥ स शिवोऽपाणिपादश्च येन सर्वमिदं ततम्॥ ८ ॥ तस्योत्पन्नस्य भूतस्य तेजो
रूपस्य भारत ॥ पश्चात्प्रजापतिर्भूयः कालः कालांतरेण वै ॥ ९ ॥ अग्निर्जातः स भूतानां मनुष्यासुररक्षसाम् ॥ सर्वदेवाधिदेवश्च आदित्यस्तेन
चोच्यते ॥१०॥ आदौ तस्य नमस्कारोन्येषां च तदनंतरम् ॥ क्रियते दैवतैः सर्वैस्तेन सर्वैर्महर्षिभिः ॥११॥ तिस्रः संध्यास्त्रयो देवाः सांनिध्याः[1]
सूर्यमण्डले ॥ नमस्कृतेन सूर्येण सर्वे देवा नमस्कृताः ॥ १२ ॥ न दिवा न भवेद्रात्रिः षण्मासा दक्षिणायनम् ॥ अयनं चोत्तरं चाऽपि भास्करेण
विना नृप ॥ १३ ॥ स्नानं दानं जपो होमः स्वाध्यायो देवतार्चनम् ॥ न वर्त्तते विना सूर्यं तेन पूज्यतमो रविः ॥ १४ ॥ शब्दगाः श्रुतिमुख्याश्च
ब्रह्मविष्णुमहेश्वराः ॥ प्रत्यक्षो भगवान्देवो दृश्यते लोकपावनः ॥ १५ ॥ उत्पत्तिः प्रलयस्थानं निधानं बीजमव्ययम् ॥ हेतुरेको जगन्नाथो नाऽन्यो
विद्येत भास्करात् ॥ १६ ॥ एवमात्मभवं कृत्वा जगत्स्थावरजंगमम् ॥ लोकानां तु हितार्थाय स्थापयेद्धर्मपद्धतिम् ॥ १७ ॥ नर्मदातटमाश्रित्य
स्थापयित्वाऽत्मनस्तनुम् ॥ सहस्रांशुं निधिं धाम्नां जगामाऽऽकाशमव्ययम् ॥ १८ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरम् ॥ सहस्रकिरणं
देवं नाममन्त्रविधानतः ॥ १९ ॥ तेन तप्तं हुतं तेन तेन सर्वमनुष्ठितम् ॥ तेन सम्यग्विधानेन संप्राप्तं परमं पदम् ॥ २० ॥ ते धन्यास्ते महात्मान
स्तेषां जन्म सुजीवितम् ॥ स्नात्वा ये नर्मदातोये देवं पश्यंति भास्करम् ॥ २१ ॥ तथा देवस्य राजेंद्र ये कुर्वंति प्रदक्षिणम् ॥ अनन्यभक्त्या
सततं त्रिरक्षरसमन्विताः[2] ॥ २२ ॥ तेन पूतशरीरास्ते मंत्रेण गतपातकाः ॥ यत्पुण्यं च भवेत्तेषां तदिहैकमनाः शृणु ॥ २३ ॥ ससमुद्रगुहा तेन
॥ ९८ ॥ सशैलवनकानना ॥ प्रदक्षिणीकृता सर्वा पृथिवी नाऽत्र संशयः ॥ २४ ॥ मंत्रमूलमिदं सर्वं त्रैलोक्यं सचराचरम् ॥ तेन मंत्रविहीनं तु कार्यं
लोके न सिद्ध्यति ॥ २५ ॥ यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः ॥ कार्यार्थं नैव सिद्ध्येत तथा कर्म ह्यमंत्रकम् ॥ २६ ॥ यथा ॥२७२॥

१ सांनिध्याः—कृतसंनिधाना—इत्यर्थः । २ त्रिः—त्रिवारम्—अक्षरसमन्विताः—मन्त्रजपकर्तारः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भस्महुतं पार्थ यथा तोयविवर्जितम् ॥ निष्फलं जायते दानं तथा मंत्रविवर्जितम् ॥ २७ ॥ काष्ठपाषाणलोष्टेषु मृन्मयेषु विशेषतः ॥ मंत्रेण लोके पूजां तु कुर्वन्ति न ह्यमंत्रतः ॥ २८ ॥ द्वादशाब्दान्नमस्काराद्भक्त्या यल्लभते फलम् ॥ मंत्रयुक्तनमस्कारात्सकृत्तल्लभते फलम् ॥ २९ ॥ संक्रांतौ च व्यतीपाते अयने विषुवे तथा ॥ नर्मदाया जले स्नात्वा यस्तु पूजयते रविम् ॥ ३० ॥ द्वादशाब्देन यात्पापमज्ञानज्ज्ञानसंचितम् ॥ तत्क्षणान्नश्यते सर्वं वह्निना तु तुषं यथा ॥ ३१ ॥ चन्द्रसूर्यग्रहे स्नात्वा सोपवासो जितेंद्रियः ॥ तत्रादित्यमुखं दृष्ट्वा मुच्यते सर्वकिल्बिषैः ॥ ॥ ३२ ॥ माघमासे तु संप्राप्ते सप्तम्यां नृपसत्तम ॥ सोपवासो जितक्रोध उषित्वा सूर्यमंदिरे ॥ ३३ ॥ प्रातः स्नात्वा विधानेन ददात्यर्घं दिवाकरे ॥ विधिना मंत्रयुक्तेन स लभेत्पुण्यमुत्तमम् ॥ ३४ ॥ पितृदेवमनुष्याणां कृत्वा ह्युदकतर्पणम् ॥ मंदिरे देवदेवस्य ततः पूजां समाचरेत् ॥ ३५ ॥ गंधैः पुष्पैस्तथा धूपैर्दीपनैवेद्यशोभनैः ॥ पूजयित्वा जगन्नाथं ततो मंत्रमुदीरयेत् ॥ ३६ ॥ विष्णुः शक्रो यमो धाता मित्रोऽथ वरुणस्तथा ॥ विवस्वान्सविता पूषा चंडांशुर्भर्ग एव च ॥ ३७ ॥ इति द्वादशनामानि जपन्कृत्वा प्रदक्षिणाम् ॥ यत्फलं लभते पार्थ तदिहैकमनाः शृणु ॥ ३८ ॥ दरिद्रो व्याधितो मूको बधिरो जड एव च ॥ न भवेत्सप्त जन्मानि इत्येवं शंकरोऽब्रवीत् ॥ ३९ ॥ एवं ज्ञात्वा विधानेन जपन्मंत्रं विचक्षणः ॥ आराधयेद्रविं भक्त्या य इच्छेत्पुण्यमुत्तमम् ॥ ४० ॥ मंत्रहीनां तु यः कुर्याद्भक्तिं देवस्य भारत ॥ स विडंबति चात्मानं पशुकीटपतंगवत् ॥ ४१ ॥ तत्र तीर्थे तु यः कश्चित्त्यजते देहमुत्तमम् ॥ स गतस्तत्र देवैस्तु पूज्यमानो महर्षिभिः ॥४२॥ स्वेच्छया सुचिरं कालमिह लोके नृपो भवेत् ॥ ४३ ॥ पुत्रपौत्रसमायुक्तो हस्त्यश्वरथसंकुलः ॥ दासीदासशतोपेतो जायते विपुले कुले ॥ ४४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखंडे रवितीर्थमाहत्म्यवर्णनंनाम पञ्चविंशत्युत्तरशततमोऽध्यायः ॥ १२५ ॥ ॥ छ ॥ ॥ मार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र परं तीर्थमयोनिजम् ॥ स्नातमात्रो नरस्तत्र न पश्येद्योनिसंकटम् ॥ १ ॥ तत्र तीर्थे नरः स्नात्वा पूजयेद्देवमीश्वरम् ॥ अयोनिजो महादेव यथा त्वं परमेश्वर ॥ २ ॥ तथा मोचय मां देव संभवाद्योनिसंकटात् ॥ गंधपुष्पादिधूपैश्च स मुच्येत्सर्वपातकैः ॥ ३ ॥ तस्य देवस्य यो भक्त्या कुरुते लिंगपूरणम् ॥ स वसेद्देवदेवस्य यावत्सिक्थस्य संख्यया ॥ ४ ॥ अयोनिजे महादेवं स्नापयेद्गंध

---

१ मूर्वः–इ० पा० । २ दध्योदनेन–इति सांप्रदायिकाचारस्मरणात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वारिणा ॥ मधुक्षीरेण दध्ना वा स लभेद्विपुलां श्रियम् ॥ ५ ॥ अष्टम्यां च सिते पक्षे असितां वा चतुर्दशीम् ॥ पूजयित्वा महादेवं प्रीणयेद्गीतवा
द्यकैः ॥ ६ ॥ वसेत्स च शिवे लोके ये कुर्वंति मनोहरम्[1] ॥ ते वसंति शिवे लोके यावदाभूतसंप्लवम् ॥ ७ ॥ तस्य देवस्य भक्त्या तु यः करोति
प्रदक्षिणाम् ॥ विज्ञापयंश्च सततं मंत्रेणानेन[2] भारत ॥ ८ ॥ तस्य यत्फलमुद्दिष्टं पारंपर्येण मानवैः ॥ सकाशाद्देवदेवस्य तच्छृणुष्व समाधिना ॥ ९ ॥
अयोनिजो महादेव यथा त्वं परमेश्वर ॥ तथा मोचय मां शर्व संभवाद्योनिसंकटात् ॥ १० ॥ किं तस्य बहुभिर्मंत्रैः कंठशोषणतत्परैः ॥ येनों
नमः शिवायेति प्रोक्तं देवस्य सन्निधौ ॥ ११ ॥ तेनाऽधीतं श्रुतं तेन तेन सर्वमनुष्ठितम् ॥ येनोंनमः शिवायेति मंत्राभ्यासः स्थिरीकृतः ॥ १२ ॥
न तत्फलमवाप्नोति सर्वदेवेषु वै द्विजः ॥ यत्फलं समवाप्नोति षडक्षर उदीरणात्[3] ॥ १३ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेच्छिवयोगिनम् ॥ द्विजा
नामयुतं साग्रं स लभेत्फलमुत्तमम् ॥ १४ ॥ अथवा भक्तियुक्तस्तु तेषां दांते जितेंद्रिये ॥ संस्कृत्य ददते भिक्षां फलं तस्य ततोधिकम् ॥ १५ ॥
यतिहस्ते जलं दद्याद्भिक्षां दत्त्वा पुनर्जलम् ॥ सा भिक्षा मेरुणा तुल्या तज्जलं सागरोपमम् ॥ १६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाह
स्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे अयोनिप्रभवतीर्थमाहात्म्यवर्णनंनाम षड्विंशत्युत्तरशततमोऽध्यायः ॥ १२६ ॥ ॥ छ ॥ ॥
मार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र अग्नितीर्थमनुत्तमम् ॥ तत्र स्नात्वा तु पक्षादौ मुच्यते सर्वकिल्बिषैः ॥ १ ॥ तत्र तीर्थे तु यः कन्यां
दद्यात्स्वयमलंकृताम् ॥ तस्य यत्फलमुद्दिष्टं तच्छृणुष्व नरोत्तम ॥ २ ॥ अग्निष्टोमातिरात्राभ्यां शतं शतगुणीकृतम् ॥ प्राप्नोति पुरुषो दत्त्वा यथा
शक्त्या ह्यलंकृताम् ॥ ३ ॥ तस्याः पुत्रप्रपौत्राणां या भवेद्रोमसंगतिः ॥ स याति तेन[4] मानेन शिवलोके परां गतिम् ॥ ४ ॥ इति श्रीस्कांदे महा
पुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखंडे अग्नितीर्थमाहात्म्यवर्णनंनाम सप्तविंशत्युत्तरशततमोऽध्यायः ॥ १२७ ॥
॥ छ ॥ ॥ मार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र भृकुटेश्वरमुत्तमम् ॥ यत्र सिद्धो महाभागो भृगुः परमकोपनः ॥ १ ॥
तेन वर्षशतं साग्रं तपश्चीर्णं पुराऽनघ ॥ पुत्रार्थं वरयामास पुत्रं पुत्रवतां वरः ॥ २ ॥ वरो दत्तो महाभाग देवेनांधकघातिना ॥
तत्र तीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरम् ॥ ३ ॥ अग्निष्टोमस्य यज्ञस्य फलमष्टगुणं लभेत् ॥ भृकुटेशं तु यः कश्चिद्घृतेन मधुना

१ मनोहरम्--लीलाचरित्राद्युत्सवम्--इत्यर्थोऽनुमानाद्भाति । २ अनेन--अयोनिज महादेव इत्यादिना वक्ष्यमाणेन--इत्यर्थः । ३ असन्धिरत्रार्षः। ४ तेन मानेन तल्लोमपरिमितवर्षप्रमाणेन--इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सह ॥ ४ ॥ पुत्रार्थी स्नापयेद्भक्त्या स लभेत्पुत्रमीप्सितम् ॥ तत्र तीर्थे तु यः स्नात्वा दद्याद्विप्राय कांचनम् ॥ ५ ॥ गोदानं वा महीं वाऽपि तस्य पुण्यफलं शृणु ॥ ६ ॥ ससमुद्रगुहा तेन सशैलवनकानना ॥ दत्ता पृथ्वी न संदेहस्तेन सर्वा नृपोत्तम ॥ ७ ॥ तेन दानेन स स्वर्गे क्रीडयित्वा यथासुखम् ॥ मर्त्ये भवति राजेंद्रो ब्राह्मणो वा सुपूजितः ॥ ८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे भृकुटेश्वरतीर्थमाहात्म्यवर्णनंनामाष्टाविंशत्युत्तरशततमोऽध्यायः ॥ १२८ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल ब्रह्मतीर्थमनुत्तमम् ॥ अन्येषां चैव तीर्थानां परात्परतरं महत् ॥ १ ॥ तत्र तीर्थे सुरश्रेष्ठो ब्रह्मा लोकपितामहः ॥ चतुर्णामपि वर्णानां नर्मदातटमाश्रितः ॥ २ ॥ वाचिकं मानसं पापं कर्मजं यत्पुराकृतम् ॥ तत्क्षालयति देवेशो दर्शनादेव पातकम् ॥ ३ ॥ श्रुतिस्मृत्युदितान्येव तत्र स्नात्वा द्विजर्षभाः ॥ प्रायश्चित्तानि कुर्वंति तेषां वासस्त्रिविष्टपे ॥ ४ ॥ ये पुनः शास्त्रमुत्सृज्य कामलोभप्रपीडिताः ॥ प्रायश्चित्तं वदिष्यंति ते वै निरयगामिनः ॥ ५ ॥ स्नात्वाऽदौ पातकी ब्रह्मन्नत्वा तु कीर्त्तयेदघम् ॥ तस्य तन्नश्यते क्षिप्रं तमः सूर्योदये यथा ॥ ६ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्पितृदेवताः ॥ अग्निष्टोमस्य यज्ञस्य स लभेत्फलमुत्तमम् ॥ ७ ॥ तत्र तीर्थे तु यद्दानं ब्रह्मोद्दिश्य[1] प्रयच्छति ॥ तदक्षयफलं सर्वमित्येवं शंकरोऽब्रवीत् ॥ ८ ॥ गायत्रीसारमात्रोऽपि तत्र यः क्रियते जपः ॥ ऋग्यजुःसामसहितः स भवेन्नात्र संशयः ॥ ९ ॥ तत्र तीर्थे तु यो भक्त्या त्यजेद्देहं सुदुस्त्यजम् ॥ अनिवर्त्तिका गतिस्तस्य ब्रह्मलोकान्न संशयः ॥ १० ॥ यावदस्थीनि तिष्ठंति ब्रह्मतीर्थे च देहिनाम् ॥ तावद्वर्षसहस्राणि देवलोके महीयते ॥ ११ ॥ अवतीर्णस्ततो लोके ब्रह्मज्ञो जायते कुले ॥ उत्तमः सर्ववर्णानां देवानामिव देवता ॥ १२ ॥ विद्यास्थानानि सर्वाणि वेत्ति वेदांगपारगः ॥ जायते पूजितो लोके राजभिः स न संशयः ॥ १३ ॥ पुत्रपौत्रसमोपेतः सर्वव्याधिविवर्जितः ॥ जीवेद्वर्षशतं साग्रं ब्रह्मतीर्थप्रभावतः ॥ १४ ॥ एतत्पुण्यं पापहरं तीर्थं ज्ञानवतां वरम् ॥ ये पश्यंति महात्मानो ह्यमृतत्वं प्रयांति ते ॥ १५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे ब्रह्मतीर्थमाहात्म्यवर्णनंनामैकोनत्रिंशदधिकशततमोऽध्यायः ॥ ॥ १२९ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ नर्मदादक्षिणे कूले देवतीर्थमनुत्तमम् ॥ तत्र देवैः समागत्य तोषितः परमेश्वरः ॥ १ ॥

---

१ ब्र॰ ।द्दिश्य—ब्रह्मार्पणमस्तु—इत्युक्त्वा—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तत्र तीर्थे तु यः स्नात्वा कामक्रोधविवर्जितः ॥ स लभेन्नात्र संदेहो गोसहस्रफलं ध्रुवम् ॥ २ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहि
तायां पञ्चम आवन्त्यखण्डे रेवाखण्डे देवतीर्थमाहात्म्यवर्णनंनाम त्रिंदशदधिकशततमोऽध्यायः ॥ १३० ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय
उवाच ॥ ॥ नर्मदादक्षिणे कूले नागतीर्थमनुत्तमम् ॥ यत्र सिद्धा महानागा भये जाते ततो नृप ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ महाभयानां
लोकस्य नागानां द्विजसत्तम ॥ कथं जातं भयं तीव्रं येन ते तपसि स्थिताः ॥ २ ॥ भूतं भव्यं भविष्यच्च यत्सुरासुरमानवे ॥ तात ते विदितं सर्वं
तेन मे कौतुकं महत् ॥ ३ ॥ मम संतापजं दुःखं दुर्योधनसमुद्भवम् ॥ तव वक्त्रांबुजोत्थेन प्लावितं निर्वृतिं गतम् ॥ ४ ॥ श्रुत्वा तव मुखोद्गीतां कथां
पापप्रणाशनीम् ॥ भूयोभूयः स्मृतिर्जाता श्रवणे मम सुव्रत ॥ ५ ॥ न क्लेशत्वं द्विजे युक्तं न चान्यो जानते फलम् ॥ विद्यादानस्य महतः श्रावित
स्य सुतस्य च ॥ ६ ॥ एवं ज्ञात्वा यथान्यायं यः प्रश्नःपृच्छितो मया ॥ कथा तु कथ्यतां विप्र दयां कृत्वा ममोपरि ॥ ७ ॥ ॥ मार्कंडेय उवाच ॥
यथायथा त्वं नृप भाषसे च तथा तथा मे सुखमेति भारती ॥ शैथिल्यभावाज्जरयाऽन्वितस्य त्वत्सौहृदं नश्यति नैव तात ॥ ८ ॥ कथयामियथा
वृत्तमितिहासं पुरातनम् ॥ कथितं पूर्वतो वृद्धैः पारंपर्येण भारत ॥ ९ ॥ द्वे भार्ये कश्यपस्याऽऽस्तां सर्वलोकेष्वनुत्तमे ॥ गरुत्मतो वै विनता सर्पाणां
कद्रुरेव च ॥ १० ॥ अश्वसंदर्शनात्ताभ्यां कलिरूपं व्यवस्थितम् ॥ प्रभातकाले राजेंद्र भास्कराकारवर्चसम् ॥ ११ ॥ तं दृष्ट्वा विनता
रूपमश्वं सर्वत्र पांडुरम् ॥ अथ तां कद्रूमवोचत्सा पश्य पश्य वरानने ॥ १२ ॥ उच्चैःश्रवसः सादृश्यं पश्य सर्वत्र पांडुरम् ॥ धाव
मानमविश्रांतं जवेन पवनोपमम् ॥ १३ ॥ तं दृष्ट्वा सहसा यांतमीर्ष्याभावेन मोहिता ॥ कृष्णं मत्वा तथाऽजल्पत्तया सह नृपो
त्तम ॥ १४ ॥ विनते त्वं मृषा लोके नृशंसे कुलपांसनि ॥ कृष्णं चैनं वद श्वेतं नरकं यास्यसे परम् ॥ १५ ॥ ॥ विनतोवाच ॥
सत्याऽनृते तु वचने पणोऽयं ते ममैव तु ॥ सहस्रं वत्सरान्दासी भवेयं तव वेश्मनि ॥ १६ ॥ तथेति ते प्रतिज्ञाय रात्रौ गत्वा स्वकं गृहम् ॥ परि
त्यज्य उभे ते तु क्रोधमूर्छितमूर्छिते ॥ १७ ॥ बन्धुगर्वस्य गत्वा तु कथयामास तं पणम् ॥ कद्रूर्विनतया सार्द्धं यद्वृत्तं प्रमदालये ॥ १८ ॥
॥१००॥ तच्छ्रुत्वा बांधवाः सर्वे कद्रूपुत्रास्तथैव च ॥ न मन्यंते हितं कार्यं कृतं मात्रा विगर्हितम् ॥ १९ ॥ अकृष्णः कृष्णतामंब कथं गच्छेद्धयोत्तमः ॥

१ एतदध्यायकथाभागः पूर्वे-प्रोक्त एव-पुनरत्रोच्यते-पूर्वत्र-वासुकिचरित्रम्-अत्र च सर्वनागचरित्रमस्ति-किंचित्पद्यरचनायां विशेषश्चास्ति कद्रूविनताचरितं तूभयत्र समानम्। २ माता-इति शेषः। ३ अत्रापि-माता-इत्येवाधारः। ४ वदसि चेत्-इत्यध्याहारः।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दासत्वं प्राप्स्यसे त्वं हि पणेनाऽनेन सुव्रते ॥ २० ॥ ॥ कद्रूरुवाच ॥ ॥ भवेयं न यथादासी तत्कुरुध्वं हि सत्वरम् ॥ विशध्वं रोमकूपेषु तस्याश्वस्य मतिर्मम ॥ २१ ॥ क्षणमात्रं कृते कार्ये सा दासी च भवेन्मम ॥ ततः स्वस्थोरगाः सर्वे भविष्यथ यथासुखम् ॥ २२ ॥ ॥ सर्पा ऊचुः ॥ ॥ यथा त्वं जननी देवि पन्नगानां मता भुवि ॥ तथाऽपि सा विशेषेण वंचितव्या न कर्हिचित् ॥ २३ ॥ ॥ कद्रूरुवाच ॥ ॥ मम वाक्यमकुर्वाणा ये केचिद्भुवि पन्नगाः ॥ हव्यवाहमुखं सर्वे ते यास्यंत्यविचारिताः ॥ २४ ॥ एतच्छ्रुत्वा तु वचनं घोरं मातृमुखोद्भवम् ॥ केचित्प्रविष्टा रोमाणि तथाऽन्ये गिरिसंस्थिताः ॥ २५ ॥ केचित्प्रविष्टा जाह्नव्यामन्ये च तपसि स्थिताः ॥ २६ ॥ ततो वर्षसहस्रांते तुतोष परमेश्वरः ॥ महादेवो जगद्धाता ह्युवाच परया गिरा ॥ २७ ॥ भो भोः सर्पा निवर्त्तध्वं तपसोऽस्य महत्फलम् ॥ यमिच्छथ ददाम्यद्य नाऽत्र कार्या विचारणा ॥ २८ ॥ ॥ सर्पा ऊचुः ॥ ॥ कद्रूशापभयाद्भीता देवदेव महेश्वर ॥ तव पार्श्वे वसिष्यामो यावदाभूतसंप्लवम् ॥ २९ ॥ ॥ देवदेव उवाच ॥ ॥ एकश्चायं महाबाहुर्वासुकिर्भुजगोत्तमः ॥ मम पार्श्वे वसेन्नित्यं सर्वेषां भयरक्षकः ॥ ३० ॥ अन्येषां चैव सर्पाणां भयं नाऽस्ति ममाऽज्ञया ॥ आप्लुत्य नर्मदातोये भुजगास्ते च रक्षिताः ॥ ३१ ॥ नास्ति मृत्युभयं तेषां वसध्वं यत्र चेप्सितम् ॥ कद्रूशापभयं नाऽस्ति ह्येष मे विस्तरः परः ॥ ३२ ॥ एवं दत्त्वा वरं तेषां देवदेवो महेश्वरः ॥ जगामाऽऽकाशमाविश्य कैलासं धरणीधरम् ॥ ३३ ॥ गते चादर्शनं देवे वासुकिप्रमुखा नृप ॥ स्थापयित्वा तथा जग्मुर्देवदेवं महेश्वरम् ॥ ३४ ॥ तत्र तीर्थे तु यः कश्चित्पंचम्यामर्चयेच्छिवम् ॥ तस्य नागकुलान्यष्टौ न हिंसंति कदाचन ॥ ३५ ॥ मृतः कालेन महता तत्र तीर्थे नरेश्वर ॥ शिवस्यानुचरो भूत्वा वसते कालमीप्सितम् ॥ ३६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे नागेश्वरतीर्थमाहात्म्यवर्णनं नामैकत्रिंशदधिकशततमोऽध्यायः ॥ १३१ ॥ ॥ छ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र उत्तरे नर्मदातटे ॥ सर्वपापहरं तीर्थं वाराहंनाम नामतः ॥ १ ॥ तत्र देवो जगद्धाता वाराहं रूपमास्थितः ॥ स्थितो लोकहितार्थाय संसारार्णवतारकः ॥ २ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेद्धरणीधरम् ॥ गंधमाल्यविशेषैश्च जयशब्दादिमंगलैः ॥ ३ ॥ उपवासपरो भूत्वा द्वादश्यां नृपसत्तम ॥ वृषलाः पापकर्माणस्तथैवांधपिशाचिनः ॥ ४ ॥ आलापाद्गात्रसंपर्कान्निःश्वासात्सहभोजनात् ॥ पापं संक्रमते यस्मात्तस्मात्तान्परिवर्जयेत् ॥ ५ ॥ ब्राह्मणान्पूजयेद्भक्त्या यथाशक्त्या यथाविधि ॥ रात्रौ जागरणं कार्यं कथायां तत्र भारत ॥ ६ ॥ प्रभाते विमले स्नात्वा तत्र तीर्थे जगद्गुरुम् ॥ ये पश्यंति जितक्रोधास्ते मुक्ताः सर्वपातकैः ॥ ७ ॥ यथा तु दृष्ट्वा भुजगाः सुपर्णं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





नश्यंति मुक्ता विषमुग्रतेजः ॥ नश्यंति पापानि तथैव शीघ्रं दृष्ट्वा मुखं शूकररूपिणस्तु ॥८॥ नभोगतं नश्यति चांधकारं दृष्ट्वा रविं देववरं तथैव ॥
नश्यंति पापानि सुदुस्तराणि दृष्ट्वा मुखं पार्थ धराधरस्य ॥ ९ ॥ किं तस्य बहुभिर्मंत्रैर्भक्तिर्यस्य जनार्दने ॥ नमो नारायणायेति मंत्रः सर्वार्थसा
धकः ॥ १० ॥ एकोऽपि कृष्णस्य कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः ॥ दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय ॥ ११ ॥
ध्यायमाना महात्मानो रूपं नारायणं हरेः ॥ ये त्यजंति स्वकं देहं तत्र तीर्थे जितेंद्रियाः ॥ १२ ॥ ते गच्छन्त्यमलं स्थानं यत्सुरैरपि दुर्लभम् ॥
क्षराक्षरविनिर्मुक्तं तद्विष्णोः परमं पदम् ॥ १३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवा
खण्डे आदिवाराहतीर्थमाहात्म्यवर्णनंनाम द्वात्रिंशदधिकशततमोऽध्यायः ॥ १३२ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥
ततो गच्छेन्महीपाल परं तीर्थचतुष्टयम् ॥ येषां दर्शनमात्रेण सर्वपापक्षयो भवेत् ॥ १ ॥ कौबेरं वारुणं याम्यं वायव्यं तु ततः परम् ॥
यत्र सिद्धा महाप्राज्ञा लोकपाला महाबलाः ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ किमर्थं लोकपालैश्च तपश्चीर्णं पुराऽनघ ॥ नर्मदातटमाश्रित्य
ह्येतन्मे वक्तुमर्हसि ॥ ३ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ अधिष्ठानं समिच्छन्ति ह्यचलं निर्बले सति ॥ संसारे सर्वभूतानां तृणबिन्दुवदस्थिरे ॥
॥ ४ ॥ कदलीसारनिःसारे मृगतृष्णेव चंचले ॥ स्थावरे जंगमे सर्वे भूतग्रामे चतुर्विधे ॥ ५ ॥ धर्मो माता पिता धर्मो धर्मो बन्धुः सुहृत्तथा ॥
आधारः सर्वभूतानां त्रैलोक्ये सचराचरे ॥ ६ ॥ एवं ज्ञात्वा तु ते सर्वे लोकपालाः कृतक्षणाः ॥ तपस्ते चक्रुरतुलं मारुताहारतत्पराः ॥ ७ ॥ तत
स्तुष्टो महादेवः कृतस्यार्द्धे गते तदा ॥ अनुरूपेण राजेंद्र युगस्य परमेश्वरः॥ ८ ॥ वरेण च्छंदयामास लोकपालान्महाबलान् ॥ यो यमिच्छति कामं
वै तंतं तस्य ददाम्यहम् ॥ ९ ॥ एतच्छ्रुत्वा वचस्तस्य लोकपाला जगद्धिताः ॥ वरदं प्रार्थयामासुर्देवं वरमनुत्तमम् ॥ १० ॥ ॥ कुबेर उवाच ॥ ॥
यदि तुष्टो महादेव यदि देयो वरो मम ॥ यक्षाणामीश्वरश्चाहं भवामि धनदस्त्विति ॥ ११ ॥ ततः प्रोवाच देवेशं यमः संयमने रतः ॥ तत्र प्रधानो
भगवान्भवेयं सर्वजंतुषु ॥ १२ ॥ वरुणोऽनंतरं प्राह प्रणम्य तु महेश्वरम् ॥ क्रीडेयं वारुणे लोके यादोगणसमन्वितः ॥ १३ ॥ जगादाऽऽशु ततो
वायुः प्रणम्य तु महेश्वरम् ॥ व्यापकत्वं त्रिलोकेषु प्रार्थयामास भारत ॥ १४ ॥ तेषां यदीप्सितं काममुमया सह शंकरः ॥ सर्वेषां लोकपालानः
दत्त्वा चादर्शनं गतः ॥ १५ ॥ गते महेश्वरे देवे यथास्थानं तु ते स्थिताः ॥ स्थापना च कृता सर्वैः स्वनाम्नैव पृथक्पृथक् ॥ १६ ॥ कुबेरश्च
कुबेरेशं यमश्चैव यमेश्वरम् ॥ वरुणो वरुणेशं तु वातो वातेश्वरं नृप ॥१७॥ तर्पणं विदधुः सर्व्वे मंत्रैश्च विविधैः शुभैः ॥ सर्वे सर्वेश्वरं देव पूजयित्वा



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथाविधि ॥ १८ ॥ आह्वयामासुस्तान्विप्रान्सर्वे सर्वेश्वराइव ॥ क्षांतदांतजितक्रोधान्सर्वभूताभयप्रदान् ॥ १९ ॥ वेदविद्याव्रतस्नातान्सर्वशास्त्रविशारदान् ॥ ऋग्यजुःसामसंयुक्तांस्तथाऽथर्व्वविभूषितान् ॥ २० ॥ चातुर्विध्यं तु सर्वेषां दानं दास्याम गृह्णत ॥ एवमुक्त्वा तु सर्व्वेषां विप्राणां दानमुत्तमम् ॥ २१ ॥ तत्र स्थाने ददुस्तेषां भूमिदानमनुत्तमम् ॥ यावच्चंद्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी ॥ २२ ॥ तावद्दानं तु युष्माकं परिपंथी न कश्चन ॥ राजा वा राजतुल्यो वा लोकपालैरनुत्तमम् ॥ २३ ॥ दत्तं लोपयते मूढः श्रूयतां तस्य यो विधिः ॥ शोषयेद्धनदो वित्तं तस्य पापस्य भारत ॥ २४ ॥ शरीरं वरुणो देवः संततीं श्वसनस्तथा ॥ आयुर्न्नयति तस्याऽऽशु यमः संयमनो महान् ॥ २५ ॥ निःशेषं भस्मसात्कृत्वा हुतभुग्याति भारत ॥ तस्मात्सर्वप्रयत्नेन ब्राह्मणेभ्यो युधिष्ठिर ॥ भक्तिः कार्या नृपैः सर्वैरिच्छद्भिः श्रेय आत्मनः ॥ २६ ॥ राजा वृक्षो ब्राह्मणास्तस्य मूलं भृत्याः पर्णा मंत्रिणस्तस्य शाखाः ॥ तस्मान्मूलं यत्नतो रक्षणीयं मूले गुप्ते नास्ति वृक्षस्य नाशः ॥ २७ ॥ षष्टिवर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ॥ आच्छेत्ता चाऽवमंता च तान्येव[1] नरके वसेत् ॥ २८ ॥ स्वदत्ता परदत्ता वा पालनीया वसुन्धरा ॥ यस्ययस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥ २९ ॥ देवताज्ञामनुस्मृत्य राजानो येऽपि तां नृप ॥ पालयिष्यंति सततं तेषां वासस्त्रिविष्टपे ॥ ३० ॥ स्वदत्ता परदता वा यत्नाद्रक्ष्या युधिष्ठिर ॥ मही महीक्षिता नित्यं दानाच्छ्रेयोऽनुपालनम् ॥ ३१ ॥ आयुर्यशो बलं वित्तं संततिश्चाऽक्षया नृप ॥ तेषां भविष्यते नूनं ये प्रजापालने रताः ॥ ३२ ॥ एवमुक्त्वा तु तान्सर्वांल्लोकपालान्द्विजोत्तमान् ॥ पूजयित्वा विधानेन प्रणिपत्य व्यसर्जयन् ॥ ३३ ॥ गतेषु विप्रमुख्येषु स्नात्वा हुतहुताशनाः ॥ लोकपालाः क्षुधाविष्टाः पर्यटन्भैक्षमात्मनः ॥ ३४ ॥ अस्थिचर्मावशेषांगाः कपालोद्धृतपाणयः ॥ अलब्धग्रासमर्द्धार्थं निर्ययुर्नगराद्बहिः ॥ ३५ ॥ शापं दत्त्वा तदा क्रोधाद्ब्राह्मणाय युधिष्ठिर ॥ दरिद्राः सततं मूर्खा भवेयुश्च ययुर्गृहान् ॥ ३६ ॥ तदाप्रभृति ते सर्वे ब्राह्मणा धनवर्जिताः ॥ शापदोषेण कौबेर्यां संजाता दुःखभाजनाः ॥ ३७ ॥ न धनं पैतृकं पुत्रैर्न पिता पुत्रपौत्रिकम् ॥ भुञ्जते सकलं कालमित्येवं शंकरोऽब्रवीत् ॥ ३८ ॥ कुबेरेशे नरः स्नात्वा यस्तु पूजयते शिवम् ॥ गंधधूपनमस्कारैः सोऽश्वमेधफलं लभेत् ॥ ३९ ॥ यमतीर्थे तु यः स्नात्वा संपश्यति यमेश्वरम् ॥ सर्वपापैः प्रमुच्येत सप्तजन्मांतरार्जितैः ॥ ४० ॥ पूर्णमास्याममावास्यां स्नात्वा तु पितृतर्पणम् ॥ यः करोति तिलैः स्नानं तस्य पुण्यफलं शृणु ॥ ४१ ॥ सुतृप्तास्तेन तोयेन पितरश्च पितामहाः ॥ स्वर्गस्था द्वादशाब्दानि क्रीडन्ति

१ तान्येव–षष्टिवर्षसहस्राणि–इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

प्रपितामहाः ॥ ४२ ॥ वरुणेशे नरः स्नात्वा ह्यर्चयित्वा महेश्वरम् ॥ वाजपेयस्य यज्ञस्य फलं प्राप्नोति पुष्कलम् ॥ ४३ ॥ मृतां कालेन महता लोके यत्र जलेश्वरः ॥ स गच्छेत्तत्र यानेन गीयमानोऽप्सरोगणैः ॥ ४४ ॥ वातेश्वरे नरः स्नात्वा संपूज्य च महेश्वरम् ॥ जायते कृतकृत्योऽसौ लोकपालानदेक्षयन् ॥ ४५ ॥ किं तस्य बहुभिर्यज्ञैर्दानैर्वा बहुदक्षिणैः ॥ स्नात्वा चतुष्टये लोके अत्रातं जन्मनः फलम् ॥ ४६ ॥ ते धन्यास्ते महात्मानस्तेषां जन्म सुजीवितम् ॥ नित्यं वसंति कौरिल्यां लोकपालान्निमंत्र्य ये ॥ ४७ ॥ एतत्पुण्यं पापहरं धन्यमायुर्विवर्धनम् ॥ पठतां शृण्वतां चैव सर्वपापक्षयो भवेत् ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्य खंडे रेवाखंडे कुबेरादितीर्थचतुष्टयमाहात्म्यवर्णनंनाम त्रयस्त्रिंशदधिकशततमोऽध्यायः ॥ १३३ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ नर्मदादक्षिणे कूले रामेश्वरमनुत्तमम् ॥ तीर्थं पापहरं पुण्यं सर्वदुःखघ्नमुत्तमम् ॥ १ ॥ तत्र तीर्थे तु ये स्नात्वा पूजयंति महेश्वरम् ॥ महादेवं महात्मानं मुच्यंते सर्वकिल्बिषैः ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखंडे रेवाखण्डे रामेश्वरतीर्थमाहात्म्यवर्णनंनाम चतुस्त्रिंशदधिकशततमोऽध्यायः ॥ १३४ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तस्यैवानंतरं चान्यत्सिद्धेश्वरमनुत्तमम् ॥ तीर्थं सर्वगुणोपेतं सर्वलोकेषु पूजितम् ॥ १ ॥ तत्र तीर्थे तु यः स्नात्वा ह्युमारुद्रं प्रपूजयेत् ॥ वाजपेयस्य यज्ञस्य स लभेत्फलमुत्तमम् ॥ २ ॥ तेन पुण्येन महता मृतः स्वर्गमवाप्नुयात् ॥ अप्सरोगणसंवीतो जयशब्दादिमंगलैः ॥ ३ ॥ सहस्रवत्सरांस्तत्र क्रीडयित्वा यथासुखम् ॥ धनधान्य समोपेते कुले महति जायते ॥ ४ ॥ पूज्यमानो नरश्रेष्ठ वेदवेदांगपारगः ॥ व्याधिशोकविनिर्मुक्तो जीवेच्च शरदां शतम् ॥ ५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखंडे रेवाखंडे सिद्धेश्वरमाहात्म्यवर्णनंनाम पंचत्रिंशदधिकशततमोऽध्यायः ॥ १३५ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल चाहल्येश्वरमुत्तमम् ॥ यत्र सिद्धा महाभागा त्वहल्या तापसी पुरा ॥ १ ॥ गौतमो ब्राह्मणस्त्वासीत्साक्षाद्ब्रह्मेव चाऽपरः ॥ सत्यधर्मसमायुक्तो वानप्रस्थाश्रमे रतः ॥ २ ॥ तस्य पत्नी महाभागा ह्यहल्यानाम विश्रुता ॥ रूपयौवनसंपन्ना
॥१०२॥ त्रिषु लोकेषु विश्रुता ॥ ३ ॥ अस्या अप्यतिरूपेण देवराजः शतक्रतुः ॥ मोहितो लोभयामास ह्यहल्यां बलसूदनः ॥ ४ ॥ मां भजस्व ॥२७६॥
वरारोहे देवराजमनिंदिते ॥ क्रीडयस्व मया सार्द्धं त्रिषु लोकेषु पूजिता ॥ ५ ॥ किं करिष्यसि विप्रेण शौचाचारकृशेन तु ॥ तपःस्वाध्या

१ कौरिल्याम्—कौबेर्याम्—इत्यर्थः । २ सर्वलोकेषु पूजितम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यशीलेन क्लिश्यंतीव सुलोचने ॥ ६ ॥ एवमुक्ता वरारोहा स्त्रीस्वभावात्सुचंचला ॥ मनसाऽध्याय शक्रं सा कामेन कलुषीकृता ॥ ७ ॥ तस्या विदित्वा तं भावं स देवः पाकशासनः ॥ गौतमं वंचयामास दुष्टभावेन भावितः ॥ ८ ॥ विदित्वा चांतरं तस्य गृहीत्वा वेषमुत्तमम् ॥ अहल्यां रमयामास विश्वस्तां मंदिरांतिके ॥ ९ ॥ क्षणमात्रांतरे तत्र देवराजस्य भारत ॥ आजगाम मुनिश्रेष्ठो मंदिरं त्वरयाऽन्वितः ॥ १० ॥ आगतं गौतमं दृष्ट्वा भीतभीतः पुरंदरः ॥ निर्गतः स ततो दृष्ट्वा शक्रोऽयमिति चिंतयन् ॥ ११ ॥ ततः शशाप देवेंद्रं गौतमः क्रोधमूर्च्छितः ॥ अजितें द्रियोऽसि यस्मात्त्वं तस्माद्बहुभगो भव ॥ १२ ॥ एवमुक्तस्तु देवेंद्रस्तत्क्षणादेव भारत ॥ भगानां तु सहस्रेण तत्क्षणादेव वेष्टितः ॥ १३ ॥ त्यक्त्वा राज्यं सुरैः सार्द्धं गतश्रीको जगाम ह ॥ तपश्चचार विपुलं गौतमेन महीतले ॥ १४ ॥ अहल्याऽपि ततः शप्ता यस्मात्त्वं दुष्टचारिणी ॥ प्रेक्ष्य मां रमसे शक्रं तस्मादश्ममयी भव ॥ १५ ॥ गते वर्षसहस्रांते रामं दृष्ट्वा यशस्विनम् ॥ तीर्थयात्राप्रसंगेन धौतपापा भविष्यसि ॥ १६ ॥ एवं गते ततः काले दृष्टा रामेण धीमता ॥ विश्वामित्रसहायेन त्यक्त्वा साऽश्ममयीं तनुम् ॥ १७ ॥ पूजयित्वा यथान्यायं गतपापा विमत्सरा ॥ आगता नर्मदातीरे तीर्थे स्नात्वा यथाविधि ॥ १८ ॥ कृतं चांद्रायणं मासं कृच्छ्रं चाऽन्यं ततः परम् ॥ ततस्तुष्टो महादेवो दत्त्वा वरमनुत्त मम् ॥ १९ ॥ जगामाऽदर्शनं भूयो रेमे चोमापतिश्चिरम् ॥ अहल्या तु गते देवे स्थापयित्वा जगद्गुरुम् ॥ २० ॥ अहल्येश्वरनामानं स्वगृहे चागमत्पुनः ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरम् ॥ २१ ॥ स मृतः स्वर्गमाप्नोति यत्र देवो महेश्वरः ॥ क्रीडयित्वा यथाकामं तत्र लोके महातपाः ॥ २२ ॥ गते वर्षसहस्रांते मानुष्यं लभते पुनः ॥ धनधान्यचयोपेतः पुत्रपौत्रसमन्वितः ॥ २३ ॥ वेदविद्याऽऽश्रयो धीमाञ्जायते विमले कुले ॥ रूपसौभाग्यसंपन्नः सर्वव्याधिविवर्जितः ॥ जीवेद्वर्षशतं साग्रमहल्यातीर्थसेवनात् ॥ २४ ॥ इति श्रीस्कांदे महापुराण एका शीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे अहल्यातीर्थमाहात्म्यवर्णनंनाम षट्त्रिंशदधिकशततमोऽध्यायः ॥ १३६ ॥ छ ॥

॥ ॥ मार्कंडेय उवाच ॥ ॥ धर्मपुत्र ततो गच्छेत्कर्कटेश्वरमुत्तमम् ॥ उत्तरे नर्मदाकूले सर्वपापक्षयं करम् ॥ १ ॥ तत्र स्नात्वा विधा नेन यस्तु पूजयते शिवम् ॥ अनिवर्त्तिका गतिस्तस्य रुद्रलोकादसंशयम् ॥ २ ॥ तस्य तीर्थस्य माहात्म्यं पुराणे यच्छुतं मया ॥ न तद्वर्णयितुं शक्यं संक्षेपेण वदाम्यतः ॥ ३ ॥ तत्र तीर्थे तु यः कुर्यात्किंचित्कर्म शुभाशुभम् ॥ हर्षान्मदान्महाराज तत्सर्वं जायतेऽक्षयम् ॥ ॥ ४ ॥ तत्र तीर्थे तपस्तप्त्वा वालखिल्या मरीचयः ॥ रमंतेऽद्यापि लोकेषु स्वेच्छया कुरुनन्दन ॥ ५ ॥ तत्रस्थास्तन्न जानन्ति नरा



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





ज्ञानबहिष्कृताः ॥ शरीरस्थमिवाऽऽत्मानमक्षयं ज्योतिरव्ययम् ॥ ६ ॥ तत्र तीर्थे नृपश्रेष्ठ देवी नारायणी पुरा ॥ अद्यापि तपते घोरं तपो यावत्किलार्बुदम् ॥ ७ ॥ तत्र तीर्थे तु यः स्नात्वा तर्प्पयेत्पितृदेवताः ॥ तस्य ते द्वादशाब्दानि तृप्तिं यांति पितामहाः ॥ ८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे कर्कटेश्वरतीर्थमाहात्म्यवर्णनंनाम सप्तत्रिंशदधिकशततमोऽध्यायः ॥ १३७ ॥

॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्पांडुपुत्र शक्रतीर्थमनुत्तमम् ॥ यत्र सिद्धो महाभागो देवराजः शतक्रतुः ॥ १ ॥ गौतमेन पुरा शप्तं ज्ञात्वा देवाः सुरेश्वरम् ॥ ब्रह्माद्या देवताः सर्वे ऋषयश्च तपोधनाः ॥ २ ॥ गौतमं प्रार्थयामासुर्वाक्यैः सानुनयैः शुभैः ॥ गतराज्यं गतश्रीकं शक्रं प्रति मुनीश्वर ॥ ३ ॥ इन्द्रेण रहितं राज्यं न कश्चित्कामयेद्द्विज ॥ देवो वा मानवो वाऽपि एतत्ते विदितं प्रभो ॥ ४ ॥ तस्य त्वं भगयुक्तस्य दयां कुरु द्विजोत्तम ॥ गतश्चादर्शनं शक्रो दूषितः स्वेन पाप्मना ॥ ५ ॥ देवानां वचनं श्रुत्वा गौतमो वेदवित्तमः ॥ तथेति कृत्वा शक्रस्य वरं दातुं प्रचक्रमे ॥ ६ ॥ एतद्भगसहस्रं तु पुरा जातं शतक्रतो ॥ तल्लोचनसहस्रं तु मत्प्रसादाद्भविष्यति ॥ ७ ॥ एवमुक्तः सहस्राक्षः प्रणम्य मुनिसत्तमम् ॥ ब्राह्मणांस्तान्महाभागान्नर्मदां प्रत्यगात्ततः ॥ ८ ॥ स्नात्वा स विमले तोये संस्थाप्य त्रिपुरांतकम् ॥ जगाम त्रिदशावासं पूज्यमानोऽप्सरोगणैः ॥ ९ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरम् ॥ परदाराभिगमनान्मुच्यते पातकान्नरः ॥ १० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे शक्रतीर्थमाहात्म्यवर्णनंनामाष्टत्रिंशदधिकशततमोऽध्यायः ॥ १३८ ॥

॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महाराज सोमतीर्थमनुत्तमम् ॥ यत्र सोमस्तपस्तप्त्वा नक्षत्रपथमास्थितः ॥ १ ॥ तत्र तीर्थे तु यः स्नायादाचम्य विधिपूर्वकम् ॥ कृतजाप्यो रविं ध्यायेत्तस्य पुण्यफलं शृणु ॥ २ ॥ ऋग्वेदयजुर्वेदाभ्यां सामवेदेन भारत ॥ जपतो यत्फलं प्रोक्तं गायत्र्या चाऽत्र तत्फलम् ॥ ३ ॥ तत्र तीर्थे तु यो भक्त्या ब्राह्मणान्भोजयेच्छुचिः ॥ तेन सम्यग्विधानेन कोटिर्भवति भोजिता ॥ ४ ॥ पादुकोपानहौ छत्रं वस्त्रं कंबलवाजिनः ॥ यो दत्ते विप्रमुख्याय तस्य तत्कोटिसंमितम् ॥ ५ ॥ सहस्रं तु सहस्राणामनृचां यस्तु भोजयेत् ॥ एकस्य मंत्रयुक्तस्य कलां नार्हति षोडशीम्॥ ६ ॥एवं तु भोजयेत्तत्र बह्वृचं वेदपारगम् ॥ शाखांतगमथाध्वर्युं[1] छंदोगं वा समाप्तिगम् ॥ ७ ॥ अग्निहोत्रसहस्रस्य यत्फलं प्राप्यते बुधैः ॥ समं तद्वेदविदुषा तीर्थे सोमस्य तत्फलम् ॥ ८ ॥ भोजयेद्यः शतं तेषां सहस्रं लभते नरः ॥ एकस्य योगयुक्तस्य तत्फलं कवयो विदुः॥९॥

१ अध्वर्युं—यजुर्वेदिनम्—इत्यर्थः । आध्वर्यवं यजुर्वेदिनामेव—सर्वत्र यज्ञेषु ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सन्निरुध्येंद्रियग्रामं यत्रयत्र वसेन्मुनिः ॥ तत्रतत्र कुरुक्षेत्रं नैमिषं पुष्कराणि च ॥ १० ॥ तस्मात्सर्वप्रयत्नेन ग्रहणे चंद्रसूर्ययोः ॥ संक्रांतौ च व्यतीपाते योगी भोज्यो विशेषतः ॥ ११ ॥ संन्यासं कुरुते यस्तु तत्र तीर्थे युधिष्ठिर ॥ विमानेन महाभागाः स याति त्रिदिवं नरः ॥ १२ ॥ सोमस्याऽनुचरो भूत्वा तेनैव सह मोदते ॥ १३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे सोमतीर्थमाहात्म्यवर्णनंनामैकोनचत्वारिंशदधिकशततमोऽध्यायः ॥ १३९ ॥ ॥छ॥ ॥ मार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महाराज नंदाह्रदमनुत्तमम् ॥ यत्र सिद्धा महाभागा नंदादेवी वरप्रदा ॥ १ ॥ महिषासुरे महाकये पुरा देवभयंकरे ॥ शूलिन्या शूलभिन्नांगे कृते दानवसत्तमे ॥ २ ॥ येनैकादश रुद्राश्च ह्यादित्याः समरुद्गणाः ॥ वसवो वायुना सार्द्धं चन्द्रादित्यौ सुरेश्वर ॥ ३ ॥ बलिना निर्जिता येन ब्रह्मविष्णुमहेश्वराः ॥ संग्रामे सुमहावीरे कृते देवभयंकरे ॥ ४ ॥ कृत्वा तत्कदनं घोरं नंदा देवी सुरेश्वरी ॥ यस्मात्स्नाता विशालाक्षी तेन नंदाह्रदः स्मृतः ॥ ५ ॥ तत्र तीर्थे तु यः स्नात्वा नंदामुद्दिश्य भारत ॥ ददाति दानं विप्रेभ्यः सोऽश्वमेधफलं लभेत् ॥ ६ ॥ भैरवं चैव केदारं तथा रुद्रं महालयम् ॥ नंदाह्रदश्चतुर्थः स्यात्पंचमं भुवि दुर्लभम् ॥ ७ ॥ बहवस्तं न जानंति कामरागसमन्विताः ॥ नर्मदायां ह्रदं पुण्यं सर्वपातकनाशनम् ॥ ८ ॥ तत्र तीर्थे तु यः स्नात्वा नंदां देवीं प्रपूजयेत् ॥ किं तस्य हिमवन्मध्यगमनेन प्रयोजनम् ॥ ९ ॥ परमार्थमविज्ञाय पर्यटंति तमोवृताः ॥ तेषां समागमे पार्थ श्रम एव हि केवलम् ॥ १० ॥ पृथिव्यां सागरांतायां स्नानदानेन यत्फलम् ॥ तत्फलं समवाप्नोति स्नात्वा नंदाह्रदे नृप ॥ ११ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे नन्दाह्रदतीर्थमाहात्म्यवर्णनंनाम चत्वारिंशदधिकशततमोऽध्यायः ॥ १४० ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल तापेश्वरमनुत्तमम् ॥ यत्र सा हरिणी सिद्धा व्याधभीता नरेश्वर ॥ १ ॥ जले प्रक्षिप्य गात्राणि ह्यंतरिक्षं गता तु सा ॥ व्याधो विस्मितचित्तस्तु तां मृगीमवलोक्य च ॥ २ ॥ विमुच्य सशरं चापं प्रारेभे तप उत्तमम् ॥ दिव्यं वर्षसहस्रं तु व्याधेनाऽऽचरितं तपः ॥ ३ ॥ अतीते तु ततः काले परितुष्टो महेश्वरः ॥ वरं ब्रूहि महाव्याध यत्ते मनसि रोचते ॥ ॥ ४ ॥ ॥ व्याध उवाच ॥ ॥ यदि तुष्टोऽसि देवेश यदि देयो वरो मम ॥ तव पार्श्वे महादेव वासो मे प्रतिदीयताम् ॥ ५ ॥ ॥ ईश्वर उवाच ॥ ॥ एवं भवतु ते व्याध यस्त्वया कांक्षितो वरः ॥ देवदेवो महादेव इत्युक्त्वांतरधीयत ॥ गते चाऽदर्शनं देवे स्थापयित्वा महेश्वरम् ॥ ६ ॥

२ छंदोगन्—सामवेदाध्यायिनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पूजयित्वा विधानेन गतो व्याधस्ततो दिवम् ॥ तदाप्रभृति तत्तीर्थं त्रिषु लोकेषु विश्रुतम् ॥ ७ ॥ व्याधानुतापसंजातं तापेश्वरमिति श्रुतम् ॥ तत्र तीर्थे तु यः स्नात्वा संपूजयति शंकरम् ॥ ८ ॥ शिवलोकमवाप्नोति मामुवाच महेश्वरः ॥ ये स्नाता नर्मदातोये तीर्थे तापेश्वरे नराः ॥ ९ ॥ तापत्रय विमुक्तास्ते नाऽत्र कार्या विचारणा ॥ अष्टम्यां च चतुर्दश्यां तृतीयायां विशेषतः ॥ १० ॥ स्नानं समाचरेन्नित्यं सर्वपातकशांतये ॥ ११ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे तापेश्वरतीर्थमाहात्म्यवर्णनंनामैकचत्वारिंशदधिकशततमोऽध्यायः ॥ १४१ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महाराज रुक्मिणीतीर्थमुत्तमम् ॥ यत्रैव स्नानमात्रेण रूपवान्सुभगो भवेत् ॥ १ ॥ अष्टम्यां च चतुर्दश्यां तृतीयायां विशेषतः ॥ स्नानं समाचरेत्तत्र न चेह जायते पुनः ॥ २ ॥ यः स्नात्वा रुक्मिणीतीर्थे दानं दद्यात्तु कांचनम् ॥ तत्तीर्थस्य प्रभावेन शोकं नाप्नोति मानवः ॥ ३ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ तीर्थस्याऽस्य कथं जातो महिमेदृङ्मुनीश्वर ॥ रूपसौभाग्यदं येन तीर्थमेतद्ब्रवीहि मे ॥ ४ ॥ ॥ मार्कंडेय उवाच ॥ ॥ कथयामि यथावृत्तमितिहासं पुरातनम् ॥ कथितं पूर्वतो वृद्धैः पारंपर्येण भारत ॥ ५ ॥ तन्तेहं संप्रवक्ष्यामि शृणुष्वैकाग्रमानसः ॥ नगरं कुंडिनं नाम भीष्मको परिपाति हि ॥ ६ ॥ हस्त्यश्वरथसंपन्नो धनाढ्योऽति प्रतापवान् ॥ स्त्रीसहस्रस्य मध्यस्थः कुरुते राज्यमुत्तमम् ॥ ७ ॥ तस्य भार्या महादेवी प्राणेभ्योऽपि गरीयसी ॥ तस्यामुत्पादयामास पुत्रमेकं च रुक्मकम् ॥ ८ ॥ द्वितीया तनया जज्ञे रुक्मिणी नाम नामतः ॥ तदाऽशरीरिणी वाचा राजानं तमुवाच ह ॥ ९ ॥ चतुर्भुजाय दातव्या कन्येयं भुवि भीष्मक ॥ एवं तद्वचनं श्रुत्वा जहर्ष प्रियया सह ॥ १० ॥ ब्राह्मणैः सह विद्वद्भिः प्रविष्टः सूतिकागृहम् ॥ स्वस्तिकं वाचयित्वास्याश्चक्रे नामेति रुक्मिणी ॥ ११ ॥ यतः सुवर्णतिलको जन्मना सह भारत ॥ ततः सा रुक्मिणीनाम ब्राह्मणैः कीर्त्तिता तदा ॥ १२ ॥ ततः सा कालपर्यायादष्टवर्षा व्यजायत ॥ पूर्वोक्तं चैव तद्वाक्यमशरीरिण्युदीरितम् ॥ १३ ॥ स्मृत्वा स्मृत्वाऽथ नृपतिश्चिंतयामास भूपतिः ॥ कस्मै देया मया बाला भविता कश्चतुर्भुजः ॥ १४ ॥ एतस्मिन्नंतरे तावद्दैवतात्पर्वतोत्तमात् ॥ मुख्यश्चेदिपतिस्तत्र दमघोषः समागतः ॥ १५ ॥ प्रविष्टो राजसदनं यत्र राजा स भीष्मकः ॥ तं दृष्ट्वा चाऽऽगतं गेहे पूजयामास भूपतिः ॥ १६ ॥ आसनं विपुलं दत्त्वा सभां गत्वा निवेशितः ॥ कुशलं तव राजेंद्र दमघोष श्रियायुत ॥ १७ ॥ पुण्याहमद्य संजातमहं त्वद्दर्शनोत्सुकः ॥ कन्या मदीया राजेंद्र ह्यष्टवर्षा व्यजायत ॥ १८ ॥ चतुर्भुजाय दातव्या वागुवाचाऽशरीरिणी ॥ भीष्मकस्य वचः श्रुत्वा दमघोषोऽब्रवीदिदम् ॥ १९ ॥ चतुर्भुजो मम सुतस्त्रिषु लोकेषु विश्रुतः ॥ तस्येयं दीयतां कन्या शिशुपालस्य



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भीष्मक ॥ २० ॥ तस्य तद्वचनं श्रुत्वा दमघोषस्य भूमिप ॥ भीष्मकेन ततो दत्ता शिशुपालाय रुक्मिणी ॥ २१ ॥ प्रारब्धं मंगलं तत्र भीष्मकेण युधिष्ठिर ॥ दिक्षु देशांतरेष्वेव ये वसंति स्वगोत्रजाः ॥ २२ ॥ निमंत्रितास्तु ते सर्वे समाजग्मुर्यथाक्रमम् ॥ ततो यादववंशस्य तिलकौ बलकेशवौ ॥ २३ ॥ निमंत्रितौ समायातौ कुंडिनं भीष्मकस्य तु ॥ भीष्मकेण यथान्यायं पूजितौ तौ यदूत्तमौ ॥ २४ ॥ ततः प्रदोषसमये रुक्मिणी काममोहिनी ॥ सखीभिः सहिता याता पूर्बहिश्चांबिकार्चने ॥ २५ ॥ साऽपश्यत्तत्र देवेशं गोपवेषधरं हरिम् ॥ तं दृष्ट्वा मोहमापन्ना कामेन कलुषीकृता ॥ २६ ॥ केशवोऽपि च तां दृष्ट्वा संकर्षणमुवाच ह ॥ स्त्रीरत्नप्रवरं तात हर्तव्यमिति मे मतिः ॥ २७ ॥ केशवस्य वचः श्रुत्वा संकर्षण उवाच ह ॥ गच्छ कृष्ण महाबाहो स्त्रीरत्नं चाऽऽशु गृह्यताम् ॥ २८ ॥ अहं च तव मार्गेण ह्यागमिष्यामि पृष्ठतः ॥ दानवानां च सर्वेषां कुर्वंश्च कदनं महत् ॥ २९ ॥ संकर्षणमतं प्राप्य केशवः केशिसूदनः ॥ ययौ कन्यां गृहीत्वा तु रथमारोप्य सत्वरम् ॥ ३० ॥ निर्गतः सहसा राजन्वेगेनैवाऽनिलो यथा ॥ हाहाकारस्तदा जातो भीष्मकस्य पुरे महान् ॥ ३१ ॥ निर्गता दानवाः क्रुद्धा वेला इव महोदधेः ॥ गर्जंतः सायुधाः सर्वे धावंतो रथवर्त्मनि ॥ ३२ ॥ बलदेवं ततः प्राप्ता रथमार्गाऽनुगामिनम् ॥ तेषां युद्धं बलस्याऽसीत्सर्वलोकक्षयंकरम् ॥ ३३ ॥ यथा तारामये पूर्वं संग्रामे लोकविश्रुते ॥ गदाहस्तो महाबाहुस्त्रैलोक्येऽप्रतिमो बलः ॥ ३४ ॥ हलेनाऽऽकृष्य सहसा गदापातैरपातयत् ॥ अशक्यो दानवैर्हंतुं बलभद्रो महाबलः ॥ ३५ ॥ बभंज दानवान्सर्वांस्तस्थौ गिरिरिवाऽचलः ॥ तं दृष्ट्वा च बलं क्रुद्धं दुर्धर्षं त्रिदशैरपि ॥ ३६ ॥ भीष्मपुत्रो महातेजा रुक्मीनाम महायशाः ॥ नराणामतिशूरणामक्षौहिण्या समन्वितः ॥ ३७ ॥ बलभद्रमतिक्रम्य ततो युद्धे निराकरोत् ॥ तद्युद्धं वंचयित्वा तु रथमार्गेण सत्वरम् ॥ ३८ ॥ केशवोऽपि तदा देवो रुक्मिण्या सहितो ययौ ॥ विंध्यं तु लंघयित्वाऽग्रे त्रैलोक्यगुरुरव्ययः ॥ ३९ ॥ नर्मदातटमापेदे यत्र सिद्धः पुरा पुनः ॥ अजेयो येन संजातस्तीर्थस्यास्य प्रभावतः ॥ ४० ॥ एतस्मात्कारणात्तातयोधनीपुरमुच्यते ॥ रुक्मोऽपि[1] दानवेंद्रोऽसौ प्राप्तः स्थानमनुत्तमम् ॥ ४१ ॥ प्रत्युवाचाऽच्युतं क्रुद्धस्तिष्ठतिष्ठेति मा व्रज ॥ अद्य त्वां निशितैर्बाणैर्नेष्यामि यमसादनम् ॥ ४२ ॥ एवं परस्परं वीरौ जगर्जतुरुभावपि ॥ तयोर्युद्धमभूद्घोरं तारकाग्निजसन्निभम् ॥ ४३ ॥ चिक्षेप शरजालानि केशवं प्रति दानवः ॥ नाऽनुचिंत्य शरांस्तस्य केशवः केशिसूदनः ॥ ४४ ॥ ततो

१ रुक्मशब्दोऽयं द्विधा–अकारान्त इन्नन्तश्च प्रायः सर्वेषु पुस्तकेषु दृश्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



रुक्मोथ संक्रुद्धो गृहीत्वा धनुरुत्तमम् ॥ सायकेन सुतीक्ष्णेन तं बिभेद तदोरसि ॥ ४५ ॥ ततो विष्णुः स्वयं क्रुद्धश्चक्रं गृह्य सुदर्शनम् ॥
संप्रहरत्यमुं यावद्रुक्मिण्याऽत्र निवारितः ॥ ४६ ॥ त्वां न जानाति देवेशं चतुर्बाहुं जनार्दनम् ॥ दर्शयस्व स्वकं रूपं दयां कृत्वा ममोपरि ॥
॥ ४७ ॥ एवमुक्तस्तु रुक्मिण्या दर्शयामास भारत ॥ देवा दृष्ट्वापि तद्रूपं स्तुवंत्याकाशसंस्थिताः ॥ दिव्यं चक्षुस्तदा देवो ददौ रुक्मस्य
भारत ॥ ४८ ॥ ॥ रुक्म उवाच ॥ ॥ यन्मया पापनिष्ठेन मंदभाग्येन केशव ॥ सायकैराहतं वक्षस्तत्सर्वं क्षंतुमर्हसि ॥ ४९ ॥ पूर्वं दत्ता स्वयं
देव जानकी जनकेन वै ॥ मया प्रदत्ता देवेश रुक्मिणी तव केशव ॥ ५० ॥ उद्वाहय यथान्यायं विधिदृष्टेन कर्मणा ॥ रुक्मस्य वचनं श्रुत्वा
ततस्तुष्टो जगद्गुरुः ॥ ५१ ॥ बभाषे देवदेवेशो रुक्मिणं भीष्मकात्मजम् ॥ गच्छ स्वकं पुरं मा भैः कुरु राज्यमकंटकम् ॥ ५२ ॥ केशवस्य
वचः श्रुत्वा रुक्मो दानवपुंगवः ॥ तं प्रणम्य जगन्नाथं जगाम भवनं पितुः ॥ ५३ ॥ गते रुक्मे तदा कृष्णः समामंत्र्य द्विजोत्तमान् ॥
मरीचिमत्र्यगिरसं पुलस्त्यं पुलहं क्रतुम् ॥ ५४ ॥ वसिष्ठं च महाभागमित्येते सप्त मानसाः ॥ इत्येते ब्राह्मणाः सप्त पुराणे निश्चयं गताः ॥
॥ ५५ ॥ क्षमावंतः प्रजावंतो महर्षिभिरलंकृताः ॥ इत्येवं ब्रह्मपुत्राश्च सत्यवंतो महामते ॥ ५६ ॥ नर्मदातटमाश्रित्य निवसंति जितेंद्रियाः ॥
तपःस्वाध्यायनिरता जपहोमपरायणाः ॥ ५७ ॥ निमंत्रितास्तु राजेंद्र केशवेन महात्मना ॥ श्राद्धं कृत्वा यथान्यायं ब्रह्मोक्तविधिना ततः
॥ ५८ ॥ हरिस्तान्पूजयामास सप्त ब्रह्मर्षिपुंगवान् ॥ प्रददौ द्वादश ग्रामांस्तेभ्यस्तत्र जनार्दनः ॥ ५९ ॥ यावच्चंद्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी ॥
तावद्दानं मया दत्तं परिपंथी न कश्चन ॥ ६० ॥ मद्दत्तं पालयिष्यंते ये नृपा गतकल्मषाः ॥ तेभ्यः स्वस्ति करिष्यामि दास्यामि परमां
गतिम् ॥ ६१ ॥ यावद्ध्रियांति लोकेषु महाभूतानि पंच च ॥ तावत्ते दिवि मोदंते मद्दत्तपरिपालकाः ॥ ६२ ॥ यस्तु लोपयते मूढो दत्तं वः पृथि
वीतले ॥ नरके तस्य वासः स्याद्यावदाभूतसंप्लवम् ॥ ६३ ॥ स्वदत्ता परदत्ता वा पालनीया वसुन्धरा ॥ यस्ययस्य यदा भूमिस्तस्यतस्य तदा फल
म् ॥ ६४ ॥ स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम् ॥ स विष्ठायां कृमिर्भूत्वा पितृभिः सह मज्जति ॥ ६५ ॥ अन्यायेन हृता भूमिरन्यायेन च
हारिता ॥ हर्त्ता हारयिता चैव विष्ठायां जायते कृमिः ॥ ६६ ॥ षष्टिवर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ॥ आच्छेत्ता चानुमंता च तान्येव नरके वसे
त् ॥ ६७ ॥ यानीह दत्तानि पुरा नरेंद्रैर्दानानि धर्मार्थयशस्कराणि ॥ निर्माल्यरूपप्रतिमानि तानि को नाम साधुः पुनराददाति ॥ ६८ ॥ एवं

१ चतुर्भुजं रूपम्—इति शेषः । २ अत्रमंता—इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तान्पूजयित्वा तु सम्यङ्न्यायेन पांडव ॥ रुक्मिण्या विधिवत्पाणिं जग्राह मधुसूदनः॥६९॥मुशली च ततः सर्वान्जित्वा दानवपुंगवान् ॥ स्वस्थान मगमत्तत्र कृत्वा कार्यं सुशोभनम्॥७०॥प्रयातौद्वारवत्यां तौ कृष्णसंकर्षणावुभौ॥गच्छमानं तु तं दृष्ट्वा केशवं क्लेशनाशनम्॥७१॥ ब्राह्मणाःसत्यवंतश्चनिर्गताः शंसितव्रताः॥ आगच्छमानांस्तौ वीक्ष्य रथमार्गेण ब्राह्मणान् ॥७२॥ मुहूर्त्तं तत्र विश्रम्य केशवो वाक्यमब्रवीत्॥किमागमनकार्यं वो ब्रूत सर्वं द्विजोत्तमाः॥७३॥ कुर्वाणाः स्वीयकर्माणि मम कृत्यं तु तिष्ठते ॥ देवस्य वचनं श्रुत्वा मुनयो वाक्यमब्रुवन् ॥७४॥ कल्पकोटिसहस्रेण सत्यभावात्तु वंदितः ॥ दुष्प्राप्योऽसि मनुष्याणां प्राप्तः किं त्यजसे हि नः ॥७५॥ ब्राह्मणानां वचः श्रुत्वा भगवानिदमब्रवीत् ॥ मथुरायां द्वारवत्यां यो धनीपुर एव च ॥ ७६ ॥ त्रिकालमागमिष्यामि सत्यंसत्यं पुनःपुनः॥ एवं ते ब्राह्मणाः श्रुत्वा योधनीपुरमागताः ॥ ७७ ॥ अवतीर्णस्त्रिभागेन प्रादुर्भावे तु माथुरे ॥ एतत्ते कथितं सर्वं तीर्थस्योत्पत्तिकारणम् ॥ ७८ ॥ भूतं भव्यं भविष्यच्च वर्त्तमानं तथाऽपरम् ॥ यं श्रुत्वा सर्वपापेभ्यो मुच्यते नाऽत्र संशयः ॥ ७९ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेद्बलकेशवौ ॥ तेन देवो जगद्धाता पूजितस्त्रिगुणात्मवान् ॥८०॥ उपवासी नरो भूत्वा यस्तु कुर्यात्प्रदक्षिणम् ॥ मुच्यते सर्वपापेभ्यो नाऽत्र कार्या विचारणा ॥ ८१ ॥ तत्र तीर्थे तु ये वृक्षास्तान्पश्यंत्यपि ये नराः ॥ तेऽपि पापैः प्रमुच्यंते भ्रूणहत्यासमैरपि ॥ ८२ ॥ प्रातरुत्थाय ये केचित्पश्यंति बलकेशवौ ॥ तेन ते सदृशाःस्युर्वै देवदेवेन चक्रिणा ॥ ८३॥ ते पूज्यास्ते नमस्कार्यास्तेषां जन्म सुजीवितम् ॥ ये नमंति जगन्नाथं देवं नारायणं हरिम् ॥ ८४ ॥ तत्र तीर्थे तु यद्दानं स्नानं देवार्चनं नृप ॥ तत्सर्वमक्षयं तस्य इत्येवं शंकरोऽब्रवीत् ॥ ॥ ८५ ॥ प्रविश्याग्नौ मृतानां च यत्फलं समुदाहृतम् ॥ तच्छृणुष्व नृपश्रेष्ठ प्रोच्यमानमशेषतः॥८६॥ विमानेनाऽर्कवर्णेन किंकिणीजालमालिना॥ आग्नेये भवते तत्र मोदते कालमीप्सितम् ॥८७॥ जले चैवा मृतानां तु योधनीपुरमध्यतः ॥ वसंति वारुणे लोके यावदाभूतसंप्लवम्॥ ८८ ॥ अनाशके मृतानां तु तत्र तीर्थे नराधिप ॥ अनिवर्त्तिका गतिर्नृणां नाऽत्र कार्या विचारणा ॥ ८९ ॥ तत्र तीर्थे तु यो दद्यात्कपिलादानमुत्तमम् ॥ विधानेन तु संयुक्तं शृणु तस्याऽपि यत्फलम् ॥ ९० ॥ यावंति तस्या रोमाणि तत्प्रसूतेश्च भारत ॥ तावंति दिवि मोदंते सर्वकामैः सुपूजिताः ॥ ९१ ॥ यावंति रोमाणि भवंति धेन्वास्तावंति वर्षाणि महीयते सः ॥ स्वर्गाच्च्युतश्चाऽपि ततस्त्रिलोक्यां कुले समुत्पत्स्यति गोमतां सः ॥९२॥ तत्र तीर्थंतु यो दद्याद्रूप्यं कांचनमेव वा॥कांचनेन विमानेन विष्णुलोके महीयते॥९३॥तस्मिंस्तीर्थे तु यो दद्यात्पादुके वस्त्रमेव च॥दानस्याऽस्य प्रभावेन लभते

१ यावंति वर्षाणि—इत्यर्थः । २ गोमताम्—विपुलधेनुमताम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



स्वर्गमीप्सितम् ॥ ९४ ॥ ऋग्यजुःसामवेदानां पठनाद्यत्फलं भवेत् ॥ तत्र तीर्थे तु राजेंद्र गायत्र्या तत्फलं लभेत् ॥९५॥ प्रयागे यद्भवेत्पुण्यं गया
यां च त्रिपुष्करे ॥ कुरुक्षेत्रे तु राजेंद्र राहुग्रस्ते दिवाकरे ॥ ९६ ॥ सोमेश्वरे च यत्पुण्यं सोमस्य ग्रहणे तथा ॥ तत्फलं लभते तत्र स्नानमात्रान्न
संशयः ॥ ९७ ॥ द्वादश्यां तु नरः स्नात्वा नमस्कृत्य जनार्दनम् ॥ उद्धृताः पितरस्तेन अवाप्तं जन्मनः फलम् ॥ ९८ ॥ संक्रांतौ च व्यतीपाते
द्वादश्यां च विशेषतः ॥ ब्राह्मणं भोजयेदेकं कोटिर्भवति भोजिता ॥ ९९ ॥ पृथिव्यां यानि तीर्थानि ह्यासमुद्राणि पांडव ॥ तानि सर्वाणि तत्रैव
द्वादश्यां पांडुनंदन ॥ १०० ॥ क्षयं यांति च दानानि यज्ञहोमबलिक्रियाः ॥ न क्षीयते महाराज तत्र तीर्थे तु यत्कृतम् ॥ १ ॥ यद्भूतं यद्भविष्यच्च
तीर्थमाहात्म्यमुत्तमम् ॥ कथितं ते मया सर्वं पृथग्भावेन भारत ॥ १०२ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आव
न्त्यखण्डे रेवाखण्डे रुक्मिणीतीर्थमाहात्म्यवर्णनंनाम द्विचत्वारिंशदधिकशततमोऽध्यायः ॥ १४२ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥
ततो गच्छेन्महाराज योजनेश्वरमुत्तमम् ॥ यत्र सिद्धौ पुरा कल्पे नरनारायणावृषी ॥ १ ॥ तत्र तीर्थे तपस्तप्त्वा संग्रामे देवदानवैः ॥ जयं प्राप्तौ
महात्मनौ नरनारायणावुभौ ॥ २ ॥ पुनस्त्रेतायुगे प्राप्ते तौ देवौ रामलक्ष्मणौ ॥ तत्र तीर्थे पुनः स्नात्वा रावणो दुर्जयो हतः ॥ ३ ॥ पुनः पार्थ
कलौ प्राप्ते तौ देवौ बलकेशवौ ॥ वसुदेवकुले जातौ दुष्करं कर्म चक्रतुः ॥ ४ ॥ नरकं कालनेमिं च कंसं चाणूरमुष्टिकौ ॥ शिशुपालं जरा
संधं जघ्नतुर्बलकेशवौ ॥ ५ ॥ ततस्तत्र रिपून्संख्ये भीष्मद्रोणपुरः सरान् ॥ कर्णदुर्योधनादींश्च निहनिष्यति स प्रभुः ॥ ६ ॥ धर्म
क्षेत्रे कुरुक्षेत्रे तत्र युध्यंति ते क्षणम् ॥ भीमार्जुननिमित्तेन शिष्यौ कृत्वा परस्परम् ॥ ७ ॥ तत्र तीर्थे पुनर्गत्वा तपः कृत्वा
सुदुष्करम् ॥ पूजयित्वा द्विजान्भक्त्या यास्येते द्वारकां पुनः ॥ ८ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेद्बलकेशवौ ॥ तेन देवो जगद्धाता
पूजितस्त्रिगुणात्मवान् ॥९॥ उपवासी नरो भूत्वा यस्तु कुर्यात्प्रजागरम् ॥ मुच्यते सर्वपापेभ्यो गायंस्तस्य शुभां कथाम् ॥१०॥ यावतस्तत्र तीर्थे तु
वृक्षान्पश्यंति मानवाः ॥ ब्रह्महत्यादिकं पापं तावदेषां प्रणश्यति ॥ ११ ॥ प्रातरुत्थाय ये केचित्पश्यंति बलकेशवौ ॥ तेनैव सदृशाः सर्वे देवदेवेन
चक्रिणा ॥ १२ ॥ ते पूज्यास्ते नमस्कार्यास्तेषां जन्म सुजीवितम् ॥ ये नमंति जगत्पूज्यं देवं नारायणं हरिम् ॥ १३ ॥ तत्र तीर्थे तु यद्दानं स्नानं
देवार्चनं नृप ॥ क्रियते तत्फलं सर्वमक्षयायोपकल्पते ॥१४॥ अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गावः॥ लोकास्त्रयस्तेन भवंति दत्ता यः
कांचनं गां च भुवं च दद्यात् ॥ १५ ॥ एतत्ते कथितं सर्वं तीर्थमाहात्म्यमुत्तमम् ॥ अतीतं च भविष्यच्च वर्तमानं महाबलम् ॥ १६ ॥ श्रुत्वा वाऽपि



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पठित्वेदं श्रावयित्वाऽथ धार्मिकान् ॥ मुच्यते सर्वपापेभ्यो नाऽत्र कार्या विचारणा ॥ १७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे योजनेश्वरतीर्थमाहात्म्यवर्णनंनाम त्रिचत्वारिंशदधिकशततमोऽध्यायः ॥ १४३ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेन्महाराज द्वादशीतीर्थमुत्तमम् ॥ क्षरंति सर्वदानानि जपहोमबलिक्रियाः ॥१॥ न क्षीयते तु राजेंद्र चक्रतीर्थे तु यत्कृतम् ॥ यद्भूतं यद्भविष्यच्च तीर्थमाहात्म्यमुत्तमम् ॥ २ ॥ कथितं तन्मया सर्वं पृथग्भावेन भारत ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे द्वादशीतीर्थमहात्म्यवर्णनंनाम चतुश्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४४ ॥ ॥ मार्कंडेय उवाच ॥ ततो गच्छेद्धरापाल शिवतीर्थमनुत्तमम् ॥ दर्शनाद्यस्य देवस्य मुच्यते सर्वकिल्बिषैः ॥ १ ॥ शिवतीर्थे तु यः स्नात्वा जितक्रोधो जितेंद्रियः ॥ पूजयेत महादेवं सोऽग्निष्टोमफलं लभेत् ॥ २ ॥ तत्र तीर्थे तु यो भक्त्या सोपवासोऽर्चयेच्छिवम् ॥ अनिवर्तिका गतिस्तस्य रुद्रलोकादसंशयम् ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे शिवतीर्थमाहात्म्यवर्णनंनाम पंचचत्वारिंशदधिकशततमोऽध्यायः ॥ १४५ ॥ ॥ मार्कंडेय उवाच ॥ ॥ अस्माहकं ततो गच्छेत्पितृतीर्थमनुत्तमम् ॥ प्रेतत्वाद्यत्र मुच्यंते पिंडेनैकेन पूर्वजाः ॥ १ ॥ युधिष्ठिर उवाच ॥ ॥ अस्माहकस्य माहात्म्यं कथयस्व ममानघ ॥ स्नानदानेन यत्पुण्यं तथा पिंडोदकेन च ॥ २ ॥ श्रीमार्कंडेय उवाच ॥ पुरा कल्पे नृपश्रेष्ठ ऋषिदेवसमागमे ॥ प्रश्नः पृष्टो मया तात यथा त्वमनुपृच्छसि ॥३॥ एकत्र सागराः सप्त सप्रयागाः सपुष्कराः ॥ नास्य साम्यं लभंते ते नात्र कार्या विचारणा ॥ ४ ॥ सोमनाथं तु विख्यातं यत्सोमेन प्रतिष्ठितम् ॥ तत्र सोमग्रहे पुण्यं तत्पुण्यं लभते नरः ॥ ५ ॥ मासांते पितरो नृणां वीक्षंते संततिं स्वकाम् ॥ कश्चिदस्मत्कुलेऽस्माकं पिंडमत्र प्रदास्यति ॥६ ॥ प्रपितामहास्तथादित्याः श्रुतिरेषा सनातनी ॥ एवंब्रुवंति देवाश्च ऋषयः सतपोधनाः ॥ ७ ॥ सक्तुपिंडोदकेनैव शृणु पार्थिव यत्फलम् ॥ द्वादशाब्दानि राजेंद्र योगं भुक्त्वा सुशोभनम् ॥ ८ ॥ युगेयुगे महाराज अस्माहके पितामहाः ॥ सर्वदा ह्यवलोकंत आगच्छंतं स्वगोत्रजम् ॥ ९ ॥ भविष्यति किमस्माकममावास्याप्यमाहके ॥ स्नानं दानं च ये कुर्युः पितॄणां तिलतर्पणम् ॥ १० ॥ ते सर्वपापनिर्मुक्ताः सर्वान्कामांल्लभंति वै ॥ जलमध्येत्र भूपाल अग्नितीर्थं च तिष्ठति ॥ ११ ॥ दर्शनात्तस्य तीर्थस्य पापराशिर्विलीयते ॥ स्नानमात्रेण राजेंद्र ब्रह्महत्यां व्यपोहति ॥ १२ ॥ शुक्लांबरधरो नित्यं नियतः स जितेंद्रियः ॥ एककालं तु भुंजानो मासं

१ इतः प्राक्–कस्मिंश्चित्पुस्तके–वाराहतीर्थमाहात्म्यरूपोऽध्यायोऽस्ति–परं सोऽत्र पूर्वं यथानुपूर्वीक एवायातोऽस्ति–अतः पुनरुक्तभयान्नात्र निक्षिप्यते । २ मासान्ते–अमावास्यायाम्–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

तीर्थस्य सन्निधौ ॥ १३ ॥ सुवर्णालंकृतानां तु कन्यानां शतदानजम् ॥ फलमाप्नोति संपूर्णं पितृलोके महीयते ॥ १४ ॥ पृथिव्यामासमुद्रायां महाभोगपतिर्भवेत् ॥ धनधान्यसमायुक्तो दाता भवति धार्मिकः ॥ १५ ॥ उपवासी शुचिर्भूत्वा ब्रह्मलोकमवाप्नुयात् ॥ अस्माहकं समासाद्य यस्तु प्राणान्परित्यजेत् ॥ १६ ॥ कोटिवर्षसहस्राणि रुद्रलोके महीयते ॥ ततः स्वर्गात्परिभ्रष्टः क्षीणकर्मा दिवश्च्युतः ॥ १७ ॥ सुवर्णमणिमुक्ताढ्ये कुले जायेत रूपवान् ॥ कृत्वाऽभिषेकविधिना हयमेधफलं लभेत् ॥ १८ ॥ धनाढ्यो रूपवान्दक्षो दाता भवति धार्मिकः ॥ चतुर्वेदेषु यत्पुण्यं सत्यवादिषु यत्फलम् ॥ १९ ॥ तत्फलं लभते नूनं तत्र तीर्थेऽभिषेचनात् ॥ तीर्थानां परमं तीर्थं निर्मितं शंभुना पुरा ॥ २० ॥ हृदयेशः स्वयं विष्णुर्जपेद्देवं महेश्वरम् ॥ गन्धर्वाप्सरसश्चैव मरुतो मारुतास्तथा ॥ २१ ॥ विश्वेदेवाश्च पितरः सचन्द्राः सदिवाकराः ॥ मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः ॥ २२ ॥ प्रचेताश्च वसिष्ठश्च भृगुर्नारद एव च ॥ च्यवनो गालवश्चैव वामदेवो महामुनिः ॥ २३ ॥ वालखिल्याश्च गंधारास्तृणबिंदुश्च जाजलिः ॥ उद्दालकश्चर्ष्यशृंगो वसिष्ठश्च सनंदनः ॥ २४ ॥ शुक्रश्चैव भरद्वाजो वात्स्यो वात्स्यायनस्तथा ॥ अगस्तिर्मित्रावरुणौ विश्वामित्रो मुनीश्वरः ॥ २५ ॥ गौतमश्च पुलस्त्यश्च पौलस्त्यः पुलहः क्रतुः ॥ सनातनस्तु कपिलो वाह्निः पंचशिखस्तथा ॥ २६ ॥ अन्येऽपि बहवस्तत्र मुनयः शंसितव्रताः ॥ क्रीडन्ति देवताः सर्व्वे ऋषयः सतपोधनाः ॥ २७ ॥ मनुष्याश्चैव योगींद्राः पितरः सपितामहाः ॥ अस्माहकेऽत्र तिष्ठंति सर्व एव न संशयः ॥ २८ ॥ पितरः पितामहाश्चैव तथैव प्रपितामहाः ॥ येषां दत्तमुपस्थायि सुकृतं वाऽपि दुष्कृतम् ॥ २९ ॥ अक्षयं तत्र तत्सर्वं यत्कृतं योधनीपुरे ॥ मातरं पितरं त्यक्त्वा सर्वबन्धुसुहृज्जनान् ॥ ३० ॥ धनं धान्यं प्रियान्पुत्रांस्तथा देहं नृपोत्तम ॥ गच्छते वायुभूतस्तु शुभाऽशुभसमन्वितः ॥ ३१ ॥ अदृश्यः सर्वभूतानां परमात्मा महत्तरः ॥ शुभाऽशुभगतिं प्राप्तः कर्मणा स्वेन पार्थिव ॥ ॥ ३२ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ शुभाऽशुभं न बन्धूनां जायते केन हेतुना ॥ एकः प्रसूयते जंतुरेक एव प्रलीयते ॥ ३३ ॥ एको हि भुंक्ते सुकृतमेक एव हि दुष्कृतम् ॥ ३४ ॥ ॥ मार्कंडेय उवाच ॥ ॥ एष त्वयोक्तो नृपते महाप्रश्नः स्मृतो मया ॥ ३५ ॥ पितामहमुखोद्गीतं श्रुतं ते कथयाम्यहम् ॥ यन्मे पितामहात्पूर्वं विज्ञातमृषिसंसदि ॥ ३६ ॥ न माता न पिता बन्धुः कस्यचिन्न सुहृत्क्वचित् ॥ कस्य न ज्ञायते रूपं वायुभूतस्य देहिनः ॥ ३७ ॥ यद्येवं न भवेत्तात लोकस्य तु नरेश्वर ॥ अमर्यादं भवेन्नूनं विनश्यति चराचरम् ॥ ३८ ॥ एवं ज्ञात्वा पुरा राजन्समस्तैर्लोककर्तृभिः ॥ मर्यादा स्थापिता लोके यथा धर्मो न नश्यति ॥ ३९ ॥ धर्मे नष्टे मनुष्याणामधर्मोऽभिभवेत्पुनः ॥ ततः

 

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वधर्मचलनान्नरके गमनं ध्रुवम् ॥ ४० ॥ लोको निरंकुशः सर्वो मर्यादालंघने रतः ॥ मर्यादा स्थापिता तेन शास्त्रं वीक्ष्य महर्षिभिः ॥ ४१ ॥ स्नानं दानं जपो होमः स्वाध्यायो देवतार्चनम् ॥ पिंडोदकप्रदानं च तथैवाऽतिथिपूजनम् ॥ ४२ ॥ पितरः पितामहाश्चैव तथैव प्रपितामहाः ॥ त्रयो देवाः स्मृतास्तात ब्रह्मविष्णुमहेश्वराः ॥ ४३ ॥ पूजितैः पूजिताः सर्वे तथा मातामहास्त्रयः ॥ तस्मात्सर्वप्रयत्नेन श्रुतिस्मृत्यर्थ नोदितान् ॥ ४४ ॥ धर्मं समाचरन्नित्यं पापांशेन न लिप्यते ॥ श्रुतिस्मृत्युदितं धर्मं मनसाऽपि न लंघयेत् ॥ ४५ ॥ इह लोके परे चैव यदीच्छेच्छ्रेय आत्मनः ॥ पितापुत्रौ सदाप्येकौ बिंबाद्बिंबमिवोद्धृतौ ॥ ४६ ॥ विभक्तौ वाऽविभक्तौ वा श्रुतिस्मृत्यर्थतस्तथा ॥ उद्धरेदात्मनात्मा नमात्मानमवसादयेत् ॥ ४७ ॥ पिंडोदकप्रदानाभ्यामृते पार्थ न संशयः ॥ एवं ज्ञात्वा प्रयत्नेन पिंडोदकप्रदो भवेत् ॥ ४८ ॥ आयुर्धर्मो यश स्तेजः संततिश्चैव वर्द्धते ॥ पृथिव्यां सागरांतायां पितृक्षेत्राणि यानि च ॥ ४९ ॥ तानि ते संप्रवक्ष्यामि येषु दत्तं महाफलम् ॥ गयायां पुष्करे ज्येष्ठे प्रयागे नैमिषे तथा ॥ ५० ॥ सन्निहत्यां कुरुक्षेत्रे प्रभासे कुरुनन्दन ॥ पिंडोदकप्रदानेन यत्फलं कथितं बुधैः ॥ ५१ ॥ अस्माहके तदाऽऽप्नोति नर्मदायां न संशयः ॥ तत्र ब्रह्मा मुरारिश्च रुद्रश्च उमया सह ॥ ५२ ॥ इन्द्राद्या देवताः सर्वे पितरो मुनयस्तथा ॥ सागराः सरितश्चैव पर्वताश्च बलाहकाः ॥ ५३ ॥ तिष्ठन्ति पितरः सर्वे सर्वतीर्थाधिकं ततः ॥ स्थिता ब्रह्मशिला तत्र गजकुम्भनिभा नृप ॥ ५४ ॥ कलौ न दृश्या भवति प्रधानं यद्गयाशिरः ॥ वैशाखे मासि संप्राप्तेऽमावास्यां नृपोत्तम ॥ ५५ ॥ व्याप्य सा तिष्ठते तीर्थं गजकुम्भनिभा शिला ॥ तच्च गव्यूतिमात्रं हि तीर्थं ततः प्रचक्षते ॥ ५६ ॥ तस्मिन्दिने तत्र गत्वा यस्तु श्राद्धप्रदो भवेत् ॥ पितॄणामक्षया तृप्तिर्जायते शतवार्षिकी ॥ ५७ ॥ अन्यस्यामप्यमावास्यां यः स्नात्वा विजितेंद्रियः ॥ करोति मनुजः श्राद्धं विधिवन्मंत्रसंयुतम् ॥ ५८ ॥ तस्य पुण्यफलं यत्स्यात्तच्छृणुष्व नराधिप ॥ अग्निष्टोमाश्वमेधाभ्यां वाजपेयस्य यत्फलम् ॥ ५९ ॥ तत्फलं समवाप्नोति यथा मे शंकरोऽब्रवीत् ॥ रौरवादिषु सर्वेषु नरकेषु व्यवस्थिताः ॥ ६० ॥ पिता पितामहाद्याश्च पितृके मातृके तथा ॥ पिंडोदकेन चैकेन तर्प्पणेन विशेषतः ॥ ६१ ॥ क्रीडंति पितृलोकस्था यावदाभूतसंप्लवम् ॥ ये कर्मस्था विकर्मस्था ये जाताः प्रेतकल्मषाः ॥ ६२ ॥ पिंडेनैकेन मुच्यंते तेऽपि तत्र न संशयः ॥ अस्माहके शिला दिव्या तिष्ठते गजसन्निभा ॥ ६३ ॥ ब्रह्मणा निर्मिता पूर्वं सर्वपापक्षयंकरी ॥ उपर्यस्या यथान्यायं पितॄनुदिश्य भारत ॥ ६४ ॥ दक्षिणाग्रेषु दर्भेषु दद्यात्पिंडान्विचक्षणः ॥ भूमौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



चान्नेन सिद्धेन[1] श्राद्धं कृत्वा यथाविधि ॥ ६५ ॥ आद्भिभ्यो वस्त्रयुग्मानि छत्रोपानत्कमंडलु ॥ दक्षिणा विविधा देया पितॄनुद्दिश्य भारत ॥
॥ ६६ ॥ यो ददाति द्विजश्रेष्ठ तस्य पुण्यफलं शृणु ॥ तस्य ते द्वादशाब्दानि तृप्तिं यांति न संशयः ॥ ६७ ॥ अस्माहके महाराज पितरश्च
पितामहाः ॥ वायुभूता निरीक्षंते आगच्छंतं स्वगोत्रजम् ॥ ६८ ॥ अत्र तीर्थे सुतोऽभ्येत्य स्नात्वा तोयं प्रदास्यति ॥ श्राद्धं वा पिंडदानं वा तेन
यास्याम सद्गतिम् ॥ ६९ ॥ स्नाने कृते तु ये केचिज्जायंते वस्त्रविप्लुषः ॥ प्रीणयेन्नरकस्थांस्तु तैः पितॄन्नाऽत्र संशयः ॥ ७० ॥ केशोदबिंदव
स्तस्य ये चाऽन्ये लेपभाजिनः ॥ तृप्यंत्यनग्निसंस्कारा ये मृताः स्युः स्वगोत्रजाः ॥ ७१ ॥ तत्र तीर्थे तु ये केचिच्छ्राद्धं कृत्वा विधानतः ॥
नरकादुद्धरंत्याशु जपंतः पितृसंहिताम् ॥ ७२ ॥ वनस्पतिगते[2] सोमे यदा सोमदिनं भवेत् ॥ अक्षयाल्लभते लोकान्पिंडेनैकेन मानवः ॥ ७३ ॥
अक्षयं तत्र वै सर्वं जायते नाऽत्र संशयः ॥ नरकादुद्धरंत्याशु जपन्ते पितृसंहिताम् ॥ ७४ ॥ तस्मिंस्तीर्थे त्वमावास्यां पितॄनुद्दिश्य भारत ॥
नीलं सर्वांगसंपूर्णं योऽभिषिच्य समुत्सृजेत् ॥ ७५ ॥ तस्य पुण्यफलं वक्तुं न तु वाचस्पतिः क्षमः ॥ अस्माहके वृषोत्सर्गाद्यत्पुण्यं समवाप्यते
॥ ७६ ॥ तव शुश्रूषणात्सर्वं तत्प्रवक्ष्यामि भारत ॥ रौरवादिषु ये किंचित्पच्यंते तस्य पूर्वजाः ॥ ७७ ॥ वृषोत्सर्गेण तान्सर्वांस्तारयेदेकविं
शतिम् ॥ लोहितो यस्तु वर्णेन मुखे पुच्छे च पांडुरः ॥ ७८ ॥ पिंगः खुरविषाणाभ्यां स नीलो वृष उच्यते ॥ यस्तु सर्वांगपिंगश्च श्वेतः
पुच्छखुरेषु च ॥ ७९ ॥ स पिंगो वृष इत्याहुः पितॄणां प्रीतिवर्धनः ॥ पारावतसवर्णश्च ललाटे तिलको भवेत् ॥ ८० ॥ तं वृषं बभ्रुमित्याहुः
पूर्णं सर्वांगशोभनम् ॥ सर्वांगेष्वेकवर्णो यः पिंगः पुच्छखुरेषु च ॥ ८१ ॥ खुरपिंगं तमित्याहुः पितॄणां सद्गतिप्रदम् ॥ नीलं सर्वशरीरेण स्वा
रक्तनयनं दृढम् ॥ ८२ ॥ तमेव नीलमित्याहुर्नीलः पञ्चविधः स्मृतः ॥ यस्तु वैश्यगृहे जातः स वै नीलो विशिष्यते ॥ ८३ ॥ न वाहयेद्गृहे
जातं वत्सकं तु कदाचन ॥ तेनैव च वृषोत्सर्गे पितॄणामनृणो भवेत् ॥ ८४ ॥ जातं तु स्वगृहे वत्सं द्विजन्मा यस्तु वाहयेत् ॥ पतंति पितर
स्तस्य ब्रह्मलोकगता अपि ॥ ८५ ॥ यथायथा हि पिबति पीत्वा धूनाति मस्तकम् ॥ पिबन्पितॄन्प्रीणयति नरकादुद्धरेद्धुनन् ॥ ८६ ॥ यथा
पुच्छाभिघातेन स्कन्धं गच्छंति बिंदवः ॥ नरकादुद्धरंत्याशु पतितान्गोत्रिणस्तथा ॥ ८७ ॥ गर्जन्प्रावृषि काले तु विषाणाभ्यां भुवं लिखन् ॥
॥१०८॥ खुरेभ्यो या मृदुद्भूता तया संप्रीणयेदृषीन् ॥ ८८ ॥ पिबन्पितॄन्प्रीणयते खादनोल्लेखने सुरान् ॥ गर्जन्नृषिमनुष्यांश्च धर्मरूपो हि धर्मज ॥ ८९ ॥

१ भूमां चान्नेन सिद्धेन—एतेन—पाकनिष्पत्तिं शिलोपरि न कुर्यात्—किं तु भूमावेव—पिंडदानमत्र शिलायां कर्तव्यमिति सूचितम् । २ वनस्पतिगते सोमे—अमायाम्—इत्यर्थः—प्रागुक्ततः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूतैर्वापि पिशाचैर्वा चातुर्थिकज्वरेण वा ॥ गृहीतोऽस्माहकं गच्छेत्सर्वेषामाधिनाशनम् ॥ ९० ॥ स्नात्वा तु विमले तोये दर्भग्रंथिं निबन्धयेत् ॥ मस्तके बाहुमूले वा नाभ्यां वा गलकेऽपि वा ॥ ९१ ॥ गत्वा देवसमीपं च प्रादक्षिण्येन केशवम् ॥ ततः समुच्चरन्मंत्रं गायत्र्या वाथ वैष्णवम् ॥ ९२ ॥ नारायणं शरण्येशं सर्वदेवनमस्कृतम् ॥ नमो यज्ञांगसंभूत सर्वव्यापिन्नमोऽस्तु ते ॥ ९३ ॥ नमो नमस्ते देवेश पद्मगर्भ सनातन ॥ दामोदर जयानंत रक्ष मां शरणागतम् ॥ ९४ ॥ त्वं कर्त्ता त्वं च हर्त्ता च जगत्यस्मिंश्चराचरे ॥ त्वं पालयसि भूतानि भुवनं त्वं बिभर्षि च ॥ ९५ ॥ प्रसीद देवदेवेश सुप्तमंगं प्रबोधय ॥ त्वद्ध्याननिरतो नित्यं त्वद्भक्तिपरमो हरे ॥ ९६ ॥ इति स्तुतो मया देव प्रसादं कुरु मेऽच्युत ॥ मां रक्षरक्ष पापेभ्यस्त्रायस्व शरणागतम् ॥ ९७ ॥ एवं स्तुत्वा च देवेशं दानवान्तकरं हरिम् ॥ पुनरुक्तेन वै स्नात्वा ततो विप्रांस्तु भोजयेत् ॥ ९८ ॥ वेदोक्तेन विधानेन स्नानं कृत्वा यथाविधि ॥ पिंडनिर्वपणं कृत्वा वाचयेत्स्वस्तिकं ततः ॥ ९९ ॥ एवं स्तुत्वा च देवेशं दानवांतकरं हरिम् ॥ पुनरुक्तेन[1] वै स्नात्वा ततो विप्रांस्तु भोजयेत्॥१००॥वेदोक्तेन विधानेन स्नानं कृत्वा यथाविधि ॥ एवं तान्वाचयित्वा तु ततो विप्रान्विसर्जयेत् ॥ १०१ ॥ यत्तत्रोच्चरितं किंचित्तद्विप्रेभ्यो निवेदयेत्॥ तत्र तीर्थे नरः स्नात्वा नारी वा भक्तितत्परा ॥ शक्तितो दक्षिणां दद्यात्कृत्वा श्राद्धं यथाविधि ॥ १०२ ॥ तत्र तीर्थे नरो यावत्स्नापयेद्विधिपूर्वकम् ॥ क्षीरेण मधुना वापि दध्ना वा शीतवारिणा ॥ १०३ ॥ तावत्पुष्करपात्रेषु पिबंति पितरो जलम्॥अयने विषुवे चैव युगादौ सूर्यसंक्रमे ॥१०४॥ पुष्पैः संपूज्य देवेशं नैवेद्यं यः प्रदापयेत ॥ सोश्वमेधस्य यज्ञस्य फलं प्राप्नोति पुष्कलम् ॥ १०५ ॥ तत्र तीर्थे तु यो राजन्सूर्यग्रहणमाचरेत् ॥ सूर्यतेजोनिभैर्यानैर्विष्णुलोके महीयते ॥ १०६ ॥ तत्र तीर्थे तु यः श्राद्धं पितृभ्यः संप्रयच्छति ॥ सत्पुत्रेण च तेनैव संप्राप्तं जन्मनः फलम् ॥१०७॥ इति श्रुत्वा ततो देवाः सर्वे शक्रपुरोगमाः॥ ब्रह्मविष्णुमहेशाश्च स्थापयां चक्रुरीश्वरम् ॥ १०८ ॥ सर्वरोगोपशमनं सर्वपातकनाशनम्॥ यस्तु संवत्सरं पूर्णममावास्यां तु भावितः ॥ १०९ ॥ पितृभ्यः पिंडदानं च कुर्याद स्माहके नृप ॥ त्रिपुष्करे गयायां च प्रभासे नैमिषे तथा ॥११०॥ यत्पुण्यं श्राद्धकर्तृणां तदिहैव भवेद्ध्रुवम् ॥ तिलोदकं कुशैर्मिश्रं यो दद्याद्दक्षिणामुखः ॥ १११ ॥ मन्वादौ च युगादौ च व्यतीपाते दिनक्षये॥ यो दद्यात्पितृमातृभ्यः सोऽश्वमेधफलं लभेत् ॥११२॥ अस्माहके नरो यस्तु स्नात्वा संपूजयेद्धरिम् ॥ ब्रह्माणं शंकरं भक्त्या कुर्य्याज्जागरणक्रियाम् ॥ ११३ ॥ सर्वपापविनिर्मुक्तः शक्रातिथ्यमवाप्नुयात् ॥ तत्र तीर्थे नरः स्नात्वा यः

१ पुनरुक्तेन—इत्याद्युक्तम्—एतेन त्रिरावृत्तिः स्तोत्रपाठस्य सूचिता पौनरुक्त्यमिदमिति तु न शंकनीयम् ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पश्यति जनार्दनम् ॥ ११४ ॥ विशेषविधिनाऽभ्यर्च्य प्रणम्य च पुनःपुनः ॥ सपुत्रेण च तेनैव पितृणां विहिता गतिः ॥ ११५ ॥ एकमूर्तिस्त्र
यो देवा ब्रह्मविष्णुमहेश्वराः ॥ सत्कार्यकारणोपेताः सुसूक्ष्माः सुमहाफलाः॥ ११६ ॥ एतत्ते कथितं राजन्महापातकनाशनम् ॥ अस्माहकस्य माहा
त्म्यं किमन्यत्परिपृच्छसि ॥ ११७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे अस्माहकतीर्थ
माहात्म्यवर्णनं नाम षट्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४६ ॥ ॥ मार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल सिद्धेश्वरमनुत्तमम् ॥
नर्मदादक्षिणे कूले तीर्थं परमशोभनम् ॥ १ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेद्वृषभध्वजम् ॥ सर्वपापविनिर्मुक्तो गतिं यात्यश्वमेधिनाम् ॥ २ ॥
तत्र तीर्थे तुयः स्नात्वा श्राद्धं कुर्यात्प्रयत्नतः॥ पितृणां प्रीणनार्थाय सर्वं तेन कृतं भवेत् ॥ ३ ॥ तत्र तीर्थे मृतानां तु जंतूनां नृपसत्तम ॥ गर्भवासे
मतिस्तेषां न जायेत कदाचन ॥ ४ ॥ गर्भवासो हि दुःखाय न सुखाय कदाचन ॥ तत्तीर्थवारिणा स्नातुर्न पुनर्भवसंभवः ॥ ५ ॥ इति
श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे सिद्धेश्वरतीर्थमाहात्म्यवर्णनं नाम सप्तचत्वारिंशदधिकशततमोऽ
ध्यायः ॥ १४७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल तीर्थमंगारकं शिवम् ॥ उत्तरे नर्मदाकूले सर्वपापक्षयंकरम् ॥ १ ॥
चतुर्थ्यंगारकदिने संकल्प्य कृतनिश्चयः ॥ स्नायादस्तं गते सूर्ये संध्योपासनतत्परः ॥ २ ॥ पूजयेल्लोहितं[1] भक्त्या गंधमाल्यविभूषणैः॥ संस्थाप्य
स्थंडिले देवं रक्तचंदनचर्चितम् ॥ ३ ॥ अंगारकायेति नमः कर्णिकायां प्रपूजयेत् ॥ कुजाय भूमिपुत्राय रक्तांगाय सुवाससे ॥ ४ ॥ हरकोपोद्भवा
येति स्वेदजायाऽतिबाहवे ॥ सर्वकामप्रदायेति पूर्वादिषु दलेषु च ॥ ५ ॥ एवं संपूज्य विधिवद्दद्यादर्घ्यं विधानतः ॥ भूमिपुत्र महावीर्य स्वेदो
द्भव पिनाकिनः ॥ ६ ॥ अंगारक महातेजा लोहितांग नमोऽस्तु ते ॥ करकं वारिसंयुक्तं शालितंदुलपूरितम् ॥ ७ ॥ सहिरण्यं सवस्त्रं च मोदकोपरि
संस्थितम् ॥ ब्राह्मणाय निवेद्यं तत्कुजो मे प्रीयतामिति ॥ ८ ॥ अर्घं दत्त्वा विधानेन रक्तचंदनवारिणा ॥ रक्तपुष्पसमाकीर्णं तिलतंदुलमिश्रितम् ॥
॥ ९ ॥ कृत्वा ताम्रमये पात्रे मंडले वर्तुले शुभे ॥ कृत्वा शिरसि तत्पात्रं जानुभ्यां धरणीं गतः ॥ १० ॥ मंत्रपूतं महाभाग दद्यादर्घ्यं विचक्षणः ॥
॥१०९॥ ततो भुंजीत मौनेन क्षारतिलाम्लवर्जितम् ॥ ११ ॥ स्निग्धं मृदुसमधुरमात्मनः श्रेय इच्छता ॥ एवं चतुर्थ्ये संप्राप्ते चतुर्थ्यंगारके नृप ॥ १२ ॥ ॥२८३॥
सौवर्णं कारयेद्देवं यथाशक्ति सुरूपिणम् ॥ स्थापयेत्ताम्रके पात्रे गुडपीठसमन्विते ॥ १३ ॥ गंधपुष्पादिभिर्देवं पूजयेद्गुडसंस्थितम् ॥ ईशान्यां

१ लोहितम्—अंगारकम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थापयेद्देवं गुडतोयसमन्वितम् ॥१४॥ कासारेण तथाग्नेय्यां स्थापयेत्करकं परम् ॥ रक्ततंदुलसंमिश्रं नैर्ऋत्यां वायुगोचरे ॥१५॥ स्थापयेन्मोदकैः सार्धं चतुर्थं करकं बुधः ॥ सूत्रेण वेष्टितग्रीवं गंधमाल्यैरलंकृतम् ॥ १६ ॥ शंखतूर्यनिनादेन जयशब्दादिमंगलैः ॥ रक्तांबरधरं विप्रं रक्तमाल्यानुलेपनम् ॥ १७ ॥ वेदिमध्यगतं वाऽपि महदासनसंस्थितम् ॥ सुरूपं सुभगं शांतं सर्वभूतहिते रतम् ॥१८॥ वेदविद्याव्रतस्नातं सर्वशास्त्रविशारदम् ॥ पूजयित्वा यथान्यायं वाचयेत्पां डुनंदन ॥ १९ ॥ रक्तां गां च ततो दद्याद्रक्तेनानडुहा सह ॥ प्रीयतां भूमिजो देवः सर्वदैवतपूजितः ॥ २० ॥ विप्रं प्रदक्षिणीकृत्य पत्नीपुत्रसम न्वितः ॥ पितृमातृसुहृत्सार्द्धं क्षमाप्य च विसर्ज्जयेत् ॥ २१ ॥ एवं कृतस्य तस्याऽथ तस्मिंस्तीर्थे विशेषतः ॥ यत्पुण्यफलमुद्दिष्टं तत्ते सर्वं वदा म्यहम् ॥ २२ ॥ सप्त जन्मानि राजेंद्र सुरूपः सुभगो भवेत् ॥ तीर्थस्याऽस्य प्रभावेन नाऽत्र कार्या विचारणा ॥ २३ ॥ अकामो वा सकामो वा तत्र तीर्थे मृतो नरः ॥ अंगारकपुरं याति देवगंधर्वपूजितः ॥ २४ ॥ उपभुज्य यथान्यायं दिव्यान्भोगाननुत्तमान् ॥ इह मानुष्य लोके वै राजा भवति धार्मिकः ॥ २५ ॥ सुरूपः सुभगश्चैव सर्वव्याधिविवर्जितः ॥ जीवेद्वर्षशतं साग्रं सर्वलोकनमस्कृतः ॥ २६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखंडे मंगलेश्वरतीर्थमाहात्म्यवर्णनंनामाष्टाचत्वारिंशदधिकशततमोऽध्यायः ॥ १४८ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तस्यैवाऽनंतरं तीर्थं लिंगेश्वरमिति श्रुतम् ॥ दर्शनाद्देवदेवस्य यत्र पापं प्रणश्यति ॥ १ ॥ कृत्वा तु कदनं घोरं दानवानां युधिष्ठिर ॥ वाराहं रूपमास्थाय नर्मदायां व्यवस्थितः ॥ २ ॥ तत्र तीर्थे तु यः स्नानं कृत्वा देवं नमस्यति ॥ स मुच्यते नृपश्रेष्ठ महापापैः पुराकृतैः ॥ ३ ॥ द्वादश्यां कृष्णपक्षस्य शुक्ले च समुपोषितः ॥ गंधमाल्यैर्जगन्नाथं पूजयेत्पांडुनंदन ॥ ४ ॥ ब्राह्मणांश्च महाभाग दानसंमानभोजनैः ॥ पूजयेत्परया भक्त्या तस्य पुण्यफलं शृणु ॥ ५ ॥ सत्रयाजिफलं जंतुर्लभते द्वादशाब्दकैः ॥ ब्राह्मणान्भोजयंस्तत्र तदेव लभते फलम् ॥ ६ ॥ तर्प्पयित्वा पितॄन्देवान्स्नात्वा तद्गतमानसः ॥ जपेद्द्वादशनामानि देवस्य पुरतः स्थितः ॥ ७ ॥ मासिमासि निराहारो द्वादश्यां कुरुनंदन ॥ केशवं पूजयेन्नित्यं मासि मार्गशिरे बुधः ॥८॥ पौषे नारायणं देवं माघमासे तु माधवम् ॥ गोविंदं फाल्गुने मासि विष्णुं चैत्रे समर्चयेत् ॥ ९ ॥ वैशाखे मधुहंतारं ज्येष्ठे देवं त्रिविक्रमम् ॥ वामनं तु तथाऽऽषाढे श्रावणे श्रीधरं स्मरेत् ॥ १० ॥ हृषीकेशं भाद्रपदे पद्मनाभं तथाऽश्विने ॥ दामोदरं कार्त्तिके तु कीर्त्तयन्नावऽसीदति ॥ ११ ॥ वाचिकं मानसं पापं कर्मजं यत्पुरा कृतम् ॥ तन्नश्यति न संदेहो मासनामानुकीर्त्तनात् ॥ १२ ॥ स्वयं विशुद्धः सततमुन्मिषन्निमिषंस्तथा ॥ शीघ्रं प्रपश्य भुंजानो मंत्रहीनं समुद्गिरेत् ॥ १३ ॥ परमापद्गतस्याऽपि जंतोरेषा प्रति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 क्रिया ॥ यन्मासाधिपतेर्विष्णोर्मासनामानुकीर्त्तनम् ॥ १४ ॥ ता निशास्ते च दिवसास्ते मासास्ते च वत्सराः ॥ नराणां सफला येषु चिंतितो 
 भगवान्हरिः ॥ १५ ॥ परमापद्गतस्याऽपि यस्य देवो जनार्दनः ॥ नाऽवसर्पति हृत्पद्मात्स योगी नाऽत्र संशयः ॥ १६ ॥ ते भाग्यहीना मनुजाः 
सुशोच्यास्ते भूमिभाराय कृतावताराः ॥ अचेतनास्ते पशुभिः समाना ये भक्तिहीना भगवत्यनंते ॥ १७ ॥ ते पूर्णकार्या पुरुषाः पृथिव्यां ते स्वां 
गपाताद्भुवनं पुनंति ॥ विचक्षणा विश्वविभूषणास्ते ये भक्तियुक्ता भगवत्यनंते ॥१८॥ स एव सुकृती तेन लब्धं जन्मतरोः फलम् ॥ चित्ते वचसि
काये च यस्य देवो जनार्दनः ॥ १९ ॥ एतत्तीर्थवरं पुण्यं लिंगो यत्र जनार्दनः ॥ वंचयित्वा रिपून्संख्ये क्रोडो भूत्वा सनातनः ॥२०॥ उपप्लवे चंद्र
मसो रवेश्च योह्यष्टकानामयनद्वये च ॥ पानीयमप्यत्र तिलैर्विमिश्रं दद्यात्पितृभ्यः प्रयतो मनुष्यः ॥ २१ ॥ घोणोन्मीलितमेरुरंध्रनिवहो दुःखाब्धि
मज्जत्प्लवः प्रादुर्भूतरसातलोदरबृहत्पंकार्द्धमग्नक्षुरः ॥ फूत्कारोत्करनुन्नवातविदलद्दिग्दंतिनादश्रुतिन्यस्तस्तब्धवपुः श्रुतिर्भवतु वः क्रोडो हरिः शांतये
॥ २२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे लिंगवाराहतीर्थमाहात्म्यवर्णनंनामैकोनपञ्चाशद
धिकशततमोऽध्यायः ॥ १४९ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महाराज कुसुमेश्वरमुत्तमम् ॥ दक्षिणे नर्मदाकूले उप
पातकनाशनम् ॥ १ ॥ कामेन स्थापितो देवः कुसुमेश्वरसंज्ञितः ॥ ख्यातः सर्वेषु लोकेषु देवदेवः सनातनः ॥ २ ॥ कामो मनोभवो विश्वः कुसु
मायुधचापभृत् ॥ स कामान्ददाति सर्वान्पूजितो मीनकेतनः ॥ ३ ॥ तेन निर्दग्धकायेन चाराध्य परमेश्वरम् ॥ अनंगेन तथा प्राप्तमंगित्वं नर्मदा
तटे ॥ ४ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ अंगिभूतस्य नाशत्वमनंगस्य तु मे वद ॥ न श्रुतं न च मे दृष्टं भूतपूर्वं कदाचन ॥ ५ ॥ एतत्सर्वं यथा
वृत्तमाचक्ष्व द्विजसत्तम ॥ श्रोतुमिच्छामि विप्रेंद्र भीमार्जुनयमैः सह ॥६॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ आदौ कृतयुगे तात देवदेवो महेश्वरः ॥ तप
श्चचार विपुलं गंगासागरसंस्थितः ॥ ७ ॥ तेन संपादिता लोकास्तपसा ससुरासुराः ॥ जग्मुस्ते शरणं सर्वे देवदेवं शचीपतिम् ॥ ८ ॥ व्यापकः सर्व
भूतानां देवदेवो महेश्वरः ॥ संतापयति लोकांस्त्रींस्तन्निवारय गोपते[1] ॥९॥ श्रुत्वा तद्वचनं तेषां देवानां बलवृत्रहा ॥ चिंतयामास मनसा तपोविघ्नाय
 चादिशत् ॥ १० ॥ अप्सरां मेनकां रंभां घृताचीं च तिलोत्तमाम् ॥ वसंतं कोकिलं कामं दक्षिणानिलमुत्तमम् ॥ ११ ॥ गत्वा तत्र महादेवं तप 
श्चरणतत्परम् ॥ क्षोभयध्वं यथान्यायं गंगासागरवासिनम् ॥ १२ ॥ एवमुक्तास्तु ते सर्वे देवराजेन भारत ॥ देवाप्सरःसमोपेता जग्मुस्ते हर

१ गोपते—स्वर्लोकाधीश्वर—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सन्निधौ ॥ १३ ॥ वसंतमासे कुसुमाकराकुले मयूरदात्यूहसुकोकिलाकुले ॥ प्रनृत्य देवाप्सरगीतसंकुले प्रवाति वाते यमनैर्ऋताकुले[1] ॥ १४ ॥ तेन
संमूर्च्छिताः सर्वे संसर्गाच्च खगोत्तमाः ॥ मधुमाधवगंधेन सकिन्नरमहोरगाः ॥ १५ ॥ यावदालोकते तावत्तद्वनं व्याकुलीकृतम् ॥ वीक्षते मदना
विष्टं दशावस्थागतं जनम् ॥ १६ ॥ देवदेवोऽपि देवानामवस्थात्रितयं गतः ॥ सात्त्विकीं राजसीं राजंस्तामसीं तां शृणुष्व मे ॥ १७ ॥ एकं
योगसमाधिना मुकुलितं चक्षुर्द्वितीयं पुनः पार्वत्या जघनस्थलस्तनतटे शृंगारभारालसम् ॥ अन्यद्दूरनिरस्तचापमदनक्रोधानलोद्दीपितं शंभो
र्भिन्नरसं समाधिसमये नेत्रत्रयं पातु वः ॥ १८ ॥ एवं दृष्टः स देवेन सशरः सशरासनः ॥ भस्मीभूतो गतः कामो विनाशः सर्वदेहिनाम् ॥ १९ ॥
कामं दृष्ट्वा क्षयं यातं तत्र देवाऽप्सरोगणाः ॥ भीता यथाऽऽगतं सर्वे जग्मुश्चैव दिशो दश ॥ २० ॥ कामेन रहिता लोकाः ससुरासुरमानवाः ॥
ब्रह्माणं शरणं जग्मुर्देवा इन्द्रपुरोगमाः ॥ २१ ॥ सीदमानं जगद्दृष्ट्वा तमूचुः परमेष्ठिनम् ॥ जानासि त्वं जगच्छेषं प्रभो मैथुनसंभवात् ॥ २२ ॥
प्रजाः सर्वा विशुष्यंति कामेन रहिता विभो ॥ २३ ॥ एतच्छ्रुत्वा वचस्तेषां देवानां प्रपितामहः॥ जगाम सहितस्तत्र यत्र देवो महेश्वरः ॥ २४ ॥
अतोषयज्जगन्नाथं सर्वभूतमहेश्वरम् ॥ स्तुतिभिस्तंडकैः[2] स्तोत्रैर्वेदवेदांगसंभवैः ॥ २५ ॥ ततस्तुष्टो महादेवो देवानां परमेश्वरः ॥ उवाच मधुरां
वाणीं देवान्ब्रह्मपुरोगमान् ॥ २६ ॥ किं कार्यं कश्च संतापः किं वाऽऽगमनकारणम् ॥ देवतानामृषीणां च कथ्यतां मम मा चिरम् ॥ २७ ॥
॥ ॥ देवा ऊचुः ॥ ॥ कामनाशाज्जगन्नाशो भविताऽयं चराचरे ॥ त्रैलोक्यं त्वं पुनः शंभो उत्पादयितुमर्हसि ॥ २८ ॥ एतच्छ्रुत्वा वचस्तेषां
विमृश्य परमेश्वरः ॥ चिंतयामास कामस्य विग्रहं भुवि दुर्लभम् ॥ २९ ॥ आजगाम ततः शीघ्रमनंगो ह्यंगतां गतः॥ प्राणदः सर्वभूतानां पश्यतां
नृपसत्तम ॥ ३० ॥ ततः शंखनिनादेन भेरीणां निःस्वनेन च ॥ अभ्यनन्दंस्ततो देवं सुरासुरमहोरगाः ॥ ३१ ॥ नमस्ते देवदेवेश कृतार्थाः सुर
सत्तमाः ॥ विसर्जिताः पुनर्जग्मुर्यथागतमरिंदम ॥ ३२ ॥ गतेषु सर्वदेवेषु कामदेवोऽपि भारत ॥ तपश्चचार विपुलं नर्मदातटमाश्रितः ॥ ३३ ॥
तपोजपकृशीभूतो दिव्यं वर्षशतं किल ॥ महाभूतैर्विघ्नकरैः पीड्यमानः समंततः ॥ ३४ ॥ आत्मविघ्नविनाशार्थं संस्मृतः कुण्डलेश्वरः ॥ चकार
रक्षां सर्वत्र शरपाते नृपोत्तम ॥ ३५ ॥ ततस्तुष्टो महादेवो दृढभक्त्या वरप्रदः ॥ वरेण च्छंदयामास कामं कामविनाशनः ॥ ३६ ॥ ज्ञात्वा तुष्टं
महादेवमुवाच झषकेतनः ॥ प्रणतः प्रांजलिर्भूत्वा देवदेवं त्रिलोचनम् ॥ ३७ ॥ यदि तुष्टोऽसि देवेश यदि देयो वरो मम ॥ अत्र तीर्थे जगन्नाथ

१ स्वेद–कंपादि–कामजदशावस्थासंकुलम्–इत्यर्थः । २ तांडवैः–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सदा सन्निहितो भव ॥ ३८ ॥ तथेति चोक्त्वा वचनं देवदेवो महेश्वरः ॥ जगामाऽऽकाशमाविश्य स्तूयमानोऽप्सरोगणैः ॥ ३९ ॥ गते चाऽदर्शनं
देवे कामदेवो जगद्गुरुम् ॥ स्थापयामास राजेंद्र कुसुमेश्वरसंज्ञितम् ॥ ४० ॥ तत्र तीर्थे तु यः स्नात्वा ह्युपवासपरायणः ॥ चैत्रमासे चतुर्दश्यां
मदनस्य दिनेऽथ वा ॥ ४१ ॥ प्रभाते विमले प्राप्ते स्नात्वा पूज्य दिवाकरम् ॥ तिलमिश्रेण तोयेन तर्पयेत्पितृदेवताः ॥ ४२ ॥ कृत्वा स्नानं
विधानेन पूजयित्वा च तं नृप ॥ पिंडनिर्वपणं कुर्यात्तस्य पुण्यफलं शृणु ॥ ४३ ॥ सत्रयाजिफलं यच्च लभते द्वादशाब्दिकम् ॥ पिंडदानात्फलं
तच्च लभते नाऽत्र संशयः ॥ ४४ ॥ अंकुल्लमूले यः पिंडं पितॄनुद्दिश्य दापयेत् ॥ तस्य ते द्वादशाब्दानि तृप्तिं यांति पितामहाः ॥ ४५ ॥ कृमिकी
टपतंगा ये तत्र तीर्थे युधिष्ठिर ॥ प्राप्नुवंति मृताः स्वर्गं किं पुनर्ये नरा मृताः ॥ ४६ ॥ संन्यासं कुरुते योऽत्र जितक्रोधो जितेंद्रियः ॥ कुसुमेशे
नरो भक्त्या स गच्छेच्छिवमन्दिरम् ॥ ४७ ॥ तत्र दिव्याप्सरोभिश्च देवगन्धर्वगायनैः ॥ क्रीडते सेव्यमानस्तु कल्पकोटिशतं नृप ॥ ४८ ॥ पूर्णे
चैव ततः काल इह मानुष्यतां गतः ॥ जायते राजराजेंद्रैः पूज्यमानो नृपो महान् ॥ ४९ ॥ सुरूपः सुभगो वाग्मी विक्रांतो मतिमाञ्छुचिः ॥
जीवेद्वर्षशतं साग्रं सर्वव्याधिविवर्जितः ॥ ५० ॥ एतत्पुण्यं पापहरं तीर्थकोटिशताधिकम् ॥ कुसुमेशेति विख्यातं सर्वदेवनमस्कृतम् ॥ ५१ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे कुसुमेश्वरतीर्थमाहात्म्यवर्णनंनाम पञ्चाशदधिकशततमो
ऽध्यायः ॥ १५० ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ उत्तरे नर्मदाकूले तीर्थं परमशोभनम् ॥ जयवाराहमाहात्म्यं सर्वपापप्रणाश
नम् ॥ १ ॥ उद्धृता जगती येन सर्वदेवनमस्कृता ॥ लोकानुग्रहबुद्ध्या च संस्थितो नर्मदातटे ॥ २ ॥ तत्र तीर्थे तु यः स्नात्वा वीक्षते मधुसूद
नम् ॥ मुच्यते सर्वपापेभ्यो दशजन्माऽनुकीर्त्तनात् ॥ ३ ॥ मत्स्यः कूर्मो वराहश्च नरसिंहोऽथ वामनः ॥ रामो[1] रामश्च कृष्णश्च बुद्धः कल्किश्च ते
दश ॥ ४ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ मत्स्येन किं कृतं तात कूर्मेण मुनिसत्तम ॥ वराहेण च किं कर्म नरसिंहेन किं कृतम् ॥ ५ ॥ वाम
नेन च रामेण राघवेण च किं कृतम् ॥ बुद्धरूपेण किं वाऽपि कल्किना किं कृतं वद ॥ ६ ॥ एवमुक्तस्तु विप्रेंद्रो धर्मपुत्रेण धीमता ॥ उवाच मधुरां
वाणीं तदा धर्मसुतं प्रति ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ मीनो भूत्वा पुरा कल्पे प्रीत्यर्थं ब्रह्मणो विभुः ॥ समर्पयत्ससमुद्धृत्य वेदान्मग्नान्म
हार्णवे ॥ ८ ॥ अमृतोत्पादने राजन्कूर्मो भूत्वा जगद्गुरुः ॥ मंदरं धारयामास तथा देवीं वसुन्धराम् ॥ ९ ॥ उज्जहार धरां मग्नां पातालतलवासि

१ रामः—परशुराम इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नीम् ॥ वाराहं रूपमास्थाय देवदेवो जनार्द्दनः ॥ १० ॥ नरस्यार्द्धतनुं कृत्वा सिंहस्यार्द्धतनुं तथा ॥ हिरण्यकशिपोर्वक्षो विददार नखांकुशैः ॥ ॥ ११ ॥ जटी वामनरूपेण स्तूयमानो द्विजोत्तमैः ॥ तद्दिव्यं रूपमास्थाय क्रमित्वा मेदिनीं क्रमैः ॥ १२ ॥ कृतवांश्च बलिं पश्चात्पातालतलवासिनम् ॥ स्थापयित्वा सुरान्सर्वान्गतो विष्णुः स्वकं पुरम् ॥ १३ ॥ जमदग्निसुतो रामो भूत्वा शस्त्रभृतां वरः ॥ क्षत्रियान्पृथिवीपालानवधीद्धैहयादिकान् ॥ १४ ॥ कश्यपाय महीं दत्त्वा सपर्वतवनाकराम् ॥ तपस्तपति देवेशो महेन्द्रेऽद्यापि भारत ॥१५॥ ततो दाशरथी रामो रावणं देवकण्टकम् ॥ सगणं समरे हत्वा राज्यं दत्त्वा विभीषणे ॥ १६ ॥ पालयित्वा नयाद्भूमिं मखैः संतपर्य्य देवताः ॥ स्वर्गं गतो महातेजा रामो राजीवलोचनः ॥ १७ ॥ वसुदेवगृहे भूयः संकर्षणसहायवान् ॥ अवतीर्णो जगन्नाथो वासुदेवो युधिष्ठिर ॥ १८ ॥ सोऽवधीत्तव सामर्थ्याद्वधार्थं दुष्टभूभृताम् ॥ चाणूरकंसकेशीनां जरासंधस्य भारत ॥ १९ ॥ तेन त्वं सुसहायेन हत्वा शत्रून्नरेश्वर ॥ भोक्ष्यसे पृथिवीं सर्वां भ्रातृभिः सह संभृताम् ॥ २० ॥ तथा बुद्धत्वमपरं नवमं प्राप्स्यतेऽच्युतः ॥ शांतिमान्देवदेवेशो मधुहंता मधुप्रियः ॥ २१ ॥ तेन बुद्धस्वरूपेण देवेन परमेष्ठिना ॥ भविष्यति जगत्सर्वं मोहितं सचराचरम् ॥ २२ ॥ न श्रोष्यंति पितुः पुत्रास्तदाप्रभृति भारत ॥ न गुरोर्बांधवाः शिष्या भविष्यत्यधरोत्तरम् ॥ ॥ २३ ॥ जितो धर्मो ह्यधर्मेण चासत्येन ऋतं जितम् ॥ जिताश्चौरैश्च राजानः स्त्रीभिश्च पुरुषा जिताः ॥ २४ ॥ सीदंति चाग्निहोत्राणि गुरौ पूजा प्रणश्यति ॥ सीदंति मानवा धर्म्माः कलौ प्राप्ते युधिष्ठिर ॥ २५ ॥ द्वादशे दशमे वर्षे नारी गर्भवती भवेत् ॥ कन्यास्तत्र प्रसूयंते ब्राह्मणो हरिपिंगलः ॥ २६ ॥ भविष्यति ततः कल्किर्दशमे जन्मनि प्रभुः ॥ २७ ॥ एकत्ते कथितं राजन्देवस्य परमेष्ठिनः ॥ कारणं दश जन्मानां सर्वपापक्षयंकरम् ॥ २८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे श्वेतवाराहतीर्थमाहात्म्यवर्णनंनामैकपञ्चाशदधिकशततमोऽध्यायः ॥ १५१ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेद्धरापाल भार्गलेश्वरमुत्तमम् ॥ शंकरं जगतः प्राणं स्मृतमात्राघनाशनम् ॥ १ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरम् ॥ अश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ २ ॥ तत्र तीर्थे तु यः कश्चित्प्राणत्यागं करिष्यति ॥ अनिवर्त्तिका गतिस्तस्य रुद्रलोकादसंशयम् ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे भार्गलेश्वरतीर्थमाहात्म्यवर्णनंनाम द्विपंचाशदधिकशततमोऽध्यायः ॥ १५२ ॥ ॥ छ ॥ ॥ छ ॥

---

१ नयात्—नीत्या—इत्यर्थः । २ अधरोत्तरम्—नीचैरुपरितनम्—सृष्टिक्रमव्यत्यासः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





॥ ॥ मार्कण्डेय उवाच ॥ ॥ तस्यैवानंतरं चान्यद्रवितीर्थमनुत्तमम् ॥ यस्य संदर्शनादेव मुच्यन्ते पातकैर्नराः ॥ १ ॥ रवितीर्थे तु यः स्नात्वा नरः पश्यति भास्करम् ॥ तस्य यत्फलमुद्दिष्टं स्वयं देवेन तच्छृणु ॥ २ ॥ नांधो न मूको बधिरः कुले भवति कश्चन ॥ कुरूपः कुनखी वापि तस्य जन्मानि षोडश ॥ ३ ॥ दद्रुचित्रककुष्ठानि मण्डलानि विचर्चिका ॥ नश्यंति देवभक्तस्य षण्मासान्नात्र संशयः ॥ ४ ॥ चरितं तस्य देवस्य पुराणे यच्छ्रुतं मया ॥ न तत्कथयितुं शक्यं संक्षेपेण नृपोत्तम ॥ ५ ॥ तत्र तीर्थे तु यद्दानं रविमुद्दिश्य दीयते ॥ विधिना पात्रविप्राय तस्यांतो नाऽस्ति कर्हिचित् ॥ ६ ॥ अयने विषुवे चैव चंद्रसूर्यग्रहे तथा ॥ रवितीर्थे प्रदत्तानां दानानां फलमुत्तमम् ॥ ७ ॥ संक्रांतौ यानि दानानि हव्यकव्यानि भारत ॥ अपामिव समुद्रस्य तेषामंतो न लभ्यते ॥ ८ ॥ येनयेन यदा दत्तं येनयेन यदा हुतम् ॥ तस्य तस्य तदा काले सविता प्रतिदायकः ॥ ९ ॥ सप्त जन्मानि तान्येव ददात्यर्कः पुनःपुनः ॥ शतमिंदुक्षये दानं सहस्रं तु दिनक्षये ॥ १० ॥ संक्रांतौ शतसाहस्रं व्यतीपाते त्वनंतकम् ॥ ११ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ रवितीर्थं कथं तात पुण्यात्पुण्यतरं स्मृतम् ॥ विस्तरेण ममाख्याहि श्रवणौ मम लंपटौ ॥ १२ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ शृणुष्वाऽवहितो भूत्वा ह्यादित्येश्वरमुत्तमम् ॥ उत्तरे नर्मदाकूले सर्वव्याधिविनाशनम् ॥ १३ ॥ पुरा कृतयुगस्यादौ जाबालिर्ब्राह्मणोऽभवत् ॥ वसिष्ठाऽन्वयसंभूतो वेदशास्त्रार्थपारगः ॥ १४ ॥ पतिव्रता साधुशीला तस्य भार्या मनस्विनी ॥ ऋतुकाले तु सा गत्वा भर्त्तारमिदमब्रवीत् ॥ १५ ॥ वर्त्तते ऋतुकालो मे भर्त्तारं त्वामुपस्थिता ॥ भज मां प्रीतिसंयुक्तः पुत्रकामां तु कामिनीम् ॥ १६ ॥ एवमुक्तो द्विजः प्राह प्रिये ह्याऽहं व्रतान्वितः ॥ गच्छेदानीं वरारोहे दास्य ऋत्वंतरे पुनः ॥ १७ ॥ पुनर्द्वितीये संप्राप्ते ऋतुकालेऽप्युपस्थिता ॥ पुनः सा च्छंदिता तेन व्रतस्थोऽद्येति भारत ॥ १८ ॥ इत्थं वा बहुशस्तेन च्छंदिता च पुनःपुनः ॥ निराशा चाऽभवत्तत्र भर्त्तारं प्रति भामिनी ॥ १९ ॥ दुःखेन महताविष्टा विधायानशनं मृता ॥ तेन भ्रूणहतेनैव पापेन सहसा द्विजः ॥ २० ॥ शीर्णघ्राणांघ्रिरभवत्तपः सर्वं ननाश च ॥ दृष्ट्वात्मानं स कुष्ठेन व्याप्तं ब्राह्मणसत्तमः ॥ २१ ॥ विषादं परमं गत्वा नर्मदातटमाश्रितः ॥ अपृच्छद्भास्करं तीर्थं द्विजेभ्यो द्विजसत्तमः ॥ २२ ॥ आरोग्यं भास्करादिच्छेदिति संचिंत्य चेतसि ॥ कुतस्तद्भास्करं तीर्थं भो द्विजाः कथ्यतां मम ॥ २३ ॥ तपस्तप्स्याम्यहं गत्वा तस्मिंस्तीर्थे सुभावितः ॥ २४ ॥ ॥ द्विजा ऊचुः ॥ ॥ रेवाया उत्तरे कूले आदित्येश्वरनामतः ॥ विद्यते भास्करं तीर्थं सर्वव्याधिविनाशनम् ॥ २५ ॥ तत्र याह्यविचारेण गंतुं चेच्छक्यते त्वया ॥ एवमुक्तो द्विजैर्विप्रो गंतुं तत्र प्रचक्रमे ॥ २६ ॥ व्याधिना परिभूतस्तु घोरेण प्राणहा



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रिणा ॥ यदा गंतुं न शक्नोति तदा तेन विचिंतितम् ॥ २७ ॥ सामर्थ्यं ब्राह्मणानां हि विद्यते भुवनत्रये ॥ लिंगपातः कृतो विप्रैर्देवदेवस्य शूलिनः ॥ २८ ॥ समुद्रः शोषितो विप्रैर्विन्ध्यश्चापि निवारितः ॥ अहमप्यत्र संस्थस्तु ह्यानयिष्यामि भास्करम् ॥ २९ ॥ तपोबलेन महता ह्यादित्ये श्वरसंज्ञितम् ॥ इति निश्चित्य मनसा ह्युग्रे तपसि संस्थितः ॥ ३० ॥ वायुभक्षो निराहारो ग्रीष्मे पंचाग्निमध्यगः ॥ शिशिरे तोयमध्यस्थो वर्षा स्वभ्रावृताकृतिः ॥ ३१ ॥ साग्रे वर्षशते पूर्णे रविस्तुष्टोऽब्रवीदिदम् ॥ ३२ ॥ ॥ सूर्य उवाच ॥ ॥ वरं वरय भद्रं ते किं ते मनसि वांच्छितम् ॥ अदेयमपि दास्यामि ब्रूहि मां त्वं चिरं कृथाः ॥ ३३ ॥ किमसाध्यं हि ते विप्र इदानीं तपसि स्थितः ॥ ३४ ॥ ॥ जाबालिरुवाच ॥ ॥ यदि तुष्टोऽसि देवेश यदि देयो वरो मम ॥ मम प्रतिज्ञा देवेश ह्यादित्येश्वरदर्शने ॥ ३५ ॥ कृता तां पारितुं देव न शक्तो व्याधिना वृतः ॥ शुक्लतीर्थेऽत्र तिष्ठ त्वमादित्येश्वरमूर्त्तिधृक् ॥ ३६ ॥ एवमुक्ते तु देवेशो बहुरूपो दिवाकरः ॥ उत्तरे नर्मदाकूले क्षणादेव व्यदृश्यत ॥ ३७ ॥ तदाप्रभृति भूपाल तद्धि तीर्थं प्रचक्षते ॥ सर्वपापहरं प्रोक्तं सर्वदुःखविनाशनम् ॥ ३८ ॥ यस्तु संवत्सरं पूर्णं नित्यमादित्यवासरे ॥ स्नात्वा प्रदक्षिणाः सप्त दत्त्वा पश्यति भास्करम् ॥ ३९ ॥ यत्फलं लभते तेन तच्छृणुष्व मयोदितम् ॥ प्रसुप्तं[1] मंडलानीह दद्रुकुष्ठविचर्चिकाः ॥ ४० ॥ नश्यंति सत्वरं राजंस्तूलराशिरिवाऽनले ॥ धनपुत्रकलत्राणां पूरयेद्वत्सरत्रयात् ॥ ४१ ॥ यस्तु श्राद्धप्रदस्तत्र पितॄनुद्दिश्य संक्रमे ॥ तृप्यंति पितरस्तस्य पितृदेवो हि भास्करः ॥ ४२ ॥ इति ते कथितं सर्वमादित्येश्वरमुत्तमम् ॥ सर्वपापहरं दिव्यं सर्वरोगविनाशनम् ॥ ४३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे आदित्येश्वरतीर्थमाहात्म्यवर्णनंनाम त्रिपंचाशदधिकशततमोऽध्यायः ॥ १५३ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ नर्मदादक्षिणे कूले तीर्थं कलकलेश्वरम् ॥ विख्यातं सर्वलोकेषु स्वयं देवेन निर्मितम् ॥ १ ॥ अंधकं समरे हत्वा देवदेवो महेश्वरः ॥ सहितो देवगंधर्वैः किन्नरैश्च महोरगैः ॥ २ ॥ शंखतूर्यनिनादैश्च मृदंगपणवादिभिः ॥ वीणावेणुरवैश्चान्यैः स्तुतिभिः पुष्कलादिभिः ॥ ३ ॥ गायंति सामानि यजूंषि चान्ये च्छन्दांसि चान्ये ऋचमुद्गिरंति ॥ स्तोत्रैरनेकैरपरे गृणंति महेश्वरं तत्र महानुभावाः ॥ ४ ॥ प्रमथानां निनादेन कलकलेन च बन्दिनाम् ॥ यस्मात्प्रतिष्ठितं लिंगं तस्माज्जातं तदाख्यया ॥५॥ तत्र तीर्थे तु यः स्नात्वा वीक्षेत्कलकलेश्वरम् ॥ वाजपेयात्परं पुण्यं स लभेन्मानवो भुवि ॥६॥

१ प्रसुतम्-कुष्ठरोगभेदः-सुनवहिरी-इति महाराष्ट्रभाषायाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तेन पुण्येन पूतात्मा प्राणत्यागाद्दिवं व्रजेत् ॥ आरूढः परमं यानं गीयमानोऽप्सरोगणैः ॥ ७ ॥ उपभुज्य महाभोगान्कालेन महता ततः ॥ मर्त्यलोके महात्माऽसौ जायते विमले कुले ॥ ८ ॥ ब्राह्मणः सुभगो लोके वेदवेदांगपारगः ॥ व्याधिशोकविनिर्मुक्तो जीवेच्च शरदां शतम् ॥ ॥ ९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे कलकलेश्वरतीर्थफलमाहात्म्यवर्णनंनाम चतुःपंचाशदधिकशततमोऽध्यायः ॥ १५४ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ अतः परं प्रवक्ष्यामि सर्वतीर्थादनुत्तमम् ॥ उत्तरे नर्मदाकूले शुक्लतीर्थं युधिष्ठिर ॥ १ ॥ तस्य तीर्थस्य चाऽन्यानि पुण्यत्वाच्छुभदर्शनात् ॥ पृथिव्यां सर्वतीर्थानि कलां नार्हंति षोडशीम् ॥ २ ॥ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ तस्य तीर्थस्य माहात्म्यं श्रोतुमिच्छामि तत्त्वतः ॥ भ्रातृभिः सहितः सर्व्वैस्तथान्यैर्द्विजसत्तमैः ॥ ३ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ शुक्लतीर्थस्य चोत्पत्तिमाकर्णय नरेश्वर ॥ यस्य संदर्शनादेव ब्रह्महत्या प्रलीयते ॥ ४ ॥ नर्मदा सरितां श्रेष्ठा सर्वपापप्रणाशिनी ॥ यच्च बाल्ये कृतं पापं दर्शनादेव नश्यति ॥ ५ ॥ मोक्षदानि न सर्वत्र शुक्लतीर्थमृते नृप ॥ शुक्लतीर्थस्य माहात्म्यं पुराणे यच्छ्रुतं मया ॥६॥ समागमे मुनीनां तु देवानां हि तथैव च ॥ कथितं देवदेवेन शितिकण्ठेन भारत ॥ कैलासे पर्वतश्रेष्ठे तत्ते संकथयाम्यहम् ॥ ॥ ७ ॥ पुरा कृतयुगस्याऽऽदौ तोषितुं गिरिजापतिम् ॥ तपश्चचार विपुलं विष्णुर्वर्षसहस्रकम् ॥ वायुभक्षो निराहारः शुक्लतीर्थे व्यवस्थितः ॥ ८ ॥ ततः प्रत्यक्षतामागाद्देवदेवो महेश्वरः ॥ प्रादुर्भूतस्तु सहसा तत्र तीर्थे नराधिप ॥९॥ क्रोशद्वयमिदं चक्रे भुक्तिमुक्तिप्रदायकम् ॥ तस्मिंस्तीर्थे नरः स्नात्वा मुच्यते सर्वकिल्बिषैः ॥ १० ॥ गंगा कनखले पुण्या कुरुक्षेत्रे सरस्वती ॥ ग्रामे वा यदि वाऽरण्ये पुण्या सर्वत्र नर्मदा ॥ ११ ॥ सर्वौषधीनामशनं प्रधानं सर्वेषु पेयेषु जलं प्रधानम् ॥ निद्रा सुखानां प्रमदा रतीनां सर्वेषु गात्रेषु शिरः प्रधानम् ॥ १२ ॥ स्नातस्याऽपि यथा पुण्यं ललाटं नृपसत्तम ॥ शुक्लतीर्थं तथा पुण्यं नर्मदायां युधिष्ठिर ॥ १३ ॥ सरितां च यथा गंगा देवतानां जनार्दनः ॥ शुक्लतीर्थं तथा पुण्यं नर्मदायां व्यवस्थितम् ॥ १४ ॥ चतुष्पदानां सुरभिर्वर्णानां ब्राह्मणो यथा ॥ प्रधानं सर्वतीर्थानां शुक्लतीर्थं तथा नृप ॥ १५ ॥ ग्रहाणां तु यथाऽऽदित्यो नक्षत्राणां यथा शशी ॥ शिरो वा सर्वगात्राणां धर्माणां सत्यमिष्यते ॥ १६ ॥ तथैव पार्थ तीर्थानां शुक्लतीर्थमनुत्तमम् ॥ दुर्विज्ञेयो यथा लोके परमात्मा सनातनः ॥ १७ ॥ सुसूक्ष्मत्वादनिर्देश्यः शुक्लतीर्थं तथा नृप ॥ मन्दप्रज्ञत्वमापन्नो महामोहसमन्वितः ॥ १८ ॥ शुक्लतीर्थं ना जानाति नर्मदातटसंस्थितम् ॥ बहुनाऽत्र किमुक्तेन धर्म्मपुत्र पुनःपुनः ॥ १९ ॥ शुक्लतीर्थं महापुण्यं संप्राप्तं कल्मषक्षयात् ॥ योऽत्र दत्ते शुचिर्भूत्वा



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकं रेवाजलांजलिम् ॥ २० ॥ कल्पकोटिसहस्राणि पितरस्तेन तर्पिताः ॥ २१ ॥ एकः पुत्रो धरापृष्ठे पितृणामार्त्तिनाशनः ॥ चाणक्यो नाम राजाऽभूच्छुक्लतीर्थं च वेद सः ॥ २२ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कोऽसौ द्विजवरश्रेष्ठ चाणक्योनाम नामतः ॥ शुक्लतीर्थस्य यो वेत्ता नाऽन्यो वेत्ता हि कश्चन ॥ २३ ॥ केनोपायेन तत्तीर्थं तेन ज्ञातं धरातले ॥ तदहं श्रोतुमिच्छामि परं कौतूहलं हि मे ॥२४॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ इक्ष्वाकुप्रभवो राजा नप्ता शुद्धोदनस्य च ॥ चाणक्यो नाम राजर्षिर्बुभुजे पृथिवीमिमाम् ॥ २५ ॥ विक्रांतो मतिमानञ्छूरः सर्वलोकैरवंचितः ॥ वंचितः सहसा धूर्तवायसाभ्यां नृपोत्तमः ॥ २६ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथं स वञ्चितो राजा वायसाभ्यां कुतोऽथवा ॥ पुरा येन प्रतिज्ञातं धीगर्भेण महात्मना ॥ २७ ॥ न जीवे वंचितोऽन्येन प्राणांस्त्यक्ष्ये न संशयः ॥ एतन्मे वद विप्रेंद्र परं कौतूहलं मम ॥ ॥ २८ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ आत्मानं वंचितं ज्ञात्वा तदा संगृह्य वायसौ ॥ प्रेषयामास तीव्रेण दण्डेन यमसादनम् ॥ ॥ २९ ॥ ॥ वायसावूचतुः ॥ ॥ सुन्दोपसुन्दयोः पुत्रावावां काकत्वमागतौ ॥ मा वधीस्त्वं महाभाग कस्मिंश्चित्कारणांतरे ॥ ३० ॥ तावावां कृतसंकल्पौ त्वया कोपेन मानद ॥ निरस्तावनिरस्तौ वा यास्यावः परमां गतिम् ॥ ३१ ॥ तदादेशय राजेंद्र कृत्वा तव महत्प्रियम् ॥ मुक्तशापौ भविष्यावो ब्रह्मणो वचनं तथा ॥ ३२ ॥ तच्छ्रुत्वा काकवचनं चाणक्यो नृपसत्तमः ॥ नाहं जीवे विदित्वैवं वञ्चितः केन कर्हिचित् ॥ ३३ ॥ तस्मात्तीर्थं विजानीतं यमस्य सदने द्विजौ[1] ॥ प्रेषयामि यथान्यायं श्रुत्वा तत्कथयिष्यथः ॥ ३४ ॥ तेनैव मुक्तौ तौ काकौ स्रक्चन्दनविभूषितौ ॥ शीघ्रगौ प्रेषयामास यमस्य सदनं प्रति ॥ ३५ ॥ ॥ राजोवाच ॥ ॥ तत्र धर्मपुरं गत्वा विचरंतावितस्ततः ॥ यदि पृच्छति धर्मात्मा यमः संयमनो महान् ॥ ३६ ॥ कुतो वामागतं[2] ब्रूतं केन वा भूषितावुभौ ॥ मदीया भारती तस्य कथनीया ह्यशंकितम् ॥ ३७ ॥ इक्ष्वाकुसम्भवो राजा चाणक्योनाम धार्मिकः ॥ द्वादशाहे मृतस्याऽस्य तर्प्पितावशनादिना ॥ ३८ ॥ तच्छ्रुत्वा वचनं राज्ञो गतौ तौ यमसादनम् ॥ क्रीडितौ प्रांगणे तस्य स्रक्चंदनविभूषितौ ॥ धर्मराजेन तौ दृष्टौ पृष्टौ धृष्टौ च वायसौ ॥ ३९ ॥ ॥ ॥ यम उवाच ॥ ॥ कुतः स्थानात्समायातौ केन वा भूषितावुभौ ॥ वृत्तं वै कथ्यतामेतद्वायसावविशंकया ॥ ४० ॥ ॥ काकावूचतुः ॥ ॥

---

१ द्विजौ—पक्षिणौ—हे काकौ—इत्यर्थः । २ वाम्—युवयोः—आगतम्—आगमनम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इक्ष्वाकुसम्भवो राजा चाणक्योनाम धार्म्मिकः ॥ द्वादशाहे मृतस्याऽस्य तर्पितावशनादिभिः ॥ ४१ ॥ तयोस्तद्वचनं श्रुत्वा तदा वैवस्वतो
यमः ॥ चित्रगुप्तं कलिं कालं वीक्ष्यतामिदमब्रवीत् ॥ ४२ ॥ अंडजस्वेदजातीनां भूतानां सचराचरे ॥ विहितं लोककर्तृणां सान्निध्यं ब्रह्मणा
मम ॥ ४३ ॥ गतः कुत्र दुराचारश्चाणक्यो नामतस्त्विह ॥ अन्विष्यतां पुराणेषु त्वितिहासेषु या गतिः ॥ ४४ ॥ ततस्तैर्धर्म्मपालैस्तु धर्मराज
प्रचोदितैः ॥ निरीक्षिता पुराणोक्ता कर्मजा गतिरागतिः ॥ ४५ ॥ ततः प्रोवाच वचनं धर्मो धर्मभृतां वरः ॥ शृण्वतां धर्मपालानां मेघगंभीरया
गिरा ॥ ४६ ॥ शुक्लतीर्थे मृतानां तु नर्मदाविमले जले ॥ अण्डजस्वेदजातीनां न गतिर्मम सन्निधौ ॥ ४७ ॥ तत्तीर्थं धार्मिकं लोके ब्रह्मविष्णुमहे
श्वरैः ॥ निर्मितं परया भक्त्या लोकानां हितकाम्यया ॥ ४८ ॥ पापोपपातकैर्युक्ता ये नरा नर्मदाजले ॥ शुक्लतीर्थे मृताः शुद्धा न ते मद्विषयाः
क्वचित् ॥ ४९ ॥ एतच्छ्रुत्वा तु वचनं तौ काकौ यमभाषितम् ॥ आगतौ शीघ्रगौ पार्थ दृष्ट्वा यमपुरं महत् ॥ ५० ॥ पृष्टौ तौ प्रणतौ राज्ञा यथा
वृत्तं यथाश्रुतम् ॥ कथयामासतुः पार्थ दानवौ काकतां गतौ ॥ ५१ ॥ अस्मात्स्थानाद्गतावावां यमस्य पुरमुत्तमम् ॥ पृथिव्या दक्षिणे भागे
ह्यतीत्य बहुयोजनम् ॥ ५२ ॥ तत्पुरं कामगं दिव्यं स्वर्णप्राकारतोरणम् ॥ अनेकगृहसंबाधं मणिकांचनभूषितम् ॥ ५३ ॥ चतुष्पथैश्चत्वरैश्च घंटा
मार्गोपशोभितम् ॥ उद्यानवनसंच्छन्नं पद्मिनीखंडमंडितम् ॥ ५४ ॥ हंससारससंघुष्टं कोकिलाकुलसंकुलम् ॥ सिंहव्याघ्रगजाकीर्णमृक्षवानरसेवि
तम् ॥ ५५ ॥ नरनारीसमाकीर्णं नित्योत्सवविभूषितम् ॥ शंखदुन्दुभिनिर्घोषैर्वीणावेणुनिनादितम् ॥ ५६ ॥ यममार्गेऽपि विहितं स्वर्गलोकमि
वाऽपरम् ॥ गतौ तत्र पुनश्चान्यैर्यमदूतैर्यमाज्ञया ॥ ५७ ॥ विदितौ प्रेषितौ तत्र यत्र देवो जगत्प्रभुः ॥ प्राणस्य भीत्या दृष्टोऽसौ सिंहासनगतः
प्रभुः ॥ ५८ ॥ महाकायो महाजंघो महास्कन्धो महोदरः ॥ महावक्षा महाबाहुर्महावक्रेक्षणो महान् ॥ ५९ ॥ महामहिषमारूढो महामुकुटभू
षितः ॥ तत्राऽन्यश्च कलिः कालश्चित्रगुप्तो महामतिः ॥ ६० ॥ समागतौ तदा दृष्टौ मध्ये ज्वलितपावकौ ॥ पुण्यपापानि जंतूनां श्रुतिस्मृत्यर्थपा
रगौ ॥ ६१ ॥ विचारयंतौ सततं तिष्ठाते तौ दिवानिशम् ॥ ततो ह्यावां प्रणामांते यमेन यममूर्तिना ॥ ६२ ॥ पृष्टावागमने हेतुं तम
ब्रूव शृणुष्व तत् ॥ उज्जयिन्यां महीपालश्चाणक्योऽभूत्प्रतापवान् ॥ ६३ ॥ द्वादशाहे मृतस्याऽस्य भुक्का प्राप्तौ यमालयम् ॥ ततोऽस्माकं
वचः श्रुत्वा कंपयित्वा शिरो यमः ॥ ६४ ॥ उवाच वचनं सत्यं सभामध्ये हसन्निव ॥ अस्ति तत्कारणं येन चाणक्यः पापपूरुषः ॥ ६५ ॥
नायातो मम लोके तु सर्वपापभयंकरे ॥ शुक्लतीर्थे मृतानां तु नर्मदायां परं पदम् ॥ ६६ ॥ जायते सर्वजंतूनां नाऽत्र काचिद्विचारणा ॥

CC-0. In Public Domain. Digitization by eGangotri

अवशः स्ववशोवाऽपि जंतुस्तत्क्षेत्रमंडले ॥ ६७ ॥ मृतः स वै न सन्देहो रुद्रस्यानुचरो भवेत् ॥ तद्धर्मवचनं श्रुत्वा निर्गत्य नगराद्बहिः ॥ ६८ ॥ पश्यन्तौ विविधां घोरां नरके लोकयातनाम् ॥ त्रिंशत्कोट्यो हि घोराणां नरकाणां नृपोत्तम ॥६९॥ दृष्ट्वा भीतौ परामार्त्तिं गतौ तत्र महापथि ॥ नरको रौरवस्तत्र महारौरव एव च ॥ ७० ॥ पेषणः शोषणश्चैव कालसूत्रोऽस्थिभंजनः ॥ तामिस्रश्चांधतामिस्रः कृमिपूतिवहस्तथा ॥ ७१ ॥ दृष्टश्चान्यो महाज्वालस्तत्रैव विषभोजनः ॥ नरकौ दंशमशकौ तथा यमलपर्वतौ ॥ ७२ ॥ नदी वैतरणी दृष्टा सर्वपापप्रणाशिनी ॥ शीतलं सलिलं यत्र पिबन्ति ह्यमृतोपमम् ॥ ७३ ॥ तदेव नीरं पापानां शोणितं परिवर्तते ॥ असिपत्रवनं चाऽन्यद्दृष्टाऽन्या महती शिला ॥ ७४ ॥ अग्निपुंजनिभाकारा विशाला शाल्मली परा ॥ इत्यादयस्तथैवान्ये शतसाहस्रसंज्ञिताः ॥ ७५ ॥ घोरघोरतरा दृष्टाः क्लिश्यंते यत्र मानवाः ॥ वाचिकैर्मानसैः पापैः कर्मजैश्च पृथग्विधैः ॥ ७६ ॥ अहंकारकृतैर्द्रोषैर्मायावचनपूर्वकैः ॥ पिता माता गुरुर्भ्राता अनाथा विकलेंद्रियाः ॥ ७७ ॥ भ्रमन्ति नोद्धृता येषां गतिस्तेषां हि रौरवे ॥ तत्र ते द्वादशाब्दानि क्षपित्वा रौरवेऽधमाः ॥७८॥ इह मानुष्यके लोके दीनांधाश्च भवंति ते ॥ देवब्रह्मस्वहर्तॄणां नराणां पापकर्मणाम् ॥ ७९ ॥ महारौरवमाश्रित्य ध्रुवं वासो यमालये ॥ ततः कालेन महता पापाः पापेन वेष्टिताः ॥ ८० ॥ जायन्ते कण्टकैर्भिन्नाः कोशे वा कोशकारकाः ॥ मृगपक्षिविहंगानां घातका मांसभक्षकाः ॥ ८१ ॥ पेषणं नरकं यांति शोषणं जीवबन्धनात् ॥ तत्रत्यां यातनां घोरां सहित्वा शास्त्रचोदिताम् ॥ ८२ ॥ इह मानुष्यतां प्राप्य पंग्वंधबधिरा नराः ॥ गवार्थे ब्राह्मणार्थे च ह्यनृतं वदतामिह ॥ ८३ ॥ पतनं जायते पुंसां नरके कालसूत्रके ॥ तत्रत्या यातना घोरा विहिता शास्त्रकर्तृभिः ॥ ८४ ॥ भुक्त्वा समागता ह्यत्र ते यास्यंत्यंत्यजां गतिम् ॥ बंधयंति च ये जीवांस्त्यक्त्वात्मकुलसंततिम् ॥ ८५ ॥ पतन्ति नात्र सन्देहो नरके तेऽस्थिभंजने ॥ तत्र वर्षशतस्यांऽत इह मानुष्यतां गताः ॥ ॥ ८६ ॥ कुब्जा वामनकाः पापा जायन्ते दुःखभागिनः ॥ ये त्यजंति स्वकां भार्यां मूढाः पंडितमानिनः ॥ ८७ ॥ ते यांति नरकं घोरं तामिस्रं नाऽत्र संशयः॥ तत्र वर्षशतस्यांते इह मानुष्यतां गताः ॥८८॥ दुश्चर्माणो दुर्भगाश्च जायन्ते मानवा हि ते ॥ मानकूटं तुलाकूटं कूटकं तु वदंति ये ॥ ॥ ८९ ॥ नरके तेंऽधतामिस्रे प्रपच्यंते नराधमाः ॥ शतसाहस्रिकं कालमुषित्वा तत्र ते नराः ॥ ९० ॥ इह शत्रुगृहे त्वंधा भ्रमन्ते दीनमूर्त्तयः ॥

१ इमावेव–यमलपर्वतावग्रे–युग्मपर्वतौ–इत्युक्तौ । २ येन–अनृतभाषणेन–गवां ब्राह्मणानां वा विपत्तिः संकटं वाऽऽपतेत्–तादृशमनृतं–कूटसाक्ष्यं वा वदतां महत्पातकं जायते–तेन पापेन पुंसां कालसूत्रनरकप्राप्तिर्भवति ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पितृदेवद्विजेभ्योऽन्नमदत्त्वा येऽत्र भुंजते ॥ ९१ ॥ नरके कृमिभक्ष्ये ते पतंति स्वात्मपोषकाः ॥ ततः प्रसूतिकाले हि कृमिभुक्तश्च सव्रणः ॥९२॥
जायतेऽशुचिगन्धोऽत्र परभाग्योपजीवकः ॥ स्वकर्मविच्युताः पापा वर्णाश्रमविवर्जिताः ॥ ९३ ॥ नरके पूयसंपूर्णे क्लिश्यन्ते ह्ययुतं समाः ॥ पूर्णे
तत्र ततः काले प्राप्य मानुष्यकं भवम् ॥ ९४ ॥ उद्वेजनीया भूतानां जायन्ते व्याधिभिर्वृताः ॥ अग्निदो गरदश्चैव लोभमोहान्वितो नरः ॥ ९५ ॥
नरके विषसंपूर्णे निमज्जति दुरात्मवान् ॥ तत्र वर्षशतात्कालादुन्मज्जनमवस्थितः ॥ ९६ ॥ भुवि मानुषतां प्राप्य कृपणो जायते पुनः ॥ पादुको
पानहौ छत्रं शय्यां प्रावरणानि च ॥ ९७ ॥ अदत्त्वा दंशमशकैर्भक्ष्यंते जन्यसप्ततिम् ॥ पितुर्द्रव्यापहर्त्तारस्ताडनक्रोशने रताः ॥९८॥ पीडनं
क्रियते तेषां यत्र तौ युग्मपर्वतौ ॥ या सा वैतरणी घोरा नदी रक्तप्रवाहिनी ॥ ९९ ॥ पिबन्ति रुधिरं तत्र येऽभियांति रजस्वलाम् ॥ असिपत्र
वने घोरे पीड्यंते पापकारिणः ॥ १०० ॥ परपीडाकरा नित्यं ये नरो[1]न्त्यजगामिनः[2] ॥ गुरुदाररतानां तु महापातकिनामपि ॥ १०१ ॥ शिला
वगूहनं तेषां जायते जन्मसप्ततिम् ॥ ज्वलन्तीमायसीं घोरां बहुकण्टकसंवृताम् ॥ २ ॥ शाल्मलीं तेऽवगूहंति परदाररता हि ये ॥ परस्य योषितं
हत्वा ब्रह्मस्वमपहृत्य च ॥ ३ ॥ अरण्ये निर्जले देशे स भवेत्क्रूरराक्षसः ॥ देवस्वं ब्राह्मणस्वं च लोभेनैवाऽऽहरेच्च यः ॥ ४ ॥ स पापात्मा परे
लोके गृध्रोच्छिष्टेन जीवति ॥ एवमादीनि पापानि भुञ्जते यमशासनात् ॥ ५ ॥ येषां तु दर्शनादेव श्रवणाज्जायते भयम् ॥ तथा दानफलं चाऽन्ये
भुंजाना यममंदिरे ॥ ६ ॥ दृष्टाः श्रुतं कथयतां दूतानां च यमाऽऽज्ञया ॥ रथैरन्ये गजैरन्ये केचिद्वाजिभिरावृताः॥ ७ ॥ दृष्टास्तत्र महाभाग तपःसं
चयसंस्थिताः ॥ गोदाता स्वर्णदाता च भूमिरत्नप्रदा नराः ॥ ८ ॥ शय्याशनगृहादीनां स लोकः कामदो नृणाम् ॥ अन्नं पानीयसहितं ददते येऽत्र
मानवाः ॥९॥ तत्र तृप्ताः सुसंतुष्टाः क्रीडन्ते यमसादने ॥ अत्र यद्दीयते दानमपि वालाग्रमात्रकम् ॥ ११० ॥ तदक्षयफलं सर्वं शुक्लतीर्थे नृपोत्तम॥
एतत्ते कथितं सर्वं यद्दृष्टं यच्च वै श्रुतम् ॥११॥ कुरुष्व यदभिप्रेतं यदि शक्नोषि मुच्यताम् ॥ तयोस्तद्वचनं श्रुत्वा चाणक्यो हृष्टमानसः ॥ १२ ॥
विसर्जयामास खगावभिनंद्य पुनःपुनः ॥ ताभ्यां गताभ्यां सर्वस्वं दत्त्वा विप्रेषु भारत ॥ १३ ॥ कामक्रोधौ परित्यज्य जगामाऽमरपर्वतम् ॥ तत्र
॥११५॥ बध्वोडुपं गाढं कृष्णरज्वावलंबितम्॥१४॥प्लवमानो जगामाऽशु ध्यायन्देवं जनार्द्दनम् ॥ आरोग्यं भास्करादिच्छेद्धनं वै जातवेदसः॥१५॥प्राप्नोति ॥२८९॥

१ नरः--'नृ' शब्दस्य बहुवचनम् । २ अन्त्यजगामिनः--हस्वत्वमार्षम् । यद्वा--स्त्रियोऽन्त्यजपुंगामिन्यः--पुरुषा--अन्त्यजस्त्रीगामिनः--इत्यभिप्रायेण--'पुमान्स्त्रिया' इति पुंलिंगैकशेषो बोद्धव्यः तथा चेत्--'नरः' इत्यत्रापि तथैव--'यत्' शब्दयोः 'नृ--नारी' शब्दयोश्चैकशेष इति न कश्चिच्छंकावकाशः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानमीशानान्मोक्षं प्राप्नोति केशवात् ॥ नीलं रक्तं तदभवन्मेचकं यद्धि सूत्रकम् ॥ १६ ॥ शुद्धस्फटिकसंकाशं दृष्ट्वा रज्जुं महामतिः ॥ आप्लुत्य विमले तोये गतोऽसौ वैष्णवं पदम् ॥ १७ ॥ गायंति यद्वेदविदः पुराणं नारायणं शाश्वतमच्युताह्वयम् ॥ प्रातः स तं राजसुतो महात्मा निक्षिप्य देहं शुभशुक्लतीर्थे ॥ १८ ॥ एषा ते कथिता राजन्सिद्धिश्चाणक्यभूभृतः ॥ तथाऽन्यत्तव वक्ष्यामि शृणुष्वैकाग्रमानसः ॥ ११९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे चाणक्यसिद्धिप्राप्तिवर्णनं नाम पंचपंचाशदधिकशततमोऽध्यायः ॥ १५५ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ नास्ति लोकेषु तत्तीर्थं पृथिव्यां यन्नरेश्वर ॥ शुक्लतीर्थेन सदृशमुपमानेन गीयते ॥ ॥ १ ॥ शुक्लतीर्थं महातीर्थं नर्मदायां व्ययेस्थितम् ॥ प्रागुदक्प्रवणे देशे मुनिसंघनिषेवितम् ॥ २ ॥ वैशाखे च तथा मासि कृष्णपक्षे चतुर्दशी ॥ कैलासादुमया सार्द्धं स्वयमायाति शंकरः ॥ ३ ॥ मध्याह्नसमये स्नात्वा पश्यत्यात्मानमात्मना ॥ ब्रह्मविष्ण्वीद्रसहितः शुक्लतीर्थे समाहितः ॥ ४ ॥ कार्त्तिक्यां तु विशेषेण वैशाख्यां च नरोत्तम ॥ ब्रह्मविष्णुमहादेवान् स्नात्वा पश्यति तद्दिने ॥ ५ ॥ देवराजः सुरैः सार्द्धं वायुमार्गव्यवस्थितः[1] ॥ कृष्णपक्षे चतुर्दश्यां स्नात्वा पश्यति शंकरम् ॥ ६ ॥ गंधर्वाप्सरसो यक्षाः सिद्धविद्याधरोरगाः ॥ तद्दिने तेऽपि देवेशं दृष्ट्वा मुंचंति किल्बिषम् ॥ ॥ ७ ॥ अर्द्धयोजनविस्तारं तदर्द्धेनैव चायतम् ॥ शुक्लतीर्थं महापुण्यं महापातकनाशनम् ॥ ८ ॥ यत्र स्थितैः प्रदृश्यंते वृक्षाग्राणि नरोत्तमैः ॥ तत्र स्थिता महापापैर्मुच्यंते पूर्वसंचितैः ॥ ९ ॥ पापोपपातकैर्युक्तो नरः स्नात्वा प्रमुच्यते ॥ उपार्जिता विनश्येत भ्रूणहत्यापि दुस्त्यजा ॥ १० ॥ यस्मात्तत्रैव देवेश उमया सह तिष्ठति ॥ वैशाख्यां च विशेषेण कैलासादेति शंकरः ॥ ११ ॥ तेन तीर्थं महापुण्यं सर्वपातकनाशनम् ॥ कथितं ब्रह्मणा पूर्वं मया तव तथा नृप ॥ १२ ॥ रजकेन यथा धौतं वस्त्रं भवति निर्मलम् ॥ तथा तत्र वपुःस्नानं पुरुषस्य भवेच्छुचि ॥ १३ ॥ पूर्वे वयसि पापानि कृत्वा पुष्टानि मानवः ॥ अहोरात्रोषितो भूत्वा शुक्लतीर्थे व्यपोहति ॥ १४ ॥ शुक्लतीर्थे महाराज राकां रेवाजलांजलिम् ॥ कल्पकोटिसहस्राणि दत्त्वा स्युः पितरः शिवाः ॥ १५ ॥ न माता न पिता बंधुः पतनं नरकार्णवे ॥ उद्धरंति यथा पुण्यं शुक्लतीर्थे नरेश्वर ॥ १६ ॥ तपसा ब्रह्मचर्य्येण न तां गच्छंति सद्गतिम् ॥ शुक्लतीर्थे मृतो जंतुर्देहत्यागेन यां लभेत् ॥ १७ ॥ कार्त्तिकस्य तु मासस्य कृष्णपक्षे चतुर्दशीम् ॥ घृतेन स्नापयेद्देवमुपोष्य प्रयतो नरः ॥ १८ ॥ स्नात्वा प्रभाते रेवायां दद्यात्सघृतकंबलम् ॥ सहिरण्यं यथाशक्ति देवमुद्दिश्य शंकरम् ॥ १९ ॥ देवस्य

१ वायुमार्गव्यवस्थितः—आकाशस्थितः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पूरणां कुर्याद्घृतेन घृतकंबलम् ॥ स गच्छति महातेजाः शिवलोकं मृतो नरः ॥ २० ॥ एकविंशकुलोपेतो यावदाभूतसंप्लवम् ॥ शुक्लतीर्थे नरः स्नात्वा ह्युमां रुद्रं च योऽर्चयेत् ॥ २१ ॥ गंधपुष्पादिधूपैश्च सोऽश्वमेधफलं लभेत् ॥ मासोपवासं यः कुर्यात्तत्र तीर्थे नरेश्वर ॥ २२ ॥ मुच्यते स महत्पापैः सप्तजन्मसुसंचितैः ॥ उष्ट्रीक्षीरमविक्षीरं नवश्राद्धे च भोजनम् ॥ २३ ॥ वृषलीगमनं चैव तथाऽभक्ष्यस्य भक्षणम् ॥ अविक्रय्येऽनृते पापं माहिषेऽयाज्ययाजके ॥ २४ ॥ वार्धुष्ये पंक्तिगरदे देवब्राह्मणदूषके ॥ एवमादीनि पापानि तथाऽन्यान्यपि भारत ॥ २५ ॥ चांद्रायणेन नश्यंति शुक्लतीर्थे न संशयः ॥ शुक्लतीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः ॥ २६ ॥ तस्य ते द्वादशाब्दानि तृप्तिं यांति सुतर्पिताः ॥ पादुकोपानहौ छत्रं शय्यामासनमेव च ॥२७ ॥ सुवर्णं धनधान्यं च श्राद्धं युक्तहलं तथा ॥ अन्नं पानीयसंहितं तस्मिंस्तीर्थे ददंति ये ॥ २८ ॥ हृष्टाः पुष्टा मृता यांति शिवलोकं न संशयः ॥ तत्र तीर्थे तु यो भक्त्या शिवमुद्दिश्य भारत ॥ २९ ॥ भिक्षामात्रं तथाऽन्नं ये तेऽपि स्वर्यांति वै नराः ॥ यज्विनां व्रतिनां चैव तत्र तीर्थनिवासिनाम् ॥ ३० ॥ अपि वालाग्रमात्रं हि दत्तं भवति चाऽक्षयम् ॥ अग्निप्रवेशं यः कुर्याच्छुक्लतीर्थे समाहितः ॥ ३१ ॥ रागद्वेषविनिर्मुक्तो हृदि ध्यात्वा जनार्दनम् ॥ सर्वकामसुसंपूर्णः स गच्छेद्वारुणं पुरम् ॥ ३२ ॥ न रोगो न जरा तत्र यत्र देवोंऽभसां पतिः ॥ अनाशकं तु यः कुर्यात्तस्मिंस्तीर्थे युधिष्ठिर ॥ ३३ ॥ अनिवर्तिका गतिस्तस्य रुद्रलोकादसंशयम् ॥ अवशः स्ववशो वाऽपि जंतुस्तत्क्षेत्रमंडले ॥ ॥ ३४ ॥ मृतः स तु न संदेहो रुद्रस्यानुचरो भवेत् ॥ शुक्लतीर्थे तु यः कन्यां शक्त्या दद्यादलंकृताम् ॥ ३५ ॥ विधिना यो नृपश्रेष्ठ कुरुते वृषमोक्षणम् ॥ तस्य यत्फलमुद्दिष्टं पुराणे रुद्रभाषितम् ॥ ३६ ॥ तदहं संप्रवक्ष्यामि शृणुष्वैकमना नृप ॥ यावंतो रोमकूपाः स्युः सर्वांगेषु पृथक्पृथक् ॥ ३७ ॥ तावद्वर्षसहस्राणि रुद्रलोके महीयते ॥ शुक्लतीर्थे तु यद्दत्तं ग्रहणे चंद्रसूर्ययोः ॥ ३८ ॥ वर्धते तद्गुणं तावद्दिनानि दश पंच च ॥ शुक्लतीर्थं शुचिर्भूत्वा यः करोति प्रदक्षिणम् ॥ ३९ ॥ पृथ्वीप्रदक्षिणा तेन कृता यत्तस्य तत्फलम् ॥ शोभनं मिथुनं यस्तु रुद्रमुद्दिश्य पूजयेत् ॥ ४० ॥ सप्त जन्मानि तस्यैव वियोगो न च वै क्वचित् ॥ एतत्ते कथितं राजन्संक्षेपेण फलं महत् ॥ ४१ ॥ शुक्लतीर्थस्य यत्पुण्यं यथा देवाच्छ्रुतं मया ॥ य इदं शृणुयाद्भक्त्या पुराणे विहितं फलम् ॥ ४२ ॥

१ घृतेन–पूरणम्–घृतकंबलम्–घृतकंबलाभिधं–तत्–घृतेन पूरणम्–इत्यर्थः । २ युक्तहलम्–वृषभाष्टकसंयुक्तः लांगलमित्यर्थः । ३ मिथुनं–ब्राह्मणदाम्पत्यम्–इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स लभेन्नात्र सन्देहः सत्यं सत्यं पुनःपुनः॥ पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम् ॥ ४३ ॥ मोक्षार्थी लभते मोक्षं स्नानदानफलं महत् ॥४४॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे शुक्लतीर्थमाहात्म्यवर्णनंनाम षट्पंचाशदधिकशततमोऽध्यायः ॥ १५६ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तस्यैवानंतरं राजञ्छुक्लतीर्थसमीपतः॥ वासुदेवस्य तीर्थं तु सर्वलोकेषु पूजितम् ॥ १ ॥ तद्धि पुण्यं सुविख्यातं नर्मदायां पुरातनम् ॥ यत्र हुंकारमात्रेण रेवा क्रोशं जगाम सा ॥ २ ॥ यदा प्रभृति राजेंद्र हुंकारेण गता सरित् ॥ तदाप्रभृति स स्वामी हुंकारः शब्दितो बुधैः ॥ ३ ॥ हुंकारतीर्थे यः स्नात्वा पश्यत्यव्ययमच्युतम् ॥ स मुच्यते नरः पापैः सप्तजन्मकृतैरपि ॥ ४ ॥ संसारार्णवमग्नानां नराणां पापकर्मिणाम् ॥ नैवोद्धर्त्ता जगन्नाथं विना नारायणं परः ॥ ५ ॥ सा जिह्वा या हरिं स्तौति तच्चित्तं यत्तदर्पितम् ॥ तावेव केवलौ श्लाघ्यौ यौ तत्पूजाकरौ करौ ॥ ६ ॥ सर्वदा सर्वकार्येषु नास्ति तेषाममंगलम् ॥ येषां हृदिस्थो भगवान्मंगलायतनो हरिः ॥ ७ ॥ यदन्यदेवतार्चायाः फलं प्राप्नोति मानवः ॥ साष्टांगप्रणिपातेन तत्फलं लभते हरेः ॥ ८ ॥ रेणुगुंठितगात्रस्य यावन्तोऽस्य रजःकणाः ॥ तावद्वर्षसहस्राणि विष्णुलोके महीयते ॥ ९ ॥ सम्मार्जनाभ्युक्षणलेपनेन तदालये नश्यति सर्वपापम् ॥ नारी नराणां परया तु भक्त्या दृष्ट्वा तु रेवां नरसत्तमस्य ॥ १० ॥ येनाऽर्चितो भगवान्वासुदेवो जन्मार्जितं नश्यति तस्य पापम् ॥ स याति लोकं गरुडध्वजस्य विधूतपापः सुरसंघपूज्यताम् ॥ ११ ॥ शाठ्येनाऽपि नमस्कारं प्रयुंजंश्चक्रपाणिनः ॥ सप्तजन्मार्जितं पापं गच्छत्याऽऽशु न संशयः ॥ १२ ॥ पूजायां प्रीयते रुद्रो जपहोमैर्दिवाकरः ॥ शंखचक्रगदापाणिः प्रणिपातेन तुष्यति ॥ १३ ॥ भवजलधिगतानां द्वंद्ववाताहतानां सुतदुहितृकलत्रत्राणभारार्दितानाम् ॥ विषमविषयतोये मज्जतामप्लवानां भवति शरणमेको विष्णुपोतो नराणाम् ॥ १४ ॥ हुंकारतीर्थे राजेंद्र शुभं वा यदि वाऽशुभम् ॥ यत्कृतं पुरुषव्याघ्र तन्नश्यति न कर्हिचित् ॥ १५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे हुंकारस्वामितीर्थमाहात्म्यवर्णनंनाम सप्तपंचाशदधिकशततमोऽध्यायः ॥ १५७ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्परं तीर्थं संगमेश्वरमुत्तमम् ॥ नर्मदादक्षिणे कूले सर्वपापभयापहम् ॥ १ ॥ धनदस्तत्र विश्रांतो मुहूर्त्तं नृपसत्तम ॥ पितृलोकात्समायातः कैलासं धरणीधरम् ॥ २ ॥ प्रत्ययार्थं नृपश्रेष्ठ ह्यद्यापि धरणीतले ॥ कृष्णवर्णा हि पाषाणा दृश्यंते स्फटिकोज्वलाः ॥ ३ ॥ विंध्यनिर्झरनिष्क्रांता पुण्यतोया सरिद्वरा ॥ प्रविष्टा नर्मदातोये सर्वपापप्रणाशने ॥४॥ संगमे तत्र यः स्नात्वा पूजयेत्संगमेश्वरम् ॥ अश्वमेधस्य यज्ञस्य फलं प्राप्नोत्यसंशयम्॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



घंटापताकावितनं[1] यो ददेत्संगमेश्वरे ॥ हंसयुक्तविमानस्थो दिव्यस्त्रीशतसंवृतः ॥ ६ ॥ स रुद्रपदमाप्नोति रुद्रस्यानुचरो भवेत् ॥ दधि भक्ते न देवस्य यः कुर्य्याल्लिंगपूरणम् ॥ ७ ॥ सिक्थसंख्यं शिवे लोके स वसेत्कालमीप्सितम् ॥ श्रीफलैः पूरयेल्लिंगं निःस्वो भूत्वा भवस्य तु ॥ ८ ॥ सोऽपि तत्फलमाप्नोति गतः स्वर्गे नरेश्वर ॥ अक्षया संततिस्तस्य जायते सप्तजन्मसु ॥ ९ ॥ स्नपनं देवदेवस्य दध्ना मधुघृतेन वा ॥ यः करोति विधानेन तस्य पुण्यफलं शृणु ॥ १० ॥ घृतक्षीरवहा नद्यो यत्र वृक्षा मधुस्रवाः ॥ तत्र ते मानवा यांति सुप्रसन्ने महेश्वरे ॥ ११ ॥ पत्रं पुष्पं फलं तोयं यस्तु दद्यान्महेश्वरे ॥ तत्सर्वं सप्तजन्मानि ह्यक्षयं फलमश्नुते ॥ १२ ॥ सर्वेषामेव पात्राणां महापात्रं महेश्वरः ॥ तस्मात्सर्वप्रयत्नेन पूजनीयो महेश्वरः ॥ १३ ॥ ब्रह्मचर्यस्थितो नित्यं यस्तु पूजयते शिवम् ॥ इह जीवन्स देवेशो मृतो गच्छेदनामयम् ॥ १४ ॥ शिवे तु पूजिते पार्थ यत्फलं प्राप्यते बुधैः ॥ योगींद्रे चैव तत्पार्थ पूजिते लभते फलम् ॥ १५ ॥ ते धन्यास्ते महात्मानस्तेषां जन्म सुजीवितम् ॥ येषां गृहेषु भुञ्जंति शिवभक्तिरता नराः ॥ १६ ॥ सन्निरुध्येंद्रियग्रामं यत्रयत्र वसेन्मुनिः ॥ तत्रतत्र कुरुक्षेत्रं नैमिषं पुष्कराणि च ॥ १७ ॥ यत्फलं वेदविदुषि भोजिते शतसंख्यया ॥ तत्फलं जायते पार्थ ह्येकेन शिवयोगिना ॥ १८ ॥ यत्र भुञ्जति भस्मांगी मूर्खो वा यदि पंडितः ॥ तत्र भुञ्जति देवेशः सपत्नीको वृषध्वजः ॥ १९ ॥ विप्राणां वेदविदुषां कोटिं संभोज्य यत्फलम् ॥ भिक्षामात्रप्रदानेन तत्फलं शिवयोगिनाम् ॥ २० ॥ संगमेश्वरमासाद्य प्राणत्यागं करोति यः ॥ न तस्य पुनरावृत्तिः शिवलोकात्कदाचन ॥ २१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखण्डे संगमेश्वरतीर्थमाहात्म्यवर्णनंनामाष्टपञ्चाशदधिकशततमोऽध्यायः ॥ १५८ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महाराज तीर्थं परमपावनम् ॥ नर्मदायां सुदुष्प्रापं सिद्धं ह्यनरकेश्वरम् ॥ १ ॥ तस्मिंस्तीर्थे नरः स्नात्वा पापकर्माऽपि भारत ॥ न पश्यति महाघोरं नरकद्वारसंज्ञिकम् ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ शुभाशुभफलैस्तात भुक्तभोगा नरास्त्विह ॥ जायंते लक्षणैर्यैस्तु तानि मे वद सत्तम ॥ ३ ॥ यथा निर्गच्छते जीवस्त्यक्त्वा देहं न पश्यति ॥ तथा गच्छन्पुनर्देहं पंचभूतसमन्वितः ॥ ४ ॥ त्वगस्थिमांसमेदोऽसृक्केशस्नायुशतैः सह ॥ विण्मूत्ररेतःसंघाते का संज्ञा जायते नृणाम् ॥ ५ ॥ एवमुक्तः स मार्कंडः कथयामास योगवित् ॥ ध्यात्वा सनातनं सर्वं देवदेवं महेश्वरम् ॥ ६ ॥ ॥ मार्कंडेय उवाच ॥ ॥ शृणु पार्थ महाप्रश्नं



१ घण्टापताका वितनम्—ह्रस्वत्वमार्षम् । वितानम्—इत्यपेक्षितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथयामि यथाश्रुतम् ॥ सकाशाद्ब्रह्मणः पूर्वमृषिदेवसमागमे ॥ ७ ॥ गुरुरात्मवतां शास्ता राजा शास्ता दुरात्मनाम् ॥ इह प्रच्छन्नपापानां शास्ता वैवस्वतो यमः ॥ ८ ॥ अचीर्णप्रायश्चित्तानां यमलोके ह्यनेकधा ॥ यातनाभिर्वियुक्तानामनेकां जीवसंततिम् ॥ ९ ॥ गत्वा मनुष्यभावे तु पाप चिह्ना भवंति ते ॥ तत्तेऽहं संप्रवक्ष्यामि शृणुष्वैकमना नृप ॥ १० ॥ सहित्वा यातनां सर्वां गत्वा वैवस्वतक्षयम्[1] ॥ विस्तीर्णयातना ये तु लोकमा यांति चिह्निताः ॥ ११ ॥ गद्गदोऽनृतवादी स्यान्मूकश्चैव गवानृते ॥ ब्रह्महा जायते कुष्ठी श्यावदंतस्तु मद्यपः ॥ १२ ॥ कुनखी स्वर्णहरणाद्दुश्चर्मा गुरुतल्पगः ॥ संयोगी हीनयोनिः स्याद्दरिद्रोऽदत्तदानतः ॥ १३ ॥ ग्रामशूकरतां याति ह्ययाज्ययाजको नृप ॥ खरो वै बहुयाजी स्याच्छ्वा ऽनिमंत्रितभोजनात् ॥ १४ ॥ अपरीक्षितभोजी स्याद्वानरो विजने वने ॥ वितर्जकोऽथ मार्जारः खद्योतः कक्षदाहतः ॥ १५ ॥ अविद्यां यः प्रयच्छेत बलीवर्दो भवेद्धि सः ॥ अन्नं पर्युषितं विप्रे ददानः क्लीबतां व्रजेत् ॥ १६ ॥ मात्सर्यादथ जात्यंधो जन्मांधः पुस्तकं हरन् ॥ फलान्या हरतोऽपत्यं म्रियते नाऽत्र संशयः ॥ १७ ॥ मृतो वानरतां यांति तन्मुक्तोऽथ गलाडवान्[2] ॥ अदत्त्वा भक्षयंस्तानि ह्यनपत्यो भवेन्नरः ॥ १८ ॥ हरन्वस्त्रं भवेद्गोधा गरदः पवनाशनः[3] ॥ प्रव्राजीगमनाद्राजन्भवेन्मरुपिशाचकः ॥ १९ ॥ वातको जलहर्त्ता च धान्यहर्त्ता च मूषकः ॥ अप्राप्त यौवनां गच्छन्भवेत्सर्प इति श्रुतिः ॥ २० ॥ गुरुदाराभिलाषी च कृकलासो भवेच्चिरम् ॥ जलप्रस्रवणं यस्तु भिंद्यान्मत्स्यो भवेन्नरः ॥ २१ ॥ अविक्रेयान्विक्रयन्वै विकटाक्षो भवेन्नरः ॥ अयोनिगो वृको हि स्यादुलूकः क्रयवंचनात् ॥ २२ ॥ मृतस्यैकादशाहे तु भुंजानः श्वोपजायते ॥ प्रतिश्रुत्य द्विजायार्थमददन्मधुको भवेत् ॥ २३ ॥ राज्ञीगमाद्भवेद्दुष्टतस्करो दिङ्गराहकः ॥ परिवादी द्विजातीनां लभते काच्छपीं तनुम् ॥ २४ ॥ व्रजेद्देवलको राजन्योनिं चांडालसंज्ञिताम् ॥ दुर्भगः फलविक्रेता वृश्चिको वृषलीपतिः ॥ २५ ॥ मार्जारोऽग्निं पदा स्पृष्ट्वा रोगवान्परमांसभुक् ॥ सोदर्यागमनात्षंढो दुर्गंधश्च सुगंधहृत् ॥ २६ ॥ ग्रामभट्टो दिवाकीर्त्तिर्दैवज्ञो गर्दभो भवेत् ॥ कुपंडितः स्यान्मार्जारो भषणो व्यास एव च ॥ २७ ॥ स एव दृश्यते राजन्प्रकाशात्परमर्मणाम् ॥ यद्वा तद्वापि पारक्यं स्वल्पं वा यदि वा बहु ॥ २८ ॥ कृत्वा वै योनिमाप्नोति तैरश्चीं नात्र संशयः ॥ एवमादीनि चान्यानि चिह्नानि नृपसत्तम ॥ २९ ॥ स्वकर्मविहितान्येव दृश्यंते यैस्तु मानवाः ॥ ततो जन्म ततो मृत्युः सर्व जंतुषु भारत ॥ ३० ॥ जायते नाऽत्र संदेहः समीभूते शुभाँऽशुभे[4] ॥ स्त्रीपुंसोः संप्रयोगेण विशुद्धे शुक्रशोणिते ॥ ३१ ॥ पंचभूतसमोपेतः स

१ वैवस्वतक्षयम्—यमनिवासम्—यमलोकम्—इत्यर्थः । २ फलचौर्यकर्ता—इत्येवात्र कर्ता बोध्यः । ३ पवनाशनः सर्पः—इत्यर्थः । ४ समीभूते शुभाशुभे—पापपुण्ययोः साम्ये जाते सति—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



षष्ठः परमेश्वरः ॥ इंद्रियाणि मनः प्राणा ज्ञानमायुः सुखं धृतिः ॥ ३२ ॥ धारणं प्रेरणं दुःखमिच्छाहंकार एव च ॥ प्रयत्न आकृतिर्वर्णः स्वरद्वेषौ भवाभवौ ॥ ३३ ॥ तस्येदमात्मनः सर्वमनादेरादिमिच्छतः ॥ प्रथमे मासि स क्लेदभूतो धातुविमूर्च्छितः ॥ ३४ ॥ मास्यर्बुदं द्वितीये तु तृतीये चेंद्रियैर्युतः ॥ आकाशाल्लाघवं सौक्ष्म्यं शब्दं श्रोत्रबलादिकम् ॥ वायोस्तु स्पर्शनं चेष्टां दहनं रौक्ष्यमेव च ॥ ३५ ॥ पित्तात्[1]तु दर्शनं पक्तिमौष्ण्यं रूपं प्रकाशनम् ॥ सलिलाद्रसनां शैत्यं स्नेहं क्लेदं समार्दवम् ॥ ३६ ॥ भूमेर्गंधं तथा घ्राणं गौरवं मूर्त्तिमेव च ॥ आत्मा गृह्णात्यजः पूर्वं तृतीये स्पंदते च सः ॥ ३७ ॥ दौर्हृदस्याप्रदानेन गर्भो दोषमवाप्नुयात् ॥ वैरूप्यं मरणं वापि तस्मात्कार्यं प्रियं स्त्रियाः ॥ ३८ ॥ स्थैर्यं चतुर्थे त्वंगानां पंचमे शोणितोद्भवः ॥ षष्ठे बलं च वर्णश्च नखरोम्णां च संभवः ॥ ३९ ॥ मनसा चेतनायुक्तो नखरोमशतावृतः ॥ सप्तमे चाऽष्टमे चैव त्वचावान्स्मृतिवानपि ॥ ४० ॥ पुनर्गर्भं पुनर्धात्रीमेनस्तस्य प्रधावति ॥ अष्टमे मास्यतो गर्भो जातः प्राणैर्वियुज्यते ॥ ४१ ॥ नवमे दशमे वाऽपि प्रबलैः सूतिमारुतैः ॥ निर्गच्छते बाण इव यंत्रच्छिद्रेण सज्वरः ॥ ४२ ॥ शरीरावयवैर्युक्तो ह्यंगप्रत्यंगसंयुतः ॥ अष्टोत्तरं मर्मशतं तत्रास्था तु शतत्रयम् ॥ ४३॥ सप्त शिरःकपालानि विहितानि स्वयंभुवा ॥ तिस्रः कोट्यो र्द्धकोटी च रोम्णामंगेषु भारत ॥ ४४ ॥ द्वासप्ततिसहस्राणि हृदयादभिनिसृताः ॥ हितानाम हि ता नाड्यस्तासां मध्ये शशिप्रभा[2] ॥ ४५ ॥ एवं प्रवर्त्तते चक्रं भूतग्रामे चतुर्विधे ॥ उत्पत्तिश्च विनाशश्च भवतः सर्वदेहिनाम् ॥ ४६ ॥ गतिरूर्ध्वा च धर्मेण ह्यधर्म्मेण त्वधोगतिः ॥ जायते सर्ववर्णानां स्वधर्म्मचलनान्नृप ॥ ४७ ॥ देवत्वे मानवत्वे च दानभोगादिकाः क्रियाः ॥ दृश्यंते या महाराज तत्सर्वं कर्मजं फलम् ॥ ४८ ॥ स्वकर्मविहिते घोरे कामक्रोधार्जिते शुभे ॥ निमज्जेन्नरके घोरे यस्योत्तारो न विद्यते ॥ ४९ ॥ उत्तारणाय जंतूनां नर्मदातटसंस्थितम् ॥ एवमेतन्महातीर्थं नरकेश्वरमुत्तमम् ॥ ५० ॥ नरकापहं महापुण्यं महापातकनाशनम् ॥ तत्तीर्थं सर्वतीर्थानामुत्तमं भुवि दुर्ल्लभम् ॥ ५१ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत महेश्वरम् ॥ महापातकयुक्तोऽपि नरकं नैव पश्यति ॥ ५२ ॥ तत्र तीर्थे तु यो दद्याद्धेनुं वैतरणीं शुभाम् ॥ स मुच्यते सुखेनैव वैतरण्यां न संशयः ॥ ५३ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ यमद्वारे महाघोरे या सा वैतरणी नदी ॥ किंरूपा किंप्रमाणा सा कथं सा वहति द्विज ॥ ५४ ॥ कथं तस्याः प्रमुच्यंते केषां वासस्तु संततम् ॥ केषां तु साऽनुकूला सा ह्येतद्विस्तरतो वद ॥ ५५ ॥ ॥ श्रीमार्कंडेय उवाच ॥

१ पित्तात्–अग्नेः–इत्यर्थः । २ शशिप्रिया--इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्मपुत्र महाबाहो शृणु सर्वं मयोदितम् ॥ या सा वैतरणी नाम यमद्वारे महासरित् ॥ ५६ ॥ अगाधा पाररहिता दृष्टमात्रा भयावहा ॥ पूयशोणितततोया सा मांसकर्दमनिर्मिता ॥ ५७ ॥ तत्तोयं भ्रमते तूर्णं तापीमध्ये घृतं यथा ॥ कृमिभिः संकुलं पूयं वज्रतुंडैरयोमुखैः ॥ ५८ ॥ शिशुमारैश्च मकरैर्वज्रकर्त्तरिसंयुतैः ॥ अन्यैश्च जलजीवैः सा सुहिंस्रैर्मर्मभेदिभिः ॥ ५९ ॥ तपंति द्वादशादित्याः प्रलयांत इवोल्बणाः ॥ पतंति तत्र वै मर्त्त्याः क्रंदंतो भृशदारुणम् ॥ ६० ॥ हा भ्रातः पुत्र हा मातः प्रलपंति मुहुर्मुहुः ॥ असिपत्रवने घोरे पततं योऽभिरक्षति ॥ ६१ ॥ प्रतरंति निमज्जंति ग्लानिं गच्छंति जंतवः ॥ चतुर्विधैः प्राणिगणैर्द्रष्टव्या सा महानदी ॥ ६२ ॥ तरंति तस्यां सद्दानैरन्यथा तु पतंति ते ॥ मातरं ये न मन्यंते ह्याचार्यं गुरुमेव च ॥ ६३ ॥ अवजानंति मूढा ये तेषां वासस्तु संततम् ॥ पतिव्रतां साधुशीलामूढां धर्मेषु निश्चलाम्॥६४॥परित्यजंति ये पापाः संततं तु वसंति ते ॥ विश्वासप्रतिपन्नानां स्वामिमित्रतपस्विनाम् ॥ ६५ ॥ स्त्रीबालवृद्धदीनानां च्छिद्रमन्वेषयंति ये ॥ पच्यंते तत्र मध्ये वै क्रंदमानाः सुपापिनः ॥ ६६ ॥ श्रांतं बुभुक्षितं विप्रं यो विघ्नयति दुर्मतिः ॥ कृमिभिर्भक्ष्यते तत्र यावत्कल्पशतत्रयम् ॥ ६७ ॥ ब्राह्मणाय प्रतिश्रुत्य यो दानं न प्रयच्छति ॥ आहूय नास्ति यो ब्रूते तस्य वासस्तु संततम् ॥ ६८ ॥ अग्निदो गरदश्चैव राजगामी च पैशुनी ॥ कथाभंगकरश्चैव कूटसाक्षी च मद्यपः ॥ ६९ ॥ वज्रविध्वंसकश्चैव स्वयंदत्तापहारकः ॥ सुक्षेत्रसेतुभेदी च परदारप्रधर्षकः ॥ ७० ॥ ब्राह्मणो रसविक्रेता वृषलीपतिरेव च ॥ गोकुलस्य तृषार्त्तस्य पालीभेदं करोति यः ॥ ७१ ॥ कन्याभिदूषकश्चैव दानं दत्त्वा तु तापकः ॥ शूद्रस्तु कपिलापानी ब्राह्मणो मांसभोजनी ॥ ॥ ७२ ॥ एते वसंति सततं मा विचारं कृथा नृप ॥ सानुकूला भवेद्येन तच्छृणुष्व नराधिप ॥ ७३ ॥ अयने विषुवे चैव व्यतीपाते दिनक्षये ॥ अन्येषु पुण्यकालेषु दीयते दानमुत्तमम् ॥ ७४ ॥ कृष्णां वा पाटलां वापि कुर्याद्वैतरणीं शुभाम् ॥ स्वर्णशृंगीं रूप्यखुरां कांस्यपात्रस्य दोहिनीम् ॥ ॥ ७५ ॥ कृष्णवस्त्रयुगाच्छन्नां सप्तधान्यसमन्विताम् ॥ कुर्यात्सद्द्रोणशिखर आसीनां ताम्रभाजने ॥ ७६ ॥ यमं हैमं प्रकुर्वीत लोहदंडसमन्वितम् ॥ इक्षुदंडमयं बद्ध्वा ह्युडुपं पट्टबंधनैः ॥७७॥ उडुपोपरि तां धेनुं सूर्यदेहसमुद्भवाम् ॥ कृत्वा प्रकल्पयेद्विद्वांच्छत्रोपानद्युगान्विताम् ॥७८॥ अंगुलीयकवासांसि ब्राह्मणाय निवेदयेत् ॥ इममुच्चारयेन्मंत्रं संगृह्यास्याश्च पुच्छकम् ॥ ७९ ॥ ॐयमद्वारे महाघोरे या सा वैतरणी नदी ॥ तर्त्तुकामो ददाम्येनां तुभ्यं वैतरणि नमः ॥ ८० ॥ ॥ इत्यधिवासनमंत्रः ॥ ॥ गावो मे चाग्रतः संतु गावो मे संतु पृष्ठतः ॥ गावो मे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



हृदये संतु गवां मध्ये वसाम्यहम् ॥ ८१ ॥ ॐ विष्णुरूप द्विजश्रेष्ठ भूदेव पंक्तिपावन ॥ सदक्षिणा मया दत्ता तुभ्यं वैतरणि नमः ॥ ८२ ॥ इति दानमंत्रः ॥ ॥ ब्राह्मणं धर्मराजं च धेनुं वैतरणीं शिवाम् ॥ सर्वं प्रदक्षिणीकृत्य ब्राह्मणाय निवेदयेत् ॥ ८३ ॥ पुच्छं संगृह्य सुरभेरग्रे कृत्वा द्विजं ततः ॥ ८४ ॥ धेनुके त्वं प्रतीक्षस्व यमद्वारे महाभये ॥ उत्तितीर्षुरहं धेनो वैतरण्यै नमोऽस्तु ते ॥ ८५ ॥ ॥ ॥ इत्यनुव्रजमन्त्रः ॥ ॥ अनुव्रजेत गच्छंतं सर्वं तस्य गृहं नयेत् ॥ एवं कृते महीपाल सरित्स्यात्सुखवाहिनी ॥ ८६ ॥ तारयते तया धेन्वा सा सरिज्जलवाहिनी ॥ सर्वान्कामानवाप्नोति ये दिव्या ये च मानुषाः ॥८७॥ रोगी रोगाद्विमुक्तः स्याच्छाम्यंति परमापदः ॥ स्वस्थे सहस्र गुणितमातुरे शतसम्मितम् ॥ ८८ ॥ मृतस्यैव तु यद्दानं परोक्षे तत्समं स्मृतम् ॥ स्वहस्तेन ततो देयं मृते कः कस्य दास्यति ॥ इति मत्वा महाराज स्वदत्तं स्यान्महाफलम् ॥ ८९ ॥ इत्येवमुक्तं तव धर्मसूनो दानं मया वैतरणीसमुत्थम् ॥ शृणोति भक्त्या पठतीह सम्यक्स याति विष्णोः पदमप्रमेयम् ॥ ९० ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ प्राप्ते चाश्वयुजे मासि तस्मिन्कृष्णा चतुर्दशी ॥ स्नात्वा कृत्वा ततः श्राद्धं संपूज्य च महेश्वरम् ॥ ९१ ॥ पितृभ्यो दीयते दानं भक्तिश्रद्धासमन्वितैः ॥ पश्चाज्जागरणं कुर्यात्सत्कथाश्रवणादिभिः ॥ ९२ ॥ ततः प्रभातसमये स्नात्वा वै नर्मदाजले ॥ तर्प्पणं विधिवत्कृत्वा पितॄणां देवपूर्वकम् ॥ ९३ ॥ सौवर्णे[1] घृतसंयुक्तं दीपं दद्याद्द्विजातये ॥ पश्चात्संभोजयेद्विप्रान्स्वयं चैव विमत्सरः ॥ ९४ ॥ एवं कृते नरश्रेष्ठ न जन्तुर्नरकं व्रजेत् ॥ अवश्यमेव मनुजैर्द्रष्टव्या नारकी स्थितिः ॥ ९५ ॥ अनेन विधिना कृत्वा न पश्येन्नरकान्नरः ॥ तत्र तीर्थे मृतानां तु नराणां विधिना नृप ॥ ९६ ॥ मन्वंतरं शिवे लोके वासो भवति दुर्लभे ॥ विमानेनाऽर्कवर्णेन किंकिणीशतशोभिना ॥ ९७ ॥ स गच्छति महाभाग सेव्यमानोऽप्सरोगणैः ॥ भुनक्ति विविधान्भोगानुक्तकालं न संशयः ॥ ९८ ॥ पूर्णे चैव ततः काल इह मानुष्यतां गतः ॥ सर्वव्याधिविनिर्मुक्तो जीवेच्च शरदां शतम् ॥ ९९ ॥ प्राप्य चाश्वयुजे मासि कृष्णपक्षे चतुर्दशीम् ॥ अहोरात्रोषितो भूत्वा पूजयित्वा महेश्वरम् ॥ महापातकयुक्तोऽपि मुच्यते नाऽत्र संशयः ॥ १०० ॥ अष्टाविंशति कोटयो वै नरकाणां युधिष्ठिर ॥ विमुक्ता नरकैर्दुःखैः शिवलोकं व्रजंति ते ॥ १ ॥ तत्र भुक्त्वा महाभोगान्दिव्यैश्वर्यसमन्वितान् ॥ लभन्ते मानुषं जन्म दुर्लभं भुवि मानवाः ॥ १०२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डेऽनरकेश्वरतीर्थमाहात्म्यवर्णनं नामैकोनषष्ट्युत्तरशततमो

१ सौवर्णे सुवर्णनिर्मितदीपपात्रे--इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽध्यायः ॥ १५९ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्पांडुपुत्र मोक्षतीर्थमनुत्तमम् ॥ सेवितं देवगन्धर्वैर्मुनिभिश्च तपोधनैः ॥
॥ १ ॥ बहवस्तत्र जानंति विष्णुमायाविमोहिताः ॥ यत्र सिद्धा महाभागा ऋषयः सतपोधनाः ॥ २ ॥ पुलस्त्यः पुलहो विद्वान्क्रतुश्चैव महा
मतिः ॥ प्राचेतसो वसिष्ठश्च दक्षो नारद एव च ॥ ३ ॥ एते चाऽन्ये महाभागाः सप्तसाहस्रसंज्ञिताः ॥ मोक्षं गताः सह सुतैस्तत्तीर्थं तेन मोक्ष
दम् ॥ ४ ॥ तत्र प्रवाहमध्ये तु पतिता[1] तमहा नदी ॥ तत्र तत्संगमं तीर्थं सर्वपापक्षयंकरम् ॥ ५ ॥ ऋग्यजुःसामसंज्ञानामभ्यस्तानां तु यत्फलम् ॥
सम्यग्जप्त्वा तु विधिना गायत्रीं तत्र तल्लभेत् ॥ ६ ॥ तत्र दत्तं हुतं जप्तं तीर्थसेवार्जितं फलम् ॥ सर्वमक्षयतां याति मोक्षसाधनमुत्तमम् ॥ ७ ॥
तत्र तीर्थे मृतानां तु संन्यासेन द्विजन्मनाम् ॥ अनिवर्त्तिका गतिस्तेषां मोक्षतीर्थप्रभावतः ॥ ८ ॥ एष ते विधिरुद्दिष्टः संक्षेपेण मयाऽनघ ॥
व्युष्टिस्तीर्थस्य[2] महती पुराणे याऽभिधीयते ॥ ९ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे
मोक्षतीर्थमाहात्म्यवर्णनं नाम षष्ट्युत्तरशततमोऽध्यायः ॥ १६० ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महाराज सर्पतीर्थमनु
त्तमम् ॥ यत्र सिद्धा महासर्पास्तपस्तप्त्वा युधिष्ठिर ॥१॥ वासुकिस्तक्षको घोरः सर्प्प ऐरावतस्तथा ॥ कालियश्च महाभागः कर्कोटकधनंजयौ ॥२॥
शंखचूडो महातेजा धृतराष्ट्रो वृकोदरः ॥ कुलिको वामनश्चैव तेषां ये पुत्रपौत्रिणः ॥३॥ तत्र तीर्थे महापुण्ये तपस्तप्त्वा सुदुष्करम् ॥ भुंजंति विवि
धान्भोगान्क्रीडन्ति च यथासुखम् ॥४॥ तत्र तीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः ॥ वाजपेयफलं तस्य पुरा प्रोवाच शंकरः ॥ ५ ॥ स्नातानां सर्प
तीर्थे तु नराणां भुवि भारत ॥ सर्पवृश्चिकजातिभ्यो न भयं विद्यते क्वचित् ॥६ ॥ मृतो भोगवतीं गत्वा पूज्यमानो महोरगैः[3] ॥ नागकन्यापरिवृतो
महाभोगपतिर्भवेत् ॥ ७ ॥ मार्गशीर्षस्य मासस्य कृष्णपक्षे च याऽष्टमी ॥ सोपवासः शुचिर्भूत्वा लिंगं संपूरयेत्तिलैः ॥ यथाविभवसारेण गंधपुष्पैः
समर्चयेत् ॥ ८ ॥ एवं विधाय विधिवत्प्रणिपत्य क्षमापयेत् ॥ तस्य यत्फलमुद्दिष्टं तच्छृणुष्व नरेश्वर[4] ॥९॥ तिलास्तत्र च यत्संख्याः पत्रपुष्पफलानि
च ॥ तावत्स्वर्गपुरे राजन्मोदते कालमीप्सितम् ॥१०॥ ततः स्वर्गात्परिभ्रष्टो जायते विमले कुले ॥ सुरूपः सुभगश्चैव धनकोटिपतिर्भवेत् ॥११॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखंडे सर्पतीर्थमाहात्म्यवर्णनंनामैकषष्ट्युत्तरशततमोऽध्यायः ॥
॥ १६१ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ गोपेश्वरं ततो गच्छेत्सर्प्पक्षेत्रादनंतरम् ॥ यत्र स्नानेन चैकेन मुच्यंते पातकैर्नराः ॥ १ ॥

१ पतितास्तमहानदी–इ०पा० । २ व्युष्टिः–फलम्–इत्यर्थः । ३ अप्सरोगणैः–इ०पा० । ४ नृप–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

तत्र तीर्थे तु यः स्नात्वा कुरुते प्राणसंक्षयम् ॥ स गच्छेद्यदि युक्तोपि पापेन शिवमंदिरम् ॥ २ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेद्देवमीश्वरम् ॥ मुच्यते सर्वपापैश्च रुद्रलोकं स गच्छति ॥ ३ ॥ क्रीडित्वा च यथाकामं रुद्रलोके महातपाः ॥ इह मानुष्यतां प्राप्य राजा भवति धार्मिकः ॥ ॥ ४ ॥ हस्त्यश्वरथसंपन्नो दासीदाससमन्वितः ॥ पूज्यमानो नरेन्द्रैश्च जीवेद्वर्षशतं सुखी ॥ ५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखंडे रेवाखण्डे गोपेश्वरतीर्थमाहात्म्यवर्णनंनाम द्विषष्ट्युत्तरशततमोऽध्यायः ॥ १६२ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महाराज नागतीर्थमनुत्तमम् ॥ आश्विनस्य सिते पक्षे पंचम्यां नियतः शुचिः ॥ १ ॥ रात्रौ जागरणं कृत्वा गन्धधूपनिवेदनैः ॥ प्रभाते विमले स्नात्वा श्राद्धं कृत्वा यथाविधि ॥ २ ॥ मुच्यते सर्वपापेभ्यो नात्र कार्या विचारणा ॥ तत्र तीर्थे तु यो राजन्प्राणत्यागं करिष्यति ॥ ३ ॥ अनिवर्त्तिका गतिस्तस्य प्रोवाचेति शिवः स्वयम् ॥ ४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखंडे रेवाखंडे नागतीर्थमाहात्म्यवर्णनंनाम त्रिषष्ट्युत्तरशततमोऽध्यायः ॥ १६३ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महाराज सांवौरं तीर्थमुत्तमम् ॥ यत्र सन्निहितो भानुः पूज्यमानः सुरासुरैः ॥ १ ॥ तत्र ये पंगुतां प्राप्ताः शीर्णघ्राणनखा नराः ॥ दद्रुमण्डलभिन्नांगा मक्षिकाकृमिसंकुलाः ॥ २ ॥ मातापितृभ्यां रहिता भ्रातृभार्याविवर्जिताः ॥ अनाथा विकला व्यंगा मग्ना ये दुःखसागरे ॥ ३ ॥ तेषां नाथो जगद्योनिर्नर्मदातटमाश्रितः ॥ सांवौरनाथो लोकानामार्त्तिहा दुःखनाशनः ॥ ४ ॥ तत्र तीर्थे तु यः स्नात्वा मासमेकं निरंतरम् ॥ पूजयेद्भास्करं देवं तस्य पुण्यफलं शृणु ॥ ५ ॥ यत्फलं चोत्तरे पार्थ तथा वै पूर्वसागरे ॥ दक्षिणे पश्चिमे स्नात्वा तत्र तीर्थे तु तत्फलम् ॥ ६ ॥ कौमारे यौवने पापं वार्द्धके यच्च संचितम् ॥ तत्प्रणश्यति सांवौरे स्नानमात्रान्न संशयः ॥ ७ ॥ न व्याधिर्नैव दारिद्र्यं न चैवेष्टवियोजनम् ॥ सप्तजन्मानि राजेंद्र सांवौरपरिसेवनात् ॥ ८ ॥ सप्तम्यामुपवासेन तद्दिने चाप्युपोषिते ॥ स तत्फलमवाप्नोति तत्र स्नात्वा न संशयः ॥ ९ ॥ रक्तचंदनमिश्रेण यदर्घ्येण फलं स्मृतम् ॥ तत्र तीर्थे नृपश्रेष्ठ स्नात्वा तत्फलमाप्नुयात् ॥ १० ॥ नर्मदासलिलं रम्यं सर्वपातकनाशनम् ॥ निरीक्षितं विशेषेण सांवौरेण महात्मना ॥ ११ ॥ ते धन्यास्ते महात्मानस्तेषां जन्म सुजीवितम् ॥ स्नात्वा पश्यंति देवेशं सांवौरेश्वरमुत्तमम् ॥ १२ ॥ सूर्यलोके वसेत्तावद्यावदाभूतसंप्लवम् ॥ १३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे सांवौरेश्वरतीर्थमाहात्म्यवर्णनंनाम चतुःषष्ट्युत्तरशततमोऽध्यायः ॥ १६४ ॥ ॥ छ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ नर्मदादक्षिणे कूले सिद्धेश्वरमिति



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुतम् ॥ तीर्थं परं महाराज सिद्धैः कृतमिति प्रभो ॥ १ ॥ तत्र तीर्थं महापुण्यं सर्वतीर्थेषु पावनम् ॥ नर्मदाया महाराज दक्षिणं कूलमाश्रितम् ॥ ॥ २ ॥ तत्र तीर्थे नरः स्नात्वा तर्प्पयेत्पितृदेवताः ॥ श्राद्धं तत्रैव यो दद्यात्पितॄनुद्दिश्य भारत ॥ ३ ॥ तृप्यंति पितरस्तस्य द्वादशाब्दान्न संशयः ॥ तत्र तीर्थे तु यो भक्त्या स्नात्वा पूजयते शिवम् ॥ ४ ॥ रात्रौ जागरणं कृत्वा पठेत्पौराणिकीं कथाम् ॥ ततः प्रभाते विमले स्नानं कुर्याद्यथा विधि ॥ ५ ॥ वीक्षते गिरिजाकांतं स गच्छेत्परमां गतिम् ॥ पुरा सिद्धा महाभागाः कपिलाद्या महर्षयः ॥ ६ ॥ जपंतश्च परं ब्रह्म योगसिद्धा महाव्रताः ॥ सिद्धिं ते परमां प्राप्ता नर्मदायाः प्रभावतः ॥ ७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे सिद्धेश्वरतीर्थमाहात्म्यवर्णनंनाम पंचषष्ट्युत्तरशततमोऽध्यायः ॥ १६५ ॥ ॥ छ ॥ ॥ मार्कंडेय उवाच ॥ ॥ ततः सिद्धेश्वरी देवी वैष्णवी पापनाशिनी ॥ आनंदं परमं प्राप्ता दृष्ट्वा स्थानं सुशोभनम् ॥ १ ॥ तत्र तीर्थे नरः स्नात्वा पूजयेत्पितृदेवताः ॥ देवीं पश्यति यो भक्त्या मुच्यते सर्वपातकैः ॥ २ ॥ मृतवत्सा तु या नारी वन्ध्या स्त्रीजननी तथा ॥ पुत्रं सा लभते नारी शीलवन्तं गुणान्वितम् ॥ ३ ॥ तत्र तीर्थे तु यः स्नात्वा पश्येद्देवीं सुभक्तितः ॥ अष्टम्यां वा चतुर्दश्यां सर्वकालेऽथवा नृप ॥ ४ ॥ संगमे तु ततः स्नाता नारी वा पुरुषोऽपि वा ॥ पुत्रं धनं तथा देवी ददाति परितोषिता ॥ ५ ॥ गोत्ररक्षां प्रकुरुते दृष्टा देवी सुपूजिता ॥ प्रजां च पाति सततं पूज्यमाना न संशयः ॥ ६ ॥ नवम्यां च महाराज स्नात्वा देवीमुपोषितः ॥ पूजयेत्परया भक्त्या श्रद्धापूतेन चेतसा ॥ ७ ॥ स गच्छेत्परमं लोकं यः सुरैरपि दुर्ल्लभः ॥ ८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखंडे सिद्धेश्वरतीर्थमाहात्म्यवर्णनं नाम षट्षष्ट्युत्तरशततमोऽध्यायः ॥ १६६ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ नर्मदादक्षिणे कूले त्वच्चिह्नेनोपलक्षितम् ॥ तीर्थमेतन्ममाऽख्याहि संभवं च महामुने ॥ १ ॥ ॥ माकडेय उवाच ॥ ॥ पुरा कृतयुगस्यादौ दक्षिणे गिरिमुत्तमम् ॥ विंध्यं सर्वगुणोपेतं नियतो नियताशनः ॥ २ ॥ ऋषिसंघैः कृतातिथ्यो दंडके न्यवसं चिरम् ॥ उषित्वा सुचिरं कालं वर्षाणामयुतं सुखी ॥ ३ ॥ तानृषीन्समनुज्ञाप्य शिष्यैरनुगतस्ततः ॥ निवृत्तः सुमहाभाग नर्मदाकूलमागतः ॥ ४ ॥ पुण्यं च रमणीयं च सर्वपापविनाशनम् ॥ कृत्वाऽहमास्पदं तत्र द्विजसंघसमायुतः ॥ ५ ॥ ब्रह्मचारिभिराकीर्णं गार्हस्थ्ये सुप्रतिष्ठितैः ॥ वानप्रस्थैश्च यतिभिर्यताहारैर्य

१ नृप–इ० पा० । २ कोपरे–इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तात्मभिः ॥ ६ ॥ तपस्विभिर्महाभागैः कामक्रोधविवर्जितैः ॥ तत्राऽहं वर्षमयुतं तपः कृत्वा सुदारुणम् ॥ ७ ॥ आराधयं वासुदेवं प्रभुं कर्त्ता रमीश्वरम् ॥ जपंस्तपोभिर्नियमैर्नर्मदाकूलमाश्रितः ॥ ८ ॥ ततस्तौ वरदौ देवौ समायातौ युधिष्ठिर ॥ प्रत्यक्षौ भास्करौ राजन्नुमाश्रीभ्यां विभूषितौ ॥ ९ ॥ प्रणम्याऽहं ततो देवौ भक्तियुक्तो वचोऽब्रुवम् ॥ भवंतौ प्रार्थयामि स्म वरार्हौ वरदौ शिवौ ॥ १० ॥ धर्मस्थितिं महाभागौ भक्तिं वाऽनुत्तमां युवाम् ॥ अजरो व्याधिरहितः पंचविंशतिवर्षवत् ॥ अस्मिन्स्थाने सदा स्थेयं सह देवैरसंशयम् ॥ ११ ॥ एवमुक्तौ मया पार्थ तौ देवौ कृष्णशंकरौ ॥ मामूचतुः प्रहृष्टौ तौ निवासार्थं युधिष्ठिर ॥ १२ ॥ ॥ देवावूचतुः ॥ ॥ अस्मिन्स्थाने स्थितौ विद्धि सह देवैः सवासवैः ॥ एवमुक्त्वा ततो देवौ तत्रैवांतरधीयताम् ॥ १३ ॥ अहं च स्थापयित्वा तौ शंकरं कृष्णमव्ययम् ॥ कृतकृत्यस्ततो जातः संपूज्य सुसमाहितः ॥ १४ ॥ तस्मिंस्तीर्थे नरः स्नात्वा पूजयेत्परमेश्वरम् ॥ मार्कंडेश्वरनाम्ना वै विष्णुं त्रिभुवनेश्वरम् ॥ १५ ॥ स गच्छेत्परमं स्थानं वैष्णवं शैवमेव च ॥ घृतेन पयसा वाऽथ दध्ना च मधुना तथा ॥ १६ ॥ नार्मदेनोदकेनाऽथ गंधधूपैः सुशोभनैः ॥ पुष्पोपहारैश्च तथा नैवेद्यैर्नियतात्मवान् ॥ १७ ॥ एवं विष्णोः प्रकुर्वीत जागरं भक्तितत्परः ॥ स्नानादीनि तथा राजन्प्रयतः शुचिमानसः ॥ १८ ॥ ज्येष्ठे मासि सिते पक्षे चतुर्दश्यामुपोषितः ॥ द्वादश्यां कारयेद्देवपूजनं वैष्णवो नरः ॥ १९ ॥ एवं कृत्वा चतुर्दश्यामेकादश्यां नरोत्तम ॥ वैष्णवं लोकमाप्नोति विष्णुतुल्यो भवेन्नरः ॥ २० ॥ माहेश्वरे च राजेंद्र गणवन्मोदते पुरे ॥ श्राद्धं च कुरुते तत्र पितॄनुदिश्य सुस्थिरः ॥ २१ ॥ तस्य ते ह्यक्षयां तृप्तिं प्राप्नुवंति न संशयः ॥ नर्मदायां द्विजः स्नात्वा मौनी नियतमानसः ॥ २२ ॥ उपास्य संध्यां तत्रस्थो जपं कृत्वा सुशोभनम् ॥ तर्पयित्वा पितन्देव..न्मनुष्यांश्च यथाविधि ॥ २३ ॥ कृष्णस्य पुरतः स्थित्वा मार्कंडेशस्य वा पुनः ॥ ऋग्यजुःसाममंत्रांश्च जपेदत्र प्रयत्नतः ॥ २४ ॥ ऋचमेकां जपेद्यस्तु ऋग्वेदस्य फलं लभेत् ॥ यजुर्वेदस्य यजुषा साम्ना सामफलं लभेत् ॥ २५ ॥ एकस्मिन्भोजिते विप्रे कोटिर्भवति भोजिता ॥ मृतप्रजा तु या नारी वंध्या स्त्रीजननी तथा ॥ २६ ॥ रुद्रांस्तु विधिवज्जप्त्वा ब्राह्मणो वेदतत्त्ववित् ॥ लिंगस्य दक्षिणे पार्श्वे स्थाप
॥१२१॥ येत्कलशं शिवम् ॥ २७ ॥ रुद्रैकादशभिर्मंत्रैः स्नापयेत्कलशांभसा ॥ पुत्रमाप्नोति राजेंद्र दीर्घायुषमकल्मषम् ॥ २८ ॥ मार्कंडेश्वरवृक्षान्यो ॥२९५॥
दूरस्थानपि पश्यति ॥ ब्रह्महत्यादिपापेभ्यो मुच्यते शंकरोऽब्रवीत् ॥ २९ ॥ य इदं शृणुयाद्भक्त्या पठेद्वा नृपसत्तम ॥ सर्वपापविशुद्धात्मा

१ अर्चाच्छिवविष्णू । १ मार्कण्डेश्वरवृक्षान्–मार्कण्डेश्वरतीर्थतीरस्थान्–वृक्षान्–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जायते नाऽत्र संशयः ॥ ३० ॥ इदं यशस्यमायुष्यं धन्यं दुःस्वप्ननाशनम् ॥ पठतां शृण्वतां वाऽपि सर्वपापप्रमोचनम् ॥ ३१ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे मार्कंडेश्वरतीर्थमाहात्म्यवर्णनंनाम सप्तषष्ट्युत्तरशत
तमोऽध्यायः ॥१६७॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ नर्मदादक्षिणे रोधस्यंकूरेश्वरमुत्तमम् ॥ तीर्थं सर्वगुणोपेतं त्रिषु लोकेषु विश्रुतम्
॥ १ ॥ यत्र सिद्धं महारक्ष आराध्य तु महेश्वरम् ॥ शंकरं जगतः प्राणं स्मृतिमात्रावहारिणम् ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ किं तद्रक्षो
द्विजश्रेष्ठ किंनाम कस्य वाऽन्वये ॥ एतद्विस्तरतः सर्वं कथयस्व ममाऽनघ ॥ ३ ॥ अज्ञानतिमिरांधा ये पुमांसः पापकारिणः ॥
युष्मद्विधैर्दीपभूतैः पश्यंति सचराचरम् ॥ ४ ॥ धर्मपुत्रवचः श्रुत्वा मार्कंडेयो मुनीश्वरः ॥ स्मितं कृत्वा बभाषे तां कथां पापप्रणा
शनीम् ॥५ ॥ ॥ मार्कंडेय उवाच ॥ ॥ मानसो ब्रह्मणः पुत्रः पुलस्त्योनाम पार्थिव ॥ वेदशास्त्रप्रवक्ता च साक्षाद्वेधा इवाऽपरः ॥ ६ ॥ तृणबिंदुसुता
तस्य भार्याऽऽसीत्परमेष्ठिनः ॥ तस्य धर्मप्रसंगेन पुत्रो जातो महामनाः ॥ ७ ॥ यस्माद्वेदेतिहासैश्च सषडंगपदक्रमाः ॥ विश्रांता ब्रह्मणा दत्ता
नामविश्रवसेति च ॥ ८ ॥ कस्मिंश्चिदथ काले च भरद्वाजो महामुनिः ॥ स्वसुतां प्रददौ राजन्मुदा विश्रवसे नृप ॥ ९ ॥ स तया रमते
सार्धं पौलोम्या मघवा इव ॥ मुदा परमया राजन्ब्राह्मणो वेदवित्तमः ॥ १० ॥ केनचित्त्वथ कालेन पुत्रः पुत्रगुणैर्युतः ॥ जज्ञे विश्रवसो राजन्नाम्ना
वैश्रवणः श्रुतः ॥ ११ ॥ सोऽपि मौनव्रतं कृत्वा बालभावाद्युधिष्ठिर ॥ सर्वभूताभयं दत्त्वा चचार परमं व्रतम् ॥ १२ ॥ तस्य तुष्टो महादेवो ब्रह्मा
ब्रह्मर्षिभिः सह ॥ सखित्वं चेश्वरो दत्त्वा धनदत्वं जगाम ह ॥ १३ ॥ यमेंद्रवरुणानां च चतुर्थस्त्वं भविष्यसि ॥ ब्रह्माऽप्युक्त्वा जगामाशु लोकपाल
त्वमीप्सितम् ॥ १४ ॥ ततस्त्वनंतरे काले कैकसी नाम राक्षसी ॥ पातालं भूतलं त्यक्त्वा विश्रवं चकमे पतिम् ॥ १५ ॥ पुत्रोऽथ रावणो जातस्त
स्या भरतसत्तम ॥ कुंभकर्णो महारक्षो धर्मात्मा च विभीषणः ॥ १६ ॥ कुंभश्चैव विकुंभश्च कुंभकर्णसुतावुभौ ॥ महाबलौ महावीर्यौ महांतौ पुरुषो
त्तम ॥ १७ ॥ अंकूरो राक्षसश्रेष्ठः कुंभस्य तनयो महान् ॥ विभीषणं च गुणवद्दृष्ट्वैवं राक्षसोत्तमः ॥ १८ ॥ ततः स यौवनं प्राप्य ज्ञात्वा रक्षः पिताम
हम् ॥ परं निर्वेदमापन्नश्चचार सुमहत्तपः ॥ १९ ॥ दक्षिणं पश्चिमं गत्वा सागरं पूर्वमुत्तरम् ॥ नर्मदायां प्रसंगेन ह्यंकूरो राक्षसेश्वरः ॥ २० ॥ तपश्च
चार सुमहद्दिव्यं वर्षशतं किल ॥ ततस्तुष्टो महादेवः साक्षात्परपुरंजयः ॥ २१ ॥ वरेण च्छंदयामास राक्षसं वृषकेतनः॥ वरं वृणीष्व भद्रं ते तव दा
स्यामि सुव्रत ॥ २२ ॥ प्रोवाच राक्षसो वाक्यं देवदेवं महेश्वरम् ॥ वरदं सोऽग्रतो दृष्ट्वा प्रणम्य च पुनःपुनः ॥२३॥ यदि तुष्टो महादेव वरदोऽसि सुरे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

श्वर ॥ दुर्लभं सर्वभूतानाममरत्वं प्रयच्छ मे ॥ २४ ॥ मम नाम्ना स्थितोऽनेन वरेण त्रिपुरांतक ॥ सदा संनिहितोऽप्यत्र तीर्थे भवितुमर्हसि ॥ २५ ॥
॥ ॥ ईश्वर उवाच ॥ ॥ यावद्विभीषणमतं यावद्धर्मनिषेवणम् ॥ करिष्यसि दृढात्मा त्वं तावदेतद्भविष्यति ॥ २६ ॥ एवमुक्त्वा ययौ देवः सर्व
दैवतपूजितः ॥ विमानेनाऽर्कवर्णेन कैलासं धरणीधरम् ॥ २७ ॥ गते चाऽदर्शनं देवे स्नात्वाऽऽचम्य विधानतः ॥ स्थापयामास राजेंद्र ह्यंकूरेश्वरमु
त्तमम् ॥ २८ ॥ गंधपुष्पैस्तथा धूपैर्वस्त्रालंकारभूषणैः ॥ पताकैश्चामरैश्छत्रैर्जयशब्दादिमंगलैः ॥ २९ ॥ पूजयित्वा सुरेशानं स्तोत्रैर्हृद्यैः सुपु
ष्कलैः ॥ जगाम भवनं रक्षो यत्र राजा विभीषणः ॥ ३० ॥ पूजितः स यथान्यायं दानसन्मानगौरवैः ॥ सौदर्ये स्थापितो भावे सोऽवात्सीत्परया
मुदा ॥ ३१ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरम् ॥ अंकूरेश्वरनामानं सोऽश्वमेधफलं लभेत् ॥ ३२ ॥ मांडव्यखातमारभ्य संगमं वाऽपि
यच्छुभम् ॥ रेवाया आमलक्याश्च देवक्षेत्रं महेश्वरम् ॥ ३३ ॥ मांडव्यखातात्पश्चिमतस्तीर्थं तदंकूरेश्वरम् ॥ तत्र तीर्थे नरः स्नात्वा शुचिः प्रयतमा
नसः ॥ ३४ ॥ संध्यामाचम्य यत्नेन जपं कृत्वाऽथ भारत ॥ तर्पयित्वा पितॄन्देवान्मनुष्यान्भरतर्षभ ॥ ३५ ॥ सचैलः क्लिन्नवसनो मौनमास्थाय
संयतः ॥ अष्टम्यां वा चतुर्दश्यामुपोष्य विधिवन्नरः ॥ ३६ ॥ पूजां यः कुरुते राजंस्तस्य पुण्यफलं शृणु ॥ साग्रं तु योजनशतं तीर्थान्यायतनानि
च ॥ ३७ ॥ भवंति तानि दृष्टानि ततः पापैः प्रमुच्यते ॥ तत्र तीर्थे तु यद्दानं देवमुद्दिश्य दीयते ॥ ३८॥ स्नात्वा तु विधिवत्पात्रे तदक्षयमुदाहृतम् ॥
होमाद्दशगुणं प्रोक्तं फलं जाप्ये ततोऽधिकम् ॥ ३९ ॥ त्रिगुणं चोपवासेन स्नानेन च चतुर्गुणम् ॥ संन्यासं कुरुते यस्तु प्राणत्यागं करोति वा ॥
॥४०॥ अनिवर्त्तिका गतिस्तस्य रुद्रलोकादसंशयम् ॥ कृमिकीटपतंगानां तत्र तीर्थे युधिष्ठिर ॥ अंकूरेश्वरनामाख्ये मृतानां सुगतिर्भवेत् ॥४१॥
एतत्ते कथितं राजन्नंकूरेश्वरसंभवम् ॥ तीर्थं सर्वगुणोपेतं परमं पापनाशनम् ॥ ४२ ॥ येऽपि शृण्वंति भक्त्येदं कीर्त्यमानं महाफलम् ॥ लभंते नात्र
संदेहः शिवस्य भुवनं हि ते ॥ ४३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखंडे अंकूरेश्वरतीर्थमाहा
॥१२२॥ त्म्यवर्णनंनामाष्टषष्ट्युत्तरशततमोऽध्यायः ॥ १६८ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्परं तीर्थं पुण्यं पापप्रणाशनम् ॥
मांडव्यो यत्र संसिद्ध ऋषिर्नारायणस्तथा ॥ १ ॥ नारायणेन शुश्रूषा शूलस्थेन कृता पुरा ॥ तत्र स्नात्वा महाराज मुच्यते पापकंचुकात् ॥ ॥२९६॥
॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ आश्चर्यमेतल्लोकेषु यत्त्वया कथितं मुने ॥ न दृष्टं न श्रुतं तात शूलस्थेन तपः कृतम् ॥ ३ ॥ एतत्सर्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथय मे ऋषिभिः सहितस्य वै ॥ अस्य तीर्थस्य माहात्म्यं मांडव्यस्य कुतूहलात् ॥ ४ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ शृणु राजन्यथा वृत्त पुरा त्रेतायुगे क्षितौ ॥ लोकपालोपमो राजा देवपन्नो महामतिः ॥ ५ ॥ धर्मज्ञश्च कृतज्ञश्च यज्वा दानरतः सदा ॥ प्रजा ररक्ष यत्नेन पिता पुत्रानिवौरसान् ॥ ६ ॥ दात्यायनी प्रिया भार्या तस्य राज्ञो वशानुगा ॥ हारनूपुरघोषेण झंकाररवनादिता ॥ ७ ॥ परस्परं तयोः प्रीतिर्वर्द्धतेनुदिनं नृप ॥ वंशस्तंबे स्थितो राजा संशास्ति पृथिवीमिमाम् ॥ ८ ॥ हस्त्यश्वरथसंपूर्णां धनवाहनसंयुताम् ॥ अलंकृतो गुणैः सर्वैरनपत्यो महीपतिः ॥ ॥९॥ दुःखेन महताऽऽविष्टः संतप्तः संततिं विना ॥ स्नानहोमरतो नित्यं द्वादशाब्दानि भारत ॥१०॥ व्रतोपवासनियमैः पत्नीभिः सह तस्थिवान् ॥ आराधयद्भगवतीं चामुण्डां मुण्डमर्दिनीम् ॥ ११ ॥ स्तोत्रैरनेकैर्भक्त्या च पूजाविधिसमाधिना ॥ जय वाराहि चामुण्डे जय देवि त्रिलोचने॥१२॥ ब्राह्मि रौद्रि च कौमारि कात्यायनि नमोऽस्तु ते ॥ प्रचंडे भैरवे रौद्रि योगिन्याकाशगामिनि ॥ १३ ॥ नास्ति किंचित्त्वया हीनं त्रैलोक्ये सचराचरे ॥ राज्ञा स्तुता च संतुष्टा देवी वचनमब्रवीत् ॥ १४ ॥ वरयस्व यथाकामं यस्ते मनसि वर्त्तते ॥ आराधिता त्वया भक्त्या तुष्टा दास्यामि ते वरम् ॥ १५ ॥ ॥ देवपन्न उवाच ॥ ॥ यदि तुष्टासि देवेशि वरार्हो यदि वाऽप्यहम् ॥ पुत्रसंतानरहितं संतप्तं मां समुद्धर ॥ १६ ॥ संतानं नय मे वृद्धिं गोत्ररक्षां कुरुष्व मे ॥ अपुत्रिणां गृहाणीह श्मशानसदृशानि हि ॥ १७ ॥ पितरस्तस्य नाश्नन्ति देवता ऋषिभिः सह ॥ क्रियमाणेऽप्यहरहः श्राद्धे मत्पितरः सदा ॥ १८ ॥ दर्शयंति सदाऽऽत्मानं स्वप्ने क्षुत्पीडितं मम ॥ इति राज्ञो वचः श्रुत्वा देवी ध्यानमुपागता ॥ १९ ॥ दिव्येन चक्षुषा दृष्टं त्रैलोक्यं सचराचरम् ॥ प्रसन्नवदना देवी राजानमिदमब्रवीत् ॥ २० ॥ संतानं नाऽस्ति ते राजंस्त्रैलोक्ये सचराचरे ॥ यजस्व यज्ञपुरुषमपत्यं नास्ति तेऽन्यथा ॥ २१ ॥ मया दृष्टं महीपाल त्रैलोक्यं दिव्यचक्षुषा ॥ एवमुक्त्वा गता देवी राजा स्वगृहमागमत् ॥ २२ ॥ इयाज यज्ञपुरुषं संजाता कन्यका ततः ॥ तेजस्विनी रूपवती सर्वलोकमनोहरा ॥ २३ ॥ देवगन्धर्वलोकेऽपि तादृशी नास्ति कामिनी ॥ तस्या नाम कृतं पित्रा हर्षात्कामप्रमोदिनी ॥ २४ ॥ ततः कालेन ववृधे रूपेणास्तंभयज्जगत् ॥ हंसलीलागतिः सुभ्रूः स्तनभारावनामिता ॥ २५ ॥ रक्तमाल्यांबरधरा कुण्डलाभरणोज्ज्वला ॥ दिव्यानुलेपनवती सखीभिः सा सुरक्षिता ॥ २६ ॥ कुचमध्यगतो हारो विद्युन्मालेव राजते ॥ भ्रमरांचितकेशी सा विंबोष्ठी चारुहासिनी ॥ २७ ॥ कर्णांतप्राप्तनेत्राभ्यां पिबन्तीवाथ कामिनः ॥ चंद्रतांबूलसौरभ्यैराकर्षंतीव[1] मन्मथम् ॥ २८ ॥

१ चन्द्रतांबूलसौरभ्यैः–कर्पूरमिश्रतांबूलसौगन्ध्यैः–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



कुम्बुग्रीवा चारुमध्या ताम्रपादांगुलीनखा ॥ निम्ननाभिः सुजघना रंभोरू सुदती शुभा ॥ २९ ॥ मातापितृसुहृद्वर्गे क्रीडानन्दविवर्द्धिनी ॥ एक
स्मिन्दिवसे बाला सखीवृन्दसमन्विता ॥ ३० ॥ चंदनागरुतांबूलधूपसौमनसांचिता ॥ गृहीत्वा पुष्पधूपादि गता देवीप्रपूजने ॥ ३१ ॥ तडागतट
उत्सृज्य भूषणान्यंगवेष्टकान् ॥ चक्रुः सरसि ताः क्रीडां जलमध्यगतास्तदा ॥ ३२ ॥ क्रीडन्तीं तामवेक्ष्याथ ससखीं विमले जले ॥ राक्षसः शंबरो
नाम श्येनरूपेण चाऽगमत् ॥ ३३ ॥ गृहीता जलमध्यस्था तेन सा काममोदिनी ॥ खमुत्पपात दुष्टात्मा गृहीत्वाऽऽभरणान्यपि ॥ ३४ ॥
वायुमार्गं गतः सोऽथ कामिन्या सह भारत ॥ अपतन्कुण्डलादीनि यत्र तोये महामुनिः ॥ ३५ ॥ मांडव्यो नर्मदातीरे काष्ठवत्संजितेंद्रियः ॥
लीनो माहेश्वरे स्थाने नारायणपदे परे ॥ ३६ ॥ तस्य चानुचरो भ्राता भ्रातुः शुश्रूषणे रतः ॥ तपोजपकृशीभूतो दध्यौ देवं जनार्दनम् ॥ ३७ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखंडे काममोदिनीहरणवर्णनंनामैकोनसप्तत्यधिशततमो
ऽध्यायः ॥ १६९ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ कामप्रमोदिनीसख्यो नीयमानां च तेन तु ॥ दृष्ट्वा ताश्चक्रुशुः सर्वा निःसृत्य
जलमध्यतः ॥ १ ॥ गता राजगृहे सर्वाः कथयंति सुदुःखिताः ॥ कामप्रमोदिनी राजन्हृता श्येनेन पक्षिणा ॥ २ ॥ क्रीडंती च जलस्थाने
तडागे देवसन्निधौ ॥ अन्वेष्या च त्वयाराजंस्तस्य मार्गं विजानता ॥ ३ ॥ तासां तद्वचनं श्रुत्वा देवपन्नः सुदुःखितः ॥ हाहेत्युक्त्वा समुत्थाय
रुदमानो वरासनात् ॥ ४ ॥ मंत्रिभिः सहितस्तस्मिंस्तडागे जलसन्निधौ ॥ न चिह्नं न च पन्थानं दृष्ट्वा दुःखान्मुमोह च ॥ ५ ॥ तस्य
राज्ञस्तु दुःखेन दुःखितो नागरो जनः ॥ क्षणेनाऽऽश्वासितो राजा मंत्रिभिः सपुरोहितैः ॥ ६ ॥ किं कुर्म इत्युवाचेदमस्मिन्काले विधीय
ताम् ॥ सर्वैस्तत्संविदं कृत्वा वाहिनीं चतुरंगिणीम् ॥ ७ ॥ प्रेषयामि दिशः सर्वा हस्त्यश्वरथसंकुला ॥ वादित्राणि च वाद्यंते व्याकुली
भूतसंकुले ॥ ८ ॥ नाराचैस्तोमरैर्भल्लैः खड्गैः परश्वधादिभिः ॥ राजा संनाहबद्धोऽभूद्गगनं ग्रसते किल ॥ ९ ॥ न देवो न च गन्धर्वो न दैत्यो
न च राक्षसः ॥ किं करिष्यति राजाऽद्य न जाने रोषनिष्कृतिम् ॥ १० ॥ नागरोऽपि जनस्तत्र दृष्ट्वा चकितमानसः ॥ चतुर्दशसहस्राणि दंतिनां सृणि
धारिणाम् ॥ ११ ॥ अश्वारोहसहस्राणि ह्यशीतिः शस्त्रपाणिनाम् ॥ रथानां त्रिसहस्राणि विंशतिर्भरतर्षभ ॥ १२ ॥ संग्रामभेरीनिर्नादैः खुररेणु

२ सह–इति शेषः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्नभोगता ॥ एतस्मिन्नंतरे तात रक्षको नगरस्य हि ॥ १३ ॥ गृहीत्वाऽऽभरणं तस्यास्त्वंगप्रत्यंगिकं तथा ॥ कुण्डलांगदकेयूरहारनूपरझल्लरीः ॥ ॥ १४ ॥ निवेद्याकथयद्राज्ञे मया दृष्टं त्ववेक्षणात् ॥ तापसानामाश्रमे तु मांडव्यो यत्र तिष्ठति ॥ १५ ॥ तापसैर्वेष्टितो यत्र ददृशे तत्र सन्निधौ ॥ दण्डवासिवचः श्रुत्वा प्रत्यक्षांगविभूषणम् ॥ १६ ॥ स क्रोधरक्तनयनो मंत्रिणो वीक्ष्य नैगमान् ॥ ईदृग्भूतस्समाचारो ब्राह्मणो नगरे मम ॥ १७ ॥ चौरचर्या व्रतच्छन्नः परद्रव्यापहरकः ॥ तेन कन्या हृता मेऽद्य तपस्विपापकर्म्मिणा ॥ १८ ॥ शाकुन्तं रूपमास्थाय जलस्थो गगनं ययौ ॥ पाखंडिनो विकर्मस्थान्बिडालव्रतिकाञ्च्छठान् ॥ १९ ॥ चाटुतस्करदुर्वृत्तान्हंन्यान्नस्त्यस्य पातकम् ॥ न द्रष्टव्यो मया पापः स्तेयी कन्यापहारकः ॥ २० ॥ शूलमारोप्यतां क्षिप्रं न विचारस्तु तस्य वै ॥ स च वध्यो मया दुष्टो रक्षोरूपी तपोधनः ॥ २१ ॥ एवं ब्रुवंश्चलन्क्रोधादादिश्य दण्डवासिनम् ॥ कार्याकार्यं न विज्ञाय शूलमारोपयद्द्विजम् ॥ २२ ॥ पौरा जानपदाः सर्वे अश्रुपूर्णमुखास्तदा ॥ हाहेत्युक्त्वा रुदंत्यन्ये वदंति च पृथक्पृथक् ॥ २३ ॥ कुत्सितं च कृतं कर्म्म राज्ञा चंडालचारिणा ॥ ब्राह्मणो नैव वध्यो हि विशेषेण तपोवृतः ॥ २४ ॥ यदि रोषसमाचारो निर्वास्यो नगराद्बहिः ॥ न जातु ब्राह्मणं हन्यात्सर्वपापेष्यवस्थितम् ॥ २५ ॥ राष्ट्रादेनं बहिःकुर्यात्समग्रधनमक्षतम् ॥ नाश्नाति च गृहे राजन्नाग्निर्नगरवासिनाम् ॥ सर्वेऽप्युद्विग्नमनसो गृहव्यातिविवर्जिताः ॥ २६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे मांडव्यशूलारोपणवर्णनंनाम सप्तत्यधिकशततमोऽध्यायः ॥ १७० ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ कथितं ब्राह्मणं दृष्टुं शूले क्षिप्तं तपोधनैः ॥ नारायणसमीपे तु गताः सर्वे महर्षयः ॥ १ ॥ नारदो देवलो रैभ्यो यमः शातातपोऽगिराः ॥ वसिष्ठो जमदग्निश्च याज्ञवल्क्यो बृहस्पतिः ॥ २ ॥ कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽरुणिर्मुनिः ॥ वालखिल्यादयोऽन्ये च सर्वेप्यृषिगणाऽन्वयाः ॥ ३ ॥ ददृशुः शूलमारूढं मांडव्यमृषिपुंगवाः ॥ प्रोचुर्नारायणं विप्रं किं कुर्मस्तव चेप्सितम् ॥ ४ ॥ सर्वे ते तत्र सान्निध्यान्मांडव्यस्य महात्मनः ॥ संभ्रांता आगता ऊचुः किं मृतः किं नु जीवति ॥ ५ ॥ अवस्थां तस्य ते दृष्ट्वा विषादमगमन्परम् ॥ असहित्वा तु तद्दुःखं सर्वे ते मनसा द्विजाः ॥ ६ ॥ पृच्छ्यतां यदि मन्येत राजानं भस्मसात्कुरु ॥ तेषां तद्वचनं श्रुत्वा वाक्यं नारायणोऽब्रवीत् ॥ ७ ॥ मयि जीवति मद्भ्राता ह्यवस्थामीदृशीं गतः ॥ धिग्जीवितं च मे किंतु तपसो विद्यते फलम् ॥ ८ ॥ दृष्ट्वा शूलस्थितं ज्येष्ठं मन्मनोऽनुविदीर्यते ॥ परं किं तु करिष्यामि

१ तपस्विपापकर्म्मिणा--तपस्विरूपेण पापिना--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



येन राष्ट्रं सराजकम् ॥ ९ ॥ भस्मसाच्च करोम्यद्य भवद्भिः क्षम्यतामिह ॥ एवमुक्त्वा गृहीत्वाऽसौ करस्थमभिमन्त्रयेत् ॥ १० ॥ क्रोधेन पश्यते
यावत्तावद्धुंकारकोऽभवत् ॥ तेन हुंकारशब्देन ऋषयो विस्मितास्तदा ॥ ११ ॥ मांडव्यस्य समीपे तु ह्यपृच्छंस्ते द्विजोत्तमाः ॥ निवारयसि किं
विप्र शापं नृपजिघांसनम् ॥ १२ ॥ अपापस्य तु येनेह कृतमस्य जिघांसनम् ॥ ऋषीणां वचनं श्रुत्वा कृच्छ्रान्मांडव्यकोऽब्रवीत् ॥ १३ ॥ अभि
वन्दामि वो मूर्ध्ना स्वागतं पयः सदा ॥ अर्घ्यसन्मानपूजार्हाः सर्वेऽत्रोपविशंतु ते ॥ १४ ॥ निविष्टैकाग्रमनसा सर्वान्मांडव्यकोऽब्रवीत् ॥ १५ ॥
प्राप्तं दुःखं मया घोरं पूर्वजन्मार्जितं फलम् ॥ मा विषादं कुरुध्वं भोः कृतं पापं तु भुज्यते ॥ १६ ॥ ॥ ऋषय ऊचुः ॥ ॥ केन कर्मविपा
केन इह जात्यंतरं व्रजेत् ॥ दानधर्मफलेनैव केन स्वर्गं च गच्छति ॥ १७ ॥ ॥ मांडव्य उवाच ॥ ॥ अदत्तदाना जायंते परभाग्योप
जीविनः ॥ न स्नानं न जपो होमो नातिथ्यं न सुरार्चनम् ॥१८॥ न पर्वणि पितृश्राद्धं न दानं द्विजसत्तमाः ॥ व्रजंति नरके घोरे यांति ते त्वंत्यजां
गतिम् ॥१९॥ पुनर्दरिद्राः पुनरेव पापाः पापप्रभावान्नरके वसंति ॥ तेनैव संसारिणि मर्त्यलोके जीवादिभूते कृमयः पतंगाः ॥२०॥ ये स्नानशीला
द्विजदेवभक्ता जितेंद्रिया जीवदयानुशीलाः ॥ ते देवलोकेषु वसंति हृष्टा ये धर्मशीला जितमानरोषाः ॥ २१ ॥ विद्याविनीता न परोपतापिनः
स्वदारतुष्टाः परदारवर्जिताः ॥ तेषां न लोके भयमस्ति किंचित्स्वभावशुद्धा गतकल्मषा हि ते ॥ २२ ॥ ॥ ऋषय ऊचुः ॥ ॥ पूर्वजन्मनि विप्रेंद्र किं
त्वया दुष्कृतं कृतम् ॥ येन कष्टमिदं प्राप्तं संधानं शूलगर्हितम् ॥२३॥ शूलस्थं त्वां समालक्ष्य ह्यागताः सर्व एव हि ॥ जीवंतं त्वां प्रपश्याम त्वंतर
न्नवतारयन् ॥ रुजा संतापजं दुःखं सोढ्वापि त्वमवेदनः ॥ २४ ॥ ॥ मांडव्य उवाच ॥ ॥ स्वयमेव कृतं कर्म स्वयमेवोपभुज्यते ॥ सुकृतं दुष्कृतं पूर्वे
नान्ये भुंजंति कर्हिचित् ॥ २५ ॥ यथा धेनुसहस्रेषु वत्सो विंदति मातरम् ॥ तथा पूर्वकृतं कर्म्म कर्त्तारमुपगच्छति ॥ २६ ॥ न माता न पिता
भ्राता न भार्या न सुताः सुहृत् ॥ न कस्य कर्मणां लेपः स्वयमेवोपभुज्यते ॥ २७ ॥ श्रूयतां मम वाक्यं च भवद्भिः पृच्छितो ह्यहम् ॥ पूर्वे वयसि
भो विप्रा मलस्नानकृतक्षणः ॥ २८ ॥ अज्ञानाद्बालभावेन यूका कंटेधिरोपिता[1] ॥ तैलाभ्यक्तशिरोगात्रे मया यूका धृता न हि ॥२९॥ कंकतीं[2] रोप्य
॥१२४॥ केशेषु सासा कंटेऽधिरोपिता ॥ तेषु पापं कृतं सद्यः फलमेतन्ममाभवत् ॥ ३० ॥ किंचित्कालं क्षपित्वाहं प्राप्स्ये मोक्षं निरामयम् ॥ भवंतस्त्विह
संतापं मा कुरुध्वं महर्षयः ॥ ३१ ॥ इमामवस्थां भुक्त्वाऽहं कंचिच्छपे न चोच्चरे ॥ अहानि कतिचिच्छूले क्षपयिष्यामि किल्बिषम् ॥ ३२ ॥ प्राक्तनं ॥२९८॥

१ कंटेऽधिरोपिता—कंकतीकंटकेन—विद्धोपरि धृता—इत्यर्थः । २ कंकती—फणी इति महाराष्ट्रभाषायाम्—कंघी इति हिन्दीभाषायाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्म भुंजामि यन्मया संचितं द्विजाः ॥ क्षंतव्यमस्य राज्ञोऽथ कोपश्चैव विसर्ज्यताम् ॥ ३३ ॥ श्रुत्वा तु तस्य तद्वाक्यं मांडव्यस्य महर्षयः ॥ प्रहर्ष मतुलं लब्ध्वा साधुसाध्वित्यपूजयन् ॥ ३४ ॥ ॥ नारायण उवाच ॥ ॥ इदं जलं मंत्रपूतं कस्मिन्स्थाने क्षिपाम्यहम् ॥ येन राजा भवेद्भस्म स राष्ट्रः सपुरोहितः ॥ ३५ ॥ ॥ मांडव्य उवाच ॥ ॥ इदं जलं च रक्षस्व कालकूटविषोपमम् ॥ समुद्रे क्षिपयिष्यामि देवकार्यं समुत्थितम् ॥ ॥ ३६ ॥ अथ ते मुनयः सर्वे मांडव्यं प्रणिपत्य च ॥ आमंत्रयित्वा हर्षाच्च कश्यपाद्या गृहान्ययुः ॥ ३७ ॥ गच्छमानास्तु ते चोक्ताः पंचमेहनि तापसाः ॥ आगंतव्यं भवद्भिश्च मत्सकाशं प्रतिज्ञया ॥ ३८ ॥ तथेति ते प्रतिज्ञाय नारदाद्या अदर्शनम् ॥ गतेषु विप्रमुख्येषु शांडिली च तपोधना ॥ ॥ ३९ ॥ द्वितीयेऽह्नि समायाता न तु बुध्वाऽथ तं ऋषिम् ॥ भर्त्तारं शिरसा धार्य रात्रौ पर्यटते स्म सा ॥ ४० ॥ न दृष्टः शूलके विप्रो भराक्रांत्या युधिष्ठिर ॥ स्खलिता तस्य जानुभ्यां शूलस्थस्य पतिव्रता ॥ ४१ ॥ सर्वांगेषु व्यथा जाता तस्याः प्रस्खलनान्मुनेः ॥ ईदृशीं वर्त्तमानां च ह्यवस्थां पूर्वदैविकीम् ॥ ४२ ॥ पुनः पापफलं किंचिद्वा कष्टं मम वर्त्तते ॥ व्यथितोऽहं त्वया पापे किमर्थं सूनकर्मणि ॥ ४३ ॥ स्वैरिणीं त्वां प्रपश्यामि राक्षसी तस्करी नु किम् ॥ एवमुक्त्वा क्षणं मोहात्क्रंदमानो मुहुर्मुहुः ॥४४ ॥ तपस्विनोऽथ ऋषयः सर्वे संत्रस्तमानसाः ॥ पश्यमाना मुनेः कष्टं पृच्छंते ते युधिष्ठिर ॥ ४५ ॥ पर्यटसे किमर्थं त्वं निशीथे वहनं नु किम् ॥ क्षिप्तं तु झोलिकाभारं किंवाऽऽगमनकारणम् ॥ व्यथामुत्पाद्य ऋषये दुःखाद्दुःख विलासिनि ॥ ४६ ॥ ॥ शांडिल्युवाच ॥ ॥ नाऽसुरीं न च गंधर्वीं न पिशाचीं न राक्षसीम् ॥ पतिव्रतां तु मां सर्वे जानंतु तपसि स्थिताम् ॥ ॥ ४७ ॥ न मे कामो न मे क्रोधो न वैरं न च मत्सरः ॥ अज्ञानाद्दृष्टिमांद्याच्च स्खलनं क्षंतुमर्हथ ॥ ४८ ॥ वहनं भर्तृसौख्याय दिवा संपीड्यते रुजा ॥ अयं भर्त्ता विजानीथ झोलिकासंस्थितः सदा ॥ ४९ ॥ भरणं पानवस्त्रं च ददाम्येतस्य रोगिणः ॥ ऋषिः शौनकमुख्योऽसौ शांडिलीं मां विजानत ॥५० ॥ स्वभर्तृधर्मिणीं कोपं मा कुरुष्वातिथिं कुरु ॥ सतां समीपं संप्राप्तां सर्वं मे क्षंतुमर्हथ ॥ ५१ ॥ ॥ ऋषय ऊचुः ॥ ॥ परव्यथां न जानीषे व्यचरंती यदृच्छया ॥ प्रभातेऽभ्युदिते सूर्ये तव भर्त्ता मरिष्यति ॥ ५२ ॥ आत्मदुःखात्परं दुःखं न जानासि कुलाधमे ॥ तेन वाक्येन घोरेण शांडिली विमनाऽभवत् ॥ ५३ ॥ परं विषादमापन्ना क्षणं ध्यात्वाऽब्रवीद्वचः ॥ कोपात्संरक्तनयना निरीक्षंती मुनींस्तदा ॥ ५४ ॥ सतां गेहे किल प्राप्ता भवतां चापकारिणी ॥ सामेनातिथिपूजायां शिष्टे च गृहमागते ॥५५॥ भवद्भिरीदृगातिथ्यं कृतं चैव ममैव तु ॥ स्वर्गापवर्ग

१ सामेन—शांततया—इत्यर्थः । अदन्तत्वमार्षम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



धर्मश्च भवद्भिर्न्न निरीक्षितम् ॥ ५६ ॥ प्राजापत्यामिमां दृष्ट्वा मां यथा प्राकृताः स्त्रियः ॥ भवंतः स्त्रीबलं मेऽद्य पश्यंतु दिवि देवताः ॥ ५७ ॥
मरिष्यति न मे भर्त्ता ह्यादित्यो नोदयिष्यति ॥ अन्धकारं जगत्सर्वं क्षीयते नाऽद्य शर्वरी ॥ ५८ ॥ एवमुक्ते तया वाक्ये स्तंभितेऽर्के तमोमयम्॥
न च प्रजायते सर्वं निर्वषट्कारसत्क्रियम् ॥ ५९ ॥ स्वाहाकारः स्वधाकारः पंचयज्ञविधिर्नहि ॥ स्नानं दानं जपो नास्ति संध्यालोपव्यतिक्रमः ॥
षण्मासं च तदा पार्थ लुप्तपिंडोदकक्रियम् ॥ ६० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे
शांडिलीऋषिसंवादवर्णनंनामैकसप्तत्युत्तरशततमोऽध्यायः ॥ १७१ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ अथ ते ऋषयः सर्वे
देवाश्चेंद्रपुरोगमाः ॥ मांडव्यस्याऽश्रमे पुण्ये समीयुर्नर्मदातटे ॥ १ ॥ शंखदुंदुभिनादेन दीपिकाज्वलनेन च ॥ अप्सरोगीतनादेन
नृत्यंत्यो वारयोषितः ॥ २ ॥ कथानकैः स्तुवत्यन्ये तस्य शूलाग्रधारिणः ॥ अष्टाशीतिसहस्राणि स्नातकानां तपस्विनाम् ॥
॥ ३ ॥ समाजे त्रिदशैः सार्द्धं तत्र ते च दिदृक्षया ॥ ब्रह्मविष्णुमहेशानास्तत्र हर्षात्समागताः ॥ ४ ॥ मातरो मल्लिकाद्याश्च क्षेत्रपाला
विनायकाः ॥ दिक्पाला लोकपालाश्च गंगाद्याश्च सरिद्वराः ॥ ५ ॥ ऋषिदेवसमाजे तु नित्यं हर्षप्रमोदने ॥ तत्र राजा समायातः पौरजानपदैः
सह ॥ ६ ॥ दृष्ट्वा कौतूहलं तत्र व्याकुलीकृतमानसम् ॥ वित्रस्तमनसो भूत्वा भयात्सर्वे समास्थिताः ॥ ७ ॥ तस्मिन्समागमे दिव्ये ब्रह्मविष्णवीश
मब्रुवन् ॥ भो मांडव्य महासत्त्व वरदास्तेऽमरैः सह ॥ ८ ॥ अनेककष्टतपसा तव सिद्धिर्भविष्यति ॥ प्रार्थयस्व यथाकामं यस्ते मनसि रोचते ॥
॥ ९ ॥ अनादित्यमयं लोकं निर्वषट्कारमाकुलम् ॥ नष्टधर्मं विजानीहि प्रकृतिस्थं कुरुष्व च ॥ अनुग्रहं तु शांडिल्याः प्रार्थयाम द्विजो
त्तम ॥ १० ॥ एष ते कष्टदो राजा समायातस्तवाऽग्रतः ॥ संभूषयस्व विप्रर्षे जनं देवासुरं गणम् ॥ ११ ॥ ॥ मांडव्य उवाच ॥ ॥ यदि
प्रसन्ना मे देवाः समायाताः सुरैः सह ॥ त्रिकालमत्र तीर्थे च स्थातव्यमृषिभिः सह ॥ १२ ॥ भवतां तु प्रसादेन रुजा मे शाम्यतां सदा ॥ एव
मस्त्विति देवेशा यावज्जलपंति पांडव ॥१३॥ तावद्रक्षो गृहीत्वाऽग्रे कन्यां कामप्रमोदिनीम् ॥ उवाच भगवञ्च्छापं पुरा दत्त्वोर्वशी मम ॥ १४ ॥
यदा कन्यां हरे[3] रक्षः शापांतस्ते भविष्यति ॥ तेन मे गर्हितं कर्म्म शापेनाऽकृतबुद्धिना ॥ १५ ॥ क्षंतव्यमिति चोक्त्वा च गतश्चाऽदर्शनं पुनः ॥
गते चैव तु सा कन्या दृष्ट्वा पद्मदलेक्षणा ॥ १६ ॥ मंत्रयित्वा सुरैः सर्वैर्दत्ता मांडव्यधीमते ॥ तां वज्रशूलिकां प्राव्य पवित्रैर्न्नर्मदोदकैः ॥ १७ ॥

१ मन्यध्वे किम्—इति शेषः । २ ब्रह्मविष्ण्वीशम्—ब्रह्मविष्ण्वीशाः—अब्रुवन् । ३ हरेः—हरिष्यसि—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मांडव्यमृषिमुत्तार्य जयशब्दादिमंगलैः ॥ विवाहयित्वा तां कन्यां मांडव्य ऋषिपुंगवः ॥ १८ ॥ अभिवाद्य च तान्सर्वान्दानसन्मानगौरवैः ॥
अथ राजा समीपस्थो रत्नैश्च विविधैरपि ॥ १९ ॥ धिग्वादैर्निंदितः सर्वैस्तैर्जनैर्भूषितः पुनः ॥ राज्ञा च ब्राह्मणाः सर्वे भूषणाच्छादनाशनैः ॥
॥ २० ॥ सुवर्णकोटिदानेन तुष्टान्कृत्वा क्षमापिताः ॥ वृत्ते विवाह आहूय शांडिलीं तामथाब्रवीत् ॥ २१ ॥ मानयस्व इमान्विप्रान्मोचयस्व दिवा
करम् ॥ अपहृत्य तमो येन कृपा सद्यः प्रवर्त्तते ॥ २२ ॥ ऋषीणां वचनं श्रुत्वा शांडिली दुःखिताऽब्रवीत् ॥ उदितेऽर्के तु मे भर्त्ता मृत्युं यास्यति
भो द्विजाः ॥ २३ ॥ तं कथं मोचयामीह ह्यात्मनोऽनिष्टसिद्धये ॥ क्रियाप्रवर्त्तनाच्चाद्य किं कार्यं मे महर्षयः ॥ २४ ॥ निःपुंसी स्त्री ह्यनाथाऽहं
भवामि भवतो मतम् ॥ तिष्ठ त्वमंधकारे तु नेच्छामि रविणोदयम् ॥ २५ ॥ तेन वाक्येन ते सर्वे देवासुरमहर्षयः ॥ शिरःसंचालनाः सर्वे साधु
साध्विति चाऽब्रुवन् ॥ २६ ॥ पतिव्रते महाभागे शृणु वाक्यं तपोधने ॥ मन्यसे यदि नः सर्वान्कुरुष्व वचनं च यत् ॥ २७ ॥ ॥ शांडिल्यु
वाच ॥ ॥ येन मे न मरेद्भर्त्ता येन सत्यं मुनेर्वचः ॥ तत्कुरुध्वं विचार्याशु येन संवर्धते सुखम् ॥ २८ ॥ तस्यास्तद्वचनं श्रुत्वा स्वप्नावस्था
कृतो ह्यृषिः ॥ अंतर्हितो मुहूर्त्तं च शांडिल्याश्च प्रपश्य ताम् ॥ २९ ॥ पुनरादाय ते सर्वे कृत्वा निर्व्रणसत्तनुम् ॥ ३१ ॥ स्नापितो नर्मदातोये
शांडिल्यायै समर्पितः ॥ ३० ॥ ततः सा हृष्टमनसा पतिं दृष्ट्वा तु तैजसम् ॥ प्रणम्य तानृषीन्देवान्विमलार्कं जगत्कृतम् ॥ ३१ ॥ क्रियाप्रवर्त्तिताः
सर्वे देवगंधर्वमानुषाः ॥ हृष्टतुष्टा गताः सर्वे स्वमाश्रमपदं महत् ॥ ३२ ॥ पतिव्रता स्वभर्त्रा सा मासमेवाऽऽश्रमे स्थिता ॥ मांडव्येनाऽप्यनुज्ञाता
ययौ नत्वा स्वमाश्रमम् ॥ ३३ ॥ गतेषु तेषु सर्वेषु स्थापयामास चाच्युतम् ॥ मांडव्येश्वरनामानं नारायण इति स्मृतम् ॥ ३४ ॥ दिव्यं वर्ष
सहस्रं तु पूजयामास भारत ॥ गतोऽसावृषिसंघैश्च सहितोऽमरपर्वतम् ॥ ३५ ॥ तपस्तपन्तौ तौ तत्र ह्यद्यापि किल भारत ॥ भ्रातरौ संयता
त्मानौ ध्यायतः परमं पदम् ॥ ३६ ॥ तत्र तीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः ॥ पितरस्तस्य तृप्यंति पिंडदानाद्दशाब्दिकम् ॥ ३७ ॥ देवगृहे
तु पक्षादौ यः करोति विलेपनम् ॥ गोदानशतसाहस्रे दत्ते भवति यत्फलम् ॥ ३८ ॥ उपलेपनेन द्विगुणमर्चने तु चतुर्गुणम् ॥ दीपप्रज्वलने
पुण्यमष्टधा परिकीर्त्तितम् ॥ ३९ ॥ दिव्यनेत्रधरो भूत्वा त्रैलोक्ये सचराचरे ॥ दध्ना मधुघृतैर्देवं पयसा नर्मदोदकैः ॥ ४० ॥ स्नपनं ये प्रकुर्वंति
पुष्पमालाविलेपनैः ॥ येऽर्च्चयंति विरूपाक्षं देवं नारायणं हरिम् ॥ ४१ ॥ तेऽपि दिव्यविमानेन क्रीडंते कल्पसंख्यया॥दीपाष्टकं तु यः कुर्यादष्टमीं

१ माण्डव्यः—इति शेषः । २ निःपुंसी—पतिरहिता—इत्यर्थः । ३ इति भवतो मतम्—अभीष्टं किम्—नैतत्तवोचितम्—मम चैतन्नाभीष्टम् । ४ जगाम—इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



च चतुर्दशीम् ॥ ४२ ॥ एकादश्यां तु कृष्णस्य न पश्यंति यमं तु ते ॥ फलैर्नानाविधैः शुभ्रैर्यः कुर्य्याल्लिंगपूरणम् ॥ ४३ ॥ तेऽपि यांति विमानेन सिद्धचारणसेविताः ॥ घण्टा चैव पताका च विमाने पुष्पमालिका ॥४४ ॥ वादित्राणि यथार्हाणि प्रांते च गच्छते शिवम् ॥ देवालयं तु यः कुर्याद्वैष्णवं मांडवेश्वरम् ॥ ४५ ॥ स्वर्गे वसति धर्मात्मा यावदाभूतसंप्लवम् ॥ मांडव्यनारायणाख्ये विप्रान्भोजयतेऽग्रतः ॥ ४६ ॥ एकस्मिन्भोजिते विप्रे कोटिर्भवति भोजिता ॥ आश्विने मासि संप्राप्ते शुक्लपक्षे चतुर्दशीम् ॥ ४७ ॥ कृतोपवासनियमो रात्रौ जागरणेन च ॥ दीपमालां चतुर्दिक्षु पूजां कृत्वा तु शक्तितः ॥ ४८ ॥ नारी वा पुरुषो वाऽपि नृत्यगीतप्रवादनैः ॥ प्रभाते विमले सूर्ये स्नानादिकविधिं नृप ॥४९॥ अभिनिर्वर्त्य मौनेन पश्यते देवमीदृशम् ॥ सर्वपापविनिर्मुक्तो रुद्रलोके महीयते ॥ ५० ॥ अथवा मार्गशीर्षे च चैत्रवैशाखयोरपि ॥ श्रावणे वा महाराज सर्वकालेऽथ वापि च ॥ ५१ ॥ शिवरात्रिसमं पुण्यमित्येवं शिवभाषितम् ॥ वाजपेयाऽश्वमेधाभ्यां फलं भवति नाऽन्यथा ॥ ५२ ॥ दुर्भगा दुःखिता वंध्या दरिद्रा च मृतप्रजा ॥ स्नाति रुद्रवटैर्या स्त्री सर्वान्कामानवाप्नुयात् ॥५३॥ कृमिकीटपतंगाश्च तस्मिंस्तीर्थे तु ये मृताः ॥ स्वर्गं प्रयांति ते सर्वे दिव्यरूपधरा नृप ॥ ५४ ॥ अनाशके जलेऽग्नौ तु ये मृता व्याधिपीडिताः ॥ अनिवर्त्तिका गतिस्तेषां रुद्रलोके ह्यसंशयम् ॥ ५५ ॥ नित्यं नमति यो राजञ्च्छिवनारायणावुभौ ॥ गोदानफलमाप्नोति तस्य तीर्थप्रभावतः ॥ ५६ ॥ देवालये तु राजेंद्र यस्श्च कुर्यात्प्रदक्षिणाम् ॥ प्रदक्षिणीकृता तेन ससागरधरा धरा ॥ ५७ ॥ सार्द्धं शतं च तीर्थानि मल्लिकाभवनाद्बहिः ॥ तस्य तीर्थप्रमाणं तु विस्तरं राजसत्तम ॥ ५८ ॥ सूत्रेण वेष्टयेत्क्षेत्रमथवा शिवमन्दिरम् ॥ अथवा शिवलिंगं च तस्य पुण्यफलं शृणु ॥ ५९ ॥ जंबूद्वीपश्च कृत्स्नश्च शाल्मली कुशक्रौंचकौ ॥ शाकपुष्करगोमेदैः सप्तद्वीपा वसुन्धरा ॥ ६० ॥ भूषिता तेन राजेंद्र सशैलवनकानना ॥ रेवायां दक्षिणे भागे शिवक्षेत्रात्समीपतः ॥ ६१ ॥ देवखातं महापुण्यं निर्मितं त्रिदशैरपि ॥ तस्मिन्यः कुरुते स्नानं मुच्यते सर्वपातकैः ॥ ६२ ॥ पूर्णिमायाममावस्यां व्यतीपातेऽर्कसंक्रमे ॥ श्राद्धं च संग्रहे कुर्यात्स गच्छेत्परमां गतिम् ॥ ६३ ॥ देवखाते त्रयो देवा ब्रह्मविष्णुमहेश्वराः ॥ तिष्ठंति ऋषिभिः सार्द्धं पितृदेवगणैः सह ॥ ६४ ॥ तत्र तीर्थेऽश्विने मासि चतुर्दश्यां विशेषतः ॥ वायुमार्गे स्थितः शक्रस्तिष्ठते दैवतैः सह ॥ ६५ ॥ पृथिव्यां यानि तीर्थानि सरितः सागरास्तथा ॥ विशंति तानि सर्वाणि देवखाते दिनद्वयम् ॥ ६६ ॥ गयाशिरे च यत्पुण्यं प्रयागेमकरकण्टके ॥ प्रयागे सोमतीर्थे च तत्पुण्यं मांडवेश्वरे ॥ ६७ ॥ पट्टबन्धेन

१ कृष्णस्य—कृष्णपक्षस्य इत्यर्थः । २ क्रीडंते कल्पसंख्यया—इ० पा० । ३ संग्रहे—ग्रहणमोक्षोत्तराव्यवहितकाले—इत्यर्थः--इति प्रतिभाति । ४ अश्विने—ह्रस्वमार्षम् ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्पुण्यं मात्रायां लकुलेश्वरे ॥ आश्विन्यामश्विनीयोगे तत्पुण्यं मांडवेश्वरे ॥ ६८ ॥ उज्जयिन्यां महाकाले वाराणस्यां त्रिपुष्करे ॥ सन्निहत्यां रवि ग्रस्ते मांडव्याख्ये सनातनम् ॥ ६९ ॥ इति ज्ञात्वा महाराज सर्वतीर्थेषु चोत्तमम् ॥ पितॄन्देवान्समभ्यर्च्य स्नानदानादिपूजनैः ॥ ७० ॥ चतुर्दश्यां निराहारः स्थितो भूत्वा शुचिव्रतः ॥ पूजयेत्परया भक्त्या रात्रौ जागरणे शिवम् ॥ ७१ ॥ स्नानैश्च विविधैर्देवं पुष्पागरुविलेपनैः ॥ प्रभाते पौर्णमास्यां तु स्नानादिविधितर्पणैः ॥ ७२ ॥ श्राद्धेन हव्यकव्येन शिवपूजार्चनेन च ॥ अग्निष्टोमादियज्ञैश्च विधिवच्चाप्तदक्षिणैः ॥ ७३ ॥ धौतपापो विशुद्धात्मा फलते फलमुत्तमम् ॥ गोसहस्रप्रदानेन दत्तं भवति भारत ॥ ७४ ॥ स्नानाद्यैर्विधिवत्तत्र तद्दिने शिवसन्निधौ ॥ हिरण्यं वृषभं धेनुं भूमिं गोमिथुनं हयम् ॥ ७५ ॥ शिवमुद्दिश्य वै वस्त्रयुग्मे दद्यात्सुरूपिणे ॥ पादुकोपानहौ छत्रं भाजनं रक्तवाससी ॥ ७६ ॥ होमं जाप्यं तथा दानमक्षयं सर्वमेव तत् ॥ ऋचमेकां तु ऋग्वेदे यजुर्वेदे यजुस्तथा ॥ ७७ ॥ सामैकं सामवेदे तु जपेद्देवाग्रसंस्थितः ॥ सम्यग्वेदफलं तस्य भवेद्वै नाऽत्र संशयः ॥ ७८ ॥ गायत्रीजाप्यमात्रस्तु वेदत्रयफलं लभेत् ॥ कुलकोटिशतं साग्रं लभते तु शिवार्च्चनात् ॥ ७९ ॥ स्नाने दाने तथा श्राद्धे जागरे गीतवादिते ॥ अनिवर्त्तिका गतिस्तस्य शिवलोकात्कदाचन ॥ ८० ॥ कालेन महताऽऽविष्टो मर्त्यलोके समाविशेत् ॥ राजा भवति मेधावी सर्वव्याधिविवर्जितः ॥ ८१ ॥ जीवेद्वर्षशतं साग्रं पुत्रपौत्रधनान्वितः ॥ तच्च तीर्थं पुनः स्मृत्वा लीयमानो महेश्वरे ॥ ८२ ॥ उपास्ते यस्तु वै सन्ध्यां तस्मिंस्तीर्थे च पर्वणि ॥ सांगोपांगैश्चतुर्वेदैर्लभते फलमुत्तमम् ॥ ८३ ॥ तत्र सर्वं शिवक्षेत्राच्छरपातं समंततः ॥ न संचरेद्भयोद्विग्ना ब्रह्महत्या नराधिप ॥ ८४ ॥ यत्र तत्र स्थितो वृक्षान्पश्यते तीर्थतत्परः ॥ विविधैः पातकैर्मुक्तो मुच्यते नाऽत्र संशयः ॥ ८५ ॥ श्वभ्री तत्र महाराज जलमध्ये प्रदृश्यते ॥ कथानिका पुराणोक्ता वानरी तीर्थसेवनात् ॥ ८६ ॥ तत्र कूपो महाराज तिष्ठते देवनिर्मितः ॥ शिवस्य पश्चिमे भागे शिवक्षेत्रमनुत्तमम् ॥ ८७ ॥ वृषोत्सर्गं तु यः कुर्यात्तस्मिंस्तीर्थे नराधिप ॥ क्रीडंति पितरस्तस्य स्वर्गलोके यदृच्छया ॥ ८८ ॥ अगम्याऽऽगमने पापमयाज्ययाजने कृते ॥ स्तेयाच्च ब्रह्मगोहत्यागुरुघाताच्च पातकम् ॥ तत्सर्वं नश्यते पापं वृषोत्सर्गे कृते तु वै ॥ ८९ ॥ मांडव्यतीर्थमाहात्म्यं यः शृणोति समाधिना ॥ मुच्यते सर्वपापेभ्यो नाऽत्र कार्या विचारणा ॥ ९० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहिताया पञ्चम आवन्त्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये माण्डव्यतीर्थमाहात्म्यवर्णनंनाम द्विसप्तत्यधिकशततमोऽध्यायः ॥१७२॥छ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र तीर्थं परमशोभनम् ॥ नर्मदादक्षिणे कूले सर्वपापप्रणाशनम् ॥१॥ सिद्धेश्वरमिति ख्यातं महापातकनाशनम् ॥ यत्र शुद्धिं परां



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



प्राप्तो देवदेवो महेश्वरः ॥ पुरा हत्यायुतः पार्थ देवदेवस्त्रिशूलधृक् ॥ २ ॥ पुरा पंचशिरा आसीद्ब्रह्मा लोकपितामहः ॥ तेनाऽनृतं वचश्चोक्तं कस्मिंश्चित्कारणांतरे ॥ ३ ॥ तच्छ्रुत्वा सहसा तस्मै चुकोप परमेश्वरः ॥ छेदयामास भगवान्मूर्द्धानं करजैस्तदा ॥ ४ ॥ तस्य तत्करसंलग्नं च्यवते न कदाचन ॥ ततो हि देवदेवेशः पर्यटन्पृथिवीमिमाम् ॥ ५ ॥ ततो वाराणसीं प्राप्तस्तस्यां तदपतच्छिरः ॥ पतिते तु कपाले च ब्रह्महत्या न मुंचति ॥ ६ ॥ ततस्तु सागरे गत्वा पूर्वे च दक्षिणे तथा ॥ पश्चिमे चोत्तरे पार्थ देवदेवो महेश्वरः ॥ ७ ॥ पर्यटन्सर्वतीर्थेषु ब्रह्महत्या न मुंचति ॥ नर्मदादक्षिणे कूले सुतीर्थं प्राप्तवान्प्रभुः ॥ ८ ॥ कुलकोटिं समासाद्य प्रार्थयामास चात्मवान् ॥ प्रायश्चित्तं ततः कृत्वा बभूव गतकल्मषः ॥ ९ ॥ ततो निष्कलमषो जातो देवदेवो महेश्वरः ॥ दत्त्वा सुरेभ्यस्तत्स्थानं ततश्चांतर्दधे प्रभुः ॥ १० ॥ तदाप्रभृति तत्तीर्थं शुद्धरुद्रेति कीर्त्तितम् ॥ विख्यातं त्रिषु लोके ब्रह्महत्याहरं परम् ॥ ११ ॥ मासे मासे सिते पक्षेऽमावास्यायां युधिष्ठिर ॥ स्नात्वा तत्र विधानेन तर्पयेत्पितृदेवताः॥ ॥ १२ ॥ दद्यात्पिंडं पितॄणां तु भावितेनांतरात्मना ॥ तस्य ते द्वादशाब्दानि सुतृप्ताः पितरो नृप ॥ १३ ॥ गंधधूपप्रदीपाद्यैरभ्यर्च्य परमेश्वरम् ॥ शुद्धेश्वराभिधानं तु शिवलोके महीयते ॥ १४ ॥ एतत्ते कथितं राजञ्च्छुद्धरुद्रमनुत्तमम् ॥ मया श्रुतं यथा देव सकाशाच्छूलपाणिनः ॥ मुच्यते सर्वपापेभ्यो रुद्रलोकं स गच्छति ॥ १५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे शुद्धेश्वरतीर्थमाहात्म्यवर्णनंनाम त्रिसप्तत्युत्तरशततमोऽध्यायः ॥ १७३ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ गोपेश्वरं ततो गच्छेदुत्तरे नर्मदातटे ॥ यत्र स्नानेन चैकेन मुच्यंते पातकैर्नराः ॥ १ ॥ तत्र तीर्थे तु यः स्नात्वा कुरुते प्राणसंक्षयम् ॥ बर्हियुक्तेन यानेन स गच्छेच्छिवमंदिरे ॥ ॥ २ ॥ क्रीडित्वा सुचिरं कालं शिवलोके नराधिप ॥ इह मानुष्यतां प्राप्य राजा भवति वीर्यवान् ॥ ३ ॥ हस्त्यश्वरथसंपन्नो दासीदाससमन्वितः ॥ पूज्यमानो नरेंद्रैश्च जीवेद्वर्षशतं नरः ॥ ४ ॥ संप्राप्ते कार्त्तिके मासि नवम्यां शुक्लपक्षतः ॥ सोपवासः शुचिर्भूत्वा दीपकांस्तत्र दापयेत् ॥ ॥ ५ ॥ गंधपुष्पैः समभ्यर्च्य रात्रौ कुर्वीत जागरम् ॥ तस्य यत्फलमुद्दिष्टं तच्छृणुष्व नराधिप ॥ ६ ॥ यावत्पुण्यं फलं संख्या दीपकानां तथैव च॥ तावद्युगसहस्राणि शिवलोके महीयते ॥ ७ ॥ तस्मिंस्तीर्थे तु राजेंद्र लिंगपूरणकं विधिम् ॥ तथैव पद्मकैश्चैव दधिभक्तैस्तथैव च ॥ ८ ॥ यस्तु कुर्यान्नरश्रेष्ठ तस्य पुण्यफलं शृणु ॥ यावंति तिलसंख्यानि दधिभक्तं तथैव च ॥ ९ ॥ पद्मसंख्या शिवे लोके मोदते कालमीप्सितम् ॥ तस्मिंस्तीर्थे तु

१ आत्मवान्-प्रार्थयामास-आत्मानमेव शंकरं प्रार्थयामास-इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजेंद्र यत्किंचिद्दीयते नृप ॥ १० ॥ सर्वं कोटिगुणं तस्य संख्यातुं वा न शक्य ते ॥ एवंते कथितं सर्वं सर्वतीर्थमनुत्तमम् ॥ ११ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे गोपेश्वरतीर्थमाहात्म्यवर्णनंनामचतुःसप्तत्युत्तरशततमोऽध्यायः ॥ ॥ १७४ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ उत्तरे नर्मदाकूले भृगुक्षेत्रस्य मध्यतः ॥ कपिलेश्वरं तु विख्यातं विशेषात्पापनाशनम् ॥ ॥ १ ॥ योऽसौ सनातनो देवः पुराणे परिपठ्यते ॥ वासुदेवो जगन्नाथः कपिलत्वमुपागतः ॥ २ ॥ पातालं सुतलं नाम तस्यैव नितलं ह्यधः ॥ गभस्तिगं च तस्याऽधो ह्यंधतामिस्रमेव च ॥ ३ ॥ पातालं सप्तमं यच्च ह्यधस्तात्संस्थितं महत् ॥ वसते तत्र वै देवः पुराणः परमेश्वरः ॥ ४ ॥ स ब्रह्मा स महादेवः स देवो गरुडध्वजः ॥ पूज्यमानः सुरैः सिद्धैस्तिष्ठते ब्रह्मवादिभिः ॥ ५ ॥ वसतस्तस्य राजेंद्र कपिलस्य जगद्गुरोः ॥ विनाशं चाऽग्रतः प्राप्ताः क्षणेन सगरात्मजाः ॥ ६ ॥ भस्मीभूतांस्तु तान्दृष्ट्वा कपिलो मुनिसत्तमः ॥ जगाम परमं शोकं चिंत्यमानोऽथ किल्बिषम् ॥ ७ ॥ सर्वसंगपरित्यागे चित्ते निर्विषयीकृते ॥ अयुक्तं षष्टिसहस्राणां कर्तुं मम विनाशनम् ॥ ८ ॥ कृतस्य करणं नास्ति तस्मात्पापविनाशनम् ॥ गत्वा तु कापिलं तीर्थं मोचयाम्यघमात्मनः ॥ ९ ॥ पातालं तु ततो मुक्त्वा कपिलो मुनिसत्तमः ॥ तपश्चचार सुमहन्नर्मदातटमास्थितः ॥ १० ॥ व्रतोपवासैर्विविधैः स्नानदानजपादिकैः ॥ परं निर्वाणमापन्नः पूजयन्रुद्रमव्ययम् ॥ ११ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरम् ॥ गोसहस्रफलं तस्य लभते नाऽत्र संशयः ॥ १२ ॥ ज्येष्ठमासे तु संप्राप्ते शुक्लपक्षे चतुर्दशी ॥ तत्र स्नात्वा विधानेन भक्त्या दानं प्रयच्छति ॥ १३ ॥ पात्रभूताय विप्राय स्वल्पं वा यदि वा बहु ॥ अक्षयं तत्फलं प्रोक्तं शिवेन परमेष्ठिना ॥ १४ ॥ अंगारकदिने प्राप्ते चतुर्थ्यां नवमीषु च ॥ स्नानं करोति पुरुषो भक्त्योपोष्य वरांगना ॥ १५ ॥ रूपमैश्वर्यमतुलं सौभाग्यं संततिं पराम् ॥ लभते सप्तजन्मानि नित्यं नित्यं पुनःपुनः ॥ १६ ॥ पौर्णमास्याममावास्यां स्नात्वा पिंडं प्रयच्छति ॥ तस्य ते द्वादशाब्दानि तृप्ता यांति सुरालयम् ॥ १७ ॥ तत्र तीर्थे तु यो भक्त्या दद्याद्दीपं सुशोभनम् ॥ जायते तस्य राजेंद्र महादीप्तिः शरीरजा ॥ १८ ॥ तत्र तीर्थे मृतानां तु जंतूनां सर्वदा किल ॥ अनिवर्त्तिका भवेत्तेषां गतिस्तु शिवमंदिरात् ॥ १९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे कपिलेश्वरतीर्थमाहात्म्यवर्णनंनाम पंचसप्ताधिकशततमोऽध्यायः ॥ १७५ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल पिंगलावर्त्तमुत्तमम् ॥ तीर्थं सर्वगुणोपेतं कामिकं भुवि दुर्लभम् ॥ १ ॥ वाचिकं मानसं पापं कर्मजं यत्पुरा कृतम् ॥ पिंगलेश्वरमासाद्य तत्सर्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri


विलयं व्रजेत् ॥ २ ॥ तत्र स्नानं च दानं च देवखाते कृतं नृप ॥ अक्षयं तद्भवेत्सर्वमित्येवं शंकरोऽब्रवीत् ॥ ३ ॥ पृथिव्यां सर्वतीर्थेषु समुद्धृत्य

शुभोदकम् ॥ मुक्तं तत्र सुरैः खात्वा देवखातं ततोऽभवत् ॥ ४ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथं तु देवखातं तत्संजातं द्विजसत्तम ॥ सुराः सर्वे

कथं तत्र मुमुचुर्वारि तीर्थजम् ॥ सर्वं कथय मे विप्र श्रवणे लंपटं मनः ॥ ५ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ यदा तुशूलशुद्ध्यर्थं रुद्रो देवगणैः
सह ॥ बभ्राम पृथिवीं सर्वां कमंडलुधरः शुभाम् ॥ ६ ॥ प्रभासाद्येषु तीर्थेषु स्नानं चक्रुः सुरास्तदा ॥ सर्वतीर्थोत्थितं तोयं पात्रे वै निहितं तु
तैः ॥ ७ ॥ शूलभेदमनुप्राप्य शूलं शुद्धं तु शूलिनः ॥ तत्रोत्थमुदकं गृह्य आगता भृगुकच्छके ॥ ८ ॥ तत्राऽपश्यंस्ततो ह्यग्निं ःपिंगलाक्षं च रोगि
णम् ॥ तपस्युग्रे व्यवसितं ध्यायमानं महेश्वरम् ॥ ९ ॥ हविर्भागैस्तु विप्राणां राज्ञां चैवामयाविनाम् ॥ दृष्ट्वा तु बहुरोगार्त्तमग्निं देवमुखं सुराः ॥
प्राहुस्ते सहिता देवं शंकरं लोकशंकरम् ॥ १० ॥ ॥ देवा ऊचुः ॥ ॥ प्रसादः क्रियतां शंभो पिंगलस्यामयाविनः ॥ यथा हि नीरुजः कायो
हविषां ग्रहणक्षमः ॥ पुनर्भवति पिंगस्तु तथा कुरु महेश्वर ॥ ११ ॥ ॥ ईश्वर उवाच ॥ ॥ भोभोः सुरा हि तपसा तुष्टोऽहं वो विशेषतः ॥
वचनाच्च विशेषेण ददाम्यभिमतं वरम् ॥ १२ ॥ ॥ पिंगल उवाच ॥ ॥ यदि तुष्टोऽसि देवेश दीयते देव चेप्सितम् ॥ चंद्रादित्यौ च नयने
कृत्वात्र कलया स्थितः ॥ १३ ॥ तथा पुनर्नवः कायो भवेद्वै मम शंकर ॥ तथा कुरु विरूपाक्ष नमस्तुभ्यं पुनःपुनः ॥ १४ ॥ ॥ मार्कंडेय
उवाच ॥ ॥ ततः स भगवाञ्छंभुर्मूर्त्तिमादित्यरूपिणीम् ॥ कृत्वा तु तस्य तद्रोगमपानुदत शंकरः ॥ १५ ॥ ततः पुनर्नवीभूतः पुनः प्रोवाच
शंकरम् ॥ अत्रैव स्थीयतां शंभो तथैव भास्करः स्वयम् ॥ १६ ॥ प्राणिनामुपकाराय रोगाणामुपशांतये ॥ पापानां ध्वंसनार्थाय श्रेयसां चैव
वृद्धये ॥ १७ ॥ एवमुक्तस्तु भगवान्पिंगलेन महात्मना ॥ अवतारं च कृतवान्गीर्वाणानिदमब्रवीत् ॥ १८ ॥ ॥ ईश्वर उवाच ॥ ॥ मुंचध्व
मुदकं देवास्तीर्थेभ्यो यत्समाहृतम् ॥ मम चोत्तरतः कृत्वा खातं देवमयं शुभम् ॥ १९ ॥ तत्र निक्षिप्यतां वारि सर्वरोगविनाशनम् ॥ सर्वपाप
हरं दिव्यं सर्वैरपि सुरादिभिः ॥ २० ॥ एवमुक्ताः सुराः सर्वे खातं कृत्वा तथोत्तरे ॥ त्रयस्त्रिंशत्कोटिगणैर्मुक्तं तत्तीर्थजं जलम् ॥ २१ ॥ प्रोचुस्ते

सहिताः सर्वे विरूपाक्षपुरोगमाः ॥ यः कश्चिद्देवखातेऽस्मिन्मृदालंभनपूर्वकम् ॥ २२ ॥ स्नानं कृत्वा रविदिने संस्नाय,नर्मदाजले ॥ श्राद्धं कृत्वा

पितृभ्यो वै दानं दत्त्वा स्वशक्तितः ॥ २३ ॥ पूजयिष्यति पिंगेशं तस्य वासस्त्रिविष्टपे ॥ भविष्यति सुरैरुक्तं शृणोति सकलं जगत् ॥ २४ ॥
आमया भुवि मर्त्यानां क्षयरोगविचर्चिकाः ॥ व्याधयो विकृताकाराः कासश्वासज्वरोद्भवाः ॥ २५ ॥ एकद्वित्रिचतुर्थाहा ये ज्वरा भूतसंभवाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ये चाऽन्ये विकृता दोषा दद्रुश्च कामलं तथा ॥२६॥ दिनैस्ते सप्तभिर्यांति नाशं स्नानै रवेर्दिने ॥ शतभेदप्रभिन्ना ये कुष्ठा बहुविधास्तथा ॥२७॥
शतमादित्यवाराणां स्नायादष्टोत्तरं तु यः ॥ संपूज्य शंकरं दद्यात्तिलपात्रं द्विजातये ॥ २८ ॥ नश्यंति तस्य कुष्ठानि गरुडेनेव पन्नगाः ॥ एव
मुक्ता गताः सर्वे त्रिदशास्त्रिदशालयम् ॥ २९ ॥ ॥ मार्कंडेय उवाच ॥ ॥ नदीषु देवखातेषु तडागेषु सरित्सु च ॥ स्नानं समाचरेन्नित्यं नरः
पापैः प्रमुच्यते ॥ ३० ॥ षष्टितीर्थसहस्रेषु षष्टितीर्थशतेषु च ॥ यत्फलं स्नानदानेषु देवखाते ततोऽधिकम् ॥ ३१ ॥ देवखातेषु यः स्नात्वा तर्प
यित्वा पितॄन्नृप ॥ पूजयेद्देवदेवेशं पिंगलेश्वरमुत्तमम् ॥ ३२ ॥ सोऽश्वमेधस्य यज्ञस्य वाजपेयस्य भारत ॥ द्वयोः पुण्यमवाप्नोति नाऽत्र कार्या
विचारणा ॥ ३३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखंडे पिंगलेश्वरतीर्थमाहा
त्म्यवर्णनंनाम षट्सप्तत्युत्तरशततमोऽध्यायः ॥ १७६ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ भूतीश्वरं ततो गच्छेत्स
र्वतीर्थेष्वनुत्तमम् ॥ दर्शनादेव राजेंद्र यस्य पापं प्रणश्यति ॥ १ ॥ तत्र स्थाने पुरा पार्थ देवदेवेन शूलिना ॥ उद्धूलनं कृतं
गात्रे तेन भूतीश्वरं तु तत् ॥ २ ॥ पुष्ये वा जन्मनक्षत्र अमावास्यां विशेषतः ॥ भूतीश्वरे नरः स्नात्वा कुलकोटिं समुद्धरेत् ॥ ३ ॥ तत्र स्थाने
तु यो भक्त्या कुरुते ह्यंगगुंठनम् ॥ तस्य यत्फलमुद्दिष्टं तच्छृणुष्व नराधिप ॥ ४ ॥ यावन्तो भूतिकणिका गात्रे लग्नाः शिवालये ॥ तावद्वर्ष
सहस्राणि शिवलोके महीयते॥५॥सर्वेषामेव स्नानानां भस्मस्नानं परं स्मृतम् ॥पुराणैर्ऋषिभिः प्रोक्तं सर्वशास्त्रेष्वनुत्तमम्॥६॥एककालं द्विकालं वा
त्रिकालं चाऽपि यः सदा ॥ स्नानं करोति चाऽऽग्नेयं पापं तस्य प्रणश्यति ॥७॥ दिव्यस्नानाद्वरं स्नानं वायव्यं भरतर्षभ ॥वायव्यादुत्तमं ब्राह्म्यं
वरं ब्राह्म्यात्तु वारुणम् ॥ ८ ॥ आग्नेयं वारुणाच्छ्रेष्ठं यस्मादुक्तं स्वयंभुवा ॥ तस्मात्सर्वप्रयत्नेन ह्याग्नेयं स्नानमाचरेत् ॥९ ॥ युधिष्ठिर उवाच ॥ ॥
आग्नेयं वारुणं ब्राह्म्यं वायव्यं दिव्यमेव च ॥ किमुक्तं श्रोतुमिच्छामि परं कौतूहलं हि मे ॥ १० ॥ ॥ मार्कंडेय उवाच ॥ ॥ आग्नेयं भस्मना
स्नानमवगाह्य च वारुणम् ॥ आपोहिष्ठेति च ब्राह्म्यं वायव्यं गोरजः स्मृतम् ॥ ११ ॥ सूर्ये दृष्टे तु यत्स्नानं गंगातोयेन तत्समम् ॥ तत्स्नानं
पंचमं प्रोक्तं दिव्यं पांडवसत्तम ॥ १२ ॥ तस्मात्सर्वप्रयत्नेन स्नात्वा भूतेश्वरे तु यः ॥ पूजयेद्देवमीशानं स बाह्याभ्यंतरः शुचिः ॥ १३ ॥ तत्र
स्थाने तु ये नित्यं ध्यायंति परमं पदम् ॥ सूक्ष्मं चातींद्रियं नित्यं ते धन्या नाऽत्र संशयः ॥ १४ ॥ मुक्तितीर्थं तु तत्तीर्थं सर्वतीर्थे
ष्वनुत्तमम् ॥ दर्शनादेव यस्यैव पापं याति महत्क्षयम् ॥ १५ ॥ जायते पूजया राज्यं तत्र स्तुत्वा महेश्वरम् ॥ जपेन पापसंशुद्धि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ध्यानेनानन्त्यमश्नुते ॥ १६ ॥ ॐ ज्योतिःस्वरूपमनादिमध्यमनुत्पाद्यमानमनुच्चार्यमाणाक्षरम् ॥ सर्वभूतस्थितं शिवं सर्वयोगेश्वरं सर्व लोकेश्वरं मोहशोकहीनं महाज्ञानगम्यम् ॥ १७ ॥ तत्र तीर्थे तु यो गत्वा स्नानं कुर्यान्नरेश्वर ॥ अश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ एवंभूतं न जानंति मोक्षापेक्षणिका नराः ॥ १८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्य खण्डे रेवाखण्डे भूतीश्वरतीर्थमाहात्म्यवर्णनं नाम सप्तसप्तत्यधिकशततमोऽध्यायः ॥ १७७ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र गंगावाहकमुत्तमम् ॥ नर्मदायां महापुण्यं भृगुतीर्थसमीपतः ॥ १ ॥ तत्र गंगा महापुण्या चचार विपुलं तपः ॥ पुरा वर्षशतं साग्रं परमं व्रतमास्थिता ॥ २ ॥ ध्यात्वा देवं जगद्योनिं नारायणमकल्मषम् ॥ आत्मानं परमं धाम सरित्सा जगतीपते ॥ ३ ॥ ततो जनार्दनो देव आगत्येदमुवाच ह ॥ ४ ॥ ॥ विष्णुरुवाच ॥ ॥ तपसा तव तुष्टोऽहं मत्पादांबुजसंभवे ॥ मत्तः किमिच्छसे देवि ब्रूहि किं करवाणि ते ॥ ५ ॥ ॥ गंगोवाच ॥ ॥ त्वत्पादकमलाद्भ्रष्टा गंगा सहचरा विभो ॥ यदृच्छया त्रिलोकेश वन्द्यमाना दिवौकसैः ॥ ६ ॥ नृपो भगीरथ स्तस्मात्तपः कृत्वा सुदुष्करम् ॥ समाराध्य जगन्नाथं शंकरं लोकशंकरम् ॥ ७ ॥ अवतारयामास हि मां पृथिव्यां धरणीधर ॥ मया वै युवयो र्वाक्यादवतारः कृतो भुवि ॥ ८ ॥ वैष्णवीमिति मां मत्वा जनः सर्वाप्लुतो[1] मयि ॥ ये वै ब्रह्महणो लोके ये च वै गुरुतल्पगाः ॥ ९ ॥ त्यागिनः पितृमातृभ्यां ये च स्वर्णहरा नराः ॥ गोघ्ना ये मनुजा लोके तथा ये प्राणिहिंसकाः ॥ १० ॥ अगम्यागामिनो ये च ह्यभक्ष्यस्य च भक्षकाः ॥ ये चा ऽनृत प्रवक्तारो ये च विश्वासघातकाः ॥ ११ ॥ देवब्राह्मणवित्तानां हर्त्तारो ये नराधमाः ॥ देवब्रह्मगुरुस्त्रीणां ये च निंदाकरा नराः ॥ १२ ॥ ब्रह्मशाप प्रदग्धा ये ये चैवात्महनो द्विजाः ॥ भ्रष्टानशनसंन्यासनियतव्रतचारिणः ॥ १३ ॥ तथैवापेयपेयाश्च ये च स्वगुरुनिंदकाः ॥ निषेधका ये दानानां पात्रदानपराङ्मुखाः ॥ १४ ॥ ऋतुघ्ना ये स्वपत्नीनां पित्रोः स्नेहपरा न हि ॥ बांधवेषु च दीनेषु करुणा यस्य नास्ति वै ॥ ॥ १५ ॥ क्षेत्रसेतुविभेदी च पूर्वमार्गप्रलोपकः ॥ नास्तिकः शास्त्रहीनस्तु विप्रः संध्याविवर्जितः ॥ १६ ॥ अहुताशी ह्यसंतुष्टः सर्वाशी सर्वविक्रयी ॥ कदर्या नास्तिकाः क्रूराः कृताघ्ना ये द्विजायः ॥ १७ ॥ पैशुन्या रसविक्रेयाः सर्वकालविनाकृताः ॥ स्वगोत्रां परगोत्रां वा ये भुंजंति द्विजाधमाः ॥ १८ ॥ ते मां प्राप्य विमुच्यंते पापसंघैः सुसंचितैः ॥ तत्पापक्षारतप्ताया[2] न शर्म मम विद्यते ॥ १९ ॥ तथा कुरु

१ सर्वः आप्लुतः—इति पदच्छेदः । सन्धिरत्रार्षः । २ यत्पापक्षारतप्तायाः—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जगन्नाथ यथाऽहं शर्म चाप्नुयाम् ॥ एवमुक्तस्तु देवेशस्तुष्टः प्रोवाच जाह्नवीम् ॥ २० ॥ ॥ विष्णुरुवाच ॥ ॥ अहमत्र वसिष्यामि गंगाधरसहायवान् ॥ प्रविशस्व सदा रेवां त्वमत्रैव च मूर्त्तिना[1] ॥ २१ ॥ मम पादतलं प्राप्य वह त्रिपथगामिनि ॥ यदा बहूदक काले नर्मदाजल संभृता ॥ २२ ॥ प्रावृट्कालं समासाद्य भविष्यति जलाकुला ॥ प्लाव्योभयतटं देवी प्राप्य मामुत्तरस्थितम् ॥ २३ ॥ प्लावयिष्यति तोयेन यदा शंखं करे स्थितम् ॥ तदा पर्वशतोद्युक्तं वैष्णवं पर्वसंज्ञितम् ॥ २४ ॥ न तेन सदृशं किंचिद्व्यतीपातादिसंक्रमम् ॥ अयने द्वे च न तथा पुण्यात्पुण्य तरं यथा ॥ २५ ॥ तस्मिन्पर्वणि देवेशि शंखं संस्पृश्य मानवः ॥ स्नानमाचरते तोये मिश्रे गांगेयनार्मदे ॥ २६ ॥ पुण्यं त्वशेषपुण्यानां मंगलानां च मंगलम् ॥ विष्णुना विधृतो येन तस्माच्छांतिः प्रचक्रमे ॥ २७ ॥ तत्रांतं पापसंघस्य ध्रुवमाप्नोति मानवः ॥ शंखोद्धारे नरः स्नात्वा तर्पयेत्पि तृदेवताः ॥ २८ ॥ तृप्तास्ते द्वादशाब्दानि सिद्धिं च सार्वकामिकीम् ॥ गंगावहे तु यः श्राद्धं शंखोद्धारे प्रदास्यति ॥ २९ ॥ तेन पिंडप्रदानेन नृत्यंति पितरस्तथा ॥ शंखोद्धारे नरः स्नात्वा पूजयेद्धलकेशवौ ॥ ३० ॥ रात्रौ जागरणं कृत्वा शुद्धो भवति जाह्नवि ॥ यत्त्वं लोककृतं कर्म मन्यसे भुवि दुःसहम् ॥ ३१ ॥ तस्मिन्पर्वणि तत्सर्वं तत्र स्नात्वा व्यपोहय ॥ एवमुक्त्वा नरश्रेष्ठ विष्णुश्चांतरधीयत ॥ ३२ ॥ तदाप्रभृति तत्तीर्थं गंगावाह कमुत्तमम् ॥ ब्रह्माद्यैर्ऋषिभिस्तात पारंपर्यक्रमागतैः ॥ ३३ ॥ तत्र तीर्थे तु यः स्नात्वा भक्तिभावेन भारत ॥ गंगातीर्थे तु स स्नातः समस्तेषु न संशयः ॥ ३४ ॥ तत्र तीर्थे मृतानां तु नराणां भावितात्मनाम् ॥ अनिवर्त्तिका गतिस्तेषां विष्णुलोकात्कदाचन ॥ ३५ ॥ इति श्रीस्कांदे महापु राण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे गंगावहकतीर्थमाहात्म्यवर्णनंनामाष्टसप्तत्युत्तरशततमोऽध्यायः ॥ १७८ ॥ छ ॥

॥ ॥ मार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र गौतमेश्वरमुत्तमम् ॥ सर्वपापहरं तीर्थं त्रिषु लोकेषु विश्रुतम् ॥ १ ॥ गौतमेन तपस्तप्तं तत्र तीर्थे युधिष्ठिर ॥ दिव्यं वर्षसहस्रं तु ततस्तुष्टो महेश्वरः॥ २ ॥ प्रणम्य शिरसा तत्र स्थापितः परमेश्वरः ॥ स्थापितो गौतमेनेशो गौतमेश्वर उच्यते ॥ ३ ॥ तत्र देवैश्च गंधर्वैर्ऋषिभिः पितृदैवतैः ॥ संप्राप्ता ह्युत्तमा सिद्धिराराध्य परमेश्वरम् ॥४॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्पितृदेवताः ॥ पूजयेत्परमीशानं सर्वपापैः प्रमुच्यते ॥५॥ बहवस्तन्न जानंति विष्णुमायाविमोहिताः॥ तत्र सन्निहितं देवं शूलपाणिं महेश्वरम् ॥ ६ ॥ ब्रह्मचारी तु यो भूत्वा तत्र तीर्थे नरेश्वर ॥ स्नात्वाऽर्चयेन्महादेवं सोऽश्वमेधफलं लभेत् ॥ ७ ॥ ब्रह्मचारी तु यो भूत्वा तर्पयेत्पितृदेवताः॥ पूजयेत्परमीशानं सर्वपापैः प्रमुच्यते ॥८॥

---

१ मूर्तिना—स्वरूपेण—इत्यर्थः । मूर्तिशब्दोऽत्र पुंल्लिंगो दृश्यते लिंगमशिष्यं लिङ्गस्य लोकाश्रयत्वात् इत्युक्तेन पुंलिंगतापि । २ गंगावगाहकतीर्थमाहात्म्यवर्णनंनाम—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तत्र तीर्थे तु यो दानं भक्त्या दद्याद्द्विजायते ॥ तदक्षयफलं सर्वं नाऽत्र कार्या विचारणा ॥ ९ ॥ मासे चाऽश्वयुजे राजन्कृष्णपक्षे चतुर्दशीम् ॥ स्ना
त्वा तत्र विधानेन दीपकानां शतं ददेत् ॥ १० ॥ पूजयित्वा महादेवं गंधपुष्पादिभिर्न्नरः ॥ मुच्यते सर्वपापेभ्यो मृतः शिवपुरं व्रजेत् ॥ ११ ॥
अष्टम्यां च चतुर्दश्यां कार्त्तिक्यां तु विशेषतः ॥ उपोष्य प्रयतो भूत्वा घृतेन स्नापयेच्छिवम् ॥ १२ ॥ पंचगव्येन मधुना दध्ना वा शीतवारिणा ॥
स च सर्वस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ १३ ॥ भक्त्या तु पूजयेत्पश्चात्स लभेत्फलमुत्तमम् ॥ बिल्वपत्रैरखंडैश्च पुष्पैरुन्मत्तकोद्भवैः ॥
॥ १४ ॥ कुशापामार्गसहितैः कदंबद्रोणजैरपि ॥ मल्लिकाकरवीरैश्च रक्तपीतैः सितासितैः ॥ १५ ॥ पुष्पैरन्यैर्यथालाभं यो नरः पूजयेच्छिवम् ॥
नैरंतर्येण षण्मासं योऽर्च्चयेद्गौतमेश्वरम् ॥ सर्वान्कामानवाप्नोति मृतः शिवपुरं व्रजेत् ॥ १६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां
संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे गौतमेश्वरतीर्थमाहात्म्यवर्णनंनामैकोनाशीत्यधिकशततमोऽध्यायः ॥ १७९ ॥ ॥ छ ॥
॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल दशाश्वमेधिकं परम् ॥ तीर्थं सर्वगुणोपेतं महापातकनाशनम् ॥ १ ॥ यत्र गत्वा महा
राज स्नात्वा संपूज्य चेश्वरम् ॥ दशानामश्वमेधानां फलं प्राप्नोति मानवः ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ अश्वमेधो महायज्ञो बहुसंभारद
क्षिणः ॥ अशक्यः प्राकृतैः कर्त्तुं कथं तेषां फलं लभेत् ॥ ३ ॥ अत्याश्चर्यमिदं तत्त्वं त्वयोक्तं वदता सता ॥ यथा मे जायते श्रद्धा दीर्घायुस्त्वं तथा
वद ॥ ४ ॥ ॥ मार्कंडेय उवाच ॥ ॥ इदमाश्चर्यभूतं हि गौर्या पृष्टस्त्रियंबकः ॥ तत्तेऽहं संप्रवक्ष्यामि पृच्छते निपुणाय वै ॥
॥ ५ ॥ पुरा वृषस्थो देवेश ह्युमया सह शंकरः ॥ कदाचित्पर्यटन्पृथ्वीं नर्मदातटमाश्रितः ॥ ६ ॥ दशाश्वमेधिकं तीर्थं दृष्ट्वा
देवो महेश्वरः ॥ तीर्थं प्रत्यंजलिं बद्धा नमश्चक्रे त्रिलोचनः ॥ ७ ॥ कृतांजलिपुटं देवं दृष्ट्वा देवीदमब्रवीत् ॥ ८ ॥
॥ ॥ देव्युवाच ॥ ॥ किमेतद्देवदेवेश चराचरनमस्कृत ॥ भद्वनम्रांजलिं बद्धा भक्त्या परमया युतः ॥ ९ ॥ एतदाश्चर्य
मतुलं सर्वं कथय मे प्रभो ॥ १० ॥ ॥ ईश्वर उवाच ॥ ॥ प्रत्यक्षं पश्य तीर्थस्य फलं मा विस्मिता भव ॥ वियत्स्था मे भुविस्थस्य क्षणं
देवि स्थिरा भव ॥ ११ ॥ एवमुक्त्वा तु देवेशो गौरवर्णो द्विजोऽभवत् ॥ क्षुत्क्षामकण्ठो जटिलः शुष्को धमनिसंततः ॥ १२ ॥ उपविश्य भुवः
पृष्ठे सुस्वरं मंत्रमुच्चरन् ॥ क्रमप्रियो महादेवो माधुर्येण प्रमोदयन् ॥ १३ ॥ श्रुत्वा तां मधुरां वाणीं स्वयं देवेन निर्मिताम् ॥ संभ्रांता ब्राह्मणाः सर्वे
स्नातुं ये तत्र चाऽऽगताः ॥ १४ ॥ नित्यक्रिया च सर्वेषां विस्मृता श्रुतिविभ्रमात् ॥ तं दृष्ट्वा पठमानं तु क्षुत्पिपासाऽभिपीडितम् ॥ १५ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विजोऽन्यमंत्रयत्कश्चिद्भक्त्या तं भोजनाय वै ॥ प्रसादः क्रियतां ब्रह्मन्भोजनाय गृहे मम ॥ १६ ॥ अद्य मे सफलं जन्म ह्यद्य मे सफलाः क्रियाः ॥ सर्वान्कामान्प्रदास्यंति प्रीता मेऽद्य पितामहाः ॥ १७ ॥ त्वयि भुक्ते द्विजश्रेष्ठ प्रसीद त्वं ध्रुवं मम ॥ एवमुक्तो महादेवो द्विजरूपधर स्तदा ॥ १८ ॥ प्रहस्य प्रत्युवाचेदं ब्राह्मणं श्लक्ष्णया गिरा ॥ मया वर्षसहस्रं तु निराहारं तपः कृतम् ॥ १९ ॥ इदानीं तु गृहे तस्य करिष्ये द्विज सत्तम ॥ दशभिर्वाजिमेधैश्च येनेष्टं पारणं तथा ॥ २० ॥ इत्युक्तो देवदेवेन ब्राह्मणो विस्मयान्वितः ॥ उत्तमांगं विधुन्वन्वै जगाम स्वगृहं प्रति ॥ ॥ २१ ॥ एवं ते बहवो विप्राः प्रत्याख्याते निमंत्रणे ॥ पुराणार्थमजानंतो नास्तिका बहवो गताः ॥ २२ ॥ अथ कश्चिद्द्विजो विद्वान्पुराणार्थस्य तत्त्ववित् ॥ देवं निमंत्रयामास द्विजरूपधरं शिवम् ॥ २३ ॥ तथैव सोऽपि देवेन प्रोक्तः स प्राह तं पुनः ॥ मनसा चिंतयित्वा तु पुराणोक्तं द्विजो त्तमः ॥ २४ ॥ स्मृतिवेदपुराणेषु यदुक्तं तत्तथा भवेत् ॥ इति निश्चित्य तं विप्रमुवाच प्रहसन्निव ॥ २५ ॥ भोभो विप्र प्रतीक्षस्व यावदागमनं पुनः ॥ इत्युक्त्वा तु द्विजो गत्वा दशाश्वमेधिकं परम् ॥ २६ ॥ स्नानं महालंभनादि कृतं तेन द्विजन्मना ॥ जपं श्राद्धं तथादानं कृत्वाधर्मानुसा रतः ॥ २७ ॥ संकल्प्य कपिलां तत्र पुराणोक्तविधानतः ॥ समायात्त्वरितं तत्र यत्राऽसौ तिष्ठते द्विजः ॥ २८ ॥ अथाऽऽगत्य द्विजं प्राह वाजि मेधः कृतो मया ॥ उत्तिष्ठ मे गृहं रम्यं भोजनार्थं हि गम्यताम् ॥ २९ ॥ इत्युक्तः शंकरस्तेन ब्राह्मणेनाऽतिविस्मितः ॥ उवाच ब्राह्मणं देव इदानीं त्वमितो गतः ॥ ३० ॥ द्विजवर्य कथं चेष्टा दश यज्ञा महाधनाः ॥ ३१ ॥ ॥ द्विज उवाच ॥ ॥ न विचारस्त्वया कार्यः कृता यज्ञा न संशयः ॥ यदि वेदाः प्रमाणं ते भुवि देवा द्विजास्तथा ॥ ३२ ॥ दशाश्वमेधिकं तीर्थं तथा सत्यं द्विजोत्तम ॥ यदि वेदपुराणोक्तं वाक्यं निःसंशयं भवेत् ॥ ३३ ॥ तदा प्राप्तं मया सर्वं नाऽत्र कार्या विचारणा ॥ एवमुक्तस्तु देवेश आस्तिक्यं तस्य चेतसः ॥ ३४ ॥ विमृश्य बहुभिः किंचिदुत्तरं न प्रपद्यत[1] ॥ जगाम तद्गृहं रम्यं पठन्ब्रह्म सनातनम् ॥ ३५ ॥ संप्राप्तं तं द्विजं भक्त्या पाद्यार्घ्येण तमर्चयत् ॥ षड्रसं भोजनं तेन दत्तं पश्चाद्यथा विधि ॥ ३६ ॥ ततो भुक्ते महादेवे सर्वदेवमये शिवे ॥ पुष्पवृष्टिः पपाताऽऽशु गगनात्तस्य मूर्द्धनि ॥ तस्यास्तिक्यं तु संलक्ष्य तुष्टः प्रोवाच शंकरः ॥ ३७ ॥ ॥ ईश्वर उवाच ॥ ॥ किं तेऽद्य क्रियतां ब्रूहि वरदोऽहं द्विजोत्तम ॥ अदेयमपि दास्यामि एकचित्तस्य ते ध्रुवम् ॥ ३८ ॥ ॥ ॥ ब्राह्मण उवाच ॥ ॥ यदि प्रीतोऽसि मे देव यदि देयो वरो मम ॥ अस्मिंस्तीर्थे महादेव स्थातव्यं सर्वदैव हि ॥ ३९ ॥ उपकाराय देवेश

१ प्रपद्यत—अडभाव आर्षः । उत्तरं न प्रापद्यत—उत्तरं वक्तुं न शशाक—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



एष मे वर उत्तमः ॥ एवमुक्तस्तु देवेन आरुरोह द्विजोत्तमः ॥ ४० ॥ गंधर्वाप्सरःसंबाधं विमानं सार्वकामिकम् ॥ पूज्यमानो गतस्तत्र यत्र लोका निरामयाः ॥ ४१ ॥ ॥ मार्कंडेय उवाच ॥ ॥ एतदाश्चर्यमतुलं दृष्ट्वा देवी सुविस्मिता ॥ विस्मयोत्फुल्लनयना पुनः पप्रच्छ शंकरम् ॥ ४२ ॥ ॥ ॥ पार्वत्युवाच ॥ ॥ कथमेतद्भवेत्सत्यं यत्रेदमसमंजसम् ॥ स्नानं कुर्वंति बहवो लोका ह्यत्र महेश्वर ॥ ४३ ॥ तेषां तु स्वर्गगमनं यथैष स्वर्गतिं गतः ॥ कथमेतत्समाचक्ष्व विस्मयः परमो मम ॥ ४४ ॥ एतच्छ्रुत्वा तु देवेशः प्रहसन्प्रत्युवाच ताम् ॥ वेदवाक्ये पुराणार्थे स्मृत्यर्थे द्विजभाषिते ॥ ४५ ॥ विस्मयो हि न कर्त्तव्यो ह्यनुमानं हि तत्तथा ॥ असंभाव्यं हि लोकानां पुराणे यत्प्रगीयते ॥ ४६ ॥ यदि पक्षं[1] पुरस्कृत्य लोकाः कुर्वंति पार्वति ॥ तस्मान्न सिद्धिरेतेषां भवत्येको न विस्मयः ॥ ४७ ॥ नास्तिका भिन्नमर्यादा ये निश्चयबहिष्कृताः ॥ तेषां सिद्धिर्न विद्यत आस्तिक्याद्भवते ध्रुवम् ॥ ४८ ॥ श्रुत्वाख्यानमिदं देवी ववंदे तीर्थमुत्तमम् ॥ सर्वपापहरं पुण्यं नर्मदायां व्यवस्थितम् ॥ ४९ ॥ ॥ मार्कंडेय उवाच ॥ ॥ दशाश्वमेधं राजेंद्र सर्वतीर्थोत्तमोत्तमम् ॥ तीर्थं सर्वगुणोपेतं महापातकनाशनम् ॥ ५० ॥ तत्रागता महाभागा स्नातुकामा सरस्वती ॥ पुण्यानां परमा पुण्या नदीनामुत्तमा नदी ॥ ५१ ॥ नाममात्रेण यस्यास्तु सर्वपापैः प्रमुच्यते ॥ स्नातास्तत्र दिवं यांति ये मृतास्तेऽपुनर्भवाः ॥ ५२ ॥ दशाश्वमेधे सा राजन्नियता ब्रह्मचारिणी ॥ आराधयित्वा देवेशं परं निर्व्वाणमागतीः ॥ ५३ ॥ कालुष्यं ब्रह्मसंभूता संवत्सरसमुद्भवम् ॥ प्रक्षालयितुमायाति दशम्यामाश्विनस्य च ॥ ५४ ॥ उपोष्य रजनीं तां तु संपूज्य त्रिपुरांतकम् ॥ राजन्निष्कल्मषा यांति श्वोभूते शाश्वतं पदम् ॥ ५५ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ सरस्वती महापुण्या नदीनामुत्तमा नदी ॥ दशाश्वमेधमायाति स्नातुं संवत्सरे सदा ॥ किमधिक्यं भवेत्तीर्थं दशम्यां तत्र शंस मे ॥ ५६ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ राजन्नाश्वयुजे मासि दशम्यां तद्विशिष्यते ॥ पार्थिवेषु च तीर्थे तु सर्वेष्वेव न संशयः ॥ ५७ ॥ दशाश्वमेधिके राजन्नित्यं हि दशमी शुभा ॥ विशेषादाश्विने शुक्ला महापातकनाशिनी ॥ ५८ ॥ तस्यां स्नात्वाऽर्च्चयेद्देवानुपवासपरायणः ॥ श्राद्धं कृत्वा विधानेन पश्चात्संपूजयेच्छिवम् ॥ ५९ ॥ तत्रस्थां पूजयेद्देवीं स्नातुकामां सरस्वतीम् ॥ नमो नमस्ते देवेशि ब्रह्मदेहसमुद्भवे ॥ ६० ॥ कुरु पापक्षयं देवि संसारान्मां समुद्धर ॥ गन्धधूपैश्च संपूज्य ह्यर्च्चयित्वा पुनःपुनः ॥ ६१ ॥ दश प्रदक्षिणा दत्त्वा सूत्रेण परिवेष्टयेत् ॥ कपिलां तु ततो विप्रे दद्याद्विगतमत्सरः ॥ ६२ ॥ सर्वलक्षणसंपन्नां सर्वोपस्करसंयुताम् ॥ दत्त्वा विप्राय कपिलां न शोचति कृता

१ पक्षम्—विकल्पम्—इत्यर्थः । कृत्यम्—इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृते ॥ ६३ ॥पश्चाज्जागरणं कुर्याद्घृते नोज्वाल्य दीपकम् ॥ पुराणपठनेनैव नृत्यगीतविवादनैः ॥६४॥ वेदोक्तैश्चैव जाप्यैश्च पूजयेच्छशिशेखरम् ॥ प्रभाते विमले पश्चात्स्नात्वा वै नर्मदाजले ॥६५॥ ब्राह्मणान्भोजयेद्भक्त्या शिवभक्तांश्च योगिनः ॥ एवं कृते ततो राजन्सम्यक्तीर्थफलं लभेत् ॥ ॥ ६६ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेच्छंकरं नरः ॥ दशाश्वमेधावभृथं लभते पुण्यमुत्तमम् ॥६७॥ पूतात्मा तेन पुण्येन रुद्रलोकं स गच्छति ॥ आरूढः परमं यानं कामगं च सुशोभनम् ॥ ६८ ॥ तत्र दिव्याऽप्सरोभिस्तु वीज्यमानोऽथ चामरैः ॥ क्रीडते सुचिरं कालं जयशब्दादिमंगलैः ॥ ॥ ६९ ॥ ततोऽवतीर्णः कालेन इह राजा भवेद्ध्रुवम् ॥ हस्त्यश्वरथसंपन्नो महाभोगी परंतपः ॥ ७० ॥ दशाश्वमेधे यद्दानं दीयते शिवयोगिनाम् ॥ दशाश्वमेधसदृशं भवेत्तन्नाऽत्र संशयः ॥ ७१ ॥ सर्वेषामेव यज्ञानामश्वमेधो विशिष्यते ॥ दुर्लभः स्वल्पवित्तानां भूरिशः पापकर्मणाम् ॥ ७२ ॥ तत्र तीर्थे तु राजेंद्र दुर्लभोऽपि सुरासुरैः ॥ प्राप्यते स्नानदानेन इत्येवं शंकरोऽब्रवीत् ॥ ७३ ॥ अकामो वा सकामो वा मृतस्तत्र नरेश्वर ॥ देवत्वं प्राप्नुयात्सोऽपि नाऽत्र कार्या विचारणा ॥ ७४ ॥ अग्निप्रवेशं यः कुर्यात्तत्र तीर्थे नरोत्तम ॥ अग्निलोके वसेत्तावद्यावदाभूतसंप्लवम् ॥ ७५ ॥ जलप्रवेशं यः कुर्यात्तत्र तीर्थे नराधिप ॥ ध्यायमानो महादेवं वारुणं लोकमाप्नुयात् ॥ ७६ ॥ दशाश्वमेधे यः कश्चिच्छूरवृत्त्या तनुं त्यजेत् ॥ अक्षया तु गतिस्तस्य इत्येवं श्रुतिनोदना ॥ ७७ ॥ न तां गतिं यांति भृगुप्रपातिनो न दंडिनो नैव च सांख्ययोगिनः ॥ ध्वजाकुले दुंदुभिशंखनादिते क्षणेन यां यांति महाहवे मृताः ॥ ७८ ॥ यत्र तत्र हतः शूरः शत्रुभिः परिवेष्टितः ॥ अक्षयाल्लँभते लोकान्यदि क्लीबं न भाषते ॥ ७९ ॥ दशाश्वमेधे संन्यासं यः करोति विधानतः ॥ अनिवर्त्तिका गतिस्तस्य रुद्रलोकात्कदाचन ॥ ८० ॥ दशाश्वमेधे यत्पुण्यं संक्षेपेण युधिष्ठिर ॥ कथितं परया भक्त्या सर्वपापप्रणाशनम् ॥ ८१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे दशाश्वमेधतीर्थमाहात्म्यवर्णनंनामाशीत्युत्तरशततमोऽध्यायः ॥ १८० ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ अतः परं प्रवक्ष्यामि भृगुतीर्थस्य विस्तरम् ॥ यं श्रुत्वा ब्रह्महा गोघ्नो मुच्यते सर्वपातकैः ॥ १ ॥ तत्र तीर्थे तु विख्यातं वृषखातमिति श्रुतम् ॥ भृगुणा तत्र राजेंद्र तपस्तप्तं पुरा किल ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ भृगुकच्छे स विप्रेंद्रो निवसन्केन हेतुना ॥ तपस्तप्त्वा सुविपुलं परां सिद्धिमुपागतः ॥ ३ ॥ को वा वृष इति प्रोक्तस्तत्खातं येन खानितम् ॥ एतत्सर्वं यथान्यायं कथयस्व ममाऽनघ ॥ ४ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ एष प्रश्नो महाराज यस्त्वया परिपृच्छितः ॥ तत्सर्वं कथयिष्यामि शृणुष्वैकमना नृप ॥ ५ ॥ षष्ठस्तु ब्रह्मणः पुत्रो मानसो भृगुसत्तमः ॥ तपश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



चार विपुलं श्रीवृते क्षेत्र उत्तमे ॥ ६ ॥ दिव्यं वर्षसहस्रं तु संशुष्को मुनिसत्तमः ॥ निराहारो निरानन्दः काष्ठपाषाणवत्स्थितः ॥ ७ ॥
ततः कदाचिद्देवेशो विमानवरमास्थितः ॥ उमया सहितः श्रीमांस्तेन मार्गेण चागतः ॥ ८ ॥ दृष्ट्वा तत्र महाभागं भृगुं वल्मीकवत्स्थि
तम् ॥ उवाच देवी देवेशं किमिदं दृश्यते प्रभो ॥ ९ ॥ ॥ ईश्वर उवाच ॥ ॥ भृगुर्नाम महादेवि तपस्तप्त्वा सुदारुणम् ॥
दिव्यं वर्षसहस्रं तु मम ध्यानपरायणः ॥ १० ॥ जलबिंदु कुशाग्रेण मासेमासे पिबेच्च सः ॥ संवत्सरशतं साग्रं तिष्ठते च वरानने
॥ ११ ॥ तच्छ्रुत्वा वचनं गौरी क्रोधसंवर्त्तितेक्षणा ॥ उवाच देवी देवेशं शूलपाणिं महेश्वरम् ॥ १२ ॥ सत्यमुग्रोऽसि लोके त्वं ख्यापितो
वृषभध्वज ॥ निष्कारुण्यो दुराराध्यः सर्वभूतभयंकरः ॥ १३ ॥ दिव्यं वर्षसहस्रं तु ध्यायमानस्य शंकरम् ॥ ब्राह्मणस्य वरं कस्मान्न
प्रयच्छसि शंस मे ॥ १४ ॥ एवमुक्तोऽथ देवेशः प्रहस्य गिरिनंदिनीम् ॥ उवाच नरशार्दूल मेघगम्भीरया गिरा ॥ १५ ॥ स्त्री
विनश्यति गर्वेण तपः क्रोधेन नश्यति ॥ गावो दूरप्रचारेण शूद्रान्नेन द्विजोत्तमाः ॥ १६ ॥ क्रोधान्वितो द्विजो गौरि तेन सिद्धिर्न विद्यते ॥
वर्षायुतैस्तथा लक्षैर्न किंचित्कारणं प्रिये ॥ १७ ॥ एवंभूतस्य तस्याऽपि क्रोधस्य चरितं महत् ॥ एवमुक्त्वा ततः शम्भुर्वृषं दध्यौ च तत्क्षणे ॥
॥ १८ ॥ वृषो हि भगवन्नाज्ञा वृषरूपी महेश्वरः ॥ ध्यानप्राप्तः क्षणादेव गर्जयन्वै मुहुर्मुहुः ॥ १९ ॥ किं करोमि सुरश्रेष्ठ ध्यातः केनैव हेतुना ॥
करोमि कस्य निधनमकाले परमेश्वर ॥ २० ॥ ॥ ईश्वर उवाच ॥ ॥ कोपयस्व द्विजश्रेष्ठं गत्वा त्वं भृगुसत्तमम् ॥ येन मे श्रद्दधत्येषा गौरी
लोकैकसुन्दरी ॥ २१ ॥ एतच्छ्रुत्वा वृषो गत्वा धर्षणार्थं द्विजोत्तमम् ॥ नर्मदायास्तटे रम्ये समीपे चाऽऽश्रमे भृगुः ॥ २२ ॥ ततः शृंगैर्गृहीत्वा
तु प्रक्षिप्तो नर्मदाजले ॥ ततः क्रुद्धो भृगुस्तत्र दण्डहस्तो महामुनिः ॥ २३ ॥ पशुवत्ते वधिष्यामि दण्डघातेन मस्तके ॥ शिखायज्ञोपवीते च परि
धानं वरासने ॥ २४ ॥ सुसंवृतं कृतं तेन धावन्वै पृष्ठतो ब्रवीत् ॥ २५ ॥ ॥ भृगुरुवाच ॥ ॥ पापकर्मन्दुराचार कथं यास्यसि मे वृष ॥ अव
मानं समुत्पाद्य कृत्वा गर्त्तं खुरैस्तथा ॥ २६ ॥ गर्जयित्वा महानादं ततो विप्रमपातयत् ॥ आत्मानं पातितं ज्ञात्वा वृषेण परमेष्ठिना ॥ २७ ॥
भृगुः क्रोधेन जज्वाल हुताहुतिरिवानलः ॥ करे गृह्य महादण्डं ब्रह्मदण्डमिवाऽपरम् ॥ २८ ॥ हन्तुकामो वृषं विप्रोऽभ्यधावत युधिष्ठिर ॥ धावमानं
ततो दृष्ट्वा स वृषः पूर्वसागरे ॥२९॥ जम्बूद्वीपं कुशं क्रौंचं शाल्मलिं शाकमेव च ॥ गोमेदं पुष्करं प्राप्तः पूर्वतो दक्षिणापथम् ॥ ३० ॥ उत्तरं पश्चिमं
चैव द्वीपाद्वीपं नरेश्वर ॥ पातालं सुतलं पश्चाद्वितलं च तलातलम् ॥३१॥ तामिस्रमंधतामिस्रं पातालं सप्तमं ययौ ॥ ततो जगाम भूर्लोकं प्राणार्थी



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स वृषोत्तमः ॥ ३२ ॥ भुवः स्वश्चैव च महस्तपः सत्यं जनस्तथा ॥ अनुगम्यमानो विप्रेण न शर्म लभते क्वचित् ॥ ३३ ॥ पापं कृत्वैव पुरुषः कामक्रोधबलार्दितः ॥ ततो जगाम शरणं ब्रह्माणं विष्णुमेव च ॥ ३४ ॥ इन्द्रं चन्द्रं तथाऽऽदित्यैर्याम्यवारुणमारुतैः ॥ यदा सर्वैः परित्यक्तो लोकालोकैः सुरेश्वरैः ॥ ३५ ॥ तदा देवं नमस्कृत्वा रक्ष रक्षस्व चाऽब्रवीत् ॥ वध्यमानं महादेवो भृगुणा परमेष्ठिना ॥ ३६ ॥ सर्वलोकैः परित्यक्तमनाथमिव तं प्रभो ॥ दृष्ट्वा श्रांतं वृषं देवः पतितं चरणाऽग्रतः ॥ ३७ ॥ ततः प्रोवाच भगवान्स्मितपूर्वमिदं वचः ॥ ३८ ॥ ॥ ईश्वर उवाच ॥ ॥ पश्य देवि महाभागे शमं विप्रस्य सुन्दरि ॥ ३९ ॥ ॥ पार्वत्युवाच ॥ ॥ यावद्विप्रो न चास्माकं कुप्यते परमेश्वर ॥ तावद्दूरं प्रयच्छाऽऽशु यदि चेच्छसि मत्प्रियम् ॥ ४० ॥ ततो भस्मी जटी शूली चंद्रार्धकृतशेखरः ॥ उमार्द्धदेहो भगवान्भूत्वा विप्रमुवाच ह ॥ ४१ ॥ भोभो द्विजवरश्रेष्ठ क्रोधस्ते न शमं गतः ॥ यस्मात्तस्मादिदं तात क्रोधस्थानं भविष्यति ॥ ४२ ॥ ततो दृष्ट्वा च तं शंभुं भृगुः श्रेष्ठं त्रिलोचनम् ॥ जानुभ्यामवनिं गत्वा इदं स्तोत्रमुदैरयत् ॥ ४३ ॥ ॥ भृगुरुवाच ॥ ॥ प्रणिपत्य भूतनाथं भवोद्भवं भूतिदं भयातीतम् ॥ भवभीतो भुवनपते विज्ञप्तुं किंचिदिच्छामि ॥ ४४ ॥ त्वद्गुणनिकरान्वक्तुं का शक्तिर्मानुषस्यास्य ॥ वासुकिरपि न तावद्वक्तुं वदनसहस्रं भवेद्यस्य ॥ ४५ ॥ भक्त्या तथाऽपि शंकर शशिधर करजालधवलिताशेष ॥ स्तुतिमुखरस्य महेश्वर प्रसीद तव चरणनिरतस्य ॥ ४६ ॥ सत्त्वं रजस्तमस्त्वं स्थित्युत्पत्तिविनाशनं देव ॥ भवभीतो भुवनपते भुवनेश शरणनिरतस्य ॥४७॥ यमनियमयज्ञदानं वेदाभ्यासश्च धारणायोगः ॥ त्वद्भक्तेः सर्वमिदं नार्हति वै कलासहस्रांशम् ॥ ४८ ॥ उत्कृष्टरससरसायनखड्गांजनविवरपादुकासिद्धिः ॥ चिह्नं हि तव नतानां दृश्यत इह जन्मनि प्रकटम् ॥ ४९ ॥ शाठ्येन यदि प्रणमति वितरसि तस्याऽपि भूतिमिच्छया देव ॥ भवति भवच्छेदकरी भक्तिर्मोक्षाय निर्मिता नाथ ॥ ५० ॥ परदारपरस्वरतं परपरिभवदुःखशोकसंततम् ॥ परवदनवीक्षणपरं परमेश्वर मां परित्राहि ॥ ५१ ॥ अधिकाभिमानमुदितं क्षणभंगुरविभवविलसंतम् ॥ क्रूरं कुपथाभिमुखं शंकर शरणागतं परित्राहि ॥ ५२ ॥ दीनं द्विजं वरार्थे बंधुजने नैव पूरिता ह्याशा ॥ छिंधि महेश्वर तृष्णां किं मूढं मां विडंबयसि ॥ ॥ ५३ ॥ तृष्णां हरस्व शीघ्रं लक्ष्मीं दद हृदयवासिनीं नित्यम् ॥ छिंधि मदमोहपाशं मामुत्तारय भवाच्च देवेश ॥ ५४ ॥ करुणाभ्युदयंनाम स्तोत्रमिदं सर्वसिद्धिदं दिव्यम् ॥ यः पठति भृगुं स्मरति च शिवलोकमसौ प्रयाति देहांते ॥ ५५ ॥ एतच्छ्रुत्वा महादेवः स्तोत्रं च भृगुभाषितम् ॥ उवाच वरदोऽस्मीति देव्या सह वरोत्तमम् ॥ ५६ ॥ ॥ भृगुरुवाच ॥ ॥ प्रसन्नो देवदेवेश यदि देयो वरो मम ॥ सिद्धिक्षेत्रमिदं सर्वं भविता मम नामतः



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



॥ ९७ ॥ भवद्भिः सन्निधानेन स्थातव्यं हि सहोमया ॥ देवक्षेत्रमिदं पुण्यं येन सर्वं भविष्यति ॥९८॥ अत्र स्थाने महास्थानं करोमि जगदीश्वर ॥
तव प्रसादाद्देदेश पूर्यतां मे मनोरथाः ॥ ९९ ॥ ॥ ईश्वर उवाच ॥ ॥ श्रिया कृतमिदं पूर्वं किं न ज्ञातं त्वया द्विज ॥ अनुमान्य श्रियं देवीं
यदीयं मन्यते भवान् ॥ ६० ॥ कुरुष्व यदभिप्रेतं त्वत्कृतं न तदन्यथा ॥ एवमुक्त्वा गते देवे स्नात्वा गत्वा भृगुः श्रियम् ॥ ६१ ॥ कृत्वा च पारणं
तत्र वसन्विप्रस्तया सह ॥ श्रिया च सहितः काल इदं वचनमब्रवीत् ॥ ६२ ॥ ॥ भृगुरुवाच ॥ ॥ यदि ते रोचते भद्रे दुःखासीनं च ते
यदि ॥ त्वया वृते महाक्षेत्रे स्वीयं स्थानं करोम्यहम् ॥ ६३ ॥ ॥ श्रीरुवाच ॥ ॥ मम नाम्ना तु विप्रर्षे तव नाम्ना तु शोभनम् ॥ स्थानं कुरुष्वा
भिप्रेतमविरोधेन मे मतिः ॥ ६४ ॥ ॥ भृगुरुवाच ॥ ॥ कच्छपाधिष्ठितं ह्येतत्तस्य पृष्ठिगतं रमे ॥ संमंत्र्य सहितं तेन शोभनं भवती कुरु
॥ ६५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे भृगुकच्छोत्पत्तिवर्णनंनामैकाशीत्युत्तरशततमो
ऽध्यायः ॥ १८१ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो भृगुः श्रिया चैव समेतः कच्छपं गतः ॥ अभिनंद्य यथान्यायमुवाच
वचनं शुभम् ॥ १ ॥ त्वया धृता धरा सर्वा तथा लोकाश्चराऽचराः ॥ तथैव पुण्यभावत्वात्स्थितस्तत्र महामते ॥ २ ॥ चातुर्विद्यस्य संस्थानं करोमि
रमया सह ॥ यदि त्वं मन्यसे देव तदादेशय मां विभो ॥ ३ ॥ ॥ कूर्म उवाच ॥ ॥ एवमेव द्विजश्रेष्ठ मम नामांकितं पुरम् ॥ भविष्यति
महत्कालं ममोपरि सुसंस्थितम् ॥ ४ ॥ अचलं सुस्थिरं तात न भीः कार्या सुलोचने ॥ एतच्छ्रुत्वा शुभं वाक्यं कच्छपस्य मुखाच्च्युतम् ॥ ५ ॥
हृष्टस्तुष्टः श्रिया सार्द्धं पद्मयोनिसुतो भृगुः ॥ अभीचि[१] उदये प्राप्ते कृतकौतुकमंगलः ॥ ६ ॥ नंदने वत्सरे माघे पंचम्यां[२] भरतर्षभ ॥ शस्ते तु ह्युत्त
रायोगे कुंभस्थे शशिमंडले ॥ ७ ॥ रेवाया उत्तरे तीरे गभीरे चाभिवारुणि ॥ प्रागुदक्प्रवणे देशे कोटितीर्थसमन्वितम् ॥ ८ ॥ क्रोशप्रमाणं तत्क्षेत्रं
प्रासादशतसंकुलम् ॥ अचिरेणैव कालेन तपोबलसमन्वितः ॥ विचिंत्य विश्वकर्माणं चकार भृगुसत्तमः ॥ ९ ॥ ब्राह्मणा वेदविद्वांसः क्षत्रिया राज्य
पालकाः ॥ वैश्या वृत्तिरतास्तत्र शूद्राः शुश्रूषकास्त्रिषु[३] ॥ १० ॥ एवं श्रिया वृतं क्षेत्रं परमानंदनंदितम् ॥ निर्म्मितं भृगुणा तात सर्वपातकनाशनम् ॥
॥१३३॥ ॥ ११ ॥ इति भृगुकच्छोत्पत्तिः ॥ ॥ मार्कंडेय उवाच ॥ ॥ ततःकालेन महता कस्मिंश्चित्कारणांतरे ॥ देवलोकं जगामाशु लक्ष्मीर्ऋषिसमा ॥३०७॥
गमे ॥ १२ ॥ समर्प्य कुंचिकाट्टालं भृगवे ब्रह्मवादिने ॥ पालयस्व यथार्थं वै स्थानकं मम सुव्रत ॥१३॥ देवकार्याण्यशेषाणि कृत्वा श्रीः पुनरा

१ सर्वपुस्तकेष्वयमेत्र पाठः । एतस्यार्थो नात्रगम्यते । २ शुक्लपक्षतः—इ० पा० । ३ त्रिषु—ब्राह्मणक्षत्रियवैश्येषु । अवसन्—इत्यध्याहारे वाक्यपरिसमाप्तिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गता ॥ आजगाम रमा देवी भृगुकच्छं त्वरान्विता ॥ १४ ॥ प्रार्थितं कुंचिकाट्टालं स्वगृहं सपरिग्रहम् ॥ भृगुर्यदा तदा पार्थ मिथ्या नास्ति तदा वदत् ॥ १५ ॥ एवं विवादः सुमहान्संजातश्च नरेश्वर ॥ ममेति मम चैवेति परस्परसमागमे ॥ १६ ॥ ततः कालेन महता भृगुणा परमर्षिणा ॥ चातुर्विद्यप्रमाणार्थं चकार महतीं स्थितिम् ॥ १७ ॥ अस्मदीयं यथा सर्वं नगरं मृगलोचने ॥ चातुर्विद्या द्विजाः सर्वे तथा जानंति सुन्दरि ॥१८॥ ॥ श्रीरुवाच ॥ ॥ प्रमाणं मम विप्रेंद्र चातुर्वण्या न संशयः ॥ मदीयं वा त्वदीयं वा कथयंतु द्विजोत्तमाः ॥ १९ ॥ ततः समस्तैर्विबुधैः संप्रधार्य परस्परम् ॥ द्विधा तैर्वाक्स्थलं दृष्ट्वा ब्राह्मणा नृपसंहितम् ॥ २० ॥ अष्टादशसहस्राणि नोचुर्वै किंचिदुत्तरम् ॥ अष्टादशसहस्रेषु भृगुकोपभयान्नृप ॥ उक्तं च तालकं हस्ते यस्य तस्येदमुत्तरम् ॥ २१ ॥ एतच्छ्रुत्वा तु सा देवी निगमं नैगमैः कृतम् ॥ क्रोधेन महताविष्टा शशाप द्विजपुंगवान् ॥ २२ ॥ ॥ श्रीदेव्युवाच ॥ ॥ यस्मात्सत्यं समुत्सृज्य लोभोपहतमानसैः ॥ मदीयं लोपितं स्थानं तस्माच्छृण्वंतु मे गिरम् ॥ ॥ २३ ॥ त्रिपौरुषा भवेद्विद्या त्रिपुरुषं न भवेद्धनम् ॥ न द्वितीयस्तु वो वेदः पठितो भवति द्विजाः ॥ २४ ॥ गृहाणि न द्विभौमानि[1] न च भूतिः स्थिरा द्विजाः ॥ पक्षपातेन वो धर्मो न च निःश्रेयभावतः ॥२५॥ इष्टो गोत्रजनः कश्चिल्लोभेनावृतमानसः ॥ न च द्वैधं परित्यज्य ह्येकं सत्यं भविष्यति ॥ २६ ॥ अद्यप्रभृति सर्वेषामहंकारो द्विजन्मनाम् ॥ न पिता पुत्रवाक्येन न पुत्रः पितृकर्मणि ॥ २७ ॥ अहंकारकृताः सर्वे भविष्यंति न संशयः ॥ इति शप्त्वा रमादेवी तदैव च दिवं ययौ ॥ २८ ॥ ततो गतायां वै लक्ष्म्यां देवा ब्रह्मर्षयोऽमलाः ॥ क्रोधलोभमिदं स्थानं तेऽपि चोक्त्वा दिवं ययुः ॥ २९ ॥ गतां दृष्ट्वा ततो देवीमृषींश्चैव तपोधनान् ॥ भृगुश्च परमेष्ठी स विषादमगमत्परम् ॥ प्रसादयामास पुनः शंकरं त्रिपुरांतकम् ॥ ३० ॥ तपसा महता पार्थ ततस्तुष्टो महेश्वरः ॥ उवाच वचनं काले हर्षयन्भृगुसत्तमम् ॥ ३१ ॥ किं विषण्णोऽसि विप्रेंद्र किं वा संतापकारणम् ॥ मयि प्रसन्नेऽपि तव ह्येतत्कथय मेऽनघ ॥ ३२ ॥ ॥ भृगुरुवाच ॥ ॥ शापयित्वा द्विजान्सर्वान्पुरा लक्ष्मीर्विनिर्गता ॥ अपवित्रमिदं चोक्त्वा ततो देवा विनिर्गताः ॥ ३३ ॥ ॥ ईश्वर उवाच ॥ ॥ पुरा मया यथा प्रोक्तं तत्तथा न तदन्यथा ॥ क्रोधस्थानमसंदेहं तथाऽन्यदपि तच्छृणु ॥ ३४ ॥ तत्र स्थानसमुद्भूता महद्भयविवर्जिताः ॥ ब्राह्मणा मत्प्रसादेन भविष्यंति न संशयः ॥ ३५ ॥ वेदविद्याव्रतस्नाताः सर्वशास्त्रविशारदाः ॥ येपि ते शतसाहस्रास्त्वरिता ह्यागतास्त्विह ॥ ३६ ॥ अपठस्यापि मूर्खस्य सर्वावस्थांगतस्य च ॥ उत्तरादुत्तरं शक्तो दातुं

१ द्विभौमानि उपरितनाट्टालक (माडी) सहितानि इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



न तु भृगूत्तम ॥ ३७ ॥ कोटितीर्थमिदं स्थानं सर्वपापप्रणाशनम् ॥ अद्यप्रभृति विप्रेंद्र भविष्यति न संशयः ॥ ३८ ॥ मत्प्रसादाद्देवगणैः सेवित
च भविष्यति ॥ भृगुक्षेत्रे मृता ये तु कृमिकीटपतंगकाः ॥ ३९ ॥ वासंस्तेषां शिवे लोके मत्प्रसादाद्भविष्यति ॥ वृषखाते नरः स्नात्वा पूजयित्वा
महेश्वरम् ॥ ४० ॥ सर्वमेधस्य यज्ञस्य फलं प्राप्नोत्यसंशयम् ॥ भृगुतीर्थे नरः स्नात्वा तर्पयेत्पितृदेवताः ॥ ४१ ॥ तस्य ते द्वादशाब्दानि शांतिं
गच्छन्ति तर्पिताः ॥ दधिक्षीरेण तोयेन घृतेन मधुना सह ॥ ४२ ॥ ये स्नपंति विरूपाक्षं तेषां वासस्त्रिविष्टपे ॥ मत्प्रसादाद्द्विजश्रेष्ठ सर्वदेवानुसेवि
तम् ॥ ४३ ॥ भविष्यति भृगुक्षेत्रं कुरुक्षेत्रादिभिः समम् ॥ मार्त्तंडग्रहणे प्राप्ते यवं कृत्वा हिरण्मयम् ॥ ४४ ॥ दत्त्वा शिरसि यः स्नाति भृगुक्षेत्रे द्विजो
त्तम ॥ अविचारेण तं विद्धि संस्नातं कुरुजांगले ॥४५॥ अहं चैव वसिष्यामि अंबिका च मम प्रिया ॥ सर्वदुःखापहा देवी नाम्ना सौभाग्यसुन्दरी ॥
॥ ४६ ॥ वसिष्यामि तया देव्या सहितो भृगुकच्छके ॥ एवमुक्त्वा स्थितो देवो भृगुकच्छेंबिका तथा ॥ ४७ ॥ भृगुस्तु स्वपुरं प्रायाद्ब्रह्मघोषनिना
दितम् ॥ ऋग्यजुःसामघोषेण ह्यथर्वणनिनादितम् ॥ ४८ ॥ तत्र तीर्थे तु यः स्नात्वा वृषमुत्सृजते नरः ॥ स याति शिवसायुज्यमित्येवं
शंकरोऽब्रवीत् ॥ ४९ ॥ तत्र तीर्थे तु यः स्नात्वा चैत्रे मासि समाचरेत् ॥ दद्याच्च लवणं विप्रे पूज्य सौभाग्यसुन्दरीम् ॥५०॥ गोभूहिरण्यं विप्रेभ्यः
प्रीयेतां ललिताशिवौ ॥ न दुःखं दुर्भगत्वं च वियोगं पतिना सह ॥ ५१ ॥ प्राप्नोति नारी राजेंद्र भृगुतीर्थाप्लवेन च ॥ यस्तु नित्यं भृगुं देवं
पश्येद्वै पांडुनंदन ॥ ५२ ॥ आब्रह्मसदनं यावत्तत्रस्थैर्दैवतैः सह ॥ यत्फलं समवाप्नोति तच्छृणुष्व नृपोत्तम ॥ ५३ ॥ सुवर्णशृंगीं कपिलां पय
स्विनीं साध्वीं सुशीलां तरुणीं सवत्साम् ॥ दत्त्वा द्विजे सर्वव्रतोपपन्ने फलं च यत्स्यात्तदिहैव नूनम् ॥ ५४ ॥ समाः सहस्राणि तु सप्त वै जले
म्रियेल्लभेद्द्वादशवह्निमध्ये ॥ त्यजंस्तनुं शूरवृत्त्या नरेंद्र शक्राऽतिथ्यं याति वै मर्त्यधर्मा ॥ ५५ ॥ आख्यानमेतच्च सदा यशस्यं स्वर्ग्यं धन्यं
पुत्र्यमायुष्यकारि ॥ शृण्वल्लँभेत्सर्वमेतद्धि भक्त्या पर्वणिपर्वण्याजमीढस्सदैव ॥ ५६ ॥ संन्यासं कुरुते यस्तु भृगुतीर्थे विधानतः ॥ स मृतः परमं
स्थानं गच्छेद्वै यच्च दुर्लभम् ॥ ५७ ॥ एतच्छ्रुत्वा भृगुश्रेष्ठो देवदेवेन भाषितम् ॥ प्रहृष्टवदनो भूत्वा तत्रैव संस्थितो द्विजः ॥ ५८ ॥ तिरोभावं
गते देवे भृगुःश्रेष्ठो द्विजोत्तमः ॥ स्वमूर्तिं तत्र मुक्त्वा तु ब्रह्मलोकं जगाम ह ॥ ५९ ॥ भृगुकच्छस्य चोत्पत्तिः कथिता तव पांडव ॥ संक्षेपेण
महाराज सर्वपापप्रणाशनी ॥ ६० ॥ एतत्पुण्यं पापहरं क्षेत्रं देवेन कीर्त्तितम् ॥ चतुर्युगसहस्रेण पितामहदिनं स्मृतम् ॥ ६१ ॥ प्राप्ते ब्रह्मदिने

१ शक्नुयात्—इति शेषः । २ इति संकल्प्य—इति शेषः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विप्रा जायते युगसंभवः ॥ न पश्यामि त्विदं क्षेत्रमिति रुद्रः स्वयं जगौ ॥ ६२ ॥ यः शृणोति त्विदं भक्त्या नारी वा पुरुषोऽपि वा ॥ स याति परमं लोकमिति रुद्रः स्वयं जगौ ॥ ६३ ॥ देवखाते नरः स्नात्वा पिंडदानादिसत्क्रियाम् ॥ यां करोति नृपश्रेष्ठ तामक्षयफलां विदुः ॥ ६४ ॥ य इमं शृणुयाद्भक्त्या भृगुकच्छस्य विस्तरम् ॥ कोटितीर्थफलं तस्य भवेद्वै नाऽत्र संशयः ॥ ६५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे भृगुकच्छतीर्थमाहात्म्यवर्णनंनाम द्व्यशीत्युत्तरशततमोऽध्यायः ॥ ॥ १८२ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ अतः परं महाराज गच्छेत्केदारसंज्ञकम् ॥ यत्र गत्वा महाराज श्राद्धं कृत्वा पिबेज्जलम् ॥ संपूज्य देवदेवेशं केदारोत्थं फलं लभेत् ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ यथमत्र सुरश्रेष्ठ केदाराख्यः स्थितः स्वयम् ॥ उत्तरे नर्मदाकूले एतद्विस्तरतो वद ॥ २ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ पुरा कृतयुगस्याऽऽदौ शंकरस्तु महेश्वरः ॥ भृगुणाराधितः शप्तः श्रिया च भृगुकच्छके ॥३॥ अपवित्रमिदं क्षेत्रं सर्ववेदविवार्जितम् ॥ भविष्यति नृपश्रेष्ठ गतेत्युक्त्वा हरिप्रिया ॥ ४ ॥ तपश्चचार विपुलं भृगुर्वर्षसहस्रकम् ॥ वायुभक्षो निराहारश्चिरं धमनिसंततः ॥ ५ ॥ ततः प्रत्यक्षतामागाल्लिंगीभूतो महेश्वरः ॥ प्रादुर्भूतस्तु सहसा भित्त्वा पातालसत्तकम् ॥ ६ ॥ ददर्शाऽथ भृगुर्देवमौत्पलीं केलिकामिव ॥ स्तुतिं चक्रे स देवाय स्थाणवे त्र्यंबकेति च ॥७॥ एवं स्तुतः स भगवान्प्रोवाच प्रहसन्निव ॥ पुनःपुनर्भृगुं मत्तः किन्नु प्रार्थयसे मुने ॥ ८ ॥ ॥ भृगुरुवाच ॥ ॥ पंचक्रोशमिदं क्षेत्रं पद्मया शापितं विभो ॥ अपवित्रमिदं क्षेत्रं सर्ववेदविवर्जितम् ॥ भविष्यतीति च प्रोच्य गता देवी दिवं प्रति ॥ ९ ॥ पुनः पवित्रतां याति यथेदं क्षेत्रमुत्तमम् ॥तथा कुरु महेशान प्रसन्नो यदि शंकर ॥ १० ॥ ॥ ईश्वर उवाच ॥ ॥ केदाराख्यमिदं ब्रह्मँल्लिंगमाद्यं भविष्यति ॥ कृत्वेदमादिलिंगानि भविष्यंति दशैव हि ॥ ११ ॥ एकादशमदृश्यं हि क्षेत्रमध्ये भविष्यति ॥ पावयिष्यति तत्क्षेत्रमेकादशः स्वयं विभुः ॥ १२ ॥ तथा वै द्वादशादित्या मत्प्रसादात्तु मूर्त्तितः ॥ वसिष्यंति भृगुक्षेत्रे रोगदुःखनिबर्हणाः ॥ १३ ॥ दुर्गा ह्यष्टादश तथा क्षेत्रपालास्तु षोडश ॥ भृगुक्षेत्रे भविष्यंति वीरभद्राश्च मातरः ॥ १४ ॥ पवित्रीकृतमेतद्धि नित्यं क्षेत्रं भविष्यति ॥ माघमासे ह्युषःकाले स्नात्वा मासं जितेंद्रियः ॥ १५ ॥ यः पूजयति केदारं स गच्छेच्छिवमंदिरम् ॥ तस्मिंस्तीर्थे नरः स्नात्वा पितॄनुद्दिश्य भारत ॥ श्राद्धं ददाति विधिवत्तस्य प्रीताः पितामहाः ॥ १६ ॥ इति ते कथितं सम्यक्केदाराख्यं सविस्तरम् ॥ सर्वं पापहरं पुण्यं सर्वदुःखप्रणाशनम् ॥ १७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखण्डे केदारेश्वरतीर्थमाहात्म्यवर्णनंनाम त्र्यशीत्युत्तरशततमोऽध्यायः ॥ १८३ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ धौतपापं ततो गच्छेद्भृगुतीर्थं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



समीपतः ॥ वृषेण तु भृगुस्तत्र भूयोभूयो धुतस्ततः ॥ १ ॥ धौतपापं तु तत्तेन नाम्ना लोकेषु विश्रुतम् ॥ तत्र स्थितो महादेवस्तुष्ट्यर्थं भृगुसत्तमे ॥ २ ॥ तत्र तीर्थे तु यः स्नात्वा शाठ्येनाऽपि नरेश्वर ॥ मुच्यते सर्वपापेभ्यो नाऽत्र कार्या विचारणा ॥ ३ ॥ यस्तु सम्यग्विधानेन तत्र स्नात्वाऽर्चयेच्छिवम् ॥ देवान्पितॄन्समभ्यर्च्य मुच्यते सर्वपातकैः ॥ ४ ॥ ब्रह्महत्या गवां वध्या तत्र तीर्थे युधिष्ठिर ॥ प्रविशेन्न सदा भीता प्रविष्टापि क्षयं व्रजेत् ॥ ५ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ आश्चर्यभूतं लोकेऽस्मिन्कथयस्व द्विजोत्तम ॥ प्रविशेन्न ब्रह्महत्या यथा वै धौतपाप्मनि ॥ ६ ॥ ब्रह्महत्यासमं पापं भविता नेह किंचन ॥ कथं वा धौतपापे तु प्रविष्टं नश्यते द्विज ॥ एतद्विस्तरतः सर्वं पृच्छामि वद कौतुकात् ॥ ७ ॥ ॥ ॥ मार्कंडेय उवाच ॥ ॥ आदिसर्गे पुरा शंभुर्ब्रह्मणः परमेष्ठिनः ॥ विकारं पंचमं दृष्ट्वा शिरोऽश्वमुखसन्निभम् ॥ ८ ॥ अंगुष्ठांगुलियोगेन तच्छिरस्तेन कृंतितम् ॥ कृत्तमात्रे तु शिरसि ब्रह्महत्याऽभवत्तदा ॥ ९ ॥ ब्रह्महत्यायुतश्चासीदुत्तरे नर्मदातटे ॥ धुनितं तु यतो राजन्वृषेण धर्म्मर्मूर्त्तिना ॥ १० ॥ तत्र धौतेश्वरीं देवीं स्थापितां वृषभेण तु ॥ ददर्श भगवाञ्छंभुः सर्वदैवतपूजिताम् ॥ ११ ॥ दृष्ट्वा धौतेश्वरीं दुर्गां ब्रह्महत्याविनाशिनीम् ॥ तत्र विश्रममाणश्च शंकरस्त्रिपुरांतकः ॥ १२ ॥ स शंकरो ब्रह्महत्या विहीनं मेने त्मानं[१] तस्य तीर्थस्य भावात् ॥ सुविस्मितो देवदेवो वरेण्यो दृष्ट्वा दूरे ब्रह्महत्यां च तीर्थात् ॥ १३ ॥ विधौतपापं महितं धर्मशक्त्या विशेन्न हत्या देवीभयात्प्रभीता ॥ रक्तांबरा रक्तमाल्योपयुक्ता कृष्णा नारी रक्तदामप्रसक्ता ॥ १४ ॥ मां वांच्छंती स्कंधदेशं रहस्ये दूरे स्थिता तीर्थवर्यप्रभावात् ॥ संचिंत्य देवो मनसा स्मरारिर्वासाय बुद्धिं तत्र तीर्थे चकार ॥ १५ ॥ विमृश्य देवो बहुशः स्थितः स्वयं विधौतपापः प्रथितः पृथिव्याम् ॥ बभूव तत्रैव निवासकारी विधूतपापनिकटप्रदेशे ॥ ॥ १६ ॥ तदाप्रभृति राजेंद्र ब्रह्महत्याविनाशनम् ॥ विधौतपापं तत्तीर्थं नर्मदायां व्यवस्थितम् ॥ १७ ॥ अश्वयुक्च्छुक्लनवमी तत्र तीर्थे विशिष्यते ॥ दिनत्रयं तु, राजेंद्र सप्तम्यादिविशेषतः ॥ १८ ॥ समुपोष्याष्टमीं भक्त्या सांगं वेदं पठेत्तु यः ॥ अहोरात्रेण चैकेन ऋग्यजुःसामसंज्ञकम् ॥ १९ ॥ अभ्यसन्ब्रह्महत्याया मुच्यते नाऽत्र संशयः ॥ वृषलीगमनं चैव यश्च गुर्वंगनागमः ॥ २० ॥ स्नात्वा ब्रह्मरसोत्कृष्टे कुंभेनैव प्रमुच्यते ॥ वंध्या स्त्रीजननी या तु काकवंध्या मृतप्रजा ॥ २१ ॥ सापि कुंभोदकैः स्नाता जीवत्पुत्रा प्रजावती ॥ अपठस्तु नरोपोष्य[२] ऋग्यजुःसामसंभवाम् ॥ २२ ॥ ऋचमेकां जपन्विप्रस्तथा पर्वणि यो नृप ॥ अनृचोपोष्य गायत्रीं जपेद्वै वेदमातरम् ॥ २३ ॥



१ त्मानम्—आत्मानम्—आकारलोप आर्षः। २ नरः—उपोष्य—इति पदच्छेदः संधिरार्षः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जपन्नवम्यां विप्रेंद्रो मुच्यते पापसंचयात् ॥ एवं तु कथितं तात पुराणोक्तं महर्षिभिः ॥ २४ ॥ धौतपापं महापुण्यं शिवेन कथितं मम ॥ प्राणत्यागं तु यः कुर्याज्जले वाऽग्नौ स्थलेऽपि वा ॥ २५ ॥ स गच्छति विमानेन ज्वलनार्कसमप्रभः ॥ हंसबर्हिप्रयुक्तेन सेव्यमानोऽप्सरोगणैः ॥ २६ ॥ शिवस्य परमं स्थानं यत्सुरैरपि दुर्लभम् ॥ क्रीडते स्वेच्छया तत्र यावच्चन्द्रार्कतारकम् ॥ २७ ॥ धौतपापे तु या नारी कुरुते प्राणसंक्षयम् ॥ तत्क्षणादेव सा पार्थ पुरुषत्वमवाप्नुयात् ॥ २८ ॥ अथ किं बहुनोक्तेन शुभं वा यदि वाऽशुभम् ॥ तदक्षयफलं सर्वं धौतपापे कृतं नृप ॥ २९ ॥ संन्यसेन्नियमेनान्नं संन्यसेद्विषयादिकम् ॥ फलमूलादिकं चैव जलमेकं न संत्यजेत् ॥ ३० ॥ एवं यः कुरुते पार्थ रुद्रलोकं स गच्छति ॥ तत्र भुक्त्वाखिलान्भोगाञ्जायते भुवि भूपतिः ॥ ३१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखंडे रेवाखण्डे धौतपापतीर्थमाहात्म्यवर्णनंनाम चतुरशीत्युत्तरशततमोऽध्यायः ॥ १८४ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल एरंडीतीर्थमुत्तमम् ॥ स्नानमात्रेण तत्रैव ब्रह्महत्या प्रणश्यति ॥ १ ॥ मासि चाश्वयुजे तत्र शुक्लपक्षे चतुर्दशीम् ॥ उपोष्य प्रयतः स्नातस्तर्प्पयेत्पितृदेवताः ॥ २ ॥ पुत्रर्द्धिरूपसंपन्नो जीवेच्च शरदां शतम् ॥ शिवलोकं मृतो याति नाऽत्र कार्या विचारणा ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखंडे रेवाखंडे एरण्डीतीर्थमाहात्म्यवर्णनंनाम पंचाशीत्युत्तरशततमोऽध्यायः ॥ १८५ ॥ ॥ छ ॥ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल तीर्थं कनखलोत्तमम् ॥ गरुडेन तपस्तप्तं पूजयित्वा महेश्वरम् ॥ १ ॥ दिव्यं वर्षशतं१ याव ज्जातमात्रेण भारत ॥ तपोजपैः कृशीभूतो दृष्टो देवेन शंभुना ॥ २ ॥ ततस्तुष्टो महादेवो वैनतेयं मनोजवम् ॥ उवाच परमं वाक्यं विनतानंदवर्धनम् ॥ ३ ॥ प्रसन्नस्ते महाभाग वरं वरय सुव्रत ॥ दुर्लभं त्रिषु लोकेषु ददामि तव खेचर ॥ ४ ॥ ॥ गरुड उवाच ॥ ॥ इच्छामि वाहनं विष्णोर्द्विजेंद्रत्वं सुरेश्वर ॥ प्रसन्ने त्वयि मे सर्वं भवत्विति मतिर्मम ॥ ५ ॥ ॥ श्रीमहेश उवाच ॥ ॥ दुर्लभः प्राणिनां तात यो वरः प्रार्थितोऽनघ ॥ देवदेवस्य वहनं द्विजेंद्रत्वं सुदुर्लभम् ॥ ६ ॥ नारायणोदरे सर्वं त्रैलोक्यं सचराचरम् ॥ त्वया स कथमूह्येत देवदेवो जगद्गुरुः ॥ ७ ॥ तेनैव स्थापितश्चेंद्रस्त्रैलोक्ये सचराचरे ॥ कथमन्यस्य चेंद्रत्वं भवतीति सुदुर्लभम् ॥ ८ ॥ तथाऽपि मम वाक्येन वाहनं त्वं भविष्यसि ॥ शंखचक्रगदापाणेर्वहतोऽपि जगत्त्रयम् ॥ ९ ॥ इन्द्रस्त्वं पक्षिणां मध्ये भविष्यसि न संशयः ॥ इति दत्त्वा वरं तस्मा अंतर्धानं गतो हरः ॥ १० ॥ ततो

१ आत्मानम्—इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



गते महादेवे ह्यरुणस्याऽनुजो नृप ॥ आराधयामास तदा चामुण्डां मुण्डमण्डिताम् ॥ ११ ॥ श्मशानवासिनीं देवीं बहुभूतसमन्विताम् ॥
योगिनीं योगसंसिद्धां वसामांसासवप्रियाम् ॥ १२ ॥ ध्यातमात्रा तु तेनैव प्रत्यक्षा ह्यभवत्तदा ॥ जालंधरे च या सिद्धिः कौलीने उड्डिशे परे ॥
॥ १३ ॥ समग्रा सा भृगुक्षेत्रे सिद्धक्षेत्रे तु संस्थिता ॥ चामुण्डा तत्र सा देवी सिद्धक्षेत्रे व्यवस्थिता ॥ १४ ॥ संस्तुता ऋषिभिर्देवैर्योगक्षेमार्थसि
द्धये ॥ विनताऽऽनंदजननस्तत्र तां योगिनीं नृप ॥ भक्त्या प्रसादयामास स्तोत्रैर्वैदिकलौकिकैः ॥ १५ ॥ ॥ गरुड उवाच ॥ ॥ ॐया सा
क्षुत्क्षामकण्ठा नवरुधिरमुखा प्रेतपद्मासनस्था भूतानां वृन्दवृन्दैः पितृवननिलया क्रीडते शूलहस्ता ॥ शस्त्रध्वस्तप्रवीरव्रजरुधिरगलन्मुण्डमालोत्त
रीया देवी श्रीवीरमाता विमलशशिनिभा पातु वश्चर्ममुण्डा ॥ १६ ॥ या सा क्षुत्क्षामकण्ठा विकृतभयकरी त्रासिनी दुष्कृतानां मुञ्चज्ज्वालाकला
पैर्दशनकसमसैः खादति प्रेतमांसम् ॥ पिंगोर्द्धोर्द्धद्धजूटारविसदृशतनुर्व्याघ्रचर्मोत्तरीया दैत्येंद्रैर्यक्षरक्षोऽप्सरसुरनमिता पातु वश्चर्ममुण्डा ॥ १७ ॥
या सा दोर्दंडचंडैर्डमरुरणरणाटोपटंकारघंटैः कल्पांतोत्पातवाताहतपटुपटहैर्वल्गते भूतमाता ॥ क्षुत्क्षामा शुष्ककुक्षिः खरतरनखरैः क्षोदति प्रेत
मांसं मुंचंती चाट्टहासं घुरघुरितरवा पातु वश्चर्ममुण्डा ॥ १८ ॥ या सा निम्नोदराभा विकृतभवभयत्रासिनी शूलहस्ता चामुंडा मुण्डघाता रणरणि
तरणज्झल्लरीनादरम्या ॥ त्रैलोक्यं त्रासयन्ती ककहकहकहैर्घोररावैरनेकैर्नृत्यंती मातृमध्ये पितृवननिलया पातु वश्चर्ममुंडा ॥ १९ ॥ याँ धत्ते
विश्वमखिलं निजांशेन महोज्वला ॥ कनकप्रसवे लीना पातु मां कनकेश्वरी ॥ २० ॥ हिमाद्रिसंभवा देवी दयादर्शितविग्रहा ॥ शिवप्रिया शिवे
सक्ता पातु मां कनकेश्वरी ॥ २१ ॥ अनादिजगदादिर्या रत्नगर्भा वसुप्रिया ॥ रथांगपाणिना पद्मा पातु मां कनकेश्वरी ॥ २२ ॥ सावित्री या च
गायत्री मृडानी वागथेंदिरा ॥ स्मर्तॄणां या सुखं दत्ते पातु मां कनकेश्वरी ॥ २३ ॥ सौम्यासौम्यैः सदा रूपैः सृजत्यवति या जगत् ॥ परा शक्तिः
परा बुद्धिः पातु मां कनकेश्वरी ॥ २४ ॥ ब्रह्मणः सर्गसमये सृज्यशक्तिः परा तु या ॥ जगन्माया जगद्धात्री पातु मां कनकेश्वरी ॥ २५ ॥ विश्वस्य
पालने विष्णोर्या शक्तिः परिपालिका ॥ मदनोन्मादिनी मुख्या पातुमां कनकेश्वरी ॥ २६ ॥ विश्वसंलयने मुख्या या रुद्रेण समाश्रिता ॥ रौद्री
शक्तिः शिवानंता पातु मां कनकेश्वरी ॥ २७ ॥ कैलाससानुसंरूढकनकप्रसवेशया ॥ भस्मकाभिहता पूर्वं पातु मां कनकेश्वरी ॥ २८ ॥ पतिप्र

१ भक्तानां पूरयन्ती विविधमनसिजान्पूजिता सेविता वै साद्या शक्तिर्महेशप्रमुखसुरनता पातु वश्चर्ममुण्डा॥–इ०पा० । २ शिवगिरिनिलया–इ० पा० । ३ अत्र 'या धत्ते' इत्यारभ्य प्रापिताः प्रथमा शक्तिः पातु मां कनकेश्वरी–इत्यन्तः पाठः केषुचित्पुस्तकेषु नास्ति ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावमिच्छंती त्रस्यन्ती या विना पतिम् ॥ अबला त्वेकभावा च पातु मां कनकेश्वरी ॥ २९ ॥ विश्वसंरक्षणे सक्ता रक्षिता कनकेन या ॥ आब्रह्म स्तम्बजननी पातु मां कनकेश्वरी ॥ ३० ॥ ब्रह्मविष्णवीश्वराः शक्त्या शरीरग्रहणं यया ॥ प्रापिताः प्रथमा शक्तिः पातु मां कनकेश्वरी ॥ ३१ ॥ श्रुत्वा तु गरुडेनोक्तं देवीवृत्तचतुष्टयम् ॥ प्रसन्ना सम्मुखी भूत्वा वाक्यमेतदुवाच ह ॥ ३२ ॥ ॥ श्रीचामुण्डोवाच ॥ ॥ प्रसन्ना ते महासत्त्व वरं वरय वाञ्छितम् ॥ ददामि ते द्विजश्रेष्ठ यत्ते मनसि रोचते ॥ ३३ ॥ ॥ गरुड उवाच ॥ ॥ अजरश्चामरश्चैव अधृष्यश्च सुरासुरैः ॥ तव प्रसादाच्चैवान्यैरजेयश्च भवाम्यहम् ॥ ३४ ॥ त्वया चाऽत्र सदा देवि स्थातव्यं तीर्थसन्निधौ ॥ ॥ मार्कंडेय उवाच ॥ ॥ एवं भविष्यतीत्युक्त्वा देवी देवैरभिष्टुता ॥ ३५ ॥ जगामाकाशमाविश्य भूतसंघसमन्विता ॥ यदा लक्ष्म्या नृपश्रेष्ठ स्थापितं पुरमुत्तमम् ॥ ३६ ॥ अनुमान्य तदा देवीं कृतं तस्यां समर्पितम् ॥ ॥ लक्ष्मीरुवाच ॥ ॥ रक्षणाय मया देवि योगक्षेमार्थसिद्धये ॥ ३७ ॥ मातृवत्प्रतिपाल्यं ते सदा देवि पुरं मम ॥ गरुडोऽपि ततः स्नात्वा संपूज्य कनकेश्वरीम् ॥ ३८ ॥ तीर्थं तत्रैव संस्थाप्य जगामाऽऽकाशमुत्तमम् ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्पितृदेवताः ॥ ३९ ॥ सर्वकामसमृद्धस्य यज्ञस्य फलमश्नुते ॥ गन्धपुष्पादिभिर्यस्तु पूजयेत्कनकेश्वरम् ॥ ४० ॥ तस्य योगैश्वर्यसिद्धिर्योगपीठेषु जायते ॥ मृतो योगेश्वरं लोकं जयशब्दादिमंगलैः ॥ स गच्छेन्नाऽत्र संदेहो योगिनीगणसंयुतः ॥ ४१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे कनखलेश्वरतीर्थमाहात्म्यवर्णनंनाम षडशीत्युत्तरशततमोऽध्यायः ॥ १८६ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ जालेश्वरं ततो गच्छेल्लिंगमाद्यं स्वयंभुवः ॥ कालाग्निरुद्रं विख्यातं भृगुकच्छे व्यवस्थितम् ॥ १ ॥ सर्वपापप्रशमनं सर्वोपद्रवनाशनम् ॥ क्षेत्रपापविनाशाय कृपया च समुत्थितम् ॥ २ ॥ पुरा कल्पेऽसुरगणैराक्रान्ते भुवनत्रये ॥ वेदोक्तकर्मनाशे च धर्मे च विलयं गते ॥ ३ ॥ देवर्षिमुनिसिद्धेषु विश्वासपरमेषु च ॥ कालाग्निरुद्रादुत्पन्नो धूमः कालोद्भवोद्भवः ॥ ४ ॥ धूमात्समुत्थितं लिंगं भित्त्वा पातालसप्तकम् ॥ अवटं दक्षिणे कृत्वा लिंगं तत्रैव तिष्ठति ॥ ५ ॥ तत्र तीर्थे नृपश्रेष्ठ कुण्डं ज्वालासमुद्भवम् ॥ यत्र सा पतिता ज्वाला शिवस्य दहतः पुरम् ॥ ६ ॥ तत्रावाटं समुद्भूतं धूमावर्त्तस्ततोऽभवत् ॥ तस्मिन्कुंडे तु यः स्नानं कृत्वा वै नर्मदाजले ॥ ७ ॥ कुर्याच्छ्राद्धं पितृभ्यो वै पूजयेच्च त्रिलोचनम् ॥ कालाग्निरुद्रनामानि स गच्छेत्परमां गतिम् ॥ ८ ॥ यत्किंचित्कामिकं

१ योगिगम्य--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



कर्म ह्याभिचारिकमेव वा ॥ रिपुसंक्षयकृद्वापि सांतानिकमथापि वा ॥ अत्र तीर्थे कृतं सर्वमचिरात्सिद्ध्यते नृप ॥ ९ ॥ इति श्रीस्कांदे महा
पुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे कालाग्निरुद्रतीर्थमाहात्म्यवर्णनंनाम सप्ताशीत्युत्तरशततमोऽध्यायः ॥
॥ १८७ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततः परं महाराज चत्वारिंशत्क्रमांतरे ॥ शालग्रामं ततो गच्छेत्सर्वदैवतपूजितम् ॥ १ ॥
यत्रादिदेवो भगवान्वासुदेवस्त्रिविक्रमः॥ स्वयं तिष्ठति लोकात्मा सर्वेषां हितकाम्यया ॥ २ ॥ नारदेन तपस्तप्त्वा कृता शाला द्विजन्मनाम् ॥ सिद्धि
क्षेत्रं भृगुक्षेत्रं ज्ञात्वा रेवातटे स्वयम् ॥ ३ ॥ शालग्रामाभिधो देवो विप्राणां त्वधिवासितः ॥ साधूनां चोपकाराय वासुदेवः प्रतिष्ठितः ॥ ४ ॥ योगि
नामुपकाराय योगिध्येयो जनार्दनः ॥ शालग्रामेति तेनैव नर्मदातटमाश्रितः ॥ ५ ॥ मासि मार्गशिरे शुक्ला भवत्येकादशी यदा ॥ स्नात्वा
रेवाजले पुण्ये तद्दिनं समुपोषयेत् ॥ ६ ॥ रात्रौ जागरणं कुर्यात्संपूज्य च जनार्दनम् ॥ पुनः प्रभातसमये द्वादश्यां नर्मदाजले ॥ ७ ॥ स्नात्वा
संतर्प्य देवांश्च पितॄन्मातॄस्तथैव च ॥ श्राद्धं कृत्वा ततः पश्चात्पितृभ्यो विधिपूर्वकम् ॥ ८ ॥ शक्तितो ब्राह्मणान्पूज्य स्वर्णवस्त्रान्नदानतः ॥ क्षमा
पयित्वा तान्विप्रांस्तथा देवं खगध्वजम् ॥ ९ ॥ एवं कृते महाराज यत्पुण्यं च भवेन्नृणाम्॥ शृणुष्वावहितो भूत्वा तत्पुण्यं नृपसत्तम ॥ १० ॥ न
शोकदुःखे प्रतिपत्स्यतीह जीवन्मृतो याति मुरारिसाम्यम् ॥ महांति पापानि विसृज्य दुग्धं पुनर्न मातुः पिबते स्तनोद्यत् ॥ ११ ॥ शाल
ग्रामं पश्यते यो हि नित्यं स्नात्वा जले नार्मदेऽघौघहारे ॥ स मुच्यते ब्रह्महत्यादिपापैर्नारायणानुस्मरणेन तेन॥१२॥वसंति ये संन्यसित्वा च तत्र
निगृह्य दुःखानि विमुक्तसंघाः ॥ ध्यायंतो वै सांख्यवृत्त्या तुरीयं पदं मुरारेस्तेपि तत्रैव यांति ॥१३॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां
संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे शालग्रामतीर्थमाहात्म्यवर्णनं नामाष्टाशीत्युत्तरशततमोऽध्यायः ॥ १८८ ॥ ॥ छ ॥ ॥
॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र तीर्थं परमशोभनम् ॥ उदीर्णो यत्र वाराहो ह्यभवद्धरणीधरः ॥ १ ॥ धुन्वन्दंष्ट्रां करालाग्रां
बिभ्रच्च पृथिवीमिमाम् ॥ स एव पंचमः प्रोक्तो वाराहो मुक्तिदायकः ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथमुदीर्णरूपोऽभूद्वाराहो धरणीधरः ॥
वाराहत्वं गतः केन पंचमः केन संज्ञितः ॥ ३ ॥ ॥ मार्कंडेय उवाच ॥ ॥ आदिकल्पे पुरा राजन्क्षीरोदे भगवान्हरिः ॥ शेते स भोगिशयने ॥३११॥
॥१३७॥ योगनिद्राविमोहितः ॥ ४ ॥ लक्ष्मीकरांबुजयुगमृद्यमानपदद्वयः ॥ तस्मिन्स्वपति देवेशे भाराक्रांता वसुन्धरा ॥ ५ ॥ बभूव नृपतिश्रेष्ठ गत्वा
वै देवसंनिधौ ॥ अवोचद्भारखिन्नाहं गमिष्यामि रसातलम् ॥ ६ ॥ दृष्ट्वा देवाः समुद्विग्ना गता यत्र जनार्दनः ॥ तुष्टुवुर्वाग्भिरिष्टाभिः केशवं

CC-0. In Public Domain. Digitization by eGangotri

जगत पतिम् ॥ ७ ॥ ॥ देवा ऊचुः ॥ ॥ नमो नमस्ते देवेश सुरार्तिहर सर्वग ॥ विश्वमूर्ते नमस्तुभ्यं त्राहि सर्वान्महद्भयात् ॥ ८ ॥ इत्युक्तो
दैवतैर्देवो ह्युवाच किमुपस्थितम् ॥ कार्यं वदध्वं मे देवा यत्कृत्यं मा चिरं कृथाः ॥ ९ ॥ ॥ देवा ऊचुः ॥ ॥ धरा धरित्री भूतानां भारो
द्विग्ना निमज्जति ॥ तामुद्धर हृषीकेश लोकान्संस्थापय स्थितौ ॥ १० ॥ एवमुक्तः सुरैः सर्वैः केशवः परमेश्वरः ॥ वाराहं रूपमा
स्थाय सर्वयज्ञमयं विभुः ॥ ११ ॥ दंष्ट्राकरालं पिंगाक्षं समाकुंचितमूर्द्धजम् ॥ कृत्वाऽनंतं पादपीठं दंष्ट्राग्रेणोद्धरन्भुवम् ॥ १२ ॥
सपर्वतवनामुर्वीं समुद्रपरिमेखलाम् ॥ उद्धृत्य भगवान्विष्णुरुदीर्णः समजायत ॥ १३ ॥ दर्शयन्पंचधात्मानमुत्तरे नर्मदातटे ॥ तथाऽऽद्यं
कोरलायां तु द्वितीयं योधनीपुरे ॥ १४ ॥ जयक्षेत्राभिधाने तु जयेति परिकीर्त्तितम् ॥ असुरान्मोहयल्लिंगस्तृतीयः परिकीर्त्तितः
॥ १५ ॥ पावनाय जगद्धेतोः स्थितो यस्माच्छशिप्रभः ॥ अतस्तु नृपशार्दूल श्वेत इत्यभिधीयते ॥ १६ ॥ उद्धृत्य जगतां देवी
सुदीर्णो भृगुकच्छके ॥ ततः पंचम उदीर्णो वराह इति संज्ञितः ॥ १७ ॥ इति पंचवराहास्ते कथितः पांडुनंदन ॥ युगपद्दर्शनं चैषां ब्रह्महत्यां
व्यपोहति ॥ १८ ॥ ज्येष्ठे मासि सिते पक्ष एकादश्यां विशेषतः ॥ गत्वा ह्यादिवराहं तु संप्राप्ते दशमीदिने ॥ १९ ॥ हविष्यमन्नं भुंजीयाल्लघु सायं
गते रवौ ॥ रात्रौ जागरणं कुर्याद्वाराहे ह्यादिसंज्ञके ॥ २० ॥ ततः प्रभाते ह्युषसि संस्नात्वा नर्मदाजले ॥ संतर्प्य पितृदेवांश्च तिलैर्यवविमिश्रितैः ॥
॥ २१ ॥ धेनुं दद्याद्द्विजे योग्ये सर्वाभरणभूषिताम् ॥ निर्ममो निरहंकारो दानं दद्याद्द्विजातये ॥ २२ ॥ गत्वा संपूजयेद्देवं वाराहं ह्यादिसंज्ञितम् ॥
अनेन विधिना पूज्य पश्चाद्गच्छेज्जयं त्वरन् ॥२३॥ त्वरितं तु जयं गत्वा पूर्वकं विधिमाचरेत् ॥ अश्वं दद्याद्द्विजाग्र्याय जयपूर्वाभिनिर्गतम्॥ २४ ॥
लिंगे चैव तिला देयाः श्वेते हिरण्यमेव च ॥ उदीर्णे च भुवं दद्यात्पूर्वकं विधिमाचरेत् ॥ २५ ॥ अनस्तमित आदित्ये वराहान्पंच पश्यतः ॥ यत्फलं
लभते पार्थ तदिहैकमनाः शृणु ॥ २६ ॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः ॥ एभिस्तु सह संयोगो विश्वस्तानां च वंचनम् ॥ २७ ॥ स्व
सृदुहितृभगिनीकुलदारोपबृंहणम् ॥ आजन्ममरणाद्यावत्पापं भरतसत्तम ॥ २८ ॥ तीर्थपंचकपूतस्य वैष्णवस्य विशेषतः ॥ युगपच्च विनश्येत तूल
राशिरिवानलात् ॥ २९ ॥ नारायणानुस्मरणाज्जपध्यानाद्विशेषतः ॥ विप्रणश्यंति पापानि गिरिकूटसमान्यपि ॥ ३० ॥ दृष्ट्वा पंच वराहान्वै पौरु
षे महति स्थितः ॥ आप्लवन्नर्मदातोये श्राद्धं कृत्वा यथाविधि ॥ ३१ ॥ उदयास्तमनादर्वाग्यः पश्येल्लोटणेश्वरम् ॥ कलेवरविमुक्तः स इत्येवं
शंकरोऽब्रवीत् ॥ ३२ ॥ मुक्तिं प्रयाति सहसा दुष्प्रापां परमेश्वरीम् ॥ पौरुषे क्रियमाणेऽपि न सिद्धिर्जायते यदि ॥ ३३ ॥ ब्रुवंति स्वर्गगमनमपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पापान्वितस्य च ॥ यत्र तत्र गतस्यैव भवेत्पंचवराहकी ॥ ३४ ॥ ज्येष्ठस्यैकादशीतिथौ ध्रुवं तत्र वसेन्नरः ॥ आदिं जयं तथा श्वेतं लिंगमुदीर्णमेव च ॥ ३५ ॥ आश्रित्य तस्या द्रष्टव्या वराहास्तु यतस्ततः ॥ ज्येष्ठस्यैकादशीतिथौ विष्णुना प्रभुविष्णुना ॥ ३६ ॥ वाराहं रूपमास्थाय उद्धृता धरणी विभो ॥ पुण्यात्पुण्यतमा तेन ह्यशेषाघौघनाशिनी ॥ ३७ ॥ दृष्ट्वा पंचवराहान्वै क्रोडमुदीर्णरूपिणम् ॥ पूजयित्वा विधानेन पश्चाज्जागरणं चरेत् ॥ ३८ ॥ सपंचवर्त्तिकान्दीपान्घृतेनोज्ज्वाल्य भक्तितः ॥ पुराणश्रवणैर्नृत्यैर्गीतवाद्यैः सुमंगलैः ॥ ३९ ॥ वेदजाप्यैः पवित्रैश्च क्षपयित्वा च शर्वरीम् ॥ यत्पुण्यं लभते मर्त्यो ह्याजमीढ शृणुष्व तत् ॥ ४० ॥ रेवाजलं पुण्यतमं पृथिव्यां तथा च देवो जगतां पतिर्हरिः ॥ एकादशी पापहरा नरेन्द्र बह्वायासैर्लभ्यते मानवानाम् ॥ ४१ ॥ एकैकशो ब्रह्महत्यादिकानि शक्तानि हंतुं पापसंघानि राजन् ॥ नैते सर्वे युगपद्वै समेता हंतुं शक्ताः किन्न तद्ब्रूहि राजन् ॥ ४२ ॥ यथेदमुक्तं तव धर्मसूनो श्रुतं च यच्छंकराच्चंद्रमौलेः ॥ श्रुत्वेदमिच्छन्मुच्यते सर्वपापैः पठन्पदं याति हि वृत्रशत्रोः ॥ ४३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखंडे नर्मदामाहात्म्ये उदीर्णवराहतीर्थमाहात्म्यवर्णनंनामैकोननवत्युत्तरशततमोऽध्यायः ॥ १८९ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल सोमतीर्थमनुत्तमम् ॥ चंद्रहासेति विख्यातं सर्वदैवतपूजितम् ॥ १ ॥ यत्र सिद्धिं परां प्राप्तः सोमो राजा सुरोत्तमः ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथं सिद्धिमनुप्राप्तः सोमो राजा जगत्पतिः ॥ तत्सर्वं श्रोतुमिच्छामि कथयस्व ममाऽनघ ॥ ३ ॥ ॥ मार्कंडेय उवाच ॥ ॥ पुरा शप्तो मुनींद्रेण दक्षेण किल भारत ॥ असेवनाद्धि दाराणां क्षयरोगी भविष्यसि ॥ ४ ॥ उद्वाहितानां पत्नीनां ये न कुर्वंति सेवनम् ॥ या निष्ठा जायते तेषां तां शृणुष्व नरोत्तम ॥ ५ ॥ ऋतुकाले तु नारीणां सेवनाज्जायते सुतः ॥ सुतात्स्वर्गश्च मोक्षश्च हीत्येवं श्रुतिनोदना ॥ ६ ॥ तत्कालोचितधर्मेण ये न सेवंति तां नराः ॥ तेषां ब्रह्मघ्नजं पापं जायते नाऽत्र संशयः ॥ ७ ॥ तेन पापेन घोरेण वेष्टितो रौरवे पतेत् ॥ तस्य तद्रुधिरं पापाः पिबंते कालमीप्सितम् ॥ ८ ॥ ततोऽवतीर्णकालेन यांयां योनिं प्रयास्यति ॥ तस्यांतस्यां स दुष्टात्मा दुर्भगो जायते सदा ॥ ९ ॥ नारीणां तु सदा कामो ह्यधिकः परिवर्त्तते ॥ विशेषेण ऋतोः काले भिद्यते कामसायकैः ॥ १० ॥ परिभूता हि सा भर्त्रा ध्यायतेऽन्यं पतिं ततः ॥ तस्याः पुत्रः समुत्पन्नो ह्यटते कुलमुत्तमम् ॥ ११ ॥ स्वर्गस्थास्तेन पितरः पूर्वं जाता महीपते ॥ पतंति जातमात्रेण कुलटस्तेन चोच्यते ॥ १२ ॥

१ वस्तव्यम्—इ० वक्तव्यम्—इ० च पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेन कर्मविपाकेन क्षयरोगी शशी ह्यभूत् ॥ त्यक्त्वा लोकं सुरेन्द्राणां मर्त्यलोकमुपागतः[1] ॥ १३ ॥ तत्र तीर्थान्यनेकानि पुण्यान्यायतनानि च ॥ भ्रमित्वा नर्मदां प्राप्तः सर्वपापप्रणाशिनीम् ॥ १४ ॥ उपवासस्तु दानानि व्रतानि नियमाश्च ये ॥ चचार द्वादशाब्दानि ततो मुक्तः स किल्बिषैः ॥ ॥ १५ ॥ स्थापयित्वा महादेवं सर्वपातकनाशनम् ॥ जगाम प्रभया पूर्णः सोमलोकमनुत्तमम् ॥ १६ ॥ येनैव स्थापितो देवः पूज्यते वर्षसंख्यया ॥ तावद्युगसहस्राणि तस्य लोकं समश्नुते ॥ १७ ॥ तेन देवान्विधानोक्तान्स्थापयंति नरा भुवि ॥ अक्षयं चाव्ययं यस्मात्फलं भवति नाऽन्यथा ॥ १८ ॥ सोमतीर्थे तु यः स्नात्वा पूजयेद्देवमीश्वरम् ॥ जायते स नरो भूत्वा सोमवत्प्रियदर्शनः ॥ १९ ॥ चन्द्रप्रभासे यो गत्वा स्नानं विधिवदाचरेत् ॥ व्याधिना नाभिभूतः स्यात्क्षयरोगेण वा युतः ॥ २० ॥ चंद्रहास्ये नरः स्नात्वा द्वादश्यां तु नरेश्वर ॥ चतुर्दश्यामुपोष्यैव क्षीरस्य जुहुयाच्चरुम् ॥ २१ ॥ मन्त्रैः पंचभिरीशानं पुरुषरुयंबकं यजेत् ॥ हविःशेषं स्वयं प्राश्य चंद्रहास्येशमीक्षयेत् ॥ २२ ॥ अनेन विधिना राजंस्तुष्टो देवो महेश्वरः ॥ विधिना तीर्थयोगेन क्षयरोगाद्विमुच्यते ॥ २३ ॥ सप्तभिः सोमवारैर्यः स्नानं तत्र समाचरेत् ॥ स वै कर्णकृताद्रोगान्मुच्यते पूजयञ्छिवम् ॥ २४ ॥ अक्षिरोगस्तथा राजंश्चन्द्रहास्ये विनश्यति ॥ चंद्रहास्ये तु यो गत्वा ग्रहणे चन्द्रसूर्ययोः ॥ स्नानं समाचरेद्भक्त्या मुच्यते सर्वपातकैः ॥ २५ ॥ तत्र स्नानं च दानं च चंद्रहास्ये शुभाशुभम् ॥ कृतं नृपवरश्रेष्ठ सर्वं भवति चाक्षयम् ॥ २६ ॥ ते धन्यास्ते महात्मानस्तेषां जन्म सुजीवितम् ॥ चंद्रहास्ये तु ये स्नात्वा पश्यंति ग्रहणं नराः ॥ २७ ॥ वाचिकं मानसं पापं कर्मजं यत्पुरा कृतम् ॥ स्नानमात्रात्तु राजेंद्र तत्र तीर्थे प्रणश्यति ॥ २८ ॥ बहवस्तन्न जानंति महामोहसमन्विताः ॥ देहस्थ इव सर्वेषां परमात्मेव संस्थितम् ॥ २९ ॥ पश्चिमे सागरे गत्वा सोमतीर्थे तु यत्फलम् ॥ तत्समग्रमवाप्नोति चन्द्रहास्ये न संशयः ॥ ३० ॥ संक्रांतौ च व्यतीपाते विषुवे चायने तथा ॥ चंद्रहास्ये नरः स्नात्वा सर्वपापैः प्रमुच्यते ॥ ३१ ॥ ते मूढास्ते दुराचारास्तेषां जन्म निरर्थकम् ॥ चंद्रहास्यं न जानंति नर्मदायां व्यवस्थितम् ॥ ३२ ॥ चंद्रहास्ये तु यः कश्चित्संन्यासं कुरुते नृप ॥ अनिवर्त्तिका गतिस्तस्य सोमलोकात्कदाचन ॥३३॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखंडे चंद्रहास्यतीर्थमाहात्म्यवर्णनंनाम[3] नवत्युत्तरशततमोऽध्यायः ॥ १९० ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ सिद्धेश्वरं ततो गच्छेत्तस्यैव तु समीपतः ॥ अमृतस्नावि तल्लिंगमाद्यं स्वायंभुवं तथा ॥ १ ॥ दृष्टमात्रेण येनेह ह्यनृणो जायते नरः ॥ पुरा वर्षशतं

१ उपाविशत्–इ० पा० । २ तान्सर्वान्–इति शेषः । ३ चन्द्रप्रभासतीर्थमाहात्म्यवर्णनंनाम–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



साग्रमाराध्य परमेश्वरम् ॥ २ ॥ प्राप्नुयुः परमां सिद्धिमादित्या द्वादशैव तु ॥ अतः सिद्धेश्वरः प्रोक्तः सिद्धिदः सिद्धिकांक्षिणाम् ॥ ३ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथं सिद्धेश्वरे प्राप्ताः सिद्धिं देवा द्विजोत्तम ॥ आदित्या इति यच्चोक्तं तन्मे विस्मापनं कृतम् ॥ ४ ॥ तपस्युग्रे व्यवसिता आदित्याः केन हेतुना ॥ संप्राप्तास्तु द्विजश्रेष्ठ सिद्धिं चैवाभिलाषिकीम् ॥ ५ ॥ संक्षिप्य तु मया पृष्टं विस्तराद्द्विज शंस मे ॥ ६ ॥ ॥ मार्कंडेय उवाच ॥ ॥ अदितेर्द्वादशादित्या जाताः शक्रपुरोगमाः ॥ इन्द्रो धाता भगस्त्वष्टा मित्रोथ वरुणोर्यमा ॥ ७ ॥ विवस्वान्सविता पूषा ह्यंशुमान्विष्णुरेव च ॥ त इमे द्वादशादित्या इच्छंतो भास्करं पदम् ॥ ८ ॥ नर्मदातटमाश्रित्य तपस्युग्रे व्यवस्थिताः ॥ सिद्धेश्वरे महाराज काश्यपेयैर्महात्मभिः ॥ ९ ॥ परा सिद्धिरनुप्राप्ता द्वादशादित्यसंज्ञितैः ॥ स्थापितश्च जगद्धाता तस्मिंस्तीर्थे दिवाकरः ॥ १० ॥ स्वकीयांशविभागेन द्वादशादित्यसंज्ञितैः ॥ तदाप्रभृति तत्तीर्थं राजन्ख्यातिं गतं भुवि ॥ ११ ॥ प्रलये समनुप्राप्ते ह्यादित्या द्वादशैव ते ॥ द्वादशादित्यतो राजन्संभवंति युगक्षये ॥ १२ ॥ इंद्रस्तपति पूर्वेण धाता चैवाग्निगोचरे ॥ गभस्तिपतिर्वैयाम्ये त्वष्टा नैर्ऋतदिङ्मुखः ॥ १३ ॥ वरुणः पश्चिमे भागे मित्रस्तु वायवे तथा ॥ विष्णुश्च सौम्यदिग्भागे विवस्वानीशगोचरे ॥१४॥ ऊर्ध्वतश्चैव सविता ह्यधः पूषा विशोषयन् ॥ अंशुमांस्तु तथा विष्णुर्मुखतो निर्गतं जगत् ॥१५॥ प्रदहन्वै नरश्रेष्ठ बभ्रमुश्च इतस्ततः ॥ यथैव ते महाराज दहंति सकलं जगत् ॥१६॥ तथैव द्वादशादित्या भक्तानां भावसाधनाः ॥ प्रातरुत्थाय यः स्नात्वा द्वादशादित्यसंज्ञितम् ॥ १७ ॥ पश्यते देवदेवेशं शृणु तस्यैव यत्फलम् ॥ वाचिकं मानसं पापं कर्मजं यत्पुराकृतम् ॥ १८ ॥ नश्यते तत्क्षणादेव द्वादशादित्यदर्शनात् ॥ प्रदक्षिणं तु यः कुर्यात्तस्य देवस्य भारत ॥ १९ ॥ प्रदक्षिणीकृता तेन पृथिवी नाऽत्र संशयः ॥ तत्र तीर्थे तु सप्तम्यामुपवासेन यत्फलम्॥२०॥ अन्यत्र सप्तसप्तम्यां लभंति न लभंति च ॥ षष्ठ्यां वारे दैनकरे द्वादशादित्यदर्शनात् ॥२१॥ प्रदक्षिणं तु यः कुर्यात्तस्य पापं तु नश्यति ॥ अरोगी सप्तजन्मानि भवेद्वै नाऽत्र संशयः ॥ २२ ॥ यस्तु प्रदक्षिणशतं दद्याद्भक्त्या दिनेदिने ॥ दद्रूपिटककुष्ठानि मण्डलानि विचर्चिकाः ॥ २३ ॥ नश्यंति व्याधयः सर्वे गरुडेनेव पन्नगाः ॥ पुत्रप्राप्तिर्भवेत्तस्य षष्ठ्या वासरसेवनात् ॥ २४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे द्वादशादित्यतीर्थमाहात्म्यवर्णनंनामैकनवत्युत्तरशततमोऽध्यायः ॥ ॥ १९१ ॥ ॥ छ ॥ ॥ मार्कंडेय उवाच ॥ ॥ तस्यैवानंतरं तात देवतीर्थमनुत्तमम् ॥ दृष्ट्वा तु श्रीपतिं पापैर्मुच्यते मानवो भुवि ॥ १ ॥ महर्षेस्तस्य जामाता भृगोर्देवो जनार्दनः ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कोऽयं श्रियः पतिर्देवो देवानामधिपो विभुः ॥ कथं जन्माऽभव



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्य देवेषु त्रिषु[1] वा मुने ॥ ३ ॥ सम्बन्धी च कथं जातो भृगुणा सह केशवः ॥ एतद्विस्तरतो ब्रह्मन्वक्तुमर्हसि भार्गव ॥ ४ ॥ ॥ मार्कंडेय उवाच ॥ ॥ संक्षेपात्कथयिष्यामि साध्यस्य चरितं महत् ॥ न हि विस्तरतो वक्तुं शक्ताः सर्वे महर्षयः ॥ ५ ॥ नारायणस्य नाभ्यब्जाज्जातो देवश्चतुर्मुखः ॥ तस्य दक्षोंगजो राजन्दक्षिणांगुष्ठसंभवः ॥ ६ ॥ धर्मः स्तनांतात्संजातस्तस्य पुत्रोऽभवत्किल ॥ नारायणसहायोसावजोपि भरतर्षभ ॥ ७ ॥ मरुत्वती वसुर्जामा लंबा भानुमती सती ॥ संकल्पा च मुहूर्त्ता च साध्या विश्वावती ककुप् ॥ ८ ॥ धर्मपत्न्यो दशैवेता दाक्षायण्यो महाप्रभाः ॥ तासां साध्या महाभागा पुत्राऽनजनयन्नृप ॥ ९ ॥ नरो नारायणश्चैव हरिः कृष्णस्तथैव च ॥ विष्णोरंशांशका ह्येते चत्वारो धर्मसूनवः ॥ १० ॥ तथा नारायणनरौ गंधमादनपर्वते ॥ आत्मन्यात्मानमाधाय तेपतुः परमं तपः ॥ ११ ॥ ध्यायमानावनौपम्यं स्वं कारणमकारणम् ॥ वासुदेवमनिर्देश्यमप्रतर्क्यमनंतरम् ॥ १२ ॥ योगयुक्तौ महात्मानावास्थितावुरुतापसौ ॥ तयोस्तपःप्रभावेण न ततापं दिवाकरः ॥ १३ ॥ ववाह शंकितो वायुः सुखस्पर्शो ह्यशंकितः ॥ शिशिरोऽभवदत्यर्थं ज्वलन्नपि विभावसुः ॥ १४ ॥ सिंहव्याघ्रादयः सौम्याश्चेरुः सह मृगैर्गिरौ ॥ तयोर्गौरिव भारार्त्ता पृथिवी पृथिवीपते ॥ १५ ॥ चेरुश्च भूधराश्चैव चुक्षुभे च महोदधिः ॥ देवाश्च स्वेषु धिष्ण्येषु निष्प्रभेषु हतप्रभाः ॥ बभूवुरवनीपाल परमं क्षोभमागताः ॥ १६ ॥ देवराजस्तथा शक्रः संतप्तस्तपसा तयोः ॥ युयोजाप्सरसस्तत्र तयोर्विघ्नचिकीर्षया ॥ १७ ॥ ॥ इन्द्र उवाच ॥ ॥ रम्भे तिलोत्तमे कुब्जे घृताचि ललिते शुभे ॥ प्रम्लोचे सुभ्रु सुम्लोचे सौरभेयि महोद्धते ॥ १८ ॥ अलंबुषे मिश्रकेशि पुण्डरीके वरूथिनि ॥ विलोकनीयं बिभ्राणा वपुर्मन्मथबोधनम् ॥ १९ ॥ गन्धमादनमासाद्य कुरुध्वं वचनं मम ॥ नरनारायणौ तत्र तपोदीक्षान्वितौ द्विजौ ॥ २० ॥ तेपाते धर्मतनयौ तपः परमदुश्चरम् ॥ तावस्माकं वरारोहाः कुर्वाणौ परमं तपः ॥ २१ ॥ कर्म्मातिशयदुःखार्त्तिप्रदावायतिनाशनौ[2] ॥ तद्गच्छत न भीः कार्या भवतीभिरिदं वचः ॥ २२ ॥ स्मरः सहायो भविता वसंतश्च वरांगनाः ॥ रूपं वयः समालोक्य मदनोद्दीपनं परम् ॥ कन्दर्प्पवशमभ्येति विवशः को न मानवः ॥ २३ ॥ ॥ मार्कंडेय उवाच ॥ ॥ इत्युक्त्वा देवराजेन मदनेन समं तदा ॥ जग्मुरप्सरसः सर्वा वसंतश्च महीपते ॥ २४ ॥ गन्धमादनमासाद्य पुंस्कोकिलकुलाकुलम् ॥ चचार माधवो रम्यं प्रोत्फुल्लवनपादपम् ॥ ॥ २५ ॥ प्रववौ दक्षिणाशायां मलयानुगतोऽनिलः ॥ भृंगमालारुतरवै रमणीयमभूद्वनम् ॥ २६ ॥ गंधश्च सुरभिः सद्यो वनराजिसमुद्भवः ॥

१ त्रिषु—ब्रह्मविष्णुमहेश्वरेषु—इत्यर्थः । २ आयतिनाशनौ—उत्तरकालिकसुखनाशकौ—इत्यर्थः । 'आयतिः काल उत्तरः' इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



किन्नरोरगयक्षाणां बभूव घ्राणतर्पणः ॥ २७ ॥ वरांगनाश्च ताः सर्वा नरनारायणावृषी ॥ विलोभयितुमारब्धा वागंगललितस्मितैः ॥ २८ ॥ जगौ मनोहरं काचिन्ननर्त तत्र चाऽप्सराः ॥ अवादयत्तथैवान्या मनोहरतरं नृप ॥ २९ ॥ हावैर्भावैः स्मृतैर्हास्यैस्तथाऽन्या वल्गुभाषितैः ॥ तयोः क्षोभाय तन्वंग्यश्चक्रुरुद्यममंगनाः ॥ ३० ॥ तथापि न तयोः कश्चिन्मनसः पृथिवीपते ॥ विकारोऽभवदध्यात्मपारसंप्राप्तचेतसोः ॥ ३१ ॥ निवातस्थौ यथा दीपावकंपौ नृप तिष्ठतः ॥ वासुदेवार्पणस्वस्थे तथैव मनसी तयोः ॥ ३२ ॥ पूर्यमाणोऽपि चांभोभिर्भुवमन्यां महोदधिः ॥ यथा न याति संक्षोभं तथा तन्मानसं क्वचित् ॥ ३३ ॥ सर्वभूतहितं ब्रह्म वासुदेवमयं परम् ॥ मन्यमानौ न रागस्य द्वेषस्य च वशंगतौ ॥ ३४ ॥ स्मरोऽपि न शशाकाथ प्रवेष्टुं हृदयं तयोः ॥ विद्यामयं दीपयुतमंधकार इवालयम् ॥ ३५ ॥ पुष्पोज्ज्वलांस्तरुवरान्व संतं दक्षिणानिलम् ॥ ताश्चैवाप्सरसः सर्वाः कन्दर्पं च महामुनी ॥ ३६ ॥ यच्चारब्धं तपस्ताभ्यामात्मानं गन्धमादनम् ॥ ददर्शातेऽखिलं रूपं ब्रह्मणः पुरुषर्षभ ॥ ३७ ॥ दाहाय नामलो वह्नेर्नापः क्लेदाय चांभसः ॥ तद्द्रव्यमेव तद्द्रव्यविकाराय न वै यतः ॥ ३८ ॥ ततो विज्ञाय विज्ञाय परं ब्रह्म स्वरूपतः ॥ मधुकंदर्पयोषित्सु विकारो नाऽभवत्तयोः ॥ ३९ ॥ ततो गुरुतरं यत्नं वसंतमदनौ नृप ॥ चक्राते ताश्च तन्वंग्यस्तत्क्षोभाय पुनःपुनः ॥ ४० ॥ अथ नारायणो धैर्यं संधार्योदीर्णमानसः ॥ ऊरोरुत्पादयामास वरांगीमबलां तदा ॥ ४१ ॥ त्रैलोक्यसुन्दरीरत्नमशेषमवनी पते ॥ गुणैर्लाघवमभ्येति यस्याः संदर्शनादनु ॥ ४२ ॥ तां विलोक्य महीपाल चकंपे मनसाऽनिलः ॥ वसंतो विस्मयं यातः स्मरः सस्मार किंचन ॥ ४३ ॥ रंभातिलोत्तमाद्याश्च वैलक्ष्यं देवयोषितः ॥ न रेजुरवनीपाल तल्लक्ष्यहृदयेक्षणाः[1] ॥ ४४ ॥ ततः कामो वसंतश्च पार्थिवाप्सरसश्च ताः ॥ प्रणम्य भगवंतौ तौ तुष्टुवुर्मुनिसत्तमौ ॥ ४५ ॥ ॥ वसंतकामाप्सरस ऊचुः ॥ ॥ प्रसीदतु जगद्धाता यस्य देवस्य मायया ॥ मोहिताः स्म विजानीमो नांतरं विद्यते द्वयोः ॥ ४६ ॥ प्रसीदतु स वां देवो यस्य रूपमिदं द्विधा ॥ धामभूतस्य लोकानामनादेरप्रतिष्ठतः[2] ॥ ४७ ॥ नर नारायणौ देवौ शंखचक्रायुधावुभौ ॥ आस्तां[3] प्रसादसुमुखावस्माकमपराधिनाम् ॥ ४८ ॥ निधानं सर्वविद्यानां सर्वपापवनानलः ॥ नारायणो ऽतो भगवान्सर्वपापं व्यपोहतु ॥ ४९ ॥ शार्ङ्गचिह्नायुधः श्रीमानात्मज्ञानमयोऽनघः ॥ नरः समस्तपापानि हतात्मा सर्वदेहिनाम् ॥ ५० ॥

१ तल्लक्ष्यहृदयेक्षणाः—तस्याः लक्ष्याणि—वेध्यानि—हृदयानि ईक्षणानि च येषां ते—तल्लक्ष्यहृदयेक्षणाः । लक्षं लक्ष्यं शरव्यं च इत्यमरः । तद्दृष्टिपातविद्धहृदयेक्षणाः—इत्यर्थः । २ अप्रतिष्ठतः—प्रस्थानरहितस्य अंतरहितस्य—इत्यर्थः अनन्तस्य—इति यावत् । ३ आस्ताम्—भवतम्—इत्यर्थः आर्षं रूपम् ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जटाकलापबद्धोऽयमनयोर्नः क्षमावतोः ॥ सौम्यास्यदृष्टिः पापानि हंतुं जन्मार्जितानि वै ॥ ५१ ॥ तथात्मविद्यादोषेण योऽपराधः कृतो महान् ॥ त्रैलोक्यवंद्यौ यौ नाथौ विलोभयितुमागताः ॥५२॥ प्रसीद देव विज्ञानघन मूढदृशामिव ॥ भवंति संतः सततं स्वधर्मपरिपालकाः ॥५३॥ दृष्टैतन्नः समुत्पन्नं यथा स्त्रीरत्नमुत्तमम् ॥ त्वयि नारायणोत्पन्ना श्रेष्ठा पारवती मतिः ॥ ५४ ॥ तेन सत्येन सत्यात्मन्परमात्मन्सनातन ॥ नारायण प्रसीदेश सर्वलोकपरायण ॥ ५५ ॥ प्रसन्नबुद्धे शांतात्मन्प्रसन्नवदनेक्षण ॥ प्रसीद योगिनामीश नर सर्वगताऽच्युत ॥ ५६ ॥ नमस्यामो नरं देवं तथा नारायणं हरिम् ॥ नमो नराय नम्याय नमो नारायणाय च ॥ ५७ ॥ प्रसन्नानामनाथानां तथा नाथवतां प्रभो ॥ शं करोतु नरोऽस्माकं शं नारायण देहि नः ॥ ५८ ॥ ॥ मार्कंडेय उवाच ॥ ॥ एवमभ्यर्चितः स्तुत्या रागद्वेषादिवर्जितः ॥ प्राहेशः सर्वभूतानां मध्ये नारायणो नृप ॥ ५९ ॥ ॥ ॥ नारायण उवाच ॥ ॥ स्वागतं माधवे कामे भवत्वप्सरसामपि ॥ यत्कार्यमागतानां च इहास्माभिस्तदुच्यताम् ॥ ६० ॥ यूयं संसिद्धये नूनमस्माकं बलशत्रुणा ॥ संप्रेषितास्ततोऽस्माकं नृत्ययोगादिदर्शनम् ॥ ६१ ॥ न वयं गीतनृत्येन नांगचेष्टादिभाषितैः ॥ लुब्धा वै विषयैर्मन्ये विषया दारुणात्मकाः ॥ ६२ ॥ शब्दादिसंगदुष्टानि यदा नाक्षाणि[१] नः शुभाः ॥ तदा नृत्यादयो भावाः कथं लोभप्रदायिनः ॥ ६३ ॥ ते सिद्धाः स्म न वै साध्या भवतीनां स्मरस्य च ॥ माधवस्य च शक्रोऽपि स्वास्थ्यं यात्वविशंकिताः ॥ ६४ ॥ योऽसौ परश्च परमः पुरुषः परमेश्वरः ॥ परमात्मा समस्तस्य स्थावरस्य चरस्य च ॥ ६५ ॥ उत्पत्तिहेतुरेते च यस्मिन्सर्वं प्रलीयते ॥ सर्वावासीति देवत्वाद्वासुदेवेत्युदाहृतः ॥ ६६ ॥ वयमंशांशकास्तस्य चतुर्व्यूहस्य मानिनः ॥ तदादेशितवार्त्मानौ जगद्बोधाय देहिनाम् ॥६७॥ तत्सर्वभूतं सर्वेशं सर्वत्र समदर्शिनम् ॥ कुतः पश्यंतौ रागादीन्करिष्यामो विभेदिनः ॥ ६८ ॥ वसंते मयि चेंद्रे च भवतीषु तथा स्मरे ॥ यदा स एव भूतात्मा तदा द्वेषादयः कथम् ॥ ६९ ॥ तन्मयाऽन्य विभक्तानि यदा सर्वेषु जंतुषु ॥ सर्वेश्वरेश्वरो विष्णुः कुतो रागादयस्ततः ॥ ७० ॥ ब्रह्माणमिंद्रमीशानमादित्यमरुतोखिलान् ॥ विश्वेदेवानृषीन्साध्यान्वसून्पितृगणांस्तथा ॥ ७१ ॥ यक्षराक्षसभूतादीन्नागान्सर्पान्सरीसृपान् ॥ मनुष्यपक्षिगोरूपगजसिंहजलेचरान् ॥ ७२ ॥ मक्षिकामशकान्दंशाञ्च्छलभाञ्जलजान्कृमीन् ॥ गुल्मवृक्षलतावल्लीत्वक्सारतृणजातिषु ॥ ७३ ॥ यच्च किंचिददृश्यं वा दृश्यं वा त्रिदशांगनाः ॥ मन्यध्वं जातमेकस्य तत्सर्वं परमात्मनः ॥ ७४ ॥ जायमानः कथं विष्णुमात्मानं परमं च यत् ॥ रागद्वेषौ तथा लोभं कः कुर्यादमरांग

१ अक्षाणि—इन्द्रियाणि—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



नाः ॥ ७५ ॥ सर्वभूतमये विष्णौ सर्वगे सर्वधातरि ॥ निपात्य तं पृथग्भूते कुतो रागादिको गुणः ॥ ७६ ॥ एवमस्मासु युष्मासु सर्वभूते
षु चाबलाः ॥ तन्मयैकत्वभूतेषु रागाद्यवसरः कुतः ॥ ७७ ॥ सम्यग्दृष्टिरियं प्रोक्ता समस्तैक्यावलोकिनी ॥ पृथग्विज्ञानमात्रैव
लोकसंव्यवहारवत् ॥ ७८ ॥ भूतेंद्रियांतःकरणप्रधानपुरुषात्मकम् ॥ जगद्वै ह्येतदखिलं तदा भेदः किमात्मकः ॥ ७९ ॥
भवंति लयमायांति समुद्रसलिलोर्मयः ॥ न वारिभेदतो भिन्नास्तथैवैक्यादिदं जगत् ॥ ८० ॥ यथाग्नेरर्चिषः पीताः पिंगलारुणधू
सराः ॥ तथाऽपि नाऽग्नितो भिन्नास्तथैतद्ब्रह्मणो जगत् ॥ ८१ ॥ भवतीभिश्च यत्क्षोभमस्माकं स पुरंदरः ॥ कारयत्यसदेतच्च विवेकाचारचेतसाम् ॥
॥ ८२ ॥ भवंत्यः स च देवेंद्रो लोकाश्च ससुरासुराः ॥ समुद्राद्रिवनोपेता मद्देहांतरगोचराः ॥ ८३ ॥ यथेयं चारुसर्वांगी भवतीनां मयाऽग्रतः ॥
दर्शिता दर्शयिष्यामि तथा चैवाऽखिलं जगत् ॥ ८४ ॥ प्रयातु शक्रो मा गर्वमिंद्रत्वं कस्य सुस्थिरम् ॥ यूयं च मा स्मयं यात संति रूपान्विताः
स्त्रियः ॥ ८५ ॥ किं सुरूपं कुरूपं वा यदा भेदो न दृश्यते ॥ तारतम्यं सुरूपत्वे सततं भिन्नदर्शनात् ॥ ८६ ॥ भवतीनां स्मयं मत्वा रूपौदार्य
गुणोद्भवम् ॥ मयेयं दर्शिता तन्वी ततस्तु शममेष्यथ ॥ ८७ ॥ यस्मान्मदूरोर्निष्पन्ना त्वियमिंदीवरेक्षणा ॥ उर्वशीनाम कल्याणी भविष्यति वरा
प्सराः ॥ ८८ ॥ तदियं देवराजस्य नीयतां वरवर्णिनी ॥ भवत्यस्तेन चाऽऽस्माकं प्रेषिताः प्रीतिमिच्छता ॥ ८९ ॥ वक्तव्यश्च सहस्राक्षो नाऽ
स्माकं भोगकारणात् ॥ तपश्चर्या न वाप्राप्यफलं प्राप्तुमभीप्सता ॥ ९० ॥ सन्मार्गमस्य जगतो दर्शयिष्ये करोम्यहम् ॥ तथा नरेण सहितो
जगतः पालनोद्यतः ॥ ९१ ॥ यदि कश्चित्तवाबाधां करोति त्रिदशेश्वर ॥ तमहं वारयिष्यामि निवृत्तो भव वासव ॥ ९२ ॥ कर्त्ताऽसि चेत्त्वमा
बाधां न दुष्टस्येह कस्यचित् ॥ तं चाऽपि शास्ता तदहं प्रवर्त्तिष्याम्यसंशयम् ॥ ९३ ॥ एतज्ज्ञात्वा न संतापस्त्वया कार्यो हि मां प्रति ॥
उपकाराय जगतामवतीर्णोऽस्मि वासव ॥ ९४ ॥ या चेयमुर्वशी मत्तः समुद्भूता पुरंदर ॥ त्रेताग्निहेतुभूतेयं एवं प्राप्य भविष्यति ॥ ९५ ॥ इति
श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये श्रीपत्युत्पत्तिवर्णनं नाम द्विनवत्युत्तरशत
॥१४१॥ तमोऽध्यायः ॥ १९२ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ इत्युक्तेऽप्सरसः सर्वाः प्रणिपत्य पुनःपुनः ॥ ऊचुर्नारायणं देवं तद्दर्शन ॥३१५॥
समीहया ॥ १ ॥ ॥ वसंतकामाप्सरस ऊचुः ॥ ॥ भगवन्भवता योऽयमुपदेशो हितार्थिना ॥ प्रोक्तः स सर्वो विज्ञातो माहात्म्यं विदितं च
ते ॥ २ ॥ यत्त्वेतद्भवता प्रोक्तं प्रसन्नेनांतरात्मना ॥ दर्शितेयं विशालाक्षी दर्शयिष्यामि वो जगत् ॥ ३ ॥ तत्रार्थे सर्वभावेन प्रपन्नानां जगत्पते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दर्शयात्मानमखिलं दर्शितेयं यथोर्व्वशी ॥ ४ ॥ यदि देवाऽपराधेपि नाऽस्मासु कुपितं तव ॥ नमस्ते जगतामीश दर्शयात्मानमात्मना ॥ ५ ॥
॥ ॥ नारायण उवाच ॥ ॥ पश्यतेहाऽखिलाँल्लोकान्मम देहे सुरांगनाः ॥ मधुं मदनमात्मानं यच्चान्यद्द्रष्टुमिच्छथ ॥ ६ ॥ ॥ श्रीमार्कंडेय
उवाच ॥ ॥ इत्युक्त्वा भगवान्देवस्तदा नारायणो नृप ॥ उच्चैर्जहास स्वनवक्त्राऽभूदखिलं जगत् ॥ ७ ॥ ब्रह्मा प्रजापतिः शक्रः सह रुद्रैः पिनाक
धृक् ॥ आदित्या वसवः साध्या विश्वेदेवा महर्षयः ॥ ८ ॥ नासत्यदस्रावनिलः सर्वशश्च तथाग्नयः ॥ यक्षगन्धर्व्वसिद्धाश्च पिशाचोरगकिन्नराः ॥
॥ ९ ॥ समस्ताप्सरसो विद्याः सांगा वेदास्तदुक्तयः ॥ मनुष्याः पशवः कीटाः पक्षिणः पादपास्तथा ॥ १० ॥ सरीसृपाश्चाथ सूक्ष्मा यच्चान्य
ज्जीवसंज्ञितम् ॥ समुद्राः सकलाः शैलाः सरितः काननानि च ॥ ११ ॥ द्वीपान्यशेषाणि तथा तथा सर्वसरांसि च ॥ नगरग्रामपूर्णा च मेदिनी
मेदिनीपते ॥ देवांगनाभिर्देवस्य देहे दृष्टं महात्मनः ॥ १२ ॥ नक्षत्रग्रहताराभिः सुसंपूर्णं नभस्तलम् ॥ ददृशुस्ताः सुचार्वंग्यस्तस्यांतर्विश्वं
रूपिणः ॥ १३ ॥ ऊर्ध्वं न तिर्यङ्नाधस्ताद्यदांतस्तस्य दृश्यते ॥ तमनंतमनादिं च ततस्तास्तुष्टुवुः प्रभुम् ॥ १४ ॥ मदनेन समं सर्वा मधुना च
वरांगनाः ॥ ससाध्वसा भक्तिपराः परं विस्मयमागताः ॥ १५ ॥ ॥ वसंतकामाप्सरस ऊचुः ॥ ॥ पश्याम नादिं तव देव नांतं न
मध्यमव्याकृतरूपपारम् ॥ परायणं त्वां जगतामनंतं नताः स्म नारायणमात्मभूतम् ॥ १६ ॥ महीनभोवायुजलाग्नयस्त्वं शब्दादिरू
पस्तु परापरात्मन् ॥ त्वत्तो भवत्यच्युत सर्वमेतद्भेदादिरूपोऽसि विभो त्वमात्मन् ॥ १७ ॥ द्रष्टासि रूपस्य परस्य वेत्ता श्रोता च
शब्दस्य हरे त्वमेकः ॥ स्प्रष्टा भवान्सर्वगतोऽखिलस्य घ्राता च गन्धस्य पृथक्छरीरी ॥ १८ ॥ सुरेषु सर्वेषु न सोऽस्ति कश्चिन्मनुष्य
लोकेषु न सोऽस्ति कश्चित् ॥ पश्वादिवर्गेषु न सोऽस्ति कश्चिद्यो नांऽशभूतस्तव देवदेव ॥ १९ ॥ ब्रह्मांबुधींदुप्रमुखानि सौम्य शक्रादि
रूपाणि तवोत्तमानि ॥ समुद्ररूपं तव धैर्यवत्सु तेजःस्वरूपेषु रविस्तथाग्निः ॥ २० ॥ क्षमाधनेषु क्षितिरूपमग्र्यं शीघ्रेषु शीघ्रो बलवत्सु
वायुः ॥ मनुष्यरूपं तव राजवेषो मूढेषु सर्वेश्वर पादपोऽसि ॥ २१ ॥ सर्वानयेष्वच्युत दानवस्त्वं सनत्सुजातश्च विवेकवत्सु ॥ रसस्वरूपेण
जलस्थितोऽसि गन्धस्वरूपं भवतो धरित्र्याम् ॥ २२ ॥ दृश्यस्वरूपश्च हुताशनस्त्वं स्पर्शस्वरूपं भवतः समीरे ॥ शब्दादिकं ते न
भसि स्वरूपं मंतव्यरूपो मनसि प्रभो त्वम् ॥ २३ ॥ बोधस्वरूपश्च मतौ त्वमेकः सर्वत्र सर्वेश्वर सर्वभूत ॥ पश्यामि ते नाभिसरोजमध्ये ब्रह्माण
मीशं च हरं भ्रुकुट्याम् ॥ २४ ॥ तवाऽश्विनौ कर्णगतौ समस्तास्तवाऽऽस्थिता बाहुषु लोकपालाः ॥ घ्राणोऽनिलो नेत्रगतौ रवीन्दू जिह्वा च ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





नाथ सरस्वतीयम् ॥ २५ ॥ पादौ धरित्री जठरं समस्ताँल्लोकान्हृषीकेश विलोकयामः ॥ जंघे वयं पादतलांगुलीषु पिशाचयक्षोरगसिद्धसंघाः ॥ ॥ २६ ॥ पुंस्त्वे प्रजानां पतिरोष्ठयुग्मे प्रतिष्ठितास्ते क्रतवः समस्ताः ॥ सर्वे वयं ते दशनेषु देव दंष्ट्रासु देवा ह्यभवंश्च दंताः ॥ २७ ॥ रोमाण्यशेषा स्तव देवसंघा विद्याधरा नाथ तवांघ्रिरेखाः ॥ सांगाः समस्तास्तव देव वेदाः समास्थिताः संधिषु बाहुभूताः ॥ २८ ॥ वराहभूतं धरणीधरस्ते नृसिंहरूपं च सदा करालम् ॥ पश्याम ते वाजिशिरस्तथोच्चैस्त्रिविक्रमे यच्च तदाऽप्रमेयम् ॥ २९ ॥ अमी समुद्रास्तव देव देहे मौर्वालयः शैलधरा स्तथाऽमी ॥ इमाश्च गंगाप्रमुखाः स्रवंत्यो द्वीपाण्यशेषाणि वनादिदेशाः ॥ ३० ॥ स्तुन्वति चेमे मुनयस्तवेश देहे स्थितास्त्वन्महिमानमग्र्यम् ॥ त्वामीशितारं जगतामनंतं यजंति यज्ञैः किल यज्ञिनोऽमी ॥ ३१ ॥ त्वत्तोऽहि सौम्यं जगतीह किंचित्त्वतो न रौद्रं च समस्तमूर्ते ॥ त्वत्तो न शीतं च न केशवोष्णं सर्वस्वरूपातिशयी त्वमेव ॥ ३२ ॥ प्रसीद सर्वेश्वर सर्वभूत सनातनात्मन्परमेश्वरेश ॥ त्वन्मायया मोहितमानसाभिर्यत्तेऽप राद्धं तदिदं क्षमस्व ॥ ३३ ॥ किं वाऽपराद्धं तव देवदेव यन्मायया नो हृदयं तवाऽपि ॥ मायाभिशंकिप्रणतार्त्तिहंतर्मनो हि नो विह्वलतामुपैति ॥ ॥३४॥ न तेपराद्धं यदि तेऽपराद्धमस्माभिरुन्मार्गविवर्त्तिनीभिः ॥ तत्क्षम्यतां सृष्टिकृतस्तवैव देवाऽपराधः सृजतो विवेकम् ॥३५॥ नमो नमस्ते गो विंद नारायण जनार्द्दन ॥ त्वन्नामस्मरणात्पापमशेषं नः प्रणश्यतु ॥ ३६ ॥ नमोऽनंत नमस्तुभ्यं विश्वात्मन्विश्वभावन ॥ त्वन्नामस्मरणात्पापमशेषं नः प्रणश्यतु ॥ ३७ ॥ वरेण्य यज्ञपुरुष प्रजापालन वामन ॥ त्वन्नामस्मरणात्पापमशेषं नः प्रणश्यतु ॥ ३८ ॥ नमोऽस्तु तेऽब्जनाभाय प्रजापतिं कृते हर ॥ त्वन्नामस्मरणात्पापमशेषं नः प्रणश्यतु ॥ ३९ ॥ संसारार्णवपोताय नमस्तुभ्यमधोक्षज ॥ त्वन्नामस्मरणात्पापमशेषं नः प्रणश्यतु ॥ ॥ ४० ॥ नमः परस्मै श्रीशाय वासुदेवाय वेधसे ॥ स्वेच्छया गुणयुक्ताय सर्गस्थित्यंतकारिणे ॥ ४१ ॥ उपसंहर विश्वात्मन्रूपमेतत्सनातनम् ॥ वर्धमानं न नो द्रष्टुं समर्थं चक्षुरीश्वर ॥ ४२ ॥ प्रलयाग्निसहस्रस्य समा दीप्तिस्तवाऽच्युत ॥ प्रमाणेन दिशो भूमिर्गगनं च समावृतम् ॥ ४३ ॥
॥१४२॥ न विद्मः कुत्र वर्त्तामो भवान्नाथोपलक्ष्यते ॥ सर्वं जगदिहैकस्थं पिंडितं लक्षयामहे ॥ ४४ ॥ किं वर्णयामो रूपं ते किं प्रमाणमिदं हरे ॥ माहात्म्यं किं नु ते देव यज्जिह्वाया न गोचरे ॥ ४५ ॥ वक्तारो वाऽयुतेनापि बुद्धीनामयुतायुतैः ॥ गुणनिर्वर्णनं नाथ कर्तुं तव न शक्यते ॥ ४६ ॥ तदेतद्द ॥३१६॥
र्शितं रूपं प्रसादः परमः कृतः ॥ छंदतो जगतामीश तदेतदुपसंहर ॥ ४७ ॥ ॥ मार्कंडेय उवाच ॥ ॥ इत्येवं संस्तुतस्ताभिरप्सरोभिर्जना र्दनः ॥ दिव्यज्ञानोपपन्नानां तासां प्रत्यक्षमीश्वरः ॥ ४८ ॥ विवेश सर्वभूतानि स्वैरंशैर्भूतभावनः ॥ तं दृष्ट्वा सर्वभूतेषु लीयमानमधोक्षजम् ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विस्मयं परमं चक्रुः समस्ता देवयोषितः ॥ स च सर्वेश्वरः शैलान्पादपान्सागरान्भुवम् ॥ ५० ॥ जलमग्निं तथा वायुमाकाशं च विवेश ह ॥ काले दिक्ष्वथ सर्वात्मा ह्यात्मनश्चाऽन्यथाऽपि च ॥ ५१ ॥ आत्मरूपस्थितं स्वेन महिम्ना भावयन्जगत् ॥ देवदानवरक्षांसि यक्षविद्याधरोरगाः ॥ ॥ ५२ ॥ मनुष्यपशुकीटादिमृगपश्वंतरिक्षगाः ॥ येऽन्तरिक्षे तथा भूमौ दिवि ये च जलाश्रयाः ॥ ५३ ॥ तान्विवेश स विश्वात्मा पुनस्त द्रूपमास्थितः ॥ नरेण सार्धं यत्ताभिर्दृष्टपूर्वमरिंदम ॥ ५४ ॥ ताः परं विस्मयं जग्मुः सर्वास्त्रिदशयोषितः ॥ प्रणेमुः साध्वसात्पांडुवदना नृपस त्तम ॥ ५५ ॥ नारायणोऽपि भगवानाह तास्त्रिदशांगनाः ॥ ५६ ॥ ॥ नारायण उवाच ॥ ॥ नीयतामुर्वशी भद्रा यत्राऽसौ त्रिदशेश्वरः ॥ भवतीनां हितार्थाय सर्वभूतेष्वसाविति ॥ ५७ ॥ ज्ञानमुत्पादितं भूयो लयं भूतेषु कुर्वता ॥ तद्गच्छध्वं समस्तोऽयं भूतग्रामो मदंशकः ॥ ५८ ॥ अह मध्यात्मभूतस्य वासुदेवस्य योगिनः ॥ अस्मात्परतरं नाऽस्ति योऽनंतः परिपठ्यते ॥ ५९ ॥ तमजं सर्वभूतेशं जानीत परमं पदम् ॥ अहं भवत्यो देवाश्च मनुष्याः पशवश्च ये ॥ एतत्सर्वमनंतस्य वासुदेवस्य वै कृतम् ॥ ६० ॥ एवं ज्ञात्वा समं सर्वं सदेवासुरमानुषम् ॥ सपश्वादिगुणं चैव द्रष्टव्यं त्रिदशांगनाः ॥ ६१ ॥ ॥ मार्कंडेय उवाच ॥ ॥ इत्युक्तास्तेन देवेन समस्तास्ताः सुरस्त्रियः ॥ प्रणम्य तौ समदनाः सवसन्ताश्च पार्थिव ॥ ६२ ॥ आदाय चोर्वशीं भूयो देवराजमुपागताः ॥ आचख्युश्च यथावृत्तं देवराजाय तत्तथा ॥ ६३ ॥ ॥ मार्कंडेय उवाच ॥ ॥ तथा त्वमपि राजेंद्र सर्वभूतेषु केशवम् ॥ चिंतयन्समतां गच्छ समतैव हि मुक्तये ॥ ६४ ॥ जानन्नेवं विशेषेण भूतेषु परमेश्वरम् ॥ वासुदेव कथं दोषाँल्लो भादीन्न प्रहास्यसि ॥ ६५ ॥ सर्वभूतानि गोविंदाद्यदा नाऽन्यानि भूपते ॥ तदा वैरादयो भावाः क्रियतां न तु पुत्रक ॥ ६६ ॥ इति पश्य जग त्सर्वं वासुदेवात्मकं नृप ॥ एतदेव हि कृष्णेन रूपमाविष्कृतं नृप ॥ ६७ ॥ परमेश्वरेति यद्रूपं तदेतत्कथितं तव ॥ जन्मादिभावरहितं तद्विष्णोः परमं पदम् ॥ ६८ ॥ संक्षेपेणाऽथ भूपाल श्रूयतां यद्वदामि ते ॥ यन्मतं पुरुषः कृत्वा परं निर्वाणमृच्छति ॥ ६९ ॥ सर्वो विष्णुसमासो हि भावाभावौ च तन्मयौ ॥ सदसत्सर्वमीशोऽसौ महादेवः परं पदम् ॥ ७० ॥ भवजलधिगतानां द्वंद्ववाताहतानां सुतदुहितृकलत्रत्राणभारार्दितानाम् ॥ विषमविषयतोये मज्जतामप्लवानां भवति शरणमेको विष्णुपोतो नराणाम् ॥ ७१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे श्रीपतिमाहात्म्यवर्णनंनाम त्रिनवत्युत्तरशततमोऽध्यायः ॥ १९३ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ तच्छुत्वानंतदेवेन विश्वरूपमुदाहृतम् ॥ देवराजस्तथा देवाः परं विस्मयमागताः ॥ १ ॥ दृष्ट्वा चाप्सरसं पुण्यामुर्वशीं कमलाननाम् ॥ संत्रस्तो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



विस्मितश्चाऽभूदिंद्रो राजश्रिया वृतः ॥ २ ॥ न किंचिदुत्तरं वाक्यमुक्तवाञ्जोषमास्थितः ॥ इति वृत्तांतभूतं हि नारायणविचेष्टितम् ॥ ३ ॥ भृगोः ख्यात्यां समुत्पन्ना लक्ष्मीः श्रुत्वा तु वै नृप ॥ वैश्वरूपं परं रूपं विस्मिताऽचिंतयत्तदा ॥ ४ ॥ केनोपायेन स स्यान्मे भर्त्ता नारायणः प्रभुः ॥ व्रतेन तपसा वाऽपि दानेन नियमेन च ॥ ५ ॥ वृद्धानां सेवनेनाऽथ देवताराधनेन वा ॥ इति चिंतापरां कन्यां सती[1] ज्ञात्वा युधिष्ठिर ॥ ६ ॥ प्राह प्राप्तो मया भर्त्ता शंकरस्तपसा किल ॥ प्रजापतिश्च गायत्र्या ह्यन्याभिरभिवांछिताः ॥ ७ ॥ तपसैव हि ते प्राप्यस्तस्मात्तच्चर सुव्रते ॥ तपस्त्वं हि महच्चोग्रं सर्ववांछितदायकम् ॥ ८ ॥ ॥ मार्कंडेय उवाच ॥ ॥ सागरांतं समासाद्य लक्ष्मीः परपुरंजय ॥ चचार विपुलं कालं तपः परमदुश्चरम् ॥ ॥ ९ ॥ स्थाणुवत्संस्थिता साऽभूद्दिव्यं वर्षसहस्रकम् ॥ तत इंद्रादयो देवाः शंखचक्रगदाधराः ॥१०॥ भूत्वा जग्मुस्तदर्थं ते सा तु पृष्टवती सुरान् ॥ विश्वरूपं वैष्णवं यत्तद्दर्शयत मा चिरम् ॥ ११ ॥ विलक्षा व्रीडिता देवा गत्वा नारायणं तदा ॥ अब्रुवन्वैश्वरूपं नो शक्ता दर्शयितुं वयम् ॥ १२ ॥ ततो यथेष्टं ते जग्मुः स च विष्णुरचिंतयत् ॥ उग्ररूपा स्थिता देवी देहं दहति भार्गवी ॥ १३ ॥ तां तस्मात्तत्र गत्वाऽहं वरं दत्त्वा तु वाञ्छितम् ॥ पुनस्तपः करिष्यामि दर्शयिष्यामि वा पुनः ॥ वैष्णवं[2] विश्वरूपं यद्दुर्दृश्यं देवदानवैः ॥ १४ ॥ ॥ मार्कंडेय उवाच ॥ ॥ ततो गत्वा हृषीकेशः सागरांतस्थितां श्रियम् ॥ प्राह तुष्टोऽस्मि ते देवि वरं वृणु यथेप्सितम् ॥ १५ ॥ ॥ श्रीरुवाच ॥ ॥ यदि तुष्टोऽसि मे देव प्रपन्नाया जनार्दन ॥ तदा दर्शय यद्दृष्टमप्सरोभिस्तवाऽनघ ॥ १६ ॥ विश्वरूपमनंतं च भूतभावन केशव ॥ गंधमादनमासाद्य कृतं यच्च तपस्त्वया ॥ १७ ॥ तद्वदस्व विभो विष्णो न मिथ्या यदि केशव ॥ श्रद्दधामि न चैवाऽहं रूपस्याऽस्य कथंचन ॥१८॥ बहुभिर्यक्षरक्षोभिर्मायाचारिप्रचारिभिः ॥ छंदिता मम जानद्भिर्भावमंतर्गतं हरौ ॥ १९ ॥ भूत्वा विष्णुस्वरूपास्ते चक्रिणश्च चतुर्भुजाः ॥ सुव्रीडिता गताः सर्वे विश्वरूपोसहा[3] यतः ॥ २० ॥ ॥ ॥ मार्कंडेय उवाच ॥ ॥ नारायऽणोऽथ भगवाञ्छंखचक्रगदाभृतम् ॥ तया तथोक्तस्तद्रूपं मुक्त्वा वै सुरपूजितम् ॥ २१ ॥ रूपं परं यथोक्तं वै विश्वरूपमदर्शत् ॥ दर्शयित्वा वचः प्राह पंचरात्रविधानतः ॥ २२ ॥ योऽर्चयिष्यति मां नित्यं स पूज्यः स च पूजितः ॥ धनधान्यसमायुक्तः सर्व भोगसमन्वितः ॥ २३ ॥ मूलं हि सर्वधर्माणां ब्रह्मचर्यं परं तपः ॥ तेनाहं तत्र स्थास्यामि मूलश्रीपतिसंज्ञितः ॥ २४ ॥ मूलश्रीः प्रोच्यते

१ सती--भवानी तां प्रति कदाचिदगत्य--कथाप्रस्तावांत इदं वक्ष्यमाणं प्राह मयेत्यादि । २ अस्य--इदानीं मद्दर्शनपथं गतस्य--तत्र--रूपस्य--इत्यर्थः । ३ विश्वरूपासहाः--विश्वरूपं दर्शयितुमसमर्थाः--इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्राह्मी ब्रह्मचर्यस्वरूपिणी ॥ सर्वयोगमयी पुण्या सर्वपापहरी शुभा ॥ २५ ॥ पतिस्तस्याः प्रभुरहं वरदः प्राणिनां प्रिये ॥ रेवा जले नरः स्नात्वा योऽर्चयेन्मां यतव्रतः ॥ २६ ॥ मूलश्रीपतिनामानं वाञ्छितं प्राप्नुयात्फलम् ॥ दानानि तत्र यो दद्या न्महादानानि च प्रिये ॥ २७ ॥ सहस्रगुणितं पुण्यमन्यस्थानादवाप्यते ॥ दृष्टं त्वया तत्र देशे सम्यक्चैवावधारितम् ॥ तद र्चित्वा परान्कामानाप्स्यसि त्वं न संशयः ॥ २८ ॥ वरं वृणीष्व देवेशि वाञ्छितं दुर्लभं सुरैः ॥ दुर्गसंसारकांतारपतितैः परमे श्वरि ॥ २९ ॥ ॥ श्रीरुवाच ॥ ॥ नारायण जगद्धातर्नारायण जगत्पते ॥ नारायण परब्रह्म नारायणपरायण ॥ ३० ॥ प्रसीद पाहि मां भक्त्या सम्यक्सर्गे नियोजय ॥ प्रियो ह्यसि प्रियाऽहं ते यथा स्यां तत्तथा कुरु ॥ ३१ ॥ गृहं धर्मार्थकामानां कारणं देव संमतम् ॥ तदा स्थायाऽश्रमं पुण्यं मां श्रेयसि नियोजय ॥ ३२ ॥ ॥ नारायण उवाच ॥ ॥ नारायणगिरा देवि विज्ञप्तोऽस्मि यतस्त्वया ॥ नारायणगिरि र्नाम तेन मेऽत्र भविष्यति ॥ ३३ ॥ नारायणस्मृतौ याति दुरितं जन्मकोटिजम् ॥ यस्माद्गिरति तस्माच्च गिरिरित्येव शब्दितम् ॥ ३४ ॥ तस्मा त्सर्वाश्रयो देवि गिरिः पर्वतराड् भवेत् ॥ सुरासुरमनुष्याणां यथाहमपि चाऽऽश्रयः ॥ ३५ ॥ य एतत्पूजयिष्यंति मंडलस्थं परं मम ॥ नारायण गिरिर्नाम देवरूपं शुभेक्षणे ॥ ३६ ॥ ते दिव्यज्ञानसंपन्ना दिव्यदेहविचेष्टिताः ॥ दिव्यं लोकमवाप्स्यंति दिव्यभोगसमन्विताः ॥ ३७ ॥ ॥ ॥ मार्कंडेय उवाच ॥ ॥ तयोरेवं संवदतोर्देवा इंद्रपुरोगमाः ॥ समागता वनोद्देशं सागरांते महर्षयः ॥ ३८ ॥ ततो भृगुं देवराजो नाराय णविचिंतितम् ॥ वव्रे ज्ञात्वा तु तत्कन्यां धर्मात्मा स ददौ च ताम् ॥ ३९ ॥ धर्मोऽपि विधिवद्वत्स विवाहं समकारयत् ॥ देवदेवस्य राजर्षे देवतार्थे समाहितः ॥ ४० ॥ ॥ युधिष्ठिर उवाच ॥ ॥ धर्मो विवाहमकरोद्विधिवद्यत्त्वयोदितम् ॥ को विधिस्तत्र का दत्ता दक्षिणा भृगुणाऽपि च ॥ ॥ ४१ ॥ विवाहयज्ञे समभूत्स्रुक्स्रुवग्रहणे च कः ॥ ऋत्विजः के सदस्याश्च तस्यासन्द्विजसत्तम ॥ ४२ ॥ किं तस्याऽवभृथं त्वासीत्तत्सर्वं वद विस्तरात् ॥ त्वद्वाक्यामृतपानेन तृप्तिर्मम न विद्यते ॥ ४३ ॥ ॥ मार्कंडेय उवाच ॥ ॥ नारायणविवाहस्य यज्ञस्य च युधिष्ठिर ॥ तपस स्तस्य देवस्य सम्यगाचरणस्य च ॥ ४४ ॥ वक्तुं समर्थो न गुणान्ब्रह्माऽपि परमेश्वरः ॥ तथाप्युद्देशतो वच्मि शृणु भूत्वा समाहितः ॥ ४५ ॥ ब्रह्मा सन्तर्पयस्तत्र स्रुक्स्रुवग्रहणे रताः ॥ अग्नीन्जुहुविरे राजन्वेदिर्धात्री ससागरा ॥ ४६ ॥ ददुः समुद्रा रत्नानि ब्रह्मर्षिभ्यो नृपोत्तम ॥ धनदोऽपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



दद‍ौ वित्तं सर्वब्राह्मणवाञ्छितम् ॥ ४७ ॥ विश्वकर्माऽपि देवानां ब्रह्मर्षीणां परंतप ॥ वेश्मानि सुविचित्राणि सर्वरत्नमयानि च ॥ ४८ ॥ कृत्वा
प्रदर्शयामास देवेंद्राय यशस्विने ॥ शतक्रतुस्ततो विप्रान्कापिष्ठलपुरोगमान् ॥ ४९ ॥ शौनकादींश्च पप्रच्छ बाष्कलाञ्छागलानपि ॥ आत्रेयानपि
राजेंद्र वृणुध्वमभिवाञ्छितम् ॥ ५० ॥ दृष्ट्वा ते चित्ररत्नानि प्राहुः सर्वेश्वरेश्वरम् ॥ देवानां च ऋषीणां च संगमोऽयं सुपुण्यकृत् ॥ ५१ ॥ अस्मि
न्पुण्ये सुरेशान वस्तुं वाञ्छामहे सदा ॥ शतक्रतुः प्राह पुनर्वासो वोऽत्र भविष्यति ॥ सत्यधर्मरता यूयं यावत्कालं भविष्यथ ॥ ५२ ॥ ॥ मार्कं
डेय उवाच ॥ ॥ पृष्टं यद्राजशार्दूल के मखे होत्रिणोऽभवन् ॥ तत्प्रोच्यमानमधुना शृणु भूत्वा समाहितः ॥ ५३ ॥ सनत्कुमारप्रमुखाः सद
स्यास्तस्य चाऽभवन् ॥ औद्गात्रमत्र्यंगिरसौ मरीचिश्च चकार ह ॥ ५४ ॥ हौत्रं धर्मवशिष्ठौ च ब्रह्मत्वं सनको मुनिः ॥ षट्त्रिंशद्ग्रामसाहस्रं
प्रादात्तेभ्यः शतक्रतुः ॥ ५५ ॥ लक्ष्मीर्भर्त्रा च संयुक्ताभवत्तत्कृतवान्प्रभुः ॥ ब्रह्मणो जुह्वतो वह्निं यावद्देशस्थितैः सुरैः ॥ ५६ ॥ दृष्टं ललाटं
देशेऽसौ ललाट इति संज्ञितः ॥ स देशः श्रीपतेः क्षेत्रपुण्यं देवर्षिसेवितम् ॥ ५७ ॥ सर्वाश्चर्यमयं दिव्यं दिव्यसिद्धिसमन्वितम् ॥ ब्राह्मणानां
ततः पंक्तिं निवेशयितुमुद्यता ॥ ५८ ॥ लक्ष्मीः श्रीपतिनामानमाह देवं वचस्तदा ॥ ॥ श्रीरुवाच ॥ ॥ य एते ब्राह्मणाः शिष्या भृग्वादीनां
यतव्रताः ॥ ५९ ॥ तान्निवेशयितुमिच्छामि त्वत्प्रसादादधोक्षज ॥ मरीच्यादयः सुरेन्द्रेण स्थापिता गरुडध्वज ॥ ६० ॥ नैष्ठिकव्रतिनो विप्रा
बहवोऽत्र यतव्रताः ॥ प्राजापत्ये व्रते ब्राह्मे केचिदत्र व्यवस्थिताः ॥ तानहं स्थापयिष्यामि त्वत्प्रसादादधोक्षज ॥ ६१ ॥ ॥ मार्कंडेय उवाच ॥
ततः कौतूहलधरो भगवान्वृषभध्वजः ॥ पप्रच्छ व्रतिनः सर्वान्वृत्तिभेदे व्यवस्थितान् ॥ ६२ ॥ नारदोऽपि महादेवमुपेत्य च सतीपतिम् ॥ प्राह
कृष्णाजिनधरो नैष्ठिका ब्राह्मणा ह्यमी ॥ ६३ ॥ अमी कार्याः सुवस्त्रेण छन्नगुह्या द्विजोत्तमाः ॥ प्राजापत्याश्चतुर्विंशसहस्राणि नरेश्वर ॥ ६४ ॥
ब्रह्मचर्यव्रतस्थानां व्रतब्रह्मविचारिणाम् ॥ द्वादशैषां सहस्राणि संति वै वृषभध्वज ॥ ६५ ॥ नारदस्य वचः श्रुत्वा देवा देवर्षयोऽपि
च ॥ साधुसाध्वित्यमन्यंत नोचुः केचन किंचन ॥ ६६ ॥ समाहूयत्ततो लक्ष्मीस्तान्विप्रान्भक्तिसंयुता ॥ उवाच चरणान्गृह्य
प्रसादः क्रियतां मयि ॥ ६७ ॥ षट्त्रिंशच्च सहस्राणि वेश्मनामत्र संस्थितिः ॥ विश्वकर्मकृतानां तु तेषु तिष्ठंतु वोऽखिलाः ॥ ६८ ॥
ते तथेति प्रतिज्ञाय स्थिताः संप्रीतमानसाः ॥ धनधान्यसमृद्धाश्च वाञ्छितप्राप्तिलक्षणाः ॥ सर्वकामसमृद्धाश्च ह्यनारंभेषु कर्मणाम् ॥ ६९ ॥

१ वः–द्वितीयात्र प्रथमार्थे आर्षी । यूयम्–इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति संस्थाप्य तान्विप्रान्सा स्थिता पर्यपालयत् ॥ चतुर्द्धा तु स्थितो विष्णुः श्रिया देव्याः प्रिये रतः ॥ ७० ॥ एवं वैवाहिकमखे निवृत्ते ऋषयस्तु तम् ॥ ऊचुश्चावभृथस्नानं कुत्र कुर्मो जनार्दन ॥ ७१ ॥ इति श्रुत्वा तु वचनं श्रीपतिः पादपंकजात् ॥ मुमोच जाह्नवीतोयं रेवामध्यगमं शुचि ॥ ७२ ॥ हरेः पादोदकं दृष्ट्वा निःसृतं मुनयस्तु ते ॥ विस्मिताः समपद्यंत जानंतस्तस्य गौरवम् ॥ ७३ ॥ रुद्रेण सहिताः सर्वे देवता ऋषयस्तथा ॥ संकथा विस्मिताश्चक्रुर्विधुन्वंतः शिरांसि च ॥ ७४ ॥ ॥ ऋषय ऊचुः ॥ ॥ ब्रूहि शंभो किमत्रायं अकस्माद्वारिसंभवः ॥ विष्णोः पादांबुजोत्थश्च सम्मोहकरणः परः ॥ ७५ ॥ ॥ ईश्वर उवाच ॥ ॥ पादोदकमिदं विष्णोरहं जानामि वै सुराः ॥ दशाश्वमेधावभृथैः स्नानमत्रातिरिच्यते ॥ ७६ ॥ युष्माभिः श्रीपतिः पूज्यः स्नानं चावभृथं कुतः ॥ भविष्यतीति तेनाशु इदं वोऽर्थे विनिर्म्मितम् ॥ ७७ ॥ स्नात्वात्र त्रिदशेशाना यत्फलं संप्रपद्यते ॥ वक्तुं न केनचिद्यांति[1] ततः किमुत्तरं वचः ॥ ७८ ॥ ॥ मार्कंडेय उवाच ॥ ॥ एवमुक्त्वा तु ते सर्वे स्नानं कृत्वा यथागतम् ॥ जग्मुर्देवा महेशानपुरोगा भरतर्षभ ॥ ७९ ॥ ब्राह्मणाश्च ततः सर्वे स्ववेश्मान्येव भेजिरे ॥ देवतीर्थे महाराज सर्वपापप्रणाशने ॥ ८० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखंडे श्रीपतिविवाहवर्णनंनाम चतुर्नवत्युत्तरशततमोऽध्यायः ॥ १९४ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ देवतीर्थे तु किन्नाम माहात्म्यं समुदाहृतम् ॥ फलं किं स्नानदानादिकारिणां जायते मुने ॥ १ ॥ ॥ ॥ मार्कंडेय उवाच ॥ ॥ पृथिव्यां यानि तीर्थानि देवैर्मुनिगणैरपि ॥ सेवितानि महाबाहो तानि ध्यातानि विष्णुना ॥ २ ॥ समागतान्येकतां वै तत्र तीर्थे युधिष्ठिर ॥ तत्तीर्थं वैष्णवं पुण्यं देवतीर्थमिति श्रुतम् ॥ ३ ॥ कुरुक्षेत्रं भुवि परमंतरिक्षे त्रिपुष्करम् ॥ पुरुषोत्तमं दिवि परं देवतीर्थं परात्परम् ॥४॥ देवतीर्थसमं नास्ति तीर्थमत्र परत्र च ॥ यत्प्राप्य मनुजस्तप्येन्न कदाचिद्युधिष्ठिर ॥५॥ देवैरुक्तानि तीर्थानि योऽत्र स्नानं समाचरेत् ॥ देवतीर्थे स सर्वत्र स्नातो भवति मानवः ॥ ६ ॥ एवमस्त्विति तैरुक्ता देवा ऋषिगणा अपि ॥ संतुष्टाः श्रीशमभ्यर्च्य स्वंस्वं स्थानं तु भेजिरे ॥७॥ सूर्यग्रहेऽत्र वै क्षेत्रे स्नात्वा यत्फलमश्नुते ॥ स्नात्वा श्रीशं समभ्यर्च्य समुपोष्य यथाविधि ॥ ८ ॥ यद्ददाति हिरण्यानि दानानि विधिवन्नृप ॥ तदनंतफलं सर्वं सूर्यस्य ग्रहणे यथा ॥ ९ ॥ भूमिदानं धेनुदानं स्वर्णदानमनंतकम् ॥ वस्त्रदानमनंतं च फलं प्राह शतक्रतुः ॥ १० ॥ सोमो वै वस्त्रदानेन मौक्तिकानां च भार्गवः ॥ सुवर्णस्य रविर्दानं धर्मराजो ह्यनंतकम् ॥ ११ ॥ देवतीर्थे तु यद्दानं श्रद्धायुक्तेन दीयते ॥ तदनंतफलं प्राह

[1] वक्तुं न केनचिद्याति—केनापि वक्तुं न शक्यते—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



बृहस्पतिरुदारधीः ॥ १२ ॥ देवतीर्थं भृगुक्षेत्रे सर्वतीर्थाधिकं नृप ॥ देवतीर्थे नरः स्नात्वा श्रीपतिं योऽनुपश्यति ॥ १३ ॥ सोमग्रहे कुलशतं
स समुद्धृत्य नाकभाक् ॥ दानानि द्विजमुख्येभ्यो देवतीर्थे नराधिप ॥ १४ ॥ यैर्दत्तानि नरैर्भोगभागिनः प्रेत्य चेह ते ॥ देवतीर्थे विप्रभोज्यं
हरिमुद्दिश्य यश्चरेत् ॥ १५ ॥ स सर्वाह्लादमाप्नोति स्वर्गलोके युधिष्ठिर ॥ देवतीर्थे नरो नारी स्नात्वा नियतमानसौ ॥ १६ ॥ उपोष्यैकादशीं
भक्त्या पूजयेद्यः श्रियः पतिम् ॥ रात्रौ जागरणं कृत्वा घृतेनोद्बोध्य दीपकम् ॥ १७ ॥ द्वादश्यां प्रातरुत्थाय तथा वै नर्मदाजले ॥ विप्रदां
पत्यमभ्यर्च्य विधिवत्कुरुनंदन ॥ १८ ॥ वस्त्राभरणतांबूलपुष्पधूपविलेपनैः ॥ अक्षये विष्णुलोकेऽसौ मोदते चरितव्रतः ॥ १९ ॥ यः सदैकाद
शीतिथौ स्नात्वोपोष्याऽर्चयेद्धरिम् ॥ रात्रौ जागरणं कुर्याद्वेदशास्त्रविधानतः ॥ २० ॥ धर्मराजकृतां पापां न स पश्यति यातनाम् ॥ पंचरात्र
विधानेन श्रीपतिं योऽर्चयिष्यति ॥ २१ ॥ दीक्षामवाप्य विधिवद्वैष्णवीं पापनाशिनीम् ॥ स्वर्गमोक्षप्रदां पुण्यां भोगदां वित्तदामथ ॥ २२ ॥
राज्यदां वा महाभाग पुत्रदां भाग्यदामथ ॥ सुकलत्रप्रदां वापि विष्णोर्भक्तिप्रदामिति ॥ २३ ॥ तरिष्यति भवांभोधिं स नरः कुरुनंदन ॥
योऽर्चयिष्यति तत्रैव देवतीर्थे श्रियः पतिम् ॥ २४ ॥ विश्वरूपमथो सम्यङ्मूलश्रीपतिमेव वा ॥ नारायणगिरिं वाऽपि गृहे वैकादशीतिथौ ॥
॥ २५ ॥ भक्तिमाञ्छ्रद्धया युक्तः क्षीरैस्तीर्थोदकैरपि ॥ सुसूक्ष्मैरहतैर्वस्त्रैर्महाकौशेयकैर्नृप ॥ २६ ॥ विचित्रैर्नेत्रजैर्वाऽपि धूपैरगुरुचंदनैः ॥
गुग्गुलैर्घृतमिश्रैश्च नैवेद्यैर्विविधैरपि ॥ २७ ॥ पायसाद्यैर्मनुष्येंद्र पयसा वा युधिष्ठिर ॥ पिष्टदीपैः सुविमलैर्वर्द्धमानैर्मनोहरैः ॥ २८ ॥
पूजयित्वा नरो याति यथा तच्छृणु भारत ॥ शंखी चक्री गदी पद्मी भूत्वाऽसौ गरुडध्वजः ॥ २९ ॥ देवलोकानतिक्रम्य विष्णुलोकं
प्रपद्यते ॥ यस्तु वै परया भक्त्या श्रीपतेः पादपंकजम् ॥ ३० ॥ चतुर्द्धाऽधिष्ठितं पश्येच्छ्रियं त्रैलोक्यमातरम् ॥ नृत्यगीतविनोदेन मुच्यते पात
कैर्ध्रुवम् ॥ ३१ ॥ नीराजने तु देवस्य प्रातर्मध्ये दिने तथा ॥ सायं च नियतो नित्यं यः पश्येत्पूजयेद्धरिम् ॥ ३२ ॥ स तीर्त्वा ह्यापदं दुर्गां
नैवार्त्तिं समवाप्नुयात् ॥ आयुःश्रीवर्द्धनं पुंसां चक्षुषामपि पूरकम् ॥ ३३ ॥ उपपापहरं चैव सदा नीराजनं हरेः ॥ तदा नीराजनाकाले यो हरेः
॥१४५॥ पठति स्तवम् ॥ ३४ ॥ स धन्यो देवदेवस्य प्रसन्नेनांऽतरात्मना ॥ हरेर्नीराजनाशेषं पाणिभ्यां यः प्रयच्छति ॥ ३५ ॥ संगृह्य चक्षुषी तेन योजये ॥३११॥
न्मार्जयन्मुखम् ॥ तिमिरादीनक्षिरोगान्नाशयेद्दीतिमन्मुखम् ॥ ३६ ॥ भवत्यशेषदुष्टानां नाशायालं नरोत्तम ॥ दीपप्रज्वलनं यस्य नित्यमग्रे
श्रियः पतेः ॥ ३७ ॥ स्नात्वा रेवाजले पुण्ये प्रदद्यादधिकं व्रती ॥ सप्तद्वीपवती तेन ससागरवनापगा ॥ ३८ ॥ प्रदक्षिणीकृता स्याद्वै धरणी शंक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रोऽब्रवीत् ॥ इदं यः पच्यमानं तु शृणुयात्पठतेऽपि वा ॥ ३९ ॥ स्मरणं सोंऽतसमये विपाप्मा प्राप्नुयाद्धरेः ॥ इदं यशस्यमायुष्यं स्वर्ग्यं पितृगुण प्रियम् ॥ ४० ॥ माहात्म्यं श्रावयेद्विप्राञ्छ्रीपतेः श्राद्धकर्मणि ॥ घृतेन मधुना तेन तर्पिताः स्युः पितामहाः ॥ ४१ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे श्रीपतिमाहात्म्यवर्णनंनाम पंचनवत्युत्तरशततमोऽध्यायः ॥ १९५ ॥ ॥ छ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेद्धरधीश हंसतीर्थमनुत्तमम् ॥ यत्र हंसस्तपस्तप्त्वा ब्रह्मवाहनतां गतः ॥ १ ॥ हंसतीर्थे नरः स्नात्वा दानं दत्त्वा च कांचनम् ॥ सर्वपापविनिर्मुक्तो ब्रह्मलोकं स गच्छति ॥ २ ॥ हंसयुक्तेन यानेन तरुणादित्यवर्चसा ॥ सर्वकामसमृद्धेन सेव्यमानोऽप्सरोगणैः ॥ ३ ॥ तत्र भुक्त्वा यथाकामं सर्वान्भोगान्यथेप्सितान् ॥ जातिस्मरो हि जायेत पुनर्मानुष्यमागतः ॥ ४ ॥ संन्यासेन त्यजेद्देहं मोक्षमाप्नोति भारत ॥ ५ ॥ एतत्ते कथितं पार्थ हंसतीर्थस्य यत्फलम् ॥ सर्वपापहरं पुण्यं सर्वदुःखविनाशनम् ॥ ६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे हंसतीर्थमाहात्म्यवर्णनंनाम षण्णवत्युत्तरशततमोऽध्यायः ॥ १९६ ॥ ॥ छ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तस्यैवानंतरं गच्छेत्सूर्यतीर्थमनुत्तमम् ॥ मूलस्थानमिति ख्यातं पद्मजस्थापितं शुभम् ॥ १ ॥ मूलश्रीपतिना देवी प्रोक्ता स्थापय भास्करम् ॥ श्रुत्वा देवोदितं देवी स्थापयामास भास्करम् ॥ २ ॥ प्रोच्यते नर्मदातीरे मूलस्थानाख्यभास्करः ॥ ३ ॥ तत्र तीर्थे नरो यस्तु स्नात्वा नियतमानसः ॥ संतर्प्य पितृदेवांश्च पिंडेन सलिलेन च ॥ ४ ॥ मूलस्थानं ततः पश्येत्स गच्छेत्परमां गतिम् ॥ गुह्याद्गुह्यतरस्तत्र विशेषस्तु श्रुतो मया ॥ ५ ॥ समागमे मुनीनां तु शंकराच्छशिशेखरात् ॥ सदा वै शुक्लसतम्यां मूलमादित्यवासरः ॥ ६ ॥ तदा रेवाजलं गत्वा स्नात्वा संतर्प्य देवताः ॥ पितॄंश्च भरतश्रेष्ठ दत्त्वा दानं स्वशक्तितः ॥ ७ ॥ करवीरैस्ततो गत्वा रक्तचन्दनवारिणा ॥ संस्थाप्य भास्करं भक्त्या संपूज्य च यथाविधि ॥ ८ ॥ ततः सागुरुकैर्धूपैः कुन्दरैश्च विशेषतः ॥ धूपयेद्देवदेवेशं दीपान्बोध्य दिशो दश ॥ ९ ॥ उपोष्य जागरं कुर्याद्गीतवाद्यं विशेषतः ॥ एवं कृते महीपाल न भवेदुग्रदुःखभाक् ॥ १० ॥ सूर्यलोके वसेत्तावद्यावत्कल्पशतत्रयम् ॥ गंधर्वैरप्सरोभिश्च सेव्यमानो नृपोत्तम ॥ ११ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे मूलस्थानतीर्थमाहात्म्यवर्णनंनाम सप्तनवत्युत्तरशततमोऽध्यायः ॥ १९७ ॥ ॥ मार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल भद्रकालीतिसंगमम् ॥ शूलतीर्थमिति ख्यातं स्वयं देवेन निर्मितम् ॥ १ ॥ पञ्चायतनमध्ये तु तिष्ठते परमेश्वरः ॥ शूलपाणिर्महादेवः सर्वदैवतपूजितः ॥ २ ॥ स संगमो नृपश्रेष्ठ नित्यं देवैर्नि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



षेवितः ॥ दर्शनात्तस्य तीर्थस्य स्नानदानाद्विशेषतः ॥ ३ ॥ दौर्भाग्यं दुर्निमित्तं च ह्यभिशापो नृपग्रहः ॥ यदन्यद्दुष्कृतं कर्म नश्यते शंकरोऽब्र
वीत् ॥ ४ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथं शूलेश्वरी देवी कथं शूलेश्वरो हरः ॥ प्रथितो नर्मदातीरे एतद्विस्तरतो वद ॥ ५ ॥ ॥ मार्क
डेय उवाच ॥ ॥ बभूव ब्राह्मणः कश्चिन्मांडव्य इति विश्रुतः ॥ वृत्तिमान्सर्वधर्मज्ञः सत्ये तपसि च स्थितः ॥ ६ ॥ अशो
काश्रममध्यस्थो वृक्षमूले महातपाः ॥ ऊर्द्ध्वबाहुर्महातेजास्तस्थौ मौनव्रतान्वितः ॥ ७ ॥ तस्य कालेन महता तीव्रे तपसि वर्त्ततः ॥
तमाश्रममनुप्राप्ता दस्यवो लोप्त्रहारिणः ॥ ८ ॥ अनुसर्प्यमाणा बहुभिः पुरुषैर्भरतर्षभ ॥ ते तस्यावसथे लोप्त्रं न्यदधुः
कुरुनन्दन ॥ ९ ॥ निधाय च तदा लीनास्तत्रैवाऽऽश्रममण्डले ॥ तेषु लीनेष्वथो शीघ्रं ततस्तद्रक्षिणां बलम् ॥ १० ॥ आज
गाम ततोऽपश्यंस्तमृषिं तस्करानुगाः ॥ तमपृच्छंस्तदा वृत्तं रक्षिणस्तं तपोधनम् ॥ ११ ॥ वद केन पथा याता दस्यवो द्विजसत्तम ॥ तेन गच्छा
महे ब्रह्मन्यथा शीघ्रतरं वयम् ॥ १२ ॥ तथा तु वचनं तेषां ब्रुवतां स तपोधनः ॥ न किंचिद्वचनं राजन्नवदत्साध्वसाधु वा ॥ १३ ॥ ततस्ते राज
पुरुषा विचिन्वंतस्तमाश्रमम्॥ संयम्यैनं ततो राज्ञे सर्वान्दस्यून्यवेदयन् ॥१४॥ तं राजा सहितैश्चोरैरन्वशाद्वध्यतामिति ॥ संबध्य तं च तै राजञ्छू
ले प्रोतो महातपाः॥ १५ ॥ ततस्ते शूलमारोप्य तं मुनिं रक्षिणस्तदा ॥ प्रतिजग्मुर्महीपाल धनान्यादाय तान्यथ ॥१६॥ शूलस्थः स तु धर्मात्मा
कालेन महता तदा ॥ ध्यायन्देवं त्रिलोकेशं शंकरं तमुमापतिम् ॥ १७ ॥ बहुकालं महेशानं मनसाऽऽध्याय संस्थितः ॥ निराहारोऽपि विप्रर्षि
र्मरणं नाऽभ्यपद्यत ॥ १८ ॥ धारयामास विप्राणामृषभः स हृदा हरिम् ॥ शूलाग्रे तप्यमानेन तपस्तेन कृतं तदा ॥ १९ ॥ संतापं परमं जग्मुः
श्रुत्वैतन्मुनयोऽखिलाः ॥ ते रात्रौ शकुना भूत्वा संन्यवर्त्तंत भारत ॥ २० ॥ दर्शयंतो मुनेः शक्तिं तमपृच्छन्द्विजोत्तमम्॥ श्रोतुमिच्छाम ते ब्रह्म
न्किं पापं कृतवानसि ॥ २१ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततः स मुनिशार्दूलस्तानुवाच तपोधनान् ॥ दोषतः किं गमिष्यामि न हि मेऽन्यो
पराध्यति ॥ २२ ॥ एवमुक्त्वा ततः सर्वानाचचक्षे ततो मुनिः॥ मुनयश्च ततो राज्ञे द्वितीयेह्नि न्यवेदयन् ॥ २३ ॥ राजा तु तमृषिं श्रुत्वा निष्क्रांतः
॥१४६॥ सह बंधुभिः ॥ प्रसादयामास तदा शूलस्थमृषिसत्तमम् ॥ २४ ॥ ॥ राजोवाच ॥ ॥ यन्मयाऽपकृतं तात तवाऽज्ञानवशाद्बहु ॥ प्रसादये त्वां
तत्राऽहं न मे त्वं क्रोद्धुमर्हसि ॥ २५ ॥ एवमुक्तस्ततो राज्ञा प्रसादमकरोन्मुनिः ॥ कृतप्रसादं राजा तं ततः समवतारयत ॥ २६ ॥ अवतीर्यमाणस्तु ॥३२०॥
मुनिः शूले मांसत्वमागते ॥ अतिसंपीडितो विप्रः शंकरं मनसाऽगमत् ॥ २७ ॥ संध्यातः शंकरस्तेन बहुकालोपवासतः ॥ प्रादुर्भूतो महादेवः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शूलं तस्य तथाच्छिनत् ॥ २८ ॥ शूलमूलस्थितः शंभुस्तुष्टः प्राह पुनःपुनः ॥ ब्रूहि किं क्रियतां विप्र सत्त्वस्थानपरायण ॥ २९ ॥ अदेयमपि दास्यामि तुष्टोऽस्म्यद्योमया सह ॥ किं तु सत्यवतां लोके सिद्धिर्न स्याच्च भूयसी ॥ ३० ॥ स्वकर्मणोनुरूपं हि फलं भुंजंति जंतवः ॥ शुभेन कर्मणा भूतिर्दुःखं स्यात्पातकेन तु ॥ ३१ ॥ बहुभेदप्रभिन्नं तु मनुष्येषु विपच्यते ॥ केषां दारिद्र्यभावेन केषां धनविपत्तिजम् ॥ ३२ ॥ संतत्यभावजं केषां केषां चित्तद्विपर्यये॥तथा दुर्वृत्तितस्तेषां फलमाविर्भवेन्नृणाम्॥३३॥ केषांचित्पुत्रमरणे वियोगात्प्रियमित्रयोः॥ राजचौराग्नितः केषां दुःखं स्याद्दैवनिर्मितम् ॥ ३४ ॥ तच्छरीरे तु केषांचित्कर्मणा संप्रदृश्यते ॥ जराश्च विविधाः केषां दृश्यंते व्याधयस्तथा ॥ ३५ ॥ दृश्यंते चाऽभिशापाश्च पूर्वकर्म्मानुसंचिताः ॥ कष्टाः कष्टतरावस्था गताः केचिदनागसः ॥ ३६ ॥ पूर्वकर्मविपाकेन धर्म्मेण तपसि स्थिताः ॥ दांताः स्वदारनिरता भूरिदाः परिपूजकाः ॥ ३७ ॥ ह्रीमंतो नयसंयुक्ता अन्ये बहुगुणैर्युताः ॥ दुर्गमामापदं प्राप्य निजकर्मसमुद्भवाम् ॥ ३८ ॥ न संज्वरंति ये मर्त्या धर्मनिंदां न कुर्वते ॥ इदमेव तपो मत्वा क्षिपंति सुविचेतसः ॥ ३९ ॥ हा भ्रातर्मातः पुत्रेति कष्टेषु न वदंति ये ॥ स्मरंति मां महेशानमथवा पुष्करेक्षणम् ॥ ॥ ४० ॥ दुष्कृतं पूर्वजं भोक्तुं ध्रुवं तदुपशाम्यति ॥४१॥ दिनानि यावंति वसेत्स कष्टे यथाकृतं चिंतयदेवमीशम् ॥ तावंति सौम्यानि कृतानि तेन भवंति विप्र श्रुतिनोदनैषा ॥ ४२ ॥ यस्मात्त्वया कष्टगतेन नित्यं स्मृतश्चाहं मनसा पूजितश्च ॥ गौरीसहायस्तेन इहाऽगतोऽस्मि ब्रूह्यद्य कृत्यं क्रियतां किं नु विप्र ॥ ४३ ॥ ॥ मांडव्य उवाच ॥ ॥ तुष्टो यद्युमया सार्धं वरदो यदि शंकर ॥ तदा मे शूलसंस्थस्य संशयं परमं वद ॥ ४४ ॥ न रुजा मम काऽपि स्याच्छूलसंप्रोतितेऽगके ॥ अमृतस्राविः तच्छूलं प्रभावात्कस्य शंस मे ॥ ४५ ॥ ॥ श्रीशूलपाणिरुवाच ॥ ॥ शूलस्थेन त्वया विप्र मनसा चिंतितोऽस्मि यत् ॥ अनयानां निहंताऽहं दुःखानां विनिबर्हणः ॥ ४६ ॥ ध्यातमात्रो ह्यऽहं विप्र पाताले वाऽपि संस्थितः ॥ शूलमूले त्वहं शंभुरग्रे देवी स्वयं स्थिता॥जगन्मातांबिका देवी त्वांऽमृतेनान्वपूरयत् ॥ ४७ ॥ ॥ माडव्य उवाच ॥ ॥ पूर्वमेव स्थितो यस्माच्छूलं व्याप्योमया सह ॥ प्रसादप्रवणो मह्यमिदानीं चानया सह ॥ ४८ ॥ यस्याः संस्मरणादेव दौर्भाग्यं प्रलयं व्रजेत् ॥ न दौर्भाग्यात्परं लोके दुःखाद्दुःखतरं किल ॥ ४९ ॥ किलैवं श्रूयते गाथा पुराणेषु सुरोत्तम ॥ त्रैलोक्यं दहतस्तुभ्यं सौभाग्यमेकतां गतम् ॥ ५० ॥ विष्णोर्वक्षःस्थलं प्राप्य तस्त्थितं चेति नः श्रुतम् ॥ पीतं तद्दक्षसत्रस्तदक्षेण परमेष्ठिना ॥ ५१ ॥

१ त्वा—त्वाम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तस्मात्सतीति संजज्ञ इयमिंदीवरेक्षणा ॥ यजतस्तस्य देवेश तव मानावखंडनात् ॥ ५२ ॥ जुहावाग्नौ तु सा देवी ह्यात्मानं प्राणसंज्ञिकम् ॥ आत्मानं भस्मसात्कृत्वा प्रालेयाद्रेस्ततः सुता ॥ ५३ ॥ मेनकायां प्रभो जाता सांप्रतं या ह्युमाभिधा ॥ अनादिनिधना देवी ह्यप्रतर्क्या सुरेश्वर ॥ ५४ ॥ यदि तुष्टोसि देवेश ह्युमा मे वरदा यदि ॥ उभावप्यत्र वै स्थाने स्थितौ शूलाग्रमूलयोः ॥ ५५ ॥ अवतारो यत्र तत्र संस्थितिं वै ततः कुरु ॥ ५६ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तेनैवमुक्ते सहसा कृत्वा भूमंडलं द्विधा ॥ निःसृतौ शूलमूलाग्राल्लिंगार्चाप्रतिरूपिणौ ॥ ५७ ॥ प्रद्योतयद्दिशः सर्वा लिंगं मूले प्रदृश्यते ॥ वामतः प्रतिमा देवी तदा शूलेश्वरी स्थिता ॥ ५८ ॥ विलोभयन्ती च जगद्भाति पूरयती दिशः ॥ दृष्ट्वा कृतांजलिपुटः स्तुतिं चक्रे द्विजोत्तमः ॥ ५९ ॥ ॥ मांडव्य उवाच ॥ ॥ त्वमस्य जगतो माता जगत्सौभाग्यदेवता ॥ न त्वया रहितं किंचिद्ब्रह्मांडेऽस्ति वरानने ॥ ६० ॥ प्रसादं कुरु धर्मज्ञे मम त्वाज्ञातुमर्हसि ॥ ईदृशेनैव रूपेण केषु स्थानेषु तिष्ठसि ॥ प्रसादप्रवणा भूत्वा वद तानि महेश्वरि ॥ ६१ ॥ ॥ श्रीदेव्युवाच ॥ ॥ सर्वगा सर्वभूतेषु द्रष्टव्या सर्वतो भुवि ॥ सर्वलोकेषु यत्किंचिद्विहितं न मया विना ॥ ६२ ॥ तथापि येषु स्थानेषु द्रष्टव्या सिद्धिमीप्सुभिः ॥ स्मर्त्तव्या भूतिकामेन तानि वक्ष्यामि तत्त्वतः ॥ ६३ ॥ वाराणस्यां विशालाक्षी नैमिषे लिंगधारिणी ॥ प्रयागे ललिता देवी कामुका गन्धमादने ॥ ६४ ॥ मानसे कुमुदानाम विश्वकाया तथाऽपरे ॥ गोमंते गोमती नाम मंदरे कामचारिणी ॥ ६५ ॥ मदोत्कटा चैत्ररथे हयन्ती हास्तिने पुरे ॥ कान्यकुब्जे स्थिता गौरी रंभा ह्यमलपर्वते ॥ ६६ ॥ एकाम्रके कीर्त्तिमती विश्वां विश्वेश्वरे विदुः ॥ पुष्करे पुरुहूता च केदारे मार्गदायिनी ॥ ६७ ॥ नंदा हिमवतः प्रस्थे गोकर्णे भद्रकर्णिका ॥ स्थानेश्वरे भवानी तु बिल्वके बिल्वपत्रिका ॥ ६८ ॥ श्रीशैले माधवीनाम भद्रे भद्रेश्वरीति च ॥ जया वराहशैले तु कमला कमलालये ॥ ६९ ॥ रुद्रकोट्यां तु कल्याणी काली कालंजरे तथा ॥ महालिंगे तु कपिला माकोटे मुकुटेश्वरी ॥ ७० ॥ शालिग्रामे महादेवी शिवलिंगे जलप्रिया ॥ मायापुर्यां कुमारी तु संताने ललिता तथा ॥ ७१ ॥ उत्पलाक्षी सहस्राक्षे हिरण्याक्षे महोत्पला ॥ गयायां विमलानाम मंगला पुरुषोत्तमे ॥ ७२ ॥ विपाशायाममोघाक्षी पाटला पुंड्रवर्धने ॥ नारायणी सुपार्श्वे तु त्रिकूटे भद्रसुन्दरी ॥ ७३ ॥ विपुले विपुलानाम कल्याणी मलयाचले ॥ कोटवी कोटितीर्थेषु सुगन्धा गंधमादने ॥ ७४ ॥ गोदाश्रमे त्रिसंध्या तु गंगाद्वारे रतिप्रिया ॥ शिवचंडे सभानंदा नंदिनी देविकातटे ॥ ७५ ॥ रुक्मिणी

१ प्रालेयाद्रेः—हिमालयस्य—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वारवत्यां तु राधा वृंदावने वने ॥ देवकी मथुरायां तु पाताले परमेश्वरी ॥ ७६ ॥ चित्रकूटे तथा सीता विंध्ये विंध्यनिवासिनी ॥ सह्याद्रावेकवीरा तु हरिश्चंद्रे तु चंडिका ॥ ७७ ॥ रमणा रामतीर्थे तु यमुनायां मृगावती॥ करवीरे महालक्ष्मी रूपादेवी विनायके ॥ ७८ ॥ आरोग्या वैद्यनाथे तु महाकाले महेश्वरी ॥ अभयेत्युष्णतीर्थे तु मृगी वा विंध्यकंदरे ॥ ७९ ॥ मांडव्ये मांडुकीनाम स्वाहा माहेश्वरे पुरे ॥ छागलिंगे प्रचंडा तु चंडिकाऽमरकण्टके ॥ ८० ॥ सोमेश्वरे वरारोहा प्रभासे पुष्करावती ॥ वेदमाता सरस्वत्यां पारा पारातटे मुने ॥ ८१ ॥ महालये महाभागा पयोष्ण्यां पिंगलेश्वरी ॥ सिंहिका कृतशौचे तु कार्त्तिके चैव शांकरी ॥ ८२ ॥ उत्पलावर्तके लोला सुभद्रा शोणसंगमे ॥ मता सिद्धवटे लक्ष्मीस्तरंगा भारताश्रमे ॥ ८३ ॥ जालंधरे विश्वमुखी तारा किष्किंधपर्वते ॥ देवदारुवने पुष्टिर्मेधा काश्मीरमण्डले ॥ ८४ ॥ भीमादेवी हिमाद्रौ तु पुष्टिर्वस्त्रेश्वरे तथा ॥ कपालमोचने शुद्धिर्माता कायावरोहणे ॥ ८५ ॥ शंखोद्धारे ध्वनिर्नाम धृतिः पिंडारके तथा ॥ काला तु चंद्रभागायामच्छोदे शक्तिधारिणी ॥ ८६ ॥ वेणायाममृतानाम बदर्यामुर्वशी तथा ॥ ओषधी चोत्तरकुरौ कुशद्वीपे कुशोदका ॥ ८७ ॥ मन्मथा हेमकूटे तु कुमुदे सत्यवादिनी ॥ अश्वत्थे वंदिनीका तु निधिर्वैश्रवणालये ॥ ८८ ॥ गायत्री वेदवदने पार्वती शिवसन्निधौ ॥ देवलोके तथेंद्राणी ब्रह्मास्ये तु सरस्वती ॥ ८९ ॥ सूर्यबिम्बे प्रभानाम मातॄणां वैष्णवी मता ॥ अरुंधती सतीनां तु रामासु च तिलोत्तमा ॥ ९० ॥ चित्रे ब्रह्मकलानाम शक्तिः सर्वशरीरिणाम् ॥ शूलेश्वरी भृगुक्षेत्रे भृगौ सौभाग्यसुन्दरी॥९१॥ एतदुद्देशतः प्रोक्तं नामाष्टशतमुत्तमम् ॥ अष्टोत्तरं च तीर्थानां शतमेतदुदाहृतम् ॥ ९२ ॥ इदमेव परं विप्र सर्वेषां तु भविष्यति ॥ पठत्यष्टोत्तरशतं नाम्नां यः शिवसन्निधौ ॥ ९३ ॥ स मुच्यते नरः पापैः प्राप्नोति स्त्रियमीप्सिताम् ॥ स्नात्वा नारी तृतीयायां मां समभ्यर्च्य भक्तितः ॥ ९४ ॥ न सा स्याद्दुःखिनी जातु मत्प्रभावान्नरोत्तम ॥ नित्यं मद्दर्शने नारी नियता या भविष्यति ॥ ९५ ॥ पतिपुत्रकृतं दुःखं न सा प्राप्स्यति कर्हिचित् ॥ मदालये तु या नारी तुलापुरुषसंज्ञितम् ॥ ९६ ॥ संपूज्य मंडयेद्देवाँल्लोकपालांश्च साग्निकान् ॥ सपत्नीकान्द्विजान्पूज्य वासोभिर्भूषणैस्तथा ॥ ९७ ॥ भूतेभ्यस्तु बलिं दद्यादृत्विग्भिः सह देशिकः ॥ ततः प्रदक्षिणीकृत्य तुलामित्यभिमंत्रयेत् ॥ ९८ ॥ शुचिरक्तांबरो वा स्याद्गृहीत्वा कुसुमांजलिम् ॥ नमस्ते सर्वदेवानां शक्तिस्त्वं परमा स्थिता ॥ ९९ ॥ साक्षिभूता जगद्धात्री निर्मिता विश्वयोनिना ॥ त्वं तुले सर्वभूतानां प्रमाणमिह कीर्त्तिता ॥ १०० ॥ कराभ्यां बद्धमुष्टिभ्यामास्ते पश्यन्नुमामुखम् ॥ ततो परे तुलाभागे न्यसेयुर्द्विजपुंगवाः ॥ १ ॥ द्रव्यमष्टविधं तत्र ह्यात्मवित्तानुसारतः ॥ मदंशभूतं विप्रेंद्र पृथिव्यां यदधिष्ठितम् ॥ २ ॥ सुवर्णं चैव निष्पावां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



स्तथा राजिकुसुम्भकम् ॥ तृणराजेंदुलवणं कुंकुमं तु तथाष्टमम् ॥ ३ ॥ एषामेकतमं कुर्याद्यथा वित्तानुसारतः ॥ साम्यादभ्यधिकं यावत्कांचनादि भवेद्द्विज ॥ ४ ॥ तावत्तिष्ठेन्नरो नारी पश्चादिदमुदीरयेत् ॥ नमो नमस्ते ललिते तुलापुरुषसंज्ञिते ॥ ५ ॥ त्वमुमे तारयस्वास्मानस्मात्संसार कर्दमात् ॥ ततोऽवतीर्य गुरवे पूर्वमर्द्धं निवेदयेत् ॥ ६ ॥ ऋत्विग्भ्योऽपरमर्द्धं च दद्यादुदकपूर्वकम् ॥ तेभ्यो लब्धा ततोऽनुज्ञां दद्यादन्येषु चार्थिषु ॥ ७ ॥ सपत्नीकं गुरुं रक्तवाससी परिधापयेत् ॥ अन्यांश्च ऋत्विजः शक्त्या गुरुं केयूरकंकणैः ॥ ८ ॥ शुक्लां गां क्षीरिणीं दद्याल्ललिता प्रीयता मिति ॥ अनेन विधिना या तु कुर्यान्नारी ममालये ॥ ९ ॥ मत्तुल्या सा भवेद्राज्ञां तेजसा श्रीरिवामला ॥ सावित्रीव च सौंदर्य्ये जन्मानि दश पंच च ॥ ११० ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ एवं निशम्य वचनं गौर्या द्विजवरोत्तमः ॥ नमस्कृत्य जगामाऽऽशु धर्मराज निवेशनम् ॥ ॥ ११ ॥ तदा प्रभृति तत्तीर्थं ख्यातं शूलेश्वरीति च ॥ तस्मिंस्तीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः ॥ १२ ॥ ब्राह्मणानन्नवासोभिः पिंडैः पितॄ पितामहान् ॥ भक्तोपहारैर्देवेशमुमया सह शंकरम् ॥ १३ ॥ धूपगुग्गुलदानैश्च दीपदानैः सुबोधितैः ॥ सर्वपापविनिर्मुक्तः स गच्छेच्छिवसन्निधिम् ॥ ॥ १४ ॥ तस्मिंस्तीर्थे तु यः कश्चिदभियुक्तो नरेश्वर ॥ अभिशापी तथा स्नातस्त्रिदिनं मुच्यते नरः ॥ १५ ॥ कृष्णपक्षे चतुर्दश्यां रात्रौ जागर्त्ति यो नरः ॥ उपवासपरः शुद्धः शिवं संपूजयेन्नरः ॥ प्रमुच्य पापसंमोहं रुद्रलोकं स गच्छति ॥ १६ ॥ त्रिनेत्रश्च चतुर्बाहुः साक्षाद्रुद्र इवाऽपरः ॥ क्रीडते देवकन्याभिर्यावच्चंद्रार्कतारकम् ॥ १७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे शूलेश्वरतीर्थमाहात्म्यवर्णनंनामाष्टनवत्युत्तरशततमोऽध्यायः ॥ १९८ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तस्यैवानंतरं राजन्नाश्विनं तीर्थ मुत्तमम् ॥ कामिकं सर्वतीर्थानां प्राणिनां सिद्धिदायकम् ॥ १ ॥ तत्र तीर्थेऽश्विनौ देवौ सुरूपौ भिषजां वरौ ॥ तपः कृत्वा सुविपुलं संजातौ यज्ञ भागिनौ ॥ २ ॥ सम्मतौ सर्वदेवानामादित्यतनयावुभौ ॥ नासत्यौ सत्त्वसंपन्नौ सर्वदुःखघ्नसत्तमौ ॥ ३ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ आदि त्यस्य सुतौ तात नासत्यौ येन हेतुना ॥ संजातौ श्रोतुमिच्छामि निर्णयं परमं द्विज ॥ ४ ॥ ॥ मार्कंडेय उवाच ॥ ॥ पुराणे[1] भास्करे तात एतद्विस्तरतो मया ॥ संश्रुतं देवदेवस्य मार्त्तंडस्य महात्मनः ॥ ५ ॥ तत्ते संक्षेपतः सर्वं भक्तियुक्तस्य भारत ॥ कथयामि न संदेहो वृद्धभावेन कर्शितः ॥ ६ ॥ अतितेजो रवेर्दृष्ट्वा राज्ञी देवी नरोत्तम ॥ चचार मेरुकांतारे वडवा तप[2] उल्बणम् ॥ ७ ॥ ततः कतिपयाऽहस्य कालस्य भग



१ पुराणे—भास्करे—आदित्यपुराणे—इत्यर्थः । २ चरित्रम्—इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वात्रविः ॥ दृष्ट्वा तु रूपमुत्सृज्य परमं तेज उज्ज्वलम् ॥ ८ ॥ मनोभववशीभूतो हयो भूत्वा लघुक्रमः ॥ विस्फुरंती यथाप्राणं¹ धावमाना इतस्ततः ॥ ॥ ९ ॥ हेषमाणः स्वरेणाऽसौ मैथुनायोपचक्रमे ॥ सम्मुखी तु ततो देवी निवृत्ता लघुविक्रमा ॥ १० ॥ यथा तथा नासिकायां प्रविष्टं बीजमुत्तमम् ॥ ततो नासागते बीजे संजातो गर्भ उत्तमः ॥ ११ ॥ जातौ यतः सुतौ पार्थ नासत्यौ विश्रुतौ ततः ॥ सुसमौ सुविभक्तांगौ बिंबाद्बिंबमिवोद्यतौ ॥ १२ ॥ अधिकौ सर्वदेवानां रूपैश्वर्य्यसमन्वितौ ॥ नर्मदातटमाश्रित्य भृगुकच्छे गतावुभौ ॥ परां सिद्धिमनुप्राप्तौ तपः कृत्वा सुदुश्चरम् ॥ ॥ १३ ॥ तत्र तीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः ॥ सुरूपः सुभगः पार्थ जायते यत्र तत्र च ॥ १४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे आश्विनतीर्थमाहात्म्यवर्णनंनामैकोनद्विशततमोऽध्यायः ॥ १९९ ॥ ॥ छ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तस्यैवानंतरं पार्थ सावित्रीतीर्थमुत्तमम् ॥ यत्र सिद्धा महाभागा सावित्री वेदमातृका ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ सावित्री का द्विजश्रेष्ठ कथं वाऽऽराध्यते बुधैः ॥ प्रसन्ना वा वरं कं च ददाति कथयस्व मे ॥२॥ श्रीमार्कंडेय उवाच ॥ पद्मा पद्मासनस्थेनाधिष्ठिता पद्मयोगिनी ॥ सावित्रतेजःसदृशी सावित्री तेन चोच्यते ॥ ३ ॥ पद्मानना पद्मवर्णा पद्मपत्रनिभेक्षणा ॥ ध्यातव्या ब्राह्मणैर्नित्यं क्षत्रवैश्यैर्यथाविधि ॥ ४ ॥ ब्रह्महत्याभयात्सा हि न तु शूद्रैः कदाचन ॥ उच्चारणाद्धारणाद्वा ²नरके पतति ध्रुवम् ॥ ५ ॥ वेदोच्चारणमात्रेण जिह्वाच्छेदोऽस्य कर्त्तव्यः शूद्रस्येति विनिश्चयः ॥ ६ ॥ बाला बालेंदुसदृशी रक्तवस्त्रानुलेपना ॥ उषःकाले तु ध्यातव्या क्षत्रियैर्द्धर्मपालकैः ॥ संध्या संधान उत्तमे ॥ ७ ॥ उत्तुंगपीवरकुचा सुमुखी शुभदर्शना ॥ सर्वाभरणसंपन्ना श्वेतमाल्यानुलेपना ॥ ८ ॥ श्वेतवस्त्रपरिच्छन्ना श्वेतयज्ञोपवीतिनी ॥ मध्याह्नसंध्या ध्यातव्या तरुणा भुक्तिमुक्तिदा ॥ ९ ॥ प्रदोषे तु पुनः पार्थ श्वेता पांडुरमूर्द्धजा ॥ स्मृता तु दुर्गकांतारे मातृवत्परिरक्षति ॥ ॥ १० ॥ विशेषेण तु राजेंद्र सावित्रीतीर्थमुत्तमम् ॥ स्नात्वाऽऽचम्य विधानेन मनोवाक्कायकर्मभिः ॥ ११ ॥ प्राणायमैर्दहेद्दोषान्सप्तजन्मार्जितान्बहून् ॥ आपोहिष्ठेति मन्त्रेण प्रोक्षयेदात्मनस्तनुम् ॥ १२ ॥ नवषट् च तथा तिस्रस्तत्र तीर्थे नृपोत्तम ॥ आपोहिष्ठेति त्रिरावृत्त्य प्रतिग्राहैर्न लिप्यते ॥ १३ ॥ अघमर्षणं त्र्यृचं तोये यथावेदमथाऽपि वा ॥ उपपापैर्न लिप्येत पद्मपत्रमिवांभसा ॥ १४ ॥ ³त्र्यापं हि कुरुते विप्र उल्लेखत्रयमाचरेत् ॥ चतुर्थं कारयेद्यस्तु ब्रह्महत्यां व्यपोहति ॥ १५ ॥ द्रुपदाख्यश्च यो मन्त्रो वेदे वाजसनेयके ॥ अन्तर्जले सकृज्जप्तः सर्वपापक्षयं

१ यथाप्रणम्—यथावलम्—यावच्छक्ति—इत्यर्थः । २ शूद्रः—इति शेषः । ३ त्र्यापम्—त्रिराचमनम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



करः ॥ १६ ॥ उदुत्यमिति मंत्रेण पूजयित्वा दिवाकरम् ॥ गायत्रीं च जपेद्देवीं पवित्रां वेदमातरम् ॥ १७ ॥ गायत्रीं तु जपेद्देवीं यः संध्यानंतरं द्विजः ॥ सर्वपापविनिर्मुक्तो ब्रह्मलोकं स गच्छति ॥ १८ ॥ दशभिर्जन्मभिर्लब्धं शतेन तु पुराकृतम् ॥ त्रियुगं तु सहस्रेण गायत्री हन्ति किल्बिषम् ॥ १९ ॥ गायत्रीसारमात्रोऽपि वरं विप्रः सुयंत्रितः ॥ नायंत्रितश्चतुर्वेदी सर्वाशी सर्वविक्रयी ॥ २० ॥ संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ॥ यदन्यत्कुरुते किंचिन्न तस्य फलभाग्भवेत् ॥ २१ ॥ संध्यां नोपासते यस्तु ब्राह्मणो मंदबुद्धिमान् ॥ स जीवन्नेव शूद्रः स्यान्मृतः श्वा संप्रजायते ॥ २२ ॥ सावित्रीतीर्थमासाद्य सावित्रीं यो जपेद्द्विजः ॥ त्रैविद्यं तु फलं तस्य जायते नाऽत्र संशयः ॥ २३ ॥ पितॄनुद्दिश्य यः स्नात्वा पिंडनिर्वपणं नृप ॥ कुरुते द्वादशाब्दानि तृप्यंति तत्पितामहाः ॥२४॥ सावित्रीतीर्थमासाद्य यः कुर्यात्प्राणसंक्षयम् ॥ ब्रह्मलोकं वसेत्तावद्यावदाभूतसंप्लवम् ॥ २५ ॥ पूर्णे चैव ततः काल इह मानुष्यतां गतः ॥ चतुर्वेदो द्विजो राजञ्जायते विमले कुले ॥ २६ ॥ धनधान्यचयोपेतः पुत्रपौत्रसमन्वितः ॥ व्याधिशोकविनिर्मुक्तो जीवेच्च शरदां शतम् ॥ २७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे सावित्रीतीर्थमाहात्म्यवर्णनंनाम द्विशततमोऽध्यायः ॥ २०० ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल देवतीर्थमनुत्तमम् ॥ यत्र सिद्धा महाभागा देवाः सेन्द्रा युधिष्ठिर ॥ १ ॥ स्नानं दानं जपो होमः स्वाध्यायो देवतार्चनम् ॥ तत्र तीर्थप्रभावेन कृतमानंत्यमश्नुते ॥ २ ॥ विशेषाद्भाद्रपदे तु कृष्णपक्षे त्रयोदशीम् ॥ प्रधानं सर्वतीर्थानां देवैरध्यासितं पुरा ॥ ३ ॥ स्नात्वा त्रयोदशीदिने श्राद्धं कृत्वा विधानतः ॥ देवैः संस्थापितं देवं संपूज्य वृषभध्वजम् ॥ सर्वपापविनिर्मुक्तो रुद्रलोकमवाप्नुयात् ॥ ४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे देवतीर्थमाहात्म्यवर्णनंनामैकोत्तरद्विशततमोऽध्यायः ॥ २०१ ॥ ॥ छ ॥ ॥ ॥ मार्कंडेय उवाच ॥ ॥ तस्यैवानंतरं चान्यच्छिखितीर्थमनुत्तमम् ॥ प्रधानं सर्वतीर्थानां पञ्चायतनमुत्तमम् ॥ १ ॥ तत्र तीर्थे तपस्तप्त्वा शिखार्थं हव्यवाहनः ॥ शिखां प्राप्य शिखी भूत्वा शिखाख्यं स्थापयञ्छिवम्[1] ॥ २ ॥ प्रतिपच्छुक्लपक्षे या भवेदाश्वयुजे नृप ॥ तदा तीर्थवरे गत्वा स्नात्वा वै नर्मदाजले ॥ ३ ॥ देवानृषीन्पितॄंश्चान्यांस्तर्प्पयेत्तिलवारिणा ॥ हिरण्यं ब्राह्मणे दद्यात्संतर्प्य[2] च हुताशनम् ॥ ४ ॥ गंधमाल्यैस्तथा धूपैस्ततः संपूजयेच्छिवम् ॥ अनेन विधिनाऽभ्यर्च शिखितीर्थे महेश्वरम् ॥ ५ ॥ विमानेनाऽर्कवर्णेन ह्यप्सरोगणसंवृतः ॥ गीयमानस्तु गन्धर्वै रुद्रलोकं स

१ स्थापयत्--अडभाव आर्षः । अस्थापयत् । २ संतर्प्य पितॄन्वारिणा--इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गच्छति ॥ ६ ॥ शत्रुक्षयमवाप्नोति तेजस्वी जायते भुवि ॥ ७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे शिखितीर्थमाहात्म्यवर्णनंनाम द्व्यधिकद्विशततमोऽध्यायः ॥ २०२ ॥ ॥ ॥ छ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेद्धराधीश कोटितीर्थमनुत्तमम् ॥ यत्र सिद्धा महाभागाः कोटिसंख्या महर्षयः ॥ १ ॥ तपः कृत्वा सुविपुलमृषिभिः स्थापितः शिवः ॥ तथा कोटीश्वरी देवी चामुण्डा महिषार्दिनी ॥२॥ कृष्णपक्षे चतुर्दश्यां मासि भाद्रपदे नृप ॥ तीर्थकोटीः समाहूय मुनिभिः स्थापितः शिवः ॥३॥ तस्यां तिथौ च हस्तर्क्षे सर्वपापप्रणाशनम् ॥ तत्र तीर्थे तदा गत्वा स्नानं कृत्वा समाहितः ॥ ४ ॥ नरकादुद्धरत्याशु पुरुषानेकविंशतिम् ॥ तिलोदकप्रदानेन किमुत श्राद्धदो नरः ॥ ५ ॥ स्नानं दानं जपो होमः स्वाध्यायो देवतार्चनम् ॥ तस्य तीर्थस्य योगेन सर्वं कोटिगुणं भवेत् ॥ ॥ ६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे कोटितीर्थमाहात्म्यवर्णनंनाम त्र्युत्तरद्विशततमोऽध्यायः ॥ २०३ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ भृगुतीर्थं ततो गच्छेत्तीर्थराजमनुत्तमम् ॥ पैतामहं महापुण्यं सर्वपातकनाशनम् ॥ १ ॥ ब्रह्मणा तत्र तीर्थे तु पुरा वर्षशतत्रयम् ॥ आराधनं कृतं शंभोः कस्मिंश्चित्कारणांतरे ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ किमर्थं मुनिशार्दूल ब्रह्मा लोकपितामहः ॥ आराधयद्देवदेवं महाभक्त्या महेश्वरम् ॥ ३ ॥ आराध्यः सर्वभूतानां जगद्धर्ता जगद्गुरुः ॥ श्रोतव्यं श्रोतुमिच्छामि महदाश्चर्यमुत्तमम् ॥ ४ ॥ धर्मपुत्रवचः श्रुत्वा मार्कंडेयो मुनीश्वरः ॥ कथयामास तद्वृत्तमितिहासं पुरातनम् ॥ ५ ॥ ॥ मार्कंडेय उवाच ॥ ॥ स्वपुत्रिकामभिगंतुमिच्छन्पूर्वं पितामहः ॥ शप्तस्तु देवदेवेन कोपाविष्टेन सत्तम ॥ ६ ॥ वेदास्तव विनश्यंति ज्ञानं च कमलासन ॥ अपूज्यः सर्वलोकानां भविष्यसि न संशयः ॥ ७ ॥ एवं दत्ते ततः शापे ब्रह्मा खेदावृतस्तदा ॥ रेवाया उत्तरे कूले स्नात्वा वर्षशतत्रयम् ॥ तोषयामास देवेशं तुष्टः प्रोवाच शंकरः ॥ ८ ॥ पूज्यस्त्वं भविता लोके प्राप्ते पर्वणिपर्वणि ॥ अहमत्र च वत्स्यामि देवैश्च पितृभिः सह ॥ ९ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तदाप्रभृति तत्तीर्थं ख्यातिं प्राप्तं पितामहात् ॥ सर्वपापहरं पुण्यं सर्वतीर्थेष्वनुत्तमम् ॥ १० ॥ तत्र भाद्रपदे मासि कृष्णपक्षे विशेषतः ॥ अमावास्यां तु यः स्नात्वा तर्पयेत्पितृदेवताः ॥ ११ ॥ पिंडदानेन चैकेन तिलतोयेन वा नृप ॥ तृप्यंति द्वादशाब्दानि पितरो नाऽत्र संशयः ॥ १२ ॥ कन्यागते तु यस्तत्र नित्यं श्राद्धप्रदो भवेत् ॥ अवाप्य तृप्तिं तत्पूर्वे वलगंति च हसंति च ॥ १३ ॥ सर्वेषु पितृ

१ तदा गजच्छायापर्वणि इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तीर्थेषु श्राद्धं कृत्वास्ति यत्फलम् ॥ तत्फलं समवाप्नोति दर्शे तत्र न संशयः ॥ १४ ॥ पैतामहे नरः स्नात्वा पूजयन्पार्वतीपतिम् ॥ मुच्यते
नाऽत्र सन्देहः पातकैश्चोपपातकैः ॥१५॥ तत्र तीर्थे मृतानां तु नराणां भावितात्मनाम् ॥ अनिवर्तिका गती राजन्रुद्रलोकादसंशयम् ॥ १६ ॥ इति
श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे पैतामहतीर्थमाहात्म्यवर्णनंनाम चतुरधिकद्विशततमोऽध्यायः ॥
॥ २०४ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ गच्छेत्ततः क्षोणिनाथ तीर्थं परमशोभनम् ॥ कुर्कुरीनाम विख्यातं सर्वपापप्रणा
शनम् ॥ १ ॥ यंयं प्रार्थयते कामं पशुपुत्रधनादिकम् ॥ तं तं ददाति देवेशी कुर्कुरी तीर्थदेवता ॥ २ ॥ क्षेत्रपालो वसेत्तत्र ढौंढेशोनाम नामतः ॥
तस्य चाऽऽराधनं कृत्वा नारी वा पुरुषोऽपि वा ॥ ३ ॥ वंदनादपि राजेंद्र दौर्भाग्यं नाशमाप्नुयात् ॥ अपुत्रो लभते पुत्रमधनो धनमुत्तमम् ॥ ४ ॥
नारी नरस्तथाप्येवं लभते काममुत्तमम् ॥ स्पर्शनाद्दर्शनात्तस्य तीर्थस्य विधिपूर्वकम् ॥ ५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां
संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे कुर्कुरीतीर्थमाहात्म्यवर्णनंनाम पंचाधिकद्विशततमोऽध्यायः ॥ २०५ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय
उवाच ॥ ॥ गच्छेत्ततः क्षोणिनाथतीर्थं परमशोभनम् ॥ सर्वपापहरं पुण्यं दशकन्येति विश्रुतम् ॥ महादेवकृतं पुण्यं सर्वकामफलप्रदम् ॥ १ ॥
तत्र तीर्थे महादेवो दशकन्या गुणान्विताः ॥ ब्रह्मणो वरयामास ह्युद्वाहेन युयोज ह ॥ २ ॥ तदाप्रभृति तत्तीर्थं दशकन्येति विश्रुतम् ॥ सर्व
पापहरं पुण्यमक्षयं कीर्त्तितं फलम् ॥ ३ ॥ तत्र तीर्थे तु यः कन्यां ददाति समलंकृताम् ॥ प्राप्नोति पुरुषो दत्त्वा यथाशक्त्या स्वलंकृताम् ॥ ४ ॥
तेन दानोत्थपुण्येन पूतात्मानो नराधिप ॥ वसंति रोमसंख्यानि वर्षाणि शिवसन्निधौ ॥ ५ ॥ ततः कालेन महता त्विह लोके नरेश्वर ॥ मानुष्यं
प्राप्य दुःष्प्राप्यं धनकोटीपतिर्भवेत् ॥ ६ ॥ तत्र तीर्थे तु यो भक्त्या स्नात्वा विप्राय कांचनम् ॥ संप्रयच्छति शांताय सोऽत्यंतं सुखमश्नुते ॥
॥ ७ ॥ वाचिकं मानसं वाऽपि कर्मजं यत्पुरा कृतम् ॥ तत्सर्वं विलयं याति स्वर्णदानेन भारत ॥ ८ ॥ नरो दत्त्वा सुवर्णं च अपि वालाग्रमात्र
कम् ॥ तत्र तीर्थे दिवं याति मृतो नाऽस्त्यत्र संशयः ॥ ९ ॥ तत्र विद्याधरैः सिद्धैर्विमानवरमास्थितः ॥ पूज्यमानो वसेत्तावद्यावदाभूतसंप्ल
वम् ॥ १० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे दशकन्यातीर्थमाहात्म्यवर्णनंनाम ॥३२४॥
॥१५०॥ षडुत्तरद्विशततमोऽध्यायः ॥ २०६ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तस्याऽग्रे पावनं तीर्थं स्वर्णबिंद्विति विश्रुतम् ॥ यत्र स्नात्वा दिवं
यांति मृताश्च न पुनर्भवम् ॥१॥ तत्र तीर्थे तु यः स्नात्वा दत्ते विप्राय कांचनम् ॥ तेन यत्तु फलं प्रोक्तं तच्छृणुष्व महीपते ॥२॥ सर्वेषामेव रत्नानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कांचनं रत्नमुत्तमम् ॥ अग्नितेजःसमुद्भूतं तेन तत्परमं भुवि ॥ ३ ॥ तेनैव दत्ता पृथिवी सशैलवनकानना ॥ सपत्तनपुरा सर्वा कांचनं यः प्रयच्छति ॥ ॥४॥ मानसं वाचिकं पापं कर्मणा यत्पुरा कृतम् ॥ तत्सर्वं नश्यति क्षिप्रं स्वर्णदानेन भारत ॥ ५ ॥ स्वर्णदानं तु यो दत्त्वा ह्यपि वालाग्रमात्रकम् ॥ तत्र तीर्थे मृतो याति दिवं नास्त्यत्र संशयः ॥ ६ ॥ तत्र विद्याधरैः सिद्धैर्विमानवरमास्थितः॥ पूज्यमानो वसेत्तावद्यावदाभूतसंप्लवम् ॥ ७ ॥ पूर्णे तत्र ततः काले प्राप्य मानुष्यमुत्तमम् ॥ सुवर्णकोटिसहिते गृहे वै जायते द्विजः ॥ ८ ॥ सर्वव्याधिविनिर्मुक्तः सर्वलोकेषु पूजितः ॥ जीवेद्वर्षशतं साग्रं राजसंसत्सु विश्रुतः ॥ ९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे सुवर्णबिंदुतीर्थमाहात्म्यवर्णनंनाम सप्ताधिकद्विशततमोऽध्यायः ॥ २०७ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ भूमिपाल ततो गच्छेत्तीर्थं परमशोभनम् ॥ विख्यातं त्रिषु लोकेषु पितॄणामृणमोचनम् ॥ १ ॥ तत्र स्नात्वा विधानेन संतर्प्य पितृदेवताः ॥ मनुष्यश्च नृपश्रेष्ठ दानं दत्त्वाऽनृणो भवेत् ॥ २ ॥ इच्छंति पितरः सर्वे स्वार्थहेतोः सुतं यतः ॥ पुन्नाम्नो नरकात्पुत्रोऽस्मानयं मोचयिष्यति ॥ ३ ॥ पिंडदानं जलं तात ऋणमुत्तममुच्यते ॥ पितणां तद्धि वै प्रोक्तमृणं दैवमतः परम् ॥ ४ ॥ अग्निहोत्रं तथा यज्ञाः पशुबंधास्तथेष्टयः ॥ इति देवऋणं प्रोक्तं शृणु मानुष्यकं ततः ॥ ५ ॥ ब्राह्मणेषु च तीर्थेषु देवायतनकर्मसु ॥ प्रतिश्रुत्य ददेत्तत्तद्व्यवहारः कृतो यथा ॥ ६ ॥ ऋणत्रयमिदं प्रोक्तं पुत्राणां धर्मनंदन ॥ सत्पुत्रास्ते तु राजेंद्र स्नाता य ऋणमोचने ॥ ७ ॥ ऋणत्रयाद्विमुच्यंते ह्यपुत्राः पुत्रिणस्तथा ॥ तस्मात्तीर्थवरं प्राप्य पुत्रेण नियतात्मना ॥ पितृभ्यस्तर्पणं कार्यं पिंडदानं विशेषतः ॥ ८ ॥ तत्र तीर्थे हुतं दत्तं गुरवस्तोषिता यदि ॥ मृतानां सप्त जन्मानि फलमक्षयमश्नुते ॥ ९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे ऋणमोचनतीर्थमाहात्म्यवर्णनं नामाष्टोत्तरद्विशततमोऽध्यायः ॥ २०८ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ तस्यैवानंतरं पार्थ पुष्कलीतीर्थमुत्तमम् ॥ तत्र तीर्थे नरः स्नात्वा ह्यश्वमेधफलं लभेत् ॥ १ ॥ क्षमानाथं ततो गच्छेत्तीर्थं त्रैलोक्यविश्रुतम् ॥ देवदानवगंधर्वैरप्सरोभिश्च सेवितम् ॥ २ ॥ तत्र तिष्ठति देवेशः साक्षाद्रुद्रो महेश्वरः ॥ भारेण महता जातो भारभूतिरिति स्मृतः ॥ ३ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ भारभूतीति विख्यातं तीर्थं सर्वगुणान्वितम् ॥ श्रोतुमिच्छामि विप्रेंद्र परं कौतूहलं हि मे ॥ ४ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ भारभूतिसमुत्पत्तिं शृणु पांडवसत्तम ॥ विस्तरेण यथा प्रोक्ता पुरा देवेन शंभुना ॥ ५ ॥ आसीत्कृतयुगे विप्रो वेदवेदांगपारगः ॥ विष्णुशर्मेति विख्यातः सर्वशास्त्रार्थपारगः ॥ ६ ॥ क्षमा दमो दया दानं सत्यं शौचं धृतिस्तथा ॥ विद्या विज्ञानमास्तिक्यं सर्वं तस्मिन्प्रतिष्ठितम् ॥ ७ ॥ ईदृग्गुणा हि ये



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



विप्रा भवंति नृपसत्तम ॥ पतितान्नरके घोरे तारयंति पितृंस्तु ते ॥ ८ ॥ इंद्रियलोलुपा विप्रा ये भवंति नृपोत्तम ॥ पतंति नरके घोरे रौरवे पाप मोहिताः ॥ ९ ॥ ये क्षांतदांताः श्रुतिपूर्णकर्णा जितेंद्रियाः प्राणिवधान्निवृत्ताः ॥ प्रतिग्रहे संकुचिताग्रहस्तास्ते ब्राह्मणास्तारयितुं समर्थाः ॥ १० ॥ एवं गुणगणाकीर्णो ब्राह्मणो नर्मदातटे ॥ वसते ब्राह्मणैः सार्धं शिलोञ्छवृत्तिजीवनः ॥ ११ ॥ तादृशं ब्राह्मणं ज्ञात्वा देवदेवो महेश्वरः ॥ द्विज रूपधरो भूत्वा तस्याश्रममगात्स्वयम् ॥ १२ ॥ दृष्ट्वा तं ब्राह्मणैः सार्धमुच्चरंतं पदक्रमम् ॥ अभिवादयते विप्रं स्वागतेन च पूजितः ॥ १३ ॥ प्रोवाच तं मुहूर्त्तेन ब्राह्मणो विस्मयान्वितः ॥ किमथ तद्बटो ब्रूहि किं करोमि तवेप्सितम् ॥ १४ ॥ ॥ बटुरुवाच ॥ ॥ विद्यार्थिनमनुप्राप्तं विद्धि मां द्विजसत्तम ॥ ददासि यदि मे विद्यां ततः स्थास्यामि ते गृहे ॥ १५ ॥ ॥ ब्राह्मण उवाच ॥ ॥ सर्वेषामेव विप्राणां बटो त्वं गोत्र उत्तमे ॥ दानानां परमं दानं कथं विद्या च दीयते ॥ १६ ॥ गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा ॥ अथवा विद्यया विद्या भवतीह फलप्रदा ॥ १७ ॥ ॥ ॥ बटुरुवाच ॥ ॥ यथान्ये बालकाः स्नाताः शुश्रूषंति ह्यहर्निशम् ॥ तथाऽहं बटुभिः सार्धं शुश्रूषामि न संशयः ॥ १८ ॥ तथेति चोक्त्वा विप्रेंद्रः पाठयंस्तं दिनेदिने ॥ वर्त्तते सह शिष्यैः स शिलोञ्छानुपहारयन् ॥१९॥ ततः कतिपयाहोभिः प्रोक्तो बटुभिरीश्वरः ॥ पचनाद्यं बटो कर्म कुरु क्रमत आगतम् ॥ २० ॥ तथेति चोक्तो देवेशो भारग्राममुपागतः ॥ ध्यात्वा वनस्पतीः सर्वा इदं वचनमब्रवीत् ॥ २१ ॥ यावदागच्छते विप्रो बटुभिः सह मंदिरम् ॥ अदर्शनाभिः कर्त्तव्यं तावदन्नं सुसंस्कृतम् ॥ २२ ॥ एवमुक्त्वा तु ताः सर्वा विश्वरूपो महेश्वरः ॥ क्रीडनार्थं गतस्तत्र बटुवेष धरः पृथक् ॥२३॥ दृष्ट्वा समागतं तत्र बटुवेषधरं पृथक् ॥ धिक्त्वां च परुषं वाक्यमूचुस्ते गिरिसन्निधौ ॥२४॥ क्षुत्क्षामकंठाः सर्वे च गत्वा तु किल मंदिरम् ॥ त्वया सिद्धन चाऽन्नेन तृप्तिं यास्यामहे वयम् ॥२५॥ तद्वृथा चिंतितं सव त्वयागत्य कृतं द्विज ॥ मिथ्याप्रतिज्ञेन सता दुरनुष्ठितमद्य ते ॥२६॥ बटुरुवाच॥संतापमनुतापं वा भोजनार्थं द्विजर्षभाः॥मा कुरुध्वं यथान्यायं सिद्धेऽन्ने गृहमेष्यथ॥२७॥बटुरुवाच॥दिनशेषेण चास्माकं पंचतां च दिनेदिने ॥ निष्पत्तिं याति वा नेति तदसिद्धमशेषतः ॥ २८ ॥ असिद्धं सिद्धमस्माकं यत्त्वया समुदाहृतम् ॥ दृष्ट्वाऽनृतं गतास्तत्र त्वां बद्ध्वांऽभसि निक्षिपे ॥ २९ ॥ ॥ बटुरुवाच ॥ ॥ भोभोः शृणुद्ध्व सर्वेऽत्र सोपाध्याया द्विजोत्तमाः ॥ प्रतिज्ञां मम दुर्द्धर्षां यां श्रुत्वा विस्मयो भवेत् ॥ ३० ॥ यदि सिद्धमिदं सर्वमन्नं स्यादाश्रमे गुरोः ॥ यूयं बध्वा मया सर्वे क्षेप्तव्या नर्मदांभसि ॥ ३१ ॥ अथवाऽन्नं न सिद्धं स्याद्भवद्भि



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृढबन्धनैः ॥ गुरोस्तु पश्यतो बध्वा क्षेप्तव्योऽहं नर्मदाह्रदे ॥ ३२ ॥ तथेति कृत्वा ते सर्वे समयं गुरुसन्निधौ ॥ स्नात्वा जाप्यविधानेन भूतग्रामं ततो ययुः ॥ ३३ ॥ दृष्ट्वा ते विस्मयं जग्मुर्विस्तृते भक्ष्यभोजने ॥ षड्रसेन नृपश्रेष्ठ भुक्त्वा हुत्वा पृथक्पृथक् ॥ ३४ ॥ ततः प्रोवाच वचनं हृष्टपुष्टो द्विजोत्तमः ॥ वरदोऽस्मि वरं वत्स वृणु यत्तव रोचते ॥ ३५ ॥ सांगोपांगास्तु ते वेदाः शास्त्राणि विविधानि च ॥ प्रतिभास्यंति ते विप्र मदीयोऽस्तु वरस्त्वयम् ॥३६॥ प्रणम्य बटुभिः सार्धं स चिक्रीड यथासुखम् ॥ द्वितीये तु ततः प्राप्ते दिवसे नर्मदाजले ॥ ३७ ॥ क्रीडनार्थं गताः सर्वे सोपाध्याया युधिष्ठिर ॥ ततः स्मृत्वा पणं सर्वे भाषयित्वा विधानतः ॥३८॥ उपाध्यायमथोवाच नत्वा देवः कृतांजलिः॥ जले प्रक्षेपयाम्यद्य निष्प्रतिज्ञान्बटून्प्रभो ॥ ३९ ॥ तद्देवस्य वचः श्रुत्वा नष्टास्ते बटवो नृप ॥ गुरोस्तु पश्यतो राजन्धावमाना दिशो दश ॥ ४० ॥ वायुवेगेन देवेन लुं[2]ञ्जितास्ते समंततः ॥ भारं बध्वा तु सर्वेषां बटूनां च नरेश्वर ॥ ४१ ॥ शापानुग्रहको देवोऽक्षिपत्तोये यथा गृहे ॥ ततो विषादमगमद्दृष्ट्वा तान्नर्मदाजले ॥ ४२ ॥ गुरुणा बटुरुक्तोऽथ किमेतत्साहसं कृतम् ॥ एतेषां मातृपितरो बालकानां गृहेंऽगनाः ॥ ४३ ॥ यदि पृच्छंति ते बालान्क्क गतान्कथयाम्यहम् ॥ एवं स्थिते महाभाग यदि कश्चिन्मरिष्यति ॥४४॥ तदा स्वकीयजीवेन त्वं योजयितुमर्हसि ॥ मृतेषु तेषु विप्रेषु न जी[3]वे निश्चयो मृतः ॥ ४५ ॥ ब्रह्महत्याश्च ते बह्वयो भविष्यंति मृते मयि ॥ द्विजबन्धनमात्रेण नरको भवति ध्रुवम् ॥ ४६ ॥ मरणाद्यां गतिं यासि न तां वेद्मि द्विजाधम ॥ एवमुक्तः स्मितं कृत्वा देवदेवो महेश्वरः ॥४७॥ भारभूतेश्वरे तीर्थ उज्जहार जलाद्विजान् ॥ मुक्त्वा भारं तु देवेन च्छादयित्वा तु तान्द्विजान्॥४८॥लिंगं प्रतिष्ठितं तत्र भारभूतेति विश्रुतम्॥मृतांस्तान्वै द्विजान्दृष्ट्वा ब्रह्महत्या निराकृता॥४९॥गतानि पञ्चवैदृष्ट्वाब्रह्महत्याशतानि वै ॥ ततः स विस्मयाविष्टो दृष्ट्वा तान्बालकान्गुरुः॥५०॥नाऽन्यस्य कस्यचिच्छक्तिरेवं स्यादीश्वरं विना॥ज्ञात्वा तं देवदेवेशं प्रणाममकरोद्द्विजः ॥५१॥ अज्ञानेन मया सव यदुक्तं परमेश्वर ॥ अप्रियं यत्कृतं सर्वं क्षंतव्यं तन्मम प्रभो ॥ ५२ ॥ ॥ देव उवाच ॥ ॥ भगवन्गुरुर्भवान्देवो भवान्मम पितामहः ॥ वेदगर्भ नमस्तेस्तु नास्ति कश्चिद्व्यतिक्रमः ॥५३॥ जनिता चोपनेता च यस्तु विद्यां प्रयच्छति ॥ अन्नदाता भयत्राता पंचैते पितरः स्मृताः ॥ ५४ ॥ एवमुक्त्वा जगन्नाथो विष्णुशर्माणमानतः ॥ तत्र तीर्थे जगामाऽऽशु कैलासं धरणीधरम् ॥ ५५ ॥ तदाप्रभृति तत्तीर्थं भारभूतीति विश्रु

---

१ अक्षराधिक्यमार्षम् । २ लुंजिताः—धृत्वा धृत्वा एकत्र कृताः—इत्यर्थः । ३ न जीवे निश्चयो मृतः—न जीवे-अहं न जीविष्यामि—इत्यर्थः । मृतः—स्याम्—इति निश्चयः—निश्चयेन मरिष्यामि—इति वाक्यार्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तम् ॥ विख्यातं सर्वलोकेषु महापातकनाशनम् ॥ ५६ ॥ तत्र तीर्थे पुनर्वृत्तमितिहासं ब्रवीमि ते ॥ सर्वपापहरं दिव्यमेकाग्रस्त्वं शृणुष्व तत् ॥ ॥ ५७ ॥ पुरा कृतयुगस्यादौ वैश्यः कश्चिन्महामनाः ॥ सुकेश इति विख्यातस्तस्य पुत्रोऽतिधार्मिकः ॥ ५८ ॥ सोमशर्मेति विख्यातो मृतः पृथुललोचनः ॥ स सखायं वणिक्पुत्रं कंचिच्चक्रे दरिद्रिणम् ॥ ५९ ॥ सहदेवमिति ख्यातं सर्वकर्मसु कोविदम् ॥ एकदा तु समं तेन व्यवहारम चिंतयत् ॥ ६० ॥ सखे समुद्रयानेन गच्छावोत्तरणैः शुभैः ॥ भांडं बहु समादाय मदीये द्रव्यसाधने ॥ ६१ ॥ परं तीरं गमिष्याव उत्कर्षस्त्वा वयोः समः ॥ इति तौ मंत्रयित्वा तु मंत्रवत्समभीप्सितम् ॥ ६२ ॥ सर्वं प्रयाणकं गृह्य ह्यारूढौ लवणोदधिम् ॥ तौ गत्वा तु परं भांडं विक्रीय पुरतस्तदा ॥ ६३ ॥ प्राप्तौ बहु सुवर्णं च रत्नानि विविधानि च ॥ नावं तां संगतां कृत्वा पश्चात्तावारुरोहतुः ॥ ६४ ॥ नावमंतर्जले दृष्ट्वा निशीथे स्वर्णसंभृताम् ॥ दृष्ट्वा तु सोमशर्माणमुत्संगे कृतमस्तकम् ॥ ६५ ॥ शयानमतिविश्वस्तं सहदेवो व्यचिंतयत् ॥ एष निद्रावशं यातो मयि प्राणान्निधाय वै ॥ ६६ ॥ अस्याधीनमिदं सर्वं द्रव्यरत्नमशेषतः ॥ उत्कर्षार्द्धं तु मे दद्यात्तत्र गत्वेति वा नवा ॥ ६७ ॥ इति निश्चित्य मनसा पापस्तं लवणोदधौ ॥ चिक्षेप सोमशर्माणं पापध्यातेन चेतसा ॥ ६८ ॥ उत्तीर्य तरणात्तस्माद्गत्वा संगृह्य तद्धनम् ॥ ततः कतिपयाहोभिः संयुक्तः कालधर्मणा ॥ ६९ ॥ गतो यमपुरं घोरं गृहीतो यमकिंकरैः ॥ स नीतस्तेन मार्गेण यत्र संतपते रविः ॥ ७० ॥ कृत्वा द्वादशधात्मानं संप्राप्ते प्रलये यथा ॥ सुतीक्ष्णाः कण्टका यत्र यत्र श्वानः सुदारुणाः ॥ ७१ ॥ तीक्ष्णदंष्ट्रा महाव्याला व्याघ्रा यत्र महावृकाः ॥ सुतप्ता वालुका यत्र क्षुधा तृष्णा तमो महत् ॥ ७२ ॥ पानीयस्य कथा नास्ति न च्छाया नाऽऽश्रमः क्वचित् ॥ अन्नं पानीयसहितं यावत्त दीयते विषम् ॥ ७३ ॥ छायां संप्रार्थमानानां भृशं ज्वलति पावकः ॥ तैर्दह्यमाना बहुशो विलपंति मुहुर्मुहुः ॥ ७४ ॥ हा भ्रातर्मातः पुत्रेति पतन्ति पथि मूर्च्छिताः ॥ इत्थंभूतेन मार्गेण स नीतो यमकिंकरैः ॥ ७५ ॥ यत्र तिष्ठति देवेशः प्रजासंयमनो यमः ॥ ते द्वारदेशे तं मुक्त्वाच चक्षुर्यमकिंकराः ॥ ७६ ॥ बद्ध्वा तं गलपाशेन ह्यासीनं मित्रघातिनम् ॥ अवधारय देवेश बुध्यस्व यदनन्तरम् ॥ ७७ ॥ ॥ यम उवाच ॥ ॥ न तु पूर्वं मुखं दृष्टं मया विश्वासघातिनाम् ॥ ये मित्रद्रोहिणः पापास्तेषां किं शासनं भवेत् ॥ ७८ ॥ ऋषयोऽत्र विचारार्थं नियुक्ता निपुणाः स्थिताः ॥ ते यत्र ब्रुवते तत्र क्षिपध्वं मा विचार्यताम् ॥ ७९ ॥ इत्युक्तास्ते तमादाय किंकराः शीघ्रगामिनः ॥ मुनीशांस्तत्र तानूचुस्तं निवेद्य यमाज्ञया ॥ ८० ॥ द्विजा अनेन मित्रं स्वं प्रसुप्तं निशि घातितम् ॥ विश्वस्तं धनलोभेन को दण्डोऽस्य भविष्यति ॥ ८१ ॥ ॥ मुनय



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऊचुः ॥ ॥ अदृष्टपूर्वमस्माभिर्वदनं मित्रघातिनाम् ॥ कृत्वा पटांतरे ह्येनं शृण्वन्तु गतिमस्य ताम् ॥ ८२ ॥ ते शास्त्राणि विचार्याथ ऋषयश्च परस्परम् ॥ आहूय यमदूतांस्तानूचुर्ब्राह्मणपुंगवाः ॥ ८३ ॥ आलोकितानि शास्त्राणि वेदाः सांगाः स्मृतीरपि ॥ पुराणानि च मीमांसा दृष्ट मस्माभिरत्र च ॥ ८४ ॥ ब्रह्मघ्न च सुरापे च स्तेये गुर्वंगनागमे ॥ निष्कृतिर्विहिता शास्त्रे कृतघ्ने नाऽस्ति निष्कृतिः ॥ ८५ ॥ ये स्त्रीघ्नाश्च गुरुघ्नाश्च ये बालब्रह्मघातिनः ॥ विहिता निष्कृतिः शास्त्रे कृतघ्ने नाऽस्ति निष्कृतिः ॥ ८६ ॥ वापीकूपतडागानां भेत्तारो ये च पापिनः ॥ उद्यानवाटिकानां च छेत्तारो ये च दुर्जनाः ॥ ८७ ॥ दावाग्निदाहका ये च सततं येऽसुहिंसकाः[1] ॥ न्यासापहारिणो ये च गरदाः स्वामिवंचकाः ॥ ८८ ॥ मातापितृगुरूणां च त्यागिनो दोषदायिनः ॥ स्वभर्तृवंचनपरा या स्त्री गर्भप्रघातिनी ॥ ८९ ॥ विवेकरहिता या स्त्री याऽस्नाता भोजने रता ॥ द्विकालभोजनरतास्तथा वैष्णववासरे ॥ ९० ॥ तासां स्त्रीणां गतिर्दृष्टा न तु विश्वासघातिनाम् ॥ विश्वासघातिनां पुंसां मित्रद्रोहकृतां तथा॥९१॥ तेषां गतिर्न वेदेषु पुराणेषु च का कथा ॥ इति स्थितेषु पापेषु गतिरेषां न विद्यते ॥ ९२ ॥ नाऽन्या गतिर्मित्रहनने विश्वस्तघ्ने च नः श्रुतम् ॥ इतो नीत्वा यमदूता एनं विश्वस्तघातिनम् ॥ ९३ ॥ कल्पकोटिशतं साग्रं पर्यायेण पृथक्पृथक् ॥ नरकेषु च सर्वेषु त्रिंशत्कोटिषु संख्यया ॥ ९४ ॥ क्षिप्यतामेष मित्रघ्नो विचारो मा विधीयताम् ॥ इति ते वचनं श्रुत्वा किंकरास्तं निगृह्य च ॥ ९५ ॥ यत्र ते नरका घोरास्तत्र क्षेप्तुं गतास्ततः ॥ ते तमादाय हि नरके घोरे रौरवसंज्ञिते ॥ ९६॥ चिक्षिपुस्तत्र पापिष्ठं क्षिप्ते रावोऽभवन्महान् ॥ नरकस्थितभूतेषु मोक्तव्यो नैष पापकृत् ॥ ९७ ॥ अस्य संस्पर्शनादेव पीडा शतगुणा भवेत् ॥ यथा व्यथासिकाष्ठैश्च समिद्धैर्दहनात्मकैः ॥ ९८ ॥ भवति स्पर्शनात्तस्य किमेतेन कृतामलम् ॥ यथा दुर्जनसंसर्गात्सुजनो याति लाघवम् ॥ ९९ ॥ सन्निधानात्तथास्याऽऽशु क्षते क्षारावसेचनम् ॥ प्रसादः क्रियतामाशु नीयतां नरकेऽन्यतः ॥ ॥ १०० ॥ एवमुक्तास्ततस्तैस्तु गतास्ते त्वशुचिं प्रति ॥ तत्र ते नारकाः संति पूर्ववत्तेऽपि चुक्रुशुः ॥ १ ॥ एवं ते किंकराः सर्वेऽपर्यटन्नरकमंडले ॥ नरकेऽपि स्थितिस्तस्य नास्ति पापस्य दुर्मतेः ॥ २ ॥ यदा तदा तु ते सर्वे तं गृह्य यमसन्निधौ ॥ गत्वा निवेद्य तत्सर्वं यदुक्तं नारकैर्नरैः ॥ नरके न स्थितिर्यस्य तस्य किं क्रियतां वद ॥ ३ ॥ ॥ यम उवाच ॥ ॥ पापिष्ठ एष वै यातु योनिं तिर्यङ्निषेविताम् ॥ कालं मुनिभिरुद्दिष्टः तिर्यग्योनिं प्रवेश्यताम् ॥ ४ ॥ एवमुक्ते तु वचने प्रजासंयमनेन च ॥ स गतः कृमितां पापो विष्ठासु च पृथक्पृथक् ॥ ५ ॥

१ असुहिंसकाः–जीवहिंसकाः–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ततोऽसौ दंशमशकान्पिपीलिकसमुद्भवान् ॥ यूकामत्कुणकाद्यांश्च गत्वा पक्षित्वमागतः ॥ ६ ॥ स्थावरत्वं गतः पश्चात्पाषाणत्वं ततः परम् ॥ सरीसृपानजगरवराहमृगहस्तिनः ॥ ७ ॥ वृकश्वानखरोष्ट्रांश्च शूकरीं ग्रामजातिकाम् ॥ योनिमाश्वतरीं प्राप्य तथा महिषसंभवाम् ॥ ८ ॥ एताश्चान्याश्च बह्वीर्वै प्राप योनीः क्रमेण वै ॥ स ता योनीरनुप्राप्य धुर्योऽभूद्भारवाहकः ॥ ९ ॥ स गृहे पार्थिवेशस्य धार्मिकस्य यशस्विनः ॥ स दृष्ट्वा कार्त्तिकीं प्राप्तामेकदा नृपसत्तमः ॥ ११० ॥ पुरोहितं समाहूय ब्राह्मणांश्च तथा बहून् ॥ न गृहे कार्त्तिकीं कुर्य्यादेतन्मे बहुशः श्रुतम् ॥ ११ ॥ समेता कुत्र यास्याम इति ब्रूत द्विजोत्तमाः ॥ यो गृहे कार्तिकीं कुर्यात्स्नानदानादिवर्जितः ॥ १२ ॥ संवत्सरकृतात्पुण्यात्स बहिर्भवति श्रुतिः ॥ तस्मात्सर्वप्रयत्नेन तीर्थं सर्वगुणान्वितम् ॥ १३ ॥ सहितास्तत्र गच्छामः स्नातुं दातुं च शक्तितः ॥ एवमुक्ते तु वचने पार्थिवेन द्विजोत्तमाः ॥ १४ ॥ ऊचुः श्रेष्ठं नृपश्रेष्ठ रेवाया उत्तरे तटे ॥ भारेश्वरेति विख्यातं मुक्तितीर्थं नृपोत्तम ॥ १५ ॥ तत्र यामो वयं सर्वे सर्वपापक्षयावहम् ॥ एवमुक्तः स नृपतिर्गृहीत्वा प्रचुरं वसु ॥ १६ शकटं संभृतं कृत्वा तत्र युक्तः स धूर्वहः ॥ यः कृत्वा मित्रहननं गोयोनिं समुपागतः ॥ १७ ॥ इत्थं स नर्मदातीरे संप्राप्तस्तीर्थमुत्तमम् ॥ गत्वा चतुर्दशीदिने ह्युपवासकृतक्षणः ॥ १८ ॥ गत्वा स नर्मदातीरे नाम रुद्रेत्यनुस्मरन् ॥ शुचिप्रदेशाच्च मृदं मंत्रेणाऽनेन गृह्यताम् ॥ १९ ॥ उद्धृतासि वराहेण रुद्रेण शतबाहुना ॥ अहमप्युद्धरिष्यामि प्रजया बंधनेन च ॥ १२० ॥ स एवं तां मृदं नीत्वा मुक्त्वा तीरे तथोत्तरे ॥ ददर्श भास्करं पश्चान्मंत्रेणाऽनेन चालभेत् ॥ २१ ॥ अश्वक्रांते रथक्रांते विष्णुक्रांते वसुन्धरे ॥ मृत्तिके हर मे पापं जन्मकोटिशतार्जितम् ॥ २२ ॥ तत एवं विगाह्यापो मंत्रमेतमुदीरयेत् ॥ त्वं नर्मदे पुण्यजले तवांभः शंकरोद्भवम् ॥ २३ ॥ स्नानं प्रकुर्वतो मेऽद्य पापं हरतु चार्जितम् ॥ स स्नात्वाऽनेन विधिना संतर्प्य पितृदेवताः ॥ २४ ॥ ययौ देवालयं पश्चादुपहारैः समन्वितः ॥ भक्त्या संचिंत्य सान्निध्ये शकरं लोकशंकरम् ॥ २५ ॥ पुराणोक्तविधानेन पूजां समुपचक्रमे ॥ पूजाचतुष्टयं देवि शिवरात्र्यां निगद्यते ॥ २६ ॥ संस्नाप्य प्रथमे यामे पंचगव्येन शंकरम् ॥ घृतेन पूरणं पश्चात्कृतं नृपवरेण तु ॥ २७ ॥ धूपदीपौनिवेद्याद्यं संकल्प्य च यथाविधि ॥ अर्घेणानेन देवेशं मंत्रेणानेन शंकरम्॥२८॥नमस्ते देवदेवेश शंभो परमकारण ॥ गृहाणार्घमिमं देव संसाराघमपाकुरु ॥२९॥ वित्तानुरूपतो दत्तं सुवर्णं मंत्रकल्पितम् ॥ अग्निर्हि देवाः सर्वे सुवर्णं च हुताशनात् ॥ १३० ॥ अतः सुवर्णदानेन प्रीताः स्युः सर्वदेवताः ॥ तदर्घं सर्वदा दातुः प्रीतो भवतु शंकरः ॥ ३१ ॥ अनेन विधिना तेन पूजितः प्रथमे शिवः ॥ यामे द्वितीये तु पुनः पूर्वोक्तविधिना चरेत् ॥ ३२ ॥ स्नापयामास दुग्धेन गव्येन त्रिपुरांतकम् ॥ तंदुलैः



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूरणं पश्चात्कृतं लिंगस्य शूलिनः ॥ ३३ ॥ कृत्वा विधानं पूर्वोक्तं दत्तं वस्त्रयुगं सितम् ॥ श्वेतवस्त्रयुगं यस्माच्छंकरस्यातिवल्लभम् ॥ ३४ ॥ प्रीतो भवति वै शंभुर्दत्तेन श्वेतवाससा ॥ यामं तृतीयं संप्राप्तं दृष्ट्वा नृपतिसत्तमः ॥ ३५ ॥ देवं संस्नाप्य मधुना पूरणं चक्रिवांस्तिलैः ॥ तिलद्रोणप्रदानं च कुर्यान्मंत्रमुदीरयन् ॥ ३६ ॥ तिलाः श्वेतास्तिलाः कृष्णाः सर्वपापहरास्तिलाः ॥ तिलद्रोणप्रदानेन संसारश्छिद्यतां मम ॥ ३७ ॥ अनेन विधिना राजा यामिनीयामपूजनम् ॥ अतिवाह्य विनोदेन ब्रह्मघोषेण जागरम् ॥ ३८ ॥ चकार पूजनं शंभोर्बहुपुण्यप्रसाधकम् ॥ ये जागरे त्रिनेत्रस्य शिवरात्र्यां शिवस्थिताः ॥३९॥ ते यां गतिं गताः पार्थ न तां गच्छंति यज्विनः ॥ पापानि यानि कानि स्युः कोटिजन्मार्जितान्यपि ॥ ॥ १४० ॥ हरकेशवयोः स्नांति जागरे यांति संक्षयम् ॥ यावंतो निमिषा नृणां भवंति निशि जाग्रताम् ॥ ४१ ॥ निमिषेनिमिषे राजन्नश्वमेधफलं ध्रुवम् ॥ उपवासपराणां च देवायतनवासिनाम् ॥ ४२ ॥ शृण्वतां धर्ममाख्यानं ध्यायतां हरकेशवौ ॥ न तां बहुसुवर्णेन क्रतुना गतिमाप्नुयुः ॥ ॥ ४३ ॥ शिवरात्रिस्तिथिः पुण्या कार्तिकी च विशेषतः ॥ रेवाया उत्तरं कूलं तीरं भारेश्वरेति च ॥ ४४ ॥ जागृतश्चातिदुःखेन कथं पापं न हास्यति ॥ इत्थंस जागरं कृत्वा शिवरात्र्यां नरेश्वरः ॥ ४५ ॥ प्रभाते विमले गत्वा नर्मदातीरमुत्तमम् ॥ स्नापितास्तेन ते सर्वे वाहनानि गजादयः ॥ ४६ ॥ यैस्तु वाहैर्गतस्तीर्थं स्नातोऽहं स्नापयामि तान् ॥ तत्र मध्यस्थितः स्नातस्तिर्यक्त्वान्निर्गतो वणिक् ॥ ४७ ॥ दानं ददौ तानुदिश्य किंचिच्छक्त्यनुरूपतः ॥ तेन वाहकृतादोषान्मुक्तो भवति मानवः ॥ ४८ ॥ अन्यथाऽसौ कृतो लाभः कृतो व्रजति तान्प्रति ॥ संस्नाप्य तं ततो राजा स्वयं स्नात्वा विधानतः ॥४९॥ संतर्प्य पितृदेवांश्च कृत्वा श्राद्धं यथाविधि॥कृत्वा पिंडान्पितृभ्यश्च वृषमुत्सृज्य लक्षणम् ॥१५०॥ गत्वा देवालयं पश्चाद्देवं तीर्थोदकेन च॥संस्नाप्य पंचगव्येन ततः पंचामृतेन च ॥५१॥सर्व्वौषधिजलेनैव ततः शुद्धोदकेन च॥चंदनेन सुगंधेन समालभ्य च शंकरम्॥५२॥कुंकुमैश्च सकर्पूरैर्गंधैश्च विविधैस्तथा ॥ पुष्पौघैश्च सुगंधाढ्यैश्चतुर्थं लिंगपूरणम् ॥५३॥कृतं नृपवरेणाऽत्र कुर्वता पूर्वकं विधिम्॥गोदानं च कृतं पश्चाद्विधिदृष्टेन कर्मणा ॥ ५४ ॥ धेनुके रुद्ररूपाऽसि रुद्रेण परिनिर्मिता ॥ अस्मिन्नगाधे संसारे पततं मां समुद्धर ॥ ५५ ॥ धेनुं स्वलंकृतां दद्यादनेन विधिना ततः ॥ क्षमाप्य देवदेवेशं ब्राह्मणान्भोजयेद्बहून् ॥ ५६ ॥ षड्विधैर्भोजनैर्भक्ष्यैर्वासोभिस्तान्समर्चयेत् ॥ दक्षिणाभिर्विचित्राभिः पूजयित्वा क्षमापयेत् ॥ ५७ ॥ स स्वयं बुभुजे पश्चात्परिवारसमन्वितः ॥ तामेव रजनीं तत्र न्यवसज्जगतीपतिः ॥ ५८ ॥ तस्य तत्रोषितस्यैवं निशीथेऽथ नरेश्वर ॥ आकाशे सोऽति शुश्राव दिव्यवाणीसमीरितम् ॥ ५९ ॥ ॥ वागुवाच ॥ ॥ राजन्समंततो लोके फलं भवति सांप्रतम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



संसारसागरे ह्यत्र पतितानां दुरात्मनाम् ॥ १६० ॥ यदि संनिधिमात्रेण फलं तत्रोच्यते कथम् ॥ यदि शंतनुवंशस्य तत्रोन्मादकरं भवेत् ॥ ६१ ॥ य एष त्वद्गृहे वोढा ह्यतिभारधुरंधरः ॥ अनेन मित्रहननं पापं विश्वासघातनम् ॥ ६२ ॥ कृतं जन्मसहस्राणामतीते परिजन्मनि ॥ गतेन पाप्मना ऽऽत्मानं नरकेषु च संस्थितिः ॥ ६३ ॥ ततो योनिसहस्रेषु गतिस्तिर्यक्षु चैव हि ॥ गोयोनिं समनुप्राप्तस्त्वद्गृहे स सुदुर्मतिः ॥ ६४ ॥ स्नापितश्च त्वया तीर्थे ह्यस्मिन्पर्वसमागमे ॥ दृष्ट्वा पूजां त्वया कृत्तां कृता जागरणक्रिया ॥ ६५ ॥ तेन निष्कलमषो जातो मुक्त्वा देहं तवाऽग्रतः ॥ स्वर्गं प्रति विमानस्थः सोद्य राजन्गमिष्यति ॥ ६६ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ एवमुक्ते निपतितो धुर्यः प्राणैर्व्ययुज्यत ॥ विमानवरमारूढस्तत्क्षणा त्समदृश्यत ॥ ६७ ॥ स तं प्रणम्य राजेंद्रमुवाच प्रहसन्निव ॥ ६८ ॥ ॥ वृष उवाच ॥ ॥ भोभो नृपवरश्रेष्ठ तीर्थमाहात्म्यमुत्तमम् ॥ यत्र चाऽस्मद्विधस्तीर्थे मुच्यते पातकैर्नरः ॥ मया ज्ञातमशेषेण मत्समो नास्ति पातकी ॥ ६९ ॥ अतः परं किं तु कुर्यां परं तीर्थाऽनुकीर्त्तनम् ॥ भवान्माता भवान्भ्राता भवांश्चैव पितामहः ॥ १७० ॥ क्षंतव्यं प्रणतोऽस्म्यद्य यस्मिंस्तीर्थे हि मादृशाः ॥ गतिमीदृग्विधां यांति न जाने तव का गतिः ॥ ७१ ॥ समाराध्य महेशानं संपूज्य च यथाविधि ॥ का गतिस्तव संभाष्या देह्यनुज्ञां मम प्रभो ॥ ७२ ॥ त्वरयंति च मां ह्येते दिविस्थाः प्रणयाद्गणाः ॥ स्वस्त्यस्तु ते गमिष्यामीत्युक्त्वा सोंऽतर्दधे क्षणात् ॥ ७३ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ गते चाऽदर्शनं तंत्र स राजा विस्म यान्वितः ॥ तीर्थमाहात्म्यमतुलं वर्णयन्स्वपुरं गतः ॥ ७४ ॥ इत्थंभूतं हि तत्तीर्थं नर्मदायां व्यवस्थितम् ॥ सर्वपापक्षयकरं सर्वदुःखघ्नमुत्तमम् ॥ ॥ ७५ ॥ उपपापानि नश्यंति स्नानमात्रेण भारत ॥ कार्त्तिकस्य चतुर्दश्यामुपवासपरायणः ॥ ७६ ॥ चतुर्द्धा पूरयेल्लिंगं तस्य पुण्यफलं शृणु ॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः॥७७॥महापापानि चत्वारि चतुर्भिर्यांति संक्षयम् ॥ सोश्वमेधस्य यज्ञस्य लभते फलमुत्तमम् ॥७८॥ कार्त्तिके शुक्लपक्षस्य चतुर्दश्यामुपोषितः॥ स्वर्णदानाच्च तत्तीर्थे यज्ञस्य लभते फलम् ॥७९॥ अष्टम्यां वा चतुर्दश्यां वैशाखे मासि पूर्ववत् ॥ दीपं पिष्टमयं कृत्वा पितॄन्सर्वान्विमोक्षयेत् ॥ १८० ॥ तत्र यद्दीयते दानमपि वालाग्रमात्रकम् ॥ तदक्षयफलं सर्वमेवमाह महेश्वरः ॥८१॥ भारभूत्यां मृतानां तु नराणां भावितात्मनाम् ॥ अनिवर्त्तिका गती राजञ्छिवलोकान्निरन्तरम् ॥ ८२ ॥ अथवा लोकवृत्त्यर्थं मर्त्यलोकं जिगीषति ॥ सांगवेदज्ञविप्राणां जायते विमलेकुले ॥ ८३ ॥ धनधान्यसमायुक्तो वेदविद्यासमन्वितः ॥ सर्वव्याधिविनिर्मुक्तो जीवेच्च शरदां शतम् ॥ ८४ ॥ पुनस्तत्तीर्थमासाद्य ह्यक्षयं

१ तत्र—वृषयोनिगते—वैश्ये—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पद्माप्नुयात् ॥ ८९ ॥ एतत्पुण्यं पापहरं कथितं ते नृपोत्तम ॥ भारतेदं महाख्यानं शृणु चैव ततः परम् ॥ १८६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे भारभूतितीर्थमाहात्म्यवर्णनंनाम नवाधिकद्विशततमोऽध्यायः ॥ २०९ ॥ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तस्यैवानंतरं तात पुंखिलं तीर्थमुत्तमम् ॥ तत्र तीर्थे पुरा पुंखः पार्थ सिद्धिमुपागतः ॥ १ ॥ जामदग्न्यो महातेजाः क्षत्रियांतकरः प्रभुः ॥ तपः कृत्वा सुविपुलं नर्मदोत्तरतीरभाक् ॥ २ ॥ ततः प्रभृति विख्यातं पुंखतीर्थं नरेश्वर ॥ तत्र तीर्थे तु यः स्नात्वा ह्याराध्य परमेश्वरम् ॥ ३ ॥ इहलोके बलैर्युक्तः परे मोक्षमवाप्नुयात् ॥ देवान्पितॄन्समभ्यर्च्य पितृणामनृणी भवेत् ॥ ४ ॥ तत्र तीर्थे नरो यस्तु प्राणत्यागं करोति वै ॥ अनिवर्त्तिका गतिस्तस्य रुद्रलोकादसंशयम् ॥ ५ ॥ तत्र तीर्थे नरः स्नात्वा हयमेधफलं लभेत् ॥ ६ ॥ तत्र तीर्थे नरो यस्तु ब्राह्मणान्भोजयेन्नृप ॥ एकस्मिन्भोजिते विप्रे कोटिर्भवति भोजिता ॥ ७ ॥ तत्र तीर्थे तु यः कश्चित्पूजयेद्वृषभध्वजम् ॥ वाजपेयस्य यज्ञस्य फलं प्राप्नोत्यसंशयम् ॥ ८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे पुंखिलतीर्थमाहात्म्यवर्णनंनाम दशोत्तरद्विशततमोऽध्यायः ॥ २१० ॥ ॥छ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ आश्चर्यभूतं लोकस्य देवदेवेन यत्कृतम् ॥ तत्ते सर्वं प्रवक्ष्यामि नर्मदातटवासिनाम् ॥ १ ॥ द्विजान्सुकृपणान्देवः कुष्ठी भूत्वा ययाच ह ॥ श्राद्धकाले तु संप्राप्ते रक्तगंधानुलेपनः ॥२॥ स्रवद्बुद्बुदगात्रस्तु मक्षिकाकृमिसंवृतः ॥ दुश्चर्मा दुर्मुखो गन्धी प्रस्खलंश्च पदेपदे ॥ ३ ॥ ब्राह्मणावसथं गत्वा स्खलन्द्वारेऽब्रवीदिदम् ॥ भोभो गृहपते त्वद्य ब्राह्मणैः सह भोजनम् ॥ ४ ॥ त्वद्गृहे कर्तुमिच्छामि ह्येभिः सह सुसंस्कृतम् ॥ ततस्तं ब्राह्मणं दृष्ट्वा यजमानसमन्विताः ॥ ५ ॥ स्रवंतं सर्वगात्रेषु धिग्धिगित्येवमब्रुवन् ॥ निर्गच्छस्वाऽऽशु दुर्गंध गृहाच्छीघ्रं द्विजाधम ॥ ६ ॥ अभोज्यमेतत्सर्वेषां दर्शनात्तव सत्कृतम् ॥ एवमेव तथेत्युक्त्वा देवदेवो महेश्वरः ॥ ७ ॥ जगामाऽऽकाशममलं दृश्यमानो द्विजोत्तमैः ॥ गते चाऽदर्शनं देवे स्नात्वाऽभ्युक्ष्य समंततः ॥ ८ ॥ भुंजतेऽस्म द्विजा राजन्यावत्पात्रे पृथक्पृथक् ॥ यत्रयत्र च पश्यंति तत्रतत्र कृमिर्बहुः ॥ ९ ॥ दृष्ट्वा विस्मयमापन्नाः सर्वे किमिति चाऽब्रुवन् ॥ ततः कश्चिदुवाचेदं ब्राह्मणो गुणवानजः ॥ १० ॥ योगीन्द्रः शंकया तत्र बहुविप्रसमागमे ॥ योऽत्र पूर्वं समायातः स योगी परमेश्वरः ॥११॥ तस्येदं क्रीडितं मन्ये भर्त्सितस्य विपाकजम् ॥ फलं भवति नाऽन्यस्य ह्यतिथेः शास्त्रनिश्चयात् ॥ १२ ॥ संपूज्य परमात्मा वै ह्यतिथिश्च विशेषतः ॥ श्राद्धकाले तु संप्राप्तमतिथिं यो न पूजयेत् ॥ १३ ॥ पिशाचा राक्षसास्तस्य तद्विलुंपन्त्यसंशयम् ॥ रूपान्वितं विरूपं वा मलिनं मलिनांबरम् ॥ १४ ॥ योगीन्द्रं श्वपचं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वाऽपि अतिथिं न विचारयेत् ॥ तच्छ्रुत्वा वचनं तस्य यजमानपुरोगमाः ॥ १५ ॥ ब्राह्मणा द्विजमन्वेष्टुं धाविताः सर्वतोदिशम् ॥ तावत्कथंचि
त्केनाऽपि गहनं वनमाश्रितः ॥ १६ ॥ दृष्टो दृष्ट इति प्रोक्तं तेन ते सर्व आगताः ॥ ततः पश्यंति तं विप्रं स्थाणुवन्निश्चलं स्थितम् ॥ १७ ॥
क्रंदते न चलति स्पन्दते न च पश्यति ॥ जल्पंति करुणं केचित्स्तुवंति च तथाऽपरे ॥ १८ ॥ वाग्भिः सततमिष्टाभिः स्तूयमानस्त्रिलोचनः ॥
क्षुधार्दितानां देवेश ब्राह्मणानां विशेषतः ॥ विनष्टमन्नं सर्वेषां पुनः संकर्तुमर्हसि ॥ १९ ॥ श्रुत्वा तु वचनं तेषां ब्राह्मणानां युधिष्ठिर ॥ परया
कृपया देवः प्रसन्नस्तानुवाच ह ॥ २० ॥ मया प्रसन्नेन महानुभावास्तदेव वोऽन्नं विहितं सुधेव ॥ भुंजंतु विप्राः सह बन्धुभृत्यैरर्चंतु नित्यं मम
मंडलं च ॥ २१ ॥ ततश्चायतनं पार्थ देवदेवस्य शूलिनः ॥ मुण्डिनामेति विख्यातं सर्वपापहरं शुभम् ॥ कार्तिक्यां तु विशेषेण गयातीर्थेन तत्स
मम् ॥ २२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखंडे मुण्डितीर्थमाहात्म्यवर्णनंनामैकादशोत्तर
द्विशततमोऽध्यायः ॥ २११ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ अथान्यत्संप्रवक्ष्यामि देवस्य चरितं महत् ॥ श्रुतमात्रेण येनाऽऽशु
सर्वपापैः प्रमुच्यते ॥ १ ॥ भिक्षुरूपं परं कृत्वा देवदेवो महेश्वरः ॥ एकशालां गतो ग्रामं भिक्षार्थी क्षुत्पिपासितः ॥ २ ॥ अक्षसूत्रोद्यतकरो भस्म
गुंठितविग्रहः ॥ स्फुरत्त्रिशूलो विश्वेशो जटाकुण्डलभूषितः ॥ ३ ॥ कृत्तिवासा महाकायो महाहिकृतभूषणः ॥ वादयन्वै डमरुकं डिंडिमप्रतिमं
शुभम् ॥ ४ ॥ कपालपाणिर्भगवान्बालकैर्बहुभिर्वृतः ॥ क्वचिद्गायन्हसंश्चैव नृत्यन्वादन्क्वचित्क्वचित् ॥ ५ ॥ यत्रयत्र गृहे देवो लीलया डिंडमं न्यसे
त् ॥ भाराक्रांतं गृहं पार्थ तत्रतत्र विनश्यति ॥६॥ एवं संप्रचरन्देवो वेष्टितो बहुभिर्जनैः ॥ दृश्यादृश्येन रूपेण निर्जगाम बहिः प्रभुः ॥ ७ ॥ इतश्चे
तश्च धावन्तं न पश्यंति यदा जनाः ॥ विस्मितास्ते स्थिताः शम्भुर्भविष्यति ततोऽस्तुवन् ॥ ८ ॥ तेषां तु स्तुवतां भक्त्या शंकरं जगतां
पतिम् ॥ डिंडिरूपो हि भगवांस्तदाऽसौ प्रत्यदृश्यत ॥ ९ ॥ तदाप्रभृति देवेशो डिंडिमेश्वर उच्यते ॥ दर्शनात्स्पर्शनाद्राजन्सर्वपापैः प्रमु
च्यते ॥ १० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखंडे रेवाखण्डे एकशालडिंडिमेश्वरतीर्थमाहात्म्यवर्णनं
नाम द्वादशोत्तरद्विशततमोऽध्यायः ॥ २१२ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ पुनरन्यत्प्रवक्ष्यामि देवस्य चरितं महत् ॥ श्रुतमात्रेण येनैव
सर्वपापैः प्रमुच्यते ॥ १ ॥ अबालो बालरूपेण ग्रामण्यैर्बालकैः सह ॥ आमलैः क्रीडते शंभुस्तत्ते वक्ष्यामि भारत ॥ २ ॥ सर्वैस्तैरामलाः क्षिता ये
ते देवेन पांडव ॥ आनीतास्तत्क्षणादेव ततः पश्चात्क्षिपेद्धरः ॥ ३ ॥ यावद्गत्वा दिशो दिग्भ्य आगच्छन्ति पृथक्पृथक् ॥ तावत्तमामलं भूतं पश्यं



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ति परमेश्वरम् ॥ ४ ॥ तृतीये चैव यत्कर्म देवदेवस्य धीमतः ॥ स्थानानां परमं स्थानमामलेश्वरमुत्तमम् ॥ ५ ॥ तेन पूजितमात्रेण प्राप्यते परमं पदम् ॥६॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखंडे रेवाखंडे आमलेश्वरतीर्थमाहात्म्यवर्णनंनाम त्रयोदशोत्तरद्विशततमोऽध्यायः ॥२१३॥ ॥छ॥ ॥ श्रीमार्कंडेयउवाच ॥ ॥ चतुर्थं संप्रवक्ष्यामि देवस्य चरितं महत्॥श्रुतमात्रेण येनैव सर्वपापैः प्रमुच्यते ॥ १ ॥ कपाली कांथिको भूत्वा यथा स व्यचरन्महीम् ॥ पिशाचै राक्षसैर्भूतैर्डाकिनीयोगिनीवृतः ॥२॥ भैरवं रूपमास्थाय प्रेतासनपरिग्रहः॥त्रैलोक्यस्याऽभयं दत्त्वा चचार विपुलं तपः ॥ ३ ॥ आषाढी तु कृता तत्र ह्याषाढीनाम विश्रुतम्॥ कंथा मुक्ता ततोऽन्यत्र देवेन परमेष्ठिना ॥४॥ तदाप्रभृति राजेंद्र स कंथेश्वर उच्यते ॥ तस्य दर्शनमात्रेण ह्यश्वमेधफलं लभेत् ॥ ५ ॥ देवो मार्गे पुनस्तत्र भ्रमते च यदृच्छया ॥ विक्रीणाति बलाकारो दृष्ट्वा चोक्तो हरेण तु ॥ ६ ॥ यदि भद्र न चेत्कोपं करोषि मयि सांप्रतम् ॥ बलाभिर्भर मे लिंगं ददामि बहु ते धनम् ॥ ७ ॥ एवमुक्तोऽथ देवेन स वणिग्लोभमोहितः ॥ योजयामास बलका लिंगे चोत्तममध्यमान् ॥ ८ ॥ तावद्यावत्क्षयं सर्वे गताः काले सुसंचिताः ॥ स्थितं समुन्नतं लिंगं दृष्ट्वा शोकमुपागमत् ॥ ९ ॥ कृत्वा तु खंडखंडानि स देवः परमेश्वरः॥ उवाच प्रहसन्वाक्यं तं दृष्ट्वा गतसाध्वसम्॥१०॥न च मे पूरितं लिंगं यास्यामि यदि मन्यसे ॥ ददामि तत्र वित्तं ते यदि लिंगं प्रपूरितम् ॥ ११ ॥ ॥ वणिगुवाच ॥ ॥ अधन्योकृतपुण्योऽहं निग्राह्यः परमेश्वर ॥ तव प्रियमकुर्वाणः शोचिष्ये शाश्वतीः समाः ॥१२॥ एतच्छ्रुत्वा वचस्तस्य वणिक्पुत्रस्य भारत ॥ असंक्षयं धनं दत्त्वा स्थितस्तत्र महेश्वरः ॥ १३ ॥ तदाप्रभृति राजेंद्र बलाकैरिव भूषितम् ॥ प्रत्ययार्थं स्थितं लिंगं लोकानुग्रहकाम्यया ॥ १४ ॥ देवेन रचितं पार्थ क्रीडया सुप्रतिष्ठितम् ॥ देवमार्गमिति ख्यातं त्रिषु लोकेषु विश्रुतम् ॥ पश्यन्प्रपूजयन्वाऽपि सर्वपापैः प्रमुच्यते ॥ १५ ॥ देवमार्गे तु यो गत्वा पूजयेद्बलाकेश्वरम् ॥ पंचायतनमासाद्य रुद्रलोकं स गच्छति ॥ १६ ॥ देवमार्गे मृतानां तु नराणां भावितात्मनाम् ॥ न भवेत्पुनरावृत्ती रुद्रलोकात्कदाचन ॥ १७ ॥ देवमार्गस्य माहात्म्यं भक्त्या श्रुत्वा नरोत्तम ॥ मुच्यते सर्वपापेभ्यो नाऽत्र कार्या विचारणा ॥ १८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे श्रीकपालतीर्थमाहात्म्यवर्णनंनाम चतुर्दशोत्तरद्विशततमोऽध्यायः ॥ २१४ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ शृंगितीर्थं ततो गच्छेन्मोक्षदं सर्वदेहिनाम् ॥ मृतानां तत्र राजेंद्र मोक्षप्राप्तिर्न संशयः ॥ १ ॥ तत्रैव पिंडदानेन पितॄणामनृणो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्कां.म.पु. भवेत् ॥ तेन पुण्येन पूतात्मा लभेद्वाणेश्वरीं गतिम् ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवा आवं०खं०५
खण्डे शृंगितीर्थमाहात्म्यवर्णनंनाम पंचदशोत्तरद्विशततमोऽध्यायः ॥ २१५ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ अषाढीतीर्थमागच्छे (रेवाखं०३)
॥३३०॥ त्ततो भूपालनंदन ॥ कामिकं रूपमास्थाय स्थितो यत्र महेश्वरः ॥ १ ॥ चातुर्युगमिदं तीर्थं सर्वतीर्थेष्वनुत्तमम् ॥ तत्र स्नात्वा नरो राजन्रुद्रस्या अ०२१८
नुचरो भवेत् ॥ २ ॥ तत्र तीर्थे तु यः कश्चित्कुरुते प्राणमोक्षणम् ॥ अनिवर्त्तिका गतिस्तस्य रुद्रलोकादसंशयम् ॥ ३ ॥ इति श्रीस्कांदे महापुराण
एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखंडे अषाढीतीर्थमाहात्म्यवर्णनंनाम षोडशोत्तरद्विशततमोऽध्यायः ॥ २१६ ॥
॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ एरंडीसंगमं गच्छेत्सुरासुरनमस्कृतम् ॥ तत्तु तीर्थं महापुण्यं महापातकनाशनम् ॥ १ ॥ उप
वासपरो भूत्वा नियतेंद्रियमानसः ॥ तत्र स्नात्वा विधानेन मुच्यते ब्रह्महत्यया ॥ २ ॥ तत्र तीर्थे तु यो भक्त्या प्राणत्यागपरो भवेत् ॥ अनिव
र्त्तिका गतिस्तस्य रुद्रलोकादसंशयम् ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे
एरंडीतीर्थमाहात्म्यवर्णनंनाम सप्तदशोत्तरद्विशततमोऽध्यायः ॥ २१७ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेद्धराधीश
तीर्थं परमशोभनम् ॥ जमदग्निरिति ख्यातं यत्र सिद्धो जनार्दनः ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथं सिद्धो द्विजश्रेष्ठ वासुदेवो जगद्गुरुः ॥
मानुषं रूपमास्थाय लोकानां हितकाम्यया ॥ २ ॥ एतत्सर्वं यथान्यायं देवदेवस्य चक्रिणः ॥ चरितं श्रोतुमिच्छामि कथ्यमानं त्वयाऽनघ ॥ ३ ॥
॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ आसीत्पूर्वं महाराज हैहयाधिपतिर्महान् ॥ कार्त्तवीर्य इति ख्यातो राजा बाहुसहस्रवान् ॥ ४ ॥ हस्त्यश्वरथसं
पन्नः सर्वशस्त्रभृतां वरः ॥ वेदविद्याव्रतस्नातः सर्वभूताभयप्रदः ॥ ५ ॥ माहिष्मत्याः पतिः श्रीमान्राजा ह्यक्षौहिणीपतिः ॥ स कदाचिन्मृगान्हंतुं निर्जं
गाम महाबलः ॥ ६ ॥ बहुभिर्दिवसैः प्राप्तो भृगुकच्छमनुत्तमम् ॥ जमदग्निर्महातेजा यत्र तिष्ठति तापसः ॥ ७ ॥ रेणुकासहितः श्रीमान्सर्वभूता
भयप्रदः ॥ तस्य पुत्रोऽभवद्रामः साक्षान्नारायणः प्रभुः ॥ ८ ॥ सर्वक्षत्रगुणैर्युक्तो ब्रह्मविद्ब्राह्मणोत्तमः ॥ तोषयन्परया भक्त्या पितरौ
परमार्थवत् ॥ ९ ॥ तं तदा चार्जुनं दृष्ट्वा जमदग्निः प्रतापवान् ॥ चरंतं मृगयां गत्वा ह्यातिथ्येन न्यमंत्रयत् ॥ १० ॥ ॥३३०॥
॥१५६॥ तथेति चोक्त्वा स नृपः सभृत्यबलवाहनः ॥ जगाम चाऽऽश्रमं पुण्यमृषेस्तस्य महात्मनः ॥ ११ ॥ तत्क्षणादेव संपन्नं श्रिया परमया वृतम् ॥
विस्मयं परमं तत्र दृष्ट्वा राजा जगाम ह ॥ १२ ॥ गतमात्रस्तु सिद्धेन परमान्नेन भोजितः ॥ सभृत्यबलवान्राजा ब्राह्मणेन यदृच्छया ॥ किमेतदिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यप्रच्छ कारणं शक्तिमेव च ॥ १३ ॥ कामधेनोः प्रभावं तं ज्ञात्वा प्राह ततो द्विजम् ॥ दक्षिणां देहि मे विप्र कल्मषां धेनुमुत्तमाम् ॥ १४ ॥ शतं शतसहस्राणामयुतं नियुतं परम् ॥ भूषितानां च धेनूनां ददामि तव चार्बुदम् ॥ १५ ॥ ॥ जमदग्निरुवाच ॥ ॥ अयुतैः प्रयुतैर्नाऽहं शतकोटिभिरुत्तमाम् ॥ कामधेनुमिमां तात न दद्मि प्रतिगम्यताम् ॥ १६ ॥ एवमुक्तः स राजेंद्रस्तेन विप्रेण भारत ॥ क्रोधसंरक्तनयन इदं वचनमब्रवीत् ॥ १७ ॥ यस्येदृशः कामचारो मय्यपि द्विजपांसन ॥ अहं ते पश्यतस्तस्मान्नयामि सुरभिं गृहात् ॥ १८ ॥ ॥ द्विज उवाच ॥ ॥ कः क्रीडति सरोषेण निर्भयो हि महाहिना ॥ मृत्युदंष्ट्रांतरेणाऽपि मम धेनुं नयेत यः ॥१९॥ एवमुक्त्वा महादण्डं ब्रह्मदंड मिवाऽपरम् ॥ गृहीत्वा परमक्रुद्धो जमदग्निरुवाच ह ॥ २० ॥ यस्याऽस्ति शक्तिस्तेजो वा क्षत्रियस्य कुलाऽधमः ॥ धेनुं नयतु मे सद्यः क्षीणायुः सपरिच्छदः ॥ २१ ॥ एतच्छ्रुत्वा वचः क्रूरं हैहयः शतशो वृतः ॥ धावमानः क्षितितले ब्रह्मदंडहतोऽपतत् ॥ २२ ॥ हुंकृतेन ततो धेन्वाः खड्गपाशासिपाणयः ॥ निर्गच्छंतः प्रदृश्यंते कल्मषायाः सहस्रशः ॥ २३ ॥ नासापुटाग्राद्रोमाग्रात्किराता मागधा गुदात् ॥ रंध्रांतरेषु चोत्पन्नाः शतशोथ सहस्रशः ॥ २४ ॥ एवमन्योऽन्यमाहत्य हैहयष्टंकणान्दहन् ॥ विनाशं सह विप्रेण गता ह्यर्जुनतेजसा ॥ २५ ॥ कार्त्तवीर्यो जयं लब्ध्वा संख्ये हत्वा द्विजोत्तमम् ॥ जगाम स्वां पुरीं हृष्टः कृतांतवशमोहितः ॥ २६ ॥ ततस्त्वरान्वितः प्राप्तः पश्चाद्रामो गते रिपौ ॥ आक्रंदमानां जननीं ददर्श पितुरंतिके ॥ २७ ॥ ॥ राम उवाच ॥ ॥ केनेदमात्मनाशाय ह्यज्ञानात्साहसं कृतम् ॥ मम तातं जिघांसुर्यो द्रष्टुं मृत्युमिहेच्छति ॥ २८ ॥ ततः सा रामवाक्येन गतसत्त्वेव विह्वला ॥ उदरं करयुग्मेन ताडयंती ह्युवाच तम् ॥ २९ ॥ अर्जुनेन नृशंसेन क्षत्रियैरपरैः सह ॥ इहाऽऽगत्य पिता तेन निहतो बाहुशालिना ॥ ३० ॥ तं पश्य निहतं तातं गतासुं गतचेतसम् ॥ संस्कृत्य विधिवत्पुत्र तर्पयस्व यथातथम् ॥ ३१ ॥ एतच्छ्रुत्वा स वचनं जननीमभिवाद्य ताम् ॥ प्रतिज्ञामकरोद्यां तां शृणुष्व च नराधिप ॥ ३२ ॥ त्रिःसप्तकृत्वः पृथिवीं निःक्षत्रियकुलान्वयाम् ॥ स्नात्वा च तेषामसृजा तर्पयिष्यामि ते पतिम् ॥ ३३ ॥ तस्यापि परशुना बाहून्कार्त्तवीर्यस्य दुर्मतेः ॥ च्छित्वा पास्यामि रुधिरमिति सत्यं शृणुष्व मे ॥ ३४ ॥ एवं प्रतिज्ञां कृत्वाऽसौ जामदग्न्यः प्रतापवान् ॥ क्रोधेन महताऽऽविष्टा संस्कृत्य पितरं ततः ॥ ३५ ॥ माहिष्मतीं पुरीं रामो जगाम क्रोधमूर्च्छितः ॥ च्छित्वा बाहुवनं तस्य हत्वा तं क्षत्रियाधमम् ॥ ३६ ॥ जगाम क्षत्रियांताय पृथिवीमवलोकयन् ॥ सप्तद्वीपार्णवयुतां सशैलवनकाननाम् ॥ ३७ ॥ पूर्वतः पश्चिमामाशां दक्षिणोत्तरतः कुरून् ॥ समंतपंचके पंच चकार रुधिरह्रदान् ॥ ३८ ॥ स तेषु रुधिरांभस्सु ह्रदेषु क्रोधमूर्च्छितः ॥ पितॄन्संतर्प्पयामास



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



रुधिरेणेति नः श्रुतम् ॥ ३९ ॥ अथर्चीकादयोपेत्य पितरो ब्राह्मणर्षभम् ॥ तं क्षमस्वेति जगदुस्ततः स विरराम ह ॥ ४० ॥ तेषां समीपे यो
देशो ह्रदानां रुधिरांभसाम् ॥ समंतपंचकमिति पुण्यं तत्परिकीर्त्तितम् ॥ ४१ ॥ निवर्त्त्य कर्मगस्तस्मात्पितॄन्प्रोवाच पांडव ॥ रामः परम
धर्मात्मा यदिदं रुधिरं मया ॥ ४२ ॥ क्षितं पंचसु तीर्थेषु तद्भूयात्तीर्थमुत्तमम् ॥ तथेत्युक्ता तु ते सर्वे पितरोऽदृश्यतां गताः ॥ ४३ ॥
एवं रामस्य संसर्गो देवमार्गे युधिष्ठिर ॥ सर्वपापक्षयकरो दर्शनात्स्पर्शनान्नृणाम् ॥ ४४ ॥ रेणुकाप्रत्ययार्थाय अद्यापि पितृदेवताः ॥ दृश्यंते देव
मार्गस्थाः सर्वपापक्षयंकराः ॥ ४५ ॥ तत्र तीर्थे तु राजेंद्र नर्मदोदधिसंगमे ॥ स्थानं कृत्वा विधानेन मुच्यंते पातकैर्नराः ॥ ४६ ॥ कुशाग्रेणाऽपि
कौंतेय न स्पृष्टव्यो महोदधिः ॥ अनेन तत्र मंत्रेण स्नातव्यं नृपसत्तम ॥ ४७ ॥ नमस्ते विष्णुरूपाय नमस्तुभ्यमपां पते ॥ सान्निध्यं कुरु देवेश
सागरे लवणांभसि ॥ ४८ ॥ ॥ इति स्पर्शनमन्त्रः ॥ ॥ अग्निश्च तेजो मृडया च देहे रेतोऽथ विष्णुरमृतस्य नाभिः ॥ एतद्ब्रुवन्पांडव सत्य
वाक्यं ततोऽवगाहेत पतिं नदीनाम् ॥ ४९ ॥ पंचरत्नसमायुक्तं फलपुष्पाक्षतैर्युतम् ॥ मंत्रेणाऽनेन राजेंद्र दद्यादर्घं महोदधेः ॥ ५० ॥ सर्वरत्ननि
धानस्त्वं सर्वरत्नाकराकरः ॥ सर्वामरप्रधानेश गृहाणार्घं नमोऽस्तु ते ॥५१॥ इत्यर्घमन्त्रः ॥ आजन्मजनितात्पापान्मामुद्धर महोदधे ॥ याह्यर्चितो
रत्ननिधे पर्वतान्पार्श्वगोत्तम ॥ ॥ इति विसर्जनमन्त्रः ॥ ॥५२॥ कोऽपरः सागराद्देवात्स्वर्गद्वारविपाटन ॥ तत्र सागरपर्यन्तं महातीर्थमनुत्तमम् ॥
॥५३॥ जामदग्न्येन रामेण तत्र देवः प्रतिष्ठितः॥ यत्र देवाः सगन्धर्वा मुनयः सिद्धचारणाः॥५४॥उपासते विरूपाक्षं जमदग्निमनुत्तमम्॥रेणुकां चैव
ये देवीं पश्यंति भुवि मानवाः ॥ ५५ ॥ प्रियवासे शिवे लोके वसन्ति कालमीप्सितम् ॥ तत्र स्नात्वा नरो राजंस्तर्पयन्पितृदेवताः ॥ ५६ ॥ तारयेन्न
रकाद्घोरात्कुलानां शतमुत्तरम् ॥ स्नात्वा दत्त्वाऽत्र सहिताः श्रुत्वा वै भक्तिपूर्वकम् ॥ ५७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहि
तायां पञ्चम आवन्त्यखण्डे रेवाखण्डे जामदग्न्यतीर्थमाहात्म्यवर्णनंनामाष्टादशाधिकद्विशततमोऽध्यायः ॥ २१८ ॥ ॥ छ ॥ ॥ श्रीमार्कं
डेय उवाच ॥ ॥ नर्मदादक्षिणे कूले तीर्थं कोटीश्वरं परम् ॥ यत्र स्नानं च दानं च सर्वं कोटिगुणं भवेत् ॥ १ ॥ तत्र देवाः सगन्धर्वा ऋषयो
॥१५७॥ ये तथाऽमलाः ॥ कोटितीर्थे परां सिद्धिं संप्राप्ता भुवि दुर्लभाम् ॥ २ ॥ स्थापितश्च महादेवस्तत्र कोटीश्वरो नृप ॥ तं दृष्ट्वा देवदेवेशं सिद्धिं प्राप्नो ॥३३१॥
त्यनुत्तमाम् ॥ ३ ॥ तत्र तीर्थे तु यत्किंचिच्छुभं वा यदि वाऽशुभम् ॥ क्रियते तन्नृपश्रेष्ठ सर्वं कोटिगुणं भवेत् ॥ ४ ॥ तत्र दक्षिणमार्गस्था ये
केचिन्मुनिसत्तमाः ॥ सिद्धा मृताः पदं यांति पितृलोकं ध्रुवं हि ते ॥ ५ ॥ उत्तरं नर्मदाकूलं ये श्रेष्ठा मुनिपुंगवाः ॥ देवलोकं गताः पूर्वमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शास्त्रस्य निश्चयः ॥ ६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे कोटितीर्थमाहात्म्यवर्णनंनामै कोनविंशदधिकद्विशततमोऽध्यायः ॥ २१९ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेद्धराधीश लोटणेश्वरमुत्तमम् ॥ उत्तरे नर्मदाकूले सर्वपातकनाशनम् ॥ १ ॥ तत्क्षणादेव तत्सर्वं सप्तजन्मार्जितं त्वघम् ॥ नश्यते देवदेवस्य दर्शनादेव तन्नृप ॥ २ ॥ बाल्यात्प्रभृति यत्पापं यौवने चाऽपि यत्कृतम् ॥ तत्सर्वं विलयं याति देवदेवस्य दर्शनात् ॥ ३ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ आश्चर्यभूतं लोकेषु नर्मदाच रितं महत् ॥ त्वया वै कथितं विप्र सकलं पापनाशनम् ॥ ४ ॥ यदेकं परमं तीर्थं सर्वतीर्थफलप्रदम् ॥ श्रोतुमिच्छामि तत्सर्वं दयां कृत्वा वदाऽऽशु मे ॥ ५ ॥ ये केचिद्दुर्लभाः प्रश्नास्त्रिषु लोकेषु सत्तम ॥ त्वत्प्रसादेन ते सर्वे श्रुता मे सह बांधवैः ॥ ६ ॥ एतमेकं परं प्रश्नं सर्वप्रश्नविदां वर ॥ श्रुत्वाऽहं त्वत्प्रसादेन यत्र यामि सबांधवः ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ साधुसाधु महाप्राज्ञ यस्य ते मतिरीदृशी ॥ दुर्लभं त्रिषु लोकेषु तस्य ते नाऽस्ति किंचन ॥ ८ ॥ धर्ममर्थं च कामं च मोक्षं च भरतर्षभ ॥ काले काले च यो वेत्ति कर्त्तव्यस्तेन धीमता ॥ ९ ॥ तस्मात्ते संप्रवक्ष्यामि प्रश्नस्यास्योत्तरं शुभम् ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यन्ते भुवि मानवाः ॥ १० ॥ नर्मदा सरितां श्रेष्ठा सर्वतीर्थमयी शुभा ॥ विशेषः कथितस्तस्या रेवासागरसंगमे ॥ ११ ॥ आगच्छन्तीं नृपश्रेष्ठ दृष्ट्वा रेवां महोदधिः ॥ प्रणम्य च पुनर्देवीं संगमे रेवया सह ॥ १२ ॥ संचिंत्य मनसा केयमिति मां वै सरिद्वरा ॥ ज्ञात्वा संचिंत्य मनसा रेवां लिंगोद्भवां पराम् ॥ १३ ॥ लुठन्वै सम्मुखस्तात गतो रेवां महोदधिः ॥ समुद्रे नर्मदा यत्र प्रविष्टाऽस्ति महानदी ॥ १४ ॥ तत्र देवाधिदेवस्य समुद्रे लिंगमुत्थितम् ॥ लिंगोद्भूता महाभागा नर्मदा सरितां वरा ॥ १५ ॥ लयं गता तत्र लिंगे तेन पुण्यतमा हि सा ॥ नर्मदायां वसन्नित्यं नर्मदांबु पिबन्सदा ॥ दीक्षितः सर्वयज्ञेषु सोमपानं दिनेदिने ॥ १६ ॥ संगमे तत्र यः स्नात्वा लोटणेश्वरमर्चयेत् ॥ सोऽश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ १७ ॥ वाचिकं मानसं पापं कर्मणा यत्कृतं नृप ॥ लोटणेश्वरमासाद्य सर्वं विलयतां व्रजेत् ॥ १८ ॥ कार्त्तिक्यां तु विशेषेण कथितं शंकरेण तु ॥ तच्छृणुष्व नृपश्रेष्ठ सर्वपापापनोदनम् ॥ १९ ॥ संप्राप्तां कार्त्तिकीं दृष्ट्वा गत्वा तत्र नृपोत्तम ॥ चतुर्दश्यामुपोष्यैव स्नात्वा वै नर्मदाजले ॥ २० ॥ संतर्प्य पितृदेवांश्च श्राद्धं कृत्वा यथाविधि ॥ रात्रौ जागरणं कुर्यात्सं पूज्य लोटणेश्वरम् ॥ २१ ॥ सफलं जीवितं तस्य सफलं तस्य चेष्टितम् ॥ पंगवस्ते न सन्देहो जन्म तेषां निरर्थकम् ॥ २२ ॥ एकाग्रमनसा यैस्तु न दृष्टो लोटणेश्वरः ॥ पिशाचत्वं वियोनित्वं न भवेत्तस्य वै कुले ॥ २३ ॥ संगमे तत्र यो गत्वा स्नानं कृत्वा यथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विधि ॥ पुण्यैश्चैव तथा कुर्याद्गीतैर्नृत्यैः प्रबोधनम्[1] ॥ २४ ॥ ततः प्रभातां रजनीं दृष्ट्वा नत्वा महोदधिम् ॥ आमन्त्र्य स्नानवि
धिना स्नानं तत्र तु कारयेत् ॥ २५ ॥ ॐनमो विष्णुरूपाय तीर्थनाथाय ते नमः ॥ सान्निध्यं कुरु मे देव समुद्र लवणांऽ
भसि ॥ २६ ॥ ॥ इत्यामंत्रणमन्त्रः ॥ ॥ अग्निश्च तेजो मृडया च देहो रेतोऽधा विष्णुरमृतस्य नाभिः ॥ एवं ब्रुवन्पांडव सत्यवाक्यं ततोऽवगाहेत
पतिं नदीनाम् ॥ २७ ॥ ॥ इति स्नानमन्त्रः ॥ ॥ आजन्मशतसाहस्रं यत्पापं कृतवान्नरः ॥ सकृत्स्नानाद्व्यपोहेत पापौघं लवणांभसि ॥
॥ २८ ॥ अन्यथा हि कुरुश्रेष्ठ देवयोनिरसौ विभुः ॥ कुशाग्रेणाऽपि विबुधैर्न स्प्रष्टव्यो महार्णवः ॥ २९ ॥ सर्वरत्नप्रधानस्त्वं सर्वरत्नाकराकर ॥
सर्वामरप्रधानेश गृहणार्घं नमोऽस्तु ते ॥ ३० ॥ ॥ इति अर्घमन्त्रः ॥ ॥ पितृदेवमनुष्यांश्च संतर्प्य तदनंतरम् ॥ उत्तीर्य तीरे तस्यैव
पंचभिर्द्विजपुंगवैः ॥ ३१ ॥ श्राद्धं समाचरेत्पश्चाल्लोकपालानुरूपिभिः॥ कृत्वाऽग्रे लोकपालांस्तु प्रतिष्ठाप्य यथाविधि ॥ ३२ ॥ संपूज्य च यथान्यायं
तानेव ब्राह्मणैः सह ॥ सुकृतं दुष्कृतं पश्चात्तेभ्यः सर्वं निवेदयेत् ॥ ३३ ॥ बाल्यात्प्रभृति यत्पापं कृतं वार्धकयौवने ॥ प्रख्यापयित्वा तेभ्योऽग्रे लोक
पालान्निमंत्रयेत् ॥ ३४ ॥ बाल्यात्प्रभृति यत्किंचित्कृतमाजन्मतोऽशुभम् ॥ विप्रेभ्यः कथितं सर्वं तत्सान्निध्यं स्थितेषु मे ॥ ३५ ॥ इत्युक्त्वा स
लुठेत्पश्चात्तेभ्योऽग्रेण च सम्मुखम् ॥ अनुमान्य च तान्पंच पश्चात्स्नानं समाचरेत् ॥ ३६ ॥ श्राद्धं च कार्यं विधिवत्पितृभ्यो नृपसत्तम ॥ एवं
कृते नृपश्रेष्ठ सर्वपापक्षयो भवेत् ॥ ३७ ॥ जिज्ञासार्थं तु यः कश्चिद्वात्मानं ज्ञातुमिच्छति ॥ शुभाऽशुभं च यत्कर्म तस्य निष्ठामिमां शृणु ॥
॥ ३८ ॥ स्नात्वा तत्र महातीर्थे लुठमानो व्रजेन्नरः ॥ पापकर्मान्यतो याति धर्मकर्मा व्रजेन्नदीम् ॥ ३९ ॥ पापकर्मा ततो ज्ञात्वा पापं मे पूर्वसंचि
तम् ॥ स्नात्वा तीर्थवरे तस्मिन्दानं दद्याद्यथाविधि ॥ ४० ॥ लोटणेश्वरमभ्यर्च्य सर्वपापैः प्रमुच्यते ॥ अवक्रगमनं गत्वा मुच्यते सर्वपातकैः ॥
॥ ४१ ॥ तस्मात्सर्वप्रयत्नेन ज्ञात्वैवं नृपसत्तम ॥ स्नातव्यं मानवैस्तत्र यत्र संनिहितो हरः ॥ ४२ ॥ एवं स्नात्वा विधानेन ब्राह्मणान्वेदपारगान्॥
पूजयेत्पृथिवीपाल सर्वपापोपशांतये ॥ ४३ ॥ एवंगुणविशिष्टं हि तत्तीर्थं नृपसत्तम ॥ तस्य तीर्थस्य माहात्म्यं शृणुष्वैकमना नृप ॥ ४४ ॥ तत्र
तीर्थे नरः स्नात्वा संतर्प्य पितृदेवताः ॥ श्राद्धं यः कुरुते तत्र पितॄणां भक्तिभावितः ॥ ४५ ॥ दानं ददाति विप्रेभ्यो गोभूतिलहिरण्यकम् ॥ षष्टि
वर्षसहस्राणि कोटिवर्षशतानि च ॥ ४६ ॥ विमानवरमारूढः स्वर्गलोके महीयते ॥ नर्मदासर्वतीर्थेभ्यः स्नाने दाने च यत्फलम् ॥ ४७ ॥ तत्फलं

१ प्रबोधनम्–जागरम्–इत्यर्थः ।



CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समवाप्नोति रेवासागरसंगमे ॥ सुवर्णं रजतं ताम्रं मणिमौक्तिकभूषणम् ॥ ४८ ॥ गोवृषं च महीं धान्यं तत्र दत्त्वाऽक्षयं फलम् ॥ शुभस्याप्यशुभ
स्याऽपि तत्र तीर्थे न संशयः ॥ ४९ ॥ तत्र तीर्थे नरः कश्चित्प्राणत्यागं युधिष्ठिर ॥ करोति भक्त्या विधिवत्तस्य पुण्यफलं शृणु ॥ ५० ॥ कोटि
वर्षं तु वर्षाणां क्रीडित्वा शिवमंदिरे ॥ वेदवेदांगविद्विप्रो जायते विमले कुले ॥ ५१ ॥ पुत्रपौत्रसमृद्धोऽसौ धनधान्यसमन्वितः ॥ सर्वव्याधिविनि
र्मुक्तो जीवेच्च शरदांशतम् ॥ ५२ ॥ अपि द्वादशयात्रासु सोमनाथे यदर्चिते ॥ कार्त्तिक्यां कृत्तिकायोगे तत्पुण्यं लोटणेश्वरे ॥५३॥ गया गंगा कुरु
क्षेत्रे नैमिषे पुष्करे तथा ॥ तत्पुण्यं लभते पार्थ लोटणेश्वरदर्शनात् ॥ ५४ ॥ यः शृणोति नरो भक्त्या पठ्यमानमिदं शुभम् ॥ सर्वपापविनिर्मुक्तो
रुद्रलोकं स गच्छति ॥ ५५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे लोटणेश्वरतीर्थमाहा
त्म्यवर्णनंनाम विंशत्युत्तरद्विशततमोऽध्यायः ॥ १२० ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत्तु राजेंद्र रेवाया दक्षिणे तटे ॥ क्रोश
द्वयांतरे तीर्थं मातृतीर्थादनुत्तमम् ॥ १ ॥ नाम्ना हंसेश्वरं पुण्यं वैमनस्यविनाशनम् ॥ कश्यपस्य कुले जातो हंसो दाक्षायणीसुतः ॥ २ ॥ ब्रह्मणो
वाहनं जातः पुरा तप्त्वा तपो महत् ॥ सैकदा विधिनिर्देशं विना वैयग्र्यमास्थितः ॥ ३ ॥ अभिभूतः शिवगणैः प्रणनाश युधिष्ठिर ॥ दक्षयज्ञप्रप
थने कांदिशीको विधिं विना ॥ ४ ॥ ब्रह्मणा संस्मृतोऽप्याशु नायाति स यदा खगः ॥ तदा तं शप्तवान्ब्रह्मा पातयामास वै पदात् ॥ ५ ॥ ततः स
शप्तमात्मानं मत्वा हंसस्त्वरान्वितः ॥ पितामहमुपागम्य प्रणिपत्येदमब्रवीत् ॥ ६ ॥ ॥ हंस उवाच ॥ ॥ तिर्यग्योनिसमुत्पन्नं भवाञ्छप्तुं न
चार्हति ॥ स्वभाव एव तिर्यक्षु विवेकविकलं मनः ॥ ७ ॥ तथापि देव पापोऽस्मि यदहं स्वामिनं त्यजे ॥ किं तु धावद्भिरत्युग्रैर्गणैः शार्वैः पिता
मह ॥ सहसाहं भयाक्रांतस्त्रस्तस्त्यक्त्वा पलायितः ॥८॥ अद्यापि भयमेवाहं पश्यन्नस्मि विभो पुरः ॥ तेन स्मृतोऽपि भवता नाव्रजं भवदंतिके ॥
॥ ९ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ इति ब्रुवन्नेव हि धातुरग्रे हंसः श्वसत्यक्षिपूज्यः सुदीनः ॥ तिर्यञ्चं मां पापिनं मूढबुद्धिं प्रभो पुरः पतितं पाहि
पाहि ॥ १० ॥ एको देवस्त्वं हि सर्गस्य कर्ता नानाविधं सृष्टमेतत्त्वयैव ॥ अहं सृष्टस्त्वीदृशो यत्त्वया वै सोऽयं दोषो धातरद्धा तवैव ॥ ११ ॥
शापस्य वानुग्रहस्यापि शक्तस्त्वत्तो नान्यः शरणं कं व्रजामि ॥ सेवाधर्माद्विच्युतं दासभूतं चपेटैर्हंतव्यं वै तात मां त्राहि भक्तम् ॥ १२ ॥ विद्या
विद्ये त्वत्त एवाविरास्तां धर्माधर्मौ सदसद्द्युनिशे च ॥ नानाभावाञ्जगतस्त्वं विधत्सेस्तं त्वामेकं शरणं वै प्रपद्ये ॥१३॥ एकोऽसि बहुरूपोऽसि
नानाचित्रैककर्मतः ॥ निष्कर्माखिलकर्मासि त्वामतः शरणं व्रजे ॥ १४ ॥ नमोनमो वरेण्याय वरदाय नमोनमः ॥ नमो धात्रे विधात्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



च शरण्याय नमोनमः ॥ १५ ॥ शिक्षाक्षरवियुक्तेयं वाणी मे स्तौति किं विभो ॥ का शक्तिः किं परिज्ञानमिदमुक्तं क्षमस्व मे ॥ १६ ॥
॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ एवं वदति हंसे वै ब्रह्मा प्राह प्रसन्नधीः ॥ शिक्षा दत्ता तवैवेयं मा विषादं कृथाः खग ॥ १७ ॥ तपसा शोध
यात्मानं यथा शापांतमाप्नुयाः ॥ रेवासेवां कुरु स्नात्वा स्थापयित्वा महेश्वरम् ॥ अचिरेणैव कालेन ततः संस्थानमाप्स्यसि ॥ १८ ॥ यच्चेष्ट्वा
बहुभिर्यज्ञैः समाप्तवरदक्षिणैः ॥ गोस्वर्णकोटिदानैश्च तत्फलं स्थापिते शिवे ॥ १९ ॥ ब्रह्मघ्नो वा सुरापो वा स्वर्णहृद्गुरुतल्पगः ॥ रेवातीरे शिवं
स्थाप्य मुच्यते सर्वपातकैः ॥ २० ॥ तस्माद्गर्गसरित्तीरे स्थापयित्वा त्रियंबकम् ॥ वियुक्तः सर्वदोषैस्त्वं यास्यसे पदमुत्तमम् ॥ २१ ॥ एवमुक्तः स
विधिना हृष्टतुष्टः खगोत्तमः ॥ तथेत्युक्त्वा जगामाशु नर्मदातीरमुत्तमम् ॥ २२ ॥ तपस्तप्त्वा कियत्कालं स्थापयामास शंकरम् ॥ २३ ॥ स्व
नाम्ना भरतश्रेष्ठ हंसेश्वरमनुत्तमम् ॥ पूजयित्वा परं स्थानं प्राप्तवान्खगसत्तमः ॥ २४ ॥ तत्र हंसेश्वरे तीर्थे गत्वा स्नात्वा युधिष्ठिर ॥ पूजयेत्परमे
शानं स पापैः परिमुच्यते ॥ २५ ॥ स्तुवन्नेकमना देवं न दैन्यं प्राप्नुयात्क्वचित् ॥ श्राद्धं दीपप्रदानं च ब्राह्मणानां च भोजनम् ॥ दत्त्वा शक्त्या
नृपश्रेष्ठ स्वर्गलोके महीयते ॥ २६ ॥ त्रिकालमेककालं वा यो भक्त्या पूजयेच्छिवम् ॥ नवप्रसूतां धेनुं च दत्त्वा पार्थ द्विजोत्तमे ॥ षष्टिवर्षसहस्राणि
शिवलोके महीयते ॥२७॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखंडे हंसेश्वरतीर्थमाहात्म्यवर्णनंनामैक
विंशदधिकद्विशततमोऽध्यायः ॥ २२१ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततः क्रोशांतरे गच्छेत्तिलादं तीर्थमुत्तमम् ॥ तिलप्राशनकृद्यत्र
जाबालिः शुद्धिमाप्तवान् ॥ १ ॥ पितृमातृपरित्यागी भ्रातुर्भार्याभिलाषकृत् ॥ पुत्रविक्रयकृत्पापश्छलकृद्गुरुणा सह ॥ २ ॥ एवं दोषसमाविष्टो यत्र
यत्रापि गच्छति ॥ तत्र तत्रापि धिक्कारं लभते सत्सु भारत ॥ न कोऽपि संगतिं धत्ते तेन सार्द्धं सभास्वपि ॥ ३ ॥ इति लज्जान्वितो विप्रः काले
न महता नृप ॥ चिंतामवाप महतीमगतिज्ञो हि पावने ॥ ४ ॥ चकार सर्वतीर्थानि रेवां चाप्यवगाहयत् ॥ ५ ॥ अणिवापांतमासाद्य दक्षिणे नर्म
दातटे ॥ तस्थौ यत्र व्रती पार्थ जाबालिः प्राशयंस्तिलान् ॥६॥ तिलैरेकाशनं कुर्वंस्तथैवैकांतराशनम् ॥ त्र्यहषड्द्वादशाहाशी पक्षमासाशनस्तथा ॥
॥ ७ ॥ कृच्छ्रचांद्रायणादीनि व्रतानि च तिलैरपि ॥ तिलादत्वमनुप्राप्तो ह्यब्दद्वासप्ततिं क्रमात् ॥८॥ कालेन गच्छता तस्य प्रसन्नोऽभवदीश्वरः ॥
प्रादादिहामुत्रिकीं तु शुद्धिं सालोक्यमात्मकम् ॥ ९ ॥ तेन स स्थापितो देवः स्वनाम्ना भरतर्षभ ॥ तिलादेश्वरसंज्ञां च प्राप लोकादपि प्रभुः ॥
॥ १० ॥ तदा प्रभृति विख्यातं तीर्थं पापप्रणाशनम् ॥ तत्र तीर्थे नरः स्नात्वा चतुर्दश्यष्टमीषु च ॥ ११ ॥ उपवासपरः पार्थ तथैव हरिवासरे ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिलहोमी तिलोद्वर्ती तिलस्नायी तिलोदकी ॥ १२ ॥ तिलदाता च भोक्ता च नानापापैः प्रमुच्यते ॥ तिलैरापूरयेल्लिंगं तिलतैलेन दीपदः ॥ रुद्रलोकमवाप्नोति पुनात्यासप्तमं कुलम् ॥ १३ ॥ तिलपिंडप्रदानेन श्राद्धे नृपतिसत्तम ॥ विकर्मस्थाश्च गच्छंति गतिमिष्टां हि पूर्वजाः ॥ १४ ॥ स्वर्गलोकस्थिताः श्राद्धैर्ब्राह्मणानां च भोजनैः ॥ अक्षयां तृप्तिमासाद्य मोदंते शाश्वतीः समाः ॥ १५ ॥ पितुः कुलं मातृकुलं तथा भार्याकुलं नृप ॥ कुलत्रयं समुद्धृत्य स्वर्गं नयति वै नरः ॥ १६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखण्डे तिलादेश्वरतीर्थमाहात्म्यवर्णनंनाम द्वाविंशदधिकद्विशततमोऽध्यायः ॥ २२२ ॥ ॥ छ ॥ ॥ मार्कंडेय उवाच ॥ ॥ ततः क्रोशांतरे पार्थ वासवं तीर्थमुत्तमम् ॥ वसुभिः स्थापितं तत्र स्थित्वा वै द्वादशाब्दकम् ॥ १ ॥ धरो ध्रुवश्च सोमश्च आपश्चैवानिलोऽनलः ॥ प्रत्यूषश्च प्रभासश्च वसवोऽष्टाविमे पुरा ॥ २ ॥ पितृशापपरिक्लिष्टा गर्भवासाय भारत ॥ नार्मदं तीर्थमासाद्य तपश्चक्रुर्यतेंद्रियाः ॥ ३ ॥ आराधयंतः परमं भवानीपतिमव्ययम् ॥ द्वादशाब्दानि राजेंद्र ततस्तुष्टो महेश्वरः ॥ ४ ॥ प्रत्यक्षः प्रददौ तेभ्यस्त्वभीष्टं वरमुत्तमम् ॥ ततः स्वनाम्ना संस्थाप्य वसवस्तं महेश्वरम् ॥ जग्मुराकाशमाविश्य प्रसन्ने सति शंकरे ॥ ५ ॥ ततः प्रभृति विख्यातं तीर्थं तद्वासवाह्वयम् ॥ तस्मिंस्तीर्थे महाराज यो भक्त्या पूजयेच्छिवम् ॥ यथालब्धोपहारैश्च दीपं दद्यात्प्रयत्नतः ॥ ६ ॥ शुक्लपक्षे तदाष्टम्यां प्रत्यहं वापि शक्तितः ॥ अष्टौ वर्षसहस्राणि स वसेच्छिवसंनिधौ ॥ ७ ॥ ततः शिवालयं याति गर्भवासं न पश्यति ॥ पुष्पैर्वा पल्लवैर्वापि फलैर्धान्यैस्तथापि वा ॥ ८ ॥ पूजयेद्देवमीशानं स दैन्यं नाप्नुयात्क्वचित् ॥ सर्वशोकविनिर्मुक्तः स्वर्गलोके महीयते ॥ ९ ॥ एकाहमपि कौंतेय यो वसेद्वासवेश्वरे ॥ पापराशिं विनिर्धूय भानुवद्दिवि मोदते ॥ १० ॥ विप्रांश्च भोजयेद्भक्त्या दद्याद्वासांसि दक्षिणाम् ॥ ११ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे वासवेश्वरतीर्थमाहात्म्यवर्णनंनाम त्रयोविंशत्यधिकद्विशततमोऽध्यायः ॥ २२३ ॥ छ ॥ ॥ मार्कंडेय उवाच ॥ ॥ ततः क्रोशांतरे पार्थ तीर्थं कोटीश्वरं परम् ॥ यत्र स्नानं च दानं च जपहोमार्चनादिकम् ॥ भक्त्या कृतं नरैस्तत्र सर्वं कोटिगुणं भवेत् ॥ १ ॥ तत्र देवाः सगन्धर्वा ऋषयः सिद्धचारणाः ॥ जलधिं प्रति गच्छंति नर्मदां वीक्षितुं किल ॥ २ ॥ मिलिताः कोटिशो राजन्रेवासागरसंगमे ॥ विनोदमतुलं दृष्ट्वा रेवार्णवसमागमे ॥ ३ ॥ स्नात्वा शिवं च संस्थाप्य पूजयित्वा महेश्वरम् ॥ कोटीश्वराभिधानं तु स्वस्वभक्त्या विधानतः ॥ ४ ॥ कोटीतीर्थे परां सिद्धिं संप्राप्ताः सर्वतोषणात् ॥ तेन तत्पुण्यमतुलं सर्वतीर्थेषु चोत्तमम् ॥ ५ ॥ तत्र तीर्थे तु यत्किंचिच्छुभं वा यदि वाऽशुभम् ॥ क्रियते नृपशार्दूल सर्वं कोटिगुणं भवेत् ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तत्र तीर्थे तु मार्गस्था ये केचिद्दषिसत्तमाः ॥ सिद्धामृतपदं यांति पितृलोकं तथोत्तमम् ॥ ७ ॥ उत्तरे नर्मदातीरे दक्षिणे चाश्रिताश्च ये ॥ देवलोकं गतास्तत्र इति मे निश्चिता मतिः ॥ ८ ॥ बिल्वार्कपुष्पैर्धत्तूरकुशकाशप्रसूनकैः ॥ ऋतूद्भवैस्तथान्यैश्च पूजयित्वा महेश्वरम् ॥ ९ ॥ नानोपचारैर्विधिवन्मंत्रपूर्वं युधिष्ठिर ॥ धूपदीपार्घनैवेद्यैस्तोषयित्वा च धूर्जटिम् ॥ १० ॥ शिवलोकमवाप्नोति यावदिंद्राश्चतुर्दश ॥ पौषकृष्णाष्टमीयोगे विशेषः पूजने स्मृतः ॥ ११ ॥ नित्यं च नृपतिश्रेष्ठ चतुर्दश्यष्टमीषु च ॥ शिवमभ्यर्च्य विप्रांश्च भोजयेद्भक्तितो वरान् ॥ १२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे कोटीश्वरतीर्थमाहात्म्यवर्णनंनाम चतुर्विंशत्यधिकद्विशततमोऽध्यायः ॥ २२४ ॥

॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततः क्रोशांतरे गच्छेदलिकातीर्थमुत्तमम् ॥ अलिकानाम गांधर्वी कुशीला कुटिलाशया ॥ १ ॥ चित्रसेनस्य दौहित्री विद्यानंदमृषिं गता ॥ वव्रे तं स्वीकृता तेन दशवर्षाणि तं श्रिता ॥ २ ॥ पतिं जघान तं सुतं कस्मिंश्चित्कारणांतरे ॥ गत्वा निवेदयामास पितरं रत्नवल्लभम् ॥ ३ ॥ पित्रा मात्रा च संत्यक्ता बहुभिर्भर्त्सिता नृप ॥ गर्भघ्नी त्वं पतिघ्नी त्वमिति दर्शय मा मुखम् ॥ ४ ॥ ब्रह्मघ्नी याहि पापिष्ठे परित्यक्ता गृहाजद्ध ॥ ५ ॥ ॥ मार्कंडेय उवाच ॥ ॥ इति दुःखान्विता मूढा ताभ्यां निर्भर्त्सिता सती ॥ तनुं त्यक्तुं मनश्चक्रे प्राप्य तीर्थांतरं क्वचित् ॥ ६ ॥ संपृच्छ्यमाना तीर्थानि ब्राह्मणेभ्यो युधिष्ठिर ॥ श्रुत्वा पापहरं तीर्थं रेवासागरसंगमे ॥ ७ ॥ तत्र पार्थ तपश्चक्रे निराहारा जितव्रता ॥ कृच्छ्रातिकृच्छ्रपाराकमहासांतपनादिभिः ॥ ८ ॥ चांद्रायणैर्ब्रह्मकूर्चैः कर्शयामास वै तनुम् ॥ एवं वर्षशतं सार्द्धं व्यतीतं तपसा नृप ॥ ९ ॥ तस्या विशुद्धिमिच्छंत्याः शिवध्यानार्चनादिभिः ॥ ततः कतिपयाहोभिस्तस्या ज्ञात्वा हठं परम् ॥ परितुष्टः शिवः प्राह पार्वत्या परिनोदितः ॥ १० ॥ ॥ ईश्वर उवाच ॥ ॥ पुत्रि मा साहसं कार्षीः शुद्धदेहासि सांप्रतम् ॥ तुष्टोऽहं तपसा तेऽद्य वरं वरय वांछितम् ॥ ११ ॥ ॥ अलिकोवाच ॥ ॥ यदि तुष्टोऽसि देवेश वरार्हा यद्यहं मता ॥ नानापापाग्नितप्ताया देहि शुद्धिं परां मम ॥ १२ ॥ त्वं मे नाथो ह्यनाथायास्त्वमेव जगतां गुरुः ॥ दीनानाथसमुद्धर्त्ता शरण्यः सर्वदेहिनाम् ॥ १३ ॥ ॥ ईश्वर उवाच ॥ ॥ त्वं भद्रे शुद्धदेहासि मा किंचिदनुशोचिथाः ॥ स्वनाम्ना स्थापयित्वेह मां ततः स्वर्गमेष्यसि ॥ १४ ॥ इत्युक्त्वा देवदेवेशस्तत्रैवांतरधीयत ॥ अलिकापि ततो भक्त्या स्नात्वा संस्थाप्य शंकरम् ॥ १५ ॥ दत्त्वा दानं च विप्रेभ्यो लोकमाप महोत्कटम् ॥ पितरं च समासाद्य मातरं च युधिष्ठिर ॥ १६ ॥ तैश्च सन्मानिता प्रीत्या बन्धुभिः सालिका ततः ॥ विमानवरमारूढा दिव्यमालान्विता नृप ॥ १७ ॥ गौरीलोकमनुप्राप्ता सखित्वेऽद्यापि मोदते ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततः प्रभृति तत्पार्थ विख्यातमलिकेश्वरम् ॥ १८ ॥ तत्र तीर्थे तु या नारी पुरुषो वा युधिष्ठिर ॥ स्नात्वा संपूजयेद्भक्त्या महादेवमुमायुतम् ॥
॥ १९ ॥ स पापैर्विविधैर्मुक्तो लोकमाप्नोति शांकरम् ॥ मानसं वाचिकं पापं कायिकं यत्पुरा कृतम् ॥ २० ॥ सर्वं तद्विलयं याति भोजयित्वा
द्विजान्सदा ॥ दीपं दत्त्वा च देवाग्रे न रोगैः परिभूयते ॥ २१ ॥ धूपपात्रं विमानं च घण्टां कलशमेव च ॥ दत्त्वा देवाय राजेंद्र शाक्रं लोक
मवाप्नुयात् ॥ २२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखंडे रेवासागरसंगमेऽलिकेश्वरतीर्थमाहा
त्म्यवर्णनंनाम पंचविंशत्यधिकद्विशततमोऽध्यायः ॥ २२५ ॥ ॥ छ ॥ ॥ मार्कंडेय उवाच ॥ ॥ ततः क्रोशांतरे पुण्यं तीर्थं तद्विमले
श्वरम् ॥ यत्र स्नानेन दानेन जपहोमार्चनादिभिः ॥ १ ॥ विमलेश्वरमाराध्य यो यदिच्छेत्स तल्लभेत् ॥ स्वर्गलाभादिकं वापि पार्थिवं वा यथेप्सि
तम् ॥ २ ॥ पुरा त्रिशिरसं हत्वा त्वष्टुः पुत्रं शतक्रतुः ॥ यस्य तीर्थस्य माहात्म्याद्वैमल्यं परमं गतः ॥ ३ ॥ यत्र वेदनिधिर्विप्रो महत्तप्त्वा तपः
पुरा ॥ नानाकर्ममलैः क्षीणैर्विमलोऽभवदर्कवत् ॥ ४ ॥ महादेवप्रसादेन सोमवत्प्रियदर्शनः ॥ पुरा भानुमतीं भानुः सुतां स्मरशरार्दितः ॥ ५ ॥
चकमे तेन दोषेण कुष्ठरोगार्दितोऽभवत् ॥ स चाप्यत्र तपस्तप्त्वा विमलत्वमुपागतः ॥ ६ ॥ महादेवेन तुष्टेन स्वस्थानं मुदितोऽभजत् ॥ तथैव
च पुरा पार्थ विभांडकसुतो मुनिः ॥ ७ ॥ योगिसंगं वने प्राप्य पुरे च नृपतेस्तथा ॥ राजसंसर्गदोषाद्वै मालिन्यं परमात्मनः ॥ ८ ॥ विचारयन्न
भ्युपेत्य रेवासागरसंगमम् ॥ शांतया भार्यया सार्द्धं तप्त्वा द्वादशवत्सरान् ॥ ९ ॥ कृच्छ्रचांद्रायणैर्देवं तोषयंस्त्र्यंबकं मुनिः ॥ महादेवेन तुष्टेन
सोऽपि वैमल्यमाप्तवान् ॥ १० ॥ शर्वाण्या प्रेरितः शर्वः पुरा दारुवने नृप ॥ मोहनान्मुनिपत्नीनां स्वं वीक्ष्य विमलं किल ॥ ११ ॥ विचार्य
परमस्थानं नर्मदोदधिसंगमम् ॥ तत्र स्थित्वा महाराज तपस्तप्त्वा सहोमया ॥ १२ ॥ विमलोऽसौ यतो जातस्तेनासौ विमलेश्वरः ॥ तेन नाम्ना
स्वयं तस्थौ लोकानां हितकाम्यया ॥ १३ ॥ ततस्तिलोत्तमां सृष्ट्वा ब्रह्मा लोकपितामहः ॥ प्रजानाथोपि तां सृष्टां दृष्ट्वाग्रे सुमनोहराम् ॥ १४ ॥
भावियोगबलाक्रांतः स तस्याम[1]भिकोऽभवत् ॥ तेन वीक्ष्य सदोषत्वं रेवातीरद्वयं श्रितः ॥ १५ ॥ तीर्थान्यनुसरन्मौनी त्रिस्नायी संस्मरञ्छिवम् ॥
रेवार्णवसमायोगे स्नात्वा संपूज्य शंकरम् ॥ कालेनाल्पेन राजर्षे ब्रह्माप्यामलतां गतः ॥ १६ ॥ एवमन्येपि बहुशो देवर्षिनृपसत्तमाः ॥ त्यक्त्वा
दोषमलं तत्र विमला बहवोऽभवन् ॥ १७ ॥ तथा त्वमपि राजेंद्र तत्र स्नात्वा शिवार्चनात् ॥ अमलोपि विशेषेण वैमल्यं प्राप्स्यसे परम् ॥ १८ ॥

१ अभिकः--कामुक--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तत्र स्नात्वा नरो नारी पूजयित्वा महेश्वरम् ॥ पापदोषविनिर्मुक्तो ब्रह्मलोके महीयते ॥ १९ ॥ तत्रोपवासं यः कृत्वा पश्येत विमले
श्वरम् ॥ अष्टम्यां च चतुर्दश्यां सर्वपर्वसु पार्थिव ॥ २० ॥ सप्तजन्मकृतं पापं हित्वा याति शिवालयम् ॥ श्राद्धं कृत्वा विधानेन पितॄणामनृणी
भवेत् ॥ ब्राह्मणान्भोजयेच्छक्त्या तेभ्यो दद्याच्च दक्षिणाम् ॥ २१ ॥ यद्यदिष्टतमं लोके यच्चैवात्महितं गृहे ॥ तत्तद्गुणवते देयं तत्रैवाक्षयमिच्छता ॥
स्वर्णधान्यानि वासांसि छत्रोपानत्कमण्डलुम् ॥ २२ ॥ गृहं देवस्य वै शक्त्या कृत्वा स्याद्भुवि भूपतिः ॥ गीतनृत्यकथाभिश्च तोषयेत्परमेश्वरम् ॥
॥ २३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे विमलेश्वरतीर्थमाहात्म्यवर्णनंनाम षड्विंशत्य
धिकद्विशततमोऽध्यायः ॥ २२६ ॥ ॥ छ ॥ ॥ मार्कंडेय उवाच ॥ ॥ एतानि तव संक्षेपात्प्राधान्यात्कथितानि च ॥ न शक्तो
विस्तराद्वक्तुं संख्यां तीर्थेषु पांडव ॥ १ ॥ एषा पवित्रा विमला नदी त्रैलोक्यविश्रुता ॥ नर्मदा सरितां श्रेष्ठा महादेवस्य वल्लभा ॥ २ ॥ मनसा
संस्मरेद्यस्तु नर्मदां सततं नृप ॥ चांद्रायणशतस्याशु लभते फलमुत्तमम् ॥ ३ ॥ अश्रद्दधानाः पुरुषा नास्तिकाश्चात्र ये स्थिताः ॥ पतंति नरके
घोरे प्राहैवं परमेश्वरः ॥ ४ ॥ नर्मदां सेवते नित्यं स्वयं देवो महेश्वरः ॥ तेन पुण्या नदी ज्ञेया ब्रह्महत्यापहारिणी ॥ ५ ॥ इयं माहेश्वरी गंगा
महेश्वरतनूद्भवा ॥ प्रोक्ता दक्षिणगंगेति भारतस्य युधिष्ठिर ॥ ६ ॥ जाह्नवी वैष्णवी गंगा ब्राह्मी गंगा सरस्वती ॥ इयं माहेश्वरी गंगा रेवा नास्त्यत्र
संशयः ॥ ७ ॥ यथा हि पुरुषे देवस्त्रैमूर्तत्वमुपाश्रितः ॥ ब्रह्मविष्णुमहेशाख्यं न भेदस्तत्र वै यथा ॥ तथा सरित्त्रये पार्थ भेदं मनसि मा कृथाः ॥
॥ ८ ॥ कोटिशो ह्यत्र तीर्थानि लक्षशश्चापि भारत ॥ तथा सहस्रशो रेवातीरद्वयगतानि तु ॥ ९ ॥ वृक्षांतरिक्षसंस्थानि जलस्थलगतानि च ॥कः
शक्तस्तानि निर्णेतुं वागीशो वा महेश्वरः ॥१०॥ स्मरणाज्जन्मजनितं दर्शनाच्च त्रिजन्मजम्॥सप्तजन्मकृतं नश्येत्पापं रेवावगाहनात्॥११॥देवकार्यं
कृतं तेन अग्नयो विधिवद्धुताः ॥ वेदा अधीताश्चत्वारो येन रेवावगाहिता ॥ १२ ॥ प्राधान्याच्चापि संक्षेपात्तीर्थान्युक्तानि ते मया ॥ न शक्यो
विस्तरः पार्थ श्रोतुं वक्तुं च वै मया ॥ १३ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ विधानं च यमांश्चैव नियमांश्च वदस्व मे ॥ प्रायश्चित्तार्थगमने को
विधिस्तं वदस्व मे ॥ १४ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ साधु पृष्टं महाराज यच्छ्रेयः पारलौकिकम् ॥ शृणुष्वावहितो भूत्वा यथाज्ञानं वदामि ॥३३५॥
॥१६१॥ ते ॥ १५ ॥ अध्रुवेण शरीरेण ध्रुवं कर्म समाचरेत् ॥ अवश्यमेव यास्यंति प्राणाः प्राघूर्णिका इव ॥ १६ ॥ दानं वित्तादृतं वाचः कीर्तिधर्मौतथा
स्युषः ॥ परोपकरणं कायादसारात्सारमुद्धरेत् ॥ १७ ॥ अस्मिन्महामोहमये कटाहे सूर्याग्निना रात्रिदिवेंधनेन ॥ मासर्तुदर्वीपरिघट्टनेन भूतानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालः पचतीति वार्ता ॥ १८ ॥ ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्त्तुमिहार्हसि ॥ नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥ १९ ॥ मंत्रे
तीर्थे द्विजे देवे दैवज्ञे भेषजे गुरौ ॥ यादृशी भावना यस्य सिद्धिर्भवति तादृशी ॥ २० ॥ अश्रद्धया हुतं दत्तं तपस्ततं कृतं च यत् ॥
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥ २१ ॥ यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ॥ न स सिद्धिमवाप्नोति न
सुखं न परां गतिम् ॥ २२ ॥ संतीह विविधोपाया नृणां देहविशोधनाः ॥ तीर्थसेवासमं नास्ति स्वशरीरस्य शोधनम् ॥ २३ ॥
कृच्छ्रचांद्रायणाद्यैर्वा द्वितीयं तीर्थसेवया ॥ यदा तीर्थं समुद्दिश्य प्रयाति पुरुषो नृप ॥ तदा देवाश्च पितरस्तं व्रजंत्यनु खेचराः ॥ २४ ॥ परमा
मोदपूर्णास्ते प्रयांत्यस्यानुयायिनः ॥ कृत्वाऽऽभ्युदयिकं श्राद्धं समापृच्छय तु देवताम् ॥२५॥ इष्टबन्धूंश्च विष्णुं च शंकरं सगणेश्वरम् ॥ व्रजेद्द्विजा
भ्यनुज्ञातो गृहीत्वा नियमानपि ॥ २६ ॥ एकाशनं ब्रह्मचर्यं भूशय्यां सत्यवादिताम् ॥ वर्जनं च परान्नस्य प्रतिग्रहविवर्जनम् ॥ २७ ॥ वर्जयित्वा
तथा द्रोहवंचनादि नृपोत्तम ॥ साधुवेषं समास्थाय विनयेन विभूषितः ॥ २८ ॥ दंभाहंकारमुक्तो यः स तीर्थफलमश्नुते ॥ यस्य हस्तौ च पादौ
च मनश्चैव सुसंयतम् ॥ २९ ॥ विद्या तपश्च कीर्तिश्च स तीर्थफलमश्नुते ॥ अक्रोधनश्च राजेन्द्र सत्यशीलो दृढव्रतः ॥ ३० ॥ आत्मोपमश्च भूतेषु
स तीर्थफलमश्नुते ॥ मुण्डनं चोपवासश्च सर्वतीर्थेष्वयं विधिः ॥ ३१ ॥ वर्जयित्वा कुरुक्षेत्रं विशालां विरजां गयाम् ॥ स्नानं सुरार्चनं चैव श्राद्धे वै
पिण्डपातनम् ॥ ३२ ॥ विप्राणां भोजनं शक्त्या सर्वतीर्थेष्वयं विधिः ॥ प्राय श्चितनिमित्तं च यो व्रजेद्यतमानसः ॥ ३३ ॥ तस्यापि च विधिं
वक्ष्ये शृणु पार्थ समाहितः ॥ एकाशनं ब्रह्मचर्यमक्षारलवणाशनम् ॥ ३४ ॥ स्नात्वा तीर्थाभिगमनं हविष्यैकान्नभोजनम् ॥ वर्जयेत्पतितालापं
बहुभाषणमेव च ॥ ३५ ॥ परीवादं परान्नं च नीचसंगं विवर्जयेत् ॥ व्रजेच्च निरुपानत्को वसानो वाससी शुचिः ॥ ३६ ॥ संकल्पं मनसा कृत्वा
ब्राह्मणानुज्ञया व्रजेत् ॥ तीर्थे गत्वा तथा स्नात्वा कृत्वा चैव सुरार्चनम् ॥ ३७ ॥ दुष्कर्मतो विमुक्तः स्यादनुतापी भवेद्यदि ॥ वेदे तीर्थे च देवे च
दैवज्ञे चौषधे गुरौ ॥ ३८ ॥ यादृशी भावना यस्य सिद्धिर्भवति तादृशी ॥ उक्ततीर्थफलानां च पुराणेषु स्मृतिष्वपि ॥ ३९ ॥ अर्थवादभवां शंकां
विहाय भरतर्षभ ॥ कृत्वा विचारं शास्त्रोक्तं परिकल्प्य यथोचितम् ॥ ४० ॥ कायेन कृच्छ्रचरणे ह्यशक्तानां विशुद्धये ॥ ज्ञात्वा तीर्थविशेषं हि
प्रायश्चित्तं समाचरेत् ॥ ४१ ॥ तच्छृणुष्व महाराज नर्मदायां यथोचितम् ॥ चतुर्विंशतिसंख्येभ्यो योजनेभ्यो व्रजेन्नरः ॥ ४२ ॥ चतुर्विंशति
कृच्छ्राणां फलमाप्नोति शोभनम् ॥ अत ऊर्ध्वं योजनेषु पादकृच्छ्र उदाहृतः ॥ ४३ ॥ तन्मध्ये च महाराज यो व्रजेच्छुद्धिकांक्षया ॥ योजने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

योजने तस्य प्रायश्चितं विदुर्बुधाः ॥ ४४ ॥ प्रणवाख्ये[1] महाराज तथा रेवोरिसंगमे ॥ भृगुक्षेत्रे तथा गत्वा फलं तद्द्विगुणं स्मृतम् ॥ ४५ ॥ संगमे
देवनद्याश्च शूलभेदे नृपोत्तम ॥ द्विगुणं पादहीनं स्यात्करजासंगमे तथा ॥ ४६ ॥ एरण्डीसंगमे तद्वत्कपिलायाश्च संगमे ॥ केचित्त्रिगुणितं प्राहुः
कुब्जारेवोत्थसंगमे ॥ ४७ ॥ ॐकारे च महाराज तदपि स्यात्समंजसम् ॥ संगमेषु तथान्यासां नदीनां रेवया सह ॥ ४८ ॥ प्राहुस्ते सार्द्धकृच्छ्रं
वै फलं पूर्वं युधिष्ठिर ॥ त्रिगुणं कृच्छ्रमाप्नोति रेवासागरसंगमे ॥ ४९ ॥ कृच्छ्रं चतुर्गुणं प्रोक्तं शुक्लतीर्थे युधिष्ठिर ॥ योजने योजने गत्वा चतुर्विं
शतियोजनम् ॥ तत्र तत्र वसेद्यस्तु सुचिरं नृवरोत्तम ॥ ५० ॥ रेवासेवासमाचारः संयुक्तः शुद्धबुद्धिमान् ॥ दंभाहंकाररहितः शुद्धयं स विमु
च्यते ॥ ५१ ॥ इति ते कथितं पार्थ प्रायश्चित्तार्थलक्षणम् ॥ रेवायात्राविधानं च गुह्यमेतद्युधिष्ठिर ॥ ५२ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ योज
नस्य प्रमाणं मे वद त्वं मुनिसत्तम ॥ यज्ज्ञात्वा निश्चितं मे स्यान्मनःशुद्धेस्तु कारणम् ॥ ५३ ॥ ॥ मार्कंडेय उवाच ॥ ॥ शृगु पांडव
वक्ष्यामि प्रमाणं योजनस्य यत् ॥ तथा यात्राविशेषेण विशेषं कृच्छ्रसम्भवम् ॥ ५४ ॥ तिर्यग्यवोदराण्यष्टावूर्ध्वा वा व्रीहयस्त्रयः ॥ प्रमाणमंगुल
स्याद्दुर्वितस्तिर्द्वादशांगुला ॥ ५५ ॥ वितस्तिद्वितयं हस्तश्चतुर्हस्तं धनुः स्मृतम् ॥ स एव दण्डो गदितो विशेषज्ञैर्युधिष्ठिर ॥ ५६ ॥ धनुःसहस्रे द्वे
क्रोशश्चतुःक्रोशं च योजनम् ॥ एतद्योजनमानं ते कथितं भरतर्षभ ॥ ५७ ॥ येन यात्रां व्रजन्वेत्ति फलमानं निजार्जितम् ॥ उक्तं कृच्छ्रफलं
तीर्थे जलरूपे नृपोत्तम ॥ ५८ ॥ यथाविशेषं ते वच्मि पूर्वोक्ते तत्र तत्र च ॥ तन्मे शृणु महीपाल श्रद्दधानाय कथ्यते ॥ ५९ ॥ यस्मि
स्तीर्थे हि यत्प्रोक्तं फलं कृच्छ्रादिकं नृप ॥ तत्राप्युपोषणात्कृच्छ्रफलं प्राप्नोत्यथाधिकम् ॥ ६० ॥ दिनजाप्याच्च लभते फलं कृच्छ्रस्य शक्तितः ॥
तत्र विख्यातदेवेशं स्नात्वा दृष्ट्वाभिपूज्य च ॥ ६१ ॥ प्रणम्य लभते पार्थ फलं कृच्छ्रभवं सुधीः ॥ तीर्थे मुख्यफलं स्नानाद्द्वितीयं चाप्युपोष
णात् ॥ ६२ ॥ तृतीयं ख्यातदेवस्य दर्शनाभ्यर्चनादिभिः ॥ चतुर्थं जाप्ययोगेन देहशक्त्या त्वहर्निशम् ॥ ६३ ॥ पंचमं सर्वतीर्थेषु कल्पनीयं हि
दूरतः ॥ तीरस्थो योजनादर्वाग्दशांशं लभते फलम् ॥ ६४ ॥ उक्ततीर्थफलात्पार्थ नात्र कार्या विचारणा ॥ ६५ ॥ उपवासेन सहितं महानद्यां
हि मज्जनम् ॥ अप्यर्वाग्योजनात्पार्थ दद्यात्कृच्छ्रफलं नृणाम् ॥ ६६ ॥ षड्योजनवहा कुल्या नद्योऽल्पा द्वादशैव च ॥ चतुर्विंशतिगा न

१ प्रणवाख्ये—ॐकारेश्वरक्षेत्रे—इत्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri

द्यो महानद्यस्ततोऽधिकाः ॥ ६७ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे तीर्थयात्रादिवि
धानविशेषकथनं नाम सप्तविंशत्यधिकद्विशततमोऽध्यायः ॥ २२७ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ परार्थं तीर्थयात्रायां गच्छतः
कस्य किं फलम् ॥ कियन्मात्रं मुनि श्रेष्ठ तन्मे ब्रूहि कृपानिधे ॥ १ ॥ ॥ मार्कंडेय उवाच ॥ ॥ परार्थं गच्छतस्तन्मे वदतः शृणु पार्थिव ॥
यथा यावत्फलं तस्य यात्रादिविहितं भवेत् ॥ २ ॥ उत्तमेनेह वर्णेन द्रव्यलोभादिना नृप ॥ नाधमस्य क्वचित्कार्यं तीर्थयात्रादिसेवनम् ॥ ३ ॥
धर्मकर्म महाराज स्वयं विद्वान्समा चरेत् ॥ शरीरस्याथवा शक्त्या अन्यद्वा कार्ययोगतः ॥ ४ ॥ धर्मकर्म सदा प्रायः सवर्णेनैव कारयेत् ॥ पुत्र
पौत्रादिकैर्वापि ज्ञातिभिर्गोत्रसंभवैः ॥ ५ ॥ श्रेष्ठं हि विहितं प्राहुर्धर्मकर्म युधिष्ठिर ॥ तैरेव कारयेत्तस्मान्नोत्तमैर्नाधमैरपि ॥ ६ ॥ अधमेन कृतं
सम्यङ् न भवेदिति मे मतिः॥ उत्तमश्चाधमार्थे वै कुर्वन्दुर्गतिमाप्नुयात् ॥ ७ ॥ न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविष्कृतम् ॥ न चास्योपदिशे
द्धर्मं न चास्य व्रतमादिशेत् ॥ ८ ॥ जपस्तपस्तीर्थयात्रा प्रव्रज्या मंत्रसाधनम् ॥ देवताराधनं दीक्षा स्त्रीशूद्रपतनानि षट् ॥ ९ ॥ पतिवत्नी पत
त्यैव विधवा सर्वमाचरेत् ॥ सभर्तृका ऽशंके पत्यौ सर्वं कुर्यादनुज्ञया ॥ १० ॥ गत्वा परार्थं तीर्थादौ षोडशांशफलं लभेत् ॥ गच्छतश्च प्रसंगेन
तीर्थमर्द्धफलं स्मृतम् ॥ ११ ॥ अनुसंगेन तीर्थस्य स्नाने स्नानफलं विदुः ॥ नैव यात्राफलं तज्ज्ञाः शास्त्रोक्तं कल्मषापहम् ॥ १२ ॥ पित्रर्थं च
पितृव्यस्य मातुर्मातामहस्य च ॥ मातुलस्य तथा भ्रातुः श्वशुरस्य सुतस्य च ॥ १३ ॥ पोषकार्थादयोश्चापि मातामह्या गुरोस्तथा ॥ स्वसुर्मातृ
ष्वसुः पैत्र्या आचर्याध्यापकस्य च ॥ १४ ॥ इत्याद्यर्थे नरः स्नात्वा स्वयमष्टांशमाप्नुयात् ॥ साक्षात्पित्रोः प्रकुर्वाणश्चतुर्थांशमवाप्नुयात ॥ १५ ॥
पतिपत्न्योर्मिथश्चार्द्धं फलं प्राहुर्मनीषिणः ॥ भागिनेयस्य शिष्यस्य भ्रातृव्यस्य सुतस्य च ॥ षट्त्रिपंचचतुर्भागान्फलमाप्नोति वै नरः॥ १६ ॥ इति
ते कथितं पार्थ पारंपर्यक्रमागतम् ॥ कर्तव्यं ज्ञातिवर्गस्य परार्थे धर्मसाधनम् ॥१७॥ वर्षाऋतुसमायोगे सर्वा नद्यो रजस्वलाः ॥ मुक्त्वा सरस्वतीं
गंगां नर्मदां यमुनानदीम् ॥ १८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे परार्थतीर्थयात्राफल
कथनंनामाष्टविंशत्यधिकद्विशततमोऽध्यायः ॥ २२८ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ एवं ते कथितं राजन्पुराणं धर्मसंहितम् ॥

१ अशके—अशक्ते—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



शिवप्रीत्या यथा प्रोक्तं वायुना देवसंसदि ॥ १ ॥ षष्टितीर्थसहस्राणि षष्टिकोटिस्तथैव च ॥ आदिमध्यावसानेषु नर्मदायां पदेपदे ॥२॥ मया द्वाद
शसाहस्री संहिता या श्रुता पुरा ॥ देवदेवस्य गदतः सांप्रतं कथिता तव ॥३॥ पृष्टस्त्वयाऽहं भूपाल पर्वतेऽमरकंटके ॥ स्थितः संक्षेपतः सर्वं मया
तत्कथितं तव ॥ ४ ॥ नर्मदाचरितं पुण्यं शृणु तस्यास्ति यत्फलम् ॥ यत्फलं सर्ववेदैः स्यात्सषडंगपदक्रमैः ॥ ५ ॥ पठितैश्च श्रुतैर्वाऽपि तस्माद्बहु
तरं भवेत् ॥ सत्रयाजी फलं यत्र लभते द्वादशाऽब्दिकम् ॥ ६ ॥ चरिते तु श्रुते देव्या लभते तादृशं फलम् ॥ सर्वतीर्थेषु यत्पुण्यं स्नात्वा सागरमा
दितः ॥ ७ ॥ सकृत्स्नात्वा तथा श्रुत्वा नर्मदायां फलं हि तत् ॥ आदिमध्यावसानेन नर्मदाचरितं शुभम् ॥ ८ ॥ यः शृणोति नरो भक्त्या
तस्य पुण्यफलं शृणु ॥ स प्राप्य शिवसंस्थानं रुद्रकन्यासमावृतः ॥ ९ ॥ रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते ॥ एतद्धर्मसुपाख्यानं सर्वशास्त्रेषु
सत्तमम् ॥ १० ॥ देशे वा मंडले वाऽपि वा ग्रामे नगरेऽपि वा ॥ गृहे वा तिष्ठते यस्य चातुर्वर्ण्यस्य भारत ॥ ११ ॥ स ब्रह्मा स शिवः साक्षात्स
च देवो जनार्दनः ॥ त्रिविधं कारणं लोके धर्मपंथानमुत्तमम् ॥ १२ ॥ देवतानां गुरुं शास्त्रं परमं सिद्धिकारणम् ॥ श्रुत्वेश्वरमुखात्पार्थ मयाऽपि
तव कीर्त्तितम् ॥ १३ ॥ दक्षिणे चोत्तरे कूले यानि तीर्थानि कानिचित् ॥ प्रधानतः सुपुण्यानि कथितानि विशेषतः ॥१४॥ स्पर्शनाद्दर्शतात्तेषां
कीर्त्तनाच्छ्रवणात्तथा ॥ मुच्यते सर्वपापेभ्यो रुद्रलोकं स गच्छति ॥ १५ ॥ इदं यः शृणुयान्नित्यं पुराणं शिवभाषितम् ॥ ब्राह्मणो वेदविद्यावान्क्ष
त्रियो विजयी भवेत् ॥ १६ ॥ धनभागी भवेद्वैश्यः शूद्रो वै धर्मभाग्भवेत् ॥ सौभाग्यं संततिं स्वर्गं नारी श्रुत्वाऽप्नुयाद्धनम् ॥ १७ ॥ ब्रह्मघ्नश्च सुरा
पश्च स्तेयी च गुरुतल्पगः ॥ माहात्म्यं नर्मदायास्तु श्रुत्वा पापबहिस्कृताः ॥ १८ ॥ पापभेदी कृतघ्नश्च स्वामिविश्वासघातकः ॥ गोघ्नश्च गरदश्चैव
कन्याविक्रयकारकः ॥ १९ ॥ एते श्रुत्वैव पापेभ्यो मुच्यंते नाऽत्र संशयः ॥ ये पुनर्भावितात्मानः शृण्वंति सततं नृप ॥ २० ॥ पूजयंत इदं देवा
पूजिता गुरुवश्च तैः ॥ नर्मदा पूजिता तेन भगवांश्च महेश्वरः ॥ २१ ॥ तस्मात्सर्वप्रयत्नेन गंधपुष्पविभूषणैः ॥ पूजितं परया भक्त्या शास्त्रमेतत्फ
लप्रदम् ॥ २२ ॥ लेखापयित्वा सकलं नर्मदाचरितं शुभम् ॥ उत्तमं सर्वशास्त्रेभ्यो यो ददाति द्विजन्मने ॥ २३ ॥ नर्मदा सर्वतीर्थेषु स्नाने दाने
 च यत्फलम् ॥ तत्फलं समवाप्नोति स नरो नाऽत्र संशयः ॥ २४ ॥ एतत्पुराणं रुद्रोक्तं महापुण्यफलप्रदम् ॥ स्वर्गदं पुत्रदं धन्यं यशस्यं कीर्त्तिवर्द्ध 
नम् ॥२५॥ सर्वपापहरं पार्थ दुःखःदुःस्वप्ननाशनम् ॥ पठतां शृण्वतां राजन्सर्वकमार्थसिद्धिदम् ॥२६॥ शांतिरस्तु शिवं चास्तु लोकाः सन्तु निरा
मयाः ॥ गोब्राह्मणेभ्यः स्वस्त्यस्तु धर्म्मं धर्म्मात्मजाऽऽश्रयः ॥ २७ ॥ नरकान्तकरी रेवा सतीर्था विश्वपावनी ॥ नर्मदा धर्मदा चास्तु शर्मदा पार्थ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ते सदा ॥ २८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे मार्कंडेययुधिष्ठिरसंवादे रेवाखण्डपठनश्रवणदानादिफलश्रुतिवर्णनंनामैकोनत्रिंशदधिकद्विशततमोऽध्यायः ॥ २२९ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ इत्युक्त्वोपरराम पाण्डोः पुत्राय वै मुनिः ॥ मृकण्डतनयो धीमान्सप्तकल्पस्मरः पुरः ॥१॥ मार्कंडमुनिना प्रोक्त यथा पार्थाय सत्तमाः ॥ तथा वः कथितं सर्वं रेवामाहात्म्यमुत्तमम् ॥ २ ॥ इयं पुण्या सरिच्छ्रेष्ठा रेवा विश्वैकपावनी ॥ रुद्रदेहसमुद्भूता सर्वभूताभयप्रदा ॥ ३ ॥ ॐकारजलधिं यावदुवाच भृगुनन्दनः ॥ तीर्थसंगमभेदान्वै धर्मपुत्राय पृच्छते ॥ ४ ॥ समासेनैव मुनयस्तथाहं कथयामि वः ॥ सप्तषष्टिसहस्राणि षष्टिकोट्यस्तथैव च ॥ ५ ॥ कथं केनात्र शक्यन्ते वक्तुं वर्षशतैरपि ॥ तथाप्यत्र मुनिश्रेष्ठाः प्रोक्तं पार्थाय वै यथा ॥ ६ ॥ तीर्थमोङ्कारमारभ्य वक्ष्ये तीर्थावलिं शुभाम् ॥ प्रोच्यमानां समासेन तां शृणुध्वं महर्षयः ॥ ७ ॥ नत्वा सोमं महेशानं नत्वा ब्रह्माच्युतावुभौ ॥ सरस्वतीं गणेशानं वेदव्यासांघ्रिपङ्कजम् ॥ ८ ॥ पूर्वाचार्यांस्तथा सर्वान्दृष्टादृष्टार्थवेदिनः ॥ प्रणम्य नर्मदां देवीं वक्ष्ये तीर्थावलिं त्विमाम् ॥ ९ ॥ ॐ नमो विश्वरूपाय ॐकारायाखिलात्मने ॥ यमारभ्य प्रवक्ष्यामि रेवातीर्थावलिं द्विजाः ॥ १० ॥ अस्मिन्मार्कडगदिते रेवातीर्थक्रमे शुभे ॥ पुराणसंहिताध्याया मार्कण्डाश्रमवर्णनम् ॥११॥ ततः प्रश्नाधिकारश्च प्रशंसा नर्मदोद्भवा ॥ तथा पञ्चदशानां च प्रवाहानां प्रकीर्तनम् ॥ १२ ॥ नामनिर्वचनं तद्वत्तथा कल्पसमुद्भवाः ॥ एकविंशतिकल्पानां तद्वन्नामानुकीर्त्तनम् ॥ १३ ॥ मार्कंडेयानुभूतानां सप्तानां लक्षणानि च ॥ माहात्म्यं चैव रेवायाः शिवविष्ण्वोस्तथैव च ॥ १४ ॥ संहारलक्षणं तद्वदोंकारस्य च संभवः ॥ तथैवोंकारमाहात्म्यममरंकटकीर्तनम् ॥ १५ ॥ अमरेश्वरतीर्थं च तथा दारुवनं महत् ॥ दारुकेश्वरतीर्थं च तीर्थं वै चरुकेश्वरम् ॥ १६ ॥ चरुकासंगमस्तद्वच्चद्वतीपातेश्वरं तथा ॥ पातालेश्वरतीर्थं च कोटियज्ञाह्वयं तथा ॥ १७ ॥ वरुणेश्वरतीर्थं च लिंगान्यष्टोत्तरं शतम् ॥ सिद्धेश्वरं यमेशं च ब्रह्मेश्वरमतः परम् ॥ १८ ॥ सारस्वतं चाष्टरुद्रं सावित्रं सोमसंज्ञितम् ॥ शिवखातं महातीर्थं रुद्रावर्तं द्विजोत्तमाः ॥ १९ ॥ ब्रह्मावर्तं परं तीर्थं सूर्यावर्तमतः परम् ॥ पिप्पलावर्ततीर्थं च पिप्पल्याश्चैव संगमः ॥ २० ॥ अमरकण्टमाहात्म्यं कपिलासंगमस्तथा ॥ विशल्यासंभवश्चापि भृगुतुंगाद्रिकीर्तनम् ॥ २१ ॥ विशल्यासंगमः पुण्यः करमर्दासमागमः ॥ करमर्देश्वरं तीर्थं चक्रतीर्थमनुत्तमम् ॥ २२ ॥ संगमो नीलगंगायाः विध्वंसस्त्रिपुरस्य च ॥ कीर्तनं तीर्थदानानां मधुकतृतीयाव्रतम् ॥ २३ ॥ अप्सरेश्वरतीर्थं च देहक्षेपे विधिस्ततः ॥ तीर्थं ज्वालेश्वरं नाम ज्वालायाः संगमस्तथा ॥ २४ ॥ शक्रतीर्थं कुशावर्तं हंसतीर्थं तथैव च ॥ अंबरीषस्य तीर्थं च महाकालेश्वरं तथा ॥ २५ ॥ मातृकेश्वरतीर्थं च भृगुतुंगानुवर्णनम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तत्र भैरवमाहात्म्यं चपलेश्वरकीर्तनम् ॥ २६ ॥ चण्डपाणेश्च माहात्म्यं कावेरीसंगमस्तथा ॥ कुबेरेश्वरतीर्थं च वाराहीसंगमस्तथा ॥ २७ ॥ संगमश्चंडवेगायास्तीर्थं चण्डेश्वरं तथा ॥ एरण्डीसंगमः पुण्य एरण्डेश्वरमुत्तमम् ॥ २८ ॥ पितृतीर्थं च तत्रैव ॐकारस्य च संभवम् ॥ माहात्म्यं पंचलिंगानामोंकारस्य मुनीश्वराः ॥ २९ ॥ कोटितीर्थस्य माहात्म्यं तीर्थं काकह्रदं तथा ॥ जम्बुकेश्वरतीर्थं च सारस्वतमतः परम् ॥ ३० ॥ कपिलासंगमस्तद्वत्तीर्थं च कपिलेश्वरम् ॥ दैत्यसूदनतीर्थं च चक्रतीर्थं च वामनम् ॥ ३१ ॥ तीर्थलक्षं विदुः पूर्वे कपिलायास्तु संगमे ॥ स्वर्गस्य नरकस्यापि लक्षणं मुनिभाषितम् ॥ ३२ ॥ व्यवस्थानं शरीरस्य गोप्रदानानुवर्णनम् ॥ अशोकवनिकातीर्थं मतंगाश्रमवर्णनम् ॥ ३३ ॥ अशोकेश्वरतीर्थं च मतंगेश्वरमुत्तमम् ॥ तथा मृगवनं पुण्यं तत्र तीर्थं मनोरथम् ॥ ३४ ॥ संगमोऽङ्गारगर्तायाः अंगारेश्वरमुत्तमम् ॥ तथा मेघवनं तीर्थं देव्या नामानुकीर्तनम् ॥ ३५ ॥ संगमश्चापि कुब्जायास्तीर्थं कुब्जेश्वरं तथा ॥ बिल्वाम्रकं तथा तीर्थं पूर्णद्वीपमतः परम् ॥ ३६ ॥ तथा हिरण्यगर्भायाः संगमः पुण्यकीर्तनः ॥ द्वीपेश्वरं नाम तीर्थं पुण्यं यज्ञेश्वरं तथा ॥ ३७ ॥ मांडव्याश्रमतीर्थं च विशोकासंगमस्तथा ॥ वागीश्वरं नाम तीर्थं पुण्यो वै वागुसंगमः ॥ ३८ ॥ सहस्रावर्तकं तत्र तीर्थं सौगंधिकं तथा ॥ संगमश्च सरस्वत्या ईशानं तीर्थमुत्तमम् ॥ ३९ ॥ देवतात्रयतीर्थं च शूलखातं ततः परम् ॥ ब्रह्मोदं शांकरं सौम्यं सारस्वतमतः परम् ॥ ४० ॥ सहस्रयज्ञतीर्थं च कपालमोचनं तथा ॥ आग्नेयमदितीशं च वाराहं तीर्थमुत्तमम् ॥ ४१ ॥ तथा देवपथं तीर्थं तीर्थं यज्ञसहस्रकम् ॥ शुक्लतीर्थं दीप्तिकेशं विष्णुतीर्थं च योधनम् ॥ ४२ ॥ नर्मदेश्वरतीर्थं च वरुणेशं च मारुतम् ॥ योगेशं रोहिणीतीर्थं दारुतीर्थं च सत्तमाः ॥ ४३ ॥ ब्रह्मावर्तं च पत्रेशं वाह्नं सौरं च कीर्त्यते ॥ मेघनादं दारुतीर्थं देवतीर्थं गुहाश्रयम् ॥ ४४ ॥ नर्मदेश्वरसंज्ञं तत्कपिलातीर्थमुत्तमम् ॥ करंजेशं कुण्डलेशं पिप्पलादमतः परम् ॥ ४५ ॥ विमलेश्वरतीर्थं च पुष्कारिण्याश्च संगमः ॥ प्रशंसा शूलभेदस्य तत्रैवांधकविक्रमः ॥ ४६ ॥ देवाश्वासनदानं च तथैवांधकनिग्रहः ॥ शूलभेदस्य चोत्पत्तिस्तथा पात्रपरीक्षणम् ॥ ॥ ४७ ॥ प्रशंसा दानधर्मस्य ऋषिश्रृंगानुभावनम् ॥ स्वर्गतिं दीर्घतपसो भानुमत्यास्तथेंगितम् ॥ ४८ ॥ शबरस्वर्गगमनं माहात्म्यं शूलभेदजम् ॥ कपिलेश्वरतीर्थं च मोक्षतीर्थमतः परम् ॥ ४९ ॥ संगमो मोक्षनद्याश्च तीर्थं च विमलेश्वरम् ॥ तथैवोलूकतीर्थं च पुष्कारिण्याश्च संगमः ले

॥१६४॥ ॥ ५० ॥ आदित्येश्वरतीर्थं च तीर्थं वै संगमेश्वरम् ॥ संगमो भीमकुल्यायास्तीर्थं भीमेश्वरं शुभम् ॥ ५१ ॥ मार्कंडेश्वरतीर्थं च तथा वै पिप्पलेश्वरम् ॥ करोटीश्वरतीर्थं च तीर्थमिंद्रेश्वरं शुभम् ॥ ५२ ॥ अगस्त्येशं कुमारेशं व्यासेश्वरमनुत्तमम् ॥ वैद्यनाथं च केदारमानन्देश्वरसंज्ञितम् ॥ ५३ ॥ मातृ ॥३३८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीर्थं च मुंडेशं चौरं कामेश्वरं तथा ॥ संगमश्चानुदुह्या वै तीर्थे भीमार्जुनाह्वये ॥ तीर्थं धर्मेश्वरं नाम लुंकेश्वरमतः परम् ॥ ५४ ॥ ततो धनदतीर्थं च जटेशं मंगलेश्वरम् ॥ कपिलेश्वरतीर्थं च गोपारेश्वरमुत्तमम् ॥५५॥ मणिनागेश्वरं नाम मणिनद्याश्च संगमः ॥ तिलकेश्वरतीर्थं च गौतमेशमतः परम् ॥ ५६ ॥ तत्रैव मातृतीर्थं च मुनिनोक्तं मुनीश्वराः ॥ शंखचूडं च केदारं पाराशरमतः परम् ॥५७॥ भीमेश्वरं च चंद्रेशमश्ववत्याश्च संगमः ॥ बह्नीश्वरं नारदेशं वैद्यनाथं कपीश्वरम् ॥ ॥ ५८ ॥ कुम्भेश्वरं च मार्कंडं रामेशं लक्ष्मणेश्वरम् ॥ मेघेश्वरं मत्स्यकेशमप्सराह्रदसंज्ञकम् ॥ ५९ ॥ दधिस्कन्दं मधुस्कन्दं नंदिकेशं च वारुणम् ॥ पावकेश्वरतीर्थं च तथैव कपिलेश्वरम् ॥ ६० ॥ नारायणाह्वयं तीर्थं चक्रतीर्थमनुत्तमम् ॥ चण्डादित्यं परं तीर्थं चंडिकातीर्थमुत्तमम् ॥ ६१ ॥ यमहासाह्वयं तीर्थं तथा गंगेश्वरं शुभम् ॥ नंदिकेश्वरसंज्ञं च नरनारायणाह्वयम् ॥ ६२ ॥ नलेश्वरं च मार्कंडं शुक्लतीर्थमतः परम् ॥ व्यासेश्वरं परं तीर्थं तत्र सिद्धेश्वरं तथा ॥ ६३ ॥ कोटितीर्थं प्रभातीर्थं वासुकीश्वरमुत्तमम् ॥ संगमश्च करंजाया मार्कंडेश्वरमुत्तमम् ॥ ६४ ॥ तीर्थं कोटीश्वरं नाम तथा संकर्षणाह्वयम् ॥ कनकेशं मन्मथेशं तीर्थं चैवानसूयकम् ॥ ६५ ॥ एरण्डीसंगमः पुण्यो मातृतीर्थं च शोभनम् ॥ तीर्थं स्वर्णशलाकाख्यं तथा चैवांबिकेश्वरम् ॥ ६६ ॥ करंजेशं भारतेशं नागेशं मुकुटेश्वरम् ॥ सौभाग्यसुन्दरी तीर्थं धनदेश्वरमुत्तमम् ॥ ६७ ॥ रोहिण्यं चक्रतीर्थं च उत्तरेश्वरसंज्ञितम् ॥ भोगेश्वरं च केदारं निष्कलंकमतः परम् ॥ ६८ ॥ मार्कंडं धौतपापं च तीर्थमांगिरसेश्वरम् ॥ कोटवीसंगमः पुण्यं कोटितीर्थं च तत्र वै ॥ ६९ ॥ अयोनिजं परं तीर्थमंगारेश्वरमुत्तमम् ॥ स्कांदं च नार्मदं ब्राह्मं वाल्मीकेश्वरसंज्ञितम् ॥ ७० ॥ कोटितीर्थं कपालेशं पांडुतीर्थं त्रिलोचनम् ॥ कपिलेशं कम्बुकेशं प्रभासं कोहनेश्वरम् ॥ ७१ ॥ इन्द्रेशं वालुकेशं च देवेशं शाक्रमेव च ॥ नागेश्वरं गौतमेशमहल्यातीर्थमुत्तमम् ॥ ७२ ॥ रामेश्वरं मोक्षतीर्थं तथा कुशलवेश्वरौ ॥ नर्मदेशं कपर्दीशं सागरेशमतः परम् ॥ ॥ ७३ ॥ धौरादित्यं परं तीर्थं तीर्थं चापरयोनिजम् ॥ पिंगलेश्वरतीर्थं च भृग्वीश्वरमनुत्तमम् ॥ ७४ ॥ दशाश्वमेधिकं तीर्थं कोटितीर्थं च सत्तमाः ॥ मार्कंडं ब्रह्मतीर्थं च आदिवाराहमुत्तमम् ॥ ७५ ॥ आशापूराभिधं तीर्थं कौबेरं मारुतं तथा ॥ वरुणेशं यमेशं च रामेशं कर्कटेश्वरम् ॥ ॥ ७६ ॥ शक्रेशं सोमतीर्थं च नंदाह्रदमनुत्तमम् ॥ वैष्णवं चक्रतीर्थं च रामकेशवसंज्ञितम् ॥ ७७ ॥ तथैव रुक्मिणीतीर्थं शिवतीर्थमनुत्तमम् ॥ जयवाराहतीर्थं च तीर्थमस्माहकाह्वयम् ॥७८॥ अंगारेशं च सिद्धेशं तापेश्वरमतः परम् ॥ पुनः सिद्धेश्वरं नाम तीर्थं च वरुणेश्वरम् ॥७९॥ पाराशरेश्वरं पुण्यं कुसुमेशमनुत्तमम् ॥ कुण्डलेश्वरतीर्थं च तथा कलकलेश्वरम् ॥ ८० ॥ न्यंकुवाराहसंज्ञं च अंकोलं तीर्थमुत्तमम् ॥ श्वेतवाराहतीर्थं च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





भार्गलं सौरमुत्तमम् ॥ ८१ ॥ हुंकारस्वामितीर्थं च शुक्लतीर्थं च शोभनम् ॥ संगमो मधुमत्याश्च तीर्थं वै संगमेश्वरम् ॥ ८२ ॥ नर्मदेश्वरसंज्ञं च नदीत्रितयसंगमः ॥ अनेकेश्वरतीर्थं च शर्भेशं मोक्षसंज्ञितम् ॥ ८३ ॥ कावेरीसंगमः पुण्यस्तीर्थं गोपेश्वराह्वयम् ॥ मार्कंडेशं च नागेशमुदंबर्याश्च संगमः ॥ ८४ ॥ सांबादित्याह्वयं तीर्थमुदंबर्याश्च संगमः ॥ सिद्धेश्वरं च मार्कंडं तथा सिद्धेश्वरीकृतम् ॥ ८५ ॥ गोपेशं कपिलेशं च वैद्यनाथमनुत्तमम् ॥ पिंगलेश्वरतीर्थं च सैंधवायतनं महत् ॥ ८६ ॥ भूतीश्वराह्वयं तीर्थं गंगावाहमतः परम् ॥ गौतमेश्वरतीर्थं च दशाश्वमेधिकं तथा ॥ ८७ ॥ भृगुतीर्थं तथा पुण्यं ख्याता सौभाग्यसुन्दरी ॥ वृषखातं च तत्रैव केदारं धूतपातकम् ॥ ८८ ॥ तीर्थं धूतेश्वरीसंगमेरण्डीसंज्ञकं तथा ॥ तीर्थं च कनकेश्वर्या ज्वालेश्वरं ततः परम् ॥ ८९ ॥ शालग्रामाह्वयं तीर्थं सोमनाथमनुत्तमम् ॥ तथैवोदीर्णवाराहं तीर्थं चन्द्रप्रभासकम् ॥ ९० ॥ द्वादशादित्यतीर्थं च तथा सिद्धेश्वराभिधम् ॥ कपिलेश्वरतीर्थं च तथा त्रैविक्रमं शुभम् ॥ ९१ ॥ विश्वरूपाह्वयं तीर्थं नारायणकृतं तथा ॥ मूलश्रीपतितीर्थं च चौलश्रीपतिसंज्ञकम्॥९२॥ देवतीर्थं हंसतीर्थं प्रभासं तीर्थमुत्तमम् ॥ मूलस्थानं च कण्ठेशमट्टहासमतः परम् ॥९३॥ भूर्भुवेश्वरतीर्थं च ख्याता शूलेश्वरी तथा ॥ सारस्वतं दारुकेशमश्विनोस्तीर्थमुत्तमम् ॥ ९४ ॥ सावित्रीतीर्थमतुलं वालखिल्येश्वरं तथा ॥ नर्मदेशं मातृतीर्थं देवतीर्थमनुत्तमम् ॥ ९५ ॥ मच्छकेश्वरतीर्थं च शिखितीर्थं च शोभनम् ॥ कोटितीर्थं मुनिश्रेष्ठास्तत्र कोटीश्वरी मृडा ॥ ९६ ॥ तीर्थं पैतामहं नाम मांडव्येश्वरसंज्ञितम् ॥ तत्र नारायणेशं च अक्रूरेशमतः परम् ॥ ९७ ॥ देवखातं सिद्धरुद्रं वैद्यनाथमनुत्तमम् ॥ तथैव मातृतीर्थं च उत्तरेशमतः परम् ॥ ॥ ९८ ॥ तथैव नर्मदेशं च मातृतीर्थं तथा पुनः ॥ तथा च कुररीतीर्थं ढौंढेशं दशकन्यकम् ॥ ९९ ॥ सुवर्णबिंदुतीर्थं च ऋणपापप्रमोचनम् ॥ भारभूतेश्वरं तीर्थं तथा मुण्डीश्वरं विदुः ॥ १०० ॥ एकशालं डिंडिपाणिं तीर्थं चाप्सरसं परम् ॥ मुन्यालयं च मार्कंडं गणितादेवताह्वयम् ॥ ॥ १०१ ॥ आमलेश्वरतीर्थं च तीर्थं कन्थेश्वरं तथा ॥ आषाढीतीर्थमित्याहुः शृंगीतीर्थं तथैव च ॥ १०२ ॥ बकेश्वरतीर्थं च कपालेशं तथैव च ॥ मार्कंडं कपिलेशं च एरण्डीसंगमस्तथा ॥ १०३ ॥ एरण्डीदेवतातीर्थं रामतीर्थमतःपरम् ॥ जमदग्नेः परं तीर्थं रेवासागरसंगमः ॥ १०४ ॥ लोटनेश्वरतीर्थं तल्लुंकेशनामकं तथा ॥ वृषखातं तत्र कुण्डं तथैव ऋषिसत्तमाः ॥ १०५ ॥ तथा हंसेश्वरंनाम तिलादं वासवेश्वरम् ॥ तथा कोटीश्वरं तीर्थमलिकातीर्थमुत्तमम् ॥ विमलेश्वरतीर्थं च रेवासागरसंगमे ॥ १०६ ॥ एवं तीर्थावलिः पुण्या मया प्रोक्ता महर्षयः ॥ तीर्थमुक्तावलिः पुण्या ग्रथिता तटरज्जुना ॥ १०७ ॥ नर्मदानीरनिर्णिक्ता मार्कंडेयविनिर्मिता ॥ मण्डनायेह साधूनां सर्वलोकहिताय च ॥ १०८ ॥ दुरितध्वांतशमनी



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धार्या धर्मार्थिभिः सदा ॥ अहोरात्रकृतं पापं सकृज्जप्त्वाशु नाशयेत्॥ १०९॥त्रिकालं जप्त्वा मासोत्थं शिवाग्रे च त्रिमासिकम् ॥ मासं जप्त्वाथ वर्षोत्थं वर्षं जप्त्वा शताब्दिकम् ॥ ११० ॥ श्राद्धकाले च विप्राणां भुञ्जतां पुरतः स्थितः ॥ पठँस्तीर्थावलिं पुण्यां गयाश्राद्धप्रदो भवेत् ॥१११॥ पूजाकाले च देवानां श्रद्धया पुरतः पठन् ॥ प्रीणयेत्सर्वदेवांश्च पुनाति सकलं कुलम् ॥ ११२ ॥ एवं तीर्थावलिः पुण्या रेवातीरद्वयाश्रिता ॥ मया प्रोक्ता मुनिश्रेष्ठा स्तथैवशृणुतानघाः ॥ ११३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे तीर्थावलिकथनं नाम त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३० ॥ ॥ छ ॥ ॥ श्रीसूत उवाच ॥ ॥ तथैव तीर्थस्तबकान्वक्ष्येहमृषिसत्तमाः ॥ यैस्तु तीर्थावलीगुंफः पूर्वोक्तैरेकतः कृतः ॥ १ ॥ विभक्तो भक्तलोकानामानंदप्रथनः शुभः ॥ मृकंडतनयः पूर्वं प्राह पार्थाय पृच्छते ॥ २ ॥ यथा तथाहं वक्ष्यामि तीर्थानां स्तबकानिह ॥ शिवांबुपानजा पुण्या रेवा कल्पलता किल ॥ ३ ॥ तीरद्वयोद्भूततीर्थप्रसूनैः पुष्पिता शुभा ॥ यत्पुण्यगंधलक्ष्म्या वै त्रैलोक्यं सुरभीकृतम् ॥ ४ ॥ तत्पुष्पमकरंदस्य रसास्वादविदुत्तमः ॥ भ्रमरः खलु मार्कंडो मुनिर्मतिमतां वरः ॥ ५ ॥ तत्पुष्पमालां हृदये तीर्थस्तबकचित्रिताम् ॥ दधाति सततं पुण्यां मुनिर्भृगुकुलोद्वहः ॥ तस्याः स्तबकसंस्थानं वक्ष्येहमृषिसत्तमाः ॥६॥ ॐकारतीर्थमारभ्य यावत्पश्चिमसागरम् ॥ संगमाः पंचत्रिंशद्वै नदीनां पापनाशनाः ॥ ७ ॥ दशैकमुत्तरे तीरे सत्रिविंशति दक्षिणे ॥ पंचत्रिंशत्तमः श्रेष्ठो रेवासागरसंगमः ॥ ८ ॥ संगमैः सहितान्येवं रेवातीरद्वयेपि च ॥ चतुःशतानि तीर्थानि प्रसिद्धानि द्विजोत्तमाः ॥ ९ ॥ त्रिशतं शिवतीर्थानि त्रयस्त्रिंशत्समन्वितम् ॥ तत्रापि व्यक्तितो वक्ष्ये शृणुध्वं तानि सत्तमाः ॥१०॥ मार्कंडेश्वरतीर्थानि दश तेषु मुनीश्वराः ॥ दशादित्यभवान्यत्र नवैव कपिलेश्वराः ॥ ११ ॥ सोमसस्थापितान्यष्टौ तावंतो नर्मदेश्वराः ॥ कोटितीर्थान्यथाष्टौ च सप्त सिद्धेश्वरास्तथा ॥१२॥ नागेश्वराश्च सप्तैव रेवातीरद्वयेऽपि तु ॥ सप्तैव वह्निविहितान्यथाप्यावर्तसप्तकम् ॥ १३ ॥ केदारेश्वरतीर्थानि पंच पंचेंद्रजानि च ॥ वरुणेशाश्च पंचैव पंचैव धनदेश्वराः ॥ १४ ॥ देवतीर्थानि पंचैव चत्वारो वै यमेश्वराः ॥ वैद्यनाथाश्च चत्वारश्चत्वारो वानरेश्वराः ॥ १५ ॥ अंगारेश्वरतीर्थानि तावंत्येव मुनीश्वराः ॥ सारस्वतानि चत्वारि चत्वारो दारुकेश्वराः ॥ १६ ॥ गौतमेश्वरतीर्थानि त्रीणि रामेश्वरास्त्रयः ॥ कपालेश्वरतीर्थानि त्रीणि हंसकृतानि च ॥ १७ ॥ त्रीण्येव मोक्षतीर्थानि त्रयो वै विमलेश्वराः ॥ सहस्रयज्ञतीर्थानि त्रीण्येव मुनिरब्रवीत् ॥ १८ ॥ भीमेश्वरास्त्रयः ख्याताः स्वर्णतीर्थानि त्रीणि च ॥ धौतपापद्वयं प्रोक्तं करंजेशद्वयं तथा ॥ १९ ॥ ऋणमोचनतीर्थे द्वे तथा स्कंदेश्वरद्वयम् ॥ दशाश्वमेधतीर्थे द्वे नंदीतीर्थद्वयं द्विजाः ॥ २० ॥ मन्मथेशद्वयं चैव भृगुतीर्थद्वयं तथा ॥ पराशरेश्वरौ द्वौ च अयोनीसंभवद्वयम् ॥ २१ ॥ व्यासेश्वरद्वयं प्रोक्तं पितृतीर्थद्वयं तथा ॥ नंदिकेश्वरतीर्थे द्वे द्वौ च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



गोपेश्वरौ स्मृतौ ॥ २२ ॥ मारुतेशद्वयं तद्वद्वौच ज्वालेश्वरौ स्मृतौ ॥ शुक्लतीर्थद्वयं पुण्यमप्सरेशद्वयं तथा ॥ २३ ॥ पिप्पलेश्वरतीर्थे द्वे मांडव्येश्वरसंज्ञिते ॥ द्वीपेश्वरद्वयं चैव प्राह तद्वद्भृगूद्वहः ॥ उत्तरेश्वरतीर्थे द्वे अशोकेशद्वयी तथा ॥ २४ ॥ द्वे योधनपुरे चैव रोहिणीतीर्थकद्वयम् ॥ लुंकेश्वरद्वयं ख्यातमाख्यानं मुनिना तथा ॥ २५ ॥ सैकोनविंशतिशतं तीर्थान्येकैकशो द्विजाः ॥ स्तबकेषु कृतं तीर्थं द्विशतं सचतुर्दशम् ॥ ॥ २६ ॥ शैवान्येतानि तीर्थानि वैष्णवानि च सत्तमाः ॥ शृणुध्वं प्रोच्यमानानि ब्राह्मशाक्तानि च क्रमात् ॥ २७ ॥ अष्टाविंशति तीर्थानि वैष्णवान्यब्रवीन्मुनिः ॥ तेषु वाराहतीर्थानि षडेव मुनिसत्तमाः ॥ २८ ॥ चत्वारि चक्रतीर्थानि शेषाण्यष्टादशैव हि ॥ विष्णुनाधितिष्ठितान्येव प्राह पूर्वं मृकंडजः ॥ २९ ॥ तथैव ब्रह्मणा सिद्ध्यै सप्ततीर्थान्यवीवदत् ॥ त्रिषु च ब्रह्मणः पूजा ब्रह्मेशाश्चतुरोऽपरे ॥ अष्टाविंशन्मया ख्याता यथासंख्यं यथाक्रमम् ॥ ३० ॥ एतत्पवित्रमतुलं ह्येतत्पापहरं परम् ॥ नर्मदाचरितं पुण्यं माहात्म्यं मुनिभाषितम् ॥ ३१ ॥ ॥ सूत उवाच ॥ ॥ एवमुद्देशतः प्रोक्तो रेवातीर्थक्रमो मया ॥ यथा पार्थाय संक्षेपान्मार्कंडो मुनिरब्रवीत् ॥ ३२ ॥ अवांतराणि तीर्थानि तेषु गुप्तान्यनेकशः ॥ यत्र यावत्प्रमाणानि तान्याकर्णयतानघाः ॥ ३३ ॥ ॐकारतीर्थपरितः पर्वतादमरंकटात् ॥ क्रोशद्वये सर्वदिक्षु सार्द्धकोटीत्रयी मता ॥ ३४ ॥ तीर्थानां संख्यया गुप्तप्रकटानां द्विजोत्तमाः ॥ कोटिरेका तु तीर्थानां कपिलासंगमे पृथक् ॥ ३५ ॥ अशोकवनिकायाश्च तीर्थं लक्षं प्रतिष्ठितम् ॥ शतमंगारगर्तायाः संगमे मुनिसत्तमाः ॥ ३६ ॥ तीर्थानामयुतं तद्वत्कुब्जायाः संगमे स्थितम् ॥ शतं हिरण्यगर्भायाः संगमे समवस्थितम् ॥ ॥ ३७ ॥ तीर्थानामष्टषष्टिश्च विशोकासंगमे स्थिता ॥ तथा सहस्रं तीर्थानां संस्थितं वागुसंगमे ॥ ३८ ॥ शतं सरस्वतीसंगे शुक्लतीर्थे शतद्वयम् ॥ सहस्रं विष्णुतीर्थेषु माहिष्मत्यामथायुतम् ॥ ३९ ॥ शूलभेदे च तीर्थानां साग्रं लक्षं स्थितं द्विजाः ॥ देवग्रामे सहस्रं च तीर्थानां मुनिरब्रवीत् ॥ ४० ॥ लुंकेश्वरे च तीर्थानां साग्रा सप्तशती स्थिता ॥ तीर्थान्यष्टोत्तरशतं मणिनद्याश्च संगमे ॥ वैद्यनाथे च तीर्थानां शतमष्टाधिकं विदुः ॥ ४१ ॥ एवं तावत्प्रमाणानि तीर्थे कुम्भेश्वरे द्विजाः ॥ साग्रं लक्षं च तीर्थानां स्थितं रेवोरसंगमे ॥ ४२ ॥

॥३६६॥ ततश्चाप्यधिकानि स्युरिति मार्कंडभाषितम् ॥ अष्टाशीतिसहस्राणि व्यासद्वीपाश्रितानि च ॥ ४३ ॥ संगमे च करंजायाः स्थितमष्टोत्तरायुतम् ॥ एरण्डीसंगमे तद्वत्तीर्थान्यष्टाधिकं शतम् ॥ ४४ ॥ धूतपापे च तीर्थानां षष्टिरष्टाधिका स्थिता ॥ स्कंदतीर्थे शतं पुण्यं तीर्थानां मुनिरुक्तवान् ॥ ॥३४०॥ ॥ ४५ ॥ कोहनेशे च तीर्थानां षष्टिरष्टाधिका स्थिता ॥ सार्द्धकोटी च तीर्थानां स्थिता वै कोरिलापुरे ॥ ४६ ॥ रामकेशवतीर्थे च सहस्रं साग्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुक्तवान् ॥ अस्माहके सहस्रं च तीर्थानि निवसंति हि ॥ ४७ ॥ लक्षाष्टकं सहस्रे द्वे शुक्लतीर्थे द्विजोत्तमाः ॥ तीर्थानि कथयामास पुरा पार्थाय
भार्गवः ॥ ४८ ॥ शतमष्टाधिकं प्राह प्रत्येकं संगमेषु च ॥ नदीनामवशिष्टानां कावेरीसंगमं विना ॥ ४९ ॥ कावेर्याः संगमे विप्राः
स्थिता पंचशती तथा ॥ तीर्थानां पर्वसु तथा विशेषो मुनिनोदितः ॥ ५० ॥ मोक्षतीर्थं हि सत्प्राहुः पुराणपुरुषाश्रितम् ॥ भृगोः क्षेत्रे च तीर्थानां
कोटिरेका समाश्रिता ॥ ५१ ॥ साधिकानामृषिश्रेष्ठा वक्तुं शक्तो हि को भवेत् ॥ सर्वामराश्रयं प्रोक्तं सर्वतीर्थाश्रयं तथा ॥ ५२ ॥ त्रिषु
लोकेषु विख्यातं पूजितं सिद्धिसाधनम् ॥ भारभूत्यां च तीर्थानां स्थितमष्टोत्तरं शतम् ॥ ५३ ॥ अक्रूरेश्वरतीर्थे च सार्द्धं तीर्थशतं स्थितम् ॥
विमलेश्वरतीर्थे तु रेवासागरसंगमे ॥ दशायुतानि तीर्थानां साधिकान्यब्रवीन्मुनिः ॥ ५४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां
संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे तीर्थसंख्यापरिगणनवर्णनं नामैकत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३१ ॥ ॥ छ ॥ ॥
॥ ॥ सूत उवाच ॥ ॥ इति वः कथितं विप्रा रेवामाहात्म्यमुत्तमम् ॥ यथोपदिष्टं पार्थाय मार्कंडेयेन वै पुरा ॥ १ ॥ तथा
तीर्थकदंबाश्च तेषु तीर्थविशेषतः ॥ प्राधान्येन मया ख्याता यथासंख्यं यथाक्रमम् ॥ २ ॥ एतत्पवित्रमतुलं ह्येतत्पापहरं परम् ॥ नर्म
दाचरितं पुण्यं माहात्म्यं मुनिभाषितम् ॥ ३ ॥ सप्तकल्पानुगो विप्रो नर्मदायां मुनीश्वराः ॥ मृकण्डतनयो धीमान्परमार्थविदुत्तमः ॥
॥ ४ ॥ संसेव्य सर्वतीर्थानि नदीः सर्वाश्च वै पुरा ॥ बहुकल्पस्मरां रेवामालक्ष्य शिवदेहजाम् ॥ ५ ॥ मे कलेति च शर्वोक्तां
शरणं शर्वजां ययौ ॥ अजराममरां देवीं दैत्यध्वंसकरीं पराम् ॥ ६ ॥ महाविभवसंयुक्तां भवघ्नीं भवजाह्नवीम् ॥ तस्यामाबध्य
सत्प्रेम जातः सोऽप्यजरामरः ॥ ७ ॥ षष्टितीर्थसहस्राणि षष्टिकोट्यश्च सत्तमाः ॥ व्यवस्थितानि रेवायास्तीरयुग्मे पदेपदे ॥ ८ ॥ सरितः परितः
संति सतीर्थास्तु सहस्रशः ॥ न तुलां यांति रेवायास्ताश्च मन्ये मुनीश्वराः ॥ ९ ॥ एतद्वः कथितं सर्वं यत्पृष्टमखिलं द्विजाः ॥ यन्महेशमुखाच्छ्रुत्वा
वायुराह ऋषीन्प्रति ॥ १० ॥ तद्वन्मृकण्डतनयोऽप्यनुभूयाखिलां नदीम् ॥ सतीर्थां पदशः प्राह पांडुपुत्राय पावनीम् ॥ ११ ॥ एतच्च कथितं सर्वं

१ एतस्माच्छ्लोकात्प्राक्–"शैवीयं संहिता पुण्या वायुना समुदीरिता ॥ चतुर्विंशतिसाहस्री मया वः समुदाहृता ॥" इति श्लोकः कस्मिंश्चित्पुस्तके पठ्यते तेन चतुर्विंशतिसहस्रसंख्याका वायुप्रोक्ता संहिता तदन्तर्गतं रेवाखण्डं स्यात् । अत्र च मार्कंडेयोक्तं रेवाखण्डं च द्वादशसहस्रसंख्याकग्रन्थसंमितमिति–"मया द्वादशसाहस्री संहिता या श्रुता पुरा । देवदेवस्य गदतः सांप्रतं कथिता तव ॥" इति मार्कण्डेयोक्तिरस्ति । ततश्च रेवाखण्डं किं चतुर्विंशतिसहस्रसंहितात्मकमाहोस्विद्द्वादशसहस्रसंहितात्मकमस्तीति शंका समुदेति । किंच, रेवाखण्डं किमावन्त्यखण्डान्तर्गतमाहोस्विच्छैवसंहितांतर्गतवायुप्रोक्तसंहितात्मकं वेत्यपि शंका समुदेति । परंतु–श्रीनारद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



संक्षेपेण द्विजोत्तमाः ॥ नर्मदाचरितं पुण्यं त्रिषु लोकेषु दुर्लभम् ॥ १२ ॥ किमन्यैः सरितां तोयैः सेवितैस्तु सहस्रशः ॥ यदि संसे
व्यते तोयं रेवायाः पापनाशनम् ॥ १३ ॥ मेकलाजलसंसेवी मुक्तिमाप्नोति शाश्वतीम् ॥ १४ ॥ यथा यथा भजेन्मर्त्यो यद्यदिच्छति तीर्थगः ॥
तत्तदाप्नोति नियतं श्रद्धयाऽश्रद्धयापि च ॥ १५ ॥ इदं ब्रह्मा हरिरिदमिदं साक्षात्परो हरः ॥ इदं ब्रह्म निराकारं कैवल्यं नर्मदा जलम्॥
॥ १६ ॥ तावद्गर्जंति तीर्थानि नद्यो ह्यघफलप्रदाः ॥ यावन्न स्मर्यते रेवा सेवाहेवा कलौ नरैः ॥ १७ ॥ ध्रुवं लोके हितार्थाय शिवेन
स्वशरीरतः ॥ शक्तिः कापि सरिद्रूपा रेवेयमवतारिता ॥ १८ ॥ तावद्गर्जंति यज्ञाश्च वनक्षेत्रादयो भृशम् ॥ यावन्न नर्मदानामकीर्तनं
क्रियते कलौ ॥ १९ ॥ गरिमा गण्यते तावत्तपोदानव्रतादिषु ॥ नरैर्वा प्राप्यते यावद्भुवि भर्गभवा धुनी ॥ २० ॥ ये वसंत्युत्तरे कूले रुद्रस्या
नुचरा हि ते ॥ वसंति याम्यतीरे ये लोकं ते यांति वैष्णवम् ॥ २१ ॥ धन्यास्ते देशवर्यास्ते येषु देशेषु नर्मदा ॥ नरकांतकरी शश्वत्संश्रिता
शर्वनिर्मिता ॥ २२ ॥ कृतपुण्याश्च ते लोकाः शोकाय न भवंति ते ॥ ये पिबंति जलं पुण्यं पार्वतीपतिसिंधुजम् ॥ २३ ॥ इदं पवित्र
मतुलं रेवायाश्चरितं द्विजाः ॥ शृणोति यः कीर्तयते मुच्यते सर्वपातकैः ॥ २४ ॥ यत्फलं सर्ववेदैश्च सषडंगपदक्रमैः ॥ श्रुतैश्च पठितैस्तस्मात्फलम
ष्टगुणं भवेत् ॥२५॥ सत्रयाजी फलं यच्च लभते द्वादशाब्दिकम्॥श्रुत्वा सकृच्च रेवायाश्चरितं तत्फलं लभेत् ॥२६॥ सर्वतीर्थावगाहाच्च यत्फलं साग
रादिषु ॥ सकृच्छ्रुत्वा च माहात्म्यं रेवायास्तत्फलं लभेत् ॥ २७ ॥ एतद्धर्म्यमुपाख्यानं सर्वशास्त्रेष्वनुत्तमम् ॥ देशे वा मण्डले वापि नगरे ग्रामम
ध्यतः ॥ २८ ॥ गृहे वा तिष्ठते यस्य लिखितं सार्ववर्णिकम् ॥ स ब्रह्मा स शिवः साक्षात्स च देवो जनार्दनः ॥ २९ ॥ धर्मार्थकाममोक्षाणां
मार्गोऽयं देवसेवितः ॥ गुरूणां च गुरुः शास्त्रं परमं सिद्धिकारणम् ॥ ३० ॥ यश्चेदं शृणुयान्नित्यं पुराणं देवभाषितम् ॥ ब्राह्मणो वेदवान्भूयात्क्ष
त्रियो विजयी भवेत् ॥३१॥ धनाढ्यो जायते वैश्यः शूद्रो वै धर्मभाग्भवेत् ॥ ३२ ॥ सौभाग्यसंततिं नारी श्रुत्वैतत्समवाप्नुयात् ॥ श्रियं सौख्यं
स्वर्गवासं जन्म चैवोत्तमे कुले ॥ ३३ ॥ रसभेदी[1] कृतघ्नश्च स्वामिध्रुङ् मित्रवंचकः ॥ गोघ्नश्च गरदश्चैव कन्याविक्रयकारकः ॥ ३४ ॥ ब्रह्मघ्नश्च

महापुराणप्रोक्तस्कान्दमहापुराणस्थप्रतिखण्डाविषयानुक्रमणिकायां पञ्चम आवंत्यखण्डे रेवाखण्डं प्रक्रांतमस्ति । तदेवैतद्रेवाखण्डमस्ति–यथावदनुक्रमम् । यत्तु–चतुर्विंशतिसहस्रसंहितात्मकं रेवाखण्डमस्ति–तत्त्वन्यदेव स्यात् । तत्पुस्तकांतरं चाप्यपूर्णमुपलभ्यते–एतेन तच्चतुर्विंशतिसहस्रसंहितात्मकमन्यदेव रेवाखण्डं स्यात्–सत्यनारायणव्रतादिकथानामत्र क्रमेऽनुपलम्भात्तत्र समावेशस्य सम्भवात् । अतश्चैकाशीतिसाहस्रसंहितात्मकस्कान्दमहापुराणे रेवाखण्डं द्वादशसहस्रसंहितात्मकमेवास्ति । अन्यच्च–रेवाखण्डं चतुर्विंशतिसहस्रसंहितात्मकं यत्तन्नात्रत्यं किंतु तन्मृग्यम् । यदि कदाचिच्छतसहस्रसंहितात्मकश्रीस्कांदमहापुराणे स्याच्चेत्–शंकरसंहितायास्तत्र सत्त्वात्तस्याश्च चतुर्विंशतिसहस्रसंहितात्मकत्वसंभवात्तत्रत्यं चान्यद्रेवाखण्डं यदेकं पुस्तकं किंचिदपूर्णमुपलब्धमस्ति तत्स्यात् । अतोऽत्र द्वादशसहस्रसंहितात्मकमेवेदमावन्त्यखण्डान्तर्गतं रेवाखण्डमस्तीति निपुणं सुधीभिरवधेयम् ।

१ रसभेदी–पंक्तिभेदकर्ता–इत्यर्थः,--धातुभस्मकरः–इत्यर्थो वा ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुरापी च स्तेयी च गुरुतल्पगः ॥ नर्मदाचरितं शृण्वंस्तामब्दं योऽभिषेवते ॥ ३५ ॥ सर्वपापविनिर्मुक्तो जायते नाऽत्र संशयः ॥ पाकभेदी वृथा पाकी देवब्राह्मणनिंदकः ॥ ३६ ॥ परीवादी गुरोः पित्रोः साधूनां नृपतेस्तथा ॥ तेऽपि श्रुत्वा च पापेभ्यो मुच्यन्ते नात्र संशयः ॥ ३७ ॥ ये पुनर्भावितात्मानः शास्त्रं शृण्वंति नित्यशः ॥ पूजयंति च तच्छास्त्रं नार्मदं वस्त्रभूषणैः ॥ ३८ ॥ पुष्पैः फलैश्चंदनाद्यैर्भोजनैर्विविधैरपि ॥ शास्त्रेऽस्मिन्पूजिते देवा पूजिता गुरवस्तथा ॥ ३९ ॥ इह लोके परे चैव नात्र कार्या विचारणा ॥ तस्मात्सर्वप्रयत्नेन गन्धवस्त्रादिभूषणैः ॥ ४० ॥ पूजयेत्परया भक्त्या वाचकं शास्त्रमेव च ॥ वेदपाठैश्च यत्पुण्यमग्निहोत्रैश्च पालितैः ॥ ४१ ॥ तत्फलं समवाप्नोति नर्मदाचरिते शुभे ॥ कुरुक्षेत्रे च यत्पुण्यं प्रभासे पुष्करे तथा ॥४२॥ रुद्रावर्ते गयायां च वाराणस्यां विशेषतः ॥ गंगाद्वारे प्रयागे च गंगासागरसंगमे ॥ ४३ ॥ एवमादिषु तीर्थेषु यत्पुण्यं जायते नृणाम् ॥ नर्मदाचरितं श्रुत्वा तत्पुण्यं सकलं लभेत् ॥ ४४ ॥ आदिमध्यावसानेषु नर्मदाचरितं शुभम् ॥ यः शृणोति नरो भक्त्या शृणुध्वं तत्फलं महत् ॥ ४५ ॥ समाप्य शिवसंस्थानं देवकन्यासमावृतः ॥ रुद्रस्यानुचरो भूत्वा शिवेन सह मोदते ॥ ४६ ॥ धर्माख्यानमिदं पुण्यं सर्वाख्यानेष्वनुत्तमम् ॥ गृहेपि पठ्यते यस्य चतुर्वर्णस्य सत्तमाः ॥ ४७ ॥ धन्यं तस्य गृहं मन्ये गृहस्थं चापि तत्कुलम् ॥ पुस्तकं पूजयेद्यस्तु नर्मदाचरितस्य तु ॥ ४८ ॥ नर्मदा पूजिता तेन भगवांश्च महेश्वरः ॥ वाचके पूजिते तद्वद्देवाश्च ऋषयोर्चिताः ॥ ४९ ॥ लेखयित्वा च सकलं रेवाचरितमुत्तमम् ॥ भूषणं सर्वशास्त्राणां यो ददाति द्विजन्मने ॥ ५० ॥ नर्मदासर्वतीर्थेषु स्नानदानेन यत्फलम् ॥ तत्फलं समवाप्नोति स नरो नात्र संशयः ॥ ५१ ॥ एतत्पुराणं रुद्रोक्तं महापुण्यफलप्रदम् ॥ स्वर्गदं पुत्रदं धन्यं यशस्यं कीर्त्तिवर्धनम् ॥ ५२ ॥ धर्म्यमायुष्यमतुलं दुःखदुःस्वप्ननाशनम् ॥ पठतां शृण्वतां चापि सर्वकामार्थसिद्धिदम् ॥ ५३ ॥ यत्प्रदत्तमिदं पुण्यं पुराणं वाच्यते द्विजैः ॥ शिवलोके स्थितिस्तस्य पुराणाक्षरवत्सरी ॥ ५४ ॥ इति निगदितमेतन्नर्मदायाश्चरित्रं पवनगदितमग्र्यं शर्ववक्त्रादवाप्य ॥ त्रिभुवनजनवंद्यं त्वेतदादौ मुनीनां कुलपतिषु रतस्तत्सूतमुख्येन साधु ॥ ५५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे रेवाखंडसमाप्तिरेवाखंडपुस्तकदानादिमाहात्म्यवर्णनं नाम द्वात्रिंशदधिकद्विशततमोऽध्यायः ॥ २३२ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥

इति श्रीस्कांदे महापुराणे पञ्चम आवन्त्यखण्डे तृतीयं रेवाखण्डं समाप्तम् ॥ (५-३) ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्रीस्कान्दे महापुराणे पञ्चम आवन्त्यखण्डे तृतीयं रेवाखण्डं समाप्तम् ॥(५-३)॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

# ॥ अथ श्रीस्कान्दे महापुराणे षष्ठं नागरखण्डं प्रारभ्यते ॥ (६) ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri








Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ श्रीगणेशाय नमः ॥ ॥ ॐनमः पुरुषोत्तमाय ॥ ॥ अथ स्कान्दे महापुराणे षष्ठनागरखण्डप्रारम्भः ॥ ॥ व्यास उवाच ॥ ॥ स धूर्जटिजटाजूटो
जायतां विजयाय वः ॥ यत्रैकपलितभ्रांतिं करोत्यद्यापि जाह्नवी ॥ १ ॥ ॥ ऋषय ऊचुः ॥ ॥ हरस्य पूज्यते लिंगं कस्मादेतन्महामते ॥ विशेषात्सं
परित्यज्य शेषांगानि सुरासुरैः ॥ २ ॥ तं[1]स्मादेतन्महाबाहो यथावद्वक्तुमर्हसि ॥ सांप्रतं सूं[2]त कात्स्न्येंन परं कौतूहलं हि नः ॥ ३ ॥ ॥ सूत उवाच ॥
प्रश्नभारो महानेष यो भवद्भिरुदाहृतः ॥ कीर्तयिष्ये तथाप्येनं नमस्कृत्य स्वयंभुवे ॥ ४॥ आनर्तविषये चास्ति वनं मुनिजनाश्रयम् ॥ मनोज्ञं सर्व
सत्त्वानां सर्वर्तुफलितद्रुमम् ॥ ५॥ तत्राश्रमपदं रम्यं सौम्यसत्त्वनिषेवितम् ॥ अस्ति तापससंकीर्णं वेदध्वनिविराजितम् ॥ ६ ॥ अब्भक्षैर्वायुभक्षैश्च
शीर्णपर्णाशिभिस्तथा ॥ दन्तोलूखलिभिर्विप्रैः सेवितं चाश्मकुट्टकैः ॥ ७ ॥ स्नानहोमपरैश्चैव जपस्वाध्यायतत्परैः ॥ वानप्रस्थैस्त्रिदण्डैश्च हंसै
श्चापि कुटीचरै[3]ः ॥ ८ ॥ स्नातकैर्यतिभिर्दान्तैस्तथा पंचाग्निसाधकैः ॥ कस्यचित्त्वथ कालस्य भगवांस्त्रिपुरांतकः ॥ ९ ॥ सतीवियोगसंत[4]प्तो भ्रम
माण इतस्ततः ॥ तस्मिन्वने समायातः सौम्यसत्त्वनिषेविते ॥ १० ॥ क्रीडंति नकुला यत्र सार्धं सर्पैः प्रहर्षिताः ॥ पञ्चाननाश्च मातंगैर्वृ[5]षदंशा
स्तथाखुभिः ॥ काकाः कौशिकसंघैश्च वैरभावविवर्जिताः ॥ ११ ॥ ततश्च भगवान्रुद्रो दृष्ट्वाश्रमपदं तदा ॥ नग्नः कपालमादाय भिक्षार्थं प्रविवेश सः
॥ १२ ॥ अथ तस्य समालोक्य रूपं गात्रसमुद्भवम् ॥ अदृष्टपूर्वं तापस्यः सर्वाः कामवशं गताः ॥ १३ ॥ गृहकर्म परित्यज्य गुरुशुश्रूषणानि च ॥
मिथः संभाषणं चक्रुः स्थानेस्थाने च ताः स्थिताः ॥ १४ ॥ एका सा कापि धन्या या चक्रे तस्यावगूहनम् ॥ विश्रब्धा सर्वगात्रेषु तापसस्य महा
त्मनः ॥ १५ ॥ तथान्याः कौतुकाविष्टा धावंत्यः सर्वतोदिशम् ॥ दृश्यंते तं समुद्दिश्य विस्तारितविलोचनाः ॥ १६ ॥ काश्चिदर्द्धानुलिप्तांग्यः
काश्चिदेकांजितेक्षणाः ॥ अर्धसंयमितैः केशैस्तथान्यास्त्यक्तबालकाः ॥ १७ ॥ एवमालोक्यमानः स कामिनीभिर्महेश्वरः ॥ बभ्राम राजमार्गेण
भिक्षां देहीति कीर्तयन् ॥ १८ ॥ अथ ते मुनयो दृष्ट्वा तं तथा विगतांबरम् ॥ कामोद्भवकरं स्त्रीणां प्रोचुः कोपारुणेक्षणाः ॥ १९ ॥ यस्मात्पाप
त्वयास्माकमाश्रमोऽयं विडंबितः ॥ तस्माल्लिंगं पतत्वाशु तवैव वसुधातले ॥ २० ॥ एतस्मिन्नंतरे भूमौ लिंगं तस्य पपात तत् ॥ भित्त्वाथ धर
णीपृष्ठं पातालं प्रविवेश ह ॥ २१ ॥ सोऽपि लिंगपरित्यक्तो लज्जायुक्तो महेश्वरः ॥ गर्तां[6] गुर्वीं समाश्रित्य भ्रूणरूपः समाविशत् ॥ २२ ॥ अथ

१ कस्मात्--इति पाठान्तरम् । २ वद--इ० पा० । ३ कुटीचकैः—इति पाठोऽपक्षितः । ४ सतीवियोगसंप्राप्तः--इ० पा० । ५ वृषदंशाः—मार्जाराः—इत्यर्थः । ६ गर्ताम्--भूश्वभ्रम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





लिंगस्य पातेन त्रैलोक्यभयशंसिनः ॥ उत्पाता दारुणास्तस्थुः सर्वत्र द्विजसत्तमाः ॥२३॥ शीर्यंते गिरिशृंगाणि पतंत्युल्का दिवापि च ॥ त्यजंति
सागराः सर्वे मर्यादां च शनैः शनैः ॥ २४ ॥ अथ देवगणाः सर्वे भयसंत्रस्तमानसाः ॥ शक्रविष्णुमुखा जग्मुर्यत्र देवः पितामहः ॥ २५ ॥ प्रोचुश्च
प्रणताः स्तुत्वा स्तोत्रैः सु[1]श्रुतिसंभवैः ॥ त्रैलोक्ये सृष्टिरूपं यत्कमलासनसंस्थितम् ॥ २६ ॥ किमिदं किमिदं देव वर्तते ह्यधरोत्तरम् ॥ त्रैलोक्यं
सकलं येन व्याकुलत्वमुपागतम् ॥ २७ ॥ प्रलयस्येव चिह्नानि दृश्यंते पद्मसंभव ॥ किं सांप्रतमकालेऽपि भविष्यति परिक्षयः ॥ २८ ॥ सर्वेषां
सुरमर्त्यानां दैत्यानां मन्त्रकोविदः ॥ गतिर्भयार्तदेहानां सर्वलोकपितामहः ॥ २९ ॥ तेषां तद्वचनं श्रुत्वा देवानां चतुराननः ॥ उवाच सुचिरं
ध्यात्वा ज्ञात्वा दिव्येन चक्षुषा ॥ ३० ॥ प्रलयस्य न कालोऽयं सांप्रतं सुरसत्तमाः ॥ शृणुध्वं यन्निमित्तोत्था महोत्पाता भवन्त्यमी ॥ ३१ ॥
ऋषिभिः पातितं लिंगं देवे[2]देवस्य शूलिनः ॥ शापेनानर्तके देशे कलत्रार्थे महात्मभिः ॥ ३२ ॥ तेनैतद्व्याकुलीभूतं त्रैलोक्यं सचराचरम् ॥
तस्माद्गच्छामहे तत्र यत्र देवो महेश्वरः ॥ ३३ ॥ येनास्मद्वचनाच्छीघ्रं तल्लिंगं निदधाति सः ॥ नो चेद्भविष्यति व्यक्तमकाले चा[3]पि संक्षयः ॥
त्रैलोक्यस्यापि कृत्स्नस्य सत्यमेतन्मयोदितम् ॥ ३४ ॥ अथ देवगणाः सर्वे ब्रह्मविष्णुपुरःसराः ॥ आदित्या वसवो रुद्रा विश्वेदेवास्तथा
श्विनौ ॥ ३५ ॥ प्रजग्मुस्त्वरितास्तत्र यत्र देवो महेश्वरः ॥ गर्तामध्यगतः सुप्तो ल[4]ज्जया परया वृतः ॥ ३६ ॥ ॥ देवा ऊचुः ॥
॥ ॥ नमस्ते देवदेवेश भक्तानामभयप्रद ॥ नमस्ते जगदाधार शशिराजितशेखर ॥ ३७ ॥ त्वं यज्ञस्त्वं वषट्कारस्त्वमापस्त्वं मही
विभो ॥ त्वया सृष्टमिदं सर्वं त्रैलोक्यं सचराचरम् ॥ ३८ ॥ त्वं पासि च सुरश्रेष्ठ तथा नाशं नयिष्यसि ॥ त्वं विष्णुस्त्वं चतु
र्वक्त्रस्त्वं चंद्रस्त्वं दिवाकरः ॥ ३९ ॥ त्वया विना महादेव न किंचिदिह विद्यते ॥ अपि कृत्वा महत्पापं नरो देव धरातले ॥ ४० ॥ तव
नामापि संकीर्त्य प्रयाति त्रिदिवालयम् ॥ महादेव महादेव महादेवेति कीर्तनात् ॥ ४१ ॥ कोटयो ब्रह्महत्यानामगम्यागमकोटयः ॥ सद्यः
प्रलयमायांति महादेवेति कीर्तनात् ॥ ४२ ॥ विप्रो यथा मनुष्याणां नदीनां वा महार्णवः ॥ तथा त्वं सर्वदेवानामाधिपत्ये व्यवस्थितः ॥ ४३ ॥
नक्षत्राणां यथा चंद्रः प्रदीप्तानां दिवाकरः ॥ तथा त्वं सर्वदेवानामाधिपत्ये व्यवस्थितः ॥ ४४ ॥ धातूनां कांचनं यद्वद्गंधर्वाणां च नारदः ॥
तथा त्वं सर्वदेवानामाधिपत्ये व्यवस्थितः ॥ ४५ ॥ ओषधीनां यथा सस्यं नगानां हेमपर्वतः ॥ तथा त्वं सर्वदेवानामाधिपत्ये व्यवस्थितः ॥४६॥

१ संस्तुतिसम्भवैः—इ० पा० । २ महादेवस्य—इ० पा० । ३ अकालेनापि—इ० पा० । ४ कलया—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मात्कुरु प्रसादं नः सर्वेषां च नृणां विभो ॥ संधारय पुनर्लिंगं स्वकीयं सुरसत्तम ॥ ४७ ॥ नो चेज्जगत्त्रयं देव नूनं नाशमुपेष्यति ॥ यद्येतद्भूतले लिङ्गं पतति स्थास्यति प्रभो ॥ ४८ ॥ ॥ सूत उवाच ॥ ॥ तेषां तद्वचनं श्रुत्वा भगवान्वृषभध्वजः ॥ प्रोवाच प्रणतान्सर्वांस्तान्देवान्व्रीडयान्वितः ॥ ४९ ॥ मया सतीवियोगार्तियुक्तेन सुरसत्तम ॥ लिंगमेतत्परित्यक्तं शापव्याजाद्द्विजन्मनाम् ॥ ५० ॥ कोऽलं पातयितुं लिंगं ममैतद्भुवनत्रये ॥ देवो वा ब्राह्मणो वापि वेत्थ यूयमपि स्फुटम् ॥ ५१ ॥ तस्मान्नैव धरिष्यामि लिंगमेतद्धरातलात् ॥ किमनेन करिष्यामि भार्यया परिवर्जितः ॥ ५२ ॥ ॥ देवा ऊचुः ॥ ॥ तव कांता सतीनाम या मृता प्राक्सुरोत्तम ॥ सा जाता मेनकागर्भे गौरीनाम हिमाचलात् ॥ ५३ ॥ भविष्यति पुनर्भार्या तवैव त्रिपुरांतक ॥ तस्माल्लिंगं समादाय कुरु क्षेमं दिवौकसाम् ॥ ५४ ॥ ॥ देवदेव उवाच ॥ ॥ अद्यप्रभृति मे लिंगं यदि देवा द्विजातयः ॥ पूजयंति प्रयत्नेन तर्हीदं धारयाम्यहम् ॥ ५५ ॥ ॥ ब्रह्मोवाच ॥ ॥ अहं तव स्वयं लिंगं पूजयिष्यामि शंकर ॥ तथान्ये विबुधाः सर्वे किं पुनर्भुवि मानवाः ॥ ५६ ॥ ततः प्रविश्य पातालं देवैः सार्धं पितामहः ॥ स्वयमेवाकरोत्पूजां तस्य लिंगस्य भक्तितः ॥ ॥ ५७ ॥ तस्मादनंतरं विष्णुः श्रद्धापूतेन चेतसा ॥ तथान्ये विबुधाः सर्वे शक्राद्याः श्रद्धयान्विताः ॥५८॥ ततस्तुष्टो महादेवः पितामहमिदं वचः ॥ प्रोवाच वासुदेवं च विनयावनतं स्थितम् ॥ ५९ ॥ भवद्भ्यां परितुष्टोऽस्मि तस्मान्मत्तः[1] प्रगृह्यताम् ॥ वरमिष्टं महाभागौ यद्यपि स्यात्सुदुर्लभम् ॥ ॥ ६० ॥ ॥ तांवूचतुः[2] ॥ ॥ यदि तुष्टोसि देवेश त्रिभागेन समाश्रयम् ॥ आवाभ्यां देहि लिंगेन येनैकत्राश्रयो भवेत् ॥ ६१ ॥ ॥ सूत उवाच ॥ ॥ स तथेति प्रतिज्ञाय लिंगमादाय च प्रभुः ॥ स्थाने नियोजयामास सर्वदेवाधिपूजितम् ॥ ६२ ॥ ततो हाटकमादाय तदाकारं पितामहः ॥ कृत्वा लिंगं स्वयं तत्र स्थापयामास हर्षितः ॥ ६३ ॥ प्रोवाच चाथ भो विप्राः साधुनादेन नांदयन्[3] ॥ लोकत्रयं समस्तानां शृण्वतां त्रिदिवौकसाम् ॥ ६४ ॥ मया ह्याद्यं त्विदं लिंगं हाटकेन विनिर्मितम् ॥ ख्यातिं यास्यति सर्वत्र पाताले हाटकेश्वरम्[4] ॥ ६५ ॥ तथान्ये मनुजा ये च हाटकादीनि भक्तितः ॥ मणिमुक्तासुरत्नैश्च कृत्वा लिंगानि कृत्स्नशः ॥ ६६ ॥ त्रिकालं पूजयिष्यंति ते यास्यंति परां गतिम् ॥ मृन्मयं संपरि

---

१ मत्तः-मत्सकाशात्-इत्यर्थः । २ तौ-ब्रह्मविष्णू-इत्यर्थः । ३ नादयन्-इत्यस्य-लोकत्रयम्-इति कर्म । भो विप्राः शौनकादयः अथ साधुनादेन लोकत्रयं नादयन् ब्रह्मा समस्तानां त्रिदिवौकसां शृण्वतां सतामुवाच-इति योजना । ४ इदं हाटकेश्वरक्षेत्रस्थानमिदानीं गुर्जरप्रान्ते 'वढनगर' नामकग्रामे सुप्रसिद्धमस्ति-उमापुरं च 'उंझा' इति प्रसिद्धं तन्निकटवर्त्येव उमादेवीस्थानमस्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



त्यज्य नीचधातुमयं तथा ॥ ६७ ॥ एवमुक्त्वा चतुर्वक्त्रः सह सर्वैर्दिवालयैः ॥ जगाम त्रिदिवं सोऽपि कैलासं शशिशेखरः ॥ ६८ ॥
एतस्मात्कारणाल्लिंगं पूज्यतेऽत्र सुरासुरैः ॥ हरस्य चोत्तमांगानि परित्यज्य विशेषतः ॥ ६९ ॥ ततःप्रभृति तल्लिंगं स्वयं ब्रह्मा व्यव
स्थितः ॥ भगवान्वासुदेवश्च तेन पूज्यं शिवं हि तत् ॥ ७० ॥ यस्तु पूजयते नित्यं श्रद्धायुक्तेन चेतसा ॥ त्र्यंबकाच्युतब्रह्माद्यास्तेन स्युः
पूजितास्त्रयः ॥ ७१ ॥ तस्मात्सर्वप्रयत्नेन शिवलिंगं प्रपूजयेत् ॥ स्पर्शयेद्दीक्षयेन्नित्यं कीर्तयेच्च द्विजोत्तमाः ॥ ७२ ॥ इति श्रीस्कान्दे
महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये लिंगोत्पत्तिवर्णनंनाम प्रथमोऽध्यायः ॥ १ ॥ ॥ छ ॥
॥ ॥ सूत उवाच ॥ ॥ तस्मिन्नुत्पाटिते लिंगे भूतलाद्द्विजसत्तमाः ॥ पातालाज्जाह्नवीतोयं तेन मार्गेण निःसृतम् ॥ सर्वपापहरं नॄणां
सर्वकामप्रदायकम् ॥ १ ॥ तत्र स्वयमभूत्पूर्वं यत्तद्द्विजवरोत्तमाः ॥ शृणुध्वं वदतो मेऽद्य लोकविस्मयकारकम् ॥ २ ॥ त्रिशंकुर्नाम राजेंद्रश्चंडा
लत्वं समागतः ॥ तत्र स्नातः पुनर्लेभे शरीरं पार्थिवोचितम् ॥ ३ ॥ ॥ ऋषय ऊचुः ॥ ॥ चंडालत्वं कथं प्राप्तस्त्रिशंकुर्नृपसत्तमः ॥
एतत्त्वं सर्वमाचक्ष्व विस्तरात्सूतनन्दन ॥ ४ ॥ ॥ सूत उवाच ॥ ॥ अहं वः कीर्तयिष्यामि कथामेतां पुरातनीम् ॥ सर्वपापहरां मेध्यां त्रिशंकु
नृपसंभवाम् ॥ ५ ॥ सूर्यवंशोद्भवः पूर्वं त्रिशंकुरिति विश्रुतः ॥ आसीत्पार्थिवशार्दूलः शार्दूलसमविक्रमः ॥ ६ ॥ वसिष्ठस्य मुनेः शिष्यो यज्वा दान
पतिः प्रभुः ॥ तेनेष्टं च मखैः सर्वैरग्निष्टोमादिभिः सदा ॥ ७ ॥ संपूर्णदक्षिणैरेव वत्सरं वत्सरं प्रति ॥ तथा दानानि सर्वाणि प्रदत्तानि महा
त्मना ॥ ८ ॥ ब्राह्मणेभ्यो विशिष्टेभ्यो दीनेभ्यश्च विशेषतः ॥ व्रतानि च प्रचीर्णानि रक्षिताः शरणागताः ॥ ९ ॥ पुत्रवल्लालिता लोकाः
शत्रवश्च निषूदिताः ॥ भ्रांतानि भूतले यानि तीर्थान्यायतनानि च ॥ तपस्विभ्यो यथाकामं यच्छता वांछितं धनम् ॥ १० ॥ कस्यचित्त्वथ
कालस्य वसिष्ठो भगवान्मुनिः ॥ तेन प्रोक्तः सभामध्ये संस्थितो नतिपूर्वकम् ॥ ११ ॥ ॥ त्रिशंकुरुवाच ॥ ॥ भगवन्यष्टुमिच्छामि तेन
यज्ञेन सांप्रतम् ॥ गम्यते त्रिदिवं येन सशरीरेण सत्वरम् ॥ १२ ॥ तस्मात्कुरु प्रसादं मे संभारानाहर द्रुतम् ॥ तस्य यज्ञस्य सिद्ध्यर्थं यथार्हा

१ नीचधातुमयम्--लोहमयम्--इत्यर्थः । २ तु--इ० पा० । ३ एतदग्रे--सर्वेषु पुस्तकेषु--यावत्खण्डसमाप्ति--'तृतीय परिच्छेदे'--इति पाठो वर्त्तते--स किमभिप्रायक इति न ज्ञायते किं-नागरखण्ड एव--पूर्वे-प्रथमद्वितीयपरिच्छेदौ गतप्रायावाहोस्वित्--समग्रस्कान्दमहापुराणे--सप्तखण्डात्मके परिच्छेदत्रयकल्पनां विधाय षष्ठसप्तमखण्डयोस्तृतीयपरिच्छेदत्वेन--कल्पना कृतास्तीति वा न तत्त्वतोऽवगम्यते, तदेतत्सुधीभिः साधु विचार्यैवेदितव्यम् । अस्माभिस्तु--एतत्पूर्वं क्वचिदपि--'प्रथमपरिच्छेदे, द्वितीयपरिच्छेदे' इति पाठः समतीतेषु पंचसु खण्डेषु न दृष्टोऽतोऽत्र 'तृतीयपरिच्छेदे' इति पाठः समाप्तिदण्डके न निवेशितः--इति विदांकुर्वंतु विदांवराः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्ब्राह्मणांस्तथा ॥ १३ ॥ ॥ वसिष्ठ उवाच ॥ ॥ न स कश्चित्क्रतुर्येन गम्यते त्रिदिवं नृप ॥ अनेनैव शरीरेण सत्यमेतद्ब्रवीम्यहम् ॥ १४ ॥
अग्निष्टोमादयो यज्ञा ये प्रोक्ताः प्राक्स्वयंभुवा ॥ अन्यदेहांतरे स्वर्गः प्राप्यते तैः कृतैर्नृप ॥१५॥ यदि वा पृथिवीपाल त्वया यज्ञप्रभावतः ॥ पार्थिवो
वा द्विजो वाथ वैश्यो वान्यतरोऽपि वा ॥ १६ ॥ स्वयं दृष्टः श्रुतो वापि संजातोऽत्र धरातले ॥ स्वर्गं गतः शरीरेण सहितस्तत्प्रकीर्तय ॥ १७ ॥
॥ ॥ त्रिशंकुरुवाच ॥ ॥ नासाध्यं विद्यते ब्रह्मंस्तवाहं वेद्मि तत्त्वतः ॥ तस्मात्कुरु प्रसादं मे यथा स्यान्मनसेप्सितम् ॥ १८ ॥ ॥ वसिष्ठ उवाच ॥
अनृतं नोक्तपूर्वं मे स्वैरेष्वपि हि जिह्वया ॥ तस्मान्नास्ति मखः कश्चित्सत्यं त्वं यष्टुमिच्छसि ॥ १९ ॥ ॥ त्रिशंकुरुवाच ॥ ॥ यदि मां विप्रशा
र्दूल न त्वं याजयितुं क्षमः ॥ स्वर्गप्रदेन यज्ञेन वपुषानेन वै विभो ॥ २० ॥ तत्किं ते तपसः शक्त्या ब्राह्मणस्य विचक्षण ॥ अपरं शृणु मे वाक्यं
यद्ब्रवीमि परिस्फुटम् ॥ शृण्वतां मुनिवृन्दानां तथान्येषां द्विजोत्तम ॥ २१ ॥ यदि मे न करोषि त्वं वचनं वदतोऽसकृत् ॥ तेन यज्ञेन यक्ष्येऽहं
तत्कृत्वान्यं द्विजं गुरुम् ॥ २२ ॥ ॥ सूत उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा वसिष्ठो भगवांस्ततः ॥ तमुवाच विहस्योच्चैः कुरुष्वैवं महीपते ॥
॥ २३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्र माहात्म्ये त्रिशंकूपाख्याने त्रिशंकुवसिष्ठसंवाद
वर्णनंनाम द्वितीयोऽध्यायः॥ २ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ ततः प्रणम्य भूयः स वसिष्ठं मुनिपुंगवम् ॥ ययौ तत्र सुतास्तस्य यत्र ते शतसंख्यकाः
॥ १ ॥ तानपि प्राह नत्वा स तमेवार्थं नराधिपः॥ वसिष्ठवचनं कृत्स्नं तस्य तैरपि शंसितम् ॥ २ ॥ ततस्तान्स पुनः प्राह युष्माकं जनकोऽधु ना ॥
अशक्तो मा दिवं नेतुं सशरीरं विसर्जितः ॥ ३ ॥ तस्माद्यदि न मां यूयं याजयिष्यथ सांप्रतम् ॥ परित्यज्य करिष्यामि शीघ्रमन्यं पुरोहितम् ॥४॥
यो मां यज्ञप्रभावेन नयिष्यति सुरालयम् ॥ अनेनैव शरीरेण सहितं गुरुपुत्रकाः॥५॥ तस्य तद्वचनं श्रुत्वा सर्वे ते मुनिसत्तमाः॥ परं कोपं समावि
ष्टास्तमूचुः परुषाक्षरैः ॥ ६ ॥ यस्मात्त्वया गुरुस्त्यक्तो हितकृत्पापवानसि ॥ तस्माद्भवाधुना पाप चंडालो लोकनिंदितः ॥ ७ ॥ अथ तद्वचनांते स
तत्क्षणात्पृथिवीपतिः ॥ बभूवांत्यजरूपाढ्यो विकृताकारदेहभृत् ॥ ८ ॥ यवमध्यः कृशग्रीवः पिंगाक्षो भुग्ननासिकः ॥ कृष्णांगः शंकुवर्णश्च दुर्गंधेन
समावृतः ॥ ९ ॥ अथात्मानं समालोक्य विकृतं स नराधिपः ॥ चण्डालधर्मिणं सद्यो लज्जयाऽधोमुखः स्थितः ॥ १० ॥ याहियाहीति विप्रै

१ प्रकांक्षय—इ० पा० । २ प्रष्टुम्—इ० पा० । ३ विवक्षया—इ० पा० । ४ प्रणम्य भूपतिस्तं वै—इ० पा० । ५ मर्दलोदरः कृशग्रीवः—इ०पा० । ६ भग्ननासिकः—इ०पा० । ७ चण्डालधर्मिणम्- इदम् 'आत्मानम्' इत्यस्य विशेषणं बोद्धव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



स्तैर्भर्त्स्यमानो मुहुर्मुहुः ॥ सर्वतः सारमेयैश्च क्लिश्यमानो निरर्गलैः ॥ काककोकिलसंकाशो जीर्णवस्त्रावगुंठितः ॥ ११ ॥ ततः स चिन्तयामास दुःखेन महता वृतः ॥ किं करोमि क्व गच्छामि कथं शांतिर्भविष्यति ॥ १२ ॥ किं मयैतत्समूर्खेण वांछितं दुर्लभं पदम् ॥ तत्प्रभावेन विभ्रष्टः कुलधर्मोऽपि मे स्वकः ॥ १३ ॥ किं जलं प्रविशाम्यद्य किं वा दीप्तं हुताशनम् ॥ भक्षयामि विषं किं वा कथं स्यान्मृत्युरद्य मे ॥ १४ ॥ अनेन वपुषा दारान्वीक्षयिष्यामि तान्कथम् ॥ तादृशेन शरीरेण याभिः संक्रीडितं मया ॥ १५ ॥ कथं पुत्रांस्तथा पौत्रान्सुहृत्संबंधिबांधवान् ॥ वीक्षयिष्यामि तान्भूयस्तथान्यं सेवकं जनम् ॥ १६ ॥ ये मया निर्जिताः सर्वे रिपवः संगरे पुरा ॥ १५ ॥ तेऽद्य मामीदृशं श्रुत्वा हर्षं यास्यंति निर्भयाः ॥ १७ ॥ ये मया तर्पिता दानैर्ब्राह्मणा वेदपारगाः ॥ तेऽद्य मामीदृशं श्रुत्वा संभविष्यंति दुःखिताः ॥ १८ ॥ तथा ये सुहृदोऽभीष्टा नित्यं मम हिते रताः ॥ कामवस्थां प्रयास्यन्ति दृष्ट्वा मां स्थितमीदृशम् ॥ १९ ॥ भद्रजात्या गजा ये मे मदान्धाः षष्टिहायनाः ॥ मया विना मिथो युद्धे कस्तानद्य नियोक्ष्यति[2] ॥ २० ॥ अश्वास्तित्तिरकल्माषाः सुदांताः सादिभिर्दृढैः ॥ कस्तांश्चित्रपदन्यासैर्नियाम्यति मया विना ॥ २१ ॥ तथा मे भृत्यवर्गास्ते कुलीना युद्धदुर्मदाः ॥ मां विना कस्य यास्यंति समीपेऽद्य सुदुःखिताः ॥ २२ ॥ संख्याहीनस्तथा कोशस्तादृङ्मे बहुरत्नभाक् ॥ कस्य यास्यति संभोगं मया हीनस्तु रक्षितः ॥ २३ ॥ तथा मे संख्यया हीनं धान्यं गोजाविकं महत् ॥ भविष्यति कथं हीनं मया भीष्टैस्तु रक्षितम् ॥ २४ ॥ एवं बहुविधं राजा स विलप्य च दुःखितः ॥ जगाम नगराभ्याशं पद्भ्यामेव शनैःशनैः ॥ २५ ॥ ततो रात्रौ समासाद्य स्वं पुरं जनवर्जितम् ॥ द्वारे स्थित्वा समाहूय पुत्रं मंत्रिभिरन्वितम् ॥२६॥ कथयामास वृत्तांतं सर्वं शापसमुद्भवम् ॥ दूरे स्थितः स पुत्राणां वसिष्ठस्य महात्मनः ॥२७॥ वज्रपातोपमं वाक्यं तेऽपि तस्य निशम्य तत् ॥ बाष्पपर्याकुलैरास्यै रुरुदुः शोकसंयुताः ॥ २८ ॥ हा नाथ हा महाराज हा नित्यं धर्मवत्सल ॥ त्वया हीना भविष्यामः कथमद्य सुदुःखिताः ॥ २९ ॥ किमेतद्युज्यते तेषां वासिष्ठानां दुरात्मनाम् ॥ शापं ददुः स्वयाज्यस्य विशेषाद्भिनतस्य च ॥३०॥ ते वयं राजशार्दूल परित्यज्य गृहादिकम् ॥ अन्त्यजत्वं गमिष्यामस्त्वया सार्धमसंशयम् ॥३१॥ ॥त्रिशंकुरुवाच॥ भक्तिश्चेदस्ति युष्माकं ममोपरि निरर्गला॥तन्मे पुत्रस्य मंत्रित्वं[3] सर्वे कुरुत सांप्रतम्॥३२॥हरिश्चंद्रः सुपुत्रोयं मम ज्येष्ठः सुवल्लभः॥नियोजयध्वमव्यग्राः पदव्यां मम सत्वरम्॥३३॥अहं पुनः करिष्यामि यन्मे मनसि संस्थितम्॥मृत्युं वा संप्रयास्यामि सदेहो वा सुरालयम्॥३४॥एवमुक्त्वा परित्यज्य सर्वां ॥ ४ ॥

१ कीर्तयिष्यामि इ० पा० । २ नियोक्ष्यति--इ०पा० । ३ मित्रत्वम्--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तान्स महीपतिः ॥ जगामारण्यमाश्रित्य पद्भ्यामेव शनैः शनैः ॥३५॥ तेपि सन्मंत्रिणस्तूर्णं पुत्रं तस्य सुसम्मतम् ॥ राज्ये नियोजयामासुर्नादवादि
त्रनिःस्वनैः ॥ ३६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये त्रिशंकूपाख्याने हरिश्चन्द्ररा
ज्योपलंभोनाम तृतीयोऽध्यायः ॥ ३ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ त्रिशंकुरिति संचिन्त्य विश्वामित्रं महामुनिम् ॥ मनसा सुचिरं कालं
ततश्चक्रे विनिश्चयम् ॥ १ ॥ विश्वामित्रं परित्यज्य नान्योस्ति भुवनत्रये ॥ यः कुर्यान्मे परित्राणं दुःखादस्मात्सुदारुणात् ॥ २ ॥ कुरुक्षेत्रं समु
द्दिश्य प्रतस्थे स ततः परम् ॥ सुश्रांतः क्षुत्पिपासार्तो मार्गपृच्छापरायणः ॥ ३ ॥ ततः कालेन संप्राप्य कुरुक्षेत्रं स पार्थिवः ॥ यत्नेनान्वेषया
मास विश्वामित्राश्रमं ततः ॥ ४ ॥ एवं चान्वेषमाणेन तेन भूमिभृता तदा ॥ सुदूरादेव संदृष्टं नीलद्रुमकदम्बकम् ॥ ५ ॥ उपरिष्टाद्बकैर्हंसैर्भ्रम
माणैः समंततः ॥ आटिभिर्मद्गुभिश्चैव समन्ताज्जलपक्षिभिः ॥ ६ ॥ स मत्वा सलिलं तत्र पिपासार्तो महीपतिः ॥ प्रतस्थे सत्वरो हृष्टो जलवात
हृतक्लमः ॥ ७ ॥ अथापश्यन्मनोहारि सौम्यसत्त्वनिषेवितम् ॥ आश्रमं नंदितीरस्थं[1] मनःशोकविनाशनम् ॥ ८ ॥ पुष्पितैः फलितैर्वृक्षैः समं
तात्परिवारितम् ॥ विविधैर्मधुरारावैर्नादितं विहगोत्तमैः ॥ ९ ॥ क्रीडंति नकुलाः सर्पैरुलूका यत्र वायसैः ॥ मूषकैर्वृषदंशाश्च द्वीपिनो विविधै
र्मृगैः ॥ १० ॥ अथापश्यन्नदीतीरे स तपस्विगणावृतम् ॥ स्वाध्यायनिरतं दांतं विश्वामित्रं तपोनिधिम् ॥ ११ ॥ तेजसा तपसातीव दीप्यमान
मिवानलम् ॥ चीरवल्कलसंवीतं शालवृक्षं समाश्रितम् ॥ १२ ॥ अथ गत्वा स राजेन्द्रो दूरस्थोऽपि प्रणम्य तम् ॥ अष्टांगेन प्रणामेन स्वनाम परि
कीर्तयन् ॥ १३ ॥ तथान्यानपि तच्छिष्यान्कृताञ्जलिपुटः स्थितः ॥ यथाक्रमं यथाज्येष्ठं[2] श्रद्धया परया युतः ॥ १४ ॥ धूलिधूसरितांगं तं ते तु
दृष्ट्वा महीपतिम् ॥ चंडाल इति मन्वानाश्चिह्नैर्गात्रसमुद्भवैः ॥ १५ ॥ भर्त्सयामासुरेवाथ वचनैः परुषाक्षरैः ॥ धिक्छब्दैश्च तथैवान्ये याहियाहीति
चासकृत् ॥ १६ ॥ कस्त्वं पापेह संप्राप्तो मुनीनामाश्रमोत्तमे ॥ वेदध्वनिसमाकीर्णे साधूनामपि दुर्लभे ॥ १७ ॥ तस्माद्गच्छ द्रुतं यावन्न कश्चि
त्तापसस्तव ॥ दत्त्वा शापं करोत्याशु प्राणानामपि संक्षयम् ॥ १८ ॥ ॥ त्रिशंकुरुवाच ॥ ॥ त्रिशंकुर्नाम भूपोऽहं सूर्यवंशसमुद्भवः ॥ शप्तो
वसिष्ठपुत्रैश्च चंडालत्वे नियोजितः ॥ १९ ॥ सोऽहं शरणमापन्नः शापमुक्त्यै द्विजोत्तमाः ॥ विश्वामित्रं जगन्मित्रं नान्या मेऽस्ति गतिः परा ॥२०॥
॥ ॥ विश्वामित्र उवाच ॥ ॥ वसिष्ठस्य भवान्याज्यस्तत्पुत्राणां विशेषतः ॥ तत्कस्मादीदृशे पापे तैस्त्वमद्य नियोजितः ॥ २१ ॥ कोऽप

१ नदितीरस्थम्–ह्रस्व आर्षः । नदीतीरस्थम् । नंदितीरस्थम्–इ०, नंदिनीरस्थम्–इ० च पा० ।   २ यथाश्रेष्ठम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



राधस्त्वया तेषां कृतः पार्थिवसत्तम ॥ प्राणद्रोहः कृतः किं वा दारधर्षणसंभवः ॥ २२ ॥ ॥ त्रिशंकुरुवाच ॥ ॥ अनेनैव शरीरेण स्वर्गाय
गमनं प्रति ॥ मया संप्रार्थितो यज्ञो वसिष्ठान्मुनिसत्तमात् ॥ २३ ॥ तेनोक्तं न स यज्ञोऽस्ति येन स्वर्गं प्रगम्यते ॥ अनेनैव शरीरेण मुक्त्वा देहां
तरं नृप ॥ २४ ॥ तच्छ्रुत्वा स मया प्रोक्तो यदि मां न नयिष्यति ॥ स्वर्गं चानेन कायेन सद्यो यज्ञप्रभावतः ॥ २५ ॥ तदन्यं गुरुमेवाद्य कर्ताहं
नास्ति संशयः॥ एतज्ज्ञात्वा मुनिः प्राह यत्क्षेमं तत्समाचर ॥ २६ ॥ ततोऽहं तेन संत्यक्तस्तत्पुत्रान्प्राप्य निष्ठुरान्॥ प्रोक्तवानथ तत्सर्वं यद्वसिष्ठस्य
कीर्तितम् ॥२७॥ ततस्तैः शोकसंतप्तैः शप्तोस्मि मुनिसत्तम ॥ नीतश्चेमां दशां पापां चंडालत्वे नियोजितः ॥२८॥ सोऽहं त्वां मनसा ध्यात्वा सुदूरादिह
सगतः ॥ आशां गरीयसीं कृत्वा कुरुक्षेत्रे मुनीश्वर ॥ २९ ॥ नासाध्यं विद्यते किंचित्त्रिषु लोकेषु ते मुने ॥ तस्मात्कुरु प्रतीकारं दुःखितस्य ममा
धुना ॥ ३० ॥ ॥ सूत उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा विश्वामित्रो मुनीश्वरः ॥ वसिष्ठस्पर्धयोवाच मुनिमध्ये व्यवस्थितः ॥ ३१ ॥ अहं त्वां
याजयिष्यामि तेन यज्ञेन पार्थिव ॥ गच्छसि त्रिदिवं येन इष्टमात्रेण तत्क्षणात् ॥ ३२ ॥ त्वमेवं विहितो भूप वासिष्ठैरंत्यजस्तु तैः ॥ मया भूयोऽ
पि भूपालः कर्तव्यो नात्र संशयः ॥ ३३ ॥ तस्मादागच्छ भूपाल तीर्थयात्रां मया सह ॥ कुरु तीर्थप्रभावेण येन त्वं स्याः शुचिः पुनः ॥ ३४ ॥
तथा यज्ञक्रियार्हश्च चंडालत्वविवर्जितः ॥ नास्ति तत्पातकं यच्च तीर्थस्नानान्न नश्यति ॥ ३५ ॥ ॥ सूत उवाच ॥ ॥ एवं स निश्चयं कृत्वा
गाधिपुत्रो मुनीश्वरः ॥ त्रिशंकुं पृष्ठतः कृत्वा तीर्थयात्रामथाव्रजत् ॥ ३६ ॥ कुरुक्षेत्रे सरस्वत्यां प्रभासे कुरुजांगले ॥ पृथूदके गयाशीर्षे नैमिषे
पुष्करत्रये ॥ ३७ ॥ वाराणस्यां प्रयागे च केदारे श्रवणे नदे ॥ चित्रकूटे च गोकर्णे शालिग्रामेऽचलेश्वरे ॥ ३८ ॥ शुक्लतीर्थे सुराज्याख्ये दृषद्वति
नदे शुभे ॥ अथान्येषु सुपुण्येषु तीर्थेष्वायतनेषु च ॥ ३९ ॥ एवं तस्य नरेंद्रस्य सार्धं तेन महात्मना ॥ अतिक्रांतो महान्कालो भ्रममाणस्य भूतले
॥ ४० ॥ मुच्यते न च पापेन चंडालत्वेन स द्विजाः ॥ एवंविधेषु तीर्थेषु स्नातोपि च पृथक्पृथक् ॥ ४१ ॥ ततः क्रमात्समायातः सोऽर्बुदं पर्वतं
प्रति ॥ तत्रारुह्य समालोक्य पापघ्नमचलेश्वरम् ॥४२॥ यावदायतनात्तस्मान्निर्गच्छति मुनीश्वरः ॥ तावत्तेनेक्षितो नाममार्कंडो मुनिसत्तमः॥ ४३ ॥
सोऽपि दृष्ट्वा जगन्मित्रं विश्वामित्रं मुनीश्वरम् ॥ प्रोवाचाथ कुतः प्राप्तः सांप्रतं त्वं मुनीश्वर ॥४४॥ कोऽयं तवानुगो रौद्रो दृश्यते चांत्यजाकृतिः ॥ 
एतत्सर्वं समाचक्ष्व पृच्छतो मम सन्मुने ॥ ४५ ॥ ॥ विश्वामित्र उवाच ॥ ॥ एष पार्थिवशार्दूलस्त्रिशंकुरिति विश्रुतः ॥ वसिष्ठस्य सुतैर्नीत

१ श्रतैः--इ० पा० । २ यद्यत्--इ० पा० । ३ श्रवणे नदे--शोणनदे--इत्यर्थः । प्रवणे नदे--इ० पा० । ४ तत्रालोक्य महादेवम्--इ० पा० । ५ नाममार्कंडः--मार्कंडोनाम--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चंडालत्वं प्रकोपतः ॥ ४६ ॥ मया चास्य प्रतिज्ञातं सप्तद्वीपवतीं महीम् ॥ प्रभ्रमिष्याम्यहं यावन्मेध्यत्वं त्वमुपेष्यसि ॥ ४७ ॥ भ्रांतोऽहं भूतले
यानि तीर्थान्यायतनानि च ॥ नचैष मेध्यतां प्राप्तः परिश्रांतोस्मि सांप्रतम् ॥ ४८ ॥ तस्मात्सर्वां महीं त्यक्त्वा लज्जया परया युतः ॥ द्वीपान्म
हार्णवांस्त्यक्त्वा संप्रयास्याम्यतः परम् ॥ ४९ ॥ मा वसिष्ठस्य पुत्राणामुपहासपदं गतः ॥ प्रतिज्ञारहितो विप्र सत्यमेतद्ब्रवीम्यहम् ॥ ५० ॥
॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ यद्येवं मुनिशार्दूल कुरुष्व वचनं मम ॥ सप्तद्वीपवतीं पृथ्वीं मा त्यक्त्वा कुत्रचिद्व्रज ॥ ५१ ॥ एतस्मात्पर्वता
त्क्षेत्रं हाटकेश्वरसंज्ञितम् ॥ अस्ति नैर्ऋतदिग्भागे देशे चानर्तसंज्ञके ॥ ५२ ॥ तत्राद्यं स्थापितं लिंगं हाटकेन सुरोत्तमैः ॥ यत्तत्संकीर्त्यते
लोके पाताले हाटकेश्वरम् ॥ ५३ ॥ पातालजाह्नवीतोयं यत्रैवास्ति द्विजोत्तम ॥ उद्धृते शंभुना लिंगे विनिष्क्रांतं रसातलात् ॥
॥ ५४ ॥ तत्र प्रविश्य यत्नेन पातालं वसुधाधिपः ॥ करोतु जाह्नवीतोये स्नानं श्रद्धासमन्वितः ॥ ५५ ॥ पश्चात्पश्यतु तल्लिंगं हाटकेश्वर
संज्ञितम् ॥ भविष्यति ततः शुद्धश्चंडालत्वविवर्जितः ॥ ५६ ॥ त्वमपि प्राप्स्यसि श्रेयः परं हृदयसंस्थितम् ॥ ततोन्यदपि
यत्किंचित्तत्रैव तपसि स्थितः ॥ ५७ ॥ ॥ सूत उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा विश्वामित्रो मुनीश्वरः ॥ त्रिशंकुना समायुक्तो
गतस्तत्र द्रुतं ततः ॥ ५८ ॥ पाताले देवमार्गेण प्रविश्य नृपसत्तमम् ॥ त्रिशंकुं स्नापयामास विधिदृष्टेन कर्मणा ॥ ५९ ॥ स्नातमात्रोथ
राजा स हाटकेश्वरदर्शनात् ॥ चंडालत्वेन निर्मुक्तो बभूवार्कसमद्युतिः ॥ ६० ॥ ततस्तं स मुनिः प्राह प्रणतं गतकल्मषम् ॥ दिष्ट्या मुक्तोसि
राजेंद्र चंडालत्वेन सांप्रतम् ॥ ६१ ॥ दिष्ट्या प्राप्तः परं तेजो दिष्ट्या प्राप्तः परं तपः ॥ तस्माद्यजस्व सत्रेण विधिवद्दक्षिणावता ॥ ६२ ॥ येन
संप्राप्स्यसे सिद्धिं नित्यं या हृदये स्थिता ॥ त्वत्कृते प्रार्थयिष्यामि स्वयं गत्वा पितामहम् ॥ ६३ ॥ मखांशं सर्वदेवाद्यो येन गृह्णाति ते मखे ॥
तस्मादत्रैव संभारान्सर्वान्यज्ञसमुद्भवान् ॥ आनय ब्रह्मलोकाच्च यावदागमनं मम ॥ ६४ ॥ बाढमित्येव सोऽप्याह स मुनिः संशितव्रतः ॥ पितामह
मुपागम्य प्रणिपत्याब्रवीद्वचः ॥ ६५ ॥ याजयिष्याम्यहं भूपं त्रिशंकुं प्रपितामह ॥ मानुषेण शरीरेण येन गच्छति ते पदम् ॥ ६६ ॥ तस्मादा
गच्छ तत्र त्वं यज्ञवाटं पितामह ॥ सर्वैः सुरगणैः सार्धं शिवविष्णुपुरःसरैः ॥ ६७ ॥ प्रगृहाण स्वहस्तेन यज्ञभागं यथोचितम् ॥ सशरीरो दिवं
याति येनासौ त्वत्प्रसादतः ॥ ६८ ॥ ॥ ब्रह्मोवाच ॥ ॥ न यज्ञकर्मणा स्वर्गः स्वेनं कायेन लभ्यते ॥ मुक्त्वा देहांतरं ब्रह्मंस्तस्मान्मैवं वदस्व

१ तेन पावेन--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



माम् ॥ ६९ ॥ वयमग्निमुखाः सर्वे हविर्गृह्णामहे मखे ॥ वेदोक्तविधिना सम्यग्यजमानहिताय वै ॥ ७० ॥ तस्माद्वह्निमुखे भूयः स जुहोतु
हविर्द्विज ॥ ततः संप्राप्स्यति[1] स्वर्गं त्वत्प्रसादादसंशयम् ॥ ७१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटके
श्वरक्षेत्रमाहात्म्ये त्रिशंकूपाख्याने विश्वामित्रकृतत्रिशंकुयाजनोपक्रमवर्णनंनाम चतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तच्छ्रुत्वा
ब्रह्मणो वाक्यं विश्वामित्रो रुषान्वितः ॥ पितामहमुवाचेदं पश्य मे तपसो बलम् ॥ १ ॥ याजयित्वा त्रिशंकुं तं विधिवद्दक्षिणावता ॥ यज्ञेनात्र न
यिष्यामि पश्यतस्ते पितामह ॥ २ ॥ एवमुक्त्वा द्रुतं गत्वा विश्वामित्रो धरातलम् ॥ चकार याजने यत्नं त्रिशंकोः सुमहात्मनः ॥ ३ ॥ ददौ दीक्षां
समाहूय ब्राह्मणान्वेदपारगान् ॥ यज्ञकर्मोचिते काले तस्मिन्नेव वने शुभे ॥ ४ ॥ बभूव स स्वयं धीमानध्वर्युर्यज्ञकर्मणि ॥ तस्मिन्होता च
शांडिल्यो ब्रह्मा गौतम एव च ॥ ५ ॥ आग्नीध्रश्च्यवनोनाम मैत्रावरुणः कार्मिकः ॥ उद्गाता याज्ञवल्क्यश्च प्रतिहर्ता च जैमिनिः ॥ ६ ॥ प्रस्तोता
शंकुवर्णश्च तथोन्नेता च गालवः ॥ पुलस्त्यो ब्राह्मणाच्छंसी होता गर्गो मुनीश्वरः ॥ ७ ॥ नेष्टा चैव तथात्रिस्तु अच्छावाको भृगुः स्वयम् ॥
तान्सर्वानृत्विजश्चक्रे त्रिशंकुः श्रद्धयान्वितः ॥ ८ ॥ वासोभिर्मुकुटैश्चैव केयूरैः समलंकृतान् ॥ कृत्वा केशपरित्यागं दधत्कृष्णाजिनं तथा ॥ ९ ॥
ऐणशृंगसमायुक्तः पयोव्रतपरायणः ॥ दीर्घसत्राय तान्सर्वान्योजयामास वै ततः ॥ १० ॥ एवं तस्मिन्प्रवृत्ते च दीर्घसत्रे यथोचिते ॥ आजग्मुर्ब्राह्म
णा दिव्या वेदवेदांगपारगाः ॥ ११ ॥ तथान्ये तार्किकाश्चैव गृहस्थाः कौतुकान्विताः ॥ दीनांधकृपणाश्चैव ये चान्ये नटनर्तकाः ॥ १२ ॥ दीयतां
दीयतामाशु एतेषामेतदेव हि ॥ भुज्यतांभुज्यतां लोकाः प्रसादः क्रियतामिति ॥ १३ ॥ इत्येष निनदस्तत्र श्रूयते सततं महान् ॥ यज्ञवाटे सदा
तस्मिन्नान्यश्चैव कदाचन ॥ १४ ॥ तत्र सस्यमयाः शैला दृश्यंते परिकल्पिताः ॥ सुवर्णस्य च रूप्यस्य रत्नानां च विशेषतः ॥ १५ ॥
दानार्थं ब्राह्मणेंद्राणामसंख्याश्चापि धेनवः ॥ तथैव वाजिनो दांता मदोन्मत्ता महागजाः ॥ १६ ॥ समंतात्कल्पितास्तत्र दृश्यंते पर्वतोपमाः ॥
वर्तमाने महायज्ञे तस्मिन्नेव सुविस्तरे ॥ १७ ॥ आहूता यज्ञभागाय नाभिगच्छंति देवताः ॥ केवलं वह्निवक्रेण तस्य गृह्णंति तद्धविः ॥ १८ ॥ ॥ ६ ॥
एवं द्वादशवर्षाणि यजतस्तस्य भूपतेः ॥ व्यतीतानि न संप्राप्तमभीष्टं मनसः फलम् ॥ १९ ॥ ततश्चावभृथस्नानं कृत्वा सत्रसमाप्तिजम्[2] ॥ ऋत्वि
जस्तर्पयित्वा तान्दक्षिणाभिर्यथार्हतः ॥ २० ॥ विससर्ज समस्तांश्च तथान्यानपि संगतान् ॥ संबंधिनो वयस्यांश्च त्रिशंकुर्मुनिसत्तमाः ॥ २१ ॥

१ संप्राप्स्यते स्वर्गस्त्वत्प्रसादान्न संशयः--इ० पा० । २ सत्रस्य चान्त्यजम्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततः प्रोवाच विनतो विश्वामित्रं मुनीश्वरम् ॥ स भूपो व्रीडया युक्तः प्रणिपातपुरःसरम् ॥ २२ ॥ त्वत्प्रसादान्मया प्राप्तं दीर्घसत्रसमुद्भवम् ॥ परिपूर्णफलं ब्रह्मन्दुर्लभं सर्वमानवैः ॥ २३ ॥ तथा जातिः पुनर्लब्धा भूयो नष्टापि सन्मुने ॥ त्वत्प्रसादेन विप्रर्षे चंडालत्वं प्रणाशितम् ॥ २४ ॥ परं मे दुःखमेवैकं हृदि शल्यमिवार्पितम् ॥ अनेनैव शरीरेण यन्न प्राप्तं त्रिविष्टपम् ॥ २५ ॥ उपहासं करिष्यंति वसिष्ठस्य सुता मुने ॥ अद्य व्यर्थं श्रमं श्रुत्वा मामप्राप्तं त्रिविष्टपम् ॥ २६ ॥ तथा तद्वचनं सत्यं वसिष्ठस्य व्यवस्थितम् ॥ यत्तेनोक्तं न यज्ञेन सदेहैर्गम्यते दिवि[1] ॥ २७ ॥ सोऽहं तपः करिष्यामि सांप्रतं वनमाश्रितः ॥ न करिष्यामि भूयोऽपि राज्यं पुत्रनिवेदितम् ॥ २८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये त्रिशंकूपाख्याने विश्वामित्रेण त्रिशंकोः सशरीरस्वर्गारोहणाय द्वादशवार्षिकयज्ञकरणंनाम पञ्चमो ऽध्यायः ॥ ५ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तच्छ्रुत्वा वचनं तस्य त्रिशंकोर्मुनिपुंगवः ॥ विश्वामित्रोऽब्रवीद्वाक्यं किंचिल्लज्जासमन्वितः ॥ ॥ १ ॥ मा विषादं महीपाल विषयेऽत्र करिष्यसि ॥ अनेनैव शरीरेण त्वां नयिष्याम्यहं दिवम् ॥ २ ॥ तत्तत्कर्म करिष्यामि स्वर्गार्थे नृप सत्तम ॥ तवाभीष्टं करिष्यामि किं वा यास्यामि संक्षयम् ॥ ३ ॥ एवमुक्त्वा परं कोपं कृत्वोपरि दिवौकसाम् ॥ उवाच च ततो रौद्रं प्रत्यक्षं तस्य भूपतेः ॥ ४ ॥ यथा मया द्विजत्वं हि स्वयमेवार्जितं बलात् ॥ तथा सृष्टिं करिष्यामि स्वकीयां नात्र संशयः ॥ ५ ॥ ततस्तं स समालोक्य शंकरं शशिशेखरम् ॥ प्रणम्य विधिवद्भक्त्या स्तुतिं चक्रे महामुनिः ॥ ६ ॥ ॥ विश्वामित्र उवाच ॥ ॥ जय देव जयाचिंत्य जय पार्वतिवल्लभ ॥ जय कृष्ण जगन्नाथ जय कृष्ण जगद्गुरो ॥ ७ ॥ जयाचिंत्य जयामेय जयानंत जयाच्युत ॥ जयामर जयाजेय जयाव्यय सुरेश्वर ॥ ८ ॥ जय सर्वग सर्वेश जय सर्वसुराश्रय ॥ जय सर्वजनध्येय जय सर्वाघनाशन ॥ ९ ॥ त्वं धाता च विधाता च त्वं कर्ता त्वं च रक्षकः ॥ चतुर्विधस्य देवेश भूतग्रामस्य शंकर ॥ १० ॥ यथा तिलस्थितं तैलं यथा दधिगतं घृतम् ॥ तथैवाधिष्ठितं कृत्स्नं त्वया गुप्तेन वै जगत् ॥ ११ ॥ त्वं ब्रह्मा त्वं हृषीकेशस्त्वं शक्रस्त्वं हुताशनः ॥ त्वं यज्ञस्त्वं वषट्कारस्त्वमिन्दुस्त्वं दिवाकरः ॥ १२ ॥ अथवा बहुनोक्तेन किं स्तवेन तव प्रभो ॥ समासा देव वक्ष्यामि विभूतिं श्रुतिनोदिताम् ॥ १३ ॥ यत्किंचित्त्रिषु लोकेषु स्थावरं जंगमं विभो ॥ तत्सर्वं भवता व्याप्तं काष्ठं हव्यभुजा यथा ॥ १४ ॥ ॥ श्रीभगवानुवाच ॥ ॥ परितुष्टोऽस्मि भद्रं ते वरं प्रार्थय सन्मुने ॥ यत्ते हृदि स्थितं नित्यं सर्वं दास्याम्य

१ हृदि--इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



संशयम् ॥ १५ ॥ ॥ विश्वामित्र उवाच ॥ ॥ यदि तुष्टोसि देवेश यदि देयो वरो मम ॥ तन्मे स्यात्सृष्टिमाहात्म्यं त्वत्प्रसा
दान्महेश्वर ॥ १६ ॥ एवमस्त्विति तं चोक्का भगवान्वृषभध्वजः ॥ सर्वैर्गणैः समायुक्तस्ततश्चादर्शनं गतः ॥ १७ ॥ विश्वामित्रोऽपि
तत्रैव स्थितो ध्यानपरायणः ॥ चक्रे चतुर्विधां सृष्टिं स्पर्द्धया हंसगामिनः ॥ १८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे
नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये त्रिशंकूपाख्याने विश्वामित्रवरलब्धिर्नाम षष्ठोऽध्यायः ॥ ६ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥
तेनैवं ध्यायमानेन जलमाविश्य काम्यया ॥ सृष्टं संध्याद्वियं तच्च दृश्यतेऽद्यापि वै द्विजाः ॥ १ ॥ ततो देवगणाः सर्वे सृष्टास्तेन महात्मना ॥
वैमानिकाश्च ये केचिन्नक्षत्राणि ग्रहास्तथा ॥ २ ॥ मनुष्योरगरक्षांसि वीरुधो वृक्षसंयुताः ॥ सप्तर्षयो ध्रुवाद्याश्च ये चान्ये गगनेचराः ॥ ३ ॥
एवं हि भगवान्सृष्ट्वा विश्वामित्रः स मन्युमान् ॥ स्वकीयेष्वथ कृत्येषु योजयामास तांस्ततः ॥ ४ ॥ एतस्मिन्नेव काले तु द्वौ सूर्यौ युगपद्दिवि ॥
उदितौ रात्रिनाथौ च जाताश्च द्विगुणा ग्रहाः ॥ द्विगुणानि च भान्येव सह सप्तर्षिभिर्द्विजाः ॥ ५ ॥ एवं वियति ते सर्वे स्पर्द्धमानाः परस्प
रम् ॥ दृश्यंते द्विगुणीभूता जनविभ्रमकारकाः ॥ ६ ॥ एतस्मिन्नंतरे शक्रः सह सर्वैर्दिवालयैः ॥ जगाम तत्र यत्रास्ते भगवान्कमलासनः ॥ ७ ॥
प्रोवाचाथ प्रणम्योच्चैः कृतांजलिपुटः स्थितः ॥ स्तुतिं कृत्वा सुरैः सार्धं वेदोक्तैः स्तवनैर्द्विजाः ॥ ८ ॥ सृष्टिः कृता सुरश्रेष्ठ विश्वामित्रेण सांप्र
तम् ॥ मनुष्ययक्षसर्पाणां देवगंधर्वरक्षसाम् ॥ ९ ॥ तस्माद्वारय तं गत्वा स्वयमेव पितामह ॥ यावन्न व्याप्यते सर्वं तत्सृष्टचेदं चराचरम् ॥ १० ॥
तस्य तद्वचनं श्रुत्वा तेनैव सहितो विधिः ॥ गत्वोवाच जगन्मित्रं विश्वामित्रं मुनीश्वरम् ॥ ११ ॥ निवृत्तिं कुरु विप्रर्षे सांप्रतं वचनान्मम ॥ सृष्टे
र्यावन्न नश्यंति सर्वे देवाः सवासवाः ॥ १२ ॥ ॥ विश्वामित्र उवाच ॥ ॥ अनेनैव शरीरेण त्रिशंकुर्नृपसत्तमः॥ यदि गच्छति ते लोके तत्सृष्टिं[1]
न करोम्यहम् ॥ १३ ॥ ॥ ब्रह्मोवाच ॥ ॥ एष गच्छतु भूपालो मया सह त्रिविष्टपम् ॥ अनेनैव शरीरेण त्वत्प्रसादान्मुनीश्वर ॥ १४ ॥
विरामं कुरु सृष्टेस्त्वं नैतदन्यः करिष्यति ॥ न कृतं केनचिल्लोके तत्कर्म भवता कृतम् ॥ १५ ॥ ॥ विश्वामित्र उवाच ॥ ॥ यन्मया कोपयुक्तेन
कृतेयं सृष्टिरब्जज ॥ तत्क्षंतव्यं त्वया देव सर्वलोकपितामह ॥१६॥ तथाऽक्षयास्तु मे देव सृष्टिस्तव प्रसादतः ॥ या कृता न करिष्यामि भूयोऽन्यां
पद्मसंभव ॥ १७ ॥ ॥ ब्रह्मोवाच ॥ ॥ भविष्यति ध्रुवा विप्र सृष्टिर्या भवता कृता ॥ परं सर्वेषु कृत्येषु यज्ञार्हा न भविष्यति ॥ १८ ॥ एव

१ तत्--तर्हि--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुक्त्वा समादाय त्रिशंकुं प्रपितामहः ॥ ब्रह्मलोकं गतो हृष्टो मुनिस्तत्रैव संस्थितः ॥ १९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखंडे हाटकेश्वरक्षेत्रमाहात्म्ये त्रिशंकूपाख्याने त्रिशंकुस्वर्गप्राप्तिवर्णनंनाम सप्तमोऽध्यायः ॥७॥ ॥छ॥ ॥ सूत उवाच ॥ ॥ एवं स्वर्गमनुप्राप्ते त्रिशंकौ नृपसत्तमे ॥ सशरीरे द्विजश्रेष्ठा विश्वामित्रसमुद्यमात् ॥ १ ॥ तत्तीर्थं ख्यातिमायातं समस्ते भुवनत्रये ॥ ततःप्रभृति लोकानां धर्मकामार्थमोक्षदम् ॥ २ ॥ अस्पृष्टं कलिदोषेण तथान्यैरुपपातकैः ॥ ब्रह्महत्यादिकैश्चैव त्रिपुरारेः प्रभावतः ॥ ३ ॥ यस्तत्र त्यजति प्राणाञ्छ्रद्धायुक्तेन चेतसा ॥ स मोक्षमाप्नुयान्मर्त्यो यद्यपि स्यात्सुपापकृत् ॥ ४ ॥ कृमिपक्षिपतंगा ये पशवः पक्षिणो मृगाः ॥ तेऽपि तत्र मृता यांति शिवलोकमसंशयम् ॥ ५ ॥ स्नानं ये तत्र कुर्वंति श्रद्धापूतेन चेतसा ॥ त्रिशंकुरिव ते स्वर्गे प्रयांत्यपि विधर्मिणः ॥ ६ ॥ घर्मार्त्ता वा तृषार्ता वा येऽवगाहंति तज्जलम् ॥ तेऽपि यांति परं स्थानं यत्र देवो महेश्वरः ॥ ७ ॥ विश्वामित्रोऽपि तद्दृष्ट्वा तीर्थमाहात्म्यमुत्तमम् ॥ कुरुक्षेत्रं परित्यज्य तत्र वासमथाकरोत् ॥ ८ ॥ तथान्ये मुनयः शांतास्त्यक्त्वा तीर्थानि दूरतः॥ तत्राश्रमपदं कृत्वा प्रयाताः परमं पदम् ॥ ९ ॥ तथैव मनुजाः सर्वे दूरादागत्य सत्वराः ॥ तत्र स्नात्वा दिवं यांति कृत्वा पापशतान्यपि ॥ १० ॥ एवं तस्य प्रभावेण तीर्थस्य द्विजसत्तमाः ॥ गच्छमानेषु लोकेषु सुखेन त्रिदिवालयम् ॥ ११ ॥ अग्निष्टोमादिकाः सर्वाः समुच्छेदं गताः क्रियाः ॥ न कश्चिद्यजते मर्त्यो न व्रतं कुरुते नरः ॥ १२ ॥ न यच्छति तथा दानं न च तीर्थं निषेवते ॥ केवलं कुरुते स्नानं लिंगभेदे समाहितः ॥ १३ ॥ ततः प्रगच्छति स्वर्गं विमानवरमाश्रितः ॥ १४ ॥ ततः प्रपूरिताः सर्वे स्वर्गलोका नरैर्द्विजाः ॥ ब्रह्मविष्णुशिवेन्द्रादीन्स्पर्धमानैः सुरोत्तमान् ॥ १५ ॥ ततो देवगणाः सर्वे यज्ञभागविवर्जिताः ॥ कृच्छ्रं परमनुप्राप्ता मन्त्रं चक्रुः परस्परम् ॥ १६ ॥ हाटकेश्वरमाहात्म्यात्स्वर्गलोकः प्रपूरितः ॥ ऊर्ध्वबाहुभिराकीर्णः स्पर्धमानैः समंततः ॥ १७ ॥ तस्मात्तत्क्रियतां कर्म येनोच्छेदं प्रगच्छति ॥ तीर्थमेतद्धरापृष्ठे हाटकेश्वरसंज्ञितम् ॥ १८ ॥ ततः संवर्तको वायुः शक्रादेशात्समंततः ॥ तत्क्षेत्रं पूरयामास पांसुभिर्द्विजसत्तमाः ॥ १९ ॥ एवं नाशमनुप्राप्ते तस्मिंस्तीर्थे स्थलोच्चये ॥ जाते जाताः क्रियाः सर्वा भूयोऽपि क्रतुसंभवाः ॥ २० ॥ ततः कालेन महता वल्मीकः[1] समपद्यत ॥ तस्मिन्क्षेत्रे स पाताले संप्रयातः शनैःशनैः ॥ २१ ॥ अथ पातालतो नागास्तेन मार्गेण कौतुकात् ॥ मर्त्यलोकं समायांति भ्रमंति च धरातले ॥ २२ ॥ तत्र ते मानवान्भोगान्भुक्त्वा चैव यथेच्छया ॥ पुनर्निर्यांति तेनैव मार्गेण निजमंदिरम् ॥ २३ ॥ ततो

१ सः—वल्मीकः—'वल्मीकं पुंनपुंसकम्'—इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



नागबिलः ख्यातः स सर्वस्मिन्धरातले ॥ गतागतेन नागानां स वल्मीको द्विजोत्तमाः ॥ २४ ॥ कस्यचित्त्वथ कालस्य भगवान्पाकशासनः ॥
ब्रह्महत्यासमोपेतो निस्तेजाः समपद्यत ॥ २५ ॥ ततः पितामहादेशं लब्ध्वा मार्गेण तेन सः ॥ प्रविश्य चेक्षयामास पाताले हाट
केश्वरम् ॥ २६ ॥ अथाऽभूत्पापनिर्मुक्तस्तत्क्षणात्तस्य दर्शनात् ॥ तेजसा च समायुक्तः पुनः प्राप त्रिविष्टपम् ॥ २७ ॥ स दृष्ट्वा
तत्प्रभावं तल्लिंगं देवस्य शूलिनः ॥ हाटकेश्वरसंज्ञस्य भयं चक्रे नरोद्भवम् ॥ २८ ॥ यदि कश्चित्पुमानत्र त्रिशंकुरिव भूपतिः ॥
पूजयिष्यति तल्लिंगं विपाप्मा श्रद्धया सह ॥ २९ ॥ यापयिष्यति तन्नूनं मामस्मात्त्रिदशालयात् ॥ तस्मात्संपूरयाम्येनं मार्गं पाता
लसंभवम् ॥ ३० ॥ ततश्च त्वरया युक्तो रक्तशृंगं नगोत्तमम् ॥ प्रचिक्षेप बिले तस्मिन्स्वयमेव शतक्रतुः ॥ ३१ ॥ ॥ ऋषय ऊचुः ॥
॥ ॥ ब्रह्महत्या कथं जाता देवेन्द्रस्य महात्मनः ॥ कस्मिन्काले च सर्वं नो विस्तरात्सूत कीर्तय ॥ ३२ ॥ रक्तशृंगो गिरिः कोऽयं संक्षिप्तस्तत्र
तेन यः ॥ मानुषाणां भयं तस्य कतमस्य शचीपतेः ॥ ३३ ॥ ॥ सूत उवाच ॥ ॥ पुरा त्वष्टुर्द्विजश्रेष्ठा हिरण्यकशिपोः सुता ॥ विवा
हिता रमानाम श्रेष्ठरूपगुणान्विता ॥ ३४ ॥ अथ तस्या ययौ कालः सुप्रभूतः सुतं विना ॥ ततो वैराग्यसंपन्ना सुतार्थं तपसि स्थिता ॥
॥ ३५ ॥ ध्यायमाना सुराधीशं देवदेवं महेश्वरम् ॥ बलिपूजोपहारेण सम्यक्छ्रद्धासमन्विता ॥ ३६ ॥ नियता नियताहारा स्नानज
प्यपरायणा ॥ यच्छमाना द्विजाग्र्येभ्यो दानानि विविधानि च ॥ ३७ ॥ ततो वर्षसहस्रांते तस्यास्तुष्टो महेश्वरः ॥ उवाच वरदोऽस्मीति
वृणुष्व यदभीप्सितम् ॥ ३८ ॥ सा वव्रे मम पुत्रोऽस्तु भगवंस्त्वत्प्रसादतः ॥ शूरः शस्त्रैरवध्यश्च विप्रदानवरूपधृक् ॥ ३९ ॥ वेदाध्ययन
संपन्नो यज्ञकर्मसमुद्यतः ॥ तेजसा यशसा ख्यातः सर्वेषामपि देहिनाम् ॥ ४० ॥ ॥ भगवानुवाच ॥ ॥ भविष्यति न संदेहः पुत्रस्ते बलवा
न्सुधीः ॥ अवध्यः सर्वशस्त्राणां महातेजोभिरन्वितः ॥ ४१ ॥ यज्वा दानपतिः शूरो वेदवेदांगपारगः ॥ ब्राह्मणोक्ताः क्रियाः सर्वाः करिष्यति स
कृत्स्नशः ॥ अजेयः संगरे चैव कृत्स्नैरपि सुरासुरैः ॥ ४२ ॥ एवमुक्त्वा स देवेशस्ततश्चादर्शनं गतः ॥ ऋतौ सापि दधे गर्भं सकाशाद्विश्वकर्मणः ॥
॥ ४३ ॥ ततश्च सुषुवे पुत्रं दशमे मासि शोभनम् ॥ द्वादशार्कप्रतीकाशं सर्वलक्षणलक्षितम् ॥ ४४ ॥ तस्य चक्रे पिता नाम प्राप्ते द्वादशमे दिने ॥ ॥ ८ ॥
प्रसिद्धं वृत्र इत्येव पूजयित्वा द्विजोत्तमान् ॥ ४५ ॥ अथासौ ववृधे बालः शुक्लपक्षे यथोडुराट् ॥ पितृमातृकृतानंदो बन्धुवर्गेण लालितः ॥ ४६ ॥

२० १ शस्त्रैरवध्यश्च सदा—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततोऽस्य प्रददौ काले व्रतं[1] विप्रजनोचितम् ॥ समभ्येत्य स्वयं शुक्रो दानवस्यापि सद्विजः[2] ॥ ४७ ॥ स चापि चतुरो वेदान्ब्रह्मचारिव्रते स्थितः ॥ वेदांगैः सहितान्वृत्रः[3] पपाठ गुरुवत्सलः ॥ ४८ ॥ ततो यौवनमासाद्य भूमिपालानशेषतः ॥ जित्वा धरां वशे चक्रे पातालं तदनंतरम् ॥ ४९ ॥ ततश्चेंद्रजयाकांक्षी समासाद्य सुरालयम् ॥ सहस्राक्षमुखान्देवान्युद्धे चक्रे पराङ्मुखान् ॥ ५० ॥ अथ तेन समं वज्री[4] चक्रेऽष्टादश संयुगान् ॥ एकस्मिन्नपि नो लेभे विजयं द्विजसत्तमाः ॥ ५१ ॥ हतशेषैः सुरैः सार्धं सर्वांगक्षतविक्षतैः ॥ ततो जगाम वित्रस्तो ब्रह्मलोकं दिवालयात् ॥ ५२ ॥ वृत्रोऽपि बुभुजे कृत्स्नं त्रैलोक्यं सचराचरम् ॥ शाक्रं पदं समास्थाय निहताशेषकंटकम् ॥ ५३ ॥ यज्ञभागभुजश्चक्रे दानवान्[5]बलगर्वितान् ॥ देवस्थानेषु सर्वेषु यथोक्तेषु महाबलः ॥ ५४ ॥ एवं त्रैलोक्यराज्येऽपि लब्धे तस्य द्विजोत्तमाः ॥ न संतोषश्च संजज्ञे ब्रह्मलोकाभिकांक्षया ॥ ५५ ॥ ततः शुक्रं समाहूय प्रोवाच मधुरं वचः ॥ विनयावनतो भूत्वा चतुर्भिः सचिवैः सह ॥ ५६ ॥ ॥ वृत्र उवाच ॥ ॥ ब्रह्मलोकं[6] गतः शक्रो भयाद्गुरुकुलोद्वह[7] ॥ कथं गतिर्भवेत्तत्र मम ब्रूहि यथातथम् ॥ ५७ ॥ येन शक्रं विरिंचिं च सूदयिष्ये तथाखिलम् ॥ तुभ्यं[8] दत्त्वा ब्रह्मलोकं भोक्ष्यामि त्रिदिवं स्वयम् ॥ ५८ ॥ ॥ शुक्र उवाच ॥ ॥ न गतिर्विद्यते तत्र तव दानवसत्तम ॥ तस्मात्त्रैलोक्यराज्येन संतोषं कर्तुमर्हसि ॥ ५९ ॥ ॥ वृत्र उवाच ॥ ॥ यावत्तिष्ठति सुत्रामा तावन्नास्ति सुखं मम ॥ तस्मान्निष्कंटकार्थाय यतिष्येऽहं द्विजोत्तम ॥ ६० ॥ कथं शक्रस्य संजाता गतिस्तत्र भृगूद्वह ॥ न भविष्यति मे ब्रूहि कथं साऽद्य महामते ॥ ६१ ॥ ॥ शुक्र उवाच ॥ ॥ तेन पूर्वं तपस्तप्तं नैमिषे दानवोत्तम ॥ यावद्वर्षसहस्रांतं ध्यायमानेन शंकरम् ॥ ६२ ॥ तत्प्रभावाद्गतिस्तस्य तत्र जाता सदैव हि ॥ सभृत्यपरिवारस्य नान्यदस्तीह कारणम् ॥ ६३ ॥ योऽन्योऽपि नैमिषारण्ये तद्रूपं कुरुते[9] तपः ॥ ब्रह्मलोके गतिस्तस्य जायते नात्र संशयः ॥ ६४ ॥ ॥ सूत उवाच ॥ ॥ तच्छ्रुत्वा सत्वरं गत्वा नैमिषं तीर्थमुत्तमम् ॥ तपश्चक्रे ततस्तीव्रं ध्यायमानो महेश्वरम् ॥ ६५ ॥ त्रैलोक्यरक्षणार्थाय संनिरूप्य दनूत्तमान् ॥ महाबलसमोपेताञ्छक्राधिकपराक्रमान् ॥ ६६ ॥ वर्षास्वाकाशस्थायी स हेमन्ते सलिलाश्रयः ॥ पंचाग्निसाधको ग्रीष्मे स बभूवानिलाशनः ॥ ६७ ॥ एवं तस्य व्रतस्थस्य जग्मुर्वर्षशतानि च ॥ तत्र[10] भीतास्ततो देवा ब्रह्मविष्णुपुरःसराः ॥ ६८ ॥ चक्रुश्च सततं

१ व्रतम्–उपनयनसंस्कारम्–इत्यर्थः । २ सद्विजाः–इ०पा० । ३ विप्रैः–इ०पा० । तदा–'सह' इत्यध्याहर्तव्यम् । ४ शक्रः–इ०पा० । ५ असुरान्दानवांस्तथा–इ०पा० । ६ ब्रह्मलोके–इ०पा० । ७ गुरुकुलोद्वह–हे शुक्र–इत्यर्थः । ८ ब्रह्मलोकं प्रदायाथ–इ०पा० । ९ तप्यते–इ०पा० । १० ते च–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



मंत्रं तद्विनाशाय[1] केवलम् ॥ वीक्षयंति च च्छिद्राणि न च पश्यंति दुःखिताः ॥ ६९ ॥ अथाब्रवीत्स्वयं विष्णुश्चिरं निश्चित्य चेतसा ॥ वधो
पायं समालोक्य वृत्रस्य प्रमुदान्वितः ॥ ७० ॥ ॥ विष्णुरुवाच ॥ ॥ तस्य शक्र वधोपायो मया ज्ञातोऽधुना ध्रुवम् ॥ तच्छुत्वा कुरु शीघ्रं
त्वमुपायो नास्ति कश्चन ॥ ७१ ॥ अवध्यः सर्वशस्त्राणां स कृतः शूलपाणिना ॥ तस्मादस्थिमयं वज्रं तद्वधार्थं निरूपय ॥ ७२ ॥ ॥ इन्द्र
उवाच ॥ ॥ अस्थिभिः कस्य जीवस्य वज्रं देव भविष्यति ॥ गजस्य शरभस्याथ किं वान्यस्य वदस्व मे ॥ ७३ ॥ ॥ विष्णुरुवाच ॥ ॥
शतहस्तप्रमाणं तत्षडस्त्रि[2] च सुराधिप ॥ मध्ये क्षामं तु पार्श्वाभ्यां स्थूलं रौद्रसमाकृति ॥ ७४ ॥ ॥ इंद्र उवाच ॥ ॥ न तादृग्दृश्यते सत्त्वं
त्रैलोक्येपि सुरेश्वर ॥ यस्यास्थिभिर्विधीयेत वज्रमेवंविधाकृति ॥ ७५ ॥ ॥ विष्णुरुवाच ॥ ॥ दधीचिर्नाम विप्रोऽस्ति तपः परममा
स्थितः ॥ द्विगुणं च तथा दीर्घः सरस्वत्यां कृताश्रमः ॥ ७६ ॥ तं गत्वा प्रार्थयाशु त्वं स्वान्यस्थीनि प्रदास्यति ॥ नादेयं विद्यते किंचित्तस्य
संप्रार्थितस्य हि ॥ ७७ ॥ ततः शक्रः सुरैः सार्धं गत्वा तस्य तदाश्रमम् ॥ प्राचीसरस्वतीतीरे पुष्करे द्विजसत्तमाः ॥ ७८ ॥ अथ देवान्समा
लोक्य संप्राप्तान्निजमंदिरे ॥ दधीचिः संप्रहृष्टात्मा सत्वरः संमुखं ययौ ॥ ७९ ॥ स प्रणम्य सहस्राक्षं तथान्यानपि सन्मुनिः ॥ अर्घ्यादिभि
स्ततः पूजां चक्रे तेषां ततः परम् ॥ ८० ॥ ततः प्रोवाच हृष्टात्मा विनयावनतः स्थितः ॥ स्वयमेव सहस्राक्षं प्रणिपत्य मुहुर्मुहुः ॥ ८१ ॥
॥ ॥ दधीचिरुवाच ॥ ॥ किमर्थमागता देवाः कृत्यं चाशु निवेद्यताम् ॥ धन्योऽहमागतो यस्य गृहे त्वं बलसूदन[3] ॥ ८२ ॥ ॥ शक्र
उवाच ॥ ॥ वृत्रेण निर्जिताः सर्वे वयं ब्राह्मणसत्तम ॥ स वध्यो नहि शस्त्राणां सर्वेषां वरपुष्टितः ॥ ८३ ॥ सोऽस्थिसंभववज्रस्य वध्यः स्याद
ब्रवीद्धरिः ॥ शतहस्तप्रमाणस्य न च जीवोस्ति[4] तादृशः ॥ ८४ ॥ त्वां मुक्त्वा ब्राह्मणश्रेष्ठ तस्मादस्थीनि यच्छ नः ॥ स्वकीयानि भवेद्येन वज्रं
तस्य विनाशकम् ॥ ८५ ॥ कुरु कृत्यं[5] द्विजश्रेष्ठ देवानामार्तिनाशनम् ॥ अन्यथा विबुधाः सर्वे नाशं यास्यंति कृत्स्नशः ॥ ८६ ॥ ॥ सूत
उवाच ॥ तच्छुत्वा संप्रहृष्टात्मा दधीचिर्भगवान्मुनिः ॥ अत्यजज्जीवितं तेषां हितार्थाय दिवौकसाम् ॥ ८७ ॥ ततो देवाः प्रहृष्टास्ते गृहीत्वास्थीनि
कृत्स्नशः ॥ ततश्चक्रुर्महावज्रं यादृशं विष्णुनोदितम्[6] ॥ ८८ ॥ अथ शक्रस्तदादाय नैमिषाभिमुखो ययौ ॥ भयेन महता युक्तो वेपमानो निशा

१ तस्य नाशाय--इ० पा० । २ षडस्त्रि--षट्कोणम्--इत्यर्थः । ३ बलिसूदन--इ०, मधुसूदन--इ० च पा० परं मूलस्थ एव पाठः शक्रविशेषणत्वात्समीचीनः । ४ जातोऽस्ति--इ० पा०। ५ पुण्यम्--इ० पा०।
६ विष्णुना उदितम्--इति पदच्छेदः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गमे ॥ ८९ ॥ तत्र ध्यानस्थितं वृत्रं दूरस्थस्त्रिदशाधिपः ॥ वज्रेण ताडयामास पलायनपरायणः ॥ ९० ॥ सो[1]ऽपि वज्रप्रहारेण भस्मसात्सम पद्यत ॥ वृत्रो दानवशार्दूलो वह्निं प्राप्य पतंगवत् ॥ ९१ ॥ शक्रोऽपि भयसंत्रस्तो गत्वा सागरमध्यगम् ॥ पर्वतं सुदुरारोहं तुंगशृंगं समाश्रितः ॥ ॥ ९२ ॥ न जानाति हतं वृत्रं वज्रघातेन तेन[2] तम् ॥ केवलं वीक्षते मार्गं वृत्रागमनसंभवम् ॥ ९३ ॥ एतस्मिन्नंतरे देवाः संप्रहृष्टतनूरुहाः ॥ वृत्रं विनिहतं दृष्ट्वा तुष्टुवुस्त्रिदशाधिपम् ॥ ९४ ॥ न जानंति भयान्नष्टं तस्मिन्सागरपर्वते ॥ अन्विष्य चिरकालेन कृच्छ्रात्संप्राप्य तं ततः॥ ९५ ॥ वीक्षांचक्रुः[3] समासीनं विषमे गिरिगह्वरे ॥ तेजोहीनं तथा दीनं ब्रह्महत्यापरिप्लुतम् ॥ ९६ ॥ गात्रदुर्गंधितासंगैः पूरयन्तं दिशो दश ॥ ९७ ॥ अथोवाच चतुर्वक्रो दृष्ट्वा शक्रं तथाविधम् ॥ समस्तान्देवसंघातान्दूरस्थः पापशंकया ॥ ९८ ॥ शक्रोऽयं विबुधश्रेष्ठा ब्रह्महत्यापरिप्लुतः ॥ तस्मात्त्याज्यः सुदूरेण नो चेत्पापमवाप्स्यथ ॥ ९९ ॥ पश्यध्वं सर्वलिंगानि ब्रह्महत्यान्वितानि च ॥ अस्य गात्रेषु दृश्यंते तस्माद्गच्छामहे दिवि ॥ १०० ॥ पितामहमुखान्दृष्ट्वा देवान्प्राप्तान्सुराधिपः ॥ पराङ्मुखानकस्माच्च संजातान्विस्मयान्वितः ॥१०१॥ ततः प्रोवाच संभ्रांतः किमिदं गम्यते सुराः ॥ दृष्ट्वापि मामनाभाष्य कच्चित्क्षेमं गृहे मम ॥ १०२ ॥ कच्चित्स निहतस्तेन मम वज्रेण दानवः ॥ कच्चिन्न मां स युद्धार्थमन्वेष यति दुर्मतिः ॥ १०३ ॥ ॥ ब्रह्मो[4]वाच ॥ ॥ निहतः स त्वया शक्र तेन वज्रेण दानवः ॥ गतो मृत्युवशं पापो न भयं कर्तुमर्हसि ॥ १०४ ॥ परं तस्य वधाज्जाता ब्रह्महत्या सुगर्हिता ॥ तव शक्र न तेनाद्य स्पृशामोऽस्पृश्यतां गतम्[5] ॥ १०५ ॥ ॥ इन्द्र उवाच ॥ ॥ मया विनिहताः पूर्वं बहवः किल दानवाः ॥ ब्रह्महत्या न संजाता मम[6] हत्याधुना कथम् ॥ १०६ ॥ ॥ ब्रह्मोवाच ॥ ॥ ते त्वया निहता युद्धे क्षात्रधर्मेण वासव ॥ विशुद्धा दानवाः सर्वे तेन जातं न पातकम् ॥ १०७ ॥ एष यज्ञोपवीताढ्यो विशेषात्तपसि स्थितः ॥ छलेन निहतः शक्र तेन त्वं पापसंयुतः ॥ १०८ ॥ ॥ ॥ इन्द्र उवाच ॥ ॥ जानाम्यहं चतुर्वक्र स्वं कायं पापसंयुतम् ॥ चिह्नैर्ब्रह्मवधोद्भूतैस्तस्माच्छुद्धिं वदस्व मे ॥ १०९ ॥ यया यानि द्रुतं पापं ब्रह्महत्यासमुद्भवम् ॥ स्पृश्यो भवामि सर्वेषां देवानां प्रपितामह ॥ ११० ॥ ॥ ब्रह्मोवाच ॥ ॥ तीर्थयात्रां सुरश्रेष्ठ तदर्थं कर्तुमर्हसि ॥ तयाँ[7] विना न ते पापं नाशमायाति कृत्स्नशः ॥ १११ ॥ ॥ सूत उवाच ॥ ॥ ततस्तद्व[8]चनाच्छक्रस्तीर्थयात्रापरायणः ॥ बभ्राम सकलां पृथ्वीं

१ ततो वज्रप्रहारेण–इ० पा० । २ तं किल–इ० पा० । ३ परस्मैपदमार्षम्--वीक्षांचक्रिरे--इत्यपेक्षितम् । ४ देवा ऊचुः--इ० पा० । ५ त्वाम्–इति शेषः । ६ तदा जाता–इ० पा० । ७ तया विना–तीर्थयात्रया विना–इत्यर्थः । तस्माद्विना–इ० पा० । ८ तद्वचनं श्रुत्वा--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



स्नानं कुर्वन्पृथक्पृथक् ॥ ११२ ॥ तीर्थेषु सुप्रसिद्धेषु नदीनदयुतेषु च ॥ वाराणस्यां प्रयागे च प्रभासे कुरुजांगले ॥ ११३ ॥ तथान्येषु
सहस्राक्षो विपाप्मा न व्यजायत ॥ ततो वैराग्यमापन्नश्चिन्तयामास चेतसि ॥११४॥ अहं स्नातः समस्तेषु तीर्थेषु धरणीतले ॥ न च पापेन निर्मुक्तः
किं करोमि च सांप्रतम् ॥ ११५ ॥ किं पतामि गिरेः शृंगाद्विषं वा भक्षयामि किम् ॥ त्रैलोक्यराज्यविभ्रष्टो नाहं जीवितुमुत्सहे ॥ ११६ ॥
एवं वैराग्यमापन्नो गिरिमारुह्य वासवः ॥ यावत्क्षिपति चात्मानं मरणे कृतनिश्चयः ॥ ११७ ॥ तावद्देवोत्थिता वाणी गगनाद्द्विजसत्तमाः ॥
मा शक्र साहसं कार्षीर्वैराग्यं प्राप्य चेतसि ॥ ११८ ॥ त्वया राज्यं प्रकर्तव्यं स्वर्गेऽद्यापि युगाष्टकम् ॥ तस्मात्पापविशुद्ध्यर्थं शृणु शक्र समा
हितः ॥ ११९ ॥ कुरुष्व वचनं शीघ्रं [1]भावनीयं न चान्यथा ॥ यत्त्वया पांसुभिः पूर्वं विवरः परिपूरितः[2] ॥ १२० ॥ हाटकेश्वरजे क्षेत्रे यत्र
देवः स्वयं हरः ॥ तत्र नागबिलो जातो वल्मीकात्त्रिदशाधिप ॥ १२१ ॥ येन नागा धरापृष्ठे निर्गच्छंति व्रजंति च ॥ तेन मार्गेण गत्वा त्वं
पाताले हाटकेश्वरम् ॥ स्नात्वा पातालगंगायां [3]पूजयस्व महेश्वरम् ॥ १२२ ॥ ततः पापविनिर्मुक्तो भविष्यसि न संशयः ॥ संप्राप्स्यसि
च भूयोऽपि देवराज्यमकण्टकम् ॥ १२३ ॥ ॥ सूत उवाच ॥ ॥ अथ शक्रः समाकर्ण्य तां गिरं गगनोत्थिताम् ॥ जगाम सत्वरं
तत्र यत्र नागबिलः स च ॥ १२४ ॥ ततः प्रविश्य पातालं गंगातोयपरिप्लुतः ॥ पूजयामास तल्लिंगं हाटकेश्वरसंज्ञितम् ॥ १२५ ॥ अथ तस्य
क्षणाज्जातं शरीरं मलवर्जितम् ॥ दुर्गन्धश्च गतो नाशं तेजोवृद्धिर्बभूव ह ॥ १२६ ॥ एतस्मिन्नंतरे प्राप्ता ब्रह्मविष्णुमुखाः सुराः ॥ प्रोचुश्च देवराजं
तं मुक्तपापं प्रहर्षिताः ॥ १२७ ॥ प्राप्तस्तु मेध्यतां शक्र विमुक्तो ब्रह्महत्यया ॥ तस्मा[4]दागच्छ गच्छामः सहितास्त्रिदशालयम् ॥ १२८ ॥ एतन्नाग
बिलं शक्र पुनः पूरय पांसुभिः ॥ नो चेदागत्य चानेन मानुषाः सिद्धिहेतवः ॥ १२९ ॥ एतल्लिंगं समभ्यर्च्य स्नात्वा भागीरथीजले ॥ अपि
पापसमायुक्ता यास्यंति परमां गतिम् ॥ १३० ॥ ततस्ते त्रिदशाः सर्वे स च देवं शतक्रतुः ॥ प्रणिपत्य पुनः प्रोच्चैः प्रजग्मुस्त्रिदशालयम् ॥१३१॥
ततो जज्ञे महांस्तत्र स्वर्गे वृत्रवधोत्सवः ॥ देवेन्द्रत्वमनुप्राप्ते पुनः शक्रे द्विजोत्तमाः ॥ १३२ ॥ ॥ सूत उवाच ॥ ॥ एतद्वः सर्वमाख्यातं हाट
केश्वरसंभवम् ॥ माहात्म्यं ब्राह्मणश्रेष्ठाः सर्वपातकनाशनम् ॥ १३३ ॥ यश्चैतत्कीर्तयेद्भक्त्या शृणोति च समाहितः ॥ स याति परमं स्थानं जरा

१ पावनीयम्–इ० पा० । २ पूरितस्तदा–इ० पा० । ३ तं पूजय–इ० पा० । ४ गच्छ महाभाग–इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मरणवर्जितम् ॥ १३४ ॥ इति श्रीस्कांदे महापुराण एाकशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये वृत्रवधवर्णनंनामाष्टमो
ऽध्यायः ॥ ८ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ अथ शक्रः समाहूय प्रोचे संवर्तकानिलम् ॥ हाटकेश्वरजे क्षेत्रे महान्नागबिलोऽस्ति वै ॥ १ ॥ तं पूरय
ममादेशाद्द्रुतं गत्वाऽभिपांसुभिः ॥ येन न स्याद्गतिस्तत्र कस्यचिन्मृत्युधर्मिणः ॥२॥ ॥ वायुरुवाच ॥ ॥ तवादेशान्मया पूर्वं पूरितो विवरो यदा ॥
लिंगोद्भवस्तदा शापः प्रदत्तो मे पुरारिणा ॥ ३ ॥ यस्माल्लिंगं ममैतद्वै त्वया पांसुभिरावृतम् ॥ तस्मात्समानधर्मा त्वं गन्धवाहो भविष्यसि ॥ ४ ॥
यद्वत्कर्पूरजं गन्धं समग्रं त्वं हि वक्ष्यसि ॥ अमेध्यसंभवं तद्वन्मम वाक्यादसंशयम् ॥५॥ तस्मात्कुरु प्रसादं मे विदित्वैतत्सुरेश्वर ॥ कृत्येऽस्मिन्स्म
र्यतामन्यस्त्रिपुरारेर्बिभेम्यहम् ॥६॥ ततः संचिंतयामास पूरणं त्रिदशाधिपः ॥ तस्य नागबिलस्यैव नैव किंचिदवैक्षत ॥७॥ ततस्तं प्राह देवेज्यः स्वय
मेव शतक्रतुम् ॥ कस्मात्त्वं व्याकुलीभूतः कृत्येऽस्मिंस्त्रिदशाधिप ॥ ८ ॥ अस्ति पर्वतमुख्योऽत्र नाम्ना ख्यातो हिमालयः ॥ तस्य पुत्रत्रयं जातं तच्च
शक्र शृणुष्व मे ॥ ९ ॥ मैनाकः प्रथमः प्रोक्तो द्वितीयो नंदिवर्धनः ॥ रक्तशृंगस्तृतीयस्तु पर्वतः परिकीर्तितः ॥ १० ॥ स मैनाकः समुद्रांतः प्रविष्टः
शक्र ते भयात् ॥ पक्षाभ्यां सहितोऽद्यापि स तत्रैव व्यवस्थितः ॥ ११ ॥ नंदिवर्धन इत्येषं द्वितीयः परिकीर्तितः ॥ वसिष्ठाश्रमजो रन्ध्रस्ते
न कृत्स्नः प्रपूरितः ॥ १२ ॥ हिमाचलसमादेशाद्वसिष्ठस्य च सन्मुनेः ॥ देवभूमिं परित्यज्य स गतस्तत्र सत्वरम् ॥ १३ ॥ तृतीयस्ति
ष्ठतेऽद्यापि रक्तशृंगः स्मृतोऽत्र यः ॥ तमानय सहस्राक्ष बिलं सार्पं प्रपूरय ॥ १४ ॥ नान्यथा पूरितुं शक्यो बिलोऽयं त्रिदशाधिप ॥ तं मुक्त्वा पर्वत
श्रेष्ठं सत्यमेतन्मयोदितम् ॥ १५ ॥ ॥ सूत उवाच ॥ तच्छ्रुत्वा देवपूज्यस्य वचनं त्रिदशाधिपः ॥ जगाम सत्वरं तत्र स यत्रास्ते हिमालयः ॥
॥ १६ ॥ ततः प्रोवाच तं गत्वा सामपूर्वमिदं वचः ॥ हिमाचलं गिरिश्रेष्ठं सिद्धचारणसेवितम् ॥ १७ ॥ ॥ इन्द्र उवाच ॥ ॥ हाटकेश्वरजे
क्षेत्रे महान्नागबिलः स्थितः ॥ तेन गत्वा नरा देवं पाताले हाटकेश्वरम् ॥ १८ ॥ पूजयिष्यंति ये केचिदपि पापपरायणाः ॥ मया सार्धं करिष्यंति
ततः स्पर्द्धां नगोत्तम ॥ १९ ॥ तस्मात्पुत्रमिमं तत्र रक्तशृंगं हिमालय ॥ प्रेषयस्व बिलो येन पूर्यते सोऽहिसंभवः ॥ २० ॥ कुरुष्व त्वं ममातिथ्यं
गृहप्राप्तस्य पर्वत ॥ आत्मपुत्रप्रदानेन कीर्तिं प्राप्स्यस्यलौकिकीम् ॥ २१ ॥ बाढमित्येव सोऽप्युक्त्वा पूजयित्वा च देवपम् ॥ ततः प्रोवाच तं
पुत्रं रक्तशृंगं हिमालयः ॥ २२ ॥ तत्रार्थाय सहस्राक्षः पुत्र प्राप्तो ममांतिकम् ॥ तस्माद्गच्छ द्रुतं तत्र यत्र नागबिलः स्थितः ॥ २३ ॥ पूरयित्वा

१ एव–इ० पा० । २ शतक्रतुर्हिमाचलम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





ममादेशात्तं त्वं शक्रस्य कृत्स्नशः ॥ सुखीभव सहानेन तथान्यैः सुरसत्तमैः ॥ २४ ॥ ॥ रक्तशृंग उवाच ॥ ॥ नाहं तत्र गमिष्यामि मर्त्ये भूमौ कथंचन ॥ यत्र कण्टकिनो वृक्षा रूक्षाः फलविवर्जिताः ॥ २५ ॥ न सिद्धा न च गंधर्वा न देवा न च किंनराः ॥ नच तीर्थानि रम्याणि न नद्यो विमलोदकाः ॥ २६ ॥ तथा पापसमाचारा मनुष्याः शीलवर्जिताः ॥ दुष्टचित्ताः सदा सर्वे तिर्यग्योनिगता अपि ॥ २७ ॥ तथा मम नगश्रेष्ठ पक्षौ द्वावपि कर्तितौ ॥ शक्रेण तेन नो शक्तिर्गंतुमस्ति कथंचन ॥ २८ ॥ तस्मात्कंचित्सहस्राक्ष उपायं तत्कृते परम् ॥ चिंतयत्वेव मां मुक्त्वा सत्यमेतन्मयोदितम् ॥ २९ ॥ ॥ शक्र उवाच ॥ ॥ अहं त्वां तत्र नेष्यामि स्वहस्तेन विदारितम् ॥ तत्रापि सुशुभा वृक्षा भविष्यंति तवा श्रयाः ॥ ३० ॥ तथा पुण्यानि तीर्थानि देवतायतनानि च ॥ समंतात्ते भविष्यंति मुनीनामाश्रमास्तथा ॥ ३१ ॥ अत्रस्थस्य प्रभावो यस्तव पर्वत नंदन ॥ मद्वाक्यात्तत्र संस्थस्य कोटिसंख्यो भविष्यति ॥ ३२ ॥ तथा ये मानवास्तत्र पापात्मानोऽपि भूतले ॥ विपाप्मानो भविष्यंति सहसा तव दर्शनात् ॥ ३३ ॥ तस्माद्गच्छ द्रुतं तत्र मया सार्धं नगात्मज ॥ न चेद्वज्रप्रहारेण करिष्यामि सहस्रधा ॥ ३४ ॥ ॥ सूत उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा रक्तशृंगो भयान्वितः॥ प्रविष्टः सहसागत्य तस्मिन्नागबिले गतः ॥ ३५ ॥ निमग्नो ब्राह्मणश्रेष्ठा नासाग्रं यावदेव हि ॥ शृंगैर्मनोरमैस्तुं गैः समग्रैः सहितस्तदा ॥ वृक्षगुल्मलताकीर्णैं रम्यपक्षिनिषेवितैः ॥ ३६ ॥ एवं संस्थाप्य तं शक्रो हिमाचलसुतं नगम् ॥ ततः प्रोवाच सहृष्टो वरो मत्तः प्रगृह्यताम् ॥ ३७ ॥ ॥ रक्तशृंग उवाच ॥ ॥ एष एव वरोऽस्माकं यत्त्वं तुष्टः सुरेश्वर ॥ किं वरेण करिष्यामि त्वत्प्रसादादहं सुखी ॥ ३८ ॥ ॥ ॥ इन्द्र उवाच ॥ ॥ न वृथा दर्शनं मे स्यादपि स्वप्ने नगात्मज ॥ किं पुनर्दर्शने जाते कृते कृत्ये विशेषतः॥३९॥ ॥ रक्तशृंग उवाच ॥ ॥ अवश्यं यदि देयो मे वरः सर्वसुराधिप ॥ विभवो मे द्विजार्थाय सर्वः स्यात्सर्वदा विभो ॥४०॥ ॥ इन्द्र उवाच ॥ ॥ भविष्यति महीपालश्चमत्कार इति स्मृ तः ॥ तव मूर्धनि विप्रार्थं स पुरं स्थापयिष्यति ॥ ४१ ॥ तत्र ब्राह्मणशार्दूला वेदवेदांगपारगाः॥ विभवं तव निःशेषं भजिष्यंति प्रहर्षिताः ॥ ४२ ॥ तथाहं चैत्रमासस्य चतुर्दश्यां नगात्मज ॥ कृष्णायां स्वयमागत्य शृंगे मुख्यतमे तव॥४३॥पूजयिष्यामि देवेशं हाटकेश्वरसंज्ञितम् ॥ सर्वैर्देवगणैः सार्धं तथा किंनरगुह्यकैः ॥४४॥ तमेकं दिवसं चात्र शृंगे तव हरः स्वयम् ॥ अस्माभिः सहितस्तुष्टो निवासं प्रकरिष्यति ॥ ४५ ॥ प्रभावस्तेन ते मुख्य स्त्रैलोक्येऽपि भविष्यति ॥ स्वस्ति तेऽस्तु गमिष्यामि सांप्रतं त्रिदिवालयम् ॥४६॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वा सहस्राक्षस्ततः प्राप्तस्त्रिविष्टपम् ॥ रक्त



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शृंगोऽपि तस्थौ च व्याप्य नागबिलं तदा ॥४७॥ तस्योपरि सुमुख्यानि तीर्थान्यायतनानि च ॥ संजातानि मुनीनां च संजाताश्च तथाऽऽश्रमाः ॥
॥४८॥इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये नागबिलपूर्तिवर्णनंनाम नवमोऽध्यायः॥९॥
॥ सूत उवाच ॥ आनर्त्ताधिपतिर्भूपश्चमत्कार इति स्मृतः ॥ एतस्मिन्नंतरे प्राप्तस्तत्र हंतुं वने मृगान् ॥१॥ स ददर्श मृगीं दूरान्निश्चलांगीं तरोरधः ॥
स्तनं सुताय यच्छंतीं विश्वस्तामकुतोभयाम् ॥ २ ॥ अथ तां पार्थिवस्तूर्णं शरेणानतपर्वणा ॥ जघानाकर्णकृष्टेन मर्मस्थाने प्रहर्षितः ॥ ३ ॥
सहसा सा हता तेन गार्द्धपत्रेण पत्रिणा ॥ दिशो विलोकयामास समंताद्व्यथयार्दिता ॥ ४ ॥ अथ दृष्ट्वा महीपालं नातिदूरे धनुर्धरम् ॥ प्रोवाचा
श्रुपरिक्लिन्नवदना सुतवत्सला ॥ ५ ॥ ॥ मृग्युवाच ॥ ॥ अयुक्तं पृथिवीपाल यत्त्वयैतदनुष्ठितम् ॥ हताऽहं बालवत्साऽद्य शरेणानतपर्वणा ॥६॥
नाऽहं शोचामि भूपाल मरणं स्वशरीरगम् ॥ यथेमं बालकं दीनं क्षीरास्वादनलंपटम् ॥ ७ ॥ यस्मात्त्वयेदृशं कर्म निर्दयं समनुष्ठितम् ॥ कुष्ठव्या
धिसमायुक्तस्तस्मात्सद्यो भविष्यसि ॥ ८ ॥ ॥ राजोवाच ॥ ॥ स्वधर्म एष भूपानां कुर्वंति मृगसंक्षयम् ॥ तस्मात्स्वधर्मसंयुक्तं न मां त्वं शप्तु
मर्हसि ॥ ९ ॥ ॥ मृग्युवाच ॥ ॥ सत्यमेतन्महीपाल यत्त्वया परिकीर्तितम् ॥ क्षत्रियाणां वधार्थाय मृगाः सृष्टाः स्वयंभुवा ॥ १० ॥ परं तेन
विधिस्तेषां कृतो यस्तं महीपते ॥ शृणुष्वाऽवहितो भूत्वा वदंत्या मम सांप्रतम् ॥ ११ ॥ सुप्तं मैथुनसंयुक्तं स्तनपानक्रियोद्यतम् ॥ हत्वा मृगं जला
सक्तं नरः पापेन लिप्यते ॥ १२ ॥ एतस्मात्कारणाच्छापस्तव दत्तो मया नृप ॥ न कामतो न मृत्योर्वा सत्येनात्मानमालभे ॥ १३ ॥ एव
मुक्त्वा मृगी प्राणान्सा मुमोच व्यथान्विता ॥ कुष्ठव्याधिसमायुक्तः सोऽपि राजा बभूव ह ॥ १४ ॥ स दृष्ट्वा कुष्ठसंयुक्तं पार्थिवः स्वं कलेवरम् ॥ ततः
स्वान्सेवकानाह समाहूय सुदुःखितः ॥ १५ ॥ अहं तपश्चरिष्यामि पूजयिष्यामि शंकरम् ॥ तावद्यावत्प्रणाशो मे कुष्ठव्याधेर्भविष्यति ॥ १६ ॥
यत्किंचित्त्रिषु लोकेषु प्रार्थयंति नराः सुखम् ॥ तत्सर्वं तपसा साध्यं तस्मात्कार्यं मया तपः ॥ १७ ॥ अधुनैकोऽहमेकाहमेकैकस्मिन्वनस्पतौ ॥
चरन्भैक्षं तु[1] नियमैश्चरिष्यामि धरातले॥१८॥ पांसुना समवच्छन्ने शून्यागारे प्रतिश्रयः ॥ वृक्षमूलनिकेते वा मुक्तसर्वप्रियाप्रियः॥१९॥ समः शत्रुषु
मित्रेषु समलोष्टाश्मकांचनः ॥ भूत्वा कालं नयिष्यामि यावत्कालस्य संस्थितिः ॥२०॥ एवं तान्सेवकान्भूपः सोऽभिधाय विसृज्य च ॥ तीर्थयात्रा
परो भूत्वा बभ्राम वसुधातले ॥ २१ ॥ ततः कालेन महता प्राप्य विप्रसमुद्भवम् ॥ उपदेशं नृपः प्राप्तः शंखतीर्थं महोदयम् ॥ २२ ॥ हाटकेश्वरजे

१ चरन्भैक्षं मुनिर्मौनी चरिष्यामि तपस्तथा—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





क्षेत्रे सर्वव्याधिविनाशकम् ॥ विख्यातं त्रिषु लोकेषु पूरितं स्वच्छवारिणा ॥ २३ ॥ तत्राऽसौ स्नानमात्रेण तत्क्षणात्पार्थिवोत्तमः ॥ कुष्ठव्याधिविनिर्मुक्तः संजातः सुमहाद्युतिः ॥ २४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शंखतीर्थमाहात्म्ये चमत्कारनृपतिकुष्ठनिवृत्तिवृत्तान्तवर्णनंनाम दशमोऽध्यायः ॥ १० ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ चमत्कारः कथं राजा मुक्तः कुष्ठेन सूतज ॥ कथं तेन तपस्तप्तं कियत्कालं च भूभुजा ॥ १ ॥ कतमे ब्राह्मणास्ते वै शंखतीर्थं प्रदर्शितम् ॥ यैस्तस्य रोगमुक्त्यर्थं दुःखितस्य महात्मनः ॥ २ ॥ कतमं शंखतीर्थं तत्कस्मिन्स्थाने व्यवस्थितम् ॥ किंप्रभावं च निःशेषं सर्वं विस्तरतो वद ॥ ३ ॥ ॥ सूत उवाच ॥ ॥ अहं वः कीर्तयिष्यामि कथामेतां मनोहराम् ॥ सर्वपापहरां विप्राश्चमत्कारनृपोद्भवाम् ॥ ४ ॥ स भ्रांतः सर्वतीर्थानि प्रभासाद्यानि कृत्स्नशः ॥ तपस्वी नियताहारो भिक्षान्नकृतभोजनः ॥५॥ पृच्छमानो भिषग्मुख्यानौषधानि मुहुर्मुहुः ॥ मंत्रान्मंत्रविदश्चैव रोगनाशाय नित्यशः ॥ ॥ ६ ॥ न लेभे किंचिदिष्टं वा स मंत्रं भेषजं च वा ॥ तीर्थं वा नृपशार्दूलो येन स्याद्व्याधिसंक्षयः ॥ ७ ॥ ततश्च पार्थिवश्रेष्ठो वैराग्यं परमं गतः ॥ एकाकी यतचित्तात्मा सर्वसत्त्वविराजिते ॥ ८ ॥ निवासमकरोत्तस्मिन्क्षेत्रे पुण्यतमे चिरम् ॥ शीर्णपर्णफलाहारो भूमौ शेते सदा निशि ॥ अन्यस्याऽन्यस्य वृक्षस्य मदाहंकारवर्जितः ॥ ९ ॥ ततः कतिपयाहस्य भ्रममाणो महीपतिः ॥ सोऽपश्यद्ब्राह्मणश्रेष्ठांस्तीर्थयात्राश्रयान्बहून् ॥ १० ॥ ततः प्रणम्य तान्विप्रां[१]नुपविष्टान्धरातले ॥ विश्वामित्राश्रमस्यांते प्रोवाच विनयान्वितः ॥११॥ ॥ राजोवाच ॥ ॥ अहं नाम्ना चमत्कारः पार्थिवः सूर्यवंशजः ॥ आनर्त्ताधिपतिर्व्याप्तः कुष्ठेन द्विजसत्तमाः ॥१२॥ अस्ति कश्चिदुपायोऽत्र दैवो वा मानुषोऽपि वा ॥ भेषजं वाऽथ मंत्रो वा येन कुष्ठं प्रशाम्यति ॥ १३ ॥ ममोपरि दयां कृत्वा वदध्वं द्विजसत्तमाः ॥ कुष्ठग्रस्तशरीरं च परं कृच्छ्रमुपागतम् ॥१४॥ अथवा वित्थ नो यूयं त्यक्ष्यामीह कलेवरम् ॥ प्रविश्याग्निं जलं वाऽपि भक्षयित्वाऽथ वा विषम् ॥ १५ ॥ तस्य तद्वचनं श्रुत्वा सर्वे ते द्विजसत्तमाः ॥ प्रोचुः कृपासमाविष्टास्ततस्तं पृथिवीश्वरम् ॥ १६ ॥ अस्ति पार्थिवशार्दूल स्थानादस्माददूरतः ॥ शंखतीर्थमिति ख्यातं सर्वरोगक्षयावहम्[२] ॥ १७ ॥ ये नरा व्याधिना ग्रस्ताः काणाश्चांधास्तथा जडाः ॥ हीनांगाश्चाऽधिकांगाश्च कुरूपा विकृताननाः ॥ १८ ॥ तेऽपि चैत्रस्य कृष्णादौ स्नातास्तत्राकृताशनाः ॥ भवंति नीरुजः सद्यश्चित्रासंस्थे निशाकरे ॥ १९ ॥ अस्माभिः शतशो दृष्टा द्वादशार्कसमप्रभाः ॥ कामदेवसमाकारास्तेजोवीर्यसमायुताः ॥ २० ॥



१ सर्वान्–इ० पा० । २ सर्वरोगभयावहम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ राजोवाच ॥ ॥ शंखतीर्थं कथं ज्ञेयं मया ब्राह्मणसत्तमाः ॥ कथं चैव समुत्पन्नं वदध्वं मम विस्तरात् ॥ २१ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ आसीत्पूर्वं मुनिश्रेष्ठो लिखिताख्यो महीतले ॥ शांडिल्यस्य मुनेः पुत्रस्तपोवीर्यसमन्वितः ॥ २२ ॥ अथ तस्यानुजो जज्ञे शंखाख्यो धर्मशास्त्रवित् ॥ कन्दमूलफलाहारः सदैव तपसि स्थितः ॥ २३ ॥ कस्यचित्त्वथ कालस्य लिखितस्याऽऽश्रमं ययौ ॥ शंखः स्वादुफलार्थाय पीडितोतिबुभुक्षया ॥ २४ ॥ स शून्यमाश्रमं प्राप्य लिखितस्य महात्मनः ॥ आत्मीयानीति मन्वानः फलानि जगृहे ततः ॥ २५ ॥ भक्षयामास भूरीणि पक्वानि मधुराणि च ॥ एतस्मिन्नन्तरे प्राप्तो लिखितः शिष्यसंयुतः ॥ २६ ॥ स गृहीतफलं दृष्ट्वा शंखं प्रोवाच कोपतः ॥ २७ ॥ अदत्तानि मया पाप फलानि हृतवानसि ॥ कस्मात्त्वं चौर्यरूपेण नानुबन्धमवेक्षसे ॥ २८ ॥ ॥ शंख उवाच ॥ ॥ ॥ सत्यमेतद्द्विजश्रेष्ठ यत्त्वया परिकीर्तितम् ॥ फलानि प्रगृहीतानि विजनेऽत्र तवाश्रमे ॥ २९ ॥ तस्मात्कुरु यथार्हं मे निग्रहं चौर्यसंभवम् ॥ इह लोकः परश्चैव येन मे स्यात्सुखावहः ॥ ३० ॥ ततः स हस्तमादाय हस्ते शंखस्य तत्क्षणात् ॥ चकर्त कोपमाविष्टो वार्यमाणोऽपि तापसैः ॥ ॥ ३१ ॥ छिन्नहस्तोऽपि शंखस्तु तपश्चक्रे सुदारुणम् ॥ विशेषेण समासाद्य स्वाश्रमे भूय एव तु ॥ ३२ ॥ ततस्तुष्टो महादेवस्तस्य कालेन केन चित् ॥ प्रोवाच दर्शनं गत्वा तं च शंखमुनीश्वरम् ॥ ३३ ॥ ॥ महेश्वर उवाच ॥ ॥ भोभो मुने महासत्त्व दुष्करं कृतवानसि ॥ वरं गृहाण मत्तस्त्वं मनसा समभीप्सितम् ॥ ३४ ॥ ॥ शंख उवाच ॥ ॥ यदि तुष्टोसि मे देव वरं चेद्यच्छसि प्रभो ॥ स्यातां मे तादृशौ हस्तौ भूयोऽपि सुरसत्तम ॥ ३५ ॥ तथेदं मम नामांकं तीर्थं स्यात्सुरसत्तम ॥ विख्यातं सर्वलोकेषु सर्वपापहरं नृणाम् ॥ ३६ ॥ हीनांगो वाधिकांगो वा व्याधिना ग्रस्त एव च ॥ अत्र स्नानं करोत्याशु स भूयः स्यात्पुनर्नवः ॥ ३७ ॥ ॥ भगवानुवाच ॥ ॥ एतत्तीर्थं तु विख्यातं तव नाम्ना भविष्यति ॥ अद्यप्रभृति विप्रेन्द्र देहिनां पापनाशनम् ॥ ३८ ॥ हीनांगो वाधिकांगो वा योऽत्र स्नानं करिष्यति ॥ चैत्रे शुक्ले निराहारश्चित्रासंस्थे निशाकरे ॥ सुवर्णांगः स तेजस्वी भविष्यति न संशयः ॥ ३९ ॥ सकामो यदि विप्रेंद्र ध्यायमानः सुरूपताम् ॥ निष्कामो वा परं स्थानं गमिष्यति शिवात्मकम् ॥ ४० ॥ अत्र श्राद्धे कृते ब्रह्मंश्चतुर्दश्यां निशाकरे ॥ चित्रास्थिते प्रयास्यंति पितरस्तृप्तिमुत्तमाम् ॥ ४१ ॥ अद्यैव विप्रशार्दूल चैत्रशुक्लांत उत्तमः ॥ अपराह्णे निशानाथश्चित्रायोगं प्रयास्यति ॥ ४२ ॥ तत्रोपवासयुक्तस्य सम्यक्स्नातस्य तत्क्षणात् ॥ स्यातां हस्तौ सुरूपाढ्यौ यथा पूर्वं तथा हि तौ ॥ ४३ ॥ एवमुक्त्वा स भगवांस्ततश्चादर्शनं गतः ॥ शंखोऽपि कुतपे काले तत्र स्नानमथाकरोत् ॥ ४४ ॥ ततश्च तत्क्षणा



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ज्जातौ हस्तौ तस्य यथा पुरा ॥ रक्तोत्पलनिभौ कांतौ मत्स्यचिह्नेन चिह्नितौ ॥ ४५ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ एवं तद्धरणीपृष्ठे तीर्थं जातं नृपोत्तम ॥ प्रभावादेवदेवस्य चंद्रांकस्य शुभावहम् ॥ ४६ ॥ तस्मात्त्वमपि राजेंद्र तत्र स्नानं समाचर ॥ चैत्रे शुक्लचतुर्दश्यां[1] चित्रासंस्थे निशाकरे ॥ ॥ ४७ ॥ भविष्यसि न संदेहः सर्वरोगविवर्जितः॥ वयं ते दर्शयिष्यामः प्राप्ते काले यथोदिते ॥४८॥ ॥ सूत उवाच ॥ ॥ ततः कतिपयाहेन चैत्रकृष्णादिरागतः ॥ चित्रासंस्थे निशानाथे संप्राप्ता च चतुर्दशी ॥ ४९ ॥ ततस्ते ब्राह्मणा भूपं समादाय च तत्क्षणात् ॥ शंखतीर्थं समुद्दिश्य गतास्तस्य हितैषिणः ॥ ५० ॥ ततः स मनसि ध्यात्वा कुष्ठव्याधिपरिक्षयम् ॥ स्नानं चक्रे यथान्यायं श्रद्धया परया युतः ॥ ५१ ॥ ततः कुष्ठविनिर्मुक्तो द्वादशार्कसमप्रभः ॥ निष्क्रांतः सलिलात्तस्माद्धर्षेण महतान्वितः ॥ ५२ ॥ ततः प्रणम्य तान्सर्वान्ब्राह्मणान्वेदपारगान् ॥ कृतांजलिपुटो भूत्वा वाक्यमेतदुवाच ह ॥ ५३ ॥ प्रसादेन हि युष्माकं मुक्तोऽहं ब्राह्मणोत्तमाः[2] ॥ कुष्ठव्याधेर्महाकालं[3] गर्हितोस्म्येव देहिनाम् ॥ ५४ ॥ तस्मान्नाहं करिष्यामि राज्यं ब्राह्मणसत्तमाः ॥ तीर्थेऽत्रैवाधुना नित्यं चरिष्यामि महत्तपः ॥ ५५ ॥ एतद्राज्यं च देशं च हस्त्यश्वादि तथापरम् ॥ यत्किंचिद्विद्यते मह्यं तद्गृह्णंतु द्विजोत्तमाः ॥ ५६ ॥ ममैवानुग्रहार्थाय दयां कृत्वा बृहत्तराम् ॥ दीनस्य भक्तियुक्तस्य विरक्तस्य विशेषतः ॥ ५७ ॥ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ न वयं रक्षितुं शक्ता राज्यं पार्थिवसत्तम ॥ तत्किं तेन गृहीतेन येन स्याद्राज्यविप्लवः ॥ ५८ ॥ जामदग्न्येन रामेण पुरा दत्ता वसुन्धरा ॥ त्रिःसप्त[4] क्षत्रियैर्हीनां कृत्वास्माकं नृपोत्तम ॥ ५९ ॥ सा भूयोपि हृताऽस्माकं क्षत्रियैर्बलवत्तरैः ॥ तिरस्कृत्य द्विजान्सर्वाँल्लीलयापि मुहुर्मुहुः ॥ ६० ॥ ॥ राजोवाच ॥ ॥ अहं वः प्रकरिष्यामि रक्षां ब्राह्मणसत्तमाः ॥ तपःस्थितोऽपि कार्येऽत्र न भीः कार्या कथंचन ॥ ६१ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ अवश्यं यदि ते श्रद्धा विद्यते दानसंभवा ॥ क्षेत्रेऽत्रापि[5] महापुण्ये कृत्वा देहि पुरोत्तमम् ॥ ॥ ६२ ॥ सर्वेषां ब्राह्मणेंद्राणां प्राकारपरिखान्वितम् ॥ सुखेन येन तिष्ठामः स्नात्वा तीर्थैः पृथग्विधैः ॥ गृहस्थधर्मिणः सर्वे स्वाध्यायनिरताः सदा ॥ ६३ ॥ ॥ सूत उवाच ॥ ॥ तच्छ्रुत्वा स महीपालस्तथेत्युक्त्वा प्रहर्षितः ॥ नगरं कल्पयामास स्थाने तत्र महत्तमम् ॥ ६४ ॥ प्राकारेण सुतुंगेन परिखाद्येन सर्वतः ॥ आयामव्यासतश्चैव क्रोशमात्रं मनोहरम् ॥ ६५ ॥ त्रिकचत्वरसंशुद्धं शोभितं सर्वतो ध्वजैः ॥ प्रासादैः प्रोन्नतैः कान्तैः समंतात्सुधया वृतैः ॥ ६६ ॥ मत्तवारणकोपेतैर्बहुभिर्भूमिभिरेव च ॥ संपूर्णं सत्यकामाद्यैः साधुलोकप्रशंसितैः ॥ ६७ ॥ ततो गृहाणि सर्वाणि



१ चैत्रे शुक्लत्रयोदश्याम्—इ० पा० । २ ब्रह्मसत्तमाः—इ० पा० । ३ यावत्—इति शेषः । महाकालंयावत्—बहुकालपर्यन्तम्—इत्यर्थः । ४ त्रिः सप्त—एकविंशतिवारम्—इत्यर्थः । ५ तत्र—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूरयित्वा स भूमिपः ॥ सुवर्णमणिमुक्तादिपदार्थैरपरैरपि ॥ ६८ ॥ ब्राह्मणेभ्यः कुलीनेभ्यो वेदविद्भ्यो विशेषतः ॥ श्रोत्रियेभ्यश्च दांतेभ्यः स तु श्रद्धासमन्वितः ॥ ६९ ॥ यथाज्येष्ठं यथाश्रेष्ठं प्रक्षाल्य चरणौ ततः ॥ शास्त्रोक्तेन विधानेन प्रददौ द्विजसत्तमाः ॥ ७० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शंखतीर्थोत्पत्तिमाहात्म्यवर्णने चमत्कारभूपतिना ब्राह्मणेभ्यो नगरदानवर्णनंनामैकादशोऽध्यायः ॥ ११ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एवं स वसुधापालो ब्राह्मणेभ्यः स्वशक्तितः ॥ ददौ तु नगरं कृत्वा पुरंदरपुरोपमम् ॥ १ ॥ मुक्ताप्रवालवैडूर्यरत्नहेमविचित्रितैः ॥ भ्राजमानं गृहश्रेष्ठैर्द्यौर्नक्षत्रगणैरिव ॥२॥ प्रासादैः स्फाटिकैश्चैव कैलासशिखरोपमैः ॥ पताकाशोभितैर्दिव्यैः समंतात्परिवारितम् ॥ ३ ॥ कांचनैः सुविचित्रैश्च प्रोन्नतैरमलैः शुभैः ॥ तोरणानां सहस्रैश्च शोभितं सुमनोहरम् ॥ ॥ ४ ॥ मणिसोपानशोभाभिर्दीर्घिकाभिः समंततः ॥ आरामकूपयंत्राद्यैः सर्वोपकरणैर्युतम् ॥ निवेद्य ब्राह्मणेंद्राणां कृतकृत्यो बभूव सः ॥ ५ ॥ शंखतीर्थे स्थितो नित्यं समाहूय ततः सुतान् ॥ पुत्रान्पौत्रांस्तथा भृत्यान्वाक्यमेतदुवाच ह ॥ ६ ॥ एतत्पुरं मया कृत्वा ब्राह्मणेभ्यो निवेदितम् ॥ भवद्भिर्मम वाक्येन रक्षणीयं प्रयत्नतः ॥ ७ ॥ यथा स्युर्ब्राह्मणाः सर्वे सुखिनो हृष्टमानसाः ॥ युष्माभिः पालनं कार्यं तथा सर्वैः समाहितैः ॥ ८ ॥ यश्चैतान्भक्तिसंयुक्तः पालयिष्यति भूमिपः ॥ अन्योऽपि परमं तेजः स संप्राप्स्यति भूतले ॥ ९ ॥ अजेयः सर्वशत्रूणां प्रतापी स्फीतिसंयुतः[1] ॥ भविष्यति न सन्देहो ब्राह्मणानां स पालनात् ॥ १० ॥ पुत्रपौत्रसुभृत्याढ्यो दीर्घायू रोगवर्जितः ॥ ब्राह्मणानां प्रसादेन मम वाक्याद्भविष्यति ॥ ११ ॥ यः पुनर्द्वेषसंयुक्तः संतापं चैव नेष्यति ॥ एतान्ब्राह्मणशार्दूलान्नरकं स प्रयास्यति ॥ १२ ॥ तथा दुःखानि संप्राप्य दृष्ट्वा नैकान्पराभवान् ॥ वियोगानिष्टबन्धूनां व्याधिग्रस्तो विगर्हितः ॥ १३ ॥ वंशोच्छेदं समासाद्य गमिष्यति यमालयम् ॥ तस्मात्सर्वप्रयत्नेन रक्षणीयमिदं पुरम् ॥ मम वाक्याद्विशेषेण हितमिच्छद्भिरात्मनः ॥ १४ ॥ एवं स भूपतिः सर्वास्तानुक्त्वा तपसि स्थितः ॥ तेऽपि सर्वे तथा चक्रुर्यथा तेन च शिक्षिताः ॥ १५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये चमत्कारभूपेन पुरस्थित्यर्थं निजपुत्रादीनामुपदेशकरणवर्णनंनाम द्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एवं निवेद्य पुत्राणां स राज्यं पृथिवीपतिः ॥ पुरं च तद्द्विजातिभ्यः प्रदाय स्वयमेव हि ॥ १ ॥ तत आराधयामास देवदेवं महेश्व

१ स्फीतिसंयुतः—वृद्धिसंयुतः—इत्यर्थः । 'स्फायी ओप्यायी वृद्धौ'—इति स्फायते रूपं स्फीतिरिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri




रम् ॥ कृत्वा तदाऽऽश्रमं तत्र श्रद्धया परया युतः ॥ २ ॥ स बभूव फलाहारो यावद्वर्षशतं नृपः ॥ शीर्णपर्णाशनः पश्चात्तावत्कालं समाहितः ॥ ३ ॥
ततः परं जलाहारो जातो वर्षशतं हि सः ॥ वायुभक्षस्ततोऽभूत्स यावद्वर्षशतं परम् ॥ ४ ॥ ततस्तुष्टो महादेवस्तस्य वर्षशते गते ॥ चतुर्थे वायुभ
क्षस्य दर्शने समुपस्थितः ॥ ५ ॥ प्रोवाच परितुष्टोऽस्मि मत्तः प्रार्थय वांछितम् ॥ अहं ते संप्रदास्यामि दुर्लभं त्रिदशैरपि ॥ ६ ॥ ॥ राजो
वाच ॥ ॥ एतत्पुण्यतमं क्षेत्रं नानातीर्थसमाश्रयम् ॥ हाटकेश्वरमाहात्म्यात्सर्वपापक्षयापहम् ॥ ७ ॥ तस्मात्तव निवासेन भूयान्मेध्यतमं पुनः ॥
एतन्मे वांछितं देव देहि तुष्टिं गतो यदि ॥ ८ ॥ मयैतदग्र्यं निर्माय ब्राह्मणेभ्यो निवेदितम् ॥ पुरं शर्वाऽमराधीश श्रद्धापूतेन चेतसा ॥ ९ ॥
तस्मिंस्त्वया सदा वासः कर्तव्यो मम वाक्यतः ॥ निश्चलत्वेन येन स्याद्गुणैः सर्वैः समन्वितम् ॥ १० ॥ ॥ भगवानुवाच ॥ ॥ अचलोऽहं
भविष्यामि स्थानेऽत्र तव भूमिप ॥ अचलेश्वर इत्येव नाम्ना ख्यातो जगत्त्रये ॥ ११ ॥ यो मामत्र स्थितं मर्त्यो वीक्षयिष्यति भक्तितः ॥ भविष्यं
त्यचलास्तस्य सर्वदैव विभूतयः ॥१२॥ माघशुक्लचतुर्दश्यां मम लिंगस्य यो नरः ॥ श्रद्धया परया युक्तः कर्ता यो घृतकंबलम् ॥१३॥ बाल्ये वयसि
यत्पापं वार्धके यौवनेऽपि वा ॥ तद्यास्यति क्षयं तस्य तमः सूर्योदये यथा ॥ १४ ॥ तस्मात्स्थापय मे लिंगं त्वमत्रैव महीपते ॥ अहं येन करोम्येव
तत्र वासं सदाचलः ॥ १५ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वा स देवेशस्ततश्चादर्शनं गतः ॥ सोऽपि राजा चकाराशु प्रासादं सुमनोहरम् ॥ १६ ॥
तत्र संस्थापयामास लिंगं देवस्य शूलिनः ॥ श्रद्धया परया युक्तः सर्वलक्षणलक्षितम् ॥१७॥ यस्मिन्दृष्टेऽथवा स्पृष्टे ध्याते वा पूजितेऽपि वा ॥ नरो
विमुच्यते पापादाजन्ममरणांतिकात् ॥१८॥ ततः संचिंतयामास भूपालः किं महेश्वरः ॥ सांनिध्यं निश्चलो भूत्वा लिंगेऽत्रैव करिष्यति ॥ १९ ॥
एतस्मिन्नंतरे जाता वाणी गगनगोचरा ॥ हर्षयन्ती महीपालं चमत्कारं सुनिस्वना ॥ २० ॥ मा त्वं भूमिपशार्दूल कार्यचिन्तां करिष्यसि ॥अस्मि
न्वासं सदात्रैव लिंगे कर्तास्मि नित्यशः ॥ २१ ॥ तथान्यदपि ते वच्मि प्रत्ययार्थं वचो नृप ॥ तच्छ्रुत्वा निर्वृतिं गच्छ वीक्षस्वैव च यत्नतः ॥ २२ ॥
सदा मे निश्चला छाया लिंगस्यास्य भविष्यति ॥ एकैव पृष्ठदेशस्था न दिक्संस्था भविष्यति ॥ २३ ॥ ॥ सूत उवाच ॥ ॥ ततः स वीक्षयामास
तां छायां लिंगसंभवाम् ॥ तद्रूपां निश्चलां नित्यं तद्दिक्संस्थे दिवाकरे ॥ २४ ॥ ततो हर्षं परं गत्वा प्रणिपत्य च तं भुवि ॥ कृतकृत्यमिवात्मानं ॥ १४ ॥
स मेने पार्थिवोत्तमः ॥ २५ ॥ अद्यापि दृश्यते छाया तादृग्रूपा सदा हि सा ॥ तस्य लिंगस्य विप्रेन्द्रा जाता विस्मयकारिणी ॥ २६ ॥ षण्मा
साभ्यंतरे मृत्युर्यस्य स्याद्भुवि भो द्विजाः ॥ न स पश्यति तां छायामेषोऽन्यः प्रत्ययः परः ॥ २७ ॥ ॥ सूत उवाच ॥ ॥ एवं स भगवांस्तत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वदैव व्यवस्थितः ॥ अचलेश्वररूपेण चमत्कारपुरांतिके ॥ २८ ॥ निश्चलत्वेन देवेशोऽष्टषष्टिषु मध्यमः ॥ क्षेत्राणां वसते तत्र तस्य वाक्यान्महेश्वरः ॥ २९ ॥ तेन तत्पावनं क्षेत्रं सर्वेषामिह कीर्तितम् ॥ कामदं मुक्तिदं चैव जायते सर्वदेहिनाम् ॥ ३० ॥ तथान्यदपि यद्वृत्तं वृत्तांतं तत्प्रभावजम् ॥ तदहं संप्रवक्ष्यामि श्रूयतां द्विजसत्तमाः ॥ ३१ ॥ अचलेश्वरमाहात्म्यात्तस्मिन्क्षेत्रे नरा द्रुतम् ॥ वांछितं मनसः सर्वे लभंते सकलं फलम् ॥ ३२ ॥ स्वर्गमेके परे मोक्षं धनधान्यसुतांस्तथा ॥ यो यं काममभिध्याय पूजयेदचलेश्वरम् ॥ तंतं स लभते मर्त्यः स्वल्पायासेन च द्रुतम् ॥ ३३ ॥ अथ दृष्ट्वा सहस्राक्षः सर्वे पापनरा भुवि ॥ स्वर्गं यांति तथा मोक्षं प्राप्नुवन्ति च सम्मुखम् ॥ ३४ ॥ ततः क्रोधं च कामं च लोभं द्वेषं भयं रतिम् ॥ मोहं च व्यसनं दुर्गं मत्सरं रागमेव च ॥ ३५ ॥ सर्वान्मूर्तान्समाहूय ततः प्रोवाच सादरम् ॥ स्वयमेव सहस्राक्षो रहस्ये द्विजसत्तमाः ॥ ३६ ॥ नरो वा यदि वा नारी चमत्कारपुरं प्रति ॥ यो गच्छति धरापृष्ठे युष्माभिर्वार्य एव सः ॥ ३७ ॥ तत्रैव वसमानोऽपि यो गच्छेदचलेश्वरम् ॥ मद्वाक्यात्स विशेषेण सर्वैर्वार्यः प्रयत्नतः ॥ ३८ ॥ ते तथेति प्रतिज्ञाय गत्वा शक्रस्य शासनात् ॥ चक्रुस्ततः समुच्छिन्नं तन्माहात्म्यं गतं भुवि ॥ ३९ ॥ एतद्वः सर्वमाख्यातमाख्यानं पापनाशनम् ॥ अचलेश्वरदेवस्य तस्मिन्क्षेत्रे निवासिनः ॥ ४० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्येऽचलेश्वरमाहात्म्यवर्णनंनाम त्रयोदशोध्यायः ॥ ॥ १३ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ यदन्यत्तत्र संजातमाश्चर्यं द्विजसत्तमाः ॥ तदहं कीर्तयिष्यामि रहस्यं हृदि संस्थितम् ॥ १ ॥ चमत्कारपुरे कश्चिद्वैश्यजातिसमुद्भवः ॥ बभूव पुरुषो मूको दारिद्र्येण समन्वितः ॥ २ ॥ यो दौःस्थ्यात्सर्वलोकानां करोति पशुरक्षणम् ॥ कुटुम्बभरणार्थाय संतुष्टो येनकेनचित् ॥ ३ ॥ कदाचिद्रक्षतस्तस्य पशूंस्तान्वनभूमिषु ॥ पशुरेको विनिष्क्रांतः स्वयूथात्तृणलोभतः ॥ ४ ॥ कृष्ण पक्षे चतुर्दश्यां चैत्रमासे द्विजोत्तमाः ॥ न तदा लक्षितस्तेन गच्छमानो यदृच्छया ॥ ५ ॥ अथ यावद्गृहं प्रातः स मूकः पशुपालकः ॥ तावत्तस्य च गोः स्वामी भर्त्सयन्समुपागतः ॥ ६ ॥ किं पाप न समायातः पशुरेकोऽद्य नो यथा ॥ नूनं त्वया हतः सोऽपि विक्रीतोऽपिहितोऽथवा ॥ तस्मा दानय मे क्षिप्रं निराहारोऽपि गां त्वरात् ॥ ७ ॥ तच्छ्रुत्वा भयसंत्रस्तः स मूकः पशुपालकः ॥ निष्क्रांतो यष्टिमादाय निराहारोऽपि मन्दिरात् ॥ ॥ ८ ॥ ततोऽरण्यं समासाद्य वीक्षांचक्रे समंततः ॥ सूक्ष्मदृष्ट्या स दुर्गाणि गहनानि वनानि च ॥ ९ ॥ अथ तेन क्वचिद्दृष्टं पदं तस्य पशोः

१ तत्प्रभावतः—इ० पा० । २ मूर्तान्—मूर्तिमतः—प्रत्यक्षमूर्तिधरान्—इत्यर्थः । ३ अथान्यत्—इ० पा० । ४ दौःस्थ्यात्—दारिद्र्यात्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

स्फुटम् ॥ अटव्यां भ्रममाणेन परिज्ञातं च कृत्स्नशः ॥ १० ॥ ततश्च तत्पदान्वेषी स जगाम वनाद्वनम् ॥ चमत्कारपुरस्यास्य समंताद्द्विजसत्त माः ॥ ११ ॥ एवं प्रदक्षिणा तस्य जाता पशुदिदृक्षया ॥ स्थानस्य[1] चैव निर्वेशे पशोश्चापि द्विजोत्तमाः ॥ १२ ॥ प्रदक्षिणावसाने च पशुर्लब्धो हि तेन सः ॥ निशांतेऽथ गृहं नीत्वा स्वामिने विनिवेदितः ॥ १३ ॥ चैत्रे पुण्यतमे मासि कृष्णपक्षे[2] चतुर्दशीम् ॥ क्षेत्रे पुण्यतमे देवा स्तीर्थान्या यांति सर्वशः ॥ १४ ॥ एवमज्ञानभावेन कृता ताभ्यां प्रदक्षिणा ॥ पशुपालपशुभ्यां वै सुपुण्ये तत्र वासरे ॥ १५ ॥ निराहारस्य मूकस्य साहारस्य पशोस्तथा ॥ १६ ॥ विना स्नानेन भक्षांच्च[3] दैवाद्द्विजवरोत्तमाः ॥ ततः काले व्यतिक्रांते कियन्मात्रे स्वकर्मतः ॥ उभौ पंचत्वमापन्नौ पृथक्त्वेनायुषः क्षये ॥ १७ ॥ ततश्च पशुपालस्तु दशार्णाधिपतेः सुतः ॥ संजातस्तत्प्रभावेन पूर्वजातिमनुस्मरन् ॥ १८ ॥ सोऽपि जज्ञे पशुस्तस्य सचिवो द्विजसत्तमाः ॥ जातिस्मरो यथा राजा सर्वदा नृपसंमतः॥१९॥ अथागत्य स राजेंद्रस्तेनैव सह मंत्रिणा ॥ कृष्णपक्षे चतुर्दश्यां पुरस्तस्याः प्रदक्षिणाम् ॥ २० ॥ चक्रे संवत्सरस्यांते श्रद्धया परया युतः ॥ निराहारश्च[4] मौनेन पदातिर्द्विजसत्तमाः ॥ २१ ॥ एकदा तत्र चाऽऽयाता मुनयः शंसितव्रताः ॥ तीर्थे पापहरे पुण्ये विश्वामित्रसमुद्भवे ॥ २२ ॥ याज्ञवल्क्यो भरद्वाजः शुनःशेपोऽथ गालवः ॥ देवलो भागुरिर्धौम्यः कश्य पश्च्यवनो भृगुः ॥ २३ ॥ तथान्ये शंसिताऽऽत्मानो ब्रह्मचर्यपरायणाः ॥ तीर्थयात्राप्रसंगेन तस्मिन्क्षेत्रे समागताः ॥ २४ ॥ तान्दृष्ट्वा स महीपालः प्रणिपत्य कृतांजलिः ॥ यथाज्येष्ठं यथाश्रेष्ठं पूजयामास भक्तितः ॥ २५ ॥ ततस्तेषां स मध्ये च संनिविष्टो महीपतिः ॥ तथागतः स भूपालः सर्वै स्तैश्चाभिनंदितः ॥ २६ ॥ ततश्चक्रुः कथा दिव्या मुनयस्ते महीपतेः ॥ पुरतो मुनिमुख्यानां चरितानि महात्मनाम् ॥ २७ ॥ राजर्षीणां पुराणानां धर्मशास्त्रसमुद्भवाः ॥ आनंदं तस्य राजर्षेर्जनयंतो द्विजोत्तमाः ॥ २८ ॥ अथ क्वाऽपि कथांते स पार्थिवस्तैर्महर्षिभिः ॥ पृष्टः कौतूहलाविष्टैर्दत्त्वा श्रौतीस्तदाशिषः ॥ २९ ॥ ॥ ऋषय ऊचुः ॥ ॥ वर्षेवर्षे महीपाल त्वमत्राऽऽगत्य यत्नतः ॥ करोषि मंत्रिणा सार्धं पुरस्याऽस्य प्रदक्षिणाम् ॥ ॥ ३० ॥ अस्मिन्क्षेत्रे सुतीर्थानि संति पार्थिवसत्तम ॥ तथाऽन्यानि प्रसिद्धानि देवतायतनानि च ॥ ३१ ॥ आदरस्तेषु वै राजन्नास्ति स्वल्पो ऽपि कर्हिचित् ॥ एतन्नः कौतुकं जातं न चेद्गुह्यं प्रकीर्तय ॥ ३२ ॥ ॥ सूत उवाच ॥ ॥ तेषां तद्वचनं श्रुत्वा विनयाऽवनतः स्थितः ॥ स प्रोवाच वचो भूपः किंचिद्व्रीडासमन्वितः॥३३॥ यत्पृष्टोऽस्मि द्विजश्रेष्ठा युष्माभिः सांप्रतं मम ॥ तद्गुह्यं न मयाऽऽख्यातं कस्यचिद्धरणीतले ॥३४॥

१ स्थानस्य चैव निर्वेशे—ग्रामाद्बहिः पशूनां संघातस्थाने—गोष्ठाने—इत्यर्थः । २ शुक्लपक्षे—इ० पा० । ३ भक्षाच्च विना—भोजनादिना—इत्यर्थः । ४ निराहारः शुचिः स्नातः—इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाऽपि हि प्रकर्तव्यं युष्माकं सत्यमेव हि ॥ अपि गुह्यतमं चेत्स्याच्छृण्वंतु मुनिसत्तमाः ॥ ३५ ॥ ॥ सूत उवाच ॥ ॥ ततः स कथयामास पूर्वजातिसमुद्भवम् ॥ वृत्तांतं तन्मुनींद्राणां तेषां ब्राह्मणसत्तमाः ॥ ३६ ॥ यथा नष्टः पशुस्तस्य कृता यद्वदवेक्षणा ॥ यथा प्रदक्षिणा जाता चमत्कारपुरस्य तु ॥ ३७ ॥ जातिस्मृतिर्यथा जाता प्राक्तनी तत्प्रभावतः ॥ राज्यप्राप्तिर्विभूतिश्च तथेष्टाप्तिः पदेपदे ॥ ३८ ॥ तच्छ्रुत्वा मुनयः सर्वे प्रहृष्टाः पृथिवीपतेः ॥ आशीर्वादान्बहून्दत्त्वा साधुसाध्विति चाऽब्रुवन् ॥ ३९ ॥ समुत्थाय ततश्चक्रुः पुरस्तस्याः प्रदक्षिणाम् ॥ यथोक्तविधिना सर्वे श्रद्धया परया युताः ॥ ४० ॥ गताश्च परमां सिद्धिं तत्प्रभावात्सुदुर्लभाम् ॥ जपयज्ञप्रदानैर्या तीर्थसेवादिकैरपि ॥ ४१ ॥ सोऽपि राजा स मन्त्री च जातौ वैमानिकौ सुरौ ॥ अद्याऽपि तौ हि दृश्येते तारारूपौ नभस्तले ॥ ४२ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये चमत्कारपुरप्रदक्षिणामाहात्म्यवर्णनंनाम चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ ऋषय ऊचुः ॥ ॥ किमेतत्कारणं सूत येनैतत्प्राप्यते नृभिः ॥ श्रेयः परं पुरस्याऽस्य सकृत्कृत्वा प्रदक्षिणाम् ॥ १ ॥ एतन्नः सर्वमाचक्ष्व विस्तरेण महामते ॥ अत्र कौतूहलं जातं सर्वं त्वं वेत्स्यशेषतः ॥ २ ॥ ॥ सूत उवाच ॥ ॥ रक्तशृंगइतिख्यातो यः स पर्वतसत्तमः ॥ तत्प्रभावादिह श्रेयो लभ्यते द्विजसत्तमाः ॥ ३ ॥ तत्र कृष्णचतुर्दश्यां चैत्रमासे सदैव हि ॥ समाश्रयं प्रकुर्वंति ब्रह्मविष्णुशिवादयः ॥ ४ ॥ सर्वे देवाश्च तीर्थानि सर्वाण्यायतनानि च ॥ तथा नद्यः समुद्राश्च यच्चान्यदपि पावनम् ॥ ५ ॥ तत्सर्वं वासरे तस्मिन्सांनिध्यं तत्र पर्वते ॥ रक्तशृंगे करोत्येव तस्याऽऽदेशाच्छतक्रतोः ॥ ६ ॥ यदेंद्रेण समानीतस्तस्मिन्देशे स पर्वतः ॥ तदा प्रोक्तो दिने[2] देवाः समेष्यंति तवांतिकम् ॥ ७ ॥ पृथिव्यां यानि तीर्थानि पुण्यान्यायतनानि च ॥ चमत्कारपुरं तस्य मुख्यशृंगे व्यवस्थितम् ॥ तेन तत्प्राप्यते श्रेयः सकृत्कृत्वा प्रदक्षिणाम् ॥ ८ ॥ तस्मिन्दिने च यत्किंचिद्दीयते दानमादरात् ॥ तदक्षयं भवेद्विप्रा यावच्चंद्रदिवाकरौ ॥ ९ ॥ परमान्नेन यः कश्चिद्ब्राह्मणान्भोजयेन्नरः ॥ पितॄनुद्दिश्य सद्भक्त्या स गयाफलमाप्नुयात् ॥ १० ॥ यो यं काममभिध्यायन्कुरुतेऽत्र प्रदक्षिणाम् ॥ स तं काममवाप्नोति निष्कामो मुक्तिमान्भवेत् ॥ ११ ॥ यस्तु सोपस्करां धेनुं प्रदद्याद्ब्राह्मणोत्तमे ॥ संपूर्णपृथिवीदानफलमाप्नोति पुष्कलम् ॥ १२ ॥ एतद्वः सर्वमाख्यातं यत्पृष्टोऽस्मि द्विजोत्तमाः ॥ प्रदक्षिणाकृतं श्रेयो यथा संप्राप्यते नृभिः ॥ १३ ॥ तस्मात्सर्वप्रयत्नेन कार्या तस्य प्रदक्षिणा ॥ पुरस्य चैत्रकृष्णायां चतुर्दश्यां समाहितैः ॥ १४ ॥ उपवासपरैः

१ तीर्थसंवाहनैरपि–ख०, तीर्थसेवादतैरपि–ग० च पा० । २ दिने–चैत्रकृष्णचतुर्दशीदिने–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



शांतैर्मौनव्रतपरायणैः ॥ शुचिभिः शुक्लवस्त्रैश्च रागद्वेषविवर्जितैः ॥ १५ ॥ मूकत्वात्पशुपालस्य मौनं जातं द्विजोत्तमाः ॥ पशोरवाचकत्वाच्च ह्यनयोः श्रद्धया विना ॥ १६ ॥ उपवासश्च संजातः पशुपालस्य तस्य च ॥ भयेन पशुसक्तस्य स्वामिनः श्रद्धया न तु ॥ १७ ॥ संजाता भ्रमणा नस्य पशोरर्थे प्रदक्षिणा ॥ तथाऽपि तादृशं जातमुभाभ्यां फलमुत्तमम् ॥ १८ ॥ यः पुनः श्रद्धयोपेत उपवासपरायणः ॥ मौनेन कुरुते मर्त्यः पुरस्याऽस्य प्रदक्षिणाम् ॥ दशार्णाधिपवत्स्वर्गे स विमानचरो भवेत् ॥ १९ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये चमत्कारपुरप्रदक्षिणामाहात्म्यवर्णनंनाम पंचदशोऽध्यायः ॥१५॥ ॥छ॥ ॥ सूत उवाच ॥ ॥ तस्मात्सर्वप्रयत्नेन त्यक्त्वाऽन्या निखिलाः क्रियाः ॥ रक्तशृंगस्य सांनिध्यं सेवनीयं विचक्षणैः ॥ १ ॥ किं दानैः किं क्रियाकांडैः किं यज्ञैः किं व्रतैरपि ॥ तत्क्षेत्रं सेवयेद्भक्त्या हाटकेश्वरसंभवम् ॥२॥ अग्निष्टोमादयो यज्ञाः सर्वे संपूर्णदक्षिणाः ॥ तस्य क्षेत्रस्य पुरतः कलां नार्हंति षोडशीम् ॥ ३ ॥ चान्द्रायणानि कृच्छ्राणि तथा सांतपनानि च ॥ तस्य क्षेत्रस्य पुरतः कलां नार्हंति षोडशीम्॥४॥प्रभासाद्यानि तीर्थानि गङ्गाद्याः सरितस्तथा ॥ तस्य क्षेत्रस्य पुरतः कलां नार्हति षोडशीम्॥५॥भूमिदानानि सर्वाणि धर्माः सर्वे दयादिकाः॥ तस्य क्षेत्रस्य पुरतः कलां नार्हंति षोडशीम्॥६॥तत्र राजर्षयः पूर्वं प्रभूताः सिद्धिमागताः ॥ पशवः पक्षिणः सर्पाः सिंहव्याघ्रा मृगादयः ॥७॥ तत्र कालवशान्नष्टास्तेऽपि प्राप्ता दिवालयम् ॥ यस्तत्र व्रतहीनोऽपि कृषिकर्मरतोऽपि वा ॥८॥ निवासं कुरुते विप्रा मृतस्तत्र दिवं व्रजेत् ॥ किंवा च बहुनोक्तेन भूयोभूयो द्विजोत्तमाः ॥९॥ श्रूयतां परमं गुह्यं तस्य क्षेत्रस्य संभवम् ॥ पुनंति क्षेत्रतीर्थानि संवासादिह मानवान् ॥ १० ॥ हाटकेश्वरजं क्षेत्रं पुनाति स्मरणादपि ॥ किं पुनर्दर्शनाद्विप्राः स्पर्शनाच्च विशेषतः ॥ ११ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये रक्तशृङ्गसांनिध्यसेवनफलश्रैष्ठ्यवर्णनंनाम षोडशोऽध्यायः॥१६॥ ॥छ॥ ॥ ऋषय ऊचुः ॥ ॥ चमत्कारपुरोत्पत्तिः श्रुता त्वत्तो महामते ॥ तत्क्षेत्रस्य प्रमाणं यत्तदस्माकं प्रकीर्तय ॥१॥ यानि तत्र च पुण्यानि तीर्थान्यायतनानि च ॥ सहितानि प्रभावेण तानि सर्वाणि कीर्तय ॥ २ ॥ ॥ सूत उवाच ॥ ॥ पञ्चक्रोशप्रमाणेन क्षेत्रं ब्राह्मणसत्तमाः ॥ आयामव्यासतश्चैव चमत्कारपुरोत्तमम् ॥ ३ ॥ प्राच्यां तस्य गयाशीर्षं पश्चिमेन हरेः पदम् ॥ दक्षिणोत्तरयोश्चैवं गोकर्णेश्वरसंज्ञितौ ॥४॥ हाटकेश्वर संज्ञं तु पूर्वमासीद्द्विजोत्तमाः ॥ तत्क्षेत्रं प्रथितं लोके सर्वपातकनाशनम् ॥ ५ ॥ यतः प्रभृति विप्रेभ्यो दत्तं तेन महात्मना ॥ चमत्कारेण तत्स्थानं 

१ तेऽग्रेण--इ० पा० । २ संस्नातानीह—इ० पा० । ३ चमत्कारपुरोद्भवम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाम्ना ख्यातिं ततो गतम् ॥ ६ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ यदेतद्भवता प्रोक्तं तस्य पूर्वं गयाशिरः ॥ माहात्म्यं तस्य नो ब्रूहि सूतपुत्र सविस्त रम् ॥ ७ ॥ ॥ सूत उवाच ॥ ॥ आसीद्विदूरथोनाम हैहयाधिपतिः पुरा ॥ यो वै दानपतिर्दक्षः शत्रुपक्षक्षयावहः ॥ ८ ॥ स कदाचिन्मृगा न्हंतुं नृपः सेनावृतो ययौ ॥ नानावृक्षलताकीर्णं वनं श्वापदसंकुलम् ॥ ९ ॥ स जघान मृगांस्तत्र शरैराशीविषोपमैः ॥ महिषांश्च वराहांश्च तरक्षू ञ्छम्बरान्रुरून् ॥ १० ॥ सिंहांन्व्याघ्रान्गजान्मत्ताञ्छतशोऽथ सहस्रशः ॥ अथ तेन मृगो विद्धः शरेणाऽऽनतपर्वणा ॥ ११ ॥ न पपात धरापृष्ठे सशरो दुद्रुवे द्रुतम् ॥ ततः स कौतुकाविष्टस्तस्य पृष्ठे हयोत्तमम् ॥ प्रेरयामास वेगेन मनोमारुतवेगधृक् ॥ १२ ॥ ततः सैन्यं समुत्सृज्य मृगं लिप्सुर्महीपतिः ॥ अन्यद्वनांतरं प्राप्तो रौद्रं चित्तभयावहम् ॥ १३ ॥ कण्टकीबदरीप्रायं शाल्मलीवनसंकुलम् ॥ तथान्यैः कण्टकाकीर्णै रूक्षै र्वृक्षैः समन्वितम् ॥ १४ ॥ तत्र रूक्षाऽखिला भूमिर्निर्जला तमसा वृता ॥ चीरिकोलूकगृध्राढ्या शीर्षच्छायाविवर्जिता ॥ १५ ॥ ग्रीष्मे मध्यगते सूर्ये मृगाकृष्टः स पार्थिवः ॥ दूराध्वानं जगामाऽथ ग्रासपाणिर्वराश्वगः ॥ १६ ॥ तेन[1]तस्यानुगा भृत्याः सर्वे सुश्रांतवाहनाः ॥ क्षुत्पिपासाकुलाः श्रांताः स्थाने स्थाने समाश्रिताः ॥ १७ ॥ सिंहव्याघ्रैस्तथा चान्यैः पतिता नष्टचेतनाः ॥ भक्ष्यंते चेतयन्तोऽपि तथाऽन्ये चलनाक्षमाः ॥ १८ ॥ ततः सोऽपि महीपालः क्षुत्पिपासासमाकुलः ॥ दृष्ट्वा तद्व्यसनं प्राप्तमात्मनः सेवकैः समम् ॥ १९ ॥ कांतारस्यांतमन्विच्छन्प्रेरयामास तं हयम् ॥ जात्यं सर्वगुणोपेतं कशाघातैः प्रताडयन् ॥ २० ॥ ततः स नृपतिस्तेन वायुवेगेन वाजिना ॥ नीतो दूरं[2] दुर्गमार्गं सर्वजंतुविवर्जितम् ॥ २१ ॥ एवं तस्य नरेन्द्रस्य कांदिशीकेऽनवस्थिते[3] ॥ सोऽश्वोऽपतद्धरापृष्ठे[4] सोऽप्यधस्तात्तुरंगमात् ॥ २२ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये विदूरथमृगयावर्णनंनाम सप्तदशोऽध्यायः ॥ १७ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ ततः सोऽपि महीपालः क्षुत्पिपासासमाकुलः ॥ पपात धरणीपृष्ठे पद्भ्यां गत्वा वनांतरम् ॥ १ ॥ अथाऽपश्यद्वियत्स्थानात्स त्रीन्प्रेतान्सु दारुणान् ॥ ऊर्ध्वकेशान्सुरक्ताक्षान्कृ[5]ष्णदन्तान्कृशोदरान् ॥ २ ॥ तान्दृष्ट्वा भयसंत्रस्तो विशेषेण स भूपतिः ॥ निराशो जीविते कृच्छ्रा दिदं वचनमब्रवीत् ॥ ३ ॥ के यूयं विकृताकारा मया दृष्टा न कर्हिचित् ॥ एवंविधा नृलोकेऽत्र भ्रमता प्राग्विभीषणाः ॥ ४ ॥ विदू रथो नरेन्द्रोऽहं क्षुत्पिपासातिपीडितः ॥ मृगलिप्सुरिह प्राप्तो वने जन्तुविवर्जिते ॥ ५ ॥ ततस्तेषां तु यो ज्येष्ठो मांसादः प्रत्युवाच तम् ॥

१ जवान–इति पूर्वश्लोकेन सम्बन्धः । २ नीतो दूरतरं मार्गम्–इ०पा० । ३ व्यवस्थिते–इ० पा० । ४ सैन्येऽपतद्धरापृष्ठे–इ० पा० । ५ स्थूलवृत्तान्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 कृतांजलिपुटो भूत्वा विनयावनतः स्थितः ॥ ६ ॥ वयं प्रेता महाराज निवसामोऽत्र कानने ॥ स्वकर्मजनितादोषाद्दुःखेन महता वृताः 
 ॥ ७ ॥ अहं मांसादकोनाम द्वितीयोऽयं विदैवतः ॥ कृतघ्नश्च तृतीयस्तु त्रयाणामेष पापकृत् ॥ ८ ॥ ॥ राजोवाच ॥ ॥ सर्वेषां देहि 
नां नाम जायते पितृमातृजम् ॥ किमेतत्कारणं येन सर्वे यूयं स्वनामकाः ॥ ९ ॥ तच्छ्रुत्वा प्राह मांसादः कर्मनामानि पार्थिव ॥ मिथः
कृतानि[1] संज्ञार्थमस्माभिः स्वयमेव हि ॥ १० ॥ शृणुष्वाऽवहितो भूत्वा सर्वेषां नः पृथक्पृथक् ॥ कर्मणा येन संजातं प्रेतत्वमिह भूमिप ॥ ११ ॥
वयं हि[2] ब्राह्मणा जात्या वैदिशाख्ये पुरे नृप ॥ देवरात[3]स्य विप्रस्य गृहे जाता महात्मनः ॥ १२ ॥ नास्तिका भिन्नमर्यादाः परदाररताः सदा ॥ पाप[4]
कर्मरतास्तत्र शुभकर्मविवर्जिताः ॥ १३ ॥ जिह्वालौल्यप्रसंगेन मया भुक्तं सदाऽऽमिषम् ॥ तेन मे कर्मजं नाम मांसादाख्यं व्यवस्थितम् ॥ १४ ॥
द्वितीयोऽयं महाराज यस्तिष्ठति तवाऽग्रतः ॥ अनेना[5]ऽन्नं सदा भुक्तमकृत्वा देवतार्चनम् ॥ १५ ॥ तेन कर्मविपाकेन प्रेतयोनिं समाश्रितः ॥ विदै
वत इति ख्यातो द्वितीयोऽयं सुपापकृत् ॥ १६ ॥ सदैवाऽनुष्ठिता[6]ऽनेन सुपापेन कृतघ्नता ॥ कृतघ्नः प्रोच्यते तेन कर्मणा नृपसत्तम ॥ १७ ॥
॥ ॥ राजोवाच ॥ ॥ आहारेण नृलोकेऽस्मिन्सर्वे जीवन्ति जन्तवः ॥ युष्माकं कतमो योऽत्र प्रोच्यतां मे सविस्तरम् ॥ १८ ॥ ॥ मांसाद
उवाच ॥ ॥ भोज्यकाले गृहे यत्र स्त्रीणां युद्धं प्रवर्तते ॥ अपि मन्त्रौषधीप्रायं प्रेता भुंजंति तत्र हि ॥ १९ ॥ भुज्यते यत्र भूपाल वैश्वदेवं विना
नरैः ॥ पाकस्याग्रमदत्त्वा च प्रेता भुंजंति तत्र च ॥ २० ॥ रात्रौ यत्क्रियते श्राद्धं दानं वा पर्ववर्जितम् ॥ तत्सर्वं नृपशार्दूल प्रेतानां भोजनं भवेत्॥
॥ २१ ॥ यस्मिन्नो मार्जनं हर्म्ये क्रियते नोपलेपनम् ॥ न मांगल्यं च सत्कारः प्रेता भुंजंति तत्र हि ॥ २२ ॥ भिन्नभाण्डपरित्यागो यत्र न क्रियते
गृहे ॥ न च वेदध्वनिर्यत्र प्रेता भुंजंति तत्र हि ॥२३॥ यच्छ्राद्धं दक्षिणाहीनं क्रियाहीनं च वा नृप ॥ तथा रजस्वलादृष्टं तदस्माकं प्रजायते॥२४॥
हीनांगा ह्यधिकांगा वा यस्मिञ्छ्राद्धे द्विजातयः ॥ भुंजते वृषलीनाथास्तदस्माकं प्रजायते ॥ २५ ॥ अतिथिर्यत्र संप्राप्तः श्राद्धकाल उपस्थिते ॥
अपूजितो गृहाद्याति तच्छ्राद्धं प्रेततृप्तिदम् ॥२६॥ किं वा ते बहुनोक्तेन शृणु संक्षेपतो नृप ॥ अस्माकं भोजनं नित्यं यत्त्वं श्रुत्वा विगर्हसि ॥२७॥
यदन्नं केशमूत्रास्थिश्लेष्मादिभिरुपप्लुतम् ॥ हीनजात्यैश्च संस्पृष्टं तदस्माकं प्रजायते ॥ २८ ॥ ॥ राजोवाच ॥ ॥ केन कर्मविपाकेन प्रेतत्वं 

१ यानि च—इ० पा० । २ वै—इ० पा० । ३ देवराजस्य—इ० पा० । ४ पूर्वं बुद्धिगतास्तत्र—इति बहुषु पुस्तकेषु पाठः, तदा—पूर्वजन्मार्जितदुष्कर्मपाकजनितदुर्बुद्धिकर्तव्यकर्मप्रवृत्ता—इत्यर्थः । ५ अनेन—तृतीयेन—इत्यर्थः । ६ हर्षिताः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जायते नृणाम् ॥ एतन्मे सर्वमाचक्ष्व मांसाद मम पृच्छतः ॥२९॥ ॥ मांसाद उवाच ॥ ॥ यो भवेन्मानवः क्षुद्रस्तथा पैशुन्यसूचकः ॥ मृष्टमांसाशने सक्तः स प्रेतो जायते नरः ॥३०॥ अकृत्वा देवकार्यं च तथा च पितृतर्पणम्॥ योऽश्नात्यदत्त्वा भृत्येभ्यः स प्रेतो जायते नरः ॥३१॥ परदाररतश्चैव परवित्तापहारकः ॥ परापवादसंतुष्टः स प्रेतो जायते नरः ॥३२॥ कन्यां यच्छति वृद्धाय नीचाय धनलिप्सया ॥ कुरूपाय कुशीलाय स प्रेतो जायते नरः ॥ ३३ ॥ कुले जातां विनीतां च धर्मपत्नीं सुखोच्छ्रिताम् ॥ यस्त्यजेद्दोषनिर्मुक्तां स प्रेतो जायते नरः ॥ ३४ ॥ देवस्त्रीगुरुवित्तानि यो गृहीत्वा न यच्छति ॥ विशेषाद्ब्राह्मणस्वं[1] च स प्रेतो जायते नरः ॥ ३५ ॥ परव्यसनसंतुष्टः कृतघ्नो गुरुतल्पगः ॥ दूषको देवविप्राणां स प्रेतो जायते नरः ॥ ३६ ॥ दीयमानस्य वित्तस्य ब्राह्मणेभ्यः सुपापकृत् ॥ विघ्नमारभते यस्तु स प्रेतो जायते नरः ॥ ३७ ॥ शूद्रान्नेनोदरस्थेन ब्राह्मणो म्रियते यदि ॥ स प्रेतो जायते राजन्यद्यपि स्यात्षडंगवित् ॥ ३८ ॥ कुलदेशोचितं धर्मं यस्त्यक्त्वाऽन्यत्समाचरेत् ॥ कामाद्वा[2] यदि वा लोभात्स प्रेतो जायते नरः ॥ ३९ ॥ एतत्ते सर्वमाख्यातं मया पार्थिवसत्तम ॥ येन कर्मविपाकेन प्रेतः संजायते नरः ॥ ४० ॥ ॥ राजोवाच ॥ ॥ कृतेन कर्मणा येन न प्रेतो जायते नरः ॥ तन्मे कीर्तय मांसाद विस्तरेण विशेषतः ॥ ४१ ॥ ॥ मांसाद उवाच ॥ ॥ मातृवत्परदारान्यः परद्रव्याणि लोष्टवत् ॥ यः पश्यत्यात्मवज्जंतून्न प्रेतो जायते नरः ॥ ४२ ॥ अन्नदानपरो नित्यं विशेषेणातिथिप्रियः ॥ स्वाध्यायव्रतशीलो यो न प्रेतो जायते नरः ॥ ४३ ॥ समः शत्रौ च मित्रे च समलोष्टाश्मकांचनः ॥ समो मानापमानेषु न प्रेतो जायते नरः ॥ ४४ ॥ दानधर्मप्रवृत्तानां धर्ममार्गानुयायिनाम् ॥ प्रोत्साहं वर्धयेद्यस्तु न प्रेतो जायते नरः ॥ ४५ ॥ यूकामत्कुणदंशादीन्सर्वसत्त्वानि यो नरः ॥ पुत्रवत्पालयेन्नित्यं न प्रेतो जायते नरः ॥ ४६ ॥ सदा यज्ञक्रियोपेतः सदा तीर्थपरायणः ॥ शास्त्रश्रवणसंयुक्तो न प्रेतो जायते नरः ॥ ४७ ॥ वापीकूपतडागानामारामाणां विशेषतः ॥ आरोपकः प्रपाणां च न प्रेतो जायते नरः ॥ ४८ ॥ एतद्वः सर्वमाख्यातं स्वं[3]गुह्यं वसुधाधिप ॥ निर्विण्णाः प्रेतभावेन तस्मात्त्वं नो गतिर्भव ॥ ४९ ॥ गत्वा गयाशिरः पुण्यमेकैकस्य पृथक्पृथक् ॥ श्राद्धं देहि महीपाल त्रयाणामपि सादरम् ॥ ५० ॥ प्रेतत्वं याति येनेदं त्वत्प्रसादात्सुदारुणम् ॥ नाऽन्यथा मुक्तिरस्माकं भविष्यति कथंचन ॥ ५१ ॥ ॥ राजोवाच ॥ ॥ ईदृग्जातिस्मृतिर्यस्यां प्रेतयोनौ च खे गतिः ॥ धर्माधर्मपरिज्ञानं तच्च कस्मात्प्रनिंदसि ॥ ५२ ॥ ॥ मांसाद उवाच ॥ ॥ प्रेतयोनिरियं राजन्नवमी देवसंज्ञिता ॥ गुणत्रयसमायुक्ता शेषैर्दोषैः

१ ब्राह्मणेन्द्राय--इ० पा० । २ मोहाद्वा--इ०पा० । ३ गुह्यं च--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



समंततः ॥ ५३ ॥ एका जातिस्मृतिः सम्यगस्यामेव प्रजायते ॥ खेचरत्वं तथैवान्यद्धर्माधर्मविनिश्चयः ॥ ५४ ॥ एतद्गुणत्रयं प्रोक्तं प्रेतयोनौ नृपोत्तम ॥ दोषानपि च ते वच्मि ताञ्च्छृणुष्व समाहितः ॥ ५५ ॥ यदि तावद्वनादस्माद्यामोन्यत्र वयं नृप ॥ अदृष्टमुद्गराघातैर्नूनं हन्यामहे ततः ॥ ॥ ५६ ॥ तथा धर्मक्रियाः सर्वा मानुषाणामुदाहृताः ॥ न प्रेतानां न देवानां नान्येषां मानुषं विना ॥ ५७ ॥ पश्यामो दूरतो राजञ्जलपूर्णाञ्जलाशयान् ॥ पिपासाकुलिताः श्रांता भास्करे वृषसंस्थिते ॥ ५८ ॥ गच्छामः संनिधौ तेषां यदि पार्थिवसत्तम ॥ अदृष्टमुद्गराघातैर्वयं हन्यामहे ततः ॥ ५९ ॥ तथा [1]रसवतीः सिद्धाः पश्यामो दूरसंस्थिताः ॥ क्षुधाविष्टा गृहस्थानां गृहेषु विविधा नृप ॥ ६० ॥ तथा सुफलिनो वृक्षान्कलपक्षिभिरावृतान् ॥ स्निग्धान्सच्छाययोपेतान्सेवितुं न लभामहे ॥ ६१ ॥ किंवा ते बहुनोक्तेन यद्यत्कर्म विगर्हितम् ॥ क्लेशदं च तदस्माकं स्वयमेवोपतिष्ठते ॥ ६२ ॥ न च्छिद्रेण विनाऽस्माकं प्राणयात्रा प्रजायते ॥ न [2]जलानि न च च्छाया न यानं न च वाहनम् ॥ ६३ ॥ एतस्मात्कारणान्नित्यं भ्रमा[3]मश्छिद्रहेतवे ॥ प्राप्ते रात्रिमुखे राजन्न प्रातर्न च वासरे ॥ ६४ ॥ यत्त्वं शंससि चाऽस्माकं खेचरत्वं महीपते ॥ व्यर्थं तदपि न श्रेयः शृणु तत्रापि कारणम् ॥ ६५ ॥ क्रियते खेचरत्वेन किंकिं धर्मं विनिश्चयैः ॥ यतो न सिध्यते मोक्षो जातिस्मृत्यादिकं तथा ॥ ६६ ॥ तस्माद्दोषादिमे राजन्गुणा यद्यपि कीर्तिताः ॥ प्रेतानां यान्समाश्रित्य काचित्सिद्धिर्न जायते ॥ ६७ ॥ विषादो जायते भूयो गुणैरेतैर्नराधिप ॥ अशक्ताः प्रेतयोगाद्वै सर्वस्य शुभकर्मणः ॥ ६८ ॥ ॥ राजोवाच ॥ ॥ यदि यास्यामि भूयोऽहं गृहमस्मान्महावनात् ॥ तत्करिष्यामि सर्वेषां गयाश्राद्धमसंशयम् ॥ ६९ ॥ तारयिष्यामि सर्वांश्च सर्वपापैः प्रयत्नतः ॥ अध्यात्मदेहदानेन सत्येनात्मानमालभे ॥ ॥ ७० ॥ यस्माद्ध्रुद्गतशंका मे हृता युष्माभिरद्य वै ॥ येन [4]तत्प्राप्य युष्माकमुपकारं करोम्यहम् ॥ ७१ ॥ ॥ मांसाद उवाच ॥ ॥ इतः स्थानान्महाराज नातिदूरे जलाशयः ॥ अस्ति नानाद्रुमोपेतश्चित्ताह्लादकरः परः ॥ ७२ ॥ तस्मादुदङ्मुखो गच्छ यत्र ते जलपक्षिणः ॥ दृश्यंते व्योममार्गेण प्रगच्छंतः समंततः ॥ ७३ ॥ ॥ सूत उवाच ॥ ॥ अथासौ नृपशार्दूलः समुत्थाय शनैःशनैः ॥ सौम्यां दिशं समुद्दिश्य [5]प्रतस्थे स तु दुःखितः ॥ ७४ ॥ एवं प्रगच्छता तेन क्षुत्पिपासाकुलेन च ॥ अदूरादेव संदृष्टं नीलं द्रुमकदंबकम् ॥ भ्रममाणैर्बकैर्हंसैः सारसैर्मद्गु[6]भिस्तथा ॥ ७५ ॥



१ रसवतीः सिद्धाः—रसवतीः—स्वयंपाकशालाः—सिद्धाः—सिद्धान्नसंपन्नाः । सिद्धान्नसंपन्नाःस्वयंपाकशालाः—इत्यर्थः । २ जलानि:—इ०, स्थलानि:—इ० च पा० । ३ वसामः—इ०पा० । ४ तत्प्राप्य—तत्—गयास्थानम्—प्राप्य गत्वा—इत्यर्थः । ५ प्रस्थितः—इ०पा० । ६ पक्षिभिर्बहुभिस्तथा—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स गत्वा सलिलं तत्र तद्वातेन[1] महीपतिः ॥ आहूत इव शीतेन प्रययौ त्वरयान्वितः ॥ ७६ ॥ अथाऽपश्यन्मनोहारि सौम्यसत्त्वनिषेवितम् ॥ आश्रमं ह्रदतीरस्थं तापसैः सर्वतो वृतम् ॥ ७७ ॥ पुष्पितैः फलितैर्वृक्षैः समंतात्परिवेष्टितम्[2] ॥ विचित्रैर्मधुरारावैर्नादितं विहगोत्तमैः ॥ ७८ ॥ तत्रापश्यन्नगाधस्तात्तपस्विगणसेवितम् ॥ शिवधर्मपरं शांतं जैमिनिं मुनिसत्तमम् ॥ ७९ ॥ अथ गत्वा स राजेंद्रः प्रणिपत्य मुनीश्वरम् ॥ तथान्यानपि तच्छिष्यान्निपपात[3] धरातले ॥ ८० ॥ ते दृष्ट्वाऽदृष्टपूर्वं तं राजलक्षणलक्षितम् ॥ धूलिधूसरितांगं च भस्मावृतमिवाचलम् ॥ ८१ ॥ मन्यमाना महीपालं विस्मयोत्फुल्ललोचनाः ॥ प्रोचुश्च मधुरैर्वाक्यैराशीर्वादपुरःसरैः ॥ ८२ ॥ कुतस्त्वमनुसंप्राप्तो वनेऽस्मिन्जनवर्जिते ॥ एकाकी सुकुमारांगः पदातिः श्रमविह्वलः ॥ ८३ ॥ पार्थिवस्येव लिंगानि दृश्यंते तव भूरिशः ॥ न विद्मो निश्चयं तस्माद्वदागमनकारणम् ॥ ८४ ॥ अथोवाच नृपः कृच्छ्रात्पिपासा मां प्रबाधते ॥ तस्माद्ददत पानीयं यत्पीत्वा कीर्तयाम्यहम् ॥ ८५ ॥ ततस्तैर्दर्शितं तोयं समीपे यन्महीपतेः ॥ सोऽपि पीत्वाऽवगाह्याथ वितृष्णः समपद्यत ॥ ८६ ॥ ततः फलानि पक्वानि तरूणां पतितान्यधः ॥ सुमृष्टानि समादाय भक्षयामास वांछया ॥ ८७ ॥ ततस्तृप्तिं परां प्राप्य गत्वा जैमिनिसंनिधौ ॥ उपविष्टः प्रणम्योच्चैस्तथान्यांश्च मुनीन्क्रमात् ॥ ८८ ॥ उवाच च निजां वार्तां कृतांजलिपुटः स्थितः ॥ स पृष्टस्तापसैः सर्वैः सुविस्मयसमन्वितैः ॥ ८९ ॥ विदूरथो महीपोऽहं माहिष्मत्यां कृतास्पदः ॥ मृगलिप्सुर्वने घोरे प्रविष्टः सैनिकैः सह ॥ ९० ॥ ततो मे भ्रममाणस्य प्रणष्टाः सर्वसैनिकाः ॥ गुल्मैरंतारिताश्चाऽन्ये न जानेऽहं कथं स्थिताः ॥ ९१ ॥ आसीद्धयो ममाऽधस्ताज्जात्यः सर्वगुणान्वितः ॥ सोऽपि कर्मविपाकेन पञ्चत्वं समुपस्थितः ॥ ९२ ॥ भ्रममाणस्त्वहं प्राप्त आयुःशेषतयात्र च ॥ तद्बूत कः प्रदेशोऽयं कियद्दूरे च मे पुरी ॥ ९३ ॥ ततस्ते तापसाः प्रोचुर्विद्महे न वयं पुरीम् ॥ त्वां च देशं च ते राजन्कोऽयं देशश्च कीर्त्यते ॥ ९४ ॥ नरेन्द्रैर्नैव नः कार्यं न देशैर्न पुरैर्नृप ॥ वनेचरा वयं नित्यं शिवाराधनतत्पराः ॥ ९५ ॥ सर्वे शीर्णानि वृक्षाणां पुष्पाणि च फलानि च ॥ भक्षयामोऽथ पत्राणि शरीरस्थितिहेतुना ॥ ९६ ॥ मानुषैः सह संसर्गं संभाषं च नराधिप ॥ न कुर्मो न च पश्यामो गच्छामोऽन्यत्र दूरतः ॥ ९७ ॥ एकैकस्य तरोर्मूले दिवसं वा दिनद्वयम् ॥ तिष्ठामो न भवेद्येन ममत्वं तत्समुद्भवम् ॥९८॥ कारणात्तव राजेंद्र निशामेतां वनस्पतौ ॥ नेष्यामोऽन्यत्र यास्यामः प्रभाते ऽन्यत्र कानने ॥ ९९ ॥ एकाकिनं पदातिं च विशस्त्रं श्रमविह्वलम् ॥ त्वां दृष्ट्वा भूपतेऽस्माकं दया जाता ततोऽधिका ॥१००॥ एकाकी पार्थिवे

१ तद्वातेन—सलिलाशयतः समागतेन वातेन—इत्यर्थः। २ परिसेवितम्—इ०पा०। ३ निपपात—साष्टाङ्गप्रणतिं चकार—इत्यर्थः। उपविष्टान्धरातले—इ०पा०।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



न्द्रोऽयं नेष्यति च कथं निशाम् ॥ वनेऽस्मिन्मंत्रयित्वैवं ततोऽत्रैव व्यवस्थिताः ॥ १०१ ॥ तस्मादत्रैव नेष्यामः समेताः शर्वरीमिमाम् ॥ गंतव्यं प्रातरुत्थाय ततः सर्वैर्यदृच्छया ॥ १०२ ॥ एवं संवदतां तेषां भगवांस्तीक्ष्णदीधितिः ॥ अस्ताचलमनुप्राप्तः कुंकुमक्षोदसंनिभः[1] ॥ १०३ ॥ अथ तांस्तापसान्राजा प्रोवाच प्रणतः स्थितः ॥ संध्याकालः समायातः सांप्रतं मुनिसत्तमाः ॥ तस्मात्संध्याविधिः कार्यः सर्वैरेव यथोचितः ॥ १०४ ॥ अथ ते मुनयः सर्वे स च राजा तथा द्विजाः ॥ चक्रुः सायंतनं कर्म यथोद्दिष्टं पुरातनैः ॥ १०५ ॥ कामिभिः कामिनीलोकैः प्रियोत्कैरभिवांछिता ॥ असत्स्त्रीभिर्विशेषेण संप्राप्ता रजनी ततः ॥ १०६ ॥ पीयूषार्णववेलेव विषवृक्षलतेव च ॥ उलूकैश्चक्रवाकैश्च युगपद्या विलोक्यते ॥ १०७ ॥ उलूका राक्षसाश्चौराः कामिनः कुलटांऽगनाः ॥ यां वांछंति सदा सोत्काः सुवृष्टिमिव कर्षुकाः ॥ १०८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये मांसादवचनादृष्याश्रमपदं प्राप्तस्य विदूरथस्य मुनिभिः सह संवादपूर्वकसायंतनकर्मादिविधानवर्णननामाष्टादशोऽध्यायः ॥ १८ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एतस्मिन्नंतरे प्राप्तास्तस्य भूपस्य सेवकाः ॥ केचिच्च दैवयोगेन श्वापदैरर्धभक्षिताः ॥ १ ॥ क्षुत्पिपासातुरा दीना दुःखेन महताऽन्विताः ॥ पदपद्धतिमार्गेण येन यातः स भूपतिः ॥ २ ॥ ते दृष्ट्वा पार्थिवं तत्र दिष्ट्यादिष्ट्येति सादरम् ॥ ब्रुवंतः पादयोस्तस्य पतिता हर्षसंयुताः ॥ ३ ॥ ततस्तस्य नरेन्द्रस्य व्यसनं सैन्यसंभवम् ॥ प्रोचुश्चैव यथादृष्टमनुभूतं यथाश्रुतम् ॥४॥ अथ ते तापसाः सर्वे स च राजा ससेवकः ॥ प्रसुप्ताः पादपस्याधः पर्णान्यास्तीर्य भूतले ॥५॥ ततस्तेषां प्रसुप्तानां सर्वेषां तत्र कानने ॥ अतिक्रांता सुखेनैव रजनी सा महात्मनाम्[2] ॥ ६ ॥ ततः स प्रातरुत्थाय कृतपूर्वाह्णिकक्रियः ॥ तं मुनिं प्रणिपत्योच्चैरनुज्ञाप्य मुहुर्मुहुः ॥ ७ ॥ निजैस्तैः सेवकैः सार्धं प्रस्थितः स्वपुरीं प्रति ॥ माहिष्मतीं समुद्दिश्य दृष्ट्वा मार्गे शनैःशनैः ॥ ८ ॥ ततो निजगृहं प्राप्य कश्चित्कालं महीपतिः ॥ विश्रम्य प्रययौ पश्चात्तूर्णं पुण्यं गयाशिरः ॥ ९ ॥ तच्च कालेन संप्राप्य स्नात्वा धौतांबरः शुचिः ॥ मांसादाय ददौ श्राद्धं श्रद्धापूतेन चेतसा ॥ १० ॥ अथाऽसौ पृथिवीपालः स्वप्नांते च ददर्श तम् ॥ दिव्यमाल्यांबरधरं दिव्यगंधानुलेपनम् ॥ विमानवरमारूढं स्तूयमानं च किंनरैः[3] ॥ ११ ॥ ॥ मांसाद उवाच ॥ ॥ प्रसादात्तव भूपाल मुक्तोऽहं प्रेतयोनितः ॥ स्वस्ति तेऽस्तु गमिष्यामि सांप्रतं त्रिदिवालयम् ॥ १२ ॥ ततः स प्रातरुत्थाय हर्षाविष्टो महीपतिः ॥ विदैवतं समुद्दिश्य चक्रे श्राद्धं यथोचितम् ॥ १३ ॥ सोऽपि तेनैव रूपेण तस्य

१ कुंकुमक्षोदसंनिभः--कुंकुमचूर्णसदृशः । २ महोत्सवा--इ० पा० । ३ किंकरैः--इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संदर्शनं गतः ॥ स्वप्नांऽते भूमिपालस्य तद्वचोक्त्वा दिवं गतः ॥ १४ ॥ ततः प्रातस्तृतीयेऽह्नि कृतघ्नस्य महीपतिः ॥ चक्रे श्राद्धं यथापूर्वं श्रद्धापूतेन
चेतसा ॥ १५ ॥ ततः सोऽपि समायातस्तस्य स्वप्ने महीपतेः ॥ तेनैव प्रेतरूपेण दुःखेन महता वृतः ॥ १६ ॥ ॥ कृतघ्न उवाच ॥ ॥ न मे
गतिर्महाराज संजाता पापकर्मिणः ॥ तडागवित्तचौरस्य कृतघ्नस्य तथैव च ॥ १७ ॥ तस्मात्संजायते मुक्तिर्यथा मे पार्थिवोत्तम ॥ तथैव त्वं
कुरुष्वाऽद्य सत्यवाक्यपरो भव ॥ १८ ॥ सत्यमेव परं ब्रह्म सत्यमेव परं तपः ॥ सत्यमेव परं ज्ञानं सत्यमेव परं श्रुतम् ॥ १९ ॥ सत्येन वायु
र्वहति सत्येन तपते रविः ॥ सागरः सत्यवाक्येन मर्यादां न विलंघयेत् ॥ २० ॥ तीर्थसेवा तपो दानं स्वाध्यायो गुरुसेवनम् ॥ सर्वं सत्यवि
हीनस्य व्यर्थं संजायते यतः ॥ २१ ॥ सर्वे धर्मा धृताः पूर्वमेकत्राऽन्यत्र चाप्यृतम् ॥ तुलायां कौतुकाद्देवैर्जातं तत्र ऋतं गुरु ॥ २२ ॥ तस्मा
त्सत्यं पुरस्कृत्य मां तारय महामते ॥ एतत्ते परमं श्रेयस्तपसोऽपि भविष्यति ॥ २३ ॥ ॥ विदूरथ उवाच ॥ ॥ कथं ते जायते मुक्तिर्वद मे
प्रेत सत्वरम् ॥ करोमि येन तत्कर्म यद्यपि स्यात्सुदुष्करम् ॥ २४ ॥ ॥ प्रेत उवाच ॥ ॥ चमत्कारपुरे भूप श्रीक्षेत्रे हाटकेश्वरे ॥
आस्ते पांसुभिराच्छन्नं कलेर्भीतं गयाशिरः ॥ २५ ॥ अधस्तात्प्लक्षवृक्षस्य दर्भस्थानैः समंततः ॥ कालशाकैस्तथानेकैस्तिलैश्चारण्यसंभवैः ॥
॥ २६ ॥ तत्र गत्वा तिलैस्तैस्त्वं तैः शाकैस्तैः कुशैस्तथा ॥ श्राद्धं देहि द्रुतं येन मुक्तिः संजायते मम ॥ २७ ॥ तस्य तद्वचनं श्रुत्वा स दीनस्य
दयान्वितः॥ जगाम तत्र यत्राऽऽस्ते स वृक्षः प्लक्षसंज्ञकः॥ २८ ॥ दृष्ट्वा शाकांस्तिलांस्तांस्तु दर्भांस्तेन यथोदितान् ॥ अखनत्तत्र देशे च जलार्थे लघु
कूपिकाम् ॥ २९ ॥ ततः कृतघ्नमुद्दिश्य श्राद्धं चक्रे यथोदितम् ॥ आनीय ब्राह्मणाञ्छ्रेष्ठान्वेदवेदांगपारगान् ॥ ३० ॥ कृतमात्रे ततः श्राद्धे दिव्य
रूपधरः पुमान् ॥ विमानवरमारूढो विदूरथमथाऽब्रवीत् ॥ ३१ ॥ मुक्तोऽहं त्वत्प्रसादाच्च प्रेतत्वाद्दारुणाद्विभो ॥ स्वस्ति तेऽस्तु गमिष्यामि सांप्रतं
त्रिदशालयम्[1] ॥ ३२ ॥ ॥ सूत उवाच ॥ ॥ ततःप्रभृति सा तत्र कूपिका ख्यातिमागता ॥ पितॄणां पुष्टिदा नित्यं गयाशीर्षसमुद्भवा ॥ ३३ ॥
प्रेतपक्षस्य दर्शायां[2] यस्तस्यां श्राद्धमाचरेत् ॥ कालशाकेन विप्रेंद्रास्तथारण्योद्भवैस्तिलैः ॥ ३४ ॥ कृतितैश्च तथा दर्भैः सम्यक्छ्रद्धासमन्वितः ॥
स प्राप्नोति फलं कृत्स्नं कृतघ्नप्रेततीर्थतः ॥ ३५ ॥ अग्निष्वात्ताः पितृगणास्तथा बर्हिषदश्च ये ॥ तत्र संनिहिता नित्यमाज्यपाः सोमपास्त

१ त्रिदिवालयम्--इ० पा० । २ प्रेतपक्षस्य दर्शायाम्--भाद्रपदकृष्णामावास्यायाम्--सर्वपित्रीत्याख्यायाम्--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



था ॥ ३६ ॥ तस्मात्सर्वप्रयत्नेन श्राद्धं तत्र समाचरेत् ॥ काले वा यदि वाऽकाले पितृणां तुष्टये सदा ॥ ३७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये मांसादादिप्रेतत्रयस्य विदूरथकृतश्राद्धद्वारा मुक्तिदाने पितृकूपिकातीर्थमाहात्म्यवर्णनंनामैकोनविंशोऽध्यायः ॥ १९ ॥ ॥ छ ॥ ॥ ॥ सूत उवाच ॥ ॥ तत्र दाशरथी रामो वनवासाय दीक्षितः ॥ भ्रममाणो धरापृष्ठे सीतालक्ष्मणसंयुतः ॥ १ ॥ समाऽऽयातो द्विजश्रेष्ठा यत्र सा पितृकूपिका ॥ तृषार्तश्च श्रमार्तश्च निषसाद धरातले ॥ २ ॥ एतस्मिन्नंतरे प्राप्तो भगवान्दिननायकः ॥ अस्ताचलं जपापुष्पसन्निभो द्विजसत्तमाः ॥ ३ ॥ ततः प्लक्षनगाधस्तात्पर्णान्यास्तीर्य भूतले ॥ सायंतनं विधिं कृत्वा सुष्वाप रघुनन्दनः ॥ ४ ॥ अथाऽवलोकयामास स्वप्ने दशरथं नृपम् ॥ यद्वत्पूर्वं प्रियाऽऽलापसंसक्तं हृष्टमानसम् ॥ ५ ॥ ततः प्रभाते विमले प्रोद्गते[1] रविमण्डले ॥ विप्रानाहूय तत्सर्वं कथयामास राघवः ॥ ६ ॥ अद्य स्वप्ने मया विप्राः प्रियालापपरः पिता ॥ अतिहृष्टमना दृष्टः श्वेतमाल्यानुलेपनः ॥ ७ ॥ तत्कीदृक्परिणामोऽस्य स्वप्नस्य द्विजसत्तमाः ॥ भविष्यति प्रजल्पध्वं[2] परं कौतूहलं यतः ॥ ८ ॥ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ पितरः श्राद्धकामा ये वृद्धिं पश्यंति वा नृप ॥ ते स्वप्ने दर्शनं यांति पुत्राणामिति नः श्रुतम् ॥ ९ ॥ तदस्यां कूपिकायां च स्वयमेव गया स्थिता ॥ तेन त्वया पिता दृष्टः स्वप्ने श्राद्धस्य वांछकः ॥ १० ॥ तस्मात्कुरु रघुश्रेष्ठ श्राद्धमत्र यथोदितम् ॥ नीवारैः शाकमूलैश्च तथाऽरण्योद्भवैस्तिलैः ॥ ११ ॥ अथैवामन्त्रयामास तान्विप्रान्रघुसत्तमः ॥ श्राद्धेषु श्रद्धया युक्तः प्रसादः क्रियतामिति ॥ १२ ॥ बाढमित्येव ते चोक्त्वा स्नानार्थं द्विजसत्तमाः ॥ गताः सर्वे सुसंहृष्टाः स्वकीयानाश्रमान्प्रति ॥ १३ ॥ अथ तेषु प्रयातेषु ब्राह्मणेषु रघूत्तमः ॥ प्रोवाच लक्ष्मणं पार्श्वे विनयावनतं स्थितम् ॥ १४ ॥ शाकमूलफलान्याशु श्राद्धार्थं समुपानय ॥ सौमित्रानय वैदेही स्वयं पचति भामिनी ॥ १५ ॥ तच्छ्रुत्वा लक्ष्मणस्तूर्णं जगामाऽरण्यमेव हि ॥ श्राद्धार्थमानिनायाऽऽशु फलानि विविधानि च ॥ १६ ॥ धात्रीफलानि चाऽऽम्राणि चिर्भटानींगुदानि च ॥ करीराणि कपित्थानि तथैवाऽन्यानि भूरिशः ॥ १७ ॥ ततश्च पाचयामास तदर्थे जनकोद्भवा ॥ रामादेशात्स्वयं साध्वी विनयेन समन्विता ॥ १८ ॥ ततश्च कुतपे प्राप्ते काले ते द्विजसत्तमाः ॥ कृताह्निकाः समायाता रामभक्तिसमन्विताः ॥ १९ ॥ एतस्मिन्नंतरे सीता प्लक्षवृक्षांतरे स्थिता ॥ आत्मानं गोपयामास यथा वेत्ति न राघवः[3] ॥ २० ॥ स तां सीतेति सीतेति व्याहृत्याथ मुहुर्मुहुः ॥ स्त्रीधर्मिणीति मत्वा ॥ २० ॥

१ प्रोद्गते—उदयं प्राप्ते सति—इत्यर्थः । २ प्रजानीध्वम्—इ०पा० । ३ यथा रामो न पश्यति—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तु लक्ष्मणं चेदमब्रवीत् ॥ २१ ॥ वत्स लक्ष्मण शुश्रूषां विप्राणां श्राद्धसंभवाम् ॥ पादप्रक्षालनाद्यां त्वं यथावत्कर्तुमर्हसि ॥ २२ ॥ बाढमित्येव संप्रोक्तो लक्ष्मणः शुभलक्षणः ॥ चक्रे सर्वं तथा कर्म यथा नारी विचक्षणा ॥ २३ ॥ ततो निर्वर्तिते श्राद्धे ब्राह्मणेषु गतेष्वथ ॥ जनकस्य सुता साध्वी तत्क्षणात्समुपस्थिता ॥ २४ ॥ तां दृष्ट्वा राघवः सीतां कोपसंरक्तलोचनः ॥ प्रोवाच परुषैर्वाक्यैर्भर्त्समानो मुहुर्मुहुः ॥ २५ ॥ आयातेषु द्विजातेषु[1] श्राद्धकाल उपस्थिते ॥ क्व गता वद पापे त्वं मां परित्यज्य दूरतः ॥ २६ ॥ नैतद्युक्तं कुलस्त्रीणां विशेषादत्र कानने ॥ विहर्तुं दूरतः शून्ये तस्मात्त्याज्या[2]ऽसि मैथिलि ॥ २७ ॥ तस्य तद्वचनं श्रुत्वा भीता सा जनकोद्भवा ॥ उवाच वेपमानांगी प्रस्खलंत्या गिरा ततः ॥ २८ ॥ न मामर्हसि कार्येऽस्मिन्गर्हितुं रघुसत्तम ॥ यस्मादहमतिक्रान्ता स्थानादस्माच्छृणुष्व तत् ॥ २९ ॥ पिता तव मया दृष्टः साक्षाद्दशरथः स्वयम् ॥ ब्राह्मणस्य शरीरस्थो द्वितीयश्च पितामहः ॥ ३० ॥ पितुः पितामहोऽन्यस्य तृतीयस्य रघूत्तम ॥ त्रयाणां च तथाऽन्येषां त्रयोऽन्ये नृपसंनिभाः ॥ ३१ ॥ ब्राह्मणानां मया दृष्टाः शरीरस्थाः सुहर्षिताः ॥ मातामहानहं मन्ये तानपि त्रीनहं स्फुटम् ॥ ३२ ॥ ततोऽहं लज्जया नष्टा दृष्ट्वा श्वशुरसंगमान् ॥ येन भुक्तानि भोज्यानि पुरा मृष्टान्यनेकशः ॥ ३३ ॥ तथा खाद्यानि[3] लेह्यानि चोष्याणि च विशेषतः ॥ पिता तव कथं सोऽद्य कषायाणि कटूनि च ॥ भक्षयिष्यति दत्तानि स्वहस्तेन मया विभो ॥ ३४ ॥ एतस्मात्कारणान्नष्टा[4] त्वत्समीपादहं विभो ॥ श्राद्धकालेऽपि संप्राप्ते सत्येनात्मानमालभे ॥ ३५ ॥ तच्छ्रुत्वा संप्रहृष्टात्मा रामो राजीवलोचनः ॥ साधुसाध्विति तां प्राह परिष्वज्य मुहुर्मुहुः ॥ ३६ ॥ ततो भुक्त्वा स्वयं रामो लक्ष्मणेन समन्वितः ॥ सायाह्ने समनुप्राप्ते संध्याकार्यं विधाय च ॥ ३७ ॥ प्रोवाच लक्ष्मणं वत्स पर्णान्यास्तीर्य भूतले ॥ शय्यां कुरु समानीय पादशौचाय सज्जलम् ॥ ३८ ॥ ततः कोपपरीतात्मा सौमित्रिः प्राह राघवम् ॥ नाहं शय्यां करिष्यामि पादप्रक्षालनं न च ॥ ३९ ॥ तथाऽन्यदपि यत्किंचित्कर्म स्वल्पमपि प्रभो ॥ त्वां वा त्यक्त्वा गमिष्यामि कुत्रचित्पीडितो भृशम् ॥ ॥ ४० ॥ प्रेष्यत्वेन रघुश्रेष्ठ सत्यमेतन्मयोदितम् ॥ सीतायाः किं समादेश्यं न किंचित्संप्रयच्छसि ॥ अपि स्वल्पतरं राम मया त्वं किं करिष्यसि ॥ ४१ ॥ तस्य तद्वचनं श्रुत्वा विकृतं चापि राघवः ॥ तूष्णीं बभूव मेधावी हास्यं कृत्वा मनाक्ततः ॥ ४२ ॥ ततः स्वयं समुत्थाय कृत्वा स्वास्तरकं शुभम् ॥ सीतया क्षालितांघ्रिस्तु सुष्वाप तदनंतरम् ॥ ४३ ॥ लक्ष्मणोऽपि विदूरस्थः कोपसंरक्तलोचनः ॥ वृक्षमूलं समाश्रित्य सुप्तश्चित्ते

१ द्विजातेषु—ब्राह्मणेषु—इत्यर्थः । २ पापासि—इ० पा० । ३ खाद्यानि—इ० पा० । ४ नष्टा—अदर्शनं गता—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



व्यचिंतयत् ॥ ४४ ॥ हत्वैनं राघवं सुप्तं सीतां पत्नीं विधाय च ॥ किं गच्छामि निजं स्थानं विदेशं वाऽपि दूरतः ॥ ४५ ॥ एवं चिंतयतस्तस्य
बहुधा लक्ष्मणस्य सा ॥ व्यतिक्रांता निशा विप्राः कृच्छ्रेण महता ततः ॥ ४६ ॥ न तस्य निश्चयो जज्ञे तस्मिन्कृत्ये कथंचन ॥ कोपात्प्रण
ष्टनिद्रस्य सोष्णं निःश्वसतो मुहुः ॥ ४७ ॥ ततः प्रभाते विमले कृतपूर्वाह्णिकक्रियः ॥ रामः सीतां समादाय प्रस्थितो दक्षिणां दिशम् ॥ ४८ ॥
लक्ष्मणोऽपि धनुः सज्यं कृत्वा संधाय सायकम् ॥ अनुव्रजति पृष्ठस्थस्तस्य च्छिद्रं विलोकयन् ॥ ४९ ॥ ततो गोकर्णमासाद्य प्रणम्य च महे
श्वरम् ॥ प्रतस्थे राघवो यावत्सौमित्रिस्तावदागतः ॥ ५० ॥ बाष्पपर्याकुलाक्षश्च व्रीडयाऽधोमुखः स्थितः ॥ प्रणम्य शिरसा रामं ततः प्राह सुदुः
खितः ॥ ५१ ॥ कुरु मे निग्रहं नाथ स्वामिद्रोहसमुद्भवम् ॥ अतिपापस्य दुष्टस्य कृतघ्नस्य रघूत्तम ॥ ५२ ॥ उत्तराणि विरुद्धानि तव दत्तानि
भूरिशः ॥ मया विनाऽपराधेन वधोपायश्च चिंतितः ॥ ५३ ॥ ततश्च तं परिष्वज्य रामोऽपि निजबांधवम् ॥ बाष्पक्लिन्नमुखः प्राह क्षांतं वत्स मया
तव ॥ ५४ ॥ न ते त्वन्यः प्रियः कश्चिन्मां मुक्त्वा वेद्म्यहं स्फुटम् ॥ तस्मादागच्छ गच्छामो मार्गं वेलाधिका भवेत् ॥५५॥ ॥ लक्ष्मण उवाच ॥ ॥
यदि मे निग्रहं नाथ न करिष्यसि सांप्रतम् ॥ प्राणत्यागं करिष्यामि वह्नावात्मविशुद्धये ॥ ५६ ॥ रामलक्ष्मणयोरेवं वदतोस्तत्र कानने ॥ आजगाम
मुनिश्रेष्ठो मार्कंड इति यः स्मृतः ॥ ५७ ॥ ततः प्रणम्य तं रामः सीतालक्ष्मणसंयुतः ॥ प्रोवाच स्वागतं तेस्तु कुतः प्राप्तोऽसि सन्मुने ॥ ५८ ॥
॥ ॥ मार्कंडेय उवाच ॥ ॥ प्रभासादहमायातः सांप्रतं रघुनंदन ॥ स्वमाश्रमं गमिष्यामि क्षेत्रेऽत्रैव व्यवस्थितम् ॥ ५९ ॥ मया राघव तत्राऽस्ति
स्थापितः प्रपितामहः ॥ तस्याऽद्य दिवसे यात्रा बहुश्रेयःप्रदा स्मृता ॥ ६० ॥ तस्मात्त्वमपि तत्रैव तूर्णमेव मया सह ॥ ममाश्रमपदे स्थित्वा
पश्य देवं पितामहम् ॥ ६१ ॥ येन स्याः सर्वशत्रूणामगम्यस्त्वं रघूद्वह ॥ ज्येष्ठपञ्चदशीयोगे ज्येष्ठपुत्रः समाहितः ॥ ६२ ॥ यस्तत्र कुरुते स्नानं तस्य
मृत्युभयं कुतः ॥ साऽद्य पंचदशी राम ज्येष्ठमाससमुद्भवा ॥ ज्येष्ठानक्षत्रसंयुक्ता तस्मात्स्नातुं त्वमर्हसि ॥ ६३ ॥ ततः संप्रस्थितं रामं दृष्ट्वा प्रोवाच
लक्ष्मणः ॥ कुरु मे निग्रहं तावद्गच्छ तीर्थं ततः प्रभो ॥ ६४ ॥ ॥ राम उवाच ॥ ॥ स्थितेऽस्मिन्मुनिशार्दूले समीपे वत्स लक्ष्मण ॥ अनर्हा
निष्कृतिः कर्तुं तस्मादेनं प्रयाचय ॥ ६५ ॥ ॥ लक्ष्मण उवाच ॥ ॥ स्वामिद्रोहे कृते ब्रह्मन्प्रायश्चित्तं यदीक्ष्यते ॥ तन्मे देहि स्फुटं येन कायशुद्धिः
प्रजायते ॥ ६६ ॥ ॥ मार्कंडेय उवाच ॥ ॥ ममाऽऽश्रमसमीपेऽस्ति सुतीर्थं [1]बालमंडनम् ॥ स्वामिद्रोहरताः स्नाता मुच्यंते तत्र पातकैः ॥ ६७ ॥

१ वालमण्डपम्—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र शक्रो विपाप्माभूद्धत्वा गर्भं दितेः पुरा ॥ विश्वस्ताया विशेषेण मातुः काकुत्स्थसत्तम ॥ तस्मात्तत्र द्रुतं गत्वा स्नानं कुरु महामते ॥ ६८ ॥
ततः प्रमुच्यसे पापात्स्वामिद्रोहसमुद्भवात् ॥ अपरं नास्ति ते दोषो मनसा पातकं कृतम् ॥ ६९ ॥ मनस्तापेन शुध्येत मतमेतन्मनीषिणाम् ॥
त्वया तु मनसा द्रोहः कृतो रामकृते यतः ॥ ७० ॥ ईदृक्षान्मनसस्तापात्तस्माच्छुद्धोऽसि लक्ष्मण ॥ अपरं शृणु मे वाक्यं नास्ति दोषस्तवा
नघ ॥ ७१ ॥ ईदृक्क्षेत्रप्रभावोऽयं सौभ्रात्रेण विवर्जितः ॥ पंचक्रोशात्मके क्षेत्रे ये वसन्त्यत्र लक्ष्मण ॥ ७२ ॥ अपि स्वल्पं न सौभ्रात्रं तेषां संजा
यते क्वचित् ॥ ७३ ॥ तावत्स्नेहपरो मर्त्यस्तावद्वदति कोमलम् ॥ चमत्कारोद्भवं क्षेत्रं यावन्न स्पृशतेंऽघ्रिभिः ॥ ७४ ॥ येऽन्येपि निवसंत्यत्र पशवः
पक्षिणो मृगाः ॥ तेऽपि सौहार्दनिर्मुक्ताः सस्पर्द्धा इतरेतरम् ॥ ७५ ॥ कस्यचित्केनचित्सार्धं सौहार्दं नैव विद्यते ॥ तस्मान्नैवास्ति ते दोष ईदृक्क्षे
त्रस्य संस्थितिः ॥ ७६ ॥ तथापि यदि ते काचिच्छंका चित्ते व्यवस्थिता ॥ तत्स्नानं कुरु गत्वा तु तस्मिंस्तीर्थे सुशोभने ॥ ७७ ॥ यत्र शक्रो
विपाप्माऽभूद्द्रोहं कृत्वा सुदारुणम् ॥ विश्वस्ताया दितेः पूर्वं गर्भपातसमुद्भवम् ॥ ७८ ॥ एवमुक्तस्तु सौमित्रिर्गत्वा तत्र द्विजोत्तमाः ॥ तीर्थे स्नानाच्च
संपन्नो विशुद्धः शक्रसेविते ॥ रामोऽपि तत्र गत्वाशु मार्कंडेयवराश्रमे ॥ ७९ ॥ स्नानं कृत्वा यथान्यायं ददर्शाऽथ पितामहम् ॥ जगामाऽथ
दिशं याम्यां सीतालक्ष्मणसंयुतः ॥ ८० ॥ तत्प्रभावाज्जघानाऽथ खरादीन्राक्षसोत्तमान् ॥ तथा वै रावणं रौद्रं मेघनादसमन्वितम् ॥ ८१ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये रामकृतयाम्यदिशाप्रयाणे बालमंडनतीर्थमाहात्म्य
वर्णनंनाम विंशोऽध्यायः ॥ २० ॥ ॥ छ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ मार्कंडेन कदा तत्र स्थापितः प्रपितामहः ॥ कस्मिन्स्थाने कृतस्तेन
स्वाश्रमो मुनिना वद ॥ १ ॥ ॥ सूत उवाच ॥ ॥ मृकण्डाख्यो द्विजश्रेष्ठ आसीद्वेदविदां वरः ॥ चमत्कारपुराभ्याशे वानप्रस्थाश्रमे
स्थितः ॥ २ ॥ शांतात्मा नियमोपेतश्चकार सुमहत्तपः ॥ तस्यैवं वर्तमानस्य वानप्रस्थस्य चाश्रमे ॥ ३ ॥ पश्चिमे वयसि प्राप्ते पुत्रो जज्ञे
सुशोभनः ॥ सर्वलक्षणसंपूर्णः पूर्णचंद्रसमप्रभः ॥ ४ ॥ मार्कंडइति नामाऽथ तस्य चक्रे पिता स्वयम् ॥ सोऽतीव ववृधे बालस्तस्मिन्नाश्रम
उत्तमे ॥ ५ ॥ शुक्लपक्षे समासाद्य तारापतिरिवांबरे ॥ वर्धमानस्य तस्यैवमतीताः पंच वत्सराः ॥ बालक्रीडाप्रसक्तस्य पितुरुत्सङ्गवर्तिनः ॥ ६ ॥
कस्यचित्त्वथ कालस्य कश्चित्तत्र समागतः ॥ सामुद्रिकस्य कृत्स्नस्य वेत्ता ज्ञानविधानभूः ॥ ७ ॥ स तं शिशुं समालोक्य नखाग्रान्मूर्द्धजावधिम् ॥

१ अपरम्—किंच— इत्यर्थः । २ रामः—इत्यध्याहार्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



विस्मयोत्फुल्लनयन ईषद्धास्यमथाऽकरोत् ॥ ८ ॥ मृकंडोऽपि समालोक्य ज्ञानिनं सस्मिताननम् ॥ पप्रच्छ विनयोपेतः किंचित्तुष्टेन चेतसा ॥ ९ ॥ ॥ मृकण्ड उवाच ॥ ॥ कस्मात्त्वं विप्रशार्दूल वीक्ष्येमं मम दारकम् ॥ सुचिरं विस्मयाविष्टस्ततोऽभूः सस्मिताननः ॥ १० ॥ ॥ सूत उवाच ॥ ॥ असकृत्तेन संपृष्टः सकृद्ब्राह्मणसत्तमः ॥ ततश्च कथयामास हास्यकारणमेव हि ॥ ११ ॥ ॥ ब्राह्मण उवाच ॥ ॥ लक्षणानि शिशोरस्य दृश्यंते यानि सन्मुने ॥ गात्रस्थानि भवेत्सत्यं तैः पुमानजरामरः ॥ १२ ॥ अस्य भावि पुनश्चाऽस्माद्दिवसान्निधनं शिशोः ॥ षड्भिर्मासैर्न सन्देहः सत्यमेतन्मयोदितम् ॥ १३ ॥ एवं ज्ञात्वा द्विजश्रेष्ठ कुरुष्वाऽस्य हितं च यत् ॥ इह लोके परे चैव बालकस्य ममाऽऽज्ञया ॥ १४ ॥ एवमुक्त्वा स विप्रेंद्रो जगामाऽभीप्सितां दिशम् ॥ मृकण्डोऽपि ततस्तस्य चक्रे मौंजीनिबन्धनम् ॥ १५ ॥ अकालेऽपि कुमारस्य किंचिद्धृत्वा[1] निजे हृदि ॥ कारणं कारणज्ञः स ततः प्रोवाच तं सुतम् ॥ १६ ॥ यं कं चिद्वीक्षसे पुत्र भ्रममाणं द्विजोत्तमम् ॥ तस्यावश्यं त्वया कार्यं विनयादभिवादनम् ॥ १७ ॥ एवं तस्य व्रतस्थस्य षण्मासा दिवसैस्त्रिभिः ॥ हीनाः स्युर्ब्राह्मणेंद्राणां नमस्कारपरस्य च ॥ १८ ॥ एतस्मिन्नंतरे प्राप्ता अग्नितीर्थपरायणाः ॥ सप्तर्षयः स्थितो यत्र मार्कंडो धृतमेखलः ॥ १९ ॥ तान्दृष्ट्वा स मुनीन्सर्वान्नमश्चक्रे मुनेः सुतः ॥ दीर्घायुर्भव तैरुक्तः सर्वैरपि पृथक्पृथक् ॥ २० ॥ अथ तं बालभावेन कौतुकाद्ब्रह्मचारिणः ॥ चिरं दृष्ट्वाऽब्रवीद्वाक्यं वसिष्ठो मुनिपुंगवः ॥ २१ ॥ सर्वैरेष शिशुः प्रोक्तो दीर्घायुरिति सादरम् ॥ तृतीयेऽह्नि पुनः प्राणांस्त्यक्ष्यत्ययमसंशयः ॥ २२ ॥ तन्न युक्तं भवेदीदृगस्माकं वचनं द्विजाः ॥ तस्मात्तत्क्रियतां कर्म येनायं स्याच्चिरायुधृक् ॥ २३ ॥ ततो मिथः समालोच्य सर्वे ते मुनिपुंगवाः ॥ प्रोचुर्न जीवनोपायो भवेन्मुक्त्वा पितामहम् ॥ २४ ॥ तस्मात्तस्य पुरो नीत्वा बालोऽयं क्षीणजीवितः ॥ क्रियतां तस्य वाक्येन यथा स्याच्चिरजीवभाक् ॥ २५ ॥ ततस्तु ते समादाय सत्वरं ब्रह्मचारिणम् ॥ ब्रह्मलोकं समाजग्मुस्त्यक्त्वा तीर्थपराक्रमम् ॥ २६ ॥ ततः प्रणम्य तं देवं वेदोक्तैःस्तवनैर्द्विजाः ॥ स्तुत्वाऽथ संविधे[2] तस्य निषेदुस्तदनन्तरम् ॥ २७ ॥ तेषामनंतरं सोऽपि नमश्चक्रे पितामहम् ॥ बालः प्रोक्तश्च दीर्घायुर्भवेति च स्वयंभुवा ॥ २८ ॥ अथोवाच मुनीन्सर्वान्विश्रांतान्पद्मयोनिजः ॥ कुतो यूयं समायाताः सांप्रतं केन हेतुना ॥ २९ ॥ प्रोच्यतां चापि यत्कृत्यं युष्माकं क्रियतेऽधुना ॥ मद्गृहे संप्रयातानां कोऽयं बालोऽपि सद्व्रती ॥ ३० ॥ ॥ मुनय ऊचुः ॥ ॥ तीर्थयात्राप्रसंगेन भ्रममाणा महीतलम् ॥ चमत्कारपुराभ्याशे वयं प्राप्ताः पितामह ॥ ३१ ॥ तत्रा

१ अहंकारेण चैव हि—इ० पा० । २ सविधे—समीपे—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेन वयं देव बालकेनाऽभिवादिताः ॥ क्रमात्सर्वैरपि प्रोक्तो दीर्घायुरिति सादरम् ॥ ३२ ॥ एतस्य तु द्युनः शेषमायुषो दिवसत्र
यम् ॥ विद्यते विबुधश्रेष्ठ व्रीडितास्तेन वै वयम् ॥ ३३ ॥ ततश्चैनं समादाय वयं प्राप्तास्तवांतिकम् ॥ भवताऽपि तथा प्रोक्तो दीर्घायु
र्बालकोऽस्त्वयम ॥ ३४ ॥ तस्माद्यथा वयं सत्या भवता सह पद्मज ॥ भवाम कुरु तत्कृत्यमेतस्मादागता वयम् ॥ ३५ ॥ ॥ सूत
उवाच ॥ ॥ तेषां तद्वचनं श्रुत्वा मुनीनां पद्मसंभवः ॥ प्रोवाच प्रहसन्वाक्यं समादाय च बालकम् ॥ ३६ ॥ मत्प्रसादादयं बालो जरामृत्युवि
वर्जितः ॥ भविष्यति न संदेहो वेदविद्याविचक्षणः ॥ ३७ ॥ तस्मात्प्राग्धरणीपृष्ठं व्रजध्वं मुनिसत्तमाः ॥ बालमेनं समादाय तस्मिन्नेवास्य मंदिरे
॥ ३८ ॥ यावदस्य पिता वृद्धः पुत्रदर्शनविह्वलः ॥ न याति निधनं सार्धं धर्मपत्न्या द्विजोत्तमाः ॥ ३९ ॥ अथाऽऽयाताश्च तं बालं सर्वे ते मुनि
सत्तमाः ॥ आगत्य वसुधापृष्ठं तस्यैवाश्रमसंनिधौ ॥ ४० ॥ अमुंचन्नग्नितीर्थे तं समाभाष्य ततः परम् ॥ तीर्थयात्राकृते पश्चाज्जग्मुरन्यत्र सत्वरम् ॥
॥ ४१ ॥ एतस्मिन्नंतरे विप्रो मृकंडः सुतवत्सलः ॥ नापश्यत्स्वसुतं पश्चाद्विललाप सुदुःखितः ॥ ४२ ॥ अहो मे तनयोऽभीष्टः कथमद्य न दृश्यते
कूपांतः पतितः किं नु किं व्यालैर्वा निपातितः ॥ ४३ ॥ कृत्वा मां दुःखसंतप्तं मातरं चापि पुत्रकः ॥ प्रस्थितो दीर्घमध्वानं विरुद्धं कृतवान्विधिः ॥
॥ ४४ ॥ पश्य ब्राह्मणि पापेन मया दुष्कृतकारिणा ॥ न बालस्य मुखं दृष्टं प्रस्थितस्य यमालये ॥४५॥ कथितं ज्ञानिना तेन मम पूर्वं महात्म
ना ॥ षड्भिर्मासैः सुतस्तेऽयं देहत्यागं करिष्यति ॥ ४६ ॥ सोऽहं पुत्रस्य दुःखेन साधयिष्ये हुताशनम् ॥ यावच्छोकाग्निना कायो दह्यते न वरान
ने ॥ ४७ ॥ ॥ ब्राह्मण्युवाच ॥ ॥ ममापि मतमेतद्धि यत्त्वया परिकीर्तितम् ॥ तत्किं चिरयसि ब्रह्मञ्छीघ्रं दारूणि चानय ॥ ४८ ॥ येनाऽहं
भवता सार्धं प्रवेक्ष्यामि हुताशनम् ॥ पुत्रशोकेन संतप्ता सुभृशं दुःखशांतये ॥ ४९ ॥ ॥ सूत उवाच ॥ ॥ एवं तयोः प्रवदतोर्दंपत्योर्द्विज
सत्तमाः ॥ आजगामाऽथ संहृष्टः स बालः सन्निधिं तयोः ॥ ५० ॥ तं दृष्ट्वा ब्राह्मणो हृष्टो ब्राह्मण्या सहितस्तदा ॥ आनंदाश्रुप्लुताक्षोऽथ सम्मुख
स्तमुपाद्रवत् ॥ ५१ ॥ भूयोभूयः परिष्वज्य सभार्यः पृष्टवांस्तदा ॥ क्व गतः स्वाश्रमाद्वत्स चिरात्कस्मादिहाऽऽगतः ॥ ५२ ॥ शोकार्णवे परिक्षिप्य
मां सभार्यं वयोऽधिकम् ॥ तन्मा पुत्रक भूयस्त्वमीदृक्कर्म करिष्यसि ॥ ५३ ॥ ॥ मार्कंडेय उवाच ॥ ॥ अत्राऽद्य मुनयः प्राप्ता मया ते चाभिवा
दिताः ॥ क्रमेण विनयात्तात स्मरमाणेन ते वचः ॥ ५४ ॥ दीर्घायुर्भव तैरुक्तः सर्वैरेवं द्विजोत्तमैः ॥ दृष्ट्वा मां विस्मयाविष्टैर्बालकं व्रतिनं

१ वै--इ० पा० । २ मां दह हि प्रशान्तये-इ०, मां दह क्षिप्रशान्तये-इ०पा० । ३ वेगात्-इ० पा० । ४ सर्वे-इ०पा० । ५ सर्वैरपि पृथक्पृथक्-इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

विभो ॥ ५५ ॥ अथ तात समालोक्य तेषां मध्यगतो मुनिः ॥ वसिष्ठस्तान्मुनीन्सर्वान्प्रोवाच प्रहसन्निव ॥ ५६ ॥ ॥ वसिष्ठ उवाच ॥ ॥
दीर्घायुर्भव यः प्रोक्तो युष्माभिर्मुनिपुंगवाः ॥ तृतीये दिवसे सोऽयं बालः पंचत्वमेष्यति ॥ ५७ ॥ ततस्ते मुनयो भीता असत्यात्तात
तत्क्षणात् ॥ समादाय ययुस्तत्र यत्र ब्रह्मा व्यवस्थितः ॥ ५८ ॥ नमस्कृतेन तेनाऽपि प्रोक्तोऽहं पद्मयोनिना ॥ दीर्घायुर्भव पृष्टश्च
कुतस्त्वमिह चागतः ॥ ५९ ॥ अथ तैर्मुनिभिः सर्वैर्वृत्तांतं तस्य कीर्तितम् ॥ आशीर्वादोद्भवं प्रोक्तं ततो वयमिहागताः ॥ ६० ॥ यथाऽयं बालको
देव त्वत्प्रसादात्पितामह ॥ दीर्घायुर्जायते लोके तथा त्वं कर्तुमर्हसि ॥ ६१ ॥ ततोऽहं ब्रह्मणा तात जरामरणवर्जितः ॥ विहितः प्रेषितस्तूर्णं
स्वगृहं प्रति तैः समम् ॥ ६२ ॥ ते तु मां मुनयोऽत्रैव प्रमुच्याश्रमसंनिधौ ॥ स्नानार्थं विविशुः सर्वे ह्रदेऽत्रैव सुशोभने ॥ ६३ ॥ तच्छ्रुत्वा[1]
वचनं तस्य मृकंडो हर्षसंयुतः ॥ प्रययौ सत्वरं तत्र यत्र ते मुनयः स्थिताः ॥ ६४ ॥ प्रणम्य[3] तान्मुनीन्सर्वान्कृताञ्जलिपुटः स्थितः ॥ प्रोवाच
वः प्रसादेन कुलं मे वृद्धिमागतम् ॥ ६५ ॥ साधु प्रोक्तमिदं कैश्चिदाचार्यैर्मुनिसत्तमाः ॥ साधुलोकं समाश्रित्य विख्यातं च जगत्त्रये ॥ ६६ ॥
साधूनां दर्शनं पुण्यं तीर्थभूता हि साधवः ॥ तीर्थं फलति कालेन सद्यः साधुसमागमः ॥ ६७ ॥ तस्मादतिथयः प्राप्ता यूयं सर्वेऽद्य
मे गृहम् ॥ प्रकरोमि किमातिथ्यं प्रोच्यतां द्विजसत्तमाः ॥ ६८ ॥ ॥ ऋषय ऊचुः ॥ ॥ एतदेव मुनेऽस्माकमातिथ्यं कोटिसंमितम् ॥
अल्पायुरपि ते बालो यज्जातो मृत्युवर्जितः ॥ ६९ ॥ ॥ मृकण्ड उवाच ॥ ॥ मृत्युनाऽऽलिंगितं बालमस्मदीयं मुनीश्वराः ॥ भवद्भिरद्य
संरक्ष्य कुलं कृत्स्नं समुद्धृतम् ॥ ७० ॥ ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते तथा ॥ निष्कृतिर्विहिता सद्भिः कृतघ्ने नाऽस्ति निष्कृतिः ॥ ७१ ॥
तस्मात्कृतघ्नतादोषो न स्यान्मम मुनीश्वराः ॥ यथा कार्यं भवद्भिश्च तथा सर्वैर्न संशयः ॥ ७२ ॥ ॥ ऋषय ऊचुः ॥ ॥ यदि प्रत्युपकाराय
मन्यसे त्वं द्विजोत्तम ॥ गृहं कुरुष्व नो वाक्याद्देवस्य परमेष्ठिनः ॥ ७३ ॥ येनाऽयं बालकस्तेऽद्य कृतो मृत्युविवर्जितः ॥ तस्मात्स्थापय तीर्थेन
देवं तं प्रपितामहम् ॥ ७४ ॥ पुत्रेण सहितः पश्चादाराधय दिवानिशम् ॥ वयमेव त्वया सार्धं तं च देवं पितामहम् ॥ ७५ ॥ नित्यं प्रपूजयिष्याम
स्तथान्येऽपि द्विजोत्तमाः ॥ बालेनाऽनेन सार्धं ते सख्यमत्र स्थितं यतः ॥ बालसख्यमिति ख्यातं नाम्ना तेन भविष्यति ॥ ७६ ॥ तीर्थमन्यैरिति
ख्यातं बालकानां हितावहम्[4] ॥ रोगार्तानां भयार्तानामस्माकं वचनात्सदा ॥ ७७ ॥ अस्मिंस्तीर्थे शिशुं लोकाः स्नापयिष्यंति ये द्विज ॥

१ तच्छ्रुत्वा स मुनीन्सर्वान्वसिष्ठो वाक्यमब्रवीत्—इ०पा० । २ यत्प्रोक्तः—इ०पा० । ३ ततः प्रणम्य तान्सर्वान्—इ० पा० । ४ हिताय वै—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रोगार्तं वा भयार्तं वा पीडितं वा ग्रहादिभिः ॥ ७८ ॥ भविष्यति न संदेहः सर्वदोषविवर्जितः ॥ पितामहप्रसादेन तथाऽस्मद्वचनाद्द्विज ॥ ७९ ॥
ये पुनर्मानुषा विप्र निष्कामाः श्रद्धयान्विताः ॥ स्नानमात्रं करिष्यंति ते यांति परमां गतिम् ॥ ८० ॥ एवमुक्त्वाथ ते सर्वे मुनयः शंसितव्रताः ॥
तमामंत्र्य मुनिं जग्मुस्तीर्थान्यन्यानि सत्वराः ॥ ८१ ॥ मृकण्डोऽपि सपुत्रश्च तस्मिन्स्थाने पितामहम् ॥ स्थापयामास संहृष्टो ज्येष्ठे ज्येष्ठास्थिते
विधौ[1] ॥ ८२ ॥ ततश्चाऽऽराधयामास दिवारात्रमतंद्रितः ॥ सपुत्रः श्रद्धया युक्तः संप्राप्तश्च परां गतिम् ॥ ८३ ॥ ॥ सूत उवाच ॥ ॥
ततःप्रभृति तत्तीर्थं बालसख्यमिति स्मृतम् ॥ पावनं सर्वजंतूनां बालानां रोगनाशनम् ॥ ८४ ॥ ज्येष्ठे ज्येष्ठासु यो बालस्तत्र स्नानं समाचरेत् ॥
न स पीडामवाप्नोति यावत्संवत्सरं द्विजाः ॥ ८५ ॥ ग्रहभूतपिशाचानां शाकिनीनां विशेषतः ॥ अगम्यः सर्वदुष्टानां तथाऽन्येषां प्रजायते ॥८६॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये बालसख्यतीर्थमाहात्म्यवर्णनंनामैकविंशोऽध्यायः॥
॥ २१ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ यदेतद्भवता प्रोक्तं तीर्थं शक्रसमुद्भवम् ॥ स्वामिद्रोहकृतात्पापान्निर्मुक्तो यत्र लक्ष्मणः ॥ १ ॥ कथं
तत्र पुरा शक्रः स्वामिद्रोहसमुद्भवात् ॥ पातकादेव निर्मुक्तः कस्मिन्काले च सूतज ॥२॥ कस्माद्दितेर्महेन्द्रेण कृतं कृत्यं तथाविधम् ॥ येन संसूदितो
गर्भः सर्वं विस्तरतो वद ॥३॥ ॥ सूत उवाच ॥ ॥ ब्रह्मणो दक्षिणांगुष्ठाज्जज्ञे दक्षः प्रजापतिः ॥ स च संजनयामास पंचाशत्कन्यकाः शुभाः ॥४॥
ददौ च दश धर्माय कश्यपाय त्रयोदश ॥ दिव्येन विधिना दक्षः सप्तविंशतिमिंदवे ॥ ५ ॥ अदितिश्च दितिश्चैव द्वे भार्ये मुख्यतां गते ॥ कश्य
पस्य द्विजश्रेष्ठाः प्राणेभ्योऽपि प्रिये सदा ॥ ६ ॥ ततः स जनयामास देवाञ्छक्रपुरःसरान् ॥ अदित्यां चैव दैत्यांश्च दित्यां स बलवत्तरान् ॥७॥
तेषां त्रैलोक्यराज्यार्थं मिथो जज्ञे महाहवः ॥ तत्र शक्रेण ते दैत्याः संग्रामे विनिपातिताः ॥ ८ ॥ ततः शोकपरा चक्रे दितिर्व्रतमनुत्तमम् ॥ पुत्रार्थं
नियमोपेता क्षेत्रेऽत्रैव समाहिता ॥ ९ ॥ ततो वर्षसहस्रांते तस्यास्तुष्टो महेश्वरः ॥ उवाच परितुष्टोऽस्मि वरं प्रार्थय वांछितम् ॥ १० ॥ साऽब्रवी
द्यदि मे तुष्टस्त्वं देव शशिशेखर ॥ तत्पुत्रं देहि देवानां सर्वेषां बलवत्तरम् ॥ यज्ञभागप्रभोक्तारं देवानां दर्पनाशनम् ॥ ११ ॥ अवध्यं संगरे पूर्वैः
सर्वैर्देवैः सवासवैः ॥ स तथेति प्रतिज्ञाय जगामादर्शनं हरः ॥ १२ ॥ दितिश्चैवाऽदधाद्गर्भं कश्यपान्मुनिपुंगवात् ॥ ततः शक्रो भयं चक्रे ज्ञात्वा
तं गर्भसंभवम् ॥ वदतो मुनिमुख्यस्य नारदस्य महात्मनः ॥ १३ ॥ ततो दुष्टां मतिं कृत्वा तस्य गर्भस्य नाशने ॥ चक्रे तस्याः स शुश्रूषां दिवा

१ विधौ–चन्द्रे–इत्यर्थः । २ अपि–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



रात्रमतंद्रितः ॥ १४ ॥ छिद्रमन्वेषमाणस्तु सुसूक्ष्ममपि च द्विजाः ॥ न तस्या लभते क्वाऽपि गता मासा नवैव तु ॥ १५ ॥ ततश्च दशमे मासि संप्राप्ते प्रसवोद्भवे ॥ गर्भालसा निशावक्त्रे सुप्ता सा दक्षिणामुखी ॥ १६ ॥ निद्रावशं तु संप्राप्ता विसंज्ञा समपद्यत ॥ शक्रहस्तात्रमर्दोत्थपादसौख्येन निश्चला ॥ १७ ॥ तां विसंज्ञामथो वीक्ष्य त्यक्त्वा पादौ शतक्रतुः ॥ प्रविवेशोदरं तस्यास्तीक्ष्णं शस्त्रं करे दधत् ॥ तेनाऽसौ सप्तधा चक्रे गर्भं शस्त्रेण देवपः ॥ १८ ॥ अथाऽपश्यत्क्षणात्सप्त बालकान्पूर्णविग्रहान् ॥ ततस्तानपि सप्तैव सप्तधा कृतवान्हरिः ॥ १९ ॥ जाता एकोनपञ्चाशदथ तत्रैव बालकाः ॥ तान्दृष्ट्वा वृद्धिमापन्नांस्ततो भीतः शतक्रतुः ॥ निश्चक्रामोदरात्तूर्णं दित्या यावन्न लक्षितः ॥ २० ॥ ततः प्रभाते विमले प्रोद्गते रविमंडले ॥ दितिः संजनयामास सप्तधा सप्त बालकान् ॥ २१ ॥ ततोऽभ्येत्य सहस्राक्षो दुर्गन्धेन समावृतः ॥ निस्तेजा म्लानवक्त्रश्च लज्जयाऽधोमुखः स्थितः ॥ २२ ॥ तं दृष्ट्वा तादृशं शक्रं दितिः प्रोवाच सादरम् ॥ प्रणतं संस्थितं पार्श्वे भयव्याकुलचेतसम् ॥ २३ ॥ किं त्वं शक्र निरुत्साहस्तेजोद्युतिविवर्जितः ॥ शरीरात्तव दुर्गन्धः कस्मादीदृक्प्रजायते ॥ २४ ॥ किं त्वया निहतो विप्रो गुरुर्वा बालकोऽथवा ॥ नारी वा येन ते नष्टं तेजो गात्रसमुद्भवम् ॥ २५ ॥ हतो[1] नखांभसा वा त्वं घृष्टः शूर्पानिलेन च ॥ अजामार्जनिकोत्थैश्च रजोभिर्वा समाश्रितः ॥ २६ ॥ ॥ शक्र उवाच ॥ ॥ सत्यमेतन्महाभागे यत्त्वयोक्तोऽस्मि सांप्रतम् ॥ रात्रौ प्रविष्टः सुप्ताया जठरे तव पापकृत् ॥ २७ ॥ कृन्तश्चैकोनपञ्चाशत्कृत्वो गर्भो मया शुभे ॥ तावन्मात्रास्ततो जाता बालकाः सर्व एव ते ॥ २८ ॥ ततो भीत्या विनिष्क्रान्तस्त्वया देवि न लक्षितः ॥ एतस्मात्कारणाज्जाता तेजोहानिरनिन्दिते ॥ २९ ॥ ॥ दितिरुवाच ॥ ॥ यस्मात्सत्यं त्वया प्रोक्तं पुरतो मम देवप ॥ तस्मात्प्रार्थय मत्तस्त्वं वरं यन्मनसेप्सितम् ॥ ३० ॥ ॥ शक्र उवाच ॥ ॥ एते तव सुता देवि च्छिद्यमाना मयासिना ॥ रुदन्तो वारिता मन्दं मा रुदन्तु मुहुर्मुहुः ॥ ३१ ॥ मरुतो नाम विख्यातास्तस्मात्संतु जगत्त्रये ॥ दैत्यभावविनिर्मुक्ता मद्विधेया मम प्रियाः ॥ ३२ ॥ यज्ञभागभुजः सर्वे भविष्यंति मया सह ॥ यस्मादेतन्मया तीर्थं बालकैस्तव मंडितम् ॥ ३३ ॥ बहुभिर्यास्यति ख्यातिं बालमंडनमित्यतः ॥ या च स्त्री गर्भसंयुक्ता स्नानं भक्त्या करिष्यति ॥ न भविष्यंति छिद्राणि तस्या गर्भे कथंचन ॥ ३४ ॥ प्राप्ते प्रसवकाले तु या जलं प्राशयिष्यति ॥ तीर्थस्यास्य सुखेनैव प्रसविष्यति सा सुतम् ॥ ३५ ॥ ॥ ॥ दितिरुवाच ॥ ॥ तवोच्छेदाय देवेश याचितः प्राङ्मया हरः ॥ एकं देव सुतं देहि सर्वदेवनिबर्हणम् ॥ ३६ ॥ त्वया चैकोनपंचाश

१ हतो नखांभसा वा त्वम्—एतेन—नखोद्भूतजलस्पर्शेन तेजोहानिर्भवति—इति नखस्पृष्टजलं न स्पृशेत्—इति सूचितम् ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्प्रकारः स विनिर्मितः ॥ यस्माद्धतं त्वया प्रोक्तं तस्मादेतद्भविष्यति ॥ ३७ ॥ ॥ सूत उवाच ॥ ॥ ततःप्रभृति ते जाता मरुतो विबुधैः समम् ॥ यज्ञभागस्य भोक्तारो दितेः शक्रस्य शासनात् ॥ ३८ ॥ अथ प्राह सहस्राक्षो देवाचार्यं बृहस्पतिम् ॥ मातुर्द्रोहकृतं पापं कथं यास्यति संक्षयम् ॥ ३९ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ अत्रैव कुरु देवेन्द्र तपः पापविशुद्धये ॥ तीर्थे यत्र कृतं पापं सर्वपातकनाशने ॥ ४० ॥ न यज्ञैर्न च दानेन नान्यैस्तीर्थसमाश्रयैः ॥ मातुर्द्रोहकृतं पापं नाशं याति पुरंदर ॥ एवमेतत्परित्यक्तुं तीर्थं मातुस्तवाऽऽश्रयम् ॥ ४१ ॥ ॥ सूत उवाच ॥ ॥ ततस्तूर्णं सहस्राक्षः सहस्राक्षेशसंज्ञितम् ॥ लिंगं संस्थापयामास स्वयमेव द्विजोत्तमाः ॥ ४२ ॥ त्रिकालं पूजयामास पुष्पधूपानुलेपनैः ॥ तथान्यैर्बलिसत्कारैर्गीतैर्नृत्यैः पृथग्विधैः ॥ ४३ ॥ ततो वर्षसहस्रांते तुष्टस्तस्य महेश्वरः ॥ प्रोवाच वरदोऽस्मीति शक्र प्रार्थय वांछितम् ॥ ४४ ॥ ॥ शक्र उवाच ॥ ॥ मातुर्द्रोहकृतं पापं यातु मे त्रिपुरांतक ॥ तथाऽन्येषां मनुष्याणां येऽत्र त्वां श्रद्धयान्विताः ॥ पूजयिष्यंति सद्भक्त्या स्नानं कृत्वा समाहिताः ॥ ४५ ॥ ॥ ॥ सूत उवाच ॥ ॥ स तथेति प्रतिज्ञाय जगामादर्शनं हरः ॥ शक्रोऽपि रहितः पापैर्जगाम त्रिदशालयम् ॥ ४६ ॥ एवं तत्र समुत्पन्नं तीर्थं तद्बालमंडनम् ॥ स्वामिद्रोहकृतात्पापान्मुच्यंते यत्र मानवाः ॥ ४७ ॥ एतद्वः सर्वमाख्यातं बालमंडनसंभवम् ॥ माहात्म्यं तु द्विजश्रेष्ठाः शृणुध्वमथ सादरम् ॥ ४८ ॥ आश्विनस्य सिते पक्षे दशम्यादि यथाक्रमम् ॥ यस्तत्र कुरुते श्राद्धं यावत्पंचदशी तिथिः ॥ ४९ ॥ तीर्थानां स हि सर्वेषां स्नानजं लभते फलम् ॥ श्राद्धस्य करणाद्वापि वाजिमेधफलं द्विजाः ॥ ५० ॥ तस्मिन्काले सहस्राक्षः समागच्छति भूतले ॥ भागानां मर्त्यजातानां सेवनाय सदैव हि ॥ ५१ ॥ यावद्भूमितले शक्रस्तिष्ठत्येवं द्विजोत्तमाः ॥ तीर्थे तीर्थानि सर्वाणि तावत्तिष्ठन्ति तत्र वै ॥ ५२ ॥ तस्मात्सर्वप्रयत्नेन तस्मिन्काले विशेषतः ॥ स्नात्वा तत्र शुभे तीर्थे शक्रेश्वरमथाऽर्चयेत् ॥ ५३ ॥ अत्र श्लोकौ पुरा गीतौ नारदेन सुरर्षिणा ॥ शृण्वंतु मुनयः सर्वे कीर्त्यमानौ मया हि तौ ॥ ५४ ॥ बालमंडनके स्नात्वा शक्रेश्वरमथेक्षयेत् ॥ यः पुमानाश्विने मासि प्राप्ते श्रवणपञ्चके ॥ स पापैर्मुच्यते सर्वैराजन्ममरणाद्भुवि ॥ ५५ ॥ प्रभावात्तस्य तीर्थस्य सत्यमेतद्द्विजोत्तमाः ॥ ५६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये बालमण्डनतीर्थमाहात्म्यवर्णनंनाम द्वाविंशोऽध्यायः ॥ २२ ॥ ॥ छ ॥ ॥ ॥ ॥ सूत उवाच ॥ ॥ तस्यैव पश्चिमे भागे मृगतीर्थमनुत्तमम् ॥ अस्ति पुण्यतमं ख्यातं समस्ते धरणीतले ॥ १ ॥ तत्र ये मानवास्तीर्थे

१ शक्र इ०पा० । २ त्वया—यत्र पापं कृतम्—इति योजना । ३ एत [—मातृद्रोहकृतं पापम्—इत्यर्थः । ४ पुष्पधूपानुतर्पणैः—इ० पा० । ५ तथैव—इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सम्यक्छ्रद्धासमन्विताः ॥ चैत्रंशुक्लचतुर्दश्यां स्नानं कुर्वंति भास्करे ॥ २ ॥ मध्ये स्थिते न ते यांति तिर्यग्योनौ कथंचन ॥ अपि पापसमोपेता
दोषैः सर्वैः समन्विताः ॥ ३ ॥ कृतघ्ना नास्तिकाश्चौरा मर्यादाभेदकास्तथा ॥ स्नाता ये तत्र सत्तीर्थे ते यांति परमां गतिम् ॥ विमानवरमारूढाः
स्तूयमानाश्च किंनरैः ॥ ४ ॥ ॥ ऋषय ऊचुः ॥ ॥ मृगतीर्थं कथं तत्र संजातं सूतनंदन ॥ किं प्रभावं समाचक्ष्व परं कौतूहलं हि नः ॥
॥ ५ ॥ ॥ सूत उवाच ॥ ॥ पूर्वं तत्र महारण्ये नानामृगगणावृते ॥ नानाविहंगसंघुष्टे नानावृक्षसमाकुले ॥ ६ ॥ समायाता महारौद्रा लुब्ध
काश्चापपाणयः ॥ कृष्णांगा भ्रममाणास्ते यमदूता इवाऽपरे ॥ ७ ॥ एतस्मिन्नंतरे दृष्टं मृगयूथं तरोरधः ॥ उपविष्टं सुविश्रब्धं तैस्तदा द्विज
सत्तमाः ॥ ८ ॥ अथ ताल्ँलुब्धकान्दृष्ट्वा दूरतोऽपि भयातुराः ॥ पलायनपराः सर्वे मृगा जग्मुर्द्रुतं ततः ॥ ९ ॥ अथ ते सन्निधौ दृष्ट्वा गंभीरं सलिला
शयम् ॥ प्रविष्टा हरिणाः सर्वे भयार्ताः शरपीडिताः ॥ १० ॥ ततस्तत्सलिलस्यांतस्ते मृगाः सर्व एव हि ॥ मानुषत्वमनुप्राप्तास्तत्प्रभावा
द्विजोत्तमाः ॥ ११ ॥ अथ तान्मानुषीभूतान्पप्रच्छुर्लुब्धका मृगान् ॥ मृगयूथं समायातं मार्गेणानेन सांप्रतम् ॥ केन मार्गेण निर्यातं तस्माद्वदत मा
चिरम् ॥ १२ ॥ ॥ मानुषा ऊचुः ॥ ॥ वयं ते हरिणाः सर्वे मानुषत्वं सुदुर्लभम् ॥ तीर्थस्याऽस्य प्रभावेन प्राप्ताः सत्यं न संशयः ॥ १३ ॥
तच्छ्रुत्वा विस्मयाविष्टास्ततस्ते लुब्धका द्रुतम् ॥ त्यक्त्वा धनूंषि बाणांश्च स्नानं तत्र प्रचक्रिरे ॥१४॥ स्नानमात्रात्ततः सर्वे दिव्यमाल्यानुलेपनाः ॥
दिव्यगात्रधराः सर्वे संजाताः पार्थिवोत्तमाः ॥ १५ ॥ ॥ ऋषय ऊचुः ॥ ॥ अत्याश्चर्यमिदं सूत यत्त्वया परिकीर्तितम् ॥ स्नानमात्रेण ते
प्राप्ता लुब्धकास्तादृशं वपुः ॥ १६ ॥ तथा मानुष्यमापन्ना मृगास्तोयावगाहनात् ॥ तत्कथं मेदिनीपृष्ठे तत्तीर्थं संबभूव ह ॥ १७ ॥ ॥ सूत
उवाच ॥ ॥ लिंगभेदोद्भवं तोयं यत्पुरा वः प्रकीर्तितम् ॥ आच्छन्नं पांसुभिः कृत्स्नं वायुना शक्रशासनात् ॥ १८ ॥ वल्मीकरंध्रमासाद्य तन्नि
ष्क्रांतं पुनर्द्विजाः ॥ कालेन महता तत्र प्रदेशे स्वल्पमेव हि ॥ १९ ॥ यत्र स्नातः पुरा सद्यस्त्रिशंकुः पृथिवीपतिः ॥ दिव्यं वपुः पुनः प्राप्त
श्चंडालत्वेन संस्थितः ॥ २० ॥ एतस्मात्कारणात्तत्र स्नाताः सारंगलुब्धकाः ॥ सर्वे पापविनिर्मुक्ताः संप्राप्ताः परमं वपुः ॥ २१ ॥ इति श्रीस्कांदे
महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये मृगतीर्थमाहात्म्यवर्णनंनाम त्रयोविंशोऽध्यायः ॥ २३ ॥ ॥छ॥ ॥ २५ ॥
॥ ॥ सूत उवाच ॥ ॥ तत्र विष्णुपदं नाम तीर्थं तीर्थे शुभे स्थितम् ॥ अपरं ब्राह्मणश्रेष्ठाः सर्वपातकनाशनम् ॥ १ ॥ अयने दक्षिणे
प्राप्ते यस्तत्पूज्य समाहितः ॥ निवेदयेत्तथात्मानं सम्यक्छ्रद्धासमन्वितः ॥ २ ॥ स मृतोऽप्ययने याम्ये तद्विष्णोः परमं पदम् ॥ प्राप्नोति नात्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संदेहस्तत्प्रभावाद्द्विजोत्तमाः ॥ ३ ॥ तथा चैवोत्तरे प्राप्ते पूजयित्वा यथाविधि ॥ सम्यङ्निवेदयेद्भक्त्या आत्मानं यः समाहितः ॥ सोऽपि विष्णोः पदं पुण्यं प्राप्य संजायते सुखी ॥ ४ ॥ ॥ ऋषय ऊचुः ॥ ॥ कथं तत्र पदं जातं विष्णोरव्यक्तजन्मनः ॥ कथं निवेद्यते तत्र सम्यगात्माऽयनद्वये ॥ ५ ॥ तस्मिन्दृष्टेऽथवा स्पृष्टे यत्फलं लभ्यते नरैः ॥ तत्सर्वं सूतज ब्रूहि परं कौतूहलं हि नः ॥ ६ ॥ ॥ सूत उवाच ॥ ॥ बलिर्बद्धो यदा तेन विष्णुना प्रभविष्णुना ॥ तदा क्रमैस्त्रिभिर्व्याप्तं त्रैलोक्यं सचराचरम् ॥ ७ ॥ हाटकेश्वरजे क्षेत्रे संन्यस्तः प्रथमः क्रमः ॥ महर्लोके द्वितीयस्तु तदा तेन महात्मना ॥ ८ ॥ तृतीयस्य समुद्योगं यदा चक्रे स चक्रधृक् ॥ तदा भिन्नं द्विजश्रेष्ठा ब्रह्मांडं लघुतां गतम् ॥ ९ ॥ पादाग्रेणाथ संभिन्ने ब्रह्मांडे निर्मलं जलम् ॥ अंगुष्ठाग्रेण संप्राप्तं क्रमेण धरणीतले ॥ १० ॥ ब्रह्मलोकं तदा कृत्स्नं प्लावयित्वा जलं हि तत् ॥ शुद्धस्फटिकसंकाशं कुन्देन्दुसदृशद्युति ॥ मत्स्यकच्छपसंकीर्णं ग्राहयूथैः समाकुलम् ॥ ११ ॥ ततःप्रभृति सा लोके गंगा विष्णुपदी स्मृता ॥ पवित्रमपि तत्क्षेत्रं नयन्ती सा पवित्रताम् ॥ १२ ॥ एवं विष्णोः पदं तत्र संजातं मुनिसत्तमाः ॥ सर्वपापहरं पुंसां तदा विष्णुपदी स्मृता ॥ १३ ॥ यस्तस्यां श्रद्धया युक्तः स्नानं कृत्वा यथोदितम् ॥ स्पर्शयेत्तत्पदं विष्णोः स याति परमं पदम् ॥ १४ ॥ यस्तत्र कुरुते श्राद्धं सम्यक्छ्रद्धासमन्वितः ॥ स्नात्वा विष्णुपदीतोये गयाश्राद्धफलं लभेत् ॥ १५ ॥ माघमासे नरः स्नानं प्रातरुत्थाय तत्र यः ॥ करोति सततं मर्त्यः स प्रयागफलं लभेत् ॥ १६ ॥ अथवा वत्सरं यावत्क्षणं कृत्वात्र भक्तितः ॥ तत्र स्नानं च यः कुर्यात्स मुक्तिं लभते नरः ॥ १७ ॥ यस्यास्थीनि जले तत्र क्षिप्यंते मनुजस्य च ॥ अपि पापसमाचारः स प्राप्नोति परां गतिम् ॥ १८ ॥ अपि पक्षिपतंगा ये पशवः कृमयो मृगाः ॥ प्रविष्टाः सलिले तस्मिंस्तृषार्ता भक्तिवर्जिताः ॥ १९ ॥ तेऽपि पापविनिर्मुक्ता देहांते चातिदुर्लभम् ॥ चक्रिणस्तत्पदं यांति जरामरणवर्जितम् ॥ २० ॥ किं पुनः श्रद्धयोपेताः पर्वकाल उपस्थिते ॥ दत्त्वा दानं द्विजेन्द्राणां नरा वेदविदां द्विजाः ॥ २१ ॥ तत्र गाथा पुरा गीता नारदेन महर्षिणा ॥ विष्णुपद्याः समालोक्य प्रभावं पापनाशनम् ॥ २२ ॥ किं व्रतैर्नियमैर्वापि तपोभिर्विविधैर्मखैः ॥ कृतैर्विष्णुपदीतोये संस्थिते धरणीतले ॥ २३ ॥ एकः सर्वेषु तीर्थेषु स्नानं मर्त्यः

---

१ नदी—इ० पा० । २ क्षणम्—निवासाय समयावकाशम्—वत्सरंयावन्निवासम्—इत्यर्थः । ३ चक्रिणस्तत्पदम्—विष्णोः परमं पदम्—वैकुंठम्--इत्यर्थः । ४ प्राप्नुवंतीति किं पुनर्वक्तव्यम्—अवश्यमेव चक्रिणः पदं यान्ति—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



समाचरेत् ॥ एको विष्णुपदीतोये स्नाति द्वाभ्यां समं फलम् ॥ २४ ॥ एको दानानि सर्वाणि ब्राह्मणेभ्यः प्रयच्छति ॥ एको विष्णुपदीतोये
स्नाति द्वाभ्यां समं हि तत्[1] ॥ २५ ॥ पञ्चाग्निसाधको ग्रीष्मे वर्षास्वाकाशमाश्रितः ॥ जलाश्रयश्च हेमंत एकः स्यात्पुरुषः क्षितौ ॥ २६ ॥
अन्यो विष्णुपदीतोये स्नात्वा विष्णुपदं स्पृशेत् ॥ तावुभावपि निर्दिष्टौ समौ पुरुषसत्तमौ ॥ २७ ॥ एकांतरोपवासी य एकः स्याज्जीविता
वधि ॥ एको विष्णुपदीतोये स्नाति द्वाभ्यां समं फलम् ॥ २८ ॥ त्रिरात्रोपोषितस्त्वेको यावद्वर्षशतं नरः ॥ एको विष्णुपदीतोये स्नाति द्वाभ्यां समं
फलम् ॥ २९ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वा मुनिश्रेष्ठो नारदो द्विजसत्तमाः ॥ विरराम मुनीनां स बहूनां पुरतोऽसकृत् ॥ ३० ॥ तस्मात्सर्व
प्रयत्नेन स्नानं तत्र समाचरेत् ॥ संस्पृशेच्च पदं विष्णोर्य इच्छेच्छ्रेय आत्मनः ॥ ३१ ॥ ॥ ऋषय ऊचुः ॥ ॥ यदेतद्भवता प्रोक्तमात्मानं
विनिवेदयेत् ॥ विष्णोः पदस्य संप्राप्ते अयने दक्षिणोत्तरे ॥ ३२ ॥ तत्केन विधिना सूत मन्त्रैश्च वद सत्वरम् ॥ वयं येन च तत्कुर्मः सर्वे
भक्तिसमन्विताः ॥ ३३ ॥ ॥ सूत उवाच ॥ दक्षिणे चोत्तरे चापि संप्राप्ते चायनद्वये ॥ पूजयित्वा पदं विष्णोरिमं मन्त्रमुदीरयेत् ॥ ३४ ॥
षण्मासाभ्यंतरे मृत्युर्यद्यकस्माद्भवेन्मम ॥ तत्ते पदं गतिर्मे[2] स्यादहं ते भृत्यतां गतः ॥ ३५ ॥ एवं प्रोच्य हरिं पश्चात्पूजयेद्ब्राह्मणांस्ततः ॥ अथ तैः
सममश्नीयात्ततः प्राप्नोति सद्गतिम् ॥ ३६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये
विष्णुपदीतीर्थोत्पत्तिवर्णनंनाम चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तत्राश्चर्यमभूत्पूर्वं यत्तद्ब्राह्मणसत्तमाः ॥ तद्वोऽहं
संप्रवक्ष्यामि गंगामाहात्म्यसंभवम् ॥ १ ॥ चमत्कारपुरे विप्रः पुरासीत्संशितव्रतः ॥ चंडशर्मेति विख्यातो रूपौदार्यगुणान्वितः ॥ २ ॥ स यदा यौव
नोपेतस्तदा वेश्यानुरागकृत् ॥ श्रोत्रियोऽप्यभवद्विप्रो यौवनोद्गारपीडितः ॥ ३ ॥ स कदाचिन्निशीथेऽथ तृषार्तश्च समुत्थितः ॥ प्रार्थयामास तां
वेश्यां पानीयं पातुमुत्सहे ॥ ४ ॥ अथ सा सलिलभ्रांत्या करकं मद्यसंभवम् ॥ समादाय ददौ पानं तस्मै निद्राकुलाय च ॥ ५ ॥ मुखमध्यगते मद्ये
सोऽपि तां कोपसंयुतः॥ वेश्यां प्रभर्त्सयामास धिग्धिक्छब्दैर्मुहुर्मुहुः ॥६॥ किमिदंकिमिदं पापे त्वया कर्म विगर्हितम् ॥ कृतं यन्मुखमध्ये मे प्रक्षिप्ता
निंदिता सुरा ॥ ७ ॥ ब्राह्मण्यमद्य मे नष्टं मद्यपानादसंशयम् ॥ प्रायश्चित्तं करिष्यामि तस्मादात्मविशुद्धये ॥ ८ ॥ एवमुक्त्वा विनिष्क्रम्य तद्गृहाद्दुः
खसंयुतः ॥ रुरोदाथ तदा गत्वा करुणं निर्जने वने ॥ ९ ॥ ततः प्रभातवेलायां स्नात्वा वस्त्रसमन्वितः ॥ त्यक्त्वा गात्रस्य रोमाणि समस्तानि

१ तत्—फलम्—इत्यर्थः। २ गतिः—शरणम्—इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विजोत्तमाः ॥ १० ॥ संप्राप्तो विप्रमुख्यानां सभा यत्र व्यवस्थिता ॥ पठंति सर्वशास्त्राणि वेदांतानि च कृत्स्नशः ॥ ११ ॥ अथासौ प्रणिपत्योच्चैः प्रोवाच द्विजसत्तमान् ॥ जलभ्रांत्या सुरा पीता मया कुरुत निग्रहम् ॥ १२ ॥ अथ ते धर्मशास्त्राणि प्रविचार्य पुनःपुनः ॥ तमूचुर्ब्राह्मणाः सर्वे प्रायश्चित्तकृते स्थितम् ॥ १३ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ अज्ञानाज्ज्ञानतो वापि सुरां चेद्ब्राह्मणः पिबेत् ॥ अग्निवर्णं घृतं पीत्वा तावन्मात्रं विशुध्यति ॥ १४ ॥ स त्वं वांछसि चेच्छुद्धिमग्निवर्णं घृतं पिब ॥ यावन्मात्रा सुरा पीता तावन्मात्रं विशुद्धये ॥ १५ ॥ स तथेति प्रतिज्ञाय घृतमादाय तत्क्षणात् ॥ चक्रे वह्निसमं यावत्पानार्थं द्विजसत्तमाः ॥ १६ ॥ तावत्तस्य पिता प्राप्तः श्रुत्वा वार्तां सभार्यकः ॥ किमिदंकिमिदं पुत्र ब्रुवाणो दुःखसंयुतः ॥ अश्रुपूर्णेक्षणो दीनो बाष्पगद्गदया गिरा ॥ १७ ॥ ततः स कथयामास सर्वं रात्रिसमुद्भवम् ॥ वृत्तांतं तच्च विप्राणां प्रायश्चित्तं यथोचितम् ॥ ॥१८॥ अथ स ब्राह्मणान्प्राह सर्वांस्तान्द्विजसत्तमाः ॥ प्रायश्चित्तं सुतायास्मै ममान्यत्संप्रदीयताम् ॥१९॥ संचिन्त्य धर्मशास्त्राणि विचार्य च पुनःपुनः ॥ सर्वस्वमपि दास्यामि पुत्रहेतोरसंशयम् ॥ २० ॥ ततस्ते ब्राह्मणाः सर्वे भूयोभूयश्च सादरम् ॥ विचिंत्य धर्मशास्त्राणि तमूचुर्मुनिसत्तमाः ॥ ॥२१॥ नान्यदस्ति सुरापाने प्रायश्चित्तं द्विजन्मनाम् ॥ मौंजीहोमं विना विप्र यद्युक्तं तत्समाचर ॥२२॥ ततः स स्वसुतं प्राह नैवं त्वं कर्तुमर्हसि ॥ यच्छ दानानि विप्रेभ्यस्तीर्थयात्रां समाचर ॥ २३ ॥ ततः शुद्धिं समाप्नोषि क्रमान्नियमसंयुतः ॥ व्रतैश्च विविधैश्चीर्णैः सत्यमेतद्ब्रवीम्यहम् ॥ २४ ॥ न ब्राह्मणसमादिष्टं प्रायश्चित्तं विशुद्धये ॥ २५ ॥ ॥ पुत्र उवाच ॥ ॥ एतन्मम महाभागा यद्ब्रुवंति व्रतादिकम् ॥ तस्मात्कार्यो मया तात मौंजीहोमो न संशयः ॥ २६ ॥ यन्मया तु कृतं बाल्ये तत्सर्वं क्षंतुमर्हसि ॥ २७ ॥ ॥ सूत उवाच ॥ ॥ तस्य तं निश्चयं ज्ञात्वा स पिता सुतवत्सलः ॥ सर्वस्वं प्रददौ रुष्टो मरणे कृतनिश्चयः ॥ २८ ॥ साऽपि तस्य सती भार्या कृत्वा मृत्युविनिश्चयम् ॥ तमुवाच सुतं दृष्ट्वा सर्वं दत्त्वा गृहादिकम् ॥ २९ ॥ आवाभ्यां संप्रविष्टाभ्यां वह्नौ पुत्र ततस्तदा ॥ मौंजीहोमस्त्वया कार्यो मां तातं यदि मन्यसे ॥ ३० ॥ ततस्तौ दम्पती हृष्टौ यावद्वह्निसमीपगौ ॥ संजातौ मरणार्थाय स च ताभ्यां समुद्भवः ॥ ३१ ॥ तावत्प्राप्तो मुनिर्नाम शांडिल्यो वेदपारगः ॥ तीर्थयात्राप्रसंगेन तत्र देशे द्विजोत्तमाः ॥ ३२ ॥ स वृत्तांतं समाकर्ण्य कोपसंरक्तलोचनः ॥ अब्रवीद्ब्राह्मणान्सर्वान्भर्त्सयमानो मुहुर्मुहुः ॥ ३३ ॥ अहो मूढतमा यूयं यदेतद्ब्राह्मणत्रयम् ॥ वृथा मृत्युमवाप्नोति निग्रहे सुगमे सति ॥ ३४ ॥ अत्र कात्यायनेनोक्तं यद्वचः सुमहात्मना ॥ तच्छृण्वन्तु द्विजाः सर्वे प्राय

१ वाक्यम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

श्चित्ती तथाप्ययम् ॥ ३५ ॥ चांद्रायणानि कृच्छ्राणि तथा सांतपनानि च ॥ प्रायश्चित्तानि दीयंते यत्र गंगा न विद्यते ॥ ३६ ॥ अत्र विष्णुपदी गंगा तत्क्षेत्रे तु द्विजोत्तमाः ॥ तस्यां स्नानं करोत्वेष ततः शुद्धिमवाप्स्यति ॥ ३७ ॥ मौंजीहोमः प्रमाणं स्यान्मुनिवाक्येन चेद्भवेत् ॥ तदेतदपि वाक्यं हि कात्यायनमुनेः स्फुटम् ॥ ३८ ॥ ततस्ते ब्राह्मणाः सर्वे हर्षेण महतान्विताः ॥ साधुसाध्विति तं प्रोच्य प्रोचुः सत्यमिदं मुने ॥ ३९ ॥ ततः प्रबोध्य तं विप्रं निन्युस्तत्र द्विजोत्तमाः ॥ यत्र विष्णुपदी गंगा स्वयमेव व्यवस्थिता ॥ ४० ॥ तत्र स ब्राह्मणो यावद्गंगातोयसमुद्भवम् ॥ गंडूषं कुरुते वक्त्रे तावच्छुद्धो बभूव सः ॥ उदरादखिलं तोयं निष्क्रांतं द्विजसत्तमाः ॥ ४१ ॥ ततोऽवगाहते यावत्तस्यास्तोयं सुशोभनम् ॥ तावदाकाशसंभूता गंभीरोवाच भारती ॥ ४२ ॥ शुद्धोऽयं ब्राह्मणः साक्षाद्विष्णुपद्याः समागमात् ॥ स्नानादाचमनादेव तस्माद्यातु गृहं निजम् ॥ ॥ ४३ ॥ ततस्ते ब्राह्मणाः सर्वे चंडशर्मादयश्च ये ॥ दिष्ट्यादिष्ट्येति जल्पन्तः स्वानि हर्म्याणि भेजिरे ॥ ४४ ॥ ॥ सूत उवाच ॥ ॥ एवं प्रभावा सा विप्रा गंगा विष्णुपदी स्थिता ॥ तस्य क्षेत्रस्य सीमांते पश्चिमे पापनाशिनी ॥ ४५ ॥ एतद्वः सर्वमाख्यातं विष्णुपद्याः समुद्भवम् ॥ माहात्म्यं ब्राह्मणश्रेष्ठाः सर्वपातकनाशनम् ॥ ४६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये विष्णुपदीगंगामाहात्म्यवर्णनंनाम पञ्चविंशोऽध्यायः ॥ २५ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ यत्पूर्वापरसीमान्तं तन्मया संप्रकीर्तितम् ॥ दक्षिणोत्तरसंभूतं तद्वो वक्ष्यामि सांप्रतम् ॥ १ ॥ अस्ति भूमितले ख्याता मथुराख्या महापुरी ॥ नानाविप्रसमाकीर्णा यमुनातटसंश्रया ॥ २ ॥ तस्यामासीद्द्विजश्रेष्ठो गोकर्णइतिविश्रुतः ॥ वेदाध्ययनसंपन्नः सर्वशास्त्रविचक्षणः ॥ ३ ॥ अथापरोऽस्ति तन्नामा तत्र विप्रो वयोऽन्वितः ॥ सोऽपि च ब्राह्मणः श्रेष्ठः सर्वविद्यासु पारगः ॥ ४ ॥ कस्यचित्त्वथ कालस्य यमः प्राह स्वकिंकरम् ॥ ऊर्ध्वकेशं सुरक्ताक्षं कृष्णदन्तं भयानकम् ॥ ५ ॥ अद्य गच्छ द्रुतं दूत मथुराख्यां महापुरीम् ॥ आनयस्व द्विजश्रेष्ठं तस्यां गोकर्णसंज्ञकम् ॥ ६ ॥ तस्यायुषः क्षयो जातो मध्याह्नेऽद्यतने दिने ॥ त्याज्योऽन्योऽस्ति च तत्रैव चिरायुस्तादृशो द्विजः ॥ ७ ॥ ॥ सूत उवाच ॥ ॥ अथ दूतो द्रुतं गत्वा तां पुरीं यमशासनात् ॥ विभ्रमादानयामास गोकर्णं च चिरायुषम् ॥ ८ ॥ ततः कोपपरीतात्मा यमः प्रोवाच किंकरम् ॥ दीर्घायुरेष आनीतो धिक्पाप किमिदं कृतम् ॥ ९ ॥ तस्मात्प्रापय तत्रैव यावदस्य च बन्धुभिः ॥ नो गात्रं दह्यते शोकात्सुसमिद्धेन वह्निना ॥ १० ॥ 

१ गम्भीरा भारती स्फुटम्–इ० पा० । २ वयोऽन्वितः–वृद्धः–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ ब्राह्मण उवाच ॥ ॥ नाहं तत्र गमिष्यामि दिष्ट्या प्राप्तोस्मि तेंऽतिकम् ॥ वांछमानः सदा मृत्युं दारिद्र्येण कदर्थितः ॥ ११ ॥ ॥ यम उवाच ॥ ॥ निमिषेणापि नो मर्त्यमानयामि महीतलात् ॥ आयुःशेषेण विप्रेन्द्र पूर्णेनाथ त्यजामि न ॥ १२ ॥ तत एव हि मे नाम धर्मराज इति स्मृतम् ॥ समत्वात्सर्वजंतूनां पक्षपातविवर्जनात् ॥ १३ ॥ तस्माद्गच्छ गृहं विप्र यावद्गात्रं न दह्यते ॥ बंधुभिस्तव शोकार्तैर्नाधुना तत्र ते स्थितिः ॥ १४ ॥ प्रार्थयस्व मनोऽभीष्टं वरं ब्राह्मणसत्तम ॥ न वृथा दर्शनं मे स्यात्कथंचिदपि देहिनाम् ॥ १५ ॥ ॥ ब्राह्मण उवाच ॥ ॥ अवश्यं यदि गंतव्यं मया देव गृहं पुनः ॥ तन्ममाचक्ष्व पृच्छामि वरश्चैष भवेन्मम ॥ १६ ॥ एते ये नरका रौद्राः सेविताः पापकर्मभिः ॥ दृश्यंते वद कः केन कर्मणा सेव्यते जनैः ॥ १७ ॥ ॥ यम उवाच ॥ ॥ असंख्या नरका विप्र यथा प्राणिगणाः क्षितौ ॥ कृत्स्नशः कथितुं शक्या नैव वर्षशतैरपि ॥ १८ ॥ कीर्तयिष्यामि तेषां ते प्राधान्येन द्विजोत्तम ॥ एकविंशतिसंख्या ये पापिलोककृते कृताः ॥ १९ ॥ आद्योऽयं रौरवो नाम नरको द्विजसत्तम ॥ प्रतप्ततैलकुंभेषु पच्यंते यत्र जंतवः ॥ २० ॥ हा मातस्तात पुत्रेति प्रकुर्वंति सुदारुणम् ॥ परपाकरताः क्षुद्राः परद्रव्या पहारकाः ॥ २१ ॥ द्वितीय एष विप्रेंद्र महारौरवसंज्ञितः ॥ कृतघ्नैः सेव्यते नित्यं तथा च गुरुतल्पगैः ॥ २२ ॥ रोरूयमाणैर्दाहार्तैः पच्यमानै र्हविर्भुजा ॥ खंडशः क्रियमाणैश्च तीक्ष्णशस्त्रैरनेकधा ॥ २३ ॥ तृतीयोंऽधतमोनाम नरकः सुभयावहः ॥ अत्र ये पुरुषा यांति तांश्च वक्ष्यामि सुद्विज ॥ २४ ॥ दुष्टेन चक्षुषा दृष्टाः परदारा नराधमैः ॥ सुलोहास्याः खगास्तेषां हरंत्यत्र विलोचने ॥ २५ ॥ चतुर्थोऽयं प्रतप्ताख्यो नरकः संप्रकीर्तितः ॥ अत्र ते यातनां भुक्त्वा तथा शुद्धा भवंति च ॥ २६ ॥ यैः कृता सततं निंदा गुरुदेवतपस्वि नाम् ॥ तेषामुत्पाद्यते जिह्वा जाताजाताऽत्र भूरिशः ॥ २७ ॥ एषोऽन्यः पंचमोनाम सुप्रसिद्धो विदारकः ॥ मित्रद्रोहरताश्चात्र च्छिद्यंते करपत्रकैः ॥ २८ ॥ प्रतप्तवालुकापूर्णो ध्मायते यश्च वह्निना ॥ निकुम्भइति विख्यातः षष्ठो लोकभयावहः ॥ २९ ॥ प्राणांतिकं पुरा दत्तं यैर्दुःखं प्राणिनां नरैः ॥ अपराधं विना तेऽत्र पच्यंते वालुकोत्करैः ॥ ३० ॥ बीभत्सुरिति विख्यातः सप्तमो नरकाधमः ॥ मूत्रमेध्य समाकीर्णः समंतादतिगर्हितः ॥ ३१ ॥ राजगामि च पैशुन्यं यैः कृतं सुदुरात्मभिः ॥ अमेध्यपूर्णवक्रास्ते धार्यंतेऽत्र नराधमाः ॥ ३२ ॥ कुत्सितोनाम विख्यातो द्विजायं चाष्टमोऽधमः ॥ श्लेष्ममूत्राभिसंपूर्णैस्तथा गन्धैश्च कुत्सितैः ॥ ३३ ॥ गुरुदेवातिथिभ्यश्च स्वभृत्येभ्यो विशे

१ मोः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



षतः ॥ अदत्त्वा भोजनं यैस्तु कृतं तेऽत्र व्यवस्थिताः ॥ ३४ ॥ एष दुर्गमनामा च नवमो द्विजसत्तम ॥ तीक्ष्णकंटकसंकीर्णः सर्पवृश्चिकसंकुलः ॥
॥ ३५ ॥ एकसार्थप्रयाताय क्षुत्क्षामायावसीदते ॥ अदत्त्वा भोजनं यैश्च कृतं तेऽत्र व्यवस्थिताः ॥ ३६ ॥ दशमोऽयं सुविख्यातो नरको नामदुः
सहः ॥ तप्तलोहमयैः स्तंभैः समंतात्परिवारितः ॥ ३७ ॥ ये पापाः परदारेषु रक्ता मिष्टामिषेषु वा ॥ तप्तलोहमयान्स्तंभांस्तेऽत्रालिंगंति मानवाः ॥
॥ ३८ ॥ एकादशोऽपरश्चायमाकर्षाख्यः प्रकीर्तितः ॥ नरको विप्रशार्दूल तप्तसंदंशसंकुलः ॥ ३९ ॥ स्त्रीविप्रगुरुदेवानां वित्तं चाश्नंति ये नराः ॥
संदंशैरपि कृष्यंते तत्र तप्तैः समंततः ॥ ४० ॥ संदंशो द्वादशश्चायं तथाऽभक्ष्यप्रभक्षकाः ॥ लोहदंतमुखैर्गृध्रैर्भक्ष्यंतेऽत्र नराधमाः ॥ ४१ ॥ एष त्रयो
दशोनाम सुविख्यातो नियंत्रकः ॥ समंतात्कृमिभिर्व्याप्तस्तथा च दृढबन्धनैः ॥ ४२ ॥ न्यासापहारकाः पापास्तत्र बद्धाश्च बंधनैः ॥ कृमिवृश्चिक
कीटाद्यैर्भक्ष्यंते द्विजसत्तम ॥ ४३ ॥ तथा चतुर्दशोनाम नरकोऽधोमुखः स्थितः ॥ नरकाणां समस्तानामेष रौद्रतमाकृतिः ॥ ४४ ॥ अत्र चाधो
मुखा बद्धा वृक्षशाखावलंबिताः ॥ पच्यंते वह्निनाऽधस्ताद्ब्रह्मघ्ना ये च मानवाः ॥ ४५ ॥ यूकामत्कुणदंशाद्यैः संकीर्णोऽयं द्विजोत्तम ॥ नरको भीष
णोनाम ख्यातः पञ्चदशो महान् ॥ ४६ ॥ कूटसाक्ष्यरतानां च तथैवानृतवादिनाम् ॥ अत्राश्रयो मया दत्तस्तथान्येषां कुकर्मिणाम् ॥ ४७ ॥ एष
षोडश उद्दिष्टो नरकोनाम क्षुद्द्रदः ॥ क्षुधार्तैर्मानवैर्व्याप्तः समंताद्द्विजसत्तम ॥४८॥ मृष्टमांसानि यैः पापैर्भक्षितानि द्विजन्मभिः ॥ क्षुधार्तास्ते निजं
कायं भक्षयंत्यत्र संस्थिताः ॥ ४९ ॥ तथा सप्तदशश्चायं क्षाराख्यो नरकः स्मृतः ॥ सुक्षारेण समाकीर्णः सर्वप्राणिभयावहः ॥ ५० ॥ व्रतभंगकरा
ये च ये च पाषण्डिनो नराः ॥ तेऽत्रागत्य शितैः शस्त्रैः पिष्यंते पापकृत्तमाः ॥ ५१ ॥ एष चाष्टादशो नाम कथितश्च निदाघकः ॥ ज्वलितां
गारसंकीर्णो दुःसेव्यः सर्वदेहिनाम् ॥ ५२ ॥ दूषयंति च ये शास्त्रं काव्यं विप्रं च कन्यकाम् ॥ अंगारांतः स्थितास्तेऽत्र ध्रियंते मानवा द्विज ॥
॥ ५३ ॥ एकोनविंशतिश्चायं प्रख्यातः कूटशाल्मलिः ॥ सुतीक्ष्णकंटकाकीर्णः समंताद्द्विजसत्तम ॥ ५४ ॥ नास्तिका भिन्नमर्यादा ये च विप्रस्य
घातकाः ॥ ते सर्वेऽत्र नरा नित्यमारुहंति पतंति च ॥५५॥ एष विंशतिमो नाम नरको द्विजसत्तम ॥ असिपत्रवनाख्यश्च कष्टसेव्यो दुरात्मभिः ॥
॥ ५६ ॥ अत्र यांति नरा विप्र पररंध्रनिरीक्षकाः ॥ कूटकर्मरता ये च शास्त्रविक्रयकारकाः ॥ ५७ ॥ एकविंशतिमा चैषा नाम्ना वैतरणी नदी ॥
सर्वैरेव नरैर्गम्या धर्मपापानुयायिभिः ॥ ५८ ॥ मृत्युकाले समुत्पन्ने धेनुं यच्छंति ये नराः ॥ तस्या लांगूलमाश्रित्य तारयंति सुखेन च ॥ ५९ ॥
अदत्त्वा गां च ये मर्त्या म्रियंते द्विजसत्तम ॥ तीर्त्वा हस्तादिभिर्दुर्गां त इमां संतरंति च ॥ ६० ॥ एतत्ते सर्वमाख्यातं यत्पृष्टोऽस्मि द्विजोत्तम ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विस्तरेण तव प्रीत्या स्वरूपं नरकोद्भवम् ॥६१॥ तस्माद्गच्छ गृहं शीघ्रं यावद्गात्रं न दह्यते ॥ बन्धुभिस्तव शोकार्तैर्गृहीत्वा वांछितं धनम् ॥ ६२ ॥ ॥ ॥ ब्राह्मण उवाच ॥ ॥ यदि देव मया सम्यग्गंतव्यं निजमंदिरम् ॥ तद्ब्रूहि कर्मणा येन नरकं याति नो नरः ॥ ६३ ॥ ॥ यम उवाच ॥ ॥ ॥ तीर्थयात्रापरो नित्यं देवतातिथिपूजकः ॥ ब्रह्मण्यश्च शरण्यश्च न याति नरकं नरः ॥ ६४ ॥ परोपकारसंयुक्तो नित्यं जपपरायणः ॥ स्वाध्यायनिरतश्चैव न याति नरकं द्विज ॥ ६५ ॥ वापीकूपतडागानि देवतायतनानि च ॥ यः करोति नरो नित्यं नरकं न स पश्यति ॥ ६६ ॥ हेमंते वह्निदो यः स्यात्तथा ग्रीष्मे जलप्रदः ॥ वर्षास्वाश्रयदो यश्च नरकं न स पश्यति ॥ ६७ ॥ व्रतोपवाससंयुक्तः शांतात्मा विजितेंद्रियः ॥ ब्रह्मचारी सदा ध्यानी नरकं याति नो नरः ॥ ६८ ॥ अन्नप्रदो नरो यः स्याद्विशेषेण तिलप्रदः ॥ अहिंसानिरतश्चैव नरकं न स पश्यति ॥६९॥ वेदाध्ययनसंपन्नः शास्त्रासक्तः सुमृष्टवाक् ॥ धर्माख्यानपरो नित्यं नरकं न स पश्यति ॥ ७० ॥ ॥ ब्राह्मण उवाच ॥ ॥ एतन्मूर्खोऽपि जानाति शुभकर्मकरः पुमान् ॥ न याति नरकं स्वर्गे तथा पापक्रियारतः ॥ ७१ ॥ तस्मादशुभकर्मापि कर्मणा येन पातकम् ॥ स्वल्पेनापि निहन्त्याशु याति स्वर्गं नरस्ततः ॥ ७२ ॥ तन्मे ब्रूहि सुरश्रेष्ठ व्रतं नियममेव वा ॥ तीर्थं वा जपहोमं वा सर्वलोकसुखावहम् ॥ ७३ ॥ ॥ यम उवाच ॥ ॥ अत्र ते सुमहद्गुह्यं कीर्तयिष्ये द्विजोत्तम ॥ गोपनीयं प्रयत्नेन वचनान्मम सर्वदा ॥७४॥ महापातकयुक्तोऽपि पुरुषो येन कर्मणा ॥ अनुष्ठितेन नो याति नरकं क्लेशकारकम् ॥ ७५ ॥ आनर्तविषये रम्यं सर्वतीर्थमयं शुभम् ॥ हाटकेश्वरजं क्षेत्रं महापातकनाशनम् ॥७६॥ तत्रैकमपि मासार्धं यो भक्त्या पूजयेद्धरम् ॥ स सर्वपापयुक्तोऽपि शिवलोके महीयते ॥ ७७ ॥ तस्मात्तत्र द्रुतं गत्वा त्वमाराधय शंकरम् ॥ येन गच्छसि निर्वाणं दशभिः पुरुषैः सह ॥ ७८ ॥ ॥ सूत उवाच ॥ ॥ उपदेशं समाकर्ण्य स यदा प्रस्थितो गृहम् ॥ धर्मराजस्य संहृष्टो मथुरां नगरीं प्रति ॥७९॥ तावद्द्वितीयं गोकर्णं दूत आदाय संगतः ॥ दर्शयामास धृत्वाग्रे धर्मराजस्य सत्वरम् ॥ ८० ॥ ततः प्रोवाच तं दूतं धर्मराजः प्रहर्षितः ॥ गोकर्णं पुरतो दृष्ट्वा द्वितीयं प्रस्थितं गृहम् ॥८१॥ यस्मात्कालात्ययं कृत्वाऽऽनीतोऽयं ब्राह्मणस्त्वया ॥ तस्मादेनमपि क्षिप्रं द्वितीयेन समं त्यज ॥८२॥ ततस्तौ तत्क्षणान्मुक्तौ गोकर्णौ ब्राह्मणौ समम् ॥ स्वंस्वं कलेवरं प्राप्य सहसाथ समन्वितौ ॥ ८३ ॥ ततः स कथयामास गोकर्णः प्रथमो द्विजः ॥ यमोपदेशसंजुष्टो द्वितीयाय सविस्तरम् ॥ ८४ ॥ ततो गृहं परित्यज्य गोकर्णौ द्वावपि स्थितौ ॥ देवतायतनैर्व्याप्तं क्षेत्रं दृष्ट्वाऽखिलं ततः ॥ ८५ ॥ लिंगे संस्थापिते ताभ्यां सीमांते दक्षिणोत्तरे ॥ हाटकेश्वरजं क्षेत्रं संप्राप्य तपसि द्रुतम् ॥ ८६ ॥ ततः शिवं समाराध्य तपः कृत्वा यथोचितम् ॥ सशरीरौ दिवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



प्राप्तौ तत्प्रभावाद्द्विजोत्तमाः ॥ ८७ ॥ ताभ्यां मार्गचतुर्दश्यां कृष्णायां जागरः कृतः ॥ यः करोति नरो भक्त्या स गच्छति शिवालयम् ॥ ८८ ॥
अपुत्रो लभते पुत्रान्धनार्थी धनमाप्नुयात् ॥ निष्कामस्तु पुनर्मोक्षं नरो याति न संशयः ॥ ८९ ॥ ॥ सूत उवाच ॥ ॥ एतद्वः सर्वमाख्यातं
सीमांतं द्विजसत्तमाः ॥ क्षेत्रस्यास्य प्रमाणं च विस्तरेण चतुर्दिशम् ॥ ९० ॥ अत्रांतरे नरा ये च निवसंति द्विजोत्तमाः ॥ कृषिकर्मोद्यताश्चापि
यांति ते परमां गतिम् ॥ किं पुनर्नियतात्मानः शांता दांता जितेंद्रियाः ॥ ९१ ॥ अपि कीटपतंगा ये पशवः पक्षिणो मृगाः ॥ तस्मिन्क्षेत्रे मृता
यांति स्वर्गलोकं न संशयः ॥ ९२ ॥ किं पुनर्ये नरास्तत्र कृत्वा प्रायोपवेशनम् ॥ संन्यस्ताः श्रद्धयोपेता हृदयस्थे जनार्दने ॥ ९३ ॥ तस्मात्सर्वं
प्रयत्नेन तत्क्षेत्रं सेव्यमेव हि ॥ विशेषेण कलौ प्राप्ते युगे पापसमावृते ॥ ९४ ॥ पुनंति स्नानदानाभ्यां सर्वतीर्थान्यसंशयम् ॥ हाटकेश्वरजं क्षेत्रं
पुनर्वासात्पुनाति च ॥ ९५ ॥ वापीकूपतडागेषु यत्रयत्र जलं द्विजाः ॥ तत्रतत्र नरः स्नातः सर्वपापैः प्रमुच्यते ॥ ९६ ॥ किं यज्ञैः किं वृथा दानैः
किं व्रतैः किं जपैरपि ॥ वरं तत्र कृतो वासः क्षेत्रे स्वर्गमभीप्सुभिः ॥ ९७ ॥ एतत्पवित्रमायुष्यं मांगल्यं पापनाशनम् ॥ हाटकेश्वरजक्षेत्रमाहात्म्यं
शृण्वतां सदा ॥ ९८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये गोकर्णतीर्थमाहात्म्य
वर्णनंनाम षड्विंशोऽध्यायः ॥ २६ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ चतुर्युगस्वरूपं तु माहात्म्यं चैव सूतज ॥ प्रमाणं वद कार्त्स्न्येन परं
कौतूहलं हि नः ॥ १ ॥ ॥ सूत उवाच ॥ ॥ इममर्थं पुरा पृष्टो वासवेन बृहस्पतिः ॥ यथा प्रोवाच विप्रेंद्रास्तद्वो वक्ष्यामि सांप्रतम् ॥ २ ॥
पुरा शक्रं समासीनं सभायां त्रिदशैः सह ॥ सह शच्या महात्मानमुपासांचक्रिरे सुराः ॥ ३ ॥ गन्धर्वाप्सरसश्चैव सिद्धविद्याधराश्च ये ॥ गुह्यकाः
किंनरा दैत्या राक्षसा उरगास्तथा ॥ ४ ॥ कलाः काष्ठा निमेषाश्च नक्षत्राणि ग्रहास्तथा ॥ सांगा वेदास्तथा मूर्तास्तीर्थान्यायतनानि च ॥ ५ ॥
तथा चक्रुः कथाश्चित्रा[1] देवदानवरक्षसाम् ॥ राजर्षीणां पुराणानां ब्रह्मर्षीणां विशेषतः ॥ ६ ॥ कस्मिंश्चिदथ संप्राप्ते प्रस्तावे त्रिदशेश्वरः ॥ पप्रच्छ
विनयोपेतो विप्रश्रेष्ठं बृहस्पतिम् ॥ ७ ॥ भगवञ्छ्रोतुमिच्छामि प्रमाणं युगसंभवम् ॥ माहात्म्यं च स्वरूपं च यथावद्वक्तुमर्हसि ॥ ८ ॥ ॥ बृहस्पति
रुवाच ॥ ॥ अहं ते कीर्तयिष्यामि माहात्म्यं युगसंभवम् ॥ यत्प्रमाणं स्वरूपं च[2] शृणुष्वावहितः स्थितः ॥ ९ ॥ अष्टाविंशतिसहस्राणि लक्षाः सप्तद
शैव तु ॥ प्रमाणेन कृतं प्रोक्तं यत्र शुक्लो जनार्दनः॥ १० ॥चतुष्पादस्तथा[3] धर्मः सुसंपूर्णा वसुन्धरा ॥ कामक्रोधविनिर्मुक्ता भयद्वेषविवर्जिताः॥ ११॥

१ दिव्याः—इ०पा० । २ तु—इ०पा० । ३ ततः—इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जनाश्चिरायुषस्तत्र शान्तात्मानो जितेन्द्रियाः ॥ पञ्चतालप्रमाणाश्च दीप्तिमन्तो बहुश्रुताः ॥ १२ ॥ तत्र षोडशसाहस्रं बालत्वं जायते नृणाम् ॥ ततश्च यौवनं प्रोक्तं द्वात्रिंशद्यावदेव हि ॥ १३ ॥ ततः परं च वार्द्धक्यं शनैः संजायते नृणाम्॥ लक्षांते परमं यावदन्येषामधिकं क्वचित् ॥ १४ ॥ तत्र सत्त्वाश्च ये केचित्पशवः पक्षिणो मृगाः ॥ दैवीं वाचं प्रजल्पंति न विरोधं व्रजंति च ॥१५॥ क्रीडंति नकुलैः सर्पा बिडाला मूषकैः समम् ॥ पञ्चान नैर्मृगा नित्यमुलूकाश्चापि वायसैः ॥१६॥ अकृष्टा च मही सस्यं जनयत्यति भूरिशः ॥ व्रीहिमुद्गयवप्रायं सुस्वादु बलवृद्धिदम् ॥१७॥ सर्वर्तुफलिनो वृक्षाः सपुष्पफलधारिणः ॥ सुपत्राः कंटकैर्हीनाः कल्पपादपसंनिभाः ॥१८॥ धेनवश्च प्रयच्छंति वांछितं स्वादु सत्पयः ॥ सर्वेष्वपि हि कालेषु भूरि सर्प्पिःप्रदं नृणाम् ॥ १९ ॥ न तत्र विधवा नारी जायते न च दुर्भगा ॥ काकवंध्या सुतैर्हीना न च शीलविवर्जिता ॥२०॥ यथा जन्म तथा मृत्युः क्रमात्संजायते नृणाम् ॥ न वीक्षते पिता पुत्रं मृतं क्वापि कदाचन[1] ॥ २१ ॥ न प्रेतत्वं च लोकानां मृतानां तत्र जायते ॥ न चापि नरके वासो न च रोगव्यथा क्वचित् ॥ २२ ॥ वेदांतगा द्विजाः सर्वे नित्यं स्वाध्यायशीलिनः ॥ वेदव्याख्यानसंहृष्टा ब्रह्मज्ञानविचक्षणाः ॥ २३ ॥ क्षत्रियाश्चापि भूपालमेकं कृत्वा सुभक्तितः ॥ तदादेशात्प्रभुंजंति महीं धर्मेण नित्यशः ॥२४॥ वैश्या वैश्यजनार्हाणि चक्रुः कर्माणि भूरिशः ॥ पशुपालनपूर्वाणि क्रयविक्रयजानि च ॥ २५ ॥ मुक्त्वैकां द्विजशुश्रूषां न शूद्रास्तत्र चक्रिरे ॥ किंचित्कर्म सुरश्रेष्ठ श्रद्धया परया युताः ॥ २६ ॥ न तत्र चांत्यजो जज्ञे न च संकरसंभवः ॥ नापवित्रो न वर्णानां पञ्चमो दृश्यते भुवि ॥ २७ ॥ यजनं याजनं दानं व्रतं नियम एव च ॥ तीर्थयात्रां नरास्तत्र निष्कामा एव कुर्वते ॥ २८ ॥ एवंविधं सहस्राक्ष मया ते परिकीर्तितम् ॥ आद्यं कृतयुगं पुण्यं सर्वलोकसुखावहम् ॥ २९ ॥ ततस्त्रेतायुगंनाम द्वितीयं संप्रवर्तते ॥ वर्षाणां षण्णवत्याढ्या लक्षा द्वादश संख्यया ॥ ३० ॥ सोऽपि साक्षाज्जगन्नाथः श्वेतद्वीपाश्रयाश्रितः[3] ॥ तत्र रक्तत्वमायाति भगवान्गरुडध्वजः ॥ ३१ ॥ त्रिपादस्तत्र धर्मः स्यात्पादेनैकेन पातकम् ॥ तेनापि जायते स्पर्द्धा वर्णानामितरेतरम् ॥ ३२ ॥ ततः फलानि वांछंति तीर्थयात्रोद्भवानि[4] ते ॥ व्रतानां नियमानां च स्वर्गवासादिहेतवः ॥ ३३ ॥ ततः कामवशान्मोहं सर्वे गच्छंति मानवाः ॥ मोहाद्द्रोहं ततो गत्वा पापं कुर्वंत्यनुक्रमात् ॥ ३४ ॥ ततस्तु रौरवादीनि नरकाणि यमः स्वयम् ॥ सज्जीकरोति देवेन्द्र ह्येकविंशतिसंख्यया ॥ ३५ ॥ कर्मानुसारतस्तानि सेवयंति नराधमाः ॥ केचिदन्ये महेन्द्रादिलोकान्मोक्षं तथा परे ॥ ३६ ॥ त्रिविधाः पुरुषास्तत्र श्रेष्ठाश्चाधममध्यमाः[2] ॥ त्रिविधानि च कर्माणि

१ कथंचन–इ० पा० । २ श्रेष्ठाः–इ० पा० । ३ श्वेतद्वीपाश्रयान्वितः–इ० पा० । ४ तीर्थयज्ञोद्भवानि ते–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



प्रकुर्वंति सुरेश्वर ॥ ३७ ॥ उन्नतास्तालमात्रेण तेजोवीर्यसमन्विताः ॥ चक्रुश्च कृषिकर्माणि वैश्याश्चैवान्नलिप्सया ॥ ३८ ॥ उप्तक्षेत्रं सकृच्चापि
सप्तवारं लुनंति ते ॥ यथर्तु फलिनो वृक्षा यथर्तु कुसुमान्विताः ॥ ३९ ॥ यथर्तु पत्रसंयुक्तास्तत्र स्युः सुमनोहराः ॥ अग्निष्टोमादिका
यज्ञाः प्रवर्तंते सहस्रशः ॥ ४० ॥ इतरेतरसंस्पर्धैः क्रियमाणा नृपोत्तमैः ॥ ब्राह्मणैश्च सुरश्रेष्ठ स्वर्गलोकमभीप्सुभिः ॥ ४१ ॥ तीर्थयात्रां व्रतं दानं
नियमं संयमं तथा ॥ परलोकमभीप्संतस्तत्र कुर्वंति मानवाः ॥ ४२ ॥ सहस्रेण तु वर्षाणां तत्र स्याद्यौवनं नृणाम् ॥ सहस्रपञ्चकं यावदूर्ध्वं वार्द्धक
मुच्यते ॥ ४३ ॥ रजकश्चर्मकारश्च नटो बुरुड एव च ॥ कैवर्त्तमेदभिल्लाश्च चंडालाः शूद्रमानवाः ॥ ४४ ॥ संभवंति युगे तस्मिन्यो
निसंसर्गतो विभो ॥ तथान्ये संख्यया हीना एतेभ्यो निंदिता नराः ॥ ४५ ॥ ॥ इन्द्र उवाच ॥ ॥ उत्पत्तिः कथमेतेषामंत्यजानां द्विजो
त्तम ॥ यथावद्वद कात्स्न्येंन अत्र कौतूहलं महत् ॥ ४६ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ एतेषामष्टधा सृष्टिर्जायतेंऽत्यजसंभवा ॥ योनि
दोषात्सुरश्रेष्ठ जातेर्वक्ष्याम्यहं स्फुटम् ॥ ४७ ॥ ब्राह्मण्यां क्षत्रियाज्जातः सूत इत्यभिधीयते ॥ सूतेन रजकश्चैव रजकेन च चर्मकृत् ॥
॥ ४८ ॥ चर्मकारेण संजज्ञे नटश्चांत्यजसंज्ञकः ॥ चत्वारः क्षेत्रसंभूता एते क्षेत्रे द्विजन्मनाम् ॥ ४९ ॥ तथा च मागधो जज्ञे वैश्येन
द्विजसंभवे ॥ क्षेत्रे मागधवीर्येण बुरुडो मरुदुत्तम ॥ ५० ॥ बुरुडेन च कैवर्तः कैवर्तेन च मेदकः ॥ चत्वारो वैश्यसंभूता एते
क्षेत्रे द्विजन्मनाम् ॥ प्रजायन्ते सुरश्रेष्ठ सर्वकर्मसु गर्हिताः ॥ ५१ ॥ तथा शूद्रेण संजज्ञे ब्राह्मण्यां सुरसत्तम ॥ भिल्लाख्यश्चापि भिल्लेन
चंडालश्च प्रजायते ॥ ५२ ॥ एतौ द्वावपि शूद्रेण भवतो द्विजसंभवे ॥ क्षेत्रे सर्वसुराधीश सत्यमेतन्मयोदितम् ॥ ५३ ॥ एतत्रेतायुगे प्रोक्तं मया ते
सुरसत्तम ॥ आकर्णय प्रयत्नेन द्वापरस्याधुना स्थितिम् ॥ ५४ ॥ लक्षाष्टकप्रमाणेन तद्युगं परिकीर्तितम् ॥ चतुःषष्टिसहस्राणि वर्षाणां परिसं
ख्यया ॥ कपिशो जायते तत्र भगवान्गरुडध्वजः ॥ ५५ ॥ द्वौ पादौ चैव धर्मस्य द्वौ पापस्य व्यवस्थितौ ॥ तत्र स्याद्यौवनं नृणां गते वर्षशतेऽ
खिले ॥ ५६ ॥ ततोऽन्यैः समतिक्रांतैर्वार्धक्यं पञ्चभिः शतैः ॥ तत्र सत्यानृता लोका देवा भूपास्तथा परे ॥ ५७ ॥ नार्यश्चापि सुरश्रेष्ठ तत्स्व
रूपाः प्रकीर्तिताः ॥ पंचहस्तप्रमाणेन चतुर्हस्तास्तथा परे ॥ ५८ ॥ नातिरूपेण संयुक्ता न च रूपविवर्जिताः ॥ अव्यक्तजल्पकाश्चापि पशवः
पक्षिणो मृगाः ॥ ५९ ॥ नातिपुष्पफलैर्युक्ता वृक्षाश्चापि सुरेश्वर ॥ सस्यानि तानि जायन्ते तत्र चोप्तानि कर्षुकैः ॥ ६० ॥ वर्षंति जलदाः कामं
भवन्त्योषधयोऽखिलाः ॥ यत्किंचिद्भूतले ज्ञानं शास्त्रं वा सुरसत्तम ॥ तत्तत्र समभावेन न सत्यं नैव चानृतम् ॥ ६१ ॥ तीर्थानां च मखानां च



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वापरे सुरसत्तम ॥ फलं भावानुरूपेण दानानां च प्रजायते ॥ ६२ ॥ एतत्तव समाख्यातं युगं द्वापरसंज्ञकम् ॥ मया सर्वं सुराधीश यथादृष्टं यथा श्रुतम् ॥ ६३ ॥ शृणुष्वावहितो भूत्वा वदतो मम सांप्रतम् ॥ रौद्रं कलियुगंनाम यत्र कृष्णो जनार्दनः ॥ ६४ ॥ द्वात्रिंशच्च सहस्राणि वर्षाणां कथितं विभो ॥ तथा लक्षचतुष्केण साधुलोकविवर्जितम् ॥६५॥ तत्रैकपादयुक्तश्च धर्मः पापं त्रिभिः स्मृतम् ॥ पूर्वार्धेभ्यः परं सर्वं संभविष्यति पातकम् ॥ ६६ ॥ न शृण्वंति पितुः पुत्रा न स्नुषा भ्रातरो न च ॥ न भृत्या न कलत्राणि यत्र द्वेषः परस्परम् ॥ ६७ ॥ यत्र षोडशमे वर्षे नराः पलितयौवनाः ॥ तत्र द्वादशमे वर्षे गर्भं धास्यति चांगना ॥ ६८ ॥ आयुः परं मनुष्याणां शतसंख्यं सुरेश्वर ॥ नागानां च तरूणां च वर्षाणां यत्र नाधिकम् ॥ ६९ ॥ द्वात्रिंशद्धयमुख्यानां चतुर्विंशतिः खरोष्ट्रयोः ॥ अजानां षोडश प्रोक्तं शुनां द्वादशसंख्यया ॥ ७० ॥ चतुष्पदानामन्येषां विंशतिः पंचभिर्युता ॥ यत्र काकाश्च गृध्राश्च कौशिकाश्चिरजीविनः ॥ ७१ ॥ तथा पापपरा लोका दुःस्थिताश्च विशेषतः ॥ तथा कण्टकिनो वृक्षा रूक्षाः पुष्पफलच्युताः ॥ सेवितास्तेऽपि गृध्राद्यैर्यत्र च्छायाविवर्जिताः ॥ ७२ ॥ यत्र धर्मो ह्यधर्मेण पीड्यते सुरसत्तम ॥ असत्येन तथा सत्यं भूपाश्चौरैः सदैव तु ॥ ७३ ॥ गुरवश्च तथा शिष्यैः स्त्रीभिश्च पुरुषाधमाः ॥ स्वामिनो भृत्यवर्गैश्च मूर्खैश्चापि बहुश्रुताः ॥ ७४ ॥ यत्र सीदंति धर्मिष्ठा नराः सत्यपरायणाः ॥ दान्ता विवेकिनः शान्तास्तथा परहिते रताः ॥ ७५ ॥ आधयो व्याधयश्चैव तथा पीडा महाद्भुता ॥ सदैव संस्थिता यत्र साधुपीडनवांछया ॥ ७६ ॥ अल्पायुषस्तथा मर्त्या जायंते वर्णसंकरात् ॥ ये केचन प्रजीवंति दुःखेन ते समन्विताः ॥७७॥ न वर्षति घनः काले संप्राप्तेऽपि यथोचिते ॥ न सस्यं स्यात्सुवृष्टेपि कर्षुकस्यापि वांछितम् ॥ ७८ ॥ न च क्षीरप्रदा गावो यद्यपि स्युः सुपोषिताः ॥ न भवंति प्रभूताश्च यत्नेनापि सुरक्षिताः ॥ ७९ ॥ आविकानां तथोष्ट्रीणां यत्र क्षीरप्रशंसकाः ॥ लोका भवंति निःश्रीकास्तथा ये च मलिम्लुचाः ॥ ८० ॥ तथा तपस्विनः शूद्राः शूद्रा धर्मपरायणाः ॥ शूद्रा वेदविचारज्ञा यज्ञकर्मणि चोद्यताः ॥ ८१ ॥ शूद्राः प्रतिग्रहीतारः शूद्रा दानप्रदास्तथा ॥ शूद्राश्चापि तथा वन्द्याः शूद्रास्तीर्थेषु संस्थिताः ॥ ८२ ॥ पंचगर्तान्खनंत्येव मृत्युकाले नराधमाः ॥ शिरसा हस्तपादाभ्यां मोहात्संनष्टचेतनाः ॥ ८३ ॥ वेदविक्रयकर्तारो ब्राह्मणाः शौचवर्जिताः ॥ ८४ ॥ स्वाध्यायरहिताश्चैव शूद्रान्ननिरताः सदा ॥ असत्प्रतिग्रहाः प्रायो जिह्वालौल्यसमुत्सुकाः ॥ ८५ ॥ पाखंडिनो विकर्मस्थाः परदारोपजीविनः॥ कार्यकारणमाश्रित्य यत्र स्नेहः प्रजायते ॥ ८६ ॥ न स्वभावात्सहस्राक्ष कथंचिदपि देहिनाम् ॥ यास्यंति म्लेच्छभावं च सर्वे वर्णा द्विजातयः ॥ ८७ ॥ नष्टोत्सवा विधर्माणो नित्यं संकरकारकाः ॥ सार्धहस्तत्रयाः पूर्वं भविष्यंति युगादितः ॥ ८८ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ततो ह्रासं प्रयास्यंति वृद्धिं यांति कलौ युगे ॥ भविष्यन्ति ततश्चांते मनुष्या बिलशायिनः ॥ ८९ ॥ अल्पत्वाद्दुर्लभत्वाच्च अशक्ता गृहकर्मणि ॥ भविष्यंत्यफला यज्ञास्तथा वेदव्रतानि च ॥ ९० ॥ नियमाः संयमाः सर्वे मंत्रवादास्तथैव च ॥ तीर्थानि म्लेच्छसंस्पर्शाद्दूषितानि शतक्रतो ॥ ॥ ९१ ॥ स्वस्वभावविहीनानि हीनानि च तथा जलैः ॥ कुत्सिता मंत्रवादा ये कुत्सिताश्च तपस्विनः ॥ ९२ ॥ तत्र ते संभविष्यंति कुत्सिता ये च मानवाः ॥ कुलीनमपि संत्यज्य वरं रूपवयोन्वितम् ॥ ९३ ॥ वित्तलोभात्प्रदास्यंति कुत्सिताय नराः सुताम् ॥ कन्यकाः प्रसविष्यंति कन्यकाः सुरतोत्सुकाः ॥ ९४ ॥ कन्यकाः प्रकरिष्यंति पुरुषैः सह संगतिम् ॥ भर्तारं वंचयिष्यंति कुलीना अपि योषितः ॥ ९५ ॥ सर्वकृत्येषु दुःशीलाः सुयत्नेनापि रक्षिताः ॥ निर्दयाश्चापि भूपालाः पीडयिष्यंति कर्षुकान् ॥ ९६ ॥ पीडयिष्यंति निर्दोषान्वित्तलोभादसंशयम् ॥ वधार्हमपि संप्राप्य वित्तलोभान्मलिम्लुचम् ॥ ९७ ॥ संत्यक्ष्यंति युगे तस्मिन्प्राणिद्रोहेऽपि वर्तिनम् ॥ क्षात्रधर्मं परित्यज्य करिष्यंति तथा रणम् ॥ ९८ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ एतद्वः सर्वमाख्यातं युगानां लक्षणं मया ॥ प्रमाणं च सुरश्रेष्ठ चतुर्णामप्यसंशयम् ॥ ९९ ॥ यश्चैतत्कीर्तयेन्मर्त्यः सदैव सुसमाहितः ॥ स नूनं मुच्यते पापादाजन्ममरणांतिकात् ॥ १०० ॥ शृणुयाद्वा नरो यश्च श्रद्धापूतेन चेतसा ॥ सोऽपि मुच्येन्न सन्देहः पापाच्च दिवसोद्भवात् ॥ १०१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखंडे हाटकेश्वरक्षेत्रमाहात्म्ये चतुर्युगस्वरूपवर्णनंनाम सप्तविंशोऽध्यायः ॥ २७ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तस्यां देवसभायां च संस्थिता ये द्विजोत्तमाः ॥ प्रभासादीनि तीर्थानि मूर्तानि सकलानि च ॥ १ ॥ तानि श्रुत्वा वचस्तस्य देवाचार्यस्य तादृशम् ॥ भयं कृत्वा महच्चित्ते प्रोचुश्च त्रिदिवेश्वरम् ॥ २ ॥ यद्येवं देवदेवेश भविष्यत्यशुभं युगम् ॥ वयं नाशं समेष्यामो न स्थास्यामो जगत्त्रये ॥ ३ ॥ पुरंदराद्य चास्माकं स्थानं किंचित्प्रदर्शय ॥ तस्मात्कीर्तय नः स्थानं किंचित्क्वापि पुरंदर ॥ ४ ॥ यदाश्रित्य नयिष्यामो रौद्रं कलियुगं विभो ॥ अस्पृष्टानि नरैर्म्लेच्छैः प्रभावसहितानि च ॥ पाताले स्वर्गलोके वा मर्त्ये वा सुरसत्तम ॥ ५ ॥ तेषां तद्वचनं श्रुत्वा कृपाविष्टः शतक्रतुः ॥ प्रोवाच ब्राह्मणश्रेष्ठं भूय एव बृहस्पतिम् ॥ ६ ॥ अस्पृष्टं कलिना स्थानं किंचिद्वद बृहस्पते ॥ समाश्रयाय तीर्थानां यदि वेत्सि जगत्त्रये ॥ ७ ॥ शक्रस्य तद्वचः श्रुत्वा चिरं ध्यात्वा बृहस्पतिः ॥ तत्र प्रोवाच तीर्थानि भयाद्भीतानि हर्षयन् ॥ ८ ॥ हाटकेश्वरमित्युक्तमस्ति क्षेत्रमनुत्तमम् ॥ लिंगस्य पतनाज्जातं देवदेवस्य शूलिनः ॥ ९ ॥ यत्र पूर्वं तपस्तप्तं विश्वा

१ याति–गच्छति सति–इति सप्तम्यन्तमिदम् । २ बिलशायिनः–मूषका इव स्वल्पदेहाः–इत्यर्थः । ३ वस्तूनाम्–इति शेषः । ४ अनयोरुभयोरप्यर्धयोः किंचिदेवार्थे वैलक्षण्यमतो न पौनरुक्त्यम् ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मित्रेण धीमता ॥ त्रिशंकोर्भूमिपालस्य कृते तीर्थे महात्मना ॥ १० ॥ यत्र स्थित्वा स भूपालस्त्रिशंकुः पापवर्जितः ॥ चण्डालत्वं परित्यज्य सदेह स्त्रिदिवं गतः ॥ ११ ॥ यत्र शक्रसमादेशात्पूरितं पांसुभिः पुरा ॥ संवर्तकेन रौद्रेण वायुना तीर्थमुत्तमम् ॥ १२ ॥ यत्र रक्षत्यधस्ताच्च स स्वयं हाटकेश्वरः ॥ उपरिष्टात्प्रदेशं च कलौ देवोऽचलेश्वरः ॥ १३ ॥ हाटकेश्वरमाहात्म्यादस्पृष्टं कलिना हि तत् ॥ पंचक्रोशप्रमाणेन अचलेश्वरजेन च ॥ १४ ॥ तस्मात्स्वांशेन गच्छंतु तत्र तीर्थान्यशेषतः ॥ तेषां कलिभयं शक्र नैव तत्रास्त्यसंशयम् ॥ १५ ॥ तच्छ्रुत्वा वचनं तस्य सर्वतीर्थानि तत्क्षणात् ॥ हाटकेश्वरसंज्ञं तत्क्षेत्रं जग्मुर्द्विजोत्तमाः ॥ १६ ॥ यज्ञोपवीतमात्राणि कृत्वा स्थानानि चात्मनः ॥ क्षेत्रमासादयामासुस्तत्सर्वं हि द्विजोत्तमाः ॥ १७ ॥ एतस्मात्कारणाज्जातं क्षेत्रं पुण्यतमं हि तत् ॥ हाटकेश्वरदेवस्य महापातकनाशनम् ॥ १८ ॥ ॥ ऋषय ऊचुः ॥ ॥ अत्याश्चर्यमिदं सूत यत्त्वयैतदुदाहृतम् ॥ संगमं सर्वतीर्थानां क्षेत्रे तत्र प्रकीर्तितम् ॥ १९ ॥ तावन्मात्रप्रभावाणि तत्स्थानि प्रभवंति किम् ॥ तानि तीर्थानि नो ब्रूहि विस्तरेण महामते ॥ २० ॥ नामतः स्थानतश्चैव तथा चैव प्रभावतः ॥ सर्वाण्यपि महाभाग परं कौतूहलं हि नः ॥ ॥ २१ ॥ ॥ सूत उवाच ॥ ॥ तिस्रः कोट्योऽर्धकोटिश्च तीर्थानां द्विजसत्तमाः ॥ हाटकेश्वरजं क्षेत्रं व्याप्य सर्वं व्यवस्थिताः ॥ ॥ २२ ॥ न तेषां कीर्तनं शक्यं कर्तुं वर्षशतैरपि ॥ तथा स्वायंभुवस्यादौ कल्पस्य प्रथमस्य च ॥ २३ ॥ कृतः समाश्रयस्तत्र क्षेत्रे तीर्थैः शुभावहे ॥ बहुत्वादथ कालस्य बहूनि द्विजसत्तमाः ॥ २४ ॥ उच्छेदं संप्रयातानि तीर्थान्यायतनानि च ॥ यान्यहं वेद कार्त्स्न्येन प्रभावसहितानि च ॥ तानि वः कीर्तयिष्यामि शृणुध्वं सुसमाहिताः ॥ २५ ॥ येषां संश्रवणादेव नरः पापात्प्रमुच्यते ध्यानात्स्नानात्तथा दानात्स्पर्शनाद्द्विजसत्तमाः ॥ २६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये हाटकेश्वरक्षेत्रे सर्वतीर्थसमाश्रयवर्णनंनामाष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एवं सर्वेषु तीर्थेषु संस्थितेषु द्विजोत्तमाः ॥ तत्क्षेत्रं ख्यातिमापन्नं समस्ते धरणीतले ॥ १ ॥ समस्तेभ्यस्ततोऽदूरान्मुनयः शंसितव्रताः ॥ संश्रयंति ततो भूपास्तपोऽर्थं जरयाऽन्विताः ॥ २ ॥ तथा ते लिंगिनो दान्ताः सिद्धिकामाः समंततः ॥ समाश्रयंति तत्क्षेत्रं सर्वतीर्थसमाश्रयम् ॥ ३ ॥ तत्र सिद्धेश्वरंनाम लिंगमस्ति द्विजोत्तमाः ॥ सर्वसिद्धिप्रदं नृणां स्वयं सिद्धिप्रदायकम् ॥ ४ ॥ निर्विघ्न भूतले शर्वः सर्वव्यापी सदा शिवः ॥ हाटकेश्वरसंज्ञेऽस्मिन्क्षेत्रे देवः स्वयं स्थितः ॥ ५ ॥ लिंगरूपेण भगवान्प्रादुर्भूतः स्वयं हरः ॥ स्मरणाद्दर्शनाच्चैव सर्वसिद्धिप्रदः सदा ॥६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सिद्धेनाराधितो यस्मात्तस्मात्सिद्धेश्वरः स्मृतः ॥ तस्यैव वरदानाद्धि अत्रैवावस्थितो हरः ॥ ७ ॥ यस्तं पश्यति सद्भक्त्या शुचिः स्पृशति वा
नरः ॥ वांछितं लभते सद्यो यद्यपि स्यात्सुदुर्लभम् ॥ ८ ॥ तत्र[1] सिद्धिं गताः पूर्वं शतशः पुरुषा भुवि ॥ दर्शनात्स्पर्शनाच्चान्ये प्रणामादपरे
नराः ॥ ९ ॥ दक्षिणामूर्तिमासाद्य[2] मन्त्रं तस्य षडक्षरम् ॥ यो जपेच्छ्रद्धयोपेतस्तस्यायुः संप्रवर्धते ॥ १० ॥ यावत्संख्यं जपेन्मंत्रं तावत्संख्यान्य
हानि सः ॥ आयुषः परतो मर्त्यो जीवते नात्र संशयः ॥ ११ ॥ ॥ ऋषय ऊचुः ॥ ॥ अत्याश्चर्यमिदं सूत यत्त्वया परिकीर्तितम् ॥ आयुषोऽ
प्यधिकं मर्त्यो जीवते यदि मानवः ॥ १२ ॥ ॥ सूत उवाच ॥ ॥ अत्र वः कीर्तयिष्यामि स्वयमेव मया श्रुतम् ॥ वदतस्तत्समुद्दिश्य यद्वत्सस्य
महात्मनः ॥ १३ ॥ पुरा मे वसमानस्य पुरतोऽत्र पितुर्गृहे ॥ आयातः स मुनिस्तत्र वत्सोनाम महाद्युतिः ॥ १४ ॥ वहमानो युवावस्थां द्वादशार्कस
मद्युतिः ॥ अंगैः सर्वैस्तु रूपाढ्यः कामदेव इवापरः ॥ १५ ॥ मत्पित्रा स तदा दृष्टस्ततो भक्त्याऽभिवादितः ॥ अर्घ्यं दत्त्वा ततः प्रोक्तो विश्रांतो
विनयेन च ॥ १६ ॥ स्वागतं तव विप्रेंद्र कुतस्त्वमिह चागतः ॥ आदेशो दीयतां मह्यं किं करोमि यथोचितम् ॥ १७ ॥ ॥ वत्स उवाच ॥ ॥
तवाश्रमपदे सूत चातुर्मास्यसमुद्भवम् ॥ कर्तुमिच्छाम्यनुष्ठानं शुश्रूषां चेत्करोषि मे ॥ १८ ॥ ॥ लोमहर्षण उवाच ॥ ॥ एवं विप्र करिष्यामि
तवादेशमसंशयम् ॥ धन्योऽस्म्यनुगृहीतोऽस्मि यस्त्वं मे गृहमागतः ॥ १९ ॥ एवमुक्त्वाथ मामाह स पिता द्विजसत्तमाः ॥ त्वया वत्सस्य कर्तव्या
शुश्रूषा नित्यमेव हि ॥ २० ॥ ततोऽहं विनयोपेतस्तस्य कृत्यानि कृत्स्नशः ॥ करोमि स च मे रात्रौ चित्राः कीर्तयते कथाः ॥ २१ ॥
राजर्षीणां पुराणानां देवदानवरक्षसाम् ॥ द्वीपानां पर्वतानां च स्वयं दृष्ट्वा सहस्रशः ॥ २२ ॥ एकदा तु मया पृष्टः कथांते प्राप्य
कौतुकम् ॥ विस्मयाविष्टचित्तेन स द्विजो द्विजसत्तमाः ॥ २३ ॥ भगवन्सुकुमारं ते शरीरं प्रथमं वयः ॥ द्वीपानां च करोषि त्वं कथा
श्चित्राः पृथक्पृथक् ॥ २४ ॥ कथं सर्वं धरापृष्ठं ससमुद्रं निरीक्षितम् ॥ स्वल्पेन वयसा तात सर्वं विस्तरतो वद ॥ २५ ॥ त्वया
ये कीर्तिता द्वीपाः समुद्राः पर्वतास्तथा ॥ मनसापि न शक्यास्ते गन्तुं मर्त्यैः कथंचन ॥ २६ ॥ अत्र कौतूहलं जातमश्रद्धेयं
वचस्तथा ॥ श्रुत्वा[3] श्रद्धेयवाक्यस्य तस्मात्सत्यं प्रकीर्तय ॥ २७ ॥ तपसः किं प्रभावोऽयं किं वा मंत्रपराक्रमः ॥ येन पृथ्वीतलं कृत्स्नं त्वया दृष्टं
मुनीश्वर ॥ २८ ॥ किं वा देवप्रसादस्तु तवौषधिकृतोऽथवा ॥ तच्च पुण्यतमं तात त्वं मे ब्रूहि सविस्तरम् ॥ २९ ॥ अथ मां स मुनिः प्राह

१ तेन—इ०पा० । २ आश्रित्य—इ०पा० । ३ तव—इत्यध्याहारः । श्रद्धेयवाक्यस्य तव अश्रद्धेयं वचः श्रुत्वा—अत्र—त्वद्वचसि—कौतूहलम्—आश्चर्यम्—जातम् । तस्मात्सत्यं प्रकीर्तय—इति योजना ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विहस्य मुनिसत्तमाः[1] ॥ सत्यमेतत्त्वया ज्ञातं मम मंत्रपराक्रमम् ॥ ३० ॥ सदाहमष्टसंयुक्तं सहस्रं शिवसंन्निधौ ॥ जपामि शिवमंत्रस्य षडक्षरमितस्य च ॥ ३१ ॥ त्रिकालं तेन मे जातं सुस्थिरं यौवनं मुने ॥ अतीतानागतं ज्ञानं जीवितं च सुखोदयम् ॥ ३२ ॥ मम वर्षसहस्राणि बहूनि प्रयुतानि च ॥ संजातानि महाभाग दृश्यते प्रथमं वयः ॥ ३३ ॥ अत्र ते कीर्तयिष्यामि विस्तरेण महामते ॥ यथा सिद्धिर्मया प्राप्ता प्रसादाच्छंकरस्य च ॥ ३४ ॥ अहं हि ब्राह्मणो नाम्ना वत्सः ख्यातो महीतले ॥ नानाशास्त्रकृताभ्यासः पुराऽऽसं वेदपारगः ॥ ३५ ॥ एतस्मिन्नेव काले तु मेनका च वराप्सराः ॥ वसंतसमये प्राप्ता मर्त्यलोके यदृच्छया ॥ ३६ ॥ सा गता भ्रममाणाथ काम्यकंनाम सद्वनम् ॥ मत्तकोकिलनादाढ्यं मनोज्ञद्रुमसंकुलम् ॥ ३७ ॥ यत्रास्ते मुनिशार्दूलो देवरातं[2] इति स्मृतः ॥ व्रतस्वाध्यायसंपन्नस्तपसा ध्वस्तकिल्बिषः ॥ ३८ ॥ उपविष्टो नदीतीरे देवतार्चापरायणः ॥ श्रद्धया परया युक्त एकाकी निर्जने वने ॥ ३९ ॥ अथ सा पश्यतस्तस्य विवस्त्रा प्राविशज्जलम् ॥ दिव्यरूपसमोपेता घर्मार्ता वरवर्णिनी ॥ ॥ ४० ॥ अथ तस्य मुनींद्रस्य रेतश्चस्कन्द तत्क्षणात् ॥ दृष्ट्वा तां चारुसर्वांगीं जलमध्यं समाश्रिताम् ॥ ४१ ॥ एतस्मिन्नंतरे प्राप्ता सारंगी सुपिपासिता ॥ जलमिश्रं तया रेतः पीतं सर्वमशेषतः ॥ ४२ ॥ अथ साऽपि दधे गर्भं मानुषं वै[3] प्रभावतः ॥ अमोघरेतसो मासे सुषुवे दशमे ततः॥४३॥ जनयामास दीप्तांगी कन्यां पद्मदलेक्षणाम् ॥ तस्मिन्नेव जले पुण्ये देवराताश्रमं प्रति ॥ ४४ ॥ अथ तां स मुनिर्ज्ञात्वा स्वज्ञानेन स्ववीर्यजाम् ॥ कृपया परयाविष्टो जग्राह च पुपोष च ॥ ४५ ॥ स्नेहेन महता युक्तः कृतकौतुकमंगलः ॥ रक्षमाणो वने चैनां श्वापदेभ्यः प्रयत्नतः ॥ ४६ ॥ आजहार सुमृष्टानि तत्कृते सुफलानि सः ॥ स्वयं गत्वा सुदूरं च कानने श्वापदाकुले ॥ ४७ ॥ तत्रस्था ववृधे सा च नाम्ना ख्याता मृगावती ॥ शुक्लपक्षे यथा व्योम्नि कलेव शशलक्ष्मणः[4] ॥ ४८ ॥ अथ सा भ्रममाणेन मया दृष्टा मृगेक्षणा ॥ ततोऽहं कामबाणेन तत्क्षणात्ताडितो हृदि ॥ ॥ ४९ ॥ विज्ञाय च कुमारीं तां सवर्णां चारुहासिनीम् ॥ आदरेण गृहं गत्वा स मुनिर्याचितस्ततः ॥ ५० ॥ प्रयच्छैनां मम ब्रह्मन्पत्न्यर्थं निजकन्यकाम् ॥ यथात्मा[5] पोषयिष्यामि भोजनाच्छादनादिभिः ॥ ५१ ॥ ततस्तेन प्रदत्ता मे तत्क्षणादेव सुन्दरी ॥ विधिना शास्त्रदृष्टेन नक्षत्रे भगदैवते ॥ ५२ ॥ ततः कतिपयाहस्य मयोढा सा सुविस्मिता ॥ सखीजनसमायुक्ता फलार्थं निर्गता वने ॥ ५३ ॥ अथ वीरुधसंछन्ने वने तस्मिन्सुसंस्थिते ॥ तया न्यस्तं पदं मूर्ध्नि तृणाच्छन्नस्य भोगिनः ॥ ५४ ॥ सा दष्टा सहसा तेन पतिता वसुधातले ॥ विषार्दिता गतप्राणा तत्क्षणादेव

१ श्रूयतां द्विजसत्तमाः—इ० पा० । २ देवराजः—इ० पा० । ३ तत्प्रभावतः—इ०पा० । ४ शशलक्ष्मणः—चन्द्रस्य । ५ यथात्मा पोषयिष्यामि—यथा ममात्मा मया पोष्यते—तथैनां पोषमिष्यायि—इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



भामिनी ॥ ५५ ॥ अथ सख्यः समागत्य तस्या दुःखेन दुःखिताः ॥ शशंसुस्ता यथावृत्तं रुदन्त्यो मम सूतज ॥ ५६ ॥ ततोऽहं सत्वर गत्वा दृष्ट्वा तां पतितां भुवि ॥ विलापान्कृतवान्दीनो रुदितं करुणस्वरम् ॥ ५७ ॥ इयं मे सुविशालाक्षी मनःप्राणसमा प्रिया ॥ मृता भूमौ यया हीनो नाहं जीवितुमुत्सहे ॥ ५८ ॥ सोऽहमद्य गमिष्यामि परलोकं सहानया ॥ प्रियारहितहर्म्यस्य जीवितस्य च किं फलम् ॥ ५९ ॥ पुत्रपौत्रवधूभिश्च भृत्यवर्गयुतस्य च ॥ पत्नीहीनानि नो रेजुर्गृहाणि गृहमेधिनाम् ॥ ६० ॥ यदीयं कर्णनेत्रांता तन्वंगी मधुरस्वरा ॥ न जीवति पृथुश्रोणी मरिष्येऽहमसंशयम् ॥ ६१ ॥ एवं विलपमानस्य मम सूतकुलोद्वह ॥ आगताः सुहृदः सर्वे रुरुदुस्तेऽपि दुःखिताः ॥ ६२ ॥ रुदित्वा सुचिरं तत्र तैः समं महतीं चिताम् ॥ कृत्वा तां संनिधायाथ प्रदत्तो हव्यवाहनः ॥ ६३ ॥ तत आदाय मां कृच्छ्रान्निन्युश्च स्वगृहं प्रति ॥ रुदन्तं प्रस्खलन्तं च मुह्यमानं पदेपदे ॥ ६४ ॥ ततो निशावशेषेऽहमुत्थाय त्वरयाऽन्वितः ॥ कांतादुःखपरीतात्मा गतोऽरण्यं तदेव हि ॥ ६५ ॥ कामेनोन्मत्ततां प्राप्तो भ्रममाण इतस्ततः ॥ विलपन्नेव दुःखार्तो वने जनविवर्जिते ॥ ६६ ॥ क्व गतासि विशालाक्षि विजनेऽस्मिन्विहाय माम् ॥ नाहं गृहं गमिष्यामि मम दुःखाय निर्दयः ॥ ६७ ॥ एषोऽरुणकरस्पर्शात्स्वाभां त्यजति चंद्रमाः ॥ निशाक्षये निरुत्साहो यथाहं विधिना कृतः ॥ ६८ ॥ अयं तनुः समायाति सविता रक्तमंडलः॥ निगदिष्यति मे वार्तां नूनं कच्चित्त्वदुद्भवाम् ॥ ६९ ॥ गगनं व्यापयन्सूर्यः संतापयति मां भृशम् ॥ बाह्ये चाभ्यंतरे कामः कथं वक्ष्यामि[1] जीवितम् ॥ ७० ॥ करींद्रः स्वयमभ्येति तत्कुचाभौ समुद्वहन् ॥ कुम्भौ गत्वा तु पृच्छामि यदि शंसति तां प्रियाम् ॥ ७१ ॥ एवं प्रलपमानस्य मम मोहो महानभूत् ॥ भास्करांशुप्रतप्तस्य मदनाकुलितस्य च ॥ ७२ ॥ यंयं पश्यामि तत्राहं भ्रममाणो महावने ॥ वृक्षं वा प्राणिनो वापि तंतं पृच्छामि मोहतः ॥ ७३ ॥ त्वद्दंतमुसलप्रख्यं यस्या ऊरुयुगं गज ॥ तां बालां वद चेद्दृष्टा दयां कृत्वा ममोपरि ॥ ७४ ॥ त्वया जंबूक चेद्दृष्टा बिंबाफलनिभाधरा ॥ दयिता मम तद्ब्रूहि श्रेयस्ते भविता महत् ॥ ७५ ॥ अथवा बिल्वः शंस त्वं यदि बिल्वोपमस्तनी ॥ भ्रममाणा वने दृष्टा मम प्राणसमा प्रिया ॥७६॥ त्वत्पुष्पसदृशांगी सा मम भार्या मनस्विनी ॥ स त्वं चंपक जानीषे यदि त्वं शंस मे द्रुतम् ॥७७॥ मधूक तव पुष्पेण दयितायाः समौ शुभौ ॥ कपोलौ पांडुरच्छायौ दृष्ट्वा त्वां स्मृतिमागतौ ॥७८॥ कदलीस्तंभ सुव्यक्तं प्रियायाश्च सुकोमलौ ॥ ऊरू त्वत्तोऽपि तन्वंग्याः सत्येनात्मानमालभे ॥७९॥ भोभो मृग न मे भार्या त्वया दृष्टाऽत्र कानने ॥ त्वत्समे लोचने स्पष्टे कज्जलेन समावृते ॥ ८० ॥ तृणादोऽपि

१ वक्ष्यामि—धारयिष्यामि—इत्यर्थः । वहतेर्लृटो रूपम् ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुवृद्धोऽपि वने वृद्धोऽपि यः पशुः ॥ सोऽपि कांतापरित्यक्तो न मृगो रमते क्षणम् ॥८१॥ कांतायाः पुरतो नित्यं विधत्तेऽगं कलापकृत् ॥ विहंगयोनि जातोऽपि वृद्ध्यर्थं पुष्पधन्वनः॥८२॥ योऽयं संदृश्यते हंसो हंसीमनुस्मरत्यसौ ॥ गतिस्तादृङ्न चाप्यस्य मत्प्रियायाश्च यादृशी ॥८३॥ एक एव सुधन्योऽयं चक्रवाको विहंगमः ॥ मुहूर्तमपि योऽभीष्टां न त्यजेच्चक्रवाकिकाम् ॥ ८४ ॥ य एष श्रूयते रावो विभ्रमं जनयन्मम ॥ किंवा पिकसमुत्थोऽयं किं वा मे दयितोद्भवः॥ ८५ ॥ मां दृष्ट्वाऽयं मृगो याति तं मृगी याति पृष्ठतः ॥ धावमाना ममाप्येवमनुयाति पुरा प्रिया ॥८६॥ वारणोऽयं प्रियां कांतामनुरागानुयायिनीम् ॥ स्पर्शयत्यग्रहस्तेन मम संस्मारयन्प्रियाम् ॥ ८७ ॥ हा प्रिये मृगशावाक्षि तप्तकांचनसंनिभे ॥ कथं मां न विजानासि भ्रमंतमिह कानने ॥ ८८ ॥ क्व सा भक्तिः क्व सा प्रीतिः क्व सा तुष्टिः क्व सा दया ॥ निगदन्तं सुदीनं मां संभाषयसि नो यतः ॥ ८९ ॥ एवं प्रलपमानस्य मम प्राप्ताः सुहृज्जनाः ॥ अन्वेषंतः पदं तत्र वनेषु विषमेषु च ॥ ९० ॥ ततस्तैः कोपरक्ताक्षैः प्रोक्तोऽहं सूतनंदन ॥ भर्त्सद्भिः परुषैर्वाक्यैर्धिक्त्वां काममयाधुना ॥ ९१ ॥ त्वं किं शोचसि मूढात्मन्नशोच्यं जीवितं नृणाम् ॥ यतस्त्वामपि शोचंतं शोचयिष्यंति चापरे ॥ ९२ ॥ यूयं वयं तथा चान्ये संजाताः प्राणिनो भुवि ॥ सर्व एव मरिष्यामस्तत्र का परिदेवना ॥ ९३ ॥ अदर्शनात्प्रिया प्राप्ता पुनश्चादर्शनं गता ॥ न सा तव न तस्यास्त्वं वृथा किमनुशोचसि ॥ ९४ ॥ नायमत्यंतसंवासः कस्यचित्केनचित्सह ॥ अपि स्वेन शरीरेण किमुतान्यैर्वृथा जनैः ॥ ९५ ॥ मृतं वा यदि वा नष्टं योतीतमनुशोचति ॥ स दुःखेन लभेद्दुःखं द्वावनर्थौ प्रपद्यते ॥ ९६ ॥ एवं संबोधयित्वा मां गृहीत्वा ते मुहुर्जनैः ॥ निन्यु गृहं ततः सर्वे वनात्तस्मात्सुदारुणात् ॥ ९७ ॥ ततो मम गृहस्थस्य स्मरमाणस्य तां प्रियाम् ॥ उत्पन्नः सुमहान्कोपः सर्पान्प्रति महामते ॥ ९८ ॥ ततः कोपपरीतेन प्रतिज्ञातं मया स्फुटम् ॥ सर्पानुद्दिश्य यत्सर्वं तन्निबोधय दारुणम् ॥ ९९ ॥ अद्यप्रभृति चेन्नाहं सर्पं दृष्टिवशं गतम् ॥ निहन्मि दण्डघातेन तत्पापं स्याद्ध्रुवं मम ॥ १०० ॥ यच्च निक्षेपहर्तॄणां यच्च विश्वासघातिनाम् ॥ तन्मे स्याद्यदि नो हन्मि सर्पं दृष्टिवशं गतम् ॥ १०१ ॥ यत्पापं साधुनिंदायां मातापितृवधे च यत् ॥ तन्मे स्याद्यदि नो हन्मि सर्पं दृष्टिवशं गतम् ॥ १०२ ॥ परदाररतानां च यत्पापं जीवघातिनाम् ॥ तन्मे स्याद्यदि नो हन्मि सर्पं दृष्टिवशं गतम् ॥ १०३ ॥ उक्तौ चाभिरतानां च यत्पापं गरदायिनाम् ॥ तन्मे स्याद्यदि नो हन्मि सर्पं दृष्टिवशं गतम् ॥ १०४ ॥ कृतघ्नानां च यत्पापं परवित्तापहारिणाम् ॥ तन्मे स्याद्यदि नो हन्मि सर्पं दृष्टिवशं गतम् ॥ १०५ ॥ यत्पापं शस्त्रकर्तॄणां तथा वह्निप्रदायिनाम् ॥ तन्मे स्याद्यदि नो हन्मि सर्पं दृष्टिवशं गतम् ॥ १०६ ॥ व्रतभंगेन यत्पापं व्रतिनां निंदयापि यत् ॥ तन्मे स्याद्यदि नो हन्मि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

सर्पं दृष्टिवशं गतम् ॥ १०७ ॥ यत्पापं भ्रूणहत्यायां मृष्टमांसाशिनां च यत् ॥ तन्मे स्याद्यदि नो हन्मि सर्पं दृष्टिवशं गतम् ॥ १०८ ॥ वृक्षच्छेद प्रसक्तानां यत्पापं शल्यकारिणाम् ॥ तन्मे स्याद्यदि नो हन्मि सर्पं दृष्टिवशं गतम् ॥ १०९ ॥ पाखंडिनां च यत्पापं नास्तिकानां च यद्भवेत् ॥ तन्मे स्याद्यदि नो हन्मि सर्पं दृष्टिवशं गतम् ॥ ११० ॥ मांसमद्यप्रसक्तानां यत्पापं विटभोजिनाम् ॥ तन्मे स्याद्यदि नो हन्मि सर्पं दृष्टिवशं गतम् ॥ १११ ॥ मृषावादप्रसक्तानां पररंध्रावलोकिनाम् ॥ तन्मे स्याद्यदि नो हन्मि सर्पं दृष्टिवशं गतम् ॥ ११२ ॥ यत्पापं साक्ष्यकर्तॄणां[1] धान्यसंग्रहकारिणाम् ॥ तन्मे स्याद्यदि नो हन्मि सर्पं दृष्टिवशं गतम् ॥ ११३ ॥ आखेटकरतानां च यत्पापं पाशदायिनाम् ॥ तन्मे स्याद्यदि नो हन्मि सर्पं दृष्टिवशं गतम् ॥ ११४ ॥ नित्यं प्रेषणकर्तॄणां[2] यत्पापं मधुजीविनाम् ॥ तन्मे स्याद्यदि नो हन्मि सर्पं दृष्टिवशं गतम् ॥ ॥ ११५ ॥ अदृष्टदेववक्राणां यत्पापं मत्स्यजीविनाम् ॥ तन्मे स्याद्यदि नो हन्मि सर्पं दृष्टिवशं गतम् ॥ ११६ ॥ विवादे पृच्छमानानां पक्षपातेन जल्पताम् ॥ भयाद्वा यदि वा लोभाद्द्वेषाद्वा कामतोऽपि वा ॥ ११७ ॥ यत्पापं तु भवेत्तेषां निर्दयानां दुरात्मनाम् ॥ तन्मे स्याद्यदि नो हन्मि सर्पं दृष्टिवशं गतम् ॥ ११८ ॥ कन्याविक्रयकर्तॄणां यत्पापं पापसंगिनाम् ॥ तन्मे स्याद्यदि नो हन्मि सर्पं दृष्टिवशं गतम् ॥ ११९ ॥ विद्याविक्रयकर्तॄणां यत्पापं समुदाहृतम् ॥ तन्मे स्याद्यदि नो हन्मि सर्पं दृष्टिवशं गतम् ॥ १२० ॥ एवं मया प्रतिज्ञाय कोपाविष्टेन सूतज ॥ गृहीतो लगुडः स्थूलो वधार्थं पवनाशिनाम् ॥ १२१ ॥ ततःप्रभृत्यहं भूमौ भ्रमामि लगुडायुधः ॥ ब्राह्मीं वृत्तिं परित्यज्य मार्गमाणो भुजंगमान् ॥ १२२ ॥ मया कोपपरीतेन बहवः पन्नगा हताः ॥ विषोल्बणा महाकायास्तथान्ये मध्यमाधमाः ॥ १२३ ॥ एकदाहं वनं प्राप्तो गहनं लगुडायुधः ॥ शयानं तत्र चापश्यं जलसर्पं वयोऽधिकम् ॥ १२४ ॥ ततोऽहं दंडमुद्यम्य[3] कालदंडोपमं रुषा ॥ हन्मि[4] तं यावदेवाहं स मां प्रोवाच पन्नगः ॥ १२५ ॥ नापराध्यामि ते किंचिदहं ब्राह्मणसत्तम ॥ संरंभात्तत्किमर्थं मां जिघांससि वयोऽधिकम् ॥ १२६ ॥ ततो मया स संप्रोक्तः कोपात्सलिलपन्नगः ॥ महामन्युपरीतेन स्मृत्वा भार्यां मृगावतीम् ॥ मम भार्या प्रिया पूर्वं सर्पेणासीद्विनाशिता ॥ १२७ ॥ ततोऽहं तेन वैरेण सूदयामि महोरगान् ॥ अद्य त्वामपि नेष्यामि वैवस्वतगृहं प्रति ॥ हत्वा दंडप्रहारेण तस्मादिष्टतमं स्मर ॥१२८॥ ततः स मां पुनः प्राह भयेन महता वृतः॥ शृणु तावद्वचोऽस्माकं ततः कुरु यथोचितम् ॥१२९॥ अन्ये ते पन्नगा विप्र ये दशंतीह मानवान् ॥ वयं सलिलसंभूता निर्विषाः सर्परूपिणः ॥ १३० ॥



१ साक्ष्यकर्तॄणाम्--कूटसाक्ष्यकर्तॄणाम्--इत्यर्थः । २ नित्यप्रेक्षणकर्तॄणाम्–इ० पा० । ३ अभ्युद्यम्–इ० पा० । ४ वा–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं प्रजल्पमानोऽपि स दंडेन मया हतः ॥ सूत तत्सूदनार्थाय निर्विकल्पेन चेतसा ॥ १३१ ॥ अथासौ लगुडस्पर्शात्तत्क्षणादेव पन्नगः॥ द्वादशार्क प्रतीकाशो बभूव पुरुषो महान् ॥ १३२ ॥ तदाश्चर्यं समालोक्य ततोऽहं विस्मयान्वितः ॥ उक्तवांस्तं प्रणम्योच्चैः क्षम्यतामिति सादरम् ॥ १३३ ॥ को भवान्किमिदं रूपं कृतं सर्पमयं विभो ॥ किं वा ते ब्रह्मशापोऽयं किं वा क्रीडा सदेदृशी ॥ १३४ ॥ ततः प्रोवाच मां हृष्टः स नरः प्रश्रयान्वितः॥ शृणुष्वावहितो भूत्वा वृत्तांतं स्वं वदामि ते ॥ १३५ ॥ अहमासं पुरा विप्र चमत्कारपुरोत्तमे ॥ युवा परमतेजस्वी धनवान्सुसमृद्धिभाक् ॥ १३६ ॥ तत्रैव नगरे रम्ये ह्यस्ति पुण्यं शिवालयम् ॥ सिद्धेश्वरस्य देवस्य पताकाभिरलंकृतम् ॥१३७॥ कस्यचित्त्वथ कालस्य[1] तत्र यात्रा व्यजायत ॥ तत्र वादित्रघोषेण नादितं भुवनत्रयम् ॥ १३८ ॥ अथ तत्र समायाता मुनयः संशितव्रताः ॥ देवस्य दर्शनार्थाय शतशोऽथ सहस्रशः ॥ १३९ ॥ शैवाः पाशुपताश्चैव तथा कापालिकाश्च ये[2] ॥ महाव्रतधराश्चान्ये शिवभक्तिपरायणाः ॥ १४० ॥ एकाहारा निराहारा वायुभक्षास्तथापरे ॥ अब्भक्षाः फल भक्षाश्च शीर्णपर्णाशिनस्तथा ॥ १४१ ॥ तेऽभिवन्द्य यथान्यायं देवदेवं महेश्वरम् ॥ उपविष्टाः पुरस्तस्य कथाश्चक्रुः पृथग्विधाः ॥ १४२ ॥ राज र्षीणां पुराणानां देवेन्द्राणां च हर्षिताः ॥ दयाधर्मसमोपेतास्तथान्येऽपि च भूरिशः ॥ १४३ ॥ केचित्तत्र प्रनृत्यंति गायंति च तथाऽपरे ॥ साधवो भक्तिसंयुक्ता वाद्यं चक्रुश्च भूरिशः ॥१४४॥ अन्ये दानानि यच्छंति धनिनः श्रद्धयान्विताः ॥ दीनांधकृपणेभ्यश्च तपस्विभ्यो विशेषतः ॥१४५॥ एवं महोत्सवे तत्र वर्तमाने महोदये ॥ आगतो बहुभिः सार्धमहं यौवनगर्वितः ॥ १४६ ॥ शिवदर्शनविद्वेषी तमसा संवृताशयः ॥ यात्रोत्सव विनाशाय प्रेरितोऽन्यैः[3] सुदुर्जनैः ॥ १४७ ॥ जलसर्पं समादाय सुदीर्घं भीषणाकृतिम् ॥ लेलिहानं मुहुर्जिह्वां जरया परया वृतम् ॥ १४८ ॥ ततश्च क्षिप्तवांस्तत्र महाजनसमागमे ॥ तं दृष्ट्वा विद्रुताः सर्वे जना मृत्युभयार्दिताः ॥ १४९ ॥ तत्रासीत्तापसो नाम्ना सुप्रभः शंसितव्रतः ॥ समाधि स्थः सुशिष्याढ्यस्तपसा दग्धकिल्बिषः ॥ १५० ॥ निष्कंपां सुदृढामृज्वीं नातिस्तब्धां न कुंचिताम् ॥ ग्रीवां दधत्स्थिरां यत्नाद्गात्रयष्टिं च सर्वतः ॥ १५१ ॥ संपश्यन्नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥ तालुमध्यगतेनैव जिह्वाग्रेणाचलेन च ॥ १५२ ॥ आवर्तपंकजांतःस्थमष्टपत्र मधोमुखम् ॥ तन्मध्यकर्णिकासंस्थं संपश्यत्रविमंडलम् ॥१५३॥ तस्यापि मध्यतश्चान्यं नरमंगुष्ठमात्रकम् ॥ द्वादशार्कप्रतीकाशमप्रतर्क्यतमाकृतिम् ॥ १५४ ॥ पश्यन्पद्मासनस्थं च वेदनाथं महेश्वरम् ॥ यमक्षरं वदंत्येव सर्वगं सर्ववेदिनम् ॥ १५५ ॥ अनिंद्यं चाप्यभेद्यं च जरामरणवर्जितम् ॥

१ अस्य–इ० पा० । २ कालमुखाश्च ये–इ० पा० । ३ पूरितोऽन्यैः--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पुलकांचितसर्वांगो योगनिद्रावशंगतः ॥ १५६ ॥ आनंदाश्रुपरिक्लिन्नः संनिरुद्धेंद्रियाकृतिः ॥ कुंभयित्वोदरांतःस्थं स्वभ्यासाद्वायुपञ्चकम् ॥१५७॥ अंगुष्ठतर्जनीयोगं कृत्वा हृदयसंगतम् ॥ एवं तत्रोपविष्टस्य स सर्पस्तस्य विग्रहम् ॥ १५८ ॥ वेष्टयामास भोगेन निश्चलस्य महात्मनः ॥ एतस्मि न्नंतरे शिष्यस्तस्यासीत्सुतपोऽन्वितः ॥ १५९ ॥ श्रीवर्धनइतिख्यातो नानाशास्त्रकृतश्रमः ॥ स दृष्ट्वा सर्पभोगेन समंताद्वेष्टितं गुरुम् ॥ १६० ॥ नातिदूरस्थितं मां च ज्ञात्वा तत्कर्मकारिणम् ॥ उवाच परुषं वाक्यं कोपसंरक्तलोचनः ॥ १६१ ॥ स्फुरताधरयुग्मेन बाष्पगद्गदया गिरा ॥ मया चेत्सुतपस्तप्तं गुरुशुश्रूषया सदा ॥ १६२ ॥ निर्विकल्पेन चित्तेन यदि ध्यातो महेश्वरः ॥ तेन सत्येन दुष्टोऽयं पापात्मा ब्राह्मणाधमः ॥ ईदृक्कायो भवत्वाशु गुरुर्मे येन धर्षितः ॥ १६३ ॥ अथाहं सर्पतां प्राप्तस्तत्क्षणादेव दारुणाम् ॥ पश्यतां सर्वलोकानां वदतां साधुसाध्विति ॥ १६४ ॥ अथ गत्वा समाधेः स पर्यंतं संयतो मुनिः ॥ ददर्श निजगात्रस्थं द्विजिह्वं दारुणाकृतिम् ॥ १६५ ॥ अथ सर्पाकृतिं मां च दुःखेन महतान्वितम् ॥ तटस्थं भयसंत्रस्तं तथा सर्वजनं तदा ॥ १६६ ॥ ततो विज्ञाय तत्सर्वं स मुनिर्ज्ञानचक्षुषा ॥ अब्रवीत्कृपयाविष्टः शिष्यं श्रीवर्धनं रुषा ॥ १६७ ॥ न मे प्रियं कृतं शिष्य त्वयैतत्कर्म कुर्वता ॥ शपता ब्राह्मणं दीनं नैष धर्मस्तपस्विनाम् ॥ १६८ ॥ समो मानेऽपमाने च समलोष्टाश्मकांचनः ॥ तपस्वी सिद्धिमायाति सुहृच्छत्रुसमाकृतिः ॥ १६९ ॥ तस्मादजानता वत्स शप्तोऽयं ब्राह्मणस्त्वया ॥ बाल्यभावात्प्रसादोऽस्य भूयो युक्तो ममाज्ञया ॥ १७० ॥ अथ श्रीवर्धनः प्राह प्रणिपत्य निजं गुरुम् ॥ अमर्षवशमापन्नः कृतांजलिपुटः स्थितः ॥ १७१ ॥ अज्ञानाद्यदि वा ज्ञानान्मया यद्व्याहृतं वचः ॥ तत्तथैव न संदेहस्तस्मान्मौनं गुरो कुरु ॥ १७२ ॥ न मृषा वचनं प्रोक्तं स्वैरेणापि गुरो मया ॥ किं पुनर्यत्त्वदर्थाय तस्मान्मौनं समाचर ॥ १७३ ॥ पश्चादुदयते सूर्यः शोषं याति महार्णवः ॥ अपि मेरुश्च शीर्येत न मे स्यादन्यथा वचः ॥ १७४ ॥ तमुवाच गुरुः शिष्यं स पुनः श्लक्ष्णया गिरा ॥ जानाम्यहं न ते वाणी कथंचिज्जायतेऽन्यथा ॥ १७५ ॥ सदा शिष्यो वयःस्थोपि शासनीयः प्रयत्नतः ॥ किं पुनर्बाल एव त्वं तेन त्वां वच्मि भूरिशः ॥ १७६ ॥ धर्मं न व्ययते कोऽपि मुनीनां पूर्वसंचितम् ॥ तपोधर्मविहीनानां गतिस्तेषां न विद्यते ॥ १७७ ॥ क्षमैका सिद्धिदा प्रोक्ता यतीनां च विशेषतः ॥ तस्मात्क्षमां पुरस्कृत्य वर्तितव्यं तपस्विभिः ॥ १७८ ॥ न पापं प्रति पापः स्याद्बुद्धि रेषा सनातनी ॥ आत्मनैव हतः पापो यः पापं तु समाचरेत् ॥ १७९ ॥ दग्धः स दहते भूयो हतमेव निहंति च ॥ सम्यग्ज्ञानपरित्यक्तो यः पापे पापमाचरेत् ॥ १८० ॥ उपकारिषु यः साधुः साधुत्वे तस्य को गुणः ॥ अपकारिषु यः साधुः स साधुः कीर्त्यते जनैः ॥ १८१ ॥ एवमुक्त्वा स



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तं शिष्यं ततो मामिदमब्रवीत् ॥ दयया परया युक्तः सुव्रतः शंसितव्रतः ॥ १८२ ॥ नान्यथा वचनं भावि मम शिष्यस्य पन्नग ॥ कञ्चि
त्कालं प्रतीक्षस्व तस्मात्सर्पवपुःस्थितः ॥ १८३ ॥ ॥ सर्प उवाच ॥ ॥ कस्मिन्काले मुनिश्रेष्ठ शापो मेऽस्तमुपैष्यति ॥ प्रसादं कुरु
दीनस्य शापस्याज्ञानिनस्तथा[1] ॥ १८४ ॥ ॥ सुव्रत उवाच ॥ ॥ मुहूर्तमपि गीतादि यः करोति शिवालये ॥ न तस्य शक्यते कर्तुं संख्या
धर्मस्य भद्रक ॥ १८५ ॥ मुहूर्तमपि यो विघ्नं करोति च महोत्सवे ॥ तस्य पापस्य नो संख्या कर्तुं शक्या हि केनचित् ॥ १८६ ॥ तस्मात्त्वं
पापको विप्रो नैव मुक्तिमवाप्स्यसि ॥ वार्तासंगेन दुर्बुद्धे तस्माच्छृणु वचो मम ॥१८७॥ शैवं षडक्षरं मंत्रं यो जपेच्छ्रद्धयान्वितः ॥ अपि ब्रह्मवधा
त्पापं जातं तस्य प्रणश्यति ॥ १८८ ॥ दशभिर्दिनजं पापं विंशत्या वत्सरोद्भवम् ॥ षडक्षरस्य जाप्येन पापं क्षालयते नरः ॥ १८९ ॥ तस्मात्त्वं
जलमध्यस्थस्तं मंत्रं जप सादरम् ॥ येन पापं क्षयं याति कृतमप्यन्यजन्मनि ॥ १९० ॥ यदा त्वां जलमध्यस्थं वत्सोनाम द्विजो रुषा ॥
ताडयिष्यति दण्डेन तदा मोक्षमवाप्स्यसि ॥ १९१ ॥ तस्माद्गच्छ द्रुतं सर्प स्थानादस्माज्जलाशये ॥ किञ्चिदिष्टं मया प्रोक्तो विरराम स
सन्मुनिः ॥ १९२ ॥ ततोऽहं दुःखसंयुक्तः संप्राप्तोऽत्र जलाशये ॥ षडक्षरं जपन्मन्त्रं नित्यमेव व्यवस्थितः ॥ १९३ ॥ त्वत्प्रसादादहं
मुक्तः सर्पत्वाद्ब्राह्मणोत्तम ॥ किं करोमि प्रियं तेऽद्य तस्माच्छीघ्रतरं वद ॥ १९४ ॥ वत्सोनाम न सन्देहः स त्वं यः कीर्तितो मम ॥
सुव्रतेन विमानं मे पश्यैतदुपसर्पति ॥ १९५ ॥ ततः प्रोक्तो मया सम्यक्स सर्पो दिव्यरूपधृक् ॥ भगवन्नुपदेशं मे किञ्चिद्देहि शुभाव
हम् ॥ १९६ ॥ येन नो जायते दुःखं प्रियलोपसमुद्भवम् ॥ न दारिद्र्यं न च व्याधिर्न च शत्रुपराभवः ॥ १९७ ॥ अथोवाच स
मां भूयः सोत्सुकः पुरुषोत्तमः ॥ प्रश्नभारः समाख्यातस्त्वया मम द्विजोत्तम ॥ १९८ ॥ न चैतच्छक्यते वक्तुं विमाने समुपस्थिते ॥ विस्त
रात्तु ततो वच्मि संक्षेपेण तव द्विज ॥ १९९ ॥ शैवः षडक्षरो मन्त्रो नृणामशुभहारकः ॥ स त्वया शक्तितो विप्र जपनीयो दिवानिशम् ॥
॥ २०० ॥ ततः प्राप्स्यस्यसंदिग्धं यद्यद्वांछसि चेतसा ॥ स्वर्गं वा यदि वा मोक्षं विमुक्तः सर्वपातकैः ॥ २०१ ॥ मया हि सुमहत्पापं
सर्वदा समनुष्ठितम् ॥ तत्रापि मंत्रमाहात्म्यात्प्राप्ता लोका महोदयाः ॥ २०२ ॥ एको दानानि सर्वाणि यच्छति श्रद्धयान्वितः ॥ षडक्षरं
जपेन्मंत्रमन्यस्ताभ्यां समं फलम् ॥ २०३ ॥ सर्वतीर्थाभिषेकं च कुरुतेऽन्यो नरो द्विज ॥ षडक्षरं जपेन्मंत्रमन्यस्ताभ्यां समं फलम् ॥ २०४ ॥

१ शापस्याज्ञानिनः—कियत्कालपर्यंतमयं शापः स्थास्यतीति ज्ञानरहितस्य—ममोपरि—इति शेषः । प्रसादं कुरु—इति योजना ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

चांद्रायणसहस्रं तु कुरुतेऽन्यो यथोचितम् ॥ षडक्षरं जपेदन्यो मंत्रं ताभ्यां समं फलम् ॥ २०५ ॥ वर्षास्वाकाशशायी च हेमंते सलिलाशयः ॥ पञ्चाग्निसाधको ग्रीष्मे यावद्वर्षशतं नरः ॥ २०६ ॥ अन्यः षडक्षरं मन्त्रं शुचिः श्रद्धासमन्वितः ॥ जपेदहर्निशं मर्त्यः फलं ताभ्यां समं स्मृतम् ॥ ॥ २०७ ॥ पितृपक्षे सदा चैको गयायां श्राद्धमाचरेत् ॥ अन्यः षडक्षरं मन्त्रं जपेत्ताभ्यां समं फलम् ॥ २०८ ॥ गोसहस्रं ददात्येकः कार्तिक्यां ज्येष्ठपुष्करे ॥ षडक्षरं जपेन्मंत्रमन्यस्ताभ्यां समं फलम् ॥ २०९ ॥ संनिहित्यां नरः स्नाति राहुग्रस्ते दिवाकरे ॥ एकोऽन्यस्तु जपेन्मन्त्रं षडर्णं तुल्यमेव तत् ॥ २१० ॥ सोमे सोमग्रहेऽन्यस्तु सोमनाथं[1] प्रपश्यति ॥ अन्यः षडक्षरं मन्त्रं जपेत्ताभ्यां समं फलम् ॥ २११ ॥ एकश्चण्डीश्वरं पश्येदयने चोत्तरे नरः ॥ अन्यः षडक्षरं मन्त्रं जपेत्ताभ्यां समं फलम् ॥ २१२ ॥ भृगुपातं पतेदेकः केदारं वीक्ष्य भक्तितः ॥ अन्यः षडक्षरं मंत्रं जपेत्ताभ्यां समं फलम् ॥ २१३ ॥ करीषं साधयेदन्यो दत्त्वा सर्वस्वमादितः ॥ षडक्षरं जपेन्मंत्रमन्यस्ताभ्यां समं फलम् ॥ २१४ ॥ सर्वं संगपरित्यागं कृत्वैको ज्ञानमाप्नुयात् ॥ अन्यः षडक्षरं मन्त्रं जपेत्ताभ्यां समं फलम् ॥ २१५ ॥ एतत्ते परमं गुह्यं मया विप्र प्रकीर्तितम् ॥ नास्तिकाय न दातव्यं भक्तिहीनाय नैव च ॥ २१६ ॥ तथान्यदपि वक्ष्यामि हितबुद्ध्या द्विजोत्तम ॥ मम वाक्यं कुरुष्वाद्य यदीच्छसि परां गतिम् ॥ २१७ ॥ अहिंसा परमो धर्मः सर्ववेदे प्रकीर्तितः ॥ ब्राह्मणस्य विशेषेण तस्मात्सर्पवधं त्यज ॥ २१८ ॥ अहिंसकानि भूतानि यो हिनस्ति सुनिर्दयः ॥ स याति नरकं घोरं यावदाभूतसंप्लवम् ॥ २१९ ॥ चराचराणां भूतानामभयं यः प्रयच्छति ॥ सर्वदा सर्वसौख्याढ्यो जायते दिवि चेह च ॥ २२० ॥ नास्ति भर्गसमो देवो नास्ति गंगासमा नदी ॥ नास्ति हिंसासमं पापं नास्ति धर्मो दयापरः ॥ २२१ ॥ अथाहमब्रुवं तं च तच्छुत्वा तस्य जल्पितम् ॥ अहिंसालक्षणं धर्मं परलोकभयातुरः ॥ २२२ ॥ मन्यते वृद्धलोकानामेतद्वाक्यं श्रुतं मया ॥ भूपतेर्नैव दोषः स्याद्वने व्यापादितैर्मृगैः ॥ २२३ ॥ प्रवदंति तथा वैद्या वैद्यशास्त्रविचक्षणाः ॥ भवंति पुष्टिसंयुक्ता मांसादाश्चिरजीविनः ॥ २२४ ॥ तदत्र विषये ब्रूहि परं निःश्रेयसं वचः ॥ सर्वं कर्तास्म्यसंदिग्धं तव वक्राद्विनिर्गतम् ॥ २२५ ॥ अथ मां स पुनः प्राह वद मैवं द्विजोत्तम ॥ मतमेतद साधूनां पापानां मांसगृद्धिनाम् ॥ २२६ ॥ अहो शोच्यतमा लोके पापात्मानः सुनिर्दयाः ॥ सर्वदोषाकरं मांसं मूढाः स्वादंति ये नराः ॥ ॥ २२७ ॥ न मांसमायुषो हेतुरारोग्यस्य बलस्य वा ॥ सर्वमेतदसत्यं स्याच्छृणुष्वाद्य निदर्शनम् ॥ २२८ ॥ मांसाशिनोऽपि दृश्यंते रोगार्ता



[1] सोमनाथम्–अवंतीस्थम्, सौराष्ट्रदेशस्थं वा सोमनाथम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुर्बलास्तथा ॥ स्वल्पायुषश्च मत्वैवं मांसं वर्जय दूरतः ॥ २२९ ॥ अमांसादा अपि क्ष्मायां दृश्यंते रोगवर्जिताः ॥ चिरायुषश्च पीनांगास्त स्मान्मांसं विवर्जयेत् ॥ २३० ॥ यो भक्षयति मांसानि सत्त्वानां जीवितैषिणाम् ॥ स याति नरकं घोरं तत्रस्थो भक्ष्यते च तैः ॥ २३१ ॥ न हि मांसं तृणात्काष्ठादुपलादपि जायते ॥ हते जंतौ भवेन्मांसं तस्मात्तत्परिवर्जयेत् ॥ २३२ ॥ एतदेव हि दृष्टांतं मांसस्य परिवर्जने ॥ यदंगं ह्रियते स्वं च कंटकेनापि विक्षतम् ॥२३३॥ आत्मौपम्येन भूतानि तस्मात्सर्वाणि पंडितैः ॥ द्रष्टव्यानि न हिंस्यानि रक्षणीयानि शक्तितः ॥ २३४ ॥ हंता चैवानुमंता च विशस्ता क्रयविक्रयी ॥ संस्कर्ता चोपहर्ता च खादकश्चाष्ट घातकाः ॥ २३५ ॥ धनेन क्रयकृद्धंति भक्षणेन च खादकः ॥ घातको वधबंधाभ्यामित्यन्यस्त्रिविधो वधः ॥ २३६ ॥ कर्मणा मनसा वाचा यो हिनस्ति न किंचन ॥ स प्राप्नोति परं स्थानं जरा मरणवर्जितम् ॥ २३७ ॥ शाकमूलफलाहारो ब्रह्मचर्यपरायणः ॥ न तस्य फलमाप्नोति यदि हिंसापरो नरः ॥ २३८ ॥ एको वर्षशतं साग्रं तपस्तपति दुस्तरम् ॥ अहिंसानिरतो यस्तु तयोः श्रेष्ठो दयान्वितः ॥ २३९ ॥ यंयं कामयते कामं दुष्प्रापमपि मानवः ॥ तं तमाप्नोत्यसंदिग्धं यदि स्यात्सुदयान्वितः ॥ २४० ॥ कामगेन विमानेन दिव्यस्त्रीशतसेवितः ॥ देववन्मोदते स्वर्गे सर्वभूताभयप्रदः ॥ २४१ ॥ एवमुक्त्वा महात्मा स पश्यतो मम सूतज ॥ विमानवरमारुह्य गतश्च त्रिदिवालयम् ॥ २४२ ॥ गन्धर्वैर्गीयमानस्तु स्तूयमानश्च किन्नरैः ॥ षडक्षरस्य मंत्रस्य माहात्म्ये न महामते ॥ २४३ ॥ तस्मिन्गते तदा स्वर्गं दुःखं मे समुपस्थितम् ॥ स्मृत्वा पूर्वं हतान्सर्पान्भग्नगात्रोऽभवं तदा ॥ २४४ ॥ ततोऽहं कृतवांस्तत्र विप्रलापाननेकशः ॥ स्वकर्मभयसंत्रस्तस्तस्मिन्नेव महावने ॥ २४५ ॥ अहो मया नृशंसेन बहवः प्राणिनो हताः ॥ निन्दितश्च महादेवो नर कार्तिर्भविष्यति ॥ २४६ ॥ सोऽहं हिंसां परित्यज्य चरिष्यामि महत्तपः ॥ शिवदीक्षां समासाद्य पूजयिष्ये महेश्वरम् ॥ २४७ ॥ यत्किंचित्त्रिषु लोकेषु प्रार्थयंति नराः सुखम् ॥ तत्सर्वं तपसा साध्यं तस्मात्कार्यं मया तपः ॥ २४८ ॥ अधुनैकोऽहमेकाहमेकैकस्मिन्वनस्पतौ ॥ चरन्भैक्षं मुनिर्मौनी चरिष्याम्याश्रमानिमान् ॥ २४९ ॥ पांसुना समवच्छन्नः शून्यागारप्रतिश्रयः ॥ वृक्षमूलनिकेतो वा त्यक्तसर्वप्रियाप्रियः ॥ २५० ॥ एवं विलप्य यत्नेन मया सूतकुलोद्वह ॥ गृहीतं भक्तियुक्तेन शिवदीक्षाव्रतं ततः ॥ २५१ ॥ षडक्षरस्य मंत्रस्य अयुतं प्रजपाम्यहम् ॥ त्रिसन्ध्यं श्रद्धया युक्तः सिद्धेश्वरसमीपतः ॥ २५२ ॥ तत्प्रभावेन मे स्थैर्यं संजातं यौवनोद्भवम् ॥ तथा लोकांतरज्ञानं खेचरत्वं च सूतज ॥ २५३ ॥

१ भग्नगात्रोत्सवांतथा–इ० पा० । २ हरेः–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सिद्धेश्वरं प्रयास्यामि द्वापरांते ह्यवस्थिते ॥ सदाशिवं प्रयास्यामि सत्यमेतन्मयोदितम् ॥ २६४ ॥ एतत्ते सर्वमाख्यातं मया सूतज मोक्षदम् ॥ षडक्षरस्य माहात्म्यं सर्वपापप्रणाशनम् ॥ २६५ ॥ यश्चैतच्छृणुयान्नित्यं सम्यक्छ्रद्धासमन्वितः ॥ आजन्ममरणात्पापात्सोऽपि मुच्येत मानवः ॥ ॥ २६६ ॥ तस्मात्त्वं हि महाभाग मन्त्रमेनं सदा जप ॥ संप्राप्स्यसि परान्कामान्मनसा वांछितान्सदा ॥ २६७ ॥ ॥ सूत उवाच ॥ ॥ एतच्छुतं मया पूर्वं सकाशात्तस्य सद्गुरोः ॥ षडक्षरस्य माहात्म्यं यद्युष्माकं प्रकीर्तितम् ॥ २६८ ॥ धन्यं यशस्यमायुष्यं शत्रुपक्षक्षयावहम् ॥ पठतां शृण्वतां नित्यं सर्वकामाभयप्रदम् ॥ २६९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये षडक्षरमन्त्रमाहात्म्ये सिद्धेश्वरमाहात्म्यवर्णनंनामैकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ तोषितः केन सिद्धेन तत्र सिद्धेश्वरो विभुः ॥ एतत्सर्वं समाचक्ष्व विस्तरात्सूतनन्दन ॥ १ ॥ ॥ सूत उवाच ॥ ॥ आसीत्सिद्धाधिपोनाम पुरा हंस इति स्मृतः ॥ अनपत्यतया तस्य कालश्चक्राम भूरिशः ॥ २ ॥ ततश्चिन्तां प्रपन्नः स गत्वा देवपुरोहितम् ॥ पप्रच्छांगिरसः पुत्रं विप्रश्रेष्ठं बृहस्पतिम् ॥ ३ ॥ भगवंश्चानपत्यस्य वार्द्धकं मे समागतम् ॥ तस्मादपत्यलाभाय ममोपायं प्रकीर्तय ॥ ४ ॥ तीर्थयात्रां व्रतं वापि शांतिकं वा द्विजोत्तम ॥ येन स्यात्संततिः शीघ्रं त्वत्प्रसादाद्बृहस्पते ॥ ५ ॥ बृहस्पतिश्चिरं ध्यात्वा सिद्धं प्राह ततः परम् ॥ चमत्कारपुरं क्षेत्रं गत्वा तत्र तपः कुरु ॥ ६ ॥ ततः प्राप्स्यसि सत्पुत्रं वंशोद्धारक्षमं शुभम् ॥ नान्यं पश्यामि सिद्धेश सुतोपायं शुभावहम् ॥ ७ ॥ ततस्तत्क्षेत्रमासाद्य स सिद्धः श्रद्धयान्वितः ॥ लिंगं संपूजयामास यथोक्तविधिना स्वयम् ॥ ८ ॥ ततश्चाराधयामास दिवानक्तमतंद्रितः ॥ बलिपूजोपहारेण गीतवाद्योच्छ्रयादिभिः ॥ ९ ॥ चांद्रायणैस्तथा कृच्छ्रैः पाराकैर्द्विजसत्तमाः ॥ तथा मासोपवासैश्च तोषयामास शंकरम् ॥ १० ॥ ततो वर्षसहस्राभ्यां तस्य तुष्टो महेश्वरः ॥ प्रोवाच दर्शनं गत्वा वृषारूढः सहोमया ॥ ११ ॥ हंसाद्य तव तुष्टोऽहं तस्मात्प्रार्थय वांछितम् ॥ अहं ते संप्रदास्यामि दुष्प्राप्यमपि निश्चितम् ॥ १२ ॥ ॥ हंस उवाच ॥ ॥ अपत्यार्थं समारंभो मयाऽयं विहितः पुरा ॥ तस्मात्त्वं देहि मे पुत्रान्वंशोद्धारक्षमान्विभो ॥ १३ ॥ त्वया चैव सदा लिंगे स्थेयमत्र सुरोत्तम ॥ मम वाक्यादसंदिग्धं सर्वलोकहितार्थतः ॥ १४ ॥ ॥ श्रीभगवानुवाच ॥ ॥ अद्यप्रभृति लिंगेस्मिन्नाश्रयो मे भविष्यति ॥ तव वाक्येन सिद्धेश सत्यमेतन्मयोदितम् ॥१५॥ यो मामत्र स्थितं मर्त्यः पूजयिष्यति भक्तितः ॥ तस्याहं ॥ ३७ ॥

१ परान्ते ह्युपरि स्थिते—इ० पा० । २ तदा—इ० पा० । ३ सर्वलोकहितार्थतः--सर्वलोकहितार्थाय--इत्यर्थः । सार्वविभक्तिकस्तसिः । सर्वलोकहितातये—इ०.पा० । ४ अवस्थितम्--इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संप्रदास्यामि चित्तस्थं सकलं फलम् ॥ १६ ॥ यो मे लिंगस्य याम्याशां स्थित्वा मंत्रं जपिष्यति ॥ षडक्षरं प्रदास्यामि तस्यायुष्यं सुतान्वितम् ॥
॥ १७ ॥ एवमुक्त्वा महादेवस्ततश्चादर्शनं गतः ॥ हंसोऽपि च गृहं गत्वा पुत्रानाप महोदयान् ॥ १८ ॥ तस्मात्सर्वप्रयत्नेन तल्लिंगं यत्नतो द्विजाः ॥
स्पर्शनीयं च पूज्यं च नमस्कार्यं प्रयत्नतः ॥ १९ ॥ षडक्षरेण मन्त्रेण कीर्तनीयं च शक्तितः ॥ वांछद्भिर्वांछितान्कामान्दुर्लभांस्त्रिदशैरपि ॥२०॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये सिद्धेश्वरोत्पत्तिवृत्तान्तवर्णनंनाम त्रिंशोऽध्यायः ॥
॥ ३० ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तथान्यदपि तत्रास्ति नागतीर्थमनुत्तमम् ॥ यत्र स्नातस्य सर्पाणां न भयं जायते क्वचित् ॥ १ ॥ तत्र
श्रावणपञ्चम्यां यो नरः स्नानमाचरेत् ॥ कृष्णायां न भयं तस्य कुलेऽपि स्यादहेः क्वचित् ॥ २ ॥ तत्र पूर्वं तपस्तप्तं मातुः शापप्रपीडितैः ॥ शेष
प्रभृतिनागैस्तु मुक्तिहेतोर्हुताशनात् ॥ ३ ॥ कम्बलाश्वतरौ नागौ तथा ख्यातौ धरातले ॥ तत्र तप्त्वा तपस्तीव्रं संसिद्धिं परमां गतौ ॥ ४ ॥ अनंतो
वासुकिश्चैव तक्षकश्च महाबलः ॥ कर्कोटश्चैव नागेन्द्रो मणिकण्ठस्तथा परः ॥५॥ ऐरावतस्तथा शंखः पुण्डरीको महाविषः ॥ शेषपूर्वाः स्मृता नागा
एतेऽत्र नव नायकाः ॥ ६ ॥ एतेषां पुत्रपौत्राश्च तेषामपि विभूतिभिः ॥ असंख्याभिरिदं व्याप्तं समस्तं धरणीतलम् ॥ ७ ॥ अथ ते कुटिला दुष्टा भ
क्षयंति सदा जनान् ॥ बहुत्वादपि संस्पर्शादपराधं विनापि च ॥ ८ ॥ ततः प्रजा इमाः सर्वा ब्रह्माणं शरणं गताः ॥ पीडिताः स्म सुरश्रेष्ठ सर्पेभ्यो
रक्ष सत्वरम् ॥ ९ ॥ यावन्न शून्यतां याति सकलं वसुधातलम् ॥ व्याप्तं सर्वैस्ततः सर्पैर्विषाढ्यैरतिभीषणैः ॥ १० ॥ अथ तानब्रवीद्ब्रह्मा शेषाद्या
न्नव नायकान् ॥ स्वसंततेः प्ररक्षध्वं भक्ष्यमाणा इमाः प्रजाः ॥ ११ ॥ ते तथेति प्रतिज्ञाय जग्मुः सर्वे भुजंगमाः ॥१२॥ अथ तेषां बहुत्वाच्च नैव रक्षा
प्रजायते ॥ वारिता अपि ते यस्मात्प्रकुर्वंति प्रजाक्षयम् ॥ १३ ॥ ततः कोपपरीतात्मा तानाहूय कुलाधिपान् ॥ तानुवाच स्वयं ब्रह्मा सर्वदेवसमागमे
॥ १४ ॥ भक्षयंति यतः सर्पा अपराधं विना प्रजाः ॥ वारिता अपि ते तस्मात्तान्निगृह्णामि सांप्रतम् ॥ १५ ॥ भविष्यति महीपालो भूतले जनमेज
यः॥ चित्रभानुर्मखे तस्य सर्पान्संभक्षयिष्यति ॥१६॥ मातुः शापाद्विशेषेण मंत्राकृष्टा द्विजोत्तमैः ॥ स्वयमेव पतिष्यंति सुसमिद्धे हुताशने ॥१७॥
तच्छ्रुत्वा वेपमानास्ते सर्पाणां नव नायकाः ॥ प्रोचुः प्रांजलयः सद्यः प्रणिपत्य पितामहम् ॥ १८ ॥ भगवन्कुटिला ज्ञातिरस्माकं भवता कृता ॥
तत्कस्मात्कुरुषे कोपं जातिधर्मानुवर्तिनाम् ॥ १९ ॥ ॥ ब्रह्मोवाच ॥ ॥ यदि नाम मया सृष्टा यूयं दिष्ट्या विषोल्बणाः ॥ अपराधं विना कस्मा

१ वाञ्छिताल्लँभते कामान्दुर्लभांस्त्रिदशैरपि--इ० पा० । २ सर्वे--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





द्रक्षयध्व इमाः प्रजाः ॥ २० ॥ ॥ नागा ऊचुः ॥ ॥ मर्यादां कुरु देवेश अस्माकं मानवैः सह ॥ अथवा संप्रयच्छस्व स्थानं मानुषवर्जितम् ॥ ॥ २१ ॥ पारिक्षितमखे तस्मिन्सर्पाणां चित्रभानुना ॥ समंताद्दह्यमानानां रक्षोपायं प्रचिंतय ॥ २२ ॥ यथा न संततिच्छेदो जायते प्रपितामह ॥ अस्माकं सर्वलोकेषु तथा त्वं कर्तुमर्हसि ॥ २३ ॥ ॥ ब्रह्मोवाच ॥ ॥ जरत्कारुरिति ख्यातो भविष्यति क्वचिद्द्विजः ॥ स संतानकृते भार्यां भूमावन्वेषयिष्यति ॥ २४ ॥ भाविनी च भवद्वंशे जरत्कन्या सुशोभना ॥ सा देया चादरात्तस्मै पुत्रार्थं वरवर्णिनी ॥ २५ ॥ ताभ्यां यो भविता पुत्रः स शेषात्रक्षयिष्यति ॥ सर्पाञ्छुद्धसमाचारान्मर्यादासु व्यवस्थितान् ॥ २६ ॥ सुतलं नितलं चैव तथैव वितलं च यत् ॥ तस्याधस्ताच्चतुर्थे च वसतिर्वो धरातले ॥ २७ ॥ मया दत्तेऽतिरम्ये च सर्वभोगसमन्विते ॥ तस्माद्व्रजत तत्रैव परित्यज्य महीतलम् ॥ २८ ॥ तत्र भुंजथ सद्भोगा न्गंत्वाऽऽशु मम शासनात् ॥ पुत्रपौत्रसमोपेतांस्त्रिदशैरपि दुर्लभान् ॥ २९ ॥ ॥ नागा ऊचुः ॥ ॥ भोगानपि प्रभुंजाना न वयं तत्र पद्मज ॥ शक्नुमो वस्तुमुर्व्यां नस्तस्मात्स्थानं प्रदर्शय ॥ मर्यादया वर्तयामो यत्रस्था मानवैः समम् ॥ ३० ॥ ॥ ब्रह्मोवाच ॥ ॥ एषा तिथिर्मया दत्ता युष्माकं धरणीतले ॥ पंचमी शेषकालस्तु नेयस्तत्र रसातले ॥ ३१ ॥ तत्रागतैर्न हंतव्या मानवा दोषवर्जिताः ॥ मंत्रसंरक्षितांगाश्च तथौषधिकृतादराः ॥ ३२ ॥ चमत्कारपुरे क्षेत्रे मया दत्ता स्थितिः सदा ॥ पृथिव्यां कुलमुख्यानां नागानां नागसत्तमाः ॥ ३३ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्ताश्च ते नागा ब्रह्मणा सत्वरं ययुः ॥ पातालं कुलमुख्याश्च तस्मिन्क्षेत्रे व्यवस्थिताः ॥ ३४ ॥ तत्र श्रावणपंचम्यां यस्तान्पूजयते नरः ॥ स प्राप्नोति नरोऽभीष्टं तेषामेव प्रसादतः ॥ ३५ ॥ तस्य वंशेऽपि सर्पाणां न भयं स्यान्न किल्बिषम् ॥ न रोगो नोपसर्गश्च न च भूतभयं क्वचित् ॥ ३६ ॥ अपुत्रस्तत्र यः श्राद्धं करोति सुतवांछया ॥ पुत्रं विशिष्टमासाद्य पितृणामनृणो हि सः ॥ ३७ ॥ तथा वंध्या च या नारी पंचम्यां भास्करोदये ॥ श्रावणे कुरुते स्नानं कृष्णपक्षे विशेषतः ॥ सा सद्यो लभते पुत्रं स्ववंशोद्धरणक्षमम् ॥ ३८ ॥ सर्वरोगविनिर्मुक्तं सुरूपं विनयान्वितम् ॥ भ्रष्टराज्यो नरो यो वा तत्र स्नानं समाचरेत् ॥ ३९ ॥ ततः पूजयते नागाञ्छ्रावणे पंचमीदिने ॥ स हत्वाऽरिगणा न्सर्वान्भूयो राज्यमवाप्नुयात् ॥ ४० ॥ येषां मृत्युर्मनुष्याणां जायते सर्पभक्षणात् ॥ न तेषां जायते मुक्तिः प्रेतभावात्कथंचन ॥ ४१ ॥ यावन्न क्रियते श्राद्धं तस्मिंस्तीर्थे द्विजोत्तमाः ॥ तस्मात्सर्वप्रयत्नेन मृतस्याहिप्रदंक्षणात् ॥ श्राद्धं कार्यं प्रयत्नेन तस्मिंस्तीर्थेऽहिसंभवे ॥ ४२ ॥



१ सर्वे च—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र वः कीर्तयिष्यामि पुरावृत्तां कथां शुभाम् ॥ इन्द्रसेनस्य राजर्षेः सर्वपातकनाशिनीम् ॥ ४३ ॥ इन्द्रसेनो महीपालः पुरासीद्रिपु
दर्पहा ॥ अश्वमेधसहस्रेण इष्टं तेन महात्मना ॥ ४४ ॥ ततः स दैवयोगेन प्रसुप्तः शयने शुभे ॥ दष्टः सर्पेण मुक्तश्च इन्द्रसेनो महीपतिः ॥
वि[1]मुक्तश्चैव सहसा जीवितव्येन तत्क्षणात् ॥ ४५ ॥ ततस्तस्य सुतोऽभीष्टस्तस्योद्देशेन कृत्स्नशः ॥ चकार प्रेतकार्याणि स्मृत्युक्तानि च भक्तितः ॥
॥ ४६ ॥ गंगायामस्थिपातं च कृत्वा श्राद्धानि षोडश ॥ गयां गत्वा ततश्चक्रे श्राद्धं श्रद्धासमन्वितः ॥ ४७ ॥ अथ स्वप्नांतरे प्राप्तः पिता तस्य
स भूपतिः ॥ प्रोवाच दुःखितः पुत्रं बाष्पव्याकुललोचनम् ॥ ४८ ॥ सर्पमृत्योः सकाशान्मे प्रेतत्वं पुत्र संस्थितम् ॥ तेन मे भवता दत्तं न किञ्चि
दुपतिष्ठते ॥ ४९ ॥ चमत्कारपुरं क्षेत्रं तस्मात्त्वं गच्छ सत्वरम् ॥ तत्र तीर्थे कुरु श्राद्धं सर्पाणां मत्कृते सुत ॥ ५० ॥ येन संजायते मोक्षः प्रेतत्वा
द्दारुणान्मम ॥ स ततः प्रातरुत्थाय तत्स्मृत्वा नृपतेर्वचः ॥ ५१ ॥ प्रेतरूपस्य दुःखार्तस्तत्तीर्थं सत्वरं गतः ॥ चकार च ततः श्राद्धं श्रावणे पंच
मीदिने ॥ ५२ ॥ स्नात्वा श्रद्धासमोपेतः संनिवेश्य पुरोधसम् ॥ ततः स दर्शनं प्राप्तो भूयोऽपि च यथा पुरा ॥ ५३ ॥ प्रेतरूपेण दुःखार्तो वाक्यमे
तदुवाच ह ॥ न मयाऽऽसादितं किञ्चिद्यत्त्वया मत्कृते कृतम् ॥ ५४ ॥ फलं श्राद्धस्य चात्र त्वं कारणं शृणु पुत्रक ॥ श्राद्धार्हा ब्राह्मणाश्चात्र चम
त्कारपुरोद्भवाः ॥ ५५ ॥ क्षेत्रेऽपि गर्हिताः श्राद्धे ये[2]ऽन्यत्र व्यंगकादयः ॥ अत्र यत्क्रियते किञ्चिद्दानं वा व्रतमेव च ॥ ५६ ॥ तथान्यदपि विप्रार्हं
कर्म यज्ञसमुद्भवम् ॥ तत्तेषां वचनात्सर्वं पूर्णं स्यादपि खंडितम् ॥ परोक्षे वापि संपूर्णं वृथा संजायते स्फुटम् ॥ ५७ ॥ तस्मादस्मात्पुराद्विप्रान्समा
नीय ततः परम् ॥ मम नाम्ना कुरु श्राद्धं येन मुक्तिः प्रजायते ॥ ५८ ॥ अथासौ प्रातरुत्थाय स्मरमाणः पितुर्वचः ॥ दुःखेन महताविष्टः प्रवि
वेश पुरोत्तमे ॥ ५९ ॥ ततश्चान्वेषयामास श्राद्धार्हान्ब्राह्मणान्नृपः ॥ यत्नतोऽपि न लेभे स धनाढ्या ब्राह्मणा यतः ॥ ६० ॥ न तत्र दुःखितः कश्चि
द्दरिद्रोऽपि न दुःखितः ॥ नाकर्मनिरतो वापि पाखण्डनिरतोऽथवा ॥ ६१ ॥ स्थानेस्थाने महानादा उत्सवाश्च गृहेगृहे ॥ वेदविद्याविनोदाश्च स्मृति
वादास्तथैव च ॥ ६२ ॥ श्रूयंते याज्ञिकानां च यज्ञकर्मसमुद्भवाः॥ न दुर्भिक्षं न च व्याधिर्नाकालमरणं नृणाम् ॥ न मृत्युः कस्यचित्तत्र पुरे ब्राह्मण
सेविते ॥ ६३ ॥ यथर्तुवर्षी पर्जन्यः सस्यानि गुणवन्ति च ॥ भूरिक्षीरस्रवा गावः क्षीराण्याजाविकानि च ॥ ६४ ॥ यंयं प्रार्थयते विप्रं स श्राद्धार्थं

---

१ जीवितव्येन वियुक्तः–मृतः–इत्यर्थः । २ ये अन्यत्र अपि–किं च–क्षेत्रेऽपि–व्यंगकादयः श्राद्धे गर्हिताः–तथापि–एतादृशा अपि–श्राद्धानर्हा अपि–चमत्कारपुरोद्भवाः ब्राह्मणाः अत्र नागह्रदे श्राद्धार्हाः । एतेन यत्रयत्र क्षेत्रे कर्तव्यं क्षेत्रकर्म–तत्रतत्र क्षेत्रे तत्तत्क्षेत्रस्थब्राह्मणानां यादृशानां तादृशानां वापि माहात्म्यं सूचितम् । अत एव क्षेत्रस्थब्राह्मणाः सदा पूज्या अनिन्द्याश्च–इति वृद्धपरंपरयोपदेशः स्मर्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



महीपतिः ॥ स स तं भर्त्सयामास दुरुक्तैः कोपसंयुतः ॥ ६५ ॥ धिग्धिक्पापसमाचार क्षत्रियापसदात्मक ॥ किं कश्चिद्ब्राह्मणोऽश्नाति प्रेतश्राद्धे
विशेषतः ॥ ६६ ॥ तस्माद्गच्छ द्रुतं यावन्न कश्चिच्छपते द्विजः ॥ निहन्ति वा प्रकोपेन स्वर्गमार्गनिरोधकम् ॥ ६७ ॥ ॥ सूत उवाच ॥ ॥ ततः
स दुःखितो राजा निश्चक्राम भयार्दितः ॥ चमत्कारपुरात्तस्माद्वैलक्ष्यं[2] परमं गतः ॥ ६८ ॥ चिन्तयामास राजेंद्रः स्मृत्वावस्थां पितुश्च ताम् ॥ किं
करोमि क्व गच्छामि कथं मे स्यात्पितुर्गतिः ॥ ६९ ॥ ततः स सचिवान्सर्वान्प्रेषयित्वा गृहं प्रति ॥ एकाकी भिक्षुरूपेण स्थितस्तत्रैव सत्पुरे ॥७०॥
स ज्ञात्वा नगरे तत्र ब्राह्मणं शंसितव्रतम् ॥ सर्वेषां ब्राह्मणेंद्राणां मध्ये दाक्षिण्यभाजनम् ॥ ७१ ॥ देवशर्माभिधानं तु शरणागतवत्सलम् ॥ आहि
ताग्निं चतुर्वेदं स्मृतिमार्गानुयायिनम् ॥ ७२ ॥ ततस्तु प्रातरुत्थाय कृत्वांत्यजमयं वपुः ॥ शोधयामास कृच्छ्रेण मलोत्सर्गनिकेतनम् ॥ ७३ ॥
अथ यः कुरुते कर्म तत्र विष्ठाप्रशोधनम् ॥ सोऽभ्येत्य तमुवाचेदं कोपसंरक्तलोचनः ॥ ७४ ॥ कुतस्त्वमिह संप्राप्तो मद्वृत्तेरुपघातकृत् ॥ तस्मा
द्गच्छ द्रुतं नो चेन्नयिष्ये यमसादनम् ॥ ७५ ॥ तस्यैवं वदतोऽप्याशु बलात्स पृथिवीपतिः ॥ शोधयामास तत्स्थानं देवशर्मसमुद्भवम् ॥ ७६ ॥
ततः संवत्सरस्यांते चंडालेन द्विजोत्तमाः ॥ स प्रोक्त उचिते काले प्रणिपत्य च दूरतः ॥ ७७ ॥ स्वामिंस्तव कुलेऽप्येवं गूथाशोधनकर्मकृत् ॥ तद
स्माकं न चान्यस्य तत्किमन्यः प्रवेशितः ॥ ७८ ॥ अथ श्रुत्वा च तद्वाक्यं स प्राह द्विजसत्तमः ॥ न मया कश्चिदन्योऽत्र निर्दिष्टो गोप्यकर्मणि ॥
अधिकारस्त्वयात्मीयस्तथा कार्यो यथा पुरा ॥ ७९ ॥ तदान्यदिवसे प्राप्ते सोंऽत्यजः कोपसंयुतः ॥ शस्त्रमादाय संप्राप्तो वधार्थं तस्य भूपतेः ॥८०॥
शस्त्रोद्यतकरं दृष्ट्वा प्रहारे कृतनिश्चयम् ॥ ततस्तं लीलया भूयो मुष्टिना मूर्ध्न्यताडयत् ॥ ८१ ॥ ततस्तस्य विनिष्क्रांते लोचने तत्क्षणाद्द्विजाः ॥
सुस्राव रुधिरं पश्चात्पपात गतजीवितः ॥ ८२ ॥ तं श्रुत्वा निहतं तेन चंडालं निजकिंकरम् ॥ देवशर्मातिकोपेन तद्वधार्थमुपागतः ॥ ८३ ॥ ततः
पुत्रैश्च पौत्रैश्च सहितोऽन्यैश्च बन्धुभिः ॥ लोष्टैस्तं[1] ताडयामास भर्त्समानो मुहुर्मुहुः ॥ ८४ ॥ सोऽपि संताड्यमानस्तु प्रहारैर्जर्जरीकृतः ॥ वेदोच्चारं
ततश्चक्रे दर्शयित्वोपवीतकम् ॥ ८५ ॥ अथ ते विस्मिताः सर्वे देवशर्मपुरःसराः ॥ ब्राह्मणास्तं समुद्वीक्ष्य वेदोच्चारपरायणम् ॥ ८६ ॥ पृष्टश्च
किमिदं कर्म तवांत्यजजनोचितम् ॥ एषा वेदात्मिका वाणी स्पष्टाक्षरकलस्वना ॥ तत्किं शापपरिभ्रष्टस्त्वं कश्चिद्ब्राह्मणोत्तमः ॥ ८७ ॥ येनैवं कुरुषे
कर्म गर्हितं चांत्यजैरपि ॥ ततः स प्रहसन्नाह क्षत्रियोऽहं महीपतिः ॥ विष्णुसेनइति ख्यातो हैहयान्वयसंभवः ॥ ८८ ॥ सोहमाराधनार्थाय त्वस्मि

१ त्वाम्–इ० शेषः । २ वै लक्ष्यम्--लज्जाम्--इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्स्थान उपागतः॥ अद्य संवत्सरो जातः कर्मण्यस्मिन्रतस्य च॥८९॥ ॥ सूत उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा स विप्रः कृपयान्वितः॥कृतांजलिपुटो भूत्वा तमुवाच महीपतिम् ॥९०॥ किं तत्कृत्यं समुद्दिश्य त्वयैतत्कर्म गर्हितम् ॥ कृतं कीर्तय येनाशु तवाभीष्टं करोम्यहम् ॥९१॥ नास्ति मे किञ्चिद्दप्राप्तं तथाऽसाध्यं महीपते ॥ तस्मात्तव करिष्यामि कृत्यं यद्यपि दुर्लभम् ॥ ९२ ॥ ॥ राजोवाच ॥ ॥ पिता ममाहिना दष्टः प्रेतत्वं समुपागतः ॥ सोऽत्र नागह्रदे श्राद्धे कृते मुक्तिमवाप्नुयात् ॥ ९३ ॥ तस्मात्तत्तारणार्थाय विप्रकृत्यं समाचर ॥ एतदर्थं मयैतत्ते कृतं कर्म विगर्हितम् ॥ ९४ ॥ ॥ ॥ देवशर्मोवाच ॥ ॥ एवं कुरु नृपश्रेष्ठ श्राद्धेऽहं ते पितुः स्वयम् ॥ ब्राह्मणः संभविष्यामि तस्माच्छ्राद्धं समाचर ॥ ९५ ॥ ॥ सूत उवाच ॥ ॥ अथ ते सुहृदस्तस्य पुत्राः पौत्राश्च बांधवाः ॥ प्रोचुर्नैतत्प्रयुक्तं ते श्राद्धं भोक्तुं विगर्हितम् ॥ ९६ ॥ तस्माद्यदि भवानस्य श्राद्धे भोक्ता ततः स्वयम् ॥ सर्वे भवन्तं त्यक्षामस्तथान्येऽपि द्विजोत्तमाः ॥ ९७ ॥ ॥ देवशर्मोवाच ॥ ॥ कामं त्यजत मां सर्वे यूयमन्येऽपि ये द्विजाः ॥ मयैवास्य प्रतिज्ञातं भोक्तुं श्राद्धे महीपतेः ॥ ९८ ॥ एवमुक्त्वा स विप्रेंद्रस्तेनैव सहितस्तदा ॥ नागह्रदं समासाद्य श्राद्धे वै भुक्तवानथ ॥ ९९ ॥ भुक्तमात्रे ततस्तस्मिन्वागुवाचाशरीरिणी ॥ नादयंती जगत्सर्वं हर्षयंती महीपतिम् ॥ १०० ॥ प्रेतभावाद्विनिर्मुक्तः पुत्राहं त्वत्प्रभावतः ॥ स्वस्ति तेऽस्तु गमिष्यामि सांप्रतं त्रिदिवालयम् ॥ १०१ ॥ तत्कृत्वा नृपतिर्हृष्टस्तं प्रणम्य द्विजोत्तमम् ॥ प्रोवाच कुरु मे वाक्यं यद्ब्रवीमि द्विजोत्तम ॥ १०२ ॥ अस्ति माहिष्मतीनाम नगरी नर्मदातटे ॥ सा चास्माकं राजधानी पितृपर्यागता विभो ॥ १०३ ॥ अहं यच्छामि ते ब्रह्मन्समस्तविषयान्विताम् ॥ मया भृत्येन तत्रस्थः कुरु राज्यमकंटकम् ॥ १०४ ॥ ॥ देवशर्मोवाच ॥ ॥ न चैतद्युज्यते वक्तुं न विप्रो राज्यमर्हति ॥ तस्माद्गच्छ निजं राज्यं परिपालय पार्थिव ॥१०५॥ ॥ सूत उवाच ॥ ॥ एवं विसर्जितस्तेन जगाम स महीपतिः ॥ स्वं देशं हर्षसंयुक्तः कृतकृत्यो द्विजोत्तमाः ॥ ॥ १०६ ॥ सोऽपि सर्वैः परित्यक्तो ब्राह्मणैः पुरवासिभिः ॥ देवशर्मा समुद्दिश्य दोषं श्राद्धसमुद्भवम् ॥ १०७ ॥ ततो नागह्रदे तस्मिन्स कृत्वा निजमन्दिरम् ॥ निवासमकरोत्तत्र स्वाध्यायनिरतः शुचिः ॥ १०८ ॥ तत्रस्थस्य निरस्तस्य ये पुत्राः स्युर्द्विजोत्तमाः ॥ तेषां संततयोऽद्यापि ते ोक्ता बाह्यवासिनः ॥ १०९ ॥ एतद्वः सर्वमाख्यातं नागतीर्थसमुद्भवम् ॥ माहात्म्यं ब्राह्मणश्रेष्ठाः सर्वपातकनाशनम् ॥ ११० ॥ यश्चैतत्पठते भक्त्या संप्राप्ते पंचमीदिने ॥ शृणुयाद्वा न वंशेऽपि तस्य स्यात्सार्पजं भयम् ॥ १११ ॥ तथा विमुच्यते पापाद्ब्रह्मजातान्न संशयः ॥ कृतादज्ञानतो विप्राः सत्यमेतन्मयोदितम् ॥ ११२ ॥ तस्मात्सर्वप्रयत्नेन नागतीर्थमनुत्तमम् ॥ माहात्म्यं पठनीयं वा श्रोतव्यं वा समाहितैः ॥ ११३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





श्राद्धकाले तु संप्राप्ते यश्चैतत्पठते द्विजः ॥ स प्राप्नोति फलं कृत्स्नं गयाश्राद्धसमुद्भवम् ॥ ११४ ॥ तथा ये कीर्तिता दोषाः श्राद्धे द्रव्यसमुद्भवाः ॥ व्रतवैकल्यजाश्चापि तथा ब्राह्मणसंभवाः ॥ ११५ ॥ ते सर्वे नाशमायांति कीर्त्यमाने समाहितैः ॥ नागह्रदस्य माहात्म्ये श्राद्धकाल उपस्थिते ॥ ११६ ॥ तथा विनिहता गोभिर्ब्राह्मणैः श्वापदैरपि ॥ एतस्मिन्पठिते श्राद्धे गच्छंति परमां गतिम् ॥ ११७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये नागह्रदमाहात्म्यवर्णनंनामैकत्रिंशोऽध्यायः ॥ ३१ ॥ ॥ छ ॥ ॥ ॥ सूत उवाच ॥ ॥ तथान्योऽस्ति द्विजश्रेष्ठास्तस्मिन्क्षेत्रे शुभावहे ॥ सप्तर्षीणां सुविख्यात आश्रमः सर्वकामदः ॥ १ ॥ तत्र श्रावणमासस्य पंचदश्यां समाहितः ॥ यः करोति नरः स्नानं स लभेद्वांछितं फलम् ॥ २ ॥ कन्दमूलफलैः शाकैर्यस्तत्र श्राद्धमाचरेत् ॥ स प्राप्नोति फलं कृत्स्नं राजसूयाश्वमेधयोः ॥ ३ ॥ पंचम्यां शुक्लपक्षे तु मासि भाद्रपदे द्विजाः ॥ यस्तान्पूजयते भक्त्या पुष्पधूपानुलेपनैः ॥ विधिनानेन[1] विप्रेन्द्राः सर्वानेव यथाक्रमम् ॥ ४ ॥ ॐ अत्रये नमः ॥ ॐ वसिष्ठाय नमः ॥ ॐ कश्यपाय नमः ॥ ॐ भरद्वाजाय नमः ॥ ॐ गौतमाय नमः ॥ ॐ कौशिकाय नमः ॥ ॐ जमदग्नये नमः ॥ ॐ अरुंधत्यै नमः ॥ ॥ पूजामंत्रः ॥ ॥ जह्नुकन्यापवित्रांगा गृहीतजपमालिकाः ॥ गृह्णंत्वर्घं[2] मया दत्तमृषयः सर्वकामदाः ॥ ५ ॥ ॥ ऋषय ऊचुः ॥ ॥ तत्र सप्तर्षिभिस्तीर्थं कस्मिन्काले व्यवस्थितम् ॥ विस्तरात्सूतज ब्रूहि परं कौतूहलं हि नः ॥ ६ ॥ ॥ सूत उवाच ॥ ॥ अनावृष्टिः पुरा जाता लोके द्वादशवार्षिकी ॥ सर्वौषधिक्षयो जातस्ततो लोकाः क्षयार्दिताः ॥ ७ ॥ अस्थिशेषा निरुत्साहास्त्यक्तधर्मव्रतक्रियाः[3] ॥ अभक्ष्यभक्षणपरास्तथैवापेयपायिनः ॥ ८ ॥ त्यजंति मातरः पुत्रान्कलत्राणि तथा नराः ॥ भृत्यान्स्वानपि वित्तेशाः का कथान्यसमुद्भवान् ॥ ९ ॥ संत्यक्तान्यग्निहोत्राणि ब्राह्मणैर्याजकैरपि ॥ व्रतानि व्रतिभिर्दांतैरपि वृद्धतमैर्द्विजाः ॥ १० ॥ दृश्यते चैव यत्रैव सस्यं वापि कथंचन ॥ ह्रियते लज्जया हीनैस्तत्र क्षुत्क्षामकैर्नरैः ॥ ११ ॥ एवमन्नक्षये जाते पीडिते धरणीतले ॥ सप्तर्षयः क्षुधाविष्टा बभ्रमुस्तत्रतत्र च ॥ १२ ॥ अत्रिश्चैव वसिष्ठश्च कश्यपः सुमहातपाः ॥ भरद्वाजस्तथा चान्यो गौतमः संशितव्रतः ॥ कौशिको जमदग्निश्च तथैवारुंधती सती ॥ १३ ॥ अथ तेषां समस्तानां चंडाभूत्परिचारिका ॥ पशुवक्त्रस्तथा भृत्यो विनयेन समन्वितः ॥ १४ ॥ ततस्ते विषयं प्राप्ता वृषादर्भिमहीपतेः ॥ क्षुत्क्षामा मुनयोऽत्यर्थं देशे चानर्तसंज्ञके ॥ १५ ॥ तत्र भिक्षाकृते भ्रांता



१ अनेन—वक्ष्यमाणेन—इत्यर्थः । २ अर्घ—पूजाम्—इत्यर्थः । 'मूल्ये पूजाविधावर्घः' इत्यमरः । एतेन षोडशोपचारपूजायामप्ययमेव मंत्रो बोद्धव्यः । ३ त्यक्तधर्मपरिक्रमाः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥२॥

ततस्तैः पतितो भूमौ दृष्टो मृतकुमारकः ॥ मंत्रयित्वा मिथः पश्चाद्गृहीतो
स्ततश्चैव गृहाद्गृहम् ॥ न ग्रासमपि सस्यस्य प्राप्नुवंस्ते द्विजोत्तमाः ॥१६॥ ततस्तैः पतितो भूमौ दृष्टो मृतकुमारकः ॥ मंत्रयित्वा मिथः पश्चाद्गृहीतो
भक्षणाय च ॥ १७ ॥ अपचन्यावदग्नौ तं क्षुधया परिपीडिताः ॥ वृषादर्भिर्नृपः प्राप्तः श्रुत्वा तेषां विचेष्टितम् ॥ १८ ॥ ॥ वृषादर्भिरुवाच ॥ ॥
किमिदं गर्हितं कर्म क्रियते मुनिसत्तमाः ॥ राक्षसानामयं धर्मो महामांसस्य भक्षणम् ॥ १९ ॥ सोऽहं सस्यं प्रदास्यामि ग्रामान्व्रीहीन्यवानपि॥
मम वाक्यादसंदिग्धं त्यजध्वं मृतबालकम् ॥ २० ॥ ॥ ऋषय ऊचुः ॥ ॥ प्रायश्चित्तं समादिष्टं महामांसस्य भक्षणात् ॥ प्रतिग्रहस्य भूपाला
दापत्कालेऽपि नो नृप ॥ २१ ॥ पश्चात्तपश्चरिष्यामो महामांससमुद्भवम् ॥ पातकं नाशयिष्यामो भक्षयामो वयं ततः ॥ २२ ॥ ॥ वृषादर्भि
रुवाच ॥ ॥ प्रतिग्रहो द्विजातीनां प्रोक्ता वृत्तिरनिंदिता ॥ ग्राह्यो मत्तस्ततः सर्वैर्नात्र कार्या विचारणा ॥ २३ ॥ ॥ ऋषय ऊचुः ॥ ॥ राज
प्रतिग्रहो घोरो मध्वास्वादो विषोपमः ॥ स दूराद्ब्राह्मणैस्त्याज्यो विशेषात्कृतिभिर्नृप ॥ २४ ॥ दशसूनासमश्चक्री दशचक्रिसमो ध्वजी ॥ दश
ध्वजिसमा वेश्या दशवेश्यासमो नृपः ॥ २५ ॥ दशसूनासहस्रेण तुल्यो राजप्रतिग्रहः ॥ कस्तस्य प्रतिगृह्णाति लोभाढ्यो ब्राह्मणो यथा ॥ २६ ॥
रौरवादिषु सर्वेषु नरकेषु स पच्यते ॥ तस्माद्गच्छ गृहे भूप स्वस्ति तेऽस्तु सदैव हि ॥ २७ ॥ वयमन्यत्र यास्यामो ग्रहीष्यामो न ते धनम् ॥
एवमुक्त्वाथ ते सर्वे मुनयः शंसितव्रताः ॥ २८ ॥ परित्यज्य कुमारं तं मृतं तमपि भूमिपम् ॥ चमत्कारपुरं क्षेत्रं समुद्दिश्य ततो ययुः ॥ २९ ॥
सोऽपि राजा ततस्तैस्तु भर्त्सितोऽतिरुषान्वितः ॥ जिज्ञासार्थं ततस्तेषां चक्रे कर्म द्विजोत्तमाः ॥ ३० ॥ ततः सुवर्णपूर्णानि विधायोदुम्बराणि च ॥
तेषां मार्गाग्रतो भूमौ समंतादथ चाक्षिपत् ॥ ३१ ॥ ॥ सूत उवाच ॥ ॥ अथ ते मुनयो दृष्ट्वा पतितानि धरातले ॥ उदुम्बराणि संहृष्टा
जगृहुः क्षुधयार्दिताः ॥ ३२ ॥ अथ तानि समालक्ष्य गुरूणि मुनिसत्तमाः ॥ अत्रिरेकं परिस्फोटय सुवर्णं वीक्ष्य चाब्रवीत् ॥ ३३ ॥
॥ ॥ अत्रिरुवाच ॥ ॥ नास्माकं मुनयोऽज्ञानं नास्माकं गृहबुद्धयः ॥ हैमानिमान्विजानंतो ग्रहीष्याम उदुम्बरान् ॥ ३४ ॥ तस्मादेतानि
संत्यज्य हेमगर्भाणि दूरतः ॥ उदुम्बराणि यास्यामः फलानि विगतस्पृहाः ॥ ३५ ॥ सार्वभौमो महीपाल एकोऽन्यश्च निरीहकः ॥
सुभगस्तु तयोर्नित्यं भूयाद्भूयो निरीहकः ॥ ३६ ॥ धर्मार्थमपि विप्राणां संचयोऽर्थस्य गर्हितः ॥ प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरम् ॥
॥ ३७ ॥ त्यजतः संचयान्सर्वान्यांति हानिमुपद्रवाः ॥ न हि सर्वार्थवान्कश्चिद्दृश्यते निरुपद्रवः ॥ ३८ ॥ निर्धनत्वं तथा राज्यं तुलायां

१ धर्मम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





धारयेद्बुधः ॥ अकिंचनत्वमधिकं जायते संमतिर्मम ॥ ३९ ॥ ॥ कश्यप उवाच ॥ ॥ अनर्थोऽयं मुने प्राप्तो यदर्थस्य परिग्रहः ॥ अर्थै
श्वर्यविमूढात्मा श्रेयसा मुच्यते हि सः ॥ ४० ॥ अर्थसंपद्विमोहाय विमोहो नरकाय च ॥ तस्मादर्थं प्रयत्नेन श्रेयोऽर्थी दूरतस्त्यजेत् ॥
॥ ४१ ॥ योर्थेन साध्यते धर्मः क्षयिष्णुः स प्रकीर्तितः ॥ यः पुनस्तपसा साध्यः स मोक्षायेति मे मतिः ॥ ४२ ॥ ॥ भरद्वाज उवाच ॥ ॥
जीर्यंति जीर्यतः केशा दंता जीर्यंति जीर्यतः ॥ चक्षुः श्रोत्रे तथा पुंसस्तृष्णैका तरुणायते ॥ ४३ ॥ सूच्या सूत्रं यथा वस्त्रं संचारयति सूचिका ॥
तद्वत्संसारसूत्रं च वांछयात्मा नयत्यसौ ॥ ४४ ॥ यथा शृंगं हि कायेन वर्द्धमानेन वर्धते ॥ तद्वत्तृष्णापि वित्तेन वर्द्धमानेन वर्द्धते ॥ ४५ ॥
अनंतपारा दुष्पूरा तृष्णा दुःखशतावहा ॥ अधर्मबहुला चैव तस्मात्तां परिवर्जयेत् ॥ ४६ ॥ ॥ गौतम उवाच ॥ ॥ संतुष्टः केन चाल्योऽस्ति
फलैरपि विवर्जितः ॥ सर्वोपीन्द्रियलौल्येन संकटे भ्रमति द्विजाः ॥ ४७ ॥ सर्वत्र संपदस्तस्य संतुष्टं यस्य मानसम् ॥ उपानद्गूढपादस्य ननु चर्मा
स्तृतेव भूः ॥ ४८ ॥ संतोषामृततृप्तानां यत्सुखं शांतचेतसाम् ॥ कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम् ॥ ४९ ॥ असंतोषः परं दुःखं संतोषः
परमं सुखम् ॥ सुखार्थी पुरुषस्तस्मात्संतुष्टः सततं भवेत् ॥ ५० ॥ ॥ विश्वामित्र उवाच ॥ ॥ कामं कामयमानस्य यदि कामः स सिध्यति ॥
तथान्यो जायते पुंसस्तत्क्षणादेव कल्पितः ॥ ५१ ॥ न जातु कामी कामानां सहस्रैरपि तुष्यति ॥ हविषा कृष्णवर्त्मेव वांछा तस्य विवर्धते ॥
॥ ५२ ॥ कामानभिलषन्मोहान्न नरः सुखमाप्नुयात् ॥ श्येनालयतरुच्छायां व्रजन्निव कपिञ्जलः ॥ ५३ ॥ नित्यं सागरपर्यन्तां यो भुङ्क्ते
पृथिवीमिमाम् ॥ तुल्याश्मकाञ्चनश्चैव स कृतार्थो महीपतेः ॥ ५४ ॥ ॥ जमदग्निरुवाच ॥ ॥ योऽर्थं प्राप्याधमो विप्रः शोचितव्येपि
हृष्यति ॥ न च पश्यति मन्दात्मा नरकं चा कुतोभयः॥ ५५ ॥ प्रतिग्रहसमर्थानां निवृत्तानां प्रतिग्रहात् ॥ य एव ददतां लोकास्त एवाप्रतिगृह्णताम्
॥ ५६ ॥ ॥ अरुन्धत्युवाच ॥ ॥ बिसतंतुर्यथाऽनन्तो नालमासाद्य संस्थितः ॥ तृष्णा चैवमनाद्यन्ता स्थिता देहे शरीरिणाम् ॥ ५७ ॥ या
दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः॥ याऽसौ प्राणान्तिको रोगस्तां तृष्णां त्यजतः सुखम् ॥५८॥ ॥ चण्डोवाच ॥ ॥ सर्पादिवद्धनाद्यस्मा
द्बिभ्यतीमे ममेश्वराः ॥ यतस्ततो विशेषेण कस्मात्तस्माद्भयं मम ॥५९॥ ॥ पशुमुख उवाच ॥ ॥ यदाचरन्ति विद्वांसः सदा धर्मपरायणाः ॥ तदेव
विदुषा कार्यमात्मनो हितमिच्छता ॥ ६० ॥ ॥ सूत उवाच ॥ ॥ इत्युक्त्वा हेमगर्भाणि त्यक्त्वा तानि फलानि च ॥ ऋषयो जग्मुरन्यत्र सर्व एव

१ पशोः—इति शेषः । २ अनर्थीता—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृढव्रताः ॥६१॥ चमत्कारपुरे क्षेत्रे विविशुस्ते ततः परम् ॥ ददृशुः सहसा प्राप्तं परिव्राजं शुनोमुखम् ॥ ६२ ॥ तेनैव सहितास्तत्र गत्वा किञ्चिद्वना
न्तरम् ॥ दृष्टवन्तस्ततो हृद्यं सरः पंकजशोभितम् ॥ ६३ ॥ ततो बुभुक्षयाविष्टा बिसान्यादाय भूरिशः ॥ तीरे निक्षिप्य सरसश्चक्रुः पुण्यां जल
क्रियाम् ॥ ६४ ॥ अथोत्तीर्य जलात्सर्वे ते समेत्य परस्परम् ॥ बिसानि तान्यपश्यन्त इदं वचनमब्रुवन् ॥ ६५ ॥ ॥ ऋषय ऊचुः ॥ ॥ केन
क्षुधाभितप्तानामस्माकं निर्दयात्मना ॥ मृणालानि समस्तानि स्थानादस्माद्धृतानि च ॥ ६६ ॥ ते शंकमाना अन्योन्यमृषयः शंसितव्रताः ॥
प्रचक्रुः शपथान्नौद्दानात्मनः प्रविशुद्धये ॥ ६७ ॥ ॥ कश्यप उवाच ॥ ॥ सर्वभक्षः सदा सोऽस्तु न्यासलोभं करोतु वा ॥ कूटसाक्षित्वमभ्ये
तु बिसस्तैन्यं करोति यः ॥ ६८ ॥ धर्मं करोतु दंभेन राजानं चोपसेवताम् ॥ मधुमांसं सदाश्नातु बिसस्तैन्यं करोति यः ॥ ६९ ॥
॥ ॥ वसिष्ठ उवाच ॥ ॥ अनृतौ मैथुनं यातु दिवा वाप्यथ पर्वणि ॥ अतिथिः स्यात्ततोऽन्योन्यं बिसस्तैन्यं करोति यः ॥ ७० ॥
॥ ॥ भरद्वाज उवाच ॥ ॥ योधिगम्य गुरोः शास्त्रं निष्क्रयं न प्रयच्छति ॥ तस्यैनसा स युक्तोस्तु बिसस्तैन्यं करोति यः ॥ ७१ ॥
नृशंसोऽस्तु स सर्वत्र समृद्ध्या चाप्यहंकृतः ॥ मत्सरी पिशुनश्चैव बिसस्तैन्यं करोति यः ॥ ७२ ॥ ॥ विश्वामित्र उवाच ॥ ॥ एकाकी मृष्टम
श्नातु प्रशंस्यादथ चात्मनः[1] ॥ वेदविक्रयकर्तास्तु बिसस्तैन्यं करोति यः ॥ ७३ ॥ ॥ जमदग्निरुवाच ॥ ॥ कन्यां यच्छतु वृद्धाय स भूयाद्वृषली
पतिः ॥ अस्तु वार्धुषिको नित्यं बिसस्तैन्यं करोति यः ॥ ७४ ॥ ॥ गौतम उवाच ॥ ॥ स गृह्णात्वविकादानं करोतु हयविक्रयम् ॥ प्रकरो
तु गुरोर्निंदां बिसस्तैन्यं करोति यः ॥७५ ॥ ॥ अत्रिरुवाच ॥ ॥ मातरं पितरं नित्यं दुर्मतिः सोऽवमन्यताम् ॥ शूद्रं पृच्छतु धर्मार्थं बिसस्तैन्यं
करोति यः ॥ ७६ ॥ प्रतिश्रुत्य न यो दद्याद्ब्राह्मणाय गवादिकम् ॥ तस्यैनसा स युज्येत बिसस्तैन्यं करोति यः ॥ ७७ ॥ ॥ अरुंधत्युवाच ॥ ॥
करोतु पत्युः पूर्वं सा भोजनं शयनं तथा ॥ नारी दुष्टसमाचारा बिसस्तैन्यं करोति या ॥ ७८ ॥ ॥ चण्डोवाच ॥ ॥ स्वामिनः प्रतिकूलास्तु
धर्मद्वेषं करोतु च ॥ साधुद्वेषपरा चैव बिसस्तैन्यं करोति या ॥ ७९ ॥ ॥ पशुमुख उवाच ॥ ॥ स्वामिद्रोहरतो नित्यं स भूयात्पापकृन्नरः ॥ साधु
द्वेषपरश्चैव बिसस्तैन्यं करोति यः ॥ ८० ॥ ॥ शुनोमुख उवाच ॥ ॥ वेदान्स पठतु न्यायाद्गृहस्थः स्यात्प्रियातिथिः ॥ सत्यं वदतु चाजस्रं
बिसस्तैन्यं करोति यः ॥ ८१ ॥ ॥ ऋषय ऊचुः ॥ ॥ इष्ट एव द्विजातीनां यस्त्वया शपथः कृतः ॥ बिसस्तैन्यं हि चास्माकं तन्नूनं भवता

१ आत्मनः—कृत्यम्—इति शेषः । आत्मनः—आत्मानम्—इत्यर्थो वा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

कृतम् ॥ ८२ ॥ ॥ शुनोमुख उवाच ॥ ॥ मया हृतानि सर्वेषां बिसानीमानि वो द्विजाः ॥ धर्मान्वै श्रोतुकामेन मां जानीत पुरंदरम् ॥ ८३ ॥
युष्माकं परितुष्टोऽस्मि लोभाभावाद्द्विजोत्तमाः ॥ तस्मात्स्वर्गं मया सार्द्धं शीघ्रमागम्यतामिति ॥ ८४ ॥ ॥ ऋषय ऊचुः ॥ ॥
मोक्षमार्ग समासक्ता न वयं स्वर्गलिप्सवः ॥ तस्मात्तपश्चरिष्यामः सरसीह विमुक्तये ॥ ८५ ॥ पूर्णां सागरपर्यंतां चरित्वा पृथिवी
मिमाम् ॥ प्राणयात्रां प्रकुर्वाणा मृणालैर्मुनिसत्तमाः ॥ तस्माद्गच्छ तव श्रेयो भूयादस्मात्समागमात् ॥ ८६ ॥ ॥ शक्र उवाच ॥ ॥ न
वृथा दर्शनं मे स्यात्कदाचिदपि सुव्रताः ॥ तस्माद्गृह्णीत यच्चित्ते सदाभीष्टं व्यवस्थितम् ॥ ८७ ॥ ॥ ऋषय ऊचुः ॥ ॥ आश्रमोऽयं
सुविख्यातो भूयाच्छक्र महीतले ॥ नाम्नास्माकं तथा नृणां सर्वपातकनाशनः ॥ ८८ ॥ वयं स्थास्यामहे नित्यमत्रैव सुरसत्तम ॥
तपोऽर्थं भावितात्मानो यावन्मोक्षगतिर्ध्रुवा ॥ ८९ ॥ ॥ इन्द्र उवाच ॥ ॥ त्रैलोक्येऽपि सुविख्यात आश्रमो वो भविष्यति ॥
तथा कामप्रदश्चैव लोकानां संभविष्यति ॥ ९० ॥ यो यं काममभिध्याय श्राद्धमत्र करिष्यति ॥ श्रावणे पौर्णमास्यां च स तं सर्वमवा
प्स्यति ॥ ९१ ॥ निष्कामो वा नरो यस्तु श्राद्धं दानमथापि वा ॥ प्रकरिष्यति मोक्षं स समवाप्स्यत्यसंशयम् ॥ ९२ ॥ ये चात्र देहं
त्यक्ष्यंति युष्माकं चाश्रमे शुभे ॥ अपि पापसमायुक्तास्ते यास्यंति परां गतिम् ॥ ९३ ॥ इंगुदैर्बदरैर्वापि बिल्वैर्भल्लातकैरपि ॥ पितॄ
नुद्दिश्य यः श्राद्धं करिष्यति समाहितः ॥ ९४ ॥ स यास्यति परां सिद्धिं दुर्लभां त्रिदशैरपि ॥ सर्वपापविनिर्मुक्तः स्तूयमानश्च किंनरैः ॥ ९५ ॥
॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वा सहस्राक्षस्तैः सर्वैरभिनंदितः ॥ जगामादर्शनं तेऽपि स्थितास्तत्र द्विजोत्तमाः ॥ ९६ ॥ ततः काले गते
तेऽपि कृत्वा तीव्रं महत्तपः ॥ संप्राप्ताः परमं स्थानं जरामरणवर्जितम् ॥ ९७ ॥ तैस्तत्र स्थापितं लिङ्गं देवदेवस्य शूलिनः ॥ तस्य संदर्शना
देव नरः पापाद्विमुच्यते ॥ ९८ ॥ यस्तल्लिंगं पुनर्भक्त्या पुष्पधूपानुलेपनैः ॥ अर्चयेत्स ध्रुवं मुक्तिं प्राप्नोति द्विजसत्तमाः ॥ ९९ ॥ एतत्पवित्र
मायुष्यं सर्वपातकनाशनम् ॥ सप्तर्षीणां समाख्यातमाश्रमस्यानुकीर्तनम् ॥ १०० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां
षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये सप्तर्ष्याश्रममाहात्म्यवर्णननाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥
अगस्त्यस्याश्रमोऽन्योस्ति तथा तत्र द्विजोत्तमाः ॥ यत्र तिष्ठति विश्वात्मा स्वयं देवो महेश्वरः ॥ १ ॥ शुक्लपक्षे चतुर्दश्यां चैत्रमासे दिवाकरः ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वयमभ्येत्य देवेशं पूजयत्येव शंकरम् ॥ २ ॥ तस्मादन्योऽपि यस्तस्यां[1] भक्त्या चागत्य शंकरम् ॥ तमेव पूजयेद्भक्त्या स याति देवं[2]मन्दिरम् ॥ ॥ ३ ॥ यस्तत्र कुरुते श्राद्धं सम्यक्छ्रद्धासमन्वितः ॥ पितरस्तस्य तृप्यंति पितृमेधे कृते यथा ॥ ४ ॥ ॥ ऋषय ऊचुः ॥ ॥ अगस्त्यस्याश्रमं प्राप्य कस्माद्देवो दिवाकरः ॥ प्रदक्षिणां प्रकुरुते वदैतन्मे सुविस्तरम् ॥ ५ ॥ ॥ सूत उवाच ॥ ॥ कथयामि कथामेतां शृणुत द्विजसत्तमाः ॥ अस्ति विंध्य इति ख्यातः पर्वतः[3] पृथिवीतले ॥ ६ ॥ यस्य वृक्षाग्रशाखायां संलग्नास्तरणेः कराः ॥ पुष्पपूगा इवाधःस्थैर्लक्ष्यंते मुग्धसिद्धकैः ॥ ७ ॥ अनभिज्ञास्तमिस्रस्य यस्य सानुनिवासिनः ॥ रत्नप्रभाप्रणुन्नस्य कृष्णपक्षनिशास्वपि ॥ ८ ॥ यस्य सानुषु मुंचंतो भांति पुष्पाणि पादपाः ॥ वायुवेगवशान्नूनं नीरौघं[4] नीरदा इव ॥ ९ ॥ यस्मिन्नानामृगा भांति धावमाना इतस्ततः ॥ कलत्रपुत्रपुष्ट्यर्थं लोभार्थं मानवा इव ॥ ॥ १० ॥ निर्यासच्छद्मना बाष्पं वासिताशेषदिङ्मुखम् ॥ मुञ्चंति तरवो यत्र दन्तिदन्तक्षतत्वचः ॥ ११ ॥ चीरिकाविरुतैर्दीर्घैं रुदंत इव चापरे ॥ हस्तिहस्तहता वृक्षा मन्यन्ते यस्य सानुषु ॥ १२ ॥ इतश्चेतश्च गच्छद्भिर्निर्झरांभोभिरावृतः ॥ शुशुभे सितवस्त्राढ्यैः पुमानिव विभूषितः ॥ ॥ १३ ॥ यस्य स्पर्द्धा समुत्पन्ना पूर्वं सह सुमेरुणा ॥ ततः प्राह सहस्रांशुं गत्वा स क्रोधमूर्च्छितः ॥ १४ ॥ कस्माद्भास्कर मेरोस्त्वं प्रकरोषि प्रदक्षिणाम् ॥ कुलपर्वतसंज्ञेऽपि न करोषि कथं मयि ॥ १५ ॥ ॥ भास्कर उवाच ॥ ॥ न वयं श्रद्धया तस्य गिरेः कुर्मः प्रदक्षिणाम् ॥ एष मे विहितः पन्था येनेदं विहितं जगत् ॥ १६ ॥ तस्य तुंगानि शृंगाणि व्याप्य खं संश्रितानि च ॥ तेन संजायते तस्य बलादेव प्रदक्षिणा ॥ १७ ॥ एतच्छ्रुत्वा विशेषेण संक्रुद्धो विंध्यपर्वतः ॥ प्रोवाच पश्य भानो त्वं तर्हि तुंगत्वमद्य मे ॥ रुरोधाथ नभोमार्गं येन गच्छति भास्करः ॥ १८ ॥ अथ रुद्धं समालोक्य मार्गं वासरनायकः ॥ चिन्तयामास चित्ते स्वे सांप्रतं किं करोम्यहम् ॥ १९ ॥ करोमि यद्यहं चास्य पर्वतस्य प्रदक्षिणाम् ॥ तद्भविष्यति कालस्य चलनं भुवनत्रये ॥ २० ॥ मासर्तुभुवनानां च तथा भावी विपर्ययः ॥ अग्निष्टोमादिकाः सर्वाः क्रिया यास्यंति संक्षयम् ॥ नष्टयज्ञोत्सवे लोके देवानां स्यान्महाव्यथा ॥ २१ ॥ एवं संचिन्त्य चित्तेन बहुधा तीक्ष्णदीधितिः ॥ जगाम मनसा भीतः सोऽगस्त्यं मुनिपुंगवम् ॥ २२ ॥ नान्योस्ति वारणे शक्तो विंधस्यास्य हि तं विना ॥ अगस्त्यं ब्राह्मणश्रेष्ठं मित्रावरुणसंभवम् ॥ २३ ॥ ततो द्विजमयं रूपं स कृत्वा तीक्ष्णदीधितिः ॥ चमत्कारपुरक्षेत्रे तस्याश्रमपदं ययौ ॥ २४ ॥ ततस्तु वैश्वदेवांते वेदोच्चार[5]परायणः ॥ प्रोवाच सोऽ

१ तत्र–इ० पा० । २ शिवमंदिरम्–इ० पा० । ३ विरतीर्गे–इ०पा० । ४ जलौघम्–इ० पा० । ५ तेन विधात्रा इति शेषः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तिथिः प्राप्तस्तवाहं मुनिसत्तम ॥ २५ ॥ ततोऽगस्त्यः कृतानन्दः स्वागतं ते महामुने ॥ मनोरथ इवाध्यातो योऽग्निकार्यांत आगतः ॥ २६ ॥
तत्त्वं ब्रूहि मुनिश्रेष्ठ यद्ददामि तवेप्सितम् ॥ अदेयं नास्ति मे किञ्चित्कालेऽस्मिन्प्रार्थितस्य च ॥ २७ ॥ ॥ भास्कर उवाच ॥ ॥ अहं भास्कर
आयातो विप्ररूपेण सन्मुने ॥ सर्वकार्यक्षमं मत्वा त्वामेकं भुवनत्रये ॥ २८ ॥ त्वया पूर्वं सुरार्थाय प्रपीतः पयसांनिधिः ॥ वातापिश्च तथा
दैत्यो भक्षितो द्विजकण्टकः ॥ २९ ॥ तस्माद्गतिर्भवास्माकं सांप्रतं मुनिसत्तम ॥ देवानामिह वर्णानां त्वमेव शरणं यतः ॥ ३० ॥ ॥ सूत
उवाच ॥ ॥ तच्छ्रुत्वा स मुनिर्विप्रा विशेषेण प्रहर्षितः ॥ अर्घ्यं दत्त्वा दिनेशाय ततः प्रोवाच सादरम् ॥ ३१ ॥ धन्योऽस्म्यनुगृहीतोस्मि यन्मे
त्वं गृहमागतः ॥ तस्माद्ब्रूहि करिष्यामि तव वाक्यमखंडितम् ॥ ३२ ॥ ॥ भास्कर उवाच ॥ ॥ एष विंध्याचलोऽस्माकं मार्गमावृत्य संस्थितः ॥
स्पर्द्धया गिरिमुख्यस्य सुमेरोर्मुनिसत्तम ॥ ३३ ॥ सामाद्यैर्विविधोपायैस्तस्मादेनं निवारय ॥ कालात्ययो यथा न स्याद्गतेर्भंगस्तथा कुरु ॥ ३४ ॥
॥ ॥ अगस्त्य उवाच ॥ ॥ अहं ते वारयिष्यामि वर्धमानं कुलाचलम् ॥ स्वस्थानं [1]गच्छ तस्मात्त्वं सुखीभव दिवाकर ॥ ३५ ॥ ततः स प्रेषितस्ते
न भास्करस्तीक्ष्णदीधितिः ॥ स्वं स्थानं प्रययौ हृष्टस्तमामंत्र्य मुनीश्वरम् ॥ ३६ ॥ अगस्त्योऽपि द्रुतं गत्वा विंध्यं प्रोवाच सादरम् ॥ न्यूनतां व्रज
मद्वाक्याच्छीघ्रं पर्वतसत्तम ॥३७॥ दाक्षिणात्येषु तीर्थेषु स्नाने जाताद्य मे मतिः ॥ तवायत्ता गिरे सैव तत्कुरुष्व यथोचितम् ॥ ३८ ॥ स तस्य वचनं
श्रुत्वा विंध्यः पर्वतसत्तमः ॥ अभजन्निम्नतां सद्यो विनयेन समन्वितः॥३९॥अगस्त्योऽपि समासाद्य तस्यांतं दक्षिणं द्विजाः॥ त्वयैवं संस्थितेनव स्थात
व्यमित्युवाच तम् ॥ ४० ॥ यावदागमनं मह्यं नात्र कार्या विचारणा ॥ नो चेच्छापं प्रदास्यामि येन संयास्यसि क्षयम् ॥४१॥ स तथेति प्रतिज्ञाय
शापाद्भीतो नगोत्तमः॥न जगाम पुनर्वृद्धिं तस्यागमनवांछया॥४२॥सोऽपि तेनैव मार्गेण निवृत्तिं न करोति च॥ यावदद्यापि विप्रेंद्रा दक्षिणां दिशमाश्रि
तः ॥४३॥ अथ तत्रैव चानीय लोपामुद्रां मुनीश्वरः ॥ समाहूय सहस्रांशुं ततः प्रोवाच सादरम् ॥ ४४ ॥ तव वाक्यान्मया त्यक्तः स्वाश्रमस्तीक्ष्णदी
धिते ॥ तवार्थे च न गंतव्यं भूयस्तत्र कथंचन ॥ ४५ ॥ तस्मान्मद्वचनाद्भानो चतुर्दश्यां मधौ सिते ॥ यन्मया स्थापितं तत्र लिंगं पूज्यं हि तत्त्व
या ॥ ४६ ॥ ॥ भास्कर उवाच ॥ ॥ एवं मुने करिष्यामि तव वाक्यादसंशयम् ॥ पूजयिष्यामि तल्लिंगं वर्षांते स्वयमेव हि ॥ ४७ ॥ योऽन्यो
हि तद्दिने लिंगं पूजयिष्यति मानवः ॥ मम लोकं समासाद्य स भविष्यति मुक्तिभाक् ॥ ४८ ॥ ॥ सूत उवाच ॥ ॥ एतस्मात्कारणात्तत्र भगवां

१ व्रज–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तीक्ष्णदीधितिः ॥ चैत्रशुक्लचतुर्दश्यां सांनिध्यं कुरुते सदा ॥ ४९ ॥ एतद्वः सर्वमाख्यातं यत्पृष्टोस्मि द्विजोत्तमाः ॥ भूयो वदत वै कश्चित्संदेहश्चे द्धृदि स्थितः ॥ ५० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्येऽगस्त्याश्रममाहात्म्यवर्णनं नाम त्रयस्त्रिंशत्तमोऽध्यायः ॥ ३ ॥ ७ ॥ ॥ ऋषय ऊचुः ॥ ॥ यदेतद्भवता प्रोक्तं तं मुनिं प्रति सूतज ॥ त्वया पुरा सुरार्थाय प्रपीतः पयसांनिधिः ॥ १ ॥ तत्त्वं सूतज नो ब्रूहि विस्तरेण महामते ॥ यथा तेन पुरा पीतो मुनिना पयसांनिधिः ॥ २ ॥ ॥ सूत उवाच ॥ ॥ कालेया इति विख्याताः पुरा दानवसत्तमाः ॥ संभूताः सर्वदेवानां वीर्योत्साहप्रणाशकाः ॥ ३ ॥ ततस्तैः पीडितं दृष्ट्वा विष्णुना प्रभविष्णुना ॥ त्रैलोक्यं शक्तियोगेन प्रोक्तो देवो महेश्वरः ॥४॥ एतदीशान दैतेयैस्त्रैलोक्यं परिपीडितम् ॥ कालिकेयैर्महावीर्यैस्तस्मात्कार्यो महाहवः॥ अद्यैव तैः समं देव समासाद्य धरातलम् ॥ ५ ॥ ततो विष्णुश्च रुद्रश्च सहस्राक्षः सुरैः सह ॥ शितशस्त्रधराः सर्वे संप्राप्ता धरणीतलम् ॥ ६ ॥ अथ ते दानवाः सर्वे श्रुत्वा देवान्समागतान् ॥ युद्धार्थं सहसा जग्मुः संमुखाः कोपसंयुताः[1] ॥ ७ ॥ ततोऽभवन्महायुद्धं देवानां दानवैः सह ॥ त्रैलोक्यं कंपितं येन समस्तं भयविह्वलम् ॥ ८ ॥ अथ कालप्रभोनाम दानवो बलगर्वितः ॥ स शक्रं पुरतो दृष्ट्वा वज्रोच्छ्रितकरं स्थितम् ॥ प्रोवाच प्रहसन्वाक्यं मेघगम्भीरनिःस्वनः ॥ ९ ॥ मुंच वज्रं सहस्राक्ष पश्यामि तव पौरुषम् ॥ चिरात्प्राप्तोऽसि मे दृष्टिं दिष्ट्या त्वं त्रिदिवेश्वरः ॥ १० ॥ ततश्चिक्षेप संक्रुद्धस्तस्य वज्रं शतक्रतुः ॥ सोऽपि तल्लीलया धृत्वा जगृहे सव्यपाणिना ॥ ११ ॥ ततः शक्रं समुद्दिश्य गदां गुर्वीं मुमोच सः ॥ सर्वायसमयीं रौद्रां यमजिह्वामिवापराम ॥ १२ ॥ तया हतः सहस्राक्षो विसंज्ञो रुधिरप्लुतः ॥ ध्वजयष्टिं समाश्रित्य संनिविष्टो रथोपरि ॥ १३ ॥ अथ तं मातलिर्दृष्ट्वा विसंज्ञं बलघातिनम् ॥ प्राङ्मुखं च रथं चक्रे संस्मरन्सारथेर्नयम्[2] ॥ १४ ॥ ततः पराङ्मुखीभूते रथे शक्रस्य संगरे ॥ दुद्रुवुर्भयसंत्रस्ताः सर्वे देवाः समंततः ॥ १५ ॥ आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः ॥ व्रीडां विहाय विध्वस्ताः पृष्ठदेशे शितैः शरैः ॥ १६ ॥ अथ भग्नं बलं दृष्ट्वा दानवैर्मधुसूदनः ॥ आरुह्य गरुडं तूर्णं कालप्रभमुपाद्रवत ॥ १७ ॥ ततस्ते दानवाः सर्वे परिवार्य शितैः शरैः ॥ सम्यगाच्छादयामासुर्गर्जमाना मुहुर्मुहुः ॥ १८ ॥ स तैराच्छादितो विष्णुः शुशुभे च समंततः ॥ सम्यक्पुलकितांगश्च रक्ताचल इवापरः ॥ १९ ॥ ततः शार्ङ्गविनिर्मुक्तैः शरैः कंकपतत्रिभिः ॥ छेदयित्वेषुजालानि दैतेयान्निजघान सः ॥ २० ॥ ततो दैत्यगणाः सर्वे हन्यमाना मुरारिणा ॥ त्रातारं नाभ्यगच्छंत मृगाः सिंहा

१ सुसंयताः-इ०पा० । २ नयम्—नीतिम्—इत्यर्थः । सारथिना हि रणान्मूर्छितः स्वामी शीघ्रमेवापसार्य तत्स्वास्थ्यार्थं दूरतो नेयः—इति हि सेवकधर्मः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



दिंता इव ॥ २१ ॥ एतस्मिन्नंतरे दैत्यः कालखंज इति स्मृतः॥ स कोपवशमापन्नो वासुदेवमुपाद्रवत् ॥ २२ ॥ स हत्वा पञ्चभिर्बाणैर्वासुदेवं शिला
शितैः ॥ जघान गरुडं क्रुद्धो दशभिर्नतपर्वभिः॥२३॥ततः सुदर्शनं चक्रं तस्य दैत्यस्य माधवः॥ प्रमुमोच वधार्थाय ज्वालामालासमावृतम् ॥२४॥
सोऽपि तच्चक्रमालोक्य वासुदेवकराच्च्युतम् ॥ आगच्छंतं प्रसार्यास्यं ग्रस्तुं तत्संमुखो ययौ ॥ २५ ॥ अग्रसच्च महादैत्यस्तिष्ठतिष्ठेति चाब्रवीत् ॥
वासुदेवं समुद्दिश्य ततश्चिक्षेप सायकान् ॥ २६ ॥ ततश्चक्री स दैत्येन ग्रस्तचक्रेण ताडितः ॥ सुपर्णेन समायुक्तो जगाम विषमां व्यथाम् ॥ २७ ॥
एतस्मिन्नंतरे क्रुद्धो भगवांस्त्रिपुरांतकः ॥ दृष्ट्वा हरिं तथाभूतं शक्रं चापि पराङ्मुखम् ॥ २८ ॥ ततः शूलप्रहारेण तं निहत्य दनोः सुतम् ॥ शरैः
पिनाकनिर्मुक्तैर्जघानोच्चैस्तथा परान् ॥ २९ ॥ कालप्रभं प्रकालं च कालास्यं कालविग्रहम् ॥ जघान भगवाञ्छंभुस्तथान्यानपि नायकान् ॥३०॥
ततः प्रधानास्ते सर्वे दानवा अपि दारुणाः ॥ पलायनपरा जाता निरुत्साहा द्विषज्जये ॥ ३१ ॥ ततः शक्रश्च विष्णुश्च लब्धसंज्ञौ धृतायुधौ ॥
श्लाघयंतौ महादेवं संस्थितौ रणमूर्धनि ॥ ३२ ॥ एतस्मिन्नंतरे भग्नान्समुद्वीक्ष्य दनोः सुतान् ॥ जघ्नुः शरशतैः शस्त्रैः सर्वे देवाः सवासवाः ॥ ३३ ॥
अथ ते हतभूयिष्ठा दानवा बलवत्तराः ॥ हन्यमानाः शितैर्बाणैस्त्रिदशैर्जितकाशिभिः ॥ ३४ ॥ अगम्यं मनसा तेषां प्रविष्टा वरुणालयम् ॥
शस्त्रैश्च क्षतसर्वांगा हतनाथाः सुदुःखिताः ॥ ३५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमा
हात्म्येऽगस्त्याश्रममाहात्म्येऽगस्त्यकृतसमुद्रप्राशनवृत्तान्ते देवासुरसंग्रामवर्णनंनाम चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥
एवं तेषु प्रभग्नेषु हतेषु च सुरोत्तमाः ॥ प्रहृष्टमनसः सर्वे स्तुत्वा[1] देवं महेश्वरम् ॥ १ ॥ तेनैव चाथ निर्मुक्ताः प्रणम्य च मुहुर्मुहुः ॥ स्वंस्वं
स्थानमथाजग्मुः शक्रविष्णुपुरःसराः ॥ २ ॥ तेऽपि दानवशार्दूला हताशाश्च सुरोत्तमैः ॥ मंत्रं प्रचक्रिरे सर्वे नाशाय त्रिदिवौकसाम् ॥ ३ ॥ तेषां
मंत्रयतामेष निश्चयः समपद्यत ॥ नान्यत्र धर्मविध्वंसाद्देवानां जायते क्षयः ॥ ४ ॥ तस्मात्तपस्विनो ये च ये च यज्ञपरायणाः ॥ तथान्ये
निरता धर्मे निहन्तव्या निशागमे ॥ ५ ॥ एवं ते निश्चयं कृत्वा निष्क्रम्य वरुणालयात् ॥ रात्रौ सदैव निघ्नंति जनान्धर्मपरायणान् ॥ ६ ॥ यत्र
यत्र भवेद्यज्ञः सत्रं वाऽप्युत्सवोऽथवा ॥ तत्र गत्वा निशायोगे प्रकुर्वंति जनक्षयम् ॥ ७ ॥ तैः प्रभूता मखा ध्वस्ता दीक्षिता विनि



१ श्रुत्वा—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पातिताः ॥ ऋत्विजश्च तथान्येऽपि सामान्या द्विजसत्तमाः ॥ ८ ॥ आश्रमे मुनिमुख्यस्य शांडिल्यस्य महात्मनः ॥ सहस्रं ब्राह्मणेंद्राणां भक्षितं तैर्दुरात्मभिः ॥ ९ ॥ शतानि च सहस्राणि निहतानि द्विजन्मनाम् ॥ विश्वामित्रस्य पञ्चैव सप्तात्रेश्चैव धीमतः ॥ १० ॥ एतस्मिन्नेव काले तु समस्तं धरणीतलम् ॥ नष्टयज्ञोत्सवं जातं कालेयभयपीडितम् ॥ ११ ॥ न कश्चिच्छयनं रात्रौ प्रकरोति महीतले ॥ धृतायुधा जनाः सर्वे तिष्ठंति सह तापसैः ॥ १२ ॥ रात्रौ स्वपंति ये केचिद्विश्वस्ता धर्मभाजनाः ॥ तेषामस्थीनि दृश्यंते प्रातरेव हि केवलम् ॥ १३ ॥ अथ देवगणाः सर्वे यज्ञभागविना[१]कृताः ॥ प्रजग्मुः परमामार्तिं ब्रह्मविष्णुपुरस्सराः ॥ १४ ॥ ततो गत्वा समुद्रांतं वधाय सुरविद्विषाम् ॥ न शेकुर्विषमस्थांस्तान्मनसापि प्रधर्षितुम् ॥ १५ ॥ ततः समुद्रनाशाय मंत्रं चक्रुः सुदुःखिताः ॥ तस्मिन्नष्टे भवन्त्येव वध्या दानवसत्तमाः ॥१६॥ अगस्त्येन विना नैष शो[२]षं यास्यति सागरः ॥ तस्मात्संप्रार्थयामोत्र कृत्ये गत्वा मुनीश्वरम् ॥१७॥ चमत्कारपुरे क्षेत्रे स तिष्ठति च सन्मुनिः ॥ तस्मात्तत्रैव गच्छामो येन गच्छति सत्वरम् ॥१८॥ एवं निश्चित्य ते सर्वे त्रिदशास्तस्य चाश्रमम् ॥ संप्राप्ता मुनिमुख्यस्य मित्रावरुणजन्मनः ॥ १९ ॥ सोऽपि सर्वान्समालोक्य संप्राप्तान्सुरसत्तमान् ॥ प्रहृष्टः सम्मुखस्तूर्णं जगामा[३]तीव सन्मुनिः ॥ २० ॥ प्रोवाच प्रांजलिर्वाक्यं हर्षगद्गदया गिरा ॥ ब्रह्मादींस्तान्सुरान्दृष्ट्वा विस्मयोत्फुल्ललोचनः ॥ २१ ॥ चमत्कारपुरं क्षेत्रमेतन्मेध्यमपि स्थितम् ॥ भूयो मेध्यतरं जातं युष्माकं हि समाश्रयात् ॥ २२ ॥ तस्माद्वदत यत्कृत्यं मया संसिद्ध्यतेऽधुना ॥ तत्सर्वं प्रकरिष्यामि यद्यपि स्यात्सुदुष्करम् ॥ २३ ॥ ॥ देवा ऊचुः ॥ ॥ कालेया इति दैत्या ये हतशेषाः सुरैः कृताः ॥ ते समुद्रं समाश्रित्य निघ्नंति शुभकारिणः ॥ २४ ॥ शुभे नाशमनुप्राप्ते ध्रुवं नाशो दिवौकसाम् ॥ तस्मात्तेषां वधार्थाय त्वं शोषय महार्णवम् ॥ २५ ॥ येन ते गोचरं प्राप्ता दृष्टेर्दानवसत्तमाः ॥ बध्यंते विबुधैः[६] सर्वे जायंते च मखाःइह ॥ २६ ॥ ॥ ॥ अगस्त्य उवाच ॥ ॥ अहं संवत्सरस्यांते शोषयिष्यामि सागरम् ॥ विद्याबलं समाश्रित्य योगिनीनां सुरोत्तमाः ॥ २७ ॥ तस्माद्व्रजत हर्म्याणि यूयं याति हि वत्सरम् ॥ यावद्भूयोऽपि वर्षांते कार्यमागमनं ध्रुवम् ॥ २८ ॥ ततो मया समं गत्वा शोषिते वरुणालये ॥ हंतव्या दानवा दुष्टा हन्त यैः पीड्यते जगत् ॥ २९ ॥ ततो देवगणाः सर्वे गताः स्वेस्वे निकेतने ॥ अगस्त्योऽपि समुद्योगं चक्रे विद्यासमुद्भवम् ॥ ३० ॥

१ यज्ञभागविनाकृताः—यज्ञभागरहिताः—इत्यर्थः । यज्ञभागनिराकृताः--इ० पा० । २ क्षयम्--इ० पा० । ३ अतीव—इत्यस्य--प्रहृष्टः--इत्यनेनान्वयो बोध्यः । ४ प्रादाय--इ० पा० । ५ मेघगम्भीरया-इ० पा० । ६ साध्याः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ततः सर्वाणि पीठानि यानि संति धरातले ॥ तानि तत्रानयामास मंत्रशक्त्या महामुनिः ॥ ३१ ॥ अष्टम्यां च चतुर्दश्यां तेषु संपूज्य भक्तितः ॥
योगिनीनां च वृन्दानि कन्यकानां विशेषतः ॥ ३२ ॥ विद्यां विशोषिणींनाम समाराधयत द्विजः ॥ पूजयित्वा दिशां पालान्क्षेत्रपालानपि
द्विजः ॥ आकाशचारिणीं चैव देवतां श्रद्धया द्विजः ॥ ३३ ॥ ततः संवत्सरस्यांते प्रसन्ना तस्य देवता ॥ प्रोवाच वद यत्कृत्यं सिद्धाहं तव सन्मुने ॥
॥ ३४ ॥ ॥ अगस्त्य उवाच ॥ ॥ यदि देवि प्रसन्ना मे तदास्यं विश सत्वरम् ॥ येन संशोषयाम्याशु समुद्रं देवि वाग्यतः ॥ ३५ ॥ सा
तथेति प्रतिज्ञाय प्रविष्टा सत्वरं मुखे ॥ संशोषणी महाविद्या तस्यर्षेर्भावितात्मनः ॥ ३६ ॥ एतस्मिन्नंतरे प्राप्ताः सर्वे देवाः सवासवाः ॥ धृता
युधकरा हृष्टाः संनद्धा युद्धहेतवे ॥ ३७ ॥ ततः संप्रस्थितो विप्रो देवैः सर्वैः समाहितः ॥ वारिराशिं समुद्दिश्य संशुष्कवदनस्तदा ॥ ३८ ॥ अथ
गत्वा समुद्रांतं स्तूयमानो दिवालयैः ॥ पिपासाकुलितोऽतीव सर्वान्देवानुवाच ह ॥ ३९ ॥ एषोऽहं सागरं सद्यः शोषयिष्यामि सांप्रतम् ॥ यूयं
भवत सोद्योगा वधाय सुरविद्विषाम् ॥ ४० ॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वा मुनिः सोऽथ मत्स्यकच्छपसंकुलम् ॥ हेलया प्रपपौ कृत्स्नं ग्राहैः कीर्णं
महार्णवम् ॥ ४१ ॥ ततः स्थलोपमे जाते ते दैत्याः सुरसत्तमैः ॥ वध्यन्ते निशितैर्बाणैः समन्ताद्विजिगीषुभिः ॥ ४२ ॥ अथ कृत्वा महद्युद्धं यथा
शक्त्यातिदारुणम् ॥ हतभूयिष्ठशेषा ये भित्त्वा भूमिं गता अधः[3]॥४३॥ ततः प्रोचुः सुराः सर्वे स्तुत्वा तं मुनिसत्तमम् ॥ परित्यज जलं भूयः पूरणार्थं
महोदधेः ॥ ४४ ॥ नैषा वसुमती विप्र समुद्रेण विनाकृता ॥ राजते वस्तुसंत्यक्ता यथा नारी विभूषिता ॥ ४५ ॥ ॥ अगस्त्य उवाच ॥ ॥
या मयाऽऽराधिता विद्या वर्षयावत्प्रशोषणी ॥ तया पीतमिदं तोयं परिणामगतं तथा ॥ ४६ ॥ एष यास्यति वै पूर्तिं भूयोऽपि वरुणालयः ॥ खात
श्चागाधतां प्राप्तो गंगातोयैः सुनिर्मलैः ॥ ४७ ॥ सगरोनाम भूपालो भविष्यति महीतले ॥ तत्पुत्राः षष्टिसाहस्राः खनिष्यंति न संशयः ॥ ४८ ॥
तस्यैवान्वयवान्राजा भविष्यति भगीरथः ॥ स ज्ञातिकारणाद्गंगां ब्रह्मांडादानयिष्यति ॥ ४९ ॥ प्रवाहेण ततस्तस्याः समंतादंभसांनिधिः ॥ भविष्य
ति सुसंपूर्णः सत्यमेतन्मयोदितम् ॥ ५० ॥ ॥ देवा ऊचुः ॥ ॥ देवकृत्यं मुनिश्रेष्ठ भवता ह्युपपादितम् ॥ तस्मात्प्रार्थय चित्तस्थं वरं सर्व
मुनीश्वर ॥ ५१ ॥ ॥ अगस्त्य उवाच ॥ ॥ चमत्कारपुरे क्षेत्रे मया पीठान्यशेषतः ॥ आनीतानि प्रभावेन मंत्राणां सुरसत्तमाः ॥ ५२ ॥
तस्मात्तेषां सदा वासस्तत्रैवास्तु प्रभावतः ॥ सर्वासां योगिनीनां च मातॄणां च विशेषतः ॥ ५३ ॥ अष्टम्यां च चतुर्दश्यां तानि यः श्रद्धयाऽन्वितः ॥

१ सुसिद्धा–इ० पा० । २ सत्वरम्–इ० पा० । ३ अधः–पातालम्–इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूजयिष्यति तस्य स्यात्समस्तं मनसेप्सितम् ॥ ५४ ॥ ॥ देवा ऊचुः ॥ ॥ यस्माच्चित्राणि पीठानि त्वयानीतानि तत्र हि ॥ तस्माच्चित्रेश्वरं नाम पीठमेकं भविष्यति ॥ ५५ ॥ यो यं काममभिध्याय तत्र पूजां करिष्यति ॥ योगिनीनां च विद्यानां मातॄणां च विशेषतः ॥ ५६ ॥ तंतं कामं नरः शीघ्रं संप्राप्स्यति महामुने ॥ अस्माकं वरदानेन यद्यपि स्यात्सुपापकृत् ॥ ५७ ॥ एवमुक्त्वा सुराः सर्वे तमामन्त्र्य मुनीश्वरम् ॥ गतास्त्रिविष्टपं हृष्टाः सोऽप्यगस्त्यः स्वमाश्रमम् ॥ ५८ ॥ ॥ सूत उवाच ॥ ॥ एतद्वः सर्वमाख्यातं यथा स पयसांनिधिः ॥ अगस्त्येन पुरा पीतो देवकार्यप्रसिद्धये ॥ ५९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्येऽगस्त्यकृतसमुद्रप्राशनवृत्तांतेऽगस्त्याहूतपीठसमूहस्य देवैश्चित्रेश्वरपीठनामपूर्वकवरप्रदानवर्णनंनाम पञ्चत्रिंशत्तमोऽध्यायः ॥ ३५ ॥ ॥छ॥ ॥ ऋषय ऊचुः ॥ ॥ चित्रेश्वरमिदं पीठमगस्त्यमुनिनिर्मितम् ॥ यत्प्रमाणं यत्प्रभावं तदस्माकं प्रकीर्तय ॥ १ ॥ ॥ सूत उवाच ॥ ॥ तस्य पीठस्य माहात्म्यं वक्तुं नो शक्यते द्विजाः ॥ सहस्रेणापि वर्षाणां मुखानामयुतैरपि ॥ २ ॥ तत्र सिद्धिमनुप्राप्ताः शतशोऽथ सहस्रशः ॥ अनुध्यानसमायुक्ता योगिनः शंसितव्रताः ॥ ३ ॥ अन्यपीठेषु या सिद्धिर्वर्षानुष्ठानतो भवेत् ॥ दिनेनैकेन तां सिद्धिं लभंते योगिनो ध्रुवम् ॥ ४ ॥ यस्तत्राथर्वणान्मंत्राञ्जपेच्छ्रद्धासमन्वितः ॥ तेषामर्थोद्भवं[२] कृत्स्नं फलं प्राप्नोति स ध्रुवम् ॥ ५ ॥ पुत्रकामो नरस्तत्र पुंलिंगान्यो जपेन्नरः ॥ स लभेतेप्सितान्पुत्रान्यद्यपि स्याज्जरान्वितः ॥ ६ ॥ गर्भोपनिषदं तत्र पुत्रकामो जपेन्नरः ॥ अपि वन्ध्याप्रसंगेन स्यात्स पुत्रसमन्वितः ॥ ७ ॥ शत्रुलोकविनाशाय यो जपेच्छतरुद्रियम् ॥ तस्मिन्पीठेऽरयस्तस्य सद्यो गच्छंति संक्षयम् ॥ ८ ॥ भूतप्रेतपिशाचादिरक्षार्थं तत्र मानवः ॥ यो जपेद्वामदेव्यं[३] च स स्याद्धि निरुपद्रवः ॥ ९ ॥ कोऽदादिति नरस्तत्र कन्यार्थं यो जपेदृचम् ॥ यां कन्यां ध्यायमानस्तु स तां प्राप्नोत्यसंशयम् ॥ १० ॥ यो भूपालप्रसादार्थमिमं देवा निशं जपेत् ॥ निरर्गलः प्रसादः स्यात्तस्य पार्थिवसंभवः ॥ ११ ॥ स्वस्त्रीस्नेहकृते यस्तु तं पत्नीभिरिति द्विजाः ॥ जपेद्भार्या भवेत्साध्वी तस्य सा स्नेहवत्सला ॥ १२ ॥ यो लोकानुग्रहार्थाय जपेददितिरित्यपि ॥ तस्य लोकानुरागः स्यात्सलाभश्च विशेषतः ॥ ॥ १३ ॥ वित्तार्थी यो जपेत्तत्र श्रीसूक्तं मनुजो द्विजाः ॥ सर्वतस्तस्य वित्तानि समागच्छंत्यनेकशः ॥ १४ ॥ भूमीति यो जपेत्साम भूम्यर्थं तत्र

१ संसिद्धिम्—इ० पा० । २ तेषामर्थोद्भवं कृत्स्नं फलम्—तेषामाथर्वणमंत्राणाम् अर्थोद्भवम्—तेषुतेष्वाथर्वणमन्त्रेषु येऽर्थाः तदुद्भवं तत्प्रातपाद्यं यदैहिकामुष्मिकपदार्थप्राप्तिपूर्वकसुखानुभवरूपं कृत्स्नं समग्रं फलम्—तत्—इत्यर्थः । ३ वामदेव्यं साम ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



मानवः ॥ स भवेद्भूपतिर्नूनं नीचजातिरपि ध्रुवम् ॥१५॥ जपेद्रथंतरं साम यानार्थं तत्र यो नरः ॥ स प्राप्नोति हि यानानि शीघ्रगानि शुभानि च ॥ १६ ॥ गजार्थी यो जपेत्तत्र गणानां द्विजसत्तमाः ॥ स प्राप्नोति गजान्मत्यों मदप्लावितभूतलान् ॥ १७ ॥ न तद्रक्षेति यो मन्त्रं जपेद्रक्षाकृते नरः ॥ तस्य स्यात्सर्वतो रक्षा समेषु विषमेषु च ॥ १८ ॥ सप्तर्षय इति श्रेष्ठां यो जपेत्तु समाहितः ॥ ऋचं रोगविनाशाय स रोगैः परिमुच्यते ॥ १९ ॥ यदुभी यो जपेत्तत्र ग्रहपीडार्दितो जनः ॥ सानुकूला ग्रहास्तस्य प्रभवंति न संशयः ॥ २० ॥ भूतपीडार्दितो यश्च बृहत्साम जपेन्नरः ॥ पितृवज्जायते तस्य स भूतोऽप्यंतकोऽपि चेत् ॥ २१ ॥ यात्रासिद्धिकृते यश्च जपेत्सूक्तं च शाकुनम् ॥ तस्य संसिध्यते यात्रा यद्यपि स्यादकिंचनः ॥ २२ ॥ सर्पनाशाय यस्तत्र सार्पसूक्तं जपेन्नरः ॥ न तस्य मंदिरे सर्पाः प्रविशंति कथंचन ॥ २३ ॥ विषनाशाय यस्तत्र जपेच्छ्रद्धासमन्वितः ॥ उत्तिष्ठेति विषं सद्यस्तस्य नाशं प्रयास्यति ॥ २४ ॥ स्थावरं जंगमं वापि कृत्रिमं यदि वा विषम् ॥ तस्य नाम्ना विनिर्याति तमः सूर्योदये यथा ॥ २५ ॥ व्याघ्रसाम जपेद्यस्तु तत्र श्रद्धासमन्वितः ॥ तस्य व्याघ्रादयो व्याला जायंते सौम्यचेतसः ॥ २६ ॥ कृषिकर्मप्रसिद्ध्यर्थं यो जपेल्लांगलानि च ॥ वृष्टिहीनेऽपि लोकेऽस्मिन्कृषिस्तस्य प्रसिध्यति ॥ २७ ॥ ईतिनाशाय तत्रैव जपेद्देवव्रतं नरः ॥ ततः संकीर्त्तनादेव ईतयो यांति संक्षयम् ॥ २८ ॥ अनवृष्टिहते लोके पंचेंद्रं तत्र यो जपेत् ॥ तस्य हस्तकृते होमे तन्मंत्रैः स्याज्जलागमः ॥ २९ ॥ दंष्ट्राभ्यामिति यस्तत्र नरश्चौरार्दितः पठेत् ॥ नोपद्रवो भवेत्तस्य कदाचिच्चौरसंभवः ॥ ३० ॥ विवादार्थं जपेद्यस्तु संसृष्टमिति तत्र च ॥ विवादे विजयस्तस्य पापस्यापि प्रजायते ॥ ३१ ॥ यो रिपूच्चाटनार्थाय नरो रुद्रशिरो जपेत् ॥ तस्य ते रिपवो यांति देशं त्यक्त्वा कुबुद्धितः ॥ ३२ ॥ मोहनाय रिपूणां च यो जपेद्विष्णुसंहिताम् ॥ तस्य मोहाभिभूतास्ते जायंते रिपवो ध्रुवम् ॥ ३३ ॥ वशीकरणहेतोर्यः कूष्मांडीः प्रजपेन्नरः ॥ शत्रवोऽपि वशे तस्य किं पुनः प्रमदादयः ॥ ३४ ॥ यः स्तंभाय रिपूणां वै प्राजापत्यं च वारुणम् ॥ मंत्रं जपेद्द्विजश्रेष्ठाः सम्यक्छ्रद्धापरायणः ॥ मंत्रसंस्तंभितास्तस्य जायंते सर्वशत्रवः ॥ ३५ ॥ जपेत्काली करालीति यः शोषाय नरो द्विजाः ॥ स शोषयति तत्कृत्स्नं यच्चित्ते धारयेन्नरः ॥ ३६ ॥ एष मंत्रस्तदा जप्तो ह्यगस्त्येन महात्मना ॥ यत्प्रभावान्नदीनाथस्तेन संशोषितो ध्रुवम् ॥ ३७ ॥ एतत्प्रभावं यत्पीठं मंत्राणां सिद्धिकारकम् ॥ ऐहिकानां फलानां च तन्मया वः प्रकीर्तितम् ॥ ३८ ॥ यो वांछति पुनः स्वर्गं स तत्र द्विजसत्तमाः ॥ स्नानं करोतु दानं च श्राद्धं चापि विशेषतः ॥ ३९ ॥ अथ वांछति यो मोक्षं विरक्तो भवसागरात् ॥ निष्कामस्तत्र संतुष्टस्तपस्तप्येत्सुबुद्धिमान् ॥ ४० ॥ ॥ ऋषय ऊचुः ॥ ॥ मंत्रजाप्यस्य माहात्म्यं



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्त्वया नः प्रकीर्तितम् ॥ तत्कथं सिद्धिमायाति मंत्रजाप्यं हि सूतज ॥ ४१ ॥ ॥ सूत उवाच ॥ ॥ अत्र तत्कथयिष्यामि यन्मया पितृतः श्रुतम् ॥ वदतो ब्राह्मणेंद्रस्य पुरा दुर्वाससो मुनेः ॥ ४२ ॥ तेन पूर्वं पिताऽस्माकं पृष्टो दुर्वाससा द्विजाः ॥ मंत्रवादकृते यच्च शृणुध्वं सुसमाहिताः ॥ ४३ ॥ ॥ ॥ दुर्वासा उवाच ॥ ॥ साधयिष्याम्यहं मन्त्रमभीष्टं कमपि व्रती ॥ तस्य सिद्धिकृते ब्रूहि विधानं शास्त्रसंभवम् ॥ ४४ ॥ ॥ लोमहर्षण उवाच ॥ ॥ मंत्राणां साधनं कष्टं सर्वेषामपि सन्मुने ॥ प्रत्यवायसमोपेतं बहुच्छिद्रसमाकुलम् ॥४५॥ तस्मान्मंत्रकृते सिद्धिं यदि त्वं वांछसि द्विज ॥ चमत्कारपुरे क्षेत्रे तत्र त्वं गंतुमर्हसि ॥ ४६ ॥ तत्र चित्रेश्वरीपीठमगस्त्येन विनिर्मितम् ॥ सद्यः सिद्धिकरं प्रोक्तं मन्त्राणां हृदि वर्तिनाम् ॥ ४७ ॥ न तत्र जायते छिद्रं प्रत्यवायो न च द्विज ॥ नासिद्धिर्वरदानेन सर्वेषां त्रिदिवौकसाम् ॥ ४८ ॥ चातुर्युग्यं हि तत्पीठं स्थितानां सिद्धिमाहरेत् ॥ युगानुरूपतः सद्यस्ततो वक्ष्याम्यहं द्विज ॥ ४९ ॥ यो यं साधयितुं मन्त्रमिच्छति द्विजसत्तम ॥ स तस्य पूर्वमेवाथ लक्षमेकं जपेन्नरः ॥ ॥ ५० ॥ ततो भवति संसिद्धो मंत्रार्हः स नरः शुचिः ॥ जपेद्ब्राह्मणशार्दूल ततो लक्षचतुष्टयम् ॥ दशांशेन तु होमः स्यात्सुसमिद्धे हुताशने ॥ ॥ ५१ ॥ ततस्तु जायते सिद्धिर्नूनं तन्मंत्रसंभवा ॥ तत्र सौम्येषु कृत्येषु होमः सिद्धार्थकैः सितैः ॥ ५२ ॥ जातीपुष्पैश्च विप्रेन्द्र स्मृतो ब्राह्मणभोजनैः ॥ तथा रौद्रेषु कृत्येषु रक्तपुष्पैः सगुग्गुलैः ॥ तर्पणैः कन्यकानां च होमः स्यात्स फलप्रदः ॥ ५३ ॥ एतत्कृतयुगे प्रोक्तं मंत्रसाधनमुत्तमम् ॥ सर्वेषां साधकानां च मया प्रोक्तं द्विजोत्तम ॥ ५४ ॥ एतत्त्रेतायुगे प्रोक्तं पादोनं मन्त्रसाधनम् ॥ युग्मार्धं द्वापरे कार्यं चतुर्थांशं कलौ युगे ॥ ५५ ॥ एवं तत्र समासाद्य सिद्धिं मंत्रसमुद्भवाम् ॥ तत्र पीठे ततः कृत्यं साधयेत्स्वेच्छया नरः ॥ ५६ ॥ शापानुग्रहसामर्थ्यसंयुतस्तेजसाऽन्वितः ॥ अजेयः सर्वभूतानां साधूनां संमतस्तथा ॥ ५७ ॥ ॥ सूत उवाच ॥ ॥ तच्छ्रुत्वा स मुनिस्तस्य पितुर्मम वचोऽखिलम् ॥ ततश्चित्रेश्वरं पीठं समातोऽथ सन्मुनिः ॥ ५८ ॥ तत्र संसाधयामास सर्वान्मंत्रान्यथाक्रमम् ॥ विधिना शास्त्रदृष्टेन श्रद्धया परया युतः ॥ ५९ ॥ इति संसिद्धमंत्रः स चमत्कारपुरं गतः ॥ विप्राणां प्रार्थनार्थाय भूमिखंडकृते द्विजाः ॥ ६० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखंडे हाटकेश्वरक्षेत्रमाहात्म्ये चित्रेश्वरीपीठमाहात्म्यवर्णनंनाम षट्त्रिंशत्तमोऽध्यायः ॥ ३६ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ अथापश्यत्स विप्राणां वृन्दं वृन्दारकोपमम् ॥ संनिविष्टं धरापृष्ठे लीलाभाजि द्विजोत्तमाः ॥ १ ॥ एके वेदविदस्तत्र वेदव्याख्यानतत्पराः ॥ परस्परं सुसंक्रुद्धा

---

१ ब्राह्मणेन्द्रस्य दुर्वाससो मुनेः पुरतः वदतः पितृतः सकाशात्—मया यच्छ्रुतं तत्कथयिष्यामि—इति योजना । २ कर्तुम्—इ० पा० । ३ सिद्धानाम्—इ० पा० । ४ शुद्धिः—इ० पा० । ५ कार्यम—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



विवदंति जिगीषवः ॥ २ ॥ यज्ञविद्याविदोऽन्येऽपि यज्ञाख्यानपरायणाः ॥ तत्र विप्राः प्रदृश्यंते शतशो ब्रह्मवादिनः ॥ ३ ॥ अन्ये ब्राह्मणशा
र्दूला वेदांगेषु विचक्षणाः ॥ प्रवदंति च संदेहान्वृन्दानामग्रतः स्थिताः ॥ ४ ॥ वेदाभ्यासपराश्चान्ये तारनादेन सर्वशः ॥ नादयंतो
दिशां चक्रं तत्र सम्यग्द्विजोत्तमाः ॥ ५ ॥ अन्ये कौतूहलाविष्टाः संचरान्विषमान्मिथः ॥ पप्रच्छुर्जहसुश्चान्ये ज्ञात्वा मार्गप्रवर्तिनम् ॥ ६ ॥
स्मृतिवादपराश्चान्ये तथान्ये श्रुतिपाठकाः ॥ संदेहान्स्मृतिजानन्ये पृच्छंति च परस्परम् ॥ ७ ॥ कीर्तयंति तथा चान्ये पुराणं ब्राह्मणोत्तमाः ॥
वृद्धानां पुरतस्तत्र सभामध्ये व्यवस्थिताः ॥ ८ ॥ अथ तान्स मुनिर्दृष्ट्वा ब्राह्मणान्संशितव्रतान् ॥ अभिवाद्य ततः प्राह सादरं विनया
न्वितः ॥ ९ ॥ मम बुद्धिः समुत्पन्ना शम्भोरायतनं प्रति ॥ कर्तुं ब्राह्मणशार्दूलास्तस्मात्स्थानं प्रदर्श्यताम् ॥ १० ॥ तत्राहं देवदेवस्य शम्भोः
प्रासादमुत्तमम् ॥ विधायाराधयिष्यामि तमेव वृषभध्वजम् ॥ ११ ॥ स एवं जल्पमानोऽपि मुहुर्मुहुरतंद्रितः ॥ न तेषामुत्तरं लेभे शुभं वा
यदि वाशुभम् ॥ १२ ॥ ततः कोपपरीतात्मा स मुनिस्तान्द्विजोत्तमान् ॥ शशाप तारशब्देन यथा शृण्वंति कृत्स्नशः ॥ १३ ॥ ॥ दुर्वासा
उवाच ॥ ॥ विद्यामदो धनमदस्तृतीयोऽभिजनोद्भवः ॥ एते मदा वलिप्तानामेत एव सतां दमाः ॥ १४ ॥ तत्र येऽपि हि युष्माकं मदा एव
व्यवस्थिताः ॥ यतस्ततोऽन्वयेऽप्येवं भविष्यंति मदान्विताः ॥ १५ ॥ सदा सौहृदनिर्मुक्ताः पितरोऽपि सुतैः सह ॥ भविष्यंति पुरे ह्यस्मिन्किं पुन
र्बांधवादयः ॥ १६ ॥ एवमुक्त्वा स विप्रेन्द्रो निवृत्तस्तदनन्तरम् ॥ अपमानं परं प्राप्य ब्राह्मणानां द्विजोत्तमाः ॥ १७ ॥ अथ तन्मध्यगो विप्र
आसीद्वृद्धतमः सुधीः ॥ सुशील इति विख्यातो वेदवेदांगपारगः ॥ १८ ॥ स दृष्ट्वा तं मुनिं क्रुद्धं गच्छंतमपमानितम् ॥ सत्वरं प्रययौ पृष्ठे तिष्ठ
तिष्ठेति च ब्रुवन् ॥ १९ ॥ अथासाद्य गतं दूरं प्रणिपत्य मुनिं च सः ॥ प्रोवाच क्षम्यतां विप्र विप्राणां वचनान्मम ॥ २० ॥ एतैः स्वाध्यायसंपन्नैर्न
श्रुतं वचनं तव ॥ नोत्तरं तेन संदत्तं सत्यमेतद्ब्रवीम्यहम् ॥ २१ ॥ तस्माद्भूमिर्मया दत्ता शंभुहर्म्यकृते तव ॥ अस्मिन्स्थाने द्विजश्रेष्ठ प्रासादं कर्तु
मर्हसि ॥ २२ ॥ तस्य तद्वचनं श्रुत्वा दुर्वासा हर्षसंयुतः ॥ क्षितिदानोद्भवां चक्रे स्वस्ति ब्राह्मणसत्तमाः ॥ प्रासादं निर्ममे पश्चात्तस्य वाक्ये व्यव
स्थितः ॥ २३ ॥ अथ ते ब्राह्मणा ज्ञात्वा सुशीलेन वसुन्धरा ॥ देवतायतनार्थाय दत्ता तस्मै तपस्विने ॥ २४ ॥ सर्वे कोपसमायुक्ताः सुशीलं
प्रति ते द्विजाः ॥ २५ ॥ ततः प्रोचुः समासाद्य येन शप्ता दुरात्मना ॥ वयं तस्मै त्वया दत्ता प्रासादार्थं वसुन्धरा ॥ २६ ॥ तस्मात्त्वमपि

१ वलिप्तानाम्—अवलिप्तानाम्—भागुरिमतेनाल्लोपः । अवलिप्तानां—सगर्वाणाम् ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चास्माकं बाह्य एव भविष्यसि ॥ सुशीलोऽपि हि दुःशीलो नाम्ना संकीर्त्यसे बुधैः ॥ २७ ॥ एषोऽपि तापसो दुष्टो यः करोति शिवालयम् ॥ नैव तस्य भवेत्सिद्धिश्चापि वर्षशतैरपि ॥ २८ ॥ तथा कीर्तिकृतां लोके कीर्तनं क्रियते नरैः ॥ ततः संपश्यतां चास्य कीर्तिर्नास्य तु दुर्मतेः ॥ ॥ २९ ॥ एष दुःशीलसंज्ञो वै तत्र नाम्ना भविष्यति ॥ प्रासादो नाममात्रेण न संपूर्णः कदाचन ॥ ३० ॥ यस्मात्सौहृदनिर्मुक्ताः कृतास्तेन वयं द्विजाः ॥ मदैस्त्रिभिः समायुक्ताः सर्वान्वयसमन्विताः ॥ ३१ ॥ तस्मादेषोऽपि पापात्मा भविष्यति स कोपभाक् ॥ ततं ततं तपो येन संप्रया स्यति संक्षयम् ॥ ३२ ॥ एवमुक्त्वाथ ते विप्राः कोपसंरक्तलोचनाः ॥ दुःशीलं संपरित्यज्य प्रविष्टाः स्वपुरे ततः ॥ ३३ ॥ दुःशीलोऽपि बहिश्चक्रे गृहं तस्य पुरस्य च ॥ देवशर्मा यथा पूर्वं संत्यक्तः पुरवासिभिः ॥ ३४ ॥ तस्यान्वयेऽपि ये जातास्ते बाह्याः संप्रकीर्तिताः ॥ बाह्याः क्रियासु सर्वासु सर्वेषां पुरवासिनाम् ॥ ३५ ॥ ॥ सूत उवाच ॥ ॥ एवं तेषु द्विजेंद्रेषु शापं दत्त्वा गतेषु च ॥ दुर्वासाः प्राह दुःशीलं कोपसंरक्तलोचनः ॥ ३६ ॥ मम सिद्धिं गता मंत्राः समर्थाः शत्रुसंक्षये ॥ आथर्वणास्तथा चान्ये वेदत्रयसमुद्भवाः ॥ ३७ ॥ तस्मादेतत्पुरं कृत्स्नं पशुपक्षिसमन्वितम् ॥ नाशमद्य नयिष्यामि यथा शत्रोर्हि दुष्टकः ॥ ३८ ॥ ॥ दुःशील उवाच ॥ ॥ नैतद्युक्तं नरश्रेष्ठ तव कर्तुं कथंचन ॥ ब्राह्मणानां कृते कर्म ब्राह्मणस्य विशेषतः ॥ ३९ ॥ निघ्नंतो वा शपंतो वा वदंतो वापि निष्ठुरम् ॥ पूजनीयाः सदा विप्रा दिव्यांल्लोकान भीप्सुभिः ॥ ४० ॥ ब्राह्मणैर्निर्जितैर्मेने य आत्मानं जयान्वितम् ॥ तामिस्रादिषु घोरेषु नरकेषु स पच्यते ॥ ४१ ॥ आत्मनश्च पराभूतिं तस्माद्विप्रात्सहेत वै ॥ य इच्छेद्वसतिं स्वर्गे शाश्वतीं द्विजसत्तम ॥ ४२ ॥ एतेषां ब्राह्मणेंद्राणां क्षेत्रे सिद्धिं समागताः ॥ मंत्रास्ते तत्कथं नाशं त्वमेतेषां करिष्यसि ॥ ४३ ॥ ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते तथा ॥ निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः ॥ ॥ ४४ ॥ तस्मात्कोपो न कर्तव्यः क्षेत्रे चात्र व्यवस्थितैः ॥ क्षमां कुरु मुनिश्रेष्ठ कृपां कृत्वा ममोपरि ॥ ४५ ॥ ॥ सूत उवाच ॥ ॥ स तथेति प्रतिज्ञाय तत्र कृत्वावसत्तपः ॥ प्राप्तश्च परमां सिद्धिं दुर्लभां त्रिदशैरपि ॥ ४६ ॥ दुःशीलाख्यः क्षितौ सोऽपि प्रासादः ख्यातिमागतः ॥ यस्य संदर्शनादेव नरः पापात्प्रमुच्यते ॥ ४७ ॥ तस्य मध्यगतं लिंगं शुक्लाष्टम्यां सदा नरः ॥ यः पश्यति क्षणं ध्यात्वा नरकं स न पश्यति ॥ ४८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये दुःशीलाख्यप्रासादोत्पत्तिवर्णनंनाम सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तत्रैव स्थापितं लिंगं धुन्धुमारेण भूभुजा ॥ सर्वरत्नमयं कृत्वा प्रासादं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





सुमनोहरम् ॥ १ ॥ तत्र कृत्वाऽऽश्रमं श्रेष्ठं तपस्तेपे सुदारुणम् ॥ यत्प्रभावादयं देवस्तस्मिँल्लिङ्गे व्यवस्थितः ॥ २ ॥ तस्य संनिहिता वापी कृता तेन महात्मना ॥ सुनिर्मलजलापूर्णा सर्वतीर्थोपमा शुभा ॥ ३ ॥ धुन्धुमारेश्वरं पश्येत्तत्र स्नात्वा नरोत्तमः ॥ न स पश्यति दुर्गाणि नरकाणि यमालये ॥ ४ ॥ ॥ ऋषय ऊचुः ॥ ॥ धुंधुमारो महीपालः कस्मिन्वंशे बभूव सः ॥ कस्मिन्काले तपस्तप्तं तेनात्र सुमहात्मना ॥ ५ ॥ ॥ सूत उवाच ॥ ॥ सूर्यवंशसमुद्भूतो बृहदश्वसुतो बली ॥ ख्यातः कुवलयाश्वेति धंधुमारस्तथैव सः ॥ ६ ॥ तेन धुन्धुर्महादैत्यो निहतो मरुजांगले ॥ धुन्धुमारः स्मृतस्तेन विख्यातो भुवनत्रये ॥ ७ ॥ चमत्कारपुरं क्षेत्रं स गत्वा पावनं महत् ॥ तपस्तेपे वयोंऽते च ध्यायमानो महेश्वरम् ॥ ८ ॥ संस्थाप्य सुमहल्लिंगं प्रासादे रत्नमंडिते ॥ बलिपूजोपहाराद्यैः पुष्पधूपानुलेपनैः ॥ ९ ॥ ततस्तस्य महादेवः स्वयमेव महेश्वरः ॥ प्रत्यक्षोऽभूद्वृषारूढो गौर्या सह तथा गणैः ॥ १० ॥ उवाच वरदोऽस्मीति प्रार्थयस्व यथेप्सितम् ॥ सर्वं तेऽहं प्रदास्यामि यद्यपि स्यात्सुदुर्लभम् ॥ ११ ॥ ॥ धुन्धुमार उवाच ॥ ॥ यदि देयो वरोऽस्माकं त्वया सर्वसुरेश्वर ॥ संनिधानं प्रकर्तव्यं लिंगेऽस्मिन्वृषभध्वज ॥ १२ ॥ ॥ श्रीभगवानुवाच ॥ ॥ चैत्रे शुक्लचतुर्दश्यां सांनिध्यं नृपसत्तम ॥ अहं सदा करिष्यामि गौर्या सार्धं न संशयः ॥ १३ ॥ तत्र वाप्यां नरः स्नात्वा यो मां संपूजयिष्यति ॥ लिंगेऽस्मिन्संस्थितं भूप मम लोकं स यास्यति ॥ १४ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वा स भगवांस्ततश्चादर्शनं गतः ॥ सोऽपि राजा प्रहृष्टात्मा स्थितस्तत्रैव मुक्तिभाक् ॥ १५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये धुन्धुमारेश्वरमाहात्म्यवर्णनंनामाष्टात्रिंशोऽध्यायः ॥ ३८ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तस्यैवोत्तरदिग्भागे धुन्धुमारेश्वरस्य च ॥ ययातिना नरेंद्रेण स्थापितं लिंगमुत्तमम् ॥ १ ॥ देवयान्या तथान्यच्च तथा शर्मिष्ठया द्विजाः ॥ भार्यया भूपतेस्तस्य सर्वकाम[1]फलप्रदम् ॥ २ ॥ स यदा सर्वभोगानां तृप्तिं प्राप्तो द्विजोत्तमाः ॥ तदा पुत्रस्य राज्यं स्वं वपुश्चैव न्यवेदयत् ॥३॥ जरामादाय तद्गात्राद्भार्याभ्यां सहितस्तदा ॥ पप्रच्छ विनयोपेतो मार्कंडं मुनिसत्तमम् ॥ ४ ॥ भगवन्सर्वतीर्थानां क्षेत्राणां च वदस्व मे ॥ यत्प्रधानं पवित्रं यत्तदस्माकं प्रकीर्तय ॥ ५ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ क्षेत्राणामिह सर्वेषां तीर्थैः सर्वैरलंकृतम् ॥ चमत्कारपुरं क्षेत्रं सांप्रतं प्रतिभाति नः ॥ ६ ॥ यत्र विष्णुपदी गंगा जंतूनां पापनाशिनी ॥ स्वयं स्थिता नृपश्रेष्ठ तथा देवा हरादयः ॥ ७ ॥ तथान्यानि च तीर्थानि यानि संति धरातले ॥ तेषां यत्र च

१ सर्वकामप्रदं नृणाम्—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सांनिध्यं सर्वदा नृपसत्तम ॥ ८ ॥ शिला यत्र द्विपञ्चाशद्धस्तानां परिसंख्यया ॥ पितामहेन निर्मुक्ता प्रमोदाय द्विजन्मनाम् ॥ ९ ॥ यदन्यत्र शुभं कर्म वर्षेणैकेन सिध्यति ॥ तत्तत्र दिवसेनापि सिद्धिं याति क्षितीश्वर ॥ १० ॥ तस्मात्तत्र द्रुतं गत्वा तपः कुरु महीपते ॥ येन प्राप्स्यसि चित्तस्थाँल्लोकान्भार्यासमन्वितः ॥ ११ ॥ तस्य तद्वचनं श्रुत्वा स राजा नहुषात्मजः ॥ चमत्कारपुरे क्षेत्रे भार्याभ्यां सहितो ययौ ॥ १२ ॥ ततः संस्थाप्य तल्लिंगं देवदेवस्य शूलिनः ॥ सम्यगाराधयामास श्रद्धया परया युतः ॥ १३ ॥ ततस्तस्य प्रभावेन भार्याभ्यां सहितो नृपः ॥ विमानवरमारूढो जगाम त्रिदिवालयम् ॥ १४ ॥ किन्नरैर्गीयमानश्च स्तूयमानश्च चारणैः ॥ स्पर्द्धमानः समं देवैर्द्वादशार्कसमप्रभः[1] ॥ १५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये ययातीश्वरमाहात्म्यवर्णनंनामैकोनचत्वारिंशोऽध्यायः॥ ॥ ३९ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ यदेषा भवता प्रोक्ता ब्राह्मी तत्र महाशिला ॥ मोक्षदा सर्वजंतूनां तथा पातकनाशिनी ॥ १ ॥ सा कथं स्थापिता तत्र किंप्रभावा च सूतज ॥ एतन्नो ब्रूहि निःशेषं न हि तृप्यामहे वयम् ॥ २ ॥ ॥ सूत उवाच ॥ ॥ ब्रह्मलोकनिविष्टस्य ब्रह्मणोऽव्यक्तजन्मनः ॥ पुराऽभून्महती चिन्ता तीर्थयात्रासमुद्भवा ॥ ३ ॥ सर्वेषामेव देवानां संति तीर्थानि भूतले ॥ मुक्त्वा मां तन्मया कार्यं तीर्थमेकं धरातले ॥ ४ ॥ यत्र त्रिकालमासाद्य कर्म संध्यासमुद्भवम् ॥ मर्त्यलोकं समासाद्य करोमि तदनंतरम् ॥ ५ ॥ तथान्यदपि यत्किञ्चित्कर्म धर्म्यं हितावहम् ॥ तत्करोमि यथान्येऽपि चक्रुर्देवाः शिवादयः ॥ ६ ॥ न स्वर्गेऽस्ति हि कृत्यानामधिकारोऽत्र कश्चन ॥ शुभानां कर्मणामेव केवलं भुज्यते फलम् ॥ ७ ॥ तस्माद्यत्र धरापृष्ठे शिलेयं निपतिष्यति ॥ त्रिसंध्यं तत्र गन्तव्यमनुष्ठानार्थमेव हि ॥ ८ ॥ एवमुक्त्वा सुविस्तीर्णां शिलां तामासनोद्भवाम् ॥ प्रचिक्षेप धरापृष्ठं[2] समुद्दिश्य पितामहः ॥ ९ ॥ अथ सा पतिता भूमौ सर्वरत्नमयी शिला ॥ चमत्कारपुरे क्षेत्रे सर्वक्षेत्रमहोदये ॥ १० ॥ तत आगत्य लोकेशः स्वयमेव धरातलम् ॥ तत्क्षेत्रं वीक्षयामास व्याप्तं तीर्थैः समन्ततः ॥ ११ ॥ ततः पुण्यतमे देशे दृष्ट्वा तां समुपस्थिताम् ॥ शिलामानंदमापन्नः प्रोवाच तदनन्तरम् ॥ १२ ॥ अहो धन्यतमो मत्तो नान्योऽस्ति भुवनत्रये ॥ सर्वतीर्थमये क्षेत्रे यतो जातात्र संस्थितिः ॥ १३ ॥ सलिलेन विना यस्मान्न क्रिया संप्रवर्तते ॥ तस्मादत्र मया कार्यः शुचितोयो महाह्रदः ॥ १४ ॥ ततः संचिंतयामास स्वसुतां च सरस्वतीम् ॥ जनसंस्पर्शभीत्या च पातालतलवाहिनीम् ॥ १५ ॥ अथ भूमितलं भित्त्वा प्रादुर्भूता महानदी ॥ तां शिलाममलैस्तोयैः क्षालयन्ती समंततः ॥ १६ ॥

१ द्वादशार्कसमद्युतिः--इ० पा० । २ धरापृष्ठे--इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



अथ मूर्तिमती भूत्वा प्रोवाच प्रपितामहम् ॥ किमर्थं संस्मृता देव ममादेशः प्रदीयताम् ॥१७॥ ॥ ब्रह्मोवाच ॥ ॥ त्वयात्रैव सदा स्थेयं शिलायां मम
संनिधौ ॥ संध्यात्रयेऽपि त्वत्तोयैर्येन कृत्यं करोम्यहम् ॥ १८ ॥ तथा ये मानवाः स्नानं करिष्यंति जले तव ॥ ते यास्यंति परां सिद्धिं दुर्लभां देव
मानुषैः ॥ १९ ॥ ॥ सरस्वत्युवाच ॥ ॥ अहं कन्या सुरश्रेष्ठ पातालतलवाहिनी ॥ जनस्पर्शभयाद्भीता नागच्छामि महीतले ॥ २० ॥ तवा
देशोऽन्यथा नैव मया कार्यः कथंचन ॥ एवं मत्वा सुरश्रेष्ठ यद्युक्तं तत्समाचर ॥ २१ ॥ ॥ ब्रह्मोवाच ॥ ॥ तवार्थे कल्पयिष्यामि स्थानेऽत्रैव
महाह्रदम् ॥ अगम्यं सर्वमर्त्यानां तत्र त्वं स्थातुमर्हसि ॥ २२ ॥ एवमुक्त्वा स देवेशश्चखान च महाह्रदम् ॥ ततः सरस्वती तत्र स्वस्थानमकरो
दथ ॥ २३ ॥ ततो दृष्टिविषान्सर्पानादिदेश पितामहः ॥ युष्माभिः सर्वदा स्थेयं ह्रदेस्मिञ्छासनान्मम ॥ २४ ॥ यथा सरस्वतीं मर्त्या न स्पृशंति
कथंचन ॥ भवद्भिः सर्वथा कार्यं तथा पन्नगसत्तमाः ॥ २५ ॥ ॥ सूत उवाच ॥ ॥ एवं ब्रह्मा व्यवस्थाप्य तत्र क्षेत्रे सरस्वतीम् ॥ तां च चित्र
शिलां मध्ये ब्रह्मलोकं जगाम ह ॥ २६ ॥ अथ मंकणकोनाम महर्षिः संशितव्रतः ॥ क्षेत्रे तत्र समायातो विषविद्याविचक्षणः ॥ २७ ॥ स क्रमा
द्भ्रममाणस्तु तस्मिन्सर्पाभिरक्षिते ॥ तं मुनिं वेष्टयामासुर्बन्धुश्चैव पाशकैः ॥ २८ ॥ सोऽपि विद्याबलात्सर्पान्निर्विषांस्तांश्चकार ह ॥ तत्र स्नात्वा
शुचिर्भूत्वा कृत्वा च पितृतर्पणम् ॥ निष्क्रांतः सलिलात्तस्मात्कृतकृत्यो मुदान्वितः ॥ २९ ॥ ततश्चक्रे मुनिर्यावत्सम्यक्कुशपरिग्रहम् ॥ दर्भाग्रेणास्य
हस्ताग्रं पाटितं तावदेव हि ॥ ३० ॥ अथ तस्मात्क्षताज्जातस्तस्य शाकरसो महान् ॥ तं दृष्ट्वा स विशेषेण हर्षितो विस्मयान्वितः ॥ ३१ ॥
सिद्धोऽहमिति विज्ञाय नृत्यं चक्रे ततः परम् ॥ ब्राह्मीं शिलां समारुह्य आनंदाश्रुपरिप्लुतः ॥ ३२ ॥ अथैवं नृत्यमानस्य मुनेस्तस्य महात्मनः ॥
लास्यं चक्रे ततः सर्वं जगत्स्थावरजंगमम् ॥ ३३ ॥ चमत्कारपुरं कृत्स्नं भग्नं नष्टा द्विजोत्तमाः ॥ प्रासादैर्ध्वंसितैस्तत्र हाहाकारो महानभूत् ॥३४॥
ततो देवगणाः सर्वे तद्दृष्ट्वा तस्य चेष्टितम् ॥ लास्यस्य वारणार्थाय प्रोचुर्वृषभवाहनम् ॥ ३५ ॥ अनेन नृत्यमानेन जगत्स्थावरजंगमम् ॥ नृत्यं
करोति देवेश तस्माद्गत्वा निवारय ॥ ३६ ॥ नान्यः शक्तः सुरश्रेष्ठ मुनिमेनं कथंचन ॥ निषेधयितुमीशान ततः कुरु जगद्धितम् ॥ ३७ ॥ अथ
तेषां वचः श्रुत्वा भगवान्वृषभध्वजः ॥ कृत्वा रूपं द्विजेंद्रस्य तत्सकाशमुपाद्रवत् ॥ ३८ ॥ अब्रवीच्च मुने कस्मात्त्वयैतन्नृत्यतेऽधुना ॥ तस्मा
त्कार्यं वदाशु त्वं परं कौतूहलं हि नः ॥ ३९ ॥ एवमुक्तः स विप्रेंद्रः शंकरेण द्विजोत्तमाः ॥ हस्तं संदर्शयामास तस्य शाकरसान्वितम् ॥ ४० ॥



१ पातालात्—इ० पा० । २ ब्रह्मर्षिः—इ०पा० । ३ क्षेत्रे समंततः—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किं न पश्यसि मे ब्रह्मन्कराच्छाकरसो महान् ॥ संजातः क्षतवक्रेण तस्मात्सिद्धिरुपस्थिता ॥ ४१ ॥ एतस्मात्कारणाद्विप्र नृत्यमेतत्करोम्यहम् ॥ आनंदं परमं प्राप्य सिद्धिजं सिद्धसत्तम ॥ ४२ ॥ एवं तु वदतस्तस्य भगवान्वृषभध्वजः ॥ अंगुष्ठं ताडयामास स्वांगुल्यग्रेण तत्क्षणात् ॥ ४३ ॥ निश्चक्राम ततो भस्म हिमस्फटिकसंनिभम् ॥ क्षताग्रात्सहसा तस्य महाविस्मयकारकम् ॥ ४४ ॥ ततः प्रोवाच तं विप्रं स देवो द्विजसत्तमाः ॥ यस्यांगुष्ठाग्रतो मह्यं निष्क्रांतं भस्म पांडुरम् ॥ ४५ ॥ तथाप्यहं मुनिश्रेष्ठ न नृत्यं कर्तुमुत्सहे ॥ त्वं पुनर्नृत्यसे कस्मादपि शाकरसेक्षणात् ॥ ॥ ४६ ॥ विरामं कुरु तस्मात्त्वं नृत्यादस्माद्विगर्हितात् ॥ तपः क्षरति विप्रेन्द्र नृत्यगीताद्विजन्मनः ॥ ४७ ॥ अथासौ तत्समुद्वीक्ष्य क्षताद्भस्मविसर्जनम् ॥ नृत्यं व्रीडान्वितस्त्यक्त्वा तस्य चक्रे नमस्कृतिम् ॥ ४८ ॥ अब्रवीत्त्वामहं मन्ये नान्यं देवान्महेश्वरात् ॥ तस्मात्कुरु प्रसादं मे यथा न स्यात्तपःक्षतिः ॥ ४९ ॥ ॥ श्रीभगवानुवाच ॥ ॥ तपस्ते मत्प्रसादेन वृद्धिं यास्यति नित्यशः ॥ स्थानेऽत्र भवता सार्धमहं स्थास्यामि सर्वदा ॥ ५० ॥ आनन्दितेन भवता प्रार्थितोऽहं यतो मुने ॥ आनन्देश्वरसंज्ञस्तु ख्यातिं यास्यामि भूतले ॥ एतत्पुरं च मे नाम्ना आनन्दाख्यं भविष्यति ॥ ५१ ॥ एवमुक्त्वा महादेवो गतश्चादर्शनं ततः ॥ सोऽपि मंकणकस्तत्र तपस्तेपे मुनीश्वरः ॥ ५२ ॥ अथ ते पन्नगाः प्रोचुः प्रणिपत्य मुनीश्वरम् ॥ भगवन्निर्विषाः सर्वे वयं हि भवता कृताः ॥ ५३ ॥ तस्मात्कुरु प्रसादं नो यथा स्याद्दारुणं विषम् ॥ नो चेद्वयं गमिष्यामः सर्वलोकपराभवम् ॥ ५४ ॥ ॥ मंकणक उवाच ॥ ॥ अनृतं न मया प्रोक्तं स्वैरेणापि कदाचन ॥ तस्मादेवंविधाः सर्वे जलसर्पा भविष्यथ ॥ ५५ ॥ ॥ ॥ सूत उवाच ॥ ॥ ततःप्रभृति संजाता जलसर्पा महीतले ॥ तद्वद्रूपा द्विजिह्वाश्च केवलं विषवर्जिताः ॥ ५६ ॥ अथ तस्मिन्ह्रदे मर्त्याः स्नात्वा सारस्वते शुभे ॥ स्पृष्ट्वा चित्रशिलां तां च प्रयांति परमां गतिम् ॥ ५७ ॥ अथ भीतः सहस्राक्षो गत्वा देवं पितामहम् ॥ यमेन सहितस्तूर्णं प्रोवाचेदं वचस्तदा ॥ ५८ ॥ त्वत्प्रसादात्समुद्वीक्ष्य गच्छंति मनुजा दिवम् ॥ पितामह महातीर्थं यत्त्वया विहितं क्षितौ ॥ सारस्वतं नरास्तत्र स्नात्वा यांति त्रिविष्टपम् ॥ ५९ ॥ अपि पापसमाचाराः सर्वधर्मबहिष्कृताः ॥ तत्र स्नात्वा शिलां स्पृष्ट्वा तदैवायांति सद्गतिम् ॥ ६० ॥ ॥ यम उवाच ॥ ॥ अप्रमाणं विभो कर्म संप्रयातं ममोचितम् ॥ शुभाशुभपरिज्ञानं सर्वेषामेव देहिनाम् ॥ ६१ ॥ तस्मात्त्यज त्वं मां देव यद्वा तत्तीर्थमुत्तमम् ॥ यत्प्रभावाज्जनैर्हीनाः संजाता नरका मम ॥ ६२ ॥ तस्य तद्वचनं श्रुत्वा यमस्य प्रपितामहः ॥ प्राह पार्श्वस्थितं शक्रं तत्तीर्थं नय

१ मह्यम्—मम—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



संक्षयम् ॥ ६३ ॥ ततः शक्रो ह्रदं गत्वा पूरयामास पांसुभिः ॥ ह्रदं सारस्वतं तं च तां च चित्रशिलां द्विजाः ॥ ६४ ॥ अद्यापि मनुजः सम्यक्त
स्मिन्स्थाने व्यवस्थितः ॥ यः करोति तपश्चर्यां स शीघ्रं सिद्धिमाप्नुयात् ॥ ६५ ॥ सोऽपि मंकणकस्तत्र सार्द्धं देवेन शंभुना ॥ तिष्ठत्यद्यापि
विप्रेंद्र पूरितं चैव पांसुभिः ॥ ६६ ॥ लिंगं मंकणकन्यस्तं तत्रास्ति सुमहोदयम् ॥ तत्स्पृष्ट्वा मानवाः पापैर्मुच्यंते द्विजसत्तमाः ॥ ६७ ॥ माघ
शुक्लचतुर्दश्यां यस्तं पूजयते नरः ॥ स पापैरपि संयुक्तः शिवलोके महीयते ॥ ६८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहि
तायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये चित्रशिलामाहात्म्यवर्णनंनाम चत्वारिंशोऽध्यायः ॥ ४० ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥
तस्यैवोत्तरदिग्भागे देवस्य जलशायिनः ॥ स्थानमस्ति सुविख्यातं सर्वपातकनाशनम् ॥ १ ॥ यस्तत्पूजयते भक्त्या शयने बोधने हरेः ॥ उप
वासपरो भूत्वा स गच्छेद्वैष्णवं पदम् ॥ २ ॥ अशून्यशयनानाम द्वितीया दयिता तिथिः ॥ सदैव देवदेवस्य कृष्णा सुतस्य या भवेत् ॥ ३ ॥ तस्यां
यः पूजयेत्तत्र तं देवं जलशायिनम् ॥ शास्त्रोक्तेन विधानेन स गच्छति हरेः पदम् ॥ ४ ॥ ॥ ऋषय ऊचुः ॥ ॥ जलशायी कथं तत्र संप्राप्तः
सूतनन्दन ॥ पूज्यते विधिना केन तत्सर्वं विस्तराद्वद ॥ ५ ॥ ॥ सूत उवाच ॥ ॥ पुरासीद्वाष्कलिर्नाम दानवेन्द्रो महाबलः ॥ अजेयः सर्वदेवानां
गन्धर्वोरगरक्षसाम् ॥ ६ ॥ अथासौ भूतलं सर्वं वशीकृत्वा महाबलः ॥ ततो दैत्यगणैः सार्द्धं जगाम त्रिदशालयम् ॥ ७ ॥ तत्राभवन्महायुद्धं
देवासुरविनाशकम् ॥ देवानां दानवानां च क्रुद्धानामितरेतरम् ॥ ८ ॥ वर्षाणामयुतं तावदहन्यहनि दारुणम् ॥ तत्रासृक्कर्दमो जातः पर्वतश्चास्थि
संभवः ॥ ९ ॥ ततो वर्षसहस्रांते दशमे समुपस्थिते ॥ जितस्तेन सहस्राक्षः ससैन्यः सपरिग्रहः ॥ १० ॥ ततः स्वर्गं परित्यज्य
सर्वदेवगणैः सह ॥ जगाम शरणं विष्णोः श्वेतद्वीपं प्रतिश्रयम् ॥ ११ ॥ यत्रास्ते भगवान्विष्णुर्योगनिद्रावशंगतः ॥ शयानः
शेषपर्यंके लक्ष्म्या संवाहितांघ्रियुक् ॥ १२ ॥ ततो वेदोद्भवैः सूक्तैः स्तुतिं चक्रुः समंततः ॥ तस्य देवस्य सद्भक्ताः सर्वे देवाः सवासवाः ॥ १३ ॥
अथोत्थाय जगन्नाथः प्रोवाच बलसूदनम् ॥ कच्चित्क्षेमं सहस्राक्ष सांप्रतं भुवनत्रये ॥ यत्त्वं देवगणैः सार्द्धं स्वयमेव इहागतः ॥ १४ ॥ ॥ शक्र
उवाच ॥ ॥ बाष्कलिर्नाम दैत्येन्द्रो हरलब्धवरो बली ॥ अजेयः संगरे देवैस्तेनाहं विजितो रणे ॥ १५ ॥ संस्थितिश्च कृता स्वर्गे सांप्रतं मधु
सूदन ॥ तेनैष शरणं प्राप्तो देवैः सार्द्धं सुरोत्तम ॥ १६ ॥ हिरण्याक्षभयाद्देवा हिरण्यकशिपोः पुरा ॥ त्वया त्राता वयं सर्वे तथान्येषां दुरात्म
नाम् ॥१७॥ तस्मादस्मादपि त्राहि दानवाद्बलवत्तरात् ॥ बाष्कलेर्नास्ति देवेश त्वां मुक्त्वान्या परा गतिः ॥१८॥ ॥ श्रीभगवानुवाच ॥ ॥ अहं ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तं निग्रहीष्यामि संप्राप्ते समये स्वयम् ॥ तस्मात्त्वं समयंयावत्कुरु शक्र तपो महत् ॥ १९ ॥ येन ते जायते शक्तिस्तपोवीर्येण वासव ॥ वधाय तस्य दैत्यस्य बलयुक्तस्य बाष्कलेः ॥ २० ॥ ॥ शक्र उवाच ॥ ॥ कस्मिन्क्षेत्रे जगन्नाथ करोमि सुमहत्तपः ॥ तस्य दैत्यस्य नाशार्थं तदस्माकं प्रकीर्तय ॥ २१ ॥ ॥ सूत उवाच ॥ ॥ तच्छ्रुत्वा भगवान्विष्णुः प्रोवाचाथ पुरंदरम् ॥ चिरं मनसि निश्चित्य क्षेत्राण्यायतनानि च ॥ २२ ॥ चमत्कारपुरं क्षेत्रं शक्र सिद्धिप्रदायकम् ॥ तस्मात्तत्र द्रुतं गत्वा तद्वधार्थं तपः कुरु ॥ २३ ॥ ॥ शक्र उवाच ॥ ॥ न वयं भवता हीना यास्यामोऽन्यत्र केशव ॥ बाष्कलेर्दानवेन्द्रस्य भयाद्भीताः कथंचन ॥ २४ ॥ तस्मादागच्छ तत्र त्वं स्वयमेव सुरेश्वर ॥ त्वया संरक्षितो येन करोमि सुमहत्तपः ॥ २५ ॥ ॥ सूत उवाच ॥ ॥ ततः स भगवान्विष्णुस्तथेत्युक्त्वा सुरैः सह ॥ चमत्कारपुरं क्षेत्रमाजगाम सह श्रिया ॥ ॥ २६ ॥ अथ देवगणाः सर्वे तत्र गत्वा तदाऽऽश्रमान् ॥ चक्रुः पृथक्पृथग्हृष्टास्तपोऽर्थं कृतनिश्चयाः ॥ २७ ॥ वासुदेवोऽपि संस्मृत्य क्षीरोदं तत्र सागरम् ॥ आनिनायाशु विस्तीर्णं ह्रदे तस्मिन्पुरातने ॥ २८ ॥ चकार शयनं तत्र श्वेतद्वीपे यथा पुरा ॥ स्तूयमानः सुरैः सर्वैः समंताद्विनयान्वितैः ॥ २९ ॥ अथाषाढस्य संप्राप्ते द्वितीयादिवसे शुभे ॥ कृष्णपक्षे सहस्राक्षं स्वयमेव बृहस्पतिः ॥ प्रोवाच वचनं श्लक्ष्णं बाष्पव्याकुललोचनम् ॥ ३० ॥ ॥ बृहस्पतिरुवाच ॥ ॥ अशून्यशयनानाम द्वितीयाद्य पुरंदर ॥ अतीव दयिता विष्णोः प्रसुप्तस्य जलाशये ॥ ३१ ॥ अस्यां संपूजितो विष्णुर्यावन्मासचतुष्टयम् ॥ ददाति सकलान्कामान्ध्यातश्चेतसि सर्वदा ॥ शास्त्रोक्तविधिना सम्यग्व्रतस्थो जलशायिनम् ॥ ३२ ॥ एवं स चतुरो मासान्द्वितीयादिवसे हरिम् ॥ पूजयित्वा सहस्राक्षस्तेजसा सहितोऽभवत् ॥ ३३ ॥ तं दृष्ट्वा तेजसा युक्तं परितुष्टो जनार्दनः ॥ प्रोवाच शक्र गच्छाद्य वधार्थं तस्य बाष्कलेः ॥ सर्वैर्देवगणैः सार्धं विजयस्ते भविष्यति ॥ ३४ ॥ ॥ शक्र उवाच ॥ ॥ बिभेमि तस्य देवाहं दानवेन्द्रस्य दुर्मतेः ॥ त्वया विना न गच्छामि सार्धं सर्वैः सुरैरपि ॥ ३५ ॥ ॥ श्रीभगवानुवाच ॥ ॥ त्वया सह सहस्राक्ष चक्रमेतत्सुदर्शनम् ॥ गमिष्यति वधार्थाय मदीयं सुरविद्विषाम् ॥ ३६ ॥ एवमुक्त्वा हरिश्चक्रं प्रमुमोच सुदर्शनम् ॥ वधार्थं दानवेन्द्राणां शक्रेण सहितं तदा ॥ ३७ ॥ शक्रोऽपि सहितस्तेन गत्वा चक्रेण कृत्स्नशः ॥ सर्वानुत्सादयामास दानवान्रणमूर्धनि ॥ ३८ ॥ स चापि बाष्कलिस्तेन च्छिन्नश्चक्रेण कृत्स्नशः ॥ पपात धरणीपृष्ठे वज्राहत इवाचलः ॥ ३९ ॥ तथान्ये बहवः शूरा दानवा बलदर्पिताः ॥ हत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सुदर्शनं चक्रं[1] भूयः प्राप्तं हरेः करम् ॥ ४० ॥ तेऽपि शक्रादयो देवाः प्रहृष्टा गतसंशयाः ॥ भूयो विष्णुं समेत्याथ प्रोचुर्नत्वा ततः परम् ॥ ४१ ॥ प्रभावात्तव देवेश हताः सर्वेऽमरारयः ॥ प्राप्तं त्रैलोक्यराज्यं च भूयो निहतकंटकम् ॥ ४२ ॥ तस्मात्कीर्तय यत्कृत्यं तच्च श्रेयस्करं मम ॥ सदा स्यात्पुंडरीकाक्ष तथा शत्रुभयावहम् ॥ ४३ ॥ ॥ श्रीभगवानुवाच ॥ ॥ मयात्रैव सदा स्थेयं रूपेणानेन वासव ॥ सर्वलोकहितार्थाय ह्रदे पुण्य जलाश्रये ॥ ४४ ॥ त्वया तस्मात्समागम्य चातुर्मास्यं शचीपते ॥ प्रयत्नेन प्रकर्तव्यमशून्यशयनं व्रतम् ॥ ४५ ॥ न भवंति सहस्राक्ष येन ते परिपंथिनः ॥ तथाभीष्टफलावाप्तिर्मत्प्रसादादसंशयम् ॥ ४६ ॥ अन्योऽपि यो नरो भक्त्या पूजयिष्यति मामिह ॥ संप्राप्स्यति स ताँल्लोकान्दुर्लभांस्त्रिदशैरपि ॥ ४७ ॥ तस्माद्गच्छ सहस्राक्ष कुरु राज्यं त्रिविष्टपे ॥ भूयोऽप्यत्रैव देवेश द्रष्टव्योऽस्मि न संशयः ॥ कार्यकाले समायाते श्वेतद्वीपे यथा तथा ॥ ४८ ॥ ॥ सूत उवाच ॥ ॥ ततः प्रणम्य तं दृष्ट्वा प्रजगाम शतक्रतुः ॥ वासुदेवोऽपि तत्रैव स्थितो लोकहिताय च ॥ ४९ ॥ एवं तत्र द्विजश्रेष्ठा जलशायी जनार्दनः ॥ सर्वलोकहितार्थाय संस्थितः परमेश्वरः ॥ ५० ॥ यस्तं पूजयते भक्त्या श्रद्धया परया युतः ॥ चातुर्मास्ये विशेषेण स याति परमां गतिम् ॥ ५१ ॥ तथा देवगणैः सर्वैर्द्वारका तत्र सा कृता ॥ संपूज्य तु नरा यांति चातुर्मास्ये त्रिविष्टपम् ॥ ५२ ॥ शेष कालेऽपि चित्तस्थान्कामान्मर्त्यः समाप्नुयात् ॥ तस्मात्सर्वप्रयत्नेन पूज्या सा द्वारका नरैः ॥ सर्वेष्वपि हि कालेषु चातुर्मास्ये विशेषतः ॥ ५३ ॥ एतद्वः सर्वमाख्यातं सर्वपातकनाशनम् ॥ आख्यानं देवदेवस्य सुपुण्यं जलशायिनः ॥ ५४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखंडे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये जलशाय्युत्पत्तिवर्णनंनामैकचत्वारिंशत्तमोऽध्यायः ॥ ४१ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ विश्वामित्रसमुद्भूतं कुण्डं तत्रापरं शुभम् ॥ संतिष्ठते द्विजश्रेष्ठाः सर्वकामप्रदायकम् ॥ १ ॥ तत्र चैत्रतृतीयायां कृते स्नाने भवेन्नरः ॥ दिव्यरूपधरः साक्षात्कामोऽन्यो द्विजसत्तमाः ॥ २ ॥ नारी वा श्रद्धयोपेता तत्र स्नात्वा प्रजावती ॥ भवेत्सौभाग्यसंयुक्ता स्पृहणीयतमा क्षितौ ॥ ३ ॥ ॥ ॥ ऋषय ऊचुः ॥ ॥ तीर्थं[2] तस्य[3] मुनेस्तत्र कस्मिन्काले व्यवस्थितम् ॥ निर्मलं केन निःशेषं वद त्वं सूतनंदन ॥ ४ ॥ ॥ सूत उवाच ॥ ॥ तत्रास्ति निर्झरः पूर्वं सामान्यो द्विजसत्तमाः ॥ अवधूतो धरापृष्ठे माहात्म्येन व्यवस्थितः ॥ ५ ॥ यत्र देवनदी गंगा स्वयमेव व्यवस्थिता ॥ यस्यां स्नातः पुमान्सद्यः सर्वपापैः प्रमुच्यते ॥ ६ ॥ यस्तत्र कुरुते श्राद्धं पितॄनुद्दिश्य भावितः ॥ तदक्षयं भवेच्छ्राद्धं पितॄणां तृप्तिकारकम् ॥ ७ ॥ यत्किं



१ तान्सर्वान्दानवान्—इति शेषः। २ तत्र—इ० पा०। ३ सूत—इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चिद्दीयते दानं तस्मिंस्तीर्थवरे द्विजाः ॥ हुतजप्यादिकं चैव तदनंतफलं भवेत् ॥ ८ ॥ कस्यचित्त्वथ कालस्य मृगी व्याधशराहता ॥ प्रविष्टा सलिले तस्मिंस्तत्र पञ्चत्वमागता ॥ ९ ॥ चैत्रशुक्लतृतीयायां मध्याह्ने द्विजसत्तमाः ॥ नक्षत्रे यमदैवत्ये मार्तंडस्य च वासरे ॥ १० ॥ अथ तत्तोयमाहात्म्यान्मेनकानाम साऽभवत् ॥ अप्सरास्त्रिदशेंद्रस्य समंताच्चारुहासिनी ॥ ११ ॥ स्मरमाणाऽथ सा तस्य प्रभावं वरवर्णिनी ॥ तीर्थमागत्य सद्भक्त्या स्नानं तत्र समाचरत् ॥ चैत्रशुक्लतृतीयायां यामर्क्षे सूर्यवासरे ॥ १२ ॥ एकदा दिवसे तस्मिन्भ्रममाणो मुनीश्वरः ॥ विश्वामित्र इति ख्यातस्तत्रायातस्तपोऽन्वितः ॥ १३ ॥ साऽपि स्वर्गात्समायाता देवतादर्शनार्थतः ॥ पूजयित्वाथ तं देवं प्रस्थिता त्रिदिवं प्रति ॥ १४ ॥ सा दृष्ट्वा तं मुनिं तत्र भ्रममाणमितस्ततः ॥ यौवनस्थं सुरूपाढ्यं पंचबाणमिवापरम् ॥ १५ ॥ व्रतप्रभावजैर्व्याप्तं तेजोभिर्भास्करं यथा ॥ बाल्यात्प्रभृति चीर्णेन तपसा दग्धकिल्बिषम् ॥ १६ ॥ सा तस्य दर्शनादेव कामबाणप्रपीडिता ॥ सानंदा सुरतार्थाय समीपं समुपाद्रवत् ॥ १७ ॥ स दृष्ट्वाऽदृष्टपूर्वां तां मार्गपृच्छाकृते ततः ॥ सम्मुखः प्रययौ तूर्णं प्रहृष्टेनांतरात्मना ॥ १८ ॥ उवाच देशं तां पृच्छन्स्त्रीधर्मांश्च विशेषतः ॥ शुभलाभोऽस्तु ते भद्रे मनसा कर्मणा गिरा ॥ १९ ॥ सदैव वासुदेवस्य भक्तिश्चाव्यभिचारिणी ॥ कच्चित्त्वं वर्तसे पुत्रि पतिपादपरायणा ॥ चारित्रविनयोपेता सर्वदा प्रियवादिनी ॥ २० ॥ कच्चित्त्वं सर्वदाभीष्टा पत्युर्दानैस्तथार्चनैः ॥ बंधून्स्वमित्रवर्गं च तत्पुरः पृष्ठतोपि वा ॥ २१ ॥ कच्चिद्भर्तरि संसुप्ते त्वं निद्रावशमेष्यसि ॥ उत्थानमप्रबुद्धे च करोषि वरवर्णिनि ॥ २२ ॥ कच्चित्प्रातः समुत्थाय करोषि गृहमार्जनम् ॥ स्वयमेव वरारोहे मण्डनं चोपमण्डनम् ॥ २३ ॥ कच्चिद्देवान्नमस्कृत्य गुरुं च तदनंतरम् ॥ करोषि त्वं प्राणयात्रां दत्त्वान्नं शक्तितो जलम् ॥ २४ ॥ कच्चिदस्तंगते सूर्ये नान्नमश्नासि भामिनि ॥ अदत्त्वा वा स्वभृत्येभ्यः साधुभ्यश्च विशेषतः ॥ २५ ॥ कच्चित्पिबसि पानीयं सप्तवारविशोधितम् ॥ निबिडेन स्ववस्त्रेण पालयंती जलोद्भवान् ॥ २६ ॥ कच्चिद्दयासमोपेता गात्रक्लेशकरानपि ॥ यूकामत्कुणदंशादीन्पुत्रवत्परिरक्षसि ॥ २७ ॥ कच्चित्साधुमुखान्नित्यं शिवधर्मं सुभक्तितः ॥ शृणोषि भक्तितो भद्रे प्रकरोषि च सादरम् ॥ २८ ॥ क्वचिच्छ्रुत्वाऽऽगमं पुण्यं प्रकरोषि च पूजनम् ॥ शास्त्रस्य वाचकस्यापि व्याख्यातुश्च विशेषतः ॥ २९ ॥ कच्चित्पुराणशास्त्राणि प्रणीतानि जनेश्वरैः ॥ संलेख्याक्षररम्याणि साधुभ्यः संप्रयच्छसि ॥ ३० ॥ यः श्रुत्वा सर्वशास्त्राणि निष्क्रयं न प्रयच्छति ॥ शास्त्रचौरः स विज्ञेयो न चैवाप्नोति तत्फलम् ॥ ३१ ॥ कच्चिच्छिवालये

१ चैत्रशुक्लद्वितीयायाम्–इ०पा० । २ अत्र–अंगानां चेष्टितं तस्या विशुद्धेनान्तरात्मना--इ०, अजानंश्चेष्टितं तस्या विशुद्धेनान्तरात्मना–इ० च पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



नृत्यगीतवाद्यादिकाः क्रियाः ॥ बलिपूजोपहारांश्च त्वं करोषि च शक्तितः ॥ ३२ ॥ कच्चित्प्रावरणं वस्त्रं सुभगे सर्वमेव च ॥ संप्रयच्छसि साधुभ्यः प्रणिपातपुरःसरम् ॥ ३३ ॥ वृथा पर्यटनं नित्यं कच्चिन्न परमंदिरे ॥ त्वं करोषि विशालाक्षि विशेषेण निशागमे ॥ ३४ ॥ कच्चिन्नाश्नासि भद्रे त्वं स्वभर्तरि बुभुक्षिते ॥ आज्ञाभंगं प्रयत्नेन कच्चित्तन्न प्ररक्षसि ॥ ३५ ॥ कच्चित्प्रकुपिते कांते नोत्तराणि प्रयच्छसि ॥ तस्य कोपप्रणाशार्थं प्रियं कच्चिच्च जल्पसि ॥ ३६ ॥ कच्चित्त्वं प्रोषिते कांते मलिनांबरधारिणी ॥ जायसे च तथा दीना विवर्णवदना कृशा ॥ ३७ ॥ कच्चिन्मंदिरपृष्ठे त्वं न धत्से भिन्नभाजनम् ॥ उच्छिष्टं वा जनैस्त्यक्तमपि कार्योपकारकम् ॥ ३८ ॥ कच्चिद्व्रजसि नो रात्रौ जागरेषु कथासु च ॥ निर्झरेषु विविक्तेषु पुलिनेषु वनेषु च ॥ ३९ ॥ कच्चिन्न कुरुषे मैत्रीं बंधकीभिः[1] समं शुभे ॥ धात्रीभिर्मालिकस्त्रीभी रजकीभिश्च भामिनि ॥ ४० ॥ कच्चिद्दधासि नित्यं त्वं मुखं कुंकुमरंजितम् ॥ शिरः पुष्पसमाकीर्णं नेत्रे कज्जलरंजिते ॥ ४१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये विश्वामित्रकुण्डोत्पत्तिवृत्तान्ते विश्वामित्रमेनकासमागमवर्णनंनाम द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥ ॥ छ ॥ ॥ मेनकोवाच ॥ ॥ अन्यास्ता नायिका विप्र यासां धर्मस्त्वयोदितः ॥ स्वेच्छाचारविहारिण्यो वयं वेश्या दिवौकसाम् ॥ १ ॥ स त्वं वद महाभाग कस्माद्देशात्समागतः ॥ मम चित्तहरो वापि तीर्थे धर्मिष्ठसंश्रये ॥ २ ॥ त्वां दृष्ट्वाहं महाभाग कामदेवसमाकृतिम् ॥ पुलकांचितसर्वांगी कामबाणप्रपीडिता ॥ ३ ॥ तस्माद्भजस्व मां रक्तां नो चेद्यास्यामि संक्षयम् ॥ कामबाणप्रदग्धा वै पुरोऽपि तव तापस ॥ ततः स्त्रीवधपापेन लिप्यसे त्वं न संशयः ॥ ४ ॥ ॥ तापस उवाच ॥ ॥ वयं व्रतधराः सुभ्रु ब्रह्मचर्यपरायणाः ॥ मूर्खाः कामविधौ भद्रे निरताः शिवशासने ॥ ५ ॥ सर्वेषां व्रतिनां मूलं ब्रह्मचर्यमुदाहृतम् ॥ विशेषाच्छिवभक्तानामेवं भूयो विधास्यसि[2] ॥ ६ ॥ अपि वर्षशतं साग्रं यत्तपः कुरुते व्रती ॥ सकृत्स्त्रीसंगमान्नाशं याति पाशुपतस्य च ॥ ७ ॥ मां च पाशुपतं लुब्धा कस्मात्त्वं भीरु भाषसे ॥ ईदृक्पापतमं कर्म गर्हितं शिवशासने ॥ ८ ॥ यः स्त्रीं भजति पापात्मा वृथा पाशुपतव्रती ॥ सोऽतीतान्दश चाधाय पुरुषान्नरके पचेत् ॥ ९ ॥ आस्तां तावत्समासंगं संस्पर्शं च वरानने ॥ संभाषमपि पापाय स्त्रीभिः पाशुपतस्य च[3] ॥ १० ॥ तस्माद्द्रुततरं गच्छ स्थानादस्माद्वरांगने ॥ यत्रावाप्स्यसि चाभीष्टं

१ बंधकीभिः—कुलटाभिः—दुराचारिणीभिः स्त्रीभिः—इत्यर्थः । २ एवं भूयो विधास्यसि—एवं ज्ञात्वा अग्रे यत्कर्तव्यं तत्करिष्यसि—इत्यर्थः । नाहं कामलंपटोऽस्मि ततस्त्वं मां मा लोभय—किं त्वन्यतो गच्छ—इति तात्पर्यम् । ३ हि–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र त्वं गन्तुमर्हसि ॥ ११ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये विश्वामित्रकुण्डोत्पत्तिवृत्तान्ते विश्वामित्रमेनकासंवादवर्णनंनाम त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥ ॥ छ ॥ ॥ मेनकोवाच ॥ ॥ नूनं हि कामधर्मे त्वं न प्रवीणो महाद्युते ॥ तेन मामीदृशैर्वाक्यैर्निवारयसि रागिणीम् ॥ १ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्तस्ततो भूयो विश्वामित्रोऽब्रवीदिदम् ॥ कोपेन महता युक्तो निःस्पृहस्तत्परिग्रहे ॥ २ ॥ ॥ विश्वामित्र उवाच ॥ ॥ त्वं जीव गच्छ वा मृत्युं नाहं कर्तास्मि ते वचः ॥ व्रतनाशात्तु यत्पापमधिकं स्त्रीवधाद्भवेत् ॥ ३ ॥ प्रायश्चित्तं बुधैरुक्तं व्रतिनां स्त्रीवधे कृते ॥ न संगात्तु पुनस्तासां तस्मात्त्वं गन्तुमर्हसि ॥ ४ ॥ न केवलं व्रतोपेताः स्त्रीसंगात्पापमाप्नुयुः ॥ व्रतबाह्या अपि नराः सक्ताः स्त्रीषु पतंत्यधः ॥ ५ ॥ संसारभ्रमणं नारी प्रथमेपि समागमे ॥ वह्निप्रदक्षिणाव्याजन्यायेनैव प्रदर्शयेत् ॥ ६ ॥ तस्मात्स्त्रीभिः समं प्राज्ञः संभाषामपि वर्जयेत् ॥ आस्तां तावत्समासंगं य इच्छेच्छ्रेय आत्मनः ॥ ७ ॥ अंगारसदृशा नारी घृतकुंभसमः पुमान् ॥ अस्पर्शाद्दृढतामेति तत्संपर्काद्विलीयते ॥ ८ ॥ स्त्रियो मूलमनर्थानां सर्वेषां प्राणिनां भुवि ॥ तस्मात्त्याज्याः सुदूरेण ताः स्वर्गस्य निरोधकाः ॥ ९ ॥ कुलीना वित्तवत्यश्च नाथवत्योऽपि योषितः ॥ एकस्मिन्नंतरे रागं कुर्वंत्येताः सुचञ्चलाः ॥ १० ॥ न स्त्रीभ्यः किंचिदन्यद्धि पापाय विद्यते भुवि ॥ यासां संगं समासाद्य संसारे भ्रमते जनः ॥ ११ ॥ नीचोऽपि कुरुते सेवां यस्तासां विजनेष्वथ ॥ विरूपं वापि नीचं वा तं सेवन्ते हि ताः स्त्रियः ॥ १२ ॥ अनर्थत्वान्मनुष्याणां भयात्परिजनस्य च ॥ मर्यादायाममर्यादाः स्त्रियस्तिष्ठन्ति भर्तृषु ॥ १३ ॥ ॥ सूत उवाच ॥ ॥ एवं संभर्त्सिता तेन मेनका कोपसंयुता ॥ शशाप तं मुनिश्रेष्ठं स्फुरमाणोष्ठसंपुटा ॥ १४ ॥ यस्मात्त्वया परित्यक्ता सकामाहं सुदुर्मते ॥ त्यजता कामजं धर्मं तस्माच्छापं गृहाण मे ॥ १५ ॥ अद्यैव भव दुर्बुद्धे वलीपलितसंयुतः ॥ जराजर्ज्जरितांगश्च तुच्छदृष्टिर्विरंगितः ॥ १६ ॥ ॥ सूत उवाच ॥ ॥ उक्तमात्रे तु वचने तत्क्षणान्मुनिसत्तमः ॥ बभूव तादृशः सद्यस्तया यादृक्प्रकीर्तितः ॥ १७ ॥ ततः कोपपरीतात्मा सोऽपि तां शप्तुमुद्यतः ॥ कमण्डलोर्जलं गृह्य संतापाद्रक्तलोचनः ॥ १८ ॥ निर्दोषोऽपि त्वया यस्माच्छप्तोऽहं गणिकाधमे ॥ तस्माद्भव त्वमप्याशु जराजर्जरितांगिका ॥ १९ ॥ सापि तद्वचनात्सद्यस्तादृग्रूपा व्यजायत ॥ यादृशोऽसौ मुनिश्रेष्ठो वलीपलितगात्रभृत् ॥ २० ॥ अथ तादृक्स्वरूपेण स्नाता तत्र जलाशये ॥ भूयोऽपि तादृशी जाता यादृशी संस्थिता पुरा ॥ २१ ॥ तद्दृष्ट्वा परमाश्चर्यमतीव त्वरयान्वितः ॥ सोऽपि तत्राकरोत्स्नानं संजातश्च यथा पुरा ॥ २२ ॥ ततस्तौ तीर्थमाहात्म्याद्रूपौदार्यगुणान्वितौ ॥ मिथ आमंत्र्य संहृष्टौ गतौ देशं यथेप्सितम् ॥ २३ ॥ एवं तीर्थस्य माहात्म्यं विज्ञाय भग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वानृषिः ॥ लिंगं संस्थापयामास देवदेवस्य शूलिनः ॥ २४ ॥ तपश्चकार सुमहत्तस्मिंस्तीर्थवरे तदा ॥ कुशस्तम्बेन कृतवांस्ततसरो विपुलं विभुः ॥
॥ २५ ॥ तत्र स्नात्वा नरो यस्तु पूजयेल्लिंगमुत्तमम् ॥ विश्वामित्रेश्वरं ख्यातं स गच्छेच्छिवमंदिरम् ॥ २६ ॥ अद्यापि दृश्यते तत्र गंगोदकसमं
जलम् ॥ सर्वपापहरं पुण्यं सर्वकामप्रदायकम् ॥ २७ ॥ यस्तत्र कुरुते स्नानं श्रद्धापूतेन चेतसा ॥ स देवलोकमासाद्य पितृभिः सह मोदते ॥२८॥
ततःप्रभृति तत्तीर्थं ख्यातिं प्राप्तं महीतले ॥ पाताले स्वर्गलोके च रूपौदार्यप्रदं नृणाम् ॥ २९ ॥ एतद्वः सर्वमाख्यातं यत्पृष्टोऽस्मि द्विजोत्तमाः ॥
विश्वामित्रेशमाहात्म्यं सर्वपातकनाशनम् ॥ ३० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखंडे श्रीहाटकेश्वरक्षेत्रमा
हात्म्ये विश्वामित्रकुण्डोत्पत्तिविश्वामित्रेश्वरमाहात्म्यवर्णनंनाम चतुश्चत्वारिंशत्तमोऽध्यायः ॥ ४४ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तत्रैवास्ति
द्विजश्रेष्ठाः सुपुण्यं पुष्करत्रयम् ॥ यत्र पूर्वं तपस्तप्तमानर्ताधिपभूभुजा ॥ १ ॥ यस्तत्र कार्तिके मासि कृत्तिकास्थे निशाकरे ॥ मध्याह्ने कुरुते स्नानं
स गच्छति परां गतिम् ॥ २ ॥ ॥ ऋषय ऊचुः ॥ ॥ कथं तत्र समायातं सुपुण्यं पुष्करत्रयम् ॥ कस्मिन्स्थाने च विज्ञेयं कैश्चिह्नैर्वद सूतज ॥
॥ ३ ॥ ॥ सूत उवाच ॥ ॥ अहं वः कीर्तयिष्यामि यैश्चिह्नैः पुष्करत्रयम् ॥ प्राग्दृष्टं मुनिना तत्र विश्वामित्रेण धीमता ॥ ४ ॥ पुरा निव
सतस्तस्य विश्वामित्रस्य सन्मुनेः ॥ संप्राप्ता कार्तिकी पुण्या कृत्तिकायोगसंयुता ॥ ५ ॥ सर्वतीर्थमयं क्षेत्रं तद्विज्ञाय तपोनिधिः ॥ ततश्च चिन्त
यामास स्वचित्ते गाधिनन्दनः ॥ ६ ॥ अद्येयं कार्तिकी पुण्या कृत्तिकायोगसंयुता ॥ यस्यां स्नाने नरैः श्रेयः प्राप्यते पुष्करोदके ॥ आद्यं तु पुष्करं
दूरे न गन्तुं शक्यतेऽधुना ॥ ७ ॥ तस्मादत्र स्थितं यच्च तस्मिन्स्नानं करोम्यहम् ॥ स एवं निश्चयं कृत्वा श्रद्धापूतेन चेतसा ॥ ८ ॥ ततश्चान्वेष
यामास पुष्कराणि समंततः ॥ बहुत्वात्तत्र तीर्थानां निश्चयं नान्वपद्यत ॥९॥ दृष्ट्वादृष्ट्वा जलस्थानं स्नानं चक्रे ततः परम् ॥ स तदा श्रममापन्नो भ्रम
माण इतस्ततः ॥१०॥ वृक्षमूलं समाश्रित्य निविष्टश्च क्षितौ ततः ॥ तुष्टावाथ शुचिर्भूत्वा श्रद्धया च त्रिपुष्करम् ॥११॥ मध्यमाद्योजनं स्वर्गः कनिष्ठादर्ध
योजनम् ॥ ज्येष्ठकुण्डात्पुनः ख्यातो हस्तप्रायः शुभात्मभिः ॥ १२ ॥ पावयंति हि तीर्थानि स्नानदानादसंशयम् ॥ पुष्करालोकनादेव नरः पापात्प्रमु
च्यते ॥ १३ ॥ पुष्करारण्यमाश्रित्य शाकमूलफलैरपि ॥ एकस्मिन्भोजिते विप्रे कोटिर्भवति भोजिता ॥ १४ ॥ पुष्करे दुष्करं स्नानं पुष्करे दुष्करं[१]
तपः ॥ पुष्करे दुष्करो वासः सर्वं पुष्करदुष्करम् ॥ १५ ॥ कार्तिक्यां कृत्तिकायोगे पुष्करे स्नाति यो नरः ॥ स क्षणान्मुच्यते पापादाजन्ममरणोद्भ



१ पुष्कलं तपः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वात् ॥ १६ ॥ ज्येष्ठे प्रातश्च मध्याह्ने मध्यमे स्नाति यो नरः ॥ कनिष्ठेऽस्तमिते भानौ सकृत्स्वर्गमवाप्नुयात् ॥ १७ ॥ तावत्तिष्ठति देहेषु पातकं सर्वदेहिनाम् ॥ यावन्न पौष्करैस्तोयैः स्नानं वै कुर्वते नराः ॥ १८ ॥ दिवाकरकरैः स्पृष्टं तमो यद्वत्प्रणश्यति ॥ पुष्करोदकसंस्पर्शाच्छीघ्रं गच्छति पातकम् ॥ १९ ॥ ब्रह्महत्यादिकं पापं कृत्वापि पुरुषो भुवि ॥ कार्तिक्यां पुष्करे स्नात्वा निर्दोषत्वं प्रपद्यते ॥ २० ॥ किं दानैः किं व्रतैर्होमैः किं यज्ञैर्बहुविस्तरैः ॥ कार्तिक्यां पुष्करे स्नानैः सर्वेषां लभ्यते फलम् ॥ २१ ॥ यद्येषा भारती सत्या मया सम्यगुदीरिता ॥ तन्मे स्याद्दर्शनं शीघ्रं सद्यः पुष्करसंभवम् ॥ २२ ॥ एवं तस्य ब्रुवाणस्य विश्वामित्रस्य धीमतः ॥ अशरीराऽभवद्वाणी गगनाद्द्विजसत्तमाः ॥ २३ ॥ विश्वामित्र मुनिश्रेष्ठ सदा मे गगने स्थितिः ॥ मुक्त्वैकां कार्तिकीं चैव कृत्तिकायोगसंयुताम् ॥ २४ ॥ तदत्र दिवसे वासो मम भूमितले ध्रुवम् ॥ अस्मिन्नेव वने पुण्ये तत्त्वं स्नानं समाचर ॥ २५ ॥ ॥ विश्वामित्र उवाच ॥ ॥ सर्वेषामेव तीर्थानां श्रूयते च समाश्रयः ॥ तत्कथं वेद्मि तीर्थेश त्वामत्रैव व्यवस्थितम् ॥ २६ ॥ तदोत्थिता पुनर्वाणी तारा[1] गगनगोचरा ॥ विश्वामित्रं मुनिश्रेष्ठं हर्षयंती द्विजोत्तमाः ॥ २७ ॥ नातिदूरे वनादस्मादत्र संति जलाशयाः ॥ तेषामेकतमे पद्मं विद्यतेऽधोमुखं स्थितम् ॥ २८ ॥ ऊर्ध्ववक्त्रं द्वितीये च तिर्यग्वक्त्रं तृतीयके ॥ तत्रोर्ध्वास्यैः सरोजैश्च विज्ञेयं ज्येष्ठपुष्करम् ॥ २९ ॥ पार्श्ववक्त्रैर्द्विजश्रेष्ठ मध्यमं परिकीर्तितम् ॥ अधोवक्त्रैस्तथा ज्ञेयं कनिष्ठं पुष्करं क्षितौ ॥ ३० ॥ एतैश्चिह्नैर्मुनिश्रेष्ठ ज्ञात्वा स्नानं समाचर ॥ तच्छ्रुत्वा स मुनिस्तूर्णं समुत्थाय ययौ ततः ॥ ३१ ॥ तादृशैः कमलैस्तत्र संस्थितास्ते जलाशयाः ॥ तान्दृष्ट्वा श्रद्धयोपेतः कृत्वा स्नानं यथाक्रमम् ॥ ३२ ॥ ततश्च विधिना सम्यक्चकार पितृतर्पणम् ॥ ३३ ॥ ततः शाकैश्च मूलैश्च नीवारैः फलसंयुतैः ॥ चकार विधिना श्राद्धं तत्रैव द्विजसत्तमाः ॥ ३४ ॥ तत्र तस्यैव तीरस्थो वीक्षांचक्रे समाहितः ॥ कार्तिक्यां कृत्तिकायोगे चिह्नदर्शनलालसः ॥ ३५ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ कीदृशं जायते चिह्नं कार्तिक्यां ज्येष्ठपुष्करे ॥ संप्राप्ते कृत्तिकायोगे सर्वं तत्र वदाशु नः ॥ ३६ ॥ ॥ सूत उवाच ॥ ॥ कार्तिक्यां कृत्तिकायोगे यदा गच्छति चंद्रमाः ॥ तदा निष्क्रामति श्रेष्ठं कमलं जलमध्यतः ॥ ३७ ॥ तन्मध्येंऽगुष्ठमात्रस्तु पुरुषो दृश्यते जनैः ॥ सुस्नातैः श्रद्धयोपेतैस्ततस्तीर्थफलं लभेत् ॥ ३८ ॥ एतस्मात्कारणात्स्नात्वा विश्वामित्रो महामुनिः ॥ तच्चिह्नं वीक्षयामास महद्यत्नं समाश्रितः ॥ ३९ ॥ तस्यैवं वीक्षमाणस्य विश्वामित्रस्य धीमतः ॥ आनर्ताधिपतिस्तत्र प्राप्तो राजा बृहद्बलः ॥ ४० ॥ अत्यंतं मृगयाश्रांतो हत्वा मृगगणा

१ तारा—उच्चतरा—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्बहून् ॥ ऋक्षांश्चैव वराहांश्च सारंगानथ संबरान् ॥ ४१ ॥ सिंहान्व्याघ्रान्वृकांश्चैव हिंस्रानारण्यचारिणः ॥ तथान्यानपि मध्याह्ने तेन मार्गेण
संगतः ॥ ४२ ॥ अथापश्यद्द्रुमोपांते विश्वामित्रं मुनीश्वरम् ॥ उपविष्टं कृतस्नानं वीक्षमाणं जलाशयम् ॥ ४३ ॥ ततस्तं प्रणिपत्योच्चैरवतीर्य
तुरंगमात् ॥ श्रमार्त्तः सलिले तस्मिन्प्रविवेश नृपोत्तमः ॥ ४४ ॥ एतस्मिन्नंतरे तोयात्कमलं तद्विनिर्गतम् ॥ सहस्रपत्रसंजुष्टं द्वादशार्कसमप्रभम् ॥
॥ ४५ ॥ तद्दृष्ट्वा स महीपालः पद्ममत्यद्भुतं महत् ॥ जग्राह कौतुकाविष्टः स्वयं सव्येन पाणिना ॥ ४६ ॥ स्पृष्टमात्रे ततस्तस्मिन्कमले द्विजस
त्तमाः ॥ उत्थितः सुमहाञ्छब्दो विश्वं येन प्रपूरितम् ॥ ४७ ॥ तं शब्दं स महीपालः श्रुत्वा मूर्छामुपाविशत् ॥ पतितश्च जले
तस्मिन्पद्मं चादर्शनं गतम् ॥ ४८ ॥ ततः कृच्छ्रेण महता कर्षितः सलिलाद्बहिः ॥ सेवकैर्दुःखशोकार्त्तैर्हाहेति प्रतिजल्पकैः ॥ ४९ ॥
ततस्तीरं समासाद्य कृच्छ्रात्प्राप्याथ चेतनाम् ॥ यावद्वीक्षयति स्वांगं तावत्कुष्ठं समागतम् ॥ ५० ॥ ततो विषादमापन्नो दृष्ट्वा तादृङ्निजं वपुः ॥
शीर्णघ्राणांघ्रिहस्तं च घर्घरस्वरसंयुतम् ॥ ५१ ॥ अथ गत्वा मुनेः पार्श्वे विश्वामित्रस्य भूमिपः ॥ उवाच वचनं दीनं बाष्पगद्गदया गिरा ॥
॥ ५२ ॥ भगवन्पश्य मे जातं यादृशं वपुरेव हि ॥ अकस्मादेव मग्नस्य सलिलेऽत्र विगर्हितम् ॥ ५३ ॥ तत्किं पानीयदोषो वा किं वा भूमेर्मुनी
श्वर ॥ येनेदृक्सहसा यातं विकृतिं मे शरीरकम् ॥ ५४ ॥ ॥ विश्वामित्र उवाच ॥ ॥ सावित्रं पद्ममेवैतद्यत्स्पृष्टं भूपते त्वया ॥ उच्छिष्टेन
रविर्मध्ये स्वयं यस्य व्यवस्थितः ॥ ५५ ॥ यदा स्यात्कृत्तिकायोगः कार्तिके मासि पार्थिव ॥ शशांकस्य तदा चैतज्जायते पौष्करे जले ॥ ५६ ॥
तदिदं पुष्करं ज्येष्ठं भवान्यत्र श्रमातुरः ॥ प्रविष्टः कार्तिकी चाद्य कृत्तिकायोगसंयुता ॥ ५७ ॥ एतद्वीक्ष्य नरो ह्यत्र स्नानं कुर्याज्जलाशये ॥
श्रद्धया परया युक्तः स गच्छति परां गतिम् ॥५८॥ उच्छिष्टेन त्वया राजन्हरणाय हि केवलम् ॥ एतत्सरोरुहं स्पृष्टं तेनेदृक्संस्थितं फलम् ॥५९॥
॥ ॥ बृहद्बल उवाच ॥ ॥ कथं मे स्यान्मुनिश्रेष्ठ कुष्ठव्याधिपरिक्षयः ॥ तपसा नियमेनापि व्रतेनापि कृतेन वै ॥ ६० ॥ ॥ विश्वामित्र
उवाच ॥ ॥ आराधय सहस्रांशुमस्मिन्क्षेत्रे महीपते ॥ ततः प्राप्स्यसि संसिद्धिं कुष्ठनाशसमुद्भवाम् ॥ ६१ ॥ तच्छ्रुत्वा स मुनेर्वाक्यं भूमिपालो
बृहद्बलः ॥ तत्क्षणात्स्थापयामास सूर्यस्य प्रतिमां तदा ॥ ६२ ॥ अर्चयामास विधिवत्पुष्पधूपानुलेपनैः ॥ श्रद्धया परया युक्तो रविवारे विशेषतः ॥
॥ ६३ ॥ उपवासपरो भूत्वा रक्तचन्दनसंयुतैः ॥ पूजयन्रक्तपुष्पैश्च श्रद्धया परया युतः ॥ ६४ ॥ ततः संवत्सरस्यांते स बभूव महीपतिः ॥ कुष्ठ
व्याधिविनिर्मुक्तो द्वादशार्कसमप्रभः ॥ ६५ ॥ ततः स्वं राज्यमासाद्य भुक्त्वा भोगाननेकशः ॥ देहांते दिननाथस्य संप्राप्तो मंदिरं तथा ॥ ६६ ॥



CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ सूत उवाच ॥ ॥ एवं तत्र द्विजश्रेष्ठा विश्वामित्रेण धीमता ॥ प्रकटं सर्वलोकस्य विहितं पुष्करत्रयम् ॥ ६७ ॥ यस्तत्र कार्तिके मासे कार्त्तिक्यां कृत्तिकासु च ॥ प्रकरोति नरः स्नानं ब्रह्मलोकं स गच्छति ॥ ६८ ॥ तथा यो भास्करं पश्येद्वृहद्दलप्रतिष्ठितम् ॥ वत्सरं रविवारेण यावत्कृत्वा क्षणं नरः ॥ स मुच्यते नरो रोगैर्यदि स्याद्रोगसंयुतः ॥ ६९ ॥ नीरोगो वा नरः सद्यो लभते मनसेप्सितम् ॥ निष्कामो मोक्षमाप्नोति प्रसादात्तीक्ष्णदीधितेः ॥ ७० ॥ कार्त्तिक्यां कृत्तिकायोगे वृषोत्सर्गं करोति यः ॥ पुष्करेषु सुपुण्येषु सोऽश्वमेधफलं लभेत् ॥ ७१ ॥ एष्टव्या बहवः पुत्रा यद्येकोपि गयां व्रजेत् ॥ यजेत वाऽश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥ ७२ ॥ एकतः सर्वतीर्थानि सर्वदानानि चैकतः ॥ एकतस्तु वृषोत्सर्गः कार्तिक्यां पुष्करेषु च ॥ ७३ ॥ यश्चैतच्छृणुयान्नित्यं पठेद्वा श्रद्धयान्वितः ॥ संप्राप्य सर्वकामान्वै ब्रह्मलोके महीयते ॥ ७४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये त्रिपुष्करमाहात्म्यवर्णनंनाम पंचचत्वारिंशोऽध्यायः ॥ ४५ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ अन्यानि तत्र तीर्थानि यानि संति महामते ॥ तानि कीर्तय सर्वाणि परं कौतूहलं हि नः ॥ १ ॥ ॥ सूत उवाच ॥ ॥ तत्र सारस्वतं तीर्थमन्यदस्ति सुशोभनम् ॥ यत्र स्नातोऽतिमूकोऽपि भवेद्वाक्यविचक्षणः ॥ २ ॥ लभते चेप्सितान्कामान्मानुषान्दैविकानपि ॥ ब्रह्मलोकादिपर्यंतांस्तथा लोकान्द्विजोत्तमाः ॥ ३ ॥ पुरासीत्पार्थिवो नाम्ना विख्यातो बलवर्धनः ॥ समुद्रवं[1]लयामुर्वीं बुभुजे यो भुजार्जिताम् ॥ ४ ॥ तस्य पुत्रः समुत्पन्नः सर्वलक्षणसंयुतः ॥ तस्य नाम पिता चक्रे संप्राप्ते द्वादशेऽहनि ॥ अंम्बुवीचिरिति स्पष्टं समाहूय द्विजोत्तमान् ॥ ५ ॥ ततः स ववृधे बालो लालितस्तेन भूभुजा ॥ मूकभावं समापन्नो न शक्नोति प्रजल्पितुम् ॥ ६ ॥ ततोऽस्य सप्तमे वर्षे संप्राप्ते बलवर्धनः ॥ पंचत्वं समनुप्राप्तः संग्रामे शत्रुभिर्हतः ॥ ७ ॥ ततो मूकोऽपि बालोपि मंत्रिभिस्तस्य भूपतेः ॥ स सुतः स्थापितो राज्ये अभावेऽन्यसुतस्य च ॥ ८ ॥ एवं तस्य महीपस्य राज्यस्थस्य जडात्मनः ॥ बालत्वे वर्तमानस्य राज्यं विप्लवमध्यगात् ॥ ९ ॥ ततो जलचरन्यायः संप्रवृत्तो महीतले ॥ पीडचंते सर्वलोकास्तु दुर्बला बलवत्तरैः ॥ १० ॥ ततस्ते मंत्रिणः प्रोचुर्वसिष्ठं स्वपुरोहितम् ॥ वचोऽर्थं नृपतेरस्य कुरूपायं महामुने ॥ ११ ॥ पश्य कृत्स्नं धरापृष्ठं शून्यतां समुपस्थितम् ॥ जडत्वान्नृपतेरस्य तस्मात्कुरु यथोचितम् ॥ ॥ १२ ॥ ततस्तु सुचिरं ध्यात्वा दीनान्प्रोवाच मंत्रिणः ॥ सर्वानार्तिसमोपेताञ्छृण्वतस्तस्य भूपतेः ॥ १३ ॥ अस्ति सारस्वतं तीर्थं सर्वकाम

१ समुद्रवसनाम्—इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



प्रदं नृणाम् ॥ हाटकेश्वरजे क्षेत्रे तत्रायं स्नातु[1] भूपतिः ॥ १४ ॥ अथ तद्वचनात्सद्यः स गत्वा तत्र सत्वरम् ॥ स्नानात्तीर्थेऽथ संजातस्तत्क्षणात्स कल
स्वनः ॥ १५ ॥ तत्प्रभावं सरस्वत्याः स विज्ञाय महीपतिः ॥ श्रद्धया परया युक्तो ध्यायमानः सरस्वतीम् ॥ १६ ॥ ततस्तूर्णं समादाय मृत्तिकां
स्त्र नदीतटात् ॥ चकार भारतीं देवीं स्वयमेव चतुर्भुजाम् ॥ १७ ॥ दधतीं दक्षिणे हस्ते कमलं सुमनोहरम् ॥ अक्षमालां तथान्यस्मिञ्जिततारक
वर्चसम् ॥ १८ ॥ कमण्डलुं तथान्यस्मिन्दिव्यवारिप्रपूरितम् ॥ पुस्तकं च तथा वामे सर्वविद्यासमुद्भवम् ॥ १९ ॥ ततो मध्ये शिलापृष्ठे तां निवेश्य
प्रयत्नतः ॥ पूजयामास सद्भक्त्या धूपमाल्यानुलेपनैः ॥ २० ॥ चकार च स्तुतिं पश्चाच्छ्रद्धापूतेन चेतसा ॥ तदग्रे प्रयतो भूत्वा स्वरेण महता नृपः
॥ २१ ॥ सदसद्देवि यत्किञ्चिद्बन्धमोक्षात्मकं पदम्[2] ॥ तत्सर्वं गुप्तया व्याप्तं त्वया काष्ठं यथाग्निना ॥ २२ ॥ सर्वस्य सिद्धिरूपेण त्वं जनस्य हृदि
स्थिता ॥ वाचारूपेण जिह्वायां ज्योतीरूपेण चक्षुषि ॥ २३ ॥ भक्तिग्राह्यासि देवेशि त्वमेका भुवनत्रये ॥ शरणागतदीनार्तपरित्राणपरायणे ॥२४॥
त्वं कीर्तिस्त्वं धृतिर्मेधा त्वं भक्तिस्त्वं प्रभा स्मृता ॥ त्वं निद्रा त्वं क्षुधा कीर्तिः सर्वभूतनिवासिनी ॥ २५ ॥ तुष्टिः पुष्टिर्वपुः प्रीतिः स्वधा स्वाहा
विभावरी ॥ रतिः प्रीतिः क्षितिर्गंगा सत्यं धर्मो मनस्विनी ॥ २६ ॥ लज्जा शांतिः स्मृतिर्दक्षा क्षमा गौरी च रोहिणी ॥ सिनीवाली कुहू राका
देवमाता दितिस्तथा ॥ २७ ॥ ब्रह्माणी विनता लक्ष्मीः कद्रूर्दाक्षायणी शिवा ॥ गायत्री चाथ सावित्री कृषिर्वृष्टिः श्रुतिः कला ॥ २८ ॥ बला[3]ना
डी तुष्टिकाष्ठा रसना च सरस्वती ॥ यत्किञ्चित्त्रिषु लोकेषु बहुत्वाद्यन्न कीर्तितम् ॥ २९ ॥ इंगितं नेंगितं तच्च तद्रूपं ते सुरेश्वरि ॥ गन्धर्वाः किन्नरा
देवाः सिद्धविद्याधरोरगाः ॥ ३० ॥ यक्षगुह्यकभूताश्च दैत्या ये च विनायकाः ॥ त्वत्प्रसादेन ते सर्वे संसिद्धिं परमां गताः ॥ ३१ ॥ तथान्येऽपि बहु
त्वाद्ये न मया परिकीर्तिताः ॥ आराधितास्तु कृच्छ्रेण पूजिताश्च सुविस्तरैः ॥ हरंतु देवताः पापमन्ये त्वं कीर्तिताऽपि च ॥ ३२ ॥ एवं स्तुता सा
देवेशी भूभुजा तेन भारती ॥ ययौ प्रत्यक्षतां तूर्णं प्राह चेदं सुहर्षिता ॥ ३३ ॥ ॥ सरस्वत्युवाच ॥ ॥ स्तोत्रेणानेन भूपाल भक्त्या सुस्थिरया सदा ॥
परितुष्टास्मि तेनाशु वरं वृणु यथेप्सितम् ॥ ३४ ॥ ॥ राजोवाच ॥ ॥ अद्यप्रभृति मद्वाक्यात्त्वया स्थेयमसंशयम् ॥ अत्रार्चायां त्रिलोकेस्मि
न्यावत्कीर्तिर्मम स्थिरा ॥ ३५ ॥ यस्त्वामाराधयेत्सम्यगत्रस्थां मन्निमित्ततः ॥ भक्त्यानुरूपमेवाशु तस्मै देयं त्वया हि तत् ॥ ३६ ॥ ॥ सरस्व
त्युवाच ॥ ॥ यो मामत्र स्थितां नित्यं स्नात्वाऽत्र सलिले शुभे ॥ अष्टम्यां च[4] चतुर्दश्यां पूजयिष्यति मानवः ॥ ३७ ॥ तस्याहं वांछितान्कामान्सं



१ स्नातुमर्हति–इ० पा० । २ परम्–इ० पा० । ३ बला नादी–इ०पा० । ४ वा–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रदास्यामि पार्थिव ॥ ॥ सूत उवाच ॥ ॥ एवं तत्र स्थिता देवी स्वयमेव सरस्वती ॥ ३८॥ ततःप्रभृति लोकानां हिताय परमेश्वरी ॥ अष्टम्यां च चतुर्दश्यामुपवासपरायणः ॥ ३९ ॥ यस्तां पूजयते मर्त्यः श्वेतपुष्पानुलेपनैः ॥ स स्याद्वाग्मी सुमेधावी सदा जन्मनिजन्मनि ॥४०॥ सरस्वत्याः प्रसादेन जायमानः पुनःपुनः ॥ अन्वयेऽपि न तस्यैव कश्चिन्मूर्खः प्रजायते ॥ ४१ ॥ यो धर्मश्रवणं तस्याः पुरतः कुरुते नरः॥ स नूनं वसति स्वर्गे तत्प्रभावाद्युगत्रयम् ॥४२॥ विद्यादानं नरो यश्च तस्या ह्यायतने सदा ॥ करोति श्रद्धया युक्तः सोऽश्वमेधफलं लभेत् ॥४३॥ यो यच्छति द्विजेन्द्राय धर्मशास्त्रसमुद्भवम् ॥ पुस्तकं वाजिमेधस्य स समग्रं फलं लभेत् ॥ ४४ ॥ यो वेदाध्ययनं तस्याः करोति पुरतः स्थितः ॥ सोऽग्निष्टोमस्य यज्ञस्य कृत्स्नं फलमवाप्नुयात् ॥ ४५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये सरस्वती तीर्थमाहात्म्यवर्णनंनाम षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ महाकालस्य माहात्म्यं विस्तरेण महामते ॥ अस्माकं सूतज ब्रूहि सर्वं वेत्ति यतो भवान् ॥ १ ॥ ॥ सूत उवाच ॥ ॥ आसीत्पूर्वं महीपाल इक्ष्वाकुकुलनन्दनः ॥ रुद्रसेन इति ख्यातः सर्वशत्रुनिषूदनः ॥ २ ॥ समुद्र इव गांभीर्ये सौम्यत्वे शशिसंनिभः ॥ वीर्ये यथा सहस्राक्षो रूपे कन्दर्पसन्निभः ॥ ३ ॥ तस्य कांतीति विख्याता पुरी सर्वगुणान्विता ॥ राजधान्यभवच्छ्रेष्ठा प्रोच्चप्राकारतोरणा ॥ ४ ॥ तथैवासीत्प्रिया तस्य भार्या परमसंमता ॥ ख्याता पद्मवतीनाम रूपौदार्य गुणान्विता ॥ ५ ॥ स तया सहितो राजा वैशाख्या दिवसे सदा ॥ समभ्येति निजस्थानात्सैन्येनाल्पेन संवृतः ॥ ६ ॥ चमत्कारपुरे क्षेत्रे पीठे तत्र द्विजोत्तमाः ॥ महाकालस्य देवस्य पुरतो रात्रिजागरम् ॥ करोति श्रद्धया युक्तः सभार्यः स महीपतिः ॥ ७ ॥ उपवासपरो भूत्वा ध्यायमानो महेश्वरम् ॥ गीतवाद्येन हृद्येन नृत्येन द्विजसत्तमाः ॥ धर्माख्यानेन विप्राणां वेदाध्ययनविस्तरैः ॥ ८ ॥ ततः प्रातः समुत्थाय स्नात्वा धौतांबरः शुचिः ॥ ददौ दानानि विप्रेभ्यस्तपस्विभ्यो विशेषतः ॥ ९ ॥ दीनांधकृपणेभ्यश्च तथान्येभ्यः सहस्रशः ॥ वर्षेवर्षे सदैवं स समभ्येत्य महीपतिः ॥ वैशाख्यां जागरं तस्य देवस्य पुरतोऽकरोत् ॥ १० ॥ यथायथा स भूपालः कुरुते रात्रिजागरम् ॥ महाकालाग्रतस्तस्य तथा वृद्धिः प्रजायते ॥ ११ ॥ शत्रवो विलयं यांति लक्ष्मीर्वृद्धिं प्रगच्छति ॥ एकदा स समायातस्तत्र यावन्महीपतिः ॥ १२ ॥ तत्रैव दिवसे ताव न्महाकालस्य चाग्रतः ॥ अपश्यद्ब्राह्मणश्रेष्ठान्नानादिग्भ्यः समागतान् ॥ १३ ॥ वेदाध्ययनसंपन्नान्व्रतनिष्ठापरायणान् ॥ एके तत्र कथाश्चक्रुः

१ इक्ष्वाकुकुलसंभवः–इ० पा० । २ निधनम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 सुपुण्या ब्राह्मणोत्तमाः ॥ १४ ॥ राजर्षीणां पुराणानां देवर्षीणां तथा परे ॥ तीर्थानां च तथा चान्ये ब्रह्मर्षीणां तथा परे ॥ यज्ञानां सागराणां च 
 द्वीपानां च मनोहराः ॥ १५ ॥ अथ तान्पृथिवीपालः स प्रणम्य यथाक्रमम् ॥ उपविष्टः सभामध्ये तैः सर्वैश्चाभिनंदितः ॥ १६ ॥ कस्मिंश्चिदथ 
संप्राप्ते कथांते ते मुनीश्वराः[1] ॥ पप्रच्छुर्भूमिपालं तु कौतूहलसमन्विताः ॥ १७ ॥ वैशाखीदिवसे राजंस्त्वं सदाभ्येत्य दूरतः ॥ वर्षेवर्षेऽस्य देवस्य
पुरतो रात्रिजागरम् ॥ १८ ॥ प्रकरोषि प्रयत्नेन त्यक्त्वान्याः सकलाः क्रियाः ॥ स्नानदानादिका याश्च निर्दिष्टाः शास्त्रचिंतकैः ॥ १९ ॥ न ते
यदि रहस्यं स्यात्तदाऽशेषं प्रकीर्तय ॥ नूनं त्वं वेत्सि तत्सर्वं यत्फलं रात्रिजागरे ॥ २० ॥ ॥ राजोवाच ॥ ॥ रहस्यं परमं चैव यत्पृष्टोऽहं
द्विजोत्तमाः ॥ युष्माभिः कीर्तयिष्यामि तथाऽप्यखिलमेव हि ॥ २१ ॥ अहमासं वणिग्जात्या पुरा वै वैदिशे पुरे ॥ निर्धनो बंधुभिर्मुक्तः परि
भूतः पदेपदे ॥ २२ ॥ कस्यचित्त्वथ कालस्य भगवान्पाकशासनः ॥ वैदिशे नाकरोद्वृष्टिं सप्त वर्षाणि पंच च ॥ २३ ॥ ततो वृष्टिनिरोधेन सर्वे
लोकाः क्षुधार्दिताः ॥ अन्नाभावान्मृताः केचित्केचिद्देशांतरे गताः ॥ २४ ॥ ततोऽहं स्वां समादाय पत्नीं क्षुत्क्षामगात्रिकाम् ॥ अश्रुपूर्णमुखीं दीनां
प्रस्खलन्तीं पदेपदे ॥२५॥ सौराष्ट्रं मनसि ध्यात्वा प्रस्थितस्तदनन्तरम् ॥ सुभिक्षं लोकतः श्रुत्वा जीवनाय द्विजोत्तमाः ॥२६॥ क्रमेण गच्छमानोऽथ
भिक्षान्नकृतभोजनः ॥ आनर्तविषयं प्राप्तश्चमत्कारपुरांतिके ॥ २७ ॥ तत्र रम्यं मया दृष्टं पद्मिनीखण्डमंडितम् ॥ सरः स्वच्छोदकापूर्णं जलपक्षिभि
रावृतम् ॥ २८ ॥ ततोऽहं तत्समासाद्य स्नातः शीतेन वारिणा ॥ क्षुधार्तश्च तृषार्तश्च श्रमार्तश्च विशेषतः ॥ २९ ॥ अथाहं भार्यया प्रोक्तो गृहाणेश
जलाशयात् ॥ जलजानि क्रयार्थाय येन स्यादद्य भोजनम् ॥ ३० ॥ एतत्संदृश्यते दूरात्पुरंदरपुरोपमम् ॥ पुरश्रेष्ठं समासाद्य विक्रयं कर्तुमर्हसि ॥
॥३१॥ ततो मया गृहीतानि पद्मानि द्विजसत्तमाः ॥ विक्रयार्थं प्रभूतानि वाञ्छमानेन भोजनम् ॥३२॥ चमत्कारपुरं प्राप्य ततोऽहं द्विजसत्तमाः ॥
भ्रांतस्त्रिकेषु सर्वेषु चत्वरेषु गृहेषु च ॥ ३३ ॥ न कश्चित्प्रतिगृह्णाति तानि पद्मानि मानवः ॥ मम भाग्यवशाल्लोको जातः क्रयपराङ्मुखः ॥३४॥
अथ क्षुत्क्षामकण्ठस्य श्रांतस्य मम भास्करः ॥ अस्ताचलमनुप्राप्तः संध्याकालस्ततोऽभवत् ॥ ३५ ॥ ततो वैराग्यमापन्नः सुप्तोऽहं भग्नमंदिरे ॥
तानि पद्मानि भूपृष्ठे निधाय सह भार्यया ॥ ३६ ॥ अथार्धरात्रे संप्राप्ते श्रुतो गीतध्वनिर्मया ॥ ततश्च चिंतितं चित्ते जागरोऽयमसंशयम् ॥३७॥ 
तस्माद्गच्छामि चेत्कश्चित्पद्मान्येतानि मे नरः ॥ मूल्येन प्रतिगृह्णाति भोजनं जायते ततः ॥ ३८ ॥ एवं विनिश्चयं कृत्वा पद्मान्यादाय सत्वरम् ॥

१ मुनीश्वराः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सभार्यः प्रस्थितस्तत्र यत्र गीतस्य निःस्वनः ॥ ३९ ॥ ततश्चायतने तस्मिन्प्राप्तोऽहं मुनिपुंगवाः ॥ अपश्यं देवदेवेशं महाकालं प्रपूजितम् ॥ अग्र स्थितैर्द्विजश्रेष्ठैर्जपगीतपरायणैः ॥ ४० ॥ एके नृत्यं प्रकुर्वंति गीतमन्ये जपं परे ॥ अन्ये होमं द्विजश्रेष्ठा धर्माख्यानमथापरे ॥ ४१ ॥ ततः कश्चिन्मया पृष्टः क्रियते जागरोऽत्र किम् ॥ क एते जागरासक्ता लोकाः कीर्तय मे द्रुतम् ॥ ४२ ॥ तेनोक्तमेष देवस्य महाकालस्य जागरः ॥ क्रियते ब्राह्मणैर्भक्त्या उपवासपरायणैः ॥ ४३ ॥ अद्य पुण्यतिथिर्नाम वैशाखी पुण्यदा परा ॥ यस्यामस्य पुरो भक्त्या नरः कुर्यात्प्रजागरम् ॥ महाकालस्य देवस्य सौख्यं प्राप्नोत्यसंशयम् ॥ ४४ ॥ संति पद्मानि मे यच्छ मूल्यमादाय भद्रक ॥ भोज नार्थमहं दद्मि कलधौतपलत्रयम् ॥ ४५ ॥ ततोऽवधारितं चित्ते मया ब्राह्मणसत्तमाः ॥ पूजयामि महाकालं पद्मैरेतैः सुरेश्वरम् ॥ ४६ ॥ न मया सुकृतं किंचिदन्यदेहांतरे कृतम् ॥ नियतं तेन संभूत इत्थंभूतोऽस्मि दुर्गतः ॥ ४७ ॥ परं क्षुत्क्षामकंठेयं भार्या मे प्रियवादिनी ॥ अन्नाभावान्न संदेहः प्रातर्यास्यति संक्षयम् ॥ ४८ ॥ एवं चिंतयमानस्य मम सा दयिता ततः ॥ प्रोवाच मधुरं वाक्यं विनयावनता स्थिता ॥४९॥ मा नाथ कुरु पद्मानां विक्रयं धनलोभतः ॥ कुरुष्व च हितं वाक्यं यत्ते वक्ष्यामि सांप्रतम् ॥ ५० ॥ उपवासो बलाज्जातः सस्याभावादसंशयम् ॥ अस्माकं जागरं चापि भविष्यति बुभुक्षया ॥ ५१ ॥ तत्रोभाभ्यां कृतं स्नानं दिवा सरसि शोभने ॥ घर्मार्त्ताभ्यां श्रमार्त्ताभ्यां कृतं देवार्चनं तथा ॥५२॥ तस्माद्देवं महाकालं पूजयामोऽधुना वयम् ॥ पद्मैरेतैः परं श्रेय आवयोर्येन जायते ॥ ५३ ॥ ॥ राजोवाच ॥ ॥ उभाभ्यामथ हृष्टाभ्यां पूजितोऽयं महेश्वरः ॥ तैः पद्मैः सत्त्वमास्थाय कृत्वा पूजां द्विजोत्तमाः ॥ ५४ ॥ क्षुत्पीडया समायाता नैव निद्रा कथंचन ॥ स्वल्पापि मंदिरे चात्र स्थितयोर्हरसन्निधौ ॥५५॥ ततः प्रभातसमये प्रोद्गते रविमंडले ॥ मृतोऽहं क्षुधयाविष्टः स्थानेऽत्रैव द्विजोत्तमाः ॥ ५६ ॥ अथ सा दयिता मह्यं तदादाय कलेवरम्॥हर्षेण महताविष्टा प्रविष्टा हव्यवाहनम् ॥ ५७ ॥ तत्प्रभावादहं जातः कांतीनाथो महीपतिः ॥ दशार्णाधिपतेः कन्या सापि जातिस्मरा सती ॥ ५८ ॥ ततः स्वयंवरं प्राप्ता मां विज्ञाय निजं पतिम् ॥ मयापि सैव विज्ञाय पूर्वपत्नी समाहृता ॥ ५९ ॥ एतस्मात्कारणादस्य महाकालस्य जागरम् ॥ वर्षेवर्षे च वैशाख्यां करोमि द्विजसत्तमाः ॥ ६० ॥ अनया प्रियया सार्धं पुष्पधूपानुलेपनैः ॥ पूजयित्वा महाकालं सत्यमेतन्मयोदितम् ॥ ६१ ॥ कृतो विप्रा मया त्वेष स तदा रात्रिजागरः ॥ यथाप्येतत्फलं जातं देवस्यास्य प्रभावतः ॥ ६२ ॥ अधुना श्रद्धया युक्तो यथोक्तविधिना ततः ॥ यत्करोमि न जानामि किं मे संयच्छते फलम् ॥ ६३ ॥ एतद्वः सर्वमाख्यातं मया सत्यं द्विजोत्तमाः ॥ येन सत्येन तेनैष महाकालः प्रसी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



दतु ॥ ६४ ॥ ॥ सूत उवाच ॥ ॥ एतच्छ्रुत्वा द्विजश्रेष्ठा विस्मयोत्फुल्ललोचनाः ॥ प्रचक्रुर्नृपतेस्तस्य साधुवादाननेकशः ॥ ६५ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ सत्यमुक्तं महीपाल त्वयैतदखिलं वचः ॥ महाकालप्रसादेन न किंचिद्दुर्लभं भुवि ॥ ६६ ॥ तस्माद्विशेषतः सर्वे वर्षेवर्षे वयं नृप ॥ करिष्यामोऽस्य देवस्य श्रद्धया रात्रिजागरम् ॥ ६७ ॥ ततः स पार्थिवस्ते च सर्व एव द्विजातयः ॥ प्रचक्रुर्जागरं तस्य महाकालस्य संनिधौ ॥६८॥ विशेषाद्धर्षसंयुक्ता विविधैर्गीतवादनैः ॥ धर्माख्यानैश्च नृत्यैश्च वेदोच्चारैः पृथग्विधैः ॥ तदारभ्य नृपाः सर्वे प्रचक्रुर्विस्मयान्विताः ॥ ६९ ॥ ततः प्रभाते विमले समुत्थाय स भूपतिः ॥ पूजयित्वा महाकालं तांश्च सर्वान्द्विजोत्तमान् ॥ अनुज्ञाप्य ययौ हृष्टः ससैन्यः स्वपुरं प्रति ॥ ७० ॥ ततः कालेन संप्राप्य देहान्तं स महीपतिः ॥ संप्राप्तः परमं स्थानं जरामरणवर्जितम् ॥ ७१ ॥ एतद्वः सर्वमाख्यातं महाकालसमुद्भवम् ॥ माहात्म्यं ब्राह्मण श्रेष्ठाः सर्वपातकनाशनम् ॥ ७२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये महाकाले श्वरमाहात्म्यवर्णनंनाम सप्तचत्वारिंशत्तमोऽध्यायः ॥ ४७ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तत्रैवास्य समुद्देशे हरिश्चंद्रस्य भूपतेः ॥ आश्रमोऽस्ति सुविख्यातो नानाद्रुमसमावृतः ॥ १ ॥ यत्र तेन तपस्तप्तं संस्थाप्योमामहेश्वरौ ॥ यच्छता विविधं दानं ब्राह्मणेभ्योऽभिवांछितम् ॥ २ ॥ आसीद्राजा हरिश्चंद्रस्त्रिशंकुतनयः पुरा ॥ अयोध्याधिपतिः श्रीमान्सूर्यवंशसमुद्भवः ॥ ३ ॥ न दुर्भिक्षं न च व्याधिर्नाकालमरणं ध्रुवम् ॥ तस्मिञ्छासति धर्मेण न च चौरकृतं भयम् ॥ ४ ॥ कालवर्षी सदा मेघः सस्यानि प्रचुराणि च ॥ रसवंति च तोयानि सर्वर्तुफलिता द्रुमाः ॥ ५ ॥ दंडस्तत्राभवद्धास्तौ गृहरोधोऽक्षदेवने ॥ एको दोषाकरश्चंद्रः प्रियदोषाश्च[1] कौशिकाः ॥ ६ ॥ स्नेहक्षयश्च दीपेषु विवाहे च करग्रहः ॥ वृत्तभंगस्तथा गद्ये दानोत्थितिर्गजानने ॥ ७ ॥ तस्यैवं गुणयुक्तस्य सार्वभौमस्य भूपतेः ॥ एक एव महानासीद्दोषः पुत्रविवर्जितः ॥ ८ ॥ ततः पुत्रकृते गत्वा चकार सुमहत्तपः ॥ चमत्कारपुरे क्षेत्रे लिंगं संस्थाप्य भक्तितः ॥९॥ पंचाग्निसाधको ग्रीष्मे वर्षास्वाकाशसंस्थितः ॥ जलाश्रयश्च हेमंते स ध्यायति महेश्वरम् ॥ १० ॥ ततो वर्षसहस्रांते तस्य तुष्टो महेश्वरः ॥ प्रत्यक्षोऽभूत्समं गौर्या गणसंघैः समावृतः ॥ ११ ॥ उवाच वरदोऽस्मीति प्रार्थयस्व यथेप्सितम् ॥ अहं ते संप्रदास्यामि यद्यपि स्यात्सुदुर्लभम्॥१२॥ ततस्तं प्रणिपत्योच्चैः स्तुत्वा सूक्तैः श्रुतैरपि ॥ प्रोवाच विनयोपेतः कृतांजलिपुटः स्थितः ॥ १३ ॥ त्वत्प्रसादात्सुरश्रेष्ठ यत्किंचिद्धरणीतले ॥ तदस्ति मे गृहे सर्वं वांछितं स्वेन चेतसा ॥ १४ ॥ सुरूपाणि कलत्राणि राज्यं निहत

१ प्रियदोषाः—प्रियरात्रयः—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कंटकम् ॥ शरीरं रोगनिर्मुक्तं संख्याहीनं तथा धनम् ॥१५॥ एकं मे सुमहद्दुःखं यदपत्यं न विद्यते ॥ तस्माद्देहि सुतं देव प्रसन्नो यदि शंकर ॥१६॥ ॥ ॥ श्रीभगवानुवाच ॥ ॥ अचिरेण नृपश्रेष्ठ पुत्रस्तव भविष्यति ॥ मत्प्रसादान्न संदेहस्तस्माद्गच्छ द्रुतं गृहम्॥१७॥ ॥ सूत उवाच ॥ ॥ एतस्मिन्नंतरे गौरी कोपसंरक्तलोचना ॥ भर्त्सयित्वा महादेवं ततः प्रोवाच तं नृपम् ॥१८॥ यस्मात्त्वया महामूर्ख न प्रणामः कृतो मम ॥ हरादनंतरं तस्माच्छापं दास्याम्यहं तव ॥ १९ ॥ तव संलप्स्यते पुत्रो यथोक्तः शूलपाणिना ॥ परं तन्मृत्युजं दुःखं त्वं शिशुत्वेपि लप्स्यसे ॥ २० ॥ एवमुक्त्वा भगवती[1] सार्धं देवेन शंभुना ॥ अदर्शनं ययौ पश्चात्तथान्यैरपि पार्श्वगैः ॥ २१ ॥ सोऽपि राजा वरं लब्ध्वा शापं च तदनंतरम् ॥ न जगाम गृहं भूयश्चकार सुमहत्तपः ॥ २२ ॥ एकासनं समारूढौ कृत्वा गौरी महेश्वरौ ॥ ततश्चाराधयामास समं पुष्पानुलेपनैः ॥ २३ ॥ विशेषेण ददौ दानं ब्राह्मणेभ्यो महीपतिः ॥ भूमिशायी प्रशांतात्मा षष्ठकालकृताशनः ॥ २४ ॥ ततः संवत्सरस्यांते भगवान्वृषभध्वजः ॥ पार्वत्या सहितो भूयस्तस्य संदर्शनं गतः ॥ २५ ॥ ततः स नृपतिस्ताभ्यां युगपद्विधिपूर्वकम् ॥ कृत्वा नतिं ततो वाक्यं विनयादिदमब्रवीत् ॥ २६ ॥ पुरा देवि मयानंदपूरे व्याकुल चेतसा ॥ न नता त्वं न मे कोपं तस्मात्त्वं कर्तुमर्हसि ॥ २७ ॥ देहार्धधारिणी देवि सदा त्वं शूलधारिणः ॥ तदैकस्मिन्नते कस्मान्न नता त्वं वदस्व मे ॥ २८ ॥ यस्तं नमति देवेशं तेन त्वं सर्वदा नता ॥ नतायां त्वयि देवेशो नतः स्यादिति मे मतिः ॥ २९ ॥ तथापि च पृथक्त्वेन मया त्वं तु[2] नता सह ॥ एकासनं समारूढा तत्समं देवि पूजिता ॥ ३० ॥ तस्मात्कुरु प्रसादं मे यः पुरोक्तः पुरारिणा ॥ सोस्तु वै सफलः सद्यो वरः पुत्रकृते मम ॥ ३१ ॥ यथा वंशधरः पुत्रो दीर्घायुर्दृढविक्रमः ॥ त्वत्प्रसादाद्भवेद्देवि तथा त्वं कर्तुमर्हसि ॥ ३२ ॥ ॥ श्रीदेव्युवाच ॥ ॥ नान्यथा मे वचो राजञ्जायतेऽत्र कथंचन ॥ तस्माद्बालोऽपि ते पुत्रः पंचत्वं समुपैष्यति ॥ ३३ ॥ दर्शयित्वा तु ते दुःखमल्पमृत्युसमुद्भवम्[3] ॥ भूयः संप्राप्स्यति प्राणानचिरान्मे प्रसादतः ॥ ३४ ॥ भविष्यति च दीर्घायुस्ततो वंशधरो जयी ॥ सार्वभौमप्रधानश्च दानी यज्वा च धर्मवित् ॥ ॥ ३५ ॥ तस्माद्राजन्गृहं गत्वा कुरु राज्यमभीप्सितम् ॥ संप्राप्स्यसि सुतं श्रेष्ठं यादृशं कीर्तितं मया[4] ॥ ३६ ॥ अन्योऽपि मानवो यो मां रूपेणानेन संस्थिताम् ॥ पूजयिष्यति चात्रैव समं देवेन शंभुना ॥ ३७ ॥ तस्याहं संप्रदास्यामि पुत्रान्हृदयवांछितान् ॥ तथान्यदपि यत्किंचिदचिरान्नात्र संशयः ॥ ३८ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ भूय एव नृपश्रेष्ठ मत्तः प्रार्थय वांछितम् ॥ न वृथा दर्शनं मे स्यात्सत्यमेतद्ब्रवीमि

१ भवानी सा—इ० पा० । २ शंभुना सह—इ० पा० । ३ आत्ममृत्युसमुद्भवम्—इ०पा० । ४ त्वया—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ते ॥ ३९ ॥ ॥ हरिश्चंद्र उवाच ॥ ॥ कृतकृत्योस्मि देवेश सर्वमस्ति गृहे मम ॥ पुत्रं त्यक्त्वा त्वया सोऽपि दत्तो वंशधरो जयी ॥ ४० ॥ तथापि न तवादेशो व्यर्थः कार्यः कथंचन ॥ एतस्मात्कारणादेव याचयिष्यामि वांछितम् ॥ ४१ ॥ राजसूयकृतेऽस्माकं सदा बुद्धिः प्रवर्तते ॥ निषेधयंति मां सर्वे मन्त्रिणः सुहृदस्तदा ॥ ४२ ॥ सर्वैस्तैर्जायते यज्ञः पार्थिवैः करदीकृतैः ॥ युद्धं विना करं तेऽपि न यच्छन्ति यतो विभो ॥ ४३ ॥ ततो युद्धार्थिनं मां ते वारयंति हितैषिणः ॥ कृतोत्साहं मखप्राप्तौ नीतिमार्गसमाश्रिताः ॥ ४४ ॥ तस्मात्तव प्रसादेन राजसूयो भवेन्मखः ॥ अविघ्नः सिद्धिमायातु मम नान्यद्वृणोम्यहम् ॥४५॥ ॥ सूत उवाच ॥ ॥ स तथेति प्रतिज्ञाय जगामादर्शनं हरः ॥ सोऽपि लब्धवरो भूपः स्वमेव भवनं गतः ॥ ४६ ॥ एवं तेन नरेन्द्रेण पूर्वं तत्र विनिर्मितौ ॥ उमामहेश्वरौ पश्चान्निर्मितावितरैरपि ॥ ४७ ॥ यस्ताभ्यां कुरुते पूजां संप्राप्ते पंचमीदिने ॥ फलैः सर्वेषु[1] गात्रेषु यावत्संवत्सरं द्विजाः ॥ सुतं प्राप्नोति सोऽभीष्टं स्ववंशोद्धरणक्षमम् ॥ ४८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्य उमामहेश्वरोत्पत्तिमाहात्म्यवर्णनंनामाष्टाचत्वारिंशत्तमोऽध्यायः ॥ ४८ ॥ ॥ छ ॥

॥ ॥ सूत उवाच ॥ ॥ तत्रैवास्ति महापुण्यो ह्रदतीरे व्यवस्थितः ॥ कलशेश्वरइत्याख्यः सर्वपापप्रणाशनः ॥ १ ॥ दृष्ट्वा प्रमुच्यते पापान्मनुष्यः कलशेश्वरम् ॥ २ ॥ पुरासीत्कलशोनाम यदुवंशसमुद्भवः ॥ यज्वा दानपतिर्दक्षः सर्वलोकहिते रतः ॥ ३ ॥ कस्यचित्त्वथ कालस्य दुर्वासा मुनिसत्तमः ॥ चातुर्मास्यव्रतं कृत्वा तद्गृहं समुपस्थितः ॥ ४ ॥ अथोत्थाय नृपस्तूर्णं सम्मुखः प्रययौ मुदा ॥ स्वागतंस्वागतं तेस्तु ब्रुवाण इति सादरम् ॥ ५ ॥ ततः प्रणम्य तं भक्त्या प्रक्षाल्य चरणौ स्वयम् ॥ दत्त्वार्घमिति होवाच हर्षबाष्पाकुलेक्षणः ॥ ६ ॥ इदं राज्यममी पुत्रा इमा नार्य इदं धनम् ॥ ब्रूहि सर्वं मुने त्वं च तव कार्यं ददाम्यहम् ॥ ७ ॥ ॥ दुर्वासा उवाच ॥ ॥ युक्तमेतन्महाराज वक्तुं ते कार्यमीदृशम् ॥ गृहागताय विप्राय व्रतिनेऽस्मद्विधाय च ॥ ८ ॥ न मे किञ्चिद्धनैः कार्यं न राज्येन नृपोत्तम ॥ चातुर्मास्यव्रतोऽतोऽहं पारणं कर्तुमुत्सहे ॥ ९ ॥ तस्माद्यत्किञ्चिदन्नं ते सिद्धमस्ति गृहे नृप ॥ तदेहि भोजनार्थं मे बुभुक्षातीव वर्धते ॥ १० ॥ ॥ सूत उवाच ॥ ॥ ततः स पृथिवीपालो यथासिद्धं सुसंस्कृतम् ॥ अन्नं भोज्यकृते तस्मै प्रददौ स्वयमेव हि ॥ ११ ॥ व्यञ्जनानि विचित्राणि पक्वान्नानि बहूनि च ॥ पेयं चोष्यं च खाद्यं च लेह्यमन्नमनेकधा ॥ तथा मांसं विचित्रं च लवणाद्यैः सुसंस्कृतम् ॥ १२ ॥ अथासौ बुभुजे विप्रः क्षुत्क्षामस्त्वरयान्वितः ॥ अविन्दन्न रसास्वादं बृहद्ग्रासैर्मुदान्वि



१ सर्वेषु गात्रेषु—उमामहेश्वरयोः सर्वांगेषु—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तः ॥ १३ ॥ अथ तृतेन मांसस्य ज्ञातस्तेन रसो द्विजाः ॥ ततः कोपपरीतात्मा तं शशाप मुनीश्वरः ॥ १४ ॥ यस्मान्मांसं त्वया दत्त्वा व्रतभंगः कृतो मम ॥ तस्मात्त्वमामिषाहारो रौद्रो व्याघ्रो भविष्यसि ॥ १५ ॥ ततः स भूपतिर्भीतः प्रणम्य च मुनीश्वरम् ॥ प्रोवाच दीनवदनो वेपमानः सुदुःखितः ॥ १६ ॥ तव क्षुत्क्षामकण्ठस्य मया भक्तिः कृता मुने ॥ यथासिद्धेन भोज्येन तत्कस्माच्छप्तुमुद्यतः ॥ १७ ॥ तस्मात्कुरु प्रसादं मे भक्तस्य विनतस्य च ॥ शापस्यानुग्रहेणैव शीघ्रं ब्राह्मणसत्तम ॥ १८ ॥ ॥ दुर्वासा उवाच ॥ ॥ मुक्त्वा श्राद्धं तथा यज्ञं न मांसं भक्षयेद्विजः ॥ विशेषेण व्रतस्यांते चातुर्मास्योद्भवस्य च ॥ १९ ॥ उपवासपरो भूत्वा मांसमश्नाति यो द्विजः ॥ वृथामांसाद्वृथा तस्य तद्व्रतं जायते ध्रुवम् ॥ २० ॥ तस्माद्व्रतं प्रणष्टं मे चातुर्मास्यसमुद्भवम् ॥ तेन शप्तोऽसि राजेंद्र मया कोपेन सांप्रतम् ॥ २१ ॥ ॥ राजोवाच ॥ ॥ तथापि कुरु मे विप्र शापस्यांतं यथेप्सितम् ॥ भक्तियुक्तस्य दीनस्य निर्दोषस्य विशेषतः ॥ २२ ॥ ॥ दुर्वासा उवाच ॥ ॥ यदा ते नंदिनी धेनुर्लिंगं बाणार्चितं पुरा ॥ दर्शयिष्यति ते मुक्तिस्तदा तूर्णं भविष्यति ॥ २३ ॥ एवमुक्त्वा स विप्रेन्द्रो जगाम निजमाश्रमम् ॥ बभूव सोऽपि भूपालो व्याघ्रो रौद्रतमाकृतिः ॥ २४ ॥ नष्टस्मृतिस्ततस्तूर्णं दृष्ट्वा जंतून्पुरःस्थितान् ॥ जवानोच्चाटितोन्यैश्च प्रविवेश महावनम् ॥ २५ ॥ अथ ते मंत्रिणस्तस्य शापस्यांतं महीपतेः ॥ वांछंतस्तस्य तद्राज्यं चक्रुरेव सुरक्षितम् ॥ २६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये कलशेश्वराख्याने कलशनृपतेर्दुर्वाससः शापेन व्याघ्रत्वप्राप्तिवर्णनंनामैकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥ ॥ छ ॥ ॥ एवं तस्य नरेन्द्रस्य व्याघ्ररूपस्य कानने ॥ जगाम सुमहान्कालो निघ्नतो विविधान्द्विज ॥ १ ॥ कस्यचित्त्वथ कालस्य तस्मिन्देशे द्विजोत्तमाः ॥ आयातं गोकुलं रम्यं गोपगोपीसमाकुलम् ॥ २ ॥ तत्रास्ति नन्दिनीनाम धेनुः पीनपयोधरा ॥ विस्तीर्णजघनाभोगा हंसवर्णा वटस्रवा ॥ ३ ॥ अथ सा निजयूथस्य सदाग्रे तृणवांछया ॥ भ्रममाणा निकुञ्जांते लिंगं देवस्य शूलिनः ॥ ४ ॥ अपश्यत्तेजसा युक्तं स्वयमेव व्यवस्थितम् ॥ द्वादशार्कप्रतीकाशं चित्ताह्लादकरं परम् ॥ ५ ॥ ततस्तस्योपरि स्थित्वा सुस्राव सुमहत्पयः ॥ श्रद्धया परया युक्ता तस्य स्नानकृते द्विजाः ॥ ६ ॥ एवं तां स्नपनं तस्य सदा लिंगस्य कुर्वतीम् ॥ न जानाति जनः कश्चिद्वने वृक्षसमाकुले ॥ ७ ॥ अन्यस्मिन्दिवसे तत्र स्थाने व्याघ्रः समागतः ॥ तीक्ष्णदंष्ट्रो महाकायः सर्वजन्तुभयावहः ॥ ८ ॥ अथ सा तत्र आयाता पतिता दृष्टिगोचरे ॥ नन्दिनी द्वीपिनस्तस्य दैवयोगाद्विजोत्तमाः ॥ ९ ॥ ततः सा गोकुले वद्धं स्मृत्वा स्वं लघुवत्सकम् ॥ अतृणादं पयोवृत्तिं करुणं पर्यदेवयत् ॥ १० ॥ अद्यैकाहं च संप्राप्ता कानने जनवर्जिते ॥ पुत्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्कां.म.पु. बालं परित्यज्य गोपैर्गोष्ठे नियंत्रितम् ॥ ११ ॥ येन सत्येन भक्त्याद्य स्नपनायाहमागता ॥ शिवस्य तेन सत्येन भूयान्मे सुतसंगमः ॥ १२ ॥ नागरखं० ६
॥ ५९ ॥ एवं सा करुणं यावन्नन्दिनी विलपत्यलम् ॥ तावद्व्याघ्रः स्मितं कृत्वा प्रोवाच परुषाक्षरम् ॥ १३ ॥ ॥ व्याघ्र उवाच ॥ ॥ प्रलापान्किं मुधा अ० ५१
धेनो करोषि वशगा मम ॥ तस्मादिष्टतमं देवं स्मर स्वर्गकृते शुभे ॥ १४ ॥ ॥ धेनुरुवाच ॥ ॥ नाहमात्मकृते व्याघ्र विलपामि सुदुः
खिता ॥ शिवार्चनकृते मृत्युर्मम जातः शुभावहः ॥ १५ ॥ वत्सो मे गोकुले बद्धः स्मरमाणो ममागमम् ॥ सन्तिष्ठते पयोवृत्तिः कथं स्यात्स
मया विना ॥ १६ ॥ एतस्मात्कारणाद्व्याघ्र विलपामि सुदुःखिता ॥ न चात्मजीवनार्थाय सत्येनात्मानमालभे ॥ १७ ॥ तस्मान्मुंच महाव्याघ्र
मां सद्यः सुतवत्सलाम् ॥ सखीजनस्य तं दत्त्वा समागच्छामि तेंतिकम् ॥ १८ ॥ ॥ व्याघ्र उवाच ॥ ॥ कथं मृत्युमुखं प्राप्य निष्क्रम्य च
कथञ्चन ॥ भूयस्तत्रैव निर्यासि तस्मात्त्वां भक्षयाम्यहम् ॥ १९ ॥ ॥ नन्दिन्युवाच ॥ ॥ शपथैरागमिष्यामि यैः पुनर्व्याघ्र तेंऽतिकम् ॥
तानाकर्णय मे वक्त्रात्ततो युक्तं समाचर ॥ २० ॥ यत्पापं ब्रह्महत्यायां मातापित्रोश्च वंचने ॥ तेन पापेन लिप्येहं नागच्छामि पुनर्यदि ॥ २१ ॥
विवस्त्रं स्नानसक्तानां दिवामैथुनगामिनाम् ॥ यत्पापं तेन लिप्येऽहं नागच्छामि पुनर्यदि ॥ २२ ॥ रजस्वलानुसक्तानां यत्पापं नग्नशायिनाम् ॥
तेन पापेन लिप्येऽहं नागच्छामि पुनर्यदि ॥ २३ ॥ विश्वासघातकानां च कृतघ्नानां च यद्भवेत् ॥ तेन पापेन लिप्येऽहं नागच्छामि पुनर्यदि ॥
॥ २४ ॥ गोकन्याब्राह्मणानां च दूषकानां च यद्भवेत् ॥ तेन पापेन लिप्येऽहं नागच्छामि पुनर्यदि ॥ २५ ॥ वृथापाकप्रकर्तॄणां वृथामांसाशिनां च
यत् ॥ तेन पापेन लिप्येऽहं नागच्छामि पुनर्यदि ॥ २६ ॥ व्रतभंगप्रकर्तॄणामनृतौ गामिनां च यत् ॥ तेन पापेन लिप्येऽहं नागच्छामि पुनर्यदि ॥
॥ २७ ॥ पैशुन्यसूचकानां च यत्पापं शस्त्रकर्मणाम् ॥ तेन पापेन लिप्येऽहं नागच्छामि पुनर्यदि ॥ २८ ॥ इति श्रीस्कान्दे महापुराण एकाशीति
साहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये कलशेश्वरमाहात्म्ये गोव्याघ्रसंवादवर्णनंनाम पञ्चाशत्तमोऽध्यायः॥ ५० ॥छ॥ ॥ सूत
उवाच ॥ ॥ अथ तान्छपथाञ्छ्रुत्वा स व्याघ्रो विस्मयान्वितः ॥ सत्यं मत्वा पुनः प्राह नन्दिनीं पुत्रवत्सलाम् ॥ १ ॥ यद्येवं तद्व्रहं गच्छ वीक्ष
यस्व निजात्मजम् ॥ सखीनामर्पयित्वाथ भूय आगमनं कुरु ॥ २ ॥ ॥ सूत उवाच ॥ ॥ इति व्याघ्रवचः श्रुत्वा सुशीला नन्दिनी तदा ॥ गतालयं ॥ ५९ ॥
समुद्दिश्य यत्र बालः सुतः स्थितः॥ ३ ॥ अथाकालागतां दृष्ट्वा मातरं त्रस्तचेतसम् ॥ रंभमाणां समालोक्य वत्सः प्रोवाच विस्मयात् ॥ ४॥ कस्मा
त्प्राप्तास्य काले तु कस्मादुद्भ्रांतमानसा ॥ बाष्पक्लिन्नमुखी कस्माद्वद मातर्द्रुतं मम ॥ ५ ॥ ॥ नंदिन्युवाच ॥ ॥ यदि पृच्छसि मां पुत्र स्तनपानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाचर ॥ येन तृप्तस्य ते सर्वं वृत्तांतं तद्वदाम्यहम् ॥ ६ ॥ ॥ सूत उवाच ॥ ॥ सोऽपि तद्वचनं श्रुत्वा पीत्वा क्षीरं यथोचितम् ॥ आघ्रातश्च तया मूर्ध्नि ततः प्रोवाच सत्वरम् ॥ ७ ॥ सर्वं कीर्तय वृत्तांतमद्यारण्यसमुद्भवम् ॥ येन मे जायते स्वास्थ्यं श्रुत्वा मातस्तवास्यतः ॥ ८ ॥ ॥ नंदिन्युवाच ॥ ॥ अहं गता महारण्ये ह्यद्य पुत्र यथेच्छया ॥ व्याघ्रेणासादिता तत्र भ्रममाणा इतस्ततः ॥ ९ ॥ स मया प्रार्थितः पुत्र भक्षमाणो नखायुधः ॥ शपथैरागमिष्यामि गोकुले वीक्ष्य चात्मजम् ॥१०॥ साहं तेन विनिर्मुक्ता शपथैर्बहुभिः कृतैः ॥ भूयस्तत्रैव यास्यामि दृष्टः संभाषितो भवान् ॥ ११ ॥ ॥ वत्स उवाच ॥ ॥ अहं तत्रैव यास्यामि यत्र त्वं हि प्रगच्छसि ॥ श्लाघ्यं हि मरणं सम्यङ्मातुरग्रे ममाधुना ॥ १२ ॥ एकाकिनापि मर्तव्यं त्वया हीनेन वै मया ॥ विनापि क्षीरपानेन स्वल्पेन समयेन तु ॥ १३ ॥ यदि मातस्त्वया सार्धं व्याघ्रो मां सूदयिष्यति ॥ या गतिर्मातृभक्तानां सा मे नूनं भविष्यति ॥ १४ ॥ अथवा ये त्वया तस्य विहिताः शपथाः शुभे ॥ ते संतु मम तिष्ठ त्वं तस्मादत्रैव गोकुले ॥ ॥ १५ ॥ नास्ति मातृसमो बन्धुर्बालानां क्षीरजीविनाम् ॥ नास्ति मातृसमो नाथो नास्ति मातृसमा गतिः ॥ १६ ॥ नास्ति मातृसमः पूज्यो नास्ति मातृसमः सखा ॥ नास्ति मातृसमो देव इह लोके परत्र च ॥ १७ ॥ एवं मत्वा सदा मातुः कर्तव्या भक्तिरुत्तमैः ॥ तमेनं परमं धर्मं प्रजापतिविनिर्मितम् ॥ अनुतिष्ठंति ये पुत्रास्ते यांति परमां गतिम् ॥ १८ ॥ तस्मादहं गमिष्यामि त्वं च तिष्ठात्र गोकुले ॥ आत्मप्राणैस्तव प्राणान्रक्षयिष्याम्यसंशयम् ॥ १९ ॥ ॥ नंदिन्युवाच ॥ ॥ ममैव विहितो मृत्युर्न ते पुत्राद्य वासरे ॥ तत्कथं मम जीवं त्वं रक्षस्यसुभिरात्मनः ॥ ॥ २० ॥ अपश्चिममिदं पुत्र मातृसंदिष्टमुत्तमम् ॥ त्वया कार्यं प्रयत्नेन मद्वाक्यमनुतिष्ठता ॥ २१ ॥ भ्रममाणो वने पुत्र मा प्रमादं करिष्यसि ॥ लोभात्संजायते नाश इह लोके परत्र च ॥ २२ ॥ समुद्रमटवीं युद्धं विशंते लोभमोहिताः ॥ इह तन्नास्ति लोभेन यन्न कुर्वंति मानवाः ॥ २३ ॥ लोभात्प्रमादाद्विश्रंभात्पुरुषो वध्यते त्रिभिः ॥ तस्माल्लोभो न कर्तव्यो न प्रमादो न विश्वसेत् ॥ २४ ॥ आत्मा पुत्र त्वया रक्ष्यः सर्वदैव प्रयततः ॥ सर्वेभ्यः श्वापदेभ्यश्च भ्रमता गहने वने ॥ २५ ॥ विषमस्थं तृणान्नाद्यं कथंचित्पुत्रक त्वया ॥ नैकाकिना प्रगंतव्यं यूथं त्यक्त्वा निजं क्वचित् ॥ २६ ॥ एवं संभाष्य तं वत्समवलिह्य मुहुर्मुहुः ॥ शोकेन महताविष्टा बाष्पव्याकुललोचना ॥ २७ ॥ ततः सखीजनं सर्वं गता द्रष्टुं द्विजोत्तमाः ॥ नन्दिनी पुत्रशोकेन पीडितांगी सुविह्वला ॥ २८ ॥ ततः प्रोवाच ताः सर्वा गत्वाऽरण्यं द्विजोत्तमाः ॥ चरंतीः स्वेच्छया हृष्टा

१ अपश्चिमम्—अंतकालिकम्—इत्यर्थः । अस्मात्संदेशवाक्यादनंतरं संदेशवाक्यं कदापि मत्तो न श्रोष्यसि—अत इदमपश्चिमम्—सर्वांतिमं संदेशवाक्यम्—इति यावत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





वांछितानि तृणानि ताः ॥ २९ ॥ बहुले चंपके दामे वसुधारे घटस्रवे ॥ हंसनादि प्रियानंदे शुभक्षीरे महोदये ॥ ३० ॥ तथान्या धेनवो याश्च संस्थिता गोकुलांतिके ॥ शृण्वंतु वचनं मह्यं कुर्वंतु च ततः परम् ॥ अद्याहं निजयूथस्य भ्रमंती नातिदूरतः ॥ ३१ ॥ ततश्च गहनं प्राप्ता वनं मानुषवर्जितम् ॥ व्याघ्रेणासादिता तत्र भ्रमंती तृणवांछया ॥ ३२ ॥ युष्माकं दर्शनार्थाय सुतसंभाषणाय च ॥ संप्राप्ता शपथैः कृच्छ्रात्तं विश्वास्य नखायुधम् ॥ ३३ ॥ दृष्टः संभाषितः पुत्रः शासितश्च मया हि सः ॥ अधुना भवतीनां च प्रदत्तः पुत्रको यथा ॥ ३४ ॥ अज्ञानाज्ज्ञानतो वापि भवतीनां मया कृतम् ॥ यत्किंचिद्दुष्कृतं भद्रास्तत्क्षंतव्यं प्रसादतः ॥३५॥ अनाथो ह्यबलो दीनः क्षीरपो मम बालकः ॥ मातृशोकाभिसंतप्तः पाल्यः सर्वाभिरेव सः ॥ ३६ ॥ भ्रममाणोऽसमे स्थाने व्रजमानोऽन्यगोकुले ॥ अकार्येषु च संसक्तो निवार्यः सर्वदाऽऽदरात् ॥ ३७ ॥ अहं तत्र गमिष्यामि स व्याघ्रो यत्र संस्थितः ॥ अपश्चिमप्रणामोऽयं सर्वासां विहितो मया ॥ ३८ ॥ ॥ धेनव ऊचुः ॥ ॥ न गंतव्यं त्वया तत्र कथंचिदपि नंदिनि ॥ आपद्धर्मं न वेत्सि त्वं नूनं येन प्रगच्छसि ॥ ३९ ॥ न नर्मयुक्तं वचनं हिनस्ति न स्त्रीषु जातिर्न विवाहकाले ॥ प्राणात्यये सर्वधनापहारे पंचानृतान्याहुरपातकानि ॥ ४० ॥ तस्मात्तत्र न गंतव्यं दोषो नास्त्यत्र ते शुभे ॥ पालयस्व निजं पुत्रं व्रजास्माभिर्निजं गृहम् ॥ ॥ ४१ ॥ ॥ नंदिन्युवाच ॥ ॥ परेषां प्राणयात्रार्थं तत्कर्तुं युज्यते शुभाः ॥ आत्मप्राणहितार्थाय न साधूनां प्रशस्यते ॥ ४२ ॥ सत्ये प्रतिष्ठितो लोको धर्मः सत्ये प्रतिष्ठितः ॥ उदधिः सत्यवाक्येन मर्यादां न विलंघयेत् ॥ ४३ ॥ विष्णवे पृथिवीं दत्त्वा बलिःपातालमाश्रितः ॥ सत्यवाक्यं समाश्रित्य न निष्क्रामति दैत्यपः ॥ ४४ ॥ यः स्वं वाक्यं प्रतिज्ञाय न करोति यथोदितम् ॥ किं तेन न कृतं पापं चौरेणाकृतबुद्धिना ॥ ४५ ॥ ॥ सख्य ऊचुः ॥ ॥ त्वं नंदिनि नमस्कार्या सर्वैरपि सुरासुरैः ॥ या त्वं सत्यप्रतिष्ठार्थं प्राणांस्त्यजसि दुस्त्यजान् ॥ ४६ ॥ किं त्वां कल्याणि वक्ष्यामः स्वयं धर्मार्थवादिनीम् ॥ सर्वैरपि गुणैर्युक्तां नित्यं सत्ये प्रतिष्ठिताम् ॥ ४७ ॥ तस्माद्गच्छ महाभागे न शोच्यः पुत्रकस्तव ॥ भवत्या यद्वयं प्रोक्तास्तत्करिष्याम एव हि ॥ ४८ ॥ एतत्पुनर्वयं विद्मः सदा सत्यवतां नृणाम् ॥ न निष्फलः क्रियारंभः कथंचिदपि जायते ॥ ४९ ॥ ॥ सूत उवाच ॥ ॥ एवं संभाष्य तं सर्वं नंदिनी स्वसखीजनम् ॥ प्रस्थिता व्याघ्रमुद्दिश्य पुत्रशोकेन पीडिता ॥ ५० ॥ शोकाग्निनापि संतप्ता निराशा पुत्रदर्शने ॥ वियुक्ता चक्रवाकीव लतेव पतिता तरोः ॥ ५१ ॥ अंधेव दृष्टिनिर्मुक्ता प्रस्खलंती पदेपदे ॥ वनाधिदेवताः ॥ ६० ॥

१ बहुले—इत्यादीनि गवां संबोधनानि । २ मह्यम्—मम—इत्यर्थः । ३ अपश्चिमप्रणामः—अंतकालिकः—सर्वान्तिमःप्रणामः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वाः प्राऽर्थयच्च सुतार्थतः ॥ ५२ ॥ प्रसुप्तं भ्रममाणं वा मम पुत्रं सुबालकम् ॥ वनाधिदेवताः सर्वा रक्षंतु वचनान्मम ॥ ५३ ॥ एवं प्रलप्य मनसा संप्राप्ता तत्र यत्र सः ॥ आस्ते विस्फूर्जितास्यश्च तीक्ष्णदंष्ट्रो भयावहः ॥ ५४ ॥ व्याघ्रः क्षुत्क्षामकण्ठश्च तस्या मार्गावलोककः ॥ सरं भाटोपसंयुक्तः सृक्किणी परिलेहयन् ॥ ५५ ॥ ॥ नंदिन्युवाच ॥ ॥ आगताहं महाव्याघ्र सत्ये च शपथे स्थिता ॥ कुरु तृप्तिं यथाकामं मम मांसेन सांप्रतम् ॥ ५६ ॥ तां दृष्ट्वा सोऽपि दुष्टात्मा वैराग्यं परमं गतः ॥ सत्याशया पुनः प्राप्तां संत्यज्य प्राणजं भयम् ॥ ५७ ॥ ॥ व्याघ्र उवाच ॥ ॥ स्वागतं तव कल्याणि सुधेनो सत्यवादिनि ॥ न हि सत्यवतां किंचिदशुभं विद्यते क्वचित् ॥ ५८ ॥ त्वयोक्तं शपथैर्भद्रे आगमिष्याम्यहं पुनः ॥ तेन मे कौतुकं जातं किमेषा प्रकरिष्यति ॥ ५९ ॥ सोऽहं भद्रे दुराचारो नृशंसो जीवघातकः ॥ यास्यामि नरकं घोरं कर्मणानेन सर्वदा ॥ ६० ॥ तस्मात्त्वं मे महाभागे पापस्यातिदुरात्मनः ॥ उपदेशप्रदानेन प्रसादं कर्तुमर्हसि ॥ ६१ ॥ येन मे स्यात्परं श्रेय इह लोके परत्र च ॥ न तेऽस्त्यविदितं किंचित्सत्याचारान्मतिर्मम ॥ ६२ ॥ तस्मात्त्वं धर्मसर्वस्वं संक्षेपान्मम कीर्तय ॥ सत्संगमफलं येन मम संजायतेऽखिलम् ॥ ६३ ॥ ॥ नंदिन्युवाच ॥ ॥ तपः कृते प्रशंसंति त्रेतायां ध्यानमेव च ॥ द्वापरे यज्ञयोगं च दानमेकं कलौ युगे ॥ सर्वेषामेव दानानां नास्ति दानमतः परम् ॥ ६४ ॥ चराचराणां भूतानामभयं यः प्रयच्छति ॥ स सर्वभयनिर्मुक्तः परं ब्रह्माधिगच्छति ॥ ६५ ॥ ॥ व्याघ्र उवाच ॥ ॥ अन्येषां चैव भूतानां तद्दानं युज्यते शुभे ॥ अहिंसया भवेद्येषां प्राणयात्रान्नपूर्वकम् ॥ ६६ ॥ न हिंसया विनाऽस्माकं यतः स्यात्प्राणधारणम् ॥ तस्माद्ब्रूहि महाभागे किञ्चिन्मम सुखावहम् ॥ उपदेशं सुधर्माय हिंसकस्यापि देहिनाम् ॥ ॥ ६७ ॥ ॥ नन्दिन्युवाच ॥ ॥ अत्रास्ति सुमहल्लिंगं पुरा बाणप्रतिष्ठितम् ॥ गहने यत्प्रभावेन त्वया मुक्तास्म्यहं ध्रुवम् ॥ ६८ ॥ तस्य त्वं प्रातरुत्थाय कुरु नित्यं प्रदक्षिणाम् ॥ प्रणामं च ततः सिद्धिं वांछितां समवाप्स्यसि ॥ ६९ ॥ नान्यस्य कर्मणः शक्तिर्विद्यते ते नखायुध ॥ पूजादिकस्य हीनत्वाद्धस्ताभ्यामिति मे मतिः ॥ ७० ॥ एवमुक्त्वाथ सा धेनुर्व्याघ्रस्याथ वनांतिके ॥ तल्लिंगं दर्शयामास पुरः स्थित्वा द्विजोत्तमाः ॥ ७१ ॥ सोऽपि संदर्शनात्तस्य तत्क्षणान्मुक्तिमातवान् ॥ व्याघ्रत्वात्पार्थिवो भूयः स बभूव यथा पुरा ॥ ७२ ॥ शापं दुर्वाससा दत्तं राज्यं स्वं सहितैः सुतैः ॥ सस्मार स नृपश्रेष्ठस्ततः प्रोवाच नंदिनीम् ॥ ७३ ॥ नृपः कलशनामाहं हैहयान्वयसंभवः ॥ शप्तो दुर्वाससा पूर्वं कस्मिंश्चित्कारणांतरे ॥ ७४ ॥

२ इति–इति शेषः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





ततः प्रसादितेनोक्तस्तेनाहं नंदिनी यदा ॥ दर्शयिष्यति तल्लिंगं तदा मुक्तिर्भविष्यति ॥ ७५ ॥ सा नूनं नन्दिनी त्वं हि ज्ञाता शापान्ततो मया ॥
तत्त्वं ब्रूहि प्रदेशोऽयं कतमो वरधेनुके ॥ ७६ ॥ येन गच्छाम्यहं भूयः स्वगृहं प्रति सत्वरम् ॥ मार्गं दृष्ट्वा महाभागे मानुषं प्राप्य कश्चन ॥ ७७ ॥
॥ ॥ नंदिन्युवाच ॥ ॥ चमत्कारपुरक्षेत्रमेतत्पातकनाशनम् ॥ सर्वतीर्थमयं राजन्सर्वकामप्रदायकम् ॥ ७८ ॥ यदन्यत्र भवेच्छ्रेयो वत्सरेण
तपस्विनाम् ॥ दिनेनैवात्र तत्सम्यग्जायते नात्र संशयः ॥ ७९ ॥ एवं मत्वा मया लिंगं स्नापितं पयसा सदा ॥ एतद्यूथं परित्यज्य भक्त्या पूतेन
चेतसा ॥ ८० ॥ ॥ राजोवाच ॥ ॥ गच्छ नन्दिनि भद्रं ते निजं प्राप्नुहि बालकम् ॥ गोकुलं च सखीः स्वाश्च तथान्यं च सुहृज्जनम् ॥ ८१ ॥
एतत्क्षेत्रं मया पूर्वं ब्राह्मणानां मुखाच्छ्रुतम् ॥ वांछितं च सदा द्रष्टुं न च द्रष्टुं प्रपारितम् ॥ ८२ ॥ राज्यकर्मप्रसक्तेन भोगासक्तेन नंदिनि ॥ स्वय
मेवाधुना लब्धं नाहं सन्त्यक्तुमुत्सहे ॥ ८३ ॥ दिष्ट्या मे मुनिना तेन दत्तः शापो महात्मना ॥ कथं स्यादन्यथा प्राप्तिः क्षेत्रस्यास्य सुशोभने ॥
॥ ८४ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वा महीपालो नन्दिनीं तां विसृज्य च ॥ स्थितस्तत्रैव तल्लिंगं ध्यायमानो दिवानिशम् ॥ ८५ ॥
प्रासादं तत्कृते मुख्यं विधायाद्भुतदर्शनम् ॥ कैलासशिखराकारं तपस्तेपे तदग्रतः ॥ ८६ ॥ ततस्तस्य प्रभावेन स्वल्पैरेव दिनैर्द्विजाः ॥ संप्राप्तः
परमां सिद्धिं दुर्लभां याज्ञिकैरपि ॥ ८७ ॥ तत्र यः कार्तिके मासि दीपकं संप्रयच्छति ॥ सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥ ८८ ॥ मार्ग
शीर्षे च सम्प्राप्ते [1]गीतनृत्यादिकं नरः ॥ तदग्रे कुरुते भक्त्या स गच्छति परां गतिम् ॥ ८९ ॥ एतद्वः सर्वमाख्यातं सर्वपातकनाशनम् ॥ कलशे
श्वरमाहात्म्यं विस्तरेण द्विजोत्तमाः ॥ ९० ॥ भक्त्या पठति यश्चैतच्छ्रद्धया परया युतः ॥ सोऽपि पापविनिर्मुक्तः शिवलोके महीयते ॥ ९१ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये कलशेश्वरमाहात्म्यवर्णनंनामैकोनपंचाशत्तमोऽ
ध्यायः ॥ ६१ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ उमामहेश्वरौ तत्र स्थापितौ तेन भूभुजा ॥ प्रासादं परमं कृत्वा साधुदृष्टिसुखप्रदम् ॥ १ ॥
तस्याग्रतः शुभं कुंडं तत्र चैव विनिर्मितम् ॥ स्वच्छोदकेन सम्पूर्णं पद्मिनीखंडमंडितम् ॥ २ ॥ स्नात्वा तत्र नरो भक्त्या तौ पश्येद्यः समाहितः ॥
माघशुक्लचतुर्दश्यां न स भूयोऽत्र जायते ॥ ३ ॥ तस्यैव पूर्वदिग्भागेऽगस्त्यकुण्डसमीपतः ॥ अस्ति[2] वापी महापुण्या सर्वपातकनाशिनी ॥ ४ ॥ ॥ ६१ ॥
तस्यां यः कुरुते स्नानं मासि वै फाल्गुने नरः ॥ सोपवासः सिताष्टम्यां वांछितं लभते च सः ॥ ५ ॥ तस्या दक्षिणदिग्भागे तत्रास्ति कपिला

१ गत्वा पाद्यादिकं नरः–इ० पा० । २ अत्र–इ०, अन्नवापी–इ० च पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नदी ॥ कपिलो यत्र संप्राप्तः सिद्धिं सांख्यसमुद्भवाम् ॥ ६ ॥ कपिलायाश्च पूर्वेण सिद्धक्षेत्रं प्रकीर्तितम् ॥ यत्र सिद्धिं गताः सिद्धाः पुरा शतसहस्रशः ॥ ७ ॥ यो यं काममभिध्याय तपस्तत्र समाचरेत् ॥ षण्मासाभ्यंतरे नूनं स तमाप्नोति मानवः ॥ ८ ॥ तस्याधस्ताच्छिला विप्रा विद्यते वैष्णवी शुभा ॥ भ्रमन्ती चतुरस्रा च सर्वपातकनाशिनी ॥ ९ ॥ सदा महानदीतोयक्षालिता मुक्तिदा नृणाम् ॥ गंगायमुनयोर्मध्ये संनिविष्टा सरस्वती ॥ १० ॥ त्रिवेणी वहते तस्याः पुरतो भुक्तिमुक्तिदा ॥ तस्यामुपरि दग्धानां ब्राह्मणानां विशेषतः ॥ ११ ॥ नूनं मुक्तिर्भवेत्तेषां चिताभस्मनि गोष्पदम् ॥ दृश्यते तत्र तज्ज्ञात्वा संस्कार्या ब्राह्मणा मृताः[1] ॥ १२ ॥ तस्यैवोत्तरदिग्भागे रुद्रकोटिर्द्विजोत्तमाः ॥ अस्ति संपूजिता विप्रैर्दाक्षिणात्यैर्महात्मभिः ॥ १३ ॥ महायोगिस्वरूपेण दाक्षिणात्या द्विजोत्तमाः ॥ चमत्कारपुरे क्षेत्रे श्रुत्वा[2] स्वयमुमापतिम् ॥ १४ ॥ ततः कौतूहलाविष्टाः श्रद्धया परया युताः ॥ कोटिसंख्या द्रुतं जग्मुस्तस्य दर्शनवांछया ॥ १५ ॥ अहंपूर्वमहंपूर्वं वीक्षयिष्यामि तं हरम् ॥ इति श्रद्धासमोपेताश्चक्रुस्ते शपथं गताः ॥ १६ ॥ एतेषां मध्यतो यस्तं महायोगिनमीश्वरम् ॥ चरमं[3] देवमीक्षेत भविष्यति स पापकृत् ॥ १७ ॥ ततस्तेषामभिप्रायं ज्ञात्वा देवो महेश्वरः ॥ भक्तिप्रीतो हितार्थाय कोटिरूपैर्व्यवस्थितः ॥ १८ ॥ हेलया दर्शनं प्राप्तः सर्वेषां द्विजसत्तमाः ॥ ततः प्रभृति तत्स्थानं रुद्रकोटीतिविश्रुतम् ॥ १९ ॥ तदर्थं पठितः श्लोको नारदेन पुरा द्विजाः ॥ रुद्रावर्तं समालोक्य प्रहृष्टेन द्विजोत्तमाः ॥ २० ॥ आषाढीं कार्तिकीं माघीं तथा चैत्रसमुद्भवाम् ॥ धन्याः पृथिव्यां लप्स्यंते रुद्रावर्ते चतुर्दशीम् ॥ २१ ॥ आजन्मशतसाहस्रं कृत्वा पापं नरः क्षितौ ॥ रुद्रावर्तं समालोक्य विपाप्मत्वं प्रपद्यते[4] ॥ २२ ॥ रुद्रावर्त्ते नरो गत्वा दृष्ट्वा योगेश्वरं हरम् ॥ शुक्लपक्षे चतुर्दश्यां विपाप्मा जायते ध्रुवम् ॥ २३ ॥ यस्तत्र कुरुते श्राद्धं महायोगिपुरे द्विजाः ॥ रुद्रावर्ते स चाप्नोति फलं शतमखोद्भवम् ॥ २४ ॥ उपवासपरो भूत्वा यः कुर्याद्रात्रिजागरम् ॥ कामगेन विमानेन स स्वर्गे याति मानवः ॥ २५ ॥ तत्र यः कपिलां दद्याद्ब्राह्मणायाहिताग्नये ॥ स गणः स्यान्न संदेहो हरस्य दयितस्तथा ॥ २६ ॥ यस्तस्य पुरतो भक्त्या जपेद्वा शतरुद्रियम् ॥ चतुःषडक्षरं जपेद्यस्तु महायोगिपुरः स्थितः ॥ मंत्रं तस्य भवेच्छ्रेयः षड्गुणं राजसूयतः ॥ २७ ॥ चतुर्णामपि वेदानां सोऽधीतानां भजेत्[5]फलम् ॥ २८ ॥ गीतं वा यदि वा नृत्यं तत्पुरः कुरुते नरः ॥ स सर्वेषां भजेच्छ्रेयो मखानां नात्र संशयः ॥ २९ ॥

---

१ स्मृताः—इ० पा० । २ श्रुत्वा श्रितमुमापतिम्—इ० पा० । ३ चरमं देवमीक्षेत—देवं सर्वेभ्यः पश्चाद् ईक्षेत—इत्यर्थः । ४ प्रपत्स्यते—इ० पा० । ५ लभेत्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





एवमुक्त्वा द्विजश्रेष्ठाः स मुनिर्ब्रह्मसंभवः ॥ विरराम ततो हृष्टस्तीर्थयात्रां गतो द्रुतम् ॥ ३० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखंडे हाटकेश्वरक्षेत्रमाहात्म्ये रुद्रकोटिमाहात्म्यवर्णनंनाम द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥ ॥ छ ॥ ॥ ॥ ॥ सूत उवाच ॥ ॥ तत्रैवोज्जयनीपीठमस्ति कामप्रदं नृणाम् ॥ प्रभूताश्चर्यसंयुक्तं बहुसिद्धनिषेवितम् ॥ १ ॥ यस्य मध्यगतो नित्यं स्वयमेव महेश्वरः ॥ महाकालस्वरूपेण स तिष्ठति द्विजोत्तमाः ॥ २ ॥ वैशाख्यां यो नरस्तत्र कृत्वा श्राद्धं समाहितः ॥ ततः पश्यति देवेशं महाकाल इति स्मृतम् ॥ पूजयेद्दक्षिणां मूर्तिं समाश्रित्य द्विजोत्तमाः ॥ ३ ॥ दश पूर्वान्दशातीतानात्मानं च द्विजोत्तमाः ॥ पुरुषान्स समुद्धृत्य शिवलोके महीयते ॥ ४ ॥ यो यं काममभिध्याय तत्र पीठं प्रपूजयेत् ॥ संपूज्य योगिनीवृंदं कन्यकावृन्दमेव च ॥ ५ ॥ स तत्कृत्स्नमवाप्नोति यदपि स्यात्सुदुर्लभम् ॥ तत्र वैशाखमासस्य पौर्णमास्यां समाहितः ॥ ६ ॥ श्रद्धायुक्तो नरो यो वा उपवासपरः शुचिः ॥ करोति जागरं तस्य पुरतः श्रद्धयान्वितः ॥ स याति परमं स्थानं जरामरणवर्जितम् ॥ ७ ॥ किं व्रतैः किं वृथा दानैः किं जपैर्नियमेन वा ॥ महाकालस्य ते सर्वे कलां नार्हंति षोडशीम् ॥ ८ ॥ ॥ सूत उवाच ॥ ॥ तत्रैवास्ति महाभागा भ्रूणगर्तेति विश्रुता ॥ गर्ता सुविपुलाकारा सर्वपातकनाशिनी ॥ ९ ॥ ब्रह्महत्याविनिर्मुक्तः सौदासो यत्र पार्थिवः ॥ स्त्रीहत्यया विनिर्मुक्तः सुषेणो वसुधाधिपः ॥ १० ॥ ॥ ऋषय ऊचुः ॥ ॥ ब्रह्महत्या कथं तस्य सौदासस्य महीपतेः ॥ ब्रह्मण्यस्यापि संजाता तदस्माकं प्रकीर्तय ॥ ११ ॥ श्रूयते स महीपालो ब्राह्मणानां हिते रतः ॥ कर्मणा मनसा वाचा ब्रह्मघ्नः सोऽभवत्कथम् ॥ १२ ॥ विमुक्तश्च कथं भूयो भ्रूणगर्तामुपाश्रितः ॥ सापि गर्ता कथं जाता सर्वं नो वद विस्तरात् ॥ १३ ॥ ॥ सूत उवाच ॥ ॥ यदा लिंगस्य पातोऽभूद्देवदेवस्य शूलिनः ॥ तदा स लज्जयाविष्टो लिंगाभावाद्द्विजोत्तमाः ॥ १४ ॥ कृत्वाऽतिविपुलां गर्तां प्रविवेश ततः परम् ॥ न कस्यचित्तदात्मानं दर्शयामास शूलधृक् ॥ १५ ॥ एवं सा तत्र संजाता गर्ता ब्राह्मणसत्तमाः ॥ यथा तस्यां विपाप्माभूत्सौदासस्तद्वदाम्यहम् ॥ १६ ॥ आसीन्मित्रसहोनाम राजा परमधार्मिकः ॥ सौदासस्तत्सुतः साक्षात्सूर्यवंशसमुद्भवः ॥ १७ ॥ तेनेष्टं विपुलैर्यज्ञैः सुवर्णवरदक्षिणैः ॥ असंख्यातानि दानानि प्रदत्तानि महात्मना ॥ १८ ॥ कस्यचित्त्वथ कालस्य सत्रे द्वादशवार्षिके ॥ वर्तमाने यथान्यायं विधिदृष्टेन कर्मणा ॥ १९ ॥ क्रूराक्षः क्रूरबुद्धिश्च राक्षसौ बलवत्तरौ ॥ यज्ञविघ्नाय संप्राप्तौ संप्राप्ते रजनीमुखे ॥ २० ॥ राक्षसैर्बहुभिः सार्धं तथा



१ नृत्यम्—इ०पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यैर्भूतसंज्ञितैः ॥ पिशाचैश्च दुराधर्षैर्यज्ञविध्वंसतत्परैः ॥ २१ ॥ अथ ते राक्षसाः सर्वे किंचिच्छिद्रमवेक्ष्य च ॥ विविशुर्यज्ञवाटं तं प्रसर्पन्तः समंततः ॥ २२ ॥ निघ्नन्तो ब्राह्मणश्रेष्ठान्भक्षयन्तो हवींषि च ॥ तथान्यानि विचित्राणि यज्ञार्थे कल्पितानि च ॥ २३ ॥ एतस्मिन्नंतरे तत्र हाहाकारो महानभूत् ॥ भक्ष्यमाणेषु विप्रेषु राक्षसैर्बलवत्तरैः ॥ २४ ॥ ततो मैत्रसहिः क्रुद्धस्त्यक्त्वा दीक्षाव्रतं नृपः ॥ आदाय सशरं चापं ध्वंसयामास वीक्ष्य तान् ॥ २५ ॥ कृतरक्षो वसिष्ठेन स्वयमेव पुरोधसा ॥ क्रूराक्षं सूदयामास राक्षसैर्बहुभिः सह ॥ २६ ॥ क्रूरबुद्धिरथो वीक्ष्य हतं श्रेष्ठं सहोदरम् ॥ तं च पार्थिवशार्दूलमगम्यं ब्रह्मतेजसा ॥ २७ ॥ हतशेषान्समादाय राक्षसान्बलसंयुतः ॥ पलायनं भयाच्चक्रे क्षतांगस्तस्य सायकैः ॥ २८ ॥ ततस्तद्वैरमाश्रित्य भ्रातुर्ज्येष्ठस्य राक्षसः ॥ छिद्रमन्वेषयामास तद्वधार्थं दिवानिशम् ॥ २९ ॥ एवं संवीक्षमाणस्य तस्य च्छिद्रं महात्मनः ॥ समाप्तिमगमद्विप्राः सत्रं तद्वादशाब्दिकम् ॥ ३० ॥ न सूक्ष्ममपि संप्राप्तं छिद्रं तेन दुरात्मना ॥ वसिष्ठविहिता रक्षा सत्रे तस्य महीपतेः ॥ ३१ ॥ अथासौ ब्राह्मणान्सर्वान्विसृज्याहितदक्षिणान् ॥ कृतांजलिपुटो भूत्वा वसिष्ठमिदमब्रवीत् ॥ ३२ ॥ स्वहस्तेन गुरोद्याहं त्वां भोजयितुमुत्सहे ॥ क्रियतां तत्प्रसादो मे भुक्त्वाद्य मम मन्दिरे ॥ ३३ ॥ ॥ सूत उवाच ॥ ॥ स तथेति प्रतिज्ञाय वसिष्ठो मुनिसत्तमः ॥ क्षालितांघ्रिः स्वयं तेन निविष्टो भोजनाय वै ॥ ३४ ॥ क्रूरबुद्धिरथो वीक्ष्य तदर्थं चामिषं शुभम् ॥ सुसंस्कृतं विधानेन सूपकारैर्द्विजोत्तमाः ॥३५॥ उखां कृत्वा ततस्तादृक्तत्प्रमाणामतर्किताम् ॥ महामांसाभृतां कृत्वा तां जहारामिषान्विताम् ॥३६॥ अथासौ मुनिशार्दूलो भुंजानो बुबुधे हि तत् ॥ महामांसमिति क्रुद्धस्तत्र प्रोवाच मन्युमान् ॥ ३७ ॥ महामांसाशनं यस्मात्कारितोऽहं त्वयाधम ॥ रक्षोवद्राक्षसस्तस्मात्त्वमद्यैव भविष्यसि ॥ ३८ ॥ ततः संशोधयामास तस्य मांसस्य चागमम् ॥ निपुणं सूपकारांस्तान्दृष्ट्वा राजा पृथक्पृथक् ॥ ३९ ॥ तेऽब्रुवन्नैतदस्माभिः श्रपितं मांसमीदृशम् ॥ श्रद्धीयतां महीपाल नान्येन मनुजेन वा ॥ ४० ॥ राक्षसं वा पिशाचं वा दानवं वा विना विभो ॥ एतज्ज्ञात्वा ततो नाथ यद्युक्तं तत्समाचर ॥ ४१ ॥ एतस्मिन्नंतरे तस्य नारदो मुनिसत्तमः ॥ समागत्याब्रवीत्सर्वं तद्राक्षसविचेष्टितम् ॥ ४२ ॥ तच्छ्रुत्वा कोपमापन्नः स राजा शप्तुमुद्यतः ॥ वसिष्ठं स्वकरे कृत्वा जलं सौदासभूपतिः ॥ शापोद्यतं च तं दृष्ट्वा नारदो वाक्यमब्रवीत् ॥ ४३ ॥ निघ्नन्तो वा शपन्तो वा द्विषन्तो वा द्विजातयः ॥ नमस्कार्या महीपाल तथापि स्वहितेच्छुना ॥ गुरुरेष पुनर्मान्यस्तव पार्थिवसत्तम ॥ ४४ ॥ तस्मान्नार्हसि शप्तुं त्वं प्रति

१ यतः इति शेषः—तत इत्यर्थाक्षिप्तेन—पूर्वस्य 'न सूक्ष्मम्' इत्यर्थस्यान्वयः । २ महामांसम्—मनुष्यमांसम्—तेन—आभृताम्—पूर्णाम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



शापेन सन्मुनिम् ॥ निषिद्धः स तथा भूपस्ततस्तत्सलिलं करात् ॥ पादयोः कृत्स्नमुपरि प्रमुमोच ततः परम् ॥ ४५ ॥ अथ तौ चरणौ तस्य तत्त
शापोदकप्लुतौ ॥ दग्धौ कृष्णत्वमापन्नौ तत्क्षणाद्विजसत्तमाः ॥ ४६ ॥ कल्माषपाद इत्युक्तस्ततःप्रभृति स क्षितौ ॥ भूपालो द्विजशार्दूला नाम्ना तेन
विशेषतः ॥ ४७ ॥ ॥ सूत उवाच ॥ ॥ एतस्मिन्नंतरे विप्रो वसिष्ठो लज्जयान्वितः ॥ ज्ञात्वा दत्तं वृथा शापं तस्य भूमिपतेस्तदा ॥ ४८ ॥
उवाच व्यर्थः शापोऽयं तव दत्तो मया नृप ॥ न च मे जायते वाक्यमसत्यं हि कथंचन ॥ ४९ ॥ तस्मात्त्वं राक्षसो भूत्वा कञ्चित्कालं नृपो
त्तम ॥ स्वरूपं लप्स्यसे भूयो यस्मिन्काले शृणुष्व तम् ॥ ५० ॥ यदा त्वं क्रूरबुद्धिं[1] तं राक्षसं निहनिष्यसि ॥ तदा त्वं लप्स्यसे मोक्षं
राक्षसत्वात्सुदारुणात् ॥ ५१ ॥ ॥ सूत उवाच ॥ ॥ एतस्मिन्नन्तरे राजा यातुधानो बभूव सः ॥ ऊर्ध्वकेशो महाकायः कृष्णदन्तो भया
नकः ॥ ५२ ॥ ततो जघान विप्रेन्द्रान्राक्षसं भावमाश्रितः ॥ यज्ञान्विध्वंसयामास मुनीनामाश्रमानपि ॥ ५३ ॥ कस्यचित्त्वथ कालस्य क्रूर
बुद्धिः स राक्षसः ॥ ज्ञात्वा तं राक्षसीभूतमेकदा[2]ऽऽयुधवर्जितम् ॥ ५४ ॥ भ्रातुर्वधकृतं वैरं स्मरमाणस्ततः परम् ॥ तद्वधार्थं समायातो राक्षसैर्ब
हुभिर्वृतः ॥ ५५ ॥ ततस्तं वेष्टयित्वापि समंताद्राक्षसो नृपम् ॥ प्रोवाच वचनं क्रुद्धो नादेनापूरयन्दिशः ॥ ५६ ॥ त्वया यो निहतोऽस्माकं ज्येष्ठो
भ्राता सुदुर्मते ॥ वसिष्ठस्य बलाद्यज्ञे तस्याद्य फलमाप्नुहि ॥ ५७ ॥ ॥ राजोवाच ॥ ॥ यद्ब्रवीषि दुराचार कर्मणा तत्समाचर ॥ शारदस्येव
मेघस्य गर्जितं तव निष्फलम् ॥ ५८ ॥ एवमुक्त्वा समादाय ततो वृक्षं स पार्थिवः ॥ प्राद्रवत्संमुखं तस्य गर्जमानो यथा घनः ॥५९॥ सोऽपि वृक्षं
समुत्पाट्य क्रोधसंरक्तलोचनः ॥ त्रिशंखां भृकुटीं कृत्वा तस्याप्यभिमुखं ययौ ॥ ६० ॥ एवं द्वावपि तौ शूरौ वृक्षयुद्धं महाबलौ ॥ कृतवन्तौ
वने तत्र बहुवृक्षक्षयावहम् ॥ ६१ ॥ अथ तं श्रांतमालोक्य क्रूरबुद्धिं[3] महीपतिः ॥ प्रगृह्य पादयोर्वेगाद्भ्रामयामास पुष्करे[4] ॥ ६२ ॥ ततश्चास्फोटया
मास भूमौ कोपसमन्वितः ॥ चक्रे चामिषखण्डं स पिष्ट्वापिष्ट्वा मुहुर्मुहुः ॥ ६३ ॥ तस्मिंस्तु निहते शूरे राक्षसे स महीपतिः ॥ राक्षसत्वाद्वि
निर्मुक्तो लेभे कायं नृपोद्भवम् ॥ ६४ ॥ ततस्ते राक्षसाः शेषाः समंतात्तं महीपतिम् ॥ परिवार्य महावृक्षैर्जघ्नुः पाषाणवृष्टिभिः॥ ६५ ॥ ततस्तानपि
भूपालो जघान प्रहसन्निव ॥ वृक्षहस्तस्तु विश्रब्धो लीलया द्विजसत्तमाः ॥ ६६ ॥ ततश्च स्वपुरं प्राप्तः संप्रहृष्टतनूरुहः ॥ राक्षसानां वधं कृत्वा 

१ दुष्टबुद्धिम्—इ०पा० । २ एकमायुधवर्जितम्—इ०पा० । ३ दुष्टबुद्धिम्—इ०पा० । सर्वत्र—'क्रूरबुद्धि'—स्थाने दुष्टबुद्धिरिति पाठान्तरं दृश्यते—परं प्रथमतः—क्रूराक्षः क्रूरबुद्धिश्च—इत्यत्र क्रूरबुद्धिरित्येव पाठस्य दृष्टत्वेतत्सवत्रापि क्रूरबुद्धिरित्येव तस्य राक्षसस्य नाम युक्तमिति बोद्धव्यम् । ४ पुष्करे—आकाशे—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लब्ध्वा देहं पुरातनम् ॥ ६७ ॥ ततस्तं तेजसा हीनं दुर्गंधेन समावृतम् ॥ ब्रह्महत्योद्भवैश्चिह्नैरन्यैरपि पृथग्विधैः ॥ ६८ ॥ दृष्ट्वा ते मंत्रिणस्तस्य पुत्रपौत्रास्तथा परे ॥ नोपसर्पंति भूपालं पापस्पर्शभयान्विताः ॥ ६९ ॥ ऊचुश्च पार्थिवश्रेष्ठ न त्वमर्हसि संगमम् ॥ कर्तुं सार्धमिहास्माभिर्ब्रह्महत्यान्वितो यतः ॥ ७० ॥ तस्माद्वसिष्ठमाहूय प्रायश्चित्तं समाचर ॥ अशुद्धं शुद्धिमायाति येन गात्रमिदं तव ॥ ७१ ॥ ततः स पार्थिवस्तूर्णं वसिष्ठं मुनिपुंगवम् ॥ समाहूयब्रवीद्वाक्यं दूरस्थो विनयान्वितः ॥ ७२ ॥ तव प्रसादतो विप्र स हतो राक्षसो मया ॥ मुक्तशापोऽस्मि संजातः परं शृणु वचो मुने ॥ ७३ ॥ मम गात्रात्सुदुर्गंधः समुद्गच्छति[1] सर्वतः ॥ भाराक्रांतानि गात्राणि सर्वाण्येवाचलानि च ॥ ७४ ॥ तत्किमेतद्द्विजश्रेष्ठ तेजोहानिरतीव मे ॥ मंत्रिणोऽपि तथा पुत्रा न स्पृशंति यतोऽद्य माम् ॥ ७५ ॥ ॥ वसिष्ठ उवाच ॥ ॥ राक्षसत्वं प्रपन्नेन त्वया पार्थिवसत्तम ॥ ब्राह्मणा बहवो ध्वस्तास्तथा विध्वंसिता मखाः ॥ तेषां त्वं पार्थिवश्रेष्ठ संस्पृष्टो ब्रह्महत्यया ॥ ७६ ॥ ॥ राजोवाच ॥ ॥ तदर्थं देहि मे विप्र प्रायश्चित्तं विशुद्धये ॥ येन निर्मुक्तपापोऽहं राज्यं प्राप्नोमि चात्मनः ॥ ७७ ॥ ॥ वसिष्ठ उवाच ॥ ॥ अत्रार्थे तीर्थयात्रां त्वं कुरु पार्थिव सत्तम ॥ निर्ममो निरहंकारस्ततः सिद्धिमवाप्स्यसि ॥ ७८ ॥ ततः स पार्थिवश्रेष्ठः संयतात्मा जितेंद्रियः ॥ प्रयागादिषु तीर्थेषु स्नानं चक्रे समाहितः ॥ ७९ ॥ न नश्यति स दुर्गंधो न च तेजः प्रवर्धते ॥ न कायो लघुतां याति नालस्येन विमुच्यते ॥ ८० ॥ ततः संभ्रममाणश्च कदाचिद्द्विजसत्तमाः ॥ चमत्कारपुरे क्षेत्रे स्नानार्थं समुपागतः ॥ ८१ ॥ सुश्रांतः क्षुत्पिपासार्तो निशीथे तमसावृते ॥ गर्तायां पतितोऽकस्मात्पूर्णायां पयसा नृपः ॥ ८२ ॥ कृच्छ्रात्ततो विनिष्क्रांतस्तीर्थात्तस्मान्महीपतिः ॥ यावत्पश्यति चात्मानं द्वादशार्कसमप्रभम् ॥ ८३ ॥ दुर्गंधेन परित्यक्तं सोद्यमं लघुतां गतम् ॥ दृष्ट्वा च चिंतयामास नूनं मुक्तोऽस्मि पातकात् ॥ ८४ ॥ एतस्मिन्नेव काले तु वागुवाचाशरीरिणी ॥ हर्षयन्ती महीपालं विमुक्तं ब्रह्महत्यया ॥८५॥ विमुक्तोऽसि महाराज सांप्रतं पूर्वपातकैः ॥ तीर्थस्यास्य प्रभावेन तस्माद्गच्छ निजं गृहम् ॥ ८६ ॥ अत्र संनिहितो नित्यं भ्रूणरूपेण शंकरः ॥ कृष्णपक्षे विशेषेण चतुर्दश्यां महीपते ॥ ८७ ॥ यदा प्रपतितं लिंगं देवदेवस्य शूलिनः ॥ द्विजशापेन गर्तैषा तदानेन विनिर्मिता ॥ ८८ ॥ लज्जितेन स्ववासार्थं महद्दुःखयुतेन च ॥ सतीवियोगयुक्तेन भ्रूणत्वं प्रगतेन च ॥ ८९ ॥ सर्वपापहरा तेन गर्तेयं पृथिवीपते ॥ भ्रूणगर्तेति विख्याता तस्य नाम्ना जगत्त्रये ॥ ९० ॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वाथ सा वाणी विररामांऽतरिक्षगा ॥ सोऽपि

१ समुज्ज्वलति–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

पार्थिवशार्दूलः प्रहृष्टः स्वपुरं ययौ ॥ ९१ ॥ ततस्तं पापनिर्मुक्तं तेजसा भास्करोपमम् ॥ दृष्ट्वा पुत्रास्तथा मर्त्याः प्रणेमुस्तुष्टिसंयुताः ॥ ९२ ॥ सोऽपि ब्राह्मणशार्दूलो वसिष्ठस्तं महीपतिम् ॥ समभ्येत्य ततः प्राह हर्षगद्गदया गिरा ॥ ९३ ॥ दिष्ट्या मुक्तोसि राजेंद्र पापाद्ब्रह्मवधोद्भवात् ॥ दिष्ट्या त्वं तेजसा युक्तः पुनः प्राप्तो निजं पुरम् ॥ ९४ ॥ तस्मात्कीर्तय भूपाल कस्मिंस्तीर्थे समागतः ॥ त्वं मुक्तः पातकाद्घोराद्ब्रह्महत्यासमुद्भवात् ॥ ९५ ॥ ततः स कथयामास भ्रूणगर्तासमुद्भवम् ॥ वृत्तांतं तस्य विप्रर्षेरनुभूतं यथा तथा ॥ ९६ ॥ ततस्ते मंत्रिणो वृद्धाः स च राजा मुनीश्वरः ॥ पुत्रं प्रतर्दनंनाम राज्ये संस्थाप्य तत्क्षणात् ॥ ९७ ॥ भ्रूणगर्तां समासाद्य तामेव द्विजसत्तमाः ॥ तपश्चेरुर्महादेवं ध्यायमाना दिवानिशम् ॥ ९८ ॥ गताश्च परमां सिद्धिं कालेनाल्पेन[1] दुर्लभाम् ॥ भ्रूणरूपधरं देवं पूजयित्वा महेश्वरम् ॥ ९९ ॥ ततःप्रभृति सा गर्ता प्रख्याता धरणीतले ॥ भ्रूणगर्तेति विप्रेंद्राः सर्वपातकनाशिनी ॥ १०० ॥ तत्र कृष्णचतुर्दश्यां यः श्राद्धं कुरुते नरः ॥ स पितॄंस्तारयेन्नूनं दश पूर्वान्दशापरान् ॥ १०१ ॥ तस्मात्सर्वप्रयत्नेन तत्र श्राद्धं समाचरेत् ॥ स्नानं च ब्राह्मणश्रेष्ठा दानं वापि स्वशक्तितः ॥ १०२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये भ्रूणगर्तामाहात्म्यवर्णनंनाम त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥ ॥ छ ॥

॥ ॥ सूत उवाच ॥ ॥ चर्ममुंडातथा देवी तस्मिन्स्थाने व्यवस्थिता ॥ नलेन स्थापिता पूर्वं स्वयमेव महात्मना ॥ १ ॥ अभ्यर्चयति तां भक्त्या यो महानवमीदिने ॥ स कामान्वांछिताँल्लब्ध्वा पदं प्राप्नोति शाश्वतम् ॥ २ ॥ वीरसेनसुतः पूर्वं नलोनाम महीपतिः ॥ आसीत्सर्वगुणोपेतः सर्वशत्रुक्षयावहः ॥ ३ ॥ भार्या तस्याभवत्साध्वी प्राणेभ्योपि गरीयसी ॥ दमयंतीति विख्याता विदर्भाधिपतेः सुता ॥ ४ ॥ अथासौ कलिनाविष्टो द्यूतं चक्रे महीपतिः ॥ पुष्करेण समं विप्रा दायादेन दिवानिशम् ॥ ५ ॥ ततः स व्यसनासक्तो वार्यमाणोऽपि सज्जनैः ॥ हारयामास सप्तांगं राज्यं मुक्त्वा च तां प्रियाम् ॥ ६ ॥ अथ तां स समादाय प्रविष्टो गहनं वनम् ॥ निर्जलं लज्जयाविष्टो दुःखव्याकुलितेंद्रियः ॥ ७ ॥ ततः स चिंतयामास यद्येषा भीमेमंदिरे[2] ॥ याति तन्मुच्यते कष्टाद्वनवाससमुद्भवात् ॥ ८ ॥ न मया तत्र गंतव्यं कथंचिदपि मानिना ॥ तस्मादेनां परित्यज्य रात्रौ गच्छामि दूरतः ॥ ९ ॥ येन त्यक्ता मया साध्वी कुण्डिनं याति तत्पुरम् ॥ स एवं निश्चयं कृत्वा सुखसुप्तां विहाय ताम् ॥ प्रजगाम वनं घोरं वन्यश्वापदसंकुलम् ॥ १० ॥ प्रत्यूषे चापि सोत्थाय यावत्पश्यति भामिनी ॥ तावत्पश्यति शून्यं स्वं पार्श्वं यत्र नलः स्थितः ॥ ११ ॥ ततो



१ काले—इ० पा० । २ भीममन्दिरे—भीमनाम्नस्तत्पितुर्मंदिरे—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विलप्य दुःखार्ता करुणं तत्र कानने ॥ जगाम मार्गमाश्रित्य पितुर्हर्म्यं शनैःशनैः ॥ १२ ॥ नलोऽपि च वने तस्मिन्भ्रममाणो महीपतिः ॥ एकाकी वृक्षकुंजानि सेवयामास सर्वदा ॥ १३ ॥ ततस्तद्वनमुत्सृज्य जगामान्यन्महावनम् ॥ नानावृक्षगणैर्युक्तं बहुश्वापदसंकुलम् ॥ १४ ॥ एवं स पृथिवीपालो भ्रममाणो वनाद्वनम् ॥ हाटकेश्वरजं क्षेत्रमाससाद ततः परम् ॥ १५ ॥ एतस्मिन्नंतरे प्राप्तं तन्महानवमीदिनम् ॥ विशेषाद्यत्र भूपालाः पूजयन्ति सुरेश्वरीम् ॥ १६ ॥ ततः स मृन्मयीं कृत्वा चर्ममुंडधरां नृपः ॥ विभवाभावतः पश्चात्फलमूलैरतर्पयत् ॥ १७ ॥ ततस्तस्याः स्तुतिं कृत्वा पुरः स्थित्वा कृतांजलिः ॥ श्रद्धया परया युक्तो निषधाधिपतिः स्वयम् ॥ १८ ॥ जय सर्वगते देवि चर्ममुण्डधरे वरे ॥ जय दैत्यकुलोच्छेददक्षे दक्षात्मजे शुभे ॥ १९ ॥ कालरात्रि जयाचिन्त्ये नवम्यष्टमिवल्लभे ॥ त्रिनेत्रे त्र्यंबकाभीष्टे जय देवि सुरार्चिते ॥ ॥ २० ॥ भीमरूपे सुरूपे च महाविद्ये महाबले ॥ महोदये महाकाये जय देवि महाव्रते ॥ २१ ॥ नित्यरूपे जगद्धात्रि सुरामांसवसाप्रिये ॥ त्रिकरालि महाकालि जय प्रेतजनानुगे ॥ २२ ॥ शवयानरते रम्ये भुजंगाभरणान्विते ॥ पाशहस्ते महाहस्ते रुधिरौघकृतास्पदे ॥ २३ ॥ फेत्काराकारवशोभिष्टे गीतवाद्यविराजिते ॥ जयानाद्ये जय ध्येये भर्गदेहार्धसंश्रये ॥ २४ ॥ त्वं रतिस्त्वं धृतिस्तुष्टिस्त्वं गौरी त्वं सुरेश्वरी ॥ त्वं लक्ष्मीस्त्वं च सावित्री गायत्री त्वमसंशयम् ॥ २५ ॥ यत्किंचित्त्रिषु लोकेषु स्त्रीरूपं देवि दृश्यते ॥ तत्सर्वं त्वन्मयं नात्र विकल्पोऽस्ति मम क्वचित् ॥ २६ ॥ येन सत्येन तेन त्वमत्रावासं द्रुतं कुरु ॥ सान्निध्यं भक्तितस्तुष्टा सुरासुरनमस्कृते ॥ २७ ॥ ॥ सूत उवाच ॥ ॥ एवं स्तुता च सा देवी नलेन पृथिवीभुजा ॥ प्रोवाच दर्शनं गत्वा तं नृपं भक्तवत्सला ॥ २८ ॥ ॥ श्रीदेव्युवाच ॥ ॥ परितुष्टाऽस्मि ते वत्स स्तोत्रेणानेन सांप्रतम् ॥ तस्माद्गृहाण मत्तस्त्वं वरं मनसि संस्थितम् ॥ २९ ॥ ॥ नल उवाच ॥ ॥ दमयन्तीति मे भार्या प्राणेभ्योऽपि गरीयसी ॥ सा मया निर्जने मुक्ता वने व्यालगणान्विते ॥ ३० ॥ अखण्डशीलां निर्दोषां यथाहं त्वत्प्रसादतः ॥ लभे भूयोऽपि तां देवि तथात्र कुरु सत्वरम् ॥ ३१ ॥ स्तोत्रेणानेन यो देवि स्तुतिं कुर्यात्पुरस्तव ॥ तत्रैव दिवसे तस्मै त्वया देयं मनोगतम् ॥ ३२ ॥ ॥ सूत उवाच ॥ ॥ सा तथेति प्रतिज्ञाय जगामादर्शनं ततः ॥ सोऽपि पार्थिवशार्दूलो लेभे सर्वं तयोदितम् ॥ ३३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये नलनिर्मितचर्ममुण्डामाहात्म्यवर्णनंनाम चतुष्पञ्चाशत्तमोऽध्यायः ॥ ५४ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तस्या एव समीपस्थं देवदेवं नलेश्वरम्[1] ॥ दृष्ट्वा विमुच्यते पापात्स्थापितं नलभूभुजा ॥ १ ॥ यस्तं पश्येन्नरो भक्त्या माघे षष्ठ्यां सिते द्विजाः ॥ सर्वं

१ महेश्वरम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





रोगविनिर्मुक्तः प्राप्नोति परमं पदम् ॥ २ ॥ कण्डूः पामाथ दद्रूणि मंडलानि विचर्चिका ॥ दर्शनात्तस्य नश्यन्ति जन्तूनां भावितात्मनाम् ॥ ३ ॥
अस्ति तस्याग्रतः कुण्डं स्वच्छोदकसुपूरितम् ॥ मत्स्यकूर्मसमाकीर्णं पद्मिनीखंडमंडितम् ॥ ४ ॥ यस्तत्र कुरुते स्नानं प्रत्यूषे सोमवासरे ॥ अपि
कुष्ठामयग्रस्तः स भूयः स्यात्पुनर्नवः ॥ ५ ॥ यदा संस्थापितः शंभुर्नलेन पृथिवीभुजा ॥ तदा तुष्टेन स प्रोक्तो ब्रूहि किं ते करोम्यहम् ॥ ६ ॥
॥ ॥ नल उवाच ॥ ॥ अत्र स्थेयं त्वया देव सदा सन्निहितेन च ॥ सर्वलोकहितार्थाय रोगनाशाय शंकर ॥ ७ ॥ ॥ शंकर उवाच ॥ ॥
अहं त्वद्वचनाद्राजन्संप्राप्ते सोमवासरे ॥ प्रत्यूषे च निवत्स्यामि प्रासादे नात्र संशयः ॥ ८ ॥ माघाष्टम्यामहोरात्रं सकलं च महीपते ॥ प्राणिनां
रोगनाशाय शुक्लपक्षे विशेषतः ॥ ९ ॥ यो मामत्र स्थितं तत्र दिवसे वीक्षयिष्यति ॥ स्नात्वा सुविमले कुंडे सम्यक्छ्रद्धासमन्वितः ॥ तस्य
नाशं प्रयास्यंति व्याधयो गात्रसंभवाः ॥ १० ॥ योऽस्य कुंडस्य संभूतां मृत्तिकामपि मानवः ॥ संधास्यति निजे देहे सोमवारे
निशाक्षये ॥ सोऽपि रोगैर्विनिर्मुक्तः संभविष्यति पुष्टिमान् ॥ ११ ॥ निष्कामस्तु पुनर्यो मां तस्मिन्काले नृपोत्तम ॥ पूजयिष्यति सद्भक्त्या
पुष्पधूपानुलेपनैः ॥ सर्वपापविनिर्मुक्तो मम लोकं स यास्यति ॥ १२ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वा स भगवांस्त्रैलोक्यदीपको हरः ॥ अन्त
र्धानं गतो विप्रा यथा दीपोऽत्र तत्क्षणात् ॥ १३ ॥ नलोऽपि तुष्टिमापन्नस्तमाराध्य चिरं नृपः ॥ तदाहूयाखिलान्विप्रांश्चमत्कारपुरोद्भवान् ॥ १४ ॥
एष संस्थापितः शंभुर्मया युष्मत्पुरोंतिके ॥ येन दृष्टेन रोगाणां सर्वेषां जायते क्षयः ॥ १५ ॥ अधुनाहं गमिष्यामि स्वराज्याय कृते[1] द्विजाः ॥
निषधां च पुरीमेष सर्वैः पूज्यः[2] समाहितैः ॥ १६ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ एवं पार्थिवशार्दूल करिष्यामः समाहिताः ॥ तव देवकृते यत्नं
यात्राद्यासु क्रियासु च ॥ १७ ॥ तथा पूजां करिष्यामः श्रद्धया परया युताः ॥ अस्माकं पुत्रपौत्रा ये भविष्यंति तथा परे ॥ वंशजास्ते करिष्यंति
पूजामस्य सुभक्तितः ॥ १८ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्तः स भूपालस्तैर्विप्रैस्तुष्टिसंयुतः ॥ प्रतस्थे तान्प्रणम्योच्चैः सर्वैस्तैश्चाभिनंदितः ॥
॥ १९ ॥ एवं स भगवाञ्छंभुस्तस्मिन्स्थाने व्यवस्थितः ॥ हिताय सर्वलोकानां सर्वरोगक्षयावहः ॥ २० ॥ तस्मात्सर्वप्रयत्नेन वीक्षणीयः सदा
हि सः ॥ विशेषात्सोमवारेण शाश्वतं श्रेय इच्छता ॥ २१ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वर
क्षेत्रमाहात्म्ये नलेश्वरमाहात्म्यवर्णनंनाम पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तस्यापि नातिदूरस्थं सांबा



१ स्वराज्याय कृते–स्वराज्यं समासाद्य पालयितुम्–इत्यर्थः। २ शम्भुः–इति शेषः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दित्यं सुरेश्वरम् ॥ दृष्ट्वा कामानवाप्नोति सर्वान्मर्त्यो हृदि स्थितान् ॥ १ ॥ यस्तु माघस्य शुक्लायां सप्तम्यां रविवासरे ॥ भक्त्या संपश्यते मर्त्यो
नरकान्न स पश्यति ॥ २ ॥ आसीत्पूर्वं द्विजो नाम गालवः स महामुनिः ॥ स्वाध्यायनिरतो नित्यं वेदवेदांगपारगः ॥ ३ ॥ शुचिव्रतपरः शांतो
देवद्विजपरायणः ॥ कृतज्ञश्च सुशीलश्च यज्ञकर्मविचक्षणः ॥ ४ ॥ तस्यैवं वर्तमानस्य संप्राप्तं पश्चिमं वयः ॥ अपुत्रस्य द्विजश्रेष्ठास्ततो दुःखं
व्यजायत ॥ ५ ॥ ततः सर्वं परित्यज्य गृहकृत्यं स भक्तिमान् ॥ सूर्यमाराधयामास क्षेत्रेऽत्रैव समाहितः ॥ ६ ॥ वटवृक्षं समाश्रित्य श्रद्धया परया
युतः ॥ स्थापयित्वा रवेरर्चां यथोक्तां पंचरात्रिके ॥ ७ ॥ वर्षास्वाकाशशायी च हेमंते जलसंश्रयः ॥ पंचाग्निसाधको ग्रीष्मे निराहारो जितेन्द्रियः
॥ ८ ॥ ततः पंचदशे वर्षे संप्राप्ते भगवान्रविः ॥ वटवृक्षं समाश्रित्य समीपस्थमुवाच तम् ॥ ९ ॥ ॥ श्रीसूर्य उवाच ॥ ॥ वरदोस्म्यद्य भद्रं ते
वरं प्रार्थय गालव ॥ अतिदुर्लभमप्याशु तव दास्याम्यसंशयम् ॥१०॥ ॥ गालव उवाच ॥ ॥ अपुत्रोऽहं सुरश्रेष्ठ पश्चिमे वयसि स्थितः ॥ तस्मा
देहि सुतं मह्यं वंशवृद्धिकरं परम् ॥ ११ ॥ ॥ श्रीसूर्य उवाच ॥ ॥ वंशवृद्धिकरो विप्र पुत्रस्तव भविष्यति ॥ तेजस्वी च यशस्वी च शास्त्रज्ञो वेद
पारगः॥१२॥ येयं त्वया कृता मेऽर्चा सांबसूर्यस्य संनिधौ ॥ सांबसूर्याभिधानोऽयं भविष्यति धरातले॥१३॥अन्योऽपि श्रद्धयोपेतो य एनं पूजयि
ष्यति ॥ सप्तम्यां सूर्यवारेण यावद्द्वादश भास्कराः ॥१४॥ सप्तम्यश्च द्विजश्रेष्ठ निराहारस्तु भक्तितः या ॥ स प्राप्स्यति न संदेहः पुत्रं वंशविवर्धनम्
॥ १५ ॥ एवमुक्त्वा च सप्ताश्वो विरराम दिवाकरः ॥ गालवोऽपि प्रहृष्टात्मा जगाम निजमंदिरम् ॥ १६ ॥ नातिदीर्घेण कालेन ततस्तस्याभव
त्सुतः॥यथोक्तस्तेन देवेन सर्वलक्षणलक्षितः ॥ १७ ॥ ततश्चक्रे पिता नाम वटेश्वर इति स्वयम् ॥ वटस्थेन यतो दत्तः संतुष्टेनांशुमालिना ॥ १८ ॥
वटेश्वरसुतान्दृष्ट्वा पौत्रांश्च द्विजसत्तमाः ॥ गालवः सूर्यमापन्नः कृत्वा सुविपुलं तपः ॥ १९ ॥ वटेश्वरोऽपि संज्ञाय पित्रा संस्थापितं रविम् ॥ तदर्थं
कारयामास प्रासादं सुमनोहरम् ॥ २० ॥ ततःप्रभृति लोके च स वटादित्यसंज्ञितः ॥ पुत्रप्रदो ह्यपुत्राणां विख्यातो भुवनत्रये ॥ २१ ॥ सप्तम्यां
सूर्यवारेण उपवासपरायणः ॥ यस्तं पूजयते भक्त्या सप्तमीर्द्वादश क्रमात् ॥ स प्राप्नोति सुतं श्रेष्ठं स्ववंशस्य विवर्धनम् ॥ २२ ॥ निष्कामो वा
नरो यस्तु तं पूजयति मानवः ॥ स मोक्षमाप्नुयान्नूनं दुर्लभं त्रिदशैरपि ॥ २३ ॥ अथ गाथा पुरा गीता नारदेन सुरर्षिणा ॥ दृष्ट्वा पुत्रप्रदं देवं
वटादित्यं सुरेश्वरम् ॥ २४ ॥ अपि वर्षशता नारी वंध्या वा दुर्भगापि वा ॥ सांबसूर्यप्रसादेन सद्यो गर्भवती भवेत् ॥ २५ ॥ किं दानैः किं व्रतै

१ गमिष्यति—इ० पा० । २ नामगालवः—नाम्ना गालवः—इत्यर्थः । ३ अर्चाम्—प्रतिमाम्—इत्यर्थः । ४ द्वादश भास्कराः—द्वादश रविवाराः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





ध्यानैः किं जपैः सोपवासकैः ॥ पुत्रार्थं विद्यमानेऽथ सांबसूर्ये सुरेश्वरे ॥ २६ ॥ वर्षमेकं नरो भक्त्या यः पश्येत्सूर्यवासरे ॥ कृतक्षणोऽत्र पुत्रं स लभते चोत्तमं सुखम् ॥ २७ ॥ तस्मात्सर्वप्रयत्नेन तं देवं यततो द्विजाः ॥ पश्येदात्महितार्थाय स्ववंशपरिवृद्धये ॥ २८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखंडे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये सांबादित्यमाहात्म्यवर्णनंनाम षट्पञ्चाशत्तमोऽध्यायः ॥ ॥ ५६ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तस्मिन्क्षेत्रे तथादित्यः स्थापितो द्विजसत्तमाः ॥ भीष्मेण ब्राह्मणेंद्राणां संमतेन तथात्मना ॥ १ ॥ शंतनोर्दयितः पुत्रो गांगेय इति विश्रुतः ॥ आसीत्पुरा वरो नृणामूर्ध्वरेताः सुविश्रुतः ॥ २ ॥ तस्यासीत्तुमुलं युद्धं भार्गवेण समं महत् ॥ त्रयोविंशद्दिनान्येव देवासुररणोपमम् ॥ अंबाकृते शितैः शस्त्रैरस्त्रैश्च तदनंतरम् ॥ ३ ॥ ततो ब्रह्मादयो देवाः स्वयमेव व्यवस्थिताः ॥ ताभ्यां निवारणार्थाय शांत्यर्थं सर्वदेहिनाम् ॥ गताश्च ते समुत्थाप्य पुनरेव त्रिविष्टपम् ॥ ४ ॥ अंबापि प्राप्य परमं गांगेयोत्थं पराभवम् ॥ प्रविष्टा कोपरक्ताक्षी सुसमिद्धे हुताशने ॥ ५ ॥ भर्त्सयित्वा नदीपुत्रं बाष्पव्याकुललोचना ॥ ततः प्रोवाच मध्यस्था वह्नेः कुरुपितामहम् ॥ ६ ॥ यस्माद्भीष्म त्वया त्यक्ता कामार्ताहं सुदुर्मते ॥ तस्मात्तव वधायाशु भविष्यामि पुनः क्षितौ ॥ ७ ॥ स्त्रीहत्यया समायुक्तस्त्वं च नूनं भविष्यसि ॥ प्रमाणं यदि धर्मोऽत्र स्मृतिशास्त्रसमुद्भवः ॥ ८ ॥ ततः स घृणयाऽऽविष्टो भीष्मः कुरुपितामहः ॥ मार्कंडेयं मुनिश्रेष्ठं पप्रच्छ विनयान्वितः ॥ ९ ॥ भगवन्काशिराजस्य सुतया मे प्रजल्पितम् ॥ मम मृत्युकरं पापं सकलं ते भविष्यति ॥ १० ॥ तत्किं स्याद्वाक्यमात्रेण नो वा ब्राह्मणसत्तम ॥ अत्र मे संशयस्तत्त्वं यथावद्वक्तुमर्हसि ॥ ११ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ आक्षिप्तस्ताडितो वापि यमुद्दिश्य त्यजेदसून् ॥ स्त्रीजनो वा द्विजो वापि तस्य पापं तु तद्भवेत् ॥ १२ ॥ स्त्रियं वा ब्राह्मणं वापि तस्मान्नैव प्रकोपयेत् ॥ निघ्नंतं वा शपंतं वा यदीच्छेच्छुभमात्मनः ॥ १३ ॥ त्वया पुनर्वराकी सा कामार्ता समुपेक्षिता ॥ जित्वा स्वयंवरे पूर्वं तत्कथं स्या न पापभाक् ॥१४॥ ॥ भीष्म उवाच ॥ ॥ तदर्थं वद मे ब्रह्मन्प्रायश्चित्तं विशुद्धये ॥ तपो वा यदि वा दानं व्रतं नियममेव वा ॥ १५ ॥ ॥ मार्कंडेय उवाच ॥ ॥ दशानां ब्राह्मणेंद्राणां यद्वधे पातकं स्मृतम् ॥ तत्पापं स्त्रीवधे कृत्स्नं जायते भरतर्षभ ॥ १६ ॥ तदत्र विषये दानं न तपो न व्रतादिकम् ॥ तीर्थसेवां परित्यज्य तस्मात्त्वं तां समाचर ॥ १७ ॥



१ एकवर्षपर्यंतं कृतक्षणः—कृतक्षेत्रवासावकाशः—इत्यर्थः । २ अंबाकृते—अंबानाम्नी काशिराजस्य सुता—अंबिकांबालिकयोर्ज्येष्ठभगिनी तदर्थम्—इत्यर्थः । ३ ताभ्याम्—तयोः—इत्यर्थः । ४ समुत्थाप्य—युद्धान्निवर्तितौ कृत्वा—इत्यर्थः । ५ आक्षिप्तस्ताडितश्चापि धनैर्वा विप्रयोजितः ॥ यमुद्दिश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकम् ॥—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ सूत उवाच ॥ ॥ स तस्य वचनं श्रुत्वा भीष्मः कुरुपितामहः ॥ तीर्थयात्रापरो भूत्वा बभ्राम क्षितिमंडले॥१८॥ततः क्रमात्समायातो भ्रममाणो
महीतले ॥ चमत्कारपुरे क्षेत्रे नानातीर्थसमाकुले ॥ १९ ॥ अथापश्यन्महात्मा स सुपुण्यं तद्गयाशिरः ॥ स्नात्वा श्राद्धं च विधिवद्यावच्छ्रद्धासम
न्वितः ॥ २० ॥ चक्रे तावन्नभोवाणी वाक्यमेतदुवाच ह ॥ भीष्मभीष्म महाबाहो नार्हस्त्वं श्राद्धजं विधिम् ॥ २१ ॥ कर्तुं स्त्रीहत्यया युक्तस्तस्मा
च्छृणु वचो मम ॥ शर्मिष्ठातीर्थमित्येव ख्यातं पातकनाशनम् ॥ २२ ॥ अस्मात्स्थानात्समीपस्थं वारुण्यां दिशि पुण्यकृत् ॥ कृष्णांगारकषष्ठ्यां
यो नरः स्नानं समाचरेत् ॥ २३ ॥ स स्त्रीहत्याकृतात्पापान्मुच्यते नात्र संशयः ॥ तस्मादद्य दिने पुत्र भौमवारसमन्विता ॥ २४ ॥ सैव षष्ठी
तिथिः पुण्या तस्मात्तत्र द्रुतं व्रज ॥ अहं तव पिता पुत्र शंतनुः पृथिवीपतिः ॥ २५ ॥ स्त्रीहत्ययान्वितं ज्ञात्वा ततस्तूर्णमिहागतः ॥ ततो भीष्मो
द्रुतं गत्वा तत्र स्थाने समाहितः ॥ २६ ॥ स्नानं कृत्वा ततः श्राद्धं चक्रे श्रद्धासमन्वितः ॥ ततो भूयः समागत्य स तं प्रोवाच शंतनुः ॥ २७ ॥
विपाप्मा त्वं कुरुश्रेष्ठ संजातोऽसि न संशयः ॥ तस्मान्निजं गृहं गच्छ राज्यचिंतां समाचर ॥ २८ ॥ ततः स विस्मयाविष्टो ज्ञात्वा तीर्थमनुत्तमम् ॥
वासुदेवात्मिकामर्चां तथान्यां कुरुसत्तमः ॥ २९ ॥ पारिजातमयीं मूर्तिं रवेर्लक्षणलक्षिताम् ॥ सुप्रमाणां सुरूपां च श्रद्धापूतेन चेतसा ॥ ३० ॥
तथान्यत्स्थापयामास लिंगं देवस्य शूलिनः ॥ दुर्गां च भक्तिसंयुक्तो विधिदृष्टेन कर्मणा ॥ ३१ ॥ ततः सर्वान्समाहूय स विप्रान्पुरसंभवान् ॥ प्रो
वाच कौरवो भीष्मो विनयावनतः स्थितः ॥ ३२ ॥ मया विनिर्मितं विप्रा देवागारचतुष्टयम् ॥ एतत्क्षेत्रे च युष्माकं दयां कृत्वा ममोपरि ॥ ३३ ॥
पालयध्वं प्रयास्यामि स्वगृहं प्रति सत्वरम् ॥ प्रेरितः पितृभिर्दिव्यैः स्वर्गमार्गसमाश्रितैः ॥ ३४ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ गच्छगच्छ कुरुश्रेष्ठ
सुविश्रब्धः स्वमायया[1] ॥ वयं सर्वे करिष्यामो युष्मच्छ्रेयोऽभिवर्धनम् ॥ ३५ ॥ देवश्रेणिरियं राजन्या त्वयात्र विनिर्मिता ॥ अस्याः पूजादिकं सर्वं
करिष्यामः सदा वयम् ॥ ३६ ॥ तथापि विनयं दृष्ट्वा परितुष्टा वयं नृप ॥ सर्वान्प्रार्थय तस्मात्त्वं वरं स्वं मनसि स्थितम् ॥ ३७ ॥ ॥ भीष्म
उवाच ॥ ॥ एष एव वरोऽस्माकं यत्संतुष्टा द्विजोत्तमाः ॥ तथाप्याशु वचः कार्यं युष्मदीयं मयाधुना ॥ ३८ ॥ एतानि देवसद्मानि मदीयानि
नरो भुवि ॥ यो यं काममभिध्याय पूजयेच्छ्रद्धयाऽन्वितः ॥ प्रसादादेव युष्माकं तस्य तत्स्यादसंशयम् ॥ ३९ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥
आदित्यस्य करिष्यामो यात्रां भाद्रपदे वयम् ॥ सप्तम्यां सूर्यवारेण सर्वदैव समाहिताः ॥ ४० ॥ तथा शिवस्य चाष्टम्यां चैत्रशुक्ले विशेषतः ॥

१ स्वमायया—निजप्रेम्णा—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



चतुर्दश्यां महाभाग तव स्नेहान्न संशयः ॥ ४१ ॥ शयने बोधने विष्णोः संप्राप्ते द्वादशीदिने ॥ विष्णोरपि च दुर्गायाः संप्राप्ते नवमीदिने ॥४२॥ आश्विने शुक्लपक्षे च गीतवादित्रनिस्वनैः॥ महोत्सवं तथा चित्रैर्हास्यलास्यैः पृथग्विधैः ॥ ४३ ॥ यस्तत्र मानवो नित्यं श्रद्धया परया युतः ॥ करिष्यति च गीतादि स यास्यति परां गतिम् ॥ ४४ ॥ वयं तस्य भविष्यामः सदैव प्रीतमानसाः ॥ प्रदास्यामस्तथा कामान्मनसा वांछितान्नृप ॥ ॥ ४५ ॥ एवमुक्त्वाथ ते विप्राः स्वानि स्थानानि भेजिरे ॥ भीष्मोऽपि हर्षसंयुक्तः स्वगृहं प्रस्थितस्ततः ॥ ४६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखंडे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये गांगेययात्राख्यानंनाम सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥ ॥ छ ॥ ॥ ॥ ॥ सूत उवाच ॥ ॥ एवं संस्थाप्य गांगेयः पुण्यं देवचतुष्टयम् ॥ ततः संस्थापयामास गंगां त्रिपथगामिनीम् ॥ १ ॥ कूपिकायां महाभाग शिवलिंगस्य पूर्वतः ॥ ततः प्रोवाच तान्हृष्टः संपूज्य द्विजसत्तमान् ॥ २ ॥ अस्यां यः पुरुषः स्नानं कृत्वा मां वीक्षयिष्यति ॥ सर्वपापविनिर्मुक्तः शिवलोकं प्रयास्यति ॥ ३ ॥ करिष्यति तथा यस्तु शपथं चात्र मानवः ॥ असत्यं यास्यति क्षिप्रं स यमस्य गृहं प्रति ॥ ४ ॥ एवमुक्त्वा महाभागो भीष्मः कुरुपितामहः ॥ जगाम स्वपुरं तस्माद्धर्षेण महता वृतः ॥ ५ ॥ ॥ सूत उवाच ॥ ॥ तत्रासीच्छूद्रसंभूतः पौंड्रकोनाम नामतः ॥ बालभावे समं मित्रैः स क्रीडति दिवानिशम् ॥ ६ ॥ हास्यभावाच्च मित्रस्य पुस्तकं तेन चोरितम् ॥ मित्रैः पृष्टः पौण्ड्रकः स प्राह नैव मया हृतम् ॥ ७ ॥ पुस्तकं चैव युष्माकं चिन्तनीयं सदैव तत् ॥ भवद्भिर्यत्नमास्थाय दृश्यतां क्वापि पुस्तकम् ॥ ८ ॥ कृताश्च शपथास्तत्र स्नात्वा भागीरथीजले ॥ अदुष्टचेतसा तेन दत्तं तत्पुस्तकं हृतम् ॥ ९ ॥ पुनश्च रुचिरं हास्यं कृत्वा तेन समं बहु ॥ अथासावभवत्कुष्ठी तत्क्षणादेव गर्हितः ॥ १० ॥ स त्यक्तो बांधवैः सर्वैः कलत्रैरपि वल्लभैः ॥ ततो वैराग्यमापन्नो भृगुपातं पपात सः ॥ ११ ॥ जातश्च तत्प्रभावेन कुष्ठेन परिवर्जितः ॥ शास्त्रचौर्यकृताद्दोषान्मूकरूपः स हास्यकृत् ॥ १२ ॥ न कार्यः शपथस्तस्मात्तस्याग्रेऽपि लघुर्द्विजाः ॥ अपि हास्योपचारेण आत्मनः सुखमिच्छता ॥ १३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शिवगंगामाहात्म्यवर्णनंनाम अष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तस्मिन्क्षेत्रे रविः पूर्वं विदुरेण प्रतिष्ठितम् ॥ शिवश्च परया भक्त्या तथा विष्णुर्द्विजोत्तमाः ॥ १ ॥ यस्तान्पूजयते भक्त्या मानुषो भक्तितस्ततः ॥ स यास्यति परं स्थानं यज्ञैरपि सुदुर्लभ

१ चैत्र–इ० पा० । २ तेन–पौण्ड्रकेण–इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म् ॥ २ ॥ हस्तिनापुरसंस्थेन विदुरेण पुरा द्विजाः ॥ गालवो मुनिशार्दूलः पृष्टः स्वगृहमागतः ॥ ३ ॥ अपुत्रस्य गतिर्लोके कीदृक्संजायते परे ॥
एतन्मे पृच्छतो ब्रूहि कृत्वा सद्भावमुत्तमम् ॥ ४ ॥ ॥ गालव उवाच ॥ ॥ अपुत्रस्य गतिर्नास्ति मृतः स्वर्गं न गच्छति ॥ द्वादशानामपि
तथा यद्येकोऽपि न विद्यते ॥ ५ ॥ औरसः क्षेत्रजश्चैव क्रयक्रीतश्च पालितः ॥ पौनर्भवः पुनर्दत्तः कुंडो गोलस्तथा परः ॥ कानीनश्च
सहोढश्च अश्वत्थो ब्रह्मवृक्षकः ॥ ६ ॥ एतेषामपि यद्येकः पुरुषाणां न जायते ॥ तन्नूनं नरके वासः पुंसंज्ञे वै प्रजायते ॥ ७ ॥
॥ ॥ सूत उवाच ॥ ॥ तच्छ्रुत्वा वचनं तस्य गालवस्य महात्मनः ॥ अपुत्रत्वात्परं दुःखं जगाम विदुरस्तदा ॥ ८ ॥ ततस्तं गालवः प्राह मा
त्वं दुःखपदं व्रज ॥ मद्वाक्यात्पुत्रकं वृक्षं विष्णुसंज्ञं द्रुतं कुरु ॥९॥ तस्मात्प्राप्स्यसि निःशेषं फलं पुत्रसमुद्भवम् ॥ गत्वा पुण्यतमे देशे रक्तशृंगस्य
मूर्धनि ॥१०॥ हाटकेश्वरजे क्षेत्रे सर्ववृद्धिशुभोदये ॥ तस्य तद्वचनं श्रुत्वा विदुरस्तत्क्षणाद्ययौ ॥ ११ ॥ तत्स्थानं गालवोद्दिष्टं हर्षेण महतान्वितः ॥
तत्राश्वत्थतरुं स्थाप्य पुत्रत्वे चाभिषेच्य[1] च ॥ १२ ॥ वैवाहिकेन विधिना कृतकृत्यो बभूव ह ॥ ततो बभ्राम तत्क्षेत्रं तीर्थयात्रापरायणः ॥ १३ ॥
कीर्तितानि विचित्राणि राजर्षीणां महात्मनाम् ॥ श्रुत्वा स्थानानि गत्वा च ददर्श स्थानदेवताः ॥ १४ ॥ स दृष्ट्वा कुरुवृद्धस्य कीर्तनानि
महात्मनः ॥ ततश्चक्रे मतिं तत्र दिव्यप्रासादकर्मणि ॥ १५ ॥ ततो माहेश्वरं लिंगं वटाधस्ताद्विधाय सः ॥ विष्णुं च स्थापयामास
अश्वत्थस्य तरोरधः ॥ १६ ॥ निवेश्य च तथा दिव्यं ब्राह्मणेभ्यो न्यवेदयत् ॥ एतद्देवत्रयं क्षेत्रे युष्माकं हि मया कृतम् ॥ भवद्भिः
सकला चास्य चिन्ता कार्या सदैव हि ॥ १७ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ वयमस्य करिष्यामो यात्राद्याः सकलाः क्रियाः ॥ १८ ॥ तथा
वंशोद्भवा ये च पुत्राः पौत्रास्तथा परे ॥ करिष्यंति क्रियाः सर्वास्त्वं गच्छ स्वगृहं प्रति ॥ १९ ॥ ततो जगाम विदुरः स्वपुरं प्रति हर्षितः ॥ कृत
कृत्यो द्विजास्ते च चक्रुर्वाक्यं तदुद्भवम् ॥ २० ॥ माघमासस्य सप्तम्यां सूर्यवारेण यो नरः ॥ पूजयेद्भास्करं तत्र स याति परमां गतिम् ॥ २१ ॥
शिवं वा सोमवारेण शुक्लाष्टम्यां विशेषतः ॥ शयने बोधने विष्णुं सम्यक्छ्रद्धासमन्वितः ॥ २२ ॥ तस्मात्सर्वप्रयत्नेन देवानां त्रयं शुभम् ॥ पूज
नीयं विशेषेण नरैः स्वर्गतिमीप्सुभिः ॥ २३ ॥ तत्र सिद्धिं गताः पूर्वं मुनयः संशितव्रताः ॥ विदुरेश्वरमाराध्य शतशोऽथ सहस्रशः ॥ २४ ॥
ततस्तत्सिद्धिदं ज्ञात्वा लिंगं वै पाकशासनः ॥ पांसुभिः पूरयामास यथा कश्चिन्न बुध्यते ॥ २५ ॥ कस्यचित्त्वथ कालस्य विदुरस्तत्र चागतः ॥

१ चोपयोज्य च–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



दृष्ट्वा लोपगतं लिंगं दुःखेन महतान्वितः ॥ २६ ॥ एतस्मिन्नेव काले तु वागुवाचाशरीरिणी ॥ मा त्वं कुरु विषादं हि लिंगार्थे विदुराधुना ॥ २७॥
योऽयं स दृश्यते बालो वटस्तस्य तले स्थिता ॥ देवद्रोणिः सुरेशेन पांसुभिः परिपूरिता ॥ २८॥ ततो गजाह्वयात्तूर्णं समानीय धनं बहु ॥ शोध
यामास तत्स्थानं दिवारात्रमतन्द्रितः ॥ २९ ॥ ततो विलोक्य तान्देवान्हर्षेण महतान्वितः ॥ प्रासादं निर्ममे तेषां योग्यं साध्वभिसंस्थितम् ॥
॥ ३० ॥ कैलासशिखराकारं भास्करार्थे महामुनिः ॥ जटामध्यगतं दृष्ट्वा वटस्य च महेश्वरम् ॥ ३१ ॥ प्रासादं नाकरोत्तत्र लिंगं यावन्न चाल
येत् ॥ वासुदेवस्य योग्यां च कृत्वा शालां बृहत्तराम् ॥ ३२ ॥ दत्त्वा वृत्तिं च संहृष्टो ब्राह्मणेभ्यो निवेद्य च ॥ जगाम स्वाश्रमं भूयो विप्रानामंत्र्य
तांस्ततः ॥ ३३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये विदुरकृतदेवप्रासादवृत्तान्त
वर्णनंनामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ माहित्थेयं त्वयाख्याता या पुरा सूतनन्दन ॥ केन संस्थापिता
तत्र वद सर्वमशेषतः ॥ १ ॥ ॥ सूत उवाच ॥ ॥ शोषणीनाम या विद्या पुरागस्त्येन साधिता ॥ आथर्वणेन मन्त्रेण स्वयं च परमेश्वरी ॥
॥ २ ॥ ततः संशोषितस्तेन स समुद्रो महात्मना ॥ मित्रावरुणपुत्रेण सा प्रोक्ता पुरतः स्थिता ॥ ३ ॥ माहित्थं साधितं यस्मात्त्वया मे सकलं
शुभम् ॥ माहित्थानाम तस्मात्त्वं देवता संभविष्यसि ॥ ४ ॥ चमत्कारपुरक्षेत्रे पूजां प्राप्स्यस्यनुत्तमाम् ॥ यस्त्वामाथर्वणैर्मन्त्रैस्तत्रस्थां भक्तिसं
युतः ॥ ५ ॥ पूजयिष्यति वृद्धिं च सर्वकालमवाप्स्यति ॥ तस्मात्तत्र द्रुतं गच्छ मया सार्द्धं पुरोत्तमे ॥ ६ ॥ द्विजानां रक्षणार्थाय नित्यं संनिहिता
भव ॥ एवं सा तत्र संभूता माहित्था वरदेवता ॥ ७ ॥ ययाऽयं चलितः शैलः स्वशक्त्या निश्चलीकृतः ॥ स्कन्देनेह द्विजश्रेष्ठाः शक्त्या विद्धस्तद
ग्रतः ॥ ८ ॥ नरादित्यस्ततश्चान्यो यो नरेण प्रतिष्ठितः ॥ षष्ठ्यां तं सूर्यवारेण दृष्ट्वा पापात्प्रमुच्यते ॥ ९ ॥ न शत्रूणां पराभूतिं प्रयास्यति यथा
र्जुनः ॥ रोगी विमुच्यते रोगाद्दरिद्रो धनमाप्नुयात् ॥ १० ॥ तथा गोवर्धनधरं तत्र देवं जनार्दनम् ॥ यः पश्येत्कार्तिके शुक्ले संप्राप्ते प्रथमे दिने ॥
तस्य गावः प्रभूताः स्युर्नीरोगा द्विजसत्तमाः ॥ ११ ॥ नरसिंहवपुः साक्षात्तथा देवो[१] हरिः स्वयम् ॥ तथा विनायकस्तत्र सर्वकामप्रदायकः ॥ सर्व
विघ्नहरश्चैव स्थापितश्चार्जुनेन हि[२] ॥ १२ ॥ यस्तं पूजयते भक्त्या चतुर्थ्यां मोदकाशनैः ॥ स सर्वविघ्ननिर्मुक्तो लभते वांछितं फलम् ॥ तत्र
स्थितो द्विजेंद्राणां हिताय द्विजसत्तमाः ॥ १३ ॥ यस्तमाथर्वणैर्मंत्रैः पूजयेद्द्वादशीदिने ॥ कार्तिकस्य सिते पक्षे स याति परमां गतिम् ॥ १४ ॥

१ वै–इ०पा० । २ नक्तभुग्जनः–इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा तत्र द्विजश्रेष्ठा नरनारायणावुभौ ॥ देवौ परमतेजस्वी यस्तौ पश्यति भक्तितः ॥ १५ ॥ पूजयेच्च द्विजश्रेष्ठा द्वादश्या दिवसे स्वयम् ॥ स याति परमं स्थानं जरामरणवर्जितम् ॥ १६ ॥ तीर्थयात्राकृतारंभः कुन्तीपुत्रो धनंजयः ॥ हाटकेश्वरजे क्षेत्रे समायातो द्विजोत्तमाः ॥ १७ ॥ दृष्ट्वा तत्पावनं क्षेत्रं तीर्थपूगप्रपूरितम् ॥ आदित्यं स्थापयामास प्रासादे सुमनोहरे ॥ १८ ॥ नरनारायणौ देवौ तस्याग्रे स्थापितौ ततः ॥ तथा गोवर्धनधरस्तत्र देवः प्रतिष्ठितः ॥ १९ ॥ नरसिंहं तथैवान्यं श्रद्धया परया युतः ॥ एवं संस्थाप्य कौंतेयो देवगृहसुपंचकम् ॥ २० ॥ ततो विप्रान्स माहूय सर्वांस्तान्पुरसंभवान् ॥ प्रोवाच प्रणतो भक्त्या धनं दत्त्वा सुपुष्कलम् ॥ २१ ॥ मया संस्थापितः सूर्यः सर्वरोगक्षयावहः ॥ तथार्पितश्च युष्माकं चिंतनीयं सदैव तु ॥ २२ ॥ ॥ विप्रा ऊचुः ॥ ॥ गच्छ त्वं पांडवश्रेष्ठ सुविश्रब्धः स्वमालयम् ॥ वयं सर्वे करिष्यामस्तव श्रेयोऽभि वर्धनम् ॥ २३ ॥ ततोऽर्जुनः प्रहृष्टात्मा तेभ्यो दत्त्वा धनं बहु ॥ तानामंत्र्य नमस्कृत्य जगाम स्वपुरं प्रति ॥ २४ ॥ ॥ सूत उवाच ॥ ॥ एतद्वः सर्वमाख्यातं नरादित्यस्य संभवम् ॥ माहात्म्यं ब्राह्मणश्रेष्ठाः शृण्वतां पापनाशनम् ॥ २५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये नरादित्यमाहात्म्यवर्णनंनाम षष्टितमोऽध्यायः ॥ ६० ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ शर्मिष्ठातीर्थमित्युक्तं त्वया यच्च महामते ॥ कथं जातं महाभाग किंप्रभावं तु तद्वद ॥ १ ॥ ॥ सूत उवाच ॥ ॥ आसीद्राजा वृकोनाम सोमवंश समुद्भवः ॥ ब्रह्मण्यश्च शरण्यश्च सर्वलोकहिते रतः ॥ २ ॥ तस्य भार्याऽभवत्साध्वी प्राणेभ्योऽपि गरीयसी ॥ सर्वलक्षणसंपन्ना पतिव्रतपरायणा ॥ ॥ ३ ॥ अथ तस्यां समुत्पन्ना प्राप्ते वयसि पश्चिमे ॥ कन्यका दिवसे प्राप्ते सर्वशास्त्रविगर्हिते ॥ ४ ॥ तत आनीय विप्रान्स ज्योतिर्ज्ञानविचक्षणान् ॥ पप्रच्छ कीदृशी कन्या ममेयं संभविष्यति ॥ ५ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ या कन्या प्राप्नुयाज्जन्म चित्रासंस्थे दिवाकरे ॥ चंद्रे वापि चतुर्दश्यां सा भवेद्विषकन्यका ॥ ६ ॥ यस्तस्याः प्रतिगृह्णाति पाणिं पार्थिवसत्तम ॥ षण्मासाभ्यंतरे मृत्युं स प्राप्नोति नरो ध्रुवम् ॥ ७ ॥ यस्मिन्सा जायते हर्म्ये षण्मासाभ्यंतरे च तत् ॥ करोति विभवैर्हीनं धनदस्याप्यसंशयम् ॥ ८ ॥ सेयं तव सुता राजन्यथोक्ता विष कन्यका ॥ पैतृकं श्वाशुरीयं च हनिष्यति गृहद्वयम् ॥ ९ ॥ तस्मादिमां परित्यज्य सुखीभव नराधिप ॥ श्रद्दधासि वचोऽस्माकं हित मुक्तं यदि प्रभो ॥ १० ॥ ॥ राजोवाच ॥ ॥ त्यक्ष्यामि यदि नामैतां धारयिष्यामि वा गृहे ॥ अन्यदेहोद्भवं कर्म फलिष्यति

१ भविष्यति—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

तथापि मे ॥ ११ ॥ शुभं वा यदि वा पापं न तु शक्यं प्ररक्षितुम् ॥ तस्मात्कर्म पुरस्कृत्य नैव त्यक्ष्यामि कन्यकाम् ॥ १२ ॥ येनयेन
शरीरेण यद्यत्कर्म करोति यः ॥ तेनतेनैव भूयः स प्राप्नोति सकलं फलम् ॥ १३ ॥ यस्यांयस्यामवस्थायां क्रियतेऽत्र शुभाशुभम् ॥
तस्यांतस्यां ध्रुवं तस्य फलं तद्भुज्यते नरैः ॥ १४ ॥ न नश्यति पुराकर्म कृतं सर्वेंद्रियैरिह ॥ अकृतं जायते नैव तस्मान्नास्ति भयं मम ॥ १५ ॥
आयुः कर्म च वित्तं च विद्या निधनमेव च ॥ पञ्चैतानि हि सृज्यन्ते गर्भस्थस्यैव देहिनः ॥ १६ ॥ यथा वृक्षेषु वल्लीषु कुसुमानि फलानि च ॥
स्वकालं नातिवर्तंते तद्वत्कर्म पुराकृतम् ॥ १७ ॥ येनैव यद्यथा पूर्वं कृतं कर्म शुभाशुभम् ॥ स एव तत्तथा भुंक्ते नित्यं विहितमात्मनः ॥ १८ ॥
यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ॥ तथैव कोटिमध्यस्थं कर्तारं कर्म विन्दति ॥ १९ ॥ अन्यदेहकृतं कर्म न कश्चित्पुरुषो भुवि ॥ बलेन
प्रज्ञया वापि समर्थः कर्तुमन्यथा ॥ २० ॥ अन्यथा शास्त्रगर्भिण्या धिया धीरो महीयते ॥ स्वामिवत्प्राक्कृतं कर्म विदधाति तदन्यथा ॥ २१ ॥
स्वकृतान्युपतिष्ठंति सुखदुःखानि देहिनाम् ॥ हेतुभूतो हि यस्तेषां सोऽहंकारेण बध्यते ॥ २२ ॥ सुशीघ्रमभिधावन्तं निजं कर्मानुधावति ॥ शेते
सह शयानेन तिष्ठन्तमनुतिष्ठति ॥ २३ ॥ यथा छायातपौ नित्यं सुसंबद्धौ परस्परम् ॥ तथा कर्म च कर्ता च नात्र कार्या विचारणा ॥ २४ ॥
येन यत्रोपभोक्तव्यं सुखं वा दुःखमेव वा ॥ नरः स बद्धो रज्ज्वेव बलात्तत्रैव नीयते ॥ २५ ॥ प्रमाणं कर्मभूतानां सुखदुःखोपपादने ॥ सावधानतया
यत्र जाग्रतां स्वपतामपि ॥ २६ ॥ तैलक्षये यथा दीपो निर्वाणमधिगच्छति ॥ कर्मक्षये तथा जंतुर्निर्वाणमधिगच्छति ॥ २७ ॥ न मन्त्रा न तपो
दानं न तीर्थं न च संयमः ॥ समर्था रक्षितुं जंतुं पीडितं पूर्वकर्मभिः ॥ २८ ॥ संगत्या जठरे न्यस्तो रेतोबिन्दुरचेतनः ॥ ऋतुकाले मनुष्येण
वृद्धिं गच्छति कर्मतः ॥ २९ ॥ अन्नपानानि जीर्यंति यत्र भक्ष्यं च भक्षितम् ॥ तस्मिन्नेवोदरे गर्भः कथं नाम न जीर्यति ॥ ३० ॥ तस्मात्कर्मकृतं
सर्वं देहिनामत्र जायते ॥ शुभं वा यदि वा पापमिति मे निश्चयः सदा ॥ ३१ ॥ अरक्षितं तिष्ठति दैवरक्षितं सुरक्षितं दैवहतं विनश्यति ॥ जीवत्यना
थोऽपि वने विसर्जितः कृतप्रयत्नोऽपि गृहे न जीवति ॥ ३२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहा
टकेश्वरक्षेत्रमाहात्म्ये विषकन्यकोत्पत्तिवर्णनंनामैकषष्टितमोऽध्यायः ॥ ६१ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एवं स निश्चयं कृत्वा पार्थिवो ॥ ६९ ॥
द्विजसत्तमाः ॥ नात्यजत्तां तथोक्तोऽपि दैवज्ञैर्विषकन्यकाम् ॥ दीयमानामपि प्रीत्या न च गृह्णाति भूभुजा ॥ १ ॥ शर्मणष्ठीवनं यस्मात्तया स्वपि

१ शुभात्रहम्–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुराहितम् ॥ शर्मिष्ठेति सुविख्याता ततः सा ह्यभवद्भुवि ॥ २ ॥ एतस्मिन्नंतरे तस्य[1] शत्रवः पृथिवीपतेः ॥ सर्वतः पीडयामासू राष्ट्रं क्रोधसमन्विताः
॥३॥ अथासौ पार्थिवः क्रुद्धः स्वसैन्यपरिवारितः ॥ युद्धाय निर्ययौ स्थानान्मृत्युं कृत्वा निवर्तने ॥४॥ ततः संप्राप्य ताञ्छत्रूंश्चकार स महाहवम् ॥
चतुरंगेन सैन्येन यमराष्ट्रविवर्धनम्[2] ॥ ५ ॥ ततश्च दशमे[3] प्राप्ते शत्रुभिः स महीपतिः ॥ निहतो दिवसे सर्वैर्वेष्टयित्वा समन्ततः ॥ ६ ॥ ततस्तस्य नरे
न्द्रस्य हतशेषाश्च ये नराः ॥ भयार्तास्ते द्रुतं जग्मुः स्वपुरं प्रति दुःखिताः ॥ ७ ॥ तेपि शत्रुगणाः सर्वे संप्रहृष्टा जिगीषवः ॥ तत्पुरं वेष्टयामासुस्त
त्पुत्रोच्छेदनाय वै ॥ ८ ॥ एतस्मिन्नंतरे पौराः सर्वे शोकपरायणाः ॥ जगर्हुः परुषैर्वाक्यैर्दुष्टां तां विषकन्यकाम् ॥९॥ अस्या दोषेण पापाया मृतश्च
स महीपतिः॥ तथा राष्ट्रस्य विध्वंसे भविष्यति पुरः[4] क्षयः ॥ १० ॥ उक्तः स नृपतिः पूर्वं ब्राह्मणैर्ज्ञानिभिस्तदा[5] ॥ त्यजैनां बहुदोषाढ्यां निन्दितां
विषकन्यकाम् ॥११॥ न तेन तत्कृतं वाक्यमपि तेषां हितैषिणाम् ॥ स्नेहपाशनिबद्धेन दयाढ्येन महात्मना ॥१२॥ तस्मादद्यापि पापैषा वध्यतामा
शु कन्यका ॥ निर्यास्यतां पुरादस्माद्यावन्न स्यात्पुरक्षयः ॥ १३ ॥ ॥ सूत उवाच ॥ ॥ सापि श्रुत्वा जनोक्तांस्तानपवादान्पृथग्विधान् ॥
वैराग्यं परमं गत्वा निंदां चक्रे तथात्मनः ॥ १४ ॥ ततो रात्रौ विनिष्क्रम्य भयशोकसमन्विता ॥ प्रतस्थेऽरण्यमासाद्य मरणे कृतनिश्चया ॥१५॥
अथ दृष्टं तया क्षेत्रं हाटकेश्वरजं महत् ॥ तपस्विभिः समाकीर्णं चित्ताह्लादकरं परम् ॥ १६ ॥ अथ तस्याः स्मृतिर्जाता पूर्वजन्मसमुद्भवा ॥
चंडालत्वे मया पूर्वं गौरेका वितृषीकृता ॥ १७ ॥ तत्प्रभावादहं जाता सुपुण्ये नृपमंदिरे ॥ क्षेत्रस्यास्य प्रभावेन तस्मादत्रैव मे स्थितिः ॥ १८ ॥
सूत उवाच ॥ ॥ अन्यदेहांतरे ह्यासीच्चंडाली सा विगर्हिता ॥ बहुप्रसूतिसंयुक्ता दरिद्रेण कदर्थिता ॥ १९ ॥ अथ सा भ्रममाणाऽत्र क्षेत्रे प्राप्ता
तृषार्दिता ॥ मध्यंदिनगते सूर्ये ज्येष्ठमासे सुदारुणे ॥ २० ॥ अथापश्यत्स्तोकजलां[6] सा तत्र लघुकूपिकाम् ॥ तृषार्तां कपिलां गां च वर्तमानां तदं
तिके ॥ २१ ॥ ततो दयां समाश्रित्य त्यक्त्वा स्नेहं सुतोद्भवम् ॥ आत्मनश्च तथा प्राणान्गां वितृष्णामथाकरोत् ॥ २२ ॥ जलाभावे तथा सा च
समस्तैर्बालकैः सह ॥ वैवस्वतगृहं प्राप्ता गोभक्तिधृतमानसा ॥ २३ ॥ ततो नृपगृहे जाता तत्प्रभावाद्द्विजोत्तमाः ॥ पूर्वकर्मविपाकेन संजाता विष
कन्यका ॥ २४ ॥ ॥ ऋषय ऊचुः ॥ ॥ केन कर्मविपाकेन संजाता विषकन्यका ॥ स्वकुलोच्छेदनकरी सर्वं सूत ब्रवीहि नः ॥ २५ ॥ ॥ सूत

१ तत्र–इ० पा० । २ यमराष्ट्रविवर्द्धनम्–शत्रूणां मरणोत्तरं यमलोकं प्रति गमनाद्यमराष्ट्रस्यलोकवृद्धेः–उचितमुक्तं–महाहवस्य–यमराष्ट्रविवर्द्धनम्–इति विशेषणम् । ३ दशमे–इत्यस्य–दिवसे–इति विशेष
णम् । ४ पुरः–पुरस्य–इत्यर्थः । ५ ज्ञातिभिः–इ० पा० । ६ स्तोकजलाम्–अल्पजलाम्–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

उवाच ॥ ॥ चंडालत्वे तया विप्रा वर्तंत्या भ्रममाणया ॥ देवतायतने दृष्टा गौरी हेममयी शुभा ॥ २६ ॥ ततस्तां विजने प्राप्य गत्वा देशांतरं मुदा ॥ यावत्करोति खंडानि विक्रयार्थं सुानंदिता ॥ तावदन्वेषमाणास्तां संप्राप्ता नृपसेवकाः ॥२७॥ अथ ते तां समालोक्य भर्त्सयित्वा मुहुर्मुहुः॥ संताड्य लकुटाघातैर्लोष्टघातैश्च मुष्टिभिः ॥ २८ ॥ ततः सुवर्णमादाय त्यक्त्वा तां रुधिरप्लुताम् ॥ अवध्यैषेति संचिंत्य स्वपुरं प्रति ते गताः ॥२९॥ यत्तया पार्वती स्पृष्टा ततो वै खण्डशः कृता ॥ तेन कर्मविपाकेन संजाता विषकन्यका ॥ ३० ॥ ततःसंस्मृतिमासाद्य पूर्वजन्मसमुद्भवाम् ॥ माहात्म्यं जलदानस्य गोपीतस्य विचार्य च ॥ चकार कूपिकास्थाने तडागं विमलोदकम् ॥३१॥ समुद्रप्रतिमं चारु पद्मिनीखंडमंडितम्[1] ॥ मत्स्यकच्छपसंकीर्णं शिशुमारविराजितम् ॥ ३२ ॥ सेवितं बहुभिर्हंसैर्बकैश्चक्रैः समंततः ॥ अगाधसलिलं पुण्यं सेवितं जलजंतुभिः ॥ ३३ ॥ प्रासादं तत्समीपस्थं साधु दृष्टिमनोहरम् ॥ कारयित्वातिसंभक्त्या कैलासशिखरोपमम् ॥ ३४ ॥ ततस्तत्र तपस्तेपे गौरीं संस्थाप्य भक्तितः॥ तदग्रे व्रतमास्थाय यथोक्तं शास्त्रसंभवम् ॥ ३५ ॥ प्रातः स्नात्वा तु हेमंते गौरीं संपूज्य भक्तितः॥ बलिपूजोपहारैश्च विप्रदानादिभिस्तथा ॥ ३६ ॥ ततश्च शिशिरे[2] प्राप्ते सायं प्रातः समाहिता ॥ एकांतरोपवासैः सा स्नानं चक्रे नृपात्मजा ॥ ३७ ॥ वसंते नृत्यगीतैश्च तोषयामास पार्वतीम् ॥ षष्ठकालाशना साध्वी सस्यदानपरायणा ॥ ३८ ॥ पञ्चाग्निसाधका ग्रीष्मे फलाहारं तपस्विनी ॥ चकार श्रद्धयोपेता वृकभूमिपतेः सुता ॥ ३९ ॥ वर्षासु च जलाहारा भूत्वा सा विषकन्यका ॥ आकाशे शयनं चक्रे परित्यक्तकुटीरका ॥ ४० ॥ वायुभक्षा सती चाऽथ साऽनयच्छरदं[3] ततः ॥ कृतजप्यपरा नित्यं पार्वतीगतमानसा ॥४१॥ एवमाराधयंत्याश्च तस्या देवीं गिरेः सुताम् ॥ जगाम सुमहान्कालो न लेभे फलमीहितम् ॥४२॥ मुखं वलिभिराक्रान्तं पलितैरंकितं शिरः॥ कन्याभावेपि वर्तंत्या न च तुष्टा हरप्रिया ॥ ४३ ॥ कस्यचित्त्वथ कालस्य तत्परीक्षार्थमेव सा ॥ शक्राणीरूपमास्थाय ततः सन्दर्शनं गता ॥४४॥ सुधावदातं[3] सूर्याभं कैलासशिखरोपमम् ॥ सुप्रलंबकरं मत्तं चतुर्दंतं महागजम् ॥ ४५ ॥ समास्थाय वृता स्त्रीभिर्देवानां सर्वतो दिशम् ॥ दधती मुकुटं[4] मूर्ध्नि हारकेयूरभूषिता ॥ ४६ ॥ पांडुरेणातपत्रेण ध्रियमाणेन मूर्धनि ॥ सेव्यमानाऽप्सरोभिश्च स्तूयमाना च किन्नरैः ॥ ४७ ॥ गन्धर्वैर्गीयमानासीत्ततः प्रोवाच सादरम् ॥ वरं यच्छामि ते पुत्रि प्रार्थयस्व यथेप्सितम् ॥ ४८ ॥ अनेन तपसा तुष्टा पुष्कलेन तवाधुना ॥ अहं भार्या ॥ ७० ॥
सुरेन्द्रस्य शचीति परिकीर्तिता ॥ त्रैलोक्येऽपि स्वयं प्राप्ता दयां कृत्वा तवोपरि ॥ ४९ ॥ त्वया महत्तपस्तप्तं ध्यायंत्या हरवल्लभाम् ॥ तपसा तुष्टि

१ पद्मिनीखंडमंडितम्—कमलिनीवृंदसंशोभितम्—इत्यर्थः । २ शिशिरं ततः—इ० पा० । ३ सुधावदातम्—सुधा—चूर्णम्—तद्वदवदातं—शुभ्रवर्णम्—इत्यर्थः । ४ मुकुरम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मायाता भवानी न सुनिष्ठुरा ॥ ९० ॥ ॥ सूत उवाच ॥ ॥ सा तस्या वचनं श्रुत्वा शक्राण्या विषकन्यका ॥ नमस्कृत्वाऽथ तामूचे
कृतांजलिपुटा स्थिता ॥ ९१ ॥ ॥ विषकन्योवाच ॥ ॥ नाहं त्वत्तो वरं देवि प्रार्थयामि कथञ्चन ॥ तथान्यासामपींद्राणि देवतानामसंश
यम् ॥ ९२ ॥ अप्यहं नरकं रौद्रं प्रगच्छामींद्रवल्लभे ॥ हरकांतासमादेशान्न स्वर्गेऽपि तवाज्ञया ॥ ९३ ॥ अनादिमध्यपर्य्यन्ता ज्ञानैश्वर्यसम
न्विता ॥ या देवी पूज्यते देवैर्वरं तस्या वृणोम्यहम् ॥ ९४ ॥ यामाराधयते विष्णुर्ब्रह्मा रुद्रश्च वासवः ॥ वांछितार्थं सदा देवीं वरं तस्या वृणो
म्यहम् ॥ ९५ ॥ यया व्याप्तमिदं सर्वं त्रैलोक्यं सचराचरम् ॥ स्त्रीरूपैर्विविधैर्देव्या वरं तस्या वृणोम्यहम् ॥ ९६ ॥ ॥ श्रीदेव्युवाच ॥ ॥ अहं[1]
भार्या सुरेन्द्रस्य प्राणेभ्योऽपि गरीयसी ॥ ममाज्ञां पालयन्तिस्म देवदानवपन्नगाः ॥ ९७ ॥ किंनरा गुह्यका यक्षाः किं पुनर्मर्त्यधर्मिणः ॥ तस्मात्त्वं
किं न गृह्णासि वरं मत्तः कुतापसि ॥ ९८ ॥ तन्नूनं वज्रघातेन चूर्णयिष्यामि ते शिरः ॥ तस्यास्तद्वचनं श्रुत्वा तापस्यथ ततो द्विजाः ॥ ९९ ॥
धैर्यमालंव्य तां प्राह भूय एव सुरेश्वरीम् ॥ स्वामिनी त्वं हि देवानां सत्यमेतदसंशयम् ॥ ६० ॥ यस्याः[2] प्राप्तं त्वयैश्वर्यं परां तां तोषयाम्यहम् ॥
स्वल्पमप्यपराधं ते न करोमि सुरेश्वरि ॥ ६१ ॥ तथापि वधयोग्यां मां मन्यसे विक्षिपायुधम् ॥ अन्यच्चापि वचो मह्यं[3] शक्राणि शृणु सादरम् ॥
॥ ६२ ॥ तच्छुत्वा कुरु यच्छ्रेयो विचिन्त्य मनसा ततः ॥ न त्वं न ते पतिः शक्रो न चान्येपि सुरासुराः ॥ मां निषूदयितुं शक्ताः पार्वत्यां
शरणं गताम् ॥ ६३ ॥ तस्माद्रुतं दिवं गच्छ मा त्वं कोपं वृथा कुरु ॥ सन्मार्गे वर्तमानायां मम सर्वसुरेश्वरि ॥ ६४ ॥ ॥ सूत उवाच ॥ ॥ एवं
सा तां शचीमुक्त्वा दुःखिता विषकन्यका ॥ चिन्तयामास तदिदं मरणे कृतनिश्चया ॥ ६५ ॥ न प्रसीदति मे देवी यस्मात्पर्वतनंदिनी ॥
तस्मान्मां यदि शक्राणी नैषा व्यापादयिष्यति ॥ ६६ ॥ तन्नूनं ज्वलनं दीप्तं सेवयिष्यामि सत्वरम् ॥ अथापश्यत्क्षणेनैव तं
चैरावणवारणम् ॥ ६७ ॥ दुग्धकुंदेन्दुसंकाशं संजातं सहसा वृषम् ॥ तस्योपरि स्थितां देवीं शंभुना सह पार्वतीम् ॥ ६८ ॥
चतुर्भुजां प्रसन्नास्यां दिव्यरूपसमन्विताम् ॥ शुक्लमाल्यांबरधरां चन्द्रार्धकृतमस्तकाम् ॥ ६९ ॥ ततः सम्यक्समालोक्य ज्ञात्वा तां पर्वतात्म
जाम् ॥ विषकन्या स्तुतिं चक्रे प्रणिपत्य मुहुर्मुहुः ॥ ७० ॥ नमस्ते देवदेवेशि नमस्ते सर्ववासिनि ॥ सर्वकामप्रदे सत्ये जरामरणवर्जिते ॥ ७१ ॥

---

तुष्टिमायातास्मि भवानी तु न तुष्टिमायाता यतः सा सुनिष्ठुरा—अतस्त्वं मत्सकाशादेव वरं गृहाण किं मुधा पार्वतीमुद्दिश्य तपस्तपसि; सा ते तपसा कदापि
१ अहम्—इत्यध्याहृत्य—योजना समाचीना—अहं ते तपसा तुष्टिमायातास्मि भवानी तु न तुष्टिमायाता यतः सा सुनिष्ठुरा—अतस्त्वं मत्सकाशादेव वरं गृहाण किं मुधा पार्वतीमुद्दिश्य तपस्तपसि; सा ते तपसा कदापि
तुष्टा न स्यात् किमपि च न दास्यति अतस्तदुद्देशेन क्रियमाणात्तपसो विरम । इति तदुक्तितात्पर्यम् । २ यस्याः—सकाशात्—इत्यर्थः । ३ मह्यम्—मम—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





शक्रादयोऽपि देवास्ते परमार्थेन नो विदुः ॥ स्वरूपवर्णनं कर्तुं किं पुनर्देवि मानुषी ॥ ७२ ॥ यस्याः सर्वं महीव्योमजलाग्निपवनात्मकम् ॥ ब्रह्मांडमंगसंभूतं सदेवासुरमानुषम् ॥ ७३ ॥ न तस्या जन्मनि ब्रह्मा न नाशाय महेश्वरः ॥ पालनाय न गोविंदस्तां त्वां स्तोष्याम्यहं कथम् ॥७४॥ तथाष्टगुणमैश्वर्यं यस्याः स्वाभाविकं परम् ॥ निरस्तातिशयं लोके स्पृहणीयतमं सदा ॥ ७५ ॥ यस्या रूपाण्यनेकानि सम्यग्ध्यानपरायणाः ॥ ध्यायंति मुनयो भक्त्या प्राप्नुवंति च वांछितम् ॥ ७६ ॥ हृदि संकल्प्य यद्रूपं ध्यानेनार्चंति योगिनः ॥ सम्यग्भावात्मकैः पुष्पैर्मोक्षाय कृत निश्चयाः ॥ ७७ ॥ तां देवीं मानुषी भूत्वा कथं स्तौमि महेश्वरीम् ॥ ७८ ॥ ॥ देव्युवाच ॥ ॥ परितुष्टास्मि ते पुत्रि वरं प्रार्थय सुव्रते ॥ असंदिग्धं प्रदास्यामि यत्ते हृदि सदा स्थितम् ॥ ७९ ॥ ॥ विषकन्योवाच ॥ ॥ भर्तुरर्थे मया देवि कृतोऽयं तपउद्यमः ॥ तत्किं तेन करिष्यामि सांप्रतं जरयावृता ॥ ८० ॥ तस्मादत्राऽऽश्रमे साकं त्वया स्थेयं सदैव तु ॥ हिताय सर्वनारीणां वचनान्मम पार्वति ॥ ८१ ॥ ॥ ॥ श्रीदेव्युवाच ॥ ॥ अद्यप्रभृत्यहं भद्रे श्रेष्ठेऽस्मिन्नाश्रमे शुभे ॥ स्वमाश्रमं करिष्यामि यत्ते हृदि समाश्रितम् ॥ ८२ ॥ माघशुक्लतृतीयायां याऽत्र स्नानं करिष्यति ॥ नारी सा मत्प्रसादेन लप्स्यते वांछितं फलम् ॥ ८३ ॥ अपि कृत्वा महापापं नारी वा पुरुषोऽथवा ॥ यत्र स्नात्वा प्रसादान्मे विपाप्मा संभविष्यति ॥ ८४ ॥ अत्र ये फलदानं च प्रकरिष्यंति मानवाः ॥ सफलाः सकलास्तेषामाशाः स्युर्नात्र संशयः ॥ ८५ ॥ अपि हत्वा स्त्रियं मर्त्यो योऽत्र स्नानं करिष्यति ॥ माघशुक्लतृतीयायां विपाप्मा स भविष्यति ॥ ८६ ॥ या तत्र कन्यका भद्रे स्नानं भक्त्या करिष्यति ॥ तस्मिन्दिने पतिश्रेष्ठं लप्स्यते नात्र संशयः ॥ ८७ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वा ततो गौरी तां च पस्पर्श पाणिना ॥ ततश्च तत्क्षणाज्जाता दिव्यरूपवपुर्द्धरा ॥ ८८ ॥ वृद्धत्वेन परित्यक्ता दिव्यमाल्यानुलेपना ॥ पीनोन्नतकुचाभोगा प्रमत्तगजगामिनी ॥ ८९ ॥ ततस्तां सा समादाय विधाय निजकिंकरीम् ॥ कैलासं पर्वतश्रेष्ठं जगाम हरसंयुता ॥ ९० ॥ ततःप्रभृति तत्तीर्थं शर्मिष्ठातीर्थमुच्यते ॥ प्रख्यातं त्रिषु लोकेषु सर्वपातकनाशनम् ॥ ९१ ॥ तस्मात्सर्वप्रयत्नेन तत्र स्नानं समाचरेत् ॥ माघशुक्लतृतीयायां यथावद्द्विजसत्तमाः ॥ ९२ ॥ एतत्पवित्रमायुष्यं सर्वपातकनाशनम् ॥ स्त्रीतीर्थसंभवं नृणां माहात्म्यं यन्मयोदितम् ॥ ९३ ॥ यश्चैतत्प्रातरुत्थाय सदा पठति मानवः ॥ स सर्वांल्लँभते कामान्मनसा



---

१ वा—इ०पा० । २ तस्मिंदिने--माघशुक्लतृतीयायाम्--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वांछितान्सदा ॥९४॥ तथा पर्वणि संप्राप्ते यश्चैतत्पठते नरः ॥ शृणोति चाशु भक्त्या यः स याति शिवमंदिरम् ॥९५॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये शर्मिष्ठातीर्थमाहात्म्यवर्णनंनाम द्विषष्टितमोऽध्यायः ॥ ६२ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ अथ सोमेश्वराख्यं च तत्र लिंगं सुशोभनम् ॥ अस्ति ख्यातं त्रिलोकेऽत्र स्वयं सोमेन निर्मितम् ॥ १ ॥ सोमवारेण यस्तत्र वत्सरं याव दर्चयेत् ॥ क्षणं कृत्वा स रोगेण दारुणेनापि मुच्यते ॥२॥ यक्ष्मणापि न संदेहः किं पुनः कुष्ठपूर्वकैः ॥ तस्मात्सर्वप्रयत्नेन रोगार्त्तस्तं प्रपूजयेत् ॥३॥ तदाराध्य पुरा सोमः क्षयव्याधिसमन्वितः ॥ बभूव नीरुग्देहोऽसौ यथा पांड्यो नराधिपः ॥ ४ ॥ ॥ ऋषय ऊचुः ॥ ॥ ओषधीनामधीशस्य कथं सोमस्य सूतज ॥ क्षयव्याधिः पुरा जात उपशांतिं कथं गतः ॥५॥ एतन्नः सर्वमाचक्ष्व विस्तरेण महामते॥तथा तस्य महीपस्य पांड्यस्यापि कथां शुभाम् ॥ ६ ॥ ॥ सूत उवाच ॥ ॥ दक्षस्य कन्यकाः पूर्वं सप्तविंशतिसंख्यया ॥ उपयेमे निशानाथो देवाग्निगुरुसंनिधौ ॥ ७ ॥ नक्षत्रसंज्ञिता लोके कीर्त्यंते या द्विजोत्तमैः ॥ दैवज्ञैरश्विनीपूर्वा रूपौदार्यगुणान्विताः ॥८॥ अथ तासां समस्तानां मध्ये तस्य निशापतेः ॥ रोहिणी वल्लभा जज्ञे प्राणेभ्योऽपि गरीयसी ॥ ९ ॥ ततः समं परित्यज्य सर्वास्ता दक्षकन्यकाः ॥ रोहिण्या सह संयुक्तः स बभूव दिवानिशम् ॥ १० ॥ ततस्ताः काम संतप्ता दौर्भाग्येन समन्विताः ॥ प्रोचुर्दुःखान्विता दक्षं गत्वा बाष्पप्लुताननाः ॥ ११ ॥ वयं यस्मै त्वया दत्ताः पत्न्यर्थं तात पापिने॥ ऋतुमात्र मपि प्रीत्या सोऽस्माकं न प्रयच्छति ॥ १२ ॥ तस्मात्प्राणान्विहास्यामः संप्रविश्य हुताशनम् ॥ अविलंबान्महाभाग सत्यं ब्रूमस्तवाग्रतः ॥ ॥ १३ ॥ ॥ सूत उवाच ॥ ॥ तासां तद्वचनं श्रुत्वा दक्षो दुःखसमन्वितः ॥ सर्वास्ताः स्वयमादाय जगाम शशिसंनिधौ ॥ १४ ॥ ततः प्रोवाच सोऽन्वक्षं तासां दक्षः प्रजापतिः ॥ भर्त्सयन्परुषैर्वाक्यैर्निशानाथं मुहुर्मुहुः ॥ १५ ॥ किमिदं युज्यते कर्तुं त्वया रात्रिपतेऽधम ॥ कर्म मूढ सतां बाह्यं धर्मशास्त्रविगर्हितम् ॥ १६ ॥ ऋतुकालेऽपि संप्राप्ते सुता मम समुद्भवाः ॥ यन्न संभाषसि प्रीत्या धर्मशास्त्रं न वेत्सि किम् ॥ १७ ॥ ऋतु स्नातां तु यो भार्यां संनिधौ नोपगच्छति ॥ घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः ॥ १८ ॥ तस्य तद्वचनं श्रुत्वा सलज्जो रात्रिनायकः ॥ प्रोवाचाधोमुखो दक्षं प्रकरिष्ये वचस्तव ॥ १९ ॥ ततो हृष्टमना दक्षः सुताः सर्वा हिमद्युते ॥ निवेद्यामंत्र्य तं पश्चाज्जगाम निजमंदिरम् ॥ २० ॥ चन्द्रोऽपि पूर्ववत्सर्वास्ताः परित्यज्य दक्षजाः ॥ रोहिण्या सह संसर्गं प्रचकारानुरागतः ॥ २१ ॥ अथ ता दुःखिता भूयो जग्मुर्यत्र पिता स्थितः ॥

१ शिवमंदिरे—इ० पा० । २ क्षणं कृत्वा--अवस्थित्यवकाशं कृत्वा--इत्यर्थोऽत्र बोद्धव्यः । ३ अन्वक्षम्—समक्षम्—इत्यर्थः । ४ हिमद्युत्—चंद्रः--तस्मै--हिमद्युते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रोचुश्च बाष्पपूर्णाक्षास्तत्कालसदृशं वचः ॥ २२ ॥ एतत्तात महद्दुःखमस्माकं वर्तते हृदि ॥ यद्दौर्भाग्यं प्रसंजातं सर्वस्त्रीजनगर्हितम् ॥
॥ २३ ॥ यत्पुनस्त्वं कृतस्तेन कामुकेन दुरात्मना ॥ व्यर्थश्रमोऽप्रमाणीव कृते[1]ऽस्माकं गतः स्वयम् ॥ २४ ॥ तद्दुःखं न वयं शक्ता
हृदि धर्तुं कथंचन ॥ रमते स हि रोहिण्या चंद्रमाः सहितोऽनिशम् ॥ २५ ॥ विशेषात्तव वाक्येन निषिद्धो रात्रिनायकः ॥ अनुज्ञां
देहि तस्मात्त्वमस्माकं तत्र सांप्रतम् ॥ दौर्भाग्यदुःखसंतप्तास्त्यजामो येन जीवितम् ॥ २६ ॥ ॥ सूत उवाच ॥ ॥ तासां तद्वचनं
श्रुत्वा दक्षः कोपसमन्वितः ॥ शशाप शर्वरीनाथं गत्वा तत्संनिधौ ततः ॥ २७ ॥ यस्मात्पाप न मे वाक्यं त्वया धर्मसमन्वितम् ॥
कृतं तस्मात्क्षयव्याधिस्त्वां ग्रसिष्यति दारुणः ॥ २८ ॥ एवमुक्त्वा ययौ दक्षश्चन्द्रोऽपि द्विजसत्तमाः ॥ तत्क्षणाद्यक्ष्मणाश्लिष्टः क्षयं याति दिने
दिने ॥ २९ ॥ ततोऽसौ कृशतां प्राप्तः संपरित्यज्य रोहिणीम् ॥ अशक्तः सेवितुं कामं बभ्राम जगतीतले ॥ ३० ॥ क्षयव्याधिप्रणाशाय पृच्छ
मानश्चिकित्सकान् ॥ औषधानि विचित्राणि प्रकुर्वाणो जितेन्द्रियः ॥ ३१ ॥ तथापि मुच्यते नैव यक्ष्मणा स निशापतिः ॥ दक्षशापेन रौद्रेण
क्षयं याति दिनेदिने ॥ ३२ ॥ ततो वैराग्यमापन्नस्तीर्थयात्रापरायणः ॥ बभूव श्रद्धया युक्तस्त्यक्त्वा भेषजमुत्तमम् ॥ ३३ ॥ अथासौ भ्रममाणस्तु
तीर्थान्यायतनानि च ॥ संप्राप्तो ब्राह्मणश्रेष्ठाः प्रभासं क्षेत्रमुत्तमम् ॥ ३४ ॥ तत्र स्नात्वा शुचिर्भूत्वा प्रभासं वीक्ष्य रात्रिपः ॥ यावत्संप्रस्थितोऽन्यत्र
तावदग्रे व्यवस्थितम् ॥ ३५ ॥ अपश्यद्रोमकंनाम स मुनिं संशितव्रतम् ॥ तपोवीर्यसमोपेतं सर्वसत्त्वानुकम्पकम् ॥ ३६ ॥ तं दृष्ट्वा स प्रणम्योच्चै
स्ततः प्रोवाच सादरम् ॥ क्षयव्याधियुतश्चन्द्रो निर्वेदाद्द्विजसत्तमाः ॥ ३७ ॥ परिक्षीणोऽस्मि विप्रेंद्र क्षयव्याधिप्रभावतः ॥ तस्मात्कुरु प्रतीकार
महं त्वां शरणं गतः ॥ ३८ ॥ मया चिकित्सकाः पृष्टास्तैरुक्तं भेषजं कृतम् ॥ अनेकधा महाभाग परिक्षीणो दिनेदिने ॥ ३९ ॥ यदि नैवोपदेशं
मे कश्चित्त्वं संप्रदास्यसि ॥ व्याधिनाशाय तत्तेन त्यक्ष्याम्यद्य कलेवरम् ॥ ४० ॥ ॥ रोमक उवाच ॥ ॥ अन्यस्यापि निशानाथ न शापः
कर्तुमन्यथा ॥ शक्यते किं पुनस्तस्य दक्षस्यामिततेजसः ॥ ४१ ॥ तस्मादत्रोपदेशं ते प्रयच्छामि सुसंमतम् ॥ येन ते स्यादसंदिग्धं क्षयव्याधि
परिक्षयः ॥ ४२ ॥ नादेयं किंचिदस्तीह देवदेवस्य शूलिनः ॥ संप्रहृष्टस्य तद्वाक्यात्तस्मादाराधयस्व तम् ॥ ४३ ॥ अष्टषष्टिषु तीर्थेषु सत्यं वासः 
सदा क्षितौ ॥ तेषु संस्थाप्य तल्लिंगं तस्य नाशाय रात्रिप ॥ ४४ ॥ आराधय ततो नित्यं श्रद्धापूतेन चेतसा ॥ संप्राप्स्यसि न संदेहः क्षयव्याधि

१ अस्माकं कृते—अस्मदर्थम्—इत्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri

परिक्षयम् ॥ ४५ ॥ ॥ सूत उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा संप्रहृष्टो निशापतिः ॥ तस्मिन्प्रभासके क्षेत्रे दिव्यलिंगानि शूलिनः ॥ संस्थाप्य पूजयामास स्वनामांकानि भक्तितः ॥ ४६ ॥ ततस्तुष्टो महादेवस्तस्य संदर्शनं गतः ॥ प्रोवाच वरदोऽस्मीति प्रार्थयस्व यथेप्सितम् ॥ ४७ ॥ ॥ ॥ चन्द्र उवाच ॥ ॥ परं क्षीणोऽस्मि देवेश यक्ष्मणाहं पदांतिकम्[1] ॥ प्राप्तस्तस्मात्परित्राहि नान्यत्संप्रार्थयाम्यहम् ॥ ४८ ॥ तस्य तद्वचनं श्रुत्वा भगवान्वृषभध्वजः ॥ दक्षमाहूय तत्रैव ततः प्रोवाच सादरम् ॥ ४९ ॥ एष चंद्रस्त्वया शप्तो जामाता न कृतं शुभम् ॥ तस्मादनुग्रहं चास्य मम वाक्यात्समाचर ॥ ५० ॥ ॥ दक्ष उवाच ॥ ॥ मया धर्म्यमपि प्रोक्तो वाक्यमेष कुबुद्धिमान् ॥ नाकरोन्मे पुरः प्रोच्य करिष्यामीत्यसत्यवाक् ॥ ५१ ॥ तेन शप्तस्तु कोपेन सुतार्थे वृषभध्वज ॥ हास्येनापि मया प्रोक्तं नान्यथा संप्रजायते ॥ ५२ ॥ ॥ देवदेव उवाच ॥ ॥ अद्यप्रभृति सर्वास्ताः सुता एष निशाकरः ॥ समाः संवीक्षते[2] नित्यं मम वाक्यादसंशयम् ॥ ५३ ॥ तस्मात्पक्षं क्षयं यातु पक्षं वृद्धिं प्रगच्छतु ॥ येन ते स्याद्वचः सत्यं मत्प्रसादसमन्वितम् ॥ ५४ ॥ ततो दक्षस्तथेत्युक्त्वा जगाम निजमन्दिरम् ॥ देवोऽपि शंकरो भूयः प्रोवाच शशलांछनम् ॥ ५५ ॥ भूयोऽपि प्रार्थयाभीष्टं मत्तस्त्वं शशलांछन ॥ येन सर्वं प्रयच्छामि यद्यपि स्यात्सुदुर्लभम् ॥ ५६ ॥ ॥ ॥ चन्द्र उवाच ॥ ॥ यदि तुष्टोऽसि देवेश यदि देयो वरो मम ॥ तत्स्थापितेषु लिंगेषु मया सर्वेषु सर्वदा ॥ संनिधानं त्वया कार्यं लोकानां हितकाम्यया ॥ ५७ ॥ ॥ देव उवाच ॥ ॥ अष्टषष्टिषु लिंगेषु स्थापितेषु त्वया विभो ॥ सोमवारेण सांनिध्यं करिष्ये वचनात्तव ॥ ५८ ॥ एवमुक्त्वा स देवेशस्ततश्चादर्शनं गतः ॥ चन्द्रोऽपि हर्षसंयुक्तः समं पश्यति तास्ततः ॥ ५९ ॥ सुता दक्षस्य विप्रेंद्राः शंकरस्य वचः स्मरन् ॥ ततो हर्षसमायुक्ता बभूवुस्तदनंतरम् ॥ ६० ॥ एवं सोमेश्वरास्तत्र बभूवुर्द्विजसत्तमाः ॥ अष्टषष्टिषु तीर्थेषु तथान्येषु ततः परम् ॥ ६१ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये सोमनाथोत्पत्तिमाहात्म्यवर्णनंनाम त्रिषष्टितमोऽध्यायः ॥ ॥ ६३ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ चमत्कारी[3] पुरा देवी तत्रैवास्ति द्विजोत्तमाः ॥ चमत्कारनरेंद्रेण स्थापिता श्रद्धया पुरा ॥ १ ॥ यथा स महिषः पूर्वं निहतो दानवो रणे ॥ कौमारव्रतधारिण्या[4] मायाशतसहस्रधृक् ॥ २ ॥ यदा तन्निर्मितं तत्र पुरं तेन महात्मना ॥ तस्य संरक्षणार्थाय तदा सा स्थापिता द्विजाः ॥ ३ ॥ पुरस्य तस्य रक्षार्थं तथा तत्पुरवासिनाम् ॥ सर्वेषां ब्राह्मणेंद्राणां भक्त्या भावितचेतसाम् ॥ ४ ॥ यस्तामभ्यर्च

१ पदांतिकं प्राप्तः—शरणं गतः—इत्यर्थः । निरर्गलम्—इ० पा० । २ संवीक्षते—संवीक्षिष्यते—इत्यर्थः । वर्तमानसामीप्ये वर्तमानवत्प्रयोगः । ३ चमत्कारपुरे देवी—इ०पा० । ४ कौमारव्रतचारिण्या—इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



येत्सम्यङ्महानवमिवासरे ॥ कृत्स्नं संवत्सरं तस्य न भयं जायते क्वचित् ॥ ५ ॥ भूतप्रेतपिशाचेभ्यः शत्रुतश्च विशेषतः ॥ रोगेभ्यस्तस्करेभ्यश्च
दुष्टेभ्योऽन्येभ्य एव च ॥ ६ ॥ यंयं काममभिध्यायञ्छुक्लाष्टम्यां नरः शुचिः ॥ तां पूजयति सद्भक्त्या स तमाप्नोत्यसंशयम् ॥ ७ ॥ निष्कामः
सुखमाप्नोति मोक्षं नास्त्यत्र संशयः ॥ तस्या देव्याः प्रसादेन सत्यमेतन्मयोदितम् ॥ ८ ॥ तामाराध्य गताः पूर्वं सिद्धिं भूरिमहीभुजः[1] ॥ ब्राह्म
णाश्च तथान्येऽपि योगिनः परमेश्वरीम् ॥ ९ ॥ यस्तस्याः श्रद्धयोपेतः प्रकरोति प्रदक्षिणाम् ॥ नित्यं संवत्सरं यावत्तिर्यग्योनौ न स व्रजेत् ॥ १० ॥
तस्या आयतने पूर्वमाश्चर्यमभवन्महत् ॥ यत्तद्वः[2] कीर्तयिष्यामि शृणुध्वं सुसमाहिताः ॥ ११ ॥ आसीच्चित्ररथोनाम पूर्वं पार्थिवसत्तमः ॥ दशार्णा
धिपतिः ख्यातः सर्वशत्रुनिबर्हणः ॥ १२ ॥ शुक्लाष्टम्यां सदा भक्त्या स तस्याः श्रद्धयान्वितः ॥ अष्टोत्तरशतंयावत्प्रचकार प्रदक्षिणाम् ॥ १३ ॥
ततः प्रणम्य तां देवीं संप्रयाति पुनर्गृहम् ॥ सैन्येन चतुरंगेण समंतात्परिवारितः ॥ १४ ॥ एवं तस्य नरेंद्रस्य प्रदक्षिणरतस्य च ॥ जगाम
सुमहान्कालो देव्या भक्तिरतस्य च ॥ १५ ॥ कस्यचित्त्वथ कालस्य स राजा तत्र संगतः ॥ अपश्यद्ब्राह्मणश्रेष्ठान्देवीगृहसमाश्रितान् ॥ १६ ॥ ततः
प्रदक्षिणां कृत्वा तां देवीं स महीपतिः ॥ १६ ॥ अग्रस्थांस्तान्द्विजान्सर्वान्नमश्चक्रे समाहितः ॥ १७ ॥ ततस्तैः सहितैस्तत्र सहासीनः कथाः
शुभाः ॥ राजर्षीणां पुराणानां विप्रर्षीणां चकार ह ॥ १८ ॥ ततः कस्मिन्कथांते स पृष्टस्तैर्द्विजसत्तमैः ॥ कौतूहलसमोपेतैर्विनयावनतः स्थितः ॥
॥ १९ ॥ राजन्पृच्छामहे सर्वे त्वां वयं कौतुकान्विताः ॥ तस्मात्कीर्तय चेद्गुह्यं नं[3] तत्तव व्यवस्थितम् ॥ २० ॥ मासिमासि सदाष्टम्यां त्वं शुक्लायां
सुदूरतः ॥ आगत्य देवतायाश्च प्रकरोषि प्रदक्षिणाम् ॥ २१ ॥ यत्नेनान्याः परित्यज्य सर्वाः पूजादिकाः क्रियाः ॥ नूनं वेत्सि फलं कृत्स्नं
यत्प्रदक्षिणसंभवम् ॥ २२ ॥ ॥ राजोवाच ॥ ॥ सत्यमेतद्द्विजश्रेष्ठा यद्भवद्भिरुदाहृतम् ॥ रहस्यमपि वक्तव्यं युष्माकं सांप्रतं मया ॥ २३ ॥
अहमास शुकः पूर्वमस्मिन्नायतने शुभे ॥ देव्याः पश्चिमदिग्भागे कुलायकृतसंश्रयः ॥ २४ ॥ तत्र निर्गच्छतो नित्यं कुर्वतश्च प्रवेशनम् ॥
प्रदक्षिणाभवद्देव्या नित्यमेव द्विजोत्तमाः ॥ २५ ॥ ततः कालेन मे मृत्युः संजातोऽत्रैव मंदिरे ॥ तत्प्रभावेण संजातो राजा जातिस्मरोऽत्र हि ॥
॥ २६ ॥ एतस्मात्कारणाद्दूरात्समभ्येत्य प्रदक्षिणाम् ॥ करोम्यस्या द्विजश्रेष्ठा देवतायाः समाहितः ॥ २७ ॥ पुरा भक्तिविहीनेन कुलाये वसता ॥ ७३ ॥
मया ॥ कृता प्रदक्षिणा देव्यास्तेन जातोऽस्मि भूपतिः ॥ २८ ॥ अधुना श्रद्धया युक्तो यत्करोमि प्रदक्षिणाम् ॥ किं मे भविष्यति श्रेयस्तन्न वेद्मि

१ भूरिमहीभुजः—बहवो भूपालाः । २ एतद्वः—इ०पा० । ३ न भवेद्व्यवस्थितम्—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विजोत्तमाः ॥ २९ ॥ ॥ सूत उवाच ॥ ॥ तच्छ्रुत्वा तस्य ते विप्रा विस्मयोत्फुल्ललोचनाः ॥ साधुवादं तथा चक्रुस्तस्य भूपस्य हर्षिताः ॥ ॥ ३० ॥ ततः स पार्थिवः सर्वान्प्रणम्य द्विजसत्तमान् ॥ अनुज्ञाप्य ययौ तूर्णं स्वगृहाय ससैनिकः ॥ ३१ ॥ अधुना श्रद्धया युक्तो यः करोति प्रदक्षिणाम् ॥ सर्वपापविनिर्मुक्तो लभते वांछितं फलम् ॥ ३२ ॥ ततः प्रभृति ते विप्राः सर्वे भक्तिपुरःसराः ॥ तस्याः प्रदक्षिणां चक्रुस्तथान्ये मुक्तिहेतवे ॥ ३३ ॥ प्राताश्च परमां सिद्धिं वांछितां तत्प्रभावतः ॥ इह लोके परे चैव दुर्लभां त्रिदशैरपि ॥ ३४ ॥ तस्मात्सर्वप्रयत्नेन तां देवीमिह संश्रयेत् ॥ सर्वकामप्रदां नृणां तस्मिन्क्षेत्रे व्यवस्थिताम् ॥ ३५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये चमत्कारीदुर्गामाहात्म्यवर्णनंनाम चतुःषष्टितमोऽध्यायः ॥ ६४ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तथान्यदपि तत्रास्ति तडागं देवनिर्मितम् ॥ यत्रानर्तो नृपः सिद्धः सुहयोनाम नामतः ॥ १ ॥ तेनैव भूभुजा तत्र लिंगं संस्थापितं शुभम् ॥ आनर्तेश्वरसंज्ञं च सर्वसिद्धिप्रदं नृणाम् ॥ २ ॥ तत्रांगारकषष्ठ्यां यस्तडागे स्नानमाचरेत् ॥ स प्राप्नोति नरः सिद्धिं यथाऽऽनर्ताधिपेन च ॥ ३ ॥ ॥ ऋषय ऊचुः ॥ ॥ कथं सिद्धिस्तु संप्राप्ता आनर्तेन महात्मना ॥ सर्वं कथय तत्सूत सर्वं वेत्सि न संशयः ॥ ४ ॥ ॥ सूत उवाच ॥ ॥ आनर्तः सुहयोनाम पुरासीत्पृथिवीपतिः ॥ सर्वारिभिर्हतो युद्धे पलायनपरायणः ॥ उच्छिष्टो म्लेच्छसंस्पृष्ट एकाकी बहुभिर्वृतः ॥ ५ ॥ अथ तस्य कपालं च कापालिकव्रतान्वितः ॥ जगृहे निजकर्मार्थं ज्ञात्वा तं वीरसंभवम् ॥ ६ ॥ आनर्तेश्वरसांनिध्ये वसमानो वनेस्थितः ॥ स रात्रौ तेन तोयेन सर्वदेवमयेन च ॥ ॥ ७ ॥ तडागोत्थेन संपूर्णं रात्रौ कृत्वा प्रमुंचति ॥ आसीत्पूर्वं वणिङ्नाम्ना सिद्धसेनइति स्मृतः ॥ धनी भृत्यसमोपेतः सदा पुण्यपरायणः ॥ ८ ॥ कस्यचित्त्वथ कालस्य पण्यबुद्ध्या द्विजोत्तमाः ॥ प्रस्थितश्चोत्तरां काष्ठां स सार्थेन समन्वितः ॥ ९ ॥ अथ प्राप्तः क्रमात्सर्वैः स गच्छन्मरुमंडलम् ॥ वृक्षोदकपरित्यक्तं सर्वसत्त्वविवर्जितम् ॥ १० ॥ तत्र रात्रिं समासाद्य श्रांताः पांथाः समन्ततः॥ सुप्ताः स्थानानि संसृत्य गता निद्रावशं तथा ॥ ११ ॥ ततः प्रत्यूषमासाद्य समुत्थाय च सत्वरम् ॥ प्रस्थिता उत्तरां काष्ठां मुक्त्वैकं शूद्रसेवकम् ॥ १२ ॥ स वै मार्गपरिश्रांतो गत्वा निद्रावशं भृशम् ॥ न जजागार जातेऽपि प्रयाणे बहुशब्दिते ॥ १३ ॥ न च तैः सँ स्मृतः सार्थैर्यैः समं प्रस्थितो गृहात् ॥ न च केनापि संदृष्टः स तु रोधसि संस्थितः ॥ १४ ॥ एवं गते ततः सार्थे प्रोद्गते सूर्यमंडले ॥ तीव्रतापपरिस्पृष्टो जजागार ततः परम् ॥१५॥ यावत्पश्यति नो किञ्चित्तस्मिन्स्थाने स

१ स्वपुरं सहसैनिकः—इ० पा० । २ मुक्तिहेतवः—इ० पा० । ३ तुम्त्रीसमुद्भवम्—इ० पा० । ४ व्यवस्थितः—इ० पा० । ५ स्थितः—इ० पा० । ६ शूद्रमेव तम्—इ० पा० । ७ संसृतः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सार्थकम्॥ न च तेषां मरौ तस्मिँल्लक्ष्यते पदपद्धतिः॥१६॥ततो दुःखपरीतात्मा धावमान इतस्ततः॥पतितो मेदिनीपृष्ठे मध्याह्ने क्षुत्तृषार्दितः ॥१७॥ एवं तस्य तृषार्तस्य पतितस्य धरातले ॥ धृतप्राणस्य कृच्छ्रेण संयातोऽस्ताचलं रविः ॥ १८ ॥ ततः किंचित्ससंज्ञोऽभून्मंदीभूते दिवाकरे ॥ चिन्तयामास चित्तेन क्वाहं गच्छामि सांप्रतम् ॥ १९ ॥ न लक्ष्यते क्वचिन्मार्गो दृश्यते न च मानुषम् ॥ नात्र तोयं न च च्छाया नूनं मे मृत्युरागतः ॥ २० ॥ एवं चिन्ताप्रपन्नस्य तस्य शूद्रस्य निर्जने ॥ मरौ तस्मिन्समायाता शर्वरी तदनन्तरम् ॥ २१ ॥ अथ क्षणेन शुश्राव स गीतं मधुरध्वनि ॥ पठतां नन्दिवृद्धानां तथा शब्दं मनोहरम् ॥ २२ ॥ अथापश्यत्क्षणेनैव प्रेतसंघैः समावृतम् ॥ प्रेतमेकं च सर्वेषामाधिपत्ये व्यवस्थितम् ॥ २३ ॥ ततस्ते पार्श्वगाः प्रेता एके नृत्यं प्रचक्रिरे ॥ तत्पुरो गीतमन्ये तु स्तुतिं चैव तथा परे ॥ २४ ॥ अथासौ प्राह तं शूद्रमतिथे कुरु भोजनम् ॥ स्वेच्छया पिब तोयं च श्रेयो येन भवेन्मम ॥ २५ ॥ ततः स भोजनं चक्रे क्षुधार्तश्च पपौ जलम् ॥ भयं त्यक्त्वा सुविश्रब्धः[1] प्रेतराजस्य शासनात् ॥ २६ ॥ ततः प्रेताश्च ते सर्वे प्रेतत्वेन समन्विताः ॥ यथाज्येष्ठं यथान्यायं प्रचक्रुर्भोजनक्रियाम्॥२७॥ एवं तेषां समस्तानां विलासैः पार्थिवोचितैः ॥ अतिक्रान्ता निशा सर्वा क्रीडतां द्विजसत्तमाः ॥ २८ ॥ ततः प्रभाते विमले प्रोद्गते रविमंडले ॥ यावत्पश्यति शूद्रः स तावत्तत्र न किञ्चन ॥ २९ ॥ ततश्च चिन्तयामास किमेतत्स्वप्नदर्शनम् ॥ चित्तभ्रमोऽथवाऽस्माकमिन्द्रजालमथापि वा ॥ ३० ॥ अथवा सत्यमेतद्धि यतो मे तृप्तिरुत्तमा ॥ संजातेयं क्षुधार्त्तस्य पिपासाकुलितस्य च ॥३१॥ एवं चिन्तयमानस्य भास्करो गगनांगणम् ॥ समारुरोह तापेन तापयन्धरणीतलम् ॥ ३२ ॥ ततः कंचित्समाश्रित्य स्वल्पच्छायं महीरुहम् ॥ प्राप्तवान्दिवसस्यांतं क्षुत्पिपासाप्रपीडितः ॥ ३३ ॥ ततो निशामुखे प्राप्ते भूयोऽपि प्रेतराजकम् ॥ प्रेतैस्तैश्च समोपेतं तथारूपं व्यलोकयत् ॥ ३४ ॥ तथैव भोजनं चक्रे तस्यातिथ्यसमुद्भवम् ॥ भयेन रहितः शूद्रो हर्षेण महतान्वितः ॥ ३५ ॥ एवं तस्य निशावक्त्रे नित्यमेव स भूपतिः ॥ आतिथ्यं प्रकरोत्येव समागत्य तथैव च ॥ ३६ ॥ ततोऽन्यदिवसे प्राप्ते तेन शूद्रेण भूपतिः ॥ पृष्टः किमेतदाश्चर्यं दृश्यते रजनीमुखे ॥ ३७ ॥ विभवस्ते महाभाग प्रणश्यति निशाक्षये ॥ एतत्कीर्तय मे गुह्यं न चेत्प्रेतपसंस्थितम् ॥ अत्र कौतूहलं जातं दृष्ट्वेदं सुविचेष्टितम् ॥ ३८ ॥ ॥ प्रेत उवाच ॥ ॥ अस्ति पुण्यं महाक्षेत्रं हाटकेश्वरसंज्ञितम् ॥ गंगा च यमुना चैव स्थिते तत्र च संगमे ॥ ३९ ॥ ताभ्यामतिसमीपस्थं शिवस्यायतनं शुभम् ॥ महाव्रतधरस्तत्र तपस्यति सुनैष्ठिकः[2] ॥ ४० ॥ स सदा

१ स विश्रब्धः—इ० पा० । २ च नैष्ठिकः—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रात्रिशौचार्थं कपालं जलपूरितम् ॥ मदीयं शयने चक्रे तत्र कृत्वा निजां क्रियाम् ॥ ४१ ॥ तत्प्रभावान्ममेयं हि विभूतिर्जायते निशि ॥ दिवा रिक्ते कृते याति भूय एव महामते ॥४२॥ तस्मात्कुरु प्रसादं मे तत्र गत्वा कपालकम् ॥ चूर्णं कृत्वा मदीयं तत्तस्मिंस्तोये विनिक्षिप ॥४३॥ येन मे जायते मोक्षः प्रेतभावात्सुदारुणात् ॥ ४४ ॥ तथा तत्रास्ति पूर्वस्यां दिशि तत्तीर्थमुत्तमम् ॥ गयाशिर इति ख्यातं प्रेतत्वान्मुक्तिदायकम् ॥ ४५ ॥ तत्र गत्वा कुरु श्राद्धं सर्वेषां त्वं महामते ॥ दृश्यते तव पार्श्वस्था भद्र संपुटिका शुभाम् ॥ ४६ ॥ अस्यां नामानि सर्वेषां यथाज्येष्ठं समालिख ॥ ततः श्राद्धं कुरुष्वाशु दयां कृत्वा गरीयसीम् ॥ ४७ ॥ वयं त्वां तत्र नेष्यामः सुखोपायेन भद्रक ॥ निधिं च दर्शयिष्यामः श्राद्धार्थं सुमहत्तरम् ॥ ४८ ॥ तथेति समनुज्ञाते तेन शूद्रेण सत्वरम् ॥ निन्युस्तं स्कन्धमारोप्य शूद्रं क्षेत्रे यथोदितम् ॥ ४९ ॥ दर्शयामासुरेवास्य निधानं भूरिवित्तजम् ॥ तदादाय गतस्तत्र यत्रासौ नैष्ठिकः स्थितः ॥ ५० ॥ ततः प्रणम्य तं भक्त्या कथयामास विस्तरात् ॥ तस्य भूतपतेः सर्वं वृत्तांतं विनयान्वितः ॥ ५१ ॥ ततो लब्ध्वा कपालं तच्चूर्णयित्वा समाहितः ॥ गंगायमुनयोर्मध्ये प्रचिक्षेप मुदान्वितः ॥ ५२ ॥ एतस्मिन्नंतरे प्रेतो दिव्यरूपवपुर्धरः ॥ विमानस्थोऽब्रवीद्वाक्यं शूद्रं तं हर्षसंयुतः ॥ ५३ ॥ प्रसादात्तव मुक्तोऽहं प्रेतत्वाद्दारुणादितः ॥ स्वस्ति तेऽस्तु गमिष्यामि सांप्रतं त्रिदिवालयम् ॥ ५४ ॥ एतेषामेव सर्वेषामिदानीं श्राद्धमाचर ॥ गत्वा गयाशिरः पुण्यं येन मुक्तिः प्रजायते ॥ ५५ ॥ ततः स विस्मयाविष्टस्तेषामेव पृथक्पृथक् ॥ श्राद्धं चक्रे च भूतानां नित्यमेव समाहितः ॥ ५६ ॥ तेऽपि सर्वे गताः स्वर्गं प्रेतास्तस्य प्रभावतः ॥ ददुश्च दर्शनं तस्य स्वप्ने हर्षसमन्विताः ॥ ५७ ॥ ततः शूद्रः स विज्ञाय तत्क्षेत्रं पुण्यवर्धनम् ॥ न जगाम गृहं भूयस्तत्रैव तपसि स्थितः ॥ ५८ ॥ गंगायमुनयोः पार्श्वे शूद्रकेश्वरसंज्ञितम् ॥ लिंगं संस्थापितं तेन सर्वपातकनाशनम् ॥ ५९ ॥ यस्तयोर्विधिवत्स्नानं कृत्वा पूजयते नरः ॥ शूद्रकेश्वरसंज्ञं च लिंगं श्रद्धासमन्वितः ॥ ६० ॥ स सर्वैः पातकैर्मुक्तः प्रयाति शिवमंदिरम् ॥ स्तूयमानश्च गंधर्वैर्विमानवरमाश्रितः ॥ ६१ ॥ यस्तत्र त्यजति प्राणान्कृत्वा प्रायोपवेशनम् ॥ न च भूयोऽत्र संसारे स जन्माप्नोति मानवः ॥ ६२ ॥ गंडूषमपि तोयस्य यस्तस्य निवसन्पिबेत् ॥ सोऽपि संमुच्यते पापादाजन्ममरणांतिकात् ॥ ६३ ॥ यस्तत्र ब्राह्मणेंद्राणां

१ शयने चक्रे—शयनस्थानसमीपे स्थापयति—इत्यर्थः । मदीयं शयनं चक्रे ततः कृत्वा निजां क्रियाम्—इ० पा० । परं मूलस्थ एव पाठः समीचीनः । २ संपुटिका—पत्रसंचायकपुस्तिका—'चौपडी' इति ख्याता—इत्यर्थः । संपुटिका—इ० पा० । ३ तयोः—गंगायमुनयोः मध्ये—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

संप्रयच्छति भोजनम् ॥ पितरस्तस्य तृप्यंति यावत्कल्पशतत्रयम् ॥ ६४ ॥ त्रुटिमात्रं च यो दद्यात्तत्र स्वर्णं समाहितः ॥ स प्राप्नोति फलं कृत्स्नं राजसूयाश्वमेधयोः ॥ ६५ ॥ तस्मात्सर्वप्रयत्नेन तत्तीर्थवरमाश्रयेत् ॥ य इच्छेच्छाश्वतं स्वर्गं सदैव मनुजो द्विजाः ॥ ६६ ॥ अत्र गाथा पुरा गीता गौतमेन महर्षिणा ॥ गंगायमुनयोस्तं च प्रभावं वीक्ष्य विस्मयात् ॥ ६७ ॥ गंगायमुनयोः संगे नरः स्नात्वा समाहितः ॥ शूद्रेश्वरं समालोक्य सद्यः स्वर्गमवाप्नुयात् ॥ ६८ ॥ एतद्वः सर्वमाख्यातं गंगायमुनयोर्मया ॥ माहात्म्यं ब्राह्मणश्रेष्ठाः सर्वपातकनाशनम् ॥ ६९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्य आनर्तकेश्वरशूद्रकेश्वरमाहात्म्यवर्णनंनाम पंचषष्टितमोऽध्यायः ॥ ६५ ॥

॥ ॥ सूत उवाच ॥ ॥ तथा तत्रास्ति विख्यातं रामह्रदइतिस्मृतम् ॥ यत्र ते पितरस्तेन रुधिरेण प्रतर्पिताः ॥ १ ॥ तत्र भाद्रपदे मासि योऽमावास्यामवाप्य च ॥ पितॄन्संतर्पयेद्भक्त्या सोऽश्वमेधफलं लभेत् ॥ २ ॥ ॥ ऋषय ऊचुः ॥ ॥ अत्याश्चर्यमिदं सूत यद्ब्रवीषि महामते ॥ यत्तेन[1] पितरस्तत्र रुधिरेण प्रतर्पिताः ॥ ३ ॥ पितॄणां तर्पणार्थाय मेध्याः संकीर्तिता बुधैः ॥ पदार्था रुधिरं प्रोक्तं राक्षसानां प्रतर्पणे[2] ॥ ४ ॥ श्रुतिस्मृतिविरुद्धं च कर्म सद्भिर्विगर्हितम् ॥ जामदग्न्येन तच्चीर्णं कस्मात्सूत वदस्व नः ॥ ५ ॥ ॥ सूत उवाच ॥ ॥ तेन कोपवशात्कर्म प्रतिज्ञां परिरक्षता ॥ तत्कृतं तर्पिता येन पितरो रुधिरेण ते ॥ ६ ॥ पिता तस्य पुरा विप्रा जमदग्निर्निपातितः ॥ क्षत्रियेण स्वधर्मस्थो विना दोषं द्विजोत्तमाः ॥ ७ ॥ ततः कोपपरीतेन तेन प्रोक्तं महात्मना ॥ रक्तेन क्षत्रियोत्थेन संतर्प्याः पितरो मया ॥ ८ ॥ एतस्मात्कारणात्तेन रुधिरेण महात्मना ॥ पितरस्तर्पिताः सम्यक्तिलमिश्रेण भक्तितः ॥ ९ ॥ ॥ ऋषय ऊचुः ॥ ॥ जमदग्निर्हतः कस्मात्क्षत्रियेण महामुनिः ॥ किंनामा स च भूपालो विस्तराद्वद सूत तत्[3] ॥ १० ॥ ॥ सूत उवाच ॥ ॥ ऋचीकतनयः पूर्वं जमदग्निरिति स्मृतः ॥ हाटकेश्वरजे क्षेत्रे तत्रासीद्दग्धकल्मषः ॥ ११ ॥ चत्वारस्तस्य पुत्राश्च बभूवुर्गुणसंयुताः ॥ जघन्योऽपि गुणज्येष्ठस्तेषां रामो बभूव ह ॥ १२ ॥ कदाचिद्वसतस्तस्य जमदग्नेर्महावने ॥ पुत्रेषु कन्दमूलार्थं निर्गतेषु वनाद्बहिः ॥ १३ ॥ एतस्मिन्नंतरे प्राप्तो हैहयाधिपतिर्बली ॥ सहस्रार्जुन इत्येव विख्यातो यो महीतले ॥ १४ ॥ मृगलिप्सुर्वने तस्मिन्भ्रममाण इतस्ततः ॥ श्रमार्तो वृषराशिस्थे[4] भास्करे दिनमध्यगे ॥ १५ ॥ ततस्तमाश्रमं दृष्ट्वा नानाद्रुम समाकुलम् ॥ चतुरंगेन सैन्येन सहितः प्रविवेश ह ॥ १६ ॥ अथापश्यत्स तत्रस्थं जमदग्निं महामुनिम् ॥ उपविष्टं कृतस्नानं देवार्चनपरायणम् ॥ १७ ॥



१ यत्नेन--इति पाठः--सोऽवास्तविकः । २ प्रतर्पणम्--इ० पा० । ३ सूतज--इ० पा० । ४ वृषराशिस्थे भास्करे--अत एव ग्रीष्मर्तौ--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ तं पार्थिवं दृष्ट्वा स मुनिस्तुष्टिसंयुतः ॥ अर्घं दत्त्वा यथान्यायं स्वागतेनाभिनंद्य च ॥ १८ ॥ सोऽपि तं प्रणिपत्योच्चैर्विनयेन समन्वितः ॥ प्रतिसंभाषयामास कुशलं पर्यपृच्छत ॥ १९ ॥ ॥ राजोवाच ॥ ॥ कच्चित्ते कुशलं विप्र पुत्रशिष्यान्वितस्य च ॥ साग्निहोत्रकलत्रस्य परिवारयुतस्य च ॥ २० ॥ अद्य मे सफलं जन्म जीवितं सफलं च मे ॥ यत्त्वं तपोनिधिर्दृष्टः सर्वलोकनमस्कृतः ॥ २१ ॥ एवमुक्त्वा स राजर्षिर्विश्रम्य सुचिरं ततः ॥ पीत्वापस्तमुवाचेदं प्रणिपत्य महामुनिम् ॥ २२ ॥ अनुज्ञां देहि मे ब्रह्मन्प्रयास्यामि निजं गृहम् ॥ मम कृत्यं समादेश्यं येन ते स्यात्प्रयोजनम् ॥ २३ ॥ ॥ जमदग्निरुवाच ॥ ॥ देवतार्चनवेलायां त्वं मे गृहमुपागतः ॥ मनोरथ इव ध्यातः सर्वदेवमयोऽतिथिः ॥ २४ ॥ तस्मान्मेऽस्ति परा प्रीतिर्भक्तिश्च नृपसत्तम ॥ तत्कुरुष्व मया[१]दत्तं स्वहस्तेनैव भोजनम् ॥ २५ ॥ राजा वा ब्राह्मणो वाथ शूद्रो वाप्यंत्यजोऽपि वा ॥ वैश्वदेवान्तसंप्राप्तः सोऽतिथिः स्वर्गसंक्रमः ॥ २६ ॥ ॥ राजोवाच ॥ ॥ ममैते सैनिका ब्रह्मञ्छतशोऽथ सहस्रशः ॥ तैरभुक्तैः कथं भोक्तुं युज्यते मम कीर्तय ॥ २७ ॥ ॥ जमदग्निरुवाच ॥ ॥ सर्वेषां सैनिकानां ते संप्रदास्यामि भोजनम् ॥ नात्र चिंता त्वया कार्या मुनिर्निष्किंचनो ह्यहम् ॥ २८ ॥ यैषा पश्यति राजेंद्र धेनुर्बद्धा ममांतिके ॥ एषा सूते मनोभीष्टं प्रार्थिता सर्वदैव हि ॥ २९ ॥ ॥ ॥ सूत उवाच ॥ ॥ ततश्च कौतुकाविष्टः स नृपो द्विजसत्तमाः ॥ बाढमित्येव संप्रोच्य तस्मिन्नेवाश्रमे स्थितः ॥ ३० ॥ ततः संतर्प्य देवांश्च पितॄंश्च तदनंतरम् ॥ पूजयित्वा ह[२]विर्वाहं ब्राह्मणांश्च ततः परम् ॥ ३१ ॥ उपविष्टस्ततः सार्धं सर्वैर्भृत्यैर्बुभुक्षितैः ॥ श्रमार्तैर्विस्मयाविष्टैः कृते तस्य द्विजोत्तमाः ॥ ३२ ॥ ततः स प्रार्थयामास तां धेनुं मुनिसत्तमः ॥ यो यत्प्रार्थयते देहि भोज्यार्थं तस्य तच्छुभे ॥ ३३ ॥ ततः सा सुषुवे धेनुरन्नमुच्चावचं शुभम् ॥ पक्वान्नं च विशेषेण चित्ताह्लादकरं परम् ॥ ३४ ॥ ततः खाद्यं च चर्व्यं च लेह्यं चोष्यं तथैव च ॥ व्यंजनानि विचित्राणि कषायकटुकानि च ॥ अम्लानि मधुराण्येव तिक्तानि गुणवंति च ॥ ३५ ॥ एवं प्राप्य परां तृप्तिं तया धेन्वा स भूपतिः ॥ सेवकैः सबलैः सार्धं सन्नैरमृतसंभवैः ॥ ३६ ॥ ततो भुक्त्यवसाने तु प्रार्थयामास भूपतिः ॥ तां धेनुं विस्मयाविष्टो जमदग्निं महामुनिम् ॥ ३७ ॥ कामधेनुरियं ब्रह्मन्नार्हारण्यनिवासिनाम् ॥ मुनीनां शान्तचित्तानां तस्माद्यच्छ मम स्वयम् ॥ ३८ ॥ येनाऽकरा[३]न्करोम्यद्य लोकांस्तस्याः प्रभावतः ॥ साधयामि

१ ह्ययम्—इ० पा० । २ हविर्वाहम्—यज्ञपुरुषम्—अग्निनारायणम्—औपासनहोमेन पूजयित्वा--समभ्यर्च्य—इत्यर्थः । ३ अकरान्—राजग्राह्यकरदानरहितान्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





च दुर्गस्थाञ्छत्रून्भूरिबलान्वितान् ॥ ३९ ॥ एवं कृते तव श्रेयो भविष्यति च सद्यशः ॥ इह लोके परे चैव तस्मात्कुरु मयोदितम् ॥ ४० ॥ ॥ ॥ जमदग्निरुवाच ॥ ॥ होमधेनुरियं राजन्ममैका प्राणसंमता ॥ अदेया सर्वदा पूज्या तस्मान्नार्हसि याचितुम् ॥ ४१ ॥ ॥ राजोवाच ॥ ॥ अहं शतसहस्रं ते यच्छाम्यस्याः कृते द्विज ॥ धेनूनामपरं वित्तं यावन्मात्रं प्रवांछसि ॥ ४२ ॥ ॥ जमदग्निरुवाच ॥ ॥ अविक्रेया महाराज सामान्यापि हि गौः स्मृता ॥ किं पुनर्होमधेनुर्या प्रभावैरीदृशैर्युता ॥ ४३ ॥ विमोहाद्ब्राह्मणो यो गां विक्रीणाति धनेच्छया ॥ विक्रीणाति न सन्देहः स निजां जननीमिह ॥ ४४ ॥ सुरां पीत्वा द्विजं हत्वा द्विजानां निष्कृतिः स्मृता ॥ धेनुविक्रयकर्तॄणां प्रायश्चित्तं न विद्यते ॥ ४५ ॥ ॥ राजोवाच ॥ ॥ यदि यच्छसि नो विप्र साम्ना धेनुमिमां मम ॥ बलादपि हरिष्यामि तस्मात्साम्ना प्रदीयताम् ॥ ४६ ॥ ॥ सूत उवाच ॥ ॥ तच्छ्रुत्वा कोपसंयुक्तो जमदग्निर्द्विजोत्तमः ॥ अस्त्रमस्त्रमिति प्रोच्य समुत्तस्थौ सभातलात् ॥ ४७ ॥ ततस्ते सेवकास्तस्य नृपतेश्चित्तवेदिनः ॥ अप्राप्तशस्त्रं तं विप्रं निजघ्नुर्निशितायुधैः ॥ ४८ ॥ तस्यैवं वध्यमानस्य जमदग्नेर्महात्मनः ॥ रेणुकाख्या प्रिया भार्या पपातोपरि दुःखिता ॥ ॥ ४९ ॥ साऽपि नानाविधैस्तीक्ष्णैः खण्डिता वरवर्णिनी ॥ आयुःशेषतया प्राणैर्न कथंचिद्वियोजिता ॥ ५० ॥ एवं हत्वा स विप्रेन्द्रं जमदग्निं महीपतिः ॥ तां धेनुं कालयामास यत्र माहिष्मती पुरी ॥ ५१ ॥ अथ सा काल्यमाना च धेनुः कोपसमन्विता ॥ जमदग्निं हतं दृष्ट्वा रराम्भ करुणं मुहुः ॥ ५२ ॥ तस्याः संरम्भमाणाया वक्रमार्गेण निर्गताः ॥ पुलिन्दा दारुणा मेदाः शतशोऽथ सहस्रशः ॥ ५३ ॥ नानाशस्त्रधराः सर्वे यमदूता इवापराः ॥ प्रोचुस्तां सादरं धेनुमाज्ञां देहि द्रुतं हि नः ॥ ५४ ॥ साऽब्रवीद्धन्यतामेतद्धैहयाधिपतेर्बलम् ॥ अथ तैः कोपसंयुक्तैर्दारुणैर्म्लेच्छजातिभिः ॥ विनाशयितुमारब्धं शितैः शस्त्रैर्निरर्गलम् ॥ ५५ ॥ न कश्चित्पुरुषस्तेषां सम्मुखोऽप्यभवद्रणे ॥ किं पुनः सहसा योद्धुं भयेन महतान्वितः ॥ ५६ ॥ अथ भग्नं बलं दृष्ट्वा वध्यमानं समंततः ॥ पुलिन्दैर्दारुणाकारैः प्रोचुस्तं मन्त्रिणो नृपम् ॥ ५७ ॥ तेजोहानिः परा तेऽद्य जाता ब्रह्मवधाद्विभो ॥ तस्माद्धेनुं परित्यज्य गम्यतां निजमन्दिरम् ॥ ५८ ॥ यावन्नागच्छते तस्य रामोनाम सुतो बली ॥ नो चेत्तेन हतोऽत्रैव सबलो वधमेष्यसि ॥ ५९ ॥ नैषा शक्या बलान्नेतुं कामधेनुर्महोदया ॥ शक्तिरूपा करोत्येवं या सृष्टिं स्वयमेव हि ॥ ६० ॥ ततः स पार्थिवो भीतस्तेषां वाक्याद्विशेषतः ॥ जगाम हित्वा तां धेनुं स्वस्थानं हतसेवकः ॥ ६१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये जमदग्निवधवर्णनंनाम षट्षष्टितमोऽध्यायः ॥ ६६ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतस्मिन्नंतरे प्राप्तो रामो भ्रातृभिरन्वितः ॥ फलानि कन्दमूलानि गृहीत्वाऽऽश्रमसम्मुखः ॥ १ ॥ स दृष्ट्वा स्वाश्रमं ध्वस्तं पुलिन्दैर्बहुशो
वृतम् ॥ लकुटाश्मप्रहारैस्तु तां धेनुं जर्जरीकृताम् ॥ २ ॥ पप्रच्छ किमिदं सर्वं व्याकुलत्वमुपागतम् ॥ आश्रमास्पदमाभीरैः पुलिन्दैश्च
समावृतम् ॥ ३ ॥ केनैषा मामिका धेनुः प्रहारैर्जर्जरीकृता ॥ तापस्यस्तापसाः सर्वे कस्मादेते रुदन्ति च ॥ ४ ॥ क्व स मेऽद्य पिता वृद्धो
माता च सुतवत्सला ॥ न मामद्य यथापूर्वं स्नेहाच्चायाति सम्मुखी ॥ ५ ॥ अथ तस्य समाचख्युर्वृत्तांतं सर्वतापसाः ॥ यथादृष्टं सुदुःखार्ताः सह
स्रार्जुनचेष्टितम् ॥ ६ ॥ ततस्ते भ्रातरः सर्वे वज्रपातोपमं वचः ॥ श्रुत्वा दृष्ट्वा च तं शस्त्रैः खंडितं जनकं निजम् ॥ ७ ॥ मातरं क्षतसर्वाङ्गीं प्राण
शेषां व्यथान्विताम् ॥ रुरुदुः शोकसन्तप्ता मुक्त्वा रामं महाबलम् ॥ ८ ॥ रुदित्वाथ चिरं कालं विप्रलप्य मुहुर्मुहुः ॥ अन्त्येष्टिं चक्रिरे तस्य वेदो
क्तविधिना ततः ॥ ९ ॥ अथ दाहावसाने ते कृत्वा गर्तां यथोचिताम् ॥ मुक्त्वा रामं ददुस्तोयं पितुः पुत्रास्तिलान्वितम् ॥ १० ॥ अथान्यैस्तापसैः
प्रोक्तो रामः शस्त्रभृतां वरः ॥ न प्रयच्छसि कस्मात्त्वं प्रेतपित्रे जलांजलिम् ॥ ११ ॥ अथासौ बहुधा प्रोक्तस्तापसैर्जमदग्निजः ॥ प्रहारान्गणयन्मातुः
शितशस्त्रविनिर्मितान् ॥ १२ ॥ ततस्तानब्रवीद्रामो विनिःश्वस्य मुनीश्वरान् ॥ निषेधस्तोयदानस्य श्रूयतां यन्मया कृतः ॥ १३ ॥ अपराधं
विना तातः क्षत्रियेण हतो मम ॥ एकविंशतिः प्रहाराणां मातुरंगे स्थिता मम ॥ १४ ॥ तस्मान्निःक्षत्रियामुर्वीं यद्यहं न करोमि वै ॥ प्रहारसंख्यया
विप्रास्तन्मे स्यात्सर्वपातकम् ॥ १५ ॥ पितृमातृवधाज्जातं यत्कृतं तेन पाप्मना ॥ क्षत्रियापसदेनात्र तथान्यदपि कुत्सितम् ॥ १६ ॥ ततस्तस्यैव
चान्येषां क्षत्रियाणां दुरात्मनाम् ॥ रुधिरैः पूरयित्वेमां गर्तां पितृजलोचिताम् ॥ तर्पयिष्यामि रक्तेन पितरं नाहमंभसा ॥ १७ ॥ ॥ सूत
उवाच ॥ ॥ श्रुत्वा ते दारुणां तस्य प्रतिज्ञां तापसोत्तमाः ॥ परं विस्मयमापन्ना नोचुः किंचित्ततः परम् ॥ १८ ॥ अथाशौचांतमासाद्य[1] रामः
क्रोधसमन्वितः ॥ तीक्ष्णं परशुमादाय माहिष्मत्युन्मुखं ययौ ॥ १९ ॥ सर्वैस्तैः शबरैः सार्धं पुलिन्दैर्मेदकैस्तथा ॥ बद्धगोधांगुलित्राणैर्वरबाणधनु
र्धरैः ॥ २० ॥ तथाऽर्जुनोऽपि तं श्रुत्वा समायांतं भृगूत्तमम् ॥ सैन्येन महता युक्तं प्रतिज्ञाधारिणं तथा ॥ २१ ॥ ततस्तु सम्मुखो हृष्टो युद्धार्थं स
विनिर्ययौ ॥ सार्धं नानाविधैर्योधैः सर्वैर्देवासुरोपमैः ॥ २२ ॥ अथाभवन्महायुद्धं पुलिन्दानां द्विजोत्तमाः ॥ हैहयाधिपतेर्योधैः सार्धं देवासुरोपमैः
॥ २३ ॥ ततस्ते हैहयाः सर्वे शरैराशीविषोपमैः ॥ वध्यन्ते शबरैः संख्ये गर्जमानैर्मुहुर्मुहुः ॥ २४ ॥ ब्रह्महत्यासमुत्थेन पातकेन ततश्च ते ॥

१ अशौचान्तम्--सूतकनिवृत्तिम्--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





जाता निस्तेजसः सर्वे प्रपतंति धरातले ॥ २५ ॥ न कश्चित्पौरुषं तत्र संप्रदर्शयितुं क्षमः ॥ पलायनपराः सर्वे वध्यन्ते निशितैः शरैः
॥ २६ ॥ अथ भग्नं बलं दृष्ट्वा हैहयाधिपतिः क्रुधा ॥ स्वचापं वाञ्छयामास सज्यं कर्तुं त्वरान्वितः ॥ शक्नोति नारोपयितुं सुयत्नमपि
चाश्रितः ॥ २७ ॥ ततश्चाकर्षयामास खड्गं कोशात्सुनिर्मलम् ॥ आकृष्टुं न च शक्नोति वैलक्ष्यं परमं गतः ॥ २८ ॥ गदया निर्जितो
रौद्रो रावणो लोकरावणः ॥ यया साप्यपतद्धस्तात्तत्क्षणात्पृथिवीतले ॥ २९ ॥ नर्मदायाः प्रवाहो यैः सहस्राख्यैः करैः शुभैः ॥ विधृत
स्तेन ते सर्वे बभूवुः कम्पविह्वलाः ॥ ३० ॥ न शस्त्रं शेकुरुद्धर्तुं दैवयोगात्कथंचन ॥ दिव्यास्त्राणां तथा सर्वे मन्त्रा विस्मृतिमागताः ॥ ३१ ॥
एतस्मिन्नंतरे रामः संप्राप्तः क्रोधमूर्छितः ॥ तीक्ष्णं परशुमुद्यम्य ततस्तं प्राह निष्ठुरम् ॥ ३२ ॥ हैहयाधिपते पाप यैः करैर्जनको मम ॥ त्वया
विनिहतस्तान्मे शीघ्रं दर्शय सांप्रतम् ॥ ३३ ॥ ब्रह्मतेजोहतः सोऽपि प्रोक्तस्तेन सुनिष्ठुरम् ॥ नोवाच चोत्तरं किंचिदालेख्ये लिखितो यथा ॥३४॥
ततो भुजवनं तस्य रामः शस्त्रभृतां वरः ॥ मुहुर्मुहुर्विनिर्भर्त्स्य प्रचकर्त शनैःशनैः ॥ ३५ ॥ ततश्छित्त्वा शिरस्तस्य कुठारेण भृगूद्वहः ॥ जग्राह
रुधिरं यत्नात्प्रहारेभ्यः स्वयं द्विजाः ॥ ३६ ॥ पूरयित्वा महाकुम्भाञ्छबरेभ्यो ददौ ततः ॥ म्लेच्छेभ्यो लुब्धकेभ्यश्च ततः प्रोवाच सादरम् ॥३७॥
हाटकेश्वरजे क्षेत्रे गर्ता मे भ्रातृभिः कृता ॥ पितृसंतर्पणार्थाय सलिलेन परिप्लुता ॥ ३८ ॥ प्रक्षिपध्वं द्रुतं गत्वा तस्यां रक्तमिदं महत् ॥ पाप
स्यास्य सपत्नस्य ममादेशादसंशयम् ॥ ३९ ॥ येन तातं निजं भक्त्या तर्पयित्वा विधानतः ॥ ऋणस्य मुक्तिर्भवति येन मे पैतृकस्य च ॥ ४० ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये सहस्रार्जुनवधवर्णनंनाम सप्तषष्टितमोऽ
ध्यायः ॥ ६७ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ अथ ते शबरा यत्नाद्रक्तं तद्धैहयोद्भवम् ॥ तत्र निन्युः स्थिता यत्र गर्ता
सा पितृसंभवा ॥ १ ॥ भार्गवोऽपि च तं हत्वा रक्तमादाय कृत्स्नशः ॥ ततः संप्रेषयामास यत्र गर्ताऽथ पैतृकी ॥ २ ॥ न स
बालं न वृद्धं च परित्यजति भार्गवः ॥ यौवनस्थं विशेषेण गर्भस्थं वाथ क्षत्रियम् ॥ ३ ॥ स्वयं जघान भूपान्स तेषां पार्श्वे तथा परान् ॥
विध्वंसाययति क्रुद्धः सैनिकैश्च समन्ततः ॥ ४ ॥ तथैवासृक्प्रगृह्णाति गृह्णापयति चादरात् ॥ तेषां पार्श्वैस्ततस्तूर्णं प्रेषयामास तत्र च ॥ ५ ॥ एवं
निःक्षत्रियां कृत्वा कृत्स्नां पृथ्वीं भृगूद्वहः ॥ हाटकेश्वरजे क्षेत्रे जगाम तदनन्तरम् ॥ ६ ॥ ततस्तै रुधिरैः स्नात्वा समादाय तिलान्बहून् ॥ अप

१ स्थापयामास—इ० पा० । २ सैनिकानाम्—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सव्यं समाधाय प्रचक्रे पितृतर्पणम् ॥ ७ ॥ प्रत्यक्षं सर्वविप्राणां तथान्येषां तपस्विनाम् ॥ प्रतिज्ञां पूरयित्वाऽथ विशोकः स बभूव ह ॥ ८ ॥ ततो निःक्षत्रिये लोके कृत्वा हयमखं च सः ॥ प्रायच्छत्सकलामुर्वीं ब्राह्मणेभ्यश्च दक्षिणाम् ॥ ९ ॥ अथ लब्धवरा विप्रास्तमूचुर्भृगुसत्तमम् ॥ नास्मद्भूमौ त्वया स्थेयमेको राजा यतः स्मृतः ॥ १० ॥ सोऽपि बाढमिति प्रोच्य हर्षेण महतान्वितः ॥ महीपर्यंतमासाद्य प्रोवाचाथ नदीपतिम् ॥ ११ ॥ आरोप्य सुमहच्चापमाग्नेयास्त्रं प्रयुज्य च ॥ त्रिशिखां भ्रुकुटीं कृत्वा कोपेन महतान्वितः ॥ १२ ॥ ॥ राम उवाच ॥ ॥ मया निःक्षत्रिया भूमिः कृता शैलवनान्विता ॥ ब्राह्मणेभ्यस्ततो दत्ता वाजिमेधे महामखे ॥ १३ ॥ तस्मात्त्वं देहि मे स्थानं कृत्वाऽपसरणं स्वयम् ॥ न हि दत्त्वा ग्रहीष्यामि विप्रेभ्यो मेदिनीं पुनः ॥ १४ ॥ न करोष्यथवा वाक्यं ममाद्य त्वं नदीपते ॥ स्थलरूपं करिष्यामि वह्न्यस्त्रपरिशोषितम् ॥ १५ ॥ ॥ सूत उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा समुद्रो भयसंकुलः ॥ अपसारं ततश्चक्रे यावत्तस्याभिवांछितम् ॥ १६ ॥ ततश्चकार तत्रैव वसतिं स भृगूद्वहः ॥ तपश्चर्यासमायुक्तः पितुर्वधमनुस्मरन् ॥ १७ ॥ ततः सर्वान्पुलिन्दांश्च शबरान्मेदसंयुतान् ॥ भूम्यन्ते धारयामास पर्वतेषु स भार्गवः ॥ १८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये परशुरामकृतमहीदानपूर्वकसमुद्रापसारणवृत्तान्तवर्णनंनामाष्टाषष्टितमोऽध्यायः ॥ ६८ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ ततो निःक्षत्रिये लोके क्षत्रिण्यो वंशकारणात् ॥ क्षेत्रजान्ब्राह्मणेभ्यश्च सुषुवुस्तनयान्वरान् ॥ १ ॥ ते वृद्धिं च समासाद्य क्षेत्रजाः क्षत्रियोपमाः ॥ जगृहुर्मेदिनीं वीर्यात्संनिरस्य द्विजोत्तमान् ॥ २ ॥ ततस्ते ब्राह्मणाः सर्वे परिभूतिपदं गताः ॥ प्रोचुर्भार्गवमभ्येत्य दुःखेन महतान्विताः ॥ ३ ॥ रामराम महाबाहो या त्वया वसुधा च नः ॥ वाजिमेधे मखे दत्ता क्षत्रियैः सा हता बलात् ॥ ४ ॥ तस्मान्नो देहि तां भूयो हत्वा तान्क्षत्रियाधमान् ॥ कुरु श्रेयोऽभिवृद्धिं तां यद्यस्ति तव पौरुषम् ॥ ५ ॥ ततो रामः क्रुधाविष्टो भूयस्तैः शबरैः सह ॥ पुलिन्दैर्मेदकैश्चैव क्षत्रियांताय निर्ययौ ॥ ६ ॥ तत्रैव क्षत्रियान्हत्वा रक्तमादाय तद्द्रुतम् ॥ तां गर्तां पूरयामास चकार पितृतर्पणम् ॥ ७ ॥ प्रददौ ब्राह्मणेभ्यश्च वाजिमेधे धरां पुनः ॥ तैश्च निर्वासितस्तत्र जगामोदधिसंनिधौ ॥ ८ ॥ एवं तेन कृता पृथ्वी सर्वक्षत्रविवर्जिता ॥ त्रिःसप्तवारं विप्रेंद्रा द्विजेभ्यश्च निवेदिता ॥ ९ ॥ तर्पिताः पितरश्चैव रुधिरेण महात्मना ॥ प्रतिज्ञा पालिता तस्माद्विकोपश्च बभूव सः ॥ १० ॥ एकविंशतिमे प्राप्ते ततश्च पितृतर्पणे ॥ अशरीराऽभवद्वाणी खस्था पितृसमुद्भवा ॥ ११ ॥ रामराम महाभाग त्यजैतत्कर्म गर्हितम् ॥ वयं ते तुष्टिमापन्नाः स्ववाक्यपरिपालनात् ॥ १२ ॥ यत्त्वया विहितं कर्म नैतदन्यः करिष्यति ॥ न कृतं केनचित्पूर्वं पितृवैरसमुद्भवम् ॥ १३ ॥ तस्मात्तुष्टा वयं वत्स दास्यामश्चित्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वांछितम् ॥ प्रार्थयस्व द्रुतं तस्माद्दुर्लभं त्रिदशैरपि ॥ १४ ॥ ॥ राम उवाच ॥ ॥ पितरो यदि तुष्टा मे यच्छंति यदि वांछितम् ॥ तस्मात्तीर्थ
मिदं पुण्यं मन्नाम्ना लोकविश्रुतम् ॥ रक्तदोषविनिर्मुक्तं सेवितं वरतापसैः ॥ १५ ॥ ॥ पितर ऊचुः ॥ ॥ पितृतर्पणजा गर्ता त्वया येयं विनि
र्मिता ॥ रामह्रद इति ख्यातिं प्रयास्यति जगत्त्रये ॥ १६ ॥ यत्र भक्तियुता लोकास्तर्पयिष्यंति वै पितॄन् ॥ तेऽश्वमेधफलं प्राप्य प्रयास्यंति परां
गतिम् ॥ १७ ॥ कृष्णपक्षे चतुर्दश्यां मासि भाद्रपदे नरः ॥ करिष्यति च यः श्राद्धं भक्त्या शस्त्रहतस्य च ॥ १८ ॥ अपि प्रेतत्वमापन्नं नरके वा
समाश्रितम् ॥ उद्धरिष्यति स[1] प्रेतमपि पापसमन्वितम् ॥ १९ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वा तु रामं ते विरेमुस्तदनंतरम् ॥ रामोऽपि च
तपस्तेपे तत्रैव क्रोधवर्जितः ॥ २० ॥ तस्मात्सर्वप्रयत्नेन तत्र शस्त्रहतस्य च ॥ तस्मिन्दिने प्रकर्तव्यं श्राद्धं श्रद्धासमन्वितैः ॥ २१ ॥ उपसर्ग
मृतानां च सर्पाग्निविषबन्धनैः ॥ तत्र मुक्तिप्रदं श्राद्धं दिने तस्मिन्नुदाहृतम् ॥ २२ ॥ यः पितॄंस्तर्पयेत्तत्र प्रेतपक्षे जलैरपि ॥ स तेषामनृणो
भूत्वा पितृलोके महीयते ॥ २३ ॥ एतद्वः सर्वमाख्यातं रामह्रदसमुद्भवम् ॥ माहात्म्यं ब्राह्मणश्रेष्ठाः सर्वपातकनाशनम् ॥ २४ ॥ श्राद्धकाले नरो
भक्त्या यश्चैतत्पठति स्वयम् ॥ स गयाश्राद्धजं कृत्स्नं फलमाप्नोत्यसंशयम् ॥ २५ ॥ पर्वकालेऽथवा प्राप्ते पठेद्ब्राह्मणसंनिधौ ॥ पितृमेधस्य यज्ञस्य
स फलं लभतेऽखिलम् ॥ २६ ॥ शृणुयाद्वापि यो भक्त्या कीर्त्यमानमिदं नरः ॥ सौत्रामणौ कृते कृत्स्नं फलमाप्नोत्यसंशयम् ॥ २७ ॥ इति
श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये रामह्रदोत्पत्तिवृत्तान्तवर्णनंनामैकोनसप्ततितमोऽ
ध्यायः ॥ ६९ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तथान्यापि च तत्रास्ति शक्तिः पापप्रणाशिनी ॥ कार्तिकेयेन निर्मुक्ता हत्वा वै तारकं
रणे ॥ १ ॥ तथास्ति सुमहत्कुण्डं स्वच्छोदकसमावृतम् ॥ तेनैव निर्मितं तत्र यः स्नात्वा तां प्रपूजयेत् ॥ स पापान्मुच्यते सद्य आजन्ममरणांति
कात् ॥ २ ॥ ॥ ऋषय ऊचुः ॥ ॥ कस्मिन्काले विनिर्मुक्ता सा शक्तिस्तेन नो वद ॥ किमर्थं स्वामिना तत्र किंप्रभावा वद स्वयम् ॥
॥ ३ ॥ ॥ सूत उवाच ॥ ॥ पुरासीत्तरकोनाम दानवोऽतिबलान्वितः ॥ हिरण्याक्षस्य दायादस्त्रैलोक्यस्य भयावहः ॥ ४ ॥
स ज्ञात्वा जनकं ध्वस्तं विष्णुना प्रभविष्णुना ॥ तपस्तेपे ततस्तीव्रं गोकर्णं प्राप्य पर्वतम् ॥ ५ ॥ यावद्वर्षसहस्रांतं शीर्णपर्णा
शनः स्थितः ॥ ध्यायमानो महादेवं कायेन मनसा गिरा ॥ ६ ॥ वरपूजोपहारैश्च नैवेद्यैर्विविधैस्ततः ॥ ततो वर्षसहस्रांते स दैत्यो



१ भूयात्–इत्यध्याहारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुःखसंयुतः ॥ ७ ॥ ज्ञात्वा रुद्रमसंतुष्टं ततो रौद्रं तपोऽकरोत् ॥ विनिष्कृत्यात्ममांसानि जुहोतिस्म हुताशने ॥ ८ ॥ ततस्तुष्टो महादेवो वृषारूढ उमापतिः ॥ सर्वैरेव गणैः सार्धं तस्य संदर्शनं ययौ ॥ ९ ॥ तत्र प्रोवाच संहृष्टस्तारनादेन नादयन् ॥ दिशः सर्वा महादेवो हर्षगद्गदया गिरा ॥ १० ॥ भोभोस्तारक तुष्टोऽस्मि साहसं मेदृशं कुरु ॥ प्रार्थयस्व मनोऽभीष्टं येन ते प्रददाम्यहम् ॥ ११ ॥ ॥ तारक उवाच ॥ अजेयः सर्वदेवानां त्वत्प्रसादादहं विभो ॥ यथा भवामि संग्रामे त्वां विहाय तथा कुरु ॥ १२ ॥ ॥ भगवानुवाच ॥ ॥ मत्प्रसादादसंदिग्धं सर्वमेतद्भविष्यति ॥ त्वया[१] यत्प्रार्थितं दैत्य त्वमेको बलवानिह ॥ १३ ॥ एवमुक्त्वा महादेवः स्वमेव भवनं गतः ॥ तारकश्चापि संहृष्टस्तथैवनिजमन्दिरम् ॥ १४ ॥ ततो दानवसैन्येन महता परिवारितः ॥ गतः शक्रपुरीं योद्धुं विख्याताममरावतीम् ॥ १५ ॥ अथाभवन्महायुद्धं देवानां दानवैः सह ॥ यावद्वर्षसहस्रांते मृत्युं कृत्वा निवर्तनम् ॥ १६ ॥ तत्राभवत्क्षयो नित्यं देवानां रणमूर्धनि ॥ विजयो दानवानां च प्रसादाच्छूलपाणिनः ॥ १७ ॥ ततश्चक्रुरुपायांस्ते विजयाय दिवौकसः ॥ वर्माणि सुविचित्राणि यन्त्राणि परिखास्तथा ॥ १८ ॥ अन्यान्यपि शरीरस्य रक्षणार्थं प्रयत्नतः ॥ तथैव योधमुख्यानां विशेषाद्द्विजसत्तमाः ॥ १९ ॥ ससृजुस्ते सुराधीशा दानवेभ्यो दिवानिशम् ॥ २० ॥ मुद्गरा भिंडिपालाश्च शतघ्न्योऽथ वरेषवः ॥ प्रासाः कुन्ताश्च भल्लाश्च तस्मिन्काले विनिर्मिताः ॥ विशेषाहवसंबन्धव्यूहानां प्रक्रियाश्च याः ॥ २१ ॥ तथान्यानि विचित्राणि कूटयुद्धान्यनेकशः ॥ भीषिकाः कुहकाश्चैव शक्रजालानि[२] कृत्स्नशः ॥ २२ ॥ न च ते विजयं प्रापुस्तथापि द्विजसत्तमाः ॥ दानवेभ्यो महायुद्धे प्रहारैर्जर्जरीकृताः॥२३॥ अथ प्राह सहस्राक्षो भयत्रस्तो बृहस्पतिम् ॥ दिनेदिने वयं दैत्यैर्विजयामो द्विजोत्तम ॥ २४ ॥ यथायथा रणार्थाय सदुपायान्करोम्यहम् ॥ तथातथा पराभूतिर्जायते मे महाहवे ॥ २५ ॥ तदुपायं सुराचार्य स्वबुद्ध्या त्वं प्रचिन्तय ॥ येन मे स्याज्जयो युद्धे तव कीर्तिरनिन्दिता ॥ २६ ॥ ॥ सूत उवाच ॥ ॥ ततो बृहस्पतिः प्राह चिरं ध्यात्वा शचीपतिम् ॥ प्रहृष्टवदनो ज्ञात्वा जयोपायं महाहवे ॥ ॥ २७ ॥ मया शक्र परिज्ञातः स उपायो महाहवे ॥ जीयन्ते शत्रवो येन लीलयैवापि भूरिशः ॥ २८ ॥ यदाभीष्टं वरं तेन प्रार्थितस्त्रिपुरांतकः ॥ तदेवं वचनं प्राह प्रणिपत्य मुहुर्मुहुः ॥ २९ ॥ अजेयः सर्वदेवानां त्वत्प्रसादादहं विभो ॥ यथा भवामि संग्रामे त्वां विहाय तथा कुरु ॥ ३० ॥ न तं स्वयं महादेवः स्वशिष्यं सूदयिष्यति ॥ विषवृक्षमपि स्थाप्य कश्छिनत्ति पुनः स्वयम् ॥ ३१ ॥ यो वै पित.. स पुत्रः स्याच्छ्रुतिवाक्यमिदं

१ त्वयापि प्रार्थितम्–इ० पा० । २ शक्रजालानि–इन्द्रजालानि इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



स्मृतम् ॥ तस्माज्जनयतु क्षिप्रं हरस्तन्नाशकृत्सुतम् ॥ ३२ ॥ येन सेनाधिपत्ये तं विनियोज्य महाहवम् ॥ कुर्मो दैत्यैः समं शक्रैः प्राप्नुयाम ततो जयम् ॥३३॥ एष एव उपायोऽत्र मया ते परिकीर्तितः ॥ विजयाय सहस्राक्ष नान्योऽस्ति भुवनत्रये ॥ ३४ ॥ ततो देवगणैः सर्वैः समेतः पाकशासनः ॥ तमर्थं प्रोक्तवाञ्छंभुं विनयावनतः स्थितः ॥ ३५ ॥ सुतस्य जननार्थाय कुरु यत्नं वृषध्वज ॥ येन सेनाधिपत्ये तं योजयामि दिवौकसाम् ॥३६॥ प्राप्नोम्यहं च संग्रामे विजयं त्वत्प्रसादतः ॥ निहत्य दानवान्सर्वांस्तारकेण समन्वितान् ॥ ३७ ॥ नान्यथा विजयो मे स्यात्संग्रामे दानवैः सह ॥ इति मां प्राह देवेज्यो ज्ञात्वा सम्यङ्महामतिः ॥ ३८ ॥ अथोवाच विहस्योच्चैः शंकरस्त्रिदशेश्वरम् ॥ करिष्यामि वचः क्षिप्रं तव शक्र न संशयः॥ ॥ ३९ ॥ पुत्रमुत्पादयिष्यामि सर्वदैत्यविनाशकम् ॥ यं त्वं सेनापतिं कृत्वा जयं प्राप्स्यसि सर्वदा ॥ ४० ॥ एवमुक्त्वा महादेवो गत्वा कैलासपर्वतम् ॥ गौर्या समं ततश्चक्रे कामधर्मं यथोचितम् ॥ ४१ ॥ हावैर्भावैः समोपेतं हास्यैरन्यैस्तदात्मिकैः ॥ यावद्वर्षसहस्रांतं दिव्यं चैव निमेषवत् ॥ ॥ ४२ ॥ अथ देवगणाः सर्वे भयसंत्रस्तमानसाः ॥ चक्रुर्मंत्रं तदर्थं हि तारकेण प्रपीडिताः ॥ ४३ ॥ सहस्रं वत्सराणां तु रतासक्तस्य शूलिनः ॥ अतिक्रांतं न देवानां तेन कृत्यं विनिर्मितम् ॥ ४४ ॥ तस्माद्गच्छामहे तत्र यत्र देवो महेश्वरः ॥ संतिष्ठते समं गौर्या कैलासे विजने स्थितः ॥४५॥ ततस्तत्रैव संजग्मुः सर्वे देवाः सवासवाः ॥ उद्वहन्तः परामार्तिं तारकारिसमुद्भवाम् ॥ ४६ ॥ अथ कैलासमासाद्य यावद्यांति भवांतिकम् ॥ निषिद्धा नंदिना तावन्न गंतव्यमतः परम् ॥ ४७ ॥ रहस्ये भगवान्सार्धं पार्वत्या समवस्थितः ॥ अस्माकमपि नो गम्यं तस्मात्तावन्न गम्यताम् ॥ ४८ ॥ ततस्तैर्विबुधैः सर्वैः प्रेषितस्तत्र चानिलः॥ किं करोति महादेवः शीघ्रं विज्ञायतामिति ॥ ४९ ॥ अथ वायुर्गतस्तत्र यत्रास्ते भगवाञ्छिवः ॥ गौर्या सह रतासक्त आनन्दं परमं गतः ॥ ५० ॥ अथ प्रचलिते शुक्रे स्थानादप्राप्तयोनिके ॥ देवेन वीक्षितो वायुर्नातिदूरे व्यवस्थितः ॥ ५१ ॥ ततो व्रीडासमोपेतस्तत्क्षणादेव चोत्थितः ॥ भावासक्तां प्रियां त्यक्त्वा मा मोत्तिष्ठेतिवादिनीम् ॥ ५२ ॥ अब्रवीदथ तं वायुं विनयावनतं स्थितम् ॥ किमर्थं त्वमिहायातः कच्चित्क्षेमं दिवौकसाम् ॥ ५३ ॥ ॥ वायुरुवाच ॥ ॥ एते शक्रादयो देवा नंदिना विनिवारिताः ॥ तारकेण हतोत्साहास्तिष्ठंति गिरिरोधसि ॥ ५४ ॥ तस्मादेतान्समाभाष्य समाश्वास्य च सादरम् ॥ प्रेषयस्व द्रुतं तत्र यत्र ते दानवाः स्थिताः ॥ ५५ ॥ अथ तानाह्वयामास तत्क्षणात्त्रिपुरांतकः ॥ संप्राह च विषण्णास्यः कृतांजलिपुटान्स्थितान् ॥ ५६ ॥ ॥ श्रीभगवानुवाच ॥ ॥ युष्मत्कृते समारंभः पुत्रार्थं यो मया कृतः ॥ स्वस्थानाच्चलिते शुक्रे कृतो मोघोद्य वायुना ॥ ५७ ॥ एतद्वीर्यं मया धैर्यात्स्तंभितं लिंगमध्यगम् ॥ अमोघं तिष्ठते सर्वं क्व दधामि निवे



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्यताम् ॥ ५८ ॥ येन संजायते पुत्रो दानवांतकरः परः ॥ सेनानाथश्च युष्माकं दुर्द्धरः समरे परैः ॥ ५९ ॥ एतत्कल्पाग्निसंकाशं धर्तुं शक्नोति नापरः ॥ विना वैश्वानरं तस्माद्धात्वेष सनातनम् ॥ ६० ॥ येन तत्र प्रमुञ्चामि सुताय विजयाय च ॥ एतद्वीर्यं महातीव्रं द्वादशार्कसमप्रभम् ॥ ॥ ६१ ॥ अथ प्राहुः सुराः सर्वे वह्निं संश्लाघ्य सादराः ॥ त्वं धारयाग्ने वक्त्रांते वीर्यमेतद्भवोद्भवम् ॥ ६२ ॥ ततः प्रसारयामास स्ववक्त्रं पावको द्रुतम् ॥ कुर्वञ्छक्रसमादेशमविकल्पेन चेतसा ॥६३॥ शंकरोऽप्यक्षिपत्तत्र कामबाणप्रपीडितः ॥ गौरीं भगवतीं ध्यायन्नानन्दं परमं गतः॥६४॥ पावकोऽपि भृशं तेन कल्पाग्निसदृशेन च ॥ दह्यमानोऽक्षिपद्भूमौ शरस्तंबे सुविस्तरे॥६५॥ एतस्मिन्नंतरे प्राप्ता भ्रममाणा इतस्ततः॥ भार्यास्तत्र[1] मुनीनां ताः षण्णां षट्कृत्तिकाः शुभाः॥६६॥तासां निदेशयामास स्वयमेव शतक्रतुः ॥ एतद्बीजं त्रिनेत्रस्य परिपाल्यं प्रयत्नतः ॥ ६७ ॥ अत्र संपत्स्यते पुत्रो द्वादशार्कसमप्रभः ॥ भवतीनामपि प्रायः पुत्रत्वं संश्रयास्यति ॥ ६८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखंडे हाटकेश्वरक्षेत्रमाहात्म्ये कार्तिकेयोत्पत्तिवृत्तांतवर्णनंनाम सप्ततितमोऽध्यायः ॥ ७० ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तास्तथेति प्रतिज्ञाय चक्रुस्तच्छक्रशासनम् ॥ सूतिकागृहधर्मं यत्तच्चक्रुस्तस्य सर्वशः ॥ १ ॥ अथान्यदिवसे बालो द्वादशार्कसमद्युतिः ॥ संजज्ञे तेन वीर्येण द्विभुजैकमुखः शुभः ॥ २ ॥ यथासौ जातमात्रस्तु प्ररुरोद सुदुःखितः ॥ तच्छ्रुत्वा रुदितं सर्वाः कृत्तिकास्तमुपागताः ॥ ३ ॥ महासेनोऽपि संवीक्ष्य मातृस्ताः समुपागताः ॥ सोत्कण्ठः षण्मुखो जातो द्वादशाक्षभुजस्तथा ॥ ४ ॥ एकैकस्याः पृथक्तेन प्रपपौ प्रयतः स्तनम् ॥ द्वाभ्यामालिंगयामास भुजाभ्यां स्नेहपूर्वकम् ॥ ५ ॥ एतस्मिन्नंतरे प्राप्ता ब्रह्मविष्णुशिवादयः ॥ सर्वे देवाः सहेन्द्रेण गन्धर्वाप्सरसस्तथा ॥ ६ ॥ महोत्सवोऽथ संजज्ञे तस्मिन्स्थाने निरर्गलः ॥ गीतवाद्यप्रणादेन येन विश्वं प्रपूरितम् ॥ ७ ॥ रंभाद्या ननृतुस्तस्य विलासिन्यो दिवौकसाम् ॥ जगुश्च मुख्यगन्धर्वाश्चित्रांगदमुखाश्च ये ॥ ८ ॥ ततस्तु देवताः सर्वास्तस्य नाम प्रचक्रिरे ॥ स्कन्दनाद्रेतसो भूमौ स्कन्द इत्येव सादरम् ॥ ९ ॥ अथ तस्य कुमारस्य तदा तत्राभिषेचनम् ॥ सेनापत्यं कृतं साक्षाद्देवानां शंभुना[2] स्वयम् ॥ १० ॥ तस्य शक्तिः स्वयं दत्ता विधिनाऽद्भुतदर्शना ॥ अमोघा विजयार्थाय दैत्यपक्षक्षयाय च ॥ ११ ॥ मयूरो वाहनार्थाय त्र्यंबकेण सुशीघ्रतः ॥ दिव्यास्त्राणि महेन्द्रेण विष्णुनाथ महात्मना[3] ॥ १२ ॥ ततोऽभी

१ भार्याः सप्तमुनीनां ताः षण्णां षट्कृत्तिकाः शुभाः—इति पाठान्तरं—सप्तर्षीणां मध्ये षण्णां मुनीनां भार्याः षट् कृत्तिकाः—एतेन ज्ञानवत्या अरुंधत्यास्तत्र गमनेऽपि तस्याग्निमयतेजसः समीपे गर्भसंक्रमणभीत्या गमनाभावात्षण्णामेव तत्समीपगमनं सर्वत्र प्रसिद्धम् । २ प्रभुः—इ० पा० । ३ सुमहात्मना—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





ष्टानि शस्त्राणि देवैः सर्वैः पृथक्पृथक् ॥ तस्य दत्तानि संतुष्टैस्तथा मातृगणैरपि ॥ १३ ॥ ततस्तमग्रतः कृत्वा सेनानाथं सुरेश्वराः ॥ जग्मुः ससैनिकास्तत्र तारको यत्र संस्थितः ॥ १४ ॥ तारकोऽपि समालोक्य देवान्स्वयमुपागतान् ॥ युद्धार्थं हर्षसंयुक्तः सम्मुखः सत्वरं ययौ ॥ १५ ॥ ततोऽभूत्सुमहद्युद्धं देवानां दानवैः सह ॥ कोपसंरक्तनेत्राणां मृत्युं कृत्वा निवर्तनम् ॥ १६ ॥ अथ स्कन्देन संवीक्ष्य दूरस्थं तारकं रणे ॥ समाहूय ततो मुक्ता सा शक्तिस्तस्य मृत्यवे ॥ १७ ॥ अथासौ हृदयं भित्त्वा तस्य दैत्यस्य दारुणा ॥ चमत्कारपुरोपांते पतिता रुधिरोक्षिता ॥ १८ ॥ तारकस्तु गतो नाशं मुक्तः प्राणैश्च तत्क्षणात् ॥ ततो देवगणाः सर्वे संहृष्टास्तं महाबलम् ॥ १९ ॥ स्तोत्रैर्बहुविधैः स्तुत्वा प्रोचुस्तस्मिन्हते सति ॥ गताश्च त्रिदिवं तूर्णं सह शक्रेण निर्भयाः ॥ २० ॥ स्कन्दोऽपि तां समादाय शक्तिं तत्र पुरोत्तमे[1] ॥ स्थापयामास येनैव रक्तशृंगोऽभवद्दृढः ॥ ॥ २१ ॥ ॥ ऋषय ऊचुः ॥ ॥ रक्तशृंगः कथं तेन निश्चलोऽपि दृढीकृतः ॥ कस्य वाक्येन नो ब्रूहि विस्तरेण महामते ॥ २२ ॥ ॥ सूत उवाच ॥ ॥ यदा वै भूमिकम्पस्तु संप्रजातः सुदारुणः ॥ रक्तशृङ्गः प्रचलितः स्वस्थानादतिवेगतः ॥ २३ ॥ तस्य दैत्यस्य पातेन यथान्ये पर्वतोत्तमाः ॥ अथ हर्म्याणि सर्वाणि चमत्कारपुरे तदा ॥ २४ ॥ शीर्णानि चलिते तस्मिन्पर्वते व्यथिता द्विजाः ॥ प्रायशो निधनं प्राप्तास्तथाऽन्ये मूर्छयार्दिताः ॥ २५ ॥ हतशेषास्ततो विप्रा गत्वा स्कन्दं क्रुधान्विताः ॥ प्रोचुश्च किमिदं पाप त्वया कृतमबुद्धिना ॥ २६ ॥ नाशं नीता वयं सर्वे सपुत्रपशुबांधवाः ॥ तस्माच्छापं प्रदास्यामो वयं दुःखेन दुःखिताः ॥ २७ ॥ ॥ स्कन्द उवाच ॥ ॥ हिताय सर्वलोकानां मयैतत्समनुष्ठितम् ॥ यद्धतो दानवो रौद्रो नान्यथा द्विजसत्तमाः ॥ २८ ॥ प्रसादः क्रियतां तस्मान्मान्या मे ब्राह्मणाः सदा ॥ मृतानपि द्विजान्सर्वानहं तानमृताश्रयात् ॥ २९ ॥ पुनर्जीवितसंयुक्तान्करिष्यामि न संशयः ॥ तथा सुनिश्चलं शैलं करिष्यामि स्वशक्तितः ॥ ३० ॥ एवमुक्त्वा समादाय तां शक्तिं रुधिरोक्षिताम् ॥ चक्रे स्थापनमस्यास्तु रक्तशृङ्गस्य मूर्धनि ॥ ३१ ॥ ततः प्रोवाच संहृष्टो देवतानां चतुष्टयम् ॥ आंबवृद्धां तथैवाम्रां माहित्थां च चमत्करीम् ॥ ३२ ॥ युष्माभिर्निश्चलः कार्यो भूयोऽयं नगसत्तमः ॥ प्रलयेऽपि यथा स्थानाद्रक्तशृङ्गश्चलेन्न हि ॥ ३३ ॥ सदैव ख्यातिमायातु मन्नाम्ना पुरमुत्तमम् ॥ युष्माकं ब्राह्मणाः सर्वे पूजां दास्यंति सर्वदा ॥ ३४ ॥ बाढमित्येव ताः प्रोच्य चतुर्दिक्षु ततश्च तम् ॥ शूलाग्रैः सुदृढं चक्रुः स्कन्दवाक्येन हर्षिताः ॥ ३५ ॥ ततश्चामृतमादाय मृतानपि द्विजोत्तमान् ॥ स्कन्दो जीवापयामास द्विजभक्तिपरायणः ॥ ३६ ॥ ततस्ते

१ सुरोत्तमः—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्राह्मणास्तत्र संहृष्टा वरमुत्तमम् ॥ ददुस्तस्य स च प्राह मन्नाम्नैतत्पुरोत्तमम् ॥ सदैव ख्यातिमायातु एतन्मे हृदि वांछितम् ॥ ३७ ॥ ॥ ऋषय ऊचुः ॥ ॥ एतत्स्कन्दपुरंनाम तव नाम्ना भविष्यति ॥ चमत्कारपुरं तद्वत्सांप्रतं सुरसत्तम ॥ ३८ ॥ पूजां तव करिष्यामः कृत्वा प्रासादमुत्तमम् ॥ तथैव देवताः सर्वाश्चतस्रोऽपि त्वया धृताः ॥ ३९ ॥ सर्वाः संपूजयिष्यामः सर्वकृत्येषु सादरम् ॥ एतां च तावकीं शक्तिं सदा सुरवरोत्तम ॥ विशेषात्पूजयिष्यामः षष्ठ्यां श्रद्धासमन्विताः ॥ ४० ॥ ॥ सूत उवाच ॥ ॥ एवं स ब्राह्मणैः प्रोक्तो महासेनो महाबलः ॥ स्थितस्तत्रैव तद्वाक्याज्ज्ञात्वा तत्क्षेत्रमुत्तमम् ॥ ४१ ॥ यस्तं पूजयते भक्त्या चैत्रषष्ठ्यां सुभावतः ॥ शुक्लायां तस्य संतुष्टिं कुरुते बर्हिवाहनः ॥ ४२ ॥ तस्यां शक्तौ नरो यश्च कुर्यात्पृष्ठिनिवर्षणम् ॥ पूजयित्वा तु पुष्पाद्यैः सम्यक्छ्रद्धासमन्वितः ॥ स न स्याद्रोगसंयुक्तो यावत्संवत्सरं द्विजाः ॥ ४३ ॥ एवं तत्र धृता शक्तिस्तेन स्कन्देन धीमता ॥ रक्तशृंगस्य रक्षार्थं तत्पुरस्य विशेषतः ॥ ४४ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये स्कन्दस्थापितशक्तिमाहात्म्यवर्णनंनामैकसप्ततितमोऽध्यायः ॥ ७१ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तत्रैव स्थापितं लिंगं धृतराष्ट्रेण भूभुजा ॥ दुर्योधनेन चालोक्य सर्वपापैः प्रमुच्यते ॥ १ ॥ ॥ ऋषय ऊचुः ॥ ॥ कस्मिन्काले नरेन्द्रेण धृतराष्ट्रेण भूभुजा ॥ तत्र संस्थापितं लिंगं वद त्वं रौमहर्षणे ॥ २ ॥ ॥ सूत उवाच ॥ ॥ आसीद्भानुमतीनाम बलभद्रसुता पुरा ॥ सर्वलक्षणसंपन्ना रूपौदार्यगुणान्विता ॥ ३ ॥ तां ददावथ पत्न्यर्थे धार्तराष्ट्राय धीमते ॥ दुर्योधनाय संमन्त्र्य विष्णुना सह यादवः ॥ ४ ॥ अथ नागपुरात्सर्वे भीष्मद्रोणादयश्च ये ॥ कौरवाः प्रस्थितास्तूर्णं पुरीं द्वारवतीं प्रति ॥५॥ तथा पांडुसुताः पंच परिवारसमन्विताः॥ सौभ्रात्रं मन्यमानास्ते दुर्योधनसमन्विताः ॥ जग्मुर्द्वारवतीं हृष्टाः सैन्येन महतान्विताः ॥६॥ अथ क्रमेण गच्छंतस्ते सर्वे कुरुपाण्डवाः ॥ आनर्तविषयं प्राप्ता धनधान्यसमाकुलम् ॥७॥ सर्वपापहरं पुण्यं यत्र तत्क्षेत्रमुत्तमम् ॥ हाटकेश्वरदेवस्य विख्यातं भुवनत्रये ॥ ८ ॥ अथ प्राह विशुद्धात्मा वृद्धः कुरुपितामहः ॥ धृतराष्ट्रं महीपालं सपुत्रं प्रहसन्निव ॥ ९ ॥ ॥ भीष्म उवाच ॥ ॥ एतद्वत्स पुरा दृष्टं मया क्षेत्रमनुत्तमम्॥ हाटकेश्वरदेवस्य सर्वपातकनाशनम् ॥ १० ॥ अत्राहं चैव निर्मुक्तः स्त्रीहत्योद्भवपातकात् ॥ तस्मादत्रैव राजेंद्र तिष्ठामः पंच वासरान् ॥११॥ येन सर्वाणि पश्यामस्तीर्थान्यायतनानि च॥ यान्यत्र संति पुण्यानि मुनीनां भावितात्मनाम् ॥१२॥ अथ तद्वचनाद्राजा धृतराष्ट्रोंऽबिकासुतः ॥ शतसंख्यैः सुतैः सार्धं कौतूहलसमन्वितः ॥१३॥ जगाम सत्वरं तत्र यत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





तत्क्षेत्रमुत्तमम् ॥ तपस्विगणसंकीर्णं युक्तं चैवाश्रमैः शुभैः ॥ १४ ॥ ब्रह्मघोषेण महता नादितं सर्वतोदिशम् ॥ वह्निपूजोत्थधूम्रेण कलुषीकृतपादपम् ॥ क्रीडामृगैश्च संकीर्णं धावद्भिर्बहुभिस्तथा ॥ १५ ॥ ततो निवार्य सैन्यं स्वमुपद्रवभयान्नृपः ॥ पञ्चभिः पांडवैः सार्धं शतसंख्यैस्तथा सुतैः ॥ ॥ १६ ॥ भीष्मेण सोमदत्तेन बाह्लीकेन समन्वितः॥ द्रोणाचार्येण वीरेण तत्पुत्रेण कृपेण च ॥१७॥ सौबलेन च कर्णेन तथान्यैरपि पार्थिवैः॥ परिवारपरित्यक्तैस्तस्मिन्क्षेत्रे चचार सः ॥ १८ ॥ तेऽपि सर्वे महात्मानः क्षत्रियास्तत्र संस्थिताः ॥ चक्रुर्धर्मक्रियाः सर्वाः श्रद्धापूतेन चेतसा ॥ १९ ॥ स्नानं चक्रुर्विधानेन तीर्थेषु द्विजसत्तमाः ॥ भ्रांत्वाभ्रांत्वा सुपुण्येषु श्रुत्वाश्रुत्वा द्विजन्मनाम् ॥ २० ॥ दानानि च विशिष्टानि ददुरिष्टानि चापरे ॥ दीनेभ्यः कृपणेभ्यश्च तपस्विभ्यो विशेषतः ॥ २१ ॥ चक्रुः श्राद्धक्रियाश्चान्ये पितॄनुद्दिश्य भक्तितः ॥ पितॄणां तर्पणं चान्ये तिलमिश्रजलेन च ॥ २२ ॥ अन्ये होमक्रिया भूपा जपमन्ये निरर्गलम् ॥ स्वाध्यायमपरे शान्ताः सम्यक्छ्रद्धासमन्विताः ॥ २३ ॥ देवतायतनान्यन्ये माहात्म्यसहितानि च ॥ श्रुत्वा पूर्वनृपाणां च पूजयंति विशेषतः ॥ २४ ॥ बलिदानैः सुवस्त्रैश्च गन्धपुष्पोपलेपनैः ॥ मार्जनैर्ध्वजदानैश्च तथा प्रेक्षणकैः शुभैः ॥ २५ ॥ मंडनैः पुष्पमालाभिः समंताद्द्विजसत्तमाः ॥ हस्त्यश्वरथदानैश्च गोभिर्वस्त्रैश्च कांचनैः ॥ कृतार्था ब्राह्मणाः सर्वे कृतास्तैस्तत्र भक्तितः ॥ २६ ॥ एवं स्नात्वा तथाऽभ्यर्च्य देवान्विप्रान्नृपोत्तमाः ॥ धृतराष्ट्रसमायुक्ता जग्मुः स्वशिबिरं ततः ॥ २७ ॥ शंसन्तो विस्मयाविष्टास्तीर्थान्यायतनानि च ॥ तस्मिन्क्षेत्रे द्विजांश्चैव तापसान्संशितव्रतान् ॥ २८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखंडे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये धृतराष्ट्रादिकृतहाटकेश्वरक्षेत्रदर्शनवर्णनंनाम द्विसप्ततितमोऽध्यायः ॥ ७२ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एवं ते कौरवाः सर्वे पांडोः पुत्राश्च शालिनः ॥ तस्मात्स्थानात्ततो जग्मुर्यत्र द्वारवती पुरी ॥ १ ॥ तत्र गत्वा विवाहं तु चक्रुः संहृष्टमानसाः ॥ दुर्योधनस्य भूपस्य भानुमत्या समं तदा ॥ २ ॥ नानावादित्रघोषेण वेदध्वनियुतेन च ॥ गीतैर्मनोहरैः पाठैर्बन्दिनां च सहस्रशः ॥ ३ ॥ एवं महोत्सवो जज्ञे तत्र यावद्दिनाष्टकम् ॥ यादवानां कुरूणां च मिलितानां परस्परम् ॥ ४ ॥ कृतार्थास्तत्र संजाताः सूतमागधबन्दिनः ॥ चारणा ब्राह्मणेंद्राश्च तथान्येऽपि च तार्किकाः ॥ ५ ॥ ततस्तु नवमे प्राप्ते दिवसे कुरुपांडवाः ॥ भीष्माद्याः पुंडरीकाक्षमिदमूचुः ससौहृदम् ॥ ६ ॥ न वयं पुंडरीकाक्ष तव रामस्य चाश्रयम् ॥ कथंचित्त्यक्तुमिच्छामः स्नेहपाशनियंत्रिताः ॥ ७ ॥ तथापि च प्रगन्तव्यं स्वपुरं प्रति माधव ॥ बलभद्रसमायुक्तस्तस्मान्नः कुरु मोक्षणम् ॥ ८ ॥ ॥ विष्णुरुवाच ॥ ॥ न तावद्वत्सरो जातो न मासः पक्ष एव च ॥ स्थितानामत्र युष्माकं



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्किमौत्सुक्यमागतम् ॥ ९ ॥ तस्मादत्रैव तिष्ठामः सहिताः कुरुपांडवाः ॥ यूयं वयं विनोदेन मृगयाक्षोद्भवेन च ॥ १० ॥ शस्त्रशिक्षाक्रियाभिश्च दमनेन च दन्तिनाम् ॥ तथाभिवांछितैरन्यैः स्नेहोऽस्ति यदि वो मयि ॥ ११ ॥ ॥ भीष्म उवाच ॥ ॥ उपपन्नमिदं विष्णो यत्त्वया व्याहृतं वचः ॥ परं शृणुष्व मे वाक्यं यदर्थं ह्युत्सुका वयम् ॥ १२ ॥ आनर्तविषयेऽस्माभिरागच्छद्भिस्तवांतिकम् ॥ दृष्टमत्यद्भुतं क्षेत्रं हाटकेश्वरजं महत् ॥ तत्र लिंगानि दृष्टानि भूपतीनां महात्मनाम् ॥ १३ ॥ सूर्यचन्द्रान्वयोत्थानामन्येषां च महात्मनाम् ॥ १४ ॥ देवानां दानवानां च मुनीनां च विशेषतः ॥ साकाराणि सुतेजांसि नानाप्रासादभांजि च ॥ १५ ॥ ततश्च कुरुमुख्यानां पांडवानां च माधव ॥ लिंगसंस्थापनार्थाय तत्र जाता मतिर्दृढा ॥ १६ ॥ ते वयं तत्र गत्वाशु यथाशक्त्या यथेच्छया ॥ लिंगानि स्थापयिष्यामः स्वानिस्वानि पृथक्पृथक् ॥ १७ ॥ एतस्मात्कारणात्तूर्णं चलिता वयमच्युत ॥ न वयं तव संगस्य तृप्यामोऽब्दशतैरपि ॥ १८ ॥ तस्मादाज्ञापयस्वाद्य कृत्वा चित्तं दृढं विभो ॥ भूयोऽप्यत्रागमिष्यामस्तव दर्शनलालसाः ॥ १९ ॥ ॥ श्रीभगवानुवाच ॥ ॥ अहं जानामि तत्क्षेत्रं सुपुण्यं पापनाशनम् ॥ तापसैः कीर्तितं नित्यं ममान्यैस्तीर्थयात्रिकैः ॥ २० ॥ तस्मात्तत्र समेष्यामो युष्माभिः सहिता वयम् ॥ लिंगसंस्थापनार्थाय क्षेत्रदर्शनवांछया ॥ २१ ॥ ॥ सूत उवाच ॥ ॥ तच्छ्रुत्वा कौरवाः सर्वे परं हर्षमुपागताः ॥ तथा पांडुसुताश्चैव ये चान्ये तत्र पार्थिवाः ॥ २२ ॥ ते तु संप्रस्थिताः सर्वे मिलिताः कुरुपांडवाः ॥ गजवाजिविमर्देन कम्पयन्तो वसुन्धराम् ॥ २३ ॥ अथ तत्क्षेत्रमासाद्य दूरे कृत्वा नि[1]वेशनम् ॥ कौरवा यादवा मुख्याश्चमत्कारपुरं गताः ॥ २४ ॥ तत्र सर्वान्समाहूय ब्राह्मणान्विनयान्विताः ॥ प्रोचुर्दत्त्वा विचित्राणि भूषणाच्छादनानि च ॥ २५ ॥ वयं सर्वेऽत्र वांछामो लिंगसंस्थापनक्रियाम् ॥ कर्तुं प्रासादमुख्यानां पृथक्त्वेन स्वशक्तितः ॥ २६ ॥ तस्मात्कृत्वा प्रसादं नो दयां च द्विजसत्तमाः ॥ आज्ञापयत शीघ्रं हि येन कर्म प्रवर्तते ॥ २७ ॥ भविष्यथ तथा यूयं होतारः सर्वकर्मसु ॥ न चान्यो ब्राह्मणो बाह्यो यद्यपि स्याद्बृहस्पतिः ॥ २८ ॥ यतोऽस्माभिः श्रुता वार्ता कीर्त्यमाना पुरातनी ॥ विष्णुना तस्य राजर्षेः प्रेतश्राद्धसमुद्भवा ॥ २९ ॥ यथा तेन कृतं श्राद्धं पितुः प्रेतस्य यत्नतः ॥ ब्राह्मणानां पुरोऽन्येषां यथोक्तानामपि द्विजाः ॥ ३० ॥ यथोक्तविधिना तीर्थे नागानां पंचमीदिने ॥ श्रावणे मासि नो मुक्तः पिता तस्य तथापि सः ॥ ३१ ॥ प्रेतत्वात्सर्पदोषेण संजाताद्द्विजसत्तमाः ॥ देवशर्मपुरो यावत्तत्कृतं श्राद्धमादरात् ॥

१ निवेशनम्—सैन्यशिबिरम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तावत्पिता विनिर्मुक्तः प्रेतत्वाद्दारुणाद्द्विजाः ॥ ३२ ॥ यदत्र क्रियते किंचित्कर्म धर्म्यं द्विजोत्तमाः ॥ तद्वाह्यं च भवेद्व्यर्थमेतद्विद्मः स्फुटं वयम् ॥ ॥ ३३ ॥ प्रार्थयामो विशेषेण तेन दैन्यं समागताः ॥ प्रसादः क्रियतां तस्मादाज्ञां यच्छत मा चिरम् ॥ ३४ ॥ ॥ सूत उवाच ॥ ॥ तेषां तद्वचनं श्रुत्वा ब्राह्मणास्ते परस्परम् ॥ मन्त्रं चक्रुस्तदर्थं हि किं कृतं सुकृतं भवेत् ॥ ३५ ॥ एके प्रोचुर्न दास्यामः प्रासादार्थं वसुन्धराम् ॥ एते षामपि चैकस्य तस्माद्गच्छंतु सत्वरम् ॥ ३६ ॥ पंचक्रोशप्रमाणेन क्षेत्रमेतद्व्यवस्थितम् ॥ पूर्वेषामपि देवानां प्रासादैस्तत्समावृतम् ॥ ३७ ॥ अन्ये प्रोचुर्धनोन्मत्ता यूयं च सुखमाश्रिताः ॥ दारिद्र्यार्तिं न जानीथ ब्रूथ तेन भृशं वचः ॥ ३८ ॥ तस्माद्वयं प्रदास्याम एतेषां हि वसु न्धराम् ॥ अर्थसिद्धिर्भवेद्येन भूषा स्थानस्य जायते ॥ ३९ ॥ तथान्ये मध्यमाः प्रोचुर्यत्र साक्षाज्जनार्दनः ॥ स्वयं प्रार्थयते भूमिं तत्कस्मान्न प्रदीयते ॥ ४० ॥ तस्माद्यत्र समायाताः कुरुपांडवयादवाः ॥ प्राधान्येन प्रकुर्वंतु प्रासादांस्तेन चापरे ॥ ४१ ॥ याचते यत्र गांगेयः स्वयमेव तथा परः ॥ धृतराष्ट्रः सपुत्रश्च पांडवाश्च महाबलाः ॥ लिंगसंस्थापनार्थाय निषेधस्तत्र नार्हति ॥ ४२ ॥ तेषां तद्वचनं श्रुत्वा प्रतिपन्नं द्विजोत्तमैः ॥ निर्धनैः सधनैश्चापि सस्पृहैर्निःस्पृहैरपि ॥ ४३ ॥ ततः समेत्य ते सर्वे ब्राह्मणाः कुरुसत्तमान् ॥ यादवान्पां डवान्प्रोचुः कृत्वा वै मन्त्रनिश्चयम् ॥ ४४ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ एतत्स्वल्पतरं क्षेत्रं सर्वेषामपि भूभुजाम् ॥ प्रासादैः सर्वतो व्याप्तं तत्किं ब्रूमोऽधुना वयम् ॥ ४५ ॥ तद्भवंतः प्रकुर्वंतु प्राधान्येन यदृच्छया ॥ क्षेत्रेऽत्रैवाभिमुख्येन प्रासादान्सुमनोहरान् ॥ यथाज्येष्ठं यथाश्रेष्ठं पृथक्त्वेन व्यवस्थिताः ॥ ४६ ॥ अथ हर्षसमायुक्ता धृतराष्ट्रमुखाः क्रमात् ॥ प्राधान्येन यथाश्रेष्ठं चक्रुः प्रासादपद्धतिम् ॥ ४७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये धृतराष्ट्रादिकृतप्रासादस्थापनोद्यमवर्णनंनाम त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥ ॥छ॥ ॥ सूत उवाच ॥ ॥ धृतराष्ट्रेण भूपेन शतपुत्रान्वितेन च ॥ लिंगानां स्थापितं तत्र शतमेकोत्तरं द्विजाः ॥ १ ॥ तथा च पांडवैः सर्वैः स्थापितं लिंगपंचकम् ॥ द्रौपद्या चाऽथ कुन्त्याऽथ गांधार्याऽथ यदृच्छया ॥ २ ॥ भानुमत्या च गौरीणां स्थापितं च चतुष्टयम् ॥ विदुरेणाथ शल्येन कलिं गेन युयुत्सुना ॥ ३ ॥ बाह्लीकेन सपुत्रेण कर्णेनाथ ससूनुना ॥ तथा शकुनिना तत्र द्रोणेन च कृपेण च ॥ ४ ॥ अश्वत्थाम्ना पृथक्त्वेन लिङ्गमेकैक मुत्तमम् ॥ स्थापितं परया भक्त्या वरप्रासादमाश्रितम् ॥ ५ ॥ तथा संस्थापितं तत्र विष्णुना प्रभविष्णुना ॥ लिंगं प्रासादमाधाय प्रोत्तुंगशिखरा



१ शिल्येन-इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्वितम् ॥ ६ ॥ सात्वतेनापि सांबेन बलभद्रेण धीमता ॥ प्रद्युम्नेनानिरुद्धेन तथान्यैर्मुख्ययादवैः ॥ ७ ॥ चारुदेष्णादिभिः पुत्रै रुक्मिण्या दशभिः सुतैः ॥ लिंगानां दशकं मुख्यं स्थापितं श्रद्धयान्वितैः ॥ ८ ॥ एवं संस्थाप्य लिङ्गानि ते सर्वे कुरुपांडवाः ॥ यादवाश्च सुसंहृष्टाः कृतकृत्यास्तदाऽभवन् ॥ ९ ॥ तत्र स्थित्वा चिरं कालं दत्त्वा दानान्यनेकशः ॥ धनाढ्यान्ब्राह्मणान्कृत्वा चमत्कारपुरोद्भवान् ॥ १० ॥ दत्त्वा तेभ्यो वरान्नागान्हयाञ्जात्याननेकशः ॥ सद्ग्रामाणि विचित्राणि क्षेत्राणि च सुधेनवः ॥ ११ ॥ महोक्षांश्च सुवस्त्राणि भूस्थानान्याश्रयांस्तथा ॥ दासीदासांस्तथा भृत्यान्दानानि विविधानि च ॥ १२ ॥ तत आमन्त्र्य तान्सर्वान्प्रणिपत्य मुहुर्मुहुः ॥ स्वस्थानं प्रति संहृष्टाः प्रजग्मुः सर्व एव ते ॥ १३ ॥ ॥ सूत उवाच ॥ ॥ एतद्वः सर्वमाख्यातं स्थापितं तेन भूभुजा ॥ तथा तद्धृतराष्ट्रेण लिंगं पातकनाशनम् ॥ १४ ॥ तथान्यैरपि भूपालैः प्राधान्येन व्यवस्थितैः ॥ पाण्डवैर्यादवैश्चैव पृथक्त्वेन व्यवस्थितैः ॥१५॥ यस्तानि पुरुषः सम्यक्पूजयेद्भक्तिभावितः ॥ स लभेच्चाखिलान्कामान्वांछितान्स्वेन चेतसा ॥ १६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये कौरवपाण्डवयादवकृतलिंगप्रतिष्ठावृत्तांतवर्णनंनाम चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥ ॥ सूत उवाच ॥ ॥ पुरा कल्पे भगवता एतत्क्षेत्रमनुत्तमम् ॥ रुद्रेण ब्रह्मणे दत्तं तुष्टेन द्विजसत्तमाः ॥ १ ॥ यदा तु स्थापितं लिंगं हाटकेश्वरसंज्ञितम् ॥ देवैः प्रीतेन रुद्रेण प्रदत्तं ब्रह्मणे पुनः ॥ २ ॥ एतत्क्षेत्रं तदा दत्तं शंभुना षण्मुखस्य ह ॥ रक्षणार्थं हि विप्राणां कलिकालादिदोषतः ॥३॥ ब्रह्मणा प्रार्थितेनेदं स्वयमादिमसुत्तमम् ॥ पित्रादिष्टस्तु गांगेयस्तत्र वासमथाकरोत् ॥ ४ ॥ कार्तिक्यां कृत्तिकायोगे यः कुर्यात्स्वामिदर्शनम् ॥ सप्तजन्म भवेद्विप्रो धनाढ्यो वेदपारगः ॥५॥ महासेनस्य देवस्य प्रासादं सुमनोहरम् ॥ उच्चैः स्थितं सर्वलोके पातुकाममिवांबरम् ॥ ६ ॥ तच्छ्रुत्वा विबुधाः सर्वे कौतुकादेत्य सत्वरम् ॥ वीक्षांचक्रुस्ततो गत्वा दृष्ट्वा मेध्यतमं पुरम् ॥ ७ ॥ प्रासादस्योत्तरे देशे प्राच्ये देशे तथा द्विजाः ॥ यज्ञक्रियासमारंभांश्चक्रुर्विप्रैर्यथोदितान् ॥८॥ इष्ट्वा च विबुधाः सर्वे दत्त्वा तेभ्यश्च दक्षिणाम् ॥ जग्मुस्त्रिविष्टपं हृष्टा लब्ध्वा तत्स्थानजं फलम् ॥ ९ ॥ ततस्तु देवयजनंनाम तस्य बभूव ह ॥ यदन्यत्र शतं कृत्वा क्रतूनां फलमाप्नुयात् ॥ तदत्रैकेन लभते क्रतुना दक्षिणावता ॥ १० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये यज्ञभूमिमाहात्म्यवर्णनंनाम पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तथान्यदपि तत्रास्ति भास्करत्रितयं शुभम् ॥

१ वसुधेनवः—इ०पा० । सुधेनवः—इति द्वितीयार्थे प्रथमा आर्षी—सूधेनूः । २ स्वीयम्—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



यैस्तुष्टैस्त्रिषु लोकेषु मानवो मुक्तिमाप्नुयात् ॥ १ ॥ मुण्डीरं प्रथमं तत्र कालप्रियं तथा परम् ॥ मूलस्थानं तृतीयं च सर्वव्याधिविनाशनम् ॥ २ ॥
तत्र संक्रमते सूर्यो मुंडीरे रजनीक्षये ॥ कालप्रिये च मध्याह्ने मूलस्थाने क्षपागमे ॥ ३ ॥ तस्मिन्काले नरो भक्त्या पश्येदप्येकमेव च ॥ कृतक्षणो
नरो मोक्षं सत्यं याति न संशयः ॥ ४ ॥ ॥ ऋषय ऊचुः ॥ ॥ मुंडीरः पूर्वदिग्भागे धरित्र्याः श्रूयते किल ॥ मध्ये कालप्रियो देवो मूलस्थानं
तदन्तरे ॥ ५ ॥ तत्कथं ते त्रयस्तत्र संजाताः सूत भास्कराः ॥ हाटकेश्वरजे क्षेत्रे सर्वं नो ब्रूहि विस्तरात् ॥ ६ ॥ ॥ सूत उवाच ॥ ॥ अस्ति
सागरपर्यंते विटंकपुरमुत्तमम् ॥ समुद्रवीचिसंसक्तप्रोच्चप्राकारमण्डनम् ॥ ७ ॥ तत्राभूद्ब्राह्मणः कश्चित्कुष्ठव्याधिसमन्वितः ॥ पूर्वकर्मविपाकेन
यौवने समुपस्थिते ॥ ८ ॥ तस्य भार्याऽभवत्साध्वी कुलीना शीलमंडना ॥ तथाभूतमपि प्रायः सा पश्यति यथा स्मरम् ॥ ९ ॥ औषधानि
विचित्राणि महार्घ्याण्यपि चाददे ॥ तदर्थमुपलेपांश्च पथ्यानि विविधानि च ॥ १० ॥ तथा भिषग्वरान्नित्यमानिनाय च सादरम् ॥ तदर्थे न
गुणस्तस्य तथापि स्याच्छरीरजः ॥ ११ ॥ यथायथा स गृह्णाति भेषजानि द्विजोत्तमाः ॥ कुष्ठेन सर्वगात्रेषु व्याप्यते च तथातथा ॥ १२ ॥
अथैवं वर्तमानस्य तस्य विप्रवरस्य च ॥ गृहेऽतिथिः समायातः कश्चित्पांथः श्रमान्वितः ॥ १३ ॥ अथ विप्रं गृहं प्राप्तं दृष्ट्वा तस्य सती
प्रिया ॥ अज्ञातमपि सद्भक्त्या सूपचारैरतोषयत् ॥ १४ ॥ अथ तं स्नातमाचांतं कृताहारं द्विजोत्तमम् ॥ विश्रान्तं शयने विप्रः प्रोवाच स गृहा
धिपः ॥ १५ ॥ तेजोऽन्वितं यथा भानुं रूपौदार्यगुणान्वितम् ॥ यौवने वर्तमानं च मूर्तं काममिवापरम् ॥ १६ ॥ ॥ कुष्ठ्युवाच ॥ ॥ कुत
आगम्यते विप्र क्व यास्यसि वदाऽधुना ॥ एवं लावण्ययुक्तोऽपि किमेकाकी यथार्तिभाक् ॥ १७ ॥ ॥ पथिक उवाच ॥ ॥ अस्ति कान्तीपुरीनाम
पुरंदरपुरी यथा ॥ सुस्थितैः सेविता नित्यं जनैर्धर्मव्रतान्वितैः ॥ १८ ॥ तस्यामहं कृतावासो गृहस्थाश्रममावहन् ॥ ग्रस्तः कुष्ठेन रौद्रेण[1] यथा
त्वं द्विजसत्तम ॥ १९ ॥ ततः श्रुतं मया तावत्पुराणे स्कान्दसंज्ञिते ॥ भास्करत्रितयं भूमौ सर्वव्याधिविनाशनम् ॥ २० ॥ ततो निर्वेदमापन्नो
भेषजैः क्लेशितश्चिरम् ॥ क्षारैश्चाम्लैः कषायैश्च कटुकैरथ तिक्तकैः ॥ २१ ॥ ततो विनिश्चयं चित्ते कृत्वा गृह्य धनं महत् ॥ मुण्डीरस्वामिनं गत्वा
स्थितस्तस्यैव सन्निधौ ॥ २२ ॥ ततः प्रातः समुत्थाय नित्यं पश्यामि तं विभुम् ॥ पूजयामि स्वशक्त्या च प्रणमामि ततः परम् ॥ २३ ॥
सूर्यवारे विशेषेण निराहारो यतेन्द्रियः ॥ करोमि जागरं रात्रौ गीतवादित्रनिःस्वनैः ॥ २४ ॥ ततः संवत्सरस्यांते तं प्रणम्य दिना



१ यथापुरम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धिपम् ॥ कालप्रियं ततः पश्चाच्छ्रद्धया परया युतः ॥ २५ ॥ तेनैव विधिना विप्र तस्यापि दिवसेशितुः[1] ॥ पूजां करोमि मध्याह्ने श्रद्धा पूतेन चेतसा ॥ २६ ॥ ततोऽपि वत्सरस्यांते तं प्रणम्याथ शक्तितः ॥ मूलस्थानं गतो देवमपरस्यां दिशि स्थितम् ॥ २७ ॥ तेनैव विधिना पूजा तस्यापि विहिता मया ॥ संध्याकाले द्विजश्रेष्ठ यावत्संवत्सरं स्थितः ॥ २८ ॥ ततः संवत्सरस्यांते स्वप्ने मां भास्करोऽब्रवीत् ॥ समेत्य प्रहसन्विप्रः संप्रहृष्टेन चेतसा ॥ २९ ॥ परितुष्टोऽस्मि ते विप्र कर्मणाऽनेन भक्तितः ॥ ममाराधनजेनैव तस्मात्कुष्ठं प्रयातु ते ॥ ३० ॥ गच्छ शीघ्रं द्विजश्रेष्ठ श्रांतोऽसि निजमंदिरम् ॥ पश्य बंधुजनं सर्वं सोत्कण्ठं तत्कृते स्थितम् ॥ ३१ ॥ त्वया हृतं पुरा रुक्मं ब्राह्मणस्य महात्मनः ॥ तेन कर्मविपाकेन कुष्ठव्याधिरुपस्थितः ॥ ३२ ॥ स मया नाशितस्तुभ्यं प्रहृष्टेनाधुना द्विज ॥ एतज्ज्ञात्वा न कर्तव्यं सुवर्णहरणं पुनः ॥ ३३ ॥ दृश्यन्ते ये नरा लोके कुष्ठव्याधिसमाकुलाः ॥ सुवर्णहरणं सर्वैस्तैः कृतं पापकर्मभिः ॥ ३४ ॥ तस्माद्देयं यथाशक्त्या न स्तेयं[2] कनकं बुधैः ॥ इच्छद्भिः परमं सौख्यं स्वशरीरस्य शाश्वतम् ॥ ३५ ॥ एवमुक्त्वा सहस्रांशुस्ततश्चादर्शनं गतः ॥ अहं च विस्मयाविष्टः प्रोत्थितः शयनाद्द्रुतम् ॥ ३६ ॥ यावत्पश्यामि देहं स्वं कुष्ठव्याधिपरिच्युतम् ॥ द्वादशार्कप्रभं दिव्यं यथा त्वं पश्यसे द्विज ॥ ३७ ॥ तस्मात्त्वमपि विप्रेंद्र भक्त्या तद्भास्करत्रयम् ॥ अनेन विधिना पश्य येन कुष्ठं प्रशाम्यति ॥३८॥ किमौषधैः किमाहारैः कटुकैरपि योजितैः ॥ सर्वव्याधिप्रणाशेशे स्थितेऽस्मिन्भास्करत्रये ॥ ३९ ॥ स्वस्ति तेऽस्तु गमिष्यामि सांप्रतं तां पुरीं प्रति ॥ गृहेऽद्य तव विश्रांतो यथा विप्र निजे गृहे ॥ ४० ॥ एवमुक्तः स पांथेन तेन विप्रः स कुष्ठभाक् ॥ वीक्षांचक्रे ततो वक्रं स्वपत्न्या दुःखसंयुतः ॥ ४१ ॥ साऽब्रवीद्युक्तमुक्तं ते पांथेनानेन वल्लभ ॥ तस्मात्तत्र द्रुतं गच्छ यत्र तद्भास्करत्रयम् ॥ ४२ ॥ अहं त्वया समं तत्र शुश्रूषानिरता सती ॥ गमिष्यामि न संदेहस्तस्माद्गच्छ द्रुतं विभो ॥ ४३ ॥ एवमुक्तस्तया सोऽथ वित्तमादाय भूरिशः ॥ प्रस्थितः कांतया सार्धं मुण्डीरस्वामिनं प्रति ॥ ४४ ॥ प्रतिज्ञया गमिष्यामि द्रष्टुं तद्देवतात्रयम् ॥ मुडीरं कालनाथं च मूलस्थानं च भास्करम् ॥ ४५ ॥ ततः कृच्छ्रेण महता कुष्ठव्याधिसमाकुलः ॥ हाटकेश्वरजे क्षेत्रे संप्राप्तः स द्विजोत्तमः ॥ ४६ ॥ तद्दृष्ट्वा सुमहत्क्षेत्रं तापसौघनिषेवितम् ॥ निर्विण्णः कुष्ठरोगेण पथि श्रांतोऽब्रवीत्प्रियाम् ॥ ४७ ॥ अहं निर्वेदमापन्नो रोगेणाथ बुभुक्षया ॥ मुण्डीरस्वामिनं यावन्न शक्नोमि प्रसर्पितुम् ॥४८॥ तस्मादत्रैव देहं स्वं विहास्यामि न संशयः ॥ त्वं गच्छ स्वगृहं कांते सार्थमासाद्य शोभनम् ॥४९॥ ॥ पत्न्युवाच ॥ ॥

१ दिवसस्पतेः—इ०पा० । २ स्तेयम्—चोरणीयम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



अभुक्ते त्वयि नो भुक्तं कदाचित्कांत वै मया ॥ एकांतेऽपि महाभाग न सुप्तं जाग्रति त्वयि ॥ ५० ॥ तस्मादेतन्महाक्षेत्रं संप्राप्य त्वां व्यवस्थितम् ॥ परलोकाय संत्यज्य कथं गच्छाम्यहं गृहम् ॥ ५१ ॥ दर्शयिष्ये मुखं तेषां त्वया हीना अहं कथम् ॥ बांधवानां गुरूणां च अन्येषां सुहृदामपि ॥५२॥ तस्मात्त्वया समं नाथ प्रवेक्ष्यामि हुताशनम् ॥ स्नेहपाशविनिर्बद्धा सत्येनात्मानमालभे ॥५३॥ यावंतस्तव संजाता उपवासा महामते॥ तावंतश्च तथास्माकं कथं गच्छामि तद्गृहम् ॥५४॥ एवं तस्या विदित्वा स निश्चयं ब्राह्मणस्तदा ॥ चितिं कृत्वा तु दाहार्थं तया सार्धं ततोऽविशत् ॥ ॥५५॥ भास्करं मनसि ध्यात्वा यावदग्निं समाददे ॥ तावत्पश्यति चाग्रस्थं सुदीप्तं पुरुषत्रयम्॥५६॥ तद्दृष्ट्वा विस्मयाविष्टः क एते पुरुषास्त्रयः॥ न कदाचिन्मया दृष्टा ईदृक्तेजःसमन्विताः ॥ ५७ ॥ ॥ पुरुषा ऊचुः ॥ ॥ मा त्वं मृत्युपथं गच्छ कृत्वा वैराग्यमाकुलः ॥ व्यावृत्य स्वगृहं गच्छ स्वे भार्यासहितो द्विज ॥ ५८ ॥ ॥ ब्राह्मण उवाच ॥ ॥ प्रतिज्ञाय मया पूर्वं गृहं मुक्तं निजं यतः ॥ मुण्डीरस्वामिनं दृष्ट्वा तथाऽन्यं कालवल्लभम् ॥ ॥ ५९ ॥ मूलस्थानं च कर्तव्यं ततः सस्यप्रभक्षणम् ॥ सोऽहं तानविलोक्याथ कथं गच्छामि मन्दिरम् ॥ भक्षयामि तथा सस्यं तेन त्यक्ष्यामि जीवितम् ॥ ६० ॥ ॥ पुरुषा ऊचुः ॥ ॥ वयं ते भास्करा ब्रह्मंस्त्रयोऽत्रैव समागताः ॥ त्वद्भक्त्याकृष्टमनसो ब्रूहि किं करवामहे ॥ ६१ ॥ ॥ ॥ ब्राह्मण उवाच ॥ ॥ यदि यूयं समायाताः स्वयमेव ममांतिकम् ॥ त्रयोऽपि भास्करा नाशमेष कुष्ठः प्रगच्छतु ॥ ६२ ॥ तथाऽत्रैव सदा स्थेयं क्षेत्रे युष्माभिरेव हि ॥ सांनिध्यं त्रिषु लोकेषु गन्तव्यं च यथा पुरा ॥ ६३ ॥ ॥ भास्करा ऊचुः ॥ ॥ एवं विप्र करिष्यामः स्थास्यामोऽत्र सदा वयम् ॥ त्वं चापि रोगनिर्मुक्तः सुखं प्राप्स्यस्यनुत्तमम् ॥ ६४ ॥ प्रासादत्रितयं तस्मादस्मदर्थं निरूपय ॥ येन त्रिकालमासाद्य गच्छामः संनिधिं द्विज ॥ ६५ ॥ एवमुक्त्वा तु ते सर्वे गताश्चादर्शनं ततः ॥ सोऽपि पश्यति कायं स्वं यावद्रोगविवर्जितम् ॥ ६६ ॥ द्वादशार्कप्रतीकाशं सर्वलक्षणलक्षितम् ॥ ततः प्रोवाच तां भार्यां विनयावनतां स्थिताम् ॥ ६७ ॥ पश्य त्वं सुभ्रूर्मे गात्रं यादृग्रूपं पुनः स्थितम् ॥ प्रसादाद्देवदेवस्य भास्करस्यांशुमालिनः ॥ ६८ ॥ सोऽहमत्र स्थितो नित्यं पूजयिष्यामि भास्करम् ॥ न यास्यामि पुनः सद्म सत्यमेतन्मयोदितम् ॥ ६९ ॥ एवमुक्त्वा स विप्रेन्द्रस्तस्मिन्क्षेत्रे सुशोभने ॥ प्रासादत्रितयं रम्यं निर्ममे भक्तिसंयुतः ॥ ७० ॥ मुण्डीरस्वामिनश्चैकमन्यत्कालप्रियस्य च ॥ मूलस्थानस्य चान्यत्तु सत्पताकाविभूषितम् ॥ ७१ ॥ त्रयाणामपि तेषां तु साध्वर्चाः शास्त्रसूचिताः ॥ स्थापयामास सूर्याणां

१ त्वर्कतेजःसमन्विताः–इ०पा० । २ त्वं भार्यासहितः–इ०पा० । ३ स्वंगि–इ०पा० । ४ अर्चाः–प्रतिमाः–इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हस्तार्के सूर्यवासरे ॥ ७२ ॥ ततस्ताः पुष्पधूपाद्यैः समभ्यर्च्य चिरं द्विजः ॥ त्रिसंध्यं क्रमशः प्रातो देहांते भास्करालयम् ॥ ७३ ॥ ॥ सूत उवाच ॥ ॥ एवं ते तत्र संजातास्त्रयोऽपि द्विजसत्तमाः ॥ भास्करा भक्तलोकस्य सर्वव्याधिविनाशकाः ॥ ७४ ॥ यस्तान्पश्यति काले स्वे यथोक्ते सूर्यवासरे ॥ स वांछिताँल्लभेत्कामान्दुर्लभानपि मानवैः ॥७५॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये मुंडीरकालप्रियमूलस्थानप्रतिष्ठावर्णनंनाम षट्सप्ततितमोऽध्यायः ॥ ७६ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ यदेतद्भवता प्रोक्तं तत्र तौ परमेश्वरौ ॥ उमामहेश्वरौ सूत हरिश्चन्द्रेण भूभुजा ॥ १ ॥ कृतौ कथयसीत्येवं वेदिमध्यं समाश्रितौ ॥ उतान्यौ स्थापितौ तत्र चमत्कारपुरांतिकम् ॥ २ ॥ वेदिमध्यगतौ नित्यं पार्वतीपरमेश्वरौ ॥ एतत्संश्रूयते सूत विवाहः प्रागभूत्तयोः ॥ ओषधिप्रस्थमासाद्य पुरं हिमवतः प्रियम् ॥ ३ ॥ अत्र नः संशयो जातः श्रद्धेयमपि ते वचः॥ श्रुत्वा किं वा भ्रमस्तेऽयं किं वाऽस्माकं प्रकीर्तय ॥ ४ ॥ ॥ सूत उवाच ॥ ॥ नास्माकं विभ्रमो जातो युष्माकं तु द्विजोत्तमाः ॥ परं यत्कारणं कृत्स्नं तद्ब्रवीमि निबोध्यताम् ॥ ५ ॥ य एष ओषधिप्रस्थे विवाहः प्रागभूत्तयोः ॥ उमात्रिनेत्रयो रम्यः सर्वदेवप्रमोदकृत् ॥ ६ ॥ वैवस्वतेऽन्तरे पूर्वं संजातो द्विजसत्तमाः ॥ सप्तमस्य तु विख्यातो युष्माकं विदितोऽत्र यः ॥ ७ ॥ हाटकेश्वरजे क्षेत्रे यश्चोद्वाहस्तयोरभूत् ॥ स्वायंभुवमनोराद्ये स संजातः सुविस्तरः ॥ ८ ॥ ॥ ऋषय ऊचुः ॥ ॥ विवाह ओषधिप्रस्थे यः पुरा समभूत्तयोः ॥ पार्वतीहरयोः सूत सोऽस्माभिर्विस्तराच्छ्रुतः ॥ ९ ॥ हाटकेश्वरजे क्षेत्रे दक्षयज्ञे मनोहरे ॥ विवाहो वृषयानस्य मनौ स्वायंभुवे पुरा ॥ १० ॥ सोऽस्माकं-कीर्तनीयश्च त्वया सूतकुलोद्वह ॥ विस्तरेण यथा वृत्तः एतन्न कौतुकं परम् ॥ ११ ॥ ॥ सूत उवाच ॥ ॥ अत्र वः कीर्तयिष्यामि सर्वपातकनाशनम् ॥ विवाहसमयं सम्यग्देवदेवस्य शूलिनः ॥ १२ ॥ ब्रह्मणो दक्षिणांगुष्ठाद्दक्षः प्राचेतसोऽभवत् ॥ शतानि पञ्च कन्यानां तस्य जातानि च द्विजाः ॥ १३ ॥ तासां ज्येष्ठतमा साध्वी सतीनाम शुचिस्मिता ॥ बभूव कन्यका सर्वैर्गुणैर्युक्ताऽऽयतेक्षणा ॥ ॥ १४ ॥ न देवी न च गंधर्वी नासुरी न च नागजा ॥ तादृग्रूपाऽभवच्चान्या यादृशी सा सुमध्यमा ॥ १५ ॥ अथ तां प्रददौ दक्षः पत्न्यर्थं शूलपाणये ॥ प्रार्थितां बहुशो यत्नात्तस्पृहाय स्पृहान्विताम् ॥१६॥ ततः पुण्यतमं क्षेत्रं कन्यादानस्य सं क्षमम् ॥ संध्याय ससुतामात्यः सभृत्यः ससुपस्थितः ॥ १७ ॥ ततश्चोद्वाहयोग्यानि वसूनि विविधान्यपि ॥ आनयामास भूरीणि मांगल्यानि विशेषतः ॥ १८ ॥ अथ चैत्रस्य शुक्लस्य नक्षत्रे

१ सत्कृते-इ०पा० ॥ २ स ज्ञात्वा-इ०,स मत्वा-इ० चपा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

भगदैवते ॥ त्रयोदश्यां दिने भानोः समायातो महेश्वरः ॥ १९ ॥ सर्वैः सुरगणैः सार्धं देवविष्णुपुरःसरैः ॥ आदित्यैर्वसुभी रुद्रैरश्विभ्यां च तथाऽपरैः ॥ २० ॥ सिद्धैः साध्यगणैर्भूतैः प्रेतैर्वैनायकैस्तथा ॥ गन्धर्वैश्चारणौघैश्च गुह्यकैर्यक्षराक्षसैः ॥ २१ ॥ एतस्मिन्नंतरे दक्षः संप्रहृष्टतनूरुहः ॥ प्रययौ संमुखस्तस्य युक्तः सर्वैः सुहृद्गणैः ॥ २२ ॥ वाद्यमानैर्महावाद्यैः सूतमागधबन्दिभिः ॥ पठद्भिः सर्वतोऽनेकैर्गायद्भिर्गायनैस्तथा ॥ २३ ॥ ततः सर्वे सुरास्तत्र स्वयं दक्षेण पूजिताः ॥ यथाश्रेष्ठं यथाज्येष्ठमुपविष्टा यथाक्रमम् ॥ परिवार्याखिलां वेदिं मंडपांतरवर्तिनीम् ॥ २४ ॥ ततः पितामहं प्राह दक्षः प्रीतिपुरःसरम् ॥ प्रणिपत्य त्वया कर्म कार्यं वैवाहिकं विभो ॥ २५ ॥ स्वयमेव सुताऽस्माकं येन स्यात्सुभगा सती ॥ पुत्रपौत्रवती नित्यं सुशीला पतिवल्लभा ॥ २६ ॥ बाढमित्येव सोऽप्युक्त्वा प्रहृष्टेनांतरात्मना ॥ समुत्थाय ततश्चक्रे कृत्यमर्हणपूर्वकम् ॥ २७ ॥ संप्रदानक्रियां कृत्वा तत्रैव विधिपूर्वकम् ॥ ततो हस्तग्रहं ताभ्यां मिथश्चक्रे यथाक्रमम् ॥ मातॄणां पुरतो वेधाः सतीशाभ्यां यथोचितम् ॥ २८ ॥ अथ वेदिं समासाद्य गृह्योक्तविधिनाऽखिलम् ॥ अग्निकार्यं यथोद्दिष्टं चकाराथ सुविस्तरम् ॥ २९ ॥ यथायथा स रम्याणि वीक्षतेऽगानि कौतुकात् ॥ सत्याः पितामहो हृष्टः कामार्तोऽभूत्तथातथा ॥ ३० ॥ तेनैकं वदनं मुक्त्वा तस्या वस्त्रावगुंठितम् ॥ वीक्षिताऽतिस्मरार्तेन यथा कश्चिन्न बुद्ध्यते ॥ ॥ ३१ ॥ न शंभोर्लज्जया वक्त्रं प्रत्यक्षं स व्यलोकयत् ॥ न च सा लज्जयाविष्टा करोति प्रकटं मुखम् ॥ ३२ ॥ ततस्तद्दर्शनार्थाय स उपायं व्यलोकयत् ॥ धूमद्वारेण कामार्तश्चकार च ततः परम् ॥ ३३ ॥ आर्द्रेंधनानि भूरीणि क्षिप्त्वाक्षिप्त्वा विभावसौ ॥ स्वल्पाज्याहुतिविन्यासादार्द्रद्रव्योद्भवस्तथा ॥ ३४ ॥ एतस्मिन्नंतरे धूमः प्रादुर्भूतः समंततः ॥ ताद्दग्येन तमोभूतं वेदिमूलं विनिर्मितम् ॥ ३५ ॥ ततो धूमाकुले नेत्रे भगवांस्त्रिपुरान्तकः ॥ हस्ताभ्यां छादयामास येऽन्ये तत्र व्यवस्थिताः ॥ ३६ ॥ ततो वस्त्रं समुत्क्षिप्य सतीवक्त्रं पितामहः ॥ वीक्षयामास कामार्तः प्रहृष्टेनांतरात्मना ॥ ३७ ॥ तस्य रेतः प्रचस्कन्द ततस्तद्वीक्षणाद्भुतम् ॥ पतितं च धरापृष्ठे तुषारचयसंनिभम् ॥ ३८ ॥ ततश्च सिकतौघेन तत्क्षणात्पद्मसंभवः ॥ छादयामास तद्रेतो यथा कश्चिन्न बुद्ध्यते ॥ ३९ ॥ अथ तद्भगवाञ्छंभुर्ज्ञात्वा दिव्येन चक्षुषा ॥ रेतोऽवस्कन्दनात्तस्य कोपादेतदुवाच ह ॥ ४० ॥ किमेतद्विहितं पाप त्वया कर्म विगर्हितम् ॥ नैवार्हा मम कान्ताया वक्त्रवीक्षाऽनुरागतः ॥ ४१ ॥ त्वं वेत्सि शंकरेणैतत्कर्मजालं न विंदितम् ॥ त्रैलोक्येऽपि मयाऽप्यस्ति गूढं तत्स्यात्कथं विधे ॥ ४२ ॥ यत्किञ्चित्त्रिषु लोकेषु जंगमं स्थावरं

१ वमानैः—इ०पा० । २ शंकितो रुद्रात्—इ० पा० । ३ कथञ्चन—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा ॥ तस्याहं मध्यगो मूढ तैलं यद्वत्तिलांतगम् ॥ ४३ ॥ तस्मात्स्पृश निजं शीर्षं ब्रह्मन्नेतदसंशयम् ॥ यावदेवं गते ब्रह्मा शिरः स्पृशति पाणिना ॥ तावत्तत्र स्थितः साक्षात्तद्रूपो वृषवाहनः ॥ ४४ ॥ ततो लज्जापरीतांगः स्थितश्चाधोमुखो द्विजाः ॥ इन्द्राद्यैरमरैः सर्वैः सहितः सर्वतः स्थितैः ॥ ४५ ॥ अथाऽसौ लज्जयाविष्टः प्रणिपत्य महेश्वरम् ॥ प्रोवाच च स्तुतिं कृत्वा क्षम्यतां क्षम्यतामिति ॥ ४६ ॥ अस्य पापस्य शुद्ध्यर्थं प्रायश्चित्तं वद प्रभो ॥ निग्रहं च यथान्यायं येन पापं प्रयाति मे ॥ ४७ ॥ ॥ श्रीभगवानुवाच ॥ ॥ अनेनैव तु रूपेण मस्तकस्थेन वै ततः ॥ तपः कुरु समाधिस्थो ममाराधनतत्परः ॥ ४८ ॥ ख्यातिं यास्यति सर्वत्र नाम्ना रुद्रशिरः क्षितौ ॥ साधकः सर्वकृत्यानां तेजोभाजां द्विजन्म नाम् ॥ ४९ ॥ मानुषाणामिदं कृत्यं यस्माच्चीर्णं त्वयाऽऽधुना ॥ तस्मात्त्वं मानुषो भूत्वा विचरिष्यसि भूतले ॥ ५० ॥ यस्त्वां चानेन रूपेण दृष्ट्वा पृच्छां करिष्यति ॥ किमेतद्ब्रह्मणो मूर्ध्नि भगवांस्त्रिपुरांतकः ॥ ५१ ॥ ततस्ते चेष्टितं सर्वं कौतुकाच्च शृणोति यः ॥ परदारकृतात्पापात्ततो मुक्तिं प्रयास्यति ॥ ५२ ॥ यथायथा जनस्त्वेतत्कृत्यं ते कीर्तयिष्यति ॥ तथातथा विशुद्धिस्ते पापस्यास्य भविष्यति ॥ ५३ ॥ एतदेव हि ते ब्रह्मन्प्रायश्चित्तं प्रकीर्तितम् ॥ जनहास्यकरं लोके तव गर्हाकरं परम् ॥ ५४ ॥ एतच्च तव वीर्यं तु पतितं वेदिमध्यगम् ॥ कामार्तस्य मया दृष्टं नैतद्व्यर्थं भविष्यति ॥ ५५ ॥ यावन्मात्रैः परिस्पृष्टमेतत्सैकतरेणुभिः ॥ तावन्मात्रा भविष्यंति मुनयः संशितव्रताः ॥ ५६ ॥ वालखिल्या इति ख्याताः सर्वेऽङ्गुष्ठप्रमाणकाः ॥ तपोवीर्यसमोपेताः शापानुग्रहकारकाः ॥ ५७ ॥ एतस्मिन्नंतरे तस्माद्वेदिमध्याच्च तत्क्षणात् ॥ अष्टाशीतिसहस्राणि मुनीनां भावितात्मनाम् ॥ अंगुष्ठकप्रमाणानि निष्क्रान्तानि द्विजोत्तमाः ॥ ५८ ॥ ततस्ते प्रणिपत्योच्चैः प्रोचुर्देवं पितामहम् ॥ स्थानं दर्शय नस्तात तपोऽर्थं कलिवर्जितम् ॥ ५९ ॥ ॥ पितामह उवाच ॥ ॥ अस्मिन्क्षेत्रे मया सार्धं कुरुध्वं पुत्रकास्तपः ॥ गमिष्यथ परां सिद्धिं येन लोके सुदुर्लभाम् ॥ ६० ॥ ते तथेति प्रतिज्ञाय कृत्वा तत्राश्रमं शुभम् ॥ वालखिल्यास्तपश्चक्रुः संसिद्धिं च परां गताः ॥ ६१ ॥ अथ ब्रह्मापि तत्कर्म सर्वं वैवाहिकं क्रमात् ॥ समातिमनयत्प्रोक्तं यच्छ्रुतौ तेन च स्वयम् ॥ ६२ ॥ पतत्सु पुष्पवर्षेषु समन्ताद्गगनांगणात् ॥ वाद्यमानेषु वाद्येषु गीयमानैश्च गीतकैः ॥ ६३ ॥ पठत्सु विप्रमुख्येषु नृत्यमानासु रागतः ॥ रंभादिषु पुरन्ध्रीषु देवानां हङ्मनोहरम् ॥ ६४ ॥ एवं महोत्सवो जज्ञे ततस्तुंबुरुपूर्वकैः ॥ गीयमानेषु गीतेषु यथापूर्वं त्रिविष्टपे ॥ ६५ ॥ अथ कर्मावसाने स भगवांस्त्रिपुरांतकः ॥ प्रोवाच पद्मजं भक्त्या दक्षिणां ते ददामि

१ स्पृश—देहि—इत्यर्थः । तस्माद्रक्ष्यामि ते शीर्षम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



किम् ॥ ६६ ॥ वैवाहिकीं सुरश्रेष्ठ यद्यपि स्यात्सुदुर्लभा ॥ ब्रूहि शीघ्रं महाभाग नादेयं विद्यते मम ॥ ६७ ॥ ॥ पितामह उवाच ॥ ॥ अने
नैव तु रूपेण वेद्यामस्यां सुरेश्वर ॥ त्वया स्थेयं सदैवात्र नृणां पापविशुद्धये ॥ ६८ ॥ येन ते सन्निधौ कृत्वा स्वाश्रमं शशिशेखर ॥
तपः करोमि नाशाय पापस्यास्य महत्तमम् ॥ ६९ ॥ चैत्रशुक्लत्रयोदश्यां नक्षत्रे भगदैवते ॥ सूर्यवारेण यो भक्त्या वीक्षयिष्यति मानवः ॥ तदैव
तस्य पापानि प्रयास्यन्ति च संक्षयम् ॥ ७० ॥ या नारी दुर्भगा वन्ध्या काणा रूपविवर्जिता ॥ साऽपि त्वद्दर्शनादेव भविष्यति सुरूपधृक् ॥
प्रजावती सुभोगाढ्या सुभगा नात्र संशयः ॥ ७१ ॥ ॥ महेश्वर उवाच ॥ ॥ हिताय सर्वलोकानां वेद्यामस्यां व्यवस्थितः ॥ स्थास्यामि
सहितः पत्न्या सत्यात्व द्वचनाद्विधे ॥ ७२ ॥ ॥ सूत उवाच ॥ ॥ एवं स भगवांस्तत्र सभार्यो वृषभध्वजः ॥ विद्यते वेदिमध्यस्थो लोकानां
पापनाशनः ॥ ७३ ॥ एतद्वः सर्वमाख्यातं यथा तस्य पुराऽभवत् ॥ विवाहो वृषनाथस्य मनौ स्वायंभुवे द्विजाः ॥ ७४ ॥ विवाहसमये प्राप्ते
प्रारम्भे वा शृणोति यः ॥ एतदाख्यानमव्यग्रं संपूज्य वृषभध्वजम् ॥ तस्याऽविघ्नं भवेत्सर्वं कर्म वैवाहिकं च यत् ॥ ७५ ॥ कन्या च सुखसौभाग्य
शीलाचारगुणान्विता ॥ तथा स्यात्पुत्रिणी साध्वी पतिव्रतपरायणा ॥ ७६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे
नागरखंडे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये हराश्रयवेदिकामाहात्म्यवर्णनंनाम सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥
ब्रह्मणा कतमे स्थाने तत्र सूत कृतं तपः ॥ वालखिल्यैश्च तैः सर्वैर्मुनिभिः शंसितव्रतैः ॥ १ ॥ ॥ सूत उवाच ॥ ॥ तस्या वायव्यदिग्भागे हर
वेद्या द्विजोत्तमाः ॥ सम्यक्छ्रद्धाप्रयत्नेन ब्रह्मणा विहितं तपः ॥ २ ॥ पश्चिमे वालखिल्यैश्च जपस्नानपरायणैः ॥ तत्राश्चर्यमभूद्यद्वै पूर्वं ब्राह्मण
सत्तमाः ॥ आश्रमे चतुरास्यस्य तद्वो वक्ष्यामि सांप्रतम् ॥ ३ ॥ तत्र दुश्चारिणी काचिद्रात्रौ ब्राह्मणवंशजा ॥ देवदत्तं समासाद्य वल्लभं रमते सदा ॥
॥ ४ ॥ अज्ञाता पतिना मात्रा तथान्यैरपि बांधवैः ॥ कृष्णपक्षं समासाद्य विजने हृष्टमानसा ॥ ५ ॥ कस्यचित्त्वथ कालस्य दृष्टा[1] सा केनचि
द्विजाः ॥ तत्रस्था जारसंयुक्ता स्वभर्तुश्च निवेदिता ॥ ६ ॥ अथासौ कोपसंयुक्तस्तस्या भर्ता सुनिष्ठुरैः ॥ वाक्यैस्तां गर्हयामास प्रहारैश्चाप्य
ताडयत् ॥ ७ ॥ अथ सा धाष्टर्यमासाद्य स्त्रीस्वभावं समाश्रिता ॥ प्रोवाच बाष्पपूर्णाक्षी दीनांजलिपुटा स्थिता ॥ ८ ॥ किं मां दुर्जनवाक्येन
त्वं ताडयसि निष्ठुरैः ॥ प्रहारैर्दोषनिर्मुक्तां त्वत्पादप्रणतां विभो ॥ ९ ॥ अहं त्वां शपथं कृत्वा भक्षयित्वाऽथ वा विषम् ॥ प्रविश्य हव्यवाहं वा

१ दृष्टा–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करिष्ये प्रत्ययान्वितम् ॥ १० ॥ अथ तां ब्राह्मणः प्राह यदि त्वं पापवर्जिता ॥ पुरतो देवविप्राणां कुरु दिव्यग्रहं स्वयम् ॥ ११ ॥ सा तथेति प्रतिज्ञाय साहसेन समन्विता ॥ दिव्यग्रहं ततश्चक्रे यथोक्तविधिना सती ॥ १२ ॥ शुद्धिं च प्राप्ता सर्वेषां बन्धूनां च द्विजन्मनाम् ॥ पुरतश्च गुरूणां च देवानामपि पापकृत् ॥ १३ ॥ एतस्मिन्नन्तरे तस्याः साधुवादो महानभूत् ॥ धिक्छब्दश्च तथा पत्युः सर्वैर्दत्तः सुगर्हितः ॥ १४ ॥ अहो पापसमाचारो दुष्टोऽयं ब्राह्मणाधमः ॥ अपापां धर्मपत्नीं यो मिथ्यादोषेण योजयेत् ॥ १५ ॥ एवं स निन्द्यमानस्तु सर्वलोकैर्द्विजोत्तमाः ॥ कोपं चक्रे ततो वह्निं समुद्दिश्य स दुःखितः ॥ १६ ॥ शापं दातुं मतिं चक्रे ततो वह्नेः सुदुःखितः ॥ अब्रवीत्परुषं वाक्यं निन्दमानः पुनःपुनः ॥ ॥ १७ ॥ मया स्वयं प्रदृष्टेयं जारेण सह संगता ॥ त्वया वह्ने सुपापेयं न कस्माद्भस्मसात्कृता ॥ १८ ॥ तस्मात्त्वां पापकर्माण मसत्यपक्षपातिनम् ॥ असंदिग्धं शपिष्यामि रौद्रशापेन सांप्रतम् ॥ १९ ॥ ॥ सूत उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा संक्रुद्धस्य द्विजन्मनः ॥ सप्तार्चिर्भयसंत्रस्तः कृतांजलिरुवाच तम् ॥ २० ॥ ॥ अग्निरुवाच ॥ ॥ नैष दोषो मम ब्रह्मन्यन्न दग्धा तव प्रिया ॥ कृतागसाऽपि मे वाक्यं शृणुष्वात्र स्फुटेरितम् ॥ २१ ॥ अनया परकांतेन कृतः सह समागमः ॥ चिरं कालं द्विज श्रेष्ठ त्वया ज्ञाताद्य वासरे ॥ २२ ॥ परं यस्माद्विशुद्धैषा मया दग्धा न सा द्विज ॥ कारणं तच्च ते वच्मि शृणुष्वैकमनाः स्थितः ॥ २३ ॥ यत्रानया कृतः संगः परकांतेन वै द्विज ॥ तस्मिन्नायतने ब्रह्मा रुद्रशीर्षो व्यवस्थितः ॥ २४ ॥ तत्र कृत्वा रतं चित्रं परकांतसमं तदा ॥ पश्यति स्म ततो रुद्रं ब्रह्ममस्तकसंस्थितम् ॥ २५ ॥ ततः प्रक्षालयत्यंगं कुण्डे तत्राग्रतः स्थिते ॥ कृतपापापि तेनैषा शुद्धिं याति शुचिस्मिता ॥ ॥ २६ ॥ अत्र पूर्वं विपाप्माऽभूद्ब्रह्मा लोकपितामहः ॥ सतीवक्त्रं समालोक्य कामार्तोऽपि स पापकृत्[1] ॥ २७ ॥ तस्मान्नास्त्यत्र मे दोषः स्वल्पोऽपि द्विजसत्तम ॥ रुद्रशीर्षप्रभावोऽयं तस्य कुण्डोदकस्य च ॥ २८ ॥ तस्मादेनां समादाय संशुद्धां[2] पापवर्जिताम् ॥ गृहं गच्छ द्विजश्रेष्ठ सत्यमेतन्मयोदितम् ॥ २९ ॥ ॥ ब्राह्मण उवाच ॥ ॥ या मया सहसा दृष्टा स्वयमेव हुताशन ॥ परकांतेन तां नाद्य शुद्धामपि गृहं नये ॥ ३० ॥ इत्युक्त्वा च द्विजश्रेष्ठस्तां त्यक्त्वापि शुचिव्रतः[3] ॥ जगाम स्वगृहं पश्चात्तथा जग्मुर्जना गृहान् ॥ ३१ ॥ सापि तेन परित्यक्ता पतिना हृष्टमानसा ॥ ज्ञात्वा तत्तीर्थमाहात्म्यं वैश्वानरमुखेरितम् ॥ ३२ ॥ तेनैव परकांतेन विशेषेण रतिक्रियाम् ॥ तस्मिन्नायतने चक्रे कुण्डे तोयावगाहनम् ॥ ३३ ॥ अथान्ये

१ पापभृक्–इ० पा० । २ शुद्धां पापविवर्जिताम्–इ० पा० । ३ शुभव्रतः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



परलोकस्य भीत्याऽतीव व्यवस्थिताः ॥ विमुखाः परदारेषु नार्यश्चापि पतिव्रताः ॥ ३४ ॥ दूरतोऽपि समभ्येत्य ते सर्वे तत्र मंदिरे ॥ रुद्रशीर्षाभि
धाने च प्रचक्रुः सुरतोत्सवम् ॥ ३५ ॥ निमज्जंति ततः कुण्डे तस्मिन्पातकनाशने ॥ भवंति पापनिर्मुक्ता रुद्रशीर्षावलोकनात् ॥ ३६ ॥ एतस्मि
न्नंतरे नष्टो धर्मः पत्नीसमुद्भवः ॥ पुरुषाणां ततः स्त्रीणां निजकांतासमुद्भवः ॥ ३७ ॥ यो यां पश्यति रूपाढ्यां नारीमपि कुलोद्भवाम् ॥ स तत्रा
नीय संहृष्टो भजते द्विजसत्तमाः ॥ ३८ ॥ तथा नारी सुरूपाढ्यं यं पश्यति नरं क्वचित् ॥ सापि तत्र समानीय कुरुते सुरतोत्सवम् ॥ ३९ ॥
लिप्यते न च पापेन कथंचित्तत्कृतेन च ॥ नरो वा यदि वा नारी तत्तीर्थस्य प्रभावतः ॥ ४० ॥ कस्यचित्त्वथ कालस्य तत्र राजा विदूरथः ॥
आनर्त्तविषये जज्ञे वार्धक्यं च क्रमाद्ययौ ॥ ४१ ॥ तस्य भार्याऽभवत्तन्वी तरुणी वररूपधृक् ॥ पश्चिमे वयसि प्राप्ते प्राणेभ्योऽपि गरीयसी ॥
॥ ४२ ॥ न तस्याः स जराग्रस्तश्चित्ते वसति पार्थिवः ॥ तस्मिंस्तीर्थे समागत्य वांछितं रमते नरम् ॥ ४३ ॥ पार्थिवोऽपि परिज्ञाय तस्यास्तच्च
विचेष्टितम् ॥ कोपाविष्टस्ततो गत्वा तस्मिन्क्षेत्रे सुशोभने ॥ ४४ ॥ तत्कुण्डं पूरयामास ततः पांशूत्करैर्द्रुतम् ॥ बभंज तं च प्रासादं ततः प्रोवाच
दारुणम् ॥ ४५ ॥ यश्चैतत्पूरितं कुण्डं पांशुना निखनिष्यति ॥ प्रासादं च पुनश्चैनं करिष्यति पुनर्नवम् ॥ ४६ ॥ परदारकृतं पापं तस्य संपत्स्य
तेऽखिलम् ॥ यदत्र प्रकरिष्यंति मानवाः काममोहिताः ॥४७॥ ॥ सूत उवाच ॥ ॥ एवं स पार्थिवः प्रोच्य तामादाय ततः प्रियाम् ॥ जगाम स्वगृहं
पश्चात्प्रहृष्टेनांतरात्मना ॥४८॥ अथ तां विरतां ज्ञात्वा सोऽन्यचित्तां प्रियां नृपः ॥ यत्नेन रक्षयामास विश्वासं नैव गच्छति ॥ ४९ ॥ अन्यस्मिन्दि
वसे शस्त्रं सूक्ष्मं वेण्यां निधाय सा॥ जगाम शयनं तस्य वधार्थं वरवर्णिनी॥५०॥ ततस्तेन समं हास्यं कृत्वा क्षत्रियभावजम्॥ सुरतं रुचिरैर्भावैर्हावै
र्भूरिभिरेव च ॥५१॥ ततो निद्रावशं प्राप्तं तं नृपं सा नृपप्रिया ॥ स्ववेण्याः शस्त्रमादाय निजघान सुनिर्दया॥५२॥एवं तस्य फलं जातं सद्यस्तीर्थस्य
भंगजम् ॥ आनर्ताधिपते रौद्रं सर्वलोकविगर्हितम् ॥ ५३ ॥ अद्यापि तत्र देवेशो रुद्रशीर्षः स तिष्ठति ॥ लिंगभेदभयात्तेन न स भग्नो द्विजोत्तमाः
॥५४॥ यस्तस्य पुरतः स्थित्वा जपेद्रुद्रशिरः[1] शुचिः ॥ माघशुक्लचतुर्दश्यां पूजयित्वा स्रगादिभिः ॥५५॥ वांछितं लभते चाशु तस्येशस्य प्रभावतः॥
अष्टोत्तरशतं यावद्यो जपेत्पुरतः स्थितः ॥ ५६ ॥ रुद्रशीर्षं न संदेहः स याति परमां गतिम् ॥ एकवारं नरो यो वा तत्पुरः पठति द्विजः ॥ ५७ ॥
नित्यं दिनकृतात्पापान्मुच्यते द्विजसत्तमाः ॥ एतद्वः सर्वमाख्यातं रुद्रशीर्षसमुद्भवम् ॥ ५८ ॥ माहात्म्यं सर्वपापानां सद्यो नाशनकारकम् ॥ मंगलं

१ रुद्रशिरः—रुद्राथर्वशीर्षम्—इत्यर्थः।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परमं ह्येतदायुष्यं कीर्तिवर्धनम् ॥ रुद्रशीर्षस्य माहात्म्यं तस्माच्छ्रोतव्यमादरात् ॥ ६९ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये रुद्रशीर्ष ( जागेश्वर ) माहात्म्यवर्णनंनामाष्टसप्ततितमोऽध्यायः ॥ ७८ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तस्यैव दक्षिणे भागे वालखिल्यैः प्रतिष्ठितम् ॥ लिंगमस्ति सुविख्यातं सर्वपातकनाशनम् ॥ १ ॥ यमाराध्य च तैः पूर्वं शक्रामर्षसमन्वितैः ॥ गरुडो जनितः पक्षी ख्यातो विष्णुरथोऽत्र यः ॥ २ ॥ ॥ ऋषय ऊचुः ॥ ॥ कथं तेषां समुत्पन्नः शक्रस्योपरि सूतज ॥ प्रकोपो वालखिल्यानां संजज्ञे गरुडः कथम् ॥ ३ ॥ ॥ सूत उवाच ॥ ॥ पुरा प्रजापतिर्दक्षस्तस्मिन्क्षेत्रे सुशोभने ॥ चकार विधिवद्यज्ञं संपूर्णवरदक्षिणम् ॥ ४ ॥ ततः शक्रादयो देवाः सहायार्थं निमंत्रिताः ॥ दक्षेण मुनयश्चैव तथा राजर्षयोऽमलाः ॥ ५ ॥ तथा वेदविदो विप्रा यज्ञकर्मविचक्षणाः ॥ गृहस्थाश्रमिणो ये च ये चारण्यनिवासिनः ॥ ६ ॥ अथ ते वालखिल्याख्या मुनयः संशितव्रताः॥ एकां समिधमादाय साहाय्यार्थं प्रजापतेः ॥ प्रस्थिता यज्ञवाटं तं भारार्ताः क्लेशसंयुताः ॥ ७ ॥ अथ तेषां समस्तानां मार्गे गोष्पदमागतम् ॥ जलपूर्णं समायातमकालजलदागमे ॥ ८ ॥ ततस्तरीतुकामास्ते क्लिश्यमाना इतस्ततः ॥ समिद्भारश्रमोपेता देवराजेन वीक्षिताः ॥ ९ ॥ गच्छता तेन मार्गेण मखे दक्षप्रजापतेः ॥ ततश्चिरं समालोक्य स्मितं कृत्वा स कौतुकात् ॥ जगामाथ समुल्लंघ्य ऐश्वर्यमदगर्वितः॥ १० ॥ततस्ते कोपसंयुक्ताः शक्राद्दृष्ट्वा पराभवम् ॥ निवृत्य स्वाश्रमं गत्वा च क्रुर्मंत्रं सनिश्चयम् ॥ ११ ॥ शाक्रं पदं समासाद्य यस्मादेतेन पाप्मना ॥ अतिक्रांता वयं सर्वे तस्मात्पात्यः स सत्पदात् ॥ १२ ॥ अन्यः शक्रः प्रकर्तव्यो मंत्रवीर्यसमुद्भवः ॥ आथर्वणैर्महासूक्तैराभिचारिकसंभवैः ॥ १३ ॥ येन व्यापाद्यते तेन शक्रोऽयं मदगर्वितः ॥ मखमाहात्म्यसंपन्नः स्वल्पबुद्धिपराक्रमः ॥ १४ ॥ ततस्ते शुचयो भूत्वा स्कंदसूक्तेन पावकम् ॥ जुहुवुश्च दिवारात्रौ क्षुरिकोक्तेन सोद्यमाः ॥ १५ ॥ गर्भोपनिषदेनैव नीलरुद्रैर्द्विजोत्तमाः ॥ रुद्रशीर्षेण काम्येन विष्णुसूक्तयुतेन च ॥ १६ ॥ निधाय कलशं मध्ये मंडलस्योदकावृतम् ॥ होमांते तत्र संस्पर्शं चक्रुस्तस्य जलैः शुभैः ॥ १७ ॥ एतस्मिन्नंतरे शक्रः प्रपश्यति सुदारुणान् ॥ उत्पातानात्मनाशाय जायमानान्समंततः ॥ १८ ॥ वामो बाहुश्च नेत्रं च मुहुः स्फुरति चास्य वै ॥ न च पश्यति नासाग्रं जिह्वाग्रं च तथा हनुम् ॥ १९ ॥ शिरोहीनां तथा छायां गगने भास्करद्वयम् ॥ अरुंधतीं ध्रुवं चैव न च विष्णुपदानि सः ॥ २० ॥ न च मंदं[1] न चाकाशे संस्थितां स्वर्धुनीं हरिः[2] ॥ स्वपन्पश्यति कृष्णांगीं नित्यं नारीं

---

१ मंदम्—शनिम् । २ हरिः—इंद्रः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



धृतायुधाम् ॥ २१ ॥ मुक्तकेशीं विवस्त्रां च कृष्णदंतां भयानकाम् ॥ तान्दृष्ट्वा स महोत्पातान्देवराजो बृहस्पतिम् ॥ २२ ॥ पप्रच्छ भयसंत्रस्तः
किमेतदिति मे गुरो ॥ जायंते सुमहोत्पाता दुर्निमित्तानि वै पृथक् ॥ २३ ॥ किं मे भविष्यति प्राज्ञ विनाशः सांप्रतं वद ॥ किं वा त्रैलोक्य
राज्यस्य किं वा वित्तादिकस्य च ॥ २४ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ ये त्वया मदमत्तेन वालखिल्या महर्षयः ॥ उल्लंघिताः स्थिता मार्गे
गोष्पदं तर्त्तुमिच्छवः ॥ २५ ॥ तैरेवाथर्वणैर्मंत्रैस्त्वत्कृतेऽस्ति शचीपते ॥ कृतो होमः सुसंपूर्णः कलशश्चाभिमंत्रितः ॥ २६ ॥ युष्माकं सुविना
शाय सर्वदेवाधिनायकः ॥ भविष्यति न संदेहो मंत्रैराथर्वणैर्हरिः ॥ २७ ॥ तस्य तद्वचनं श्रुत्वा सहस्राक्षो भयान्वितः ॥ दक्षं गत्वा च दी
नास्यः प्रोवाच तदनंतरम् ॥ २८ ॥ अस्मन्नाशाय मुनिभिर्वालखिल्यैः प्रजापते ॥ प्रोद्यमो विहितः सम्यक्छक्रस्यान्यस्य वै कृते ॥ २९ ॥
तान्वारय स्वयं गत्वा यावन्नो जायते परः ॥ शक्रोऽस्मद्ध्वंसनार्थाय नास्ति तेषामसाध्यता ॥ ३० ॥ अथ दक्षो द्रुतं गत्वा शक्राद्यैरमरैर्वृतः ॥
प्रहसंस्तानुवाचेदं विनयेन समन्वितः ॥ ३१ ॥ किमेतत्क्रियते विप्राः कर्म रौद्रतमं महत् ॥ त्रैलोक्यं व्याकुलं येन सर्वमेतद्व्यवस्थितम् ॥ ३२ ॥
अथ ते दक्षमालोक्य समायांतं स्वमाश्रयम् ॥ संमुखाश्चाभ्ययुस्तूर्णं प्रगृहीतार्घ्यपाणयः ॥ ३३ ॥ अर्घ्यं दत्त्वा यथान्यायं पूजां कृत्वाथ भक्तितः ॥
प्रोचुश्च प्रणता भूत्वा स्वागतं ते प्रजापते ॥ ३४ ॥ आदेशो दीयतां शीघ्रं यदर्थमिह चागतः ॥ अपि प्राणप्रदानेन करिष्यामः प्रियं तव ॥ ३५ ॥
॥ ॥ दक्ष उवाच ॥ ॥ एतद्रौद्रतमं कर्म सर्वदेवभयावहम् ॥ त्याज्यं युष्माभिरव्यग्रैरेतदर्थमिहागतः ॥ ३६ ॥ ॥ मुनय ऊचुः ॥ ॥ वयं
शक्रेण ते यज्ञे समायाताः सुभक्तितः ॥ उल्लंघिता मदोद्रेकात्कृत्वा हास्यं मुहुर्मुहुः ॥ ३७ ॥ शक्रोच्छेदाय चास्माभिः शक्रोऽन्यो वीर्यमंत्रतः ॥
प्रारब्धः कर्तुमत्युग्रैर्होमांतश्च व्यवस्थितः ॥ ३८ ॥ तत्कथं मंत्रवीर्यं तत्क्रियते मोघमित्यहो ॥ वेदोक्तं च विशेषेण तस्मादत्र वद प्रभो ॥ ३९ ॥
त्वमेव यदि शक्तः स्यादन्यथा कर्तुमेव हि ॥ कुरुष्व वा स्वयं नाथ नास्माकं शक्तिरीदृशी ॥ ४० ॥ ॥ दक्ष उवाच ॥ ॥ सत्यमेतन्महा
भागा यद्युष्माभिः प्रकीर्तितम् ॥ नान्यथा शक्यते कर्तुं वेदमन्त्रोद्भवं बलम् ॥ ४१ ॥ तद्य एष कृतो होमो युष्माभिर्वेदमंत्रतः ॥ देवराजार्थम
व्यग्रैः कलशश्चाभिमंत्रितः ॥ ४२ ॥ सोऽयं मद्वचनाद्राजा भविष्यति पतत्रिणाम् ॥ तेजोवीर्यसमोपेतः शक्रादपि सुवीर्यवान् ॥ ४३ ॥ एतस्य ॥ ८८ ॥
देवराजस्य क्षंतव्यं मम वाक्यतः ॥ तत्कृतं मूढभावेन यदनेन विचेष्टितम् ॥ ४४ ॥ एवमुक्त्वाथ तेषां तं सहस्राक्षं भयातुरम् ॥ दर्शयामास दक्षस्तु
विनयावनतं स्थितम् ॥ ४५ ॥ तेऽपि दृष्ट्वा सहस्राक्षं वेपमानं कृतांजलिम् ॥ प्रोचुर्माऽतिक्रमं शक्र ब्राह्मणानां करिष्यसि ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूयो यदि दिवेशानामाधिपत्यं प्रवांछसि ॥ अपि मन्दोऽपि मूर्खोऽपि क्रियाहीनोऽपि वा द्विजः ॥ नावज्ञेयो बुधैः क्वापि लोकद्वय
मभीप्सुभिः ॥ ४७ ॥ ॥ इन्द्र उवाच ॥ ॥ अज्ञानाद्यदि वा ज्ञानाद्यन्मया कुकृतं कृतम् ॥ तत्क्षंतव्यं द्विजैः सर्वैर्विशेषाद्दक्ष
वाक्यतः ॥ ४८ ॥ प्रगृह्यतां वरोऽस्माकं यः सदा वर्तते हृदि ॥ प्रदास्यामि न संदेहो नादेयं विद्यते मम ॥ ४९ ॥ ॥ मुनय
ऊचुः ॥ ॥ अस्मिन्कुण्डे नरो होमं यः कुर्याच्छ्रद्धयाऽन्वितः ॥ एतल्लिंगं समभ्यर्च्य तस्याऽस्तु हृदि वांछितम् ॥ ५० ॥ ॥ इन्द्र
उवाच ॥ ॥ एतल्लिंगं समभ्यर्च्य योऽत्र होमं करिष्यति ॥ कुंडेऽत्र वांछितं सद्यः सफलं स हि लप्स्यते ॥ ५१ ॥ निष्कामो
वाऽथ संपूज्य लिंगमेतच्छुभावहम् ॥ प्रयास्यति परां सिद्धिं त्रिदशैरपि दुर्लभाम् ॥ ५२ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वा सहस्राक्षो
वालखिल्यान्मुनीश्वरान् ॥ ऐरावतं समारुह्य दक्षयज्ञे ततो गतः ॥ ५३ ॥ दक्षोऽपि विधिवद्यज्ञं चकार द्विजसत्तमाः ॥ संहृष्टैर्वाल
खिल्यैस्तैरुपविष्टैः समीपतः ॥ ५४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये
वालखिल्याश्रममाहात्म्यकथनंनामैकोनाशीतितमोऽध्यायः ॥ ७९ ॥ ॥ छ ॥ ॥ अथ सुपर्णाख्यमाहात्म्यं भविष्यति ॥ ॥ ऋषय
ऊचुः ॥ ॥ यदेतद्भवता प्रोक्तं तेजोवीर्यसमन्वितः ॥ गरुडस्तेन संजज्ञे मुनीनां होमकर्मणा ॥ १ ॥ स कथं तत्र संभूत एतन्नो विस्तराद्वद ॥
विनतायाः समुद्भूत इत्येषा श्रूयते श्रुतिः ॥ २ ॥ ॥ सूत उवाच ॥ ॥ योऽसावाथर्वणैर्मंत्रैः कलशश्चाभिमन्त्रितः ॥ तैर्मंत्रैर्वालखिल्यैश्च महा
ऽमर्षसमन्वितैः ॥ ३ ॥ निवारितैश्च दक्षेण सूचिते विहगाधिपे ॥ कश्यपस्तं समादाय कलशं प्रययौ गृहम् ॥ ४ ॥ ततः प्रोवाच संहृष्टो विनतां
दयितां निजाम् ॥ एतत्पिब जलं भद्रे मन्त्रपूतं महत्तरम् ॥ ५ ॥ येन ते जायते पुत्रः सहस्राक्षाधिको बली ॥ तेजस्वी च यशस्वी च अजेयः सर्व
दानवैः ॥ ६ ॥ तस्य तद्वचनं श्रुत्वा तत्क्षणादेव संपपौ ॥ तत्तोयं सा वरारोहा सद्यो गर्भं ततो दधे ॥ ७ ॥ एवं तज्जलपानेन तेजोवीर्यसम
न्वितः ॥ कश्यपाद्गरुडो जज्ञे सर्वसर्पभयावहः ॥ ८ ॥ येनामृतं हृतं वीर्यात्परिभूय पुरंदरम् ॥ मातृभक्तिपरीतेन सर्पाणां संनिवेदितम् ॥ ९ ॥
यो जज्ञे दयितो विष्णोर्वाहनत्वमुपागतः ॥ ध्वजाग्रे तु रथस्यापि यः सदैव व्यवस्थितः ॥ १० ॥ येन पूर्वं तपस्तप्त्वा क्षेत्रेऽत्रैव महात्मना ॥
त्रिनेत्रस्तुष्टिमानीतो गतपक्षेण धीमता ॥ ११ ॥ पक्षतिर्येन संजाता यस्य भूयोऽपि तादृशी ॥ देवदेवप्रसादेन विशिष्टा चाऽथ निर्मिता ॥ १२ ॥
॥ ॥ मुनय ऊचुः ॥ ॥ कथं तस्य गतौ पक्षौ गरुडस्य महात्मनः ॥ पुनर्लब्धौ कथं तेन कथं तुष्टो महेश्वरः ॥ एतन्नो विस्तराद्ब्रूहि सूत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





पुत्र यथातथम् ॥ १३ ॥ ॥ सूत उवाच ॥ ॥ पुरासीद्ब्राह्मणो मित्रं भृगुवंशकुलोद्वहः ॥ गरुडस्य द्विजश्रेष्ठा बालभावादपि प्रभो ॥ १४ ॥
तस्य कन्या पुरा जाता माधवीनाम संमता ॥ रूपौदार्यसमोपेता सर्वलक्षणलक्षिता ॥ १५ ॥ न देवी न च गन्धर्वी नासुरी न च पन्नगी ॥
तादृग्रूपा महाभागा यादृशी सा सुमध्यमा ॥ १६ ॥ अथ तस्या वरार्थाय गरुडं विहगाधिपम् ॥ स प्रोवाच परं मित्रं विनयावनतः स्थितः ॥
॥ १७ ॥ एतस्या मम कन्याया वरं त्वं विहगाधिप ॥ सदृशं वीक्षयस्वाद्य येन तस्मै ददाम्यहम् ॥ १८ ॥ ॥ गरुड उवाच ॥ ॥ मम पृष्ठं
समारुह्य समस्तं क्षितिमंडलम् ॥ त्वं भ्रमस्व द्विजश्रेष्ठ गृहीत्वेमां च कन्यकाम् ॥ १९ ॥ ततस्तस्याः कुमार्या वै अनुरूपं गुणान्वितम् ॥ स्वयं
चाहर भर्तारमेषा मैत्री समोद्भवा ॥ २० ॥ ॥ सूत उवाच ॥ एवमुक्तोऽथ विप्रः स तत्क्षणात्कन्यया सह ॥ आरूढो गारुडं पृष्ठं वरार्थाय
द्विजोत्तमाः ॥ २१ ॥ यंयं पश्यति विप्रः स कुमारं तरुणाकृतिम् ॥ स स नो तस्य चित्तांते वर्ततेस्म कथंचन ॥ २२ ॥ कस्यचिद्रूपमत्युग्रं
न कुलं च सुनिर्मलम् ॥ कुलं रूपं च यस्य स्यात्तस्य नो गुणसंचयः ॥ २३ ॥ यस्य वा गुणसन्दोहस्तस्य नो रूपमुत्तमम् ॥ पक्षपातं च वित्तं
च तथान्यद्वरलक्षणम् ॥ २४ ॥ एवं वर्षसहस्रांते भ्रमतस्तस्य भूतलम् ॥ विप्रस्य पक्षिनाथस्य वरार्थाय द्विजोत्तमाः ॥ २५ ॥ कदाचिदथ तौ
श्रान्तौ भ्रममाणावितस्ततः ॥ क्षेत्रेऽत्रैव समायातौ वासुदेवदिदृक्षया ॥ २६ ॥ श्वेतद्वीपं समालोक्य तथान्यां बदरीं शुभाम् ॥ क्षीरोदं च
सवैकुण्ठं तथान्यं तस्य संश्रयम् ॥ २७ ॥ अथ ताभ्यां मुनिर्दृष्टो नारदो ब्रह्मसंभवः ॥ सांत्वपूर्वं तदा पृष्टो विष्णुं ब्रह्म सनातनम् ॥
॥ २८ ॥ क्व देवः पुंडरीकाक्षः सांप्रतं वर्तते मुने ॥ विष्णुस्थानानि सर्वाणि वीक्षितानि समंततः ॥ आवाभ्यां संप्रहृष्टाभ्यां न संदृष्टः स
केशवः ॥ २९ ॥ ॥ नारद उवाच ॥ ॥ जलशायिस्वरूपेण यावन्मासचतुष्टयम् ॥ हाटकेश्वरजे क्षेत्रे स संतिष्ठति सर्वदा ॥ ३० ॥
तस्मात्तद्दर्शनार्थाय गम्यतां तत्र मा चिरम् ॥ येन सन्दर्शनं याति द्वाभ्यामपि स चक्रधृक् ॥ ३१ ॥ अहमप्येव तत्रैव प्रस्थितस्तस्य
दर्शनात् ॥ प्रस्थितश्च त्वया युक्तो देवकार्येण केनचित् ॥ ३२ ॥ अथ तौ पक्षिविप्रेन्द्रौ स च ब्रह्मसुतो मुनिः ॥ प्राप्ताः सर्वे स्थितो यत्र जलशायी
जनार्दनः ॥ ३३ ॥ अथ दृष्ट्वा महत्तेजो वैष्णवं दूरतोऽपि तम् ॥ ब्राह्मणं गरुडः प्राह नारदश्च मुनीश्वरः ॥ ३४ ॥ अत्रैव त्वं द्विजश्रेष्ठ तिष्ठ
दूरेऽपि तेजसः ॥ वैष्णवस्य सुतायुक्तः कल्पांताग्निसमस्य च ॥ ३५ ॥ नो चेत्संपत्स्यसे भस्म पतंग इव पावकम् ॥ [1]समासाद्य निशायोगे मूढं



१ रूढम्–इ, गूढम्–इ० च पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावं समाश्रितः ॥ ३६ ॥ आवाभ्यां तत्प्रसादेन सोढमेतत्सुदुःसहम् ॥ न करोति शरीरार्तिं तथान्यदपि कुत्सितम् ॥ ३७ ॥ एवं तं ब्राह्मणं तत्र मुक्त्वा दूरे सुतान्वितम् ॥ गतौ तौ तत्र संस्तुतस्तोये यत्र जनार्दनः ॥ ३८ ॥ दिव्यस्तुतिपरौ मूर्ध्नि धृतहस्तांजलीपुटौ ॥ पुलकांकितसर्वांगावानन्दाश्रुप्लुताननौ ॥ ३९ ॥ त्रिःपरिक्रम्य तं देवमष्टांगं प्रणतौ हरिम् ॥ दृष्टवन्तौ च पादांते संनिविष्टां समुद्रजाम् ॥ ४० ॥ पादसंवाहनासक्तां विष्णुवक्राहितेक्षणाम् ॥ अथापरां वयोवृद्धां श्वेतवस्त्रावगुंठिताम् ॥ ४१ ॥ सन्निविष्टां तदभ्याशे सम्यग्ध्यानपरायणाम् ॥ द्वादशार्कप्रभायुक्तां कृशांगीं पुलकान्विताम् ॥ ४२ ॥ अथ तौ विष्णुना हर्षादुभावपि प्रहर्षितौ ॥ संभाषितौ च संपृष्टौ यदर्थं च समागतौ ॥ ४३ ॥ ॥ श्रीनारद उवाच ॥ ॥ अहं हि सुरकार्येण संप्राप्तोऽत्र तवांतिकम् ॥ गरुडो वै ब्राह्मणाय यन्मां पृच्छसि केशव ॥ ४४ ॥ ॥ श्रीभगवानुवाच ॥ ॥ कच्चित्क्षेमं मुनिश्रेष्ठ सर्वेषां त्रिदिवौकसाम् ॥ कच्चिन्नेंद्रस्य संजातं भयं दानवसंभवम् ॥ ४५ ॥ यज्ञभागं लभंतेस्म कच्चिद्देवाः सवासवाः ॥ कच्चिन्न दानवः कश्चिदुत्कटोऽभूद्धरातले ॥ ४६ ॥ ॥ श्रीनारद उवाच ॥ ॥ सांप्रतं धरणी प्राप्ता चतुर्वक्त्रस्य संनिधौ ॥ रोरूयमाणा भारार्ता दानवैः पीडिता भृशम् ॥ प्रोवाच पद्मजं तत्र दुःखेन महताऽन्विता ॥ ४७ ॥ ॥ धरण्युवाच ॥ ॥ कालनेमिर्हतो योऽसौ विष्णुना प्रभविष्णुना ॥ उग्रसेनसुतः कंसः संभूतः स महासुरः ॥ ४८ ॥ अरिष्टो धेनुकः केशी प्रलम्बोनाम चापरः ॥ तथान्या तु महारौद्रा पूतनानाम राक्षसी ॥ ४९ ॥ इतश्चेतश्च धावद्भिर्दानवैरेभिरेव च ॥ वृथा मे जायते पीडा तथान्यैरपि दारुणैः ॥ ५० ॥ ऊर्ध्वबाहुस्तथा जातो मर्त्यलोके जनोऽधुना ॥ बहुत्वान्न प्रमातिस्म कथंचिद्धि ममोपरि ॥ ५१ ॥ भारावतरणं देव न करिष्यसि चाशु चेत् ॥ रसातलं प्रयास्यामि तदाऽहं नात्र संशयः ॥ ५२ ॥ तस्यास्तद्वचनं श्रुत्वा ब्रह्मणा लोककर्तृणा ॥ संमंत्र्य विबुधैः सार्धं प्रेषितोऽहं तवांतिकम् ॥ ५३ ॥ प्रोक्तव्यो भगवान्वाक्यं त्वया देवो जनार्दनः ॥ यथाऽवतीर्य भूपृष्ठे भारमस्याः प्रणाशयेत् ॥ ५४ ॥ तस्माद्भूमितले देव कृत्वा जन्म स्वयं विभो ॥ भारं नाशय मेदिन्या एतदर्थमिहागतः ॥ ५५ ॥ ॥ श्रीभगवानुवाच ॥ ॥ एवं मुने करिष्यामि संमंत्र्य ब्रह्मणा सह ॥ भारावतरणं भूमेः साकं देवैः सवासवैः ॥ ५६ ॥ एवमुक्त्वाऽथ तं विष्णुर्नारदं मुनिपुंगवम् ॥ ततश्च गरुडं प्राह त्वं किमर्थमिहागतः ॥ ५७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये सुपर्णाख्यमाहात्म्ये विष्णुदर्शनमाहात्म्यवर्णनंनामाशीतितमोऽध्यायः ॥ ८० ॥ ॥ छ ॥

१ उत्कण्ठः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





॥ ॥ श्रीगरुड उवाच ॥ ॥ ममास्ति दयितं मित्रं ब्राह्मणो भृगुवंशजः ॥ तस्यास्ति माधवीनाम कन्या कमललोचना ॥ १ ॥
न तस्याः सदृशः कांतः प्राप्तस्तेन महात्मना ॥ यतस्ततोऽहमादिष्टः कांतमस्यास्त्वमानय ॥ अनुरूपं द्विजश्रेष्ठ यद्यहं संमतस्तव ॥ २ ॥ ततो
मयाऽखिला भूमिस्तद्वरार्थं विलोकिता ॥ न तदर्थं वरो लब्धः सर्वैः समुचितो गुणैः ॥ ३ ॥ ततस्त्वं पुण्डरीकाक्ष मम चित्ते व्यवस्थितः ॥ अनु
रूपः पतिस्तस्याः सर्वैरेव गुणैर्युतः ॥ ४ ॥ तस्मात्पाणिग्रहं तस्याः स्वीकुरुष्व सुरेश्वर ॥ अत्यन्तरूपयुक्ताया मम वाक्यप्रणोदितः ॥ ५ ॥ ॥ भग
वानुवाच ॥ ॥ अत्रानय द्विजश्रेष्ठ तां कन्यां कमलेक्षणाम् ॥ येन दृष्ट्वा स्वयं पश्चात्प्रकरोमि यथोदितम् ॥ ६ ॥ ॥ गरुड उवाच ॥ ॥ तव
तेजोभयादेव सा कन्या जनकान्विता ॥ मया दूरे विनिर्मुक्ता तत्कथं तामिहानये ॥ ७ ॥ ॥ श्रीभगवानुवाच ॥ ॥ अत्र तां
मम तत्तेजो जनकेन समन्विताम् ॥ न हि धक्ष्यति तस्मात्त्वं शीघ्रं द्विजवराऽऽनय ॥ ८ ॥ एवमुक्तस्ततस्तेन विष्णुना प्रभविष्णुना ॥ तां कन्या
मानयामास तं च विप्रं भृगूद्वहम् ॥ ९ ॥ अथासौ प्रणिपत्योच्चैर्ब्राह्मणो मधुसूदनम् ॥ लक्ष्मीवन्न्यविशत्पार्श्वे गरुडस्य समीपतः ॥ १० ॥ सापि
कन्या वरारोहा बाल्यभवादनिन्दिता ॥ शय्यैकांते समाविष्टा दक्षिणे सुरविद्विषः ॥ ११ ॥ अथ कोपपरीतांगी महिष्याधर्ममाश्रिता ॥ लक्ष्मीः
शशाप तां कन्यां सपत्नीति विचिन्त्य च ॥ १२ ॥ यस्मान्मे पुरतः पापे कांतस्य मम हर्षिता ॥ शय्यायां त्वं समाविष्टा लज्जां त्यक्त्वा सुदूरतः ॥
तस्मादश्वमुखी नूनं विकृता त्वं भविष्यसि ॥ १३ ॥ एवं शापे श्रिया दत्ते हाहाकारो महानभूत् ॥ सर्वेषां तत्र संस्थानां कोपश्चापि द्विजन्मनः ॥
॥ १४ ॥ ॥ ब्राह्मण उवाच ॥ ॥ सहस्रं याच्यते कन्या करोत्येकः करग्रहम् ॥ वाङ्मात्रेण न तस्याः स्यात्पत्नीभावः कथंचन ॥ १५ ॥
यावन्नाग्निद्विजातीनां प्रत्यक्षं गुरुसंनिधौ ॥ ससंकल्पं स्वयं दत्ता गृह्योक्तविधिना जनैः ॥ १६ ॥ तस्मात्तद्दोषनिर्मुक्ता सपत्न्येषा समा त्वया ॥
कृता वाजिमुखी पापे त्वं गजास्या भविष्यसि ॥१७॥ एवमुक्त्वा स विप्रेंद्रस्ततः प्रोवाच केशवम् ॥ आतिथ्यं विहितं ह्येतत्तव पत्न्या यथोचितम् ॥
तस्मात्तत्र प्रयास्यामि यत्र स्यात्तादृशी सुता ॥ १८ ॥ ॥ श्रीभगवानुवाच ॥ ॥ न सन्तापस्त्वया कार्यः कृत्येस्मिन्द्विजसत्तम ॥ ममांतिके
प्रयातानां नाशुभं जायते क्वचित् ॥ १९ ॥ तस्मान्नाश्वमुखी ह्येषा जन्मन्यस्मिन्भविष्यति ॥ गृहीत्वेमां गृहं गच्छ प्रयच्छस्वेप्सिताय च ॥ २० ॥
शयने वामदिग्भागः कलत्राणामुदाहृतः ॥ दक्षिणे बन्धुलोकानां तत्कालोचितशायिनाम् ॥२१॥ सेयं तव सुता विप्र बन्धुस्थानं समाश्रिता ॥ भवि
ष्यति ततो जामिः कनिष्ठा मेऽन्यजन्मनि ॥ २२ ॥ अवतीर्णस्य भूपृष्ठे देवकार्येण केनचित् ॥ वाजिवक्त्रधरा प्रोक्ता यद्येषा मम कांतया ॥२३॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततोऽहं सुमहत्कृत्वा तपश्चैवानया सह ॥ करिष्यामि शुभास्यां च तथा लक्ष्मीमपि द्विज ॥ २४ ॥ एवं स भगवान्विप्रं तं सन्तोष्य तदा गिरा ॥ गरुडेन समं चक्रे कथाश्चित्रा मनोरमाः ॥ २५ ॥ अथ तस्मिन्कथांते स गरुडः पुरुषोत्तमम् ॥ प्रोवाच तां स्त्रियं दृष्ट्वा वृद्धां तेजःसमन्विताम् ॥ ॥ २६ ॥ अपूर्वेयं सुरश्रेष्ठ स्त्री वृद्धा तव पार्श्वगा ॥ किमर्थं केयमाख्याहि कुतः प्राप्ता जनार्दन ॥ २७ ॥ ॥ श्रीभगवानुवाच ॥ ॥ एषा ख्याता खगश्रेष्ठ लोकेऽस्मिन्वृद्धकन्यका ॥ शांडिलीनाम सर्वज्ञा ब्रह्मचर्यपरायणा ॥ २८ ॥ तपोवीर्यसमोपेता सर्वदेवाभिवंदिता[1] ॥ नास्ति वै चेदृशी नारी खगेन्द्रात्र जगत्त्रये ॥ २९ ॥ ॥ सूत उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा विहस्य विहगाधिपः ॥ प्रोवाच वासुदेवं च तां विलोक्य चिरं द्विजाः ॥ ३० ॥ ॥ गरुड उवाच ॥ ॥ नैतच्चित्रं तपो यच्च क्रियते सुमहत्तरम् ॥ यथा च दीयते दानं यच्च तन्नास्ति चाद्भुतम् ॥ तथाच क्रियते युद्धं संग्रामे युद्धशालिभिः ॥ ३१ ॥ नाश्चर्यं चित्रमेतच्च ब्रह्मचर्यं तदद्भुतम् ॥ विशेषाद्यौवनावस्थां संप्राप्य पुरुषोत्तमं ॥ ३२ ॥ विशेषेण च नारीभिरत्र न श्रद्दधाम्यहम् ॥ अवश्यं यौवनस्थेन तिर्यग्योनिगतेन च ॥ ३३ ॥ विकारः खलु कर्तव्यो नाधिकाराय यौवनम् ॥ यदि न प्राप्नुवंत्येताः पुरुषं योषितः क्वचित् ॥ ३४ ॥ अन्योन्यं मैथुनं चक्रुः कामबाणप्रपीडिताः ॥ कुष्ठिनं व्याधितं वापि स्थविरं व्यंगमेव च ॥ अप्येताः पुरुषाभावे मन्यंते पंचसायकम् ॥ ३५ ॥ नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ॥ नांतकः सर्वभूतानां न पुंसां वामलोचना ॥ ३६ ॥ न परत्र भयादेता मर्यादां विदधुः स्त्रियः ॥ मुक्त्वा भूपभयं चैकमथवा गुरुजं भयम् ॥ ३७ ॥ ॥ सूत उवाच ॥ ॥ एवं तस्य वचः श्रुत्वा शांडिली ब्रह्मचारिणी ॥ मौनव्रतधराऽप्येवं हृदि कोपं दधार सा ॥ ३८ ॥ एतस्मिन्नंतरे तस्य पक्षिनाथस्य तत्क्षणात् ॥ उभौ पक्षौ गतौ नाशं रुण्डाकारोऽत्र सोऽभवत् ॥ ३९ ॥ मांसपिंडमयो रौद्रः सर्वरोगविवर्जितः ॥ अशक्तश्च तथा गन्तुं पदमात्रमपि क्वचित् ॥ ॥ ४० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये सुपर्णपक्षपातवर्णनंनामैकाशीतितमोऽध्यायः ॥ ८१ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तद्दृष्ट्वा पुंडरीकाक्षो गरुडस्य विचेष्टितम् ॥ विस्मितश्चिंतयामास किमिदं सांप्रतं स्थितम् ॥ १ ॥ अपि वज्रप्रहारेण यस्य रोमापि न च्युतम् ॥ तौ पक्षौ सहसा चास्य कथं निपतितौ भुवि ॥ २ ॥ नूनमेतेन या स्त्रीणां कृता निंदा महात्मना ॥ दूषितं ब्रह्मचर्यं यच्छांडिलीं समवेक्ष्य च ॥ ३ ॥ अनया पातितौ पक्षौ तपःशक्तिप्रभावतः ॥ नान्यस्य विद्यते शक्तिरीदृशी भुवन[2]

[1] सर्वदेवाभिनदिता—इ० पा० । [2] अपि—इति शेषः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

त्रये ॥ ४ ॥ ततः प्रसादयामास शांडिलीं गरुडध्वजः ॥ तदर्थं विनयोपेतः स्मितं कृत्वा द्विजोत्तमाः ॥ ५ ॥ ॥ श्रीभगवानुवाच ॥ ॥ सामा न्यवचनं प्रोक्तं सर्वस्त्रीणामनेन हि ॥ तत्किमर्थं महाभागे त्वया चैवेदृशः कृतः ॥ ६ ॥ ॥ शांडिल्युवाच ॥ ॥ मम वक्त्रं समालोक्य स्मितं चक्रे जनार्दन ॥ स्त्रीनिंदा विहितानेन स्वमत्यापि जगद्गुरो ॥ ७ ॥ एतस्मात्कारणादस्य निग्रहोऽयं मया कृतः ॥ मनसा न च वाक्येन न च केशव कर्मणा ॥ ८ ॥ ॥ श्रीभगवानुवाच ॥ ॥ तथापि कुरु चास्य त्वं प्रसादं गतकल्मषे ॥ मम वाक्यानुरोधेन यदि मां मन्यसे शुभे ॥ ९ ॥ ॥ शांडिल्युवाच ॥ ॥ मनसापि मया ध्यातं शुभं वा यदि वाऽशुभम् ॥ नान्यथा जायते देव विशेषात्कोपयुक्तया ॥ १० ॥ तस्मादेष ममादेशादाराध यतु शंकरम् ॥ पक्षलाभाय नान्यस्य शक्तिर्दातुं व्यवस्थिता ॥ ११ ॥ अथवा पुंडरीकाक्ष रूपमीदृग्व्यवस्थितः ॥ एष संस्थास्यते लोके सत्यमेतद्ब्रवीम्यहम् ॥ १२ ॥ ॥ सूत उवाच ॥ ॥ तस्यास्तद्वचनं श्रुत्वा तं प्रोवाच जनार्दनः ॥ गरुडं दैन्यसंयुक्तं मांसपिंडोपमं स्थितम् ॥ १३ ॥ एष एव वरश्चास्या द्विपदेश्या[२] द्विजोत्तम ॥ पक्षलाभाय यत्प्रोक्तं तव शंभुप्रसादनम् ॥ १४ ॥ तस्मादाराधय क्षिप्रं त्वं देवं शशिशेखरम् ॥ अव्यग्रं चित्तमास्थाय दिवारात्रमतंद्रितः ॥ १५ ॥ येन ते तत्प्रभावेन भूयः स्यात्तादृशं वपुः ॥ तस्य देवस्य माहात्म्यादचिरादपि काश्यप ॥ १६ ॥ तच्छ्रुत्वा गरुडस्तूर्णं धृतपाशुपतव्रतः ॥ संस्थाप्य देवमीशानं ततस्तं तोषमानयत् ॥ १७ ॥ चांद्रायणानि कृच्छ्राणि तथा सांतपनानि च ॥ प्राजापत्यानि चक्रेऽथ पाराकाणि तदग्रतः ॥ १८ ॥ स्नात्वा त्रिषवणं पश्चाद्भस्मस्नान परायणः ॥ जपन्रुद्रशिरो रुद्रान्नीलरुद्रांस्तथापरान् ॥ १९ ॥ चक्रे पूजां स्वयं तस्य स्नापयित्वा यथाविधि ॥ बलिपूजोपहारांश्च विधानेन प्रय च्छति ॥ २० ॥ एवं तस्य व्रतस्थस्य जपपूजापरस्य च ॥ ततो वर्षसहस्रांते गतस्तुष्टिं महेश्वरः ॥ अब्रवीद्वरदोऽस्मीति वृणुष्वेष्टं द्विजोत्तम ॥ ॥ २१ ॥ ॥ गरुड उवाच ॥ ॥ पश्यावस्थां ममेशान शांडिल्या या विनिर्मिता ॥ पक्षपातः कृतोऽस्माकं तमहं प्रार्थयामि वै ॥ २२ ॥ त्वयात्रैव सदा लिंगे स्थेयं हर ममाधुना ॥ मम वाक्यादसंदिग्धं यदि चेष्टं प्रयच्छसि ॥ २३ ॥ ॥ भगवानुवाच ॥ ॥ अद्यप्रभृति मे चात्र लिंगे वासो भविष्यति ॥ त्वं च तद्रूपसंपन्नो विशेषाद्बलवेगभाक् ॥ २४ ॥ भविष्यसि न संदेहो मत्प्रसादाद्विहंगम ॥ एवमुक्त्वाथ तं देवः स्वयं पस्पर्श पाणिना ॥ २५ ॥ ततोऽस्य पक्षौ संजातौ तत्क्षणादेव सुन्दरौ ॥ तथा रोमाणि दिव्यानि जातरूपोपमानि[३] च ॥ २६ ॥ ततः प्रणम्य



१ क्वचित्–इति पाठोऽप्रासंगिकः प्रतिभाति । २ द्विपदेश्याः–द्विपदश्रेष्ठायाः–मानुष्याः–इत्यर्थः । ३ जातरूपोपमानि–सुवर्णोपमानि–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तं देवं प्रहृष्टः स विहंगमः ॥ गतः स्वभवनं पश्चादनुज्ञाप्य महेश्वरम् ॥ २७ ॥ देवोपि वचनात्तस्य तस्मिँल्लिंगे सदा हरः ॥ निवासमकरोत्सम्य क्प्राप्ते संध्यात्रये सदा ॥ २८ ॥ तस्य चायतने पुण्ये योगात्प्राणान्परित्यजेत् ॥ प्रायोपवेशनं कृत्वा न स भूयोऽपि जायते ॥ २९ ॥ अपि पाप समाचारः कौलो वा निर्घृणोऽपि वा ॥ ब्रह्मघ्नो वा सुरापो वा चौरो वा भ्रूणहाऽपि वा ॥ ३० ॥ त्रिकालं पूजयन्यस्तु श्रद्धापूतेन चेतसा ॥ संवत्सरं वसेत्सोऽपि शिवलोके महीयते ॥ ३१ ॥ अथवा सोमवारेण यस्तं पश्यति मानवः ॥ कृत्वा क्षणं सुभक्त्या यो यावत्संवत्सरं द्विजाः ॥ ॥ ३२ ॥ सोऽपि याति न संदेहः पुरुषः शिवमन्दिरे ॥ विमानवरमारूढः सेव्यमानोऽप्सरोगणैः ॥३३॥ तस्मात्सर्वप्रयत्नेन कलिकाले विशेषतः॥ द्रष्टव्यो वै सुपर्णाख्यो देवः श्रद्धासमन्वितैः ॥३४॥ संत्याज्याश्च तथा प्राणास्तदग्रे प्रायसंश्रितैः ॥ वांछद्भिः शिवसांनिध्यं सत्यमेतन्मयोदितम् ॥ ॥ ३५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये सुपर्णेश्वराख्यमाहात्म्यवर्णनंनाम द्व्यशीतितमोऽध्यायः ॥ ८२ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तत्राश्चर्यमभूत्पूर्वं यत्तद्ब्राह्मणसत्तमाः ॥ अहं वः कीर्तयिष्यामि पुराणे यदुदाहृतम् ॥ १ ॥ वेणुर्नाम महीपालः पुरासीत्सूर्यवंशजः ॥ सदैव पापसंयुक्तो दुर्मेधाः कामपीडितः ॥ २ ॥ शासनानि प्रदत्तानि ब्राह्मणानां महात्मनाम् ॥ अन्यैः पार्थिवशार्दूलैस्तेन तानि हृतान्यलम् ॥ ३ ॥ विध्वंसिताः स्त्रियो नैका विधवाश्च विशेषतः ॥ कुमार्यो रूपवत्यश्च तथा निजकुलोद्भवाः ॥ ४ ॥ देवताराधनं पूजां कर्तुं नैव ददाति सः ॥ न च यज्ञं न होमं च स्वाध्यायं न च पापकृत् ॥ ५ ॥ प्रोवाचाथ जनान्सर्वान्मां पूजयत सर्वदा ॥ न मामभ्यधिकोऽन्योऽस्ति देवो वा ब्राह्मणोऽपि वा ॥ ६ ॥ मया तुष्टेन सर्वेषां संपत्स्यति[1] हृदि स्थितम् ॥ इह लोकेष्वसंदिग्धं शुभं वा यदि वाऽशुभम् ॥ ७ ॥ तेन शस्त्रविहीनानां विश्वस्तानां वधः कृतः ॥ संत्यक्ताः शरणं प्राप्ताः पुरुषा भयविह्वलाः ॥ ८ ॥ नष्टो[2] महाहवं दृष्ट्वा शत्रुसंघानुपस्थितान् ॥ क्षात्रं धर्मं परित्यज्य प्राणरक्षार्थमेव हि ॥ ९ ॥ अचौराः प्रगृहीताश्च चौराः संरक्षिताः सदा ॥ साधवः क्लेशिता नित्यं तेषां संहरता धनम् ॥ १० ॥ न कृतं च व्रतं तेन श्रद्धापूतेन चेतसा ॥ न दत्तं ब्राह्मणेभ्यश्च न च यष्टं कदाचन ॥ ॥ ११ ॥ एवं तस्य नरेन्द्रस्य पापासक्तस्य नित्यशः ॥ कुष्ठव्याधिरभूदुग्रो वंशोच्छेदश्च सद्द्विजाः ॥ १२ ॥ ततस्तं व्याधिना ग्रस्तं पुत्रपौत्रविवर्जितम् ॥ दायादाः सहसोपेता राज्यं जहुस्ततः परम् ॥ १३ ॥ तं च निर्वासयामासुस्तस्माद्देशात्पदातिकम् ॥ एकाकिनं परित्यक्तं सर्वैरपि[3]

१ संपत्स्यति हृदि स्थितम्–अभीष्टम्–इत्यर्थः । २ नष्टः–पलायितः–इत्यर्थः । ३ स तैरपि–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सुहृद्गणैः ॥ १४ ॥ सोऽपि सर्वैः परित्यक्तस्तेन पापेन कर्मणा ॥ कलत्रैरपि चात्मीयैः स्मृत्वा पूर्वविचेष्टितम् ॥ १५ ॥ एकाकी भ्रममाणोऽथ सोऽपि कष्टवशं गतः ॥ क्षुत्तृष्णासुपरिश्रांतः क्षेत्रेऽत्रैव समागतः ॥ १६ ॥ ततः प्रासादमासाद्य सुपर्णाख्यसमुद्भवम् ॥ यावत्प्राप्तः परित्यक्तस्ताव त्प्राणैरुपोषितः ॥ १७ ॥ ततो दिव्यवपुर्भूत्वा विमानवरमाश्रितः ॥ जगाम शिवलोकं स दुर्लभं धार्मिकैरपि ॥ १८ ॥ सेव्यमानोप्सरोभिश्च स्तूयमानश्च किन्नरैः ॥ गीयमानश्च गन्धर्वैः शिवपार्श्वे व्यवस्थितः ॥ १९ ॥ अथ तं संनिधौ दृष्ट्वा गौरी पप्रच्छ सादरम् ॥ कोऽयं देव समायातः सुकृती तव मन्दिरे ॥ अनेन किं कृतं कर्म यत्प्राप्तोऽत्र विभूतिधृक् ॥ २० ॥ ॥ श्रीभगवानुवाच ॥ ॥ एष पापसमाचारः सदाऽऽसीत्पृ थिवीपतिः ॥ वेणुसंज्ञो धरापृष्ठे कुष्ठव्याधिसमाकुलः ॥ २१ ॥ स संत्यक्तो निजैर्दारैः शत्रुवर्गेण धर्षितः ॥ भ्रममाणः समायातः सुपर्णाख्यस्य मन्दिरे ॥ २२ ॥ उपवासपरिश्रांतः सांनिध्यं मम यत्र च ॥ सर्वप्राणैः परित्यक्तस्तस्मिन्नायतने शुभे ॥ २३ ॥ तत्प्रभावादिह प्राप्तः सत्यमेतन्म योदितम् ॥ अन्योऽप्यनशनं कृत्वा प्राणान्यस्तत्र संत्यजेत् ॥ २४ ॥ स सर्वाभ्यधिकां भूतिं प्राप्नुयाद्वरवर्णिनि ॥ यानेतान्वीक्षसे देवि गणान्मे पार्श्वसंस्थितान् ॥ २५ ॥ एतैस्तत्र कृतं सर्वैर्देवि प्रायोपवेशनम् ॥ अपि कीटपतंगा ये पशवः पक्षिणो मृगाः ॥ प्रासादे तत्र निर्मुक्ताः प्राणैर्यांति ममांतिकम् ॥ २६ ॥ ॥ सूत उवाच ॥ ॥ तच्छ्रुत्वा पार्वती वाक्यं प्रोक्तं देवेन शम्भुना ॥ विस्मयाविष्टहृदया साधु साध्विति साऽब्रवीत् ॥ २७ ॥ ततःप्रभृति लोकेऽत्र पुरुषा मुक्तिमिच्छवः ॥ दूरतोऽपि समभ्येत्य स्वान्प्राणांस्तत्र तत्यजुः ॥ २८ ॥ प्रायोपवेशनं कृत्वा श्रद्धया परया युताः ॥ गच्छन्ति च परां सिद्धिमपि पापपरायणाः ॥ २९ ॥ एतद्वः सर्वमाख्यातं सर्वपातकनाशनम् ॥ सुपर्णाख्यस्य माहात्म्यं यन्मया स्वपितुः श्रुतम् ॥ ३० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये सुपर्णाख्यमाहात्म्यवर्णनंनाम त्र्यशीतितमोऽध्यायः ॥ ८३ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ यदेतद्भवता प्रोक्तं देवदेवेन विष्णुना ॥ माधवीं भगिनीं प्राप्य जन्मांतरमुपस्थिताम् ॥ १ ॥ अश्ववक्त्रां करिष्यामि तपसा सुशुभाननाम् ॥ सा कथं विहिता तेन तपस्तप्तं तथा कथम् ॥ सर्वं विस्तरतो ब्रूहि परं कौतूहलं हि नः ॥ २ ॥ ॥ सूत उवाच ॥ ॥ नारदस्य समाकर्ण्य तं सन्देशं सुरोद्भवम् ॥ गत्वा विष्णुः सुरैः सार्द्धं प्रचक्रे मंत्रनिश्चयम् ॥ ३ ॥ भारावतरणार्थाय दानवानां वधाय च ॥ वसुदेवगृहे श्रीमान्द्वापरांते ततो हरिः ॥ ४ ॥ देव



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्या जठरे देवः संजातो दैत्यदर्पहा ॥ तथान्या रोहिणीनाम भार्या तस्य च याऽभवत् ॥ ५ ॥ तस्यां जज्ञे हलीनाम बलभद्रः प्रतापवान् ॥ तृतीया सुप्रभानाम वसुदेवप्रिया च या ॥ ६ ॥ तस्यां सा माधवी जज्ञे अश्ववक्रस्वरूपधृक् ॥ तां दृष्ट्वा विकृताकारां सुतां जातां च सुप्रभा ॥ वासुदेवसमायुक्ता विषादं परमं गता ॥ ७ ॥ अथ ते यादवाः सर्वे कृतशान्तिकपौष्टिकाः ॥ स्वस्तिस्वस्तीति संत्रस्ताः प्रोचुर्भूयात्कुलेऽत्र नः ॥८॥ एवं सा यौवनोपेता तथा दुःखसमन्विता ॥ न कश्चिद्वरयामास वाजिवक्त्रां विलोक्य ताम् ॥ ९ ॥ ततश्च भगवान्विष्णुर्ज्ञात्वा तां भगिनीं तथा ॥ मातरं पितरं चैव तथा दुःखसमन्वितौ ॥ १० ॥ तामादाय गतस्तूर्णं बलदेवसमन्वितः ॥ हाटकेश्वरजे क्षेत्रे तपस्तप्तुं ततः परम् ॥ ११ ॥ ब्रह्माणं तोषयामास सम्यग्यज्ञपरायणः ॥ व्रतैश्च विविधैर्दानैर्ब्राह्मणानां च तर्पणैः ॥ १२ ॥ ततस्तुष्टिं गतो ब्रह्मा वर्षांते तस्य शार्ङ्गिणः ॥ उवाच वरदोऽस्मीति प्रार्थयस्वाभिवांछितम् ॥ १३ ॥ ॥ विष्णुरुवाच ॥ ॥ एषा मे भगिनी देव जाताऽश्ववदना किल ॥ तव प्रसादात्सद्वक्त्रा भूयादेतन्ममेप्सितम्[1] ॥ १४ ॥ ॥ श्रीब्रह्मोवाच ॥ ॥ एषा शुभानना साध्वी मत्प्रसादाद्भविष्यति ॥ सुभद्रानाम विख्याता वीरसूः पतिवल्लभा ॥ १५ ॥ एतद्रूपां पुमान्योऽत्र पूजयिष्यति भक्तितः ॥ एतां विष्णो त्वया सार्धं तथानेन च सीरिणा ॥ १६ ॥ द्वादश्यां माघमासस्य गन्धपुष्पानुलेपनैः ॥ सोऽप्यवाप्स्यति यच्चित्ते वर्तते नात्र संशयः ॥ १७ ॥ या नारी पतिना त्यक्ता वंध्या वा भक्तिसंयुता ॥ तृतीयादिवसे चैतां पूजयिष्यति केशव ॥ १८ ॥ भविष्यति सुपुत्राढ्या सुभगा सा सुखान्विता ॥ ऐश्वर्यसहिता नित्यं सर्वैः समुदिता गुणैः ॥ १९ ॥ एवमुक्त्वा चतुर्वक्त्रो विरराम ततः परम् ॥ वासुदेवोऽपि हृष्टात्मा ययौ द्वारवतीं पुरीम् ॥ २० ॥ तामादाय विशालाक्षीं चंद्रबिंबसमाननाम् ॥ बलदेवसमायुक्तो ह्यनुज्ञाप्य पितामहम् ॥ २१ ॥ ॥ सूत उवाच ॥ ॥ एवं सा माधवी विप्राः सुभगारूपमास्थिता ॥ अवतीर्णा धरापृष्ठे लक्ष्मीशापप्रपीडिता ॥ २२ ॥ उपयेमे सुतः पांडोर्यां पार्थश्चारुहासिनीम् ॥ जज्ञे तस्याः सुतो वीरोऽभिमन्युरिति विश्रुतः ॥ २३ ॥ एतद्वः सर्वमाख्यातं माधवीजन्मसम्भवम् ॥ सुपर्णाख्यस्य देवस्य कथासंगाद्द्विजोत्तमाः ॥ २४ ॥ यश्चैतत्पठते मर्त्यो भक्त्या युक्तः शृणोति वा ॥ मुच्यते स नरः पापात्तद्दिनैकसमुद्भवात् ॥ २५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये सुपर्णाख्यतीर्थमाहात्म्ये माधव्या अश्वमुख्याः श्रीकृष्णतपश्चर्यया पद्माद्दत्तशापविमुक्तिपूर्वकसुभद्रात्वप्राप्तिवर्णनंनाम चतुरशीतितमोऽध्यायः ॥ ८४ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ माधव्याः

१ मयोदितम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पद्मया दत्तो यः शापस्तस्य यत्फलम् ॥ परिणामोद्भवं सर्वं श्रुतमस्माभिरद्य तव् ॥ १ ॥ तेन यत्कमला शप्ता ब्राह्मणेन महात्मना ॥ सा कथं गज
वक्राऽथ पुनर्जाता शुभानना ॥ २ ॥ ॥ सूत उवाच ॥ ॥ शापेन तस्य विप्रस्य तत्क्षणादेव सा द्विजाः ॥ गजवक्रा समुत्पन्ना महाविस्मयकारिणी
॥ ३ ॥ सा प्रोक्ता हरिणा तिष्ठ किंचित्कालांतरे शुभे ॥ अनेनैव तु रूपेण यावत्स्याद्द्वापरक्षयः ॥ ४ ॥ ततोऽहं मेदिनीपृष्ठे ह्यवतीर्य समुद्व्रजे ॥ तपः
शक्त्या करिष्यामि भूयस्त्वां तु शुभाननाम् ॥ ५ ॥ अवज्ञायाथ सा तस्य तद्वाक्यं शार्ङ्गधन्विनः ॥ शुभास्यत्वकृते तेपे तपस्तीव्रं सुहर्षिता ॥
॥ ६ ॥ एतत्क्षेत्रं समासाद्य त्रिकालं स्नानमाचरत् ॥ ब्रह्माणं तोषयामास दिवारात्रिमतंद्रिता ॥ ७ ॥ तामुवाच ततो ब्रह्मा वर्षांते तुष्टिमागतः ॥ वरं प्रार्थय
तुष्टोऽहं तव केशववल्लभे ॥ ८ ॥ ॥ लक्ष्मीरुवाच ॥ ॥ गजास्याहं कृता देव शापं दत्त्वा सुदारुणम् ॥ ब्राह्मणेन सुक्रुद्धेन कस्मिंश्चित्कारणांतरे ॥ ९ ॥
तस्मात्तद्रूपिणीं भूयो मां कुरुष्व पितामह ॥ यदि मे तुष्टिमापन्नो नान्यत्किंचिद्वृणोम्यहम् ॥ १० ॥ ॥ ब्रह्मोवाच ॥ ॥ भविष्यति शुभं वक्त्रं
मत्प्रसादादसंशयम् ॥ तव भद्रे विशेषेण तस्मात्त्वं स्वगृहं व्रज ॥ ११ ॥ महत्त्वं ते मया दत्तमद्यप्रभृति शोभने ॥ महालक्ष्मीति ते नाम तस्मा
दत्र भविष्यति ॥ १२ ॥ गजवक्त्रां नरो यस्त्वां पूजयिष्यति भक्तितः ॥ स गजाधिपतिर्भूपो भविष्यति च भूतले ॥ १३ ॥ द्वितीयादिवसे यस्त्वां
महालक्ष्मीरिति ब्रुवन् ॥ श्रीसूक्तेन सुभक्त्याऽथ देवि संपूजयिष्यति ॥ १४ ॥ सप्तजन्मांतराण्येव न भविष्यति सोऽधनः ॥ एवमुक्त्वा चतुर्वक्त्रो विर
राम ततः परम् ॥ १५ ॥ साऽपि हृष्टा गता देवी यत्र तिष्ठति केशवः ॥ १६ ॥ इति श्रीस्कांदे महापुराण एकाशीति साहस्र्यां संहितायां षष्ठे नागर
खण्डे हाटकेश्वरक्षेत्रमाहात्म्ये महालक्ष्मीमाहात्म्यवर्णनंनाम पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥छ॥ ॥ सूत उवाच ॥ ॥ अथान्यापि च तत्रास्ति सप्त
विंशतिका तथा ॥ नक्षत्रैः स्थापिता देवी वांछितस्य प्रदायिनी ॥ १ ॥ दक्षस्य तनयाः पूर्वं सप्तविंशतिसंख्यया ॥ उद्वाहिता हि सोमेन पूर्वं ब्राह्मण
सत्तमाः ॥ २ ॥ तासां मध्येऽभवच्चैका रोहिणी तस्य वल्लभा ॥ प्राणेभ्योऽपि सदासक्तस्तया सार्धं स तिष्ठति ॥ ३ ॥ ततो दौर्भाग्यसंतप्ताः सर्वा
स्ता दक्षकन्यकाः ॥ वैराग्यं परमं गत्वा क्षेत्रेऽस्मिंस्तपसि स्थिताः ॥ ४ ॥ संस्थाप्य देवतां दुर्गां श्रद्धया परया युताः ॥ बलिपूजोपहारैस्तां पूजयंत्यः ॥ ९३ ॥
सुरेश्वरीम् ॥ ५ ॥ ततः कालेन महता तासां सा तुष्टिमभ्यगात् ॥ अब्रवीच्च प्रतुष्टोऽहं वरं दास्यामि पुत्रिकाः ॥ ६ ॥ तस्मात्तत्प्रार्थ्यतां चित्ते
यद्युष्माकं व्यवस्थितम् ॥ सर्वं दास्याम्यसंदिग्धं यद्युष्माकं हृदि स्थितम् ॥ ७ ॥ ततः प्रोचुश्च ताः सर्वाः प्रसादात्तव वांछितम् ॥ अस्माकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्यते देवि यावत्रैलोक्यसंस्थितम् ॥ ८ ॥ एकं पत्युः सुखं मुक्त्वा यत्सौभाग्यसमुद्भवम् ॥ तस्मात्तद्देहि चास्माकं यदि तुष्टासि चंडिके ॥ ९ ॥ वयं दौर्भाग्यदोषेण सर्वाः क्लेशं परं गताः ॥ न शक्नुमः प्रियान्प्राणान्देहे धर्तुं कथंचन ॥ १० ॥ ॥ श्रीदेव्युवाच ॥ ॥ अद्यप्रभृति युष्माकं सौभाग्यं पतिसंभवम् ॥ मत्प्रसादादसंदिग्धं भविष्यति सुखोदयम् ॥ ११ ॥ अन्यापि या पतित्यक्ता स्त्री मामत्र स्थितां सदा ॥ पूजयिष्यति सद्भक्त्या चतुर्दश्यामुपोषिता ॥ १२ ॥ सा भविष्यति सौभाग्ययुक्ता पुत्रवती सती ॥ यावत्संवत्सरं तावदेकभक्तपरायणा ॥ १३ ॥ अक्षारलवणाशा या नारी मां पूजयिष्यति ॥ न तस्याः पतिजं दुःखं दौर्भाग्यं वा भविष्यति ॥ १४ ॥ आश्विनस्य सिते पक्षे संप्राप्ते नवमीदिने ॥ उपवासपरा या मां निशीथे पूजयिष्यति ॥ तस्याः सौभाग्यमत्युग्रं सर्वदा वै भविष्यति ॥ १५ ॥ एवमुक्त्वा तु सा देवी विरराम द्विजोत्तमाः ॥ ताश्च सर्वाः सुसंहृष्टा जग्मुर्दक्षस्य मंदिरम् ॥ १६ ॥ एतस्मिन्नंतरे दक्ष आहूतः शूलपाणिना ॥ प्रोक्तः कस्मात्त्वया चन्द्रो यक्ष्मणा संनियोजितः ॥ तदयुक्तं कृतं दक्ष जामाताऽयं यतस्तव ॥ १७ ॥ ॥ दक्ष उवाच ॥ ॥ अनेन तनया मह्यमष्टाविंशतिसंख्यया ॥ ऊढा अखण्डचारित्रास्तास्त्यक्ता दोषवर्जिताः ॥ मुक्त्वैकां रोहिणीं देव निषिद्धेन मयाऽसकृत् ॥ १८ ॥ ततो मयाऽतिकोपेन नियुक्तो राजयक्ष्मणा ॥ असत्यजल्पको मन्दः कामदेववशं गतः ॥ १९ ॥ ॥ श्रीभगवानुवाच ॥ ॥ अद्यप्रभृति सर्वासां समं स प्रचरिष्यति ॥ मद्वाक्यान्नात्र संदेहः सत्यमेतन्मयोदितम् ॥ २० ॥ त्वयापि यद्वचः प्रोक्तमसत्यं स्यान्न तत्क्वचित् ॥ तस्मादेष क्षयं पक्षं वृद्धिं पक्षं प्रयास्यति ॥ २१ ॥ दक्षोऽपि बाढमित्येवं तत्प्रोक्त्वा च ययौ गृहम् ॥ चंद्रस्तु दक्षकन्यास्ताः समं पश्यति सर्वदा ॥ २२ ॥ गच्छमानः क्षयं पक्षं वृद्धिं पक्षं च सद्द्विजाः ॥ सापि देवी ततः प्रोक्ता सप्तविंशतिका क्षितौ ॥ सर्वसौभाग्यदा स्त्रीणां तस्मिन्क्षेत्रे व्यवस्थिता ॥ २३ ॥ यश्चैतत्पुरतस्तस्याः संप्राप्ते चाष्टमीदिने ॥ शुचिर्भूत्वा पठेद्भक्त्या स सौभाग्यमवाप्नुयात् ॥ २४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये सप्तविंशतिकामाहात्म्यवर्णनंनाम षडशीतितमोऽध्यायः ॥ ८६ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तथा तत्रास्ति विप्रेन्द्राः सोमस्यायतनं शुभम् ॥ यस्यापि दर्शनादेव मुच्यते पातकैर्नरः ॥ १ ॥ सोमवारे तु संप्राप्ते सोमस्य ग्रहणे नरः ॥ यस्तं पश्यति पापोऽ

१ मह्यम्—मम—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

पि नरकं न स पश्यति ॥ २ ॥ ॥ ऋषय ऊचुः ॥ ॥ सर्वेषामेव देवानां दृश्यंतेऽत्र समाश्रयाः ॥ अत्र चंद्रस्य चैवैकः कथं जातः समाश्रयः
॥ ३ ॥ एतन्नः सूतपुत्रातिचित्रं मनसि वर्तते ॥ तस्माद्वद महाभाग सर्वं त्वं वेत्स्यशेषतः ॥ ४ ॥ ॥ सूत उवाच ॥ ॥ एतज्जगद्द्विजश्रेष्ठाः सर्वं
सोममयं स्मृतम् ॥ तस्मात्प्रतिष्ठिते तस्मिंस्त्रैलोक्यं स्यात्प्रतिष्ठितम् ॥ ५ ॥ एताश्चौषधयः सर्वाः सस्याद्याश्चेह भूतले ॥ सर्वाः सोममयास्ताश्च
याभिर्जीवंति जंतवः ॥ ६ ॥ तस्माद्ब्रह्मादयो देवाः सोमं प्राप्य क्रमाद्द्विजाः ॥ तृप्तिं यांति परां दृष्ट्वा यतस्तस्माद्वरोऽत्र सः ॥ ७ ॥ अग्निष्टो
मादयो यज्ञास्तथा सोमे प्रतिष्ठिताः ॥ तस्य पानाद्यतस्तृप्तिं तत्र यांति द्विजोत्तमाः ॥ ८ ॥ एतस्मात्कारणात्सोमः सर्वेषामधिकः स्मृतः ॥ देवानां
दानवानां च स हि पूज्यतमः स्मृतः ॥ ९ ॥ यथान्येषां सुरेन्द्राणां हर्म्याणि धरणीतले ॥ क्रियन्ते रात्रिनाथस्य तद्वत्कुर्वंति मानवाः ॥ १० ॥
यैर्यैर्नरैर्निशेशस्य प्रासादो विहितः क्षितौ ॥ तेते मुक्तिपदं प्राप्ताः कृत्वाऽथ शुभसंचयम् ॥ ११ ॥ यन्महेश्वरहर्म्याणां सहस्रेण भवेच्छुभम् ॥ तदेके
नैव चंद्रस्य प्राप्नुवंति शुभं नराः ॥ १२ ॥ अथ चन्द्रोत्थहर्म्यस्य माहात्म्यं तद्द्विजोत्तमाः ॥ ज्ञात्वा ब्रह्मादयो देवा भयसंत्रस्तमानसाः ॥ तद्वि
घ्नार्थमिदं प्रोचुर्मेरुमूर्धानमाश्रिताः ॥ १३ ॥ सौम्यर्क्षे सोमवारेण सौम्ये मासि च संस्थिते ॥ तिथौ च सोमदेवत्ये प्राप्ते सोमग्रहे तथा ॥ सकारैः
पंचभिर्युक्ते काले सोमस्य मंदिरम् ॥ १४ ॥ य एकाहेन संपाद्य प्रासादं स्थापयिष्यति ॥ चंद्रं स सर्वदेवोत्थहर्म्यस्याप्नोति सत्फलम् ॥ १५ ॥
सहस्रगुणितं सम्यक्छ्रद्धापूतेन चेतसा ॥ अन्यथा यस्तु चंद्रस्य प्रासादं प्रकरिष्यति ॥ १६ ॥ वंशोच्छेदं समासाद्य नरकं स प्रयास्यति ॥ एत
स्मात्कारणाद्भीता न कुर्वंति नरा भुवि ॥ १७ ॥ प्रासादं रात्रिनाथस्य सुपुण्यमपि सद्द्विजाः ॥ य एष रात्रिनाथस्य क्षेत्रेऽत्रैव व्यवस्थितः ॥ १८ ॥
प्रासादस्त्वंबरीषेण भूभुजा स विनिर्मितः ॥ कथंचित्समयं प्राप्य यथोक्तं शास्त्रचिंतकैः ॥ १९ ॥ तस्यैवोत्तरदिग्भागे द्वितीयोऽन्यः प्रतिष्ठितः ॥
चन्द्रमा धंधुमारेण तद्वत्सोऽपि प्रतिष्ठितः ॥ २० ॥ ततश्च तौ महीपालौ तत्प्रभावादुभौ द्विजाः ॥ गतौ च परमां सिद्धिं जन्ममृत्युविवर्जिताम् ॥
॥ २१ ॥ प्रासादोऽन्यस्तृतीयस्तु क्षेत्रे प्राभासिके तथा ॥ इक्ष्वाकुणा नरेंद्रेण श्रद्धायुक्तेन निर्मितः ॥ २२ ॥ प्रासादत्रयमेतद्धि मुक्त्वात्र धरणीतले ॥ 
अपरो नास्ति चन्द्रस्य सत्यमेतन्मयोदितम् ॥ एकोऽस्ति नर्मदातीरे पुण्ये रेवोरिसंगमे ॥ २३ ॥ एतद्वः सर्वमाख्यातं चन्द्रमाहात्म्यमुत्तमम् ॥

१ सूतपुत्रेति—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पठतां शृण्वतां चापि सर्वपातकनाशनम् ॥ २४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये सोमप्रासादमाहात्म्यवर्णनंनाम सप्ताशीतितमोऽध्यायः ॥ ८७ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ यास्त्वया देवताः प्रोक्ताश्चतस्रः सूतनंदन ॥ चमत्कारी महित्था च महालक्ष्मीस्तथाऽपरा ॥ १ ॥ अंबावृद्धा चतुर्थी च तासां तिस्रः प्रकीर्तिताः॥ विस्तरेण चतुर्थी च अंबावृद्धा न कीर्तिता ॥ २ ॥ एतस्याः सर्वमाचक्ष्व प्रभावं सूतसंभव ॥ केनैषा निर्मिता यात्रा सर्वं विस्तरतो वद ॥ ३ ॥ ॥ सूत उवाच ॥ ॥ एषा तपोमयी शक्तिरम्बावृद्धा सुरेश्वरी ॥ यथात्र संस्थिता पूर्वं तत्सर्वं श्रूयतां मम ॥ ४ ॥ चमत्कारमहीपेन पुरमेतद्यदा कृतम् ॥ तदा तद्रक्षणार्थाय निर्मिता भावितात्मना ॥ चतस्रो देवता ह्येताः संमतेन द्विजन्मनाम् ॥ ५ ॥ अथ तस्य महीपस्य अंबानामाभवत्सुता ॥ तथान्या वृद्धसंज्ञा च रूपौदार्यगुणान्विते ॥ ६ ॥ उभे ते काशिराजेन परिणीते द्विजोत्तमाः ॥ गृह्योक्तेन विधानेन देवविप्राग्निसंनिधौ ॥ ७ ॥ कस्यचित्त्वथ कालस्य काशिराजस्य भूपतेः ॥ तैः कालयवनैः सार्धमभवत्संगरो महान् ॥ ८ ॥ अथ तैर्निहतः संख्ये सभृत्यबलवाहनः ॥ हरलब्धवरै रौद्रैः काशिराजः प्रतापवान् ॥ ९ ॥ अथांबा चैव वृद्धा च वैधव्यं प्राप्य दुःखदम् ॥ हाटकेश्वरजं क्षेत्रं गत्वा ते वांछितप्रदम् ॥ १० ॥ देव्या आराधने यत्नं कृतवत्यौ ततः परम् ॥ नाशार्थं पतिशत्रूणां धृतवत्यौ शुभव्रतम् ॥ ११ ॥ यावद्वर्षशतं साग्रं न च तुष्टा सुरेश्वरी ॥ ततो वैराग्यमासाद्य वांछंत्यौ स्वतनुक्षयम् ॥ १२ ॥ मंत्रैराथर्वणैर्विप्राः क्षुरिकासूक्तसंभवैः ॥ छित्त्वाच्छित्त्वा स्वमांसानि मंत्रपूतानि भक्तितः ॥ १३ ॥ कृतवत्यौ ततो होमं सुसमिद्धे हुताशने ॥ अग्निकुण्डात्ततस्तस्माच्चतुर्हस्ता शुभानना ॥ १४ ॥ श्वेतवस्त्रा विनिष्क्रांता नारी बालार्कसन्निभा ॥ तथान्या च¹ सुनेत्रास्या तप्तहाटकसन्निभा ॥ १५ ॥ तस्मात्कुण्डाद्विनिष्क्रांता धृतखड्गा भयावहा ॥ साऽपरापि तथारूपा शक्तिः परमदारुणा ॥ १६ ॥ प्रोचतुस्ते वरं ह्रत्स्थं प्रार्थ्यतामिति दुर्लभम् ॥ ॥ १७ ॥ ॥ ते ऊचतुः ॥ ॥ अस्माकं दयितो भर्ता काशिराजः प्रतापवान् ॥ निहतः संगरे क्रुद्धैर्यवनैः कालपूर्वकैः ॥ १८ ॥ युष्मदीयप्रसादेन यथा तेषां परिक्षयः ॥ सञ्जायते महादेव्यौ तथा कार्यमसंशयम् ॥ १९ ॥ स्थातव्यं च तथात्रैव उभाभ्यामपि सादरम् ॥ स्वपुरस्य² प्ररक्षार्थमेतत्कृत्यं मतं हि नौ ॥ २० ॥ तयोस्तद्वचनं श्रुत्वा उभे ते देवते ततः॥ संप्रोच्य बाढमित्येवं तस्मिन्कुण्डे व्यवस्थिते ॥ २१ ॥ एतस्मिन्नंतरे तस्मात्कुण्डाच्छतसहस्रशः ॥ निष्क्रांताः संख्यया हीना मातरो नैकरूपिकाः ॥ २२ ॥ एका गजमुखी तत्र तथान्या तुरगानना ॥ सारमेय

१ वसुनेत्रास्या–इ० पा० । २ स्वपुत्रस्य–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



मुखाश्चान्याः पक्षिच्छागमुखाः पराः ॥ २३ ॥ तिर्यञ्चवपुषश्चान्या वक्रैर्मानुषसंभवैः ॥ त्रिशीर्षाः पञ्चशीर्षाश्च दशशीर्षास्तथा पराः ॥ २४ ॥ गुह्य स्थानस्थितैर्वक्रैरेकाश्चान्या हृदिस्थितैः ॥ पार्श्वसंस्थैः स्थिताश्चान्या अन्याः पृष्ठिगतैर्मुखैः ॥ २५ ॥ एकहस्ता द्विहस्ताश्च पञ्चहस्तास्तथापराः ॥ अन्या विंशतिहस्ताश्च विहस्ताश्च तथापराः ॥ २६ ॥ बहुपादा विपादाश्च एकपादास्तथापराः ॥ तथान्याश्चार्धपादाश्च अधोवक्रा विभीषणाः ॥ ॥ २७ ॥ एकनेत्रा द्विनेत्राश्च त्रिनेत्रा[1]श्च तथापराः ॥ काश्चिद्गजसमारूढा हयारूढास्तथापराः ॥ २८ ॥ वृषवानरसिंहाजव्याघ्रसर्पास्थिताः पराः ॥ गोधाश्वरासभारूढास्तथा च विहगाश्रिताः ॥ २९ ॥ कूर्मकुक्कुटसर्पादिसमारूढाः सहस्रशः ॥ प्रकुर्वंत्यो रुदन्त्यश्च गायन्त्यश्च तथा पराः ॥ नृत्यंत्यश्च हसंत्यश्च क्रीडासक्ताः परस्परम् ॥ ३० ॥ ऊर्ध्वकेशा विकेशाश्च गात्रकेशाश्च भूरिशः ॥ लंबकेशा विकेशाश्च वाजिकेशास्तथैव च ॥३१॥ ह्रस्वदन्त्यो विदंत्यश्च दीर्घदन्त्यो विभीषणाः ॥ गजदंत्यस्तथैवान्या लोहदंत्यो भयावहाः ॥ ३२ ॥ लंबकर्ण्यो विकर्ण्यश्च शूर्पकर्ण्यस्तथा पराः ॥ शंकुकर्ण्यः कुकर्ण्यश्च बहुकर्ण्यः सुकर्णिकाः ॥ ३३ ॥ एकवस्त्रा विवस्त्राश्च बहुवस्त्रास्तथा पराः ॥ चर्मप्रावरणाश्चैव कंथाप्रावरणान्विताः ॥ ३४ ॥ खड्गहस्ताः शराहस्ताः कुंतहस्ताश्च भीषणाः ॥ पाशहस्तास्तथैवान्याः प्रासचापकराः पराः ॥ शूलमुद्गरहस्ताश्च भुशुंडिकरभूषिताः ॥ ३५ ॥ अथ ताभ्यां तथा[2]ऽऽकर्ण्य ताः सर्वा हर्षसंयुताः ॥ प्रस्थितास्तत्र ता यत्र ते कालयवनाः स्थिताः ॥३६॥ ततस्ते तत्समालोक्य बलं देवीसमुद्भवम् ॥ रौद्ररूपधरं तीव्रं विकृतं विकृतैर्मुखैः ॥३७॥ विषण्णवदनाः सर्वे भयभीताः समंततः ॥ धावंतो भक्षितास्ताभिर्देवताभिः सुनिर्दयम् ॥ ३८ ॥ बालवृद्धसमोपेतं तेषां राष्ट्रं दुरात्मनाम् ॥ स्त्रीभिश्च सहितं ताभिर्देवताभिः प्रभक्षितम् ॥३९॥ एवं निर्वास्य तद्राष्ट्रं सर्वास्ता हर्षसंयुताः ॥ भूय एव निजं स्थानं संप्राप्ता द्विजसत्तमाः ॥ ४० ॥ ततः प्रोचुः प्रणम्योच्चैस्ताभ्यां विनयपूर्वकम् ॥ हतास्ते यवनाः कृष्णाः सपुत्रपशुबांधवाः ॥४१॥ उद्वासितस्तथा सर्वो देशस्तेषां स वै महान् ॥ सांप्रतं दीयतां कश्चिदाहारस्तृप्तिहेतवे ॥ निवासाय ततः स्थानं किंचिच्चावेद्यतां हि नः ॥ ४२ ॥ ॥ देव्यावूचतुः ॥ ॥ मर्त्यलोकेऽत्र या नार्यो गर्भवत्यः स्वपंति च ॥ संध्याकालप्रकाशे च तासां गर्भोऽस्तु वो द्रुतम् ॥ ४३ ॥ रुदंत्यो या विनिर्यांति चत्वरेषु त्रिकेषु च ॥ तासां गर्भस्तु युष्माकं संप्रदत्तः प्रभुज्यताम् ॥ ४४ ॥ उच्छिष्टा याः प्रसर्पंति रमन्ते च स्वपंति च ॥ तासां गर्भः समस्तानां युष्माकं भोजनाय वै ॥ ४५ ॥ सूतिकाभवने यस्मिन्नुच्छिष्टं चोपजायते ॥ स बालकस्तु युष्माकं भोजनाय प्रकल्पितः ॥ ४६ ॥ न षष्ठीजागरो यस्य बाल

१ कटिनेत्रास्तथापराः—इ० पा० । २ अथ अनन्तरम्—ताभ्यां—द्वाभ्यां पूर्वं निर्गत्य स्थिताभ्यां—देवीभ्यां सकाशात्—तथा—कालादियवनाः विध्वंसनीयाः—इत्याज्ञावचनम्—आकर्ण्य—श्रुत्वा—इत्यर्थसंगतिर्योजनीया ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कस्य भविष्यति ॥ स भविष्यति भोज्याय युष्माकं नात्र संशयः ॥ ४७ ॥ नाशं यास्यति वा यत्र पावकः सूतिकागृहे ॥ स भविष्यति भोज्याय युष्माकं बालरूपधृक् ॥ ४८ ॥ मांगल्यैः संपरित्यक्तं यद्भवेत्सूतिकागृहम् ॥ तस्मिन्यस्तिष्ठते बालः स युष्माकं प्रकल्पितः ॥४९॥ संध्यायां बालका ये वा स्वपंत्याकाशदेशगाः॥ ते सर्वे भोजनार्थाय युष्माकं संनिवेदिताः ॥ ५० ॥ यस्य जन्मदिने प्राप्ते वर्षांते क्रियते न च ॥ मांगल्यं तस्य यद्गात्रं तद्युष्माकं प्रकल्पितम् ॥ ५१ ॥ तैलाभ्यंगं नरः कृत्वा यश्च स्नानं करोति न ॥ स दत्तो भोजनार्थाय युष्माकं नात्र संशयः ॥ ५२ ॥ उच्छिष्टो यः पुमांस्तिष्ठेद्यो वा चत्वरमध्यगः॥ भक्षणीयः स सर्वाभिर्निर्विकल्पेन चेतसा ॥५३॥ रजस्वलां व्रजेद्यो वा पुरुषः काममोहितः॥नग्नः शेते तथा स्नाति भक्षणीयः स सत्वरम् ॥ ५४ ॥ दक्षिणाभिमुखो रात्रौ यश्च स्नाति विमूढधीः ॥ शेते च शयने सोऽपि भक्षणीयश्च सत्वरम् ॥५५॥ उदङ्मुखश्च यो रात्रौ दिवा वा दक्षिणामुखः ॥ मूत्रोत्सर्गं पुरीषं वा प्रकुर्याद्भक्ष्य एव सः ॥ ५६ ॥ यः कुर्याद्रजनीवक्त्रे दधिसक्तुप्रभक्षणम् ॥ अंत्यजाभिगमं चाथ भक्षणीयो द्रुतं हि सः ॥ ५७ ॥ ॥ सूत उवाच ॥ ॥ एवं ताभ्यां[1] तदा प्रोक्ता देवतास्ताः समंततः ॥ परिवार्यतदा तस्थुः संप्रहृष्टेन चेतसा ॥ ५८ ॥ एतस्मिन्नंतरे राजा चमत्कारः प्रतापवान् ॥ प्रासादं निर्ममे ताभ्यां कैलासशिखरोपमम् ॥ ५९ ॥ ततःप्रभृति ते ख्याते क्षेत्रे तत्र महोदये ॥ अंबावृद्धाभिधाने च पुररक्षापरे सदा ॥ ६० ॥ यः पुमान्प्रातरुत्थाय ताभ्यां पश्यति चाननम् ॥ तस्य संवत्सरंयावन्न च च्छिद्रं प्रजायते ॥ ६१ ॥ वृद्ध्यादौ वाथ चांते वा ताभ्यां पूजां करोति यः ॥ न तस्य जायते च्छिद्रं कथंचिदपि भूतले ॥ ६२ ॥ यात्राकाले पुमान्यश्च ताभ्यां पूजां समाचरेत् ॥ स वांछितफलं प्राप्य शीघ्रं स्वगृहमाप्नुयात् ॥ ६३ ॥ सदाष्टम्यां चतुर्दश्यां यस्ताभ्यां बलिमाहरेत् ॥ स कामानाप्नुयादिष्टानिह प्रेत्य च सद्गतिम् ॥ ६४ ॥ यो महानवमीसंज्ञे दिवसे श्रद्धयान्वितः ॥ ताभ्यां समाचरेत्पूजां स सदा स्यादकण्टकी ॥ ॥ ६५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्येऽबावृद्धामाहात्म्यवर्णनंनामाष्टाशीतितमोऽध्यायः ॥ ८८ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एवं तत्र स्थिते नित्यं तस्मिन्मातृगणे द्विजाः ॥ बालकानां क्षयो जज्ञे ब्राह्मणानां गृहेगृहे ॥ १ ॥ तरुणानां विशेषेण चमत्कारपुरोत्तरे ॥ छिद्रमन्वेषमाणास्ता भ्रमंत्यखिलदेवताः ॥ २ ॥ ततस्ते ब्राह्मणाः सर्वे ज्ञात्वा छिद्रसमुद्भवम् ॥ विघातं बालकानां च देवताभिर्विनिर्मितम् ॥ ३ ॥ अम्बावृद्धे समासाद्य पूजयित्वा प्रयत्नतः ॥ प्रोचुश्च दुःखसन्तप्ता

१ ताभ्याम्—तयोः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

विनयावनताः स्थिताः ॥ ४ ॥ रक्षार्थं सर्वविप्राणां चमत्कारेण भूभुजा ॥ भवद्भ्यां निर्मितः श्रेष्ठः प्रासादोऽयं मनोहरः ॥ ५ ॥ ह्रियंते बालका रात्रौ छिद्रं प्राप्य सहस्रशः ॥ युष्मदीयाभिरेताभिर्देवताभिः समन्ततः ॥ ६ ॥ प्रसादः क्रियतां तस्माद्ब्राह्मणानां महात्मनाम् ॥ नो चेत्पुरं परित्यज्य यास्यामोऽन्यत्र भूतले ॥ ७ ॥ तेषां तद्वचनं श्रुत्वा ततोंऽबा कृपयान्विता ॥ हत्वा पादप्रहारेण भूमिं चक्रे गुहां ततः ॥ ८ ॥ तस्यां स्वे पादुके न्यस्य ततः प्रोवाच देवताः ॥ सर्वास्ता नतसर्वांगीर्विनयेन समन्विताः ॥ ९ ॥ इमे मत्पादुके दिव्ये गुहामध्यगते सदा ॥ सर्वाभिः सेवनीये च न गन्तव्यं बहिः क्वचित् ॥ १० ॥ या काचिल्लौल्यमास्थाय निष्क्रमिष्यति मोहतः ॥ सा दिव्यभावनिर्मुक्ता शृगाली संभविष्यति ॥ ११ ॥ ॥ देवता ऊचुः ॥ ॥ अत्र स्थाने महादेवि कोऽस्माकं प्रकरिष्यति ॥ पूजां को वात्र चाहारस्तस्माद्ब्रूहि सुरेश्वरि ॥ १२ ॥ ॥ अम्बोवाच ॥ ॥ अत्रागत्य विनिर्मुक्ता योगिनो ध्यानचिन्तकाः ॥ पूजां सम्यक्करिष्यंति सर्वासां भक्तिसंयुताः ॥ १३ ॥ पादुके मे प्रपूज्यादौ मांसमद्यादिभिः क्रमात् ॥ अवाप्स्यंति च संसिद्धिं दुर्लभाममरैरपि ॥ १४ ॥ ततस्तथेति ताः प्रोच्य गुहामध्ये व्यवस्थिताः ॥ परिवार्य शुभे तस्याः पादुके मोक्षदायिके ॥ १५ ॥ ततस्तत्र समागत्य पुरुषा अपि दूरतः ॥ प्रपूज्य पादुके सम्यङ्मातॄस्ताश्च ततः परम् ॥ प्रयांति च परां सिद्धिं जन्ममृत्युविवर्जिताम् ॥ १६ ॥ एतस्मिन्नंतरे नष्टा अग्निष्टोमादिकाः क्रियाः ॥ तीर्थयात्राव्रतान्येव संयमा नियमाश्च ये ॥ १७ ॥ ये चापि ब्राह्मणाः शांताः सदा मद्यस्य दूषणम् ॥ प्रकुर्वंति स्वहस्तेन तेऽपि मद्यैः पृथग्विधैः ॥ १८ ॥ तर्पयंति तथा मांसैस्त्यक्ताशेषमखक्रियाः ॥ पादुके मातृभिर्जुष्टे तथा धूपानुलेपनैः ॥ १९ ॥ एतस्मिन्नंतरे भीताः सर्वे देवाः सवासवाः ॥ दृष्ट्वा यज्ञक्रियोच्छेदं क्षुत्पिपासासमाकुलाः॥२०॥ प्रोचुर्महेश्वरं गत्वा विनयावनताःस्थिताः ॥ स्तुत्वा पृथग्विधैः सूक्तैर्वेदोक्तैः शतरुद्रियैः ॥ २१ ॥ ॥ देवा ऊचुः ॥ ॥ हाटकेश्वरजे क्षेत्रे पादुके तत्र संस्थिते ॥ अंबाया मातृभिः सार्धं गुहामध्ये सुगुप्तके ॥ २२ ॥ ब्राह्मणा अपि देवेश मद्यमांसेन भक्तितः ॥ ताभ्यां पूजां प्रकुर्वंति प्रयांति परमां गतिम् ॥ २३ ॥ नष्टा धर्मक्रिया सर्वा मर्त्यलोकेत्र सांप्रतम् ॥ अस्माकं संक्षयो जातो यज्ञभागं विना प्रभो ॥२४॥ तस्मात्त्वं कुरु देवेश यथा स्यात्पादुकाक्षयः ॥ प्रभवंति मखा भूमावस्माकं स्युः परा मुदः ॥२५॥ ॥ श्रीभगवानुवाच ॥ ॥ या सा अंबेति विख्याता शक्तिः सा परमेश्वरी ॥ जगन्माताऽक्षया साक्षान्ममापि जननी च सा ॥ २६ ॥ तत्कथं संक्षयस्तस्याः कर्तुं केनापि शक्यते ॥ मनसापि महाभागाः पादुकानां विशेषतः ॥ २७ ॥ परं तत्र करिष्यामि 

१ स्तोत्रैः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुखोपायं सुरेश्वराः ॥ युष्मभ्यं पादुकाभ्यां च महत्त्वं येन जायते ॥ २८ ॥ एवमुक्त्वा ततो ध्यानं चक्रे देवो महेश्वरः ॥ व्यावृत्यकमलं हृत्स्थम ष्टपत्रं सकर्णिकम् ॥ २९ ॥ तस्यांतर्गतमासीनमंगुष्ठाग्रमितं शुभम् ॥ द्वादशार्कप्रभं सूक्ष्मं स्वमात्मानं व्यलोकयत् ॥ ३० ॥ तस्यैवं ध्याय मानस्य तृतीयनयनात्ततः ॥ श्वेतांबरधरा शुभ्रा निर्गता कन्यका शुभा ॥ ३१ ॥ अथ सा प्राह तं देवं प्रणिपत्य महेश्वरम् ॥ किमर्थं देव सृष्टास्मि ममादेशः प्रदीयताम् ॥ ३२ ॥ ॥ श्रीभगवानुवाच ॥ ॥ हाटकेश्वरजे क्षेत्रे पादुके संस्थिते शुभे ॥ श्रीमातुर्जगतां मुख्ये ताभ्यां पूजां त्वमांचर[1] ॥ ३३ ॥ कन्यकां संपरित्यज्य तवांन्वयविवर्द्धिताम्[2] ॥ यः करिष्यति तत्पूजामाहारः स्यात्स मातृषु ॥ ३४ ॥ कौमारब्रह्मचर्य्येण त्वयापि च सुभक्तितः ॥ ताभ्यां पूजा प्रकर्तव्या नो चेन्नाशमवाप्स्यसि ॥ ३५ ॥ तव पूजां करिष्यन्ति ये नरा भक्तितत्पराः ॥ मातॄणां संमतास्ते स्युः सर्वदैव सुखान्विताः ॥ ३६ ॥ एवमुक्त्वा ततस्तस्या मंत्रमार्गं यथोचितम् ॥ पूजामार्गं विशेषेण कथयामास विस्तरात् ॥ ३७ ॥ ततो विसर्जया मास दत्त्वा छत्रादिभूषणम् ॥ प्रतिपत्तिं महादेवस्तांश्च सर्वान्सुरेश्वरान् ॥ ३८ ॥ ॥ कुमार्युवाच ॥ ॥ त्वयैतत्कथितं देव त्वदन्वयसमुद्भवाः ॥ कन्यकाः पूजयिष्यंति पादुके ते सुशोभने ॥ ३९ ॥ कौमारब्रह्मचर्य्येण भविष्यत्यन्वयः कथम् ॥ एतन्मे विस्तरात्सर्वं यथावद्वक्तुमर्हसि ॥ ४० ॥ ॥ ॥ श्रीभगवानुवाच ॥ ॥ यस्यायस्याः प्रसन्ना त्वं कन्यकाया वदिष्यसि ॥ मंत्रग्राममिमं सम्यक्त्वद्भावा सा भविष्यति ॥ ४१ ॥ एवं चान्या महाभागे पारंपर्येण कन्यकाः ॥ तव वंशोद्भवाः सर्वाः प्रभविष्यंति मंत्रतः ॥ ४२ ॥ ततः सा तां समासाद्य पादुकासंभवां गुहाम् ॥ पूजां चक्रे यथान्यायं यथोक्तं त्रिपुरारिणा ॥ ४३ ॥ ॥ सूत उवाच ॥ ॥ तदन्वयसमुत्थायाः कन्यकायाः करेण यः ॥ पादुकाभ्यां नरः पूजां प्रकरोति समाहितः ॥ इह लोके सुखं प्राप्य स स्यात्प्रेत्य सुखान्वितः ॥ ४४ ॥ तस्मात्सर्वप्रयत्नेन कन्याहस्तेन पादुके ॥ पूजनीये विशेषेण पूज्या सा चापि कन्यका ॥ ४५ ॥ वांछद्भिः शाश्वतं सौख्यमिह लोके परत्र च ॥ मानवैर्भक्तिसंयुक्तैरित्युवाच महेश्वरः ॥ ४६ ॥ एतद्वः सर्वमा ख्यातं माहात्म्यं पादुकोद्भवम् ॥ श्रीमातुरनुषंगेण अंबादेव्या द्विजोत्तमाः ॥ ४७ ॥ यश्चैतच्छृणुयाद्भक्त्या चतुर्दश्यां समाहितः ॥ तथाष्टम्यां विशेषेण स प्राप्नोति परं पदम् ॥ ४८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये श्रीमातुः पादुकामाहात्म्यवर्णनंनामैकोननवतितमोऽध्यायः ॥ ८९ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ अग्नितीर्थं त्वया प्रोक्तं ब्रह्मतीर्थं च

[1] त्वमाहर–इ० पा० । [2] तवान्वयविवर्जिताम्–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



यत्पुरा ॥ न तयोः कथितोत्पत्तिर्माहात्म्यं च महामते ॥ १ ॥ तस्माद्विस्तरतो ब्रूहि एकैकस्य पृथक्पृथक् ॥ न वयं तृप्तिमापन्नाः शृण्वंतस्ते वचोऽमृतम् ॥ २ ॥ ॥ सूत उवाच ॥ ॥ अत्र वः कीर्तयिष्यामि कथां पातकनाशिनीम् ॥ अग्नितीर्थसमुद्भूतां सर्वसौख्यावहां शुभाम् ॥ ३ ॥ सोमवंशसमुद्भूतः प्रतीपोनाम[1] भूपतिः ॥ पुरासीच्छौर्यसंपन्नो ब्रह्मज्ञानविचक्षणः ॥ ४ ॥ तस्य पुत्रद्वयं जज्ञे सर्वलक्षणलक्षितम् ॥ देवापिः प्रथमस्तत्र द्वितीयः शंतनुर्द्विजाः ॥ ५ ॥ अथो शिवपदं[2] प्राप्ते प्रतीपे नृपसत्तमे ॥ तपोऽर्थं राज्यमुत्सृज्य देवापिर्निर्ययौ वनम् ॥ ६ ॥ ततश्च मंत्रिभिः सर्वैः शंतनुस्तस्य चानुजः ॥ पितृपैतामहे राज्ये सत्वरं सन्नियोजितः ॥ ७ ॥ एतस्मिन्नंतरे शक्रो न ववर्ष क्रुद्धाऽन्वितः ॥ यावद्द्वादशवर्षाणि तस्मिन्राज्यं प्रशासति ॥ ८ ॥ अतः कृच्छ्रं गतः सर्वो लोकः क्षुत्परिपीडितः ॥ चामुंडासदृशो जातो यो न मृत्युवशंगतः ॥ ९ ॥ संत्यक्ताः पतिभिर्नार्यः पुत्राश्च पितृभिर्निजैः ॥ मातरश्च तथा पुत्रैर्लोकेष्वन्येषु का कथा ॥ १० ॥ दैवयोगात्कचित्किंचित्कस्यचिद्यदि दृश्यते ॥ सस्यं सिद्धमसिद्धं वा ह्रियते वीर्यतः परैः ॥ ११ ॥ शुष्का महीरुहाः सर्वे तथा ये च जलाशयाः॥ नद्यश्च स्वल्पतोयाश्च गंगाद्या अपि संस्थिताः ॥ १२ ॥ एवं वृष्टेः क्षये जाते नष्टे धर्मपथे तथा ॥ लोकेऽस्मिन्नस्थिसंघातैः पूरिते भस्मना वृते ॥ १३ ॥ न कश्चिद्यजनं चक्रे न स्वाध्यायं न च व्रतम् ॥ एवमालोक्यते व्योम वृष्ट्यर्थं क्षुत्समाकुलैः ॥ १४ ॥ एतस्मिन्नेव काले तु विश्वामित्रो महामुनिः ॥ चर्मास्थिशेषसर्वांगो बुभुक्षार्त इतस्ततः ॥ १५ ॥ परिभ्रमंस्ततः प्राप्य कंचिद्ग्रामं निरुद्वसम् ॥ मृतमर्त्योद्भवैर्व्याप्तमस्थिसंघैः समंततः ॥ १६ ॥ अथ तत्र भ्रमन्प्राप्तश्चंडालस्य निवेशनम् ॥ शून्ये गोऽस्थिसमाकीर्णे दुर्गंधेन समावृते ॥ १७ ॥ अथापश्यन्मृतं तत्र सारमेयं चिरोषितम् ॥ संशुष्कं गन्धनिर्मुक्तं गृहप्रांते व्यवस्थितम् ॥ १८ ॥ समादाय ततस्तं च आपद्धर्मपरायणः ॥ प्रक्षाल्य सलिले पश्चात्प्रचकर्त तदा मुनिः ॥ १९ ॥ ततश्च श्रपयामास सुसमिद्धे हुताशने ॥ क्षुत्क्षामो भोजनार्थाय ततः पाकाग्रमेव च ॥ २० ॥ समादाय पितॄंस्तर्प्य यावदग्नौ जुहोति सः ॥ तावद्वह्निः परित्यज्य समस्तमपि भूतलम् ॥ २१ ॥ गतश्चादर्शनं सद्यः सर्वेषां क्षितिवासिनाम् ॥ चित्ते कोपं समाधाय शक्रस्योपरि भूरिशः ॥ २२ ॥ एतस्मिन्नंतरे वह्नौ मर्त्यलोकाद्विनिर्गते ॥ विशेषात्पीडिता लोका येऽवशिष्टा धरातले ॥ २३ ॥ एतस्मिन्नंतरे देवा ब्रह्मविष्णुपुरःसराः ॥ वह्नेरन्वेषणार्थाय बभ्रमुर्धरणीतले ॥ २४ ॥ अथ तैर्भ्रममाणैश्च प्रदृष्टोऽभूद्गजो महान् ॥ निश्वसन्पतितो भूमौ वह्नितापप्रपीडितः ॥ २५ ॥ अथ देवा गजं दृष्ट्वा पप्रच्छुस्त्वरयाऽन्वि

१ प्रतापोनाम—इ० पा० । २ शिवप्रदं प्राप्ते--भूलोकं परित्यज्य कैलासं गते—मृते—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताः ॥ कच्चित्त्वया स दृष्टोऽत्र कानने पावको गज ॥ २६ ॥ ॥ गज उवाच ॥ ॥ वंशस्तंबेऽत्र संकीर्णे संप्रविष्टो हुताशनः ॥ सांप्रतं तेन निर्दग्धः कृच्छ्रादत्राहमागतः ॥ २७ ॥ अथ तैर्वेष्टितस्तस्मिन्वंशस्तंबे हुताशनः ॥ देवैर्दत्त्वा गजेंद्रस्य शापं पश्चाद्विनिर्गतः ॥ ॥ २८ ॥ यस्मात्त्वयाहमादिष्टो देवानां वारणाधम ॥ तस्मात्तव मुखे जिह्वा विपरीता भविष्यति ॥ २९ ॥ एवं शप्त्वा गजं शीघ्रं नष्टो वैश्वानरः पुनः ॥ देवाश्चापि तथा पृष्ठे संलग्नास्तद्दिदृक्षया ॥ ३० ॥ अथ दृष्टः शुकस्तैश्च भ्रममाणैर्महावने ॥ भोभोः शुक त्वया वह्निर्यदि दृष्टो निवेद्यताम् ॥ ३१ ॥ शुक उवाच ॥ ॥ योऽयं संदृश्यते दूराच्छमीगर्भे च पिप्पलः ॥ एतस्मिंस्तिष्ठते वह्निरश्वत्थे सुरसत्तमाः ॥ ३२ ॥ अत्रस्थो यः कुलायो म आसीच्छिशुसमन्वितः ॥ संदग्धस्तत्प्रतापेन अहं कृच्छ्राद्विनिर्गतः ॥३३॥ तच्छ्रुत्वा तैः सुरैः सर्वैः शमीगर्भः स तत्क्षणात् ॥ वेष्टितः पावकोऽप्याशु शुकं शप्त्वा विनिर्गतः ॥ ३४ ॥ अहं यस्मात्त्वया पाप देवानां संनिवेदितः ॥ तस्माच्छुक न ते वाणी विस्पष्टा संभविष्यति ॥ ३५ ॥ एवमुक्त्वा जातवेदा देवादर्शनवांछया ॥ हाटकेश्वरजे क्षेत्रे देवस्य परमेष्ठिनः ॥ ३६ ॥ जलाशयं सुगम्भीरं पूर्वोत्तरदिक्संस्थितम् ॥ दृष्ट्वा तत्र प्रविष्टस्तु निभृतं च समाश्रितः ॥ ३७ ॥ एतस्मिन्नंतरे तत्र मत्स्यकच्छपदर्दुराः ॥ वह्निप्रतापनिदग्धा दृश्यंते शतशो मृताः ॥ ३८ ॥ अथ चैकोऽर्धनिर्दग्ध आयुःशेषेण दर्दुरः ॥ तस्माज्जलाद्विनिष्क्रांतो दृष्टो देवैश्च दूरतः ॥ ३९ ॥ पृष्टश्च ब्रूहि चेद्भेक त्वया दृष्टो हुताशनः ॥ तदर्थमिह संप्राप्ताः सर्वे देवाः सवासवाः ॥ ४० ॥ ॥ भेक उवाच ॥ ॥ अस्मिञ्जलाशये वह्निः सांप्रतं पर्यवस्थितः ॥ तस्यैते जलमध्यस्था मृता भूरिजलोद्भवाः ॥ ४१ ॥ अस्माकं निधनं प्राप्तं कुटुम्बं सुरसत्तमाः ॥ अहं कृच्छ्रेण निष्क्रांत एतस्माज्जलसंश्रयात् ॥ ४२ ॥ तच्छ्रुत्वा ते सुराः सर्वे सर्वतस्तं जलाशयम् ॥ वेष्टयित्वा स्थितास्तत्र वह्निर्भेकं शशाप ह ॥ ४३ ॥ यस्माद्भेक त्वया मूढ देवेभ्योऽहं निवेदितः ॥ तस्मात्त्वं भविता नूनं विजिह्वोऽत्र धरातले ॥ ४४ ॥ एवमुक्त्वा ततः स्थानात्ततो वह्निर्विनिर्गतः ॥ तावत्स ब्रह्मणा प्रोक्तः स्वयमेव महात्मना ॥ ४५ ॥ भोभो वह्ने किमर्थं त्वं देवान्दृष्ट्वा प्रगच्छसि ॥ त्वमाद्यश्चैव सर्वेषामेतेषां संस्थितो मुखम् ॥ ४६ ॥ त्वय्याहुतिर्हुता सम्यगादित्यमुपतिष्ठते ॥ आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥ ४७ ॥ तस्माद्धाता विधाता च त्वमेव जगतः स्थितः ॥ संतुष्टे धार्यते विश्वं त्वयि रुष्टे विनंक्ष्यति ॥ ४८ ॥ अग्निष्टोमादिका यज्ञास्त्वयि सर्वे प्रतिष्ठिताः ॥ अथ सर्वाणि भूतानि जीवंति तव संश्रयात् ॥ ४९ ॥ त्वमग्ने सर्वभूतानामन्तश्चरसि सर्वदा ॥ तेनैवाऽन्नं

१ च करिणं गतः—इ० पा० । २ धरापृष्ठे—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

च पानं च जठरस्थं पचत्यलम् ॥ ५० ॥ तस्मात्कुरु प्रसादं त्वं सर्वेषां च दिवौकसाम् ॥ कोपस्य कारणं ब्रूहि यतस्त्यक्त्वा प्रगच्छसि ॥ ५१ ॥
॥ ॥ सूत उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा देवस्य परमेष्ठिनः ॥ प्रोवाच प्रणयात्कोपं कृत्वा नत्वा च पद्मजम् ॥ ५२ ॥ ॥ अग्निरुवाच ॥ ॥
अहं कोपं समाधाय शक्रस्योपरि पद्मज ॥ प्रणष्टो जगदुत्सृज्य यस्मात्तत्कारणं शृणु ॥ ५३ ॥ अनावृष्ट्या महेन्द्रस्य संजातश्चौषधीक्षयः ॥ ततोऽ
स्म्यहं श्वमांसेन विश्वामित्रेण योजितः ॥ ५४ ॥ एतस्मात्कारणान्नष्टो न कामान्न च संभ्रमात् ॥ अभक्ष्यभक्षणाद्भीतः सत्यमेतन्मयोदितम् ॥५५॥
तच्छ्रुत्वा स चतुर्वक्त्रः शक्रमाह ततः परम् ॥ युक्तमेव शिखी प्राह किमर्थं न च वर्षसि ॥ ५६ ॥ ॥ शक्र उवाच ॥ ॥ ज्येष्ठं भ्रातरमुल्लंघ्य शंतनुः
पृथिवीपतिः ॥ पितृपैतामहे राज्ये स निविष्टः पितामह ॥ ५७ ॥ एतस्मात्कारणाद्वृष्टिः संनिरुद्धा मया प्रभो ॥ तद्ब्रूहि किं करोम्यद्य त्वं प्रमाणं
पितामह ॥ ५८ ॥ ॥ पितामह उवाच ॥ ॥ तस्याक्रमस्य संप्राप्तं पापं तेन महीभुजा ॥ उपभुक्तमवृष्ट्याद्य तस्माद्वृष्टिं कुरु द्रुतम् ॥ ५९ ॥ मद्वा
क्याद्याति नो नाशं यावदेतज्जगत्त्रयम् ॥ अकालेनापि देवेन्द्र सस्याभावाद्बुभुक्षया ॥ ६० ॥ एतस्मिन्नंतरे शक्र आदिदेश त्वरान्वितः ॥ पुष्करावर्त
कान्मेघान्वृष्ट्यर्थं धरणीतले ॥ ६१ ॥ तेऽपि शक्रसमादेशात्समस्तधरणीतलम् ॥ तत्क्षणात्पूरयामासुर्गर्जन्तो विद्युदन्विताः ॥ ६२ ॥ अथाब्रवी
त्पुनर्ब्रह्मा देवैः[1] सार्धं हुताशनम् ॥ अग्निहोत्रेषु विप्राणां प्रत्यक्षो भव पावक ॥ सांप्रतं त्वं वरं मत्तः प्रार्थयस्वाभिवांछितम् ॥ ६३ ॥ ॥ अग्निरु
वाच ॥ ॥ अयं जलाशयः पुण्यो मन्नाम्ना पृथिवीतले ॥ ख्यातिं यातु चतुर्वक्त्र वह्नितीर्थमिति स्मृतम्[2] ॥६४॥ अत्र यः प्रातरुत्थाय स्नात्वा श्रद्धा
समन्वितः ॥ अग्निसूक्तं जपित्वा च त्वां प्रपश्यति सादरम् ॥ तस्य तुष्टिस्त्वया कार्या द्रुतं मद्वाक्यतः प्रभो ॥ ६५ ॥ ॥ श्रीब्रह्मोवाच ॥ ॥ अत्र
यः प्रातरुत्थाय स्नात्वा वै वेदविद्द्विजः ॥ अग्निसूक्तं जपित्वा च वीक्षयिष्यति मां ततः ॥ ६६ ॥ अग्निष्टोमस्य यज्ञस्य सकलं लप्स्यते
फलम् ॥ अनेकजन्मजं पापं नाशमेष्यति पावक ॥ ६७ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वा स भगवान्विरराम पितामहः ॥ पावकोऽपि च
विप्राणामग्निहोत्रेषु संस्थितः ॥ ६८ ॥ एवं तत्र समुद्भूतं वह्नितीर्थं महाद्भुतम् ॥ तत्र स्नातो नरः प्रातः सर्वपापैः प्रमुच्यते ॥ ६९ ॥ ॥ अग्नि
रुवाच ॥ ॥ ममातृप्तस्य लोकेश तावद्द्वादशवत्सरान् ॥ क्षुत्पीडासंवृते मर्त्ये न प्राप्तं कुत्रचिद्धविः ॥ ७० ॥ भविष्यंति तथा यज्ञा कालेन महता
विभो ॥ संजातैः पशुभिर्भूयः सस्याद्यैरपरैर्[3] भुवि ॥ ७१ ॥ ॥ श्रीब्रह्मोवाच ॥ ॥ अत्र ये ब्राह्मणाः केचिन्निवसंति हुताशन ॥ वसोर्द्धाराप्रदानेन



१ देवः–इ० पा० । २ श्रुतम्–इ० पा० । ३ अपि–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ते त्वां नक्तंदिनं सदा ॥ ७२ ॥ तर्पयिष्यंति सद्भक्त्या ततः पुष्टिमवाप्स्यसि ॥ तेऽपि काम्यैर्मनोऽभीष्टैर्भविष्यंति समन्विताः ॥ ७३ ॥ संक्रांति समये येषां वसोर्द्धाराप्रदायिनाम् ॥ भविष्यति क्षुतं वह्ने हूयमाने तवानल ॥ ७४ ॥ तेषां पापं च यत्किंचिज्ज्ञानतोऽज्ञानतः कृतम् ॥ तद्यास्यति क्षयं सर्वमाजन्ममरणांतिकम् ॥ ७५ ॥ त्वयि तुष्टिं गते पश्चाद्भविष्यति महीपतिः ॥ शिबिर्नाम सुविख्यात उशीनरसमुद्भवः ॥ ७६ ॥ स कृत्वा श्रद्धया युक्तः सत्रं द्वादशवार्षिकम् ॥ वसोर्द्धाराप्रदानेन वर्षं त्वां तर्पयिष्यति ॥ कलशस्य च वक्रेणाविच्छिन्नेन दिवानिशम् ॥ ७७ ॥ ततस्तुष्टिं परां प्राप्य परां पुष्टिमवाप्स्यसि ॥ पूज्यमानो धरापृष्ठे सर्वैर्वेदविदां वरैः ॥ ७८ ॥ अद्यप्रभृति यत्किंचित्कर्म चात्र भविष्यति ॥ शांतिकं पौष्टिकं वापि वसोर्द्धारासमन्वितम् ॥ संभविष्यति तत्सर्वं तव तृप्तिकरं परम् ॥ ७९ ॥ अपि यद्वैश्वदेवीयं कर्म किंचिद्द्विजन्मनाम् ॥ वसोर्द्धाराविहीनं च निष्फलं संभविष्यति ॥ ८० ॥ यस्माद्भवति संपूर्णं कर्म यज्ञादिकं हि तत् ॥ शांतिकं वैश्वदेवं च पूर्णाहुतिरिहोच्यते ॥ ८१ ॥ यः सम्यक्छ्रद्धया युक्तो वसोर्द्धारां प्रदास्यति ॥ स कामं मनसा ध्यातं समवाप्स्यति कृत्स्नशः ॥ ८२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखंडे हाटकेश्वरक्षेत्रमाहात्म्ये वसोर्द्धारामाहात्म्यवर्णनंनाम नवतितमोऽध्यायः ॥ ९० ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वा स भगवान्विरराम पितामहः ॥ संतोष्य पावकं क्रुद्धं स्वयमेव द्विजोत्तमाः ॥ १ ॥ ततः सर्वैः सुरैः सार्धं शक्रविष्णुशिवादिभिः ॥ जगाम ब्रह्मलोकं च देवास्ते च निजं पदम् ॥ २ ॥ पावकोऽपि द्विजेंद्राणामग्निहोत्रेषु संस्थितः ॥ हविर्जग्राह विधिवद्वसोर्द्धारोद्भवं तथा ॥ ३ ॥ एवं तत्र समुद्भूतमग्नितीर्थमनुत्तमम् ॥ यत्र स्नातो नरः प्रातर्मुच्यते दिनजादघात् ॥ ४ ॥ अथ संप्रस्थितान्दृष्ट्वा तान्देवान्स्वाश्रमं प्रति ॥ गजेंद्रशुकमण्डूकास्ते प्रोचुर्दुःखसंयुताः ॥५॥ युष्मत्कृते वयं शप्ताः पावकेन सुरेश्वराः ॥ तस्माज्जिह्वाकृतेऽस्माकमुपायश्चिंत्यतामपि ॥६॥ ॥ देवा ऊचुः ॥ ॥ विपरीतापि ते जिह्वा यथान्येषां गजोत्तम ॥ कार्यक्षमा न संदेहो भविष्यति विशेषतः ॥ ७ ॥ तथा यूयं नरेन्द्राणां मंदिरेषु व्यवस्थिताः ॥ बहुमानसमायुक्ता मृष्टान्नं भक्षयिष्यथ ॥ ८ ॥ यथा च शुक ते जिह्वा कृता मंदा हविर्भुजा ॥ तथापि भूमिपालानां शंसनीया भविष्यति ॥ ९ ॥ श्रीमतां च तथान्येषामस्मदीयप्रसादतः ॥ त्वं च मंडूक यत्तेन विजिह्वो वह्निना कृतः ॥ तद्भविष्यति ते शब्दो विजिह्वस्यापि दीर्घगः ॥ १० ॥ एव

१ वह्नितीर्थं महाद्भुतम्-इ० पा० । २ सर्वपापैः प्रमुच्यते-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



मुक्काऽथ ते देवाः स्वं स्थानं प्रस्थितास्ततः ॥ तेषामनुग्रहं कृत्वा कृपया परया युताः ॥ ११ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्येऽग्नितीर्थोत्पत्तिवर्णनंनामैकनवतितमोऽध्यायः ॥ ९१ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ अग्नितीर्थस्य माहात्म्यमेतद्वः परिकीर्तितम् ॥ ब्रह्मकुंडसमुत्पत्तिरधुना श्रूयतां द्विजाः ॥ १ ॥ यदा संस्थापितो ब्रह्मा मार्कंडेन महात्मना ॥ तदा विनिर्मितं तत्र कुण्डं शुचिजलान्वितम् ॥ २ ॥ प्रोक्तं च कार्तिके मासि कृत्तिकास्थे निशाकरे ॥ सम्यग्भीष्मव्रतं कृत्वा स्नात्वात्र सलिले शुभे ॥ ३ ॥ पूजयिष्यति यो देवं पद्मयोनिं ततः परम् ॥ स शूद्रोऽपि तनुं त्यक्त्वा ब्रह्मयोनौ प्रयास्यति ॥ ४ ॥ ब्राह्मणोऽपि यदि स्नानं तत्र कुण्डे करिष्यति ॥ कृत्वा भीष्मव्रतं सम्यग्ब्रह्मलोकं प्रयास्यति ॥ ५ ॥ एवं प्रवदतस्तस्य मार्कंडेयस्य सन्मुनेः ॥ श्रुतं तत्सकलं वाक्यं पशुपालेन केनचित् ॥ ६ ॥ ततः श्रद्धाप्रयुक्तेन तेन तद्भीष्मपंचकम् ॥ यथावद्विहितं सम्यक्कार्तिके मासि संस्थिते ॥ ७ ॥ ततश्च कृत्तिकायोगे पूर्णिमायां यथाविधि ॥ संपूज्य पद्मजं पश्चात्पूजितः पुरुषोत्तमः ॥ ८ ॥ ततः कालविपाकेन स पंचत्वमुपागतः ॥ ब्राह्मणस्य गृहे जातः पुरेऽत्रैव द्विजोत्तमाः ॥ जातिस्मरः प्रभायुक्तः पितृमातृप्रतुष्टिदः ॥ ९ ॥ एवं प्रगच्छतस्तस्य वृद्धिं तत्र पुरोत्तमे ॥ पितृमातृसमुद्भूतो यादृक्स्नेहो व्यवस्थितः ॥ १० ॥ अन्यदेहोद्भवे वापि तस्य शूद्रेपरिस्थितः ॥ स तस्य [1]धनसंपन्नः सदैव कुरुते द्विजः ॥ ११ ॥ उपकारप्रदानं च यत्किंचित्तस्य संमतम् ॥ अन्यस्मिन्दिवसे शूद्रः स पिता पूर्वजन्मनः ॥ तस्य पञ्चत्वमापन्नः संप्राप्ते चायुषः क्षये ॥ १२ ॥ अथ तस्य महाशोकं स कृत्वा तदनंतरम् ॥ चकार प्रेतकार्याणि निःशेषाणि प्र[2]भक्तितः ॥ १३ ॥ अथ तस्य समालोक्य तादृशं तद्विचेष्टितम् ॥ पृष्टः स कौतुकाविष्टैः पितृमातृसुतादिभिः ॥ १४ ॥ कस्मात्त्वमस्य नीचस्य पशुपालस्य सर्वदा ॥ अतिस्नेहसमायुक्तो निःस्पृहस्यापि शंस नः ॥ १५ ॥ तस्यापि प्रेतकार्याणि मृतस्यापि करोषि किम् ॥ एतन्नः सर्वमाचक्ष्व न चेद्गुह्यं व्यवस्थितम् ॥ १६ ॥ तेषां तद्वचनं श्रुत्वा किंचिल्लज्जासमन्वितः ॥ तानब्रवीच्छृणुध्वं च कथयिष्याम्यसंशयम् ॥ १७ ॥ अहमस्यान्यदेहत्वे पुत्र आसं सुसंमतः ॥ पशुपालनकर्मज्ञः प्राणेभ्यो वल्लभः सदा ॥ १८ ॥ कस्यचित्त्वथ कालस्य मार्कंडस्य महामुनेः ॥ श्रुतं प्रवदतो वाक्यं ब्रह्मकुण्डसमुद्भवम् ॥ १९ ॥ कार्तिक्यां कृत्तिकायोगे भीष्मपञ्चककृन्नरः ॥ सम्यक्छ्रद्धासमुत्पन्नो योऽत्र स्नानं करिष्यति ॥ २० ॥ दृष्ट्वा पितामहं देवं पूजयित्वा जनार्दनम् ॥ स भविष्यति शूद्रोऽपि ब्राह्मणश्चान्यजन्मनि ॥ २१ ॥ तन्मया

॥ ९९ ॥

१ स तस्य धर्मसंपात्तिं सदैव कुरुते द्विजः—इ०पा० । २ प्रसक्तितः—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विहितं सम्यक्स्नात्वा तत्र शुभावहे ॥ सुकुण्डे कार्तिके मासि तेन जातोऽस्मि सद्द्विजः ॥ २२ ॥ चन्द्रोदयस्य विप्रर्षेरन्वये भुवि विश्रुते ॥ संस्मरन्पूर्विकां जाति तेन स्नेहो मम स्थितः ॥ तस्योपरि महान्नित्यं शूद्रस्यापि निरर्गलः ॥ २३ ॥ अतोऽहं कृत्तिकायोगे कार्तिक्यां भक्ति संयुतः ॥ ज्ञात्वा करोमि भीष्मस्य पंचकं व्रतमुत्तमम् ॥ २४ ॥ ॥ सूत उवाच ॥ ॥ एवं तस्य वचः श्रुत्वा ते चान्ये च द्विजोत्तमाः ॥ भीष्मस्य पञ्चकं चक्रुः सम्यक्छ्रद्धासमन्विताः ॥ २५ ॥ ततःप्रभृति तत्कुण्डं विख्यातं धरणीतले ॥ स्थितमुत्तरदिग्भागे ब्रह्मकुण्डमिति स्मृतम् ॥ ॥ २६ ॥ यः स्नानं सर्वदा तत्र ब्राह्मणः प्रकरोति वै ॥ स संभवति विप्रेंद्रो जायमानः पुनःपुनः ॥ २७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये ब्रह्मकुण्डमाहात्म्यवर्णनंनाम द्विनवतितमोऽध्यायः ॥९२॥ ॥ सूत उवाच ॥ ॥ अथान्यदपि तत्रास्ति गोमुखाख्यं सुशोभनम् ॥ यद्गोवक्रात्पुरा लब्धं सर्वपातकनाशनम् ॥ १ ॥ पुरासीदत्र गोपालः कश्चित्कुष्ठसमावृतः ॥ चमत्कारपुरे विप्र अतीव क्षामतां गतः ॥ २ ॥ कस्यचित्त्वथ कालस्य तेन मार्गेण गोकुलम् ॥ मध्याह्नसमये प्राप्तं चंद्रे चित्रासमन्विते[1] ॥ ३ ॥ एकादश्यां तृषार्त्तं च भास्करे वृषसंस्थिते ॥ एकयापि ततो धेन्वा तृणस्तम्बमतीव हि ॥ नीलमालोकितं तत्र दूरादेत्य प्रहर्षिता ॥ ४ ॥ दन्तैर्द्रुतं समुत्पाट्य यावदाकर्षति द्विजाः ॥ तावत्तज्जडमार्गेण[2] तोयधारा विनिर्गता ॥ ५ ॥ अथास्वाद्य तृणं तस्मात्तृषार्ता च शनैःशनैः ॥ पपौ तोयं सुविश्रब्धा सुस्वादु क्षीरसंनिभम् ॥ ६ ॥ तस्या वेगेन तत्तोयं पिबन्त्यास्तत्र भूतले ॥ गर्ता जाता सुविस्तीर्णा सलिलेन समावृता ॥ ७ ॥ ततोऽन्याः शतशो गावः पपुस्तोयं सुनिर्मलम् ॥ तृषार्त्तास्तद्द्विजश्रेष्ठाः पीयूषरससंनिभम् ॥ ८ ॥ यथायथा गता गावस्तत्र तोयं पिबंति ताः ॥ सा गर्ता वक्रसंस्पर्शाद्वृद्धिं याति तथातथा ॥ ९ ॥ ततश्च गोकुले कृत्स्ने जाते तृष्णाविवर्जिते ॥ गोपालोऽपि तृषार्तस्तु तस्मिंस्तोये विवेश च ॥ १० ॥ अंगं प्रक्षाल्य पीत्वापो यावन्निष्क्रामति द्रुतम् ॥ तावत्पश्यति गात्रं स्वं द्वादशार्कसमप्रभम् ॥ ११ ॥ ततो विस्मयमापन्नो गत्वा स्वीयं निकेतनम् ॥ वृत्तांतं कथयामास लोकानां पुरतोऽखिलम् ॥ १२ ॥ तृणस्तम्बं यथा धेन्वा तत्रोत्पाट्य प्रशक्तितः ॥ यथा विनिर्गतं तोयं यथा तेनावगाहितम् ॥ १३ ॥ तद्दृष्ट्वा मानवाः सर्वे गत्वा दिव्यं जलं च तत् ॥ व्याधिग्रस्ता विशेषेण स्नानं चक्रुः समाहिताः ॥१४॥ भवंति च विनिर्मुक्ता रोगैः पापैश्च तत्क्षणात्॥ अपापाश्च पुनर्यांति तत्क्षणात्त्रिदिवालयम् ॥ १५ ॥ ततःप्रभृति तत्ख्यातं तीर्थं गोमुखसंज्ञितम् ॥ गोमुखाद्भूतले जातं यतश्चैव[3] द्विजोत्तमाः ॥ १६ ॥

१ चन्द्रे चित्रासमं स्थिते–इ० पा० । २ जडमार्गेण–मूलमार्गेण–इत्यर्थः । 'जड' शब्दो मूलवाचकः प्रायः सर्वभाषाप्रसिद्धः । ३ एतत्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



अथ भीतः सहस्राक्षस्तद्दृष्ट्वा स्वर्गदायकम् ॥ अक्लेशेन मनुष्याणां पूरयामास पांसुभिः ॥ १७ ॥ ॥ ऋषय ऊचुः ॥ ॥ किं तत्कारणमादिष्टं येन तत्तादृशं जलम् ॥ तस्मात्स्थानाद्विनिष्क्रांतं सूतपुत्र वदस्व नः ॥ १८ ॥ ॥ सूत उवाच ॥ ॥ अंत्र पूर्वं तपस्तत्तमम्बरीषेण भूभुजा ॥ पुत्रशोकाभिभूतेन तोषितो गरुडध्वजः ॥ १९ ॥ तस्य पुत्रः सुविख्यातः सुवर्चा इति विश्रुतः ॥ एको बभूव वृद्धत्वे कथंचिद्द्विजसत्तमाः ॥ २० ॥ पूर्वकर्मविपाकेन स बालोऽपि च तत्सुतः ॥ कुष्ठव्याधिसमाक्रांतः पितृमातृसुदुःखदः ॥ २१ ॥ अथ तत्कामिकं क्षेत्रं स गत्वा पृथिवीपतिः ॥ चकार रोगनाशाय स्वपुत्रार्थं ²महत्तपः ॥ २२ ॥ ततस्तुष्टिं गतस्तस्य स्वयमेव जनार्दनः ॥ प्रदाय दर्शनं वाक्यं ततः प्रोवाच सादरम् ॥ २३ ॥ परितुष्टोऽस्मि ते वत्स तस्माच्चित्तेऽभिवांछितम् ॥ प्रार्थयस्व प्रयच्छामि वरं पुत्र न संशयः ॥ २४ ॥ ॥ राजोवाच ॥ ॥ ममायं संमतः पुत्रो ग्रस्तः कुष्ठेन केशव ॥ बालोऽपि तत्कुरुष्वास्य कुष्ठव्याधिपरिक्षयम् ॥ २५ ॥ ॥ श्रीभगवानुवाच ॥ ॥ एष आसीत्पुरा राजा मेघवाहनसंज्ञितः ॥ ब्रह्मण्यश्च कृतज्ञश्च सर्वशास्त्रार्थपारगः ॥ २६ ॥ कस्यचित्त्वथ कालस्य ब्राह्मणोऽनेन घातितः ॥ अंतःपुरे निशाकाले प्रविष्टो जारकर्मकृत् ॥ २७ ॥ अथ पश्यति यावत्स प्रभातेऽभ्युदिते रवौ ॥ यज्ञोपवीतसंयुक्तस्तावत्स द्विजरूपधृक् ॥ २८ ॥ अथ तं ब्राह्मणं मत्वा घृणाविष्टः सुदुःखितः ॥ गत्वा काशीपुरीं पश्चात्तपश्चक्रे समाहितः ॥ २९ ॥ राज्ये पुत्रं समाधाय वैराग्यं परमं गतः ॥ नियतो नियताहारो भिक्षान्नकृतभोजनः ॥ ३० ॥ ततः कालेन संप्राप्तो यमस्य सदनं प्रति ॥ विपाप्मापि च चिह्नेन युक्तोऽयं पृथिवीपतिः ॥ ३१ ॥ ब्रह्मघातोद्भवेनैव बालभावेऽपि संस्थिते ॥ येऽत्र कुष्ठसमायुक्ता दृश्यंते मानवा भुवि ॥ तैर्नूनं ब्राह्मणाघातो विहितश्चान्यजन्मनि ॥ ३२ ॥ हाटकेश्वरजे क्षेत्रे यो गत्वा श्राद्धमाचरेत् ॥ पितॄणां चैव सर्वेषामनृणः स प्रजायते ॥ ३३ ॥ न ब्राह्मणवधाद्बाह्यं³ कुष्ठव्याधिः प्रजायते ॥ एतत्सत्यं विजानीहि वदतो मम भूपते ॥ ३४ ॥ ॥ अंबरीष उवाच ॥ ॥ एतदर्थं सुराधीश मया त्वं पूजितः प्रभो ॥ प्रसन्ने त्वयि देवेश नासाध्यं विद्यते भुवि ॥ ३५ ॥ एवमुक्तस्ततस्तेन भगवान्मधुसूदनः ॥ पातालजाह्नवीतोयं स सस्मार समाधिना ॥ ३६ ॥ सा ध्याता सहसा तेन विष्णुना प्रभविष्णुना ॥ कृत्वा तु विवरं सूक्ष्मं विनिष्क्रांताऽथ तत्क्षणात् ॥ ३७ ॥ ततः प्रोवाच वचनमंबरीषं चतुर्भुजः ॥ निमज्जतु सुतस्तेऽत्र सुपुण्ये जाह्नवीजले ॥ ३८ ॥ येन कुष्ठविनिर्मुक्तस्तत्क्षणादेव जायते ॥ तथा ब्रह्मवधोद्भूतैः पातकैरुपपातकैः ॥ ३९ ॥ एतस्मिन्नेव काले तु समानीय सुतं नृपः ॥ स्नापयामास तत्तोयैः प्रत्यक्षं शार्ङ्गध



१ तत्र—इ० पा० । २ साम्प्रतम्—इ० पा० । ३ बाह्यम्--विना--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्वनः ॥ ४० ॥ ततः स बालकः सद्यः स्नातमात्रो द्विजोत्तमाः ॥ कुष्ठव्याधिविनिर्मुक्तो जातो बालार्कसंनिभः ॥ ४१ ॥ ततः प्रणम्य तं देवं हर्षेण महताऽन्वितः ॥ पित्रा समं जगामाथ स्वकीयं भवनं द्विजाः ॥ ४२ ॥ तस्मिन्गते महीपाले सपुत्रे तत्क्षणाद्धरिः ॥ तद्रंध्रं पूरयामास यथा नो वेत्ति कश्चन ॥ ४३ ॥ एतस्मात्कारणात्पूर्वं तत्तोयं सर्वपापहृत् ॥ यद्गोमुखेन भूयोऽपि भूतले प्रकटीकृतम् ॥ ४४ ॥ अद्यापि तज्जलस्पर्शात्सु पवित्रो धरातले ॥ यः स्नानं सूर्यवारेण कुरुतेऽर्कोदयं प्रति ॥ तस्य नाशं द्रुतं यांति गलगंडादिका इह ॥ ४५ ॥ व्याधयोपि महारौद्रा दद्रुपामासमुद्भवाः ॥ उपसर्गोद्भवाश्चैव विस्फोटकविचर्चिकाः ॥ ४६ ॥ निष्कामस्तु पुनर्मर्त्यो यः स्नानं तत्र भक्तितः[1] ॥ कुरुते याति लोकं स देवदेवस्य चक्रिणः ॥ ४७ ॥ यस्मिन्दिने समानीता सा गंगा तत्र विष्णुना ॥ तस्मिन्दिने वृषे सूर्यः स्थितश्चित्रासु चंद्रमाः ॥ ४८ ॥ तिथिश्चैकादशी चैव देवदेवस्य शार्ङ्गिणः ॥ गोवक्त्रेण तृणस्तंबं यस्मिंश्चैव तु वासरे ॥ समाकृष्टं च तत्रैव योग एवं व्यवस्थितः ॥ ४९ ॥ तथान्येऽपि दिने तस्मिन्यदि तोयमवाप्य च ॥ स्नानं करोति सद्भक्त्या तत्फलं सोऽपि चाप्नुयात् ॥ ५० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये गोमुखतीर्थमाहात्म्यवर्णनंनाम त्रिनवतितमोऽध्यायः ॥ ९३ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तथान्या लोहयष्टिस्तु तस्मिन्क्षेत्रेऽतिशोभना ॥ मुक्ता परशुरामेण भंक्त्वा निजकुठारकम् ॥ १ ॥ तां दृष्ट्वा मानवः सम्यगुपवासपरायणः ॥ मुच्यते हि स्वकात्पापात्तत्क्षणाद्द्विजसत्तमाः ॥ २ ॥ ॥ ऋषय ऊचुः ॥ ॥ कुतः परशुरामेण भंक्त्वा निजकुठारकम् ॥ निर्मिता लोहयष्टिः सा तत्रोत्सृष्टा च सा कुतः ॥ ३ ॥ ॥ सूत उवाच ॥ ॥ यदा रामो ह्रदं कृत्वा तर्पयित्वा निजान्पितॄन् ॥ गतामर्षो द्विजेन्द्राणां दत्त्वा यज्ञे वसुन्धराम् ॥ ४ ॥ ततः संप्रस्थितो हृष्टो धृत्वा मनसि सागरम् ॥ स्नानार्थं तं समादाय कुठारं भास्करप्रभम् ॥ ५ ॥ तदा स मुनिभिः प्रोक्तः सर्वैस्तत्क्षेत्रवासिभिः ॥ वांछद्भिस्तु हितं तस्य सदा शमपरायणैः ॥ ६ ॥ रामराम महाभाग यद्धारयसि पाणिना ॥ शस्त्रं पूर्णप्रतिज्ञोऽपि तन्न युक्तं भवेत्तव ॥ ७ ॥ अनेन करसंस्थेन तव कोपः कथंचन ॥ न यास्यति शरीरस्थस्तस्मादेनं परित्यज ॥ ८ ॥ तेषां तद्वचनं श्रुत्वा ततो रामः कृतांजलिः ॥ प्रोवाच विनयोपेतः प्रहसंस्तान्द्विजोत्तमान् ॥ ९ ॥ कुठारश्चैव विप्रेंद्रा रुद्रतेजोद्भवेन च ॥ लोहेन निर्मितः पूर्वमक्षयो विश्वकर्मणा ॥ १० ॥ तदहं संपरित्यज्य कथमेनं द्विजोत्तमाः ॥ क्षत्रधर्मपरोऽप्येवं प्रगच्छामि दिगंतरम् ॥ ११ ॥ यदि चैनं मया मुक्तं कुठारं च द्विजोत्तमाः ॥ ग्रहीष्यति परः कश्चिन्मम वध्यो भविष्यति ॥ १२ ॥

१ भक्तिपूर्वकम्–इ० पा० । २ एतेन—वैशाखशुक्लैकादशी तिथिरस्य तीर्थस्य प्रादुर्भावतिथिरवगम्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



नापराधमिमं शक्तः सोढुं चाहं कथंचन ॥ अपि ब्राह्मणमुख्यस्य जनस्यान्यस्य का कथा ॥ १३ ॥ तथापि नास्ति मे शांतिर्मुक्तेऽप्यस्मिन्द्विजो
त्तमाः ॥ गृहीतेऽपि च युष्माभिस्तस्माद्रक्ष्यः प्रयत्नतः ॥ १४ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ यद्येवं त्वं महाभाग रक्षार्थं संप्रयच्छसि ॥ अस्माकं
तत्र भंक्त्वाशु पिंडं कृत्वा समर्पय ॥ १५ ॥ येन रक्षामहे सर्वे परमं यत्नमाश्रिताः ॥ न च गृह्णाति वा कश्चिद्गते कालांतरेऽपि च ॥ १६ ॥ तेषां
तद्वचनं श्रुत्वा रामः शस्त्रभृतां वरः ॥ चक्रे लोहमयीं यष्टिं तं भंक्त्वा सकुठारकम् ॥ १७ ॥ ततः स ब्राह्मणेंद्राणामर्पयामास सादरम् ॥ रक्षार्थं
भार्गवश्रेष्ठो विनयावनतः स्थितः ॥ १८ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ लोहयष्टिमिमां राम त्वत्कुठारसमुद्भवाम् ॥ वयं संरक्षयिष्यामः पूजयि
ष्याम एव हि ॥ १९ ॥ यथा शक्तिमयी कीर्तिः स्कन्दस्यात्र प्रतिष्ठिता ॥ लोहयष्टिमयी तद्वत्तव राम भविष्यति ॥ २० ॥ भ्रष्टराज्यस्तु यो
राजा एनामाराधयिष्यति ॥ स्वं राज्यमचिरात्प्राप्य स प्रतापी भविष्यति ॥ २१ ॥ विद्याकृते द्विजो वा यः सदैनां पूजयिष्यति ॥ स विद्यां
परमां प्राप्य सर्वज्ञत्वं प्रपत्स्यते ॥ २२ ॥ अपुत्रो वा नरो योऽथ नारी वा पूजयिष्यति ॥ एतां यष्टिं त्वदीयां च पुत्रवान्स भविष्यति ॥ २३ ॥
उपवासपरो भूत्वा यश्चैनां पूजयिष्यति ॥ आश्विनस्यासिते पक्षे चतुर्दश्यां विशेषतः ॥ २४ ॥ स प्राप्स्यति सदा कामानभीष्टान्मनसि स्थितान्॥
॥ २४ ॥ एवं श्रुत्वा ततो रामस्तेषामेव द्विजन्मनाम् ॥ प्रणम्य प्रययौ तूर्णं समुद्रसदनं प्रति ॥ २६ ॥ तेऽपि विप्रास्ततस्तस्याश्चक्रुः प्रासाद
मुत्तमम् ॥ तत्र संस्थाप्य तां चक्रुस्ततः पूजां समाहिताः ॥ २६ ॥ प्राप्नुवंति च तत्पार्श्वात्कामानेव हृदि स्थितान् ॥ सुस्तोकेनाऽपि कालेन दुर्लभां
स्त्रिदशैरपि ॥ २७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये लोहयष्टिमाहात्म्यवर्णनं
नाम चतुर्णवतितमोऽध्यायः ॥ ९४ ॥ ॥ सूत उवाच ॥ ॥ अथान्यापि च तत्रास्ति देवी कामप्रदा नृणाम् ॥ अजापालेन भूपेन स्थापिता
पापनाशनी ॥ १ ॥ तां च शुक्लचतुर्दश्यामजापालेश्वरीं नरः ॥ यो वै पूजयते भक्त्या धूपपुष्पानुलेपनैः ॥ स प्राप्नोतीप्सितान्कामान्दुर्लभा
न्सर्वमानवैः ॥ २ ॥ तस्या देव्याः प्रसादेन सत्यमेतन्मयोदितम् ॥ अजापालो महीपालः पुराऽऽसीत्संमतः सताम् ॥ ३ ॥ हितकृत्सर्व
लोकस्य यथा माता यथा पिता ॥ तेन राज्यं समासाद्य पितृपैतामहं शुभम् ॥ ४ ॥ चिंतितं मनसा पश्चात्स्वयमेव महात्मना ॥ 
मया तत्कर्म कर्तव्यं यदन्यैरिह भूमिपैः ॥ न कृतं न करिष्यंति ये भविष्यन्त्यतः परम् ॥ ५ ॥ एष एव परो धर्मो भूपतीना
मुदाहृतः ॥ यत्प्रजापालनं शश्वत्तासां च सुखसंस्थितिः ॥ ६ ॥ यथायथा करं भूपास्तासां गृह्णंति लोलुपाः ॥ तथातथा मनः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षोभो हृदये संप्रजायते ॥ ७ ॥ न करेण विना भूपा हस्त्यश्वादिबलं च यत् ॥ शक्नुवंति परित्रातुं पादातं च विशेषतः ॥ ८ ॥ विना तेन स गम्यः स्यान्नीचानामपि सत्वरम् ॥ एतस्मात्कारणाद्भूपाः करं गृह्णंति लोकतः ॥ ९ ॥ तस्मान्मया विनाप्याशु नागैश्चैव नरैस्तथा ॥ तपः शक्त्या प्रकर्तव्यं राज्यं निहतकण्टकम् ॥ १० ॥ करानगृह्णता तेन लोकान्रंजयता सदा ॥ अन्येषां भूमिपालानां विशेषेण महात्मनाम् ॥ ११ ॥ एवं चित्ते समाधाय वसिष्ठं मुनिपुंगवम् ॥ पुरोधसं समाहूय ततः प्रोवाच सादरम् ॥ १२ ॥ अत्र भूमितले विप्र सर्वेषां तीर्थमुत्तमम् ॥ अल्पकालेन सन्तुष्टिं यत्र याति महेश्वरः ॥ वासुदेवोऽथवा ब्रह्मा ह्येतच्छीघ्रं वदस्व मे ॥ १३ ॥ येनाहं सर्वलोकस्य हितार्थं तप आददे ॥ न स्वार्थं ब्राह्मण श्रेष्ठ सत्येनात्मानमालभे ॥ १४ ॥ ॥ वसिष्ठ उवाच ॥ ॥ तिस्रः कोटयोर्धकोटी च तीर्थानामिह भूतले ॥ संति पार्थिवशार्दूल प्रभावसहितानि च ॥ १५ ॥ अष्टषष्टिस्तथा राजन्क्षेत्राणामस्ति भूतले ॥ येषां सांनिध्यमभ्येति सर्वदैव महेश्वरः ॥ १६ ॥ तथा सर्वे सुरास्तुष्टा ब्रह्मविष्णुशिवादयः ॥ परं सिद्धिप्रदं शीघ्रं मानुषाणां महीपते ॥ १७ ॥ हाटकेश्वरदेवस्य क्षेत्रं पातकनाशनम् ॥ देवानामपि सर्वेषां तुष्टिं गच्छति चंडिका ॥ १८ ॥ शीघ्रमाराधिता सम्यक्छ्रद्धायुक्तैर्नरैर्भुवि ॥ तस्मात्तत्क्षेत्रमासाद्य तां देवीं श्रद्धयान्वितः ॥ आराधय महाभाग द्रुतं सिद्धिमवाप्स्यसि ॥ ॥ १९ ॥ एवमुक्तः स तेनाथ गत्वा तत्क्षेत्रमुत्तमम् ॥ प्रतिष्ठाप्य च देवीं तां पूजयामास भक्तितः ॥ २० ॥ ब्रह्मचर्यपरो भूत्वा शुचिर्व्रतपरायणः ॥ नियतो नियताहारस्त्रिकालं स्नानमाचरन् ॥ २१ ॥ एवमाराध्यतस्तत्र गन्धपुष्पानुलेपनैः ॥ पूजापरस्य सा देवी तस्य तुष्टिं ततो गता ॥ २२ ॥ ॥ देव्युवाच ॥ ॥ परितुष्टास्मि ते वत्स व्रतेनानेन नित्यशः ॥ बलिपूजाविधानेन विहितेनामुना स्वयम् ॥ २३ ॥ तद्ब्रूहि येन ते सर्वं प्रकरोमि हृदि स्थितम् ॥ सद्य एव महीपाल त्रिदशैरपि दुर्लभम् ॥ २४ ॥ ॥ राजोवाच ॥ ॥ लोकानां हितकामेन मयैतद्व्रतमाहृतम् ॥ येन तेषां भवेत्सौख्यं मत्प्रसादादनुत्तमम् ॥२५॥ तस्माद्देहि महाभागे ज्ञानयुक्तानि भूरिशः ॥ ममास्त्राणि विचित्राणि स्वैरगाणि समन्ततः ॥२६॥ यानि जानंति भूपृष्ठे मम पार्श्वे स्थितान्यपि ॥ अपराधं सदा लोके परदारादि यत्कृतम् ॥ २७ ॥ अनुरूपं ततस्तस्य पातकस्य विनिग्रहम् ॥ प्रकुर्वंति मिथो येन न तेषां संकरो भवेत् ॥२८॥ मंत्रग्रामं तथा देवि मम देहि पृथग्विधम् ॥ निग्रहं व्याधिसत्त्वानां येन शीघ्रं करोम्यहम् ॥२९॥ येन स्युर्मनुजाः सर्वे मम राज्ये सुखान्विताः ॥ नीरोगाः पुष्टिसंपन्ना भयशोकविवर्जिताः ॥ ३० ॥ नाहं देवि करिष्यामि हस्त्यश्वरथसंग्रहम् ॥ यतस्तेषां भवेत्पुष्टिर्वित्तैर्वित्तं करैर्भवेत् ॥ गृहीतैः सर्वलोकानां तस्मात्तन्न ममेप्सितम् ॥ ३१ ॥ ॥ श्रीदेव्युवाच ॥ ॥ अत्यद्भुततरं कर्म त्वयैतत्पृथिवीपते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



प्रारब्धं यत्र केनापि कृतं न च करिष्यति ॥ ३२ ॥ तथाप्येवं करिष्यामि तव दास्यामि कृत्स्नशः ॥ ज्ञानयुक्तानि शस्त्राणि मंत्रग्रामं च तादृशम् ॥ ३३ ॥ गृह्यन्ते येन ते सर्वे व्याधयोऽपि सुदारुणाः ॥ परं सदैव ते रक्ष्या मन्मन्त्रैरपि संयुताः ॥ ३४ ॥ यदि दृष्टिपथात्तुभ्यं[1] क्वचिद्यास्यंति दूरतः ॥ मानवान्पीडयिष्यंति चिरात्प्राप्याधिकं ततः ॥ ३५ ॥ यदा त्वं पृथिवीपाल स्वर्गं यास्यसि भूतलात् ॥ तदात्र सलिले स्थाप्या मदग्रे यद्व्यवस्थितम्[2] ॥ ३६ ॥ सर्वे मंत्रास्तथाऽस्त्राणि मम वाक्यादसंशयम् ॥ येन स्यात्पूर्ववत्सर्वो व्यवहारो नृपोद्भवः ॥ ३७ ॥ ॥ सूत उवाच ॥ ॥ बाढमित्येव तेनोक्ते तत्क्षणाद्द्विजसत्तमाः ॥ प्रादुर्भूतानि दिव्यानि तस्यास्त्राणि बहूनि च ॥ ३८ ॥ ज्ञानसंपत्प्रयुक्तानि यादृशानि महात्मनः ॥ तेन संयाचितान्येव व्याधिमंत्रास्तथैव च ॥ ३९ ॥ व्याधयो यैश्च गृह्यंते मुच्यंते स्वेच्छया सदा ॥ सुखेन परिपाल्यंते दृष्टिगोचरसंस्थिताः ॥ ॥ ४० ॥ ततस्तं सकलं प्राप्य प्रसादं चंडिकोद्भवम् ॥ तच्च हस्त्यादिकं सर्वं ब्राह्मणेभ्यो ददौ नृपः ॥ ४१ ॥ एकां मुक्त्वा निजां भार्यामेकं दशरथं सुतम् ॥ तांश्चापि सकलान्व्याधीन्मंत्रैः संयम्य यत्नतः ॥ ४२ ॥ अजारूपान्स्वयं पश्चाद्यष्टिमादाय रक्षति ॥ एवं तस्य नरेन्द्रस्य वर्तमानस्य भूतले ॥ ४३ ॥ गुप्तोऽपि नापराधः स्यात्कस्यचित्प्रकटः कुतः ॥ प्रमादाद्यदि भूलोके कश्चित्पापं समाचरेत् ॥ ४४ ॥ तद्रूपो निग्रहस्तस्य तत्क्षणादेव जायते ॥ वधं वा यदि वा बंधं क्लेशं चाऽरातिसंभवम् ॥ ४५ ॥ अदृष्टान्यपि शस्त्राणि तानि कुर्वंति तत्क्षणात् ॥ अन्येषां च महीपानां राज्ये गुप्तान्यनेकशः ॥ कुर्वन्ति मनुजास्तेषां चक्रे वैवस्वतो ग्रहम् ॥ ४६ ॥ न तत्र भयसंत्रस्तस्ततः पापं समाचरेत् ॥ प्रत्यक्षं वा विशेषेण ज्ञात्वा शस्त्रभयं च तत् ॥ ४७ ॥ ततस्ते पापनिर्मुक्ता लोकाः संशुद्धगात्रकाः ॥ रोगेषु निगृहीतेषु प्राप्ताः सुखमनुत्तमम् ॥ ४८ ॥ एवं स्थितेषु लोकेषु गतपापामयेषु च ॥ प्रयाताः शून्यतां सर्वे नरका ये यमालये ॥ ४९ ॥ न कश्चिन्नरकं याति न च मृत्युपथं नरः ॥ यथा कृतयुगं तादृक्त्रेतायामपि संस्थितम् ॥ ५० ॥ व्यवहारे ततो नष्टे यमलोकसमुद्भवे ॥ स्वर्गेण तुलयतां प्राप्ते प्राणिभिर्मृत्युवर्जितैः ॥ ५१ ॥ ततो वैवस्वतो गत्वा ब्रह्मणः सदनं प्रति ॥ प्रोवाच दुःखसंपन्नः प्रणिपत्य पितामहम् ॥ ५२ ॥ अहं पुरा त्वया देव धर्माधर्मदिदृक्षया ॥ मानुषाणां समादिष्टो निग्रहानुग्रहं प्रति ॥ ५३ ॥ अजापालेन भूपेन तत्सर्वं विफलीकृतम् ॥ तपःशक्त्या सुरश्रेष्ठ देवीमाराध्य चंडिकाम् ॥ ५४ ॥ नाधयो व्याधयस्तत्र न पापानि महीतले ॥ कस्यचिद्देव जायंते यथा कृतयुगे तथा ॥ ५५ ॥ तस्मात्कुरु सुरश्रेष्ठ पुनरेव यथा पुरा ॥ मदीयभवने कृत्स्नो व्य[3]वहारः प्रजा



१ तुभ्यम्—तव—इत्यर्थः । २ सलिलम्—इत्यस्य विशेषणम्—यत्सलिलं मदग्रे व्यवस्थितम्—अत्र सालिले—सर्वे मंत्राः मम वाक्यात् असंशयं स्थाप्याः—च अस्त्राणि स्थाप्यानि—इति योजना बोद्धव्या । ३ यथा इत्यध्याहारः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यते ॥ ५६ ॥ तस्य तद्वचनं श्रुत्वा ब्रह्मा लोकपितामहः ॥ समीप उपविष्टस्य शिवस्याऽऽस्यं व्यलोकयत् ॥ ५७ ॥ अथाब्रवीत्प्रहस्योच्चै स्त्रिनेत्रश्चतुराननम् ॥ अत्यद्भुततमां श्रुत्वा तां वार्तां यमसंभवाम् ॥ ५८ ॥ ॥ महेश्वर उवाच ॥ ॥ धर्ममार्गप्रवृत्तस्य सदाचारस्य भूपतेः ॥ कथं निवारणं तत्र क्रियते कश्च निग्रहः ॥ ५९ ॥ तस्मात्तेन महीपेन यस्मान्मार्गः प्रदर्शितः ॥ अपूर्वो धर्मसंभूतः कृतः स म्यङ्महात्मना ॥ ६० ॥ तन्मयापि यथा चास्य प्रसादः सुरसत्तम ॥ अपूर्वः करणीयश्च यथा धर्मो न दुष्यति ॥ ६१ ॥ एवमुक्त्वा चतुर्वक्त्रं यमं प्राह ततः शिवः ॥ वदायुषोऽस्य यच्छेषमजापालस्य भूपतेः ॥ येन तत्समये प्राप्ते तं नयामि निजालयम् ॥ ६२ ॥ ॥ ॥ यम उवाच ॥ ॥ पञ्चवर्षसहस्राणि तस्यातीतानि चायुषः ॥ तिष्ठंति पञ्चपञ्चाशत्प्रतीक्ष्येऽहं ततः कथम् ॥ ६३ ॥ यावत्कालं सुरश्रेष्ठ शून्ये जाते स्व आश्रये ॥ तस्मात्कुरु द्रुतं कंचिदुपायं तद्विनाशने ॥ ६४ ॥ एवमुक्ते यमेनाथ तं विसृज्य गृहं प्रति ॥ व्याघ्ररूपं समास्थाय स्वयं तत्संनिधौ ययौ ॥ ६५ ॥ यत्र संस्थो महीपः स प्रजापालनतत्परः ॥ मेघगम्भीरनिर्घोषं गर्जमानो मुहुर्मुहुः ॥ ६६ ॥ अजास्तास्तं च संवीक्ष्य व्याघ्रं रौद्रवपुर्द्धरम् ॥ अजापालं समुद्दिश्य संत्रस्ताः शरणं गताः ॥ ६७ ॥ तस्य यत्नपरस्यापि रक्षमाणस्य भूपतेः॥ अजास्ता व्याघ्ररूपेण शंकरेण प्रभक्षिताः ॥ ६८ ॥ अजानां कदनं दृष्ट्वा ततः स पृथिवीपतिः ॥ स्वहस्ताद्यष्टिमुत्सृज्य जग्राह निशितायुधम् ॥ ॥ ६९ ॥ यत्तस्य तुष्टया दत्तं चंडं चंडार्चिषा[1] समम् ॥ तच्छस्त्रं च तथान्यानि देवीदत्तानि शंकरः ॥ शनैःशनैः प्रजग्राह स्वचक्रेण महेश्वरः ॥ ॥ ७० ॥ अस्त्राभावात्ततस्तूर्णं ध्रियमाणेऽपि कांतया ॥ द्वंद्वयुद्धेन तं व्याघ्रं योधयामास भूपतिः ॥ ७१ ॥ ततस्तस्यांगसंस्पर्शान्मुक्त्वा व्याघ्रतनुं च ताम् ॥ दधार भस्मसंदिग्धां तनुं चन्द्रविभूषिताम् ॥ ७२ ॥ रुंडमालाधरां दिव्यां सखट्वांगां सपन्नगाम् ॥ तां दृष्ट्वा स महीपालः सभार्यः प्रणतस्ततः ॥ ७३ ॥ प्रोवाचाथ स्तुतिं कृत्वा विनयावनतः स्थितः ॥ आनंदाश्रुपरिक्लिन्नो हर्षगद्गदया गिरा ॥ ७४ ॥ ॥ राजोवाच ॥ ॥ अज्ञानाद्यन्मया देव प्रहारास्तव निर्मिताः ॥ तिरस्कारस्तथा दत्तस्तत्सर्वं क्षम्यतां विभो ॥ ७५ ॥ ॥ श्रीभगवानुवाच ॥ ॥ क्षांत एष मया पुत्र तव सर्वः पराभवः ॥ परितुष्टेन ते कर्म दृष्ट्वा चैवातिमानुषम् ॥ ७६ ॥ यथा कृतं त्वया राज्यं प्रजाः संरक्षिता नृप ॥ तथान्यो भूपतिः कश्चिन्न कर्ता न करिष्यति ॥ ७७ ॥ तस्माद्गच्छ मया सार्धं पाताले पार्थिवोत्तम ॥ अनेनैव शरीरेण धर्मपत्न्यानया सह ॥ ७८ ॥

१ चंडार्चिषा—सूर्येण—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

नातः परं त्वया स्थेयं मर्त्यलोके कथंचन ॥ विरुद्धं सर्वदेवानां यतः कर्म त्वदुद्भवम् ॥ ७९ ॥ ॥ राजोवाच ॥ ॥ एवं देव करिष्यामि गत्वाऽयोध्यां महापुरीम् ॥ पुत्रं राज्ये प्रतिष्ठाप्य मंत्रिणां संनिवेद्य च ॥ ८० ॥ तथाहं देव देव्या च प्रोक्तः संतुष्टया पुरा ॥ मन्त्रग्रामो यया दत्तः शस्त्राणि विविधानि च ॥ ८१ ॥ यदा त्वं त्यजसि प्राज्ञ मर्त्यलोकं सुदुस्त्यजम् ॥ तदात्र मामके कुण्डे प्रक्षेप्तव्यानि कृत्स्नशः ॥ ८२ ॥ तानि चार्पय मे भूयो येनानृण्यं व्रजाम्यहम् ॥ तस्या देव्याः सुराधीश त्वत्प्रसादेन सांप्रतम् ॥ ८३ ॥ एवमुक्तस्ततस्तेन भगवांस्त्रिपुरांतकः ॥ आज्ञाप्य तानि सर्वाणि ददौ तत्र द्रुतं गतः ॥ ८४ ॥ अब्रवीच्च सुतस्तत्र स्वयं राजा भविष्यति ॥ वीर्यौदार्यसमोपेतो वंशस्योद्धरणक्षमः ॥ ८५ ॥ त्वं चागच्छ मया सार्धमद्यैव मम मंदिरे ॥ प्रविश्यात्र जले पुण्ये देवीकुण्डसमुद्भवे ॥ ८६ ॥ अद्य माघचतुर्दश्यां शुक्लायामपरोऽपि यः ॥ देवीमिमां च संपूज्य जलेऽस्मिन्भक्तिसंयुतः ॥ ८७ ॥ करिष्यति प्रवेशेन प्राणत्यागं नृपोत्तम ॥ स च यास्यति यत्रास्ते पाताले हाटकेश्वरः ॥ ८८ ॥ स्नानं वा पार्थिवश्रेष्ठ यः करिष्यति मानवः ॥ अष्टोत्तरशतं तस्य व्याधीनां न भविष्यति ॥ ॥ ८९ ॥ एवमुक्त्वा तमादाय नृपं भार्यासमन्वितम् ॥ अजाभिस्ताभिरस्त्रैश्च तैश्चापि परमेश्वरः ॥ प्रविवेश जले तस्मिन्देवीकुण्डसमुद्भवे ॥ ९० ॥ ततश्च मंदिरं नीतः स्वकीयं द्विजसत्तमाः ॥ तेनैव नरदेहेन स कलत्रसमन्वितः ॥ ९१ ॥ अद्यापि तिष्ठते तत्र जरामरणवर्जितः ॥ पूजयानश्च तं देवं पाताले हाटकेश्वरम् ॥ ९२ ॥ एवं तत्र समुद्भूता सा देवी परमेश्वरी ॥ स्थापिता तेन भूपेन श्रद्धापूतेन चेतसा ॥ ९३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्येऽजापालेश्वरीमाहात्म्यवर्णनंनाम पञ्चनवतितमोऽध्यायः ॥ ॥ ९५ ॥ ॥छ॥ ॥ सूत उवाच ॥ ॥ एवं तस्मिन्गते भूपे ह्यजापाले रसातलम् ॥ तत्पुत्रश्चाभवद्राजा मंत्रिभिस्तु पुरस्कृतः ॥ १ ॥ यो नित्य मगमत्स्वर्गे वासवं रमते सदा ॥ शनैश्चरो जितो येन रोहिणीं परिभेदयन् ॥ २ ॥ गृहे यस्य स्वयं विष्णुर्भूत्वा चैव चतुर्विधः ॥ रावणस्य विनाशार्थं जन्म चक्रे प्रहर्षितः ॥ ३ ॥ तेनागत्यात्र सत्क्षेत्रे तोषितो मधुसूदनः ॥ प्रासादं शोभनं कृत्वा ततश्चैव प्रतिष्ठितः ॥ ४ ॥ तस्यापि विश्रुता वापी स्वयं तेन विनिर्मिता ॥ राजवापीति लोकेऽस्मिन्विख्यातिं परमां गता ॥ ५ ॥ तस्यां यः कुरुते श्राद्धं संप्राप्ते पञ्चमीदिने ॥ प्रेतपक्षे विशेषेण स नरः स्यात्सतां प्रियः ॥ ६ ॥ ॥ ऋषय ऊचुः ॥ ॥ कथं तेन जितः सौरी रोहिणीशकटं च यत् ॥ भिंदानस्तोषितस्तेन कथं नारायणो वद ॥ ७ ॥ ॥ सूत उवाच ॥ ॥ तस्मिञ्छासति धर्मज्ञे स्वधर्मेण वसुन्धराम् ॥ अतिसौख्यान्वितो लोकः सर्वदैव



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यजायत ॥ ८ ॥ बहुक्षीरप्रदा गावः सस्यानि गुणवंति च ॥ कामवर्षी च पर्जन्यो यथर्तुफलिता द्रुमाः ॥ ९ ॥ कस्यचित्त्वथ कालस्य दैवज्ञै
स्तस्य भूपतेः ॥ कथितं रोहिणीभेदं रविपुत्रः करिष्यति ॥ १० ॥ तस्यानंतरमेवाशु दुर्भिक्षं संभविष्यति ॥ अनावृष्टिश्च भविता रौद्रा द्वादश
वार्षिकी ॥ यया संपत्स्यते सर्वं भूतलं गतमानवम् ॥ ११ ॥ तेषां तद्वचनं श्रुत्वा स राजा कुपितोऽभ्यगात् ॥ शनैश्वरं समुद्दिश्य विमानमधि
रुह्य च ॥ १२ ॥ तस्य तुष्टेन संदत्तं विमानं कामगं पुरा ॥ शक्रेण तत्र संतिष्ठञ्छनैश्चरमुपाद्रवत् ॥ १३ ॥ ततः सूर्यपथं मुक्त्वा ततश्चंद्रस्य
पार्थिवः ॥ नक्षत्रसरणिं प्राप्य सज्यं कृत्वा महद्धनुः ॥ १४ ॥ तत्र बाणं समारोप्य शनैश्चरमुपाद्रवत् ॥ प्रोवाच पुरतः स्थित्वा सूर्यपुत्रमधो
मुखम् ॥ १५ ॥ त्यजैनं रोहिणीमार्गं सांप्रतं त्वं शनैश्चर ॥ मद्वाक्यादन्यथाऽहं त्वां नयिष्यामि यमक्षयम् ॥ १६ ॥ एतेन निशिताग्रेण शरेणा
नतपर्वणा ॥ दिव्यास्त्रमंत्रयुक्तेन सत्यमेतद्ब्रवीम्यहम् ॥ १७ ॥ तस्य तद्वचनं श्रुत्वा तादृशोद्रतमं महत् ॥ मन्दो विस्मयमापन्नस्ततश्चेदमभाषत ॥
॥ १८ ॥ कस्त्वं ब्रूहि महाभाग मम मार्गं रुणत्सि यः ॥ अगम्यं केनचिल्लोके सर्वैरपि सुरासुरैः ॥ १९ ॥ ॥ राजोवाच ॥ ॥ अहं दशरथो
नाम सूर्यवंशोद्भवो नृपः ॥ अजस्य तनयः प्राप्तः कामं वारयितुं क्रुधा ॥ २० ॥ ॥ मंद उवाच ॥ ॥ न त्वया सह संबंधः कश्चिदस्ति महीपते ॥
मम यत्त्वं प्रकोपाढ्यो मन्मार्गं हंतुमिच्छसि ॥ २१ ॥ ॥ राजोवाच ॥ ॥ रोहिणीसंभवं त्वं हि शकटं भेदयिष्यसि ॥ सांप्रतं मम दैवज्ञैर्वाक्य
मेतदुदाहृतम् ॥ २२ ॥ तस्मिन्मन्द त्वया भिन्ने न वर्षति शतक्रतुः ॥ एतद्वदंति दैवज्ञा ज्योतिःशास्त्रविचक्षणाः ॥ २३ ॥ जाते वृष्टिनिरोधेऽथ
जायंतेऽन्नानि न क्षितौ ॥ अन्नाभावात्क्षयं यांति ततो भूमितले जनाः ॥ २४ ॥ जनोच्छेदे ततो जाते अग्निष्टोमादिकाः क्रियाः ॥ न भवंति धरा
पृष्ठे ततः स्यादेव संक्षयः॥ २५ ॥ एतस्मात्कारणाद्रुद्धो मार्गस्ते सूर्यसंभव ॥ रोहिणीं गंतुकामस्य सत्यमेतन्मयोदितम् ॥२६॥ ॥ शनिरुवाच ॥ ॥
गच्छ पुत्र निजं गेहं ममापि त्वं च रोचसे ॥ तुष्टोऽहं तव वीर्येण न त्वन्येन महीपते॥२७॥ न केनचित्कृतं कर्म यदेतद्भवता कृतम् ॥ न करिष्यति
चैवान्यो देवो वा मानवोऽथ वा ॥ २८ ॥ नाहं पश्यामि भूपाल कथंचिदपि तूर्ध्वतः॥ यतो दृष्टिविनिर्दग्धं भस्मसाज्जायतेऽखिलम् ॥ २९ ॥ जात
मात्रेण बालेन मया पादौ निरीक्षितौ ॥ तातस्य सहसा दग्धौ ततोऽहं वारितोऽबया ॥ ३० ॥ न त्वया पुत्र द्रष्टव्यं किंचिदेव कथंचन ॥ प्रमाणं
यदि ते धर्मो मातृवाक्यसमुद्भवः ॥ ३१ ॥ तस्मात्त्वया महत्कर्म कृतमीदृक्सुदुष्करम् ॥ प्रजानां पार्थिवश्रेष्ठ त्यक्त्वा दूराद्भयं मम ॥ ३२ ॥ तस्मा

१ यथा–इ० पा० । २ रोहिण्याम्–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तव कृते नाहं भेदयिष्यामि रोहिणीम् ॥ कथंचिदपि भूपाल युगांतरशतेष्वपि ॥ ३३ ॥ वरं वरय चास्माकं तस्मादद्य भविष्यति ॥ हृतत्स्थितं दुर्लभं भूप सर्वेषामिह देहिनाम् ॥ ३४ ॥ ॥ राजोवाच ॥ ॥ तव यो वासरे प्राप्ते तैलाभ्यंगं करोति वै ॥ तस्याऽन्यैदिवसं यावत्पीडा कार्या न च त्वया ॥ ३५ ॥ तिलदानं करोत्येवं लोहदानं च यस्तव ॥ करोति दिवसे शक्त्या यावद्वर्षं त्वया हि सः ॥ ३६ ॥ रक्षणीयः सुकृच्छ्रेषु संकटेषु सदैव हि ॥ त्वयि गोचरपीडायां संस्थिते चार्कसंभव ॥ ३७ ॥ यः कुर्याच्छांतिकं सम्यक्तिलहोमं च भक्तितः ॥ वासरे तव संप्राप्ते समिद्भिश्च तथाऽक्षतैः ॥ ३८ ॥ तस्य सार्धानि वर्षाणि सप्त कार्या प्रयत्नतः ॥ त्वया रक्षा महाभाग वरं चेन्मम यच्छसि ॥ ३९ ॥ ॥ सूत उवाच ॥ ॥ एवमित्येव संप्रोच्य विरराम ततः परम् ॥ शनैश्चरो महीपालवचनाद्विजसत्तमाः ॥ ४० ॥ एतद्वः सर्वमाख्यातं यत्पृष्टोऽहं सुविस्तरात् ॥ भवद्भिः सूर्यपुत्रस्य राज्ञा दशरथेन हि ॥ संवादं रोहिणीभेदे सञ्जातं समुपस्थिते ॥ ४१ ॥ यश्चैतत्पठते नित्यं शृणुयाद्यो विशेषतः ॥ शनैश्चरकृता पीडा तस्य नाशं प्रगच्छति ॥ ४२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये दशरथशनैश्चरसंवादवर्णनंनाम षण्णवतितमोऽध्यायः ॥ ९६ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ ततःप्रभृति नो मन्दो रोहिणीशकटं द्विजाः ॥ भिनत्ति वचनात्तस्य राज्ञो दशरथस्य च ॥ १ ॥ तद्वृत्तांतं समाकर्ण्य तस्य शक्रः प्रहर्षितः ॥ भूपालं तं समभ्येत्य ततश्चोवाच सादरम् ॥ २ ॥ अत्यद्भुततरं कर्म त्वयैतत्पृथिवीपते ॥ संसाधितं यदन्येन मनसापि न चिन्त्यते ॥ ३ ॥ अत एव हि संतुष्टिः सञ्जाताद्य तवोपरि ॥ वरं मत्तो गृहाणाद्य तदभीष्टं हृदि स्थितम् ॥ ४ ॥ ॥ राजोवाच ॥ ॥ त्वया सह सुरश्रेष्ठ मैत्रीं संप्रार्थयाम्यहम् ॥ शाश्वती सर्वकृत्येषु परमां लोकसंस्थिताम् ॥५॥ ॥ इन्द्र उवाच ॥ एवं भवतु राजेंद्र त्वया सह सदा मम ॥ संपत्स्यते सदा मैत्री वसोरिव च शाश्वती ॥ ६ ॥ त्वया सदैव मे पार्श्वे सभायां देवसंनिधौ ॥ आगन्तव्यं विशेषेण येन मैत्री प्रवर्धते ॥७॥ एवमुक्त्वा सहस्राक्षो जगाम त्रिदिवालयम् ॥ राजापि चागतो हर्म्ये स्वकीये हर्षसंयुतः ॥८॥ रक्षयित्वा जगत्सर्वं शनैश्चरकृताद्भयात् ॥ अप्राप्यां प्राप्य संकीर्तिं स्तूयमानस्तु बन्दिभिः ॥ ९ ॥ ततःप्रभृति नित्यं स सन्ध्याकाल उपस्थिते ॥ सायाह्नं संविधायाथ याति शक्रस्य मंदिरे ॥१०॥ तत्र स्थित्वा चिरं श्रुत्वा गंधर्वाणां मनोहरम् ॥ गीतं दृष्ट्वा च नृत्यं च तानादिविहितं शुभम् ॥११॥ विचित्रार्थाः कथाः श्रुत्वा देवर्षीणां मुखाच्युताः ॥ स्वयं च कीर्तयित्वाथ प्रयाति निजमंदिरम्॥१२॥विमानवरमारुह्य हंसबर्हिणनादितम्॥मनोहरपताकाभिः समंताच्च विभूषि

१ अन्यदित्रसंयावत्—अन्यशनित्रासरंयावत्—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तम्॥१३॥यदायदा स निर्याति शक्रस्थानान्निजालयम्॥तदातदाऽऽसने तस्य क्रियतेऽभ्युक्षणं सदा॥१४॥शक्रादेशात्तदा वेत्ति न स भूपः कथंचन ॥ अन्यस्मिन्दिवसे तस्य नारदो मुनिसत्तमः ॥ कथयामास तत्सर्वमभ्युक्षणसमुद्भवम् ॥ १५ ॥ वृत्तांतं तस्य राजर्षेस्तस्यैव गृहमागतः ॥ तीर्थयात्राप्रसंगेन विद्वेषपरिवृद्धये ॥ १६ ॥ तच्छ्रुत्वा नारदेनोक्तं श्रद्धेयमपि भूपतिः ॥ न चक्रे हृदयेऽधर्ममात्मानं परिचिंतयन् ॥ १७ ॥ तथापि कौतुकाविष्टो गत्वा शक्रनिवेशनम् ॥ अन्यस्मिन्दिवसे स्थित्वा चिरं तत्र समुत्थितः ॥ १८ ॥ अलक्ष्यं वीक्षयामास स्वासनं दूरमास्थितः ॥ किंचित्सञ्जांतरं प्राप्य कौतूहलसमन्वितः ॥ १९ ॥ ततः शक्रसमादेशादुत्थाय सुरकिंकरः ॥ प्रोक्षयामास तोयेन पार्थिवस्य तदासनम् ॥ २० ॥ तद्दृष्ट्वा कोपसंपन्नः स राजाऽभ्येत्य वासवम् ॥ प्रोवाच किमिदं शक्र प्रोक्ष्यते यन्ममासनम् ॥ २१ ॥ किं मया निहता विप्राः किं वा विप्रसमुद्भवम् ॥ शासनं लोपितं किंचित्किं वा विप्रा विनिंदिताः ॥ २२ ॥ किं वा नष्टोऽस्मि संग्रामे दृष्ट्वा शत्रून्समागतान् ॥ दैन्यं वा जल्पितं तेषां भयत्रस्तेन चेतसा ॥ २३ ॥ मम राज्येऽथवा शक्र दुर्बलो बलवत्तरैः ॥ पीड्यते वाथ चौराद्यैर्मुष्यते वंचकैस्तथा ॥ २४ ॥ किं वा राज्ये मदीये च जायते योनिविप्लवः ॥ संकरो वाथ वर्णानां परित्यक्तविधिक्रमः ॥ २५ ॥ किं वा दुर्जनवाक्येन दूषितो दोषवर्जितः ॥ दंडयते मम राज्ये च केनचित्रिदशेश्वर ॥ २६ ॥ किं वा चौरोऽथ पापो वा गृहीतो दोषवान्स्वयम् ॥ मुच्यते द्रव्यलोभेन तथान्यो वा जुगुप्सितः ॥ २७ ॥ किंस्विन्मया परित्यक्तः कोऽप्यत्र शरणागतः ॥ भयत्रस्तः सुभीतेन प्राणानां त्रिदशाधिप ॥ २८ ॥ कस्य वा पृष्ठमांसानि भक्षितानि मया क्वचित् ॥ कच्चिच्च त्रिदशाधीश ब्राह्मणस्य विशेषतः ॥ २९ ॥ किं वा दानं मया दत्त्वा ब्राह्मणाय महात्मने ॥ पश्चात्तापः कृतः पश्चाद्वृत्तं चोपेक्षितं च वा ॥ ३० ॥ किं वा राज्ये मदीये च दीनानां प्रपतंति च ॥ अश्रुपाता दिवारात्रं दुःखितानां समंततः ॥ ३१ ॥ दैवं वा पैतृकं वापि किं वा कर्म गृहे मम ॥ लोपं गच्छति देवेन्द्र क्रियते वा विधिच्युतम् ॥ ३२ ॥ यत्त्वया क्रियते नित्यं तोयैरभ्युक्षणं मम ॥ आसनस्य द्रुतं ब्रूया यत्पापं विहितं मया ॥ ॥ ३३ ॥ ॥ इन्द्र उवाच ॥ ॥ न विद्यते महाराज शरीरे तव पातकम् ॥ न राष्ट्रे च कुले गेहे भृत्यवर्गे विशेषतः ॥ ३४ ॥ परं शृणु प्रवक्ष्यामि यत्ते पापं भविष्यति ॥ तेन संप्रोक्ष्यते चैव आसनं सर्वदैव तु ॥ ३५ ॥ अपुत्रस्य गतिर्नास्ति न च स्वर्गं प्रपद्यते ॥ पैतृकेण नरो ग्रस्तो य ऋणेन सदा नृप ॥ ३६ ॥ द्वेष्यतां याति देवानां पितॄणां च विशेषतः ॥ यदा पश्यति पुत्रस्य वदनं पुरुषो नृप ॥ ३७ ॥ आनृण्यं समवाप्नोति पितॄणां स तदा ध्रुवम् ॥ स त्वं नैव गतो राजन्नानृण्यं यन्मयोदितम् ॥ ३८ ॥ पितॄणां तेन ते नित्यमासनेऽभ्युक्षणं कृतम् ॥ तस्माद्यतस्व पुत्रार्थं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

यदीच्छसि परां गतिम् ॥ ३९ ॥ आत्मानं नरकात्रातुं पुंसंज्ञाच्च तथा नृप ॥ एवमुक्तः स शक्रेण राजा दशरथस्तदा ॥ ४० ॥ दुःखेन महता युक्तो लज्जयाऽधोमुखः स्थितः ॥ आमंत्र्याथ सहस्राक्षं गत्वाऽयोध्यां निजां पुरीम् ॥ अमात्यानां निजं राज्यमर्पयामास सत्वरः ॥ ४१ ॥ ततः प्रोवाच तान्सर्वांस्तपः कार्यं मयाऽधुना ॥ यावत्पुत्रस्य संप्राप्तिस्तावदेव न संशयः ॥४२॥ एतद्राज्यं प्रयत्नेन रक्षणीयं यथाविधि ॥ युष्माभिर्मम वाक्येन यावदागमनं मम ॥४३॥ ॥ मंत्रिण ऊचुः ॥ ॥ युक्तमेतन्महाराज पुत्रार्थं यत्समुद्यमः ॥ क्रियते पुत्रहीनस्य किं राज्येन धनेन वा ॥ ॥ ४४ ॥ वयं रक्षां करिष्यामस्तव राज्ये समंततः ॥ निर्वृतिं त्वं समास्थाय कुरु पुत्रकृते तपः ॥ ४५ ॥ कार्तिकेयपुरं गत्वा यत्र पित्रा पुरा तव ॥ तपस्ततं यथा लब्धा सिद्धिश्च मनसेप्सिता ॥ ४६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये दशरथकृततपःसमुद्योगवर्णनंनाम सप्तनवतितमोऽध्यायः ॥ ९७ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ ततो दशरथो राजा मंत्रिभिस्तैर्विसर्जितः ॥ हाटकेश्वरजं क्षेत्रं संप्राप्तो हर्षसंयुतः ॥ १ ॥ तत्रागत्य ततो देवीं पित्रा संस्थापितां पुरा ॥ पूजयित्वाऽथ सद्भक्त्या स्नात्वा कुण्डे शुभोदके ॥ २ ॥ ततोऽन्यानि च मुख्यानि दृष्ट्वा चायतनानि सः ॥ स्नात्वा तीर्थेष्वनेकेषु दत्त्वा दानान्यनेकशः ॥ ३ ॥ प्रासादं कारयामास देवदेवस्य चक्रिणः ॥ तत्र संस्थापयामास प्रतिमां वैष्णवीं शुभाम् ॥ ४ ॥ तस्याग्रे कारयामास वापीं स्वच्छोदकान्विताम् ॥ सोपानपंक्तिभिर्युक्तां साधुभिः संप्रशंसिताम् ॥ ५ ॥ उदकेन ततस्तस्या देवाराधनतत्परः ॥ प्रकारैर्बहुभिस्तीव्रं चकार सुमहत्तपः ॥ ६ ॥ ततो वर्षशतेऽतीते तस्य तुष्टो जनार्दनः ॥ विलोक्य च तपस्तीव्रं विहितं तेन भूभुजा ॥ ७ ॥ प्रोवाच दर्शनं गत्वा पक्षिराजं समाश्रितः ॥ मेघगम्भीरया वाचा बहुदेवगणैर्वृतः ॥ ८ ॥ ॥ श्रीविष्णुरुवाच ॥ ॥ परितुष्टोऽस्मि ते वत्स वरं वरय सुव्रत ॥ अपि ते दुर्लभं काममहं दास्यामि कृत्स्नशः ॥ ९ ॥ ॥ राजोवाच ॥ ॥ पुत्रार्थोऽयं समारंभो मया देव कृतोऽखिलः ॥ तपसो देहि मे पुत्रांस्तस्माद्वंशविवृद्धिदान् ॥ १० ॥ अन्यत्सर्वं सुराधीश ध्रुवमस्ति गृहे स्थितम् ॥ प्रसादात्तव यत्किंचिद्वैभवं विद्यते मम ॥ ११ ॥ ॥ विष्णुरुवाच ॥ ॥ अहं तव गृहे राजन्स्वयमेव न संशयः ॥ अवतारं करिष्यामि कृत्वा रूपचतुष्टयम्॥ १२ ॥ देवकार्याय तस्मात्त्वं गृहं गत्वा महीपते ॥ कुरु राज्यं यथान्यायं पितृपैतामहं महत् ॥ १३ ॥ तथेयं या त्वया वापी निर्मिता विमलोदका ॥ राजवापीति विख्याता लोके सेयं भविष्यति ॥ १४ ॥ अस्यां स्नात्वा नरो भक्त्या य एनां पूजयिष्यति ॥ श्रद्धया

१ महाराज–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परया युक्तः संप्राप्ते पंचमीदिने ॥ १५ ॥ ततः करिष्यति श्राद्धं यावत्संवत्सरं नृप ॥ अपुत्रः प्राप्स्यते पुत्रान्वंशवृद्धिकरान्स हि ॥ १६ ॥ एवमुक्त्वा स भगवांस्ततश्चादर्शनं गतः ॥ प्रहृष्टवदनो भूत्वा सोऽपि राजा ययौ गृहम् ॥ १७ ॥ ततः स्तोकेन कालेन तस्य पुत्रचतुष्टयम् ॥ संजातं लोकविख्यातं कलत्रत्रितयस्य च ॥ १८ ॥ कौशल्यानाम विख्याता तस्य भार्या सुशोभना ॥ ज्येष्ठा तस्यां सुतो जज्ञे रामाख्यः प्रथमः सुतः ॥ १९ ॥ तथान्या कैकयीनाम तस्य भार्या कनिष्ठिका ॥ भरतोनाम विख्यातस्तस्याः पुत्रोऽभवत्त्वसौ ॥ २० ॥ सुमित्राख्या तथा चान्या पत्नी या मध्यमा स्थिता ॥ शत्रुघ्नलक्ष्मणौ पुत्रौ तस्यां जातौ महाबलौ ॥ २१ ॥ तथान्या कन्यका चैका बभूव वरवर्णिनी ॥ ददौ यां पुत्रहीनस्य लोमपादस्य भूपतेः ॥२२॥ आनृण्यं भूपतिः प्राप्य एवं दशरथस्तदा॥ पितॄणां प्रययौ स्वर्गं कृतकृत्यस्तथा द्विजाः ॥ २३ ॥ अथ राजाऽभवद्रामः सार्वभौमस्ततः परम् ॥ रावणो येन दुर्धर्षो निहतो देवकंटकः ॥ २४ ॥ येन रामेश्वरश्चात्र निर्मितो लक्ष्मणेश्वरः ॥ सीतादेवी तथा मूर्ता येन चात्र प्रतिष्ठिता ॥२५॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखंडे हाटकेश्वरक्षेत्रमाहात्म्ये राजस्वामिराजवापीमाहात्म्यवर्णनंनामाष्टनवतितमोऽध्यायः ॥ ९८ ॥ ॥ ऋषय ऊचुः ॥ ॥ यदेतद्भवता प्रोक्तं तत्र रामेण निर्मितः ॥ रामेश्वरस्तथा सीता तेन तत्र विनिर्मिता ॥ १ ॥ तथा च लक्ष्मणार्थाय निर्मितस्तेन संश्रयः ॥ एतन्महद्विरुद्धं ते प्रतिभाति वचोऽखिलम् ॥ २ ॥ त्वया सूत पुरा प्रोक्तं रामो लक्ष्मणसंयुतः ॥ सीतया सहितः प्राप्तः क्षेत्रेऽत्र प्रस्थितो वने ॥ ३ ॥ श्राद्धं कृत्वा गयाशीर्षे लक्ष्मणेन विरुद्ध्य च ॥ पुनः संप्रस्थितोऽरण्यं क्रोधाविष्टश्च तं प्रति ॥ ४ ॥ यत्त्वयोक्तं तदा तेन निर्मितोऽत्र महेश्वरः ॥ एतच्च सर्वमाचक्ष्व संदेहं सूतनन्दन ॥ ५ ॥ ॥ सूत उवाच ॥ ॥ अत्र मे नास्ति संदेहो युष्माकं च पुनः स्थितः ॥ ततो वक्ष्याम्यशेषेण श्रूयतां द्विजसत्तमाः ॥ एतत्क्षेत्रं पुनश्चाद्यं न क्षयं याति कुत्रचित् ॥ ६ ॥ अन्यस्मिन्दिवसे प्राप्ते स तदा रघुनंदनः ॥ यदा विरोधमापन्नः सार्धं सौमित्रिणा सह ॥ ७ ॥ एतत्पुनर्दिनं चान्यद्यत्र तेन प्रतिष्ठितः ॥ रामेश्वरः स्वयं भक्त्या दुःखितेन महात्मना ॥ ८ ॥ ॥ ऋषय ऊचुः ॥ ॥ अन्यस्मिन्दिवसे तत्र कस्मिन्काले रघूत्तमः ॥ संप्राप्तस्तस्य किं दुःखं संजातं तत्प्रकीर्तय ॥ ९ ॥ ॥ ॥ सूत उवाच ॥ ॥ कृत्वा सीतापरित्यागं रामो राजीवलोचनः ॥ लोकापवादसंत्रस्तस्ततो राज्यं चकार सः ॥ १० ॥ कृत्वा स्वर्णमयीं सीतां पत्नीं यज्ञप्रसिद्धये ॥ न स चक्रे महाभागो भार्यामन्यां कथंचन ॥ ११॥ दशवर्षसहस्राणि दशवर्षशतानि च ॥ ब्रह्मचर्येण चक्रे स राज्यं निहतकंट

१ रघूद्वहः-इ०पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



कम् ॥ १२ ॥ ततो वर्षसहस्रांते प्राप्ते चैकादशे द्विजाः ॥ देवदूतः समायातो रामस्य सदनं प्रति ॥१३॥ तेनोक्तं देवराजेन प्रेषितोऽहं तवांतिकम् ॥
तस्मात्कुरु समालोकं विजने त्वं मया सह ॥ १४ ॥ एवमुक्तस्तदा तेन दूतेन रघुनंदनः ॥ परं रहः समासाद्य मन्त्रं चक्रे ततः परम् ॥ १५ ॥
तस्यैवमुपविष्टस्य मंत्रस्थाने महात्मनः ॥ बहुत्वादिष्टलोकस्य न रहस्यं प्रजायते ॥ १६ ॥ ततः कोपपरीतात्मा दूतः प्रोवाच सादरम् ॥ त्रिहस्य
जनसंसर्गं दृष्ट्वैकांतेऽपि संस्थिते ॥ १७ ॥ यथा दंष्ट्राच्युतः सर्पो नागो वा मदवर्जितः ॥ आज्ञाहीनस्तथा राजा मानवैः परिभूयते ॥ १८ ॥
सेयं तव रघुश्रेष्ठ नाज्ञास्ति प्रतिवेद्म्यहम् ॥ शक्रालापमपि त्वं च नैकांते श्रोतुमर्हसि ॥ १९ ॥ तस्य तद्वचनं श्रुत्वा कोपसंरक्तलोचनः ॥
त्रिशाखां भृकुटीं कृत्वा ततः स प्राह लक्ष्मणम् ॥ २० ॥ ममात्र संनिविष्टस्य सहानेन प्रजल्पतः ॥ यदि कश्चिन्नरो मोहादागमिष्यति लक्ष्मण ॥
स्वहस्तेन न संदेहः सूदयिष्यामि तं द्रुतम् ॥ २१ ॥ न हन्मि यदि तं प्राप्तमत्र मे दृष्टिगोचरम् ॥ तन्मा भून्मे गतिः श्रेष्ठा धर्मिणां या प्रपद्यते ॥
॥ २२ ॥ एवं ज्ञात्वा प्रयत्नेन त्वया भाव्यमसंशयम् ॥ राजद्वारि यथा कश्चिन्न मया वध्यतेऽधुना ॥ २३ ॥ तमोमित्येव संप्रोच्य लक्ष्मणः
शुभलक्षणः ॥ राजद्वारं समासाद्य चकार विजनं ततः॥ २४ ॥ देवदूतोऽपि रामेण समं चक्रे ततः परम् ॥ मंत्रं शक्रसमादिष्टं तथान्यैः स्वर्गवासिभिः
॥ २५ ॥ ॥ देवदूत उवाच ॥ ॥ त्वं रावणविनाशार्थमवतीर्णो धरातले ॥ स च व्यापादितो दुष्टः पापस्त्रैलोक्यकंटकः ॥ २६ ॥ कृतं सर्वं महाभाग देव
कृत्यं त्वयाऽधुना ॥ तस्मात्संतु सनाथास्ते देवाः शक्रपुरोगमाः॥२७॥ यदि ते रोचते चित्ते नोपरोधेन[1] सांप्रतम् ॥ प्रसादं कुरु देवानां तस्मादागच्छ
सत्वरम् ॥ स्वर्गलोकं परित्यज्य मर्त्यलोकं सुनिंदितम् ॥२८॥ ॥ सूत उवाच ॥ ॥ एतस्मिन्नंतरे प्राप्तो दुर्वासा मुनिसत्तमः ॥ प्रोवाचाथ क्षुधाविष्टः
क्वासौ क्वासौ रघूत्तमः ॥ २९ ॥ ॥ लक्ष्मण उवाच ॥ ॥ व्यग्रः स पार्थिवश्रेष्ठो देवकार्येण केनचित् ॥ तस्मादत्रैव विप्रेंद्र मुहूर्तं परिपालय ॥३०॥
यावत्सांत्वयते रामो दूतं शक्रसमुद्भवम् ॥ ममोपरि दयां कृत्वा विनयावनतस्य हि ॥ ३१ ॥ ॥ दुर्वासा उवाच ॥ ॥ यदि यास्यति नो दृष्टिं मम
द्वास्स रघूत्तमः ॥ शापं दत्त्वा कुलं सर्वं तद्धक्ष्यामि न संशयः ॥ ३२ ॥ ममापि दर्शनादन्यन्न किंचिद्विद्यते गुरु ॥ कृत्यं लक्ष्मण यावत्त्वमन्य
न्मूढ प्रकत्थसे ॥ ३३ ॥ तच्छ्रुत्वा लक्ष्मणश्चित्ते चिंतयामास दुःखितः ॥ वरं मे मृत्युरेकस्य मा भूयात्कुलसंक्षयः ॥ ३४ ॥ एवं स निश्चयं 
कृत्वा ततो राममुपाद्रवत् ॥ उवाच दंडवद्भूमौ प्रणिपत्य कृतांजलिः ॥ ३५ ॥ दुर्वासा मुनिशार्दूलो देव ते द्वारि तिष्ठति ॥ दर्शनार्थी क्षुधाविष्टः

१ न उपरोधेन सांप्रतम्–अस्माभिः तत्र उपरोधः आग्रहः कर्तुं न सांप्रतं न योग्यः । किं तु यदि ते चित्ते रोचते–तर्हि–देवानां प्रसादं कुरु तस्मात्सत्वरम् आगच्छ–इति योजना ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किं करोमि प्रशाधि माम् ॥ ३६ ॥ तस्य तद्वचनं श्रुत्वा ततो दूतमुवाच तम् ॥ गत्वेमं ब्रूहि देवेशं मम वाक्यादसंशयम् ॥ अहं संवत्सरस्यांत आगमिष्यामि तेंऽतिके ॥ ३७ ॥ एवमुक्त्वा विसृज्याथ तं दूतं प्राह लक्ष्मणम् ॥ प्रवेशय द्रुतं वत्स तं त्वं दुर्वाससं मुनिम् ॥ ३८ ॥ ततश्चार्घ्यं च पाद्यं च गृहीत्वा सम्मुखो ययौ ॥ रामदेवः प्रहृष्टात्मा सचिवैः परिवारितः ॥ ३९ ॥ दत्त्वार्घ्यं विधिवत्तस्य प्रणिपत्य मुहुर्मुहुः ॥ प्रोवाच रामदेवोऽथ हर्षगद्गदया गिरा ॥ ४० ॥ स्वागतं ते मुनिश्रेष्ठ भूयः सुस्वागतं च ते ॥ एतद्राज्यममी पुत्रा विभवश्च तव प्रभो ॥ ४१ ॥ कृत्वा मम प्रसादं च गृहाण मुनिसत्तम ॥ धन्योऽस्म्यनुगृहीतोऽस्मि यत्त्वं मे गृहमागतः ॥ पूज्यो लोकत्रयस्यापि निःशेषतपसांनिधिः ॥ ४२ ॥ ॥ मुनिरुवाच ॥ ॥ चातुर्मास्यव्रतं कृत्वा निराहारो रघूत्तम ॥ अद्य ते भवनं प्राप्य आहारार्थं बुभुक्षितः ॥ ४३ ॥ तस्मात्त्वं यच्छ मे शीघ्रं भोजनं रघुनंदन ॥ नान्येन कारणं किंचित्संन्यस्तस्य धनादिना ॥ ४४ ॥ ततस्तं भोजयामास श्रद्धापूतेन चेतसा ॥ स्वयमेवाग्रतः स्थित्वा मृष्टान्नैर्विविधैः शुभैः ॥ ४५ ॥ लेह्यैश्चोष्यैस्तथा चर्व्यैः खाद्यैरेव पृथग्विधैः ॥ यावदिच्छा मुनेस्तस्य तथान्नैर्विविधैरपि ॥ ४६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये रामेश्वरस्थापनप्रस्तावे श्रीरामंप्रति दुर्वासः समागमनवृत्तांतवर्णनंनामैकोनशततमोऽध्यायः ॥ ९९ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एवं भुक्त्वा स विप्रर्षिर्वांछया राममंदिरे ॥ दत्ताशीर्निर्गतः पश्चादामंत्र्य रघुनंदनम् ॥ १ ॥ अथ याते मुनौ तस्मिन्दुर्वाससि तदंतिकात् ॥ लक्ष्मणः खड्गमादाय रामदेवमुवाच ह ॥ २ ॥ एतत्खड्गं गृहीत्वाशु मां प्रभो विनिपातय ॥ येन ते स्यादृतं वाक्यं प्रतिज्ञातं च यत्पुरा ॥ ३ ॥ ततो रामश्चिरात्स्मृत्वा तां प्रतिज्ञां स्वयं कृताम् ॥ वधार्थं संप्रविष्टस्य समीपे पुरुषस्य च ॥ ४ ॥ ततोऽतिचिंतयामास व्याकुलेनांतरात्मना ॥ बाष्पव्याकुलनेत्रश्च निःश्वसन्पन्नगो यथा ॥ ५ ॥ तं दीनवदनं दृष्ट्वा निःश्वसंतं मुहुर्मुहुः ॥ भूयः प्रोवाच सौमित्रिर्विनयावनतः स्थितः ॥ ६ ॥ एष एव परो धर्मो भूपतीनां विशेषतः ॥ यश्चात्मीयं वचस्तथ्यं क्रियते निर्विकल्पितम् ॥ ७ ॥ तस्मात्त्वया प्रभो प्रोक्तं स्वयमेव ममाग्रतः ॥ तस्यैव देवदूतस्य तारनादेन कोपतः ॥ ८ ॥ योऽत्रागच्छति सौमित्रे मम दूतस्य संनिधौ ॥ तं चेद्धन्मि स्वहस्तेन नाहं तस्मात्सुपापकृत् ॥ ९ ॥ तदहं चागतस्तात भयाद्दुर्वाससो मुनेः ॥ निषिद्धोऽपि त्वयातीव तस्माच्छीघ्रं तु घातय ॥ १० ॥ ततः संमंत्र्य सुचिरं मंत्रिभिः सहितो नृपः ॥ ब्राह्मणैर्धर्मशास्त्रज्ञैस्तथान्यैर्वेदपारगैः ॥ ११ ॥ प्रोवाच लक्ष्मणं पश्चाद्विनयावनतं स्थितम् ॥ बाष्पक्लिन्नमुखो रामो गद्गदं निःश्वसन्मुहुः ॥ १२ ॥ व्रज लक्ष्मण मुक्तस्त्वं मया देशांतरं द्रुतम् ॥ त्यागो वाथ वधो वाथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



साधूनामुभयं समम् ॥ १३ ॥ न मया दर्शनं भूयस्तव कार्यं कथंचन ॥ न स्थातव्यं च देशेऽपि यदि मे वांछसि प्रियम् ॥ १४ ॥ तस्य तद्वचनं
श्रुत्वा प्रणिपत्य ततः परम् ॥ निर्ययौ नगरात्तस्मात्तत्क्षणादेव लक्ष्मणः ॥ १५ ॥ अकृत्वापि समालापं केनचिन्निजमन्दिरे ॥ मात्रा वा भार्यया
वाथ सुतेन सुहृदाथवा ॥ १६ ॥ ततोऽसौ सरयूं गत्वाऽवगाह्याथ च तज्जलम् ॥ शुचिर्भूत्वा निविष्टोथ तत्तीरे विजने शुभे ॥ १७ ॥ पद्मासनं विधा
याथ न्यस्यात्मानं तथात्मनि ॥ ब्रह्मद्वारेण तं पश्चात्तेजोरूपं व्यसर्जयत् ॥ १८ ॥ अथ तद्राघवो दृष्ट्वा महत्तेजो वियद्गतम् ॥ विस्मयेन समा
युक्तोऽचिन्तयत्किमिदं ततः ॥ १९ ॥ अथ मर्त्ये परित्यक्ते तेजसा तेन तत्क्षणात् ॥ वैष्णवेन तुरीयेण भागेन द्विजसत्तमाः ॥ २० ॥ पपात
भूतले कायं काष्ठलोष्टोपमं द्रुतम् ॥ लक्ष्मणस्य गतश्रीकं सरय्वाः पुलिने शुभे ॥ २१ ॥ ततस्तु राघवः श्रुत्वा लक्ष्मणं गतजीवितम् ॥ पतितं
सरितस्तीरे विललाप सुदुःखितः ॥ २२ ॥ स्वयं गत्वा तमुद्देशं सामात्यःससुहृज्जनः ॥ लक्ष्मणं पतितं दृष्ट्वा करुणं पर्यदेवयत् ॥ २३ ॥ हा वत्स
मां परित्यज्य किं त्वं संप्रस्थितो दिवम् ॥ प्राणेष्टं भ्रातरं श्रेष्ठं सदा तव मते स्थितम् ॥ २४ ॥ तस्मिन्नपि महारण्ये गच्छमानः पुरादहम् ॥
अपि संधार्यमाणेन अनुयातस्त्वया तदा ॥ २५ ॥ संप्राप्तेऽपि कबंधाख्ये राक्षसे बलवत्तरे ॥ त्वया रात्रिमुखे घोरे सभार्योऽहं प्ररक्षितः ॥ २६ ॥
येनेन्द्रजिद्धतो युद्धे तादृग्रूपो निशाचरः ॥ स एष पतितः शेते गतासुर्धरणीतले ॥ २७ ॥ येन शूर्पणखा ध्वस्ता राक्षसी सा च दारुणा ॥ लील
यापि ममादेशात्सोयमेवंविधः स्थितः ॥ २८ ॥ यद्बाहुबलमाश्रित्य मया ध्वस्ता निशाचराः ॥ सोऽयं निपतितः शेते मम भ्राता ह्यनाथवत् ॥
॥ २९ ॥ हा वत्स क्व गतो मां त्वं विमुच्य भ्रातरं निजम् ॥ ज्येष्ठं प्राणसमं किं ते स्नेहोऽद्य विगतः क्वचित् ॥ ३० ॥ ॥ सूत उवाच ॥ ॥ एवं
बहुविधान्कृत्वा प्रलापान्रघुनन्दनः ॥ मातृभिः सहितो दीनः शोकेन महतान्वितः ॥ ३१ ॥ ततस्ते मंत्रिणस्तस्य प्रोचुस्तं वीक्ष्य दुःखितम् ॥
विलपंतं रघुश्रेष्ठं स्त्रीजनेन समन्वितम् ॥ ३२ ॥ ॥ मंत्रिण ऊचुः ॥ ॥ मा शोकं कुरु राजेन्द्र यथान्यः प्राकृतः स्थितः ॥ कुरुष्व च यथेदं
स्यात्सांप्रतं चौर्ध्वदैहिकम् ॥ ३३ ॥ नष्टं मृतमतीतं च ये शोचन्ति कुबुद्धयः ॥ धीराणां तु पुरा राजन्नष्टं नष्टं मृतं मृतम् ॥ ३४ ॥ एवं ते मन्त्रिणः
प्रोच्य ततस्तस्य कलेवरम् ॥ लक्ष्मणस्य विलिप्योच्चैश्चन्दनोशीरकुंकुमैः ॥ ३५ ॥ कर्पूरागुरुमिश्रैश्च तथान्यैः सुसुगन्धिभिः ॥ परिवेष्ट्य शुभैर्वस्त्रैः
पुष्पैः संभूष्य शोभनैः ॥ ३६ ॥ चन्दनागुरुकाष्ठैश्च चितिं कृत्वा सुविस्तराम् ॥ न्यदधुस्तस्य तद्गात्रं तत्र दक्षिणदिङ्मुखम् ॥ ३७ ॥ एतस्मिन्नंतरे
जातं तत्राश्चर्यं द्विजोत्तमाः ॥ तन्मे निगदतः सर्वं शृण्वंतु सकलं द्विजाः ॥ ३८ ॥ यावत्तेऽतः समारोप्य चितां तस्य कलेवरम् ॥ प्रयच्छंति हवि



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्वाहं तावन्नष्टं कलेवरम् ॥ ३९ ॥ एतस्मिन्नंतरे वाणी निर्गता गगनांगणात् ॥ नादयंती दिशः सर्वाः पुष्पवर्षादनंतरम् ॥ ४० ॥ रामराम महाबाहो
मा त्वं शोकपरो भव ॥ न चास्य युज्यते वह्निर्दातुं चैव कथंचन ॥ ४१ ॥ ब्रह्मज्ञानप्रयुक्तस्य संन्यस्तस्य विशेषतः ॥ अग्निदानं न युक्तं स्यात्स
र्वेषामपि योगिनाम् ॥ ४२ ॥ तवायं बांधवो राम ब्रह्मणः सदनं गतः ॥ ब्रह्मद्वारेण चात्मानं निष्क्रम्य सुमहायशाः ॥ ४३ ॥ अथ ते मंत्रिणः
प्रोचुस्तच्छ्रुत्वाऽऽकाशगं वचः ॥ अशोच्योऽयं महाराज संसिद्धिं परमां गतः ॥ लक्ष्मणो गम्यतां शीघ्रं तस्मात्स्वभवने विभो ॥ ४४ ॥ चिन्त्यन्तां
राजकार्याणि तथान्यच्चौर्ध्वदैहिकम् ॥ कुरु स्नेहोचितं तस्य पृष्ट्वा[1] ब्राह्मणसत्तमान् ॥ ४५ ॥ ॥ राम उवाच ॥ ॥ नाहं गृहं गमिष्यामि
लक्ष्मणेन विनाऽधुना ॥ प्राणानत्र विहास्यामि यथा तेन महात्मना ॥ ४६ ॥ एष पुत्रो मया दत्तः कुशाख्यो मम संमतः ॥ युष्मभ्यं क्रियतां
राज्ये मदीये यदि रोचते ॥ ४७ ॥ एवमुक्त्वा ततो रामो गन्तुकामो दिवालयम् ॥ चिन्तयामास भूयोऽपि स्मृत्वा मित्रं विभीषणम् ॥ ४८ ॥
मया तस्य तदा दत्तं लंकायां राज्यमक्षयम् ॥ बहुभक्तिप्रतुष्टेन यावच्चन्द्रार्कतारकाः ॥ ४९ ॥ अतिक्रूरतरा जाती राक्षसानां यतः स्मृता ॥ विशेषा
द्दुरपुष्टानां जायतेऽत्र धरातले ॥ ५० ॥ तच्चेद्राक्षसभावेन स महात्मा विभीषणः ॥ करिष्यति सुरैः सार्धं विरोधं रावणो यथा ॥ ५१ ॥ तं देवाः
सूदयिष्यंति उपायैः सामपूर्वकैः ॥ त्रैलोक्यकण्टको यद्वत्तस्य भ्राता दशाननः ॥ ५२ ॥ ततो मे स्यान्मृषा वाणी तस्माद्गत्वा तदंतिकम् ॥ शिक्षां
ददामि तस्याहं यथा देवान्न दूषयेत् ॥ ५३ ॥ तथा मे परमं मित्रं द्वितीयं वानरः स्थितः ॥ सुग्रीवाख्यो महाभागो जांबवांश्च तथाऽपरः ॥ ५४ ॥
सभृत्यो वायुपुत्रश्च वालिपुत्रसमन्वितः ॥ कुमुदाख्यश्च तारश्च तथान्येऽपि च वानराः ॥५५॥ तस्मात्तानपि संभाष्य सर्वान्संमंत्र्य सादरम् ॥ ततो
गच्छामि देवानां कृतकृत्यो गृहं प्रति ॥ ५६ ॥ एवं संचिन्त्य सुचिरं समाहूय च पुष्पकम् ॥ तत्रारुह्य ययौ तूर्णं किष्किन्धाख्यां पुरीं प्रति ॥५७॥
अथ ते वानरा दृष्ट्वा प्रोद्द्योतं पुष्पकोद्भवम् ॥ विज्ञाय राघवं प्राप्तं सत्वरं सम्मुखा ययुः ॥ ५८ ॥ ततः प्रणम्य ते दूराज्जानुभ्यामवनिं गताः ॥
जयेति शब्दमादाय मुहुर्मुहुरितस्ततः ॥ ५९ ॥ ततस्तेनैव संयुक्ताः किष्किन्धां तां महापुरीम् ॥ विविशुः सत्पताकाभिः समंतात्समलंकृताम् ॥६०॥
अथोत्तीर्य विमानाग्र्यात्सुग्रीवभवने शुभे ॥ प्रविवेश द्रुतं रामः सर्वतः सुविभूषिते ॥ ६१ ॥ तत्र रामं निविष्टं ते विश्रांतं वीक्ष्य वानराः ॥ अर्घ्या
दिभिश्च संपूज्य पप्रच्छुस्तदनन्तरम् ॥६२॥ ॥ वानरा ऊचुः ॥ ॥ तेजसा त्वं विनिर्मुक्तो दृश्यसे रघुनन्दन ॥ कृशोऽस्यतीव चोद्विग्नः कच्चित्क्षेमं

१ सृष्ट्वा—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





गृहे तव ॥६३॥ काये वाऽनुगतो नित्यं तथा ते लक्ष्मणोऽनुजः॥ न दृश्यते समीपस्थः किमद्य तव राघव ॥६४॥ तथा प्राणसमाऽभीष्टा सीता भार्या तव प्रभो ॥ दृश्यते किं न पार्श्वस्था एतन्नः कौतुकं परम् ॥ ६५ ॥ ॥ सूत उवाच ॥ ॥ तेषां तद्वचनं श्रुत्वा चिरं निःश्वस्य राघवः ॥ बाष्पपूर्णेक्षणो भूत्वा सर्वं तेषां न्यवेदयत् ॥६६॥ अथ सीता परित्यक्ता तथा भ्राता स लक्ष्मणः॥ यदर्थं तत्र संप्राप्तः स्वयमेव द्विजोत्तमाः ॥६७॥ तच्छ्रुत्वा वानराः सर्वे सुग्रीवप्रमुखास्ततः ॥ रुरुदुस्ते सुदुःखार्ताः समालिंग्य ततः परम् ॥६८॥ एवं चिरं प्रलप्योच्चैस्ततः प्रोचू रघूत्तमम् ॥ आदेशो दीयतां राजन्योऽस्माभिरिह सिध्यति ॥६९॥ धन्या वयं धरापृष्ठे येषां त्वं रघुसत्तम ॥ ईदृक्स्नेहसमायुक्तः समागच्छसि मंदिरे ॥ ७० ॥ ॥ राम उवाच ॥ ॥ उषित्वा रजनी मेकां सुग्रीव तव मंदिरे ॥ प्रातर्लंकां गमिष्यामि यत्रास्ते स विभीषणः ॥ ७१ ॥ प्रधानामात्ययुक्तेन त्वयापि कपिसत्तम ॥ आगंतव्यं मया सार्धं विभीषणगृहं प्रति ॥ ७२ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये श्रीरामेश्वरस्थापन प्रस्तावे लक्ष्मणनिर्याणोत्तरं श्रीरामस्य सुग्रीवनगरींप्रति गमनवर्णनंनाम शततमोऽध्यायः ॥ १०० ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एवं तां रजनीं तत्र स उषित्वा रघूत्तमः ॥ उपास्यमानः सर्वैस्तैः सद्भक्त्या वानरोत्तमैः ॥ १ ॥ ततः प्रभाते विमले प्रोद्गते रविमण्डले ॥ कृत्वा प्राभातिकं कर्म समाहूयाथ पुष्पकम् ॥ २ ॥ सुग्रीवेण सुषेणेन तारेण कुमुदेन च ॥ अंगदेनाथ कुण्डेन वायुपुत्रेण धीमता ॥ ३ ॥ गवाक्षेण नलेनैव तथा जांबवतापि च ॥ दशभिर्वानरैः सार्धं समारूढः स पुष्पके ॥ ४ ॥ ततः संप्रस्थितः काले लंकामुद्दिश्य राघवः ॥ मनोजवेन तेनैव विमानेन सुवर्चसा ॥ ५ ॥ संप्राप्तस्तत्क्षणादेव लंकाख्यां च महापुरीम् ॥ वीक्षयंस्तान्प्रदेशांश्च यत्र युद्धं पुराऽभवत् ॥ ६ ॥ ततो विभीषणो दृष्ट्वा प्रोद्द्योतं पुष्पकोद्भवम् ॥ रामं विज्ञाय संप्राप्तं प्रहृष्टः सम्मुखो ययौ ॥ मंत्रिभिः सकलैः सार्धं तथा भृत्यैः सुतैरपि ॥ ७ ॥ अथ दृष्ट्वा सुदूरात्तं रामदेवं विभीषणः ॥ पपात दण्डवद्भूमौ जयशब्दमुदीरयन् ॥ ८ ॥ तथागतं परिष्वज्य सादरं स विभीषणम् ॥ तेनैव सहितः पश्चाल्लंकां तां प्रविवेश ह ॥ ९ ॥ विभीषणगृहं प्राप्य तत्र सिंहासने शुभे ॥ निविष्टो वानरैस्तैश्च समन्तात्परिवारितः ॥ १० ॥ ततो निवेदयामास तस्मै सर्वं विभीषणः ॥ राज्यं पुत्रकलत्रादि यच्चान्यदपि किंचन ॥ ११ ॥ ततः प्रोवाच विनयात्कृतांजलिपुटः स्थितः ॥ आदेशो दीयतां देव ब्रूहि कृत्यं करोमि किम् ॥ १२ ॥ अकस्मादेव संप्राप्तः किमर्थं वद मे प्रभो ॥ किं नायातः स सौमित्रिस्त्वया सार्धं च जानकी ॥१३॥ ॥ सूत उवाच ॥ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निवेद्य राघवस्तस्मै सर्वं गद्गदया गिरा ॥ बाष्पपूरप्रतिच्छन्नवक्त्रो भूयो विनिःश्वसन् ॥ १४ ॥ ततः प्रोवाच सत्यार्थं विभीषणकृते हितम् ॥ तं चापि शोकसंतप्तं संबोध्य रघुनंदनः ॥ १५ ॥ अहं राज्यं परित्यज्य सांप्रतं राक्षसोत्तम ॥ यास्यामि त्रिदिवं तूर्णं लक्ष्मणो यत्र संस्थितः ॥ ॥ १६ ॥ न तेन रहितो मर्त्ये मुहूर्तमपि चोत्सहे ॥ स्थातुं राक्षसशार्दूल बांधवेन महात्मना ॥ १७ ॥ अहं शिक्षापणार्थाय तव प्राप्तो विभीषण ॥ तस्मादव्यग्रचित्तेन संशृणुष्व कुरुष्व च ॥ १८ ॥ एषा राज्योद्भवा लक्ष्मीर्मदं संजनयेन्नृणाम् ॥ मद्यवत्स्वल्पबुद्धीनां तस्मात्कार्यो न स त्वया ॥ १९ ॥ शक्राद्या अमराः सर्वे त्वया पूज्याः सदैव हि ॥ मान्याश्च येन ते राज्यं जायते शाश्वतं सदा ॥ २० ॥ मम सत्यं भवेद्वाक्यमेतस्मादहमागतः ॥ प्राप्तराज्यप्रतिष्ठोऽपि तव भ्राता महाबलः ॥ २१ ॥ विनाशं सहसा प्राप्तस्तस्मान्मान्याः सुराः सदा ॥ यदि कश्चित्समायाति मानुषोऽत्र कथंचन ॥ मत्काय एव द्रष्टव्यः सर्वैरेव निशाचरैः ॥ २२ ॥ तथा निशाचराः सर्वे त्वया वार्या विभीषण ॥ मम सेतुं समुल्लंघ्य न गंतव्यं धरातले ॥ २३ ॥ ॥ विभीषण उवाच ॥ ॥ एवं विभो करिष्यामि तवादेशमसंशयम् ॥ परं त्वया परित्यक्ते मर्त्ये मे जीवितं व्रजेत् ॥ २४ ॥ तस्मान्मामपि तत्रैव त्वं विभो नेतुमर्हसि ॥ आत्मना सह यत्रास्ते प्रागतो लक्ष्मणस्तव ॥ २५ ॥ ॥ श्रीराम उवाच ॥ ॥ मया तेऽक्षयमादिष्टं राज्यं राक्षससत्तम ॥ तस्मान्नार्हसि मां कर्तुं मिथ्याचारं कथंचन ॥ २६ ॥ अहमस्मिन्स्वके सेतौ शंकरत्रितयं शुभम् ॥ स्थापयिष्यामि कीर्त्यर्थं तत्पूज्यं भवता सदा ॥ भक्तिमान्प्रतिसंधाय यावच्चंद्रार्कतारकम् ॥ २७ ॥ एवमुक्त्वा रघुश्रेष्ठो राक्षसेन्द्रं विभीषणम् ॥ दशरात्रं तत्र तस्थौ लंकायां वानरैः सह ॥ २८ ॥ कुर्वन्युद्धकथाश्चित्रा याः कृताः पूर्वमेव हि ॥ पश्यन्युद्धस्य सर्वाणि स्थानानि विविधानि च ॥ २९ ॥ शंसमानः प्रवीरांस्तान्राक्षसान्बलवत्तरान् ॥ कुम्भकर्णेन्द्रजित्पूर्वान्संख्ये चाभिमुखागतान् ॥ ३० ॥ ततश्चैकादशे प्राप्ते दिवसे रघुनंदनः ॥ पुष्पकं तत्समारुह्य प्रस्थितः स्वपुरीं प्रति ॥ ३१ ॥ वानरैस्तैः समोपेतो विभीषणपुरःसरः ॥ ततः संस्थापयामास सेतुप्रांते महेश्वरम् ॥ ३२ ॥ मध्ये चैव तथादौ च श्रद्धापूतेन चेतसा ॥ रामेश्वरत्रयं राम एवं तत्र विधाय सः ॥ ३३ ॥ सेतुबंधं तथासाद्य प्रस्थितः स्वगृहं प्रति ॥ तावद्विभीषणेनोक्तः प्रणिपत्य मुहुर्मुहुः ॥ ३४ ॥ ॥ विभीषण उवाच ॥ ॥ अनेन सेतुमार्गेण रामेश्वरदिदृक्षया ॥ मानवा आगमिष्यंति कौतुकाच्छ्रद्धयान्विताः ॥ ३५ ॥ राक्षसानां महाराज जातिः क्रूरतमा मता ॥ दृष्ट्वा मानुषमायांतं मांसस्येच्छा प्रजायते ॥ ३६ ॥ यदा कश्चिज्जनं कश्चिद्राक्षसो भक्षयिष्यति ॥ आज्ञाभंगो ध्रुवं भावी मम भक्तिरतस्य च ॥ ३७ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



भविष्यंति कलौ काले दरिद्रा नृपमानवाः ॥ तेऽत्र स्वर्णस्य लोभेन देवतादर्शनाय च ॥ ३८ ॥ नित्यं चैवागमिष्यन्ति त्यक्त्वा रक्षःकृतं भयम् ॥
तेषां यदि वधं कश्चिद्राक्षसात्प्रापयिष्यति ॥ ३९ ॥ भविष्यति च मे दोषः प्रभुद्रोहोद्भवः प्रभो ॥ तस्मात्कंचिदुपायं त्वं चिन्तयस्व यथा मम ॥
आज्ञाभंगकृतं पापं जायते न गुरो क्वचित् ॥ ४० ॥ तस्य तद्वचनं श्रुत्वा ततः स रघुसत्तमः ॥ बाढमित्येव चोक्त्वाथ चापं सज्जीचकार सः ॥
॥ ४१ ॥ ततस्तं कीर्तिरूपं च मध्यदेशे रघूत्तमः॥ अच्छिनन्निशितैर्बाणैर्दशयोजनविस्तृतम् ॥ ४२ ॥ तेन संस्थापितो यत्र शिखरे शंकरः स्वयम्॥
शिखरं तत्सलिंगं च पतितं वारिधेर्जले ॥ ४३ ॥ एवं मार्गमगम्यं तं कृत्वा सेतुसमुद्भवम् ॥ वानरै राक्षसैः सार्धं ततः संप्रस्थितो गृहम् ॥ ४४ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये सेतुमध्ये श्रीरामकृतरामेश्वरप्रतिष्ठावर्णनंनामैको
त्तरशततमोऽध्यायः ॥ १०१ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ संप्रस्थितस्य रामस्य स्वकीयं सदनं प्रति ॥ यदाश्चर्यमभून्मार्गे
श्रूयतां द्विजसत्तमाः ॥ १ ॥ नभोमार्गेण गच्छत्तद्विमानं पुष्पकं द्विजाः ॥ अस्माकदेव सञ्जातं निश्चलं चित्रकृन्नृणाम् ॥ २ ॥
अथ तन्निश्चलं दृष्ट्वा पुष्पकं गगनांगणे ॥ रामो वायुसुतस्येदं वचनं प्राह विस्मयात् ॥ ३ ॥ त्वं गत्वा मारुते शीघ्रं भूमिं जानीहि
कारणम् ॥ किमेतत्पुष्पकं व्योम्नि निश्चलत्वमुपागतम् ॥ ४ ॥ कदाचिद्धार्यते नास्य गतिः कुत्रापि केनचित् ॥ ब्रह्मदृष्टिप्रसूतस्य
पुष्पकस्य महात्मनः ॥ ५ ॥ बाढमित्येव स प्रोच्य हनूमान्धरणीतलम् ॥ गत्वा शीघ्रं पुनः प्राह प्रणिपत्य रघूत्तमम् ॥ ६ ॥ अत्रास्याधः शुभं
क्षेत्रं हाटकेश्वरसंज्ञितम् ॥ यत्र साक्षाज्जगत्कर्ता स्वयं ब्रह्मा व्यवस्थितः ॥ ७ ॥ आदित्या वसवो रुद्रा देववैद्यौ तथाश्विनौ ॥ तत्र तिष्ठन्ति
ते सर्वे तथाऽन्ये सिद्धकिन्नराः ॥ ८ ॥ एतस्मात्कारणान्नैतदतिक्रामति पुष्पकम् ॥ तत्क्षेत्रं निश्चलीभूतं सत्यमेतन्मयोदितम् ॥ ९ ॥ ॥ सूत
उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा कौतूहलसमन्वितः ॥ पुष्पकं प्रेरयामास तत्क्षेत्रं प्रति राघवः ॥१०॥ सर्वैस्तैर्वानरैः सार्धं राक्षसैश्च पृथग्विधैः ॥
अवतीर्य ततो हृष्टस्तस्मिन्क्षेत्रे समन्ततः ॥ ११ ॥ तीर्थमालोकयामास पुण्यान्यायतनानि च ॥ ततो विलोकयामास पितामहविनिर्मिताम् ॥
चामुण्डां तत्र च स्नात्वा कुण्डे कामप्रदायिनि ॥ १२ ॥ ततो विलोकयामास पित्रा तस्य विनिर्मितम् ॥ रामः स्वमिव देवेशं दृष्ट्वा देवं चतुर्भुजम्॥ ॥१०९॥
॥ १३ ॥ राजवाप्यां शुचिर्भूत्वा स्नात्वा तर्प्य निजान्पितॄन् ॥ ततश्च चिन्तयामास क्षेत्रेऽत्र बहुपुण्यदे ॥ १४ ॥ लिंगं संस्थापयाम्येव
यद्वत्तातेन केशवः ॥ तथा मे दयितो भ्राता लक्ष्मणो दिवमाश्रितः ॥ १५ ॥ यस्तस्य नामनिर्दिष्टं लिंगं संस्थापयाम्यहम् ॥ तं चापि मूर्तिमंतं च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सीतया सहितं शुभम् ॥ क्षेत्रे मेध्यतमे चात्र तथात्मानं दृषन्मयम् ॥ १६ ॥ एवं स निश्चयं कृत्वा प्रासादानां च पंचकम् ॥ स्थापयामास सद्भक्त्या रामः शस्त्रभृतां वरः ॥ १७ ॥ ततस्ते वानराः सर्वे राक्षसाश्च विशेषतः ॥ लिंगानि स्थापयामासुः स्वानिस्वानि पृथक्पृथक् ॥ १८ ॥ तत्रैव सुचिरं कालं स्थितास्ते श्रद्धयाऽन्विताः ॥ ततो जग्मुरयोध्यायां विमानवरमाश्रिताः ॥ १९ ॥ एतद्वः सर्वमाख्यातं यथा रामेश्वरो महान् ॥ लक्ष्मणेश्वरसंयुक्तस्तस्मिंस्तीर्थे सुशोभने ॥ २० ॥ यस्तौ प्रातः समुत्थाय सदा पश्यति मानवः ॥ स कृत्स्नं फलमाप्नोति श्रुते रामायणेऽत्र यत् ॥ २१ ॥ अथाष्टम्यां चतुर्दश्यां यो रामचरितं पठेत् ॥ तदग्रे वाजिमेधस्य स कृत्स्नं लभते फलम् ॥ २२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये श्रीरामचन्द्रेण हाटकेश्वरक्षेत्रे लक्ष्मणादिप्रासादपञ्चकनिर्माणप्रतिष्ठापनवर्णनंनाम द्व्युत्तरशततमोऽध्यायः ॥ १०२ ॥ ॥ ऋषय ऊचुः ॥ ॥ आश्चर्यं सूतपुत्रैतद्यत्त्वया परिकीर्तितम् ॥ यत्स्थापितानि लिंगानि राक्षसैरपि वानरैः ॥ १ ॥ तस्माद्विस्तरतो ब्रूहि यत्रयत्र यथायथा ॥ तैः स्थापितानि लिंगानि येषु स्थानेषु सूतज ॥ २ ॥ ॥ सूत उवाच ॥ ॥ सुग्रीवः संभ्रमित्वाथ क्षेत्रं सर्वमशेषतः ॥ बालमंडनकं प्राप्य तत्र स्नात्वा समाहितः ॥ ३ ॥ मुखलिंगं ततस्तत्र स्थापयामास शूलिनः ॥ तथान्यैर्वानरैः सर्वैर्मुखलिंगानि शूलिनः ॥ स्वसंज्ञार्थं द्विजश्रेष्ठाः स्थापितानि यथेच्छया ॥ ४ ॥ यस्तेषां मुखलिंगानां करोति घृतकंबलम् ॥ मकरस्थेन सूर्येण शिवलोकं स गच्छति ॥ ५ ॥ ततः पश्चिमदिग्भागे तस्य क्षेत्रस्य राक्षसैः ॥ संस्थापितानि लिङ्गानि चतुर्वक्त्राणि च द्विजाः ॥ ॥ ६ ॥ रामेण पूर्वदिग्भागे प्रासादानां च पंचकम् ॥ स्थापितं भक्तियुक्तेन सर्वपातकनाशनम् ॥ ७ ॥ तथा दक्षिणदिग्भागे कूपिका तेन निर्मिता ॥ आनर्त्तीयतडागस्य समीपे पापनाशनी ॥ ८ ॥ यस्तस्यां कुरुते श्राद्धं संप्राप्ते दक्षिणायने ॥ सोऽश्वमेधफलं प्राप्य पितृलोके महीयते ॥ ९ ॥ यस्तत्र दीपकं दद्यात्कार्तिके मासि च द्विजाः ॥ न स पश्यति रौद्रांस्तान्नरकानेकविंशतिम् ॥ न चांधो जायते क्वापि यत्रयत्र प्रजायते ॥ १० ॥ ॥ ॥ ऋषय ऊचुः ॥ ॥ आनर्त्तीयतडागं तत्केन तत्र विनिर्मितम् ॥ किंप्रभावं च कात्स्न्र्येन सूतपुत्र प्रकीर्तय ॥ ११ ॥ ॥ सूत उवाच ॥ ॥ आनर्त्तीयतडागस्य महिमा द्विजसत्तमाः ॥ एकवक्त्रेण नो शक्यो वक्तुं वर्षशतैरपि ॥ १२ ॥ आश्विनस्य सिते पक्षे चतुर्दश्यां समाहितः ॥ स्नात्वा देवान्पितॄंश्चैव तर्पयेद्विधिपूर्वकम् ॥ १३ ॥ ततो दीपोत्सवदिने श्राद्धं कृत्वा समाहितः ॥ दामोदरं यमं पूज्य दीपं दद्यात्स्वभक्तितः ॥ ॥ १४ ॥ संपूज्यो धर्मराजस्तु गन्धपुष्पानुलेपनैः ॥ माषास्तिलाश्च दातव्या गोविंदः प्रीयतामिति ॥ १५ ॥ तिलमाषप्रदानेन द्विजानां तर्पणेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



च ॥ यमेन सहितो देवः प्रीयते पुरुषोत्तमः ॥ १६ ॥ य एवं कुरुते विप्रास्तीर्थ आनर्त संज्ञिते ॥ सोऽश्वमेधफलं प्राप्य ब्रह्मलोके महीयते ॥ १७ ॥ यस्मिन्दिने समायातो रामस्तत्र प्रहर्षितः ॥ तस्मिन्द्विजोत्तमैः सर्वैः प्रोक्तः सोऽभ्येत्य सादरम् ॥ १८ ॥ अत्रागस्त्यो मुनिश्रेष्ठस्तिष्ठते रघुनंदन ॥ तं गत्वा पश्य विप्रेन्द्र मित्रावरुणसंभवम् ॥ १९ ॥ अथ तेषां वचः श्रुत्वा रामो राजीवलोचनः ॥ वानरै राक्षसैः सार्धं प्रहृष्टः सत्वरं ययौ ॥ २० ॥ अष्टांगप्रणिपातेन तं प्रणम्य रघूत्तमः ॥ परिष्वक्तो दृढं तेन सानन्देन महात्मना ॥ २१ ॥ नातिदूरे ततस्तस्य विनयेन समन्वितः ॥ उपविष्टो धरापृष्ठे कृतांजलिपुटः स्थितः ॥ २२ ॥ ततः पृष्टस्तु मुनिना कथयामास विस्तरात् ॥ वृत्तांतं सर्वमात्मीयं स्वर्गस्य गमनं प्रति ॥ २३ ॥ यथा सीता परित्यक्ता यथा सौमित्रिणा कृतः ॥ परित्यागः स्वकीयस्य संत्यक्तेन महात्मना ॥ ॥ २४ ॥ तथा सुग्रीवमासाद्य तथैव च विभीषणम् ॥ संभाष्य चागमस्त्वत्र ततः पुष्पकसंस्थितिः ॥ २५ ॥ ततोऽगस्त्यः कथाश्चित्राश्चक्रे तस्य पुरस्तदा ॥ राजर्षीणां पुराणानां दृष्टांतैर्बहुभिर्मुनिः ॥ २६ ॥ ततः कथावसाने च चलचित्तं रघूत्तमम् ॥ विलोक्य प्रददौ तस्मै रत्नाभरणमुत्तमम् ॥ २७ ॥ यन्न देवेषु यक्षेषु सिद्धविद्याधरेषु च ॥ नागेषु राक्षसेन्द्रेषु मानुषेषु च का कथा ॥ २८ ॥ यस्येन्द्रायुधसंघाश्च निष्क्रामंति सहस्रशः ॥ रात्रौ तमिस्रपक्षेऽपि लक्ष्यंतेऽर्कोपमत्विषः ॥ २९ ॥ तद्रामस्तु गृहीत्वाऽथ विस्मयोत्फुल्ललोचनः ॥ पप्रच्छ कौतुकाविष्टः कुतस्त्वेतन्मुने तव ॥ ॥ ३० ॥ अत्यद्भुतकरं रत्नैर्निर्मितं तिमिरापहम् ॥ कण्ठाभरणमाख्याहि नेदमस्ति जगत्त्रये ॥ ३१ ॥ ॥ अगस्तिरुवाच ॥ ॥ यत्पश्यसि रघुश्रेष्ठ तडागमिदमुत्तमम् ॥ ममाश्रमसमीपस्थं तद्देवदेवनिर्मितम् ॥ ३२ ॥ तस्य तीरे मया दृष्टं यदाश्चर्यमनुत्तमम् ॥ तत्तेऽहं संप्रवक्ष्यामि शृणुष्व रघुनन्दन ॥ ३३ ॥ कदाचिद्राघवश्रेष्ठ निशीथेऽहं समुत्थितः ॥ पश्यामि व्योममार्गेण प्रद्योतं भास्करोपमम् ॥ ३४ ॥ यावत्तावद्विमानं तदप्सरोगणराजितम् ॥ तस्य मध्यगतश्चैकः पुरुषस्तरुणस्तथा ॥ अन्धस्तत्र समारूढः स्तूयते किन्नरैर्नृपः ॥ ३५ ॥ रत्नाभरणमेतच्च बिभ्रत्कण्ठे सुनिर्मलम् ॥ द्वादशार्कप्रतीकाशं कामदेव इवापरः ॥ ३६ ॥ अथोत्तीर्य विमानाग्र्यात्स्कंधलग्नो रघूद्वह ॥ एकस्य देवदूतस्य सलिलांतमुपागतः ॥ ३७ ॥ ततश्च सलिलात्तस्मादाकृष्य च कलेवरम् ॥ मृतकस्य ततो दंतैर्भक्षयामास सत्वरम् ॥ ३८ ॥ यथायथा महामांसं स भक्षयति राघव ॥ तथातथा पुनः कायं तद्रूपं तत्प्रजायते ॥ ३९ ॥ ततस्तृप्तिं चिरात्प्राप्य शुचिर्भूत्वा प्रहर्षितः ॥ निष्क्रम्य सलिलाद्यावद्विमानमधिरोहति ॥ ४० ॥ तावन्मया द्रुतं गत्वा स पृष्टः कौतुकान्नृपः ॥ सेव्यमानोऽपि गन्धर्वैः समंताद्बुद्धितत्परैः ॥ ४१ ॥ भोभो वैमानिकश्रेष्ठ मुहूर्तं प्रतिपालय ॥ अगस्ति



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्नाम विप्रोऽहं मित्रावरुणसंभवः ॥ ४२ ॥ तच्छ्रुत्वा सम्मुखो भूत्वा प्रणाममकरोत्ततः ॥ तैश्च वैमानिकैः सार्धं सर्वैस्तैः किन्नरादिभिः ॥ ४३ ॥
सोऽयं राजा मया पृष्टः कृतानतिः पुरः स्थितः ॥ कस्त्वमीदृग्वपुः श्रीमान्विमानवरमाश्रितः ॥ सेव्यमानोऽप्सरोभिश्च गन्धर्वैः किन्नरैस्तथा ॥
॥ ४४ ॥ अत्राऽऽगत्य तडागांते महामांसप्रभक्षणम् ॥ कृतवानसि नैकल्यं कस्मात्ते दृष्टिसंभवम् ॥ ४५ ॥ ॥ वैमानिक उवाच ॥ ॥ साधु
साधु मुनिश्रेष्ठ यत्त्वं प्राप्तो ममान्तिकम् ॥ अवश्यं सानुकूलो मे विधिर्यत्त्वं समागतः ॥ ४६ ॥ साधूनां दर्शनं पुण्यं तीर्थभूता हि
साधवः ॥ कालेन फलते तीर्थं सद्यः साधुसमागमः ॥ ४७ ॥ तस्मात्सर्वं तवाख्यानं कथयामि महामुने ॥ येन मे गर्हितं भोज्यं
विभवश्च तथेदृशः ॥ ४८ ॥ अहमासं पुरा राजा श्वेतोनाम महामुने ॥ आनर्ताधिपतिः पापः सर्वलोकनिपीडकः ॥ ४९ ॥
न किंचित्प्राङ्मया दत्तं न हुतं जातवेदसि ॥ न च रक्षा कृता लोके न त्राताः शरणागताः ॥ ५० ॥ दृष्ट्वादृष्ट्वा मया रत्नं यत्किंचिद्धरणीतले ॥
तद्वै बलाद्धृतं सर्वं सर्वेषामिह देहिनाम् ॥ ५१ ॥ ततः कालेन दीर्घेण जराग्रस्तस्य मे बलात् ॥ हृतं राज्यं स्वपुत्रेण मां निर्वास्य विगर्हितम् ॥
॥ ५२ ॥ ततोऽहं जरया ग्रस्तो वैराग्यं परमं गतः ॥ समायातोऽत्र विप्रेंद्र भ्रममाण इतस्ततः ॥ ५३ ॥ ततः क्षुत्क्षामकण्ठोऽहं स्नात्वाऽत्र सलिले
शुभे ॥ मृतश्च संनिविष्टोऽहं क्षुधया परिपीडितः ॥ ५४ ॥ प्रविश्याऽत्र जले पुण्ये पंचत्वं समुपागतः ॥ ततश्च तत्क्षणादेव विमानं समुपस्थितम् ॥
॥ ५५ ॥ मामन्येन शरीरेण समादाय च ाकिंकराः ॥ तत्रारोप्य ततः प्राप्ता ब्रह्मणः सदनं प्रति ॥ ५६ ॥ दिव्यमाल्यांबरधरं दिव्यगन्धानुलेपनम् ॥
दिव्याभरणसंजुष्टं स्तूयमानं च किन्नरैः ॥ ५७ ॥ ततो ब्रह्मसभामध्ये ह्यहं तैर्देवकिंकरैः ॥ तादृग्रूपो विचक्षुश्च धारितो ब्रह्मणः पुरः ॥ ५८ ॥
सर्वैः सभागतैर्दृष्टा विस्मितास्यैः परस्परम् ॥ अन्यैश्च निन्दमानैश्च धिक्छब्दस्य प्रजल्पकैः ॥ ५९ ॥ ॥ किंकरा ऊचुः ॥ ॥ एष देवश्चतु
र्वक्त्रः सभेयं तस्य सम्भवा ॥ सर्वैर्देवगणैर्जुष्टा प्रणामः क्रियतामिति ॥ ६० ॥ ततोऽहं प्रणिपत्योच्चैस्तं देवं देवसंयुतम् ॥ उपविष्टः सभामध्ये
व्रीडयाऽवनतः स्थितः ॥ ६१ ॥ यथायथा कथास्तत्र प्रजायन्ते सभातले ॥ देवद्विजनरेन्द्राणां धर्माख्यानानि कुंभज ॥ ६२ ॥ तथातथा ममा
तीव क्षुद्वृद्धिं संप्रगच्छति ॥ जाने किं भक्षयाम्याशु दृषदः काष्ठमेव वा ॥ ६३ ॥ ततो मया प्रणम्योच्चैर्विज्ञप्तः प्रपितामहः ॥ प्रणिपत्य मुनिश्रेष्ठ
लज्जां त्यक्त्वा सुदूरतः ॥६४॥ क्षुधा मां बाधतेऽतीव सांप्रतं प्रपितामह ॥ तथा पश्यामि नो किंचित्तादृग्भोज्यं प्रयच्छ मे ॥६५॥ क्षुत्पिपासादयो
दोषा न विद्यंतेऽत्र ते किल ॥ स्वर्गे स्थितस्य यच्चैतत्तत्किमेवंविधं मम ॥६६॥ ॥ पितामह उवाच ॥ ॥ त्वया नान्नं क्वचिद्दत्तं कस्यचित्पृथिवीतले ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तेनात्रापि बुभुक्षा ते वृद्धिं गच्छति दुर्मते ॥ ६७ ॥ तथा हृतानि रत्नानि यानि दृष्टिं गतानि ते ॥ चक्षुर्हीनस्ततो जातो मम लोके गतोऽपि च ॥ ६८ ॥ यस्त्वं पातकयुक्तोऽपि संप्राप्तो मम मंदिरम् ॥ तद्वक्ष्याम्यखिलं तेऽहं शृणुष्वैकमनाः स्थितः॥ ६९ ॥ यस्मिञ्जले त्वया मुक्ताः प्राणाः पापात्मनापि च ॥ श्वेतद्वीपपतिस्तत्र कलिकालभयातुरः ॥ ७० ॥ ततोऽस्य स्पर्शनात्सद्यो विमुक्तः सर्वपातकैः ॥ अन्नादानात्परा पीडा जायते क्षुत्समुद्भवा ॥७१॥ तथा रत्नापहारेण सञ्जाता चांधता तव ॥ नैवान्यत्कारणं किंचित्सत्यमेतन्मयोदितम् ॥ ७२ ॥ ततो मया विधिः प्रोक्तः पुनरेव द्विजोत्तम ॥ एषोऽपि ब्रह्मलोकस्ते नरकादतिरिच्यते ॥ तस्मात्तत्रैव मां देव प्रेषयस्व किमत्र वै ॥ ७३ ॥ ॥ ब्रह्मोवाच ॥ ॥ तस्मात्तत्रैव गच्छ त्वं प्रेषितोऽसि किमत्र वै ॥ नरके तव वासो न श्वेतद्वीपसमुद्भवम् ॥७४॥ माहात्म्यं नाशमायाति शास्त्रं स्यात्सत्यवर्जितम् ॥ तस्मात्त्वं नित्यमारूढो विमानेऽत्रैव सुन्दरे ॥ ७५ ॥ गत्वा जलाशये तस्मिन्यत्र प्राणाः समुज्झिताः ॥ तमेव निजदेहं च भक्षयस्व यथेच्छया ॥ ७६ ॥ तद्भविष्यति मद्वाक्यादक्षयं जलमध्यगम् ॥ तावत्कालं च दृष्टिस्ते भोज्यकाले भविष्यति ॥ ७७ ॥ ततोऽहं तस्य वाक्येन दीपोत्सवदिने सदा ॥ निशीथेऽत्र समागत्य भक्षयामि निजां तनुम् ॥ ७८ ॥ ततस्तृप्तिं प्रगच्छामि यावद्दैवं दिनं स्थितम् ॥ मानुषं च तथा वर्षमीदृग्रूपो व्यवस्थितः ॥ ७९ ॥ नास्त्यसाध्यं मुनिश्रेष्ठ तव किंचिज्जगत्त्रये ॥ येनैकं चुलुकं कृत्वा निपीतः पयसांनिधिः ॥ ८० ॥ तस्मान्मुने दयां कृत्वा ममोपरि महत्तराम् ॥ अकृत्याद्रक्ष मामस्मात्सर्वलोकविगर्हितात् ॥ ८१ ॥ तथा दृष्टिप्रदानं मे कुरुष्व मुनिसत्तम ॥ निर्विण्णोऽस्म्यंधभावेन नान्या त्वत्तोऽस्ति मे गतिः ॥ ॥ ८२ ॥ तस्य तद्वचनं श्रुत्वा कृपया मम मानसम् ॥ द्रवीभूतं तदा वाक्यमवोचं तं रघूत्तम ॥ ८३ ॥ त्वमन्ननिष्क्रयं देहि कण्ठस्थमिह भूषणम् ॥ येन नाशं प्रयात्येषा बुभुक्षा जठरोद्भवा ॥ ८४ ॥ तथाऽद्यप्रभृति प्राज्ञ रत्नदीपान्सुनिर्मलान् ॥ अत्रैव सरसस्तीरे देहि दामोदराय च ॥ ८५ ॥ येन संजायते दृष्टिः शाश्वती तव निर्मला ॥ मम वाक्यादसंदिग्धं सत्येनात्मानमालभे ॥ ८६ ॥ ॥ राजोवाच ॥ ॥ ममोपरि दयां कृत्वा त्वमेव मुनिसत्तम ॥ गृहाण रत्नसंभूतं कण्ठाभरणमुत्तमम् ॥ ८७ ॥ ततो दयाभिभूतेन मया तस्य प्रतिग्रहः ॥ निःस्पृहेणापि संचीर्णो मुनिनारण्यवासिना ॥ ८८ ॥ ततः प्रक्षाल्य मे पादौ यावत्तेनान्ननिष्क्रये ॥ विभूषणमिदं दत्तं सद्भक्त्या भावितात्मना ॥ ८९ ॥ ततस्तस्य प्रणष्टा सा

१ इतः परं केषुचित्पुस्तकेषु—"सूत उवाच—तस्य तद्वचनं श्रुत्वा कृपाविष्टो मुनीश्वरः ॥ तं प्रोवाचाथ दुःखार्तं मृतं संजीवयन्निव ॥" इति पाठो दृश्यते—परं स प्रकरणविरुद्ध इवाभाति । यतः—प्रस्तुतप्रसंगे च श्रीरामं प्रत्यगस्त्योक्तिरियम्—ततः—अगस्त्येन निजवृत्तान्तनिरूपणप्रसंगस्यैवौचित्यात्स्वोक्तेरेव समञ्जसत्वम्—अतो मूलस्थ एव पाठः समीचीनः—इति सुधियो विमृशन्तु ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुभुक्षा तत्क्षणान्नृप ॥ संजाता परमा तृप्तिर्देवपीयूषसंभवा ॥ ९० ॥ तस्य नष्टं मृतं कायं तच्च जीर्णं पुरोद्भवम् ॥ यदासीदक्षयं नित्यं तस्मिंस्तोये व्यवस्थितम् ॥ ९१ ॥ ततः संस्थापितस्तेन तस्मिन्स्थाने सुभक्तितः ॥ दामोदरो रघुश्रेष्ठ कृत्वा प्रासादमुत्तमम् ॥ ९२ ॥ तस्याग्रे श्रद्धया युक्तो दीपं दद्याद्यथायथा ॥ तथातथा भवेद्दृष्टिस्तस्य नित्यं सुनिर्मलाम् ॥ ९३ ॥ ततो मासात्समासाद्य दिव्यचक्षुर्महीपतिः ॥ स बभूव नृपश्रेष्ठः स्पृहणीयतमः सताम् ॥ ९४ ॥ ततः प्रोवाच मां हृष्टः प्रणिपत्य कृतांजलिः ॥ हर्षगद्गदया वाचा प्रस्थितस्त्रिदिवं प्रति ॥ ९५ ॥ त्वत्प्रसादात्प्रणष्टा मे बुभुक्षाऽतिसुदारुणा ॥ तथा दृष्टिश्च संजाता दिव्या ब्राह्मणसत्तम ॥ ९६ ॥ अनुज्ञां देहि मे तस्माद्येन गच्छामि सांप्रतम् ॥ ब्रह्मलोकं मुनिश्रेष्ठ तीर्थस्यास्य प्रभावतः ॥ ९७ ॥ ततो मया विनिर्मुक्तः प्रणिपत्य मुहुर्मुहुः ॥ स जगाम प्रहृष्टात्मा ब्रह्मलोकं सनातनम् ॥ ९८ ॥ एवं मे भूषणमिदं जातं हस्तगतं पुरा ॥ तव योग्यमिदं ज्ञात्वा तुभ्यं तेन निवेदितम् ॥ ९९ ॥ ततःप्रभृति राजेंद्र समागत्यात्र मानवाः ॥ रत्नदीपान्प्रदायोच्चैः स्नात्वाऽत्र सलिले शुभे ॥ कार्तिके मासि निर्यांति देहांते त्रिदिवालयम् ॥ १०० ॥ ये पुनः प्राणसंत्यागं प्रकुर्वंति समाहिताः ॥ पापात्मानोऽपि ते यांति ब्रह्मलोकं रघूत्तम ॥ १०१ ॥ ततो दृष्ट्वा सहस्राक्षः प्रभावं तज्जलोद्भवम् ॥ पांसुभिः पूरयामास समंताद्भयसंकुलम् ॥ १०२ ॥ तदद्य दिवसः प्राप्तो दीपोत्सवसमुद्भवः ॥ सुपुण्योऽत्र ममादेशात्त्वं कुरुष्व सुकूपिकाम् ॥ १०३ ॥ तस्यां स्नानं विधायाथ पितॄंस्तर्पय राघव ॥ देवस्यास्य पुरो देहि रत्नदीपमनुत्तमम् ॥१०४॥ येन संजायते सिद्धिर्ब्रह्मलोकसमुद्भवा ॥ अनेनैव शरीरेण सत्यमेतन्मयोदितम् ॥१०५॥ ततस्ते राघवादेशात्सर्वे राक्षसवानराः ॥ तस्मिन्देशे विनिदधुः कूपिकां विमलोदकाम् ॥१०६॥ तत्र स्नात्वा पितॄंस्तर्प्य रत्नदीपं प्रदाय च ॥ समस्तं कार्तिकं यावदयोध्यां प्रस्थितास्ततः ॥ १०७ ॥ ततो विभीषणं मुक्त्वा हनूमंतं च वानरम् ॥ ब्रह्मलोकं गताः सर्वे तत्तीर्थस्य प्रभावतः ॥ १०८ ॥ ॥ सूत उवाच ॥ ॥ अद्यापि दीपदानं यः कुरुते तत्र सादरम् ॥ संप्राप्ते कार्तिके मासि स्नात्वा तत्र जले शुभे ॥ स सर्वपातकैर्मुक्तो ब्रह्मलोके महीयते ॥ १०९ ॥ एवं तत्र समुत्पन्नं तत्तडागं शुभावहम् ॥ आनर्त्तीयं तथा विष्णुकूपिका सा च शोभना ॥ ११० ॥ इति श्रीस्कांदे महापुराण एकाशीति साहस्र्यां संहितायां षष्ठ नागरखडे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये आनर्तकतीर्थकूपिकामाहात्म्यवर्णनंनाम त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥ ॥ छ ॥ ॥ ॥ ॥ ऋषय ऊचुः ॥ ॥ राक्षसैस्तत्र लिंगानि यानि भक्त्या समन्वितैः ॥ स्थापितानि च माहात्म्यं तेषां सूत प्रकीर्तय ॥ १ ॥ ॥ सूत उवाच ॥ ॥

२ ततःप्रभृति--श्वेतभूपत्युद्धारादिनमारभ्य--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तेषां पूजाकृते रौद्रा राक्षसा बलवत्तराः ॥ लंकापुर्याः समायांति सदैव शतशः पुरा ॥ २ ॥ आगच्छन्तो व्रजन्तस्ते मार्गे क्षेत्रे च तत्र च ॥ भक्षयन्ति जनौघांश्च बालवृद्धाङ्गनानपि ॥ ३ ॥ ततस्ते मानवाः सर्वे प्रद्रवंतः समंततः ॥ इतश्चेतश्च धावन्ति प्राणरक्षणतत्पराः ॥ ४ ॥ तथान्ये बहवो गत्वा ह्ययोध्याख्यां महापुरीम् ॥ रामपुत्रं नृपश्रेष्ठं कुशं प्रोचुः सुदुःखिताः ॥ ५ ॥ तव पित्रा समं प्राप्ताः पूर्वं ये राक्षसा नृप ॥ हाटकेश्वरजे क्षेत्रे विभीषणपुरःसराः ॥ ६ ॥ संस्थापितानि लिंगानि चतुर्वक्राणि तत्र वै ॥ राक्षसेंद्रैः स्वमन्त्रैस्तैस्तस्य क्षेत्रस्य पश्चिमे ॥ ७ ॥ तेनैव चानुषंगेण समागच्छंति नित्यशः ॥ तस्मिन्क्षेत्रे प्रकुर्वंति तथा लोकस्य भक्षणम् ॥ ८ ॥ यदि वा तानि लिंगानि कश्चित्संपूजयेन्नरः ॥ सद्यो विनाशमायाति सोऽप्यनर्थो महान्[1]भूत् ॥ ९ ॥ तस्माद्यदि न रक्षां नः करिष्यसि महीपते ॥ तच्छनैर्यास्यते लोकः सर्वोऽयं संक्षयं ध्रुवम् ॥ १० ॥ तत्र क्षेत्रविशेषेण यत्रागच्छंति ते सदा ॥ राक्षसाः क्रूरकर्माणो महामांसस्य लोलुपाः ॥ ११ ॥ तच्छ्रुत्वा स नृपस्तूर्णं स्वामात्यानां न्यवेदयत् ॥ राज्यभारं ततस्तत्र बलेन सहितो ययौ ॥ १२ ॥ अथ प्राप्तं कुशं दृष्ट्वा हतशेषा द्विजोत्तमाः ॥ प्रोचुस्तं भर्त्सयित्वा तु वचनैः परुषाक्षरैः ॥ १३ ॥ किमेवं क्रियते राज्यं यथा त्वं क्षत्रियाधमः ॥ करोषि यत्र विध्वंसं राक्षसैर्नीयते जनः ॥ १४ ॥ नूनं जातो न रामेण भवान्रावणसंभवः ॥ येनोपेक्षसि सर्वान्नो राक्षसैः परिपीडितान् ॥ १५ ॥ सत्यमेतत्पुरा प्रोक्तं नीतिशास्त्रविचक्षणैः ॥ यस्य वर्णस्य यो राजा स वर्णः सुखमेधते ॥ १६ ॥ तस्मात्त्वं राक्षसोद्भूतो राक्षसैर्द्विजसत्तमान् ॥ उपेक्षसे ततः सर्वान्भक्ष्यमाणांस्तथापरान् ॥ १७ ॥ आर्तानां यत्र लोकानां दोषैः पार्थिवसंभवैः ॥ पतंत्यश्रूणि भूपृष्ठे तत्र राजा स दोषभाक् ॥ १८ ॥ ॥ कुश उवाच ॥ ॥ प्रसादः क्रियतां विप्रा न मया ज्ञातमीदृशम् ॥ राक्षसेभ्यः समुत्पन्नो ब्राह्मणानां पराभवः ॥ १९ ॥ अद्यप्रभृति यः कश्चिद्विनाशं नीयते क्वचित् ॥ ब्राह्मणो वाऽथवाऽन्योऽपि तद्भवेन्मम पातकम् ॥ २० ॥ एवमुक्त्वा ततस्तूर्णं प्रेषयामास राघवः ॥ विभीषणाय संक्रुद्धो दूतं भयविवर्जितम् ॥ २१ ॥ गच्छ दूत द्रुतं गत्वा त्वया वाच्यो विभीषणः ॥ रामोचितस्त्वया स्नेहो मया सह कृतो महान् ॥ २२ ॥ यद्राक्षसगणैः सार्धं मम भूमिं समंततः ॥ त्वं क्लेशयसि दुर्बुद्धे मां विश्वास्य सुभाषितैः ॥ २३ ॥ मम पित्रा कृतेयं ते प्रतिष्ठा राक्षसाधम ॥ तेन नो हन्मि ते भ्राता यथा तातेन शातितः ॥ २४ ॥ विषवृक्षोऽपि यो वृद्धिं स्वयमेव प्रणीयते ॥ कथं संछिद्यते सोऽत्र स्वयमेव मनीषिभिः ॥ २५ ॥ तस्मादद्य दिनादूर्ध्वं यदि कश्चिन्निशाचरः ॥ समुद्रस्योत्तरं पारं कथंचिदागमिष्यति ॥ २६ ॥

१ महान्स्मृतः—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदहं सत्वरं प्राप्य लंकां तव पुरीमिमाम् ॥ ससैन्यो ध्वंसयिष्यामि तथा सर्वान्निशाचरान् ॥ २७ ॥ त्वां च बद्ध्वा दृढैः पाशैर्निगडैश्च सुसंयतम् ॥ कारासंस्थं करिष्यामि सद्य एव न संशयः ॥ २८ ॥ एवमुक्तस्ततो दूतो गत्वा सेतुं द्रुतं ततः ॥ दृष्ट्वा रामेश्वरं देवं यावदग्रे व्यवस्थितः ॥ २९ ॥ तावत्पृष्टो जनैः कैश्चित्कस्त्वं वत्स इहागतः ॥ केन कार्येण नो ब्रूहि नात्र गच्छंति मानवाः ॥ ३० ॥ ॥ दूत उवाच ॥ ॥ अहं कुशेन भूपेन विभीषणगृहं प्रति ॥ प्रेषितः कार्यमुद्दिश्य तत्र यास्याम्यहं कथम् ॥ ३१ ॥ ॥ जना ऊचुः ॥ ॥ नातः परं नरः कश्चिद्गन्तुं शक्तः कथंचन ॥ भग्नः सेतुर्यतो मध्ये रामेणाक्लिष्टकर्मणा ॥ ३२ ॥ तस्मादत्रैव ते कार्यं सिद्धिं दूत प्रयास्यति ॥ विभीषणकृतं सर्वं दर्शनात्तस्य रक्षसः ॥ ३३ ॥ सर्वदा राक्षसेन्द्रोऽसौ शुभं रामेश्वरत्रयम् ॥ त्रिकालं पूजयत्येव नियमं समुपाश्रितः ॥ ३४ ॥ लंकाद्वारे स्थितो यो वै सेतुखण्डे महेश्वरः ॥ प्रभाते कुरुते तस्य स्वयं पूजां विभीषणः ॥ ३५ ॥ जलमध्यगतं यच्च सेतुखंडं द्वितीयकम् ॥ तत्र रामेश्वरो यश्च मध्याह्ने तं प्रपूजयेत् ॥ ३६ ॥ एनं देवं निशीथे च सर्वदागत्य भक्तितः ॥ संपूजयेन्न सन्देहः सत्यमेतत्प्रकीर्तितम् ॥ ३७ ॥ तस्मात्तिष्ठ त्वमव्यग्रः स्थानेऽत्रैव समाहितः ॥ यावदागमनं तस्य राक्षसस्य महात्मनः ॥ ३८ ॥ तेनैव सहितः पश्चात्स्वेच्छया तस्य मन्दिरम् ॥ प्रयास्यसि गृहं वापि स्वकीयं तद्विसर्जितः ॥ ३९ ॥ अथ तेषां तदाकर्ण्य स दूतो हर्षसंयुतः ॥ बाढमित्येव चोक्त्वाथ तत्र चैव व्यवस्थितः ॥ ४० ॥ अथ प्राप्ते निशार्धे स राक्षसैः परिवारितः ॥ विभीषणः समायातस्तस्मिन्नायतने शुभे ॥ ४१ ॥ विमानवरमारूढः स्तूयमानः समन्ततः ॥ राक्षसैर्बंदिरूपैस्तैर्गीयमानस्तथा परैः ॥४२॥ उत्तीर्य च विमानाग्र्यात्कृत्वाऽथ त्रिः प्रदक्षिणाम् ॥ रामेश्वरं प्रणम्योच्चैः स्तोत्रमेतच्चकार सः ॥४३॥ नमस्ते देवदेवेश भक्तानामभयप्रद ॥ सर्वतःपाणिपादं ते सर्वतोक्षिशिरोमुखम् ॥ ४४ ॥ त्वं यज्ञस्त्वं वषट्कारस्त्वं चंद्रस्त्वं प्रभाकरः ॥ त्वं विष्णुस्त्वं चतुर्वक्त्रः शक्रस्त्वं परमेश्वरः ॥ ४५ ॥ यथा तिलगतं तैलं गूढं तिष्ठति सर्वदा ॥ तथा त्वं सर्वलोकेषु गूढस्तिष्ठसि शंकर ॥ ४६ ॥ यथा काष्ठगतो वह्निः संस्थितोऽपि न लक्ष्यते ॥ मूढैः सर्वत्रसंस्थोपि तथा त्वं नैव लक्ष्यसे ॥४७॥ यथा दधिगतं सर्पिर्निगूढत्वेन संस्थितम् ॥ चराचरेषु भूतेषु तथा त्वं देव संस्थितः ॥४८॥ यथा जलं धरापृष्ठात्खनन्नाप्नोति मानवः ॥ तथा त्वां पूजयन्नित्यं मोक्षमाप्नोत्यसंशयम् ॥ ४९ ॥ तावच्च दुर्लभः स्वर्गस्तावच्छूराश्च शत्रवः ॥ यावदेव न सन्तोषं त्वं करोषि शरीरिणाम् ॥ ५० ॥ तावल्लक्ष्मीश्चला नृणां तावद्रोगाः पृथग्विधाः ॥ न यावद्देवदेव त्वं सन्तोषं संप्रयास्यसि ॥ ५१ ॥ तावत्पुत्रोद्भवं दुःखं तथा प्रियसमुद्भवम् ॥ यावत्त्वं देव नायासि सन्तोषं देहिनामिह ॥ ५२ ॥ एवं स्तुत्वा ततो लिंगं स्नापयित्वा यथाविधि ॥ गन्धानुलेपनैर्दिव्यैर्मर्दयामास वै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

ततः ॥ ९३ ॥ पारिजातकपुष्पैश्च तथा सन्तानसम्भवैः ॥ कल्पपादपसंभूतैस्तथा मन्दारजैरपि ॥९४॥ पूजांचक्रे सुविस्तीर्णां श्रद्धया परया युतः ॥
दिव्यैराभरणैर्भूष्य दिव्यवस्त्रैस्ततः परम् ॥ ९५ ॥ स च गीतं स्वयं चक्रे तालमादाय पाणिना ॥ मूर्छातालकृतं रम्यं सप्तस्वरविराजितम् ॥ ९६ ॥
तानयुक्त्या समोपेतं ग्रामै रागैः स्वलंकृतम् ॥ एवं कृत्वा स शुश्रूषां तस्य देवस्य भक्तितः ॥ ९७ ॥ यावत्संप्रस्थितो भूयो लंकां प्रति विभीषणः ॥
तावद्दूतोऽग्रतः स्थित्वा कुशवाक्यमुवाच ह ॥ ९८ ॥ विशेषतस्तु तेनोक्तं यत्तस्य पुरतः पुरा ॥ अतिकोपाभिभूतेन प्ररक्तनयनेन च ॥ ९९ ॥
तच्छ्रुत्वाथ प्रणम्योच्चैर्दूतं प्राह विभीषणः ॥ कृतांजलिपुटो भूत्वा विनयावनतः स्थितः ॥ ६० ॥ यद्येवं विहितं राज्ये रामपुत्रस्य राक्षसैः ॥
तन्नूनं तन्मया सर्वं विहितं दूतसत्तम ॥ ६१ ॥ तस्मान्महाप्रसादो मे कृतस्तेन महात्मना ॥ कुशेन प्रेषितो यस्त्वं मम मूर्खस्य संनिधौ ॥ ६२ ॥
एवमुक्त्वा स तान्सर्वाञ्छोधयामास राक्षसान् ॥ ये गत्वा भूतले मर्त्यान्ध्वंसयंति सदैव हि ॥ ६३ ॥ ततस्तत्रैव चानीय तस्य दूतस्य संनिधौः ॥
प्रत्येकं तानुवाचेदं कोपादश्रूणि चोत्सृजन् ॥ ६४ ॥ यैः कृतो जनविध्वंसो राक्षसैः सुदुरात्मभिः ॥ राज्ये कुशस्य संप्राप्तैः प्रभोर्मम महात्मनः ॥
॥ ६५ ॥ ते सर्वे व्यंतरा रौद्राः प्रभवंतु सुदुःखिताः ॥ लंकाद्वारगता नित्यं क्षुत्पिपासानिपीडिताः ॥ ६६ ॥ सर्वभोगपरित्यक्ताः शीतातपसहि
ष्णवः ॥ श्लेष्ममूत्रकृताहारा निन्द्याः सर्वजनस्य च ॥ ६७ ॥ एवं दत्त्वाथ तेषां स शापं राक्षससत्तमः ॥ ततः प्राह च तं दूतं पुनरेव कृतां
जलिः ॥ ६८ ॥ अद्यप्रभृति नो कश्चिद्राक्षसः संप्रयास्यति ॥ तस्माद्वाच्यो रघुश्रेष्ठो मद्वाक्यात्स कुशस्त्वया ॥ क्षम्यतामपराधो मे यदज्ञाना
दयं कृतः ॥ ६९ ॥ राक्षसैर्दुष्टजातीयैर्महामांसस्य लोलुपैः ॥ कृतश्च निग्रहस्तेषां प्रत्यक्षं तव दूत यः ॥ ७० ॥ यदन्यदपि कृत्यं स्याद्दैवं वा मानुषं
च वा ॥ मम भृत्यस्य तत्सर्वं कथनीयमशंकितम् ॥ ७१ ॥ ॥ दूत उवाच ॥ ॥ यानि तत्र च लिंगानि राक्षसैर्निर्मितानि च ॥ तानि गत्वा
स्वयं शीघ्रं त्वमुत्पाटय राक्षस ॥ ७२ ॥ एतदेव परं कृत्यं सर्वलोकसुखावहम् ॥ स्थापितानि च यान्येव मंत्रैः राक्षससंभवैः ॥ ७३ ॥ संपूजितानि
रक्षोभिश्चतुर्वक्राणि राक्षस ॥ अजानन्मानवः कश्चिद्यदि पूजां समाचरेत् ॥७४॥ तत्क्षणान्नाशमायाति एतद्दृष्टं मया स्वयम् ॥ एतस्मात्कारणाद्ब्रूमि
त्वामहं राक्षसाधिप ॥ तैः स्थितैर्भूतले लिंगैः स्थिताः सर्वे निशाचराः ॥७५॥ ॥ विभीषण उवाच ॥ ॥ मया पूर्वं प्रतिज्ञातं रामस्य पुरतः किल ॥ 
रामेश्वरमतिक्रम्य न गंतव्यं धरातले ॥ ७६ ॥ अन्यच्च कारणं दूत प्रोक्तमत्र मनीषिभिः ॥ दुःस्थितं सुस्थितं वापि शिवलिंगं न चालयेत् ॥ ७७ ॥
तत्कथं तत्र गत्वाऽथ लिंगभेदं करोम्यहम् ॥ स्वयं माहेश्वरो भूत्वा प्रतिज्ञाय च वै स्वयम् ॥ ७८ ॥ तस्मात्प्रसादनीयस्ते मद्वाक्यात्स नराधिपः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्युक्तं मया प्रोक्तं तत्त्वं कुरु विनिग्रहम् ॥ ७९ ॥ एवमुक्त्वाथ तं दूतं रत्नैः सागरसंभवैः ॥ प्रभूतैर्भूषयित्वाऽथ विससर्ज नृपं प्रति ॥ ८० ॥ अथ ते राक्षसास्तेन शप्ताः प्रोचुः सुदुःखिताः ॥ कुरु शापस्य मोक्षं नः सर्वेषां राक्षसेश्वर ॥ ८१ ॥ ॥ विभीषण उवाच ॥ ॥ नाहं करोमि भूयोऽपि युष्माकं राक्षसाधमाः ॥ अनुग्रहं प्रशप्तानां वंचकानां विशेषतः ॥ ८२ ॥ तस्मात्सोऽपि रघुश्रेष्ठः प्रसादं वः करिष्यति ॥ मम वाक्याद संदिग्धं कालः कश्चित्प्रतीक्ष्यताम् ॥ ८३ ॥ एवमुक्त्वाऽथ रक्षेन्द्रः प्रेषयामास सत्वरम् ॥ दूतं कुशमहीपस्य मानुषं देवपूजकम् ॥ ८४ ॥ गत्वा ब्रूहि कुशं भूपं सत्वरं वचनान्मम ॥ एतेषां मत्प्रशप्तानां राक्षसानां दुरात्मनाम् ॥ अनुग्रहं कुरु विभो दीनानां भोजनाय वै ॥ ८५ ॥ एवमुक्तस्त तस्तेन दूतो दूतेन[१] संयुतः ॥ कुशस्तेन विनिर्यातः सत्वरं द्विजसत्तमाः ॥ ८६ ॥ ततो गत्वा द्रुतं दूतः कुशं प्रोवाच सादरम् ॥ प्रणिपत्य यथा न्यायं विनयावनतः स्थितः ॥ ८७ ॥ विभीषणो मया दृष्टो देवे रामेश्वरे विभो ॥ पूजार्थं तत्र चायातो राक्षसैर्बहुभिर्वृतः ॥ ८८ ॥ प्रोक्तो मया भवद्वाक्यमशेषं रघुनन्दन ॥ श्रुतं तेनापि तत्सर्वं विनयावनतेन च ॥ ८९ ॥ अजानतः प्रभो तस्य राक्षसैः सुदुरात्मभिः ॥ प्रजैवं पीडिता भूमौ महामांसस्य लोलुपैः ॥ ९० ॥ तच्छ्रुत्वा मन्मुखात्तेन सर्वेषां निग्रहः कृतः ॥ यैः कृतं कदनं भूमौ तत्र पार्थिव सत्तम ॥ कृतास्ते व्यन्तराः सर्वे पापाहारविहारिणः[२] ॥ ९१ ॥ भविष्यथ तथा यूयं क्षुत्पिपासानिपीडिताः ॥ तैः सर्वैः प्रार्थितः सोऽपि भूयोभूयः प्रणम्य तम् ॥ ९२ ॥ शप्ताः सर्वे वयं तावत्प्रसादं कुरु तद्विभो ॥ ते तेनाथ ततः प्रोक्ता नाहं वो राक्षसाधमाः ॥ ९३ ॥ अनुग्रहं करिष्यामि न दास्यामि च भोजनम् ॥ कुशादेशान्मया सर्वे यूयं पापसमन्विताः ॥ ९४ ॥ निगृहीताः स युष्माकं प्रसादं प्रकरिष्यति ॥ तदर्थं प्रेषितो दूतस्त्वत्सकाशं महीपते ॥ ९५ ॥ रक्षसा तेन यद्युक्तमखिलं तत्त्वमाचर ॥ किं वा ते बहुनोक्तेन नास्ति भक्तस्तथा विधः ॥ भक्तिशक्तिसमोपेतो यथा ते स विभीषणः ॥ ९६ ॥ अद्यप्रभृति नो भूमौ विचरिष्यंति राक्षसाः ॥ तस्य वाक्यादसंदेहं त्वं राजन्सुख भाग्भव ॥ ९७ ॥ लिंगानां च कृते राजन्विज्ञप्तं तेन रक्षसा ॥ न मया चात्र राजेंद्र आगन्तव्यं कथंचन ॥ रामदेवस्य वाक्येन जंबुद्वीपे न मे

१ दूतेन—विभीषणेन कुशं प्रति स्वेन सह प्रेषितेन विभीषणभृत्येन सह—इत्यर्थः । २ पापाहारविहारिणः—पापौ—पापकरौ च तावाहारविहारौ च—पापाहारविहारौ—पापाहारविहारौ विद्येते येषां ते पापाहार विहारिणः—दोषदूषिताहारविहारवन्तः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



गतिः ॥ ९८ ॥ अत्र स्थितस्य यत्कृत्यं दैवं वा मानुषं च वा ॥ तवादेशं करिष्यामि यद्यपि स्यात्सुदुष्करम् ॥ ९९ ॥ तस्मात्तेन महाराज रामेश्वरप्रपूजकः ॥ मनुष्यः प्रेषितो दूतो यस्तं पश्य महीपते ॥ १०० ॥ अथ तस्य समादेशाड्ढौकनीयैः पृथग्विधैः ॥ सहितः स समायातो दूतो रक्षेंद्रनोदितः ॥ १०१ ॥ धात्रीफलप्रमाणानां तेन प्रस्थास्त्रयोदश ॥ मौक्तिकानां समानीताः कृते तस्य महीपतेः ॥ १०२ ॥ वैडूर्याणां मरकतानां मणीनां च द्विजोत्तमाः ॥ जात्यानां षोडश द्रोणाः समानीताः सुनिर्मलाः ॥ १०३ ॥ अग्निशौचानि वस्त्राणि तथा देवमयानि च ॥ असंख्यातानि वै हेम जात्यं संख्याविवर्जितम् ॥ १०४ ॥ तत्सर्वं दर्शयित्वाथ कुशाय सुमहात्मने ॥ कृत्वा प्रदक्षिणं पश्चात्प्रणाममकरोद्द्विजाः ॥ ॥ १०५ ॥ एष पार्थिवशार्दूल राक्षसेन्द्रो विभीषणः ॥ प्रणामं कुरुते भक्त्या मन्मुखेनेदमब्रवीत् ॥ १०६ ॥ प्रसादात्ते पितुः क्षेमं मम राज्ये महीपते ॥ एष तिष्ठाम्यहं नित्यं पूजयंस्ते पितुर्हरम् ॥ ॥ १०७ ॥ मम राजन्नविज्ञातैर्यदि तैः सुदुरात्मभिः ॥ महीतले कृतं किंचिद्विरुद्धं क्षम्यतां मम ॥ १०८ ॥ एते ये राक्षसाः शप्तास्तवार्थाय मया प्रभो ॥ एतेषां प्रेतरूपाणां त्वमाहारं प्रकीर्तय ॥ १०९ ॥ ॥ कुश उवाच ॥ ॥ ममादेशात्समागत्य तेऽत्र लिंगानि कृत्स्नशः ॥ पूरयंतु प्रयत्नेन पांसुभिः सर्वतोदिशम् ॥ ११० ॥ ततस्तु भोजनं तेषां यद्भविष्यति भूतले ॥ तद्वक्ष्यामि स्थिरो भूत्वा शृणु देवप्रपूजक ॥ १११ ॥ तुलागते सदादित्ये तैरागत्य धरातले ॥ विहर्तव्यं प्रयत्नेन यावद्वृश्चिकदर्शनम् ॥ ११२ ॥ तत्र यैर्न कृतं श्राद्धं प्रेतपक्षे नराधमैः ॥ कन्यास्थे वा रवौ यावन्न तुलांतगतिर्भवेत् ॥ ११३ ॥ ज्वररूपैस्तदंगस्थैर्भक्ष्यमन्नं पृथग्विधम् ॥ ममादेशादसंदिग्धं मासमेकं निशाचरैः ॥ ११४ ॥ विधिहीनं च यैर्दत्तं भुक्तं च विधिवर्जितम् ॥ श्राद्धं वा मानुषैः सेव्या ज्वररूपैश्च ते सदा ॥ ११५ ॥ एवं वाच्यास्त्वया सर्वे प्रेतास्ते मद्वचोऽखिलम् ॥ तस्मादागत्य कुर्वंतु कार्तिके मासि मद्वचः ॥ ११६ ॥ तथा दूत त्वया वाच्यो मम वाक्याद्विभीषणः ॥ प्रमादाद्यन्मया प्रोक्तं परुषं वचनं तव ॥ ११७ ॥ जानाम्यहं महाभाग न तेऽस्ति विकृतिः क्वचित् ॥ परिक्लिष्टं जनं दृष्ट्वा मयैतद्व्याहृतं वचः ॥ ११८ ॥ राक्षसेन्द्रे स्थिते भूमौ त्वयि जानाम्यहं सदा ॥ तिष्ठते जनको मह्यं रामः शस्त्रभृतां वरः ॥ ११९ ॥ एवमुक्त्वा ततो दूतं पूजयामास राघवः ॥ वस्त्रैर्बहुविधै रत्नैर्नंद्युतैश्च पृथग्विधैः ॥ १२० ॥ विभीषणकृते पश्चात्प्रेषयामास राघवः ॥ ढौकनीयान्यनेकानि यानि संति च



१ ढौकनीयैः—उपायनैः—इत्यर्थः । २ मह्यम्—मम—इत्यर्थः । ३ तेभ्यो मुक्तादिकं नृपः—इ० पा० । ४ धरातले—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र वै ॥ १२१ ॥ ॥ सूत उवाच ॥ ॥ एवं स सुखसंयुक्तान्कृत्वा सर्वान्द्विजोत्तमान् ॥ एतत्सर्वं ददौ पश्चात्तेभ्यो मुक्तादिकं नृपः ॥ १२२ ॥ ढौकनीयं तथाऽऽयातं तल्लंकायाः पृथग्विधम् ॥ शासनानि तथान्यानि गजाश्वसहितानि च ॥ १२३ ॥ पत्तनानि विचित्राणि ग्रामाणि नगराणि च ॥ यच्चान्यद्वांछितं येन तद्दत्तं तेन तस्य वै ॥ १२४ ॥ ततः कुशेश्वरं देवं विधाय च लवेश्वरम् ॥ स्वां तनुं च महाभागौ भ्रातरौ तौ रघूत्तमौ ॥ १२५ ॥ निवेद्य ब्राह्मणेन्द्राणां कृत्वा वृत्तिं यथोचिताम् ॥ अयोध्यां नगरीं तूर्णं कृतकृत्यौ विनिर्गतौ ॥ १२६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये कुशेश्वरलवेश्वरप्रतिष्ठावर्णनंनाम चतुरुत्तरशततमोऽध्यायः ॥ ॥ १०४ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ अथ प्राप्ते दिनाधीशे तुलायां द्विजसत्तमाः ॥ प्रेता लिंगोद्भवां भूमिं पूरयामासुरेव हि ॥ १ ॥ यत्किंचित्तत्र संस्थं तु आद्यतीर्थं सुरालयम् ॥ तत्सर्वं व्यन्तरैस्तैश्च पांसुभिः परिपूरितम् ॥ २ ॥ ततः क्षेमं समुत्पन्नं क्षेत्रे तत्र द्विजोत्तमाः ॥ अन्येषामपि लोकानां लिंगैस्तैर्लुप्तिमागतैः ॥ ३ ॥ कस्यचित्त्वथ कालस्य बृहदश्वो महीपतिः ॥ शाल्वदेशात्समायातः कस्मिंश्चिद्युगपर्यये ॥ ४ ॥ स दृष्ट्वा विपुलां भूमिं प्रासादैः परिवर्जिताम् ॥ प्रासादार्थं मतिं चक्रे तत्र क्षेत्रे द्विजोत्तमाः ॥ ५ ॥ शिल्पिनश्च समाहूयानेकांस्तत्र सहस्रशः ॥ शोधयामास तां भूमिमधस्ताद्बहुविस्तृताम् ॥ ६ ॥ भूमौ निखन्यमानायां ततो लिंगानि भूरिशः ॥ चतुर्वक्त्राणि तान्येव यांति दृष्टेश्च गोचरम् ॥ ७ ॥ ततः स पार्थिवस्तैश्च लिंगैर्दृष्ट्वा वृतां भुवम् ॥ तत्क्षणान्मृत्युमापन्नः शिल्पिभिश्च समन्वितः ॥ ८ ॥ ततःप्रभृति नो तत्र कश्चिन्मर्त्यो महीतले ॥ प्रासादं कुरुते भीत्या तडागं कूपमेव च ॥ ९ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये राक्षसलिंगच्छेदनंनाम पञ्चोत्तरशततमोऽध्यायः ॥ १०५ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ भूपृष्ठे पांसुभिस्तस्मिन्प्रेतैस्तैः परिपूरिते ॥ यानि तीर्थानि लुप्तानि लिङ्गानि च वदस्व नः ॥ १ ॥ ॥ सूत उवाच ॥ ॥ असंख्यातानि तीर्थानि तथा लिंगानि च द्विजाः ॥ लोपं गतानि वक्ष्यामि प्राधान्येन प्रबोधत ॥ २ ॥ तत्र लोपं गतं तीर्थं चक्रतीर्थमिति स्मृतम् ॥ यत्र चक्रं पुरा न्यस्तं विष्णुना प्रभविष्णुना ॥ ॥ ३ ॥ मातृतीर्थं तथैवान्यत्सर्वकामप्रदं नृणाम् ॥ यत्र ता मातरो दिव्याः कार्तिकेयप्रतिष्ठिताः ॥ ४ ॥ मुचुकुन्दस्य राजर्षेस्तथान्यल्लिंगमुत्तमम् ॥ तत्र लोपं गतं विप्राः सगरस्य तु भूपतेः ॥ ५ ॥ इक्ष्वाकोर्वसुषेणस्य ककुत्स्थस्य महात्मनः ॥ ऐलस्य चन्द्रदेवस्य काशिराजस्य सन्म



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तेः ॥ ६ ॥ अग्निवेशस्य रैभ्यस्य च्यवनस्य भृगोस्तथा ॥ आश्र[illegible]ाज्ञवल्क्यस्य तत्र लोपं समाययौ ॥ ७ ॥ हारीतस्य महर्षेश्च हर्यश्वस्य
महात्मनः ॥ कुत्सस्य च वसिष्ठस्य नारदस्य त्रितस्य च ॥ ८ ॥ [illegible] ऋषिपत्नीनां तत्र लिंगानि भूरिशः ॥ कात्यायन्याश्च शांडिल्या मैत्रे
य्याश्च तथा पुरा ॥ ९ ॥ अन्यासां मुनिपत्नीनां यासां संख्या न विद्यते ॥ तत्राश्चर्यमभूदन्यत्पूर्यमाणे महीतले ॥ १० ॥ पांसुभी राक्षसैर्यै
स्तैः प्रेतैर्ब्राह्मणसत्तमाः ॥ तद्वोऽहं संप्रवक्ष्यामि श्रोतव्यं सुसमाहितैः ॥ १० ॥ दृष्ट्वा पांसुमयीं वृष्टिं मुक्तां प्रेतैः समंततः ॥ मातृवर्गेण तेनाथ प्रमुक्तः
प्रचुरोऽनिलः ॥ ११ ॥ तेन पांसुकृता वृष्टिः समंतान्मथिता बहिः ॥ तस्या भूमेः पतत्येव न किंचित्तत्र पूर्यते ॥ १३ ॥ ततस्ते व्यंतराः खिन्ना
निराशास्तस्य पूरणे ॥ भूतास्तस्य पुरो गत्वा चुक्रुशुः कुशभूपतेः ॥ १४ ॥ अस्माभिर्विहिता तत्र पांसुवृष्टिर्महीपते ॥ नीयते शतधाऽन्यत्र मातृ
मुक्तेन वायुना ॥ १५ ॥ स त्वं तासां विघातार्थमुपायं भूप चिंतय ॥ येन तां पांसुभिर्भूमिं पूरयामः समंततः ॥ १६ ॥ तेषां तद्वचनं श्रुत्वा
ततः कुशमहीपतिः ॥ रुद्रमाराधयामास तत्क्षेत्रं प्राप्य सद्द्विजाः ॥ १७ ॥ ततस्तस्य गतस्तुष्टिं वर्षांते भगवान्हरः ॥ प्रोवाच प्रार्थयाभीष्टं यत्ते
मनसि वांछितम् ॥ १८ ॥ ॥ कुश उवाच ॥ ॥ यथा संपूर्यते चाशु पांसुभिर्भूमिमंडलम् ॥ एतत्प्रेतप्रमुखैश्च प्रसादात्ते तथा कुरु ॥ १९ ॥
मया प्रेतगणा देव निर्दिष्टास्तस्य पूरणे ॥ मातृसंरक्ष्यमाणं तच्छक्यं चैतन्न पूरितुम् ॥ २० ॥ तत्र राक्षसजैर्मंत्रैः संति लिंगानि च प्रभो ॥
प्रतिष्ठितानि तत्स्पर्शाद्दर्शनात्स्याज्जनक्षयः ॥ २१ ॥ अचलत्वात्तथा देव लिंगानां शास्त्रसद्भयात् ॥ अन्यदुत्पाटनाद्यं च नैव कुर्मः कथं
चन ॥ २२ ॥ तस्माल्लिंगकृतो नाशो ब्राह्मणानां तपस्विनाम् ॥ यथा न स्यात्सुरश्रेष्ठ तथा नीतिर्विधीयताम् ॥ २३ ॥ ततश्च भगवान्रुद्रस्ताः
समाहूय मातरः ॥ प्रोवाच त्यज्यतां स्थानं भवत्यो यत्र संस्थिताः ॥ २४ ॥ तत्र पांसुभिरव्यग्राः करिष्यंति दिवानिशम् ॥ प्रेताः कुशसमा
देशाद्वृष्टिं लोकहिताय च ॥ २५ ॥ ॥ मातर ऊचुः ॥ ॥ त्यक्ष्यामश्च तवादेशात्तत्स्थानं वृषभध्वज ॥ परं दर्शय चास्माकं किंचिदन्यत्तथा
विधम् ॥ २६ ॥ क्षेत्रेऽत्रैव निवत्स्यामो येन स्कन्दकृते वयम् ॥ तेन संस्थापिताश्चात्र प्रोक्ताः स्थेयं सदा ततः ॥ २७ ॥ ततः प्रोवाच भगवांस्त
स्मात्स्थानान्महत्तरम् ॥ स्थानं दास्यामि सर्वासां पृथक्त्वेन शुभावहम् ॥ २८ ॥ अष्टषष्टिस्तु क्षेत्राणां मदीयानां समंततः ॥ संस्थितास्ति महा ॥११५॥
भागा येषु मत्संस्थितिः सदा ॥ २९ ॥ अष्टषष्टिविभागेन भूत्वा सर्वाः पृथक्पृथक् ॥ तेषु तिष्ठथ मद्वाक्यात्पूजामग्र्यामवाप्स्यथ ॥ ३० ॥ तस्य
देवस्य तच्छ्रुत्वा वाक्यं ता मातरस्तदा ॥ प्रहृष्टास्तत्परित्यज्य स्थानं स्कन्दविनिर्मितम् ॥ ३१ ॥ अष्टषष्टिविभागेन भूत्वा रूपैः पृथग्विधैः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टषष्टिषु क्षेत्रेषु तस्य ताः संस्थिताः सदा ॥ ३२ ॥ ततस्ताभिर्विनिर्मुक्तं तत्सर्वं भूमिमण्डलम् ॥ पांसुभिः पूरितं प्रेतैर्दिवारात्रमतंद्रितैः ॥ ३३ ॥ एवं तस्य वरं दत्त्वा भगवान्वृषवाहनः ॥ जगामादर्शनं पश्चात्सार्धं सर्वैर्गणैर्द्विजाः ॥३४॥ कुशोऽपि ब्राह्मणैः सर्वैस्तापसैश्च प्रशंसितः ॥ लब्धाशीः प्रययौ तस्मादयोध्यानगरीं प्रति ॥ ३५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये लुप्ततीर्थमाहात्म्यकथनंनाम षडुत्तरशततमोऽध्यायः ॥ १०६ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ अष्टषष्टिरियं प्रोक्ता या त्वया सूतनन्दन ॥ क्षेत्राणां देवदेवस्य कथं सा तत्र संस्थिता ॥ एतत्सर्वं समाचक्ष्व परं कौतूहलं हि नः ॥ १ ॥ ॥ सूत उवाच ॥ ॥ प्रश्नभारो महानेष यो भवद्भिः प्रकीर्तितः ॥ तथापि कीर्तयिष्यामि नमस्कृत्वा पिनाकिनम्[1] ॥ २ ॥ चमत्कारपुरेऽत्रासीत्पूर्वं[2] ब्राह्मणसत्तमः ॥ वत्सस्यान्वयसंभूतश्चित्रशर्मा महायशाः ॥ ३ ॥ तस्य बुद्धिरियं जाता पाताले हाटकेश्वरम् ॥ अत्रानीय ततो भक्त्या पूजयामि दिवानिशम् ॥ ४ ॥ एवं स निश्चयं कृत्वा तपश्चक्रे ततः परम् ॥ नियतो नियताहारः परां निष्ठां समाश्रितः ॥ ५ ॥ तस्यापि भगवाञ्छंभुः कालेन महता ततः ॥ संतुष्टो ब्राह्मणश्रेष्ठास्ततः प्रोवाच सादरम् ॥ ६ ॥ वरं प्रार्थय विप्रेन्द्र यत्ते मनसि वर्तते ॥ अपि त्रैलोक्यराज्यं ते तुष्टो दास्याम्यसंशयम् ॥ ७ ॥ तस्मात्प्रार्थय ते नित्यं यच्च चित्ते व्यवस्थितम् ॥ दुर्लभं सर्वदेवानां मनुष्याणां विशेषतः ॥ ८ ॥ ॥ चित्रशर्मोवाच ॥ ॥ यदि तुष्टोसि मे देव वरं चेन्मे प्रयच्छसि ॥ तदत्रागच्छ पातालाल्लिंगरूपी सुरेश्वर ॥ ९ ॥ यत्पाताले स्थितं लिंगं ब्रह्मणा संप्रतिष्ठितम् ॥ हाटकेश्वरसंज्ञं तु तदिहायातु सत्वरम् ॥ १० ॥ ॥ श्रीभगवानुवाच ॥ ॥ अचलं सर्वलिंगं स्यात्सर्वत्रापि द्विजोत्तम ॥ किं पुनः प्रथमं यच्च ब्रह्मणा निर्मितं स्वयम् ॥ ११ ॥ तस्मात्स्थापय लिंगं तद्धाटकेन द्विजोत्तम ॥ हाटकेश्वरसंज्ञं तु लोके ख्यातं भविष्यति ॥ १२ ॥ सोमवारे चतुर्दश्यां शुक्लायां श्रद्धयान्वितः ॥ यस्तद्भक्तिसमायुक्तः पूजयिष्यति मानवः ॥१३॥ आद्यलिंगोद्भवं श्रेयः पूजया लप्स्यते द्विज ॥ एवमुक्त्वाऽथ भगवांस्ततश्चादर्शनं गतः ॥१४॥ चित्रशर्माऽपि कृत्वाथ प्रासादं सुमनोहरम् ॥ तत्र हेममयं लिंगं स्थापयामास भक्तितः ॥ १५॥ शास्त्रोक्तेन विधानेन पूजां चक्रे च नित्यशः ॥ ततस्त्रैलोक्यविख्यातं तल्लिंगं तत्र वै द्विजाः ॥ १६ ॥ दूरादभ्येत्य लोकाश्च पूजयंति ततः परम् ॥ अथ तत्र द्विजा येऽन्ये संस्थिता गुणवत्तराः ॥ १७ ॥ तेषां स्पर्धा ततो जाता दृष्ट्वा तस्य विचेष्टितम् ॥ एकस्थानप्रसूतानां सर्वेषां गुणशालिनाम्[3] ॥ १८ ॥ अयं गुणविहीनोऽपि प्रख्यातो भुवनत्रये ॥

१ पितामहम्–इ० पा० । २ अवात्सीत्–इ० पा० । ३ सर्वकामप्रदं नृणाम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

हराराधनमासाद्य यस्मात्तस्माद्वयं हरम् ॥ तदर्थं तोषयिष्यामः साम्यं येन प्रजायते ॥ १९ ॥ अष्टषष्टिः स्मृता लोके क्षेत्राणां शूलपाणिनः ॥ यत्र सान्निध्यमभ्येति त्रिकालं परमेश्वरः ॥ २० ॥ अष्टषष्टिश्च गोत्राणामस्माकं चात्र संस्थिता ॥ एतेन मूढमनसा सार्धं सामान्यलक्षणा ॥ २२ ॥ तस्मादनेन चाराध्य भगवन्तं त्रिलोचनम् ॥ तच्च लिंगं समानीतमत्र पातालसंस्थितम् ॥ २२ ॥ तथा सर्वैश्च सर्वाणि क्षेत्रलिंगानि कृत्स्नशः ॥ आनेतव्यानि चाराध्य तपःशक्त्या महेश्वरम् ॥ २३ ॥ एतेषां सर्वगोत्राणामानेष्यति च शंकरः ॥ यद्गोत्रं क्षेत्रसंयुक्तं यच्चान्यद्वा भविष्यति ॥ २४ ॥ ततस्ते शर्मसंयुक्ताः सर्व एव द्विजोत्तमाः ॥ चक्रुस्तपःक्रियां सर्वे दुष्करां सर्वजन्तुभिः ॥ ॥ २५ ॥ जपैर्होमोपवासैश्च नियमैश्च पृथग्विधैः ॥ बलिपूजोपहारैश्च स्नानदानादिभिस्तथा ॥ २६ ॥ लिंगं संस्थाप्य देवस्य नाम्ना ख्यातं द्विजेश्वरम् ॥ मनोहरतरे प्रोच्चे प्रासादे पर्वतोपमे ॥ २७ ॥ त्यक्त्वा गृहक्रियाः सर्वास्तथा यज्ञसमुद्भवाः ॥ अन्याश्च लोकयात्रोत्थास्तोषयंति महेश्वरम् ॥ ॥ २८ ॥ एवमाराध्यमानोऽपि सन्तोषं परमेश्वरः ॥ नाभ्यगच्छत्परां तुष्टिं कथंचिदपि स द्विजाः ॥ २९ ॥ ततो वर्षसहस्रांते समाराध्य महेश्वरम् ॥ न च किञ्चित्फलं प्राप्ता यावत्क्रुद्धास्ततोऽखिलाः ॥३०॥ अस्य मूर्खतमस्याऽपि त्वं शूलिंश्चित्रशर्मणः ॥ सुस्तोकेनाऽपि कालेन सन्तोषं परमं गतः ॥३१॥ वयं वार्धक्यमापन्ना बाल्यात्प्रभृति शंकरम् ॥ पूजयन्तोऽपि नो दृष्टस्तथाऽपि परमेश्वर ॥ ३२ ॥ तस्मात्सर्वैः प्रकर्तव्यं हव्यवाहप्रवेशनम् ॥ अस्माभिर्निश्चयो ह्येष तवाग्रे सांप्रतं कृतः ॥ ३३ ॥ ततश्चाहृत्य काष्ठानि सर्वे ते द्विजसत्तमाः ॥ ईश्वरं मनसि ध्यात्वा चिताश्चक्रुः पृथग्विधाः ॥३४॥ तथा सर्वं क्रियाकल्पं स्नानदानादिकं च यत् ॥ कृत्वा ते ब्राह्मणाः सर्वे सुसमिद्धं हुताशनम् ॥३५॥ यावत्कृत्वा सुतैः सार्धं प्रविशंति समाहिताः ॥ तावत्स भगवांस्तुष्टस्तेषां संदर्शनं ययौ ॥ ३६ ॥ अब्रवीच्च विहस्योच्चैर्मेघगम्भीरया गिरा ॥ सर्वांस्तान्ब्राह्मणश्रेष्ठान्मृतान्संजीवयन्निव ॥ ३७ ॥ भोभो ब्राह्मणशार्दूला मा मैवं साहसं महत् ॥ यूयं कुरुत मद्वाक्यात्संतुष्टस्य विशेषतः ॥ ३८ ॥ तस्माद्वदत यच्चित्ते युष्माकं चैव संस्थितम् ॥ येन दत्त्वा प्रगच्छामि स्वमेव भुवनं पुनः ॥ ३९ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ अस्मिन्क्षेत्रे सुरश्रेष्ठ पुरस्यास्य च संनिधौ ॥ क्षेत्राणामष्टषष्टिर्या धन्या संकीर्त्यते जनैः ॥ ४० ॥ सदाभ्येतु समं लिंगैस्तैराद्यैः सुरसत्तम ॥ येनामर्षप्रशांतिर्नः सर्वेषामिह जायते ॥ ४१ ॥ एष संस्पर्धतेऽस्माभिः सर्वैर्गुणविवर्जितः ॥ त्वल्लिंगस्य प्रभावेन तस्मादेतत्समाचर ॥४२॥ ॥ सूत उवाच ॥ ॥ एतस्मिन्नंतरे विप्रो ज्ञात्वा तं वरदं हरम् ॥ उवाच स्पर्धया युक्तश्चित्रशर्मा महेश्वरम् ॥४३॥ ॥ चित्रशर्मोवाच ॥ ॥ एतैः प्राणपरित्यागमारभ्य तदनंतरम् ॥ तुष्टिं नीतोऽसि देवेश कृत्वा च सुमहत्तपः॥४४॥ मया



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्पर्द्धमानैश्च केवलं गुणगर्वितैः ॥ तस्मादेषां न दातव्यं त्वया किंचित्सुरेश्वर ॥४५॥ यदि त्वं मामतिक्रम्य संप्रदास्यसि वांछितम् ॥ एतैः पुत्रकलत्रैश्च सार्धं प्रत्यक्षतस्तव ॥ पावकं साधयिष्यामि तस्माद्युक्तं समाचर ॥४६॥ ॥ सूत उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा भगवाञ्छशिशेखरः ॥ चिन्तयामास चित्तेन किमत्र सुकृतं भवेत् ॥ ४७ ॥ एते ब्राह्मणशार्दूला विनाशं यांति मत्कृते ॥ एषोऽपि सर्वसंसिद्धो गणतुल्यो द्विजोत्तमः ॥४८॥ तस्माद्वाभ्यां मया कार्यं क्षेत्रे सौख्यं यथा भवेत् ॥ ब्राह्मणानां विशेषेण तथा चात्र निवासिनाम् ॥४९॥ ममापि सर्वदा चित्ते कृत्यमेतद्धि वर्तते ॥ एकस्थाने करोम्येव सर्वक्षेत्राणि यानि मे ॥ ५० ॥ भविष्यति तथा कालो रौद्रः कलिसमुद्भवः ॥ तत्र क्षेत्राणि तीर्थानि नाशं यास्यंति भूतले ॥ ५१ ॥ सत्तीर्थैस्तद्भयात्सर्वैः क्षेत्रमेतत्समाश्रितम् ॥ आनयिष्याम्यहमपि स्वानि क्षेत्राणि कृत्स्नशः ॥ ५२ ॥ ततस्तं चित्रशर्माणं प्राह चेदं महेश्वरः ॥ शृणु मद्वचनं कृत्स्नं कुरुष्व तदनंतरम् ॥ ५३ ॥ अत्र क्षेत्राणि सर्वाणि मदीयानि द्विजोत्तम ॥ समागच्छंतु विप्राश्च प्रभवंतु प्रहर्षिताः ॥ ५४ ॥ तवापि योग्यतां श्रेष्ठां करिष्यामि महामते ॥ यदि मे वर्तसे वाक्ये मुक्त्वा स्पर्द्धां द्विजोद्भवाम् ॥ ५५ ॥ तुरीयमपि ते गोत्रं वेदोक्तेन क्रमेण च ॥ आद्यतां चापि ते सर्वे कीर्तयिष्यंति ते द्विजाः ॥ ५६ ॥ तथान्यदपि सन्मानं तव यच्छामि च द्विज ॥ आचन्द्रार्कमसंदिग्धं पुत्रपौत्रादिकं च यत् ॥ ५७ ॥ त्वदन्वये भविष्यंति पुत्रपौत्रास्तथा परे ॥ कृत्ये श्राद्धे तर्पणे वा क्रियमाणे विधानतः ॥ ५८ ॥ आद्यस्य वत्ससंज्ञस्य नाम उच्चार्य गोत्रजम् ॥ ततो नामानि चाप्येवं कीर्तयिष्यंति भक्तितः ॥ ५९ ॥ ततः संतर्पयिष्यंति पितॄनथ पितामहान् ॥ तथान्यानपि बंधूंश्च सुहृत्संबंधिबांधवान् ॥ ॥ ६० ॥ त्वदन्वये विना नाम्ना त्वदीयेन विमोहिताः ॥ ये पितॄंस्तर्पयिष्यंति तेषां व्यर्थं भविष्यति ॥ ६१ ॥ श्राद्धं वा यदि वा दानं तर्पणं वा त्वदुद्भवम् ॥ तस्मादहंकृतिं मुक्त्वा मामाराधय केवलम् ॥६२॥ येन सिद्धोऽपि संसिद्धिं परामाप्नोषि शाश्वतीम् ॥ एवं संबोध्य तं विप्रं कृत्वाद्यमपि पश्चिमम् ॥६३॥ ततस्तान्ब्राह्मणानाह प्रासादः क्रियतामिति ॥ गोत्रंगोत्रं पुरस्कृत्य स्थाप्यं लिंगमनुत्तमम् ॥ येन संक्रमणं तेषु मम संजायते द्विजाः ॥ ६४ ॥ अथ ते ब्राह्मणास्तत्र भूमिभागान्मनोहरान् ॥ दृष्ट्वादृष्ट्वा प्रचक्रुश्च प्रासादान्हर्षसंयुताः ॥ ६५ ॥ अष्टषष्टिमितान्दिव्यान्कैलासशिखरोपमान् ॥ तेषु संस्थापयामासुर्लिङ्गानि विविधानि च ॥ क्षेत्रेक्षेत्रे च यन्नाम तत्तत्संज्ञां प्रचक्रिरे ॥ ६६ ॥ अथ तेषां पुनर्दृष्टिं गत्वा देवस्त्रिलोचनः ॥ प्रोवाच मधुरं वाक्यं कस्मिंश्चित्कालपर्यये ॥ आराधितस्तपःशक्त्या लिंगसंस्थापनादनु ॥ ६७ ॥ ॥ श्रीभगवानुवाच ॥ ॥ परितुष्टोऽस्मि विप्रेंद्रा युष्माकमहमद्य वै ॥ एतन्मम कृतं कृत्यं भवद्भिरखिलं ततः ॥ ६८ ॥ अस्मदीयानि लिंगानि क्षेत्राणि च कलेर्भयात् ॥ ततो मान्याश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



मे यूयं नान्यैरेतद्भविष्यति ॥ ६९ ॥ तस्माच्चित्तस्थितं शीघ्रं प्रार्थयंतु द्विजोत्तमाः ॥ संप्रयच्छामि येनाशु यद्यपि स्यात्सुदुर्लभम् ॥ ७० ॥ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ यदि देव प्रसन्नस्त्वमस्माकं च सुरेश्वर ॥ पश्चिमश्चित्रशर्मा च यथाद्यो भवता कृतः ॥ ७१ ॥ अस्मदीयं सदा नाम कीर्तनीयमसंशयम् ॥ श्राद्धकृत्येषु सर्वेषु यथा तेन समा वयम् ॥ भवामस्त्वत्प्रसादेन सांप्रतं चित्रशर्मणा ॥ ७२ ॥ ॥ श्रीभगवानुवाच ॥ ॥ युष्माकमपि ये केचिद्वशं यास्यंति मानवाः ॥ युवानः शास्त्रसंयुक्ता वेदविद्याविशारदाः ॥७३॥ आनयिष्यथ तान्यूयमामुष्यायणसंज्ञितान् ॥ नित्यं स्थिताश्च ते क्षेत्रे श्राद्धस्याक्षय्यकारकाः ॥ ७४ ॥ एवमुक्त्वाथ देवेशस्ततश्चादर्शनं गतः ॥ तेऽपि विप्राः सुसंतुष्टास्तत्र स्थाने व्यवस्थिताः ॥ ७५ ॥ एवं तत्र समस्तानि क्षेत्राण्यायतनानि च ॥ कलिभीतानि विप्रेंद्रा निवसंति सदैव हि ॥ ७६ ॥ एवं ते ब्राह्मणाः प्राप्य सिद्धिं चेश्वरपूजनात् ॥ ख्याताः सर्वत्र भुवने श्राद्धस्याक्षय्यकारकाः ॥ ७७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्र माहात्म्ये ब्राह्मणचित्रशर्मलिंगस्थापनवृत्तांतवर्णनंनाम सप्तोत्तरशततमोऽध्यायः ॥ १०७ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ अष्टषष्टिप्रमाणानि यानि क्षेत्राणि सूतज ॥ त्वयोक्तानि च तान्येव नामतो नः प्रकीर्तय ॥ १ ॥ तथान्यानि च तीर्थानि यानि संति धरातले ॥ तानि कीर्तय कात्स्न्र्येन परं कौतूहलं हि नः ॥ २ ॥ ॥ सूत उवाच ॥ ॥ यानि प्रोक्तानि तीर्थानि भवद्भिर्द्विजसत्तमाः ॥ अष्टषष्टिप्रमाणानि तथा क्षेत्राणि भूतले ॥३॥ तानि सर्वाणि भीतानि प्रविष्टानि रसातलम् ॥ तीर्थानि मुनिशार्दूलाः पापे ह्यत्र कलौ युगे ॥४॥ एतदेव पुरा पृष्टः पार्वत्या परमेश्वरः ॥ यद्भवद्भिरहं पृष्टस्तीर्थयात्राकृते द्विजाः ॥ ५ ॥ कैलासशिखरासीनः पुरा देवो महेश्वरः ॥ सर्वैर्गणगणैः सार्धमुपविष्टो वरासने ॥ ६ ॥ प्रणाम करणार्थाय ह्यागतेष्वमरेषु च ॥ गतेषु तेषु विप्रेंद्राः सर्वेषु त्रिदिवालयम् ॥ अर्धासनगता देवी वाक्यमेतदुवाच ह ॥ ७ ॥ ॥ देव्युवाच ॥ ॥ देवदेव महादेव गंगाक्षालितशेखर ॥ वद मे तीर्थमाहात्म्यं यद्यहं वल्लभा तव ॥ ८ ॥ तिस्रः कोट्योऽर्धकोटी च तीर्थानामिह भूतले ॥ संख्यया नामतो देव मह्यं कीर्तय सांप्रतम् ॥ ९ ॥ यानि तीर्थान्यनेकानि क्षेत्राणि चैव मे प्रभो ॥ तानि कीर्तय देवेश सुगम्यं चैव देहिनाम् ॥ कीर्तनाच्च समग्राणां तीर्थानां लभ्यते फलम् ॥ १० ॥ ॥ ईश्वर उवाच ॥ ॥ तीर्थशब्दो वरारोहे धर्मकृत्येषु वर्तते ॥ धर्मस्थानेषु सर्वेषु तत्त्वं शृणु समाहिता ॥ ११ ॥ माता तीर्थं पिता तीर्थं तीर्थं साधुसमागमः ॥ धर्मानुचिंतनं चैव तथैव नियमो यमः ॥ १२ ॥ पुण्याः



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथा वरारोहे देवर्षीणां कृतास्तथा ॥ आश्रयाः सन्मुनींद्राणां देवानां च तथा प्रिये ॥ १३ ॥ भूमिभागाः पवित्राः स्युः कीर्त्यंते तीर्थमित्युत ॥ तेषां संदर्शनादेव स्मरणाच्चावगाहनात् ॥ मुच्यंते जन्तवः पापैरपि जन्मशतोद्भवैः ॥ १४ ॥ तथा पातकिनो ये च ये च विश्वासघातकाः ॥ तेऽपि सर्वे तथा मुक्तास्तेषां चैवावगाहनात् ॥ १५ ॥ एवं पापानि संयांति नाशं सर्वांगसुन्दरि ॥ अपि ब्रह्मवधात्पापं यद्भवेदिह देहिनाम् ॥ तच्चापि तीर्थसंसर्गात्प्रलयं यात्यसंशयम् ॥ १६ ॥ ममापि करसंलग्नं कपालं ब्रह्मणः पुरा ॥ पतितं तीर्थसंसर्गात्तेषां चैवावगाहनात् ॥ १७ ॥ एवं सर्वेषु तीर्थेषु तथा ह्यायतनेषु च ॥ स्नातव्यं भक्तियुक्तेन चेतसा नान्यगामिना ॥ १८ ॥ यत्र स्नातैर्नरैः सम्यक्सर्वेषां लभ्यते फलम् ॥ ममाश्रयं विशालाक्षि सर्वपातकनाशनम् ॥ कामदं च तथा नृणां नारीणां च विशेषतः ॥ १९ ॥ एतद्गुह्यतमं देवि मम नित्यं व्यवस्थितम् ॥ न कस्याऽपि मयाख्यातं देवेंद्रस्यापि पृच्छतः ॥ २० ॥ वाल्लभ्यात्तव मे भद्रे कथितं वै वरानने ॥ अष्टषष्टिः प्रगम्यानि भक्त्या तीर्थानि मानवैः ॥ २१ ॥ ममाश्रयाणि तान्येव सर्वपापहराणि च ॥ कामदानि वरारोहे मत्प्रभावादसंशयम् ॥ २२ ॥ यंयं कामं समाधाय तत्र तीर्थे पुमान्यदि ॥ कृत्वा स्नानं ततो देवमर्चयेच्च महेश्वरम् ॥ २३ ॥ सुकृतं मनसि ध्यात्वा यैर्नरैः पूजितो हरिः ॥ आस्तां तेषां वरारोहे दर्शनं स्पर्शनं तथा ॥ स्मरणादपि मुच्यंते नराः पापैः पुराकृतैः ॥ २४ ॥ एते शक्रादयो देवास्तेषु तीर्थेषु सुन्दरि ॥ मां पूज्य त्रिदिवं प्राप्तास्तथान्ये नारदादयः ॥ २५ ॥ तान्यहं ते प्रवक्ष्यामि विस्तरेण पृथक्पृथक् ॥ नामतः शृणु देवेशि समाहितमनाः स्थिता ॥ २६ ॥ वाराणसी प्रयागं च नैमिषं चापरं तथा ॥ गंया[1] शिरः सुपुण्यं च पवित्रं कुरुजांगलम् ॥ २७ ॥ प्रभासं पुष्करं चैव विश्वेश्वरमथापरम् ॥ अट्टहासं महेन्द्रं च तथैवोज्जयनी च या ॥ २८ ॥ मरुकोटिः शंकुकर्णं गोकर्णं क्षेत्रमुत्तमम् ॥ रुद्रकोटिः स्थलेशं च हर्षितं वृषभध्वजम् ॥ २९ ॥ केदारं च तथा क्षेत्रं क्षेत्रं मध्यमकेश्वरम् ॥ सह[2] स्राक्षं तथा क्षेत्रं तथान्यत्कार्तिकेश्वरम् ॥ ३० ॥ तथैव वस्त्रमार्गं च तथा कनखलं स्मृतम् ॥ भद्रकर्णं च विख्यातं दण्डकाख्यं[3] तथैव च ॥ ३१ ॥ त्रिदंण्डाख्यं तथा क्षेत्रं तथैव कृमिजांगलम् ॥ एकाम्रं च तथा क्षेत्रं क्षेत्रं छागलकं तथा ॥ ३२ ॥ कालिंजरं च देवेशि तथान्यन्मण्डलेश्वरम्[4] ॥ काश्मीरं मरुकेशं च हरिश्चंद्रं सुशोभनम् ॥ ३३ ॥ पुरश्चंद्रं च वामेशं कुक्कुटेश्वरमेव च ॥ भस्मगात्रमथोंकारं त्रिसंध्या विरजा तथा ॥ ३४ ॥ अर्केश्वरं च नेपालं दुष्कर्णं करवीरकम् ॥ जांगेश्वरं तथा देवि श्रीशैलं पर्वतोत्तमम् ॥ ३५ ॥ अयोध्या चैव पातालं तथा कारोहणं महत् ॥

---

१ महीशिरः–इ० पा० । २ देवदारुवनं तथा–इ० पा० । ३ दण्डकारण्यकं क्षेत्रम्–इ० पा० । ४ जालेश्वरम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



देविका च नदी पुण्या भैरवं पूर्वसागरः ॥ ३६ ॥ सप्तगोदावरीतीर्थं तथैव समुदाहृतम् ॥ निर्मलेशं तथान्यच्च कर्णिकारं सुशोभनम् ॥ ३७ ॥
कैलासं जाह्नवीतीरं जललिंगं च वाडवम् ॥ बदरीतीर्थवर्यं च कोटितीर्थं तथैव च ॥ ३८ ॥ विंध्याचलो हेमकूटं गन्धमादनमेव च ॥ लिंगेश्वरं
तथा क्षेत्रं लंकाद्वारं तथैव च ॥ ३९ ॥ नलेश्वरं तु मध्येशं केदारं रुद्रजालकम् ॥ सुवर्णाख्यं च वामोरु तथान्यत्षष्टिकापथम् ॥ ४० ॥ इति
श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्येऽष्टषष्टितीर्थवर्णनंनामाष्टोत्तरशततमोऽध्यायः ॥
॥ १०८ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ एतत्ते सर्वमाख्यातं यत्पृष्टोऽस्मि वरानने ॥ सर्वेषामेव तीर्थानां सारं तीर्थसमुच्चयम् ॥ १ ॥
एतेष्वहं वरारोहे सर्वेष्वेव व्यवस्थितः ॥ नाम्ना चान्येषु तीर्थेषु त्रिदशानां हितार्थतः ॥ २ ॥ यो मामेतेषु तीर्थेषु स्नात्वा पश्यति मानवः ॥
कीर्तयेत्कीर्तनान्नाम्ना स नूनं मोक्षमाप्नुयात् ॥ ३ ॥ ॥ श्रीदेव्युवाच ॥ ॥ येषु तीर्थेषु यन्नाम कीर्तनीयं तव प्रभो ॥ तत्कात्स्न्र्येन मम
ब्रूहि यद्यहं तव वल्लभा ॥ ४ ॥ ॥ ईश्वर उवाच ॥ ॥ वाराणस्यां महादेवं प्रयागे च महेश्वरम् ॥ नैमिषे देवदेवं च गयायां प्रपितामहम् ॥ ५ ॥
कुरुक्षेत्रे विदुः स्थाणुं प्रभासे शशिशेखरम् ॥ पुष्करे तु ह्यजागन्धिं विश्वं विश्वेश्वरे तथा ॥ ६ ॥ अट्टहासे महानादं महेन्द्रे च महाव्रतम् ( १० ) ॥
उज्जयिन्यां महाकालं मरुकोटे महोत्कटम् ॥७॥ शंकुकर्णे महातेजं गोकर्णे च महाबलम् ॥ रुद्रकोट्यां महायोगं महालिंगं स्थलेश्वरे ॥८॥ हर्षिते
च तथा हर्षं वृषभं वृषभध्वजे ॥ केदारे चैव ईशानं शर्वं मध्यमकेश्वरे ( २० ) ॥ ९ ॥ सुपर्णाक्षं सहस्राक्षे सुसूक्ष्मं कार्तिकेश्वरे ॥ भवं वस्त्रापथे देवि
ह्युग्रं कनखले तथा ॥ १० ॥ भद्रकर्णे शिवं चैव दण्डके दण्डिनं तथा ॥ ऊर्ध्वरेतं त्रिदण्डायां चण्डीशं कृमिजांगले ॥ ११ ॥ कृत्तिवासं तथैकाम्रे
छागलेये कपर्दिनम् ( ३० ) ॥ कालिञ्जरे नीलकण्ठं श्रीकण्ठं मण्डलेश्वरे ॥ १२ ॥ विजयं चैव काश्मीरे जयन्तं मरुकेश्वरे ॥ हरिश्चन्द्रे हरं चैव
पुरश्चन्द्रे च शंकरम् ॥ १३ ॥ जटिं वामेश्वरे विन्द्यात्सौम्यं वै कुक्कुटेश्वरे ॥ भूतेश्वरं भस्मगात्रे ओंकारेऽमरकण्टकम् ( ४० ) ॥ १४ ॥ त्र्यंबकं च
त्रिसंध्यायां विरजायां त्रिलोचनम् ॥ दीप्तमर्केश्वरे ज्ञेयं नेपाले पशुपालकम् ॥ १५ ॥ यमलिंगं च दुष्कर्णे कपाली करवीरके ॥ जांगेश्वरे त्रिशूली
च श्रीशैले त्रिपुरांतकम् ॥ १६ ॥ रोहणं तु अयोध्यायां पाताले हाटकेश्वरम् ( ५० ) ॥ कारोहणे नकुलीशं देविकायामुमापतिम् ॥ १७ ॥ भैरवे

१ इदमेव गंगाद्वाराख्यं क्षेत्रं बोद्धव्यम् । २ पांडवम्–इ० पा० । ३ नलेश्वरम्–इत्यादिरयं श्लोकस्तु–सर्वेषु पुस्तकेषु पठितोऽस्ति । परं त्वितोऽनन्तरेऽध्याये तत्तत्क्षेत्रस्थितानां शंकराणां नामानि कुत्रापि पुस्तके नोल्लिखितानि सन्ति । "लंकायां च नरान्तकम्" इत्यंतक्षेत्रस्थितशंकरनाम्नामुल्लेखः सर्वेषु पुस्तकेष्वप्यस्ति । अष्टषष्टिसंख्या चात्र परिपूर्यते च । ४ जालेश्वरे–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भैरवाकारममरं पूर्वसागरे ॥ सप्तगोदावरे भीमं स्वयंभूर्निर्मलेश्वरे ॥ १८ ॥ कर्णिकारे गणाध्यक्षं कैलासे तु गणाधिपम् ॥ गंगाद्वारे हिमस्थानं जल लिंगे जलप्रियम् ( ६० ) ॥ १९ ॥ अनलं वाडवेऽग्नौ च भीमं बदरिकाश्रमे ॥ श्रेष्ठे कोटीश्वरं चैव वाराहं विन्ध्यपर्वते ॥ २० ॥ हेमकूटे विरूपाक्षं भूर्भुवं गन्धमादने ॥ लिंगेश्वरे च वरदं लंकायां च नरांतकम् ( ६८ ) ॥ २१ ॥ अष्टषष्टिरियं देवि तवाख्याता विशेषतः ॥ पठतां शृण्वतां वापि सर्वपातकनाशिनी ॥ २२ ॥ तस्मात्सर्वप्रयत्नेन कीर्तनीया विचक्षणैः ॥ कालत्रयेऽपि शुचिभिर्विशेषाच्छिवदीक्षितैः ॥ २३ ॥ लिखितापि वरारोहे यस्यैषा तिष्ठते गृहे ॥ न तत्र जायते दोषो भूतप्रेतसमुद्भवः ॥ २४ ॥ न व्याधेर्न च सर्पाणां न चौराणां वरानने ॥ नान्येषां भूभुजादीनां कदाचिदपि कुत्रचित् ॥ २५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्येऽष्टषष्टितीर्थमाहात्म्य कथनंनाम नवोत्तरशततमोध्यायः ॥ १०९ ॥ ॥ छ ॥ ॥ श्रीदेव्युवाच ॥ ॥ नैतेष्वपि सुरश्रेष्ठ सर्वेषु भुवि मानवाः ॥ अपि दीर्घायुषो भूत्वा स्नातुं शक्ताः कथंचन ॥ १ ॥ एतेषामपि साराणि मम तीर्थानि कीर्तय ॥ येषु स्नातो नरः सम्यक्सर्वेषां लभते फलम् ॥ २ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ एतेषां मध्यतो देवि तीर्थाष्टकमनुत्तमम् ॥ अस्ति स्नातैर्नरैस्तत्र सर्वेषां लभ्यते फलम् ॥ ३ ॥ नैमिषं चैव केदारं पुष्करं कृमिजांगलम् ॥ वाराणसी कुरुक्षेत्रं प्रभासं हाटकेश्वरम् ॥ ४ ॥ अष्टास्वेतेषु यः स्नातः सम्यक्छ्रद्धासमन्वितः ॥ स स्नातः सर्वतीर्थेषु सत्यमेतन्मयोदितम् ॥ ५ ॥ ॥ श्रीदेव्युवाच ॥ ॥ कलिकाले महादेव भविष्यति कथंचन ॥ स्नानं तस्मान्मम ब्रूहि यत्सारं तीर्थमेव हि ॥ ६ ॥ अष्टानामपि चैतेषां देवदेव त्रिलोचन ॥ यद्यहं वल्लभा भक्ता तथा चित्तानुवर्तिनी ॥ ७ ॥ ॥ ईश्वर उवाच ॥ ॥ अष्टानामपि देवेशि क्षेत्राणामस्ति चोत्तमम् ॥ एतेषामपि तत्क्षेत्रं हाटकेश्वरसंज्ञितम् ॥ ८ ॥ यत्र सर्वाणि क्षेत्राणि संस्थितानि ममाज्ञया ॥ तथान्यानि च तीर्थानि कलिकालेऽपि संस्थिते ॥ ९ ॥ तस्मात्सर्वप्रयत्नेन तत्क्षेत्रं सेव्यमेव हि ॥ मानुषैर्मोक्षमिच्छद्भिः सत्यमेतन्मयोदितम् ॥ १० ॥ ॥ सूत उवाच ॥ ॥ एतद्वः सर्वमाख्यातमष्टषष्टिसमुद्भवम् ॥ समुच्चयं द्विजश्रेष्ठा नामदेवसमन्वितम् ॥ ११ ॥ यथा देवेन चाख्यातं पार्वत्या गुह्यमुत्तमम् ॥ प्रसन्नेन मया कृत्स्नं युष्माकं समुदाहृतम् ॥१२॥ यश्चैतत्पठते भक्त्या ह्यष्टषष्टिसमुद्भवम् ॥ स्नानजं लभते पुण्यं

---

१ अत्रवाष्टषष्टितीर्थानि परिपूर्यन्ते । यत्पूर्वाध्याये 'नलेश्वरं तु' इत्यादितीर्थनामोल्लेखः कृतोऽस्ति, सोऽष्टषष्टिसंख्याकतीर्थस्थानातिरिक्ततीर्थनाम्नामुल्लेखो बोद्धव्यः । २ कृत्तिजांगलम्-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





शृण्वानः श्रद्धयान्वितः ॥ १३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्य ऽष्टषष्टितीर्थमाहात्म्यवर्णनंनाम दशोत्तरशततमोऽध्यायः ॥ ११० ॥ ॥ ऋषय ऊचुः ॥ ॥ शिवक्षेत्राणि यैर्विप्रैः समानीतानि तत्र च ॥ तेषां सर्वाणि गोत्राणि वद सूतज विस्तरात् ॥ १ ॥ कस्य गोत्रोद्भवैर्विप्रैः किं क्षेत्रं समुपार्जितम् ॥ शंकरस्य प्रसादेन तस्मिन्काल उपस्थिते ॥२॥ कियंत्यपि च गोत्राणि चमत्कारपुरोत्तमे ॥ स्थापितानि सुभक्तेन तेनानर्तेन सूतज ॥ ३॥ त्वया प्रोक्तं पुरा दत्तं पुरं कृत्वा द्विजन्मनाम् ॥ न च तेषां कृता संख्या तस्मात्तां परिकीर्तय ॥ ४ ॥ ॥ सूत उवाच ॥ ॥ उपदेशः पुरा दत्तो द्विस त्ततिमुनीश्वरैः ॥ आनर्ताधिपतिः पूर्वं कुष्ठरोग प्रपीडितः ॥ शंखतीर्थं समागत्य स्नानं चक्रे त्वरान्वितः ॥ ५ ॥ तेन नाशं गतः कुष्ठो भूपतेस्तस्य तत्क्षणात् ॥ तस्य तीर्थस्य माहात्म्यान्निर्वि ण्णस्य तनुं प्रति ॥ ६ ॥ ततः स नीरुजो भूत्वा तोषेण महतान्वितः ॥ तानुवाच मुनिश्रेष्ठान्प्रणिपत्य मुहुर्मुहुः ॥ ७ ॥ सुवर्णं वा गजाश्वं वा राज्यं सकलमेव वा ॥ भवद्भ्यः संप्रदास्यामि तस्माद्ब्रूत द्विजोत्तमाः ॥ ८ ॥ यद्यस्य रोचते यावन्मात्रमन्यदपि द्विजाः ॥ प्रसादः क्रियतां मह्यं दीनस्य प्रणतस्य च ॥ ९ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ निष्परिग्रहधर्माणो वानप्रस्था वयं द्विजाः ॥ सद्यःप्रक्षालकाः किं नो राज्येन विभवेन च ॥ १० ॥ ॥ ॥ राजोवाच ॥ ॥ उपकारं समासाद्य यः करोति न पापकृत् ॥ उपकारं पुनस्तस्य स कृतघ्न उदाहृतः ॥ ११ ॥ ब्रह्मघ्ने च सुरापे च चौरे भग्नव्र ते शठे ॥ निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः ॥ १२ ॥ तस्मात्कृत्वा प्रसादं मे किंचिद्ब्रूत द्विजोत्तमाः॥ येनानृण्यं प्रगच्छामि यद्यपि स्यात्सुजीवितम् ॥१३॥ ॥ मुनय ऊचुः ॥ ॥ सत्यमेतन्महाभाग कृतघ्ने नास्ति निष्कृतिः॥ परं तत्र भवेद्दोषो यत्र दाता तु सस्पृहः॥१४॥ निःस्पृहो यत्र राजेन्द्र ह्युपकारपरो भवेत्॥ न तत्र जायते दोषः स्वल्पोऽपि च कथंचन ॥१५॥ तस्मात्त्वं गच्छ राज्यं स्वं स्वधर्मेण प्रपालय ॥ इह लोके परे चैव येन सौख्यं प्रजायते ॥ १६ ॥ एवं स भूमिपो विप्रैर्निषिद्धः स सहस्रधा ॥ कृच्छ्रेण तान्प्रणम्योच्चैर्जगाम स्वगृहं ततः ॥१७॥ तत्र गत्वा प्रहृष्टा त्मा कृत्वा रम्यं महेश्वरम् ॥ गीतनृत्यसुवाद्यैश्च रात्रिजागरणादिभिः ॥ चकार पूर्ववद्राज्यं समंताद्धतकंटकम् ॥ १८ ॥ चिंतयानो दिवानक्तं ब्राह्मणा न्प्रति तान्सदा ॥ कथं तेषां द्विजेंद्राणामुपकारो भविष्यति ॥ मदीयो मम यैर्दत्तं गात्रमेतत्पुनर्नवम् ॥ १९ ॥ तेऽपि सर्वे मुनिश्रेष्ठाः खेचरत्व समन्विताः ॥ तपःशक्त्या सदा यांति नानातीर्थेषु भक्तितः ॥ २० ॥ तेषु स्नानं जपं कृत्वा तथैव पितृतर्पणम् ॥ प्राणयात्रां पुनश्चक्रुस्तत्रागत्य



१ पुरा दत्तम्–इ० पा० । २ सद्यःप्रक्षालकाः–प्राप्ते धने तत्क्षणमेव धर्मादिकार्येषु तद्विनियोगकर्तारः–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्व आश्रमे ॥ २१ ॥ अन्ये तत्रैव कुर्वंति नित्यकृत्यानि ये द्विजाः ॥ तथान्ये दूरमासाद्य तीर्थं दृष्ट्वा मनोहरम् ॥ २२ ॥ उषित्वा रजनीं तत्र द्विरात्रं वा पुनर्गृहम् ॥ समागच्छंति चान्ये तु त्रिरात्रेण समाययुः ॥ २३ ॥ वाराणस्यां प्रयागे वा पुष्करे वाथ नैमिषे ॥ प्रभासे वाऽथ केदारे ह्यन्यस्मिन्नहि वांछयंते ॥ २४ ॥ कदाचिदथ ते सर्वे कार्तिक्यां पुष्करत्रये ॥ गता विनिश्चयं कृत्वा स्नानार्थं द्विजसत्तमाः ॥ २५ ॥ पंचरात्रं वसिष्यामो वयं तत्र समाहिताः ॥ तस्माद्गृहेषु दारेषु रक्षा कार्या स्वशक्तितः ॥ २६ ॥ एवं ते समयं कृत्वा गता यावद्द्विजोत्तमाः॥ तावद्भूपतिना ज्ञाता न कश्चित्तत्र तिष्ठति ॥ २७ ॥ तेषां मध्ये मुनींद्राणां सुतीर्थाश्रमवासिनाम् ॥ दमयंतीति विख्याता चंद्रबिंबसमानना ॥ २८ ॥ तामुवाच रहस्येवं व्रज त्वं चारुहासिनि ॥ हाटकेश्वरजे क्षेत्रे ममादेशोऽधुना ध्रुवम् ॥ २९ ॥ तत्र तिष्ठंति याः पत्न्यो मुनीनां भावितात्मनाम् ॥ भूषणानि विचित्राणि तासां यच्छ यथेच्छया ॥ ३० ॥ न तासां पतयोऽस्माकं प्रकुर्वंति प्रतिग्रहम् ॥ कथंचिदपि सुश्रोणि लोभ्यमानापि भूरिशः ॥ ३१ ॥ स्त्रीणां भूषणजा चिन्ता सदा चैवाधिका भवेत् ॥ लौल्यं च कौतुकं चैव सदा भूषणजं भवेत् ॥ ३२ ॥ अपि मृन्मयकं किंचित्काष्ठसूत्रमयं च वा ॥ जतुकाचमयं वापि नारी धत्ते विभूषणम् ॥ ३३ ॥ एष एव भवेत्तेषामुपकारस्य संभवः ॥ उपायः पद्मपत्राक्षि न चान्योऽस्ति कथंचन ॥ ३४ ॥ सा तथेति प्रतिज्ञाय विचित्राभरणानि च ॥ गृहीत्वा हर्षसंयुक्ता ततस्तत्क्षेत्रमाययौ ॥३५॥ मणिमुक्तामयान्येव कुण्डलानि शुभानि च ॥ तथा चन्द्रोज्ज्वलान्हारान्नूपुराणि बृहंति च ॥ ३६ ॥ इन्द्रनीलमहानीलवैडूर्यखचितानि च ॥ पद्मरागैस्तथा वज्रैर्माणिक्यैश्च मनोरमैः॥३७॥ केयूरैः कंकणैर्दिव्यैः शक्रचापनिभैः शुभैः ॥ हेमसूत्रैश्च जात्यैश्च मेखलाभिस्तथैव च ॥ ३८ ॥ अथ सा बोधने विष्णोः संप्राप्ते दिवसे शुभे ॥ उपवासपरा स्नाता एकस्मिन्सलिलाशये ॥ ३९ ॥ तीरदेशे निवेश्यैव महाभूषणपर्वतम् ॥ यस्य प्रभाभिरुग्राभिर्व्याप्तं गगनमंडलम् ॥ ४० ॥ एतस्मिन्नंतरे प्राप्तास्तापस्यः कौतुकान्विताः ॥ कीदृशा राजपत्नी सा किंरूपा किंविभूषणा ॥ ४१ ॥ अथ तास्तां समालोक्य दिव्यभूषणभूषिताम् ॥ सुरूपांगीं समाधिस्थां चित्ते चिन्तां प्रचक्रिरे ॥ ४२ ॥ धन्येयं भूपतेर्भार्या यैवं भूषणभूषिता ॥ दमयंती सुरूपाढ्या सर्वलक्षणलक्षिता ॥ ४३ ॥ समाध्यंतं समासाद्य तापसीर्वीक्ष्य साऽपि च ॥ दमयंती नमश्चक्रे ताः सर्वा विधिपूर्वकम् ॥ ४४ ॥ ताः कृतांजलिना प्राह वल्गुवाक्यं मनोहरम् ॥ मयायं भूषणस्तोम उद्दिश्य गरुडध्वजम् ॥ कल्पितोऽद्य दिने स्नात्वा समुपोष्य दिने हरेः ॥ ४५ ॥ तस्माद्गृह्णंतु तापस्यो मया दत्तानि वांछया ॥

१ तैः-वस्तुम्-इति शेषः । २ इयं दमयंती-आनर्ताधिपतेर्भार्या । ३ लोभ्यमानाः-अपि-इति पदच्छेदः-सन्धिस्त्वार्षः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



भूषणानि विचित्राणि प्रसादः क्रियतां मम ॥ ४६ ॥ ततश्चैकाऽब्रवीत्तासामेषा मुक्तावली मम ॥ इमां देहि न मे वांछा विद्यतेऽन्या नृपप्रिये॥४७॥ ततस्तया विहस्योच्चैः प्रक्षाल्य चरणौ स्वयम् ॥ दत्ता मुक्तावली तस्या वस्त्रैर्दिव्यैः समन्विता ॥ यस्याः षण्माषतुल्यानि मौक्तिकान्यमलानि च ॥ ४८ ॥ शरत्काले यथा व्योम्नि नक्षत्राणि द्विजोत्तमाः॥ तथान्या स्पर्द्धया युक्ता ययाचेऽमलवर्चसम् ॥ हारं निर्मूल्यतायुक्तं चित्ताह्लादकरं परम् ॥ ॥ ४९ ॥ अथ सा तं करे कृत्वा तस्या हारं प्रयच्छति ॥ तावदन्या प्रजग्राह हारं शृंगारलालसा ॥ ५० ॥ ततः शेषाश्च तापस्यो भूषणार्थं समुत्सुकाः ॥ सस्पर्द्धा जगृहुस्तानि भूषणानि स्वयं द्विजाः ॥ ५१ ॥ अन्याश्चान्याकरे कृत्वा भूषणं सुमनोहरम् ॥ बलादाकृष्य जग्राह धर्षयित्वा ततः परम् ॥ ५२ ॥ यथायथा प्रगृह्णंति तापस्यो भूषणार्चिताः ॥ तथातथास्याः संजज्ञे दमयंत्या मुदा हृदि ॥ ५३ ॥ अन्यानि च प्रचिक्षेप शतशोऽथ सहस्रशः ॥ न तृप्तिर्जायते तासां तथापि द्विजसत्तमाः ॥५४॥ भूषणाभावमासाद्य ततः सा पार्थिवप्रिया ॥ हृष्ट्वा[1] प्रोवाच ताः सर्वाः संतोषः क्रियतामिति॥५५॥पुनश्चैवानयिष्यामि प्रभाते नात्र संशयः॥अन्यानि च विचित्राणि यस्या रोचंति यानि च॥५६॥ततस्ताः सकलाः प्रोचुर्गच्छ त्वं पार्थिवप्रिये॥ आगंतव्यं च भूयोऽपि प्रगृह्याभरणानि च ॥ ५७ ॥ एवमुक्ता ततस्ताभिः प्रणिपत्य नृपप्रिया ॥ प्रहृष्टा प्रययौ तूर्णं स्वपुरं प्रति सद्विजाः ॥ ५८ ॥ तापस्योपि गृहं गत्वा वस्त्राणि विविधानि च ॥ भूषणानि च गात्रेषु सस्पर्द्धा निदधुस्तदा ॥ ५९ ॥ तापसीनां चतुष्कं च परित्यज्य यतव्रतम् ॥ शेषाभिः प्रगृहीतानि मण्डनानि यथेच्छया ॥ ६० ॥ ततः प्रभाते विमले प्रोद्गते रविमण्डले ॥ भूयोपि राजपत्नी सा भूषणान्यंबराणि च ॥ ॥ ६१ ॥ तथैव प्रददौ तासां जगृहुश्च तथैव ताः ॥ एवं तस्याः प्रयच्छंत्या अहन्यहनि भक्तितः ॥ ६२ ॥ पंचरात्रमतिक्रांतं तृप्तास्तास्तापसप्रियाः ॥ न राज्ञी तृप्तिमायाति प्रयच्छंती प्रभक्तितः ॥ ६३ ॥ ततः शुश्राव तापस्यश्चतस्रोऽत्र सुनिःस्पृहाः ॥ वल्कलाजिनधारिण्यो न तस्याः पार्श्वमागताः ॥ न चान्या भूषिता दृष्ट्वा चक्रुरीर्ष्यां कथंचन ॥ ६४ ॥ अथ सा त्वरितं गत्वा तासां पार्श्वमनिंदिता ॥ भूषणानि महार्हाणि गृहीत्वा पंचमीदिने ॥ ६५ ॥ ततः प्रोवाच ताः सर्वाः प्रसादः क्रियतामिति ॥ इमानि भूषणार्थाय भूषणानि प्रगृह्यताम् ॥ ६६ ॥ ॥ तापस्य ऊचुः ॥ ॥ नास्माकं भूषणैः कार्यं भूषिता वल्कलैर्वयम् ॥ तस्माद्गच्छ निजं हर्म्यमर्थिभ्यः संप्रदीयताम् ॥ ६७ ॥ वदन्तीनां तया सार्धमेवं तासां द्विजोत्तमाः ॥ चत्वारः पतयः प्राप्ता एकैकस्याः पृथक्पृथक् ॥ ६८ ॥ शुनःशेपोऽथ शाक्रेयो बौद्धो दान्तश्चतुर्थकः ॥ वियन्मार्गं हि चत्वारः

१ दृष्ट्वा–इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राप्य स्वाश्रममाययुः ॥ ६९ ॥ शेषाः सर्वे गतिभ्रंशं प्राप्य भूमार्गमाश्रिताः ॥ अथ ते स्वाश्रमं दृष्ट्वा विकृताकारभूषणम् ॥ किमिदंकिमिदं प्रोचुर्यत्तापस्यो विडंबिताः ॥ ७० ॥ केनैवं पाप्मनाऽस्माकमाश्रमोऽयं विडंबितः ॥ प्रदत्त्वा तापसीनां च भूषणान्यंबराणि च ॥ ७१ ॥ ॥ ॥ तत्पत्न्य ऊचुः ॥ ॥ चमत्कारस्य भूपस्य यैषा भार्या व्यवस्थिता ॥ अनया संप्रदत्तानि सर्वासां भूषणानि वै ॥ ७२ ॥ अस्माकमपि संप्राप्ता गृहे वै नृपवल्लभा ॥ दातुं विभूषणान्येवं निषिद्धाऽस्माभिरद्य सा ॥ ७३ ॥ ॥ सूत उवाच ॥ ॥ तासां तद्वचनं श्रुत्वा ततस्ते कोपमूर्च्छिताः ॥ ऊचुस्तां नृपतेर्भार्यां शापं दातुं मुहुर्मुहुः ॥ ७४ ॥ द्विसप्ततिर्वयं पापे स्नानार्थं पुष्करे गताः ॥ कार्तिक्यां व्योममार्गेण मनोमारुतरंहसा ॥ ७५ ॥ चत्वारस्त इमे प्राप्ता येषां दारैः प्रतिग्रहः ॥ न कृतस्तस्य भूपस्य कुभार्यायाः कथंचन ॥ ७६ ॥ तस्माद्विडंबितो यस्मादाश्रमोऽयं तपस्विनाम् ॥ शिलारूपा च भवती तस्माद्भवतु कुत्सिता ॥ ७७ ॥ अथ सा तत्क्षणादेव शिलारूपा बभूव ह ॥ निश्चेष्टा तत्क्षणादेव मुनिवाक्यादनंतरम् ॥ ७८ ॥ ततः स परिवारोऽस्यास्तद्दुःखेन समाकुलः ॥ बाष्पपूर्णेक्षणो दीनः प्रस्थितः स्वपुरं प्रति ॥ ७९ ॥ कथयामास तत्सर्वं दमयंत्याः समुद्भवम् ॥ वृत्तांतं ब्राह्मणश्रेष्ठास्तस्याः शापसमुद्भवम् ॥ ८० ॥ श्रुत्वा स पार्थिवस्तूर्णं वृत्तांतं शापजं तदा ॥ प्रसादनाय विप्राणां दुःखितः स वनं ययौ ॥ ८१ ॥ ततस्ते मुनयस्तूर्णं चत्वारोऽपि महीपतिम् ॥ ज्ञात्वा प्रसादनार्थाय भार्यार्थं समुपस्थितम् ॥ ८२ ॥ अग्निहोत्राणि दारांश्च समादाय ततः परम् ॥ कुरुक्षेत्रं समाजग्मुः खमार्गेण द्रुतं तदा ॥ ८३ ॥ पार्थिवोऽपि समन्वेष्य यत्नात्तान्सर्वतो मुनीन्॥स निर्विण्णः श्रमार्तश्च भार्याव्यसनदुःखितः ॥८४॥ ततो जगाम तं देशं यत्र भार्या शिलामयी ॥ सा स्थिता तापसीवृन्दैः सर्वतोऽपि समन्विता ॥८५॥ अथ तां तादृशीं दृष्ट्वा सेवकैः सकलैर्वृतः ॥ हाहेति स मुहुः प्रोच्य मूर्च्छितः प्रापतत्क्षितौ ॥८६॥ ततः कृच्छ्रात्समासाद्य संज्ञां तोयसमुक्षितः ॥ प्रलापमकरोत्पश्चात्स्मृत्वास्मृत्वा प्रियान्गुणान् ॥८७॥ हा प्रिये मृगशावाक्षि मम प्राणविनाशिनि ॥ मां मुक्त्वाऽद्य प्रियं कांतं क्व गतासि शुभानने ॥८८॥ नाभुक्ते मयि भुक्तासि निद्रां नाऽनिद्रिते गता ॥ न सौभाग्यस्य गर्वेण ममाज्ञा लंघिता क्वचित् ॥ ८९ ॥ न स्मरामि त्वया प्रोक्तं कदाचिद्विकृतं वचः ॥ रहस्यपि विशालाक्षि किमु भोजनसंसदि ॥ ९० ॥ ॥ सूत उवाच ॥ ॥ एवं प्रलपतस्तस्य भूपतेः करुणं बहु ॥ आयाता मंत्रिणस्तस्य श्रुत्वा भूपं तथाविधम् ॥ ९१ ॥ ततः संबोध्य तं कृच्छ्राद्दृष्टान्तैर्बहुविस्तरैः ॥ राजर्षीणां पुराणानां महद्व्यसनसंभवैः ॥ ९२ ॥ निन्युस्तं भूपतिं दीनं बाष्पव्याकुललोचनम् ॥ निश्वसंतं यथा नागं तेजसा परिवर्जितम् ॥ ९३ ॥ सोऽपि कृत्वाऽऽलयं तस्याः समंतात्सुमनोहरम् ॥ कर्पू



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

रागरुधूपाद्यैर्वस्त्रकुंकुमचन्दनैः ॥ योजयामास तां भार्यां शिलारूपामपि स्थिताम् ॥ ९४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये दमयन्त्युपाख्याने दमयन्त्या विप्रशापेन शिलात्वप्राप्तावानर्ताधिपतिकृतशोककथनंनामैकादशोत्तरशततमोऽध्यायः ॥ १११ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ ततः कतिपयाहस्य गते तस्मिन्महीपतौ ॥ स्वगृहं प्रति दुःखार्ते परिवारसमन्विते ॥ १ ॥ पद्भ्यामेव समायाता ह्यष्टषष्टिर्द्विजोत्तमाः ॥ परिश्रांताः कृशांगाश्च धूलिधूसरिताननाः ॥ २ ॥ यावत्पश्यंति दाराः स्वा दिव्याभरणभूषिताः ॥ दिव्यवस्त्रैः सुसंवीता राजपत्न्य इवापराः ॥ ३ ॥ ततश्च विस्मयाविष्टाः पप्रच्छुस्ते क्षुधान्विताः ॥ किमिदंकिमिदं पापा विरुद्धं विहितं वपुः ॥ ४ ॥ कथं प्राप्तानि वस्त्राणि भूषणानि वराणि च ॥ नूनमस्मद्व्रतेर्भ्रंशः खे जातो नाऽन्यथा भवेत् ॥ ५ ॥ विकारमेनं संत्यक्त्वा युष्मदीयं सुगर्हिताः ॥ अथ ताः सर्ववृत्तांतमूचुस्तापसयोषितः ॥६॥ यथा राज्ञी समायाता दमयन्ती नृपप्रिया ॥ भूषणानि च दत्तानि तया चैव यथा द्विजाः ॥ ७ ॥ यथा शापश्च सञ्जातो ब्राह्मणानां महात्मनाम् ॥ अथ ते मुनयः क्रुद्धास्तच्छ्रुत्वा गर्हितं वचः ॥ राजप्रतिग्रहो निंद्यस्तापसानां विशेषतः॥८॥ततो भूपस्य राष्ट्रस्य नाशार्थं जगृहुर्जलम् ॥ क्रोधेन महता विष्टा वेपमाना निरर्गलम्॥९॥अनेन पाप्मनाऽस्माकं कुभूपेन प्रणाशिता ॥ खे गतिर्लोभयित्वा तु पत्न्योऽस्माकमकृत्रिमाः ॥ सरलास्तद्गुणाः सर्वे येनेदृग्व्यसनं स्थितम् ॥१०॥ ॥ सूत उवाच ॥ ॥ एवं ते मुनयो यावच्छापं तस्य महीपतेः॥प्रयच्छंति च तास्तावदूचुर्भार्या रुषान्विताः ॥ ११ ॥ न देयो भूपतेस्तस्य शापो ब्राह्मणसत्तमाः ॥ अस्मदीयं वचस्तावच्छ्रोतव्यमविशंकितैः ॥१२॥ वयं सर्वा नरेन्द्रस्य भार्यया समलंकृताः ॥ सुवस्त्रैर्भूषणैर्दिव्यैः श्रद्धापूतेन चेतसा ॥ १३ ॥ वयं दरिद्रदोषेण सदा युष्मद्गृहे स्थिताः ॥ कर्शिता न च संप्राप्तं सुखं मर्त्यसमुद्भवम् ॥१४॥ एतेषां परलोकोऽत्र विद्यते ये तपोरताः ॥ न च मर्त्यफलं किञ्चिदपि स्वल्पतरं भवेत् ॥१५॥ अन्येषां विषयस्थानामिह लोकः प्रकीर्तितः ॥ भोगप्रसक्तचित्तानां नीचानां सुदुरात्मनाम् ॥ १६ ॥ गृहस्थाश्रमिणां चैव स्वधर्मरतचेतसाम् ॥ इह लोकः परश्चैव जायते नाऽत्र संशयः ॥१७॥ ता वयं नात्र सन्देहो गृहस्थाश्रममुत्तमम् ॥ संसेव्य साधयिष्यामो लोकद्वयमनुत्तमम् ॥१८॥ तस्माद्गृहाणि रम्याणि प्रवदंति समाहिताः ॥ भूपालाद्भूमिमादाय वृत्तिं चैवाभिवांछिताम् ॥ १९ ॥ ततश्चैवाथ वीक्षध्वं पुत्रपौत्रसमुद्भवम् ॥ सौख्यं चापि कुमारीणां बांधवानां विशेषतः ॥ २० ॥ न करिष्यथ चेद्वाक्यमेतदस्मदुदीरितम् ॥ सर्वाः प्राणपरित्यागं करिष्यामो न संशयः ॥ २१ ॥ यूयं स्त्रीवधपापेन युक्ताः सन्तस्ततः परम् ॥



१ समन्विताः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नरकं रौरवं दुर्गं गमिष्यथ सुनिश्चितम् ॥२२॥ एवं ते मुनयः श्रुत्वा तासां वाक्यानि तानि वै ॥ भूपृष्ठे तत्यजुस्तोयं शापार्थं यत्करैर्धृतम् ॥२३॥ ततस्तत्तोयनिर्दग्धं तद्विभागं क्षितेस्तदा ॥ ऊषरत्वमनुप्राप्तमद्यापि द्विजसत्तमाः ॥ २४ ॥ आस्तामन्नादिकं तत्र यदुप्तं न प्ररोहति ॥ न जन्म चाप्नु याद्भूयः पक्षी वा कीट एव वा ॥ २५ ॥ तृणं वाथ मृगस्तत्र किं पुनर्भक्तिमान्नरः ॥ यस्तत्र कुरुते श्राद्धं श्रद्धया फाल्गुने नरः ॥ २६ ॥ पौर्णमास्यां रवेर्वारे स पितॄनुद्धरेन्निजान् ॥ अपि स्वकर्मणा प्राप्तान्नरके दारुणाकृतौ ॥ २७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये दमयन्त्युपाख्यान ऊषरोत्पत्तिमाहात्म्यकथनंनाम द्वादशोत्तरशततमोऽध्यायः ॥ ११२ ॥ ॥ सूत उवाच ॥ ॥ ततस्ते ब्राह्मणाः सर्वे गतकोपा दधुर्मतिम् ॥ यज्ञकर्मसु गार्हस्थ्ये पुत्रपौत्रसमुद्भवे ॥ १ ॥ एतस्मिन्नंतरे राजा स तान्प्राप्तान्द्विजोत्तमान् ॥ श्रुत्वा भक्तिसमायुक्तः प्रणामार्थमुपागतः ॥ २ ॥ श्रुत्वा कोपगतां वार्तामुपशामकृतां तथा ॥ गार्हस्थ्याप्रतिपन्नानां वाक्यैर्भार्यासमुद्भवैः ॥ ३ ॥ ततः प्रणम्य तान्सर्वान्साष्टांगं स महीपतिः ॥ ततः कृतांजलिपुटः प्रोवाच विनतः स्थितः ॥ ४ ॥ युष्मदीयप्रसादेन संप्राप्तं जन्मनः फलम् ॥ मया रोगविनाशेन तस्माद्ब्रूत करोमि किम् ॥ ५ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ भार्यया तव राजेंद्र वयं सर्वत्र वासिनः ॥ नीताः कृतार्थतां दत्त्वा रत्नानि विविधानि च ॥ ६ ॥ तस्मात्पुरवरं कृत्वा क्षेत्रेऽत्रैव सुशोभने ॥ अस्माकं देहि गार्हस्थ्यं येन सम्यक्प्रजायते ॥ ७ ॥ यजामो विविधैर्यज्ञैः सदा संपूर्णदक्षिणैः ॥ इमं लोकं परं चैव साधयामः सदा स्थिताः ॥ ८ ॥ तच्छ्रुत्वा पार्थिवो हृष्टस्तथेत्युक्त्वा ततः परम् ॥ अनुकूलदिने प्राप्ते शिल्पानाहूय[1] भूरिशः ॥ ९ ॥ पुरं प्रकल्पयामास बहुप्राकारसंकुलम् ॥ प्राकारपरिखायुक्तं गोपुरैः समलंकृतम् ॥ १० ॥ अथाष्टषष्टिविप्राणां तत्र मध्ये नृपोत्तमः ॥ अष्टषष्टिगृहण्येव चकार सुबृहंति च ॥ ११ ॥ मत्तवारणजुष्टानि दीर्घिकासहितानि च ॥ गृहोद्यानैः समेतानि यथा राजगृहाणि च ॥ १२ ॥ तथा कृत्वाऽथ रत्नौघैः पूरयित्वा तथा परैः ॥ ददौ तेभ्योऽष्टषष्टिं च ग्रामाणां तदनंतरम् ॥ १३ ॥ ततः सर्वान्समाहूय पुत्रपौत्रांस्तदग्रतः ॥ प्रोवाच तारनादेन श्रूयतां जल्पतो मम ॥ १४ ॥ एतत्पुरं मया दत्तमेभिर्ग्रामैः समन्वितम् ॥ एतेभ्यो ब्राह्मणेंद्रेभ्यः श्रद्धापूतेन चेतसा ॥ १५ ॥ तस्माद्रक्षा प्रकर्तव्या यथा न स्यात्क्षतिः क्वचित् ॥ कष्टं वा ब्राह्मणेंद्राणां तथा चैव पराभवम् ॥ १६ ॥ अस्मद्वंशसमुद्भूतो यस्त्वेतांस्तोषयिष्यति ॥ अन्यो वा भूपतिर्वृद्धिमग्र्यां नूनं स यास्यति ॥ १७ ॥ यश्चापराधसंयुक्तानेतान्खेदं नयिष्यति ॥ योजयिष्यति वा क्लेशैर्विविधैर्वा पराभवैः ॥ स शत्रुभिः पराभूतो

१ शिल्पान्–शिल्पिनः–इत्यर्थः । अर्शआदित्वादच् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वेष्टितो विविधैर्गदैः ॥ १८ ॥ इह लोके वियोगादीन्प्राप्य क्लेशान्सुदारुणान् ॥ रौरवादिषु रौद्रेषु नरकेषु प्रयास्यति ॥ १९ ॥ एवमुक्त्वा ततः सर्वं तेषां कृत्यं महीपतिः ॥ स्वयमेवाकरोन्नित्यं दिवारात्रमतंद्रितः ॥ २० ॥ अथ ता ब्राह्मणेंद्राणां भार्याः सर्वा द्विजोत्तमाः ॥ दमयंत्याः समासाद्य प्रासादं स्नेहवत्सलाः ॥ २१ ॥ कुंकुमागरुकर्पूरैः पुष्पैर्गंधैः पृथग्विधैः ॥ तदर्चां पूजयामासुः स च राजा दिनेदिने ॥ २२ ॥ अथ ताः प्रोचुरन्योन्यं तापस्यस्तत्पुरः स्थिताः ॥ तस्य भूपस्य संतोषं जनयंत्यो द्विजोत्तमाः ॥ २३ ॥ यदास्माकं गृहे वृद्धिः[1] कदाचित्संभविष्यति ॥ तदग्रतश्च पश्चाच्च दमयंत्याः प्रपूजनम् ॥ करिष्यामो न संदेहः सर्वकृत्येषु सर्वदा ॥ २४ ॥ एनां दृष्ट्वा कुमारी या वेदिमध्यं[2] गमिष्यति ॥ सा भविष्यत्यसंदेहः पत्युः प्राणसमा सदा ॥ २५ ॥ तस्मात्सर्वप्रयत्नेन कन्यायज्ञ[3] उपस्थिते ॥ दमयंती प्रद्रष्टव्या पूजनीया प्रयत्नतः ॥ २६ ॥ ॥ सूत उवाच ॥ ॥ एवं तत्र पुरे तेन भूभुजा सुमहात्मना ॥ अष्टषष्टिं च संस्थाप्य गोत्राणां निर्वृतिः कृता ॥ २७ ॥ तेषामपि च चत्वारि गोत्राण्युरगजाद्भयात् ॥ गतानि तत्र यत्र स्युस्तानि पूर्वोद्भवानि च ॥ चतुःषष्टिः स्थिता तत्र पुरे शेषा द्विजन्मनाम् ॥ २८ ॥ ॥ ऋषय ऊचुः ॥ ॥ कीदृङ्नागभयं तेषां येन ते विगता विभो ॥ परित्यज्य निजं स्थानमेतन्नो विस्तराद्वद ॥ २९ ॥ ॥ सूत उवाच ॥ ॥ आनर्ताधिपतिः पूर्वमासीन्नाम्ना प्रभंजनः ॥ धर्मज्ञः सुप्रतापी च परपक्षक्षयावहः ॥ ३० ॥ ततस्तस्य सुतो जज्ञे प्राप्ते वयसि पश्चिमे ॥ अनिष्टस्थानसंस्थेषु ग्रहेषु द्विजसत्तमाः ॥ ३१ ॥ ततस्तेन समाहूय दैवज्ञाञ्छास्त्रपंडितान् ॥ तेषां निवेदितं सर्वं कालं तस्य समुद्भवम् ॥ ३२ ॥ ॥ दैवज्ञा ऊचुः ॥ ॥ एष ते पृथिवीपाल जातः पुत्रः सुगर्हिते ॥ कालेऽनिष्टप्रदे रौद्रे गंडांतत्रितयोद्भवे ॥ ३३ ॥ कथंचिदपि यद्येष जीवयिष्यति पार्थिव ॥ पितृमातृपुरार्थं च देशानुत्सादयिष्यति ॥ ३४ ॥ ॥ राजोवाच ॥ ॥ अस्ति कश्चिदुपायोऽत्र दैवो वा मानुषोऽपि वा ॥ येन संजायते क्षेमं पुत्रस्य विषयस्य च ॥ ३५ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ यथा समुत्थितं यंत्रं यंत्रेण प्रतिहन्यते ॥ यथा बाणप्रहाराणां कवचं वारणं भवेत् ॥ तथा ग्रहविकाराणां शांतिर्भवति वारणम् ॥ ३६ ॥ तस्मान्नित्यमनुद्विग्नः शांतिकं कुरु भूपते ॥ येन सर्वे ग्रहाः सौम्या जायंते च शुभावहाः ॥ ३७ ॥ अनिष्टस्थानसंस्थेषु ग्रहेषु विषमेषु च ॥ ततः स सत्वरं गत्वा चमत्कारपुरं नृपः ॥ ३८ ॥ तत्र विप्रान्समावेश्य सर्वान्प्रोवाच सादरम् ॥ वयं युष्मत्प्रसादेन राज्यं कुर्मः सदैव हि ॥ ३९ ॥ येऽतीता ये भविष्यंति वंशेऽस्माकं नृपोत्तमाः ॥ भवंतोऽत्र गतिस्तेषां सस्यानां नीरदो यथा ॥ ४० ॥



१ वृद्धिः—आभ्युदयिकं—विवाहमौञ्ज्यादिकं कार्यम् । २ वेदिमध्यं—विवाहवेदिमध्यम्—एतेन—विवाहात्पूर्वं कुमारीणामेतस्या दमयंत्या दर्शनमवश्यं कर्तव्यम्—इत्याचारस्तत्रास्तीति बोद्धव्यम् । ३ कन्यायज्ञे—विवाहकर्मणि—इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदत्र मत्सुतो जातो दुष्टस्थानस्थितैर्ग्रहैः ॥ दैवज्ञैः शांतिकं प्रोक्तं तस्यानिष्टस्य शांतिदम् ॥ ४१ ॥ तस्मात्कुरुत विप्रेंद्रा यथोक्तं शांतिकं मम ॥ येन पुत्रश्च राष्ट्रं च विभवश्च विवर्धते ॥ ४२ ॥ ततस्ते ब्राह्मणाः प्रोचुः संमंत्र्याऽथ परस्परम् ॥ क्षेमाय तव भूनाथ करिष्यामोऽत्र शांतिकम् ॥ ॥ ४३ ॥ सदैव नियताः संतः शांताः षोडश ते द्विजाः ॥ उपहाराः सदा प्रेष्यास्त्वया भक्त्या महीपते ॥ मासांते चाभिषेकश्च ग्राह्यो रुद्रघटोद्भवः ॥ ४४ ॥ एवं प्रकुर्वतस्तुभ्यं पुत्रो वृद्धिं प्रयास्यति ॥ तथा राष्ट्रं च कोशश्च यच्चान्यदपि किंचन ॥४५॥ ततः प्रणम्य तान्हृष्टो गत्वा निजनिवेशनम् ॥ उत्सवं पुत्रजन्मोत्थं चक्रे तैः प्रेरितः सदा ॥ ४६ ॥ संभारान्प्रेषयामास चमत्कारपुरे ततः ॥ मासांते चाभिषेकश्च ग्राह्यो वै विधिपूर्वकम् ॥ ४७ ॥ तेऽपि ब्राह्मणशार्दूलाश्चातुश्चरणसंभवाः ॥ क्रमेण शांतिकं चक्रुर्ब्रह्मचर्यपरायणाः ॥४८॥ मासं मासं प्रति सदा शांता दांता जितेंद्रियाः ॥ ततो मासावसानेऽन्ये चक्रुस्तच्छांतिकं द्विजाः ॥ ४९ ॥ सोऽपि राजाऽथ मासांते समागत्य सुभक्तितः ॥ अभिषेकं समादाय पूजयित्वा द्विजोत्तमान् ॥ ५० ॥ वासोभिर्मुकुटैश्चैव गोभूदानेन केवलम् ॥ संतर्प्यान्यांस्तथा विप्रान्स्वस्थानं याति भूमिपः ॥ ५१ ॥ एवं प्रवर्तमाने च शांतिके तत्र भूपतेः ॥ जगाम सुमहान्कालः क्षेमारोग्यधनागमैः ॥ ५२ ॥ कस्यचित्त्वथ कालस्य मासादावपि भूपतेः ॥ प्रारब्धे शांतिके तस्मिन्महाव्याधिरजायत ॥ ॥ ५३ ॥ तत्पुत्रस्य विशेषेण तथैवांतःपुरस्य च ॥ राष्ट्रस्य च समग्रस्य वाहनानां तथा क्षयः ॥ ५४ ॥ स ततः प्रेषयामास शांत्यर्थं तत्र सत्पुरे ॥ सुसंभारान्विशेषेण दक्षिणाश्च विशेषतः ॥ ५५ ॥ यथायथा द्विजास्तत्र होमं कुर्वंति पावके ॥ तथा सर्वे विशेषेण रोगा वर्धंति सर्वशः ॥ ५६ ॥ म्रियन्ते वाजिनस्तस्य बृहन्तो वारणास्तथा ॥ शत्रवः सर्वकाष्ठासु विग्रहार्थमुपस्थिताः ॥ ५७ ॥ ततः स व्याकुलीभूतो रोगग्रस्तो महीपतिः ॥ चमत्कारपुरं प्राप्य सर्वान्विप्रानुवाच ह ॥ ५८ ॥ युष्माभिः स्वामिभिः संस्थैरापदोऽभिभवंति माम् ॥ तत्किमेतन्महाभागाः क्षीयन्ते मम संपदः ॥ रोगाश्चैव विवर्धंते शत्रुसंघैः समन्विताः ॥ ५९ ॥ तस्माद्विशेषतो होमः कार्यो रोगप्रशांतये ॥ दानानि च विशिष्टानि प्रदास्यामि द्विजन्मनाम् ॥ ॥ ६० ॥ ततस्ते ब्राह्मणाः सर्वे प्रत्यक्षं तस्य भूपतेः ॥ चक्रुः समाहिता भूत्वा शांतिकं तद्धिताय च ॥ ६१ ॥ यथायथा प्रयुञ्जीरन्होमांते सुसमाहिताः ॥ तथातथास्य भूपस्य वृद्धिं रोगः प्रगच्छति ॥ ६२ ॥ एतस्मिन्नंतरे क्रुद्धास्ते सर्वे द्विजसत्तमाः ॥ ग्रहानुद्दिश्य सूर्यादीञ्छापाय कृतनिश्चयाः ॥ ६३ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ पूजिता अपि सद्भक्त्या विधानेन तथा ग्रहाः ॥ पीडयंति पुरं राज्ञः सपुत्रपशुबांधवम् ॥ ६४ ॥ एवं ते निश्चयं कृत्वा शुचीभूय समाहिताः ॥ यावद्यच्छंति तच्छापं ग्रहेभ्यः क्रोधमूर्छिताः ॥ ६५ ॥ तावद्वह्निरुवाचेदं मूर्तो भूत्वा द्विजोत्तमान् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

मा प्रयच्छत विप्रेंद्राः शापं कोपात्कथंचन ॥ ६६ ॥ ग्रहेभ्यो दोषमुक्तेभ्यः श्रूयतां वचनं मम ॥ मासिमासि प्रकुर्वंति होमं ते षोडश द्विजाः ॥ ॥ ६७ ॥ तेषां मध्यस्थितश्चैकस्त्रिजातो ब्राह्मणाधमः ॥ तेन तद्दूषितं द्रव्यं समग्रं होमसंभवम् ॥ ६८ ॥ मया दत्तं न गृह्णंति ते ग्रहा भास्करादयः ॥ तेन कुर्वंति भूपस्य पीडामप्यधिकामिमाम् ॥ ६९ ॥ तस्मादेनं परित्यज्य होमं कुरुत मा चिरम् ॥ येन प्रीतिं परां यांति ग्रहाः सर्वेऽर्कपूर्वकाः ॥ ॥ ७० ॥ आरोग्यश्च भवेद्राजा गतशत्रुः सुतान्वितः ॥ सततं सुखमभ्येति मच्छांतिकप्रभावतः ॥ ७१ ॥ एवमुक्त्वा स भगवान्वह्निश्चादर्शनं गतः ॥ तेऽपि विप्रा विषण्णास्या लज्जया परया वृताः ॥ ७२ ॥ ततस्तं पावकं भूयः स्तुवंतस्तत्र च स्थिताः ॥ प्रोचुर्वैश्वानरं ब्रूहि त्रिजातो योऽत्र च द्विजः ॥ ७३ ॥ येन तं संपरित्यज्य कुर्मः कर्म प्रशांतये ॥ निःशेषमेव दोषाणां भूपस्यास्य महात्मनः ॥ ७४ ॥ ॥ वह्निरुवाच ॥ ॥ नाहं दोषं द्विजेंद्राणां जानन्नपि कथंचन ॥ ब्रवीमि ब्राह्मणा वन्द्या मम सर्वे धरातले ॥ ७५ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ यदि तं ब्राह्मणं वह्ने नास्माकं कीर्तयिष्यसि ॥ तत्ते शापं प्रदास्यामस्तस्माच्छीघ्रं वदस्व नः ॥ ७६ ॥ ॥ सूत उवाच ॥ ॥ तेषां तद्वचनं श्रुत्वा वह्निर्भयसमन्वितः ॥ चिरं विचिंतयामास कुर्वेऽतः किं शुभावहम् ॥ ७७ ॥ ब्राह्मणं दूषयिष्यामि यदि तावच्च पातकम् ॥ भविष्यति न संदेहः शापश्चापि तदुद्भवः ॥ ॥ ७८ ॥ कीर्तयिष्यामि वा नैव विद्यमानं द्विजोत्तमम् ॥ शपिष्यंति न संदेहः क्रुद्धा आशीविषोपमाः ॥ ७९ ॥ एवं चिंतयतस्तस्य गात्रे स्वेदोऽभवन्महान् ॥ येन तत्पूरितं कुण्डं होमार्थं यत्प्रकल्पितम् ॥८०॥ ततः प्रोवाच तान्विप्रान्कृतांजलिपुटः स्थितः॥ वेपमानो भयत्रस्तः कुण्डान्निष्क्रम्य पावकः ॥ ८१ ॥ नाहं स्वजिह्वया दोषं ब्राह्मणस्य समुद्भवम् ॥ कथञ्चित्कीर्तयिष्यामि तस्माच्छृण्वन्तु भो द्विजाः ॥ ८२ ॥ अत्र स्वेद जले विप्रा ये स्थिताः षोडश द्विजाः ॥ ते स्नानमद्य कुर्वंतु प्रविशुद्धयर्थमात्मनः ॥ ८३ ॥ एतेषां मध्यगो यश्च त्रिजातः स भविष्यति ॥ तस्य विस्फोटकैर्युक्तं स्नातस्यांगं भविष्यति ॥ ८४ ॥ ततस्ते ब्राह्मणाः सर्वे क्रमात्तत्र निमज्जनम् ॥ चक्रुः शुद्धिं गताश्चापि मुक्त्वैकं ब्राह्मणं तदा ॥ ॥ ८५ ॥ हाहाकारस्ततो जज्ञे महांस्तत्र जनोद्भवः ॥ दृष्ट्वा विस्फोटकैर्युक्तमकस्मात्तं द्विजोत्तमम् ॥ ८६ ॥ सोऽपि लज्जान्वितो विप्रः कृत्वाऽधोवदनं ततः ॥ निष्क्रांतोऽथ सभामध्यात्स्थानाद्विप्रसमुद्भवात् ॥ ८७ ॥ ॥ वह्निरुवाच ॥ ॥ एतद्वः साधितं कृत्यं मया पूर्वं द्विजोत्तमाः ॥ ॥१२३॥ तस्माद्यास्ये निजं स्थानं भवद्भिः पारमापितः ॥ ८८ ॥ न वृथा दर्शनं मे स्यादपि स्वप्ने द्विजोत्तमाः ॥ तस्मात्सम्प्रार्थ्यतां किंचिदभीष्टं हृदि संस्थितम् ॥ ८९ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ एतत्तव जलं वह्ने स्वेदजं सर्वदैव तु ॥ स्थिरं भवतु चात्रैव विशुद्धयर्थं द्विजन्मनाम् ॥ ९० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्यजातो नरो योऽत्र प्रकरोति निमज्जनम् ॥ तस्य चिह्नं त्वया कार्यं विस्फोटकसमुद्भवम् ॥ ९१ ॥ बाढमित्येव स प्रोच्या गतोंऽतर्धानमेव हि ॥ पावकस्ते द्विजाः सर्वे मंत्रं चक्रुः परस्परम् ॥९२॥ अद्यप्रभृति सर्वेषां ब्राह्मणानां समुद्भवम् ॥ शुद्धिरत्र प्रकर्तव्या पितृमातृसमुद्भवा ॥९३॥ चमत्कारपुरोत्थो यः कश्चिद्विप्रः प्रकीर्तितः ॥ सोऽत्र स्नातो विशुद्धश्च विज्ञेयः कुलपुत्रकः ॥ ९४ ॥ तस्मै कन्या प्रदातव्या स श्राद्धार्हो भविष्यति ॥ धर्मकृत्येषु सर्वेषु योजनीयः स एव हि ॥ ९५ ॥ अष्टषष्टिषु गोत्रेषु मिलितेषु यथाक्रमम् ॥ तत्प्रत्यक्षं विशुद्धो यः स शुद्धः पंक्तिपावनः ॥ ९६ ॥ अपवादाश्च ये केचिद्ब्रह्महत्यादिकाः स्थिताः ॥ अन्येऽपि दुर्जनैः प्रोक्ता धर्मसन्देहकारकाः ॥ ९७ ॥ ते सर्वेऽत्र विशुद्धाः स्युर्विज्ञेयाः कुलपुत्रकाः ॥ अपवादास्तथा चान्ये नाशं यास्यंति चाखिलाः ॥ ९८ ॥ यावन्नात्र कृतं स्नानं प्रत्यक्षं च द्विजन्मनाम् ॥ सर्वेषां तावदेवाऽत्र न स विप्रो भवेत्स्फुटम् ॥ ९९ ॥ ॥ सूत उवाच ॥ ॥ एवं ते समयं कृत्वा चमत्कारपुरोद्भवाः ॥ ब्राह्मणाः शांतिकं चक्रुर्हितार्थं तस्य भूपतेः ॥१००॥ तस्मिन्कुण्डे ततः स्नानं कृतं सर्वैर्महात्मभिः ॥ भयत्रस्तैर्विशुद्ध्यर्थं शेषैरपि महात्मभिः ॥ १०१ ॥ ततो नीरोगतां प्राप्तः स भूपस्तत्क्षणाद्विजाः ॥ यस्तत्र कुरुते स्नानमद्यापि द्विजसत्तमाः ॥ १०२ ॥ कार्तिक्यां परदारोत्थैः स विमुच्येत पातकैः ॥ एषां युगत्रये शुद्धिरासीत्तत्र द्विजन्मनाम् ॥ ॥ १०३ ॥ कुलशीलविहीनानामन्येषामपि पाप्मनाम् ॥ मत्वा कलियुगं घोरं परदारसुरंजितम् ॥ तत्र शुद्धिस्ततः सर्वैः कृता विप्रैश्च वाचिका ॥ ॥ १०४ ॥ पुरतो देवदेवस्य ब्रह्मणो द्विजसत्तमाः ॥ पितृमातृजवंशस्य विशुद्ध्यर्थमतंद्रितैः ॥१०५॥ अद्यापि कुरुते तत्र यः स्नानं द्विजसत्तमाः ॥ त्रिजातो दह्यते तत्र वह्निना स न संशयः ॥ १०६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये दमयन्त्युपाख्याने त्रिजातकविशुद्धयेऽग्निकुंडमाहात्म्यवर्णनंनाम त्रयोदशोत्तरशततमोऽध्यायः ॥ ११३ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ सोऽपि विप्रो द्विजश्रेष्ठा विस्फोटकपरिप्लुतः ॥ लज्जया परया युक्तो गत्वा किंचिद्वनांतरम् ॥ १ ॥ ततो वैराग्यमापन्नो रौद्रे तपसि संस्थितः ॥ त्यक्त्वा गृहादिकं सर्वं स्नेहं दारसुतोद्भवम् ॥ २ ॥ नियमैः संयमैश्चैव शोषयन्नात्मनस्तनुम् ॥ किंचिज्जलाश्रयं गत्वा स्थापयित्वा महेश्वरम् ॥ ३ ॥ ततः कालेन महता तुष्टस्तस्य महेश्वरः ॥ प्रोवाच दर्शनं गत्वा प्रार्थयस्व यथेप्सितम् ॥ ४ ॥ ॥ त्रिजात उवाच ॥ ॥

१ रौद्रे तपसि संस्थितः—इति पूर्वश्लोकस्थितेन सम्बन्धो बोद्धव्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 मातृदोषादहं देव वैलक्ष्यं परमं गतः ॥ मध्ये ब्राह्मणमुख्यानामानर्त्ताधिपतेस्तथा ॥ ५ ॥ अहं शक्नोमि नो वक्तुं कस्यचिद्दर्शितुं विभो ॥ त्रिजा 
तोऽस्मीति विज्ञाय भूरिविद्यान्वितोऽपि च ॥ ६ ॥ तस्मात्सर्वोत्तमस्तेषामहं चैव द्विजन्मनाम् ॥ यथा भवामि देवेश तथा नीतिर्विधीयताम् ॥७॥
॥ ॥ श्रीभगवानुवाच ॥ ॥ चमत्कारपुरे विप्रा ये वसंति द्विजोत्तम ॥ तेषां सर्वोत्तमो नूनं मत्प्रसादाद्भविष्यसि ॥ ८ ॥ तस्मात्कालं प्रती
क्षस्व कंचित्त्वं ब्राह्मणोत्तम ॥ समये समनुप्राप्ते त्वां च नेष्यामि तत्र वै ॥ ९ ॥ एवमुक्त्वा स देवेशस्ततश्चादर्शनं गतः ॥ ब्राह्मणोऽपि तपस्तेपे तथा
संपूजयन्हरम् ॥ १० ॥ कस्यचित्त्वथ कालस्य मत्कारपुरे द्विजाः ॥ मौद्गल्यान्वयसंभूतो देवरातोऽभवद्द्विजः ॥ ११ ॥ तस्य पुत्रः क्रथोनाम यौव
नोद्धतविग्रहः ॥ सदा गर्वसमायुक्तः पौरुषे च व्यवस्थितः ॥१२॥ स कदाचिद्ययौ विप्रो नागतीर्थं प्रति द्विजाः ॥ श्रावणस्यासिते पक्षे पंचम्यां पर्य
टन्वने ॥१३॥ अथापश्यत्स नागेन्द्रतनयं भूरिवर्चसम् ॥ रुद्रमालमिति ख्यातं जनन्या सह संगतम् ॥१४॥ अथाऽसौ तं समालोक्य सुलघुं सर्प
पुत्रकम् ॥ जलसर्पमिति ज्ञात्वा लगुडेन व्यपोथयत् ॥१५॥ हन्यमानेन तेनाथ प्रमुक्तः सुमहान्स्वनः ॥ हा मातस्तात तातेति विपन्नोऽस्मि निराग
सः॥१६॥ सोऽपि श्रुत्वाऽथ तं शब्दं ब्राह्मणो मानुषोद्भवम् ॥ सर्पस्य भयसंत्रस्तः सत्वरं स्वगृहं ययौ ॥१७॥ अथ सा जननी तस्य निष्क्रांता सलि
लाश्रयात्॥यावत्पश्यति तीरस्थं तावत्पुत्रं निपातितम्॥१८॥ततो मूर्च्छामनुप्राप्ता दृष्ट्वा पुत्रं तथाविधम्॥यष्टिप्रहारनिर्भिन्नं सर्वांगरुधिरोक्षितम्॥१९॥
अथ लब्ध्वा पुनः संज्ञां प्रलापानकरोद्बहून् ॥ करुणं शोकसंतप्ता बाष्पपर्याकुलेक्षणा ॥२०॥ हाहा पुत्र परित्यक्त्वा मां च क्वासि विनिर्गतः ॥ अना
वृत्तिकरं स्थानं किं स्नेहो नास्ति ते मयि॥२१॥केन त्वं निहतः पुत्र पापेन च दुरात्मना ॥ निष्पापोऽपि च पुत्र त्वं कस्य क्रुद्धोऽद्य वै यमः॥२२॥
सपुरस्य सराष्ट्रस्य सकुटुंबस्य दुर्मतेः ॥ येन त्वं निहतोऽद्यापि पंचम्यां पूजितो न च ॥२३॥ रजसा क्रीडयित्वाऽद्य समागत्य चिरादथ ॥ कामेनो
त्संगमागत्य ग्लानिं नैष्यति चांबरम् ॥२४॥ गद्गदानि मनोज्ञानि जनहास्यकराणि च ॥ त्वया विनाऽद्य वाक्यानि को वदिष्यति मे पुरः ॥२५॥
पितुरुत्संगमाश्रित्य कूर्चाकर्षणपूर्वकम् ॥ कः करिष्यति पुत्राऽद्य संतोषं भवता विना ॥ २६ ॥ निषिद्धोऽसि मया वत्स त्वमायातोऽनुपृष्ठतः ॥
मर्त्यलोकमिमं तात बहुदोषसमाकुलम् ॥ २७ ॥ एवं विलप्य नागी सा संक्रुद्धा शोककर्षिता ॥ तं मृतं सुतमादाय जगामानंतसंनिधौ ॥ २८ ॥
ततस्तदग्रतः क्षिप्त्वा तं मृतं निजबालकम् ॥ प्रलापानकरोद्दीना वियुक्ता कुररी यथा ॥ २९ ॥ नागराजोऽपि तं दृष्ट्वा स्वपुत्रं विनिपातितम् ॥ 
जगाम सोऽपि मूर्च्छां च पुत्रशोकेन पीडितः ॥ ३० ॥ ततः सिक्तो जलैः शीतैः संज्ञां लब्ध्वा स कृच्छ्रतः ॥ प्रलापान्कृपणांश्चक्रे प्राकृतः पुरुषो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथा ॥३१॥ एतस्मिन्नंतरे नागाः सर्वे तत्र समागताः॥ रुरुदुर्दुःखिताः संतो बाष्पपर्याकुलेक्षणाः॥३२॥ वासुकिः पद्मजः शंखस्तक्षकश्च महाविषः॥ शंखचूडः सचूडश्च पुंडरीकश्च दारुणः ॥ ३३ ॥ अञ्जनो वामनश्चैव कुमुदश्च तथा परः ॥ कम्बलाश्वतरौ नागौ नागः कर्कोटकस्तथा ॥ ३४ ॥ पुष्पदंतः सुदंतश्च मूषको मूषकादनः ॥ एलापत्रः सुपत्रश्च दीर्घास्यः पुष्पवाहनः ॥ ३५ ॥ एते चान्ये तथा नागास्तत्राऽऽयाताः सहस्रशः ॥ पुत्रशो काभिसंतप्तं ज्ञात्वा तं पन्नगाधिपम् ॥ ३६ ॥ ततः संबोध्य ते सर्वे तमीशं पवनाशनम् ॥ पूर्ववृत्तैः कथोद्भेदैर्दृष्टांतैर्विविधैरपि ॥ ३७ ॥ एवं संबोधि तस्तैस्तु चिरात्पन्नगसत्तमः ॥ अग्निदाह्यं ततश्चक्रे तस्य पुत्रस्य दुःखितः ॥ ३८ ॥ जलदानस्य काले च सर्पान्सर्वानुवाच सः ॥ सर्वान्नागान्प्रदा नार्थं तोयस्य समुपस्थितान् ॥ ३९ ॥ नाहं तोयं प्रदास्यामि स्वपुत्रस्य कथंचन ॥ भवद्भिः प्रेरितोऽप्येवं तथान्यैरपि बांधवैः ॥ ४० ॥ याव त्तस्य न दुष्टस्य मम पुत्रांतकारिणः ॥ सदारपुत्रभृत्यस्य विहितो न परिक्षयः ॥ ४१ ॥ एवमुक्त्वा ततः शेषः शोधयामास तं द्विजम् ॥ येन संसूदितः पुत्रो दंडकाष्ठेन पाप्मना ॥ ४२ ॥ ततः प्रोवाच तान्नागान्पार्श्वस्थान्पन्नगाधिपः ॥ हाटकेश्वरजे क्षेत्रे यांतु मे सुहृदुत्तमाः ॥ ४३ ॥ पुत्रघ्नं तं निहत्याऽऽशु सकुटुम्बपरिग्रहम् ॥ चमत्कारपुरं सर्वं भक्षणीयं ततः परम् ॥ ४४ ॥ तत्रैव वसतिः कार्या समस्तैः पन्नगोत्तमैः ॥ यथा भूयो वसेन्नैव तथा कार्यं च तत्पुरम् ॥ ४५ ॥ एवमुक्तास्ततस्तेन नागाः प्राधान्यतः श्रुताः ॥ गत्वाथ सत्वरं तत्र प्रथमं तं द्विजोत्तमम् ॥ ४६ ॥ देवरातसुतं सुप्तं भक्षयित्वा ततः परम् ॥ तत्कुटुंबं समग्रं च क्रोधेन महतान्विताः ॥ ४७ ॥ ततोऽन्यानपि संक्रुद्धा बालान्वृद्धान्कुमारकान् ॥ भक्षयामासुः सर्वे ते तिर्यग्योनिगता अपि ॥ ४८ ॥ एतस्मिन्नंतरे जातः पुरे तत्र सुदारुणः ॥ आक्रंदो ब्राह्मणेंद्राणां सर्पभक्षणसंभवः ॥ ४९ ॥ तत्र भूमौ तथाऽन्यच्च यत्किंचिदपि दृश्यते ॥ तत्सर्वं पन्नगैर्व्याप्तं रौद्रैः कृष्णवपुर्धरैः ॥ ५० ॥ एतस्मिन्नंतरे प्राप्ताः केचिन्मृत्युवशं गताः ॥ विषसं घूर्णिताः केचित्पतिता धरणीतले ॥ ५१ ॥ अन्ये गृहादिकं सर्वं परित्यज्य सुतादि च ॥ वित्रस्ताः परिधावंति वनमुद्दिश्य दूरतः ॥ ५२ ॥ अन्ये मंत्रविदो विप्राः प्रयतंते समंततः ॥ मंदं धावंति संत्रस्ता गृहीत्वौषधयः परे ॥ ५३ ॥ एवं तत्पुरमुद्दिश्य सर्वे ते पन्नगोत्तमाः ॥ प्रचरंति यथा कश्चिन्न तत्र ब्राह्मणो वसेत् ॥ ५४ ॥ अथ शून्यं पुरं कृत्वा सर्वे ते पन्नगोत्तमाः ॥ व्यचरन्स्वेच्छया तत्र तीर्थेष्वायतनेषु च ॥ ५५ ॥ न कश्चित्प न्नगः क्षेत्रात्त्यक्त्वा निर्याति बाह्यतः ॥ प्रविशेन्न परः कश्चित्तत्र क्षेत्रे च मानवः ॥ ५६ ॥ व्यवस्थैवं समुद्भूता सर्पाणां मानुषैः सह ॥ वधभक्षणजा न्योन्यं बाह्याभ्यंतरसंभवा ॥ ५७ ॥ एतस्मिन्नंतरे शेषो मुक्त्वा दुःखं सुतोद्भवम् ॥ प्रहृष्टः प्रददौ तोयं तस्य जातिभिरन्वितः ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



अथ ते ब्राह्मणाः केचित्सर्पेभ्यो भयविह्वलाः ॥ सशोका दिङ्मुखान्याशु ते सर्वे संगता मिथः ॥५९॥ ततो वनं समाजग्मुस्त्रिजातो यत्र संस्थितः ॥ हरलब्धवरो हृष्टः सुमहत्तपसि स्थितः ॥ ६० ॥ स दृष्ट्वा ताञ्जनान्सर्वांस्तथा दुःखपरिप्लुतान् ॥ पुत्रदारादिकं स्मृत्वा रुदतः करुणं बहु ॥ ६१ ॥ सोऽपि दुःखसमायुक्तो दृष्ट्वा तान्स्वपुरोद्भवान् ॥ ब्राह्मणेंद्रांस्ततः प्राह बाष्पव्याकुललोचनः ॥ ६२ ॥ शृण्वंतु ब्राह्मणाः सर्वे वचनं मम सांप्रतम् ॥ मया विनिर्गतेनैव तत्पुरात्तोषितो हरः ॥ ६३ ॥ तेन मह्यं वरो दत्तो वांछितो द्विजसत्तमाः ॥ गृहीतो न मयाद्यापि प्रार्थयिष्यामि सांप्रतम् ॥६४॥ यथा स्यात्संक्षयस्तेषां नागानां सुदुरात्मनाम् ॥ यैः कृतं नः पुरं कृत्स्नमुद्वसं पापकर्मभिः ॥ ६५ ॥ एवमुक्त्वाऽथ विप्रः स त्रिजातः परमेश्वरम् ॥ प्रार्थयामास मे देव तं वरं यच्छ सांप्रतम् ॥६६॥ ततः प्रोवाच देवेशः प्रार्थयस्व द्रुतं द्विज ॥ येनाभीष्टं प्रयच्छामि यद्यपि स्यात्सुदुर्लभम् ॥ ६७ ॥ ॥ ॥ त्रिजात उवाच ॥ ॥ नागैरस्मत्पुरं कृत्स्नं कृतं जनविवर्जितम् ॥ तत्तस्मात्ते क्षयं यांतु सर्वे वृषभवाहन ॥ ६८ ॥ येन तत्पूर्यते विप्रैर्भूयोऽपि सुरसत्तम ॥ ममापि जायते कीर्तिः स्वस्थानोद्धरणोद्भवा ॥ ६९ ॥ ॥ श्रीभगवानुवाच ॥ ॥ नायुक्तं विहितं विप्र पन्नगैस्तैर्महात्मभिः ॥ निर्दोषश्चापि पुत्रोऽत्र येषां विप्रेण सूदितः ॥ ७० ॥ विशेषेण द्विजश्रेष्ठ संप्राप्ते पंचमीदिने ॥ तत्राऽपि श्रावणे मासि पूज्यंते यत्र पन्नगाः ॥ ७१ ॥ तस्मात्तेऽहं प्रवक्ष्यामि सिद्धमंत्रमनुत्तमम् ॥ यस्योच्चारणमात्रेण सर्प्पाणां नश्यते विषम् ॥ ७२ ॥ तं मंत्रं तत्र गत्वा त्वं तद्विप्रैरखिलैर्वृतः ॥ श्राव यस्व महाभाग तारशब्देन सर्वशः ॥७३॥ तं श्रुत्वा ये न यास्यंति पातालं पन्नगाधमाः ॥ युष्मद्वाक्याद्भविष्यंति निर्विषास्ते न संशयः ॥ ७४ ॥ ॥ ॥ त्रिजात उवाच ॥ ॥ ब्रूहि तं मे महामंत्रं सर्वतीक्ष्णविनाशनम् ॥ येन गत्वा निजं स्थानं सर्पानुत्सादयाम्यहम् ॥७५॥ ॥ श्रीभगवानुवाच ॥ ॥ गरं विषमिति प्रोक्तं न तत्रास्ति च सांप्रतम् ॥ मत्प्रसादात्त्वया ह्येतदुच्चार्यं ब्राह्मणोत्तम ॥ ७६ ॥ न गरं न गरं चैतच्छ्रुत्वा ये पन्नगाधमाः॥ तत्र स्था स्यंति ते वध्या भविष्यंति यथासुखम् ॥ ७७ ॥ अद्यप्रभृति तत्स्थानं नगराख्यं धरातले ॥ भविष्यति सुविख्यातं तव कीर्तिविवर्धनम् ॥ ७८ ॥ तथान्योपि च यो विप्रो नागरः शुद्धवंशजः ॥ नगराख्येन मंत्रेण अभिमंत्र्य त्रिधा जलम् ॥ ७९ ॥ प्राणिनं कालसंदष्टमपि मृत्युवशंगतम् ॥ प्रकरि ष्यति जीवाढ्यं प्रक्षिप्य वदने स्वयम् ॥८०॥ अन्यत्रापि स्थितो मर्त्यो मंत्रमेतं त्रिरक्षरम् ॥ यः स्मरिष्यति संसुतो न हिंस्यः स्यादहेर्हि सः ॥८१॥ स्थावरं जंगमं वापि कृत्रिमं वा गरं हि तत् ॥ तदनेन च मंत्रेण संस्पृष्टं त्वमृतायितम् ॥८२॥ अजीर्णप्रभवा रोगा ये चान्ये जठरोद्भवाः ॥ मंत्रस्यास्य प्रभावेन सर्वे यांति द्रुतं क्षयम् ॥८३॥ एवमुक्त्वाऽथ तं विप्रं भगवान्वृषभध्वजः ॥ जगामादर्शनं पश्चाद्यथा दीपो वितैलकः ॥८४॥ त्रिजातोऽपि समं



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विप्रैर्हतशेषैस्तु तैर्द्रुतम् ॥ जगाम संप्रहृष्टात्मा चमत्कारपुरं प्रति ॥ ८५ ॥ एवं ते ब्राह्मणाः सर्वे त्रिजातेन समन्विताः ॥ न गरं न गरं प्रोच्चैरुच्चरंतः समाययुः ॥ ८६ ॥ हाटकेश्वरजं क्षेत्रं यत्तद्व्याप्तं समंततः ॥ रौद्रैराशीविषैः क्रूरैः शेषस्यादेशमाश्रितैः ॥८७॥ अथ ते पन्नगाः श्रुत्वा सिद्धमंत्रं शिवोद्भवम् ॥ निर्विषास्तेजसा हीनाः समंतात्ते प्रदुद्रुवुः ॥८८॥ वल्मीकान्केचिदासाद्य चित्ररंध्रांतरोद्भवान् ॥ अन्ये चापि प्रजग्मुश्च पातालं दंदशूककाः ॥ ८९ ॥ ये केचिद्भयसंत्रस्ता वार्द्धक्येन निपीडिताः ॥ बालत्वेन तथा चान्ये शक्नुवंति न सर्पितुम् ॥ ९० ॥ ते सर्वे ब्राह्मणेन्द्रैस्तैः कृतस्य प्रतिकारकैः ॥ निहताः पन्नगास्तत्र दंडकाष्ठैः सहस्रशः ॥ ९१ ॥ एवमुत्साद्य तान्सर्वान्ब्राह्मणास्ते गतव्यथाः ॥ तं त्रिजातं पुरस्कृत्य स्थानकृत्यानि चक्रिरे ॥ ९२ ॥ एवं तन्नगरं जातमस्मात्कालादनंतरम् ॥ देवदेवस्य भर्गस्य प्रसादेन द्विजोत्तमाः ॥ ९३ ॥ एतद्यः पठते नित्यमाख्यानं नगरोद्भवम् ॥ न तस्य सर्पजं क्वापि कथंचिज्जायते भयम् ॥ ९४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये नगरसंज्ञोत्पत्तिवर्णनंनाम चतुर्दशोत्तरशततमोऽध्यायः ॥ ११४ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ त्रिजातो ब्राह्मणस्तत्र किन्नामा कस्य सम्भवः ॥ किंगोत्रश्चैव किंसंज्ञः कीर्तयस्व महामते ॥ १ ॥ किं कुलीनैर्गुणाढ्यैर्वा तेजोविद्याविचक्षणैः ॥ त्रिजातोऽपि वरं सोऽपि स्वं स्थानं येन चोद्धृतम् ॥ २ ॥ ॥ सूत उवाच ॥ ॥ सांकृत्यस्य मुनेर्वंशे स संभूतो द्विजोत्तमः ॥ प्रभाव इति विख्यातो दत्तसंज्ञो निमेः सुतः ॥ ३ ॥ स एवं स्थानमुद्धृत्य चकारायतनं शुभम् ॥ त्रिजातेश्वरनाम्ना च देवदेवस्य शूलिनः ॥ ४ ॥ तमाराध्य दिवा नक्तं सम्यक्छ्रद्धासमन्वितः॥ सशरीरो गतः स्वर्गं ततः कालेन केनचित् ॥ ५ ॥ यस्तं पश्यति सद्भक्त्या स्नापयेद्विषुवे सदा ॥ न त्रिजातः कुले तस्य कथञ्चिदपि जायते ॥ ६ ॥ ॥ ऋषय ऊचुः ॥ ॥ यानि गोत्राणि नष्टानि यानि संस्थापितानि च ॥ नामतस्तानि नो ब्रूहि तत्पुरे सूतनन्दन ॥ ७ ॥ ॥ सूत उवाच ॥ ॥ तत्रोपमन्युगोत्रा ये क्रौंचगोत्रसमुद्भवाः ॥ कैशोर्यगोत्रसंभूतास्त्रैवणेया द्विजोत्तमाः ॥ ८ ॥ ते भूयोऽपि न संप्राप्ता यथा गोत्रचतुष्टयम् ॥ तत्पूर्वकं शुकादीनां यन्नष्टं नागजाद्भयात् ॥ ९ ॥ शेषान्वः संप्रवक्ष्यामि ब्राह्मणान्गोत्रसंभवान् ॥ कौशिकान्वयसंभूताः षड्विंशतिश्च ते स्मृताः ॥ १० ॥ कश्यपान्वयसंभूताः सप्ताशीतिर्द्विजोत्तमाः ॥ लक्ष्मणान्वयसंभूता एकविंशतिरागताः ॥ ११ ॥ तत्र नष्टाः पुनः प्राप्तास्तस्मिन्स्थाने सुदुःखिताः ॥ भारद्वाजास्त्रयः प्राप्ताः कौंडनीयाश्चतुर्दश ॥ १२ ॥ रैतिकानां तथा विंशत्पाराशर्याष्टकं तथा ॥ गर्गाणां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



च द्विविंशं च हारीतानां त्रिविंशतिः ॥ १३ ॥ और्वभार्गवगोत्राणां पञ्चविंशदुदाहृताः ॥ गौतमानां च षड्विंशमालूभायनविंशतिः ॥ १४ ॥ मांड
व्यानां त्रिविंशच्च बह्वृचानां त्रिविंशतिः ॥ सांकृत्यानां विशिष्टानां पृथक्त्वेन दशैव तु ॥ १५ ॥ तथैवांगिरसानां च पंच चैव प्रकीर्तिताः ॥ आत्रेया
दश संख्याताः शुक्लात्रेयास्तथैव च ॥ १६ ॥ वात्स्याः पञ्च समाख्याताः कौत्साश्च नव सप्त वै ॥ शांडिल्या भार्गवाः पञ्च मौद्गल्या विंशतिः स्मृताः
॥१७॥ बौधायनाः कौशलाश्च त्रिंशन्मात्राः प्रकीर्तिताः ॥ अथर्वाः पंचपंचाशन्मौनसाः सप्तसप्ततिः ॥१८॥ याज्ञुषास्त्रिंशतिः ख्याताश्च्यावनाः सप्त
विंशतिः ॥ आगस्त्याश्च त्रयस्त्रिंशज्जैमिनेया दशैव तु ॥ १९ ॥ नैवृताः पंचपंचाशत्पाठीनाः सप्ततिर्द्विजाः ॥ गोभिलाश्चापि काक्काश्च पंचपंच द्विजाः
स्मृताः ॥२०॥ औशनसाश्च दाशार्हास्त्रयस्त्रय उदाहृताः ॥ लोकाख्यानां तथा षष्टिरैणिशानां द्विसप्ततिः ॥२१॥ कापिष्ठलाः शार्कराख्या दत्ताख्याः
सप्तसप्ततिः ॥ शार्कवानां शतं प्रोक्तं दार्ज्यानां सप्तसप्ततिः॥२२॥ कात्यायन्यास्त्रयोऽधिष्ठा वैदिशाश्च त्रयः स्मृताः ॥ कृष्णात्रेयास्तथा पंच दत्तात्रेया
स्तथैव च ॥२३॥ नारायणाः शौनकेया जाबालाः शतसंख्यया ॥ गोपाला जामदग्न्याश्च शालिहोत्राश्च कर्णिकाः ॥२४॥ साग्रुरायणकाश्चैव मातृका
स्त्रैणवास्तथा ॥ सर्वे ते ब्राह्मणश्रेष्ठाः क्रमेण द्विजसत्तमाः ॥२५॥ एतेषामेव सर्वेषां संस्काराय द्विजोत्तमाः ॥ चत्वारिंशत्तथाष्टौ च पुरा प्रोक्ताः स्वयंभुवा
॥२६॥ ते सर्वे च पृथक्त्वेन निर्दिष्टाः पद्मयोनिना ॥ संध्यातर्पणकृत्यानि वैश्वदेवोद्भवानि च ॥ श्राद्धानि पक्षकृत्यानि पितृपिंडांस्तथैव च ॥२७॥
यज्ञोपवीतसंयुक्ताः प्रवराश्चैव कृत्स्नशः ॥ तथा मौंजीविशेषाश्च शिखाभेदाः प्रकीर्तिताः ॥ २८ ॥ त्रिजातेन समाराध्य देवदेवं पितामहम् ॥ तेषां
कृत्वा द्विजेंद्राणामात्मकीर्तिकृते तदा ॥ २९ ॥ ॥ ऋषय ऊचुः ॥ ॥ कथं सन्तोषितो ब्रह्मा त्रिजातेन महात्मना ॥ कर्मकांडं कथं भिन्नं कृतं तेन
महात्मना ॥ सर्वं विस्तरतो ब्रूहि परं कौतूहलं हि नः ॥ ३० ॥ ॥ सूत उवाच ॥ ॥ तस्यार्थे ब्राह्मणैः सर्वैस्तोषितः प्रपितामहः ॥ अनेनैवो
द्धृतं स्थानमस्माकं सकलं विभो ॥ ३१ ॥ तस्मादस्य विभो यच्छ वेदज्ञानमनुत्तमम् ॥ येन कर्मविशेषाश्च जायंतेऽत्र पुरोत्तमे ॥ ३२ ॥ एतस्य
च गुरुत्वं च प्रसादात्तव पद्मज ॥ यथा भवति देवेश तथा नीतिर्विधीयताम् ॥ ३३ ॥ ब्रह्मा ददौ ततस्तस्य मंत्रग्राममनुत्तमम् ॥ येन विज्ञायते
सर्वं वेदार्थो यज्ञकर्म च ॥ ३४ ॥ ततः प्रोवाच तान्सर्वान्प्रहृष्टेनांतरात्मना ॥ एष वेदार्थसंपन्नो भविष्यति महायशाः ॥ ३५ ॥ भर्तृयज्ञइति ॥१२६॥
ख्यातो यज्ञकर्मविचक्षणः ॥ यदेव वक्ति युष्माकं क्रियाकांडमशंकितैः ॥ ३६ ॥ तत्कार्यं स्वर्गमोक्षाय मम वाक्यात्प्रबोधितैः ॥ वेदार्थानेष सर्वेषां

१ आल्हतायनविंशतिः—इ० पा० । २ तान्विप्रान्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युष्माकं योजयिष्यति ॥ ३७ ॥ ये चान्येषु च देशेषु स्थानेषु च गताः क्वचित् ॥ एतत्स्थानं परित्यज्य सत्यमेतद्द्विजोत्तमाः ॥ ३८ ॥ वेदस्थाने च बुद्ध्यैष यत्कर्म प्रचरिष्यति ॥ नानृते वाथ पापे च वाणी चास्य चरिष्यति ॥ ३९ ॥ एवमुक्त्वा स देवेशो विरराम पितामहः ॥ भर्तृयज्ञोऽपि ताः सर्वाश्चक्रे यज्ञक्रियाः शुभाः ॥ ४० ॥ ब्राह्मणानां हितार्थाय श्रुत्यर्थं तस्य केवलम् ॥ दशप्रमाणाः संप्रोक्ताः सर्वे ते ब्राह्मणोत्तमाः ॥ ४१ ॥ चतुःषष्टिषु गोत्रेषु ह्येवं ते ब्राह्मणोत्तमाः ॥ तेन तत्र समानीतास्त्रिजातेन महात्मना ॥ ४२ ॥ तेषामेकत्र जातानि दशपंचशतानि च ॥ सामान्य भोगमोक्षाणि तानि तेन कृतानि च ॥ ४३ ॥ अष्टषष्टिविभागेन पूर्वमायव्ययोद्भवम् ॥ तत्रासीदथ गोत्रे च पुरुषाणां प्रसंख्यया ॥ ४४ ॥ ततः प्रभृति सर्वेषां सामान्येन व्यवस्थितम् ॥ त्रिजातस्य च वाक्येन येन दूरादपि द्रुतम् ॥ ४५ ॥ समागच्छंति विप्रेन्द्राः पुरवृद्धिः प्रजायते ॥ न कश्चिद्याति संत्यक्त्वा दौस्थ्यादन्यत्र च द्विजाः ॥ ४६ ॥ ततस्तेषां सुतैः पौत्रैर्नप्तृभिश्च सहस्रशः ॥ दौहित्रैर्भागिनेयैश्च भूयो भूरि प्रपूरितम् ॥ ॥ ४७ ॥ तत्पुरं वृद्धिमायाति दूर्वांकुरैरिव द्विजाः ॥ कांडात्कांडात्प्ररोहद्भिः संख्याहीनैरनेकधा ॥ ४८ ॥ ॥ सूत उवाच ॥ ॥ एतद्वः सर्वमाख्यातं गोत्रसंख्यानकं शुभम् ॥ ऋषीणां कीर्तनं चापि सर्वपातकनाशनम् ॥ ४९ ॥ यश्चैतत्पठते नित्यं शृणुयाद्वा प्रभक्तितः ॥ न स्यात्तस्य कुलच्छेदः कदाचिदपि भूतले ॥ ५० ॥ तथा विमुच्यते पापैराजन्ममरणोद्भवैः ॥ न पश्यति वियोगं च कदाचित्प्रियसंभवम् ॥ ५१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्येऽष्टषष्टितीर्थोपाख्याने भर्तृयज्ञकृतयज्ञविधानमुनिगोत्रवर्णनंनाम पंचदशोत्तरशततमोऽध्यायः ॥ ११५ ॥ ॥ छ ॥ ॥ ॥ सूत उवाच ॥ ॥ तथान्यापि च तत्रास्ति सुविख्याताम्बरेवती ॥ देवी कामप्रदा पुंसां बालकानां सुखप्रदा ॥ १ ॥ यां दृष्ट्वा पूजयित्वाऽथ चैत्राष्टम्यां विशेषतः ॥ शुक्लायां नाप्नुयान्मर्त्यः कुटुम्बव्यसनं क्वचित् ॥ २ ॥ ॥ ॥ ऋषय ऊचुः ॥ ॥ केन वा स्थापिता तत्र सा देवी चाम्बरेवती ॥ किंप्रभावा किंस्वरूपा सूतपुत्र वदस्व नः ॥ ३ ॥ ॥ सूत उवाच ॥ ॥ यदा शेषेण संदिष्टा नानानागा विषोल्बणाः ॥ पुरस्यास्य विनाशाय क्रोधसंरक्तलोचनाः ॥ तदा तस्य प्रिया सा च पुत्रशोकेन पीडिता ॥ ४ ॥ स्वयमेवाग्रतो गत्वा भक्षयामास तं द्विजम् ॥ कुटुम्बेन समायुक्तं येन पुत्रो निपातितः ॥ ५ ॥ अथ तस्य द्विजेन्द्रस्य बालवैधव्यसंयुता ॥ अनुजाऽऽसीत्तपोयुक्ता ब्रह्मचर्यकृतक्षणा ॥ ६ ॥ सा दृष्ट्वा भक्षितं सर्वं भद्रिकाख्या कुटुम्बकम् ॥ नागपत्न्या ततः प्राह जलमादाय पाणिना ॥ ७ ॥ यस्मात्त्वया कुटुम्बं मे नाशं नीतं द्विजिह्वके ॥ दर्शितं च महद्दुःखं मम बन्धुजनोद्भ

१ द्विजोत्तमाः—इ० पा० । २ भविष्यति—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वम् ॥ ८ ॥ तथा त्वमपि संप्राप्य मानुषत्वं सुगर्हितम् ॥ मानुषं पतिमासाद्य पुत्रपौत्रानवाप्य च ॥ ९ ॥ तेषां विनाशजं दुःखं मां नुषे त्वमवाप्स्यसि ॥ नागत्वे वर्तमानायाः शापं तेऽमुं ददाम्यहम् ॥ १० ॥ साऽपि श्रुत्वाऽथ तं शापं रेवती भद्दिकोद्भवम् ॥ क्रोधेन महताविष्टा ह्यदशत्तां द्रुतं ततः ॥ ११ ॥ अथ तस्यास्तनुं प्राप्य नागीदंष्ट्रा विषोल्बणा ॥ जगाम शतधा नाशं बिभिदे न त्वचं क्वचित् ॥ १२ ॥ ततः सा लज्जयाविष्टा स्वरक्तप्लावितानना ॥ विषण्णा निषसादाथ संनिविष्टा धरातले ॥ १३ ॥ एतस्मिन्नंतरे नागास्तथान्ये ये समागताः ॥ रेवतीं ते समालोक्य तथारूपां भयान्विताम् ॥ प्रोचुश्च किमिदं देवि तव वक्रे रुजास्पदम् ॥ १४ ॥ अथवा किं प्रभावोऽयं कस्यचिद्रक्तसंपदः ॥ १५ ॥ ॥ रेवत्युवाच ॥ ॥ येयं दुष्टतमा काचिद्दृश्यते दुष्टतापसी ॥ अस्या जातो विकारोऽयं ममास्ये नागसत्तमाः ॥ १६ ॥ तस्मादेनां महा दुष्टां भगिनीं तस्य दुर्मतेः ॥ येन मे निहतः पुत्रो द्विजपुत्रेण सांप्रतम् ॥ १७ ॥ भक्ष्यतां भक्ष्यतां शीघ्रं मम नाशाय संस्थिताम् ॥ सांप्रतं मन्मुखे तेन[2] रुधिरं पन्नगोत्तमाः ॥ १८ ॥ अथ ते पन्नगाः क्रुद्धा ददंशुस्तां तपस्विनीम् ॥ समं सर्वेषु गात्रेषु यथान्यां प्राकृतां स्त्रियम् ॥ १९ ॥ ततस्तेषा मपि तथा मुखाद्दंष्ट्रा विनिर्गताः ॥ रुधिरं च ततो जज्ञे शेषपत्न्या यथा तथा ॥ २० ॥ अथ तस्याः प्रभावं तं दृष्ट्वा ते नागसत्तमाः ॥ शेषा भय परित्रस्ताः प्रजग्मुश्च दिशो दश ॥ २१ ॥ भद्दिकापि जगामाशु स्वाश्रमं प्रति दुःखिता ॥ भयत्रस्तैः समंताच्च वीक्ष्यमाणा महोरगैः ॥ २२ ॥ ततः सर्वं समालोक्य ताप्यमानं महोरगैः॥ तत्स्थानं स्वजनैर्मुक्तं दुःखेन महतान्वितैः ॥ २३ ॥ जगामान्यत्र सा साध्वी सम्यग्व्रतपरायणा ॥ तीर्थ यात्रां प्रकुर्वाणा परिबभ्राम मेदिनीम् ॥ २४ ॥ एवमुद्वासिते स्थाने तस्मिन्सा रेवती तदा ॥ स्मृत्वा तं भद्दिकाशापं दुःखेन महताऽन्विता ॥ २५ ॥ कथं मे मानुषीगर्भे शापाद्वासो भविष्यति ॥ मानुष्येण च कांतेन प्रभविष्यति संगमः ॥ २६ ॥ नैतत्पुत्रोद्भवं दुःखं तथा मां बाधते हृदि ॥ यथेदं मानुषे गर्भे संवासो मानुषं प्रति ॥ २७ ॥ तथा दशनसंत्यक्ता कथं भर्तुः स्वमाननम् ॥ दर्शयिष्यामि भूयोऽपि क्षते क्षारोऽत्र मे स्थितः ॥ २८ ॥ तस्मात्परिचरिष्यामि क्षेत्रेऽत्रैव व्यवस्थिता ॥ किं करिष्यामि संप्राप्य गृहं पुत्रं विनाकृता ॥ २९ ॥ ततश्चाराधयामास सम्यक्छ्रद्धासमन्विता ॥ अंबिकां सा तदा देवीं स्थापयित्वा सुरेश्वरीम् ॥ ३० ॥ गन्धपुष्पोपहारेण नैवेद्यैर्विविधैरपि ॥ गीतनृत्यैस्तथा वाद्यैर्मनोहारिभिरेव च ॥ ३१ ॥ ततः कतिपयाहस्य तस्यास्तुष्टा सुरेश्वरी ॥ प्रोवाच वरदाऽस्मीति प्रार्थयस्व हृदि स्थितम् ॥ ३२ ॥ ॥ रेवत्युवाच ॥ ॥ अहं शप्ता पुरा देवि

१ महांतं मानुषं तथा—इ०, मानुषं महतं तथा—इ० च पा० । २ तेन—विकारेण—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्राह्मण्या कारणांतरे ॥ यत्त्वं मानुषमासाद्य स्वयं भूत्वा च मानुषी ॥ ३३ ॥ ततः संप्राप्स्यसि फलं तेषां नाशसमुद्भवम् ॥ महद्दुःखं स्वपुत्रोत्थं मम शापेन पीडिता ॥ ३४ ॥ तथा मम मुखाद्दंष्ट्राः संनीताश्च सुरेश्वरि ॥ तेषां च संभवस्तावत्कथं स्यात्त्वत्प्रभावतः ॥ ३५ ॥ भवंतु तनया नश्च तथा वंशविवर्धनाः ॥ एतन्मे वांछितं देवि नान्यत्संप्रार्थयाम्यहम् ॥ ३६ ॥ ॥ देव्युवाच ॥ ॥ नात्र त्रासस्त्वया कार्यः कथंचिदपि शोभने ॥ मनुष्यगर्भसंवासो भर्त्ता च भविता नरः ॥ ३७ ॥ तस्माच्छृणुष्व मे वाक्यं यत्त्वां वक्ष्यामि सांप्रतम् ॥ दुःखनाशकरं तुभ्यं सत्यं च वरवर्णिनि ॥ ॥ ३८ ॥ उत्पत्स्यति न संदेहो देवकार्यप्रसिद्धये ॥ तव भर्त्ता त्रिलोकेऽस्मिन्कृत्वा मानुषविग्रहम् ॥ ३९ ॥ तक्षकाख्यस्तथा नागो द्विजशापवशाच्छुभे ॥ सौराष्ट्रविषये राजा रैवताख्यो भविष्यति ॥४०॥ तस्य क्षेमकरी भार्या नामवंशसमुद्भवा ॥ भविष्यति न संदेहो विशिष्टा विप्रशापतः ॥ ॥४१॥तस्या गर्भं समासाद्य त्वं जन्म समवाप्स्यसि ॥ रामरूपस्य शेषस्य पुनर्भार्या भविष्यसि ॥४२॥ तस्मात्त्वं देवि मा शोकं कार्येऽस्मिन्कुरु शोभने ॥ तेन मानुषजे गर्भे संभूतिः संभविष्यति ॥ ४३ ॥ तत्र पश्यसि यन्नाशं स्वकुटुम्बसमुद्भवम् ॥ हिताय तदवस्थायास्तद्भविष्यत्यसंशयम् ॥ ४४ ॥ ततः परं युगं[1] पापं यतो भीरु भविष्यति ॥ तदूर्ध्वं मर्त्यधर्माणो म्लेच्छाः स्थास्यंति सर्वतः ॥ ४५ ॥ ततः स्वर्गनिवासार्थं भगवान्देवकीसुतः ॥ संहर्ता स्वकुलं सर्वं स्वयमेव न संशयः ॥ ४६ ॥ भविष्यंति पुनर्दंष्ट्रास्तव वक्त्रे मनोरमाः ॥ तस्मात्त्वं गच्छ पातालं स्वभर्त्ता यत्र तिष्ठति ॥ ४७ ॥ अन्यच्चापि यदिष्टं ते[2] किंचिच्चित्ते व्यवस्थितम् ॥ तत्कीर्तयस्व कल्याणि महांस्तोषो मम स्थितः ॥ ४८ ॥ ॥ रेवत्युवाच ॥ ॥ स्थाने स्थेयं सदाऽत्रैव मम नाम्ना सुरेश्वरि ॥ येन मे जायते कीर्तिस्त्रैलोक्ये सचराचरे ॥४९॥ तथाऽहं नागलोकाच्च चतुर्दश्यष्टमीषु च ॥ सदा त्वां पूजयिष्यामि विशेषान्नवमीदिने ॥५०॥ आश्विनस्य सिते पक्षे सर्वैर्नागैः समन्विता ॥ प्रपूजां ते विधास्यामि श्रद्धया परया युता ॥५१॥ तस्मिन्नहनि येऽन्येऽपि पूजां दास्यंति ते नराः ॥ मा पश्यंतु प्रसादात्ते नरास्ते वल्लभक्षयम् ॥ ५२ ॥ ॥ देव्युवाच ॥ ॥ एवं भद्रे करिष्यामि वासो मेऽत्र भविष्यति ॥ त्वन्नाम्ना पूजकानां च श्रेयो दास्यामि ते सदा ॥ महानवमिजे चाह्नि विशेषेण शुचिस्मिते ॥ ५३ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्ता तया साऽथ रेवती शेषवल्लभा ॥ जगाम स्वगृहं पश्चाद्धर्षेण महतान्विता ॥ ५४ ॥ ततःप्रभृति सा देवी तस्मिन्क्षेत्रे व्यवस्थिता ॥ तन्नाम्ना कामदा नृणां सर्वव्यसननाशिनी ॥ ५५ ॥ अंबा सा कीर्त्यते दुर्गा रेवती सोरगप्रिया ॥ ततः संकीर्त्यते लोके भूतले चांब

---

१ युगम्—कलियुगम्—इत्यर्थः । २ ते—तव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

रेवती ॥ ९६ ॥ यस्तां श्रद्धासमोपेतः शुचिर्भूत्वा प्रपूजयेत् ॥ नवम्यामाश्विने मासि शुक्लपक्षे समाहितः ॥ न स संवत्सरं यावद्व्यसनं स्वकुलोद्भवम् ॥ ९७ ॥ दृष्ट्वाग्रे छिद्रकं व्यालयुक्तं दोषैर्विमुच्यते ॥ ग्रहभूतपिशाचोत्थैस्तथान्यैरपि चापदैः ॥ ९८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्येऽबारेवतीतीर्थमाहात्म्यवर्णनंनाम षोडशोत्तरशततमोऽध्यायः ॥ ॥ ११६ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ भट्टिकाख्या पुरा प्रोक्ता या त्वया सूतनन्दन ॥ कस्मात्तस्याः शरीरान्तादंष्ट्रा नागसमुद्भवाः ॥ १ ॥ विशीर्णाः किं प्रभावश्च तपसः सूतनन्दन ॥ किं वा मंत्रप्रभावश्च एतन्नः कौतुकं परम् ॥ २ ॥ यन्मानुषशरीरेऽपि विशीर्णास्ता विषोल्बणाः ॥ नागानां तु विशेषेण तस्मात्सव प्रकीर्तय ॥ ३ ॥ ॥ सूत उवाच ॥ ॥ सा पुरा ब्राह्मणी बाल्ये वर्तमाना पितुर्गृहे ॥ वैधव्येन समायुक्ता जाता कर्मविपाकतः ॥ ४ ॥ ततो बाल्येऽपि शुश्राव शास्त्राणि विविधानि च ॥ देवयात्रां प्रचक्रेऽथ तीर्थे स्नाति समाहिता ॥ ५ ॥ तत्र केदारदेवं च गत्वा नित्यं समाहिता ॥ प्रातरुत्थाय गीतं च भक्त्या चक्रे तदग्रतः ॥ ६ ॥ ततस्तद्गीतलौल्येन पातालात्समुपेत्य च ॥ तक्षको वासुकिश्चैव द्विजरूपधरावुभौ ॥ ७ ॥ साऽपि तत्र महद्गीतं तानैः सर्वैरलंकृतम् ॥ मूर्च्छनाभिः समोपेतं सप्तस्वरविराजितम् ॥ ८ ॥ यतिभिश्च तथा ग्रामैर्वर्णग्रामैः पृथग्विधैः ॥ ततं च विततं चैव घनं सुषिरमेव च ॥ ९ ॥ तालकालक्रियामानवर्धमानादिकं च यत् ॥ अविदग्धापि सा तेषां गीतांगानां द्विजांगना ॥ केवलं कंठसंशुद्ध्या ताभ्यां तोषं समादधे ॥१०॥ ततस्तद्गीतलोभेन सर्वे तत्पुरवासिनः ॥ प्रातरुत्थाय केदारं समागच्छंति[2] कौतुकात् ॥११॥ कस्यचित्त्वथ कालस्य नागौ तौ स्वपुरं प्रति ॥ निन्युर्बलात्समुद्यम्य सर्वलोकस्य पश्यतः॥ १२ ॥ नागरूपं समाधाय रौद्रं जनविभीषणम् ॥ भोगाग्र्येण[3] च संवेष्टय पातालतलमभ्ययुः ॥ १३ ॥ अथ तां स्वगृहं नीत्वा प्रोचतुः कामपीडितौ ॥ भवावाभ्यां विशालाक्षि भार्या धर्मपरायणा ॥ एतदर्थं समानीता त्वं पाताले महीतलात् ॥ १४ ॥ ॥ भट्टिकोवाच ॥ ॥ यत्त्वं तक्षक मां शांतामनपेक्षां रतोत्सवे ॥ आनैषीरपहृत्याशु ब्राह्मणान्वयसंभवाम् ॥ १५ ॥ मानुषं रूपमास्थाय पुरा मां त्वं समाश्रितः ॥ कामोपहतचित्तात्मा तस्मान्मर्त्यो भविष्यसि ॥ १६ ॥ यदि मां त्वं दुराचार धर्षयिष्यसि वीर्यतः ॥ शतधा तव मूर्धाऽयं सद्य एव भविष्यति ॥ १७ ॥ तं श्रुत्वा सुमहाशापं तस्याः स भयविह्वलः ॥ ततः प्रसादयामास कृतां



१ आपदैः—आपद्भिः—इत्यर्थः। लिंगमशिष्यं लिंगस्य लोकाश्रयत्वात्। आर्षश्चायं प्रयोगोऽकारान्तः पुंलिंगः। २ सन्मागच्छंति—इ० पा०। ३ भोगाग्रेण—भव्यसर्पशरीरेण—इत्यर्थः। "अहेः शरीरं भोगः स्यात्" इत्यमरः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जलिपुटः स्थितः ॥ १८ ॥ मया त्वं कामसक्तेन समानीता सुमोहतः ॥ तस्मात्कुरु प्रसादं मे शापस्यांतो यथा भवेत् ॥ १९ ॥ ॥ सूत उवाच ॥ ॥ एवं प्रसादिता तेन तक्षकेण द्विजात्मजा ॥ ततः प्रोवाच तं नागं बाष्पव्याकुललोचना ॥ २० ॥ यदि मां मर्त्यलोके त्वं भूयो न यसि तक्षक ॥ तत्र शापस्य पर्यंतं करिष्यामि न संशयः ॥ २१ ॥ एतस्मिन्नंतरे ज्ञात्वा मानुषीं स्वगृहागताम् ॥ तक्षकेण समानीतां कामोपहतचेतसा ॥ २२ ॥ ततस्तस्य कलत्राणि महेर्ष्यासंश्रितानि च ॥ तस्या नाशार्थमाजग्मुः कोपरक्तेक्षणानि च ॥ २३ ॥ अथ तासां परिज्ञाय तक्षकः स विचेष्टितम् ॥ वाञ्छञ्छापस्य पर्यंतं तत्पार्श्वाद्व्रयसंयुतः ॥२४॥ वज्रां नामास्मरद्दिव्यां तस्या गात्रं ततस्तया ॥ योजयामास रक्षार्थं प्राप्ता चाथ भुजंगमी ॥ २५ ॥ अदशत्तां ततः क्रुद्धा ब्राह्मणस्य सुतां सतीम् ॥ सपत्नीं मन्यमानोच्चैः शीर्णदंष्ट्रा व्यजायत ॥ २६ ॥ अथ तामपि सा क्रुद्धा शशाप द्विजसंभवा ॥ दृष्ट्वा सापत्न्यजैर्भावैर्वर्तमानां सहेर्ष्यया ॥ २७ ॥ यस्मात्त्वं दोषहीनां मां सदोषामिव मन्यसे ॥ तस्माद्भव द्रुतं पापे मानुषी दुःखभागिनी ॥ २८ ॥ अथ तां संगृहीत्वा स तक्षको नागसत्तमः ॥ केदारायतने तस्मिन्नर्धरात्रे मुमोच ह ॥ २९ ॥ ततः प्रोवाच तां देवीं कृतांजलिपुटः स्थितः ॥ शापांतं कुरु मे साध्वि स्वगृहं येन याम्यहम् ॥ ३० ॥ ॥ भट्टिकोवाच ॥ ॥ सौराष्ट्रविषये राजा त्वं भविष्यसि पन्नग ॥ भूमौ रैवतकोनाम भोगानां भाजनं सदा ॥ ३१ ॥ ततश्चैव तनुं त्यक्त्वा क्षेत्रेष्वाश्रममध्यतः ॥ संप्राप्स्यसि निजं स्थानं तत्क्षेत्रस्य प्रभावतः ॥ ॥ ३२ ॥ ॥ तक्षक उवाच ॥ ॥ एषा मम प्रिया कांता त्वया शापेन योजिता ॥ या सा भवतु मे भार्या मानुषत्वेऽपि वर्तिते ॥ ३३ ॥ एतत्कुरु प्रसादं मे दीनस्य परियाचतः ॥ माऽस्या भवतु चान्येन पुरुषेण समागमः ॥ ३४ ॥ ॥ भट्टिकोवाच ॥ ॥ आनर्ताधिपतेरेषा भवित्री दुहिता शुभा ॥ ततः पाणिग्रहं प्राप्य भार्या तव भविष्यति॥३५॥ क्षेमंकरीति विख्याता रूपयौवनशालिनी ॥ त्वया सार्धं बहून्भोगान्भुक्त्वाऽथ पृथिवीतले॥ परलोके पुनस्त्वां वै चानुयास्यति शोभना ॥ ३६॥ ॥ सूत उवाच ॥ ॥ एवं च स तया प्रोक्तः क्षम्यतामिति सादरम् ॥ प्रणिपत्य जगामाऽथ निजं स्थानं प्रहर्षितः ॥३७॥ साऽपि प्राप्ते निशाशेषे केदारस्य पुरः स्थिता ॥ पुनश्चक्रे च तद्गीतं श्रुतिसौख्यकरं परम् ॥३८॥ अथ तस्य समायाताः केदारस्य दिदृक्षवः॥पुनः केदारभक्त्याढ्या ब्राह्मणाः शतशः परम् ॥३९॥ ते तां दृष्ट्वा समायातां भट्टिकां तां द्विजोद्भवाम् ॥ विस्मयेन समायुक्ताः पप्रच्छुस्तदनंतरम् ॥४०॥ कोऽसौ ब्राह्मणरूपेण नागः प्राप्तः सुशोभने ॥ तेन त्वं कुत्र नीतासि किमर्थं च वदस्व नः॥४१॥कस्मात्पुनः प्रमुक्ताऽसि सर्वं वद यथातथम्॥अत्र नः कौतुकं जातं सुमहत्तव कारणात् ॥४२॥ ॥ सूत उवाच ॥ ॥ ततः सा कथयामास सर्वं तक्षकसंभवम् ॥ वृत्तांतं नागसंभूतं शापानुग्रहजं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तथा ॥ ४३ ॥ एतस्मिन्नंतरे प्राप्तं सर्वं तस्याः कुटुम्बकम् ॥ रोरूयमाणं दुःखार्तं श्रुत्वा तां तत्र चागताम् ॥ ४४ ॥ अथ सा जननी तस्या बाष्प पर्याकुलेक्षणा ॥ सस्वजे तां तथा चान्याः सख्यः स्निग्धेन चेतसा ॥ ४५ ॥ ततो निन्युर्गृहं स्वं च शृण्वंतश्च मुहुर्मुहुः ॥ नागलोकोद्भवां वार्तां विस्मयाविष्टचेतसः ॥ ४६ ॥ अथ तत्र पुरे पौराः सर्वे प्रोचुः परस्परम् ॥ अयुक्तं कृतमेतेन ब्राह्मणेन दुरात्मना ॥ ४७ ॥ यदानीता सुतरुणी परहर्म्योषिता सुता ॥ अन्येषामपि विप्राणां संति नार्यो ह्यनेकशः ॥ ४८ ॥ तरुण्यो रूपवत्यश्च वैधव्येन समन्विताः ॥ तासामपि च सर्वासामेष न्यायो भविष्यति ॥ योनिसंकरजो नूनं तस्मान्निर्वास्यतामिति ॥ ४९ ॥ एकीभूय ततः सर्वे ब्राह्मणं तं द्विजोत्तमाः ॥ सामपूर्वमिदं वाक्यं प्रोचुः शास्त्रसमुद्भवम् ॥ ५० ॥ एषा तव सुता विप्र तरुणी रूपसंयुता ॥ सानुरागेण नागेण पाताले च समाहृता ॥ ५१ ॥ तद्वक्ष्यति प्रमुक्ताहं निर्दोषा तेन रागिणा ॥ न श्रद्धां याति लोकोऽयं शुद्धैषा समुदाहृता ॥ ५२ ॥ तस्माच्छुद्धिं[1] द्विजेंद्राणां प्रयच्छतु द्विजोत्तम ॥ येनान्येषामपि प्राज्ञ विनश्यंति न योषितः ॥ ५३ ॥ बाढमित्येव स प्रोक्त्वा ततस्तां विजने सुताम् ॥ पप्रच्छ यदि ते दोषः कश्चिदस्ति प्रकीर्तय ॥ ५४ ॥ नो चेत्प्रयच्छ संशुद्धिं[2] ब्राह्मणानां प्रतुष्टये ॥ ५५ ॥ ॥ भट्टिकोवाच ॥ ॥ युक्तमुक्तं त्वया तात तथान्यैरपि च द्विजैः ॥ युक्ता स्याद्योषितः शुद्धिर्द्वारातिक्रमणादपि ॥ ॥ ५६ ॥ किं पुनः परदेशं च गताया रागिणा सह ॥ तस्मादहं न संदेहः प्रातः स्नाता हुताशनम् ॥ ५७ ॥ प्रविश्य सर्वविप्राणां शुद्धिं दास्याम्यसंशयम् ॥ अहमन्नं च पानं च यच्चान्यदपि किंचन ॥ प्राशयिष्यामि संप्राप्य शुद्धिं चैव हुताशनात् ॥ ५८ ॥ एवमुक्तस्तया सोऽथ हर्षेण महतान्वितः ॥ प्रातरुत्थाय दारूणि पुरबाह्ये न्ययोजयत् ॥ ५९ ॥ भट्टिकाऽपि ततः स्नात्वा शुक्लांबरधरा शुचिः ॥ सर्वैः परिजनैः सार्धं तथा निजकुटुंबकैः ॥ ६० ॥ प्रसन्नवदना हृष्टा विष्णुध्यानपरायणा ॥ जगाम तत्र यत्रास्ते सुमहान्दारुपर्वतः ॥ ६१ ॥ ततो वह्निं समाधाय स्वयं तत्र द्विजोत्तमाः ॥ प्रदक्षिणात्रयं कृत्वा प्राह चैव कृतांजलिः ॥ ६२ ॥ यदि मेऽस्ति क्वचिद्दोषः कामजोऽल्पोऽपि गात्रके ॥ कृतो वाऽपि बलात्तेन तक्षकेण दुरात्मना ॥ ६३ ॥ अन्येनापि च केनापि भविष्यत्यथवा परः ॥ तस्मात्प्रदहतु क्षिप्रं समिद्धोऽयं हुताशनः ॥ ६४ ॥ एवमुक्त्वाऽथ सा साध्वी प्रविष्टा निजहर्म्यवत् ॥ सुसमिद्धो हुतो वह्निर्जातो जलमयः क्षणात् ॥ ६५ ॥ सा च पश्यति चात्मानं जलमध्यगतां शुभा ॥ पपाताऽथ महावृष्टिः कुसुमानां नभस्तलात् ॥ ६६ ॥ देवदूतो विमानस्थ इदं वाक्यमुवाच ह ॥ शुद्धासि त्वं महाभागे चारित्रै



१ शुद्धिम्—शुद्धताविषये प्रत्ययम्—इत्यर्थः । २ संशुद्धिम्—शुद्धताविषये दिव्यादिकरणप्रत्ययम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्निजगात्रजैः ॥ ६७ ॥ न त्वया सदृशी चान्या काचिन्नारी भविष्यति ॥ तिस्रः कोट्योर्धकोटी च यानि लोमानि मानुषे ॥ प्रभवंति महाभागे सर्वगात्रेषु सर्वदा ॥ ६८ ॥ तेषां मध्ये न ते साध्वि पापमेकमपि क्वचित् ॥ तस्माच्छीघ्रं गृहं गच्छ निजं बांधवसंयुता ॥ ६९ ॥ कुरु कृत्यानि पुण्यानि समाराधय केशवम् ॥ एतच्चैव चितेः स्थानं त्वदीयं जलपूरितम् ॥ ७० ॥ तव नाम्ना सुविख्यातं तीर्थं लोके भविष्यति ॥ येऽत्र स्नानं करिष्यंति शयने बोधने हरेः ॥ ७१ ॥ ते यास्यंति परां सिद्धिं दुष्प्राप्या याऽमरैरपि ॥ उक्त्वैवं विरता वाणी देवदूतसमुद्भवा ॥ ७२ ॥ भट्टिका तु ततो दृष्ट्वा प्रणम्य जनकं निजम् ॥ नाहं गृहं गमिष्यामि किं करिष्याम्यहं गृहे ॥ ७३ ॥ अत्रैवाराधयिष्यामि निजतीर्थे सदाऽच्युतम् ॥ तथा तपः करिष्यामि भिक्षान्नकृतभोजना ॥ ७४ ॥ तस्मात्तात गृहं गच्छ स्थिताऽहं चाऽत्र संश्रये ॥ ७५ ॥ ततः स जनकस्तस्यास्ते चाऽपि पुरवासिनः ॥ संप्रहृष्टा गृहं जग्मुः शंसंतस्तां पृथक्पृथक् ॥ ७६ ॥ तया त्रैविक्रमी तत्र प्रतिमा प्राग्विनिर्मिता ॥ पश्चान्माहेश्वरं लिंगं कृत्वा प्रासादमुत्तमम् ॥ ७७ ॥ ततः परं तपश्चक्रे भिक्षान्नकृतभोजना ॥ शंस्यमाना जनैः सर्वैश्चमत्कारपुरोद्भवैः ॥ ७८ ॥ ॥ सूत उवाच ॥ ॥ एतद्वः सर्वमाख्यातं यत्पृष्टोऽस्मि द्विजोत्तमाः ॥ यथा तस्या दृढं कायमभेद्यं संस्थितं सदा ॥ ७९ ॥ सर्पाणां च तथाऽन्येषां शस्त्रादीनामपि द्विजाः ॥ यश्चैतत्पठते नित्यं भट्टिकाख्यानमुत्तमम् ॥ नापवादो भवेत्तस्य कुकृतो द्विजसत्तमाः ॥ ८० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखंडे हाटकेश्वरक्षेत्रमाहात्म्ये भट्टिकातीर्थोत्पत्तिमाहात्म्यकथनंनाम सप्तदशोत्तरशततमोऽध्यायः ॥ ॥ ११७ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ यत्त्वया सूतज प्रोक्तं तक्षकः संभविष्यति ॥ सौराष्ट्रविषये राजा रैवताख्यो महाबलः ॥ १ ॥ तथा तस्य प्रिया भार्या नाम्ना क्षेमंकरीति या ॥ आनर्ताधिपतेर्हर्म्ये संभविष्यति भामिनी ॥ २ ॥ तांभ्यां सर्वं समाचक्ष्व वृत्तांतं सूतनंदन ॥ अत्र नः कौतुकं जातं विचित्रं जल्पतस्तव ॥ ३ ॥ केदारश्च श्रुतोऽस्माभिः सूतपुत्र हिमाचले ॥ स कथं तत्र संजातः सर्वं विस्तरतो वद ॥ ४ ॥ ॥ ॥ सूत उवाच ॥ ॥ अत्र वः कीर्तयिष्यामि सर्वं ब्राह्मणसत्तमाः ॥ यथा मया श्रुतं पूर्वं निजतातमुखाद्द्विजाः ॥ ६ ॥ पूर्वं तच्छापदोषेण तक्षको धरणीतले ॥ सौराष्ट्राधिपतेर्हर्म्ये रैवताख्यो बभूव ह ॥ ६ ॥ आनर्त्ताधिपतेश्चापि संजाता तनया गृहे ॥ तस्याश्चापि सुविख्यातं नाम जातं धरातले ॥ ७ ॥ क्षेमंकरीति विप्रेन्द्राः कर्मणा प्रकटीकृतम् ॥ आनर्ताधिपतिः पूर्वमासीद्राजा प्रभंजनः ॥ ८ ॥ तस्य वैरं समुत्पन्नं बहुभिः सह

१ ताभ्याम्—तयोः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

भूमिपैः ॥ ततो निर्वास्यते देशो नीयंते पशवो बलात् ॥ शत्रुभिर्जायते युद्धं दिवा नक्तं द्विजोत्तमाः॥९॥ ततः कतिपयाहस्य तस्य भार्या प्रियंवदा ॥
ऋतुस्नाता दधाराथ गर्भं पुण्यं निजोदरे॥१०॥यतः प्रभृति तस्याः स गर्भोऽभूदुदराश्रयः॥ ततः प्रभृति राष्ट्रस्य क्षेमं जातं तथा पुरे॥११॥एके संख्ये जिता
स्तेन शत्रवोऽपि सुदुर्जयाः ॥ निहताश्च तथैवान्ये मित्रभावं समाश्रिताः ॥ १२ ॥ ततो जज्ञे शुभा कन्या तस्याः पद्मायतेक्षणा ॥ अंधकारेऽपि यद्गात्र्यां
द्योतितं सूतिकागृहम् ॥१३॥ अथाऽसौ पार्थिवश्चक्रे सुतवत्सुमहोत्सवम् ॥ तस्यास्तोषसमायुक्तो गीतवाद्यादिनिस्वनैः ॥१४॥ दिने त्रयोदशे प्राप्ते नाम
तस्या यथोचितम्॥विहितं भूभुजा तेन विप्राणां पुरतो द्विजाः ॥१५॥ यस्मात्क्षेमं समुत्पन्नं गर्भवासेऽपि संस्थया ॥ अनया क्षेमंकरीनाम तस्मादेषा भवे
द्विजाः ॥१६॥ एवं सुविहिता ख्याता वृद्धिं याति दिनेदिने ॥ शुक्लपक्षे कला चेन्दोर्यथैव गगनांगणे॥१७॥ततस्तां यौवनोपेतां रैवताय महीपतिः ॥
ददौ सौराष्ट्रनाथाय काले वैवाहिके शुभे ॥ १८ ॥ अथ ताभ्यां सुता जाता रेवतीनाम विश्रुता ॥ भट्टिकाशापदोषेण शेषपत्नी यशस्विनी ॥१९॥
या तूढा रामरूपेण नागराजेन धीमता ॥ पुत्रपौत्रवती जाता सौभाग्यमदगर्विता ॥ २० ॥ न च ताभ्यां सुतो जातः कथंचिदपि वंशजः ॥
वयसोंऽतेऽपि विप्रेंद्रास्ततो दुःखं व्यजायत ॥ २१ ॥ अथ तौ मंत्रिवर्गस्य राज्यं सर्वमशेषतः ॥ अर्पयित्वा तु पुत्रार्थं तपोऽर्थमिह चागतौ ॥
॥ २२ ॥ ततः स्वमाश्रमं गत्वा स्थितौ तत्र समाहितौ ॥ देवीं कात्यायनीं स्थाप्य तदाराधनतत्परौ ॥ २३ ॥ यया विनिहतो रौद्रो महिषाख्यो
महासुरः ॥ कौमारव्रतधारिण्या तस्मिन्विन्ध्ये महाचले ॥ २४ ॥ ततस्ताभ्यां ददौ तुष्टा सा पुत्रं वंशवर्धनम् ॥ नाम्ना क्षेमजितं ख्यातं परपक्षक्षया
वहम् ॥ २५ ॥ ततः स्वं राज्यमासाद्य भूयोऽपि स महीपतिः ॥ स्वपुत्रं वर्धयामास हर्षेण महतान्वितः ॥ २६ ॥ यदा स यौवनोपेतः सञ्जातः
क्षेमजित्सुतः ॥ तं च राज्ये नियोज्याऽथ स्वस्थानं स पुनर्ययौ ॥ २७ ॥ हाटकेश्वरजं क्षेत्रं तदेतद्विजसत्तमाः ॥ भार्यया सहितस्त्यक्त्वा शेषमन्यं
परिच्छदम् ॥ २८ ॥ तत्र संस्थापयामास लिंगं देवस्य शूलिनः ॥ प्रासादं च मनोहारि ततश्चक्रे समाहितः ॥ २९ ॥ रैवतेश्वरमित्युक्तं सर्वपातक
नाशनम् ॥ दर्शनादेव सर्वेषां देहिनां द्विजसत्तमाः ॥ ३० ॥ या पूर्वं स्थापिता दुर्गा तस्मिन्क्षेत्रे महीभुजा ॥ तस्याः क्षेमंकरी चक्रे प्रासादं श्रद्ध
यान्विता ॥ ३१ ॥ सापि क्षेमंकरीनाम ततः प्रभृति कीर्त्यते ॥ कात्यायन्यपि या प्रोक्ता महिषासुरमर्दिनी ॥ ३२ ॥ यस्तां चैत्रसिते पक्षे संप ॥१३०॥
श्येदष्टमीदिने ॥ तस्याभीष्टा भवेत्सिद्धिः सर्वदैव द्विजोत्तमाः ॥ ३३ ॥ एतद्वः सर्वमाख्यातं रैवतेश्वरवर्णनम् ॥ क्षेमंकर्याः प्रभावं च सर्वपातकना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शनम् ॥ ३४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये क्षेमंकरीरैवतेश्वरोत्पत्तितीर्थ माहात्म्यवर्णनंनामाष्टादशोत्तरशततमोऽध्यायः ॥ ११८ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ यत्त्वया सूतज प्रोक्तं देवी कात्यायनी च सा ॥ महिषांतकरी जाता कथं सा मे प्रकीर्तय॥१॥ कीदृग्दानववर्यः स माहिषं रूपमाश्रितः ॥ कस्मात्स सूदितो देव्या तन्मे विस्तरतो वद ॥२॥ ॥ सूत उवाच ॥ ॥ अत्र वः कीर्तयिष्यामि देव्या माहात्म्यमुत्तमम् ॥ श्रुतमात्रेऽपि मर्त्यानां येन शत्रुक्षयो भवेत् ॥ ३ ॥ हिरण्याक्षसुतः पूर्वं महिषोनाम दानवः ॥ आसीन्महिषरूपेण येन भुक्तं जगत्त्रयम्॥४॥ ॥ ऋषय ऊचुः ॥ ॥ माहिषेण स्वरूपेण किं जातः सूतनंदन ॥ अथवा शापदोषेण सञ्जातः केनचिद्वद ॥५॥ ॥ सूत उवाच ॥ ॥ संजातो हि सुरूपाढ्यः शतपत्रनिभाननः ॥ दीर्घबाहुः पृथुग्रीवः सर्वलक्षणलक्षितः ॥ नाम्ना चित्रसमः प्रोक्त स्तेजोवीर्यसमन्वितः ॥ ६ ॥ स बाल्यात्प्रभृति प्रायो महिषाणां प्रबोधनम्[1] ॥ करोति संपरित्यज्य सर्वमश्वादिवाहनम् ॥ ७ ॥ कदाचिन्महिषारूढः स प्रतस्थे दनोः सुतः ॥ जाह्नवीतीरमासाद्य विनिघ्नञ्जलपक्षिणः ॥ ८ ॥ अथासीत्सुसमाधिस्थो दुर्वासा मुनिसत्तमः ॥ गंगातीरे विधायोच्चैः पद्मा सनमनुत्तमम् ॥ ९ ॥ विहंगासक्तचित्तेन शून्येन स मुनीश्वरः ॥ दृष्टो न महिषक्षुण्णः खुरैर्वेगवशाद्द्विजः ॥ १० ॥ ततः क्षतजदिग्धांगः स दृष्ट्वा दानवं पुरः ॥ अथ दृष्ट्वा प्रणामेन रहितं कोपमाविशत् ॥ ११ ॥ ततः प्रोवाच तं क्रुद्धस्तोयमादाय पाणिना ॥ यस्मात्पाप मम क्षुण्णं गात्रं महिषजैः खुरैः ॥ १२ ॥ समाधेश्च कृतो भंगस्तस्मात्त्वं महिषो भव ॥ यावज्जीवसि दुर्बुद्धे सम्यग्ज्ञानसमन्वितः ॥ १३ ॥ अथाऽसौ महिषो जातः कृष्णगात्रधरो महान् ॥ अतिदीर्घविषाणश्च अंजनाद्रिरिवापरः ॥ १४ ॥ ततः प्रसादयामास तं मुनिं विनयान्वितः ॥ शापांतं कुरु मे विप्र बाल्यभावादजानतः ॥ १५ ॥ अथ तं स मुनिः प्राह न मे स्याद्वचनं वृथा ॥ तस्माद्यावत्स्थिताः प्राणास्तावदित्थं भवि ष्यति ॥ १६ ॥ महिषस्य स्वरूपेण निन्दितस्य सुदुर्मते ॥ एवमुक्त्वा परित्यज्य गंगातीरं मुनीश्वरः ॥ जगामाऽन्यत्र सोऽप्याशु गत्वा शुक्रमुवाच ह ॥ १७ ॥ अहं दुर्वाससा शप्तः कस्मिंश्चित्कारणांतरे ॥ महिषत्वं समानीतस्तस्मात्त्वं मे गतिर्भव ॥ १८ ॥ यथा स्यात्पूर्वजं देहं तिर्यक्त्वं नश्यते यथा ॥ प्रसादात्तव विप्रेंद्र तथा नीतिर्विधीयताम् ॥ १९ ॥ ॥ शुक्र उवाच ॥ ॥ तस्य शापोऽन्यथा कर्तुं नैव शक्यः कथंचन ॥ केनापि संपरित्यज्य देवमेकं महेश्वरम् ॥ २० ॥ तस्मादाराधयाऽऽशु त्वं गत्वा लिंगमनुत्तमम् ॥ हाटकेश्वरजे क्षेत्रे सर्वसिद्धिप्रदायके ॥ २१ ॥ तत्र सञ्ज्ञा

१ प्रबोधनम्—वाहनार्थमुत्थापनम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



यते सिद्धिः शीघ्रं दानवसत्तम ॥ अपि पापयुगे प्राप्ते किं पुनः प्रथमे युगे ॥ २२ ॥ एवमुक्तः स शुक्रेण दानवः सत्वरं ययौ ॥ हाटकेश्वरजं क्षेत्रं तपस्तेपे ततः परम् ॥ २३ ॥ स्थापयित्वा महल्लिंगं भक्त्या देवस्य शूलिनः ॥ प्रासादं च ततश्चक्रे कैलासशिखरोपमम् ॥ २४ ॥ तस्यैवं वर्तमानस्य तपःस्थस्य महात्मनः ॥ जगाम सुमहान्कालः कृच्छ्रे तपसि वर्ततः ॥ २५ ॥ ततस्तुष्टो महादेवो गत्वा तद्दृष्टिगोचरम् ॥ प्रोवाच परितुष्टोऽस्मि वरं वरय दानव ॥ २६ ॥ ॥ महिष उवाच ॥ ॥ अहं दुर्वाससा शप्तो महिषत्वे नियोजितः ॥ तिर्यक्त्वं नाशमायातु तस्मान्मे त्वत्प्रसादतः ॥ २७ ॥ ॥ श्रीभगवानुवाच ॥ ॥ नान्यथा शक्यते कर्तुं तस्य वाक्यं कथंचन ॥ तस्मात्तव करिष्यामि सुखोपायं शृणुष्व तम् ॥ २८ ॥ ये केचिन्मानवा भोगा दैविका ये तथाऽऽसुराः ॥ ते सर्वे तव गात्रेऽत्र सम्प्रयास्यंति संश्रयम् ॥ २९ ॥ भोगार्थमिष्यते कायं यतो मर्त्यं सुरासुरैः ॥ समवाप्स्यसि तान्सर्वांस्तस्मात्तव कलेवरम् ॥ ३० ॥ ॥ महिष उवाच ॥ ॥ यद्येवं देवदेवेश भोगप्राप्तिर्भवेन्मम ॥ तस्मादवध्यमेवास्तु गात्रमेतन्मम प्रभो ॥ ३१ ॥ दशानां देवयोनीनां मनुष्याणां विशेषतः ॥ तिर्यञ्चानां च नागानां पक्षिणां सुरसत्तम ॥ ३२ ॥ ॥ श्रीभगवानुवाच ॥ ॥ नावध्योऽस्ति धरापृष्ठे कश्चिद्देही च दानव ॥ तस्मादेकं परित्यक्त्वा शेषान्प्रार्थय दैत्यप ॥ ३३ ॥ ततः स सुचिरं ध्यात्वा प्रोवाच वृषभध्वजम् ॥ स्त्रियमेकां परित्यज्य नान्येभ्यस्तु वधो मम ॥ ३४ ॥ तथात्र मामके तीर्थे यः कश्चिच्छ्रद्धया नरः ॥ करोति स्नानमव्यग्रस्त्वां पश्यति ततः परम् ॥ ३५ ॥ तस्य स्यात्त्वत्प्रसादेन संसिद्धिः सार्वकामिकी ॥ सर्वोपद्रवनाशश्च तेजोवृद्धिश्च शंकर ॥ ३६ ॥ ॥ श्रीभगवानुवाच ॥ ॥ मार्गशुक्लचतुर्दश्यां तीर्थे स्नात्वाऽत्र तावके ॥ विलोकयिष्यति प्रीत्या मम लिंगं ततः परम् ॥ ३७ ॥ भूतप्रेतपिशाचादिसंभवास्तस्य तत्क्षणात् ॥ दोषा नाशं प्रयास्यंति तथा रोगा ज्वरादयः ॥ ३८ ॥ एवमुक्त्वाऽथ देवेशस्ततश्चादर्शनं गतः ॥ महिषोऽपि निजं स्थानं प्रजगाम ततः परम् ॥ ३९ ॥ स गत्वा दानवान्सर्वान्समाहूय ततः परम् ॥ प्रोवाचामर्षसंयुक्तः सभामध्ये व्यवस्थितः ॥ ४० ॥ पिता मम पितृव्यश्च ये चान्ये मम पूर्वजाः ॥ दानवा निहता देवैर्वासुदेवपुरोगमैः ॥ ४१ ॥ तस्मात्तान्नाशयिष्यामि देवानपि महाहवे ॥ अहं त्रैलोक्यराज्यं हि ग्रहीष्यामि ततः परम् ॥ ४२ ॥ अथ ते दानवाः प्रोचुर्युक्तमेतदनुत्तमम् ॥ अस्मदीयमिदं राज्यं यच्छक्रः कुरुते दिवि ॥ ४३ ॥ तस्मादद्यैव गत्वाऽऽशु हत्वेन्द्रं रणमूर्धनि ॥ दिव्यान्भोगान्प्रभुञ्जानाः स्थास्यामः सुखिनो दिवि ॥ ४४ ॥ एवं ते दानवाः सर्वे कृत्वा मंत्रविनिश्चयम् ॥ मेरुशृंगं ततो जग्मुः



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सभृत्यबलवाहनाः ॥ ४५ ॥ अथ शक्रादयो देवा दृष्ट्वा तद्दानवोद्भवम् ॥ अकस्मादेव संप्राप्तं बलं शस्त्रास्त्रसंयुतम् ॥ युद्धार्थं स्वपुरद्वारि निर्ययुस्त दनंतरम् ॥ ४६ ॥ आदित्या वसवो रुद्रा नासत्यौ च भिषग्वरौ ॥ विश्वेदेवास्तथा साध्याः सिद्धा विद्याधराश्च ये ॥ ४७ ॥ ततः समभवद्युद्धं देवानां सह दानवैः ॥ मिथः प्रभत्स्र्यमानानां मृत्युं कृत्वा निवर्तनम् ॥ ४८ ॥ एवं समभवद्युद्धं यावद्वर्षत्रयं दिवि ॥ रक्तनद्योतिविपुलास्तत्रातीव प्रसुस्रुवुः ॥ ४९ ॥ अन्यस्मिन्दिवसे शक्रं दृष्ट्वैरावणसंस्थितम् ॥ तं शुक्लेनातपत्रेण ध्रियमाणेन मूर्धनि ॥ देवैः परिवृतं दिव्यशस्त्रपाणिभिरेव च ॥ ५० ॥ ततः कोपपरीतात्मा महिषो दानवाधिपः ॥ महावेगं समासाद्य तस्यैवाभिमुखो ययौ ॥ ५१ ॥ शृंगाभ्यां च सुतीक्ष्णाभ्यां ततश्चैरावणं गजम् ॥ विव्याध हृदये सोऽथ चक्रे रावं सुदारुणम् ॥ ५२ ॥ ततः पराङ्मुखो भूत्वा पलायनपरायणः ॥ अभिदुद्राव वेगेन पुरीं यत्रामरावती ॥ ५३ ॥ अंकुशोत्थप्रहारैश्च क्षतकुंभोऽपि[1] भूरिशः ॥ महामात्रनिरुद्धोऽपि न स तस्थौ कथंचन ॥ ५४ ॥ अथाब्रवीत्सहस्राक्षो महिषं वीक्ष्य गर्वितम् ॥ गर्जमानांस्तथा दैत्यान्क्ष्वेडनास्फोटनादिभिः ॥ ५५ ॥ मा दैत्य प्रविजानीहि यन्नष्टस्त्रिदशाधिपः ॥ एष नागो रणं हित्वा विवशो याति मे बलात् ॥ ५६ ॥ तस्मात्तिष्ठ मुहूर्तं त्वं यावदास्थाय सद्रथम् ॥ नाशयामि च ते दर्पं निहत्य निशितैः शरैः ॥ ५७ ॥ एतस्मिन्नन्तरे प्राप्तो मातलिः शक्रसारथिः ॥ सहस्रैर्दशभिर्युक्तं वाजिनां वातरंहसाम् ॥ ५८ ॥ तेऽथ मातलिना अश्वाः प्रतोदेन समाहताः ॥ उत्पतंत इवाकाशे सत्वरं संप्रदुद्रुवुः ॥ ५९ ॥ अथ चापं समारोप्य सत्वरं पाकशासनः ॥ शरैराशीविषाकारैश्छादयामास दानवम् ॥ ६० ॥ ततः स वेगमास्थाय भूयोऽपि क्रोधमूर्छितः ॥ अभिदुद्राव वेगेन स यत्र त्रिदशाधिपः ॥ ६१ ॥ ततस्तान्सुहयांस्तस्य शृंगाभ्यां वेगमाश्रितः ॥ दारयामास संक्रुद्ध आविध्याविध्य चासकृत् ॥ ६२ ॥ ततस्ते वाजिनस्त्रस्ताः संजग्मुः क्षतवक्षसः ॥ रक्तप्लावितसर्वांगा मार्गमैरावणस्य च ॥ ६३ ॥ ततः शक्ररथं दृष्ट्वा विमुखं सुरसत्तमाः ॥ सर्वे प्रदुद्रुवुर्भीतास्तस्य मार्गमुपाश्रिताः ॥ ६४ ॥ ततस्तु दानवाः सर्वे भग्नान्दृष्ट्वा रणे सुरान् ॥ शस्त्रवृष्टिं प्रमुंचंतो गर्जमाना यथा घनाः ॥ ६५ ॥ एतस्मिन्नंतरे प्राप्ता रजनी तमसावृता ॥ न किंचित्तत्र संयाति कस्यचिद्दृष्टिगोचरे ॥ ६६ ॥ ततस्तु दानवाः सर्वे युद्धान्निर्वृत्य सर्वतः ॥ मेरुशृंगं समाश्रित्य रम्यं वासं प्रचक्रमुः ॥ ६७ ॥ विजयेन समायुक्तास्तुष्टिं च परमां गताः ॥ कथाश्चक्रुश्च युद्धोत्था युद्धं तस्य यथाऽभवत् ॥ ६८ ॥ देवाश्चापि हतोत्साहाः प्रहारैः क्षतविक्षताः ॥ मंत्रं चक्रुर्मिथो भूत्वा बृहस्पतिपुरःसराः ॥ ६९ ॥ सांप्रतं दानवैः सैन्यमस्माकं

१ क्षतकुंभः—प्रविद्धगण्डस्थलः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



विमुखं कृतम् ॥ विध्वस्तं सुनिरुत्साहमक्षमं युद्धकर्मणि ॥ ७० ॥ तस्मात्त्यक्त्वा प्रवेक्ष्यामः पुरीं चैवामरावतीम् ॥ ब्रह्मणः सदनं यत्र न स्याद्दानवजं भयम् ॥ ७१ ॥ एवं ते निश्चयं कृत्वा ब्रह्मलोकं ततो गताः ॥ शून्यां शक्रपुरीं कृत्वा सर्वे देवाः सवासवाः ॥ ७२ ॥ ततः प्रातः समुत्थाय दानवास्ते प्रहर्षिताः ॥ शून्यां शक्रपुरीं दृष्ट्वा विविशुस्तदनंतरम् ॥ ७३ ॥ अथ शाक्रे पदे दैत्यं महिषं संनिधाय च ॥ प्रणेमुस्तुष्टिसंयुक्ताश्चक्रुश्चैव महोत्सवम् ॥ ७४ ॥ जगृहुर्यज्ञभागांश्च सर्वेषां त्रिदिवौकसाम् ॥ देवस्थानेषु सर्वेषु देवताऽभिमताश्च ये ॥ ७५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये देवसेनापराजयवर्णनंनामैकोनविंशत्युत्तरशततमोऽध्यायः ॥ ११९ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एवं शक्रादयो देवा जितास्ते तु रणाजिरे ॥ महिषेण ततो राज्यं त्रैलोक्येऽपि चकार सः ॥ १ ॥ यत्किञ्चित्त्रिषु लोकेषु सारभूतं प्रपश्यति ॥ गजवाजिरथाश्वादि सर्वं गृह्णाति सोऽसुरः ॥ २ ॥ एवं प्रवर्तमानस्य तस्य देवाः सवासवाः ॥ वधार्थं मिलिताश्चक्रुः कथा दुःखसमन्विताः ॥ ३ ॥ एतस्मिन्नंतरे प्राप्तो नारदो मुनिसत्तमः ॥ दृष्ट्वा तं माहिषं सर्वं व्यवहारं महोत्कटम् ॥ ४ ॥ ततश्च कथयामास सर्वं तेषां सविस्तरम् ॥ तस्य संचेष्टितं भूरि लोकत्रयप्रपीडनम् ॥ ५ ॥ अथ तेषां महाकोपो भूय एवाभ्यवर्धत ॥ नारदस्य वचः श्रुत्वा तादृग्लोककथोद्भवम् ॥ ॥ ६ ॥ तेषां कोपोद्भवो घर्मो वक्त्रद्वारेण निर्ययौ ॥ येन दिङ्मंडलं सर्वं तत्क्षणात्कलुषीकृतम् ॥ ७ ॥ एतस्मिन्नंतरे तत्र कार्तिकेयः समभ्ययात् ॥ पप्रच्छ च किमेतद्धि देवानां कोपकारणम् ॥ येन कालुष्यतां प्राप्तं दिक्चक्रं सकलं मुने ॥ ८ ॥ ॥ नारद उवाच ॥ ॥ एतेषां सांप्रतं स्कन्द मया वार्ता निवेदिता ॥ त्रैलोक्यं दानवैः सर्वैर्यथा नीतं मदोत्कटैः ॥ ९ ॥ स्त्रीरत्नमश्वरत्नं वा न किंचित्कस्यचिद्गृहे ॥ ते दृष्ट्वा मोक्षयंति स्म दुर्निवार्या मदोत्कटाः ॥ १० ॥ तच्छ्रुत्वा कार्तिकेयस्य विशेषात्संप्रजायत ॥ वक्त्रद्वा[१]रेण देवानां यथा कोपः समागतः ॥ ११ ॥ एतस्मिन्नंतरे जाता तत्कोपांते कुमारिका ॥ सर्वलक्षणसंपन्ना दिव्यतेजोऽन्विता शुभा ॥ १२ ॥ कार्तिकेयस्य कोपेन कोपे मिश्रे दिवौकसाम् ॥ यस्माज्जातात्र सा कन्या तस्मात्कात्यायनी स्मृता ॥ १३ ॥ ततस्तस्या ददौ वज्रमायुधं त्रिदशाधिपः ॥ शक्तिं स्कन्दः सुतीक्ष्णाग्रां चापं देवो जनार्दनः ॥ १४ ॥ त्रिशूलं च महादेवः पाशं च वरुणः स्वयम् ॥ आदित्यश्च सितान्बाणांश्चंद्रमाश्चर्म चोत्तमम् ॥ १५ ॥ निस्त्रिंशं निर्ऋतिस्तुष्ट उल्मुकं च हुताशनः ॥ वायुश्च च्छुरिकां तीक्ष्णां धनदः परिघं तथा ॥ १६ ॥ दण्डं प्रेताधिपो रौद्रं वधाय सुरविद्विषाम् ॥ द्वादशैवं समालोक्य साऽऽयुधानि द्विजोत्तमाः ॥ १७ ॥

१ वक्त्रमार्गेण—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कात्यायनी ततश्चक्रे भुजद्वादशकं तदा ॥ जग्राह च द्रुतं तानि सुशस्त्राणि दिवौकसाम् ॥ १८ ॥ ततः प्रोवाच तान्सर्वान्संप्रहृष्टतनूरुहा ॥ यदर्थं विबुधश्रेष्ठाः सृष्टा तद्ब्रूत मा चिरम् ॥ १९ ॥ सर्वं कार्यं करिष्यामि युष्माकं नात्र संशयः ॥ ॥ देवा ऊचुः ॥ ॥ महिषो दानवो रौद्रः समुत्पन्नोऽत्र सांप्रतम् ॥ २० ॥ अवध्यः सर्वभूतानां मानुषाणां विशेषतः ॥ मुक्त्वैकां योषितं तेन त्वमस्माभिर्विनिर्मिता ॥ २१ ॥ तस्मात्त्वं सांप्रतं गच्छ विंध्याख्यं पर्वतोत्तमम् ॥ तपस्तत्र कुरुष्वोग्रं तेजो येनाभिवर्धते ॥ २२ ॥ ततस्तु तेजःसंयुक्तां त्वां ज्ञात्वा वयमेव हि ॥ अग्रे धृत्वा करिष्यामो युद्धं तेन दुरात्मना ॥ २३ ॥ ततस्त्वच्छस्त्रनिर्दग्धः पंचत्वं स प्रयास्यति ॥ वयं च त्रिदशैश्वर्यं लभिष्यामो हतद्विषः ॥ २४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये कात्यायन्युत्पत्तिवर्णनंनाम विंशत्युत्तरशततमोऽध्यायः॥ ॥१२०॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ देवानां तद्वचः श्रुत्वा ततः सा परमेश्वरी ॥ प्रोवाच वाहनं किंचिद्देवा यच्छंतु मे द्रुतम् ॥१॥ ततः सिंहं ददौ गौरी यानार्थं विकृताननम् ॥ तमारुह्य प्रतस्थे सा ततो विंध्यं नगं प्रति ॥ २ ॥ तस्यैकं शृंगमास्थाय रम्यं श्रेष्ठद्रुमान्वितम् ॥ फलपुष्पसमाकीर्णं [1]लतामंडपमंडितम् ॥ ३ ॥ ततस्तपोऽकरोत्साध्वी तीव्रव्रतपरायणा ॥ संयम्येन्द्रियवर्गं स्वं ध्यायमाना महेश्वरम् ॥ ४ ॥ यथायथा तपोवृद्धिस्तस्याः सञ्जायते द्विजाः ॥ तथा रूपं च कांतिश्च शरीरे प्रतिवर्धते ॥ ५ ॥ एतस्मिन्नंतरे प्राप्तास्तत्र दैत्येशकिंकराः ॥ ते तां दृष्ट्वा व्रतोपेतामत्यद्भुतवपुर्धराम् ॥ गत्वा प्रोचुः स्वनाथस्य महिषस्य दुरात्मनः ॥ ६ ॥ ॥ चारा ऊचुः ॥ ॥ भ्रममाणैर्धरापृष्ठे दृष्टाऽपूर्वा कुमारिका ॥ विन्ध्याचलेऽद्य चास्माभिर्भुजैर्द्वादशभिर्युता ॥ नानाशस्त्रधरैर्दीप्तैश्चर्मच्छादितगात्रका ॥७॥ न देवी न च गन्धर्वी नासुरी नागकन्यका ॥ तादृग्रूपा पुराऽस्माभिः काचिद्दृष्टा नितम्बिनी ॥ ८ ॥ न विद्मो यन्निमित्तं सा तपश्चक्रे यशस्विनी ॥ स्वर्गकामाऽर्थकामा वा पतिकामाथ वा विभो ॥ ९ ॥ ॥ सूत उवाच ॥ ॥ तेषां तद्वचनं श्रुत्वा महिषो दानवाधिपः ॥ कामदेववशं प्राप्तः श्रवणादपि तत्क्षणात् ॥ १० ॥ ततस्तानग्रतः कृत्वा सैन्येन महतान्वितः ॥ जगाम कौतुकाविष्टो यत्रास्ते सा तु कन्यका ॥ ११ ॥ यथा मृत्युकृते मन्दः शृगालः सिंहवल्लभाम् ॥ वने सुप्तां सुविश्वस्तां सर्वथाप्यकुतोभयाम् ॥ १२ ॥ तस्याः संदर्शनादेव ततः कामशरैर्हतः ॥ स दानवप्रधानश्च तत्क्षणादेव सद्द्विजाः ॥ १३ ॥ अथ प्राह प्रियं वाक्यमेकाकी तत्पुरःस्थितः ॥ धृत्वा दूरतरे सैन्यं तस्या रूपेण मोहितः ॥ १४ ॥ विरुद्धं यौवनस्यैतद्व्रतं ते चारुहासिनि ॥ तस्मादेतत्परित्यक्त्वा त्रैलोक्यस्वा

१ तालमंडपमंडितम्—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

मिनी भव ॥ १५ ॥ अहं हि महिषोनाम दानवेन्द्रो यदि श्रुतः ॥ मया येन सहस्राक्षो द्वन्द्वयुद्धे विनिर्जितः ॥ १६ ॥ त्रैलोक्यं सकलं यद्यं सांप्रतं च वशे स्थितम् ॥ तस्मात्त्वं भव सुश्रोणि भार्या मम सुवल्लभा ॥१७॥ सहस्रं मम भार्याणामन्यदस्ति सुशोभनम्॥तत्सर्वं तेऽद्य भृत्यत्वं सांप्रतं प्रकरिष्यति॥१८॥ अहं चापि तवात्यंतं दासभावं समाश्रितः॥वर्तयिष्यामि सुश्रोणि प्रदत्त्वाऽशेषसंपदः॥१९॥॥ सूत उवाच ॥॥ तस्य तद्वचनं श्रुत्वा ततः सापरमेश्वरी ॥ प्रोवाच भर्त्सयमाना तं कोपसंरक्तलोचना॥२०॥धिग्धिक्पापसमाचार कुमारव्रतधारिणीम् ॥ कामोपहतचित्तात्मा किं मामित्थं प्रभाषसे ॥२१॥ अहं तव वधार्थाय निर्मिता विबुधोत्तमैः ॥ तस्मात्त्वां नाशयिष्यामि स्मरेष्टं यद्धृदि स्थितम् ॥२२॥ ॥ महिष उवाच ॥ ॥ यद्येवं तद्वरारोहे युक्ता स्याच्च कुमारिका ॥ प्रार्थनीया भवेदत्र सर्वेषां प्राणिनां यतः ॥२३॥ स्वर्गार्थं क्रियते धर्मस्तपश्च वरवर्णिनि ॥ येन भोगाः प्रभुञ्जंति ये दिव्या ये च मानुषाः ॥ २४ ॥ तस्मादेहि ममात्मानं गांधर्वेण सुशोभने ॥ विवाहेन यतोऽन्येषां स प्रधानः प्रकीर्तितः ॥२५॥ एवं प्रवदतस्तस्य सा देवी क्रोधमूर्छिता ॥ तद्वक्त्रांतं समुद्दिश्य शरं चिक्षेप सक्षणात् ॥२६॥ विवेश वदनं तस्य वल्मीकं पन्नगो यथा ॥ अथ तैर्मार्गणैर्विद्धः स वक्त्रांतान्नदंस्ततः ॥२७॥ सुस्राव रुधिरं भूरि गैरिकं पर्वतो यथा ॥ ततः कोपपरीतात्मा निवृत्त्याथ शनैःशनैः ॥२८॥ स्वसैन्यं त्वरितो भेजे कामेन च वशीकृतः॥प्रोवाच सैनिकान्सर्वान्दुष्टा स्त्रीयं प्रगृह्यताम् ॥ यथा न त्यजति प्राणान्प्रहारैर्जर्जरीकृता॥२९॥एषा मम न सन्देहः प्रिया भार्या भविष्यति॥ यदि नो शस्त्रपातेन पंचत्वमुपयास्यति ॥ ३० ॥ एवमुक्तास्तदा तेन दानवा युद्धदुर्मदाः ॥ दुद्रुवुः सम्मुखास्तस्या मुञ्चन्तो निशितान्छरान्॥३१॥ एतस्मिन्नंतरे देवी सा दृष्ट्वा तानुपस्थितान् ॥ युद्धाय कृतसंकल्पांस्तर्जतश्च मुहुर्मुहुः ॥ ३२ ॥ ततस्तु लीलया देवी मुक्त्वा तीक्ष्णान्महाशरान् ॥ तान्सर्वांस्ताडयामास सर्वमर्मसु तत्क्षणात् ॥ ३३ ॥ अथ तीक्ष्णैः शरैर्दैत्या निहता दानवास्तथा ॥ एके पंचत्वमापन्ना गताश्चान्य इतस्ततः॥३४॥ ततः सैन्यं समालोक्य तद्भग्नं च तया रणे ॥ कोपाविष्टस्ततो दैत्यः स्वयं तां समुपाद्रवत् ॥ ३५ ॥ यच्छन्छृंगप्रहारांश्च तस्याः शतसहस्रशः ॥ गर्जितं विदधच्चोग्रं शारदाभ्रसमं मुहुः ॥ ३६ ॥ एतस्मिन्नंतरे देवी साट्टहासकृतस्वना ॥ त्रैलोक्यविवरं सर्वं यच्छब्देन प्रपूरितम् ॥ ३७ ॥ एवं तस्या हसंत्याश्च वक्त्रांतादथ निर्ययुः ॥ पुलिंदाः शबरा म्लेच्छास्तथान्येऽरण्यवासिनः ॥ ३८ ॥ शकाश्च यवनाश्चैव शतशस्तु वपुर्धराः ॥ वर्मस्थगितगात्राश्च यमदूता इवापरे ॥ ३९ ॥ ते प्रोचुर्देवि नो ब्रूहि येन सृष्टा वयं क्षितौ ॥ कार्येण क्रियते कृत्स्नं येन शीघ्रं वरानने ॥ ४० ॥



१ गतान्ये दिक्षु संहताः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ देव्युवाच ॥ ॥ एतानस्य सुदुष्टस्य सैनिकान्बलगर्वितान् ॥ सूदयध्वं द्रुतं वाक्यादस्मदीयाद्यथेच्छया ॥ ४१ ॥ अथ ते तद्वचः श्रुत्वा वल्गंतोऽसिधनुर्द्धराः ॥ दैतेयबलमुद्दिश्य दुद्रुवुर्वेगमाश्रिताः ॥ ४२ ॥ ततस्तेषां महद्युद्धं मिथो जज्ञे सुदारुणम् ॥ नात्मीयं न परं तत्र केनचिज्ज्ञायते क्वचित् ॥ ४३ ॥ अथ ते दानवाः सर्वे योधैर्देवीसमुद्भवैः ॥ भग्ना व्यापादिताश्चान्ये प्रहारैर्जर्जरीकृताः ॥ ४४ ॥ ततो भग्नं बलं दृष्ट्वा महिषः क्रोधमूर्छितः ॥ तामुवाच क्रुधा देवीं वचनैः परुषाक्षरैः ॥ ४५ ॥ आः पापे स्त्रीति मत्वाद्य न हतासि मया युधि ॥ तस्मात्पश्य प्रहारं मे तत्त्वं बुध्यसि नान्यथा ॥ ४६ ॥ एवमुक्त्वा विशेषेण प्रहारान्स विचिक्षिपे ॥ विषाणाभ्यां महावेगो भर्त्सयानो मुहुर्मुहुः ॥ ४७ ॥ ततोऽभ्याशगतं दृष्ट्वा सा देवी दानवं च तम् ॥ आरुरोहाथ वेगेन पृष्ठिदेशेन कोपतः ॥ ४८ ॥ ततश्चुक्रोश दैत्योऽसौ व्योममार्गं समाश्रितः ॥ पृष्ठ्यास्तलेन निर्भिन्नो रुधिरौघपरिप्लुतः ॥ ४९ ॥ एतस्मिन्नंतरे सिंहः स तस्या ज्योतिसंभवः ॥ जग्राह पश्चिमे भागे दंष्ट्राग्रैर्निशितैः क्रुधा ॥ ५० ॥ ततो निश्चलतां प्राप्तः पादाक्रांतश्च दानवः॥ अकरोद्भैरवान्नादान्न शक्तश्चलितुं पदम् ॥ ५१ ॥ एतस्मिन्नंतरे प्राप्ताः सर्वे देवाः सवासवाः ॥ व्योमस्थास्तां तदा प्रोचुर्देवीं हर्षसमन्विताः ॥ ५२ ॥ एतस्य शिरसश्छेदं शीघ्रं कुरु सुरेश्वरि ॥ खड्गेनानेन तीक्ष्णेन यावन्नो याति चान्यतः ॥ ५३ ॥ सा श्रुत्वा वचनं तेषां देवी कोपसमन्विता ॥ खड्गं व्यापारयामास कंठे तस्यातिपीवरे ॥ ५४ ॥ स तेन खड्गघातेन कंठः पीनोऽपि निष्ठुरः॥ द्विधा जज्ञेऽथ दैत्यस्य दधत्तुष्टिं दिवौकसाम् ॥ ५५ ॥ द्वादशार्कप्रतीकाशो वक्रांतश्चर्मखड्गधृक् ॥ भर्त्सयंस्तां महादेवीं खड्गोद्यतकरां तदा ॥ खड्गं व्यापारयन्गात्रे तस्या बालार्कसन्निभम् ॥ ५६ ॥ ततः केशेषु चाधाय यावत्तस्यापि चिक्षिपे ॥ प्रहारं गां[2]त्रनाशाय तावदूचे स दानवः ॥ ५७ ॥ ॥ दानव उवाच ॥ ॥ जय देवि जयाचिंत्ये जय सर्वसुरेश्वरि ॥ जय सर्वगते देवि जय सर्वजनप्रिये ॥ ५८ ॥ जय काम[3]प्रदे नित्यं जय त्रैलोक्यसुन्दरि ॥ जय त्रैलोक्यरक्षार्थमुद्यते ह्यकुतोभये ॥ ५९ ॥ जय देवि कृतानंदे जय दैत्यविनाशिनि ॥ जय क्लेशच्छिदे कांते जयाभक्तविमोहदे ॥ ६० ॥ त्वं सृष्टिस्त्वं वरा देवी त्वं लक्ष्मीस्त्वं सरस्वती ॥ त्वं स्वाहा त्वं स्वधा तुष्टिः पुष्टिर्मेधा धृतिः क्षमा ॥६१॥ तस्मात्कुरु प्रसादं मे प्राणान्रक्ष दयां कुरु॥ प्रणतस्य सुदीनस्य हीनस्य च विशेषतः ॥ ६२ ॥ अहं दुर्वाससा शप्तो हिरण्याक्षसुतो बली ॥ महिषत्वं समानीतस्त्वया देवी विमोक्षितः ॥ ६३ ॥ तस्माद्दर्पः प्रयुक्तोऽयं मया दानवसंभवः ॥ किंकरत्वं प्रयास्यामि सांप्रतं ते सुरेश्वरि ॥६४॥ जय सर्वगते देवि सर्वदुष्टविनाशिनि ॥६५॥ इति तस्य

१ प्रभावम्–इ० पा० । २ कोशनाशाय–इ० पा० । ३ लोकप्रदे–इ० पा० । ४ अयम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वचः श्रुत्वा कृपणं सा सुरेश्वरी ॥ कृपाविष्टाऽब्रवीद्वाक्यं ततो व्योमस्थितान्सुरान् ॥६६॥ किं करोमि दया जाता ममैनं प्रति हे सुराः ॥ तस्मान्नाहं हनिष्यामि दानवं दीनजल्पकम् ॥ ६७ ॥ विमुखं खड्गशस्त्रं च तवास्मीति प्रवादिनम् ॥ अपि मे पितृहंतारं न हन्यां रिपुमाहवे ॥ ६८ ॥ ॥ देवा ऊचुः ॥ ॥ न चेद्धंसि च देवेशि त्वमेनं दानवाधमम् ॥ नाशयिष्यति तत्कृत्स्नं त्रैलोक्यं सचराचरम् ॥ ६९ ॥ एष व्यर्थः श्रमः सर्वस्तथास्माकं भविष्यति ॥ तत्र संभूतिसंभूतस्तव क्लेशस्तथाऽखिलः ॥ ७० ॥ ॥ देव्युवाच ॥ ॥ नाहमेनं हनिष्यामि त्यजिष्यामि तथाऽमराः ॥ एनं कच ग्रहं कृत्वा धारयिष्यामि सर्वदा ॥ ७१ ॥ ॥ देवा ऊचुः ॥ ॥ साधुसाधु महाभागे युक्तमुक्तं त्वया वचः ॥ एतद्धि युज्यते कर्तुं कालेऽस्मिंस्त्रि दशेश्वरि ॥ ७२ ॥ सांप्रतं मर्त्यलोके त्वं रूपमेतत्समाश्रिता ॥ शस्त्रोद्यतकरा रौद्रा महिषोपरि संस्थिता ॥ ७३ ॥ अत्राप्स्यसि परां पूजां दुर्लभा ममरैरपि ॥ यस्त्वामेतेन रूपेण संस्थितां पूजयिष्यति ॥ ७४ ॥ त्वमस्य संगतो भावि विख्याता विंध्यवासिनी ॥ किं ते वा बहुनोक्तेन शृणु संक्षेपतो वचः ॥ ७५ ॥ अस्मदीयं परं तथ्यं सर्वलोकहितावहम् ॥ पार्थिवानां त्वदायत्तं बलं देवि भविष्यति ॥ ७६ ॥ युद्धकाले समुत्पन्ने भक्तानां नात्र संशयः ॥ प्रस्थानं वा प्रवेशं च यः करिष्यति मानवः ॥ ७७ ॥ त्वां स्मृत्वा प्रणिपत्याथ पूजयित्वा विशेषतः ॥ तस्य संपत्स्यते सिद्धिः सर्वकृत्येषु सर्वदा ॥ इह कापुरुषस्यापि किं पुनः सुभटस्य च ॥ ७८ ॥ आश्विनस्य सिते पक्षे नवम्यां चाष्टमीदिने ॥ पूजयिष्यति यो मर्त्यस्त्वां सद्भक्तिसमन्वितः ॥ ७९ ॥ तस्य संवत्सरं यावत्समग्रं सुरसुन्दरि ॥ न भविष्यति वै रोगो न भयं न पराभवः ॥ नापमृत्युर्न चौरादि समुद्भूत उपद्रवः ॥ ८० ॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वाथ ते देवास्तां देवीं हर्षसंयुताः ॥ अनुज्ञातास्तया जग्मुः स्वां पुरीममरावतीम् ॥ ॥ ८१ ॥ तत्र गत्वा चिरात्प्राप्य स्वं राज्यं पाकशासनः ॥ पालयामास संहृष्टस्त्रैलोक्यं हतकंटकम् ॥ ८२ ॥ लोकाश्च सुखसंपन्नाः सर्वे जाता स्ततः परम् ॥ यज्ञभागभुजो देवा भूयो जाता जगत्त्रये ॥ ८३ ॥ ततः परं च सा देवी त्रैलोक्ये ख्यातिमागता ॥ सर्वक्षेत्रेषु तीर्थेषु स्थानेषु च विशेषतः ॥ ८४ ॥ एतस्मिन्नंतरे जातः सुरथोनाम भूपतिः ॥ आनर्तस्तेन सद्भक्त्या क्षेत्रेऽत्रैव विनिर्मिता ॥ ८५ ॥ यस्तां पश्यति सद्भक्त्या चैत्राष्टम्यां सितेऽहनि ॥ स पुमान्वत्सरंयावत्कृतार्थः स्यान्न संशयः ॥ ८६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये महिषासुरपराजयकात्यायनीमाहात्म्यवर्णनंनामैकविंशत्युत्तरशततमोऽध्यायः ॥ १२१ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एतद्वः सर्वमाख्यातं यत्पृष्टोस्मि द्विजोत्तमाः ॥ यथा स निहतो देव्या महिषाख्यो दनूत्तमः ॥ १ ॥ सांप्रतं कीर्तयिष्यामि कथां



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पातकनाशिनीम् ॥ केदारसंभवां पुण्यां तां शृणुध्वं समाहिताः ॥ २ ॥ ॥ ऋषय ऊचुः ॥ ॥ केदारः श्रूयते सूत गंगाद्वारे हिमाचले ॥ स कथं चेह संप्राप्तः सर्वं विस्तरतो वद ॥ ३ ॥ ॥ सूत उवाच ॥ ॥ एतत्सत्यं गिरौ तस्मिन्स्वयंभूः संस्थितः प्रभुः ॥ परं तत्र वसेद्देवो यावन्मासाष्टकं द्विजाः ॥ ४ ॥ यावद्घर्मश्च वर्षा च तावत्तत्र वसेत्प्रभुः ॥ शीतकाले पुनश्चात्र क्षेत्रे संतिष्ठते सदा ॥ ॥ ५ ॥ ॥ ऋषय ऊचुः ॥ ॥ किं तत्कार्यं वसेद्येन क्षेत्रे मासचतुष्टयम् ॥ हिमाचले यथैवाष्टौ सूतपुत्र वदस्व नः ॥ ६ ॥ ॥ सूत उवाच ॥ ॥ पूर्वं स्वायंभुवस्यादौ मनोर्दैत्यो महाबलः ॥ हिरण्याक्षो महातेजास्तपोवीर्यसमन्वितः ॥ ७ ॥ तैर्व्याप्तं जगदेतद्धि निरस्य त्रिदशाधिपम् ॥ यज्ञभागाश्च देवानां हृता वीर्यप्रभावतः ॥ ८ ॥ अथ शक्रः सुरैः सार्धं गंगाद्वारं समाश्रितः ॥ तपस्तेपे सुदुःखार्तो राज्यश्रीपरिवर्जितः ॥ ९ ॥ तस्यैवं तप्यमानस्य तपस्तीव्रं महात्मनः ॥ माहिषं रूपमास्थाय निश्चक्राम धरातलात् ॥ १० ॥ स्वयमेव महादेवस्ततः शक्रमुवाच ह ॥ केदारयामि[2] मे शीघ्रं ब्रूहि सर्वं सुरोत्तम ॥ दैत्यानामथ सर्वेषां रूपेणानेन वासव ॥ ११ ॥ ॥ इन्द्र उवाच ॥ ॥ हिरण्याक्षो महादैत्यः सुबाहुर्वक्रकन्धरः ॥ त्रिशृंगो लोहिताक्षश्च पंचैतान्दारय प्रभो ॥ हतैरेतैर्हतं सर्वं दानवानामसंशयम् ॥ १२ ॥ किमन्यैः कृपणैर्ध्वस्तैर्यैः किंचिन्नात्र सिध्यति ॥ तस्य तद्वचनं श्रुत्वा भगवांस्तूर्णमभ्यगात् ॥ यत्र दानवमुख्योऽसौ हिरण्याक्षो महाबलः ॥ १३ ॥ अथ तं दूरतो दृष्ट्वा महिषं पर्वतोपमम् ॥ आयातं रौद्ररूपेण[3] दानवाः सर्वतश्च ते ॥ १४ ॥ ततो जघ्नुश्च पाषाणैर्लगुडैश्च तथा परे ॥ क्ष्वेडितास्फोटितांश्चक्रुस्तथान्ये बलगर्विताः ॥ ॥ १५ ॥ अथावमन्य तान्देवः प्रहारं लीलया ददौ ॥ यत्रास्ते दानवेन्द्रोऽसौ चतुर्भिः सचिवैः सह ॥ १६ ॥ ततः शस्त्रं समुद्यम्य यावद्धावति सम्मुखः ॥ तावच्छृंगप्रहारेण सोनयद्यमसादनम् ॥ १७ ॥ हत्वा तं सचिवान्पश्चात्सुबाहुप्रमुखांश्च तान् ॥ जघान हन्यमानोऽपि समन्ताद्दानवैः परैः ॥ १८ ॥ न तस्य लगते क्वापि शस्त्रं गात्रे कथंचन ॥ यत्नतोऽपि विसृष्टं च लब्धलक्षैः प्रहारिभिः ॥ १९ ॥ एवं पंच प्रधानांस्तान्हत्वा दैत्यान्महेश्वरः ॥ भूयो जगाम तं देशं यत्र शक्रो व्यवस्थितः ॥ अब्रवीच्च प्रहृष्टात्मा ततः शक्रं तपोन्वितम् ॥ २० ॥ मया ते निहताः पंच दानवा ये त्वयेरिताः ॥ तस्मात्त्रैलोक्यराज्यं स्वं भूय एव समाचर ॥२१॥ मत्तोऽन्यदपि देवेश वरं प्रार्थय वांछितम् ॥ कैलासशिखरं येन गच्छामि त्वरयाऽ

१ भवेद्येन –इ० पा० । २ केदारयामि–कान्–दारयामि–इत्यर्थः । ३रुद्ररूपेण–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



न्वितः ॥ २२ ॥ ॥ इन्द्र उवाच ॥ ॥ अनेनैव हि रूपेण तिष्ठ त्वं चात्र शंकर ॥ त्रैलोक्यरक्षणार्थाय धर्माय च शिवाय च ॥ २३ ॥ ॥ श्रीभगवानुवाच ॥ ॥ एतद्रूपं मया शक्र कृतं तस्य वधाय वै ॥ अवध्यः सर्वभूतानां यतोन्येषां मया हतः ॥ २४ ॥ तस्मादत्रैव ते वाक्यात्स्थास्यामि सुरसत्तम ॥ अनेनैव तु रूपेण मोक्षदः सर्वदेहिनाम् ॥ २५ ॥ एवमुक्त्वा विरूपाक्षश्चक्रे कुंडं ततः परम् ॥ शुद्धस्फटिकसंकाशं सुस्वादुक्षीरवत्प्रियम् ॥ २६ ॥ ततः प्रोवाच देवेन्द्रं मेघगंभीरया गिरा ॥ शृण्वतां सर्वदेवानां भगवांस्त्रिपुरांतकः ॥ २७ ॥ यो मां दृष्ट्वा शुचिर्भूत्वा कुंडमेतत्प्रपश्यति ॥ त्रिः पीत्वा वामसव्येन द्वाभ्यां चैव ततो जलम् ॥ २८ ॥ कराभ्यां स पुमान्नूनं तारयेच्च कुलत्रयम् ॥ अपि पापसमाचारं नरकेऽपि व्यवस्थितम् ॥ २९ ॥ वामेन मातृकं पक्षं दक्षिणेनाथ पैतृकम् ॥ उभाभ्यामथ चात्मानं कराभ्यां मद्वचो यथा ॥ ३० ॥ ॥ इन्द्र उवाच ॥ ॥ अहमागत्य नित्यं त्वां स्वर्गाद्वृषभवाहन ॥ अत्रस्थं पूजयिष्यामि पास्यामि च तथोदकम् ॥ ३१ ॥ केदारयामि यत्प्रोक्तं त्वया महिषरूपिणा ॥ केदारइति नाम्ना त्वं ततः ख्यातो भविष्यसि ॥ ३२ ॥ ॥ श्रीभगवानुवाच ॥ ॥ यद्येवं कुरुषे शक्र ततो दैत्यभयं न ते ॥ भविष्यति परं तेजो गात्रे संपत्स्यतेऽखिलम् ॥ ३३ ॥ एवमुक्तः सहस्राक्षस्ततः प्रासादमुत्तमम् ॥ तदर्थं निर्मयामास सांध्यालोकं[1] मनोहरम् ॥ ३४ ॥ ततः प्रणम्य तं देवमनुमन्त्र्य ततः परम् ॥ जगाम निजमावासं मेरुशृंगाग्रसंस्थितम् ॥ ३५ ॥ ततश्चागत्य नित्यं स स्वर्गाद्देवस्य शूलिनः ॥ केदारस्य सुभक्त्याढ्यां पूजां चक्रे समाहितः ॥ ३६ ॥ मन्त्रोदकं च त्रिः पीत्वा ययौ ब्राह्मणसत्तमाः ॥ कस्यचित्त्वथ कालस्य यावत्तत्र समाययौ ॥ ३७ ॥ तांवद्धिमेन तत्सर्वं गिरेः शृंगं प्रपूरितम् ॥ तच्च कुण्डं स देवश्च प्रासादेन समन्वितः ॥ ३८ ॥ ततो दुःखपरीतात्मा भक्त्या परमया युतः ॥ तां दिशं प्रणिपत्योच्चैर्जगाम निजमंदिरम् ॥ ३९ ॥ एवमागच्छतस्तस्य गतं मासचतुष्टयम् ॥ अपश्यतो महादेवं दिदृक्षागतचेतसः[2] ॥ ४० ॥ ततः प्राप्ते पुनर्विप्रा घर्मकाले हिमालये ॥ संयातो दृक्पथं देवः स तथारूपसंस्थितः ॥ ४१ ॥ ततः पूजां विधायोच्चैश्चातुर्मास्यसमुद्भवाम् ॥ गीतवाद्यादिकं चक्रे तत्पुरः श्रद्धयान्वितः ॥ ४२ ॥ अथ देवः समालोक्य तां श्रद्धां तस्य गोपतेः[3] ॥ प्रोवाच दर्शनं गत्वा भगवांस्त्रिपुरांतकः ॥ ४३ ॥ परितुष्टोऽस्मि देवेश भक्त्या चानन्ययाऽनया ॥ तस्मात्प्रार्थय दास्यामि यं कामं हृदि संस्थितम् ॥४४॥ ॥ शक्र उवाच ॥ ॥ तव प्रसादात्संजातं ममैश्वर्यमनुत्तमम् ॥ यत्किंचित्त्रिषु लोकेषु तत्सर्वं गृहसंस्थितम् ॥ ४५ ॥ तस्माद्यदि प्रसादं मे करोषि वृषभध्वज ॥ वरं वा[4] यच्छसि प्रीतस्तत्कु

१ साध्यालोकम्–दर्शनीयतमम्–इत्यर्थः । २ तदिच्छासंगतस्य च–इ०पा०। ३ गोपतेः–स्वर्गपतेः–इंद्रस्य–इत्यर्थः। "स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजले ॥ लक्ष्यदृष्ट्यां स्त्रियां पुंसि गौः" इत्यमरः। ३.च–इ०पा०।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुष्व वचो मम ॥ ४६ ॥ पर्वतोऽयं भवेद्रम्यो मासानष्टौ सुरेश्वर ॥ यावन्मीनस्थितो भानुः प्रगच्छति श्रुतं मया ॥ ४७ ॥ ततः परमगम्यश्च हिमपूरेण संवृतः ॥ यदा स्याच्चतुरो मासान्यावत्कुम्भगतो रविः ॥ ४८ ॥ संजायतेऽप्यगम्यश्च ममापि त्रिपुरांतक ॥ किं पुनः स्वल्पसत्त्वानां नरादीनां सुरेश्वर ॥ ४९ ॥ तस्मात्स्वर्गेऽथ पाताले मर्त्ये वा त्रिदशेश्वर ॥ कुरुष्वानेन रूपेण स्थितिं मासचतुष्टयम् ॥ येन न स्यात्प्रतिज्ञाया हानिर्मम सुरेश्वर ॥ ५० ॥ ॥ सूत उवाच ॥ ॥ ततो देवश्चिरं ध्यात्वा प्रोवाच बलसूदनम् ॥ परं संतोषमापन्नो मेघनिर्घोषनिःस्वनम् ॥ ॥ ५१ ॥ आनर्तविषये क्षेत्रं हाटकेश्वरसंज्ञितम् ॥ अस्मदीयं सहस्राक्ष विद्यते धरणीतले ॥ ५२ ॥ तत्राहं वृश्चिकस्थेऽर्के सदा स्थास्यामि वासव ॥ यावत्कुम्भस्य पर्यंतं तव वाक्यादसंशयम् ॥ ५३ ॥ तस्मात्तत्र द्रुतं गत्वा कृत्वा प्रासादमुत्तमम् ॥ मम रूपं प्रतिष्ठाप्य कुरु पूजां यथोचिताम् ॥ येन तत्र निजं तेजो धारयामि तवार्थतः ॥ ५४ ॥ ॥ सूत उवाच ॥ ॥ एतच्छ्रुत्वा सहस्राक्षो देवदेवस्य शूलिनः ॥ गत्वा तत्र ततश्चक्रे यद्देवेने रितं वचः ॥ ५५ ॥ प्रासादं निर्मयित्वाथ रूपं संस्थाप्य शूलिनः ॥ कुण्डं चक्रे च तद्रूपं स्वच्छोदकसमावृतम् ॥५६॥ ततश्चाराधयामास पुष्पधूपानु लेपनैः ॥ स्नात्वा कुण्डेऽपिबत्तोयं त्रिःकृत्वा च यथा पुरा ॥ ५७ ॥ एवं स भगवांस्तत्र शक्रेणाराधितः पुरा ॥ समायातोऽत्र विप्रेंद्राः सुरम्यात्तु हिमाचलात् ॥ ५८ ॥ यस्तमाराधयेत्सम्यक्सदा मासचतुष्टयम् ॥ हिमपातोद्भवे मर्त्यः स शिवाय प्रपद्यते ॥ ५९ ॥ शेषकालेऽपि यः पूजां करोत्येव सुभक्तितः ॥ स पापं क्षालयेत्प्राज्ञ आजन्ममरणांतिकम् ॥ ६० ॥ तत्र गीतं प्रशंसंति नृत्यं चैव पृथग्विधम् ॥ देवस्य पुरतः प्राज्ञाः सर्वशास्त्रविशारदाः ॥ ६१ ॥ अत्र श्लोकः पुरा गीतो नारदेन सुरर्षिणा ॥ तद्वोऽहं कीर्तयिष्यामि श्रूयतां ब्राह्मणोत्तमाः ॥ ६२ ॥ केदारे सलिलं पीत्वा गयापिंडं प्रदाय च ॥ ब्रह्मज्ञानमथासाद्य पुनर्जन्म न विद्यते ॥ ६३ ॥ एतद्वः सर्वमाख्यातं केदारस्य च संभवम् ॥ आख्यानं ब्राह्मणश्रेष्ठाः सर्वपातकनाशनम् ॥ ६४ ॥ यश्चैतच्छृणुयात्सम्यक्पठेद्वा तस्य चाग्रतः ॥ श्रावयेद्वापि वा विप्राः सर्वपातकनाशनम् ॥ केदारस्य स पापौघैर्मुच्यते तत्क्षणान्नरः ॥ ६५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखंडे हाटकेश्वरक्षेत्रमाहात्म्ये केदारोत्पत्तिमाहात्म्यवर्णनंनाम द्वाविंशत्युत्तरशततमोऽध्यायः ॥ १२२ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तथान्यदपि तत्रास्ति शुक्लतीर्थमनुत्तमम् ॥ दर्भैः संसूचितं श्वेतैर्यदद्यापि द्विजोत्तमाः ॥ १ ॥ चमत्कारपुरे पूर्वमासीत्कश्चित्सुशलयवित् ॥ रजकः शुद्धकोनाम पुत्रपौत्रसमन्वितः ॥ ॥ २ ॥ स सर्वरजकानां च प्राधान्येन व्यवस्थितः ॥ प्रधानब्राह्मणानां च करोत्यंबरशोधनम् ॥ ३ ॥ कस्यचित्त्वथ कालस्य नीलीकुण्ड्यां समा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



हितः ॥ प्राक्षिपद्ब्राह्मणेंद्राणां वासो विज्ञातवांश्चिरात् ॥ ४ ॥ अथासौ मन्दचित्तश्च स्वामाहूय कुटुम्बिनीम् ॥ पुत्रांश्च वचनं प्राह रहस्ये भयवि
ह्वलः ॥ ५ ॥ निर्मूल्यानि सुवस्त्राणि ब्राह्मणानां महात्मनाम् ॥ नीलीमध्ये विमोहेन प्रक्षिप्तानि बहूनि च ॥ ६ ॥ वधबन्धादिकं कर्म ते करिष्यं
त्यसंशयम् ॥ तस्मादन्यत्र गच्छामो गृहीत्वा रजनीमिमाम् ॥ ७ ॥ एवं स निश्चयं कृत्वा सारमादाय मंदिरात् ॥ प्रस्थितो भार्यया सार्द्धं कांदि
शीको द्विजोत्तमाः ॥ ८ ॥ तावत्तस्य सुता गत्वा स्वां सखीं दाशसंभवाम् ॥ उवाच क्षम्यतां भद्रे यन्मया कुकृतं कृतम् ॥ ९ ॥ अज्ञानाज्ज्ञानतो
वापि प्रक्रीडंत्या त्वया सह ॥ प्रणयाद्बाल्यभावाच्च क्रोधाद्वाथ महेर्ष्यया ॥ १० ॥ अथ सा सहसा श्रुत्वा बाष्पपर्याकुलेक्षणा ॥ उवाच किमिदं भद्रे
यन्मामित्थं प्रभाषसे ॥ ११ ॥ ॥ सख्युवाच ॥ ॥ मम तातेन नीलायां प्रक्षिप्तान्यंबराणि च ॥ ब्राह्मणानां महार्हाणि विभ्र
मेण सुलोचने ॥ १२ ॥ तत्प्रभाते परिज्ञाय दंडं धास्यंति दारुणम् ॥ एवं चित्ते समास्थाय तातः संप्रस्थितोऽधुना ॥ १३ ॥ अहं
तवांतिकं प्राप्ता दर्शनार्थमनिन्दिते ॥ अनुज्ञाता प्रयास्यामि त्वया तस्मात्प्रमुच्यताम् ॥ १४ ॥ अथ सा तद्वचः श्रुत्वा प्रसन्नवदनाऽब्र
वीत् ॥ यद्येवं मा सरोजाक्षि कुत्रचित्संप्रयास्यसि ॥ १५ ॥ निवारय द्रुतं गत्वा तातं नो गम्यतामिति ॥ अस्ति पूर्वोत्तरे भागे
स्थानादस्माज्जलाशयः ॥ १६ ॥ तत्रैकदा विनिक्षिप्तं मम तातेन जालकम् ॥ अतीव कृष्णकेशोत्थं तावच्छुक्लत्वमागतम् ॥१७॥ ततः स विस्मया
विष्टः स्वयं सस्नौ कुतूहलात् ॥ यावच्छुक्लत्वमापन्नस्तादृक्कृष्णवपुर्धरः ॥ १८ ॥ सुश्वेतमूर्धजः सद्यः स्त्रीणां वैराग्यकारकः ॥ ततःप्रभृति नो
ज्ञात्वा कश्चित्तत्र प्रगच्छति ॥ १९ ॥ तस्मात्तत्रैव वस्त्राणि प्रक्षालयतु सत्वरम् ॥ तातः स तव यास्यंति विशुद्धिं परमां शुभे ॥ २० ॥ अथ सा
सत्वरं गत्वा निजतातस्य तद्वचः ॥ सत्वरं कथयामास प्रहृष्टवदना सती ॥ २१ ॥ मम सख्या समादिष्टं नातिदूरे जलाशयः ॥ तत्र श्वेतत्वमायाति
सर्वं क्षिप्तं सितेतरम् ॥२२॥ तस्मात्प्रक्षालय प्रातस्तत्र गत्वा जलाशये ॥ वस्त्राण्यमूनि शुक्लत्वं संप्रयास्यंत्यसंशयम् ॥ २३ ॥ ॥ रजक उवाच ॥
नैतत्संपत्स्यते पुत्रि यन्नीलस्य परिक्षयः ॥ वस्त्रलग्नस्य जायेत यतः प्रोक्तं पुरातनैः ॥२४॥ वज्रलेपस्य मूर्खस्य नारीणां कर्कटस्य च ॥ एको ग्रहस्तु
मीनानां नीलीमद्यपयोस्तथा ॥२५॥ ॥ कन्योवाच ॥ ॥ तत्र ह्यागम्यतां तावद्वस्त्राण्यादाय यत्नतः ॥ तोयाच्छुद्धिं प्रयास्यंति तदाऽऽगंतव्यमेव हि ॥
॥२६॥ भूयोऽपि मंदिरे वाऽथ तस्मात्स्थानाद्दिगंतरम् ॥ गंतव्यं सकलैरेव ममैतद्धृदि संस्थितम् ॥२७॥ तस्यास्तद्वचनं श्रुत्वा साधुसाध्विति तेऽस ॥१३६॥
कृत् ॥ प्रोच्य बांधवभृत्याश्च रात्रावेव प्रजग्मिरे ॥२८॥ दाशकन्यां पुरः कृत्वा संशयं परमं गताः ॥ विभवेन समायुक्ता निजेन द्विजसत्तमाः ॥२९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततः सा दर्शयामास दाशकन्या जलाशयम् ॥ बहुवीरुधसंछन्नं दुष्प्रवेशं च देहिनाम् ॥ ३० ॥ ततः स रजकस्तत्र वस्त्राण्यादाय सर्वशः ॥ प्रविष्टः सलिले तस्मिन्क्षालयामास वै द्विजाः ॥ ३१ ॥ अथ तानि सुवस्त्राणि मेचकाभानि तत्क्षणात् ॥ जातानि स्फटिकाभानि तत्क्षणादेव कृत्स्नशः ॥ ॥ ३२ ॥ ततस्तुष्टिसमायुक्तः साधुसाध्विति चाऽब्रवीत् ॥ समालिंग्य सुतां प्राह दाशकन्यां च सादरम् ॥ ३३ ॥ सुवस्त्राणि द्विजेंद्राणामर्पयामो यथाक्रमम् ॥ ३४ ॥ ततः स स्वगृहं गत्वा तानि वस्त्राणि कृत्स्नशः ॥ यथाक्रमेण संहृष्टः प्रददौ द्विजसत्तमाः ॥ ३५ ॥ अथ ते ब्राह्मणा दृष्ट्वा तां शुद्धिं वस्त्रसंभवाम् ॥ तं च श्वेतीकृतं चेदृग्रजकं विस्मयान्विताः ॥ ३६ ॥ पप्रच्छुः किमिदं चित्रं वस्त्रमूर्धजसंभवम् ॥ अनौपम्यं च संजातं वदस्व यदि मन्यसे ॥ ३७ ॥ ॥ रजक उवाच ॥ ॥ एतानि विप्रा वस्त्राणि मया क्षिप्तानि मोहतः ॥ नीलीमध्ये सुवस्त्राणि विनष्टानि च कृत्स्नशः ॥ ॥ ३८ ॥ ततो भयं महद्भूतं कुटुम्बेन समन्वितः ॥ चलितो रजनीवक्त्रे दिगंते ब्राह्मणोत्तमाः ॥ ३९ ॥ अथैषा तनयाऽस्माकं गता निजसखीं प्रति ॥ दाशात्मजां सुदुःखार्ता पुनर्दर्शनलालसा ॥ ४० ॥ तया सर्वमभिप्रायं ज्ञात्वा मे दुःखहेतुकम् ॥ ततः संदर्शयामास स्थिताग्रे स्वजलाशयम् ॥ ४१ ॥ तस्मिन्प्रक्षिप्तमात्राणि वस्त्राणीमानि तत्क्षणात् ॥ ईदृग्वर्णानि जातानि विस्मयस्य हि कारणम् ॥ ४२ ॥ तथा मे मूर्धजाः कृष्णास्तत्र स्नातस्य तत्क्षणात् ॥ परं शुक्लत्वमापन्ना एतत्प्रोक्तं मया स्फुटम् ॥ ४३ ॥ एवं ते ब्राह्मणाः श्रुत्वा कौतूहलसमन्विताः ॥ तत्र जग्मुः परीक्षार्थं प्रक्षिप्य तदनंतरम् ॥ ४४ ॥ कृष्णद्रव्याणि भूरीणि केशादीनि सहस्रशः ॥ सर्वं तच्छुक्लतां याति त्यक्त्वा वर्णं मलीमसम् ॥ ४५ ॥ ततो वृद्धतया ये च विशेषाच्छ्वेतमूर्धजाः ॥ ते सस्नुः श्रद्धया युक्तास्तरुणाश्चापि धर्मिणः ॥ ४६ ॥ ततः शुक्लत्वमापन्नास्तेजोवीर्यसमन्विताः ॥ भवंति तत्प्रभावेन प्रयांति च परां गतिम् ॥ ४७ ॥ अथ तद्वासवो दृष्ट्वा शुक्लतीर्थं प्रमुक्तिदम् ॥ पूरयामास रजसा मानुषोत्थभयेन च ॥ ४८ ॥ अद्यापि तत्र यत्किंचिज्जायतेऽथ तृणादिकम् ॥ तत्सर्वं शुक्लतामेति तत्तोयस्य प्रभावतः ॥ ४९ ॥ तत्रोत्थैर्यः कुशैः श्राद्धं कुरुते श्रद्धयान्वितः ॥ श्वेतैस्तैस्तारयेत्सर्वान्पितॄन्नरकगानपि ॥ ५० ॥ तत्तीर्थोत्थां मृदं गात्रे योजयित्वा नरोत्तमः ॥ स्नानं करोति तीर्थानां सर्वेषां लभते फलम् ॥ ५१ ॥ यस्तैर्दर्भैर्नरो भक्त्या तिलैश्चारण्यसंभवैः ॥ करोति तर्पणं विप्राः स प्रीणाति पितामहान् ॥ ५२ ॥ अथाश्वमेधात्संप्राप्यं गयाश्राद्धेन यत्फलम् ॥ नीलसंज्ञगवोत्सर्गे तथात्रापि द्विजोत्तमाः ॥ ५३ ॥ ॥ ऋषय ऊचुः ॥ ॥ शुक्लतीर्थं कथं जातं तत्र त्वं सूतनंदन ॥ विस्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



रेण समाचक्ष्व परं कौतूहलं हि नः ॥ ५४ ॥ ॥ सूत उवाच ॥ ॥ श्वेतद्वीपः समानीतो विष्णुना प्रभविष्णुना ॥ तत्क्षेत्रे कलिभीतेन यथा शौक्ल्यं न संत्यजेत् ॥ ५५ ॥ कलिकालेन संस्पृष्टः श्वेतद्वीपोऽपि श्यामताम् ॥ न प्रयाति द्विजश्रेष्ठास्ततस्तत्र निवेशितः ॥ ५६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये शुक्ततीर्थमाहात्म्यवर्णनंनाम त्रयोविंशत्युत्तर शततमोऽध्यायः ॥ १२३ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ अथान्यदपि तत्रास्ति मुखारं तीर्थमुत्तमम् ॥ यत्र ते मुनयः श्रेष्ठा विप्राश्चौरेण संगताः ॥ १ ॥ यत्र सिद्धिं समापन्नः स चौरस्तत्प्रभावतः ॥ वाल्मीकिरिति विख्यातो रामायणनिबंधकृत् ॥ २ ॥ चमत्कारपुरे पूर्वं मांडव्यान्वय संभवः ॥ लोहजंघो द्विजो ह्यासीत्पितृमातृपरायणः ॥३॥ तस्यैका चाभवत्पत्नी प्राणेभ्योऽपि गरीयसी ॥ पतिव्रता पतिप्राणा पतिप्रियहिते रता ॥४॥ अथ तस्य स्थितस्यात्र ब्रह्मवृत्त्याभिवर्ततः ॥ जगाम सुमहान्कालः पितृमातृरतस्य च ॥५॥ एकदा भगवाञ्छक्रो न ववर्ष धरातले ॥ आनर्तविषये कृत्स्ने यावद्द्वादशवत्सराः ॥ ६ ॥ ततः स कष्टमापन्नो लोहजंघो द्विजोत्तमः ॥ न प्राप्नोति क्वचिद्भिक्षां न च किंचित्प्रतिग्रहम् ॥ ७ ॥ ततस्तौ पितरौ द्वौ तु दृष्ट्वा क्षुत्परिपीडितौ ॥ भार्यां च चिंतयामास दुःखेन महतान्वितः ॥ ८ ॥ किं करोमि क्व गच्छामि कथं स्याद्दर्शनं मम ॥ एताभ्या मपि वृद्धाभ्यां पत्न्याश्चैव विशेषतः ॥ ९ ॥ ततः स दुःखसंयुक्तः फलार्थं प्रययौ वने ॥ न च किंचिदवाप्नोति सर्वे शुष्का महीरुहाः ॥ १० ॥ अथापश्यत्स वृद्धां स्त्रीं स्तोकसस्यसमन्विताम् ॥ गच्छमानां तथा तेन श्रमेण महतान्विताम् ॥११॥ ततस्तत्सस्यमादाय वस्त्राणि च स निर्दयः॥ जगाम स्वगृहं हृष्टः पितृभ्यां च न्यवेदयत् ॥ १२ ॥ स एवं लब्धलक्षोऽपि दस्युकर्मणि नित्यशः ॥ कृत्वा चौर्यं पुपोषाथ निजमेव कुटुम्ब कम् ॥ १३ ॥ सुभिक्षे चापि संप्राप्ते नान्यत्कर्म करोति सः ॥ ब्राह्मीं वृत्तिं परित्यक्त्वा चौर्यकर्म समाचरत् ॥ १४ ॥ कस्यचित्त्वथ कालस्य तीर्थयात्राप्रसंगतः ॥ तत्र सप्तर्षयः प्राप्ता मरीचिप्रमुखा द्विजाः ॥ १५ ॥ ततस्तान्विजने दृष्ट्वा द्रोहकोपसमन्वितः ॥ यष्टिमुद्यम्य वेगेन तिष्ठध्व मिति चाब्रवीत् ॥ १६ ॥ त्रिशिखां भ्रुकुटीं कृत्वा सत्वरं समुपाद्रवत् ॥ भर्त्समानः स परुषैर्वाक्यैस्तांस्ताडयन्निव ॥ १७ ॥ ततस्ते मुनयो दृष्ट्वा यमदूतोपमं च तम् ॥ यज्ञोपवीतसंयुक्तं प्रोचुस्ते कृपयाऽन्विताः ॥ १८ ॥ ॥ ऋषय ऊचुः ॥ ॥ अहो त्वं ब्राह्मणोऽसीति तत्कस्मादतिगर्हित तम् ॥ करोषि कर्म चैतद्धि म्लेच्छकृत्यं तु बालिश ॥ १९ ॥ वयं च मुनयः शांतास्त्यक्ताऽशेषपरिग्रहाः ॥ नास्माकमपि पार्श्वस्थं किंचिद्द्रव्यमस्ति यद्भवान् ॥ २० ॥ ॥ लोहजंघ उवाच ॥ ॥ एतानि शुभ्रचीराणि वल्कलान्यजिनानि च ॥ उपानहसमेतानि शीघ्रं यच्छंतु मे द्विजाः ॥२१॥



१ तत्रतत्र विशेषतः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नो चेद्धत्वा प्रहारेण यष्ट्या वज्रोपमेन च ॥ प्रापयिष्याम्यसंदिग्धं धर्मराजनिवेशनम् ॥ २२ ॥ ॥ ऋषय ऊचुः ॥ ॥ सर्वं दास्या महे तुभ्यं वयं तावन्मलिम्लुच ॥ किंवदन्तीं वदास्माकं यां पृच्छामः कुतूहलात् ॥ २३ ॥ किमर्थं कुरुषे चौर्यं त्वं विप्रोऽसि सुनिर्घृणः ॥ किं जितो व्यसनै रौद्रैः किं वा व्याधद्विजो भवान् ॥२४॥ ॥ लोहजंघ उवाच ॥ ॥ व्यसनार्थं न मे कृत्यमेतच्चौर्यसमुद्भवम् ॥ टुकुम्बार्थं विजानीथ धर्ममेतन्न संशयः ॥ २५ ॥ पितरौ मम वार्द्धक्ये वर्तमानौ व्यवस्थितौ ॥ तथा पतिव्रता पत्नी गृहधर्मविचक्षणा ॥ २६ ॥ उपार्ज्जयामि यत्किञ्चि दहमेतेन कर्मणा ॥ तत्सर्वं तत्कृते नूनं सत्येनात्मानमालभे ॥२७॥ तस्मान्मुंचथ प्राक्सर्वं विभवं किं वृथोक्तिभिः ॥ कृताभिः स्फुरते हस्तो ममायं हन्तुमेव हि ॥२८॥ ॥ ऋषय ऊचुः ॥ ॥ यद्येवं चौर तद्गत्वा त्वं पृच्छस्व कुटुम्बकम् ॥ मम पापांशभागी त्वं किं भविष्यसि किं न वा ॥२९॥ यदि ते संविभागेन पापस्यांशोऽपि गच्छति ॥ तत्कुरुष्वाथवा पापं दुर्वहं ते भविष्यति ॥ ३० ॥ सकलं रौरवे रौद्रे पतितस्य सुदुर्मते ॥ वयं त्वां ब्राह्मणं मत्वा ब्रूम एतदसंशयम् ॥३१॥ कृपाविष्टाः सहास्माभिः सञ्जातेऽपि सुदर्शने ॥ मुनीनां यतचित्तानां दर्शनाद्धि शुभं भवेत् ॥३२॥ एकः पापानि कुरुते फलं भुंक्ते महाजनः ॥ भोक्तारो विप्रमुच्यंते कर्ता दोषेण लिप्यते ॥ ३३ ॥ ॥ सूत उवाच ॥ ॥ स तेषां तद्वचः श्रुत्वा चौरः किंचिद्भ यान्वितः ॥ सत्यमेतन्न संदेहो यदेतैर्व्याहृतं वचः ॥ ३४ ॥ तस्मात्पृच्छामि तद्गत्वा निजमेव कुटुम्बकम् ॥ यदि स्यात्संविभागो मे पापांशस्य करोमि वै ॥ ३५ ॥ एतत्कर्म न गृह्णंति यदि वा संत्यजाम्यहम् ॥ महद्भयं समुत्पन्नं मम चेतसि सांप्रतम् ॥३६॥ यदि यूयं न चान्यत्र प्रयास्यथ मुनीश्वराः ॥ पलायनपरा भूत्वा तद्गत्वा निजमंदिरम् ॥३७॥ पृच्छामि पोष्यवर्गं च युष्मद्वाक्यं विशेषतः ॥ यदि तत्पातकांशं मे ग्रहीष्यति कुटुम्ब कम् ॥ तद्युष्माकं ग्रहीष्यामि यत्किंचित्पार्श्वसंस्थितम् ॥ ३८ ॥ अथवा प्रतिषेधं मे पापस्यास्य करिष्यति ॥ तत्त्यजिष्याम्यसंदिग्धं सर्वान्वः सप रिच्छदान् ॥ ३९ ॥ ततस्ते शपथान्कृत्वा तस्य प्रत्ययकारणात् ॥ तस्योपरि दयां कृत्वा मुमुचुस्तं गृहं प्रति ॥ ४० ॥ सोऽपि गत्वाऽथ पप्रच्छ प्रगत्वा पितरं निजम् ॥ शृणु तात वचोऽस्माकं ततः प्रत्युत्तरं कुरु ॥ ४१ ॥ यत्कृत्वाहमकृत्यानि चौर्यादीनि सहस्रशः ॥ पुष्टिं करोमि ते नित्यं तद्भागस्तेऽस्ति वा न वा ॥ ४२ ॥ पापस्य मम प्रब्रूहि पृच्छतोऽत्र यथातथम् ॥ अत्र मे संशयो जातस्तस्माच्छीघ्रं प्रकीर्तय ॥ ४३ ॥ ॥ पितो वाच ॥ ॥ बाल्ये पुत्र मया नीतस्त्वं पुष्टिं व्याकुलात्मना ॥ शुभाऽशुभानि कृत्यानि कृत्वा स्निग्धेन चेतसा ॥ ४४ ॥ एतदर्थं पुनर्येन वार्धक्ये समुपस्थिते ॥ मां पालयसि भूयोऽपि कृत्वा कर्म शुभाऽशुभम् ॥ ४५ ॥ न तस्य विद्यते भागस्तव स्वल्पोऽपि पुत्रक ॥ शुभस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वाऽथ पापस्य सांप्रतं च तथा मम ॥ ४६ ॥ आत्मनैव कृतं कर्म स्वयमेवोपभुज्यते ॥ शुभं वा यदि वा पापं भोक्तारोन्यजनाः स्मृताः ॥ ४७ ॥
साधुत्वेनाथ चौर्येण कृष्या वा वाणिजेन वा ॥ त्वमुपानयसे भोज्यं न मे चिन्ता प्रजायते ॥ ४८ ॥ तस्मान्नैतद्धृदि स्थाप्यं कर्म निंद्यं करिष्यसि ॥
यत्तस्यांशं प्रभोक्ता त्वं वयं सर्वे प्रभुंजकाः ॥ ४९ ॥ ॥ सूत उवाच ॥ ॥ स एतद्वचनं श्रुत्वा व्याकुलेनान्तरात्मना ॥ पप्रच्छ मातरं गत्वा तमेवार्थं
प्रयत्नतः ॥५०॥ ततस्तयापि तच्चोक्तं यत्पित्रा तस्य जल्पितम् ॥ असामान्यं शुभे पापे कृत्ये तस्य द्विजोत्तमाः ॥५१॥ ततः पप्रच्छ तां भार्यां गत्वा
दुःखसमन्वितः ॥ साऽप्युवाच ततस्तादृक्पापं गुरुजनोद्भवम् ॥ ५२ ॥ ततः स शोकसंततः पश्चात्तापेन संयुतः ॥ गर्हयन्नेव चात्मानं ययौ ते यत्र
तापसाः ॥५३॥ ततः प्रणम्य तान्सर्वान्कृतांजलिपुटः स्थितः ॥ गम्यतांगम्यतां विप्राः क्षम्यतांक्षम्यतां मम ॥ ५४ ॥ यन्मया मौर्ख्यमास्थाय युष्म
न्निर्भर्त्सना कृता ॥ सुपाप्मना विमूढेन तस्मात्कार्या क्षमाद्य मे ॥ ५५ ॥ युष्मदीयं वचः कृत्स्नं मद्गुरुभ्यां प्रजल्पितम् ॥ भार्यया च द्विजश्रेष्ठास्तेन
मे दुःखमागतम् ॥५६॥ तस्मात्कुर्वंतु मे सर्वे प्रसादं मुनिसत्तमाः ॥ उपदेशप्रदानेन येन पापं क्षपाम्यहम् ॥५७॥ मया कर्म कृतं निंद्यं सदैव द्विजस
त्तमाः॥स्त्रियोऽपि च द्विजेंद्राश्च तापसाश्च विशेषतः ॥५८॥ येये दीनतरा लोका न समर्थाः प्रयोधितुम् ॥ ते मया मुषिताः सर्वे न समर्थाः कदाचन
॥५९॥ कुटुम्बार्थं विमूढेन साधुसंगविवर्जिना ॥ यथैव पठता शास्त्रं तन्मेऽद्य पतितं हृदि ॥६०॥ यदि न स्याद्भवद्भिर्मे दर्शनं चाद्य सत्तमाः ॥ तद
न्यान्यपि पापानि कर्ताहं स्यां न संशयः ॥ ६१ ॥ तेषां मध्यगतश्चासीत्पुलहोनाम सन्मुनिः ॥ हास्यशीलः स तं प्राह विप्लवार्थं द्विजोत्तमम् ॥
॥ ६२ ॥ अहं ते कीर्तयिष्यामि मन्त्रमेकं सुशोभनम् ॥ यं ध्यायञ्जपमानस्त्वं सिद्धिं यास्यसि शाश्वतीम् ॥ ६३ ॥ जाटघोटेति मन्त्रोऽयं सर्वसि
द्धिप्रदायकः ॥ तमेनं जप विप्र त्वं दिवारात्रमतंद्रितः ॥ ६४ ॥ ततो यास्यसि संसिद्धिं दुर्लभां त्रिदशैरपि ॥ ६५ ॥ एवमुक्त्वाथ ते विप्रास्तीर्थयात्रां
ततो ययुः ॥ सोऽपि तत्रैव चौरस्तु स्थितो जपपरायणः ॥ ६६ ॥ अनन्यमनसा तेन प्रारब्धः स तदा जपः ॥ यथाऽभवत्समाधिस्थो येना
वस्थां परां गतः ॥ ६७ ॥ तस्यैवं स्मरमाणस्य तं मन्त्रं ब्राह्मणस्य च ॥ निश्चलत्वं गतः कायः कार्ये[१] च निश्चलः स्थितः ॥ ६८ ॥
ततः कालेन महता वल्मीकेन समावृतः ॥ समंताद्ब्राह्मणश्रेष्ठा ध्यानस्थस्य महात्मनः ॥ ६९ ॥ तौ मातापितरौ तस्य सा च भार्या
मनस्विनी ॥ याता मृत्युवशं सर्वे तमन्वेष्य प्रयत्नतः ॥ ७० ॥ न विज्ञातश्च तत्रस्थः संन्यस्तः स महाव्रतः ॥ संसारभावनिर्मु



१ कार्ये–जपरूपकार्ये–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्तस्तस्मान्मुनिसमागमात् ॥ ७१ ॥ कस्यचित्त्वथ कालस्य तेन मार्गेण ते पुनः ॥ तीर्थयात्राप्रसंगेन मुनयः समुपस्थिताः ॥ ७२ ॥ प्रोचुश्चैत द्विजाः स्थानं यत्र चौरेण संगमः ॥ आसीद्यस्तेन रौद्रेण ब्राह्मणच्छद्मधारिणा ॥ ७३ ॥ ततो वल्मीकमध्यस्थं शुश्रुवुर्निस्वनं च ते ॥ जांटघोटे तिमंत्रस्य तस्यैव च महात्मनः ॥ ७४ ॥ अथ भूम्यां प्रहारास्ते सस्रवुः सर्वतोदिशम् ॥ ते वल्मीकं ततो दृष्ट्वा तं चौरं तस्य मध्यगम् ॥ ७५ ॥ जपमानं तु तं मन्त्रं पुलहेन निवेदितः ॥ हास्यरूपेण यस्तस्य सिद्धिं च द्विजसत्तमाः ॥ ७६ ॥ यद्वा सत्यमिदं प्रोक्तमाचार्यैः शास्त्रदृष्टिभिः ॥ स्तोकं सिद्धिकृते तस्य यस्मात्सिद्धिरुपस्थिता ॥ ७७ ॥ मन्त्रे तीर्थे द्विजे देवे दैवज्ञे भेषजे गुरौ ॥ यादृशी भावना यस्य सिद्धिर्भवति तादृशी ॥ ॥ ७८ ॥ अथ तं वीक्ष्य संसिद्धं कुमन्त्रेणापि तस्करम् ॥ ते विप्रा विस्मयाविष्टाः कृपाविष्टा विशेषतः ॥ ७९ ॥ समाध्यर्हैस्ततो द्रव्यैस्तैलैस्त द्भेषजैरपि ॥ ८० ॥ ममर्दुस्तस्य तद्गात्रं समाधिस्थं चिरं द्विजाः ॥ ततः स चेतनां लब्ध्वा आलोक्य च मुहुर्मुहुः ॥ प्रोवाच विस्मया विष्टस्तान्मुनीन्प्रकृतानिति ॥ ८१ ॥ ॥ लोहजंघ उवाच ॥ ॥ किमर्थं न गता यूयं मया मुक्ता द्विजोत्तमाः ॥ नाहं किंचिद्ग्रहीष्यामि युष्म दीयं कथंचन ॥ कुटुंबार्थं यतस्तस्माद्व्रजध्वं स्वेच्छयाऽधुना ॥ ८२ ॥ ॥ मुनय ऊचुः ॥ ॥ चिरकालाद्वयं प्राप्ताः पुनर्भ्रांत्वाऽत्र कानने ॥ समाधिस्थेन न ज्ञातः कालोऽतीतस्त्वया बहु ॥ ८३ ॥ तौ मातापितरौ वृद्धौ त्वया मुक्तौ क्षयं गतौ ॥ त्वं च संसिद्धिमापन्नः परामस्मत्प्रसादतः ॥ ॥ ८४ ॥ वल्मीकांतः स्थितो यस्मात्संसिद्धिं परमां गतः ॥ वाल्मीकिर्नाम विख्यातस्तस्माल्लोके भविष्यसि ॥ ८५ ॥ अत्रस्थेन यतो मुष्टास्त्वया लोकाः पुरा द्विज ॥ मुखाराख्यं ततस्तीर्थमेतत्ख्यातिं गमिष्यति ॥ ८६ ॥ येऽत्र स्नानं करिष्यंति श्रावण्यां श्रद्धया द्विजाः ॥ क्षालयिष्यंति ते पापं चौर्य कर्मसमुद्भवम् ॥ ८७ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वाथ ते विप्रास्तमामंत्र्य मुनिं ततः ॥ प्रणतास्तेन संजग्मुर्वांछिताशां ततः परम् ॥ ८८ ॥ तपःस्थः सोऽपि तत्रैव वाल्मीकिरिति यः स्मृतः ॥ ८९ ॥ मुनीनां प्रवरः श्रेष्ठः संजातश्च ततः परम् ॥ अद्यापि तिष्ठते मूर्तः स तत्रस्थो मुनीश्वरः ॥ ९० ॥ यस्तं प्रपूजयेद्भक्त्या स कविर्जायते ध्रुवम् ॥ अष्टम्यां च विशेषेण सम्यक्छ्रद्धासमन्वितः ॥ ९१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये मुखारतीर्थोत्पत्तिवर्णनंनाम चतुर्विंशत्युत्तरशततमोऽध्यायः ॥ १२४ ॥ ॥ सूत उवाच ॥ ॥ ततः कर्णोत्पलातीर्थं विख्यातं चास्ति शोभनम् ॥ यत्र स्नातो नरः सम्यङ्न वियोगमवाप्नुयात् ॥ १ ॥ कथंचिदपि चेष्टेन धनेनालिजनेन च ॥

१ लोहजंघेतिविप्रस्य–इ॰पा॰। २ प्रहाराः–मंत्रघोषजन्या आघाताः–इत्यर्थः।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पराक्रमेण धर्मेण कलत्रेण विशेषतः ॥ २ ॥ सत्यसंध इति ख्यातः पुरासीत्पृथिवीपतिः ॥ इक्ष्वाकुकुलसंभूतः सर्वरूपगुणैर्युतः ॥ ३ ॥ तस्य कर्णो
त्पलानाम जाता कन्या सुशोभना ॥ बहुपुत्रस्य चैका सा सर्वलक्षणलक्षिता ॥ ४ ॥ अथ तस्याः पिता नाम चक्रे द्वादशमे दिने ॥ संमंत्र्य ब्राह्मणैः
सार्धं भृत्यामात्यैर्मुहुर्मुहुः ॥ ५ ॥ यस्मात्कर्णोत्पला चेयं जाता मम कुमारिका ॥ तस्मात्कर्णोत्पलानाम जाता कन्या सुशोभना ॥ ६ ॥ बहु
पुत्रस्य चैका सा सर्वलक्षणलक्षिता ॥ तस्मात्कर्णोत्पलानाम जायतां द्विजसत्तमाः ॥ ७ ॥ कृतनामाऽथ सा बाला वृद्धिं याति दिनेदिने ॥
आह्लादकारिणी नित्यं कला चांद्रमसी यथा ॥ ८ ॥ अथ सा क्रमशः प्राप्ता यौवनं बंधुलालिता ॥ हस्ताद्धस्तं प्रगच्छंती सर्वेषां द्विजसत्तमाः ॥
॥ ९ ॥ अथ तां यौवनोपेतां दृष्ट्वा स पृथिवीपतिः ॥ चिंतयामास चित्तेन कस्येमां प्रददाम्यहम् ॥ १० ॥ न तस्याः सदृशः कश्चिद्वरोऽत्र धर
णीतले ॥ न स्वर्गे न च पाताले किं कृत्यं मेऽधुना भवेत् ॥ ११ ॥ स एवं बहुधा ध्यात्वा तदर्थं पृथिवीपतिः ॥ निश्चयं प्राकरोच्चित्ते प्रष्टव्योऽत्र
पितामहः ॥ १२ ॥ मयाद्य विषये चास्मिन्स देवः प्रेरयिष्यति ॥ तस्मै पुत्रीं प्रदास्यामि नान्यस्मै वै कथंचन ॥ १३ ॥ स एवं निश्चयं कृत्वा
तामादाय ततः परम् ॥ ब्रह्मलोकं जगामाथ प्रष्टुं तस्याः कृते वरम् ॥ १४ ॥ अथ यावत्स संप्राप्तो ब्रह्मलोकं नरेश्वरः ॥ तावत्संध्या समुत्पन्ना ब्राह्मी
ब्राह्मणसत्तमाः ॥ १५ ॥ एतस्मिन्नंतरे ब्रह्मा सायंतनक्रियोत्सुकः ॥ उपविष्टः समाधिस्थस्तत्कालं समपद्यत ॥ १६ ॥ सत्यसंधोऽपि तं दृष्ट्वा समा
धिस्थं पितामहम् ॥ समाध्यंतं प्रतीक्षन्स उपविष्टः समीपतः ॥ १७ ॥ ततो विलोक्य चात्मानमात्मनि प्रपितामहः ॥ पद्मे प्रवर्तिते सम्यगष्टपत्रे
हृदि स्थिते ॥ १८ ॥ कर्णिकामध्यगं दीप्तं बहुवर्णमतिस्थिरम् ॥ आनंदाश्रुपरिक्लिन्नवदनः पुलकांकितः ॥ १९ ॥ तत आचम्य प्रक्षाल्य चरणौ
सर्वतोदिशम् ॥ अपश्यत्प्रणतः सर्वैर्ब्रह्मलोकनिवासिभिः ॥ २० ॥ एतस्मिन्नंतरे राजा तामादाय शुभाननाम् ॥ नमस्कृत्य तया सार्धं ततः प्रोवाच
सादरम् ॥ २१ ॥ अहं देव समायातो मर्त्यलोकात्त्वदंतिकम् ॥ सत्यसंधो महीपाल आनर्तभुवि विश्रुतः ॥ २२ ॥ इयं कर्णोत्पलानाम मम कन्या
सुशोभना ॥ अस्या भुवि मया लब्धो न समोऽत्र पतिः क्वचित् ॥ २३ ॥ सदृशस्तेन चायातस्तव पार्श्वे सुरोत्तम ॥ तस्मान्मे ब्रूहि भर्तारमस्या
येन ददाम्यहम् ॥ २४ ॥ ॥ सूत उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा ततः प्रोवाच पद्मजः ॥ विहस्य सर्वदेवानां समाजे द्विजसत्तमाः ॥ २५ ॥
यदि पृच्छसि मे भूप कन्याधर्मपतिं प्रति ॥ तन्नैषा कस्यचिद्देया सांप्रतं शृणु कारणम् ॥ २६ ॥ आत्मश्रेणिप्रसूताय वयोज्येष्ठाय भूपते ॥ कन्या
देया च धर्माय यशसे कुलवृद्धये ॥ २७ ॥ सेयं तव सुता मर्त्ये ज्येष्ठभावं समाश्रिता ॥ सर्वेषां भूमिपालानां यत्तत्त्वं कारणं शृणु ॥ २८ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ममांतिकं प्रपन्नस्य तव जातं युगत्रयम् ॥ अतीता भूतले मर्त्या ये दृष्टाः प्राक्त्वया नृप ॥ २९ ॥ अन्या सृष्टिः समुत्पन्ना सांप्रतं धरणीतले ॥ न त्वं जानासि माहात्म्यान्मम लोकसमुद्भवात् ॥ ३० ॥ न देवा मानुषीं भार्यां कुर्वन्ति च कथंचन ॥ श्लेष्ममूत्रपुरीषाणां संस्थानं या विगर्हिता ॥ ३१ ॥ तस्मादत्रैव तिष्ठ त्वं सुतया सहितो नृप ॥ हस्त्यश्वादि च यत्किंचित्तत्सर्वं ते क्षयं गतम् ॥ ३२ ॥ पुत्राः पौत्रास्तथा भृत्या ये चान्ये बांधवास्तव ॥ ते सर्वे निधनं प्राप्ता ये चान्ये भवतेक्षिताः ॥ ३३ ॥ स तथेति प्रतिज्ञाय स्थितः पार्थिवसत्तमः ॥ यावत्तावत्सुदुःखार्ता रुदती साऽब्रवीत्सुता ॥ ३४ ॥ नाहं तात वसिष्यामि स्थानेस्मिन्ब्रह्मसंभवे ॥ सखीजनपरित्यक्ता बंधुवर्गविनाकृता ॥ ३५ ॥ तस्माद्यास्यामि तत्रैव यत्र सा जननी मम ॥ ताश्च सख्यः कृतानंदा याभिः संक्रीडितं मया ॥ ३६ ॥ भर्त्रा विनाकृता नाहं नयिष्ये कालसंस्थितिम् ॥ तस्मात्तत्र द्रुतं गच्छ यत्र मे जननी स्थिता ॥ ३७ ॥ तस्यास्तद्वचनं श्रुत्वा स्नेहार्द्रेण स चेतसा ॥ तामादाय ततः प्राप्तः स्वं देशं पार्थिवोत्तमः ॥ ३८ ॥ यावत्पश्यति तावत्स स्थलस्थाने जलाशयान् ॥ जलस्थानेषु संजाताः स्थलसंघाः सुदुर्गमाः ॥ ३९ ॥ अन्ये लोकास्तथा धर्मास्तेषां मध्ये व्यवस्थिताः ॥ पृच्छन्नपि न जानाति संबंधं केनचित्सह ॥ ४० ॥ तथा मर्त्यानिलस्पृष्टस्तत्क्षणात्स महीपतिः ॥ सा च कन्या जराग्रस्ता संजाता श्वेतमूर्द्धजा ॥ ४१ ॥ वलिभिः पूर्णितांगी च शीर्णदंता कुचच्युता ॥ अमनोज्ञा विरूपांगी चिपिटाक्षी द्विजोत्तमाः ॥ ४२ ॥ सोपि राजा तथाभूतो वेपमानः पदेपदे ॥ पप्रच्छ भूपतिः कोत्र देशः कोयं पुरं च किम् ॥ ४३ ॥ अथ प्रोचुर्जनास्तस्य देश आनर्त इत्ययम् ॥ अयं भूपोत्र विख्यातः सुधर्मज्ञो बृहद्बलः ॥ ४४ ॥ एतत्प्राप्तिपुरंनाम एषा साभ्रमती नदी ॥ गर्तातीर्थमिदं पुण्यमेतस्याः परिकीर्तितम् ॥ ४५ ॥ यत्रैते मुनयः शांता दांताश्चाष्टगुणे रताः ॥ तपोरता महाभागाः स्नानजप्यपरायणाः ॥ ॥ ४६ ॥ ततः स तु समाकर्ण्य रुरोद कृतनिःस्वनः ॥ स्वसुतां तां समालिंग्य दुःखशोकसमन्वितः ॥ ४७ ॥ तौ च वृद्धतमौ दृष्ट्वा रुदंतौ कृपयान्विताः ॥ सर्वे लोकाः समाजग्मुः पप्रच्छुश्च सुदुःखिताः ॥ ४८ ॥ किं त्वं वृद्ध सुदुःखार्तः प्ररोदिषि निरर्गलम् ॥ अनया वृद्धया सार्धं तस्मान्नः कारणं वद ॥ ४९ ॥ किं ते नष्टः प्रियः कश्चित्किं वा जातो धनक्षयः ॥ पराभूतोसि वा किं त्वं केनापि वद मा चिरम् ॥ ५० ॥ धर्मज्ञो दुष्टहंता च साधूनां पालने रतः ॥ राजा बृहद्बलोस्माकं येन ते कुरुते सुखम् ॥ ५१ ॥ ॥ सत्यसंध उवाच ॥ ॥ आनर्त्ताधिपतिश्चाहं सत्यसंध इति स्मृतः ॥ मम कर्णोत्पलानाम सुतेयं दयिता सदा ॥ ५२ ॥ सोहमस्याः प्रदानार्थं ब्रह्मलोकमितो गतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



प्रष्टुं पितामहं देवं स्थितस्तत्र मुहूर्तवत् ॥ ९३ ॥ ततो भूयः समायातो यावत्पश्यामि भूतलम् ॥ तावद्विलोमतां प्राप्तं सर्वं नो वेद्मि किञ्चन ॥ ९४ ॥ तच्छ्रुत्वा ते जना गत्वा विस्मयोत्फुल्ललोचनाः ॥ बृहद्बलाय तत्सर्वमाचख्युस्तुष्टिसंयुताः ॥ ९५ ॥ सोऽपि तत्सर्वमाकर्ण्य ततः शीघ्रतरं गतः ॥ पद्मामेव स्थितो यत्र सत्यसन्धो महीपतिः ॥ ९६ ॥ ततस्तं प्रणिपत्योच्चैः कृतांजलिपुटः स्थितः ॥ स्वागतं ते महीपाल भूयः सुस्वागतं च ते ॥ ९७ ॥ इदं राज्यं निजं भूयो मया भृत्येन सादरम् ॥ कुरुष्व स्वेच्छया देहि दानानि विविधानि च ॥ ९८ ॥ ततस्तं च स मालिंग्य शिरस्याघ्राय चासकृत् ॥ उवाचाश्रुपरिक्लिन्नवदनो गद्गदाक्षरम् ॥ ५९ ॥ वत्स चीर्णं मया राज्यं दानं दत्तं पृथग्विधम् ॥ वाजिमेधमुखैर्यज्ञैरिष्टं संपूर्णदक्षिणैः ॥६०॥ तस्मात्तपश्चरिष्यामि सुतया चानया सह ॥ यथैषा लभते भूयस्तारुण्यं प्राक्तनं शुभम् ॥६१॥ ॥ बृहद्बल उवाच ॥ ॥ पारंपर्येण राजेंद्र मयैतत्सकलं श्रुतम् ॥ सत्यसंधो महीपालः कन्यामादाय निर्गतः ॥ ६२ ॥ कुत्रचिन्न समायातः स भूयोऽपि पुरोत्तमे ॥ ततस्तत्सचिवै राज्यं प्रतिपाल्य चिरं नृप ॥ अभिषिक्तस्ततः पुत्रः सुहयोनाम विश्रुतः ॥ ६३ ॥ तस्याहं क्रमशो जातः सप्तसप्ततिमो विभो ॥ पुरुषस्तव वंशस्य समुद्भूतो महीपतिः ॥ ६४ ॥ तस्मादत्रैव कल्याणे स्थानेऽस्मिन्मेध्यतां गते ॥ गर्तातीर्थे कुरु विभो तपस्त्वमनया सह ॥ ६५ ॥ येन ते चरणौ नित्यं प्रणिपत्य त्रिसंधिजम् ॥ श्रेयः प्राप्नोम्यसंदिग्धं प्रसादः क्रियतामिति ॥ ६६ ॥ ॥ सत्यसंध उवाच ॥ ॥ हाटकेश्वरजे क्षेत्रे मयासीत्स्थापितं पुरा ॥ लिंगं वृषभनाथस्य तावदस्ति सुपुत्रक ॥ ६७ ॥ तत्तस्याराधनं नित्यं करिष्यामि दिवानिशम् ॥ तस्मात्प्रापय मां तत्र अनया सुतया सह ॥ ६८ ॥ एवं तयोः प्रवदतोरन्योन्यं भूमिपालयोः ॥ गर्तातीर्थात्समायाता ब्राह्मणाः कौतुकान्विताः ॥ श्रुत्वा भूमिपतिं प्राप्तं चिरंतनगुरुं शुभम् ॥ ६९ ॥ ततः स पार्थिवस्तेषां दत्त्वार्घं प्रांजलिः स्थितः ॥ प्रोवाच स्वर्गवृत्तांतमास्यतामिति सादरम् ॥ ७० ॥ अथ ते ब्राह्मणाः सर्वे यथाज्येष्ठं यथासुखम् ॥ उपविष्टा नरेंद्रस्य चतुर्दिक्षु सुविस्मिताः ॥ पप्रच्छुस्तं च भूपालं वार्तां ब्रह्मगृहोद्भवाम् ॥ ७१ ॥ यथा स तत्र निर्यात आगतश्च यथा पुरा ॥ आलापाः पद्मयोनेश्च यथा जातास्त्वनेकशः ॥ ७२ ॥ ततः कथांतमासाद्य सत्यसंधो महीपतिः ॥ किंचिदासाद्य तं प्राह समीपस्थं बृहद्बलम् ॥ ७३ ॥ मया इष्टं मखैश्चित्रैरनेकैर्भूरिदक्षिणैः ॥ दानानि च विचित्राणि येषां संख्या न विद्यते ॥ ७४ ॥ एकदाहं गतः पुत्र चमत्कारपुरोत्तमे ॥ दृष्टं मया पुरं तच्च समंताद्ब्राह्मणैर्वृतम् ॥ ७५ ॥ जपस्वाध्यायसंपन्नैरग्निहोत्रपरायणैः ॥ गृहस्थधर्मसंपन्नैर्लोकद्वयफलान्वितैः ॥ ७६ ॥ ततश्च चिंतितं चित्ते स धन्यो मम पूर्वजः ॥ येनैषोपार्जिता कीर्तिः शाश्वती क्षयवर्जिता ॥ ७७ ॥ तस्मा



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दहमपि स्थाप्य पुरमीदृक्समुच्छ्रितम् ॥ ब्राह्मणेभ्यः प्रदास्यामि तत्कीर्तिपरिवृद्धये ॥ ७८ ॥ एवं चिंतयमानस्य मम नित्यं महीपते ॥ अवांतरेण संजातं ब्रह्मलोकप्रयाणकम् ॥ ७९ ॥ एतदेकं हि मे चित्ते पश्चात्तापकरं स्थितम् ॥ नान्यत्किंचिन्महीपाल कृतकृत्यस्य सर्वतः ॥ ८० ॥ तस्मात्प्रार्थय विप्रेंद्रान्कांश्चिदेषां महात्मनाम् ॥ येन यच्छामि सुस्थानं कृत्वा तेभ्यस्तवाज्ञया ॥ ८१ ॥ ततः स प्रार्थयामास तदर्थं ब्राह्मणोत्तमान् ॥ ममोपरि दयां कृत्वा क्रियतां भोः परिग्रहः ॥ ८२ ॥ अस्य भूपस्य सद्वृत्त्या यच्छतः पुरमुत्तमम् ॥ अहं वः पालयिष्यामि सर्वे मद्वंशजाश्च ते ॥ ॥ ८३ ॥ ततः कांश्चित्सुकृच्छ्रेण समानीय बृहद्बलः ॥ राज्ञे निवेदयामास एतेभ्यो दीयतामिति ॥ ८४ ॥ ततः प्रक्षाल्य सर्वेषां पादान्स पृथिवीपतिः ॥ सत्यसंधो ददौ तेभ्यः पुरार्थं भूमिमुत्तमाम् ॥ ८५ ॥ बृहद्बलस्य चादेशं ददौ संप्रस्थितः स्वयम् ॥ त्वयैतद्योग्यतां नेयं पुरं परपुरंजय ॥ ८६ ॥ गत्वा च स तया सार्धं तत्क्षेत्रं हाटकेश्वरम् ॥ तल्लिंगं प्राप्य संहृष्टश्चिरं तेपे तपस्ततः ॥ ८७ ॥ सापि कर्णोत्पला प्राप्य किंचित्पुण्यं जलाशयम् ॥ तपस्तेपे प्रतिष्ठाप्य गौरीं श्रद्धासमन्विता ॥ ८८ ॥ एतस्मिन्नंतरे राजा कालधर्ममुपागतः ॥ आनर्ताधिपतिर्युद्धे हतः पुत्रैः समन्वितः ॥ ८९ ॥ ततस्ते ब्राह्मणाः सर्वे गर्तातीर्थसमुद्भवाः ॥ सत्यसंधं समभ्येत्य प्रोचुर्दुःखसमन्विताः ॥ ९० ॥ परिग्रहः कृतोऽस्माभिः केवलं पृथिवीपते ॥ न च किंचित्फलं जातं वृत्तिजं नः पुरोद्भवम् ॥ ९१ ॥ तस्मात्कुरु स्थितिं त्वं च स्वधर्मपरिवृद्धये ॥ येन तद्वर्तनोपायो ह्यस्माकं नृपसत्तम ॥ ९२ ॥ राजा बृहद्बलो युद्धे कालधर्ममुपागतः ॥ यस्त्वया दर्शितोऽस्माकं वृत्त्यर्थं नृपसत्तम ॥ ९३ ॥ ॥ सत्यसन्ध उवाच ॥ ॥ संन्यस्तोऽहं द्विजश्रेष्ठा वृत्तिं कर्तुं न च क्षमः ॥ यदि मे स्यात्पुमान्कश्चिदन्वयेऽपि न संशयः ॥ ९४ ॥ तस्माद्व्रजथ हर्म्यं स्वं प्रसादः क्रियतां मम ॥ अभाग्यैर्भवदीयैश्च हतो राजा बृहद्बलः ॥ ९५ ॥ एवमुक्ताश्च ते विप्रा मत्वा तथ्यं च तद्वचः ॥ स्वस्थानं त्वरिता जग्मुः सोऽपि चक्रे तपश्चिरम् ॥ ९६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये सत्यसन्धनृपतिवृत्तान्तवर्णनंनाम पंचविंशत्यधिकशततमोऽध्यायः ॥ १२५ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एवं तस्य तपःस्थस्य पुत्र्या सह द्विजोत्तमाः ॥ आजग्मुर्ब्राह्मणाः सर्वे चमत्कारपुरोद्भवाः ॥ १ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ सन्देहेषु च सर्वेषु विवादेषु विशेषतः ॥ पृष्टश्च प्रार्थितश्चैव निजराज्यस्य रक्षणे ॥ अन्य अभावात्पार्थिवेन्द्रस्य संजातश्च पराभवः ॥ २ ॥ ततश्च द्विजवर्यैः स संन्यस्तः पृथिवीपतिः ॥

१ एवं तस्य नरेन्द्रस्य तपःस्थस्य द्विजोत्तमाः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



स्मिन्दिवसे प्राह कृतांजलिपुटः स्थितः ॥ ३ ॥ ॥ राजोवाच ॥ ॥ अनर्होऽहं द्विजश्रेष्ठाः संदेहं हर्तुमेव वः ॥ रक्षां कर्तुं विशेषेण त्यक्त
शस्त्रोऽस्मि चाधुना ॥ ४ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ सर्वे वयं महाराज भूपस्याप्यधिका यतः ॥ अहंकारेण दर्पेण निजं स्थानं समा
श्रिताः ॥ ५ ॥ न कस्यचिन्महाराज कदापि च कथंचन ॥ वर्तनायाश्च सन्देहः स्थानकृत्येऽपि संस्थितः ॥ ६ ॥ असंख्याता कृता वृत्तिः
पुराऽस्माकं महात्मना ॥ ततः सा वृद्धिमानीता तत्परैः पार्थिवोत्तमैः ॥ ७ ॥ त्वया चैव विशेषेण यावद्राजा बृहद्बलः ॥ आनर्तविषये राजा यो यः
स्यात्स प्रयच्छति ॥ ८ ॥ सर्वां वृत्तिं गृहस्थानां यथायोग्यं प्रयत्नतः ॥ तवाग्रे किं वयं ब्रूमस्त्वं वेत्सि सकलं यतः ॥ ९ ॥ यथा वृत्तिः पुरा दत्ता
यथा संरक्षिता त्वया ॥ तस्माच्चिन्तय राजेन्द्र स्थानं वर्तनसंभवम् ॥ उपायं येन मर्यादा वृत्तिस्तस्मात्सुखेन तु ॥ १० ॥ ततः स सुचिरं ध्यात्वा
गर्तातीर्थसमुद्भवान् ॥ आकार्योपमन्युवंशस्य संभवान्वेदपारगान् ॥ ११ ॥ प्रणिपातं प्रकृत्वाथ ततः प्रोवाच सादरम् ॥ मदीयस्थान
संस्थानां ब्राह्मणानां विशेषतः ॥ १२ ॥ सर्वकृत्यानि कार्याणि भृत्यवद्विनयान्वितैः ॥ नित्यं रक्षा विधातव्या युष्मदीयं वचोखिलम् ॥ १३ ॥
एते संपालयिष्यन्ति मर्यादाकारमुत्तमम् ॥ सन्देहेषु च सर्वेषु विवादेषु विशेषतः ॥ १४ ॥ राजकार्येषु चान्येषु एते दास्यन्ति निर्णयम् ॥ युष्म
दीयं वचः श्रुत्वा शुभं वा यदि वाऽशुभम् ॥ १५ ॥ एते पाल्याः प्रसादेन पुष्टिं नेयाश्च शक्तितः॥ ईर्ष्यां सर्वां परित्यज्य मदीयस्थानवृद्धये ॥ १६ ॥
बाढमित्येव तैः प्रोक्तः स राजा ब्राह्मणोत्तमान् ॥ चमत्कारपुरोद्भूतान्भूयः प्रोवाच सादरम् ॥ १७ ॥ युष्माकं वर्तनार्थाय सर्वकृत्येषु सर्वदा ॥ एते
विप्रा मया दत्ता गर्तातीर्थसमुद्भवाः ॥ १८ ॥ एतेषां वचनात्सर्वं युष्मदीयं प्रजायताम् ॥ प्रतिष्ठा जायते नूनं चातुश्चरणसूचिता[1] ॥ १९ ॥
नान्यथा ब्राह्मणश्रेष्ठाः स्वल्पं वा यदि वा बहु ॥ प्रोक्तं लक्षमितैरन्यैर्युष्मदीयपुरोद्भवैः ॥ २० ॥ ॥ सूत उवाच ॥ ॥ ततस्ते ब्राह्मणा हृष्टास्ता
नादाय द्विजोत्तमान् ॥ तेषां मतेन चक्रुश्च सर्वकृत्यानि सर्वदा ॥ २१ ॥ ततस्तत्र पुरे जाता मर्यादा धर्मवर्द्धिनी ॥ सर्वकृत्येषु सर्वेषां तथा वृद्धिः
पुरस्य च ॥ २२ ॥ तेऽपि तेषां प्रसादेन गर्त्तातीर्थभवा द्विजाः ॥ परां विभूतिमास्थाय मोदन्ते सुखसंयुताः ॥ २३ ॥ कस्यचित्त्वथ कालस्य स
राजा तत्पुरोत्तमम् ॥ समभ्येत्य द्विजान्सर्वांस्ततः प्रोवाच सादरम् ॥२४॥ युष्मदीयप्रसादेन क्षेत्रेऽत्र सुमहत्तपः ॥ कृतं स्वर्गं प्रयास्यामि सांप्रतं तु
द्विजोत्तमाः ॥ २५ ॥ नास्माकमन्वये कश्चित्सांप्रतं वर्तते नृपः ॥ तस्याहं लिंगमेतद्वै दर्शयामि द्विजोत्तमाः ॥२६॥ पूजार्थं चापि वृत्त्यर्थं भोगार्थं

१ चातुश्चरणसूचिता—चतुर्वेदसूचिता—इत्यर्थः । चातुश्चरणसूचिका—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च विशेषतः ॥ तस्माद्युष्माभिरेवास्य पूजा कार्या प्रयत्नतः ॥ रथयात्रा विशेषेण दया कृत्वा ममोपरि ॥ २७ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ सप्त विंशतिलिंगानि यथेष्टानि महीतले ॥ चमत्कारसुतानां च पूज्यंते सर्वदैव तु ॥ २८ ॥ अष्टाविंशतिमं तद्वदेतल्लिंगं तवोद्भवम् ॥ सर्वदा पूजयिष्यामो निश्चिन्तो भव पार्थिव ॥ २९ ॥ अस्य यात्रां करिष्यामः कार्तिके मासि सर्वदा ॥ बलिपूजोपहारांश्च गीतवाद्यानि शक्तितः ॥ ३० ॥ एवमुक्तः स तैर्हृष्टो गत्वात्मीयं तदाश्रमम् ॥ स्नापयित्वाथ तल्लिंगं पूजां चक्रे प्रभक्तितः ॥ ३१ ॥ ॥ सूत उवाच ॥ ॥ एवं समर्पितं लिंगं तेन तद्वरसंभवम् ॥ सर्वेषां ब्राह्मणेंद्राणां वंशोच्छेदे स्थिते द्विजाः ॥ ३२ ॥ सकलं कार्तिकं मर्त्यो यस्तच्छ्रद्धासमन्वितः ॥ स्नापयेत्पूजयेच्चापि स नूनं मुक्तिमाप्नुयात् ॥ ३३ ॥ सोमस्य दिवसे प्राप्ते वर्षं यावत्कृतक्षणः ॥ तस्य पूजां करोत्येवं स्नापयित्वा विधानतः ॥ सोऽपि मुक्तिं व्रजेन्मर्त्य एतत्तातान्मया श्रुतम् ॥ ३४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये सत्यसंधेश्वरमाहात्म्यवर्णनंनाम षड्विंशत्यधिकशततमोऽध्यायः ॥ १२६ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ या सा कर्णोत्पलानाम त्वयास्माकं प्रकीर्तिता ॥ किञ्चिज्जलाश्रयं प्राप्य तपस्तपति संस्थिता ॥ तस्याः सर्वं समाचक्ष्व यथा तपसि सा स्थिता ॥ १ ॥ ॥ सूत उवाच ॥ ॥ गौरीपादकृतस्थाना श्रद्धया परया युता ॥ तात्तुष्टिं गता देवी गिरिजा शंकरप्रिया ॥ २ ॥ ततः प्रोवाच ते पुत्रि तुष्टाहं वांछितं वद ॥ येन यच्छाम्यसंदिग्धं यद्यपि स्यात्सुदुर्लभम् ॥ ३ ॥ ॥ कर्णोत्पलोवाच ॥ ॥ मम पत्युः कृते देवि मम तातः सुदुःखितः ॥ राज्याद्भ्रष्टः सुखाच्चापि कुटुंबेन विवर्जितः ॥ ४ ॥ ततश्चैव तपस्तेपे वैराग्यं परमं गतः ॥ अहं वार्द्धक्यमापन्ना कौमार्येऽपि च संस्थिता ॥ ५ ॥ तस्माद्भवतु मे भर्ता कश्चिद्रूपोत्कटः स्मृतः ॥ सर्वेषां देवमर्त्यानां त्वत्प्रसादात्सुरेश्वरि ॥६॥ तथा स्यात्परमं रूपं तारुण्यं त्वत्प्रसादतः ॥ यथास्य जायते सौख्यं तापसस्यापि मे पितुः ॥ ७ ॥ ॥ देव्युवाच ॥ ॥ माघमासतृतीयायां शनैश्चरदिने शुभे ॥ नक्षत्रे वसुदैवत्ये रूपं ध्यात्वाथ यौवनम् ॥ ८ ॥ त्वया स्नानं प्रकर्तव्यं सुपुण्येऽत्र जलाशये ॥ ततो दिव्यवपुर्भूत्वा यौवनेन समन्विता ॥ भविष्यसि न संदेहः सत्यमेतन्मयोदितम् ॥ ९ ॥ अन्यापि या महाभागे नारी स्नानं करिष्यति ॥ तस्मिन्नहनि साप्येवं रूपयुक्ता भविष्यति ॥ १० ॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वाथ सा देवी गता चादर्शनं ततः ॥ सापि चान्वेषयामास तृतीयां शनिना सह ॥ ११ ॥ ततः कतिपयाहस्य जाता सा योगसंयुता ॥ तृतीया या वसुदेवात्मकेनैव नक्षत्रेण प्रयत्नतः ॥ ध्यायमाना च तां देवीं सर्वकामप्रदायिनीम् ॥ १२ ॥ ततः सा रूपसौभाग्यं यौवनं वांछितं पतिम् ॥ ध्यायमाना जले तस्मिन्नर्द्धरात्रे विवेश च ॥ १४ ॥ यथोक्ता च तया देव्या पुरा द्विजाः ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ततो दिव्यवपुर्भूत्वा यौवनेन समन्विता ॥ निष्क्रांता सलिलात्तस्माज्जनविस्मयकारिणी ॥ १५ ॥ एतस्मिन्नंतरे प्राप्तो गौरीवाक्यप्रबोधितः ॥ तदर्थं भगवान्कामः पत्न्यर्थं प्रीतिसंयुतः ॥ अब्रवीच्च महाभागे कामोहं स्वयमागतः ॥ १६ ॥ पार्वत्यादेशिता भार्या तस्मान्मे भव मा चिरम् ॥ ॥ १७ ॥ यस्मात्प्रीत्या समायातस्तवांतिकमहं शुभे ॥ तस्मात्प्रीतिरिति ख्याता मम भार्या भविष्यसि ॥ १८ ॥ ॥ कर्णोत्पलोवाच ॥ ॥ यद्येवं स्मर मत्तातं तं गत्वा प्रार्थय स्वयम् ॥ स्वच्छंदा स्याद्यतः कन्या न कथंचित्प्रवर्तिता ॥ १९ ॥ य एष दृश्यते रम्यः प्रासादो नाति दूरतः ॥ अस्यांते तिष्ठतेऽस्माकं तातस्तपसि संस्थितः ॥ २० ॥ अत्राहं पूर्वतो गत्वा तस्य तिष्ठामि चांतिके ॥ भवानागत्य पश्चाच्च प्रार्थ यिष्यति मां ततः ॥ २१ ॥ बाढमित्येव कामोक्ते गता सा तत्समीपतः ॥ प्रणिपत्य ततः प्राह दिष्ट्या तात मया पुनः ॥ २२ ॥ संप्राप्तं यौवनं कांतं समाराध्य हरप्रियाम् ॥ तस्मात्कुरु विवाहं मे हृत्स्थं सुखमवाप्नुहि ॥ २३ ॥ मदर्थे प्रेषितो भर्ता तया देव्याऽतिसुन्दरः ॥ पुष्प चापः स्वयं प्राप्तः सोऽपि तात तवांतिकम् ॥ २४ ॥ अथ तां स समालोक्य स्वां सुतां यौवनान्विताम् ॥ हर्षेण महता युक्तां कांतयुक्तां विशेषतः ॥ अब्रवीदद्य मे पुत्रि संजातं तपसः फलम् ॥ २५ ॥ जीवितस्य च कल्याणि यत्त्वं प्राप्ता नवं वयः ॥ भर्तारं च तथाभीष्टं देव्या दत्तं मनोभवम् ॥ २६ ॥ एतस्मिन्नंतरे कामस्तस्यांतिकमुपाद्रवत् ॥ अब्रवीद्देहि मे भूप स्वां कन्यां चारुहासिनीम् ॥ २७ ॥ अस्या अर्थेऽह मादिष्टः स्वयं गौर्या नृपोत्तम ॥ कामदेवइति ख्यातस्त्रैलोक्यं येन मोहितम् ॥ २८ ॥ ततस्तामर्पयामास तां कन्यां स महीपतिः ॥ कृत्वाग्निं साक्षिणं वाक्याद्ब्राह्मणानां द्विजोत्तमाः ॥ २९ ॥ सा चास्य चाभवत्प्रीतिस्थानं यस्मात्सुलोचना ॥ रतेरनंतरा तस्मात्प्रीतिनामाऽभव च्छुभा ॥ ३० ॥ एवं तया तपस्तप्तं तस्मात्तत्र जलाशये ॥ तन्नाम्ना ख्यातिमायातं समस्तेऽत्र महीतले ॥ ३१ ॥ सकलं माघमासं च या स्त्री स्नानं समाचरेत् ॥ पुमान्वा प्रातरुत्थाय स प्रयागफलं लभेत् ॥ ३२ ॥ रूपवाञ्जायते दक्षः सदा जन्मनि जन्मनि ॥ न वियोगमवाप्नोति कदाचिद्बांधवैः सह ॥ ३३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये कर्णोत्पलातीर्थमाहात्म्यवर्णनं नाम सप्तविंशत्युत्तरशततमोऽध्यायः ॥ १२७ ॥ ॥ छ ॥ ॥ ॥ सूत उवाच ॥ ॥ सत्यसन्धोपि हृष्टात्मा सुतां दृष्ट्वा सुखान्विताम् ॥ अभीष्टपति ना युक्तां कृतकृत्यो बभूव ह ॥ १ ॥ ततस्तस्यैव लिंगस्य दक्षिणां मूर्तिमाश्रितः ॥ दृढं पद्मासनं कृत्वा सम्यग्ध्यानपरायणः ॥ २ ॥ आत्मा



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमात्मनैवाथ ब्रह्मद्वारेण संस्थितः ॥ ततो निःसारयामास पुलकेन समन्वितः ॥ ३ ॥ अथ ते ब्राह्मणास्तस्य चमत्कारपुरोद्भवाः ॥ देवता दर्शनार्थाय प्राप्ता दृष्ट्वा कलेवरम् ॥ ४ ॥ अप्रियं तेजसा हीनं मृतमस्पृश्यतां गतम् ॥ लिंगस्य नातिदूरस्थं दाह्यार्थं यत्नमास्थिताः ॥ ५ ॥ यावद्गुर्वीं चितां कृत्वा तमन्वेष्टुं समुद्यताः ॥ तावन्नष्टं शवं तच्च ज्ञायते नैव कुत्रचित् ॥ ६ ॥ ततश्च विस्मयाविष्टास्तं प्रशंसासमन्वितैः ॥ वचनैर्बहुशो भूयो विकथ्य च मुहुर्मुहुः ॥ ७ ॥ ततस्तस्योत्थलिंगस्य सर्वं पूजादिकं च यत् ॥ सर्वे निरूपयामासुः सप्तविंशतिमध्यतः ॥ ८ ॥ लिंगानां तद्भवेन्नित्यं सत्यसंधस्य भूपतेः ॥ कामदं भक्तजंतूनां सर्वपातकनाशनम् ॥ ९ ॥ ॥ ऋषय ऊचुः ॥ ॥ चमत्कारनरेंद्रस्य वंशे क्षीणे महामते ॥ आनर्त्ताधिपतिः कोऽन्यस्तत्र राजा बभूव ह ॥ १० ॥ ॥ सूत उवाच ॥ ॥ बृहद्बले हते भूपे संग्रामे द्विजसत्तमाः ॥ पुत्रबंधुसमायुक्ताः सर्वे लोकाः समाययुः ॥ ११ ॥ यत्रस्थः स महीपालः सत्यसंधस्तपोन्वितः ॥ शोकोद्विग्नास्ततः प्राहुस्तं भूपं रहसि स्थितम् ॥ १२ ॥ क्षीणोऽयं तावको वंशो न कश्चिद्विद्यते यतः ॥ दायादोऽपि कथं पृथ्वी संप्रतीयं भविष्यति ॥ १३ ॥ अराजके नृपश्रेष्ठ मात्स्यो न्यायः प्रवर्तते ॥ राष्ट्रे चैव पुरे चैव ग्रामे चैव विशेषतः ॥ १४ ॥ परदाररता ये च ये च तस्करवृत्तयः ॥ सर्वे राजभयाद्राजन्मर्यादां पालयंति वै ॥ १५ ॥ तस्मात्त्वं तप उत्सृज्य राज्यं पूर्वक्रमागतम् ॥ कुरु राज्यं तथा दारान्पुत्रार्थं प्राप्य मा चिरम् ॥ १६ ॥ ॥ राजोवाच ॥ ॥ संन्यस्तोऽहं द्विजश्रेष्ठा न राज्यं कर्तुमुत्सहे ॥ न सुतानां न दाराणां संग्रहं च कथंचन ॥ १७ ॥ तत्पुत्रार्थं प्रवक्ष्यामि युष्माकं स्वामिनः कृते ॥ उपायं येन राजा स्यादानर्त्तो लोकपालकः ॥ १८ ॥ जामदग्न्येन रामेण यदा क्षत्रं निपातितम् ॥ गर्भस्थमपि कार्त्स्न्येन कोपोपहतचेतसा ॥ १९ ॥ ततः क्षत्रियभार्याः प्रागृतुस्नानात्समाययुः ॥ ब्राह्मणान्पुत्रजन्मार्थं न कामार्थं कथंचन ॥ २० ॥ ततः पुत्राः समुत्पन्नास्तेजोवीर्यसमन्विताः ॥ क्षेत्रजा भूमिपालानां संजाताश्च महीक्षितः ॥२१॥ तस्माद्बृहद्बलस्यैता भार्यास्तिष्ठंति या जनाः ॥ ब्राह्मणांस्ता उपागम्य ऋतुस्नाता यथोचितान् ॥ २२ ॥ लभिष्यंति च पुत्रांस्तास्तेभ्यः क्षत्रियपुंगवान् ॥ ये भूमिं पालयिष्यंति पालयिष्यंति च प्रजाः ॥ २३ ॥ तथाऽत्रास्ति शुभं कुण्डं वासिष्ठं पुत्रजन्मदम् ॥ यत्र स्नाता ऋतौ नारी सद्यो गर्भवती भवेत् ॥ अमोघरेताः कांता च स्नानादत्र प्रजायते ॥ २४ ॥ ये पूर्वं क्षत्रिया जाता ब्राह्मणैः क्षत्रिणीषु च ॥ ते सर्वे तत्प्रभावेन संजाता नात्र संशयः ॥ २५ ॥ ययायया द्विजो यश्च क्षत्रिण्याऽभूद्वृतः पुरा ॥ तया सह समागत्य स्नातं मन्त्रपुरस्कृतम् ॥ २६ ॥

१ मात्स्यो न्यायः—'प्रबलैर्दुर्बला घात्या मात्स्यो न्यायोऽयमुच्यते'—इति मात्स्यन्यायस्य लक्षणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सकृन्मैथुनसंसर्गात्ततस्तीर्थप्रभावतः ॥ सर्वासां यत्सुता जाता दुहिता न कथंचन ॥ २७ ॥ ये केचित्पुत्रदा मंत्राश्चातुश्चरणसंभवाः ॥ ते सर्वेऽत्र
वसिष्ठेन प्रयुक्ताः क्षत्रमिच्छता ॥ २८ ॥ दंपत्योः स्नानमात्रेण जातेऽत्र स्यात्सुपुत्रकः॥ तस्मात्सुपुत्रदंनाम कुण्डमेतन्निगद्यते ॥ २९ ॥ तस्माद्भार्याः
समस्तास्ता बृहद्बलसमुद्भवाः ॥ अत्र स्नानं प्रकुर्वंतु यथोक्तविधिना जनाः ॥ ३० ॥ नैव किंचिदसत्यं स्यान्न च निंदाकरं तथा ॥ श्रूयते च यतः
श्लोकः पूर्वाचार्यैरुदाहृतः ॥ ३१ ॥ अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुच्छ्रितम् ॥ तेषां सर्वत्रगं तेजः स्वासु योनिषु शाम्यति ॥ ३२ ॥ तच्छ्रुत्वा
ते जनाः सर्वे सचिवानां वचोखिलम् ॥ तदाचख्युर्द्रुतं गत्वा सत्यसंधस्य भूपतेः ॥ ३३ ॥ ततस्ताः सर्वशो दारा ब्राह्मणानतिसुन्दरान् ॥ ऋतुस्नाताः
समाजग्मुर्नृपपत्न्यः सुहर्षिताः ॥ ३४ ॥ यत्र तत्पुत्रदं तीर्थं वसिष्ठेन विनिर्मितम् ॥ तत्र स्नात्वा सकृत्संगं समासाद्य द्विजोद्भवम् ॥ ३५ ॥ सर्वास्ताः
पुत्रवत्यश्च संजाता द्विजसत्तमाः ॥ आसीत्तस्य नरेंद्रस्य शतं पंचभिरन्वितम् ॥ ३६ ॥ तासां समभवद्विप्राः शतं पंचाधिकं तथा ॥ ३७ ॥ प्रत्येकं
वरपुत्राणां वंशवृद्धिकरं परम् ॥ आनंदजननं सम्यक्सर्वेषां राष्ट्रवासिनाम् ॥ ३८ ॥ तत्र श्रेष्ठोऽभवत्पुत्रो य आनर्तपतिर्भुवि ॥ अटोनाम सुविख्यातः
सर्वशत्रुनिबर्हणः ॥ ३९ ॥ अटेश्वरइति ख्यातो येन देवोऽत्र निर्मितः ॥ सुभक्त्या येन दृष्टेन वंशोच्छित्तिर्न जायते ॥ ४० ॥ ॥ ऋषय ऊचुः ॥ ॥
कस्मात्तस्य कृतं नाम एतच्चाऽट इति स्मृतम् ॥ अन्वयेन परित्यक्तं तस्मात्कीर्तय सूतज ॥४१॥ सचिवैर्ब्राह्मणैर्वापि तस्यैतन्नाम निर्मितम् ॥ मात्रा
वा तत्समाचक्ष्व परं कौतूहलं हि नः ॥ ४२ ॥ ॥ सूत उवाच ॥ ॥ न मात्रा तत्कृतं नाम न विप्रैः सचिवैर्नृप ॥ तत्कृतं देवदूतेन व्योमस्थेन द्वि
जोत्तमाः ॥ ४३ ॥ यथा तथा प्रवक्ष्यामि श्रोतव्यं सुसमाहितैः ॥ यथा स भूपतिर्जातो दशार्णाधिपतेः सुता ॥ ४४ ॥ सा रूपयौवनोपेता रूपाढ्यं
प्राप्य सद्द्विजम् ॥ प्रस्थिता स्नातुकामाथ पुत्रतीर्थे मृगेक्षणा ॥ ४५ ॥ सहिता तेन विप्रेण कंदर्पप्रतिमेन च ॥ अथ ताभ्यां महात्रागो मिथः संदर्श
नात्स्थितः ॥ ४६ ॥ तादृङ्मात्रं सुकृच्छ्रेण प्राप्तं तीर्थं सुतप्रदम् ॥ ततः स्नात्वा जले तस्मिन्निष्क्रांतौ तौ सुकामुकौ ॥४७॥ व्रजमानौ च मार्गेऽपि
कामधर्ममुपागतौ ॥ अत्यौत्सुक्यात्सुसंहृष्टौ लज्जां त्यक्त्वा सुदूरतः ॥ ४८ ॥ निंदमानस्य लोकस्य विच्छेदवचनैस्तदा ॥ वीर्योत्सर्गेऽथ संजाते
यावदुत्तिष्ठते द्विजः ॥ ४९ ॥ तावदाकाशगा वाणी सहसा देवनिर्मिता ॥ अटता राजमार्गेण विप्रेणानेन वै यतः ॥ ५० ॥ उत्पादितस्तु पुत्रोऽय ॥१४३॥
मौत्सुक्याद्ब्राह्मणेन तु ॥ अटाख्यो भूपतिस्तस्माल्लोके ख्यातो भविष्यति ॥ ५१ ॥ दीर्घायुर्बहुपुत्रश्च शत्रुपक्षक्षयावहः ॥ एतस्मात्कारणाद्विप्रा
अटाख्यः स बभूव ह ॥ ५२ ॥ स्ववंशोद्धरचंद्रोऽत्र वांछितार्थप्रदोऽर्थिनाम् ॥ तेनैतत्क्षेत्रमासाद्य स्थापितं लिंगमुत्तमम् ॥ स्वनाम्ना ब्राह्मणश्रेष्ठाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वदेष्टप्रदं नृणाम् ॥ ९३ ॥ यस्तन्माघचतुर्दश्यां पूजयेच्छ्रद्धयान्वितः ॥ न तस्य जायते किंचिद्दुःखं संतानसंभवम् ॥ ९४ ॥ अपि वर्षशता नारी स्नात्वा कुण्डे सुतप्रदे ॥ अटेश्वरं ततः पश्येच्छिवभक्तिपरायणा ॥ ९५ ॥ सद्यः पुत्रमवाप्नोति[1] वंशवृद्धिकरं परम् ॥ तत्प्रसादान्न संदेहः कार्तिकेय वचो यथा ॥ ९६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्येऽटेश्वरोत्पत्तिमाहात्म्यवर्णनंनामाष्टाविंशत्युत्तरशततमोऽध्यायः ॥ १२८ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ तथान्योऽपि च तत्रास्ति याज्ञवल्क्यसमुद्भवः ॥ आश्रमो लोकविख्यातो मूर्खाणामपि सिद्धिदः ॥ १ ॥ यत्र तप्त्वा तपस्तीव्रं याज्ञवल्क्येन धीमता ॥ संप्राप्ता निखिला वेदा गुरुणाऽपहृताश्च ये ॥ २ ॥ ॥ ऋषय ऊचुः ॥ ॥ कोऽसौ गुरुरभूत्तस्य याज्ञवल्क्यस्य धीमतः ॥ पाठयित्वा पुनर्येन हृता वेदा महात्मना ॥ ३ ॥ किमर्थं च समाचक्ष्व सूतपुत्रात्र विस्तरात् ॥ कौतुकं परमं जातं सर्वेषां नो द्विजन्मनाम् ॥ ४ ॥ ॥ सूत उवाच ॥ ॥ आसीद्ब्राह्मणशार्दूलः शाकल्य इति विश्रुतः॥ भार्गवान्वयसंभूतो वेदवेदांगपारगः ॥ ५ ॥ बृहत्कल्पे पुरा विप्रा वर्धमाने पुरोत्तमे ॥ बहुशिष्यसमायुक्तो वेदाध्ययनतत्परः ॥ ६ ॥ स सदा प्रातरुत्थाय विद्यादानं प्रयच्छति ॥ शिष्येभ्यश्चानुरूपेभ्यः प्रसादाद्द्विजसत्तमाः ॥ ७ ॥ चकार स तदा विप्राः पौरोहित्यं महीपतेः ॥ सूर्यवंशप्रसूतस्य सुप्रियस्य महात्मनः ॥ ॥ ८ ॥ स तस्य धर्मकृत्यानि सर्वाण्येव दिनेदिने ॥ कृत्वा स्वगृहमभ्येति पूजितस्तेन भूभुजा ॥ ९ ॥ एकं शिष्यं समारोप्य शांत्यर्थं तस्य भूपतेः ॥ कथयित्वा प्रमाणं च विधानं होमसंभवम् ॥ १० ॥ शिष्योऽपि सकलं कृत्वा तत्कर्म सुसमाहितः ॥ आशीर्वादं प्रदत्त्वा च भूपतेर्गृहमेति च ॥ ११ ॥ एवं प्रकुर्वतस्तस्य शाकल्यस्य महात्मनः ॥ पौरोहित्यं गतः कालः कियन्मात्रो द्विजोत्तमाः ॥ १२ ॥ तदा वैवाहिके काले शप्तो यः[2] शंभुना स्वयम् ॥ सुनिंद्यां विकृतिं दृष्ट्वा तस्य वेद्यां गतस्य च ॥ १३ ॥ अथ तं योजयामास शांत्यर्थं नृपमदिरे ॥ याज्ञवल्क्यं स शाकल्यः प्रतिपद्यागतं तदा ॥ १४ ॥ सोऽपि तारुण्यगर्वेण वेश्याकरजविक्षतः ॥ सर्वांगेषु सुनिर्लज्जः प्रकटांगो जगाम वै ॥ १५ ॥ ततश्च शांतिकं कृत्वा जपांते भूपतिं च तम् ॥ शांतोदकप्रदानाय हस्यमानो जनैर्ययौ ॥ १६ ॥ पार्थिवोऽपि च तं दृष्ट्वा तादृग्रूपं विटं द्विजम् ॥ नाशीर्जग्राह तेनोक्तां वाक्यमेतदुवाच ह ॥ १७ ॥ उच्छिष्टोऽहं द्विजश्रेष्ठ शय्यारूढो व्यवस्थितः ॥ अत्र शालोद्भवे स्तंभे तस्मादेतज्जलं

१ व्रतांते–इ० पा० । २ यः–ब्रह्मा–स एव मानुष्ये याज्ञवल्क्योऽभवत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



क्षिप ॥ १८ ॥ सोऽपि सावज्ञमाज्ञाय तं भूपं कुपिताननः ॥ तं च स्तंभं समुद्दिश्य ध्यात्वा तद्ब्रह्म शाश्वतम् ॥ १९ ॥ द्यां त्वमालिख्य इत्येव प्रोक्त्वा मंत्रं च याजुषम् ॥ प्राक्षिपच्छांतिकं तोयं तस्य मूर्धनि सत्वरम् ॥ २० ॥ ततः स पतिते तोये स्तंभः पल्लवशोभितः ॥ तत्क्षणादेव संजज्ञे फल पुष्पैर्विराजितः ॥ २१ ॥ तं दृष्ट्वा पार्थिवः सोऽथ विस्मयोत्फुल्ललोचनः ॥ पश्चात्तापं विधायाथ वाक्यमेतदुवाच ह ॥ २२ ॥ अभिषेकं द्विजश्रेष्ठ ममापि त्वं प्रयच्छ भोः ॥ अनेनैव तु मन्त्रेण शुचित्वं मे व्यवस्थितम् ॥ २३ ॥ ॥ याज्ञवल्क्य उवाच ॥ ॥ ममाभिषेकदानस्य त्वमनर्होऽसि पार्थिव ॥ तस्माद्यास्याम्यहं सद्यो यत्रस्थः स गुरुर्मम ॥ २४ ॥ ॥ राजोवाच ॥ ॥ तव दास्यामि वस्त्राणि वाहनानि वसूनि च ॥ तस्माद्य च्छाभिषेकं मे मन्त्रेणाऽनेन सांप्रतम् ॥ २५ ॥ ॥ याज्ञवल्क्य उवाच ॥ ॥ न होमांतं विना मन्त्रः स्फुरते पार्थिवोत्तम ॥ अभिषेकविधौ प्रोक्तो यः पूर्वं पद्मयोनिना ॥ तस्मान्नाहं करिष्यामि तव यद्वै हृदि स्थितम् ॥ २६ ॥ इत्युक्त्वा वचनं भूपं याज्ञवल्क्यः स वै द्विजः ॥ जगाम स्वगृहं तूर्णं निःस्पृहत्वं समाश्रितः ॥ २७ ॥ अपरेऽह्नि समायातं शाकल्यमथ भूपतिः ॥ प्रोवाच प्रांजलिर्भूत्वा विनयावनतः स्थितः ॥ २८ ॥ यस्त्वया प्रेषितः कल्ये शिष्यो ब्राह्मणसत्तमः ॥ शांत्यर्थं प्रेषणीयश्च भूयोऽप्येवं गृहे मम ॥ २९ ॥ बाढमित्येव स प्रोक्त्वा ततो गत्वा निजालयम् ॥ याज्ञ वल्क्यं समाहूय ततः प्रोवाच सादरम् ॥ ३० ॥ अद्यापि त्वं नरेंद्रस्य शांत्यर्थं भवने व्रज ॥ विशेषात्पार्थिवेंद्रेण समाहूतोऽसि पुत्रक ॥ ३१ ॥ ॥ याज्ञवल्क्य उवाच ॥ ॥ नाहं तात गमिष्यामि शांत्यर्थं तस्य मंदिरे ॥ अवलेपेन युक्तस्य शुद्ध्या विरहितस्य च ॥ ३२ ॥ मया तस्याभिषेकार्थं सलिलं चोद्यतं च यत् ॥ सलिलं तेन तत्काष्ठे समादिष्टं कुबुद्धिना ॥ ३३ ॥ ततो मयापि तत्रैव तत्क्षणात्सलिलं च यत् ॥ तस्मि न्काष्ठे परिक्षिप्तं नीतं वृद्धिं च तत्क्षणात् ॥ ३४ ॥ ॥ शाकल्य उवाच ॥ ॥ अत एव विशेषेण समाहूतोऽसि पुत्रक ॥ तस्मात्तत्र द्रुतं गच्छ नावज्ञेया महीभुजः ॥ ३५ ॥ अपमानाद्भवेन्मानं पार्थिवानामसंशयम् ॥ यः करोति पुनस्तत्र मानं न स भवेत्प्रियः ॥ ३६ ॥ कोपप्रसाद वस्तूनि विचिन्वंतीह ये सदा ॥ आरोहंति शनैर्भृत्या ध्रुवं तमपि पार्थिवम् ॥ ३७ ॥ समौ मानापमानौ च चित्तज्ञः कालवित्तथा ॥ सर्वसहः क्षमी विज्ञः स भवेद्राजवल्लभः ॥ ३८ ॥ अपमानमनादृत्य तस्माद्गच्छ नृपालयम् ॥ ममाज्ञापि न लंघ्या त एष धर्मः सनातनः ॥ ३९ ॥ ॥ ॥ याज्ञवल्क्य उवाच ॥ ॥ आज्ञाभंगो ध्रुवं भावी परिपाटीव्यतिक्रमात् ॥ करोषि यदि शिष्याणां ये त्वया तत्र योजिताः ॥ ४० ॥

१ यां त्वभालिख्य इत्येव–इ० पा ० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्माद्यदि बलान्मां त्वं योजयिष्यसि तं प्रति ॥ त्वां त्यक्त्वाऽन्यत्र यास्यामि यतः प्रोक्तं महर्षिभिः ॥ ४१ ॥ गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ॥ उत्पथे वर्तमानस्य परित्यागो विधीयते ॥ ४२ ॥ ॥ सूत उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा शाकल्यः क्रोधमूर्छितः ॥ ततः प्रोवाच तं भूयो भर्त्समानो मुहुर्मुहुः ॥ ४३ ॥ एकमप्यक्षरं यत्र गुरुः शिष्ये निवेदयेत् ॥ पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा ह्यनृणी भवेत् ॥ ४४ ॥ तस्माद्गच्छ द्रुतं दत्त्वा मदध्ययनमालयम् ॥ त्यक्त्वा विद्यां मया दत्तां नो चेच्छप्स्याम्यहं तव ॥ ४५ ॥ एवमुक्त्वाभिमंत्र्याथ नादबिंदुसमुद्भवैः ॥ मंत्रैराथर्वणैस्तोयं पानार्थं चार्पयत्ततः ॥ ४६ ॥ सोऽपिबत्तत्क्षणात्तोयं तत्पीत्वा व्याकुलेंद्रियः ॥ उद्गिरद्भ्रांतिधर्मेण तत्त्वविद्याविमिश्रितम् ॥ ४७ ॥ ततः प्रोवाच तं भूयः शाकल्यं कुपिताननः ॥ एकमप्यक्षरं नास्ति तावकीयं ममोदरे ॥ ४८ ॥ तस्माच्छिष्योऽस्मि ते नाहं न च मे त्वं गुरुः स्थितः ॥ सांप्रतं स्वेच्छयाऽन्यत्र प्रयास्यामि करोषि किम् ॥ ४९ ॥ एवमुक्त्वाऽथ निर्गत्य तस्मात्स्थानाच्चिरंतनात् ॥ पप्रच्छ मानवान्भूयः सिद्धिक्षेत्राणि चासकृत्[1] ॥ ५० ॥ ततस्तस्य समादिष्टं क्षेत्रमेतन्मनीषिभिः ॥ सिद्धिदं सर्वजंतूनां न वृथा स्यात्कथंचन ॥ ५१ ॥ आस्तां तावत्तपस्तप्त्वा व्रतं नियममेव वा ॥ हाटकेश्वरजे क्षेत्रे सिद्धिः संवसतोऽपि च ॥ ५२ ॥ येनयेन च भावेन तत्र क्षेत्रे वसेज्जनः ॥ तस्यानुरूपिणी सिद्धिः शुभा स्याद्यदि वाऽशुभा ॥ ५३ ॥ तच्छ्रुत्वा च द्रुतं प्राप्य क्षेत्रमेतद्द्विजोत्तमाः ॥ भानुमाराधयामास स्थापयित्वा ततः परम् ॥ ५४ ॥ नियतो नियताहारो ब्रह्मचर्यपरायणः ॥ गायत्रं न्यासमासाद्य निर्विकल्पेन चेतसा ॥ ५५ ॥ ततश्च भगवांस्तुष्टो वर्षांते तमुवाच सः ॥ दर्शने तस्य संस्थित्वा तेजः संयम्य दारुणम् ॥ ५६ ॥ याज्ञवल्क्य वरं ब्रूहि यत्ते मनसि रोचते ॥ सर्वमेव प्रदास्यामि नादेयं विद्यते त्वयि ॥ ५७ ॥ ॥ याज्ञवल्क्य उवाच ॥ ॥ यदि तुष्टः सुरश्रेष्ठ वेदाध्ययनसंभवे ॥ गुरुर्भव ममाद्यैव ममैतद्वांछितं हृदि ॥ ५८ ॥ ॥ भास्कर उवाच ॥ ॥ अहं तव कृपाविष्टस्तेजः संहृत्य तत्परम् ॥ ततश्चात्र समायातस्तेन नो दह्यसे द्विज ॥ ५९ ॥ तस्मादत्रैव कुंडे च मंत्रान्सारस्वताञ्छुभान् ॥ वेदोक्तान्क्षेपयिष्यामि स्वयमेव द्विजोत्तम ॥ ६० ॥ तत्र स्नात्वा शुचिर्भूत्वा यत्किंचिद्वेदसंभवम् ॥ पठिष्यसि सकृत्तत्ते कंठस्थं संभविष्यति ॥ ६१ ॥ तत्त्वार्थं प्रकटं कृत्स्नं विदितं ते भविष्यति ॥ मत्प्रसादान्न संदेहः सत्यमेतन्मयोदितम् ॥ ६२ ॥ अद्यादि मानवः प्रातः स्नात्वा त्वत्र ह्रदे च यः ॥ सावित्रेण च सूक्तेन मां दृष्ट्वा प्रपठिष्यति ॥ तस्मै तत्स्यादसंदिग्धं यत्तवोक्तं मया द्विज ॥ ६३ ॥ ॥ याज्ञवल्क्य उवाच ॥ ॥ एवं भवतु देवेश यत्त्वयोक्तं वचोऽखिलम् ॥ परं मम

१ अविंदतः—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वचोऽन्यच्च तच्छृणुष्व ब्रवीमि ते ॥ ६४ ॥ नाहं मनुष्यधर्माणमुपाध्यायं कथंचन ॥ करिष्यामि जगन्नाथ कृपां कुरु ममोपरि ॥ ६५ ॥ ततस्तस्य
ददौ सूर्यो लघिमांनाम शोभनाम् ॥ विद्यां हि तत्प्रभावाय सुतुष्टेनांतरात्मना ॥ ६६ ॥ ततस्तं प्राह कर्णांते ममाश्वानां प्रविश्य वै ॥ अभ्यासं कुरु
विद्यानां वेदाध्ययनमाचर ॥ ६७ ॥ मन्मुखाद्ब्राह्मणश्रेष्ठ यद्येतत्तव वांछितम् ॥ न ते स्याद्येन दोषोऽयं मम रश्मिसमुद्भवः ॥ ६८ ॥ एवमुक्तः
स तेनाथ वाजिकर्णं समाश्रितः ॥ लघुर्भूत्वाऽपठद्वेदान्भास्करस्य मुखात्ततः ॥ ६९ ॥ एवं सिद्धिं समापन्नो याज्ञवल्क्यो द्विजोत्त
माः ॥ कृत्वोपनिषदं चारु वेदार्थैः सकलैर्युतम् ॥ ७० ॥ जनकाय नरेंद्राय व्याख्याय च ततः परम् ॥ कात्यायनं सुतं प्राप्य वेदसूत्रस्य
कारकम् ॥ ७१ ॥ त्यक्त्वा कलेवरं तत्र ब्रह्मद्वारि विनिर्मिते ॥ तत्तेजो ब्रह्मणो गात्रे योजयामास शक्तितः ॥ ७२ ॥ तस्य तीर्थे नरः
स्नात्वा दृष्ट्वा तं च दिवाकरम् ॥ नादबिंदुं पठित्वा च तदग्रे मुक्तिमाप्नुयात् ॥ ७३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे
नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये याज्ञवल्क्याश्रममाहात्म्यवर्णनंनामैकोनत्रिंशदुत्तरशततमोऽध्यायः ॥ १२९ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥
याज्ञवल्क्यसुतः सूत यस्त्वया परिकीर्तितः ॥ कतमा तस्य माताभूत्सर्वं नो ब्रूहि विस्तरात् ॥ १ ॥ ॥ सूत उवाच ॥ ॥ तस्य भार्याद्वयं
श्रेष्ठमासीत्सर्वगुणान्वितम् ॥ एका गुणवती तस्य मैत्रेयीति प्रकीर्तिता ॥ २ ॥ ज्येष्ठा चान्याथ कल्याणी ख्याता कात्यायनीति च ॥ यस्याः
कात्यायनः पुत्रो वेदार्थानां प्रजल्पकः ॥ ३ ॥ तांभ्यां[१] कुण्डद्वयं तत्र संतिष्ठति सुशोभनम् ॥ यत्र स्नाता नरा यांति लोकांस्तांश्च महोदयान् ॥ ४ ॥
कात्यायन्याश्च तीर्थस्य[२] शांडिल्यास्तीर्थमुत्तमम् ॥ पतिव्रतात्वयुक्तायास्तथान्यत्तत्र संस्थितम् ॥ ५ ॥ यत्र कात्यायनी प्राप्ता शांडिल्या प्रतिबो
धिता ॥ वैराग्यं परमं प्राप्ता सपत्नीदुःखदुःखिता ॥ ६ ॥ तत्र या कुरुते स्नानं तृतीयायां समाहिता ॥ नारी मार्गसिते पक्षे सा सौभाग्यवती
भवेत् ॥ ७ ॥ अथ दौर्भाग्यसंपन्ना काणा वृद्धाऽथ वामना ॥ अभीष्टा जायते सा च तत्प्रभावाद्द्विजोत्तमाः ॥ ८ ॥ ॥ ऋषय ऊचुः ॥ ॥
कीदृक्सपत्निजं दुःखं कात्यायन्या उपस्थितम् ॥ उपदेशः कथं लब्धः शांडिल्याः सूत कीदृशः ॥ ९ ॥ कात्यायन्या समाचक्ष्व कौतुकं नो व्यव
स्थितम् ॥ सामान्यो भविता नैष उपदेशस्तयेरितः ॥ १० ॥ ॥ सूत उवाच ॥ ॥ मैत्रेय्या सह संसक्तं याज्ञवल्क्यं विलोक्य सा ॥ कात्या
यनी सुदुःखार्ता संजाता चेर्ष्यया ततः ॥ ११ ॥ सा न स्नाति न भुंक्ते च न हास्यं कुरुते क्वचित् ॥ केवलं बाष्पपूर्णाक्षी निःश्वासाढ्या बभूव

१ ताभ्याम्–तयोः–इत्यर्थः । २ समीपे–इति शेषः ।

CC-0. In Public Domain. Digitization by eGangotri

ह ॥ १२ ॥ ततः कदाचिदेवाथ फलार्थं निर्गता बहिः ॥ अपश्यच्छांडिलींनाम पतिपार्श्वे व्यवस्थिताम् ॥ १३ ॥ कृतांजलिपुटां साध्वीं विनयावनतां स्थिताम् ॥ सोऽपि तस्या मुखासक्तः सानुरागः प्रसन्नदृक् ॥ १४ ॥ गुणदोषोद्भवां वार्तामापृच्छ्याकथयत्तथा ॥ सा च तौ दंपती दृष्ट्वा संहृष्टावितरेतरम् ॥ १५ ॥ चित्ते स्वे चिंतयामास सुधन्येयं तपस्विनी ॥ यस्याः पतिर्मुखासक्तो गुणदोषप्रजल्पकः ॥ सानुरागश्च सुस्निग्धो नान्यां नारीं बिभर्त्ति च ॥ १६ ॥ एवं संचिंत्य सा साध्वी भूयोभूयो द्विजोत्तमाः ॥ जगाम स्वाश्रमं पश्चान्निंद्यमाना स्वकं वपुः ॥ १७ ॥ ततः कदाचिदेकांते स्थितां तां शांडिलीं द्विजाः ॥ बहिर्गते भर्तरि च तस्याः कार्येण केनचित् ॥ १८ ॥ कात्यायनी समागम्य ततः पप्रच्छ सादरम् ॥ वद कल्याणि मे कंचिदुपदेशं महोदयम् ॥ १९ ॥ मुखप्रेक्षः सदा भर्त्ता येन स्त्रीणां प्रजायते ॥ नापमानं करोत्येव दुरुक्तवचनैः क्वचित् ॥ ॥ २० ॥ नान्यां संगच्छते नारीं चित्तेनापि कथंचन ॥ अहं भर्तुः कृतैर्दुःखैरतीव परिपीडिता ॥ सपत्नीजैर्विशेषेण तस्मान्मे त्वं प्रकीर्तय ॥ ॥ २१ ॥ यथा ते वशगो भर्त्ता संजातः कामदः[1] सदा ॥ मनसापि न संदध्यान्नारीमेष कथंचन ॥ २२ ॥ ॥ शांडिल्युवाच ॥ ॥ शृणु साध्वि प्रवक्ष्यामि तवाहं गुह्यमुत्तमम् ॥ यथा ममाभवद्वश्यो मुखप्रेक्षस्तथा पतिः ॥ २३ ॥ मम तातः कुरुक्षेत्रे शांडिल्यो मुनिसत्तमः ॥ वानप्रस्थाश्रमेऽतिष्ठत्पूर्वे वयसि संस्थितः ॥ २४ ॥ तत्रैकाहं समुत्पन्ना कन्या तस्य महात्मनः ॥ वृद्धिं गता क्रमेणाथ तस्मिन्नेव तपोवने ॥ २५ ॥ करोमि तत्र शुश्रूषां होमकाले यथोचिताम् ॥ नीवारादीनि धान्यानि नित्यं चैवानयाम्यहम् ॥ २६ ॥ कस्यचित्त्वथ कालस्य नारदो मुनिसत्तमः ॥ आश्रमे मम तातस्य सुश्रांतः समुपागतः ॥ २७ ॥ तातादेशात्ततस्तत्र मया स विश्रमः कृतः ॥ पादशौचादिभिः कृत्यैः स्नानाद्यैश्च तथापरैः ॥ २८ ॥ ततो भुक्तावसानेऽथ निविष्टः सुखसंस्थितः ॥ मम मात्रा परिपृष्टो विनयाद्वरवर्णिनि ॥ २९ ॥ एकेयं कन्यकास्माकं जाते वयसि संस्थिते ॥ संजाता मुनिशार्दूल प्राणेभ्योऽपि गरीयसी ॥ ३० ॥ तदस्याः कीर्तय क्षिप्रं सुखोपायं सुखोदयम् ॥ व्रतं वा नियमं वा त्वं होमं वा मन्त्रमेव वा ॥ ३१ ॥ येन चीर्णेन भर्त्ता स्यात्सुसौम्यः सद्गुणान्वितः ॥ प्रियंवदो मुखप्रेक्षः परनारीपराङ्मुखः ॥ ३२ ॥ तस्यास्तद्वचनं श्रुत्वा स मुनिस्तदनंतरम् ॥ चिरं ध्यात्वा वचः प्राह प्रसन्नवदनस्ततः ॥ ३३ ॥ सदा हाटकेश्वरजे क्षेत्रे पञ्चपिंडा व्यवस्थिता ॥ गौरी गौर्या स्वयं तत्र स्थापिता परमेश्वरी ॥ ३४ ॥ तामेषा वत्सरं यावच्छ्रद्धया परया युता ॥

१ सर्वकामदः–इ॰ पा॰ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पूजयतु प्रीत्या तृतीयायां विशेषतः ॥ ३५ ॥ ततो वर्षांतमासाद्य संप्राप्स्यति यथोचितम् ॥ भर्त्तारं नात्र संदेहो यादृग्रूपं यथोचितम् ॥ ३६ ॥ तत्र
पूर्वं गता गौरी परित्यज्य महेश्वरम् ॥ गंगेर्ष्यया महाभागे ज्ञात्वा क्षेत्रं सुसिद्धिदम् ॥ ३७ ॥ ततः सा चिंतयामास कां देवीं पूजयाम्यहम् ॥ सौभा
ग्यार्थं यतोऽन्या मां पूजयंति सुरस्त्रियः ॥ ३८ ॥ तस्मादहं प्रभक्त्याढ्या स्वयमात्मानमेव च ॥ आत्मनैव कृतोत्साहा पूजयिष्यामि सिद्धये ॥
॥ ३९ ॥ ततः प्रागाग्निहोत्रोत्थैर्मंत्रैराथर्वणैः शुभैः ॥ मृत्पिंडान्पंच संयोज्य ह्येकस्थाने समाहिता ॥ ४० ॥ पृथ्वीमपश्च तेजश्च वा द्युमाकाशमेव
च ॥ तेषु संयोजयामास मृत्पिंडेषु निधाय सा ॥ ४१ ॥ महद्भूतानि चैतानि पञ्च देवी यतव्रता ॥ ततः संपूजयामास पुष्पधूपानुलेपनैः ॥ ४२ ॥
अथ तां तत्र विज्ञाय तपःस्थां गिरजां भवः ॥ तन्मंत्राकृष्टचित्तश्च सत्वरं समुपागतः ॥ ४३ ॥ प्रोवाच च प्रहृष्टात्मा कस्मात्त्वमिह चागता ॥ मां
मुक्त्वा दोषनिर्मुक्तं मुखप्रेक्षं सदा रतम् ॥ ४४ ॥ तस्मादागच्छ कैलासं वृषारूढा मया सह ॥ अथवा कारणं ब्रूहि यदि दोषोऽस्ति मे क्वचित् ॥
॥ ४५ ॥ ॥ देव्युवाच ॥ ॥ त्वं मूर्ध्ना जाह्नवीं धत्से मूर्तां पद्जलात्मिकाम् ॥ तस्मान्नाहं गमिष्यामि मंदिरं ते कथंचन ॥ ४६ ॥ यावन्न
त्यजसि व्यक्तं मम सापत्न्यतां गताम् ॥ तथा नित्यं प्रणामं त्वं करोषि वृषभध्वज ॥ ४७ ॥ प्रत्यक्षमपि मे नित्यं संध्यायाश्च न लज्जसे ॥ तस्मा
देतत्परित्यज्य कर्म लज्जाकरं परम् ॥ ४८ ॥ आकारयसि मां देव तत्स्याद्यदि मतं मम ॥ अन्यथाहं न यास्यामि तव हर्म्ये कथंचन ॥ एतच्छु
त्वा यदिष्टं ते कुरुष्व वृषभध्वज ॥ ४९ ॥ ॥ देव उवाच ॥ ॥ नाहं सौख्येन तां गंगां धारयामि सुरेश्वरि ॥ ५० ॥ भगीरथेन भूपेन प्रार्थितो ज्ञाति
कारणात् ॥ दिव्यं वर्षसहस्रं तु तपस्तप्त्वा सुदारुणम् ॥ ५१ ॥ येन नो याति पातालं गंगा स्वर्गपरिच्युता ॥ तस्मात्त्वं देव मद्वाक्यात्स्वमूर्ध्ना वह जा
ह्नवीम् ॥५२॥ मया तस्य प्रतिज्ञातं धारयिष्याम्यसंशयम् ॥ आकाशाज्जाह्नवीवेगं पतंतं धरणीतले ॥ ५३ ॥ नो चेद्व्रजेत पातालं यदत्र विषये स्थि
म् ॥ ततोऽहं संप्रवक्ष्यामि तदिहैकमनाः शृणु ॥५४॥ एषा गंगा वरारोहे मम मूर्ध्नो विनिर्गता ॥ हिमवंतं नगं भित्त्वा द्विधा जाता ततः परम् ॥५५॥
ततः सिंध्वभिधाना सा पश्चिमं सागरं गता ॥ शतानि नव संगृह्य नदीनां परमेश्वरि ॥५६॥ तथा गंगाभिधाना च सैव प्राक्सागरं गता ॥ तावतीश्च समा
दाय नदीः पर्वतनन्दिनि ॥५७॥ एवमष्टादशैतानि नदीनां पर्वतात्मजे ॥ शतानि सागरे यांति तेन नित्यं स तिष्ठति ॥५८॥ सततं शोष्यमाणोऽपि ॥१४६॥
वाडवेन दिवानिशम् ॥ समुद्रसलिलं मेघाः समादाय ततः परम् ॥५९॥ मर्त्यलोके प्रवर्षंति ततः सस्यं प्रजायते ॥ सस्येन जीवते लोकः प्रभवन्ति

१ एतज्ज्ञात्वा—इ०पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मखास्तथा ॥ मखांशेन सुराः सर्वे तृप्तिं यांति ततः परम् ॥ ६० ॥ एतस्मात्कारणान्मूर्ध्नि देवि गंगां दधाम्यहम् ॥ न स्नेहात्कामतो नैव जगद्येन प्रवर्तते ॥ ६१ ॥ अथवा सन्त्यजाम्येनां यदि मूर्ध्नः कथंचन ॥ तद्दूरं वेगतो भित्त्वा पृथ्वीं याति रसातलम् ॥ ६२ ॥ ततः शोषं व्रजेदाशु समुद्रः सरितां पतिः ॥ और्वेण पीयमानोऽत्र ततो वृष्टिर्न जायते ॥ वृष्ट्यभावाज्जगन्नाशः सत्यमेतन्मयोदितम् ॥ ६३ ॥ एवं गंगाकृते प्रोक्तं मया तव सुरेश्वरि ॥ शृणु सन्ध्याकृतेऽन्यच्च येन तां प्रणमाम्यहम् ॥ ६४ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये पंचपिण्डागौर्युत्पत्तिवर्णनंनाम त्रिंशदुत्तरशततमोऽध्यायः ॥ १३० ॥ ॥ छ ॥ ॥ देव उवाच ॥ ॥ एषा रात्रिः समादिष्टा दानवानां सुरेश्वरि ॥ पिशाचानां च भूतानां राक्षसानां विशेषतः ॥ १ ॥ यत्किंचित्क्रियते कर्म तत्र स्नानादिकं शुभम् ॥ तत्सर्वं जायते तेषां पुरा दत्तं स्वयंभुवा ॥ २ ॥ मर्यादा तैः समं येन देवानां च यदा कृता ॥ अर्हाणां यज्ञभागस्य काश्यपानामथाग्रजाम् ॥ ३ ॥ तदर्थं दशसाहस्रा दानवा युद्धदुर्मदाः ॥ कुंतप्रासकरा भानुं रुंधन्त्युद्यतकार्मुकाः ॥४॥ तमुद्दिश्य सहस्रांशुं यज्जलं परिक्षिप्यते ॥ सावित्रेण च मन्त्रेण तेषां तज्जायते फलम् ॥५॥ ते हतास्तेन तोयेन वज्रतुल्येन तत्क्षणात् ॥ प्रमुंचंति सहस्रांशुं नित्यमेव सुरेश्वरि ॥ ६ ॥ एतस्मात्कारणात्तोयमस्त्ररूपं क्षिपाम्यहम् ॥ संध्याकालं समुद्दिश्य भानुं संध्यां न पार्वति ॥ ७ ॥ यद्यदाचरति श्रेष्ठस्तत्तदुत्तरतः स्थितः ॥ उदयार्थं रविं यान्तं निरुन्धन्ति च दारुणाः ॥ ८ ॥ तेऽपि संध्याजलैर्देवि निहता ब्राह्मणोत्तमैः ॥ मया च तं विमुञ्चंति मूर्च्छिता निपतन्ति च ॥ ९ ॥ एतस्मात्कारणाद्देवि सन्ध्ययोरुभयोरपि ॥ अहं चान्ये च विप्रा ये ते नमंति दिवाकरम् ॥ १० ॥ तस्मात्त्वं गृहमागच्छ त्यक्त्वेर्ष्यां पर्वतात्मजे ॥ प्रशस्यां त्वां परित्यक्त्वा नान्यास्ति हृदये मम ॥ ११ ॥ ॥ देव्युवाच ॥ ॥ निष्कामो वा सकामो वा संध्यां स्त्रीसंज्ञितामिमाम् ॥ यत्त्वं नमसि देवेश तन्मे दुःखं प्रजायते ॥ १२ ॥ तस्माद्गङ्गापरित्यागं सन्ध्यायाश्च विशेषतः ॥ यावन्न कुरुषे देव तावत्तुष्टिर्न मे भवेत् ॥ १३ ॥ एवमुक्त्वाऽथ सा देवी विशेषव्रतमास्थिता ॥ अवमन्य महादेवं प्रार्थयानमपि स्वयम् ॥ १४ ॥ ततः स चिन्तयामास किमेतत्कारणं स्थितम् ॥ विरक्ताऽपि ममोत्कण्ठां येनैषा प्रकरोति न ॥ १५ ॥ न च साम्ना व्रजेत्तुष्टिं कथंचिदपि पार्वती ॥ मृषेर्ष्याधारिणी देवी नैतत्स्वल्पं हि कारणम् ॥ १६ ॥ ततो मन्त्रप्रभावं तं विज्ञाय परमेश्वरः ॥ सम्यगाराधयामास संपूज्यात्मानमात्मध्यानं धृत्वा सुसूक्ष्मेण ज्ञानेनाथ स्वयं ततः ॥ १७ ॥ तमेव मन्त्रं मन्त्रेण न्यासेन च विशेषतः ॥

१ नियमेन–इ० पा० । २ वियुक्तापि–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ना ॥ १८ ॥ यथा देव्यात्मभूतानि पृथक्कृत्वा च पंच च ॥ पूजितानि तथा देवः सर्वेषामंतरे गतः ॥ १९ ॥ तान्येव पूजयामास पृथक्कृत्वा समाधितः ॥ नियोज्य च पुनर्बाह्ये ततः पूजां समाचरत् ॥२०॥ तस्मान्नास्ति परः कश्चित्पूज्यपूज्यः स एव च ॥ ऐश्वर्यात्सर्वदेवानामीशानस्तेन निर्मितः ॥ २१ ॥ एवं यावत्स ईशानः समाराधयति प्रभुः ॥ तावद्देवी समायाता मन्त्राकृष्टा च यत्र सः ॥ २२ ॥ ततः प्रोवाच तं देवं प्रणिपत्य कृतांजलिः ॥ ज्ञातं मया विभो सर्वं न मां त्यज तव प्रियाम् ॥ २३ ॥ तस्मादागच्छ गच्छावो यत्र त्वं वाञ्छसि प्रभो ॥ क्षम्यतां देव मे सर्वं न कृतं यद्वचस्तव ॥ २४ ॥ ततस्तुष्टो महादेवस्तामालिङ्ग्य शुचिस्मिताम् ॥ इदमूचे विहस्योच्चैर्मेघगम्भीरया गिरा ॥ २५ ॥ येषा त्वयाऽऽत्मभूतोत्था निर्मिता परमा तनुः ॥ एतां या कामिनी काचित्पूजयिष्यति भक्तितः ॥ अनेनैव विधानेन तस्या भर्ता भविष्यति ॥ २६ ॥ तृतीयायां विशेषेण यावत्संवत्सरं शुभे ॥ सा लभिष्यति सत्कान्तं पुत्रदं सर्वकामदम् ॥ २७ ॥ तथैतां मामकीं मूर्तिमीशानाख्यां च ये नराः ॥ तेषां दुष्टापि या कान्ता सौम्या चैव भविष्यति ॥ २८ ॥ ये पुनः कन्यकाहेतोः पूजयिष्यंति भक्तितः ॥ यां कन्यां मनसि स्थाप्य तां लभिष्यन्त्यसंशयम् ॥२९॥ निष्कामाश्चापि ये मर्त्या पूजयिष्यंति सर्वदा ॥ ते यास्यंति परां सिद्धिं जरामरणवर्जिताम् ॥ ३० ॥ एवमुक्त्वा महादेवो वृषमारोप्य तां प्रियाम् ॥ स्वयमारुह्य पश्चाच्च कैलासं पर्वतं गतः ॥ ३१ ॥ ॥ नारद उवाच ॥ ॥ तस्मात्त्वं सुतेयं या तामाराधयतु द्रुतम् ॥ पञ्चपिण्डमयां गौरीं यावत्संवत्सरं शुभाम् ॥ ३२ ॥ तृतीयायां विशेषेण ततः प्राप्स्यति सत्पतिम् ॥ मुखप्रेक्षमतिप्रीतं रूपादिभिर्गुणैर्युतम् ॥ ३३ ॥ ॥ शांडिल्युवाच ॥ ॥ एवमुक्त्वा मुनिश्रेष्ठो नारदः प्रययौ ततः ॥ तीर्थयात्रां प्रति प्रीत्या मम मात्रा विसर्जितः ॥ ३४ ॥ मयापि च तदादेशात्कौमार्येपि च संस्थया ॥ पूजया वत्सरंयावत्पूजिता पतिकाम्यया ॥ ३५ ॥ तृतीयायां विशेषेण मार्गमासादितः शुभे ॥ नैवेद्यैर्विविधैर्दानैर्गंधमाल्यानुलेपनैः ॥ ३६ ॥ तत्प्रभावादयं प्राप्तो जैमिनिर्नाम सद्द्विजः ॥ कात्यायनि यथा दृष्टस्त्वया किं कीर्तितैः परैः ॥ ३७ ॥ तस्मात्त्वमपि कल्याणि पूजयैनां समाहिता ॥ संप्राप्स्यसि सुसौभाग्यं मैत्रेय्या सदृशं शुभे ॥ ३८ ॥ त्वया न पूजिता चेयं कौमार्ये वर्तमानया ॥ यावत्संवत्सरं गौरी तृतीयायां न चाधिकम् ॥ ३९ ॥ सापत्न्यं तेन संजातं सौभाग्येपि निरर्गले ॥ [1]यथोक्तविधिना देवी सत्यमेतन्मयोदितम् ॥ ४० ॥ ॥ सूत उवाच ॥ ॥ श्रुत्वा कात्यायनी सर्वं शांडिलया यत्प्रकीर्तितम् ॥ ततः प्रणम्य तां पृष्ट्वा स्वमेव भवनं ययौ ॥ ४१ ॥ मार्गशीर्षेऽथ संप्राप्ते तृतीयादिवसे सिते ॥ तां देवीं

१ यथोक्तविधिना देवी—इत्यस्य–'त्वया न पूजिता चेयम्' इत्यनेन 'गौरी' इत्यनेन च पूर्वेण वाक्यकदम्बकेन सह सम्बन्धो योजनीयः । तेन सरलवाक्यसम्बन्धो भविष्यति । व्यवहितपदसंबंधस्तु दुर्बोध इव भासते ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूजयामास वर्षंयावत्कृतक्षणा ॥ ४२ ॥ गौरिंणीर्भोजयामास मृष्टान्नैर्भोजनै रसैः ॥ तैलक्षारपरित्यक्तैर्गन्धैः कुंकुमपूर्वकैः ॥ ४३ ॥ ततस्तु वत्सरे
पूर्णे याज्ञवल्क्यस्तदन्तिकम् ॥ गत्वा प्रोवाच किं कष्टं त्वं करोषि शुचिस्मिते ॥ ४४ ॥ मया कांतेन रक्तेन कामदेन सदैव तु ॥ तस्मादागच्छ
गच्छाव स्वमेव भवनं शुभे ॥ ४५ ॥ एवमुक्त्वा तु तां हृष्टां गृहीत्वा दक्षिणे करे ॥ जगाम भवनं पश्चात्पुलकांकितगात्रजाम् ॥ ४६ ॥ ततः परं तया
सार्धं वर्तते हर्षिताननः ॥ मैत्रेय्या सहितो यद्वदविशेषेण सर्वदा ॥ ४७ ॥ ततः संजनयामास तस्यां पुत्रं गुणान्वितम् ॥ कात्यायनाभिधानं च यज्ञ
विद्याविचक्षणम् ॥ ४८ ॥ पुत्रो वररुचिर्यस्य बभूव गुणसागरः॥ सर्वज्ञः सर्वकृत्येषु वेदवेदांगपारगः ॥४९॥ स्थापितोऽत्र शुभे क्षेत्रे येन विद्यार्थिनां
कृते ॥ समाराध्य विशेषेण चतुर्थ्यां शुक्रवासरे ॥ ५० ॥ महागणपतिर्भक्त्या सर्वविद्याप्रदायकः ॥ यस्तस्य पुरतो विप्राः शांतिपाठविधानतः ॥
॥ ५१ ॥ गृह्णाति पुष्पमालां यः पठेच्छक्त्या द्विजोत्तमाः ॥ वेदांतकृत्स विप्रः स्यात्सदा जन्मनिजन्मनि ॥ ५२ ॥ अशक्त्या चाथ पाठस्य
यो गृह्णाति धनेन च ॥ स विशेषाद्भवेद्विप्रो वेदवेदांगपारगः ॥ ५३ ॥ विदुषां स गृहे जन्म याज्ञिकानां सदा लभेत् ॥ न कदाचित्तु मूर्खाणां निन्दि
तानां कथञ्चन ॥ ५४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्य ईशानोत्पत्तिपंचपिं
डिकागौरीमाहात्म्यवररुचिस्थापितगणपतिमाहात्म्यवर्णनंनामैकत्रिंशदुत्तरशततमोऽध्यायः ॥ १३१ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥
त्वया सूतज तत्रस्थं याज्ञवल्क्यस्य कीर्तितम् ॥ तीर्थं वररुचेश्चैव वैनायक्यं प्रविद्यते ॥ १ ॥ कात्यायनस्य न प्रोक्तं किञ्चित्तत्र महामते ॥
किं वा तेन कृतं नैव किं वा ते विस्मृतिं गतम् ॥ २ ॥ तस्मादाचक्ष्व नः शीघ्रं यदि किंचिन्महात्मना ॥ क्षेत्रेत्र निर्मितं तीर्थं सर्वसिद्धिप्रदायक
म् ॥ ३ ॥ ॥ सूत उवाच ॥ ॥ तेन वास्तुपदंनाम तत्र तीर्थं विनिर्मितम् ॥ कात्यायनेन विप्रेण सर्वकामप्रदं नृणाम् ॥ ४ ॥ चत्वारिंशत्त्रिभि
र्युक्ता देवता यत्र पंच च ॥ पूज्यंते पूजिताश्चापि सिद्धिं यच्छंति तत्क्षणात् ॥ ५ ॥ ॥ ऋषय ऊचुः ॥ ॥ कस्मात्ता देवताः सूत पूज्यंते तत्र संस्थि
ताः ॥ नामतश्च विभागेन कीर्तयस्व पृथक्पृथक् ॥ ६ ॥ ॥ सूत उवाच ॥ ॥ पूर्वं किंचिन्महद्भूतं निर्गतं धरणीतलात् ॥ अपूर्वं रौद्रमत्युग्रं कृष्ण
दंतं भयानकम् ॥ ७ ॥ शंकुकर्णं कृशास्यं च ऊर्ध्वकेशं भयानकम् ॥ देवानां नाशनार्थाय मानुषाणां विशेषतः ॥ ८ ॥ आकृष्टं दानवेंद्रेण मंत्रैः
शुक्रप्रदर्शितैः ॥ अवध्यं सर्वशस्त्राणामस्त्राणां च विशेषतः ॥ ९ ॥ अथ देवाः समालोक्य तत्तादृक्सुभयावहम् ॥ जघ्नुः शस्त्रैः शितैश्चित्रैः कोपेन
महतान्विताः ॥ १० ॥ नैव शेकुस्तदंगेषु प्रहर्तुं यत्नमास्थिताः ॥ भक्ष्यंते केवलं तेन शतशोऽथ सहस्रशः ॥ ११ ॥ अथ ते यत्नमास्थाय सर्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

देवाः सवासवाः ॥ ब्रह्माणमग्रतः कृत्वा तद्भूतमभिदुद्रुवुः ॥ १२ ॥ ततः संगृह्य यत्नेन सर्वगात्रेषु सर्वतः ॥ तच्च पंचगुणैर्देवैः पातितं धरणीतले ॥
॥ १३ ॥ उपविष्टास्ततस्तस्य सर्वे भूत्वा समंततः ॥ प्रहारान्संप्रयच्छंति न लगंति च तस्य ते ॥ १४ ॥ आथर्वणेन सूक्तेन जातं चामृतबिंदुना ॥
तद्भूतं प्रेषितं दैत्यैर्मुंडेन च तदंतिकम् ॥ १५ ॥ एवं वर्षसहस्रांतं तत्तथैव व्यवस्थितम् ॥ न मुंचंति भयात्ते तु न हंतुं शक्नुवंति च ॥ १६ ॥
तस्योदरे स्थितो ब्रह्मा शक्राद्या अमराश्च ये ॥ चतुर्दिक्षु स्थिताः क्रुद्धा महद्यत्नेन संस्थिताः ॥ ततस्ते दानवाः सर्वे मंत्रं चक्रुः परस्परम् ॥ १७ ॥
अस्य भूतस्य रौद्रस्य शुक्रसृष्टस्य तत्क्षणात् ॥ एक एवात्र निर्दिष्ट उपायो देवसंक्षयः ॥ १८ ॥ ततः शस्त्राणि तीक्ष्णानि दानवास्ते महाबलाः ॥
मुंचंतो विविधान्नादान्समाजग्मुः सहस्रशः ॥ १९ ॥ एतस्मिन्नंतरे विष्णुरागतस्तत्र तत्क्षणात् ॥ आह भूतं तदा विष्णुर्वचसा ह्लादयन्निव ॥ २० ॥
यो यस्मिन्संस्थितो गात्रे देवस्तव समुद्भवे ॥ तत्र पूजां समादाय तस्मात्त्वां तर्पयिष्यति ॥२१॥ नैवंविधा तु लोकेऽस्मिन्पूजा देवस्य संस्थिता ॥
कस्यचिद्यादृशी तेऽद्य मया संप्रतिपादिता ॥ २२ ॥ ततस्तेन प्रतिज्ञातमविकल्पेन चेतसा ॥ एवं तेऽहं करिष्यामि परं मे वचनं शृणु ॥ २३ ॥
यदि कश्चिन्न मे पूजां करिष्यति कदाचन ॥ कथंचिन्मानवः कश्चित्स मे भक्ष्यो भविष्यति ॥ २४ ॥ ॥ सूत उवाच ॥ ॥ बाढमित्येव च प्रोक्ते
ततो देवेन चक्रिणा ॥ तद्भूतं निश्चलं जातं हर्षेण महतान्वितम् ॥ २५ ॥ ततो देवाः समुत्थाय तत्त्यक्त्वा शस्त्रपाणयः ॥ जघ्नुश्च निशितैः
शस्त्रैः पलायनसमुत्सुकान् ॥ लज्जाहीनान्गतामर्षान्दीनवाक्यप्रजल्पकान् ॥ २६ ॥ ततः स्वस्थः स भूत्वा तु हरिर्दैत्यैर्निपातितैः ॥ प्रोवाच
पद्मजं नाम भूतस्यास्य कुरुष्व भोः ॥ २७ ॥ ॥ ब्रह्मोवाच ॥ ॥ अनेन तव वाक्यस्य प्रोक्तं वाक्यं हरे यतः ॥ वास्त्वेतदिति यस्माच्च
तस्माद्वास्तु भविष्यति ॥ २८ ॥ एवमुक्त्वा हृषीकेश आहूय विश्वकर्मणे ॥ विधानं कथयामास पूजार्थं विस्तरान्वितम् ॥ २९ ॥
एतस्मिन्नंतरे प्राह याज्ञवल्क्यसुतः सुधीः ॥ विश्वकर्माणमाहूय प्रथमं द्विजसत्तमाः ॥ ३० ॥ हाटकेश्वरजे क्षेत्रे ममाश्रमपदं कुरु ॥
अनेनैव विधानेन प्रोक्तेन तु महामते ॥ ३१ ॥ ततोहं सकलं बुद्ध्वा वृद्धिं नेष्यामि भूतले ॥ बालावबोधनार्थाय तस्मादागच्छ सत्वरम् ॥ ३२ ॥
ततः संप्रेषयामास तं ब्रह्मापि तदंतिकम् ॥ विश्वकर्माणमाहूय स्वसुतस्य हिते स्थितः ॥ ३३ ॥ विश्वकर्मापि तत्रैत्य वास्तुपूजां यथोदिताम् ॥ 
चकार ब्रह्मणा प्रोक्तां यादृशीं सकलां ततः ॥ ३४॥ कात्यायनोऽपि तां सर्वां दृष्ट्वा चक्रे सहस्रशः ॥ तदा विश्वहितार्थाय शालाकर्मादिपूर्विकाम् ॥
॥ ३५ ॥ एवं वास्तुपदं जातं तस्मिन्क्षेत्रे द्विजोत्तमाः ॥ अस्मिन्क्षेत्रे नरः पापात्स्पृष्टो मुच्येत कर्मणा ॥ ३६ ॥ तथा न प्राप्नुयाद्दोषं गृहजातं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथंचन ॥ शिल्पोत्थं कुपदोत्थं च कुवास्तुजमथापि च ॥ ३७ ॥ वैशाखस्य तृतीयायां शुक्लायां रोहिणीषु च ॥ तत्पदं निहितं तत्र वास्तोस्तेन महात्मना ॥ ३८ ॥ तस्मिन्नपि च यः पूजां तेनैव विधिना नरः ॥ तस्य यः कुरुते सम्यक्स भूपत्वमवाप्नुयात् ॥ ३९ ॥ गृहं दोषान्वितं प्राप्य शिल्पादिभिरुपद्रुतम् ॥ तस्योपसंगमं प्राप्य समृद्धिं याति तद्दिने ॥ ४० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागर खण्डे हाटकेश्वरक्षेत्रमाहात्म्ये वास्तुपदोत्पत्तिमाहात्म्यवर्णनंनाम द्वात्रिंशदुत्तरशततमोऽध्यायः ॥ १३२ ॥ ॥ सूत उवाच ॥ ॥ तथाऽन्यापि च तत्रास्ति देवता द्विजसत्तमाः ॥ अजागृहेति विख्याता सर्वरोगक्षयावहा ॥ १ ॥ अजापालो यदा राजा सर्वलोकहिते रतः ॥ अजारूपाः प्रयांति स्म व्याधयः सकला द्विजाः ॥ तदा रात्रौ समानीय तस्मिन्स्थाने दधाति सः ॥ २ ॥ ततस्तदाश्रयात्स्थानमजागृहमिति स्मृतम् ॥ सर्वैर्जनैर्धरा पृष्ठे दर्शनाद्व्याधिनाशनम् ॥ ३ ॥ तत्रैश्वर्यमभूत्पूर्वं यत्तद्ब्राह्मणसत्तमाः ॥ अहं वः कीर्तयिष्यामि श्रोतव्यं सुसमाहितैः ॥ ४ ॥ तत्रागतो द्विजः कश्चित्क्षेत्रे तापसरूपधृक् ॥ तीर्थयात्राप्रसंगेन रात्रौ प्राप्तः श्रमान्वितः ॥ ५ ॥ अजावृंदमथालोक्य निविष्टं सुसुखान्वितम् ॥ रोमंथ कर्मसंयुक्तं विश्वस्तमकुतोभयम् ॥ ६ ॥ स ज्ञात्वा मानुषेणात्र भवितव्यमसंशयम् ॥ न शून्याः पशवो रात्रौ स्थास्यंति विजने वने ॥ ७ ॥ ततः फूत्कृत्य फूत्कृत्य दिवं यावन्न संदधे ॥ कश्चिद्वाचं प्रसुप्तश्च तावत्तत्रैव चिंतयन् ॥ ८ ॥ अवश्यं मानुषेणात्र पशूनां रक्षणाय च ॥ आगंतव्यं कुतोऽप्याशु तस्मात्तिष्ठामि निर्भयः ॥ ९ ॥ एवं तस्य प्रसुप्तस्य गता सा रजनी ततः ॥ ततस्त्वरितवत्तस्य सुश्रांतस्य द्विजोत्तमाः ॥ १० ॥ अथ याव त्प्रभाते स प्रपश्यति निजां तनुम् ॥ तावत्कुष्ठादिभी रोगैः समंतात्परिवारिताम् ॥ ११ ॥ अशक्तश्चलितुं स्थानादपि चैकं पदं क्वचित् ॥ तेजो हीनोऽपि रौद्रेण चिन्तयामास वै ततः ॥ १२ ॥ किमिदं कारणं येन ममैषा संस्थिता तनुः ॥ अकस्मादेव रोगोऽयं चलितुं नैव च क्षमः ॥ १३ ॥ एवं चिन्तयमानस्य तस्य विप्रस्य तत्क्षणात् ॥ द्वादशार्कप्रतीकाशः पुरुषः समुपागतः ॥ १४ ॥ तं यूथं कालयामास ततः संज्ञाभिराह्वयन् ॥ पृथ क्त्वेन समादाय यष्टिं सव्येन पाणिना ॥ १५ ॥ अथापश्यत्स तं विप्रं व्याधिभिः सर्वतो वृतम् ॥ अशक्तं चलितुं क्वापि ततः प्रोवाच सादरम् ॥ १६ ॥ कस्त्वमेवंविधः प्राप्तः स्थाने चात्र द्विजोत्तम ॥ नास्ति राज्ये मम व्याधिः कस्यचित्कुत्रचित्स्फुटम् ॥ १७ ॥ अजोनाम नरेन्द्रोऽहं यदि ते श्रोत्रमा गतः ॥ व्याधींश्च च्छागरूपेण रक्षामि जनकारणात् ॥ १८ ॥ तस्माद्ब्रूहि शरीरस्थो यस्ते व्याधिर्व्यवस्थितः ॥ येनाऽहं निग्रहं तस्य करोमि द्विजसत्तम ॥ १९ ॥ ॥ ब्राह्मण उवाच ॥ ॥ तीर्थयात्रापरोऽहं च भ्रमामि क्षितिमंडले ॥ क्रमेणाऽत्र समायातः क्षेत्रेऽस्मिन्हाटकेश्वरे ॥ २० ॥ निशावक्त्रे नृपश्रेष्ठ वासः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



संचिंतितो मया ॥ दृष्ट्वाऽमूंश्च पशून्भूप मानुषं भाव्यमेव हि ॥ २१ ॥ ततश्चात्र प्रसुप्तोऽहं पशूनामंतिके नृप ॥२२॥ अथ यावत्प्रभातेऽहं प्रपश्यामि निजां तनुम् ॥ तावत्कुष्ठादिरोगैश्च समंतात्परिवारिताम् ॥ २३ ॥ नान्यत्किंचिन्नृपश्रेष्ठ कारणं वेद्मि तत्त्वतः ॥ किमेतेन नृपश्रेष्ठ भूयोभूयः प्रजल्पता ॥ बहुत्वात्कुरु तस्मान्मे यथा स्यान्नीरुजा तनुः॥ २४ ॥ ततस्ते व्याधयः प्रोक्ता अजापालेन भूभुजा ॥ केनाज्ञा खंडिता मेऽद्य को वध्यः सांप्रतं मम ॥ २५ ॥ ॥ व्याधय ऊचुः ॥ ॥ मा कोपं कुरु भूपाल कृत्येऽस्मिंस्त्वं कथंचन ॥ यस्मादेष द्विजो विष्टः सांप्रतं व्याधिभिस्त्रिभिः ॥२६॥ राजयक्ष्मा च कुष्ठं च पामा च द्विजसत्तम ॥ एते संसर्गजा दोषास्त्रयोऽप्यापि प्रकीर्तिताः ॥ २७ ॥ एतेषां प्रथमौ यौ द्वौ निवृत्तिरहितौ स्मृतौ ॥ औषधैश्चैव मंत्रैश्च शेषा नाशं व्रजंति च ॥२८॥ आभ्यां च ब्रह्मशापोस्ति येन नास्ति निवर्तनम् ॥ तस्मादत्र नृपश्रेष्ठ कुरु यत्ते क्षमं भवेत् ॥२९॥ एतेन ब्राह्मणेनैते स्पृष्टा राजंस्त्रयोऽपि च ॥ तस्मात्तावत्तनुं चास्याविशतां तावसंशयम् ॥ ३० ॥ अपरं शृणु भूपाल वचनं नो मुखाच्च्युतम् ॥ हिताय सर्वजंतूनां तव श्रेयोविवृद्धये ॥३१॥ यत्र स्थानं चिरं तत्र मेदिन्यां विहितं नृप ॥ पुरीषं च समाविद्धा तेनैषा मेदिनी द्रुतम् ॥३२॥ कालांतरेपि ये मर्त्या भूम्यामस्यां समागताः ॥ भूमेः स्पर्शं करिष्यंति ते भविष्यंति चेदृशाः॥३३॥ वयं शेषा महाराज व्याधयो ये व्यवस्थिताः ॥ त्वया मुक्ता भविष्यामो मन्त्रौषधवशानुगाः ॥३४॥ नैतौ पुनस्तु दुर्ग्राह्यौ ब्रह्मशापसमुद्भवौ ॥३५॥ तच्छ्रुत्वा पार्थिवः सोऽपि तस्मिन्स्थाने व्यवस्थितः॥ तं ब्राह्मणं पुनः प्राह न भेतव्यं त्वया द्विज ॥ ३६ ॥ अहं त्वां रक्षयिष्यामि व्याधेरस्मात्सुदारुणात् ॥ अत्र तस्मात्प्रतीक्षस्व कञ्चित्कालं ममाज्ञया ॥ ३७ ॥ एवमुक्त्वा ततश्चक्रे तदर्थं सुमहत्तपः ॥ आराधयन्प्रभक्त्या च सम्यक्तां क्षेत्रदेवताम् ॥३८॥ मुंडेनाथर्वशीर्षेण दिवारात्रमतंद्रितः ॥ क्षेत्रपालोत्थसूक्तेन वास्तुसूक्तेन च द्विजाः ॥३९॥ सिद्धार्थै रक्तपुष्पैश्च गुग्गुलेन सुधूपितैः ॥ होमं कुर्वन्नृपः पश्चान्नीलरुद्रान्विशेषतः ॥४०॥ अथ नक्तावसानेन तस्य होमस्य चोत्थिता ॥ भित्त्वा धरातलं देवी मन्त्राकृष्टा विनिर्गता ॥४१॥ देवता तस्य क्षेत्रस्य ततः प्रोवाच तं नृपम् ॥ ४२ ॥ एकाहं तव भूपाल होमस्यास्य प्रभावतः ॥ विनिर्गता धरापृष्ठात्क्षेत्रस्यास्याधिपा स्मृता ॥ ४३ ॥ तस्माद्वद महाभाग यत्ते कृत्यं करोम्यहम् ॥ परां तुष्टिमनुप्राप्ता तस्माद्ब्रूहि यदीप्सितम् ॥ ४४ ॥ ॥ राजोवाच ॥ ॥ अत्र स्थाने सदा स्थेयं त्वया देवि विशेषतः ॥ व्याधिसंसर्गजो दोषो भूमेरस्या यथा व्रजेत् ॥ ॥ ४५ ॥ अद्यप्रभृति देवेशि तथा नीतिर्विधीयताम् ॥ नो चेदस्याः प्रसंगेन प्रभविष्यंति मानवाः ॥ ४६ ॥ व्याधिग्रस्ता यथा विप्रो योऽयं संद



१ मानुषं भाव्यमेव हि—मानुषेण अत्र अवश्यं भाव्यम्—इति मत्वा—इत्यर्थः । २ दुर्गन्धौ—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्यते पुरः ॥ मयात्र व्याधयः कालं चिरं संस्थापिता यतः ॥ भविष्यति च मे दोषो नो चेद्देवि न संशयः ॥ ४७ ॥ तथायं ब्राह्मणो रोगात्त्वत्प्रसा
दात्सुरेश्वरि ॥ मुक्तो भवतु मेदिन्यामत्र स्थेयं सदा त्वया ॥४८॥ ॥ क्षेत्रदेवतोवाच ॥ ॥ एतत्स्थानं मया सर्वं व्याधिदोषविवर्जितम् ॥ विहितं
सर्वदैवात्र स्थास्येऽहमिह सर्वदा ॥४९॥ सांप्रतं योऽत्र मे स्थाने व्याधिग्रस्तः समेष्यति ॥ पूजयिष्यति मां भक्त्या नीरोगः स भविष्यति ॥ ५० ॥
तस्मादद्य द्विजेंद्रोऽयं मां पूजयतु सादरम् ॥ भक्त्या परमया युक्तः शुचिर्भूत्वा समाहितः ॥ ५१ ॥ अत्र क्षेत्रे पराऽन्यास्ति विख्याता चंद्रकूपिका ॥
तस्यां स्नातु यथान्यायं नित्यमेव महीपते ॥ ५२ ॥ दक्षशापप्रशतेन या चंद्रेण पुरा कृता ॥ स्वस्नानार्थं क्षयव्याधिप्रग्रस्तेन महात्मना ॥ ५३ ॥
तथा खण्डशिलानाम देवता चात्र तिष्ठति ॥ सौभाग्यकूपिकास्नानं कृत्वा तां च प्रपश्यतु ॥५४॥ या कृता कामदेवेन कुष्ठग्रस्तेन वै पुरा ॥ स्नप
नार्थं च कुष्ठस्य विनाशाय च सादरम् ॥ ५५ ॥ तथा चाप्सरसां कुण्डमत्रास्ति नृपसत्तम ॥ तत्र स्नात्वा रवेरह्नि ततः पामा प्रशाम्यति ॥ ५६ ॥
॥ सूत उवाच ॥ ततः स ब्राह्मणः प्राप्य सुपुण्यां चन्द्रकूपिकाम् ॥ स्नानं कृत्वा च तां देवीं पूजयामास भक्तितः ॥ यावन्मासं ततो मुक्तः सत्वरं
राजयक्ष्मणा ॥ ५७ ॥ ततः सौभाग्यकूपीं तां दृष्ट्वा कामविनिर्मिताम् ॥ तथा स्नानं विधायाथ पश्यन्खंडशिलां च ताम् ॥ ५८ ॥ तद्वन्मासेन
निर्मुक्तः कुष्ठेन द्विजसत्तमाः ॥ तस्या देव्याः प्रभावेन कूपिकायां विशेषतः ॥ ५९ ॥ ततश्चाप्सरसां कुंडे स्नात्वैकं रविवासरम् ॥ पामया संपरि
त्यक्तो बुद्ध्येव विषयात्मकः ॥ ६० ॥ ततः स ब्राह्मणो जातो द्वादशार्कसमप्रभः ॥ तोषेण महता युक्तो दत्ताशीस्तस्य भूपतेः ॥ ६१ ॥ प्रययौ
वांछितं देशमनुज्ञातश्च भूभुजा ॥ देवताभ्यां प्रणामं च ताभ्यां कृत्वा पुनःपुनः ॥ ६२ ॥ सोपि राजा सदोषांस्तानजारूपान्विलोक्य च ॥ स्वस्यैव
ब्राह्मणं दृष्ट्वा तं तथा संप्रहर्षितः ॥ ६३ ॥ स्वयं च प्रययौ तत्र यत्रस्थो हाटकेश्वरः ॥ तेनैव च शरीरेण निजकांतासमन्वितः ॥ ६४ ॥ अजागृहे
स्थिता यस्मात्सा देवी क्षेत्रदेवता ॥ अजागृहा ततः ख्याता सर्वत्रैव द्विजोत्तमाः ॥ ६५ ॥ अद्यापि यक्ष्मणा ग्रस्तो यस्तां पूजयते नरः ॥ तेनैव
विधिना सम्यक्स नीरोगो द्रुतं भवेत् ॥ ६६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्येऽजा
गृहोत्पत्तिमाहात्म्यवर्णनंनाम त्रयस्त्रिंशदुत्तरशततमोऽध्यायः ॥ १३३ ॥ ॥ ऋषय ऊचुः ॥ ॥ यदा दक्षेण क्रुद्धेन पुरा शप्तो हिमद्युतिः ॥
तत्सर्वं भवता प्रोक्तं सोमनाथकथानकम् ॥ १ ॥ सांप्रतं वद कामस्य यथा कुष्ठोऽभवत्पुरा ॥ येन दोषेण शापश्च केन तस्य नियोजितः ॥ २ ॥
शिलाखंडा च या देवी तथा सौभाग्यकूपिका ॥ यथा तत्र समुत्पन्ना तथाऽस्माकं प्रकीर्तय ॥ ३ ॥ ॥ सूत उवाच ॥ ॥ पुरासीद्ब्राह्मणोनाम हारीत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



इति विश्रुतः ॥ स तपस्तत्र संतेपे वानप्रस्थाश्रमे वसन् ॥ ४ ॥ तस्य भार्याऽभवत्साध्वी रूपौदार्यसमन्विता ॥ त्रैलोक्यसुन्दरी साक्षाल्लक्ष्मीरिव मधुद्विषः ॥ ५ ॥ ख्याता पूर्णकलानाम सर्वैः समुदिता गुणैः ॥ तां दृष्ट्वा पद्मजोऽप्याशु कामस्य वशगोऽभवत् ॥ ६ ॥ कदाचिदपि संप्राप्तस्तस्मिन्क्षेत्रे मनोभवः ॥ सह रत्या तथा प्रीत्या कामेश्वरदिदृक्षया ॥ ७ ॥ एतस्मिन्नंतरे सापि स्नानार्थं तत्र चागता ॥ कृत्वा वस्त्रपरित्यागं प्रविवेश जलाशयम् ॥ ८ ॥ अथ तां कामदेवोपि समालोक्य शुभाननाम् ॥ आत्मीयैरपि निर्विद्धो हृदये पुष्पसायकैः ॥ ९ ॥ ततो रतिं परित्यक्त्वा प्रीतिं च शरपीडितः॥ विजनं कंचिदासाद्य प्रसुप्तः स तरोरधः ॥ १० ॥ गात्रैः पुलकितैः सर्वैर्निःश्वासान्निःश्वसन्मुहुः ॥ अग्निवर्णान्सुदीर्घांश्च बाष्पपूर्णविलोचनः ॥ ११ ॥ तिष्ठन्स दर्शने तस्या एकदृष्ट्या व्यलोकयत् ॥ योगीव सुसमाधिस्थो ध्यायंस्तद्ब्रह्म संस्थितम् ॥ १२ ॥ सापि कामं समालोक्य सानुरागं पुरः स्थितम् ॥ जृंभाभंगकृतास्यं च वेपमानशरीरकम् ॥ १३ ॥ सापि तद्बाणनिर्भिन्ना साभिलाषा बभूव ह ॥ कामं प्रति विशेषेण तस्य रूपेण मोहिता ॥ १४ ॥ अथ तस्माज्जलात्कृच्छ्राद्विनिष्क्रम्य शुचिस्मिता ॥ तीरोपांतं समासाद्य स्थिता तद्दृष्टिगोचरे ॥ १५ ॥ ततः कामः समुत्थाय शनैस्तदंतिकं ययौ ॥ कृतांजलिपुटो भूत्वा ततः प्रोवाच सादरम् ॥ १६ ॥ का त्वमत्र विशालाक्षि प्राप्ता स्नातुं जलाशये ॥ मम नाशाय चार्वंगि तस्माच्छृणु वचो मम ॥ १७ ॥ अहं पुष्पशरो लोके प्रसिद्धश्चारुहासिनि ॥ विडंबनां मया नीता देवा अपि निजैः शरैः ॥ १८ ॥ मद्बाणेनाहतो रुद्रः स्वशरीरे नितंबिनीम् ॥ अर्द्धेन धारयामास त्यक्त्वा लज्जां सुदूरतः ॥ १९ ॥ ब्रह्मा मच्छरनिर्भिन्नः स्वसुतां चकमे ततः ॥ जनयामास तान्विप्रान्वालखिल्यांस्तथाविधान् ॥ २० ॥ अहिल्यां चकमे शक्रो गौतमस्य प्रियां सतीम् ॥ मद्बाणैः पीडितोऽतीव स्वर्गादेत्य धरातलम् ॥ २१ ॥ एवं देवा अपि क्षुण्णा मच्छरैर्ये महत्तराः ॥ किं पुनर्मानवाः सुभ्रूः कृमिप्रायाः सुचंचलाः ॥ २२ ॥ आकीटांतं जगत्सर्वमाब्रह्मांतं तथैव च ॥ विडंबनां परां प्राप्तं मच्छरैश्चारुहासिनि ॥ २३ ॥ अहं पुनस्त्वया भीरु नीतोऽवस्थामिमां शुभे ॥ २४ ॥ तस्माद्देहि महाभागे ममाद्य रतदक्षिणाम् ॥ यावन्न यांति संत्यज्य मम प्राणाः कलेवरात् ॥ २५ ॥ ॥ सूत उवाच ॥ ॥ सापि तद्वचनं श्रुत्वा पतिव्रतपरायणा ॥ हन्यमाना विशेषेण तद्बाणैर्हृदये भृशम् ॥ २६ ॥ अनभिज्ञा च सा साध्वी कामधर्मस्य केवलम् ॥ तापसैः सह संवृद्धा नान्यं जानाति किंचन ॥ २७ ॥ वक्तुं तद्विषये यच्च प्रोच्यते कामपीडितैः ॥ अधोमुखाऽलिखद्भूमिमंगुष्ठेन स्थिता चिरम् ॥ २८ ॥ एतस्मिन्नन्तरे भानुः प्राप्तश्चास्तं गिरिं प्रति ॥ विहारसमये[1] प्राप्त आहिताग्निर्निवेशने ॥ २९ ॥ हारीतोऽपि



१ विहारसमये—औपासनहोमसमये—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चिरं वीक्ष्य तन्मार्गं चाकृताशनः ॥ ततः स चिंतयामास कस्मात्सा चात्र नागता ॥ ३० ॥ स्नात्वा तीर्थवरे तस्मिन्दृष्ट्वा तां चन्द्रकूपिकाम् ॥ कामेश्वरं च देवेशं कामदं सुखदं नृणाम् ॥ ३१ ॥ ततः शिष्यसमायुक्तो वीक्षमाण इतस्ततः ॥ तं देशं समनुप्राप्तो यत्र तौ द्वावपि स्थितौ ॥ ३२ ॥ आलपन्बहुधा कामो हन्यमानो निजैः शरैः ॥ सापि चैव विशेषेण व्रीडयाऽधोमुखी स्थिता ॥ ३३ ॥ स गुल्मांतरितः सर्वं तच्छुत्वा कामजल्पितम् ॥ तस्याश्च तद्गतं भावं ततः कोपादुवाच सः ॥ ३४ ॥ यस्मात्पाप त्वया पत्नी ममैवं शरपीडिता ॥ अनभिज्ञा तथा साध्वी पतिधर्मपरायणा ॥ कुष्ठव्याधिसमायुक्तस्तस्माद्विप्रियदर्शनः ॥ ३५ ॥ त्वं भविष्यसि पापात्मन्मुक्तो दारैः स्वकैरपि ॥ साऽपि चैव विशेषेण व्रीडयाऽधोमुखी स्थिता ॥ ३६ ॥ एषापि च शिलाप्राया भविष्यति विचेतना ॥ त्वां दृष्ट्वा या सरागाऽभून्निजधर्मबहिष्कृता ॥ ३७ ॥ ततः प्रसादयामास तं कामः प्रणिपत्य च ॥ न ज्ञातेयं मया विप्र तव भार्येति सुन्दरी ॥ ३८ ॥ तेन प्रोक्ता विरुद्धानि वाक्यानि विविधानि च ॥ एतस्या नास्ति दोषोऽत्र मद्बाणैः पीडिता भृशम् ॥ ३९ ॥ सानुरागा परं जाता नोक्तं किंचिद्वचो मुने ॥ तस्मान्नार्हसि शापं त्वं दातुमस्याः कथंचन ॥ ४० ॥ ममास्त्येषोऽपराधोऽत्र तस्मान्मे निग्रहं कुरु ॥ भूयोऽपि ब्राह्मणश्रेष्ठ अस्याः शापसमुद्भवम् ॥ ४१ ॥ अपि रुद्रादयो देवा मद्बाणेभ्यो द्विजोत्तम ॥ सोढुं शक्ता न ते यस्मात्तत्कथं स्यादियं शिला ॥ ४२ ॥ तथात्र त्रिविधं पापं प्रवदंति मनीषिणः ॥ मानसं वाचिकं चैव कर्मजं च तृतीयकम् ॥ तदस्माकं द्विधा जातमेकं चास्या मुनीश्वर ॥ ४३ ॥ भार्यायास्ते सुरूपायास्तस्मात्संपूर्णनिग्रहम् ॥ करिष्यसि न ते भीतिः काचिदस्ति परत्रजा ॥ ॥ ४४ ॥ मनस्तापाद्व्रजेत्पापं मानसं वाचिकं च यत् ॥ तस्य प्रसादनेनैव यस्योपरि विजल्पितम् ॥ ४५ ॥ प्रायश्चित्तैर्यथोक्तैश्च कर्मजं पातकं व्रजेत् ॥ धर्मशास्त्रैः परिप्रोक्तं यतः सर्वैर्महामुने ॥ ४६ ॥ ॥ हारीत उवाच ॥ ॥ अन्यत्र विषये तस्याः पातकं कामदेव ते ॥ एतस्य तव धर्मस्य प्राधान्यं मनसः स्मृतम् ॥ ४७ ॥ तस्मादेवंविधा चेयं सदा स्थास्यति चाधम ॥ किं पुनः कुरु यत्कृत्यं नाहं वक्ष्यामि किंचन ॥ ४८ ॥ प्रथमं मनसा सर्वं चिंत्यते तदनंतरम् ॥ ततः प्रजल्पते वाचा क्रियते कर्मणा ततः ॥ ४९ ॥ प्रमाणं हि मनस्तस्मात्सर्वकृत्येषु सर्वदा ॥ एतस्मात्कारणात्पूर्णो मयाऽस्या निग्रहः कृतः ॥ ५० ॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वा मुनिश्रेष्ठो हारीतः स्वाश्रमं ययौ ॥ सापि पूर्णकला जाता शिलारूपा च तत्क्षणात् ॥ ५१ ॥ कामदेवोऽपि कुष्ठेन ग्रस्तो रौद्रेण च द्विजाः ॥ शीर्णनासांघ्रिपाणिश्च नेत्राणामप्रियोऽभवत् ॥ ५२ ॥ अथ कामे निरुत्साहे संजाते द्विजसत्तमाः ॥ व्याधिग्रस्ते जगत्यस्मिन्सृष्टिरोधो व्यजायत ॥ ५३ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



केवलं क्षीयते लोको नैव वृद्धिं प्रगच्छति ॥ स्वेदजा येऽपि जीवाः स्युस्तेपि याताः परिक्षयम् ॥ ५४ ॥ एतस्मिन्नंतरे देवाः सर्वे चिंतासमाकुलाः ॥
किमिदं क्षीयते लोको जलस्थैः स्थलजैः सह ॥५५॥ न दृश्यते क्वचिद्बालः कोऽपि कश्चित्कथंचन ॥ नच गर्भवती नारी कश्चित्क्षेमं स्मरस्य च ॥
॥५६॥ ततस्तं व्याधिना ग्रस्तं ज्ञात्वात्र क्षेत्रसंश्रयम् ॥ आजग्मुस्त्वरिताः सर्वे व्याकुलेनांतरात्मना॥५७॥ कामेश्वरपुरस्थं च तं दृष्ट्वा कुसुमायुधम्॥
अत्यंतविकृताकारं चिंतयानं महेश्वरम् ॥ ५८ ॥ ततः प्रोचुः सुदुःखार्ताः किमिदं कुसुमायुध ॥ निरुत्साहः समुत्पन्नः कुष्ठव्याधिसमाकुलः ॥५९॥
ततश्चाधोमुखो जातो लज्जया परया वृतः ॥ प्रोवाच शापजं सर्वं हारीतस्य विचेष्टितम् ॥ ६० ॥ ततस्ते विबुधाः प्रोचुः पातकं यद्गिरा कृतम् ॥
तत्तस्याराधनात्सर्वं संक्षयं यात्यसंशयम् ॥ ६१ ॥ तस्मादेतां शिलारूपां त्वमाराधय चित्तज ॥ येन कुष्ठः क्षयं याति ततस्तेजोऽभिवर्धते ॥ ६२ ॥
जगति स्यान्महासृष्टिर्देवकृत्यं कृतं भवेत् ॥ न तेऽस्ति कायजं पापं यतो मुक्ता प्रवाचिकम् ॥ ६३ ॥ अत्र कुण्डे त्वदीयेऽन्यो यः स्नात्वा श्रद्धया
न्वितः ॥ एनां पापविनिर्मुक्तां शिलां वै मानवः स्पृशेत् ॥ ६४ ॥ कुष्ठव्याधिसमोपेतः कायोत्थेनापि कर्मणा ॥ सोऽपि व्याधिविनिर्मुक्तो भवि
ष्यति गतज्वरः ॥ ६५ ॥ एतत्सौभाग्यकूपं च लोके ख्यातं जलाशयम् ॥ भविष्यति न संदेहः सर्वरोगक्षयावहम् ॥ ६६ ॥ दद्रूणि दुर्विभूतानि
तथान्याश्च विचर्चिकाः ॥ अत्र स्नातस्य यास्यंति दृष्टेतां सद्य एव हि ॥ ६७ ॥ एवमुक्त्वाथ ते देवाः प्रजग्मुस्त्रिदशालयम् ॥ कामदेवोऽपि तत्रस्थ
स्तस्याः पूजामथ व्यधात् ॥ ६८ ॥ ततश्च समतिक्रांते मासमात्रे द्विजोत्तमाः ॥ तादृग्रूपः स संजातो यादृगासीत्पुरा स्मरः ॥ ६९ ॥ ततश्चायतनं
तस्याः कृत्वा श्रद्धासमन्वितः ॥ जगाम वांछितं देशं सृष्ट्यर्थं यत्नमास्थितः ॥ ७० ॥ सापि नम्रमुखी तादृक्तेन शप्ता तथैव च ॥ संजाता खण्डका
कारा तेन खण्डशिला स्मृता ॥ ७१ ॥ यस्तां पूजयते भक्त्या त्रयोदश्यां तथैव च ॥ नापवादो भवेत्तस्य परदारसमुद्भवः ॥ ७२ ॥ कामिन्याश्च
विशेषेण प्राहैतच्छंकरात्मजः ॥ कार्तिकेयो द्विजश्रेष्ठाः सत्यमेतन्मयोदितम् ॥ ७३ ॥ तथा कामेश्वरं देवं कामदेवप्रतिष्ठितम् ॥ त्रयोदश्यां समा
राध्य सर्वान्कामानवाप्नुयात् ॥ ७४ ॥ रतिप्रीतिसमायुक्तः स्थितस्तत्र स्मरस्तथा ॥ मूर्तो ब्राह्मणशार्दूलाः श्रेष्ठं प्रासादमाश्रितः ॥ ७५ ॥ विरूपो
दुर्भगो यो वा त्रयोदश्यां समाहितः ॥ यस्तं कुंकुमजैः पुष्पैः संपूजयति मानवः ॥ ७६ ॥ स सौभाग्यसमायुक्तो रूपवांश्च प्रजायते ॥ या नारी
पतिना त्यक्ता सपत्नीजनसंवृता ॥ ७७ ॥ तं देवं सुकलत्राढ्यं तथैव परिपूजयेत् ॥ त्रयोदश्यां द्विजश्रेष्ठाः केसरैः कुंकुमोद्भवैः ॥ ७८ ॥ सा सौभा



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्यवती विप्रा जायते च प्रजावती ॥ धनधान्यसमृद्धा च दुःखशोकविवर्जिता ॥ दोषैः सर्वैर्विनिर्मुक्ता शंसिता धरणीतले ॥ ७९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये खंडशिलासौभाग्यकूपिकोत्पत्तिमाहात्म्यवर्णनं नाम चतुस्त्रिंशदुत्तरशततमोध्यायः ॥ १३४ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तथान्यापि च तत्रास्ति दीर्घिकाख्या सुशोभना ॥ सरसी लोकविख्याता सर्वपातकनाशनी ॥ १ ॥ यस्यां स्नातो नरः सम्यग्भास्करस्योदयं प्रति ॥ ज्येष्ठशुक्लचतुर्दश्यां मुच्यते सर्वपातकैः ॥२॥ आसीत्पूर्वं द्विजो वीरशर्मनामातिविश्रुतः ॥ वेदविद्याव्रतस्नातो वर्धमाने पुरोत्तमे ॥ ३ ॥ तस्य कन्या समुत्पन्ना कदाचिल्लक्षणाच्युता ॥ अतिदीर्घा प्रमाणेन जनहास्यविवर्द्धिनी ॥ ४ ॥ ततः सा यौवनं प्राप्ता तद्रूपापि कुमारिका ॥ न कश्चिद्वरयामास शास्त्रवाक्यमनुस्मरन् ॥ ५ ॥ अतिसंक्षिप्तकेशा या अतिदीर्घातिवामना ॥ उद्वाहयति यः कन्यां पुरुषः काममोहितः ॥ ६ ॥ षण्मासाभ्यंतरे मृत्युं स प्राप्नोति नरो ध्रुवम् ॥ एतस्मात्कारणात्सर्वे तां त्यजंति कुमारिकाम् ॥ ७ ॥ पुरुषा अतिदीर्घत्वयुक्तां वीक्ष्य समंततः ॥ ततो वैराग्यमापन्ना तपस्तेपेऽतिदारुणम् ॥ ८ ॥ चांद्रायणानि कृच्छ्राणि तया चीर्णान्यनेकशः ॥ पाराकाणि यथोक्तानि तथा सांतपनानि च ॥ ९ ॥ व्रतं यद्विद्यते किंचिन्नियमः संयमस्तथा ॥ अन्यच्चापि शुभं कृत्यं तत्सर्वं च तया कृतम् ॥ १० ॥ एवं तस्या व्रतस्थाया जरा सम्यगुपस्थिता ॥ तथापि तेजसो वृद्धिर्ववृधे तपसा कृता ॥ ११ ॥ सा च नित्यं महेन्द्रस्य सभां यात्यतिकौतुकात् ॥ देवर्षीणां मतं श्रोतुं देवतानां विशेषतः ॥ १२ ॥ यदा सा स्वासनं त्यक्त्वा प्रयाति स्वगृहोन्मुखी ॥ तदैवाभ्युक्षणं चक्रुस्तत्र शक्रस्य किंकराः ॥ १३ ॥ तथान्यदिवसे दृष्टं क्रियमाणं तया हि तत् ॥ अभ्युक्षणं स्वकीये च आसने द्विजसत्तमाः ॥ ॥ १४ ॥ ततः कोपपरीतांगी दीर्घिका सा कुमारिका ॥ त्रिशाखां भृकुटीं कृत्वा ततः प्राह पुरंदरम् ॥ १५ ॥ किं दोषं वीक्ष्य मे शक्र प्रोक्षितं चासनं त्वया ॥ परद्वारकृतं दोषं किं मयैतत्कृतं क्वचित् ॥ १६ ॥ तस्मान्मे पातकं ब्रूहि नो चेच्छापं सुदारुणम् ॥ त्वयि दास्याम्यसंदिग्धं सत्ये नात्मानमालभे ॥ १७ ॥ ॥ इन्द्र उवाच ॥ ॥ न ते दीर्घेऽस्ति दोषोत्र कश्चिदेकं विना शुभे ॥ तेनाथ क्रियते चैतदासनस्याभिषेचनम् ॥ ॥ १८ ॥ त्वं कुमार्यपि संप्राप्ता ऋतुकालं विगर्हिता ॥ तेन दोषं त्वमापन्ना नान्यदस्तीह कारणम् ॥ १९ ॥ तस्मादद्यापि त्वां कश्चिदुद्वाहयति तापसः ॥ त्वं तं वरय भर्तारं येन गच्छसि मेध्यताम् ॥ २० ॥ ततश्च लज्जया युक्ता सा तदा दीर्घकन्यका ॥ गत्वा भूमितले तूर्णं वर्धमाने पुरो

१ महत्-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



त्तमे ॥ २१ ॥ ततः फूत्कर्तुमारब्धा चत्वरेषु त्रिकेषु च ॥ उच्छ्रित्य दक्षिणं पाणिं भ्रममाणा इतस्ततः ॥ २२ ॥ यदि कश्चिद्द्विजो जात्या करोति मम सांप्रतम् ॥ पाणिग्राहं तपोऽर्द्धस्य श्रेयो यच्छामि तस्य च ॥२३॥ एवं तां प्रविजल्पन्तीं श्रुत्वा लोका दिवानिशम् ॥ उन्मत्तामिति मन्वाना हास्यं चक्रुः परस्परम् ॥ २४ ॥ ततः कतिपयाहस्य प्रकुर्वती च दीर्घिका ॥ कुष्ठव्याधिगृहीतेन ब्राह्मणेन परिश्रुता ॥ २५ ॥ ततः प्रोवाच मन्दं स समाहूय सुदुःखिताम् ॥ २६ ॥ अहं त्वामुद्वहाम्यद्य कृत्वा पाणिग्रहं तव ॥ यदि मद्वचनं सर्वं सर्वदैवानुतिष्ठसि ॥ २७ ॥ ॥ ॥ कुमारिकोवाच ॥ ॥ करिष्यामि न संदेहस्तव वाक्यं द्विजाधिप ॥ कुरु पाणिग्रहं मेऽद्य विधिदृष्टेन कर्मणा ॥ २८ ॥ ॥ सूत उवाच ॥ ॥ ततस्तस्याः कुमार्याः स पाणिं जग्राह दक्षिणम् ॥ गृह्योक्तेन विधानेन देवाग्निगुरुसंनिधौ ॥ २९ ॥ अथ सा प्राह भूयोऽपि विवाहकृतमंगला ॥ आदेशं देहि मे नाथ यं करोमि तवाधुना ॥ ३० ॥ ॥ पतिरुवाच ॥ ॥ अष्टषष्टिषु तीर्थेषु स्नातुमिच्छामि सुन्दरि ॥ साहाय्ये न त्वदीयेन यदि शक्नोषि तत्कुरु ॥ ३१ ॥ बाढमित्येव सा प्रोच्य ततस्तूर्णं पतिव्रता ॥ तत्प्रमाणं दृढं कृत्वा रम्यं वंशकुटीरकम् ॥ ३२ ॥ मृदुतूलसमायुक्तं ततः प्राह निजं पतिम् ॥ कृतांजलिपुटा भूत्वा प्रहृष्टेनान्तरात्मना ॥ ३३ ॥ एतत्तव कृते रम्यं कृतं वंशकुटीरकम् ॥ मम नाथारुहाशु त्वं येन कृत्वाथ मूर्धनि ॥ नयामि सर्वतीर्थेषु क्षेत्रेषु सुशुभेषु च ॥ ३४ ॥ ततः कुष्ठी प्रहृष्टात्मा शनैरुत्थाय भूतलात् ॥ तया चोद्धृतदेहः सन्सुप्तो वंशकुटीरके ॥ ३५ ॥ ततस्तं मस्तके कृत्वा सर्वतीर्थे यथासुखम् ॥ सर्वक्षेत्रेषु बभ्राम स्नापयन्ती निजं पतिम् ॥ ३६ ॥ यथा यथा स चक्रेऽथ स्नानं तीर्थेषु कुष्ठभाक् ॥ तथातथास्य गात्रेषु तेजो वृद्धिं प्रगच्छति ॥३७॥ ततः क्रमेण सा साध्वी भ्रममाणा महीतले ॥ हाटकेश्वरजे क्षेत्रे संप्राप्ता रजनीमुखे ॥ ३८ ॥ क्रान्ता वैक्लव्यमापन्ना भाराक्रान्ता पतिव्रता ॥ निद्रान्धा निश्वसन्ती च प्रस्खलन्ती पदेपदे ॥ ३९ ॥ अथ तत्र प्रदेशे तु माण्डव्यो मुनिपुंगवः ॥ शूलारोपितगात्रस्तु संतिष्ठति सुदुःखितः ॥ ४० ॥ अथ सा तं समासाद्य शूलं रात्रौ पतिव्रता ॥ निजगात्रेण भारार्त्ता गच्छमाना महासती ॥ ४१ ॥ तया संचालितः सोऽथ मांडव्यो मुनिपुंगवः ॥ परां पीडां समासाद्य ततः प्राह सुदुःखितः ॥४२॥ केनेदं पापमना शल्यं ममांतः परिचालितम् ॥ येनाहं दुःखयुक्तोऽपि भूयो दुःखास्पदीकृतः ॥ ४३ ॥ ॥ दीर्घिकोवाच ॥ ॥ न मया त्वं महाभाग निद्रोपहतया दृशा ॥ दृष्टस्तेन परिस्पृष्टो ह्यस्पृश्यः पापकृत्तमः ॥ ४४ ॥ न त्वया सदृशश्चान्यः पापात्मास्ति धरातले ॥ शिरस्युद्धृतशूलोऽपि यो मृत्युं नाधिगच्छति ॥ ॥ ४५ ॥ अहं पतिव्रता मूढ वहामि शिरसा धृतम् ॥ तीर्थयात्राकृते कांतं विकलांगं सुवल्लभम् ॥ ४६ ॥ कस्मात्तस्यास्तिरस्कारं मम यच्छसि



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निष्ठुरम् ॥ अज्ञातां मूढबुद्धिः सन्विशेषान्मानुषोद्भवाम् ॥ ४७ ॥ ॥ माण्डव्य उवाच ॥ ॥ अहं यादृक्त्वया प्रोक्तस्तादृगेव न संशयः ॥ पापा त्मा मूढबुद्धिश्च अस्पृश्यः सर्वदेहिनाम् ॥ ४८ ॥ यदि प्रातस्तवायं च भर्त्ता जीवति निष्ठुरे ॥ येन मे जनिता पीडा प्राणांतकरणी दृढा ॥ ४९ ॥ तस्मादेष तवाभीष्टः स्पृष्टः सूर्यस्य रश्मिभिः ॥ मया शप्तः परित्यागं जीवितस्य करिष्यति ॥ ५० ॥ ॥ दीर्घिकोवाच ॥ ॥ यद्येवं मरणं पत्युः प्रभाते संभविष्यति ॥ मदीयस्य ततः प्रातर्नोद्गमिष्यति भास्करः ॥ ५१ ॥ एवमुक्त्वा ततः साथ निषसाद धरातले ॥ भूमौ तद्भर्तृसंयुक्तं मुक्त्वा वंशकुटीरकम् ॥ ५२ ॥ अथ तां प्राह कुष्ठी स पिपासा संप्रवर्तते ॥ तस्मात्तोयं समानेहि[1] पानार्थमतिशीतलम् ॥ ५३ ॥ तथैव सा समा कर्ण्य भर्तुरादेशमुत्सुका ॥ इतस्ततश्च बभ्राम जलार्थं न प्रपश्यति ॥ न च निर्याति दूरं सा त्यक्त्वारण्ये तथाविधम् ॥ ५४ ॥ भर्तारं श्वापदोत्थं च भयं हृदि वितन्वती ॥ उपविश्य ततो भूमौ स्पृष्ट्वा पादौ पतेस्तदा ॥ प्रोवाच दीर्घिका वाक्यं तारवाक्येन दुःखिता ॥ ५५ ॥ पतिव्रता त्वमाचीर्णं यदि सम्यङ्मया स्फुटम् ॥ तेन सत्येन भूपृष्ठान्निर्गच्छतु जलं शुभम् ॥ ५६ ॥ एवमुक्त्वा जघानाथ पादाघातेन मेदिनीम् ॥ कान्तभक्तिं पुरस्कृत्य तस्य जीवितवांछया ॥ ५७ ॥ एतस्मिन्नन्तरे तोयं पादाघातादनन्तरम् ॥ निष्क्रांतं निर्मलं स्वादु माण्डव्यस्य च पश्यतः ॥ ५८ ॥ ततस्तं स्नापयामास तस्मिंस्तोये श्रमातुरम् ॥ अपाययत्ततः पश्चात्स्वयं स्नात्वा पपौ जलम् ॥ ५९ ॥ एतस्मिन्नंतरे सूर्यः पतिव्रतकृताद्भयात् ॥ नाभ्युदेति समुत्पन्नस्ततः कालात्ययो महान् ॥ ६० ॥ अथ रात्रिं समालोक्य दीर्घां ये कामुका जनाः ॥ ते सर्वे तुष्टिमापन्ना स्तथा च कुलटाः स्त्रियः ॥ ६१ ॥ कौशिका राक्षसाश्चापि चोरा जाराश्च ये नराः ॥ ते सर्वे प्रोचुः संहृष्टाः समालिंग्य परस्परम् ॥ ६२ ॥ अद्या स्माकं विधिस्तुष्टो भगवान्मन्मथस्तथा ॥ येन दीर्घा कृता रात्रिर्नाशं नीतश्च भास्करः ॥ ६३ ॥ ये पुनर्ब्राह्मणाः शांता यज्ञकर्मसमुद्यताः ॥ ते सर्वे दुःखमापन्नाः सूर्योदयविनाकृताः ॥ ६४ ॥ न कश्चिद्यजनं चक्रे याजनं न च सद्द्विजः ॥ न श्राद्धं न च संकल्पं न स्वाध्यायं कथंचन ॥ ॥ ६५ ॥ न स्नानं न च दानं च लोकयात्रां विशेषतः ॥ व्यवहारं न कृत्यं च किंचिद्धर्मसमुद्भवम् ॥ ६६ ॥ एतस्मिन्नन्तरे देवाः सर्वे शक्रपुरो गमाः ॥ परं दौःस्थ्यं समापन्ना यज्ञभागविवर्जिताः ॥ ६७ ॥ ततो भास्करमासाद्य ऊचुर्दुःखसमन्विताः ॥ कस्मान्नोद्गमनं देव प्रकरोषि दिवाकर ॥ ॥ ६८ ॥ एतत्त्वया विना सर्वं जगद्व्याकुलतां गतम् ॥ ६९ ॥ तस्माल्लोकहितार्थाय त्वमुद्गच्छ यथा पुरा ॥ अग्निष्टोमादिका यज्ञा वर्तंते येन

१ समानेहि—आर्षोऽयं प्रयोगः । समानय—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



भूतले ॥ ७० ॥ ॥ सूर्य उवाच ॥ ॥ पतिव्रतासमादेशात्त्यक्तश्चाभ्युदयो मया ॥ तस्माद्गत्वा सुराः सर्वे तां वदंतु कृते मम ॥ ७१ ॥ येन
तद्वाक्यमासाद्य प्रवर्त्तामि यथासुखम् ॥ अन्यथा मां शपेत्क्रुद्धा नूनं सा हि पतिव्रता ॥ ७२ ॥ एवं सा तपसा युक्ता प्रोत्कृष्टं हि सुरोत्तमाः ॥ पति
व्रतात्वमाधत्ते तथान्यदपरं महत् ॥ ७३ ॥ कस्तस्या वचनं शक्तः कर्तुमेवमतोऽन्यथा ॥ एतस्मात्कारणाद्भीतो नोद्गच्छामि कथंचन ॥ ७४ ॥ न
तत्क्रतुसहस्रेण यजंतः प्राप्नुयुः फलम् ॥ पतिव्रतात्वमापन्ना यत्स्त्री विंदति केवलम् ॥ ७५ ॥ ततस्ते विबुधाः सर्वे गत्वा तत्क्षेत्रमुत्तमम् ॥ प्रोचुस्तां
दीर्घिकां वाक्यैर्मृदुभिः पुरतः स्थिताः ॥ ७६ ॥ त्वया पतिव्रते सूर्यो यन्निषिद्धो न तत्कृतम् ॥ शुभं यतो हताः सर्वा भूतले शोभनाः क्रियाः ॥७७॥
तस्मादुद्गच्छतु प्राज्ञे त्वद्वाक्यात्तीक्ष्णदीधितिः ॥ यज्ञक्रिया विशेषेण येन वर्तंति भूतले ॥ ७८ ॥ ॥ पतिव्रतोवाच ॥ अयं च मे पतिः सद्यः
प्राणेभ्योऽपि च यः प्रियः ॥ सोऽभ्येति निधनं देवाः प्रोद्गते रविमंडले ॥ ७९ ॥ शप्तश्चानेन दुष्टेन मांडव्येन सुपाप्मना ॥ कार्यं विनापि निर्दिष्ट
स्तद्ब्रूयां भास्करं कथम् ॥ ८० ॥ उदयार्थं न मे यज्ञैः कार्यं किंचिन्न चापरैः ॥ श्राद्धदानादिकैः कृत्यैः संजातैर्दयितं विना ॥ ८१ ॥ ॥ सूत
उवाच ॥ ॥ ततस्ते विबुधाः सर्वे समालोक्य परस्परम् ॥ चिरकालं सुदुःखार्तास्तामूचुर्विनयान्विताः ॥ ८२ ॥ उद्गच्छतु रविर्भद्रे तवायं
दयितः पतिः ॥ प्रयातु निधनं सद्यो भूयादेष मुनीश्वरः ॥ ८३ ॥ पुनर्जीवापयिष्यामो वयमेनमपि द्रुतम् ॥ मृत्युमार्गमनुप्राप्तं त्वत्कृते पतिवत्सले
॥ ८४ ॥ पञ्चविंशतिवर्षीयं कामदेवमिवापरम् ॥ त्वं द्रक्ष्यसि सुदीप्तांगं सर्वलक्षणलक्षितम् ॥ ८५ ॥ भूत्वा पंचदशाब्दीया पद्मपत्रायतेक्षणा ॥
मर्त्यलोके सुखं सम्यक्स्वेच्छया साधयिष्यसि ॥ ८६ ॥ एषोऽपि मुनिशार्दूलो विपाप्मा सांप्रतं शुभे ॥ शूलवेधेन निर्मुक्तः सुखभागी भवत्वलम्॥
॥ ८७ ॥ ॥ सूत उवाच ॥ ॥ बाढमित्येव च प्रोक्ते तया स द्विजसत्तमाः ॥ उद्गतो भगवान्सूर्यस्तत्क्षणादेव वेगतः ॥ ८८ ॥ ततः सूर्यांशुसंस्पृष्टः
स मृतश्च सुकुष्ठभाक् ॥ विबुधानां करैः स्पृष्टः पुनरेव समुत्थितः ॥ ८९ ॥ पंचविंशतिवर्षीयः कामदेव इवापरः ॥ संस्मरन्पूर्विकां जातिं सर्वां हर्ष
समन्वितः ॥ ९० ॥ दीर्घिकापि परिस्पृष्टा स्वयं देवेन शंभुना ॥ संजाता यौवनोपेता दिव्यलक्षणलक्षिता ॥ ९१ ॥ पद्मपत्रेक्षणा रम्या चन्द्रबि
म्बसमानना ॥ मध्ये क्षामा सुगौरांगी पीनोन्नतपयोधरा ॥ ९२ ॥ ततस्तं मुनिशार्दूलं शूलाग्रादवतार्य च ॥ प्रोचुश्च विबुधश्रेष्ठाः सादरं हर्षसंयुताः
॥९३॥ एतत्सत्यं कृतं वाक्यं मुने तव यथोदितम्॥ मृतोऽपि ब्राह्मणः कुष्ठी संस्पृष्टो रविरश्मिभिः॥९४॥पुनरुत्थापितोऽस्माभिः कृतश्च तरुणः पुनः॥

१ शुभः—इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनया भार्यया सार्धं तस्मात्त्वं स्वाश्रमं व्रज ॥९५॥ नास्माकं दर्शनं व्यर्थं कथंचिदपि जायते ॥ तस्मात्प्रार्थय यच्चित्ते तव नित्यं समाश्रितम् ॥९६॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये पतिव्रतावरलाभोनाम पञ्चत्रिंशदुत्तरशततमोऽध्यायः ॥ १३५ ॥ ॥ छ ॥ ॥ मांडव्य उवाच ॥ ॥ ग्रहीष्यामि सुरश्रेष्ठा वरं युष्मत्समुद्भवम् ॥ परं मे निर्णयं चैकं धर्मराजः प्रचक्षतु ॥ ॥ १ ॥ सर्वेषां प्राणिनां लोके कृतं कर्म शुभाशुभम् ॥ उपतिष्ठति नान्यत्र सत्यमेतत्सुरोत्तमाः ॥ २ ॥ मयाप्यत्र परे चापि किं कृतं पातकं च यत् ॥ ईदृशीं वेदनां प्राप्तो न च मृत्युं कथंचन ॥ ३ ॥ ॥ धर्मराज उवाच ॥ ॥ अन्यदेहे त्वया विप्र बालभावेन वर्तता ॥ शूलाग्रेण सुतीक्ष्णेन काये विद्धो बकः क्षितौ ॥ ४ ॥ नान्यत्कृतमपि स्वल्पं पातकं किंचिदेव हि ॥ एतस्मात्कारणादेषा व्यथा संसेविता द्विज ॥ ५ ॥ ॥ ॥ सूत उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा भृशं क्रोधसमन्वितः ॥ ततस्तं प्राह मांडव्यो धर्मराजं पुरः स्थितम् ॥ ६ ॥ अस्य स्वल्पापराधस्य यस्माद्भूयान्विनिग्रहः ॥ कृतस्त्वया सुदुर्बुद्धे तस्माच्छापं गृहाण मे ॥ ७ ॥ त्वं प्राप्य मानुषं देहं शूद्रयोनौ व्यवस्थितः ॥ जातिक्षयकृतं दुःखं प्रभूतं सेवयिष्यसि ॥ ८ ॥ तथा कृता मयैषाद्य व्यवस्था सर्वदेहिनाम् ॥ अष्टमाद्वत्सरादूर्ध्वं कर्मणा गर्हितेन च ॥ प्रग्रहीष्यति वै जंतुः पुरुषो योषिदेव वा ॥ ९ ॥ एवमुक्त्वा स मांडव्यो धर्मराजं ततः परम् ॥ प्रस्थितो रोषनिर्मुक्तो वांछिताशां प्रति द्विजाः ॥ १० ॥ अथ तं प्रस्थितं दृष्ट्वा प्रोचुः सर्वे दिवौकसः ॥ धर्मराजकृते व्यग्राः श्रुत्वा शापं तथाविधम् ॥ ११ ॥ ॥ देवा ऊचुः ॥ ॥ भगवन्पापसक्तस्य धर्मराजस्य केवलम् ॥ न त्वमर्हसि शापेन शूद्रं कर्तुं कथंचन ॥ १२ ॥ प्रसादं कुरु तस्मात्त्वमस्य धर्मपतेर्द्विज ॥ अस्माकं वचनात्सद्यः प्रार्थयस्व तथा वरम् ॥ ॥ १३ ॥ ॥ मांडव्य उवाच ॥ ॥ नान्यथा जायते वाणी या मयोक्ता सुरोत्तमाः ॥ अवश्यं धर्मराजोऽयं शूद्रयोनौ प्रयास्यति ॥ १४ ॥ परं नैवास्य संतानं तस्यां योनौ भविष्यति ॥ संप्राप्स्यति च भूयोऽपि धर्मराजत्वमुत्तमम् ॥ १५ ॥ आराधयतु चाव्यग्रः क्षेत्रेऽत्रैव त्रिलोचनम् ॥ प्रसादात्तस्य देवस्य शीघ्रं मृत्युमवाप्स्यति ॥ १६ ॥ तथा देयो वरो मह्यं भवद्भिर्यदि स्वर्गपाः ॥ तदेषा शूलिकाऽस्माकं स्पर्शाद्भूयात्सुधर्मदा ॥ ॥ १७ ॥ ॥ देवा ऊचुः ॥ ॥ एनां यः प्रातरुत्थाय स्पर्शयिष्यति शूलिकाम् ॥ पातकात्स विमुक्तो वा इह लोके भविष्यति ॥ १८ ॥ एवमुक्त्वा मुनिं तं ते देवाः शक्रपुरोगमाः ॥ ततस्तां सादरं प्राहुः सह भर्त्रा पतिव्रताम् ॥ १९ ॥ त्वमपि प्रार्थयाभीष्टमस्मत्तो वरवर्णिनि ॥ यत्ते चित्ते स्थितं नित्यं नादेयं विद्यतेऽत्र नः ॥ २० ॥ ॥ पतिव्रतोवाच ॥ ॥ येयं मया कृता गर्ता स्थानेऽत्र त्रिदशेश्वराः ॥ मन्नाम्ना ख्यातिमायातु दीर्घ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





केति जगत्रये ॥ २१ ॥ ॥ देवा ऊचुः ॥ ॥ अद्यप्रभृति लोकेऽत्र गर्त्तेयं तव शोभने ॥ दीर्घिकेति सुविख्याता भविष्यति जगत्रये ॥ २२ ॥ येऽस्यां स्नानं करिष्यंति प्रातरुत्थाय मानवाः ॥ सर्वपापविनिर्मुक्तास्ते भविष्यंति तत्क्षणात् ॥ २३ ॥ कन्याराशिगते सूर्ये संप्राप्ते पंचमीदिने ॥ येऽत्र स्नानं करिष्यंति श्रद्धया सहिता नराः ॥ २४ ॥ अपुत्रास्ते भविष्यंति सपुत्रा वंशवर्धनाः ॥ एवमुक्त्वाऽथ तां देवा जग्मुः स्वर्गं द्विजोत्तमाः॥ ॥ २५ ॥ पतिव्रतापि तेनैव सह कांतेन सुन्दरी ॥ सेवयामास कल्याणी स्मरसौख्यमनुत्तमम् ॥ २६ ॥ पर्वतेषु सुरम्येषु नदीनां पुलिनेषु च ॥ उद्यानेषु विचित्रेषु वनेषूपवनेषु च ॥ २७ ॥ ततो वयसि संप्राप्ते पश्चिमे कालपर्ययात् ॥ तदेवात्मीयसत्तीर्थं सेवयामास सादरम् ॥ २८ ॥ ततो देहं परित्यक्त्वा स्वकांतं वीक्ष्य तं मृतम् ॥ तत्र तोये जगामाथ ब्रह्मलोकं पतिव्रता ॥ २९ ॥ एतद्वः सर्वमाख्यातं दीर्घिकाख्यानमुत्तमम् ॥ यस्य संश्रवणादेव नरः पापात्प्रमुच्यते ॥ ३० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखंडे हाटकेश्वर क्षेत्रमाहात्म्ये दीर्घिकोत्पत्तिमाहात्म्यवर्णनंनाम षट्त्रिंशदुत्तरशततमोऽध्यायः ॥ १३६ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ केनासौ मुनिशार्दूलो मांडव्यः सुमहातपाः ॥ शूलायां स्थापितः केन कारणेन च नो वद ॥ १ ॥ ॥ सूत उवाच ॥ ॥ स मांडव्यो मुनिः पूर्वं तीर्थयात्रां समाचरन् ॥ अस्मिन्क्षेत्रे समायातः श्रद्धया परया युतः ॥ २ ॥ विश्वामित्रीयमासाद्य सत्तीर्थं पावनं महत् ॥ पितॄणां तर्पणं चक्रे भास्करं प्रति स व्रती ॥ ३ ॥ जपन्विभ्राडिति श्रेष्ठं सूक्तं भास्करवल्लभम् ॥ एतस्मिन्नंतरे चौरो लोप्त्रमादाय कस्यचित् ॥ ४ ॥ कोपि तत्र समायातः पृष्ठे लग्नैर्जनैर्द्विजाः ॥ ततश्चौरोऽपि तं दृष्ट्वा मौनस्थं मुनिसत्तमम् ॥ ५ ॥ लोप्त्रं मुक्त्वा तदग्रेऽथ प्रविवेश गुहांतरे ॥ एतस्मिन्नंतरे प्राप्तास्ते जना लोप्त्रहेतवे ॥ ६ ॥ दृष्ट्वा लोप्त्रं तदग्रस्थं तमूचुर्मुनिपुंगवम् ॥ मार्गेणानेन चायातो लोप्त्रहस्तो मलिम्लुचः ॥ ब्रूहि शीघ्रं महाभाग केन मार्गेण निर्गतः ॥ ७ ॥ स च जानन्नपि प्राज्ञो गुहासंस्थं मलिम्लुचम् ॥ न किंचिदपि चोवाच मौनव्रतपरायणः ॥ ८ ॥ असकृत्प्रोच्यमानोऽपि परचिंतासमन्वितः ॥ यदा प्रोवाच नो किंचित्स रक्षंश्चौरजीवितम् ॥ ९ ॥ ततस्तैर्मंत्रितं सर्वैरेष नूनं मलिम्लुचः ॥ संप्राप्तः पृष्ठतोऽस्माभिर्मुनिरूपो बभूव ह ॥ १० ॥ अविचार्य ततः सर्वैराभीरैस्तैर्दुरात्मभिः॥ शूलीमारोपितः सद्यो नीत्वा किंचिद्वनांतरम् ॥ ११ ॥ एवं प्राप्ता तदा शूली मुनिना तेन दारुणा ॥ पूर्वकर्मविपाकेन दोषहीनेन धीमता ॥१२॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये मांडव्यशूलीप्राप्तिवृत्तान्तवर्णनंनाम सप्तत्रिंशदुत्तरशततमोऽध्यायः ॥ १३७ ॥ ॥ छ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ ऋषय ऊचुः ॥ ॥ किं कृतं धर्मराजेन तपोध्यानादिकं च यत् ॥ मांडव्यशापनाशाय तदस्माकं प्रकीर्तय ॥ १ ॥ ॥ सूत उवाच ॥ ॥ मांडव्य शापमासाद्य धर्मराजः सुदुःखितः ॥ तपस्तेपे द्विजश्रेष्ठास्तस्मिन्क्षेत्रे व्यवस्थितः ॥ २ ॥ प्रासादं देवदेवस्य संविधाय कपर्दिनः ॥ अव्यग्रं[1] पूजया मास पुष्पधूपानुलेपनैः ॥ ३ ॥ ततः कालेन महता तुष्टस्तस्य महेश्वरः ॥ प्रोवाच वरदोऽस्मीति प्रार्थयस्व यदीप्सितम् ॥ ४ ॥ ॥ धर्मराज उवाच ॥ ॥ अहं देव पुरा शप्तो मांडव्येन महात्मना ॥ स्वधर्मे वर्तमानोऽपि सर्वदोषविवर्जितः ॥ ५ ॥ कुपितेन च तेनोक्तं शूद्रयोनौ भविष्यसि ॥ ६ ॥ तत्रापि च महद्दुःखं ज्ञातिनाशसमुद्भवम् ॥ मच्छापजनितं सद्यो जातिजं समवाप्स्यसि ॥ ७ ॥ तस्मात्त्राहि सुरश्रेष्ठ तस्या योनेः सकाशतः ॥ कथं चैतद्विधो भूत्वा तस्यां जन्म करोम्यहम् ॥८॥ तत्रापि च महद्दुःखं ज्ञातिनाशसमुद्भवम् ॥ एतदर्थं सुरश्रेष्ठ मया चाराधितो भवान् ॥९॥ ॥ ॥ श्रीभगवानुवाच ॥ ॥ न तस्य सन्मुनेर्वाक्यं शक्यते कर्तुमन्यथा ॥ तस्माच्छूद्रोऽपि भूत्वा त्वं न संतानमवाप्स्यसि ॥ १० ॥ ज्ञातिक्षयं प्रदृष्ट्वापि नैव दुःखमवाप्स्यसि ॥ यतो निषिध्यमानोपि[2] न करिष्यंति ते वचः ॥ ११ ॥ एतस्मात्कारणाच्चित्ते न ते दुःखं भविष्यति ॥ ज्ञातिजं धर्मराजैतत्सत्यमेव मयोदितम् ॥ १२ ॥ स्थित्वा वर्षशतं प्राज्ञ त्वं शूद्रो धर्मवत्सलः ॥ उपदेशान्बहून्दत्त्वा ज्ञातिभ्यो हितकाम्यया ॥ अपि श्रद्धा विहीनेषु पापात्मसु सदैव हि ॥ १३ ॥ ततो वर्षशते पूर्णे ब्रह्मद्वारेण केवलम् ॥ आत्मानं सम्यगुत्सृज्य मोक्षमेव प्रयास्यसि ॥ १४ ॥ एवमुक्त्वा स भगवान्गतश्चादर्शनं ततः ॥ धर्मराजोऽपि तं शापं भेजे मांडव्यसंभवम् ॥ १५ ॥ तदा विदुररूपेण ह्यवतीर्य धरातले ॥ मांडव्यस्य वचः सत्यं स चकार महामतिः ॥ १६ ॥ जातो भगवता साक्षाद्व्यासेनामिततेजसा ॥ पाराशर्येण विप्रेण दासीगर्भसमुद्भवः ॥ १७ ॥ एतद्वः सर्वमाख्यातं धर्मराजसमुद्भवम् ॥ आख्यानं यदहं पृष्टः सर्वपातकनाशनम् ॥ १८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये धर्मराजेश्वरोत्पत्तिवर्णनंनामाष्टात्रिंशदुत्तरशततमोऽध्यायः ॥ १३८ ॥ ॥ सूत उवाच ॥ ॥ धर्मराजेश्वरोत्थं च माहात्म्यं द्विजसत्तमाः ॥ यन्मया प्रश्रुतं पुण्यं सकाशात्स्वपितुः पुरा ॥ १ ॥ तदहं कीर्तयिष्यामि शृणुध्वं सुसमाहिताः ॥ त्रैलोक्येऽपि सुविख्यातं सर्व पातकनाशनम् ॥ २ ॥ तत्र क्षेत्रे पुरा विप्रः कश्यपान्वयसंभवः ॥ उपाध्याय इति ख्यातो वेदविद्यापरायणः ॥ ३ ॥ पश्चिमे वयसि प्राप्ते तस्य पुत्रो बभूव ह ॥ स्वाध्यायनियमस्थस्य प्रभूतविभवस्य च ॥४॥ पञ्चवर्षकमात्रस्तु यदा जज्ञे च तत्सुतः ॥ तदा मृत्युवशं प्राप्तः पितृमातृसुदुःखकृत् ॥५॥

१ अत्युग्रम्–इ० पा० । २ निषिध्यमानाः–अपि–इति पदच्छेदः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

ततः स ब्राह्मणः कोपं चक्रे वैवस्वतोपरि ॥ धर्मराजगृहं प्राप्तं दृष्ट्वा निजकुमारकम् ॥ ६ ॥ आदाय सलिलं हस्ते शुचिर्भूत्वा समाहितः ॥ प्रददौ दारुणं शापं धर्मराजाय दुःखितः ॥ ७ ॥ अपुत्रोऽद्य कृतो यस्मादहं तेन दुरात्मना ॥ अतः सोऽपि च दुष्टात्मा यमोऽपुत्रो भविष्यति ॥ ८ ॥ तथास्य भूतले लोको नैव पूजां विधास्यति ॥ कीर्तयिष्यति नो नाम यथान्येषां दिवौकसाम् ॥ ९ ॥ यः कश्चित्प्रातरुत्थाय नाम चास्य ग्रहीष्यति ॥ मंगल्यकरणे चाथ विघ्नं तस्य भविष्यति ॥ १० ॥ तं श्रुत्वा तस्य विप्रस्य यमः शापं सुदारुणम् ॥ स्वधर्मे वर्तमानस्तु ततो दुःखान्वितोऽभवत् ॥ ११ ॥ एतस्मिन्नंतरे गत्वा ब्रह्मणः सदनं प्रति ॥ कृतांजलिपुटो भूत्वा यमः प्राह पितामहम् ॥ १२ ॥ पश्य देवेश शप्तोऽहं निर्दोषोपि द्विजन्मना ॥ स्वधर्मे वर्तमानस्तु यथान्यः प्राकृतो जनः ॥ १३ ॥ तस्मादहं त्यजिष्यामि नियोगं ते पितामह ॥ ब्रह्मशापभयाद्भीतः सत्यमेतन्मयोदितम् ॥ १४ ॥ पुरा मांडव्यशापेन शूद्रयोन्यवतारितः ॥ सांप्रतं पुत्ररहितः कृतोऽपूज्यश्च सत्तम ॥ १५ ॥ ॥ सूत उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा दीनं वैवस्वतस्य च ॥ तत्कालोचितमाहेदं स्वयमेव शतक्रतुः ॥ १६ ॥ युक्तमुक्तमनेनैतद्धर्मराजेन पद्मज ॥ नियोगे वर्तमानेन तावकीये सुरेश्वर ॥ १७ ॥ अवश्यमेव मर्त्यै च मनुष्याः समये स्थितः।५ बाल्ये वा यौवने वाथ वार्धक्ये वा पितामह ॥ संहर्तव्या न संदेहो नाकाले च कथंचन ॥ १८ ॥ एतदेव कृतं नाम धर्मराजाख्यमुत्तमम् ॥ त्वया च सममित्रस्य समशत्रोर्महात्मनः ॥ १९ ॥ तस्मादद्य समालोक्य कश्चिदेव विचिंत्यताम् ॥ उपायो येन निर्दोषो नियोगं कुरुते तव ॥ २० ॥ ॥ ब्रह्मोवाच ॥ ॥ ब्रह्मशापं न शक्तोऽहमन्यथा कर्तुमेव च ॥ उपायं च करिष्यामि सांप्रतं त्रिदशाधिप ॥ २१ ॥ ततो ध्यानं प्रचक्रे स ब्रह्मा लोकपितामहः ॥ तदर्थं सर्वदेवानां पुरतः सुसमाहितः ॥ २२ ॥ तस्यैवं ध्यानसक्तस्य प्रादुर्भूताः समंततः ॥ मूर्ता रोगाः सुरौद्रास्ते वातगुल्मकफात्मकाः ॥ अष्टोत्तरशतप्रायाः प्रोचुस्तं च कृतादराः ॥ २३ ॥ ॥ रोगा ऊचुः ॥ ॥ किमर्थं देवदेवेश त्वया सृष्टा वयं विभो ॥ आदेशो दीयतां शीघ्रं प्रसादः क्रियतामिति ॥ २४ ॥ ॥ ॥ ब्रह्मोवाच ॥ ॥ व्रजध्वं भूतले शीघ्रं ममादेशादसंशयम् ॥ यमादेशान्मनुष्येषु गन्तव्यमविकल्पितम् ॥ २५ ॥ एवमुक्त्वा तु तान्रोगांस्ततः प्राह पितामहः ॥ धर्मराजं समीपस्थं भृशं दीनमधोमुखम् ॥ २६ ॥ एते ते व्याधयः सर्वे मया यम नियोजिताः ॥ साहाय्यं च करिष्यंति सर्वकृत्येषु सर्वदा ॥२७॥ यः कश्चिदधुना मर्त्यो गतायुः संप्रपद्यते ॥ वधाय तस्य यत्नेन त्वया प्रेष्याः सदैव तु ॥२८॥ एतेषां जायते तेन जननाशसमु

१ वचः—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्भवः ॥ अपवादो धरापृष्ठे न च संजायते तव ॥२९॥ तस्माद्गत्वा निजं स्थानं स्वाधिकारपरो भव ॥ ममादेशादसंदिग्धं नैवं दोषमवाप्स्यसि ॥३०॥ ततस्तान्सकलान्व्याधीन्गृहीत्वा रविनंदनः॥ यमलोकं समासाद्य ततः प्रोवाच सादरम् ॥ ३१ ॥ पृष्ट्वापृष्ट्वा[1] च गंतव्यं चित्रगुप्तं धरातले ॥ गंतव्यं जननाशाय समये समुपस्थिते ॥ ३२ ॥ परमस्ति मया तत्र स्थापितं लिंगमुत्तमम् ॥ हाटकेश्वरजे क्षेत्रे सर्वपातकनाशनम् ॥३३॥ यस्तं पश्यति सद्भक्त्या प्रातरुत्थाय मानवः ॥ स युष्माभिः सदा त्याज्यो दूरतो वचनान्मम ॥ ३४ ॥ एवमुक्त्वा स तान्व्याधींस्ततो वैवस्वतः स्वयम् ॥ तस्य विप्रस्य तं पुत्रं गृहीत्वा सत्वरं ययौ ॥ तस्यैव मंदिरे रम्ये कृत्वा रूपं द्विजन्मनः ॥ ३५ ॥ अथासौ ब्राह्मणो दृष्ट्वा स्वं पुत्रं गृहमागतम् ॥ सहितं विप्ररूपेण धर्मराजेन धीमता ॥ ३६ ॥ ततः प्रहृष्टचित्तेन सत्वरं सम्मुखो ययौ ॥ पुत्रपुत्रेति जल्पन्स निजभार्यासमन्वितः ॥ ३७ ॥ परिष्वज्य ततो भूयो बाष्पपर्याकुलेक्षणः ॥ आघ्राय च ततो मूर्ध्नि वाक्यमेतदुवाच ह ॥ ३८ ॥ ॥ ब्राह्मण उवाच ॥ ॥ कथं पुत्र समायातस्त्वं तस्मा द्यममंदिरात् ॥ न कश्चित्पुनरायाति यत्र गत्वाऽपि वीर्यवान् ॥ ३९ ॥ किं वा चैतत्समुत्पन्नमिन्द्रजालं ममांतिकम् ॥ किं वा स्वप्नमिदं किं वा ममायं दृष्टिविभ्रमः ॥४०॥ कश्चायं ब्राह्मणः पार्श्वे तव संतिष्ठते सुत ॥ दिव्येन तेजसाऽयुक्तस्तं नमाम्यहमात्मज ॥ ४१ ॥ ॥ पुत्र उवाच ॥ ॥ एष ब्राह्मणरूपेण समायातो यमः स्वयम् ॥ मामादाय कृपाविष्टो ज्ञात्वा त्वां दुःखसंयुतम् ॥ ४२ ॥ तस्मात्त्वं कुरु तातास्य शापानुग्रहमद्य वै ॥ गृहप्राप्तस्य सुस्नेहाद्यद्यहं तव वल्लभः ॥ ४३ ॥ ततस्तस्य प्रणामं स कृत्वा ब्राह्मणसत्तमः ॥ व्रीडयाऽधोमुखो भूत्वा ततः प्रोवाच सादरम् ॥ ४४ ॥ ॥ ॥ ब्राह्मण उवाच ॥ ॥ अद्य मे सफलं जन्म जीवितं च सुजीवितम् ॥ यत्पुत्रस्य मम प्राप्तिर्गतस्य यमसादनम् ॥ ४५ ॥ त्वं च पुत्रकृते तात सन्तोषं परमं गतः ॥ तस्मात्पुत्रेण संयुक्तो यथायं स्यात्तथा कुरु ॥ ४६ ॥ ॥ ब्राह्मण उवाच ॥ ॥ न मे स्यादनृतं वाक्यं कदा चिदपि पुत्रक ॥ अपि स्वैरेण यत्प्रोक्तं किं पुनर्दुःखितेन च ॥ ४७ ॥ तस्मात्तस्य भवेत्पुत्रो दैवयोनिसमुद्भवः ॥ न कथंचिदपि प्राज्ञ मम शापवशाद्ध्रुवम् ॥ ४८ ॥ भविष्यति सुतश्चान्यो मानुषीयोनिसंभवः ॥ राजसूयाश्वमेधाभ्यां यश्चैनं तारयिष्यति ॥ ४९ ॥ कोऽर्थः पुत्रेण जातेन यो न संतारणक्षमः ॥ पितृपक्षं शुभं कर्म कृत्वा सर्वोत्तमं भुवि ॥ ५० ॥ तथा पूजाकृते योऽस्य शापो दत्तश्च वै पुरा ॥ तत्रापि शृणु मे वाक्यं तस्य पुत्रक जल्पतः ॥५१॥ वेदोक्तैर्विविधैर्मन्त्रैर्या पूजा चास्य संस्थिता ॥ न भविष्यति सा लोके कथंचिदपि पुत्रक ॥ ५२ ॥ अस्य मानुषसंभूतैर्मन्त्रैः

---

१ दृष्ट्वादृष्ट्वा–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





पूजा भविष्यति ॥ विशिष्टा सर्वदेवेभ्यः सत्यमेतन्मयोदितम् ॥ ५३ ॥ ॥ पुत्र उवाच ॥ ॥ अहमेनं प्रतिष्ठाप्य द्विजश्रेष्ठ महीतले ॥ सम्यगाराधयिष्यामि किमन्यैर्विबुधैर्मम ॥ ५४ ॥ तस्मात्संकीर्तयिष्यामि मंत्रान्मानुषसंभवान् ॥ तथा पूजाविधानं च त्वत्प्रसादेन पूर्वज ॥ ५५ ॥ ततः सुगं नः पन्थेति तस्य मंत्रं विधाय सः ॥ समाचरत्प्रहृष्टात्मा धर्मराजस्य शृण्वतः ॥ ५६ ॥ तच्छ्रुत्वाथ यमः प्रोच्चैः सुप्रसन्नेन चेतसा ॥ तं ब्राह्मणमुवाचेदं हर्षगद्गदया गिरा ॥ ५७ ॥ ॥ यम उवाच ॥ ॥ कथंचिदपि विप्रेंद्र न मे स्याद्दर्शनं वृथा ॥ अन्येषामपि देवानां तस्मात्प्रार्थय वांछितम् ॥ ५८ ॥ ॥ ब्राह्मण उवाच ॥ ॥ तवार्चां मम पुत्रोऽयं स्थापयिष्यति यामिह ॥ तामनेनैव मंत्रेण यः कश्चित्पूजयेद्द्विजः ॥ ५९ ॥ भवेत्संवत्सरंयावत्संप्राप्ते पंचमीदिने ॥ मा तस्य पुत्रशोको हि इह लोके कथञ्चन ॥ ६० ॥ ॥ सूत उवाच ॥ ॥ स तथेति प्रतिज्ञाय संप्रहृष्टमना यमः ॥ यमलोकं जगामाथ स्वाधिकारपरोऽभवत् ॥ ६१ ॥ सोऽपि ब्राह्मणदायादः कृत्वा प्रासादमुत्तमम् ॥ यममाराधयामास मध्ये संस्थाप्य भक्तितः ॥ पित्रा चोक्तेन मन्त्रेण तेनैव विधिपूर्वकम् ॥ ६२ ॥ ततश्च क्रमशः प्राप्य पुत्रपौत्राननेकशः ॥ कालधर्ममनुप्राप्तश्चिरं स्थित्वा महीतले ॥ ६३ ॥ एतद्वः सर्वमाख्यातं पुराणे यत्पुरा श्रुतम् ॥ यश्चैतत्कीर्तयेद्भक्त्या संप्राप्ते पंचमीदिने ॥ नापमृत्युर्भवेत्तस्य न च शोकः सुतोद्भवः ॥ ६४ ॥

इति श्रीस्कांदे महपुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये धर्मराजेश्वरमाहात्म्यवर्णनंनामैकोनचत्वारिंशदुत्तरशततमोऽध्यायः ॥ १३९ ॥ ॥ छ ॥

॥ ऋषय ऊचुः ॥ ॥ यदेतद्भवता प्रोक्तं पुत्रो मानुषविग्रहः ॥ भविष्यति यमस्यात्र कः संभूतः स सूतज ॥ १ ॥ ॥ सूत उवाच ॥ ॥ तस्य पुत्रः समुत्पन्नः पांडोः क्षेत्रे महीतले ॥ युधिष्ठिरइति ख्यातः सर्वक्षत्रियपुंगवः ॥ २ ॥ राजसूयो मखो येन इष्टः सम्पूर्णदक्षिणः ॥ सर्वान्भूमिपतीन्वीर्यात्संविधाय करप्रदान् ॥ ३ ॥ अश्वमेधाः कृताः पंच तथा सम्पूर्णदक्षिणाः ॥ भ्रामयित्वा हयं भूमौ पश्चात्प्राप स सद्गतिम् ॥ ४ ॥ एष्टव्या बहवः पुत्रा यद्येकोपि गयां व्रजेत् ॥ यजेत वाऽश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥ ५ ॥ यदनेन वृतं मत्तः पुत्रित्वं सुमहात्मना ॥ हयमेधान्महायज्ञान्कर्ता स्यादस्य वै सुतः ॥ ६ ॥ मन्येत कृतकृत्यत्वं येन पुत्रेण धर्मपः ॥ अन्यैः पुत्रशतैः किं वा वंशानुद्धारकारकैः ॥ ७ ॥ ॥ सूत उवाच ॥ ॥ एतद्वः सर्वमाख्यातं धर्मराजसुतोद्भवम् ॥ आख्यानं ब्राह्मणश्रेष्ठा धर्मवृद्धिकरं परम् ॥ ८ ॥

इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये धर्मराजपुत्राख्यानवर्णनंनाम चत्वारिंशदुत्तरशततमोऽध्यायः ॥ १४० ॥ ॥ छ ॥

॥ सूत उवाच ॥ ॥ तथान्योऽपि हि तत्रास्ति देवो मिष्टान्नदायकः ॥ यस्य संदर्शनादेव मिष्टान्नं



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लभते नरः ॥ १ ॥ आसीत्पूर्वं नृपो नाम्ना वसुसेन इति स्मृतः ॥ आनर्त्ताधिपतिः ख्यातो बृहत्कल्पे द्विजोत्तमाः ॥ २ ॥ अत्यैश्वर्यसमायुक्तो गजवाजिरथान्वितः ॥ जितारिपक्षस्तेजस्वी[1] दाता भोगी[2] जितेंद्रियः ॥ ३ ॥ स संक्रांतौ व्यतीपाते ग्रहणे रविसोमयोः ॥ पर्वकालेषु चान्येषु विविधेषु सुभक्तितः ॥ ४ ॥ प्रयच्छति द्विजातिभ्यो रत्नानि विविधानि च ॥ इंद्रनीलमहानीलविद्रुमस्फटिकादि च ॥ ५ ॥ माणिक्यमौक्तिकान्येव विद्रुमाणि विशेषतः ॥ हस्त्यश्वरथयानानि वस्त्राणि विविधानि च ॥ ६ ॥ न कस्यचित्प्रदद्यात्स सस्यं ब्राह्मणसत्तमाः ॥ अतीव सुलभं मत्वा तथा तोयं विशेषतः॥ ७ ॥ ततो राज्यं चिरं कृत्वा दृष्ट्वा पुत्रोद्भवान्सुतान् ॥ कालधर्ममनुप्रातः कस्मिंश्चित्कालपर्यये ॥ ८ ॥ ततश्च मंत्रिभिस्तस्य सत्यसेन इति स्मृतः ॥ अभिषिक्तः सुतो राज्ये वीर्यौदार्यसमन्वितः ॥ ९ ॥ वसुसेनोऽपि संप्राप्य स्वर्गं दानप्रभावतः ॥ दिव्यांबरधरो भूत्वा दिव्यरत्नैर्विभूषितः ॥ १० ॥ सेव्यमानोऽप्सरोभिश्च विमानवरमाश्रितः ॥ बभ्राम सर्वलोकेषु स्वेच्छया क्षुत्समावृतः ॥ ११ ॥ पिपासाकुलचित्तश्च मुखेन परिशुष्यता ॥ न कंचिद्ददृशे तत्र भुंजानमपरं दिवि ॥ १२ ॥ न च पानसमासक्तं न सस्यं सलिलं न च ॥ १३ ॥ ततो गत्वा सहस्राक्षमुवाच द्विजसत्तमाः ॥ क्षुत्तृषावृतदेहस्तु लज्जयाऽधोमुखः स्थितः ॥ १४ ॥ नैवात्र दृश्यते कश्चित्क्षुत्तृषापरिपीडितः ॥ मां मुक्त्वा विबुधश्रेष्ठ तत्किमेतद्वदस्व मे ॥ १५ ॥ एष मे स्वर्गरूपेण नरकः समुपस्थितः ॥ किमेतैर्भूषणैर्वस्त्रैर्विमानादिभिरेव च ॥ १६ ॥ क्षुधा संपीड्यमानस्य स्वर्गमेतच्छचीपते ॥ अग्नितुल्यं समुद्दिष्टं मम चित्तेऽपि वर्तते ॥ १७ ॥ तस्मात्कुरु प्रसादं मे यथा क्षुन्न प्रबाधते ॥ नो चेत्क्षिप सुरश्रेष्ठ रौरवे नरके द्रुतम् ॥१८॥ ॥ ॥ इंद्र उवाच ॥ ॥ अनर्होऽसि महीपाल नरकस्य त्वमेव हि ॥ त्वया दानानि दत्तानि संख्याहीनानि सर्वदा ॥१९॥ परं किं तु क्वचिन्नान्नं दत्तं राजन्न चोदकम्॥ न किंचिदपि संचिंत्य यतः सुलभमेव हि ॥२०॥ तोयं सान्नं सदा दद्यादन्नं चैव सदक्षिणम्॥ य इच्छेच्छाश्वतीं तृप्तिमिह लोके परत्र च ॥ २१ ॥ तस्मात्त्वं हि क्षुधाविष्टः स्वर्गे चैव महीपते ॥ भूषितो भूषणैः श्रेष्ठैर्विमानवरमाश्रितः ॥ २२ ॥ ॥ राजोवाच ॥ ॥ अस्ति कश्चिदुपायोऽत्र दैवो वा मानुषोऽपि वा ॥ क्षुत्पिपासेऽतितीव्रे मे विनाशं येन गच्छतः ॥२३॥ ॥ इन्द्र उवाच ॥ ॥ यदि कश्चित्सुतस्तुभ्यं विप्रेभ्यः सततं जलम्॥ ददाति च सदा सस्यं तत्ते तृप्तिः प्रजायते ॥ २४ ॥ नान्यथा पार्थिवश्रेष्ठ एकस्मिन्नपि वासरे ॥ अदत्तस्य तव प्राप्तिः सत्यमेतन्मयोदितम् ॥२५॥ सोऽपि भूमिपतेः पुत्रस्तव यच्छति नोदकम् ॥ न च सस्यं द्विजातिभ्यस्त्वन्मार्गमनुसंचरन्॥२६॥ एतस्मिन्नंतरे प्राप्तो नारदो मुनिसत्तमः॥ ब्रह्मलोकात्स्थि

१ ओजस्वी–इ० पा० । २ भोक्ता–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तौ यत्र तौ भूमिपसुरेश्वरौ ॥ २७ ॥ ततः शक्रः समुत्थाय तस्मै तुष्टिसमन्वितः ॥ अर्घं दत्त्वा विधानेन सादरं चेदमब्रवीत् ॥ २८ ॥ कुतः प्राप्तोऽसि विप्रेंद्र प्रस्थितः क्व च सांप्रतम् ॥ केन कार्येण चेद्ब्रह्मं न तेऽस्ति वद सांप्रतम् ॥ २९ ॥ ॥ नारद उवाच ॥ ॥ ब्रह्मलोकादहं प्राप्तः प्रस्थितस्तु धरातले ॥ तीर्थयात्राकृते शक्र नान्यदस्तीह कारणम् ॥ ३० ॥ ॥ सूत उवाच ॥ ॥ तच्छुत्वा स नृपो हृष्टस्तमुवाच मुनीश्वरम् ॥ प्रसादः क्रियतां मह्यं दीनस्य मुनिपुंगव ॥ ३१ ॥ त्वया भूमितले वाच्यो मम पुत्रो महीपतिः ॥ आनर्ताधिपतिः ख्यातः सत्यसेन इति प्रभो ॥ ॥ ३२ ॥ तव तातो मया दृष्टः शक्रस्य सदनं प्रति ॥ क्षुत्पिपासापरीतांगो दीनात्मा देवमध्यगः ॥ ३३ ॥ तस्मात्पुत्रोऽसि चेन्मह्यं त्वं सत्यं परिरक्षसि ॥ तन्मन्नाम्ना प्रयच्छोच्चैः सस्यानि सलिलानि च ॥ ३४ ॥ स तथेति प्रतिज्ञाय नारदो मुनिसंत्तमः ॥ अनुज्ञाप्य सहस्राक्षं प्रस्थितो भूतलं प्रति ॥ ३५ ॥ ततः क्रमेण तीर्थानि भ्रममाणः स सद्द्विजः ॥ आनर्त्तविषयं प्राप्य सत्यसेनमुपाद्रवत् ॥ ३६ ॥ अथ संपूजितस्तेन सम्यग्भूपतिना मुनिः ॥ पितुः संदेशमाचख्यौ विजने तस्य सादरम् ॥ ३७ ॥ तच्छुत्वा शोकसंतप्तः सत्यसेनो महीपतिः ॥ तं विसृज्य मुनिश्रेष्ठं पूजयित्वा विधानतः ॥ ३८ ॥ ततो जनकमुद्दिश्य मिष्टान्नेन सुभक्तितः ॥ सहस्रं ब्राह्मणेंद्राणां भोजयामास नित्यशः ॥ ३९ ॥ प्रपादानं तथा चक्रे ग्रीष्मकाले विशेषतः ॥ त्यक्त्वान्याः सकला याश्च क्रिया धर्मसमुद्भवाः ॥ ४० ॥ एवं तस्य महीपस्य वर्तमानस्य च द्विजाः ॥ अनावृष्टिरभूद्रौद्रा सर्वसस्यक्षयावहा ॥ ४१ ॥ यावद्द्वादशवर्षाणि न जलं त्रिदशाधिपः ॥ मुमोच धरणीपृष्ठे सर्वे लोकाः क्षुधार्दिताः ॥ ४२ ॥ अन्नाभावात्ततो भूयो न सस्यं संप्रयच्छति ॥ ब्राह्मणेभ्यः समुद्दिश्य पितरं स्वं यथा पुरा ॥ ४३ ॥ ततः स क्षुत्परीतांगः पिता तस्य महीपतेः ॥ स्वप्ने प्रोवाच तं पुत्रमतीव मलिनांबरः ॥ ४४ ॥ त्वया पुत्रेण पुत्राहं क्षुत्पिपासासमाकुलः ॥ स्वर्गस्थोऽपि हि तिष्ठामि तस्मादन्नं प्रयच्छ वै ॥ मन्नाम्ना तोयसंयुक्तं यदि त्वं मत्समुद्भवः ॥ ४५ ॥ ततः शोकसमायुक्तः स नृपः स्वप्नदर्शनात् ॥ अन्नाभावात्समं मंत्रं मंत्रिभिः स तदाकरोत् ॥ ४६ ॥ अहमाराधयिष्यामि सस्यार्थे वृषभध्वजम् ॥ राज्ये रक्षा विधातव्या भवद्भिः सादरं सदा ॥ ४७ ॥ ततोऽत्रैव समागत्य स्थापयित्वा महेश्वरम् ॥ सम्यगाराधयामास व्रतैश्च नियमैस्तथा ॥ ४८ ॥ अथ तस्य गतस्तुष्टिं वर्षांते भगवाञ्छिवः ॥ अब्रवीद्वरदोऽस्मीति प्रार्थयस्व यथेप्सितम् ॥ ४९ ॥ ॥ ॥ राजोवाच ॥ ॥ अन्नार्थं देवदेवेश मयायं विहितो विधिः ॥ तस्मात्त्वं यच्छ मे शीघ्रमसंख्यं वृषवाहन ॥ ५० ॥ तथा संजायतां वृष्टिः



१ मुनिपुंगवः–इ० पा० । २ ततस्त्वन्नम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समस्ते धरणीतले ॥ येन सस्यानि जायंते सलिलानि च सांप्रतम् ॥ ५१ ॥ जायंतां मम तातस्य स्वर्गस्थस्य महात्मनः ॥ प्रसादात्तव संतृप्तिरक्षया सुरसत्तम ॥५२॥ ॥ श्रीभगवानुवाच ॥ ॥ भविता न चिराद्वृष्टिः प्रभूता धरणीतले ॥ भविष्यंति तथान्नानि यानिकानि महीतले ॥ ५३ ॥ तस्मात्त्वं गच्छ राजेंद्र स्वगृहं प्रति सांप्रतम् ॥ मम वाक्यादसंदिग्धमेतदेव भविष्यति ॥ ५४ ॥ तच्चैतन्मामकं लिंगं यत्त्वया स्थापितं नृप ॥ प्रातरुत्थाय यः कश्चित्सम्यक्तद्वीक्षयिष्यति ॥ ५५ ॥ मिष्टान्नममृतस्वादु स हि नूनमवाप्स्यति ॥ मम वाक्यान्नृपश्रेष्ठ सदा जन्मनिजन्मनि ॥ ५६ ॥ स एवं भगवानुक्त्वा ततश्चादर्शनं गतः ॥ सोऽपि राजा निजं स्थानं हर्षेण महतान्वितः ॥ आजगाम चकाराथ राज्यं निहतकंटकम् ॥५७॥ ॥ सूत उवाच ॥ ॥ अद्यापि कलिकालेऽत्र संप्राप्ते दारुणे युगे ॥ यस्तं मिष्टान्नदं पश्येत्प्रातरुत्थाय भक्तितः ॥५८॥ स मिष्टान्नमवाप्नोति यदि कामयते द्विजाः ॥ निष्कामो वा समभ्येति स्थानं देवस्य शूलिनः॥ ५९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये मिष्टान्नदेश्वरमाहात्म्यवर्णनंनामैकचत्वारिंशदुत्तरशततमोऽध्यायः ॥१४१॥ ॥ सूत उवाच ॥ ॥ तथान्यदपि तत्रास्ति पुण्यं गणपतित्रयम् ॥ स्वर्गदं मर्त्यदं पुण्यं तथान्यन्नरकापहम् ॥ १ ॥ हंतृ वै सर्वविघ्नानां पूजितं सुरदानवैः ॥ सर्वकामप्रदं चैव विद्याकीर्तिविवर्धनम् ॥ २ ॥ ॥ ऋषय ऊचुः ॥ ॥ त्रिविधाः पुरुषाः सूत जायंतेत्र महीतले ॥ उत्तमा मध्यमाश्चान्ये तथा चान्येऽधमाः स्थिताः ॥ ३ ॥ उत्तमाः प्रार्थयंति स्म मोक्षमेव हि केवलम् ॥ गता यत्र निवर्तंते न कथंचिद्धरातले ॥ ४ ॥ मध्यमाः स्वर्गमार्गं च दिव्यान्भोगान्मनोरमान् ॥ अप्सरोभिः समं क्रीडां यज्ञाद्यैः कर्मभिः कृताम् ॥ ॥ ५ ॥ अधमा मर्त्यलोकेत्र रमंते विषयात्मकाः ॥ विषकीटकवत्तत्र रतिं कृत्वा गरीयसीम् ॥ ६ ॥ स्वर्गमोक्षौ परित्यज्य तत्कस्मान्मर्त्य इष्यते ॥ येनासौ प्रार्थ्यते मर्त्यैर्मर्त्यदो गणनायकः ॥ ७ ॥ केन संस्थापितास्ते च तस्मिन्क्षेत्रे गजाननाः ॥ कस्मिन्काले च द्रष्टव्याः सर्वं विस्तरतो वद ॥ ८ ॥ ॥ सूत उवाच ॥ ॥ पूर्वं तप्त्वा तपस्तीव्रं मर्त्यलोके द्विजोत्तमाः ॥ ततो गच्छंति संहृष्टाः स्वेच्छया त्रिदिवं प्रति ॥ मोक्षमार्गं तथैवान्ये ध्यानाविष्कृतमानसाः ॥ ९ ॥ ततः स्वर्गे समाकीर्णे कदाचिन्मनुजोत्तमैः ॥ देवेषु क्षिप्यमाणेषु समंतात्तत्प्रभावतः ॥ १० ॥ गत्वा स्वयं सहस्राक्षः सर्वैर्देवगणैः सह ॥ प्रोवाच शंकरं गौर्या सार्धमेकासनस्थितम् ॥ ११ ॥ ॥ इन्द्र उवाच ॥ ॥ तपःप्रभावसंसिद्धैर्मानवैः परमेश्वर ॥ अस्माकं व्याप्यते सर्वं महिमानं गृहादिकम् ॥ १२ ॥ तस्मात्कृत्वा प्रसादं नः कंचिच्चिंतय सांप्रतम् ॥ उपायं येन तिष्ठामः सौख्येनात्र शिवालये ॥ १३ ॥ अथ श्रुत्वा विरूपाक्षस्तेषां तद्वचनं द्विजाः ॥ पार्वत्याः पार्श्वसंस्थाया मुखचन्द्रं समैक्षयत् ॥ १४ ॥ निजगात्रं ततो देवी सुसंमर्द्य मुहुर्मुहुः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



मलमाहृत्य तं कृत्स्नं चक्रे नागमुखं ततः ॥ १५ ॥ चतुर्हस्तं महाकायं लंबोदरसमन्वितम् ॥ १सुकौतुककरं तेषां सर्वेषां च दिवौकसाम् ॥ १६ ॥ ततः स विनयादाह देवीं शिखरवासिनीम् ॥ यदर्थमंब सृष्टोऽहं तत्कार्यं वद मा चिरम् ॥ १७ ॥ त्रैलोक्ये त्वत्प्रसादेन नासाध्यं विद्यते मम ॥ ॥ १८ ॥ ॥ श्रीदेव्युवाच ॥ ॥ मर्त्यलोके नरा ये च स्वर्गमोक्षपराः सदा ॥ तेषां विघ्नं त्वया कार्यं शुभकृत्येषु चैव हि ॥ १९ ॥ सरितां पत यस्त्रिंशच्छंकवः सप्तसप्ततिः ॥ महासरोजषष्टिश्च निखर्वाणां च विंशतिः ॥ २० ॥ अर्बुदायुतसंयुक्ताः कोटयो नवतिपञ्च च ॥ लक्षाश्च पंचपंचाशत्स हस्राः पंचविंशतिः॥शतानि नवषष्टिश्च गणाश्चान्येऽत्र संस्थिताः॥२१॥येषां नंदी स्मृतः पूर्वो महाकालस्तथा परः॥ते सर्वे वशगास्तुभ्यं प्रभवंतु गणो त्तमाः ॥२२॥ आधिपत्यं मया दत्तं तव वत्स कुरुष्व तत् ॥ सर्वेषां गणवृंदानामाधिपत्ये व्यवस्थितः ॥२३॥ एवमुक्त्वाथ सा देवी समानीयौषधीभृता न् ॥ हेमकुंभान्सुतीर्थांभःपरिपूर्णान्महोदयान् ॥ २४ ॥ तस्याभिषेचनं चक्रे स्वयमेव सुरेश्वरी ॥ गीतवाद्यविनोदेन नृत्यमंगलजैः स्वनैः ॥ २५ ॥ त्रयस्त्रिंशत्स्मृताः कोटयो देवानां याः स्थिता दिवि ॥ ताः सर्वास्तत्र चागत्य तस्य चक्रुश्च मंगलम् ॥ २६ ॥ अथ तस्य ददौ तुष्टो भगवान्वृषभध्व जः ॥ कुठारं निशितं हस्ते सदा वै श्रेष्ठमायुधम् ॥ २७ ॥ पात्रं मोदकसंपूर्णमक्षयं चैव पार्वती ॥ भोजनार्थे महाभागा मातृस्नेहपरायणा ॥ २८ ॥ मूषकं कार्तिकेयस्तु वाहनार्थं प्रहर्षितः ॥ भ्रातरं मन्यमानस्तु बन्धुस्नेहेन संयुतः ॥ २९ ॥ ज्ञानं दिव्यं ददौ ब्रह्मा तस्मै हृष्टेन चेतसा ॥ अतीताना गतं चैव वर्तमानं च यद्भवेत् ॥ ३० ॥ प्रज्ञां विष्णुः सहस्राक्षः सौभाग्यं चोत्तमं महत् ॥ सौभाग्यं कामदेवस्तु कुबेरो विभवादिकम् ॥ ३१ ॥ प्रतापं भगवान्सूर्यः कांतिमग्र्यां निशाकरः ॥३२॥ तथान्ये विबुधाः सर्वे ददुरिष्टानि भूरिशः॥ आत्मीयानि प्रतुष्ट्यर्थं देव्या देवस्य च प्रभोः॥३३॥ एवं लब्धवरः सोऽथ गणनाथो द्विजोत्तमाः ॥ देवकृत्यपरो नित्यं चक्रे विघ्नानि भूतले ॥ ३४ ॥ धर्मार्थं यतमानानां मोक्षाय सुकृताय च ॥ ततो भूमितलेऽभ्येत्य गणेशस्तत्र यः स्मृतः ॥ ३५ ॥ वैमानिकैः समभ्येत्य स्थापितस्तत्र स द्विजाः ॥ येन स्वर्गार्थिनो लोकाः पूजां तस्य प्रचक्रिरे ॥ प्रथमं सर्वकृत्येषु विघ्ननाशाय तत्पराः ॥ ३६ ॥ एतस्मिन्नेव काले च चमत्कारपुरोद्भवैः ॥ ब्राह्मणैर्ब्रह्मविज्ञानतत्परैर्मोक्षहेतुभिः ॥ ईशानः स्थापि तस्तत्र मोक्षदो य उदाहृतः ॥ ३७ ॥ स्वर्गं वाञ्छद्भिरेवान्यैः स्वर्गद्वारप्रदस्तथा ॥ हेरंबः स्थापितस्तत्र सत्यनामा यथोदितः ॥ ३८ ॥ तथान्यैर्मर्त्य ॥१५८॥ दोनाम गणेशस्तत्र यः स्थितः ॥ येन स्वर्गाच्च्युता यांति न कदा नरकादिकम् ॥ तिर्यक्त्वं वा कृमित्वं वा स्थावरत्वमथापि वा ॥ ३९ ॥ एतस्मा

१ सुकेतककरम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्कारणात्तत्र क्षेत्रे पुण्ये द्विजोत्तमाः ॥ हेरम्बो मर्त्यदो जातः स्वर्गिणां मर्त्यदः सदा ॥ ४० ॥ एतद्वः सर्वमाख्यातं पुण्यं हेरंबसंभवम् ॥ आख्यानं सर्वविघ्नानि यन्निहन्ति श्रुतं नृणाम् ॥ ४१ ॥ एतन्माघचतुर्थ्यां यः शुक्लायां पूजयेन्नरः ॥ न तस्य वत्सरं यावद्विघ्नं सञ्जायते क्वचित् ॥ ४२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये गणपतित्रयमाहात्म्यवर्णनंनाम द्विचत्वारिंशदुत्तरशततमोऽध्यायः ॥ १४२ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तथान्योऽपि च तत्रास्ति देवश्चित्रेश्वरो द्विजाः ॥ चित्रपीठस्य मध्यस्थश्चित्रसौख्यप्रदो नृणाम् ॥ १ ॥ यं दृष्ट्वा पूजयित्वा च स्नापयित्वाथवा नरः ॥ मुच्यते परदारोत्थैः पातकैश्चोपपातकैः ॥ २ ॥ धर्षयित्वा गुरोः पत्नीं कन्यां वा निजवंशजाम् ॥ नीचां वा व्रतयुक्तां वा कामासक्तेन चेतसा ॥ ३ ॥ चैत्रशुक्लचतुर्दश्यां यस्तं पूजयते नरः ॥ स तत्पापं निहत्याशु स्वर्गलोकं ततो व्रजेत् ॥ ४ ॥ तथा चित्रांगदस्तत्र जाबालिसहितो नृपः ॥ कुमार्या सहितः सार्द्धं नग्नया तत्समुत्थया ॥ सन्तिष्ठते तदग्रे तु शप्तो जाबालिना पुरा ॥ ५ ॥ त्रयाणामपि यस्तेषां तस्मिन्नहनि निर्वपेत् ॥ स इष्टां लभते नारीं सिद्धिं च मनसि स्थिताम् ॥ ६ ॥ ॥ ऋषय ऊचुः ॥ ॥ कस्माज्जाबालिना शप्तः पूर्वं चित्रांगदो युवा ॥ सा च तत्तनया कस्मात्कुमारी वस्त्रवर्जिता ॥ ७ ॥ अद्यापि तिष्ठते तत्र विरुद्धं रूपमाश्रिता ॥ जनहास्यकरं नित्यं तस्मात्सूत वदस्व नः ॥ ८ ॥ ॥ सूत उवाच ॥ ॥ आसीत्पूर्वं मुनिर्नाम्ना जाबालिरिति विश्रुतः ॥ कौमारब्रह्मचर्येण येन चीर्णं तपः सदा ॥ ९ ॥ हाटकेश्वरजं क्षेत्रं समासाद्य स सद्द्विजाः ॥ बाल्येऽपि वयसि प्राप्ते समारेभे महत्तपः ॥ १० ॥ कृच्छ्रचांद्रायणादीनि पाराकाणि शनैःशनैः ॥ कुर्वता तेन ते देवाः संनीता भयगोचरम् ॥ ११ ॥ ततः शक्रादयो देवाः संत्रस्ता मेरुमूर्धनि ॥ मिलित्वा चक्रिरे मंत्रं तस्य विघ्नकृते मिथः ॥ १२ ॥ यद्यस्य तपसो वृद्धिरेवं यास्यति नित्यशः ॥ च्यावयिष्यति तन्नूनं स्वर्गराज्याच्छतक्रतुम् ॥ १३ ॥ तस्माद्गच्छतु रंभाख्या तत्पार्श्वेऽप्सरसां वरा ॥ ब्रह्मचर्यविघाताय तस्यर्षेर्भावितात्मनः ॥ १४ ॥ ब्रह्मचर्यं तपोमूलं यतः संकीर्तितं द्विजैः ॥ तस्याभावात्परिक्लेशः केवलं न फलं व्रते ॥ १५ ॥ एवं ते निश्चयं कृत्वा समाहूय ततः परम् ॥ रंभामूचुर्महेंद्रेण सर्वे देवास्तदादरात् ॥ १६ ॥ गच्छ शीघ्रं महाभागे जाबालिर्यत्र तिष्ठति ॥ हाटकेश्वरजे क्षेत्रे तपोविघ्नाय तस्य वै ॥ १७ ॥ ते ते भावाः प्रयोक्तव्याः कथास्तास्ता मनोहराः ॥ वर्धयंती तथा चित्ते तस्य कामं निरर्गलम् ॥ १८ ॥ ॥ ॥ रंभोवाच ॥ ॥ स मुनिर्न विजानाति कामधर्मं सुरेश्वर ॥ अरसज्ञं कथं देव करिष्यामि स्मरान्वितम् ॥ १९ ॥ ॥ इन्द्र उवाच ॥ ॥ एष यास्यति मद्वाक्याद्वसंतस्तस्य सन्निधौ ॥ अस्य संदर्शनादेव भविष्यति स सस्मरः ॥ २० ॥ तस्माद्गच्छ द्रुतं तत्र सहानेन वरानने ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

संसिद्धिर्जायते येन देवकृत्यं भवेद्ध्रुतम् ॥ २१ ॥ अथ सा तं प्रणम्योच्चैः प्रस्थिता धरणीतलम् ॥ वसंतेन समायुक्ता जाबालिर्यत्र तिष्ठति ॥ २२ ॥ अथाकस्मादशोकस्य संजातः पुष्पसंचयः ॥ तिलकस्य च चूतस्य मंजर्यः समुपस्थिताः ॥ २३ ॥ शिशिरे च सरोजानि विकासं प्रापुरेव हि ॥ ववौ च सुरभिर्वायुर्दाक्षिणात्यः सुकामदः ॥ २४ ॥ एतस्मिन्नंतरे प्राप्ता रंभा तत्र वराप्सराः ॥ सलिलाशयतीरस्थो जाबालिर्यत्र तिष्ठति ॥ ॥ २५ ॥ अक्षमालाधृतकरो जपन्मंत्रमनेकधा ॥ अभीष्टं श्रद्धया युक्तो विधाय पितृतर्पणम् ॥ २६ ॥ अथ संपश्यतस्तस्य मुक्त्वा वस्त्रपरिग्रहम् ॥ स्नानार्थं तज्जलं साऽथ प्रविवेश वराप्सराः ॥ २७ ॥ विवस्त्रां तां समालोक्य सोऽपि यौवनशालिनीम् ॥ याम्यानिलेन च स्पृष्टः कामस्य वशगो ऽभवत् ॥ २८ ॥ ततस्तस्याभवत्कंपस्तत्क्षणादेव सन्मुने ॥ अक्षमाला कराग्राच्च पपात धरणीतले ॥ २९ ॥ पुलकः सर्वगात्रेषु संजज्ञेऽतीव दारुणः ॥ अश्रुपाताः पतंतिस्म कोष्णाः प्लावितभूतलाः ॥ ३० ॥ अथ तं क्षुभितं ज्ञात्वा चित्तज्ञा सा वराप्सराः ॥ निर्गत्य सलिलात्तस्माच्चक्रे वस्त्रपरिग्रहम् ॥ ॥ ३१ ॥ ततस्तस्यांतिके गत्वा प्रणिपत्य कृतादरा ॥ प्रोवाच मधुरं वाक्यं वर्द्धंती तस्य तन्मतम् ॥ ३२ ॥ आश्रमे सकलं ब्रह्मन्कच्चित्ते कुशलं मुने ॥ स्वाध्याये तपसि प्राज्ञ शिष्येषु मृगपक्षिषु ॥ ३३ ॥ ॥ मुनिरुवाच ॥ ॥ कुशलं मे वरारोहे सर्वत्रैवाधुना स्थितम् ॥ विशेषेणात्र संप्राप्ता सर्वलक्षणलक्षिता ॥ ३४ ॥ का त्वं वद महाभागे मम मन्मथवर्धनी ॥ किं देवी वासुरी वा किं पन्नगी किं तु मानुषी ॥ ३५ ॥ निवेदय शरीरे मे किं न पश्यसि वेपथुम् ॥ निरर्गलश्च रोमांचो बाष्पपूरश्च नेत्रजः ॥ ३६ ॥ ॥ रंभोवाच ॥ ॥ किं ते गात्रस्वभावोऽयं किं वान्यो व्याधिसंभवः ॥ कच्चिदेव न ते स्वास्थ्यं प्रपश्यामि शरीरजम् ॥ ३७ ॥ ॥ मुनिरुवाच ॥ ॥ न मे गात्रस्वभावो न व्याधिभिश्च सुलोचने ॥ शृणुष्व कारणं कृत्स्नं येनेदृक्संस्थितं वपुः ॥ ३८ ॥ यावती वर्तते वेला तव दर्शनसंभवा ॥ तावत्कालमिदं रूपं मम गात्रसमुद्भवम् ॥ ३९ ॥ तदहं मन्मथाविष्टो दर्शनात्तव शोभने ॥ ब्रह्मचर्यपरोपीत्थं महाव्रतधरोऽपि च ॥ ४० ॥ ॥ रंभोवाच ॥ ॥ यद्येवं ब्राह्मणश्रेष्ठ मां भजस्व यथासुखम् ॥ नात्र कश्चिद्भवेद्दोषः पण्यनारी यतोऽस्म्यहम् ॥ ४१ ॥ साधारणा वयं विप्र यतः सृष्टाः स्वयंभुवा ॥ सर्वेषामेव लोकानां विशेषेण द्विजन्मनाम् ॥ ४२ ॥ अहं चापि समालोक्य त्वां मुने मन्मथोपमम् ॥ हता कामशरैस्तीक्ष्णैर्न च गंतुं समुत्सहे ॥ ॥ ४३ ॥ मया दृष्टाः सुराः पूर्वं यक्षा विद्याधरास्तथा ॥ सिद्धाश्च किंनरा नागा गुह्यकाः किमु मानुषाः ॥ ४४ ॥ नेदृग्रूपं वपुस्तेषामेकस्यापि विलोकितम् ॥ मध्ये ब्राह्मणशार्दूल तस्माद्भक्तां भजस्व माम् ॥ ४५ ॥ यो नारीं कामसंतप्तां स्वयं प्राप्तां परित्यजेत् ॥ स मूर्खः पच्यते घोरे



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नरके शाश्वतीः समाः ॥ ४६ ॥ एवमुक्ता तया सोऽथ परिष्वक्तो महामुनिः ॥ अनिच्छन्नपि वाक्येन हृदयेन च सस्पृहः ॥ ४७ ॥ ततो लतानि कुंजे तं समानीय मुनीश्वरम् ॥ कामशास्त्रोदितैर्भावै रराम कृत्रिमैर्मुनिम् ॥ ४८ ॥ एवं तया समं तत्र स्थितो यावद्दिनक्षयम् ॥ कामधर्मसमासक्तः संत्यक्ताशेषकर्मकः ॥ ४९ ॥ ततो निष्कामतां प्राप्तो लज्जया परिवारितः ॥ विससर्ज च तां रंभां शौचं चक्रे ततः परम् ॥ ५० ॥ सापि तेन विनिर्मुक्ता कृतकृत्या विलासिनी ॥ प्रहृष्टा प्रययौ तत्र यत्र देवाः सवासवाः ॥ ५१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये जाबालिक्षोभणोनाम त्रिचत्वारिंशदुत्तरशततमोऽध्यायः ॥ १४३ ॥ ॥ सूत उवाच ॥ ॥ सा गत्वा त्रिदिवं पश्चात्सहस्राक्षं सुरैर्युतम् ॥ प्रोवाच भगवन्दिष्ट्या क्षोभितोऽसौ महामुनिः ॥ १ ॥ तपस्तस्य हतं कृत्स्नं यत्कृच्छ्रेण समाचितम् ॥ तथा निस्तेजसत्वं च नीतस्त्वं सुखभाग्भव ॥ २ ॥ एवमुक्ताऽथ सा रंभा शंसिता निखिलैः सुरैः ॥ अमोघरेतसस्तस्य दध्रे गर्भं निजोदरे ॥ ३ ॥ जाबालिरपि कृत्वा च पश्चात्तापमनेकधा ॥ भूयस्तु तपसि स्थित्वा स्थितस्तत्रैव चाश्रमे ॥ ४ ॥ ततस्तु दशमे मासि संप्राप्ते सुषुवे शुभाम् ॥ कन्यां सरोजपत्राक्षीं दिव्यलक्षणलक्षिताम् ॥ ५ ॥ अथ तां मानुषोद्भूतां मत्वा तस्यैव चाश्रमम् ॥ गत्वा मुमोच प्रत्यक्षं तस्यर्षेश्चेदमब्रवीत् ॥ ६ ॥ तव वीर्यसमुद्भूतामेनां मज्जठरोषिताम् ॥ कन्यकां मुनिशार्दूल तस्मात्पालय सांप्रतम् ॥ ७ ॥ न स्वर्गे विद्यते वासो मानुषाणां कथंचन ॥ एतस्मात्कारणात्तुभ्यं मया ब्रह्मन्समर्पिता ॥ ८ ॥ एवमुक्त्वा ययौ रंभा सत्वरं त्रिदशालयम् ॥ जाबालिरपि तां दृष्ट्वा कन्यकां स्नेहमाविशत्[1] ॥ ९ ॥ ततस्तां कन्यकां कृत्वा सुष्ठु गुप्ते लतागृहे ॥ रसैर्मिष्टफलोद्भूतैः पुपोष च दिवानिशम् ॥ १० ॥ सापि कन्या परां वृद्धिं शनैर्याति दिनेदिने ॥ शुक्लपक्षं समासाद्य यथा चन्द्रकला दिवि ॥ ११ ॥ यथायथाथ सा याति वृद्धिं कमललोचना ॥ तथातथास्य सुस्नेहो जाबालेरप्यवर्धत ॥ १२ ॥ सा शिशुत्वे मृगैः सार्द्धं पक्षिभिश्च सुशोभना ॥ क्रीडां चक्रे सुविश्रब्धैर्वर्धयंती मुनेर्मुदम् ॥ १३ ॥ ततो बाल्यं परित्यक्त्वा वल्कलावृतगात्रिका ॥ तस्यर्षेः सर्वकृत्येषु साहाय्यं प्रकरोति च ॥ १४ ॥ समित्कुशादि यत्किंचित्फलपुष्पसमन्वितम् ॥ वनात्तदानयामास तस्य प्रीतिमवर्धयत् ॥ ॥ १५ ॥ ततः कतिपयाहस्य फलार्थं सा मृगेक्षणा ॥ निदाघसमये दूरं स्वाश्रमात्प्रजगाम ह ॥ १६ ॥ एतस्मिन्नंतरे तत्र विमानवरमाश्रितः ॥ प्रातश्चित्रांगदोनाम गन्धर्वस्त्रिदिवौकसाम् ॥ १७ ॥ तेन सा विजने बाला पूर्णचन्द्रनिभानना ॥ दृष्टा चांद्रमसी लेखा पतितेव धरातले ॥ १८ ॥

१ समाविशत्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ततः कामपरीतांगः सोवतीर्य धरातलम् ॥ विमानान्मधुरैर्वाक्यैस्तामुवाच कृतांजलिः ॥ १९ ॥ का त्वं कमलगर्भाभा निर्जनेऽथ महावने ॥ भ्रमस्येकाकिनी बाले वनमध्ये सुलोचने ॥ २० ॥ ॥ कन्योवाच ॥ ॥ अहं फलवतीनाम जाबालेर्दुहिता मुने ॥ फलपुष्पार्थमायाता तदर्थमिह कानने ॥ २१ ॥ ॥ चित्रांगद उवाच ॥ ॥ कुमारब्रह्मचारी स श्रूयते मुनिसत्तमः ॥ तत्कथं तस्य वामोरु त्वं जाता भार्यया विना ॥ २२ ॥ ॥ कन्योवाच ॥ ॥ सत्यमेतन्महाभाग नास्ति दारपरिग्रहः ॥ तस्यर्षेः किं तु संजाता यथा तन्मेऽवधारय ॥ २३ ॥ रंभानामाप्सरास्तेन पुरा दृष्टा सुरांगना ॥ ततः कामपरीतेन सेविता च यथासुखम् ॥ २४ ॥ ततस्तदुदराज्जाता देवलोके महत्तरे ॥ तयापि चेह तस्यर्षेर्भूय एव नियोजिता ॥ २५ ॥ एवं स मे पिता जातो जाबालिर्मुनिसत्तमः ॥ पोषिताऽहं ततस्तेन नानाफलसमुद्भवैः ॥ २६ ॥ ततः फलवती नाम कृतं तेन महात्मना ॥ ममानुरूपमेतद्धि यन्मां त्वं परिपृच्छसि ॥ २७ ॥ ॥ चित्रांगद उवाच ॥ ॥ तव रूपं समालोक्य कामस्याहं वशं गतः ॥ तस्माद्भजस्व मां भीरु नो चेद्यास्यामि संक्षयम् ॥ २८ ॥ अहं चित्रांगदोनाम गन्धर्वस्त्रिदिवौकसाम् ॥ तीर्थयात्राकृते प्राप्तः क्षेत्रेऽस्मिञ्छ्रद्धयाऽन्वितः ॥ २९ ॥ ॥ कन्योवाच ॥ ॥ कुमारधर्मिणी चाहमद्यापि वशगा पितुः ॥ कामधर्मं न जानामि चित्रांगद कथंचन ॥ ॥ ३० ॥ तस्मात्प्रार्थय मे तातं स मां तुभ्यं प्रदास्यति ॥ अनुरूपाय योग्याय तरुणाय मनस्विनीम् ॥ ३१ ॥ ममापि रुचितं चित्ते तव वाक्यमिदं शुभम् ॥ धन्याहं यदि ते कण्ठमालिंगामि यथेच्छया ॥ ३२ ॥ ॥ चित्रांगद उवाच ॥ ॥ न शक्नोमि महाभागे तावत्कालं प्रतीक्षितुम् ॥ मां दहत्येष गात्रोत्थः सुमहान्कामपावकः ॥ ३३ ॥ तस्मात्कुरु प्रसादं मे रतिदानेन शोभने ॥ को जानाति हि तच्चित्तं कीदृग्रूपं भविष्यति ॥ ३४ ॥ ॥ ॥ कन्योवाच ॥ ॥ एवं ते वर्तमानस्य मम तातः प्रकोपतः ॥ दहिष्यति न संदेहः शापं दत्त्वा सुदारुणम् ॥ ३५ ॥ ॥ चित्रांगद उवाच ॥ ॥ तव तातः स कालेन मां दहिष्यति मानदे ॥ कामानलः पुनः सद्य एष भस्म करिष्यति ॥३६॥ एवमुक्त्वाऽथ तां बालां वेपमानां त्रपावतीम् ॥ गृहीत्वा दक्षिणे पाणौ प्रविवेश सुरालयम् ॥ ३७ ॥ तत्र तां रमयामास तदा कामप्रपीडितः ॥ तत्कालजातरागांधां निर्लज्जत्वमुपागताम् ॥ ॥ ३८ ॥ एवं तस्याः समं तेन स्थितताया दिवसो गतः ॥ निमेषवन्मुनिश्रेष्ठास्ततश्चास्तं गतो रविः ॥ ३९ ॥ एतस्मिन्नंतरे विप्रो जाबालिर्दुःखसंयुतः ॥ अनायातां सुतां ज्ञात्वा परिबभ्राम सर्वतः ॥ ४० ॥ अहो सा दुहिता मह्यं किमु व्यालैः प्रभक्षिता ॥ वृक्षं कंचित्समारूढा पतिता धरणीतले ॥ ४१ ॥ किं वा जलाशयं कंचित्प्राप्य गाधमजानती ॥ निमग्ना तत्र सा बाला संप्रविष्टा जलार्थिनी ॥ ४२ ॥ एवं स प्रलपन्विप्रो बभ्राम



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गहने वने ॥ कुशकण्टकविद्धांगः क्षुत्पिपासासमाकुलः ॥ ४३ ॥ यंयं शृणोति शब्दं स मृगपक्षिसमुद्भवम् ॥ रजन्यां तत्र निर्याति मत्वा फलवतीं च ताम् ॥ ४४ ॥ अथ क्रमात्समायातो हरहर्म्यं स सन्मुनिः ॥ यत्र चित्रांगदोपेता सा संतिष्ठति कन्यका ॥ ४५ ॥ निःशंका जल्पमाना च रागवाक्यान्यनेकशः ॥ अनर्हाणि कुमारीणां ब्रह्मजानां विशेषतः ॥ ४६ ॥ ततः स सुचिरं श्रुत्वा दूरस्थो विस्मयान्वितः ॥ कुमार्याश्चेष्टितं दृष्ट्वा कोपसंरक्तलोचनः ॥ ४७ ॥ अथ दुद्राव वेगेन गृह्य काष्ठसमुच्चयम् ॥ द्वाभ्यामेव विनाशाय भर्त्सयमानो मुहुर्मुहुः ॥ ४८ ॥ धिग्धिक्पापसमाचारे कौमार्यं दूषितं त्वया ॥ लांछनं च समानीतं मम लोकत्रयेऽपि च ॥ ४९ ॥ नितरां पतिमासाद्य कर्मणानेन चाधमे ॥ तस्मादनेन पापेन युक्तां त्वां नाशयाम्यहम् ॥ ५० ॥ एवमुक्त्वा प्रहारं स यावत्क्षिपति सन्मुनिः ॥ तावच्चित्रांगदो नष्टो व्योममार्गेण सत्वरम् ॥ ५१ ॥ विवस्त्रा सापि तत्रैव खिन्नांगी कामसेवया ॥ न शशाक क्वचिद्गंतुं समुत्थाय ततः क्षितौ ॥ ५२ ॥ ततः काष्ठप्रहारौघैर्हत्वा तां पतितां क्षितौ ॥ मृतामिति परिज्ञाय स क्रोधपरिवारितः ॥ ५३ ॥ ततश्चित्रांगदस्यापि ददौ शापं सुदारुणम् ॥ स दृष्ट्वाऽऽकाशमार्गेण गच्छमानं भयातुरम् ॥ ५४ ॥ य एष कन्यकां मह्यं धर्षयित्वा समुत्पतेत् ॥ स पतत्वचिरात्पापश्छिन्नपक्ष इवांडजः ॥ ५५ ॥ कुष्ठव्याधिसमायुक्तश्चलितुं नैव च क्षमः ॥ एतस्मिन्नन्तरे भूमौ स पपात नभस्तलात् ॥ ५६ ॥ कुष्ठव्याधिसमायुक्तः स च चित्रांगदो युवा ॥ ततस्तं स मुनिः प्राह काष्ठोद्यतकरः क्रुधा ॥ ५७ ॥ कस्त्वं पापसमाचार येन मे धर्षिता बलात् ॥ कुमारी तन्नयाम्येष त्वामद्य यमशासनम् ॥ ५८ ॥ ॥ चित्रांगद उवाच ॥ ॥ अहं चित्रांगदोनाम गन्धर्वस्त्रिदिवौकसाम् ॥ तीर्थयात्राप्रसंगेन क्षेत्रेऽस्मिन्समुपागतः ॥ ५९ ॥ ततस्तु कन्यकां दृष्ट्वा कामदेववशं गतः ॥ ६० ॥ ततः सेवितवानत्र लताहर्म्ये जनच्युते ॥ तस्मात्कुरु क्षमां मह्यं दीनस्य प्रणतस्य च ॥ ६१ ॥ यथा व्याधेर्भवेन्नाशो यथा स्याद्गगने गतिः ॥ भूयोऽपि त्वत्प्रसादेन स्वल्पः कोपो हि साधुषु ॥ ६२ ॥ ॥ जाबालिरुवाच ॥ ॥ ईदृग्रूपधरस्त्वं हि मम वाक्याद्भविष्यसि ॥ एषापि मत्सुता पापा वस्त्रहीना सदेदृशी ॥ ६३ ॥ भविष्यति न संदेहो जीवयिष्यति चेत्क्वचित् ॥ यद्येषा धास्यति क्वापि वस्त्रं गात्रे निजे क्वचित् ॥ ६४ ॥ तन्नूनं च शिरोऽप्यस्याः फलिष्यति[1] न संशयः ॥ एवमुक्त्वा विकोपश्च स जगाम निजाश्रमम् ॥ ६५ ॥ चित्रांगदोऽपि तत्रैव तया सार्धं तथा स्थितः ॥ कस्यचित्त्वथ कालस्य तत्र क्षेत्रे समाययौ ॥ ६६ ॥ चैत्रशुक्लचतुर्दश्यां भगवाञ्छशिशेखरः ॥ गन्तुं

१ फलिष्यति–विशीर्णं भविष्यति–इत्यर्थः । फल विशरणगत्यवसादनेषु धातुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





चित्रेश्वरे पीठे गणै रौद्रैः समावृतः ॥ योगिनीभिः प्रचण्डाभिः सार्धं प्राप्ते निशामुखे ॥ ६७ ॥ अथ प्राप्ते निशार्धे तु योगिन्यस्ताः सुदारुणाः ॥ महामांसं महामांसमित्यूचुर्भक्षणाय वै ॥६८॥ नृत्यमानाः पुरस्तस्य देवदेवस्य शूलिनः ॥ सस्पर्धा गणमुख्यैस्तैर्नर्तमानैः समंततः ॥६९ ॥ यस्तत्र समये तासां महामांसं प्रयच्छति ॥ मंत्रपूतं स संसिद्धिं समवाप्नोति वांछिताम् ॥ ७० ॥ मद्यं मांसं तथा चान्यन्नैवेद्यं वा फलादिकम् ॥ तस्य सिद्धिः समादिष्टा यथा स्वहृदये स्थिता ॥ ७१ ॥ एतस्मिन्नंतरे कन्या सा जाबालिसमुद्भवा ॥ स च चित्रांगदस्तत्र गत्वा प्रोवाच सादरम् ॥ ७२॥ अस्मदीयमिदं मांसं योगिन्यो हर्षसंयुताः ॥ भक्षयन्तु यथासौख्यं स्वयमेव प्रकल्पितम् ॥ ७३ ॥ अथ तं पुरुषं दृष्ट्वा कुष्ठव्याधिसमावृतम् ॥ विवस्त्रां कन्यकां तां च सर्वास्ता विस्मयान्विताः ॥ ७४ ॥ ते च सर्वे गणा रौद्राः स च देवस्त्रिलोचनः ॥ पप्रच्छ कौतुकाविष्टस्तत्र चित्रांगदं प्रभुः ॥ ७५ ॥ कस्त्वं धैर्यसमायुक्तो महत्सत्त्वे व्यवस्थितः ॥ यः प्रयच्छसि जीवं त्वं कीटस्यापि सुवल्लभम् ॥ ७६ ॥ केयं च वसनैर्हीना त्वया सार्धं गतव्यथा ॥ प्रयच्छति निजं देहं यद्देयं नैव कस्यचित् ॥ ७७ ॥ ॥ सूत उवाच ॥ ॥ ततः स कथयामास सर्वमात्मविचेष्टितम् ॥ यथा कन्यासमं संगः कृतः शापश्च सन्मुनेः ॥ ७८ ॥ ततश्चित्रांगदं दृष्ट्वा स गन्धर्वं दिवौकसाम् ॥ तथारूपं कृपाविष्टस्ततः प्रोवाच शंकरः ॥ ७९ ॥ मम संदर्शनं प्राप्य न मृत्युर्जायते क्वचित् ॥ न वृथा दर्शनं चैतत्तस्मात्प्रार्थय सादरम् ॥ ८० ॥ ॥ चित्रांगद उवाच ॥ ॥ व्याधिनाऽहं सुनिर्विण्णस्तेन देवात्र चागतः ॥ येन व्याधिक्षयो भावी देहनाशेन शंकर ॥ ८१ ॥ तस्मात्कुरु क्षयं व्याधेर्यदि यच्छसि मे वरम् ॥ खेचरत्वं पुनर्देहि येन स्वर्गं व्रजाम्यहम् ॥ ८२ ॥ ॥ श्रीशंकर उवाच ॥ ॥ त्वं स्थापयात्र मल्लिंगं पीठे गन्धर्वसत्तम ॥ ततश्चाराधय प्रीत्या यावद्वर्षमुपस्थितम् ॥ ८३ ॥ यथायथा सुपूजां त्वं मल्लिंगस्य करिष्यसि ॥ दिनेदिने तथा व्याधेस्तव नाशो भविष्यति ॥ ८४ ॥ ततस्तु खे गतिं प्राप्य पुनः स्वर्गं प्रयास्यसि ॥ मत्प्रसादान्न सन्देहः सत्यमेतन्मयोदितम् ॥ ८५ ॥ एषापि कन्यका यस्मात्प्रविष्टा पीठमध्यतः ॥ तस्मात्फलवतीनाम योगिनी सम्भविष्यति ॥ ८६ ॥ अनेनैव तु रूपेण नग्नत्वेन व्यवस्थिता ॥ मुख्यामवाप्स्यते पूजां वांछितं च प्रदास्यति ॥ पूजकानां स्थितं चित्ते शतसंख्यगुणं तदा ॥ ८७ ॥ एतां संपूजयेन्मर्त्यः पीठमेतत्ततः परम् ॥ पूजयिष्यति तस्येष्टा सिद्धिरेवं भविष्यति ॥ ८८ ॥ एवमुक्त्वा ततः साऽथ हर्षेण महताऽन्विता ॥ योगिनीवृंदमध्यस्था नृत्यं चक्रे ततः परम् ॥ ८९ ॥ एवं बभूव सा तत्र योगिनी च वरांगना ॥ तथा चक्रे परं नृत्यं यथा तुष्टो महेश्वरः ॥ ९० ॥ ततः प्रोवाच तां हृष्टः सर्वयोगिनिसंनिधौ ॥ अनेन तव



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नृत्येन गीतेन च विशेषतः ॥ ९१ ॥ परितुष्टोस्मि ते वत्से तस्माच्छृणु वचो मम ॥ निशीथेऽद्य दिने प्राप्ते यस्ते पूजां करिष्यति ॥ ९२ ॥ सुरा मांसान्नसत्कारैर्मंत्रैरागमसंभवैः ॥ स भविष्यति तत्कालं शापानुग्रहशक्तिमान् ॥ ९३ ॥ बंधनं मोहनं चापि शत्रोरुच्चाटनं तथा ॥ करिष्यति न सन्देहो वशीकरणमेव च ॥ ९४ ॥ त्रिकोणं कुण्डमास्थाय[1] दिशां पालान्प्रपूजयेत् ॥ क्षेत्रपालं च सर्वास्ता देवता गगनोद्भवाः ॥ ९५ ॥ तथा च त्वत्पूजां च प्रकृत्वा विधिपूर्वकम् ॥ पश्चात्त्वां पूजयित्वा च होमं यश्च करिष्यति ॥ ९६ ॥ शत्रुवामपदोत्थेन स्पृष्टेन रजसाऽथवा ॥ गुग्गुलेन सहस्रांतं स्तंभनं च करिष्यति ॥ ९७ ॥ यश्च शत्रुं हृदि स्थाप्य शत्रूद्वर्तनसंभवम् ॥ मलं धात्रीफलैः सार्धं मोहनं स करिष्यति ॥ ९८ ॥ यः शत्रोः स्नानजं तोयं गृहीत्वा चाथ कर्दमम् ॥ शिवनिर्माल्यसंयुक्तं जुहवयिष्यति पावके ॥ ९९ ॥ तवाग्रे स नरो नूनं शत्रुमुच्चाटयिष्यति ॥ एषोपि तव संगेन तव चित्रांगदः प्रियः ॥ संप्राप्स्यति च सत्पूजामनुषंगात्त्वदुद्भवात् ॥ १०० ॥ ॥ फलवत्युवाच ॥ ॥ यदि देव प्रसन्नो मे तथान्यमपि सद्वरम् ॥ १०१ ॥ हृदिस्थं देहि मे सौख्यं येन संजायतेऽखिलम् ॥ पिता ममैष जाबालिर्निर्मुक्तो वसनैः सदा ॥ १०२ ॥ अहं यथा तथात्रैव संतिष्ठतु दिवानिशम् ॥ येन संतापमायाति पश्यन्मम विरोधिनीम् ॥ १०३ ॥ क्रीडां ब्राह्मणवंशस्य मद्यमांससमुद्भवाम् ॥ मद्यगन्धं समाघ्राति मांसं पश्यति संस्कृतम् ॥ मां स्वच्छंदरतां नित्यं दुःखं याति दिनेदिने ॥ १०४ ॥ ॥ श्रीभगवानुवाच ॥ ॥ एवं भविष्यति प्रोक्तं संजातं चाधुना शुभे ॥ अहं यास्यामि कैलासं त्वं तिष्ठात्र यथोदिता ॥ १०५ ॥ ॥ सूत उवाच ॥ ॥ एवं स भगवान्प्रोक्त्वा गतश्चादर्शनं हरः ॥ योगिन्यश्चैव ताः सर्वाः स्वेस्वे स्थाने व्यवस्थिताः ॥ १०६ ॥ चित्रांगदोपि तत्रैव कृत्वा प्रासादमुत्तमम् ॥ लिंगं संस्थापयामास देवदेवस्य शूलिनः ॥ १०७ ॥ ततश्चाराधयामास दिवारात्रमतंद्रितः ॥ १०८ ॥ ततः संवत्सरस्यांते व्याधिमुक्तः सुरूपधृक् ॥ विमानवरमारूढो जगाम त्रिदशालयम् ॥ सोऽपि जाबालिनामाथ विवस्त्रः समपद्यत ॥ १०९ ॥ जनहास्यकरो लोके स्थितस्तत्रैव सर्वदा ॥ पश्यमानो विकारांस्तान्दुःखितः स्वसुतोद्भवान् ॥ ११० ॥ ततश्च गर्हयामास स्त्रीणां जन्म महामुनिः ॥ तस्मिन्पीठे समासाद्य दुःखेन महताऽन्वितः ॥ १११ ॥ अहो पापात्मनां पुंसां संभविष्यंति योषितः ॥ यासामीदृक्समाचारो द्विजवंशोद्भवास्वपि ॥ ११२ ॥ सकृदेव मया संगः कृतो नार्या समन्वितः ॥ आजन्ममरणं यावत्पापं प्राप्तं यथेदृशम् ॥ ११३ ॥ ये पुनस्तासु संसक्ताः सदैव पुरुषाधमाः ॥ का तेषां जायते लोके गतिर्वेद्मि न चिंतयन् ॥ ११४ ॥ एवं तस्य

[1] आग्याय-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ब्रुवाणस्य योगिन्यस्ताः क्रुधान्विताः ॥ तमूचुर्ब्राह्मणं तत्र घृणया परिवारितम् ॥ ११५ ॥ ॥ योगिन्य ऊचुः ॥ ॥ मा निंदां कुरु मूढात्मंस्त्वं
स्त्रीणां योगमाश्रितः ॥ एतच्चराचरं विश्वं स्त्रीभिः संधार्यते यतः ॥ ११६ ॥ याभिः संजनितः शेषः कूर्मश्च तदनंतरम् ॥ याभ्यां संधार्यते
पृथ्वी यस्यां विश्वं प्रतिष्ठितम् ॥ ११७ ॥ धन्येयं ते सुता मूढ या प्राप्ता योगमुत्तमम् ॥ प्राप्ता च परमं स्थानं स्तोकैरेवात्र वासरैः ॥ ११८ ॥
त्वं पुनर्मूर्खतां प्राप्तश्छांदसं मार्गमास्थितः ॥ अविद्यया समायुक्तः संसारेऽत्र भ्रमिष्यसि ॥ ११९ ॥ ॥ मुनिरुवाच ॥ ॥ स्त्रियो निंद्यतमाः
सर्वाः सर्वावस्थासु दुःखदाः ॥ इह लोके परे चैव ताभ्यः सौख्यं न लभ्यते ॥ १२० ॥ यदर्थं निहतः शुम्भो निशुम्भश्च महासुरः ॥ रावणो
दण्डभूपश्च तथान्येऽपि सहस्रशः ॥ १२१ ॥ प्राप्य तादृग्द्विजं कांतं गौतमं स्त्रीस्वभावतः ॥ अहिल्या शक्रमासाद्य चकमे शीलवर्जिता ॥ १२२ ॥
॥ ॥ कन्योवाच ॥ ॥ यच्च निंदसि मूढात्मन्संति निंद्याश्च योषितः ॥ तद्वदस्व मया सार्धं येन त्वां बोधयाम्यहम् ॥ १२३ ॥ न तेऽस्ति
हृदये बुद्धिर्न लज्जा न दया मुने ॥ किमंत्यजोऽपि तत्कर्म कुरुते यत्त्वया कृतम् ॥ १२४ ॥ अहं तावत्प्रहारेण त्वया व्यापादिताऽधम ॥ स्त्रीह
त्योद्भवपापस्य न चिन्ता विधृता हृदि ॥ १२५ ॥ विशेषेण सुतायाश्च कोपाविष्टेन चेतसा ॥ गच्छंति पातकान्यत्र प्रायश्चित्तैः पृथग्विधैः ॥
॥ १२६ ॥ स्त्रीवधोत्थं पुनर्याति यदि तत्त्वं प्रकीर्तय ॥ एतन्मे न च दुःखं स्याद्यद्धतास्मि द्विजाधम ॥ १२७ ॥ यच्छप्ता नग्नसद्भावं नीता तत्पा
तकं च ते ॥ कल्पांतेऽपि सुदुर्बुद्धे न संयास्यति कुत्रचित् ॥ १२८ ॥ तस्माद्भुंक्ष्व सुदुःखार्तः स्थितोऽत्रैव मया सह ॥ न भूयो निंदसि प्रायो न
च व्यापादयिष्यसि ॥ १२९ ॥ अनिंद्या योषितः सर्वा नैता दुष्यंति कर्हिचित् ॥ मासिमासि रजो ह्यासां दुष्कृतान्यपकर्षति ॥ १३० ॥ ॥ मुनि
रुवाच ॥ ॥ स्त्रियः पापसमाचारा नैताः शुध्यंति कर्हिचित् ॥ परकांते रतिर्यासामंत्यजत्वं प्रयच्छति ॥ १३१ ॥ ॥ कन्योवाच ॥ ॥
मा मैवं वद मूढात्मन्नमेध्या इति योषितः ॥ अत्र श्लोकः पुरा गीतो मनुना तं निबोध मे ॥ १३२ ॥ ब्राह्मणाः पादतो मेध्या गावो
मेध्यास्तु पृष्ठतः ॥ अजाश्वा मुखतो मेध्याः स्त्रियो मेध्याश्च सर्वतः ॥ १३३ ॥ ॥ मुनिरुवाच ॥ ॥ ब्राह्मणाः सर्वतो मेध्या गावो मेध्याश्च
सर्वतः ॥ अजाश्वा मुखतो मेध्या न मेध्याश्च स्त्रियः क्वचित् ॥ १३४ ॥ ॥ कन्योवाच ॥ ॥ तस्य चिंतामणिर्हस्ते तस्य कल्पद्रुमो गृहे ॥
कुबेरः किंकरस्तस्य यस्य स्यात्कामिनी गृहे ॥ १३५ ॥ ॥ मुनिरुवाच ॥ ॥ तस्यापदोऽखिला दुःखं दुःखं तस्याखिलं गृहे ॥
नरकः सर्वतस्तस्य यस्य स्यात्कामिनी गृहे ॥ १३६ ॥ ॥ कन्योवाच ॥ ॥ यानि कान्यत्र सौख्यानि भोगस्थानानि यानि च ॥ धर्मार्थ



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामजातानि तानि स्त्रीभ्यो भवंति हि ॥ १३७ ॥ ॥ मुनिरुवाच ॥ ॥ यानिकानि सुदुःखानि क्लेशानि यानि देहिनाम् ॥ यानि कष्टा न्यनिष्टानि स्त्रीभ्यस्तानि भवंति च ॥ १३८ ॥ ॥ कन्योवाच ॥ ॥ धर्मार्थकाममोक्षान्स्त्री चतुरोऽपि चतसृभिः ॥ वह्निप्रदक्षिणाभिस्तान्वि वाहेऽपि प्रदर्शयेत् ॥ १३९ ॥ ॥ मुनिरुवाच ॥ ॥ संसारभ्रमणं नारी प्रथमेऽपि समागमे ॥ वह्निप्रदक्षिणान्यायव्याजेनैव प्रदर्शयेत् ॥ १४० ॥ ॥ ॥ कन्योवाच ॥ ॥ के नाम न विरज्यंति ज्ञानाढ्या अपि मानवाः ॥ कर्णांतलग्ननेत्रांतां दृष्ट्वा पीनपयोधराम् ॥ १४१ ॥ ॥ मुनिरुवाच ॥ ॥ के नाम न विनश्यंति मूढज्ञाना नितंबिनीम् ॥ रम्यबुद्ध्योपसर्पंति ये ज्वालाः शलभा इव ॥ १४२ ॥ ॥ कन्योवाच ॥ ॥ निर्मुखौ च कठोरौ च प्रोद्धतौ च मनोरमौ ॥ स्त्रीस्तनौ सेवते धन्यो मधुमांसे विशेषतः ॥१४३॥ ॥ मुनिरुवाच ॥ ॥ आभोगिनौ मंडलिनौ तत्क्षणान्मुक्तकंचुकौ॥ वरमाशीविषौ स्पृष्टौ न तु पत्न्याः पयोधरौ ॥ १४४ ॥ ॥ कन्योवाच ॥ ॥ न चासां रचनामात्रं केवलं रम्यमंगिभिः ॥ परिष्वंगोऽपि रामाणां सौख्याय पुलकाय च ॥ १४५ ॥ ॥ मुनिरुवाच ॥ ॥ न चासां रचनामात्रं रम्यं स्यात्पापदं दृशः ॥ वपुः स्पृष्टं विनाशाय स्त्रीणां प्रेत्य नरकाय च ॥ १४६ ॥ ॥ कन्योवाच ॥ ॥ को नाम न सुखी लोके को नाम सुकृती न च ॥ स्पृहणीयतमः को न स्त्रीजनो यस्य रज्यते ॥ १४७ ॥ ॥ ॥ मुनिरुवाच ॥ ॥ को न मुक्तिं व्रजेत्तत्र को न शस्यतरो भवेत् ॥ को न स्यात्क्षेमसंयुक्तः स्त्रीजने यो न रज्यते ॥ १४८ ॥ ॥ कन्यो वाच ॥ ॥ संसारांतः प्रसुतस्य कीटस्यापि प्ररोचते ॥ स्त्रीशरीरं नरस्यात्र किं पुनर्न विवेकिनः ॥ १४९ ॥ ॥ मुनिरुवाच ॥ ॥ अमेध्यजा तस्य यथा तथा तद्रोचनं कृमेः ॥ तथा संसारसूतस्य स्त्रीशरीरे च कामिनः ॥ १५० ॥ ॥ कन्योवाच ॥ ॥ सौख्यस्थानं नृणां किंचिद्वेधसा ऽन्यदपश्यता ॥ शाश्वतं चिंतयित्वाथ स्त्रीरत्नमिदमाहृतम् ॥ १५१ ॥ ॥ मुनिरुवाच ॥ ॥ बंधनं जगतः किंचिद्वेधसाऽन्यदपश्यता ॥ स्त्रीरूपेण ततः कोपि पाशोऽयं स्त्रीमयः कृतः ॥ १५२ ॥ ॥ सूत उवाच ॥ ॥ एवं स मुनिशार्दूलस्तयातीव समागमे ॥ निरुत्तरीकृतो यावत्ततः प्राह निजां सुताम् ॥ १५३ ॥ ॥ मुनिरुवाच ॥ ॥ त्वया सह न संवादो मया कार्योऽधुना क्वचित् ॥ या त्वं बालापि मामेवं निषेधयसि सर्वतः॥१५४॥ तस्माद्धन्यतरं मन्ये अहमात्मानमद्य वै ॥ यस्य मे त्वं सुता ईदृगीदृक्छास्त्रविचक्षणा ॥ १५५ ॥ तस्मान्न मे महाभागे कोपः स्वल्पोऽपि विद्यते ॥ तस्माद्यथेच्छया क्रीडां कुरु योगिनिमध्यगा ॥ १५६ ॥ ततः सा लज्जिता दृष्ट्वा पितरं स्नेहवत्सलम्[1] ॥ प्रणिपत्य पुनः प्राह योगिनीमध्यसं

१ स्नेहवल्लभम्–इ०पा०।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



स्थिता ॥ १६७ ॥ अज्ञानाद्यदि वा ज्ञानात्त्वं निषिद्धो मया प्रभो ॥ क्षंतव्यं सकलं मेऽद्य बालिकाया विशेषतः ॥ १६८ ॥ अत्र पीठे समागत्य प्रथमं ते द्विजोत्तमाः ॥ पूजां सर्वे करिष्यंति मानवा भक्तितत्पराः ॥ पश्चाच्च सर्वपीठस्य यास्यंति च परां गतिम् ॥ १६९ ॥ एवं सा तत्र संजाता जाबालिमुनिसंभवा ॥ जाबालिश्च मुनिश्रेष्ठस्तथा चित्रांगदेश्वरः ॥ १६० ॥ त्रयाणामपि यस्तेषां पूजां मर्त्यः समाचरेत् ॥ दिवसेदिवसे तत्र स सिद्धिं समवाप्नुयात् ॥ १६१ ॥ नासाध्यं विद्यते किंचित्तावदत्र धरातले ॥ पूज्यते भूमिपालाद्यैर्भोगान्दिव्यांस्तथा लभेत् ॥ १६२ ॥ तस्मात्सर्वप्रयत्नेन स मुनिः सा च कन्यका ॥ पूजनीया विशेषेण स देवोऽथ महेश्वरः ॥ १६३ ॥ एतद्वः सर्वमाख्यातमाख्यानं सर्वकामदम्[१] ॥ पठतां शृण्वतां चैवं इहलोके परत्र च ॥ १६४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये चित्रांगदेश्वरफलवतीजाबाल्याख्यानवर्णनंनाम चतुश्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४४ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ यत्त्वया कथितं सूत न मृता सा कुमारिका ॥ हता रौद्रप्रहारैश्च कौतुकं तन्महत्तरम् ॥ १ ॥ यतो भूयः प्रसंजाता योगिनी हरतुष्टिदा ॥ तत्त्वार्थं सर्वमाचक्ष्व कारणं च तदद्भुतम् ॥ २ ॥ ॥ सूत उवाच ॥ ॥ सा प्रविष्टा समं तेन सुपुण्यममरेश्वरम् ॥ माघकृष्णचतुर्दश्यां न मृत्युर्यत्र विद्यते ॥ ३ ॥ अपि चैवायुषः शेषे किमुताकालतो द्विजाः॥ तेन नो निधनं प्राप्ता हतापि सुदृढं तदा ॥ ४ ॥ ॥ ऋषय ऊचुः ॥ ॥ अमरेश्वर इत्युक्तो यो देवो ह्यमरत्वदः ॥ केन संस्थापितो ह्यत्र किंप्रभावश्च कीर्तय ॥ ५ ॥ ॥ सूत उवाच ॥ ॥ अदितिश्च दितिश्चैव प्रजापतिसुते शुभे ॥ कृते पुरातिरूपाढ्ये कश्यपेन महात्मना॥६॥अदित्यां विबुधा जाता दितेश्चैव तु दैत्यपाः॥ तेषां सापत्न्यभावेन महद्वैरमुपस्थितम्॥७॥ अथ दैत्यैः सुरा ध्वस्ताः कृताश्चान्ये पराङ्मुखाः ॥ अन्ये तु भयसंत्रस्ता दिशो जग्मुः क्षतांगकाः ॥८॥ ततो दुःखसमायुक्ता देवमातात्र संस्थिता ॥ तपश्चक्रे दिवानक्तं शिवध्यानपरायणा ॥ ९ ॥ एवं तस्यास्तपःस्थाया गते युगचतुष्टये ॥ निर्भिद्य धरणीपृष्ठं शिवलिंगं समुत्थितम् ॥ १० ॥ ततस्तस्मै कृतानन्दा स्तुत्वा स्तोत्रैः पृथग्विधैः ॥ अष्टांगप्रणिपातेन नमश्चक्रे समाहिता ॥ ११ ॥ एतस्मिन्नंतरे वाणी संजाता गगनांगणे ॥ शरीररहिता दिव्या मेघगम्भीरनिःस्वना ॥ १२ ॥ वरं प्रार्थय कल्याणि यस्ते हृदि व्यवस्थितः ॥ प्रसन्नोऽहं प्रदास्यामि तवाद्य शशिशेखरः ॥ १३ ॥ ॥ अदितिरुवाच ॥ ॥ मम पुत्राः सुरश्रेष्ठ हन्यन्ते युधि दानवैः॥ तान्कुरुष्व गतायासानवध्यान्त्रणमूर्धनि ॥ १४ ॥ ॥ श्रीभगवानुवाच ॥ ॥ एतल्लिंगं मदीयं ये स्पृष्ट्वा यास्यंति संयुगे ॥ अव



१ सर्वकामदम्—इत्यनेन संबंधः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्यास्ते भविष्यन्ति यावत्संवत्सरं शुभे ॥ १५ ॥ अन्योऽपि मानवो योऽत्र चतुर्दश्यां समाहितः ॥ माघमासस्य कृष्णायां प्रकरिष्यति जागरम् ॥ ॥१६॥ सोऽपि संवत्सरंयावद्भविष्यति निरामयः ॥ अपि मृत्युदिने प्राप्ते योऽस्मिन्नायतने शुभे ॥ १७ ॥ आगमिष्यति तं मृत्युर्दूरात्परिहरिष्यति ॥ एवमुक्त्वाथ सा वाणी विरराम ततः परम् ॥ १८ ॥ अदितिश्चापि सन्तुष्टा हतशेषान्सुतांस्ततः ॥ समानीयाथ तल्लिंगं तेषामेवान्यदर्शयत् ॥ कथयामास तत्सर्वं माहात्म्यं यद्वरोदितम् ॥ १९ ॥ ततस्ते विबुधाः सर्वे तल्लिंगं प्रणिपत्य च ॥ प्रतिजग्मुस्तुष्टियुक्ताः शस्त्राण्यादाय तान्प्रति ॥ २० ॥ यत्र ते दानवा हृष्टाः स्थिताः शक्रपदे शुभे ॥ स्वर्गभोगसमायुक्ता नन्दनांतर्व्यवस्थिताः ॥ २१ ॥ अथ ते दानवा दृष्ट्वा संप्राप्तांस्त्रिदिवौकसः ॥ सहसा संगरार्थाय नानाशस्त्रधरान्बहून् ॥ २२ ॥ रथवर्यान्समारुह्य धृतशस्त्रास्त्रवर्मणः ॥ युद्धार्थं सम्मुखा जग्मुर्गर्जमाना घना इव ॥ २३ ॥ ततः समभवद्युद्धं देवानां दानवैः सह ॥ रोषप्रेरितचित्तानां मृत्युं कृत्वा निवर्तनम् ॥ २४ ॥ ततस्ते विबुधाः सर्वे हरलब्धवरास्तदा ॥ जघ्नुर्दैत्यानसंख्याताञ्छितैः शस्त्रैरनेकधा ॥ २५ ॥ हतशेषाश्च ये तेषां ते त्यक्त्वा त्रिदशालयम् ॥ पलायनकृतोत्साहाः प्रविष्टा मकरालयम् ॥ २६ ॥ ततः शक्रः समापेदे स्वराज्यं दानवैर्हृतम् ॥ यदासीत्पूर्वकाले तत्समग्रं हतकण्टकम् ॥ २७ ॥ ततस्ते दानवाः शेषा ज्ञात्वा तल्लिंगसंभवम् ॥ माहात्म्यं वृषनाथस्य क्षेत्रस्यास्योद्भवस्य च ॥ २८ ॥ शुक्रेण कथितं सर्वं माघकृष्णे निशागमे ॥ चतुर्दश्यां शुचिर्भूत्वा यस्तल्लिंगं प्रपूजयेत् ॥ कालाघ्रातोऽपि न प्राणैः स पुमांस्त्यज्यते क्वचित् ॥२९॥ तस्माद्यूयं समासाद्य तल्लिंगं तद्दिने निशि ॥ पूजयध्वं महाभागा येन स्युर्मृत्युवर्जिताः ॥ ३० ॥ यावत्संवत्सरस्यांतं सत्यमेतन्मयोदितम् ॥ यथा ते देवसंघाश्च तत्प्रभावादसंशयम् ॥ ३१ ॥ अथ तं दानवेन्द्राणां मंत्रं ज्ञात्वा सुरेश्वरः ॥ नारदाद्ब्राह्मणः पुत्राद्भयत्रस्तमनास्ततः ॥ ३२ ॥ मंत्रं चक्रे समं देवैस्तत्र देवस्य रक्षणे ॥ यथा स्यादुद्यमः सम्यक्तस्मिन्नहनि सर्वदा ॥ ३३ ॥ कोटयस्तु त्रयस्त्रिंशद्देवानां सायुधास्ततः ॥ रक्षार्थं तस्य लिंगस्य तस्मिन्क्षेत्रे व्यवस्थिताः ॥ माघकृष्णचतुर्दश्यां सुसंनद्धाः प्रहारिणः ॥ ३४ ॥ अथ ते दानवा दृष्ट्वा तान्देवांस्तत्र संस्थितान् ॥ भयसंत्रस्तमनसो दुद्रुवुः सर्वतो दिशम् ॥ ३५ ॥ अथ प्रभाते विमले प्रोद्गते रविमण्डले ॥ भूय एव सुराः सर्वे मंत्रं चक्रुः परस्परम् ॥ ३६ ॥ यद्येतत्क्षेत्रमुत्सृज्य गमिष्यामः सुरालयम् ॥ लिंगमेतत्समभ्येत्य पूजयिष्यंति दानवाः ॥ ३७ ॥ ततोऽवध्या भविष्यंति तेऽपि सर्वे यथा वयम् ॥ तस्मादत्रैव तिष्ठामस्त्रयस्त्रिंशत्प्रनायकाः ॥ ३८ ॥ कोटीनामेव सर्वेषां शेषा गच्छन्तु तत्र च ॥ सहस्राक्षेण संयुक्ताः स्वर्गे स्वपररक्षकाः ॥ ३९ ॥ ततोऽष्टौ वसवस्तत्र द्वादशार्कास्तथैव च ॥ एकादशापरे रुद्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

नासत्यौ द्वौ च सुन्दरौ ॥४०॥ एते तल्लिंगरक्षार्थं तस्मिन्क्षेत्रे व्यवस्थिताः॥ शेषाः शक्रसमायुक्ताः प्रजग्मुस्त्रिदशालयम् ॥ ४१ ॥ ॥ सूत उवाच ॥ ॥
एवंप्रभावं लिंगं तु देवदेवस्य शूलिनः ॥ भवद्भिः परिपृष्टं यददित्या स्थापितं पुरा ॥ ४२ ॥ यस्मान्न विद्यते मृत्युस्तेन दृष्टेन देहिनाम् ॥
अमराख्यं ततो लिंगं विख्यातं भुवनत्रये ॥ ४३ ॥ यस्मिन्देशेऽपि सा कन्या हता तेन द्विजन्मना ॥ जाबालिना सुक्रुद्धेन तस्य देवस्य मंदिरे ॥
॥ ४४ ॥ आसीत्तत्र दिने कृष्णा माघमासचतुर्दशी ॥ तेन नो निधनं प्राप्ता सुहताऽपि तपस्विनी ॥ ४५ ॥ एतद्वः सर्वमाख्यातं तस्य लिंगस्य
सम्भवम् ॥ माहात्म्यं ब्राह्मणश्रेष्ठाः सर्वपातकनाशनम् ॥ ४६ ॥ यश्चैतत्पठते भक्त्या तस्य लिंगस्य संनिधौ ॥ अपमृत्युभयं तस्य कथंचिन्नैव
जायते ॥ ४७ ॥ तस्याग्रेऽस्ति शुभं कुण्डं पूरितं स्वच्छवारिणा ॥ अदित्या निर्मितं देव्या स्नानार्थं चात्मनः कृते ॥ ४८ ॥ स्नानं कृत्वा नर
स्तस्मिन्यस्तल्लिंगं प्रपश्यति ॥ करोति जागरं रात्रौ तस्मिन्नेव दिनेदिने ॥ सोऽब्दापि वत्सरंयावन्नापमृत्युवाप्नुयात् ॥ ४९ ॥ इति श्रीस्कान्दे
महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्येऽमरकेश्वरक्षेत्रमाहात्म्यवर्णनंनाम पंचचत्वारिंशदधिकशततमो
ऽध्यायः ॥ १४५ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ आदित्यानां च सर्वेषां वसुरुद्रादिकाश्विनाम् ॥ प्रत्येकशः समाचक्ष्व नामानि त्वं
महामते ॥ १ ॥ ॥ सूत उवाच ॥ ॥ वृषध्वजश्च शर्वश्च मृगव्याधस्तृतीयकः ॥ अजैकपादहिर्बुध्न्यः पिनाकी षष्ठ एव हि ॥ २ ॥ दहनश्चेश्वरश्चैव
कपाली नवमस्तथा ॥ वृषाकपिस्तु दशमो रुद्रस्त्र्यंबक एव च ॥ ३ ॥ धुरो ध्रुवश्च सोमश्च मखश्चैवानिलोऽनलः ॥ प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ
प्रकीर्तिताः ॥ ४ ॥ वरुणश्च तथा सूर्यो भानुः ख्यातश्च तापनः ॥ इंद्रश्चैवार्यमा चैव धाता चैव भगस्तथा ॥ ५ ॥ गभस्तिर्धर्मराजश्च स्वर्णरेता
दिवाकरः ॥ मित्रश्च वासुदेवश्च द्वादशैते च भास्कराः ॥ ६ ॥ नासत्यश्चैव दस्रश्च ख्यातावेतौ तथाश्विनौ ॥ देववैद्यौ महाभागौ त्वाष्ट्रीगर्भसमुद्भवौ
॥ ७ ॥ त्रयस्त्रिंशत्समाख्याता एते ये सुरनायकाः ॥ क्षेत्रेऽत्रैवास्थिता नित्यं दानवानां वधाय च ॥८॥ यस्तान्संपूजयेद्भक्त्या पुरुषः संयतेंद्रियः॥
यथोक्तदिवसे प्राप्ते नापमृत्युः प्रजायते ॥ ९ ॥ अष्टम्यां च चतुर्दश्यां रुद्राः पूज्या विचक्षणैः ॥ तस्मिन्क्षेत्रे विशेषेण वांछद्भिः परमं पदम् ॥१०॥
दशम्यां वसवः पूज्यास्तथाष्टम्यां विशेषतः ॥ स्वर्गं समीहमानैश्च विलासैर्विविधैस्तथा ॥ ११ ॥ सप्तम्यामथ षष्ठ्यां च पूजनीया दिवाकराः ॥

१ रुद्रश्च–इ० पा० । २ दशम्याम्–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ये वाछन्ति नराः सत्त्वं परिपंथिविवर्जितम् ॥ १२ ॥ देववैद्यौ तथा पूज्यौ द्वादश्यां व्याधिसंक्षयम् ॥ ये वांछन्ति सदा मर्त्या नीरुजाः सम्भवंति ते ॥ १३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्येऽमरेश्वरकुण्डमाहात्म्यवर्णनं नाम षट्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४६ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तथान्योऽपि च तत्रास्ति देवः पुत्रप्रदो नृणाम् ॥ वटिकेश्वर नामा च सर्वपापहरो हरः ॥ १ ॥ यस्मिन्वटिकया पूर्वं तपस्तप्तं द्विजोत्तमाः ॥ प्राप्ता पुत्रं शुके याते वनं व्यासात्कपिंजलम् ॥ २ ॥ ॥ ऋषय ऊचुः ॥ ॥ कस्यासौ वटिका तत्र कथं तप्तवती तपः ॥ कस्माद्गृहं परित्यक्ता शुकोऽपि वनमाश्रितः ॥ ३ ॥ कथं कपिंजलं पुत्रं व्यासाल्लेभे शुचिस्मिता ॥ ४ ॥ ॥ सूत उवाच ॥ ॥ आसीद्व्यासस्य विप्रेंद्राः कलत्रार्थं मतिः क्वचित् ॥ निष्कामस्य प्रशांतस्य सर्वज्ञस्य महात्मनः ॥ ५ ॥ ततः क्षयमनुप्राप्ते वंशे कुरुसमुद्भवे ॥ विचित्रवीर्यमासाद्य पार्थिवं द्विजसत्तमाः ॥ ६ ॥ सत्यवत्याः समादेशात्तस्य क्षेत्रे ततः परम् ॥ स पुत्राञ्जनयामास त्रीञ्छूरान्पांडुपूर्वकान् ॥ ७ ॥ वानप्रस्थव्रते तिष्ठन्सक्तुन्मैथुनतत्परः ॥ क्षेत्रजैस्तनयैर्वंशे कुरोस्तस्मादुपस्थिते ॥ ८ ॥ ततः स चिंतयामास भार्यामद्य करोम्यहम् ॥ गार्हस्थ्येनाथ धर्मेण साधयामि शुभां गतिम् ॥ ९ ॥ ततः स प्रार्थयामास जाबालिं तु सुतां शुभाम् ॥ वटिकाख्यां शुभां कन्यां स ददौ तस्य सत्वरम् ॥ १० ॥ ततस्तया समेतः स वनवासं समाश्रितः ॥ वानप्रस्थाश्रमे तिष्ठन्कृतमैथुनतत्परः ॥ ११ ॥ ततो गर्भवती जज्ञे पिंजला तस्य पार्श्वतः ॥ ऋतौ मोहनमासाद्य[1] व्यासात्सत्यवतीसुतात् ॥ १२ ॥ अथ याति परां वृद्धिं स गर्भस्तत्र संस्थितः ॥ उदरे व्यासभार्यायाः शुक्लपक्षे यथा शशी ॥ १३ ॥ एवं संगच्छतस्तस्य वृद्धिं गर्भस्य नित्यशः ॥ द्वादशाब्दा अतिक्रांता न जन्म समवाप्नुयात् ॥ १४ ॥ यत्किंचिच्छृणुते तत्र गर्भस्थोऽहि वचः क्वचित् ॥ तत्सर्वं हृदिसंस्थं च चक्रे प्रज्ञासमन्वितः ॥ १५ ॥ वेदाः सांगाः समाधीता गर्भवासेऽपि तेन च ॥ स्मृतयश्च पुराणानि मोक्षशास्त्राणि कृत्स्नशः ॥ १६ ॥ तत्रस्थोऽपि दिवा नक्तं स्वाध्यायं प्रकरोति सः ॥ न च जन्मोत्थजां बुद्धिं कथंचिदपि चिंतयेत् ॥ १७ ॥ सापि माता परां पीडां नित्यं याति तथाकुला ॥ यथायथा स संयाति वृद्धिं जठरमाश्रितः ॥ १८ ॥ ततश्च विस्मयाविष्टो व्यासो वचनमब्रवीत् ॥ कस्त्वं मद्गृहिणीकुक्षौ प्रविष्टो गर्भरूपधृक् ॥ १९ ॥ न निष्कामसि कस्मात्त्वं किमेतां सूदयिष्यसि ॥ ॥ ॥ गर्भ उवाच ॥ ॥ राक्षसोऽहं पिशाचोहं देवोऽहं मानुषस्तथा ॥२०॥ गजोऽहं तुरगश्चापि कुक्कुटश्छाग एव च ॥ योनीनां चतुराशीतिसहस्राणि

१ मेहनम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



च संख्यया ॥ २१ ॥ भ्रांतोऽहं तेषु सर्वेषु तत्कोऽहं प्रब्रवीमि किम् ॥ सांप्रतं मानुषो भूत्वा जठरं समुपाश्रितः ॥ २२ ॥ मानुषं न करिष्यामि निष्क्रामं च कथंचन ॥ निर्विष्टो भ्रममाणोऽत्र संसारे दारुणे ततः ॥ २३ ॥ अत्रस्थो भवनिर्मुक्तो योगाभ्यासरतः सदा ॥ मोक्षमार्गं प्रयास्यामि स्थानान्मोक्षमसंशयम् ॥ २४ ॥ तावज्ज्ञानं च वैराग्यं पूर्वजातिस्मृतिर्यथा ॥ यावद्गर्भस्थितो जन्तुः सर्वोऽपि द्विजसत्तम ॥ २५ ॥ यदा गर्भाद्विनिष्क्रांतः स्पृश्यते विष्णुमायया ॥ तदा नाशं व्रजत्याशु सत्यमेतदसंशयम् ॥ २६ ॥ तस्मान्नाहं द्विजश्रेष्ठ निष्क्रमिष्ये कथंचन ॥ गर्भादस्मात्प्रयास्यामि स्थानान्मोक्षमसंशयम् ॥ २७ ॥ ॥ व्यास उवाच ॥ ॥ न भविष्यति ते माया वैष्णवी सा कथंचन ॥ सुघोरान्नरकादस्मान्निष्क्रमस्व विगर्हितात् ॥ २८ ॥ गर्भवासात्ततो योगं समाश्रित्य शिवं व्रज ॥ तस्माद्दर्शय मे वक्त्रं स्वकीयं येन मे भवेत् ॥ आनृण्यं पितृलोकस्य तव वक्त्रस्य दर्शनात् ॥ २९ ॥ ॥ गर्भ उवाच ॥ ॥ वासुदेवं प्रतिभुवं यदि मे त्वं प्रयच्छसि ॥ इदानीं यत्स्वयं तन्मे जन्म स्यान्नान्यथा द्विज ॥ ३० ॥ ॥ सूत उवाच ॥ ॥ ततो व्यासो द्रुतं गत्वा द्वारकां प्रति दुःखितः ॥ कथयामास वृत्तांतं विस्तराच्चक्रपाणिने ॥ ३१ ॥ तेनैव सहितः पश्चात्स्वगृहं पुनरागतः ॥ व्यासः प्रतिभुवं तस्मै दातुं विष्णुं निरंजनम् ॥ ३२ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ प्रतिभूरस्मि नाशाय मायायास्तव निर्गमे ॥ मद्वाक्यान्निष्क्रमं कृत्वा गच्छ मोक्षमनुत्तमम् ॥ ३३ ॥ ततो द्रुतं विनिष्क्रांतो विष्णुवाक्येन स द्विजाः ॥ द्वादशाब्दप्रमाणस्तु यौवनस्य समीपगः ॥ ३४ ॥ ततः प्रणम्य दैत्यारिं व्यासं च जननीं तथा ॥ प्रस्थितो वनवासाय तत्क्षणाद्व्यासनंदनः ॥ ३५ ॥ अथ तं स मुनिः प्राह तिष्ठ पुत्रात्ममंदिरे ॥ संस्काराञ्जातकाद्यांश्च येन ते प्रकरोम्यहम् ॥ ३६ ॥ ॥ शिशुरुवाच ॥ ॥ संस्काराः शतशो जाता मम जन्मनिजन्मनि ॥ भवार्णवे परिक्षितो यैरहं बन्धनात्मकैः ॥ ३७ ॥ ॥ श्रीभगवानुवाच ॥ ॥ शुकवज्जल्पते यस्मात्तवायं पुत्रको मुने ॥ तस्माच्छुकोऽयं नाम्नास्तु योगविद्याविचक्षणः ॥ ३८ ॥ नायं स्थास्यति हर्म्ये स्वे मोहमायाविवर्जितः ॥ तस्माद्गच्छतु मा स्नेहं त्वं कुरुष्वास्य संभवम् ॥ ३९ ॥ अहं गृहं प्रयास्यामि त्वं मुक्तः पैतृकादृणात् ॥ दर्शनादेव पुत्रस्य सत्यमेतन्मयोदितम् ॥ ४० ॥ एवमुक्त्वा हृषीकेशो व्यासमामंत्र्य सत्वरम् ॥ विहगाधिपमारूढः प्रययौ द्वारकां प्रति ॥ ४१ ॥ ततो गते हृषीकेशे व्यासः पुत्रमुवाच ह ॥ प्रस्थितं वनवासाय निःस्पृहं स्वगृहं प्रति ॥ ४२ ॥ ॥ व्यास उवाच ॥ ॥ गृहस्थधर्मरिक्तानां पितृवाक्यं प्रणश्यति ॥ पितृवाक्यं तु यो मोहान्नैव सम्यक्समाचरेत् ॥ स याति नरकं तस्मान्मद्वाक्यात्पुत्र मा व्रज ॥ ४३ ॥ ॥ शुक उवाच ॥ ॥ यथाद्याहं त्वया जातो मया त्वं चान्यजन्मनि ॥ संजातोऽसि मुनिश्रेष्ठ



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाहमपि ते पिता ॥ ४४ ॥ तस्माद्वाक्यं त्वया कार्यं यद्येषा धर्मसंस्थितिः ॥ नाहं निषेधनीयस्तु व्रजमानस्तपोवनम् ॥ ४५ ॥ ॥ व्यास उवाच ॥ ॥ ब्राह्मणस्य गृहे जन्म पुण्यैः संप्राप्यते नृभिः ॥ संस्कारान्यत्र संप्राप्य वेदोक्तान्मुनिराप्यते ॥ ४६ ॥ ॥ शुक उवाच ॥ ॥ संस्कारैराप्यते मुक्तिर्यदि कर्म शुभं विना ॥ पाखंडिनोऽपि यास्यंति तन्मुक्तिं व्रतधारिणः ॥ ४७ ॥ ॥ व्यास उवाच ॥ ॥ ब्रह्मचारी भवेत्पूर्वं गृहस्थश्च ततः परम् ॥ वानप्रस्थो यतिश्चैव ततो मोक्षमवाप्नुयात् ॥ ४८ ॥ ॥ शुक उवाच ॥ ॥ ब्रह्मचर्येण चेन्मोक्षस्तत्षण्ढानां सदा भवेत् ॥ गृहस्थाश्रमिणां चेत्स्यात्तत्सर्वं मुच्यते जगत् ॥ ४९ ॥ अथवा वनरक्तानां तन्मृगाणां प्रजायते ॥ ५० ॥ अथवा यतिधर्माणां यदि मोक्षो भवेन्नृणाम् ॥ दरिद्राणां च सर्वेषां तन्मुक्तिः प्रथमा भवेत् ॥ ५१ ॥ ॥ व्यास उवाच ॥ ॥ गृहस्थधर्मरक्तानां नृणां सन्मार्गगामिनाम् ॥ इह लोकः परश्चैव मनुना संप्रकीर्तितः ॥ ५२ ॥ ॥ श्रीशुक उवाच ॥ ॥ गृहगुप्तौ सुगुप्तानां बंधानां बंधुबंधनैः ॥ मोहरागसमावेशात्सन्मार्गगमनं कुतः ॥ ५३ ॥ ॥ व्यास उवाच ॥ ॥ कष्टं वने निवसतोऽत्र सदा नरस्य नो केवलं निजतनुप्रभवं भवेच्च ॥ दैवं च पित्र्यमखिलं न विभाति कृत्यं तस्माद्गृहे निवसतात्महितं प्रचिन्त्यम् ॥ ५४ ॥ ॥ श्रीशुकदेव उवाच ॥ ॥ भावेन भावितमहातपसां मुनीनां तिष्ठन्ति तावदखिलानि तपःफलानि ॥ यत्ते निकाशशरणाः पुरुषा न जातु पश्यंत्यसज्जनमुखानि सुखं तदेव ॥ ५५ ॥ ॥ व्यास उवाच ॥ ॥ गृहे परिग्रहः पुंसां गृहस्थाश्रमधर्मिणाम् ॥ इहलोके परे चैव सुखं यच्छति शाश्वतम् ॥ ५६ ॥ ॥ श्रीशुक उवाच ॥ ॥ शीतं हुताशादपि दैवयोगात्सञ्जायते चन्द्रमसोऽपि तापः ॥ परिग्रहात्सौख्यसमुद्भवोऽत्र भूतोऽभवद्भावि न मर्त्यलोके ॥ ५७ ॥ ॥ व्यास उवाच ॥ ॥ सुपुण्यैर्लभ्यते कृच्छ्रान्मानुष्यं भुवि दुर्लभम् ॥ तस्मिँल्लब्धे न किं लब्धं यदि स्याद्गृहधर्मवित् ॥ ५८ ॥ ॥ श्रीशुकदेव उवाच ॥ ॥ यदि स्याज्ज्ञानसंयुक्तो जन्मकालेत्र मानवः ॥ निजावस्थां समालोक्य तज्ज्ञानं हि विलीयते ॥ ५९ ॥ ॥ व्यास उवाच ॥ ॥ मुदितस्यापि पुत्रस्य गर्दभस्यार्भकस्य च ॥ भस्मलोलस्य लोकस्य शब्दोऽपि रटतो मुदे ॥ ६० ॥ ॥ श्रीशुक उवाच ॥ ॥ रसता सर्पता धूलिं लोके त्वशुचिना चिरम् ॥ मुनेऽत्र शिशुना लोकस्तुष्टिं याति स बालिशः ॥ ६१ ॥ ॥ व्यास उवाच ॥ ॥ पुंनामास्ति महारौद्रो नरको यममन्दिरे ॥ पुत्रहीनो व्रजेत्तत्र तेन पुत्रः प्रशस्यते ॥ ६२ ॥ ॥ श्रीशुक उवाच ॥ ॥ यदि स्यात्पुत्रतः स्वर्गः सर्वेषां स्यान्महामुने ॥ शूकराणां शुनां चैव शलभानां विशेषतः ॥ ॥ ६३ ॥ ॥ व्यास उवाच ॥ ॥ पितॄणामनृणो मर्त्यो जायते पुत्रदर्शनात् ॥ पौत्रस्यापि च देवानां प्रपौत्रस्य दिवाश्रयः ॥ ६४ ॥ ॥ शुक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





उवाच ॥ ॥ चिरायुर्जायते गृध्रः संततिं पश्यते निजाम् ॥ क्रमेण संततं किं न स मोक्षं प्रतिपद्यते ॥ ६५ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वा परित्यज्य पितरं स वनं गतः ॥ मातरं च सुदुःखार्तां प्रलपन्तीमनेकधा ॥ ६६ ॥ तं दृष्ट्वा दुःखितो व्यासो निराशः पुत्रदर्शने ॥ पुत्रशोकाभिसंतप्तो भार्यया सहितोऽभवत् ॥ ६७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये व्यासशुकसंवादवर्णनंनाम सप्तचत्वारिंशदुत्तरशततमोध्यायः ॥ १४७ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एवं तं निःस्पृहं ज्ञात्वा गृहं प्रति निजात्मजम् ॥ पिंगला दुःखसंयुक्ता व्यासमेतदुवाच ह ॥ १ ॥ अहं तपश्चरिष्यामि पुत्रार्थं द्विजसत्तम ॥ अनुज्ञां देहि मे येन तोषयामि महेश्वरम् ॥ पुत्रो येन भवेन्मह्यं वंशवृद्धिकरः परः ॥ २ ॥ एवं सा निश्चयं कृत्वा लब्ध्वानुज्ञां मुनेस्ततः ॥ क्षेत्रमेतत्समासाद्य तपस्तेपे पतिव्रता ॥ ३ ॥ संस्थाप्य शंकरं देवं तदग्रे निर्मलोदकम् ॥ कृत्वा वापीं सुविस्तीर्णां स्नानात्पातकनाशनीम् ॥ ४ ॥ ततस्तस्या गतस्तुष्टिं भगवांस्त्रिपुरांतकः ॥ वरदोऽस्मीति तां प्राह प्रहृष्टेनांतरात्मना ॥ ५ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ परितुष्टोऽस्मि ते भद्रे वरं वरय सुव्रते ॥ यः स्थितो हृदये नित्यं नादेयं विद्यते मम ॥ ६ ॥ ॥ वटिकोवाच ॥ ॥ सुतं देहि सुरश्रेष्ठ मम वंशविवर्धनम् ॥ चित्ताह्लादकरं नित्यं सुशीलं विनयान्वितम् ॥ ७ ॥ ॥ श्रीमहादेव[1] उवाच ॥ ॥ भविष्यति न संदेहस्तव पुत्रः सुशोभने ॥ यादृक्त्वया महाभागे प्रार्थितस्तद्विशेषतः ॥ ८ ॥ अन्यापि मानुषी याऽत्र वाप्यां स्नात्वा समाहिता ॥ पञ्चम्यां वत्सरं यावच्छुक्लपक्षे ह्युपस्थिते ॥ पूजयिष्यति मल्लिंगं यच्चाद्य स्थापितं त्वया ॥ ९ ॥ साथ लप्स्यति सत्पुत्रं दत्त्वा फलमनुत्तमम् ॥ या च दौर्भाग्यसंयुक्ता तृतीयादिवसेऽत्र वै ॥ १० ॥ स्नात्वाऽत्र सलिले पश्चान्मल्लिंगं पूजयिष्यति ॥ सा सौभाग्यसमोपेता वर्षांते च भविष्यति ॥ ११ ॥ यः पुनः पुरुषश्चात्र स्नात्वा मां पूजयिष्यति ॥ सकामो लप्स्यते कामान्निष्कामो मोक्षमेव च ॥ १२ ॥ एवमुक्त्वा महादेवस्ततश्चादर्शनं गतः ॥ साऽपि लेभे सुतं[2] व्यासात्कपिंजलमिति श्रुतम् ॥ १३ ॥ यादृक्तेन पुरा प्रोक्तो देवदेवेन शूलिना ॥ येनैव स्थापिता चात्र देवी केलीश्वरी पुरा ॥ सर्वसिद्धिप्रदा लोके तत्र याऽऽराधिता पुरा ॥ १४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये वटिकेश्वरमाहात्म्यवर्णनंनामाष्टचत्वारिंशदधिकशततमोऽध्यायः ॥ १४८ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ केलीश्वरी च या देवी श्रूयते सूतनंदन ॥ माहात्म्यं वद नस्तस्या उत्पत्तिं च सुविस्तरात् ॥ १ ॥ कस्मिन्काले समुत्पन्ना किमर्थं च सुरेश्वरी ॥



१ श्रीभगवानुवाच—इ० पा० । २ श्रीभगवानुवाच—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किं तस्या जायते श्रेयः पूजया नमनेन च ॥ २ ॥ त्वया कात्यायनी प्रोक्ता चामुण्डा च सुरेश्वरी ॥ श्रीमाता च समुत्पन्ना किमर्थं च सुरेश्वरी ॥
॥ ३ ॥ श्रीमाता च तथा तारा देवी शत्रुविनाशिनी ॥ केलीश्वरी न संप्रोक्ता तस्मात्तां वद सांप्रतम् ॥ ४ ॥ कौतुकं नः समुत्पन्नमत्रार्थे सूतनंदन
॥ ५ ॥ ॥ सूत उवाच ॥ ॥ आंद्यैका देवता लोके बहुरूपा व्यवस्थिता ॥ देवतानां हितार्थाय दैत्यपक्षक्षयाय च ॥ ६ ॥ यदायदात्र देवानां
व्यसनं जायते क्वचित् ॥ तदातदा परा शक्तिर्या सा व्याप्य व्यवस्थिता ॥ ७ ॥ सर्वमेतज्जगद्धात्री जन्म चक्रे धरातले ॥ महिषासुरनाशाय सा च
कात्यायनी भुवि ॥ ८ ॥ अवतीर्णा परा मूर्तिर्गतास्मिन्भुवनत्रये ॥ यदा शुंभनिशुंभौ च दानवौ बलदर्पितौ ॥ ९ ॥ अवतीर्णा तदा सैव चामुंडा
रूपमाश्रिता ॥ प्रोद्भूते कालयवने सर्वदेवभयावहे ॥ १० ॥ श्रीमाताह्रूपिणी देवी सैव जाता महीतले ॥ अंधासुरवधार्थाय शंभुनाऽऽक्रांतचेतसा ॥
सृष्टा केलीश्वरी देवी यया व्याप्तमिदं जगत् ॥ ११ ॥ ततस्तस्याः प्रभावेन हत्वा दैत्यानशेषतः ॥ अन्धको निहतः पश्चात्रैलोक्यव्यसनप्रदः ॥
॥ १२ ॥ ॥ ऋषय ऊचुः ॥ ॥ अन्धकः कस्य पुत्रोऽयं किंप्रभावः कथं हतः ॥ कस्माद्धतस्तु संग्रामे सर्वं विस्तरतो वद ॥
॥ १३ ॥ ॥ सूत उवाच ॥ ॥ दक्षस्य दुहिता नाम्ना दितिः सर्वगुणालया ॥ हिरण्यकशिपुर्नाम तस्याः पुत्रो बभूव ह ॥ १४ ॥
येन शक्रादयो देवा जिताः सर्वे रणाजिरे ॥ स्वर्गे राज्यं कृतं भूरि स्वयमेव महात्मना ॥ १५ ॥ यद्भयात्सकलैर्देवैर्नानाशस्त्राण्यनेक
शः ॥ निर्मितान्यतिमुख्यानि वर्मचर्मयुतानि च ॥ १६ ॥ स्वयं विदारितो यश्च विष्णुना प्रभविष्णुना ॥ करजैर्जानुनि पृष्ठे विनि
धाय प्रकोपतः ॥ १७ ॥ तस्य पुत्रद्वयं जज्ञे वीर्यौदार्यगुणान्वितम् ॥ ज्येष्ठः प्रह्लाद इत्युक्तो द्वितीयश्चांधकस्तथा ॥ १८ ॥ हिरण्यकशिपौ प्राप्ते
मृत्युलोकं सुहृद्गणैः ॥ अमात्यैश्च ततः प्रोक्तः प्रह्लादो विनयान्वितैः ॥ १९ ॥ पितृपैतामहं राज्यमेतदाचर सांप्रतम् ॥ धुरं वहस्व राज्योत्थां देवा
न्युद्धे निपातय ॥२०॥ ॥ प्रह्लाद उवाच ॥ ॥ नाहं राज्यं करिष्यामि कथंचिदपि भूतले ॥ यतस्ततो निबोधध्वं वचनं मम सांप्रतम् ॥२१॥
दैत्यराज्यं न वांछंति देवाः शक्रपुरोगमाः ॥ तेषां रक्षाकरो नित्यं विष्णुः स भगवान्स्वयम् ॥२२॥ अप्यहं सन्त्यजे प्राणान्सर्वस्वं वा न संशयः ॥
हरिणा सह संग्रामं नाहं कर्तुमहो क्षमः॥ २३ ॥ यो मयाऽभ्यर्चितो नित्यं प्रणतश्च सुरेश्वरः ॥ न तेन सहितो युद्धं करिष्यामि कथञ्चन ॥ २४ ॥
॥ ॥ सूत उवाच ॥ ॥ प्रह्लादेन च संत्यक्ते राज्ये पितृसमुद्भवे ॥ अन्धकः स्थापितस्तत्र संमंत्र्य सचिवैर्मिथः ॥ २५ ॥ हिरण्यकशिपोः पुत्रो

१ अथैका–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



देवदानवदर्पहा ॥ सोऽपि राज्यममात्येभ्यो निधाय तदनन्तरम् ॥ २६ ॥ तपश्चक्रे चिरं कालं ध्यायमानः पितामहम् ॥ त्यक्त्वा कामं तथा क्रोधं दंभं मत्सरमेव च ॥ २७ ॥ जितेंद्रियः सुशांतात्मा समः सर्वेषु जन्तुषु ॥ वृक्षमूलाश्रयः शांतः संतुष्टेनांतरात्मना ॥ २८ ॥ यावद्वर्षसहस्रांतं फलाहारो बभूव ह ॥ शीर्णपर्णाशनाहारो यावद्वर्षसहस्रकम् ॥ २९ ॥ ध्यायमानो दिवानक्तं देवंदेवं पितामहम् ॥ वायुभक्षस्ततो जज्ञे तावत्कालं द्विजोत्तमाः ॥ ३० ॥ ततो वर्षसहस्रांते चतुर्थे समुपस्थिते ॥ तमुवाच स्वयं ब्रह्मा स्वयमभ्येत्य हर्षितः ॥ ३१ ॥ ॥ ब्रह्मोवाच ॥ ॥ परितुष्टोऽस्मि ते वत्स वरं वरय सुव्रत ॥ तुष्टोऽहं ते प्रदास्यामि यद्यपि स्यात्सुदुर्लभम् ॥ ३२ ॥ ॥ अन्धक उवाच ॥ ॥ यदि यच्छसि मे ब्रह्मन्वरं मनसि वांछितम् ॥ जरामरणनाशाय दीयतां सुरसत्तम ॥ ३३ ॥ ॥ श्रीब्रह्मोवाच ॥ ॥ न कश्चिच्च जराहीनो विद्यतेऽत्र धरातले ॥ मरणेन विना नैव यस्य जन्म भवेत्क्षितौ ॥ ३४ ॥ तथापि तव दास्यामि बहुधर्मरतस्य च ॥ तस्मात्कुरु महाभाग राज्यं गत्वा निजं गृहम् ॥ ३५ ॥ भवेद्बहुफलं राज्यं श्मशानं भवनं यथा ॥ बहुकण्टकसंकीर्णं क्रूरकर्मभिरावृतम् ॥ ३६ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वा चतुर्वक्त्रस्ततश्चादर्शनं गतः ॥ कस्यचित्त्वथ कालस्य प्रेरितः कालधर्मणा ॥ प्रोवाच सचिवान्सोऽथ पितुर्वैरमनुस्मरन् ॥ ३७ ॥ ॥ अन्धक उवाच ॥ ॥ पितास्माकं हतो देवैः पितृव्यश्च महाबलः ॥ कपटेन न शौर्येण तस्मात्तान्सूदयाम्यहम् ॥ ३८ ॥ कोऽर्थः पुत्रेण जातेन यो न कृत्यैः सुशंसितैः ॥ प्राकट्यं याति सर्वत्र वंशस्याग्रे ध्वजो यथा ॥ ३९ ॥ ॥ मंत्रिण ऊचुः ॥ ॥ युक्तमेतन्महाभाग यत्त्वया व्याहृतं वचः ॥ वध्याः स्युर्विबुधाः सर्वे येऽस्माकं परिपंथिनः ॥ ॥४०॥ अस्माकं खल्विमे लोकाः के देवाः के द्विजातयः ॥ यज्ञभागान्हरिष्यामो हत्वा शक्रमुखान्सुरान् ॥४१॥ एवं ते समयं कृत्वा सैन्येन महतान्विताः ॥ प्रजग्मुस्त्वरितास्तत्र यत्र शक्रो व्यवस्थितः ॥४२॥ शक्रोऽपि दानवानीकं दृष्ट्वा तान्सहसागतान्॥आरुह्यैरावणं नागं युद्धार्थं निर्ययौ तदा ॥ ४३ ॥ सह देवगणैः सर्वैर्वसुरुद्रार्कपूर्वकैः ॥ एतस्मिन्नंतरे शक्रो वज्रं रौद्रतमं च यत् ॥ ४४ ॥ समुद्दिश्यांधकं तस्मै मुमोच परवीरहा ॥ स हतस्तेन वज्रेण विहस्य दनुजोत्तमः ॥ ४५ ॥ शक्रं प्रोवाच संहृष्टस्तारनादेन संयुगे ॥ दृष्टं बाहुबलं शक्र तवाद्य सुचिरान्मया ॥ ४६ ॥ अधुना पश्य चास्माकं त्वमेव बलसूदन ॥ ४७ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वाथ चाविध्य गदां गुर्वीं मुमोच ह ॥ शतघंटामहारावां निर्मितां विश्वकर्मणा ॥ ॥ ४८ ॥ सर्वायसमयीं गुर्वीं यमजिह्वामिवापराम् ॥ शतहस्तां प्रमाणेन प्राणिनां भयवर्द्धिनीम् ॥ ४९ ॥ तया विनिहतः शक्रो मूर्छाव्याकुलितेंद्रियः ॥ ध्वजयष्टिं समाश्रित्य निविष्टो गजमूर्द्धनि ॥ ५० ॥ अथ संमूर्छितं दृष्ट्वा शक्रं स्कन्दः प्रकोपितः ॥ मुमोचाथ निजां शक्तिममोघां वज्रसं



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निभाम् ॥ ५१ ॥ तामायांतीं समालोक्य दानवो निशितैः शरैः ॥ प्रतिलोमां ततश्चक्रे लीलयैव महाबलः ॥ ५२ ॥ ततः स्कन्दोऽपि संगृह्य चापं तं प्रति सायकान् ॥ मुमोचाशीविषाकाराञ्छँघ्वस्त्रं तस्य दर्शयन् ॥ ५३ ॥ एतस्मिन्नन्तरे देवाः सर्वे शस्त्रप्रवृष्टिभिः ॥ समंताच्छादयामासुर्दानवाना मनीकिनीम् ॥ ५४ ॥ ततस्तु दानवाः सर्वे देवतानामनीकिनीम् ॥ प्रहारैः पीडयामासुर्दुद्रुवुस्ते दिवौकसः ॥ ५५ ॥ ततो भग्नान्सुरान्दृष्ट्वा सगणो वृषवाहनः ॥ दर्शयामास चात्मानं देवानाश्वासयन्निव ॥ ५६ ॥ मा भैष्ट देवताः सर्वाः पश्यध्वं मद्विचेष्टितम् ॥ इत्युक्त्वा भगवाञ्छम्भुर्मंत्रैराथर्वणैस्तदा ॥ ५७ ॥ आह्वयामास विश्वेशीं परां शक्तिमनुत्तमाम् ॥ आहूता परमा शक्तिर्जगाम हरसंनिधिम् ॥ ५८ ॥ दृष्ट्वा तामग्रतः प्राप्तां सर्वैर्देवैः समन्वितः ॥ अस्तावीत्प्रणतो भूत्वा स्तोत्रेणानेन भक्तितः ॥ ५९ ॥ ॥ श्रीभगवानुवाच ॥ ॥ नमस्ते देवदेवेशि नमस्ते भक्तिवल्लभे[1] ॥ सर्वगे सर्वदे देवि नमस्ते विश्वधारिणि ॥ ६० ॥ नमस्ते शक्तिरूपेण सृष्टिप्रलयकारिणि ॥ नमस्ते प्रभया युक्ते विद्युज्ज्वलितकुण्डले ॥ ६१ ॥ त्वं स्वाहा त्वं स्वधा देवि त्वं सृष्टिस्त्वं शुचिर्धृतिः ॥ अरुंधती तथैंद्राणी त्वं लक्ष्मीस्त्वं च पार्वती ॥ ६२ ॥ यत्किंचित्स्त्रीस्वरूपं च समस्तं भुवनत्रये ॥ तत्सर्वं त्वत्स्वरूपं स्यादिति शास्त्रेषु निश्चयः ॥ ६३ ॥ ॥ श्रीदेव्युवाच ॥ ॥ किमर्थं च समाहूता त्वयाहं वृषवाहन ॥ मंत्रैराथर्वणे रौद्रैस्तत्सर्वं मे प्रकीर्तय ॥ ६४ ॥ येन ते कृत्स्नशः कृत्यं प्रकरोमि यथोदितम् ॥ ६५ ॥ ॥ श्रीभगवानुवाच ॥ ॥ एते शक्रादयो देवाः सर्वे स्वर्गाद्विवासिताः ॥ अंधकेन महाभागे दैत्यानामधिपेन च ॥ ६६ ॥ तस्मात्तस्य वधार्थाय गच्छमानस्य मे शृणु ॥ साहाय्यं कुरु मे चाशु सूदयामि रणाजिरे ॥ ॥ ६७ ॥ एते मातृगणाः सर्वे मया दत्तास्तवाधुना ॥ क्षुत्क्षामाः सूदयिष्यंति दानवान्ये पुरः स्थिताः ॥ ६८ ॥ यस्मात्केलीमयं रूपं विधाय त्वं सहस्रधा ॥ अनेकैर्विकृतै रूपैः समाहूताग्निमध्यतः ॥ ६९ ॥ तस्मात्केलीश्वरीनाम त्रैलोक्ये त्वं भविष्यसि ॥ अनेनैव तु रूपेण यस्त्वां भक्त्याऽर्चयिष्यति ॥ ७० ॥ अष्टम्यां च चतुर्दश्यां तस्याभीष्टं भविष्यति ॥ युद्धकालेऽथ संप्राप्ते स्तोत्रेणानेन ते स्तुतिम् ॥ ॥ ७१ ॥ यः करिष्यति भूपालो जयस्तस्य भविष्यति ॥ अपि स्वल्पस्वसैन्यस्य स्वल्पाश्वस्य च संगरे ॥ ७२ ॥ भविष्यति जयो नूनं त्वत्प्रसादादसंशयम् ॥ एवं सा देवदेवेन प्रोक्ता केलीश्वरी तदा ॥ ७३ ॥ प्रस्थिता पुरतस्तस्य भवसैन्यस्य हर्षिता ॥ सर्वैर्मातृगणैः सार्धं रौद्रारावैः सुभीषणैः ॥ ७४ ॥ युद्धोत्साहपरै रौद्रैर्नानाशस्त्रप्रहारिभिः ॥ अथ ते दानवा दृष्ट्वा स्त्रीसैन्यं तत्समागतम् ॥ ७५ ॥ विकृतं विकृताकारं विकृताकाररावणम् ॥

१ भक्तवत्सले—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

शस्त्रोद्यतकरं सर्वयुद्धवांछापरायणम् ॥ ७६ ॥ जहसुः सुस्वरं केचित्केचिन्निर्भर्त्सयंति च ॥ अन्ये स्त्रीति परिज्ञाय प्रहरंति न दानवाः ॥ ७७ ॥ वध्यमानापि[१] लज्जंतः पौरुषे स्वे व्यवस्थिताः ॥ एतस्मिन्नंतरे प्राप्तो नारदो मुनिसत्तमः ॥ ७८ ॥ अन्धकाय स वृत्तांतं कथयामास कृत्स्नशः ॥ नैताः स्त्रियो दनुश्रेष्ठ युद्धार्थं समुपस्थिताः ॥ ७९ ॥ एषा कृत्या वधार्थाय तव रुद्रेण निर्मिता ॥ यैषा सिंहसमारूढा चक्रांकितकरा स्थिता ॥ ८० ॥ एषा केलीश्वरीनाम वह्निकुण्डाद्विनिर्गता ॥ एताभिः सह रौद्राभिः स्त्रीभिर्मंत्रबलाश्रयात् ॥ ८१ ॥ स्वरक्तेन कृते होमे देवदेवेन शम्भुना ॥ स एष भगवान्क्रुद्धः स्वयमभ्येति तेंऽतिकम् ॥ ८२ ॥ युद्धाय निजहर्म्ये तान्स्थापयित्वा सुरोत्तमान् ॥ प्रतिज्ञाय वधं तुभ्यं पुरतः परमेष्ठिनः ॥ ८३ ॥ एतज्ज्ञात्वा महाभाग यद्युक्तं तत्समाचर ॥ ८४ ॥ ॥ अन्धक उवाच ॥ ॥ नाहं बिभेमि रुद्रस्य तथान्यस्यापि कस्यचित् ॥ न स्त्रीणां प्रहरिष्यामि पालयन्पुरुषव्रतम् ॥ ८५ ॥ ॥ सूत उवाच ॥ ॥ एवं प्रवदतस्तस्य दानवस्य महात्मनः ॥ आक्रंदः सुमहाञ्जज्ञे तस्मिन्देशे समंततः ॥ ८६ ॥ भक्ष्यन्ते दानवाः केचिद्बध्यन्ते त्वथ चापरे ॥ अर्धभक्षितगात्राश्च प्रणश्यंति तथा परे ॥ ८७ ॥ युध्यमानास्तथैवान्ये शक्तिमंतोऽपि दानवाः ॥ भक्ष्यंते मातृभिस्तत्र सायुधाश्च सवाहनाः ॥ ८८ ॥ तच्छ्रुत्वा स महाक्रंदमंधकः क्रोधमूर्छितः॥ आदाय खड्गमुत्तस्थौ किमिदं किमिदं ब्रुवन् ॥ ८९ ॥ अथ पश्यति विध्वस्तान्दानवान्बलदर्पितान् ॥ भक्ष्यमाणांस्तथैवान्यान्पलायनपरायणान् ॥ ९० ॥ अन्येषां निहतानां च रुदंत्यो निकटस्थिताः ॥ स पश्यति प्रिया भार्याः प्रलपंत्योऽतिदुःखिताः ॥९१॥ अथ तत्कदनं दृष्ट्वा अंधकः क्रोधमूर्छितः ॥ भर्त्सयामास ताः सर्वा योगिनीः समरोद्यताः ॥ ९२ ॥ न च तास्तस्य दैत्यस्य भयं चक्रुः कथंचन ॥ केवलं सूदयंति स्म भक्षयंति च दानवान् ॥९३॥ ततः स दानवस्तासां दृष्ट्वा तच्चेष्टितं रुषा ॥ स्वस्य गात्रस्य रक्षां स चकार भयसंकुलः ॥ ९४ ॥ तमोऽस्त्रं मुमुचे रौद्रं कृत्वा रावं स तत्क्षणात् ॥ एतस्मिन्नंतरे कृत्स्नं त्रैलोक्यं तमसा वृतम् ॥ ९५ ॥ न किंचिज्ज्ञायते तत्र समं विषममेव च ॥ केवलं दानवेन्द्रश्च सर्वं पश्यति नेतरः ॥ ९६ ॥ ततः स सूदयामास योगिनीस्ताः शितैः शरैः ॥ यथायथा परा नार्यस्तादृग्रूपा भवन्ति च ॥९७॥ अथ दृष्ट्वा परां वृद्धिं योगिनीनां स दानवः ॥ संहारं तस्य चास्त्रस्य चकार भयसंकुलः ॥ ९८ ॥ ततः शुक्रं समासाद्य दीनः प्राह कृतांजलिः ॥ पश्य मे भार्गवश्रेष्ठ स्त्रीभिर्यत्कदनं कृतम् ॥९९॥ अवध्याभिर्ममास्त्राणां मंत्रशक्त्या सुरद्विषः ॥ उत्पन्नाभिः प्रभूताभिर्हतं मे सर्वतो बलम् ॥१००॥

१ वध्यमानाः—अपि—इति पदच्छेदः । संधिरार्षः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मात्त्वमपि तां विद्यां प्रसाधय महामते ॥ यदि मे वांछसि श्रेयो नान्यथास्ति जयो रणे ॥ १०१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्येऽन्धकासुरवधवृत्तान्ते शंकरकृतकेलीश्वरीप्रादुर्भाववर्णनंनामैकोनपंचाशदुत्तरशततमोऽध्यायः ॥ १४९ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ शुक्रस्तस्य वचः श्रुत्वा चित्ते कृत्वा दयां ततः ॥ हाटकेश्वरजं क्षेत्रं गत्वा सिद्धिप्रदायकम् ॥ ॥ १ ॥ चकार विधिवद्धोमं स्वमांसेन हुताशने ॥ मंत्रैराथर्वणे रौद्रैः कुण्डं कृत्वा त्रिकोणकम् ॥ २ ॥ एवं संजुह्वतस्तस्य तेन वै विधिना तदा ॥ यथा रुद्रेण संतुष्टा देवी केलीश्वरी तदा ॥ ३ ॥ तं प्रोवाच समेत्याशु शुक्रं दैत्यपुरोहितम् ॥ मा त्वं भार्गवशार्दूल कुरु मांसपरिक्षयम् ॥ ४ ॥ भाविताऽहं त्रिनेत्रेण तत्किं ब्रूहि करोमि ते ॥ ५ ॥ ॥ शुक्र उवाच ॥ ॥ यथा रुद्रस्य साहाय्यं त्वयात्र विहितं शुभे ॥ अंधकस्याऽपि कर्तव्यं तथैवैष वरो मम ॥ ६ ॥ ये केचिद्दानवा युद्धे भक्षिताश्च विनाशिताः ॥ अस्य सैन्यस्य ते सर्वे पुनर्जीवंतु सत्वरम् ॥ ७ ॥ ॥ देव्युवाच ॥ ॥ जीवयिष्यामि तान्सर्वान्दानवान्निहतान्रणे ॥ नवसंभक्षितान्विप्र प्रविष्टान्योगिनीमुखे ॥ ८ ॥ एवमुक्त्वा ददौ तस्मै सा देवी हर्षितानना ॥ नाम्नाऽमृतवतीं विद्यां यया जीवंति ते मृताः ॥ ९ ॥ ततः शुक्रः प्रहृष्टात्मा गत्वांधकमुवाच ह ॥ सिद्धा केलीश्वरी[1] देवी यथा शम्भोस्तथा मम ॥ १० ॥ तया दत्ता शुभा विद्या मम दैत्या मृताश्च ये ॥ तान्सर्वांस्तत्प्रभावेन योजयिष्यामि जीविते ॥ ११ ॥ त्वयाऽस्याः सततं भक्तिः कार्या दानवसत्तम ॥ अष्टम्यां च विशेषेण चतुर्दश्यां च सर्वदा ॥ १२ ॥ एषा सा परमा शक्तिर्यया व्याप्तमिदं जगत् ॥ केवलं भक्तिसाध्या सा न दण्डेन कथंचन ॥ १३ ॥ एवमुक्तस्तु शुक्रेण स तदा दानवाधिपः ॥ तां देवीं पूजयामास भावभक्तिसमन्वितः ॥ १४ ॥ स्तुत्वा च विविधैः स्तोत्रैस्ततः प्रोवाच सादरम् ॥ तथान्या मातरः सर्वा यथाज्येष्ठं यथाक्रमम् ॥ १५ ॥ अज्ञानाद्यन्मया देवि कृतः कोपस्तवोपरि ॥ मर्षणीयस्तथा सोऽद्य दीनस्य प्रणतस्य च ॥ १६ ॥ ॥ श्रीदेव्युवाच ॥ ॥ परितुष्टाऽस्मि ते वत्स प्रभावाद्भार्गवस्य च ॥ वरं वरय तस्मात्त्वं न वृथा दर्शनं मम ॥ १७ ॥ ॥ अन्धक उवाच ॥ ॥ अनेनैव तु रूपेण[2] ये त्वां ध्यायंति देहिनः ॥ पूजयंति च सद्भक्त्या संस्थाप्य प्रतिमां तव ॥ तेषां सिद्धिः प्रदातव्या त्वया हृदयवांछिता ॥ १८ ॥ ॥ देव्युवाच ॥ ॥ यो मामनेन रूपेण स्थापयिष्यति मानवः ॥ तस्य मोक्षं प्रदास्यामि पापस्यापि न संशयः ॥ १९ ॥ योऽष्टम्यां च चतुर्दश्यां मम पूजां करिष्यति ॥ तस्मै स्वर्गं प्रदास्यामि पापस्यापि दनू

१ केलेश्वरी—इत्यप्यस्या देव्या नाम दृश्यते । २ सुरूपेण—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

त्तम ॥ २० ॥ केवलं दर्शनं यश्च ध्यानं वा मे करिष्यति ॥ तस्य राज्यं प्रदास्यामि भोगान्मानुषसंभवान् ॥ २१ ॥ एवमुक्त्वाऽथ सा देवी ततश्चा
दर्शनं गता ॥ तैश्च मातृगणैः सार्धं पश्यतस्तस्य तत्क्षणात् ॥ २२ ॥ शुक्रोऽपि दानवान्सर्वांस्तया संसिद्धया ततः ॥ मृतान्संजीवयामास दैते
यान्नवभक्षितान् ॥ २३ ॥ तैः समेत्य स दैत्येन्द्रः प्रहृष्टेनांतरात्मना ॥ तां पुरीं प्राप्य शक्रस्य राज्यं चक्रे दिवानिशम् ॥ २४ ॥ तां देवीं ध्यायमा
नस्तु पूजयानो दिवानिशम् ॥ अष्टम्यां च चतुर्दश्यां विशेषेण महाबलः ॥ २५ ॥ अथ तस्याः प्रभावं तं ज्ञात्वा व्याससमुद्भवः ॥ स्थानेऽत्र स्थाप
यामास संसिद्धिं च परां गतः ॥ २६ ॥ ॥ सूत उवाच ॥ ॥ एवं केलीश्वरी देवी संजाता परमेश्वरी ॥ तस्मात्स्थाप्या च पूज्या च ध्येया चैव
विशेषतः ॥ २७ ॥ एवं देव्या नरो यश्च पठते वा शृणोति वा ॥ वाच्यमानं स मुच्येत व्यसनेन गरीयसा ॥ २८ ॥ भ्रष्टराज्योऽथवा राजा यः शृणो
त्यष्टमीदिने ॥ स राज्यं लभते भूयो निखिलं हतकंटकम् ॥ २९ ॥ युद्धकाले च संप्राप्ते यश्चैतच्छृणुयान्नरः ॥ स हत्वा शत्रुसंघातं विजयं च समा
प्नुयात् ॥ ३० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये केलीश्वरीमाहात्म्यवर्णनंनाम
पञ्चाशदुत्तरशततमोऽध्यायः ॥ १५० ॥ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ अन्धकोऽपि परां विद्यां ज्ञात्वा शुक्रार्जितां तदा ॥ केलीश्वर्याः
प्रसादं च भक्तिजं बलवृद्धिदम् ॥ १ ॥ अवध्यतामात्मनश्च पितामहवरोद्भवम् ॥ महेश्वरं समुद्दिश्य कोपं चक्रे ततः परम् ॥ २ ॥ दूतं च प्रेषया
मास कैलासं पर्वतं प्रति ॥ गच्छ दूत हरं ब्रूहि मम वाक्येन सांप्रतम् ॥ ३ ॥ शक्रमेनं परित्यज्य सुखं तिष्ठात्र पर्वते ॥ नो चेद्द्रुतं समागत्य सकैलासं
सभार्यकम् ॥ ४ ॥ सगणं च रणे हत्वा सुखी स्थास्यामि नंदने ॥ त्वामहं नाशयिष्यामि सत्येनात्मानमालभे ॥ ५ ॥ एवमुक्तः स दैत्येन दूतो
गत्वा द्रुतं ततः ॥ प्रोवाच शंकरं वाक्यैः परुषैः स विशेषतः ॥ ६ ॥ ततः कोपपरीतात्मा भगवान्वृषभध्वजः ॥ गणान्संप्रेषयामास वधार्थं तस्य
दुर्मतेः ॥ ७ ॥ वीरभद्रं महाकालं नंदिं हस्तिमुखं तथा ॥ अघोरं घोरनादं च घोरघंटं महाबलम् ॥ ८ ॥ एतेषामनुगाश्चान्ये कोटिरेका पृथक्पृथक्॥
सर्वान्संप्रेषयामास वधार्थं तस्य दुर्मतेः ॥ ९ ॥ अथ संप्रेषितास्तेन गणास्ते विकृताननाः ॥ हर्षेण महताविष्टा गर्जमाना यथा घनाः ॥ १० ॥
धृतायुधा गताः सर्वे युद्धार्थं यत्र सा पुरी ॥ शक्रस्यासादिता तेन दानवेन बलीयसा ॥ ११ ॥ अथ प्राप्तान्गणान्दृष्ट्वा दानवास्ते धृतायुधाः ॥ ॥१६९॥
निश्चक्रमुर्वै सहसा युद्धार्थमतिगर्विताः ॥ १२ ॥ ततः समभवद्युद्धं गणानां दानवैः सह ॥ परस्परं महारौद्रं मृत्युं कृत्वा निवर्तनम् ॥ १३ ॥ ततो

१ स्वर्गम् –इ०पा० । २ व्याससमुद्भवः–कपिंजलः । ३ चरित्रम्–इति शेषः । ४ नष्टराज्यः–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हरगणाः सर्वे दानवैस्तै रणाजिरे ॥ जिता जग्मुर्दिशो भीता हरवीक्षणतत्पराः ॥ १४ ॥ हरोऽपि तान्गणान्भग्नान्दृष्ट्वा कोपाद्विनिर्ययौ ॥ हरं दृष्ट्वा ततो दैत्या दुद्रुवुस्ते दिशो दश ॥ १५ ॥ अन्धकोऽपि हरं दृष्ट्वा युद्धार्थं संमुखो ययौ ॥ ततो युद्धं समभवदंधकस्य [१]हरेण तु ॥ वृत्रवासवयोः पूर्वं यथा युद्धमभून्महत् ॥ १६ ॥ चक्रनालीकनाराचैस्तोमरैः खड्गमुद्गरैः॥ एवं न शक्यते हंतुं दानवो विविधायुधैः ॥ १७ ॥ अस्त्रयुद्धं परित्यज्य बाहुयुद्धमुपागतौ ॥ करं करेण संगृह्य मुष्टिप्रहरणौ तदा॥१८॥दानवेनाथ देवेशो बंधेनाक्रम्य पीडितः ॥ निष्पंदभावमापन्नस्ततो मूर्च्छामुपागतः ॥१९॥ मूर्छागतं तु तज्ज्ञात्वा ह्यन्धको निर्ययौ गृहात् ॥ तावत्स्थाणुः क्षणाल्लब्ध्वा चेतनामात्तकार्मुकः ॥ २० ॥ आयसीं लकुटीं गृह्य प्रभुर्भारसहस्रिकाम् ॥ दानवेन्द्रं ततः प्राप्य ताडयामास मूर्धनि ॥ २१ ॥ सोऽपि खड्गेन देवेशं ताडयामास वेगतः ॥ अथ देवोऽपि सस्मार कौबेरास्त्रं महाहवे ॥ ॥ २२॥ अस्त्रेण तेन हृदये ताडयामास दानवम् ॥ ततः स ताडितस्तेन रुधिरोद्गारमुद्वमन् ॥ २३ ॥ पतितोऽधोमुखो भूत्वा ततः शूलेन भेदितः॥ शूलाग्रसंस्थितः पापश्चक्रवद्भ्रमते ततः ॥ २४ ॥ अन्धकोऽपि तदात्मानं तथावस्थमवेक्ष्य च ॥ ततो वाग्भिः सुपुष्टाभिरस्तौद्देवं महेश्वरम् ॥ २५ ॥ ॥ ॥ अन्धक उवाच ॥ ॥ नमस्ते जगतां धात्रे शर्वाय त्रिगुणात्मने ॥ वृषभासनसंस्थाय शशांककृतभूषण ॥ २६ ॥ नमः खट्वांगहस्ताय नमः शूलधराय च ॥ नमो डमरुकोदण्डकपालानलधारिणे ॥ २७ ॥ स्मरदेहविनाशाय मूर्त्यष्टकमयात्मने ॥ नमः स्वरूपदेहाय ह्यरूपबहुरूपिणे ॥ २८ ॥ उत्तमांगविनाशाय विरिंचेः सृष्टिकारिणे ॥ स्मशानवासिने नित्यं नमो भैरवरूपिणे ॥ २९ ॥ सर्वगः सर्वकर्ता च त्वं हर्ता नान्य एव हि ॥ त्वं भूमिस्त्वं रजश्चैव त्वं ज्योतिस्त्वं तमस्तथा ॥ ३० ॥ त्वं वपुः सर्वभूतानां जीवभूतो महेश्वर ॥ अस्तौद्देवं दानवेन्द्रो देवशूलाग्रसंस्थितः ॥ ३१ ॥ ॥ सूत उवाच ॥ ॥ एवं तस्य स्तुतिं श्रुत्वा परितुष्टो महेश्वरः ॥ ततः प्रोवाच तं हर्षाच्छूलाग्रस्थं दनूत्तमम् ॥ ३२ ॥ ॥ ॥ श्रीभगवानुवाच ॥ ॥ नेदं वीरव्रतं दैत्य यच्छत्रुकरपीडनात् ॥ प्रोच्यन्ते सामवाक्यानि विशेषाद्दैत्यजन्मना ॥ ३३ ॥ ॥ अन्धक उवाच ॥ ॥ निर्विण्णोऽस्मि सुरश्रेष्ठ त्रिशूलाऽग्रं समाश्रितः ॥ तस्मात्सूदय मां येन द्रुतं स्यान्मे व्यथाक्षयः ॥ ३४ ॥ ॥ श्रीभगवानुवाच ॥ ॥ न तेऽस्ति मरणं दैत्य कथंचिच्चिंतितं मया ॥ तेनेत्थं विधृतं व्योम्नि भित्त्वा शूलेन वक्षसि ॥ ३५ ॥ तस्मात्त्वं गणतां गच्छ सांप्रतं पापवर्जितः ॥ ॥ त्यक्ता दानवजं भावं श्रद्धया परया युतः ॥ ३६ ॥ ॥ अन्धक उवाच ॥ ॥ गतो मे दानवो भावः सांप्रतं तव किंकरः ॥ भविष्यामि न

१ नित्यम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सन्देहः सत्येनात्मानमालभे ॥ ३७ ॥ ॥ शंकर उवाच ॥ ॥ परितुष्टोऽस्मि ते वत्स ब्रूहि यत्तेऽभिवांछितम् ॥ प्रार्थयस्व प्रयच्छामि यद्यपि स्यात्सुदुर्लभम् ॥ ३८ ॥ ॥ अन्धक उवाच ॥ ॥ अनेनैव तु रूपेण शूलाग्रस्थितमत्तनुम् ॥ यो मर्त्योऽर्चां प्रकृत्वा ते स्थापयिष्यति भूतले ॥ ॥ ३९ ॥ तस्य मोक्षस्त्वया देयो मद्वाक्यात्सुरसत्तम ॥ तथेत्युक्त्वा महेशस्तं शूलाग्रात्प्रमुमोच ह ॥ अस्थिशेषं कृशांगं च चामुण्डासदृशं द्विजाः ॥ ४० ॥ ततः स गणतां प्राप्तो गीतं चक्रे मनोहरम् ॥ पुरतो देवदेवस्य पार्वत्याश्च विशेषतः ॥ ४१ ॥ भृंगवद्रटनं यस्मात्तस्य श्रोत्रसुखावहम् ॥ भृंगीरीटइति प्रोक्तस्ततः स त्रिपुरारिणा ॥ ४२ ॥ एवं स गणतां प्राप्तो देवदेवस्य शूलिनः ॥ विश्वास्यः सर्वकृत्येषु तत्परं समपद्यत ॥ ॥ ४३ ॥ ततःप्रभृति लोकेऽत्र देवदेवो महेश्वरः ॥ तादृशेनैव रूपेण स्थाप्यते भूतले जनैः ॥ ४४ ॥ प्राप्यतेऽत्र परा सिद्धिस्तत्प्रसादादलौकिकी ॥ कस्य चित्त्वथ कालस्य राज्याद्भ्रष्टो महीपतिः ॥ ४५ ॥ सुरथाख्यः प्रसिद्धोऽत्र सूर्यवंशसमुद्भवः ॥ ततो वसिष्ठमासाद्य स चात्मीयं पुरोहितम् ॥ प्रोवाच प्रणतो भूत्वा बाष्पव्याकुललोचनः ॥ ४६ ॥ त्वया नाथेन मे ब्रह्मन्संस्थितेनाऽपि शत्रुभिः ॥ बलाच्च यद्धृतं राज्यं मन्दभाग्यस्य सांप्रतम् ॥ ४७ ॥ तस्मात्कुरु प्रसादं मे येन मे राज्यसंस्थितिः ॥ भूयोऽपि त्वत्प्रसादेन नान्या मे विद्यते गतिः ॥ ४८ ॥ ॥ वसिष्ठ उवाच ॥ ॥ यद्येवं ते महाराज मद्वाक्यात्सत्वरं व्रज ॥ हाटकेश्वरजं क्षेत्रं सर्वसिद्धिप्रदायकम् ॥ ४९ ॥ तत्र भैरवरूपेण स्थापयित्वा महेश्वरम् ॥ भुजोद्यतोग्रशूलाग्रविद्धान्धककलेवरम् ॥ ५० ॥ नारसिंहेन मंत्रेण ततः पूजय तं नृप ॥ रक्तपुष्पैस्तथा धूपै रक्तैश्चैवानुलेपनैः ॥ ५१ ॥ ततः सद्वीर्यमासाद्य तेजोवीर्यसमन्वितः ॥ हनिष्यस्यखिलाञ्छत्रूंस्तत्प्रसादादसंशयम् ॥ ५२ ॥ परं शौचसमेतेन संपूज्यो भगवांस्त्वया ॥ अन्यथा प्राप्स्यसे विघ्नान्सत्यमेतन्मयोदितम् ॥ ५३ ॥ अथ तस्य वचः श्रुत्वा स राजा सत्वरं ययौ ॥ तत्र क्षेत्रे ततो देवं स्थापयामास भैरवम् ॥ ५४ ॥ ततः संपूजयामास नारसिंहेन भक्तितः ॥ मन्त्रेण प्रयतो भूत्वा ब्रह्मचर्यपरायणः ॥५५॥ ततो दशसहस्रांते तस्य मंत्रस्य संख्यया ॥ भैरवस्तुष्टिमापन्नः प्रोवाच तदनन्तरम् ॥ ५६ ॥ ॥ श्रीभैरव उवाच ॥ ॥ परितुष्टोऽस्मि ते राजन्मंत्रेणानेन पूजितः ॥ तस्मात्प्रार्थय यच्चेष्टं येन सर्वं ददाम्यहम् ॥ ५७ ॥ ॥ ॥ सुरथ उवाच ॥ ॥ शत्रुभिर्मे हृतं राज्यं त्वत्प्रसादात्सुरेश्वर ॥ तन्मे भवतु भूयोऽपि शत्रुभिः परिवर्जितम् ॥ ५८ ॥ अन्योऽपि यः पुमानित्थं त्वामिहागत्य पूजयेत् ॥ अनेनैव तु मंत्रेण तस्य सिद्धिस्त्वया विभो ॥५९॥ देया देव सहस्रांते यथा मम सुरेश्वर ॥ तथेति तं प्रतिज्ञाय गतश्चादर्शनं



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हरः ॥ ६० ॥ सुरथोऽपि निजं राज्यं प्राप हत्वा रणे रिपून् ॥६१॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटके
श्वरक्षेत्रमाहात्म्ये भैरवक्षेत्रमाहात्म्यवर्णनंनामैकपञ्चाशदुत्तरशततमोऽध्यायः ॥ १५१ ॥छ॥ ॥ ऋषय ऊचुः ॥ ॥ असंख्यातानि तीर्थानि त्वयोक्ता
न्यत्र सूतज ॥ देवमानुषजातानि देवतायतनानि च ॥ तथा वानरजातानि राक्षसस्थापितानि च ॥१॥ सूतपुत्र वदास्माकं यैर्दृष्टैः स्पर्शितैरपि ॥
सर्वेषां लभ्यते पूर्णं फलं चेप्सितमत्र च ॥ २ ॥ ॥ सूत उवाच ॥ ॥ सत्यमेतन्महाभागास्तत्र संख्या न विद्यते ॥ तीर्थानां चैव लिंगानामाश्र
माणां तथैव च ॥ ३ ॥ तत्र यः कुरुते स्नानं शंखतीर्थे समाहितः ॥ एकादश्यां विशेषेण सर्वेषां लभते फलम् ॥ ४ ॥ यः पश्यति नरो भक्त्या
तत्रैकादशरुद्रकम् ॥ सिद्धेश्वरसमं तेन दृष्टाः सर्वे महेश्वराः ॥ ५ ॥ यः पश्यति वटादित्यं षष्ठ्यां चैत्रे विशेषतः ॥ भास्कराः कृत्स्नशो दृष्टास्तेन
तत्र हि संस्थिताः ॥ ६ ॥ माहित्थां पश्यति तथा ये देवीं श्रद्धयान्विताः ॥ तेन दुर्गाः समस्तास्ता वीक्षिता नात्र संशयः ॥ ७ ॥ यः पश्यति
गणेशं च स्वर्गद्वारप्रदं नृणाम् ॥ सर्वे विनायकास्तेन दृष्टाः स्युर्नात्र संशयः ॥ ८ ॥ शर्मिष्ठास्थापितां गौरीं यो ज्येष्ठां तत्र पश्यति ॥ तेन गौर्यः
समस्तास्ता वीक्षिता द्विजसत्तमाः ॥ ९ ॥ चक्रपाणिं च यः पश्येत्प्रातरुत्थाय मानवः ॥ वासुदेवाः समस्ताश्च तेन तत्र निरीक्षिताः ॥ १० ॥
॥ ॥ ऋषय ऊचुः ॥ ॥ त्वया सूत तथाऽस्माकं चक्रपाणिश्च यः स्थितः ॥ नाख्यातः स कथं तत्र विस्मृतः किं वदस्व नः ॥ कस्मिन्काले
विशेषेण स द्रष्टव्यो मनीषिभिः ॥ ११ ॥ ॥ सूत उवाच ॥ ॥ अर्जुनेनैष विप्रेन्द्राः क्षेत्रेऽत्रैव प्रतिष्ठितः ॥ शयने बोधने चैव प्रातरुत्थाय
मानवः ॥ १२ ॥ स्नानं कृत्वा सुभक्त्या च यः पश्येच्चक्रपाणिनम् ॥ ब्रह्महत्यादिपापानि तस्य नश्यंति तत्क्षणात् ॥ १३ ॥ भूभारोत्तारणार्थाय
धर्मसंस्थापनाय च ॥ ब्रह्मणावतारितौ विप्रा नरनारायणावुभौ ॥ १४ ॥ कृष्णार्जुनौ तदा मर्त्ये द्वापरांते द्विजोत्तमाः ॥ अवतीर्णौ धरापृष्ठे मिथः
स्नेहानुगौ तदा ॥ नरनारायणावेतौ स्वयमेव व्यवस्थितौ ॥ १५ ॥ यथा रक्षोविनाशाय रामो दशरथात्मजः ॥ अवतीर्णो धरापृष्ठे तद्वत्कृष्णोऽपि
चापरः ॥ १६ ॥ यदा पार्थः समायातस्तीर्थयात्रां प्रति द्विजाः ॥ युधिष्ठिरसमादेशाच्छक्रप्रस्थात्पुरोत्तमात् ॥ १७ ॥ द्रौपद्या सहितं दृष्ट्वा रहसि
भ्रातरं द्विजम् ॥ प्रोवाच प्रणतो भूत्वा विनयावनतोऽर्जुनः ॥ १८ ॥ ॥ अर्जुन उवाच ॥ ॥ आयुधार्थमहं प्राप्तः सांप्रतं पार्थिवोत्तम ॥ द्विज
धेनुविमोक्षाय ममाज्ञां देहि पार्थिव ॥ १९ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ गच्छार्जुन द्रुतं तत्र नीयन्ते यत्र तस्करैः ॥ धेनवो द्विजवर्यस्य ता
मोक्षय धनंजय ॥ २० ॥ तीर्थयात्रां ततो गच्छ यावद्वादशवत्सरान् ॥ ततः पापविनिर्मुक्तः समेष्यसि ममांतिकम् ॥ २१ ॥ यः सदारं नरं पश्येदे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

कांतस्थं तु बुद्धिमान् ॥ अपि चात्यंतपापः स्यात्किं पुनर्निजबांधवम् ॥ २२ ॥ तस्मान्न वीक्षयेत्कश्चिदेकांतस्थं सभार्यकम् ॥ बांधवं च विशेषेण य इच्छेच्छुभमात्मनः ॥ २३ ॥ स तथेति प्रतिज्ञाय रथमारुह्य सत्वरम् ॥ धनुरादाय बाणांश्च जगाम तदनन्तरम् ॥ २४ ॥ येन मार्गेण ता गावो नीयन्ते तस्करैर्बलात् ॥ तिरस्कृत्य द्विजान्सर्वांञ्छितशस्त्रधरैर्द्विजाः ॥ २५ ॥ अथ हत्वा क्षणाच्चौरान्गाः सर्वाः स्वयमाहृताः ॥ स्वाः स्वा निवेदयामास ब्राह्मणानां महात्मनाम् ॥ २६ ॥ ततस्तीर्थान्यनेकानि स दृष्ट्वायतनानि च ॥ क्षेत्रेऽत्रैव समायातः स्नानार्थं पांडुनन्दनः ॥ २७ ॥ तेन पूर्वमपि प्रायस्तत्क्षेत्रमवलोकितम् ॥ दुर्योधनसमायुक्तो यदा तत्र समागतः ॥ २८ ॥ अथ संपूजयामास यल्लिंगं स्थापितं पुरा ॥ अर्जुनेश्वरसंज्ञं तु पुष्पधूपानुलेपनैः ॥ २९ ॥ अन्येषां कौरवेन्द्राणां पांडवानां विशेषतः ॥ ३० ॥ अथ संचिंतयामास मनसा पांडुनंदनः ॥ अहं नरः स्वयं साक्षात्कृष्णो नारायणः स्वयम् ॥ ३१ ॥ तस्मादत्र करिष्यामि चक्रपाणिं सुरेश्वरम् ॥ प्रासादो मानवश्चैव यादृङ्नास्ति धरातले ॥ ३२ ॥ कल्पांतेऽपि न नाशः स्यादस्य क्षेत्रस्य कर्हिचित् ॥ प्रासादोऽपि तथाप्येवमत्र क्षेत्रे भविष्यति ॥ ३३ ॥ एवं स निश्चयं कृत्वा स्वचित्ते पांडवानुजः ॥ प्रासादं निर्ममे पश्चाद्वैष्णवं द्विजसत्तमाः ॥ ३४ ॥ ततो विप्रान्समाहूय चमत्कारपुरोद्भवान् ॥ प्रतिष्ठां कारयामास मतं तेषां समाश्रितः ॥ ३५ ॥ दत्त्वा दानान्यनेकानि शासनानि बहूनि च ॥ अन्यच्च प्रददौ पश्चात्स तेषां तुष्टिदायकम्[1] ॥ ३६ ॥ ततः प्रोवाच तान्सर्वान्कृतांजलिपुटः स्थितः ॥ नरोऽहं ब्राह्मणाज्जातः[2] पाण्डोर्भूमिं[3][4] प्रपेदिवान् ॥ ३७ ॥ मानुषेणैव रूपेण त्यक्त्वा तां बदरीं शुभाम् ॥ प्रसिद्ध्यर्थं मया चात्र प्रासादोऽयं विनिर्मितः ॥ मन्नाम्ना नरसंज्ञश्च श्रद्धापूतेन चेतसा ॥ ३८ ॥ तस्मादेष भवद्भिश्च चक्रपाणिरिति द्विजाः ॥ कीर्तनीयः सदा येन मम नाम प्रकाश्यताम् ॥ ३९ ॥ विष्णुलोके ध्वनिर्याति यावच्चंद्रदिवाकरौ ॥ ४० ॥ तथा महोत्सवः कार्यः शयने बोधने हरेः ॥ चैत्रमासे विशेषेण संप्राप्ते विष्णुवासरे ॥ ४१ ॥ एतेषु त्रिषु लोकेषु त्यक्त्वेमां बदरीमहम् ॥ पूजामस्य करिष्यामि स्वयं विष्णोर्द्विजोत्तमाः ॥४२॥ यस्तत्र दिवसे मर्त्यः पूजामस्य विधास्यति ॥ सर्वपापविनिर्मुक्तो विष्णुलोकं स यास्यति ॥४३॥ तथा ये वासुदेवस्य क्षेत्रे केचिद्व्यवस्थिताः ॥ तेषां प्रदर्शनं श्रेयो नित्यं दृष्ट्वा च लप्स्यते ॥४४॥ ॥ सूत उवाच ॥ ॥ बाढमित्येव तैरुक्तो दाशार्हः पांडुनंदनः ॥ तेषां तद्वारमावेश्य प्रशांतेनांतरात्मना ॥ ययौ तीर्थानि चान्यानि कृतकृत्यस्ततः परम् ॥ ४५ ॥ एवं तत्र स्थितो देवश्चक्रपाणिवपुर्द्धरः ॥ स्वयमेव हृषीकेशो जंतूनां पापनाशनः ॥ ४६ ॥ अद्याऽपि च कला विष्णोः प्राप्ते



१ पुष्टिदायकम्—इ० पा० । २ पूर्वम्—इति शेषः । ३ पश्चादवतारांतरे—इति शेषः । ४ भूमिम्—क्षेत्रम्—कुन्तीम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चैकादशीत्रये ॥ पूर्वोक्तेन विधानेन तस्माच्छ्रद्धासमन्वितैः ॥ सदैव पूजनीयश्च वन्दनीयो विशेषतः ॥ ४७ ॥ इति श्रीस्कांदे महापुराण एकाशीति साहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये चक्रपाणिमाहात्म्यवर्णनंनाम द्विपञ्चाशदुत्तरशततमोऽध्यायः ॥ १५२ ॥ ॥ छ ॥ ॥ ॥ सूत उवाच ॥ ॥ तथान्यदपि तत्रास्ति रूपतीर्थमनुत्तमम् ॥ यत्र स्नातो नरः सम्यग्विरूपो रूपवान्भवेत् ॥ १ ॥ पूर्वं भगवता तेन ब्रह्मणा लोककर्तृणा ॥ सृष्टिं कृत्वा च विस्तीर्णां यथोक्तं च चतुर्विधाम् ॥२॥ ततः स चिन्तयामास रूपसंचयसंयुताम् ॥ एकामप्सरसं दिव्यां देवमायां सृजाम्यहम् ॥ ॥३॥ ततश्च सर्वदेवानां समादाय तिलं तिलम् ॥ रूपं च निर्ममे पश्चादत्याश्चर्यमयीं च ताम् ॥४॥ यां दृष्ट्वा क्षोभमापन्नः स्वयमेव पितामहः ॥५॥ ततस्तां प्रेषयामास कैलासं प्रति पद्मजः ॥ गच्छ देवि महादेवं प्रणमस्व शुचिस्मिते ॥ ६ ॥ ततः सा सत्वरं गत्वा कैलासं पर्वतोत्तमम् ॥ अपश्यच्छंकरं तत्र निविष्टं पार्वतीसमम् ॥ ७ ॥ शंकरोऽपि च तां दृष्ट्वा विस्मयं परमं गतः ॥ सुदृष्टां नाकरोद्भीत्या पार्श्वस्थां वीक्ष्य पार्वतीम् ॥ ८ ॥ ततः प्रदक्षिणां चक्रे सा प्रणम्य महेश्वरम् ॥ श्रद्धया परया युक्ता कृतांजलिपुटा स्थिता ॥९॥ यावद्दक्षिणपार्श्वस्था तावद्वक्त्रं स दक्षिणम् ॥ प्रचकार महादेवस्तदुपाकृष्टलोचनः ॥ १० ॥ पश्चिमायां यदा साऽभूत्प्रदक्षिणवशाच्छुभा ॥ पश्चिमं वदनं तेन तदर्थं च कृतं ततः ॥११॥ एवमुत्तरसंस्थायां तस्यां देवेन शंभुना ॥ उत्तरं वदनं कृतं गौरीभीतेन चेतसा ॥ न ग्रीवां चालयामास कथंचिदपि स द्विजाः ॥१२॥ एतस्मिन्नंतरे तत्र नारदो मुनिपुंगवः॥ अब्रवीत्पार्वतीं पश्चात्प्रणिपत्य महेश्वरम् ॥ १३ ॥ ॥ नारद उवाच ॥ ॥ पश्य पार्वति ते पत्युश्चेष्टितं गर्हितं यथा ॥ दृष्ट्वा रूपवतीं नारीं कृतं मुखचतुष्टयम् ॥ १४ ॥ अहमेतद्विजानामि न त्वया सदृशी क्वचित् ॥ अस्ति नारी तथाऽन्योपि विजानाति सुरेश्वरि ॥ १५ ॥ हास्यस्य पदवीमद्य त्वं गमिष्यसि पार्वति ॥ सर्वासां देवपत्नीनां ज्ञात्वान्यासक्तमीश्वरम् ॥ १६ ॥ एतद्देवि विजानासि यादृक्चित्तं शिवोद्भवम् ॥ अस्या उपरि वेश्याया निंदिताया विचक्षणैः ॥ १७ ॥ समादाय निजे हर्म्ये एतां संस्थापयिष्यति ॥ परं लज्जासमोपेतो न ब्रवीति वचः शुभे ॥ १८ ॥ ॥ ॥ सूत उवाच ॥ ॥ नारदस्य वचः श्रुत्वा दृष्ट्वा कांतं चतुर्मुखम् ॥ क्रोधेन महताविष्टा विकृतं वीक्ष्य तं हरम् ॥ १९ ॥ ततो निरोधयामास द्रुतं सा पर्वतात्मजा ॥ सर्वनेत्राणि देवस्य महिषीधर्ममाश्रिता ॥ २० ॥ एतस्मिन्नंतरे शैला विशीर्यंति समंततः ॥ मर्यादां संत्यजंति स्म सर्वे च मकरालयाः ॥ २१ ॥ प्रलयस्य समुत्थानं संजातं द्विजसत्तमाः ॥ तावद्ब्रह्मदिनं प्राप्तं परमं सृष्टिलक्षणम् ॥ २२ ॥ निमेषेण पुनस्तस्य प्रलयस्य

१ आर्षम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



प्रजापतेः ॥ ब्रह्मणः सा निशा प्रोक्ता सर्वं तोयमयं भवेत् ॥ २३ ॥ अथ तत्र गणाः सर्वे भृंगिनंदिपुरःसराः ॥ सोऽपि देवमुनिर्भीतस्तामुवाच सुरेश्वरीम् ॥ २४ ॥ मुंचमुंच सुरज्येष्ठे देवनेत्राणि संप्रति ॥ नो चेन्नाशः समस्तस्य लोकस्यास्य भविष्यति ॥ २५ ॥ एवं प्रोक्ताऽपि सा देवी यावच्च न मुमोच तम् ॥ तावद्देवेन ललाटं विसृष्टं लोचनं परम् ॥ २६ ॥ कृपाविष्टेन लोकानां येन रक्षा प्रजायते ॥ न शक्तो वारितुं देवीं प्राणेभ्योऽपि गरीयसीम् ॥ २७ ॥ अंबिकां विबुधाः प्राहुस्त्र्यंबकाणि यतो द्विजाः ॥ तस्मात्संकीर्त्यते लोके त्र्यंबकश्च सुरेश्वरः ॥ २८ ॥ ततः संत्यज्य तं देवं देवी पर्वतपुत्रिका ॥ प्रोवाच कोपरक्ताक्षी पुरःस्थां तां तिलोत्तमाम् ॥ २९ ॥ यस्मान्मे दयितः पापे त्वया रूपाद्विडंबितः ॥ चतुर्वक्त्रः कृतस्तस्मात्त्वं विरूपा भव द्रुतम् ॥ ३० ॥ ततः सा सहसा भूत्वा तत्क्षणाद्भग्ननासिका ॥ शीर्णकेशा बृहद्दंता चिपिटाक्षी महोदरा ॥ ३१ ॥ अथ वीक्ष्य निजं देहं तथाभूतं वराप्सराः ॥ प्रोवाच वेपमाना सा कृतांजलिपुटा स्थिता ॥ ३२ ॥ अहं संप्रेषिता देवि प्रणामार्थं त्रिशूलिनः ॥ ब्रह्मणा तेन चायाता युष्माकं च विशेषतः ॥ ३३ ॥ निर्दोषाया विरागायास्तस्माद्युक्तं न ते भवेत् ॥ शापं दातुं प्रसादं मे तस्मात्त्वं कर्तुमर्हसि ॥ ३४ ॥ तस्यास्तद्वचनं श्रुत्वा दीनं सत्यं च पार्वती ॥ पश्चात्तापसमोपेता ततः प्रोवाच सुप्रियम् ॥ ३५ ॥ स्त्रीस्वभावात्समायातः कोपोऽयं त्वां प्रति द्रुतम् ॥ तस्मादागच्छ गच्छावो मया सार्धं धरातले ॥ ३६ ॥ तत्रास्ति रूपदं तीर्थं मया चोत्पादितं स्वयम् ॥ माघशुक्लतृतीयायां स्नानार्थं विमलोदकम् ॥ ३७ ॥ या नारी प्रातरुत्थाय तत्र स्नानं समाचरेत् ॥ सा स्याद्रूपवती नूनमदृष्टे रविमंडले ॥ ३८ ॥ सदा माघे तृतीयायां तत्र स्नानं करोम्यहम् ॥ अद्य सां[1] तत्र यास्यामि स्नानाय कृतनिश्चया ॥ ३९ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वा समादाय सा देवी तां तिलोत्तमाम् ॥ हाटकेश्वरजे क्षेत्रे रूपतीर्थं जगाम च ॥ ४० ॥ तत्र स्नानं स्वयं चक्रे विधिपूर्वं सुरेश्वरी ॥ तस्या ह्यनन्तरं सापि भक्तियुक्ता तिलोत्तमा ॥ ४१ ॥ ततः कांतिमती जाता तत्क्षणादेव भामिनी ॥ पूर्वमासीद्यथारूपा तथा साऽभूद्विशेषतः ॥ ४२ ॥ अथ तुष्टिसमायुक्ता तां प्रणम्य सुरेश्वरीम् ॥ प्रोवाच विस्मयाविष्टा हर्षगद्गदया गिरा ॥ ४३ ॥ प्राप्तं रूपं महादेवि त्वत्प्रसादाच्चिरन्तनम् ॥ ब्रह्मलोकं गमिष्यामि मामनुज्ञातुमर्हसि ॥ ४४ ॥ ॥ गौर्युवाच ॥ ॥ वरं यच्छामि ते पुत्रि यत्किंचिद्धृदि संस्थितम् ॥ तस्मात्प्रार्थय विश्रब्धा न वृथा मम दर्शनम् ॥ ४५ ॥ ॥ तिलोत्तमोवाच ॥ ॥ अहमत्र करिष्यामि क्षेत्रे तीर्थं निजं शुभे ॥ त्वत्प्रसा



१ सा—माघशुक्लतृतीया—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देन तद्देवि यातु ख्यातिं धरातले ॥ ४६ ॥ त्वया तत्रापि कर्तव्यं वर्षांते स्नानमेव हि ॥ हितार्थं सर्वनारीणां रूपसौभाग्यदायकम् ॥ ४७ ॥ ॥ ॥ गौर्युवाच ॥ ॥ चैत्रशुक्लतृतीयायां सदाहं त्वत्कृते शुभे ॥ स्नानं तत्र करिष्यामि मध्याह्ने समुपस्थिते ॥ ४८ ॥ हितार्थं सर्वनारीणां तव वाक्यादसंशयम् ॥ या तत्र दिवसे नारी तस्मिंस्तीर्थे करिष्यति ॥ ४९ ॥ स्नानं सा सौख्यसंयुक्ता भविष्यति सुखान्विता ॥ स्पृहणीया च नारीणां सर्वासां धरणीतले ॥ ५० ॥ पुरुषोऽपि सुभक्त्या यस्तत्र स्नानं करिष्यति ॥ सप्तजन्मानि रूपाढ्यः स सौभाग्यो भविष्यति ॥ ५१ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वा तदा देव्या साप्सरा द्विजसत्तमाः ॥ चक्रे कुण्डं सुविस्तीर्णं विमलोदप्रपूरितम् ॥ ५२ ॥ उपकंठे ततस्तस्य स्थापयामास पार्वतीम् ॥ ततो जगाम संहृष्टा ब्रह्मलोकं तिलोत्तमा ॥ ५३ ॥ ततःप्रभृति संजातं कुण्डमप्सरसा कृतम् ॥ स्नानमात्रैर्नरैर्यत्र सौभाग्यं लभ्यते द्विजाः ॥ ५४ ॥ नारीभिश्च विशेषेण पुत्रप्राप्तिरनुत्तमा ॥ तथान्यदपि यत्किंचिद्वांछितं हृदये स्थितम् ॥ ५५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्येऽप्सरःकुण्डोत्पत्तिमाहात्म्यवर्णनंनाम त्रिपंचाशदुत्तरशततमोऽध्यायः ॥ ॥ १५३ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ या नारी तत्र सत्कुण्डे स्नात्वा तां पार्वतीं पुनः ॥ दृष्ट्वा स्नाति ततस्तीर्थे तस्मिन्रूपमये शुभे ॥ १ ॥ पुनश्च पार्वतीं पश्येच्छ्रद्धया परया युता ॥ सद्यः सा मुच्यते कृत्स्नैराजन्ममरणांतिकैः[1] ॥ २ ॥ तत्रैवास्ति जयानाम पार्वत्याः किंकरी द्विजाः ॥ तया तत्र कृतं कुण्डं गौरीकुण्डसमीपतः ॥ ३ ॥ या तत्र कुरुते स्नानं तृतीयादिवसेऽबला ॥ सुतसौभाग्यसंपन्ना सा भवेत्पतिवल्लभा ॥ ४ ॥ तथान्यदपि तत्रास्ति विजयाकुण्डमुत्तमम् ॥ तत्र स्नाताऽपि वंध्या स्त्री जायते पुत्रसंयुता ॥ ५ ॥ न च पश्यति पुत्राणां कदाचिद्व्यसनं द्विजाः ॥ न वियोगं न दुःखं च स्वप्नांते च कदाचन ॥६॥ काकवंध्याऽपि या नारी तत्र स्नानं समाचरेत् ॥ सा पुत्रान्विविधाँल्लब्ध्वा स्वर्गलोके महीयते ॥७॥ ॥ ॥ ऋषय ऊचुः ॥ ॥ एतेषां सूत तीर्थानां तीर्थमस्ति सुसिद्धिदम् ॥ क्वचित्किंचिद्भवेत्सिद्धिर्यत्र स्नानाच्छरीरजा ॥ ८ ॥ ॥ सूत उवाच ॥ ॥ सप्तविंशतिलिंगानि यानि संति द्विजोत्तमाः ॥ तेषां मध्येऽभवत्सिद्धिरेकस्मिन्निखिला[2] द्विजाः ॥९॥ एकस्य सत्त्वयुक्तस्य वीरव्रतयुतस्य च ॥ आश्विनस्य चतुर्दश्यां कृष्णायां द्विजसत्तमाः॥१०॥ अर्धरात्रे विधानेन तेषां पूजां करोति यः ॥ प्रागुक्तं जपनं भक्त्या स क्रमात्साधकोत्तमः॥११॥ अंगन्यासं विधायोच्चैः क्षुरिकासूक्तमुच्चरत्[3] ॥ तेषामग्रे पुनः सम्यक्पूजयित्वा च शंकरम् ॥ १२ ॥ पृथगेकैकशो भक्त्या पूजयेद्दिक्पतींश्च वै ॥ १३ ॥ अथाऽऽ

१ पापैः—इति विशेष्यं बोध्यम् । २ साधकस्य—इति शेषः । ३ उच्चरत्—अडभाव आर्षः । उदचरत्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





गत्य गणेशो वै विकरालो भयानकः ॥ लंबोदरो वै नग्नश्च कृष्णदन्तसमुद्भवः ॥ १४ ॥ खड्गहस्तोऽब्रवीद्युद्धं प्रकुरुष्व मया समम् ॥ मुक्त्वैतत्कपटं
भूमौ यदि वीरोऽसि सात्त्विकः ॥ १५ ॥ ततस्तत्कर्षणाच्चापि यस्तेनाशु प्रताड्यते ॥ स तेनैव शरीरेण नीयते तेन तत्पदम् ॥ १६ ॥ यत्र स्थाने
जरा मृत्युर्न शोकश्च कदाचन ॥ तथा चित्रेश्वरीपीठे सिद्धिरेकस्य कीर्तिता ॥ १७ ॥ माघकृष्णचतुर्दश्यां यः पीठं तत्र पूजयेत् ॥ आगमोक्तविधा
नेन सम्यक्छ्रद्धासमन्वितः ॥ १८ ॥ पश्चात्कपालमादाय महामांसप्रपूरितम् ॥ अहमस्य करोम्यद्य महामांसस्य विक्रयम् ॥ १९ ॥ सिद्धिमूल्ये
न गृह्णातु कश्चिच्चेदस्ति सात्त्विकः ॥ ततश्च याचते यश्च प्रगृह्णाति च सद्द्विजाः ॥ २० ॥ स तमादाय निर्याति यत्र देवो महेश्वरः ॥ हाटकेश्वरजं
लिंगं चित्रशर्मप्रतिष्ठितम् ॥ २१ ॥ तस्य स्थानस्य मध्यस्थो यस्तं पूजयते नरः ॥ शिवरात्रौ निशीथे च पुष्पलक्षणभक्तितः ॥ सुसिद्धिमाप्नुया
त्तूर्णं स शरीरेण तत्क्षणात् ॥ २२ ॥ सिद्धिस्थानानि सर्वाणि तस्मिन्क्षेत्रे स्थितानि वै ॥ वीरव्रतप्रयुक्तानां मानवानां द्विजोत्तमाः ॥ २३ ॥
॥ ॥ ऋषय ऊचुः ॥ ॥ तामसो यस्त्वया प्रोक्तः सिद्धिमार्गो महामते ॥ अनर्हो ब्राह्मणेन्द्राणां श्रोत्रियाणां विशेषतः ॥ २४ ॥ शुद्धान्तः
करणैः सूत भूतहिंसाविवर्जितैः ॥ यथा संप्राप्यते मोक्षो ब्राह्मणैः सुचिरादपि ॥ २५ ॥ तत्त्वं ब्रूहि महाभाग मोक्षोपायं द्विजन्मनाम् ॥ २६ ॥
॥ ॥ सूत उवाच ॥ ॥ रुद्रैर्दशभिः संयुक्तमानंदेश्वरकं तथा ॥ स्नात्वा तदग्रतः कुण्डे शास्त्रदृष्टेन कर्मणा ॥ २७ ॥ संसिद्धिमाप्नुयान्मर्त्यो
दुर्लभां त्रिदशैरपि ॥ माघमासे नरः स्नात्वा विश्वामित्रह्रदे नरः ॥ २८ ॥ प्रत्यूषे तिलपात्रं च ब्राह्मणाय निवेदयेत् ॥ सर्वपापविनिर्मुक्तो ब्रह्म
लोके महीयते ॥ २९ ॥ यद्यपि स्याद्दुराचारः सर्वाशी सर्वविक्रयी ॥ सुपर्णाख्यस्य देवस्य पुरतः श्रद्धयाऽन्वितः ॥ ३० ॥ प्रायोपवेशनं कृत्वा
ह्युपवासपरो नरः ॥ यस्त्यजेन्मानवः प्राणान्न स भूयोऽभिजायते ॥ ३१ ॥ एवं सिद्धित्रयं प्रोक्तं ब्राह्मणानां हितावहम् ॥ सात्त्विकं ब्राह्मणश्रेष्ठाः
शंसितं त्रिदशैरपि ॥ ३२ ॥ अन्यानि तत्र तीर्थानि देवतायतनानि च ॥ तानि स्वर्गप्रदान्याहुर्मुनयः शंसितव्रताः ॥ ३३ ॥ एतद्वः सर्वमाख्यातं
क्षेत्रमाहात्म्यमुत्तमम् ॥ हाटकेश्वरदेवस्य सर्वपातकनाशनम् ॥ ३४ ॥ योऽत्र सर्वेषु तीर्थेषु स्नात्वा पश्यति भक्तितः ॥ सर्वाण्यायतनान्येव स
पापोऽपि विमुच्यते ॥ ३५ ॥ एतत्खंडं पुराणस्य प्रथमं परिकीर्तितम् ॥ कार्तिकेयप्रणीतस्य सर्वपापहरं शुभम् ॥ ३६ ॥ यश्चैतत्कीर्तयेद्भक्त्या ॥१७३॥
शृणुयाद्वा समाहितः ॥ इह भुक्त्वा सुविपुलान्भोगान्याति त्रिविष्टपम् ॥ ३७ ॥ सर्वतीर्थेषु यत्पुण्यं सर्वदानैश्च यत्फलम् ॥ तत्फलं समवाप्नोति
शृण्वञ्छ्रद्धासमन्वितः ॥ ३८ ॥ श्रुत्वा पुराणमेतद्धि जन्मकोटिसमुद्भवात् ॥ पातकाद्विप्रमुच्येत कुलानामुद्धरेच्छतम् ॥ ३९ ॥ ततो व्यासः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूजनीयो वस्त्रदानादिभूषणैः ॥ गोभूहिरण्यनिर्वापैर्दानैश्च विविधैरपि ॥४०॥ तेन संपूजितो व्यासः कृष्णद्वैपायनः प्रभुः ॥ साक्षात्सत्यवतीपुत्रो येन व्यासः सुपूजितः॥४१॥एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत्॥पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा ह्यनृणी भवेत् ॥४२॥ एतत्पवित्रमायुष्यं धन्यं स्वस्त्ययनं महत्॥यच्छ्रुत्वा सर्वदुःखेभ्यो मुच्यते नात्र संशयः॥४३॥इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये चित्रेश्वरीपीठक्षेत्रमाहात्म्यवर्णनंनाम चतुःपंचाशदुत्तरशततमोऽध्यायः॥१५४॥ ॥ सूत उवाच ॥ ॥ तथाऽन्ये तत्र तिष्ठंति वसवोऽष्टौ द्विजोत्तमाः॥स्थानमेकं समाश्रित्य सर्वदैव प्रपूजिताः॥१॥ एकादश तथा रुद्रा आदित्या द्वादशैव तु ॥ देववैद्यौ तथा चान्यावश्विनौ तत्र संस्थितौ ॥२॥ देवतास्तत्र तिष्ठंति कोटिकोटिप्रनायकाः॥ एकैका ब्राह्मणश्रेष्ठाः कलिकालभयाकुलाः॥३॥ हाटकेश्वरजे क्षेत्रे यज्ञभागाप्तये सदा ॥ अष्टम्यां शुक्लपक्षे तु मधुमासे व्यवस्थिते ॥ ४ ॥ यस्तान्वसूञ्छुचिर्भूत्वा स्नात्वा धौतांबरो नरः ॥ तर्पयित्वा द्विजश्रेष्ठान्पश्चात्संपूजयेन्नरः ॥ ५ ॥ वसवस्त्वा कृण्वन्निति मन्त्रेणानेन भक्तितः ॥ नैवेद्यं च ततो दद्याद्वसवश्छंदसाविति ॥ ६ ॥ ततो धूपं सुगन्धं च यो यच्छति समाहितः ॥ वसवस्त्वां जेतु तथा मन्त्रमेतमुदीरयेत् ॥ ७ ॥ आरार्तिकं ततो भूयो यः करोति द्विजोत्तमाः ॥ वसवस्त्वां जेतु तथा श्रूयतां यत्फलं हि तत् ॥ ८ ॥ कन्याभिः कोटिभिर्यच्च पूजिताभिर्भवेत्फलम् ॥ वसूनां चैव तत्सर्वमष्टभिस्तैः प्रपूजितैः ॥ ९ ॥ तथा ये द्वादशादित्यास्तस्मिन्क्षेत्रे व्यवस्थिताः ॥ तान्स्थाप्य पूजयित्वा च सप्तम्यामर्कवासरे ॥ सम्यक्छ्रद्धासमोपेतः पुष्पगन्धानुलेपनैः ॥ १० ॥ पश्चात्तत्पुरतस्तेषां समस्तान्येकविंशतिः ॥ आदित्यव्रतसंज्ञानि तस्य पुण्यफलं शृणु ॥११॥ कोटिद्वादशकं यस्तु सूर्याणां पूजयेन्नरः ॥ तत्फलं प्राप्नुयात्कृत्स्नं पूजयन्नात्र संशयः ॥ १२ ॥ तथैकादशरुद्रा ये तत्र क्षेत्रे द्विजोत्तमाः ॥ एकस्थाने स्थितास्तेषां पूजया श्रूयतां फलम् ॥ १३ ॥ यस्तान्पूजयते भक्त्या स्थापयित्वा सुरेश्वरान् ॥ चैत्रशुक्लचतुर्दश्यां जपेच्च शतरुद्रियम् ॥ १४ ॥ एकादशप्रमाणेन कोटयस्तेन पूजिताः ॥ भवंति नात्र संदेहः सत्यमेतन्मयोदितम् ॥ १५ ॥ यथा तावश्विनौ तत्र देववैद्यौ व्यवस्थितौ ॥ आश्विने मासि चाश्विन्यां पूर्णिमायां तथा तिथौ ॥ १६ ॥ यस्तौ संपूजयित्वा तु ह्यश्विनीसूक्तमुच्चरेत् ॥ द्विकोटिगुणितं पुण्यं सम्यक्तेन समाप्यते ॥ १७ ॥ एतद्वः सर्वमाख्यातं माहात्म्यं वसुसंभवम् ॥ आदित्यानां च रुद्राणामश्विनोर्द्विजसत्तमाः ॥ १८ ॥ ॥ ॥ सूत उवाच ॥ ॥ तथाऽन्योऽपि च तत्रास्ति याज्ञवल्क्यप्रतिष्ठितः ॥ पुष्पादित्य इति ख्यातः सर्वकामप्रदो नृणाम् ॥ १९ ॥ यो यं काम

१ इतोऽग्रे केषुचित्पुस्तकेषु—"चतुर्विंशतिसाहस्र्यां संहितायां प्रथमखण्डं समाप्तम्"—इति पाठो विद्यते । अन्येषु पुस्तकेषु नास्ति । २ पूष्णः पूजया—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



मभिध्याय तं पूजयति मानवः ॥ स तं कृत्स्नमवाप्नोति यद्यपि स्यात्सुदुर्लभम् ॥२०॥ अपुत्रो लभते पुत्रान्धनार्थी धनमाप्नुयात् ॥ बहुवैरोऽरिनाशं च विद्यार्थी शास्त्रविद्भवेत् ॥ २१ ॥ सप्तम्यामर्कवारेण यस्तं पश्यति मानवः ॥ मुच्येद्दिनोद्भवात्पापान्महतोऽपि द्विजोत्तमाः ॥ २२ ॥ पूजया हि प्रणश्येत पापं वर्षसमुद्भवम् ॥ नाशं याति न संदेहस्तमः सूर्योदये यथा ॥ २३ ॥ अष्टोत्तरशतं चैव यः करोति प्रदक्षिणाम् ॥ फलहस्तः स मुच्येत ह्याजन्ममरणादघात् ॥ २४ ॥ प्रदक्षिणां प्रकुर्वाणो यो यं काममभीप्सति ॥ स तमाप्नोत्यसंदिग्धं निष्कामो मोक्षमाप्नुयात् ॥ २५ ॥ संक्रांतौ सूर्यवारेण यः कुर्यात्स्नापनक्रियाम् ॥ अभीष्टं सिध्यते तस्य मेषे वा यदि वा तुले ॥ २६ ॥ तस्मिन्सर्वप्रयत्नेन वांछद्भिरीप्सितं फलम् ॥ स देवो वीक्षणीयश्च पूजनीयो विशेषतः ॥ २७ ॥ यद्देवैः सकलैर्दृष्टैश्चमत्कारपुरोद्भवैः ॥ फलमाप्नोति तद्दृष्टो तेन तत्फलमाप्नुयात् ॥ २८ ॥ ॥ ऋषय ऊचुः ॥ ॥ याज्ञवल्क्येन देवोऽसौ यदि तावत्प्रतिष्ठितः ॥ पुष्पादित्यः कथं प्रोक्त एतन्नो वक्तुमर्हसि ॥ २९ ॥ ॥ सूत उवाच ॥ ॥ अत्र वः कीर्तयिष्यामि चेतिहासं पुरातनम् ॥ पुष्पादित्यो यथा जातो याज्ञवल्क्यप्रतिष्ठितः॥३०॥ अस्त्यत्र मेदिनीपृष्ठे सुपुरं वैदिशं महत् ॥ नानासौध समाकीर्णं वरप्राकारशोभितम् ॥ ३१ ॥ उद्यानशतसंकीर्णं तडागैरुपशोभितम् ॥ तत्रासीत्पार्थिवश्रेष्ठश्चित्रवर्मेति विश्रुतः ॥ ३२ ॥ न दुर्भिक्षं न च व्याधिर्न च चौरकृतं भयम् ॥ तस्मिञ्छासति धर्मज्ञे सततं धर्मवत्सले ॥ ३३ ॥ तत्पुरे क्षत्रियो जात्या मणिभद्र इति स्मृतः ॥ स वै धनेन संयुक्तः पितृपैतामहेन च ॥ ३४ ॥ तत्पुरं सकलं चैव स राजा मंत्रिभिः सह ॥ कुसीदाहृतवित्तेन वर्तते कार्य उत्थिते ॥ ३५ ॥ स च कायेन कुब्जः स्याज्जराव्याप्तस्तथैव च ॥ वलीपलितगात्रश्च ह्यत्यंतं च विरूपधृक् ॥३६॥ तथा चैव कुकीनाशः प्रभूतेऽपि धने सति ॥ न ददाति स पापात्मा कस्यचित्किंचिदेव हि ॥ न भक्षयति तृष्णार्तः स्वयमेव कथंचन ॥ ३७ ॥ एवंविधोऽपि सोऽतीव विरूपोऽपि सुदुर्मतिः ॥ प्रार्थयामास वै कन्यां स्वजात्यां वीक्ष्य सुंदरीम् ॥ ३८ ॥ बिंबोष्ठीं चारुदेहां च मुष्टिग्राह्यकृशोदरीम् ॥ पद्मपत्रविशालाक्षीं गूढगुल्फां सुकेशिकाम् ॥ ३९ ॥ रक्तां सप्तसु गात्रेषु त्रिगंभीरां तथा पुनः ॥ सर्वलक्षणसंपूर्णां जातीयां सुमनोरमाम् ॥ ४० ॥ क्षत्रियाद्द्विजशार्दूला दरिद्रेण च पीडितात् ॥ तेन तत्सकलं वृत्तं भार्यायै संनिवेदितम् ॥ ४१ ॥ तच्छ्रुत्वा सा च दुःखेन मूर्च्छिता संबभूव ह ॥ संबोधिता ततस्तेन वाक्यैर्दृष्टांतसंभवैः ॥ ४२ ॥ ॥ क्षत्रिय उवाच ॥ ॥ न सा विद्या न तच्छिल्पं न तत्कार्यं न सा कला ॥ अर्थार्थिभिर्न तज्ज्ञानं धनिनां यन्न दीयते ॥ ४३ ॥ इह लोके च धनिनां

१ कुकीनाशः—अतिक्षुद्रः—अतिकदर्यः—इत्यर्थौ वा ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परोऽपि स्वजनायते ॥ स्वजनोऽपि दरिद्राणां कार्यार्थे दुर्जनायते ॥ ४४ ॥ अर्थेभ्यो हि विवृद्धेभ्यः संभृतेभ्यस्ततस्ततः ॥ प्रवर्तंते क्रियाः सर्वाः पर्वतेभ्यो यथापगाः ॥ ४५ ॥ पूज्यते यदपूज्योऽपि यदगम्योऽपि गम्यते ॥ वंद्यते यदवन्द्योऽपि ह्यनुबंधो[1] धनस्य सः ॥ ४६ ॥ अशनादिंद्रियाणीव स्युः कार्याण्यखिलानि ह ॥ सर्वस्मात्कारणाद्वित्तं सर्वसाधनमुच्यते ॥ ४७ ॥ अर्थार्थी जीवलोकोऽयं श्मशानमपि सेवते ॥ जनितारमपि त्यक्त्वा निःस्वः[2] संयाति दूरतः ॥ ४८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये पुष्पादित्यमाहात्म्ये मणिभद्रवृत्तांते मणिभद्राय कन्याप्रदानार्थं क्षत्रियकृतनिजभार्यासंबोधनवर्णनंनाम पञ्चपञ्चाशदुत्तरशततमोऽध्यायः ॥१५५॥ ॥छ॥ ॥ ॥ सूत उवाच ॥ ॥ एवं सम्बोधिता तेन सा भार्या विजने गता ॥ कन्याप्रदानस्य रुचिः संजाता तदनन्तरम् ॥ १ ॥ ततः स पादौ प्रक्षाल्य मणिभद्रस्य सत्वरम् ॥ उदकं साक्षतं हस्ते कन्यादानकृते ददौ ॥ २ ॥ सोऽपि हस्तकृते तोये तं क्षत्रियमुवाच ह ॥ अद्यैव कुरु मे शीघ्रं विवाहं कन्यया सह ॥ ३ ॥ यस्मादिच्छामि संस्थातुं तेन ते गृहमागतः ॥ ॥ क्षत्रिय उवाच ॥ ॥ नात्र नक्षत्रमर्हं तु न किंचिद्भगदैवतम् ॥ ॥ ४ ॥ विवाहस्य न वारस्तु प्रसुप्ते मधुसूदने ॥ अस्मिन्काले तु संप्राप्ते या कन्या परिणीयते ॥५॥ सा च संवत्सरान्मध्ये ध्रुवं वैधव्यमाप्नुयात्॥ एवं दैवज्ञमुख्यानां श्रुतं प्रवदतां मया ॥ ६ ॥ तस्माच्छुभे तु संप्राप्ते नक्षत्रे भगदैवते ॥ त्वं विवाहय मे कन्यां प्रोत्थिते मधुसूदने ॥ येन क्षेमंकरी ते स्यात्तथा पुत्रप्रपौत्रिणी ॥ ७ ॥ ॥ मणिभद्र उवाच ॥ ॥ नक्षत्रं वह्निदैवत्यं प्रसुप्तो मधुसूदनः ॥ ८ ॥ सांप्रतं वत्सरांतोऽयं विवाहे विहिते सति ॥ कामाग्निरुत्थितः काये सांप्रतं मां प्रबाधते ॥ ९ ॥ तस्मात्कुरु प्रसादं मे कन्याविवहितेन तु ॥ तव वित्तं प्रदास्यामि सुखी येन भविष्यसि ॥ १० ॥ ॥ सूत उवाच ॥ ॥ तस्माच्च वित्तलोभेन क्षत्रियो द्विजसत्तमाः ॥ विवाहं कारयामास तत्क्षणादेव स द्विजाः ॥ ११ ॥ ददौ कन्यां सुदुःखार्तामश्रुपूर्णेक्षणां स्थिताम् ॥ सन्निधौ वह्निविप्राणां तदा तेन विवाहिता ॥ १२ ॥ नीत्वा निजगृहं पश्चात्कामधर्मे नियोजिता ॥ अनिच्छंतीमपि सतीं तामतीव निरर्गलः ॥ १३ ॥ सोऽपि निष्कामतां प्राप्य निर्भर्त्स्यं च मुहुर्मुहुः ॥ भाँषिकाभिरनेकाभिस्तापयित्वा[3] च भामिनीम् ॥ १४ ॥ शांतिं नीता ततस्तेन प्रत्यूषे समुपस्थिते ॥ भृत्यवर्गः समस्तोऽपि ततो निःसारितो गृहात् ॥ १५ ॥ इर्ष्याधर्मं समास्थाय परमं द्विजसत्तमाः ॥ एक एव कृतस्तेन द्वारपालो नपुंसकः ॥ १६ ॥ प्रोक्तं न च त्वया देयः प्रवेशोऽत्र गृहे मम ॥ भृत्यस्य भिक्षु

१ स प्रभावो धनस्य हि–इ० पा० । २ निजम्–इ० पा० । ३ भाँपिकाभिरनेकाभिर्भीपयित्वा–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



कस्यैव वृद्धस्य व्रतिनस्तथा ॥१७॥ एवं कृत्वा विधानं तु ततश्चक्रे जनैः समम् ॥ व्यवहारक्रियाः सर्वा द्रव्यलक्षैः सहस्रशः॥ १८ ॥ श्वशुरस्यापि
नो दत्तं किंचित्तेन दुरात्मना ॥ भार्यायाः श्वेतवस्त्राणि मुक्त्वाऽन्यन्नैव किंचन ॥ १९ ॥ यामद्वयेऽपि संप्राप्ते दिनस्य गृहमागतः ॥ मितमन्नं तत
स्तस्या भोजनार्थं प्रयच्छति ॥ २० ॥ यावन्मात्रं च सा भुंक्ते एकविप्रान्वितः स्वयम् ॥ भुक्त्वा चैव ततो याति व्यवहारकृते बहिः ॥ २१ ॥
आगच्छति पुनर्हर्म्यं संध्याकाल उपस्थिते ॥ साऽपि तिष्ठति हर्म्यस्था पत्नी तस्य दुरात्मनः ॥ २२ ॥ वैराग्यं परमं प्राप्ता दुःखशोकसमन्विता ॥
मत्सीव पतिता तोयादन्यस्मिंस्तु स्थलांतिके ॥ २३ ॥ चक्रवाकी विमुक्तेव संप्राप्ते दिवसक्षये ॥ हंसी हंसवियुक्तेव मृगीव मृगवर्जिता ॥ २४ ॥
सोऽपि नित्यं ददौ भोज्यं विप्रस्यैकस्य च द्विजाः ॥ प्रोच्य तं ब्राह्मणं पूर्वं सामपूर्वमिदं वचः ॥ २५ ॥ अधोवक्त्रेण भोक्तव्यं सदा विप्र गृहे मम ॥
यदि पश्यसि मे भार्यां संप्राप्स्यसि विडंबनाम् ॥२६॥ एवं विडंबितास्तेन ह्यूर्ध्ववक्त्रावलोकिनः ॥ ये चान्ये भयसंत्रस्ता न यांति च तदालयम् ॥
॥ २७ ॥ कस्यचित्त्वथ कालस्य पुष्पोनाम द्विजोत्तमः ॥ तीर्थयात्राप्रसंगेन संप्राप्तस्तत्पुरं प्रति ॥२८॥ पूर्वे वयसि संस्थश्च दर्शनीयतमाकृतिः ॥
क्षुत्क्षामः सुपरिश्रांतो मध्याह्ने समुपस्थिते ॥ २९ ॥ परिभ्रमति वै नृणां स गृहाणि समंततः ॥ मणिभद्रः समादिष्टस्तस्य केनापि भोज्यदः ॥३०॥
ततस्तं प्रार्थयामास गत्वा भोज्यं च स द्विजाः ॥ तेनापि स द्विजः प्रोक्तस्तदासौ द्विजसत्तमाः ॥ ३१ ॥ अधोवक्त्रेण भोक्तव्यं त्वया वीक्ष्या न मे
प्रिया ॥ नो चेद्विडंबनां विप्र संप्राप्स्यसि न संशयः ॥ ३२ ॥ एवं ज्ञात्वा महाभाग यत्क्षेमं तत्समाचर ॥ ३३ ॥ ॥ पुष्प उवाच ॥ ॥ क्षुत्क्षाम
स्य न मे कार्यं परदारविलोकनैः ॥ वेदाध्ययनयुक्तस्य तीर्थयात्रारतस्य च ॥ ३४ ॥ ॥ मणिभद्र उवाच ॥ ॥ तदागच्छ मया सार्धं सांप्रतं मम
मंदिरम् ॥ विशेषात्तव दास्यामि भोजनं दक्षिणान्वितम् ॥ ३५ ॥ एवं तौ संविदं कृत्वा ययतुर्ब्राह्मणोत्तमाः ॥ हट्टमार्गे गतौ तत्र यत्र षंढो व्यव
स्थितः ॥ ३६ ॥ तत्पार्श्वे ब्राह्मणं धृत्वा प्रविष्टो गृहमध्यतः ॥ भार्यया श्रपयामास धान्यं मानमितं तदा ॥ ३७ ॥ ततो देवार्चनं कृत्वा वैश्वदेवांत
आगतम् ॥ पुष्पमाहूय तत्पादौ प्रक्षाल्य च निवेश्य च ॥ ३८ ॥ कृत्वार्चनविधिं तस्य दत्त्वान्नं च सुसंस्कृतम् ॥ उपविश्य ततः पश्चाद्भोजनार्थं
ततो द्विजाः ॥ पुष्पोऽपि वीक्षते तस्याः पादौ पंकजसंनिभौ ॥ ३९ ॥ यथायथा स कौतुक्याद्वीक्षते यौवनाश्रितः ॥ कौतुक्यात्तेन च ततस्तस्या
वक्त्रं निरीक्षितम् ॥ ४० ॥ ततश्चाकारयामास मणिभद्रः प्रकोपतः ॥ तं षण्ढमुक्तवाञ्जारं त्वमेनं च विडंबय ॥ ४१ ॥ ततस्तेन द्विजश्रेष्ठाः स

१ पुरस्कृतम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुष्पो मूर्ध्नि ताडितः ॥ ४२ ॥ अधो निपतितं भूमौ रुधिरेण परिप्लुतम् ॥ चरणाभ्यां समाकृष्य दूतो मार्गं समाश्रितः ॥ ४३ ॥ यावच्चतुष्पथं
नीतो यत्र संचरते जनः ॥ हाहाकारो महानासीत्तस्मिन्पुरवरे तदा ॥ ४४ ॥ सर्वेषामेव पौराणां तदवस्थं विलोक्य तम् ॥ ततोऽन्यैः शीततोयेन
सोभिषिक्तो दयान्वितैः ॥ ४५ ॥ कृत्वा वायुप्रदानं च गमितश्चेतनां प्रति ॥ स प्राप्य चेतनां कृच्छ्रात्ततोयात्तानथाब्रवीत् ॥ ४६ ॥ न मया विहितं
चौर्यं परदारा न सेविताः ॥ पश्यध्वं मणिभद्रेण यथाहं क्लेशितो जनाः ॥ ४७ ॥ तीर्थयात्रापरो विप्रो ब्रह्मचर्यपरायणः ॥ भोजनार्थं समामन्त्र्य
नीतोऽवस्थामिमां ततः ॥ ४८ ॥ किं नास्ति वात्र भूपालो येनैतदसमंजसम् ॥ ब्राह्मणस्य विशेषेण निर्दोषस्य महाजनाः ॥ ४९ ॥ ॥ जना
ऊचुः ॥ ॥ बहवस्तेन पापेन विप्राः पूर्वं विडंबिताः ॥ राजप्रसादयुक्तेन चेर्ष्यां प्राप्य शरीरिणा ॥ ५० ॥ कोऽपि राजप्रसादान्न किंचिद्ब्रूतेऽस्य
सम्मुखम् ॥ तस्मादुत्तिष्ठ गच्छामो दास्यामस्तेऽशनं वयम् ॥ ५१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागर
खण्डे हाटकेश्वरक्षेत्रमाहात्म्ये पुष्पादित्यमाहात्म्ये मणिभद्रकृतपुष्पब्राह्मणविडंबनवर्णनंनाम षट्पञ्चाशदुत्तरशततमोऽध्यायः ॥ १५६ ॥ ॥ छ ॥
॥ ॥ सूत उवाच ॥ ॥ एवं संबोधितस्तैस्तु लोकैः पुष्पस्तदा द्विजाः ॥ तानब्रवीत्ततः क्रुद्धो न करिष्यामि भोजनम् ॥ १ ॥ यावन्न चास्य
पापस्य करिष्यामि प्रतिक्रियाम् ॥ तद्वदध्वं महाभागा देवो वा देवताऽथवा ॥ २ ॥ तथान्ये सिद्धमन्त्रा वा सद्यः प्रत्ययकारकाः ॥ आराधिता
यथा सद्यो मानुषाणां वरप्रदाः ॥ ३ ॥ ॥ जना ऊचुः ॥ ॥ एको देवः स्थितश्चात्र सद्यःप्रत्ययकारकः ॥ तथैका देवता चात्र श्रूयते जगती
तले ॥ ४ ॥ ॥ पुष्प उवाच ॥ ॥ कोऽसौ देवः कियद्दूरे कस्मिन्स्थाने व्यवस्थितः ॥ तथा च देवता ब्रूत दयां कृत्वा ममोपरि ॥ ५ ॥
॥ ॥ जना ऊचुः ॥ ॥ चमत्कारपुरे सूर्यो याज्ञवल्क्यप्रतिष्ठितः ॥ अस्ति विप्र श्रुतोऽस्माभिः सद्यः प्रत्ययकारकः ॥ ६ ॥ सूर्यवारेण सप्तम्यां
फलहस्तः प्रदक्षिणाम् ॥ यः करोति नरस्तस्य ह्यष्टोत्तरशतं द्विज ॥ ७ ॥ तस्य सिद्धिप्रदः सम्यङ्मनसा वांछितं ददेत् ॥ तथान्या शारदा
नाम देवी काश्मीरसंस्थिता ॥ ८ ॥ उपवासकृतेरेव सापि सिद्धिप्रदायिनी ॥ तच्छ्रुत्वा वचनं तेषां जनानां स द्विजोत्तमाः ॥ ९ ॥ समुद्दिश्य
चमत्कारं तस्मात्स्थानात्ततः परम् ॥ चमत्कारपुरं प्राप्य सप्तम्यां सूर्यवासरे ॥ १० ॥ तत्रागत्य ततः स्नात्वा शुचिर्भूत्वा समाहितः ॥ गतः संति
ष्ठते यत्र याज्ञवल्क्यकृतो रविः ॥ ११ ॥ ततः प्रदक्षिणाः कृत्वा अष्टोत्तरशतं मिताः ॥ नालिकेराणि चादाय श्रद्धया परयाऽयुतः ॥ १२ ॥ ततः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



क्षुत्क्षामकंठः स परिश्रांतस्तदग्रतः ॥ उपविष्टो जपं कुर्वन्सूर्येष्टैः स्तवनैस्तदा ॥ १३ ॥ मंडलब्राह्मणाद्यैश्च तारं स्वरमुपाश्रितः ॥ सप्तयुंजर
वाद्यैश्च अग्निरेवेति भक्तितः ॥ १४ ॥ आदित्यव्रतसंज्ञाद्यैः सामभिर्दृढभक्तिभाक् ॥ क्षुरिकामंत्रपूर्वैश्च तथैवाथर्वणोद्भवैः ॥ १५ ॥ यावदन्योर्कवा
रस्तु नैव तुष्टो दिवाकरः ॥ पौर्णमासीदिने प्राप्ते वैराग्यं परमं गतः ॥ १६ ॥ ततः पुष्पो विधायाथ स्नानं धौतांबरः शुचिः ॥ भूनाम्ना साध्य भूमिं
च स्थंडिलार्थं द्विजोत्तमाः ॥ १७ ॥ स्थंडिलं हस्तमात्रं च स्थंडिले प्रत्यकल्पयत् ॥ अग्निमीळेतिमंत्रेण ततोऽग्निं स निधाय च ॥ १८ ॥ तृणैः
परिस्तृणामीति कृत्वोपस्तरणं ततः ॥ आब्रह्मन्निति मन्त्रेण दत्त्वा ब्रह्मासनं ततः ॥ १९ ॥ सुत्रामाणमिति प्रोच्य समिधःस्थापनं च यत् ॥
प्रोक्षणीपात्रमासाद्य प्रोक्षणं कृतवांस्ततः ॥ २० ॥ पात्राणामथ सर्वेषां स्रुवादीनां यथाक्रमम् ॥ ततः प्रकल्पयामास हविःस्थाने निजां तनुम् ॥
॥ २१ ॥ न्यायं तु देवतास्थाने स आचार्यविधानतः ॥ ग्रहणं प्रोक्षणं चैव सूर्याय त्वेति चोत्तरम् ॥ २२ ॥ अयं त इध्म आत्मेति जप्त्वाथ
समिधं ततः ॥ अग्निसोमेति मन्त्राभ्यां हुत्वा चाज्याहुती ततः ॥ २३ ॥ कृत्वा व्याहृतिहोमं तु भूर्भुवः स्वेति भो द्विजाः ॥ ये ते शतेति
मन्त्राद्यैर्हुत्वात्रैव च दारुणम् ॥ २४ ॥ आह्वयामास वह्निं च प्रत्यक्षो भव देव मे ॥ एवं मन्त्रेण कृत्वा तं संमुखं ज्वलनं ततः ॥ २५ ॥
कालीकरालिकाद्याश्च सप्तजिह्वाश्च याः स्मृताः ॥ तासामाह्वानकं कृत्वा ततो दीप्ते हविर्भुजि ॥ २६ ॥ जुहाव च स मांसानि स्वानि
चोत्कृत्य शस्त्रतः ॥ लोमभ्यः स्वाहेति विदिशो दिग्भ्यो दत्त्वा ततः परम् ॥ २७ ॥ अग्नये स्विष्टकृतइति यावदात्मानमाक्षिपेत् ॥ ताव
द्धृतः स सूर्येण स्वहस्तेन समंततः ॥ २८ ॥ धृतश्च सादरं तेन मा विप्र कुरु साहसम् ॥ नेदृग्घोमः कृतः क्वापि कदाचित्केनचिद्द्विज ॥
॥ २९ ॥ तुष्टोऽहं च महाभाग ब्रूहि किं करवाणि ते ॥ अदेयमपि दास्यामि यत्ते मनसि वर्तते ॥ ३० ॥ ॥ पुष्प उवाच ॥ ॥ यदि
तुष्टोसि देवेश यदि देयो वरो मम ॥ तद्देयं गुटिकायुग्मं यदर्थं प्रार्थयाम्यहम् ॥ ३१ ॥ वैदिशे नगरे चास्ति मणिभद्रो महाधनी ॥ कुब्जांगः क्षत्रियो
देव जरावलिसमन्वितः ॥ ३२ ॥ अब्रह्मण्यो महानीचः कीनाशो जनदूषितः ॥ द्वयोरेकां यदा वक्त्रे सदा चैव करोम्यहम् ॥ ३३ ॥ तदा मे तादृशं

१ "यदेतन्मंडलं तपति" इत्यादिकैः । २ "सप्त युंजंति रथमेकचक्रम्" इत्यादिभिर्मन्त्रैः—इत्यर्थः । ३ "सूर्याय त्वा जुष्टं निर्वपामि—सूर्याय त्वा जुष्टं प्रोक्षामि" इति कृत्वा—इत्यर्थः । ४ अग्निसोमेति मंत्राभ्याम्—"अग्नये स्वाहा—सोमाय स्वाहा"—इति चक्षुषी हुत्वा—इत्यर्थः । कचित्पुस्तके—"चक्षुषी चेति मंत्रेण हुत्वा चाज्याहुती ततः" इति पाठान्तरम् । ५ "अग्ने वैश्वानर शाण्डिल्यगोत्र"—इत्यादिना आह्वयामास—इत्यर्थः । ६ द्वयोः—गुटिकयोः मध्ये—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपमविकल्पं भवत्विति ॥ यदा पुनर्गृहीत्वा तां द्वितीयां प्रक्षिपाम्यहम् ॥ ३४ ॥ ततश्च सहजं रूपं मम भूयात्सुरेश्वर ॥ वैदिशे नगरे चास्ति मणिभद्रः सुरेश्वर ॥ ३५ ॥ अपरं तस्य यत्किंचिद्धनधान्यादिकं गृहे ॥ तत्सर्वं विदितं मे स्यात्तथा देव प्रजायताम् ॥ ३६ ॥ किं वानेन बहूक्तेन तस्य मित्राणि बांधवाः ॥ व्यवहारास्तथा सर्वे प्रकटाः स्युः सदैव हि ॥ ३७ ॥ न कश्चिज्जायते तत्र विकल्पः कस्यचित्क्वचित् ॥ मम तस्याधमस्यापि सर्वकृत्येषु सर्वदा ॥ ३८ ॥ ॥ भास्कर उवाच ॥ ॥ गृहाण त्वं महाभाग गुटिकाद्वितयं शुभम् ॥ शुक्लं कृष्णं च वक्त्रस्थं विभेदजननं महत् ॥ ३९ ॥ शुक्लया तस्य रूपं च तव नूनं भविष्यति ॥ कृष्णयापि पुनः स्वं च संप्राप्स्यसि महाद्विज ॥ ४० ॥ ॥ पुष्प उवाच ॥ ॥ अपरं वद मे देव संदेहं हृदये स्थितम् ॥ यत्त्वां पृच्छामि देवेश तव कीर्तिविवर्धनम् ॥४१॥ मया श्रुतं सुरश्रेष्ठ सप्तम्यां सूर्यवासरे ॥ यस्ते प्रदक्षिणानां च कुर्यादष्टोत्तरं शतम् ॥ तस्य त्वं तत्क्षणादेव फलहस्तस्य सिद्धिदः ॥ ४२ ॥ मूर्खस्यापि च पापस्य सर्वदोषान्वितस्य च ॥ चतुर्वेदस्य मे कस्मात्तीर्थयात्रापरस्य च ॥ ४३ ॥ सप्तरात्रे गते तुष्टो होम एवंविधे कृते ॥ ४४ ॥ ॥ श्रीसूर्य उवाच ॥ ॥ तामसेन तु भावेन त्वया सर्वमिदं कृतम् ॥ तेन सर्वं वृथा जातं त्वया सर्वं च यत्कृतम् ॥ ४५ ॥ यत्किंचित्क्रियते विप्र तामसं भावमाश्रितैः ॥ तत्सर्वं जायते व्यर्थं किं न वेत्ति भवानिदम् ॥ ४६ ॥ एवमुक्त्वा ततः सूर्यस्तस्य गात्राण्युपास्पृशत् ॥ खंडितानि स्वहस्तेन निर्व्रणानि कृतानि च ॥ ४७ ॥ अब्रवीच्च पुनः पुष्पं प्रसन्नवदनः स्थितः ॥ अनेनैव विधानेन यः करोति कुशंडिकाम् ॥ ४८ ॥ सोम्यभावं समाश्रित्य समिद्भिश्चार्कसंभवैः ॥ तिलाक्षतैर्विशेषेण होमं यस्तु समाचरेत् ॥ ४९ ॥ छन्दऋषिसमोपेतमेकं यावत्सहस्रकम् ॥ तस्य दास्याम्यहं हृत्स्थमधिकेभ्योऽधिकं फलम् ॥५०॥ एवमुक्त्वा सहस्रांशुस्तत्रैवांतरधीयत ॥ दीपवल्लक्षितो नैव केन मार्गेण निर्गतः ॥ ५१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये सूर्यसकाशात्पुष्पब्राह्मणस्य वरलब्धिवर्णनंनाम सप्तपञ्चाशदुत्तरशततमोऽध्यायः ॥ १५७ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ पुष्पोऽपि गुटिके लब्ध्वा भास्कराद्वारितस्करात् ॥ चिराद्भोजनमासाद्य प्रस्थितो वैदिशं प्रति ॥ १ ॥ ततो वैदिशमासाद्य स पुष्पो हृष्टमानसः ॥ शुक्लां तां गुटिकां वक्त्रे चकार द्विजसत्तमाः ॥ २ ॥ मंणिभद्रसमो जातस्तत्क्षणादेव स द्विजः ॥ हट्टमार्गं गते सोऽथ तस्मिन्गत्वाऽथ मंदिरे ॥ प्रविष्टः सहसा मध्ये प्रहृष्टेनांतरात्मना ॥ ३ ॥ ततश्चाकारयामास तं षंढं द्वारमाश्रितम् ॥ तस्य दत्त्वाथ वस्त्राणि पश्चात्षंढमुवाच सः ॥ ४ ॥ षंढ

१ पुस्तकांतरे सर्वत्र 'माणिभद्र' शब्दस्थाने 'माणिभद्र' इति शब्दपाठो वरीवर्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कश्चित्पुमानत्र सम्यग्वेषकरो हि सः ॥ मम वेषं समाधाय भ्रमते सकले पुरे ॥ ५ ॥ सांप्रतं मद्गृहे सोऽथ लोभनायागमिष्यति ॥ स च कृत्रिम
वेषेण निषेद्धव्यस्त्वया हि सः ॥ स तथेति प्रतिज्ञाय द्वारदेशं समाश्रितः ॥ ६ ॥ पुष्पोऽपि चाब्रवीद्भार्यां माहिकाख्यां ततः परम् ॥ माहिकेद्य मया
दृष्टः स्वतातः स्वपुरः स्थितः ॥ ७ ॥ वीरभद्रः सुदुःखार्तो मलिनांबरसंवृतः ॥ अब्रवीच्च ततः कोपान्मामेवं परुषाक्षरम् ॥ ८ ॥ धिग्धिक्पाप त्वया
कन्यातीव रूपवती सदा ॥ वंचयित्वा जनेतारमुदूढा सा सुमध्यमा ॥ ९ ॥ न दत्तं तत्पितुः किंचिन्न तस्या अथ पुत्रक ॥ विधवां यादृशीं तां
च श्वेतांबरधरां सदा ॥ १० ॥ संधारयसि पापात्मन्नेष्टं भोज्यं प्रयच्छसि ॥ तस्मात्तस्याः पितुर्देहि त्वं सुवर्णायुतं ध्रुवम् ॥ ११ ॥ भूषणं वांछितं
तस्या यत्तद्दे रुचिपूर्वकम् ॥ येन संधारयेद्भार्या साऽऽनंदं परमं गता ॥ १२ ॥ निरानंदा यतो नारी न गर्भं धारयेत्स्फुटम् ॥ निःसंतानो यतो
वंशः स्वर्गादपि क्षितिं व्रजेत् ॥ १३ ॥ स पतिष्यत्यसंदिग्धं कुलांगारेण च त्वया ॥ सा त्वमानय वस्त्राणि गृहमध्याच्छुभानि च ॥ १४ ॥ यानि
दत्तानि भूपेन व्यवहारैस्तदा मम ॥ पञ्चांगश्च प्रसादो यो मया प्राप्तश्च तैः सह ॥ १५ ॥ त्वं संधारय गात्रैः स्वैः शीघ्रं रसवतीं कुरु ॥ भोजना
यैव शीघ्रं तु त्वया सार्धं करोम्यहम् ॥ १६ ॥ एकस्मिन्नपि पात्रे च तदादेशादसंशयम् ॥ सापि सर्वं तथा चक्रे यदुक्तं तेन हर्षिता ॥ १७ ॥ भोज
नाच्छादनं चैव निर्विकल्पेन चेतसा ॥ ततः कामातुरः पुष्पो मैथुनायोपचक्रमे ॥ १८ ॥ एतस्मिन्नंतरे प्राप्तो मणिभद्रः समुत्सुकः ॥ क्षुत्क्षामः स
पिपासार्तो व्यवहारोत्थलिप्सया ॥ १९ ॥ प्रवेशं कुरुते यावद्गृहमध्ये समुत्सुकः ॥ निषिद्धस्तेन षण्ढेन भर्त्सयित्वा मुहुर्मुहुः ॥ २० ॥ हठाद्याव
त्प्रवेशं स चकार निजमंदिरे ॥ तावच्च दण्डकाष्ठेन मस्तके तेन ताडितः ॥ २१ ॥ अथ संपतितो भूमौ मूर्छया संपरिप्लुतः ॥ कर्तव्यं नैव जानाति
तत्प्रहारप्रपीडितः ॥ २२ ॥ ततः कोलाहलो जातस्तस्य द्वारे गृहस्य च ॥ जनस्य संप्रयातस्य हाहाकारपरस्य च ॥ २३ ॥ पप्रच्छुस्तं जनाः केचि
द्धिक्पाप किमिदं कृतम् ॥ वृत्तिभंगः कृतोऽनेन अथ त्वं व्यंतरार्दितः ॥ २४ ॥ इमामवस्थां यन्नीतः संप्राप्तोऽसि नृपाद्भयम् ॥ २५ ॥ ॥ षंढ
उवाच ॥ ॥ न वृत्तिर्गर्हिता तेन नाहं व्यंतरपीडितः ॥ मणिभद्रो न चैष स्यादेष वेषकरः पुमान् ॥ २६ ॥ मणिभद्रं वपुः कृत्वा संप्राप्तो याचितुं
धनम् ॥ हठात्प्रविश्यमानस्तु स मया मूर्ध्नि ताडितः ॥ २७ ॥ मणिभद्रो गृहस्यांतर्भुक्त्वा शयनमाश्रितः ॥ संतिष्ठते न जानाति वृत्तांतमिदमा
स्थितम् ॥ २८ ॥ ततः पुष्पोऽपि तच्छ्रुत्वा तं च कोलाहलं बहिः ॥ मणिभद्रस्य रूपेण द्वारदेशं समागतः ॥ २९ ॥ अब्रवीन्नित्यमभ्येति मम

१ 'माहिका' शब्दे 'मोहिका' इति पाठांतरं पुस्तकांतरे सर्वत्र ।

CC-0. In Public Domain. Digitization by eGangotri

रूपेण चाधमः ॥ एष वेषधरः कश्चिद्याचितुं धनमेव हि ॥ ३० ॥ एतेनापि च षंढेन न च भद्रमनुष्ठितम् ॥ यत्कुब्जोऽयं हतो मूर्ध्नि याचितुं समु पस्थितः ॥ ३१ ॥ एतस्मिन्नन्तरे सोऽपि चेतनां प्राप्य कृत्स्नशः ॥ वीक्षते पुरतो यावत्तावदात्मसमः पुमान् ॥ ३२ ॥ सर्वतः स तमालोक्य ततो वचनमब्रवीत् ॥ ३३ ॥ क्व चोरः संप्रविष्टो मे मम रूपेण मंदिरे ॥ भेदयित्वा तु षण्ढाख्यमेवं दत्त्वा च वाससी ॥ ३४ ॥ यावद्रूपगृहं गत्वा त्वां पंढेन समन्वितम् ॥ वधाय योजयाम्येव तावद्द्रुततरं व्रज ॥ ३५ ॥ ॥ कुष्प उवाच ॥ ॥ मम रूपं समाधाय त्वमायातो गृहे मम ॥ शून्यं मत्वा ततो ज्ञातस्त्वयाऽहं गृहसंस्थितः ॥३६॥ ततो नृपाय दास्यामि वधार्थं च न संशयः ॥ नो चेद्गच्छ द्रुतं पाप यदि जीवितुमिच्छसि ॥३७॥ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वा ततस्तौ च बाहुयुद्धेन वै मिथः ॥ युध्यमानौ नरैरन्यैः कृच्छ्रेण तु निवारितौ ॥३८॥ ततस्ते स्वजना ये तु मणिभ द्रस्य चागताः ॥ परिजानंति नो द्वाभ्यां विशेषं माणिभद्रकम् ॥ ३९ ॥ वालिसुग्रीवयोर्युद्धं तारार्थे युध्यमानयोः ॥ एवं विवदमानौ तु क्रोधताम्रा यतेक्षणौ ॥ ४० ॥ राजद्वारं समासाद्य स्थितौ स्वजनसंवृतौ ॥ द्वाःस्थेन सूचितौ राज्ञे सभातलमुपस्थितौ ॥ ४१ ॥ चौरचौरेति जल्पन्तौ पर स्परवधैषिणौ ॥ भूभुजा वीक्षितौ तौ च द्विजौ तु द्विजसत्तमाः ॥ ४२ ॥ न विशेषोऽस्ति विश्लेषस्तयोरेकोपि कायतः ॥ ततश्च व्यवहारेषु समती तेषु वै तदा ॥ ४३ ॥ पृष्टौ गुह्येषु सर्वेषु प्रत्यक्षेषु विशेषतः ॥ वदतस्तौ यथावृत्तं पृथक्पृथग्व्यवस्थितम् ॥ ४४ ॥ ततस्तु स्वजनैः सर्वैरेको नीत्व थ चान्यतः ॥ पृष्टो गोत्रान्वयं सर्वं द्वितीयस्तु ततः परम् ॥ ४५ ॥ तेषामपि तथा सर्वं यथा सम्यङ्निवेदितम् ॥ अथ राजा बृहत्सेनः सर्वांस्तानि दमब्रवीत् ॥ ४६ ॥ पत्नी चानीयतां तस्य मणिभद्रस्य वै गृहात् ॥ निजकान्तस्य विज्ञाने सा प्रमाणं भविष्यति ॥ ४७ ॥ ततो गत्वा च सा प्रोक्ता पुरुषैर्नृपसंभवैः ॥ आगच्छ कांतं जानीहि त्वं प्रमाणं भविष्यसि ॥ ४८ ॥ ततः सा व्रीडया युक्ता प्रच्छादितशिरास्ततः ॥ नृपाग्रे संस्थिता प्रोचे[2] विद्धि सम्यङ्जिं प्रियम् ॥ ४९ ॥ न वयं निश्चयं विद्मो न चैते स्वजनास्तव ॥ ५० ॥ ततः सा चिन्तयामास निजचित्ते वरांगना ॥ मणिभद्रेण दग्धाहमीर्ष्यावह्निगताऽनिशम् ॥ ५१ ॥ वंचयित्वा तु पितरं गृहीतास्मि ततः परम् ॥ न किंचित्पाप्मना दत्तं जल्पयित्वा धनं बहु ॥ ॥ ५२ ॥ द्वितीयेन तु मे पुंसा मर्त्यलोके सुखं कृतम् ॥ दत्त्वा वस्त्राणि चित्राणि तथैवाभरणानि च ॥ ५३ ॥ प्रदास्यति च तातस्य सुवर्णं कथितं च यत् ॥ यद्गृह्णामि स्वहस्तेन मणिभद्रं द्वितीयकम् ॥ ५४ ॥ एवं निश्चित्य मनसा दृष्ट्वा रक्तपरिप्लुतम् ॥ प्रथमं मणिभद्रं सा जगृहेऽथ द्वितीय

१ द्विजौ—ब्राह्मणक्षत्रियौ—उभयोरपि द्विजत्वात् । २ प्रोचे—प्रोक्ता—राज्ञो—इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



कम् ॥ ९५ ॥ अब्रवीच्च ततो वाक्यं सर्वलोकस्य शृण्वतः ॥ अहं तातेन दत्तास्य विवाहे अग्निसंनिधौ ॥९६॥ द्वितीयोऽयं दुराचारो वेषकर्ता समा
गतः ॥ मां च प्रार्थयते गुप्तां नानाचारैः पृथग्विधैः ॥ ९७ ॥ ततस्तु पार्थिवः क्रुद्धस्तस्य शाखावलंबनम् ॥ आदिदेश द्विजश्रेष्ठा मणिभद्रस्य
दुर्मतेः ॥ ९८ ॥ एतस्मिन्नंतरे सोऽथ वधकानां समर्पितः ॥ तं वृक्षं नीयमानस्तु श्लोकानेतांस्तदापठत् ॥ ९९ ॥ निर्दयत्वं तथा द्रोहं कुटिलत्वं
विशेषतः ॥ अशौचं निर्घृणत्वं च स्त्रीणां दोषाः स्वभावजाः ॥ ६० ॥ अन्तर्विषमया ह्येता बहिर्भागे मनोरमाः ॥ गुञ्जाफलसमाकारा योषितः सर्व
देव हि ॥ ६१ ॥ उशना वेद यच्छास्त्रं यच्च वेद बृहस्पतिः ॥ मन्वादयस्तथान्येऽपि स्त्रीबुद्धेस्तत्र किंच न ॥ ६२ ॥ पीयूषमधरे वासं हृदि हालाहलं
विषम् ॥ आस्वाद्यतेऽधरस्तेन हृदयं च प्रपीडयते ॥ ६३ ॥ अलक्तको यथा रक्तो नरः कामी तथैव च ॥ हृतसारस्तथा सोऽपि पादमूले निपा
त्यते ॥ ६४ ॥ संसारविषवृक्षस्य कुकर्मकुसुमस्य च ॥ नरकार्तिफलस्योक्ता मूलमेषा नितंबिनी ॥ ६५ ॥ कस्य नो जायते त्रासो दृष्ट्वा दूरा
दपि स्त्रियम् ॥ ६६ ॥ संसारभ्रमणं नारी प्रथमेऽपि समागमे ॥ वह्निप्रदक्षिणन्यायव्याजेनैव प्रदर्शयेत् ॥ ६७ ॥ एतास्तु निर्घृणत्वेन निर्दय
त्वेन नित्यशः ॥ विशेषाज्जाड्यकृत्येन दूषयंति कुलत्रयम् ॥ ६८ ॥ कुलत्रयगृहं कीर्त्या निजया धवलीकृतम् ॥ कृष्णं करोत्यकृ
त्येन नारी दीपशिखेव तु ॥ ६९ ॥ धर्मवृक्षस्य वाताली चित्तपद्मशशिप्रभा ॥ सृष्टा कामार्णवग्राही केन मोक्षदृढार्गला ॥ ७० ॥
कारा संतानकूटस्य संसारवनवागुरा ॥ स्वर्गमार्गमहागर्ता पुंसां स्त्री वेधसा कृता ॥ ७१ ॥ वेधसा बंधनं किंचिन्नृणामन्यदपश्यता ॥ स्त्रीरूपेण
ततः कोऽपि पाशोऽयं सुदृढः कृतः ॥७२॥ इत्येवं बहुधा सोऽपि विललाप सुदुःखितः ॥ स्त्रीचिन्तां बहुधा कृत्वा आत्मानं चाप्यगर्हयत् ॥ ७३ ॥
अहो कुबुद्धिना नैव लब्धं संसारजं फलम् ॥ न कदाचिन्मया दत्तं तृष्णाव्याकुलचेतसा ॥ ७४ ॥ ऐश्वर्येऽपि स्थिते भूरि न मया सुकृतं कृतम् ॥
कदाचिन्नैव जप्तं च न हुतं च हुताशने ॥ ७५ ॥ अथवा सत्यमेवोक्तं केनापि च महात्मना ॥ कृपणेन समो दाता न भूतो न भविष्यति ॥ अस्पृ
ष्ट्वापि च वित्तं स्वं यः परेभ्यः प्रयच्छति ॥ ७६ ॥ शरणं किं प्रपन्नानां विषवन्मारयंति किम् ॥ न दीयंते न भुज्यंते कृपणेन धनानि च ॥ ७७ ॥
दानं भोगो नाशस्तिस्रो गतयो भवंति वित्तस्य ॥ यो न ददाति न भुंक्ते तस्य तृतीया गतिर्भवति ॥ ७८ ॥ धनिनोप्यदानविभवा गण्यंते धुरि
दरिद्राणाम् ॥ नहि हंति यत्पिपासामतः समुद्रोऽपि मरुरेव ॥ ७९ ॥ अत्युपयुक्ताः सद्भिर्गतागतैरहरहः सुनिर्विण्णाः ॥ कृपणजनसंनिकाशं संप्रा

१ रौद्रम्—इ० पा० । २ केन—ब्रह्मणा—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्यार्थाः स्वपंतीह ॥ ८० ॥ प्राप्तान्न लभंते ते भोगान्भोक्तुं स्वकर्मणा कृपणाः ॥ मुखपाकः किल भवति द्राक्षापाके बलिभुजानाम् ॥ ८१ ॥ दातव्यं भोक्तव्यं सति विभवे संचयो न कर्तव्यः ॥ पश्येह मधुकरीणां संचितमर्थं हरंत्यन्ये ॥ ८२ ॥ याचितं द्विजवरे न दीयते संचितं क्रतुवरे न योज्यते ॥ तत्कदर्यपरिरक्षितं धनं चौरपार्थिवगृहेषु भुज्यते ॥ ८३ ॥ त्यागो गुणो वित्तवतां वित्तं त्यागवतां गुणः ॥ परस्परवियुक्तौ तु वित्तत्यागौ विडम्बनम् ॥ ८४ ॥ किं तया क्रियते लक्ष्म्या या वधूरिव केवला ॥ या न वेश्येव सामान्या पथिकैरपि भुज्यते ॥ ८५ ॥ अर्थोष्मणा भवेत्प्राणो भवेद्रक्ष्यैर्विना नृणाम् ॥ यतः संधार्यते भूमिः कृपणस्योष्मणा हि सा ॥ ८६ ॥ कृपणानां प्रसादेन शेषो धारयते महीम् ॥ यतस्ते भूगतं वित्तं कुर्वते तस्य चोष्मणा ॥ ८७ ॥ एवं बहुविधा वाचः प्रलपन्मणिभद्रकः ॥ नीत्वा तैः पार्थिवोद्दिष्टैः पुरुषैः परुषाक्षरम् ॥ बहुधा प्रलपंश्चैव कृतः शाखावलंबनः ॥ ८८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये मणिभद्रोपाख्याने मणिभद्रनिधनवर्णनंनामाष्टपंचाशदुत्तरशततमोऽध्यायः ॥ १५८ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ पुष्पोऽपि तां समादाय माहिकाख्यां वरांगनाम् ॥ स तदा प्रययौ हृष्टो मणिभद्रस्य मंदिरम् ॥ १ ॥ शंखतूर्यनिनादेन सर्वैस्तैः स्वजनैर्वृतः ॥ न कस्य तत्र संभूतो विकल्पस्तत्समुद्भवः ॥ २ ॥ भास्करस्य प्रसादेन तथैवान्यस्य कर्हिचित् ॥ सोऽपि मंदिरमासाद्य यथात्मपितृसंभवम् ॥ ३ ॥ उपविश्य ततो मध्ये बन्धून्सर्वान्समाह्वयत् ॥ अद्य तावद्दिने मह्यं तुलाग्रं कमला श्रिता ॥ ४ ॥ चलितापि पुनश्चास्याः सुपत्न्या वाक्यतः स्थिता ॥ कियंतं चैव कालं मे कार्पण्यं महदास्थितम् ॥ ५ ॥ ज्ञातमद्य चला लक्ष्मीस्तेन त्यक्तं सुदूरतः ॥ तस्माद्बंधुजनैः सार्धं देवैर्विप्रैश्च कृत्स्नशः ॥ संविभक्तां करिष्यामि सत्येनात्मानमालभे ॥ ६ ॥ एवमुक्त्वा ततः सर्वान्समाहूय पृथक्पृथक् ॥ स नामभिर्ददौ वस्त्रं भूषणानि यथार्हतः ॥ ७ ॥ ततो वेदविदो विप्रान्समाहूय स नामभिः ॥ एकैकस्य ददौ वित्तं सवस्त्रं श्रद्धयान्वितः ॥ ८ ॥ ततस्तु नर्तकेभ्यश्च दीनांधेभ्यो विशेषतः ॥ ददौ भोज्यं समिष्टान्नं सवस्त्रं च द्विजोत्तमाः ॥ ९ ॥ ततस्तु स्वयमेवान्नं बुभुजे भार्यया सह ॥ विसृज्य तान्समायातान्स्वजनान्ब्राह्मणैः सह ॥ १० ॥ एवं तेन तदा प्राप्तं वित्तं च परसंभवम् ॥ बुभुजे स्वेच्छया नित्यं तदा भार्यासमन्वितः ॥ ११ ॥ इति श्रीस्कांदे महापुराण एकाशीति साहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये पुष्पविभवप्राप्तिवर्णनंनामैकोनषष्ट्युत्तरशततमोऽध्यायः ॥ १५९ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ अन्यस्मिन्नहनि प्राप्ते रहस्युक्तः स भार्यया ॥ रात्रौ प्रसुप्तः पार्श्वे च पादौ संस्पृश्य तत्क्षणात् ॥ १ ॥ त्वं तावन्मम भर्तासि यावज्जीवमसंशयम् ॥ तद्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



दस्त्र विभोऽस्माकं त्वदर्थं स मयोज्झितः ॥ २ ॥ इन्द्रजालमिदं किं ते किं वा मंत्रप्रसाधनम् ॥ देवानां वा प्रसादोऽयं यत्त्वं चैतादृशः स्थितः ॥ ३ ॥ मया त्वं हि तदा ज्ञातः प्रथमेऽपि दिने स्थिते ॥ यदा संभूषिता वस्त्रैस्तथा वस्तुविभूषणैः ॥ ४ ॥ यद्यहं तव वार्तां च सर्वां कपटसंभवाम् ॥ कथयामि द्वितीयस्य तत्ते पादौ स्पृशाम्यहम् ॥ ५ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्तो विहस्योच्चैः स तदा ब्राह्मणोत्तमाः ॥ तामालिंग्य ततः प्राह वचनं मधुराक्षरम् ॥ ६ ॥ साधु[1] प्रिये त्वया ज्ञातं सर्वं मम विचेष्टितम् ॥ अहं स विप्रः सुभगे मणिभद्रेण यः पुरा ॥ ७ ॥ विडंबितो मुखं पश्यंस्त्वदीयं चंद्रसन्निभम् ॥ चमत्कारपुरं गत्वा मया चाराधितो रविः ॥ तेन तुष्टेन मे दत्तं तद्रूपं ज्ञानमेव च ॥८॥ ॥ ॥ माहिकोवाच ॥ ॥ त्वदीयदर्शनेनाहं कामदेववशं गता ॥ ९ ॥ तस्मादाराधयिष्यामि तं गत्वा दिननायकम् ॥ येन ते तादृशं भूयः प्रतुष्टो विदधाति सः ॥ १० ॥ किं मे चैतेन रूपेण तारुण्येनापि च प्रभो ॥ यत्ते तथाविधं रूपं संभजामि दिवानिशम् ॥ ११ ॥ ॥ सूत उवाच ॥ ॥ तच्छ्रुत्वा गुटिकां पुष्पः समादाय मुखान्ततः ॥ दधार तादृशं रूपं यादृग्दृष्टं पुरा तया ॥ १२ ॥ ततः सा हर्षिता माही पुलकेन समन्विता ॥ तमालिंग्याभजद्गाढं वाक्यमेतदुवाच ह ॥ १३ ॥ अद्य मे सफलं जन्म यौवनं रूपमेव च ॥ यत्त्वं हृद्वांछितः कांतः प्रलब्धो मदनोपमः ॥ १४ ॥ एतावंति दिनान्येव न मया कामजं सुखम् ॥ अपि स्वल्पतरं लब्धं कथंचिद्वृद्धसेवया ॥ १५ ॥ भजस्व स्वेच्छया विप्र दासी तेऽहं व्यवस्थिता ॥ १६ ॥ ॥ पुष्प उवाच ॥ ॥ प्रविशामि किमंगेषु भवन्तीं किं मिलाम्यहम् ॥ प्रिये चिरेण लब्धासि न जाने करवाणि किम् ॥ १७ ॥ एवमुक्त्वा ततस्तौ च मैथुनाय कृतक्षणौ ॥ प्रवृत्तौ ब्राह्मणश्रेष्ठाः कामदेववशंगतौ ॥ १८ ॥ अथ रात्र्यां व्यतीतायामुदिते सूर्यमण्डले ॥ वक्त्रे तां गुटिकां कृत्वा स पुष्पस्तादृशोऽभवत् ॥ १९ ॥ एवं तस्य स्थितस्यात्र महान्कालो व्यजायत ॥ पुत्राः पौत्रास्तथा जाताः कन्यकाश्च तथैव च ॥ २० ॥ स वृद्धत्वं यदा प्राप्तो जराविप्लुवतां गतः ॥ तदा स चिन्तयामास मया पापं महत्कृतम् ॥ २१ ॥ मणिभद्रो वराकोऽसौ मिथ्याचारेण घातितः ॥ तस्य भार्या हृता चैव प्रसूतिं च नियोजिता ॥ २२ ॥ हाटकेश्वरजं क्षेत्रं तस्माद्गत्वा करोम्यहम् ॥ पुरश्चरणसंज्ञं च येन शुद्धिः प्रजायते ॥ २३ ॥ एवं स निश्चयं कृत्वा पुष्पश्चित्ते निजे तदा ॥ असंख्यं वित्तमादाय चमत्कारपुरं गतः ॥ ॥ २४ ॥ पुत्रेभ्योऽपि यथासंख्यं दत्त्वा चैव पृथक्पृथक् ॥ प्रासादं कारयामास तस्य सूर्यस्य शोभनम् ॥ २५ ॥ यस्मिन्सिद्धिं गतः

१ साधुसाधु प्रिये ज्ञातम्-इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सोऽत्र याज्ञवल्क्यप्रतिष्ठिते ॥ ततो मध्यममाहूय प्रणिपत्याभिवाद्य च ॥ सोऽब्रवीद्ब्राह्मणानां मे चातुश्चरणमानय ॥ २६ ॥ येनाहमग्रतो भूत्वा
प्रायश्चित्तं विशुद्धये ॥ पुरश्चरणसंज्ञं तु प्रार्थयामि यथाविधि ॥ २७ ॥ इति स्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखंडे हाट
केश्वरक्षेत्रमाहात्म्ये पुष्पस्य पापक्षालनार्थं हाटकेश्वरक्षेत्रगमनपुरश्चरणार्थब्राह्मणामन्त्रणवर्णनंनाम षष्ट्यधिकशततमोऽध्यायः ॥ १६० ॥ ॥ छ ॥
॥ ॥ सूत उवाच ॥ ॥ अथ तेन द्विजाः सर्वे ब्रह्मस्थाने निवेशिताः ॥ चातुश्चरणसंज्ञाश्च ततस्तस्य निवेशिताः ॥ १ ॥ सोऽपि केशान्परि
त्यज्य सर्वगात्रसमुद्भवान् ॥ निजपत्न्या समोपेतः प्रणम्य च द्विजोत्तमान् ॥ २ ॥ कृतांजलिपुटो भूत्वा वाक्यमेतदुवाच ह ॥ भास्करस्यास्य
विहितः प्रासादोयं मया द्विजाः ॥ ३ ॥ पुष्पादित्य इति ख्यातिं प्रयातु भुवनत्रये ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ न वयं याज्ञवल्क्यस्य
कीर्तिं नेष्यामहे क्षयम् ॥ ४ ॥ प्रायश्चित्तं प्रदास्यामश्चित्तस्य हृदयंगमम् ॥ अन्ये च ब्राह्मणाः प्रोचुः केचिन्मध्यस्थवृत्तयः ॥ ५ ॥
वृत्त्यर्थमस्य देवस्य लक्षं होमेऽत्र कल्प्यताम् ॥ लक्षं तु सर्वविप्राणां प्रायश्चित्तविशुद्धये ॥ ६ ॥ ॥ पुष्प उवाच ॥ ॥ तस्मात्सर्वे द्विजश्रेष्ठा
मन्नाम्ना कीर्तयंत्विमम् ॥ पुष्पादित्यमिति ख्यातिं कीर्तयंतु तथानिशम् ॥ ७ ॥ अनया भार्यया मह्यं मान्या या स्थापिता पुरा ॥ दुर्गाऽस्याश्चात्र
नाम्ना वै भूयात्ख्याताऽत्र सत्पुरे ॥ ८ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ दुःशीलेन पुराऽकारि प्रासादो हरसंभवः ॥ दुर्वासःस्थापितस्यापि भवद्भिस्तुष्ट
मानसैः ॥ ९ ॥ तथाप्यस्य तु दीनस्य प्रासादः क्रियतां द्विजाः ॥ १० ॥ नाममात्रेण देवस्य दुःशीलेन यथा पुरा ॥ अनेनाराधितः पूर्वं स्वमां
सैरेष भास्करः ॥ ११ ॥ तस्मान्न क्षतिरस्याथ दत्ते नाम्नि यथा पुरा ॥ नाम्ना माहिकया नाम माहीत्येव च सा भवेत् ॥१२॥ ॥ सूत उवाच ॥ ॥
पुष्पेण दाने दत्तेऽथ संमतेनाग्रजन्मनाम् ॥ मध्यगेन कृतं नाम पुष्पादित्य इति श्रुतम् ॥ १३ ॥ तत्पत्न्या चापि या तत्र दुर्गा देवी द्विजोत्तमाः ॥
नाम्ना माहिकया नाम माहीत्येव च साऽभवत् ॥ १४ ॥ ॥ सूत उवाच ॥ ॥ एतद्वः सर्वमाख्यातं यत्पृष्टोस्मि द्विजोत्तमाः ॥ पुष्पा
दित्यो यथा जातो याज्ञवल्क्यप्रतिष्ठितः ॥ १५ ॥ अद्यापि कलिकाले स दृष्टो भक्त्या सुरेश्वरः ॥ नाशयेद्दिनजं पापं नराणां नात्र संशयः ॥
॥ १६ ॥ तथा च सप्तमीयुक्ते रवेर्वारे द्विजोत्तमाः ॥ अष्टोत्तरशतं यावत्फलहस्तः करोति यः ॥ प्रदक्षिणां च सद्भक्त्या स लभेद्वांछितं फलम् ॥१७॥
माहीकामपि यो दुर्गां नित्यमेव प्रपश्यति ॥ न स पश्यति कष्टानि तस्मिन्नहनि कर्हिचित् ॥ १८ ॥ चैत्रशुक्लचतुर्दश्यां यस्तां पूजयते नरः ॥

१ स्वयंभुवा—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तस्य संवत्सरंयावन्नापत्संजायते क्वचित् ॥ १९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये पुष्पादित्यमाहात्म्यवर्णनंनामैकषष्ट्युत्तरशततमोऽध्यायः ॥ १६१ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एवं नाम्नि कृते तस्य भास्करस्यांशुमालिनः ॥ द्विजानां पुरतः पुष्पः कथयामास चेष्टितम् ॥ १ ॥ आत्मीयं कुत्सितं तेषां मणिभद्रवधो यथा ॥ विहितो विहिता पत्नी तस्य व्याजेन कृत्स्नशः ॥ २ ॥ ततस्ते ब्राह्मणाः प्रोचुस्तच्छ्रुत्वा कोपसंयुताः ॥ सीत्कारान्प्रचुरान्कृत्वा धिक्त्वां पाप प्रगम्यताम् ॥ ३ ॥ आत्मीयं हेम चादाय न ते शुद्धिर्भविष्यति ॥ ४ ॥ ब्रह्मघ्नस्त्वं यतः प्रोक्तास्त्रयो वर्णा द्विजोत्तमाः ॥ ब्राह्मणः क्षत्रियो वैश्यः स्मृतिशास्त्रप्रपाठकैः ॥ ५ ॥ ॥ सूत उवाच ॥ ॥ ततस्तु दुःखितः पुष्पो बाष्पसंपूरितेक्षणः ॥ ब्रह्मस्थानाद्विनिर्गत्य प्ररुरोद सुदुःखितः ॥ ६ ॥ रोरूयमाणमालोक्य ततस्ते नागरा द्विजाः ॥ दयां च महतीं कृत्वा ततः प्रोचुः परस्परम् ॥ ७ ॥ नानाविधानि शास्त्राणि स्मृतयश्च पृथग्विधाः ॥ पुराणानि समस्तानि वीक्षध्वं सुसमाहिताः ॥ ८ ॥ कुत्रचित्क्वचिदेवास्य कथंचिच्छुद्धिरस्ति चेत् ॥ न तच्च विद्यते शास्त्रमस्मिन्स्थाने न चास्ति यत् ॥९॥ न स्मृतिर्न पुराणं च वेदांतं वा द्विजोत्तमाः ॥ न चास्ति ब्राह्मणः सोऽत्र सर्वज्ञप्रतिमो न यः ॥ १० ॥ तस्माच्चिन्तयत क्षिप्रमस्य शुद्धिप्रदं हि यत् ॥ तच्च प्रमाणतां नीत्वा शुद्धिरस्य प्रदीयते ॥ ११ ॥ अथैको ब्राह्मणः प्राह चंडशर्मेति[1] विश्रुतः ॥ मया स्कांदपुराणेऽस्मिन्पुरश्चरणसंश्रिता ॥१२॥ पठिता सप्तमी या च पुरश्चरणसंज्ञिता ॥ पुरश्चरणतः पापं विहितं तु यथा व्रजेत् ॥ १३ ॥ सम्यक्कृथापि विप्रेंद्रास्ततो यांति न संशयः ॥ तस्मात्करोतु तामेष पुरश्चरणसप्तमीम् ॥ १४ ॥ अपरं भूभुजादेशान्मणिभद्रो निपातितः ॥ वधकैस्तस्य तत्पापं यदि पापं प्रजायते ॥ १५ ॥ राजा भूत्वा न यः सम्यग्विचारयति वादिनम् ॥ तस्य तत्पातकं घोरं राज्ञश्चैव प्रजायते ॥ १६ ॥ तथास्य पत्न्यास्तत्पापं जानंत्या यत्तयोदितम् ॥ मत्पित्रा ब्राह्मणैर्दत्तोऽयं पुरा वह्निसंनिधौ ॥ १७ ॥ विडंबितेन चानेन कृतप्रतिकृतं कृतम् ॥ तस्मान्न चास्य दोषः स्याद्यतः प्रोक्तं मुनीश्वरैः ॥ ॥ १८ ॥ कृते प्रतिकृतं कुर्याद्धिंसने प्रतिहिंसनम् ॥ न तत्र जायते दोषो[2] यो दुष्टे दुष्टमाचरेत् ॥ १९ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ यद्येवं वद विप्रास्य पुरश्चरणसंज्ञिताम् ॥ सप्तमीमद्य विप्रेंद्र वराकस्य विशुद्धये ॥ २० ॥ ॥ सूत उवाच ॥ ॥ अथास्य कथयामास सप्तमीं तां द्विजोत्तमाः ॥ चंडशर्माभिधानस्तु कृत्वा तस्योपरि कृपाम् ॥ २१ ॥ तेनापि विहिता सम्यग्यथा तस्य मुखाच्छ्रुता ॥ ततः संवत्सरस्यांते विपाप्मा समपद्यत ॥ २२ ॥

१ चन्द्रशर्मेति—इ० पा० । २ पापम्—इति शेषः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

॥ ॥ ऋषय ऊचुः ॥ ॥ पुरश्चरणसंज्ञां तु सप्तमीं वद सूतज ॥ विधिना केन कर्तव्या कस्मिन्काल उपस्थिते ॥ २३ ॥ ॥ सूत उवाच ॥ ॥ अहं वः कीर्तयिष्यामि रोहिताश्वस्य भूपतेः ॥ मार्कंडेन पुरा प्रोक्ता पृच्छ्यमानेन भक्तितः ॥ २४ ॥ सप्तकल्पस्मरो[1] विप्रा मार्कंडाख्यो महामुनिः ॥ रोहिताश्वेन पृष्टः स हरिश्चंद्रात्मजेन च ॥ २५ ॥ ॥ रोहिताश्व उवाच ॥ ॥ अज्ञानाज्ज्ञानतो वापि यत्पापं कुरुते नरः ॥ उपायं तस्य नाशाय किंचिन्मे वद सन्मुने ॥ २६ ॥ ॥ मार्कंडेय उवाच ॥ ॥ मानसं वाचिकं चैव कायिकं च तृतीयकम् ॥ त्रिविधं पातकं लोके नराणामिह जायते ॥ २७ ॥ तत्रोपाया विनाशाय तस्य संपरिकीर्तिताः ॥ तानहं ते प्रवक्ष्यामि शृणुष्व नृपसत्तम ॥ २८ ॥ मानसं चैव यत्पापं नराणामिह जायते ॥ पश्चात्तापे कृते तस्य तत्क्षणादेव नश्यति ॥ २९ ॥ वाचिकं चैव यत्पापं नाभुक्त्वा तत्प्रणश्यति ॥ पुरश्चरणबाह्यं तु सत्यमेतन्मयोदितम् ॥ ॥ ३० ॥ निवेद्य ब्राह्मणेंद्राणां तदुक्तं च समाचरेत् ॥ प्रायश्चित्तं यथोक्तं तु ततः शुद्धिमवाप्नुयात् ॥ ३१ ॥ अथवा पार्थिवो ज्ञात्वा कुरुते तस्य निग्रहम् ॥ तेन शुद्धिमवाप्नोति यद्यपि स्यात्स किल्बिषी ॥ ३२ ॥ लज्जया ब्राह्मणेंद्राणां यो न ब्रूते कथंचन ॥ न च राजा विजानाति शरीरस्थेन यो म्रियेत ॥ तस्य निग्रहकर्ता च स्वयं वैवस्वतो यमः ॥ ३३ ॥ तस्मात्सर्वप्रयत्नेन कृत्वा पापं विजानता ॥ प्रायश्चित्तं तु कर्तव्यं यथोक्तं ब्राह्मणोदितम् ॥ ३४ ॥ ॥ रोहिताश्व उवाच ॥ ॥ सर्वेषामेव पापानां विहितानां मुनीश्वर ॥ किंचिद्व्रतं समाचक्ष्व दानं वा होममेव वा ॥ विपाप्मा जायते येन पुरश्चरणवर्जितम् ॥ ३५ ॥ नित्यं पापानि कुरुते नरः सूक्ष्माणि सर्वतः ॥ प्रायश्चित्तानि सर्वेषां कर्तुं शक्तिः कथं भवेत् ॥ ३६ ॥ ॥ ॥ मार्कंडेय उवाच ॥ ॥ अस्ति राजन्व्रतं पुण्यं पुरश्चरणसंज्ञितम् ॥ पुरश्चरणसंज्ञा तु सप्तमी सूर्यवल्लभा ॥ ३७ ॥ यया संचीर्णया राजन्कायस्थो यमसंभवः ॥ विचित्रो मार्जयेत्पापं कृतं जन्मनि संचितम् ॥ ३८ ॥ तस्मात्कुरु महाराज तथाशु वचनं मम ॥ येन वा मुच्यते पापात्सर्वस्मात्कायसंभवात् ॥ ३९ ॥ ॥ रोहिताश्व उवाच ॥ ॥ पुरश्चरणसंज्ञा तु सप्तमी मुनिसत्तम ॥ विधिना केन कर्तव्या कस्मिन्काले वद स्व मे ॥ ४० ॥ ॥ मार्कंडेय उवाच ॥ ॥ माघमासे सिते पक्षे मकरस्थे दिवाकरे ॥ सूर्यवारेण सप्तम्यां व्रतमेतत्समाचरेत् ॥ ४१ ॥ पाखंडैः पतितैः सार्धं तस्मिन्नहनि नालपेत् ॥ भक्षयित्वा नृपश्रेष्ठ प्रभाते दन्तधावनम् ॥ मंत्रेणानेन पश्चाच्च कर्तव्यो नियमो नृप ॥ ४२ ॥ पुरश्चरणकृत्यायां सप्तम्यां दिवसाधिप ॥ उपवासं करिष्यामि अद्य त्वं शरणं मम ॥४३॥ ततोऽपराह्णसमये स्नात्वा धौतांबरः शुचिः ॥ प्रतिमां पूजयेद्भक्त्या दिनाधि

१ सप्तकल्पचरः—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पसमुद्भवाम् ॥४४॥ रक्तैः पुष्पैर्महावीर पादार्घ्यं पूजयेत्ततः ॥ पतंगाय नमः पादौ मार्तंडायेति जानुनी ॥ ४५ ॥ गुह्यं दिवसनाथाय नाभिं द्वादश मूर्तये ॥ बाहू च पद्महस्ताय हृदयं तीक्ष्णदीधिते ॥ ४६ ॥ कंठं पद्मदलाभाय शिरस्तेजोमयाय च ॥ एवं संपूज्य विधिवद्रूपं कर्पूरमाददेत् ॥ ॥ ४७ ॥ गुडौदनं च नैवेद्यं रक्तवस्त्राभिवेष्टितम् ॥ रक्तसूत्रेण दीपं च तथैवारार्तिकं नृप ॥ ४८ ॥ शंखे तोयं समादाय रक्तचन्दनमिश्रितम् ॥ सफलं च ततः कृत्वा अर्घ्यं दद्यात्ततः परम् ॥ ४९ ॥ कुकृतं यत्कृतं किंचिदज्ञानाज्ज्ञानतोऽपि वा ॥ प्रायश्चित्तं कृतं देव ममार्घ्यश्च प्रगृह्यताम् ॥ ५० ॥ ततः संपूजयेद्विप्रं गन्धपुष्पानुलेपनैः ॥ दत्त्वा तु भोजनं तस्मै दक्षिणां च स्वशक्तितः ॥ प्राशनं कायशुद्ध्यर्थं पञ्चगव्यस्य चाचरेत् ॥ ५१ ॥ कृतांजलिपुटो भूत्वा समुद्वीक्ष्य दिवाकरम् ॥ दिवाकरं गतश्चैव मन्त्रमेतं[1] समुच्चरेत् ॥ ५२ ॥ इदं व्रतं मया देव गृहीतं पुरतस्तव ॥ अविघ्नं सिद्धिमायातु प्रसादात्तव भास्कर ॥ ५३ ॥ ततश्च फाल्गुने मासि संप्राप्ते मुनिसत्तम ॥ कुन्देन पूजयेद्देवं तेनैव विधिना ततः ॥ ५४ ॥ धूपं च गुग्गुलुं दद्यान्नैवेद्यं भक्तमेव च ॥ प्राशनं गोमयं प्रोक्तं सर्वपापविशुद्धये ॥ ५५ ॥ चैत्रे मासि तु संप्राप्ते सुरभ्या पूजयेद्धरिम् ॥ नैवेद्यं गुणिकाः प्रोक्ता धूपं सर्जरसोद्भवम् ॥ ५६ ॥ कुशोदकं च संप्राश्य कायशुद्धिमवाप्नुयात् ॥ वैशाखे किंशुकैः पूजां यथावच्च घृताशनैः ॥ ५७ ॥ नैवेद्यं च सुरामांसं धूपं च विनिवेदयेत् ॥ दधिप्राशनमेवात्र कर्तव्यं कायशुद्धये ॥ ५८ ॥ पुष्पपाटलया पूजा विधातव्या रवेर्नृप ॥ नैवेद्ये सक्तवः प्रोक्ताः प्राशनं च घृतं स्मृतम् ॥ ५९ ॥ कपिलाया महावीर सर्वपापविशुद्धये ॥ आषाढे मुनिपुष्पैश्च पूजयेद्भास्करं नृप ॥ ६० ॥ नैवेद्ये घारिका प्रोक्ता प्राशनं मधुसर्पिषोः ॥ धूपं चैवागरुं दद्यात्परया श्रद्धया युतः ॥ ६१ ॥ श्रावणे तु कदंबेन पूजनं तीक्ष्णदीधितेः ॥ नैवेद्ये मोदकाश्चैव तगरं धूपमाददेत् ॥ ६२ ॥ गोशृंगोदकमादाय[2] सद्यः पापात्प्रमुच्यते ॥ जात्या भाद्रपदे पूजा क्षीरं नैवेद्यमाददेत् ॥ ६३ ॥ धूपं नखसमुद्भूतं प्राशनं क्षीरमेव च ॥ आश्विने कमलैः पूजा नैवेद्ये घृतपूरिका ॥ ६४ ॥ धूपं कुंकुमजं प्रोक्तं कर्पूरप्राशनं स्मृतम् ॥ ६५ ॥ तुलस्या कार्तिके पूजा भास्करस्य प्रकीर्तिता ॥ नैवेद्ये चैव खंडाख्यं धूपं कौसुंभिकं नृप ॥ ६६ ॥ प्राशनं च लवंगाख्यं सर्वपापविशोधनम् ॥ भृंगराजेन पूजा च सौम्ये[3] मासि समाचरेत् ॥ ६७ ॥ नैवेद्ये फेणिका देया धूपं गुडसमुद्भवम् ॥ कंकोलप्राशनं चैव भास्करस्य प्रतुष्टये ॥ ६८ ॥ शतपत्रिकया पूजा पौषे मासि रवेः स्मृता ॥ सहजं धूपमादिष्टं नैवेद्ये शुष्कली तथा ॥ ६९ ॥ प्राशने पूर्वमुक्तानि सर्वाण्येव समाचरेत् ॥ समाप्तौ च ततो दद्यात्षड्भागं

१ एतम्—वक्ष्यमाणम्—इत्यर्थः । २ गोमयोदकम्—इ० पा० । ३ सौम्ये मासि—मार्गशीर्षे मासि—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृहसंभवम् ॥ ७० ॥ ब्राह्मणाय नृपश्रेष्ठ सर्वपापविशुद्धये ॥ इष्टभोज्यं ततः कार्यं स्वशक्त्या पार्थिवोत्तम ॥ ७१ ॥ एवं तु कुरुते योऽत्र सप्तमीं भास्करोद्भवाम् ॥ सर्वपापविनिर्मुक्तो निर्मलत्वं स गच्छति ॥ ७२ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ एवं पुरा वै कथिता रोहिताश्वाय धीमते ॥ मार्कंडेन महाभाग तस्मात्त्वमपि तां कुरु ॥ ७३ ॥ येन संजायते सम्यक्पुरश्चरणमेव ते ॥ ७४ ॥ ॥ सूत उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा पुष्पोऽपि द्विजसत्तमाः ॥ तां चक्रे सप्तमीं हृष्टो यथा तेन निवेदिता ॥ ७५ ॥ षड्भागं प्रददौ तस्मै ब्राह्मणाय महात्मने ॥ स्ववित्तस्य गृहस्थस्य कुप्याकुप्यस्य कृत्स्नशः ॥ ७६ ॥ सोऽपि जग्राह तद्वित्तं प्रहृष्टेनांतरात्मना ॥ सुवर्णमणि रत्नानि संख्यया परिवर्जितम् ॥ ७७ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये पुरश्चरणसप्तमीव्रतविधानवर्णनंनाम द्विपष्ट्युत्तरशततमोऽध्यायः ॥ १६२ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ अथ ते नागराः सर्वे दृष्ट्वा तद्वित्तभाजनम् ॥ न केनापि ग्रहीतव्यं सर्वान्[१]कामान्निरस्य च ॥ १ ॥ ततस्ते समयं कृत्वा समानीय च मध्यगम् ॥ तस्यास्येन ततः प्रोचुर्ब्रह्मस्थाने व्यवस्थिताः ॥ २ ॥ अनेन लोभयुक्तेन तिरस्कृत्य द्विजोत्तमान् ॥ पुष्पवित्तमुपादाय प्रायश्चित्तं प्रकीर्तितम् ॥ ३ ॥ तथा चैव तु षड्भागो गृहीतो विभवस्य च ॥ तस्मादेष समस्तानां बाह्यभूतो भविष्यति ॥ ४ ॥ नागराणां द्विजेंद्राणां यथान्यः प्राकृतस्तथा ॥ ५ ॥ अद्यप्रभृति चानेन यः संबंधं करिष्यति ॥ सोऽपि बाह्यस्तु सर्वेषां नागराणां भविष्यति ॥ ६ ॥ भोजनं वाथ पानीयं योऽस्य सद्मनि कर्हिचित् ॥ करिष्यति स चाऽप्येवं पतितः संभविष्यति ॥ ७ ॥ एवमुक्त्वा ततस्तेन दत्तं तालत्रयं द्विजाः ॥ ब्रह्मस्थाने द्विजश्रेष्ठाः कृत्वा पुष्प[२]समं च तम् ॥ ८ ॥ अथ ते ब्राह्मणाः सर्वे जग्मुः स्वंस्वं निवेशनम् ॥ चंडशर्मा[३] स चोद्विग्नः पुष्पपार्श्वं तदा गतः ॥ ९ ॥ एतेषामेव सर्वेषां संमतेन मया तव ॥ प्रायश्चित्तं तदा दत्तं तथापि पतितः कृतः ॥ १० ॥ तस्मादहं पतिष्यामि सुसमिद्धे हुताशने ॥ नैव जीवितुमिच्छामि स्वजनैः परिवर्जितः॥ ११ ॥ ॥ पुष्प उवाच ॥ ॥ न विषादस्त्वया कार्यः कार्येऽस्मिन्द्विजसत्तम ॥ वित्तार्थं दूषितस्त्वं हि यतो ब्राह्मणसत्तमैः ॥ १२ ॥ नागरांस्तोषयिष्यामि तानहं विविधैर्धनैः ॥ याचयिष्यंति यन्मात्रं तव गात्रविशुद्धये ॥ १३ ॥ तावन्मात्रं प्रदास्यामि तेभ्यो हि तव कारणात् ॥ एवमुक्त्वा समागत्य ब्रह्मस्थानं त्वरान्वितः ॥ ॥ १४ ॥ चातुश्चरणमानीय मध्यगास्येन सोऽब्रवीत् ॥ चंडशर्मा द्विजो यश्च मदर्थे पतितः कृतः ॥ १५ ॥ युष्माभिर्वित्तलोभेन तद्वित्तं वो ददा

१ सद्यो निष्कान्निरस्य च—इ०पा० । २ पुष्पसमम्—निर्माल्यवत्—इत्यर्थः । ३ चन्द्रशर्मा—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



म्यहम् ॥ समस्तं मद्गृहे यच्च क्रियतां वचनं द्विजैः ॥ १६ ॥ अथ ते कुपिताः प्रोचुः सर्व एव द्विजोत्तमाः ॥ सीत्कारान्विविधान्कृत्वा क्रोध संरक्तलोचनाः ॥ १७ ॥ धिग्धिक्पापसमाचार जिह्वा ते शतधा ततः ॥ किं न याति यदेवं त्वं प्रजल्पसि विगर्हितम् ॥ १८ ॥ पतितोऽयं कृतोऽस्माभिर्नैव वित्तस्य कारणात् ॥ प्रायश्चित्तं यतो दत्तमेकेनापि दुरात्मना ॥ १९ ॥ स्मृतयो दूषितास्तेन पुराणानि विशेषतः ॥ स्थानं चैवास्मदीयं च कर्म चैतत्प्रकुर्वता ॥ २० ॥ प्रायश्चित्तं प्रदातव्यं चतुर्भिरपरैः सह ॥ संमन्त्र्य मनुना प्रोक्तमेतदेव द्विजोत्तमाः ॥ २१ ॥ त्वदीयं पातकं चास्य शरीरेऽद्य व्यवस्थितम् ॥ एकाकिना यतो दत्तं तेनायं पतितः स्थितः ॥ २२ ॥ ॥ सूत उवाच ॥ ॥एवमुक्त्वा द्विजाः सर्वे जग्मुः स्वंस्वं निकेतनम् ॥ पुष्पोपि च समुद्विग्नो वैलक्ष्यं परमं गतः ॥ २३ ॥ जगामाथ निजावासं निःश्वसन्नुरगो यथा ॥ २४ ॥ ततः स चिन्तयामास यावन्नो साहसं कृतम् ॥ तावत्सिद्धिर्मनुष्याणां न कथंचित्प्रजायते ॥ २५ ॥ तस्मादहं करिष्यामि चण्डशर्मकृते महत् ॥ कृतघ्नता यथा न स्यात्प्रोक्तं चैव यतो बुधैः ॥ २६ ॥ ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते तथा ॥ निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः ॥ २७ ॥ एवं निश्चित्य मनसा सूर्यवारेण सप्तमी ॥ यदाऽऽयाता द्विजश्रेष्ठास्तदा चाष्टोत्तरं शतम् ॥ २८ ॥ प्रदक्षिणाः कृतास्तेन पुष्पादित्यस्य धीमता ॥ तीक्ष्णं शस्त्रं समादाय पूर्वोक्तविधिना ततः ॥ छित्त्वाछित्त्वा निजांगानि जुहुयाज्जातवेदसि ॥ २९ ॥ ततः पूर्णाहुतिं यावत्कायशेषेण यच्छति ॥ तावत्प्रत्यक्षतां गत्वा स प्रोक्तो भास्वता स्वयम् ॥ ३० ॥ पुष्प मा साहसं कार्षीः परितुष्टोऽस्मि तेऽनघ ॥ भूय एव महाभाग ब्रूहि किं ते ददाम्यहम् ॥ ३१ ॥ ॥ पुष्प उवाच ॥ ॥ चण्डशर्मा द्विजेन्द्रोऽयं मदर्थे पतितः कृतः ॥ समस्तैर्नागरैर्देव तं तैर्नय समानताम् ॥ ३२ ॥ शास्त्रं दृष्ट्वा प्रदत्तं मे प्रायश्चित्तं महात्मना ॥ तथापि दूषितः क्षुद्रैः समस्तैरसहिष्णुभिः ॥ ३३ ॥ ॥ भगवानुवाच ॥ ॥ एकस्यापि वचो नैव शक्यते कर्तुमन्यथा ॥ नागरस्य द्विजश्रेष्ठ समस्तानां च किं पुनः ॥ ३४ ॥ परमेष द्विजः पूतश्चंडशर्मा भविष्यति ॥ ब्राह्मोऽयं नागरः ख्यातः समस्ते धरणीतले ॥ ३५ ॥ एतस्य ये सुताश्चैव भविष्यंति धरातले ॥ विख्यातिं तेऽपि यास्यंति मान्याः पूज्या महीभृताम् ॥ ३६ ॥ ये चापि बांधवाश्चास्य सुहृदश्च समागमम् ॥ करिष्यंति समं तेऽपि भविष्यंति सुशोभनाः ॥ ३७ ॥ त्वं चापि मत्प्रसादेन संपूर्णांगो भविष्यसि ॥ ३८ ॥ एवमुक्त्वा



१ एतेषाम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहस्रांशुस्ततश्चादर्शनं गतः ॥ पुष्पोऽपि चाक्षतांगत्वं तत्क्षणात्समपद्यत ॥ ३९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये ब्राह्मनागरोत्पत्तिवृत्तांतवर्णनंनाम त्रिषष्ट्युत्तरशततमोऽध्यायः ॥ १६३ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एतस्मिन्नंतरे पुष्पः प्रहृष्टेनान्तरात्मना ॥ चंडशर्मगृहं गत्वा दिष्ट्यादिष्ट्येति चाब्रवीत् ॥ १ ॥ विवर्णवदनं दृष्ट्वा बाष्पपूर्णेक्षणं तदा ॥ बान्धवैः सहितं सर्वैर्दारैर्भृत्यैस्तथा सुतैः ॥ २ ॥ ॥ पुष्प उवाच ॥ ॥ तवार्थे च मया सूर्यः कायत्यागेन तोषितः ॥ पतितत्त्वं न ते काये तत्प्रसादाद्भविष्यति ॥ ॥ ३ ॥ तव पुत्राश्च पौत्राश्च ये भविष्यंति वंशजाः ॥ नागराणां च ते सर्वे भविष्यंति गुणाधिकाः ॥ ४ ॥ तस्मादुत्तिष्ठ गच्छामो नदीं पुण्यां सरस्वतीम् ॥ तस्यास्तटे निवासाय कृत्वा चैवाश्रमं द्विज ॥ ५ ॥ त्वया सह वसिष्यामि अहमेव न संशयः ॥ अस्ति मे विपुलं वित्तं ये चान्ये तेनुयायिनः ॥ ६ ॥ तान्सर्वान्पोषयिष्यामि त्यज्यतां मानसो ज्वरः ॥ तच्छ्रुत्वा चण्डशर्मा तु पुत्रैर्बंधुभिरन्वितः ॥ ७ ॥ सरस्वतीं समुद्दिश्य निष्क्रांतोनगरात्ततः ॥ स्थानं प्रदक्षिणीकृत्य नमस्कृत्य सुदुःखितः ॥ ८ ॥ बाष्पपूर्णेक्षणो दीन उत्तराभिमुखो ययौ ॥ पुष्पेण सहितश्चैव मुहुर्मुहुः प्रबोधितः ॥ ९ ॥ ततः सरस्वतीं प्राप्य पुण्यां शीतजलां नदीम् ॥ सेवितां मुनिसंघैस्तां लोलकल्लोलमालिनीम् ॥ १० ॥ तस्या दक्षिणकूले स निवासमकरोत्तदा ॥ पुष्पस्य मतिमास्थाय बन्धुभिः सकलैर्वृतः ॥ ११ ॥ तस्यासीन्नगरस्थस्य प्रतिज्ञा चण्डशर्मणः ॥ सप्तविंशतिभिर्लिंगैर्दृष्टैर्भोक्ष्याम्यहं सदा ॥ १२ ॥ तां च संस्मरतस्तस्य प्रतिज्ञां पूर्वसंचिताम् ॥ हृदयं दह्यते तस्य दिवानक्तं द्विजोत्तमाः ॥ १३ ॥ स च स्नात्वा सरस्वत्यां शुचिर्भूत्वा समाहितः ॥ षडक्षरस्य मन्त्रस्य जपं चक्रे पृथक्पृथक् ॥ १४ ॥ नाम चोच्चार्य लिंगस्य नमस्कारान्तमादधे ॥ कर्दमेन द्विजश्रेष्ठाः पंचांगुलशतेन च ॥ १५ ॥ संस्थाप्य पूजयेद्भक्त्या पुष्पधूपानुलेपनैः ॥ प्राणरुद्राञ्जपन्पश्चाच्छ्रद्धया परया युतः ॥ १६ ॥ दुःस्थितं सुस्थितं वापि शिवलिंगं न चालयेत् ॥ इति मत्वा द्विजेन्द्रोऽसौ नैव तानि विसर्जयेत् ॥ १७ ॥ उपर्युपरि तेषां च कर्दमेन द्विजोत्तमाः ॥ चक्रे लिंगानि नित्यं स सप्तविंशतिसंख्यया ॥ १८ ॥ ततः कालेन महता जातः कर्दमपर्वतः ॥ १९ ॥ अथ तुष्टो महादेवस्तस्य भक्त्यतिरेकतः ॥ निर्भिद्य धरणीपृष्ठं तस्य लिंगमदर्शयत् ॥ २० ॥ अब्रवीत्सादरं तं च मेघगम्भीरया गिरा ॥ चण्डशर्मन्प्रतुष्टोस्मि तव भक्त्याऽनया द्विज ॥ २१ ॥ तस्माल्लिंगमिदं नित्यं पूजयस्व प्रभक्तितः ॥ सप्तविंशतिलिंगानां यतः फलमवाप्स्यसि ॥ २२ ॥ अन्योपि च नरो भक्त्या यश्चैनं पूजयिष्यति ॥ सप्तविंशतिलिंगानां सोऽपि श्रेयोऽभिलप्स्यति ॥ २३ ॥ एवमुक्त्वा स भगवांस्ततश्चादर्शनं गतः ॥ चंडशर्मापि तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



हृष्टः पूजयामास तत्त्वतः ॥ २४ ॥ प्रासादं कारयामास तस्य लिंगस्य शोभनम् ॥ नाम चक्रे ततस्तस्य विचार्य च मुहुर्मुहुः ॥ २५ ॥ नगरस्थित लिंगानां यस्मात्संस्मरणात्स्थितः ॥ नागरेश्वरसंज्ञस्तु तस्मादेष भविष्यति ॥ २६ ॥ ॥ सूत उवाच ॥ ॥ एवं संस्थाप्य तल्लिंगं चंडशर्मा द्विजोत्तमाः ॥ आराधयामास तदा पुष्पधूपानुलेपनैः ॥२७॥ सप्तविंशतिलिंगानां प्राप्नोति च तथा फलम् ॥ पूजितानां द्विजश्रेष्ठा नगरे यानि तानि च ॥ ॥ २८ ॥ ततः कालेन महता नागरेश्वरतुष्टितः ॥ शिवलोकं गतः साक्षाद्यानमध्ये निवेशितः ॥२९॥ पुष्पोपि स्थापयामास पुष्पादित्यमथापरम् ॥ पुण्ये सरस्वतीतीरे ततः पूजापरोऽभवत् ॥ ३० ॥ तस्यापि दर्शनं गत्वा प्रीत्या वचनमब्रवीत् ॥ पुष्प तुष्टोस्मि भद्रं ते वरं प्रार्थय सुव्रत ॥ ३१ ॥ अदेयमपि दास्यामि तस्मात्प्रार्थय मा चिरम् ॥ ३२ ॥ ॥ पुष्प उवाच ॥ ॥ यदि तुष्टोऽसि मे देव यदि देयो वरो मम ॥ तद्देहि याचमानस्य मम यद्धृदि संस्थितम् ॥ ३३ ॥ चमत्कारपुरे देव तव या मूर्तयः स्थिताः ॥ द्वादशैव प्रमाणेन पूज्याः सर्वदिवौकसाम् ॥ ३४ ॥ तासां पूजाफलं कृत्स्नं संप्राप्नोतु नरो भुवि ॥ यः पूजयति मूर्तिं ते यैषा संस्थापिता मया ॥ ३५ ॥ नागरादित्य इत्येषा ख्याता भवतु भूतले ॥ येयं सरस्वतीतीरे प्रासादे स्थापिता मया ॥ ३६ ॥ ॥ सूत उवाच ॥ ॥ स तथेति प्रतिज्ञाय गतश्चादर्शनं रविः ॥ दीपवद्ब्राह्मणश्रेष्ठास्तदद्भुतमिवाभवत् ॥ ३७ ॥ ततः कालेन महता पुष्पोपि द्विजसत्तमाः ॥ सूर्यलोकमनुप्राप्तो विमानेन सुवर्चसा ॥ ३८ ॥ शाकम्भरीति विख्याता भार्याऽऽसीच्चंडशर्मणः ॥ तया संस्थापिता दुर्गा सरस्वत्याः शुभे तटे ॥ ३९ ॥ आराधिताऽथ सद्भक्त्या दिवानक्तं द्विजोत्तमाः ॥ ततस्तुष्टा वरं तस्याः सा ददौ द्विजसत्तमाः ॥४०॥ पुत्रि तुष्टास्मि भद्रं ते शाकंभरि प्रगृह्यताम् ॥ वरं यत्ते सदाभीष्टं मत्प्रसादादसंशयम् ॥४१॥ ॥ शाकम्भर्युवाच ॥ ॥ चतुःषष्टिगणा देवि मातॄणां ये व्यवस्थिताः॥ चमत्कारपुरे ख्याता हास्यात्तुष्टिं व्रजंति याः ॥ ४२ ॥ या रात्रौ बलिदानेन जाते वृद्धौ ततः परम् ॥ तत्सर्वं जायतां पुण्यं यस्ते मूर्तिं प्रपूजयेत्॥ ४३ ॥ अत्रागत्य नदीतीरे यैषा संस्थापिता मया ॥ ४४ ॥ ॥ श्रीदेव्युवाच ॥ ॥ आश्विनस्य सिते पक्षे महानवमिसंज्ञिते ॥ यो ममाग्रे समागत्य पूजयिष्यति भक्तितः ॥ ४५ ॥ तस्य कृत्स्नं फलं सद्यो भविष्यति न संशयः ॥ नागरस्य विशेषेण सत्यमेतन्मयोदितम् ॥ ४६ ॥ एवमुक्त्वा तु सा देवी ततश्चादर्शनं गता ॥ तस्या नाम्ना च सा देवी प्रोक्ता शाकम्भरी भुवि ॥ ४७ ॥



१ गंधपुष्पानुलेपनैः—इ० पा० । २ दत्त्वा—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृद्धेरनंतरं तस्या यः पूजां कुरुते नरः ॥ तस्य वृद्धेर्न विघ्नः स्यात्कदाचिद्द्विजसत्तमाः ॥ ४८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये नागरेश्वरनागरादित्यशाकम्भर्युत्पत्तिवर्णनंनाम चतुःषष्ट्युत्तरशततमोध्यायः ॥ १६४ ॥

॥ ॥ सूत उवाच ॥ ॥ ततःप्रभृति पुण्ये च सरस्वत्यास्तटे शुभे ॥ बाह्यानां नागराणां च स्थानं जातं महत्तरम् ॥ १ ॥ पुत्रपौत्रप्रवृद्धानां दौहित्राणां द्विजोत्तमाः ॥ चमत्कारपुरस्याग्रे यज्ज्ञातं विद्यया धनैः ॥ २ ॥ कस्यचित्त्वथ कालस्य विश्वामित्रेण धीमता ॥ शप्ता सरस्वती कोपात्कृता रुधिरवाहिनी ॥ ३ ॥ ततः संसेव्यते हृष्टै राक्षसैः सा दिवानिशम् ॥ गीतनृत्यपरैश्चान्यैर्भूतैः प्रेतैः पिशाचकैः ॥ ४ ॥ ततस्ते नागरा बाह्यास्तां त्यक्त्वा दूरतः स्थिताः ॥ कांदिशीकास्ततो याता भक्ष्यमाणास्तु राक्षसैः ॥ नर्मदायास्तटे पुण्ये मार्कण्डाश्रमसंनिधौ ॥ ५ ॥ ॥ ॥ ऋषय ऊचुः ॥ ॥ कस्मात्सरस्वती शप्ता विश्वामित्रेण धीमता ॥ महानद्या कोऽपराधस्तया तस्य विनिर्मितः ॥ ६ ॥ ॥ सूत उवाच ॥ ॥ आसीत्पुरा महद्वैरं विश्वामित्रवसिष्ठयोः ॥ ब्राह्मण्यस्य कृते विप्राः प्राणान्तकरणं महत् ॥ स सर्वैर्ब्राह्मणैः प्रोक्तो विश्वामित्रो महामुनिः ॥ ७ ॥ क्षत्रियोऽपि पुरस्कृत्य देवदेवं पितामहम् ॥ न चैकेन वसिष्ठेन तेनैतद्वैरमाहितम् ॥ ८ ॥ ॥ ऋषय ऊचुः ॥ ॥ क्षत्रियोऽपि कथं विप्रो विश्वामित्रो महामते ॥ वसिष्ठेन कथं नोक्तो यः प्रोक्तो ब्रह्मणा स्वयम् ॥ ९ ॥ एतन्नः सर्वमाचक्ष्व परं कौतूहलं स्थितम् ॥१०॥ ॥ सूत उवाच ॥ ॥ आसीत्पुरा ऋचीकाख्यो भृगुपुत्रो महामुनिः ॥ व्रताध्ययनसंपन्नः सुतपस्वी महायशाः ॥ ११ ॥ तीर्थयात्राप्रसंगेन स कदाचिन्मुनीश्वरः ॥ स्थानं भोजकटंनाम प्राप्तो गाधिमहीपतेः ॥ यत्र सा कौशिकीनाम नदी त्रैलोक्यविश्रुता ॥ १२ ॥ तस्यां स्नात्वा द्विजश्रेष्ठो यावत्तिष्ठति तीरगः ॥ समाधिस्थो जपं कुर्वन्संतर्प्य पितृदेवताः ॥ १३ ॥ तावत्तत्र समायाता राजकन्या सुशोभना ॥ सर्वलक्षणसम्पूर्णा सर्वैरेव गुणैर्युता ॥ ॥ १४ ॥ स तां संवीक्षते यावत्सर्वावयवशोभनाम् ॥ तावत्कामशरैर्व्याप्तः कर्तव्यं नाभ्यविंदत ॥ १५ ॥ ततः पप्रच्छ लोकान्स लब्ध्वा कृच्छ्रेण चेतनाम् ॥ कस्येयं कन्यका साध्वी किमर्थमिह चागता ॥ १६ ॥ क यास्यति वरारोहा सर्वं मे कथ्यतां जनाः ॥ १७ ॥ ॥ जना ऊचुः ॥ ॥ एषा गाधिसुतानाम ख्याता त्रैलोक्यसुन्दरी ॥ अन्तःपुरात्समायाता गौरीपूजनलालसा ॥ १८ ॥ वांछमाना सुभर्त्तारं सर्वैः समुदितं गुणैः ॥ प्रासादोऽयं स्थितो योऽत्र नदीतीरे बृहत्तरः॥ १९ ॥ उमा संतिष्ठते चात्र सर्वैः संपूजिता सुरैः ॥ एतां च स्नापयित्वेयं पूजयित्वा यथाक्रमम् ॥ २० ॥ नैवेद्यं विविधं दत्त्वा करिष्यति ततः परम् ॥ वीणाविनोदमात्रं च श्रुतिमार्गसुखावहम् ॥ २१ ॥ ततो यास्यति हर्म्यं स्वं मन्दीभूते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





च भास्करे ॥ ऋचीकस्तु तदाकर्ण्य लोकानां वचनं च यत् ॥ २२ ॥ ययौ गाधिगृहं शीघ्रं कामबाणप्रपीडितः ॥ तं दृष्ट्वा सहसा प्राप्तमृचीकं भृगुसत्तमम् ॥ संमुखः प्रययौ तूर्णं गाधिः पार्थिवसत्तमः ॥ २३ ॥ गृह्योक्तेन विधानेन कृत्वा चैवार्हणं ततः ॥ कृतांजलिपुटो भूत्वा वाक्यमेतदुवाच ह ॥ २४ ॥ निःस्पृहस्यापि ते विप्र किमागमनकारणम् ॥ तत्सर्वं मे समाचक्ष्व येन यच्छामि तेऽखिलम् ॥ २५ ॥ ॥ ऋचीक उवाच ॥ ॥ तव कन्याऽस्ति विप्रेंद्र वरार्हा वरवर्णिनी ॥ ब्राह्मोक्तेन विवाहेन तां मे देहि महीपते ॥ २६ ॥ एतदर्थमहं प्राप्तो गृहे तव स्मरार्दितः ॥ सा मया वीक्षिता राजन्गौरीपूजार्थमागता ॥ २७ ॥ ॥ सूत उवाच ॥ ॥ तच्छ्रुत्वा भयसंत्रस्तो गाधिः पार्थिवसत्तमः ॥ असवर्णं च तं मत्वा दरिद्रं वृद्धमेव च ॥ अदाने शापभीतस्तु ततो व्याजमुवाच सः ॥ २८ ॥ अस्माकं कन्यकादाने शुल्कमस्ति द्विजोत्तम ॥ तच्चेद्यच्छसि कन्यां तां तुभ्यं दास्याम्यसंशयम् ॥ २९ ॥ ॥ ऋचीक उवाच ॥ ॥ ब्रूहि पार्थिवशार्दूल कन्याशुल्कं मम द्रुतम् ॥ येन यच्छामि ते सर्वं यद्यपि स्यात्सुदुर्लभम् ॥ ॥ ३० ॥ ॥ गाधिरुवाच ॥ ॥ एकतः श्यामकर्णानामश्वानां वातरंहसाम् ॥ शतानि सप्त विप्रेंद्र श्वेतानां चैव सर्वतः ॥ ३१ ॥ य आनीय प्रदद्यान्मे तस्मै कन्यां ददाम्यहम् ॥ ३२ ॥ ॥ सूत उवाच ॥ ॥ स तथेति प्रतिज्ञाय ऋचीको मुनिसत्तमः ॥ कान्यकुब्जं समासाद्य गंगातीरे विवेश ह ॥ ॥ ३३ ॥ अश्वो वोढेति यत्सूक्तं चतुःषष्टिसमुद्भवम् ॥ छंदऋषिदेवतायुक्तं जपं चक्रे ततः परम् ॥ ३४ ॥ विनियोगं वाजिकृतं गाधिना यत्प्रकीर्तितम् ॥ ततस्ते वाजिनस्तस्मान्निष्क्रांताः सलिलाद्द्विजाः ॥ ३५ ॥ सर्वश्वेताः सुवेगाश्च श्यामैकश्रवणास्तथा ॥ शतानि सप्तसंख्यानि तावत्संख्यैर्नरैर्युताः ॥ ३६ ॥ ततः प्रभृति विख्यातमश्वतीर्थं धरातले ॥ गंगातीरे शुभे पुण्ये कान्यकुब्जसमीपगम् ॥ यस्मिन्स्नाने कृते मर्त्यो वाजिमेधफलं लभेत् ॥ ३७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्येऽश्वतीर्थोत्पत्तिवर्णननाम पंचषष्ट्यधिकशततमोऽध्यायः ॥ १६५ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ ऋचीकोऽपि समादाय पुरुषैरातकारिभिः ॥ तानश्वान्प्रजगामाथ यत्र गाधिर्व्यवस्थितः ॥ १ ॥ तस्मै निवेदयामास कन्यार्थं तान्हयोत्तमान् ॥ गाधिस्तु तान्प्रगृह्याथ योग्यान्वाजिमखस्य च ॥ २ ॥ एकैकं परमं तेषां स जगामाथ पार्थिवः ॥ ततस्तां प्रददौ तस्मै कन्यां त्रैलोक्यसुन्दरीम् ॥ ३ ॥ विप्राग्निसाक्षिसंभूतां गृह्योक्तविधिनान्वितः ॥ ततो विवाहे निर्वृत्त ऋचीको मुनिसत्तमः ॥ ४ ॥ तस्याः संवेशने चैव निष्कामः समपद्यत ॥ अथाब्रवीन्निजां भार्यां निष्कामः संस्थितो मुनिः ॥ ५ ॥ अहं यास्यामि सुश्रोणि काननं तपसः कृते ॥ त्वं प्रार्थय वरं कंचिद्येनाभीष्टं ददामि ते ॥ ६ ॥ सा श्रुत्वा



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्य तद्वाक्यं निष्कामस्य प्रजल्पितम् ॥ बाष्पपूर्णेक्षणा दीना जगाम जननीं प्रति ॥ ७ ॥ प्रोवाच वचनं तस्य सा निष्कामपते स्तदा ॥ वरदानं तथा तेन यथोक्तं द्विजसत्तमाः ॥ ८ ॥ अथ श्रुत्वैव सा माता यथा तज्जल्पितं तया ॥ सुतया ब्राह्मणश्रेष्ठास्ततो वचनमब्रवीत् ॥ ९ ॥ यद्ययं पुत्रि ते भर्ता वरं यच्छति वांछितम् ॥ तत्प्रार्थय सुतं तस्माद्ब्राह्मण्येन समन्वितम् ॥ १० ॥ मदर्थं चैकपुत्रं च निःशेषक्षात्रतेजसा ॥ संयुक्तं याचय शुभे विपुत्राऽहं यतः स्थिता ॥ ११ ॥ सा श्रुत्वा जननीवाक्यमृचीकं प्राप्य सुव्रता ॥ अब्रवीज्जननी वाक्यं सर्वं विस्तरतो द्विजाः ॥ १२ ॥ स तस्याश्च वचः श्रुत्वा चकाराथ चरुद्वयम् ॥ पुत्रेष्टिं विधिवत्कृत्वा नमस्कृत्य स्वयंभुवम् ॥ १३ ॥ एकस्मिन्योजयामास ब्राह्म्यं तेजोऽखिलं च सः ॥ क्षात्रं तेजस्तथान्यस्मिन्सकलं द्विजसत्तमाः ॥ १४ ॥ भार्यायै प्रददौ पूर्वं ब्राह्म्यं च चरुमुत्त मम् ॥ अब्रवीत्प्राशयित्वैनमश्वत्थालिंगनं कुरु ॥ १५ ॥ ततः प्राप्स्यसि सत्पुत्रं ब्राह्मयतेजःसमन्वितम् ॥ द्वितीयश्चरुको यश्च तं त्वं मात्रे निवे दय ॥ १६ ॥ अब्रवीच्च ततस्तां तु ऋचीको मुनिसत्तमः ॥ त्वमेनं चरुकं प्राश्य न्यग्रोधालिंगनं कुरु ॥ १७ ॥ ततः प्राप्स्यसि सत्पुत्रं संयुक्तं क्षात्रतेजसा ॥ निःशेषेण महाभागे न मे स्याद्वचनं वृथा ॥ १८ ॥ एवमुक्त्वा ऋचीकस्तु स विसृज्य च तेजसी ॥ सुहृष्टो ब्राह्मणश्रेष्ठः स्वयं च मंहितोऽभवत् ॥१९॥ ते चैव तु गृहे गत्वा प्रहृष्टेनांतरात्मना ॥ ऊचतुश्च मिथस्ते च सत्यमेतद्भविष्यति ॥ २० ॥ ततो माता सुतां प्राह आत्मार्थे सकलो जनः ॥ विशेषं कुरुते कृत्ये सामान्ये च व्यवस्थिते ॥ २१ ॥ तत्तवार्थं कृतोऽनेन यश्चरुश्चारुलोचने ॥ यस्तस्मिन्विहितोऽनेन मन्त्रग्रामो भविष्यति ॥ विशेषेण महाभागे सत्यमेतन्मयोदितम् ॥ २२ ॥ तस्माच्च चरुकं मह्यं त्वं गृहाण शुचिस्मिते ॥ आत्मीयं मम यच्छस्व वृक्षाभ्यां च विपर्ययः ॥ क्रियतां च महाभागे येन मे स्यात्सुतोत्तमः ॥ २३ ॥ राज्यकर्मणि दक्षश्च शूरः परबलार्दनः ॥ त्वदीयो द्विजमात्रोऽपि तव तुष्टिं करिष्यति ॥ २४ ॥ अथ सा विजने प्रोक्ता तया मात्रा यशस्विनी ॥ अकरोद्व्यत्ययं वृक्षे चरौ च द्विजसत्तमाः ॥ २५ ॥ ततः पुंस वने स्नाते ते शुभे चारुलोचने ॥ दधाते गर्भमेवाथ भर्तुः संयोगतः क्षणात् ॥ २६ ॥ ततस्तु गर्भमासाद्य सा च त्रैलोक्यसुन्दरी ॥ क्षात्रेण तेजसा युक्ता तत्क्षणात्समपद्यत ॥ मनो राज्ये ततश्चक्रे हस्त्यश्वारोहणोद्भवे ॥ २७ ॥ युद्धवार्त्तास्तथा चक्रे देवासुरगणोद्भवाः ॥ शृणोति च तथा नित्यं विलासेषु मनो दधे ॥ अनुष्ठानं ततश्चक्रे मनोराज्यसमुद्भवम् ॥ २८ ॥ पितुर्गृहात्समानीय जात्यानश्वांस्तथा गजान् ॥ रत्नानि चैव वस्त्राणि

१ महितः—उत्सवयुक्तः—इत्यर्थः । 'मह उद्धव उत्सवः' इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



काश्मीराद्यं विलेपनम् ॥ २९ ॥ तद्दृष्ट्वा चेष्टितं तस्या राज्यार्हं बहुभोगधृक् ॥ ब्राह्मणार्हैः परित्यक्तं समाचारैश्च कृत्स्नशः ॥ ३० ॥ अब्रवीच्च ततः क्रुद्धो धिक्पापे किमिदं कृतम् ॥ व्यत्ययो विहितो नूनं चरुकस्य नगस्य च ॥ ३१ ॥ त्वया पापे प्रपश्यामि येनेदृक्तव चेष्टितम् ॥ क्षत्रियार्हं द्विजाचारैः सकलैः परिवर्जितम् ॥ ३२ ॥ चीरवल्कलसंत्यक्तं स्नानजाप्यविवर्जितम् ॥ संयुक्तं विविधैर्गन्धैर्मृगनाभिपुरःसरैः ॥ ३३ ॥ तव माता शमस्था सा जपहोमपरायणा ॥ तीर्थयात्रापरा चैव वेदश्रवणलालसा ॥ ३४ ॥ तस्मात्ते क्षत्रियः पुत्रो भविष्यति न संशयः ॥ ३५ ॥ मातुश्च ब्राह्मणश्रेष्ठो ब्रह्मचर्यकथापरः ॥ भविष्यति सुतश्चिह्नैर्गर्भलक्षणसंभवैः ॥ ३६ ॥ यस्मादुदीरितः पूर्वं श्लोकोऽयं शास्त्रचिन्तकैः ॥ यादृशा दोहदाः सन्ति सगर्भाणां च योषिताम् ॥ ३७ ॥ तादृगेव स्वभावेन तासां पुत्रोऽत्र जायते ॥ सैवमुक्ता भयत्रस्ता वेपमाना कृतांजलिः ॥ ॥ ३८ ॥ बाष्पपूर्णेक्षणा दीना वाक्यमेतदुवाच ह ॥ सत्यमेतत्प्रभो वाक्यं यत्त्वया समुदाहृतम् ॥ ३९ ॥ अतीतानागतं वेत्ति विना लिंगैर्भवानिह ॥ तस्मात्कुरु प्रसादं मे यथा स्याद्ब्राह्मणः सुतः ॥ क्षत्रियस्य तु पुत्रस्य भवान्नार्हः कथंचन ॥ ४० ॥ ॥ ऋचीक उवाच ॥ ॥ यत्किंचिद्ब्रह्मतेजः स्यात्तन्न्यस्तं ते चरौ मया ॥ क्षात्रं तेजश्च ते मातुर्व्यत्ययं च कथंचन ॥ करोमि वाधमो लोके शास्त्रस्य च व्यतिक्रमम् ॥ ४१ ॥ ॥ पत्न्युवाच ॥ ॥ यद्येवं भृगुशार्दूल मम पौत्रोऽत्र यो भवेत् ॥ क्षात्रं तेजोऽखिलं तस्य गात्रे भूयात्त्वयाऽऽहृतम् ॥ ४२ ॥ पुत्रस्तु ब्राह्मणश्रेष्ठो भूयादभ्यधिकस्तव[1] ॥ ४३ ॥ ॥ ऋचीक उवाच ॥ ॥ एवं भवतु मद्वाक्यात्पुत्रस्ते ब्राह्मणः शुभे ॥ पौत्रः सुदुर्द्धरः संख्ये संयुक्तः क्षात्रतेजसा ॥ ४४ ॥ ततः सत्यं वरं लब्ध्वा प्रसन्नवदना सती ॥ मातुर्निवेदयामास तत्सर्वं कांत जल्पितम् ॥ ४५ ॥ ततः सा दशमे मासि संप्राप्ते गुरुदैवते ॥ नक्षत्रे जनयामास पुत्रं बालार्कसन्निभम् ॥ ४६ ॥ ब्राह्म्या लक्ष्म्या समोपेतं निधानं तपसां शुचि ॥ जमदग्निरिति ख्यातो योऽसौ त्रैलोक्यविश्रुतः ॥ तस्य पुत्रोभवत्ख्यातो रामोनाम महायशाः ॥ ४७ ॥ एकविंशतिदा येन धरा निःक्षत्रिया कृता ॥ क्षात्रतेजःप्रभावेन पितामहप्रसादतः ॥ ४८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये परशुरामोत्पत्तिवर्णनंनाम षट्षष्ट्युत्तरशततमोऽध्यायः ॥ १६६ ॥ ॥ सूत उवाच ॥ ॥ गाधेस्तु याऽथ पत्नी च प्राशनाच्चरुकस्य वै ॥ सापि गर्भं दधे तत्र वासरे मन्त्रतः शुभा ॥ १ ॥ सा च गर्भसमोपेता यदा जाता द्विजोत्तमाः ॥ तीर्थयात्रापरा साध्वी जाता व्रतपरा



१ अभ्यधिकः—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यणा ॥ २ ॥ वेदध्वनिर्भवेद्यत्र तत्र हर्षसमन्विता ॥ पुलकांकितसर्वांगी सा शुश्राव च सर्वदा ॥ त्यक्त्वा राज्योचितान्सर्वानलंकारान्सुखानि च ॥
॥ ३ ॥ अथ सापि द्विजश्रेष्ठा दशमे मासि संस्थिते ॥ सुषुवे सुप्रभं पुत्रं ब्राह्म्या लक्ष्म्या समावृतम् ॥ ४ ॥ विश्वामित्रस्तथा ख्यातस्त्रैलोक्ये सचरा
चरे ॥ ववृधे स महाभागो नित्यमेवाधिकं नृणाम् ॥ ५ ॥ शुक्लपक्षे समासाद्य तारापतिरिवांबरे ॥ यदासौ यौवनोपेतः संजातो द्विजसत्तमाः ॥ ६ ॥
राज्यक्षमस्तदा राज्ये गाधिना स नियोजितः ॥ अनिच्छमानः स्वं राज्यं पितृपैतामहं महत् ॥ ७ ॥ वेदाध्ययनसंपन्नो नित्यं च पठते हि सः ॥
ब्राह्मणोचितमार्गेण गच्छमानो दिवानिशम् ॥ ८ ॥ संस्थाप्याथ सुतं राज्ये बभूव वनगोचरः ॥ सकलत्रो महाभागो वानप्रस्थाश्रमे रतः ॥ ९ ॥
विश्वामित्रोऽपि राज्यस्थो द्विजसंपूजने रतः ॥ द्विजैः सर्वैश्चचाराथ स्नानजाप्यपरायणः ॥ १० ॥ कस्यचित्त्वथ कालस्य पापर्द्धिं समुपागतः ॥
प्रविवेश वनं रौद्रं नानामृगसमाकुलम् ॥ ११ ॥ जघान स वने तत्र वराहान्संबरान्गजान् ॥ तरक्षांश्च रुरून्खड्गानारण्यान्महिषांस्तथा ॥ १२ ॥
सिंहान्व्याघ्रान्महासर्पाञ्छरभांश्च द्विजोत्तमाः ॥ मृगयासक्तचित्तः स भ्रममाणो महावने ॥ १३ ॥ मध्याह्नसमये प्राप्ते वृषस्थे च दिवाकरे ॥
क्षुत्पिपासापरिश्रांतो विश्वामित्रो द्विजोत्तमाः ॥ १४ ॥ आससादाश्रमं पुण्यं वसिष्ठस्य महात्मनः ॥ वसिष्ठोऽपि समालोक्य विश्वामित्रं नृपो
त्तमम् ॥ १५ ॥ निजाश्रमे तु संप्राप्तं सानन्दं सम्मुखो ययौ ॥ दत्त्वा तस्मै तदार्घ्यं च मधुपर्कं च भूभुजे ॥ १६ ॥ अब्रवीच्च ततो वाक्यं स्वागतं
ते महीपते ॥ वद कृत्यं करोम्येव गृहायातस्य यच्च ते ॥ १७ ॥ ॥ विश्वामित्र उवाच ॥ ॥ मृगयायां परिश्रांतः पिपासाव्याकुलेन्द्रियः ॥
पानार्थमिह संप्राप्त आश्रमे ते मुनीश्वर ॥ १८ ॥ तत्पीतं शीतलं तोयं वितृष्णोऽहं व्यवस्थितः ॥ अनुज्ञां देहि मे ब्रह्मन्येन गच्छामि मंदिरम् ॥
॥ १९ ॥ ॥ वसिष्ठ उवाच ॥ ॥ मध्याह्नसमयो रौद्रः सूर्योऽतीव सुतापदः ॥ तत्कृत्वा भोजनं राजन्नपराह्णे व्यवस्थिते ॥ गन्तासि निजमा
वासं भुक्त्वान्नं मम चाश्रमे ॥ २० ॥ ॥ राजोवाच ॥ ॥ चतुरंगेण सैन्येन मृगयामहमागतः ॥ २१ ॥ तवाश्रमस्य द्वारस्थं मम सैन्यं व्यवस्थितम्॥
बुभुक्षितेषु भृत्येषु यः स्वामी कुरुतेऽशनम् ॥२२॥ स याति नरकं घोरं त्यज्यते च गुणैर्द्रुतम् ॥ तस्मादाज्ञापय क्षिप्रं मां मुने स्वगृहाय भोः ॥२३॥
॥ ॥ वसिष्ठ उवाच ॥ ॥ यदि ते सेवकाः संति द्वारदेशे बुभुक्षिताः ॥ सर्वानिहानय क्षिप्रं तृप्तिं नेष्याम्यहं परम् ॥ २४ ॥ अस्ति मे नन्दिनीनाम
कामधेनुः सुशोभना ॥ वांछितं यच्छते सर्वं तपसा पार्थिवोत्तम ॥ २५ ॥ तृप्तिं नेष्यति ते सर्वं सैन्यं पार्थिवसत्तम ॥ तस्मादानीयतां क्षिप्रं पश्य मे
धेनुजं फलम् ॥ २६ ॥ तच्छ्रुत्वा चानयामास सर्वं सैन्यं महीपतिः ॥ स्नातश्च कृतजप्यश्च सन्तर्प्य पितृदेवताः ॥२७॥ ब्राह्मणान्प्राचयित्वा च सिंहा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

सनसमाश्रितः ॥ एतस्मिन्नंतरे धेनुः समाहूता च नंदिनी ॥ २८ ॥ वसिष्ठेन समाहूता विश्वामित्रपुरःस्थिता ॥ अब्रवीच्च ततः वाक्यं वसिष्ठमृषिसत्तमम् ॥ २९ ॥ आदेशो दीयतां मह्यं किं करोमि प्रशाधि माम् ॥ ३० ॥ ॥ वसिष्ठ उवाच ॥ ॥ पादप्रक्षालनाद्यं तु कुरुष्व वचनान्मम ॥ विश्वामित्रस्य राजर्षेर्यावद्भोजनसंस्थितिम् ॥ ३१ ॥ खाद्यैः सर्वैस्तथा लेह्यैश्चोष्यैः पेयैः पृथग्विधैः ॥ कुरुष्व तृप्तिपर्यन्तं ससैन्यस्य महीपतेः ॥ अश्वानां च गजानां च घासादिभिर्यथाक्रमम् ॥ ३२ ॥ ॥ सूत उवाच ॥ ॥ बाढमित्येव साप्युक्त्वा ततस्तत्ससृजे क्षणात् ॥ यत्प्रोक्तं तेन मुनिना भृत्यानां चायुतं तथा ॥ ३३ ॥ ततस्ते सर्वमादाय भृत्या भोज्यं ददुस्तथा ॥ एकैकस्य पृथक्त्वेन प्रतिपत्तिपुरःसरम् ॥ ३४ ॥ एवं तया क्षणेनैव तृप्तिं नीतो महीपतिः ॥ ससैन्यः सपरीवारो गजोष्ट्राश्वैर्वृषैः सह ॥ ३५ ॥ ततस्तु कौतुकं दृष्ट्वा विश्वामित्रो महीपतिः ॥ सामात्यो विस्मयाविष्टो मन्त्रयामास च द्विजाः ॥ ३६ ॥ अहो चित्रमहो चित्रं ययाऽकस्माद्वरूथिनी ॥ तृप्तिं नीतेयमस्माकं क्षुत्पिपासासमाकुला ॥ ३७ ॥ तस्मात्संनीयतामेषा स्वगृहं धेनुरुत्तमा ॥ किं करिष्यति विप्रोऽयं निर्भृत्यो वनसंस्थितः ॥३८॥ ततो वसिष्ठमाहूय वाक्यमेतदुवाच सः ॥ नंदिनी दीयतां मह्यं किं करिष्यसि चानया ॥ ३९ ॥ त्वमेको वनसंस्थस्तु निर्द्वन्द्वो निष्परिग्रहः ॥ अथवा तव दास्यामि व्ययार्थे मुनिसत्तम ॥ वरान्ग्रामांश्च हस्त्यश्वानन्यांश्चापि यथेप्सितान् ॥ ४० ॥ ॥ वसिष्ठ उवाच ॥ ॥ होमधेनुरियं राजन्नस्माकं कामदोहिनी ॥ अदेया गौर्महाराज सामान्यापि द्विजन्मनाम् ॥ ४१ ॥ किं पुनर्नंदिनी यैषा सर्वकामप्रदायिनी ॥ अपरं शृणु राजेंद्र स्मृतिवाक्यमनुत्तमम् ॥ ४२ ॥ गवां हि विक्रयार्थे च यदुक्तं मनुना स्वयम् ॥ गवां विक्रयजं वित्तं यो गृह्णाति द्विजोत्तमः ॥ ४३ ॥ अन्त्यजः स परिज्ञेयो मातृविक्रयकारकः ॥ तस्मान्नाहं प्रदास्यामि नन्दिनीं तां महीपते ॥ ४४ ॥ न साम्ना नैव भेदेन न दानेन कथंचन ॥ न दण्डेन महाराज तस्माद्गच्छ निजालयम् ॥ ४५ ॥ ॥ विश्वामित्र उवाच ॥ ॥ यत्किंचिद्विद्यते रत्नं पार्थिवस्य क्षितौ द्विज ॥ तत्सर्वं राजकीयं स्यादिति वित्तविदो विदुः ॥ ४६ ॥ रत्नभूता ततो धेनुर्ममेयं नंदिनी स्थिता ॥ दण्डेनापि ग्रहीष्यामि साम्ना यच्छसि नो यदि ॥ ४७ ॥ एवमुक्त्वा वसिष्ठं स विश्वामित्रो महीपतिः ॥ आदिदेश ततो भृत्यान्नंदिनीयं प्रगृह्यताम् ॥ ४८ ॥ अथ सा भृत्यवर्गेण नीयमाना च नंदिनी ॥ हन्यमाना प्रहारैश्च पाषाणैर्लकुटैरपि ॥ ४९ ॥ अश्रुपूर्णेक्षणा दीना प्रहारैर्जर्जरीकृता ॥ कृच्छ्रादुपेत्य तं प्राह वसिष्ठं मुनिसत्तमम् ॥ ५० ॥ किं दत्तास्मि मुनिश्रेष्ठ त्वयाहं चास्य भूपतेः ॥ येन मां



१ ह–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालयंत्यस्य पुरुषाः स्वामिनो यथा ॥ ५१ ॥ ॥ वसिष्ठ उवाच ॥ ॥ न त्वां यच्छाम्यहं धेनो प्राणत्यागेऽपि संस्थिते ॥ तद्रक्षस्व स्वयं धेनो आत्मानं मत्प्रभावतः ॥ ५२ ॥ एवमुक्ता तदा धेनुर्वसिष्ठेन महात्मना ॥ कोपाविष्टा ततश्चक्रे हुंकारान्दारुणांस्तथा ॥ ५३ ॥ तस्या हुंकारशब्दैश्च निष्क्रांताः सायुधा नराः ॥ शबराश्च पुलिंदाश्च म्लेच्छाः संख्याविवर्जिताः ॥ ५४ ॥ तैश्च भृत्या हताः सर्वे विश्वामित्रस्य भूपतेः ॥ ततः कोपाभिभूतोऽसौ विश्वामित्रो महीपतिः ॥ ५५ ॥ सज्जं कृत्वा स्वसैन्यं तु चतुरंगं प्रकोपतः ॥ युद्धं चक्रे च तैः सार्धं मरणे कृतनिश्चयः ॥ ५६ ॥ अथ ते सैनिकास्तस्य ते गजास्ते च वाजिनः ॥ पश्यतो निहताः सर्वे पुरुषैर्धेनुसंभवैः ॥५७॥ विश्वामित्रं परित्यज्य शेषं सर्वं निपातितम् ॥ तं दृष्ट्वा वेष्टितं म्लेच्छैर्युध्यमानं महीपतिम् ॥ ५८ ॥ कृपां कृत्वा वसिष्ठस्तु नन्दिनीमिदमब्रवीत् ॥ रक्ष नंदिनि भूपालं म्लेच्छैरेतैः समावृतम् ॥ ५९ ॥ राजा हि यत्नतो रक्ष्यो यत्प्रसादादिदं जगत् ॥ सन्मार्गे वर्तते सर्वं न चामार्गे प्रवर्तते ॥ ६० ॥ ततस्तु नंदिनीं यावन्निषेधयितुमागताम् ॥ विश्वामित्रोऽसिमुद्यम्य प्रहर्तुमुपचक्रमे ॥ ६१ ॥ वसिष्ठोऽपि समालोक्य वध्यमानां च तां तदा ॥ बाहुं संस्तंभयामास खड्गं तस्य च भूपतेः ॥ ६२ ॥ अथ वैलक्ष्यमापन्नो विश्वामित्रो महीपतिः ॥ प्रोवाच व्रीडया युक्तो वसिष्ठं मुनिसत्तमम् ॥ ६३ ॥ रक्ष मां त्वं मुनिश्रेष्ठ वध्यमानं सुदारुणैः ॥ म्लेच्छैः कुरुष्व मे बाहुं स्तम्भेन तु विवर्जितम् ॥ ६४ ॥ ममापराधात्संनष्टं सर्वं सैन्यमनन्तकम् ॥ तस्माद्यास्याम्यहं हर्म्यं न युद्धेन प्रयोजनम् ॥ ६५ ॥ दुर्विनीतः श्रियं प्राप्य विद्यामैश्वर्यमेव च ॥ न तिष्ठति चिरं युद्धे यथाहं मदगर्वितः ॥ ६६ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्तो वसिष्ठस्तु विश्वामित्रेण भूभुजा ॥ चकार तं भुजं तस्य स्तंभदोषविवर्जितम् ॥ ६७ ॥ अब्रवीत्प्रहसन्वाक्यं विधाय स शुभं करम् ॥ गच्छ राजन्विमुक्तोऽसि स्तंभदोषेण वै मया ॥ ६८ ॥ मा कार्षीर्ब्राह्मणैः साध विरोधं भूय एव हि ॥ अनुज्ञातः स तेनाथ विश्वामित्रो महीपतिः ॥ ६९ ॥ सव्रीडं प्रययौ हर्म्यं पद्भ्यामेव द्विजोत्तमाः ॥ स्वपुरद्वारमासाद्य सुगुप्ते रजनीमुखे ॥७०॥ प्रलापमकरोत्तत्र बाष्पपर्याकुलेक्षणः ॥ धिग्बलं क्षत्रियाणां च धिग्वीर्यं धिक्प्रजीवितम् ॥ ॥ ७१ ॥ श्लाघ्यं ब्रह्मबलं चैकं ब्राह्म्यं तेजश्च केवलम् ॥ ७२ ॥ एतत्कर्म मया कार्यं यथा स्याद्ब्रह्मजं बलम् ॥ त्यक्त्वा चैव निजं राज्यं चरिष्यामि महत्तपः ॥ ७३ ॥ एवं स निश्चयं कृत्वा राज्ये संस्थाप्य वै सुतम् ॥ नाम्ना विश्वसहं ख्यातं प्रजगाम तपोवनम् ॥ ७४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये विश्वामित्रराज्यपरित्यागवर्णनंनाम सप्तषष्ट्युत्तरशततमोऽध्यायः ॥ १६७ ॥

१ तत्र–इ० पा० । २ ब्रह्मकुलम्–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



॥ ॥ सूत उवाच ॥ ॥ एवं राज्यं परित्यज्य विश्वामित्रो द्विजोत्तमाः ॥ हिमवन्तं नगं प्राप्य तपश्चक्रे सुदारुणम् ॥ १ ॥ वर्षास्वाका शशायी च हेमंते सलिलाशयः ॥ पञ्चाग्निसाधको ग्रीष्मे स्थितो वर्षशतत्रयम् ॥ २ ॥ फलमूलकृताहारस्ततो वर्षशतत्रयम् ॥ ध्यायमानः परं ब्रह्म स्थितो ब्राह्मणसत्तमाः ॥ शीर्णपर्णाशनः पश्चात्तावत्कालं व्यवस्थितः ॥ ३ ॥ ततश्चैव जलाहारस्तावन्मात्रं व्यवस्थितः ॥ कालं स वायुभक्षश्च ततश्चैवायुतं समाः ॥४॥ ॥ सूत उवाच ॥ ॥ अथ दृष्ट्वा तपःशक्तिं तस्य तां त्रिदशाधिपः ॥ पातयिष्यति मां नूनमेष स्थानान्नृपोत्तमः॥ ॥ ५ ॥ ततः प्रोवाच संगत्य साम्ना परमवल्गुना ॥ विश्वामित्रं नृपश्रेष्ठं भयेन महताऽन्वितः ॥ ६ ॥ ॥ इंद्र उवाच ॥ ॥ विश्वामित्र प्रतुष्टोऽस्मि तपसानेन पार्थिव ॥ वरं वरय भद्रं ते यदभीष्टं हृदि स्थितम् ॥ ७ ॥ ॥ विश्वामित्र उवाच ॥ ॥ ब्राह्मण्यं देहि मे शक्र यदि तुष्टोऽसि सांप्रतम् ॥ तदर्थं तपसश्चर्यां जानीहि त्वं पुरंदर ॥८॥ ॥ इंद्र उवाच ॥ ॥ अनेनैव शरीरेण क्षत्रियः स्यात्कथं द्विजः[1] ॥ चतुर्विंशतिसंस्कारैर्द्विगुणैर्यः प्रजायते ॥ तदन्यत्प्रार्थय क्षिप्रं यत्तेऽभीष्टतरं स्थितम् ॥ ९ ॥ ॥ विश्वामित्र उवाच ॥ ॥ न ब्राह्मण्यात्परं किंचित्प्रार्थयामि सुरेश्वर ॥ १० ॥ अपि त्रैलोक्यराज्यं ते वस्तुष्वन्येषु का कथा ॥ तस्माद्गच्छ सुरश्रेष्ठ स्वराज्यं परिपालय ॥ ११ ॥ परित्यक्ष्याम्यहं देहं यास्ये वाऽहं द्विजन्मताम् ॥ तच्छ्रुत्वा वचनं तस्य देवराजो दिवं गतः ॥ १२ ॥ तस्य तं निश्चयं ज्ञात्वा सर्वदेवसमावृतः॥ विश्वामित्रोऽपि तद्रूपं चकार दुश्चरं तपः ॥ १३ ॥ अथ वर्षसहस्रे तु व्यतिक्रान्ते द्विजोत्तमाः ॥ अन्यस्मिन्वायुभक्षस्य विश्वामित्रस्य भूपतेः ॥ १४ ॥ आजगाम स्वयं ब्रह्मा पुण्यैर्देवर्षिभिः सह ॥ अब्रवीत्तं महीपालं तपसा दग्धकिल्बिषम् ॥ १५ ॥ ॥ श्रीब्रह्मोवाच ॥ ॥ विश्वामित्र प्रतुष्टोऽस्मि तपसानेन सत्तम ॥ वरं वरय भद्रं ते प्रदास्याम्यपि दुर्लभम् ॥ १६ ॥ ॥ विश्वामित्र उवाच ॥ ॥ यदि तुष्टोऽसि मे देव यदि देयो वरो मम ॥ ब्राह्मण्यं देहि मे देव नान्यदिष्टतमं महत् ॥ १७ ॥ ॥ ॥ ब्रह्मोवाच ॥ ॥ क्षत्रियेण प्रजातस्य द्विजत्वं जायते कथम् ॥ श्रुतिस्मृतिविरुद्धं हि किमेवं वदसीप्सितम् ॥ १८ ॥ यत्र जातं धरापृष्ठे न भविष्यति कर्हिचित् ॥ १९ ॥ ॥ विश्वामित्र उवाच ॥ ॥ गच्छ त्वं देवदेवेश ब्रह्मलोकमनुत्तमम् ॥ अहं त्यक्ष्यामि वा प्राणान्संप्राप्स्ये वा द्विजन्मताम् ॥ २० ॥ अथ देवर्षिमध्यस्थ ऋचीको वाक्यमब्रवीत् ॥ अस्य जन्मकृते देव ब्राह्मैर्मंत्रैर्मया चरुः ॥ २१ ॥ अभितो ब्रह्मसर्वस्वं तत्र संयोजितं मया ॥ तेनैव क्षत्रजन्माऽयं ब्राह्मणश्चतुरानन ॥ २२ ॥ ब्रह्मर्षिं कीर्तयस्वैनं तस्मात्त्वं प्रपितामह ॥ राज्यस्थोऽपि[2] द्विजार्हाणि सत्कृत्यान्य



१ द्विजः—ब्राह्मणः—इत्यर्थोऽत्र 'द्विज' शब्दस्य बोद्धव्यः । 'द्विज' शब्दस्य यौगिकोऽर्थो यद्यपि त्रैवर्णिकपरः साधारणस्तथाप्यत्र शब्दशक्त्या रूढ्या ब्राह्मणपर एव बोद्धव्य इति तात्पर्यम् । २ अपि—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करोदसौ ॥ २३ ॥ ब्राह्ममन्त्रप्रभावेन तस्माद्ब्रह्मर्षिमाह्वय ॥ येन कीर्तामहे सर्वे विश्वामित्रं द्विजोत्तमम् ॥ २४ ॥ अथ ब्रह्मा चिरं ध्यात्वा ब्राह्म्यै मंत्रैश्च तेजसा ॥ समुत्पन्नं ततः प्राह ब्राह्मणस्त्वं मया कृतः ॥ २५ ॥ त्यजेदं दुष्करं घोरं तपो मद्वचनाद्भुतम् ॥ स यदा ब्रह्मणा प्रोक्तो ब्रह्मर्षि स्त्वमसंशयम् ॥ २६ ॥ ऋचीकाद्यैस्ततः सर्वैः प्रोक्तो देवर्षिभिस्तथा ॥ २७ ॥ अथ तेषां मध्यगतो वसिष्ठो मुनिसत्तमः ॥ सोऽब्रवीत्कोपसंयुक्तो नाहं वक्ष्यामि कर्हिचित् ॥ २८ ॥ ब्राह्मणं क्षत्रियाज्जातं जानन्नपि पितामह ॥ ऋचीकस्य च दाक्षिण्यात्तथा त्वं वदसि प्रभो ॥ २९ ॥ प्रोच्यमानोऽपि बहुधा वसिष्ठो मुनिसत्तमः ॥ पितामहेन मुनिभिर्नारदाद्यैरनेकधा ॥ जगामाथ परित्यज्य तान्सर्वान्द्विजसत्तमान् ॥ ३० ॥ स चागत्य मुनिश्रेष्ठो देशं चानर्तसंज्ञितम् ॥ हाटकेश्वरजे क्षेत्रे शंखतीर्थसमीपतः ॥ ३१ ॥ यत्र ब्रह्मशिला पुण्या श्वेतद्वीपसमन्विता ॥ सरस्वती स्थिता यत्र नदी पापहरा शुभा ॥ ३२ ॥ तत्राश्रमपदं कृत्वा चकार विपुलं तपः ॥ विश्वामित्रोऽपि सामर्षस्तद्वधार्थं समागतः ॥ ३३ ॥ तस्याश्रमस्य दूरे स याम्यां दिशि समाश्रितः ॥ कृत्वाश्रमपदं तत्र तस्य च्छिद्राणि चिन्तयन् ॥ ३४ ॥ संस्थितः सुचिरं कालं न च पश्यति किंचन ॥ अथाभिचारिकं तेन प्रारब्धं तस्य चोपरि ॥ ३५ ॥ यदुक्तं सामविधिना सामवेदे वधात्मकम् ॥ तस्य तैर्दारुणैर्मंत्रैर्जुह्वतो जातवेदसम् ॥ ३६ ॥ निष्क्रांता दारुणा शक्तिर्मुक्तकेशी भयानका ॥ वानरस्कंधमारूढा कुर्वाणा किलिकिलाध्वनिम् ॥ ३७ ॥ नानायुधसमोपेता यमजिह्वा यथा परा ॥ साऽब्रवीद्वद विप्रेंद्र किं ते कृत्यं करोम्यहम् ॥ ३८ ॥ त्रैलोक्यमपि कृत्स्नं च संहरामि तवाज्ञया ॥ ३९ ॥ ॥ विश्वामित्र उवाच ॥ ॥ मम शत्रुर्महान्योऽत्र वसिष्ठः कुमुंनिः[1] स्थितः ॥ तं त्वं जहि द्रुतं गत्वा तदर्थं च मया कृता ॥४०॥ एवमुक्ता तु सा तेन विश्वामित्रेण धीमता ॥ वसिष्ठाश्रममुद्दिश्य प्रस्थिता चोत्तरामुखी॥४१॥एतस्मिन्नेव काले तु वसिष्ठस्याश्रमे द्विजाः ॥ दुर्निमित्तानि जातानि प्रभूतानि महांति च॥४२॥ पपात महती चोल्का निहत्य रविमंडलम्॥ तथा रुधिरवृष्टिश्च अस्थिमिश्रा व्यजायत ॥४३॥ दीप्तां दिशं समासाद्य रुरोद च तथा शिवा ॥ तां दृष्ट्वा सुमहोत्पातान्वसिष्ठो मुनिपुंगवः ॥४४॥ यावदालोकते रूपं ज्वालामालासमाकुलम्[2] ॥ ततः सम्यक्परिज्ञाय सर्वं दिव्येन चक्षुषा ॥ ४५ ॥ विश्वामित्रप्रयुक्तेयं शक्तिर्मम वधाय च ॥ कृत्यारूपा सुमंत्रैश्च सामवेदसमुद्भवैः ॥ ४६ ॥ तिष्ठतिष्ठेति तेनोक्ता ततः सा निश्चलाभवत् ॥ निजमंत्रैश्च सा तेन स्तंभिताथर्वणोद्भवैः ॥ ४७ ॥ ततः स्त्रीरूपमादाय[3] प्रोवाच मुनिपुंगवम् ॥ सामवेदस्तु वेदानां प्राधान्येन व्यवस्थितः ॥ ४८ ॥ विधिना तेन संसृष्टा विश्वामित्रेण धीमता ॥ मा कुरु

१ कुमतिः–इ०पा० । २ ज्वालामालासमुज्ज्वलम्–इ० पा० । ३ आधाय–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

त्वत्प्रमाणं तु प्रहारं सह मे मुने ॥ रक्षयिष्यामि ते प्राणान्स्वल्पस्पर्शेन ते मुने ॥ ४९ ॥ ॥ वसिष्ठ उवाच ॥ ॥ यद्येवं कुरु मे स्पर्शं न मर्म
स्पर्शनं शुभे ॥ मया चाथर्वणा मंत्राः संहृताः कृपया तव ॥ ५० ॥ ततः सा दारुणा शक्तिर्विश्वामित्रप्रयोजिता ॥ तस्यांगदेशं स्पृष्ट्वाथ निपपात
धरातले ॥ ५१ ॥ ततस्तुष्टो वसिष्ठस्तु तामाह मधुरं वचः ॥ अद्यप्रभृति ते पूजां करिष्यंति समाहिताः ॥ जनाः सर्वे महाभागे भक्त्या परमया
युताः ॥ ५२ ॥ चैत्रमासे सिते पक्षे अष्टमीदिवसे स्थिते ॥ ये ते पूजां करिष्यंति श्रद्धया परया युताः ॥ ५३ ॥ ते सर्वे वत्सरंयावद्भवि
ष्यंति निरामयाः ॥ तस्मादत्रैव स्थातव्यं सदैव मम वाक्यतः ॥ ५४ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्ता च सा तेन वसिष्ठेन महात्मना ॥
स्थिता तत्रैव सा देवी तस्य वाक्येन तत्क्षणात् ॥ ५५ ॥ प्राप्नोति परमां पूजां विशेषान्नागरैः कृताम् ॥ धारानामेति विख्याता भक्तलोकसुख
प्रदा ॥ ५६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये धारोत्पत्तिमाहात्म्यवर्णनंनामाष्ट
षष्ट्युत्तरशततमोऽध्यायः ॥ १६८ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ कस्मात्सा तुष्टिदा प्रोक्ता नागराणां विशेषतः ॥ धारानामेतिविख्याता
कस्मात्सा धरणीतले ॥ १ ॥ ॥ सूत उवाच ॥ ॥ चमत्कारपुरे पूर्वं धारानामेति विश्रुता ॥ आसीत्तपस्विनी साध्वी नागरी ब्राह्मणोत्तमा ॥
तस्याः सख्यमरुन्धत्या आसीत्पूर्वं सुमेधया ॥ २ ॥ अरुन्धती यदा प्राप्ता चमत्कारपुरे शुभे ॥ स्नानार्थं शंखतीर्थं तु वसिष्ठेन समागता ॥ ३ ॥
तया दृष्टाथ सा तत्र अंगुष्ठाग्रेण संस्थिता ॥ वायुभक्षा निराहारा दिव्येन वपुषान्विता ॥ ४ ॥ तया पृष्टा च सा साध्वी का त्वं कस्य सुता शुभे ॥
किमर्थं तु स्थिता चोग्रे तपसि ब्रूहि मे शुभे ॥ ५ ॥ ॥ धारोवाच ॥ ॥ देवशर्माख्यविप्रस्य सुताहं नागरस्य च ॥ बालत्वे वर्तमानाया
वैधव्यं मे व्यवस्थितम् ॥ ६ ॥ शंखतीर्थस्य माहात्म्यं श्रुत्वा शंखेश्वरस्य च ॥ ततोऽहं संस्थिता ह्यत्र तस्यैवाराधने स्थिता ॥ ७ ॥
॥ ॥ अरुन्धत्युवाच ॥ ॥ तवोपरि महान्स्नेहो दर्शनात्ते व्यवस्थितः ॥ तस्मादागच्छ गच्छावो ममाश्रमपदं शुभम् ॥ ८ ॥ सरस्वत्या
स्तटे शुभ्रे सर्वपातकनाशने ॥ शास्त्रगोष्ठीरता नित्यं तत्र तिष्ठ मया सह ॥ ९ ॥ ततः संप्रस्थिता सा तु तया सार्धं तपस्विनी ॥ अनुज्ञाता
स्वपित्रा तु जनन्या बांधवैस्तथा ॥ १० ॥ तस्याः सख्यं चिरं कालं तया सह बभूव ह ॥ कस्यचित्त्वथ कालस्य सा शक्तिस्तत्र चागता ॥ 
॥ ११ ॥ विश्वामित्रेण संसृष्टा वसिष्ठस्य वधाय च ॥ सा स्तंभिता वसिष्ठेन कृता देवीस्वरूपिणी ॥ संपूज्या देवमर्त्यानां सर्वरक्षाप्रदा
शुभा ॥ १२ ॥ ततस्तु धारया तस्याः कैलासशिखरोपमः ॥ प्रासादो निर्मितो विप्रा नानारत्नविचित्रितः ॥ १३ ॥ चकाराथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततः स्तोत्रं तस्याः सा च तपस्विनी ॥ १४ ॥ नमस्ते परमे ब्राह्मि धारयोगे नमोनमः ॥ अर्धमात्रे परे शून्ये तस्यार्धार्धे नमोऽस्तु ते ॥ ॥ १५ ॥ नमस्ते जगदाधारे नमस्ते भूतधारिणि ॥ नमस्ते पद्मपत्राक्षि नमस्ते कांचनद्युते ॥ १६ ॥ नमस्ते सिंहयानाढ्ये नमस्तेऽस्तु महाभुजे ॥ नमस्ते देवताभीष्टे नमस्ते दैत्यसूदिनि ॥ १७ ॥ नमस्ते महिषाक्रांतशरीरच्छिन्नमस्तके[1] ॥ नमस्ते विंध्यनिरते सुरामांसबलिप्रिये ॥ १८ ॥ त्वं लक्ष्मीस्त्वं शची गौरी त्वं सिद्धिस्त्वं विभावरी ॥ त्वं स्वाहा त्वं स्वधा तुष्टिस्त्वं पुष्टिस्त्वं सुरेश्वरी ॥ १९ ॥ शक्तिरूपासि देवि त्वं सृष्टिसंहारकारिणी ॥ त्वयि दृष्टमिदं सर्वं त्रैलोक्यं सचराचरम् ॥ २० ॥ यथा तिले स्थितं तैलं दधिसंस्थं यथा घृतम् ॥ हविर्भुजश्च काष्ठस्थः सुगुप्तं लभ्यते न हि ॥ २१ ॥ तथा त्वमपि देवेशि सर्वगापि न लक्ष्यसे ॥ २२ ॥ ॥ सूत उवाच ॥ ॥ एतेन स्तोत्रमुख्येन स्मृता सा परमेश्वरी ॥ बहूनि वर्षपूगानि पूजयंत्या दिनेदिने ॥ २३ ॥ कस्यचित्त्वथ कालस्य चैत्रशुक्लाष्टमी सिता ॥ तस्मिन्नहनि देवी सा नद्यां संप्राप्य पूजिता ॥ २४ ॥ बलिपूजां ततो दत्त्वा स्तोत्रेणानेन च स्तुता ॥ ततः प्रत्यक्षतां गत्वा[2] तामुवाच तपस्विनीम् ॥२५॥ पुत्रि तुष्टास्मि भद्रं ते स्तोत्रेणानेन चानघे ॥ वरं वरय भद्रं ते तव दास्यामि वांछितम् ॥ २६ ॥ ॥ धारोवाच ॥ ॥ यदि तुष्टासि मे देवि यदि देयो वरो मम ॥ तन्मे नाम तवाप्यस्तु प्रासादेऽत्र हि केवलम् ॥ २७ ॥ अपरं नागरो योऽत्र त्वस्मिन्नहनि संस्थिते ॥ प्रदक्षिणात्रयं कृत्वा तव दत्त्वा फलत्रयम् ॥ २८ ॥ स्तोत्रेणानेन भवतीं स्तुत्वा च कुरुते नतिम् ॥ तस्य संवत्सरंयावद्रोगो रक्ष्यस्त्वयाऽखिलः ॥२९॥ या च वंध्या भवेन्नारी सा भूयात्पुत्रसंयुता ॥ दुर्भगा च ससौभाग्या कुरूपा रूपसंभवा ॥ रोगिणी रोगनिर्मुक्ता सर्वसौख्यसमन्विता ॥ ३० ॥ ॥ देव्युवाच ॥ ॥ अहं धारेति विख्याता प्रासादेऽत्र त्वया कृते ॥ भविष्यामि न सन्देहस्तव कीर्तिकृते सदा ॥ ३१ ॥ अत्र यो नागरो भक्त्या समागत्य तपस्विनि ॥ प्रदक्षिणात्रयं कुर्याद्दत्त्वा मम फलत्रयम् ॥ ३२ ॥ सोऽपि संवत्सरंयावद्भविता रोगवर्जितः ॥ एवमुक्त्वा तु सा देवी ततश्चादर्शनं गता ॥ ३३ ॥ धारापि संस्थिता तत्र अरुन्धत्या समन्विता ॥ अद्यापि दृश्यते व्योम्नि तस्याश्चापि समीपगा ॥ ३४ ॥ एतद्धारोद्भवं योऽत्र वृत्तांतं कीर्तयिष्यति ॥ शृणुयाद्वा द्विजश्रेष्ठा मुच्येत्पापाद्दिनोद्भवात् ॥ ३५ ॥

---

१ महिषाक्रांतशरीरच्छिन्नमस्तके–शरीरं च च्छिन्नमस्तकं च शरीरच्छिन्नमस्तके–महिषस्य आक्रान्ते–शरीरच्छिन्नमस्तके यया सा–महिषाक्रान्तशरीरच्छिन्नमस्तका–तत्संबुद्धौ–हे महिषाक्रान्तशरीरच्छिन्नमस्तके–इति विग्रहवाक्यं बोध्यम्। २ यात्वा–इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





तस्मात्सर्वप्रयत्नेन पठनीयं विशेषतः ॥ श्रोतव्यं च प्रभक्त्येदं नागरैश्च विशेषतः ॥ ३६ ॥ इति श्रीस्कांदे महापुराण एकाशीति साहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये धारानामोत्पत्तिवृत्तांतधारादेवीमाहात्म्यवर्णनंनामैकोनसप्तत्युत्तरशततमोऽध्यायः ॥१६९॥ ॥ छ ॥

॥ ॥ सूत उवाच ॥ ॥ तथान्यदपि संजातमाश्चर्यं यदभूद्द्विजाः ॥ विश्वामित्रेण सा शक्तिर्वसिष्ठाय विसर्जिता ॥ १ ॥ वधार्थं तस्य विप्रर्षेर्वसिष्ठेन च धीमता ॥ स्तंभिताऽथर्वणैर्मन्त्रैः प्रस्वेदः समजायत ॥२॥ स्वेदात्समभवत्तोयं शीतलं तदजायत॥पादाभ्यां निर्गतं तोयमत्र दृश्यमजायत ॥३॥ विदार्य भूमिं संजाता जलधारा सुशीतला ॥ निर्मलं पावनं स्वच्छं गंगांभ इव निःसृतम् ॥ ४ ॥ गंगा प्रत्यक्षतां याता तीर्थैः सर्वैः समन्विता॥पूरितं वारिणा कुण्डं निर्मलं शीतलं शिवम् ॥ ५ ॥ तस्यां या कुरुते स्नानं नारी वंध्या द्विजोत्तमाः ॥ सद्यः पुत्रवती सा स्याद्रौद्रे कलियुगे द्विजाः ॥ ६ ॥ अन्योऽपि कुरुते स्नानं सर्वतीर्थफलं लभेत् ॥७॥ स्नात्वा तत्र तु यो देवीं पश्येच्च विधिना नरः ॥ धनं धान्यं तथा पुत्रान्राज्योत्थं च सुखं लभेत् ॥ ॥८॥ या नारी दुर्भगा वन्ध्या साऽपि पुत्रवती भवेत् ॥ चैत्रे मासि सिताष्टम्यां भक्तियोगसमन्विता ॥ महानिशायां तत्रैव नैवेद्यबलिपिंडिकाम्॥९॥ प्रसन्नया कुमार्या तु स्वयं वाऽथ करोति या ॥ गृह्णाति या च वै नारी पिंडिकां बलिसंयुताम् ॥ १० ॥ शतवर्षा तु या नारी पिंडिकां भक्षयेद्द्विजाः ॥ साऽपि पुत्रवती च स्याद्यदि वृद्धतमा भवेत् ॥ ११ ॥ किं पुनर्यौवनोपेता सौभाग्येन समन्विता ॥ पुत्रसौख्यवती नारी देव्या वै दर्शनेन च ॥ ॥ १२ ॥ सर्वेषां नागराणां तु भावजा देवता स्मृता ॥ सा सार्धाष्टद्विपंचाशद्गोत्राणां कुलदेवता ॥ १३ ॥ एतस्मात्कारणाद्यात्रा नागरैः सुकृता भवेत् ॥ न विना नागरैर्यात्रां तुष्टिं याति सुरेश्वरी ॥ १४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये धारातीर्थोत्पत्तिमाहात्म्यवर्णनंनाम सप्तत्युत्तरशततमोऽध्यायः ॥ १७० ॥ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एतस्मिन्नेव काले तु विश्वामित्रो महामुनिः ॥ तां शक्तिं व्यर्थतां प्राप्तां ज्ञात्वा कोपसमन्वितः ॥ १ ॥ मुमोच तद्वधार्थाय ब्रह्मास्त्रं सोऽभिमंत्रितम् ॥ तस्य संहितमात्रस्य प्रस्वनः समजायत ॥ २ ॥ ततश्चोल्काः प्रभूताश्च प्रयांति च नभस्तलात् ॥ ततः कुन्ताः शक्तयश्च तोमराः परिघास्तथा ॥ ३ ॥ भिंडिपाला गदाश्चैव खड्गाश्चैव परश्वधाः ॥ बाणाः प्रासाःशतघ्न्यश्च शतशोऽथ सहस्रशः ॥४॥ वसिष्ठोऽपि परिज्ञाय प्रेषितं गाधिसूनुना ॥ ब्रह्मास्त्रं मृत्यवे तेन शुचिर्भूत्वा ततः परम् ॥ ५ ॥ इषीकां च समादाय ब्रह्मास्त्रं तत्र योजयन् ॥ अब्रवीद्गाधिपुत्राय स्वस्त्यस्तु तव पार्श्वतः ॥ ६ ॥ हन्य



१ प्रद्योतितनभस्तलाः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तामस्त्रमेतद्धि मम वाक्यादसंशयम् ॥ ततस्तेन हतं तच्च ब्रह्मास्त्रं तत्समुद्भवम् ॥ ७ ॥ वज्रास्त्रं च ततो मुक्तं वज्रास्त्रेण विनाशितम् ॥ यद्यदस्त्रं क्षिप त्येष विश्वामित्रः प्रकोपितः ॥ ८ ॥ तत्तद्धंति वसिष्ठस्तु मंत्रस्य च प्रभावतः ॥ एतस्मिन्नेव काले तु क्षुभितो मकरालयः ॥ ९ ॥ शीर्यंते गिरिशृं गाणि रक्तवृष्टिः परा स्थिता ॥ प्रलयस्येव चिह्नानि संजातानि धरातले ॥ किमकाले महानेष प्रलयः संभविष्यति ॥ १० ॥ ततः पितामहं जग्मुः सर्वे देवाः सवासवाः ॥ प्रोचुः प्रलयचिह्नानि यानि संति धरातले ॥ ११ ॥ ततो ब्रह्मा चिरं ध्यात्वा तानुवाच दिवौकसः ॥ विश्वामित्र वसिष्ठाभ्यां युद्धमेतद्व्यवस्थितम् ॥ १२ ॥ दिव्यास्त्रसंभवं देवास्तेनैतद्व्याकुलं जगत् ॥ १३ ॥ तस्माद्गच्छामहे तत्र यावन्नो जायते क्षयः ॥ सर्वेषामेव भूतानां दिव्यास्त्राणां प्रभावतः ॥ १४ ॥ ततोऽभिगम्य ते देशं यत्र तौ मुनिसत्तमौ ॥ विश्वामित्रवसिष्ठौ तौ युध्यमानौ परस्परम् ॥१५॥ ततः प्रोवाच तौ ब्रह्मा साम्ना परमवल्गुना ॥ निवर्त्यतामिदं युद्धमेतद्दिव्यास्त्रसंभवम् ॥ यावन्न प्रलयो भावि समस्ते धरणीतले ॥ १६ ॥ ॥ ॥ वसिष्ठ उवाच ॥ ॥ नाहमस्त्रं प्रयुंजामि विश्वामित्रवधेच्छया ॥ आत्मरक्षाकृते देव अस्त्रमस्त्रेण शामयन् ॥ १७ ॥ अयं मम विनाशाय केवलं चास्त्रमोक्षणम् ॥ कुरुते निर्दयो ब्रह्मंस्तं निवारय सांप्रतम् ॥ १८ ॥ ॥ ब्रह्मोवाच ॥ ॥ विश्वामित्र मुनिश्रेष्ठ वसिष्ठं ब्राह्मणोत्तमम् ॥ त्वं रक्ष मम वाक्येन तथा सर्वमिदं जगत् ॥ १९ ॥ अस्त्रमोक्षविरामं त्वं ब्रह्मर्षे कुरु सत्वरम् ॥ २० ॥ ॥ विश्वामित्र उवाच ॥ ॥ न मामेष द्विजं ब्रूते कथंचित्प्रपितामह ॥ तस्मादेष प्रकोपो मे संजातोऽस्य वधोपरि ॥ २१ ॥ तस्माद्वदतु देवेश मामेष ब्राह्मणं द्रुतम् ॥ निवारयामि येनास्त्रं यदस्योपरि संधितम् ॥२२॥ ॥ ब्रह्मोवाच ॥ ॥ त्वं वसिष्ठाधुना ब्रूहि विश्वामित्रं ममाज्ञया ॥ ब्राह्मणो जायते तेन तव जीवस्य रक्षणम् ॥ २३ ॥ ॥ ॥ वसिष्ठ उवाच ॥ ॥ नाहं क्षत्रियसंजातं ब्राह्मणं वच्मि पद्मज ॥ न वधे मम शक्तोऽयं कथंचित्क्षत्रियोद्भवः ॥ २४ ॥ ब्राह्मयं तेजो न क्षा त्रेण तेजसा संप्रणश्यति ॥ एवं ज्ञात्वा चतुर्वक्त्र यद्युक्तं तत्समाचर ॥ २५ ॥ ॥ ब्रह्मोवाच ॥ ॥ विश्वामित्र द्विजश्रेष्ठ त्यक्त्वा दिव्यास्त्रसंभवम् ॥ कुरु युद्धं वसिष्ठेन नो चेच्छप्स्याम्यहं च ते ॥ २६ ॥ ॥ विश्वामित्र उवाच ॥ ॥ दिव्यास्त्राणि च संत्यज्य मया वध्यः सुदुर्मतिः ॥ किंचि च्छिद्रं समासाद्य त्वं गच्छ निजसंश्रयम् ॥ ॥ २७ ॥ ॥ सूत उवाच ॥ ॥ बाढमित्येवमुक्त्वा च ब्रह्मलोकं गतो विधिः ॥ विश्वामित्रवसिष्ठौ च सरस्वत्यास्तटे स्थितौ ॥ २८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये वसिष्ठविश्वामित्र युद्धे दिव्यास्त्रनिवर्तनवर्णनंनामैकसप्तत्युत्तरशततमोऽध्यायः ॥ १७१ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ ततःप्रभृति च्छिद्राणि विश्वामित्रो निरी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



क्षयन् ॥ वसिष्ठस्य वधार्थाय संस्थितो द्विजसत्तमाः ॥ १ ॥ आत्मशक्तिप्रभावेन मशकस्य यथा गजः ॥ अन्यस्मिन्नहनि प्राप्ते विश्वामित्रेण सा नदी ॥ २ ॥ समाहूता समायाता द्रुतं सा स्त्रीस्वरूपिणी ॥ अब्रवीत्प्रांजलिर्भूत्वा आदेशो दीयतां मम ॥ ब्रह्मर्षे येन कार्येण समाहूतास्मि सांप्रतम् ॥ ३ ॥ ॥ विश्वामित्र उवाच ॥ ॥ यदा निमज्जनं कुर्यात्तव तोये महानदि ॥ परमं वेगमास्थाय तदाऽऽनय ममांतिकम् ॥ ४ ॥ पूर्णश्रोत्रं जले नैव व्याकुलांगं व्यवस्थितम् ॥ निहन्मि येन शीघ्रं च नान्यच्छिद्रं प्रलक्षये ॥ ५ ॥ एवमुक्ता तदा तेन विश्वामित्रेण सा नदी ॥ वित्रस्ता भयसंयुक्ता शापाद्वाक्यमुवाच सा ॥ ६ ॥ नाहं द्रोहं करिष्यामि वसिष्ठस्य महात्मनः ॥ ब्रह्मर्षे न च ते युक्तं कर्तुं वै ब्रह्मणो[1] वधम् ॥ ७ ॥ यदि त्वं ब्रह्मणा प्रोक्तो ब्रह्मर्षिः स्वयमेव तु ॥ कामान्नायं वसिष्ठस्तु तस्मात्कोपं परित्यज ॥ ८ ॥ मनसापि वधं यस्तु ब्राह्मणस्य विचिंतयेत् ॥ तप्तकृच्छ्रेण मुच्येत मनुः स्वायंभुवोऽब्रवीत् ॥ ९ ॥ वाचया प्रवदेद्यस्तु ब्राह्मणस्य वधं नरः ॥ चांद्रायणेन शुद्धिः स्यात्तस्य देवोऽब्रवीदिदम् ॥ १० ॥ तस्मान्नाहं करिष्यामि तव वाक्यं कथंचन ॥ वसिष्ठार्थं तु यत्प्रोक्तं कुरु यत्तव रोचते ॥ ११ ॥ तच्छ्रुत्वा कुपितस्तस्या विश्वामित्रो द्विजोत्तमाः ॥ शशाप तां नदीं श्रेष्ठां यत्तद्वक्ष्यामि श्रूयताम् ॥ १२ ॥ यस्मात्पापे वचो मह्यं न कृतं कुनदि त्वया ॥ तस्माद्रक्तप्रवाहस्ते जलजोऽयं भविष्यति ॥ १३ ॥ एवमुक्त्वा करात्तोयं सप्तवाराभिमंत्रितम् ॥ चिक्षेपाथ जले तस्याः क्रोधसंरक्तलोचनः ॥ १४ ॥ ततश्च तत्क्षणाज्जातं तत्तोयं रुधिरं द्विजाः ॥ सारस्वतं सुपुण्यं च यदासीच्छंखसंनिभम्[2] ॥ १५ ॥ एतस्मिन्नंतरे प्राप्ता भूतप्रेतनिशाचराः ॥ पीत्वापीत्वा प्रनृत्यंति गायंति च हसंति च ॥ १६ ॥ ये तत्र तापसाः केचित्तटे तस्या व्यवस्थिताः ॥ ते सर्वेऽपि च तां त्यक्त्वा दूरदेशं समाश्रिताः ॥ १७ ॥ बहिर्वासाश्च ये तत्र नागराः समवस्थिताः ॥ चण्डशर्मप्रभृतयस्तेऽपि याताः सुदूरतः ॥ १८ ॥ वसिष्ठोऽपि मुनिश्रेष्ठो जगामार्बुदपर्वतम् ॥ विश्वामित्रस्तु विप्रर्षिश्चमत्कारपुरं गतः ॥ १९ ॥ हाटकेश्वरजे क्षेत्रे यत्स्थितं विप्रसंकुलम् ॥ तत्राश्रमपदं कृत्वा तपस्तेपे सुदारुणम् ॥२०॥ येन सृष्टिक्षमो जातः स्पर्धते ब्रह्मणा सह ॥ एतद्वः सर्वमाख्यातं यथा सारस्वतं जलम् ॥ २१ ॥ रुधिरत्वमनुप्राप्तं विश्वामित्रस्य शापतः ॥ चंडशर्मादयो विप्रा यथा देशांतरं गताः ॥२२॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये सरस्वतीशापवृत्तांतवर्णनंनाम द्विसप्तत्युत्तरशततमोऽध्यायः ॥१७२॥ छ ॥ ॥ ॥ ऋषय ऊचुः ॥ ॥ अहो बत महाश्चर्यं विश्वामित्रस्य सन्मुनेः ॥ मंत्रप्रभावतो येन तत्तोयं रुधिरीकृतम् ॥ १ ॥ ततःप्रभृति संप्राप्तं कथं[3] तोयं

१ ब्रह्मणः–ब्राह्मणस्य–इत्यर्थः । २ शंखसंनिभम्–पांडुरवर्णम्–इत्यर्थः । ३ यथा–इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकीर्तय ॥ सरस्वत्या महाभाग सर्वं विस्तरतो वद ॥ २ ॥ ॥ सूत उवाच ॥ ॥ बहुकालं प्रवाहः स सरस्वत्या द्विजोत्तमाः ॥ महारक्तमयो जातो भूतराक्षससेवितः ॥ ३ ॥ कस्यचित्त्वथ कालस्य वसिष्ठो मुनिसत्तमः ॥ अर्बुदस्थस्तया प्रोक्तो दीनया दुःखयुक्तया ॥ ४ ॥ तवार्थाय मुने शप्ता विश्वामित्रेण कोपतः ॥ रुधिरौघवहा जाता तपस्विजनवर्जिता ॥५॥ तस्मात्कुरु प्रसादं मे यथा स्यात्सलिलं पुनः ॥ प्रवाहे मम विप्रेन्द्र प्रयाति रुधिरं क्षयम् ॥६॥ त्रैलोक्यकरणे विप्र संक्षये वा स्थितौ हि वा ॥ नाशक्तिर्विद्यते काचित्तव सर्वमुनीश्वर ॥ ७ ॥ ॥ वसिष्ठ उवाच ॥ ॥ तथा भद्रे करिष्यामि यथा स्यात्सलिलं पुनः ॥ प्रवाहे तव निर्याति सर्वं रक्तं परिक्षयम् ॥ ८ ॥ एवमुक्त्वा स विप्रर्षिरवतीर्य धरातले ॥ गतः प्लक्षतरुं यस्मादवतीर्णा सरस्वती ॥ ९ ॥ समाधिं तत्र संधाय निविष्टो धरणीतले ॥ संभ्रमं परमं गत्वा विश्वामित्रस्य चोपरि ॥ १० ॥ वारुणेन तु मन्त्रेण वीक्षयन्वसुधातलम् ॥ ततो निर्भिद्य वसुधां भूरितोयं विनिर्गतम् ॥ ११ ॥ रन्ध्रद्वयेन विप्रेन्द्रा लोचनाभ्यां निरीक्षणात् ॥ एकस्य सलिलं क्षिप्रं यत्र जाता सरस्वती ॥ १२ ॥ प्लक्षमूले ततस्तस्य वेगेनापहृतं बलात् ॥ तद्रक्तं तेन संपूर्णं ततस्तेन महानदी ॥ १३ ॥ द्वितीयस्तु प्रवाहो यः संभ्रमात्तस्य निर्गतः ॥ सा च साभ्रमतीनाम नदी जाता धरातले ॥ १४ ॥ एवं प्रकृतिमापन्ना भूय एव सरस्वती ॥ यत्पृष्टोऽस्मि महाभागाः सरस्वत्याः कृते द्विजाः ॥ १५ ॥ एतत्सारस्वतंनाम व्याख्यानमतिबुद्धिदम् ॥ यः पठेच्छृणुयाद्वापि मतिस्तस्य विवर्द्धते ॥ सरस्वत्याः प्रसादेन सत्यमेतन्मयोदितम् ॥ १६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये सरस्वत्युपाख्याने सरस्वतीशापमोचनसाभ्रमत्युत्पत्तिवृत्तान्तवर्णनंनाम त्रिसप्तत्युत्तरशततमोऽध्यायः ॥ १७३ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तथान्यदपि वो वच्मि लिंगं यत्तत्र संस्थितम् ॥ स्थापितं पिप्पलादेन कंसारेश्वरमित्यहो ॥ १ ॥ यस्मिन्दृष्टे तु लोकानां पापं याति दिनोद्भवम् ॥ नते षाण्मासिकं चैव पूजिते वर्षसंभवम् ॥ २ ॥ ॥ ऋषय ऊचुः ॥ ॥ पिप्पलादेन यल्लिंगं स्थापितं सूतनन्दन ॥ कंसारेश्वरमित्युक्तं कस्मात्तच्च ब्रवीहि नः ॥ ३ ॥ क एष पिप्पलादस्तु कस्य पुत्रो वदस्व नः ॥ किमर्थं स्थापितं लिंगं क्षेत्रे तत्र महात्मना ॥ ४ ॥ ॥ सूत उवाच ॥ ॥ प्रश्नभारो महानेष भवद्भिः समुदाहृतः ॥ तथापि कथयिष्यामि नमस्कृत्वा स्वयंभुवम् ॥ ५ ॥ याज्ञवल्क्यस्य भगिनी कंसारीति च विश्रुता ॥ कुमारब्रह्मचर्येण तपस्तेपे सुदारुणम् ॥ ६ ॥ याज्ञवल्क्याश्रमे पुण्ये बांधवेन समन्विता ॥ कस्यचित्त्वथ कालस्य याज्ञवल्क्यस्य भो द्विजाः ॥७॥ चस्कन्द रेतः स्वप्नांते दृष्ट्वा कांचिद्वराप्सराम् ॥ तारुण्यभावसंस्थस्य तपोयुक्तस्य सद्द्विजाः ॥ ८ ॥ रेतसा तस्य महता परिधानं परिप्लुतम् ॥ तच्च तेन परित्यक्तं प्रभाते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



समुपस्थिते ॥ ९ ॥ कंसारिकाऽथ जग्राह स्नानार्थं वसनं च तत् ॥ अमोघरेतसा क्लिन्नमजानन्ती द्विजोत्तमाः ॥ १० ॥ कुर्वन्त्या मज्जनं तस्या
जलं वीर्यसमन्वितम् ॥ प्रविष्टं भगमध्ये तु ऋतुकाल उपस्थिते ॥ ११ ॥ ततो गर्भः समभवत्तस्यास्तूदरमध्यगः ॥ वृद्धिं चाप्यगमन्नित्यं
शुक्लपक्षे यथोडुराट् ॥ १२ ॥ साऽपि तं गर्भमादाय स्वोदरस्थं तपस्विनी ॥ दुःखेन महता युक्ता लज्जयाऽथ तदाऽऽवृता ॥ १३ ॥ चिन्त
यामास सुचिरं विस्मयेन समन्विता ॥ गोपायन्ती तदाऽऽत्मानं दर्शनं याति नो नृणाम् ॥ १४ ॥ व्रतचर्यामिषं कृत्वा सदा रहसि
संस्थिता ॥ संप्राप्ते दशमे मासि निशीथे समुपस्थिते ॥ तस्याः कुमारको जातो बालार्कसदृशद्युतिः ॥ १५ ॥ अथ सा तं समा
दाय सूक्ष्मवस्त्रेण वेष्टितम् ॥ कृत्वा जगाम चारण्यं मनुष्यपरिवर्जितम् ॥ अश्रुपूर्णेक्षणा दीना रुदन्ती गुप्तमेव च ॥ १६ ॥ ततो
गत्वा च साऽश्वत्थं विजने सुमहत्तरम् ॥ तस्याधस्ताद्विमुच्याथ वाक्यमेतदुवाच ह ॥ १७ ॥ अश्वत्थ विष्णुरूपोऽसि त्वं देवेषु प्रतिष्ठितः ॥
तस्माद्रक्षस्व मे पुत्रं सर्वतस्त्वं वनस्पते ॥ १८ ॥ एष ते शरणं प्राप्तो मम पुत्रस्तु बालकः ॥ पापाया निर्दयायाश्च तस्माद्रक्षां समाचर ॥ १९ ॥
एवमुक्त्वा रुदित्वा च सुचिरं सा तपस्विनी ॥ जगाम स्वाश्रमं पश्चाद्बाष्पव्याकुललोचना ॥ २० ॥ यावद्रोदिति सा माता तस्याधस्ताद्वनस्पतेः ॥
तावदाकाशजा वाणी संजाता मेघनिःस्वना ॥ २१ ॥ मा त्वं शोकं कुरुष्वास्य बालकस्य कृते शुभे ॥ एष शापादुतथ्यस्य ज्येष्ठभ्रातुर्बृहस्पतिः ॥
अवतीर्णो धरापृष्ठे योग्यतां समवाप्स्यति ॥ २२ ॥ एष चाथर्वणं वेदं शतकल्पं सुविस्तरम् ॥ शतभेदं च नवधा पंचकल्पं करिष्यति ॥ २३ ॥
पिप्पलस्य तरोरेष रसं संभक्षयिष्यति ॥ पिप्पलाद इति ख्यातस्ततो लोके भविष्यति ॥ २४ ॥ या त्वं विस्मयमापन्ना पुरुषेण विना शिशुः॥
संजातोऽयं मम प्रांशुस्ततस्तत्कारणं शृणु ॥ २५ ॥ स्नानवस्त्रं च ते भ्रातू रेतसा यत्परिप्लुतम् ॥ तत्त्वया ऋतुकाले तु परिधानं कृतं शुभे ॥ २६ ॥
स्नानकाले तु तोयानि रेतोदकमथास्पृशन्[1] ॥ अमोघरेतसा तेन पुत्रोऽयं तव संस्थितः ॥ २७ ॥ एवं ज्ञात्वा महाभागे यद्युक्तं तत्समाचर ॥ २८ ॥
॥ ॥ सूत उवाच ॥ ॥ तच्छ्रुत्वा देवलोकस्य वज्रपातोपमं वचः ॥ हाहाकारपरा भूत्वा निपपात धरातले ॥ २९ ॥ छिन्नवृक्षलता यद्वत्पतिता
सा तपस्विनी ॥ ३० ॥ चिरायन्त्यां तु तस्यां स याज्ञवल्क्यो महामुनिः ॥ शून्यं तमाश्रमं दृष्ट्वा पप्रच्छान्यान्मुनीश्वरान् ॥ ३१ ॥ क्व च मे
भगिनी याता कंसारी सुतपस्विनी ॥ तया विनाऽद्य मे सर्वं शून्यमाश्रममंडलम् ॥ ३२ ॥ आचख्यौ तापसः कश्चिद्भगिनी ते यवीयसी ॥



१ रेतोदकम्—रेतोरूपं जलम्—इत्यर्थः । उदकवाची 'दक' शब्दोऽप्यस्ति । 'एधो दकस्योपस्कुरुते' इत्युदाहरणदर्शनात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निश्चेष्टा पतिता भूमावश्वत्थस्य समीपतः ॥ ३३ ॥ मया दृष्टा मुनिश्रेष्ठ तां त्वं भावय मा चिरम् ॥ अथासौ त्वरया युक्तः संभ्रांतस्तु प्रधावितः ॥ ॥ ३४ ॥ यत्र सा कथिता तेन तापसेन तपस्विनी ॥ वीक्षते यावत्तत्रस्था श्वसमाना व्यवस्थिता ॥३५॥ अथ तोयेन शीतेन सेचयित्वा मुहुर्मुहुः॥ दत्त्वा भूयोऽपि वातं च यावच्चक्रे सचेतनाम् ॥ तावत्कात्यायनी प्राप्ता मैत्रेयी च ससंभ्रमम् ॥ ३६ ॥ किमिदंकिमिदं जातं ननांदर्वद मा चिरम् ॥ ३७ ॥ किं वा सर्पेण दष्टासि सन्निपातेन दूषिता ॥ किं वा भूतगृहीताऽसि माहेंद्रेण ज्वरेण वा ॥ ३८ ॥ अथ सा चेतनां लब्ध्वा याज्ञवल्क्यं पुरः स्थितम् ॥ भार्यया सहितं दृष्ट्वा व्रीडयाऽसून्मुमोच ह ॥ ३९ ॥ अथ तां च मृतां दृष्ट्वा रुदित्वा च चिरं द्विजाः ॥ याज्ञवल्क्यः सभार्यस्तु दत्त्वा वह्निं च शोकधृक् ॥ जगाम स्वाश्रमं पश्चाद्दत्त्वा च सलिलाञ्जलिम् ॥ ४० ॥ सोऽपि बालोऽथ ववृधे पिप्पलास्वादपुष्टिधृक् ॥ अश्वत्थस्य तले तस्य वृद्धिं याति शनैःशनैः ॥ ४१ ॥ कस्यचित्त्वथ कालस्य नारदो मुनिसत्तमः ॥ तीर्थयात्राप्रसंगेन तेन मार्गेण चागतः ॥ ४२ ॥ स दृष्ट्वा बालकं तत्र द्वादशार्कसमप्रभम् ॥ एकाकिनं वने शून्ये पिप्पलास्वादतत्परम् ॥ पप्रच्छ विस्मयाविष्ट एकाकी को भवानिह ॥ ४३ ॥ वने शून्ये महारौद्रे सिंहव्याघ्रसमाकुले ॥ क्व ते माता पिता चैव किमर्थं चेह तिष्ठसि ॥ ४४ ॥ निवससि कथं चैव सर्वं मे विस्तराद्वद ॥ ४५ ॥ ॥ पिप्पलाद उवाच ॥ ॥ नाहं जानामि पितरं मातरं न च बांधवम् ॥ नापि त्वां कोऽत्र चायातो मम पार्श्वे तु सांप्रतम् ॥ ४६ ॥ ॥ सूत उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा चिरं ध्यात्वा मुनीश्वरः ॥ ततस्तं प्रहसन्प्राह ज्ञात्वा दिव्येन चक्षुषा ॥ ४७ ॥ ॥ नारद उवाच ॥ ॥ मया ज्ञातोऽसि वत्स[1] त्वं याज्ञवल्क्यस्य रेतसा ॥ दैवयोगात्समुत्पन्नो भगिन्या उदरे धृतौ ॥ ४८ ॥ उतथ्यशापदोषेण देवाचार्यो बृहस्पतिः ॥ देवकार्यस्य सिद्ध्यर्थं तस्मात्तच्छृणु कारणम् ॥ ४९ ॥ अथर्ववेदो यश्चैष शतशाखो विनिर्मितः ॥ शतकल्पश्च गूढार्थो भूपानां कार्यसिद्धये ॥५०॥ नवशाखः पंचकल्पस्त्वया कार्यः सुखावहः ॥५१॥ तत्र मात्रा महाभाग रेतसा च परिप्लुतम् ॥ यद्वस्त्रं याज्ञवल्क्यस्य परिधानं कृतं च यत् ॥५२॥ भगिन्या सुतपस्विन्या स्नानार्थं न च काम्यया ॥ तद्रेतो जलमिश्रं तु भगमध्ये विनिर्गतम् ॥५३॥ अमोघं तेन संभूतस्त्वमत्र जगतीतले ॥ माता वै मृत्युमापन्ना ज्ञात्वैवं लज्जया तया ॥ ५४ ॥ चमत्कारपुरे तुभ्यं मातुलो जनकस्तथा ॥ संतिष्ठते महाभाग तत्पार्श्वे त्वमितो व्रज ॥ ५५ ॥ सांप्रतं व्रतकालस्ते वर्षं चैवाष्टमं स्थितम् ॥ तच्छ्रुत्वा वचनं तस्य लज्जयाऽधोमुखः स्थितः ॥ ५६ ॥

---

१ वै सत्यम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ततश्चिरेण दीनं स वाक्यमेतदुवाच तम् ॥ किं मया पापमाख्याहि पूर्वदेहांतरे कृतम् ॥ ५७ ॥ येनेदं गर्हितं जन्म वियोगो मातृसंभवः ॥ परि
त्यक्ष्यामि जीवं स्वं दुःखेनानेन सन्मुने ॥ ५८ ॥ ॥ नारद उवाच ॥ ॥ न त्वया दुष्कृतं किंचित्पूर्वदेहांतरे कृतम् ॥ परं येन सुरंजातं
तवेदं व्यसनं शृणु ॥ ५९ ॥ जन्मस्थेन भवाञ्ज्ञातः शनिना नाऽत्र संशयः ॥ तेनावस्थामिमां प्राप्तो नान्यदस्ति हि कारणम् ॥ ६० ॥
तच्छ्रुत्वा वचनं तस्य कोपसंरक्तलोचनः ॥ ऊर्ध्वमालोकयामास समुद्दिश्य शनैश्चरम् ॥ ६१ ॥ तस्य दृष्टिनिपातेन न्यपतत्स तु तत्क्षणात् ॥
विमानात्स्वाद्रवेः पुत्रो ययातिरिव नाहुषः ॥६२ ॥ अधोवक्त्रो द्विजश्रेष्ठाः पितुरादेशमाश्रितः ॥ बालभावेऽपि तेनैव दग्धौ पादौ तदा रवेः ॥६३॥
अथ तं नारदः प्राह पतमानमधोमुखम् ॥ बाल्यभावादनेन त्वं पातितोऽसि शनैश्चर ॥ ६४ ॥ तस्मान्मा वीक्षयस्वैनं भविष्यति प्रकोपभाक् ॥
मा पतस्व तथा भूमौ बलान्मद्वाक्यसंभवात् ॥ ६५ ॥ स्तंभयित्वा तथाप्येवं गगनस्थं शनैश्चरम् ॥ ततः प्रोवाच तं बालं पिप्पलादं मुनीश्वरः ॥
॥६६॥ मा कोपं कुरु बाल त्वमेष सूर्यसुतो ग्रहः ॥ देवानामपि पीडां च कुरुतेऽष्टमराशिगः[1] ॥ ६७ ॥ जन्मस्थस्तु विशेषेण द्वितीयस्तु तथापरः ॥
यद्येष कुपितस्त्वां तु वीक्षयिष्यति कर्हिचित् ॥ ६८ ॥ करिष्यति न संदेहो भस्मराशिं ममाग्रतः ॥ अनेन वीक्षितौ पादौ जातमात्रेण सूर्यकौ[2] ॥
॥ ६९ ॥ आयातस्य तु तुष्टस्य पुत्रदर्शनवाञ्छया ॥ अन्तर्धानीकृते वस्त्रे ज्ञात्वा तं रौद्रचक्षुषम्[3] ॥ ७० ॥ ततो दग्धावुभौ चापि तिष्ठतश्चर्म
वेष्टितौ ॥ दृश्येतेऽद्यापि मूर्त्तौ तौ घटितायां धरातले ॥ ७१ ॥ ॥ सूत उवाच ॥ ॥ तच्छ्रुत्वा वचनं तस्य नारदस्य स बालकः ॥ भयेन महता
युक्तस्ततः पप्रच्छ तं मुनिम् ॥ ७२ ॥ कथं यास्यति मे तुष्टिं वदैष मम सन्मुने ॥ अज्ञानात्पातितो व्योम्नः शक्तिं चास्याविजानता ॥ ७३ ॥
॥ ॥ नारद उवाच ॥ ॥ ग्रहा गावो नरेंद्राश्च ब्राह्मणाश्च विशेषतः ॥ पूजिताः प्रतिपूर्ज्यंते[4] निर्दहंत्यपमानिताः ॥ ७४ ॥ तस्मात्कुरु स्तुतिं
चास्य स्वशक्त्या भास्करेः प्रभो ॥ प्रसादं गच्छते येन कोपं त्यजति पातजम् ॥ ७५ ॥ ततः कृतांजलिर्भूत्वा स्तुतिं चक्रे स बालकः ॥ भयेन
महता युक्तस्ततः संपृच्छय तं मुनिम् ॥ ७६ ॥ पिप्पलादो द्विजश्रेष्ठाः प्रणिपत्य मुहुर्मुहुः ॥ नमस्ते क्रोधसंस्थाय पिंगलाय नमोऽस्तु ते ॥ ७७ ॥
नमस्ते बभ्रुरूपाय कृष्णाय च नमोऽस्तु ते ॥ नमस्ते रौद्रदेहाय नमस्ते चांतकाय च ॥ ७८ ॥ नमस्ते यमसंज्ञाय नमस्ते सौरये विभो ॥
नमस्ते मन्दसंज्ञाय शनैश्चर नमोऽस्तु ते ॥ ७९ ॥ प्रसादं कुरु देवेश दीनस्य प्रणतस्य च ॥८०॥ ॥ शनैश्चर उवाच ॥ ॥ परितुष्टोऽस्मि ते वत्स

१ षष्ठराशिगः–इ० पा० । २ सूर्यकौ–सूर्यसम्बन्धिनौ–इत्यर्थः । प्रयोगस्त्वार्षः । ३ रौद्रचक्षुषा–इ० पा० । ४ प्रतिपूज्यन्ते–प्रतिपूजयन्ति–इत्यर्थः । आर्षः प्रयोगः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तोत्रेणानेन सांप्रतम् ॥ वरं वरय भद्रं ते येन यच्छामि सांप्रतम् ॥ ८१ ॥ पिप्पलाद उवाच ॥ ॥ अद्यप्रभृति नो पीडा बालानां सूर्यनन्दन ॥ त्वया कार्या महाभाग स्वकीया च कथंचन ॥ ८२ ॥ यावद्वर्षाष्टमं जातं मम वाक्येन सूर्यज ॥ स्तोत्रेणानेन योऽत्र त्वां स्तूयात्प्रातः समुत्थितः ॥ ॥ ८३ ॥ तस्य पीडा न कर्तव्या त्वया भास्करनन्दन ॥ तव वारे च संजाते तैलाभ्यंगं करोति यः ॥ ८४ ॥ दिनाष्टकं न कर्तव्या तस्य पीडा कथंचन ॥ यस्त्वां लोहमयं कृत्वा तैलमध्ये ह्यधोमुखम् ॥ ८५ ॥ धारयेत्तेन तैलेन ततः स्नानं समाचरेत् ॥ तस्य पीडा न कर्तव्या देयो लाभो महीभुजः ॥ ८६ ॥ अध्यर्द्धाष्टमिकायोगे[1] तावके संस्थिते नरः ॥ तव वारे तु संप्राप्ते यस्तिलाँल्लोहसंयुतान् ॥ ८७ ॥ स्वशक्त्या राति[2] नो तस्य पीडा कार्या त्वया विभो ॥ कृष्णां गां यस्तु विप्राय तवोद्देशेन यच्छति ॥ ८८ ॥ अध्यर्द्धाष्टमजा पीडा नाऽस्य कार्या त्वया विभो ॥ शमी समिद्भिर्यो होमं तवोद्देशेन यच्छति[3] ॥ ८९ ॥ तथा कृष्णतिलैश्चैव कृष्णपुष्पानुलेपनैः ॥ पूजां करोति यस्तुभ्यं धूपं वै गुग्गुलं दहेत् ॥ कृष्णवस्त्रेण संवेष्ट्य त्याज्या तस्य व्यथा त्वया ॥ ९० ॥ ॥ सूत उवाच ॥ ॥ एवमुक्तः शनिस्तेन बाढमित्येव जल्प्य च ॥ नारदं समनुज्ञाप्य जगाम निजसंश्रयम् ॥ ९१ ॥ नारदोऽपि तमादाय बालकं कृपयान्वितः ॥ चमत्कारपुरं गत्वा याज्ञवल्क्याय चार्पयत् ॥ ९२ ॥ कथयामास वृत्तांतं तस्य संभूतिसंभवम् ॥ यद्दृष्टं ज्ञानदीपेन तस्मै सर्वं न्यवेदयत् ॥९३॥ एष ते वीर्यसंभूतो बालको भगिनीसुतः ॥ मयाऽश्वत्थतले लब्धः काननेऽश्वत्थसंनिधौ ॥ ९४ ॥ व्रतबंधं कुरुष्वास्य सांप्रतं चाष्टवार्षिकः ॥ नात्र दोषोस्ति विप्रेंद्र न भगिन्यास्तथा तव ॥ तस्माद्गृहाण पुत्रं स्वं भागिनेयं विशेषतः ॥ ॥ ९५ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वा स देवर्षिस्ततश्चादर्शनं गतः ॥ याज्ञवल्क्योऽपि तच्छ्रुत्वा विषादं परमं गतः ॥ ९६ ॥ पापं तच्चिंतयन्नेव न शांतिमधिगच्छति ॥ आत्मानं गर्हयन्नित्यं दिवानक्तं च शोचति ॥ ९७ ॥ तं च पुत्रं परिज्ञाय तैस्तैश्चिह्नैर्निजैः स्थितैः ॥ ततस्तु पोषयित्वा तं व्रतेन समयोजयत् ॥ ९८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखंडे हाटकेश्वरक्षेत्रमाहात्म्ये पिप्पलादोत्पत्तिवर्णनंनाम चतुःसतत्युत्तरशततमोऽध्यायः ॥ १७४ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एवं संशोचते यावदात्मानं परिगर्हयन् ॥ ततस्तु ब्रह्मणा प्रोक्तः स्वयमभ्येत्य भो द्विजाः॥१॥ त्वया शंका न कर्तव्या सुतस्यास्य कृते द्विज॥अज्ञानादेव ते जातो दैवयोगेन बालकः॥२॥ ॥याज्ञवल्क्य उवाच॥ ॥ तथापि देव मे शुद्धिर्हृदयस्य न जायते ॥ तस्माद्वद सुरश्रेष्ठ प्रायश्चित्तं विशुद्धये ॥३॥ ॥ ब्रह्मोवाच ॥ ॥ यदि ते चित्तशुद्धिस्तु न कथंचित्प्रवर्तते ॥ तत्स्था

१ अध्यर्धाष्टमिकायोगे—सार्धसप्तवार्षिकायोगे—इत्यर्थः । २ राति—ददाति—इत्यर्थः । 'रा दाने' धातुः । ३ निर्वपेत्—इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पय महाभाग लिंगं देवस्य शूलिनः ॥ ४ ॥ अज्ञानाज्ज्ञानतो वापि यत्पापं कुरुते नरः ॥ ब्रह्महत्यादिकं चापि स्त्रीवधाद्वापि यद्भवेत् ॥ ५ ॥ पंचे
ष्टिकामयं वापि यः कुर्याद्धरमन्दिरम् ॥ तस्य तन्नाशमायाति तमः सूर्योदये यथा ॥ ६ ॥ विशेषेण महाभाग हाटकेश्वरसंभवे ॥ क्षेत्रे तत्र सुमेध्ये तु
सर्वपातकनाशने ॥ ७ ॥ कलिकाले च संप्राप्ते यत्र पापं न विद्यते ॥ अहमप्यत्र वांछामि यज्ञं कर्तुं द्विजोत्तम ॥ ८ ॥ आनयिष्यामि तत्तीर्थं
पुष्करं चात्मनः प्रियम् ॥ कलिकालभयाच्चैतद्यावन्नो व्यर्थतां व्रजेत् ॥ ९ ॥ कलिकाले तु संप्राप्ते तीर्थानि सकलानि च ॥ यास्यंति व्यर्थतां
विप्र मुक्त्वेदं क्षेत्रमुत्तमम् ॥ १० ॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वा चतुर्वक्त्रस्ततश्चादर्शनं गतः ॥ याज्ञवल्क्योऽपि तच्छ्रुत्वा पितामहवचोऽ
खिलम् ॥ ११ ॥ लिंगं संस्थापयामास ज्ञात्वा क्षेत्रमनुत्तमम् ॥ अब्रवीच्च ततो वाक्यं मेघगंभीरया गिरा ॥ १२ ॥ अष्टम्यां च चतुर्दश्यां यो लिंगं
मामकं त्विदम् ॥ स्नापयिष्यति सद्भक्त्या तस्य पापं प्रयास्यति ॥ १३ ॥ परदारकृतं यच्च मात्रापि च समं कृतम् ॥ क्षालयिष्यति तत्पापं स्नापितं
पूजितं परैः ॥ १४ ॥ अस्मिन्नहनि संप्राप्ते तस्य पक्षसमुद्भवम् ॥ प्रयास्यति कृतं पापं यदज्ञानाद्विनिर्मितम् ॥ १५ ॥ ततःप्रभृति विख्यातो याज्ञव
ल्क्येश्वरः शुभः ॥ तस्मिन्क्षेत्रे द्विजश्रेष्ठा हाटकेश्वरसंज्ञके ॥ १६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे
हाटकेश्वरक्षेत्रमाहात्म्ये याज्ञवल्क्येश्वरोत्पत्तिमाहात्म्यवर्णनंनाम पंचसप्तत्युत्तरशततमोऽध्यायः ॥ १७५ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ दृष्ट्वा
प्रतिष्ठितं लिंगं याज्ञवल्क्येन धीमता ॥ स्वमातुः शुद्धिहेतोः स[1] तन्नाम्ना लिंगमुत्तमम् ॥ १ ॥ स्थापयामास विप्रेंद्राः श्रद्धया परया युतः ॥ ततश्चा
नीय विप्रेंद्रं मध्यगं नागरोद्भवम् ॥ २ ॥ गर्तातीर्थसमुद्भूतमाहिताग्निं प्रयाजिनम् ॥ यथैतन्नगरस्थानं तथा त्वमपि दीक्षितः ॥ ३ ॥ अष्टषष्टिषु
गोत्राणां नायकत्वे व्यवस्थितः ॥ तव वाक्येन सर्वाणि गोत्राणि द्विजसत्तम ॥ ४ ॥ वर्तयिष्यंति कृत्येषु यावच्चन्द्रार्कतारकाः ॥ गोवर्धन त्वया
चिंता कार्या चास्य सम्रुद्भवा ॥ ५ ॥ लिंगस्य पूजनार्थाय प्रेरणीयाश्च नागराः॥ पूजया तस्य लिंगस्य वृद्धिं यास्यति तेऽन्वयः ॥ ६ ॥ अपूजया
विनाशं च यास्यत्यत्र न संशयः ॥ तव वंशोद्भवा ये च पूजयित्वा प्रभक्तितः ॥ ७ ॥ एतल्लिंगं करिष्यंति कृत्यानि विविधानि च ॥ तानि
सिद्धिं प्रयास्यंति प्रसादादस्य दीक्षित ॥ ८ ॥ ॥ गोवर्धन उवाच ॥ ॥ अहमर्चां करिष्यामि लिंगस्यास्य सदा द्विज ॥ भक्तिं[2] च प्रकरि ॥१९३॥
ष्यामि हेतोरस्य कृते द्विज ॥ पूजार्थं चैव ये चान्ये मम वंशसमुद्भवाः ॥ ९ ॥ ॥ पिप्पलाद उवाच ॥ ॥ गोवर्धन द्रुतं विप्रांस्तत्र चानय नागरान् ॥

१ सः–पिप्पलादः । २ भक्तिं करिष्यंति–इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेषां मतेन देवस्य नाममात्रं करोम्यहम् ॥ १० ॥ ततश्चानाययामास विप्रांश्चैव विचक्षणान् ॥ श्रुताध्ययनसंपन्नान्यज्ञकर्मपरायणान् ॥ ११ ॥ तानब्रवीत्प्रणम्योच्चैः पिप्पलादो महामुनिः ॥ मम माता मृता पूर्वं कंसारीति च नामतः ॥ १२ ॥ तस्या उद्देशतो लिंगं मयैतत्संप्रतिष्ठितम् ॥ युष्मद्वाक्यात्प्रसिद्धिं च प्रयातु द्विजसत्तमाः ॥ १३ ॥ अष्टम्यां च चतुर्दश्यां यश्चैतत्स्नापयिष्यति ॥ याज्ञवल्क्येश्वरोत्थं च स वै श्रेयो ह्यवाप्स्यति ॥ १४ ॥ ॥ सूत उवाच ॥ ॥ अथ तैर्ब्राह्मणैः सर्वैस्तस्य नाम प्रतिष्ठितम् ॥ कंसारीश्वर इत्येवं गौरवात्तस्य सन्मुनेः ॥ १५ ॥ एतद्वः सर्वमाख्यातं यत्पृष्टोऽस्मि द्विजोत्तमाः ॥ कंसारीश्वरसंज्ञस्तु यथा जातस्तु पापहा ॥ स्थापितः पिप्पलादेन स्वयं चैव महात्मना ॥ १६ ॥ यश्चैतत्पुण्यमाख्यानं तस्य देवस्य संनिधौ ॥ संपठेच्छृणुयाद्वापि सम्यक्छक्तिसमन्वितः ॥ १७ ॥ मनसा चिंतितं पापं परदारकृतं च यत् ॥ तस्य तन्नाशमायाति पिप्पलादव चो यथा ॥ १८ ॥ यस्तस्य पुरतो भक्त्या नीलरुद्रान्सदा जपेत् ॥ प्राणरुद्रान्विशेषेण भवरुद्रसमन्वितान् ॥ १९ ॥ ब्रह्महत्योद्भवं चैव अपि तस्य प्रणश्यति ॥ परचक्रभये जाते ह्यनावृष्टिभये तथा ॥ २० ॥ अथर्ववेदे साद्यंते पठिते तस्य चाग्रतः ॥ शत्रुर्विलयमभ्येति वृष्टिः सञ्जायते द्रुतम् ॥ २१ ॥ राजदौःस्थ्ये समुत्पन्ने राजा भवति धार्मिकः ॥ सर्वरोगविनिर्मुक्तः प्रजापालनतत्परः ॥ २२ ॥ उपसर्गभये जाते तस्य दोषः प्रशाम्यति ॥ शनैः शनैरसंदिग्धं पिप्पलादवचो यथा ॥ २३ ॥ किं वा ते बहुनोक्तेन यत्किंचिद्व्यसनं महत् ॥ तत्तस्य व्यसनं किंचिदथर्वणः प्रकीर्तनात् ॥ २४ ॥ अस्य देवस्य पुरतो याति नाशं च वै द्रुतम् ॥ २५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये कंसारेश्वरोत्पत्तिमाहात्म्यवर्णनंनाम षट्सप्तत्युत्तरशततमोऽध्यायः ॥ १७६ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तथान्यापि च तत्रास्ति गौरी वै पञ्चपिंडिका ॥ लक्ष्म्या संस्थापिता चैव मानुषत्वव्यवस्थया ॥ १ ॥ तस्या दर्शनमात्रेण नारी सौभाग्यमाप्नुयात् ॥ ज्येष्ठे मासि सिते पक्षे वृषस्थे च दिवाकरे ॥ २ ॥ तस्या उपरि नारी या जलयन्त्रं दधाति वै ॥ स्नाप्यमाणं दिवानक्तं सौभाग्यं परमं लभेत् ॥ ३ ॥ यत्फलं लभते नारी समस्तैर्विहितैर्व्रतैः ॥ गौरीसमुद्भवैश्चैव दानैर्दत्तैस्तदिष्टजैः ॥ तत्फलं लभते सर्वं जलयन्त्रस्य कारणात् ॥ ४ ॥ तस्मात्सर्वप्रयत्नेन स्त्रीभिः सौभाग्यकारणात् ॥ जलयन्त्रं विधातव्यं ज्येष्ठे गौर्याः प्रयत्नतः ॥ ५ ॥ किं व्रतैर्नियमैर्वापि

१ सार्वम्–इ० पा० । २ यस्याः–इ० पा० । ३ जलयन्त्रस्य–गलंतिकायाः–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





स्त्रीणां ब्राह्मणसत्तमाः ॥ जपैर्होमैः कृतैरन्यैर्बहुक्लेशकरैश्च तैः ॥ ६ ॥ स्त्रीणां ब्राह्मणशार्दूला जलयन्त्रे धृते सति ॥ गौर्या उपरि सद्भक्त्या वृषस्थे तीक्ष्णदीधितौ ॥ ७ ॥ नैवं संजायते वंध्या काकवन्ध्या न जायते ॥ न दौर्भाग्यसमोपेता सप्तजन्मांतराणि सा ॥ ८ ॥ ॥ ऋषय ऊचुः ॥ ॥ गौरी चतुर्भुजा प्रोक्ता दृश्यते परमेश्वरी ॥ पञ्चपिंडा कथं जाता ह्येतं नः संशयं वद ॥ ९ ॥ ॥ सूत उवाच ॥ ॥ यदा च प्रलयो भावि तदात्मानं करोत्यसौ ॥ पञ्चपिंडीमयं विप्राः कुरुते रूपमुत्तमम् ॥ १० ॥ एषा सा परमा शक्तिः सर्वं व्याप्य सुरेश्वरी ॥ तया सर्वमिदं व्याप्तं त्रैलोक्यं सचराचरम् ॥ ११ ॥ पृथिव्यापश्च तेजश्च वायुराकाशमेव च ॥ सृष्ट्यर्थं रक्षयेदेषा ततः स्यात्पंचपिंडिका ॥ १२ ॥ यदस्यां पूजितायां तु प्रत्यक्षायां प्रजायते ॥ सहस्रत्रिगुणं तच्च यत्र स्यात्पञ्चपिण्डिका ॥ १३ ॥ ज्येष्ठे मासि विशेषेण जलयंत्रार्चनेन च ॥ अत्र वः कीर्तयिष्यामि त्वितिहासं पुरातनम् ॥ १४ ॥ यद्वृत्तं काशिराजस्य भार्याया द्विजसत्तमाः ॥ यच्च प्रोक्तं पुरा लक्ष्म्या विष्णवे परिपृष्टया ॥ १५ ॥ ॥ लक्ष्मीरुवाच ॥ ॥ काशिराजः पुरा ह्यासीज्जयसेन इति श्रुतः ॥ तस्य भार्यासहस्रं तु ह्यासीद्रूपसमन्वितम् ॥ १६ ॥ अथ चान्या प्रिया तेन लब्धा भार्या सुशोभना ॥ मनुष्यत्वव्यवस्थाया मम चांशकला हि या ॥ सुता मद्राधिराजस्य विष्वक्सेनस्य धीमतः ॥ १७ ॥ सा गत्वा प्रातरुत्थाय शुभे गंगातटे तदा ॥ पञ्चपिंडात्मिकां गौरीं कृत्वा कर्दमसंभवाम् ॥ १८ ॥ ततः संपूजयामास मन्त्रैः पंचभिरेव च ॥ ततो गन्धैः परैर्माल्यैर्धूपैर्वस्त्रैः सुशोभनैः ॥ १९ ॥ नैवेद्यैः परमान्नैश्च गीतैर्नृत्यैः प्रवादितैः ॥ ततो विसृज्य तां देवीं तदुद्देशेन वै ततः ॥ २० ॥ दत्त्वा दानानि भूरीणि गौरिणीनां[1] द्विजन्मनाम् ॥ ततश्च गृहमभ्येति भूरिवादित्रनिःस्वनैः ॥ २१ ॥ यथायथा च तां पूजां तस्या गौर्या करोति सा ॥ तथातथा तु सौभाग्यं तस्याश्चाप्यधिकं भवेत् ॥ २२ ॥ सर्वासां च सपत्नीनां सौभाग्यं वाधिकं भवेत् ॥ २३ ॥ अथ तस्याः सपत्न्यो याः सर्वा दुःखसमन्विताः॥ दृष्ट्वा सौभाग्यवृद्धिं तां तस्या एव दिनेदिने ॥ २४ ॥ एकाः प्रोचुः कर्म चैतद्यदेषा कुरुते सदा ॥ मृन्मयांश्च समादाय पूजयेत्पंचपिंडकान् ॥ २५ ॥ अन्यास्तां मंत्रसंसिद्धां प्रवदंति महर्षयः ॥ अन्या वदन्ति पुण्यानि ह्यस्याः पूर्वकृतानि च ॥ २६ ॥ एवं तासां सुदुःखानां महान्कालो जगाम ह ॥ कस्यचित्त्वथ कालस्य सर्वाः संमंत्र्य ता मिथः ॥ २७ ॥ तस्याः संनिधिमाजग्मुस्तस्मिन्नेव जलाशये ॥ यत्र सा पूजयेद्गौरीं कृत्वा तां पञ्चपिंडिकाम् ॥ २८ ॥ ततः सर्वाः समालोक्य त्यक्त्वा गौरीप्रपूजनम् ॥ संमुखी प्रययौ तूर्णं कृतांजलिपुटा स्थिता ॥ २९ ॥ स्वागतं वो महाभागा[2] भूयः सुस्वागतं च वः ॥ कृत्यं निवेद्यतां शीघ्रं येनाशु प्रकरोम्यहम् ॥ ३० ॥ ॥ सपत्न्य ऊचुः ॥ ॥ वयं सर्वाः समायाताः कौतुकेन

१ गौरिणीनाम्—सुवासिनीनां—कुमारीणां च—इत्यर्थः । २ संबोधनमिदम् ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तवांतिकम् ॥ दौर्भाग्यवह्निनिर्दग्धास्तव सौभाग्यजेन च ॥ ३१ ॥ तस्माद्वद महाभागे मृन्मयां पंचपिंडिकाम् ॥ नित्यमर्चयसि त्वं किं सौभाग्यस्य विवर्धनम् ॥ ३२ ॥ किं ते कारणमेतद्धि किं वा मन्त्रसमुद्भवः ॥ प्रभावोऽयं महाभागे गुह्यं चेन्नो वदस्व नः ॥ ३३ ॥ ॥ पद्मावत्युवाच ॥ ॥ ॥ रहस्यं परमं गुह्यं यत्पृष्टास्मि शुभाननाः ॥ अवक्तव्यं वदिष्यामि भवतीनां तथापि च ॥ ३४ ॥ गौरीपूजनकाले तु यस्माच्चैव समागताः॥ सर्वा मम भगिन्यः स्थ ईर्ष्याधर्मो न मेऽस्ति च ॥ ३५ ॥ अहमासं पुरा कन्या पुरे कुसुमसंज्ञिते ॥ वीरसेनस्य शूद्रस्य वणिक्पुत्रस्य धीमतः ॥ तेन दत्ताऽस्मि धर्मेण विवाहार्थं महात्मना ॥ ३६ ॥ ततो विवाहसमये मम दत्तानि वृद्धये ॥ पंचाक्षराणि श्रेष्ठानि योषिता दीक्षया सह ॥ गौरीपूजाकृते चैव प्रोक्ता चाहं ततः परम् ॥ ३७ ॥ यावत्पुत्रि त्वमात्मानमेतैः पूजयसेऽक्षरैः ॥ जलपानं न कर्तव्यं तावच्चैव कथञ्चन ॥ ३८ ॥ येन संप्राप्स्यसेऽभीष्टं तत्प्रभावाद्यदीप्सितम् ॥ तथेति च मया प्रोक्तं तस्याश्चैव वरानने ॥ ३९ ॥ ततो विवाहे निर्वृत्ते गताऽहं पतिना सह ॥ श्वशुरस्तिष्ठते यत्र श्वश्रूश्चैव सुदारुणा ॥ ४० ॥ गौरीपूजाकृते मां च निवारयति सर्वदा ॥ ततोऽहं भयसन्त्रस्ता गौरीभक्तिपरायणा ॥ जलार्थं यत्र गच्छामि तस्मिंश्चैव जलाश्रये ॥ ४१ ॥ ततः कर्दममादाय मन्त्रैः पंचभिरेव च ॥ तैरेव पूजयाम्येव गौरीं भक्तिपरायणा ॥ ४२ ॥ प्रक्षिपामि ततस्तोये ततो गच्छामि मन्दिरम् ॥ कस्यचित्त्वथ कालस्य भर्ता मे प्रस्थितः शुभः ॥ देशांतरं वणिग्वृत्त्या सोऽपि मार्गं तमाश्रितः ॥ ४३ ॥ स गच्छन्मरुमार्गेण मां समादाय स्नेहतः ॥ संप्राप्तो निर्जलं देशं सुरौद्रं मरुमंडलम् ॥ ४४ ॥ तथा रौद्रतरे काले वृषस्थे दिवसाधिपे ॥ ततः सार्थः समस्तश्च विश्रांतः स्थलमध्यगः ॥ ४५ ॥ कूपमेकं समाश्रित्य गम्भीरं जलदोपमम् ॥ एतस्मिन्नेव काले तु मया दृष्टः समीपगः ॥ तोयाकारो मरुदेशस्तश्चित्ते विचिन्तितम् ॥ ४६ ॥ यत्तच्च दृश्यते तोयं समीपस्थं तथा बहु ॥ अत्र स्नात्वा शुचिर्भूत्वा गौरीमभ्यर्च्य भक्तितः ॥ पिबामि सलिलं पश्चात्सुस्वादु सरसीभवम् ॥ ४७ ॥ ततः संप्रस्थिता यावत्प्रगच्छामि पदात्पदम् ॥ यावद्दूरतरं यामि तावत्सा मृगतृष्णिका ॥ ४८ ॥ एतस्मिन्नन्तरे प्राप्तो नभोमध्यं दिवाकरः ॥ वृषस्थो येन दह्यामि ह्युपरिष्टाच्छुभानना ॥ ४९ ॥ अधोभागे सुतप्ताभिर्वालुकाभिः समंततः ॥ तृष्णार्ताऽहं ततस्तस्मिन्मरुदेशे समाकुला ॥ ५० ॥ ततश्च पतिता भूमौ विस्फोटकसमावृता ॥ ततो मया स्मृता चित्ते कथा भारतसंभवा ॥ ५१ ॥ नृगेण तु यथा यज्ञो वालुकाभिर्विनिर्मितः ॥ कूपान्तः क्षिप्यमाणेन तृणलोष्टांबुवर्जितम् ॥ ५२ ॥ भक्तिग्राह्यास्ततो देवास्तुष्टास्तस्य महात्मनः ॥ तदहं वालुकाभिश्च पूजयामि हरप्रियाम् ॥ ५३ ॥ तेन तुष्टा तु सा देवी मम राज्यं प्रयच्छति ॥ अद्य देहान्तरे प्राप्ते मनोभीष्टमनंतकम् ॥ ५४ ॥ ततस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

पंचभिर्मन्त्रैस्तैरेव स्मृतिमागतैः ॥ पंचभिर्मुष्टिभिर्देवी वालुकोत्थैः प्रपूजिता ॥ ५५ ॥ ततः पञ्चत्वमापन्ना तत्कालेऽहं वरांगनाः ॥ दशार्णाधिपते र्जाता सदने लोकविश्रुते ॥ ५६ ॥ जातिस्मरणसंयुक्ता तस्या देव्याः प्रसादतः ॥ भवतीनां कनिष्ठास्मि ज्येष्ठा सौभाग्यतः स्थिता ॥ ५७ ॥ एत स्मात्कारणाद्गौरीं मुक्त्वैतान्पञ्चपिण्डकान् ॥ कर्द्दमेन विधायाथ पूजयामि दिनेदिने ॥ ५८ ॥ एतद्गुह्यं मया ख्यातं भवतीनामसंशयम् ॥ सत्येना नेन मे गौरी मनोभीष्टं प्रयच्छतु ॥ ५९ ॥ ॥ लक्ष्मीरुवाच ॥ ॥ ततः सर्वाः सपत्न्यस्ताः कृतांजलिपुटाः स्थिताः ॥ मांमूचुर्विनयाद्वाचा प्रणिपत्य मुहुर्मुहुः ॥६०॥ प्रसादं कुरु चास्माकं दीयतां मन्त्रपंचकम् ॥ तदेव येन ते देवी तुष्टा सा परमेश्वरी ॥ ६१ ॥ मया प्रोक्ताश्च ताः सर्वाः प्रार्थयध्वं यथेच्छया ॥ अहं सर्वं प्रदास्यामि तत्सत्यं वचनं मम ॥ ६२ ॥ ततो देव मया प्रोक्तं तासां तन्मंत्रपंचकम् ॥ शिष्यत्वं गमितानां च वाङ्मनःकायकर्मभिः ॥ ६३ ॥ ॥ विष्णुरुवाच ॥ ॥ ममापि वद देवेशि कीदृक्तन्मन्त्रपञ्चकम् ॥ यत्त्वयाऽनुष्ठितं पूर्वं तया तासां निवेदि तम् ॥ ६४ ॥ ॥ लक्ष्मीरुवाच ॥ ॥ नमः पृथिव्यै क्षांतीशि नम आपोमये शुभे ॥ तेजस्विनि नमस्तुभ्यं नमस्ते वायुरूपिणि ॥ ६५ ॥ आकाशरूपसंपन्ने पंचरूपे नमोनमः ॥ ६६ ॥ एभिर्मन्त्रैर्मया पूर्वं पूजिता परमेश्वरी ॥ तेन राज्यं मया प्राप्तं सर्वस्त्रीणां सुदुर्लभम् ॥ ६७ ॥ ततश्च स्थापिता देवी कृत्वा रत्नमयी शुभा ॥ हाटकेश्वरजे क्षेत्रे मया तत्र सुरेश्वर ॥ ६८ ॥ तां या पूजयते नारी सद्योऽपि पतिवल्लभा ॥ जायते नात्र सन्देहः सर्वपापविवर्जिता ॥ ६९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये पञ्चपिं डिकोत्पत्तिमाहात्म्यवर्णनंनाम सप्तसप्तत्युत्तरशततमोऽध्यायः ॥ १७७ ॥ ॥ छ ॥ ॥ लक्ष्मीरुवाच ॥ ॥ एवं राज्यं मया प्राप्तं गौरीपूजा कृते विभो ॥ सौभाग्यं परमं चैव दुर्लभं सर्वयोषिताम्[१] ॥ १ ॥ न चापत्यं मया लब्धं तथापि परमेश्वर ॥ तादृशेऽपि च सौभाग्ये तारुण्ये तादृशे स्थिते ॥ २ ॥ दह्यामि तेन दुःखेन दिवानक्तं सुखं न मे ॥ कस्यचित्त्वथ कालस्य दुर्वासा मुनिसत्तमः ॥ ३ ॥ आनर्ताधिपतेर्हर्म्यं संप्राप्तो गौरवाय सः॥ चातुर्मास्यकृते चैव मृत्तिकाग्रहणाय च ॥ ४ ॥ ततः संपूजितो राज्ञा आनर्तेन यथाक्रमम् ॥ दत्त्वार्घ्यं मधुपर्कं च ततः प्रोक्तं प्रणम्य च ॥५॥ स्वागतं ते मुनिश्रेष्ठ भूयः सुस्वागतं च ते ॥ नान्यो धन्यतमो लोके भूपोऽस्ति सदृशो मया ॥ ६ ॥ यौ ते पादौ रजोध्वस्तौ केशैर्मे निर्मलीकृतौ ॥ 

१ माम्—तद्राजपत्नीरूपां माम्—इत्यर्थः । एवं सर्वत्र 'अस्मद्' शब्दप्रयोगस्थले काशिराजस्वरूपाया लक्ष्म्याः व्याख्यानं बोद्धव्यम् । एवं योजनयैवैतस्येतिहासस्य संगतिर्घटते । अन्यथा व्यामोह इवात्रेतिहासे समा पतति तन्निवृत्तिश्च—मद्रराजसुतारूपेणावतीर्णाया लक्ष्म्याः श्रीविष्णुं प्रति स्वचरित्रवर्णनेन बोद्धव्या सुनिपुणैर्विद्वज्जनैः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्ब्रूहि किं करोम्यद्य गृहायातस्य ते मुने ॥ ७ ॥ अपि राज्यं प्रयच्छामि का वार्तान्येषु वस्तुषु ॥ ८ ॥ ॥ दुर्वासा उवाच ॥ ॥ चातुर्मासीविधानं ते करिष्ये नृप मंदिरे ॥ मृत्तिकाग्रहणं तावच्छुश्रूषा क्रियतां मम ॥ स तथेति प्रतिज्ञाय मामूचे पार्थिवोत्तमः ॥ ९ ॥ शुश्रूषा चास्य कर्तव्या सर्व देव वरानने ॥ चातुर्मासीव्रतं यावद्देवतार्चनपूर्वकम् ॥ १० ॥ बाढमित्येवमुक्त्वाथ मया सर्वमनुष्ठितम् ॥ शुश्रूषार्हं च यत्कर्म दुहितेव पितुर्यथा ॥ ॥ ११ ॥ चातुर्मास्यां व्यतीतायां यदा संप्रस्थितो मुनिः ॥ तदा प्रोवाच मां तुष्टः पुत्रि किं करवाणि ते ॥ १२ ॥ ततः स भगवान्प्रोक्तः प्रणिपत्य मया मुहुः ॥ अपत्यं नास्ति मे ब्रह्मंस्तेन दह्याम्यहर्निशम् ॥ १३ ॥ ईदृशे सति राज्ञोऽपि यौवने च महत्तरे ॥ तत्त्वं वद मुनिश्रेष्ठ येन स्यान्मम संततिः ॥ १४ ॥ व्रतेन नियमेनाथ दानेन च हुतेन च ॥ ततः स सुचिरं ध्यात्वा मामुवाच स्मयन्निव ॥ १५ ॥ अन्यदेहांतरे पुत्रि त्वया गौरी प्रपूजिता ॥ तप्ताभिर्वालुकाभिः सा मृत्युकाल उपस्थिते ॥ १६ ॥ तद्भक्त्या लब्धराज्यापि दाहेन परियुज्यसे ॥ गौरी यत्तापसंयुक्ता वालुकाभिः कृता त्वया ॥ १७ ॥ न देवो विद्यते काष्ठे पाषाणे मृत्तिकासु च ॥ भावेषु विद्यते देवो मन्त्रसंयोगसंयुतः ॥ १८ ॥ भावभक्तिसमायुक्ता मंत्रसंयोजनेन च ॥ देवी मन्त्रसमायाता त्वया वालुकयाऽर्चिता ॥ १९ ॥ त्वत्काये तेन संतापः सर्वदाऽयं व्यवस्थितः॥ तस्माद्रत्नमयीं गौरीं कृत्वा त्वं पंचपिंडिकाम् ॥ हाटकेश्वरजे क्षेत्रे संस्थापय शुभानने ॥२०॥ वृषस्थे भास्करे पश्चात्तस्या उपरि स्राविं यत् ॥ जलयन्त्रं दिवारात्रं धारयस्व प्रयत्नतः ॥ २१ ॥ ततो यथायथा तस्याः शीतभावो भविष्यति ॥ तथातथा च ते दाहः शांतिं यास्यत्यहर्निशम् ॥ २२ ॥ दाहांते भविता गर्भस्ततः पुत्रमवाप्स्यसि ॥ राज्यभारक्षमं शूरं त्रिषु लोकेषु विश्रुतम् ॥ २३ ॥ अन्यापि कामिनी यात्र एवं तां पूजयिष्यति ॥ ज्येष्ठे मासे तथा सापि यथा त्वं प्रभविष्यति ॥ २४ ॥ ॥ लक्ष्मीरुवाच ॥ ॥ ततो मया पुनः प्रोक्तो भगवान्स मुनीश्वरः ॥ मानुषत्वे न मे रागो विरक्तिर्महती स्थिता ॥ २५ ॥ नदीवेगोपमं दृष्ट्वा जीवितं सर्वदेहिनाम् ॥ तन्मे वद महाभाग यत्किंचिद्व्रतमुत्तमम् ॥ २६ ॥ मानुषत्वं न येन स्यात्सम्यक्चीर्णेन सद्द्विज ॥ ततः स सुचिरं ध्यात्वा मामाह परमेश्वर ॥ २७ ॥ अस्ति पुत्रि व्रतं पुण्यं गौरीतुष्टिकरं परम् ॥ येन चीर्णेन वै सम्यग्योषिद्देवत्वमाप्नुयात् ॥ २८ ॥ गोमयाख्या महादेवी कृता वै गोमयेन सा ॥ ततो गोलोकमापन्नाः सर्वास्ता वरवर्णिनि ॥ २९ ॥ तां त्वं कुरुष्व कल्याणि येन देवत्वमाप्स्यसि ॥ ततो मया पुनः प्रोक्तः स मुनिः सुरसत्तम ॥ ३० ॥ कस्मिन्काले प्रकर्तव्या विधिना केन सन्मुने ॥ सर्वं विस्तरतो ब्रूहि येन तां प्रकरोम्यहम् ॥ ३१ ॥ ॥ दुर्वासा उवाच ॥ ॥ नभस्ये चासिते पक्षे तृतीयादिवसे स्थिते ॥ प्रातरुत्थाय पश्चाच्च भक्षयेद्दंतधावनम् ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

ततश्च नियमं कृत्वा उपवाससमुद्भवम् ॥ गौरीनाम समुच्चार्य श्रद्धापूतेन चेतसा ॥ ३३ ॥ ततो निशागमे प्राप्ते कृत्वा गौरीचतुष्टयम् ॥ मृन्मयं यादृशं चैव तदिहैकमनाः शृणु ॥ ३४ ॥ एका गौरी प्रकर्तव्या पंचपिंडा यथोदिता ॥ प्रहरेप्रहरे प्राप्ते तासु पूजां समाचरेत् ॥ यैर्मंत्रैस्तान्निबोध त्वमेकैकस्याः पृथक्पृथक् ॥ ३५ ॥ हिमाचलगृहे जाता देवि त्वं शंकरप्रिये ॥ मेनागर्भसमुद्भूता पूजां गृह्ण नमोस्तु ते ॥ ३६ ॥ धूपं दद्यात्ततश्चैव कर्पूरं श्रद्धया सह ॥ रक्तसूत्रेण दीपं च घृतेन परिकल्पयेत् ॥ ३७ ॥ जातिपुष्पैः समभ्यर्च्य नैवेद्ये मोदकान्न्यसेत् ॥ रक्तवस्त्रेण संछाद्य अर्घ्यं दत्त्वा ततः परम् ॥ ३८ ॥ यस्य वृक्षस्य पुष्पं च तस्य स्याद्दन्तधावनम् ॥ मातुलिंगेन तस्यास्तु मन्त्रेणानेन भक्तितः ॥ ३९ ॥ अर्घ्यं दद्यात्प्रयतेन गन्धपुष्पाक्षतान्वितम् ॥ शंकरस्य प्रिये देवि हिमाचलसुते शुभे ॥ अर्घ्यमेनं मया दत्तं प्रतिगृह्ण नमोऽस्तु ते ॥ ४० ॥ तदेव प्राशनं कुर्यात्ततः कायविशुद्धये ॥ प्रहरांते[1] च संपूज्य अर्धनारीश्वरं ततः ॥ ४१ ॥ सुरभ्या पूजयेद्भक्त्या मन्त्रेणानेन पार्वति ॥ वाममर्धं शरीरस्य या हरस्य व्यवस्थिता ॥ सा मे पूजां प्रगृह्णातु तस्यै देव्यै नमोऽस्तु ते ॥ ४२ ॥ अगरुं च ततो भक्त्या धूपं दद्यात्तथा शुभे ॥ नैवेद्ये गुणकांश्चैव नालिकेरेण चार्घकम् ॥ ४३ ॥ मन्त्रेणानेन दातव्यं तदेव प्राशनं स्मृतम् ॥ अर्धनारीश्वरौ यौ च संस्थितौ परमेश्वरौ ॥ ४४ ॥ अर्घ्यो मे गृह्यतां देवौ स्यातं सर्वसुखप्रदौ ॥ तृतीये प्रहरे प्राप्ते शतपत्र्या प्रपूजयेत् ॥ ४५ ॥ उमामहेश्वरौ देवौ मंत्रेणानेन पूजयेत् ॥ ॥ ४६ ॥ उमामहेश्वरौ देवौ यौ तौ सृष्टिलयान्वितौ ॥ तौ गृह्णीतामिमां पूजां मया दत्तां प्रभक्तितः ॥ ४७ ॥ गुग्गुलोत्थं ततो धूपं नैवेद्यं घारिकात्मकम् ॥ जातीफलेन चार्घ्यं च तदेव प्राशनं स्मृतम् ॥ ४८ ॥ ततश्चार्घ्यः प्रदातव्यो मंत्रेणानेन भक्तितः ॥ ग्रंथिचूर्णेन धूपं च अर्घ्यं मदनजं फलम् ॥ ४९ ॥ तदेव प्राशनं कार्यं ततः कायविशुद्धये ॥ ५० ॥ उमामहेश्वरौ देवौ सर्वकामसुखप्रदौ ॥ गृह्णीतामर्घ्यमेतं मे दयां कृत्वा महत्तमाम् ॥ ५१ ॥ चतुर्थे प्रहरे प्राप्ते तां गौरीं पंचपिंडिकाम् ॥ भृंगराजेन संपूज्य मंत्रेणानेन भक्तितः ॥ ५२ ॥ पृथिव्यादीनि भूतानि यानि प्रोक्तानि पंच च ॥ पंचरूपाणि देवेशि पूजां गृह्ण नमोऽस्तु ते ॥ ५३ ॥ नैवेद्ये घृतपूपांश्च दद्याद्देव्याः प्रभक्तितः ॥ ग्रंथिचूर्णेन धूपं च ह्यर्घ्यं मदनजं फलम् ॥ तदेव प्राशनं कार्यमर्घ्यमंत्रमिदं स्मृतम् ॥ ५४ ॥ पंचभूतमयी देवी पंचधा या व्यवस्थिता ॥ अर्घ्यमेनं मया दत्तं सा गृह्णातु सुरेश्वरी ॥ ५५ ॥ एवं सर्वा निशा सा च गीतवाद्यादिनिःस्वनैः ॥ तासां चैवाग्रतो नेया नैव निद्रां समाचरेत् ॥ ५६ ॥ ततः प्रभाते विमले प्रोद्गते

[1] प्रहरांते–प्रथमप्रहरांते–द्वितीयप्रहरादौ–इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रविमण्डले ॥ स्नात्वा संपूजयेद्विप्रं सह पत्न्या प्रभक्तितः ॥ ५७ ॥ वस्त्रैराभरणैश्चैव स्वशक्त्या नृपनंदिनि ॥ गौर्यै भक्ष्यं च दातव्यं मिष्टान्नेन शुचिस्मिते ॥ ५८ ॥ ततः करेणुमानीय वडवां वा सुमध्यमे ॥ गौरीचतुष्टयं तच्च समारोप्य तथोपरि ॥ ५९ ॥ गीतवादित्रशब्देन वेदध्वनियुतेन च ॥ नद्यां वाऽथ तडागे वा वाप्यां वाथ परिक्षिपेत् ॥ ६० ॥ मंत्रेणानेन सद्भक्त्या तवेदं वच्मि सुन्दरि ॥ ६१ ॥ आहूतासि मया देवि पूजितासि मया शुभे ॥ मम सौभाग्यदानाय यथेष्टं गम्यतामिति ॥ ६२ ॥ ॥ लक्ष्मीरुवाच ॥ ॥ एवं मया कृता देव सा तृतीया यथोदिता ॥ नभस्ये मासि संप्राप्ते भक्त्या परमया विभो ॥ ६३ ॥ द्वितीये च तथा प्राप्ते तृतीये च विशेषतः ॥ यावत्पश्यामि प्रत्यूषे तावद्गौरीचतुष्टयम् ॥ जातं रत्नमयं तच्च मया यत्परिपूजितम् ॥ ६४ ॥ प्रस्थितां मां नदीतीरमुद्दिश्य च विसर्जनम् ॥ करिष्यामीति सा प्राह व्यक्तीभूता सुरेश्वरी ॥ ॥ ६५ ॥ मा पुत्रि जलमध्येऽत्र मम मूर्तिचतुष्टयम् ॥ परिभावय मद्वाक्यं श्रुत्वा चैव विधीयताम् ॥ ६६ ॥ हाटकेश्वरजे क्षेत्रे स्थापय त्वं च मा क्षिप ॥ अक्षयं जायते येन सर्वस्त्रीणां हिताय च ॥ ६७ ॥ त्वं प्रार्थय वरं सर्वं ददाम्यहमिहार्चिता ॥ अभ्यर्चिता गिरिसुता मया प्रोक्ता सुरेश्वरी ॥ ॥ ६८ ॥ यदि यच्छसि मे देवि वरं तुष्टा सुरेश्वरि ॥ तदहं मानुषे गर्भे मा भूयासं कथंचन ॥ ६९ ॥ भर्ता भवतु मे विष्णुः शाश्वताभीष्टदः सदा ॥ नान्यत्किंचिदभीष्टं मे राज्यं त्रिदिवशोभनम् ॥ ७० ॥ अन्यापि कुरुते या च व्रतमेतत्समाहिता ॥ सर्वैस्त्रैर्यथा तुष्टिस्तथा देवि प्रजायते ॥ ७१ ॥ तथा तस्याः प्रकर्तव्यमेकेनानेन पार्वति ॥ तथेति गौरी मामुक्त्वा ततश्चादर्शनं गता ॥ ७२ ॥ सा देवी च मया तत्र तच्च गौरीचतुष्टयम् ॥ हाटकेश्वरजे क्षेत्रे शुभे संस्थापितं विभो ॥ ७३ ॥ तत्प्रभावान्मया लब्धो भर्ता त्वं परमेश्वर ॥ शाश्वतश्चाक्षयश्चैव सुखप्रेक्षश्च सर्वदा ॥ ७४ ॥ एतत्ते सर्वमाख्यातं यत्पृष्टास्मि सुरेश्वर ॥ सत्येनानेन देवेश तव पादौ स्पृशाम्यहम् ॥ ७५ ॥ ॥ सूत उवाच ॥ ॥ तच्छ्रुत्वा वचनं तस्याः शंखचक्रगदाधरः ॥ विहस्याथ महालक्ष्मीं तामुवाच प्रहर्षितः ॥ मुहुर्मुहुः समालिंग्य वक्षसश्चोपरि स्थिताम् ॥ ७६ ॥ साधुसाधु महाभागे सत्यमेतत्त्वयोदितम् ॥ जानतापि मया पृष्टा भवती वरवर्णिनि ॥ ७७ ॥ ॥ सूत उवाच ॥ ॥ एतद्वः सर्वमाख्यातं यत्पृष्टोऽस्मि द्विजोत्तमाः ॥ चतुर्भुजा यथा गौरी संजाता पंचपिंडिका ॥ ७८ ॥ यश्चैतत्पठते भक्त्या प्रातरुत्थाय मानवः ॥ न स लक्ष्म्या विमुच्येत न च दौर्भाग्यमाप्नुयात् ॥ ७९ ॥ तस्मात्सर्वप्रयत्नेन पठनीयमिदं शुभम् ॥ आख्यानं गौरिकं विप्रा यन्मया परिकी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



र्तितम् ॥ ८० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये पंचपिंडिकागौर्युत्पत्तिमाहात्म्य
वर्णनंनामाष्टसप्तत्युत्तरशततमोऽध्यायः ॥ १७८ ॥ ॥छ॥ ॥ सूत उवाच ॥ ॥ तथान्यदपि तत्रास्ति पुष्करत्रितयं शुभम् ॥ हाटकेश्वरजे क्षेत्रे
सर्वपातकनाशनम् ॥ १ ॥ यस्मिन्दृष्टेऽथवा स्पृष्टे कीर्तिते वा द्विजोत्तमाः ॥ पातकं नाशमायाति भास्करेण तमो यथा ॥ २ ॥ पुनंति सर्वतीर्थानि
स्नानाद्दानादसंशयम् ॥ पुष्करालोकनादेव सर्वपापैः प्रमुच्यते ॥ ३ ॥ ॥ ऋषय ऊचुः ॥ ॥ श्रूयते पुष्करंनाम तीर्थं त्रैलोक्यविश्रुतम् ॥ ब्रह्मणा
निर्मितं तत्र यच्च योजनमात्रकम् ॥ ४ ॥ उत्तरे चन्द्रभागाया नद्या यावत्सरस्वती ॥ दक्षिणे करतोयायाः सीमेयं पुष्करत्रये ॥ ५ ॥ अस्माकं
तु पुरा सूत त्वयोक्तं वियति स्थितम् ॥ एतन्नः कौतुकं सूत तत्कथं हाटकेश्वरे ॥ तत्र क्षेत्रे समायातं तस्मात्त्वं वक्तुमर्हसि ॥ ६ ॥ ॥ सूत
उवाच ॥ ॥ सत्यमेतन्महाभागा यद्भवद्भिरुदाहृतम् ॥ तस्मिन्क्षेत्रे द्विजश्रेष्ठास्तच्छृणुध्वं समाहिताः ॥ ७ ॥ सर्वतो विस्तराद्वच्मि नमस्कृत्य स्वयं
भुवम् ॥ ८ ॥ ब्रह्मलोके निवसतो ब्रह्मणोऽव्यक्तजन्मनः ॥ देवर्षिर्नारदः प्राप्तो भ्रांत्वा लोकत्रयं मुनिः ॥ ९ ॥ स नत्वा शिरसा पादावुपविष्टस्त
दग्रतः ॥ १० ॥ ॥ ब्रह्मोवाच ॥ ॥ कस्माद्वत्स चिराद्दृष्टः कुतः प्राप्तोऽधुना भवान् ॥ क्व भ्रांतस्त्वं समाचक्ष्व ब्रूहि वत्सात्र कारणम् ॥ ११ ॥
॥ ॥ नारद उवाच ॥ ॥ मर्त्यलोकाद्विभो प्राप्तः सांप्रतं च त्वरान्वितः ॥ तव पादप्रपूजार्थं सत्येनात्मानमालभे ॥ १२ ॥ ॥ ब्रह्मोवाच ॥ ॥
किंवदन्तीं समाचक्ष्व मर्त्यलोकसमुद्भवाम् ॥ कीदृशाः पार्थिवास्तत्र कीदृशा द्विजसत्तमाः ॥ कीदृशा व्यवहाराश्च वर्तन्ते तत्र सांप्रतम् ॥ १३ ॥
॥ ॥ नारद उवाच ॥ ॥ मर्त्यलोके कलिर्जातः सांप्रतं सुरसत्तम ॥ १४ ॥ राजानः सत्पथं त्यक्त्वा तथा लोभपरायणाः ॥ पीडयंति च
लोकांश्च अर्थहेतोः सुनिर्घृणाः ॥ १५ ॥ शौर्यभावपरित्यक्ताः परदारविमर्दकाः ॥ पूजयन्ति न ते विप्रान्न देवान्न गुरूनपि ॥ १६ ॥ वेदविक्रय
कतारो ब्राह्मणाः शौचवर्जिताः ॥ पापप्रतिग्रहासक्ताः सन्ध्याहीनाः सुनिर्घृणाः ॥ १७ ॥ कृषिकर्मरता नित्यं वैश्यवत्पशुपालकाः ॥ वैश्याः सर्वे
समुच्छेदं प्रयाता धरणीतले ॥ १८ ॥ शूद्रा नित्यं धर्मकामाः शूद्राश्चैव तपस्विनः ॥ लोकयात्राक्रियाः सर्वे प्रहसंति व्यपत्रपाः ॥ १९ ॥ यस्य
चास्ति गृहे वित्तं तरुण्यश्च तथा स्त्रियः ॥ तेनतेन समं सख्यं प्रकुर्वन्ति नरा भुवि ॥ २० ॥ विधवानां व्रतस्थानां सर्वेषां लिंगिनां तथा ॥ हृदि
स्थितो महान्कामो व्रतचर्याबहिःस्थिताः ॥२१॥ तीर्थानि विप्लवं यांति पापलोकश्रितानि च ॥ कलेर्भीतानि सर्वाणि प्रद्रवन्ति दिशो दश ॥२२॥

१ इति–इति शेषः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कलिकाले विशेषेण स्वैरिण्यो ललितस्पृहाः ॥ भर्त्रा विवदमानाश्च स्त्रियः कार्मणतत्पराः ॥
अहं तत्र स्थितो यस्मात्कलिकाले पितामह ॥ २३ ॥ कलिर्बलिष्ठः सुतरां वरदानेन ते कृतः ॥ यदा मर्त्ये भवेद्युद्धं कंडूतिर्जायते हृदि ॥ २५ ॥
वृथा व्रतानि कुर्वंति त्यक्त्वा ताः स्वपतेः कथाम् ॥ २४ ॥ श्वश्रूणां च वधूनां च तथा जनकपुत्रयोः ॥
स्वर्गे वा मस्तके चैव पाताले चाथ पादयोः ॥ सांप्रतं मर्त्यलोके च मया दृष्टमनेकशः ॥ २६ ॥ स्वल्पोदकास्तथा मेघाः स्वल्पसस्या च
बांधवानां विशेषेण तथा च स्वामिभृत्ययोः ॥ २७ ॥ चौराणां पार्थिवानां च दम्पत्योश्च विशेषतः ॥ अहं मर्त्ये परिभ्रांतश्चिरात्तेन
मेदिनी ॥ २८ ॥ स्वल्पक्षीरास्तथा गावः क्षीरे सर्पिर्न विद्यते ॥ एवं युद्धानि तेषां च वीक्षमाणो दिवानिशम् ॥ २९ ॥ पुष्करस्य कृते जातश्चिन्ताव्याकु
समागतः ॥ भूयो यास्यामि तत्रैव कण्डूतिर्महती स्थिता ॥ ३० ॥ तच्छ्रुत्वा वचनं तस्य नारदस्य पितामहः ॥ तस्मादन्यत्र नेष्यामि
लितेंद्रियः ॥ ३१ ॥ मर्त्ये च मामकं तीर्थं पुष्करंनाम विश्रुतम् ॥ नाशं यास्यति तन्नूनं कलिकालपरिप्लुतम् ॥ ३२ ॥ तत्र प्रयांतु तीर्थानि सर्वा
कलिर्यत्र न विद्यते ॥ येन तत्र विमुंचामि निजं तीर्थं च पुष्करम् ॥ ३३ ॥ कलिकाले च संप्राप्ते सर्वप्राणिभयंकरे ॥ प्रोवाच सादरं तच्च
ण्येव विशेषतः ॥ ३४ ॥ गते कलौ प्रयास्यंति निजं स्थानमसंशयम् ॥ ३५ ॥ एवं निश्चित्य मनसा हस्तस्थं कमलं ततः ॥ ततस्तत्प्रेषितं तेन
स्वयं ध्यात्वा पितामहः ॥ ३६ ॥ पत त्वं पद्म भूपृष्ठे कलिर्यत्र न विद्यते ॥ येनानयामि तत्रैव पुष्करं तीर्थमात्मनः ॥ ३७ ॥ तेषां यज्ञक्रियाभिश्च यज्ञोपांतैः
पद्मं भ्रांत्वा महीतले ॥ समस्ते पतितं क्षेत्रे हाटकेश्वरसंभवे ॥३८॥ दृष्ट्वा वेदविदो विप्रान्स्वाध्यायनिरताञ्छुचीन् ॥ दिग्मण्डले तथा व्याप्ते नान्यः
समंततः ॥ ३९ ॥ यूपाद्यैः सर्वतो व्याप्ते सदिशे गगनांगणे ॥ ऋग्यजुःसामघोषेण तथा चाथर्वजेन च ॥ ४० ॥ दृश्यन्ते मुनयो यत्र
संश्रूयते ध्वनिः ॥ तथा च तार्किकाणां च विवादेषु महत्सु च ॥ ४१ ॥ वेदांतानां समस्तानां व्याख्याने बहुधा कृते ॥ महापारा
संस्थिता नियमेषु च ॥ ४२ ॥ एकाहारा निराहारा एकांतरकृताशनाः ॥ त्रिरात्रोपोषिताश्चान्ये कृच्छ्रचांद्रायणे रताः ॥ ४३ ॥ शीर्णपर्णाशिनश्चैके फलाहारा महर्षयः ॥
किणश्चान्ये तथा मासोपवासिनः ॥ अश्मकुट्टाशिनश्चान्ये दन्तोलूखलिकास्तथा ॥ ४४ ॥ यत्र स्थानेऽपतत्पूर्वं तस्मादुच्चलितं पुनः ॥ ४६ ॥
तद्दृष्ट्वा तादृशं क्षेत्रं संयुक्तं विविधैर्गुणैः ॥ ४५ ॥ ततस्तत्पतितं तत्र पुण्यं ज्ञात्वा महीतले ॥ ततो गर्तात्रयं जातं तेषु स्थानेषु च त्रिषु ॥
अन्यस्मिंश्च ततः स्थाने द्वितीये द्विजसत्तमाः ॥ तस्मादपि तृतीये तु तृतीयं पंकजं हितम् ॥ ४७ ॥

१ युद्धम्—इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

गर्तासु च जल जातं स्वच्छं स्फटिकसंनिभम् ॥ ४८ ॥ एतस्मिन्नंतरे प्राप्तः स्वयमेव पितामहः ॥ तत्र स्थाने द्विजश्रेष्ठा यज्ञकर्मप्रसिद्धये ॥ ॥ ४९ ॥ दृष्ट्वा समंततः क्षेत्रं हाटकेश्वरसंज्ञितम् ॥ नानाविप्रैः समाकीर्णं वेदवेदांगपारगैः ॥ तपस्विभिस्तथानेकैर्व्रतचर्यापरायणैः ॥ ५० ॥ अहो क्षेत्रमहो क्षेत्रं पुण्यं रम्यं द्विजप्रियम् ॥ तस्माद्यज्ञं करिष्यामि क्षेत्रेऽस्मिंश्च द्विजाश्रये ॥ ५१ ॥ आनयिष्यामि तच्चापि पुष्करत्रितयं शुभम् ॥ गर्तास्वेतासु पुण्यासु ज्येष्ठं मध्यं कनीयकम्[1] ॥ ५२ ॥ कलिकाले च संप्राप्ते येन लोपं न गच्छति ॥ स्वयं निश्चित्य मनसा चोपविश्य धरातले ॥ ५३ ॥ ध्यात्वा च सुचिरं कालमानयामास तत्र च ॥ पुष्करत्रितयं श्रेष्ठं ज्येष्ठमध्यकनीयकम् ॥ ५४ ॥ ततोऽब्रवीत्स हृष्टात्मा ह्येतद्धि पुष्करत्रयम् ॥ मया सम्यक्समानीतं कलिकालभयेन च ॥ ५५ ॥ येऽत्र स्नानं करिष्यंति श्रद्धया परया युताः ॥ ते यास्यंति परां सिद्धिमक्षयां मत्प्रसादतः ॥ ५६ ॥ ये च श्राद्धं करिष्यंति कार्तिक्यां सुसमाहिताः ॥ करिष्यंति गयाशीर्षे तेषां पुण्यं महत्तमम् ॥ ५७ ॥ तत्राद्यात्पुष्करात्पुण्यं लभिष्यंति शताधिकम् ॥ मया यज्ञः कृतस्तत्र कार्तिक्यां पूर्वपुष्करे ॥ ५८ ॥ वैशाख्यां च करिष्यामि अत्राहं च द्वितीयके ॥ ॥ ५९ ॥ एवमुक्त्वा ततो ब्रह्मा ह्यादिदेश सदागतिम् ॥ ममादेशाद्द्रुतं वायो समानय पुरंदरम् ॥ ६० ॥ आदित्यैर्वसुभिः सार्धं रुद्रैश्चैव मरुद्गणैः ॥ गंधर्वैर्लोकपालैश्च सिद्धैर्विद्याधरैस्तथा ॥ ६१ ॥ येन मे स्यात्सहायत्वं समस्ते यज्ञकर्मणि ॥ तच्छ्रुत्वा सकलं वायुर्गत्वा शक्रनिवेशनम् ॥ कथयामास तत्सर्वं यदुक्तं परमेष्ठिना ॥ ६२ ॥ सत्वरं प्रययौ तत्र सर्वैर्देवगणैः सह ॥ प्रणिपत्य ततस्तं स ब्रह्माणं वाक्यमब्रवीत् ॥ ६३ ॥ आदेशो दीयतां देव ह्यहमाकारितस्त्वया ॥ यदर्थं तत्करिष्यामि तस्माच्छीघ्रं निवेदय ॥ ६४ ॥ ब्रह्मोवाच ॥ ॥ मया शक्रात्र चानीतं सुपुण्यं पुष्करत्रयम् ॥ कलिकालभयाच्चैव करिष्ये तदहं स्थिरम् ॥ ६५ ॥ अग्निष्टोमत्रयं[2] कृत्वा वैशाख्यां च यथार्चितम् ॥ संभारमाहरस्वाशु तदर्थं सर्वमेव हि ॥ ६६ ॥ ब्राह्मणांश्च तदर्हांश्च वेदवेदांगपारगान् ॥ तच्छ्रुत्वा विनयाच्छक्रस्तथेत्युक्त्वा त्वरान्वितः ॥ संभारानानयामास तदर्हांश्च द्विजोत्तमान् ॥ ६७ ॥ ततश्चकार विधिवद्यज्ञं स प्रपितामहः ॥ यथोक्तविधिना सर्वं तथा संपूर्णदक्षिणम् ॥ ६८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये पुष्करत्रयोत्पत्तिपूर्वकं यज्ञसमारंभार्थमुपकरणानयनब्राह्मणामन्त्रणादिप्रकारकथनंनामैकोनाशीत्युत्तरशततमोऽध्यायः ॥ १७९ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ अत्यद्भुतमिदं सूत यत्त्वया समुदाहृतम् ॥ 

१ कनिष्ठकम्–इ० पा० । २ अग्निष्टोमक्रतुं कृत्वा–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मणा यत्कृतो यज्ञस्तत्र क्षेत्रे महात्मना ॥ १ ॥ अग्निष्टोमादयो यज्ञा ये वर्तन्ते धरातले ॥ यष्टव्यस्तेषु यज्ञेषु स एव हि सुरेश्वरः ॥ २ ॥ तेनैव यजता तत्र को हीष्टः प्रब्रवीहि नः ॥ ऋत्विजः के स्थितास्तत्र यैस्तत्कर्म मखोद्भवम् ॥ तत्प्रत्यक्षे कृतं सर्वमेतन्नः कौतुकं परम् ॥ ३ ॥ का चैव दक्षिणा दत्ता तेन तेषां द्विजन्मनाम् ॥ कोऽध्वर्युर्विहितस्तत्र येन तद्यजनं कृतम् ॥४॥ को होता कश्च वाऽग्नीध्रः को ब्रह्मा तत्र संस्थितः ॥ उद्गाता कः स्थितस्तत्र ह्याचार्यो यज्ञकर्मणि ॥ ५ ॥ ॥ सूत उवाच ॥ ॥ अहं वः कीर्तयिष्यामि सर्वं यज्ञस्य संभवम् ॥ वृत्तांतं यच्च तत्रस्थ माश्चर्यं द्विजपुंगवाः ॥ ६ ॥ ये सदस्याः स्थितास्तत्र ऋत्विजश्च द्विजोत्तमाः ॥ दक्षिणा याः प्रदत्ताश्च तेभ्यस्तेन महात्मना ॥ ७ ॥ यजता देव देवेन ब्रह्मणाऽमिततेजसा ॥ यज्ञकामं चतुर्वक्त्रं ज्ञात्वा देवः शतक्रतुः ॥ ८ ॥ सर्वैः सुरगणैः सार्धं साहाय्यार्थमुपागतः ॥ तथा च भगवाञ्छंभुः सर्वदेवगणैः सह ॥ ९ ॥ तान्दृष्ट्वाऽभ्यागतान्ब्रह्मा मर्त्यधर्मसमाश्रितान् ॥ प्रोवाच विनयोपेतः कृतांजलिपुटः स्थितः ॥ १० ॥ स्वागतं वः सुरश्रेष्ठाः प्रसादः क्रियतां मम ॥ निविश्यतां यथान्यायं स्थानेषु रुचिरेषु च ॥ ११ ॥ धन्योऽस्म्यनुगृहीतोऽस्मि यद्यूयं स्वयमागताः ॥ मंत्राहूता यथा कृच्छ्रात्सर्वसत्रेषु गच्छथ ॥ १२ ॥ ॥ देवा ऊचुः ॥ ॥ येन यच्चात्र कर्तव्यं तच्छीघ्रं वद पद्मज ॥ यज्ञे तव महाभाग तस्य तत्त्वं समादिश ॥ ॥ १३ ॥ ॥ ब्रह्मोवाच ॥ ॥ विश्वकर्मन्द्रुतं गच्छ यज्ञमण्डपसिद्धये ॥ पत्नीशालां ततश्चैव यज्ञवेदीस्तथैव च ॥ १४ ॥ कुण्डानि चैव सर्वाणि यथास्थानेषु कारय ॥ यज्ञपात्राणि सर्वाणि ग्रहाश्च चमसास्तथा ॥ १५ ॥ यूपाश्च यत्प्रमाणेन कर्तव्याः सचषालकाः ॥ पचनार्थं तथा गर्ताः कर्तव्या यत्प्रमाणतः ॥ १६ ॥ इष्टिकानां सहस्राणि दश चाष्टशतानि च ॥ कर्तव्यानि त्वया शीघ्रं चयनानीति सत्वरम् ॥ १७ ॥ तथा हिरण्मयश्चापि पुरुषः कार्य एव हि ॥ तथेत्युक्त्वा ततस्त्वष्टा शीघ्राच्छीघ्रतरं ययौ ॥ १८ ॥ ततस्तु पद्मजः प्राह देवाचार्यं बृहस्पतिम् ॥ बृहस्पते त्वमानीहि यज्ञार्हानृत्विजोऽखिलान् ॥ १९ ॥ यावत्षोडशसंख्याश्च नान्यस्यैतद्धि युज्यते ॥ त्वया शक्र सदा कार्या शुश्रूषा च द्विजन्मनाम् ॥ २० ॥ हस्तपादावमर्दश्च श्रांतानां पृष्ठमर्दनम् ॥ धनाध्यक्ष त्वया देया दक्षिणा कालसंभवा ॥ २१ ॥ सुवस्त्राणि हिरण्यं च तथान्यद्वापि वांछितम् ॥ त्वया विष्णो सदा कार्यं कृत्याकृत्यपरीक्षणम् ॥ २२ ॥ युक्तं कृतमथो नैव सावधानेन सर्वदा ॥ लोकपालाश्च ये सर्वे रक्षंतु सकला दिशः ॥ भूतप्रेतपिशाचानां प्रवेशं राक्षसोद्भवम् ॥ २३ ॥ यो यं कामयते कामं किंचिद्वस्त्रं धनं च वा ॥ विचार्य तस्य तद्देयं सर्वयज्ञाधिपेन तु ॥ २४ ॥ आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः ॥ भवंतु परिवेष्टारो भोक्तुकामजनस्य च ॥ २५ ॥ एतस्मिन्न



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तरे प्राप्तो विश्वकर्मा त्वरान्वितः ॥ अब्रवीत्पंकजभवं संसिद्धो यज्ञमण्डपः ॥ २६ ॥ सर्वमन्यत्समादिष्टं यत्त्वयोक्तं चतुर्मुख ॥ २७ ॥ ततो बृहस्प
तिः प्राह समभ्येत्य पितामहम् ॥ समानीता मया देव ब्राह्मणा यज्ञकर्मणि ॥ २८ ॥ विप्राः षोडशसंख्याश्च ऋत्विक्कर्मणि योजय ॥ स्वयं परीक्ष्य
देवेश यज्ञकर्मप्रसिद्धये ॥ २९ ॥ ततो ब्रह्मा स्वयं दृष्ट्वा तान्परीक्ष्य प्रयत्नतः ॥ ऋत्विक्त्वे च नियोज्याथ ततश्चक्रे तदर्हणम् ॥ ३० ॥ ॥ ऋषय
ऊचुः ॥ ॥ ऋत्विजां चैव सर्वेषां सूत नामानि कीर्तय ॥ येन यो विहितस्तत्र पदार्थः सूत तं वद ॥ ३१ ॥ ॥ सूत उवाच ॥ ॥ भृगुर्होत्रे
ततस्तेन वृतो ब्राह्मणसत्तमाः ॥ मैत्रावरुणसंज्ञस्तु तथैव च्यवनो मुनिः ॥ ३२ ॥ अच्छावाको मरीचिश्च ग्रावस्तुद्दालवो मुनिः ॥ पुलस्त्यश्च तथा
ऽध्वर्युः प्रस्थातात्रिश्च संस्थितः ॥ ३३ ॥ तत्र रैभ्यो मुनिर्नेष्टा तत्रोन्नेता सनातनः ॥ ब्रह्मा च नारदो गर्गो ब्राह्मणाच्छंसिरेव च ॥३४॥ आग्नीध्रश्च
भरद्वाजो होता पाराशरस्तथा ॥ [१]तथैव तत्र क्षेत्रे च उद्गाता गोभिलो मुनिः ॥ ३५ ॥ तथैव कौथुमो जज्ञे प्रस्तौता यज्ञकर्मणि ॥ शांडिल्यः प्रतिह
र्ता च सुब्रह्मण्यस्तथांगिराः ॥ ३६ ॥ तस्य यज्ञस्य सिद्ध्यर्थमित्येते षोडशर्त्विजः ॥ वस्त्राभरणशोभाढ्या विनयेन कृताश्च ते ॥३७॥ ततः कृत्वा
स्वयं ब्रह्मा सर्वेषामर्हणक्रियाम् ॥ गृह्योक्तेन विधानेन ततः प्रोवाच सादरम् ॥ ३८ ॥ एषोऽहं शरणं प्राप्तो युष्माकं द्विजसत्तमाः ॥ अनुगृह्णीत
मां सर्वे दीक्षायै यज्ञकर्मणः ॥ ३९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे ब्रह्मयज्ञोपाख्याने यज्ञमण्ड
पप्राप्तब्राह्मणसत्कारपूर्वकर्त्विगादिस्थानयोजनापूर्वकाध्वरकर्मारंभोनामाशीत्युत्तरशततमोऽध्यायः ॥ १८० ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥
एतस्मिन्नंतरे सर्वैर्नागरैर्ब्राह्मणोत्तमैः ॥ प्रेषितो मध्यगस्तत्र गर्तातीर्थसमुद्भवः ॥ १ ॥ रेरे मध्यग गत्वा त्वं ब्रूहि तं कुपितामहम् ॥ विप्रवृत्ति
प्रहंतारं नीतिमार्गविवर्जितम् ॥ २ ॥ एतत्क्षेत्रं प्रदत्तं नः पूर्वेषां च द्विजन्मनाम् ॥ महेश्वरेण तुष्टेन पूरिते सर्पजे बिले ॥ ३ ॥ तस्य दत्तस्य
चाद्यैव पितामहशतं गतम् ॥ पंचोत्तरमसन्दिग्धं यावत्त्वं कुपितामह ॥ ४ ॥ न केनापि कृतोऽस्माकं तिरस्कारो यथाऽधुना ॥ त्वां
मुक्त्वा पापकर्माणं न्यायमार्गविवर्जितम् ॥ ५ ॥ नागरैर्ब्राह्मणैर्बाह्यं योऽत्र यज्ञं समाचरेत् ॥ श्राद्धं वा स हि वध्यः स्यात्सर्वेषां च
द्विजन्मनाम् ॥ ६ ॥ न तस्य जायते श्रेयस्तत्समुत्थं कथंचन ॥ एतत्प्रोक्तं तदा तेन यदा स्थानं ददौ हि नः ॥ ७ ॥ तस्माद्यत्कुरुषे यज्ञं ॥१९९॥
ब्राह्मणैर्नागरैः कुरु ॥ नान्यथा लप्स्यसे कर्तुं जीवद्भिर्नागरैर्द्विजैः ॥ ८ ॥ एवमुक्तस्ततो गत्वा मध्यगो यत्र पद्मजः ॥ यज्ञमण्डपदूरस्थो

१ कस्मिंश्चित्पुस्तके तु—उद्गाता गोभिलो जज्ञे प्रस्तोता यज्ञकर्मणि—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्राह्मणैः परिवारितः ॥ ९ ॥ यत्प्रोक्तं नागरैः सर्वैः सविशेषं तदा हि सः ॥ तच्छ्रुत्वा पद्मजः प्राह सांत्वपूर्वमिदं वचः ॥ १० ॥ मानुषं भावमापन्न ऋत्विग्भिः परिवारितः ॥ त्वया सत्यमिद प्रोक्तं सर्वं मध्यगसत्तम ॥ ११ ॥ किं करोमि वृताः सर्वे मया ते यज्ञकर्मणि ॥ ऋत्विजोऽध्वर्युपूर्वा ये प्रमादेन न काम्यया ॥ १२ ॥ तस्मादानय तान्सर्वानत्र स्थाने द्विजोत्तमान् ॥ अनुज्ञातस्तु तैर्येन गच्छामि मखमण्डपे ॥ १३ ॥ ॥ मध्यग उवाच ॥ ॥ त्वं देवत्वं परित्यज्य मानुषं भावमाश्रितः ॥ तत्कथं ते द्विजश्रेष्ठाः समागच्छंति तेंऽतिकम् ॥ १४ ॥ श्रेष्ठा गावः पशूनां च यथा पद्मसमुद्भव ॥ विप्राणामिह सर्वेषां तथा श्रेष्ठा हि नागराः ॥ १५ ॥ तस्माच्चेद्वांछसि प्राप्तिं त्वमेतां यज्ञसंभवाम् ॥ तद्भक्त्यानागरान्सर्वान्प्रसादय पितामह ॥ १६ ॥ ॥ सूत उवाच ॥ ॥ तच्छ्रुत्वा पद्मजो भीत ऋत्विग्भिः परिवारितः ॥ जगाम तत्र यत्रस्था नागराः कुपिता द्विजाः ॥१७॥ प्रणिपत्य ततः सर्वान्विनयेन समन्वितः ॥ प्रोवाच वचनं श्रुत्वा कृतांजलिपुटः स्थितः॥१८॥जानाम्यहं द्विजश्रेष्ठाः क्षेत्रेऽस्मिन्हाटकेश्वरे ॥ युष्मद्बाह्यं वृथा श्राद्धं यज्ञकर्म तथैव च ॥ १९ ॥ कलिभीत्या मयाऽऽनीतं स्थानेऽस्मिन्पुष्करं निजम् ॥ तीर्थं च युष्मदीयं च निक्षेपोऽयंसमर्पितः ॥ २० ॥ ऋत्विजोऽमी समानीता गुरुणा यज्ञसिद्धये ॥ अजानता द्विजश्रेष्ठा आधिक्यं नागरात्मकम् ॥ २१ ॥ तस्माच्च क्षम्यतां मह्यं यतश्च वरणं कृतम् ॥ एतेषामेव विप्राणामग्निष्टोमकृते मया ॥ २२ ॥ एतच्च मामकं तीर्थं युष्माकं पापनाशनम् ॥ भविष्यति न सन्देहः कलिकालेऽपि संस्थिते ॥ २३ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ यदि त्वं नागरैर्बाह्यं यज्ञं चात्र करिष्यसि ॥ तदन्येऽपि सुराः सर्वे तव मार्गानुयायिनः ॥ भविष्यन्ति तथा भूपास्तत्कार्यो न मखस्त्वया ॥ २४ ॥ यद्येवमपि देवेश यज्ञकर्म करिष्यसि ॥ अवमन्य द्विजान्सर्वान्क्षिप्रं गच्छास्मदंतिकात् ॥ २५ ॥ ॥ ब्रह्मोवाच ॥ ॥ अद्यप्रभृति यः कश्चिद्यज्ञमत्र करिष्यति ॥ श्राद्धं वा नागरैर्बाह्यं वृथा तत्संभविष्यति ॥२६॥ नागरोऽपि च योन्यत्र कश्चिद्यज्ञं करिष्यति ॥ एतत्क्षेत्रं परित्यज्य वृथा तत्संभविष्यति ॥ २७ ॥ मर्यादेयं कृता विप्रा नागराणां मयाऽधुना ॥ कृत्वा प्रसादमस्माकं यज्ञार्थं दातुमर्हथ ॥ अनुज्ञां विधिवद्विप्रा येन यज्ञं करोम्यहम् ॥ २८ ॥ ॥ सूत उवाच ॥ ॥ ततस्तैर्ब्राह्मणैस्तुष्टैरनुज्ञातः पितामहः ॥ चकार विधिवद्यज्ञं ये वृता ब्राह्मणाश्च तैः ॥ २९ ॥ विश्वकर्मा समागत्य ततो मस्तकमण्डनम् ॥ चकार ब्राह्मणश्रेष्ठा नागराणां मते स्थितः ॥ ३० ॥ ब्रह्मापि परमं तोषं गत्वा नारदमब्रवीत् ॥ सावित्रीमानय क्षिप्रं येन गच्छामि मण्डपे ॥ ३१ ॥ वाद्यमानेषु वाद्येषु सिद्धकिन्नरगुह्यकैः ॥ गन्धर्वै

१ क्षेत्रेऽस्मिन्नागरैर्बाह्यं क्षिप्रं गच्छास्मदान्तिकात्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



गीतसंसक्तैर्वेदोच्चारपरैर्द्विजैः ॥ अरणिं समुपादाय पुलस्त्यो वाक्यमब्रवीत् ॥ ३२ ॥ पत्नी २ पत्नीति विप्रेन्द्राः प्रोच्चैस्तत्र व्यवस्थिताः ॥ ३३ ॥ एतस्मिन्नंतरे ब्रह्मा नारदं मुनिसत्तमम् ॥ संज्ञया प्रेषयामास पत्नी चानीयतामिति ॥ ३४ ॥ सोऽपि मंदं समागत्य सावित्रीं प्राह लीलया ॥ युद्ध प्रियोंऽतरं वांछन्सावित्र्या सह वेधसः ॥ ३५ ॥ अहं संप्रेषितः पित्रा तव पार्श्वे सुरेश्वरि ॥ आगच्छ प्रस्थितः स्नातः सांप्रतं यज्ञमण्डपे ॥ ३६ ॥ परमेकाकिनी तत्र गच्छमाना सुरेश्वरि ॥ कीदृग्रूपा सदसि वै दृश्यसे त्वमनाथवत् ॥ ३७ ॥ तस्मादानीयतां सर्वा याः काश्चिद्देवयोषितः ॥ याभिः परिवृता देवि यास्यसि त्वं महामखे ॥ ३८ ॥ एवमुक्त्वा मुनिश्रेष्ठो नारदो मुनिसत्तमः ॥ अब्रवीत्पितरं गत्वा तातांबाऽऽकारिता मया ॥ ३९ ॥ परं तस्याःस्थिरो भावः किंचित्संलक्षितो मया ॥ तस्य तद्वचनं श्रुत्वा ततो मन्युसमन्वितः ॥४०॥ पुलस्त्यं प्रेषयामास सावित्र्या सन्निधौ ततः ॥ गच्छ वत्स त्वमानीहि स्थानं सा शिथिलात्मिका ॥ सोमभारपरिश्रांतं पश्य मामूर्ध्वसंस्थितम्॥४१॥एष कालात्ययो भावि यज्ञकर्मणि सांप्रतम् ॥ यज्ञया नमुहूर्तोऽयं सावशेषो व्यवस्थितः ॥४२॥ तस्य तद्वचनं श्रुत्वा पुलस्त्यः सत्वरं ययौ ॥ सावित्री तिष्ठते यत्र गीतनृत्यसमाकुला ॥ ४३ ॥ ततः प्रोवाच किं देवि त्वं तिष्ठसि निराकुला ॥ यज्ञयानोचितः कालः सोऽयं शेषस्तु तिष्ठति ॥४४॥ तस्मादागच्छ गच्छामस्तातः कृच्छ्रेण तिष्ठति ॥ सोमभारार्दितश्चोर्ध्वं सर्वैर्देवैः समावृतः ॥४५॥ ॥ सावित्र्युवाच ॥ ॥ सर्वदेववृतस्तात तव तातो व्यवस्थितः ॥ एकाकिनी कथं तत्र गच्छाम्यहमनाथवत् ॥४६॥ तद्ब्रूहि पितरं गत्वा मुहूर्तं परिपाल्यताम् ॥४७॥ यावदभ्येति शक्राणी गौरी लक्ष्मीस्तथा पराः॥ देवकन्याः समाजेऽत्र ताभिरेष्याम्यहं द्रुतम् ॥ ४८ ॥ सर्वासां प्रेषितो वायुर्निमंत्रणकृते मया ॥ आगमिष्यन्ति ताः शीघ्रमेवं वाच्यः पिता त्वया ॥४९॥ ॥ सूत उवाच ॥ ॥ सोऽपि गत्वा द्रुतं प्राह सोमभारार्दितं विधिम् ॥ नैषाभ्येति जगन्नाथ प्रसक्ता गृहकर्मणि ॥ ५० ॥ सा मां प्राह च देवानां पत्नीभिः सहिता मखे ॥ अहं यास्यामि तासां च नैकाद्यापि प्रदृश्यते ॥ ५१ ॥ एवं ज्ञात्वा सुरश्रेष्ठ कुरु यत्ते सुरोचते ॥ अतिक्रामति कालोऽयं यज्ञयानसमुद्भवः ॥ तिष्ठते च गृहव्यग्रा सापि स्त्री शिथिलात्मिका ॥ ५२ ॥ तच्छ्रुत्वा वचनं तस्य पुलस्त्यस्य पितामहः ॥ समीपस्थं तदा शक्रं प्रोवाच वचनं द्विजाः ॥ ५३ ॥ ॥ ब्रह्मोवाच ॥ ॥ शक्र नायाति सावित्री सापि स्त्री शिथिलात्मिका ॥ अनया भार्यया यज्ञो मया कार्योऽयमेव तु ॥ ५४ ॥ गच्छ शक्र समानीहि कन्यां कांचित्त्वरान्वितः ॥ यावन्न क्रमते कालो यज्ञयानसमुद्भवः ॥ ५५ ॥ पितामहवचः श्रुत्वा तदर्थं कन्यका द्विजाः ॥ शक्रेणासादिता शीघ्रं भ्रममाणा समीपतः ॥ ५६ ॥ अथ तक्रघटव्यग्रमस्तका तेन वीक्षिता ॥ कन्यका गोपजा तन्वी चंद्रास्या पद्मलोचना ॥ ५७ ॥ सर्वलक्षणसंपूर्णा



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यौवनारंभमाश्रिता ॥ सा शक्रेणाथ संपृष्टा का त्वं कमललोचने ॥ ५८ ॥ कुमारी वा सनाथा वा सुता कस्य ब्रवीहि नः ॥ ५९ ॥ ॥ कन्योवाच ॥ ॥ गोपकन्यास्मि भद्रं ते तक्रं विक्रेतुमागता ॥ यदि गृह्णासि मे मूल्यं तच्छीघ्रं देहि मा चिरम् ॥ ६० ॥ तच्छ्रुत्वा त्रिदिवेन्द्रोऽपि मत्वा तां गोपकन्यकाम् ॥ जगृहे त्वरया युक्तस्तक्रं चोत्सृज्य भूतले ॥ ६१ ॥ अथ तां रुदतीं शक्रः समादाय त्वरान्वितः ॥ गोवक्रेण प्रवेश्याथ गुह्येनाकर्षयत्ततः ॥ ६२ ॥ एवं मेध्यतमां कृत्वा संस्नाप्य सलिलैः शुभैः ॥ ज्येष्ठकुण्डस्य विप्रेन्द्राः परिधाप्य सुवाससी ॥ ६३ ॥ ततश्च हर्षसंयुक्तः प्रोवाच चतुराननम् ॥ द्रुतं गत्वा पुरो धृत्वा सर्वदेवसमागमे ॥ ६४ ॥ कन्यकेयं सुरश्रेष्ठ समानीता मयाऽधुना ॥ तवार्थाय सुरूपांगी सर्वलक्षणलक्षिता ॥ ६५ ॥ गोपकन्यां विदित्वेमां गोवक्रेण प्रवेश्य च ॥ आकर्षिता च गुह्येन पावनार्थं चतुर्मुख ॥ ६६ ॥ ॥ श्रीवासुदेव उवाच ॥ ॥ गवां च ब्राह्मणानां च कुलमेकं द्विधा कृतम् ॥ एकत्र[1] मंत्रास्तिष्ठंति हविरन्यत्र तिष्ठति ॥ ६७ ॥ धेनूदराद्विनिष्क्रांता तज्जातेयं द्विजन्मनाम् ॥ अस्याः पाणिग्रहं देव त्वं कुरुष्व मखाप्तये ॥ ६८ यावन्न चलते कालो यज्ञयानसमुद्भवः ॥ ६९ ॥ ॥ रुद्र उवाच ॥ ॥ प्रविष्टा गोमुखे यस्मादपानेन विनिर्गता ॥ गायत्रीनाम ते पत्नी तस्मादेषा भविष्यति ॥ ७० ॥ ॥ ब्रह्मोवाच ॥ ॥ वदन्तु ब्राह्मणाः सर्वे गोपकन्याप्यसौ यदि ॥ संभूय ब्राह्मणीश्रेष्ठा यथा पत्नी भवेन्मम ॥ ७१ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ एषा स्याद्ब्राह्मणश्रेष्ठा गोपजातिविवर्जिता ॥ अस्मद्वाक्याच्चतुर्वक्त्र कुरु पाणिग्रहं द्रुतम् ॥ ७२ ॥ ॥ सूत उवाच ॥ ॥ ततः पाणिग्रहं चक्रे तस्या देवः पितामहः ॥ कृत्वा सोमं ततो मूर्ध्नि गृह्योक्तविधिना द्विजाः ॥ ७३ ॥ संतिष्ठति च तत्रस्था महादेवी सुपावनी ॥ अद्यापि लोके विख्याता धनसौभाग्यदायिनी ॥ ॥ ७४ ॥ यस्तस्यां कुरुते मर्त्यः कन्यादानं समाहितः ॥ समस्तं फलमाप्नोति राजसूयाश्वमेधयोः ॥ ७५ ॥ कन्या हस्तग्रहं तत्र याऽऽप्नोति पतिना सह ॥ सा स्यात्पुत्रवती साध्वी सुखसौभाग्यसंयुता ॥ ७६ ॥ पिंडदानं नरस्तस्यां यः करोति द्विजोत्तमाः ॥ पितरस्तस्य संतुष्टास्तर्पिताः पितृतीर्थवत् ॥ ७७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये गायत्रीविवाहे गायत्रीतीर्थमाहात्म्यवर्णनंनामैकाशीत्युत्तरशततमोऽध्यायः ॥ १८१ ॥ ॥छ॥ ॥ सूत उवाच ॥ ॥ एवं पत्नीं समासाद्य गायत्रीं चतुराननः ॥ संप्रहृष्टमना भूत्वा प्रस्थितो यज्ञमण्डपम् ॥ १ ॥ गायत्र्यपि समादाय मूर्ध्नि तामरणिं मुदा ॥ प्रतस्थे संपरित्यज्य गोपभावं विगर्हितम् ॥ २ ॥

१ एकत्र–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वाद्यमानेषु वाद्येषु ब्रह्मघोषे दिवंगते ॥ कलं प्रगायमानेषु गन्धर्वेषु समंततः ॥ ३ ॥ सर्वदेवद्विजोपेतः संप्राप्तो यज्ञमण्डपे ॥ गायत्र्या सहितो ब्रह्मा मानुषं भावमाश्रितः ॥ ४ ॥ एतस्मिन्नंतरे चक्रे केशनिर्वपणं विधेः ॥ विश्वकर्मा नखानां च गायत्र्यास्तदनंतरम् ॥ ५ ॥ औदुम्बरं ततो दण्डं पुलस्त्योऽस्मै समाददे ॥ एणशृंगान्वितं चर्म मन्त्रवद्द्विजसत्तमाः ॥ ६ ॥ पत्नीशालां गृहीत्वा च गायत्रीं मौनधारिणीम् ॥ मेखलां निदधे चान्यां कट्यां मौंजीमयीं शुभाम् ॥ ७ ॥ ततश्चक्रे परं कर्म यदुक्तं यज्ञमंडपे ॥ ऋत्विग्भिः सहितो वेधा वेदवाक्यसमादृतः ॥ ८ ॥ प्रवर्ग्ये जायमाने च तत्राश्चर्यमभून्महत् ॥ जालमरूपधरः कश्चिद्दिग्वासा विकृताननः ॥ ९ ॥ कपालपाणिरायातो भोजनं दीयतामिति ॥ निषेध्यमानोऽपि च तैः प्रविष्टो याज्ञिकं सदः ॥ स कृत्वाऽटनमन्याय्यं तर्ज्यमानोऽपि तापसैः ॥ १० ॥ ॥ सदस्या ऊचुः ॥ ॥ कस्मात्पापसमेतस्त्वं प्रविष्टो यज्ञमण्डपे ॥ कपाली नग्नरूपो यो यज्ञकर्मविवर्जितः ॥ ११ ॥ तस्माद्गच्छ द्रुतं मूढ यावद्ब्रह्मा न कुप्यति ॥ तथाऽन्ये ब्राह्मणश्रेष्ठास्तथा देवाः सवासवाः ॥ १२ ॥ ॥ जालम उवाच ॥ ॥ ब्रह्मयज्ञमिमं श्रुत्वा दूरादत्र समागतः ॥ बुभुक्षितो द्विजश्रेष्ठास्तत्किमर्थं विगर्हथ ॥ १३ ॥ दीनांधैः कृपणैः सर्वैस्तर्पितैः क्रतुरुच्यते ॥ अन्यथाऽसौ विनाशाय यदुक्तं ब्राह्मणैर्वचः ॥१४॥ अन्नहीनो दहेद्राष्ट्रं मन्त्रहीनस्तु ऋत्विजः ॥ याज्ञिकं दक्षिणाहीनो नास्ति यज्ञसमो रिपुः ॥ १५ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ यदि त्वं भोक्तुकामस्तु समायातो व्रज द्रुतम् ॥ एतस्यां सत्रशालायां भुञ्जते यत्र तापसाः ॥ दीनान्धाः कृपणाश्चैव ततः क्षुत्क्षामकंठिताः ॥ १६ ॥ अथवा धनकामस्त्वं वस्त्रकामोऽथ तापस ॥ व्रज वित्तपतिर्यत्र दानशालां समाश्रितः ॥ १७ ॥ अनिंद्योऽयं महामूर्ख यज्ञः पैतामहो यतः ॥ अर्चितः सर्वतः पुण्यं तत्किं निन्दसि दुर्मते ॥ १८ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्तः कपालं स परिक्षिप्य धरातले ॥ जगामादर्शनं सद्यो दीपवद्द्विजसत्तमाः ॥ १९ ॥ ॥ ऋत्विज ऊचुः ॥ ॥ कथं यज्ञक्रिया कार्या कपाले सदसि स्थिते ॥ परिक्षिपथ तस्मात्तु एवमूचुर्द्विजोत्तमाः ॥ २० ॥ अथैको बहुधा प्रोक्तः सदस्यैश्च द्विजोत्तमैः ॥ दण्डकाष्ठं समुद्यम्य प्रचिक्षेप बहिस्तथा ॥ २१ ॥ अथान्यत्तत्र संजातं कपालं तादृशं पुनः ॥ तस्मिन्नपि तथा क्षिप्ते भूयोऽन्यत्समपद्यत ॥ २२ ॥ एवं शतसहस्राणि ह्ययुतान्यर्बुदानि च ॥ तत्र जातानि तैर्व्याप्तो यज्ञवाटः समंततः ॥ २३ ॥ हाहाकारस्ततो जज्ञे समस्ते यज्ञमण्डपे ॥ दृष्ट्वा कपालसंघांस्तान्यज्ञकर्मप्रदूषकान् ॥ २४ ॥ अथ संचिंतयामास ध्यानं कृत्वा पितामहः ॥ हरारिष्टं समाज्ञाय तत्सर्वं हृष्टरूपधृक् ॥ २५ ॥ कृतांजलिपुटो भूत्वा ततः प्रोवाच सादरम् ॥ महेश्वरं समासाद्य यज्ञवाटसमाश्रितम् ॥ २६ ॥ किमिदं युज्यते देव यज्ञेऽस्मिन्कर्मणः क्षतिः ॥ तस्मात्संहर सर्वाणि



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कपालानि सुरेश्वर ॥ २७ ॥ यज्ञकर्मविलोपोऽयं मा भूत्त्वयि समागते ॥ २८ ॥ ततः प्रोवाच संक्रुद्धो भगवाञ्छशिशेखरः ॥ तन्ममेष्टतमं पात्रं भोजनाय सदा स्थितम् ॥ २९ ॥ एते द्विजाधमाः कस्माद्विद्विषंति पितामह ॥ तथा न मां समुद्दिश्य जुहुवुर्जातवेदसि ॥ ३० ॥ यथान्या देवतास्तद्वन्मन्त्रपूतं हविर्विधे ॥ तस्माद्यदि विधे कार्या समाप्तिर्यज्ञकर्मणि ॥ ३१ ॥ तत्कपालाश्रितं हव्यं कर्तव्यं सकलं त्विदम् ॥ तथा च मां समुद्दिश्य विशेषाज्जातवेदसि ॥ ३२ ॥ होतव्यं हविरेवात्र समाप्तिं यास्यति क्रतुः ॥ नान्यथा सत्यमेवोक्तं तवाग्रे चतुरानन ॥ ३३ ॥ ॥ पितामह उवाच ॥ ॥ रूपाणि तव देवेश पृथग्भूतान्यनेकशः ॥ संख्यया परिहीनानि ध्येयानि सकलानि च ॥ ३४ ॥ एतन्महाव्रतं रूपमाख्यातं ते त्रिलोचन ॥ नैवं च मखकर्म स्यात्तत्रैव च न युज्यते ॥ ३५ ॥ अद्यैतत्कर्म कर्तुं च श्रुतिबाह्यं कथंचन ॥ तव वाक्यमपि त्र्यक्ष नान्यथा कर्तुमुत्सहे ॥ ३६ ॥ मृन्मेयषु कपालेषु हविः श्राप्यं सुरेश्वर ॥ अद्यप्रभृति यज्ञेषु पुरोडाशात्मिकं द्विजैः ॥ तवोद्देशेन देवेश होतव्यं शतरुद्रियम् ॥ ३७ ॥ विशेषात्सर्वयज्ञेषु जप्यं चैव विशेषतः ॥ कपालानां तु द्वारेण त्वया रूपं निजं कृतम् ॥ ३८ ॥ प्रकटं च सुरश्रेष्ठ कपालेश्वरसंज्ञितः ॥ तस्मात्त्वं भविता रुद्र क्षेत्रेऽस्मिन्द्वादशोऽपरः ॥ ३९ ॥ अत्र यज्ञं समारभ्य यस्त्वां प्राक्पूजयिष्यति ॥ अविघ्नेन मखस्तस्य समाप्तिं प्रव्रजिष्यति ॥ ४० ॥ एवमुक्ते ततस्तेन कपालानि द्विजोत्तमाः ॥ तानि सर्वाणि नष्टानि संख्यया रहितानि च ॥ ४१ ॥ ततो हृष्टश्चतुर्वक्त्रः स्थापयामास तत्क्षणात् ॥ लिंगं माहेश्वरं तत्र कपालेश्वरसंज्ञितम् ॥ ४२ ॥ अब्रवीच्च ततो वाक्यं यश्चैतत्पूजयिष्यति ॥ मम कुण्डत्रये स्नात्वा स यास्यति परां गतिम् ॥ ४३ ॥ शुक्लपक्षे चतुर्दश्यां कार्तिके जागरं तु यः ॥ करिष्यति पुनश्चास्य लिंगस्य सुसमाहितः ॥ आजन्मप्रभवात्पापात्स विमुक्तिमवाप्स्यति ॥ ४४ ॥ एवमुक्तेऽथ विधिना प्रहृष्टस्त्रिपुरांतकः ॥ यज्ञमण्डपमासाद्य प्रस्थितो वेदिसंनिधौ ॥ ४५ ॥ ब्राह्मणैश्च ततः कर्म प्रारब्धं यज्ञसम्भवम् ॥ विस्मयोत्फुल्लनयनैर्नमस्कृत्य महेश्वरम् ॥ ४६ ॥ ॥ सूत उवाच ॥ ॥ एवं च यजतस्तस्य चतुर्वक्त्रस्य तत्र च ॥ ऋषीणां कोटिरायाता दक्षिणापथवासिनाम् ॥ ४७ ॥ श्रुत्वा पैतामहं यज्ञं कौतुकेन समन्विताः ॥ कीदृशो भविता यज्ञो दीक्षितो यत्र पद्मजः ॥ ४८ ॥ कीदृक्क्षेत्रं च तत्पुण्यं हाटकेश्वरसंज्ञितम् ॥ कीदृशास्ते च विप्रेन्द्रा ऋत्विजस्तत्र ये स्थिताः ॥ ४९ ॥ अथ ते सुपरिश्रांता मध्यंदिनगते रवौ ॥ रविवारेण संप्राते नक्षत्रे चाश्विसंस्थिते ॥ ५० ॥ वैवस्वत्यां तिथौ चैव संप्राप्ता घर्मपीडिताः ॥ कंचिज्जलाशयं प्राप्य प्रविष्टाः सलिलं शुभम् ॥ ५१ ॥ शंकुकर्णा महाकर्णा वक्रनासास्तथापरे ॥ महोदरा बृहद्दन्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





दीर्घोष्ठाः स्थूलमस्तकाः ॥ ५२ ॥ चिपिटाक्षास्तथा चान्ये दीर्घग्रीवास्तथा परे ॥ कृष्णांगाः स्फुटितैः पादैर्नखैर्दीर्घैः समुत्थितैः ॥ ५३ ॥ ततो यावद्विनिष्क्रांताः प्रपश्यन्ति परस्परम् ॥ तावद्वैरूप्यनिर्मुक्ताः संजाताः कामसन्निभाः ॥ ५४ ॥ ततो विस्मयमापन्ना मिथः प्रोचुः प्रहर्षिताः ॥ रूपव्यत्ययमालोक्य ज्ञात्वा तीर्थं तदुत्तमम् ॥ अत्र स्नानादिदं रूपमस्माभिः प्राप्तमुत्तमम् ॥ ५५ ॥ यस्मात्तस्मादिदं तीर्थं रूपतीर्थं भविष्यति ॥ त्रैलोक्ये सकले ख्यातं सर्वपातकनाशनम् ॥ ५६ ॥ येऽत्र स्नानं करिष्यन्ति श्रद्धया परया युताः ॥ सुरूपास्ते भविष्यंति सदा जन्मनि जन्मनि ॥ ५७ ॥ पितृंश्च तर्पयिष्यन्ति येऽत्र श्रद्धासमन्विताः ॥ जलेनापि गयाश्राद्धात्ते लप्स्यन्तेऽधिकं फलम् ॥५८॥ येऽत्र रत्नप्रदानं च प्रकरिष्यन्ति मानवाः ॥ भविष्यंति न संदेहो राजानस्ते भवेभवे ॥ ५९ ॥ स्थास्यामो वयमत्रैव सांप्रतं कृतनिश्चयाः ॥ न यास्यामो वयं तीर्थं यद्यपि स्यात्सु शोभनम् ॥ ६० ॥ एवमुक्त्वाऽथ व्यभजंस्तत्सर्वं मुनयश्च ते ॥ यज्ञोपवीतमात्राणि स्वानि तीर्थानि चक्रिरे ॥ ६१ ॥ ॥ सूत उवाच ॥ ॥ अद्यापि च द्विजश्रेष्ठास्तत्र तीर्थे जगद्गुरुः ॥ प्रथमं स्पृशते तोयं नित्यं स्यादयितं शुभम् ॥ ६२ ॥ निष्कामस्तु पुनर्मर्त्यो यः स्नानं तत्र श्रद्धया ॥ कुरुते स परं श्रेयः प्राप्नुयात्सिद्धिलक्षणम् ॥ ६३ ॥ एवं ते मुनयः सर्वे विभज्य तन्महत्सरः ॥ सायंतनं च तत्रैव कृत्वा कर्म सुविस्तरम् ॥ ६४ ॥ ततो निशामुखे प्राप्ता यत्र देवः पितामहः ॥ दीक्षितस्त्वथ मौनी च यज्ञमण्डपसंश्रितः ॥ ६५ ॥ तं प्रणम्य ततः सर्वे गता यत्रर्त्विजः स्थिताः ॥ उपविष्टाः परिश्रान्ता दिवा यज्ञियकर्मणा ॥ ६६ ॥ इन्द्रादिकैः सुरैर्भक्त्या मृग्यमानाङ्घ्रयः स्थिताः ॥ अभिवाद्याथ तान्सर्वानुपविष्टास्ततोऽग्रतः ॥६७॥ चक्रुश्चाथ कथाश्चित्रा यज्ञकर्मसमुद्भवाः ॥ सोमपानस्य संबन्धो व्यत्ययं च समुद्भवम् ॥ ६८ ॥ उद्गातुः[1] प्रभवं चैव तथाध्वर्योः परस्परम्॥ प्रोचुस्ते तत्त्वमाश्रित्य तथान्ये दूषयन्ति तत् ॥ ६९ ॥ अन्ये मीमांसकास्तत्र कोपसंरक्तलोचनाः ॥ हन्युस्तेषां मतं वादमाश्रिता वाग्विचक्षणाः ॥ ॥ ७० ॥ परिशिष्टविदश्चान्ये मध्यस्था द्विजसत्तमाः ॥ प्रोचुर्वादं परित्यज्य साभिप्रायं यथोदितम् ॥ ७१ ॥ महावीरपुरोडाशचयनप्रमुखां स्तथा ॥ विवादांश्चक्रिरे चान्ये स्वंस्वं पक्षं समाश्रिताः ॥ ७२ ॥ एवं सा रजनी तेषामतिक्रान्ता द्विजन्मनाम् ॥ ७३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये रूपतीर्थोत्पत्तिपूर्वकप्रथमयज्ञदिवसवृत्तान्तवर्णनंनाम द्व्यशीत्युत्तरशततमोऽध्यायः ॥ १८२ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ द्वितीये दिवसे प्राप्ते यज्ञकर्मसमुद्भवे ॥ द्वादश्यामभवत्तत्र शृणुध्वं तद्द्विजोत्तमाः ॥ वृत्तान्तं



१ उद्गीथप्रभवं चैव–इ०, उद्गातुः प्रथमं चैव–इ० च पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वदेवानां महाविस्मयकारकम् ॥ १ ॥ मखकर्मणि प्रारब्ध ऋत्विग्भिर्वेदपारगैः ॥ जलसर्पं समादाय बटुः कश्चित्सुनर्मकृत् ॥ २ ॥ प्रविश्याथ सदस्तत्र तं सर्पं ब्राह्मणान्तिके ॥ चिक्षेप प्रहसंश्चैव सर्वदुःखभयंकरम् ॥ ३ ॥ ततस्तु डुण्डुभस्तूर्णं भ्रममाण इतस्ततः ॥ विप्राणां सदसिस्थानां सक्तानां यज्ञकर्मणि ॥ ४ ॥ अहो होतुः स्थिते प्रैषे दीर्घसत्रसमुद्भवे ॥ स सर्पो वेष्टयामास तस्य गात्रं समंततः ॥ ५ ॥ न चचाल निजस्थानात्प्रा यश्चित्तविभीषया ॥ नोवाच वचनं सोऽत्र चयनन्यस्तलोचनः ॥ ६ ॥ हाहाकारो महाञ्जज्ञे एतस्मिन्नंतरे द्विजाः ॥ तस्मिन्सदसि विप्राणां विषा द्व्याहिप्रशंकया ॥ ७ ॥ हाहाकारो महानासीत्तं दृष्ट्वा सर्पवेष्टितम् ॥ तस्य पुत्रो विनीतात्मा मैत्रावरुणकर्मणि ॥ ८ ॥ संस्थितस्तेन संदृष्टः पिता सर्पाभिवेष्टितः ॥ ज्ञात्वा तु चेष्टितं तस्य भये सर्पसमुद्भवे ॥ शशाप क्रोधसंयुक्तस्ततस्तं स बटुं मुनिः ॥ ९ ॥ यस्मात्पाप त्वया सर्पः क्षितः सदसि दुर्मते ॥ तस्माद्भव द्रुतं सर्पो मम वाक्यादसंशयम् ॥ १० ॥ ॥ बटुरुवाच ॥ ॥ हास्येन जलसर्पोऽयं मया मुक्तोऽत्र लीलया ॥ न ते तातं समुद्दिश्य तत्किं मां शपसि द्विज ॥ ११ ॥ एतस्मिन्नंतरे मुक्ता तस्य गात्रं स पन्नगः ॥ जगामान्यत्र तस्यापि सर्पत्वं समपद्यत ॥ १२ ॥ सोऽपि सर्पत्वमापन्नः सनातनसुतो बटुः ॥ दुःखशोकसमापन्नो ब्राह्मणैः परिवेष्टितः ॥ १३ ॥ अथ गत्वा भृगुं सोऽपि बाष्पव्याकुललोचनः ॥ प्रोवाच गद्गदं वाक्यं प्रणिपत्य पुरःसरः ॥ १४ ॥ सनातनसुतश्चास्मि पौत्रस्तु परमेष्ठिनः ॥ शप्तस्तव सुतेनास्मि च्यवनेन महात्मना ॥ १५ ॥ निर्दोषो ब्राह्मणश्रेष्ठ तस्माच्छापात्प्ररक्ष माम् ॥ तच्छ्रुत्वा च्यवनं प्राह कृपाविष्टो भृगुः स्वयम् ॥ १६ ॥ अयुक्तं विहितं तात यच्छप्तोऽयं बटुस्त्वया ॥ न मां धर्षयितुं शक्तो विषाढ्योऽपि भुजंगमः ॥ १७ ॥ किं पुनर्जलसर्पोऽयं निर्विषो रज्जुसंनिभः ॥ न मामुद्दिश्य निर्मुक्तः सर्पोऽनेन द्विजन्मना ॥ शापमोक्षं कुरुष्वास्य तस्माच्छीघ्रं द्विजन्मनः ॥ १८ ॥ ॥ च्यवन उवाच ॥ ॥ यदि त्यजति मर्यादामब्धिः शैत्यं व्रजेद्रविः ॥ उष्णत्वं च क्ष पानाथस्तन्मे स्यादनृतं वचः ॥ १९ ॥ तच्छ्रुत्वा वचनं तस्य स्वयमेव पितामहः ॥ तत्रायातः स्थितो यत्र स पौत्रः सर्परूपधृक् ॥ २० ॥ प्रोवाच न विषादस्ते पुत्र कार्यः कथंचन ॥ यत्सर्पत्वमनुप्राप्तः शृणुष्वात्र वचो मम ॥ २१ ॥ पुरा संस्रष्टुकामोऽहं नागानां नवमं कुलम् ॥ तद्भविष्यति त्वत्पार्श्वात्समर्यादं धरातले ॥ २२ ॥ मन्त्रौषधियुजां पुंसां न पीडामाचरिष्यति ॥ संप्राप्स्यति परां पूजां समस्ते जगतीतले ॥ २३ ॥ अत्राऽस्ति

१ अथ रुपाविष्टः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सुशुभं तोयं हाटकेश्वरसंज्ञिते ॥ क्षेत्रे तत्र समावासः पुत्र कार्यस्त्वया सदा ॥ २४ ॥ तत्रस्थस्य तपःस्थस्य नागः कर्कोटको निजम् ॥ तव दास्यति सत्कन्यां ततः सृष्टिर्भविष्यति ॥ २५ ॥ नवमस्य कुलस्यात्र समर्यादस्य भूतले ॥ श्रावणे कृष्णपक्षे तु संप्राप्ते पंचमीदिने ॥ २६ ॥ संप्राप्स्यति परां पूजां पृथिव्यां नवमं कुलम् ॥ अद्यप्रभृति तत्तोयं नागतीर्थमिति स्मृतम् ॥२७॥ ख्यातिं यास्यति भूपृष्ठे सर्वपातकनाशनम्॥ येऽत्र स्नानं करिष्यंति संप्राप्ते पंचमीदिने ॥२८॥ न तेषां वत्सरंयावद्भविष्यत्यहिजं भयम् ॥ विषार्दितस्तु यो मर्त्यस्तत्र स्नानं करिष्यति ॥२९॥ तत्क्षणा न्निर्विषो भूत्वा संप्राप्स्यति परं सुखम् ॥ पुत्रकामा तु या नारी पंचम्यां भास्करोदये ॥३०॥ करिष्यति तथा स्नानं फलहस्ता प्रभक्तितः ॥ भविष्यति च सा शीघ्रं वंध्याऽपि च सुपुत्रिणी ॥३१॥ ॥ सूत उवाच ॥ ॥ एवं प्रवदतस्तस्य ब्रह्मणोऽव्यक्तजन्मनः॥ अन्ये नागाः समायातास्तत्र यज्ञे निमंत्रिताः ॥ ३२ ॥ वासुकिस्तक्षकश्चैव पुण्डरीकः कृशोदरः ॥ कम्बलाश्वतरौ नागौ शेषः कालिय एव च ॥ ३३ ॥ ते प्रणम्य वचः प्रोचुः प्रोच्चैर्देवं पितामहम् ॥ तवादेशाद्वयं प्राप्ता यज्ञेऽत्र प्रपितामह ॥३४॥ साहाय्यार्थं तदादेशो दीयतां प्रपितामह ॥ येन कुर्मो वयं शीघ्रं नागराज्ये ह्यधिष्ठिताः ॥३५॥ ब्रह्मोवाच ॥ साहाय्यमेतदस्माकं भवदीयं महोरगाः ॥ गत्वानेन समं शीघ्रं नागराजेन तिष्ठत ॥३६॥ नागतीर्थे ततः स्थेयं सर्वैस्तत्र समास्थितैः ॥३७॥ यः कश्चि न्मम यज्ञेऽत्र दुष्टभावं समाश्रितः ॥ समागच्छति विघ्नाय रक्षणीयः स सत्वरम् ॥३८॥ राक्षसो वा पिशाचो वा भूतो वा मानुषोऽपि वा ॥ एतत्कृत्य तमं नागा मम यज्ञस्य रक्षणम् ॥ ३९ ॥ तथा यूयमपि प्राप्ते मासि भाद्रपदे तथा ॥ पंचम्यां कृष्णपक्षस्य तत्र पूजामवाप्स्यथ ॥ ४० ॥ ॥ सूत उवाच ॥ ॥ बाढमित्येव ते प्रोच्य प्रणिपत्य पितामहम् ॥ सनातनसुतोपेता नागतीर्थं समाश्रिताः ॥ ४१ ॥ ततःप्रभृति तत्तीर्थं नागतीर्थ मिति स्मृतम् ॥ कामप्रदं च भक्तानां नराणां स्नानकारिणाम् ॥ ४२ ॥ यस्तत्र कुरुते स्नानं सकृद्भक्त्या समन्वितः ॥ नान्वयेऽपि भयं तस्य जाय ते सर्पसंभवम् ॥ ४३ ॥ तत्र यच्छति मिष्टान्नं द्विजानां सज्जनैः सह ॥ पूजयित्वा तु नागेंद्रान्सनातनपुरःसरान् ॥ ४४ ॥ सप्तजन्मांतरं यावन्न स दौःस्थ्यमवाप्नुयात् ॥ भूतप्रेतपिशाचानां शाकिनीनां विशेषतः ॥ न च्छिद्रं न च रोगाश्च नाधयो न रिपोर्भयम् ॥ ४५ ॥ यश्चैतच्छृणुयाद्भक्त्या वाच्यमानं द्विजोत्तमाः ॥ सोऽपि संवत्सरंयावत्पन्नगैर्न च पीड्यते ॥ ४६ ॥ सर्पदष्टस्य यस्यैतत्पुरतः पठ्यते भृशम् ॥ नागतीर्थस्य माहात्म्यं काल दष्टोऽपि जीवति ॥ ४७ ॥ पुस्तके लिखितं चैतन्नागतीर्थसमुद्भवम् ॥ माहात्म्यं तिष्ठते यत्र न सर्पस्तत्र तिष्ठति ॥ ४८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये नागतीर्थोत्पत्तिमाहात्म्यवर्णनंनाम त्र्यशीत्युत्तरशततमोऽध्यायः ॥ १८३ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ सूत उवाच ॥ ॥ तृतीये च दिने प्राप्ते त्रयोदश्यां द्विजोत्तमाः ॥ प्रातःसवनमादाय ऋत्विजः सर्व एव ते ॥ स्वेस्वे कर्मणि संलग्ना यज्ञकृत्यसमुद्भवे ॥ १ ॥ ततः प्रवर्तते यज्ञस्तदा पैतामहो महान् ॥ सर्वकामसमृद्धस्तु सर्वैः समुदितो गुणैः ॥ २ ॥ दीयतां दीयतां तत्र भुज्यतां भुज्यतामिति ॥ एकः संश्रूयते शब्दो द्वितीयो द्विजसंभवः ॥ ३ ॥ नान्यस्तत्र तृतीयस्तु यज्ञे पैतामहे शुभे ॥ यो यं कामयते कामं हेमरत्नसमुद्भवम् ॥ ४ ॥ स तत्प्राप्नोत्यसंदिग्धं वांछिताच्च चतुर्गुणम् ॥ पक्वान्नस्य कृतास्तत्र दृश्यंते पर्वताः शुभाः ॥ ५ ॥ घृतक्षीरमहानद्यो दानार्थं वित्तराशयः ॥ एतस्मिन्नंतरे प्राप्तः कश्चिज्ज्ञानी द्विजोत्तमाः ॥ ६ ॥ अतीतानागतान्वेत्ति वर्तमानं च यः सदा ॥ स ब्रह्माणं नमस्कृत्य निविष्टश्च तदग्रतः ॥ ७ ॥ कर्मांतरेषु विप्राणां स सर्वेषां द्विजोत्तमाः ॥ कथयामास यद्वृत्तं बाल्यात्प्रभृति कृत्स्नशः ॥ ८ ॥ ततस्त ऋत्विजः सर्वे कौतुकाविष्टचेतसः ॥ पप्रच्छुर्ज्ञानिनं तं च विस्मयोत्फुल्ललोचनाः ॥ ९ ॥ विस्मृतानि स्मरंतस्ते निजकृत्यानि वै ततः ॥ प्रोक्तानि गर्हणीयानि ह्यसंख्यातानि सर्वशः ॥ १० ॥ ततस्ते पुनरेवाथ पप्रच्छुर्ज्ञानिनं च तम् ॥ लोकोत्तरमिदं ज्ञानं कथं ते संस्थितं द्विज ॥ ११ ॥ को गुरुस्ते समाचक्ष्व परं कौतूहलं हि नः ॥ अहो ज्ञानमहो ज्ञानं नैतद्दृष्टं श्रुतं च न ॥ १२ ॥ यादृशं ते द्विजश्रेष्ठ दृश्यते पार्श्वसंस्थितम् ॥ किं ब्रह्मणा स्वयं विप्र त्वमेवं प्रतिबोधितः ॥ १३ ॥ किं वा हरेण तुष्टेन किं वा देवेन चक्रिणा ॥ नान्यप्रबोधितस्यैवं ज्ञानं संजायते स्फुटम् ॥ १४ ॥ ॥ ॥ अतिथिरुवाच ॥ ॥ पिंगला कुररः सर्पः सारंगश्चैव यो वने ॥ इषुकारः कुमारी च षडेते गुरवो मम ॥ १५ ॥ एतेषां चेष्टितं दृष्ट्वा ज्ञानं मे समुपस्थितम् ॥ १६ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ कथयस्व महाभाग कथं ते गुरवः स्थिताः ॥ कीदृशं च त्वया दृष्टं तेषां चैव विचेष्टितम् ॥ ॥ १७ ॥ कस्मिन्देशे त्वमुत्पन्नः कस्मिन्स्थाने वदस्व नः ॥ किंनामा किं नु गोत्रश्च सर्वं विस्तरतो वद ॥ १८ ॥ ॥ अतिथिरुवाच ॥ ॥ आसन्नत्र पुरे विप्राश्चत्वारो ये विवासिताः ॥ शुनःशेपोऽथ शाक्रेयो बौद्धो दांतश्चतुर्थकः ॥ १९ ॥ तेषां मध्ये तु यो बौद्धः शांतो दांत इति स्मृतः ॥ छन्दोगगोत्रविख्यातो वेदवेदांगपारगः ॥ २० ॥ नागरेषु समुत्पन्नः पश्चिमे वयसि स्थितः ॥ तस्याहं प्रथमः पुत्रः प्राणे भ्योऽपि सुहृत्प्रियः ॥ २१ ॥ ततोऽहं यौवनं प्राप्तो यदा द्विजवरोत्तमाः ॥ तदा मे दयितस्तातः पंचत्वं समुपागतः ॥ २२ ॥ एतस्मिन्नंतरे राजा ह्यानर्ताधिपतिर्द्विजाः ॥ सुतपास्तेन निर्दिष्टोऽहं तु कंचुकिकर्मणि ॥ २३ ॥ शांतं दांतं समालोक्य विश्वस्तेन महात्मना ॥ तस्य चांतःपुरे ह्यासी

१ तद्वृत्तम्–इ० पा० । २ सारंगः–भ्रमर–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

त्पिंगलानाम नायिका ॥ २४ ॥ दौर्भाग्येण समोपेता रूपेणापि समन्विता ॥ अथान्याः शतशस्तस्य भार्याश्चांतःपुरे स्थिताः ॥ २५ ॥ ताः सर्वा रजनीवक्रे व्याकुलत्वं प्रयांति च ॥ आहरंति परान्गन्धान्धूपांश्च कुसुमानि च ॥ २६ ॥ विलेपनानि मुख्यानि सुरभीणि तथा पुरः ॥ पुष्पाणि च विचित्राणि ह्यन्याः सूक्ष्मांबराणि च ॥२७॥ तावद्यावत्स्थितः कालः शयनीयसमुद्भवः ॥ मन्मथोत्साहसंयुक्ताः पुलकेन समन्विताः ॥ ॥२८॥ एका जानाति मां सुप्तां नूनमाकारयिष्यति ॥ अन्या जानाति मां चैव परस्परममर्षतः ॥२९॥ स्पर्धयन्ति प्रयुध्यन्ति विरूपाणि वदन्ति च ॥ तासां मध्यात्ततश्चैका प्रयाति नृपसंनिधौ ॥ ३० ॥ शेषा वैलक्ष्यमासाद्य निःश्वस्य प्रस्वपन्ति च ॥ दुःखार्ता न लभन्तिस्म ताश्च निद्रां पराभवात् ॥ ३१ ॥ कामेन पीडितांगाश्च बाष्पपूर्णेक्षणाः स्थिताः ॥ ३२ ॥ आशा हि परमं दुःखं निराशा परमं सुखम् ॥ आशानिराशां कृत्वा च सुखं स्वपिति पिंगला ॥ ३३ ॥ न करोति च शृंगारं न स्पर्धां च कदाचन ॥ न व्याकुलत्वमापेदे सुखं स्वपिति पिंगला ॥ ३४ ॥ ततो मयापि तद्दृष्ट्वा तस्याश्चेष्टितमुत्तमम् ॥ आशाः सर्वाः परित्यक्ताः स्वपिमीह ततः सुखी ॥ ३५ ॥ ये स्वपंति सुखं रात्रौ तेषां कायाग्निरिध्यते ॥ आहारं प्रतिगृह्णाति ततः पुष्टिकरं परम् ॥ ३६ ॥ तदेत्कारणं जातं मम तेजोऽभिवृद्धये ॥ गुरुत्वे पिंगला जाता तेन सा मे द्विजोत्तमाः ॥ ३७ ॥ आशापाशैः परीतांगा ये भवन्ति नैरोऽर्दिताः ॥ ते रात्रौ शेरते नैव तदप्राप्तिविचिन्तया ॥ ३८ ॥ नैवाग्निर्दीप्यते तेषां जाठरश्च ततः परम् ॥ आहारं वांछते नैव तंन्न तेजोऽभिवर्धनम् ॥ ३९ ॥ सर्वस्य विद्यते प्रांतो न वांछायाः कथंचन ॥ ४० ॥ यथायथा भवेल्लाभो वांछितस्य नृणामिह ॥ हविषा कृष्णवर्त्मेव वृद्धिं याति तथातथा ॥ ४१ ॥ यथा शृंगं रुरोः काये वर्धमानस्य वर्धते ॥ एवं तृष्णापि यत्नेन वर्धमानेन वर्धते ॥ ॥ ४२ ॥ एवं ज्ञात्वा महाभागाः पुरुषेण विजानता ॥ दिवा तत्कर्म कर्तव्यं येन रात्रौ सुखं स्वपेत् ॥ ४३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये ब्रह्मयज्ञे तृतीयदिवसे पिंगलोपाख्यानवर्णनंनाम चतुरशीत्युत्तरशततमोऽध्यायः ॥ १८४ ॥ ॥ छ ॥ ॥ अतिथिरुवाच ॥ ॥ एतद्वः सर्वमाख्यातं यथा मे पिंगला गुरुः ॥ संजाता कुररो जातो यथा तत्प्रवदाम्यहम् ॥ १ ॥ ममासीद्द्रविणं भूरि पितृपैतामहं महत् ॥ २ ॥ येऽथ पुत्राश्च पौत्राश्च दायादा बांधवा अपि ॥ ते मां सर्वे प्रबाधन्ते द्रव्यसस्यकृते सदा ॥ ३ ॥ यस्याहं न प्रयच्छामि स मां चैव प्रबाधते ॥ सीदमानस्तु सुभृशं दर्शयन्प्राणसंक्षयम् ॥ ४ ॥ एके साम्ना प्रयाचंते वित्तं भेदेन



१ नृशब्दस्य बहुवचनमिदम्। २ तत्—ततः—इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चापरे ॥ भयदानेन चान्येऽपि केचिद्दंडेन च द्विजाः ॥ ५ ॥ एवं नाहं क्वचित्सौख्यं तेषां पार्श्वाल्लभामि भोः ॥ चिन्तयानो दिवानक्तं क्लेशस्य परिसंक्षयम् ॥ उपायं न च पश्यामि येन शांतिः प्रजायते ॥ ६ ॥ अन्यस्मिन्दिवसे दृष्टः कृतमांसपरिग्रहः ॥ कुररश्चंचुना व्योम्नि गच्छमानस्त्वरान्वितः ॥ ७ ॥ हन्यमानः समंताच्च मांसार्थे विविधैः खगैः ॥ अथ तेन परिक्षिप्तं तन्मांसं पक्षिजाद्भयात् ॥ ८ ॥ यावत्तावत्सुखी जातस्तेऽपि सर्वे समुज्झिताः ॥ मयापि क्लिश्यमानेन तद्वच्च निजबांधवैः ॥ ९ ॥ सामिषं कुररं दृष्ट्वा वध्यमानं निरामिषैः ॥ आमिषस्य परित्यागात्कुररः सुखमेधते ॥ १० ॥ एवं निश्चित्य मनसा सर्वानानीय बांधवान् ॥ पुत्रान्पौत्रांस्ततः सर्वान्पुरस्तेषां निवेदितम् ॥ ११ ॥ त्रिःसत्यं शपथं कृत्वा नान्यदस्तीति मे गृहे ॥ विभज्यार्थं यथान्यायं यूयं गृह्णीत बान्धवाः ॥ १२ ॥ ततःप्रभृति तैर्मुक्तः सुखं तिष्ठाम्यहं द्विजाः ॥ एतस्मात्कारणाज्जातो ममासौ कुररो गुरुः॥ १३ ॥ अर्थसंपद्विमोहाय विमोहो नरकाय च ॥ तस्मादर्थमनर्थं तं मोक्षार्थी दूरतस्त्यजेत् ॥ १४ ॥ यथामिषं जले मत्स्यैर्भक्ष्यते श्वापदैर्भुवि ॥ आकाशे पक्षिभिश्चैव तथा सर्वत्र वित्तवान्॥१५॥ दोषहीनोऽपि धनवान्भूपाद्यैः परिताप्यते ॥ दरिद्रः कृतदोषोऽपि सर्वत्र निरुपद्रवः॥१६॥ आलंबिताः परैर्यांति प्रस्खलंति पदेपदे ॥ गद्गदानि च जल्पंते धनिनो मद्यपा इव॥१७॥भक्ते द्वेषो बहिः प्रीती रुचितं गुरुलघ्वपि ॥ मुखे च कटुता नित्यं धनिनां ज्वरिणामिव ॥१८॥ अर्थानामर्जने दुःखमर्जितानां च रक्षणे ॥ नाशे दुःखं व्यये दुःखं धिगर्थो दुःखभाजनम्॥१९॥ अर्थार्थी जीवलोकोऽयं स्मशानमपि सेवते ॥ जनितारमपि त्यक्त्वा निःस्वं यांति सुता अपि ॥ २० ॥ सुतस्य वल्लभस्तावत्पिता पुत्रोऽपि वै पितुः ॥ यावन्नार्थस्य संबन्धस्ताभ्यां भावी परस्परम् ॥ संबन्धे वित्तजे जाते वैरं संजायते मिथः ॥ २१ ॥ एतस्मात्कारणाद्वित्तं मया त्यक्तं तपोधनाः ॥ तेन सौख्येन तिष्ठामि कुररस्योपदेशतः ॥ २२ ॥ शृणुध्वं च महाभागा यथा मेऽहिर्गुरुः स्थितः ॥ २३ ॥ यथा मया गृहं त्यक्तं दृष्ट्वा सर्पविचेष्टितम् ॥ गृहारंभः सुदुःखाय सुखाय न कदाचन ॥ २४ ॥ सर्पः परकृतं वेश्म प्रविश्य सुखमेधते ॥ उषित्वा तत्र सौख्येन भूयोऽन्यत्तादृशं व्रजेत् ॥ २५ ॥ ममत्वं कुरुते नैव ममेदं गृहमित्यसौ ॥ न गृहं जायते तस्य न स्वयं हि कृतं यतः ॥ २६ ॥ यः पुनः कुरुते हर्म्यं स्वयं क्लेशैः पृथग्विधैः ॥ न तस्य याति तत्पश्चान्मृत्युकालेऽपि संस्थिते ॥ २७ ॥ गृहात्संजायते भार्या ततः पुत्रश्च कन्यका ॥ तेषामर्थे करोति स्म कृत्याकृत्यं ततः परम् ॥२८॥ कोशकारमिवात्मानं वेष्टयन्नावबुध्यते ॥ २९ ॥ पुत्रदारगृहक्षेत्रसक्ताः सीदंति जंतवः ॥ लोभपंकार्णवे मग्ना जीर्णा वनगजा इव ॥ ३० ॥ एकः पापानि

१ ममैतत्र यथाविधि–इ०पा० । २ आये दुःखं व्यये दुःखम्–इत्यन्यत्र पाठान्तरम् ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



कुरुते फलं भुंक्ते महाजनः ॥ भोक्तारो विप्रमुच्यंते कर्ता दोषेण लिप्यते ॥ ३१ ॥ एतस्मात्कारणाद्धर्म्यं मया त्यक्तं द्विजोत्तमाः॥ मोक्षमार्गार्गला
भूतं दृष्ट्वा सर्पविचेष्टितम् ॥ ३२ ॥ एकरात्रं वसेद्ग्रामे त्रिरात्रं पत्तने वसेत् ॥ यो याति स यतिः प्रोक्तो योऽन्यो योगविडंबकः ॥ ३३ ॥ विधूमे
च प्रशांताग्नौ यस्तु माधुकरीं चरेत् ॥ गृहे च विप्रमुख्यानां यतिः स नेतरः स्मृतः ॥ ३४ ॥ दण्डी भिक्षां च वा कुर्यात्तदेव व्यसनं विना ॥ यस्ति
ष्ठति न वैराग्यं याति नैव यतिर्हि सः ॥ ३५ ॥ दिवा स्वप्नं वृथान्नं च स्त्रीकथाऽऽलोक्यमेव च ॥ श्वेतवस्त्रं हिरण्यं च यतीनां पतनानि षट् ॥ ३६॥
समः शत्रौ च मित्रे च समलोष्टाश्मकांचनः ॥ सुहृत्पुत्र उदासीनः स यतिर्नेतरः स्मृतः ॥ ३७ ॥ समौ मानापमानौ च स्वदेशे परिकेपि वा ॥
यो न हृष्यति न द्वेष्टि स यतिर्नेतरः स्मृतः ॥ ३८ ॥ यस्मिन्गृहे विशेषेण लभेद्भिक्षा च वाशनम् ॥ तत्र नो याति यो भूयः स यतिर्नेतरः स्मृतः
॥ ३९ ॥ एवं ज्ञात्वा मया विप्र दृष्ट्वा सर्पविचेष्टितम् ॥ सर्वसंगपरित्यागो मोक्षार्थं परिकल्पितः ॥ ४० ॥ एवं ममाहिः संजातो गुरुर्ब्राह्मणसत्तमाः॥
तत्प्रभावान्महत्तेजः संजातं विग्रहे मम ॥ ४१ ॥ यथा मे भ्रमरो जातो गुरुस्तद्वद्वदामि च ॥ कस्मिन्वृक्षे मया दृष्टो भ्रमरः कोऽपि संगतः ॥४२॥
शाखाग्रं तु समाश्रित्य कृतपूर्वनिबंधनम् ॥ वसंतसमये प्राप्ते पुष्पवंतश्च ये द्रुमाः ॥ ४३ ॥ सुगन्धफलपुष्पाश्च सुगन्धदलसंयुताः ॥ तेषामणुं समा
दाय श्रेष्ठश्रेष्ठतमं रसम् ॥ ४४ ॥ नियोजयति शाखाग्रे तरोरस्य सदैव हि ॥ अनिर्विण्णतया हृष्टस्तदा सम्यङ्निरीक्षितः ॥ ४५ ॥ मधुजालं ततो
जातं कालेन महता महत् ॥ येनान्ये मधुना तृप्तिं प्राप्ताः शतसहस्रशः ॥ ४६ ॥ तच्चेष्टितं मया वीक्ष्य शास्त्राण्यन्यानि भूरिशः ॥ ततस्तेषां समा
दाय सारभूतं पृथक्पृथक् ॥ कृतानि भूरिशास्त्राणि वेदांतानि च कृत्स्नशः ॥ ४७ ॥ उपजीवंति यान्यन्ये यथा भृङ्गास्तथा द्विजाः ॥ ४८ ॥ एवं मे
मधुपो जातो गुरुत्वे च द्विजोत्तमाः ॥ तेनाहं तेजसा युक्तो नान्यदस्तीह कारणम् ॥ ४९ ॥ वेदांतवादिनो येऽत्र प्रभवंति व्रतान्विताः ॥ निर्लोभा
गततृष्णाश्च ते भवंति सुतेजसः ॥ ५० ॥ एकेनापि विहीना ये प्रभवंति कुबुद्धयः ॥ लोभमोहान्विताः पापा जायंते ते विचेतसः ॥५१॥ वेदांतानि
सुभूरीणि मया दृष्ट्वा विचार्य च ॥ समरूपाः कृता ग्रन्था मर्त्यलोकहितार्थिना ॥ ५२ ॥ एवं मे गुरुतां प्राप्तो मधुपो द्विजसत्तमाः ॥ इषुकारो यथा
जातस्तथा चैव ब्रवीमि वः ॥ ५३ ॥ आत्मावलोकनार्थाय मया दृष्टाः सहस्रशः ॥ योगिनो ज्ञानसंपन्नास्तैः प्रोक्तं च स्वशक्तितः ॥ ५४ ॥ ॥२०५॥
आत्मावलोकनं भावि सुशिष्याय यथा तथा ॥ स समाधिजद्वारेण चतुराशीतिकेन च ॥ ५५ ॥ आसनैस्तत्प्रमाणैश्च पद्मासनप्रपूर्वकैः ॥
असंख्यैः कारणैश्चैव ह्यध्यात्मपठनैस्तथा ॥ ततोऽपि लक्षितो नैव मयाऽऽत्मा च कथंचन ॥ ५६ ॥ ततो वैराग्यमापन्नः प्रभ्रमामि धरातले ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुर्वर्थे न च लेभेऽहं गुरुमात्मावलोकने ॥ ५७ ॥ अन्यस्मिन्नहनि प्राप्ते राजमार्गेण गच्छता ॥ मया दृष्टो महीपालः सैन्येन महता वृतः ॥ ५८ ॥
ततोऽहं मार्गमुत्सृज्य संमुखस्य महीपतेः ॥ उटजद्वारमाश्रित्य किंचिदूर्ध्वोपि संस्थितः ॥ ५९ ॥ तत्रापि च स्थितः कश्चित्पुरुषः कांडकारकः ॥
ऋजुकर्मणि संयुक्तः शराणां नतपर्वणाम् ॥ ६० ॥ तस्मिन्दूरगते भूपे तथान्यः सेवकोऽभ्यगात् ॥ ६१ ॥ तं पप्रच्छ त्वरायुक्तः शृण्वतोऽपि मम
द्विजाः ॥ कांडकर्मणि संसक्तमृजुत्वेन स्थितं तदा ॥६२॥ कियती वर्तते वेला गतस्य पृथिवीपतेः ॥ मार्गेणानेन मे ब्रूहि येन गच्छामि पृष्ठतः॥६३॥
सोऽब्रवीत्तं तदा विप्रा अधोवक्त्रः स्थितो नरः ॥ अनेन राजमार्गेण गच्छमानो महीपतिः ॥ ६४ ॥ न मया वीक्षितः कश्चिदिदानीं राजसेवक ॥
तदन्यं पृच्छ चेत्कार्यं तवानेन ब्रवीतु सः ॥ ६५ ॥ शरकर्मणि संसक्तस्त्वहमत्र व्यवस्थितः ॥ तच्छ्रुत्वा वचनं तस्य स्वचित्ते चिन्तितं मया॥६६॥
एकचित्ततया योगो ब्रह्मज्ञानसमुद्भवः ॥ नान्यथा भविता मे स ततश्चित्तनिरोधनम् ॥ करोमि ब्रह्मसंसिद्ध्यै ततो मेऽसौ भविष्यति ॥ ६७ ॥
ततःप्रभृति चित्ते स्वे धारयामि सदैव तु ॥ विश्वरूपं तथा सूर्यं हृत्पंकजनिवासिनम् ॥ ६८ ॥ ततो दिक्षु दिगन्तेषु गगने धरणीतले ॥ तमेकं
चैव पश्यामि नान्यत्किंचिद्द्विजोत्तमाः ॥ ६९ ॥ अहं च तेजसा युक्तस्तत्प्रभावेण संस्थितः ॥ ७० ॥ एवं मे स गुरुर्जातः शरकारो द्विजोत्तमाः ॥
शृणुध्वं कन्यका जाता गुरुत्वे मे यथा पुरा ॥ ७१ ॥ सर्वसंगपरित्यागी यदाहं निर्गतो गृहात् ॥ ममानुपृष्ठतश्चैव ततो भार्या विनिर्गता ॥ ७२ ॥
शिशुं पुत्रं समादाय कन्यामेकां च शोभनाम् ॥ ततोऽहं भार्यया प्रोक्तो वानप्रस्थाश्रमे स्थितः ॥ ७३ ॥ कुरु मे वचनं मुक्तिरत्रैव हि भविष्यति ॥
ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथवा यतिः ॥ यदि स्यात्संयतात्मा स नूनं मुक्तिमवाप्नुयात् ॥७४॥ अथवा मां परित्यज्य यदि यास्यसि चान्यतः॥
तदहं च मरिष्यामि सत्यमेतदसंशयम् ॥ ७५ ॥ मृतायां मयि ते बालावेतावनुमरिष्यतः ॥ कुमारी च कुमारश्च तस्मान्नाथ दयां कुरु ॥ ७६ ॥
मा व्रजस्व परं तीर्थं परिजानन्नपि स्वयम् ॥ हाटकेश्वरजं क्षेत्रमेतत्पुण्यतरं स्मृतम् ॥ ७७ ॥ सर्वेषामेव तीर्थानां श्रुतमेतन्मया विभो ॥ वदतां ब्राह्म
णेन्द्राणां तथान्येषां तपस्विनाम् ॥ ७८ ॥ श्लोकोऽयं बहुधा नाथ कीर्त्यमानो मया विभो ॥ विश्वामित्रस्य वक्त्रेण सन्मुनेः सत्यवादिनः ॥ ७९ ॥
पुनंति सर्वतीर्थानि स्नानदानादसंशयम् ॥ हाटकेश्वरजं क्षेत्रं स्मरणादपि पावयेत् ॥ ८० ॥ ततः कृच्छ्रात्प्रतिज्ञातं मयाश्रमनिषेवणम् ॥ वान
प्रस्थोद्भवं वा स्यात्ततोऽहं तत्र संस्थितः ॥ ८१ ॥ तत्रस्थस्य हि मे कन्या क्रीडते पुरतः स्थिता ॥ वलयापूरिताभ्यां च प्रकोष्ठाभ्यां तत

१ वा—इ० पा० । २ श्रुतः—इत्यध्याहारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

स्ततः ॥ ८२ ॥ यथायथा सा कुरुते कन्दमूलफलाशनम् ॥ तनुत्वं याति कायेन तथा चैव दिनेदिने ॥ ८३ ॥ ततो मे जायते दुःखं तेषां पतन
संभवम् ॥ कस्यचित्त्वथ कालस्य संजातं वलयत्रयम् ॥ तस्या हस्ते ततस्ताभ्यां शब्दः संजायते मिथः ॥ ८४ ॥ ततः कालेन महता ताभ्या
मेकं व्यवस्थितम् ॥ न संघर्षो न शब्दश्च तत्रस्थस्य च जायते ॥ ८५ ॥ तद्विचिन्त्य मया सोऽपि ह्याश्रमः परिवर्जितः ॥ चिन्तितं च मया चित्ते
कृत्वा चैवं सुनिश्चयम् ॥ ८६ ॥ बहुभिः कलहो नित्यं द्वाभ्यां संघर्षणं तथा ॥ एकाकी विचरिष्यामि कुमारीवलयं यथा ॥ ८७ ॥ ततः सुतां
परित्यज्य तां भार्यां शिशुसंयुताम् ॥ गतोऽहं दूरमध्वानं यत्र नो वेत्ति सा च माम् ॥ ८८ ॥ यत्राऽस्तमितशायी च यल्लब्धकृतभोजनः ॥
भ्रमामि मेदिनीपृष्ठे त्यक्त्वा संसारबन्धनम् ॥ ८९ ॥ ततो मे ज्ञानमापन्नमेवं विप्राः शनैःशनैः ॥ अतीतानागतं चैव वर्तमानं विशेषतः ॥ ९० ॥
एवं मे कन्यका जाता गुरुत्वे द्विजसत्तमाः ॥ ९१ ॥ एतद्वः सर्वमाख्यातं यत्पृष्टोऽस्मि गुरोः कृते ॥ न युष्माकं पुरो मिथ्या कीर्तयामि कथंचन॥
॥ ९२ ॥ एवं मे ज्ञानमुत्पन्नं प्रकारैः षड्भिरेव च ॥ एभिर्लोकोत्तरं ज्ञानं युष्मत्प्रत्ययकारकम् ॥ ९३ ॥ ॥ सूत उवाच ॥ ॥ ततस्ते ब्राह्मणाः
सर्वे पप्रच्छुस्तं द्विजोत्तमाः ॥ वानप्रस्थाश्रमं त्यक्त्वा भार्यां शिशुसमन्विताम् ॥ क्व गतस्त्वं तदाचक्ष्व कियत्कालं च संस्थितः ॥ ९४ ॥ ॥ अति
थिरुवाच ॥ ॥ अहं भीतः सहस्राणि ग्रामाणां च शतानि च ॥ यत्रास्तमितशायी सन्ननेकानि द्विजोत्तमाः ॥ संख्यया रहितान्येव वर्षाणां च
शतानि च ॥ ९५ ॥ दृष्टानि मुख्यतीर्थानि तथैवायतनानि च ॥ दृष्टाश्च पर्वताः श्रेष्ठा नद्यश्च विमलोदकाः ॥ ९६ ॥ स्वयमेव मया ज्ञातो
वाराणस्यां स्थितेन च ॥ यज्ञः पैतामहो भावी स्थानेऽस्मिन्मामके यतः ॥९७॥ ततोऽहं सत्वरं प्राप्तः कौतुकेन द्विजोत्तमाः ॥ कीदृशः स मखो
भावी यत्र यज्वा पितामहः ॥ ९८ ॥ ॥ सूत उवाच ॥ ॥ एतस्मिन्नंतरे प्राप्ताः सर्वे देवाः सवासवाः ॥ वासुदेवं पुरस्कृत्य तथा चैव महेश्वरम् ॥९९॥
कमान्तरं समासाद्य पुलस्त्याद्यास्तथर्त्विजः ॥ ब्रह्मापि स्वयमायातो मृगचर्मधरस्तथा॥१००॥ ततस्ते तुष्टिमापन्नास्तस्य ज्ञानेन तेन च ॥ प्रोचुश्च
वरदास्तुभ्यं सर्व एव दिवौकसः ॥ १०१ ॥ तस्माद्वरय भद्रं ते प्रार्थयस्व यथेप्सितम् ॥ अवश्यं तव दास्यामो यद्यपि स्यात्सुदुर्लभम् ॥ १०२ ॥
॥ ॥ अतिथिरुवाच ॥ ॥ यदि तुष्टाः सुरा मह्यं प्रयच्छंति वरं मम ॥ अनेनैव शरीरेण देवत्वं प्रार्थयाम्यहम् ॥ १०३ ॥ यज्ञभागसमोपेतं
तथान्येषां दिवौकसाम् ॥ विशेषेण सुरश्रेष्ठाः स्थानं चोपरि संस्थितम् ॥ १०४ ॥ ॥ देवा ऊचुः ॥ ॥ नूनं त्वं विबुधो भूत्वा देवलोके
निवत्स्यसि ॥ अनेनैव शरीरेण यज्ञभागविवर्जितः ॥ १०५ ॥ यच्छामो यदि ते विप्र यज्ञांशं मानुषस्य भोः ॥ अप्रामाण्यं श्रुतेर्भावि तव दत्तेन



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेन च ॥ १०६ ॥ ॥ अतिथिरुवाच ॥ ॥ देवत्वेन न मे कार्यं यज्ञांशरहितेन च ॥ तदहं साधयिष्यामि यथा मुक्तिर्भविष्यति ॥ १०७ ॥
तच्छ्रुत्वा पद्मजः प्राह सर्वान्देवान्कृतांजलिः ॥ शृण्वंतु देवताः सर्वा यद्ब्रवीमि हितं वचः ॥ १०८ ॥ ममायं ब्राह्मणो यज्ञे दूरादेव समागतः ॥ नागर
स्तु विशेषेण पात्रं ज्ञानसमुद्भवम् ॥ १०९ ॥ प्रतिज्ञातस्तथा सर्वैर्वरोऽस्य विबुधैर्यतः ॥ तस्मात्प्रदीयतामस्मै यदभीष्टं सुरोत्तमाः ॥ ११० ॥
॥ ॥ महेश्वर उवाच ॥ ॥ यथाऽस्य जायते तृप्तिर्यज्ञभागाधिका सदा ॥ तथाहं कथयिष्यामि शृण्वंतु विबुधोत्तमाः ॥ १११ ॥ य एष क्रियते
यज्ञस्तस्य नाथो हरिः स्मृतः॥ एतस्मात्कारणात्प्रोक्तः स देवो यज्ञपुरुषः ॥ ११२ ॥ अद्यप्रभृति यत्किंचिच्छ्राद्धं मर्त्ये भविष्यति ॥ दैवं वा पैतृकं
वाऽपि तस्य चांते व्यवस्थितः ॥ ११३ ॥ एतस्य नाम संकीर्त्य पश्चाच्च यज्ञपूरुषम् ॥ संकीर्त्य भोजनं देयं ब्राह्मणस्य द्विजोत्तमाः ॥ ११४ ॥
तेनास्य भविता तृप्तिर्यज्ञांताऽभ्यधिका सदा ॥ अदत्त्वास्य कृतं श्राद्धं यत्किंचित्प्रभविष्यति ॥११५॥ तद्यास्यत्यखिलं व्यर्थं तथा भस्महुतं यथा ॥
वैश्वदेवांतमासाद्य यश्चैनं पूजयिष्यति ॥ ११६ ॥ विष्णुनामसमोपेतं भविष्यति तदक्षयम् ॥ दत्तं स्वल्पमपि प्रायः श्रद्धापूतेन चेतसा ॥ ११७ ॥
श्राद्धे वा वैश्वदेवे वा यश्चैनं नार्चयिष्यति ॥ संप्राप्तं व्यर्थतां तस्य तच्च सर्वं भविष्यति ॥११८॥ अस्मिंस्तुष्टिं गते सर्वे सुरा यास्यंति संमुदम् ॥
पितरश्च तमायांति विमुखे संमुखे तथा ॥ ११९ ॥ तच्छ्रुत्वा विबुधाः सर्वे महेश्वरवचस्तदा ॥ तथेति मुदिताः प्रोचुर्ब्रह्मविष्णुपुरस्सराः ॥ १२० ॥
ततःप्रभृति संजाता पूजा चातिथिसंभवा ॥ तस्मात्सर्वप्रयत्नेन पूजा कार्याऽतिथेः सदा ॥ यज्ञे पूरुषयज्ञस्य न चैकस्य कथंचन ॥ १२१ ॥
॥ ॥ अतिथिरुवाच ॥ ॥ अत्रास्ति मामकं तीर्थं मया यत्र तपः कृतम् ॥ हाटकेश्वरजे क्षेत्रे पुरुकाले द्विजोत्तमाः ॥१२२॥ अंगारकेण संयुक्ता चतुर्थी
स्याद्यदा तिथिः ॥ सांनिध्यं तत्र कार्यं च सर्वैर्देवैश्च तद्दिने ॥ १२३ ॥ कुर्यात्तत्रैव यः स्नानं तस्मिन्नहनि संस्थिते ॥ सर्वतीर्थफलं तस्य जायतां वः
प्रसादतः ॥ १२४ ॥ तथास्त्विति ततः सर्वेऽतिथिं प्रोचुः सुरोत्तमाः ॥ एतस्मिन्नंतरे प्राह पुलस्त्यर्षिः पितामहम् ॥१२५॥ ॥ पुलस्त्य उवाच ॥ ॥
ऋत्विजः सकला देवाः संस्थिताः कौतुकान्विताः ॥ उत्तिष्ठंतु च ते शीघ्रं यज्ञकर्मप्रसिद्धये ॥ १२६ ॥ एतस्मिन्नंतरे सर्वे तस्य वाक्यप्रणोदिताः ॥
उत्थिता ऋत्विजो ये च स्वानि स्थानानि भेजिरे ॥ ततः प्रववृते यज्ञः स पुनर्द्विजसत्तमाः ॥ कुर्वंता यज्ञकर्माणि होमपूर्वाणि यानि च ॥ १२७ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये तीर्थोत्पत्तिमाहात्म्यवर्णनं नाम पञ्चाशीत्युत्तरशत
तमोऽध्यायः ॥ १८५ ॥ ॥ छ ॥ ऋषय ऊचुः ॥ ॥ भूय एव महाभाग वद माहात्म्यमुत्तमम् ॥ अतिथेः कृत्स्नमस्माकं विस्तरेण च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





सूतज ॥ १ ॥ ॥ सूत उवाच ॥ ॥ शृण्वन्तु मुनयः सर्वे माहात्म्यमिदमुत्तमम् ॥ येन संश्रुतमात्रेण नश्येत्पापं दिनोद्भवम् ॥ २ ॥ यन्मया च श्रुतं पूर्वं सकाशात्स्वपितुः शुभम् ॥ ३ ॥ गृहस्थानां परो धर्मो नान्योऽस्त्यतिथिपूजनात् ॥ अतिथेर्न च दोषोस्ति तस्यातिक्रमणेन च ॥ ४ ॥ अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते ॥ स दत्त्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति ॥ ५ ॥ सत्यं शौचं तपोऽधीतं दत्तमिष्टं शतं समाः ॥ तस्य सर्वमिदं नष्टमतिथिं यो न पूजयेत् ॥ ६ ॥ दूरादतिथयो यस्य गृहमायांति निर्वृताः ॥ स गृहस्थ इति प्रोक्तः शेषाश्च गृहरक्षिणः ॥ ७ ॥ न पुराकृतपुण्यानां नराणामिह भूतले ॥ त्रीनेतान्प्रतिहन्यंते श्राद्धं दानं शुभा गिरः ॥ ८ ॥ तुष्टेऽतिथौ गृहस्थस्य तुष्टाः स्युः सर्वदेवताः ॥ विमुखे विमुखाः सर्वा भवंति च न संशयः ॥ ९ ॥ तस्मात्तोषयितव्यश्च गृहस्थेन सदाऽतिथिः ॥ अप्यात्मनः प्रदानेन यदीच्छेत्पुण्यमात्मनः ॥ ॥ १० ॥ त्रिविधस्त्वतिथिः प्रोक्तो गृहस्थानां द्विजोत्तमाः ॥ तस्याहं वच्मि वः कालं शृणुध्वं सुसमाहिताः ॥ ११ ॥ श्राद्धीयो वैश्वदेवीयः सूर्योढश्च तृतीयकः ॥ ये चान्ये भोजनार्थीयास्ते सामान्याः प्रकीर्तिताः ॥ १२ ॥ सांकल्पे विहिते श्राद्धे पितॄणां भोजनोद्भवे ॥ समागच्छति यः काले तस्मिञ्छ्राद्धीय एव सः ॥ १३ ॥ दूराध्वानं पथि श्रांतं वैश्वदेवांत आगतम् ॥ अतिथिं तं विजानीयान्नातिथिः पूर्वमागतः ॥ १४ ॥ प्रियो वा यदि वा द्वेष्यो मूर्खः पंडित एव वा ॥ वैश्वदेवे तु संप्राप्तः सोऽतिथिः स्वर्गसंक्रमः ॥ १५ ॥ न पृच्छेद्गोत्रचरणं न स्थानं वेदमेव च ॥ दृष्ट्वा यज्ञोपवीतं च भोजयेत्तं प्रभक्तितः ॥ १६ ॥ श्राद्धे वा वैश्वदेवे वा यद्यागच्छति नातिथिः ॥ घृताहुतिं ततो दद्यात्तन्नाम्ना च हविर्भुजि ॥ १७ ॥ अशक्त्या भोज्यदानस्य देयं भक्त्या ततः परम् ॥ तस्यान्नमपि तु स्तोकं येन तुष्टिं प्रगच्छति ॥ १८ ॥ तथान्यश्च तृतीयस्तु सूर्योढोऽतिथिरुच्यते ॥ कृते तु भोजने यस्तु रात्रौ वा चाधिगच्छति ॥ तस्य शक्त्या प्रदातव्यं सस्यं च गृहमेधिना ॥ १९ ॥ सूर्योढो यस्य संप्राप्तो गृहात्पूजां विना व्रजेत् ॥ निराशः पातकं तस्य निजं दत्त्वा प्रयाति सः ॥ २० ॥ तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता ॥ एतान्यपि सतां गेहे नोच्छिद्यंते कदाचन ॥ २१ ॥ स्वागतेनाग्नयस्तृप्तिं गृहस्थस्य प्रयांति च ॥ आसनेन व्रजेत्तुष्टिं स्वयंभूः प्रपितामहः ॥ २२ ॥ अर्घेण शंभुः पाद्येन सर्वे देवाः सवासवाः ॥ भोज्यदानेन विष्णुः स्यात्सर्वदेवमयोऽतिथिः ॥ २३ ॥ तस्मात्पूज्यः सदा विप्रा भोजनीयो विशेषतः ॥ नामाप्युच्चार्य भोज्योऽन्यो ब्राह्मणो गृहमेधिना ॥ २४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्येऽतिथिमाहात्म्यवर्णनंनाम षडशीत्युत्तरशततमोऽध्यायः ॥ १८६ ॥ ॥ ७ ॥ ॥ सूत उवाच ॥ ॥ चतुर्थे दिवसे प्राप्ते



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततो यज्ञसमुद्भवे ॥ ऋत्विग्भिर्याज्ञिकं कर्म प्रारब्धं तदनंतरम् ॥ १ ॥ सोमपानादिकं सर्वं पशोर्हिंसादिकं तथा ॥ पशोर्गुदं समादाय प्रस्थाता च न्यधारयत् ॥ २ ॥ एकांते सदसो मध्ये होमार्थं द्विजसत्तमाः ॥ तस्मिन्व्याकुलतां याते ब्राह्मणः कश्चिदागतः ॥ ३ ॥ युवा तत्र प्रविष्टस्तु मांसभक्षणलालसः ॥ ततो गुदं पशोर्दृष्ट्वा भक्षयामास चोत्सुकः ॥ ४ ॥ एतस्मिन्नंतरे प्रातः प्रस्थाता तस्य संनिधौ ॥ भक्षमाणं समालोक्य तं शशाप ततः परम् ॥ ५ ॥ धिग्धिक्पापसमाचार होमार्थं यद्गुदं धृतम् ॥ तत्त्वया दूषितं लौल्याद्यज्ञविघ्नकरं कृतम् ॥ ६ ॥ उच्छिष्टेन मया होमः कर्तव्यो नैव सांप्रतम् ॥ राक्षसानामिदं कर्म यत्त्वया समनुष्ठितम् ॥ ७ ॥ तस्मात्त्वं मम वाक्येन राक्षसो भव मा चिरम् ॥ ८ ॥ एतस्मिन्नेव काले तु ह्यूर्ध्वकेशोऽभवद्धि सः ॥ रक्ताक्षः शंकुकर्णश्च कृष्णदन्तोऽतिभैरवः ॥ ९ ॥ लम्बोष्ठो विकरालास्यो मांसमेदोविवर्जितः ॥ त्वगस्थिस्नायुशेषश्च चामुण्डाकृतिरेव च ॥ १० ॥ स च विश्वावसुर्नाम पुलस्त्यस्य सुतो मुनिः ॥ मंत्रपूतस्य मांसस्य भक्षणार्थं समागतः ॥ ११ ॥ वेदवेदांगतत्त्वज्ञः पौत्रस्तु परमेष्ठिनः ॥ तं दृष्ट्वा राक्षसाकारं वित्रेसुः सर्वतो द्विजाः ॥ १२ ॥ राक्षोघ्नानि च सूक्तानि जजपुश्चापरे तथा ॥ केचिच्छरणमापन्ना विष्णो रुद्रस्य चापरे ॥ १३ ॥ पितामहस्य चान्ये तु गायत्र्याः शरणं गताः ॥ रक्षरक्षेति जल्पन्तो भयसंत्रस्तमानसाः ॥ १४ ॥ सोऽपि दृष्ट्वा तदात्मानं गतं राक्षसतां द्विजाः ॥ बाष्पपूर्णेक्षणो दीनः पितामहमुपाद्रवत् ॥ १५ ॥ स प्रणम्य ततो वाक्यं कृतांजलिरुवाच तम् ॥ १६ ॥ पौत्रोऽहं तव देवेश पुलस्त्यस्य सुतो द्विजः ॥ नीतो राक्षसतामद्य प्रस्थात्रा कोपतो विभो ॥ १७ ॥ जिह्वालौल्येन देवेश पशोर्गुदमजानता ॥ भक्षितं तन्मया देव होमार्थं यत्प्रकल्पितम् ॥ १८ ॥ तस्मान्मानुषताप्राप्त्यै मम देहे दयां कुरु ॥ राक्षसत्वं यथा याति तथा नीतिर्विधीयताम् ॥ १९ ॥ तच्छ्रुत्वा जल्पितं तस्य दयां कृत्वा पितामहः ॥ प्रतिप्रस्थातरं सामवाक्यमेतदुवाच ह ॥ २० ॥ बालोऽयं मम पौत्रस्तु कृत्याकृत्यं न वेत्ति च ॥ तस्मात्त्वं राक्षसं भावं हरस्वास्य द्विजोत्तम ॥ २१ ॥ तच्छ्रुत्वा स मुनिः प्राह प्रायश्चित्तं मखे तव ॥ अनेन जनितं देव गुदं दूषयता विभो ॥ २२ ॥ तस्मादेष मया शप्तो यज्ञविघ्नकरो मम ॥ नाहमस्य हरिष्यामि राक्षसत्वं कथंचन ॥ २३ ॥ नर्मणापि मया प्रोक्तं कदाचिन्नानृतं वचः ॥ २४ ॥ ॥ ब्रह्मोवाच ॥ ॥ प्रायश्चित्तं करिष्येऽहं यज्ञस्यास्य प्रसिद्धये ॥ दक्षिणा गौर्यथोक्ता च कृत्वा होमं विधानतः ॥ त्वमस्य राक्षसं भावं हरस्व मम वाक्यतः ॥ २५ ॥ सोऽब्रवीच्छीतलो वह्निर्यदि स्यादुष्णगुः शशी ॥ तन्मे स्यादन्यथा वाक्यं व्याहृतं प्रपितामह ॥ २६ ॥ तस्य तद्व

१ यः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



चनं श्रुत्वा ज्ञात्वा चैव तु निश्चितम् ॥ विश्वावसुं विधिः प्राह ततो राक्षसरूपिणम् ॥ २७ ॥ त्वं वत्सानेन रूपेण तिष्ठ तावद्वचो मम ॥ कुरुष्व ते
प्रयच्छामि येन स्थानमनुत्तमम् ॥ २८ ॥ चमत्कारपुरस्यास्य पश्चिमस्थानमाश्रिताः ॥ सन्त्यन्ये राक्षसास्तत्र मर्यादायां व्यवस्थिताः ॥ २९ ॥
लंकायां राक्षसाश्चैव प्रार्थयन्तोऽत्र सद्गतिम् ॥ ते चागत्य तमुद्देशं तपः कुर्वंति सुव्रताः ॥३०॥ तत्र प्रभुत्वमातिष्ठ नागराणां हिते स्थितः ॥ राक्षसा
बहवः संति कूष्मांडाश्च पिशाचकाः ॥ ३१ ॥ ये चान्ये राक्षसाः केचिदुष्टभावसमाश्रिताः ॥ तत्र गच्छंति ये सर्वे निगृह्णंति च तत्क्षणात् ॥ ३२ ॥
भूताः प्रेताः पिशाचाश्च कूष्मांडाश्च विशेषतः॥ नागरं तु पुरो दृष्ट्वा तद्भयाद्यांति दूरतः ॥ ३३ ॥ तद्गच्छ पुत्र तत्र त्वं सर्वेषामधिपो भव ॥ राक्षसानां
मया दत्तं तव राज्यं च सांप्रतम् ॥ ३४ ॥ ॥ राक्षस उवाच ॥ ॥ आधिपत्ये स्थितस्यैवं राक्षसानां पितामह ॥ किं मया तत्र भोक्तव्यं तेभ्यो
देयं च किं वद ॥ ३५ ॥ राज्ञा चैव यतो देयं भृत्यानां भोजनं विभो ॥ तन्ममाचक्ष्व देवेश दयां कृत्वा ममोपरि ॥ ३६ ॥ न करोति च यो राजा
भृत्यवर्गस्य पोषणम् ॥ रौरवं नरकं याति स एवं हि श्रुतं मया ॥ ३७ ॥ ॥ ब्रह्मोवाच ॥ ॥ यच्छ्राद्धं दक्षिणाहीनं तिलैर्दर्भैर्विवर्जितम् ॥ तत्सर्वं
ते मया दत्तं यद्यपि स्यात्सुतीर्थगम् ॥ ३८ ॥ यच्छ्राद्धं सूकरः पश्येन्नारी वाथ रजस्वला ॥ कौलेयकोऽथ बालेयस्तत्सर्वं ते भविष्यति ॥ ३९ ॥
विधिहीनं तु यच्छ्राद्धं दर्भैर्वा मूलवर्जितैः ॥ वितस्तेरधिकैर्वापि तत्सर्वं ते भविष्यति ॥ ४० ॥ तिलं वा तैलपक्कं वा शूकधान्यमथापि वा ॥ न
यत्र दीयते श्राद्धे तत्ते श्राद्धं भविष्यति ॥ ४१ ॥ अस्नातैर्यत्कृतं श्राद्धं यच्चाधौतांबरैः कृतम् ॥ तैलाभ्यंगयुतैश्चैव तत्ते सर्वं भविष्यति ॥ ४२ ॥
यद्वा माहिषिको भुंक्ते श्वित्री वा कुनखोऽपि वा ॥ कुष्ठी वाथ द्विजो भुंक्ते तत्ते श्राद्धं भविष्यति ॥ ४३ ॥ हीनांगो वाऽथ यद्भुंक्तेऽधिकांगो वाथ
निंदितः ॥ महाव्याधिगृहीतो वा चौरो वार्द्धुषिकोऽपि वा ॥ यत्र भुंक्तेऽथवा श्राद्धे तत्ते श्राद्धं भविष्यति ॥ ४४ ॥ श्यावदन्तस्तु यद्भुंक्ते यद्भुंक्ते
वृषलीपतिः ॥ विनग्नो वाथ यद्भुंक्ते तत्ते श्राद्धं भविष्यति ॥ ४५ ॥ यो यज्ञो दक्षिणाहीनो यश्चाशौचयुतैः कृतः ॥ ब्रह्मचर्यविहीनस्तु
तत्फलं ते भविष्यति ॥ ४६ ॥ यस्मिन्नेवातिथिः पूज्यः श्राद्धे वा यज्ञकर्मणि ॥ संप्राप्ते वैश्वदेवांते तत्ते सर्वं भविष्यति ॥ ४७ ॥
आवाहनात्परं यत्र मौनं न श्राद्धदश्चरेत् ॥ ब्राह्मणो वाऽथ भोक्ता च तत्ते श्राद्धं भविष्यति ॥ ४८ ॥ मृन्मयेषु च पात्रेषु यः श्राद्धं

१ गरीयसीम्–इ० पा० । २ कौलेयकः–श्वा–इत्यर्थः । ३ बालेयः–गर्दभः–इत्यर्थः । ४ शूकधान्यम्–यवाः–इत्यर्थः । ५ माहिषिकः–व्यभिचारिणीपतिः–इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुरुते नरः ॥ भिन्नपात्रेषु वा यच्च तत्ते सर्वं भविष्यति ॥ ४९ ॥ प्रत्यक्षं लवणं यत्र तक्रं वा विकृतं भवेत् ॥ जातीपुष्पप्रदानं च तत्ते सर्वं भविष्यति ॥ ५० ॥ यजमानो द्विजो वाथ ब्रह्मचर्यविवर्जितः ॥ तच्छ्राद्धं ते मया दत्तं त्रिपात्रेण विवर्जितम् ॥ ५१ ॥ आयसेन तु पात्रेण यत्रान्नं च प्रदीयते ॥ तच्छ्राद्धं ते मया दत्तं तथान्यदपि हीयते[1] ॥ ५२ ॥ मंत्रक्रियाभ्यां यत्किंचिद्रात्रौ दत्तं हुतं तथा ॥ सक्रांतिसोमपर्वभ्यां व्यतिरिक्तं तु कुत्सितम् ॥ ५३ ॥ इत्युक्त्वा विररामाशु ब्रह्मा लोकपितामहः ॥ राक्षसः सोऽपि तत्रापि लेभे स्थानं तु राक्षसम् ॥ ५४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये राक्षसप्राप्यश्राद्धवर्णनंनाम सप्ताशीत्युत्तरशततमोऽध्यायः ॥ ॥ १८७ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ ततस्तु पंचमे चाह्नि संजाते ते द्विजोत्तमाः ॥ श्वेतधौतांबराः सर्वे सुस्नाताः शुचयः स्थिताः ॥ ॥ १ ॥ चक्रुः सर्वाणि कर्माणि पुलस्त्येन प्रबोधिताः ॥ सदोमध्ये गताश्चैव ऋत्विग्वरणपूर्वकाः ॥ २ ॥ अध्वर्युणा समादिष्टान्प्रैषान्प्रोचुर्यथाक्रमम् ॥ होमार्थं दीप्तवह्नौ च ऋत्विग्भिः सुसमाहितैः ॥ ३ ॥ एतस्मिन्नेव काले तु ह्युद्गात्रा कर्म योजितम् ॥ शंकुभिः क्रियते यच्च सामगीतिप्रसूचितम् ॥ ४ ॥ सप्तावर्तं द्विजश्रेष्ठाः सदोमध्यगतेन च ॥ यत्राऽऽगच्छंति ते सर्वे देवा यज्ञांशलालसाः ॥ ५ ॥ सोमपानकृते चैव विशेषेण मुदान्विताः ॥ प्रारब्धे सोमभक्ष्येऽथ गीते चोद्गातृनिर्मिते ॥ ६ ॥ आगता कन्यका चैका सामगीतिसमुत्सुका ॥ शंकुकर्णनजं चित्रं वांछमाना विचक्षणा ॥ ७ ॥ छन्दोगस्य सुता श्रेष्ठा देवशर्माभिधस्य च ॥ औदुम्बरीति नाम्ना सा सामश्रवणलालसा ॥ ८ ॥ उद्गातारं च सदसि वचनं व्याजहार सा ॥ यथायथा प्रवर्तंते शंकवः साममूचिताः ॥ ९ ॥ दक्षिणाग्नौ द्रुतं गत्वा कुरु होमं यथोदितम् ॥ येन त्वं मुच्यसे पापान्न चेद्व्यर्थो भविष्यति ॥ १० ॥ तस्यास्तद्वचनं श्रुत्वा साभिप्रायं द्विजोत्तमाः ॥ ततः स चिन्तयामास यावत्तद्व्याहृतं वचः ॥ ११ ॥ ततः पप्रच्छ तां कन्या मुद्गाता विस्मयान्वितः ॥ कुतस्त्वमसि चाऽऽयाता सुता कस्य वदस्व मे ॥ १२ ॥ ॥ औदुम्बर्युवाच ॥ ॥ पर्वतस्य सुता चास्मि विख्याता देवशर्मणः ॥ जातिस्मरा महाभाग प्राप्ता गन्धर्वलोकतः ॥ १३ ॥ ॥ उद्गातोवाच ॥ ॥ गन्धर्वस्य सुता कस्य केन शप्तासि पुत्रिके ॥ कदा ते भविता मोक्षो मानुषत्वस्य कीर्त्तय ॥ १४ ॥ ॥ औदुम्बर्युवाच ॥ ॥ नारदः पर्वतश्चैव गन्धर्वौ विदितौ जनैः ॥ पर्वतस्य सुता चास्मि

१ 'हीयते'—इत्यस्याग्रिमेण 'मंत्रक्रियाभ्याम्'—इत्यनेन सह संबन्धः । २ अत्र—'यज्ञः' इति कर्ताऽध्याहर्तव्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



शप्ताहं नारदेन हि ॥ १५ ॥ विपंचीं वादयन्स्वैरं दृष्टः स मुनिसत्तमः ॥ अजानंत्या च तानानां विशेषं मूर्च्छनोद्भवम् ॥ मया स हसितोऽतीव
तानभंगतया गतः ॥ १६ ॥ ततः स कुपितो मह्यं ददौ शापं द्विजोत्तमः ॥ मिथ्यापहसितो यस्मादहं शापमतोऽर्हसि ॥ १७ ॥ मानुषाणामयं
धर्मस्तस्मात्त्वं मानुषी भव ॥ मया प्रसादितः सोऽथ पित्रा सार्धं मुनीश्वरः ॥ १८ ॥ शापांतं कुरु मे नाथ बालिशाया विशेषतः ॥ मानुषत्वं च मे
भूयात्सुस्थाने सुकुले विभो ॥ १९ ॥ सुस्थाने चांतकालश्च ब्राह्मणस्य निवेशने ॥ ततोऽहं तेन संप्रोक्ता चमत्कारपुरे शुभे ॥ २० ॥ देवशर्मा तु
विप्रेंद्रः कुलीनः सर्वशास्त्रवित् ॥ तस्य तु ब्राह्मणी नाम्ना सत्यभामेति विश्रुता ॥ २१ ॥ तस्या गर्भं समासाद्य मानुषत्वं समाचर ॥ यदा पैतामहो
यज्ञस्तस्मिन्क्षेत्रे भविष्यति ॥ २२ ॥ उद्गातुः समये तस्य शंकोश्चैव विपर्यये ॥ तदा तु स त्वया वाच्यो ह्यस्थाने शंकुराहितः ॥ सर्वदेवसभा
मध्ये तदा मोक्षो भविष्यति ॥ २३ ॥ इमां मे दैविकीं कांतां तनुं पश्य द्विजोत्तम ॥ विमानं पश्य चायातं पित्रा संप्रेषितं मम ॥ २४ ॥
॥ ॥ उद्गातोवाच ॥ ॥ तुष्टोऽहं ते विशालाक्षि यज्ञस्याऽविघ्नकारके ॥ न वृथा दर्शनं मे स्याद्विशेषाद्देवसंभवे ॥ वरं वरय मत्त
स्त्वं तस्मादौदुम्बरीप्सितम् ॥ २५ ॥ ॥ औदम्बर्युवाच ॥ ॥ यदि मे यच्छसि वरं सन्तुष्टो ब्राह्मणोत्तम ॥ सर्वेषामेव देवानां
पुरतश्च ददस्व तम् ॥ २६ ॥ अद्यप्रभृति यः कश्चिद्यज्ञं भूमौ समाचरेत् ॥ तस्मिन्सदसि मध्यस्था मूर्तिः कार्या यथा मम ॥
॥ २७ ॥ ततो मत्पुरतश्चैव कार्यं शंकुप्रचारणम् ॥ स्वर्गस्थाया भवेत्तुष्टिर्मम तेन कृतेन च ॥ २८ ॥ ॥ सूत उवाच ॥ ॥
तस्यास्तद्वचनं श्रुत्वा उद्गाता तामथाब्रवीत् ॥ अद्यप्रभृति यः कश्चिद्यज्ञमत्र करिष्यति ॥ २९ ॥ सदोमध्ये तु तां स्थाप्य पूजयित्वा
विलेपनैः ॥ वस्त्रैराभरणैश्चैव गन्धपुष्पानुलेपनैः ॥ ३० ॥ ततः शंकुप्रचारं तु करिष्यति तदग्रतः ॥ एतद्वाक्यं मया प्रोक्तं सर्वदेवसमा
गमे ॥ ३१ ॥ नान्यथा भावि भद्रं ते त्वं संतोषं परं व्रज ॥ त्वया विरहितं भद्रे सदःकर्म करिष्यति ॥ ३२ ॥ वृथा भावि च तत्सर्वं यथा
भस्महुतं तथा ॥ या नारी सदसो मध्ये फलैस्त्वां पूजयिष्यति ॥ ३३ ॥ फलेफले कोटिगुणं तस्याः श्रेयो भविष्यति ॥ सफलाश्च दिशः
सर्वा भविष्यंति न संशयः ॥ ३४ ॥ वस्त्रमाभरणं या च पुष्पधूपादिकं तथा ॥ तुभ्यं दास्यति तत्सर्वं तस्याः कोटिगुणं फलम् ॥ ३५ ॥ परं ॥२०९॥
तावत्प्रतीक्षस्व मा विमानं समारुह ॥ देवि केनापि कार्येण तव पूजां समाचरे ॥ ३६ ॥ ॥ देवा ऊचुः ॥ ॥ युक्तं त्वया द्विजश्रेष्ठ वचनं
समुदाहृतम् ॥ अस्माकमपि वाक्येन सत्यमेतद्भविष्यति ॥ ३७ ॥ ॥ सूत उवाच ॥ ॥ उद्गात्रा सैवमुक्ता च तिष्ठतिष्ठेत्यथोदिता ॥ देवी वर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विमानेन गृहीता सांऽबरे स्थिता ॥ ३८ ॥ एतस्मिन्नेव काले तु देवशर्मसुताऽभवत् ॥ देवी नगरमध्यस्थां सर्वा नार्यो द्विजोत्तमाः ॥ ३९ ॥ कुतू
हलात्समायातास्तस्या दर्शनलालसाः ॥ काचित्फलानि चादाय काचिद्वस्त्राणि भक्तितः ॥ यथार्हं पूजिता ताभिः सर्वाभिश्च द्विजोत्तमाः ॥ ४० ॥
श्रुत्वा स्वदुहितुः सोऽपि देवशर्मा समाययौ ॥ सपत्नीकः प्रहृष्टात्मा विस्मयोत्फुल्ललोचनः ॥ ४१ ॥ सोऽपि यावत्प्रणामं च तस्याश्चक्रे द्विजो
त्तमाः ॥ सपत्नीकस्तदा प्रोक्ता निषिद्धस्तु तथा तया ॥ ४२ ॥ ताततात नमस्कारं मा मे कुरु सहांबया ॥ प्राप्ता स्वर्गगतिर्नाम मम नाशं प्रया
स्यति ॥ ४३ ॥ तिष्ठात्रैव सपत्नीको यावदद्य दिनं विभो ॥ त्वामादाय सपत्नीकं यास्यामि त्रिदिवालयम् ॥ अनेनैव शरीरेण याचयित्वा सुरो
त्तमान् ॥ ४४ ॥ ततस्तौ हर्षितौ तत्र पितरौ हि व्यवस्थितौ ॥ प्रेक्षमाणौ सुतायास्तां पूजां जनविनिर्मिताम् ॥ मन्यमानौ तदात्मानमधिकं सर्व
देहिनाम् ॥ ४५ ॥ तस्य ये स्वजनाः केचित्सर्वे तेऽपि द्विजोत्तमाः ॥ शंसमानाः सुतां तां तु तत्समीपं व्यवस्थिताः ॥ ४६ ॥ एतस्मिन्नंतरे प्राप्तो
भृगुर्यत्र पितामहः ॥ निष्क्रम्य सदसस्तस्मात्कृताञ्जलिरुवाच तम् ॥ ४७ ॥ उद्गात्रा देव चात्मीयो मार्गः श्रुतिविवर्जितः ॥ विहितः कन्यकां धृत्वा
सदोमध्ये सुरेश्वर ॥ ४८ ॥ देवत्वं जल्पितं तस्यां नागर्याः सुरसंनिधौ ॥ सोमपानं तथा कुर्मो वयं तत्र तया सह ॥ ४९ ॥ ततो विधिस्तमानीय
पप्रच्छ द्विजसत्तमाः ॥ काऽसौ कन्या किमर्थं च सदोमध्ये धृता त्वया ॥५०॥ सोऽब्रवीच्छापभ्रष्टेयं गन्धर्वी ब्राह्मणालये ॥ अवतीर्णा विधेर्यज्ञे मुक्ति
रस्याः प्रकीर्तिता ॥५१॥ नारदेन पुरा देव कोपेन च तथा मुदा ॥ तस्या देव वरो दत्तो मया तुष्टेन सांप्रतम् ॥ ५२ ॥ शंकुप्रचारं नो बाह्यं तव
संपत्स्यते क्वचित् ॥ देवैः सर्वैः समानीता प्रतिष्ठां प्रपितामहं ॥ ५३ ॥ एतस्मिन्नंतरे प्राप्ताः कैलासाच्च द्विजोत्तमाः ॥ श्रुत्वा चौदुंबरीजातं माहात्म्यं
धरणीतले ॥ ५४ ॥ यज्ञे पैतामहे चैव हाटकेश्वरसंभवे ॥ क्षेत्रे पुण्यतमे तत्र पूजार्थं द्विजसत्तमाः ॥५५॥ दृष्ट्वा मातृगणा ये च अष्टषष्टिप्रमाणतः ॥
पूज्यंते ये च गन्धर्वैः सिद्धैः साध्यैर्मरुद्गणैः ॥ ५६ ॥ पृथक्पृथग्विधै रूपैर्लोकविस्मयकारकैः ॥ नृत्यंतयश्च हसंतयश्च गायंतयश्च तथापराः ॥
॥ ५७ ॥ तासां कोलाहलं श्रुत्वा ब्रह्मविष्णुपुरःसराः ॥ विस्मयं परमं प्राप्ताः सर्वे देवाः सवासवाः ॥ ५८ ॥ किमेतदिति जल्पंतः
प्रोत्थिता यज्ञमंडपात् ॥ एतस्मिन्नंतरे प्राप्ताः सर्वास्ता यत्र पद्मजः ॥ ५९ ॥ प्रणम्य शिरसा हृष्टास्ततः प्रोचुस्तु सादरम् ॥ वयमेवं
समायाताः श्रुत्वा ते यज्ञमुत्तमम् ॥ ६० ॥ आमंत्रिताश्च देवेश वायुना जगदायुना ॥ यज्ञभागा न चास्माकं विद्यंते यज्ञकर्मणि ॥ ६१ ॥

१ एतस्मादग्रे– "अनेन सहिताः सर्वे कामिनीलालसेन च" इत्यर्धं बहुषु पुस्तकेषु दृश्यते, परं तस्य संगतिः सम्यङ्मनसि नायाति अतो न तन्मूले प्रवेशितमिति बोद्धव्यं सुधीभिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



एतान्येव दिनानीह नायातास्तेन पद्मज ॥ औदुंबरीं वयं श्रुत्वा ह्यपूर्वां तेनं संगताः ॥ ६२ ॥ सा दृष्टा पूजिताऽस्माभिः प्रणिपातपुरःसरम् ॥
पर्वतस्य सुता यस्माद्गन्धर्वस्य महात्मनः ॥ ६३ ॥ सर्वकामप्रदा स्त्रीणां सर्वदेवैः प्रतिष्ठिता ॥ स्थानं दर्शय चास्माकं त्वं देव प्रपितामह ॥ ६४ ॥
अष्टषष्टिप्रमाणश्च गणोऽस्माकं व्यवस्थितः ॥ तच्छ्रुत्वा पद्मजो ज्ञात्वा संकीर्णं यज्ञमंडपम् ॥ व्याप्तं देवगणैः सर्वैस्त्रयस्त्रिंशत्प्रमाणकैः ॥ ६५ ॥
ततो मध्यगमाहूय स तदा नगरोद्भवम् ॥ श्रुताध्ययनसंपन्नं बृहस्पतिमिवापरम् ॥ अब्रवीच्छ्लक्ष्णया वाचा त्यक्त्वा मौनं पितामहः ॥ ६६ ॥ त्वं
गत्वा मम वाक्येन विप्रान्नागरसंभवान् ॥ प्रब्रूहि गोत्रमुख्यांश्च ह्यष्टषष्टिप्रमाणतः ॥ ६७ ॥ एते मातृगणाः प्राप्ता अष्टषष्टिप्रमाणकाः ॥ एकैक
गोत्रमुख्याश्च एकैकस्य प्रमाणतः ॥ ६८ ॥ स्वेस्वे भूमिविभागे च स्थानं यच्छंतु सांप्रतम् ॥ एतत्साहाय्यकं कार्यं भवद्भिर्मम नागराः ॥
प्रसादं प्रचुरं कृत्वा येन तुष्टिं प्रयांति च ॥ ६९ ॥ ततः स सत्वरं गत्वा तान्समाहूय नागरान् ॥ प्रोवाच विनयोपेतः प्रणिपत्य ततः परम् ॥ ७० ॥
तच्छ्रुत्वा नागराः सर्वे संतोषं परमं गताः ॥ एकैकस्य गणस्यैव ददुः स्थानं निजं तदा ॥ ७१ ॥ ततस्ता मातरः सर्वाः प्रणिपत्य पितामहम् ॥
तदनन्तरमेवाथ गायत्रीं भक्तिपूर्वकम् ॥ ७२ ॥ विप्रसंसूचिते स्थाने सर्वाश्चैव व्यवस्थिताः ॥ पूजितास्तर्पिताश्चैव बलिभिर्विविधैरपि ॥ ७३ ॥
ततो गायन्ति ता हृष्टा नृत्यंति च हसंति च ॥ तर्पिता ब्राह्मणेन्द्रैश्च प्रोचुश्च तदनन्तरम् ॥ ७४ ॥ न यास्यामोऽपरं स्थानं स्थास्यामोत्रैव सर्वदा ॥
ईदृशा यत्र विप्रेन्द्राः सर्वे भक्तिसमन्विताः ॥ ७५ ॥ ईदृशं च महाक्षेत्रं हाटकेश्वरसंभवम् ॥ एतस्मिन्नेव काले तु सावित्री तत्र संस्थिता ॥ ७६ ॥
प्रणिपत्य द्विजैः सर्वैर्गच्छमाना निवारिता ॥ मा देवयजनं गच्छ सावित्रि पतिवल्लभे ॥ ७७ ॥ ब्रह्मणा परिणीतास्ति गायत्रीति वरांगना ॥७८॥
तच्छ्रुत्वा वचनं तेषां सावित्री भ्रांतलोचना ॥ दुःखशोकसमोपेता बाष्पव्याकुललोचना ॥ ७९ ॥ दृष्ट्वा ता नृत्यमानाश्च गायमानास्तथैव च ॥ उत्कू
र्दंतीर्धरापृष्ठे संतोषं परमं गताः ॥ ८० ॥ शशापाथ च सावित्री बाष्पगद्गदया गिरा ॥ सपत्न्या मम यत्पूजां कृत्वा वंः सुसमागताः ॥ ८१ ॥
न प्रणामः कृतोऽस्माकं मम दुःखेन दुःखिताः ॥ तस्मान्नैवापरं स्थानं गमिष्यथ कथंचन ॥ ८२ ॥ नागराणां च नो पूजा कदाचित्प्रभविष्यति ॥
न प्रासादोऽथ युष्माकं कदाचित्संभविष्यति ॥ ८३ ॥ शीतकाले तु शीतेन ह्युष्णकाले च रश्मिभिः ॥ वर्षाकाले तु तोयेन क्लेशं यास्य
थ भूरिशः ॥८४॥ एवमुक्त्वा ततो देवी सा तत्रैव व्यवस्थिता ॥ नागराणां वरस्त्रीभिः सर्वाभिः परिवारिता ॥ ८५ ॥ संबोध्यमाना सततं सुस्त्रीणां

१ तेन—तेन कारणेन—तच्छ्रवणेन—इति वाऽर्थः। २ वः—यूयम्—इत्यर्थः। प्रथमार्थे द्वितीयाऽऽर्षी।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेष्टितेन च ॥ एतस्मिन्नेव काले तु भगवांस्तीक्ष्णदीधितिः ॥ ८६ ॥ अस्तं गतो महाञ्छब्दः प्रस्थितो यज्ञमंडपे ॥ याज्ञिकानां तु विप्राणां सुमहाञ्छास्त्रसंभवः ॥ ८७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये मातृगणगमनसावित्रीदत्तमातृगणशापवर्णनंनामाष्टाशीत्युत्तरशततमोऽध्यायः ॥१८८॥ ७॥ ॥ सूत उवाच ॥ ॥ अथ यावच्च ताः शप्ता मातरो द्विजसत्तमाः ॥ सावित्र्यास्तु गंधर्व्यः प्राप्ताः सा यत्र तिष्ठति ॥ १ ॥ ततः प्रणम्य ता ऊचुः सर्वा दीनतरं वचः ॥ वयं समागता देवि सर्वास्तव मखे यतः॥ २ ॥ यज्ञभागं लभिष्याम औदुंबर्याः प्रसादतः ॥ न चास्माभिः परिज्ञाता सावित्री चात्र तिष्ठति ॥ ३ ॥ दौर्भाग्यदोषसंपन्ना नागरीभिः समावृता ॥ अस्माकं सुखमार्गोऽयं नृत्यगीतसमुद्भवः ॥ ४ ॥ तत्कुर्वाणास्ततो रात्रौ शप्ता गांधर्वसत्तमे ॥ स्त्रीणां दुःखेन दुःखार्ता जायंते सर्वयोषितः ॥५॥ यूयमानंदिताः सर्वाः सपत्न्या मम चोत्सवे ॥ तां प्रणम्य प्रपूज्याद्य नाहं संभाषितापि च ॥ ६ ॥ विशेषान्नृत्यगीतं च प्रारब्धं मम चाग्रतः॥ तस्माद्वचोमगतिर्नैव भवतीनां भविष्यति ॥ ७ ॥ अस्मिन्स्थाने सदा दीनास्तथाऽऽश्रयविवर्जिताः ॥ संतिष्ठध्वं न वः पूजां करिष्यंति च मानवाः ॥ ८ ॥ दीनानामसमर्थानां यात्राकृत्येषु सर्वदा ॥ तस्यास्तद्वचनं देवि नान्यथा संभविष्यति ॥ ९ ॥ औदुम्बर्याः पूजनाय गत्वा तस्यै निवेद्यताम् ॥ सा हि व्यपनयेद्दुःखं ध्रुवं सा हि प्रकामदा ॥ १० ॥ तेनाऽत्र सहसा प्राप्ता यावन्नष्टमनोरथाः ॥ ११ ॥ तस्मात्कुरुष्व कल्याणि यथास्माकं गतिर्भवेत् ॥ माहात्म्यं तव वर्द्धेत त्रैलोक्येऽपि चराचरे ॥ १२ ॥ ॥ औदुम्बर्युवाच ॥ ॥ का शक्तिर्विद्यतेऽस्माकं कृतं सावित्रिसंभवम् ॥ अन्यथा कर्तुमेवाद्य सुवैरपि[1] सुरासुरैः ॥ १३ ॥ तथापि शक्तितो देव्यो यतिष्यामि हिताय वः ॥ अष्टषष्टिषु गोत्रेषु भवत्यः संनियोजिताः ॥ १४ ॥ पितामहेन तुष्टेन तत्र पूजामवाप्स्यथ ॥ यूयं रात्रौ च संज्ञाभिर्हास्यपूर्वाभिरेव च ॥१५॥ अद्यप्रभृति यस्यात्र नागरस्य तु मंदिरे ॥ वृद्धिः संपत्स्यते काचिद्विशेषान्मंडपोद्भवा[2] ॥ १६ ॥ तथा या योषितः काश्चित्पुरद्वारं समेत्य च ॥ अदृष्टहास्यमाध्याय क्षपिष्यंति बलिं ततः ॥ १७ ॥ तेन वो भविता तृप्तिर्देवानां च यथा मखैः ॥ याः पुनर्न करिष्यंति पूजामेतां मयोदिताम् ॥ १८ ॥ युष्माकं नगरे तासां सुपुत्रो नाशमाप्स्यति ॥ युष्माकमपमाने न सदा रोगी भविष्यति ॥ १९ ॥ तस्मात्तिष्ठध्वमत्रैव रक्षार्थं नगरस्य च ॥ शापव्याजेन युष्माकं वरोऽयं समुपस्थितः ॥ २० ॥ एतस्मिन्नंतरे प्राप्तो देवशर्मा द्विजोत्तमाः ॥ गंधर्वः पर्वतो जातः स्वपत्न्या सहितस्तदा ॥ २१ ॥ यदा चौदुम्बरी शप्ता नारदेन सुरर्षिणा ॥ मानुषी भव क्रुद्धेन

१ सर्वम्-इ०पा० । २ मण्डपोद्भवा—उपनयनविवाहरूपा—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तदा संप्रार्थितस्तया ॥ २२ ॥ मदर्थं मानुषो भूत्वा तात त्वं चानया सह ॥ सृज मां मानुषीं चैव येन गच्छामि नो भुवि ॥ २३ ॥ विण्मूत्रसंयुते गर्भे सर्वदोषसमन्विते ॥ ततः सा कृपया तस्याः सत्पत्न्या देवशर्मणः ॥२४॥ अवतीर्णा धरापृष्ठे वानप्रस्थाश्रमे ततः ॥ एवं सा पञ्चमी रात्रिस्तस्य यज्ञस्य सत्तमाः ॥२५॥ उत्सवेन मनोज्ञेन चौदुम्बर्या व्यतिक्रमात् ॥ प्रत्यूषे च ततो जाते यदा तेन विसर्जिता ॥ २६ ॥ औदुम्बरी तदा प्राह पर्वतं जनकं निजम् ॥ कल्येऽत्रावभृथो भावी विधियज्ञसमुद्भवः ॥२७॥ सर्वतीर्थमयस्तस्मिन्स्नानं न स्यात्ततः परम् ॥ यास्यामः स्वगृहान्भूयः सर्वैर्देवैः समन्विताः ॥२८॥ अनेनैव विमानेन त्रयो वापि यथासुखम् ॥ ममापि च वरो जातो यः शापान्नारदोद्भवात् ॥२९॥ यज्ञभागो मया प्राप्तो देवानामपि दुर्लभः ॥ पौर्णमासीदिने प्राप्ते विशेषात्स्त्रीजनैः कृतः ॥३०॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्य औदुंबर्युत्पत्तिपूर्वकतत्प्राग्जन्मवृत्तांतवर्णनंनामैकोननवत्युत्तरशततमोऽध्यायः ॥ १८९ ॥छ॥ सूत उवाच ॥ एवं क्रतुः स संजातः पञ्चरात्रं द्विजोत्तमाः ॥ हाटकेश्वरजे क्षेत्रे सर्वकामसमृद्धिमान् ॥१॥ विप्रांश्च भिक्षुकांश्चैव दीनांधांश्च विशेषतः ॥ समाप्तौ तस्य यज्ञस्य संतर्प्य सकलांस्ततः ॥ ऋत्विजो दक्षिणाभिस्तान्यथोक्तान्द्विजसत्तमान् ॥ २ ॥ ततः स चानयामास नागरान्ब्राह्मणोत्तमान् ॥ चातुश्चरणसंपन्नाञ्छ्रुतिस्मृतिसमन्वितान् ॥ ३ ॥ कृतांजलिपुटो भूत्वा ततस्तान्प्राह सादरम् ॥ यद्भूमौ तु मया तीर्थं पुष्करं संनिवेशितम् ॥ ४ ॥ कलिकालस्य भीतेन द्वितीयं ब्राह्मणोत्तमाः ॥ येन नो नाशमभ्येति म्लेच्छैरपि समाश्रितम् ॥ ५ ॥ हाटकेश्वरदेवस्य प्रभावेन महात्मनः ॥ कलिकाले च सम्प्राप्ते तीर्थान्यायतनानि च ॥ ६ ॥ म्लेच्छैः स्पृष्टान्यसंदिग्धं प्रयागादीनि कृत्स्नशः ॥ यज्ञस्तु विहितस्तेन मयायं तत्कृतेन च ॥ ७॥ तस्माद्वदथ किं दानं युष्मद्भूमेश्च निष्क्रये ॥ प्रयच्छामि च यज्ञस्य येन मे स्यात्फलं द्विजाः ॥८॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ यदि यच्छसि चास्माकं दक्षिणां यज्ञसंभवाम् ॥ तदस्माकं स्ववासेन स्थानं नय पवित्रताम् ॥ ९ ॥ यदेतद्भवता चात्र पुष्करं तीर्थमुत्तमम् ॥ स्थापितं तस्य नो ब्रूहि माहात्म्यं सुरसत्तम ॥ येन स्नानादिकाः सर्वाः क्रियाः कुर्मः पितामह ॥ १० ॥ ॥ ब्रह्मोवाच ॥ ॥ एतत्तीर्थं मया सृष्टमंतरिक्षस्थितं सदा ॥ किं न श्रुतं पुराणेषु भवद्भिर्द्विजसत्तमाः ॥११॥ पृथिव्यां नैमिषं तीर्थमन्तरिक्षे च पुष्करम् ॥ त्रैलोक्ये तु कुरुक्षेत्रं विशेषेण व्यवस्थितम् ॥ १२ ॥ तद्युष्माकं हितार्थाय पंचरात्रं धरातले ॥ आगमिष्यत्यसंदिग्धं मम वाक्यप्रणोदितम् ॥ १३ ॥ कार्तिक्यां शुक्लपक्षे तु ह्येकादश्यां दिने स्थिते ॥ यावत्पंचदशी तावत्तिथिः पापप्रणाशिनी ॥१४॥ 

१ स्नातकैः–इ० पा० । २ अपि–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पंचरात्रस्य मध्ये तु यः स्नानं च करिष्यति ॥ श्राद्धं वा श्रद्धया युक्तस्तस्य स्यादक्षयं हि तत् ॥ १५ ॥ अह तु पंचरात्रं तद्ब्रह्मलोकादुपेत्य च ॥
संश्रयं तु करिष्यामि तीर्थेऽत्रैव द्विजोत्तमाः ॥ १६ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ तव मूर्तिं करिष्यामः स्थानेऽत्र प्रपितामह ॥ तस्यां संक्रमणं
नित्यं तस्मात्कार्यं त्वया विभो ॥ १७ ॥ तीर्थं चैव सदाप्यऽत्र समागच्छंतु चांबरात् ॥ लोकानां पापनाशाय तथा त्वं कर्तुमर्हसि ॥ १८ ॥ एषा
नो दक्षिणा देव यज्ञस्यैव समुद्भवा ॥ १९ ॥ एवं कृते सुरश्रेष्ठ सफलः स्यात्क्रतुस्तव ॥ प्रतिज्ञा च तथा सत्या तस्माद्दानाय निर्मिता ॥ २० ॥
॥ ॥ श्रीब्रह्मोवाच ॥ ॥ मन्त्राहूतं ततः श्रेष्ठं नभोमार्गाद्द्विजोत्तमाः ॥ हाटकेश्वरजे क्षेत्रे पुष्करं चागमिष्यति ॥ २१ ॥ अघमर्षं जपंश्चैव यः
करिष्यति तोयगः॥ मम मूर्तेः पुरः स्थित्वा पैल[1]मन्त्रपुरःसरम् ॥२२॥ जपिष्यति द्विजश्रेष्ठाः सवनानां चतुष्टयम् ॥ ब्रह्मलोकात्समागत्य प्रश्रोष्या
मि च तद्द्विजाः ॥ २३ ॥ ॥ सूत उवाच ॥ ॥ अथ ते नागराः सर्वे पुष्पदानप्रपूर्वकम् ॥ अनुज्ञां प्रददुस्तुष्टा यज्ञफलसमाप्तये ॥ २४ ॥ एतस्मि
न्नंतरे प्राप्तः पुलस्त्योऽध्वर्युसत्तमः ॥ यत्र स्थाने स्थितो ब्रह्मा नागरैः परिवारितः ॥ २५ ॥ अब्रवीच्च समाप्तस्ते यज्ञः संपूर्णदक्षिणः ॥
प्रायश्चित्तैर्विरहितो यथा नान्यस्य कस्यं[2]चित् ॥ २६ ॥ अतः परं कर्मशेषं किंचिदस्ति पितामह ॥ वारुणेष्टिर्जपश्चैव तत्करिष्यामि
सांप्रतम् ॥ २७ ॥ तथा चाऽवभृथस्नानं प्रकर्तव्यं त्वया सह ॥ तस्मादुत्तिष्ठ गच्छामो यत्र तोयं व्यवस्थितम् ॥ २८ ॥ येनेष्टिं वारुणीं तत्र कुर्मो
विप्रैर्यथोचितैः ॥ चतुर्भिर्ब्रह्मपूर्वैश्च मया चाग्नीध्रहोतृभिः ॥ २९ ॥ यथा वह्नौ तथा तोये मन्त्रवत्तद्धवं शुभम् ॥ हूयते संविधानेन यज्ञपात्रैः सम
न्वितम् ॥ ३० ॥ वरुणस्य प्रतुष्ट्यर्थं स्नानं कार्यं त्वयैव च ॥ ऋत्विग्भिः सहितेनैव सर्वारिष्टप्रशांतये ॥ ३१ ॥ यस्तत्र समये स्नानं करिष्यति
त्वया सह ॥ अन्योऽपि मानवः कश्चिद्विपाप्मा स भविष्यति ॥ ३२ ॥ यानीह संति तीर्थानि त्रैलोक्ये सचराचरे ॥ वारुणीमिष्टिमासाद्य तानि
यांति च संनिधौ ॥ ३३ ॥ तस्मात्सर्वप्रयत्नेन दीक्षितेन समन्वितम् ॥ तत्र स्नानं प्रकर्तव्यं जलमध्ये तु सार्थिभिः ॥ ब्राह्मणैः क्षत्रियैर्वैश्यैः सर्वैरव
भृथोत्सवे ॥ ३४ ॥ तस्माद्विसर्जयाद्यैतान्ब्राह्मणांस्तावदेव च ॥ एतेऽपि च करिष्यंति स्नानं तत्र त्वया सह ॥ ३५ ॥ ॥ सूत उवाच ॥ ॥
तच्छ्रुत्वा प्रस्थितो ब्रह्मा ज्येष्ठकुण्डतटं शुभम् ॥ गायत्र्या सहितो हृष्टः कृतकृत्यत्वमागतः ॥ ३६ ॥ अथ तद्वचनं श्रुत्वा सुराः सर्वे तथा
द्विजाः ॥ पुलस्त्यश्च शुभार्थाय स्नानार्थं प्रस्थितास्तदा ॥ ब्रह्मणा सहिता हृष्टाः पुत्रदारसमन्विताः ॥ ३७ ॥ अथ संकीर्णता जाता समंता

१ पौलमैत्रेयपूर्वकम्–इ०, पैलमैत्रेयपूर्वकम्–इ०, पैलमंत्रेयपूर्वकम्–इ०, पौलामैत्रेयपूर्वकम्–इ० च पा० । २ कर्हिचित्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





ज्येष्ठपुष्करे ॥ स्नानार्थमागतैर्लोकैरूर्ध्वबाहुभिरेव च ॥ ३८ ॥ न तत्र लक्ष्यते ब्रह्मा न तत्कर्म च वारुणम् ॥ क्रियमाणैर्द्विजैस्तत्र व्याप्ते भूमितलेऽखिले ॥ ३९ ॥ अथांते कर्मणस्तस्य ब्रह्मा प्राह शतक्रतुम् ॥ हितार्थं सर्वलोकस्य विनयावनतं स्थितम् ॥ ४० ॥ न मां ज्ञास्यंति दूरस्था जनाः स्नानार्थमागताः ॥ मज्जमानं जले पुण्ये सम्मर्देऽस्मिञ्जलोद्भवे ॥ ४१ ॥ तस्मान्नागं समारुह्य निजं वृत्रनिषूदन ॥ एणस्य कृष्णसारस्य वंशांते चर्म न्यस्य च ॥ ४२ ॥ ततस्तत्स्नानवेलायां क्षेप्तव्यं सलिले त्वया ॥ येन लोकः समस्तोऽयं वेत्ति कालं तु स्नानजम् ॥ ४३ ॥ स्नानं च कुरुते श्रेयः संप्राप्नोति यथोदितम् ॥ दूरस्थोऽपि सुवृद्धोऽपि बालोऽपि च समागतः ॥ स्नानजं लभते श्रेयः संदृष्टेऽपि यथोदितम् ॥ ४४ ॥ ॥ सूत उवाच ॥ ॥ बाढमित्येव संप्रोच्य सत्वरं प्रययौ हरिः ॥ ४५ ॥ ततो नागं समारुह्य धृत्वा वंशं करे निजे ॥ मृगचर्माग्रसंयुक्तं तोयमध्ये व्यवस्थितः ॥ ४६ ॥ एतत्कर्मावसाने स स्नातुकामे पितामहे ॥ तच्चर्म प्राक्षिपत्तोये स्वयमेव शतक्रतुः ॥ ४७ ॥ एतस्मिन्नन्तरे देवाः सर्वे गन्धर्वगुह्यकाः ॥ मानुषाश्च विशेषेण स्नातास्तत्र समाहिताः ॥ ४८ ॥ एतस्मिन्नन्तरे ब्रह्मा शक्रं प्रोवाच सादरम् ॥ कृतस्नानं सुरैः सार्धं विनयावनतं स्थितम् ॥ ४९ ॥ सहस्राक्षं त्वया कष्टं मन्मखे विपुलं कृतम् ॥ आनीता च तथा पत्नी गायत्री च सुमध्यमा ॥ ५० ॥ तस्माद्वरय भद्रं ते यं वरं मनसि स्थितम् ॥ सर्वं तेऽहं प्रदास्यामि यद्यपि स्यात्सुदुर्लभम् ॥ ५१ ॥ ॥ इन्द्र उवाच ॥ ॥ यदि तुष्टोऽसि मे देव यदि देयो वरो मम ॥ यदि त्वां प्रार्थयाम्यद्य भूयात्तु तादृशं विभो ॥ ५२ ॥ वर्षेवर्षे तु यः कुर्यात्संप्राप्तेऽस्मिन्दिने[1] शुभे ॥ मृगचर्म समादाय वंशाग्रे यो महीपतिः ॥ ५३ ॥ नागप्रवरमारुह्य स्वयमेव पितामह ॥ यथाऽहं प्रक्षिपेत्तोये स स्यात्पापविवर्जितः ॥ ५४ ॥ अजेयः सर्वशत्रूणां सर्वव्यसनवर्जितः ॥ ये करिष्यंति च स्नानमनेन मृगचर्मणा ॥ ५५ ॥ सार्धमन्येऽपि ये लोका अपि पापसमन्विताः ॥ तेषां वर्षकृतं पापं त्वत्प्रसादात्प्रणश्यतु ॥ ५६ ॥ ॥ ब्रह्मोवाच ॥ ॥ एतत्सर्वं सहस्राक्ष तव वाक्यमसंशयम् ॥ भविष्यति न संदेहः सर्वमेतन्मयोदितम् ॥ ५७ ॥ यो राजा श्रद्धया युक्तो देशस्यास्य समुद्भवः ॥ आनर्तस्य गजारूढो मृगचर्म क्षिपिष्यति ॥ ५८ ॥ अत्र कुण्डे मदीये तु मां संपूज्य तटस्थितम् ॥ सर्वलोकहितार्थाय संप्राप्ते प्रतिपद्दिने ॥ ५९ ॥ समाप्ते कुतपे काले विजयी स भविष्यति ॥ कार्तिक्यां च व्यतीतायां द्वितीयेऽह्नि व्यवस्थिते ॥ ६० ॥ तथा तत्कालमासाद्य ये करिष्यंति मानवाः ॥ स्नानं तच्च दिनेऽत्रैव वर्षपापविवर्जिताः ॥ आधिव्याधिविमुक्ताश्च ते भविष्यंत्यसंश



१ प्रथमे दिने–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यम् ॥ ६१ ॥ ॥ सूत उवाच ॥ ॥ एतस्मिन्नंतरे प्रातो यक्ष्माख्यो दारुणो गदः ॥ अचिकित्स्योऽपि देवानां तथा धन्वंतरेरपि ॥ ६२ ॥ नीलां बरधरः क्षामो दीनो दण्डसमाश्रितः ॥ क्षुत्कुर्वञ्छ्लेष्मणा तावत्कृच्छ्रात्संधारयन्पदम् ॥ ६३ ॥ ततश्च प्रणतो भूत्वा वाक्यमेतदुवाच सः ॥ ६४ ॥ ॥ ॥ यक्ष्मोवाच ॥ ॥ तव यज्ञमहं श्रुत्वा दूरादेव पितामह ॥ क्षुत्क्षामकंठश्चायातः समात्तावद्य कृच्छ्रतः ॥ ६५ ॥ दक्षेणाहं पुरा सृष्टश्चंद्रार्थं कुपितेन च ॥ रोहिणीं सेवमानस्य संत्यक्तान्यासुतस्य च ॥६६॥ ततो माहेश्वरादेशात्तेन तुष्टेन तस्य च ॥ पक्षमेकं कृतं मह्यं तस्यास्वादनकर्मणि ॥ ६७ ॥ अन्यपक्षे न किंचिच्च येन तृप्तिः प्रजायते ॥ यज्ञस्यैव तु सर्वस्य तर्पयित्वा द्विजोत्तमम् ॥ ६८ ॥ ततस्तद्वचनं ग्राह्यं तर्पितोऽहमसंशयम् ॥ पौर्णमास्यां ततो देव यस्य यज्ञस्य कृत्स्नशः ॥ ६९ ॥ यस्य नो ब्राह्मणो ब्रूते यज्ञस्यांते प्रतर्पितः ॥ तर्पितोऽस्मीति तत्तस्य वृथा स्याद्यज्ञजं फलम् ॥ यदि कोटिगुणं दत्तमपि श्रद्धासमन्वितम् ॥ ७० ॥ एतच्छ्रुत्वा त्वया देव पठ्यमानं श्रुताविह ॥ तस्मात्सम्यक्स्थिते यज्ञे ब्राह्मणं तर्पयेत वै ॥ ७१ ॥ प्रत्यक्षं मे यथा तृप्तिरन्नेनैव प्रजायते ॥ त्वत्प्रसादात्सुरश्रेष्ठ तथा नीतिर्विधीयताम् ॥ ७२ ॥ ॥ सूत उवाच ॥ ॥ तच्छ्रुत्वा पद्मजस्तस्य पथ्यंपथ्यं वचोऽखिलम् ॥ श्रुतिं प्रमाणतां नीत्वा ततो वचनमब्रवीत् ॥ ७३ ॥ अद्यप्रभृति ये विप्राः साग्नयः स्युर्धरातले ॥ तैः सर्वैर्वैश्वदेवांते बलिर्देयस्तथाखिलः ॥ ७४ ॥ दत्त्वाऽन्येभ्योथ देवेभ्यस्तव तृप्तिर्भविष्यति ॥ तव पक्षे द्वितीये तु सत्यमेतन्मयोदितम् ॥ ७५ ॥ ये विप्रास्तु बलिं दद्युर्वैश्वदेवांत आगते ॥ न तेषामन्वये चापि त्वया सेव्योऽत्र कश्चन ॥ ७६ ॥ ॥ यक्ष्मोवाच ॥ ॥ तीर्थेऽस्मिंस्तावके देव सदाहं तपसि स्थितः ॥ तिष्ठामि यदि वादेशस्तावको जायते मम ॥ ७७ ॥ ॥ ब्रह्मोवाच ॥ ॥ यद्येवं कुरु चान्यत्र त्वमाश्रमपदं निजम् ॥ संप्राप्य भूमिदेशं च कश्चिद्यदभिरोचते ॥ अर्थयित्वा द्विजानेतान्यथा यज्ञकृते मया ॥ ७८ ॥ ॥ सूत उवाच ॥ ॥ तच्छ्रुत्वा प्रार्थयामास चमत्कारपुरोद्भवान् ॥ तेभ्यः प्राप्य ततो भूमिं चकाराथाश्रमं निजम् ॥ ७९ ॥ तत्र यः कुरुते स्नानं प्रतिपद्दिवसे स्थिते ॥ सूर्यवारेण मुच्येत यक्ष्मणा सेवितोऽपि वा ॥ ८० ॥ अद्यापि दृश्यते चात्र प्रत्ययस्तस्य संभवे ॥ सर्वेषामाहिताग्नीनां नागराणां विशेषतः ॥ कलि कालेऽपि संप्राप्ते न यक्ष्मा संप्रजायते ॥ ८१ ॥ तथा चतुष्पदानां च तेषां गृहनिवासिनाम् ॥ न तस्य भेषजानि स्युर्न मंत्रा न

१ विश्वधर्मम्–इ० पा० । २ ग्राह्यम्–ब्राह्मणेन "अहं तर्पितोऽस्मि" इति वचनं वक्तव्यम्–तच्च यजमानेन श्रोतव्यम्–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



चिकित्सकाः ॥ ८२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये ब्रह्मयज्ञावभृथयक्ष्म तीर्थोत्पत्तिमाहात्म्यवर्णनंनाम नवत्युत्तरशततमोऽध्यायः ॥ १९० ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ सूतपुत्र त्वया प्रोक्तं सावित्री नागता च यत् ॥ कौटिल्येन समायुक्तैराहूता वचनैस्तथा ॥ पुलस्त्येन पुनश्चैव प्रसक्ता गृहकर्मणि ॥ १ ॥ ततस्तु ब्रह्मणा कोपाद्गायत्री च समाहृता ॥ देवैर्विप्रैश्च साऽतीव शंसिता भार्यतां[1] गता ॥ २ ॥ सावित्री च कथं जाता तां ज्ञात्वा यज्ञमण्डपे ॥ पत्नीशालां प्रविष्टां च सर्वं नो विस्तराद्वद ॥ ३ ॥ ॥ सूत उवाच ॥ ॥ सावित्री वशगं कांतं ज्ञात्वा विश्वासमागता ॥ स्थिरा भूत्वा तदा सर्वा देवपत्नीः समानयत् ॥ ४ ॥ गौरी लक्ष्मीः शची मेधा तथा चैवाप्यरुन्धती ॥ स्वधा स्वाहा तथा कीर्तिर्बुद्धिः पुष्टिः क्षमा धृतिः ॥ तथा चान्याश्च बहवो ह्यप्सरोभिः[2] समन्विताः ॥ ५ ॥ घृताची मेनका रंभा उर्वशी च तिलोत्तमा ॥ अप्सराणां गणाः सर्वे समाजग्मुर्द्विजोत्तमाः ॥ ६ ॥ सा ताभिः सहिता देवी पूर्णहस्ताभिरेव च ॥ संप्रहृष्टमनोभिश्च प्रस्थिता मण्डपं प्रति ॥ ७ ॥ वाद्यमानेषु वाद्येषु गीतध्वनियुतेषु च ॥ गन्धर्वाणां प्रमुख्यानां किन्नराणां विशेषतः ॥ ८ ॥ प्रस्थिता सा महाभागा यावत्तद्यज्ञमण्डपम्[3] ॥ तावत्तस्यास्तदा चक्षुः प्रास्फुरद्दक्षिणं मुहुः ॥ ९ ॥ अपसव्यं मृगाश्चक्रुस्तथान्येऽपि खगादयः ॥ विपर्यस्तेन संयांति शब्दान्कुर्वंति चासकृत् ॥ १० ॥ दक्षिणानि तथाऽङ्गानि स्फुरमाणानि वै मुहुः ॥ तस्या मनसि संक्षोभं जनयंति निरर्गलम् ॥ ११ ॥ ताश्च देवस्त्रियः सर्वा नृत्यंति च हसंति च ॥ गायंति च यथोत्साहं तस्याः पार्श्वे व्यव स्थिताः ॥ १२ ॥ न जानंति च संक्षोभं तथा शकुनजं हृदि ॥ अन्योन्यस्पर्द्धया सर्वा गीतनृत्यपरायणाः ॥ १३ ॥ अहंपूर्वमहंपूर्वं[4] प्रविशामि महामखे ॥ इत्यौत्सुक्यसमोपेतास्ता गच्छंति तदा[5] पथि ॥ १४ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागर खण्डे हाटकेश्वरक्षेत्रमाहात्म्ये सावित्र्या यज्ञागमनकालिकोत्पाताद्यपशकुनोद्भववर्णनंनामैकनवत्युत्तरशततमोऽध्यायः ॥१९१॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ अथ श्रुत्वा महानादं वाद्यानां समुपस्थितम् ॥ नारदः सम्मुखः प्रायाज्ज्ञात्वा च जननीं निजाम् ॥ १ ॥ प्रणिपत्य स दीनात्मा भूत्वा चाश्रुपरिप्लुतः ॥ प्राह गद्गदया वाचा कण्ठे बाष्पसमावृतः ॥ २ ॥ आत्मनः शापरक्षार्थं तस्याः कोपविवृद्धये ॥ कलिप्रियस्तदा विप्रो देवस्त्रीणां पुरः स्थितः ॥ ३ ॥ मेघगम्भीरया वाचा प्रस्खलंत्या पदेपदे ॥ मया त्वं देवि चाहूता पुलस्त्येन ततः परम् ॥ ४ ॥



१ भार्यताम्—भार्यात्वम्—इत्यर्थः । २ अजन्तोऽपि—'अप्सरा' शब्दः । ३ यज्ञमण्डपे—इ० पा० । ४ अहं पूर्वं प्रवेक्ष्यामि पितामहमहामखे—इ० पा० । ५ सदा—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्रीस्वभावं समाश्रित्य दीक्षाकालेऽपि नागता ॥ ५ ॥ ततो विधेः समादेशाच्छक्रेणान्या समाहृता ॥ काचिद्गोपसमुद्भूता कुमारी देवरूपिणी ॥ ६ ॥ गोवक्त्रेण प्रवेश्याथ गुह्यमार्गेण तत्क्षणात् ॥ आकर्षिता महाभागे समानीताथ तत्क्षणात् ॥ ७ ॥ सा विष्णुना विवाहार्थं ततश्चैवानुमोदिता ॥ ईश्वरेण कृतं नाम गायत्री च तवानुगम् ॥ ८ ॥ ब्राह्मणैः सकलैः प्रोक्तं ब्राह्मणीति भवत्वियम् ॥ अस्माकं वचनाद्ब्रह्मन्कुरु हस्तग्रहं विभो ॥ ९ ॥ देवैः सर्वैः स सम्प्रोक्तस्ततस्तां च वराननाम् ॥ ततः पत्न्युत्थधर्मेण योजयामास सत्वरम् ॥ १० ॥ किं वा ते बहुनोक्तेन पत्नीशालां समागता ॥ रशना[1] योजिता तस्या गोप्याः कट्यां सुरेश्वरि ॥ ११ ॥ तद्दृष्ट्वा गर्हितं कर्म निष्क्रांतो यज्ञमण्डपात् ॥ अमर्षवशमापन्नो न शक्तो वीक्षितुं च ताम् ॥ १२ ॥ एतज्ज्ञात्वा महाभागे यत्क्षमं तत्समाचर ॥ गच्छ वा तिष्ठ वा तत्र मण्डपे धर्मवर्जिते ॥ १३ ॥ तच्छ्रुत्वा सा तदा देवी सावित्री द्विजसत्तमाः ॥ प्रम्लानवदना जाता पद्मिनीव हिमागमे ॥ १४ ॥ लतेव च्छिन्नमूला सा चक्रीव[2] प्रियविच्युता ॥ शुचिशुक्रागमे काले सरसीव गतोदका ॥ १५ ॥ प्रक्षीणचन्द्रलेखेव मृगीव मृगवर्जिता ॥ सेनेव हतभूपाला सतीव गतभर्तृका ॥ १६ ॥ संशुष्का पुष्पमालेव मृतवत्सेव सौरभी ॥ वैमनस्यं परं गत्वा निश्चलत्वमुपस्थिताम् ॥ तां दृष्ट्वा देवपत्न्यस्ता जगदुर्नारदं तदा ॥ १७ ॥ धिग्धिक्कलिप्रिय त्वां च रागे वैराग्यकारकम् ॥ त्वया कृतं सर्वमेतद्विधेस्तस्य तथान्तरम् ॥ १८ ॥ ॥ गौर्युवाच ॥ ॥ अयं कलिप्रियो देवि ब्रूते सत्यानृतं वचः ॥ अनेन कर्मणा प्राणान्बिभर्त्येष सदा मुनिः ॥ १९ ॥ अहं त्र्यक्षेण सावित्रि पुरा प्रोक्ता मुहुर्मुहुः ॥ नारदस्य मुनेर्वाक्यं न श्रद्धेयं त्वया प्रिये ॥ यदि वांछसि सौख्यानि मम जातानि पार्वति ॥ २० ॥ ततःप्रभृति नैवाहं श्रद्दधेऽस्य वचः क्वचित् ॥ तस्माद्गच्छामहे तत्र यत्र तिष्ठति ते पतिः ॥ २१ ॥ स्वयं दृष्ट्वैव वृत्तांतं कर्तव्यं यत्क्षमं ततः ॥ नात्रास्य वचनादद्य स्थातव्यं तत्र गम्यताम् ॥ २२ ॥ ॥ सूत उवाच ॥ ॥ गौर्यास्तद्वचनं श्रुत्वा सावित्री हर्षवर्जिता ॥ मखमण्डपमुद्दिश्य प्रस्खलन्ती पदेपदे ॥ २३ ॥ प्रजगाम द्विजश्रेष्ठाः शून्येन मनसा तदा ॥ प्रतिभाति तदा गीतं तस्या मधुरमप्यहो ॥ २४ ॥ कर्णशूलं यथाऽऽयातमसकृद्द्विजसत्तमाः ॥ वैन्ध्यवाद्यं[3] यथा वाद्यं मृदंगानकपूर्वकम् ॥ २५ ॥ प्रेतसंदर्शनं यद्वन्मर्त्यं तत्सा महासती ॥ वीक्षितुं न च शक्नोति गच्छमाना तदा मखे ॥ २६ ॥ शृंगारं च तथागारं मन्यते सा तनुस्थितम् ॥ बाष्पपूर्णेक्षणा दीना प्रजगाम महासती ॥ २७ ॥ ततः कृच्छ्रात्समासाद्य सैवं तं यज्ञमंडपम् ॥ कृच्छ्रात्कारागृहं तद्वद्दुष्प्रेक्ष्यं दृक्पथं गतम् ॥ २८ ॥ अथ दृष्ट्वा तु

१ रशना–यज्ञोपयोगिनी दर्भमेखला–इत्यर्थः । २ चक्री इव–चक्रवाकी इव–इत्यर्थः । ३ वंधवाद्यम्–इ०, वंध्यवाद्यम्–इ० च पा०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



संप्राप्तां सावित्रीं यज्ञमण्डपम्[1] ॥ तत्क्षणाच्च चतुर्वक्त्रः संस्थितोऽधोमुखो ह्रिया ॥ २९ ॥ तथा शम्भुश्च शक्रश्च वासुदेवस्तथैव च ॥ ये चान्ये विबुधास्तत्र संस्थिता यज्ञमंडपे ॥ ३० ॥ ते च ब्राह्मणशार्दूलास्त्यक्त्वा वेदध्वनिं ततः ॥ मूकीभावं गताः सर्वे भयसंत्रस्तमानसाः ॥३१॥ अथ संवीक्ष्य सावित्री सपत्न्या सहितं पतिम् ॥ कोपसंरक्तनयना परुषं वाक्यमब्रवीत् ॥ ३२ ॥ ॥ सावित्र्युवाच ॥ ॥ किमेतद्युज्यते कर्तुं तव वृद्धतमाकृते ॥ ऊढवानसि यत्पत्नीमेतां गोपसमुद्भवाम् ॥ ३३ ॥ उभयोः पक्षयोर्यस्याः स्त्रीणां कांता यथेप्सिताः ॥ शौचाचारपरित्यक्ता धर्मकृत्यपराङ्मुखाः ॥ ३४ ॥ यदन्वये जनाः सर्वे पशुधर्मरतोत्सवाः ॥ सोदर्यां भगिनीं त्यक्त्वा जननीं च तथा पराम् ॥ ३५ ॥ तस्याः कुले प्रसेवंते सर्वा नारीं जनाः पराम् ॥ यथा हि पशवोऽश्नंति तृणानि जलपानगाः ॥ ३६ ॥ विण्मूत्रं केवलं चक्रुर्भारोद्वहनमेव च ॥ तद्वदस्याः कुलं सर्वं तक्रमश्नाति केवलम् ॥ ३७ ॥ कृत्वा मूत्रपुरीषं च जन्मभोगविवर्जितम् ॥ नान्यज्जानाति कर्तव्यं धर्मं स्वोदरसंश्रयात् ॥ ३८ ॥ अन्त्यजा अपि नो कर्म यत्कुर्वन्ति विगर्हितम् ॥ आभीरास्तच्च कुर्वंति तत्किमेतत्त्वया कृतम् ॥ ३९ ॥ अवश्यं यदि ते कार्यं भार्यया परया मखे ॥ त्वया वा ब्राह्मणी कापि प्रख्याता भुवनत्रये ॥ ४० ॥ नोढा विधे वृथा मुण्ड नूनं धूर्तोऽसि मे मतः ॥ यत्त्वया शौचसंत्यक्ता कन्याभावप्रदूषिता ॥ ४१ ॥ प्रभुक्ता बहुभिः पूर्वं तथा गोपकुमारिका ॥ एषा प्राप्ता सुपापाढ्या वेश्याजनशताधिका ॥ ४२ ॥ अन्त्यजाता तथा कन्या क्षतयोनिः प्रजायते ॥ तथा गोपकुमारी च काचित्तादृक्प्रजायते ॥ ४३ ॥ मातृकं पैतृकं वंशं श्वाशुरं च प्रपातयेत् ॥ तस्मादेतेन कृत्येन गर्हितेन धरातले ॥ ४४ ॥ न त्वं प्राप्स्यसि तां पूजां तथाऽन्ये विबुधोत्तमाः ॥ अनेन कर्मणा चैव यदि मेऽस्ति ऋतं क्वचित् ॥ ४५ ॥ पूजां ये च करिष्यंति भविष्यंति च निर्धनाः ॥ कथं न लज्जितोसि त्वमेतत्कुर्वन्विगर्हितम् ॥ ४६ ॥ पुत्राणामथ पौत्राणामन्येषां च दिवौकसाम् ॥ अयोग्यं चैव विप्राणां यदेतत्कृतवानसि ॥ ४७ ॥ अथ वा नैष दोषस्ते न कामवशगा नराः ॥ लज्जंति च विजानंति कृत्याकृत्यं शुभाशुभम् ॥ ४८ ॥ अकृत्यं मन्यते कृत्यं मित्रं शत्रुं च मन्यते ॥ शत्रुं च मन्यते मित्रं जनः कामवशं गतः ॥ ४९ ॥ द्यूतकारे यथा सत्यं यथा चौरे च सौहृदम् ॥ यथा नृपस्य नो मित्रं तथा लज्जा न कामिनाम् ॥ ५० ॥ अपि स्याच्छीतलो वह्निश्चंद्रमा दहनात्मकः ॥ क्षाराब्धिरपि मिष्टः स्यान्न कामी लज्जते ध्रुवम् ॥ ५१ ॥ न मे स्याद्दुःखमेतद्धि यत्सापत्न्यमुपस्थितम् ॥ सहस्रमपि नारीणां पुरुषाणां यथा भवेत् ॥ ५२ ॥ 
कुलीनानां च शुद्धानां स्वजात्यानां विशेषतः ॥ त्वं कुरुष्व पराणां च यदि कामवशं गतः ॥ ५३ ॥ एतत्पुनर्महद्दुःखं यदाभीरी विगर्हिता ॥ वेश्येव

१ यज्ञमण्डपे—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नष्टचारित्रा त्वयोढा बहुभर्तृका ॥ ५४ ॥ तस्मादहं प्रयास्यामि यत्र नाम न ते विधे ॥ श्रूयते कामलुब्धस्य ह्रिया परिहृतस्य च ॥ ५५ ॥ अहं विडंबिता यस्मादत्रानीय त्वया विधे ॥ पुरतो देवपत्नीनां देवानां च द्विजन्मनाम् ॥ तस्मात्पूजां न ते कश्चित्सांप्रतं प्रकरिष्यति ॥ ५६ ॥ अद्य प्रभृति यः पूजां मंत्रपूजां करिष्यति ॥ तव मर्त्यो धरापृष्ठे यथान्येषां दिवौकसाम् ॥ ५७ ॥ भविष्यति च तद्वंशो दरिद्रो दुःखसंयुतः ॥ ब्राह्मणः क्षत्रियो वापि वैश्यः शूद्रोपि चालये ॥ ५८ ॥ एषाभीरसुता यस्मान्मम स्थाने विगर्हिता ॥ भविष्यति न संतानस्तस्माद्वाक्यान्ममैव हि ॥ ५९ ॥ न पूजां लप्स्यते लोके यथान्या देवयोषितः ॥ ६० ॥ करिष्यति च या नारी पूजा यस्या अपि क्वचित् ॥ सा भविष्यति दुःखाढ्या वंध्या दौर्भाग्यसंयुता ॥ ६१ ॥ पापिष्ठा नष्टचारित्रा यथैषा पंचभर्तृका ॥ विख्यातिं यास्यते लोके यथा चासौ तथैव सा ॥ ६२ ॥ एतस्या अन्वयः पापो भविष्यति निशाचर ॥ सत्यशौचपरित्यक्ताः शिष्टसंगविवर्जिताः ॥ ६३ ॥ अनिकेता भविष्यंति वंशेऽस्या गोप्रजीविनः ॥ एवं शप्त्वा विधिं साध्वी गायत्रीं च ततः परम् ॥ ६४ ॥ ततो देवगणान्सर्वाञ्छशाप च तदा सती ॥ भोभोः शक्र त्वयानीता यदेषा पंचभर्तृका ॥ ६५ ॥ तदाप्नुहि फलं सम्यक्छुभं कृत्वा गुरोरिदम् ॥ त्वं शत्रुभिर्जितो युद्धे बंधनं समवाप्स्यसि ॥ ६६ ॥ कारागारे चिरं कालं संगमिष्यत्यसंशयम् ॥ वासुदेव त्वया यस्मादेषा वै पंचभर्तृका ॥ ६७ ॥ अनुमोदिता विधेः पूर्वं तस्माच्छप्स्याम्यसंशयम् ॥ त्वं चापि परभृत्यत्वं संप्राप्स्यसि सुदुर्मते ॥ ६८ ॥ समीपस्थोऽपि रुद्र त्वं कर्मैतद्यदुपेक्षसे ॥ निषेधयसि नो मूढ तस्माच्छृणु वचो मम ॥ ६९ ॥ जीवमानस्य कांतस्य मया तद्विरहोद्भवम् ॥ संसेवितं मृतायां ते दयितायां भविष्यति ॥ ७० ॥ यत्र यज्ञे प्रविष्टेयं गर्हिता पंचभर्तृका ॥ भवानपि हविर्वह्ने यत्त्वं गृह्णासि लौल्यतः ॥ ७१ ॥ तथान्येषु च यज्ञेषु सम्यक्छंकाविवर्जितः ॥ तस्माद्दुष्टसमाचार सर्वभक्षो भविष्यसि ॥ ७२ ॥ स्वधया स्वाहया सार्धं सदा दुःखसमन्वितः ॥ नैवाप्स्यसि परं सौख्यं सर्वकालं यथा पुरा ॥ ७३ ॥ एते च ब्राह्मणाः सर्वे लोभोपहतचेतसः ॥ होमं प्रकुर्वते ये च मखे चापि विगर्हिते ॥ ७४ ॥ वित्तलोभेन यत्रैषा निविष्टा पञ्चभर्तृका ॥ तथा च वचनं प्रोक्तं ब्राह्मणीयं भविष्यति ॥ ७५ ॥ दरिद्रोपहतास्तस्माद्वृषलीपतयस्तथा ॥ वेदविक्रयकर्तारो भविष्यथ न संशयः ॥ ७६ ॥ भोभो वित्तपते वित्तं ददासि मखविप्लवे ॥ तस्मात्त्वत्तेऽखिलं वित्तमभोग्यं संभविष्यति ॥ ७७ ॥ तथा देवगणाः सर्वे साहाय्यं ये समाश्रिताः ॥ अत्र कुर्वंति दोषाढ्ये यज्ञे वै पांचभर्तृके ॥ ७८ ॥ संतानेन परित्यक्तास्ते

१ संतानः—वंशः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

भविष्यंति सांप्रतम् ॥ दानवैश्च पराभूता दुःखं प्राप्स्यंति केवलम् ॥ ७९ ॥ एतस्याः पार्श्वतश्चान्याश्चतस्रो या व्यवस्थिताः ॥ आभीरीति सप त्नीति प्रोक्ता ध्यानप्रहर्षिताः ॥ ८० ॥ मम द्वेषपरा नित्यं शिवदूतीपुरस्सराः ॥ तासां परस्परं संगः कदाचिच्च भविष्यति ॥ ८१ ॥ नान्येनात्र नरेणापि दृष्टिमात्रमपि क्षितौ ॥ पर्वताग्रेषु दुर्गेषु चागम्येषु च देहिनाम् ॥ वासः संपत्स्यते नित्यं सर्वभोगविवर्जितः ॥ ८२ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वाऽथ सावित्री कोपोपहतचेतसा ॥ विसृज्य देवपत्नीस्ताः सर्वा याः पार्श्वतः स्थिताः ॥ ८३ ॥ उदङ्मुखी प्रतस्थे च वार्यमाणापि सर्वतः ॥ सर्वाभिर्देवपत्नीभिर्लक्ष्मीपूर्वाभिरेव च ॥८४॥ तत्र यास्यामि नो यत्र नामापि किल वै यतः ॥ श्रूयते कामुकस्यास्य तत्र यास्याम्यहं द्रुतम् ॥८५॥ एकश्चरणयोर्न्यस्तो वामः पर्वतरोधसि ॥ द्वितीयेन समारूढा तस्यागस्य तथोपरि ॥८६॥ अद्यापि तत्पदं वामं तस्यास्तत्र प्रदृश्यते ॥ सर्वपापहरं पुण्यं स्थितं पर्वतरोधसि ॥ ८७ ॥ अपि पापसमाचारो यस्तं पूजयते नरः ॥ सर्वपातकनिर्मुक्तः स याति परमं पदम् ॥ ८८ ॥ यो यं काममभि ध्याय तमर्चयति मानवः ॥ अवश्यं समवाप्नोति यद्यपि स्यात्सुदुर्लभम् ॥ ८९ ॥ ॥ सूत उवाच ॥ ॥ एवं तत्र स्थिता देवी सावित्री पर्वता श्रया ॥ अपमानं महत्प्राप्य सकाशात्स्वपतेस्तदा ॥ ९० ॥ यस्तामर्चयते सम्यक्पौर्णमास्यां विशेषतः ॥ सर्वान्कामानवाप्नोति स मनोवांछितां स्तदा ॥ ९१ ॥ या नारी कुरुते भक्त्या दीपदानं तदग्रतः ॥ रक्ततंतुभिराज्येन श्रूयतां तस्य यत्फलम् ॥ ९२ ॥ यावन्तस्तंतवस्तस्य दह्यंते दीप संभवाः ॥ मुहूर्तानि च यावंति घृतदीपश्च तिष्ठति ॥ तावज्जन्मसहस्राणि सा स्यात्सौभाग्यभागिनी ॥ ९३ ॥ पुत्रपौत्रसमोपेता धनिनी शील मंडना ॥ न दुर्भगा न वन्ध्या च न च काणा विरूपिका ॥ ९४ ॥ या नृत्यं कुरुते नारी विधवापि तदग्रतः ॥ गीतं वा कुरुते तत्र तस्याः शृणुत यत्फलम् ॥ ९५ ॥ यथायथा नृत्यमाना स्वगात्रं विधुनोति च ॥ तथातथा धुनोत्येव यत्पापं प्रकृतं पुरा ॥ ९६ ॥ यावन्तो जन्तवो गीतं तस्याः शृण्वंति तत्र च ॥ तावंति दिवि वर्षाणि सहस्राणि वसेच्च सा ॥ ९७ ॥ सावित्रीं या समुद्दिश्य फलदानं करोति सा ॥ फलसंख्याप्रमाणानि युगानि दिविमोदते ॥ ९८ ॥ मिष्टान्नं यच्छते यश्च नारीणां च विशेषतः ॥ तस्या दक्षिणमूर्तौ च भर्त्राढ्यानां द्विजोत्तमाः ॥ स च सिक्थप्रमाणानि युगा नि दिवि मोदते ॥९९॥ यः श्राद्धं कुरुते तत्र सम्यक्छ्रद्धासमन्वितः ॥ रसेनैकेन सस्येन तथैकेन द्विजोत्तमाः ॥ तस्यापि जायते पुण्यं गयाश्राद्धेन यद्भवेत् ॥ १०० ॥ यः करोति द्विजस्तस्या दक्षिणां दिशमाश्रितः ॥ सन्ध्योपासनमेकं तु स्वपत्न्या क्षिपितैर्जलैः ॥ १०१ ॥ सायंतने च संप्राप्ते

१ परेणापि—इ० पा० । २ सौभाग्यदायिनी—इ० पा० । ३ धुनाति—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काले ब्राह्मणसत्तमाः॥ तेन स्याद्वंदिता संध्या सम्यग्द्वादशवार्षिकी ॥ १०२ ॥ यो जपेद्ब्राह्मणस्तस्याः सावित्रीं पुरतः स्थितः ॥ तस्य यत्स्यात्फलं विप्राः श्रूयतां तद्वदामि वः ॥ १०३ ॥ दशभिर्जन्मजनितं शतेन च पुरा कृतम् ॥ त्रियुगे तु सहस्रेण तस्य नश्यति पातकम् ॥ १०४ ॥ तस्मात्सर्वप्रयत्नेन चमत्कारपुरं प्रति ॥ गत्वा तां पूजयेद्देवीं स्तोतव्या च विशेषतः ॥ १०५ ॥ सावित्र्या इदमाख्यानं यः पठेच्छृणुयाच्च वा ॥ सर्वपापविनिर्मुक्तः सुखभागत्र जायते ॥ १०६ ॥ एतद्वः सर्वमाख्यातं यत्पृष्टोऽहं द्विजोत्तमाः ॥ सावित्र्याः कृत्स्नं माहात्म्यं किं भूयः श्रवदाम्यहम् ॥ १०७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये सावित्रीमाहात्म्यवर्णनंनाम द्विनवत्युत्तरशततमोऽध्यायः ॥ १९२ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ एवं गतायां सावित्र्यां सकोपायां च सूतज ॥ किं कृतं तत्र गायत्र्या ब्रह्माद्यैश्चापि किं सुरैः ॥ १ ॥ एतत्सर्वं समाचक्ष्व परं कौतूहलं हि नः ॥ कथं शापान्विता देवाः संस्थितास्तत्र मण्डपे ॥ २ ॥ ॥ सूत उवाच ॥ ॥ गतायामथ सावित्र्यां शापं दत्त्वा द्विजोत्तमाः ॥ गायत्री सहसोत्थाय वाक्यमेतदुदैरयत् ॥ ३ ॥ सावित्र्या यद्वचः प्रोक्तं तन्न शक्यं कथंचन ॥ अन्यथा कर्तुमेवाथ सर्वैरपि सुरासुरैः ॥ ४ ॥ महासती महाभागा सावित्री सा पतिव्रता ॥ पूज्या च सर्वदेवानां ज्येष्ठा श्रेष्ठा च सद्गुणैः ॥ ५ ॥ परं स्त्रीणां स्वभावोऽयं सर्वासां सुरसत्तमाः॥ अपि सह्यो वज्रपातः सपत्न्या न पुनः कथा ॥६॥ मत्कृते येऽत्र शपिताः सावित्र्या ब्राह्मणाः सुराः ॥ तेषामहं करिष्यामि शक्त्या साधारणां स्वयम् ॥ ७ ॥ अपूज्योऽयं विधिः प्रोक्तस्तया मंत्रपुरःसरः ॥ सर्वेषामेव वर्णानां विप्रादीनां सुरोत्तमाः ॥ ८ ॥ ब्रह्मस्थानेषु सर्वेषु समग्रे धरणीतले ॥ न ब्रह्मणा विना किंचित्कृत्यं सिद्धिमुपैष्यति ॥ ९ ॥ कृष्णार्चने च यत्पुण्यं यत्पुण्यं लिंगपूजने ॥ तत्फलं कोटिगुणितं सदा वै ब्रह्मदर्शनात् ॥ भविष्यति न सन्देहो विशेषात्सर्वपर्वसु ॥ १० ॥ त्वं च विष्णो तया प्रोक्तो मर्त्यजन्म यदाप्स्यसि ॥ तत्रापि परभृत्यत्वं परेषां ते भविष्यति ॥११॥ तत्कृत्वा रूपद्वितयं तत्र जन्म त्वमाप्स्यसि ॥ यत्तया कथितो वंशो ममायं गोपसंज्ञितः ॥ तत्र त्वं पावनार्थाय चिरं वृद्धिमवाप्स्यसि ॥ १२ ॥ एकः कृष्णाभिधानस्तु द्वितीयोऽर्जुनसंज्ञितः ॥ तस्यात्मनोऽर्जुनाख्यस्य सारथ्यं त्वं करिष्यसि ॥ १३ ॥ तेनाकृत्येऽपि रक्तास्ते गोपा यास्यंति श्लाघ्यताम् ॥ सर्वेषामेव लोकानां देवानां च विशेषतः ॥ १४ ॥ यत्रयत्र च वत्स्यंति मद्वंशप्रभवा नराः ॥ तत्रतत्र श्रियो वासो वनेऽपि प्रभविष्यति ॥ १५ ॥ भोभोः शक्र भवानुक्तो यत्तया कोपयुक्तया ॥ पराजयं रिपोः प्राप्य कारागारे पतिष्यति ॥ १६ ॥ तन्मुक्तिं ते स्वयं ब्रह्मा मद्वाक्येन करिष्यति ॥ १७ ॥ ततः प्रविष्टः संग्रामे न पराजयमाप्स्यसि ॥ त्वं वह्ने सर्वभक्षश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



यत्प्रोक्तो रुष्टया तया ॥ १८ ॥ तदमेध्यमपि प्रायः स्पृष्टं तेऽर्च्चिर्भिरग्रतः ॥ मेध्यतांया स्यति क्षिप्रं ततः पूजामवाप्स्यसि ॥ १९ ॥ स्वाहानाम च भार्या या देवान्सन्तर्पयिष्यति ॥ स्वधा चाऽपि पितॄन्सर्वान्मम वाक्यादसंशयम् ॥२०॥ यद्रुद्र प्रियया सार्धं वियोगः कथितस्तया ॥ तस्याः श्रेष्ठ तरा चान्या तव भार्या भविष्यति ॥ गौरीनामेति विख्याता हिमाचलसुता शुभा ॥ २१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये गायत्रीवरप्रदानोनाम त्रिनवत्युत्तरशततमोऽध्यायः ॥ १९३ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एवं सा तान्वरान्दत्त्वा सर्वेषां शापभागिनाम् ॥ मौनव्रतपरा भूत्वा निविष्टाऽथ धरातले ॥ १ ॥ ततो देवगणाः सर्वे तापसाश्च महर्षयः ॥ साधुसाध्विति तां प्रोच्य ततः प्रोचुरिदं वचः ॥ २ ॥ एतां देवीं प्रसादेन ब्राह्मणानां विशेषतः ॥ पूजयिष्यंति मर्त्येऽत्र सर्वे लोकाः समाहिताः ॥ ३ ॥ ब्रह्माणं पूजयित्वा तु पश्चादेनां सुरेश्वरीम् ॥ पूजयिष्यंति ये मर्त्यास्ते तु यांति परां गतिम् ॥ ४ ॥ या कन्या पतिसंयोगं संप्राप्यात्र समाहिता ॥ ततः पादप्रणामं च गायत्र्याश्च करिष्यति ॥ पतिं प्रजापतिं प्राप्य सा भविष्यत्यसंशयम् ॥ ५ ॥ सर्वकामसुखोपेता धनधान्यसमन्विता ॥ या नारी दुर्भगा वंध्या भविष्यति च शोभना ॥ ६ ॥ ॥ ऋषय ऊचुः ॥ ॥ यदेतद्भवता प्रोक्तं गते पंचोत्तरे शते ॥ पद्मजानां हरः प्रादादेतत्कथमनुत्तमम् ॥ ७ ॥ ब्राह्मणेभ्यः स संतुष्टः किंवाऽन्योऽस्ति महेश्वरः ॥ एतं नः संशयं भूयो यथावद्वक्तुमर्हसि ॥ ८ ॥ आयुष्यं शंकरस्यापि यत्प्रमाणं तथा हरेः ॥ ब्रह्मणोऽपि समाचक्ष्व परं कौतूहलं हि नः ॥ ९ ॥ ॥ सूत उवाच ॥ ॥ अहं वः कीर्त यिष्यामि विस्तरेण द्विजोत्तमाः ॥ त्रयाणामपि चायुष्यं यत्प्रमाणं व्यवस्थितम् ॥ १० ॥ निमेषस्य चतुर्भागस्त्रुटिः स्यात्तद्द्वयं लवः ॥ लवद्वयं कला प्रोक्ता काष्ठा तु दशपंचभिः ॥ ११ ॥ त्रिंशत्काष्ठां कलामाहुः क्षणस्त्रिंशत्कलो मतः ॥ मुहूर्तमानं मौहूर्ता वदंति द्वादशक्षणम् ॥ १२ ॥ त्रिंशन्मुहूर्तमुद्दिष्टमहोरात्रं मनीषिभिः ॥ मासस्त्रिंशदहोरात्रैर्द्वौ मासावृतुसंज्ञितः ॥ १३ ॥ ऋतुत्रयं चायनं च अयने द्वे तु वत्सरम् ॥ दैविकं च भवेत्तच्च ह्यहोरात्रं द्विजोत्तमाः ॥ १४ ॥ उत्तरं चायनं तत्र दिनं रात्रिस्तथाऽपरम् ॥ लक्षैः सप्तदशाख्यैस्तु मनुष्याणां च वत्सरैः ॥ १५ ॥ अष्टाविंशतिभिश्चैव सहस्रैस्तु तथा परैः ॥ आद्यं कृतयुगं चैव तद्भविष्यति सद्द्विजाः ॥ १६ ॥ ततो द्वादशभिर्लक्षैः षोडशानां सहस्रकैः ॥ त्रेतायुगं समादिष्टं द्वितीयं द्विजसत्तमाः ॥ १७ ॥ द्वापरं चाष्टभिर्लक्षैस्तृतीयं परिकीर्तितम् ॥ चतुःषष्टिसहस्रैस्तु यथावत्परिसंख्यया ॥ १८ ॥ चतुर्लक्षं समादिष्टं युगं कलिसमुद्भवम् ॥ द्वात्रिंशता सहस्रैस्तु चतुर्थं

१ ते च सर्वे–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्विदुर्बुधाः ॥ १९ ॥ चतुर्युगसहस्रेण दिनं पैतामहं भवेत् ॥ तेषां त्रिंशद्दिनैर्मासो मासैर्द्वादशभिर्वत्सरो भवेत् ॥२०॥ ब्रह्मा तेषां शतं यावत्स जीवति पितामहः ॥ सांप्रतं चाष्टवर्षीयः षण्मासश्चैव संस्थितः ॥२१॥ प्रतिपद्दिवसस्यास्य प्रथमस्य तथा गतम् ॥ यामद्वयं शुक्रवारे वर्तमाने महात्मनः ॥ ॥२२॥ ब्रह्मणो वर्षमात्रेण दिनं वैष्णवमुच्यते ॥२३॥ सोपि वर्षशतंयावदात्ममानेन जीवति ॥ पंचपंचाशदादिष्टास्तस्य जातस्य वत्सराः ॥ २४ ॥ तिथयः पंच यामार्द्धं सोमवारेण संगतम् ॥ वैष्णवेन तु वर्षेण दिनं माहेश्वरं भवेत् ॥ २५ ॥ शिवो वर्षशतं यावत्तेन रूपेण च स्थितः ॥ यावदुच्छ्वसितं वक्रं सदाशिवसमुद्भवम् ॥ २६ ॥ पश्चाच्छक्तिं समभ्येति यावन्निश्वसितं भवेत् ॥ निश्वासोच्छ्वसितानां च सर्वेषामेव देहिनाम् ॥ २७ ॥ ब्रह्मविष्णुशिवानां च गन्धर्वोरगरक्षसाम् ॥ एकविंशत्सहस्राणि शतैः षड्भिः शतानि च ॥ २८ ॥ अहोरात्रेण चोक्तानि प्रमाणे द्विज सत्तमाः ॥ षड्भिरुच्छ्वासनिश्वासैः पलमेकं प्रवर्तते ॥ २९ ॥ नाडी षष्टिपला प्रोक्ता तासां षष्ट्या दिनं निशा ॥ निश्वासोच्छ्वसितानां च परिसंख्या न विद्यते ॥ सदाशिवसमुत्थानामेतस्मात्सोऽक्षयः स्मृतः ॥ ३० ॥ अन्येऽपि ये प्रगच्छांति ब्रह्मज्ञानसमन्विताः ॥ अक्षयास्तेऽपि जायंते सत्यमेतन्मयोदितम् ॥ ३१ ॥ ॥ ऋषय ऊचुः ॥ ॥ यद्येवं सूतपुत्रात्र ब्रह्मविष्णुमहेश्वराः ॥ आत्मवर्षशते पूर्णे यांति नाशमसंशयम् ॥ ॥ ३२ ॥ तत्कथं मानुषाणां च मर्त्यलोकेलपजीविनाम् ॥ कथयंति च ये मुक्तिं विद्वांसश्चैव सूतज ॥ ३३ ॥ नूनं तेषां मृषा वादो मोक्षमार्गसमुद्भवः ॥ ३४ ॥ ॥ सूत उवाच ॥ ॥ अनादिनिधनः कालः संख्यया परिवर्जितः ॥ असंख्याता गता मोक्षं ब्रह्मविष्णुमहेश्वराः ॥ ३५ ॥ निजे वर्षशते पूर्णे वालुकारेणवो यथा ॥ निजमानेन या श्रद्धा ब्रह्मज्ञानसमुद्भवा ॥ तेषां चेन्मानुषाणां च तन्मुक्तिः स्यादसंशयम् ॥ ३६ ॥ यथैते दंशमशका मानुषाणां[1] च कीटकाः ॥ जायंते च म्रियंते च गण्यंते नैव कुत्रचित् ॥ इन्द्रादीनां तथा मर्त्याः संभाव्या जगतीतले ॥ ३७ ॥ देवानां च यथा मर्त्याः कीटस्थाने च संस्थिताः ॥ तथा देवा अपि ज्ञेया ब्रह्मणोऽव्यक्तजन्मनः ॥ ३८ ॥ ब्रह्मणस्तु यथा देवाः कीटस्थाने व्यवस्थिताः ॥ तथा ब्रह्मापि विष्णोश्च कीटस्थाने व्यवस्थितः ॥ ३९ ॥ पितामहो यथा विष्णोः कीटस्थाने व्यवस्थितः ॥ तथा स शिवशक्तिभ्यां परिज्ञेयो द्विजोत्तमाः ॥ ४० ॥ यथा विष्णुः कृमिर्ज्ञेयस्ताभ्यामेव द्विजोत्तमाः ॥ सदाशिवस्य विज्ञेयौ तथा तौ कृमिरूपकौ ॥ ४१ ॥ एवं च विविधैर्यज्ञैः श्रद्धापूतेन चेतसा ॥ ब्रह्मज्ञानात्परं यांति सदाशिवसमुद्भवम् ॥ ४२ ॥ अग्निष्टोमादिभिर्यज्ञैः कृतैः संपूर्णदक्षिणैः ॥ तदर्थं ते दिवं यांति भुक्त्वा भोगान्पृ

१ मानुषाणां दृष्ट्या—इति भावः । एवमेव—इंद्रादीनाम्—इत्यादीनामुत्तरोत्तरेषां दृष्ट्या इति सर्वत्रऽनुसंधेयः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



थविधान् ॥ ४३ ॥ क्षये च पुनरायांति सुकृतस्य महीतले ॥ ब्रह्मज्ञानात्परं प्राप्य पुनर्जन्म न विद्यते ॥ ४४ ॥ तस्मात्सर्वप्रयत्नेन तत्राभ्यासं समाचरेत् ॥ जन्मभिर्बहुभिः पश्चाच्छनैर्मुक्तिमवाप्नुयात् ॥ ४५ ॥ एकजन्मनि संप्राप्तो लेशो ज्ञानस्य तस्य च ॥ द्वितीये द्विगुणस्तस्य तृतीये त्रिगुणो भवेत् ॥ ४६ ॥ एकोत्तरो भवेदेवं सदा जन्मनिजन्मनि ॥ ४७ ॥ ॥ ऋषय ऊचुः ॥ ॥ ब्रह्मज्ञानस्य संप्राप्तिर्मर्त्यानां जायते कथम् ॥ एतन्नः सर्वमाचक्ष्व यदि त्वं वेत्सि सूतज ॥ ४८ ॥ ॥ सूत उवाच ॥ ॥ का शक्तिर्मम वक्तव्ये ज्ञाने मर्त्यसमुद्भवे ॥ स्वयमेव न यो वेत्ति स परस्य वदेत्कथम् ॥ ४९ ॥ उपदेशः परं यो मे पित्रा दत्तो द्विजोत्तमाः ॥ तमहं वः प्रवक्ष्यामि ब्रह्मज्ञानसमुद्भवम् ॥ ५० ॥ हाटकेश्वरजे क्षेत्रे ह्यस्ति तीर्थद्वयं शुभम् ॥ कुमारिकाभ्यां विहितं ब्रह्मज्ञानप्रदं नृणाम् ॥ ५१ ॥ ब्राह्मण्या चैव शूद्र्या च कुमारीभ्यां विनिर्मितम् ॥ अष्टम्यां च चतुर्दश्यां यस्ताभ्यां स्नानमाचरेत् ॥ ५२ ॥ पश्चात्पूजयते भक्त्या प्रसिद्धे सिद्धिपादुके ॥ सुगुप्ते गर्तमध्यस्थे कुमार्या परिपूजिते ॥ ५३ ॥ तस्य संवत्सरस्यान्ते ब्रह्मज्ञानं प्रजायते ॥ शक्त्या विनिहिते ते च स्वदर्शनविवृद्धये ॥ ५४ ॥ लोकानां मुक्तिकामानां ब्रह्मज्ञानसुखावहे ॥ मम तातो गतस्तत्र ततश्च ज्ञानवान्स्थितः ॥ ५५ ॥ तस्यादेशादहं तत्र गतः संवत्सरं स्थितः ॥ पादुके पूजयामास ततो ज्ञानं च संस्थितम् ॥ ५६ ॥ यत्किञ्चिद्वा श्रुतं लोके पुराणाग्र्यं व्यवस्थितम् ॥ वर्तमानं भविष्यच्च तदहं वेद्मि भो द्विजाः ॥ ५७ ॥ तत्प्रसादादसंदिग्धं प्रमाणं चात्र संस्थितम् ॥ मुक्त्वैकं वेदपठनं सूतत्वं च यतो मयि ॥ ५८ ॥ तस्यापि वेद्मि सर्वार्थं भर्तृयज्ञो यथा मुनिः ॥ अस्मादत्रैव गच्छध्वं यदि मुक्तेः प्रयोजनम् ॥ ॥ ५९ ॥ किमेतैः स्वर्गदैः सत्रैः पुनरावृत्तिकारकैः ॥ आराधयध्वं ते गत्वा पादुके सिद्धिदे नृणाम् ॥ येन संवत्सरस्यान्ते ब्रह्मज्ञानं प्रजायते ॥ ॥ ६० ॥ ॥ ऋषय ऊचुः ॥ ॥ साधुसाधु महाभाग ह्युपदेशः कृतो महान् ॥ तेन संतारिताः सर्वे वयं संसारसागरात् ॥ ६१ ॥ यास्यामोऽपि वयं तत्र सत्रे द्वादशवार्षिके ॥ समाप्तेऽस्मिन्न संदेहः सर्वे च कृतनिश्चयाः ॥ ६२ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये ब्रह्मज्ञानप्राप्त्यर्थं कुमारिकातीर्थद्वयगर्तक्षेत्रस्थपादुकामाहात्म्यवर्णनंनाम चतुर्णवत्युत्तरशततमोऽध्यायः ॥ ॥ १९४ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ शूद्री च ब्राह्मणी चापि ये त्वया परिकीर्तिते ॥ हाटकेश्वरजे क्षेत्रे तीर्थद्वयमनुत्तमम् ॥ १ ॥ तत्कथं तत्र संजातं केन वा तद्विनिर्मितम् ॥ एतच्च सर्वमाचक्ष्व विस्तरेण महामते ॥ २ ॥ पादुकाभ्यां समुत्पत्तिः श्रुताऽस्माभिः पुरा तव ॥ वद तच्चापि माहा

१ ताभ्याम्—तीर्थाभ्याम्—तयोस्तीर्थयोर्मध्ये—इत्यर्थः। २ पादुकाभ्याम्—पादुकयोः—इत्यर्थः।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्म्यं ताभ्यां[1] चैव समुद्भवम् ॥ ३ ॥ ॥ सूत उवाच ॥ ॥ पुरासीन्नागरो विप्रश्छांदोग्य इति विश्रुतः ॥ यस्याऽन्वयेऽपि विप्रेन्द्राश्छान्दोग्या इति विश्रुताः ॥ ४ ॥ सामवेदविदस्तस्य गृहस्थाश्रमधर्मिणः ॥ पश्चिमे वयसि प्राप्ते कन्या जाता सुशोभना ॥ ५ ॥ सर्वैरपि गुणैर्युक्ता सर्वलक्षण लक्षिता ॥ सप्तरक्ता त्रिगंभीरा पञ्चसूक्ष्माऽबृहत्कटिः ॥ ६ ॥ पद्मपत्रविशालाक्षी लंबकेशी सुशोभना ॥ बिंबोष्ठी ह्रस्वलोमा च पूर्णचन्द्रसमप्रभा ॥ ॥ ७ ॥ तस्या नाम पिता चक्रे ब्राह्मणीति द्विजोत्तमाः ॥ यस्मात्सा ब्राह्मणैर्दत्ता मण्डपान्ते सुपूजितैः ॥ ८ ॥ पश्चिमे वयसि प्राप्ते अपत्यरहितस्य च ॥ ववृधे सा च तन्वङ्गी चन्द्रलेखा यथा तथा ॥ ९ ॥ शुक्लपक्षे तु संप्राप्ते जनलोचनतुष्टिदा ॥ यस्मिन्नहनि संजाता छान्दोग्यस्य महात्मनः ॥ आनर्ताधिपतेस्तस्मिंस्ताहृग्रूपा सुताऽभवत् ॥ १० ॥ यस्याः कायप्रभौघेण सर्वं तत्सूतिकागृहम् ॥ निशागमेऽपि संजातं रत्नौघैरिव सुप्रभम् ॥ तत स्तस्याः पिता नाम चक्रे रत्नवतीति च ॥ ११ ॥ अथ सख्यं समापन्ना ब्राह्मण्या सह सा शुभा ॥ नैरन्तर्येण ताभ्यां च वियोगो नैव जायते ॥ ॥ १२ ॥ एकाशनं तथा शय्या एकान्नेन च भोजनम् ॥ अष्टमेऽब्दे च संजाते पिता तस्या द्विजोत्तमाः ॥ १३ ॥ विवाहं चिन्तयामास प्रदानाय वरे तथा ॥ सा ज्ञात्वा चेष्टितं तस्य पितुर्दुःखसमन्विता ॥ १४ ॥ सख्या वियोगभीता च प्रोचे रत्नवती तदा ॥ अश्रुपूर्णेक्षणा दीना बाष्पगद्गदया गिरा ॥ १५ ॥ सखि तातो विवाहं मे प्रकरिष्यति सांप्रतम् ॥ विवाहितायाश्च सख्यं न भविष्यति कर्हिचित् ॥ १६ ॥ वज्रपातोपमं वाक्यं तस्याः श्रुत्वा सखी च सा ॥ रुरोद कण्ठमाश्लिष्य स्नेहव्याकुलितेन्द्रिया ॥ १७ ॥ अथ तद्रुदितं श्रुत्वा माता तस्या मृगावती ॥ ससंभ्रमा समागत्य वाक्य मेतदुवाच ह ॥ १८ ॥ किमर्थं रुद्यते पुत्रि केन ते विप्रियं कृतम् ॥ करोमि निग्रहं येन तस्याद्यैव दुरात्मनः ॥ १९ ॥ ॥ रत्नवत्युवाच ॥ ॥ शृणु मे सुप्रियातीव ब्राह्मणी प्राणसंमता ॥ विवाहं प्राप्य कल्याणी प्रयास्यति पतेर्गृहम् ॥ २० ॥ अनया रहिताहं च न जीवामि कथंचन ॥ एतस्मात्कार णाद्देवि प्ररोदिमि सुदुःखिता ॥ २१ ॥ ॥ मृगावत्युवाच ॥ ॥ यद्येवं पुत्रि यत्र त्वं प्रयास्यसि पतेर्गृहे ॥ तस्य राज्ञस्तु यो विप्रः पौरोहित्ये व्यवस्थितः ॥ २२ ॥ तस्य पुत्राय दास्यामि सखीमेनां तव प्रियाम् ॥ तत्रापि येन ते संगो भविष्यत्यनया सह ॥ २३ ॥ एवमुक्त्वा ततो राज्ञी छांदोग्यं द्विजसत्तमम् ॥ समानीयाब्रवीदेनं विनयावनता स्थिता ॥ २४ ॥ इयं तव सुता ब्रह्मन्सुताया मम सुप्रिया ॥ न वियोगं सहत्यस्या मुहूर्तमपि भामिनी ॥ २५ ॥ तथा तव सुतायाश्च सुतेयं मम सुप्रिया ॥ तस्मात्कुरु वचो मह्यं यच्च वक्ष्यामि सुव्रत ॥ २६ ॥ यस्य मे दीयते कन्या कदाचिन्नृप

[1] ताभ्याम्—तयोः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





तेरियम् ॥ पुरोधास्तस्य यो विप्रस्तस्मै देया निजा सुता ॥ २७॥ येन न स्यान्मिथो भेदस्ताभ्यां द्विजवरोत्तम ॥ एकस्थाने स्थिताभ्यां च प्रज्ञा दात्तव सत्तम ॥ २८ ॥ ॥ छांदोग्य उवाच ॥ ॥ नागरो नागरं मुक्त्वा योऽन्यस्मै संप्रयच्छति ॥ कन्यकां यः प्रगृह्णाति विवाहार्थं कथंचन ॥ ॥२९॥ स पंक्तिदूषकः पापान्नागरो न भवेदिह ॥ तस्मान्नाहं प्रदास्यामि कथंचिन्निजकन्यकाम् ॥ अन्यस्मै नागरं मुक्त्वा निश्चयोऽयं मया कृतः ॥ ॥ ३० ॥ ॥ ब्राह्मण्युवाच ॥ ॥ नाहं पतिं प्रयास्यामि कुमारी ब्रह्मचारिणी ॥ देया प्रिया सखी यत्र तावद्यास्यामि तत्र च ॥ ३१ ॥ यदि तात बलान्मह्यं विवाहं त्वं करिष्यसि ॥ विषं वा भक्षयिष्यामि साधयिष्यामि पावकम् ॥ ३२ ॥ शस्त्रेण वा हनिष्यामि स्वदेहं तात निश्चयम् ॥ एवं ज्ञात्वा तु तात त्वं यत्क्षमं तत्समाचर ॥ ३३ ॥ ॥ सूत उवाच ॥ ॥ तस्यास्तं निश्चयं ज्ञात्वा स विप्रो दुःखसंयुतः ॥ स्त्रीहत्यापाप भीतस्तु तां त्यक्त्वा स्वगृहं ययौ ॥ ३४ ॥ सापि रेमे तया सार्धं रत्नवत्या द्विजोत्तमाः ॥ संहृष्टहृदया नित्यं संत्यक्तपितृसौहृदा ॥ ३५ ॥ यौवनं सां तु संप्राप्ता रूपेणाप्रतिमा भुवि ॥ ३६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये छान्दोग्यब्राह्मणकन्यावृत्तान्तवर्णनंनाम पञ्चनवत्युत्तरशततमोऽध्यायः ॥ १९५ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ अथ तां यौवनोपेतां स्वसुतां प्रेक्ष्य पार्थिवः ॥ अनौपम्येन रूपेण संयुक्तां वरवर्णिनीम् ॥ आनर्तश्चिन्तयामास कन्यकां प्रददाम्यहम् ॥ १ ॥ अनर्हाय च यो दद्या द्वराय निजकन्यकाम् ॥ कार्यकारणलोभेन नरकं स प्रगच्छति ॥ २ ॥ एवं चिंतयतस्तस्य महान्कालो व्यवस्थितः ॥ न पश्यति च तद्योग्यं कंचिद्वरमनुत्तमम् ॥ ३ ॥ अथ संप्रेषयामास सर्वभूताश्रयेषु ये ॥ चित्रकर्मणि विख्यातान्नरांश्चित्रकरांस्तदा ॥ ४ ॥ गच्छध्वं मम वाक्येन सर्वा न्भूमितले नृपान् ॥ लिखित्वा पट्टमध्ये तु दर्शयध्वं ततः परम् ॥ ५ ॥ सुताया मम येनाऽसौ दृष्ट्वाऽभीष्टं नराधिपम् ॥ पत्यर्थं वरयेत्साध्वी मम दोषो भवेन्न हि ॥ ६ ॥ तस्य तद्वचनं श्रुत्वा सर्वे चित्रकरास्तदा ॥ प्रस्थिता धरणीपृष्ठे पार्थिवानां गृहेषु च ॥ ७ ॥ ते लिखित्वा महीपाला न्यौवनस्थान्वयोऽन्वितान् ॥ रूपौदार्यगुणोपेतान्दर्शयामासुरग्रतः ॥ रत्नवत्याः क्रमेणैव तस्य भूपस्य शासनात् ॥ ८ ॥ अथ तेषां तु सर्वेषां मध्ये राजा बृहद्बलः ॥ दशार्णाधिपतिर्भव्यः पत्यर्थं च वृतस्तया ॥ ९ ॥ तदाऽऽनर्ताधिपो हृष्टः प्रेषयामास तं प्रति ॥ विवाहार्थं सुविज्ञाय वाक्य मेतदुवाच ह ॥ १० ॥ गच्छध्वं मम वाक्येन दशार्णाधिपतिं प्रति ॥ वाच्यः स विनयाद्गत्वा विवाहार्थं ममांतिकम् ॥ ११ ॥ समागच्छ निजां



१ समनुप्राप्ता–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कन्यां येन यच्छाम्यहं तव ॥ नाम्ना रत्नवतीं ख्यातां त्रैलोक्यस्यापि सुन्दरीम् ॥ १२ ॥ गत्वा स सत्वरं तत्र यत्र राजा बृहद्बलः ॥ प्रोवाच सकलं वाक्यमानर्ताधिपतेः स्फुटम् ॥ १३ ॥ सोऽपि तत्सहसा श्रुत्वा तेषां वाक्यमनुत्तमम् ॥ परमां तुष्टिमासाद्य प्रस्थितस्तत्पुरं प्रति ॥ सैन्येन महता युक्तश्चतुरंगेण पार्थिवः ॥ १४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये दशार्णाधिपतेर्बृहद्बलस्यानर्तेशपुरं प्रत्यागमनवर्णनंनाम षण्णवत्युत्तरशततमोऽध्यायः ॥ १९६ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एतस्मिन्नेव काले तु नागरो द्विजसत्तमः ॥ विश्वावसुरिति ख्यातो वेदवेदांगपारगः ॥ १ ॥ पश्चिमे वयसि प्राप्ते तस्य पुत्रो बभूव ह ॥ परावसुरिति ख्यातस्तस्य प्राणसमः सदा ॥ २ ॥ स वेदाध्ययनं चक्रे यौवने समुपस्थिते ॥ वयस्यैः संमतैः सार्धं सदा हास्यपरायणैः ॥ ३ ॥ कस्यचित्त्वथ कालस्य माघमास उपस्थिते ॥ रात्रौ सोऽध्ययनं चक्र उपाध्यायगृहं गतः ॥ ४ ॥ निशीथे स समुत्थाय सर्वैर्मित्रैश्च रक्षितः ॥ वेश्यागृहं समासाद्य प्रसुप्तो वेश्यया सह ॥ ५ ॥ जलपूर्णं समाधाय जलपात्रं समीपगम् ॥ निजाचमनयोग्यं च जलपानार्थमेव च ॥ ६ ॥ निशाशेषे तु संप्राप्ते स पिपासासमाकुलः ॥ निद्रालस्यसमोपेतः शय्यां त्यक्त्वा समुत्थितः ॥ ७ ॥ वेश्याया मद्यपात्रं तु ह्यधस्तात्संव्यवस्थितम् ॥ तदादाय पपौ मद्यं जलभ्रांत्या यदैव सः ॥ ८ ॥ तदा मद्यं परिज्ञाय पात्रं त्यक्त्वा सुदुःखितः ॥ वैराग्यं परमं गत्वा प्रलापानकरोद्बहून् ॥ ९ ॥ अहो निद्रान्वितेनाद्य किं मया विकृतं कृतम् ॥ यदद्य मद्यमापीतं जलभ्रांत्या विगर्हितम् ॥ १० ॥ किं करोमि क्व गच्छामि कथं शुद्धिर्भवेन्मम ॥ प्रायश्चित्तं करिष्यामि यद्यपि स्यात्सुदुष्करम् ॥ ११ ॥ एवं निश्चित्य मनसा प्रभाते समुपस्थिते ॥ शंखतीर्थं समासाद्य कृत्वा स्नानं तथा परम् ॥ १२ ॥ सशिखं वपनं पश्चात्कारयित्वा त्वरान्वितः ॥ गतश्च तिष्ठते यत्र ब्रह्मघोषपरायणः ॥ १३ ॥ उपाध्यायः सशिष्यश्च ब्रह्मस्थानं समाश्रितः ॥ स गत्वा दूरतः स्थित्वा संनिविष्टो यथान्त्यजः ॥१४॥ श्मश्रुमूर्धजहीनस्तु यदा मित्रैर्विलोकितः ॥ तदा हास्याद्धतो मूर्ध्नि हस्ताग्रैश्च मुहुर्मुहुः ॥ १५ ॥ उपाध्यायस्तु तं दृष्ट्वा दीनं बाष्पपरिप्लुतम् ॥ श्मश्रुमूर्धजसंत्यक्तं ततः प्रोवाच सादरम् ॥१६॥ किमद्य वत्स दूरे त्वमुपविष्टस्तु दैन्यधृक् ॥ एहि मे संनिधौ ब्रूहि पराभूतोऽसि केन वा ॥ १७ ॥ ॥ परावसुरुवाच ॥ ॥ अयोग्योऽहं गुरो जातः सेवायास्तव सांप्रतम् ॥ वेश्याया मंदिरस्थेन ज्ञात्वा निजकमंडलुम् ॥ १८ ॥ वेश्याया मद्यपात्रं तु मद्यपूर्णं [1]प्रगृह्य च ॥ तस्माद्देहि विभो मह्यं प्रायश्चित्तं विशु

१ प्रगृह्य—इत्यस्य—पीत्वा—इत्यर्थोऽत्र बोद्धव्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





द्धये ॥ १९ ॥ धर्मद्रोणेषु यत्प्रोक्तं तत्करिष्याम्यसंशयम् ॥ २० ॥ अथ तं बटवः प्रोचुर्वयस्यास्तस्य ये स्थिताः ॥ हास्यं कृत्वा प्रकामाश्च वेश्या या गुरुसंनिधौ ॥२१ ॥ या एषा नृपतेः कन्या ख्याता रत्नावती जने ॥ अस्याः स्तनौ गृहीत्वा त्वमधरं पिबसि द्रुतम् ॥ ततस्ते स्याद्विशुद्धिश्च नान्यथा प्रभविष्यति ॥ २२ ॥ ॥ परावसुरुवाच ॥ ॥ न वयस्या नर्मकालो विषमे मम संस्थिते ॥ ममोपरि यदि स्नेहो बालमित्रत्वसंभवः ॥ तदानीय द्विजानन्यान्वदध्वं निष्कृतिं मम ॥ २३ ॥ अथ ते नर्ममुत्सृज्य तद्दुःखेन च दुःखिताः ॥ विश्वावसुं समासाद्य तद्वृत्तांतमथाब्रुवन् ॥२४॥ सोऽपि तेषां समाकर्ण्य तत्कर्णकटुकं वचः ॥ सभार्यः प्रययौ तत्र यत्र पुत्रो व्यवस्थितः ॥ २५ ॥ दुःखेन महता युक्तः स्खलमानः पदेपदे ॥ वृद्धभावात्तथा शोकात्पुत्राकृत्यसमुद्भवात् ॥ २६ ॥ ततस्तौ प्रोचतुः पुत्रं बाष्पगद्गदया गिरा ॥ दंपती बहुशोकार्तौ हा पुत्र किमिदं कृतम् ॥ सोऽपि सर्वं समाचख्यौ ताभ्यां वृत्तांतमात्मनः ॥ २७ ॥ प्रायश्चित्तं करिष्यामि तस्मादात्मविशुद्धये ॥ ततो विश्वावसुर्विप्रान्स्मार्ताञ्छ्रुतिसमन्वितान् ॥ तदर्थमानयामास वेदविद्याविचक्षणान् ॥ २८ ॥ ततः परावसुस्तेषां पुरः स्थित्वा कृतांजलिः ॥ प्रोवाच स्वादितं मद्यं मया रात्रावजानता ॥ वेश्या भांडं समादाय ज्ञात्वा निजकमंडलुम् ॥ २९ ॥ एवं ज्ञात्वा यदर्हं च प्रायश्चित्तं प्रदीयताम् ॥ येन मे जायते शुद्धिः प्रसादाद्वो द्विजोत्तमाः ॥३०॥ एवमुक्तास्ततस्तेन विप्रास्ते स्मृतिवादिनः ॥ धर्मशास्त्रं समालोक्य ततः प्रोचुश्च तं द्विजाः ॥ ३१ ॥ अतिमानादतिक्रोधात्स्नेहाद्वा यदि वा भयात् ॥ प्रायश्चित्तमनर्हं तु ददत्तत्पापमश्नुते ॥ ३२ ॥ प्रायश्चित्तं प्रदास्यामस्तस्माद्युक्तं वयं तव ॥ यदि शक्नोषि तत्कर्तुं तत्कुरुष्व समाहितः ॥ ३३ ॥ ॥ परावसुरुवाच ॥ ॥ करोमि वो न चेद्वाक्यं तत्पृच्छामि कुतो द्विजाः ॥ नाहं केनापि संदृष्टो मद्यपानं समाचरन् ॥ ३४ ॥ तस्माद्ब्रूत यथार्हं मे प्रायश्चित्तं विशुद्धये ॥ अपि प्राणहरं रौद्रं नो चेत्पापमवाप्स्यथ ॥ ३५ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ बुध्यमानो द्विजो यस्तु मद्यपानं समाचरेत् ॥ तावन्मात्रं हिरण्यं च ततं पीत्वा विशुध्यति ॥ ३६ ॥ अज्ञानतो यदा पीतं मद्यं विप्रेण कर्हिचित् ॥ अग्नितुल्यं घृतं पीत्वा तावन्मात्रं विशुध्यति ॥ ॥ ३७ ॥ एवं ते सर्वमाख्यातं प्रायश्चित्तं विशुद्धये ॥ यदि शक्नोषि चेत्कर्तुं कुरुष्व त्वं द्विजोत्तम ॥ ३८ ॥ ॥ परावसुरुवाच ॥ ॥ गंडूषमेकं मद्यस्य मया पीतं द्विजोत्तमाः ॥ तावन्मात्रं पिबाम्येव घृतं वह्निसमं कृतम् ॥ ३९ ॥ युष्मदादेशतोऽद्यैव स्वशरीरविशुद्धये ॥ विश्वावसुश्च तच्छ्रुत्वा वज्रपातोपमं वचः ॥ ४० ॥ विप्राणां चाथ पुत्रस्य तदोवाच सुदुःखितः ॥ कृत्वाश्रुमोक्षणं भूरि बाष्पगद्गदया गिरा ॥ ४१ ॥ सर्वस्व

१ धर्मद्रोणेषु—धर्मशास्त्रेषु—इत्यर्थः । २ धुरि स्थितम्—इ०,हृदि स्थितम्—इ० च पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मपि दास्यामि पुत्रस्यास्य विशुद्धये ॥ प्रायश्चित्तं समाचर्तुं न दास्यामि कथंचन ॥ ४२ ॥ अश्राद्धेयो विपांक्तेयः सपुत्रो वा भवाम्यहम् ॥ स्थानं वा संत्यजाम्येतत्पुत्र मैवं समाचर ॥ ४३ ॥ तच्छ्रुत्वा वचनं तस्य पितुर्विघ्नकरं परम् ॥ प्रायश्चित्तस्य सस्नेहं पुत्रो वचनमब्रवीत् ॥ ४४ ॥ त्यज तात मम स्नेहं मा विघ्नं मे समाचर ॥ प्रायश्चित्तं करिष्यामि निश्चयोऽयं मया कृतः ॥ ४५ ॥ ॥ मातोवाच ॥ ॥ यदि पुत्र त्वया कार्यं प्रायश्चित्तं विशुद्धये ॥ तदहं पतिना सार्धं प्रवेक्ष्यामि पुरोऽनलम् ॥ ४६ ॥ त्वां द्रष्टुं नैव शक्नोमि पिबंतमग्निवद्घृतम् ॥ पश्चात्[1]प्राणपरित्यक्तं सत्येनात्मानमालभे ॥ ४७ ॥ ॥ पितोवाच ॥ ॥ युक्तं पुत्रानया प्रोक्तं मात्रा तव हितं तथा ॥ ममापि संमतं ह्येतत्करिष्यामि न संशयः ॥ ४८ ॥ ॥ ॥ सूत उवाच ॥ ॥ एतस्मिन्नंतरे सर्वे सुहृदस्तस्य ये स्थिताः ॥ तच्छ्रुत्वा तं समायाता वृत्तांतं दुःखसंयुताः ॥ ४९ ॥ प्रोचुश्च विविधैर्वाक्यैः सपत्नीकं विभावसुम्[2] ॥ पुत्रशोकेन संतप्तं मरणे कृतनिश्चयम् ॥५०॥ पुत्रं प्रबोधयामासुः प्रायश्चित्तनिवृत्तये ॥ तदा न शक्नुवंति स्म निवर्तयितुमंजसा ॥ ५१ ॥ तावुभौ च पितापुत्रौ प्राणत्यागकृतादरौ ॥ ५२ ॥ ततो वास्तुपदं जग्मुः सर्वज्ञो यत्र तिष्ठति ॥ भर्तृयज्ञो महाभागः सर्वसंदेहवारकः ॥ ५३ ॥ तस्य सर्वं समाचख्युः परावसुसमुद्भवम् ॥ वृत्तांतं मद्यपानोत्थं यन्मित्रैस्तस्य कीर्तितम् ॥ ५४ ॥ प्रायश्चित्तं तु हास्येन यच्च स्मार्तैः प्रकीर्तितम् ॥ विश्वावसोश्च संकल्पं वह्निसाधनसंभवम् ॥ ५५ ॥ सपत्नीकस्य मित्राणां यच्च दुःखमुपस्थितम् ॥ निवेद्य तत्तथा प्रोचुर्भूयोऽपि विनयान्वितम् ॥ ५६ ॥ अतीतं वर्त्तमानं च भविष्यद्वापि यद्भवेत् ॥ न तेऽस्त्यविदितं किंचित्सर्वं जानीमहे वयम् ॥ ५७ ॥ एतच्च नगरं सर्वं विश्वावसुकृतेऽधुना ॥ संशयं परमं प्राप्तं तेन प्राप्तास्तवांतिकम् ॥ ५८ ॥ तस्माद्ब्रूहि महाभाग यद्यस्त्यपरमेव हि ॥ प्रायश्चित्तं द्विजस्यास्य मद्यपानविशुद्धये ॥ ५९ ॥ न ते ह्यविदितं किंचित्तव वेदसमुद्भवम् ॥ भर्तृयज्ञो विहस्योच्चैस्ततो वचनमब्रवीत् ॥ ६० ॥ ब्राह्मणस्यास्य शुद्ध्यर्थमस्त्युपायः सुखावहः ॥ विद्यमानोऽपि नास्त्येव मतिरेषा स्थिता मम ॥ ६१ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ पूर्वापरविरोधेनवाक्यमेतन्महामते ॥ कथमस्ति कथं नास्ति तस्मात्त्वं वक्तुमर्हसि ॥ विस्मयोऽयं महाञ्जातः सर्वेषां च द्विजन्मनाम् ॥ ६२ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ जपच्छिद्रं तपश्छिद्रं यच्छिद्रं यज्ञकर्मणि ॥ सर्वं भवति निश्छिद्रं यस्य चेच्छंति ब्राह्मणाः ॥ ६३ ॥ अच्छिद्रमिति यद्वाक्यं वदंति क्षितिदेवताः ॥ विशेषान्नागरोद्भूतास्तत्तथैव न चान्यथा ॥६४॥ तथा च ब्रह्मशालायां संस्थितैर्यदुदाहृतम् ॥ नान्यथा तत्परिज्ञेयं हास्येनापि स्मृतिं

१ पश्चात्–प्राणपरित्यक्तम्–इत्यस्य–त्वां द्रष्टुं नैव शक्नोमि–इत्यनेन संबंधः । २ विभावसुम्–विश्वावसुम्–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

विना ॥ ६५ ॥ स एष हास्यभावेन प्रोक्तो मित्रैः परावसुः ॥ ६६ ॥ रत्नवत्याः स्तनौ गृह्य यथास्वादयतेऽधरम् ॥ तद्भविष्यति मे शुद्धिर्मद्यपान
समुद्भवा ॥ ६७ ॥ तदुपायो मया प्रोक्तो विप्रस्यास्य सुखावहः ॥ पराशरमतेनैव करोति यदि शुध्यति ॥ ६८ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ यद्ये
तच्छृणुते राजा वाक्यमीर्ष्यापरायणः ॥ तत्सर्वेषां वधं कुर्याद्विप्राणामन्यथा भवेत् ॥ ६९ ॥ तस्मात्करोतु चाभीष्टमेष विप्रः परावसुः ॥ मातापि
तृसमोपेतो वयं यास्यामहे गृहम् ॥ ७० ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ स राजा नीतिमान्विज्ञः सर्वधर्मपरायणः ॥ भक्तो देवद्विजानां च सर्वशा
स्त्रविचक्षणः ॥ ७१ ॥ तस्मान्मया समं सर्वे नागरायांतु तद्गृहे ॥ ७२ ॥ मध्यगं पुरतः कृत्वा तद्वक्त्रेण च तत्पुरः ॥ कथयंतु च वृत्तांतं मद्यपान
समुद्भवम् ॥ ७३ ॥ परावसोश्च यत्प्रोक्तं वयस्यैर्हास्यमाश्रितैः ॥ पराशरसमुत्थं च यद्वाक्यं तत्स्मृतेः परम् ॥ ७४ ॥ तच्छ्रुत्वा यदि भूपाल ईर्ष्या
लोभसमन्वितः ॥ भविष्यति ततोऽहं तं धारयिष्यामि सत्पथे ॥ ७५ ॥ ॥ सूत उवाच ॥ ॥ ततस्ते नागराः सर्वे सन्तोषं परमं गताः ॥ साधु
वादैः समभ्यर्च्य भर्तृयज्ञं पृथग्विधैः ॥ ७६ ॥ तेनैव सहितं तूर्णं मध्ये कृत्वा च मध्यगम् ॥ गर्त्तातीर्थसमुद्भूतं वेदवेदांगपारगम् ॥ ७७ ॥ स्मृतिज्ञं
लक्षणज्ञं तमाहिताग्निं यशस्विनम् ॥ यष्टारं बहुयज्ञानां भर्तृयज्ञमते स्थितम् ॥ ७८ ॥ आनर्तेनापि भूपेन स्वर्गभ्रष्टेन वै पुरा ॥ कर्णोत्पलाजनि
त्रेण यश्च पूर्वं चिरन्तनः ॥ ७९ ॥ चमत्कारपुरे न्यस्तः स्थानेऽस्मिन्विप्रगौरवात् ॥ येन सिध्यंति कार्याणि सर्वेषां च द्विजन्मनाम् ॥ ८० ॥
तथा चैव तु चान्यानि चमत्कारपुरस्य च ॥ हरिभद्राभिधानं तं भर्तृयज्ञसमन्वितम् ॥ ८१ ॥ कृत्वा ते नागराः सर्वे राजद्वारमुपागताः ॥ परावसुं
समादाय मातापितृसमन्वितम् ॥ ८२ ॥ अथ द्वाःस्थो द्रुतं गत्वा भूपतेस्तान्न्यवेदयत् ॥ ब्राह्मणान्भर्तृयज्ञेन हरिभद्रेण संयुतान् ॥ ८३ ॥ आन
र्तोऽपि च ताञ्छ्रुत्वा राजद्वारसमागतान् ॥ पुरोधसा समायुक्तः संमुखं प्रययौ तदा ॥ ८४ ॥ दत्त्वार्घं मधुपर्कं च विष्टरं गां तथा नृपः ॥ प्रथमं भर्तृ
यज्ञाय हरिभद्राय वै ततः ॥ ८५ ॥ चतुर्णां मुद्गहस्तानां तथान्येषां द्विजन्मनाम् ॥ आद्यऋग्यजुःसाम्नां च प्रगृह्याशीर्वचः परम् ॥ ८६ ॥ सभामं
डपमासाद्य सर्वान्समुपवेशयत् ॥ वरासनेषु हैमेषु यथावदनुपूर्वशः ॥ ८७ ॥ तथा तेषूपविष्टेषु सर्वेषु पृथिवीपतिः ॥ उपविश्य धरापृष्ठे कृतांजलिर
भाषत ॥ ८८ ॥ धन्योऽस्म्यनुगृहीतोऽस्मि यन्मे गृहमुपागतः ॥ सर्वोऽयं नागरो लोको भर्तृयज्ञसमन्वितः ॥ ८९ ॥ तदादिशतु मां 
लोको यत्कृत्यं प्रकरोमि वः ॥ अदेयमपि यच्छामि गृहायातस्य सांप्रतम् ॥ ९० ॥ अगम्यमपि यास्यामि करिष्येऽकृत्यमेव च ॥ तच्छ्रुत्वा

१ नृपद्वारम्-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हरिभद्रः स समुत्थाय त्वरान्वितः ॥ ९१ ॥ पप्रच्छाद्यांस्तदर्थं च बह्वृचांस्तदनंतरम् ॥ अध्वर्यूंश्चैव छांदोग्यांननुज्ञातश्च तैस्तदा ॥ ९२ ॥ प्राणरुद्रान्वदंत्याद्या जीवसूक्तं च बह्वृचाः ॥ एषां चैव पृथिव्यादिसवनं यत्पुरा कृतम् ॥ ९३ ॥ पठन्त्वध्वर्यवः सर्वे छांदोग्याश्च पृथक्पृथक् ॥ मधुच्युतेन संयुक्तं प्रपठन्तु च सिद्धये ॥ ९४ ॥ भर्तृयज्ञमतेनैवं तेन प्रोक्ता द्विजोत्तमाः ॥ पप्रच्छुश्चैव तत्सर्वं यत्प्रोक्तं तेन धीमता ॥ ॥ ९५ ॥ ततः पाठावसाने तु मध्यगः प्राह सादरम् ॥ परावसुसमुद्भूतं वृत्तांतं तस्य भूपतेः ॥ ९६ ॥ यथा तेनाऽऽसवः प्रीतो यथा मित्रैः प्रजल्पितम् ॥ प्रायश्चित्तं समादिष्टं यथा स्मार्तैर्घृतोद्भवम् ॥ ९७ ॥ भर्तृयज्ञेन चानीता यथा सर्वे द्विजातयः ॥ तच्छ्रुत्वा पार्थिवो हृष्टः कृतांजलिपुटोऽब्रवीत् ॥ ९८ ॥ धन्योहं कृतपुण्योऽस्मि यस्य मे नागरैर्द्विजैः ॥ विप्रत्रयप्ररक्षार्थं प्रसादोऽयं महान्कृतः ॥ ९९ ॥ धन्या मे कन्यका चेयं रक्षयिष्यति च स्वयम् ॥ ब्राह्मणत्रितयं ह्येतन्मरणे कृतनिश्चयम् ॥ १०० ॥ अथाऽऽसावानयामास तां कन्यां तत्क्षणा द्विजाः ॥ उपविष्टं सभामध्ये ब्राह्मणेभ्यो न्यवेदयत् ॥ १०१ ॥ एषा कन्या मयानीता युष्मद्वाक्याद्द्विजोत्तमाः ॥ भर्तृयज्ञेन यत्प्रोक्तं तत्करोतु च स द्विजः ॥ १०२ ॥ ततस्तत्र समानीय ब्राह्मणं तं परावसुम् ॥ भर्तृयज्ञ इदं वाक्यं कन्यायाः पुरतोऽब्रवीत् ॥ १०३ ॥ इमां त्वं कन्यकां चित्ते जननीं यदि मन्यसे ॥ अधरास्वादनं कुर्वंस्ततः सिद्धिमवाप्स्यसि ॥ १०४ ॥ अनुरागपरो भूत्वा यद्यास्वादनतत्परः ॥ भविष्यति ततो रक्तं तव वक्त्रे परावसो ॥ १०५ ॥ शुद्धस्य त्वथ दुग्धं च भविष्यति न संशयः ॥ १०६ ॥ स्तनाभ्यां तव हस्ताभ्यां स्पर्शात्क्षीरं भवेद्यदि ॥ तत्ते शुद्धिः परिज्ञेया रक्तं वा न भविष्यति ॥ १०७ ॥ एवमुक्त्वाथ तं कन्यां ततः प्रोवाच स द्विजः ॥ एनं त्वं पुत्रवत्पश्य पुत्रि ब्राह्मणसत्तमम् ॥ १०८ ॥ येन शुद्धिमवाप्नोति त्वदोष्ठास्वादने कृते ॥ स्पर्शिताभ्यां स्तनाभ्यां च प्रायश्चित्तं यतः स्मृतम् ॥ १०९ ॥ एतदस्य द्विजेंद्रस्य वयस्यैर्हास्यसंयुतैः ॥ येन शुद्धिमवाप्नोति नो चेन्मृत्युमवाप्स्यति ॥ ११० ॥ ॥ सूत उवाच ॥ ॥ सा तथेति प्रतिज्ञाय सव्रीडं तमुवाच ह ॥ एहि वत्स कुरुष्व त्वं प्रायश्चित्तं विशुद्धये ॥ १११ ॥ मातृभावं समाधाय मया त्वं कल्पितः सुतः ॥ सोऽपि तां मातृवन्मत्वा तस्याः सांनिध्यमागतः ॥ ११२ ॥ स्पृष्टवांश्च स्तनौ तस्याः सर्वलोकस्य पश्यतः ॥ स्पृष्टाभ्यां च स्तनाभ्यां च तत्क्षणाद्द्विजसत्तमाः ॥ ११३ ॥ क्षीरधारे विनिष्क्रांते कुन्देंदुहिमसंनिभे ॥ ॥ ११४ ॥ अथौष्ठास्वादनं यावत्तस्याः स कुरुते द्विजः ॥ तावत्क्षीरं विनिष्क्रांतं तादृग्रूपं तदाननात् ॥ ११५ ॥ एतस्मिन्नंतरे सर्वैस्ताला दत्ता

१ अध्वर्यून्—यजुर्वेदिनः—इत्यर्थः । २ छान्दोग्यान्—सामवेदिनः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



द्विजातिभिः ॥ राज्ञाऽयं ब्राह्मणः शुद्धो वदमानैर्मुहुर्मुहुः ॥ ११६ ॥ सोऽपि प्रदक्षिणीकृत्य तां च कन्यां मुहुर्मुहुः ॥ नमस्कृत्य क्षमस्वेति त्वं
मातः पुत्रवत्सले ॥ ११७ ॥ तं दृष्ट्वा महदाश्चर्यमानर्तो विस्मयान्वितः ॥ शशंस भर्तृयज्ञं तं प्रायश्चित्तप्रदायकम् ॥ ११८ ॥ अहोऽतीव सुभा
ग्योऽहं यस्य मे गृहमागताः ॥ ईदृशा ब्राह्मणाः सर्वे चमत्कारपुरोद्भवाः ॥ ११९ ॥ तथा चैतादृशी कन्या ह्यसामान्यप्रवर्तिनी ॥ रत्नावती
महाभागा सत्यशौचसमन्विता ॥ १२० ॥ तथाऽयं नैव सामान्यो ब्राह्मणश्च परावसुः ॥ यश्चेदृशीं समासाद्य कन्यां नो विकृतः स्थितः ॥
॥ १२१ ॥ एवमुक्त्वा विसृज्याथ तान्विप्रान्पार्थिवोत्तमः ॥ तां च कन्यां समादाय ततश्चांतःपुरं ययौ ॥ १२२ ॥ अथ ते नागराः
सर्वे मर्यादां चक्रिरे ततः ॥ अद्यप्रभृति या वेश्या स्थानेऽस्मिन्वासमेष्यति ॥ १२३ ॥ तया नैव गृहे धार्यं सुरामांसं कथंचन ॥
दूषयंति सदा दुष्टा नागराणां सुतानिह ॥ १२४ ॥ अथ व्यवस्थामुत्क्रम्य या हि तद्धारयिष्यति ॥ सा दण्ड्यास्माच्च निर्वास्या
प्रेत्य स्यात्पापभागिनी ॥ १२५ ॥ औदुम्बर्या मध्यगेन दत्तं तालत्रयं तदा ॥ १२६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां
षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये परावसुप्रायश्चित्तविधानवृत्तांतवर्णनंनाम सप्तनवत्युत्तरशततमोऽध्यायः ॥ १९७ ॥ ॥ छ ॥ ॥
॥ ॥ सूत उवाच ॥ ॥ एतस्मिन्नेव काले तु दशार्णाधिपतिस्तदा ॥ रत्नवत्या विवाहार्थं तत्र स्थाने समागतः ॥ १ ॥ स श्रुत्वा तत्र वृत्तांतं
रत्नवत्याः समुद्भवम् ॥ विरक्तिं परमां कृत्वा प्रस्थितः स्वपुरं प्रति ॥ २ ॥ तं श्रुत्वा प्रस्थितं भूपमानर्तः स्वपुरं प्रति ॥ पृष्ठतोऽनुययौ तस्य [3]व्याघो
टनकृते तदा ॥ ३ ॥ अथाब्रवीच्च तं प्राप्य कस्मात्त्वं प्रस्थितो नृप ॥ पाणिग्रहमकृत्वा तु मम कन्यासमुद्भवम् ॥ ४ ॥ ॥ दशार्ण उवाच ॥ ॥
दूषितेयं तव सुता कन्यकात्वविवर्जिता ॥ यस्याः पीतोऽधरोऽन्येन मर्दितौ च तथा स्तनौ ॥ ५ ॥ पुनर्भूरिति संज्ञा सा सञ्जाता दुहिता तव ॥
पुनर्भूर्जनयेत्पुत्रं यं कदाचित्कथंचन ॥ ६ ॥ स पातयत्यसंदिग्धं दश पूर्वान्दशापरान् ॥ एकविंशतिमं चैव तथैवात्मानमेव च ॥ ७ ॥ न वरि
ष्याम्यहं तेन सुतां तेऽहं नराधिप ॥ निर्दाक्षिण्यमिति प्रोच्य दशार्णाधिपतिस्तदा ॥ ८ ॥ छंद्यमानोऽपि विविधैर्हस्त्यश्वरथपूर्वकैः ॥ अवज्ञाय
महीपालं प्रस्थितः स्वपुरं प्रति ॥ ९ ॥ अथानर्तो गृहं प्राप्य मृगावत्याः समाकुलः ॥ तद्वृत्तं कथयामास यदुक्तं तेन भूभुजा ॥ स्वभार्यायाः सुता ॥२२१॥

१ राज्ञा—सह—द्विजातिभिः तालाः—हस्ततालिकाः—दत्ताः—इति योजना । २ महासती—इ० पा० । ३ व्याघोटनकृते—परावर्तनार्थम्—परावृत्य विवाहार्थम्—स्वपुरं प्रत्यानयनार्थम्—इत्यर्थः । 'घुट परिवर्तने' इत्यस्य धातो रूपमिदम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

याश्च मन्त्रिणां दुःखसंयुतः ॥ १० ॥ ते प्रोचुः संति भूपालाः संख्याहीना महीतले ॥ रूपाढ्या यौवनोपेता हस्त्यश्वरथसंयुताः ॥ ११ ॥ तेषामेकतमस्य त्वं देहि कन्यां निजां विभो ॥ मा विषादे मनः कृत्वा दुःखस्य वशगो भव ॥ १२ ॥ आनर्तोऽपि च तच्छ्रुत्वा तेषां वाक्यं सुदुःखितम् ॥ ततः प्राह प्रहृष्टात्मा तान्सर्वान्मन्त्रिपूर्वकान् ॥ १३ ॥ तां च कन्यां स्थितां तत्र साम्ना परमवल्गुना ॥ पुत्रि दृष्टा महीपालाः सर्वे चित्रगतास्त्वया ॥ ॥ १४ ॥ तेषां मध्यान्नृपं चान्यं कश्चिद्वरय शोभने ॥ यस्ते चित्तस्य सन्तोषं कुरुते दृक्पथं गतः ॥ १५ ॥ ॥ रत्नावत्युवाच ॥ ॥ न चाहं वरयिष्यामि पतिमन्यं कथंचन ॥ दशार्णाधिपतिं मुक्त्वा श्रूयतामत्र कारणम् ॥ १६ ॥ सकृज्जल्पंति राजानः सकृज्जल्पंति च द्विजाः ॥ सकृत्कन्याः प्रदीयंते त्रीण्येतानि सकृत्सकृत् ॥ १७ ॥ एवं ज्ञात्वा न मां तात त्वमन्यस्मिन्महीपतौ ॥ दातुमर्हसि धर्मोऽयं न भवेच्छाश्वतो यतः ॥१८॥ ॥ ॥ आनर्त उवाच ॥ ॥ वाङ्मात्रेण प्रदत्ता त्वं दशार्णाधिपतेर्मया ॥ न ते हस्तग्रहं प्राप्तो विप्राग्निगुरुसन्निधौ ॥ १९ ॥ तत्कथं स पतिर्जातस्तवः पुत्रि वदस्व मे ॥ २० ॥ ॥ रत्नावत्युवाच ॥ ॥ मनसा चिंत्यते कार्यं सकृत्तात पुरा यतः ॥ वाचया प्रोच्यते पश्चात्कर्मणा क्रियते ततः ॥ २१ ॥ तन्मया मनसा दत्तस्तस्यात्माऽयं पुरा किल ॥ त्वया च वाचया चास्मै प्रदत्तास्मि तथा विभो ॥ तत्कथं न पतिर्मे स्याद्ब्रूहि वा यदि मन्यसे॥२२॥ साहं तपश्चरिष्यामि कौमारव्रतधारिणी ॥ नान्यं पतिं करिष्यामि निश्चयोऽयं मया कृतः ॥ २३ ॥ तच्छ्रुत्वा वचनं रौद्रं माता तस्या मृगावती ॥ अश्रुपूर्णेक्षणा दीना वाक्यमेतदुवाच ह ॥ २४ ॥ मा पुत्रि साहसं कार्षीस्तपोऽर्थं त्वं कथञ्चन ॥ बाला त्वं सुकुमारांगी सदैव सुखभागिनी ॥२५॥ कथं तपः समर्थासि विधातुं त्वमनिंदिते ॥ कन्दमूलफलाहारा चीरवल्कलधारिणी ॥ २६ ॥ तस्मान्मुख्यस्य भूपस्य कस्यचित्त्वां ददाम्यहम् ॥ ॥ २७ ॥ एषा ते ब्राह्मणीनाम सखी परमसंमता ॥ प्रतीक्षते विवाहं ते कौमारं भावमाश्रिता ॥ २८ ॥ यस्य भूपस्य त्वं हर्म्ये प्रयास्यसि विवाहिता ॥ पुरोधास्तस्य यो राज्ञो भार्येयं तस्य भाविनी[1] ॥ २९ ॥ ॥ रत्नावत्युवाच ॥ ॥ न च भूयस्त्वया वाच्यं वाक्यमेवंविधं क्वचित् ॥ मदर्थे यदि मे प्राणांस्त्वं वांछसि सुतैषिणी ॥ ३० ॥ अथवा त्वं हठार्थं च तपोविघ्नं करिष्यसि ॥ ३१ ॥ ततस्त्यक्ष्याम्यहं देहं भक्षयित्वा महद्विषम् ॥ खंडयिष्याम्यहं जिह्वां प्रवेक्ष्यामि च वा जलम् ॥ ३२ ॥ एवं सा निश्चयं कृत्वा प्रोच्य तां जननीं तदा ॥ ३३ ॥ ततः प्रोवाच तां कन्यां ब्राह्मणीं संमतां सखीम् ॥ कृतांजलिपुटा भूत्वा समालिंग्य च सादरम् ॥ ३४ ॥ गच्छ त्वं स्वपितुर्हर्म्यं प्रेषितासि मया शुभे ॥ येन ते

१ भामिनी—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





यच्छति पिता नागराय महात्मने ॥ ३५ ॥ क्षमस्व यन्मया प्रोक्ता कदाचित्परुषं वचः ॥ त्वयापि यन्मम प्रोक्तं क्षांतं चैतन्मया ध्रुवम् ॥ ३६ ॥
॥ ॥ ब्राह्मण्युवाच ॥ ॥ अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी ॥ दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला ॥ ३७ ॥ कौमार्यं च प्रणष्टं मे
त्वत्संपर्काद्वरानने ॥ जातं षोडशकं वर्षं स्त्रीधर्मेण समन्वितम् ॥ ३८ ॥ न मे पाणिग्रहं कश्चिन्नागरोऽत्र करिष्यति ॥ बुध्यमानस्तु स्मृत्यर्थं वक्ष्य
माणं वरानने ॥ ३९ ॥ रजस्वलां च यः कन्यामुद्वाहयति निर्घृणः ॥ तस्याः सन्तानमासाद्य पातयेत्पुरुषान्दश ॥ ४० ॥ रजस्वलां तु यः कन्यां
पिता यच्छति निर्घृणः ॥ स पातयेदसंदिग्धं दश पूर्वान्दशापरान् ॥ ४१ ॥ तस्मादहं करिष्यामि त्वया सार्धं तपः शुभे ॥ पित्रा नैव हि मे कार्यं
न च मात्रा कथंचन ॥ ४२ ॥ ॥ सूत उवाच ॥ ॥ एवं ते निश्चयं कृत्वा कन्यके द्वे द्विजोत्तमाः ॥ गते यत्र स्थितः साक्षाद्भर्तृयज्ञो महामुनिः
॥ ४३ ॥ स्थितो वास्तुपदे रम्ये सर्वतीर्थमये शुभे ॥ तस्य तपःप्रभावेन जातु कोपो न दृश्यते ॥ ४४ ॥ कस्यचित्क्वापि मर्त्यस्य तिर्यग्योनिग
तस्य च ॥ क्रीडंति नकुलाः सर्पैर्मार्जाराः सह मूषकैः ॥ ४५ ॥ सारंगा द्वीपिभिः सार्धं काकाश्च सह कौशिकैः ॥ भर्तृयज्ञं सुखासीनं तत्र गत्वा
तु ते शुभे ॥ प्रोचतुर्विनयोपेते कृतांजलिपुटे स्थिते ॥ ४६ ॥ ॥ ब्राह्मण्युवाच ॥ ॥ अहं सख्या समं याता ह्यनया राजकन्यया ॥ तपोऽर्थे
तव पादांते तद्ब्रूहि तपसो विधिम् ॥ ४७ ॥ वदस्व येन तत्कृत्स्नं प्रकरोमि महामते ॥ ४८ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ अहं ते कथयिष्यामि
तपश्चर्याविधिं पृथक् ॥ येन संप्राप्यते मोक्षः किं पुनस्त्रिदशालयः ॥ ४९ ॥ चांद्रायणानि कृच्छ्राणि तथा सांतपनानि च ॥ षष्ठे काले तथा भोज्यं
दिनांतरितमेव च ॥ ५० ॥ ब्रह्मकूर्चं त्रिरात्रं च एकभक्तमयाचितम् ॥ तपोद्वाराणि सर्वाणि कृतान्येतानि वेधसा ॥ ५१ ॥ स्वशक्त्या चैव कार्याणि
रागद्वेषविवर्जितैः ॥ वांछितव्यं फलं चैव सर्वेषामेव पुत्रिके ॥ ततः सिद्धिमवाप्नोति या सदा मनसि स्थिता ॥ ५२ ॥ समत्वं शत्रुमित्राभ्यां तथा पा
षाणरत्नयोः ॥ यदा संजायते चित्ते तदा मोक्षमवाप्नुयात् ॥ ५३ ॥ यो लिंगग्रहणं कृत्वा ततः कोपपरो भवेत् ॥ तस्य वृथा हि तत्सर्वं यथा भस्महुतं
तथा ॥ ५४ ॥ ॥ सूत उवाच ॥ ॥ सा तथेति प्रतिज्ञाय ब्राह्मणी सहिता तया ॥ रत्नावत्या जगामाथ किंचिच्चैव जलाशयम् ॥ ५५ ॥ स्वच्छोदकेन
संपूर्णं पद्मिनीषंडमंडितम् ॥ ततश्चांद्रायणं चक्रे तपसः प्रथमं व्रतम् ॥ ५६ ॥ ततः कृच्छ्रव्रतं चक्रे ततः सांतपनं च सा ॥ षष्ठान्नकालभोज्या च सा
चाभूद्वत्सरत्रयम् ॥ ५७ ॥ त्रिरात्रोपोषणं पश्चाद्यावद्वर्षत्रयं तथा ॥ एकान्तरोपवासैश्च साऽनयद्वत्सरत्रयम् ॥ ५८ ॥ हेमंते जलमध्यस्था सा बभूव
तपस्विनी ॥ पंचाग्निसाधका ग्रीष्मे सा बभूव यशस्विनी ॥ ५९ ॥ निराश्रयाऽभवत्साध्वी वर्षाकाल उपस्थिते ॥ ध्यायमाना दिवानक्तं देवदेवं



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जनार्दनम् ॥६०॥ यद्व्रतं पुरा चक्रे ब्राह्मणी सा च सुव्रता ॥ अन्यं जलाशयं प्राप्य सा¹ तच्चक्रे नृपात्मजा ॥ प्रीत्या परमया युक्ता तदा सा द्विजसत्तमाः ॥ ६१ ॥ ततो वर्षशतं सार्धं फलाहारा बभूव सा ॥ शीर्णपर्णाशना पश्चात्तावन्मात्रं व्यवस्थिता ॥ ६२ ॥ ततश्चैव जलाहारा यावद्वर्षशतानि षट् ॥ वायुभक्षा बभूवाथ सहस्रं परिवत्सरान् ॥ ६३ ॥ यथायथा तपश्चक्रे सा कुमारी द्विजोत्तमाः ॥ तथातथाऽभवत्तस्यास्तेजोवृद्धिरनुत्तमा ॥६४॥ एतस्मिन्नेव काले तु भगवाञ्छशिशेखरः ॥ ६५ ॥ गौर्या सह प्रसन्नात्मा तस्या गोचरमागतः ॥ मेघगंभीरया वाचा ततो वचनमब्रवीत् ॥ ६६ ॥ वत्से तपोनिवृत्तिं त्वं कुरुष्व वचनान्मम ॥ प्रार्थयस्व मनोऽभीष्टं येन सर्वं ददामि ते ॥ ६७ ॥ ॥ ब्राह्मण्युवाच ॥ ॥ अभीष्टमेतदेवं मे यत्त्वं दृष्टोऽसि शंकर ॥ स्वप्नेऽपि दर्शनं देव दुर्लभं ते नृणां यतः ॥ ६८ ॥ ॥ भगवानुवाच ॥ ॥ न मे स्याद्दर्शनं व्यर्थं कथंचित्सुतपस्विनि ॥ तस्माद्वरय भद्रं ते वरं येन ददाम्यहम् ॥ ६९ ॥ ॥ ब्राह्मण्युवाच ॥ ॥ एषा मे सुसखी साध्वी राजपुत्री यशस्विनी ॥ ख्याता रत्नावतीनाम प्राणेभ्योऽपि गरीयसी ॥ ७० ॥ मम तुल्यं तपश्चक्रे शूद्रयोनावपि² स्थिता ॥ निवर्तते तु यद्येषा तपसस्तु निवर्तनम् ॥ करोम्यद्य जगन्नाथ तदहं संशयं विना ॥ ७१ ॥ अस्याः स्नेहेन संत्यक्तो मया भर्ता सुरेश्वर ॥ तस्मादेव वरं देहि त्वमस्या मनसि स्थितम् ॥ ७२ ॥ ॥ सूत उवाच ॥ ॥ तस्यास्तद्वचनं श्रुत्वा भगवाञ्छशिशेखरः ॥ अब्रवीद्राजपुत्रीं तां मेघगंभीरया गिरा ॥ वत्से मद्वचनादद्य तपस्त्वं त्यक्तुमर्हसि ॥ ७३ ॥ वरं वरय कल्याणि नित्यं मनसि संस्थितम् ॥ अदेयमपि दास्यामि सांप्रतं तव भामिनि ॥ ७४ ॥ ॥ रत्नावत्युवाच ॥ ॥ एतज्जलाशयं पुण्यं पद्मिनीषण्डमण्डितम् ॥ ७५ ॥ यत्रैषा ब्राह्मणी साध्वी नित्यं च तपसि स्थिता ॥ अस्या नाम्ना च विख्यातिं तीर्थमेतत्प्रपद्यताम् ॥ ७६ ॥ अत्र यः कुरुते स्नानं श्रद्धया परया युतः ॥ तस्य भूयात्सदा वासो देवदेव त्रिविष्टपे ॥ ७७ ॥ मदीयं मम नाम्ना तु शूद्रासंज्ञं तु जायताम् ॥ तस्य तुल्यप्रभावं तु तीर्थस्य प्रतिपद्यताम् ॥ ७८ ॥ आवाभ्यां नित्यशः कार्यं कुमारत्वे महत्तपः ॥ आराध्यस्त्वं सुरश्रेष्ठो वाङ्मनःकर्मभिस्तथा ॥ ७९ ॥ एतस्मिन्नेव काले तु निर्भिद्य धरणीतलम् ॥ लिंगं माहेश्वरं विप्रा निष्क्रांतं सूर्यसंनिभम् ॥ ८० ॥ ततः प्रोवाच ते देवः स्वयमेव महेश्वरः ॥ ताभ्यां सुतपसा तुष्टः सादरं भक्तवत्सलः ॥ ८१ ॥ एतत्तीर्थद्वयं ख्यातं त्रैलोक्येपि भविष्यति ॥ शूद्रीनाम त्वदीयं तु ब्राह्मणी च सखी तव ॥ ८२ ॥ तीर्थद्वयेऽपि यः स्नात्वा एतस्मिञ्छ्रद्धयाऽन्वितः ॥ त्वत्तः पद्मानि संगृह्य अस्यास्तोयं च निर्मलम् ॥ एतच्च मामकं लिंगं स्नापयित्वाऽर्चयिष्यति ॥ ८३ ॥

१ सा चक्रे च–इ० पा० । २ अत्र–'शूद्रयोनावपि स्थिता'–इत्युक्त्या किमानर्ताधिपतेः क्षत्रियत्वं नासीदिति संदेहः समुद्भवति ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पश्चात्पद्मैश्चतुर्दश्यां शुक्लायां सोमवासरे ॥ चैत्रे मासि च संप्राप्ते चिरायुः स भविष्यति ॥ ८४ ॥ सर्वपापविनिर्मुक्तो यद्यपि स्यात्सुपापकृत् ॥ ८५ ॥ एवमुक्त्वा स भगवांस्ततश्चादर्शनं गतः ॥ तत्र नित्यं च तपसि स्थिते सख्याबुभावपि ॥ ८६ ॥ यावत्कल्पशतं तावज्जरामरणवर्जिते ॥ अद्यापि गगने ते च दृश्येते तारकात्मके ॥ ८७ ॥ ततःप्रभृति तत्ख्यातं तीर्थयुग्मं धरातले ॥ आगत्याथ नरो दूरात्ताभ्यां कृत्वा निमज्जनम् ॥ ८८ ॥ पूजयित्वा तु तल्लिंगं ततो याति दिवालयम् ॥ महापातकयुक्तोऽपि तत्प्रभावादसंशयम् ॥ ८९ ॥ एतस्मिन्नंतरे मर्त्ये नष्टा धर्मस्य च क्रिया ॥ यज्ञदानकृता या च देवार्चनसमुद्भवा ॥ ९० ॥ व्याप्तस्तथाखिलः स्वर्गो मानवैः स्पर्धयान्वितैः ॥ सार्धं देवैर्विमानस्थैरप्सरोगणसेवितैः ॥ ९१ ॥ एतस्मिन्नेव काले तु धर्मराजः समाययौ ॥ यत्र वेदध्वनिर्ब्रह्मा ब्रह्मलोकं समाश्रितः ॥ ९२ ॥ अब्रवीद्दुःखितो दीनः क्षिप्त्वाग्रे पत्रकद्वयम् ॥ एकं पापसमुद्भूतमन्यद्धर्मसमुद्भवम् ॥ ९३ ॥ चित्रेण लिखितं यच्च विचित्रेण तथा परम् ॥ हाटकेश्वरजे क्षेत्रे देवतीर्थयुगं स्थितम् ॥ ९४ ॥ शूद्राख्यं ब्राह्मणीनाम तथान्यत्पद्ममंडितम् ॥ तथा तत्रास्ति लिंगं च पुण्यं माहेश्वरं महत् ॥ ९५ ॥ त्रयाणामथ तेषां च प्रभावात्सर्वमानवाः ॥ अपि पापसमायुक्ताः प्रयांति त्रिदशालयम् ॥ ९६ ॥ शून्या मे नरका जाताः सर्वे ते रौरवादयः ॥ ९७ ॥ न कश्चिद्यजनं चक्रे न दानं न च तर्पणम् ॥ देवतानां पितॄणां च मनुष्याणां विशेषतः ॥ ९८ ॥ तस्मान्मुक्तो मया सर्वो योऽधिकारस्तवोद्भवः ॥ नियोजयस्व तत्रान्यं कश्चिच्छक्ततमं ततः ॥ ९९ ॥ अप्रमाणं स्थितं सर्वमेतत्पत्रद्वयं मम ॥ तच्छ्रुत्वा पद्मजः प्राह समानीय शतक्रतुम् ॥ १०० ॥ गत्वा शीघ्रतमं मर्त्ये त्वं शक्र वचनान्मम ॥ हाटकेश्वरजे क्षेत्रे तीर्थद्वयमनुत्तमम् ॥ १०१ ॥ शूद्र्याख्यं ब्राह्मणीत्येव यच्च लिंगमनुत्तमम् ॥ तत्रस्थं नाशय क्षिप्रं कृत्वा पांसुप्रवर्षणम् ॥ १०२ ॥ ॥ सूत उवाच ॥ ॥ तच्छ्रुत्वा सत्वरं शक्रो गत्वा भूमितलं ततः ॥ पांसुभिः पूरयामास ते तीर्थे लिंगमेव च ॥ १०३ ॥ अद्यापि कलिकालेऽस्मिन्द्वाभ्यां[1] गृह्य सुमृत्तिकाम् ॥ स्नात्वा च तिलकं कार्यं सर्वपापविशुद्धये ॥ १०४ ॥ चतुर्दशीदिने प्राप्ते सोमवारे च संस्थिते ॥ द्वाभ्यां यः कुरुते श्राद्धं श्रद्धया परया युतः ॥ गयाश्राद्धेन किं तस्य मनुः स्वायंभुवोऽब्रवीत् ॥ १०५ ॥ एतद्वः सर्वमाख्यातं यत्पृष्टोऽस्मि द्विजोत्तमाः ॥ यथा सा ब्राह्मणी जाता शूद्री चापि तथापरा ॥ १०६ ॥ यश्चैतच्छृणुयाद्भक्त्या पठेद्वा द्विजसत्तमाः ॥ सोऽपि तद्दिनजात्पापान्मुच्यते नात्र संशयः ॥ १०७ ॥ एवं नरो न कः सिद्धस्तस्य लिंगस्य

१ द्वाभ्याम्—द्वयोस्तीर्थयोः स्थले—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूजनात् ॥ चिरायुश्च तथा जातो यथान्यो नात्र विद्यते ॥ १०८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शूद्रीब्राह्मणीतीर्थद्वयमाहात्म्यवर्णनंनामाष्टनवत्युत्तरशततमोऽध्यायः ॥ १९८ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ तिस्रः कोट्योऽर्धकोटी च तीर्थानामिह भूतले ॥ श्रूयते सूत कार्त्स्न्येन कीर्त्यमाना मुनीश्वरैः ॥ १ ॥ कथं लभ्येत सर्वेषां तीर्थानां स्नानजं फलम् ॥ अल्पायुर्भिर्महाभाग कलिकाल उपस्थिते ॥ २ ॥ ॥ सूत उवाच ॥ ॥ क्षेत्रत्रयमिहाख्यातं तथारण्यत्रयं महत् ॥ पुरीत्रयं वनान्येव त्रीणि ग्रामास्तथा त्रयः ॥ ३ ॥ तथा तीर्थत्रयं चान्यत्पर्वतत्रितयान्वितम् ॥ महानदीत्रयं चैव सर्वपातकनाशनम् ॥ ४ ॥ मर्त्यलोके स्थितं विप्राः सर्वतीर्थफलप्रदम् ॥ सर्वेष्वेतेषु यः स्नाति स सर्वेषां फलं लभेत् ॥ ५ ॥ चतुर्विंशतिसंख्यानामिदमाह प्रजापतिः ॥ य एकस्मिंस्त्रिके स्नाति सर्व त्रिकफलं लभेत् ॥ ६ ॥ ॥ ऋषय ऊचुः ॥ ॥ त्रीणि क्षेत्राणि कानीह तथारण्यानि कानि च ॥ पुर्यस्तिस्रो महाभाग काः ख्याताश्च वनानि च ॥ ७ ॥ के ग्रामाः कानि तीर्थानि के नगाः सरितश्च काः ॥ नामभिर्वद नः सूत सर्वाण्येतानि विस्तरात् ॥ ८ ॥ ॥ सूत उवाच ॥ ॥ कुरुक्षेत्रमिति ख्यातं प्रथमं क्षेत्रमुत्तमम् ॥ हाटकेश्वरजं क्षेत्रं द्वितीयं परिकीर्तितम् ॥ ९ ॥ प्राभासिकं तृतीयं तु क्षेत्रं हि द्विजसत्तमाः ॥ एतत्क्षेत्रत्रयं पुण्यं सर्वपातकनाशनम् ॥ १० ॥ यथोक्तविधिना दृष्ट्वा नरः पापात्प्रमुच्यते ॥ यो यं काममभिध्यायन्क्षेत्रेष्वेतेषु भक्तितः ॥ ११ ॥ स्नानं करोति तस्येष्टं मनसो जायते फलम् ॥ चतुर्विंशतिमानेषु स्नातो भवति स द्विजाः ॥ १२ ॥ एकं तु पुष्करारण्यं नैमिषारण्यमेव च ॥ धर्मारण्यं तृतीयं तु तेषां संकीर्त्यते द्विजाः ॥ १३ ॥ त्रिष्वेतेषु च यः स्नाति चतुर्विंशतिभाग्भवेत् ॥ १४ ॥ वाराणसी पुरीत्येका द्वितीया द्वारकापुरी ॥ अवन्त्याख्या तृतीया च विश्रुता भुवनत्रये ॥ १५ ॥ एतासु यो नरः स्नाति चतुर्विंशतिभाग्भवेत् ॥ १६ ॥ वृन्दावनं वनं चैकं द्वितीयं खांडवं वनम् ॥ ख्यातं द्वैतवनं चान्यत्तृतीयं धरणीतले ॥ १७ ॥ त्रिष्वेतेषु च यः स्नाति चतुर्विंशतिभाग्भवेत् ॥ १८ ॥ कल्पग्रामः स्मृतश्चैकः शालिग्रामो द्वितीयकः ॥ नंदिग्राम स्तृतीयस्तु विश्रुतो द्विजसत्तमाः ॥ १९ ॥ त्रिष्वेतेषु च यः स्नाति चतुर्विंशतिभाग्भवेत् ॥ २० ॥ अग्नितीर्थं स्मृतं चैकं शुक्लतीर्थमथापरम् ॥ तृतीयं पितृतीर्थं तु पितॄणामतिवल्लभम् ॥ २१ ॥ त्रिष्वेतेषु च यः स्नाति चतुर्विंशतिभाग्भवेत् ॥ २२ ॥ श्रीपर्वतः स्मृतश्चैको द्वितीयश्चार्बुदस्तथा ॥ तृतीयो रैवताख्योऽत्र विख्यातः पर्वतोत्तमाः ॥ २३ ॥ त्रिष्वेतेषु च यः स्नाति चतुर्विंशतिभाग्भवेत् ॥ २४ ॥ गंगा नदी स्मृता पूर्वा नर्मदाख्या

१ कानि—इति शेषः । २ नगाः—पर्वताः—इत्यर्थः । 'शैलवृक्षौ नगावगौ'—इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तथा परा ॥ सरस्वती तृतीया तु नदी प्लक्षसमुद्भवा ॥ २५ ॥ आसु सर्वासु यः स्नाति चतुर्विंशतिभाग्भवेत् ॥ २६ ॥ एतेष्वेव हि सर्वेषु यः स्नानं कुरुते नरः ॥ सार्धकोटित्रयस्यात्र स कृत्स्नं फलमाप्नुयात् ॥ २७ ॥ यश्चैकस्मिन्नरः स्नाति स त्रिकस्य फलं लभेत् ॥ २८ ॥ एतद्वः सर्वमाख्यातं यत्पृष्टोऽस्मि द्विजोत्तमाः ॥ संक्षेपात्तीर्थजं पुण्यं लभ्यते यन्नरैर्भुवि ॥ २९ ॥ सांप्रतं किं नु वो वच्मि यत्तद्वदत मा चिरम् ॥ ३० ॥ ॥ ऋषय ऊचुः ॥ ॥ हाटकेश्वरजे क्षेत्रे यानि तीर्थानि सूतज ॥ तानि प्रोक्तानि सर्वाणि त्वयाऽस्माकं सुविस्तरात् ॥ ३१ ॥ तथा चायतनान्येव संख्यया रहितानि च ॥ अपि वर्षशतेनात्र स्नानं कर्तुं न शक्यते ॥ ३२ ॥ तेषु सर्वेषु मर्त्येन यथोक्तविधिना स्फुटम् ॥ देवतायतनान्येव तथा द्रष्टुं महामते ॥ ३३ ॥ यस्मिन्स्नातो दिने चैव तस्य व्युष्टिः[1] प्रकीर्तिता ॥ अल्पायुषस्तदा मर्त्याः कृतेऽपि परिकीर्तिताः ॥ ३४ ॥ त्रेतायां द्वापरे चापि किमु प्राप्ते कलौ युगे ॥ एवमल्पायुषो ज्ञात्वा मानवान्सूतनंदन ॥ ३५ ॥ लभेरंश्च कथं सर्वतीर्थानां स्नानजं फलम् ॥ देवदर्शनजं वापि विशेषान्निर्धनाश्च ये ॥ ३६ ॥ अस्ति कश्चिदुपायोऽत्र दैवो वा मानुषोऽपि वा ॥ येन तेषां भवेत्पुण्यं सर्वेषामेव हेलया ॥ ३७ ॥ ॥ सूत उवाच ॥ ॥ अस्मिन्नर्थे पुरा पृष्टो विश्वामित्रो महामुनिः ॥ समुपेत्याश्रमं तस्य आनर्तेन महीभुजा ॥ ३८ ॥ ॥ राजोवाच ॥ ॥ भगवन्नत्र तीर्थानि संख्यया रहितानि च ॥ तेषु स्नानविधिः प्रोक्तः सर्वेष्वेव पृथक्पृथक् ॥ ३९ ॥ मासे वारे दिने चैव कुत्रचिन्मुनिसत्तमैः ॥ दानानि च तथोक्तानि यथा स्नानविधिस्तथा ॥ ४० ॥ देवानां दर्शनं चापि पृथक्त्वेन प्रकीर्तितम् ॥ न शक्यते फलं प्राप्तुं सर्वेषां केनचिन्मुने ॥ ४१ ॥ अपि वर्षशतेनापि किं पुनः स्तोकवासरैः॥ तस्माद्वद महाभाग सुखोपायं च देहिनाम् ॥४२॥ एकस्मिन्नपि च स्नातस्तीर्थे प्राप्नोति मानवः॥ सर्वेषामेव तीर्थानां स्नानजं सकलं फलम् ॥ ४३ ॥ तथैकस्मिन्सुरे दृष्टे सर्वदेवसमुद्भवम् ॥ फलं दर्शनजं भावि नराणां द्विजसत्तम ॥ ४४ ॥ ॥ सूत उवाच ॥ ॥ तच्छ्रुत्वा सुचिरं ध्यात्वा विश्वामित्रो महामुनिः ॥ अब्रवीच्छृणु राजेंद्र सरहस्यं वदामि ते ॥ ४५ ॥ चत्वार्यत्र प्रकृष्टानि मुख्यतीर्थानि पार्थिव ॥ येषु स्नाने कृते राजञ्छ्राद्धे च तदनंतरम् ॥ सर्वेषामेव तीर्थानां स्नानजं लभ्यते फलम् ॥ ४६ ॥ सप्तविंशतिलिंगानि तथात्रैव स्थितानि च ॥ सिद्धेश्वरप्रपूर्वाणि सर्वपापहराणि च ॥ ४७ ॥ तेषु सर्वेषु दृष्टेषु भक्त्या पूतेन[2] चेतसा ॥ सर्वेषामेव देवानां भवेद्दर्शनजं फलम् ॥ ४८ ॥ एकस्मिन्नपि संदृष्टे पूजिते वा सुरोत्तमे ॥ सप्तविंशतिलिंगानां पूजा तेन कृता भवेत् ॥ ४९ ॥ ॥ राजोवाच ॥ ॥ कानि चत्वारि तीर्थानि तत्र मुख्यानि सन्मुने ॥



१ व्युष्टिः—फलम्—इत्यर्थः । २ श्रद्धापूतेन—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येषु स्नातो नरः सम्यक्सर्वेषां लभते फलम् ॥ ५० ॥ ॥ विश्वामित्र उवाच ॥ ॥ अत्रास्ति कूपिका पुण्या यस्यां संश्रयते गया ॥ कृष्णपक्षे चतुर्दश्याममावास्यादिने तथा ॥ ५१ ॥ विशेषेण महाभाग कन्यासंस्थे दिवाकरे ॥ निर्विण्णा भूमिलोकानां कृतैः श्राद्धैरनेकधा ॥ ५२ ॥ यस्तस्यां कुरुते श्राद्धं सम्यक्छ्रद्धासमन्वितः ॥ ५३ ॥ तस्मिन्नहनि राजेंद्र स संतारयते पितॄन् ॥ तथा तीर्थं द्वितीयं तु शंखतीर्थमिति स्मृतम् ॥ ॥ ५४ ॥ तत्र स्नात्वा नरो यस्तु पश्येच्छंखेश्वरं ततः ॥ सर्वेषां फलमाप्नोति माघस्य प्रथमेऽहनि ॥ ५५ ॥ तथा मन्नामकं तीर्थं तृतीयं मुख्यतां गतम् ॥ अत्र स्नात्वा तु यः पश्येन्मया संस्थापितं हरम् ॥ ५६ ॥ विश्वामित्रेश्वरंनाम सर्वेषां स फलं लभेत् ॥ नभस्यस्य सिताष्टम्यां सर्वेषां लभते फलम् ॥ ५७ ॥ शक्रतीर्थमिति ख्यातं चतुर्थं बालमण्डनम् ॥ तत्र स्नात्वा च पंचाहं शक्रेश्वरमवेक्ष्य च ॥ आश्विनस्य सितेऽष्टम्यां सर्वेषां लभते फलम् ॥ ५८ ॥ ॥ राजोवाच[1] ॥ ॥ विधानं वद मे विप्र गयाकूप्याः समुद्भवम् ॥ विस्तरेण महाभाग श्रद्धा मे महती स्थिता ॥ ५९ ॥ ॥ ॥ विश्वामित्र उवाच ॥ ॥ अमावास्यादिने प्राप्ते तत्र कन्यागते रवौ ॥ यः श्राद्धं कुरुते भक्त्या स पितॄंस्तारयेन्निजान् ॥ ६० ॥ भर्तृयज्ञविधानेन शुद्धैः स्थानोद्भवैर्द्विजैः ॥ भर्तृयज्ञविधिं त्यक्त्वा योऽन्येन विधिना नरः ॥ ६१ ॥ श्राद्धं करोति मूढात्मा विहीनं स्थानजैर्द्विजैः ॥ स्थानजैरपि वाऽशुद्धैस्तस्य तद्व्यर्थतां व्रजेत् ॥ ६२ ॥ वृष्टिः स्यादूषरे यद्वत्सत्यमेतन्मयोदितम् ॥ अंधस्याग्रे यथा नृत्यं प्रगीतं बधिरस्य च ॥ तथा च व्यर्थतां याति अन्यस्थानोद्भवैर्द्विजैः ॥ ६३ ॥ ब्राह्मणैः कारयेच्छ्राद्धं मूर्खैरपि द्विजोत्तमाः ॥ चतुर्वेदा अपि त्याज्या अन्यस्थानसमुद्भवाः ॥६४॥ दवे कर्मणि पित्र्ये वा सोमपाने विशेषतः॥ देशांतरगतो यस्तु श्राद्धं च कुरुते नरः ॥ वैश्वानरपुरस्तेन[2] कार्यं नान्यद्विजस्य च ॥ ६५॥ संनिवेश्य दर्भवटून्छ्राद्धं कुर्याद्द्विजोत्तमाः ॥ दक्षिणा भोजनं देयं स्थानिकानां चिरादपि ॥ ६६ ॥ पंचगव्यस्य संपूर्णो यथा कुम्भः प्रदुष्यति ॥ बिंदुनैकेन मद्यस्य पतितेन नृपोत्तम ॥ ६७ ॥ एकेनापि च बाह्येन बहूनामपि भूपते ॥ मध्ये समुपविष्टेन तच्छ्राद्धं दोषमाप्नुयात् ॥ ६८ ॥ स्थानजोऽपि चतुर्वेदो यद्यपि स्यान्न शुद्धिभाक् ॥ बहूनामपि शुद्धानां मध्ये श्राद्धं विनाशयेत् ॥ ६९ ॥ तस्मात्सर्वप्रयत्नेन शुद्धं ब्राह्मणमानयेत् ॥ ७० ॥ स्थानिकं मूर्खमप्येवमलाभे गुणिनामपि ॥ हीनांगमधिकांगं वा दूषितं नो तथा परम्[3] ॥ ७१ ॥ कन्यादाने तथा श्राद्धे कुलीनो ब्राह्मणः सदा ॥

१ महाराज—इ० पा० । २ वैश्वानरपुरः—अग्निमेव द्विजं स्थापयित्वा तत्पुरः श्राद्धं कर्तव्यम् अन्यद्विजस्य पुरतः न कार्यम्—अन्यदेशोद्भवं द्विजं ब्राह्मणस्थाने संस्थाप्य--श्राद्धं न कर्तव्यम्—एतेन--तत्क्षेत्रभवब्राह्मणानामेव तस्मिन्क्षेत्रे श्राद्धयोग्यता नान्यदेशोद्भवानामिति सूचितम् । ३ परम्--अन्यस्थानीयम्--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आहर्तव्यः प्रयत्नेन य इच्छेच्छुभमात्मनः ॥ सोऽपि शुद्धिसमायुक्तो यदि स्यान्नृपसत्तम ॥ ७२ ॥ वृक्षाणां च यथाऽश्वत्थो देवतानां यथा हरिः॥
श्रेष्ठस्थानजविप्राणां तथा चाष्टकुलोद्भवः ॥ ७३ ॥ आयुधानां यथा वज्रं सरसां सागरो यथा ॥ श्रेष्ठस्थानजविप्राणां तथाष्टकुलसंभवः ॥ ७४ ॥
उच्चैःश्रवा यथाऽश्वानां गजानां शक्रवाहनः ॥ श्रेष्ठस्थानजविप्राणां तथाष्टकुलसंभवः ॥ ७५ ॥ नदीनां च यथा गंगा सतीनां चाप्यरुंधती ॥
तद्वत्स्थानजविप्राणां श्रेष्ठोऽष्टकुलिकः स्मृतः ॥ ७६ ॥ ग्रहाणां भास्करो यद्वन्नक्षत्राणां निशाकरः ॥ तद्वत्स्थानजविप्राणां श्रेष्ठोऽष्टकुलिकः
स्मृतः ॥ ७७ ॥ पर्वतानां यथा मेरुर्द्विपदानां द्विजोत्तमः ॥ स्थानजानां तु विप्राणां श्रेष्ठोऽष्टकुलिकस्तथा ॥ ७८ ॥ पक्षिणां गरुडो यद्वत्सिंहोऽ
रण्यनिवासिनाम् ॥ स्थानजानां तु विप्राणां श्रेष्ठोऽष्टकुलिकस्तथा ॥ ७९ ॥ एवं ज्ञात्वा प्रयत्नेन श्राद्धे यज्ञे च पार्थिव ॥ कन्यादाने विशेषेण
योज्यश्चाष्टकुलोद्भवः ॥ ८० ॥ नृत्यंति पितरस्तस्य गर्जंति च पितामहाः ॥ वेदिमूले समालोक्य प्राप्तमष्टकुलं नृप ॥ ८१ ॥ पुनर्वदंति संहृष्टाः
किमस्माकं प्रदास्यति ॥ दौहित्रश्चापसव्येन जलं दर्भतिलान्वितम् ॥ ८२ ॥ ॥ राजोवाच ॥ ॥ यदेतद्भवता प्रोक्तं श्रेष्ठत्वमष्टकुलोद्भवम् ॥
सर्वेषां नागराणां च तत्किं वद महामते ॥८३॥ न ह्यत्र कारणं स्वल्पं भविष्यति द्विजोत्तम ॥ ८४ ॥ ॥ विश्वामित्र उवाच ॥ ॥ सत्यमेतन्महाराज
यत्त्वया व्याहृतं वचः ॥ अन्येऽपि नागराः संति वेदवेदांगपारगाः॥८५॥ श्राद्धार्हा यज्ञयोग्याश्च कन्यायोग्या विशेषतः॥ परं ते स्थापिता राजन्स्व
यमिंद्रेण तत्र च ॥ ८६ ॥ प्रधानत्वेन सर्वेषां नागरैश्चापि कृत्स्नशः ॥ तेन ते गौरवं प्राप्ताः स्थानेत्रैव विशेषतः ॥ ८७ ॥ तस्माच्छ्राद्धं प्रकर्तव्यं विप्रै
श्चाष्टकुलोद्भवैः ॥ अप्राप्तौ चैव तेषां तु कार्यं नागरसंभवैः ॥ ८८ ॥ नान्यस्थानसमुद्भूतैश्चतुर्वेदैरपि द्विजैः ॥ भर्तृयज्ञेन मर्यादा कृता ह्येषा महा
त्मना ॥ ८९ ॥ मुक्त्वा तु नागरं विप्रं योऽन्येनात्र करिष्यति ॥ श्राद्धं वा यदि वा यज्ञं व्यर्थं तस्य भविष्यति ॥ ९० ॥ ॥ राजोवाच ॥ ॥
संत्यन्ये विविधा विप्रा वेदवेदांगपारगाः ॥ मध्यदेशोद्भवाः शान्तास्तथान्ये तीर्थसंभवाः ॥ ९१ ॥ भर्तृयज्ञेन ये त्यक्ताः श्राद्धे यज्ञे विशेषतः ॥
हीनांगाश्चाधिकांगाश्च द्विर्नग्नाः[1] श्यावदंतकाः ॥ ९२ ॥ कुनखाः कुष्ठसंयुक्ता मूर्खा अपि विगर्हिताः ॥ श्राद्धार्हाः सूचितास्तेन एतं मे संशयं

१ द्विर्नग्नाः–इत्यस्य पंचकच्छविहीनाः इति, वेदशास्त्रवर्णाश्रमाचारपरिभ्रष्टाः–इति चार्थः । तथा चोक्तमाह्निकतत्त्वे "द्विकच्छः कच्छशेषश्च मुक्तकच्छस्तथैव च । एकवासा अवासाश्च नग्नः पंचविधः स्मृतः॥" इति । अन्यत्रोक्तं मार्कण्डेयपुराणे सदाचाराध्याये–"येषां कुले न वेदोऽस्ति न शास्त्रं नैव च व्रतम् । ते नग्नाः कीर्तिताः सद्भिस्तेषामन्नं विगर्हितम् ॥" इति । किं च वैष्णवपुराणेऽष्टादशेऽध्याये–"ऋग्यजुःसामसंज्ञेयं त्रयी वर्णावृतिर्द्विज एतामुज्झति यो मोहात्स नग्नः पातकी स्मृतः । यस्तु संत्यज्य गार्हस्थ्यं वानप्रस्थो न जायते । परिव्राडपि मैत्रेय स नग्नः पापकृन्नरः ॥" इति ।

CC-0. In Public Domain. Digitization by eGangotri

वद ॥ ९३ ॥ ॥ विश्वामित्र उवाच ॥ ॥ कीर्तयिष्ये नरव्याघ्र कारणानि बहूनि च ॥ चमत्कारस्य पत्न्याश्च दानेन पतिता यतः॥ ९४ ॥ स्त्रीणां प्रतिग्रहेणैव विप्रेषु प्रोषितेषु च ॥ पृथक्त्वं च ततो जातं बाह्याभ्यन्तरसंज्ञकम् ॥ ९५ ॥ दुर्वाससा ततः शप्ता रुष्टेनेवाहिना यथा ॥ विद्याधना भिमानेन शापेन पतिताः सदा ॥ ९६ ॥ कुशे राज्यगते राजन्राक्षसानां महाभयम् ॥ प्रजयाऽऽवेदितं सर्वं तस्य राज्ञो महात्मनः ॥ ९७ ॥ विभीषणस्य लंकायां दूतश्च प्रेषितस्तदा ॥ सर्वं निवेदयामास प्रजानां भयसंभवम् ॥ ९८ ॥ अभिवन्द्य कुशादेशं रामस्य चरितं स्मरन् ॥ पुर्यां विलोकयामास लङ्कायां रामशासनात् ॥ ९९ ॥ उपप्लवस्य कर्तारो नष्टाः सर्वे दिशो दश ॥ गन्धर्वाणां च लोकं हि भयेन महता गताः ॥ १०० ॥ स्थातुं तत्र न शक्तास्ते विभीषणभयेन च ॥ पृथिव्यां समनुप्राप्ताः स्थानान्यपि बहूनि च ॥ १०१ ॥ भयेन महता तत्र कुशस्यैव तु शासने ॥ ब्राह्मणानां च रूपाणि कृत्वा तत्र समागताः ॥ १०२ ॥ वाडवानां महिम्ना च मध्ये स्थातुं न तेऽशकन् ॥ पतितानां च संस्थानं चमत्कारपुरं गताः ॥ १०३ ॥ मायाविशारदैस्तैश्च धनेन विद्यया ततः ॥ अर्धं जग्धं ततस्तैस्तु तेषां मध्ये स्थितं च तैः ॥ १०४ ॥ ततःप्रभृति ते सर्वे राक्षसत्वं प्रपेदिरे ॥ क्रूराण्यपि च कर्माणि कुर्वंति च पदेपदे ॥ १०५ ॥ ततस्ते सर्वथा राजन्वर्जनीयाः प्रयत्नतः ॥ श्राद्धे यज्ञे नरव्याघ्र नरके पातयंति च ॥ ॥ १०६ ॥ अन्यच्च दूषणं तेषां कीर्तयिष्ये तवाऽनघ ॥ त्रिजाताः स्थापिता राजन्सर्पाणां गरनाशनात् ॥ १०७ ॥ नगरत्वं ततो जातं चमत्कारपुरस्य तु ॥ त्रिजातत्वं तु सर्वेषां जातं तत्र विशेषतः ॥ १०८ ॥ एतेभ्यः कारणेभ्यश्च भर्तृयज्ञेन वर्जिताः ॥ पुनश्च कारणं तेषां स्पर्शादपि न शुद्धिभाक् ॥ १०९ ॥ कुम्भकोत्थं च संप्राप्तं महच्चण्डालसंभवम् ॥ ११० ॥ ॥ राजोवाच ॥ ॥ एतच्च कारणं विप्र कथयस्व प्रसादतः ॥ स्थावरस्य चरस्यैव जगतो ज्ञानमस्ति ते ॥ १११ ॥ ॥ विश्वामित्र उवाच ॥ ॥ अत्र ते कीर्तयिष्यामि पूर्ववृत्तकथांतरम् ॥ भर्तृयज्ञेन ये त्यक्ताः सर्वेऽन्ये ब्राह्मणोत्तमाः ॥ ११२ ॥ वर्धमाने पुरे पूर्वमासीदंत्यजजातिजः ॥ चण्डालः कुंभकोनाम निर्दयः पापकर्मकृत्[1] ॥ ११३ ॥ कस्यचित्त्वथ कालस्य तस्य पुत्रो बभूव ह ॥ विरूपस्यापि रूपाढ्यः पूर्वकर्मप्रभावतः ॥ ११४ ॥ पिंगाक्षस्य सुकृष्णस्य वयोमध्यस्य पार्थिव ॥ दक्षः सर्वेषु कृत्येषु सर्वलक्षणलक्षितः ॥ ११५ ॥ स वृद्धिं द्रुतमभ्येति शुक्लपक्षे यथोडुराट् ॥ तथाऽसौ शंस्यमानस्तु सर्वलोकैः सुरूपभाक् ॥ दृष्ट्वा कुटुंबकं नित्यं वैराग्यं परमं गतः ॥११६॥ ततो देशांतरं दुःखाद्भ्रममाण इतस्ततः ॥ चमत्कारपुरं प्राप्तो द्विजरूपं समाश्रितः ॥ स स्नाति सर्वकृत्येषु भिक्षा

१ कामपापकृत्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





व्रतभोजनः ॥ ११७ ॥ एतस्मिन्नेव काले तु ब्राह्मणः शंसितव्रतः ॥ छांदोग्यगोत्रविख्यातः सुभद्रोनाम पार्थिवः ॥ ११८ ॥ नागरो वर्षयाजी च वेदवेदांगपारगः ॥ तत्रासीत्तस्य सञ्जाता कन्यका द्विगुणै रदैः ॥ ११९ ॥ तथा त्रिभिःस्तनै रौद्रा पृष्ठचावर्तकसंयुता ॥ दरिद्रोऽपि सुदुःस्थोऽपि कुलहीनोपि पार्थिव॥१२०॥ दीयमानामपि न तां प्रतिगृह्णाति कश्चन ॥ यद्भक्षयति भर्तारं षण्मासाभ्यंतरे हि सा ॥१२१॥ यस्याः स्युर्द्विगुणा दंता एवं सामुद्रिका जगुः ॥ त्रिस्तनी कन्यका या तु श्वशुरस्य कुलक्षयम् ॥ संधत्ते नात्र सन्देहस्तस्मात्तां दूरतस्त्यजेत् ॥१२२॥ पृष्ठचावर्ता भवेद्यस्या असती सा भवेद्ध्रुवम् ॥ बहुपापसमाचारा तस्मात्तां परिवर्जयेत् ॥ १२३ ॥ अथ तां वृद्धिमापन्नां दृष्ट्वा विप्रः सुभद्रकः ॥ चिन्ताचक्रं समारूढो न शांतिमधिगच्छति ॥ १२४ ॥ किं करोमि क्व गच्छामि कथमस्याः पतिर्भवेत् ॥ न कश्चित्प्रतिगृह्णाति प्रार्थितोऽपि मुहुर्मुहुः ॥ १२५ ॥ दरिद्रो व्याधितो वाऽपि वृद्धोऽपि ब्राह्मणो हि सः ॥ स्मृतौ यस्मादिदं प्रोक्तं कन्यार्थे प्राङ्महर्षिभिः ॥ १२६ ॥ अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी ॥ दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला ॥ १२७ ॥ माता चैव पिता चैव ज्येष्ठो भ्राता तथैव च ॥ त्रयस्ते नरकं यांति दृष्ट्वा कन्यां रजस्वलाम् ॥ १२८ ॥ एवं चिन्तयतस्तस्य सोंऽत्यजो द्विजरूपधृक् ॥ भिक्षार्थं तद्गृहं प्राप्तो दृष्टस्तेन महात्मना ॥ १२९ ॥ पृष्टश्च विस्मयात्तेन दृष्ट्वा रूपं तथाविधम् ॥ कुतस्त्वमिह सम्प्राप्तः क्व यास्यसि च भिक्षुक ॥ १३० ॥ ईदृग्भव्यतरो भूत्वा कस्मान्माधुकरीं गतः ॥ किं गोत्रं तव मे ब्रूहि कतमः प्रवरश्च ते ॥ १३१ ॥ सोऽब्रवीद्गौडदेशीयं स्थानं मे सुमहत्तरम् ॥ नाम्ना भोजकटं ख्यातं नानाद्विजसमाश्रितम् ॥ १३२ ॥ तत्रासीन्माधवोनाम ब्राह्मणो वेदपारगः ॥ वसिष्ठगोत्रविख्यात एकप्रवरसूचितः ॥ ॥ १३३ ॥ तस्याहं तनयो नाम्ना चंद्रप्रभ इति स्मृतः ॥ १३४ ॥ ततोऽहमष्टमे वर्षे यदा व्रतधरः स्थितः ॥ तदा पंचत्वमापन्नः पिता मे वेदपारगः ॥ १३५ ॥ माता मे सह तेनैव प्रविष्टा हव्यवाहनम् ॥ ततो वैराग्यमापन्नो निष्क्रांतोऽहं निजालयात् ॥ १३६ ॥ तीर्थानि भ्रममाणोऽत्र संप्राप्तस्तु पुरं तव ॥ अधुना संप्रयास्यामि प्रभासं क्षेत्रमुत्तमम् ॥ १३७ ॥ यत्र सोमेश्वरो देवस्त्यक्त्वा कैलासमागतः ॥ न मया पठिता वेदा न च शास्त्रं नृपोत्तम ॥ तीर्थयात्राप्रसंगेन तेन भिक्षां चराम्यहम् ॥ १३८ ॥ ॥ विश्वामित्र उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा चिन्तयामास चेतसि ॥ ब्राह्मणोऽयं सुदेशीयस्तथा भव्यतमाकृतिः ॥ यदि गृह्णाति मे कन्यां तदस्मै प्रददाम्यहम् ॥ १३९ ॥ यावद्रजस्वला नैव जायते सा निरूपिता ॥ कृत्स्नं दूषयति क्षिप्रं नैव वंशं ममाधमा ॥ १४० ॥ ततः प्रोवाच तं म्लेच्छं संमंत्र्य सह भार्यया ॥ यदि गृह्णासि मे कन्यां तव यच्छाम्यहं



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विज ॥ १४१ ॥ भरणं पोषणं द्वाभ्यां करिष्यामि सदैव हि ॥१४२॥ तच्छुत्वा हर्षितः प्राह सोंऽत्यजो नृपसत्तमम् ॥ तवादेशं करिष्यामि यच्छ मे कन्यकां नृप ॥ १४३ ॥ तथेत्युक्त्वा गतस्तेन तस्मै दत्ता निजा सुता ॥ गृह्योक्तेन विधानेन विवाहो विहितस्ततः ॥ १४४ ॥ ततो ददौ धनं धान्यं गृहं क्षेत्रं च गोधनम् ॥ तस्मै तुष्टिसमायुक्तो मन्यमानः कृतार्थताम् ॥ १४५ ॥ अथ सोऽपि च तां प्राप्य विलासानकरोद्बहून् ॥ खाद्यैः पानैः सुवस्त्रैश्च गन्धमाल्यैर्विभूषणैः ॥ १४६ ॥ परं स व्रजति प्रायो येन मार्गेण केनचित् ॥ सारमेयाः सशब्दाश्च पृष्ठतोऽनुव्रजंति वै ॥ १४७ ॥ अन्येषामंत्यजात्यानां यद्वत्तस्य विशेषतः ॥ वेदाभ्यासपरश्चैव यदि संजायते क्वचित् ॥ रक्तं पतति वक्त्रेण तत्क्षणात्तस्य दुर्मतेः ॥ १४८ ॥ एतस्मिन्नंतरे लोकः सर्व एव प्रशंकितः ॥ अब्रवीच्च मिथोऽभ्येत्य चंडालोऽयमसंशयम् ॥ १४९ ॥ यदेते पृष्ठतो यांति भषमाणाः शुनीसुताः ॥ सुभद्रोऽपि च तत्तेषां श्रुत्वा चिन्तापरोऽभवत् ॥ १५० ॥ मन्यमानश्च तत्सत्यं दुःखेन महतान्वितः ॥ नूनमंत्यजजातीयो भविष्यति सुतापतिः ॥ १५१ ॥ ज्ञायते चेष्टितैः सर्वैर्यथाऽयं जल्पते जनः ॥ १५२ ॥ एवं रात्रिंदिवं तस्य चिन्तयानस्य भूपतेः ॥ लोकापवादयुक्तस्य कियान्कालोऽभ्यवर्तत ॥ १५३ ॥ अन्यस्मिन्नहनि प्राप्ते आद्याद्या द्विजसत्तमाः ॥ मध्यगेन समायुक्ता ब्रह्मस्थानं समागताः ॥ तस्य शुद्धिकृते प्रोचुर्येन शंका प्रणश्यति ॥ १५४ ॥ अथोचुस्तं द्विजश्रेष्ठा ब्रह्मस्थानस्य मध्यगम् ॥ मध्यगस्य तु वक्त्रेण विवर्णवदनं स्थितम् ॥ १५५ ॥ कुलं गोत्रं निजं ब्रूहि प्रवरांश्च विशेषतः ॥ स्थानं देशं च विप्राणां येन शुद्धिः प्रदीयते ॥ १५६ ॥ अथासौ वेपमानस्तु प्रस्विन्नवदनस्तथा ॥ अधोदृष्टिरुवाचेदं गद्गदं विहिताञ्जलिः ॥ १५७ ॥ गर्भाष्टमे पिता मह्यं[1] वर्षे मृत्युं गतस्ततः ॥ ततः सा तं समादाय जननी मे पतिव्रता[2] ॥ मां त्यक्त्वा दुःखितं दीनं प्रविष्टा हव्यवाहनम् ॥ १५८ ॥ अहं वैराग्यमापन्नस्तीर्थयात्रां समाश्रितः ॥ बालभावे पितुर्दुःखात्तापसैरपरैः सह ॥ १५९ ॥ न मया पठितो वेदो न च शास्त्रं निरूपितम् ॥ तीर्थयात्रापरोऽहं च समायातो भवत्पुरम् ॥ १६० ॥ अभद्रेण सुभद्रेण श्वशुरेण दुरात्मना ॥ एतज्जानाम्यहं विप्रा गोत्रं वासिष्ठमेव वा ॥ १६१ ॥ अथैकप्रवरो देशो गौडो मधुपुरं पुरम् ॥ ततस्ते ब्राह्मणाः प्रोचुर्यस्य नो ज्ञायते कुलम् ॥ तस्य शुद्धिः प्रदातव्या घटद्वारेण केवला ॥१६२॥ स त्वं घटं समारुह्य ब्राह्मण्यार्थं च केवलम् ॥ शुद्धिं प्राप्य ततो भोगान्भुंक्ष्वात्रस्थोऽपि केवलम् ॥ १६३ ॥ सोऽब्रवीत्साहसं कृत्वा सर्वानेव द्विजोत्तमान् ॥ प्रतिगृह्णाम्यहं कामं तप्तमाषकमेव च॥१६४॥प्रविशामि हुताशं वा भक्षयिष्याम्यहं विषम्॥१६५॥किं पुनर्घटदिव्यं च

१ मह्यम्—मम—इत्यर्थः । २ पतिप्रिया—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

क्रियमाणं सुखावहम् ॥ ब्राह्मणस्य कृते विप्राश्चित्ते नो मामके घृणा ॥ १६६ ॥ अथ ते ब्राह्मणास्तस्य घटारोहणसंभवम् ॥ शुद्धिं निर्दिश्य वारं च सूर्यस्य च ततः परम् ॥ जग्मुः स्वंस्वं गृहं सर्वे सोऽपि विप्रोंऽत्यजो द्विजाः ॥ १६७ ॥ ततः प्राह निजां भार्यां रहस्ये नृपसत्तम ॥ ज्ञातोऽहं ब्राह्मणैः सर्वैरंत्यजातिसमुद्भवः ॥ देशांतरं गमिष्यामि त्वमागच्छ मया सह ॥ १६८ ॥ ॥ भार्योवाच ॥ ॥ अहमग्निं प्रवेक्ष्यामि न यास्यामि त्वया सह ॥ पापबुद्धे पतिष्यामि न चाहं नरकाग्निषु ॥ १६९ ॥ बुध्यमाना न सेविष्ये त्वामंत्यजसमुद्भवम् ॥ पाप संदूषितं सर्वं त्वयैतत्स्थानमुत्तमम् ॥ १७० ॥ तथा मम पितुर्हर्म्यं संवत्सरप्रयाजिनः ॥ तस्माद्द्रुततरं गच्छ यावन्नो वेत्ति कश्चन ॥ १७१ ॥ नो चेत्पापसमाचार संप्राप्स्यसि महाऽऽपदम् ॥ १७२ ॥ ततो निशामुखे प्राप्ते कौपीनावरणान्वितः ॥ नष्टोऽभीष्टां दिशं प्राप्य तदा जीवितजाद्भयात् ॥ १७३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये नागराष्टकुलश्रेष्ठ्यवर्णनंनामैकोनद्विशततमोऽध्यायः ॥ १९९ ॥ ॥ छ ॥ ॥ विश्वामित्र उवाच ॥ ॥ ततः प्रभाते संजाते प्रोद्गते रविमण्डले ॥ सा चापि दुहिता तस्य दीक्षितस्य महात्मनः ॥ १ ॥ रोरूयमाणाऽभ्यगमत्पितरं मातरं प्रति ॥ प्रोवाच गद्गदं वाक्यं बाष्पव्याकुललोचना ॥ २ ॥ तताम्ब किमिदं पापं युवाभ्यां समनुष्ठितम् ॥ अन्त्यजस्य प्रदत्ताऽहं यत्पापस्य दुरात्मनः ॥ ३ ॥ स नष्टो रजनीवक्त्रे ममावेद्य निजं कुलम् ॥ तस्मादहं प्रवेक्ष्यामि प्रदीप्ते हव्यवाहने ॥ ४ ॥ तस्यास्तद्वचनं श्रुत्वा दीक्षितः स सुभद्रकः ॥ निश्चेष्टः पतितो भूमौ वातभग्न इव द्रुमः ॥ ५ ॥ ततः स शीततोयेन संसिक्तश्च पुनःपुनः ॥ लब्ध्वाशु चेतनां कृच्छ्रात्स्वजनैः परिवारितः ॥ प्रलापान्विविधांश्चक्रे ताडयन्स्वशिरो मुहुः ॥ ६ ॥ अथ ते ब्राह्मणाः सर्वे तस्य संपर्कदूषिताः ॥ भर्तृयज्ञं समासाद्य तेनैव सहितास्ततः ॥ ७ ॥ प्रोचुर्विनयसंयुक्ताः प्रोच्चैस्तत्सुतया सह ॥ सुभद्रेण निजे हर्म्ये सुतां दत्त्वा निवेशितः ॥ ८ ॥ चण्डालो द्विजरूपोत्र चंद्रप्रभ इति स्मृतः ॥ ९ ॥ यावत्संवत्सरं सार्धं दैवे पित्र्ये च योजितः ॥ पापकर्मा न विज्ञातः सोऽधुना प्रकटोऽभवत् ॥ १० ॥ सुभद्रस्यानुषंगेण स्थानं सर्वं प्रदूषितम् ॥ अन्त्यजेन महाभाग तत्कुरुष्व विनिग्रहम् ॥ ११ ॥ कैश्चित्तस्य गृहे भुक्तं जलं पीतं तथा परैः ॥ अन्यैश्च गृहमानीय प्रदत्तं भोजनं तथा ॥ १२ ॥ किं वा ते बहुनोक्तेन न स कोऽस्ति द्विजोत्तम ॥ संकरो यस्य नो जातस्तस्य पापस्य संभवः ॥ १३ ॥ त्वया स्थानमिदं पुण्यं कृतं पूर्वं महामते ॥ सर्वेषां च गुरुस्त्वं हि तस्माच्छुद्धिं वदस्व नः ॥ १४ ॥ ततः संचिन्त्य

१ दुःखिता—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुचिरं स्मृतिशास्त्राण्यनेकशः ॥ प्रायश्चित्तं ददौ तेषां सर्वेषां स द्विजन्मनाम् ॥ १५ ॥ चांद्रायणशतं प्रादात्सुभद्रायाहिताग्नये ॥ सर्वभडपरित्यागं पुनराधानमेव च ॥ १६ ॥ लक्षहोमविधानं च गृहमध्यविशुद्धये ॥ वह्निप्रवेशनं तस्यास्तत्सुतायाः प्रकीर्तितम् ॥ १७ ॥ येन यावंति भोज्यानि तस्य भुक्तानि मंदिरे ॥ तस्य तावंति कृच्छ्राणि तेनोक्तानि महात्मना ॥ १८ ॥ यैर्जलानि प्रपीतानि यावन्मात्राणि तद्गृहे ॥ प्राजापत्यानि दत्तानि तेभ्यस्तावंति पार्थिव ॥ १९ ॥ ब्राह्मणानां तथान्येषां तत्र स्थाने निवासिनाम् ॥ तत्स्पर्शदूषितानां च प्राजापत्यं पृथक्पृथक् ॥ २० ॥ स्त्रीशूद्राणां तदर्धं च तदर्धं बालवृद्धयोः ॥ मृन्मयानां च भांडानां परित्यागो निवेदितः ॥ २१ ॥ सर्वेषामेव लोकानां रसत्यागस्तथैव च ॥ कोटिहोमस्तु निर्दिष्टो ब्रह्मस्थाने यथोदितः ॥ सर्वस्थानविशुद्ध्यर्थं स्थानवित्तेन केवलम् ॥ ॥ २२ ॥ अथोवाच पुनर्विप्रान्स कृत्वा चोच्छ्रितं भुजम् ॥ तारनादेन महता सर्वांस्तान्नगरोद्भवान् ॥ २३ ॥ सुभद्रेण च सर्वस्वं देयं विप्रेभ्य एव च ॥ चतुर्थांशश्च यैर्भुक्तं तद्गृहे स्वधनस्य च ॥ २४ ॥ अष्टांशं यैर्जलं पीतं गोदानं स्पर्शसंभवम् ॥ शेषाणामपि लोकानां यथाशक्त्या तु दक्षिणा ॥ २५ ॥ दीक्षितेन जपः कार्यो लक्षगायत्रिसंभवः ॥ शेषैर्विप्रैर्यथा वित्तं तथा कार्यो जपोऽखिलः ॥ २६ ॥ अहं चैव करिष्यामि प्राणायामशतत्रयम् ॥ नित्यमेव द्विजश्रेष्ठाः षष्ठकालकृताशनः ॥ २७ ॥ यावत्संवत्सरस्यांतं ततः शुद्धिर्भविष्यति ॥ जनसंपर्कसंजाता सैवं तस्य दुरात्मनः ॥ २८ ॥ एवमुक्त्वा ततो भूयः स प्रोवाच द्विजोत्तमान् ॥ अथाऽऽद्यान्मध्यगास्येन ब्रह्मस्थानसमाश्रयान् ॥ ॥ २९ ॥ अद्यप्रभृति यः कन्यामविदित्वा तु नागरम् ॥ नागरो दास्यति क्वापि पतितः स भविष्यति ॥ ३० ॥ अश्राद्धेयो ह्यपांक्तेयो नागराणां विशेषतः ॥ ३१ ॥ यः श्राद्धं नागरं मुक्त्वा ह्यन्यस्मै संप्रदास्यति ॥ विमुखास्तस्य यास्यंति पितरो विबुधैः सह ॥ ३२ ॥ नागरेण विना यस्तु सोमपानं करिष्यति ॥ स करिष्यत्यसंदिग्धं मद्यपानं तु नागरः ॥ तन्मतेन विना यस्तु श्राद्धकर्म करिष्यति ॥ ३३ ॥ ततः सर्वं वृथा तस्य भविष्यति न संशयः ॥ विशुद्धिरहितं यस्तु नागरं भोजयिष्यति ॥ ३४ ॥ श्राद्धे तस्यापि तत्सर्वं व्यर्थतां संप्रयास्यति ॥ सर्वेषां नागराणां च मर्यादेयं कृता मया ॥ ३५ ॥ तस्मात्सर्वप्रयत्नेन शुद्धिः कार्या द्विजोत्तमैः ॥ वर्षेवर्षे तु संप्राप्ते स्वस्थानस्य विशुद्धये ॥ ३६ ॥ ॥ विश्वामित्र उवाच ॥ ॥ एतत्ते सर्वमाख्यातं यत्पृष्टोऽस्मि नृपोत्तम ॥ श्राद्धार्हा नागरा येन नागराणां व्यवस्थिता: ॥ भर्तृयज्ञेन मर्यादा कृता तेषां यथा

१ तेषाम्—इ० पा० । २ अद्यायान्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पुरा ॥ ३७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये भर्तृयज्ञकृतनागरज्ञातिमर्यादावर्णनं नाम द्विशततमोऽध्यायः ॥ २०० ॥ ॥ छ ॥ ॥ विश्वामित्र उवाच ॥ ॥ अथ ते ब्राह्मणाः सर्वे भर्तृयज्ञं महामतिम् ॥ कृतांजलिपुटा भूत्वा स्तुतिं कृत्वा वचोऽब्रुवन् ॥ १ ॥ यदेतद्भवता प्रोक्तं शोधितो यो भवेद्द्विजः ॥ श्राद्धस्य कन्यकायाश्च सोमपानस्य सोऽर्हति ॥ २ ॥ कथं शुद्धिः प्रकर्तव्या तस्य सर्वं ब्रवीहि नः ॥ नागरस्य समस्तस्य देशांतरगतस्य च ॥३॥ देशांतरप्रजातस्य तत्र जातस्य वा पुनः ॥ अज्ञातपितृवर्गस्य सामान्यं पदमिच्छतः ॥ ४ ॥ एतन्नः सर्वमाचक्ष्व विस्तरेण महामते ॥ ५ ॥ ॥ विश्वामित्र उवाच ॥ ॥ तेषां तद्वचनं श्रुत्वा ब्राह्मणानां नृपोत्तम ॥ अब्रवीद्भर्तृयज्ञस्तु स्वाभिप्रायं सुसंमतम् ॥ ६ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ प्रश्नभारो महानेष भवद्भिः समुदाहृतः ॥ तथापि कथयिष्यामि नमस्कृत्य स्वयंभुवम् ॥ ७॥ अज्ञातपितृवंशो यो दूरादपि समागतः ॥ सामान्यं वांछते पदं नागरोऽस्मीति कीर्तयन् ॥ ८ ॥ तस्य शुद्धिः प्रदातव्या मुख्यैः शांतैः शुभैर्द्विजैः ॥ गर्तातीर्थोद्भवं विप्रं कृत्वा चैव पुरःसरम् ॥ ९ ॥ विशुद्धिं याचमानस्य यदि यच्छंति नो द्विजाः ॥ कामाद्वा यदि वा क्रोधात्प्रद्वेषाद्वा च्युतेर्भयात् ॥ १० ॥ ब्रह्महत्योद्भवं पापं सर्वेषां तत्र जायते ॥ तस्मादभ्यागतो यस्तु दूरादपि विशेषतः ॥ ११ ॥ तस्य शुद्धिः प्रदातव्या प्रयत्नेन द्विजोत्तमैः ॥ शुद्धिं तु त्रिविधां प्राप्तो मम वाक्यसमुद्भवाम् ॥ १२ ॥ स शुद्धो नागरो ज्ञेयो जातो देशांतरेष्वपि ॥ पूर्वं विशोधयेद्वंशं ततो मातृकुलं स्मृतम् ॥ १३ ॥ ततः शीलं त्रिभिः शुद्धः सामान्यं पदमर्हति ॥ १४ ॥ सर्वेषामपि विप्राणां वर्षांते समुपस्थिते ॥ शुद्धिः कार्या प्रयत्नेन स्वस्थानस्य विशुद्धये ॥ १५ ॥ तदर्थं शरदश्चांते शुभर्त्तौ ब्राह्मणोत्तमाः ॥ चातुश्चरणसंपन्नाः संस्थाप्याः षोडशैव तु ॥ १६ ॥ ब्राह्मणाः पुरतः सर्वे शांता दांता जितेंद्रियाः ॥ गर्तातीर्थोद्भवं विप्रं तेषां मध्ये निवेशयेत् ॥ १७ ॥ तदग्रे पीठिका देयाश्चतस्रो लक्षणान्विताः ॥ यावत्कार्त्तिकपर्यंतं चातुश्चरणकल्पिताः ॥ १८ ॥ प्रथमा बह्वृचस्यार्थे याजुषस्य तथाऽपरा ॥ सामगस्य तथैवान्या तथाऽऽथर्वस्य चतुर्थिका ॥ ॥ १९ ॥ मुद्रिकार्थं तथैवान्या पंचमी परिकीर्तिता ॥ श्रीसूक्तं पावमानं च शाकुनं विष्णुदैवतम् ॥ २० ॥ पारावतं तथा सूक्तं जीवसूक्तेन संयुतम् ॥ बह्वृचः कीर्तयेत्तत्र शांतिकं च तथापरम् ॥ २१ ॥ शांतिकं शिवसंकल्पमृषिकल्पं चतुर्विधम् ॥ मंडलंब्राह्मणं चैव गायत्रीब्राह्मणं तथा ॥ २२ ॥ तथा पुरुषसूक्तं च मधुब्राह्मणमेव च ॥ अध्वर्युः कीर्तयेत्तत्र रुद्रान्पंचांगसंयुतान् ॥ २३ ॥ देवव्रतं च गायत्रं सोमसूर्यव्रते तथा ॥ एकविंशतिपर्यंतं



१ वेदम्—इ० पा० । २ तदर्हम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथान्यच्च रथंतरम् ॥ २४ ॥ सौ व्रतं संहिता विष्णोर्ज्येष्ठसाम तथैव च ॥ सामवेदोक्तरुद्रांश्च भारुंडैः सामभिर्युतान् ॥ २५ ॥ छंदोगः कीर्तयेत्तत्र यच्चान्यच्छांतिकं भवेत् ॥ गर्भोपनिषदं चैव स्कंदसूक्तं तथापरम् ॥ २६ ॥ नीलरुद्रैः समोपेतान्प्राणरुद्रांस्तथापरान् ॥ नवरुद्रांश्च क्षुरिकानाद्य स्तत्र प्रकीर्तयेत् ॥ २७ ॥ ततः पुण्याहघोषेण गीतवादित्रनिस्वनैः ॥ शुक्लमाल्यांबरधरः शुक्लचंदनचर्चितः ॥ २८ ॥ शुद्धिकामो व्रजेत्तत्र यत्र ते ब्राह्मणाः स्थिताः ॥ प्रणम्य शिरसा तेषां ततो वाच्यस्तु मध्यगः ॥ २९ ॥ मदर्थं प्रार्थय त्वं हि सर्वानेतान्द्विजोत्तमान् ॥ यतः शुद्धिं प्रयच्छंति प्रसादं कर्तुमर्हसि ॥ ३० ॥ ततस्तु प्रार्थयेद्विप्रांस्तदर्थं च विशुद्धये ॥ गर्तातीर्थोद्भवो विप्रो विनयावनतः स्थितः ॥ ३१ ॥ गोचर्मणि समालग्नः शुद्धिकामस्य तस्य च ॥ प्रष्टव्यास्तु ततस्तेन सर्व एव द्विजोत्तमाः ॥ ३२ ॥ एष शुद्धिकृते प्राप्तः सुदूरान्नागरो द्विजः ॥ अस्य शुद्धिः प्रदातव्या युष्माकं रोचते यदि ॥ ३३ ॥ अथ तैर्वेदसूक्तेन निषेधो वा प्रवर्तनम् ॥ वक्तव्यं वचसा नैव मम वाक्यमिदं स्थितम् ॥ ३४ ॥ ततश्च बहुलान्दृष्ट्वा ऋगध्वर्यूंस्ततः परम् ॥ छांदोग्यांश्च तथाद्यांश्च क्रमेण तु द्विजोत्तमाः ॥ ३५ ॥ यदि तेषां मनस्तुष्टिर्जायते द्विजसत्तमाः ॥ ततः सूक्तानि वाक्यानि सौम्यानि सुशुभानि च ॥ वारुणानि तथैंद्राणि मांगल्यप्रभवाणि च ॥ ३६ ॥ श्रेष्ठानि मंत्रलिंगानि वृद्धितुष्टिकराणि च ॥ यदि नो मानसी तुष्टि स्तेषां चैव प्रजायते ॥ ३७ ॥ तदा रौद्राणि याम्यानि नैर्ऋत्यानि विशेषतः ॥ आग्नेयानि त्वनिष्टानि तथा नाशकराणि च ॥ ३८ ॥ अथ ये तत्र मूर्खाःस्युर्न वेदपठने रताः ॥ पुष्पदानं तु वक्तव्यं तैः संतुष्टैर्द्विजोत्तमैः ॥ ३९ ॥ सीत्कारः कुपितैः कार्यः संतोषेण विवर्जितैः ॥ एवं सर्वेषु कृत्येषु न च कार्यो विनिर्णयः ॥ ४० ॥ प्राकृतैर्वचनैश्चैव यथा कुर्वंति मानवाः ॥ तथैव निर्णयस्यांते मध्यगेन विपश्चिता ॥ ४१ ॥ देयं तालत्रयं सम्यक्सर्वेषां निर्णयोद्भवे ॥ ४२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये नागर प्रश्ननिर्णयवर्णनंनामैकोत्तरद्विशततमोऽध्यायः ॥ २०१ ॥ ॥ छ ॥ ॥ विश्वामित्र उवाच ॥ ॥ तच्छ्रुत्वा ब्राह्मणाः सर्वे विनयावनताः स्थिताः ॥ तं पप्रच्छुर्नरश्रेष्ठ कौतुकाविष्टचेतसः ॥ १ ॥ कस्यचिन्निर्णयो देयो मध्यस्थस्य द्विजोत्तमैः ॥ वेदवाक्येन संत्यज्य वाक्यं मनुजसंभवम् ॥ २ ॥ कस्मात्तालत्रयं देयं मध्यगेन महात्मना ॥ एतन्नः सर्वमाचक्ष्व परं कौतूहलं हि नः ॥ ३ ॥ तच्छ्रुत्वा भर्तृयज्ञस्तु तानुवाच द्विजोत्तमान् ॥ श्रूयतामभिधास्यामि यदेतत्कारणं स्थितम् ॥ ४ ॥ नासत्यं जायते वाक्यं नागराणां कथंचन ॥

१ एतस्यार्थो मनसि नायाति । २ अस्य च–'विशुद्धये विप्रान् प्रार्थयेत्' इति पूर्वेण संबंधो बोद्धव्यः । ३ वाक्यादिदं स्थितम्–इ० पा० । ४ निर्णये ध्रुवे–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ब्रह्मशालास्थितानां च शुभं वा यदि वाऽशुभम् ॥ ५ ॥ वेदोक्तैः सवनैस्तस्मादर्शयंति द्विजोत्तमाः ॥ इष्टं वा यदि वानिष्टं पृच्छमानस्य चार्थिनः ॥ ६ ॥ भूयोभूयस्ततः कुर्यान्मध्यस्थः स द्विजन्मनाम् ॥ प्रश्नं तस्य निमित्तं च यावत्तस्य विनिर्णयः ॥ ७ ॥ ब्रह्मशालोपविष्टानां यदि वाक्यं वृथा भवेत् ॥ माहात्म्यं नश्यते तेषां ततः क्रोधः प्रजायते ॥ ८ ॥ क्रोधात्सञ्जायते द्रोहो द्रोहात्पापस्य संगमः ॥ एतस्मात्कारणाद्विप्रा मध्यस्थः पृच्छयते मुहुः ॥ ९ ॥ समुदायः समस्तानां यथा चैव प्रजायते ॥ तदा तालत्रयं यच्च मध्यस्थः संप्रयच्छति ॥ १० ॥ तासां तु पूर्वया कामं हंति पृच्छाप्रदायिनाम् ॥ द्वितीयया तथा क्रोधं हंति लोभं तृतीयया ॥ ११ ॥ एतस्मात्कारणादेयं तेन तालत्रयं द्विजाः ॥ १२ ॥ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ आथर्वणश्चतुर्थस्तु ब्राह्मणः परिकीर्तितः ॥ स कस्मात्प्रथमः प्रश्नो नागराणां प्रकीर्तितः ॥ १३ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ आथर्वः प्रथमः प्रश्नो यस्मात्प्रोक्तो मया द्विजाः ॥ तदहं संप्रवक्ष्यामि शृणुध्वं सुसमाहिताः ॥ १४ ॥ नेर्ष्या चैवात्र कर्तव्या स्वस्थानस्य विनाशनी ॥ निरूपितं मया सम्यक्स्थानस्थस्य विशुद्धये ॥ १५ ॥ ऋग्यजुःसामसंज्ञाख्या अग्निष्टोमादिका मखाः ॥ पारत्रिकाः प्रवर्तंते नैहिकाश्चाभिचारिकाः ॥ १६ ॥ अथर्ववेदे तच्चोक्तं सर्वं चैवाभिचारिकम् ॥ हिताय सर्वलोकानां ब्रह्मणा लोककारिणा ॥ १७ ॥ अथर्ववेदः प्रथमं द्रष्टव्यः कार्यसिद्धये ॥ एतस्मात्कारणादाद्यः स चतुर्थोऽपि संस्थितः ॥ १८ ॥ एतद्वः सर्वमाख्यातं यत्पृष्टोऽस्मि द्विजोत्तमाः ॥ पृच्छासंबंधजं सर्वमेकं कार्यं सदैव हि ॥ १९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये भर्तृयज्ञवाक्यनिर्णयवर्णनंनाम द्व्युत्तरद्विशततमोऽध्यायः ॥ २०२ ॥ ॥ छ ॥ ॥ आनर्त उवाच ॥ ॥ एवं शुद्ध्यर्थमायातो नागराणां पुरः स्थितः ॥ नागरः शुद्धिमाप्नोति यथा तन्मे वद द्विज ॥ १ ॥ ॥ विश्वामित्र उवाच ॥ ॥ एवं मध्यस्थवचनात्समुदाये स्थिरे सति ॥ स प्रष्टव्यः पितुर्माता कतमा ते वदस्व नः ॥ २ ॥ किंगोत्रः कतमस्तस्याः पिता किंप्रवरः स्मृतः ॥ एवं तस्यान्वयं ज्ञात्वा गोत्रप्रवरसंयुतम् ॥ ३ ॥ प्रष्टव्या च ततो माता तस्याश्चापि च या भवेत् ॥ जननी चापि प्रष्टव्या तस्याश्चापि च या भवेत् ॥ ४ ॥ ज्ञातव्या सापि यत्नेन ब्राह्मणैः शुद्धिकर्मणि ॥ ५ ॥ पिता पितामहश्चैव तथैव प्रपितामहः ॥ शोधनीयाः प्रयत्नेन त्रयश्चैतेऽपि तस्य च ॥ ६ ॥ तथा पितामहीपक्षे[1] त्रय एते द्विजोत्तमाः ॥ मातामहस्ततस्तस्य पिता तस्यापि यः पिता ॥ ७ ॥ माता मातामही चैव तथैवान्या प्रपूर्विका[2] ॥ पितामह्याश्च या माता सापि शोध्या



१ पितामहीचक्रे–इ० पा०। २ प्रपूर्विका–प्रमातामही–इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सभर्तृका ॥ ८ ॥ एवं शाखाऽगमं[1] ज्ञात्वा तस्य सर्वं यथाक्रमम् ॥ मूलवंशादधिष्ठानं न्यग्रोधस्येव सर्वतः ॥ ९ ॥ ततः शुद्धिः प्रदातव्या सिन्दूरतिलकेन तु ॥ चातुश्चरणमंत्रैश्च दत्त्वाशीर्वचनं क्रमात् ॥ १० ॥ ततो वाच्यं नृपश्रेष्ठ मध्यस्थेन तदग्रतः ॥ दत्त्वा तालत्रयं राजञ्छुद्धोऽयं नागरो द्विजः ॥ सामान्यपदयोग्यश्च संजातः सांप्रतं द्विजः ॥ ११ ॥ ततोऽग्निशरणं गत्वा संतर्प्य च हुताशनम् ॥ पञ्चवक्त्रेण मंत्रेण दत्त्वा पूर्णाहुतिं ततः ॥ विप्रेभ्यो दक्षिणां दद्यात्स्वशक्त्या भोजनान्विताम् ॥ १२ ॥ सिन्दूरतिलके जाते ब्रह्माग्रे द्विजवाक्यतः ॥ पितॄणां जायते तुष्टिर्वंशो नोऽद्य[2] प्रतिष्ठितः ॥ १३ ॥ यस्य नो जायते शुद्धिः शाखाभिर्मूलवंशगा ॥ निग्रहस्तस्य कर्तव्यो द्विजार्हो द्विजसत्तमैः ॥ १४ ॥ यथा नान्यो हि जायेत शुद्धिस्तस्य प्रकल्पिता॥ एवं संशोधितो विप्रः श्राद्धार्हो जायते ततः॥१५॥अपि चाष्टकुलोत्पन्नः सामान्यः किं पुनर्हि यः॥अशुद्धेन तु विप्रेण यः श्राद्धाद्यं करोति हि ॥ तस्य भस्महुतं यद्वत्सर्वं तज्जायते वृथा ॥१६॥ तस्मात्सर्वप्रयत्नेन शोध्योऽयं नागरो द्विजः ॥ स्वस्थानस्य विशुद्ध्यर्थं तथैव स्वकुलस्य च ॥ १७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये नागरविशुद्धिप्रकारवर्णनंनाम त्र्युत्तरद्विशततमोऽध्यायः ॥ २०३ ॥ ॥ छ ॥ ॥ आनर्त उवाच ॥ ॥ प्रोक्ताऽस्माकं त्वया विप्र शुद्धिर्नागरसंभवा ॥ वंशजा विस्तरेणैव यथा पृष्टोऽसि सुव्रत ॥ १ ॥ सांप्रतं शीलजां ब्रूहि नष्टवंशश्च यो भवेत् ॥ पितामहं न जानाति न च मातामहीं निजाम् ॥ तस्य शुद्धिः कथं कार्या नागरोऽस्मीति यो वदेत् ॥ २ ॥ ॥ विश्वामित्र उवाच ॥ ॥ एतदर्थं पुरा पृष्टो भर्तृयज्ञश्च नागरैः ॥ नष्टवंशकृते राजन्यथा पृष्टोऽस्मि वै त्वया ॥ ३ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ नष्टवंशस्तु यो ब्रूयान्नागरोऽस्मीति संसदि ॥ तस्य शीलं प्रविज्ञेयं ततः शुद्धिं समादिशेत् ॥ ४ ॥ नागराणां तु ये धर्मा व्यवहाराश्च केवलाः ॥ तेषु चेद्वर्तते नित्यं संभाव्यो नागरो हि सः ॥ ५ ॥ तस्य शुद्धिकृते देयं घटं ब्राह्मणसत्तमाः ॥ घटे तु शुद्धिमापन्ने ततोऽसौ शुद्धतां व्रजेत् ॥ ६ ॥ श्राद्धार्हः कन्यकार्हश्च सोमार्हश्च विशेषतः ॥ सामान्यपदयोग्यश्च समस्ते स्थानकर्मणि ॥ ७ ॥ एतत्ते सर्वमाख्यातं यत्पृष्टोऽस्मि नरोत्तम ॥ द्वितीया जायते शुद्धिर्यथा नष्टान्वये द्विजे ॥ तस्माद्वद महाराज यद्भूयः श्रोतुमर्हसि ॥ ८ ॥ ॥ आनर्त उवाच ॥ ॥ तस्मात्ते नागरा भूत्वा विप्राश्चाष्टकुलोद्भवाः ॥ सर्वेषामुत्तमा जाताः प्राधान्येन व्यवस्थिताः ॥ ९ ॥ तपसः किं प्रभावः स तेषां वा यजनोद्भवः ॥ विद्योद्भवोऽथवा विप्र किं वा दानसमुद्भवः ॥ १० ॥ ॥ विश्वामित्र उवाच ॥ ॥ ते सर्वे गुणसंपन्ना यथान्ये नागरास्तथा ॥ विशेषश्चापरस्तेषां

१ शाखागमम्—शाखावृक्षम्—इत्यर्थः । २ अतः—इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ते शक्रेण प्रतिष्ठिताः ॥ ११ ॥ तेन ते गौरवं प्राप्ताः सर्वेषां तु द्विजन्मनाम् ॥ १२ ॥ ॥ आनर्त उवाच ॥ ॥ कस्मिन्काले तु ते विप्राः शक्रेणात्र प्रतिष्ठिताः ॥ किमर्थं च वदास्माकं विस्तरेण महामते ॥ १३ ॥ ॥ विश्वामित्र उवाच ॥ ॥ हिरण्याक्ष इति ख्यातः पुराऽऽसीद्दानवोत्तमः ॥ अभवत्तस्य संग्रामः शक्रेण सह दारुणः ॥ १४ ॥ तत्र देवासुरे युद्धे मृता भूरिदिवौकसः ॥ दानवाश्च महाराज परस्परजिगीषवः ॥ १५ ॥ अथ ते दानवाः संख्ये शक्रेण विनिपातिताः ॥ विद्याबलेन ताञ्छुक्रः सजीवान्कुरुते पुनः ॥ १६ ॥ देवाश्च निधनं प्राप्ता न जीवंति कथंचन ॥ कस्यचित्त्वथ कालस्य विष्णुं प्रोवाच वृत्रहा ॥ १७ ॥ धारातीर्थमृतानां च प्रहारैः सन्मुखैः प्रभो ॥ या गतिश्च समादिष्टा तां मे वद जनार्दन ॥ ॥ १८ ॥ पराङ्मुखा मृता ये च पलायनपरायणाः ॥ तेषामपि गतिं ब्रूहि यादृग्जायेत वाच्युत ॥ १९ ॥ ॥ विष्णुरुवाच ॥ ॥ धारातीर्थमृतानां च सन्मुखानां महाहवे ॥ यथा चोच्छिन्नबीजानां पुनर्जन्म न विद्यते ॥ २० ॥ ये पुनः पृष्ठदेशे तु हन्यंते भयविक्लवाः ॥ भुंज्यमानाः[1] परैस्ते च प्रेताः स्युस्त्रिदशाधिप ॥ २१ ॥ ॥ इन्द्र उवाच ॥ ॥ केचिद्देवा मृता युद्धे युध्यमानाश्च सन्मुखाः ॥ तथैवान्ये मया दृष्टा हन्यमानाः पराङ्मुखाः ॥ प्रेतत्वं दानवानां च सर्वेषां स्यान्न वा प्रभो ॥ २२ ॥ ॥ विष्णुरुवाच ॥ ॥ असंशयं सहस्राक्ष हता युद्धे पराङ्मुखाः ॥ प्रेतत्वे यांति ते सर्वे देवा वा मानुषा यदि ॥ २३ ॥ विषादग्नेः कुलघ्नानां तथा चैवात्मघातिनाम् ॥ दंष्ट्रिभिर्हतदेहानां शृंगिभिश्च सुरेश्वर ॥ प्रेतत्वं जायते नूनं सत्यमेतदसंशयम् ॥२४॥ ॥ इन्द्र उवाच ॥ ॥ कथं तेषां भवेन्मुक्तिः प्रेतत्वाद्दारुणाद्विभो ॥ एतन्मे सर्वमाचक्ष्व येन यत्नं करोम्यहम् ॥२५॥ ॥ श्रीभगवानुवाच ॥ ॥ तेषां संयुज्यते श्राद्धं कन्यासंस्थे दिवाकरे ॥ कृष्णपक्षे चतुर्दश्यां नभस्यस्य सुरेश्वर ॥ २६ ॥ गयायां भक्तिपूर्वं तु पितामहवचो यथा ॥ ततः प्रयांति ते मोक्षं सत्यमेतदसंशयम् ॥ २७ ॥ ॥ इन्द्र उवाच ॥ ॥ कस्मात्तत्र दिने श्राद्धं क्रियते मधुसूदन ॥ शस्त्रैर्विनिहतानां च सर्वं मे विस्तराद्वद ॥ २८ ॥ ॥ श्रीभगवानुवाच ॥ ॥ भूतप्रेतपिशाचैश्च कूष्मांडै राक्षसैरपि ॥ पुरा संप्रार्थितः शंभुर्दिने तत्र समागते ॥ अद्यैकं दिवसं देव कन्यासंस्थे दिवाकरे ॥ २९ ॥ अस्माकं देहि येन स्यात्तृप्तिर्वर्षसमुद्भवा ॥ प्रदत्ते वंशजैः श्राद्धे दीनानां त्वं दयां कुरु ॥ ३० ॥ ॥ ॥ श्रीभगवानुवाच ॥ ॥ यः करिष्यति वै श्राद्धमस्मिन्नहनि संस्थिते ॥ कृष्णपक्षे चतुर्दश्यां नभस्यस्य च वंशजः ॥ भविष्यति परा प्रीतिर्यावत्संवत्सरः स्थितः ॥ ३१ ॥ यः पुनस्तु गयां गत्वा युष्मद्वंशसमुद्भवः ॥ करिष्यति तथा श्राद्धं तेन मुक्तिमवाप्स्यथ ॥ ३२ ॥ शस्त्रेण निह

१ भुज्यमानाः परैः—परैः अन्यैः स्वामीभिः—भुज्यमानाः—सेवकत्वात्स्वकीये कार्ये नियोज्यमानाः—दासकर्म कार्यमाणाः—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तानां च स्वर्गस्थानामपि ध्रुवम् ॥ न करिष्यति यः श्राद्धं तस्मिन्नहनि संस्थिते ॥ ३३ ॥ क्षुत्पिपासार्तदेहाश्च पितरस्तस्य दुःखिताः ॥
स्थास्यंति वत्सरंयावदेतदाह पितामहः ॥ ३४ ॥ तस्मात्सर्वप्रयत्नेन तस्मिन्नहनि कारयेत् ॥ अन्यमुद्दिश्य तत्सर्वं प्रेतानामिह जायते ॥ ३५ ॥
ततो भगवता दत्ता तेषां चैव तु सा तिथिः ॥ श्राद्धकर्मणि संजाते विना शस्त्रहतं जनम् ॥ ३६ ॥ संमुखस्यापि संग्रामे युध्यमानस्य देहिनः ॥
कदाचिच्चलते चित्तं तीक्ष्णशस्त्रहतस्य च ॥ ३७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्र
माहात्म्ये शक्रविष्णुसंवादे प्रेतश्राद्धकथनंनाम चतुरधिकद्विशततमोऽध्यायः ॥ २०४ ॥ ॥ छ ॥ ॥ विष्णुरुवाच ॥ ॥ एवं ज्ञात्वा सहस्राक्ष
मम वाक्यं समाचर ॥ यदि ते वल्लभास्ते च ये हता रणमूर्धनि ॥ १ ॥ युध्यमानास्तवाग्रे च गयाश्राद्धेन तर्पय ॥ तान्सर्वान्प्रेतभावाच्च येन
मुक्तिं भजंति ते ॥ २ ॥ पलायनपरा ये च पृष्ठदेशे हता मृताः ॥ ३ ॥ ॥ इन्द्र उवाच ॥ ॥ वर्षेवर्षे तदा श्राद्धं प्रकरोति पितामहः ॥ गयां
गत्वा दिने तस्मिन्पितॄणां दिव्यरूपिणाम् ॥ ४ ॥ तत्कथं देव गच्छामि तत्राहं श्राद्धसिद्धये ॥ तस्मात्कथय मे तेषां किंचिच्छ्राद्धाय भूतले ॥
मुक्तिदं येन गच्छामि तव वाक्याज्जनार्दन ॥ ५ ॥ ॥ विश्वामित्र उवाच ॥ ॥ ततः स सुचिरं ध्यात्वा तमुवाच जनार्दनः ॥ अस्ति तीर्थं
महत्पुण्यं तस्मादप्यधिकं च यत् ॥ ६ ॥ हाटकेश्वरजे क्षेत्रे कूपिकामध्यसंस्थितम् ॥ अमावास्यादिने तत्र चतुर्दश्याश्च देवप ॥ गया संक्रमते
सम्यक्सर्वतीर्थसमन्विता ॥ ७ ॥ कन्यासंस्थे रवौ तत्र यः श्राद्धं कुरुते नरः ॥ अष्टवंशोद्भवैर्विप्रैः स पितॄंस्तारयेन्निजान् ॥ ८ ॥ अपि प्रेतत्व
मापन्नान्किं पुनः स्वर्गसंस्थितान् ॥ तत्क्षेत्रप्रभवा विप्रा अष्टवंशसमुद्भवाः ॥ ९ ॥ तप उग्रं समास्थाय वर्तंते हिमपर्वते ॥ आनर्ताधिपतेर्दानाद्भीता
स्तत्र समागताः ॥ १० ॥ तान्गृहीत्वा द्रुतं गच्छ तत्र संबोध्य गौरवात् ॥ सामपूर्वैरुपायैस्तैस्तेषामग्रे समाचर ॥ ११ ॥ श्राद्धं चैव यथान्यायं
ततः प्राप्स्यसि वांछितम् ॥ ते चाऽपि सुखिनः सर्वे भविष्यंति समागताः ॥ १२ ॥ त्वया सह प्रपूज्याश्च ह्यस्माभिः श्राद्धकारणात् ॥ तच्छ्रुत्वा
सहसा शक्रः सन्तोषं परमं गतः ॥ १३ ॥ हिमवंतं समुद्दिश्य प्रस्थितस्त्वरयाऽन्वितः ॥ वासुदेवोऽपि राजेंद्र क्षीराब्धिमगमत्तदा ॥ १४ ॥ हिम
वन्तं समाश्रित्य शक्रोऽपि ददृशे द्विजान् ॥ अष्टवंशसमुद्भूतान्विष्णुना समुदाहृतान् ॥ १५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां
संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शक्रविष्णुसंवादे गयाश्राद्धफलमाहात्म्य वर्णनंनाम पञ्चोत्तरशततमोऽध्यायः ॥२०५॥ ॥ छ ॥
॥ ॥ विश्वामित्र उवाच ॥ ॥ इंद्रोऽपि विष्णुवाक्येन हिमवंतं समागतः ॥ ऐरावतं समारुह्य नागेंद्रं पर्वतोपमम् ॥१॥ तत्रापश्यदृषींस्तान्स चमत्कार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



समुद्भवान् ॥ नियमैः संयमैर्युक्तान्सदाचारपरायणान् ॥ वानप्रस्थाश्रमोपेतान्कामक्रोधविवर्जितान् ॥ २ ॥ एके विप्राः स्थितास्तेषामेकांतरितभोजनाः ॥ षष्ठकालाशिनश्चान्ये चांद्रायणपरायणाः ॥ ३ ॥ अश्मकुट्टाः स्थिताः केचिद्दंतोलूखलिनः परे ॥ शीर्णपर्णाशनाः केचिज्जलाहारास्तथा परे ॥ वायुभक्षास्तथैवान्ये तपस्तेपुः सुदारुणम् ॥४॥ अथ शक्रं समालोक्य तत्राऽऽयातं द्विजोत्तमाः ॥ पूजितं चारणैः सिद्धैस्तैरदृष्टं कदाचन ॥५॥ ते सर्वे ब्राह्मणाः प्रोक्तास्तदाश्रमसमीपगैः ॥ ६ ॥ अयं शक्रः समायातो भवतामाश्रमे द्विजाः ॥ क्रियतामर्हणं चास्मै यच्चोक्तं शास्त्रचिंतकैः ॥ ७ ॥ ततस्ते ब्राह्मणाः सर्वे विस्मयोत्फुल्ललोचनाः॥ संमुखाः प्रययुस्तूर्णं कृतांजलिपुटाः स्थिताः ॥ ८ ॥ गृह्योक्तविधिना तस्मै संप्रहृष्टतनूरुहाः ॥ प्रोचुश्च विनयात्सर्वे किमागमनकारणम् ॥ ९ ॥ निरीहस्यापि देवेंद्र कौतुकं नो व्यवस्थितम् ॥ १० ॥ ॥ इन्द्र उवाच ॥ ॥ कुशलं वो द्विजश्रेष्ठा अग्निहोत्रेषु कृत्स्नशः ॥ तपश्चर्यासु सर्वासु वेदाभ्यासे तथा श्रुते ॥ ११ ॥ हाटकेश्वरजं क्षेत्रं त्यक्त्वा तीर्थमयं शुभम् ॥ कस्मादत्र समायाता हिमार्तिजनके गिरौ ॥ १२ ॥ तस्मात्सर्वे मया सार्धं समागच्छंतु सद्द्विजाः ॥ चमत्कारपुरे पुण्ये बहुविप्रसमाकुले ॥ १३ ॥ वासुदेवसमादेशात्तत्र गत्वाथ सांप्रतम् ॥ गयाकूपे करिष्यामि श्राद्धं भक्त्या द्विजोत्तमाः ॥ १४ ॥ युष्मदग्रे चतुर्दश्यां प्रेतपक्ष उपस्थिते ॥ खेचरत्वं समायातं सर्वेषां भवतां स्फुटम् ॥ १५ ॥ सबालवृद्धपत्नीकाः साग्निहोत्रा मया सह ॥ तस्माद्गच्छत भद्रं वस्तत्र स्थानं भविष्यति ॥ १६ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ न वयं तत्र यास्यामश्चमत्कारपुरं पुनः॥ अन्येऽपि ब्राह्मणास्तत्र वेदवेदांगपारगाः ॥ १७ ॥ नागरा याज्ञिकाः संति स्मार्ताः श्रुतिपरायणाः ॥ तेषामग्रे कुरु श्राद्धं श्रद्धा चेच्छ्राद्धजा तव ॥ १८ ॥ ॥ इन्द्र उवाच ॥ ॥ तत्र ये ब्राह्मणाः केचिद्भवद्भिः संप्रकीर्तिताः ॥ तथाविधाश्च ते सर्वे वेदवेदांगपारगाः ॥ १९ ॥ श्रुताध्ययनसंपन्ना याज्ञिकाश्च विशेषतः ॥ परं द्वेषपराः सर्वे तथा परुषवादिनः ॥ २० ॥ अहंकारेण संयुक्ताः परस्परजिगीषवः ॥ तपसा विप्रयुक्ताश्च भोगसक्ता दिवानिशम् ॥ २१ ॥ यूयं सर्वगुणोपेता विष्णुना मे प्रकीर्तिताः ॥ तस्मादागमनं कार्यं मया सार्धं समस्तकैः ॥ २२ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ अस्माभिस्तेन दोषेण त्यक्तं स्थानं निजं हि तत् ॥ बहुतीर्थसमोपेतं स्वर्गमार्गप्रदर्शकम् ॥ २३ ॥ यदि यास्यामहे तत्र त्वया सार्धं पुरंदर ॥ अस्माकं स्वजनाः सर्वे रागद्वेषपरायणाः ॥ २४ ॥ अपराधान्करिष्यंति नित्यमेव पदेपदे ॥ ईर्ष्याधर्मसमोपेताः परुषाक्षरजल्पकाः ॥ २५ ॥ ततः संपत्स्यते क्रोधः क्रोधाच्च तपसः क्षयः ॥ ततो न प्राप्यते मुक्तिस्तद्गच्छामः कथं विभो ॥ २६ ॥ अपरं तत्र



१ तथा विप्राश्र–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूपोऽस्ति देशे दानपरः सदा ॥ आनर्ताधिपतिः ख्यातः सर्वभूमौ सदैव सः ॥ २७ ॥ ददाति विविधं दानं हस्त्यश्वकनकादिकम् ॥ यदि तत्र न गृह्णीमस्तदा कोपं स गच्छति ॥ २८ ॥ भूपाले कोपमापन्ने स्वजनेषु विरोधिषु ॥ सिद्धिर्नो तपसोऽस्माकं तेन त्यक्तं निजं पुरम् ॥ २९ ॥ यदि गृह्णीमहे दानं तस्य भूपस्य देवप ॥ तपसः संप्रणाशः स्याद्यद्धि प्रोक्तं स्वयंभुवा ॥ ३० ॥ दशसूनासमश्चक्री दशचक्रिसमो ध्वजी ॥ दशध्वजिसमा वेश्या दशवेश्यासमो नृपः ॥ ३१ ॥ तत्कथं तस्य गृह्णीमो दानं पापरतस्य च ॥ यथाऽन्ये नागराः सर्वे लोभेन महतान्विताः ॥ ३२ ॥ ॥ इन्द्र उवाच ॥ ॥ प्रभावोऽयं द्विजश्रेष्ठास्तस्य क्षेत्रस्य संस्थितः ॥ हाटकेश्वरसंज्ञस्य सर्वदैव व्यवस्थितः ॥ ३३ ॥ पितॄणां च सुतानां च बंधूनां च विशेषतः ॥ श्वश्रूणां च स्नुषाणां च भगिनीभ्रातृभार्ययोः ॥ ३४ ॥ तस्या धस्तात्स्वयं देवो हाटकेश्वरसंज्ञितः ॥ पुरस्य विद्यते तस्य प्रतापेनाखिला जनाः ॥ ३५ ॥ सन्तप्यंते ततो द्वेषं प्रकुर्वंति परस्परम् ॥ किं न श्रुतं भवद्भिस्तु यथा रामः सलक्ष्मणः ॥ सीतया सह संप्राप्तो विरोधं परमं गतः ॥ ३६ ॥ सीतया लक्ष्मणेनैव सार्धं कोपेन संयुतः ॥ अवाच्यं प्रोक्तवान्विप्रास्तौ च तेन समं तदा ॥ ३७ ॥ अपि मासं वसेत्तत्र यदि कोपविवर्जितः ॥ तदा मुक्तिमवाप्नोति स्वर्गभाक्पञ्चरात्रतः ॥ ३८ ॥ तस्मात्तत्र प्रगंतव्यं युष्माभिस्तु मया सह ॥ ईर्ष्याधर्मं न युष्माभिस्ते करिष्यंति नागराः ॥ ३९ ॥ न चैव भवतां कोपस्तत्रस्थानां भविष्यति ॥ प्रसादान्मम विप्रेंद्राः सत्यमेतन्मयोदितम् ॥ ४० ॥ आनर्तः पार्थिवो दाने योजयिष्यति न क्वचित् ॥ युष्माकं पुत्रपौत्रेभ्यो ये दास्यंति च कन्यकाः ॥ ४१ ॥ सहस्रगुणितं तेषां तत्फलं संभविष्यति ॥ अमावास्यादिने श्राद्धं कन्यासंस्थे दिवाकरे ॥ ४२ ॥ युष्मदग्रे द्विजश्रेष्ठा गया कूप्यां करिष्यति ॥ यस्तस्य तत्फलं भावि सहस्रशतसंमितम् ॥ ४३ ॥ गयाश्राद्धान्न सन्देहः सत्यमेतन्मयोदितम् ॥ यदि श्राद्धकृते तत्र नाया

१ दशसूनासम इति । दशसूनासमश्चक्री–दशमनुष्यहत्यासमपातकभागेकश्चक्री तैलिको भवति । तस्य तैलयन्त्रनिपीडनेनानन्तक्षुद्रजीवानां निरंतरं हत्यादोषप्रसंगात् । दशचक्रिसमो ध्वजी–दशतैलिकप्राप्यनिरंतरानन्त क्षुद्रजीवहत्यासमपातकभागेको ध्वजी सुरासंधानकृद्भवति । मादकमद्यनिषेवणोपकारकत्वेन तस्य धर्मबुद्धिभ्रंशसाहाय्यकरत्वात् । दशध्वजिसमा वेश्या–दशशौण्डिकप्राप्यधर्मबुद्धिभ्रंशसाहाय्यजनितपापभागिन्येका वेश्या वारांगना भवति । तस्या बहुपुरुषभोक्तृत्वेन पातिव्रत्यधर्मनाशे व्यभिचाररूपाधर्मानुकूल्यात् । दशवेश्यासमो नृपः–दशवेश्याप्राप्यव्यभिचारजन्यपापसमपापभागेको नृपो भवति । तस्य च नरासाधारणधर्मरूपप्रमादवशात्कदाचिदन्यायापहृतानपराधिजनधनसंग्राहित्वादनपराधिशिष्टजनापमानकरत्वाच्च । एतेषां प्रतिग्रहे दोषाधिक्यमनेन सूचितम् । एतदेवोक्तं याज्ञवल्क्येनापि–"प्रतिग्रहे सूनिचक्रिध्वजिवेश्यानराधिपाः ।" इति । एत उत्तरोत्तरं प्रतिग्रहानर्हा इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

स्यथ द्विजोत्तमाः ॥ ४४ ॥ ततः शापं प्रदास्यामि तपोविघ्नकरं हि वः ॥ एवं ज्ञात्वा मया सार्धं तत्राऽऽगच्छत सत्वरम् ॥ ४५ ॥ इत्युक्तास्तेन ते सर्वे शक्रेण सह तत्क्षणात् ॥ कश्यपश्चैव कौंडिन्य उक्षणाशः शार्कवो द्विषः ॥ ४६ ॥ बैजवापश्चैव षष्ठः कापिष्ठलो द्विकस्तथा ॥ एतत्कुलाष्टकं प्राप्तमिंद्रेण सह पार्थिव ॥ ४७ ॥ अग्निष्वात्तादिकान्सर्वान्पितॄनाहूय कृत्स्नशः ॥ विश्वेदेवांस्तथा चैव प्रस्थितः पाकशासनः ॥ ४८ ॥ सम्यक्छ्रद्धासमाविष्टश्चमत्कारपुरं प्रति ॥ एतस्मिन्नेव काले तु ब्रह्मा लोकपितामहः ॥ ४९ ॥ गयायां प्रस्थितः सोऽपि श्राद्धार्थं तत्र वासरे ॥ विश्वेदेवाः प्रतिज्ञाय गयायां प्रस्थिता विधिम् ॥ ५० ॥ शक्रश्राद्धं परित्यज्य गता यत्र पितामहः ॥ शक्रोऽपि तत्पुरं प्राप्य गयाकूप्यामुपागतः ॥ ५१ ॥ ततः स्नात्वाह्वयामास श्राद्धार्थं श्रद्धयान्वितः ॥ विश्वेदेवान्पितॄंश्चैव काले कुतपसंज्ञिते ॥५२॥ एतस्मिन्नंतरे प्राप्ताः समाहूताश्च तेन ये ॥ पितरो देवरूपा ये प्रेतरूपास्तथैव च॥५३॥ प्रत्यक्षरूपिणः सर्वे द्विजोपांते समाश्रिताः॥विश्वेदेवा न संप्राप्ता ये गयायां गतास्तदा॥५४॥ ततो विलंबमकरोत्तदर्थं पाकशासनः ॥ विश्वेदेवा यतः श्राद्धे पूज्याः प्रथममेव च ॥ ५५ ॥ एतस्मिन्नंतरे प्राप्तो नारदो मुनिसत्तमः ॥ शक्रं प्राह समागत्य विश्वेदेवाऽभिकांक्षिणम् ॥ ५६ ॥ ॥ नारद उवाच ॥ ॥ विश्वेदेवा गताः शक्र श्राद्धे पैतामहेऽधुना ॥ गयायां ते मया दृष्टा गच्छमानाः प्रहर्षिताः ॥ ५७ ॥ तच्छ्रुत्वा तत्र कुपितस्तेषामुपरि तत्क्षणात् ॥ अब्रवीत्परुषं वाक्यं विप्राणां पुरतः स्थितः ॥ ५८ ॥ विश्वेदेवान्विना श्राद्धं करिष्याम्यहमद्य भोः ॥ तथान्ये मानवाः सर्वे करिष्यंति धरातले ॥५९॥ विश्वेदेवान्पुरः स्थाप्य योऽत्र श्राद्धं करिष्यति ॥ व्यर्थतां यास्यते तस्य ऊषरे वर्षितं यथा ॥६०॥ एवमुक्त्वा सहस्राक्ष एकोद्दिष्टानि कृत्स्नशः ॥ चकार सर्वदेवानां ये हता रणमूर्धनि ॥ ६१ ॥ एतस्मिन्नेव काले तु वागुवाचाशरीरिणी ॥ येषामुद्दिश्य तच्छ्राद्धं कृतं तेषां नृपोत्तम ॥ ६२ ॥ शक्रशक्र महाबाहो येषां श्राद्धं कृतं त्वया ॥ प्रेतत्वे संस्थितानां च प्रेतत्वेन विवर्जिताः ॥ ६३ ॥ गताः स्वर्गं प्रसादात्ते दिव्यरूपवपुर्धराः ॥ ये पुनः स्वर्गताः पूर्वं युध्यमाना महाहवे ॥ ६४ ॥ ते च मोक्षं गताः सर्वे प्रसादात्तव वासव ॥ तच्छ्रुत्वा वासवो वाक्यं तोषेण महतान्वितः ॥ ६५ ॥ अहो तीर्थमहो तीर्थं शंसमानः पुनःपुनः ॥ एतस्मिन्नन्तरे प्राप्ता विश्वेदेवाः समुत्सुकाः ॥ ६६ ॥ निर्वृत्य ब्रह्मणः श्राद्धं गयायां तत्र पार्थिव ॥ प्रोचुश्च वृत्रहंतारं कुरु श्राद्धं शतक्रतो ॥ ६७[१] ॥ भूयोऽपि न विनाऽस्माभिर्लभ्यते श्राद्धजं फलम् ॥ वयं दूरात्समायातास्तव श्राद्धस्य कारणात् ॥ निर्वर्त्य ब्रह्मणः श्राद्धं येन पूर्वं निमंत्रिताः ॥ ६८ ॥ तच्छ्रुत्वा



१ सर्वशः—इ० पा० । २ विश्वान्देवान्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वचनं तेषां कुपितः पाकशासनः ॥ अब्रवीत्परुषं वाक्यं मेघगम्भीरया गिरा ॥ ६९ ॥ अद्यप्रभृति यः श्राद्धं मर्त्यलोके करिष्यति ॥ अन्योऽपि यो भवत्पूर्वं वृथा तस्य भविष्यति ॥ ७० ॥ एकोद्दिष्टानि श्राद्धानि करिष्यंत्यखिला जनाः ॥ सांप्रतं मर्त्यलोकेऽत्र मर्यादेयं कृता मया ॥ ७१ ॥ भूताः प्रेताः पिशाचाश्च ये चान्ये श्राद्धहारकाः ॥ विश्वेदेवैः प्ररक्ष्यंते रक्षयिष्यामि तानहम् ॥ ७२ ॥ यजमानस्य काये च श्राद्धं संयोज्य यत्नतः ॥ मया हताः प्रयास्यंति सर्वे ते दूरतो द्रुतम् ॥ ७३ ॥ एवमुक्त्वा सहस्राक्षो विश्वेदेवांस्ततः परम् ॥ प्रोवाच ब्राह्मणान्सर्वान्विश्वेदेवैर्विना कृतम् ॥ श्राद्धकर्म भवद्भिस्तु कार्यमन्यैश्च मानवैः ॥ ७४ ॥ तथेत्युक्ते द्विजेंद्रैश्च विश्वेदेवाः सुदुःखिताः ॥ रुरुदुर्बाष्पपूरेण प्लावयन्तो वसुन्धराम् ॥ ७५ ॥ तेषामुष्णाश्रुणा तेन यत्पृथ्वी प्लाविता नृप ॥ भूतान्यंडान्यनेकानि संख्यया रहितानि च ॥७६॥ ततोऽडेभ्यो विनिष्क्रांताः प्राणिनो रौद्ररूपिणः ॥ कृष्णदंताः शंकुकर्णा ऊर्ध्वकेशा भयावहाः ॥ रक्ताक्षाश्च ततः प्रोचुर्विश्वेदेवांश्च ते नृप ॥ ७७ ॥ वयं बुभुक्षिताः सर्वे भोजनं दीयतां ध्रुवम् ॥ भवद्भिर्विहिता यस्माद्याचयामो न चापरम् ॥ ७८ ॥ ॥ विश्वेदेवा ऊचुः ॥ ॥ अस्माभी रहितं श्राद्धं किञ्चित्संजायते क्षितौ ॥ श्रद्धया परया यच्च युष्माकं भावि भोजनम् ॥ ७९ ॥ एवमुक्त्वा तु ते श्राद्धं[1] विश्वेदेवा नृपोत्तम ॥ ब्रह्मलोकं गताः सर्वे दुःखेन महताऽन्विताः ॥ प्रोचुश्च दीनया वाचा प्रणिपत्य पितामहम् ॥ ८० ॥ वयं बाह्याः कृता देव श्राद्धानां बलविद्विषा ॥ तव श्राद्धे गता यस्माद्दयायां प्राङ्गिमंत्रिताः ॥ ॥ ८१ ॥ तेन रुष्टः सहस्राक्षस्तव चांते समागताः ॥ तस्मात्कुरु प्रसादं नः श्राद्धार्हाः स्याम वै यथा ॥ ८२ ॥ तच्छ्रुत्वा सत्वरं ब्रह्मा कृपया परयान्वितः ॥ विश्वेदेवान्समादाय कूष्माण्डैस्तैः समन्वितान् ॥ ८३ ॥ शक्रोऽपि श्राद्धकर्माणि कृत्वा तेषां दिवौकसाम् ॥ तीर्थयात्रापरो भूत्वा तथैव च व्यवस्थितः ॥ ८४ ॥ एतस्मिन्नेव काले तु ब्रह्मा तत्र समागतः ॥ विश्वेदेवसमायुक्तो हंसयानसमाश्रितः ॥ ८५ ॥ शक्रोऽपि सहसा दृष्ट्वा संप्राप्तं कमलासनम् ॥ अर्घ्यमादाय पाद्यं च सत्वरं सम्मुखो ययौ ॥ ८६ ॥ ततः प्रणम्य शिरसा साष्टांगं विनयान्वितः ॥ प्रोवाच प्रांजलिर्भूत्वा स्वागतं ते पितामह ॥ ८७ ॥ तव संदर्शनादेव ज्ञातं जन्मत्रयं मया ॥ द्रुतं पूर्वं शुभं कर्म करोमि च यथाऽधुना ॥ ८८ ॥ करिष्यामि परे लोके व्यक्तमेतदसंशयम् ॥ ८९ ॥ निःस्पृहस्यापि ते देव यदागमनकारणम्[2] ॥ तन्मे द्रुततरं ब्रूहि येन सर्वं करोम्यहम् ॥ ९० ॥ ॥ ब्रह्मोवाच ॥ ॥ यैर्विना न भवेच्छ्राद्धं ममापि सुरसत्तम ॥ विश्वेदेवास्त्वया तेऽद्य श्राद्धबाह्या विनिर्मिताः ॥ ९१ ॥ तत्त्वया न कृतं भद्रं तेन

१ श्राद्धमुक्त्वा—श्राद्धं प्रत्युद्दिश्य उक्त्वा—इत्यर्थः । २ यथागमनकारणम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



कर्म वितन्वता ॥ अप्रमाणं कृता वेदा यतश्च स्मृतयस्तथा ॥ ९२ ॥ एते पूर्वं मया शक्र श्राद्धार्थं विनिमंत्रिताः ॥ पश्चात्त्वया न दोषोऽस्ति
तस्माच्चैषां महात्मनाम् ॥ ९३ ॥ तस्माच्छापप्रमोक्षार्थं त्वं यतस्व सुरेश्वर ॥ येन स्युः श्राद्धयोग्याश्च सर्वेऽमी दुःखिता भृशम् ॥ ९४ ॥ पुरा ह्येतन्म
या प्रोक्तं सर्वेषां च द्विजन्मनाम् ॥ एतत्पूर्वं च यच्छ्राद्धं सफलं तद्भविष्यति ॥९५॥ तत्कथं मम वाक्यं त्वमसत्यं प्रकरोषि च ॥९६॥ ॥ इंद्र उवाच ॥
मयाऽपि कोपयुक्तेन शप्ता एते पितामह ॥ तद्यथा सत्यवाक्योऽहं प्रभवामि तथा कुरु ॥ ९७ ॥ ॥ ब्रह्मोवाच ॥ ॥ तव वाक्यं यथा सत्यं प्रभविष्य
ति वासव ॥ तथाऽहं संविधास्यामि विश्वेदेवार्थमेव ह ॥९८॥ विश्वेदेवैर्विना श्राद्धं यत्त्वया समुदाहृतम् ॥ एकोद्दिष्टं नराः सर्वे करिष्यंति धरातले ॥
॥ ९९ ॥ तस्मिन्नहनि देवेंद्र त्वया यत्र विनिर्मितम् ॥ प्रेतपक्षे चतुर्दश्यां शस्त्रेण निहतस्य च ॥ १०० ॥ क्षयाहे चाऽपि संजाते विश्वेदेवैर्विना
कृतम् ॥ नागरस्य शुभं श्राद्धं वचनान्मे भविष्यति ॥ १०१ ॥ शेषकाले तु यः श्राद्धं प्रकरिष्यति तैर्विना ॥ व्यर्थं संपत्स्यते तस्य मम वाक्याद
संशयम् ॥ १०२ ॥ मुक्त्वा शस्त्रहतं चैकं तस्मिन्नहनि यो नरः ॥ करिष्यति तथा श्राद्धं भूतभोज्यं भविष्यति ॥ ॥ विश्वामित्र उवाच ॥ ॥
तथेत्युक्ते तु शक्रेण ब्रह्मा लोकपितामहः ॥ विश्वेदेवैस्ततः प्रोक्तो विनयावनतैः स्थितैः ॥ १०४ ॥ एते पुत्राः समुत्पन्ना अस्मदश्रुभ्य एव च ॥ तेषां
तु भोजनं दत्तं क्षुधार्तानां मया विभो ॥ १०५ ॥ अस्मद्विवर्जितं श्राद्धं कुपितैर्वासवोपरि ॥ तद्यथा जायते सत्यं वाक्यमस्मदुदीरितम् ॥ १०६ ॥
अस्माकं वासवस्यापि तथा कुरु पितामह ॥ निरूपय शुभाहारं येन स्यात्तृप्तिरुत्तमा ॥ १०७ ॥ एतेषामेव सर्वेषां प्रसादात्तव पद्मज ॥ १०८ ॥
॥ ॥ पद्मज उवाच ॥ ॥ श्राद्धकाले तु विप्राणां भोज्यपात्रेषु कृत्स्नशः॥ भस्मरेखां प्रदास्यंति ह्येतैस्तत्त्याज्यमेव हि॥१०९॥ भस्मरक्षां विना यच्च किंचि
च्छ्राद्धं भविष्यति ॥ एकोद्दिष्टं पार्वणं च वृद्धिश्राद्धमथापि वा ॥११०॥ एतेभ्यश्चैव तद्दत्तं मया तुष्टेन सांप्रतम् ॥ एवमुक्त्वा ततो नाम तेषां चक्रे
पितामहः ॥ १११ ॥ कुशब्देन स्मृता भूमिः संसिक्ता चाश्रुणा यतः ॥ ततोऽडानि च जातानि तेभ्यो जाता अमी घनाः ॥ कूष्मांडा इति विख्या
ता भविष्यंति जगत्त्रये ॥ ११२ ॥ ततस्तांश्च त्रिधा कृत्वा क्रमेणैवार्पयत्तदा ॥ अग्नेर्वायोस्तथार्कस्य वाक्यमेतदुवाच ह ॥ ११३ ॥ यजुर्वेदे प्रवि
ख्यातं यद्देवेति ऋचां त्रयम् ॥ तेन भागः प्रदातव्य एतेषां भक्तिहोमतः ॥ ११४ ॥ कोटिहोमोद्भवे चैव निजभागस्य मध्यतः ॥ तेन तृप्तिं प्रया
स्यंति मम वाक्यादसंशयम् ॥ ११५ ॥ एवमुक्त्वा चतुर्वक्त्रस्ततश्चादर्शनं गतः ॥ विश्वेदेवास्तथा हृष्टाः कूष्माण्डाश्च विशेषतः ॥ ११६ ॥ एतस्मा

१. यद्देवा देवहेडनम्—इत्यादि—इत्यर्थः । २ भक्तितो नरैः—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्कारणाद्रक्षा क्रियते भस्मसम्भवा ॥ विप्राणां भोज्यपात्रेषु श्राद्धे कूष्मांडजाद्भयात् ॥ नागराणां न वांछंति श्राद्धे छिद्रं यतः शृणु ॥ ११७ ॥ तेषां स्थाने यतो जाता दाक्षिण्येन समन्विताः ॥ निषिद्धा भस्मजा रक्षा भर्तृयज्ञेन तेजसा ॥ ११८ ॥ तदर्थं नागराः सर्वे न कुर्वन्ति हि कर्हिचित् ॥ इन्द्रोऽपि च गते तस्मिंश्चतुर्वक्रे निजालयम् ॥ ११९ ॥ अब्रवीद्ब्राह्मणान्सर्वांश्चमत्कारपुरोद्भवान् ॥ कृतांजलिपुटो भूत्वा विनयावनतः स्थितः ॥ १२० ॥ श्रूयतां मद्वचो विप्राः करिष्यथ ततः परम् ॥ स्थापयिष्याम्यहं लिंगं देवदेवस्य शूलिनः ॥ १२१ ॥ ततस्तैर्ब्राह्मणैस्तस्य दर्शितं स्थानमुत्तमम् ॥ सोऽपि लिंगं च संस्थाप्य प्रहृष्टस्त्रिदिवं ययौ ॥ १२२ ॥ ॥ विश्वामित्र उवाच ॥ ॥ एतत्ते सर्वमाख्यातं यत्पृष्टोऽस्मि नराधिप ॥ गयाकूप्याश्च माहात्म्यं सर्वकामप्रदायकम् ॥ १२३ ॥ ॥ आनर्त उवाच ॥ ॥ गयाकूप्याश्च माहात्म्यं भवता मे प्रकीर्तितम् ॥ बालमंडनजं वापि सांप्रतं वक्तुमर्हसि ॥ १२४ ॥ कस्मिन्स्थाने च शक्रेण तच्च लिंगं प्रतिष्ठितम् ॥ वदास्माकं महाभाग तस्मिन्दृष्टे तु किं फलम् ॥२१५॥ ॥ विश्वामित्र उवाच ॥ ॥ सहस्राक्षेण ते विप्रा लिंगार्थं याचिता यदा ॥ स्थानं शुभं पवित्रं च सर्वक्षेत्रस्य मध्यगम् ॥ ॥ १२६ ॥ ततस्तैर्दर्शितं लिंगं सुपुण्यं बालमंडनम् ॥ यत्र बालाः पुरा जाता मरुदाख्या दितेः सुताः ॥१२७॥ तेनैव च पुरा ध्वस्ता न च मृत्युमुपागताः ॥ तच्च मेध्यतमं ज्ञात्वा स्थानं दृष्टं पुरा च यत् ॥१२८॥ यत्र दित्या तपस्तप्तं सुसुतं कांक्षमाणया ॥ तद्दृष्ट्वा परमं स्थानं जीवं प्रोवाच देवपः॥ ॥ १२९ ॥ गुरो ब्रूहि ममाशु त्वं सुमुहूर्तं च सांप्रतम् ॥ दिवसं यत्र सल्लिंगं स्थापयामि हरोद्भवम् ॥ प्रलयेऽपि समुत्पन्ने न नाशो यत्र जायते ॥ ॥ १३० ॥ ततः सोऽपि चिरं ध्यात्वा तं प्रोवाच शचीपतिम् ॥ माघमासे सिते पक्षे पुष्यर्क्षे रविवासरे ॥ १३१ ॥ त्रयोदश्यामभीष्टे तु संजातेऽभ्युदये शुभे ॥ संस्थापय विभो लिंगं मम वाक्येन सांप्रतम् ॥ १३२ ॥ आकल्पांतसमं दिव्यं स्थिरं ते तद्भविष्यति ॥ तच्छ्रुत्वा देवराजस्तु हर्षेण महताऽन्वितः ॥ १३३ ॥ बालमंडनसांनिध्ये स्थापयामास तत्तदा ॥ विप्रपुण्याहघोषेण गीतवादित्रनिःस्वनैः ॥ १३४ ॥ ततो होमावसाने तु तर्पयित्वा द्विजोत्तमान् ॥ दक्षिणायां ददौ तेषामाघाटं स्थानमुत्तमम् ॥ १३५ ॥ मांकूले संस्थितं यच्च दिव्यप्राकारभूषितम् ॥ सर्वेषामेव विप्राणां सामान्येन नृपोत्तम ॥ १३६ ॥ ततोऽष्टकुलिकान्विप्रान्समाहूयाब्रवीदिदम् ॥ युष्माभिस्तु सदा कार्या चिंता लिंगसमुद्भवा ॥ १३७ ॥ अस्य यस्मान्मया दत्ता वृत्तिश्चन्द्रार्ककालिका ॥ सा च ग्राह्या तदर्थे च द्वादशग्रामसंभवा ॥ १३८ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ न वयं विबुधश्रेष्ठ

१ च–३० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

करिष्यामो वचस्तव ॥ लिंगचिंतासमुद्भूतं श्रूयतामत्र कारणम् ॥ १३९ ॥ ब्रह्मस्वं विबुधस्वं च तडागोत्थं विशेषतः ॥ भक्षितं स्वल्पमप्यत्र नाश
येत्सर्वपूर्वजान् ॥ १४० ॥ यदि कश्चित्कुलेऽस्माकं जातस्तद्भक्षयिष्यति ॥ पातयिष्यति नः सर्वांस्तदस्माकं महद्भयम् ॥ १४१ ॥ अथ तं मध्यगः
प्राह कृतांजलिर्द्विजोत्तमः ॥ दृष्ट्वाऽन्यमनसं शक्रं कृतपूर्वोपकारिणम् ॥ १४२ ॥ देवशर्माभिधानस्तु विख्यातः प्रवरैस्त्रिभिः ॥ अहं चिंतां करि
ष्यामि तव लिंगसमुद्भवाम् ॥ १४३ ॥ अपुत्रस्य तु मे पुत्रं यदि यच्छसि वासव ॥ यस्मात्संजायते वंशो यावदाभूतसंप्लवम् ॥ १४४ ॥ धर्मज्ञस्तु
कृतज्ञस्तु देवस्वपरिवर्जकः ॥ तच्छ्रुत्वा वासवो हृष्टस्तमुवाच द्विजोत्तमम् ॥१४५॥ ॥ इन्द्र उवाच ॥ ॥ भविष्यति शुभस्तुभ्यं पुत्रो वंशधरः परः ॥
धर्मात्मा सत्यवादी च देवस्वपरिवर्जकः ॥१४६॥ तस्यान्वये तु ये पुत्रा भविष्यंति महात्मनः ॥ ते सर्वेऽत्र भविष्यंति तद्रूपा वेदपारगाः ॥ १४७ ॥
अपरं शृणु मे वाक्यं यत्ते वक्ष्यामि सद्द्विज ॥ तथा शृण्वंतु विप्रेंद्राः सर्वे येऽत्र समागताः ॥१४८॥ बालमण्डनके तीर्थे मयैतल्लिंगमुत्तमम् ॥ चतुर्वक्त्र
समादेशाच्चतुर्वक्त्रं प्रतिष्ठितम् ॥ १४९ ॥ योऽत्र स्नानविधिं कृत्वा तीर्थेऽत्र पितृतर्पणम् ॥ आजन्म पितरस्तेन प्रभविष्यंति तर्पिताः ॥ १५० ॥
ग्रामा द्वादश ये दत्ता मया देवस्य चास्य भोः ॥ वसिष्यंति च ये विप्रा वृद्धिश्राद्ध उपस्थिते ॥ ते श्राद्धं प्रथमं चास्य कृत्वा श्राद्धं ततः परम् ॥
॥ १५१ ॥ तत्कृत्यानि करिष्यन्ति ते विघ्नेन विवर्जिताः ॥ वृद्धिः संपत्स्यते तेषां नो चेद्विघ्नं भविष्यति ॥ १५२ ॥ माघमासे सिते पक्षे त्रयो
दश्यां दिने स्थिते ॥ तद्ग्रामसंस्थिता लोका येऽत्रागत्य समाहिताः ॥ १५३ ॥ बालमण्डनके स्नात्वा लिंगमेतत्समाहिताः ॥ पूजयिष्यंति
सद्भक्त्या ते यास्यंति परां गतिम् ॥ १५४ ॥ ग्रामाणां मम लिंगस्य ये करिष्यंति पीडनम् ॥ कालांतरेऽपि संप्राप्तास्ते यास्यंति च संक्षयम् ॥
॥ १५५ ॥ पृथिव्यां यानि तीर्थानि ह्यासमुद्रसरांसि च ॥ बालमण्डनके तीर्थ आगमिष्यंति तद्दिने ॥ १५६ ॥ ॥ विश्वामित्र उवाच ॥ ॥
एतदुक्त्वा सहस्राक्षस्ततश्चाष्टकुलान्द्विजान् ॥ अग्रतः कोपसंयुक्तस्ततो वचनमब्रवीत् ॥ १५७ ॥ एतैः सप्तकुलैर्विप्रैर्यत्कृतं वचनं न मे ॥ कृतघ्नैस्ता
ञ्छपिष्यामि कृतघ्नत्वान्न संशयः ॥ १५८ ॥ यस्मादिदं पुरा प्रोक्तं मनुना सत्यवादिना ॥ स्वायंभुवेन प्रोद्दिश्य कृतघ्नं सकलं जनम् ॥ १५९ ॥
ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते शठे ॥ निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः ॥ १६० ॥ अवध्या ब्राह्मणा गावः 
स्त्रियो बालास्तपस्विनः ॥ तेनाऽहं न वधाम्येताञ्छिद्रेऽपि महति स्थिते ॥ १६१ ॥ ततस्तोयं समादाय सदर्भं निजपाणिना ॥

१ सप्तपूर्वजान्—इ० पा० । २ यावदाहूतसंप्लवम्—इ० पां० । ३ असंशयम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शशाप तान्द्विजश्रेष्ठान्कृतघ्नान्पाकशासनः ॥ १६२ ॥ मम वाक्यादपि प्राप्य एते लक्ष्मीं द्विजोत्तमाः ॥ निर्धनाः संभविष्यंति नीत्वा यद्द्वारतो ऽखिलम् ॥ १६३ ॥ भक्तानां च परित्यागमेतेषां वंशजा द्विजाः ॥ करिष्यंति न सन्देहो यथा मम सुनिष्ठुराः ॥ दाक्षिण्यरहिताः सर्वे तथा बह्वाशिनः सदा ॥ १६४ ॥ एवमुक्त्वाऽथ तान्विप्रान्सप्तवंशसमुद्भवान् ॥ पुनः प्रोवाच तान्विप्राञ्छेषान्नगरसंभवान् ॥ १६५ ॥ ममात्र दीयतां स्थानं स्थानेऽत्रैव द्विजोत्तमाः ॥ येन संवत्सरस्यांते पंचरात्रं वसाम्यहम् ॥ १६६ ॥ देवस्यास्य प्रपूजार्थं मर्त्यलोकसुखाय च ॥ ब्राह्मणानां प्रपूजार्थं सर्वेषां भवतामिह ॥ १६७ ॥ ॥ विश्वामित्र उवाच ॥ ॥ ततस्ते ब्राह्मणाः सर्वे तदर्थं स्थानमुत्तमम् ॥ दर्शयामासुः संहृष्टाः प्रोचुश्च तदनंतरम् ॥ १६८ ॥ ब्रह्मस्थाने त्वया शक्र पंचरात्रमुपेत्य च ॥ स्थातव्यं मर्त्यलोकस्य सुखमासेव्यतां प्रभो ॥ ॥ १६९ ॥ अत्र स्थाने तवाऽग्रे तु करिष्यामो महोत्सवम् ॥ गीतवादित्रनिर्घोषैर्गंधमाल्यानुलेपनैः ॥ द्विजानां तर्पणैश्चैव सर्वकामसमृद्धिदम् ॥ ॥ १७० ॥ ॥ विश्वामित्र उवाच ॥ ॥ तच्छ्रुत्वा वचनं तेषां प्रहृष्टः पाकशासनः ॥ पूजयित्वा द्विजान्सर्वान्गतोऽथ त्रिदिवालयम् ॥ १७१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये बालमण्डनतीर्थमाहात्म्यवर्णनंनाम षडुत्तरद्विशततमोऽध्यायः ॥ २०६ ॥ ॥ छ ॥ ॥ विश्वामित्र उवाच ॥ ॥ एतत्ते सर्वमाख्यातं यत्पृष्टोऽस्मि नराधिप ॥ बालमंडनमाहात्म्यं सर्वपातकनाशनम् ॥ १ ॥ यत्रैकस्मिन्नपि स्नाने कृते पार्थिवसत्तम ॥ सर्वेषां लभ्यते पुण्यं तीर्थानां स्नानसंभवम् ॥ माघमासे त्रयोदश्यां शुक्लपक्ष उपस्थिते ॥ २ ॥ ॥ आनर्त उवाच ॥ ॥ कस्माच्छक्रस्य संस्थानं पंचरात्रं धरातले ॥ नाधिकं जायते तेषां यथान्येषां दिवौकसाम् ॥ ३ ॥ वर्षांते कानि चाहानि येषु शक्रो धरातले ॥ समागच्छति को मास एतत्सर्वं ब्रवीहि मे ॥ ४ ॥ ॥ विश्वामित्र उवाच ॥ ॥ श्रूयतामभिधास्यामि कथामेनां धराधिप ॥ पंचरात्रात्परं शक्रो यथा न स्याद्धरातले ॥ ५ ॥ आसीत्पूर्वं बृहत्कल्पे जयत्सेनः सुरेश्वरः ॥ त्रैलोक्यस्य समस्तस्य स्वामी दानवदर्पहा ॥ ६ ॥ त्रैलोक्ये सकले पूजां भजमानः सदैव हि ॥ कस्यचित्त्वथ कालस्य गौतमस्य मुनेः प्रिया ॥ ७ ॥ अहिल्यानाम भार्याऽभूद्रूपेणाप्रतिमा भुवि ॥ तां दृष्ट्वा चकमे शक्रः कामदेववशं गतः ॥८॥ नित्यमेव समागत्य स्वर्गलोकात्स कामभाक् ॥ गौतमे निर्गते राजन्समिदिध्मार्थ

१ यद्द्वारतोऽखिलम्—येषां भक्तानां द्वारतः—याचनां कृत्वा—अखिलम—अन्नवस्त्रवित्तादिकमुपजीविकासाधनं—नीत्वा—उपजीविकां करिष्यंति—इत्यध्याहारः। तेषां भक्तानामपि—एतेषां वंशजा द्विजास्त्यागं करिष्यंति—कृतघ्नत्वदोषादिति भावः। इति योजना।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



मेव हि ॥ दर्भार्थं फलमूलार्थं स्वयमेव महात्मभिः ॥ ९ ॥ अथ तस्य समाचख्यौ नारदो मुनिसत्तमः ॥ शक्रस्य चेष्टितं सर्वं तथाहिल्यासमुद्भवम् ॥
॥१०॥ तच्छ्रुत्वा सहसा तूर्णं गौतमो गृहमभ्यगात् ॥ यावत्पश्यति देवेशं सह पत्न्या समागतम् ॥११॥ शक्रोऽपि गौतमं दृष्ट्वा पलायनपरायणः ॥
निर्जगामाश्रमात्तस्माद्विवस्त्रोऽपि भयाकुलः ॥१२॥ अहिल्यापि भयत्रस्ता दृष्ट्वा भर्तारमागतम्॥अधोमुखी स्थिता राजंस्तदा व्याकुलितेंद्रिया॥१३॥
गौतमोऽपि च तद्दृष्ट्वा सम्यग्भार्याविचेष्टितम् ॥ ददौ शापं महाराज कोपसंरक्तलोचनः ॥ १४ ॥ यस्माच्छक्र पापकर्म कृतमीदृग्विगर्हितम् ॥
भार्या मे दूषिता साध्वी तस्मादवृषणो भव ॥१५॥ सहस्रं च भगानां ते वक्त्रे भवतु मा चिरम् ॥ येन त्वं विप्लवं यासि त्रैलोक्ये सचराचरे ॥१६॥
अपरं मर्त्यलोकेऽत्र यद्यागच्छसि वासव ॥ पूजाकृते ततो मूर्धा शतधा ते भविष्यति ॥ १७ ॥ एवं शप्त्वा च तं शक्रं ततोऽहिल्यामुवाच सः ॥
कोपसंरक्तनेत्रस्तु भर्त्सयित्वा मुहुर्मुहुः ॥ १८ ॥ यस्मात्पापे त्वया कर्म कृतमेतद्विगर्हितम् ॥ तस्माच्छिलामयी भूत्वा त्वं तिष्ठ वसुधातले ॥ १९ ॥
ततः सा तत्क्षणाज्जाता तस्य भार्या शिलात्मिका ॥ इन्द्रोऽपि च परित्यक्तो वृषणाभ्यां तथाऽभवत् ॥ २० ॥ सहस्रभगचिह्नस्तु वक्त्रदेशे बभूव
ह ॥ २१ ॥ अथ मेरोः समासाद्य कंदरं विजनं हरिः ॥ सव्रीडः सेवते नित्यं न जगाम निजां पुरीम् ॥ २२ ॥ ततो देवगणाः सर्वे सोद्वेगास्तेन
वर्जिताः ॥ नो जानंति च तत्रस्थं कन्दरान्वेषणे रताः ॥ २३ ॥ पीड्यंते दानवै रौद्रैः स्वर्गे जाते विराजके ॥ २४ ॥ एतस्मिन्नन्तरे जीवः
शक्राण्या भयभीतया ॥ सोद्वेगया परिपृष्टः क्व गतोऽथ पुरंदरः ॥ २५ ॥ अथ जीवश्चिरं ध्यात्वा दृष्ट्वा तं ज्ञानचक्षुषा ॥ जगाम सहितो देवैः
प्रोवाचाथ सुनिष्ठुरम् ॥ २६ ॥ किमित्थं राज्यभोगांस्त्वं त्यक्त्वा विजनमाश्रितः ॥ किं त्वया विहितं ध्यानं किं रौद्रं संश्रितं तपः ॥ २७ ॥ बृह
स्पतेर्वचः श्रुत्वा भगवक्त्रः पुरंदरः ॥ प्रोवाच लज्जया युक्तो दीनो बाष्पपरिप्लुतः ॥ २८ ॥ नाहं राज्यं करिष्यामि त्रैलोक्येऽपि कथंचन ॥ पश्य
मे यादृशी जाता ह्यवस्था गौतमान्मुनेः ॥ २९ ॥ सहस्रभगचिह्नेन कथं वक्त्रेण तानहम् ॥ देवान्संभावयिष्यामि पौलोमीं च तथा शिवम् ॥३०॥
मर्त्यलोकोद्भवा पूजा नष्टा मम बृहस्पते ॥ गौतमस्य मुनेः शापात्कस्मिंश्चित्कारणांतरे ॥ ३१ ॥ तच्छ्रुत्वा देवराजस्य बृहस्पतिरुवाच ह ॥ दुःखेन
महता युक्तः सर्वैर्देवैः समावृतः ॥ गौतमस्य समीपे च गत्वा प्रोवाच तं स्वयम् ॥ ३२ ॥ एतच्छक्रपरित्यक्तं त्रैलोक्यमपि चाखिलम् ॥ पीड्यते ॥२३५॥
दानवैर्विप्र नष्टयज्ञोत्सवक्रियम् ॥ ३३ ॥ नैष वांछति राज्यं स्वं लज्जया परया युतः ॥ तस्मादस्य प्रसादं त्वं यथावत्कर्तुमर्हसि ॥ अनुग्रहेण

१ उदारधीः-इ॰ पा॰ । २ वृतः-इ॰ पा॰ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शापस्य मम वाक्याद्द्विजोत्तम ॥ ३४ ॥ तच्छ्रुत्वा गौतमः प्राह न मे वाक्यं भवेन्मृषा ॥ न वाक्यं लोपयिष्यामि यदुक्तं स्वयमेव हि ॥ ॥ ३५ ॥ ततः प्रोवाच ते विष्णुः स्वयं चापि महेश्वरः ॥ तथा देवगणाः सर्वे विनयावनता स्थिताः ॥ ३६ ॥ अन्यथा ब्रह्मणो वाक्यं न ते कर्तुं प्रयुज्यते ॥ तस्मात्कुरुष्व विप्रेन्द्र शापस्यानुग्रहं हरेः[१] ॥ ३७ ॥ दृष्ट्वा तन्मनसो दार्ढ्यं सुरा विष्णुपुरोगमाः ॥ ब्रह्मणोऽतिकमभ्येत्य तस्मै सर्वं न्यवेदयन् ॥ ३८ ॥ शापं शक्रस्य संजातं तथा तस्मान्महामुनेः ॥ ३९ ॥ यथा विडंबना जाता देवराजस्य गर्हिता ॥ तथा च दानवैः सर्वं त्रैलोक्यं व्याकुलीकृतम् ॥ ४० ॥ यथा न कुरुते राज्यं व्रीडितः स शचीपतिः ॥ तच्छ्रुत्वा पद्मजस्तूर्णं हरिशंभुसमन्वितः ॥ ४१ ॥ जगाम तत्र यत्रास्ते दुःखितः पाकशासनः ॥ गौतमं च समानीय तत्रैव च पितामहः ॥ ४२ ॥ ततः प्रोवाच प्रत्यक्षं देवानां वासवस्य च ॥ अयुक्तं देवराजेन विहितं मुनिसत्तम ॥४३॥ यत्ते प्रदूषिता भार्या कामोपहतचेतसा ॥ न ते दोषोऽस्ति यच्छत्तश्छिद्रे चास्मिन्पुरंदरः ॥ परं प्रशस्यते नित्यं मुनीनां परमा क्षमा ॥ ४४ ॥ यथा त्रैलोक्यराज्यं स्वं प्रकरोति शतक्रतुः ॥ त्वया स्वयं प्रसादेन तथा नीतिर्विधीयताम् ॥४५॥ दत्त्वाऽस्य वृषणौ भूयो नाशयित्वा भगानिमान् ॥ मर्त्यलोके गतिश्चास्य यथा स्यात्तत्समाचर॥४६॥ तच्छ्रुत्वा वचनं तेषां स मुनिर्देवगौरवात् ॥ वृषणौ मेषसंभूतौ योजयामास तौ तदा ॥४७॥ तान्भगान्पाणिना स्पृष्ट्वा चक्रे नेत्राणि सन्मुनिः॥ ततः प्रोवाच तान्देवान्गौतमश्च महातपाः॥४८॥सहस्राक्षो मया शक्रो निर्मितोयं सुरोत्तमाः ॥ स मेषवृषणश्चापि स्वं च राज्यं करिष्यति ॥ शोभाऽस्य नेत्रजा वक्रे सुरम्या संभविष्यति ॥४९॥ पुंस्त्वं च मेषजोत्थाभ्यां वृषणाभ्यां भविष्यति ॥ न च मर्त्ये गतिश्चास्य पूजार्थं संभविष्यति ॥ ५० ॥ एतस्मिन्नन्तरे जातः सहस्राक्षः पुरंदरः॥ शोभया परया युक्तो मुनेस्तस्य प्रभावतः ॥५१॥ ततः संगृह्य पादौ च गौतमस्य महात्मनः॥ प्रोवाच वचनं शक्रः सर्वदेवसमागमे ॥ ५२ ॥ दुर्लभा मर्त्यलोकोत्था पूजा ब्राह्मणसत्तम ॥ सा मे तव प्रसादेन यथा स्यात्तत्समाचर ॥ ५३ ॥ त्रैलोक्यपतिजा संज्ञा मा नाशं यातु मे द्विज ॥ प्रसादात्तव सा नित्यं यथा स्यात्तद्विधीयताम् ॥ ५४ ॥ तच्छ्रुत्वा लज्जयाविष्टः कृपया चाथ सन्मुनिः॥ तमूचे सर्वदेवानां प्रत्यक्षं पाकशासनम् ॥ ५५ ॥ पंचरात्रं च ते पूजा मर्त्यलोके भविष्यति ॥ अनन्यां तृप्तिमभ्येपि यथा चैव तु वत्सरम् ॥ ५६ ॥ यत्र देशे पुरे ग्रामे पंचरात्रं महोत्सवः ॥ तत्र संवत्सरं यावन्नीरोगो भविता जनः ॥५७॥ आधयो व्याधयो नैव न दुर्भिक्षं कथंचन ॥ न च राज्ञो विनाशः स्यान्नैव लोकेऽसुखं क्वचित् ॥ ५८ ॥ यत्र स्थाने महो भावी तावकश्च पुरंदर ॥

[१] हरेः–इन्द्रस्य–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



प्रभूतपयसो गावः प्रभविष्यंति तत्र च ॥ सुभिक्षं सुखिनो लोकाः सर्वोपद्रववर्जिताः ॥ ५९ ॥ ॥ इन्द्र उवाच ॥ ॥ यद्येवं शरदि प्राप्ते सर्व सत्त्वमनोहरे ॥ सप्तच्छदसमाकीर्णे बन्धूकसुविराजिते ॥ ६० ॥ मालतीगन्धसंकीर्णे नवसस्यसमाकुले ॥ चंद्रज्योत्स्नाकृतोद्द्योते षट्पदाराव संकुले ॥ ६१ ॥ कुमुदोत्पलसंयुक्ते तत्र स्यात्सुमहोत्सवः ॥ येन बालोऽपि वृद्धोऽपि संहृष्टस्तत्समाचर ॥ ६२ ॥ ॥ गौतम उवाच ॥ ॥ अद्य श्रवणनक्षत्रे तव दत्तो महोत्सवः ॥ वैष्णवे पुण्यनक्षत्रे सर्वपापविवर्जिते ॥ ६३ ॥ त्वया मे धर्षिता भार्या पौष्णे नक्षत्रसंज्ञिते ॥ तस्मिन्भवि ष्यति व्यक्तं तव पातः पुरंदर ॥ ६४ ॥ येनैषा मामकी कीर्तिस्तावकं वक्तु कर्म तत् ॥ विख्यातिं यांतु लोकेऽत्र न कश्चित्पापमाचरेत् ॥ ६५ ॥ श्रवणादीनि पंचैव नक्षत्राणि पृथक्पृथक् ॥ तव पूजाकृते पंच क्रतुतुल्यानि तानि च ॥ भविष्यंति न संदेहः सर्वतीर्थमयानि च ॥ ६६ ॥ यो यं काममभिध्याय पूजां तव करिष्यति ॥ विशेषात्फलपुष्पैश्च स तं कृत्स्नमवाप्नुयात् ॥ ६७ ॥ परं मूर्तिर्न ते पूज्या कुत्रापि च भविष्यति ॥ त्वया मे दूषिता भार्या ब्राह्मणी प्राणसंमता ॥ ६८ ॥ तस्माद्वृक्षोद्भवां यष्टिं ब्राह्मणा वेदपारगाः ॥ तावकैः सकलैर्मंत्रैः स्थापयिष्यंति शक्तितः ॥ ६९ ॥ पंच रात्रविधानेन यथान्येषां दिवौकसाम् ॥ ततः संक्रमणं कृत्वा पूजा मर्त्यसमुद्भवा ॥ त्वया ग्राह्या सहस्राक्ष तृप्तिश्चैव भविष्यति ॥ ७० ॥ यो यथा चैव ते यष्टिं सुप्तामुत्थापयिष्यति ॥ तस्य तस्याधिका सिद्धिः संभविष्यंति वासव ॥ ७१ ॥ पंचरात्रव्रतस्थो यो ब्रह्मचर्यपरायणः ॥ प्रकरिष्यति ते पूजां फलपुष्पैर्यथोदितैः ॥ ७२ ॥ परदारकृतात्पापात्स सर्वान्मुक्तिमेष्यति ॥ ७३ ॥ नमः शक्राय देवाय शुनासीराय ते नमः ॥ नम स्ते वज्रहस्ताय नमस्ते वज्रपाणये ॥ ७४ ॥ मन्त्रेणानेन यश्चार्घ्यं तव शक्र प्रदास्यति ॥ परदारकृतं पापं तस्य सर्वं प्रयास्यति ॥ ॥ ७५ ॥ यश्चेदं तव संवादं मया सार्धं पुरंदर ॥ कीर्तयिष्यति सद्भक्त्या तथैवाकर्णयिष्यति ॥ ७६ ॥ तस्य संवत्सरंयावन्नैव रोगो भविष्यति ॥ तच्छुत्वा विबुधाः सर्वे तथेत्युक्त्वा प्रहर्षिताः ॥ ७७ ॥ जग्मुः शक्रं समादाय पुनरेवामरावतीम् ॥ गौतमोऽपि निजा वासं गतः कोपसमाश्रितः ॥ ७८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्य इन्द्रमहोत्सववर्णनंनाम सप्तोत्तरद्विशततमोऽध्यायः ॥ २०७ ॥ ॥ छ ॥ ॥ विश्वामित्र उवाच ॥ ॥ एवं शक्रे दिवं प्राप्ते देवेषु

१ अत्रापि कीर्तिरेव कर्ता ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सकलेषु च ॥ गौतमः स्वाश्रमं प्रापत्कोपेन महता ज्वलन् ॥ १ ॥ ततः स कथयामास सर्वं देवविचेष्टितम् ॥ वरदानं च शक्राय शता नन्दस्य चाग्रतः ॥ २ ॥ तच्छ्रुत्वा पितरं प्राह विनयावनतः स्थितः ॥ तातांबाया न कस्मात्त्वं प्रसादं प्रकरोषि मे ॥ ३ ॥ उत्थापने न ते किञ्चिदसाध्यं विद्यते विभो ॥ तस्मात्कुरु प्रसादं मे यथा स्यान्मम चांबया ॥ ४ ॥ समागमो मुनिश्रेष्ठ दीनस्योत्कण्ठितस्य च ॥ तस्मा दुत्थाप्य तां तूर्णं प्रायश्चित्तविधिं ततः ॥ तस्मादादिश मे क्षिप्रं येन शुद्धिः प्रजायते ॥ ५ ॥ ॥ गौतम उवाच ॥ ॥ मद्यावलिप्तभांडस्य यदि शुद्धिः प्रजायते ॥ तत्स्त्रीणां जायते शुद्धिर्योनौ शुक्राभिषेचनात् ॥ ६ ॥ ब्राह्मणस्तु सुरां पीत्वा मौंजीहोमेन शुध्यति ॥ तिंगिनीं साधयित्वा च न तु नारी विधर्मिता ॥ ७ ॥ मद्यभांडमपि प्रायो यथावद्वह्निशोधितम् ॥ विशुध्यति तथा नारी वह्निदग्धा विशुध्यति ॥ यस्या रेतोऽथ संक्रांत मुदरांतेऽन्यसंभवम् ॥ ८ ॥ एतस्मात्कारणान्माता मया ते पुत्र सा शिला ॥ विहिता न हि तस्याश्च विशुद्धिस्तु कथञ्चन ॥ ९ ॥ ॥ शतानन्द उवाच ॥ ॥ यद्येवं साधयिष्यामि तत्कृतेऽहं हुताशनम् ॥ विषं वा भक्षयिष्यामि पतिष्यामि जलाशये ॥ १० ॥ मातुर्वियोगतस्तात सत्यमेतन्म योदितम् ॥ धर्मद्रोणाः[3] स्थिताश्चान्ये मन्वाद्या मुनयस्तथा ॥ ११ ॥ इतिहासपुराणानि वेदांतानि बहूनि च ॥ संचिंत्य तात सर्वाणि देहि शुद्धिं ममापि ताम् ॥ मम मातुः करिष्यामि नो चेत्प्राणपरिक्षयम् ॥ १२ ॥ ॥ विश्वामित्र उवाच ॥ ॥ तच्छ्रुत्वा सुचिरं ध्यात्वा गौतमः प्राह तं सुतम् ॥ परिष्वज्य स्वबाहुभ्यां मूर्ध्न्याघ्राय ततः परम् ॥ १३ ॥ यद्येवं वत्स मा कार्षीः साहसं पापसंभवम् ॥ आत्मदेहविघातेन श्रूयतां वचनं मम ॥ ॥ १४ ॥ मेध्यत्वे तव मातुश्च शुद्धिर्ज्ञाता मया पुरा ॥ यया सा मम हर्म्यार्हा भविष्यति न संशयः ॥ १५ ॥ उत्पत्स्यते रवेर्वंशे रामरूपी जना र्दनः ॥ रावणस्य वधार्थाय मानुषं रूपमास्थितः ॥ १६ ॥ तस्य पादस्य संस्पर्शाद्भूयः शुद्धा भविष्यति ॥ तस्मात्प्रतीक्ष्य तावत्त्वमौत्सुक्यं[4] व्रज पुत्रक ॥ १७ ॥ एतत्सम्यङ्मया ज्ञातं वत्स दिव्येन चक्षुषा ॥ १८ ॥ एतच्छ्रुत्वा तथेत्युक्त्वा शतानन्दः प्रहर्षितः ॥ स्थितः प्रतीक्षमाणस्तु

१ शतानन्दस्य—शतानन्दनामकस्वपुत्रस्य—इत्यर्थः । अयमेव शतानन्दः श्रीमदध्यात्मरामायणे जनकमहीपतेः पुरोहित आसीत्—अत एव तत्रोक्तं "शतानंदपुरोधसा" इति । २ तंगिनीम्—इ० पा० । तिंगिनीसाधनं चात्रैवाग्रे कृष्णपुत्रसाम्बब्राह्मणसंवादे ब्राह्मणेन वक्ष्यते—"गोवाटचूर्णमादाय गर्तां भृत्वा स्वमानजाम् ॥ शयनं तत्र कर्तव्यं यावद्वक्रेण यादव ॥ उपरिष्टात्तु तच्चूर्णं धार्यं गोवाटसंभवम् ॥ यावद्वक्त्रप्रमाणं च वर्जयित्वा स्वमाननम् ॥ ततः पादप्रदेशे तु ज्वालयेद्धव्यवाहनम् ॥ यथा शनैःशनैर्दाहः शरीरस्य प्रजायते ॥ न चैव चालयेदंगं कथंचित्तत्र संस्थितः ॥ नैवाक्रंदं तथा कुर्याद्ध्यायेदेकं जनार्दनम् ॥ ततो जीवितनाशेन गात्रशुद्धिः प्रजायते ॥ तिंगिन्या यत्स्वरूपं च तन्मया परिकीर्तितम् ॥" इति । ३ धर्मद्रोणाः—धर्माधारपात्रसदृशाः—इत्यर्थः । ४ मौत्सुक्यम्—मा—औत्सुक्यम्—इति पदच्छेदः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तं कालं मातृवत्सलः ॥ १९ ॥ ततः कालेन महता रामरूपी जनार्दनः ॥ रावणस्य वधार्थाय जातो दशरथालये ॥ २० ॥ स मया[1] भगवा न्विष्णुर्बालभावेन संस्थितः ॥ निजयज्ञस्य रक्षार्थं समानीतः स्वमाश्रमम् ॥ राक्षसानां विनाशाय यज्ञकर्मविनाशिनाम् ॥ २१ ॥ हतैस्तै राक्षसै रौद्रैर्मम पूर्णोऽभवन्मखः ॥ अयोध्यायाः समानीतः स मया रघुनंदनः ॥ २२ ॥ सीतायाश्च विवाहार्थं लक्ष्मणेन समन्वितः ॥ श्रुत्वा स्वयंवरं तस्याः पार्थिवानां समागमम् ॥ २३ ॥ ततो मार्गे मया दृष्टा गौतमस्याश्रमे शुभे ॥ अहिल्या सा शिला रूपा प्रमाणेन महत्तमा ॥ २४ ॥ ततः प्रोक्तो मया रामः स्पृशेमां वत्स पाणिना ॥ मानुषत्वं लभेद्येन गौतमस्य प्रिया मुनेः ॥ शापदोषेण संजाता शिलेयं तस्य सन्मुनेः ॥ २५ ॥ अविकल्पं ततो रामो मम वाक्येन तां शिलाम् ॥ पस्पर्श पार्थिवश्रेष्ठ कौतू हलसमन्वितः ॥ २६ ॥ अथ रामेण संस्पृष्टा सहसैवांगना मुनेः ॥ शुशुभे मानुषी जाता दिव्यरूपवपुर्धरा ॥ २७ ॥ ततः सा लज्जयाऽऽ विष्टा प्रणिपत्य च गौतमम् ॥ स्मरमाणाऽऽत्मनः कृत्यं यच्छक्रेण समन्वितम् ॥ २८ ॥ प्रायश्चित्तं मम स्वामिन्देहि सर्वमशेषतः ॥ यन्नरस्य समायोगे परस्याह प्रजापतिः ॥ २९ ॥ अहं दुष्करमप्येतत्करिष्यामि न संशयः ॥ येन शुद्धिर्भवेन्मह्यं पुरश्चरणसेवनात् ॥ ३० ॥ ततः संचिंत्य सुचिरं प्रोवाच गौतमस्तदा ॥ कुरु चान्द्रायणशतं कृच्छ्राणां च सहस्रकम् ॥ ३१ ॥ प्राजापत्यायुतं चापि तीर्थयात्रापरायणा ॥ अष्टषष्टिषु तीर्थेषु या[3]नि तीर्थानि भूतले ॥ तेषां संदर्शनात्सम्यक्ततः शुद्धिमवाप्स्यसि ॥ ३२ ॥ सा तथेति प्रतिज्ञाय नित्यं व्रतपरायणा ॥ अष्टषष्टिसुतीर्थेषु वाराणस्यादिषु क्रमात् ॥ ३३ ॥ बभ्राम तानि लिंगानि पूजयन्ती प्रभक्तितः ॥ क्रमेणैव तु संप्राप्ता हाटकेश्वरसंभवम् ॥ ३४ ॥ यावत्पश्यति सा साध्वी तावन्नागबिलो महान् ॥ पूरितो नागरेणैव मार्गः पातालसंभवः ॥ ३५ ॥ गच्छंति येन पूर्वं तु तीर्थयात्रापरायणाः ॥ हाटकेश्वरदेवस्य दर्शनार्थं मुनीश्वराः ॥ ३६ ॥ अथ सा चिन्तयामास न दृष्टे तु सुरेश्वरे ॥ हाटकेश्वरदेवे च न हि यात्राफलं लभेत् ॥ ३७ ॥ तस्मात्तपः करि ष्यामि स्थित्वा चैव सुदुष्करम् ॥ येनाहं तत्प्रभावेन तं पश्यामि सुरेश्वरम् ॥ ३८ ॥ एवं सा निश्चयं कृत्वा तपस्तेपे सुदुष्करम् ॥ दर्शनार्थं हि देवस्य पातालनिलयस्य च ॥ ३९ ॥ पंचाग्निसाधका ग्रीष्मे हेमन्ते सलिलाश्रया ॥ वर्षास्वाकाशशयना सा बभूव तपस्विनी ॥ ४० ॥ हरलिंगं प्रतिष्ठाप्य स्वनाम्ना चांतिके तदा ॥ त्रिकालं पूजयामास गन्धपुष्पानुलेपनैः ॥ ४१ ॥ एवं तपसि संस्थायास्तस्याः कालो महान्गतः ॥ न च

१ मया—विश्वामित्रेण—इत्यर्थः । २ यज्ञे निवर्तिते—इ० पा० । ३ यानि तीर्थानि अष्टषष्टिसंख्याकानि भूतले सन्ति तेषु—अष्टषष्टिषु तीर्थेषु—इति योजना ।

CC-0. In Public Domain. Digitization by eGangotri

संदर्शनं जातं हाटकेश्वरसंभवम् ॥ ४२ ॥ कस्यचित्त्वथ कालस्य शतानन्दश्च तत्सुतः ॥ स तामन्वेषमाणस्तु तस्मिन्क्षेत्रे समागतः ॥ मातृस्नेह परीतात्मा तीर्थान्वेषणतत्परः ॥ ४३ ॥ अथ तां तत्र संवीक्ष्य दारुणे तपसि स्थिताम् ॥ प्रणिपत्य स्थितो दीनः सदुःखो वाक्यमब्रवीत् ॥ ४४ ॥ किमत्र[1] क्लिश्यते कायस्तपः कृत्वा सुदारुणम् ॥ सप्तषष्टिषु तीर्थेषु यानि लिंगानि तेषु च ॥ ४५ ॥ माहेश्वराणि लिंगानि तानि दृष्टानि च त्वया ॥ एतत्पातालसंस्थं च हाटकेश्वरसंज्ञितम् ॥ ४६ ॥ न पश्यति नरः कश्चिद्दृष्टं क्षेत्रे न केनचित् ॥ तेन शुद्धिश्च संजाता स्वभर्त्रा विहिता तु या ॥ ४७ ॥ तस्मादागच्छ गच्छामस्ताताश्रमपदे शुभे ॥ त्वन्मार्गं वीक्षते तातः कर्षुको वर्षणं यथा ॥ ४८ ॥ ॥ अहिल्योवाच ॥ ॥ यावत्पश्यामि नो देवं हाटकेश्वरसंज्ञितम् ॥ तावद्गच्छामि नो गेहं यदा पश्यामि तं हरम् ॥ ४९ ॥ तदा यास्ये गृहं पुत्र निश्चयोऽयं मया कृतः ॥ ५० ॥ तच्छ्रुत्वा सोऽपि तां प्राह ह्येष चेन्निश्चयस्तव ॥ मयाऽपि तातपार्श्वे तु प्रगंतव्यं त्वया सह ॥ ५१ ॥ एवमुक्त्वा ततः सोपि स्थापयामास शांभवम् ॥ लिंगं च पूजयामास त्रिकालं तपसि स्थितः ॥ ५२ ॥ शतानन्दस्तु राजर्षे गन्धपुष्पानुलेपनैः ॥ नैवेद्यैर्विविधैः सूक्तैर्वेदोक्तैः पर्यतोषयत् ॥ ५३ ॥ षष्ठान्नकालभोज्यस्य व्रतचर्यारतस्य च ॥ एवं तस्याऽपि संस्थस्य गतः कालो महान्मुने ॥ न च तुष्यति देवेशस्ताभ्यां द्वाभ्यां कथञ्चन ॥ ५४ ॥ ततः कालेन महता गौतमोऽपि महामुनिः ॥ आजगाम स्वयं तत्र पुत्रदर्शनलालसः ॥ ५५ ॥ स दृष्ट्वा भार्यया सार्धं पुत्रं तपसि संस्थितम् ॥ तुतोष प्रथमं तावत्पश्चाद्दुःखसमन्वितः ॥ ५६ ॥ अहो बत महत्कष्टं पुत्रो मे कृशतां गतः ॥ तपसः संप्रभावेन नयामि स्वगृहं कथम् ॥ भार्येयं च तथा मह्यं[2] विवर्णा तु कृशा स्थिता ॥ ५७ ॥ एवं संचिंत्य मनसा तावुभौ प्रत्यभाषत ॥ गम्यतां स्वगृहं कृत्वा तपसः संनिवर्तनम् ॥ ५८ ॥ ॥ शतानन्द उवाच ॥ ॥ तातांबा बहुधा प्रोक्ता तपसः संनिवर्तने ॥ नो गच्छति तथा हर्म्यमदृष्टे हाटकेश्वरे ॥ ५९ ॥ अहं तया विहीनस्तु नैव यास्यामि निश्चितम् ॥ एवं ज्ञात्वा महाभाग यद्युक्तं तत्समाचर ॥ ६० ॥ ॥ गौतम उवाच ॥ ॥ यद्येवं निश्चयो वत्स तव मातुश्च संस्थितः ॥ अहं तं दर्शयिष्यामि तपसा हाटकेश्वरम् ॥ ६१ ॥ एवमुक्त्वा ततः सोऽपि तपश्चक्रे महामुनिः ॥ एकांतरोपवासस्तु स्थितो वर्षशतं मुनिः ॥ षष्ठान्नकालभोजी च तावत्काले ततोऽभवत् ॥ ६२ ॥ त्रिरात्रभोजी पश्चाच्च स बभूव मुनीश्वरः ॥ तावत्कालं फलैर्निन्ये तावत्कालं जलाशनः ॥ वायुभक्षस्ततो भूयस्तावत्कालमभून्मुनिः ॥ ६३ ॥ ततो वर्षसहस्रांते परमे संव्यवस्थिते ॥ प्रभिद्य मेदि

१ किं मात्रा क्लिश्यते—इ० पा० । २ मह्यम्—मम ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



नीपृष्ठं निष्क्रांतं लिंगमुत्तमम् ॥ ६४ ॥ द्वादशार्कप्रतीकाशं सर्वलक्षणलक्षितम् ॥ एतस्मिन्नंतरे देवः शंभुः प्रत्यक्षतां गतः ॥ ६५ ॥ एतस्मिन्नेव काले तु भगवाञ्छशिशेखरः ॥ तस्य दृष्टिपथं गत्वा वाक्यमेतदुवाच ह ॥ ६६ ॥ गौतमाऽहं प्रतुष्टस्ते तपसाऽनेन सुव्रत ॥ ६७ ॥ एतच्च मामकं लिंगं हाटकेश्वरसंज्ञितम् ॥ पातालाच्च विनिष्क्रांतं तव भक्त्या महामुने ॥६८॥ एतदर्थं तपस्ततं सभार्येण त्वया हि तत् ॥ सपुत्रेणाखिलं जातं फलं तस्य यथेप्सितम् ॥ ६९ ॥ एतत्पश्यतु ते भार्या अहिल्या दिव्यरूपिणी ॥ अद्यषष्ठ्युद्भवं येन यात्राफलमवाप्नुयात् ॥ ७० ॥ त्वं चापि प्रार्थय वरं येन सर्वं ददामि ते ॥ ७१ ॥ ॥ गौतम उवाच ॥ हाटकेश्वरसंज्ञे तु सकृद्दृष्टे च यत्फलम् ॥ पातालस्थे च यत्पुण्यं नराणां जायते फलम् ॥ दृष्टेनानेन तत्पुण्यं पूजितेन विशेषतः ॥ ७२ ॥ अन्येऽपि ये जनास्तच्च पूजयंति प्रभक्तितः ॥ चैत्रशुक्लचतुर्दश्यां ते प्रयांतु त्रिविष्टपम् ॥ ७३ ॥ एतल्लिंगं न जानंति नराः सिद्ध्यभिकांक्षिणः ॥ विशंति विवरं तेन हाटकेश्वरकांक्षया ॥ ७४ ॥ अपि पापसमोपेता लिंगस्यास्य प्रभावतः ॥ परदारोद्भवात्पापादहिल्येश्वरदर्शनात् ॥ ७५ ॥ मुच्यंते मानवास्तद्वच्छतानंदेश्वरादपि ॥ तस्मिन्दिने विहितया ताभ्यां चैव प्रपूजया ॥ ७६ ॥ ॥ विश्वामित्र उवाच ॥ ॥ एतस्मिन्नेव काले तु व्याप्तः स्वर्गोऽखिलो नृप ॥ मानुषैरपि पापाढ्यैः सर्वधर्मविवर्जितैः ॥ ७७ ॥ न कश्चित्कुरुते यज्ञं तीर्थयात्रामथापरम् ॥ न व्रतं नियमं चैव दानस्यापि कथामपि ॥ ७८ ॥ तच्च लिंगत्रयं दृष्ट्वा स्पृष्ट्वा संपूज्य भक्तितः ॥ ७९ ॥ ततो भीताः सुराः सर्वे सस्पर्धैर्मानुषैर्वृताः ॥ प्रोचुः पुरंदरं गत्वा व्यथया परया युताः ॥ ८० ॥ मर्त्यलोके सहस्राक्ष सर्वे धर्माः क्षयं गताः ॥ अपि पापसमाचारा अभ्येत्य पुरुषा इह ॥ ८१ ॥ अस्माभिः सह गर्वाढ्याः स्पर्धां कुर्वंति सर्वदा ॥ हाटकेश्वरजे क्षेत्रे लिंगत्रयमनुत्तमम् ॥ ८२ ॥ यत्स्थितं स्थापितं तत्र गौतमेन महात्मना ॥ सपुत्रेण सदारेण तस्य पूजाप्रभावतः ॥ ८३ ॥ अपि पापसमाचारा इहागच्छंति तेऽखिलाः ॥ यमस्य नरकाः सर्वे सांप्रतं शून्यतां गताः ॥ ८४ ॥ गौतमेन समानीतः पातालाद्धाटकेश्वरः ॥ तपसा तोषयित्वा तु तत्र स्थाने सुरेश्वरः ॥ ८५ ॥ तत्प्रभावादयं जातो व्यवहारो धरातले ॥ ८६ ॥ एवं ज्ञात्वा प्रवर्तंते यथा यज्ञास्तथा कुरु ॥ तैर्विना नैव तृप्तिः स्यादस्माकं च कथंचन ॥ ८७ ॥ तच्छ्रुत्वा वासवस्तत्र समाहूय च मन्मथम् ॥ क्रोधं लोभं तथा दंभं मत्सरं द्वेषसंयुतम् ॥ ८८ ॥ गत्वा धरातलं सर्वे ममादेशाद्द्रुतं ततः ॥ स्वशक्त्या वारयध्वं भो गौतमेश्वरपूजकान् ॥ ८९ ॥ अहिल्येश्वरदेवस्य शतानंदेश्वरस्य च ॥ शक्रादेशं तु सं

१ ततः—तेषां सर्वेषां नराणां तत्स्वर्गगमनरूपचरित्रदर्शनानन्तरम्—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राप्य ते गता धरणीतले ॥ ९० ॥ कामादिका नरान्भेजुर्गौतमेश्वरपूजकान् ॥ तथाऽहिल्येश्वरस्यापि शतानंदेश्वरस्य च ॥ ९१ ॥ ततो भूयो मखा जाताः समग्रे धरणीतले ॥ संपूर्णदक्षिणाः सर्वे व्रतानि नियमास्तथा ॥ ९२ ॥ तीर्थयात्रा जपो होमो याश्चान्याः सुकृतक्रियाः ॥ एतत्सर्वं मया ख्यातं यत्पृष्टोऽस्मि धराधिप ॥ ९३ ॥ गयाकूप्यनुषंगेण शक्रगौतमचेष्टितम् ॥ बालमण्डनमाहात्म्यं शक्रेश्वरसमन्वितम् ॥ ९४ ॥ इन्द्रस्य स्थापनं मर्त्ये अहिल्याख्यानमेव च ॥ गौतमेश्वरमाहात्म्यं तथाहिल्येश्वरस्य च ॥ ९५ ॥ यश्चैतच्छृणुयान्नित्यं श्रद्धया परया युतः ॥ स मुच्येत्पातकात्सद्यः परदारसमुद्भवात् ॥ ९६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये गौतमेश्वराहिल्येश्वर शतानन्देश्वरमाहात्म्यवर्णननामाष्टोत्तरद्विशततमोऽध्यायः ॥ २०८ ॥ ॥ छ ॥ ॥ आनर्त उवाच ॥ ॥ सांप्रतं मुनिशार्दूल शंखतीर्थ समुद्भवम् ॥ माहात्म्यं वद मे कृत्स्नं श्रद्धा मे महती स्थिता ॥ १ ॥ अहो तीर्थमहो तीर्थं हाटकेश्वरसंज्ञितम् ॥ क्षेत्रं यच्च धरापृष्ठे सर्वाश्चर्यमयं शुभम् ॥ २ ॥ नाहं तृप्तिं द्विजश्रेष्ठ प्रगच्छामि कथंचन ॥ शृण्वानस्तु सुमाहात्म्यं क्षेत्रस्यास्य समुद्भवम् ॥ ३ ॥ ॥ विश्वामित्र उवाच ॥ ॥ अत्र ते कीर्तयिष्यामि पूर्ववृत्तं कथांतरम् ॥ शंखतीर्थस्य माहात्म्यं यथा जातं धरातले ॥ ४ ॥ आनर्ताधिपतिः पूर्वमासीदन्यो महीपतिः ॥ यथा त्वं सांप्रतं भूमौ सर्वलोकप्रपालकः ॥ ५ ॥ सोऽकस्मात्कुष्ठभाग्जातो विकलांगो बभूव ह ॥ अपुत्रः शत्रुभिर्व्याप्तस्त्रस्तश्च नृपसत्तमः ॥ ६ ॥ स सर्वैर्भूमिपालैश्च सर्वतः परिपीडितः ॥ राज्यभ्रंशसमोपेतः प्राप्तो रैवतकं गिरिम् ॥ ७ ॥ तत्रापि पीडयते नित्यं सर्वतस्तु मलिम्लुचैः ॥ ८ ॥ हस्त्यश्वरथहीनस्तु कोशहीनो यदाऽभवत् ॥ स तदा चिंतयामास किं करोमि च सांप्रतम् ॥ ९ ॥ कलत्राण्यपि सर्वाणि ह्रियंते तस्करैर्बलात् ॥ ॥ १० ॥ स एवं चिंतयानस्तु गतो वै नारदं विभुम् ॥ द्रष्टुं पार्थिवशार्दूल वैष्णवे दिवसे स्थिते ॥ ११ ॥ तत्रापश्यत्स संप्राप्तं नारदं मुनिसत्तमम् ॥ तीर्थयात्राप्रसंगेन दामोदरदिदृक्षया ॥ १२ ॥ तं प्रणम्याथ शिरसा कृतांजलिपुटः स्थितः ॥ प्रोवाच वचनं दीन उपविश्य तदग्रतः ॥ १३ ॥ ॥ ॥ राजोवाच ॥ ॥ शत्रुभिः परिभूतोऽहं समंतान्मुनिसत्तम ॥ ततो राज्यपरिभ्रंशात्संप्राप्तोऽत्र महागिरौ ॥ १४ ॥ विपिने तस्करैः पापैः प्रपीडयेऽहं समंततः ॥ यत्किंचिदश्वनागाद्यं मया सह समागतम् ॥ १५ ॥ तत्सर्वं तस्करैर्नीतं कोशा दारास्तथा वसु ॥ तस्माद्वद मुनिश्रेष्ठ वैराग्यं मे महत्स्थितम् ॥ १६ ॥ अन्यजन्मोद्भवं किंचिन्मम पापं सुदारुणम् ॥ येनेमां च दशां प्राप्तः सहसा मुनिसत्तम ॥ १७ ॥ तस्य तद्वचनं श्रुत्वा चिरं ध्यात्वा मुनीश्वरः ॥ प्रोवाचाऽथ नृपं दीनं ज्ञात्वा दिव्येन चक्षुषा ॥ १८ ॥ ॥ नारद उवाच ॥ ॥ न त्वया कुत्सितं किंचित्पूर्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



देहांतरे कृतम् ॥ मया ज्ञातं महाराज सर्वं दिव्येन चक्षुषा ॥ १९ ॥ त्वमासीः पार्थिवः पूर्वं सिद्धपन्नगसंज्ञिते ॥ पत्तने सोमवंशीयः सर्व
शत्रुनिबर्हणः ॥ २० ॥ त्वया चेष्टं महायज्ञैः सदा संपूर्णदक्षिणैः ॥ महादानानि दत्तानि पूजिता ब्राह्मणोत्तमाः ॥ २१ ॥ तेन कर्म
विपाकेन भूयः पार्थिवतां गतः ॥ २२ ॥ ॥ आनर्त उवाच ॥ ॥ इह जन्मनि नो कृत्यं संस्मरामि विभो कृतम् ॥ तत्किं राज्यपरि
भ्रंशः सहसा मे समुत्थितः ॥ २३ ॥ लक्ष्म्या हीनस्य लोकस्य लोकेऽस्मिन्व्यर्थतां व्रजेत् ॥ जीवितं मुनिशार्दूल विज्ञातं हि मयाऽधुना ॥ २४ ॥
मृतो नरो गतश्रीको मृतं राष्ट्रमराजकम् ॥ मृतमश्रोत्रिये दानं मृतो यज्ञस्त्वदक्षिणः ॥ २५ ॥ लक्ष्म्या हीनस्य मर्त्यस्य बांधवोऽपि विंजायते
प्रार्थयिष्यति मां नूनं दृष्ट्वा तं चान्यतो व्रजेत् ॥ २६ ॥ यथा मां सांप्रतं दृष्ट्वा ये मयाऽपि प्रतर्पिताः ॥ तेऽपि दूरतरं यांति एष मां प्रार्थयि
ष्यति ॥ २७ ॥ धनहीनं नरं त्यक्त्वा कुलीनमपि चोत्तमम् ॥ गच्छति स्वजनोऽन्यत्र शुष्कं वृक्षमिवांडजाः ॥ २८ ॥ तत्कार्यकारणार्थाय दरिद्रोऽ
भ्येति चेद्गृहम् ॥ धनिनो भर्त्सयंत्येनं समागच्छंति नांतिकम् ॥ २९ ॥ कृपणोऽपि धनाढ्यश्चेदागच्छति हि याचितुम् ॥ एष दास्यति मे किंचि
दिति चित्ते नृणां भवेत् ॥ ३० ॥ मम त्वं पूर्ववंशीयः पिता ते च पितुर्मम ॥ सदा स्नेहपरश्चासीत्त्वं च स्नेहविवर्जितः ॥ ३१ ॥ एवं ब्रुवंति
लोकेऽत्र धनिनां पुरतः स्थिताः ॥ कुलीना अपि पापानां दृश्यंते धनलिप्सया ॥ दरिद्रस्य मनुष्यस्य क्षितौ राज्यं प्रकुर्वतः ॥ ३२ ॥ प्रशोषः
केवलं भावी हृदयस्य महामुने ॥ द्वाविमौ कण्टकौ तीक्ष्णौ शरीरपरिशोषिणौ ॥ यश्चाधनः कामयते यश्च कुप्यत्यनीश्वरः ॥ ३३ ॥ श्मशानमपि
सेवंते धनलुब्धा निशागमे ॥ जनेतारमपि त्यक्त्वा नित्यं यांति सुदूरतः ॥ ३४ ॥ सुमूर्खोपि भवेद्विद्वानकुलीनोऽपि सत्कुलः ॥ यस्य वित्तं भवे
द्धर्म्ये विपरीतमतोऽन्यथा ॥ ३५ ॥ निर्विण्णोऽहं मुनिश्रेष्ठ जीवितस्य च सांप्रतम् ॥ तस्माद्ब्रूहि किमर्थं मे दारिद्र्यं समुपस्थितम् ॥ ३६ ॥ कुष्ठ
श्चापि ममोपेतः शत्रुभिश्च पराभवम् ॥ अन्यजन्मांतरं दृष्टं त्वया दिव्येन चक्षुषा ॥ ३७ ॥ कुकर्मणा न संस्पृष्टं स्वल्पेनापि ब्रवीषि माम् ॥ एतज्ज
न्मांतरं दृष्टं स्मरामि मुनिसत्तम ॥ ३८ ॥ न मया कुकृतं किंचित्कदाचित्समनुष्ठितम् ॥ तत्किं राज्यपरिभ्रंशो जातोऽयं मम सन्मुने ॥ ३९ ॥
अत्र मे कौतुकं जातं तस्माद्देहि विनिर्णयम् ॥ भवेन्न वा भवेत्कर्म कृतं यच्च शुभाशुभम् ॥ ४० ॥ ॥ विश्वामित्र उवाच ॥ ॥ तस्य तद्वचनं
श्रुत्वा चिरं ध्यात्वा तु नारदः ॥ कृपया परयाविष्टस्ततः प्रोवाच सादरम् ॥ ४१ ॥ शृणु राजन्प्रवक्ष्यामि यथा शुद्धिः प्रजायते ॥ तव राज्यस्य



१ विंजायते—विपरीतो—जायते—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संप्राप्तिर्यथा भूयोऽपि जायते ॥ ४२ ॥ तव भूमौ महापुण्यमस्ति क्षेत्रं जगत्त्रये ॥ हाटकेश्वरसंज्ञं तु तीर्थं तत्रास्ति शोभनम् ॥ शंखतीर्थमिति ख्यातं सर्वपातकनाशनम् ॥ ४३ ॥ यस्तत्र कुरुते स्नानं श्रद्धया परया युतः ॥ अष्टम्यां शुक्लपक्षस्य संप्राप्ते मासि माधवे ॥ ४४ ॥ सूर्यवारे तु सम्प्राप्ते भास्करस्योदयं प्रति ॥ सर्वकुष्ठविनिर्मुक्तो जायते सूर्यसंनिभः ॥ ४५ ॥ यंयं काममभिध्यायेत्तंतं सर्वेषु दुर्लभम् ॥ स तदाऽऽप्नोत्यसंदिग्धं दृष्ट्वा शंखेश्वरं शुभम् ॥ ४६ ॥ किं त्वया न श्रुतं तत्र स्वदेशे वसता नृप ॥ तस्य तीर्थस्य माहात्म्यं यत्त्वमत्र समागतः ॥४७॥ ॥ सिद्धसेन उवाच ॥ ॥ कथं शंखेश्वरो देवः संजातो वद सन्मुने ॥ ४८ ॥ ॥ नारद उवाच ॥ ॥ अहं ते कथयिष्यामि कथामेतां पुरातनीम् ॥ यथा शंखेश्वरो जातः शंखतीर्थं तु पार्थिव ॥ ४९ ॥ आसतुर्ब्राह्मणौ पूर्वं लिखितः शंख एव च ॥ भ्रातरौ वेदविदुषौ तपस्युग्रे व्यवस्थितौ ॥ ५० ॥ कस्यचित्त्वथ कालस्य लिखितस्याश्रमं प्रति ॥ भ्रातुर्ज्येष्ठस्य संप्राप्तो नमस्कारकृते नृप ॥५१॥ सोऽपश्यदाश्रमं शून्यं लिखितेन विवर्जितम् ॥५२॥ अथापश्यद्वने तस्मिन्परिपक्वफलानि सः ॥ प्रणयात्प्रतिजग्राह मत्वा भ्रातुर्नृपाऽऽश्रमम् ॥५३॥ एतस्मिन्नन्तरे प्राप्तो लिखितस्तत्र चाश्रमे ॥ यावत्पश्यति शंखं स प्रगृहीतबृहत्फलम् ॥५४॥ किमिदं विहितं पाप पापं साधुविगर्हितम् ॥ चौर्यकर्म त्वया निंद्यं यद्धृतानि फलानि च ॥५५॥ अनेन कर्मणा तुभ्यं[1] तपो यास्यति संक्षयम् ॥ चौर्यकर्मप्रवृत्तस्य ब्राह्मणैर्गर्हितस्य च ॥५६॥ ॥ शंख उवाच ॥ ॥ एकोदरसमुत्पन्नो ज्येष्ठभ्राता यथा पिता ॥ भूयादिति श्रुतिर्लोके प्रसिद्धा सर्वतः स्थिता ॥ ५७ ॥ तत्किं पुत्रस्य विप्रेन्द्र नाधिकारः पितुर्धने ॥ यथैवं निष्ठुरैर्वाक्यैर्निर्भर्त्सयसि मां विभो ॥ ५८ ॥ ॥ लिखित उवाच ॥ ॥ न दोषो जायते हर्तुः पुत्रस्यात्र कथंचन ॥ एकत्र संस्थितस्यात्र पितुर्वित्तमसंशयम् ॥ ५९ ॥ विभक्तस्तु यदा पुत्रो भ्राता वाऽपहरेद्धनम् ॥ तदा दोषमवाप्नोति चौर्योत्थं मतमेव मे ॥ ६० ॥ पुत्रस्य तु पुनर्वित्तं पिता हरति सर्वदा ॥ न तस्य विद्यते दोषो विभक्तस्यापि कर्हिचित् ॥ ६१ ॥ अत्र श्लोकः पुरा गीतो मनुना स्मृतिकारिणा ॥ तं तेऽहं संप्रवक्ष्यामि धर्मशास्त्रोद्भवं वचः ॥ ६२ ॥ त्रय एवाधनाः प्रोक्ता भार्या दासस्तथा सुतः ॥ यत्ते समधिगच्छंति यस्य ते तस्य तद्धनम् ॥ ६३ ॥ ॥ शंख उवाच ॥ ॥ यद्येवं चौर्यदोषोऽस्ति मम तात महत्तरः ॥ निग्रहं कुरु मे शीघ्रं येन न स्यात्तपःक्षयः ॥ ६४ ॥ ॥ विश्वामित्र उवाच ॥ ॥ तस्य तं निश्चयं ज्ञात्वा शस्त्रमादाय निर्मलम् ॥ चकर्ताथ भुजौ तस्य भ्राता भ्रातुश्च निर्घृणः ॥ सोऽपि च्छिन्नकरो विप्रो व्यथयाऽपि समन्वितः ॥ ६५ ॥ मन्यमानः प्रसादं तं भ्रातुर्ज्येष्ठस्य

१ तुभ्यम्–तव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पार्थिव ॥ ६६ ॥ ततस्तु कामदं क्षेत्रं हाटकेश्वरसंज्ञितम् ॥ मत्वा प्राप्य तपस्तेपे कंचित्प्राप्य जलाशयम् ॥ ६७ ॥ वर्षास्वाकाशशायी च हेमन्ते सलिलाश्रयः ॥ पञ्चाग्निसाधको ग्रीष्मे षष्ठकालकृताशनः ॥ ६८ ॥ संप्राप्य भास्करं स्थाणुं तत्पुरः शतरुद्रियम् ॥ जपन्सामोक्तरुद्रांश्च भव रुद्रांस्तथा जपन् ॥ प्राणरुद्रांस्तथा नीलान्स्कन्दसूक्तसमन्वितान् ॥ ६९ ॥ ततो वर्षसहस्रांते तुष्टस्तस्य महेश्वरः ॥ प्रोवाच दर्शनं गत्वा सह सूर्य वृषेश्वरैः ॥ ७० ॥ ॥ महेश्वर उवाच ॥ ॥ शंख तुष्टोऽस्मि ते वत्स तपसानेन सुव्रत ॥ तस्मात्कथय मे क्षिप्रं यद्ददामि तवाऽधुना ॥ ७१ ॥ ॥ ॥ शंख उवाच ॥ ॥ यदि तुष्टोऽसि मे देव यदि देयो वरो मम ॥ जायेतां तादृशौ हस्तौ यादृशौ मे पुरा स्थितौ ॥ ७२ ॥ त्वयाऽत्रैव सदा वासः कार्यः सुरवरेश्वर ॥ लिंगे कृत्वा दयां देव ममोपरि महत्तराम् ॥ ७३ ॥ एतज्जलाशयं नाथ मम नाम्ना धरातले ॥ प्रसिद्धिं यातु लोकस्य यावच्चन्द्रार्कतारकाः ॥ ७४ ॥ अत्र यः कुरुते स्नानं धृत्वा मनसि दुर्लभम् ॥ किंचिद्वस्तु समग्रं तु तस्य संपत्स्यते विभो ॥ ७५ ॥ ॥ ॥ श्रीभगवानुवाच ॥ ॥ अद्याहं दर्शनं प्राप्तस्तव चैवाष्टमीदिने ॥ माधवस्य सिते पक्षे यस्माद्ब्राह्मणसत्तम ॥ ७६ ॥ तस्मात्संक्रमणं लिंगे तावकेऽस्मिन्द्विजोत्तम ॥ करिष्यामि न सन्देहो दिनमेकमसंशयम् ॥ ७७ ॥ यश्चात्र दिवसे प्राप्ते तीर्थेऽत्रैव भवोद्भवे ॥ स्नानं कृत्वा रवेर्वार उदयं समुपस्थिते ॥ ७८ ॥ पूजयिष्यति मे मूर्तिं त्वया संस्थापितां द्विज ॥ कुष्ठव्याधिविनिर्मुक्तो मम लोकं स यास्यति ॥ ७९ ॥ शेषकालेऽपि विप्रेन्द्र अज्ञानविहितादघात् ॥ मुक्तिं प्राप्स्यत्यसंदिग्धं मम वाक्याद्द्विजोत्तम ॥ ८० ॥ तथा तवापि यौ हस्तौ छिन्नावेतावुभावपि ॥ तस्मिन्योगेऽभिषेकात्तौः स्यातां भूयोऽपि तादृशौ ॥ ८१ ॥ एष मे प्रत्ययो विप्र भविष्यति तवाऽधुना ॥ भूयः स्नानं विधाय त्वं ततो मूर्तिं ममार्चय ॥ ८२ ॥ अन्येऽपि व्यंगतां प्राप्ताः संयोगेऽत्र[1] तव स्थिते ॥ स्नात्वा मां पूजयिष्यंति मुक्तिं यास्यंति ते द्विज ॥ ॥ ८३ ॥ एवमुक्त्वा सहस्रांशुस्ततश्चादर्शनं गतः ॥ शंखोऽपि तत्क्षणात्स्नात्वा पूजयित्वा दिवाकरम् ॥ ८४ ॥ यावत्पश्यति चात्मानं तावद्धस्तसमन्वितम् ॥ आत्मानं पश्यमानस्तु विस्मयं परमं गतः ॥ ८५ ॥ ततःप्रभृति तत्रैव कृत्वाऽऽश्रमपदं नृप ॥ तपस्तेपे द्विज श्रेष्ठो गतश्च परमां गतिम् ॥ ८६ ॥ तस्मात्त्वमपि राजेंद्र संयोगं प्राप्य तत्त्वतः ॥ तेनैव विधिना स्नात्वा त्वं पूजय दिवाकरम् ॥ ८७ ॥ यश्चैतच्छृणुयान्नित्यं पठेद्वा पुरतो रवेः ॥ तस्यान्वयेऽपि नो कुष्ठी कदाचित्सम्प्रजायते ॥ ८८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शंखादित्यशंखतीर्थोत्पत्तिवृत्तांतवर्णनंनाम नवोत्तरद्विशततमोऽध्यायः ॥ २०९ ॥ ॥ छ ॥



१ संयोगेऽत्र तव स्थिते—एतस्मिन्वैशाखशुक्लाष्टमीदिने—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ विश्वामित्र उवाच ॥ ॥ तच्छ्रुत्वा वचनं तस्य देवर्षेर्नारदस्य च ॥ सिद्धसेनो महीपालः प्राप्य तं योगमुत्तमम् ॥ १ ॥ माधवे मासि संप्राप्ते अष्टम्यां सूर्यवासरे ॥ सूर्योदये तु संप्राप्ते यावत्स्नात्वाऽर्चयेद्रविम् ॥२॥ तावत्कुष्ठविनिर्मुक्तः सहसा समपद्यत ॥ ततो दिव्यवपुर्भूत्वा सन्तोषं परमं गतः ॥ ३ ॥ प्रायश्चित्तं ततश्चक्रे तांबूलस्य च भक्षणम् ॥ अज्ञानेन कृतं यच्च चूर्णपत्रसमन्वितम् ॥ ४ ॥ ततश्च परमां लक्ष्मीं संप्राप्तः स महीपतिः ॥ पितृपैतामहं राज्यं स प्रचक्रे यथा पुरा ॥ ५ ॥ एतत्ते सर्वमाख्यातं शंखतीर्थसमुद्भवम् ॥ माहात्म्यं पार्थिवश्रेष्ठ किं भूयः श्रोतुमिच्छसि ॥ ६ ॥ ॥ आनर्त उवाच ॥ ॥ अत्याश्चर्यमिदं ब्रह्मन्यत्त्वया परिकीर्तितम् ॥ यल्लक्ष्मीस्तस्य सन्नष्टा चूर्णपत्रस्य भक्षणात् ॥ ७ ॥ कीदृक्तेन कृतं तस्य प्रायश्चित्तं विशुद्धये ॥ कीदृक्तेन कृतं तच्च निजराज्यं यथा पुरा ॥ ८ ॥ ॥ विश्वामित्र उवाच ॥ ॥ एषा पुण्यतमा मेध्या नागवल्ली नराधिप ॥ अयथावत्कृता वक्रे बहून्दोषान्प्रयच्छति ॥ तस्माद्यत्नेन संभक्ष्या दत्त्वा चैव स्वशक्तितः ॥ ९ ॥ ॥ आनर्त उवाच ॥ ॥ नागवल्ली कथं जाता कस्माद्दोषो महान्स्मृतः ॥ अयथावद्भक्षणाच्च तन्मे वक्तुमिहार्हसि ॥ १० ॥ ॥ विश्वामित्र उवाच ॥ ॥ प्रश्नभारो महानेष त्वया मे परिकीर्तितः ॥ तथापि च वदिष्यामि यदि ते कौतुकं नृप ॥ यस्मात्सञ्जायते दोषश्चूर्णपत्रस्य भक्षणात् ॥ ११ ॥ अमृतार्थं पुरा देवैर्मथितः कलशोदधिः ॥ मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम् ॥ १२ ॥ मुखदेशे बलिर्लग्नः पुच्छदेशेऽखिलाः सुराः ॥ वासुदेवमतेनैव सन्दधाराथ कच्छपः ॥ १३ ॥ मन्दरे भ्रममाणे तु प्रागेव नृपसत्तम ॥ आनर्त सहसा जातं रत्नत्रितयमेव च ॥ १४ ॥ नीलांबरधरः कृष्णः पुरुषो वक्रनासिकः ॥ कृष्णदन्तः स्थूलशिरा दीर्घग्रीवो महोदरः ॥ शूर्पाकारांघ्रिरेवाऽसौ चिपिटाक्षो भयावहः ॥ १५ ॥ तथा तद्रूपिणी तस्य कुभार्या राक्षसी यथा ॥ शिशुनांगुलिलग्नेन गर्भश्रमपरायणा ॥ १६ ॥ ततो देवगणाः सर्वे दानवाश्च विशेषतः ॥ मन्थानं तत्परित्यज्य तान्ग्रहीतुं प्रधाविताः ॥ १७ ॥ अथ तान्विकृतान्दृष्ट्वा सर्वे शंकासमन्विताः ॥ जगृहुर्नैव राजेंद्र जहसुश्च परस्परम् ॥ १८ ॥ अथोवाच बलिर्दैत्यः कृतांजलिपुटः स्थितः ॥ ब्रह्माऽऽदिर्यल्लभेत्सर्वं यत्पुरस्तात्प्रजायते ॥ १९ ॥ रत्नत्रितयमेतद्धि तस्माद्ब्रह्मातु पद्मजः ॥

१ एतेन लक्ष्मीकामैः—यत्तांबूलपत्रं तांबूलवल्ल्युपर्येव छिन्नं वा चूर्णितं वा स्यात्तस्य भक्षणं न कर्तव्यम्—इति निषेधः सूचितः एतदुक्तप्रायश्चित्तार्हदोषश्रवणात् । २ ततः—प्रायश्चित्तकरणानन्तरम् । ३ कलशोदधिः—क्षीराब्धिः—इत्यर्थः । ४ यत्—यस्मात्कारणात्—नः सर्वेषाम्—इत्यध्याहार्यम् । यस्मात्कारणात्सर्वेषां न आदिर्मुख्यो ब्रह्मास्ति तस्मात्कारणात् यत्सर्वं किञ्चित्—पुरस्तात्प्रजायते तत्प्रथमं लभेत् । इति योजनाऽनुसन्धेया ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





येन सिद्धिर्भवेदस्मिन्मन्थने कस्य चाऽर्पणात् ॥ २० ॥ तद्वाक्यं विष्णुना तस्य शंसितं शंकरेण तु ॥ इंद्राद्यैश्च सुरैः सर्वैर्दानवैश्च विशेषतः ॥२१॥ एतस्मिन्नंतरे ब्रह्मा जग्राह त्रितयं च तत् ॥ दाक्षिण्यात्सर्वदेवानामनिच्छन्नपि पार्थिव ॥ ममन्थुः सागरं राजन्पुनस्ते यत्नमाश्रिताः ॥ २२ ॥ ततश्च वारुणी जाता दिव्यगन्धसमन्विता ॥ बलिना संगृहीता सा प्रत्यक्षं बलविद्विषः ॥ २३ ॥ आवर्ते चापरे जाते निष्क्रांतः कौस्तुभो मणिः ॥ स गृहीतो महाराज विष्णुना प्रभविष्णुना ॥ २४ ॥ अथापरे स्थिते तत्र महावर्ते निशापतिः ॥ सञ्जातः स वृषांकेन संगृहीतश्च तत्क्षणात् ॥ २५ ॥ पारिजातस्ततो जातो दिव्यगन्धसमन्वितः ॥ स गृहीत्वा सुरैः सर्वैः स्थापितो नंदने वने ॥ २६ ॥ तस्यानंतरमेवाथ सुरभी वत्ससंयुता ॥ निष्क्रांता व्योममार्गेण गोलोकं समवस्थिता ॥ २७ ॥ ततो धन्वंतरिर्जातो बिभ्रद्धस्ते कमंडलुम् ॥ संपूर्णममृतेनैव स देवैर्दानवैर्नृप ॥ २८ ॥ गृहीतो युगपत्क्रुद्धैः परस्परजिगीषया ॥ देवानां हस्तगो वैद्यो दैत्यानां च कमण्डलुः॥ २९ ॥ ततस्तं लोभसंयुक्ता ममंथुः सागरं नृप ॥ पद्महस्तात्र संजाता ततो लक्ष्मीः सितांबरा ॥ ३० ॥ स्वयमेव वृतो विष्णुस्तया पार्थिवसत्तम ॥ मथ्यमाने ततोतीव समुद्रे देवदानवैः ॥ ३१ ॥ कालकूटं समुत्पन्नं येन सर्वे सुरासुराः ॥ संप्राप्ताः परमं कष्टं प्रभग्नाश्च दिशो दश ॥ ३२ ॥ तं दृष्ट्वा भगवाञ्छंभुस्तीव्रं तीव्रपराक्रमः ॥ भक्षयामास राजेंद्र नीलकण्ठस्ततोऽभवत् ॥ ३३ ॥ अथ संत्यज्य मंथानं मंदरं वासुकिं तथा ॥ अमृतार्थेऽभवद्युद्धं दैत्यानां विबुधैः सह ॥ ३४ ॥ अथ स्त्रीरूपमाधाय विष्णुर्दैत्यानुवाच तान् ॥ ततो हृष्टो बलिस्तस्यै दत्त्वा पीयूषमेव तत् ॥ ३५ ॥ विश्वासं परमं गत्वा युद्धं चक्रे सुरैः सह ॥ ततो विष्णुः परित्यज्य स्त्रीरूपं पुरुषाकृतिः ॥ ३६ ॥ तदेवामृतमादाय ययौ यत्र दिवौकसः ॥ अब्रवीत्तान्सुहृष्टात्मा पिबध्वममृतं सुराः ॥ ३७ ॥ येनामरत्वमासाद्य व्यापादयत दानवान् ॥ ते तथेति प्रतिज्ञाय पपुः पीयूषमुत्तमम् ॥ ३८ ॥ अमराश्च ततो जाता जघ्नुः संख्ये महासुरान् ॥ ३९ ॥ तेषां पानविधौ तत्र वर्तमाने महीपते ॥ राहुर्विबुधरूपेण पपौ पीयूषमुत्सुकः ॥ ४० ॥ स लक्षितो महादैत्यश्चंद्रार्काभ्यां च तत्क्षणात् ॥ निवेदितो हरे राजन्नायं देवो महासुरः ॥ ॥ ४१ ॥ तच्छ्रुत्वा वासुदेवेन तस्य चक्रं सुदर्शनम् ॥ वधाय पार्थिवश्रेष्ठ मुक्तं वज्रसमप्रभम् ॥ ४२ ॥ यावन्मात्रं शरीरं तत्तस्य व्याप्तं महीपते ॥ अमृतेन ततः कृत्तममोघेनापि तच्छिरः ॥ ४३ ॥ ततोऽमरत्वमापन्नः स यावत्सिंहिकासुतः ॥ तावत्प्रोक्तोऽच्युतेनाथ साम्ना परमवल्गुना ॥ ४४ ॥ त्यज दैत्यान्महाभाग देवानां संमतो भव ॥ संप्राप्स्यसि परां पूजां सदा त्वं ग्रहमंडले ॥ ४५ ॥ स तथेति प्रतिज्ञाय त्यक्त्वा तान्दैत्यसत्तमान् ॥ पूजां प्राप्नोति मर्त्यानां संस्थितो ग्रहमण्डले ॥ ४६ ॥ एतस्मिन्नंतरे दैत्या निर्जिताः सुरसत्तमैः ॥ दिशो जग्मुः परित्रस्ताः केचिन्मृत्युमुपाग



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताः ॥ ४७ ॥ पीतशेषं च पीयूषं स्थापितं नन्दने वने ॥ नागराजस्य[1] यत्रैव स्थितमालानमेव[2] च ॥ ४८ ॥ अहर्निशं मदस्रावी करींद्रः सोऽपि संस्थितः ॥ तत्प्रभावैः प्रभिन्नः स पीयूषस्य कमंडलुः ॥४९॥ ततो वल्ली समुत्पन्ना तस्माच्चैव कमण्डलोः ॥ तत्रालानसमारूढा वृद्धिं च परमां गता ॥ ५० ॥ तदुद्भवानि पत्राणि गृहीत्वा सुरसत्तमाः ॥ अपूर्वाणि सुगंधीनि मत्वा ते भक्षयंति च ॥ ५१ ॥ वक्त्रशुद्धिकृते राजन्विशेषेण प्रहर्षिताः ॥ ५२ ॥ अथ धन्वंतरिर्वैद्यः स्वबुद्ध्या पृथिवीपते ॥ नागालाने यतो जाता नागवल्ली भविष्यति ॥ ५३ ॥ सदा स्मरस्य संस्थानं मम वाक्याद्भविष्यति ॥ नागवल्लीति वै नाम तस्याश्चक्रे ततः परम् ॥ ५४ ॥ संयोगं च चकाराथ तांबूलं जायते यथा ॥ पूगीफलेन चूर्णेन खदिरेणापि पार्थिव ॥ ५५ ॥ कस्यचित्त्वथ कालस्य वाणीवत्सरको[3] नृपः ॥ प्रतोषं नीतवाञ्छक्रं तपसा निर्मलेन च ॥ ५६ ॥ ततस्तत्तपसा तुष्ट इन्द्रो वचनमब्रवीत् ॥ ५७ ॥ ॥ इन्द्र उवाच ॥ ॥ भोभोः पार्थिव तुष्टोऽस्मि तपसाऽनेन सांप्रतम् ॥ ब्रूहि यत्ते वरं दद्मि मनसा वांछितं सदा ॥ ५८ ॥ सोऽब्रवीद्यदि मे तुष्टो यदि देयो वरो मम ॥ विमानं खेचरं देहि येनागच्छामि ते गृहे ॥ नित्यमेव धरापृष्ठाद्वंदनार्थं तव प्रभो ॥५९॥ स तथेति प्रतिज्ञाय हंसबर्हिणनादितम् ॥ विमानं प्रददौ तस्मै मनोमारुतवेगधृक् ॥ ६० ॥ स तत्र नित्यमारुह्य प्रयाति त्रिदशालयम् ॥ भक्त्या परमया युक्तः सहस्राक्षं प्रवंदितुम् ॥ ६१ ॥ तस्य शक्रः स्वहस्तेन तांबूलं च प्रयच्छति ॥ स च तद्भक्षयामास प्रहृष्टेनांतरात्मना ॥ ६२ ॥ वृद्धभावेऽपि संप्राप्ते तस्य कामोऽत्यवर्द्धत ॥ तांबूलस्य प्रभावेन सुमहान्पृथिवीपते ॥ ६३ ॥ अथ शक्रमुवाचेदं स राजा विनयान्वितः ॥ नागवल्लीप्रदानेन प्रसादो मे विधीयताम ॥ ६४ ॥ मर्त्यलोके समानेतुं प्रचारं येन गच्छति ॥ स तथेति प्रतिज्ञाय तस्मै तां प्रददौ तदा ॥ ६५ ॥ गत्वा निजपुरं सोपि स्वोद्यानेऽस्थापयत्तदा ॥ ततः कालेन महता प्रचारं सा गता क्षितौ ॥ ६६ ॥ यस्याः स्वादनतो लोकः कामात्मा समपद्यत ॥ न कश्चिद्यजनं चक्रे याजनं च विशेषतः ॥ अन्या धर्मक्रियाः सर्वाः प्रणष्टा धर्मसंभवाः ॥ ६७ ॥ ततो देवगणाः सर्वे यज्ञभागविवर्जिताः ॥ पीडयमानाः क्षुधाविष्टा गत्वा प्रोचुः पितामहम् ॥ ६८ ॥ मर्त्यलोके सुरश्रेष्ठ नष्टा धर्मक्रिया भृशम् ॥ कामासक्तो यतो लोकस्तांबूलस्य च भक्षणात् ॥ तस्मात्कुरु प्रसादं नो येनास्माकं क्रिया भवेत् ॥ ६९ ॥ एतस्मिन्नेव काले तु पुष्करस्थं पितामहम् ॥ यजनार्थे समायांतं दरिद्रो वीक्ष्य पार्थिव ॥ ७० ॥ प्रणिपत्य ततः प्राह विनयावनतः स्थितः ॥ निर्विण्णोऽहं सुरश्रेष्ठ ब्राह्मणानां गृहे स्थितः ॥ ७१ ॥ तस्मात्कीर्तय मे स्थानं श्रेष्ठं वित्तवतां हि

१ नागराजस्य—ऐरावतस्य । २ आलानम्—गजबंधनाधारस्तम्भः—इत्यर्थः । ''तोत्रं वेणुकमालानं बन्धस्तम्भे''—इत्यमरः । ३ वाणीवत्सारिकः—इति पाठान्तरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



यत् ॥ तत्र सञ्जायते तृप्तिः शाश्वती प्रचुरा प्रभो ॥ ७२ ॥ तस्य तद्वचनं श्रुत्वा चिरं ध्यात्वा पितामहः ॥ अब्रवीच्च दरिद्रं तं छिद्रार्थं धनिनामिह ॥ ७३ ॥ चूर्णपत्रे त्वया वासः सदा कार्यो दरिद्र भोः ॥ तांबूलस्य तु पर्णाग्रे भार्यया मम वाक्यतः ॥ ७४ ॥ पर्णानां चैव वृंतेषु सर्वेषु त्वत्सुतेन च ॥ रात्रौ खदिरसारे च त्वं ताभ्यां सर्वदा वस ॥ ७५ ॥ धनिनां छिद्रकृत्प्रोक्तमेतत्स्थानचतुष्टयम् ॥ पार्थिवानां विशेषेण मम वाक्याद्व्रज द्रुतम् ॥ ७६ ॥ ॥ नारद उवाच ॥ ॥ एतत्ते सर्वमाख्यातं यत्पृष्टोऽस्मि नराधिप ॥ ७७ ॥ तांबूलोत्थानि छिद्राणि यथा स्युर्धनिनामिह ॥ तानि सर्वाणि चीर्णानि त्वया राजन्नजानता ॥ तेन वै विभवोच्छित्तिः संजाता सहसा नृप ॥ ७८ ॥ ॥ राजोवाच ॥ ॥ तदर्थमपि मे ब्रूहि प्रायश्चित्तं मुनीश्वर ॥ कदाचिद्भक्षणं मे स्यात्तांबूलस्य तथाविधम् ॥ ७९ ॥ येन सञ्जायते शुद्धिः कुतांबूलसमुद्भवा ॥ ८० ॥ ॥ विश्वामित्र उवाच ॥ ॥ शृणु राजन्प्रवक्ष्यामि प्रायश्चित्तं तु यच्चरेत् ॥ आश्वासनेन शुद्ध्यर्थं कुतांबूलस्य भक्षणात् ॥ ८१ ॥ पर्वकालं समुद्दिश्य सम्यक्छ्रद्धासमन्वितः ॥ आनयेद्ब्राह्मणं राजन्वेदवेदांगपारगम् ॥ ८२ ॥ प्रक्षाल्य चरणौ तस्य वाससी परिधापयेत् ॥ संपूज्य गंधपुष्पाद्यैस्ततः पत्रं हिरण्मयम् ॥ स्वशक्त्या कारयित्वाऽथ चूर्णे मुक्ताफलं न्यसेत् ॥ ८३ ॥ पूगीफलं च वैडूर्यं खदिरं रूप्यमेव च ॥ मन्त्रेणानेन विप्राय तथैव च समर्पयेत् ॥ ८४ ॥ यन्मया भक्षितं पूर्वं धृन्तं पत्रसमुद्भवम् ॥ चूर्णपत्रं तथैवान्यद्रात्रौ खदिरमेव च ॥ ८५ ॥ तस्य पापस्य शुद्ध्यर्थं तांबूलं प्रतिगृह्यताम् ॥ ततस्तु ब्राह्मणो मंत्रमेवं राजन्नुदाहरेत् ॥ ८६ ॥ यजमानहितार्थाय सर्वपापविशुद्धये ॥ अज्ञानाज्ज्ञानतो वापि कुतांबूलं प्रभक्षितम् ॥ ८७ ॥ भक्षयिष्यसि यच्चान्यत्कदाचिन्मे प्रसादनात् ॥ तस्य दोषो न ते भावी मम वाक्यादसंशयम् ॥ ८८ ॥ अनेन विधिना दत्त्वा तांबूलं शुद्धिमाप्नुयात् ॥ कुतांबूलस्य दोषेण गृह्यते न नरो नृप ॥ ८९ ॥ तस्मात्त्वं हि महाराज व्रतमेतत्समाचर ॥ बहुपुण्यतमं ह्येतन्महाभोगविवर्द्धनम् ॥ ९० ॥ यः प्रयच्छति राजेन्द्र विधिनानेन भक्तितः ॥ जन्मजन्मान्तरे वापि न तांबूलेन मुच्यते ॥ ९१ ॥ तांबूलं भक्षयित्वा यो नैतद्दानं प्रयच्छति ॥ तांबूलवर्जितः सोऽत्र भवेज्जन्मनिजन्मनि ॥ ९२ ॥ तांबूलवर्जितं यस्य मुखं स्यात्पृथिवीपते ॥ कृपणस्य दरिद्रस्य तद्बिलं न हि तन्मुखम् ॥ ९३ ॥ तांबूलं ब्राह्मणेन्द्राय यो दत्त्वा प्राक्प्रभक्षयेत् ॥ सुरूपो भाग्यवान्दक्षो भवेज्जन्मनिजन्मनि ॥ ९४ ॥ एतत्ते सर्वमाख्यातं कुतांबूलस्य भक्षणात् ॥ यत्फलं जायते पुंसां यद्दानेन महीपते ॥ ९५ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शंखादित्यानुषंगेण तांबूलस्य च भक्षणे ॥ ये दोषा ये गुणा राजन्दानं चैव प्रभक्षणे ॥ ९६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये तांबूलोत्पत्तितांबूलमाहात्म्यवर्णनंनाम दशोत्तरद्विशततमोऽध्यायः ॥ २१० ॥ ॥ छ ॥ ॥ ॥ विश्वामित्र उवाच ॥ ॥ राज्ञो दारिद्र्यदोषस्य कुष्ठव्याधेश्च कारणम् ॥ कथयित्वा पुनः प्राह नारदो मुनिसत्तमः ॥ १ ॥ ॥ नारद उवाच ॥ ॥ एतत्ते सर्वमाख्यातं राजन्कुष्ठस्य कारणम् ॥ दारिद्र्यस्य च यत्सम्यग्ज्ञात्वा दिव्येन चक्षुषा ॥ २ ॥ अधुना संप्रवक्ष्यामि यथा तव पराभवः ॥ शत्रुभ्यः संप्रजातोऽत्र द्विजानामपमानतः ॥ ३ ॥ आनर्ताधिपतिर्योऽत्र कश्चिद्राज्येऽभिषिच्यते ॥ स पूर्वं गच्छति ग्रामं नागराणां प्रभक्तितः ॥ ४ ॥ त्वया तत्कल्पितं राजन्नैव दत्तं प्रमादतः ॥ पराभूता द्विजास्ते च याचमाना मुहुर्मुहुः ॥ ५ ॥ तथा कोपवशाद्यानि शासनानि द्विजन्मनाम् ॥ लोपितानि त्वयान्यानि पितृपैतामहानि च ॥ ६ ॥ तेन तेऽत्र पराभूतिः संजाता शत्रुसंभवा ॥ एवं ज्ञात्वा द्विजेंद्राणां शासनानि प्रयच्छ भोः ॥ ७ ॥ गृहीतानि च यान्येव तेषां मोक्षं समाचर ॥ तच्छ्रुत्वा पार्थिवः सोऽथ शंखतीर्थे प्रभक्तितः ॥ ८ ॥ स्नात्वा विप्रान्समाहूय मध्यगेन समन्वितान् ॥ शंखादित्यस्य पुरतः प्रक्षाल्य चरणौ नृप ॥ ९ ॥ ददौ च शासनशतं प्रक्षाल्य चरणांस्ततः ॥ षड्विंशत्यधिकं राजा नागराणां महात्मनाम् ॥ १० ॥ एतस्मिन्नंतरे तत्र शत्रवो ये च संस्थिताः ॥ सर्वे मृत्युं समापन्ना ब्राह्मणानां प्रसादतः ॥ ११ ॥ ॥ विश्वामित्र उवाच ॥ ॥ एतत्ते सर्वमाख्यातं शंखतीर्थसमुद्भवम् ॥ प्रभावं पार्थिवश्रेष्ठ किं भूयः श्रोतुमिच्छसि ॥ १२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शंखतीर्थमाहात्म्यवर्णनंनामैकादशोत्तरद्विशततमोऽध्यायः ॥२११॥ ॥ छ ॥ ॥ ॥ ऋषय ऊचुः ॥ ॥ श्रुतं तीर्थत्रयं पुण्यं हाटकेश्वरसंज्ञिते ॥ क्षेत्रेऽत्र यत्त्वया प्रोक्तमस्माकं सूतनंदन ॥ १ ॥ विश्वामित्रीयमाहात्म्यं श्रोतुमिच्छामहे वयम् ॥ सांप्रतं तत्समाचक्ष्व परं कौतूहलं हि नः ॥ २ ॥ ॥ सूत उवाच ॥ ॥ समुद्रस्यापि पारोऽत्र लक्ष्यते च क्षितेरपि ॥ तारकाणां मुनेस्तस्य न गुणानां द्विजोत्तमाः ॥ ३ ॥ लक्ष्यते केनचित्पारो गाधेः पुत्रस्य धीमतः ॥ क्षत्रियोऽपि द्विजत्वं यः संप्राप्तो द्विजसत्तमाः ॥ ॥ ४ ॥ अंत्यजत्वं गतस्यापि त्रिशंकोः पृथिवीपतेः ॥ यज्ञभागभुजो देवाः प्रत्यक्षेण विनिर्मिताः ॥ ५ ॥ ब्रह्मणः स्पर्धया येन पुरा सृष्टिर्द्विजोत्तमाः ॥ प्रारब्धा च ततो देवैः प्रणिपत्य निवारितः ॥ ६ ॥ तस्य तीर्थस्य माहात्म्यं सांप्रतं वदतो मम ॥ श्रूयतां ब्राह्मणश्रेष्ठाः सर्वपातकनाशनम् ॥ ७ ॥ तेन तत्र कृतं कुण्डं स्वहस्तेन महात्मना ॥ शस्त्रं विनापि भूपृष्ठं प्रविदार्य समंततः ॥ ८ ॥ तत्र ध्यात्वा समानीता पातालाज्जाह्नवी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



नदी ॥ मर्त्यलोके समायातं यस्यास्तोयं सुनिर्मलम् ॥ ९ ॥ सुस्वादु च तथा स्नानात्सर्वपातकनाशनम् ॥ तेनापि स्थापितस्तत्र भास्करो वारित
स्करः ॥ १० ॥ यः सप्तम्यां सूर्यवारे स्नात्वा तस्य ह्रदे शुभे ॥ माघमासे सिते पक्षे नमस्यति दिवाकरम् ॥ स कुष्ठैर्मुच्यते सर्वैस्तथा पापैर्द्विजो
त्तमाः ॥ ११ ॥ पश्चिमोत्तरदिग्भागे तस्यास्ति जलसंभवा ॥ धन्वंतरिकृता वापी सर्वरोगविनाशिनी ॥ १२ ॥ तत्र पूर्वं तपस्तेपे धन्वं
तरिरुदारधीः ॥ ववन्दे तपसा युक्तो ध्यायमानः समाहितः ॥ १३ ॥ ततः कालेन महता संतुष्टस्तस्य भास्करः ॥ उवाच वरदोऽस्मीति
प्रार्थयस्व महामते ॥ १४ ॥ ॥ धन्वंतरिरुवाच ॥ ॥ अत्र कुण्डे नरो भक्त्या यः स्नानं कुरुते विभो ॥ तस्य स्यात्सर्वरोगाणां
संक्षयः सुरसत्तम ॥ १५ ॥ ॥ श्रीभगवानुवाच ॥ ॥ अद्य शस्ते दिने योऽत्र सप्तम्यां रविवासरे ॥ सूर्योदये नरः स्नानं करिष्यति
समाहितः ॥ व्याधिग्रस्तः स नीरोगस्तत्क्षणात्संभविष्यति ॥ १६ ॥ नीरोगश्चेप्सितान्कामान्निष्कामो मोक्षमेष्यति ॥ १७ ॥ एवमुक्त्वा सुरश्रे
ष्ठोंऽतर्धानं स गतो रविः ॥ धन्वन्तरिः प्रहृष्टात्मा स्वस्थानं च गतस्ततः ॥ १८ ॥ कस्यचित्त्वथ कालस्य रत्नाक्षोऽथ महीपतिः ॥ अयोध्याधि
पतिः ख्यातः सूर्यवंशसमुद्भवः ॥ १९ ॥ कृतज्ञश्च वदान्यश्च स्वदारनिरतः सदा ॥ शूरः परमतेजस्वी सर्वशत्रुनिषूदनः ॥ २० ॥ पूर्वकर्मविपाकेन
तस्य भूमिपतेर्द्विजाः ॥ कुष्ठव्याधिरभूद्रौद्रो दुश्चिकित्स्यो जगत्त्रये ॥२१॥ तदस्ति नौषधं लोके यत्तेन न कृतं द्विजाः ॥ कुष्ठग्रस्तेन वा दानं यत्र
दत्तं महात्मना ॥ २२ ॥ यथायथौषधान्येव स करोति ददाति च ॥ तथातथा तस्य कायो व्याधिना क्षामितो भृशम् ॥ २३ ॥ ततो वैराग्यमापन्नः
स नृपो द्विजसत्तमाः ॥ पुत्रं राज्येऽथ संस्थाप्य वांछयामास पावकम् ॥ निषिद्धोऽपि हि तैः सर्वैः कलत्रैराप्तसेवकैः ॥ २४ ॥ दत्त्वा दानानि
विप्रेभ्यः पूजयित्वा सुरोत्तमान् ॥ संभाष्य च सुहृद्वर्गं शासयित्वा निजं सुतम् ॥ २५ ॥ एतस्मिन्नेव काले तु भ्रममाणो यदृच्छया ॥ कश्चित्का
र्पटिकः प्राप्तो दिव्यरूपवपुर्धरः ॥ २६ ॥ अथासौ व्याकुलं दृष्ट्वा तत्सर्वं नृपतेः पुरम् ॥ अपृच्छद्विस्मयाविष्टो दृष्ट्वा कश्चिन्नरं द्विजाः ॥ २७ ॥
॥ ॥ कार्पटिक उवाच ॥ ॥ किमेषा व्याकुला भद्र सर्वा जाता महापुरी ॥ निरानन्दाऽश्रुपूर्णाक्षैर्बालवृद्धैर्निषेविता ॥ २८ ॥ सोऽब्रवीन्नृपति
श्चायं कुष्ठव्याधिसमन्वितः ॥ साधयिष्यति सन्दीप्तं सुनिर्विण्णो हुताशनम् ॥ २९ ॥ तेनेयं नगरी कृत्स्ना परं दुःखमुपागता ॥ गुणैरस्य समा ॥२४३॥
विष्टा नूनं मृत्युं प्रयास्यति ॥ ३० ॥ तच्छ्रुत्वा सत्वरं गत्वा नृपं कार्पटिकोऽब्रवीत् ॥ ३१ ॥ सर्वं जनं नरेन्द्रस्य मृतं जीवापयन्निव ॥ मा नृपानेन
दुःखेन व्याधिजेन हुताशनम् ॥ प्रविश त्वं स्थिते तीर्थे सर्वव्याधिक्षयावहे ॥ ३२ ॥ मदीयो भूपते देह ईदृगासीद्यथा तव ॥ तत्र स्नातस्य सद्योऽथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जात ईदृक्पुनः प्रभो ॥ ३३ ॥ सप्तम्यां सूर्यवारेण भास्करस्योदयं प्रति ॥ यस्तत्र कुरुते स्नानं व्याधिग्रस्तो नरो भुवि ॥३४॥ स व्याधिना विनिर्मुक्तस्तत्क्षणात्कल्पतां व्रजेत् ॥ तथा पापविनिर्मुक्तो यथाहं नृपसत्तम ॥३५॥ ॥ राजोवाच ॥ ॥ कस्मिन्देशे महातीर्थं तादृशं वद मे द्रुतम् ॥ ॥ ३६ ॥ ॥ कार्पटिक उवाच ॥ ॥ अस्ति भूमितले ख्यातं नागरं क्षेत्रमुत्तमम् ॥ कुष्ठव्याधिसमाक्रांतो गतोऽहं तत्र भूपते ॥ ३७ ॥ तस्य सन्दर्शनार्थाय तीर्थयात्रापरायणः ॥ तत्र मां दीनमालोक्य व्याधिग्रस्तं सुदुःखितम् ॥ कश्चित्तत्रा[1]श्रयः प्राह तपस्वी कृपयान्वितः ॥ ३८ ॥ पश्चिमोत्तरदिग्भागे देवस्य जलशायिनः ॥ तीर्थमस्ति महापुण्यं विश्वामित्रजलावहम् ॥३९॥ तत्र गत्वा कुरु स्नानं सप्तम्यां रविवासरे ॥ माघमासे तु संप्राप्ते शुक्लपक्षे विशेषतः ॥ ४० ॥ येन निर्याति ते कुष्ठो भास्करस्योदयं प्रति ॥ तच्छ्रुत्वाऽहं च तत्प्राप्तः सप्तम्यां सूर्यसंयुजि ॥ ततश्च कृतवान्स्नानं निर्झरे तत्र शांभवे ॥४१॥ ततस्तस्माद्विनिष्क्रांतो यावत्पश्याम्यहं तनुम् ॥ तावन्नृपेदृशी जाता सत्यमेतत्तवोदितम् ॥४२॥ तस्मात्त्वमपि राजेंद्र तत्र स्नानं समाचर ॥ सप्तम्यां सूर्यवारेण भास्करस्योदयं प्रति ॥ ४३ ॥ येन ते नश्यति व्याधिर्विशेषमपि पातकम् ॥ तच्छ्रुत्वा स नृपस्तूर्णं तेनैव सहितो ययौ ॥ ४४ ॥ चकार स तथा स्नानं सप्तम्यां सूर्यवासरे ॥ माघमासे तु संप्राप्ते विश्वामित्रजले शुभे ॥ ४५ ॥ ततः कुष्ठविनिर्मुक्तस्तत्क्षणात्समपद्यत ॥ दिव्यरूपवपुर्द्धारी कामदेव इवापरः ॥ ४६ ॥ अथ तुष्टो नरेंद्रस्तु तस्मै कार्पटिकाय च ॥ ददौ कोटित्रयं हेम्नः प्रोवाच स ततो वचः ॥ ४७ ॥ त्वत्प्रसादाद्विमुक्तोऽस्मि रोगादस्मात्सुदारुणात् ॥ तस्मात्त्वं गच्छ गेहं स्वं स्थास्येऽहं चात्र निर्भरम् ॥ ४८ ॥ करिष्यामि तपो नित्यं स्वकलत्रसमन्वितः ॥ राज्ये संस्थापितः पुत्रः समर्थो राज्यकर्मणि ॥ ४९ ॥ इत्युक्त्वा प्रेरयामास तं तथान्यान्समागतान् ॥ सेवकान्स्वगृहायैव स्वयं तत्रैव संस्थितः ॥ ५० ॥ कृत्वाऽऽश्रमपदं रम्यं स्वकलत्रसमन्वितः ॥ संप्राप्तश्च परां सिद्धिं कालेन द्विजसत्तमाः ॥ ५१ ॥ तस्य नाम्ना ततः ख्यातं तीर्थमेतत्त्रिविष्टपे ॥ सर्वव्याधिहरं रम्यं सर्वपातकनाशनम् ॥५२॥ तेन संस्थापितस्तत्र देवदेवो दिवाकरः ॥ रत्नादित्य इति ख्यातो निजनाम्ना महात्मना ॥ ५३ ॥ सप्तम्यां सूर्यवारेण तत्र स्नात्वा प्रपश्यति ॥ यस्तु पापविनिर्मुक्तः सूर्यलोकं स गच्छति ॥ ५४ ॥ यदन्यत्तत्र संवृत्तं क्षेत्रजातं द्विजोत्तमाः ॥ तदहं कीर्तयिष्यामि शृणुध्वं सुसमाहिताः ॥ ५५ ॥ आसीत्तत्र पुमान्कश्चिद्देशे ग्राम्यो जरात्मकः ॥ कुष्ठी तथापि नित्यं स करोति पशुरक्षणम् ॥५६॥ एकदा रक्षतस्तस्य पशूंस्तत्र गिरेरधः ॥ एकः पशुर्विनिष्क्रांतः सत्पथात्तृणलोभतः ॥५७॥ सप्तम्यां रविवारेण पतितस्तस्य निर्झरे ॥

१ तत्राश्रयः—तत्क्षेत्रनिवासी—इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





न च संलक्षितस्तेन गच्छमानः कथंचन ॥ ५८ ॥ अथ यावद्गृहे सोऽथ भोजनार्थं समुद्यतः ॥ तावत्तस्य पशोः स्वामी भर्त्सयन्समुपागतः ॥५९॥ नायातः स पशुः कस्मान्मदीयो मामके गृहे ॥ तस्मादानय तं शीघ्रं नो चेत्प्राणान्हरामि ते ॥ ६० ॥ ॥ सूत उवाच ॥ ॥ तच्छ्रुत्वा भयसंत्रस्तः स कुष्ठी सत्वरं ययौ ॥ तेन मार्गेण येनैव दिवा भ्रांतो महीतले ॥ ६१ ॥ अथ दूरात्स शुश्राव तस्य रावं पशोस्तदा ॥ पतितस्य महागर्ते निशांते तमसि स्थिते ॥६२॥ ततो गत्वाऽथ तं गर्तं प्रविश्य जलमध्यतः ॥ चकर्ष तं पशुं कृच्छ्रात्पंकमध्यात्सुदारुणात् ॥ समादायाथ तं हर्म्यं प्रजगाम शनैःशनैः ॥ ६३ ॥ अर्पयित्वाथ तं तस्य स्वकीयं त्वाश्रमं गतः ॥ ६४ ॥ ततः सुप्तो महाभागाः स प्रबुद्धः पुनर्यदा ॥ प्रभाते वीक्षते गात्रं यावत्कुष्ठविवर्जितम् ॥ ६५ ॥ शोभया परया युक्तं विस्मयोत्फुल्ललोचनः ॥ चिंतयामास किं ह्येतदकस्माद्रोगसंक्षयः ॥ ६६ ॥ नूनं तस्य प्रभावोऽयं तीर्थस्याद्य निशागमे ॥ मयावगाहितं यच्च पशोरर्थं सुकर्दमम् ॥ ६७ ॥ ततश्च वीक्षयामास तेन गत्वा सुकौतुकात् ॥ यावत्कंडूविनिर्मुक्तस्तेजसा परिवारितः ॥ ६८ ॥ तत्र स्थाने स्वयं गत्वा ज्ञात्वा च तीर्थमुत्तमम् ॥ तपस्तेपे स तत्रैव ध्यायमानो दिवाकरम् ॥६९॥ अरण्यवासिनं सम्यग्दिवारात्रमतंद्रितः ॥ गतश्च परमां सिद्धिं दुर्लभां त्रिदशैरपि ॥ ७० ॥ तस्मात्सर्वप्रयत्नेन तत्र स्नानं समाचरेत् ॥ ७१ ॥ पूजयेच्चापि तं देवं भास्करं वारितस्करम् ॥ अद्यापि कलिकालेऽपि तत्र स्नातो नरः शुचिः ॥ ७२ ॥ तत्र पुण्यजले कुण्डे सप्तम्यां सूर्यवासरे ॥ यस्तं पूजयते भक्त्या सोऽपि पापैः प्रमुच्यते ॥७३॥ गायत्र्यष्टसहस्रं यो जपेत्तत्पुरतः स्थितः ॥ सोऽपि रोगविनिर्मुक्तो मुच्यते सर्वपातकैः ॥ ७४ ॥ तस्योद्देशेन यो दद्याद्धेनुं श्रद्धासमन्वितः ॥ न तस्यान्वयजातोऽपि व्याधिना परिगृह्यते ॥ ७५ ॥ एतद्वः सर्वमाख्यातं मयादित्यस्य संभवम् ॥ माहात्म्यं श्रवणाद्यस्य नरः पापाद्विमुच्यते ॥ ७६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये रत्नादित्यमाहात्म्यवर्णनंनाम द्वादशोत्तरद्विशततमोऽध्यायः ॥ २१२ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ रत्नादित्यस्य माहात्म्यमेतद्वः परिकीर्तितम् ॥ सर्वकुष्ठहरं यच्च सर्वपातकनाशनम् ॥ भूयस्तथैव माहात्म्यं महद्वै श्रूयतां रवेः ॥ १ ॥ पुरासीद्ब्राह्मणः कश्चित्कुष्ठव्याधिसमाकुलः ॥ तेन चाराधितः सूर्यस्तत्रस्थेन द्विजोत्तमाः ॥ २ ॥ पूर्वदक्षिणदिग्भागे समासाद्य ततः परम् ॥ रक्तचन्दनजां कृत्वा प्रतिमां भावितात्मना ॥ ३ ॥ ततो वर्षसहस्रांते तुष्टस्तस्य दिवाकरः ॥ वरदोऽस्मीति तं प्राह दृष्टिगोचरमागतः ॥ ४ ॥ ॥ ॥ ब्राह्मण उवाच ॥ ॥ यदि तुष्टोऽसि मे देव कुष्ठव्याधिं हर प्रभो ॥ नान्येन कारणं मेऽस्ति राज्येनापि त्रिविष्टपे ॥ ५ ॥ ॥ श्रीभगवा



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नुवाच ॥ ॥ सप्तम्यां सूर्यवारेण कुरु विप्र प्रदक्षिणाम् ॥ शतमष्टोत्तरं यावत्स्नात्वा पुण्यह्रदे[1] शुभे ॥ फलहस्तः पृथक्त्वेन ततः कुष्ठेन मुच्यसे ॥६॥ अन्योऽत्र गां गतो[2] योऽपि व्रतमेतत्करिष्यति ॥ सर्वरोगविनिर्मुक्तो मम लोकं स गच्छति ॥ ७ ॥ ॥ श्रीसूर्य उवाच ॥ ॥ तच्छ्रुत्वा स तथा चक्रे ब्राह्मणः श्रद्धयाऽन्वितः ॥ विमुक्तश्च तदा कुष्ठाद्दिव्यदेहमवाप्तवान् ॥ ८ ॥ अथ भूयोऽपि तं प्राह नीरोगं भगवान्रविः ॥ किं ते प्रियं करोम्यन्यद्वद ब्राह्मणसत्तम ॥ ९ ॥ सोऽब्रवीत्सर्वदैवात्र स्थातव्यं भगवन्विभो ॥ १० ॥ ॥ श्रीभगवानुवाच ॥ ॥ अतः परं ममावासः स्थानेऽत्र च भविष्यति ॥ नाम्ना कुहरवासाख्या संज्ञा मम भविष्यति ॥ ११ ॥ कस्यचित्त्वथ कालस्य विष्णुपुत्रो बभूव ह ॥ सांबोनाम सुरूपाढ्यो जांबवत्यां द्विजोत्तमाः ॥ १२ ॥ क्षोभसंजननः स्त्रीणां मातॄणामपि स द्विजाः ॥ अथ तं राजमार्गेण गच्छंतं यदुसत्तमम् ॥ १३ ॥ पुरनार्योऽपि संतुष्टा वीक्षांचक्रुः सुकौतुकात् ॥ गृहकार्याणि संत्यज्य समारूढा गवाक्षकान् ॥ १४ ॥ तस्य कामात्मदेहस्य दर्शनार्थं समुत्सुकाः ॥ काश्चिदर्धानुलितांग्यः काश्चिदेकांजितेक्षणाः ॥ १५ ॥ अर्धसंयमितैः केशैस्तथान्यास्त्यक्तबालकाः ॥ एकस्मिंश्चरणे काश्चिन्नियोज्योपानहं द्रुताः ॥ १६ ॥ पादुकां च द्वितीये तु पर्यधावन्नितंबिनीः[3] ॥ व्रजंतीषु तथान्यासु वनितासु गवाक्षकान् ॥ १७ ॥ व्याक्रोशंति क्षुधाविष्टाः शिशवो गुरवस्तथा ॥ नीवीबन्धनविश्लेषसमाकुलितचेतसः ॥ १८ ॥ ययुरेवापराः स्वेषु गवाक्षेषु वरांगनाः ॥ स चकर्ष तदा तासां पतितैर्नेत्ररश्मिभिः ॥ १९ ॥ हृदयानि धरापृष्ठे कामदेवसमो युवा ॥ काचिद्दृष्ट्वैव तद्रूपं तस्य सांबस्य कामिनी ॥ २० ॥ निश्चला कामतप्तांगी लिखितेव विभाव्यते ॥ काचिदग्निसमान्मुक्त्वा निश्वासान्कामपीडिता ॥ २१ ॥ एकास्तं च समालोक्य रूपयौवनसंयुतम् ॥ गवाक्षात्प्रपतंति स्म निश्चेष्टा धरणीतले ॥ २२ ॥ अन्याः परस्परालापं प्रकुर्वंति वरस्त्रियः ॥ एका सा कामिनी धन्या यास्य चक्रेवगूहनम् ॥ २३ ॥ निःशेषां रजनीं प्राप्य माघमाससमुद्भवाम् ॥ आस्तां तावत्स्त्रियो याश्च नरा अपि निरर्गलम् ॥ २४ ॥ जल्पंति चेदृशं सर्वं तस्य रूपेण विस्मिताः ॥ अन्ये वदन्ति सेवाम एनमर्थेन वर्जिताः[4] ॥ २५ ॥ वीक्ष्यामो[5] वदनं येन नित्यमेवेंदुसंनिभम् ॥ कर्णाभ्यां वारिता वृद्धिर्नेत्रयोरप्यसंशयम् ॥ नो चेज्जानीमहे नैव कियती संभविष्यति ॥ २६ ॥ एवं संवीक्ष्यमाणस्तु कामिनीभिर्नरैस्तथा ॥ निर्ययौ राजमार्गेण पितृदर्शनलालसः ॥ २७ ॥ भगिन्यो मा

१ पुण्यद्रवे–इ० पा० । २ गां गतः–इति पदच्छेदः कर्तव्यः । गां गतः–भूमिष्ठः–यः कोऽपि–मनुजः–इत्यर्थः । ३ नितंबिनीः–नितंबिन्यः–इत्यर्थः । आर्षत्वाचात्र–"दीर्घाज्जसि च" इति न प्रवर्तते । सर्वेषां विधीनां छन्दसि वैकल्पिकत्वात् । "छन्दोवत्कवयः कुर्वन्ति" इति भाष्योक्तेः । ४ अर्थेन वर्जिताः–वेतनमन्तरैव–इत्यर्थः । ५ वीक्ष्यामः–आर्षं रूपम्–वीक्षिष्यामहे–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तरो याश्च भ्रातृपत्न्यश्च याः स्थिताः ॥ अवस्थामीदृशीं प्राप्ता ब्राह्मणानामपि स्त्रियः ॥ मातरोऽपि च यास्तस्य भगिन्यश्च विशेषतः ॥ ॥ २८ ॥ अन्यस्मिन्नहनि प्राप्ते प्रावृट्काले निशागमे ॥ कृष्णपक्षे तमोभूते अलक्ष्येऽपि गते पुरः ॥ २९ ॥ तन्माता नन्दिनीनाम कामदेवशरार्दिता ॥ तत्पत्न्या वेषमाधाय तच्छय्यायामुपस्थिता ॥ ३० ॥ सोऽपि तां दयितां ज्ञात्वा सेवयामास कामिनीम् ॥ रतोपचारै[1]र्विविधैर[2]श्रद्धेयविनिर्मितैः ॥ ३१ ॥ तया तत्र यदुश्रेष्ठो विकल्पमकरोत्तदा ॥ अंगराजसुता या मे प्राणेभ्योऽपि गरीयसी ॥ ॥ ३२ ॥ नैवंविधं रतं वेद अनया यद्विनिर्मितम् ॥ वेश्या अपि न जानंति रतमीदृक्कथञ्चन ॥ ३३ ॥ ततो गाढं करे धृत्वा दीपमानीय तत्क्षणात् ॥ यावत्पश्यति सा माता नन्दिनीति च या स्मृता ॥ ३४ ॥ ततश्च गर्हयामास धिक्पापे किमिदं कृतम् ॥ गर्हितं सर्वलोकानां नरकार्तिप्रदं तथा ॥ ३५ ॥ सापि लज्जासमोपेता महाभयसमाकुला ॥ प्रणष्टा तत्क्षणादेव भयेन महताऽन्विता ॥ ३६ ॥ सांबोऽपि प्रलपन्नार्तो निद्रां लेभे न वै द्विजाः ॥ रात्रिशेषमभूत्तस्य तदा वर्षशतोपमम् ॥ ३७ ॥ अथ रात्र्यां व्यतीतायां प्रोद्गते रविमण्डले ॥ दुःखेन महता युक्तः प्रोत्थितः स हरेः सुतः ॥ ३८ ॥ आवश्यकमपि त्यक्त्वा कंचिद्ब्राह्मणसत्तमम् ॥ धर्मशास्त्रविधानज्ञं समानीयाथ चाब्रवीत् ॥ ३९ ॥ रहस्ये विनयोपेतः कृतांजलिपुटः स्थितः ॥ ॥ सांब उवाच ॥ ॥ मात्रा स्वस्रा दुहित्रा वा स्त्रयं स्याद्यदि मोहनम्[3] ॥ ४० ॥ कथं शुद्धिर्भवेत्तस्य परमार्थेन मे वद ॥ धर्मशास्त्राणि संवीक्ष्य सर्वाणि च यथाक्रमम् ॥ ४१ ॥ ॥ ब्राह्मण उवाच ॥ ॥ परनार्याः कृते वत्स प्रायश्चित्तं विनिर्मितम् ॥ धर्म[4]द्रोणेषु सर्वेषु वर्णानां च पृथग्विधम् ॥ ४२ ॥ आसां च तिसृणां चैव त्रयाणां परिकीर्तितम् ॥ एवमेवं[5] विनिर्दिष्टं प्रायश्चित्तं विशुद्धये ॥ ४३ ॥ मात्रा मोहनमासाद्य भगिन्या वाथ यादव ॥ दुहित्रा वा प्रमादाच्च कार्यं संशोधनं बुधैः ॥ शुद्ध्यर्थं तिंगिनीमेकां नान्यज्जानाम्यहं यतः ॥ ४४ ॥ धर्मद्रोणेषु सर्वेषु निर्णयोऽयमुदाहृतः ॥ यो मया तव संदिष्टो नान्योस्ति यदुपुंगव ॥ ४५ ॥ अन्यथा यो वदेत्पृष्टः प्रायश्चित्तं स्वच्छन्दतः ॥ तस्य पापस्य भागी स्याद्यथा कर्ता तथैव सः ॥ ४६ ॥ ॥ सांब उवाच ॥ ॥ तिंगिन्याः किं स्वरूपं च किं प्रमाणं द्विजोत्तम ॥ सर्वं विस्तरतो ब्रूहि ममास्त्यत्र प्रयोजनम् ॥ ४७ ॥ ॥ ब्राह्मण उवाच ॥ ॥ गोवाट[6]चूर्णमादाय गर्तां भृत्वा स्वमानजाम् ॥ शयनं तत्र कर्तव्यं



१ नानोपचारैः—इ० पा० । २ अश्रद्धेयविनिर्मितैः—अश्रद्धेयं विनिर्मितं विनिर्माणं येषां तैः इमे रतोपचाराः स्वपत्न्या एवेति श्रद्धातुमशक्यैः—अपूर्ववैदग्ध्यदर्शनादिति भावः । ३ मोहनम्—मैथुनम्—इत्यर्थः । ४ धर्मद्रोणेषु धर्माधारपात्रभूतेषु धर्मशास्त्रेषु—इत्यर्थः ५ एवमेवम्—वक्ष्यमाणप्रकारेण—इत्यर्थः । ६ गोवाटचूर्णम्—शुष्कगोमयचूर्णम्—इत्यर्थः—प्रकरणात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यावद्वक्रेण यादव ॥ ४८ ॥ उपरिष्टात्तच्च चूर्णं धार्यं गोवाटसंभवम् ॥ यावद्वक्त्रप्रमाणं च वर्जयित्वा स्वभाननम् ॥ ४९ ॥ ततः पादप्रदेशे तु ज्वालयेद्धव्यवाहनम् ॥ यथा शनैः शनैर्दाहः शरीरस्य प्रजायते ॥ ५० ॥ न चैव चालयेदंगं कथंचित्तत्र संस्थितः ॥ नैवाक्रंदं तथा कुर्या द्ध्यायेदेकं जनार्दनम् ॥ ५१ ॥ ततो जीवितनाशेन गात्रशुद्धिः प्रजायते ॥ ५२ ॥ तिंगिन्या यत्स्वरूपं च तन्मया परिकीर्तितम् ॥ प्रायश्चित्त मिदं सम्यङ्महापातकनाशनम् ॥ ५३ ॥ तच्छुत्वा वचनं तस्य सांबो जांबवतीसुतः ॥ हृदये निश्चयं कृत्वा तिंगिनीसाधकोद्भवम् ॥ ५४ ॥ ततः प्रोवाच विजने वासुदेवं घृणान्वितः ॥ ताताहं विप्रलब्धस्तु नंदिन्या तव भार्यया ॥ ५५ ॥ भार्याया रूपमाधाय पापया तमसि स्थिते ॥ सा मया निजभार्येयमिति मत्वा निषेविता ॥ ५६ ॥ ततस्तु चेष्टितैर्ज्ञात्वा गर्हयित्वा विसर्जिता ॥ ततःप्रभृति गात्रे मे कुष्ठव्याधिरयं स्थितः ॥ ॥ ५७ ॥ मयाथ धर्मशास्त्रज्ञः कश्चित्पृष्टो द्विजोत्तमः ॥ प्रायश्चित्तं यथोक्तं मे वद मातृनिषेवणात् ॥ ५८ ॥ तेनोक्तं साधनं सम्यक्तिंगिन्या मम शुद्धये ॥ सोऽहं तां साधयिष्यामि तस्य पापस्य शुद्धये ॥ ५९ ॥ अनुज्ञां देहि मे शीघ्रं कार्यं येन करोम्यहम् ॥ क्षंतव्यं च मया बाल्ये यत्किंचित्कु कृतं कृतम् ॥ ६० ॥ मम माता यथा दुःखं न कुर्यात्त्वं तथा कुरु ॥ ६१ ॥ तच्छुत्वा वचनं तस्य वज्रपातोपमं हरिः ॥ बाष्पपूर्णेक्षणो दीनस्ततः प्रोवाच गद्गदम् ॥ ६२ ॥ न त्वया कामतः पुत्र कृत्यमेतदनुष्ठितम् ॥ न ज्ञानेन[1] कृतं यस्मात्तस्मात्स्वल्पं हि पातकम् ॥ ६३ ॥ जानता यत्कृतं पापं तच्चैवाक्षयतां व्रजेत् ॥ न करोति महीपालो यदि तस्य विनिग्रहम् ॥ ६४ ॥ तस्मात्ते कीर्तयिष्यामि प्रायश्चित्तं विशुद्धये ॥ दानं चैव महाभाग येन कुष्ठं प्रणश्यति ॥ ६५ ॥ उक्तानि प्रतिषिद्धानि पुनः संभावितानि च ॥ सापेक्षनिरपेक्षाणि मुनिवाक्यान्यशेषतः ॥ ६६ ॥ तदत्र विषये पुत्र मम वाक्यं समाचर ॥ भविष्यति महच्छ्रेय इह लोके परत्र च ॥ ६७ ॥ हाटकेश्वरजे क्षेत्रे विश्वामित्रप्रतिष्ठितः ॥ मार्तण्डोऽस्ति सुवि ख्यातः सर्वकुष्ठविनाशकः ॥ ६८ ॥ सूर्यवारेण सप्तम्यां संप्राप्ते मासि माधवे ॥ नक्षत्रे पितृदैवत्ये शुक्लपक्षे समागते ॥ ६९ ॥ भास्करस्योदये प्राप्ते श्रद्धापूतेन चेतसा ॥ शतमष्टोत्तरंयावत्कुरुते च प्रदक्षिणाम् ॥ ७० ॥ फलैः श्रेष्ठतमैश्चैव तत्प्रमाणैः पृथक्पृथक् ॥ तस्य कुष्ठं विनिर्याति सद्य एव न संशयः ॥ ७१ ॥ नीरोगः कुरुते यस्तु रवेस्तस्य प्रदक्षिणाः ॥ तावद्युगं[2] पुमानेष सूर्यलोके महीयते ॥ ७२ ॥ सूर्यवारेण यो मर्त्यस्तस्य कृत्वा प्रदक्षिणाम् ॥ नमस्करोति सद्भक्त्या सोऽपि रोगैः प्रमुच्यते ॥ ७३ ॥ तस्मात्त्वं हि महाराज तमाराधय भास्करम् ॥ देवं वै विधिनानेन यो

१ ज्ञानतः–इ० पा० । २ तावद्युगम्–प्रदक्षिणासंख्यापरिमितयुगपर्यन्तम्–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

मयोक्तोऽखिलस्तव ॥ ७४ ॥ अविकल्पेन मनसा समाराधय सत्वरम् ॥ मुक्तरोगे विपाप्माथ दिव्यदेहमवाप्स्यसि ॥ ७५ ॥ मा कुरुष्व विषादं त्वं कुष्ठव्याधिसमुद्भवम् ॥ तस्मिन्क्षेत्रे स्थिते देवे कुहराश्रयसंज्ञिते ॥ ७६ ॥ अथ तद्वचनं श्रुत्वा प्रस्थितो विष्णुनन्दनः ॥ ७७ ॥ ॥ सूत उवाच ॥ ॥ एतच्छ्रुत्वा वचस्तस्य देवदेवस्य चक्रिणः ॥ चकार गमने बुद्धियोगं सांबोऽर्बुदं[1] प्रति ॥ ७८ ॥ ततः शुभेऽहनि प्राप्ते हस्त्यश्वरथसंयुतः ॥ प्रतस्थे स सुतो विष्णोः सेनया परिवारितः ॥ ७९ ॥ अनुयातः सुदूरं च कृष्णेनाक्लिष्टकर्मणा ॥ बाष्पपूर्णेक्षणेनैव सर्वमातृजनेन च ॥ ८० ॥ बलभद्रेण वीरेण चारुदेष्णेन धीमता ॥ युयुधानानिरुद्धाभ्यां प्रद्युम्नेन च धीमता ॥ ८१ ॥ ततो जांबवती पुत्रं दृष्ट्वा तीर्थोन्मुखं तदा ॥ गच्छमानं प्रचक्रेऽथ प्रलापान्कुररी यथा ॥ ८२ ॥ हा हतास्मि विनष्टास्मि मंदभाग्या ह्यभागिनी ॥ एकोपि तनयो यस्या ममाप्येनां दशां गतः ॥ ८३ ॥ अथ तां रुदतीं दृष्ट्वा प्रोवाच मधुसूदनः ॥ किममंगलमेतस्य प्रस्थितस्य करिष्यसि ॥८४॥ बाष्पपूर्णेक्षणा दीना मुक्तकेशी विशेषतः ॥ एष व्याधिविनिर्मुक्तस्तीर्थयात्राफलान्वितः ॥ कुष्ठव्याधिपरित्यक्तः पुनरेष्यति तेऽतिकम् ॥ ८५ ॥ एतस्मिन्नंतरे यानादवतीर्य त्वरान्वितः ॥ सांबोऽसौ प्रस्थितस्तत्र यत्र जांबवती स्थिता ॥ ८६ ॥ स तां प्रणम्य हृष्टात्मा कृतांजलिपुटः स्थितः ॥ प्रणिपत्य विहस्योच्चैर्वाक्यमेतदुवाच ह ॥८७॥ मा त्वं मातर्वृथा दुःखमस्मदर्थे करिष्यसि ॥ आगमिष्याम्यहं शीघ्रं तीर्थयात्रां विधाय वै ॥८८॥ ॥ जांबवत्युवाच ॥ ॥ रक्षंतु त्वां वने वत्स सर्वास्ता वनदेवताः ॥ श्वापदेभ्यः पिशाचेभ्यो दुष्टेभ्यः पुत्र सर्वतः ॥८९॥ शिरस्ते पातु गोविंदः कण्ठं च मधुसूदनः ॥ बाहुदेशं हृषीकेशो हृदयं दैत्यनाशनः ॥९०॥ जठरं पुंडरीकाक्षः कटिं पातु गदाधरः ॥ जानुनोर्युगलं कृष्णः पादौ च धरणीधरः ॥ ९१ ॥ एवं संस्पृश्य हस्तेन निजेनांगानि तस्य सा ॥ समालिंग्य समाघ्राय मूर्धदेशे मुहुर्मुहुः ॥ ९२ ॥ प्रेषयामास तं पुत्रं कृतरक्षं यशस्विनी ॥ सा सर्वांतःपुरीयुक्ता निवृत्ता तदनन्तरम् ॥ ९३ ॥ अश्रुपूर्णेक्षणा दीना निःश्वसन्ती यथोरगी ॥ तथा च भगवान्विष्णुर्यादवैः सकलैः सह ॥ ९४ ॥ प्रविष्टो द्वारकापुर्यां सांबं प्रोष्य ततः परम् ॥ अश्रुपूर्णेक्षणो दीनो बलभद्रपुरःसरः ॥ ९५ ॥ पुत्रैः पौत्रैस्तथा मित्रैर्बांधवैरपरैरपि ॥ द्वारकाया विनिष्क्रम्य सांबोऽपि द्विजसत्तमाः ॥ ९६ ॥ संप्राप्तश्च क्रमेणाथ सिंधुसागरसंगमे ॥ यत्र योगीश्वरः साक्षादंबरीषप्रतिष्ठितः ॥ ९७ ॥ अद्यापि तिष्ठते विष्णुर्जंतूनां पापनाशनः ॥ तत्र स्नात्वा समभ्यर्च्य देवं योगीश्वरं ततः ॥ ९८ ॥ ददौ दानानि विप्रेभ्यो नानारूपाणि शक्तितः ॥ दीनांधकृपणेभ्यश्च तथैवा



१ एतेन—अर्बुदाचलमार्गेणहाटकेश्वरक्षेत्रगमनं साम्बस्य सूचितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्येभ्य एव च ॥ ९९ ॥ यानानि वस्त्ररत्नानि यद्यच्च येन वांछितम् ॥ स त्रिरात्रं हरेः पुत्रः स्थित्वा तत्र समाहितः ॥ १०० ॥ च्यवनस्याश्रमं पुण्यं जगामाथ ततः परम् ॥ यत्र संतिष्ठते विष्णुश्च्यवनेन प्रतिष्ठितः ॥ १ ॥ सिंधोस्तटे च पुण्ये च सर्वपातकनाशनः ॥ तत्रापि विप्रमुख्येभ्यो ददौ दानानि यादवः ॥ २ ॥ वांछितानि यथोक्तानि शास्त्रदृष्टेन कर्मणा ॥ तत्रापि संयतः सांब स स्थित्वा श्रद्धयान्वितः ॥ ३ ॥ त्रिरात्रं प्रजगामाथ स्नात्वा सिंधूदके शुभे ॥ ततस्तु पुष्करादीनि समुद्दिश्य शनैः शनैः ॥ ४ ॥ पुष्करावासिनं देवं ध्यायमानो ह्यहर्निशम् ॥ तस्तु पुष्करं प्राप्य क्रमेण यदुसत्तमः ॥५॥ पुण्ये कुण्डजले स्नातः संतर्प्य पितृदेवताः॥ सप्तम्यां सूर्यवारेण गृहीत्वाथ फलानि च ॥ गतः संतिष्ठते यत्र देवो वै विष्णुसूचितः ॥ ६ ॥ पूजयित्वा ततो भक्त्या देवं कुहरवासिनम् ॥ वस्त्रानुलेपनैर्धूपैर्नैवेद्यैस्तु पृथग्विधैः ॥७॥ ततः प्रदक्षिणाश्चक्रे फलहस्तः शनैःशनैः ॥ प्रपठन्सूर्यगायत्रीं श्रद्धया परया युतः ॥ ८ ॥ यथायथा करोत्येष रवेस्तस्य प्रदक्षिणाम् ॥ तथातथा च संयाति तस्य कुष्ठं द्विजोत्तमाः ॥ ९ ॥ तत्र क्षणेऽभवत्तस्य चित्ते सांबस्य धीमतः ॥ मुक्तोऽहं कुष्ठरोगेण निर्विकल्पं द्विजोत्तमाः ॥ ११० ॥ ततश्च सहितं तेन यत्किंचित्तत्र चागतम् ॥ हस्त्यश्वरथरत्नाढ्यं तत्सर्वं भक्तिपूर्वकम् ॥ ११ ॥ नागराणां ददौ सर्वं तथान्यद्ग्रामपंचकम् ॥ सांबाऽऽदित्यं प्रतिष्ठाप्य ततः संप्रस्थितो गृहम् ॥ १२ ॥ किंचिदुर्वरितं यच्च तत्सर्वं भक्तिसंयुतम् ॥ प्रददौ सूर्यविप्रेभ्यः पूजयित्वा दिवाकरम् ॥ १३ ॥ अष्टौ वाजिसहस्राणि नागानां च शतत्रयम् ॥ रथानां षट्छतान्येव अश्वैर्युक्तानि वाजिभिः ॥ अनंतानि च रत्नानि दत्त्वा सांबो गृहं गतः ॥ १४ ॥ य एतत्पठते भक्त्या सांबाख्यानमनुत्तमम् ॥ शृणोति वाऽन्वये तस्य न कुष्ठं संप्रजायते ॥ १५ ॥ ॥ सूत उवाच ॥ ॥ एतद्वः सर्वमाख्यातं विश्वामित्रीयमुत्तमम् ॥ चतुर्थं च पुण्यतीर्थं स्त्रीणां चैव शुभावहम् ॥ ११६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये विश्वामित्रीयमाहात्म्ये कुहरवासिसांबादित्यप्रभाववर्णनंनाम त्रयोदशोत्तरद्विशततमोऽध्यायः ॥ २१३ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तथान्योपि च तत्रास्ति विश्वामित्रप्रतिष्ठितः ॥ गणनाथो द्विजश्रेष्ठाः सर्वसिद्धिप्रदो नृणाम् ॥ १ ॥ माघमासे चतुर्थ्यां च शुक्लायां पूजयेत्तु यः ॥ स च संवत्सरंयावत्सर्वैर्विघ्नैर्विमुच्यते ॥ २ ॥ ॥ ऋषय ऊचुः ॥ ॥ गणनाथस्य चोत्पत्तिं सांप्रतं सूत नो वद ॥ कथमेष समुत्पन्नः किंमाहात्म्यः प्रकीर्तितः ॥ ३ ॥ ॥ ॥ सूत उवाच ॥ ॥ एष चोत्पादितो गौर्या निजांगमलतः स्वयम् ॥ क्रीडार्थं मानुषैरंगैर्मातंगाननशोभितः ॥४॥ चतुर्हस्तसमोपेत आखुवाहनग

१ समन्वितः—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





स्तथा ॥ कुठारहस्तश्च तथा मोदकाशनतोषकृत् ॥ ५ ॥ सर्वसिद्धिप्रदो लोके भक्तानां च विशेषतः ॥ एष पूर्वं प्रभोः कार्ये संग्रामे तारकामये ॥६॥
संग्राममकरोद्रौद्रं न कृतं यच्च केनचित् ॥ निहता दानवाः सर्वे संख्यया परिवर्जिताः ॥ ७ ॥ ततः शक्रेण तुष्टेन प्रोक्तः संग्रामभूमिपः ॥ क्षत
विक्षतसर्वांगो रुधिरेण परिप्लुतः ॥ ८ ॥ अस्मदर्थे त्वया युद्धं यत्कृतं सुगजानन ॥ निहता दानवाः सर्वे संख्यया परिवर्जिताः ॥९॥ तस्मात्त्वं
सर्वदेवानामपि पूज्यो भविष्यसि ॥ किं पुनर्मानुषाणां च ये नित्यं विघ्नसंप्लुताः ॥ १० ॥ ये त्वां संपूजयिष्यंति कार्यारंभेषु सर्वतः ॥ कार्यसि
द्धिर्न संदेहस्तेषां भूयाद्गिरा मम ॥ ११ ॥ एवमुक्त्वा सहस्राक्षो विससर्जाथ तं तदा ॥ संमान्य बहुमानेन गौरीशंकरपार्श्वतः ॥ १२ ॥ अयमर्थः पुरा
पृष्टो रोहिताश्वेन धीमता ॥ सर्वविघ्नविनाशार्थं मार्कंडेयं महामुनिम् ॥ १३ ॥ तमेवार्थं महाभागाः कथयिष्ये यथार्थतः ॥ तच्छृणुध्वं पुरावृत्तं
सर्वं सर्वे समाहिताः ॥ १४ ॥ ॥ रोहिताश्व उवाच ॥ ॥ भगवन्नत्र ये मर्त्याः सर्वे विघ्नसमन्विताः ॥ शुभकृत्येषु सर्वेषु जायंते शुचयोऽपि च ॥
॥ १५ ॥ प्रारब्धेषु च कार्येषु धर्मजेषु विशेषतः ॥ तानि विघ्नानि जायन्ते यैस्तत्कार्यं न सिध्यति ॥ १६ ॥ तस्माद्विघ्नविनाशाय किंचिन्मे व्रतमा
दिश ॥ व्रतं वा नियमो वाऽथ तपो वा दानमेव च ॥ १७ ॥ सकृच्चीर्णेन येनात्र यावज्जीवति मानवः ॥ तावन्न जायते विघ्नमाजन्ममरणांतिकम् ॥
॥ १८ ॥ ॥ मार्कण्डेय उवाच ॥ ॥ अत्र ते कीर्तयिष्यामि सर्वविघ्नविनाशनम् ॥ व्रतं सर्वगुणोपेतं सर्वपापप्रणाशनम् ॥ विश्वामित्रेण सञ्चीर्णं
यत्पुरा भावितात्मना ॥ १९ ॥ विश्वामित्र इति ख्यातो गाधिपुत्रः प्रतापवान् ॥ वसिष्ठेन समं तस्य वैरमासीन्महात्मनः ॥ २० ॥ ब्राह्मण्यार्थे न
सम्प्रोक्तः कथंचित्स महातपाः ॥ ब्राह्मणस्त्वं वसिष्ठेन ततो वैरमजायत ॥ २१ ॥ ॥ रोहिताश्व उवाच ॥ ॥ कस्मान्न प्रोक्तवान्विप्रो वसिष्ठस्तु
कथंचन ॥ ब्राह्मणः स परं प्रोक्तो ब्रह्मादिभिरपि स्वयम् ॥ २२ ॥ ॥ मार्कण्डेय उवाच ॥ ॥ क्षत्रियश्च स्थितः पूर्वं विश्वामित्रो महीपतिः ॥
मृगयासु परिश्रांतो वसिष्ठस्य तदाऽऽश्रमम् ॥ प्रविष्टः क्षुत्पिपासार्त्तः स तेनाथ प्रपूजितः ॥ २३ ॥ तस्यासीन्नन्दिनीनाम धेनुः कामदुघा सदा ॥
सा सूते वाञ्छितं सद्यो यद्वसिष्ठोऽभिवाञ्छति ॥ २४ ॥ तत्प्रभावात्स भूपालः सभृत्यबलवाहनः ॥ तेन तृप्तिं परां नीतो मिष्टान्नैर्विविधैस्ततः ॥
॥ २५ ॥ पार्थिवोऽयमिति ज्ञात्वा ह्यर्घ्याद्यैर्भोजनैः स च ॥ सोऽपि दृष्ट्वा प्रभावं तं सर्वं धेनोश्च संभवम् ॥ प्रार्थयामास तां मूल्यैर्गजवाजिसमु ॥२४७॥
द्भवैः ॥ २६ ॥ न ददौ स तदा विप्रः साम्ना दानेन वा पुनः ॥ भेदेन च ततो दण्डं योजयामास वै नृपः ॥ २७ ॥ कालयामास तां धेनुं ततः

१ चैत्र—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कोपात्स पार्थिवः ॥ २८ ॥ साऽब्रवीन्नीयमानाऽथ वसिष्ठं किं त्वया विभो ॥ दत्ताहमस्य नृपतेर्यन्मां नयति यत्नतः ॥ २९ ॥ ॥ वसिष्ठ उवाच ॥ ॥ न मया त्वं महाभागे दत्ता चास्य महीपतेः ॥ बलान्नयति यद्येष तस्माद्युक्तं समाचर ॥ ३० ॥ तच्छ्रुत्वा कोपसंयुक्ता नन्दिनी धेनुरुत्तमा ॥ जृंभां चकार तत्सैन्यं समुद्दिश्य नृपोद्भवम् ॥ ३१ ॥ धूमावर्तिस्ततो जाता तस्या वक्त्रात्ततः परम् ॥ ततो ज्वाला महारौद्रास्ततो योधाः सहस्रशः ॥ ३२ ॥ नानाशस्त्रधरा रौद्रा यमदूता यथा च ते ॥ पुलिन्दा बर्बराभीराः किराता यवनाः शकाः ॥ ॥ ३३ ॥ ते प्रोचुस्तां वदास्माकं कस्मात्सृष्टा वयं शुभे ॥ ३४ ॥ ॥ नन्दिन्युवाच ॥ ॥ एते मां ये बलात्पापा नयंति नृपसेवकाः ॥ तान्निघ्नन्तु समादेशान्नान्यद्वांछामि किंचन ॥ ३५ ॥ ततस्तैस्तस्य तत्सैन्यं विश्वामित्रस्य सूदितम् ॥ युध्यमानं महाराज दशरात्रेण संयुगे ॥ ३६ ॥ विश्वामित्रोऽपि तद्दृष्ट्वा ब्राह्म्यं बलमनुत्तमम् ॥ प्रतिज्ञामकरोत्तत्र तारेण सुस्वरेण च ॥ ३७ ॥ अथाहं संभविष्यामि ब्राह्मणो नात्र संशयः ॥ ममापि जायते येन प्रभावश्चेदृशोऽद्भुतः ॥ ३८ ॥ तस्मात्तपः करिष्यामि यदसाध्यं सुरैरपि ॥ स्वपुत्रं स्वे पदे धृत्वा ततश्चक्रे तपो महत् ॥ ३९ ॥ ब्राह्मण्यार्थं महारौद्रं सुमहद्दुष्करं तपः ॥ ब्राह्मण्यं तेन नैवाप्तं वैलक्ष्यं परमं गतः ॥ ४० ॥ ततः कैलासमासाद्य देवदेवं महेश्वरम् ॥ सम्यगाराधयामास गौरीयुक्तं महेश्वरम् ॥ ४१ ॥ अहं तपः करिष्यामि ब्राह्मण्यस्य कृते प्रभो ॥ त्वदीये पर्वतश्रेष्ठे कैलासे शरणं गतः ॥ ४२ ॥ तस्माद्विघ्नस्य मे रक्षां देवदेवः प्रयच्छतु ॥ यथा नो नाशमायाति तपः सर्वं[1] कृतं महत् ॥ ४३ ॥ ॥ श्रीभगवानुवाच ॥ ॥ शुद्ध्यर्थं[2] चैव यत्कार्यं कार्येस्मिन्नृपसत्तम ॥ विनायकसमुद्भूतां तत्त्वं पूंजां समाचर ॥ ४४ ॥ येन ते जायते सिद्धिः सम्यग्ब्राह्मण्यसंभवा ॥ ४५ ॥ ॥ ॥ विश्वामित्र उवाच ॥ ॥ तद्वदस्व सुरश्रेष्ठ तथा तस्य करोम्यहम् ॥ पूर्वं पूजां गणेशस्य सर्वविघ्नप्रशान्तये ॥ ४६ ॥ ॥ श्रीभगवानुवाच ॥ ॥ एष गौर्या पुरा कृत्वा निजांगोद्वर्तनं कृतः ॥ निर्मलेन कृतः पश्चान्नराकारश्चतुर्भुजः ॥ ४७ ॥ क्रीडार्थं मम पुत्रोऽयं बालभावः प्रकल्पितः ॥ गजवक्त्रो महाकायो लंबोदरलघूरुकः ॥ ४८ ॥ ततोऽहमनया प्रोक्तः सजीवः क्रियतामयम् ॥ पुत्रको मे यथा भावी लोके पूज्यतमो विभो ॥ ४९ ॥ ततो मयापि संस्पृष्टः सृष्टिसूक्तेन पार्थिव ॥ जीवसूक्तेन[3] सम्यक्स प्राणवान्समजायत ॥ ५० ॥ ततो मया प्रहृष्टेन प्रोक्ता देवी हिमाद्रिजा ॥ चतुर्थीदिवसे प्राप्ते मयाऽद्यायं विनिर्मितः ॥ ५१ ॥ पुत्रस्तव महाभागे जीवसूक्तप्रभावतः ॥ एष सर्वग-ानां च मदीयानां

१ सर्वम्-इ० पा० । २ तत्त्व शुद्धिम्-इ० पा० । ३ जीवसूक्तेन-"शतं जीव शरदः" इत्यादिना ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सुरेश्वरि ॥ भविष्यति सदाऽध्यक्ष स्तस्माच्च गणनायकः ॥ ५२ ॥ पञ्चमानेन यश्चैनं जीवसूक्तेन सुन्दरि ॥ पूजयिष्यति सद्भक्त्या चतुर्थीदिवसे शुभे ॥ ५३ ॥ तस्य सर्वेषु कृत्येषु सर्वविघ्नानि कृत्स्नशः ॥ प्रयास्यंति क्षयं देवि तमः सूर्योदये यथा ॥ ५४ ॥ नमो लंबोदरायेति नमो गणविभो तथा ॥ कुठारधारिणे नित्यं तथा वाक्संगताय च ॥ ५५ ॥ नमो मोदकभक्षाय नमो दन्तैकधारिणे ॥ ५६ ॥ एभिर्मन्त्रैः समभ्यर्च्य पश्चान्मोदकजं शुभम् ॥ नैवेद्यं च प्रदातव्यं ततश्चार्घ्यं निवेदयेत् ॥ ५७ ॥ अहं कर्म करिष्यामि यत्किंचिच्छंभुसंभवम् ॥ अविघ्नं तत्र कर्तव्यं सर्वदैव त्वया विभो ॥ ५८ ॥ ततस्तु ब्राह्मणानां च भोजनं मोदकोद्भवम् ॥ यथाशक्त्या प्रदातव्यं वित्तशाठ्यं विवर्जयेत् ॥ ५९ ॥ एवमुक्तं मया पूर्वं स्वयमेव नृपोत्तम ॥ गणनाथं समुद्दिश्य गौर्याः पुरत एव च ॥ ६० ॥ ततः प्रहृष्टा सा देवी वाक्यमेतदुवाच ह ॥ अद्यप्रभृति यः पुत्रं मदीयं गणनायकम् ॥ ६१ ॥ अनेन विधिना सम्यक्चतुर्थ्यां पूजयिष्यति ॥ तस्य विघ्नानि सर्वाणि नाशं यास्यंत्यसंशयम् ॥ ६२ ॥ स्मृत्वा वा पूजयित्वा वा यः कार्याणि करिष्यति ॥ भविष्यंति न संदेहस्ततोस्याविचलानि च ॥ ६३ ॥ न सन्देहस्ततोऽस्य श्रीरचलैव भविष्यति ॥ ६४ ॥ ॥ श्रीभगवानुवाच ॥ ॥ तस्मात्त्वं हि महाभाग चतुर्थ्यां सम्यगाचर ॥ विनायकोद्भवां पूजां येनाभीष्टेन युज्यसे ॥ ६५ ॥ ॥ मार्कण्डेय उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा विश्वामित्रो महीपतिः ॥ गणनाथसमुद्भूतां पूजां कृत्वा यथोचिताम् ॥ ६६ ॥ तपश्चचार विपुलं सर्वविघ्नविवर्जितम् ॥ ब्राह्मण्यं च ततः प्राप्तं सर्वेषामपि दुर्लभम् ॥ ६७ ॥ तस्मात्त्वं हि महाभाग विनायकसमुद्भवाम् ॥ पूजां कुरु चतुर्थ्यां च संप्राप्तायां विशेषतः ॥ संप्राप्नोषि महाभोगान्हृदिस्थान्नात्र संशयः ॥ ६८ ॥ यो यं काममभिध्याय गणनाथं प्रपूजयेत् ॥ स तं सर्वमवाप्नोति महेश्वरवचो यथा ॥ ६९ ॥ अपुत्रो लभते पुत्रं धनहीनो महद्धनम् ॥ शत्रूञ्जयति संग्रामे स्मृत्वा तं गणनायकम् ॥ ७० ॥ या नारी पतिना त्यक्ता दुर्भगा च विरूपिता ॥ सा सौभाग्यमवाप्नोति गणनाथस्य पूजया ॥ ७१ ॥ य इदं पठते नित्यं शृणुयाद्वा समाहितः ॥ न विघ्नं जायते तस्य सर्वकृत्येषु सर्वदा ॥ ७२ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये विश्वामित्रोपाख्यानप्रसंगेन गणपतिपूजाविधिमाहात्म्यवर्णनंनाम चतुर्दशोत्तरद्विशततमोऽध्यायः ॥ २१४ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ सांप्रतं वद नः सूत श्राद्धकल्पस्य यो विधिः ॥ विस्तरेण महाभाग यथा तच्चाक्षयं भवेत् ॥ १ ॥ कस्मिन्काले प्रकर्तव्यं श्राद्धं पितृपरायणैः ॥

१ तथावासंगताय च–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कीदृशैर्ब्राह्मणैस्तच्च तथा द्रव्यैर्महामते ॥ २ ॥ ॥ सूत उवाच ॥ ॥ एतदर्थं पुरा पृष्टो मार्कंडेयो महामुनिः ॥ रोहिताश्वेन विप्रेंद्रा हरिश्चन्द्रसुतेन सः ॥ ३ ॥ हरिश्चन्द्रे गते स्वर्गं रोहिताश्वे नृपे स्थिते ॥ तीर्थयात्राप्रसंगेन मार्कण्डो मुनिसत्तमः ॥ ४ ॥ सरय्वाः संगमे पुण्ये स्नानार्थं समुपस्थितः ॥ तत्र स्नात्वा पितॄन्देवान्संतर्प्य विधिपूर्वकम् ॥ ५ ॥ प्रविष्टस्तां पुरीं रम्यामयोध्यां सत्यनामिकाम् ॥ रोहिताश्वोऽपि तं श्रुत्वा समायांतं मुनीश्वरम् ॥ पदातिः प्रययौ तूर्णं दूरदेशं तु सम्मुखम् ॥ ६ ॥ ततः प्रणम्य तं मूर्ध्ना कृतांजलिपुटः स्थितः ॥ प्रोवाच मधुरं वाक्यं विनयेन समन्वितः ॥ ७ ॥ स्वागतं ते मुनिश्रेष्ठ भूयः सुस्वागतं मुने ॥ धन्योऽहं कृतपुण्योऽहं संप्राप्तः परमां गतिम् ॥ यत्ते पादरजोभिर्मे मूर्द्धजा विमलीकृताः ॥ ॥ ८ ॥ एवमुक्त्वा गृहीत्वा तं स्वहस्तालंबनं तदा ॥ ययौ तत्र सभास्थानं बृहत्सिंहासनाश्रयम् ॥ ९ ॥ सिंहासने निवेश्याथ तं मुनिं पार्थिवोत्तमः ॥ उपविष्टो धरापृष्ठे कृतांजलिपुटः स्थितः ॥ १० ॥ ततः प्रोवाच मधुरं विनयावनतः स्थितः ॥ निःस्पृहस्यापि विप्रेंद्र किं वाऽऽगमनकारणम् ॥ ॥ ११ ॥ तद्ब्रवीहि यथातथ्यं करोमि तव सांप्रतम् ॥ अदेयमपि दास्यामि गृहायातस्य ते विभो ॥ १२ ॥ ॥ मार्कंडेय उवाच ॥ ॥ तीर्थयात्राप्रसंगेन वयमत्र समागताः ॥ सरय्वाः संगमे पुण्ये कल्ये[1] यास्याम्यहे पुनः ॥ १३ ॥ निःस्पृहैरपि द्रष्टव्या धर्मवन्तो द्विजोत्तमाः ॥ ततः प्रोक्तं पुराणज्ञैर्ब्राह्मणैः शास्त्रदृष्टिभिः ॥ १४ ॥ धर्मवन्तं नृपं दृष्ट्वा लिंगं स्वायंभुवं तथा ॥ नदीं सागरगां चैव मुच्येत्पापादिनोद्भवात् ॥ १५ ॥ एवमुक्त्वा ततश्चक्रे पृच्छां स मुनिसत्तमः ॥ तं दृष्ट्वा नृपशार्दूलं पुरःस्थं विनयान्वितम् ॥ १६ ॥ कच्चित्ते सफला वेदाः कच्चित्ते सफलं श्रुतम् ॥ कच्चित्ते सफला दाराः कच्चित्ते सफलं धनम्॥ १७ ॥ ॥ रोहिताश्व उवाच ॥ ॥ कथं स्युः सफला वेदाः कथं स्यात्सफलं श्रुतम् ॥ कथं स्युः सफला दाराः कथं स्यात्सफलं धनम् ॥ १८ ॥ ॥ मार्कंडेय उवाच ॥ ॥ अग्निहोत्रफला वेदाः शीलवृत्तफलं श्रुतम् ॥ रतिपुत्रफला दारा दत्तभुक्तफलं धनम् ॥ १९ ॥ एवं ज्ञात्वा महाराज नान्यथा कर्तुमर्हसि ॥ २० ॥ चत्वार्येतानि कृत्यानि मयोक्तानि च तानि ते ॥ यथा तानि प्रकृत्यानि लोकद्वयमभीप्सता ॥ २१ ॥ एवमुक्त्वा ततश्चक्रे कथाश्चित्राश्च तत्पुरः ॥ राजर्षीणां पुराणानां देवर्षीणां विशेषतः ॥ २२ ॥ ततः कथावसाने च कस्मिंश्चिद्द्विजसत्तमाः ॥ पप्रच्छ तं मुनिश्रेष्ठं रोहिताश्वो महीपतिः ॥ २३ ॥ भगवञ्छ्रोतुमिच्छामि श्राद्धकल्पमहं यतः ॥ दृश्यंते बहवो भेदा द्विजानां श्राद्धकर्मणि ॥ २४ ॥ ॥ ॥ मार्कंडेय उवाच ॥ ॥ सत्यमेतन्महाभाग यत्पृष्टोऽस्मि नृपोत्तम ॥ श्राद्धस्य बहवो भेदाः शाखाभेदैर्व्यवस्थिताः ॥ २५ ॥

१ कल्ये—श्वः प्रभाते—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तस्मात्ते निर्णयं वच्मि भर्तृयज्ञेन यत्पुरा ॥ आनर्ताधिपतेः प्रोक्तं सम्यक्छ्राद्धस्य लक्षणम् ॥ २६ ॥ भर्तृयज्ञं सुखासीनं निजाश्रमपदे नृपः ॥ आनर्ताधिपतिर्गत्वा प्रणिपत्य ततोऽब्रवीत् ॥ २७ ॥ ॥ आनर्त उवाच ॥ ॥ सांप्रतं वद मे ब्रह्मञ्छ्राद्धकल्पं पित्रीप्सितम् ॥ येन मे तुष्टिमायांति पितरः श्राद्धतर्पिताः ॥ २८ ॥ कः कालो विहितः श्राद्धे कानि द्रव्याणि मे वद ॥ श्राद्धार्हाणि तथान्यानि मेध्यानि द्विजसत्तम ॥ यानि योज्यानि वांछद्भिः पितॄणां तृप्तिमुत्तमाम् ॥ २९ ॥ कीदृशा ब्राह्मणा ब्रह्मञ्छ्राद्धार्हाः परिकीर्तिताः ॥ कीदृशा वर्जनीयाश्च सर्वं मे विस्तराद्वद ॥ ३० ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ अहं ते कीर्तयिष्यामि श्राद्धकल्पमनुत्तमम् ॥ यं श्रुत्वाऽपि महाराज लभेच्छ्राद्धफलं नरः ॥ ॥ ३१ ॥ श्राद्धमिंदुक्षयेऽवश्यं सदा कार्यं विपश्चिता ॥ यदि ज्येष्ठतमः सर्गः सन्तानं च तथा नृप ॥ ३२ ॥ शीतार्ता यद्वदिच्छंति वह्निं प्रावरणानि च ॥ पितरस्तद्वदिच्छंति क्षुत्क्षामाश्चन्द्रसंक्षयम् ॥ ३३ ॥ दरिद्रोपहता यद्वद्धनं वांछंति मानवाः ॥ पितरस्तद्वदिच्छंति क्षुत्क्षामाश्चन्द्रसंक्षयम् ॥ ३४ ॥ यथा वृष्टिं प्रवांछन्ति कर्षुकाः सस्यवृद्धये ॥ तथात्मप्रीतये तेऽपि प्रवांछन्तींदुसंक्षयम् ॥ ३५ ॥ यथोषश्चक्रवाक्यश्च वांछन्ति रविदर्शनम् ॥ पितरस्तद्वदिच्छंति श्राद्धं दर्शसमुद्भवम् ॥ ३६ ॥ जलेनापि च यः श्राद्धं शाकेनापि करोति वाः ॥ दर्शस्य पितरस्तृप्तिं यांति पापं प्रणश्यति ॥ ३७ ॥ अमावास्यादिने प्राप्ते गृहद्वारं समाश्रिताः ॥ वायुभूताः प्रवांछन्ति श्राद्धं पितृगणा नृणाम् ॥ यावदस्तमयं भानोः क्षुत्पिपासासमाकुलाः ॥ ३८ ॥ ततश्चास्तं गते भानौ निराशा दुःखसंयुताः ॥ निःश्वस्य सुचिरं यांति गर्हयंति स्ववंशजम् ॥ ३९ ॥ ॥ आनर्त उवाच ॥ ॥ किमर्थं क्रियते श्राद्धममावास्यादिने द्विज ॥ विशेषेण ममाचक्ष्व विस्तरेण यथातथम् ॥ ४० ॥ मृताश्च पुरुषा विप्र स्वकर्मजनितां गतिम् ॥ गच्छन्ति ते कथं तस्य सुतस्याश्रयमाययुः ॥ ४१ ॥ एष नः संशयो विप्र सुमहान्हृदि संस्थितः ॥ ४२ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ सत्यमेतन्महाभाग यत्त्वया व्याहृतं वचः ॥ स्वकर्मार्हां गतिं यांति मृताः सर्वत्र मानवाः ॥ ४३ ॥ परं यथा समायांति वंशजस्याश्रयं प्रति ॥ तथा तेऽहं प्रवक्ष्यामि न तथा संशयो भवेत् ॥ ४४ ॥ मृता यांति तथा राजन्येऽत्र केचिन्महीतले ॥ ते जायंते न मर्त्येऽत्र यावद्वंशस्य संस्थितिः ॥ ४५ ॥ परं शुभात्मका ये च ते तिष्ठंति सुरालये ॥ पापात्मानो नरा ये च वैवस्वतनिवासिनः ॥ ४६ ॥ अन्यदेहं समाश्रित्य भुंजानाः कर्मणः फलम् ॥ शुभं वा यदि वा पापं स्वयं विहितमात्मनः ॥ ४७ ॥ यमलोके स्थितानां हि स्वर्गस्थानामपि क्षुधा ॥ पिपासा च तथा राजंस्तेषां संजायतेऽ



१ अनुदात्तेत्त्वलक्षणस्यात्मनेपदस्यानित्यत्वात्परस्मैपदमपि । २ चन्द्रसंक्षयम्—अमावास्याम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धिका ॥ ४८ ॥ यावन्नरत्रयं राजन्मातृतः पितृतस्तथा ॥ तेषां च परतो ये च ते स्वकर्म शुभाशुभम् ॥ भुंजते क्षुत्पिपासा च न तेषां जायते क्वचित् ॥ ४९ ॥ तत्रापि पतनं तस्मात्स्थानाद्भवति भूमिप ॥ वंशोच्छेदात्पुनः सर्वे निपतंति महीतले ॥ त्रुटद्रज्जुनिबद्धं हि भांडं यद्वन्निराश्रयम् ॥ ॥ ५० ॥ एतस्मात्कारणाद्यत्नः सन्तानाय विचक्षणैः ॥ प्रकर्तव्यो मनुष्येंद्र वंशस्य स्थितये सदा ॥ ५१ ॥ अपि द्वादशधा राजन्नौरसादिसमुद्भवाः ॥ तेषामेकतमोऽप्यत्र न दैवाज्जायते सुतः ॥ ५२ ॥ पितॄणां गुप्तये तेन स्थाप्योऽश्वत्थः समाधिना ॥ पुत्रवत्परिपाल्यश्च निर्विशेषं नराधिप॥ ॥ ५३ ॥ यावत्संधारयेद्भूमिस्तमश्वत्थं नराधिप ॥ कृतोद्वाहं समं शम्या तावद्वंशोऽपि तिष्ठति ॥ ५४ ॥ अश्वत्थजनका मर्त्या निपत्य जगतीतले ॥ पापान्मुक्ताः समायांति योनिं श्रेष्ठां शुभान्विताः ॥ ५५ ॥ एतस्मात्कारणादन्नं नित्यं देयं तथोदकम् ॥ समुद्दिश्य पितॄन्राजन्यतस्ते तन्मयाः स्मृताः ॥ ५६ ॥ अदत्त्वा सलिलं सस्यं पितॄणां यो नराधिप ॥ स्वयमश्नाति वा तोयं पिबेत्स स्यात्पितृद्रुहः ॥ स्वर्गेऽपि च न ते तोयं लभंते नान्नमेव च ॥ ५७ ॥ न दत्तं वंशजैर्मर्त्यैश्चेद्व्यथां यांति दारुणाम् ॥ क्षुत्पिपासासमुद्भूतां तस्मात्संतर्पयेत्पितॄन् ॥ ॥ ५८ ॥ नित्यं शक्त्या नरो राजन्पयोऽन्नैश्च पृथग्विधैः ॥ तथान्यैर्वस्त्रनैवेद्यैः पुष्पगन्धानुलेपनैः ॥ ५९ ॥ पितृमेधादिभिः पुण्यैः श्राद्धैरुच्चावचैरपि ॥ तर्पितास्ते प्रयच्छंति कामानिष्टान्हृदि स्थितान् ॥ त्रिवर्गं च महाराज पितरः श्राद्धतर्पिताः ॥ ॥ ६० ॥ तर्पयंति न ये पापाः स्वपितॄन्नित्यशो नृप ॥ पशवस्ते सदा ज्ञेया द्विपदाः शृंगवर्जिताः ॥ ६१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये श्राद्धकल्पे श्राद्धावश्यकताकारणवर्णनंनाम पञ्चदशोत्तरद्विशततमोऽध्यायः ॥ २१५ ॥ ॥ छ ॥ ॥ आनर्त उवाच ॥ ॥ अन्येऽपि विविधाः कालाः सन्ति पुण्यतमा द्विज ॥ कस्माच्चेंदुक्षये श्राद्धं विशेषात्समुदाहृतम् ॥ १ ॥ एतन्मे सर्वमाचक्ष्व विस्तरेण महामुने ॥ २ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ सत्यमेतन्महाराज श्राद्धार्हाः संति भूरिशः ॥ कालाः पितृगणानां च तृप्तिदास्तुष्टिदाश्च ये ॥ ३ ॥ मन्वाद्या वा युगाद्याश्च तेषां संक्रांतयोऽपराः ॥ व्यतीपातो गजच्छाया ग्रहणं सोमसूर्ययोः ॥ ४ ॥ एतेषु युज्यते श्राद्धं प्रकर्तुं पितृतृप्तये ॥ तथा तीर्थे विशेषेण पुण्य आयतने शुभे ॥ ५ ॥ श्राद्धार्हैर्ब्राह्मणैः प्राप्तैर्द्रव्यैर्वा पितृवल्लभैः ॥ अपर्वण्यपि कर्तव्यं सदा श्राद्धं विचक्षणैः ॥ ६ ॥ सोमक्षये विशेषेण शृणुष्वैकमना नृप ॥ अमानाम रवे रश्मिसह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्त्रप्रमुखः स्थितः ॥ ७ ॥ यस्य स्वतेजसा सूर्यः प्रोक्तस्त्रैलोक्यदीपकः ॥ तस्मिन्वसति येनेन्दुरमावस्या ततः स्मृता ॥ ८ ॥ अक्षया धर्मकृत्ये सा पितृकृत्ये विशेषतः ॥ अग्निष्वात्ता बर्हिषद आज्यपाः सोमपास्तथा ॥ ९ ॥ रश्मिपा उपहूताश्च तथैवायंतुनाः[2] परे ॥ तथा श्राद्धभुजश्चान्ये स्मृता नान्दीमुखा नृप ॥ १० ॥ एते पितृगणाः ख्याता नव देवसमुद्भवाः ॥ आदित्या वसवो रुद्रा नासत्यावश्विनावपि ॥ ११ ॥ सन्तर्पयन्ति ते चैतान्मुक्त्वा नान्दीमुखान्पितॄन् ॥ ब्रह्मणा ते समादिष्टाः पितरो नृपसत्तम ॥ १२ ॥ तान्संतर्प्य ततः सृष्टिं कुरुते पद्मसंभवः ॥ ॥ १३ ॥ पितरो अन्येऽपि मर्त्या निवसन्ति त्रिविष्टपे ॥ द्विविधास्ते प्रदृश्यंते सुखिनोऽसुखिनः परे ॥ १४ ॥ येभ्यः श्राद्धानि यच्छंति मर्त्ये लोके स्ववंशजाः ॥ ते सर्वे तत्र संहृष्टा देववन्मुदिताः स्थिताः ॥ १५ ॥ येषां यच्छन्ति ते नैव किंचित्किञ्चित्स्ववंशजाः ॥ क्षुत्पिपासाकुला स्ते च दृश्यन्ते बहुदुःखिताः ॥ १६ ॥ कस्यचित्त्वथ कालस्य पितरः सुरपूजिताः ॥ अग्निष्वात्तादयः सर्वे त्रिदशेन्द्रमुपस्थिताः ॥ १७ ॥ भक्त्या दृष्टा महाराज सहस्राक्षेण पूजिताः ॥ तथान्यैर्विबुधैः सर्वैः प्रस्थिताः स्वे निकेतने ॥ १८ ॥ पितृलोकं महाराज दुर्लभं त्रिदशैरपि ॥ तान्दृष्ट्वा प्रस्थितान्राजन्पितरो मर्त्यसंभवाः ॥ १९ ॥ क्षुत्पिपासार्दिता ये च त ऊचुर्दैन्यमाश्रिताः ॥ स्तुत्वाऽथ सुस्तवैर्दिव्यैः पितृसूक्तैश्च पार्थिव ॥ ॥ २० ॥ वेदोक्तैरपरैश्चैव पितृतुष्टिकरैः परैः ॥ ततः प्रोचुश्च संहृष्टाः पितरस्तान्सुरोद्भवाः ॥ २१ ॥ प्रसन्नाः स्मो वयं सर्वे युष्माकं शंसितव्रताः ॥ तस्माद्भूत वयं येन यच्छामो वो हृदि स्थितम् ॥ २२ ॥ ॥ पितरं[3] ऊचुः ॥ ॥ वयं हि पितरः ख्याता मनुष्याणामिहागताः ॥ स्वर्गे स्वकर्मणा नित्यं निवसाम सुरैः सह ॥ २३ ॥ विमानेषु विचित्रेषु संस्थिताः सर्वतोदिशम् ॥ वांछितेषु च लोकेषु यामो ध्वजपताकिषु ॥ २४ ॥ हंसबर्हिण जुष्टेषु संसेव्येष्वप्सरोगणैः ॥ गन्धर्वैर्गीयमानाश्च स्तूयमानाश्च गुह्यकैः ॥ २५ ॥ परं सन्तिष्ठमानानामस्माकं त्रिदशैः सह ॥ अत्यर्थं जायते तीव्रा क्षुत्पिपासा सुदारुणा ॥ २६ ॥ यस्या मन्यामहे चित्ते वह्निमध्यगता वयम् ॥ भक्षयामः किमेतान्हि पक्षिणो विविधानपि ॥ हंसादीन्मधुरा लापान्कि वा चाप्सरसां गणान् ॥ २७ ॥ यदि कश्चित्क्षुधाविष्टः कश्चिदादाय पक्षिणम् ॥ गृहीतो गृह्णाति भक्षार्थं हन्तुं शक्तोऽपि सोऽपि न ॥ २८ ॥ अजराश्चामराश्चैव स्वर्गे ये स्वर्गगाः खगाः ॥ तथा मनोरमा वृक्षा नन्दनादि वनेषु च ॥ २९ ॥ फलिता ये प्रदृश्यंते प्राप्यांश्चापि[4] मनो

---

१ अमानाम रवे रश्मिसहस्रप्रमुखः स्थितः—यः रवेः रश्मिसहस्रप्रमुखः—रश्मिसहस्रस्य सम्मुखः समीपभागः स्थितः—सः—अमानाम—इत्यर्थः—यस्य—तस्य—अमानामकस्य रश्मिसहस्रसमीपभागस्य स्वतेजसा रश्मिसहस्रप्रभा मण्डलेन—इत्यर्थः । सूर्यः त्रैलोक्यदीपकः—अस्ति । इति श्लोकयोजना बोद्धव्या । २ आयंतुनस्तथा—इ० पा० । ३ पितरः—मर्त्यसंभवाः पितरः—इत्यर्थः । ४ प्राप्याः—इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

रमाः ॥ तत्फलानि वयं सर्वे गृह्णीमः पितरो यदि ॥ ३० ॥ न त्रुटंत्यपि यत्नेन समाकृष्टानि तान्यपि ॥ एतल्लेखापगातोयं तृषार्त्ता यदि यत्नतः ॥ प्रपिबामो न हस्तेषु तच्च तोयं पुनः स्पृशेत् ॥ ३१ ॥ भुंजानश्च न कोऽप्यत्र दृश्यतेऽत्र पिबन्नपि ॥ तस्मात्त्रिविष्टपावासो ह्यस्माकं घोरदारुणः ॥ ३२ ॥ एते सुरगणाः सर्वे ये चान्ये गुह्यकादयः ॥ दृश्यंतेऽत्र विमानस्थाः सर्वे संहृष्टमानसाः ॥ ३३ ॥ क्षुत्पिपासापरित्यक्ता नानाभोगसमाश्रयाः ॥ कदाचिच्च वयं सर्वे भवामस्तादृशा इव ॥ ३४ ॥ क्षुत्पिपासापरित्यक्ताः संतोषं परमं गताः ॥ तत्किं कारणमेतद्यत्क्षुत्पिपासा प्रजायते ॥ ३५ ॥ आकस्मिकी च बाधा नः कदाचिन्न प्रणश्यति ॥ तथा कुरुत भद्रं वो यथा तुष्टिः प्रजायते ॥ ३६ ॥ शाश्वती नो यथाऽन्येषां देवानां स्वर्गवासिनाम् ॥ यूयं हि पितरो यस्माद्देवानां भावितात्मनाम् ॥ ३७ ॥ वयं चैव मनुष्याणां तेन वः शरणं गताः ॥ ॥ ॥ पितरे ऊचुः ॥ ॥ अस्माकमपि चैवैषा कष्टावस्था प्रजायते ॥ ३८ ॥ शक्राद्या विबुधा व्यग्राः श्राद्धं यच्छंति नो यदा ॥ ततश्चागत्य तान्सर्वे देवान्संप्रार्थयामहे ॥ ३९ ॥ ततस्तृप्तिं प्रगच्छामस्तैर्दैवैस्तर्पिता वयम् ॥ युष्माकं वंशजा ये च प्रयच्छंति समाहिताः ॥ ४० ॥ कथं न तृप्तिमायातास्ते सर्वे तैः प्रतर्पिताः ॥ यत्र प्रमादिभिर्वंश्यैर्न तर्प्यंते कथंचन ॥ ४१ ॥ क्षुत्पिपासाकुलाः सर्वे ते तदा स्युर्न संशयः ॥ किं पुनर्नरकस्था ये धर्मराजनिवेशने ॥ ४२ ॥ एतद्धि कारणं प्रोक्तं युष्माकं च कथंचन ॥ क्षुत्पिपासोद्भवं रौद्रं युष्माभिर्यदुदीरितम् ॥ ४३ ॥ तदस्माकं विभागं चेद्यूयं यच्छत सत्तमाः ॥ सर्वे कव्यस्य दत्तस्य तत्कुर्मो वै हितं शुभम् ॥ ४४ ॥ ब्रह्माणं प्रार्थयित्वा च स्वयं गत्वा तदंतिकम् ॥ बाढमित्येव तैरुक्ते तत आदाय तानपि ॥ ४५ ॥ दिव्याः पितृगणाः प्राप्ता विधेः सदनमुत्तमम् ॥ नांदीमुखान्पुरस्कृत्य पितॄन्यांस्तर्पयेद्विधिः ॥ ४६ ॥ सृष्टिकाले तु संप्राप्ते वृद्धिकामः सुरेश्वरः ॥ अथ तैः सह ते सर्वे स्तुत्वा तं कमलासनम् ॥ प्रणिपत्य स्थिताः सर्वे पितरो विनयान्विताः ॥ ४७ ॥ पितॄंस्तान्विनयोपेतान्प्रणिपातपुरःसरान् ॥ विधिः प्रोवाच राजेंद्र सांत्वयञ्श्लक्ष्णया गिरा ॥ ४८ ॥ ॥ ब्रह्मोवाच ॥ ॥ किमर्थं पितरः सर्वे समायाता ममांतिकम् ॥ देवतानां मया सार्धं संपूज्याः सर्वदा स्थिताः ॥ ४९ ॥ तथान्येऽपि च दृश्यंते युष्माभिः सह संगताः ॥ य एते मानवाकाराः स्वल्पतेजोन्विताः स्थिताः ॥ ५० ॥ ॥ पितर ऊचुः ॥ ॥ पितरो मानवा ह्येते स्वर्गं प्राप्ताः स्वकर्मभिः ॥ देवानां मध्यसंस्थाश्च पीड्यंते क्षुत्पिपासया ॥ ५१ ॥ यदा यच्छंति नो वंश्याः कव्यं चैव प्रमादतः ॥ तदा गच्छंति नो तृप्तिं यान्नैर्यांति यथा सुराः ॥ ५२ ॥ तदैतैः

१ लेखापगातोयम्–स्वर्गङ्गाजलम्–इत्यर्थः । २ पितरः–देवपितरः–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

प्रार्थनाऽस्माकं कृता शाश्वततृप्तये ॥ न च शक्ता वयं दातुं तेन त्वां समुपस्थिताः ॥ ५३ ॥ यथा स्युर्देवता व्यग्रास्तदाऽस्माकमपि प्रभो ॥ कव्यं विना भवेदेषा दशा कष्टा सुरेश्वर ॥ ५४ ॥ तस्मात्कुरु प्रसादं नः सममेतैः सुरेश्वर ॥ यथा स्याच्छाश्वती तृप्तिः स्वस्थानस्थायिनामपि ॥ ॥ ५५ ॥ एतेऽस्माकं प्रदास्यंति कव्यं यन्निजवंशजैः ॥ प्रदत्तं तेन संप्राप्ता वयं देव त्वदन्तिकम् ॥ ५६ ॥ देवानां चैव यत्कव्यं तन्नास्माकं प्रतृप्तये ॥ यतः क्रियाविहीनं तन्न तेषां विद्यते क्रिया ॥ ५७ ॥ पितनुद्दिश्य यत्कव्यं ब्राह्मणेभ्यः प्रदीयते ॥ स्नातैर्धौतांबरैर्मर्त्यैस्तद्भवेत्तृप्तिदं महत् ॥ ॥ ५८ ॥ पितॄणां सर्वदेवेश इत्येषा वैदिकी श्रुतिः ॥ न स्नातस्याधिकारोऽस्ति देवानां च द्विजातिवत् ॥ ५९ ॥ पीयूषमपि तैर्दत्तं तेन नः स्यान्न तृप्तये ॥ ६० ॥ तस्मान्मानुषदत्तैर्नो यथा कव्ये प्रजायते ॥ स्वर्गस्थानां परा तृप्तिः सममेतैस्तथा कुरु ॥ ६१ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ तच्छ्रुत्वा सुचिरं ध्यात्वा ब्रह्मा लोकपितामहः ॥ तानुवाच ततः सर्वान्पितॄन्पार्थिवसत्तम ॥६२॥ ॥ ब्रह्मोवाच ॥ ॥ अस्मिंस्त्रेतायुगे संज्ञा हव्यकव्यसमुद्भवा ॥ संप्रयाता युगे युग्मे कलौ न प्रभविष्यति ॥ ६३ ॥ यथायथा युगानां च ह्रास एष भविष्यति ॥ तथातथा जना दुष्टा भविष्यंत्यन्यभक्तिकाः ॥ ॥ ६४ ॥ न दास्यंति यथोक्तानि ते कव्यानि कथंचन ॥ ततः कष्टतराऽवस्था पितणां संभविष्यति ॥ ६५ ॥ तस्मादहं करिष्यामि सुखोपायं शरीरिणाम् ॥ येन सन्तर्पिता यूयं परां तृप्तिमवाप्स्यथ ॥ ६६ ॥ पितुः पितामहस्यैव तत्पितुश्च ततः परम् ॥ समुद्देशेन दत्तेन ब्राह्मणेभ्यः प्रभक्तितः ॥ ६७ ॥ सर्वेषां स्यात्परा तृप्तिर्यावन्मां[1] पितरोऽधुना ॥ तथा मातामहानां च पक्षे नास्त्यत्र संशयः ॥ ६८ ॥ त्रिभिः सन्तर्पितास्तेऽपि तर्पिताः स्युर्ममावधि[2] ॥ युष्माकं तृप्तये यश्च सुखोपायो भविष्यति ॥ ६९ ॥ तं शृणुध्वं महाभागा गदतो मम सांप्रतम् ॥ पितॄनन्नेन येनैव समुद्दिश्य द्विजोत्तमान् ॥ ७० ॥ तर्पयिष्यंति तेनैव पिण्डान्दास्यंति भक्तितः ॥ तन्नाम्ना तेन वस्तृप्तिः शाश्वती संभविष्यति ॥ ७१ ॥ तस्माद्गच्छत सन्तुष्टाः स्वानि स्थानानि पूर्वजाः ॥ ७२ ॥ ततस्ते सहितास्तैस्तु स्वानि स्थानानि भेजिरे ॥ विमानैः सूर्यसंकाशैर्गत्वा पार्थिवसत्तम ॥ ७३ ॥ अथ संगच्छता राजन्कालेन महता ततः ॥ तच्चापि न ददुः श्राद्धं मर्त्यास्त्रिपुरुषं च यत् ॥ ७४ ॥ नित्यं पितन्समुद्दिश्य बहवोऽत्र नराधिप ॥ कव्यभागान्पुनस्तेषां तथा पूर्वं यथा नृप ॥ ७५ ॥ क्षुत्पिपासोद्भवा पीडा महती समजायत ॥ तेषां च दैविकानां च पितॄणां नृपसत्तम ॥ ७६ ॥ समेत्याथ पुनः सर्वे ब्रह्माणं शरणं गताः ॥ प्रोचुश्च प्रणिपत्योच्चैः सुदीनाः प्रपितामहम् ॥ ७७ ॥ भगवन्न प्रयच्छंति नित्यं नो वंशसंभवाः ॥ श्राद्धानि 

१ यावन्माम्—एतेन—पित्रादिब्रह्मान्तानां तृप्तिरनेन संसूचिता । २ ममावधि—मत्पर्यन्तम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दौःस्थ्यमापन्नास्तेन सीदामहे विभो ॥ ७८ ॥ यथा पूर्वं तथा देव तदुपायं प्रचिन्तय ॥ कंचिद्येन दरिद्रा वै प्रीणयंति च ते पितॄन् ॥७९॥ ॥ भर्तृ
यज्ञ उवाच ॥ ॥ तेषां तद्वचनं श्रुत्वा तानाह प्रपितामहः ॥ कृपाविष्टो महाराज सर्वान्पितृगणांस्तथा ॥ ८० ॥ सत्यमेतन्महाभागा दौःस्थ्यं यांति
दिनेदिने ॥ जना यथायथा याति युगं श्रेष्ठं च पृष्ठतः ॥ ८१ ॥ तथापि च करिष्यामि युष्मदर्थमसंशयम् ॥ उपायं लघु सन्तृप्तिर्येन वोऽत्र भवि
ष्यति ॥ ८२ ॥ अमानाम रवे रश्मिसहस्रप्रमुखः स्थितः ॥ तस्मिन्वसति येनेन्दुरमावास्या ततः स्मृता ॥ ८३ ॥ तस्मिन्नहनि ये श्राद्धं पितॄनुद्दिश्य
चात्मनः ॥ करिष्यंति नरा भक्त्या ते भविष्यंति सुस्थिताः ॥ ८४ ॥ धनधान्यसमोपेताः सर्वशत्रुविवर्जिताः ॥ अपमृत्युपरित्यक्ता मम वाक्याद
संशयम् ॥ ८५ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा बभूवुर्हृष्टमानसाः ॥ पितरः कव्यमासाद्य प्रहृष्टेनांतरात्मना ॥ ८६ ॥ ययुःस्वानि
निकेतानि प्रेषिताः पद्मयोनिना ॥ अमावास्यादिनं प्राप्य श्राद्धं दत्तं स्ववंशजैः ॥ ८७ ॥ संतृप्ता मासमात्रं च तस्थुः संतुष्टमानसाः ॥ गच्छता
त्वथ कालेन दौःस्थ्यं प्राप्य नरा भुवि ॥ दर्शेऽस्मिन्नपि नो श्राद्धं प्रायः कुर्वंति केचन ॥८८॥ ततः पितृगणाः सर्वे ये दिव्या ये च मानुषाः॥ क्षुत्पि
पासाकुला भूयो ब्रह्माणं शरणं गताः ॥८९॥ प्रोचुश्च प्रणिपत्योच्चैस्ते समेताः पितामहम् ॥ परमं दैन्यमास्थाय बाष्पगद्गदया गिरा ॥९०॥ भगवन्निंदुक्षये
श्राद्धं प्रोक्तं मासं त्वया विभो॥अस्माकं प्रीणनार्थाय यत्करिष्यंति मानवाः ॥९१॥ दौःस्थात्तदपि नो कुर्युः प्रायशस्तु पितामह ॥ तेनास्माकं परा पीडा
क्षुत्पिपासासमुद्भवा॥९२॥तस्मात्कुरु प्रसादं नो यथा पूर्वं सुरेश्वर॥ तथापि दुःस्थताभाजस्तर्पयिष्यंति नोऽधुना॥९३॥ ॥भर्तृयज्ञ उवाच॥ ॥ अथ ब्रह्मा
पि संचिन्त्य तानुवाच कृपान्वितः ॥ युष्मदर्थं मयोपायश्चिंतितः पितरो लघुः ॥ ९४ ॥ येन तृप्तिं परां यूयं गमिष्यथ पित्रीश्वराः ॥ अमावास्योद्भवं
श्राद्धमलब्ध्वापि च वत्सरम् ॥ ९५ ॥ यथा मम प्रसादेन तच्छृणुध्वं समाहिताः ॥ आषाढ्याः पंचमे पक्षे कन्यासंस्थे दिवाकरे ॥ ९६ ॥ मृताहनि
पुनर्यो वै श्राद्धं दास्यति मानवः ॥ तस्य संवत्सरंयावत्तृप्ताः स्युः पितरो ध्रुवम् ॥ ९७ ॥ एवं ज्ञात्वा करिष्यंति प्रेतपक्षे नरा भुवि ॥ श्राद्धं यूयं न
संदेहो भविष्यथ सुतर्पिताः ॥ ९८ ॥ यावत्संवत्सरं तेन एकेनापि तु सत्तमाः ॥ तस्मिन्नपि च यः श्राद्धं युष्माकं न प्रदास्यति ॥ ९९ ॥ शाकेना
ऽपि दरिद्रोऽसावंत्यजत्वमुपेष्यति ॥ आसनं शयनं भोज्यं स्पर्शं संभाषणं तथा ॥ १०० ॥ ये करिष्यंति तैः सार्धं तेऽपि पापतमा नराः ॥ न तेषां
संततिर्वृद्धिं संप्रयास्यति कर्हिचित् ॥१०१॥ न सुखं धनधान्यं च तेषां भावि कथंचन ॥ तस्माद्गच्छत चाव्यग्राः स्वस्थानं पितरो द्रुतम् ॥१०२॥
कलिकालेऽपि संप्राप्ते दारुणे निर्धने जने ॥ वर्षांते श्राद्धमेकं हि प्रकरिष्यंति मानवाः ॥१०३॥ येनाखिलं भवेद्वर्षं युष्माकं प्रीतिरुत्तमा ॥१०४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ तच्छ्रुत्वा पितरो हृष्टा जग्मुः स्वंस्वं निकेतनम् ॥ वर्षांतेऽपि समासाद्य श्राद्धं न स्युर्बुभुक्षिताः ॥ १०५ ॥ अथ येऽत्र दुरा त्मानो निःशंकाः कृपणात्मकाः ॥ कलिना मोहिताः श्राद्धं वत्सरांतेऽपि नो ददुः ॥१०६॥ तेषां तु पितरो भूयो दिव्यैः पितृभिरन्विताः ॥ ब्रह्माणं शरणं जग्मुः प्रोचुस्ते दीनमानसाः ॥ १०७ ॥ भगवन्वत्सरांतेऽपि कन्यासंस्थे दिवाकरे ॥ नास्माकं वंशजाः श्राद्धं प्रयच्छंति दुरात्मकाः ॥१०८॥ तेन संपीडिता देव क्षुत्पिपासासमाकुलाः ॥ वयं शरणमापन्नास्तत्प्रतीकारमाचर ॥ १०९ ॥ यथा पूर्वं महाभाग वदोपायं लघूत्तमम् ॥ एकाहिकेन श्राद्धेन येनास्माकं हि शाश्वती ॥ प्रीति[1]: संजायते देव त्वत्प्रसादात्सुरेश्वर ॥ ११० ॥ वंशक्षयेऽपि संजाते ह्यस्माकं पतनं भवेत् ॥ १११ ॥ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ तेषां तद्वचनं श्रुत्वा चिरं ध्यात्वा पितामहः ॥ कृपया परयाविष्टस्ततः प्रोवाच सादरम् ॥ ११२ ॥ ब्रह्मोवाच ॥ अन्यो युष्मत्प्रतुष्ट्यर्थमुपायश्चिंतितो मया ॥ स लघुर्येन वोऽत्यंतं तृप्तिर्भवति शाश्वती ॥११३॥ गयाशिरः समासाद्य श्राद्धं दास्यंति येऽत्र वः ॥ अप्येकं तत्प्रभावेन दिव्यां गतिमवाप्स्यथ ॥ ११४ ॥ अपि पापात्मनः पुंसो ब्रह्मघ्नस्यापि देहिनः ॥ अपि रौरवसंस्थस्य कुम्भीपाकगतस्य च ॥११५॥ प्रेतभावगतस्यापि यस्य श्राद्धं प्रदास्यति ॥ गयाशिरसि वंशस्थस्तस्य मुक्तिर्भविष्यति ॥ ११६ ॥ एतन्मम वचः श्रुत्वा सांप्रतं भुवि मानवाः ॥ निःस्वा अपि करिष्यंति श्राद्धमेकं हि तत्र च ॥ गयाशिरसि सुव्यक्तं युष्माकं मुक्तिदायकम् ॥ ११७ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ तच्छ्रुत्वा पितर स्तस्य वचनं परमेष्ठिनः ॥ अनुज्ञातास्ततस्तेन स्वानि स्थानानि भेजिरे ॥ ११८ ॥ ततःप्रभृति श्राद्धानि प्रवृत्तानि धरातले ॥ पिंडदानसमे तानि यावदापुरुषत्रयम् ॥ ११९ ॥ पूर्वं ब्रह्मादितः कृत्वा ये केचित्पुरुषा गताः ॥ परलोकं समुद्दिश्य तान्नराञ्छक्तितो नृप ॥ १२० ॥ तत्संख्यानां द्विजेंद्राणां दत्तवंतोऽपि वांछितम् ॥ अदैवत्यमिदं श्राद्धं दरिद्राणां सुखावहम् ॥ १२१ ॥ पितॄणां देवतानां च मनुष्याणां सुतृप्ति दम् ॥ तस्माच्छ्राद्धं प्रकर्तव्यं पुरुषेण विजानता ॥ १२२ ॥ पितॄणां वांछता तृप्तिं कालेष्वेतेषु यत्नतः ॥ गयायां च विशेषेण लोकद्वयमभीप्सता ॥ १२३ ॥ न ददाति नरः श्राद्धं पितॄणां चन्द्रसंक्षये ॥ क्षुत्पिपासापरीतांगाः पितरस्तस्य दुःखिताः ॥ ॥ १२४ ॥ प्रेतपक्षं प्रतीक्षंते गुरुवांछासमन्विताः ॥ कर्षुका जलदं यद्वद्दिवानक्तमतंद्रिताः ॥ १२५ ॥ प्रेतपक्षे व्यतिक्रां



१ तृप्तिः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ते यावत्कन्यां गतो रविः ॥ तावच्छ्राद्धं च वांछंति दत्तं स्वैः पितरः सुतैः ॥ १२६ ॥ ततस्तुलागतेऽप्ये[1]के सूर्ये वांछंति पार्थिव ॥ श्राद्धं स्ववंशजैर्दत्तं क्षुत्पिपासासमाकुलाः ॥ १२७ ॥ तस्मिन्नपि व्यतिक्रांते काले चा[2]लिं गते रवौ ॥ निराशाः पितरो दीनास्ततो यांति निजालयम् ॥ १२८ ॥ मासद्वयं प्रतीक्षंते गृहद्वारं समाश्रिताः ॥ वायुभूताः पिपासार्ताः क्षुत्क्षामाः पितरो नृणाम् ॥ १२९ ॥ यावत्कन्यागतः सूर्यस्तुलास्थश्च महीपते॥ तथा दर्शदिने तद्वद्ब्रह्मणो वचनान्नृप ॥ १३० ॥ तस्माच्छ्राद्धं सदा कार्यं पितॄणां तृप्तिमिच्छता ॥ तिलोदकं विशेषेण यथा ब्रह्मवचो नृप ॥१३१॥ वित्ताभावेऽपि दर्शायां श्राद्धं देयं विपश्चिता ॥ तदभावे च कन्यायां संस्थिते दिवसाधिपे ॥ १३२ ॥ तदभावे गयायां च सकृच्छ्राद्धं हि निर्वपेत् ॥ येन नित्यं प्रदत्तस्य श्राद्धस्य फलमश्नुते ॥ १३३ ॥ एतत्ते सर्वमाख्यातं यत्पृष्टोऽस्मि नराधिप ॥ येनैतत्क्रियते श्राद्धं जनैः पितृपरायणैः ॥ १३४ ॥ अमावास्यां विशेषेण प्रेतपक्षे च पार्थिव ॥ १३५ ॥ यश्चैतां शृणुयात्पुण्यां श्राद्धोत्पत्तिं पठेच्च वा ॥ स सर्वदोषनिर्मुक्तः श्राद्धदानफलं लभेत् ॥ १३६ ॥ श्राद्धकाले पठेद्यस्तु श्राद्धोत्पत्तिमिमां नरः ॥ अक्षयं तद्भवेच्छ्राद्धं सर्वच्छिद्रविवर्जितम् ॥ ॥ १३७ ॥ असद्द्रव्येण वा चीर्णमनर्हैर्ब्राह्मणैरपि ॥ अभुक्तं कामहीनं वा मन्त्रहीनमथापि वा ॥ १३८ ॥ सर्वं संपूर्णतां याति कीर्तनात्पार्थिवोत्तम ॥ अस्याः श्राद्धसमुत्पत्तेः कीर्तनाच्छ्रवणादपि ॥ १३९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये श्राद्धकल्पे श्राद्धोत्पत्तिवर्णनंनाम षोडशोत्तरद्विशततमोऽध्यायः ॥ २१६ ॥ ॥ छ ॥ ॥ आनर्त उवाच ॥ ॥ विधिना येन कर्तव्यं श्राद्धं सर्वं मुनीश्वर॥ तमाचक्ष्वाऽद्य कात्स्न्येन श्रद्धा मे महती स्थिता ॥ १ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ शृणु राजन्प्रवक्ष्यामि श्राद्धस्य विधिमुत्तमम् ॥ पितॄणां तुष्टिदं नित्यं सर्वकामप्रदं नृणाम् ॥ २ ॥ स्वकर्मोपार्जितैर्वित्तैः श्राद्धकार्याणि चाहरेत् ॥ मायादिभिर्न चौर्येण न च्छलातैर्न वंचनैः ॥ ३ ॥ स्ववृत्त्योपार्जितैर्वित्तैः श्राद्धद्रव्यं समाहरेत् ॥ सुप्रतिग्रहजैर्द्रव्यैर्ब्राह्मणानां विशिष्यते ॥ ४ ॥ रक्षणात्तैर्नरेन्द्रस्य वैश्यस्य क्षेत्रसंभवैः ॥ शूद्रस्य पण्यलब्धैश्च श्राद्धं कर्तुं प्रयुज्यते ॥ ५ ॥ एवं शुद्धिसमोपेते द्रव्ये प्राप्ते गृहांतिकम् ॥ पूर्वेद्युः सायमासाद्य श्राद्धार्हाणां द्विजन्मनाम् ॥ ६ ॥ गृहं गत्वा शुचिर्भूत्वा कामक्रोधविवर्जितः ॥ आमंत्रयेद्यतीन्पश्चात्स्नातकान्ब्रह्म[3]कर्मिणः ॥ ७ ॥ तदभावे गृहस्थांश्च ब्रह्मज्ञानपरायणान् ॥ अग्निहोत्रपरान्विप्रान्वेदविद्याविचक्षणान् ॥ ८ ॥ श्रोत्रियांश्च तथा वृद्धान्षट्कर्मनिरतान्सदा ॥ बहुभृत्यकुटुम्बांश्च दरिद्रान्संयुतान्गुणैः ॥९॥

१ एके–केचित्–इत्यर्थः । २ अलिम्–वृश्चिकम्–इत्यर्थः । ३ ब्रह्मकर्मिणः–यथाशास्त्र ब्रह्मकर्मानुष्ठानपरान्–इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अभ्यंगात्रोगनिर्मुक्ताञ्जिताहारांस्तथा शुचीन् ॥ एते स्युर्ब्राह्मणा राजञ्छ्राद्धार्हाः परिकीर्तिताः ॥ १० ॥ अनर्हा ये च निर्दिष्टाः शृणु तानपि वच्मि
ते ॥ हीनांगानधिकांगांश्च सर्वभाक्षन्निराकृतीन् ॥ ११ ॥ श्यावदन्तान्वृथादन्तान्वेदविक्रयकारकान् ॥ वेदविप्लवकान्वापि वेदशास्त्रविवर्जितान् ॥
॥ १२ ॥ कुनखान्रोगसंयुक्तान्द्विर्नग्नान्परहिंसकान् ॥ जनापवादसंयुक्तान्नास्तिकान्नृतकानपि ॥ १३ ॥ वार्धुषिकान्विकर्मस्थाञ्छौचाचारविवर्जि
तान् ॥ अतिदीर्घान्कृशान्वापि स्थूलानपि च लोमशान् ॥ १४ ॥ निर्लोमान्वर्जयेच्छ्राद्धे य इच्छेत्पितृगौरवम् ॥ परदाररता ये च तथा यो वृषली
पतिः ॥ १५ ॥ वंध्या वै वृषली प्रोक्ता वृषली च मृतप्रजा ॥ अपरा वृषली प्रोक्ता कुमारी या रजस्वला ॥ १६ ॥ षण्ढो मलिम्लुचो दम्भी राजपै
शुन्यवृत्तयः ॥ सगोत्रायाश्च संभूतस्तथैकप्रवरासुतः ॥ १७ ॥ कनिष्ठः प्राक्कृताधानः कृतोद्वाहश्च प्राकु यः ॥ तथा प्राग्दीक्षितो यश्च स त्याज्यो
गृहसंयुतः ॥ १८ ॥ पितृमातृपरित्यागी तथाच गुरुतल्पगः ॥ निर्दोषां यस्त्यजेत्पत्नीं कृतघ्नो यश्च कर्षुकः ॥ १९ ॥ शिल्पजीवी प्रमादी च पण्य
जीवी कृतायुधः ॥ एतान्विवर्जयेच्छ्राद्धे येषां नो ज्ञायते कुलम् ॥ २० ॥ अत ऊर्ध्वं प्रवक्ष्यामि ये शस्ताः श्राद्धकर्मणि ॥ ये ब्राह्मणाः पुरा ख्याताः
पापानां पंक्तिपावनाः ॥ २१ ॥ त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णः षडंगवित् ॥ यश्च विद्याव्रतस्नातो धर्मद्रोणस्य पाठकः ॥ २२ ॥ पुराणज्ञस्तथा ज्ञानी
विज्ञेयो ज्येष्ठसामवित् ॥ अथर्वशिरसो वेत्ता क्रतुगामी सुकर्मकृत् ॥ २३ ॥ सद्यःप्रक्षालको यश्च शुक्लो दौहित्र एव च ॥ जामाता भागिनेयश्च
परोपकरणे रतः ॥ २४ ॥ मृष्टान्नादो मृष्टवाक्यः सदा जपपरायणः ॥ एते च ब्राह्मणा ज्ञेया निःशेषाः पंक्तिपावनाः ॥ २५ ॥ एतैर्विमिश्रिताः सर्वे
गर्हिता अपि ये द्विजाः ॥ पितॄणां तेऽपि कुर्वंति तृप्तिं भुक्त्वा कुलोद्भवाः ॥ २६ ॥ तस्मात्सर्वप्रयत्नेन कुलं ज्ञेयं द्विजन्मनाम् ॥ शीलं पश्चाद्वयो नाम
कन्यादानं ततः परम् ॥ २७ ॥ श्रुतशीलविहीनाय धर्मज्ञायापि मानवः ॥ श्राद्धं ददाति कन्यां च यस्तेनाग्निं विना हुतम् ॥ २८ ॥ ऊषरे वापि
तं सस्यं तुषाणां कण्डनं कृतम् ॥ कुलाचारसमोपेतांस्तस्माच्छ्राद्धे नियोजयेत् ॥ २९ ॥ ब्राह्मणान्नृपशार्दूल मन्दविद्याधरानपि ॥ एवं विज्ञाय
तान्विप्रान्गृहीत्वा चरणौ ततः ॥ ३० ॥ प्रयत्नेन तु सव्येन पाणिना दक्षिणेन तु ॥ युग्मानथ यथाशक्त्या नमस्कृत्य पुनःपुनः ॥ ३१ ॥ दक्षिणं

१ निराकृतीन्—अपांक्तेयान्—इत्यर्थः । २ नास्तिकान्नृतकानपि—नास्तिकान्—परलोकबुद्धिरहितान्—अनृतकान्—असत्यभाषिणः—इत्यर्थः । ३ प्राक्कृताधानः—ज्येष्ठभ्रातुः पूर्वं कृताग्निहोत्रः—परिवित्तः—इत्यर्थः ।
४ धर्मद्रोणस्य—धर्मशास्त्रस्य—इत्यर्थः । ५ मृष्टान्नादो—मृष्टान्नभक्षणकर्ता—श्राद्धे मृष्टान्नस्य सर्वदैव स्थितत्वात्तद्विषये प्रीतिमत एव ब्राह्मणस्य श्राद्धभोजनार्हता—न तु मृष्टान्नेष्वप्रीतिमतो ब्राह्मणस्य श्राद्धभोजनार्हता ।
श्राद्धप्रकल्पितमृष्टान्नस्य ब्राह्मणेन भक्षणेऽक्रियमाणे पितॄणां मृष्टान्नप्राप्त्यभावाच्छ्राद्धफलवैकल्यापत्ते । मृष्टान्नदो मृष्टवाक्यः—इ० पा० । ६ अग्निं विना हुतम्—भस्मनि हुतम्—इत्यर्थः ।



CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जान्वथालभ्य मन्त्रमेनमुदीरयेत् ॥ आगच्छंतु महाभागा विश्वेदेवा महाबलाः ॥ ३२ ॥ भक्त्याहूता मया चैव त्वं चापि व्रतभाग्भव ॥ एवं युग्मान्समामंत्र्य विश्वेदेवकृते द्विजान् ॥ ३३ ॥ अपसव्यं ततः कृत्वा पित्रर्थं चाभिमंत्रयेत् ॥ ब्राह्मणांस्त्रीन्यथाशक्त्या एकैकस्य पृथक्पृथक् ॥ ३४ ॥ एकैकं वा त्रयाणां वा एकमेवं निमंत्रयेत् ॥ ब्राह्मणान्मातृपक्षे च एष एव विधिः स्मृतः ॥ ३५ ॥ ततः पादौ परिस्पृष्ट्वा द्विजस्येदमुदीरयेत् ॥ श्रद्धापूतेन मनसा पितृभक्तिपरायणः ॥ ३६ ॥ पिता मे तव कार्येऽस्मिंस्तथा चैव पितामहः ॥ स्वपित्रा सहितो ह्येतु त्वं च व्रतपरो भव ॥ ३७ ॥ एवं पितॄन्समाहूय तथा मातामहानथ ॥ संमंत्रिताश्च ते विप्राः संयमात्मान एव ते ॥ ३८ ॥ यजमानः शांतमना ब्रह्मचर्यसमन्वितः ॥ तां रात्रिं समतिक्रम्य प्रातरुत्थाय मानवः ॥ ३९ ॥ तदह्नि वर्जयेत्कोपं स्वाध्यायं कर्म कुत्सितम् ॥ तैलाभ्यंगं श्रमं यानं वाहनं चाथ दूरतः ॥ ४० ॥ ततो मध्यं गते सूर्ये काले कुतपसंज्ञिते ॥ स्नातः शुक्लांबरधरः सन्तर्प्य पितृदेवताः ॥ सन्तुष्टांश्च समाहूतांस्तान्विप्राञ्छ्राद्धमाचरेत् ॥ ४१ ॥ विविक्ते गृहमध्यस्थे मनोज्ञे दक्षिणाप्लवे ॥ न यत्र जायते दृष्टिः पापानां क्रूरकर्मिणाम् ॥ ४२ ॥ यच्छ्राद्धं वीक्षते श्वा वा नारी वाऽथ रजस्वला ॥ पतितो वा वराहो वा तच्छ्राद्धं व्यर्थतां व्रजेत् ॥ ४३ ॥ अन्नं पर्युषितं यच्च तैलाक्तं वा प्रदीयते ॥ सकेशं वा सनिंद्यं च तच्छ्राद्धं व्यर्थतां व्रजेत् ॥ ४४ ॥ विभक्तिरहितं श्राद्धं तथा मौनविवर्जितम् ॥ दक्षिणारहितं यच्च तच्छ्राद्धं व्यर्थतां व्रजेत् ॥ ४५ ॥ घरट्टोलूखलोत्थौ च यत्र शब्दौ व्यवस्थितौ ॥ शूर्पस्य वा विशेषेण तच्छ्राद्धं व्यर्थतां व्रजेत् ॥ ४६ ॥ यत्र संस्क्रियमाणे च कलहः संप्रजायते ॥ पंक्तिभेदो विशेषेण तच्छ्राद्धं व्यर्थतां व्रजेत् ॥४७॥ पूर्वाह्णे क्रियते यच्च रात्रौ वा संध्ययोरपि ॥ पर्याकाशे तथा देशे तच्छ्राद्धं व्यर्थतां व्रजेत् ॥ ४८ ॥ ब्राह्मणो यजमानो वा ब्रह्मचर्यं विना यदि ॥ भुंक्ते दद्याच्च यच्छ्राद्धं तद्राजन्व्यर्थतां व्रजेत् ॥४९॥ तुषधान्यं सनिष्पावं यच्चोच्छिष्टं च दीयते ॥ अर्धभुक्तं घृतं क्षीरं तच्छ्राद्धं व्यर्थतां व्रजेत् ॥५०॥ येषु कालेषु यद्दत्तं श्राद्धमक्षयतां व्रजेत् ॥ तानहं संप्रवक्ष्यामि शृणुष्वैकमना नृप ॥ ५१ ॥ मन्वादीरपि ते वच्मि ताः शृणुष्व नराधिप ॥ पितॄणां वल्लभा नित्यं सर्वपापक्षयावहाः ॥ ५२ ॥ यासु तोयमपि क्ष्मायां प्रदत्तं तिलमिश्रितम् ॥ पितृभ्योऽक्षयतां याति श्रद्धापूतेन चेतसा ॥ ५३ ॥

१ अन्यत्र प्रसिद्धपाठस्तु—"ये अत्र विहिताः श्राद्धे सावधाना भवन्तु ते" इत्यस्ति। २ त्वं चापि व्रतभाक्—विप्र त्वमपि—व्रतभाक्—अक्रोधनत्वशौचपरत्वब्रह्मचारित्वादिव्रतयुक्तः—इत्यर्थः। ३ तैलाक्तम्—तैलम्रक्षितम्—यथा घृतम्रक्षणं पोलिकादौ तथा घृताभावे तैलम्रक्षितं पोलिकादि श्राद्धे निषिद्धम्—इत्यर्थः। एतेन तैलपक्व वटकादिकं न निषिद्धम्—वटकादितैलपक्वं तु श्राद्धे विहितमेव—इति ध्येयम्। ४ पर्याकाशे—अनाच्छादितोर्ध्वदेशे—इत्यर्थः। ५ अर्धभुक्तं घृतं क्षीरम्—एतेन "निःशेषं घृतपायसम्" इति वचनेन च घृतक्षीरयोः पात्रेऽर्धभुक्त्याऽवशेषणं न युक्तम्—इति सूचितम्। ६ मन्वादीः—तिथीः—इति शेषः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



अश्वयुक्छुक्लनवमी द्वादशी कार्तिकस्य च ॥ तृतीयापि च माघस्य तथा भाद्रपदस्य च ॥ ५४ ॥ अमावास्या तपस्यस्य पौषस्यैकादशी तथा ॥ तथाऽऽषाढस्य दशमी माघमासस्य सप्तमी ॥ ५५ ॥ श्रावणस्याष्टमी कृष्णा तथाऽऽषाढी च पूर्णिमा ॥ तथा कार्तिकमासस्य या चान्या फाल्गुनस्य च ॥ ५६ ॥ चैत्रस्य ज्येष्ठमासस्य पंचैताः पूर्णिमा नृप ॥ मन्वादयः प्रोक्तास्तिथयस्ते मया नृप ॥ ५७ ॥ आसु तोयमपि स्नात्वा तिलदर्भविमिश्रितम् ॥ पितॄनुद्दिश्य यो दद्यात्स याति परमां गतिम् ॥ ५८ ॥ इह लोके परे चैव पितॄणां च प्रसादतः ॥ किं पुनर्विविधैरन्नै रसैर्वस्त्रैः सदक्षिणैः ॥ ५९ ॥ अधुना शृणु राजेन्द्र युगाद्याः पितृवल्लभाः ॥ यासां संकीर्तनेनापि क्षीयते पापसंचयः ॥ ६० ॥ नवमी कार्तिके शुक्ला तृतीया माधवे सिता ॥ अमावास्या च तपसो नभस्यस्य त्रयोदशी ॥ ६१ ॥ त्रेताकृतकलीनां तु द्वापरस्यादयः क्रमात् ॥ स्नाने दाने जपे होमे विशेषात्पितृतर्पणे ॥ ६२ ॥ कृतस्याक्षयकारिण्यः सुकृतस्य महाफलाः ॥ यदा स्यान्मेषगो भानुस्तुलां वाथ यदा व्रजेत् ॥ ६३ ॥ तदा स्याद्विषुवाख्यस्तु कालश्चाक्षयकारकः ॥ मकरे कर्कटे चैव यदा भानुर्व्रजेन्नृप ॥ ६४ ॥ तदायनाभिधानस्तु विषुवोऽथ विशिष्यते ॥ रवेः संक्रमणं राशौ संक्रांतिरिति कथ्यते ॥ ६५ ॥ स्नानदानजपश्राद्धहोमादिषु महाफलाः ॥ त्रेताद्याः क्रमशः प्रोक्ताः कालाः संक्रांतिपूर्वकाः ॥ नैतेषु विद्यते विघ्नं दत्तस्याक्षयसंज्ञिताः ॥ ६६ ॥ अश्रद्धयाऽपि यद्दत्तं कुपात्रेभ्योऽपि मानवैः ॥ अकालेऽपि हि तत्सर्वं सद्यो ह्यक्षयतां व्रजेत् ॥ ६७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये श्राद्धकल्पे श्राद्धार्हपदार्थब्राह्मणकालनिर्णयवर्णनंनाम सप्तदशोत्तरद्विशततमोऽध्यायः ॥ २१७ ॥ ॥ छ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ एतत्सामान्यतः प्रोक्तं मया श्राद्धं यथा नरैः ॥ कर्तव्यं विप्रपूर्वैर्यद्वर्णैः पार्थिवसत्तम ॥ १ ॥ अतः परं प्रवक्ष्यामि स्वशाखायाः स्मृतं नृप ॥ स्वदेशवर्णजातीयं यथा स्यादत्र निर्वृतिः ॥ २ ॥ श्राद्धे श्रद्धा यतो मूलं तेन श्राद्धं प्रकीर्तितम् ॥ तत्तस्मिन्क्रियमाणे तु न किंचिद्व्यर्थतां व्रजेत् ॥ ३ ॥ अनिष्टमपि राजेन्द्र तस्माच्छ्राद्धं समाचरेत् ॥ विप्रपादोदकं यत्तु भूमौ पतति पार्थिव ॥ ४ ॥ जाता ये गोत्रजाः केचिदपुत्रा मरणं गताः ॥ ते यांति परमां तृप्तिममृतेन यथा सुराः ॥ ॥ ५ ॥ विप्रपादोदकक्लिन्ना यावत्तिष्ठति मेदिनी ॥ तावत्पुष्करपात्रेषु पिबन्ति पितरो जलम् ॥६॥ श्राद्धेऽथ क्रियमाणे तु यत्किंचित्पततिक्षितौ ॥ पुष्पगन्धोदकं चान्नमपि तोयं नरेश्वर ॥ ७ ॥ तेन तृप्तिं परां यांति ये कृमित्वमुपागताः ॥ कीटत्वं वापि तिर्यक्त्वं व्यालत्वं च नराधिप ॥ ८ ॥



१ याति पापं तदाह्निकम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदुच्छिष्टं क्षितौ याति पात्रप्रक्षालनोद्भवम् ॥ तेन तृप्तिं परां यांति ये प्रेतत्वमुपागताः ॥ ९ ॥ ये चापमृत्युना केचिन्मृत्युं प्राप्ताः स्ववंशजाः ॥ असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम् ॥ १० ॥ उच्छिष्टभागधेयं स्याद्दर्भेषु विकिरश्च यः ॥ विकिरेण प्रदत्तेन ते तृप्तिं यांति चाखिलाः ॥ ॥ ११ ॥ यत्किंचिन्मंत्रहीनं वा कालहीनमथापि वा ॥ विधिहीनं च संपूर्णं दक्षिणायां तु तद्भवेत् ॥ १२ ॥ तस्मान्न दक्षिणाहीनं श्राद्धं कार्यं विपश्चिता ॥ य इच्छेच्छाश्वतीं तृप्तिं पितॄणामात्मनश्च यः ॥ १३ ॥ दक्षिणारहितं श्राद्धं यथैवोषरवर्षितम् ॥ यथा तमसि नृत्यं च गीतं वा बधिरस्य च ॥ १४ ॥ श्राद्धं दत्त्वा च भुक्त्वा च श्राद्धे निष्कामतां व्रजेत् ॥ न स्वाध्यायः प्रकर्तव्यो न ग्रामांतरकं व्रजेत् ॥ १५ ॥ श्राद्धभुग्रमणीतल्पं तदहर्योऽधिगच्छति ॥ तं मासं पितरस्तस्य जायंते वीर्यभोजिनः ॥ १६ ॥ श्राद्धभुक्छ्राद्धदाता च यः सेवयति मैथुनम् ॥ तस्य संवत्सरं यावत्पितरः शुक्रभोजिनः ॥ प्रभवंति न संदेह इत्येषा वैदिकी श्रुतिः ॥ १७ ॥ श्राद्धे भुक्त्वाथ दत्त्वा वा यः श्राद्धं कुरुतेल्पधीः ॥ स्वाध्यायं पितरस्तस्य यावत्संवत्सरं नृप ॥ [1]व्यर्थश्राद्धफलाः संतः पीडयंते क्षुत्पिपासया ॥ १८ ॥ श्राद्धे भुक्त्वाऽथ दत्त्वा वा यः श्राद्धं मानवाधमः ॥ ग्रामांतरं प्रयात्यत्र तच्छ्राद्धं व्यर्थतां व्रजेत् ॥ १९ ॥ ब्राह्मणेन न भोक्तव्यं समायाते निमंत्रणे ॥ अथ भुंक्ते च यो मोहात्स प्रयाति ह्यधोगतिम् ॥ २० ॥ यजमानेन च तथा न कार्यं भोजनं परम् ॥ कुर्वंति ये नराः सर्वे ते यांति नरकं ध्रुवम् ॥ २१ ॥ श्राद्धे भुक्त्वाऽथ दत्त्वा वा श्राद्धं यो युद्धमाचरेत् ॥ असंदिग्धं हि तच्छ्राद्धं स मन्दो व्यर्थतं नयेत् ॥ २२ ॥ तस्मात्सर्वप्रयत्नेन दोषानेतान्परित्यजेत् ॥ श्राद्धभुग्यजमानश्च विशेषेण महीपते ॥ २३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये श्राद्धकल्पे श्राद्धनियमवर्णनंनामाष्टादशोत्तरद्विशततमोऽध्यायः ॥ २१८ ॥ ॥ छ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ काम्यानि तेऽधुना वच्मि श्राद्धानि पृथिवीपते ॥ यैः कृतैः समवाप्नोति मर्त्यो हृदयसंस्थितम् ॥ १ ॥ यो नारीं वांछते क्ष्माप रूपाढ्यां शीलमण्डनाम् ॥ इह लोके परे चैव तस्याहं प्रथमं दिनम् ॥ २ ॥ श्राद्धीयप्रेतपक्षस्य मुख्यभूतं च यन्नृप ॥ य इच्छेत्कन्यकां श्रेष्ठां सुशीलां रूपसंयुताम् ॥ द्वितीयादिवसे तेन श्राद्धं कार्यं महीपते ॥ ३ ॥ यो वांछति नरोऽश्वांश्च वायुवेगसमाञ्जवे ॥ तृतीयादिवसे श्राद्धं तेन कार्यं विपश्चिता ॥ ४ ॥ यो वांछति पशून्मुख्यान्कुप्याकुप्यधनानि च ॥ चतुर्थ्यां तेन कर्तव्यं श्राद्धं पितृप्रतुष्टये ॥ ५ ॥ पुत्रान्वांछति योऽभीष्टान्सुशीलान्वंशमंडनान् ॥

१ यः अल्पधीः श्राद्धे भुक्त्वा स्वाध्यायं कुरुते—अथवा यः अल्पधीः श्राद्धं कृत्वा स्वाध्यायं कुरुते—तस्य पितरः यावत्संवत्सरं व्यर्थश्राद्धफलाः सन्तः क्षुत्पिपासया पीडयन्ते–इति योजना ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पञ्चम्यां तेन कर्तव्यं सदा श्राद्धं नराधिप ॥ ६ ॥ यः श्राद्धं वंशजैर्दत्तं परलोकगतो नृप ॥ वांछते तेन कर्तव्यं षष्ठयां श्राद्धं विपश्चिता ॥ ७ ॥
कृषिसिद्धिं य इच्छेत ग्रैष्मिकीं शारदीमपि ॥ सप्तम्यां युज्यते तस्य श्राद्धं कर्तुं न संशयः ॥ ८ ॥ य इच्छेत्पण्यसंसिद्धिं व्यवहारसमुद्भवाम् ॥
अष्टम्यां युज्यते श्राद्धं तस्य कर्तुं नराधिप ॥ ९ ॥ नवम्यां श्राद्धकृन्नाना चतुष्पदगणाँल्लभेत् ॥ सौभाग्यं रोगनाशं च तथा वल्लभसंगमम् ॥ १० ॥
दशमीदिवसे श्राद्धं यः करोति समाहितः ॥ तस्य स्याद्वांछिता सिद्धिः सर्वकृत्येषु सर्वदा ॥ ११ ॥ एकादश्यां धनं धान्यं श्राद्धकर्ता लभेन्नरः ॥
तथा भूपप्रसादं च यच्चान्यन्मनसि स्थितम् ॥ १२ ॥ यः करोति च द्वादश्यां श्राद्धं श्रद्धासमन्वितः ॥ पुत्रांस्तु प्रवरांश्चैव स पशून्वांछिताँल्लभेत् ॥
॥ १३ ॥ यो वांछति नरो मुक्तिं पितृभिः सह चात्मनः ॥ असंतानश्च यस्तस्य श्राद्धे प्रोक्ता त्रयोदशी ॥ १४ ॥ संतानकामो यः कुर्यात्तस्य
वंशक्षयो भवेत् ॥ न संतानविवृद्धयै च तस्य प्रोक्ता त्रयोदशी ॥ १५ ॥ श्राद्धकर्मणि राजेंद्र श्रुतिरेषा पुरातनी ॥ अपि नः स कुले
भूयाद्यो नो दद्यात्त्रयोदशीम् ॥ १६ ॥ पायसं मधुसर्पिर्भ्यां वर्षासु च मघासु च ॥ मघात्रयोदशीयोगे पायसेन यजेत्पितॄन् ॥ १७ ॥
पितरस्तस्य नेच्छंति तद्वर्षं श्राद्धसत्क्रियाम् ॥ पुण्यातिशयभीतेन पिंडदानं निराकृतम् ॥ १८ ॥ शक्रेण तद्दिने पुत्रमरणं दर्शितं
भयम् ॥ येषां च शस्त्रमृत्युः स्यादपमृत्युरथापि वा ॥ १९ ॥ उपसर्गमृतानां च विषमृत्युमुपेयुषाम् ॥ वह्निना तु प्रदग्धानां जलमृत्यु
मुपेयुषाम् ॥ २० ॥ सर्पव्यालहतानां च शृंगैरुद्बन्धनैरपि ॥ एकोद्दिष्टं प्रकर्तव्यं चतुर्दश्यां नराधिप ॥ २१ ॥ तेषां तस्मिन्कृ
ते तृप्तिस्ततस्तत्पक्षजा भवेत् ॥ २२ ॥ सर्वे कामाः पुरः प्रोक्ता युष्माकं ये मया नृप ॥ अमावास्यादिने श्राद्धात्तानाप्नोति न संश
यः ॥ २३ ॥ एतत्ते सर्वमाख्यातं काम्यश्राद्धफलं नृप ॥ यच्छ्रुत्वा वांछितान्कामान्सर्वानाप्नोति मानवः ॥ २४ ॥ इति श्रीस्कांदे महा
पुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये श्राद्धकल्पे काम्यश्राद्धवर्णनंनामैकोनविंशोत्तरद्विशततमोऽ
ध्यायः ॥ २१९ ॥ ॥ छ ॥ ॥ आनर्त उवाच ॥ ॥ त्रयोदश्यां कृते श्राद्धे कस्माद्वंशक्षयो भवेत् ॥ एतन्मे सर्वमाचक्ष्व विस्तरात्त्वं महा
मुने ॥ १ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ एषा मेध्यतमा राजन्युगादिः कलिसंभवा ॥ स्नाने दाने जपे होमे श्राद्धे ज्ञेया तथाऽक्षया ॥ २ ॥



१ एतेन त्रयोदश्यां केवलमपुत्रेणैव स्वस्य पितॄणां च मुक्त्यर्थं श्राद्धं कर्तव्यम्— न तु जीवत्पुत्रेण त्रयोदश्यां श्राद्धं कर्तव्यं—वंशक्षयभयात्—इति सूचितम्। २ एतेनाप्यपुत्रवतैव मघात्रयोदशीश्राद्धं कर्तव्यम्—न तु पुत्रवता—पुत्रकामेन वा—इति—एतच्चागामिन्यध्याये स्फुटीभविष्यति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्यां चेत्तु गजं[1]च्छाया तिथौ राजन्प्रजायते ॥ तदाऽक्षयं मघायोगे श्राद्धं संजायते ध्रुवम् ॥३॥ यः क्षीरं मधुना युक्तं तस्मिन्नहनि यच्छति ॥ पितॄ
नुद्दिश्य यो मांसं दद्याद्वाध्रीणसं च यः ॥ ४ ॥ वाध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी ॥ त्रिःपिबं त्विन्द्रियक्षीणं श्वेतं वृद्धमजापतिम् ॥ ५ ॥ तं तु
वाध्रीणसं विद्यात्सर्वयूथाधिपं तथा ॥ खड्गमांसं च वा दद्यात्तृप्तिर्द्वादशवार्षिकी ॥ संजायते न संदेहस्तेषां वाक्यं न मे मृषा ॥ ६ ॥ आसीद्रथंतरे
कल्पे पूर्वं पार्थिवसत्तमः॥ सिताश्वोनाम पांचालदेशीयः पितृभक्तिमान् ॥७॥ मधुना कालशाकेन खड्गमांसेन केवलम् ॥ स हि श्राद्धं त्रयोदश्यां कुरु
ते पायसेन च ॥ ८ ॥ सोमवंशं समुद्दिश्य श्राद्धं यच्छति भक्तितः ॥९॥ अथ तैर्ब्राह्मणैः सर्वैः स भूपः कौतुकान्वितैः ॥ कस्यचित्त्वथ कालस्य पृष्टो
भुक्त्वा यथेच्छया ॥ १० ॥ श्राद्धादनंतरं राजन्दृष्ट्वा तं श्रद्धयाऽन्वितम् ॥ पादावमर्दनपरं प्रणिपातपुरः सरम् ॥११॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ कृत्वा
श्राद्धं महाराज प्रदातव्याऽथ दक्षिणा ॥ ब्राह्मणेभ्यस्ततः श्राद्धं पितणां चोपतिष्ठति ॥ १२ ॥ सा त्वया कल्पिताऽस्माकं वितीर्णाद्यापि नो नृप॥
कुप्याकुप्यं परित्यज्य तां देहि नृप मा चिरम् ॥ १३ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ तच्छ्रुत्वा च नृपः प्राह संप्रहृष्टेन चेतसा ॥ धन्योऽस्म्यनुगृही
तोऽस्मि विप्रैरद्य न संशयः ॥ १४ ॥ ये वांछंति ममाभीष्टं श्राद्धे भुक्त्वाऽथ पैतृके ॥ तस्माद्ब्रूत महाभागा युष्मभ्यं किं ददाम्यहम् ॥ १५ ॥ वर
न्नागान्मदोन्मत्तान्भद्रजातिसमुद्भवान् ॥ किं वा सं[2]तिप्रधानांश्च मनोमारुतरंहसः ॥ १६ ॥ किं वा स्थानानि चित्राणि ग्रामाणि नगराणि च ॥
पितॄनुद्दिश्य यत्किंचिन्नादेयं विद्यते यतः ॥ १७ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ नास्माकं वाजिभिः कार्यं न रत्नैर्न च हस्तिभिः ॥ न देशैर्ग्रामसु
ख्यैर्वा नान्येनापि च केनचित् ॥ १८ ॥ यदर्थेन महाराज पृष्टोस्माभिर्यतो भवान् ॥ तस्मान्नो दक्षिणां देहि संदेहघ्नां नृपोत्तम ॥ १९ ॥ यां
पृच्छामो वयं सर्वे कौतूहलसमाहिताः ॥ २० ॥ ॥ राजोवाच ॥ ॥ उपदेशाधिकारोऽस्ति ब्राह्मणानां महात्मनाम् ॥ दातुं नैव ग्रहीतुं च नी
चजात्यस्य वैदिकाः ॥ २१ ॥ सोऽहं राजा न सर्वज्ञो यो यच्छामि द्विजोत्तमाः ॥ उपदेशं हि युष्मभ्यं सर्वज्ञेभ्यो विचक्षणाः ॥ २२ ॥ ॥ ब्राह्मणा
ऊचुः ॥ ॥ गुरुशिष्यसमुत्थोऽयमुपदेशो महीपते ॥ प्रार्थयामो वयं किंचिन्मा भयं त्वं समाविश ॥ २३ ॥ वयं च प्रश्नमेकं हि पृच्छामो यदि
भूपते ॥ ब्रूषे कौतुकयुक्तानां सर्वेषां च द्विजन्मनाम् ॥ २४ ॥ तस्माद्वद महाभाग यदि जानासि तत्त्वतः ॥ न चेद्गुह्यतमं किंचित्पृच्छामस्त्वां कुतू

१ मघानक्षत्रे चान्द्रे चान्द्रस्यैव हस्तनक्षत्रस्यासंभवात्सूर्यनक्षत्रं हस्तसंज्ञकमत्र बोद्धव्यम् । एतेन कन्यासंक्रांतिर्यदि स्यात्तदा मघानक्षत्रयुक्तायां त्रयोदश्यां श्राद्धस्य महाफलत्वमिति ध्येयं सुधीभिः । अत एवोक्तमपरार्के वायवीये—"हंसे हस्तस्थिते या तु मघायुक्ता त्रयोदशी । तिथिर्वैवस्वतीनाम सा च्छाया कुञ्जरस्य तु ॥" इति निर्णयसिन्धौ । २ सप्तिप्रधानान्—अश्वश्रेष्ठान्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



हलात् ॥ २५ ॥ ॥ राजोवाच ॥ ॥ यदि वः संशयो विप्रा युष्मत्प्रश्नमसंशयम् ॥ कथयिष्यामि चेद्गुह्यं तद्वदध्वं गपु
ज्वराः ॥ २६ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ अन्नेषु च विचित्रेषु लेह्येषु विविधेषु च ॥ अमृतेष्वेषु सर्वेषु तथा पेयेषु पार्थिव ॥
॥ २७ ॥ तस्मादद्य दिने ब्रूहि मधु यच्छसि गर्हितम् ॥ वर्तते च यथाऽभक्ष्यं ब्राह्मणानां विशेषतः ॥ २८ ॥ तथा विचित्र
मासेषु संस्थितेषु नराधिप ॥ खड्गमांसं निरास्वादं कस्माद्यच्छसि केवलम् ॥ २९ ॥ संति शाकानि राजेन्द्र पावनीयानि सर्वशः ॥ सुष्ठु स्वादु
कराण्यत्र व्यञ्जनार्थं महीपते ॥ ३० ॥ कालशाकं सकटुकं मुखाऽऽ[1]धिजनकं महत् ॥ कस्माद्यच्छसि चास्माकं भक्त्या परमया युतः ॥ न श्राद्धे
प्रतिषेधश्च प्रकर्तव्यः कथंचन ॥ ३१ ॥ न च त्याज्यं समुच्छिष्टं तेन भुंजामहे ततः ॥ तदत्र कारणेनैव गुरुणा भाव्यमेव हि ॥ येन त्वं यच्छसि
प्राय एतत्सिद्धिर्भवेत्स्थिता ॥ ३२ ॥ तस्मात्कथय नः सर्वं परं कौतूहलं हि नः ॥ निःस्वादितं यथा दद्यादीदृक्छ्राद्धे विगर्हितम् ॥ ३३ ॥ यथा
त्वं नृपशार्दूल श्रद्धया संप्रयच्छसि ॥ ३४ ॥ तच्छ्रुत्वा वचनं तेषां ब्राह्मणानां महात्मनाम् ॥ सवैलक्ष्यस्मितं प्राह सलज्जं पृथिवीपतिः ॥ ३५ ॥
गुह्यमेतन्महाभागा अस्माकं यदि संस्थितम् ॥ अवाच्यमपि वक्ष्यामि शृणुध्वं सुसमाहिताः ॥ ३६ ॥ अहमासं पुरा पापो लुब्धकश्चान्य
जन्मनि ॥ निहंता सर्वजंतूनां तथा भक्षयिता पुनः ॥ ३७ ॥ पर्यटामि तदारण्ये धनुषा मृगयारतः ॥ सिंहो व्याघ्रो गजेन्द्रो वा शरभो वा द्विजो
त्तमाः ॥ ३८ ॥ मद्बाणगोचरं प्राप्तो न जीवत्यपि कर्हिचित् ॥ कस्यचित्त्वथ कालस्य भ्रममाणो महीतले ॥ ३९ ॥ संप्राप्तोऽहं महाभागा अग्नि
वेशस्य सन्मुनेः ॥ आश्रमे समनुप्राप्तो निशीथे क्षुत्पिपासितः ॥ ४० ॥ तावत्तत्र सशिष्याणां श्राद्धकर्मविधिं वदन् ॥ संस्थितो वेष्टितः शिष्यैः
समन्ताद्द्विजसत्तमाः ॥ ४१ ॥ ॥ अग्निवेश उवाच ॥ ॥ ऋक्षे पित्र्ये[2] यदा चन्द्रो हंसश्चापि करे व्रजेत् ॥ त्रयोदशी तु सा च्छाया विज्ञेया
कुञ्जरोद्भवा ॥ ४२ ॥ पित्र्ये यदास्थितश्चेन्दुर्हंसश्चापि करे स्थितः ॥ तिथिर्वैश्रवणी[3] या च सा च्छाया कुञ्जरस्य च ॥ ४३ ॥ सैंहिकेयो यदा
चंद्रं ग्रसते पर्वसंधिषु ॥ हस्तिच्छाया तु सा ज्ञेया तस्यां श्राद्धं समाचरेत् ॥ ४४ ॥ तस्यां यः कुरुते श्राद्धं जलैरपि प्रभक्तितः ॥ यावद्द्वादश
वर्षाणि पितरस्तस्य तर्पिताः ॥ ४५ ॥ वनस्पतिगते[4] सोमे या च्छाया पूर्वतोमुखी ॥ गजच्छाया तु सा ज्ञेया पितॄणां दत्तमक्षयम् ॥ ४६ ॥ सा
भवेच्च न सन्देहः पुण्यदा पैतृकी तिथिः ॥ तस्यां श्राद्धं प्रकर्तव्यं संभाराः संभृताश्च ये ॥ ४७ ॥ प्रभाते तु न सन्देहः पितॄणां परितृप्तये ॥ शाकै



१ आधिशब्दोऽत्र व्याधिपरः—मुखाधिजनकम्—मुखरोगकरम्—इत्यर्थः । २ पित्र्ये—मघायाम्—इत्यर्थः । ३ वैश्रवणी—त्रयोदशी—इत्यर्थः । ४ वनस्पतिगतः सोमो ह्यमावास्यायां भवति इति पूर्वं दर्शश्राद्ध विधावुक्तं स्मर्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तथैगुदैर्बिल्वैर्बदरैश्चिर्भटैरपि ॥ ४८ ॥ यदन्नं पुरुषोऽश्नाति तदन्नास्तस्य देवताः ॥ बाढमित्येव ते प्रोच्य गताः स्वंस्वं निकेतनम् ॥ ४९ ॥ सर्वे शिष्या महाभागा नारायणपुरोगमाः ॥ अग्निवेश्योऽपि सुष्वाप समामन्त्र्य द्विजोत्तमान् ॥ ५० ॥ तेन संकथ्यमानं च रात्रौ तच्च श्रुतं मया ॥ अहं चापि करिष्यामि प्रातः श्राद्धमसंशयम् ॥ ५१ ॥ निहत्य खड्गमादाय तस्य मांसं सुपुष्कलम् ॥ तथा मधु समादाय कालशाकं विशेषतः ॥ ॥ ५२ ॥ स्वजातीयेभ्य आदाय तर्पयिष्यामि तान्पितॄन् ॥ ५३ ॥ एवं निश्चित्य मनसा प्रसुप्तोऽहं द्विजोत्तमाः ॥ ततः प्रभाते विमले प्रोद्गते रविमण्डले ॥५४॥ मधुजालानि भूरीणि गृहीतानि मया ततः ॥ कालशाकं तथा लब्धं स्वेच्छया द्विजसत्तमाः ॥५५॥ ततः सर्वं समादाय श्रपितं तत्क्षणान्मया ॥ स्नात्वा च निजवर्गाणां पितॄनुद्दिश्य चात्मनः ॥ प्रदत्तं लुब्धकानां च भक्तिपूर्वं द्विजोत्तमाः ॥ ५६ ॥ एवं मया पुरा दत्तं पितॄनुद्दिश्य तान्निजान् ॥ नान्यत्किंचिन्मया दत्तं कदाचित्कस्यचिद्द्विजाः ॥ ५७ ॥ ततः कालेन महता मृत्युं प्राप्तोऽस्म्यहं द्विजाः ॥ तद्दानस्य प्रभावेन पार्थिवीं योनिमाश्रितः ॥ ५८ ॥ एवं जातिस्मरत्वं च सञ्जातं मे द्विजोत्तमाः ॥ ते च मे तर्पितास्तेन खड्गमांसेन माक्षिकैः ॥ ५९ ॥ संप्राप्ताः परमां प्रीतिं ततो द्वादशवार्षिकीम्[1] ॥ एतस्मात्कारणाच्छ्राद्धं प्रकरोमि द्विजोत्तमाः ॥ ६० ॥ खड्गमांसेन मधुना कालशाकेन भूरिशः ॥ विधिहीनं द्विजैर्हीनं तिलदर्भैर्विवर्जितम् ॥ ६१ ॥ मया तद्विहितं श्राद्धं तस्यैतत्फलमागतम् ॥ सांप्रतं विधिना सम्यग्ब्राह्मणैर्वेदपारगैः ॥ ६२ ॥ उपविष्टैः करोम्येव यच्छ्राद्धं श्रद्धयान्वितः ॥ दर्भैस्तिलैः समोपेतं मन्त्रवच्च द्विजोत्तमाः ॥ ६३ ॥ नो जानामि फलं किं वा सांप्रतं च भविष्यति ॥ तस्मादेवं परिज्ञाय यूयं चैव द्विजोत्तमाः ॥ ६४ ॥ संतर्पयध्वं च पितॄन्निजान्गजदिने स्थिते ॥ छायायां चैव जातायां कुञ्जरस्य द्विजोत्तमाः ॥६५॥ येन संजायते तृप्तिः पितॄणां द्वादशाब्दिकी ॥ युष्माकं च गतिः श्रेष्ठा यथा जाता ममाधुना ॥ ६६ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा सर्वे ते ब्राह्मणोत्तमाः ॥ संतुष्टाः साधुवादांश्च ददुस्तस्य महीपतेः ॥ ६७ ॥ ततःप्रभृति चक्रुस्ते श्राद्धानि द्विजसत्तमाः ॥ त्रयोदश्यां नभस्यस्य कृष्णायां भक्तितत्पराः ॥ ६८ ॥ मधुना कालशाकेन खड्गमांसेन तर्पिताः ॥ प्राप्नुवंति परां सिद्धिं विमानवरमास्थिताः ॥ ६९ ॥ स्पर्धंते सहिता देवैः पितरश्च विशेषतः ॥ वंशजेन प्रदत्तस्य प्रभावात्सुरसत्तमाः ॥ ७० ॥ श्राद्धार्थं संपरिज्ञाय मन्त्रं चक्रुः परस्परम् ॥ आदित्या वसवो रुद्रा नासत्यावपि पार्थिव ॥ ७१ ॥ यथा न भवति श्राद्धं तस्मिन्नहनि भूतले ॥ यत्प्रभावाद्वयं सर्वे मानुषैः श्राद्धमाश्रितैः ॥ न यामोऽभि भवस्थानं तस्माच्छप्स्यामहे च तान् ॥ ७२ ॥ अद्यप्रभृति यः श्राद्धं त्रयोदश्यां करिष्यति ॥ कन्यासंस्थे सहस्रांशौ तस्य स्याद्वंशसंक्षयः ॥७३॥

---

१ ततः परम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





इति शापेन देवानां निर्दग्धेयं महातिथिः ॥ ७४ ॥ ततःप्रभृति नैतस्यां क्रियते श्राद्धमुत्तमम् ॥ यः प्रमादेन कुरुते तस्य स्याद्वंश संक्षयः ॥ ७५ ॥ येन भीता न कुर्वंति च्छायायां कुञ्जरस्य च ॥ विशेषेण गजच्छाये तत्र पिण्डोऽयमाहृतः ॥ ७६ ॥ इति श्रीस्कान्दे महा पुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये श्राद्धकल्पे गजच्छायामाहात्म्यवर्णनंनाम विंशत्युत्तरद्विशत तमोऽध्यायः ॥ २२० ॥ ॥ छ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ एतस्मात्कारणात्कश्चित्तस्मिन्नहनि पार्थिव ॥ ददाति नैव च श्राद्धं पितृनु दिश्य कर्हिचित् ॥ वंशच्छेदभयाद्राजन्सत्यमेतन्मयोदितम् ॥ १ ॥ श्राद्धं विनापि दातव्यं तद्दिने मधुना सह ॥ पायसं ब्राह्मणाग्र्येभ्यः सघृतं तृप्तिकारणात् ॥ २ ॥ खड्गमांसं कालशाकं मांसं वाध्रीणसोद्भवम् ॥ प्रदेयं ब्राह्मणेभ्यश्च तत्समंतादुदाहृतम् ॥ ३ ॥ त्रिःपिबश्चेंद्रियक्षीणः

१ खड्गमांसम्—इत्यनेनायं श्राद्धे मांसप्रचारः कदाचिद्युगान्तरविषयत्वेन प्रशस्तः स्यात्—कलियुगे तु—"देवरेण सुतोत्पत्तिर्मधुपर्के पशोर्वधः। मांसदानं तथा श्राद्धे वानप्रस्थाश्रमस्तथा ॥ इमान्धर्मान्कलियुगे वर्ज्यानाहुर्मनीषिणः ॥" इति बृहत्पाराशरस्मृतिपञ्चमाध्यायवचनेन निषिद्ध एव। तथा च तत्रैव द्वादशाध्याये—"यस्तु प्राणिवधं कृत्वा मांसेन तर्पयेत्पितॄन्। सोऽविद्वांश्चन्दनं दग्ध्वा कुर्यादंगारविक्रयम् ॥ क्षिप्त्वा कूपे यथा किंचिद्बाल आदातुमिच्छति। पतत्यज्ञानतः सोऽपि मांसेन श्राद्धकृत्तथा ॥" इति वचनाच्च मांसेन श्राद्धकरणस्य निषेधात्, "अग्निहोत्रं गवालम्भं संन्यासं पलपैतृकम् ॥ देवराच्च सुतोत्पत्तिं कलौ पञ्च विवर्जयेत् ॥" इति वचनेनापि निषेधवचनस्य—"हरिर्वसति मेदिन्यां यावद्वेदः प्रवर्तते। संन्यासं चाग्निहोत्रं च तावत्कुर्यात्कलौ युगे ॥" इति प्रतिप्रसववाक्ये पलपैतृकगवालम्भदेवरद्वारकसुतोत्पादनानामनुक्तेश्च, "तस्मादेषां न भक्षितव्यम्" इत्यैतरेयक ब्राह्मणद्वितीयपञ्चिकायां मांसभक्षणस्य प्रत्यक्षं निषेधनाच्च श्राद्धादिषु मांसप्रचारः सर्वथैव न प्रशस्ततरः। एवमेवाग्रेऽपि प्रोक्तामजशिशुमारखराहारण्यमहिषरुर्वादीनां मांसप्रशस्तिं युगांतरविषयामेव जानंतु सन्तः। मांसस्थाने माषान्नं शिष्टा उपयुञ्जन्ति—तत्तु युक्तमित्यवधेयं सुधीभिः। अपरं च प्रसंगतोऽत्रेदमप्यवधेयं सज्जनैः—हिंसायज्ञस्याप्यधर्मजनकत्वमेव—अत्रार्थे मात्स्ये ११९ तमेऽध्याये प्रोक्ताऽऽख्यायिका प्रमाणार्थत्वेनोच्यते हि—"तथा विश्वभुगिंद्रस्तु यज्ञं प्रावर्तयत्प्रभुः। दैवतैः सह संभृत्य सर्वसाधनसंभृतम् ॥ तस्याश्वमेधे वितते समाजग्मुर्महर्षयः। महर्षयश्च तान्दृष्ट्वा दीनान्पशुगणांस्तदा ॥ विश्वभुजं ते त्वापृच्छन्कोऽयं यज्ञविधिस्तव। अधर्मो बलवानेष हिंसाधर्मेप्सया तव ॥ न नः पशुवधस्त्विष्टस्तव यज्ञेत्र्वरोत्तम। अधर्मो धर्मघाताय प्रारब्धः पशुभिस्त्वया ॥ नायं धर्मो ह्यधर्मोऽयं न हिंसा धर्म उच्यते। आगमेन भवान्धर्मं प्रकरोतु यदीच्छति ॥ विधिदृष्टेन यज्ञेन धर्म्येणा व्यसेतुना ॥ एवं विश्वभुगिंद्रस्तु ऋषिभिस्तत्त्वदर्शिभिः। उक्तो न प्रतिजग्राह मानमोहसमन्वितः ॥ तेषां विवादः सुमहाञ्जज्ञ इन्द्रमहर्षिणाम् ॥ जङ्गमैः स्थावरैः केन यष्टव्यमिति चोच्यते ॥ ते तु खिन्ना विवादेन तथ्यमुक्त्वा महर्षयः ॥ संध्याय वाक्यमिन्द्रेण पप्रच्छुः खचरं वसुम् ॥ ॥ ऋषय ऊचुः ॥ ॥ महाप्राज्ञ कथं दृष्टस्तव यज्ञविधिर्नृप। औत्तानपादे प्रब्रूहि संशयं नो नुद प्रभो ॥ ॥ सूत उवाच ॥ ॥ श्रुत्वा वाक्यं वसुस्तेषा मविचार्य बलाबलम्। वेदशास्त्रमनुस्मृत्य यज्ञतत्त्वमुवाच ह ॥ ॥ वसुरुवाच ॥ ॥ यष्टव्यं पशुभिर्मेध्यैरथ मूलफलैरपि। हिंसा स्वभावो यज्ञस्य इति मे दर्शनागमः ॥ एवं कृतोत्तरास्ते तु युक्त्वाऽऽत्मानं ततो धिया। अवश्यंभाविनं दृष्ट्वा तमधो ह्यशपंस्तदा ॥ इत्युक्तमात्रो नृपतिः प्रविवेश रसातलम्। धर्माणां संशयच्छेत्ता राजा वसुरधो गतः ॥ तस्मान्न वाच्यो ह्येकेन बहुज्ञेनापि संशयः। तस्मान्न हिंसा यज्ञस्य यदुक्तमृषिभिः पुरा ॥" इत्यनयाऽऽख्यायिकया हि हिंसायज्ञोऽधर्मजनक एवेति। ऐतरेयब्राह्मणादिवचनेन—व्रीह्यादीनामेव मेध्यपशुत्वस्योक्तेस्तैरेव यज्ञविध्यनुष्ठानस्य प्रशस्ततरत्वमभ्युपगम्यतां, किं हिंसारूपधर्मप्रचारेण। ब्राह्मणादीनां स्वधर्मयज्ञास्तु यथा मात्स्ये ११८ तमेऽध्याये—"आरंभयज्ञाः क्षत्राः स्युर्हविर्यज्ञा विशः स्मृताः। परिचारयज्ञाः शूद्रास्तु जपयज्ञास्तु ब्राह्मणाः ॥" इत्यनेनोक्ताः। आरंभो बहुतरदानधर्मादिः। एवमनेकेषां मन्वादिस्मृतिकारमहर्षीणां हिंसायाः सर्वथा निर्दयराक्षसधर्मत्वेन वर्जनीयतायामेव तात्पर्यं तावद्गम्यते। अतो हिंसाधर्मतो निवृत्य शुद्धस्वधर्माचरणमेव वरमिति शम्।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वयूथानुगस्तथा ॥ एष वाध्रीणसः प्रोक्तः पितॄणां तृप्तिदः सदा ॥ ४ ॥ तस्याभावेऽपि दातव्यं क्षीरौदनमनुत्तमम् ॥ तस्मिन्नहनि विप्रेभ्यः पितॄणां तुष्टये नृप ॥ ५ ॥ तस्याभावेऽपि दातव्यं जलं तिलविमिश्रितम् ॥ सदर्भं सहिरण्यं च हिरण्यशकलान्वितम् ॥ ६ ॥ यच्छ्रेयो जायते पुंसः पक्षश्राद्धेन पार्थिव ॥ कृतेन तत्फलं कृत्स्नं तस्मिन्नहनि पार्थिव ॥ ७ ॥ पितॄनुद्दिश्य चाऽऽज्येन मधुना पायसेन च ॥ कालशाकेन मधुना खड्गमांसेन वा नृप ॥ ८ ॥ श्राद्धं विनापि दत्तेन श्रुतिरेषा पुरातनी ॥ तस्मात्सर्वप्रयत्नेन पित्र्यक्षे समुपस्थिते ॥ त्रयोदश्यां नभस्यस्य हस्तगे दिननायके ॥ ९ ॥ दरिद्रेणापि दातव्यं हिरण्यशकलान्वितम्॥ तोयं तिलैर्युतं राजन्पितॄणां तुष्टिमिच्छता ॥ १० ॥ ॥ ॥ आनर्त उवाच ॥ ॥ मांसं विगर्हितं विप्र यतः शास्त्रे निगद्यते ॥ तस्मात्तत्क्रियते केन श्राद्धं कीर्तय मेऽखिलम् ॥ ११ ॥ स्वमांसं परमांसेन यो वर्धयति निर्दयः॥ स नूनं नरकं याति प्रोक्तमेतन्महर्षिभिः ॥ १२ ॥ त्वं च तस्य प्रभावं मे प्रजल्पसि द्विजोत्तम ॥ विशेषाच्छ्राद्धकृत्ये च तदेवं मम संशयः ॥ १३ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ सत्यमेतन्महाभाग मांसं सद्भिर्विगर्हितम् ॥ श्राद्धे प्रयुज्यते यस्मात्तत्तेऽहं वच्मि कारणम् ॥ १४ ॥ यदा चारंभिता सृष्टिर्ब्रह्मणा लोककारिणा ॥ संपूज्य च पितॄन्देवान्नांदीमुखपुरःसरान् ॥ तदा खड्गः समुत्पन्नः पूर्वं वाध्रीणसश्च यः ॥ १५ ॥ ततो ये पितरो दिव्या ये च मानुषसम्भवाः ॥ जगृहुस्ते ततः सर्वे बलिभूतमिवात्मनः ॥ १६ ॥ तानुवाच ततो ब्रह्मा एतौ तु पितरो मया ॥ युष्मभ्यं कल्पितौ सम्यग्बलिभूतौ प्रगृह्यताम् ॥ १७ ॥ एताभ्यां परमा प्रीतिर्युष्मभ्यं संभविष्यति ॥ मम वाक्यादसंदिग्धं परमेतौ नरो भुवि ॥ १८ ॥ नैव संप्राप्स्यते पापं युष्मदर्थं हनन्नपि ॥ तस्मात्सर्वप्रयत्नेन दातव्यं भूतिमिच्छता ॥ १९ ॥ खड्गवाध्रीणसोद्भूतं मांसं श्राद्धे सुतृप्तिदम् ॥ तौ चापि परमौ दिव्यौ स्वर्गं लोकं गमिष्यतः ॥ २० ॥ श्राद्धदस्य परं श्रेयो भविष्यति सुदुर्लभम् ॥ पितॄणां चाक्षया तृप्तिर्भवेद्द्वादशवार्षिकी ॥ २१ ॥ एतस्मात्कारणाच्छस्तं मांसमाभ्यां नराधिप ॥ तस्मिन्नहनि नान्यत्र विनियोगोऽस्य कीर्तितः ॥ २२ ॥ ॥ रोहिताश्व उवाच ॥ ॥ अप्राप्तखड्गमांसस्य तथा वाध्रीणसस्य च ॥ कथं श्राद्धं भवेद्विप्र पितॄणां तृप्तिकारकम् ॥ २३ ॥ ॥ मार्कण्डेय उवाच ॥ ॥ मधुना सह दातव्यं पायसं पितृतुष्टये ॥ तेन वै वार्षिकी तृप्तिः पितॄणां चोपजायते ॥ २४ ॥ आजं च पिशितं राजञ्छिशुमारसमुद्भवम् ॥ मांसं प्रतुष्टये प्रोक्तं वत्सरं मासवर्जितम् ॥ २५ ॥ तदभावे वराहस्य दशमासप्रतुष्टिदम् ॥ मांसं

१ हिरण्यकलशान्वितम्—इ० पा० । २ आभ्याम्—अनयोः—खड्गवाध्रीणसयोः—इत्यर्थः । ३ वत्सरं मासवर्जितम्—एकमासोनवत्सरं यावत्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





प्रोक्तं महाराज पितॄणां नात्र संशयः ॥ २६ ॥ आरण्यमहिषोत्थेन तृप्तिः स्यान्नवमासिकी ॥ रुरोश्चैवाष्टमासोत्था एणस्य सप्तमासिका ॥ २७ ॥ शम्बरोर्मांसषट्कं च शशकस्य तु पञ्चकम् ॥ चत्वारः शल्लकस्योक्तास्त्रयो वा तैत्तिरस्य च ॥ २८ ॥ मासद्वयं च मत्स्यस्य मासमेकं कपिञ्जले ॥ नान्येषां योजयेन्मांसं पितृकार्ये कथंचन ॥ २९ ॥ एतेषामेव मांसानि पावनानि नृपोत्तम ॥ ३० ॥ ॥ आनर्त उवाच ॥ ॥ कस्मादेते पवित्राः स्युर्येषां मांसं प्रचोदितम् ॥ श्राद्धे च तन्ममाचक्ष्व यथावद्द्विजसत्तम ॥ ३१ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ सृष्टिं प्रकुर्वता तेन पशवो लोककारिणा ॥ खड्गवाध्रीणसादीनां पश्चात्सृष्टाः स्वयंभुवा ॥ ३२ ॥ एकादशप्रमाणेन ततश्चान्ये नृपोत्तम ॥ अजश्च प्रथमं सृष्टः स तथा मेध्यतां गतः ॥ ३३ ॥ तथैते प्रथमं सृष्टाः पशवोऽत्र नराधिप ॥ सस्यानि सृजता तेन तिलाः पूर्वं च निर्मिताः ॥ ३४ ॥ श्राद्धार्थे व्रीहयः सृष्टा वन्येषु च प्रियंगवः ॥ गोधूमाश्च यवाश्चैव माषा मुद्गाश्च वै नृप ॥ ३५ ॥ नीवाराश्चापि श्यामाकाः प्रवक्ष्यामि यथाक्रमम् ॥ तृप्तिं मांसेन वाञ्छंति मांसं मांसेन वर्जितम्[3] ॥ ३६ ॥ पुष्पजात्यो यदा सृष्टास्तदा प्राक्छतपत्रिका ॥ सृष्टा तेन च मुख्या सा श्राद्धकर्मणि सर्वदा ॥ ३७ ॥ धातूनि सृजता तेन रूप्यं सृष्टं स्वयंभुवा ॥ तेन तद्विहितं श्राद्धे दक्षिणायां प्रतृप्तये ॥ ३८ ॥ राजतेषु च पात्रेषु यद्द्विजेभ्यः प्रदीयते ॥ पितृभ्यस्तस्य नैवाऽन्तो युगान्तेऽपि प्रजायते ॥ ३९ ॥ अभावे रूप्यपात्राणां नामापि परिकीर्तयेत् ॥ तुष्यंति पितरो राजन्कीर्तनादपि वै यतः ॥ ४० ॥ रसांश्च सृजता तेन मधु सृष्टं स्वयंभुवा ॥ तेन तच्छस्यते श्राद्धे पितॄणां तुष्टिदायकम् ॥ ४१ ॥ यच्छ्राद्धं मधुना हीनं तद्रसैः सकलैरपि ॥ मिष्टान्नैरपि संयुक्तं तत्पितॄणां न तृप्तये ॥ ४२ ॥ अणुमात्रमपि श्राद्धे यदि न स्याद्धि माक्षिकम् ॥ नामापि कीर्तयेत्तस्य पितॄणां तुष्टये यतः ॥ ४३ ॥ शाकानि सृजता तेन ब्रह्मणा परमेष्ठिना ॥ कालशाकं पुरः सृष्टं तेन तत्तृप्तिदायकम् ॥ ४४ ॥ कालं हि सृजता तेन कुतपः प्राग्विनिर्मितः ॥ तस्मात्कुतपकाले च श्राद्धं कार्यं विजानता ॥ य इच्छेच्छाश्वतीं तृप्तिं पितॄणामात्मनः सुखम् ॥ ४५ ॥ वीरुधः सृजता तेन विधिना नृपसत्तम ॥ दर्भास्तु प्रथमं सृष्टाः श्राद्धार्हास्तेन ते स्मृताः ॥ ४६ ॥ श्राद्धार्हान्ब्राह्मणांस्तेन सृजता पद्मयोनिना ॥ दौहित्राः प्रथमं सृष्टाः श्राद्धार्हास्तेन ते स्मृताः ॥ ४७ ॥ अपि शौचपरित्यक्तं हीनांगाधिकमेव वा ॥ दौहित्रं योजयेच्छ्राद्धे पितॄणां परितुष्टये ॥ ४८ ॥ पशून्विसृजता तेन पूर्वं गावो विनिर्मिताः ॥ तेन तासां पयः शस्तं श्राद्धे सर्पिर्विशेषतः ॥ ४९ ॥ तस्माच्छ्राद्धे घृतं शस्तं प्रदत्तं पितृतुष्टये ॥ ५० ॥ प्रजाश्च सृजता तेन पूर्वं सृष्टा

१ पञ्चकम्—मासपञ्चकम्—इत्यर्थः । २ कपिंजले—कपिंजलोद्भवमांसे—इत्यर्थः । ३ मांसं मांसेन वर्जितम्—एतेन मांसभक्षकानां व्याघ्रादीनां हिंस्राणां मांसममेध्यं सूचितम् ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विजोत्तमाः ॥ तस्मात्प्रशस्तास्ते श्राद्धे पितृतृप्तिकराः सदा ॥ ५१ ॥ देवांश्च सृजता तेन विश्वेदेवाः कृताः पुरः ॥ तेन ते प्रथमं पूज्याः प्रवृत्ते श्राद्धकर्मणि ॥ ५२ ॥ ते रक्षंति ततः श्राद्धं यथावत्परितर्पिताः ॥ छिद्राणि नाशयंति स्म श्राद्धे पूर्वं प्रपूजिताः ॥ ५३ ॥ एतैर्मुख्यतमैः सृष्टैः पुरा श्राद्धं विनिर्मितम् ॥ स्वयं पितामहेनैव ततो देवा विनिर्मिताः ॥ ५४ ॥ तेन ते सर्वलोकेषु गताः ख्यातिं पुरा नृप ॥ ५५ ॥ एतच्छ्राद्धस्य सर्वस्वं मया ते परिकीर्तितम् ॥ पितॄणां परमं गुह्यं दत्तस्याक्षयकारकम् ॥ ५६ ॥ यश्चैतत्कीर्तयेच्छ्राद्धे क्रियमाणे नृपोत्तम ॥ विप्राणां भोक्तुकामानां तच्छ्राद्धं त्वक्षयं भवेत् ॥५७॥ यश्चैतच्छृणुयाद्राजन्सम्यक्छ्रद्धासमन्वितः ॥ विहितस्य भवेत्पुण्यं यच्छ्राद्धस्य तदाप्नुयात् ॥५८॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये श्राद्धकल्पे सृष्ट्युत्पत्तिकालिकब्रह्मोत्सृष्टश्राद्धार्हवस्तुपरिगनणवर्णनं नामैकविंशत्युत्तरद्विशततमोऽध्यायः ॥ २२१ ॥ ॥ छ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ येषां च शस्त्रमृत्युः स्यादपमृत्युरथापि वा ॥ उपसर्गान्मृतानां च विषमृत्युमुपेयुषाम् ॥ १ ॥ वह्निना च प्रदग्धानां जलमृत्युमुपेयुषाम् ॥ सर्पव्याघ्रहतानां च शृंगैरुद्बन्धनैरपि ॥ २ ॥ श्राद्धं तेषां प्रकर्तव्यं चतुर्दश्यां नराधिप ॥ तेषां तस्मिन्कृते तृप्तिस्ततस्तत्पक्षजा भवेत् ॥ ३ ॥ ॥ आनर्त उवाच ॥ ॥ कस्माच्छस्त्रहतानां च प्रोक्ता श्राद्धे चतुर्दशी ॥ नान्येषां दिवसे तत्र संशयोऽयं वदस्व मे ॥ ४ ॥ एकोद्दिष्टं न शंसंति सपिण्डीकरणं परम् ॥ कस्मात्तत्र प्रकर्तव्यं वदैतन्मम विस्तरात् ॥ ५ ॥ कस्मान्न पार्वणं तत्र क्रि यते दिवसे स्थिते ॥ प्रेतपक्षे विशेषेण कृते श्राद्धेऽखिलेऽपि च ॥ ६ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ बृहत्कल्पे पुरा राजन्हिरण्याक्षो महासुरः ॥ बभूव बलवाञ्छूरः सर्वदेवभयंकरः ॥ ७ ॥ ब्रह्मा प्रतोषितस्तेन विधाय विविधं तपः ॥ कृष्णपक्षे विशेषेण नभस्ये मासि संस्थिते ॥ ८ ॥ ॥ ब्रह्मोवाच ॥ ॥ परितुष्टोस्मि ते वत्स प्रार्थयस्व यथेप्सितम् ॥ अदेयमपि दास्यामि तस्मात्प्रार्थय मा चिरम् ॥ ॥ ९ ॥ ॥ हिरण्याक्ष उवाच ॥ ॥ भूताः प्रेताः पिशाचाश्च राक्षसा दैत्यदानवाः ॥ बुभुक्षिताः प्रयाचंते मां नित्यं पद्मसंभव ॥ १० ॥ प्रेतपक्षे कृते श्राद्धे कन्यासंस्थे दिवाकरे ॥ एकस्मिन्नहनि प्रायस्तृप्तिः स्याद्वर्षसंभवा ॥ ११ ॥ तत्त्वमद्य दिनं देहि तेभ्यः कमलसम्भव ॥ तेन तृप्तिं गताः सर्वे स्थास्यंत्यब्दं पितामह ॥ १२ ॥ ॥ श्रीब्रह्मोवाच ॥ ॥ यः कश्चिन्मानवः श्राद्धं स्वपितृभ्यः प्रदास्यति ॥ प्रेतपक्षे चतुर्दश्यां नभस्ये मासि संस्थिते ॥ १३ ॥ प्रेतानां राक्षसानां च भूतादीनां भविष्यति ॥ मम वाक्यादसंदिग्धं ये चान्ये कीर्तितास्त्वया ॥ १४ ॥ दुर्मृत्युना मृता ये च

१ प्रयावन्ति–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





संग्रामेषु हताश्च ये ॥ एकोदिष्टे सुतैर्दत्ते तेषां तृप्तिर्भविष्यति ॥ १९ ॥ एवमुक्त्वा ततो ब्रह्मा ततश्चादर्शनं गतः ॥ हिरण्याक्षोऽपि संहृष्टः स्वमेव भवनं ययौ ॥ १६ ॥ यच्च शस्त्रहतानां च तस्मिन्नहनि दीयते ॥ एकोद्दिष्टं नरैः श्राद्धं तत्ते वक्ष्यामि कारणम् ॥ १७ ॥ संख्ये शस्त्रहता ये च निर्विकल्पेन चेतसा ॥ युध्यमाना न ते मर्त्ये जायंते मनुजाः पुनः ॥ १८ ॥ पराङ्मुखाश्च हन्यंते पलायनपरायणाः ॥ ते भवंति नराः प्रेता एतदाह पितामहः ॥१९॥सम्मुखा अपि ये दैन्यं हन्यमाना वदंति च ॥ पश्चात्तापं च वा कुर्युः प्रहारैर्जर्जरीकृताः॥२०॥ तेऽपि प्रेता भवन्तीह मनुः स्वायंभुवोऽब्रवीत्॥ कदाचिच्चित्तचलनं शूराणामपि जायते ॥ २१ ॥ तेषां भ्रांत्या दिने तत्र श्राद्धं देयं निजैः सुतैः ॥ अपमृत्युमृतानां च सर्वेषामपि देहिनाम् ॥ २२ ॥ प्रेतत्वं जायते यस्मात्तस्माच्छ्राद्धस्य तद्दिनम् ॥ श्राद्धार्हं पार्थिवश्रेष्ठ विशेषेण प्रकीर्तितम् ॥ २३ ॥ एकोद्दिष्टं प्रकर्तव्यं यस्मात्तत्र दिने नरैः ॥ सपिंडीकरणादूर्ध्वं तत्ते वक्ष्यामि कारणम् ॥ २४ ॥ यदि प्रेतत्वमापन्नः कदाचित्स्वपिता भवेत् ॥ तृप्त्यर्थं तस्य कर्तव्यं श्राद्धं तत्र दिने नृप ॥२५॥ पितामहाद्यास्तत्राह्नि श्राद्धं नार्हंति कुत्रचित् ॥ अथ चेद्भ्रांतितो दद्याद्ध्रियते राक्षसैस्तु तत् ॥ २६ ॥ ब्रह्मणो वचनाद्राजन्भूतप्रेतैश्च दानवैः ॥ तेनैकोद्दिष्टमेवात्र कर्तव्यं न तु पार्वणम् ॥ २७ ॥ पितृपक्षे चतुर्दश्यां कन्यासंस्थे दिवाकरे ॥ पितामहो न गृह्णाति पित्रा तेन समं तदा ॥ २८ ॥ न च तस्य पिता राजंस्तथैव प्रपितामहः ॥ २९ ॥ एतस्मात्कारणाद्राजन्पार्वणं न विधीयते ॥ तस्मिन्नहनि संप्राप्ते व्यर्थं श्राद्धं भवेद्यतः ॥ ३० ॥ नान्यस्थानोद्भवैर्विप्रैः श्राद्धकर्मव्रतानि च ॥ नागरो नागरैः कुर्यादन्यथा तद्वृथा भवेत् ॥ ३१ ॥ अन्यस्थानोद्भवैर्विप्रैर्यच्छ्राद्धं क्रियते ध्रुवम् ॥ संपूर्णं व्यर्थतां याति नागराणां क्रियापरैः ॥ ३२ ॥ अथाचारपरिभ्रष्टाः श्राद्धार्हा एव नागराः ॥ बलीवर्दसमानोऽपि ज्ञातीयो यदि लभ्यते ॥ किमन्यैर्बहुभिर्विप्रैर्वेदवेदांगपारगैः ॥ ३३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये श्राद्धकल्पे चतुर्दशीशस्त्रहतश्राद्धनिर्णयवर्णनंनाम द्वाविंशत्युत्तरद्विशततमोऽध्यायः ॥ २२२ ॥ ॥छ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ श्राद्धार्हैर्ब्राह्मणैः कार्यं श्राद्धं दर्शे तु पार्वणम् ॥ विपरीतं न कर्तव्यं श्राद्धमेकं कथंचन ॥ १ ॥ जारजातापविद्धाद्यैर्यो नरः श्राद्धमाचरेत् ॥ ब्राह्मणैस्तु न सन्देहस्तच्छ्राद्धं व्यर्थतां व्रजेत् ॥ २ ॥ ॥ आनर्त उवाच ॥ ॥ भयं मे सुमहज्जातमत्र यत्परिकीर्तितम् ॥ जारजातापविद्धैस्तु यच्छ्राद्धं व्यर्थतां व्रजेत् ॥ ३ ॥ मनुना द्वादश प्रोक्ताः किल पुत्रा महामते ॥ अपुत्राणां च पुत्रत्वं ये कुर्वंति सदैव हि ॥ ४ ॥ औरसः क्षेत्रजश्चैव क्रयक्रीतश्च पालितः ॥ प्रतिपन्नः सहोढश्च कानीनश्चापि सत्तम ॥५॥ तथान्यौ कुण्डगोलौ च पुत्रावपि प्रकीर्तितौ ॥६॥ शिष्यश्च रक्षितो मृत्योस्तथाश्वत्थो वनांतिगः ॥ किमेते नैव कथिता



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्त्वमेवं प्रजल्पसि ॥ ७ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ सत्यमेतन्महाभाग सर्वे ते धर्मतः सुताः ॥ परं युगत्रये प्रोक्ता न कलौ कलुषापहाः ॥ ॥ ८ ॥ तदर्थं तेषु सन्तानं तावन्मात्रं युगेयुगे ॥ सत्त्वाढ्यानां च लोकानां न कलौ चाल्पमेधसाम् ॥ ९ ॥ कलावेव समाख्यातो व्यवहारः प्रपातदः ॥ अल्पसत्त्वा यतो लोकास्तेन चैष विधिः स्मृतः ॥ १० ॥ अत्र यः संकरं कुर्याद्योनेस्तस्य फलं शृणु ॥ ब्राह्मण्यां ब्राह्मणात्पुत्रो ब्रह्मघ्नः संप्रजायते ॥ ११ ॥ सर्वाधमानामधमो यो वारंड इति स्मृतः ॥ १२ ॥ क्षत्रियाच्च तथा सूतो वैश्यान्मागध एव च ॥ शूद्रात्तथांत्यजः प्रोक्तस्तेनैते वर्जिताः सुताः ॥ १३ ॥ एतेषामपि निर्दिष्टाः सप्त राजन्सुपुत्रकाः ॥ पंच वंशविनाशाय पूर्वेषां पातनाय च ॥ १४ ॥ औरसः प्रतिपन्नश्च क्रीतः पालित एव च ॥ शिष्यश्च दत्तजीवश्च तथाश्वत्थश्च सप्तमः ॥ १५ ॥ पुंनाम्नो नरकाद्घोराद्रक्षंति च सदा हि ते ॥ पतन्तं पुरुषं तत्र तेन ते शोभनाः स्मृताः ॥ १६ ॥ क्षेत्रजश्च सहोढश्च कानीनः कुण्डगोलकौ ॥ पंचैते पातयंतिस्म पितन्स्वर्गगतानपि ॥ १७ ॥ एतस्मात्कारणाच्छ्राद्धं जारजातस्य तद्वृथा ॥ १८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये श्राद्धकल्पे श्राद्धार्हानर्हब्राह्मणादिवर्णनंनाम त्रयोविंशत्युत्तरशततमोऽध्यायः ॥ २२३ ॥ ॥ छ ॥ ॥ आनर्त उवाच ॥ ॥ श्रुता मया महाभाग श्राद्धार्हा ब्राह्मणाश्च ये ॥ ये च त्याज्यास्तथा पुत्रा बहवश्चैव सुव्रत ॥ १ ॥ सांप्रतं कथयाऽस्माकं मन्त्रपूर्वश्च यो विधिः ॥ गृहस्थेन सदा कार्यः पितॄणां परितुष्टये ॥ २ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ प्रणम्यामंत्रिता ये च श्राद्धार्थं ब्राह्मणोत्तमाः ॥ आनीय कुतपे काले तान्सर्वान्प्रार्थयेदिदम् ॥ ३ ॥ आगच्छंतु महाभागा विश्वेदेवा महाबलाः ॥ ये यत्र विहिताः श्राद्धे सावधाना भवंतु ते ॥ ४ ॥ एवमभ्यर्च्य तान्सर्वांस्ततः कृत्वा प्रदक्षिणाम् ॥ जानुनी भूतले न्यस्य ततश्चार्घं प्रदापयेत् ॥ ५ ॥ मंत्रेणानेन राजेंद्र सपुष्पाक्षतचंदनैः ॥ अर्घमेनं प्रगृह्णंतु मया दत्तं द्विजोत्तमाः ॥ पादप्रक्षालनार्थाय प्रकुर्वंतु मम प्रियम् ॥ ६ ॥ एवमुक्त्वा महीपृष्ठे अनुलिप्ते ततः परम् ॥ साक्षतान्प्रक्षिपेद्दर्भान्विश्वेदेवान्प्रकीर्तयन् ॥ ७ ॥ अपसव्यं ततः कृत्वा दर्भांस्तिलसमन्वितान् ॥ द्विगुणान्प्रक्षिपेद्भूमौ पितॄनुद्दिश्य चात्मनः ॥ ८ ॥ एवं सर्वाः क्रियाः कार्या दैविकाः सव्यपूर्विकाः ॥ पैतृकाश्चापसव्येन मुक्त्वा नांदीमुखान्पितॄन् ॥ ९ ॥ सर्वे पूर्वामुखाः स्थाप्या युग्माश्च शक्तितो नृप ॥ पितरो मातृपक्षीयाः स्थाप्याश्चोदङ्मुखास्तथा ॥ १० ॥ एकैकं वा त्रयो वाऽपि स्युरेकैकं वा पृथक्पृथक् ॥ पैतृकान्स्थाप्य चक्रेण पितॄणां परितुष्टये ॥ ११ ॥ षष्ठ्या विभक्त्या तु तेषामासनं च

१ व्यभिचारेण—इति शेषः। २ स च चार इति स्मृतः—इ० पा०। ३ वक्रेण—इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



प्रदापयेत् ॥ ऋजुभिः साक्षतैर्दर्भैः सोदकैर्दक्षिणांगतः ॥ १२ ॥ विषमैर्द्विगुणैर्दर्भैः सतिलैर्वामपार्श्वतः ॥ पाणौ तोयं परिक्षिप्य न दर्भांस्तु कथं
चन ॥ १३ ॥ यो हस्ते चासनं दद्याच्चेदार्भं बुद्धिवर्जितः ॥ पितरो नासने तत्र प्रकुर्वंति निवेशनम् ॥ १४ ॥ आवाहनं प्रकर्तव्यं विभक्त्या च
द्वितीयया ॥ येनागच्छंति ते सर्वे समाहूताः पृथक्पृथक् ॥ १५ ॥ अन्यया च विभक्त्या चेत्पितॄनावाहयेत्क्वचित् ॥ नागच्छंति महाभागा
यद्यपि स्युर्बुभुक्षिताः ॥ १६ ॥ विश्वेदेवास आगत मंत्रेणानेन पार्थिव ॥ तेषामावाहनं कार्यमक्षतैश्च शिरोऽतिकात् ॥ १७ ॥ उशंतस्त्वेति च तिलैः
पितॄनावाहयेत्ततः ॥ आयंतुन इति जपेत्ततः पार्थिवसत्तम ॥ १८ ॥ शन्नो देवीति मंत्रेण स्वाहाकारसमन्वितम् ॥ पितॄणामर्घपात्रेषु तथैव
च जलं क्षिपेत् ॥ १९ ॥ यवोऽसि यवयास्मद्द्वेत्यक्षतांस्तत्र निक्षिपेत् ॥ चंदनं गंधपुष्पाणि धूपं दद्याद्यथाक्रमम् ॥ सपवित्रेषु
हस्तेषु दद्यादर्घ्यं समाहितः ॥ २० ॥ या दिव्या इति मन्त्रेण स्वाहाकारसमन्वितम् ॥ पितॄणामर्घपात्रेषु तथैव च जलं क्षिपेत् ॥ २१ ॥
तिलोऽसि सोमदैवत्यो गोसवे देवनिर्मितः ॥ प्रत्नवद्भिः पृक्तः स्वधया पितॄनिमाँल्लोकान्प्रीणाहि नः स्वधेति प्रक्षिपेत्तिलान् ॥ २२ ॥
यादिव्येति च मन्त्रेण ततो ह्यर्घ्यं प्रदापयेत् ॥ पितृपात्रे समादाय अर्घ्यपात्राणि कृत्स्नशः ॥ २३ ॥ अधोमुखं च तत्पात्रं मन्त्रवत्स्थापयेत्ततः ॥
आयुष्कामस्तु तत्तोयं लोचनाभ्यां न वीक्षयेत् ॥ २४ ॥ ततस्तु चन्दनादीनि दीपांतानि समाददेत् ॥ ततः पाकं समादाय पृच्छेद्विप्रान्द्विजो
त्तमान् ॥ २५ ॥ अहमग्नौ करिष्यामि होमं पितृसमुद्भवम् ॥ अनुज्ञा दीयतां मह्यमपसव्याश्रितस्य भोः ॥ २६ ॥ कुरुष्वेति च तैः प्रोक्ते गत्वाग्नि
शरणं ततः ॥ अग्नये कव्यवाहनाय स्वाहेति प्रथमाहुतिः ॥ २७ ॥ सोमाय पितृमते स्वधेति च ततः परम् ॥ हुतमन्नं च शेषं च श्राद्धार्हेभ्यः
प्रदीयते ॥ २८ ॥ इष्टमन्नं ततो दत्त्वा पात्रमालभ्य संजपेत् ॥ विप्रांगुष्ठं समादाय पाकमध्ये निधाय च ॥ २९ ॥ पृथिवी ते पात्रमादाय वैष्ण
व्या च ऋचा तथा ॥ स्वहस्तेन न वै दद्यात्प्रत्यक्षं लवणं तथा ॥ ३० ॥ स्वहस्तेन च यद्दत्तं प्रत्यक्षं लवणं नृप ॥ तच्छ्राद्धं व्यर्थतां याति घृते
दत्तेर्द्धभुक्तके ॥ तृप्तान्ज्ञात्वा ततो विप्रानग्रे त्वन्नं परिक्षिपेत् ॥ ३१ ॥ अग्निदग्धाश्च ये जीवा येप्यदग्धाः कुले मम ॥ भूमौ दत्तेन तृप्यंतु तृप्ता
यांतु परां गतिम् ॥ ३२ ॥ सकृत्सकृज्जलं दत्त्वा गायत्रीत्रितयं जपेत् ॥ मधुवातेति संकीर्त्य ततः पृच्छेद्द्विजोत्तमान् ॥ ३३ ॥ तृप्ताः स्थ इति
राजेन्द्र अनुज्ञां प्रार्थयेत्ततः ॥ बन्धूनां भोजनार्थाय शेषस्यान्नस्य भक्तिमान् ॥ ३४ ॥ उच्छिष्टसन्निधौ पश्चात्पितृवेदिं समाचरेत् ॥ पितृविप्रा

१ न चासनम्–इ० पा० । २ गन्धपुष्पाणि–सुगंधिपुष्पाणि–इत्यर्थः । ३ पितृदैवत्यः–इ० पा० । ४ परिक्षिपेत्–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सनस्थानां नोच्छिष्टं द्विजसन्निधौ ॥ ३५ ॥ ततो वेदिं समाधाय पतृकीं दक्षिणाप्लवाम् ॥ तस्यां दर्भान्समाधाय कुर्याच्चैवावनेजनम् ॥ ३६ ॥ विभक्त्या पूर्वया पश्चात्पिंडान्दद्याद्यथाक्रमम् ॥ भूयोऽप्यत्र जलं दद्यात्पितृतीर्थेन पार्थिव ॥ सूत्रं च प्रतिपिण्डे वै दद्यात्तेषु पृथक्पृथक्[1] ॥ ३७ ॥ यः सूत्रं पूर्वपिण्डेषु सततं विनियोजयेत् ॥ स विरोधं चरेत्तेषां त्रोटनाच्च परस्परम् ॥ ३८ ॥ ततः संपूजयेत्सर्वान्पिंडान्यद्वद्विजोत्तमान् ॥ आचम्य प्रक्षाल्य तथा हस्तौ पादौ च पार्थिव ॥ ३९ ॥ नमस्कृत्य पितॄन्पश्चात्सुप्रोक्षितं ततः परम् ॥ कृत्वा सव्येन राजेन्द्र याचयित्वा वराशिषः ॥ ४० ॥ अक्षय्यसलिलं देयं षष्ठ्या[2] चैव ततः परम् ॥ पवित्राणि समादाय ऊर्ध्वं स्वधेति कीर्तयेत् ॥ अस्तु स्वधेति तैरुक्ते पिंडोपरि परिक्षिपेत् ॥ ४१ ॥ ततो मधु समादाय पायसं च तिलोदकम् ॥ ऊर्जस्वेति च मन्त्रेण पितॄणामुपरि क्षिपेत् ॥ ४२ ॥ उत्तानमर्घपात्रं तु कृत्वा दद्याच्च दक्षिणाम् ॥ हिरण्यं देवतानां च पितॄणां रजतं तथा ॥ ४३ ॥ ततः स्वस्त्युदकं दद्यात्पितृपूर्वं च सव्यतः ॥ न स्त्रीभिर्न च बालेन नान्ये नैव च केनचित् ॥ ४४ ॥ श्राद्धीयविप्रपात्रं च स्वयमेव प्रचालयेत् ॥ ४५ ॥ ततः कृतांजलिर्भूत्वा प्रार्थयेत्पार्थिवोत्तम ॥ अघोराः पितरः सन्तु अस्मद्गोत्रं विवर्द्धताम् ॥ ४६ ॥ दातारो नोऽभिवर्धंतां वेदाः सन्ततिरेव नः ॥ श्रद्धा च नो मा व्यगमद्बहुधेयं[3] च नोऽस्त्विति ॥ ४७ ॥ अन्नं च नो बहु भवेदतिथींश्च लभेमहि ॥ याचितारश्च नः सन्तु मा च याचिष्म कञ्चन ॥ ४८ ॥ एता एवाशिषः सन्तु विश्वेदेवाः प्रीयंतां ततः ॥ स्वस्त्यर्थमुदकं दद्यात्पितृपूर्वं च सव्यतः ॥ ४९ ॥ वाजेवाजेति च ऋचा विसृजेच्च ततः परम् ॥ आमा वाजस्येति प्रदक्षिणीकृत्योपवेशयेत् ॥५०॥ पादावमर्दनं कृत्वा आसीमांतमनुव्रजेत् ॥ बलिं च निक्षिपेत्तस्माद्भोजनं च समाचरेत् ॥ ५१ ॥ मौनेन दृश्यते सूर्यो यावत्तावन्नराधिप ॥ ५२ ॥ यश्चैवास्तमिते सूर्ये भुंक्ते च श्राद्धकृन्नरः ॥ व्यर्थतां याति तच्छ्राद्धं तस्माद्भुंजीत नो निशि ॥ ५३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये श्राद्धकल्पे श्राद्धविधिवर्णनंनाम चतुर्विंशत्युत्तरद्विशततमोऽध्यायः ॥ २२४ ॥ ॥ छ ॥ ॥ आनर्त उवाच ॥ ॥ एकोद्दिष्टविधिं ब्रूहि मम त्वं वदतां वर ॥ पार्वणं तु यथा प्रोक्तं विस्तरेण महामते ॥ १ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ त्रीणि संचयनादर्वाक्तानि त्वं शृणु सांप्रतम् ॥ यस्मिन्स्थाने भवेन्मृत्युस्तत्र श्राद्धं तु कारयेत् ॥२॥ एकोद्दिष्टं ततो मार्गे विश्रामो यत्र कारितः ॥ ततः संचयनस्था

१ अतः प्रतिपिण्डं पृथक्पृथक्सूत्रं दद्यात्—इति तात्पर्यम्। २ षष्ठ्या—विभक्त्या—इत्यर्थः। ३ बहुदेयम्-इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





ने तृतीयं श्राद्धमिष्यते ॥ ३ ॥ प्रथमेऽह्नि द्वितीयेह्नि पञ्चमे सप्तमे तथा ॥ नवमे दशमे चैव नव श्राद्धानि तानि च ॥ ४ ॥ वैतरिण्याश्च संप्राप्तौ प्रेतस्तृप्तिमवाप्नुयात् ॥ एकोद्दिष्टं दैवहीनमेकार्घैकपवित्रकम् ॥ ५ ॥ आवाहनपरित्यक्तं कार्यं पार्थिवसत्तम ॥ तृप्तिप्रश्नस्तथा कार्यः स्वदितं च सक्तततः ॥ ६ ॥ अभिरम्यतामिति मन्त्रेण ब्राह्मणस्य विसर्जनम् ॥ अच्छिन्नाग्रमभिन्नाग्रं कुर्याद्दर्भतृणद्वयम् ॥ पवित्रं तद्विजानीयादेकोद्दिष्टे विधीयते ॥ ७ ॥ सर्वत्रैव पितः प्रोक्तं पिता तर्पणकर्मणि ॥ पित्र्ये संकल्पकाले च पितुरक्षय्यदापने ॥ ८ ॥ गोत्रं स्वरांतं सर्वत्र गोत्रे तर्पणकर्मणि ॥ गोत्राय कल्पनविधौ गोत्रस्याक्षय्यदापने ॥ ९ ॥ शर्मन्नर्घ्यादिकर्तव्ये शर्मा तर्पणकर्मणि ॥ शर्मणे सस्यदाने च शर्मणोऽक्षय्यके विधौ ॥ १० ॥ मातर्मात्रे तथा मातुरासने कल्पनेऽक्षये ॥ गोत्रे गोत्रायै गोत्रायाः प्रथमाद्या विभक्तयः ॥ ११ ॥ देवि देव्यै तथा देव्या एवं मातुश्च कीर्तयेत् ॥ प्रथमा च चतुर्थी च षष्ठी स्याच्छ्राद्धसिद्धये ॥ १२ ॥ विभक्तिरहितं श्राद्धं क्रियते वा विपर्ययात् ॥ अकृतं तद्विजानीयात्पितॄणां नोपतिष्ठति ॥ ॥ १३ ॥ तस्मात्सर्वप्रयत्नेन ब्राह्मणेन विजानता ॥ विभक्तिभिर्यथोक्ताभिः श्राद्धे कार्यो विधिः सदा ॥ १४ ॥ ततः सपिंडीकरणं वत्सरादूर्ध्वतः स्थितम् ॥ वृद्धिर्वाऽऽगामिनी चेत्स्यात्तदार्वागपि कारयेत् ॥ १५ ॥ पार्वणोक्तविधानेन त्रिदैवत्यमदैविकम् ॥ प्रेतमुद्दिश्य कर्तव्यमेकोद्दिष्टं च पार्थिव ॥ १६ ॥ एकेनैव तु पाकेन मम चैतन्मतं स्मृतम् ॥ अर्घपात्रं समादाय यत्प्रेतार्थं प्रकल्पितम् ॥ १७ ॥ पितृपात्रेषु त्रिष्वेव त्रिधा तच्च परिक्षिपेत् ॥ एवं पिंडं त्रिधा कृत्वा पितॄपिंडेषु च त्रिषु ॥ १८ ॥ ये समानेति मन्त्राभ्यां न स्यात्प्रेतस्ततः परम् ॥ अवनेजनं ततः कृत्वा पितृपूर्वं यथाक्रमम् ॥ १९ ॥ गन्धधूपादिकं सर्वं पुनरेव प्रदापयेत् ॥ पितृपूर्वं समुच्चार्य वर्जयेच्च चतुर्थकम् ॥ २० ॥ केचिच्चतुर्थं कुर्वंति प्रेतं च स्वपितुस्ततः ॥ पितुः पूर्वं भवेच्छ्राद्धं परं नैतन्मतं मम ॥ २१ ॥ सपिण्डीकरणादूर्ध्वमेकोद्दिष्टं न कारयेत् ॥ क्षयाहं च परित्यज्य शस्त्राहत चतुर्दशीम् ॥ २२ ॥ यः सपिण्डीकृतं प्रेतं पृथक्पिण्डे नियोजयेत् ॥ अकृतं तद्विजानीयात्पितृहा चोपजायते ॥ २३ ॥ पिता यस्य तु निर्वृत्तो जीवते च पितामहः ॥ पितुः स नाम संकीर्त्य कीर्तयेत्प्रपितामहम् ॥ २४ ॥ पितामहस्तु प्रत्यक्षं भुक्त्वा गृह्णाति पिण्डकम् ॥ पितामहक्षयाहे च पार्वणं श्राद्धमिष्यते ॥ २५ ॥ जनकं स्वं परित्यज्य कथंचिन्नास्य दीयते ॥ तस्याकृतेन श्राद्धेन न स्वल्पं पितृतो भयम् ॥ २६ ॥ अमावास्यासु सर्वासु मृते पितरि पार्वणम् ॥ नभस्यापरपक्षस्य मध्ये चैतदुदाहृतम्॥ २७ ॥ यावत्सपिंडता नैव न तावच्छ्राद्धमाचरेत् ॥ २८ ॥ जनके मृत्युमापन्ने



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्राद्धपक्षे समागते ॥ पितामहादेः कर्तव्यं[1] श्राद्धं येनैकपिंडता[2][3] ॥२९॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाट केश्वरक्षेत्रमाहात्म्ये सपिंडीकरणविधिवर्णनंनाम पञ्चविंशत्युत्तरद्विशततमोऽध्यायः ॥ २२५ ॥ छ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ यतः सपिंडता प्रोक्ता पितृपिण्डैः समंततः ॥ यावत्सपिण्डता नैव तावत्प्रेतः स तिष्ठति ॥ १ ॥ अपि धर्मसमोपेतस्तपसाऽपि समन्वितः ॥ एतस्मात्कारणात्प्रोक्ता मुनि भिस्तु सपिंडता ॥ २ ॥ यस्ययस्य च योऽन्यत्र योनिं प्राप्नोति मानवः ॥ तत्रस्थस्तृप्तिमाप्नोति यद्दत्तं तस्य वंशजैः ॥ ३ ॥ ॥ आनर्त उवाच ॥ ॥ ये दृश्यंते निजाः स्वप्ने चिरात्पितृपितामहाः ॥ प्रार्थयंति निजान्कामांस्ततः किं स्यान्महामुने ॥ ४ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ येषां गतिर्न संजाता प्रेतत्वे च व्यवस्थिताः ॥ दर्शयंति च ते सर्वे स्वयमात्मानमेव हि ॥ ५ ॥ स्ववंश्यानां न चान्ये तु सत्यमेतन्मयोदितम् ॥ यथा लोकेऽत्र संजाता ये च कृत्यैः शुभाशुभैः ॥ ६ ॥ ॥ आनर्त उवाच यस्य नो विद्यते पुत्रः सपिण्डीकरणं कथम् ॥ तस्य कार्यं भवेदत्र तन्मे त्वं वक्तुमर्हसि ॥ ॥ ७ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ यस्य नो विद्यत पुत्र औरसश्च महीपते ॥ चतुर्णां स्वपितॄणां तु कथं स स्याच्चतुर्थकः ॥ ८ ॥ प्रकर्षेण व्रजेद्यस्मात्तस्मात्प्रेतः[4] प्रकीर्तितः ॥ पुत्रेण भ्रात्रा[5] पत्न्या वा तस्य कार्या सपिंडता ॥ ९ ॥ चतुर्थो यदि राजेंद्र जायते न कथंचन ॥ क्षेत्रजादीन्सु तानेतानेकादश यथोदितान् ॥ १० ॥ पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः ॥ काले यदि न राजेंद्र जायतेऽस्योत्तरक्रिया ॥ ११ ॥ नारा यणबलिः कार्यः प्रेतत्वस्य विनाशकः ॥ यथान्येषां मनुष्याणामपमृत्युमुपेयुषाम् ॥ कार्यश्चैवात्महंतॄणां ब्राह्मणान्मृत्युमीयुषाम् ॥ १२ ॥ ॥ आनर्त उवाच ॥ ॥ कथं मृत्युमवाप्नोति पुरुषोऽत्र महामते ॥ १३ ॥ स्वर्गं वा नरकं वापि कर्मणा केन गच्छति ॥ मोक्षं वाऽथ महाभाग सर्वं मे विस्त राद्वद ॥ १४ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ धर्मी पापी तथा ज्ञानी तिस्रोऽत्र गतयः स्मृताः ॥ धर्मात्संप्राप्यते स्वर्गः पापान्नरक एव च ॥ १५ ॥ ज्ञानात्संप्राप्यते मोक्षः सत्यमेतन्मयोदितम् ॥ एनमर्थं भविष्यं तु भीष्मं शांतनवं नृप ॥ १६ ॥ युधिष्ठिरो महाराज धर्मपुत्रो नृपोत्तमः ॥ कृष्णेन सह राजेंद्र पितामहमपृच्छत ॥ १७ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कियंतो नरकाः ख्याता यमलोके पितामह ॥ केन पापेन गच्छंति तेषु सर्वेषु जंतवः ॥ १८ ॥ ॥ श्रीभीष्म उवाच ॥ ॥ एकविंशत्प्रमाणाः स्युर्नरका यममंदिरे ॥ प्राणिनस्तेषु गच्छंति निजकर्मानुसारतः ॥ १९ ॥ ख्यातौ चित्रविचित्रौ च कायस्थौ यममंदिरे ॥ २० ॥ चित्रोऽथ लिखते धर्मं सर्वं प्राणिसमुद्भवम् ॥ विचित्रः पातकं सर्वं परमं यत्नमास्थितः ॥ २१ ॥

१ संवत्सरादर्वागेतत्—इति तात्पर्यम् । २ यत्—यस्मात्कारणात्—इत्यर्थः । ३ एकपिंडता—सपिंडीकरणम्—इत्यर्थः । ४ प्र—प्रकर्षेण—एति—व्रजति—इति—प्रेतः—इत्यर्थः । ५ भ्रातुः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



यमदूताः सदैवाष्टौ धर्मराजसमुद्भवाः ॥ ये नयंति नरान्मृत्युलोकात्स्ववशगान्सदा ॥ २२ ॥ करालो विकरालश्च वक्रनासो महोदरः ॥ सौम्यः
शांतस्तथा नंदः सुवाक्यश्चाष्टमः स्मृतः ॥ २३ ॥ एतेषां ये पुरा प्रोक्ताश्चत्वारो रौद्ररूपिणः ॥ पापं जनं च ते सर्वे नयन्ति यमसादनम् ॥ २४ ॥
चत्वारो ये परे प्रोक्ताः सौम्यरूपवपुर्द्धराः ॥ धर्मिणं ते जनं सर्वं नयंति यमसादनम् ॥ २५ ॥ विमानेन समारूढमप्सरोगणसेवितम् ॥ २६ ॥
लिखितस्यानुरूपेण पापधर्मोद्भवस्य च ॥ एतेषां किंकरा ये च तेषां संख्या न जायते ॥ २७ ॥ अष्टोत्तरशतं तेषां व्याधीनां परिकल्पितम् ॥
सहायार्थं यमेनात्र ज्वरयक्ष्मांतरस्थितम् ॥ २८ ॥ ते गत्वा व्याधयः पूर्वं वशे कुर्वंति मानवम् ॥ २९ ॥ यमदूतास्ततो गत्वा नाभिमूलव्यवस्थि
तम् ॥ वायुरूपं समादाय जनैः सर्वैरलक्षिताः ॥ ३० ॥ गच्छंति यममार्गेण देहं संस्थाप्य भूतले ॥ षडशीतिसहस्राणि[1] यममार्गः प्रकीर्तितः ॥
॥ ३१ ॥ तत्र वैतरणीनाम नदी पूर्वं परिश्रुता ॥ स्रोतोभ्यां सा महाभाग तत्र संस्था सदैव हि ॥ ३२ ॥ तत्र शोणितमेकस्मिन्स्रोतस्यस्या वह
त्यलम् ॥ शस्त्राणि च सुतीक्ष्णानि तन्मध्ये भरतर्षभ ॥ ३३ ॥ मृत्युकाले प्रयच्छंति ये धेनुं ब्राह्मणाय वै ॥ तस्याः पुच्छं समाश्रित्य
ते तरंति च तां नृप ॥ ३४ ॥ स्वबाहुभिस्तथैवान्ये शतयोजनविस्तृतम् ॥ द्वितीयं चैव तत्स्रोतो वैतरण्या व्यवस्थितम् ॥ तस्या
स्तत्सलिलस्रावि गम्यं धर्मवतां[2] सदा ॥ ३५ ॥ ये नरा गोप्रदातारो मृत्युकाले व्यवस्थिते ॥ ते गोपुच्छं समाश्रित्य तां तरं
ति पृथूदकाम् ॥ अन्ये स्वबाहुभिः कृत्वा गोप्रदानविवर्जिताः ॥ ३६ ॥ गोप्रदानं प्रकर्तव्यं तस्माच्चैव विशेषतः ॥ मृत्युकाले
ऽत्र संप्राप्ते य इच्छेद्गतिमात्मनः ॥ ३७ ॥ तस्या[3] अनन्तरं यांति पापमार्गेण पापिनः ॥ धर्मिष्ठा धर्ममार्गेण विमानवरमाश्रिताः
॥ ३८ ॥ वैतरण्याः परे पारे पंचयोजनमायतम् ॥ असिपत्रवनंनाम पापलोकस्य दुःखदम् ॥ ३९ ॥ तत्र लोहमयान्येवासिपत्राणां
शतानि च ॥ यानि कृन्तंति मर्त्यानां शरीराणि समंततः ॥ ४० ॥ यैर्हृतं परवित्तं च कलत्रं च दुरात्मभिः ॥ नव श्राद्धानि तेषां
चेत्तस्मान्मुक्तिः प्रजायते ॥ ४१ ॥ तस्मात्परतरो ज्ञेयो विख्यातः कूटशाल्मलिः ॥ अधोमुखाः प्रलंबंते तस्मिन्कंटकसंकुले ॥ ४२ ॥ अधस्ता
द्वह्निना चैव दह्यमाना दिवानिशम् ॥ विश्वासघातका ये च सर्वदैव सुनिर्दयाः ॥ तस्मान्मुक्तिं प्रयांति स्म श्राद्धे ह्येकादशे कृते ॥ ४३ ॥ यंत्रात्म
कस्ततः प्रोक्तो नरको दारुणाकृतिः ॥ ब्रह्मघ्नास्तत्र पीड्यंते ये चाऽन्ये पापकर्मिणः ॥ ४४ ॥ श्राद्धेन द्वादशोत्थेन तेभ्यो दत्तेन पार्थिव ॥ तस्मा

१ योजनानि—इति शेषः। २ धर्मभृताम्—इ० पा०। ३ तस्या अनन्तरम्—वैतरण्या अतिक्रमणोत्तरम्—इत्यर्थः।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्मुक्तिं प्रगच्छन्ति यन्त्राख्यनरकात्स्फुटम् ॥ ४५ ॥ ततो लोहसमाः स्तंभा ज्वलमाना व्यवस्थिताः ॥ आलिंगंति च तान्सर्वान्परदाररताश्च ये ॥ ॥ ४६ ॥ मासिकोत्थे कृते श्राद्धे तेभ्यो मुक्तिमवाप्नुयुः ॥ ४७ ॥ लोहदंष्ट्रास्ततो रौद्राः सारमेया व्यवस्थिताः ॥ भक्षयंति च ते पापान्पृष्ठमांसाशिनो नरान् ॥ त्रैपक्षिके कृते श्राद्धे तेभ्यो मुक्तिमवाप्नुयुः ॥ ४८ ॥ लोहचंचुमयाः काकाः संस्थितास्तदनंतरम् ॥ सरागैर्लोचनैर्यैश्च ईक्षिताः परयोषितः ॥ ४९ ॥ तेषां नेत्राणि ते घ्नंति भूयो जातानि भूरिशः ॥ द्विमासिकं च यच्छ्राद्धं तेन मुक्तिः प्रजायते ॥ ५० ॥ ततः शाल्मलिकूटस्तु तथान्ये लोहकण्टकाः ॥ तेषां मध्येन नीयंते पैशुन्यनिरता नराः ॥ त्रिमासिकं तु यच्छ्राद्धं तेन मुक्तिः प्रजायते ॥ ५१ ॥ रौरवोऽथ सुविख्यातो दारुणो नरको महान् ॥ ब्रह्मघ्नानां समादिष्टः स महाक्लेशकारकः ॥ ५२ ॥ छिद्यंते विविधैः शस्त्रैस्तत्रस्था ये मुहुर्मुहुः ॥ चतुर्मासिकश्राद्धेन मुक्तिस्तेषां प्रजायते ॥ ५३ ॥ अपरस्तु समाख्यातः क्षारोदस्तु सुदारुणः ॥ कृतघ्नानां समादिष्टः सदैव बहुवेदनः ॥ ५४ ॥ अधोमुखा ऊर्ध्वपादाः पीडयंते यत्र लंबिताः ॥ पञ्चमासिकदानेन मुक्तिस्तेषां प्रजायते ॥ ५५ ॥ कुम्भीपाकस्ततो ज्ञेयो नरको दारुणाकृतिः ॥ तैलेन क्षिप्यमाणास्तु यत्र दण्डाभिसंधिताः ॥ दृश्यंते जनहंतारो बालहंतार एव च ॥ ५६ ॥ पतंति नरके रौद्रे नरा विश्वासघातकाः॥ षण्मासिकप्रदानेन मुच्यंते तत्र संकटात् ॥ ५७ ॥ सर्पवृश्चिकसंयुक्तस्तथाऽन्यो नरकः श्रुतः ॥ तत्र ये दांभिका लोके ते गच्छन्ति नराधमाः ॥ सप्तमासिकदानेन तेषां मुक्तिः प्रजायते ॥ ५८ ॥ तथा संवर्तकोनाम नरकोऽन्यः प्रकीर्तितः ॥ वेदविप्लावकाः साधुनिंदकाश्च दुरात्मकाः ॥ ५९ ॥ उत्पाट्यते ततो जिह्वा सन्दंशैर्वह्निसम्भवैः ॥ स्वकार्ये येऽनृतं ब्रूयुस्तद्गात्रं खाद्यते[१] श्वभिः ॥ ६० ॥ परार्थेऽपि च ये ब्रूयुस्तेषां गात्राणि कृत्स्नशः ॥ अष्टमासिकदानेन तेषां मुक्तिः प्रजायते ॥ ६१ ॥ अग्निकूटो महाप्लावो दारुणो नरको महान् ॥ तत्र ते यांति वै मूढाः कूटसाक्ष्यप्रदा नराः ॥ ६२ ॥ तत्रस्था यातनां रौद्रां सहंतेऽतीव दुःखिताः ॥ नवमासिकदानं च तेषामाह्लादनं परम् ॥ ६३ ॥ ततो लोहमयैः कीलैः संचितोऽन्यः समंततः ॥ तत्र चाग्निप्रदातारः स्त्रीणां हन्तार एव च ॥ ६४ ॥ तत्र धावंति दुःखार्तास्ताड्यमानाश्च किंकरैः ॥ दशमासिकजं दानं तत्र तेषां प्रमुक्तये ॥६५॥ ततोंऽगारमयैः पुंजैरावृताभूः समंततः ॥ स्वामिद्रोहरतास्तत्र भ्राम्यंते सर्वतो दिशः ॥ ६६ ॥ एकादशोद्भवं[२] दानं तत्र मुक्त्यै प्रजायते ॥ संतप्तसिकतापूर्णो नरको दारुणाकृतिः ॥ ॥६७॥ स्वामिनं चागतं दृष्ट्वा पलायनपरायणाः ॥ ये भवन्ति नरास्तत्र पच्यंते तेऽपि दुःखिताः ॥ तेषां द्वादशमासीयं श्राद्धं चैवोपतिष्ठति ॥६८॥

१ घात्यते–इ० पां० । २ एकादशोद्भवम्–एकादशमासिकम्–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



यत्किंचिद्दीयते तोयमन्नं वा वत्सरांतरे ॥ प्रभुंजते च तन्मार्गे प्रदत्तं निजबान्धवैः ॥ ६९ ॥ ततः संवत्सरादूर्ध्वं निजकर्मसमुद्भवम् ॥ शुभाशुभं प्रपद्यंते धर्मराजसमीपगाः ॥ ७० ॥ एवं पंचदशैतानि संसेव्य नरकाणि ते ॥ प्राप्नुवंति ततो जन्म मर्त्यलोके पुनर्नराः ॥ ७१ ॥ प्राप्नुवंति विदेशे च जन्म ये हेतुवादकाः ॥ नित्यं तर्पणदानेन तेषां तृप्तिः प्रजायते ॥ ७२ ॥ स्वामिद्रोहरता ये च कुराज्ये जन्म चाप्नुयुः ॥ हंतकारप्रदानेन तेषां तृप्तिः प्रजायते ॥ ७३ ॥ अदत्त्वा ये नरोऽश्नंति पितृदेवद्विजातिषु ॥ दुर्भिक्षे जन्म तेषां तु तेन पापेन जायते ॥ ७४ ॥ क्षयाहे श्राद्धसंप्राप्तौ ततस्तृप्तिः प्रजायते ॥ ७५ ॥ ये प्रकुर्वंति दम्पत्योर्भेदं वै सानुरागयोः ॥ परस्परमसत्यानि तेषां भार्याऽसती भवेत् ॥ ७६ ॥ एकस्मिन्वचने प्रोक्ते दश ब्रूते क्रुधान्विता ॥ विरूपा भ्रममाणा च सर्वलोकविगर्हिता ॥ कन्यादानफलैस्तेषां तत्रासां च सुखं भवेत् ॥ ७७ ॥ कन्यकादानविघ्नं हि विक्रयं वा करोति यः ॥ स कन्याः केवलाः सूते न पुत्रं केवलं क्वचित् ॥ ७८ ॥ जायंते ताश्च बंधक्यो विधवा दुर्भगास्तथा ॥ कन्यादानफलप्राप्त्या तासां सौख्यं प्रजायते ॥ ७९ ॥ यैर्हृतानि च रत्नानि तथा शास्त्रांतराणि च ॥ ते दरिद्राः प्रजायंते मूकाः खंजा विचक्षुषः ॥ तेषां शास्त्रप्रदानेन इह सौख्यं प्रजायते ॥ ८० ॥ एते तु नरकाः प्रोक्ता मर्त्यलोकसमुद्भवाः ॥ एतैर्विज्ञायते सर्वं कृतं कर्म शुभाशुभम् ॥ ८१ ॥ तीर्थयात्राफलैस्तस्य ततः शुद्धिः प्रजायते ॥ ८२ ॥ ॥ भीष्म उवाच ॥ ॥ एतत्ते सर्वमाख्यातं यत्पृष्टोस्मि नराधिप ॥ एकविंशत्प्रमाणं च नरकाणां यथा स्थितम् ॥ ८३ ॥ भूयश्च पृच्छ राजेंद्र संदेहो यो हृदि स्थितः ॥ ८४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये श्राद्धकल्पे भीष्मयुधिष्ठिरसंवादे तत्तद्दुरितप्राप्यैकविंशतिनरकयातनातन्निवारणोपायवर्णनंनाम षड्विंशत्युत्तरद्विशततमोऽध्यायः ॥ २२६ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ नरकाणां स्वरूपं च श्रुत्वा मे भयमागतम् ॥ कथं मुक्तिर्भवेत्तेषां पापानामपि पार्थिव ॥ व्रतैर्वा नियमैर्वापि होमैर्वा तीर्थसंश्रयैः ॥ १ ॥ ॥ भीष्म उवाच ॥ ॥ गंगायामस्थिपातोऽत्र येषां संजायते नृणाम् ॥ न तेषां नारको वह्निः प्रभवेन्मध्यवर्तिनाम् ॥ २ ॥ गंगायां क्रियते श्राद्धं येषां नाम्ना स्वकैः सुतैः ॥ ते विमानं समाश्रित्य प्रयांति नरकोपरि ॥ ॥ ३ ॥ पापं कृत्वा प्रकुर्वंति प्रायश्चित्तं यथोदितम् ॥ हेम यच्छंति वा भूप न तेषां नरको भवेत् ॥ ४ ॥ शेषाः स्वकर्मणः



१ 'नृ' शब्दस्य प्रथमाबहुवचनमिदम्। २ बंधक्यः—कुलटाः—इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राप्त्या सेवंते च यथोचितम् ॥ स्वर्गं वा नरकं वापि सेवन्ते ते नराधिप ॥ ५ ॥ धारातीर्थे[1] म्रियंते ये स्वामिनः पुरतः स्थिताः ॥ ते गच्छंति परं स्थानं नरकाणां सुदूरतः ॥ ६ ॥ वाराणस्यां कुरुक्षेत्रे नैमिषे नागरे पुरे ॥ प्रयागे वा प्रभासे वा यस्त्यजेत्तनुमात्मनः ॥ महापातकयुक्तोऽपि नरकं न स पश्यति ॥ ७ ॥ नीलो वा वृषभो यस्य[2] विवाहे संनियुज्यते ॥ स्वपुत्रेण न संपश्येन्नरकं ब्रह्महाऽपि सः ॥ ८ ॥ प्रायोपवेशनं कृत्वा हृदयस्थे जनार्दने ॥ यस्त्यजेत्पुरुषः प्राणान्नरकं न स पश्यति ॥ ९ ॥ प्रायोपवेशनं यो च चित्रेश्वरनिवेशने ॥ कुर्वन्ति नरकं नैव ते गच्छंति कदाचन ॥ १० ॥ दीनांधकृपणानां च पथिश्रममुपेयुषाम् ॥ तीर्थयात्रापराणां च यो यच्छति सदाऽशनम् ॥ काले वा यदि वाऽकाले नरकं न स पश्यति ॥ ११ ॥ जलधेनुं च यो दद्याद्वृषसंस्थे दिवाकरे ॥ तिलधेनुं मृगस्थे च नरकं न स पश्यति ॥ १२ ॥ सोमे सोमग्रहे चैव सोमनाथस्य दर्शनात् ॥ समुद्रे च सरस्वत्यां स्नात्वा न नरकं व्रजेत् ॥ १३ ॥ सन्निहित्यां कुरुक्षेत्रे राहुग्रस्ते दिवाकरे ॥ सूर्यवारेण यः स्नाति नरकं न स पश्यति ॥ १४ ॥ कार्तिक्यां कृत्तिकायोगे यः करोति प्रदक्षिणाम् ॥ त्रिपुष्करस्य मौनेन नरकं न स पश्यति ॥ १५ ॥ मृगसंक्रमणे ये तु सूर्यवारेण संस्थिते ॥ चण्डीशं वीक्षयंति स्म न ते नरकगामिनः ॥ १६ ॥ गां पंकाद्ब्राह्मणीं दास्यात्साधूंस्तेनाद्द्विजं वधात् ॥ मोचयन्ति च ये राजन्न ते नरकगामिनः ॥ १७ ॥ एतत्ते सर्वमाख्यातं यत्पृष्टोऽस्मि नराधिप ॥ यथा न नरकं याति पुरुषस्तु स्वकर्मणा ॥ यथा च नरकं याति स्वल्पपापोऽपि मानवः ॥ १८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये श्राद्धकल्पे भीष्मयुधिष्ठिरसंवादे नरकयातनानिरसनोपायवर्णनंनाम सप्तविंशत्युत्तरद्विशततमोऽध्यायः ॥ २२७ ॥

॥ ॥ सूत उवाच ॥ ॥ तथान्यच्च बिलद्वारि शयनार्थे व्यवस्थितम् ॥ दृष्ट्वा प्रमुच्यते पापी देवं च जलशायिनम् ॥ १ ॥ स्नात्वा तस्मिन्बिलद्वारे पवित्रे लोकसंश्रये ॥ यस्तं पूजयते भक्त्या शेषपर्यंकशायिनम् ॥ आजन्ममरणात्पापात्स च मुक्तिमवाप्नुयात् ॥ २ ॥ चतुरो वार्षिकान्मासान्सुप्रसुप्तं सुरेश्वरम् ॥ संपूजयति यो भक्त्या न स भूयोऽत्र जायते ॥ ३ ॥ तत्र पूर्वं महाभागा मुनयः सेव्य तं प्रभुम् ॥ मृत्तिकाग्रहणं कृत्वा तस्य चायतने शुभे ॥ ४ ॥ संप्राप्ताः परमं स्थानं तद्विष्णोः परमं पदम् ॥ यत्फलं सर्वतीर्थेषु सर्वयज्ञेषु यत्फलम् ॥ तत्फलं तस्य पूजायां चातुर्मास्यां प्रजायते ॥ ५ ॥ यत्फलं गोग्रहे मृत्युं संप्राप्ता यांति मानवाः ॥ तत्फलं चतुरो मासान्पूजया जलशा

१ धारातीर्थे—रणांगणे—इत्यर्थः । २ यस्य—उद्देशेन—नीलो वृषभो विवाहे—वत्सतरीभिः सह विवाहपूर्वकमुत्सर्गे संनियुज्यते—योज्यते—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



यिनः ॥ ६ ॥ अपि पापसमाचारः परदाररतोऽपि च ॥ ब्रह्मघ्नोऽपि सुरापोऽपि स्त्रीहन्ताऽपि विगर्हितः ॥ पूजयन्‌ चतुरो मासांस्तस्य देवस्य मुच्यते ॥ ७ ॥ ॥ ऋषय ऊचुः ॥ ॥ यदेतद्भवता प्रोक्तं तत्रस्थं जलशायिनम् ॥ बिलद्वारे कथं सूत तत्र नः संशयो महान् ॥ ८ ॥ स किल श्रूयते देवः क्षीराब्धौ मधुसूदनः ॥ सदैव भगवाञ्छेते योगनिद्रां समाश्रितः ॥ ९ ॥ कथं स भगवाञ्छेते बिलद्वारे व्यवस्थितः ॥ एतत्कीर्तय कार्त्स्न्येन परं कौतूहलं हि नः ॥ १० ॥ ॥ सूत उवाच ॥ ॥ सत्यमेतन्महाभागाः क्षीराब्धौ मधुसूदनः ॥ योगनिद्रां गतः शेते शेषपर्यंकशायकः ॥ ११ ॥ स यथा तत्र क्षेत्रे तु संश्रितो भगवान्स्वयम् ॥ जलशायिस्वरूपेण तच्छृणुध्वं समाहिताः ॥ १२ ॥ यथा च चतुरो मासान्पूजितस्तत्र संस्थितः ॥ मुक्तिं ददाति पुंसां स तथा संकीर्तयाम्यहम् ॥ १३ ॥ चत्वारोऽपि यथा मासा गर्हणीया धरातले ॥ सर्वकर्मसु मुख्येषु यज्ञोद्वाहादिषु द्विजाः ॥ १४ ॥ तद्वोऽहं कीर्तयिष्यामि नमस्कृत्य द्विजोत्तमाः ॥ तस्मै देवाधिदेवाय निर्गुणाय गुणात्मने ॥ १५ ॥ अव्यक्तायाऽप्रमेयाय सर्वदेवमयाय च ॥ सर्वज्ञाय कवीशाय सर्वभूतात्मने तथा ॥ १६ ॥ पुरासीद्दानवो रौद्रो हिरण्यकशिपुर्महान् ॥ नारसिंहं वपुः कृत्वा विष्णुना यो निपातितः ॥ १७ ॥ तस्य पुत्रद्वयं जज्ञे सर्वलक्षणलक्षितम् ॥ प्रह्लादश्चांधकश्चैव वीर्येणाप्रतिमौ युधि ॥ १८ ॥ हिरण्यकशिपौ प्राप्ते परं लोकं महासुरे ॥ अमात्यैरभिषेकाय प्रह्लादः स नियोजितः ॥ १९ ॥ स नैच्छत तदा राज्यं पितृपैतामहं महत् ॥ समागतमपि प्राज्ञो यस्मात्तद्वो वदाम्यहम् ॥ २० ॥ दानवानां सदा द्वेषो देवेन सह चक्रिणा ॥ न करोति पुनर्द्वेषं तं समुद्दिश्य सर्वदा ॥ ॥ २१ ॥ एतस्मात्कारणात्सर्वे तेन त्यक्ता दितेः सुताः ॥ स्वराज्यमपि संत्यज्य विष्णुस्तेन समाश्रितः ॥ २२ ॥ ततस्तैर्दानवैः क्षुद्रैर्विष्णुद्वेषपरायणैः ॥ अन्धकः स्थापितो राज्ये पितृपैतामहे तदा ॥ २३ ॥ अन्धकोऽपि समाराध्य देवदेवं चतुर्मुखम् ॥ अमरत्वं ततो लेभे यावच्चन्द्रार्कतारकम् ॥ २४ ॥ वरपुष्टस्ततः सोऽपि चक्रे शक्रेण विग्रहम् ॥ २५ ॥ जित्वा शक्रं महासंख्ये यज्ञांशाञ्जगृहे स्वयम् ॥ गत्वाऽमरावतीं दैत्यो निःसार्य च शतक्रतुम् ॥ स्ववर्गेण समोपेतः स्वर्गं समहरत्तदा ॥ २६ ॥ शक्रोऽपि च समाराध्य शंकरं लोकशंकरम् ॥ सर्वदेवसमोपेतो भृत्यवत्परिवर्तते ॥२७॥ ततः कालेन महता तस्य तुष्टः पिनाकधृक् ॥ तं प्राह वरदोऽस्मीति वद शक्र करोमि किम् ॥ २८ ॥ ॥ इन्द्र उवाच ॥ ॥ अंधकेन हृतं राज्यं मम वीर्यात्सुरेश्वर ॥ यज्ञभागैः समोपेतं हत्वाऽऽशु तत्प्रयच्छ मे ॥२९॥ तच्छ्रुत्वा तस्य दीनस्य भगवाञ्छशिशेखरः ॥ प्रोवाच



१ एषा कथाऽस्मिन्खण्ड एव पुराप्यागतास्ति । अत्र सर्वेषु पुस्तकेषु पुनः सा दृश्यते–किंचित्पूर्वापेक्षया भेदोऽस्ति । तस्माद्देशात्रापि पाठक्रमागता तथैव स्थापिताऽस्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तव दास्यामि राज्यं त्रैलोक्यसंभवम् ॥ ३० ॥ ततः संप्रेषयामास दूतं तस्य विचक्षणम् ॥ गणेशं वीरभद्राख्यं गत्वा तं ब्रूहि चांधकम् ॥ ३१ ॥ ममादेशात्परित्यज्य स्वर्गं गच्छ धरातलम् ॥ पितृपैतामहं स्थानं राज्यं तत्र समाचर ॥ ३२ ॥ परित्यजस्व यज्ञांशान्नो चेद्धंतास्मि सत्वरम् ॥ स गत्वा चांधकं प्राह यथोक्तं शंभुना स्फुटम् ॥ ३३ ॥ सविशेषमहाबुद्धिः स्वामिकार्यप्रसिद्धये ॥ अथ तं चांधकः प्राह प्रविहस्य महाबलः ॥ ॥ ३४ ॥ अवध्यो हि यथा दूतस्तेन त्वां न निहन्म्यहम् ॥ क स्याद्वै शंकरोनाम यो मामेवं प्रभाषते ॥ ३५ ॥ न मां वेत्ति स किं मूढः किं वा मृत्यु मभीप्सते ॥ ३६ ॥ अथवा सत्यमेवैतान्निर्विण्णो जीविताच्च सः॥ दरिद्रोपहतो नित्यं सर्वभोगविवर्जितः ॥ ३७ ॥ श्मशाने क्रीडनं यस्य भस्म गात्रविलेपनम् ॥ भूषणं चाहयो वस्त्रं दिशो यस्य जटालका ॥ ३८ ॥ कस्तस्य जीवितेनार्थस्तेनेदं मां ब्रवीति सः॥ तस्माद्गत्वा द्रुतं ब्रूहि मद्वाक्यं दूत सस्फुटम् ॥ ३९ ॥ त्यक्त्वा कैलासमेनं त्वं वाराणस्यां तपः कुरु ॥ मया स्थानमिदं दत्तं कैलासं स्वसुतस्य च ॥ ४० ॥ वृकस्यापि न सन्देहो विभवेन समन्वितम् ॥ नो चेत्प्राणान्हरिष्यामि सेंद्रस्य तव शंकर ॥ ४१ ॥ तच्छ्रुत्वा वीरभद्रस्तु निर्भर्त्स्य च मुहुर्मुहुः ॥ क्रोधेन महताविष्टः कैलासं समुपाविशत् ॥ ४२ ॥ ततः स कथयामास तद्वाक्यं च पिनाकिनः ॥ अतिक्रूरं विशेषेणः तत क्रुद्धः पिनाकधृक् ॥ ४३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये जलशाय्युपाख्याने ब्रह्मदत्तवरप्रदानोद्धतान्धकासुरकृतशंकराज्ञावमाननवर्णनंनामाष्टाविंशत्युत्तरद्विशततमोऽध्यायः ॥ २२८ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एतास्मिन्नंतरे शम्भुर्गणैः सर्वैः समावृतः ॥ इन्द्राद्यैश्च सुरैः सर्वैः क्रोधसंरक्तलोचनः ॥ जगाम वृषमारुह्य पुरीं चैवामरावतीम् ॥ १ ॥ अंधकोऽपि समालोक्य संप्राप्तां देववाहिनीम् ॥ सगणां च महादेवं परितोषं परं गतः ॥ २ ॥ निश्चक्रामाथ युद्धाय बलेन चतुरंगिणा ॥ वरं स्यंदनमारुह्य सुश्वेताश्ववहं शुभम् ॥ ३ ॥ ततः समभवद्युद्धं देवानां दानवैः सह ॥ गणैश्च विकृताकारैर्मृत्युं कृत्वा निवर्तनम् ॥ ४ ॥ एकवर्षसहस्रांतं यावद्युद्धमवर्तत ॥ दिनेदिने क्षयं यांति तत्र देवा न दानवाः ॥ ५ ॥ ततो वर्षसहस्रांते संक्रुद्धः शशिशेखरः ॥ त्रिशूलेन समुद्यम्य स्वहस्तेन व्यभेदयत् ॥ ६ ॥ स विद्धोऽपि स्वयं तेन त्रिशूलेन महासुरः॥ ब्रह्म

१ समुपाद्रवत्–इ० पा० । २ मृत्युं कृत्वा निवर्तनम्–युद्धाय गत्वा यावच्छत्रवोऽग्रे युध्यन्ते न तावत्पराङ्मुखीभूय निवर्त्यतां, किंत्वग्रे शत्रूपर्येव तद्धननाय गन्तव्यम्–यदि शत्रूणां संमुखे हतः सन्भूमौ पतेत्तदा भवतु नामाग्रे गमनान्निवर्तनम्–यावज्जीवं तु पराङ्मुखेन न भवितव्यम्–इति निश्चयं कृत्वा–इति तावदत्र तात्पर्यम्–एत एव च संशप्तका योधा इत्युच्यन्ते–तल्लक्षणं चोक्तममरसिंहेन–"संशप्तकास्तु समयात्संग्रामादनिवर्तिनः।" इति । अत एव लौकिकोक्तिरियं प्रचलितास्ति "[illegible]"–शब्द[illegible]यायां [illegible]यते–"जत्र मरतेहैं, तत्र हटतेहैं" इति ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



णो वरमाहात्म्यान्नैव प्राणैर्वियुज्यते ॥ ७ ॥ ततो भूयोऽपि चोत्थाय चक्रे युद्धं महात्मना ॥ जघान च स संक्रुद्धो विशेषेण बहून्गणान् ॥ ८ ॥ शंकरं ताडयामास गदाघातैर्मुहुर्मुहुः ॥ ९ ॥ एवं वर्षसहस्रांतमभूत्सार्द्धं पिनाकिना ॥ रौद्रं युद्धमन्धकस्य सर्वलोकभयावहम् ॥ १० ॥ त्रिशूलभिन्नो दैत्यः स यदा मृत्युं न गच्छति ॥ उत्थायोत्थाय कुरुते प्रहारान्गदया बली ॥ ११ ॥ तथा तं शंकरो ज्ञात्वा मृत्युना परिवर्जितम् ॥ ब्रह्मणो वरदानेन सर्वेषां च दिवौकसाम् ॥ १२ ॥ ततो निर्भिद्य शूलाग्रैः प्रोत्क्षिप्य गगनांगणे ॥ छत्रवद्धारयामास लंबमानमधोमुखम् ॥ अक्षरद्रुधिरं भूमौ गात्रेभ्यो वर्ष्मसंभवम् ॥ १३ ॥ यावद्वर्षसहस्रांते चर्मास्थि स्नायुरेव च ॥ धातुत्रयं स्थितं तस्य नष्टमन्यच्चतुष्टयम् ॥ १४ ॥ स ज्ञात्वा बलसंहीनमात्मानं धातुसंक्षयात् ॥ सामोपायं ततश्चक्रे स्तुत्वा सार्धं पिनाकिना ॥ १५ ॥ ॥ अन्धक उवाच ॥ ॥ न त्वं देवो मया ज्ञातो वाग्दुष्टेन दुरात्मना ॥ ईदृग्वीर्यसमोपेतस्तद्युक्तं भवता कृतम् ॥ १६ ॥ अनुरूपं मदांधस्याविवेकस्य सुरोत्तम ॥ स्ववीर्यमदयुक्तस्य विवेकरहितस्य च ॥ १७ ॥ दुर्विनीतः श्रियं प्राप्य विद्यामैश्वर्यमेव च ॥ न तिष्ठति चिरं कालं यथाऽहं मदगर्वितः ॥ १८ ॥ पापोऽहं पापकर्माऽहं पापात्मा पापसंभवः ॥ त्राहि मां देव ईशान सर्वपापहरो भव ॥ १९ ॥ दुःखितोऽहं वराकोऽहं दीनोऽहं शक्तिवर्जितः ॥ त्रातुमर्हसि मां देव प्रपन्नं शरणं विभो ॥ २० ॥ दुष्टोऽहं पापयुक्तोऽहं सांप्रतं परमेश्वर ॥ तेन बुद्धिरियं जाता तवोपरि ममानघ ॥ २१ ॥ सर्वपापक्षये जाते शिवे भवति भावना ॥ २२ ॥ नाममात्रमपि त्र्यक्ष यस्ते कीर्तयति प्रभो ॥ सोऽपि मुक्तिमवाप्नोति किं पुनः पूजने रतः ॥ २३ ॥ तव पूजाविहीनानां दिनान्यायांति यांति च ॥ यानि देव मृतानां च तानि यांति न जीवताम् ॥ २४ ॥ कुष्ठी वा रोगयुक्तो वा पंगुर्वा बधिरोऽपि वा ॥ मा भूत्तस्य कुले जन्म शंभुर्यत्र न देवता ॥ २५ ॥ तस्मान्मोचय मां देव स्वागतं कुरु सांप्रतम् ॥ गतो मे दानवो भावस्त्यक्तं राज्यं तथा विभो ॥ ॥ २६ ॥ त्यक्ताः पुत्राश्च पौत्राश्च पत्न्यश्च विभवैः सह ॥ त्रिः सत्येन सुरश्रेष्ठ तव पादौ स्पृशाम्यहम् ॥ २७ ॥ तस्य तद्वचनं श्रुत्वा ज्ञात्वा तं गतकल्मषम् ॥ उत्तार्य शनकैः शूलाद्विनयावनतं स्थितम् ॥ २८ ॥ ततो नाम स्वयं चक्रे भृंगिरीटिरिति प्रभुः ॥ अब्रवीच्च सदा मे त्वं वल्लभः संभविष्यसि ॥२९॥ नन्दिनोऽपि गजास्यस्य महाकालस्य पुत्रक ॥ तिष्ठ सौम्य मया सौख्यं न स्मरिष्यसि बांधवान् ॥३०॥ स तथेति प्रतिज्ञाय प्रणम्य

१ सौख्यम्—सुखेन—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शशिशेखरम् ॥ तस्थौ सर्वगणैर्युक्तः प्रभुसंश्रयसंयुतः ॥ ३१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वर क्षेत्रमाहात्म्ये भृंगीरिट्युत्पत्तिवर्णननामैकोनत्रिंशदुत्तरद्विशततमोऽध्यायः ॥ २२९ ॥ ॥छ॥ ॥ सूत उवाच ॥ ॥ एवं गणत्वमापन्ने ह्यन्धके दान वोत्तमे ॥ तस्य पुत्रो वृकोनाम निरुत्साहो द्विषज्जये ॥ १ ॥ भयेन महता युक्तो हतशेषैश्च दानवैः ॥ प्रविवेश समुद्रांतं सुदुर्गं ब्राह्मणोत्तमाः ॥ २ ॥ ततः शक्रः प्रहृष्टात्मा प्रणम्य वृषभध्वजम् ॥ तस्यादेशं समासाद्य प्रविवेशामरावतीम् ॥ ३ ॥ चकार च सुखी राज्यं त्रैलोक्येऽपि द्विजोत्तमाः॥ यज्ञ भागान्पुनर्लेभे यथार्थं च धरातले ॥ ४ ॥ एतस्मिन्नेव काले तु ह्यंधकस्य सुतो वृकः ॥ निष्क्रम्य सागराच्चूर्णं जंबूद्वीपं समागतः ॥५॥ हाटकेश्वरजं क्षेत्रं मत्वा पुण्यं सुसिद्धिदम् ॥ पित्रा यत्र तपस्तप्तमंधकेन दुरात्मना ॥ ६ ॥ सगुप्तस्तु तपस्तेपे[1]यथा वेत्ति न कश्चन ॥ ध्यायमानः सुरश्रेष्ठं भक्त्या कमलसंभवम् ॥७॥ यावद्वर्षसहस्रांतं जलाहारो द्वितीयकम् ॥ तपस्तेपे स दैत्येन्द्रो ध्यायमानः पितामहम् ॥ ८ ॥ वायुभक्षस्ततो जातस्तावत्कालं द्विजोत्तमाः ॥ अंगुष्ठाग्रेण भूपृष्ठं स्पर्शमानो जितेन्द्रियः ॥ ९ ॥ एवं च पञ्चमे प्राप्ते सहस्रे द्विजसत्तमाः ॥ ब्रह्मा तस्य गतस्तुष्टिं दृष्ट्वा तस्य तपो महत् ॥ १० ॥ ततोऽब्रवीत्तमागत्य तां गतां ब्राह्मणोत्तमाः ॥ भोभो वृक निवर्तस्व तपसोऽस्मात्सुदारुणात् ॥ ११ ॥ वरं वरय भद्रं ते यो नित्यं मन सि स्थितः ॥ १२ ॥ ॥ वृक उवाच ॥ ॥ यदि तुष्टोऽसि मे देव यदि देयो वरो मम ॥ जरामरणहीनं मां तत्कुरुष्व पितामह ॥ १३ ॥ ॥ श्रीब्र ह्मोवाच ॥ ॥ मम प्रसादतो वत्स जरामरणवर्जितः ॥ भविष्यसि न सन्देहः सत्यमेतन्मयोदितम् ॥ १४ ॥ एवमुक्त्वा ततो ब्रह्मा तत्रैवांतरधी यत ॥ वृकोऽपि कृतकृत्यस्त्वागतश्च स्वगृहं पितुः ॥ १५ ॥ गिरिं रैवतकं नाम सर्वर्तुकुसुमोज्ज्वलम् ॥ तत्र गत्वा निजामात्यैः समं मन्त्र्य[2] च सत्व रम् ॥ इन्द्रोपरि ततश्चक्रे यानं युद्धपरीप्सया ॥ १६ ॥ इंद्रोऽपि च परिज्ञाय दानवं तं महाबलम् ॥ जरामृत्युपरित्यक्तं प्रभावात्परमेष्ठिनः ॥ १७ ॥ परित्यज्य भयाच्चैव पुरीं चैवामरावतीम् ॥ ब्रह्मलोकं गतस्तूर्णं देवैः सर्वैः समन्वितः ॥ १८ ॥ एतस्मिन्नंतरे प्राप्तो वृकश्च त्रिदशालये ॥ ससैन्यप रिवारेण प्रहृष्टेन[3] समन्वितः ॥ १९ ॥ ततश्चेंद्रपदे तस्मिन्स्वयमेव व्यवस्थितः ॥ शुक्रात्प्राप्याभिषेकं च पुष्पस्नानसमुद्भवम् ॥ २० ॥ सोऽभिषि क्तस्तु शुक्रेण देवराज्यपदे वृकः ॥ स्थापयामास दैतेयान्देवतानां पदेषु च ॥ २१ ॥ आदित्यानां वसूनां च रुद्राणां मरुतामपि ॥ यज्ञभागकृते

१ नागरात्—इ० पा० । २ मन्त्र्य—मन्त्रयित्वा—इत्यर्थः । असमासे ल्यबार्षः । ३ प्रकृष्टेन—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



विप्राः शुक्रशासनमाश्रिताः ॥ २२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये जलशाय्यु
पाख्याने वृकेन्द्रराज्यलंभनवर्णनंनाम त्रिंशदुत्तरद्विशततमोऽध्यायः ॥ २३० ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ वृकोऽपि तत्समासाद्य राज्यं
त्रैलोक्यसंभवम् ॥ यदृच्छया जगत्सर्वं स समाज्ञापयत्तदा ॥ १ ॥ सोंऽधकस्य बले वीर्ये धैर्ये कोपे च दानवः ॥ सहस्रगुणितश्चासीद्रौद्रः परमदा
रुणः ॥ २ ॥ एतस्मिन्नंतरे कश्चिन्न मर्त्यो यजति क्षितौ ॥ न होमं नैव जाप्यं च दैत्यान्ज्ञात्वा सुरास्पदे ॥ ३ ॥ अथ यः कुरुते धर्मं होमं वा जप
मेव वा ॥ सुगुप्तस्थानमासाद्य करोत्यमरतुष्टये ॥ ४ ॥ अथ स्वर्गस्थिता दैत्या यज्ञभागविवर्जिताः ॥ तथा मर्त्योद्भवैर्भोगैः संदेहं परमं गताः ॥ ५ ॥
ततः कोपपरीतात्मा प्रेषयामास दानवः ॥ मर्त्यलोके चरान्गुप्तान्निपुणांश्चाब्रवीत्ततः ॥ ६ ॥ यः कश्चिद्देवतानां च प्रगृह्णाति करोति च ॥ तदर्थं
यजनं होमं दानं वा पृथिवीतले ॥ स च वध्यश्च युष्माभिर्मम वाक्यादसंशयम् ॥ ७ ॥ अथ ते तद्वचः श्रुत्वा दानवा बलवत्तराः ॥ गत्वा च मेदि
नीपृष्ठं गुप्ताः सर्पंति सर्वतः ॥ ८ ॥ यं कश्चिद्वीक्षयंतिस्म जपहोमपरायणम् ॥ स्वाध्यायं वा प्रकुर्वाणं तं निघ्नंति शितासिभिः ॥ ९ ॥ एतस्मिन्नेव
काले तु सांकृतिर्मुनिसत्तमः ॥ गुप्तश्चक्रे ततस्तस्यां गर्तायां छन्नवर्ष्मकः ॥ यत्र पूर्वं तपस्तप्तं वृकेण च द्विजाः पुरा ॥ १० ॥ अथ ते तं तदा दृष्ट्वा
तद्गुहायां व्यवस्थितम् ॥ भर्त्समानास्तपस्तच्च प्रोचुश्च परुषाक्षरैः ॥ ११ ॥ दृष्ट्वा तस्याग्रतः संस्थां गन्धपुष्पैश्च पूजिताम् ॥ वासुदेवात्मिकां
मूर्तिं चतुर्हस्तां द्विजोत्तमाः ॥ १२ ॥ ततस्ते शस्त्रमुद्यम्य निर्जघ्नुस्तं क्रुधान्विताः ॥ न शेकुस्ते यदा हंतुं संवृतं विष्णुतेजसा ॥ कुण्ठतां सर्वश
स्त्राणि गतानि विमलान्यपि ॥ १३ ॥ अथ वैलक्ष्यमापन्ना निर्विण्णाः सर्व एव ते ॥ तां वार्तां दानवेन्द्राय वृकायोचुश्च ते तदा ॥ १४ ॥ कश्चि
द्विप्रः समाधाय वैष्णवीं प्रतिमां पुरः ॥ तपस्तेपे महाभाग क्षेत्रे वै हाटकेश्वरे ॥ १५ ॥ यत्र त्वया तपस्तप्तं भीत्या सर्वदिवौकसाम् ॥ अपि
चौर्येण चास्माकं तपस्तपति तादृशम् ॥ १६ ॥ येन सर्वाणि शस्त्राणि कुण्ठतां प्रगतानि च ॥ तस्य गात्रे प्रहारैश्च तस्मात्कुरु यथोचितम् ॥
॥ १७ ॥ तेषां तद्वचनं श्रुत्वा वृकः कोपसमन्वितः ॥ जगाम सत्वरं तत्र यत्रासौ सांकृतिः स्थितः ॥ १८ ॥ स गत्वा वैष्णवीं मूर्तिं तामुत्क्षिप्य
सुदूरतः ॥ श्वभ्राद्बहिः प्रचिक्षेप भर्त्समानः पुनः पुनः ॥ १९ ॥ जघान पादघातेन दक्षिणेनेतरेण तम् ॥ अब्रवीन्मम वध्यस्त्वं यन्मच्छत्रुं जना
र्दनम् ॥ २० ॥ संपूजयसि चौर्येण तेन प्राणान्हराम्यहम् ॥ एवमुक्त्वाथ खड्गेन तं जघान स दैत्यपः ॥ २१ ॥ ततस्तस्य स खड्गस्तु तीक्ष्णोऽपि
द्विजसत्तमाः ॥ तस्य काये [1]प्रहीणस्तु शतधा समपद्यत ॥ २२ ॥ ततः कोपपरीतात्मा तं शशाप स सांकृतिः ॥ २३ ॥ यस्मात्पाप त्वयाहं च ॥२६६॥

१ प्रहीणः—प्रेरितः—इत्यर्थः । प्रणष्टस्तु—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पादघातैः प्रताडितः ॥ तस्मात्ते पततां पादौ सद्य एव धरातले ॥ २४ ॥ ॥ सूत उवाच ॥ ॥ उक्तमात्रे ततस्तेन पादौ तस्य द्विजोत्तमाः ॥ पतितौ मेदिनीपृष्ठे पंचशीर्षाविवोरगौ ॥ २५ ॥ एतस्मिन्नेव काले तु आक्रन्दः सुमहानभूत् ॥ वृकस्य सैनिकानां च नारीणां च विशेषतः ॥ ॥ २६ ॥ अथ देवाः परिज्ञाय तं तदा पंगुतां गतम् ॥ आगत्य मेरुपृष्ठं च निजघ्नुस्तत्परिग्रहम् ॥ २७ ॥ हतशेषाश्च दैत्यास्ते पातालांतःसमागताः ॥ वृकोऽपि पंगुतां प्राप्तस्तस्थौ तपसि सुस्थिरम् ॥ २८ ॥ सर्वैरंतःपुरैः सार्धं दुःखशोकसमन्वितः ॥ इन्द्रोऽपि प्राप्तवान्राज्यं तदा निहतकंटकम् ॥ २९ ॥ धर्मक्रियाः प्रवृत्ताश्च ततो भूयो रसातले ॥ ३० ॥ अथ दीर्घेण कालेन तस्य तुष्टः पितामहः ॥ उवाच तत्र चागत्य गर्त्तामध्ये द्विजोत्तमाः ॥ ३१ ॥ वृक तुष्टोऽस्मि ते वत्स वरं वरय सुव्रत ॥ अहं दास्यामि ते नूनं यद्यपि स्यात्सुदुर्लभम् ॥ ३२ ॥ ॥ वृक उवाच ॥ ॥ यदि तुष्टोऽसि मे देव यदि देयो वरो मम ॥ पाददानं तदा देव मम ब्रह्मन्समाचर ॥ पंगुता याति शीघ्रं मे येनेयं ते प्रसादतः[२] ॥ ३३ ॥ तच्छ्रुत्वा तं समानीय सांकृतिं तत्र पद्मजः ॥ प्रोवाच सांत्वपूर्वं च वृकस्यास्य द्विजोत्तम ॥ ३४ ॥ मद्वाक्यात्पंगुता याति येनास्य त्वं तथा कुरु ॥ ३५ ॥ ॥ ॥ सांकृतिरुवाच ॥ ॥ अनृतं नोक्तपूर्वं मे स्वैरेष्वपि पितामह ॥ ज्ञायते देवदेवेश तत्कथं तत्करोम्यहम् ॥ ३६ ॥ ॥ ब्रह्मोवाच ॥ ॥ मम भक्तिपरो नित्यं वृकोऽयं दैत्यसत्तमः ॥ पौत्रस्त्वं दयितो नित्यं तेन त्वां प्रार्थयाम्यहम् ॥ ३७ ॥ तव वाक्यं च नो मिथ्या कर्तुं शक्नोमि सन्मुने ॥ ३८ ॥ ॥ सांकृतिरुवाच ॥ ॥ एष दैत्यः सुदुष्टात्मा देवानामहिते स्थितः ॥ विशेषाद्वासुदेवस्य गुरोर्मम महात्मनः ॥ ३९ ॥ पंगुतामर्हति प्रायः पापात्मा द्विजदूषकः ॥ बलेन महता युक्तो जरामरणवर्जितः ॥ ४० ॥ पुरा कृतस्त्वया देव स चेत्पादाववाप्स्यति ॥ हनिष्यति जगत्सर्वं सदेवासुरमानुषम् ॥ ४१ ॥ तस्मात्तिष्ठतु तद्रूपो न कल्पं कर्तुमर्हसि ॥ त्वयापि चिन्ता कर्तव्या त्रैलोक्यस्य यतः प्रभो ॥ ॥ ४२ ॥ ॥ ब्रह्मोवाच ॥ ॥ प्रावृट्कालेःतुःसञ्जाते यानं कर्तुं न युज्यते ॥ विजिगीषोर्विशेषेण मुक्त्वा शीतातपागमम् ॥ ४३ ॥ तस्मा च्च चतुरो मासान्वार्षिकान्पादसंयुतः ॥ अगम्यः सर्वलोकानां कुर्यात्कर्माणि धैर्यतः ॥ ४४ ॥ तद्भूयात्पादसंयुक्तः[३] स वृको दानवोत्तमः ॥ येन क्षेमं च देवानां द्विजानां जायते द्विज ॥ ४५ ॥ एवं कृते न मिथ्या ते वाक्यं विप्र भविष्यति ॥ फलं च तपसस्तस्य न वृथा संभविष्यति ॥ ४६ ॥ ॥ सूत उवाच ॥ ॥ बाढमित्येव तेनोक्ते सांकृतेन महात्मना ॥ उत्थितौ सहसा पादौ तस्य गात्रात्पुनर्नवौ ॥ ४७ ॥

१ पतताम्—लोटः प्रथमपुरुषस्य द्विवचनमिदम्—पतितौ स्याताम्—इत्यर्थः । २ प्रसादतः—प्रसादेन—इत्यर्थः । सार्वविभक्तिकस्तसिः । ३ तद्भूयः—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पुनश्च दानवो रौद्रः पंगुत्वं समपद्यत ॥ तस्यामेव तु गर्तायां संतिष्ठति द्विजोत्तमाः॥४८॥मासानष्टौ स दुःखेन सकलत्रः सबांधवः ॥ स्मरमाणो मह द्वैरं देवैः सार्धं दिवानिशम्॥४९॥अन्यांश्च चतुरो मासान्निष्क्रम्य स रुषान्वितः॥ सदा पीडयते देवान्सहेंद्रान्मानुषानपि ॥५०॥ विध्वंसयति सर्वाणि धर्मस्थानानि यानि च ॥५१॥ विध्वंसयति देवानां स्त्रियो मासचतुष्टयम् ॥ उद्यानानि च सर्वाणि सपुराणि गृहाणि च ॥५२॥ ततो देवाः समभ्येत्य देवदेवं जनार्दनम् ॥ क्षीराब्धौ संस्थितं नित्यं शेषपर्यंकशायिनम्॥५३॥ चतुरो वार्षिकान्मासांस्तत्र स्थित्वा तदंतिके ॥ मासानष्टौ पुनर्जग्मुस्त्रिदिवं प्रति निर्भयाः ॥ ५४ ॥ तस्मिन्पंगुत्वमापन्ने दैत्ये परमदारुणे ॥ कस्यचित्त्वथ कालस्य देवराजो बृहस्पतिम् ॥ प्रोवाच दुःखसंतप्त आषाढांते सुरो त्तमः ॥ ५५ ॥ गुरो स मासः संप्राप्तः प्रावृट्कालो भयावहः ॥ आगमिष्यति यत्रासौ लब्धपादो वृकासुरः ॥५६॥ गन्तव्यं च ततोऽस्माभिः क्षीरोदे केशवालये ॥ मैवं दीनैस्तथा भाव्यं पराश्रयनिवासिभिः ॥ ५७ ॥ स्वगृहाणि परित्यज्य शयनान्यासनानि च ॥ वाहनानि विचित्राणि यच्चान्य दयितं गृहे ॥ ५८ ॥ तस्मात्कथय चास्माकमुपायं कञ्चिदेव हि ॥ व्रतं वा नियमं वाथ होमं वा मुनिसत्तम ॥ ५९ ॥ अशून्यं शयनं येन स्वकलत्रेण जायते ॥ तथा न गृहसंत्यागः स्वकीयस्य प्रजायते ॥ ६० ॥ निर्विण्णोऽहं निजस्थानभ्रंशाद्द्विजवरोत्तम ॥ वर्षेवर्षे च सम्प्राप्ते स्थानकस्य च्युति र्भवेत् ॥ ६१ ॥ पुनर्भूमौ शयिष्यामि यावन्मासचतुष्टयम् ॥ निष्कलत्रो भयोद्विग्नो ब्रह्मचर्यपरायणः ॥ ६२ ॥ तस्य तद्वचनं श्रुत्वा भयार्तस्य बृहस्पतिः ॥ प्रोवाच सुचिरं ध्यात्वा ततो देवं शतक्रतुम् ॥ ६३ ॥ अशून्यशयनंनाम व्रतमस्ति महत्तपः ॥ विष्णोराराधनार्थाय तत्कुरुष्व समा हितः ॥ ६४ ॥ देवो यत्रास्ति विष्णुः स क्षीराब्धौ मधुसूदनः ॥ जलशायी जगद्योनिः स दास्यति हितं च ते ॥ ६५ ॥ यथा न शून्यं शयनं गृह भंगः प्रजायते ॥ सर्वशत्रुविनाशश्च तत्प्रसादेन वासव ॥ ६६ ॥ ॥ सूत उवाच ॥ ॥ तस्मिन्व्रते ततश्चीर्णे ह्यशून्यशयनात्मके ॥ तुतोष भगवा न्विष्णुस्ततः प्रोवाच देवपम् ॥ ६७ ॥ शक्र तुष्टोऽस्मि भद्रं ते वरं वरय सुव्रत ॥ व्रतेनानेन चीर्णेन चातुर्मास्योद्भवेन च ॥ तस्मात्प्रार्थय देवेन्द्र नित्यं यन्मनसि स्थितम् ॥ ६८ ॥ ॥ इन्द्र उवाच ॥ ॥ कृष्ण जानासि त्वं चापि यश्च मेऽत्र पराभवः ॥ क्रियते दानवेन्द्रेण वृकेण सुदुरा त्मना ॥ ६९ ॥ ममाष्टमासिकं राज्यं त्रैलोक्येऽपि व्यवस्थितम् ॥ शेषांश्च चतुरो मासान्वर्षेवर्षे समेति सः ॥ ७० ॥ एवं ज्ञात्वा सुरश्रेष्ठ दयां कृत्वा ममोपरि ॥ तथा कुरु यथा राज्यं मम स्यात्सार्वकालिकम् ॥ ७१ ॥ ॥ विष्णुरुवाच ॥ ॥ अजरश्चामरश्चापि स कृतः पद्मयोनिना ॥ तत्कथं जीवमानेन तेन राज्यं भवेत्तव ॥ ७२ ॥ परं तथापि देवेन्द्र करिष्यामि हितं तव ॥ ७३ ॥ क्षीरार्णवं परित्यज्य हाटकेश्वरसंज्ञिते ॥ क्षेत्रे गत्वा समं



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लक्ष्म्या तस्योपरि ततः परम् ॥ ७४ ॥ करिष्यामि त्वहं शक्र शयनं यत्नमास्थितः ॥ यावच्च चतुरो मासान्यथा स न चलिष्यति ॥ ७५ ॥ तस्मा
त्स्थानात्सहस्राक्ष मद्भारेण प्रपीडितः ॥ वर्षेवर्षे सदा कार्यं मया तत्सुहितं तव ॥ ७६ ॥ तस्माद्गच्छाधुना स्वर्गे कुरु राज्यमकण्टकम् ॥ प्रावृट्
काले तु संप्राप्ते न भीः कार्या तदुद्भवा ॥ ७७ ॥ यो मां तत्र शयानं तु व्रतेनानेन देवप ॥ पूजयिष्यति सद्भक्त्या तस्य दास्यामि वांछितम् ॥ ७८ ॥
॥ सूत उवाच ॥ एवमुक्त्वा हृषीकेशो विससर्ज शतक्रतुम् ॥ निःशेषभयनिर्मुक्तं स्वराज्यपरिवृद्धये ॥७९॥ आषाढस्य सिते पक्ष एकादश्या दिनेसदा ॥
हाटकेश्वरजे क्षेत्रे तत्रागत्य स्वयं विभुः ॥ ८० ॥ वृकोपरि ततश्चक्रे शयनं यत्नमास्थितः ॥ तेनाक्रांतस्ततः सोऽपि शक्नोति चलितुं न हि ॥ ८१ ॥
मृतप्रायस्ततो नित्यं तद्भारेण प्रपीडितः ॥ कार्तिकस्य सिते पक्ष एकादश्या दिने स्थिते ॥ ८२ ॥ उत्थानं कुरुते विष्णुः क्षीरोदं प्रति गच्छति ॥
सोऽपि सांकृतिशापेन वृकः पंगुत्वमाप्नुयात् ॥ ८३ ॥ एवं च चतुरो मासान्न त्यजेच्छयनं हरिः ॥ भयात्तस्यासुरेंद्रस्य दानवस्य दुरात्मनः ॥
॥ ८४ ॥ तत्र मर्त्यैः क्रिया सर्वाः क्रियंते न मखोद्भवाः ॥ यस्मात्स यज्ञपुरुषो न सुप्तो भागमश्नुते ॥ ८५ ॥ तथा यज्ञाश्च ये सर्वे कन्यादानादि
काः शुभाः ॥ ते सर्वे न क्रियंते च चूडाकरणपूर्वकाः ॥ ८६ ॥ भुक्त्वान्नप्राशनंनाम सीमंतोन्नयनं तथा ॥ तस्मात्सुप्ते जगन्नाथे ताः सर्वाः स्युर्वृथा
द्विजाः ॥ ८७ ॥ व्रतं वा नियमं वाथ तस्मिन्यः कुरुते नरः ॥ प्रसुप्ते देवदेवेशे तत्सर्वं निष्फलं भवेत् ॥८८॥ तस्मात्सर्वप्रयत्नेन संप्रसुप्ते जनार्दने ॥
व्रतस्थैर्मानवैर्भाव्यं तस्य देवस्य तुष्टये ॥ ८९ ॥ एकादश्यां दिने प्राप्ते शयने बोधने हरेः ॥ यत्किंचित्क्रियते कर्म श्रेष्ठं तच्चाक्षयं भवेत् ॥ ९० ॥
किंवात्र बहुनोक्तेन क्रियते यद्व्रतं नरैः ॥ तेन तुष्टिं परां याति दैत्योपरि स्थितो हरिः ॥९१॥ एवं स भगवान्प्राह सुप्तस्तत्र जनार्दनः ॥ किं वा तस्य
ज्वरो जातो महती वेदनापि च ॥ ९२ ॥ तस्मिन्नहनि पापात्मा योऽन्नमश्नाति मानवः ॥ तस्मात्सर्वप्रयत्नेन संप्राप्ते हरिवासरे ॥ ९३ ॥ अन्यस्मि
न्नपि भोक्तव्यं न नरेण विजानता ॥ किं पुनः शयनं यत्र कुरुते यत्र बोधनम् ॥ ९४ ॥ ॥ सूत उवाच ॥ ॥ एतद्वः सर्वमाख्यातं यत्पृष्टोऽस्मि द्विजो
त्तमाः ॥ हाटकेश्वरजे क्षेत्रे यस्माच्छेते जनार्दनः ॥ ९५ ॥ क्षीराब्धिं संपरित्यज्य सदा मासचतुष्टयम् ॥ श्रूयतां च फलं यत्स्यात्तस्मिन्नाराधिते
विभो ॥ ९६ ॥ चतुरो वार्षिकान्मासान्यस्तं पूजयते विभुम् ॥ व्रतस्थः स नरो याति यत्र देवः स संस्थितः ॥ ९७ ॥ किं दानैर्बहुभिर्दत्तैः किं व्रतैः
किमुपोषितैः ॥ तत्र यः पुंडरीकाक्षं सुप्तं पूजयति ध्रुवम् ॥ ९८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्व
रक्षेत्रमाहात्म्ये जलशाय्युपाख्यान एकादशीव्रतमाहात्म्यवर्णनंनामैकत्रिंशदुत्तरद्विशततमोऽध्यायः ॥ २३१ ॥ ॥ ऋषय ऊचुः ॥ ॥ प्रसुप्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



देवदेवेशे शंखचक्रगदाधरे ॥ यच्चान्यदपि कर्तव्यं नियमो व्रतमेव वा ॥ १ ॥ होमो वाथ जपो वाथ दानं वा तद्वदस्व नः ॥ ॥ सूत उवाच ॥ ॥ यः कश्चिन्नियमो विप्राः प्रसुप्ते गरुडध्वजे ॥ २ ॥ अनंतफलदः स स्यादित्युवाच पितामहः ॥ तस्मात्सर्वप्रयत्नेन कश्चिद्ग्राह्यो विजानता ॥ ३ ॥ नियमो वा जपो होमः स्वाध्यायो व्रतमेव वा ॥ कर्तव्यं ब्राह्मणश्रेष्ठास्तुष्ट्यर्थं चक्रपाणिनः ॥ ४ ॥ चतुरो वार्षिकान्मासानेकभक्तेन यो नयेत् ॥ वासुदेवं समुद्दिश्य स धनी जायते नरः ॥ ५ ॥ नक्तैर्भोजनं कुर्याद्यः प्रसुप्ते जनार्दने ॥ स धनी रूपसंपन्नः सुमतिश्च प्रजायते ॥ ६ ॥ एकांतरोपवासैश्च यो नयेद्द्विजसत्तमाः ॥ चतुरो वार्षिकान्मासान्वैकुंठे स सदा वसेत् ॥ ७ ॥ षष्ठान्नकालभोजी स्याद्यः प्रसुप्ते जनार्दने ॥ राजसूयाश्वमेधाभ्यां स कृत्स्नं फलमाप्नुयात् ॥ ८ ॥ त्रिरात्रोपोषितो यस्तु चतुर्मासान्सदा नयेत् ॥ न स भूयोऽपि जायेत संसारेऽत्र कथंचन ॥ ९ ॥ सायंप्रातःपरो भूत्वा चतुर्मासान्सदा नयेत् ॥ अग्निष्टोमस्य यज्ञस्य स फलं लभते नरः ॥ १० ॥ अयाचितं चरेद्यस्तु प्रसुप्ते मधुसूदने ॥ न विच्छेदो भवेत्तस्य कदाचित्सह बंधुभिः ॥ ११ ॥ तैलाभ्यंगं च यो जह्याद्घृताभ्यंगं विशेषतः ॥ चतुरो वार्षिकान्मासान्स स्वर्गे भोगभाग्भवेत् ॥ १२ ॥ ब्रह्मचर्येण यो मासांश्चतुरोऽपि नयेन्नरः ॥ विमानवरमारूढः स स्वर्गे स्वेच्छया वसेत् ॥ १३ ॥ यः स्नानं चतुरो मासान्कुरुते तैलवर्जितम् ॥ मधुमांसपरित्यागी स भवेन्मुक्तिभाक्सदा ॥ १४ ॥ वर्जयेच्छ्रावणे शाकं दधि भाद्रपदे च यः ॥ क्षीरमाश्वयुजे मासि कार्तिके च सदामिषम् ॥ १५ ॥ न स पापेन लिप्येत संवत्सरकृते पुनः ॥ एतत्प्राह द्विजश्रेष्ठा मनुः स्वायंभुवो वचः ॥ १६ ॥ शाके संक्रमते ब्रह्मा श्रावणे मासि संस्थिते ॥ दध्नि भाद्रपदे विष्णुः क्षीरे चाश्वयुजे हरः ॥ १७ ॥ त्रयोऽपि कार्तिके मासि संक्रमंति तथाऽऽमिषे ॥ तस्मादेतान्स दैवेषु सर्वथा परिवर्जयेत् ॥ १८ ॥ यः कांस्यं वर्जयेन्मर्त्यः प्रसुप्ते गरुडध्वजे ॥ स फलं प्राप्नुयात्कृत्स्नं वाजपेयातिरात्रयोः ॥ १९ ॥ अक्षारलवणाशी च यो भवेद्ब्राह्मणोत्तमः ॥ तस्यापि सकलाः पूर्ताः प्रभवंति सदा ततः ॥ २० ॥ यो होमं चतुरो मासान्प्रकरोति तिलाक्षतैः ॥ स्वाहांतैर्वैष्णवैर्मंत्रैर्न स रोगेण युज्यते ॥ २१ ॥ यो जपेत्पौरुषं सूक्तं स्नात्वा विष्णोः स्थितोऽग्रतः ॥ मतिस्तस्य विवर्धेत शुक्लपक्षे यथोडुराट् ॥ २२ ॥ शतमष्टोत्तरं यावत्फलहस्तः प्रदक्षिणाम् ॥ करोति विष्णोर्मौनेन न स पापेन लिप्यते ॥ २३ ॥ मिष्टान्नं ब्राह्मणेंद्राणां यो ददाति स्वशक्तितः ॥ विशेषात्कार्तिके मासि सोऽग्निष्टोमफलं लभेत् ॥ २४ ॥ यः स्वाध्यायं चतुर्वेदैर्विष्णोरायतने चरेत् ॥ चतुरो वार्षिकान्मासान्स विद्वान्सर्वदा भवेत् ॥ २५ ॥

१ सायं प्रातः—एकस्मिन्दिने सायंकालभोजी—एकस्मिन्दिने प्रातःकालभोजी—इत्यर्थः।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नृत्यगीतादिकं यश्च कुर्याद्विष्णोः सदा गृहे ॥ अप्सरसोऽस्य कुर्वंति पुरतः स्वर्गतस्य च ॥ २६ ॥ यस्तु रात्रिदिनं विप्रो नृत्यगीतादिकं ददेत् ॥ चतुरो वार्षिकान्मासान्स गन्धर्वत्वमाप्नुयात् ॥ २७ ॥ एते च नियमाः सर्वे शक्यंते यदि भो द्विजाः ॥ कर्तुं च चतुरो मासानेकस्मिन्वाऽपि कार्त्तिके ॥ २८ ॥ तथापि चैव कर्तव्यं लोकद्वयमभीप्सता ॥ कार्तिक्यां ब्राह्मणश्रेष्ठा वैष्णवैः पुरुषैरिह ॥ २९ ॥ कांस्यं मांसं क्षुरं क्षौद्रं पुनर्भोजनमैथुने ॥ कार्तिके वर्जयेद्यस्तु य एतान्ब्राह्मणः सदा ॥ ३० ॥ पूर्वोक्तानां तु सर्वेषां नियमानां फलं लभेत् ॥ ३१ ॥ अथ यः कार्तिके मासि प्रासादस्योपरि द्विजाः ॥ जलशाय्याख्यदेवस्य कलशे दीपकं ददेत् ॥ पूर्वोक्तनियमानां च स षण्णां[1] फलभाग्भवेत् ॥ ३२ ॥ यद्यदिष्टतमं किंचित्सुप्राप्यं चैव यद्भवेत् ॥ नियमस्तस्य कर्तव्यश्चातुर्मास्ये शुभार्थिभिः ॥ ३३ ॥ नियमे च कृते दद्याद्ब्राह्मणाय तदेव हि ॥ नियमस्तु कृतो यस्य स्वशक्त्या स्यात्फलं ततः ॥ ३४ ॥ यो विना नियमं मर्त्यो व्रतं वा जाप्यमेव वा ॥ चतुर्मासान्नयेन्मूर्खो जीवन्नपि मृतो हि सः ॥३५॥ यथा काकयवाः प्रोक्ता यथारण्यास्तिलोद्भवाः ॥ नाममात्रप्रसिद्धाश्च तथा ते मानवा भुवि ॥ ३६ ॥ तस्मात्सर्वप्रयत्नेन कार्यो यत्नेन कार्तिके ॥ एकोऽपि नियमः कश्चित्सुसूक्ष्मोऽपि द्विजोत्तमाः ॥ ३७ ॥ एतद्वः सर्वमाख्यातं चातुर्मासीसमुद्भवम् ॥ व्रतानां नियमानां च माहात्म्यं विस्तराद्द्विजाः ॥३८॥ यश्चैतच्छृणुयान्नित्यं पठेद्वापि समाहितः ॥ चातुर्मासी कृतात्पापात्सोऽपि मुक्तिमवाप्नुयात् ॥ ३९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये जलशाय्युपाख्याने चातुर्मास्यव्रतनियमवर्णनंनाम द्वात्रिंशदुत्तरद्विशततमोऽध्यायः ॥ २३२ ॥छ॥

॥ ॥ ऋषय ऊचुः ॥ ॥ सूत सूत महाभाग श्रोतुमिच्छामहे वयम् ॥ चातुर्मास्यव्रतानां हि त्वत्तो माहात्म्यविस्तरम् ॥१॥ तदस्माकं महाभाग कृपां कृत्वाऽधुना वद ॥ त्वद्वचोऽमृतपानेन भूयः श्रद्धाभिवर्धते ॥२॥ ॥ सूत उवाच ॥ ॥ शृणुध्वं मुनयः सर्वे चातुर्मास्यव्रतोद्भवम् ॥ माहात्म्यं विस्तरेणैव कथयिष्यामि वोऽग्रतः ॥३॥ पुरा ब्रह्ममुखाच्छ्रुत्वा नानाव्रतविधानकम् ॥ नारदः परिपप्रच्छ भूयो ब्रह्माणमादरात् ॥४॥ ॥ नारद उवाच ॥ ॥ देवदेव महाभाग व्रतानि सुबहून्यपि ॥ श्रुतानि त्वन्मुखाद्ब्रह्मन्न तृप्तिमधिगच्छति ॥ ५ ॥ अधुना श्रोतुमिच्छामि चातुर्मास्यव्रतं शुभम् ॥ ६ ॥ ॥ ॥ ब्रह्मोवाच ॥ ॥ शृणु देवमुने मत्तश्चातुर्मास्यव्रतं शुभम् ॥ यच्छ्रुत्वा भारते खंडे नृणां मुक्तिर्न दुर्लभा ॥ ७ ॥ मुक्तिप्रदोऽयं भगवान्संसारोत्तारकारणम् ॥ यस्य स्मरणमात्रेण सर्वपापैः प्रमुच्यते ॥ ८ ॥ मानुष्यं दुर्लभं लोके तत्राऽपि च कुलीनता ॥ तत्रापि सदयत्वं च तत्र सत्संगमः

[1] कांस्यादिमैथुनांतानां पूर्वोक्तानां षण्णाम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



शुभः ॥ ९ ॥ सत्संगमो न यत्रास्ति विष्णुभक्तिर्व्रतानि च ॥ चातुर्मास्ये विशेषेण विष्णुव्रतकरः शुभः ॥ १० ॥ चातुर्मास्येऽव्रती यस्तु तस्य पुण्यं निरर्थकम् ॥ सर्वतीर्थानि दानानि पुण्यान्यायतनानि च ॥ ११ ॥ विष्णुमाश्रित्य तिष्ठंति चातुर्मास्ये समागते ॥ सुपुष्टेनापि देहेन जीवितं तस्य शोभनम् ॥ १२ ॥ चातुर्मास्ये समायाते हरिं यः प्रणमेद्बुधः ॥ कृतार्थास्तस्य विबुधा यावज्जीवं वरप्रदाः ॥ १३ ॥ संप्राप्य मानुषं जन्म चातुर्मास्यपराङ्मुखः ॥ तस्य पापशतान्याहुर्देहस्थानि न संशयः ॥ १४ ॥ मानुष्यं दुर्लभं लोके हरिभक्तिश्च दुर्लभा ॥ चातुर्मास्ये विशेषेण सुप्ते देवे जनार्दने ॥ १५ ॥ चातुर्मास्ये नरः स्नानं प्रातरेव समाचरेत् ॥ सर्वक्रतुफलं प्राप्य देववद्दिवि मोदते ॥ १६ ॥ चातुर्मास्ये तु यः स्नानं कुर्यात्सिद्धिमवाप्नुयात् ॥ तथा निर्झरणे स्नाति तडागे कूपिकासु च ॥ १७ ॥ तस्य पापसहस्राणि विलयं यांति तत्क्षणात् ॥ पुष्करे च प्रयागे वा यत्र क्वापि महाजले ॥ चातुर्मास्येषु यः स्नाति पुण्यसंख्या न विद्यते ॥ १८ ॥ रेवायां भास्करक्षेत्रे प्राच्यां सागरसंगमे ॥ एकाहमपि यः स्नातश्चातुर्मास्ये न दोषभाक् ॥ १९ ॥ दिनत्रयं च यः स्नाति नर्मदायां समाहितः ॥ सुप्ते देवे जगन्नाथे पापं याति सहस्रधा ॥ २० ॥ पक्षमेकं तु यः स्नाति गोदावर्यां दिनोदये ॥ स भित्त्वा कर्मजं देहं याति विष्णोः सलोकताम् ॥ २१ ॥ तिलोदकेन यः स्नाति तथा चैवामलोदकैः ॥ बिल्वपत्रोदकैश्चैव चातुर्मास्येन दोषभाक् ॥ २२ ॥ गंगां स्मरति यो नित्यमुदमात्रसमीपतः[1] ॥ तद्गांगेयं जलं जातं तेन स्नानं समाचरेत् ॥ २३ ॥ गंगाऽपि देवदेवस्य चरणांगुष्ठवाहिनी ॥ पापघ्नी सा सदा प्रोक्ता चातुर्मास्ये विशेषतः ॥ २४ ॥ यतः पापसहस्राणि विष्णुर्दहति संस्मृतः ॥ तस्मात्पादोदकं शीर्षे चातुर्मास्ये धृतं शिवम् ॥२५॥ चातुर्मास्ये जलगतो देवो नारायणो भवेत् ॥ सर्वतीर्थाधिकं स्नानं विष्णुतेजोंशसंगतम् ॥२६॥ स्नानं दशविधं कार्यं विष्णुनाम महाफलम् ॥ सुप्ते देवे विशेषेण नरो देवत्वमाप्नुयात् ॥२७॥ विना स्नानं तु यत्कर्म पुण्यकार्यमयं शुभम् ॥ क्रियते निष्फलं ब्रह्मंस्तत्प्रगृह्णंति राक्षसाः ॥२८॥ स्नानेन सत्यमाप्नोति स्नानं धर्मः सनातनः ॥ धर्मान्मोक्षफलं प्राप्य पुनर्नैवावसीदति ॥२९॥ ये चाध्यात्मविदः पुण्या ये च वेदांगपारगाः ॥ सर्वदानप्रदा ये च तेषां स्नानेन शुद्धता ॥३०॥ कृतस्नानस्य च हरिर्देहमाश्रित्य तिष्ठति ॥ सर्वक्रियाकलापेषु संपूर्णफलदो भवेत् ॥ ३१ ॥ सर्वपापविनाशाय देवतातोषणाय च ॥ चातुर्मास्ये जलस्नानं सर्वपापक्षयावहम् ॥ ३२ ॥ निशायां चैव न स्नायात्संध्यायां ग्रहणं विना ॥ उष्णोदकेन न स्नानं रात्रौ शुद्धिर्न जायते ॥ ३३ ॥ भानुसंदर्शनाच्छुद्धिर्विहिता सर्वकर्मसु ॥ चातुर्मास्ये विशेषेण जलशुद्धिस्तु

१ उदमात्रसमीपतः—यस्य कस्यापि जलमात्रस्य समीपे—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भाविनी ॥ ३४ ॥ अशक्त्या तु शरीरस्य भस्मस्नानेन शुध्यति ॥ मंत्रस्नानेन विप्रेंद्र विष्णुपादोदकेन वा ॥ ३५ ॥ नारायणाग्रतः स्नानं क्षेत्र तीर्थनदीषु च ॥ यः करोति विशुद्धात्मा चातुर्मास्ये विशेषतः ॥ ३६ ॥ इति श्रीस्कांदे महापुराणे एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शेषशाय्युपाख्याने चातुर्मास्यमाहात्म्ये ब्रह्मनारदसंवादे गंगोदकस्नानफलमाहात्म्यवर्णनंनाम त्रयस्त्रिंशदुत्तरद्विशततमोऽध्यायः॥२३३॥छ॥ ॥ ब्रह्मोवाच ॥ ॥ पितणां तर्पणं कुर्याच्छ्रद्धायुक्तेन चेतसा ॥ स्नानावसाने नित्यं च सुप्ते देवे महाफलम् ॥१॥ संगमे सरितोस्तत्र पितन्संतर्प्य देवताः ॥ जपहोमादिकर्माणि कृत्वा फलमनंतकम् ॥२॥ गोविंदस्मरणं कृत्वा पश्चात्कार्याः शुभाः क्रियाः ॥ एष एव पितृदेवमनुष्यादिषु तृप्तिदः ॥ ३ ॥ श्रद्धां धर्मयुतां नाम स्मृतिपूतानि कारयेत् ॥ कर्माणि सकलानीह चातुर्मास्ये गुणोत्तरे ॥ ४ ॥ सत्संगो द्विजभक्तिश्च गुरुदेवाग्नितर्पणम् ॥ गोप्रदानं वेदपाठः सत्क्रिया सत्यभाषणम् ॥ ५ ॥ गोभक्तिर्दानभक्तिश्च सदा धर्मस्य साधनम् ॥ कृष्णे सुप्ते विशेषेण नियमोऽपि महाफलः ॥ ६ ॥ ॥ नारद उवाच ॥ ॥ नियमः कीदृशो ब्रह्मन्फलं च नियमेन किम् ॥ नियमेन हरिस्तुष्टो यथा भवति तद्वद ॥७ ॥ ॥ ब्रह्मोवाच ॥ ॥ नियमश्चक्षुरादीनां क्रियासु विविधासु च ॥ कार्यो विद्यावता पुंसा तत्प्रयोगान्महासुखम् ॥ ८ ॥ एतत्षड्वर्गहरणं रिपुनिग्रहणं परम् ॥ अध्यात्ममूलमेतद्धि परमं सौख्यकारणम् ॥ ९ ॥ तत्र तिष्ठंति नियतं क्षमासत्यादयो गुणाः ॥ विवेकरूपिणः सर्वे तद्विष्णोः परमं पदम् ॥ १० ॥ कृत्वा भवति यज्ञान्यत्कृतकृत्यत्वमत्र तत् ॥ स्यात्तस्य तत्पूर्वजानां येन ज्ञातमिदं पदम् ॥ ११ ॥ तन्मुहूर्त्तमपि ध्यात्वा पापं जन्मशतोद्भवम् ॥ भस्म सायाति विहितं निरंजननिषेवणात् ॥ १२ ॥ प्रत्यहं संकुचत्यस्य क्षुत्पिपासादिकः श्रमः ॥ स योगी नियमी नित्यं हरौ सुप्ते विशिष्यते ॥ १३ ॥ चातुर्मास्ये नरो भक्त्या योगाभ्यासरतो न चेत् ॥ तस्य हस्तात्परिभ्रष्टममृतं नात्र संशयः ॥ १४ ॥ मनो नियमितं येन सर्वेच्छासु सदागतम् ॥ तस्य ज्ञाने च मोक्षे च कारणं मन एव हि ॥ १५ ॥ मनोनियमने यत्नः कार्यः प्रज्ञावता सदा ॥ मनसा सुगृहीतेन ज्ञानाप्तिरखिला ध्रुवम् ॥ १६ ॥ तन्मनः क्षमया ग्राह्यं यथा वह्निश्च वारिणा ॥ एकया क्षमया सर्वो नियमः कथितो बुधैः ॥ १७ ॥ सत्यमेकं परो धर्मः सत्यमेकं परं तपः ॥ सत्यमेकं परं ज्ञानं सत्ये धर्मः प्रतिष्ठितः ॥ १८ ॥ धर्ममूलमहिंसा च मनसा तां च चिंतयन् ॥ कर्मणा च तथा वाचा तत एतां समाचरेत् ॥ १९ ॥ परस्वहरणं चौर्यं सर्वदा सर्वमानुषैः ॥ चातुर्मास्ये विशेषेण ब्रह्मदेवस्ववर्जनम् ॥ २० ॥ अकृत्यकरणं चैव वर्जनीयं सदा बुधैः ॥ अहीनः सर्वकार्येषु यः सदा विप्र वर्तते ॥ २१ ॥ स च योगी महाप्राज्ञः प्रज्ञाचक्षुरहं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



नधीः ॥ अहंकारो विषमिदं शरीरे वर्त्तते नृणाम् ॥ २२ ॥ तस्मात्स सर्वदा त्याज्यः सुप्ते देवे विशेषतः ॥ अनीहया जितक्रोधो जितलोभो भवेन्नरः ॥ २३ ॥ तस्य पापसहस्राणि देहाद्यांति सहस्रधा ॥ मोहं मानं पराजित्य शमरूपेण शत्रुणा ॥ २४ ॥ विचारेण शमो ग्राह्यः सन्तोषेण तथा हि सः ॥ मात्सर्यमृजुभावेन नियच्छेत्स मुनीश्वरः ॥ २५ ॥ चातुर्मास्ये दयाधर्मो न धर्मो भूतविद्रुहाम् ॥ सर्वत्र सर्व दानेषु भूतद्रोहं विवर्जयेत् ॥ २६ ॥ एतत्पापसहस्राणां मूलं प्राहुर्मनीषिणः ॥ तस्मात्सर्वप्रयत्नेन कार्या भूतदया नृभिः ॥ २७ ॥ सर्वेषामेव भूतानां हरिर्नित्यं हृदि स्थितः ॥ स एव हि पराभूतो यो भूतद्रोहकारकः ॥ २८ ॥ यस्मिन्धर्मे दया नैव स धर्मो दूषितो मतः ॥ दयां विना न विज्ञानं न धर्मो ज्ञानमेव च ॥ २९ ॥ तस्मात्सर्वात्मभावेन दयाधर्मः सनातनः ॥ सेव्यः स पुरुषैर्नित्यं चातुर्मास्ये विशेषतः ॥ ३० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये चातुर्मास्यमाहात्म्ये शेषशाय्युपाख्याने ब्रह्म नारदसंवादे चातुर्मास्यनियमविधिमाहात्म्यवर्णनंनाम चतुस्त्रिंशदुत्तरद्विशततमोऽध्यायः ॥ २३४ ॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ दानधर्म प्रशंसंति सर्वधर्मेषु सर्वदा ॥ हरौ सुप्ते विशेषेण दानं ब्रह्मत्वकारणम् ॥ १ ॥ अन्नं ब्रह्म इति प्रोक्तमन्ने प्राणाः प्रतिष्ठिताः ॥ तस्मादन्नप्रदो नित्यं वारिदश्च भवेन्नरः ॥ २ ॥ वारिदस्तृप्तिमायाति सुखमक्षय्यमन्नदः ॥ वार्यन्नयोः समं दानं न भूतं न भविष्यति ॥ ३ ॥ मणिरत्नप्रवालानां रूप्य हाटकवाससाम् ॥ अन्येषामपि दानानामन्नदानं विशिष्यते ॥ ४ ॥ अन्नोदकप्रदानं च गोप्रदानं च नित्यदा ॥ वेदपाठो वह्निहोमश्चातुर्मास्ये महाफलम् ॥ ५ ॥ वैकुण्ठपदवाञ्छा चेद्विष्णुना सह संगमे ॥ सर्वपापक्षयार्थाय चातुर्मास्येऽन्नदो भवेत् ॥ ६ ॥ सत्यंसत्यं हि देवर्षे मयोक्तं तव नारद ॥ जन्मांतरसहस्रेषु नादत्तमुपतिष्ठते ॥ ७ ॥ तस्मादन्नप्रदानेन सर्वे हृष्यंति जन्तवः ॥ देवाश्च स्पृहयंत्येनमन्नदानप्रदायिनम् ॥ ८ ॥ आज्यं देयं च पात्रेषु श्रद्धया वस्त्रमिश्रितम् ॥ वस्त्रदानकरो मर्त्यश्चातुर्मास्ये न मानवः ॥ ९ ॥ भोजनं गुरुविप्राणां घृतदानं च सत्क्रिया ॥ एतानि यस्य तिष्ठन्ति चातुर्मास्ये न मानवः ॥ १० ॥ सद्धर्मः सत्कथा चैव सत्सेवा दर्शनं सताम् ॥ विष्णुपूजा रतिर्दाने चातुर्मास्येषु दुर्लभाः ॥ ११ ॥ पितॄनुद्दिश्य यो मर्त्यश्चातुर्मास्येऽन्नदो भवेत् ॥ सर्वपापविशुद्धात्मा पितृलोकमवाप्नुयात् ॥ १२ ॥ देवाः सर्वेऽन्नदानेन तृप्ता यच्छन्ति वांछितम् ॥ पिपीलिकाऽपि यद्गेहाद्भक्ष्यमादाय गच्छति ॥ १३ ॥ रात्रौ दिवाऽनिषिद्धान्नो ह्यन्नदानमनुत्तमम् ॥ हरौ सुप्ते हि पापघ्नं न वार्य मपि शत्रुषु ॥ १४ ॥ चातुर्मास्ये दुग्धदानं दधि तक्रं महाफलम् ॥ जन्मकाले येन बद्धः पिंडस्तद्दानमुत्तमम् ॥ १५ ॥ शाकप्रदाता नरकं



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यमलोकं न पश्यति ॥ वस्त्रदः सोमलोकं च वसेदाभूतसंप्लवम् ॥ १६ ॥ सुप्ते देवे यथाशक्ति ह्यन्यासु प्रतिमासु च ॥ पुष्पवस्त्रप्रदानेन सन्तानं नैव हीयते ॥ १७ ॥ चन्दनागुरुधूपं च चातुर्मास्ये प्रयच्छति ॥ पुत्रपौत्रसमायुक्तो विष्णुरूपो भवेन्नरः ॥ १८ ॥ सुप्ते देवे जगन्नाथे फलदानं प्रयच्छति ॥ विप्राय वेदविदुषे यमलोकं न पश्यति ॥ १९ ॥ विद्यादानं च गोदानं भूमिदानं प्रयच्छति ॥ विष्णुप्रीत्यर्थमेवेह स तारयति पूर्वजान् ॥ २० ॥ गुडसैंधवतैलादिमधुतिक्ततिलान्नदः ॥ देवतायास्समुद्दिश्य तासां लोकं प्रयाति हि ॥ २१ ॥ चातुर्मास्ये तिलान्दत्त्वा न भूयः स्तनपो भवेत् ॥ यवप्रदाता वसते वासवं लोकमक्षयम् ॥ २२ ॥ हूयेत हव्यं वह्नौ च दानं दद्याद्द्विजातये ॥ गावः सुपूजिताः कार्याश्चातुर्मास्ये विशेषतः ॥ २३ ॥ यत्किंचित्सुकृतं कर्म जन्मावधि सुसंचितम् ॥ चातुर्मास्ये गते पात्रे विमुखे यन्न दीयते ॥ २४ ॥ प्रणश्यति क्षणादेव वचनाद्यस्तु प्रच्युतः ॥ दिवसेदिवसे तस्य वर्द्धते च प्रतिश्रुतम् ॥ २५ ॥ तस्मान्नैव प्रतिश्राव्यं स्वल्पमप्याशु दीयते ॥ तावद्विवर्द्धते दानं यावत्तन्न प्रयच्छति ॥ २६ ॥ यो मोहान्मनुजो लोके यावत्कोटिगुणं भवेत् ॥ ततो दशगुणा वृद्धिश्चातुर्मास्ये प्रदातरि ॥ २७ ॥ नरके पतनं तस्य यावदिंद्राश्चतुर्दश ॥ अतस्तु सर्वदा देयं नरैर्यत्तु प्रतिश्रुतम् ॥ २८ ॥ अन्यस्मै न प्रदातव्यं प्रदत्तं नैव हारयेत् ॥ चातुर्मास्येषु यः शय्यां द्विजाग्र्याय प्रयच्छति ॥ २९ ॥ वेदोक्तेन विधानेन न स याति यमालयम् ॥ आसनं वारिपात्रं च भाजनं ताम्रभाजनम् ॥ ३० ॥ चातुर्मास्ये प्रयत्नेन देयं वित्तानुसारतः ॥ सर्वदानानि विप्रेभ्यो ददत्सुप्ते जगद्गुरौ ॥ ३१ ॥ आत्मानं पूर्वजैः सार्द्धं स मोचयति पातकात् ॥ गौर्भूश्च तिलपात्रं च दीपदानमनुत्तमम् ॥ ३२ ॥ ददद्द्विजातये मुक्तो जायते स ऋणत्रयात् ॥ ३३ ॥ स विश्वकर्ता भुवनेषु गोप्ता स यज्ञभुक्सर्वफलप्रदश्च ॥ दानानि वस्तुष्वधिदैवतं च यस्मिन्समुद्दिश्य ददाति मुक्तः ॥ ३४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शेषशाय्युपाख्याने चातुर्मास्यमाहात्म्ये ब्रह्मनारदसंवादे चातुर्मास्यदानमहिमवर्णनंनाम पञ्चत्रिंशदुत्तरद्विशततमोऽध्यायः ॥ ॥ २३५ ॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ इष्टवस्तुप्रदो विष्णुर्लोकश्चेष्टरुचिः सदा ॥ तस्मात्सर्वप्रयत्नेन चातुर्मास्ये त्यजेच्च तत् ॥ १ ॥ नारायणस्य प्रीत्यर्थं तदेवाक्षय्यमाप्यते ॥ मर्त्यस्त्यजति श्रद्धावान्सोऽनंतफलभाग्भवेत् ॥ २ ॥ कांस्यभाजनसंत्यागाज्जायते भूपतिर्भुवि ॥ पालाशपत्रे भुञ्जानो ब्रह्मभूयस्त्वमश्नुते ॥ ३ ॥ ताम्रपात्रे न भुञ्जीत कदाचिद्वा गृही नरः ॥ चातुर्मास्ये विशेषेण ताम्रपात्रं विवर्जयेत् ॥ ४ ॥ अर्कपत्रेषु भुञ्जानोऽनुपमं लभते फलम् ॥ वटपत्रेषु भोक्तव्यं चातुर्मास्ये विशेषतः ॥ ५ ॥ अश्वत्थपत्रसंभोगः कार्यो बुधजनैः सदा ॥ एकान्न



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



भोजी राजा स्यात्सकले भूमिमण्डले ॥ ६ ॥ तथा च लवणत्यागात्सुभगो जायते नरः ॥ गोधूमान्नपरित्यागाज्जायते जनवल्लभः ॥ ७ ॥
अशाकभोजी दीर्घायुश्चातुर्मास्येऽभिजायते ॥ रसत्यागान्महाप्राणी मधुत्यागात्सुलोचनः ॥ ८ ॥ मुद्गत्यागाद्रिपुमृती राजमाषाद्ध
नाढचता ॥ अश्वाप्तिस्तंडुलत्यागाच्चातुर्मास्येऽभिजायते ॥ ९ ॥ फलत्यागाद्बहुसुतस्तैलत्यागात्सुरूपिता ॥ ज्ञानी तुवरिसंत्यागाद्बलं वीर्यं
सदैव हि ॥ १० ॥ मार्गमांसपरित्यागान्नरकं न च पश्यति ॥ शौकरस्य परित्यागाद्ब्रह्मवासमवाप्नुयात् ॥ ११ ॥ ज्ञानं लावकसन्त्यागादाज्यत्यागे
महत्सुखम् ॥ आसवं सम्परित्यज्य मुक्तिस्तस्य न दुर्लभा ॥ १२ ॥ सबलः कनकत्यागाद्रूप्यत्यागेन मानुषः ॥ दधिदुग्धपरित्यागी गोलोके सुख
भाग्भवेत् ॥ १३ ॥ ब्रह्मा पायससंत्यागात्क्षिप्रात्यागान्महेश्वरः ॥ कन्दर्पोऽपूपसंत्यागान्मोदकत्याजकः सुखी ॥ १४ ॥ गृहाश्रमपरित्यागी बाह्या
श्रमनिषेवकः ॥ चातुर्मास्यं हरिप्रीत्यै न मातुर्जठरे शिशुः ॥ १५ ॥ नृपो मरीचसंत्यागाच्छुण्ठीत्यागेन सत्कविः ॥ शर्करायाः परित्यागाज्जायते
राजपूजितः ॥ १६ ॥ गुडत्यागान्महाभूतिस्तथा दाडिमवर्जनात् ॥ रक्तवस्त्रपरित्यागाज्जायते जनवल्लभः ॥ १७ ॥ पट्टकूलपरित्यागादक्षय्यं स्वर्ग
माप्नुयात् ॥ माषान्नचणकान्नस्य त्यागान्नैव पुनर्भवः ॥ १८ ॥ कृष्णवस्त्रं सदा त्याज्यं चातुर्मास्ये विशेषतः ॥ सूर्यसंदर्शनाच्छुद्धिर्नीलवस्त्रस्य दर्श
नात् ॥ १९ ॥ चंदनस्य परित्यागाद्गांधर्वं लोकमश्नुते ॥ कर्पूरस्य परित्यागाद्यावज्जीवं महाधनी ॥ २० ॥ कुसुम्भस्य परित्यागान्नैव पश्येद्यमाल
यम् ॥ केशरस्य परित्यागान्मनुष्यो राजवल्लभः ॥ २१ ॥ यक्षकर्दमसंत्यागाद्ब्रह्मलोके महीयते ॥ ज्ञानी पुष्पपरित्यागाच्छय्यात्यागे महत्सु
खम् ॥ २२ ॥ भार्यावियोगं नाप्नोति चातुर्मास्ये न संशयः ॥ अलीकवादसंत्यागान्मोक्षद्वारमपावृतम् ॥ २३ ॥ परमर्मप्रकाशश्च सद्यः पापसमा
गमः ॥ चातुर्मास्ये हरौ सुप्ते परनिन्दां विवर्जयेत् ॥ २४ ॥ परनिन्दा महापापं परनिन्दा महाभयम् ॥ परनिन्दा महद्दुःखं न तस्याः पातकं
परम् ॥ २५ ॥ केवलं निन्दने चैव तत्पापं लभते गुरु ॥ यथा शृण्वान एव स्यात्पातकी न ततः परः ॥ २६ ॥ केशसंस्कारसंत्यागात्तापत्रयविव
र्जितः ॥ नखरोमधरो यस्तु हरौ सुप्ते विशेषतः ॥ २७ ॥ दिवसेदिवसे तस्य गंगास्नानफलं भवेत् ॥ २८ ॥ सर्वोपायैर्विष्णुरेव प्रसाद्यो योगिध्येयः
प्रवरैः सर्ववर्णैः ॥ विष्णोर्नाम्ना मुच्यते घोरबन्धाच्चातुर्मास्ये स्मर्यतेऽसौ विशेषात् ॥ २९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहिता
यां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शेषशाय्युपाख्याने चातुर्मास्यमाहात्म्ये ब्रह्मनारदसंवाद इष्टवस्तुपरित्यागमहिमवर्णनंनाम षट्त्रिंशदुत्तरद्वि
शततमोऽध्यायः ॥ २३६ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ कदा विधिनिषेधौ च कर्तव्यौ विष्णुसन्निधौ ॥ युष्मद्वाक्यामृतं पीत्वा तृप्तिर्मम



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न विद्यते ॥ १ ॥ ॥ ब्रह्मोवाच ॥ ॥ कर्कसंक्रांतिदिवसे विष्णुं संपूज्य भक्तितः ॥ फलैरर्घ्यः प्रदातव्यः शस्तजंबूफलैः शुभैः ॥ २ ॥ जंबूद्वीपस्य संज्ञेयं फलेन च विजायते ॥ मन्त्रेणानेन विप्रेंद्र श्रद्धाधर्मसुसंयतैः ॥ ३ ॥ षण्मासाभ्यंतरे मृत्युर्यत्र क्वापि भवेन्मम ॥ तन्मया वासुदेवाथ स्वयमात्मा निवेदितः ॥ ४ ॥ ॥ इति मंत्रेणार्घ्यम् ॥ ॥ ततो विधिनिषेधौ च ग्राह्यौ भक्त्या हरेः पुरः ॥ चातुर्मास्ये समायाते सर्वलोकमहासुखे ॥ ५ ॥ विधिर्वेदविधिः कार्यो निषेधो नियमो मतः ॥ विधिश्चैव निषेधश्च द्वावेतौ विष्णुरेव हि ॥ ६ ॥ तस्मात्सर्वप्रयत्नेन सेव्य एव जनार्दनः ॥ विष्णोः कथा विष्णुपूजा ध्यानं विष्णोर्नतिस्तथा ॥ ७ ॥ सर्वमेव हरिप्रीत्या यः करोति स मुक्तिभाक् ॥ वर्णाश्रमविधेर्मूर्तिः सत्यो विष्णुः सनातनः ॥ ८ ॥ चातुर्मास्ये विशेषेण जन्मकष्टादिनाशनम् ॥ हरिरेव व्रताद्ग्राह्यो व्रतं देहेन कारयेत् ॥ देहोऽयं तपसा शोध्यः सुप्ते देवे तपोनिधौ ॥ ९ ॥ ॥ नारद उवाच ॥ ॥ किं व्रतं किं तपः प्रोक्तं ब्रह्मन्ब्रूहि सविस्तरम् ॥ सुप्ते देवे मया कार्यं कृतं यच्च महाफलम् ॥ १० ॥ ॥ ब्रह्मोवाच ॥ ॥ व्रतं विष्णुव्रतं विद्धि विष्णुभक्तिसमन्वितम् ॥ तपश्च धर्मवर्तित्वं कृच्छ्रादिकमथापि वा ॥ ११ ॥ शृणु व्रतस्य माहात्म्यं वक्ष्यामि प्रथमं तव ॥ ब्रह्मचर्यव्रतं सारं व्रतानामुत्तमं व्रतम् ॥ १२ ॥ ब्रह्मचर्यं तपः सारं ब्रह्मचर्यं महत्फलम् ॥ क्रियासु सकलास्वेव ब्रह्मचर्यं विवर्द्धयेत् ॥ १३ ॥ ब्रह्मचर्यप्रभावेण तप उग्रं प्रवर्त्तते ॥ ब्रह्मचर्यात्परं नास्ति धर्मसाधनमुत्तमम् ॥ १४ ॥ चातुर्मास्ये विशेषेण सुप्ते देवे गुणोत्तरम् ॥ महाव्रतमिदं लोके तन्निबोध सदा द्विज ॥ १५ ॥ नारायणमिदं कर्म यः करोति न लिप्यते ॥ शतत्रयं षष्टियुतं दिनमाहुश्च वत्सरे ॥ १६ ॥ तत्र नारायणो देवः पूज्यते व्रतकारिभिः ॥ सत्क्रियाममुकीं देव कारयिष्यामि निश्चयः ॥ १७ ॥ कुरुते तद्व्रतं प्राहुः सुप्ते देवे गुणोत्तरम् ॥ वह्निहोमो विप्रभक्तिः श्रद्धा धर्मे मतिः शुभा ॥ १८ ॥ सत्संगो विष्णुपूजा च सत्यवादो दया हृदि ॥ आर्जवं मधुरा वाणी सच्चरित्रे सदा रतिः ॥ १९ ॥ वेदपाठस्तथाऽस्तेयमहिंसा ह्रीः क्षमा दमः ॥ निर्लोभताऽक्रोधता च निर्मोहोऽममताऽरतिः ॥ २० ॥ श्रुतिक्रियापरं ज्ञानं कृष्णार्पितमनोगतिः ॥ एतानि यस्य तिष्ठंति व्रतानि ब्रह्मवित्तम ॥ २१ ॥ जीवन्मुक्तो नरः प्रोक्तो नैव लिप्यति पातकैः ॥ व्रतं कृतं सकृदपि सदैव हि महाफलम् ॥ २२ ॥ चातुर्मास्ये विशेषेण ब्रह्मचर्यादिसेवनम् ॥ अव्रतेन गतं येषां चातुर्मास्यं सदा नृणाम् ॥ २३ ॥ धर्मस्तेषां वृथा सद्भिस्तत्त्वज्ञैः परिकीर्तितः ॥ सर्वेषामेव वर्णानां व्रतचर्या महाफलम् ॥ २४ ॥ स्वल्पापि विहिता वत्स चातुर्मास्ये सुखप्रदा ॥ सर्वत्र दृश्यते विष्णुर्व्रतसेवापरैर्नृभिः ॥ २५ ॥ चातुर्मास्ये समायाते पालयेत्तत्प्रयत्नतः ॥ २६ ॥ भजस्व विष्णुं द्विजवह्नितीर्थ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वेदप्रभेदमयमूर्तिमजं विराजम् ॥ यत्प्रसादाद्भवति मोक्षमहातरुस्थस्तापं न यास्यति भवार्कसमुद्भवं तम् ॥ २७ ॥ इति श्रीस्कांदे महापुराण एका
शीतिसाहस्र्यां संहितायां षष्ठे नागरखंडे हाटकेश्वरक्षेत्रमाहात्म्ये शेषशाय्युपाख्याने ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये व्रतमहिमवर्णनंनाम सप्तत्रिं
शदुत्तरद्विशततमोऽध्यायः ॥ २३७ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ तपः शृणुष्व विप्रेंद्र विस्तरेण महामते ॥ यस्य श्रवणमात्रेण चातुर्मास्येऽ
घनाशनम् ॥ १ ॥ षोडशैरुपचारैश्च विष्णोः पूजा सदा तपः ॥ ततः सुप्ते जगन्नाथे महत्तप उदाहृतम् ॥ २ ॥ करणं पंचयज्ञानां
सततं तप एव हि ॥ तन्निवेद्य हरौ चैव चातुर्मास्ये महत्तपः ॥ ३ ॥ ऋतुयानं गृहस्थस्य तप एव सदैव हि ॥ चातुर्मास्ये हरिप्रीत्यै तन्निषेव्यं
महत्तपः ॥ ४ ॥ सत्यवादस्तपो नित्यं प्राणिनां भुवि दुर्लभम् ॥ सुप्ते देवपतौ कुर्वन्ननंतफलभाग्भवेत् ॥ ५ ॥ अहिंसादिगुणानां च पालनं सततं
तपः ॥ चातुर्मास्ये त्यक्तवैरं महत्तप उदारधीः ॥ ६ ॥ तप एव महन्मर्त्यैः पंचायतनपूजनम् ॥ चातुर्मास्ये विशेषेण हरिप्रीत्या समाचरेत् ॥ ७ ॥
॥ ॥ नारद उवाच ॥ ॥ पंचायतनसंज्ञेयं कस्योक्ता सा कथं भवेत् ॥ कथं पूजा च कर्तव्या विस्तरेणाशु तद्वद ॥ ८ ॥ ॥ ब्रह्मोवाच ॥ ॥
प्रातर्मध्याह्नपूजायां मध्ये पूज्यो रविः सदा ॥ रात्रौ मध्ये भवेच्चंद्रस्तद्वर्णकुसुमैः शुभैः ॥ ९ ॥ वह्निकोणे तु हेरंबं सर्वविघ्नोपशांतये ॥ रक्तचंदन
पुष्पैश्च चातुर्मास्ये विशेषतः ॥ १० ॥ नैर्ऋतं दलमास्थाय भगवान्दुष्टदर्पहा ॥ गृहस्थस्य सदा शत्रुविनाशं विदधाति सः ॥ ११ ॥ नैर्ऋत्यकोणगं
विष्णुं पूजयेत्सर्वदा बुधः ॥ सुगन्धचंदनैः पुष्पैर्नैवेद्यैश्चातिशोभनैः ॥ १२ ॥ गोत्रजा वायुकोणे तु पूजनीया सदा बुधैः ॥ पुत्रपौत्रप्रवृद्ध्यर्थं
सुमनोभिर्मनोहरैः ॥ १३ ॥ ऐशाने भगवान्रुद्रः श्वेतपुष्पैः सदाऽर्चितः ॥ अपमृत्युविनाशाय सर्वदोषापनुत्तये ॥ १४ ॥ जागर्ति महिमा यस्य
ब्रह्माद्यैर्नैव लिख्यते ॥ पंचायतनमेतद्धि पूज्यते गृहमेधिभिः ॥ १५ ॥ तप एतत्सदा कार्यं चातुर्मास्ये महाफलम् ॥ पर्वकालेषु सर्वेषु दानं देयं तपः
सदा ॥ चातुर्मास्ये विशेषेण तदनंतं प्रजायते ॥ १६ ॥ शौचं तु द्विविधं ग्राह्यं बाह्यमाभ्यंतरं सदा ॥ जलशौचं तथा बाह्यं श्रद्धया चांतरं भवेत् ॥
॥ १७ ॥ इंद्रियाणां ग्रहः कार्यस्तपसो लक्षणं परम् ॥ निवृत्त्येंद्रियलौल्यं च चातुर्मास्ये महत्तपः ॥ १८ ॥ इन्द्रियाश्वान्सन्नियम्य सततं सुख
मेधते ॥ नरके पात्यते प्राणैस्तैरेवोत्पथगामिभिः ॥ १९ ॥ ममताह्वपिणीं ग्राहीं दुष्टां निर्भर्त्स्य निग्रहेत् ॥ तप एव सदा पुंसां चातुर्मास्येऽधिगौर ॥२७२॥
वम् ॥ २० ॥ काम एष महाशत्रुस्तमेकं निर्जयेद्दृढम् ॥ जितकामा महात्मानस्तैर्जितं निखिलं जगत् ॥ २१ ॥ एतच्च तपसो मूलं तपसो मूलमेव
तत् ॥ सर्वदा कामविजयः संकल्पविजयस्तथा ॥ २२ ॥ तदेव हि परं ज्ञानं कामो येन प्रजीयते ॥ महत्तपस्तदेवाहुश्चातुर्मास्ये फलोत्तमम् ॥२३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोभः सदा परित्याज्यः पापं लोभे समास्थितम् ॥ तपस्तस्यैव विजयश्चातुर्मास्ये विशेषतः ॥ २४ ॥ मोहः सदाऽविवेकश्च वर्जनीयः प्रयत्नतः ॥ तेन त्यक्तो नरो ज्ञानी न ज्ञानी मोहसंश्रयात ॥२५॥ मद एव मनुष्याणां शरीरस्थो महारिपुः ॥ सदा स एव निग्राह्यः सुप्ते देवे विशेषतः ॥२६॥ मानः सर्वेषु भूतेषु वसत्येव भयावहः ॥ क्षमया तं विनिर्जित्य चातुर्मास्ये गुणाधिकः॥२७॥ मात्सर्यं निर्जयेत्प्राज्ञो महापातककारणम् ॥ चातुर्मास्ये जितं तेन त्रैलोक्यममरैः सह ॥२८॥ अहंकारसमाक्रांता मुनयो विजितेंद्रियाः ॥ धर्ममार्गं परित्यज्य कुर्वंत्युन्मार्गजां क्रियाम् ॥२९॥ अहंकारं परित्यज्य सततं सुखमाप्नुयात् ॥ चातुर्मास्ये विशेषेण तस्य त्यागे महाफलम् ॥३०॥ एतद्धि तपसो मूलं यदेतन्मनसस्त्यजेत् ॥ त्यक्तेष्वेतेषु सर्वेषु परब्रह्ममयो भवेत् ॥ ३१ ॥ प्रथमं कायशुद्ध्यर्थं प्राजापत्यं समाचरेत् ॥ शयने देवदेवस्य विशेषेण महत्तपः ॥ ३२ ॥ हरेस्तु शयने नित्यमेकांतरमुपोषणम् ॥ यः करोति नरो भक्त्या न स गच्छेद्यमालयम् ॥ ३३ ॥ हरिस्वापे नरो नित्यमेकभक्तं समाचरेत् ॥ दिवसेदिवसे तस्य द्वादशाहफलं लभेत् ॥ ३४ ॥ चातुर्मास्ये नरो यस्तु शाकाहारपरो यदि ॥ पुण्यं क्रतुसहस्राणां जायते नात्र संशयः ॥ ३५ ॥ चातुर्मास्ये नरो नित्यं चांद्रायणव्रतं चरेत् ॥ एकैकमासे तत्पुण्यं वर्णितुं नैव शक्यते ॥ ३६ ॥ सुप्ते देवे च पाराकं यः करोति विशुद्धधीः ॥ नारी वा श्रद्धया युक्ता शतजन्माघनाशनम् ॥ ३७ ॥ कृच्छ्रसेवी भवेद्यस्तु सुप्ते देवे जनार्दने ॥ पापराशिं विनिर्धूय वैकुण्ठे गणतां व्रजेत् ॥ ३८ ॥ तप्तकृच्छ्रपरो यस्तु सुप्ते देवे जनार्दने ॥ कीर्तिं संप्राप्य वा पुत्रं विष्णुसायुज्यतां व्रजेत् ॥ ३९ ॥ दुग्धाहारपरो यस्तु चातुर्मास्येऽभिजायते ॥ तस्य पापसहस्राणि विलयं यांति देहिनः ॥ ४० ॥ मितान्नाशनकृद्धीरश्चातुर्मास्ये नरो यदि ॥ निर्धूय सकलं पापं वैकुण्ठपदमाप्नुयात ॥ ४१ ॥ एकान्नाशनकृन्मर्त्यो न रोगैरभिभूयते ॥ अक्षारलवणाशी च चातुर्मास्ये न पापभाक् ॥ ४२ ॥ कृताहारो महापापैर्निर्मुक्तो जायते ध्रुवम् ॥ हरिमुद्दिश्य मासेषु चतुर्षु च न संशयः ॥ ४३ ॥ कन्दमूलाशनकरः पूर्वजान्सह चात्मना ॥ उद्धृत्य नरकाद्घोराद्याति विष्णुसलोकताम् ॥ ४४ ॥ नित्यांबुप्राशनकरश्चातुर्मास्ये यदा भवेत् ॥ दिनेदिनेऽश्वमेधस्य फलमाप्नोत्यसंशयम् ॥ ४५ ॥ शीतवृष्टिसहो यस्तु चातुर्मास्ये नरो भवेत् ॥ हरिप्रीत्यै जगन्नाथस्तस्यात्मानं प्रयच्छति ॥ ४६ ॥ महापाराकसंज्ञं तु महत्तप उदाहृतम् ॥ मासैकमुपवासेन सर्वं पूर्णं प्रजायते ॥ ४७ ॥ देवस्वापदिनादौ तु यावत्पवित्रद्वादशी ॥ पवित्रद्वादशीपूर्वं यावच्छ्रवणद्वादशी ॥ ४८ ॥ महापाराकमेतद्धि द्वितीयं परिकीर्तितम् ॥ श्रवणद्वादशीपूर्वं प्राप्ता चाश्विनद्वादशी ॥४९॥ महापाराकं तृतीयं प्राज्ञैश्च समुदाहृतम् ॥ आश्विनद्वादशी चादौ प्राप्ता देवसुबोधिनी ॥ ५० ॥ महापाराकमेतद्धि चतुर्थं परिकथ्यते ॥ एतेषामेकमपि च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





नारी वा पुरुषोऽपि वा ॥ ५१ ॥ यः करोति नरो भक्त्या स च विष्णुः सनातनः ॥ इदं च सर्वतपसां महत्तप उदाहृतम् ॥ ५२ ॥ दुष्करं दुर्लभं लोके चातुर्मास्ये मखाधिकम् ॥ दिवसेदिवसे तस्य यज्ञायुतफलं स्मृतम् ॥ ५३ ॥ महत्तप इदं येन कृतं जगति दुर्लभम् ॥ इदमेव महापुण्यमिदमेव महत्सुखम् ॥ इदमेव परं श्रेयो महापाराकसेवनम् ॥ ५४ ॥ नारायणो वसेद्देहे ज्ञानं तस्य प्रजायते ॥ जीवन्मुक्तः स भवति महापातककारकः ॥ ५५ ॥ तावद्गर्जंति पापानि नरकास्तावदेव हि ॥ तावन्मायासहस्राणि यावन्मासो पवासकः ॥ ५६ ॥ चातुर्मास्युपवासी यो यस्य प्रांगणिको भवेत् ॥ सोऽपि हत्यासहस्राणि त्यक्त्वा निष्कल्मषो भवेत् ॥ ५७ ॥ य इदं श्रावयेन्मर्त्यो यः पठेत्सततं स्वयम् ॥ ५८ ॥ सोऽपि वाचस्पतिसमः फलं प्राप्नोत्यसंशयम् ॥ ५९ ॥ इदं पुराणं परमं पवित्रं शृण्वन्गृणन्पापविशुद्धिहेतु ॥ नारायणं तं मनसा विचिन्त्य मृतोऽभिगच्छत्यमृतं सुराधिकम् ॥ ६० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शेषशाय्युपाख्याने ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये तपोमहिमावर्णनं नामाष्टत्रिंशदुत्तरद्विशततमोऽध्यायः ॥ २३८ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ उपचारैः षोडशभिः पूजनं क्रियते कथम् ॥ ते के षोडश भावाः स्युर्नित्यं ये शयने हरेः ॥ १ ॥ एतद्विस्तरतो ब्रूहि पृच्छतो मे प्रजापते ॥ तव प्रसादमासाद्य जगत्पूज्यो भवाम्यहम् ॥ २ ॥ ॥ ब्रह्मोवाच ॥ ॥ विष्णुभक्तिर्दृढा कार्या वेदशास्त्रविधानतः ॥ वेदमूलमिदं सर्वं वेदो विष्णुः सनातनः ॥ ३ ॥ ते वेदा ब्राह्मणाधारा ब्राह्मणाश्चाग्निदैवताः ॥ अग्नौ प्रास्ताहुतिर्विप्रो यज्ञे देवं यजन्सदा ॥ ४ ॥ जगत्संधारयेत्सर्वं विष्णुपूजारतः सदा ॥ नारायणः स्मृतो ध्यातः क्लेशदुःखादिनाशनः ॥ ५ ॥ चातुर्मास्ये विशेषेण जलरूपगतो हरिः ॥ जलादन्नानि जायंते जगतां तृप्तिहेतवे ॥ ६ ॥ विष्णुदेहांशसंभूतं तदन्नं ब्रह्म इष्यते ॥ तदन्नं विष्णवे दत्त्वा ह्यावाहनपुरःसरम् ॥ ७ ॥ पुनर्जन्मजराक्लेशसंस्कारैर्नाभिभूयते ॥ आकाशसंभवो वेद एक एव पुराऽभवत् ॥ ८ ॥ ततो यजुःसामसंज्ञामृग्वेदः प्राप भूतये ॥ ऋग्वेदोऽभिहितः पूर्वं यजुःसहस्रशीर्षेति च ॥ ९ ॥ षोडशर्चं महासूक्तं नारायणमयं परम् ॥ तस्यापि पाठमात्रेण ब्रह्महत्या निवर्तते ॥ १० ॥ विप्रः पूर्वं न्यसेद्देहे स्मृत्युक्तेन निजे बुधः ॥ ततस्तु प्रतिमायां च शालग्रामे विशेषतः ॥ ११ ॥ क्रमेण च ततः कुर्यात्पश्चादावाहनादिकम् ॥ आवाह्य सकलं रूपं वैकुण्ठस्थानसंस्थितम् ॥ १२ ॥ कौस्तुभेन विराजंतं सूर्यकोटिसमप्रभम् ॥ दंडहस्तं शिखासूत्रसहितं पीतवास

१ प्रांगणिकः—अतिथिः—इत्यर्थः । प्राघुणिकः—इति पाठश्चेत्समंजस एव ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम् ॥१३॥ महासंन्यासिनं ध्यायेच्चातुर्मास्ये विशेषतः ॥ एवं रूपमयं विष्णुं सर्वपापौघहारिणम् ॥१४॥ आवाहयेच्च पुरतो ध्यानसंस्थं द्विजोत्तम॥ ऋचा प्रथमया चास्योंकारादिसमुदीर्णया ॥१५॥ द्वितीयया चासनं च पार्षदैश्च समन्वितम् ॥ सौवर्णान्यासनान्येषां मनसा परिचिन्तयेत् ॥१६॥ चिन्तनैर्भक्तियोगेन परिपूर्णं च तद्भवेत् ॥ पाद्यं तृतीयया कार्यं गंगां तत्र स्मरेद्बुधः ॥ १७ ॥ अर्घ्यः कार्यस्ततो विष्णोः सरिद्भिः सप्तसागरैः ॥ पुनराचमनं कार्यममृतेन जगत्पतेः ॥१८॥ त्रिभिराचमनैः शुद्धिर्ब्राह्मणस्य निगद्यते ॥ अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः ॥१९॥ हृत्कण्ठ तालुगाभिश्च यथावर्णं द्विजातयः ॥ शुध्येरन्स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरंततः ॥२०॥ पञ्चम्याऽऽचमनं कार्यं भक्तियुक्तेन चेतसा ॥ भक्तिग्राह्यो हृषी केशो भक्त्याऽऽत्मानं प्रयच्छति ॥ २१ ॥ ततः सुवासितैस्तोयैः सर्वौषधिसमन्वितैः ॥ शेषोदकैः स्वर्णघटैः स्नानं देवस्य कारयेत् ॥ २२ ॥ तीर्थो दकैः श्रद्धया च मनसा समुपाहृतैः ॥ अश्रद्धया रत्नराशिः प्रदत्तो निष्फलो भवेत् ॥ २३ ॥ वार्यपि श्रद्धया दत्तमनंतत्वाय कल्पते ॥ चातुर्मास्ये विशेषेग श्रद्धया पूयते नरः ॥ २४ ॥ षष्ठ्या स्नानं ततः कार्यं पुनराचमनं भवेत् ॥ दद्याच्च वाससी स्वर्णसहिते भक्तिशक्तितः ॥ २५ ॥ आच्छादितं जगत्सर्वं वस्त्रेणाच्छादितो हरिः ॥ चातुर्मास्ये विशेषेण वस्त्रदानं महाफलम् ॥ २६ ॥ पुनराचमनं देयं यतये विष्णुरूपिणे ॥ वस्त्रदानं च सप्तम्या कार्यं विष्णोर्मुनीश्वर ॥ २७ ॥ यज्ञोपवीतमष्टम्या तच्चाध्यात्मतया शृणु ॥ सूर्यकोटिसमस्पर्शं तेजसा भास्वरं तथा ॥ २८ ॥ क्रोधाभिभूते विप्रे तु तडित्कोटिसमप्रभम् ॥ सूर्येन्दुवह्निसंयोगाद्गुणत्रयसमन्वितम् ॥ २९ ॥ त्रयीमयं ब्रह्मविष्णुरुद्ररूपं त्रिविष्टपम् ॥ यस्य प्रभावाद्विप्रेंद्र मानवो द्विज उच्यते ॥ ३० ॥ जन्मना जायते शूद्रः संस्काराद्द्विज उच्यते ॥ शापानुग्रहसामर्थ्यं तथा क्रोधः प्रसन्नता ॥ ३१ ॥ त्रैलोक्यप्रवरत्वं च ब्राह्मणादेव जायते ॥ न ब्राह्मणसमो बन्धुर्न ब्राह्मणसमा गतिः ॥ ३२ ॥ न ब्राह्मणसमः कश्चित्त्रैलोक्ये सचराचरे ॥ दत्तोपवीते ब्रह्मण्ये सुप्ते देवे जनार्दने ॥ ॥ ३३ ॥ सर्वं जगद्ब्रह्ममयं संजातं नात्र संशयः ॥ नवम्या च सुलेपश्च कर्तव्यो यज्ञमूर्तये ॥ ३४ ॥ सुयक्षकर्दमैर्लिप्तो विष्णुर्येन जगद्गुरुः ॥ तेना प्यायितमेतद्धि वासितं यशसा जगत् ॥ ३५ ॥ तेजसा भास्करो लोके देवत्वं प्राप्य मानवः ॥ ब्रह्मलोकादिके लोके मोदते चंदनप्रदः ॥ ३६ ॥ चंदनालेपसुभगं विष्णुं पश्यंति मानवाः ॥ न ते यमपुरं यांति चातुर्मास्ये विशेषतः ॥ ३७ ॥ दशम्या पुष्पपूजा च भक्तिपूजा तथैव च ॥ पुष्पे चैव सदा लक्ष्मीर्वसत्येव निरंतरम् ॥ ३८ ॥ लक्ष्म्याः सर्वत्र गामिन्या दोषो नैव प्रजायते ॥ यथा सर्वमयो विष्णुर्न दोषैरनुभूयते ॥ ३९ ॥ तथा सर्वमयी लक्ष्मीः सतीत्वान्नैव हीयते ॥ प्रतिमासु च सर्वासु सर्वभूतेषु नित्यदा ॥ ४० ॥ मनुष्यदेवपितृषु पुष्पपूजा विधीयते ॥ पुष्पैः संपूजि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





तो येन हरिरेकः श्रिया सह ॥ ४१ ॥ आब्रह्मस्तंबपर्यंतं पूजितं तेन वै जगत् ॥ अतः सुश्वेतकुसुमैर्विष्णुं संपूजयेत्सदा ॥ ४२ ॥ चातुर्मास्ये विशेषेण भक्तियुक्तः सदा शुचिः ॥ भक्त्या सुविहिता ब्रह्मन्पुष्पपूजा नरैर्यदि ॥ ४३ ॥ यंयं काममभिध्यायेत्तस्य सिद्धिर्निरंतरा ॥ पुष्पैरुपचितं विष्णुं यद्यन्ये प्रणमंति च ॥ ४४ ॥ तेषामप्यक्षया लोकाश्चातुर्मास्येऽधिकं फलम् ॥ एकादश्या धूपदानं कर्तव्यं यतये हरौ ॥ ४५ ॥ वनस्पति रसो दिव्यो गंधाढ्यो गन्ध उत्तमः॥ आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥ ४६ ॥ इमं मंत्रं समुच्चार्य धूपमागुरुजं शुभम् ॥ दद्याद्भगवते नित्यं चातुर्मास्ये महाफलम् ॥ ४७ ॥ कर्पूरचन्दनदलैः सितामधुसमन्वितम् ॥ मांसीजटाभिः सहितं सुप्ते देवेऽथ सत्तम ॥ ४८ ॥ देवा घ्राणेन तुष्यंति धूपं घ्राणहरं शुभम् ॥ द्वादश्या दीपदानं तु कर्तव्यं मुक्तिमिच्छुभिः ॥ ४९ ॥ दीपः सर्वेषु कार्येषु प्रथमस्तेजसां पतिः ॥ दीपस्तमोघना शाय दीपः कांतिं प्रयच्छति ॥ ५० ॥ तस्माद्दीपप्रदानेन प्रीयतां मे जनार्दनः ॥ अयं पौराणजो मंत्रो वेदर्चेन समन्वितः ॥ दीपप्रदा ने सकलः प्रयुक्तो नाशयेदघम् ॥ ५१ ॥ चातुर्मास्ये दीपदानं कुरुते यो हरेः पुरः ॥ तस्य पापमयो राशिर्निमेषादपि दह्यते ॥ ५२ ॥ तावत्पापानि गर्जंति तावद्बिभेति पातकी ॥ यावन्न विहितो भास्वान्दीपो नारायणालये ॥ ५३ ॥ दर्शनादपि दी पस्य सर्वसिद्धिर्नृणां भवेत् ॥ ५४ ॥ कामनां यां समुद्दिश्य दीपं कारयते हरौ ॥ सासा सिद्ध्यति निर्विघ्ना सुतेऽनंते गुणोत्तरम् ॥ ५५ ॥ पंचायतनसंस्थेषु तथा देवेषु पंचसु ॥ विहितं दीपदानं च चातुर्मास्ये महाफलम् ॥ ५६ ॥ एको विष्णुस्तुष्यते मुक्तिदाता नित्यं ध्यातः पूजितः संस्तुतश्च ॥ यच्चाभीष्टं यच्च गेहे शुभं वा तत्तद्देयं मुक्तिहेतोर्नृवर्यैः ॥ ५७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शेषशाय्युपाख्याने ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये तपोऽधिकारषोडशोपचारदीपमहिमवर्णनंनामैकोनचत्वारिंशदुत्तर द्विशततमोऽध्यायः ॥ २३९ ॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ हरेर्दीपस्तु मद्दीपादधिकोऽयं प्रकुर्वतः ॥ वैकुण्ठवास एव स्यान्ममैश्वर्यमवांछि तम् ॥ १ ॥ ॥ नारद उवाच ॥ ॥ दीपोऽयं विष्णुभवने मन्त्रवद्विहितो नरैः ॥ सदा विशेषफलदश्चातुर्मास्येऽधिकः कथम् ॥ २ ॥ ॥ ॥ ब्रह्मोवाच ॥ ॥ विष्णुर्नित्याधिदैवं मे विष्णुः पूज्यः सदा मम ॥ विष्णुमेनं सदा ध्याये विष्णुभक्तः परो हि सः ॥ ३ ॥ स विष्णु वल्लभो दीपः सर्वदा पापहारकः ॥ चातुर्मास्ये विशेषेण कामनासिद्धिकारकः ॥ ४ ॥ विष्णुर्दीपेन संतुष्टो यथा भवति पुत्रक ॥ तथा यज्ञसहस्रैश्च वरं नैव प्रयच्छति ॥ ५ ॥ स्वल्पव्ययेन दीपस्य फलमानंतकं नृणाम् ॥ अनंतशयने प्राप्ते पुण्यसंख्या न विद्यते ॥ ६ ॥ तस्मात्सर्वात्मभावेन



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रद्धया संयुतेन च ॥ दीपप्रदानं कुरुते हरेः पापैर्न लिप्यते ॥ ७ ॥ उपचारैः षोडशकैर्यतिरूपे हरौ पुनः ॥ दीपप्रदाने विहिते सर्वमुद्द्योतितं जगत् ॥ ८ ॥ दीपादनंतरं ब्रह्मन्नन्नस्य च निवेदनम् ॥ त्रयोदश्या भक्तियुक्तैः कार्यं मोक्षपदस्थितैः ॥ ९ ॥ अमृतं संपरित्यज्य यदन्नं देवता अपि ॥ स्पृहयंति गृहस्थस्य गृहद्वारगताः सदा ॥ १० ॥ हरौ सुते विशेषेण प्रदेयः प्रत्यहं नरैः ॥ फलैरर्घ्यो विष्णुतुष्ट्यै तत्कालसमुदाहृतैः ॥ ११ ॥ तांबूलवल्लीपत्रैश्च तथा पूगफलैः शुभैः ॥ द्राक्षाजंब्वाम्रजफलैरक्षोडैर्दाडिमैरपि ॥ १२ ॥ बीजपूरफलैश्चैव दद्यादर्घ्यं सुभक्तितः ॥ शंखतोयं समादाय तस्योपरि फलं शुभम् ॥ १३ ॥ मंत्रेणानेन विप्रेन्द्र केशवाय निवेदयेत् ॥ पुनराचमनं देयमन्नदानादनंतरम् ॥ १४ ॥ आर्तिक्यं च ततः कुर्यात्सर्वपापविनाशनम् ॥ चतुर्दश्या नमस्कुर्याद्विष्णवे यतिरूपिणे ॥ १५ ॥ पंचदश्या भ्रमः कार्यः सर्वदिक्षु द्विजैः सह ॥ सप्तसागरजैस्तोयैर्दत्तैर्यत्फलमाप्यते ॥ १६ ॥ तत्तोयदानाच्च हरेः प्राप्यते विष्णुवल्लभैः ॥ चतुर्वारभ्रमीभिश्च जगत्सर्वं चराचरम् ॥ १७ ॥ क्रांतं भवति विप्राग्र्य तत्तीर्थगमनादिकम् ॥ षोडश्या देवसायुज्यं चिन्तयेद्योगवित्तमः ॥ १८ ॥ आत्मनश्च हरेर्नित्यं न मूर्तिं भावयेत्तदा ॥ मूर्तामूर्तस्वरूपत्वाद्दृश्यो भवति योगवित् ॥ १९ ॥ तस्मिन्दृष्टे निवर्त्तेत सदसद्रूपजा क्रिया ॥ आत्मानं तेजसां मध्ये चिन्तयेत्सूर्यवर्चसम् ॥ २० ॥ अहमेव सदा विष्णुरित्यात्मनि विचारयन् ॥ लभते वैष्णवं देहं जीवन्मुक्तो द्विजो भवेत् ॥ २१ ॥ चातुर्मास्ये विशेषेण योगयुक्तो द्विजो भवेत् ॥ इयं भक्तिः समादिष्टा मोक्षमार्गप्रदे हरौ ॥ २२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शेषशाय्युपाख्याने ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये दीपदानादिसायुज्यचिन्तनान्तभक्तिनिरूपणंनाम चत्वारिंशदुत्तरद्विशततमोऽध्यायः ॥२४०॥ ॥छ॥

॥ ईश्वर उवाच ॥ ॥ एतत्ते पूजनं विष्णोः षोडशोपायसंभवम् ॥ कथितं यद्द्विजः कृत्वा प्राप्नोति परमं पदम् ॥ १ ॥ तथा च क्षत्रियविशां करणान्मुक्तिरुत्तमा ॥ शूद्राणां नाधिकारोऽस्मिन्स्त्रीणां नैव कदाचन ॥ २ ॥ ॥ कार्तिकेय उवाच ॥ ॥ शूद्राणां च तथा स्त्रीणां धर्मं विस्तरतो वद ॥ केन मुक्तिर्भवेत्तेषां कृष्णस्याराधनं विना ॥ ३ ॥ ॥ ईश्वर उवाच ॥ ॥ सच्छूद्रैरपि नो कार्या वेदाक्षरविचारणा ॥ न श्रोतव्या न पत्न्या च पठन्नरकभाग्भवेत् ॥ ४ ॥ पुराणानां नैव पाठः श्रवणं कारयेत्सदा ॥ स्मृत्युक्तं सुगुरोर्ग्राह्यं न पाठः श्रवणादिकम् ॥ ५ ॥ ॥ स्कंद उवाच ॥ ॥ सच्छूद्राः के समाख्यातास्तांश्च विस्तरतो वद ॥ के संतः के च शूद्राश्च सच्छूद्रा नामतश्च के ॥ ६ ॥ ॥ ईश्वर उवाच ॥ ॥ धर्मोढा यस्य पत्नी स्यात्स सच्छूद्र उदाहृतः ॥ समानकुलरूपा च दशदोषविवर्जिता ॥ ७ ॥ उद्वोढा वेदविधिना स सच्छूद्रः प्रकीर्तितः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





अक्लीबाऽव्यंगिनी शस्ता महारोगाद्यदूषिता ॥ ८ ॥ अनिंदिता शुभकला चक्षूरोगविवर्जिता ॥ बाधिर्यहीना चपला कन्या मधुरभाषिणी ॥ ९ ॥ दूषणैर्दशभिर्हीना वेदोक्तविधिना नरैः ॥ विवाहिता च सा पत्नी गृहिणी यस्य सर्वदा ॥ १० ॥ सच्छूद्रः स तु विज्ञेयो देवादीनां विभागकृत् ॥ पुण्यकार्येषु सर्वेषु प्रथमं सा प्रकीर्तिता ॥ ११ ॥ तया सुविहितो धर्मः संपूर्णफलदायकः ॥ चातुर्मास्ये विशेषेण तया सह गुणाधिकः ॥ १२ ॥ भार्यारतिः शुचिर्भृत्यादीनां पोषणतत्परः ॥ श्राद्धादिकारको नित्यमिष्टापूर्त्तप्रसाधकः ॥ १३ ॥ नमस्कारान्तमन्त्रेण नामसंकीर्तनेन च ॥ देवास्तस्य च तुष्यन्ति पंचयज्ञादिकैः शुभैः ॥ १४ ॥ स्नानं च तर्पणं चैव वह्निहोमोऽप्यमंत्रकः ॥ ब्रह्मयज्ञोऽतिथेः पूजा पंचयज्ञान्न संत्यजेत् ॥ १५ ॥ कार्यं स्त्रीभिश्च शूद्रैश्च ह्यमंत्रं पंचयज्ञकम् ॥ पंचयज्ञैश्च संतुष्टा यथैषां पितृदेवताः ॥ १६ ॥ तथा पतिव्रतायाश्च पतिशुश्रूषया सदा ॥ पतिव्रताया देहे तु सर्वे देवा वसंति हि ॥ १७ ॥ अतस्ताभ्यां समेताभ्यां धर्मादीनां समागमः ॥ यदोभयोर्मते पृष्टे संतुष्टाः पितृदेवताः ॥ १८ ॥ कार्यादीनां च सर्वेषां संगमस्तत्र नित्यदा ॥ चातुर्मास्ये समायाते विष्णुभक्त्या तयोः शिवम् ॥ १९ ॥ समानजातिसंभूता पत्नी यस्य धृता भवेत् ॥ पूर्वो भर्त्ताऽर्द्धभागी स्याद्द्वितीयस्य न किंचन ॥ २० ॥ अर्थकार्याधिकारोऽस्यास्तेन धर्मार्धधारिणी ॥ स्वंस्वं कृतं सदैव स्यात्तयोः कर्म शुभाशुभम् ॥ ॥ २१ ॥ याऽनुगच्छति भर्तारं मृतं सुतपसा द्विज ॥ साध्वी सा हि परिज्ञेया तया चोद्ध्रियते कुलम् ॥ २२ ॥ अन्यजातेर्मृतस्याथ धृता वापि विवाहिता ॥ वैश्वानरस्य मार्गेण सा तमुद्धरते पतिम् ॥ २३ ॥ यथा जलाच्च जंबालः कृष्यते धार्मिकैर्नृभिः ॥ एवमुद्धरते साध्वी भर्त्तारं याऽनुगच्छति ॥ २४ ॥ अन्यजातिसमुद्भूता अन्येन विधृता यदि ॥ तावुभौ धर्मकार्येषु संत्याज्यौ नित्यदा मतौ ॥ २५ ॥ स्वंस्वं कर्म प्रकुरुतः सत्कर्मजं स्वकं फलम् ॥ तस्माद्दरिद्रा हीना वा सत्कुल्या शूद्रसंभवैः ॥ २६ ॥ धृता न कार्या सा पत्नी यत्करोति न वर्द्धते ॥ तया सह कृतं पुण्यं वर्द्धते दशधोत्तरम् ॥ २७ ॥ अनन्ततृप्तिदं नैव तत्सुतैरपि वा तथा ॥ क्रयक्रीता च या कन्या दासी सा परिकीर्तिता ॥ २८ ॥ सच्छूद्रस्याधिकारे सा कदाचिन्नैव जायते ॥ या कन्या स्वयमुद्यम्य पित्रा दत्ता वराय च ॥ २९ ॥ विवाहविधिनोढा पितृदेवार्थसाधिनी ॥ सुलक्षणा विनीता या विवेकादिगुणा शुभा ॥ ३० ॥ सच्चरित्रा पतिपरा सा तेभ्यो दातुमर्हति ॥ विशुद्धकुलजा कन्या धर्मोढा धर्मचारिणी ॥ ३१ ॥ सा पुनाति कुलं सर्वं मातृतः पितृतस्तथा ॥ एष एव मया प्रोक्तः सच्छूद्राणां परो विधिः ॥ ३२ ॥ अधोजातिसमुद्भूता सच्छूद्रात्क्रमहीनजा ॥ विवाहो दशधा तेषां दशधा पुत्रता भवेत् ॥ ३३ ॥ चत्वार उत्तमाः प्रोक्ता विवाहा मुनिसत्तम ॥ शेषाः सर्वप्रकृतिषु कथिताश्च पुराविदैः ॥ ३४ ॥ प्राजापत्यस्तथा



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्राह्मो दैवार्षौ चातिशोभनाः ॥ गांधर्वश्चासुरश्चैव राक्षसश्च पिशाचकः ॥३५॥ प्रातिभो घातनश्चेति विवाहाः कथिता दश ॥ एते हि हीनजातीनां विवाहाः परिकीर्तिताः ॥३६॥ औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ॥ गूढोत्पन्नोऽपविद्धश्च कानीनश्च सहोढजः ॥३७॥ क्रीतः पौनर्भवश्चापि पुत्रा दशविधाः स्मृताः ॥ औरसादपि हीनाश्च तेऽपि तेषां शुभावहाः ॥ ३८ ॥ अष्टादशमिता नीचाः प्रकृतीनां यथातथा ॥ विधिनैव क्रिया नैव स्मृति मार्गोऽपि नैव च ॥३९॥ तासां ब्राह्मणशुश्रूषा विष्णुध्यानं शिवार्चनम् ॥ अमन्त्रात्पुण्यकरणं दानं देयं च वै सदा ॥४०॥ न दानस्य क्षयो लोके श्रद्धया यत्प्रदीयते ॥ अश्रद्धयाऽशुचितया दानं वैरस्यकारणम् ॥ ४१ ॥ अहिंसादिः समादिष्टो धर्मस्तासां महाफलः ॥ चातुर्मास्ये विशेषेण त्रिदिवेशादिसेवया ॥४२॥ सुदर्शनैस्तथा धर्मः सेव्यते ह्यविरोधिभिः ॥ सच्छूद्रैर्दानपुण्यैश्च द्विजशुश्रूषणादिभिः॥४३॥ वृत्तिश्च सत्यानृतजा वाणिज्यव्यवहारजा ॥ अशीतिभागमादद्याद्व्याजाद्वार्धुषिकः शते ॥४४॥ सपादभागवृद्धिस्तु क्षत्रियादिषु गृह्यते ॥ एवं न बन्धो भवति पातकस्य कदाचन॥४५॥ प्रातःकर्म सुरेशानां मध्याह्ने द्विजसेवनम् ॥ अपराह्णेऽथ कार्याणि कुर्वन्मर्त्यः सुखी भवेत् ॥ ४६ ॥ गृहस्थैश्च सदा भाव्यं यावज्जीवं क्रियापरैः ॥ पंचयज्ञरतैश्चैवातिथिद्विजसुपूजकैः ॥ ४७ ॥ विष्णुभक्तिरतैश्चैव वेदमन्त्रविपाठकैः ॥ सततं दानशीलैश्च दीनार्तजनवत्सलैः ॥ ४८ ॥ क्षमादिगुणसंयुक्तैर्द्वादशाक्षरपूजकैः ॥ षडक्षरमहोद्वारपरमानन्दपूरितैः ॥ ४९ ॥ सदपत्यैः सदाचारैः सतां शुश्रूषणैरपि ॥ विमत्सरैः सदा स्थेयं तापक्लेशविवर्जितैः ॥ ५० ॥ प्रव्रज्यावर्जनैरेवं सच्छूद्रैर्धर्मतत्परैः ॥ तोषणं सर्वभूतानां कार्यं वित्तानुसारतः ॥ ५१ ॥ सदा विष्णुशिवादीनां ये भक्तास्ते नराः सदा ॥ देववद्दिवि दीव्यंति चातुर्मास्ये विशेषतः ॥ ५२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शेषशाय्युपाख्यान ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये तपोऽधिकारे सच्छूद्रकथनंनामैकचत्वारिंशदुत्तरद्विशततमोऽध्यायः ॥ ॥ २४१ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ अष्टादश प्रकृतयः का वदस्व पितामह ॥ वृत्तिस्तासां च को धर्मः सर्वं विस्तरतो मम ॥ १ ॥ ॥ ॥ ब्रह्मोवाच ॥ ॥ मज्जन्माभूद्भगवतो नाभिपंकजकोशतः ॥ स्वकालपरिमाणेन प्रबुद्धस्य जगत्पतेः ॥ २ ॥ ततो बहुतिथे काले केशवेन पुरा स्मृतः ॥ स्रष्टुकामेन विविधाः प्रजा मनसि राजसीः ॥ ३ ॥ अहं कमलजस्तत्र जातः पुत्रश्चतुर्मुखः ॥ उदरं नाभिनालेन प्रविश्याथ व्यलोकयम् ॥ ४ ॥ तत्र ब्रह्मांडकोटीनां दर्शनं मेऽभवत्पुनः ॥ विस्मयाच्चिंतयानस्य सृष्ट्यर्थमभिधावता ॥ ५ ॥ निर्गम्य पुनरेवाहं पद्मनालेन यावता ॥ बहिरागां विस्मृतं तत्सर्वं सृष्ट्यर्थकारणम् ॥ ६ ॥ पुनरेव ततो गत्वा प्रजाः सृष्ट्वा चतुर्विधाः ॥ नाभिनालेन निर्गत्य विस्मृतेनांतरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



त्मना ॥ ७ ॥ तदाहं जडवज्जातो वागुवाचाशरीरिणी ॥ तपस्तप महाबुद्धे जडत्वं नोचितं तव ॥ ८ ॥ दशवर्षसहस्राणि ततोऽहं तप आस्थितः॥
पुनराकाशजा वाणी मामुवाचाविनश्वरा ॥ ९ ॥ वेदरूपाश्रिता पूर्वमाविर्भूता तपोबलात् ॥ ततो भगवताऽऽदिष्टः सृज त्वं बहुधा प्रजाः ॥ १० ॥
राजसं गुणमाश्रित्य भूतसर्गमकल्मषम् ॥ मनसा मानसी सृष्टिः प्रथमं चिंतिता मया ॥ ११ ॥ ततो वै ब्राह्मणा जाता मरीच्यादिमुनीश्वराः ॥
तेषां कनीयांस्त्वं जातो ज्ञानवेदांतपारगः ॥ १२ ॥ कर्मनिष्ठाश्च ते नित्यं सृष्ट्यर्थं सततोद्यताः ॥ निर्व्यापारो विष्णुभक्त एकांतब्रह्मसेवकः ॥ १३ ॥
निर्ममो निरहंकारो मम त्वं मानसः सुतः ॥ क्रमान्मया तु तेषां वै वेदरक्षार्थमेव च ॥ १४ ॥ प्रथमा मानसी सृष्टिर्द्विजात्यादिर्विनिर्मिता ॥ ततो
हर्मांगिकीं सृष्टिं सृष्टवांस्तत्र नारद ॥ १५ ॥ मुखाच्च ब्राह्मणा जाता बाहुभ्यः क्षत्रिया मम ॥ वैश्या ऊरुसमुद्भूताः पद्भ्यां शूद्रा बभूविरे ॥ १६ ॥
अनुलोमविलोमाभ्यां क्रमाच्च क्रमयोगतः ॥ शूद्राद्धोऽधो जाताश्च सर्वे पादतलोद्भवाः ॥ १७ ॥ ताः सर्वास्तु प्रकृतयो मम देहांशसंभवाः ॥
नारद त्वं विजानीहि तासां नामानि वच्मि ते ॥ १८ ॥ ब्राह्मणः क्षत्रियो वैश्यस्त्रय एव द्विजातयः ॥ वेदास्तपोऽध्ययनं च यजनं दानमेव
च ॥ १९ ॥ वृत्तिरध्यापनाच्चैव तथा स्वल्पप्रतिग्रहात् ॥ विप्रः समर्थस्तपसा यद्यपि स्यात्प्रतिग्रहे ॥ २० ॥ तथापि नैव गृह्णीयात्तपोरक्षा यतः
सदा ॥ वेदपाठो विष्णुपूजा ब्रह्मध्यानमलोभता ॥ २१ ॥ अक्रोधता निर्मलत्वं क्षमासारत्वमार्यता ॥ क्रियातत्परता दानक्रिया सत्यादिभि
र्गुणैः ॥ २२ ॥ भूषितो यो भवेन्नित्यं स विप्र इति कथ्यते ॥ क्षत्रियेण तपः कार्यं यजनं दानमेव च ॥ २३ ॥ वेदपाठो विप्रभक्तिरेषां शस्त्रेण
जीवनम् ॥ स्त्रीबालगोब्राह्मणार्थे भूम्यर्थे स्वामिसंकटे ॥ २४ ॥ संप्राप्ते शरणं चैव पीडितानां च शब्दिते ॥ आर्तत्राणपरा ये च क्षत्रिया ब्रह्मणा
कृताः ॥ २५ ॥ धनवृद्धिकरो वैश्यः पशुपालः कृषीवलः ॥ रसादीनां च विक्रेता देवब्राह्मणपूजकः ॥ २६ ॥ अर्थवृद्धिकरो व्याजाद्यज्ञकर्मा
दिकारकः ॥ दानमध्ययनं चेति वैश्यवृत्तिरुदाहृता ॥ २७ ॥ एतान्येव ह्यमंत्राणि शूद्रः कारयते सदा ॥ नित्यं षड्दैवतं श्राद्धं हन्तकारोऽग्नि
तर्पणम् ॥ २८ ॥ देवद्विजातिभक्तिश्च नमस्कारेण सिद्ध्यति ॥ शूद्रोऽपि प्रातरुत्थाय कृत्वा पादाभिवंदनम् ॥ २९ ॥ विष्णुभक्तिमयाञ्श्लोकान्पठ
न्विष्णुत्वमाप्नुयात् ॥ वार्षिकव्रतकृन्नित्यं तिथिवाराधिदैवतः ॥ ३० ॥ अन्नदः सर्वजीवानां गृहस्थः शूद्र ईरितः ॥ अमंत्राण्यपि कर्माणि कुर्वन्नेव हि ॥२७६॥
मुच्यते ॥ ३१ ॥ चातुर्मास्यव्रतकरः शूद्रोऽपि हरितां व्रजेत् ॥ शिल्पी च नर्तकश्चैव काष्ठकारः प्रजापतिः ॥ ३२ ॥ वर्धकिश्चित्रकश्चैव सूत्रको रजक
स्तथा ॥ गच्छकस्तन्तुकारश्च चक्रिकश्चर्मकारकः ॥ ३३ ॥ सूनिको ध्वनिकश्चैव कौलिहको मत्स्यघातकः ॥ औनामिकस्तु चंडालः प्रकृत्याष्टा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दशैव ते ॥ ३४ ॥ शिल्पिकः स्वर्णकारकश्च दारुकः कांस्यकारकः ॥ काण्डुकः कुम्भकारश्च प्रकृत्या उत्तमाश्च षट् ॥ ३५ ॥ खरवाह्युष्ट्रवाही च
हयवाही तथैव च ॥ गोपाल इष्टिकाकारो अधमाधमपञ्चकम् ॥ ३६ ॥ रजकश्चर्मकारश्च नटो बुरुड एव च ॥ कैवर्त्तमेदभिल्लाश्च सप्तैते अन्त्यजाः
स्मृताः ॥३७॥ यो यस्य हीनो वर्णेन स चाष्टादशमो नरः ॥ सर्वासां प्रकृतीनां च उत्तमा मध्यमाः समाः ॥३८॥ भेदास्त्रयः समाख्याता विज्ञेयाः
स्मृतिनिर्णयात् ॥ शिल्पिनः सप्त विज्ञेया उत्तमाः समुदाहृताः ॥ ३९ ॥ स्वर्णकृत्कंबुकश्चैव तन्दुली पुष्पलावकः ॥ तांबूली नापितश्चैव मणिकारश्च
सप्तधा ॥ ४० ॥ न स्नानं देवताहोमस्तपोनियम एव च ॥ न स्वाध्यायवषट्कारौ न च शुद्धिर्विवाहिता ॥ ४१ ॥ एतासां प्रकृतीनां च गुरुपूजा
सदोदिता ॥ विप्राणां प्राकृतो नित्यं दानमेव परो विधिः ॥ ४२ ॥ सर्वेषामेव वर्णानामाश्रमाणां महामुने ॥ सर्वासां प्रकृतीनां च विष्णुभक्तिः सदा
शुभा ॥ ४३ ॥ इति ते कथितं सर्वं यथाप्रकृतिसंभवम् ॥ कथां शृणु महापुण्यां शूद्रः शुद्धिमगाद्यथा ॥ ४४ ॥ इदं पुराणं परमं पवित्रं विशुद्धधी
र्यस्तु शृणोति वा पठेत् ॥ विधूय पापानि पुरार्जितानि स याति विष्णोर्भवनं क्रियापरः ॥ ४५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां
संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शेषशाय्युपाख्याने ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्येऽष्टादशप्रकृतिकथनंनाम द्विचत्वारिंशदु
त्तरद्विशततमोऽध्यायः ॥ २४२ ॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ शूद्रः पैजवनोनाम गार्हस्थ्याच्छुद्धिमाप्तवान् ॥ धर्ममार्गाविरोधेन तन्निबोध
महामते ॥ १ ॥ आसीत्पैजवनः शूद्रः पुरा त्रेतायुगे किल ॥ स्वधर्मनिरतः ख्यातो विष्णुब्राह्मणपूजकः ॥ २ ॥ न्यायागतधनो नित्यं शांतः सर्वज
नप्रियः ॥ सत्यवादी विवेकज्ञस्तस्य भार्या च सुन्दरी ॥ ३ ॥ धर्मोढा वेदविधिना समानकुलजा शुभा ॥ पतिव्रता महाभागा देवद्विजहिते रता ॥
॥ ४ ॥ काश्यां संबंधिता बाला वैजयंत्यां विवाहिता ॥ सा धर्माचरणे दक्षा वैष्णवव्रतचारिणी ॥ ५ ॥ भर्त्रा सह तथा सम्यक्चिक्रीडे सुविनीत
वत् ॥ सोऽपि रेमे तया काले हस्तिन्येव महागजः ॥६॥ अर्थाप्तिः पूर्वपुण्येन जाता तस्य महात्मनः ॥ वाणिज्यं स्वजनैर्नित्यं स्वदेशपरदेशजम् ॥
॥७॥ कारयत्यर्थजातैश्च परकीयस्वकीयजैः ॥ एवमर्थश्च बहुधा संजातो धर्मदर्शिनः ॥ ८ ॥ पुत्रत्रयं च संजातं पितुः शुश्रूषणे रतम् ॥ तस्य पुत्राः
पितुर्भक्ता द्रव्यादिमदवर्जिताः ॥ ९ ॥ पितृवाक्यरताः श्रेष्ठाः स्वधर्माचारशोभनाः ॥ पित्रोः शुश्रूषणादन्यन्नाभिनंदंति किंचन ॥१०॥ ते सम्बन्धैः
सुसंबद्धाः पित्रा धर्मार्थदर्शिना ॥ तत्पत्न्यो मातृपित्रर्चां कारयंत्यनिवारितम् ॥ ११ ॥ ऋद्धिमद्भवनं तस्य धनधान्यसमन्वितम् ॥ सोऽपि धर्म
रतो नित्यं देवतातिथिपूजकः ॥ १२ ॥ गृहागतो न विमुखो यस्य जातु कदाचन ॥ शीतकाले धनं प्रादादुष्णकाले जलान्नदः ॥ १३ ॥-वर्षा



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



काले वस्त्रदश्च बभूवान्नप्रदः सदा ॥ वापीकूपतडागादिप्रपादेवगृहाणि च ॥ १४ ॥ कारयत्युचिते काले शिवविष्णुव्रतस्थितः ॥ इष्टधर्मस्तु
वर्णानां समाचीर्णो महाफलः ॥ १५ ॥ अन्येषां पूर्तधर्माणां तेषां पूर्तकरः सदा ॥ स बभूव धनाढ्योपि व्यसनैर्न समाश्रितः ॥ १६ ॥ विष्णु
भक्तिरतो नित्यं चातुर्मास्ये विशेषतः ॥ एकदा गालवमुनिः शिष्यैर्बहुभिरावृतः ॥ १७ ॥ ब्रह्मज्ञानरतः शांतस्तपोनिष्ठो महावशी ॥ अभ्याज
गाम शूद्रस्य गेहे पैजवनस्य सः ॥ १८ ॥ स वाग्भिर्मधुभिस्तस्य अभ्युत्थानासनादिभिः ॥ उपचारैः पुनर्युक्तः कृतार्थ इव मानयन् ॥ १९ ॥ अद्य
मे सफलं जन्म जातं जीवितमुत्तमम् ॥ अद्य मे सफलो धर्मः कुशलश्चोद्धृतस्त्वया ॥ २० ॥ मम पापसहस्राणि दृष्ट्या दग्धानि ते मुने ॥ गृहं
मम गृहस्थस्य सकलं पावितं त्वया ॥ २१ ॥ तस्य भक्त्या प्रसन्नोऽभूद्गतमार्गपरिश्रमः ॥ उवाच मुनिशार्दूलः सच्छूद्रं तं कृतांजलिम् ॥ २२ ॥
कच्चित्ते कुशलं सौम्य मनो धर्मे प्रवर्तते ॥ अर्थानुबंधाः सततं बन्धुदारसुतादयः ॥ २३ ॥ गोविन्दे सततं भक्तिस्तथा दाने प्रवर्तते ॥ धर्मार्थकाम
कार्येषु सप्रभावं मनस्तव ॥ २४ ॥ विष्णुपादोदकं नित्यं शिरसा धार्यते न वा ॥ पादोद्भवं च गंगोदं द्वादशाब्दफलप्रदम् ॥ २५ ॥ चातुर्मास्ये
विशेषेण तत्फलं द्विगुणं भवेत् ॥ हरिभक्तिर्हरिकथा हरिस्तोत्रं हरेर्नतिः ॥ २६ ॥ हरिध्यानं हरेः पूजा सुप्ते देवे च मोक्षकृत् ॥ एवं ब्रुवाणं स मुनिं
पुनराह नतिं गतः ॥ २७ ॥ भवद्दृष्ट्याश्रमफलमेतज्जातं न संशयः ॥ तथापि श्रोतुमिच्छामि तव वाणीमनामयीम् ॥ २८ ॥ भवादृशानां गमनं
सर्वार्थेषु प्रकल्पते ॥ ततस्तौ सुमुदा युक्तौ संजातौ हृष्टचेतसौ ॥ २९ ॥ मुनिं पैजवनोनाम सच्छूद्रः प्राह संमतः ॥ किमागमनकृत्यं ते कथयस्व
प्रसादतः ॥ ३० ॥ को वा तीर्थप्रसंगश्च चातुर्मास्ये समीपगे ॥ गालवः प्राह सच्छूद्रं धार्मिकं सत्यवादिनम् ॥ ३१ ॥ मम तीर्थावसिक्तस्य मासा
बहुतरा गताः ॥ इदानीमाश्रमं यास्ये चातुर्मास्ये समागते ॥ ३२ ॥ आषाढशुक्लैकादश्यां करिष्ये नियमं गृहे ॥ नारायणस्य प्रीत्यर्थं श्रेयो
ऽर्थं चात्मनस्तथा ॥ प्रत्युवाच मुनिर्धर्मान्विनयानतकन्धरम् ॥ ३३ ॥ ॥ पैजवन उवाच ॥ ॥ मामनुग्रहजां बुद्धिं ब्रूहि त्वं द्विजपुंग
व ॥ वेदेऽधिकारो नैवास्ति वेदसारजपस्य वा ॥ ३४ ॥ पुराणस्मृतिपाठस्य तस्मात्किंचिद्वदस्व मे ॥ तत्त्वात्मसदृशं किंचिद्भाति रूपं
महाफलम् ॥ ३५ ॥ चातुर्मास्ये विशेषेण मुक्तिसंसाधकं वद ॥ ३६ ॥ ॥ गालव उवाच ॥ ॥ शालिग्रामगतं विष्णुं चक्रांकित
पुटं सदा ॥ येऽर्चयन्ति नरा नित्यं तेषां मुक्तिस्त्वदूरतः ॥ ३७ ॥ शालिग्रामे मनो यस्य यत्किंचित्क्रियते शुभम् ॥ अक्षय्यं तद्भवे



१ भाक्ति—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्नित्यं चातुर्मास्ये विशेषतः ॥ ३८ ॥ शालिग्रामशिला यत्र यत्र द्वारावती शिला ॥ उभयोः संगमः प्राप्तो मुक्तिस्तस्य न दुर्लभा ॥ ३९ ॥ शालिग्रामशिला यस्यां भूमौ संपूज्यते नृभिः ॥ पञ्चक्रोशं पुनात्येषा अपि पापशतान्वितैः ॥ ४० ॥ तैजसं पिंडमेतद्धि ब्रह्मरूपमिदं शुभम् ॥ यस्याः संदर्शनादेव सद्यः कल्मषनाशनम् ॥ ४१ ॥ सर्वतीर्थानि पुण्यानि देवतायतनानि च ॥ नद्यः सर्वा महाशूद्र तीर्थत्वं प्राप्नुवंति हि ॥४२॥ सन्निधानेन वै तस्याः क्रियाः सर्वत्र शोभनाः ॥ व्रजंति हि क्रियात्वं च चातुर्मास्ये विशेषतः ॥ ४३ ॥ पूज्यते भवने यस्य शालिग्रामशिला शुभा ॥ कोमलैस्तुलसीपत्रैर्विमुखस्तत्र वै यमः ॥ ४४ ॥ ब्राह्मणक्षत्रियविशां सच्छूद्राणामथापि वा ॥ शालिग्रामाधिकारोऽस्ति न चान्येषां कदाचन ॥ ४५ ॥ ॥ सच्छूद्र उवाच ॥ ॥ ब्रह्मन्वेदविदां श्रेष्ठ सर्वशास्त्रविशारद ॥ स्त्रीशूद्रादिनिषेधोऽयं शालिग्रामे हि श्रूयते ॥ ४६ ॥ मादृश स्त्वं कथं शालिग्रामपूजाविधिं वद ॥ ४७ ॥ ॥ गालव उवाच ॥ ॥ असच्छूद्रगतं दास निषेधं विद्धि मानद ॥ स्त्रीणामपि च साध्वीनां नैवाभावः प्रकीर्तितः ॥ ४८ ॥ मा भूत्संशयस्तेनात्र नाऽऽप्नुषे संशयात्फलम् ॥ शालिग्रामार्चनपराः शुद्धदेहा विवेकिनः ॥ ४९ ॥ न ते यमपुरं यांति चातुर्मास्ये च पूजकाः ॥ शालिग्रामार्पितं माल्यं शिरसा धारयंति ये ॥ ५० ॥ तेषां पापसहस्राणि विलयं यांति तत्क्षणात् ॥ शालिग्रामशिलाग्रे तु ये प्रयच्छंति दीपकम् ॥ ५१ ॥ तेषां सौरपुरे वासः कदाचिन्नैव हीयते ॥ शालिग्रामगतं विष्णुं सुमनोभिमनोर्हरैः ॥ येऽर्चयंति महाशूद्र सुते देवे हरौ तथा ॥ ५२ ॥ पंचामृतेन स्नपनं ये कुर्वंति सदा नराः ॥ शालिग्रामशिलायां च न ते संसारिणो नराः ॥ ५३ ॥ मुक्तेर्निदानममलं शालिग्रामगतं हरिम् ॥ हृदि न्यस्य सदा भक्त्या यो ध्यायति स मुक्तिभाक् ॥ ५४ ॥ तुलसीदलजां मालां शालिग्रामोपरि न्यसेत् ॥ चातुर्मास्ये विशेषेण सर्वकामानवाप्नुयात् ॥ ५५ ॥ न तावत्पुष्पजा माला शालिग्रामस्य वल्लभा ॥ सर्वदा तुलसी देवी विष्णोर्नित्यं शुभा प्रिया ॥ ॥ ५६ ॥ तुलसी वल्लभा नित्यं चातुर्मास्ये विशेषतः ॥ शालिग्रामो महाविष्णुस्तुलसी श्रीर्न संशयः ॥ ५७ ॥ अतो वासितपानीयैः स्नाप्यं चंदनचर्चितैः ॥ मंजरीभिर्युतं देवं शालग्रामशिलाहरिम् ॥ ५८ ॥ तुलसीसंभवाभिश्च कृत्वा कामानवाप्नुयात् ॥ पत्रे तु प्रथमे ब्रह्मा द्वितीये भगवाञ्छिवः ॥ ५९ ॥ मंजर्यां भगवान्विष्णुस्तदेकस्थत्रया सदा ॥ मंजरी दलसंयुक्ता ग्राह्या बुधजनैः शुभा ॥ ६० ॥ तां निवेद्य गुरौ भक्त्या जन्मादिक्षयकारणम् ॥ शालिग्रामे धूपराशिं निवेद्य हरितत्परः ॥ ६१ ॥ चातुर्मास्ये विशेषेण मनुष्यो नैव नारकी ॥ शालिग्रामं नरो दृष्ट्वा पूजितं कुसु

१ मादृशः—मादृशस्य—शूद्रस्य—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



मैः शुभैः ॥ ६२ ॥ सर्वपापविशुद्धात्मा याति तन्मयतां हरौ ॥ य स्तौत्यश्मगतं विष्णुं गंडकीजलसंभवम् ॥ ६३ ॥ श्रुतिस्मृतिपुराणैश्च सोऽपि विष्णुपदं व्रजेत् ॥ शालिग्रामशिलायाश्च चतुर्विंशतिसंख्यकाः ॥ भेदाः संति महाशूद्र तान्छृणुष्व महामते ॥ ६४ ॥ इमाः पूज्याश्च लोकेऽत्र चतुर्विंशतिसंख्यकाः ॥ तासां च दैवतं विष्णुं नामानि च वदाम्यहम् ॥ ६५ ॥ स एव मूर्त्तश्चतुरुत्तराभिर्विंशद्भिरेको भगवान्यथाऽऽद्यः ॥ स एव संवत्सरनामसंज्ञः स एव ग्रावागत[1] आदिदेवः ॥ ६६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शेषशाय्युपाख्याने ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये पैजवनोपाख्याने शालिग्रामपूजनमाहात्म्यवर्णनंनाम त्रिचत्वारिंशत्युत्तरद्विशततमोऽध्यायः ॥ २४३ ॥ ॥ छ ॥ ॥ पैजवन उवाच ॥ ॥ एतान्भेदान्मम ब्रूहि विस्तरेण तपोधन ॥ त्वद्वाक्यामृतपानेन तृषा नैव प्रशाम्यति ॥ १ ॥ ॥ गालव उवाच ॥ ॥ शृणु विस्तरतो भेदान्पुराणोक्तान्वदामि ते ॥ याञ्छ्रुत्वा मुच्यतेऽवश्यं मनुजः सर्वकिल्बिषात् ॥ २ ॥ पूर्वं तु केशवः पूज्यो द्वितीयो मधुसूदनः ॥ संकर्षणस्तृतीयस्तु ततो दामोदरः स्मृतः ॥ ३ ॥ पंचमो वासुदेवाख्यः षष्ठः प्रद्युम्नसंज्ञकः ॥ सप्तमो विष्णुरुक्तश्चाष्टमो माधव एव च ॥ ४ ॥ नवमोऽनंतमूर्त्तिश्च दशमः पुरुषोत्तमः ॥ अधोक्षजस्ततः पश्चाद्द्वादशस्तु जनार्दनः ॥ ५ ॥ त्रयोदशस्तु गोविंदश्चतुर्दशस्त्रिविक्रमः ॥ श्रीधरश्च पंचदशो हृषीकेशस्तु षोडशः ॥ ६ ॥ नृसिंहस्तु सप्तदशो विश्वयोनिस्ततः परम् ॥ वामनश्च ततः प्रोक्तस्ततो नारायणः स्मृतः ॥ ७ ॥ पुंडरीकाक्ष उक्तस्तु ह्युपेंद्रश्च ततः परम् ॥ हरिस्त्रयोविंशतिमः कृष्णश्चांत्य उदाहृतः ॥ ८ ॥ शालिग्रामस्य भेदाश्च मयोक्तास्तव शूद्रज ॥ मूर्तिभेदास्तथा प्रोक्ता एत एव महाधन ॥ ९ ॥ मूर्त्तयस्तिथिनाम्न्यः स्युरेकादश्यः सदैव हि ॥ संवत्सरेण पूज्यंते चतुर्विंशतिमूर्तयः ॥ १० ॥ देवावताराश्च तथा चतुर्विंशतिसंख्यकाः ॥ मासा मार्गशिराद्याश्च मासार्द्धाः पक्षसंज्ञकाः ॥ ११ ॥ अधीशसहितान्नित्यं पूजयन्भक्तिमान्भवेत् ॥ चतुर्विंशतिसंज्ञं च चतुष्टयमुदाहृतम् ॥ १२ ॥ एतच्चतुष्टयं नणां धर्मकामार्थमोक्षदम् ॥ यः शृणोति नरो भक्त्या पठेद्वापि समाहितः ॥ १३ ॥ भूतसर्गस्य गोप्ताऽसौ हरिस्तस्य प्रसीदति ॥ १४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शेषशाय्युपाख्याने ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये शालिग्रामशिलासुमूर्त्त्युत्पत्तिवर्णनंनाम चतुश्चत्वारिंशदुत्तरद्विशततमोऽध्यायः ॥ २४४ ॥ ॥ छ ॥ ॥ पैजवन उवाच ॥ ॥ शालिग्रामशिलायां च जगदादिः सनातनः ॥ कथं पाषाणतां प्राप्तो गण्ड

१ ग्रावागतः—ग्राव्णि आगतः—ग्रावागतः—शालिग्रामशिलागत—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथां तच्च मे वद ॥ १ ॥ त्वत्प्रसादेन विप्रर्षे हरौ भक्तिर्दृढा भवेत् ॥ भवंतस्तीर्थरूपा हि दर्शनात्पापहारिणः ॥ २ ॥ तीर्थामृतावगाहेन यथा पवित्रता नृणाम् ॥ भवद्वाक्यामृताज्जाता तथा मम न संशयः ॥ ३ ॥ ॥ गालव उवाच ॥ ॥ इतिहासस्त्वयं पुण्यः पुराणेषु च पठ्यते ॥ यथा स एव भगवाञ्छालिग्रामत्वमागतः ॥ ४ ॥ महेश्वरश्च लिंगत्वं कथयेऽहं तवाऽनघ ॥ पूर्वं प्रजापतिर्दक्षो ब्रह्मणोऽङ्गुष्ठसंभवः ॥ ५ ॥ तस्यासीद्दुहिता साध्वी सतीनाम्नी सुलक्षणा ॥ हरेणोढा विधिज्ञेन वेदोक्तविधिना ततः ॥ ६ ॥ स चकार महायज्ञे हरद्वेषं विमूढधीः ॥ तेन द्वेषेण महता सती प्रकुपिता भृशम् ॥ ७ ॥ यज्ञवेद्यां समागम्य वह्निधारणया तदा ॥ प्राणायामपरा भूत्वा देहोत्सर्गं चकार सा ॥ ८ ॥ पितृभागं परित्यज्य स्वभागेन युता सती ॥ मनसा ध्यानमगमच्छीतलं च हिमालयम् ॥ ९ ॥ यत्रयत्र मनो याति स्वकर्मवशगं मृतौ ॥ अवतारस्तत्रतत्र जायते नात्र संशयः ॥ १० ॥ दह्यमाना हि सा देवी हिमालयसुताऽभवत् ॥ तत्र सा पार्वती भूत्वा तप उग्रं समाश्रिता ॥ ११ ॥ शिवभक्तिरता नित्यं हरव्रतपरायणा ॥ शृंगे हिमवतः पुत्री मनो न्यस्य महेश्वरे ॥ ॥ १२ ॥ ततो वर्षसहस्रांते भगवान्भूतभावनः ॥ अथाजगाम तं देशं विप्ररूपो महेश्वरः ॥ १३ ॥ तां ज्ञात्वा तपसा शुद्धां कर्मभावैः परीक्षितैः ॥ ततो दिव्यवपुर्भूत्वा करे जग्राह पार्वतीम् ॥ १४ ॥ तपसा निर्जितश्चास्मि करवाणि च किं प्रियम् ॥ ततः प्राह महेशानं प्रमाणं मे पिता गुरुः ॥ ॥ १५ ॥ सप्तर्षीन्स तथोक्तस्तु प्रेषयामास शंकरः ॥ ते तत्र गत्वा समयं वक्तुं हिमवता सह ॥ १६ ॥ निवेद्य च महेशानं प्रेषिता मुनयो ययुः ॥ ततो लग्नदिने देवा महेन्द्रादय ईश्वरम् ॥ १७ ॥ ब्रह्मविष्णुपुरोगाश्च पुरोधायाग्निमाययुः ॥ योगसिद्धाः समायांतं वरवेषं वृषध्वजम् ॥ १८ ॥ हिमवान्पूजयामास मधुपर्कादिकैः शुभैः ॥ उपचारैर्मुदा युक्तो मानयन्कृतकृत्यताम् ॥ १९ ॥ वेदोक्तेन विधानेन तां कन्यां समयोजयत् ॥ पाणिग्रहेण विधिना द्विजातिगणसंवृतः ॥ २० ॥ वह्निं प्रदक्षिणीकृत्य गिरीशस्तदनन्तरम् ॥ दानकाले च गोत्रादि पृष्टो लज्जापरो हरः ॥२१॥ ब्रह्मणो वचनात्तेन विधिशेषोऽवशेषितः ॥ चरुप्राशनकाले तु पंचवक्त्रप्रकाशकृत् ॥ २२ ॥ सहितः सकलैर्देवैः कुतूहलपरायणः ॥ गिरिजार्थं समायुक्तो वरः सोऽपि महेश्वरः ॥ २३ ॥ नवकोटिमुखां[1] दृष्ट्वा साट्टहासो जनोऽभवत् ॥ वैदिकी श्रुतिरित्युक्ता शिव त्वं स्थिरतां व्रज ॥ २४ ॥ लज्जिता सा

१ नवकोटिमुखाम्-पार्वतीम्-इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



परित्यागं नाकरोत्पंचजन्मसु ॥ भर्त्तारमसितापांगी हरमेवाभ्यगच्छत ॥ २५ ॥ देवानां पर्वतानां च प्रहृष्टं सकलं कुलम् ॥ ततो विवाहे संपूर्णे
हरोऽगात्कौतुकौकसि ॥ २६ ॥ गणानां चापि सान्निध्ये सा नामर्षयदंबिका ॥ पारिबर्हं ततो दत्त्वा शैलेन स विसर्जितः ॥ २७ ॥ मानितः
सत्कृतश्चापि मन्दराचलमभ्यगात् ॥ विश्वकर्मा ततस्तस्य क्षणेन मणिमद्गृहम् ॥ २८ ॥ निर्ममे देवदेवस्य स्वेच्छावर्द्धिष्णुमंदिरम् ॥ सर्वर्द्धिमत्प्रश
स्ताभं मणिविद्रुमभूषितम् ॥ २९ ॥ स्थूणासहस्रसंयुक्तं मणिवेदिमनोहरम् ॥ गणा नंदिप्रभृतयो यस्य द्वारि समाश्रिताः ॥ ३० ॥ त्रिनेत्राः शूलह
हस्ताश्च बभ्रुः शंकररूपिणः ॥ वाटिका अस्य परितः पारिजाताः सहस्रशः ॥ ३१ ॥ कामधेनुर्मणिर्दिव्यो यस्य द्वारि समाश्रितौ ॥ तस्मिन्मनोह
रतरे कामवृद्धिकरे गृहे ॥ ३२ ॥ पार्वत्या वसतः सार्द्धं कामो दृष्टिपथं ययौ ॥ वायुरूपः शिवं दृष्ट्वा कामः प्रोवाच शंकरम् ॥ ३३ ॥ नमस्ते सर्व
रूपाय नमस्ते वृषभध्वज ॥ नमस्ते गणनाथाय पाहि नाथ नमोऽस्तु ते ॥३४॥ त्वया विरहितं लोकं शववत्स्पृशते मही ॥ न त्वया रहितं किञ्चि
दृश्यते सचराचरे ॥ ३५ ॥ त्वं गोप्ता त्वं विधाता च लोकसंहारकारकः ॥ कृपां कुरु महादेव देहदानं प्रयच्छ मे ॥ ३६ ॥ ॥ ईश्वर उवाच ॥
॥ ॥ यन्मया त्वं पुरा दग्धः पर्वते पुरतोऽनघ ॥ तस्या एव समीपे त्वं पुनर्भवस्व देहवान् ॥ ३७ ॥ एवमुक्तस्ततः कामः स्वशरीरमुपागतः ॥
ववंदे चरणौ शूद्र विनयावनतोऽभवत् ॥ ३८ ॥ ततो ननाम चरणौ पार्वत्याः संप्रहृष्टवान् ॥ लब्धप्रसादस्तु तयोः समीपाद्भुवनत्रये ॥ ३९ ॥
चचार सुमहातेजा महामोहबलान्वितः ॥ पुष्पधन्वा पुष्पबाणस्त्वाकुञ्चितशिरोरुहः ॥ ४० ॥ सदाघूर्णितनेत्रश्च तयोर्देहमुपाविशत् ॥ दिव्यासवै
र्दिव्यगंधैर्वस्त्रमाल्यादिभिस्तथा ॥ ४१ ॥ सख्यः संभोगसमये परिचक्रुः समंततः ॥ एवं प्रक्रीडतस्तस्य वत्सराणां शतं ययौ ॥ ४२ ॥ साग्रमेका
निशा यद्वन्मैथुने सक्तचेतसः ॥ एतस्मिन्नंतरे देवास्तारकप्रद्रुता भयात् ॥ ब्रह्माणं शरणं जग्मुः स्तुत्वा तं शरणं गताः ॥ ४३ ॥ ॥ देवा ऊचुः ॥ ॥
तारकोऽसौ महारौद्रस्त्वया दत्तवरः पुरा ॥ ४४ ॥ विजित्य तरसा शक्रं भुंक्ते त्रैलोक्यपूजितः ॥ वधोपायो यथा तस्य जायते त्वं कुरु स्वयम् ॥
॥ ४५ ॥ ॥ ब्रह्मोवाच ॥ ॥ मया दत्तवरश्चासौ मयैवोच्छिद्यते नहि ॥ स्वयं संवर्ध्य कटुकं छेत्तुं कोऽपि न चार्हति ॥ ४६ ॥ तस्मात्तस्य
वधोपायं कथयामि महात्मनः ॥ पार्वत्यां यो महेशानात्सूनुरुत्पत्स्यते हि सः ॥ ४७ ॥ दिनसप्तकवान्भूत्वा तारकं स हनिष्यति ॥ इति वाक्यं तु 
ते श्रुत्वा मंदरं लोकसुंदरम् ॥ ४८ ॥ ब्रह्मलोकात्समाजग्मुः पीडिता दैत्यदानवैः ॥ ४९ ॥ तत्र नंदिप्रभृतयो गणाः शूलभृतः पुरः ॥ गृहद्वारे ह्युपा
वृत्य तस्थुः संयतचेतसः ॥ ५० ॥ ॥ देवा ऊचुः ॥ ॥ देवाश्च दुःखातुरचेतसो भृशं हतप्रभास्त्यक्तगृहाश्रयाखिलाः ॥ संप्राप्य मासांश्चतुरः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तपः स्थिता देवे प्रसुप्ते हरतोषणं परम् ॥ ५१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शेषशाय्युपाख्याने ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये पैजवनोपाख्याने तारकोपद्रुतानां देवानां शिवदर्शनार्थं मंदराचलंप्रतिगमनवर्णनंनाम पञ्चचत्वारिंशदुत्तरद्विशततमोऽध्यायः ॥ २४५ ॥ ॥ गालव उवाच ॥ ॥ शक्रादयस्तु देवेशा दुःखसंतप्तमानसाः ॥ ॥ ईश्वरादर्शनभ्रांतमनः कर्मेंद्रिया रतिम् ॥ १ ॥ न प्रापुर्लोकनाथं ते कृत्वा यः प्रतिमाकृतिम् ॥ तपसाराधयामासुः सर्वभूतहृदि स्थितम् ॥ २ ॥ कपर्दशिरसं देवं शूल हस्तं पिनाकिनम् ॥ कपालखट्वांगधरं दशहस्तं किरीटिनम् ॥ ३ ॥ उमासहितमीशानं पंचवक्त्रं महाभुजम् ॥ कर्पूरगौरदेहाभं सितभूतिविभूषितम् ॥ ॥ ४ ॥ नागयज्ञोपवीतेन गजचर्मसमन्वितम् ॥ कृष्णसारत्वचा चापि कृतप्रावरणं विभुम् ॥ ५ ॥ कृतध्यानाः सुरास्तत्र वृक्षाधारे समाश्रिताः ॥ व्रतचर्यां समाश्रित्य प्रचक्रुस्तप उत्तमम् ॥ ६ ॥ षडक्षरेण मंत्रेण शैवेन विहिताः सुराः ॥ ॥ शूद्र उवाच ॥ ॥ व्रतचर्या त्वया या सा प्रोक्ता संजा यते कथम् ॥ ७ ॥ ब्रह्मन्विस्तरतो ब्रूहि न तृप्ये ते वचोऽमृतैः ॥ ८ ॥ ॥ गालव उवाच ॥ ॥ जपन्भस्म च खट्वांगं कपालं स्फाटिकं तथा ॥ रुंडमालां पंचवक्त्रमर्द्धचंद्रं च मूर्द्धनि ॥ ९ ॥ चित्रकृत्तिपरीधानं कौपीनकुण्डलद्वयम् ॥ घंटायुग्मं त्रिशूलं च सूत्रं चर्यास्वरूपकम् ॥ १० ॥ अमीभिर्लक्षणैर्लक्ष्यं मयोक्तं तव शूद्रज ॥ अनेन विधिना सर्वे देवा वह्निपुरोगमाः ॥ ११ ॥ सर्व आराधयामासुः सर्वोपायैर्वरप्रदम् ॥ चातुर्मास्ये च संपूर्णे सपूर्णे कार्तिकेऽमले ॥ १२ ॥ चीर्णव्रतान्सुरान्दृष्ट्वा विशुद्धांश्च महेश्वरः ॥ मतिं तेषां ददौ तुष्टो जीवात्मा सर्वभूतदृक् ॥ १३ ॥ शतरुद्रीयजाप्येन विधानसहितेन च ॥ ध्यानेन दीपदानेन चातुर्मास्ये तुतोष सः ॥ १४ ॥ पूजनैः षोडशविधैर्यथा विष्णोस्तथा हरे ॥ कुर्वाणान्भक्तिभावेन ज्ञात्वा देवान्समागतान् ॥ १५ ॥ प्रहृष्टो भगवान्रुद्रो ददौ तेषां शुभां मतिम् ॥ ततः संमंत्र्य ते देवा वह्निं स्तुत्वा यथार्थतः ॥ १६ ॥ प्रसन्नवदनं चक्रुः कार्यसाधनतत्परम् ॥ कर्मसाक्षी महातेजाः कृत्वा पारावतं वपुः ॥ १७ ॥ प्रविवेश ततो मध्ये द्रष्टुं देवं महेश्वरम् ॥ चकार गतिविक्षेपं गुंठनैरवगुंठनैः ॥ १८ ॥ लुंठनैः सर्पणैश्चैव चारुरूपोऽद्भुतां गतिम् ॥ तं दृष्ट्वा भगवांस्तत्र कारणं समबुद्ध्यत ॥ १९ ॥ ऊर्ध्वरेतास्ततस्तस्मिन्ससर्जादौ दधार तत् ॥ वीर्यं वह्निमुखे चैव सोत्पपात गृहाद्बहिः ॥ २० ॥ गते तस्मिन्पतंगेऽथ पार्वती विफलश्रमा ॥ संक्रुद्धा सर्वदेवानां सा शशाप महेश्वरी ॥ २१ ॥ यस्मान्ममेच्छा विहता भवद्भिर्दुष्टबुद्धिभिः ॥ तस्मात्पाषाणतामाशु व्रजंतु त्रिदिवौकसः ॥ २२ ॥ निरपत्या निर्दयाश्च सर्वे देवा भविष्यथ ॥ ततः प्रसादयामासुः प्रणताः शापयंत्रिताः ॥ २३ ॥ महद्दुःखं संप्रविष्टाः पुनः पुनरथाब्रुवन् ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



॥ ॥ देवा ऊचुः ॥ ॥ त्वं माता सर्वदेवानां सर्वसाक्षी सनातनी ॥ उत्पत्तिस्थितिसंहारकारणं जगतां सदा ॥ २५ ॥ भूतप्रकृतिरूपा त्वं महाभूतसमाश्रिता ॥ अपर्णा तपसां धात्री भूतधात्री वसुन्धरा ॥ २६ ॥ मंत्राराध्या मन्त्रबीजं विश्वबीजलयस्थितिः ॥ यज्ञादिफलदात्री च स्वाहारूपेण सर्वदा ॥ २७ ॥ मन्त्रयन्त्रसमोपेता ब्रह्मविष्णुशिवादिषु ॥ नित्यरूपा महारूपा सर्वरूपा निरञ्जना ॥ २८ ॥ दोषत्रयसमाक्रान्तजननैः श्रेयसप्रदा ॥ महालक्ष्मीर्महाकाली महादेवी महेश्वरी ॥ २९ ॥ विश्वेश्वरी महामाया मायाबीजवरप्रदा ॥ वररूपा वरेण्या त्वं वरदात्री वरासुता ॥ ३० ॥ बिल्वपत्रैः शुभैर्ये त्वां पूजयन्ति नराः सदा ॥ तेषां राज्यप्रदात्री च कामदा सिद्धिदा सदा ॥ ३१ ॥ चातुर्मास्येऽर्चिता यैस्त्वं बिल्वपत्रैर्विशेषतः ॥ तेषां वांछितसिद्ध्यर्थं जाता कामदुघा स्वयम् ॥ ३२ ॥ येऽर्चयंति सदा लोके महेश्वरसमन्विताम् ॥ बिल्वपत्रैर्महाभक्त्या न तेषां दुःखदुष्कृती ॥ ३३ ॥ चातुर्मास्ये विशेषेण तव पूजा महाफला ॥ अद्यप्रभृति यैर्लोकैर्बिल्वपत्रैस्तु पूजिता ॥ ३४ ॥ विधास्यसि महेशानि तेषां ज्ञानमनुत्तमम् ॥ चातुर्मास्येऽधिकफलं बिल्वपत्रं वरानने ॥ ३५ ॥ उमामहेश्वरप्रीत्यै दत्तं विधिवदक्षयम् ॥ यथा श्रीस्तुलसीवृक्षे तथा बिल्वे च पार्वती ॥ ३६ ॥ त्वं मूर्त्या दृश्यसे विश्वं सकलाभीष्टदायिनी ॥ चातुर्मास्ये विशेषेण सेवितौ द्वौ महाफलौ ॥ ३७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शेषशाय्युपाख्याने ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये पैजवनोपाख्याने पार्वत्येन्द्रादीनां शापप्रदानवृत्तान्तवर्णनंनाम षट्चत्वारिंशदुत्तरशततमोऽध्यायः ॥ २४६ ॥ ॥ छ ॥ ॥

॥ ॥ पैजवन उवाच ॥ ॥ श्रीः कथं तुलसीरूपा बिल्ववृक्षे च पार्वती ॥ एतच्च विस्तरेण त्वं मुने तत्त्वं वद प्रभो ॥ १ ॥ ॥ ॥ गालव उवाच ॥ ॥ पुरा देवासुरे युद्धे दानवा बलदर्पिताः ॥ देवान्निजघ्नुः संग्रामे घोररूपाः सुदारुणाः ॥ २ ॥ देवाश्च भयसंविग्ना ब्रह्माणं शरणं ययुः ॥ ते स्तुत्वा पितरं नत्वा बृहस्पतिपुरःसराः ॥ ३ ॥ तस्थुः प्रांजलयः सर्वे तानुवाच पितामहः ॥ किमर्थं म्लानवदना अस्मद्गेहमुपागताः ॥ ४ ॥ कारणं कथ्यतामाशु वह्नीन्द्रवसुभिर्युताः ॥ ॥ देवा ऊचुः ॥ ॥ दैत्यैः पराजितास्तात संगरेऽद्भुतकारिभिः ॥ ५ ॥ वयं सर्वे पराक्रांता अतस्त्वां शरणं गताः ॥ त्राह्यस्मान्देवदेवेश शरणं समुपागतान् ॥ ६ ॥ तच्छ्रुत्वा भगवान्प्राह ब्रह्मा लोकपितामहः ॥ मया न शक्यते कर्तुं पक्षः कस्य जनस्य च ॥ ७ ॥ वक्ष्याम्युपायं सद्धर्माश्रितानां भवतां पुरः ॥ एकदा शिवभक्तानां विवादः सुमहानभूत् ॥८॥ समं केशवभक्तैश्च परस्परजिगीषया ॥ ततस्तु भगवान्रुद्रः स्वभक्तानां च पश्यताम् ॥ ९ ॥ ऐक्यं विष्णुगणैः कुर्वन्दध्रे रूपं महा



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्भुतम् ॥ तदा हरिहराख्यं च देहार्द्धाभ्यां दधार सः॥१०॥ हरश्चैवार्द्धदेहेन विष्णुरर्द्धेन चाभवत् ॥ एकतो विष्णुचिह्नानि हरचिह्नानि चैकतः॥११॥ एकतो वैनतेयश्च वृषभश्चान्यतोऽभवत् ॥ वामतो मेघवर्णाभो देहोऽश्मनिचयोपमः ॥ १२ ॥ कर्पूरगौरः सव्ये तु समजायत वै तदा ॥ द्वयोरैक्यसमं विश्वं विश्वमैक्यमवर्त्तत ॥ १३ ॥ विभेदमतयो नष्टाः श्रुतिस्मृत्यर्थबाधकाः ॥ पाखंडिनो हैतुकाश्च सर्वे विस्मयमागमन् ॥ १४ ॥ स्वंस्वं मार्गं परित्यज्य ययुर्निर्वाणपद्धतिम् ॥ मंदरे पर्वतश्रेष्ठे सा मूर्तिर्नित्यसंस्तुता ॥ १५ ॥ प्रमथाद्यैर्गणैश्चैव वर्त्ततेऽद्यापि निश्चला ॥ सृष्टिस्थित्यंतकर्त्री सा विश्वबीजमनंतका ॥ १६ ॥ महेशविष्णुसंयुक्ता सा स्मृता पापनाशिनी ॥ योगिध्येया सदापूज्य सत्त्वाधारगुणातिगा ॥ १७ ॥ मुमुक्षवोऽपि तां ध्यात्वा प्रयांति परमं पदम् ॥ चातुर्मास्ये विशेषेण ध्यात्वा मर्त्यो ह्यमानुषः ॥ १८ ॥ तत्र गच्छंति ये तेषां स देवः संविधास्यति ॥ इत्युक्त्वा भगवां स्तेषां तत्रैवांतरधीयत ॥ १९ ॥ तेऽपि वह्निमुखा देवाः प्रजग्मुर्मंदराचलम् ॥ बभ्रमुस्तत्रतत्रैव विचिन्वाना महेश्वरम् ॥ २० ॥ पार्वतीं बिल्ववृक्षस्थां लक्ष्मीं च तुलसीगताम् ॥ आदौ सर्वं वृक्षमयं पूर्वं विश्वमजायत ॥ २१ ॥ एते वृक्षा महाश्रेष्ठाः सर्वे देवांशसंभवाः ॥ एतेषां स्पर्शनादेव सर्वपापैः प्रमुच्यते ॥ २२ ॥ चातुर्मास्ये विशेषेण महापापौघहारिणः ॥ यदा तेनैव ददृशुर्देवास्त्रिभुवनेश्वरम् ॥ २३ ॥ तदाकाशभवा वाणी प्राह देवान्यथार्थतः ॥ ईश्वरः सर्वभूतानां कृपया वृक्षमाश्रितः ॥ २४ ॥ चातुर्मास्येऽथ संप्राप्ते सर्वभूतदयाकरः ॥ अश्वत्थोऽतः सदा सेव्यो मंदवारे विशेषतः ॥ २५ ॥ नित्यमश्वत्थसंस्पर्शात्पापं याति सहस्रधा ॥ दुग्धेन तर्पणं ये वै तिलमिश्रेण भक्तितः ॥ २६ ॥ सेचनं वा करिष्यंति तृप्तिस्तत्पूर्वजेषु च ॥ दर्शनादेव वृक्षस्य पातकं तु विनश्यति ॥ २७ ॥ पिप्पलः पूजितो ध्यातो दृष्टः सेवित एव वा ॥ पापरोगविनाशाय चातुर्मास्ये विशेषतः ॥ अश्वत्थं पूजितं सिक्तं सर्वभूतसुखावहम् ॥ २८ ॥ सर्वामयहरं चैव सर्वपापौघहा रिणम् ॥ ये नराः कीर्तयिष्यंति नामाप्यश्वत्थवृक्षजम् ॥ २९ ॥ न तेषां यमलोकस्य भयं मार्गे प्रजायते ॥ कुंकुमैश्चंदनैश्चैव सुलितं यश्च कारयेत् ॥ ३० ॥ तस्य तापत्रयाभावो वैकुंठे गणता भवेत् ॥ दुःस्वप्नं दुष्टचिंताञ्च दुष्टज्वरपराभवान् ॥ ३१ ॥ विलयं नय पापानि पिप्पल त्वं हरिप्रिय ॥ मंत्रेणानेन ये देवाः पूजयिष्यंति पिप्पलम् ॥ ३२ ॥ ततस्तेषां धर्मराजो जायते वाक्यकारकः ॥ अश्वत्थो वचनेनापि प्रोक्तो ज्ञानप्रदो नृणाम् ॥ ३३ ॥ श्रुतो हरति पापं च जन्मादि मरणावधि ॥ अश्वत्थसेवनं पुण्यं चातुर्मास्ये विशेषतः ॥ ३४ ॥ सुप्ते देवे वृक्षम ध्यमास्थाय भगवान्प्रभुः ॥ जलं पृथ्वीगतं सर्वं प्रपिबन्निव सेवते ॥ ३५ ॥ जलं विष्णुर्जलत्वेन विष्णुरेव रसो महान् ॥ तस्माद्वृक्षगतो विष्णुश्चातु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



र्मास्येऽघनाशनः ॥ ३६ ॥ सर्वभूतगतो विष्णुराप्याययति वै जगत् ॥ तथाश्वत्थगतं विष्णुं यो नमस्येन्न नारकी ॥ ३७ ॥ अश्वत्थं रोपयेद्यस्तु
पृथिव्यां प्रयतो नरः ॥ तस्य पापसहस्राणि विलयं यांति तत्क्षणात् ॥ ३८ ॥ अश्वत्थः सर्ववृक्षाणां पवित्रो मंगलान्वितः ॥ मुक्तिदो रोपितो
ध्यातश्चातुर्मास्येऽघनाशनः ॥ ३९ ॥ अश्वत्थे चरणं दत्त्वा ब्रह्महत्या प्रजायते ॥ निष्कारणं संकुथित्वा नरके पच्यते ध्रुवम् ॥ ४० ॥ मूले विष्णुः
स्थितो नित्यं स्कंधे केशव एव च ॥ नारायणस्तु शाखासु पत्रेषु भगवान्हरिः ॥ ४१ ॥ फलेऽच्युतो न संदेहः सर्वदेवैः समन्वितः ॥ चातुर्मास्ये
विशेषेण द्रुमपूजी स मुक्तिभाक् ॥ ४२ ॥ तस्मात्सर्वप्रयत्नेन सदैवाश्वत्थसेवनम् ॥ यः करोति नरो भक्त्या पापं याति दिनोद्भवम् ॥ ४३ ॥
स एव विष्णुर्द्रुम एव मूर्तो महात्मभिः सेवितपुण्यमूलः ॥ यस्याश्रयः पापसहस्रहंता भवेन्नृणां कामदुघो गुणाढ्यः ॥ ४४ ॥ इति श्रीस्कांदे महापु
राण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शेषशाय्युपाख्याने ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये पैजवनोपाख्यान
अश्वत्थमहिमवर्णनंनाम सप्तचत्वारिंशदुत्तरद्विशततमोऽध्यायः ॥ २४७ ॥ ॥छ॥ ॥ ब्रह्मोवाच ॥ ॥ पलाशो हरिरूपेण सेव्यते हि पुराविदैः ॥
बहुभिर्ह्युपचारैस्तु ब्रह्मवृक्षस्य सेवनम् ॥ १ ॥ सर्वकामप्रदं प्रोक्तं महापातकनाशनम् ॥ त्रीणि पत्राणि पालाशे मध्यमं विष्णुशापितम् ॥ २ ॥
वामे ब्रह्मा दक्षिणे च हर एकः प्रकीर्तितः ॥ पलाशपात्रे यो भुंक्ते नित्यमेव नरोत्तमः ॥ ३ ॥ अश्वमेधसहस्रस्य फलं प्राप्नोत्यसंशयम् ॥ चातु
र्मास्ये विशेषेण भोक्तुर्मोक्षप्रदं भवेत् ॥ ४ ॥ पयसा वाथ दुग्धेन रविवारेऽनिशं यदि ॥ चातुर्मास्येऽर्चितो यैस्तु ते यांति परमं पदम् ॥५॥ दृश्यते
यदि पालाशः प्रातरुत्थाय मानवैः ॥ नरकानाशु निर्धूय गम्यते परमं पदम् ॥ ६ ॥ पालाशः सर्वदेवानामाधारो धर्मसाधनम् ॥ यत्र लोभस्तु तस्य
स्यात्तत्र पूज्यो महातरुः ॥७॥ यथा सर्वेषु वर्णेषु विप्रो मुख्यतमो भवेत् ॥ मध्ये सर्वतरूणां च ब्रह्मवृक्षो महोत्तमः ॥८॥ यस्य मूले हरो नित्यं स्कंधे
शूलधरः स्वयम् ॥ शाखासु भगवान्रुद्रः पुष्पेषु त्रिपुरांतकः ॥ ९ ॥ शिवः पत्रेषु वसति फले गणपतिस्तथा ॥ गंगापतिस्त्वचायां तु मज्जायां भगवा
न्भवः ॥ १० ॥ ईश्वरस्तु प्रशाखासु सर्वोऽयं हरवल्लभः ॥ हरः कर्पूरधवलो यथावद्वर्णितः सदा ॥ ११ ॥ तथा ह्ययं ब्रह्मरूपः सितवर्णो महाभगः॥
चिंतितो रिपुनाशाय पापसंशोषणाय च ॥ १२ ॥ मनोरथप्रदानाय जायते नात्र संशयः ॥ गुरुवारे समायाते चातुर्मास्ये तथैव च ॥ १३ ॥
पूजितश्च स्तुतो ध्यातः सर्वदुःखविनाशकः ॥ १४ ॥ देवस्तुत्यो देवबीजं परं यन्मूर्तं ब्रह्म ब्रह्मवृक्षत्वमातम् ॥ नित्यं सेव्यः श्रद्धया स्थाणुरूप



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चातुर्मास्ये सेवितः पापहा स्यात्॥ १९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शेषशाय्युपाख्याने ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये पैजवनोपाख्याने पालाशमहिमवर्णनंनामाष्टचत्वारिंशदुत्तरद्विशततमोऽध्यायः ॥ २४८ ॥ ॥छ॥ ॥ ॥ वाण्युवाच ॥ ॥ तुलसी रोपिता येन गृहस्थेन महाफला ॥ गृहे तस्य न दारिद्र्यं जायते नात्र संशयः ॥ १ ॥ तुलस्या दर्शनादेव पापराशिर्निवर्तते ॥ श्रियेऽमृतकणोत्पन्ना तुलसी हरिवल्लभा ॥ २ ॥ पिबन्त्या रुचिरं पानं प्राणिनां पापहारिणी ॥ यस्या रूपे वसेल्लक्ष्मीः स्कन्धे सागरसंभवा ॥ ३ ॥ पत्रेषु सततं श्रीश्च शाखासु कमला स्वयम् ॥ इन्दिरा पुष्पगा नित्यं फले क्षीराब्धिसंभवा ॥ ४ ॥ तुलसी शुष्ककाष्ठेषु या रूपा विश्वव्यापिनी ॥ मज्जायां पद्मवासा च त्वचासु च हरिप्रिया ॥ ५ ॥ सर्वरूपा च सर्वेशा परमानन्ददायिनी ॥ तुलसी प्राशको मर्त्यो यमलोकं न गच्छति ॥ ६ ॥ शिरस्था तुलसी यस्य न याम्यैरनुभूयते ॥ मुखस्था तुलसी यस्य निर्वाणपददायिनी ॥ ७ ॥ हस्तस्था तुलसी यस्य स तापत्रयवर्जितः ॥ तुलसी हृदयस्था च प्राणिनां सर्वकामदा ॥ ८ ॥ स्कन्धस्था तुलसी यस्य स पापैर्न च लिप्यते ॥ कण्ठगा तुलसी यस्य जीवन्मुक्तः सदा हि सः ॥ ९ ॥ तुलसीसंभवं पत्रं सदा वहति यो नरः ॥ मनसा चिन्तितां सिद्धिं संप्राप्नोति न संशयः ॥ ॥ १० ॥ तुलसीं सर्वकार्यार्थसाधिनीं दुष्टवारिणीम् ॥ यो नरः प्रत्यहं सिञ्चेन्न स याति यमालयम् ॥ ११ ॥ चातुर्मास्ये विशेषेण वन्दितापि विमुक्तिदा ॥ नारायणं जलगतं ज्ञात्वा वृक्षगतं तथा ॥ १२ ॥ प्राणिनां कृपया लक्ष्मीस्तुलसीवृक्षमाश्रिता ॥ चातुर्मास्ये समायाते तुलसी सेविता यदि ॥ १३ ॥ तेषां पापसहस्राणि यांति नित्यं सहस्रधा ॥ गोविन्दस्मरणं नित्यं तुलसीवनसेवनम् ॥ १४ ॥ तुलसीसेचनं दुग्धै श्चातुर्मास्येऽतिदुर्लभम् ॥ तुलसीं वर्द्धयेद्यस्तु मानवो यदि श्रद्धया ॥ १५ ॥ आलवालांबुदानैश्च पावितं सकलं कुलम् ॥ यथा श्रीस्तुलसीसंस्था नित्यमेव हि वर्द्धते ॥ १६ ॥ तथातथा गृहस्थस्य कामवृद्धिः प्रजायते ॥ ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ॥ १७ ॥ तथा प्रकृतयः सर्वा स्तुलसीसेवने रताः ॥ श्रद्धया यदि जायन्ते न तासां दुःखदो हरिः ॥ १८ ॥ एको हरिः सकलवृक्षगतो विभाति नानारसैस्तु परिभावितमूर्तिरेव ॥ वृक्षाधिवासमगमत्कमला च देवी दुःखादिनाशनकरी सततं स्मृताऽपि ॥ १९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शेषशाय्युपाख्याने ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये पैजवनोपाख्याने तुलसीमाहात्म्यवर्णनंनामैकोनपञ्चाशदुत्तरद्विशततमोऽध्यायः ॥२४९॥ ॥छ॥ ॥ वाण्युवाच ॥ ॥ बिल्वपत्रस्य माहात्म्यं कथितुं नैव शक्यते ॥ तत्रोद्देशेन वक्ष्यामि महेन्द्र शृणु तत्त्वतः ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

विहारश्रममापन्ना देवी गिरिसुता शुभा ॥ ललाटफलके तस्याः स्वेदबिन्दुरजायत ॥२॥ स भवान्या विनिक्षिप्तो भूतले निपपात च ॥ महातरुरयं
जातो मन्दरे पर्वतोत्तमे ॥ ३ ॥ ततः शैलसुता तत्र रममाणा ययौ पुनः ॥ दृष्ट्वा वनगतं वृक्षं विस्मयोत्फुल्ललोचना ॥ ४ ॥ जयां च विजयां चैव
पप्रच्छ च सखीद्वयम् ॥ कोऽयं महातरुर्दिव्यो विभाति वनमध्यगः ॥ दृश्यते रुचिराकारो महाहर्षकरो ह्ययम् ॥ ५ ॥ ॥ जयोवाच ॥ ॥ देवि
त्वद्देहसंभूतो वृक्षोऽयं स्वेदबिन्दुजः ॥ नामाऽस्य कुरु वै क्षिप्रं पूजितः पापनाशनः ॥ ६ ॥ ॥ पार्वत्युवाच ॥ ॥ यस्मात्क्षोणीतलं भित्त्वा
विशिष्टोऽयं महातरुः ॥ ७ ॥ उदतिष्ठत्समीपे मे तस्माद्बिल्वो भवत्वयम् ॥ इमं वृक्षं समासाद्य भक्तितः पत्रसंचयम् ॥ ८ ॥ आहरिष्यत्यसौ राजा
भविष्यत्येव भूतले ॥ यः करिष्यति मे पूजां पत्रैः श्रद्धासमन्वितः ॥ ९ ॥ यंयं काममभिध्यायेत्तस्य सिद्धिः प्रजायते ॥ यो दृष्ट्वा बिल्वपत्राणि
श्रद्धामपि करिष्यति ॥ १० ॥ पूजनार्थाय विधये धनदाऽहं न संशयः ॥ पत्राग्रप्राशने यस्तु करिष्यति मनो यदि ॥ तस्य पापसहस्राणि यास्यंति
विलयं स्वयम् ॥ ११ ॥ शिरः पत्राग्रसंयुक्तं करोति यदि मानवः ॥ न याम्या यातना ह्यस्य दुःखदात्री भविष्यति ॥ १२ ॥ इत्युक्त्वा पार्वती
दृष्ट्वा जगाम भवनं स्वकम् ॥ सखीभिः सहिता देवी गणैरपि समन्विता ॥ १३ ॥ ॥ वाण्युवाच ॥ ॥ अयं बिल्वतरुः श्रेष्ठः पवित्रः पापना
शनः ॥ तस्य मूले स्थिता देवी गिरिजा नात्र संशयः ॥ १४ ॥ स्कन्धे दाक्षायणी देवी शाखासु च महेश्वरी ॥ पत्रेषु पार्वती देवी फले कात्या
यनी स्मृता ॥ १५ ॥ त्वचि गौरी समाख्याता अपर्णा मध्यवल्कले ॥ पुष्पे दुर्गा समाख्याता उमा शाखांगकेषु च ॥ १६ ॥ कण्टकेषु च सर्वेषु
कोट्यो नवसंख्यया ॥ शक्तयः प्राणिरक्षार्थं संस्थिता गिरिजाऽऽज्ञया ॥१७ ॥ तां भजंति सुपत्रैश्च पूजयंति सनातनीम् ॥ यंयं कामयते कामं तस्य
सिद्धिर्भवेद्ध्रुवम् ॥ १८ ॥ महेश्वरी सा गिरिजा महेश्वरी विशुद्धरूपा जनमोक्षदात्री॥ हरं च दृष्ट्वाथ पलाशमाश्रितं स्वलीलया बिल्ववपुश्चकार सा
॥ १९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शेषशाय्युपाख्याने ब्रह्मनारदसंवादे चातु
र्मास्यमाहात्म्ये पैजवनोपाख्याने बिल्वोत्पत्तिवर्णनंनाम पञ्चाशदुत्तरद्विशततमोऽध्यायः ॥२५०॥ ॥ छ ॥ ॥ गालव उवाच ॥ ॥ इत्युक्त्वाऽऽ
काशजा वाणी विरराम शुभप्रदा ॥ तेऽपि देवास्तदाश्चर्यं महद्दृष्ट्वा महाव्रताः ॥ १ ॥ चतुष्टयं च वृक्षाणां चातुर्मास्ये समागते ॥ अपूजयंश्च विधिव
दैक्यभावेन शूद्रज ॥ २ ॥ चातुर्मास्येऽथ संपूर्णे देवो हरिहरात्मकः ॥ प्रसन्नस्तानुवाचाथ भक्त्या प्रत्यक्षरूपधृक् ॥ ३ ॥ यूयं गच्छत देवेशा महा
व्रतपरायणाः ॥ भुंक्त स्वान्स्वांश्चाधिकारान्मया ते दानवा हताः ॥ ४ ॥ इत्युक्त्वा देवदेवेशावैक्यरूपधरौ यदा ॥ गणानां देवतानां च बुद्धिं निर्मे



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दतां तदा ॥ ५ ॥ नयन्तौ तौ तदा चेशौ बभूवतुररिन्दमौ ॥ तेऽपि देवा निराबाधा हृष्टचित्ता ह्यभेदतः ॥ ६ ॥ प्रययुः स्वांश्चाधिकारान्विमानगण
कोटिभिः ॥ ॥ गालव उवाच ॥ ॥ तथा तत्रापि ते देवाः पार्वत्याः शापमोहिताः ॥ ७ ॥ स्तुत्वा तां बिल्वपत्रैश्च पूजयित्वा महेश्वरीम् ॥ प्रसन्नव
दनां स्तुत्वा प्रणिपत्य पुनःपुनः ॥ ८ ॥ सा प्रोवाच ततो देवान्विश्वमाता तु संस्तुता ॥ मम शापो वृथा नैव भविष्यति सुरोत्तमाः ॥ ९ ॥ तथापि
कृतपापानां करवाणि कृपां च वः॥ स्वर्गे दृषन्मया नैव भविष्यथ सुरोत्तमाः ॥ १० ॥ मर्त्यलोकं च संप्राप्य प्रतिमासु च सर्वशः ॥ सर्वे देवाश्च
वरदा लोकानां प्रभविष्यथ ॥ ११ ॥ पाणिग्रहेण विहिता ये कुमाराः कुमारिकाः ॥ तेषांतेषां प्रजाश्चैव भविष्यथ न संशयः ॥ १२ ॥ इत्युक्त्वा सा
भगवती देवतानां वरप्रदा ॥ विष्णुं महेश्वरं चैव प्रोवाच कुपिता भृशम् ॥ १३ ॥ देवास्तस्या भयान्नष्टा मर्त्येषु प्रतिमां गताः ॥ भक्तानां मानसं
भावं पूरयन्तः सुसंस्थिताः ॥ १४ ॥ यस्माद्विष्णो महेशानस्त्वयाऽपि न निषेधितः ॥ तस्मात्त्वमपि पाषाणो भविष्यसि न संशयः ॥ १५ ॥
हरोऽप्यश्ममयं रूपं प्राप्य लोकविगर्हितम् ॥ लिंगाकारं विप्रशापान्महद्दुःखमवाप्स्यति ॥ १६ ॥ तच्छ्रुत्वा भगवान्विष्णुः पार्वतीमनुकूलयन् ॥
उवाच प्रणतो भूत्वा हरभार्यां महेश्वरीम् ॥ १७ ॥ ॥ श्रीविष्णुरुवाच ॥ ॥ महाव्रते महादेवि महादेवप्रिया सदा ॥ त्वं हि सत्त्वरजःस्था च
तामसी शक्तिरुत्तमा ॥ १८ ॥ मात्रात्रयसमोपेता गुणत्रयविभाविनी ॥ मायादीनां जनित्री त्वं विश्वव्यापकरूपिणी ॥ १९ ॥ वेदत्रयस्तुता
त्वं च साध्यारूपेण रागिणी ॥ अरूपा सर्वरूपा त्वं जनसन्तानदायिनी ॥ २० ॥ फलवेला महाकाली महालक्ष्मीः सरस्वती ॥ ॐकारश्च वष
ट्कारस्त्वमेव हि सुरेश्वरि ॥ २१ ॥ भूतधात्रि नमस्तेऽस्तु शिवायै च नमोऽस्तु ते ॥ रागिण्यै च विरागिण्यै विकराले नमः शुभे ॥ २२ ॥ एवं
स्तुता प्रसन्नाक्षी प्रसन्नेनांतरात्मना ॥ उवाच परमोदारं मिथ्यारोषयुतं वचः ॥ २३ ॥ मच्छापो नाऽन्यथा भावी जनार्दन तवाप्ययम् ॥ तत्रा
ऽपि संस्थितस्त्वं हि योगीश्वरविमुक्तिदः ॥ २४ ॥ कामप्रदश्च भक्तानां चातुर्मास्ये विशेषतः ॥ निम्नगा गंडकीनाम ब्रह्मणो दयिता सुता ॥ २५ ॥
पाषाणसारसंभूता पुण्यदात्री महाजला ॥ तस्याः सुविमले नीरे तव वासो भविष्यति ॥ २६ ॥ चतुर्विंशतिभेदेन पुराणज्ञैर्निरीक्षितः ॥ सुखे
जांबूनदं चैव शालग्रामः प्रकीर्तितः ॥ २७ ॥ वर्तुलस्तेजसः पिंडः श्रिया युक्तो भविष्यसि ॥ सर्वसामर्थ्यसंयुक्तो योगिनामपि मोक्षदः ॥ २८ ॥
ये त्वां शिलागतं विष्णुं पूजयिष्यंति मानवाः ॥ तेषां सुचिन्तितां सिद्धिं भक्तानां संप्रयच्छसि ॥ २९ ॥ शिलागतं च देवेशं तुलस्या भक्ति
तत्पराः ॥ पूजयिष्यंति मनुजास्तेषां मुक्तिर्न दूरतः ॥ ३० ॥ शिलास्थितं च यः पश्येत्त्वां विष्णुं प्रतिमागतम् ॥ सुचक्रांकितसर्वांगं न स



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



गच्छेद्यमालयम् ॥ ३१ ॥ ॥ गालव उवाच ॥ ॥ इति ते कथितं सर्वं शालग्रामस्य कारणम् ॥ यथा स भगवान्विष्णुः पाषाणत्वमुपा गतः ॥ ३२ ॥ गोविन्दोऽपि महाशापं लब्ध्वा स्वभवनं गतः ॥ पार्वती च महेशानं कुपिता प्रणमय्य च ॥ ३३ ॥ एवं स एव भगवान्भवभूत भव्यभूतादिकृत्सकलसंस्थितिनाशनांकः ॥ सोऽपि श्रिया सह भवोऽपि गिरीशपुत्र्या सार्द्धं चतुर्षु च द्रुमेषु निवासमाप ॥ ३४ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शेषशाय्युपाख्याने ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये पैज वनोपाख्याने विष्णुशापोनामैकपञ्चाशदुत्तरद्विशततमोऽध्यायः ॥ २५१ ॥ ॥ शूद्र उवाच ॥ ॥ महदाश्चर्यमेतद्धि यत्सुरा वृक्षरूपिणः ॥ चातु र्मास्ये समायाते सर्ववृक्षनिवासिनः ॥ १ ॥ भगवन्के सुरास्ते तु केषुकेषु निवासिनः ॥ एतद्विस्तरतो ब्रूहि ममानुग्रहकाम्यया ॥ २ ॥ ॥ गालव उवाच ॥ ॥ अमृतं जलमित्याहुश्चातुर्मास्ये तदिच्छया ॥ लीलया विधृतं देवैः पिबंति द्रुमदेवताः ॥ ३ ॥ तस्य पानान्महातृप्तिर्जायते नाऽत्र संशयः ॥ बलं तेजश्च कांतिश्च सौष्ठवं लघुविक्रमः ॥ ४ ॥ गुणा एते प्रजायन्ते पानात्कृष्णांशसंभवात् ॥ नित्यामृतस्य पानेन बलं स्वल्पं प्रजायते ॥ ५ ॥ भोजनं तत्प्रशंसंति नित्यमेतन्न संशयः ॥ तस्माच्चतुर्षु मासेषु पिबन्ति जलमेव हि ॥ ६ ॥ वृक्षस्थाः पितरो देवाः प्राणिनां हित काम्यया ॥ वृक्षाणां सेवनं श्रेष्ठं सर्वमासेषु सर्वदा ॥ ७ ॥ चातुर्मास्ये विशेषेण सेविताः सौख्यकारकाः ॥ तिलोदकेन वृक्षाणां सेचनं सर्वकाम दम् ॥ ८ ॥ क्षीरवृक्षाः क्षीरयुक्तैस्तोयैः सिक्ताः शुभप्रदाः ॥ चतुष्टयं च वृक्षाणां यच्चोक्तं पूर्वतो मया ॥ ९ ॥ चातुर्मास्ये विशेषेण सर्वकाम फलप्रदम् ॥ ब्रह्मा तु वटमाश्रित्य प्राणिनां स वरप्रदः ॥ १० ॥ सावित्रीं तिलमास्थाय पवित्रं श्वेतभूषणम् ॥ सुप्ते देवे विशेषेण तिलसेवा महाफला ॥ ११ ॥ तिलाः पवित्रमतुलं तिला धर्मार्थसाधकाः ॥ तिला मोक्षप्रदाश्चैव तिलाः पापापहारिणः ॥ १२ ॥ तिला विशेषफलदास्तिलाः शत्रुविनाशनाः ॥ तिलाः सर्वेषु पुण्येषु प्रथमं समुदाहृताः ॥ १३ ॥ न तिला धान्यमित्याहुर्देवधान्यमिति स्मृतम् ॥ तस्मात्सर्वेषु दानेषु तिल दानं महोत्तमम् ॥ १४ ॥ कनकेन युता येन तिला दत्तास्तु शूद्रज ॥ ब्रह्महत्यादिपापानां विनाशस्तेन वै कृतः ॥ १५ ॥ सावित्री च तिलाः प्रोक्ता सर्वकार्यार्थसाधकाः ॥ तिलैस्तु तर्पणं कुर्याच्चातुर्मास्ये विशेषतः ॥ १६ ॥ तिलानां दर्शनं पुण्यं स्पर्शनं सेवनं तथा ॥ हवनं भक्षणं चैव शरीरोद्वर्त्तनं तथा ॥ १७ ॥ सर्वथा तिलवृक्षोऽयं दर्शनादेव पापहा ॥ चातुर्मास्ये विशेषेण सेवितः सर्वसौख्यदः ॥ १८ ॥ महेन्द्रो यवमा स्थाय स्थितो भूतहिते रतः ॥ यवस्य सेवनं पुण्यं दर्शनं स्पर्शनं तथा ॥ १९ ॥ यवैस्तु तर्पणं कुर्याद्देवानां दत्तमक्षयम् ॥ प्रजानां पतयः



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वे चूतवृक्षमुपाश्रिताः ॥ २० ॥ गन्धर्वा मलयं वृक्षमगुरुं गणनायकः ॥ समुद्रा वेतसं वृक्षं यक्षा पुन्नागमेव च ॥ २१ ॥ नागवृक्षं तथा नागाः सिद्धाः कंकोलकं द्रुमम् ॥ गुह्यकाः पनसं चैव किन्नरा मरिचं श्रिताः ॥ २२ ॥ यष्टीमधुं समाश्रित्य कन्दर्पोऽभूद्व्यवस्थितः ॥ रक्तांजनं महावृक्षं वह्निराश्रित्य तिष्ठति ॥ २३ ॥ यमो विभीतकं चैव बकुलं नैर्ऋताधिपः ॥ वरुणः खर्जुरीवृक्षं पूगवृक्षं च मारुतः ॥ २४ ॥ धनदोऽक्षोटकं वृक्षं रुद्राश्च बदरीद्रुमम् ॥ सप्तर्षीणां महातालाः बहुलश्चामरैर्वृतः ॥ २५ ॥ जंबूमेंघैः परिवृतः कृष्णवर्णोऽघनाशनः ॥ कृष्णस्य सदृशो वर्णस्तेन जंबूनगोत्तमः ॥ २६ ॥ तत्फलैर्वासुदेवस्तु प्रीतो भवति दानतः ॥ जंबूवृक्षं समाश्रित्य कुर्वंति द्विजभोजनम् ॥ २७ ॥ तेषां प्रीतो हरिर्दद्यात्पुरुषार्थचतुष्टयम् ॥ चातुर्मास्ये समायाते सुप्ते देवे जनार्दने ॥ २८ ॥ ब्राह्मणान्भोजयेद्यस्तु सपत्नीकाञ्छुचिः स्थितः ॥ तेन नारायणस्तुष्टो भवेल्लक्ष्मीसहायवान् ॥ २९ ॥ लक्ष्मीनारायणप्रीत्यै वस्त्रालंकरणैः शुभैः परिधाय सपत्नीकः कृतकृत्यो भवेन्नरः ॥ ३० ॥ यद्रात्रित्रितयेनैव वटाशोकभवेन च ॥ फलं संजायते तच्च जंबुना द्विजभोजनात् ॥ ३१ ॥ तस्मिन्दिने एकभुक्तं कारयेत्कृत्यकृत्तदा ॥ बहुना च किमुक्तेन जंबूवृक्षप्रपूजनात् ॥ ३२ ॥ पुत्रपौत्रधनैर्युक्तो जायते नात्र संशयः ॥ जंबूमेंघैः परिवृता विद्युताऽशोक एव च ॥ ३३ ॥ वसुभिः स्वीकृतो नित्यं प्रियालश्च महानगः ॥ आदित्यैस्तु जपावृक्षो ह्यश्विभ्यां मदनस्तथा ॥ ३४ ॥ विश्वेभिश्च मधूकश्च गुग्गुलः पिशिताशनैः ॥ सूर्येणार्कः पवित्रेण सोमेनाथ त्रिपत्रकः ॥ ३५ ॥ खदिरो भूमिपुत्रेण अपामार्गो बुधेन च ॥ अश्वत्थो गुरुणा चैव शुक्रेणोदुम्बरस्तथा ॥ ३६ ॥ शमी शनैश्चरेणाथ स्वीकृता शूद्रजातिभिः ॥ राहुणा स्वीकृता दूर्वा पितॄणां तर्पणोचिता ॥ ३७ ॥ विष्णोश्च दयिता नित्यं चातुर्मास्ये विशेषतः ॥ केतुना स्वीकृतो दर्भो याज्ञिकेयो महाफलः ॥ ३८ ॥ विना येन शुभं कर्म संपूर्णं नैव जायते ॥ पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम् ॥ ३९ ॥ मूले मध्ये तथाऽग्रे च यस्य नामापि तृप्तिमुमूर्षूणां मोक्षरूपो धरासंस्थो महाद्रुमः ॥ अस्मिन्वसंति सततं ब्रह्मविष्णुशिवाः सदा ॥ ४० ॥ अन्येऽपि देवा वृक्षांस्तानधिश्रित्य महाद्रुमाः ॥ ४१ ॥ प्रवर्त्तंते हि मासेषु चतुर्षु च न संशयः ॥ चातुर्मास्ये देवपत्न्यः सर्वा वल्लीसमाश्रिताः ॥ ४२ ॥ प्रयच्छंति नृणां कामान्वांछितान्सेविता अपि ॥ तस्मात्सर्वात्मभावेन पिप्पलो येन सेवितः ॥ ४३ ॥ सेविताः सकला वृक्षाश्चातुर्मास्ये विशेषतः ॥ तुलसी सेविता येन सर्ववल्ल्यश्च सेविताः ॥ ४४ ॥ आप्यायितं जगत्सर्वमाब्रह्मस्तंबसेवितम् ॥ चातुर्मास्ये गृहस्थेन वानप्रस्थेन वा पुनः ॥ ४५ ॥ ब्रह्मचारियतिभ्यां च सेविता मोक्षदायिनी ॥ एतेषां सर्ववृक्षाणां छेदनं नैव कारयेत् ॥ ४६ ॥ चातुर्मास्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



विशेषेण विना यज्ञादिकारणम् ॥ एतदुक्तमशेषेण यत्पृष्टोऽहमिह त्वया ॥ ४७ ॥ यथा वृक्षत्वमापन्ना देवाः सर्वेऽपि शूद्रज ॥ ४८ ॥ अश्वत्थमेकं पिचुमन्दमेकं न्यग्रोधमेकं दश तित्तिडीश्च ॥ कपित्थबिल्वामलकीत्रयं च एतांश्च दृष्ट्वा नरकं न पश्येत् ॥ ४९ ॥ सर्वे देवा विश्ववृक्षेशयाश्च कृष्णा धारा कृष्णमध्याग्रकाश्च ॥ यस्मिन्देवे सेविते विश्वपूज्ये सर्वं तृप्तं जायते विश्वमेतत् ॥ ५० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शेषशाय्युपाख्याने ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये वृक्षमाहात्म्यकथनं नाम द्विपञ्चाशदुत्तरद्विशततमोऽध्यायः ॥ २५२ ॥ छ ॥ ॥ शूद्र उवाच ॥ ॥ पार्वती कुपिता देवी कथं देवेन शूलिना ॥ प्रसादं च गता शप्त्वा यत्कोपात्क्षुभ्यते जगत् ॥ १ ॥ कथं स भगवान्रुद्रो भार्याशापमवाप ह ॥ वैकृतं रूपमासाद्य पुनर्दिव्यं वपुः श्रितः ॥ २ ॥ ॥ गालव उवाच ॥ ॥ देवा रूपाण्यदृश्यानि कृत्वा देव्या महाभयात् ॥ मनुष्यलोके सकले प्रतिमासु च संस्थिताः ॥ ३ ॥ तेषामपि प्रसन्ना साऽनुग्रहं समुपाकरोत् ॥ विष्णुस्तुता महाभागा विश्वमाताऽघनाशिनी ॥ ४ ॥ तेषां बलाच्च पार्वत्याः शापभारेण यन्त्रितः ॥ तां नित्यमेवानुनयन्नूचे सोवाच शंकरम् ॥ ५ ॥ एते देवा विश्वपूज्या विश्वस्य च वरप्रदाः ॥ मत्प्रसादाद्भविष्यंति भक्तितस्तोषिता नरैः ॥ ६ ॥ त्वामृते मम कर्मेदं कृतं साधुविनिन्दितम् ॥ वेद्यां विवाहकाले च प्रत्यक्षं सर्वसाक्षिकम् ॥ ७ ॥ यत्सप्तमंडलानां च गमनं च करार्पणम् ॥ वह्निश्च वरुणः कृष्णो देवताश्च सवल्लभाः ॥ ८ ॥ चतुर्दिक्ष्वंगसंयुक्ता देवब्राह्मणसंयुताः ॥ एतेषामग्रतो दिव्यं कृत्वा त्वं जनसंसदि ॥ ९ ॥ प्रमादात्सत्त्वमापन्नो व्यभिचारं कथं कृथाः ॥ गुरवोऽपि न सन्मार्गे प्रवर्त्तंते जनौघवत् ॥ १० ॥ निग्राह्याः सर्वलोकेषु प्रबुद्धैः श्रूयते श्रुतौ ॥ पुत्रेणापि पिता शास्यः शिष्येणापि गुरुः स्वयम् ॥ ११ ॥ क्षत्रियैर्ब्राह्मणः शास्यो भार्यया च पतिस्तथा ॥ उन्मार्गगामिनं श्रेष्ठमपि वेदान्तपारगम् ॥ १२ ॥ नीचैरपि प्रशास्येत श्रुतिराह सनातनी ॥ सन्मार्ग एव सर्वत्र पूज्यते नापथः क्वचित् ॥ १३ ॥ येन स्वकुलजो धर्मस्त्यक्तः स पतितो भवेत् ॥ मृतश्च नरकं प्राप्य दुःखभारेण युज्यते ॥ १४ ॥ धर्मं त्यजति नास्तिक्याज्ज्ञातिभेदमुपागतः ॥ स निग्राह्यः सर्वलोकैर्मनुधर्मपरायणैः ॥ १५ ॥ कुलधर्माञ्ज्ञातिधर्मान्देशधर्मान्महेश्वर ॥ ये त्यजंति च तेऽवश्यं कुलाच्च पतिता जनाः ॥ १६ ॥ अग्नित्यागो व्रतत्यागो वचनत्याग एव च ॥ धर्मत्यागो नैव कार्यः कुर्वन्पतित एव हि ॥ १७ ॥ न पिता न च ते माता न भ्राता स्वजनोऽपि च ॥ पश्यते तव वार्तां च अस्पृश्यस्त्वमंदन्विषम् ॥ १८ ॥ अस्थिमालाचिताभस्म

१ विषम्–अदन्–विभक्षकः–इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जटाधारी कुचैलवान् ॥ चपलो मुक्तमर्यादस्तस्त्थं नार्हसि मेऽग्रतः ॥ १९ ॥ अब्रह्मण्योऽव्रती भिक्षुर्दुष्टात्मा कपटी सदा ॥ नार्हसि त्वं मम पुरः संभाषयितुमीश्वर ॥ २० ॥ एवं सा रुदती देवी बाष्पव्याकुललोचना ॥ महादुःखयुतैवासीद्देवेशेऽनुनयत्यपि ॥ २१ ॥ पुनरेव प्रकुपिता हरं प्रोवाच भामिनी ॥ तवार्जवं न हृदये काठिन्यं वेद्मि नित्यदा ॥ २२ ॥ ब्राह्मणैस्त्वासुरैरुक्तं तन्मृषा प्रतिभाति मे ॥ यस्मान्मयि महादुष्टभाव एव कृतस्त्वया ॥ २३ ॥ ब्राह्मणा वंचिता यस्माद्ब्राह्मणैस्त्वं हनिष्यसे ॥ एवमुक्त्वा भगवती पुनराह न किञ्चन ॥ २४ ॥ ईशः प्रसन्नवदना मुपचारैरथाकरोत् ॥ शनैर्नीतिमयैर्वाक्यैर्हेतुमद्भिर्महेश्वरः ॥ २५ ॥ प्रसन्नलोचनां ज्ञात्वा किंचित्प्राह हरस्ततः ॥ कोपेन कलुषं वक्त्रं पूर्णचन्द्र समप्रभम् ॥ २६ ॥ कस्मात्त्वं कुरुषे भद्रे युक्तमेव वचो न ते ॥ सर्वभूतदया कार्या प्राणिनां हि हितेच्छया ॥ २७ ॥ यद्यपीष्टो हि यस्यार्थो न कार्यं परपीडनम् ॥ जगत्सर्वं सुतप्रायं तवास्ति वरवर्णिनि ॥ २८ ॥ जगत्पूज्या त्वमेवैका सर्वरूपधरानघे ॥ मया यदि कृतं कर्मावद्यं देव हिताय वै ॥ २९ ॥ तथाप्येवं तव सुतो भविष्यति न संशयः ॥ अथवा मम सर्वेभ्यः प्राणेभ्योऽपि गरीयसी ॥ ३० ॥ यदिच्छसि तथा कुर्यां तथा तव मनोरथान् ॥ प्रसन्नवदना भूत्वा कथयस्व वरानने ॥ ३१ ॥ इत्युक्ता सा भगवती पुनराह महेश्वरम् ॥ चातुर्मास्ये च संप्राप्ते महाव्रत धरो यदि ॥ ३२ ॥ देवतानां च प्रत्यक्षं तांडवं नर्तसे यदि ॥ पारयित्वा व्रतं सम्यग्ब्रह्मचर्यं महेश्वर ॥ ३३ ॥ मत्प्रीत्यै यदि देहार्थं वैष्णवं च प्रयच्छसि ॥ शापस्यानुग्रहं कुर्यां प्रसन्नवदना सती ॥ ३४ ॥ नान्यथा मम चित्तं त्वां विश्वासमनुगच्छति ॥ तच्छ्रुत्वा भगवांस्तुष्टस्तथेति प्रत्युवाच ताम् ॥ ३५ ॥ सापि हृष्टा भगवती शापस्यानुग्रहे वृता ॥ ३६ ॥ इदं पुराणं[१] मनुजः शृणोति श्रद्धायुक्तो भेदबुद्ध्या दृढत्वम् ॥ तस्या वश्यं जीवितं सर्वसिद्धं मर्त्याः सत्यात्तच्छ्रयत्वं प्रयांति ॥ ३७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शेषशाय्युपाख्याने ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये शंकरकृतपार्वत्यनुनयो नाम त्रिपंचाशदुत्तरद्विशततमोऽध्यायः ॥ ॥ २५३ ॥ ॥ छ ॥ ॥ शूद्र उवाच ॥ ॥ इदमाश्चर्यरूपं मे प्रतिभाति वचस्तव ॥ यद्यपि स्यान्महाक्लेशो वदतस्तव सुव्रत ॥ १ ॥ तथापि मम भाग्येन मत्पुण्यैर्मद्गृहं गतः ॥ न तृप्ये त्वन्मुखांभोजाच्च्युतं वाक्यामृतं पुनः ॥ २ ॥ पिबन्गौरीकथाख्यानं विशेषगुणपूरितम् ॥ कथं महेश्वरो नृत्यं चकार सुरसंवृतः ॥ ३ ॥ चातुर्मास्ये कथं जातं किं ग्राह्यं व्रतमुच्यते ॥ अनुग्रहं कृतवती सा कथं को ह्यनुग्रहः ॥ ४ ॥ एतद्विस्तरतो

१ पुराणम्—प्राचीनं कथानकम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ब्रूहि पृच्छतो मे द्विजोत्तम ॥ भगवान्पूज्यते लोके ममानुग्रहकारकः ॥ ५ ॥ प्रसन्नवदनो भूत्वा स्वस्थः कथय सुव्रत ॥ गालवश्चापि तच्छ्रुत्वा पुनराह प्रहृष्टवान् ॥ ६ ॥ ॥ गालव उवाच ॥ ॥ इतिहासमिमं पुण्यं कथयामि तवानघ ॥ शृणुष्वावहितो भूत्वा यज्ञायुतफलप्रदम् ॥ ७ ॥ चातुर्मास्येऽथ संप्राप्ते हरो भक्तिसमन्वितः ॥ ब्रह्मचर्यव्रतपरः प्रहृष्टवदनोऽभवत् ॥ ८ ॥ देवतानां च संकल्पं महर्षीणां चकार ह ॥ समागत्य ततो देवा मन्दराचलमास्थिताः ॥ ९ ॥ प्रणम्य ते महेशानं तस्थुः प्रांजलयोऽग्रतः ॥ तानुवाच सुरान्सर्वान्हरो दृष्ट्वा समागतान् ॥१० ॥ पार्वत्या भिहितं प्राह कस्मिन्कार्यांतरे सति ॥ मया नियुक्तेऽभिनये यत्र साहाय्यकारिणः ॥ ११ ॥ भवंत्विंद्रपुरोगाश्च चातुर्मास्ये समागते ॥ ते तथोचुश्च संहृष्टा नमस्कृत्य च शूलिनम् ॥ १२ ॥ स्वंस्वं भवनमाजग्मुर्विमानैः सूर्यसन्निभैः ॥ तथाऽऽषाढे शुक्लपक्षे चतुर्दश्यां महेश्वरः ॥ १३ ॥ प्रनर्त्तयितु मारेभे भवानीतोषणाय च ॥ मंदरे पर्वतश्रेष्ठे तत्र जग्मुर्महर्षयः ॥ १४ ॥ नारदो देवलो व्यासः शुकद्वैपायनादयः ॥ अंगिराश्च मरीचिश्च कर्दमश्च प्रजापतिः ॥ १५ ॥ कश्यपो गौतमश्चात्रिर्वसिष्ठो भृगुरेव च ॥ जमदग्निस्तथोत्तंको रामो भार्गव एव च ॥ १६ ॥ अगस्त्यश्च पुलोमा च पुलस्त्यः पुलहस्तथा ॥ प्रचेताश्च क्रतुश्चैव तथैवान्ये महर्षयः ॥ १७ ॥ सिद्धा यक्षाः पिशाचाश्च चारणाश्चारणैः सह ॥ आदित्या गुह्यकाश्चैव साध्याश्च वसवोऽश्विनौ ॥ १८ ॥ एते सर्वे तथेन्द्राद्या ब्रह्मविष्णुपुरोगमाः ॥ समाजग्मुर्महेशस्य नृत्यदर्शनलालसाः ॥ १९ ॥ ततो गणा नंदिमुखा रत्नानि प्रददुस्तथा ॥ भूषणानि च वासांसि मुन्यादिभ्यो यथाक्रमम् ॥ २० ॥ ततो वाद्यसहस्रेषु वादित्रेषु समंततः ॥ सर्वैर्जयेति चैवोक्ता भगवान्व्रतमादिशत् ॥ २१ ॥ भवानी हृष्टहृदया महादेवं व्यलोकयत् ॥ जया च विजया चैव जयन्ती मंगलारुणा ॥ २२ ॥ चतुष्टयसखीमध्ये विरराज शुभानना ॥ तस्याः सान्निध्ययोगेन जगद्भाति गुणोत्तरम् ॥ २३ ॥ यस्याः शरीरजा शोभा वर्णितुं नैव शक्यते ॥ ईशोऽपि गणकोटीभिर्नानावक्त्राभिरीक्षितः ॥ २४ ॥ पिशाचभूतसंघैश्च वृतः परमशोभनः ॥ स्वर्णवेत्रधरो नन्दी बभौ कपिमुखोऽग्रतः ॥ २५ ॥ विद्याधराश्च गंधर्वाश्चित्रसेनादयस्तथा ॥ चित्रन्यस्ता इव बभुस्तत्र नागा मुनीश्वराः ॥ २६ ॥ श्रीरागप्रमुखा रागास्तस्य पुत्रा महौजसः ॥ अमूर्त्ताश्चैव ते पुत्रा हरदेवसमुद्भवाः ॥ २७ ॥ एकैकस्य च षड्भार्याः सर्वासां च पितामहः ॥ ताभिः सहैव ते रागा लीलावपुर्धरास्तथा ॥ २८ ॥ प्रादुर्बभूवुः सहसा चिंतितास्तेन शंभुना ॥ तेषां नामानि ते वच्मि शृणुष्व त्वं महाधन ॥ २९ ॥ श्रीरागः प्रथमः पुत्र ईश्वरस्य विमोहनः ॥ आसां चक्रे भ्रुवोर्मध्ये परब्रह्मप्रदायकः ॥ ३० ॥ तन्मध्यश्चैव माहेशात्समुद्भूतो गणोत्तमः ॥ द्वितीयोऽथ वसन्तोऽभूत्कटिदेशान्महायशाः ॥ ३१ ॥ महदंकश्च भूतानां चक्राच्चैव



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशुद्धितः[1] ॥ पंचमस्तु तृतीयोऽभूत्सुतो विश्वविभूषणः ॥ ३२ ॥ महेश्वरहृदो जातं चक्रं चैवमनाहतम् ॥ नासादेशात्समुद्भूतो भैरवो भैरवः स्वयम् ॥ ॥ ३३ ॥ मणिपूरकनामेदं चक्रं तद्धि विमुक्तिदम् ॥ पंचाशच्च तथा वर्णा अंका नाम महेश्वरात् ॥ ३४ ॥ राशयो द्वादश तथा नक्षत्राणि तथैव च ॥ स्वाधिष्ठानसमुद्भूता जगद्बीजसमन्विताः ॥ ३५ ॥ क्षणेन वृद्धिमायांति ततो रेतः प्रवर्तते ॥ रेतसस्तु जगत्सृष्टं तदीशजननेंद्रियम् ॥ ३६ ॥ आधाराच्च महान्षष्ठो नटो नारायणोऽभवत् ॥ महेशवल्लभः पुत्रो नीलो विष्णुपराक्रमः ॥ ३७ ॥ एते मूर्तिधरा रागा जाता भार्यासहायिनः ॥ भार्यास्तेषां समुद्भूताः शिरोभागात्पिनाकिनः ॥ ३८ ॥ षट्त्रिंशत्परिमाणेन ततस्तास्त्वं निशामय ॥ गौरी कोलाहली धीरा द्राविडी माल कौशिकी ॥ ३९ ॥ षष्ठी स्याद्देवगांधारी श्रीरागस्य प्रिया इमाः ॥ आन्दोला[2] कौशिकी चैव तथा चरममंजरी ॥ ४० ॥ गंडगिरी देवशाखा राम गिरी वसन्तगा ॥ त्रिगुणा स्तम्भतीर्था च अहिरी कुंकुमा तथा ॥ ४१ ॥ वैराटी सामवेरी च षड्भार्याः पंचमे मताः ॥ भैरवी गुर्जरी चैव भाषा वेलागुली तथा ॥ ४२ ॥ कर्णाटकी रक्तहंसा षड्भार्या भैरवानुगाः ॥ बंगाली मधुरा चैव कामोदा चाक्षिनारिका ॥ ४३ ॥ देवगिरी च देवाली मेघ रागानुगा इमा ॥ त्रोटकी मोडकी चैव नरादुम्बी तथैव च ॥ ४४ ॥ मल्हारी सिन्धुमल्हारी नटनारायणानुगाः ॥ एता हि गिरिशं नत्वा महेशं च महेश्वरीम् ॥ ४५ ॥ स्वमूर्त्तिवाहनोपेताः स्वभर्तृसहिताः स्थिताः ॥ ब्रह्मा मृदंगवाद्येन तोषयामास शंकरम् ॥ ४६ ॥ चतुरक्षरवाद्येन सुवाद्यं चाकरोत्पुनः ॥ तालक्रियां महेशाय दर्शयामास केशवः ॥ ४७ ॥ वायवस्तत्र वाद्यं च चक्रुः सुस्वरमोजसा ॥ महेन्द्रो वंशवाद्यं च शुषिरं सुस्वरं बहु ॥ ४८ ॥ वह्निः शूर्परवं चक्रे पणवं च तथाश्विनौ ॥ उपांगवादनं चक्रे सोमः सूर्यः समंततः ॥ ४९ ॥ घंटानां वादनं चक्रुर्गणाः शतसह स्रशः ॥ मुनीश्वरास्तथा देव्यः पार्वतीसहितास्तथा ॥ ५० ॥ स्वर्णभद्रासनेष्वेते ह्युपविष्टा व्यलोकयन् ॥ शृंगाणां वादनं चक्रुर्वसवः समहोरगाः ॥ ॥ ५१ ॥ भेरीध्वनिं तथा साध्या वाद्यान्यन्ये सुरोत्तमाः ॥ झर्झरीगोमुखादीनि साध्याश्चक्रुर्महोत्सवे[3] ॥ ५२ ॥ तन्त्रीलयसमायुक्ता गंधर्वा मधुर स्वराः ॥ सुवर्णशृंगनादं च चक्रुः सिद्धाः समंततः ॥ ५३ ॥ ततस्तु भगवानासीन्महानटवपुर्धरः ॥ मुकुटाः पंचशीर्षे तु पन्नगैरुपशोभिताः ॥ ॥ ५४ ॥ जटा विमुच्य सकला भस्मोद्धूलितविग्रहः ॥ बाहुभिर्दशभिर्युक्तो हारकेयूरसंयुतः ॥ ५५ ॥ त्रैलोक्यव्यापकं रूपं सूर्यकोटिसमप्रभम् ॥

१ विशुद्धितः चक्रात्—विशुद्धिसंज्ञकात्—कण्ठस्थिताच्चक्रात्—इत्यर्थः । २ आंदोला कौशिकी चरममंजरी—इति पर्यायत्रयोपेता प्रथमा, गण्डगिरी देवशाखा—इति पर्यायद्वयोपेता—द्वितीया, रामगिरिवसंतगा—एषा तृतीया, त्रिगुणा स्तम्भतीर्थाः—एषा चतुर्थी, अहिरी कुंकुमा—एषा पंचमी, वैराटी सामवेरी—एषा च षष्ठी । इति बोद्धव्यम् । ३ एते साध्या अपि पूर्वोक्तसाध्येभ्य इतरे साध्यगणा एव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





कृत्वा ननर्त्त भगवान्भासुरं स महानगे ॥ ५६ ॥ ततं वीणादिकं वाद्यं कांस्यतालादिकं घनम् ॥ वंशादिकं तु वादित्रं तोमरादिकनामकम् ॥ ५७॥
चतुर्विधं ततो वाद्यं तुमुलं समजायत ॥ तालानां पटहादीनां हस्तकानां तथैव च ॥ ५८ ॥ मानानां चैव तानानां प्रत्यक्षं रूपमाबभौ ॥ सुकंठं
सुस्वरं सुक्तं सुगम्भीरं महास्वनम् ॥ ५९ ॥ विश्वावसुर्नारदश्च तुंबुरुश्चैव गायकाः ॥ जगुर्गंधर्वपतयोऽप्सरसो मधुरस्वराः ॥ ६० ॥ ग्रामत्रयसमोपेतं
स्वरसप्तकसंयुतम् ॥ दिव्यं शुद्धं च सांकल्पं तत्र गेयमवर्त्तत ॥ ६१ ॥ पर्वतोऽपि महानादं हरपादतलाहतः ॥ भ्रमिभिर्भ्रमयंस्तत्र महीं सपुरकान
नाम् ॥ ६२ ॥ हस्तकांश्चतुराशीतिं स ससर्ज सदाशिवः ॥ ललाटफलकस्वेदात्सूतमागधबंदिनः ॥६३॥ महेशहृदयाज्जाता गंधर्वा विश्वगायकाः ॥
ते मूर्त्ता देवदेवस्य सुरंगालयसंयुताः ॥ ६४ ॥ प्रेक्षकाणामृषीणां च चक्रुराश्चर्यमोजसा ॥ किन्नराः पुष्पवर्षाणि ससृजुः स्वैर्गुणैरिह ॥ ६५ ॥ एवं
चतुर्षुमासेषु यदा नृत्यमजायत ॥ अतिक्रांता शरज्जाता निर्मलाकाशशोभिता ॥ ६६ ॥ पद्मखंडसमाच्छन्नसरोवरमुखांबुजा ॥ फलवृक्षौषधीभिश्च
किंचित्पांडुमुखच्छविः ॥ ६७ ॥ ऊर्जशुक्लचतुर्दश्यां प्रसन्ना गिरिजा तदा ॥ समाप्तव्रतचर्यः स ईश्वरोऽपि तदा बभौ ॥ ६८ ॥ सा
चोवाच तदा शंभुं विकचस्वरलोचना ॥ विप्रशापपातितं च यदा लिंगं भविष्यति ॥ ६९ ॥ नर्मदाजलसंभूतं विश्वपूज्यं भविष्यति ॥
एवमुक्ता ततस्तुष्टा हरस्तोत्रं चकार ह ॥ ७० ॥ नमस्ते देवदेवाय महादेवाय मौलिने ॥ जगद्धात्रे सवित्रे च शंकराय शिवाय च ॥
॥ ७१ ॥ कपर्दिनेऽजयादाय ब्रह्मगर्भाय ते नमः ॥ हिरण्यरेतसे तुभ्यं नीलग्रीवाय ते नमः ॥ ७१ ॥ नमो ब्रह्मण्य
देवाय सितभूतिधराय च ॥ पंचवक्त्राय रूपाय नीरूपाय नमोनमः ॥ ७३ ॥ सहस्राक्षाय शुभ्राय नमस्ते कृत्तिवाससे ॥
अन्धकासुरमोक्षाय पशूनां पतये नमः ॥ ७४ ॥ विप्रवह्निमुखाग्राय हराय च भवाय च ॥ शंकराय महेशाय ईश्वराय नमो
नमः ॥ ७५ ॥ अमूर्त्तब्रह्मरूपाय मूर्त्तानां भावनाय च ॥ नमः शिवाय चोग्राय हराय च भवाय च ॥ ७६ ॥ नमः कृष्णाय शर्वाय त्रिपुरांतक
हारिणे ॥ अघोराय नमस्तेऽस्तु नमस्ते पुरुषाय ते ॥ ७७ ॥ सद्योजाताय तुभ्यं भो वामदेवाय ते नमः ॥ ईशानाय नमस्तुभ्यं पंचास्याय
कपालिने ॥ ७८ ॥ विरूपाक्षाय भावाय भगनेत्रनिपातिने ॥ पूषदंतनिपाताय महायज्ञनिपातिने ॥ ७९ ॥ मृगव्याधाय धर्माय कालचक्राय ॥२८६॥
चक्रिणे ॥ महापुरुषपूज्याय गणानां पतये नमः ॥ ८० ॥ गंगाधराय मृडिने भवानीप्रियकारिणे ॥ जगदानंददात्रे च ब्रह्मरूपाय ते नमः ॥८१॥
गुणातीताय गुणिने सूक्ष्माय गुरवेऽपि च ॥ नमो महास्वरूपाय भस्मनो जन्मकारिणे ॥ ८२ ॥ वैराग्यरूपिणे नित्यं योगाचार्याय वै नमः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मयोक्तमप्रियं देव स्मरसंहारकारक ॥ ८३ ॥ क्षंतुमर्हसि विश्वेश शिरसा त्वां प्रसादये ॥ शापानुग्रह एवैष कृतस्ते वै न संशयः ॥ ८४ ॥ ममा
पराधजो मन्युर्न कार्यो भवताऽनघ ॥ एवं प्रसादितः शंभुर्हृष्टात्मा त्रिदशैः सह ॥ ८५ ॥ तीर्णव्रतपरानंदनिर्भरः प्राह तामुमाम् ॥ य इमां
मत्स्तुतिं भक्त्या पठिष्यति तवोद्गताम् ॥ तस्य चेष्टवियोगश्च न भविष्यति पार्वति ॥ ८६ ॥ जन्मत्रयधनैर्युक्तः सर्वव्याधिविवर्जितः ॥ भुक्त्वेह
विविधान्भोगानंते यास्यति मत्पुरम् ॥ ८७ ॥ इत्युक्त्वा तां महेशोऽपि स्वमंगं प्रददौ ततः ॥ वैष्णवं वामभागं सा प्रतिजग्राह पार्वती ॥ ८८ ॥
शर्वं कपालहस्तं च ग्रीवार्द्धे गरलान्वितम् ॥ रुण्डमालार्द्धहारं च सितगौरं समंततः ॥ ८९ ॥ ब्रह्मांडकोटिजनकं जटाभिर्भूषितं शिरः ॥ सित
द्युतिकलाखंडरत्नभासावभासितम् ॥ ९० ॥ स्वर्णाभरणसंयुक्तमेकतो भुजगांगदम् ॥ एकतः कृत्तिवसनमन्यतः पट्टकूलवत् ॥ ९१ ॥ मत्स्य
वाहनसंयुक्तमन्यतो वृषभांकितम् ॥ एकतः पार्षदैः सेव्यमन्यतः सखिसेवितम् ॥ ९२ ॥ रूपमेवंविधं दृष्ट्वा ब्रह्माद्या देवतागणाः ॥ तुष्टुवुः परया
भक्त्या तेजोभूषितलोचनम् ॥ ९३ ॥ त्वमेको भगवान्सर्वव्यापकः सर्वदेहिनाम् ॥ पितृवद्रक्षकोऽसि त्वं माता त्वं जीवसंज्ञकः ॥ ९४ ॥ साक्षी
विश्वस्य बीजं त्वं ब्रह्मांडवशकारकः ॥ उत्पद्यंते विलीयंते त्वयि ब्रह्मांडकोटयः ॥ ९५ ॥ ऊर्मयः सागरे नित्यं सलिले बुद्बुदा यथा ॥ अहं कदा
चित्ते नेत्रात्कदाचित्तव भालतः ॥ ९६ ॥ क्वचित्संगे शिवादेव्या प्रादुर्भूत्वा सृजे जगत् ॥ तवाज्ञाकारिणः सर्वे वयं ब्रह्मादयः सुराः ॥ ९७ ॥
अनंतवैभवोऽनंतोऽनंतधामाऽस्यनंतकः ॥ अनंतः सर्वभंगाय कुरुषे रूपमद्भुतम् ॥ ९८ ॥ भवानि त्वं भयं नित्यमशिवानां पवित्रकृत् ॥ शिवा
नामपि दात्री त्वं तपसामपि त्वं फलम् ॥ ९९ ॥ यः शिवः स स्वयं विष्णुर्यो विष्णुः स सदाशिवः ॥ इत्यभेदमतिर्जाता स्वल्पा नस्त्वत्प्रसादतः ॥
॥ १०० ॥ यत्किंचिच्च जगत्यस्मिन्दृश्यते श्रूयतेऽपि वा ॥ मध्ये बहिश्च तत्सर्वं त्रयं व्याप्य स्थिता यदा ॥ १ ॥ जगत्पूज्ये सुरेशानि जगद्वंद्ये
तथांबिके ॥ प्रसादं कुरु देवेशि देवेश प्रणता वयम् ॥ २ ॥ इत्युक्त्वा त्रिदशाः सर्वे हृष्टा जग्मुर्यथागतम् ॥ ३ ॥ ॥ गालव उवाच ॥ ॥
तद्दिव्यरूपमतुलं भुवि ये मनुष्याः संसारसागरसमुत्तरणैकपोतम् ॥ संचिन्तयंति मनसा हृतकिल्बिषास्ते ब्रह्मस्वरूपमनुयांति विमुक्तसंगाः ॥
॥१०४॥इति श्रीस्कांदे महापुराण एशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शेषशाय्युपाख्याने ब्रह्मनारदसंवादे चातुर्मास्य
माहात्म्ये हरतांडवनर्त्तनवर्णनं नाम चतुःपञ्चाशदुत्तरद्विशततमोऽध्यायः ॥ २५४ ॥ छ ॥ ॥ गालव उवाच ॥ ॥ एवं ते लब्धशापाश्च पार्वतीशाप

१ तत्—गौरीशंकरात्मकम्—अर्धनारीनटेश्वरस्वरूपम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पीडिताः ॥ अनपत्या बभूवुश्च तथा च प्रतिमानवाः ॥ १ ॥ शालग्रामस्तु गंडक्यां नर्मदायां महेश्वरः ॥ उत्पद्यते स्वयंभूश्च तावेतौ नैव कृत्रिमौ ॥ २ ॥ चतुर्विंशतिभेदेन शालग्रामगतो हरिः ॥ परीक्ष्यः पुरुषैर्नित्यमेकरूपः सदाशिवः ॥ ३ ॥ शालग्रामशिला यत्र गंडकीविमले जले ॥ तत्र स्नात्वा च पीत्वा च ब्रह्मणः पदमाप्नुयात् ॥ ४ ॥ तां पूजयित्वा विधिवद्गंडकीसंभवां शिलाम् ॥ योगीश्वरो विशुद्धात्मा जायते नात्र संशयः ॥ ५ ॥ एतत्ते कथितं सर्वं यत्पृष्टोऽहमिह त्वया ॥ यथा हरो विप्रशापं प्राप्तवांस्तंन्निशामय ॥ ६ ॥ यः शृणोति नरो भक्त्या वाच्यमानामिमां कथाम् ॥ गिरीशनृत्यसंबन्धामुमादेहार्द्धवर्णिताम् ॥ ७ ॥ ब्रह्मणः स्तुतिसंयुक्तां स गच्छेत्परमां गतिम् ॥ श्लोकार्द्धं श्लोकपादं वा समस्तं श्लोकमेव वा ॥ ८ ॥ यः पठेदविरोधेन मायामानविवर्जितः ॥ स याति परमं स्थानं यत्र गत्वा न शोचति ॥ ९ ॥ चातुर्मास्ये विशेषेण पठञ्छृण्वन्नरोत्तमः ॥ लभते चिंतितां सिद्धिं धनपुत्रादिसंवृतः॥१०॥ यथा ब्रह्मादयो देवा गीतवाद्याभियोगतः ॥ परां सिद्धिमवापुस्ते दुर्गाशिवसमीपतः ॥ ११ ॥ वर्षाकाले च संप्राप्ते भक्तियोगे जनार्दने ॥ महेश्वरेऽथ दुर्गायां न भूयः स्तनपो भवेत् ॥ १२ ॥ गणेशस्य सदा कुर्याच्चातुर्मास्ये विशेषतः ॥ पूजां मनुष्यो लाभार्थं यतो लाभप्रदो हि सः ॥१३॥ सूर्यो नीरोगतां दद्याद्भक्त्या यैः पूज्यते हि सः॥ चातुर्मास्ये समायाते विशेषफलदो नृणाम् ॥ १४ ॥ इदं हि पंचायतनं सेव्यते गृहमेधिभिः ॥ चातुर्मास्ये विशेषेण सेवितं चिंतितप्रदम् ॥ १५ ॥ शालग्रामगतं विष्णुं यः पूजयति नित्यदा ॥ द्वारवतीचक्रशिलासहितं मोक्षदायकम् ॥ १६ ॥ चातुर्मास्ये विशेषेण दर्शनादपि मुक्तिदम् ॥ यस्मिन्स्तुते स्तुतं सर्वं पूजिते पूजितं जगत् ॥ १७ ॥ पूजितः पठितो ध्यातः स्मृतो वै कलुषापहः ॥ शालग्रामे किं पुनर्यच्छालग्रामगतो हरिः ॥ १८ ॥ पुनर्हि हरिनैवेद्यं फलं चापि धृतं जलम् ॥ चातुर्मास्ये विशेषेण शालग्रामगतं शुभम् ॥ १९ ॥ तिलाः पुनंत्यर्पिताश्च शालग्रामस्य शूद्रज ॥ चातुर्मास्ये विशेषेण नरं भक्त्या समन्वितम् ॥ २० ॥ स लक्ष्मीसहितो नित्यं धनधान्यसमन्वितः ॥ महाभाग्यवतां गेहे जायते नात्र संशयः ॥२१॥ स लक्ष्मीसहितो विष्णुर्विज्ञेयो नात्र संशयः ॥ तं पूजयेन्महाभक्त्या स्थिरा लक्ष्मीर्गृहे भवेत् ॥ २२ ॥ तावद्दरिद्रता लोके तावद्गर्जति पातकम् ॥ तावत्क्लेशाः शरीरेऽस्मिन्न यावत्पूजयेद्धरिम् ॥ २३ ॥ स एव पूज्यते यत्र पंचक्रोशं पवित्रकम् ॥ करोति सकलं क्षेत्रं न तत्राऽशुभसंभवः ॥ २४ ॥ एतदेव महाभाग्यमेतदेव महातपः ॥ एष एव परो मोक्षो यत्र लक्ष्मीशपूजनम् ॥ २५ ॥ शंखश्च दक्षिणावर्त्तो लक्ष्मीनारायणात्मकः ॥ तुलसी

१ अग्रे वक्ष्यमागम् इति शेषः । इयं हरशापप्राप्तिकथा २९८ अष्टपंचाशदुत्तरद्विशततमेऽध्याये वर्णिताऽस्ति ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृष्णसारोऽत्र यत्र द्वारवती शिला ॥ तत्र श्रीर्विजयो विष्णुर्मुक्तिरेवं चतुष्टयम् ॥ २६ ॥ लक्ष्मीनारायणे पूजां विधातुर्मनुजस्य तु ॥ ददाति पुण्य मतुलं मुक्तो भवति तत्क्षणात् ॥ २७ ॥ चातुर्मास्ये विशेषेण पूज्यो लक्ष्मीयुतो हरिः ॥ २८ ॥ कुर्वतस्तस्य देवस्य ध्यानं कल्मषनाशनम् ॥ तुलसीमञ्जरीभिश्च पूजितो जन्मनाशनः ॥ २९ ॥ पूजितो बिल्वपत्रेण चातुर्मास्येऽघहत्तमः ॥ ३० ॥ सर्वप्रयत्नेन स एव सेव्यो यो व्याप्य विश्वं जगतामधीशः ॥ काले सृजत्यत्ति च हेलया वा तं प्राप्य भक्तो न हि सीदतीति ॥ ३१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शेषशाय्युपाख्याने ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये लक्ष्मीनारायणमहिमवर्णनंनाम पञ्चपञ्चाशदुत्तरद्विशततमोऽध्यायः ॥ २५५ ॥ ॥ छ ॥ ॥ गालव उवाच ॥ ॥ एकदा भगवान्रुद्रः कैलासशिखरे स्थितः ॥ दधार परमां लक्ष्मीमुमया सहितः किल ॥ १ ॥ गणानां कोट्यस्तिस्रस्तं यदा पर्यवारयन् ॥ वीरबाहुर्वीरभद्रो वीरसेनश्च भृङ्गिराट् ॥ २ ॥ रुचिस्तुटिस्तथा नन्दी पुष्पदन्तस्तथोत्कटः ॥ विकटः कण्टकश्चैव हरः केशो विघंटकः ॥ ३ ॥ मालाधरः पाशधरः शृङ्गी च नरनस्तथा ॥ पुण्योत्कटः शालि भद्रो महाभद्रो विभद्रकः ॥ ४ ॥ कणपः कालपः कालो धनपो रक्तलोचनः ॥ विकटास्यो भद्रकश्च दीर्घजिह्वो विरोचनः ॥ ५ ॥ पारदो धनदो ध्वांक्षी हंसकी नरकस्तथा ॥ पंचशीर्षस्त्रिशीर्षश्च क्रोडदंष्ट्रो महाद्भुतः ॥ ६ ॥ सिंहवक्त्रो वृषहनुः प्रचण्डस्तुंडिरेव च ॥ एते चान्ये च बहवस्तदा भवसमीपगाः ॥ ७ ॥ महादेव जयेत्युच्चैर्भद्रकालीसमन्विताः ॥ भूतप्रेतपिशाचानां समूहा यस्य वल्लभाः ॥८॥ अस्तुवंस्तं समीपस्था वसन्ते समुपा गते ॥ वनराजिर्विभाति स्म नवकोरकशोभिता ॥ ९ ॥ दक्षिणानिलसंस्पर्शः कवीनां सुखकृद्बभौ ॥ वियोगिहृदयाकर्षी किंशुकः पुष्पशोभितः ॥ ॥ १० ॥ द्वन्द्वादिविक्रियाभावं चिक्रीडुश्च समंततः ॥ तस्मिन्विगाढे समये मनस्युन्मादके तथा ॥ ११ ॥ नंदी दंडधरः संज्ञां दृष्ट्वा चक्रे हरो परः॥ अलं चापलदोषेण तपः कुर्वंतु भो गणाः ॥ १२ ॥ तदा सर्वे वनमपि भूकांडजमभूत्पुनः ॥ गणास्ते तप आतस्थुर्दृष्ट्वा कान्तिवसन्तजाम् ॥ १३ ॥ ततः सा विश्वजननी पार्वती प्राह शंकरम् ॥ इयं ते करगा नित्यमक्षमाला महेश्वर ॥ १४ ॥ त्वया किं जप्यते देव संदेहयति मे मनः ॥ त्वमेकः सर्व भूतानामादिकृत्सकलेश्वरः ॥ १५ ॥ न माता न पिता बंधुस्तव जातिर्न कश्चन ॥ अहं तव परं किंचिद्वेद्मि नास्तीति किंचन ॥ १६ ॥ श्रमेण त्वं समायुक्तो श्वासोच्छ्वासपरायणः॥ जपन्नपि महाभक्त्या दृश्यसे त्वं मया सदा ॥१७॥ त्वत्तः परतरं किंचिद्यत्त्वं ध्यायसि चेतसा ॥ तन्मे कथय देवेश यद्यहं दयिता तव ॥ १८ ॥ इति स्पृष्टस्तदा शंभुरुवाच हरिसेवकः ॥ हरेर्नामसहस्राणां सारं ध्यायामि नित्यशः ॥ १९ ॥ जपामि रामनामांकमवातरं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ससप्तमम् ॥ चतुर्विंशतिसंख्याकान्प्रादुर्भावान्हरेर्गुणान् ॥ २० ॥ एतेषामपि यत्सारं प्रणवाख्यं महत्फलम् ॥ द्वादशाक्षरसंयुक्तं ब्रह्मरूपं सना
तनम् ॥ २१ ॥ अक्षरत्रयसंबद्धं ग्रामत्रयसमन्वितम् ॥ सबिंदुं प्रणवं शश्वज्जपामि जपमालया ॥ २२ ॥ वेदसारमिदं नित्यं त्र्यक्षरं सततोद्यतम् ॥
निर्मलं ह्यमृतं शांतं सद्रूपममृतोपमम् ॥ २३ ॥ कलातीतं निर्वशगं निर्व्यापारं महत्परम् ॥ विश्वाधारं जगन्मध्यं कोटिब्रह्मांडबीजकम् ॥ २४ ॥
जडं शुद्धक्रियं वापि निरंजनं नियामकम् ॥ यज्ज्ञात्वा मुच्यते क्षिप्रं घोरसंसारबंधनात् ॥ २५ ॥ ओंकारसहितं यच्च द्वादशाक्षरबीजकम् ॥
जपतः पापकोटीनां दावाग्नित्वं प्रजायते ॥ २६ ॥ एतदेव परं गुह्यमेतदेव परं महः ॥ एतद्धि दुर्लभं लोके लोकत्रयविभूषणम् ॥ २७ ॥ प्राप्यते
जन्मकोटीभिः शुभाशुभविनाशकम् ॥ एतदेव परं ज्ञानं द्वादशाक्षरचिन्तनम् ॥ २८ ॥ चातुर्मास्ये विशेषेण ब्रह्मदं चिंतितप्रदम् ॥ एतदक्षरजं
स्तोत्रं यः समाश्रयते सदा ॥ २९ ॥ मनसा कर्मणा वाचा तस्य नास्ति पुनर्भवः ॥ द्वादशाक्षरसंयुक्तं चक्रद्वादशभूषितम् ॥ ३० ॥ मासद्वादशना
मानि विष्णोर्यो भक्तितत्परः ॥ शालग्रामेषु तान्युक्त्वा न्यसेदघहराणि च ॥ ३१ ॥ दिवसेदिवसे तस्य द्वादशाहफलं लभेत् ॥ द्वादशाक्षर
माहात्म्यं वर्णितुं नैव शक्यते ॥ ३२ ॥ जिह्वासहस्रैरपि च ब्रह्मणापि न वार्यते ॥ महामन्त्रो ह्ययं लोके जप्यो ध्यातः स्तुतस्तथा ॥ ३३ ॥ पाप
हा सर्वमासेषु चातुर्मास्ये विशेषतः ॥ इदं रहस्यं वेदानां पुराणानामनेकशः ॥ ३४ ॥ स्मृतीनामपि सर्वासां द्वादशाक्षरचिन्तनम् ॥ चिंतनादेव
मर्त्यानां सिद्धिर्भवति हीप्सिता ॥ ३५ ॥ पुण्यदानेन याम्येन मुक्तिर्भवति शाश्वती ॥ वर्णैस्तथाश्रमैरेव प्रणवेन समन्वितैः ॥ ३६ ॥ जपैर्ध्यानैः
शमपरैर्मोक्षं यास्येत निश्चितम् ॥ शूद्राणां चापि नारीणां प्रणवेन विवर्जितः ॥ ३७ ॥ प्रकृतीनां च सर्वासां न मन्त्रो द्वादशाक्षरः ॥
न जपो न तपः कार्यं कायक्लेशाद्विशुद्धिता ॥ ३८ ॥ विप्रभक्त्या च दानेन विष्णुध्यानेन सिद्ध्यति ॥ तासां मन्त्रो रामनाम ध्येयः कोट्य
धिको भवेत् ॥ ३९ ॥ रामेति द्व्यक्षरजपः सर्वपापापनोदकः ॥ गच्छंस्तिष्ठञ्छयानो वा मनुजो रामकीर्तनात् ॥ ४० ॥ इह निर्वर्ततो याति
प्रान्ते हरिगणो भवेत् ॥ रामेति द्व्यक्षरो मन्त्रो मंत्रकोटिशताधिकः ॥ ४१ ॥ सर्वासां प्रकृतीनां च कथितः पापनाशकः ॥ चातुर्मास्येऽथ संप्राप्ते
सोऽप्यनंतफलप्रदः ॥ ४२ ॥ चातुर्मास्ये महापुण्ये लभ्यते भक्तितत्परैः ॥ देववन्निष्फलं तेषां यमलोकस्य सेवनम् ॥ ४३ ॥ न रामाद ॥२८८॥
धिकं किंचित्पठनं जगतीतले ॥ रामनामाश्रया ये वै न तेषां यमयातना ॥ ४४ ॥ ये च दोषा विघ्नकरा मृतका विग्रहाश्च ये ॥ राम
नाम्नैव विलयं यांति नात्र विचारणा ॥ ४५ ॥ रमते सर्वभूतेषु स्थावरेषु चरेषु च ॥ अन्तरात्मस्वरूपेण यच्च रामेति कथ्यते ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रामेति मंत्रराजोऽयं भयव्याधिनिषूदकः ॥ रणे विजयदश्चापि सर्वकार्यार्थसाधकः ॥ ४७ ॥ सर्वतीर्थफलः प्रोक्तो विप्राणामपि कामदः ॥ रामचन्द्रेति रामेति रामेति समुदाहृतः ॥ ४८ ॥ द्व्यक्षरो मन्त्रराजोऽयं सर्वकार्यकरो भुवि ॥ देवा अपि प्रगायंति रामनामगुणाकरम् ॥ ॥ ४९ ॥ तस्मात्त्वमपि देवेशि रामनाम सदा वद ॥ रामनाम जपेद्यो वै मुच्यते सर्वकिल्बिषैः ॥ ५० ॥ सहस्रनामजं पुण्यं रामनाम्नैव जायते ॥ चातुर्मास्ये विशेषेण तत्पुण्यं दशधोत्तरम् ॥ ५१ ॥ हीनजातिप्रजातानां महदह्यति पातकम् ॥ ५२ ॥ रामो ह्ययं विश्वमिदं समग्रं स्वतेजसा व्याप्य जनांतरात्मना ॥ पुनाति जन्मांतरपातकानि स्थूलानि सूक्ष्माणि क्षणाच्च दग्ध्वा ॥ ५३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शेषशाय्युपाख्याने ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये रामनाममहिमवर्णनं नाम षट्पंचाशदुत्तरद्विशततमोऽध्यायः ॥ २५६ ॥ ॥ पार्वत्युवाच ॥ ॥ द्वादशाक्षरमाहात्म्यं मम विस्तरतो वद ॥ यथावर्णं यत्फलं च यथा च क्रियते मया ॥ १ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ द्विजातीनां सहोंकारसहितो द्वादशाक्षरः ॥ स्त्रीशूद्राणां नमस्कारपूर्वकः समुदाहृतः ॥ २ ॥ प्रकृतीनां रामनाम संमतो वा षडक्षरः ॥ सोऽपि प्रणवहीनः स्यात्पुराणस्मृतिनिर्णयः ॥ ३ ॥ क्रमोऽयं सर्ववर्णानां प्रकृतीनां सदैव हि ॥ क्रमेण रहितो यस्तु करोति मनुजो जपम् ॥ तस्य प्रकुप्यति विभुर्नरकादिप्रदायकः ॥ ४ ॥ ॥ पार्वत्युवाच ॥ ॥ मया त्रिमात्रया स्वामिन्सेव्यते जगदीश्वरः ॥ रूपमस्य कथं जाने वचसामप्यगोचरम् ॥ ५ ॥ ॥ ईश्वर उवाच ॥ ॥ प्रणवस्याधिकारो न तवास्ति वरवर्णिनि ॥ नमो भगवते वासुदेवायेति जपः सदा ॥ ६ ॥ ॥ पार्वत्युवाच ॥ ॥ यदि सप्रणवं दद्याद्द्वादशाक्षरचिंतनम् ॥ प्रणवे नाधिकारो मे कथं भवति धूर्जटे ॥ ७ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ प्रणवः सर्वदेवानामादिरेष प्रकीर्तितः ॥ ब्रह्मा विष्णुः शिवश्चैव वसंति दयितायुताः ॥ ८ ॥ तत्र सर्वाणि भूतानि सर्वतीर्थानि भागशः ॥ तिष्ठंति सर्वतीर्थानि कैवल्यं ब्रह्म एव यः ॥९॥ तस्य योग्या तदा देवि भविष्यसि यदा तपः ॥ चातुर्मास्ये हरिप्रीत्यै करिष्यसि शुभानने ॥ १० ॥ तपसा प्राप्यते कामस्तपसा च महत्फलम् ॥ तपसा जायते सर्वं तत्तपः सुलभं नरैः ॥ ११ ॥ यशः सौभाग्यमतुलं क्षमासत्यादयो गुणाः ॥ सुलभं तपसा नित्यं तपश्चर्तुं न शक्यते ॥ १२ ॥ यदा हि तपसो वृद्धिस्तदा भक्तिर्हरौ भवेत् ॥ तदा हि तपसो हानिर्यदा भक्तिं विना कृतम् ॥ १३ ॥ तावत्तपांसि गर्जंति देहेऽस्मिन्सततं नृणाम् ॥ यदा विष्णुं स्मरेन्नित्यं जिह्वाग्रं पावनं भवेत् ॥ १४ ॥ यथा प्रदीपे ज्वलिते प्रणश्यति महत्तमः ॥ तथा हरेः कथायां च याति पापमनेकधा ॥ १५ ॥ तस्मात्पार्वति यत्नेन हरौ सुप्ते तपः कुरु ॥ चातु



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

र्मास्येऽथ संप्राप्ते प्रणवेन समन्वितम् ॥ १६ ॥ विशुद्धहृदया भूत्वा मन्त्रराजमिमं जप ॥ स एव भगवांस्तुष्टो द्वादशाक्षरसंयुतम् ॥ ॥ १७ ॥ प्रदास्यति परं ज्ञानं ब्रह्मरूपमखण्डितम् ॥ ब्रह्मकल्पांतकोटीषु जप त्वं द्वादशाक्षरम् ॥ १८ ॥ मन्त्रराजं सप्रणवं ध्याये त्सोऽपि न पश्यति ॥ इत्युक्ता सा तपोनिष्ठा तपश्चर्तुमागता ॥ १९ ॥ हिमाचलस्य शिखरे चातुर्मास्ये समागते ॥ ब्रह्मचर्यव्रत परा वसनत्रयसंयुता ॥ २० ॥ प्रातर्मध्येऽपराह्णे च ध्यायन्ती हरिशंकरम् ॥ वपुर्यथा पुरा कृष्टं पूजने शंकरस्य च ॥ २१ ॥ सखीजन समायुक्ता पितुः शृंगे मनोहरे ॥ अतपत्सा विशालाक्षी क्षमादिगुणसंयुता ॥ २२ ॥ ॥ गालव उवाच ॥ ॥ या हि योगीश्वरध्येया या वन्द्या विश्ववन्दिता ॥ जननी या च विश्वस्य साऽपि कामात्तपोगता ॥ २३ ॥ या हि प्रकृतिसद्रूपा तडित्कोटिसमप्रभा ॥ विरजा या स्वयं वन्द्या गुणातीताचरत्तपः ॥ २४ ॥ पृथ्व्यंबु तेजो वायुश्च गगनं यन्मयं विदुः ॥ मूलप्रकृतिरूपा या सा चकारोत्तमं तपः ॥ २५ ॥ या स्थावरं जंगममाशु विश्वं व्याप्य स्थिता या प्रकृतेः पुरापि ॥ स्पृहादिरूपेण च तृप्तिदात्री देवे प्रसुप्ते तपसाऽऽप शुद्धिम् ॥ २६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शेषशाय्युपाख्याने ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये द्वादशाक्षरनाममहिमपूर्वकपार्वतीतपोवर्णनं नाम सप्तपंचाशदुत्तरशततमोऽध्यायः ॥ २५७ ॥ ॥ छ ॥ ॥ गालव उवाच ॥ ॥ प्रवृत्तायां शैलपुत्र्यां महत्तपसि दारुणे ॥ कन्दर्पेण पराधूतो विचचार महीं हरः ॥ १ ॥ वृक्षच्छायासु तीर्थेषु नदीषु च नदेषु च ॥ जलेन सिंचत्स्ववपुः सर्वत्रापि महेश्वरः ॥ २ ॥ तथापि कामाकुलितो न लेभे शर्म कर्हिचित् ॥ एकदा यमुनां दृष्ट्वा जलकल्लोलमालिनीम् ॥ ॥ ३ ॥ विगाहितुं मनश्चक्रे तापार्तिं शमयन्निव ॥ कृष्णं बभूव तन्नीरं हरकायाग्निवह्निना ॥ ४ ॥ दग्धं विगाहनेनाशु मषीप्रायं तदा बभौ ॥ साऽपि दिव्यवपुः पूर्वं श्यामा भूत्वा हराग्रतः ॥ ५ ॥ स्तुत्वा नत्वा महेशानमुवाच पुनरेव सा ॥ प्रसादं कुरु देवेश वशगास्मि सदा तव ॥ ६ ॥ ॥ ईश्वर उवाच ॥ ॥ अस्मिंस्तीर्थवरे पुण्ये यः स्नास्यति नरो भुवि ॥ तस्य पापसहस्राणि यास्यंति विलयं ध्रुवम् ॥ ७ ॥ हरतीर्थमिति ख्यातं पुण्यं लोके भविष्यति ॥ इत्युक्त्वा तां प्रणम्याथ तत्रैवांतरधीयत ॥ ८ ॥ तस्यास्तीरे महेशोऽपि कृत्वा रूपं मनोहरम् ॥ कामालयं वाद्यहस्तं कृतपुंड्रं जटाधरम् ॥ ९ ॥ स्वेच्छया मुनिगेहेषु दर्शयत्यंगचापलम् ॥ क्वचिद्गायति गीतानि क्वचिन्नृत्यति छन्दतः ॥ १० ॥ स च कुर्दयति हसति स्त्रीणां मध्यगतः क्वचित् ॥ एवं विचरतस्तस्य ऋषिपत्न्यः समंततः ॥ ११ ॥ पत्युः शुश्रूषणं गेहे त्यक्त्वा कार्याण्यपि क्षणात् ॥ तमेव मनसा चक्रुः



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पतिरूपेण मोहिताः ॥ १२ ॥ भ्रमंत्यश्चैव हास्यानि चक्रुस्ता अपि योषितः ॥ ततस्तु मुनयो दृष्ट्वा तासां दुःशीलभावनाम् ॥ १३ ॥ चुक्रुधुर्मुनयः
सर्वे रूपं तस्य मनोहरम् ॥ गृह्यतां हन्यतामेष कोऽयं दुष्ट उपागतः ॥ १४ ॥ इति ते गृह्य काष्ठानि यदोपस्थे ययुस्तदा ॥ पलायितः स बहुधा
भयात्तेषां महात्मनाम् ॥ १५ ॥ यो जीवकलया विश्वं व्याप्य तिष्ठति देहिनाम् ॥ न ज्ञायते न च ग्राह्यो न भेद्यश्चापि जायते ॥ १६ ॥ न
शेकुस्ते यदा सर्वे ग्रहीतुं तं महेश्वरम् ॥ तदा शिवं प्रकुपिता शेपुरित्थं द्विजातयः ॥ १७ ॥ यस्माल्लिंगार्थमागत्य ह्याश्रमांश्चोरवत्कृतम् ॥
परदारापहरणं तल्लिङ्गं पततां भुवि ॥ १८ ॥ सद्य एव हि शापं त्वं दुष्टं प्राप्नुहि तापस ॥ एवमुक्ते स शापाग्निर्वज्ररूपधरो महान् ॥ १९ ॥
तल्लिंगं धूर्जटेश्छित्त्वा पातयामास भूतले ॥ रुधिरौघपरिव्याप्तो मुमोह भगवान्विभुः ॥ २० ॥ वेदनार्त्तोज्ज्वलवपुर्महाशापाभिभूतधीः ॥ तं
तथा पतितं दृष्ट्वा त आजग्मुर्महर्षयः ॥ २१ ॥ आकाशे सर्वभूतानि त्रेसुर्विश्वं चचाल ह ॥ देवाश्च व्याकुला जाता महाभयमुपागताः ॥ २२ ॥
ज्ञात्वा विप्रा महेशानं पीडिता हृदयेऽभवन् ॥ शुशुचुर्भृशदुःखार्ता दैवं हि बलवत्तरम् ॥ २३ ॥ किं कृतं भगवानेष देवैरपि स सेव्यते ॥ साक्षी
सर्वस्य जगतोऽस्माभिर्नैवोपलक्षितः ॥ २४ ॥ वयं मूढधियः पापाः परमज्ञानदुर्बलाः ॥ कथमस्माभिर्यस्यात्मा श्रुतश्च न निवेदितः ॥ २५ ॥
मयेदृशो गृहस्थाय ह्यात्माऽयं न निवेदितः ॥ निर्विकारो निर्विषयो निरीहो निरुपद्रवः ॥ २६ ॥ निर्ममो निरहंकारो यः शंभुर्नोपलक्षितः ॥ यस्य
लोका इमे सर्वे देहे तिष्ठंति मध्यगाः ॥ २७ ॥ स एष जगतां स्वामी हरोऽस्माभिर्न वीक्षितः ॥ इत्युक्त्वा ते ह्युपविष्टा यावत्तत्र समागताः ॥ २८ ॥
तान्दृष्ट्वा सहसा त्रस्तः पुनरेव महेश्वरः ॥ विप्रशापभयान्नष्टस्त्रिपुरारिर्दिवं ययौ ॥ २९ ॥ सुरभिं गां च गोलोके तां तुष्टाव सुसंयतः ॥ सृष्टिस्थिति
विनाशानां कर्त्र्यै मात्रे नमोनमः ॥ ३० ॥ या त्वं रसमयैर्भावैराप्यायसि भूतलम् ॥ देवानां च तथा संघान्पितॄणामपि वै गणान् ॥ ३१ ॥ सर्वै
र्ज्ञाता रसाभिज्ञैर्मधुरास्वाददायिनी ॥ त्वया विश्वमिदं सर्वं बलस्नेहसमन्वितम् ॥ ३२ ॥ त्वं माता सर्वरुद्राणां वसूनां दुहिता तथा ॥ आदि
त्यानां स्वसा चैव तुष्टा वांच्छितसिद्धिदा ॥ ३३ ॥ त्वं धृतिस्त्वं तथा पुष्टिस्त्वं स्वाहा त्वं स्वधा तथा ॥ ऋद्धिः सिद्धिस्तथा लक्ष्मीर्धृतिः कीर्ति
स्तथा मतिः ॥ ३४ ॥ कांतिर्लज्जा महामाया श्रद्धा सर्वार्थसाधिनी ॥ त्वया विरहितं किंचिन्नास्ति त्रिभुवनेष्वपि ॥ ३५ ॥ वह्नेस्तृप्तिप्रदात्री च
देवादीनां च तृप्तिदा ॥ त्वया सर्वमिदं व्याप्तं जगत्स्थावरजंगमम् ॥ ३६ ॥ पादास्ते वेदाश्चत्वारः समुद्राः स्तनतां ययुः ॥ चंद्रार्कौ लोचने यस्या
रोमाग्रेषु च देवताः ॥ ३७ ॥ शृङ्गयोः पर्वताः सर्वे कर्णयोर्वायवस्तथा ॥ नाभौ चैवामृतं देवि पातालानि खुरास्तथा ॥३८॥ स्कन्धे च भगवान्ब्रह्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



मस्तकस्थः सदाशिवः ॥ हृद्देशे च स्थितो विष्णुः पुच्छाग्रे पन्नगास्तथा ॥ ३९ ॥ शकृत्स्था वसवः सर्वे साध्या मूत्रस्थितास्तव ॥ सर्वे यज्ञा
ह्यस्थिदेशे किन्नरा गुह्यसंस्थिताः ॥ ४० ॥ पितॄणां च गणाः सर्वे पुरःस्था भांति सर्वदा ॥ सर्वे यक्षा भालदेशे किन्नराश्च कपोलयोः ॥ ४१ ॥
सर्वदेवमयी त्वं हि सर्वभूतविवृद्धिदा ॥ सर्वलोकहिता नित्यं मम देहहिता भव ॥ ४२ ॥ प्रणतस्तव देवेशि पूजये त्वां सदाऽनघे ॥ स्तौमि विश्वा
र्तिहन्त्रीं त्वां प्रसन्ना वरदा भव ॥ ४३ ॥ विप्रशापाग्निना दग्धं शरीरं मम शोभने ॥ स्वतेजसा पुनः कर्त्तुमर्हस्यमृतसंभवे ॥ ४४ ॥ इत्युक्त्वा तां
परिक्रम्य तस्या देहे लयं गतः ॥ साऽपि गर्भं दधाराथ सुरभिस्तदनन्तरम् ॥ ४५ ॥ कालातिक्रमयोगेन सर्वव्याकुलतां ययौ ॥ यस्मिन्प्रनष्टे
देवेशे विप्रशापभयावृते ॥ ४६ ॥ देवा महार्तिं प्रययुश्चचाल पृथिवी तथा ॥ चंद्रार्कौ निष्प्रभौ चैव वायुरुच्चण्ड एव च ॥ ४७ ॥ समुद्राः क्षोभमग
मंस्तस्मिन्काले द्विजोत्तम ॥ ४८ ॥ यस्मिञ्जगत्स्थावरजंगमादिकं काले लयं प्राप्य पुनः प्ररोहति ॥ तस्मिन्प्रनष्टे द्विजशापपीडिते जगद्गतप्राय
मवर्तत क्षणात् ॥ ४९ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शेषशाय्युपाख्याने
ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये हरशापो नामाष्टपंचाशदुत्तरद्विशततमोऽध्यायः ॥ २५८ ॥ ॥ छ ॥ ॥ गालव उवाच ॥ ॥ तस्मिंस्तु
पतिते लिंगे योजनायामविस्तृते ॥ विषादार्त्ता ऋषिगणास्तत्राजग्मुः सहस्रशः ॥ १ ॥ व्यलोकयन्त सर्वत्र दृष्ट्वा तत्र महेश्वरम् ॥ नासौ दृष्टिपथे
तेषां बभूव भयविह्वलः ॥ २ ॥ वीर्यं वर्षसहस्राणि बहून्यपि सुसंचितम् ॥ पृथिवीं सकलां व्याप्य स्थितं ददृशिरे द्विजाः ॥ ३ ॥ तद्दृष्ट्वा सुमह
ल्लिंगं रुधिराक्तं जलैः प्लुतम् ॥ ब्राह्मणाः संशयगता दह्यमाना वसुन्धरा ॥ ४ ॥ तल्लिंगं तत्र संस्थाप्य चक्रुस्तां नर्मदां नदीम् ॥ तज्जलं नर्म
दारूपं ल्लिंगं चामरकण्टकम् ॥ ५ ॥ नरकं वारयत्येतत्सेवितं नरकापहम् ॥ भूतग्रहाश्च सर्वेऽपि यास्यंति विलयं ध्रुवम् ॥ ६ ॥ तत्र स्नात्वा जलं
पीत्वा संतर्प्य च पितॄंस्तथा ॥ सर्वान्कामानवाप्नोति मनुष्यो भुवि दुर्लभान् ॥ ७ ॥ लिंगानि नार्मदेयानि पूजयिष्यंति ये नराः ॥ तेषां रुद्रमयो
देहो भविष्यति न संशयः ॥ ८ ॥ चातुर्मास्ये विशेषेण लिंगपूजा महाफला ॥ चातुर्मास्ये रुद्रजपं हरपूजा शिवे रतिः ॥ ९ ॥ पंचामृतेन स्नपनं न
तेषां गर्भवेदना ॥ ये करिष्यंति मधुना सेचनं लिंगमस्तके ॥ १० ॥ तेषां दुःखसहस्राणि यास्यंति विलयं ध्रुवम् ॥ दीपदानं कृतं येन चातु
र्मास्ये शिवाग्रतः ॥ ११ ॥ कुलकोटिं समुद्धृत्य स्वेच्छया शिवलोकभाक् ॥ चन्दनागुरुधूपैश्च सुश्वेतकुसुमैरपि ॥ १२ ॥ नर्मदाजललिंगं ये ह्यर्च
यिष्यंति ते शिवाः ॥ शिला हरत्वमापन्नाः प्राणिनामपि का कथा ॥ १३ ॥ तत्संभूतं महालिंगं जलधारणसंयुतम् ॥ पूजयित्वा विधानेन चातु



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्मास्ये शिवो भवेत् ॥ १४ ॥ चातुर्मास्ये ये मनुजा नर्मदाऽमरकण्टके ॥ तीर्थे स्नास्यंति नियतास्तेषां वासस्त्रिविष्टपे ॥ १५ ॥
॥ ॥ ब्रह्मोवाच ॥ ॥ इत्युक्त्वा ते द्विजास्तत्र स्थाप्य लिंगं यथाविधि ॥ अमरकण्टकतीर्थे नर्मदां च महानदीम् ॥ १६ ॥
पुनश्चिन्तापरा जाता विश्वस्य क्षोभकारणे ॥ पद्मासनगता भूत्वा प्राणायामपरायणाः ॥ १७ ॥ चिन्तयामासुरव्यग्रं हृदयस्थं महे
श्वरम् ॥ ततो देवा महेंद्राद्याः संप्राप्यामरकण्टकम् ॥ १८ ॥ ब्राह्मणानां स्तुतिं चक्रुर्विनयानतकन्धराः ॥ नमोऽस्तु वो द्विजातिभ्यो
ब्रह्मविद्भ्यो महेश्वराः ॥ १९ ॥ भूसुरेभ्यो गुरुभ्यश्च विमुक्तेभ्यश्च बंधनात् ॥ यूयं गुणत्रयातीता गुणरूपा गुणाकराः ॥ २० ॥ गुणत्रयमयैर्भावैः
सततं प्राणवुद्बुदाः ॥ येषां वाक्यजलेनैव पापिष्ठा अपि शुद्धताम् ॥ प्रयांति पापपुंजाश्च भस्मसाद्यांति पापिनाम् ॥ २१ ॥ शस्त्रं लोहमयं
येषां वागेव तत्समन्विताः ॥ पापैः पराभिभूतानां तेषां लोकोत्तरं बलम् ॥ २२ ॥ क्षमया पृथिवीतुल्याः कोपे वैश्वानरप्रभाः ॥
पातनेऽनेकशक्तीनां समर्था यूयमेव हि ॥ २३ ॥ स्वर्गादीनां तथा याने भवन्तो गतयो ध्रुवम् ॥ २४ ॥ सत्कर्मकारकाश्चैव सत्कर्मनिरताः सदा ॥
सत्कर्मफलदातारः सत्कर्मेभ्यो मुमुक्षवः ॥ २५ ॥ सावित्रीमंत्रनिरता ये भवंतोऽघनाशनाः ॥ आत्मानं यजमानं च तारयंति न संशयः ॥ २६ ॥
वह्नयश्च तथा विप्रास्तर्पिताः कार्यसाधकाः ॥ चातुर्मास्ये विशेषेण तेषां पूजा महाफला ॥ २७ ॥ कोपिताः सर्वदेहस्य नाशनाय भवंति हि ॥
तावन्न वज्रमिंद्रस्य शूलं नैव पिनाकिनः ॥ २८ ॥ दण्डो यमस्य तावन्नो यावच्छापो द्विजोद्भवः ॥ अग्निना ज्वाल्यते दृश्यं शापोद्दिष्टानपि
स्वयम् ॥ २९ ॥ हंति जातानजातांश्च तस्माद्विप्रं न कोपयेत् ॥ विप्रकोपाग्निना दग्धो नरकान्नैव मुच्यते ॥ ३० ॥ शस्त्रक्षतोऽपि नरकान्मुच्यते
नात्र संशयः ॥ देवानां मधुधान्यानां सामर्थ्यं भेदनेन हि ॥ ३१ ॥ वाङ्मात्रेण हि विप्रस्य भिद्यते सकलं जगत् ॥ ते यूयं गुरवोऽस्माकं
विश्वकारणकारकाः ॥ प्रसादपरमा नित्यं भवंतु भुवनेश्वराः ॥ ३२ ॥ ईश्वरेण विना सर्वे वयं लोकाश्च दुःखिताः ॥ तत्कथ्यतां स भगवान्कुत्रास्ते
परमेश्वरः ॥ ३३ ॥ ॥ गालव उवाच ॥ ॥ ज्ञात्वा मुनिभयत्रस्तं देवेशं शूलपाणिनम् ॥ ३४ ॥ सुरभीगर्भसंभूतं देवानूचुर्महर्षयः ॥
स्वागतं देवदेवेभ्यो ज्ञातो वै स महेश्वरः ॥ ३५ ॥ तत्र गच्छंतु देवेशा यत्र देवः सनातनः ॥ इत्युक्ता ते महात्मानः सह देवैर्ययुस्तदा ॥ ३६ ॥
गोलोकं देवमार्गेण यत्र पायसकर्दमाः ॥ घृतनद्योमधु ह्रदा नदीनां यत्र संवशः ॥ ३७ ॥ पूर्वजानां गणाः सर्वे दधिपीयूषपाणयः ॥ मरीचिपाः
सोमपाश्च सिद्धसंघास्तथा परे ॥ ३८ ॥ घृतपाश्चैव साध्याश्च यत्र देवाः सनातनाः ॥ ते तत्र गत्वा मुनयो ददृशुः सुरभीसुतम् ॥ ३९ ॥ तेजसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





भास्करं चैव नीलनामेति विश्रुतम् ॥ इतस्ततोऽभिधावंतं गवां संघातमध्यगम् ॥ ४० ॥ नंदा सुमनसा चैव सुरूपा च सुशीलका ॥ कामिनी
नंदिनी चैव मेध्या चैव हिरण्यदा ॥ ४१ ॥ धनदा धर्मदा चैव नर्मदा सकलप्रिया ॥ वामनालंबिका कृष्णा दीर्घशृंगा सुपिच्छिका ॥ ४२ ॥
तारा तरेयिका शांता दुर्विषह्या मनोरमा ॥ सुनासा दीर्घनासा च गौरा गौरमुखीह या ॥ ४३ ॥ हरिद्रवर्णा नीला च शंखिनी पंचवर्णका ॥
विनताभिनता चैव भिन्नवर्णा सुपत्रिका ॥ ४४ ॥ जयाऽरुणा च कुण्डोध्नी सुदती चारुचंपका ॥ एतासां मध्यगं नीलं दृष्ट्वा ता मुनिदेवताः ॥४५॥
विचरंति सुरूपं तं संजातविस्मयोन्मुखाः ॥ मुनीश्वराः कृपाविष्टा इन्द्राद्या हृष्टमानसाः ॥ स्तुतिमारेभिरे कर्त्तुं तेजसा तस्य तोषिताः ॥ ४६ ॥
॥ ॥ शूद्र उवाच ॥ ॥ कथं नीलेति नामासौ जातोयमद्भुताकृतिः ॥ किमस्तुवन्प्रसन्नास्ते ब्राह्मणा विश्वकारणम् ॥ ४७ ॥ ॥ गालव
उवाच ॥ ॥ लोहितो यस्तु वर्णेन मुखे पुच्छे च पांडुरः ॥ ४८ ॥ श्वेतः खुरविषाणेषु स नीलो वृषभः स्मृतः ॥ चतुष्पादो धर्मरूपो नील
लोहितचिह्नकः ॥ ४९ ॥ कपिलः खुरचिह्नेषु स नीलो वृषभः स्मृतः ॥ योऽसौ महेश्वरो देवो वृषश्चापि स एव हि ॥ ५० ॥ चतुष्पादो धर्मरूपो
नीलः पंचमुखो हरः ॥ यस्य संदर्शनादेव वाजपेयफलं लभेत् ॥ ५१ ॥ नीले च पूजिते यस्मिन्पूजितं सकलं जगत् ॥ स्निग्धग्रासप्रदानेन
जगदाप्यायितं भवेत् ॥ ५२ ॥ यस्य देहे सदा श्रीमान्विश्वव्यापी जनार्दनः ॥ नित्यमर्चयते योऽसौ वेदमन्त्रैः सनातनैः ॥ ५३ ॥ ॥ ऋषय
ऊचुः ॥ ॥ त्वं देवः सर्वगोमॄणां विश्वगोप्ता सनातनः ॥ विघ्नहर्ता ज्ञानदश्च धर्मरूपश्च मोक्षदः ॥५४॥ त्वमेव धनदः श्रीदः सर्वव्याधिनिषूदनः ॥
जगतां शर्मकरणे प्रवृत्तः कनकप्रदः ॥ ५५ ॥ तेजसां धाम सर्वेषां सौरभेय महाबल ॥ शृंगाग्रे धृतकैलासः पार्वतीसहितस्त्वया ॥ ५६ ॥ वेद
स्तुत्यो वेदमयो वेदात्मा वेदवित्तमः ॥ वेदवेद्यो वेदयानो वेदरूपो गुणाकरः ॥ ५७ ॥ गुणत्रयेभ्योऽपि परो याथात्म्यं वेद कस्तव ॥ वृषस्त्वं
भगवान्देव यस्तुभ्यं कुरुते त्वघम् ॥ ५८ ॥ वृषलः स तु विज्ञेयो रौरवादिषु पच्यते ॥ पदा स्पृष्टः स तु नरो नरकादिषु यातनाः ॥ ५९ ॥
सेवते पापनिचयैर्निगाढप्रायबन्धनैः ॥ क्षुत्क्षामं च तृषाक्रांतं महाभारसमन्वितम् ॥ ६० ॥ निर्दया ये प्रशोष्यंति मतिस्तेषां न शाश्वती ॥
चतुर्भिः सहितं मर्त्या विवाहविधिना तु ये ॥ ६१ ॥ विवाहं नीलरूपस्य ये करिष्यंति मानवाः ॥ पितॄनुद्दिश्य तेषां वै कुले नैवास्ति नारकी ॥ ॥२९१॥
॥ ६२ ॥ त्वं गतिः सर्वलोकानां त्वं पिता परमेश्वरः ॥ त्वया विना जगत्सर्वं तत्क्षणादेव नश्यति ॥ ६३ ॥ परा चैव तु पश्यंती मध्यमा
वैखरी तथा ॥ चतुर्विधानां वचसामीश्वरं त्वां विदुर्बुधाः ॥ ६४ ॥ चतुःशृंगं चतुष्पादं द्विशीर्षं सप्तहस्तकम् ॥ त्रिधा बद्धं धर्ममयं त्वामेव वृषभं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विदुः ॥ ६५ ॥ तृप्तिदं सर्वभूतानां विश्वव्यापकमोजसा ॥ ब्रह्म धर्ममयं नित्यं त्वामात्मानं विदुर्जनाः ॥ ६६ ॥ अच्छेद्यस्त्वमभेद्यस्त्वमप्रमेयो महा यशाः ॥ अशोच्यस्त्वमदाह्योऽसि विदुः पौराणिका जनाः ॥ ६७ ॥ त्वदाधारमिदं सर्वं त्वदाधारमिदं जगत् ॥ त्वदाधाराश्च देवाश्च त्वदाधारं तथा मृतम् ॥ ६८ ॥ जीवरूपेण लोकांस्त्रीन्व्याप्य तिष्ठसि नित्यदा ॥ एवं स संस्तुतो नीलो विप्रैस्तैः सोमपायिभिः ॥ ६९ ॥ प्रसन्नवदनो भूत्वा विप्रा न्प्रणतितत्परः ॥ पुनरेव वचः प्रोचुर्विप्राः कृतशिवागसः ॥ ७० ॥ वरं ददुर्महेशस्य नीलरूपस्य धर्मतः ॥ एकादशाहे प्रेतस्य यस्य नोत्सृज्यते वृषः ॥ ७१ ॥ प्रेतत्वं सुस्थिरं तस्य दत्तैः श्राद्धशतैरपि ॥ पुनरेव सुसर्पंतं दृष्ट्वा नीलं महावृषम् ॥ ७२ ॥ स्वल्पक्रोधसमाविष्टं द्विजाश्चक्रुस्तमं कितम् ॥ चक्रं च वामभागेषु शूलं पार्श्वे च दक्षिणे ॥ ७३ ॥ उत्ससृजुर्गवां मध्ये तं देवैर्गोपितं तदा ॥ ततो देवगणाः सर्वे महर्षीणां गणाः पुनः ॥ स्वानि स्थानानि ते जग्मुर्मुनयो वीतमत्सराः ॥ ७४ ॥ एवमृषीणां दयितासु सक्तः कामार्त्तचित्तो मुनिपुंगवानाम् ॥ शापं समासाद्य शिवोऽपि भक्त्या रेवाजलेऽगात्सुशिलामयत्वम् ॥ ७५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखंडे हाटकेश्वरक्षेत्र माहात्म्ये शेषशाय्युपाख्याने ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये पैजवनोपाख्याने वृषस्तुतिर्नामैकोनषष्ट्युत्तरद्विशततमोऽध्यायः ॥ २५९ ॥ ॥ छ ॥ ॥ गालव उवाच ॥ ॥ इति ते कथितं सर्वं शालग्रामकथानकम् ॥ महेश्वरस्य चोत्पत्तिर्यथा लिंगत्वमाप सः ॥ १ ॥ तस्माद्वरं लिंगरूपं शालग्रामगतं हरिम् ॥ येऽर्चयंति नरा भक्त्या न तेषां दुःखयातनाः ॥ २ ॥ चातुर्मास्ये समायाते विशेषात्पू जयेच्च तौ ॥ अर्चितौ यावभेदेन स्वर्गमोक्षप्रदायकौ ॥ ३ ॥ देवौ हरिहरौ भक्त्या विप्रवह्निगवां गतौ ॥ येऽर्चयंति महाशूद्र तेषां मोक्षप्रदो हरिः ॥ ॥ ४ ॥ वेदोक्तं कारयेत्कर्म पूर्तेष्टं वेदतत्परः ॥ पंचायतनपूजा च सत्यवादो ह्यलोलता ॥ ५ ॥ विवेकादिगुणैर्युक्तः स शूद्रो याति सद्गतिम् ॥ ब्रह्मचर्यं तपो नान्यद्द्वादशाक्षरचिंतनात् ॥ ६ ॥ मन्त्रैर्विना षोडश सोपचारैः कार्या सुपूजा नरकादिहंतुः ॥ यथा तथा वै गिरिजापतेश्च कार्या महा शूद्र महाघहंत्री ॥ ७ ॥ ॥ ब्रह्मोवाच ॥ ॥ एवं कथयतोरेषा रजनी क्षयमाययौ ॥ सच्छूद्रो गालवश्चैव शिष्यैश्च परिवारितः ॥ ८ ॥ स तेन पूजितो विप्रो ययौ शीघ्रं निजाश्रमम् ॥ ९ ॥ य इमं शृणुयान्मर्त्यो वाचयेत्पाठयेच्च वा ॥ श्लोकं वा सर्वमपि च तस्य पुण्यक्षयो न हि ॥ १० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शेषशाय्युपाख्याने ब्रह्मनारदसंवादे चातुर्मास्य माहात्म्ये पैजवनोपाख्याने षष्ट्युत्तरद्विशततमोऽध्यायः ॥ २६० ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ कथं नित्या भगवती हरपत्नी यश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



स्विनी ॥ योगसिद्धिं सुमहतीं प्राप मासचतुष्टये ॥ १ ॥ मन्त्रराजमिमं जप्त्वा द्वादशाक्षरसंभवम् ॥ एतन्मे विस्तरेण त्वं कथयस्व यथातथम् ॥२॥
॥ ॥ ब्रह्मोवाच ॥ ॥ चातुर्मास्ये हरौ सुप्ते पार्वती नियतव्रता ॥ मनसा कर्मणा वाचा हरिभक्तिपरायणा ॥ ३ ॥ चारुशृंगे पितुर्नित्यं तिष्ठंती
तपसि स्थिता ॥ देवद्विजाग्निगोऽश्वत्थातिथिपूजापरायणा ॥ ४ ॥ चातुर्मास्येऽथ संप्राप्ते विमले हरिवासरे ॥ जजाप परमं मंत्रं यथादिष्टं पिनाकि
ना ॥ ५ ॥ शंखचक्रधरो विष्णुश्चतुर्हस्तः किरीटधृक् ॥ मेघश्यामोंऽबुजाक्षश्च सूर्यकोटिसमप्रभः ॥ ६ ॥ गरुडाधिष्ठितो हृष्टो वसन्व्याप्य जगत्र
यम् ॥ श्रीवत्सकौस्तुभयुतः पीतकौशेयवस्त्रकः ॥७॥ सर्वाभरणशोभाभिरभिदीप्तमहावपुः ॥ बभाषे पार्वतीं विष्णुः प्रसन्नवदनः शुभाम् ॥ देवि तुष्टो
ऽस्मि भद्रं ते कथयस्व तवेप्सितम् ॥ ८ ॥ ॥ पार्वत्युवाच ॥ ॥ तज्ज्ञानममलं देहि येन नावर्त्तनं भवेत् ॥ इत्युक्तः स महाविष्णुः प्रत्युवाच ह प्रि
याम् ॥९॥ स एव देवदेवेशस्तव वक्ष्यत्यसंशयम् ॥ स एव भगवान्साक्षी देहांतरबहिःस्थितः ॥१०॥ विश्वस्रष्टा च गोप्ता च पवित्राणां च पावनः ॥
अनादिनिधनो धर्मो धर्मादीनां प्रभुर्हि सः ॥ ११ ॥ अक्षरत्रयसेव्यं यत्सकलं ब्रह्म एव सः ॥ मूर्त्तामूर्त्तस्वरूपेण योऽजो जन्मधरो हि सः ॥ १२ ॥
ममाधिकारो नैवास्ति वक्तुं तव न संशयः ॥ इत्युक्त्वा भगवानीशो विरराम प्रहृष्टवान् ॥१३॥ एतस्मिन्नंतरे शंभुर्गिरिजाश्रममभ्यगात् ॥ सर्वभूत
गणैर्युक्तो विमाने सार्वकामिके ॥ १४ ॥ तया वै भगवान्देवः पूजितः परमेश्वरः ॥ सखीनामपि प्रत्यक्षमाश्चर्यं समजायत ॥ १५ ॥ स्तुत्वाऽथ तं
महादेवं विष्णुर्देहे लयं ययौ ॥ अथोवाच महेशानः पार्वतीं परमेश्वरः ॥ १६ ॥ विमानवरमारुह्य तुष्टोऽहं तव सुव्रते ॥ गत्वैकांतप्रदेशं ते कथये परमं
महः ॥ १७ ॥ एवमुक्त्वा भगवतीं करे गृह्य मुदान्वितः ॥ विमानवरमारोप्य लीलया प्रययौ तदा ॥ १८ ॥ नानाधातुमयानद्रीन्नानारत्नविचित्रितान् ॥
नदीनिर्झरकुंजांश्च नदान्कोकिलकूजितान् ॥१९॥ अखातान्देवखातांश्च गंगाद्याः सरितस्तथा ॥ सौगंधिकांश्च कल्हारान्सहस्रदलपिंजरान् ॥२०॥
दर्शन्यकर्णिकारांश्च कोविदारान्महाद्रुमान् ॥ तालांस्तमालान्हिंतालान्प्रियंगून्पनसानपि ॥ २१ ॥ तिलकान्बकुलांश्चैव बहूनपि च पुष्पितान् ॥
क्षेत्राणि कलनाभानि पिञ्जराणि विदर्शयन् ॥ २२ ॥ ययौ देवनदीतीरे गतं शरवणं महत् ॥ फुल्लकाशं स्वर्णमयं शरस्तंबगणान्वितम् ॥ २३ ॥ हेम
भूमिविभागस्थं वह्निकांतिमृगद्विजम् ॥ तत्र तीरगतानां च मुनीनामूर्ध्वरेतसाम् ॥ २४ ॥ आश्रमान्स विमानाग्रे तिष्ठन्पत्न्यै प्रदर्शयत् ॥ षट्कृत्ति
काश्च ददृशे पार्वती वनसन्निधौ ॥ २५ ॥ स्नाताः स्वलंकृताश्चन्द्रपत्न्यस्ता विरजांबराः ॥ ऊचुस्ता योजितकरा केऽयं पुत्राय गम्यते ॥ २६ ॥
तत्कथ्यतां महाभागे स च ते दर्शनं गतः ॥ २७ ॥ ॥ पार्वत्युवाच ॥ ॥ मम भाग्यवशात्पुत्रः कथमुत्संगमाहरेत् ॥ न ह्यभाग्यवशात्पुंसां



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्वापि सौख्यं निरन्तरम् ॥ २८ ॥ सुतनाम्नाप्यहं दृष्ट्वा भवतीनां च दर्शनात् ॥ किमर्थमिह संप्राप्ताः कथ्यतामविलंबितम् ॥ २९ ॥ ॥ कृत्तिका ऊचुः ॥ ॥ वयं तव सुतं न्यस्तं प्रदातुमिह सुन्दरि ॥ चातुर्मास्ये रवौ स्नातुमागता देवनिम्नगाम् ॥ ३० ॥ ॥ पार्वत्युवाच ॥ ॥ न हास्यावसरः सख्यः सत्यमेव हि कथ्यताम् ॥ एकांतावसरे हास्यं जायते चेतरेतरम् ॥ ३१ ॥ ॥ कृत्तिका ऊचुः ॥ ॥ सत्यं वदामहे देवि तव त्रैलोक्यशोभिते ॥ अस्य स्तंबसमूहस्य मध्यस्थं बालकं वृणु ॥ ३२ ॥ कृत्तिकानां वचः श्रुत्वा शंकिता पार्वती तदा ॥ ददर्श बालं दीप्ताभं षण्मुखं दीप्तवर्चसम् ॥ ३३ ॥ तडित्कोटिप्रतीकाशं रूपदिव्यश्रिया युतम् ॥ वह्निपुत्रं च गांगेयं कार्तिकेयं महाबलम् ॥ ॥ ३४ ॥ सा वत्सेति गृहीत्वा तं कुमारं पाणिना मुदा ॥ विमानमध्यमादाय कृत्वोत्संगे ह्युवाच ह ॥ ३५ ॥ चिरंजीव चिरं नन्द चिरं नंदय बांधवान् ॥ इत्युक्त्वा गाढमालिंग्य मूर्ध्नि चाघ्राय तं सुतम् ॥ ३६ ॥ संहृष्टा परमोदारं भास्वरं हृष्टमानसम् ॥ कार्तिकेयो महाप्रेम्णा प्रणिपत्य महेश्वरम् ॥ ३७ ॥ ततः प्रांजलिरव्यग्रः प्रहृष्टेनांतरात्मना ॥ तद्विमानं ययौ शीघ्रं तीर्त्वा नदनदीपतीन् ॥ ३८ ॥ जंबुद्वीपमतिक्रम्य लक्षयोजनमायतम् ॥ ततः समुद्रं द्विगुणं लवणोदं तथैव च ॥ ३९ ॥ उत्तरांश्च कुरून्नीत्वा विमानेनार्कतेजसा ॥ समुद्रद्विगुणं द्वीपं कुशनाभेति कीर्तितम् ॥ ४० ॥ दिव्यलोकसमाक्रांतं दिव्यपर्वतसंकुलम् ॥ इक्षूदाद्विगुणं द्वीपं तद्वीपाद्विगुणः पुनः ॥ ४१ ॥ तमतिक्रम्य तत्सिन्धोर्द्विगुणं क्रौंचसंज्ञितम् ॥ ततोऽपि द्विगुणः सिन्धुः सुरोदो यक्षसेवितः ॥ ४२ ॥ ततोऽपि द्विगुणं द्वीपं शाकद्वीपेतिसंज्ञितम् ॥ अर्णवद्विगुणं तस्मादाज्यरूपं सुनिर्मितम् ॥ ४३ ॥ परमस्वादसंपूर्णं यत्र सिद्धाः समंततः ॥ तस्माच्च द्विगुणं द्वीपं शाल्मलीवृक्षसंज्ञितम् ॥ ४४ ॥ समुद्रो द्विगुणस्तत्र दधिमंडोदसंभवः ॥ साध्या वसंति नियतं महत्तपसि संस्थिताः ॥ ४५ ॥ ततोऽपि द्विगुणं द्वीपं प्लक्षनामेति विश्रुतम् ॥ क्षीरोदो द्विगुणस्तत्र यत्रयत्र महर्षयः ॥ ४६ ॥ षडिमानि सुदिव्यानि भौमः स्वर्ग उदाहृतः ॥ तत्र स्वर्णमयी भूमिस्तथा रजतसंयुता ॥ ४७ ॥ दृष्टा मधूपलस्वादैः सर्वकामप्रदायका ॥ यत्र स्त्रीपुरुषाणां च कल्पवृक्षा गृहे स्थिताः ॥ ४८ ॥ वासांसि भूषणानां च समूहान्हर्षयंति च ॥ एतानि दक्षचिह्नानि द्वीपानि मुनिसत्तम ॥ ४९ ॥ महेश्वरो विमानेन व्यतिक्रामद्विहायसा ॥ प्लक्षद्वीपस्य च प्रांते द्विगुणः क्षीरसागरः ॥ ५० ॥ तन्मध्ये सुमहद्वीपं श्वेतं नाम सुनिश्चितम् ॥ रम्यकः पर्वतस्तत्र शतशृंगोमितद्रुमः ॥ ५१ ॥ तस्य शृंगे महद्दिव्ये विमानं स्थापितं तदा ॥ तदाऽमृतफलैर्वृक्षैः सेविते हेमवालुके ॥ ५२ ॥ क्षीरच्छेदेन विहते शिलातलसुसंवृते ॥ विविक्ते सर्वसुभगे मणिरत्नसमन्विते ॥ ५३ ॥ उमायै कथयामास देवदेवः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पिनाकधृक् ॥ कार्तिकेयोऽपि शुश्राव गुह्याद्गुह्यतरं महत् ॥९४॥ ध्यानयोगं मंत्ररूपं द्वादशाक्षरसंज्ञितम् ॥ प्रणवेन युतं साग्रं सरहस्यं श्रुतेः परम् ॥ ॥ ९५ ॥ ॥ ईश्वर उवाच ॥ ॥ अक्षरत्रयसंयुक्तो मन्त्रोऽयं सकृदक्षरः ॥ माघमाससहितश्चायममायो विश्वपावनः ॥ ९६ ॥ विष्णुगम्यो विष्णु मध्यो मन्त्रत्रयसमन्वितः ॥ तुरीयकलयाऽशेषब्रह्मांडगणसेवितः ॥ ९७ ॥ निष्कामैर्मुनिभिः सेव्यो महाविद्यादिसेवितः ॥ नाभितः शिरसि व्याप्त अखण्डसुखदायकः ॥ ९८ ॥ ओंकारेति प्रियोक्तिस्ते महादुःखविनाशनः ॥ तं पूर्वं प्रणवं ध्यात्वा ज्ञानरूपं सुखाश्रयम् ॥ ९९ ॥ ज्ञात्वा सर्वगतं ब्रह्म देहशोधनतत्परः ॥ पद्मासनपरो भूत्वा संपूज्य ज्ञानलोचनः ॥६०॥ नेत्रे मुकुलिते कृत्वा करौ कृत्वा तु संहतौ ॥ चेतसि ध्यानरूपेण चिंतये च्छिवमंगलम् ॥६१॥ तडित्कोटिप्रतीकाशं सूर्यकोटिसमच्छविम् ॥ चन्द्रलक्षसमच्छन्नं पुरुषं द्योतिताखिलम् ॥६२॥ मूर्तामूर्तविराजं तं सदसद्रूप मव्ययम् ॥ चिंतयित्वा विराड्रूपं न भूयःस्तनपो भवेत् ॥ चातुर्मास्ये सकृदपि ध्यानात्कलमषसंक्षयः॥ ६३ ॥ एवं च मद्रूपमिदं मुरारेरमोघवीर्यं गुण तोप्यपारम् ॥ विलोकयेद्योऽघविनाशनाय क्षणं प्रभुर्जन्मशतोद्भवाय ॥ ६४ ॥ इतिश्रीस्कांदे महापुराण एकाशीसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शेषशाय्युपाख्याने ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये ध्यानयोगोनामैकषष्ट्युत्तरद्विशततमोऽध्यायः ॥ २६१ ॥ ७ ॥ ॥ ॥ पार्वत्युवाच ॥ ॥ ध्यानयोगमहं प्राप्य ज्ञानयोगमवाप्नुयाम् ॥ तथा कुरुष्व देवेश यथाहममरी भवे ॥१॥ ॥ ईश्वर उवाच ॥ ॥ प्रत्युक्तोऽयं मंत्रराजो द्वादशाक्षरसंज्ञितः॥ जप्तव्यः सुकुमारांगि वेदसारः सनातनः ॥ २ ॥ प्रणवः सर्ववेदाद्यः सर्वब्रह्मांडयाजकः ॥ प्रथमः सर्वकार्येषु सर्वसिद्धिप्रदा यकः ॥३॥ सितवर्णो मधुच्छंदा ऋषिर्ब्रह्मा तु देवता ॥ परमात्मा तु गायत्री नियोगः सर्वकर्मसु ॥४॥ एतद्ब्रह्ममयं बीजं विश्वमत्र समन्वितम् ॥ वेदवेदांग तत्त्वाख्यं सदसद्रूपमव्ययम् ॥ ५ ॥ नकारः पीतवर्णस्तु जलबीजः सनातनः ॥ बीजं पृथ्वी मनश्छन्दो विषहा विनियोगतः ॥ ६ ॥ मोकारः पृथिवी बीजो विश्वामित्रसमन्वितः ॥ रक्तवर्णो महातेजा धनदो विनियोजितः ॥ ७ ॥ भकारः पंचवर्णस्तु जलबीजः सनातनः ॥ मरीचिना समायुक्तः पूजि तः सर्वभोगदः ॥ ८ ॥ गकारो हेमरक्ताभो भरद्वाजसमन्वितः ॥ वायुबीजो विनियोगं कुर्वतामादिभोगदः ॥ ९ ॥ वकारः कुन्दधवलो व्योमबीजो महाबलः ॥ ऋषिमंत्रिपुरस्कृत्य योजितो मोक्षदायकः ॥ १० ॥ तेकारो विद्युद्विकारः सोमबीजं महत्स्मृतम् ॥ अंगिरावर्द्धमूलं च वर्जितं कर्मका मिकम् ॥ ११ ॥ वाकारो धूम्रवर्णश्च सूर्यबीजं मनोजवम् ॥ पुलस्त्यर्षिसमायुक्तं नियुक्तं सर्वसौख्यदम् ॥ १२ ॥ सुकारश्चाक्षरो नित्यं जपाकुसुम भास्वरः ॥ मनो बीजं दुर्विषह्यं पुलहाश्रितमर्थिदम् ॥ १३ ॥ देकाराक्षरकं बीजं हंसरूपं च कर्बुरम् ॥ सिद्धिबीजं महासत्त्वं क्रतौ क्रतुनियोजि



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तम् ॥ १४ ॥ वाकारो निर्मलो नित्यं यजमानस्तु बीजभृत् ॥ प्रचेताश्रियमाश्रेयं मोक्षे मोक्षप्रदायकम् ॥ १५ ॥ यकारस्य महाबीजं पिंगवर्णश्च खेचरी ॥ भूचरी च महासिद्धिः सर्वदा भूविचिन्तनम् ॥ १६ ॥ भृगुयन्त्रे समाश्रांतिनियोगे सर्वकर्मकृत् ॥ गायत्रीछंद एतेषां देहन्यासक्रमो भवेत् ॥ १७ ॥ ओंकारं सर्वदा न्यस्यन्नकारं पादयोर्द्वयोः ॥ मोकारं गुह्यदेशे तु भकारं नाभिपंकजे ॥ १८ ॥ गकारं हृदये न्यस्य वकारः कण्ठमध्यगः ॥ तेकारं दक्षिणे हस्ते वाकारो वामहस्तगः ॥ १९ ॥ सुकारं मुखजिह्वायां देकारः कर्णयोर्द्वयोः ॥ वाकारश्चक्षुषोर्द्वन्द्वे यकारं मस्तके न्यसेत् ॥ २० ॥ लिंगमुद्रा योनिमुद्रा धेनुमुद्रा तथा त्रयम् ॥ सकलं कृतमेतद्धि मंत्ररूपे बिजाक्षरम् ॥ २१ ॥ योजयेत्प्रत्यहं देवि न स पापैः प्रलिप्यते ॥ एतद्द्वादशलिंगारं कूर्मस्थं द्वादशाक्षरम् ॥ २२ ॥ शालग्रामशिलाश्चैव द्वादशैव हि पूजिताः ॥ ताभिः सहाकरैरेभिः प्रत्यक्षैः सह संसदि ॥ २३ ॥ यथावर्णमनुध्यानैर्मुनिबीजसमन्वितैः ॥ विनियोगेन सहितैश्छन्दोभिः समलंकृतैः ॥ २४ ॥ ध्यानैर्जपैः पूजितैश्च भक्तानां मुनिसत्तम ॥ मोक्षो भवति बन्धेभ्यः कर्मजेभ्यो न संशयः ॥ २५ ॥ अयं हि ध्यानकर्माख्यो योगो दुष्प्राप्य एव हि ॥ ध्यानयोगं पुनर्वच्मि शृणुष्वैकाग्रमानसा ॥ २६ ॥ ध्यानयोगेन पापानां क्षयो भवति नान्यथा ॥ जपध्यानमयो योगः कर्मयोगो न संशयः ॥ २७ ॥ शब्दब्रह्मसमुद्भूतो वेदेन द्वादशाक्षरः ॥ ध्यानेन सर्वमाप्नोति ध्यानेनाप्नोति शुद्धताम् ॥ २८ ॥ ध्यानेन परमं ब्रह्म मूर्त्तौ योगस्तु ध्यानजः ॥ सावलम्बो ध्यानयोगो यन्नारायणदर्शनम् ॥ २९ ॥ द्वितीयो निखिलालम्बो ज्ञानयोगेन कीर्तितः ॥ अरूपमप्रमेयं यत्सर्वकायं महः सदा ॥ ३० ॥ तडित्कोटिसमप्रख्यं सदोदितमखंडितम् ॥ निष्कलं सकलं वापि निरंजनमयं वियत् ॥ ३१ ॥ तत्स्वरूपं भोगरूपं तुर्यातीतमनोपमम् ॥ विभ्रांतकरणं मूर्तं प्रकृतिस्थं च शाश्वतम् ॥ ३२ ॥ दृश्यादृश्यमजं चैव वैराजं संततोज्ज्वलम् ॥ बहुलं सर्वजं धर्म्यं निर्विकल्पमनीश्वरम् ॥ ३३ ॥ अगोत्रं वरणं वापि ब्रह्मांडशतकारणम् ॥ निरीहं निर्ममं बुद्धिशून्यरूपं च निर्मलम् ॥ ३४ ॥ तदीशरूपं निर्देहं निर्द्वंद्वं साक्षिमात्रकम् ॥ शुद्धस्फटिकसंकाशं ध्यातृध्येयविवर्जितम् ॥ नोपमेयमगाधं त्वं स्वीकुरुष्व स्वतेजसा ॥ ३५ ॥ ॥ पार्वत्युवाच ॥ ॥ तत्कथं प्राप्यते सम्यग्ज्ञानं योगिस्वरूपिणम् ॥ नारायणममूर्त्तं च स्थानं तस्य वद प्रभो ॥ ३६ ॥ ॥ ईश्वर उवाच ॥ ॥ शिरः प्रधानं गात्रेषु शिरसा धार्यते महान् ॥ ॥ ३७ ॥ शिरसा पूजितो देवः पूजितं सकलं जगत् ॥ शिरसा धार्यते योगः शिरसा ध्रियते बलम् ॥ ३८ ॥ शिरसा ध्रियते तेजो जीवितं शिरसि स्थितम् ॥ सूर्यः शिरो ह्यमूर्त्तस्य मूर्तस्यापि तथैव च ॥ ३९ ॥ उरस्तु पृथिवीलोकः पादश्चैव रसातलम् ॥ अयं ब्रह्मांडरूपे च मूर्त्तामूर्त्तस्वरू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पतः ॥ ४० ॥ विष्णुरेव ब्रह्मरूपो ज्ञानयोगाश्रयः स्वयम् ॥ सृजते सर्वभूतानि पालयत्यपि सर्वशः ॥ ४१ ॥ विनाशयति सर्वं हि सर्वदेवमयो ह्ययम् ॥ सर्वमासेष्वाधिपत्यं यस्य विष्णोः सनातनम् ॥ ४२ ॥ तस्मात्सर्वेषु मासेषु सर्वेषु दिवसेष्वपि ॥ सर्वेषु यामकालेषु संस्मरन्मुच्यते हरिम् ॥ ४३ ॥ चातुर्मास्ये विशेषेण ध्यानमात्रात्प्रमुच्यते ॥ अमूर्त्तसेवनं गंगातीर्थध्यानाद्वरं परम् ॥ ४४ ॥ सर्वदानोत्तरं चैव चातुर्मास्ये न संशयः ॥ सर्वमासकृतं पापं चातुर्मास्ये शुभाशुभम् ॥ ४५ ॥ अक्षय्यं तद्भवेद्देवि नात्र कार्या विचारणा ॥ तस्मात्सर्वप्रयत्नेन ज्ञानयोगो बहूत्तमः ॥ ॥ ४६ ॥ सेवितो विष्णुरूपेण ब्रह्ममोक्षप्रदायकः ॥ शृणुष्वावहिता भूत्वा मूर्त्तामूर्ते स्थितिं शुभे ॥ ४७ ॥ न कथ्येयं यस्य कस्य सुतस्याप्य परस्य च ॥ अदांतायाथ दुष्टाय चलचित्ताय दांभिके ॥ ४८ ॥ स्ववाक्च्युताय निंद्याय न वाच्या योगजा कथा ॥ नित्यभक्ताय दांताय शमादि गुणिने तथा ॥ ४९ ॥ विष्णुभक्ताय दातव्या शूद्रायापि द्विजन्मने ॥ अभक्तायाप्यशुचये ब्रह्मस्थानं न कथ्यते ॥ ५० ॥ मद्भक्त्या योगसिद्धिं त्वं गृहाणाशु तपोधने ॥ अभूतं ज्ञानगम्यं तं विद्धि नारायणं परम् ॥ ५१ ॥ नादरूपेण शिरसि तिष्ठंतं सर्वदेहिनाम् ॥ स एव जीवशिरसि वर्त्तते सूर्यबिंबवत् ॥ ५२ ॥ सदोदितः सूक्ष्मरूपो मूर्त्तो मूर्त्या प्रणीयते ॥ अभ्यासेन सदा देवि प्राप्यते परमात्मकः ॥ ५३ ॥ शरीरे सकला देवा योगिनो निवसंति हि ॥ कर्णे तु दक्षिणे नद्यो निवसंति तथाऽपराः ॥ ५४ ॥ हृदये चेश्वरः शंभुर्नाभौ ब्रह्मा सनातनः ॥ पृथ्वी पादतलाग्रे तु जलं सर्वगतं तथा ॥ ५५ ॥ तेजो वायुस्तथाऽऽकाशं विद्यते भालमध्यतः॥ हस्ते च पंच तीर्थानि दक्षिणे नात्र संशयः ॥ ५६ ॥ सूर्यो यद्दक्षिणं नेत्रं चन्द्रो वाममुदाहृतम् ॥ भौमश्चैव बुधश्चैव नासिके द्वे उदाहृते ॥ ५७ ॥ गुरुश्च दक्षिणे कर्णे वामकर्णे तथा भृगुः ॥ मुखे शनैश्चरः प्रोक्तो गुदे राहुः प्रकीर्तितः ॥ ५८ ॥ केतुरिंद्रियगः प्रोक्तो ग्रहाः सर्वे शरीरगाः ॥ योगिनो देहमासाद्य भुवनानि चतुर्दश ॥ ५९ ॥ प्रवर्त्तंते सदा देवि तस्माद्योगं सदाऽभ्यसेत् ॥ चातुर्मास्ये विशेषेण योगी पापं निकृन्तति ॥ ६० ॥ मुहूर्त्तमपि यो योगी मस्तके धारयेन्मनः ॥ कर्णौ पिधाय पापेभ्यो मुच्यतेऽसौ न संशयः ॥ ६१ ॥ अंतरं नैव पश्यामि विष्णोर्योगपरस्य वा ॥ एकोऽपि योगी यद्गेहे ग्रासमात्रं भुनक्ति च ॥ ६२ ॥ कुलानि त्रीणि सोऽवश्यं तारयेदात्मना सह ॥ यदि विप्रो भवेद्योगी सोऽवश्यं दर्शनादपि ॥ ६३ ॥ सर्वेषां प्राणिनां देवि पापराशि निषूदकः ॥ सक्रियो ब्रह्मनिरतः सच्छूद्रो योगभाग्यदि ॥ ६४ ॥ भवेत्सद्गुरुभक्तो वा सोऽप्यमूर्त्तफलं लभेत् ॥ यो योगी नियताहारः परब्रह्म समाधिमान् ॥ ६५ ॥ चातुर्मास्ये विशेषेण हरौ स लयभाग्भवेत् ॥ यथा सिद्धकरस्पर्शाल्लोहं भवति कांचनम् ॥ ६६ ॥ तथा मूर्त्तं हरिप्रीत्या



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनुष्यो लयमाव्रजेत् ॥ यथामार्गजलं गंगापतितं त्रिदशैरपि ॥ ६७ ॥ सेवितं सर्वफलदं तथा योगी विमुक्तिदः ॥ यथा गोमयमात्रेण वह्निर्दीप्यति सर्वदा ॥ ६८ ॥ देवतानां मुखं तद्धि कीर्त्यते याज्ञिकैः सदा ॥ एवं योगी सदाऽभ्यासाज्जायते मोक्षभाजनम् ॥ ६९ ॥ योगोऽयं सेव्यते देवि ज्ञानसिद्धिप्रदः सदा ॥ सनकादिभिराचार्यैर्मुमुक्षुभिरधीश्वरैः ॥ ७० ॥ प्रथमं ज्ञानसंपत्तिर्जायते योगिनां सदा ॥ तेषां गृहीतमात्रस्तु योगी भवति पार्वति ॥ ७१ ॥ ततस्तु सिद्धयस्तस्य त्वणिमाद्याः पुरोगताः ॥ भवन्ति तत्रापि मनो न दद्याद्योगिनां वरः ॥ ७२ ॥ सर्वदानक्रतुभवं पुण्यं भवति योगतः ॥ योगात्सकलकामाप्तिर्न योगाद्भुवि प्राप्यते ॥ ७३ ॥ योगान्न हृदयग्रंथिर्न योगान्ममता रिपुः ॥ न योगसिद्धस्य मनो हर्तुं केनापि शक्यते ॥ ७४ ॥ स एव विमलो योगी यच्चित्तं शिरसि स्थितम् ॥ स्थिरीभूतव्यथं नित्यं दशमद्वारसंपुटे ॥ ७५ ॥ कर्णौ पिधाय मर्त्यस्य नादरूपं विचिन्वतः ॥ तदेव प्रणवस्याग्रं तदेव ब्रह्म शाश्वतम् ॥ ७६ ॥ तदेवानंतरूपाख्यं तदेवामृतमुत्तमम् ॥ प्राणवायौ प्रघोषोऽयं जठराग्नेर्महत्पदम् ॥ ७७ ॥ पंचभूतं निवासं यज्ज्ञानरूपमिदं पदम् ॥ पदं प्राप्य विमुक्तिः स्याज्जन्मसंसारबंधनात् ॥ ७८ ॥ यदाप्तिर्दुर्लभा लोके योगसिद्धिप्रदायिका ॥ ७९ ॥ एवं ब्रह्ममयं विभाति सकलं विश्वं चरं स्थावरं विज्ञानाख्यमिदं पदं स भगवान्विष्णुः स्वयं व्यापकः ॥ ज्ञात्वा तं शिरसि स्थितं बहुवरं योगेश्वराणां परं प्राणी मुंचति सर्पवज्जगतिजां निर्मोकमायाकृतिम् ॥ ८० ॥ इति श्रीस्कांदे महापुराण एकाशीति साहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शेषशाय्युपाख्याने ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये ज्ञानयोगकथनं नाम द्विषष्ट्युत्तरद्विशततमोऽध्यायः ॥ २६२ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ यदि चेत्तामसं कर्म त्यक्त्वा कर्मसु जायते ॥ तदा ज्ञानमयो योगी जीवतां मोक्षदायकः ॥ १ ॥ यदा निर्ममता देहे यदा चित्तं सुनिर्मलम् ॥ यदा हरौ भक्तियोगस्तदा बन्धो न कर्मणा ॥ २ ॥ कुर्वन्नेव हि कर्माणि मनः शांतं नृणां यदा ॥ तदा योगमयी सिद्धिर्जायते नात्र संशयः ॥ ३ ॥ गुरुत्वं स्थानमसकृदनुभूय महामतिः ॥ जीवन्विष्णुत्वमासाद्य कर्म संगात्प्रमुच्यते ॥ ४ ॥ कर्माणि नित्यजातानि नित्यनैमित्तिकानि च ॥ इच्छया नैव सेव्यानि दुःखतापविवृद्धये ॥ ५ ॥ कर्मणामीशितारं च विष्णुं विद्धि महेश्वरि ॥ तस्मिन्संत्यज्य सर्वाणि संसारान्मुच्यतेऽखिलात् ॥ ६ ॥ एतदेव परं ज्ञानमेतदेव परं तपः ॥ एतदेव परं श्रेयो यत्कृष्णे कर्मणोऽर्पणम् ॥ ७ ॥ अयं हि निर्मलो योगो निर्गुणः स उदाहृतः ॥ तद्विष्णोः कर्म जनितं शुभस्व प्रतिपादनम् ॥ ८ ॥ तावद्भ्रमंति संसारे पितरः पिंडतत्पराः ॥ यावत्कुले भक्तियुतः सुतो नैव प्रजायते ॥ ९ ॥ तावद्विजानि गर्जंति



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तावद्गर्जंति पातकम् ॥ तावत्तीर्थान्यनेकानि यावद्भक्तिं न विंदति ॥ १० ॥ स एव ज्ञानवाँल्लोके योगिनां प्रथमो हि सः ॥ महाक्रतू
नामाहर्ता हरिभक्तियुतो हि सः ॥ ११ ॥ निमिषं निर्नयन्मेषं योगः समभिजायते ॥ वाणीजये योगिनस्तु गोमेधश्च प्रकीर्तितः ॥
॥ १२ ॥ मनसो विजये नित्यमश्वमेधफलं लभेत् ॥ कल्पनाविजयान्नित्यं यज्ञं सौत्रामणिं लभेत् ॥ १३ ॥ देहस्योत्सर्जनान्नित्यं नरयज्ञः
प्रकीर्तितः ॥ पंचेंद्रियपशून्हत्वाऽनघौ शीर्षे च कुण्डले ॥ १४ ॥ गुरूपदेशविधिना ब्रह्मभूतत्वमश्नुते ॥ स योगी नियताहारो दण्डत्रि
तयधारकः ॥ १५ ॥ त्रिदंडी स तु विज्ञेयो ज्ञाते देवे निरंजने ॥ मनोदण्डः कर्मदण्डो वाग्दंडो यस्य योगिनः ॥ १६ ॥ स योगी ब्रह्मरूपेण
जीवन्नेव समाप्यते ॥ अज्ञानी बाध्यते नित्यं कर्मभिर्बंधनात्मकैः ॥ १७ ॥ कुर्वन्नेव हि कर्माणि ज्ञानी मुक्तिं प्रयाति हि ॥ यदा हि गुरुभिः स्थानं
ब्रह्मणः प्रतिपाद्यते ॥ १८ ॥ तदैव मुक्तिमाप्नोति देहस्तिष्ठति केवलम् ॥ यावद्ब्रह्मफलावाप्त्यै प्रयाति पुरुषोत्तमः ॥ १९ ॥ तावत्कर्ममयी वृत्तिर्ब्रह्म
वृक्षांतरा भवेत् ॥ अवांतराणि पर्वाणि ज्ञेयानि मुनिभिः सदा ॥ २० ॥ मोक्षमार्गो द्विजैश्चैव श्रुतिस्मृतिसमुच्चयात् ॥ मोक्षोऽयं नगराकारश्चतुर्द्वार
समाकुलः ॥ २१ ॥ द्वारपालास्तत्र नित्यं चत्वारस्तु शमादयः ॥ त एव प्रथमं सेव्या मनुजैर्मोक्षदायकाः ॥ २२ ॥ शमश्च सद्विचारश्च संतोषः
साधुसंगमः ॥ एते वै हस्तगा यस्य तस्य सिद्धिर्न दूरतः ॥ २३ ॥ योगसिद्धिर्विष्णुभक्त्या सद्धर्माचरणेन च ॥ प्राप्यते मनुजैर्देवि ह्येतज्ज्ञानमलं
विदुः ॥ २४ ॥ ज्ञानार्थं च भ्रमन्मर्त्यो विद्यास्थानेषु सर्वशः ॥ सद्यो ज्ञानं सद्गुरुतो दीपार्चिरिव निर्मला ॥ २५ ॥ मुहूर्तमात्रमपि यो लयं चिंत
यति ध्रुवम् ॥ तस्य पापसहस्राणि विलयं यांति तत्क्षणात् ॥ २६ ॥ रागद्वेषौ परित्यज्य क्रोधलोभविवर्जितः ॥ सर्वत्र समदर्शी च विष्णुभक्तस्य
दर्शनम् ॥ २७ ॥ सर्वेषामपि जीवानां दया यस्य हृदि स्थिरा ॥ शौचाचारसमायुक्तो योगी दुःखं न विंदति ॥ २८ ॥ मायाधिपटलैर्हीनो मिथ्या
वस्तुविरागवान् ॥ कुसंसर्गविहीनश्च योगसिद्धेश्च लक्षणम् ॥ २९ ॥ ममतावह्निसंयोगो नराणां तापदायकः ॥ उत्पन्नः शमनं तस्य योगिनां
शांतिचारणम् ॥ ३० ॥ इन्द्रियाणामथोद्धृत्य मनसैव निषेधयेत् ॥ यथा लोहेन लोहं च घर्षितं तीक्ष्णतां व्रजेत् ॥ ३१ ॥ बुद्धिर्हि द्विविधा देहे
देया ग्राह्या विशुद्धिदा ॥ संसारविषया त्याज्या परब्रह्मणि सा शुभा ॥ ३२ ॥ अहंकारो यथा देवि पापपुण्यप्रदायकः ॥ ज्ञाते तत्त्वे ॥२९५॥
शुभफले कृतः संधाय नान्यथा ॥ ३३ ॥ श्यामलं च उपस्थं च रूपातीतान्नराः शिवम् ॥ हृदिस्थं सिरशिस्थं च द्वयं बद्धविमुक्तये ॥
॥ ३४ ॥ एतदक्षरमव्यक्तममृतं सकलं तव ॥ रूपरूपविष्णुरूपरूपमूर्तिनिवेदितम् ॥ ३५ ॥ एवं ज्ञात्वा विमुच्येत योगी संसार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बन्धनात् ॥ गुरूपदेशाद्गृहस्थो लभते नान्यथा क्वचित् ॥३६॥ यदा गुरुः प्रसन्नात्मा तस्य विश्वं प्रसीदति ॥ गुरुश्च तोषितो येन संतुष्टाः पितृदेवताः ॥ ३७ ॥ गुरूपदेशः प्रतिमा सद्विचारः समे मनः ॥ क्रिया च ज्ञानसहिता मोक्षसिद्धेर्हि लक्षणम् ॥ ३८ ॥ क्रियापतिर्विष्णुरेव स्वयमेव हि निष्क्रियः ॥ स च प्राणविरूपाय द्वादशाक्षरबीजकः ॥३९॥ द्वादशाक्षरकं चक्रं सर्वपापनिबर्हणम् ॥ दुष्टानां दमनं चैव परब्रह्मप्रदायकम् ॥ ४० ॥ एतदेव परं ब्रह्म द्वादशाक्षररूपधृक् ॥ मया प्रकाशितं देवि स्कन्दे हि विमलं तव ॥४१॥ एतत्सारं योगिनां ध्यानरूपं भक्तिग्राह्यं श्रद्धया चिन्तयेच्च ॥ चातुर्मास्ये जन्मकोट्यां च जातं पापं दग्ध्वा मुक्तिदः कैटभारिः ॥ ४२ ॥ ॥ ब्रह्मोवाच ॥ ॥ एतस्मिन्नगरे तत्र क्षीरसागरमध्यतः ॥ उज्जहार विमानाग्रे तेजोभाराभिपीडितः ॥ ४३ ॥ उरो बाहुकृतिं कुर्वन्सान्निध्यं समुपागतः ॥ महामत्स्योऽज्ञातपूर्वः सन्निधानेऽनहंकृतिः ॥ ४४ ॥ हुंकारगर्भे मत्स्यं च दृष्ट्वा तं स महेश्वरः ॥ तेजसा स्तंभयामास वाक्यमेतदुवाच ह ॥ ४५ ॥ कस्त्वं मत्स्योदरस्थश्च देवो यक्षोऽथ मानुषः ॥ कथं जीवसि देहांतर्गतो मम वद प्रभो ॥ ४६ ॥ ॥ मत्स्य उवाच ॥ ॥ अहं मत्स्योदरे क्षिप्तः समुद्रे क्षीरसंभवे ॥ मात्रा तु पितृवाक्येन नायं मम कुलान्वितः ॥४७॥ कुलक्षयभयात्तेन जातं स्वकुलनाशनम् ॥ गंडांतयोगजनितो बालो न गृहकर्मकृत् ॥ ४८ ॥ इति मात्रा दुःखितया निरस्तः शृणु वंशजः ॥ झषेणापि गृहीतोऽस्मि कालो मेऽत्र महानभूत् ॥ ४९ ॥ तव वाक्यामृतैरेभिर्ज्ञानयोगो महानभूत् ॥ तेन त्वं सकलो ज्ञातो मयामूर्तोऽथ मूर्त्तगः ॥५०॥ अनुज्ञां मम देवेश देहि निष्क्रमणाय च ॥ यथाऽहं पितृपो ब्रह्मन्भवान्याश्चापि लक्ष्यते ॥ ५१ ॥ ॥ हर उवाच ॥ ॥ विप्रोऽसि सुतरूपोऽसि पूज्योस्यासि बभाषतः ॥ बहिर्निष्क्रम वेगेन स्तंभितोऽसि महाझषः ॥ ५२ ॥ ततोऽसौ शिरसा जात उत्क्लेशान्मत्स्ययोजितः ॥ ततो हि विकृतं वक्रं क्षणाद्बहिरुपागतः ॥ ५३ ॥ रूपवान्प्रतिमायुक्तो मत्स्यगंधेन संयुतः ॥ सोमकांतिसमस्तत्र ह्यभवद्दिव्यगंधभाक् ॥ ५४ ॥ उमापि प्रणतं चामुं सुतं स्वोत्संगभाजनम् ॥ चकार तस्य नामापि हरः परमहर्षितः ॥ ५५ ॥ यस्मान्मत्स्योदराज्जातो योगिनां प्रवरो ह्ययम् ॥ तस्मात्तु मत्स्यनाथेति लोके ख्यातो भविष्यति ॥ ५६ ॥ अच्छेद्यः स्यान्नरतनुर्ज्ञानयोगस्य पारगः ॥ निर्मत्सरोऽपि निर्द्वंद्वो निराशो ब्रह्मसेवकः ॥ ५७ ॥ जीवन्मुक्तश्च भविता भुवनानि चतुर्दश ॥ इत्युक्तश्च महेशानं प्रणमंश्च पुनःपुनः ॥ महेश्वरेण सहितो मंदराचलमाययौ ॥ ५८ ॥ ॥ ब्रह्मोवाच ॥ ॥ कृत्वा प्रदक्षिणं देवीं स्कन्दमालिंग्य सोऽगमत् ॥ ५९ ॥ ततः सा पार्वती हृष्टा प्राप्य ज्ञानमनुत्तमम् ॥ एवं सा परमां सिद्धिं प्रणवस्यप्रभाजनम् ॥ ६० ॥ सा प्राप्य जगतां माता द्वादशाक्षरजांबुना ॥ इमां मत्स्येन्द्रनाथस्य चोत्पत्तिं यः शृणोति च ॥ ६१ ॥ चातुर्मास्ये विशेषेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सोऽश्वमेधफलं लभेत् ॥ ६२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शेषशाय्युपा
ख्याने ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये मत्स्येन्द्रनाथोत्पत्तिकथनं नाम त्रिषष्ट्युत्तरद्विशततमोऽध्यायः ॥ २६३ ॥ ॥ छ ॥ ॥ ब्रह्मो
वाच ॥ ॥ कार्तिकेयश्च पार्वत्याः प्राणेभ्यश्चातिवल्लभः ॥ संक्रीडति समीपस्थो नानाचेष्टाभिरुद्यतः ॥ १ ॥ रक्तकांतिर्महातेजाः षण्मुखोऽद्भुत
विक्रमः ॥ क्वचिद्गायति चात्यर्थं क्वचिन्नृत्यति स्वेच्छया ॥ २ ॥ मातरं पितरं दृष्ट्वा विनयावनतः क्वचित् ॥ क्वचिच्च गंगापुलिने सिकतालेपना
कृतिः ॥ ३ ॥ गणैः सह विचिन्वानो विविधान्वनभूरुहान् ॥ एवं प्रक्रीडितस्तस्य दिवसाः पंच जज्ञिरे ॥ ४ ॥ ततो देवा महेन्द्राद्यास्तारकत्रास
विद्रुताः ॥ स्तुवन्तः शंकरं सर्वे तारकस्य जिघृक्षया ॥ ५ ॥ चक्रुः कुमारं सेनान्यं जाह्नव्यां स्वगणैः सुराः ॥ सस्वनुर्देववाद्यानि पुष्पवर्षं पपात
ह ॥ ६ ॥ वह्निस्तु स्वां ददौ शक्तिं हिमवान्वाहनं ददौ ॥ सर्वदेवसमुद्भूतगणकोटिसमावृतः ॥ ७ ॥ प्रणम्य मुनिसंघेभ्यः प्रययौ रिपुविग्रहे ॥ ताम्र
वत्यां नगर्यां च शंखं दध्मौ प्रतापवान् ॥ ८ ॥ ततस्तारकसैन्यस्य दैत्यदानवकोटयः ॥ समाजग्मुस्तस्य पुराच्छंखनादभयातुराः ॥ ९ ॥ स्ववाह
नसमारूढाः संयता बलदर्पिताः ॥ देवाः सर्वेऽपि युयुधुः स्कन्दतेजोपबृंहिताः ॥ १० ॥ तदा दानवसैन्यानि निजघान च सर्वशः ॥ विष्णुचक्रेण
ते छिन्नाः पेतुरुर्व्यां सहस्रशः ॥ ११ ॥ ततो भग्नाश्च शतशो दानवा निहतास्तदा ॥ नद्यः शोणितसंभूता जाता बहुविधामुने ॥ १२ ॥ तद्भग्नं दान
वबलं दृष्ट्वा स युयुधे रणे ॥ बभंज सद्यो देवेशो बाणजालैरनेकधा ॥ १३ ॥ शक्तिनायुध्य गंगिन्याश्चिक्षेप कृष्णप्रेरिताः ॥ सरथं च
सयंतारं चक्रे तं भस्मसात्क्षणात् ॥ १४ ॥ शेषाः पातालमगमन्हतं दृष्ट्वाऽथ तारकम् ॥ ततो देवगणाः सर्वे शशंसुस्तस्य विक्रमम् ॥
॥ १५ ॥ देवदुन्दुभयो नेदुः पुष्पवृष्टिस्तथाऽभवत् ॥ ते लब्धविजयाः सर्वे महेश्वरपुरोगमाः ॥ १६ ॥ सिषिचुः सर्वदेवानां सेना
पत्ये षडाननम् ॥ ततः स्कंदं समालिंग्य पार्वती हर्षगद्गदा ॥ १७ ॥ मांगल्यानि तदा चक्रे स्वसखीभिः समावृता ॥ एवं च
तारकं हत्वा सप्तमेऽहनि बालकः ॥ १८ ॥ मंदराचलमासाद्य पितरौ संप्रहर्षयन् ॥ उवाच सकलं स्कन्दः परमानंदनिर्भरः ॥ १९ ॥
काले दारक्रियां तस्य चिन्तयामास शंकरः ॥ स उवाच प्रसन्नात्मा गांगेयममितद्युतिम् ॥ २० ॥ प्राप्तः कालस्तव विभो पाणिग्रहणसंमतः ॥ कुरु
दारान्समासाद्य धर्मस्ते पुंससंमतः ॥ २१ ॥ क्रीडस्व विविधैर्भोगैर्विमानैः सह कामिकैः ॥ तच्छ्रुत्वा भगवान्स्कन्दः पितरं वाक्यमब्रवीत् ॥२२॥
अहमेव हि सर्वत्र दृश्यः सर्वगणेषु च ॥ दृश्यादृश्यपदार्थेषु किं गृह्णामि त्यजामि किम् ॥ २३ ॥ याः स्त्रियः सकला विश्वे पार्वत्या ताः समा हि



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मे ॥ नराः सर्वेऽपि देवेश भवद्वत्तान्विलोकये ॥ २४ ॥ त्वं गुरुर्मां च रक्षस्व पुनर्नरकमज्जनात् ॥ येन ज्ञातमिदं ज्ञानं त्वत्प्रसादादखंडितम् ॥ ॥ २५ ॥ पुनरेव महाघोरसंसाराब्धौ निमज्जये ॥ दीपहस्तो यथा वस्तु दृष्ट्वा तत्करणं त्यजेत् ॥ २६ ॥ तथा ज्ञानमधिप्राप्य योगी त्यजति संसृतिम् ॥ ज्ञात्वा सर्वगतं ब्रह्म सर्वज्ञ परमेश्वर ॥ २७ ॥ निवर्त्तंते क्रियाः सर्वा यस्य तं योगिनं विदुः ॥ विषये लुब्धचित्तानां वनेऽपि जायते रतिः ॥ २८ ॥ सर्वत्र समदृष्टीनां गेहे मुक्तिर्हि शाश्वती ॥ ज्ञानमेव महेशान मनुष्याणां सुदुर्लभम् ॥ २९ ॥ लब्धं ज्ञानं कथमपि पंडितो नैव पातयेत् ॥ नाहमस्मि न माता मे न पिता न च बांधवः ॥ ३० ॥ ज्ञानं प्राप्य पृथक्भावमापन्नो भुवनेष्वहम् ॥ प्राप्यं भागमिदं दैवात्प्रभावात्तव नार्हसि ॥ ३१ ॥ वक्तुमेवंविधं वाक्यं मुमुक्षोर्मे न संशयः ॥ यदाग्रहपरा देवी पुनःपुनरभाषत ॥ ३२ ॥ तदा तौ पितरौ नत्वा गतोऽसौ क्रौंचपर्वतम् ॥ तत्राश्रमे महापुण्ये चचार परमं तपः ॥ ३३ ॥ जजाप परमं ब्रह्म द्वादशाक्षरबीजकम् ॥ पूर्वं ध्यानेन सर्वाणि वशीकृत्ये न्द्रियाणि च ॥ ३४ ॥ ममतां संवियुज्याथ ज्ञानयोगमवाप्तवान् ॥ सिद्धयस्तस्य निर्विघ्ना अणिमाद्या यदाऽऽगताः ॥ ३५ ॥ तदा तासां गणा क्रुद्धो वाक्यमेतदुवाच ह ॥ ममापि दुष्टभावेन यदि यूयमुपागताः ॥ ३६ ॥ तदास्मत्समशांतानां नाभिभूतिं करिष्यथ ॥ एवं ज्ञात्वा महेशोऽपि यतो ज्ञानमहोदयम् ॥ ३७ ॥ मत्तोऽपि ज्ञानयोगेनस्कन्दोऽप्यधिकभावभृत् ॥ विस्मयाविष्टहृदयः पार्वतीमनुशिष्टवान् ॥ ३८ ॥ पुत्रशोकपरां चोमां शुभैर्वाक्यामृतैर्हरः ॥ चातुर्मासस्य माहात्म्यं सर्वपापप्रणाशनम् ॥ ३९ ॥ महेश्वरो वा मधुकैटभारिर्द्वंद्वाश्रितो ध्यानमयोऽद्वितीयः ॥ अभेदबुद्ध्या परमार्तिहंता रिपुः स एवातिप्रियो भवेत्ततः ॥ ४० ॥ ॥ सूत उवाच ॥ ॥ एतद्वः कथितं विप्राश्चातुर्मास्यसमुद्भवम् ॥ माहात्म्यं विस्तरेणैव किमन्यच्छ्रोतुमिच्छथ ॥ ४१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्र माहात्म्ये शेषशाय्युपाख्याने ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये तारकासुरवधो नाम चतुःषष्ट्युत्तरद्विशततमोऽध्यायः ॥ २६४ ॥ ॥ छ ॥ ॥ ॥ ऋषय ऊचुः ॥ ॥ प्रभूतानि त्वयोक्तानि व्रतानि नियमास्तथा ॥ प्रसुप्ते पुंडरीकाक्षे येषां संख्या न विद्यते ॥ १ ॥ अशक्त्या हि शरीरस्य नियमानां कथं चरेत् ॥ व्रतं हि सुकुमारांगो दानैर्वापि वदस्व नः ॥ २ ॥ ॥ सूत उवाच ॥ ॥ अशक्तो नियमं कर्तुं सुकुमारो भवेत्तु यः ॥ तेन तत्र प्रकर्तव्यं विख्यातं भीष्मपंचकम् ॥ ३ ॥ कार्त्तिकस्य सिते पक्ष एकादश्यां समाहितः ॥ प्रातरुत्थाय विप्रेंद्र कर्तव्यं दंतधावनम् ॥ ॥ ४ ॥ ततस्तु नियमं कुर्याद्वासुदेवपरायणः ॥ पूर्वोक्तानां च सर्वेषां नियमानां द्विजोत्तमाः ॥ ५ ॥ उपवासः प्रकर्तव्यस्तस्मिन्नहनि भक्तितः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



अशक्त्या वा शरीरस्य हेमं दद्यात्स्वशक्तितः ॥ ६ ॥ ब्राह्मणाय हविष्यान्नं दातव्यं वैष्णवैर्नरैः ॥ एवं पञ्चदिनं यावत्कर्तव्यं व्रतमुत्तमम् ॥ ७ ॥ पूजनीयो हृषीकेशो जलशायिस्वरूपधृक् ॥ गंधैर्धूपैश्च नैवेद्यै रात्रिजागरणैरपि ॥ ८ ॥ षष्ठेऽहनि ततो जाते पूजयेद्ब्राह्मणोत्तमान् ॥ तांश्च वस्त्रैर्हिरण्येन मिष्टान्नेन प्रभक्तितः ॥ ९ ॥ ततः कृतांजलिर्भूत्वा याचयेद्ब्राह्मणोत्तमान् ॥ सर्वे मे नियमाः प्राप्ता युष्माकं च प्रसादतः ॥ १० ॥ ततस्तैरपि वक्तव्यं चतुर्मासीसमुद्भवम् ॥ व्रतानां नियमानां च व्रतं भूयात्तवाखिलम् ॥ ११ ॥ ततो विसर्ज्य तान्विप्रान्भोजनं स्वयमाचरेत् ॥ सर्वाहारेण राजेंद्र पंचगव्यप्रपूर्वकम् ॥ १२ ॥ यः करोति व्रतं तस्य फलं स्याद्बहुपुण्यदम् ॥ यः पुनर्व्रतमेतद्धि कुरुते दिनपंचकम् ॥ उपवासपरस्तस्य फलं शतगुणं भवेत् ॥ १३ ॥ एकादश्यां हरेः पूजां जातिपुष्पैः समाचरेत् ॥ द्वादश्यां बिल्वपत्रेण शतपत्र्या ततः परम् ॥ त्रयोदश्यां चतुर्दश्यां सुरभ्या भक्तिपूर्वकम् ॥ १४ ॥ भृंगराजेन पुण्येन पौर्णमास्यां प्रपूजयेत् ॥ प्रतिपद्दिवसे सर्वैः पूजनीयो जनार्दनः ॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ॥ १५ ॥ प्रतिपद्दिवसे सर्वान्प्राशयेत्कायशुद्धये ॥ अगरं गुग्गुलं चैव कर्पूरं तगरं त्वचा ॥ १६ ॥ एकैकं निर्वपेद्धूपं प्रतिपद्दिवसेऽखिलम् ॥ जलशायी जगद्योनिः शेषपर्यंकमाश्रितः ॥ १७ ॥ अर्घं गृह्णातु मे देवो भीष्मपंचकसिद्धये ॥ मंत्रेणानेन दातव्यो ह्यर्घो देवस्य भक्तितः ॥ १८ ॥ शंखतोयं समादाय सपुष्पफलचंदनैः ॥ नैवेद्यं परमान्नं च स्वशक्त्या निर्वपेद्द्विजाः ॥ १९ ॥ एतद्वः सर्वमाख्यातं व्रतं वै भीष्मपंचकम् ॥ संप्राप्यते फलं चैव व्रतानां नियमैः सह ॥ २० ॥ ॥ ऋषय ऊचुः ॥ ॥ यदेतद्भवता प्रोक्तमशून्यशायिनीव्रतम् ॥ इन्द्रेण यत्कृतं पूर्वं तुष्ट्यर्थं चक्रपाणिनः ॥ प्रसुप्तस्य महाभाग फलं चैव प्रकीर्तितम् ॥ २१ ॥ कस्मिन्काले प्रकर्तव्यं केनैव विधिना तथा ॥ तस्मात्सूत महाभाग विधानं विस्तराद्वद ॥ २२ ॥ ॥ सूत उवाच ॥ ॥ श्रावण्यां समतीतायां द्वितीयादिवसे स्थिते ॥ प्रातरुत्थाय विप्रेन्द्रा नक्षत्रे विष्णुदैवते ॥ पापिष्ठैः पतितैर्म्लेंच्छैः संभाषं नैव कारयेत् ॥ २३ ॥ ततो मध्याह्नसमये स्नात्वा धौतांबरः शुचिः ॥ जलशायिनमासाद्य मंत्रेणानेन पूजयेत् ॥ २४ ॥ श्रीवत्सधारिञ्छ्रीकांत श्रीधामञ्छ्रीपतेऽव्यय ॥ गार्हस्थ्यं मा प्रणाशं मे यातु धर्मार्थकामदम् ॥ २५ ॥ पितरो मा प्रणश्यंतु मा प्रणश्यंतु चाग्नयः ॥ देवता मा प्रणश्यंतु मत्तो दांपत्यभेदतः ॥ २६ ॥ लक्ष्म्या वियुज्यसे कृष्ण न कदाचिद्यथा भवान् ॥ तथा कलत्रसम्बन्धो देव मा मे प्रणश्यतु ॥ २७ ॥ लक्ष्म्या ह्यशून्यं शयनं यथा ते देव सर्वदा ॥ शय्या ममाप्यशून्यास्तु तथा जन्मनि जन्म



१ याचयेत्–प्रार्थयेत्–इत्यर्थः । २ सुरभ्या–सुगंधिपुष्पेण–सौगन्धिकेन–कह्लारेण–इत्यर्थः । ३ सर्वम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नि ॥ २८ ॥ एवमर्थं निवेद्याथ ततो विप्रं प्रपूजयेत् ॥ यथाशक्त्या द्विजश्रेष्ठा वित्तशाठ्यं विवर्जयेत् ॥ २९ ॥ एवं भाद्रपदे मासि आश्विने कार्तिके तथा ॥ पूजयेच्च जगन्नाथं जलशायिनमच्युतम् ॥ ३० ॥ अक्षारभोजनं कार्यं विशेषात्तैलवर्जितम् ॥ समाप्तौ च ततो दद्याद्ब्राह्मणेंद्राय भक्तितः ॥ ३१ ॥ फलव्रीहिसमोपेतां शय्यां वस्त्रसमन्विताम् ॥ सुवर्णं दक्षिणायां च तथैव च फलं लभेत् ॥ ३२ ॥ एवं यः कुरुते सम्यग्व्रतमेतत्समाहितः ॥ तस्य तुष्टिपथं याति जलशायी जगद्गुरुः ॥ ३३ ॥ यथा शक्रस्य संतुष्टः पूर्वमेव द्विजोत्तमाः ॥ अशून्यं शयनं तस्य भवेज्जन्मनि जन्मनि ॥ ३४ ॥ अष्टमासकृतं पापमज्ञानाज्ज्ञानतोऽपि वा ॥ अशून्यशयनात्सर्वं व्रतान्नाशं नयेत्पुमान् ॥ ३५ ॥ पुत्रहीना च या नारी काकवन्ध्या च या भवेत् ॥ विधवा या करोत्येतद्व्रतमेवं समाहिता ॥ तस्यास्तुष्टो जगन्नाथः कायशुद्धिं प्रयच्छति ॥ ३६ ॥ न तस्या जायते बुद्धिः कदाचित्पापसंभवा ॥ न कामोपहता बुद्धिः कथंचिदपि जायते ॥ ३७ ॥ कुमारिकापि या सम्यग्व्रतमेतत्समाचरेत् ॥ सा पतिं लभते विप्राः कुलीनं रूपसंयुतम् ॥ ३८ ॥ निष्कामः कुरुते यस्तु [1]व्रतमेतत्समाहितः ॥ चतुर्मास्युद्भवानां च नियमानां फलं लभेत् ॥ ३९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये जलशाय्युपाख्याने अशून्यशयनव्रतमाहात्म्यवर्णनं नाम पञ्चषष्ट्युत्तरद्विशततमोऽध्यायः ॥ २६५ ॥ ॥ ऋषय ऊचुः ॥ ॥ श्रुतानि मुख्यतीर्थानि तत्क्षेत्रप्रोद्भवानि च ॥ येषु स्नातो नरः सम्यक्सर्वतीर्थफलं लभेत् ॥१॥ लिंगानि च महाभाग तत्र मुख्यानि यानि च ॥ यैर्दृष्टैर्लभ्यते श्रेयः सर्वेषां तानि नो वद ॥ २ ॥ ॥ सूत उवाच ॥ ॥ तत्र च मंकणाख्यं तु लिंगमस्ति सुशोभनम् ॥ तथा सिद्धेश्वरं नाम गौतमेश्वरसंयुतम् ॥ ३ ॥ कपालेश्वरमन्यच्च चतुर्थं परिकीर्तितम् ॥ एकैकं सर्वलिंगानां फलं यच्छत्यसंशयम् ॥ यथोक्तविधिना सम्यग्यथोक्तं द्विजसत्तमाः ॥ ४ ॥ तत्र तावत्प्रवक्ष्यामि मंकणेश्वरजं फलम् ॥ मकाराक्षरयुक्तस्य लिंगस्यात्र द्विजोत्तमाः ॥ ५ ॥ शिवरात्रिं समासाद्य यस्तस्य पुरुषो द्विजाः ॥ कुर्याज्जागरणं रात्रौ निराहारः स्थितः शुचिः ॥ ६ ॥ सर्वलिंगोद्भवं चैव फलं दर्शनसंभवम् ॥ जायते नात्र संदेह इत्युवाच हरः स्वयम् ॥ ७ ॥ ॥ ऋषय ऊचुः ॥ ॥ शिवरात्रिर्महाभाग कस्मिन्काले तु सा भवेत् ॥ विध्यानं चैव माहात्म्यं सर्वं नो विस्तराद्वद ॥ ८ ॥ ॥ सूत उवाच ॥ ॥ माघस्य कृष्णपक्षे या तिथिश्चैव चतुर्दशी ॥ तस्या रात्रिः समाख्याता शिवरात्रिसमुद्भवा ॥ ९ ॥ तस्यां सर्वेषु लिंगेषु सदा संक्रमते हरः ॥ विशेषात्सर्वपुण्येषु ख्यातेयं मंकणेश्वरे ॥१०॥ ॥ ऋषय ऊचुः ॥ ॥

१ सकामो वा समाहितः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





शिवरात्रिः कथं जाता केनैषा च विनिर्मिता ॥ कस्माद्बहुफला जाता सर्वं नो विस्तराद्वद ॥ ११ ॥ ॥ सूत उवाच ॥ ॥ अत्र वः
कीर्तयिष्यामि पूर्ववृत्तं कथानकम् ॥ भर्तृयज्ञस्य संवादमश्वसेनस्य भूपतेः ॥ १२ ॥ आनर्ताधिपतिः पूर्वमश्वसेन इति स्मृतः ॥ आसीद्धर्मपरो नित्यं
वेदवेदांगपारगः ॥ १३ ॥ भर्तृयज्ञः पुरा तेन इदं पृष्टः कुतूहलात् ॥ कलिकालं समुद्वीक्ष्य वर्धमानं दिनेदिने ॥ १४ ॥ ॥ अश्वसेन उवाच ॥ ॥
कलिकालकृते किंचिद्व्रतं मे वद सन्मुने ॥ स्वल्पायासं महत्पुण्यं सर्वपापप्रणाशनम् ॥ १५ ॥ स्वल्पायुषः सदा मर्त्या ब्रह्मन्कृतयुगे पुरा ॥
त्रेतायां द्वापरे चैव किमु प्राप्ते कलौ युगे ॥ १६ ॥ तस्माद्वर्षव्रतं त्यक्त्वा किंचिदेकाह्निकं वद ॥ १७ ॥ श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् ॥
न हि प्रतीक्षते मृत्युः कृतं वास्य न वा कृतम् ॥ १८ ॥ तस्य तद्वचनं श्रुत्वा भर्तृयज्ञ उदारधीः ॥ अब्रवीत्सुचिरं ध्यात्वा ज्ञात्वा दिव्येन चक्षुषा ॥
॥ १९ ॥ अस्ति राजन्व्रतं पुण्यं शिवरात्रीतिसंज्ञितम् ॥ एकाह्निकं महाराज सर्वपातकनाशनम् ॥ २० ॥ तत्र यद्दीयते दानं हुतं जप्तं तथैव च ॥
सर्वमक्षयतां याति रात्रि जागरणे कृते ॥ २१ ॥ अपुत्रो लभते पुत्रानधनो धनमाप्नुयात् ॥ स्वल्पायुर्दीर्घमायुष्यं शत्रूणां चैव संक्षयम् ॥ २२ ॥
यंयं काममभिध्यायन्व्रतमेतत्समाचरेत् ॥ तंतं समाप्नुयान्मर्त्यो निष्कामो मोक्षमाप्नुयात् ॥२३॥ कार्पण्येनाथ वित्तेन यदि कुर्यात्प्रजागरम् ॥ तथा
वर्षकृतात्पापान्मुच्यते नात्र संशयः ॥ २४ ॥ यानि कान्यत्र लिंगानि स्थावराणि चराणि च ॥ तेषु संक्रमते देवस्तस्यां रात्रौ यतो हरः ॥ २५ ॥
शिवरात्रिस्ततः प्रोक्ता तेन सा हरवल्लभा ॥ प्रार्थितः स सुरैः सर्वैर्लोकानुग्रहकाम्यया ॥ २६ ॥ भगवन्कलिकालेऽस्मिन्सर्वपापसमन्विते ॥ वर्ष
पापविशुद्ध्यर्थं दिनमेकं क्षितौ व्रज ॥ येन त्वत्पूजया पूता मर्त्याः शुद्धिमवाप्नुयुः ॥ २७ ॥ ततो दत्तं हुतं तेषामस्माकमुपतिष्ठति ॥ यदुच्छिष्टं
नरैर्दत्तं तद्वृथा जायतेऽखिलम् ॥ २८ ॥ कलिकाले न चास्माकं किंचिदेवोपतिष्ठति ॥ अशुद्धैर्मानवैर्दत्तं प्रभूतमपि शंकर ॥ २९ ॥ ॥ श्रीभगवानु
वाच ॥ ॥ माघमासस्य कृष्णायां चतुर्दश्यां सुरेश्वर ॥ अहं यास्यामि भूपृष्ठे रात्रौ नैव दिवा कलौ ॥३०॥ लिंगेषु च समस्तेषु चलेषु स्थावरेषु च ॥
संक्रमिष्याम्यसंदिग्धं वर्षपापविशुद्धये ॥ ३१ ॥ तस्यां रात्रौ हि मे पूजां यः करिष्यति मानवः ॥ मंत्रैरेतैः सुरश्रेष्ठ विपाप्मा स भविष्यति ॥ ३२ ॥
"ॐ सद्योजाताय नमः॥ ॐ वामदेवा नमः ॥ ॐ घोराय नमः ॥ ॐ तत्पुरुषाय नमः॥ ॐ ईशानाय नमः॥" एवं वक्त्राणि संपूज्य गन्धपुष्पानु
लेपनैः ॥ वस्त्रैर्दीपैश्च नैवेद्यैस्ततोऽर्घं संप्रदापयेत् ॥ मंत्रेणानेन संपूज्य मां ध्यात्वा मनसि स्थितम् ॥ ३३ ॥ गौरीवल्लभ देवेश सर्वाद्य शशिशेखर ॥
वर्षपापविशुद्ध्यर्थमर्घो मे प्रतिगृह्यताम् ॥३४॥ ततः संपूजयेद्विप्रं भोजनाच्छादनादिभिः ॥ दत्त्वाथ दक्षिणां तस्मै वित्तशाठ्यं विवर्जयेत् ॥ ३५ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्माख्यानकथाभिश्च सलास्यैस्तांडवैस्तथा ॥ ३६ ॥ एवं करिष्यते योऽत्र व्रतमेतत्सुरेश्वर ॥ वर्षपापविशुद्ध्यर्थं प्रायश्चित्तं भविष्यति ॥ ३७ ॥ तच्छ्रुत्वा त्रिदशाः सर्वे प्रणम्य शशिशेखरम् ॥ संप्रहृष्टा नरश्रेष्ठ स्वानि स्थानानि भेजिरे ॥ ३८ ॥ प्रेषयामासुरुर्व्यां च नारदं मुनिसत्तमम् ॥ प्रबोधनाय लोकानां शिवरात्रिकृते सदा ॥ ३९ ॥ सोऽपि गत्वा धरापृष्ठं श्रावयामास सर्वतः ॥ शिवरात्रेस्तु माहात्म्यं यदुक्तं शूलपाणिना ॥ ॥ ४० ॥ ततःप्रभृति संजाता शिवरात्रिर्धरातले ॥ सर्वकामप्रदा पुण्या सर्वपातकनाशिनी ॥ ४१ ॥ अत्र वः कीर्तयिष्यामि पुरावृत्तं कथानकम् ॥ यद्वृत्तं नैमिषारण्ये लुब्धकस्यात्र कस्यचित् ॥ ४२ ॥ तत्रासील्लुब्धकः कश्चिज्जातिमात्रान्न[1] कर्मतः[2] ॥ व्यसनेनाभिभूतात्मा परवित्तापहारकः ॥ ४३ ॥ न कदाचिद्धृतं तेन न दत्तं न जपः कृतः ॥ केवलं च हृतं वित्तं लोकानां छलसंश्रयात् ॥ ४४ ॥ कस्यचित्त्वथ कालस्य शिवरात्रिः समागता ॥ माघमासेऽसिते पक्षे सर्वपातकनाशिनी ॥ ४५ ॥ तत्रास्त्यायतनं पुण्यं देवदेवस्य शूलिनः ॥ तत्र जागरणं रात्रौ प्रारब्धं बहुभिर्जनैः ॥४६॥ नारीभिर्नरशार्दूल भूषिताभिः सुभूषणैः ॥ अथासौ चिंतयामास चोरो दृष्ट्वाथ जागरम् ॥४७॥ गच्छामि यदि कांचित्स्त्रीं भूषणैः परिभूषिताम् ॥ निष्क्रांतां बाह्यतश्चास्य प्रासादस्याप्नुयामहम् ॥ ४८ ॥ ततो हत्वा समादाय भूषणानि व्रजाम्यहम् ॥ ४९ ॥ एवं निश्चित्य मनसा गतस्तस्य समीपतः ॥ कर्णिकारं समारुह्य स्थितो गुप्तस्ततो हि सः ॥ ५० ॥ वीक्षमाणो दिशः सर्वा नारीनिष्क्रामणोद्भवाः[3] ॥ चौरकर्मप्रवृत्तस्य शीतार्तस्य विशेषतः ॥ ५१ ॥ अल्पापि निद्रा नायाता न च नारी विनिर्गता ॥ तस्याधस्तात्ततो लिंगमभवत्तु धरोद्भवम् ॥ गत्वा च पत्राण्यादाय प्रचिक्षेपास्य चोपरि ॥ ५२ ॥ एतस्मिन्नेव काले तु प्रोद्गतस्तीक्ष्णदीधितिः ॥ असतीनां च चौराणां कामिनामसुखावहः ॥ ॥ ५३ ॥ ततो नराश्च नार्यश्च जग्मुः स्वंस्वं निकेतनम् ॥ उपचारपराः शांताः प्रणिपत्य महेश्वरम् ॥ ५४ ॥ सोऽपि चौरो निराशश्च क्षुत्क्षामः शीतविह्वलः ॥ अवतीर्य द्रुमात्तस्मादुपायं कंचिदाश्रितः ॥ ५५ ॥ ततः कालेन महता पंचत्वं समपद्यत ॥ जातो जातिस्मरः सोऽथ दशार्णाधिपतेर्गृहे ॥ ५६ ॥ उपवासप्रभावेन बलादपि प्रजागरात् ॥ शिवरात्रेस्तथा तस्य लिङ्गस्यापि प्रपूजया ॥ ५७ ॥ ततो राज्यं समासाद्य पितृपैतामहं महत् ॥ कारयामास लिंगस्य प्रासादं तस्य शोभनम् ॥ ५८ ॥ वर्षेवर्षे समाश्रित्य शिवरात्रौ प्रजागरात् ॥ उपवासपरो भूत्वा गीत

१ जातिमात्रात्—जन्मनैव—लुब्धकजात्युद्भव—एव—इत्यर्थः । २ न कर्मतः—अन्यजात्युद्भवोऽपि लुब्धकसदृशकर्माचरणात्—लुब्धको न—किं तु जन्मनैव लुब्धकजातावुत्पन्नः—अतस्तस्य सर्वं कर्मापि लुब्धकजात्युचितमेवासीत्—इति तात्पर्यम् । ३ नारीनिष्क्रामगोद्भवाः—नारीणां निष्क्रामणमुद्भवति याभ्यस्ताः नारीनिष्क्रामगोद्भवाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वादित्रनिःस्वनैः ॥ ५९ ॥ धर्माख्यानकथाभिश्च गीतध्वनिभिरेव च ॥ पूर्वोक्तमंत्रैः संपूज्य अर्घं दत्त्वा विधानतः ॥ संतर्प्य ब्राह्मणान्कामैर्जगाम
निलयं निजम् ॥ ६० ॥ कस्यचित्त्वथ कालस्य शिवरात्रौ समागताः ॥ प्रासादे तत्र मुनयः प्राप्ता शाण्डिल्यपूर्वकाः ॥ ६१ ॥ शांडिल्योऽथ
भरद्वाजो यवक्रीतोऽथ गालवः ॥ पुलस्त्यः पुलहो गार्ग्यस्तथान्ये बहवो नृप ॥६२॥ सोऽपि राजा बृहत्सेनो दर्शाणाधिपतेः सुतः ॥ संप्राप्तो जागरं
कर्तुं तस्य लिंगस्य चाग्रतः ॥ ६३ ॥ पूजयित्वा ततो देवं प्रणिपत्य मुनीश्वरान् ॥ उपविष्टस्तस्य चाग्रे ह्यनुज्ञातो द्विजोत्तमैः ॥ ६४ ॥ ततस्तस्या
ग्रतश्चक्रुः कथास्ते बहुधा नृप ॥ राजर्षीणामतीतानां ब्रह्मर्षीणां विशेषतः ॥ ६५ ॥ अथ कस्मिन्कथांते स तैः पृष्टो ब्रह्मवादिभिः ॥ कौतुकाविष्ट
चित्तैश्च विस्मयोत्फुल्ललोचनैः ॥ ६६ ॥ राजन्पृच्छामहे सर्वे वयं कौतूहलान्विताः ॥ यदि ब्रवीषि नः सत्यं देवतायतने स्थितः[1] ॥ ६७ ॥
॥ ॥ राजोवाच ॥ ॥ यदि ज्ञास्यामि विप्रेंद्राः कथयिष्याम्यसंशयम् ॥ देवस्याग्रे च संपृष्टः सत्येनात्मानमालभे ॥ ६८ ॥ ॥ ऋषय ऊचुः ॥ ॥
पुष्कलानि परित्यज्य कस्माद्दानान्यनेकशः ॥ जागरं कर्तुकामोऽत्र स्वदेशादुपतिष्ठसि ॥ ६९ ॥ वर्षेवर्षे सदा प्राप्ते नूनं त्वं वेत्सि कारणम् ॥
रहस्यं यदि ते न स्यात्तद्ब्रवीहि नराधिप ॥ ७० ॥ ॥ सूत उवाच ॥ ॥ सवैलक्ष्यं स्मितं कृत्वा ततः प्राह स दुर्मनाः ॥ रहस्यं परमं ह्येतदवाच्यं
हि द्विजोत्तमाः ॥ ७१ ॥ तथापि च वदिष्यामि पृष्टो देवाग्रतो यतः ॥ ७२ ॥ ततः स कथयामास पूर्वदेहसमुद्भवम् ॥ मलिम्लुचस्ततो नूनं
शिवरात्रिसमुद्भवम् ॥ ७३ ॥ चौर्यभावेन देवस्य पूजनं जागरस्तथा ॥ उपवासं विना तेन शिवरात्रौ पुरा कृतम् ॥ ७४ ॥ जातिस्मरणसंयुक्तं
जन्म जातं यथातथम् ॥ ततस्ते मुनयः सर्वे साधुवादान्पृथग्विधान् ॥ ७५ ॥ नृपोत्तमस्य राजर्षेर्दत्त्वाशीर्भिः समन्वितान् ॥ रात्रौ जागरणं कृत्वा
प्रजग्मुस्ते निजाश्रमान् ॥७६॥ सोऽपि राजा समभ्यर्च्य तं देवं तान्द्विजोत्तमान् ॥ जगाम स्वपुरं पश्चात्कृत्वा रात्रौ प्रजागरम् ॥७७॥ ॥ भर्तृयज्ञ
उवाच ॥ ॥ शिवरात्रिः समुत्पन्ना एवं भूमितले नृप ॥ एवंविधं च माहात्म्यं तस्यास्ते परिकीर्तितम् ॥ ७८ ॥ तस्मात्सर्वप्रयत्नेन कार्या सा नृपस
त्तम ॥ कलिकाले विशेषेण य इच्छेद्भूतिमात्मनः ॥७९॥ एषा कृता दिलीपेन नलेन नहुषेण च ॥ मान्धात्रा धुंधुमारेण सगरेण युयुत्सुना ॥८०॥
तथान्यैश्च विशेषेण सम्यक्छ्रद्धासमन्वितैः ॥ प्राप्ताश्च हृद्गताः कामा ये दिव्या ये च मानुषाः ॥८१॥ तथा चैव तु सावित्र्या श्रिया देव्या तु सीत ॥२९९॥
या ॥ अरुंधत्या सरस्वत्या मेनया रंभया तथा ॥ ८२ ॥ इंद्राण्याथ दृषद्वत्या स्वधया स्वाहया तथा ॥ रत्या प्रीत्या प्रभावत्या गायत्र्या च नृपो

१ स्थित–इति संबोधनान्तोऽपि पाठोऽन्यास्मिन्पुस्तकेऽस्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तम ॥ सर्वाः प्राप्ताः प्रियान्कामानतिसौभाग्यसंयुतान् ॥ ८३ ॥ यश्चैतां पठते व्युंष्टिं भावेन शिवसंनिधौ ॥ दिनजात्पातकात्सोऽपि मुच्यते नात्र संशयः ॥८४॥ नास्ति गंगासमं तीर्थं नास्ति देवो हरोपमः ॥ शिवरात्रेः परं नास्ति तपः सत्यं मयोदितम् ॥८५॥ सर्वरत्नमयो मेरुः सर्वाश्चर्यमयं तपः ॥ सर्वधर्ममयी राजञ्छिवरात्रिः प्रकीर्तिता ॥८६॥ गरुडः पक्षिणां यद्वन्नदीनां सागरो यथा ॥ प्रधानः सर्वधर्माणां शिवरात्रिस्तथोत्तमा ॥८७॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये शिवरात्रिमाहात्म्यवर्णनं नाम षट्षष्ट्युत्तर द्विशततमोऽध्यायः ॥ २६६ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तस्मादेषा महाराज शिवरात्रिर्विपश्चिता ॥ कर्तव्या पुरुषेणात्र लोकद्वयम भीप्सुना ॥ १ ॥ ॥ आनर्त उवाच ॥ ॥ मंकणेश्वरमाहात्म्यं मया विस्तरतः श्रुतम् ॥ शिवरात्रिसमोपेतं यत्त्वया परिकीर्तितम् ॥ २ ॥ सांप्रतं वद मे कृत्स्नं सिद्धेश्वरसमुद्भवम् ॥ विस्तरेण महाभाग परं कौतूहलं हि मे ॥ ३ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ सिद्धेश्वर इति ख्यातो महादेवो महीपते ॥ तस्योत्पत्तिस्त्वया पूर्वं श्रुतात्र वदतो मम ॥ ४ ॥ सांप्रतं तत्फलं वच्मि तस्मिन्दृष्टे तु दानजम् ॥ यत्फलं जायते नृणां चक्रवर्त्तित्व संभवम् ॥ ५ ॥ तुलापुरुषदानं च तत्रै राजन्प्रशस्यते ॥ य इच्छेच्चक्रवर्तित्वं समस्ते धरणीतले ॥ ६ ॥ ॥ आनर्त उवाच ॥ ॥ तुलापुरुष दानस्य यो विधिः परिकीर्तितः ॥ तं मे सर्वं समाचक्ष्व विस्तरेण महामुने ॥ ७ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ चंद्रसूर्योपरागे वा अयने विषुवे तथा ॥ तीर्थे वा पुरुषश्रेष्ठ तुलापुरुषसंभवम् ॥ ८ ॥ प्रशंसंति विधिं सम्यक्प्राप्ते वा चेंदुसंक्षये ॥ ब्राह्मणानां सुदांतानामनुष्ठानवतां सताम् ॥ ९ ॥ वेदाध्ययनयुक्तानां निर्दोषाणां च पार्थिव ॥ विभज्य स भवेद्देयो नैकस्य च कथंचन ॥ १० ॥ शुचौ देशे समे पुण्ये पूर्वोत्तरप्लवे शुभे ॥ मंडपं कारयेद्विद्वान्रम्यं षोडशहस्तकम् ॥ ११ ॥ तन्मध्ये कारयेद्वेदिं चतुर्हस्तप्रमाणतः ॥ यजमानस्य हस्तेन हस्तैकेन समुच्छ्रिताम् ॥ १२ ॥ चतुर्हस्तानि कुण्डानि चतुर्दिक्षु प्रकल्पयेत् ॥ एकहस्तप्रमाणानि आयामव्यासविस्तरात् ॥ १३ ॥ ऐशान्यामपरां वेदिं हस्तमात्रां न्यसेच्छुभाम् ॥ रत्निमात्रोत्थितां चैव ग्रहांस्तत्र प्रकल्पयेत् ॥ १४ ॥ युग्माश्च ऋत्विजः कार्याश्चतुर्दिक्षु यथाक्रमम् ॥ बहृचोऽध्वर्यवश्चैव च्छंदोगाथर्वणावपि ॥ १५ ॥ तूष्णीं तु देवताहोमस्तैः कार्यः सुपमाहितैः ॥ तल्लिंगैर्नृपते मंत्रैः स्वशक्त्या जप एव च ॥ १६ ॥ एकहस्तप्रविष्टं तु चतुर्हस्तोच्छ्रितं

१ व्युष्टिम्—फलम्—इत्यर्थः । २ चक्रवर्तित्वसंभवम्—चक्रवर्तिना राज्यस्य दानेन यत्फलं स्यात्—तत्फलं सिद्धेश्वरमहादेवस्य दर्शनेन लभ्यते—इति भावः । ३ तदा—इ० पा० । ४ अध्वर्यवः—याजुषा—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तथा ॥ स्तंभद्वयं तु कर्तव्यं वेदियाम्योत्तरे स्थितम् ॥ १७ ॥ तन्मध्ये सुशुभं काष्ठं स्तंभजात्यं दृढं न्यसेत् ॥ चन्दनः खदिरो वाथ बिल्वो वाऽश्वत्थ एव वा ॥ १८ ॥ तिंदुको देवदारुर्वा श्रीपर्णी वा वटोऽथवा ॥ अष्टौ वृक्षाः शुभाः शस्ताः स्तंभार्थं नृपसत्तम ॥ १९ ॥ शिक्यद्वय समोपेतां तन्मध्ये विन्यसेत्तुलाम् ॥ स्नातः शुक्लांबरधरः शुक्लमाल्यानुलेपनः ॥ २० ॥ पूजयित्वा समंताच्च लोकपालान्यथाक्रमम् ॥ स्तंभान्सं पूजयेत्पश्चाद्गन्धमाल्यानुलेपनैः ॥ २१ ॥ तुलां च पार्थिवश्रेष्ठ पुण्याहं च प्रकीर्तयेत् ॥ यजमानो निजैः सर्वैरायुधैः कायसंस्थितैः ॥ २२ ॥ पश्चिमां दिशमास्थाय प्राङ्मुखः श्रद्धयाऽन्वितः ॥ कृतांजलिपुटो भूत्वा इमं मंत्रमुदीरयेत् ॥ २३ ॥ ब्रह्मणो दुहिता नित्यं सत्यं परममाश्रिता ॥ काश्यपी गोत्रतश्चैव नामतो विश्रुता तुला ॥ २४ ॥ त्वं तुले सत्यनामासि स्वभीष्टं चात्मनः शुभम् ॥ करिष्यामि प्रसादं मे सांनिध्यं कुरु सांप्रतम् ॥ २५ ॥ ततस्तस्यां समारुह्य स्वशक्त्या यत्समाहृतम् ॥ दानार्थं पूर्वमायोज्यं शिक्येन्यस्मिन्नरोत्तम ॥ २६ ॥ सुवर्णं रजतं वाऽथ वस्त्रं चान्यदभीप्सितम् ॥ यावत्साम्यं भवेद्राजन्नात्मनोऽभ्यधिकं च वा ॥ २७ ॥ ततोऽभीष्टां समासाद्य देवतां शिक्यमाश्रितः ॥ उदकं जल मध्ये च तदर्थं प्रक्षिपेद्बुतम् ॥ २८ ॥ सतिलं सहिरण्यं च साक्षतं विधिपूर्वकम् ॥ अवतीर्य ततः सर्वं ब्राह्मणेभ्यो निवेदयेत् ॥ २९ ॥ यत्फलं प्राप्यते पश्चात्तदिहैकमनाः शृणु ॥ ३० ॥ अजानता जानता वा यत्पापं तु भवेत्कृतम् ॥ तत्सर्वं नाशयेन्मर्त्यो दानस्यास्य प्रभावतः ॥ ३१ ॥ यावन्मात्रं कृतं पापमतीतं नृपसत्तम ॥ तावन्मात्रं क्षयं याति तुलापुरुषदानतः ॥ ३२ ॥ ईश्वराणां समादिष्टं कायक्लेशभयात्मनाम् ॥ पुरश्चरणमे तद्धि दानं तौल्यसमुद्भवम् ॥ ३३ ॥ एतद्दत्तं दिलीपेन कार्तवीर्येण भूपते ॥ पृथुना पुरुकुत्सेन तथान्यैरपि पार्थिवैः ॥ ३४ ॥ एतत्पुण्यं प्रशस्यं च सर्वकामप्रदं नृणाम् ॥ तुलापुरुषदानं च सर्वोपद्रवनाशनम् ॥ ३५ ॥ आधयो व्याधयो न स्युर्न वैधव्यं गदोद्भवम्[1] ॥ संजायते नृपश्रेष्ठ न वियोगः स्वबन्धुभिः ॥ तुलापुरुषदानस्य फलमेतदुदाहृतम् ॥ ३६ ॥ तुलापुरुषदानस्य प्रदत्तस्य नृपोत्तम ॥ न शक्यते कथयितुं फलं यत्स्यात्कलौ युगे ॥ ३७ ॥ दक्षिणामूर्तिमासाद्य सिद्धेश्वरविभोः पुरः ॥ यः प्रयच्छति भूपाल सहस्रगुणितं फलम् ॥ ३८ ॥ तस्मात्सर्वप्रयत्नेन प्राप्य सिद्धेश्वरं विभुम् ॥ तुलापुरुषदानं च कर्तव्यं सुविवेकिना ॥३९॥ एकत्र सर्वतीर्थानि सर्वाण्यायतनानि च ॥ हाटकेश्वरजे क्षेत्रे कथितानि स्वयंभुवा ॥४०॥



१ गदोद्भवम्–रोगोद्भवम्–इत्यर्थः–दुःखम्–इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिद्धेश्वरः सुरश्रेष्ठ एकत्र समुदाहृतः ॥ तस्मिन्दृष्टे तथा स्पृष्टे पूजिते नृपसत्तम ॥ सर्वेषां लभते मर्त्यः फलं यत्परिकीर्तितम् ॥ ४१ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये श्रीसिद्धेश्वरमाहात्म्ये तुलापुरुषदानमाहात्म्यवर्णनं नाम सप्तषष्ट्युत्तरद्विशततमोऽध्यायः ॥ २६७ ॥ ॥ छ ॥ ॥ आनर्त उवाच ॥ ॥ कर्मणा केन मर्त्ये च नराणां जायते वद ॥ चक्रवर्तित्वमखिलं सर्वशत्रुविमर्दनम् ॥ १ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ दुर्लभं भूमिपालत्वं सर्वपापैर्नराधिप ॥ तपोभिर्नियमैर्दानैस्तथान्यैश्च शुभैर्व्रतैः[1] ॥ ॥ २ ॥ यः पुनर्भूपतिर्भूत्वा पृथ्वीं दद्याद्धिरण्मयीम् ॥ गौतमेश्वरदेवस्य पुरतः श्रद्धयान्वितः ॥ चक्रवर्ती भवेन्नूनमेवमाह पितामहः ॥ ३ ॥ मांधाता धुन्धुमारश्च हरिश्चंद्रः पुरूरवाः ॥ भरतः कार्तवीर्यश्च षडेते चक्रवर्तिनः ॥ ४ ॥ पृथ्वीदानं पुरा कृत्वा गौतमेश्वरसंनिधौ ॥ दत्त्वा हिरण्मयीं पृथ्वीं सार्वभौमास्ततः स्थिताः ॥ ५ ॥ ॥ आनर्त उवाच ॥ ॥ भगवन्केन विधिना दातव्या सा वसुन्धरा ॥ अहं दास्यामि तां नूनं श्रद्धा मे महती स्थिता ॥ ६ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ कार्या पलशतेनोर्वी वृत्ताकारा नृपोत्तम ॥ तदर्धेनाथ वा शक्त्या पंचविंशत्पलात्मिका ॥ ७ ॥ धरादाने महाराज वित्तशाठ्यं विवर्जयेत ॥ ८ ॥ नैव पंचपलादर्वाक्प्रदातव्या कथञ्चन ॥ लवणेक्षुसुरासर्पिर्दधिदुग्धजलोद्भवाः ॥ समुद्राः सप्त चैतांस्तु कक्षायां तत्र दर्शयेत् ॥ ९ ॥ जंबूप्लक्षकुशक्रौंचशाकशाल्मलिपुष्कराः ॥ समुद्रान्सरितः सप्त द्वैगुण्येन प्रकल्पयेत् ॥ १० ॥ महेन्द्रो मलयः सह्यो हिमवान्गंधमादनः ॥ विंध्यः शृंगी च सप्तैव कल्पयेत्कुलपर्वतान् ॥ ११ ॥ मध्ये प्रकल्पयेन्मेरुं दिक्षु विष्कर्म्भपर्वतान्[2] ॥ जंबून्यग्रोधनीपांश्च प्लक्षश्चैव तथा द्रुमान् ॥१२॥ गंगाद्याः सरितस्तत्र प्राधान्येन प्रकल्पयेत् ॥ एवं निर्माप्य वसुधां सर्वां हेममयीं नृप ॥१३॥ मंडपं कारयेत्पश्चाद्यथापूर्वं प्रकल्पितम् ॥ १४ ॥ कुण्डानि तोरणान्येव ब्राह्मणग्रहपूजने[3] ॥ पूर्ववत्सकलं कृत्वा मध्ये वेदिं प्रकल्पयेत् ॥ १५ ॥ तत्र संस्थापयेत्पृथ्वीं पंचगव्येन पार्थिव ॥ यथोक्तमंत्रैस्तल्लिंगैस्ततः शुद्धोदकेन तु ॥ १६ ॥ इमं मे गंगे यमुने पंचनद्यस्त्रिपुष्करम् ॥ श्रीसूक्तं पावमानं च हैमीं[4] च तदनंतरम् ॥ १७ ॥ स्नानकर्मणि योग्यांश्च स्वादिष्ठायनमुत्तमम् ॥ १८ ॥ एवं संस्नाप्य विधिवद्वासांसि परिधापयेत् ॥ युवा सुवासामंत्रेण सूक्ष्माणि विविधानि च ॥ १९ ॥ ये भूतानामधीत्येवं ततः प्रोच्य प्रपूजयेत् ॥ धूरसीति च मंत्रेण धूपं दद्यात्समाहितः ॥ २० ॥ अग्निर्ज्योतीति मंत्रेण कुर्यादारार्तिकं ततः ॥ अहमस्मीति मंत्रेण सप्तधान्यं प्रकल्पयेत् ॥ २१ ॥ एवं कृत्वाऽखिलं तस्या यजमानः सितांबरः ॥ पुरः स्थितो

१ व्रतैः क्रतैः—इ० पा० । २ विष्कुम्भपर्वतान्—इ० पा० । ३ ब्राह्मणग्रहपूजने—ब्राह्मणपूजनं, ग्रहपूजनं च—इत्यर्थः । ४ हैमीम्—स्वर्णघर्मोनुवाकम्—इत्यर्थः—इति भाति ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



जलिं बद्धा मंत्रानेतानुदाहरेत् ॥ २२ ॥ त्वया संधार्यते विश्वं जगदेतच्चराचरम् ॥ तव दानं करिष्यामि सांनिध्यं कुरु मेदिनि ॥ २३ ॥ शरीरे
ष्वपि भूतानां त्वं देवि प्रथमं स्थिता ॥ ततश्चान्यानि भूतानि जलादीनि वसुन्धरे ॥ २४ ॥ ये त्वां यच्छंति ते भूयस्त्वां लभंते न संशयः ॥ इह
लोके परे चैव पार्थिवं रूपमाश्रिता ॥ २५ ॥ एवं स्तुत्वा समादाय तोयं हेमाकृतिं नृप ॥ वासुदेवं हृदि स्थाप्य मंत्रेणानेन कल्पयेत् ॥ २६ ॥
पातालादुद्धृता येन पृथ्वी सा लोककारिणा ॥ अस्या दानेन च सदा प्रीयतां मे जनार्दनः ॥ २७ ॥ एवमुच्चार्य तत्तोयं तोयमध्ये परिक्षिपेत् ॥ न
भूमौ नैव हस्ते च ब्राह्मणस्य नृपोत्तम ॥२८॥ ततो विसर्जयेद्देवीं मंत्रेणानेन भागशः ॥ आगता च यथान्यायं पूजिता च यथाविधि॥२९॥अस्माकं
त्वं हितार्थाय यत्रेष्टं तत्र गम्यताम् ॥ उस्रा वेदेति मंत्रेण समुच्चार्य ततः परम् ॥ ब्राह्मणेभ्यः प्रदातव्या संविभज्य नराधिप ॥ ३० ॥ एवं ते सर्वमा
ख्यातं पृथिवीदानमुत्तमम् ॥ शृणुयात्पार्थिवो भावी दाता जन्मनिजन्मनि ॥ ३१ ॥ यो राजा पृथिवीं दद्याद्विधिनानेन पार्थिव ॥ राज्यभ्रंशो न
वंशेऽपि तस्य संजायते क्वचित् ॥ ३२ ॥ राज्यभ्रंशसमोपेता ये दृश्यंते महीभुजः ॥ न तैर्वसुन्धरा दत्ता ब्राह्मणानां धृतात्मनाम् ॥ ३३ ॥ तस्मा
त्सर्वप्रयत्नेन पृथ्वीदानं समाचरेत् ॥ न हरेत्परदत्तां च कथंचिदपि मेदिनीम् ॥ ३४ ॥ एतत्पुण्यं प्रशस्यं च पृथिवीदानमुत्तमम् ॥ शृण्वतामपि
राजेंद्र तद्देहाद्यघनाशनम् ॥ ३५ ॥ आस्तां तावत्प्रदानं च पृथिव्याः पृथिवीपतेः ॥ दातुः संप्रेरणं यस्या अज्ञानौघविनाशनम् ॥ ३६ ॥ रूपवा
न्सुभगश्चैव तथा च प्रियदर्शनः ॥ आधिव्याधिविनिर्मुक्तः पुत्रपौत्रसमन्वितः ॥ ३७ ॥ मेधावी जायते मर्त्यो दानस्यास्य प्रभावतः ॥ इत्थंभूता
महाराज कृत्वा राज्यमकण्टकम् ॥ ३८ ॥ प्रीता विष्णोः पदं यांति शाश्वतं यन्निरामयम् ॥ अन्यत्रापि धरादानात्प्रकुर्याच्चक्रवर्तिताम् ॥ ३९ ॥
एकजन्मांतरं यावत्सम्यग्दत्तं नृपोत्तमः ॥ गौतमेश्वरदेवस्य यत्पुरा पुरतः कृतम् ॥ ४० ॥ सप्तजन्मांतरं यावत्प्रकरोति न संशयः ॥ तस्मात्सर्वप्रय
त्नेन तत्र देया मही नृप ॥४१॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये गौतमेश्वरमाहात्म्ये
पृथ्वीदानमाहात्म्यवर्णनंनामाष्टषष्ट्युत्तरद्विशततमोऽध्यायः ॥२६८॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ कपालेशस्य माहात्म्यं श्रूयतामधुना द्विजाः॥
चतुर्थस्य महाभागास्तत्र क्षेत्रे स्थितस्य च ॥ १ ॥ श्रुतमात्रेण येनात्र नरः पापात्प्रमुच्यते ॥ २ ॥ ॥ ऋषय ऊचुः ॥ ॥ त्रयाणां चैव लिंगानां पूर्वोक्तानां महा
मते ॥ श्रुतास्माभिः समुत्पत्तिः कपालेश्वरवर्जिता ॥ केनायं स्थापितो देवः कपालेश्वरसंज्ञितः ॥ ३ ॥ तस्मिन्दृष्टे फलं किं स्यात्पूजिते च वदस्व



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नः ॥ ४ ॥ ॥ सूत उवाच ॥ ॥ इंद्रेण स्थापितः पूर्वमेष देवो द्विजोत्तमाः ॥ कपालेश्वरसंज्ञस्तु ब्रह्महत्याविमुक्तये ॥ ५ ॥ तत्प्रभावात्सुर[1]श्रेष्ठस्तया[2] मुक्तो द्विजोत्तमाः ॥ पापं पूरुषदानेन इत्येषा वैदिकी श्रुतिः ॥ ६ ॥ अन्योऽपि यो नरस्तं च पूजयित्वा प्रभक्तितः ॥ प्रयच्छेद्ब्राह्मणेन्द्राय शुद्धये पापपूरुषम् ॥ स मुच्येत्पातकाद्घोराद्ब्रह्महत्यासमुद्भवात् ॥ ७ ॥ दक्षिणामूर्तिमासाद्य प्रोवाचेदं बृहस्पतिः ॥ हाटकेश्वरजे क्षेत्रे गत्वा तं वीक्ष्य शंकरम् ॥ ८ ॥ यो ददाति शरीरं च कृत्वा हेममयं ततः ॥ मुच्यते नात्र संदेहः पातकैः पूर्व[3]संयुतैः ॥ ९ ॥ ॥ ऋषय ऊचुः ॥ ब्रह्महत्या कथं जाता सुरेन्द्रस्य हि सूतज ॥ एतन्नः सर्वमाचक्ष्व परं कौतूहलं हि नः ॥ १० ॥ कपालेश्वरसंज्ञस्तु कथं देवोऽत्र संस्थितः ॥ ब्रह्महत्या कथं नष्टा तत्प्रभावाद्दिवस्पतेः ॥११॥ स पापपूरुषो देयो विधिना केन सूतज ॥ कैर्मंत्रैः स हि देयः स्यात्कैः कैश्चैव ह्युपस्करैः ॥१२॥ दर्शनात्पूजनाच्चापि किं फलं जायते नृणाम् ॥ अदत्त्वा स्वशरीरं वा पुजया केवलं वद ॥ १३ ॥ ॥ सूत उवाच ॥ ॥ अहं वः कीर्तयिष्यामि कथामेतां पुरातनीम् ॥ यां श्रुत्वापि महाभागा नरः पापात्प्रमुच्यते ॥ १४ ॥ अज्ञानाज्ज्ञानतो वापि विहितैरन्यजन्मजैः ॥ दृष्टमात्रेण येनात्र पातकैस्त[4]द्दिनोद्भवात् ॥ मुच्यते नात्र संदेहः सत्यमेतन्मयोदितम् ॥ १५ ॥ पुरा त्वष्टुः सुतो जज्ञे वृत्रो हि द्विजसत्तमाः॥ पुलोमदुहितुः पार्श्वाद्विभावर्याः सुवीर्यवान्॥१६॥ स बाल एव धर्मात्मा आसीत्सर्वजनप्रियः ॥ दानवं भावमुत्सृज्य द्विजभक्तिपरायणः ॥ १७ ॥ स गत्वा पुष्करारण्यं परमेण समाधिना ॥ तोषयामास देवेशं पद्मजं तपसि स्थितः ॥ १८ ॥ तस्य तुष्टः स्वयं ब्रह्मा दृष्टिगोचरमागतः ॥ प्रोवाच वरदोऽस्मीति किं ते कृत्यं करोम्यहम् ॥ १९ ॥ ॥ ॥ वृत्र उवाच ॥ ॥ यदि तुष्टोसि मे देव ब्राह्मणत्वं प्रयच्छ मे ॥ ब्राह्मणत्वं समासाद्य साधयामि परं पदम् ॥ २० ॥ तेन किंचिदसाध्यं न ब्राह्मण्येन भवेन्मम ॥ ब्राह्मणेन समं चान्यन्न किंचित्प्रतिभाति मे ॥ २१ ॥ परमं दैवतं किंचिन्न विप्राद्विद्यते परम् ॥ तस्मान्मे हृत्स्थितं नान्यदपि राज्यं त्रिविष्टपे ॥ २२ ॥ ॥ सूत उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा तुष्टस्तस्य पितामहः ॥ ब्राह्मणत्वं स्वयं दत्त्वा ततः प्रोवाच सादरम् ॥ ॥ २३ ॥ मया त्वं विहितो विप्र पुत्र प्रकुरु वांछितम् ॥ प्रसादयस्व सततं ब्राह्मणान्ब्रह्मवित्तमान् ॥ २४ ॥ ब्राह्मणैः सुप्रसन्नैश्च प्रीयंते सर्वदेवताः ॥ तस्मात्सर्वप्रयत्नेन पूजनीया द्विजोत्तमाः ॥ २५ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्तस्तदा तेन वृत्रोऽभूद्ब्राह्मणस्ततः ॥ ब्राह्म्या लक्ष्म्या समोपेतो ब्रह्मचर्यपरायणः ॥ २६ ॥ तस्मिंस्तपसि संस्थे तु हता इंद्रेण दानवाः ॥ वंशोच्छेदे समापन्ने दानवानां महात्मनाम् ॥ २७ ॥ ततस्ते दानवाः

१ सुरश्रेष्ठः—इन्द्रः । २ तया—ब्रह्महत्यया । ३ सर्वसंयुतैः—इ० पा० । ४ तद्दिनोद्भवात्—तद्दिनपर्यंतं पूर्वकाले जातेष्वनेकजन्मसु समुत्पन्नात्—इत्यर्थः । ५ दानवः—इ० पा० । ६ ध्रुवम्—इ० पा० । ७ हृष्टः इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सर्वे पराभूताः सुरैस्ततः ॥ स्वं स्थानं संपरित्यज्य दुःखशोकसमन्विताः ॥ २८ ॥ तन्मातरं पुरस्कृत्वा तत्सकाशमुपागताः ॥ स च तां मातरं दृष्ट्वा
वृतां तैश्च समन्वितः ॥ २९ ॥ दानवैश्च पराभूतैस्तथाभूतां च मातरम् ॥ किमागमनकृत्यं च दुःखितानां ममांतिके ॥ ३० ॥ ॥ दानवा ऊचुः ॥ ॥
वयं देवैः पराभूता भवंतं शरणागताः ॥ क्व यामोऽन्यत्र चाऽस्माकं त्वां विना नास्ति संश्रयः ॥३१॥ तेषां तद्वचनं श्रुत्वा वृत्रः प्रोवाच सादरम् ॥
देवानहं हनिष्यामि गम्यतां तत्र मा चिरम् ॥ ३२ ॥ तवागमनकृत्यं च मातः कथय सांप्रतम् ॥३३॥ ॥ मातोवाच ॥ ॥ तथा कुरु महाभाग शीघ्रं
दारपरिग्रहम् ॥ वंशवृद्धौ प्रमाणं चेद्वाक्यं तव ममोद्भवम् ॥३४॥ एष एव परो धर्म एष एव परो नयः ॥ पुत्रस्य जननीवाक्यं यत्करोति समाहितः ॥
॥३५॥तथा स्त्रीणां पतिं मुक्त्वा नान्यास्ति भुवि देवता ॥ जनन्यां जीवमानायां तथैव च सुतस्य च ॥ ३६ ॥ अतिक्रम्य च या नारी पतिं
धर्मपरा भवेत् ॥ तत्सर्वं विफलं तस्या जायते नात्र संशयः ॥ ३७ ॥ पुत्रः स्वजननीवाक्यं योऽतिक्रम्य यथारुचि ॥ करोति धर्मकृत्यनि तानि
सर्वाणि तस्य च ॥ ३८ ॥ भवंति च तथा नूनं वृथा भस्महुतं यथा ॥ अरण्ये रुदितानीव ऊषरे वापितानि च ॥ ३९ ॥ यथैव बधिरस्या
ग्रे गीतं नृत्यमचक्षुषः ॥ तद्वन्मातृमतादन्यकृतं पुत्रस्य धर्मजम् ॥ ४० ॥ सर्वं कर्म न संदेहस्ते नाहं त्वामुपागता ॥ बंधूनां वचनात्पुत्र
दुःखार्ता च विशेषतः ॥ ४१ ॥ किं वा ते बहुनोक्तेन भूयो भूयश्च पुत्रक ॥ आनृण्यं जायते यद्वत्पितॄणां तत्तथा शृणु ॥ ४२ ॥ तव वत्स प्रमाणं
चेत्कुरुष्व च वचो मम ॥ तस्यास्तद्वचनं श्रुत्वा वृत्रः संचिंत्य चेतसि ॥ ४३ ॥ श्रुतिस्मृत्युक्तमार्गेण न मातुर्विद्यते परम् ॥ स तथेति प्रति
ज्ञाय आनिनाय परिग्रहम् ॥ ४४ ॥ त्वष्टा तस्मै ददौ प्रीतस्ततो रत्नान्यनेकशः ॥ संख्याहीनानि तस्यैव कुप्याकुप्यमनंतकम् ॥ ४५ ॥ हस्त्य
श्वयानकोशाढ्यं सोऽभिषिक्तः पदे निजे ॥ दानवानां महावीर्यो ब्राह्मण्येन समन्वितः ॥ ४६ ॥ अभिषिक्तं तदा वृत्रं स्वराज्ये तेऽसुरादयः ॥
श्रुत्वाभिषेकं संहृष्टास्तस्य वृत्रस्य बांधवाः ॥ ४७ ॥ दानवाश्च समाजग्मुर्ये तत्रासन्पुरोगताः ॥ पातालाद्गिरिदुर्गाच्च स्थलदुर्गेभ्य एव च ॥ कृत
वैराः समं देवैः कोपेन महता वृताः ॥ ४८ ॥ ततः प्रोत्साहितः सर्वैर्दानवैः स महाबलः ॥ प्रस्थितः शत्रुनाशाय महेन्द्रभवनं प्रति ॥ ४९ ॥
शक्रोऽपि वृत्रमाकर्ण्य समायांतं युयुत्सया ॥ सन्मुखः प्रययौ हृष्टः सर्वदेवसमन्वितः ॥ ५० ॥ ततः समभवद्युद्धं देवानां दानवैः सह ॥ मेरुपृष्ठे सुवि
स्तीर्णे नित्यमेव दिवानिशम् ॥ ५१ ॥ नित्यं पराजयो जज्ञे देवानां दानवैः सह ॥ तत्रोवाच गुरुः शक्र मा युद्धं कुरु देवप ॥ ५२ ॥ वृत्रोऽयं
दारुणो युद्धे बलद्वयसमन्वितः ॥ चत्वारश्चाग्रतो वेदाः पृष्ठतः सशरं धनुः ॥ ५३ ॥ तेन जेयतमो दैत्यस्तवैव च महाहवे ॥ तस्मात्संधानमेतेन



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वं कुरुष्व शचीपते ॥ ५४ ॥ ततो विश्वासमाया तं जहि वज्रेण दानवम् ॥ षडुपायै रिपुर्वध्य इति शास्त्रनिदर्शनम् ॥ ५५ ॥ भुंजानश्च शयानश्च दत्त्वा कन्यामपि स्वकाम् ॥ विप्रदानेन संयोज्य कृत्वापि शपथं गुरुम् ॥ मायाप्रपंचमासाद्य तस्मादेवं समाचर ॥ ५६ ॥ ॥ इन्द्र उवाच ॥ ॥ यद्येवं च स्वयं गत्वा त्वं विश्वासे नियोजय ॥ तव वाक्येन विश्वासं नूनं यास्यति दानवः ॥ ५७ ॥ ॥ सूत उवाच ॥ ॥ शक्रस्य मतमाज्ञाय प्रतस्थे च बृहस्पतिः ॥ यत्र वृत्रः स्थितो दैत्यो युद्धार्थं कृतनिश्चयः ॥ ५८ ॥ वृत्रोऽपि तं समालोक्य स्वयं प्राप्तं बृहस्पतिम् ॥ सदैव द्विजभक्तः स हृष्टात्मा समपद्यत ॥ विशेषात्प्रणिपत्योच्चैर्वाक्यमेतदभाषत ॥ ५९ ॥ ॥ वृत्र उवाच ॥ ॥ स्वागतं ते द्विजश्रेष्ठ किं करोमि प्रशाधि माम् ॥ प्रिया मे ब्राह्मणा यस्मात्तस्मात्कीर्तय सांप्रतम् ॥ ६० ॥ ॥ बृहस्पतिरुवाच ॥ ॥ संदिग्धो विजयो युद्धे यस्माद्दैवेन सत्तम ॥ तस्मात्कुरु महेंद्रेण व्यवस्थां वचनान्मम ॥ ६१ ॥ त्वं भुंक्ष्व भूतलं कृत्स्नं शक्रश्चापि त्रिविष्टपम् ॥ व्यवस्थयाऽनया नित्यं वर्तितव्यं परस्परम् ॥ ६२ ॥ ॥ ॥ वृत्र उवाच ॥ ॥ अहं तव वचो ब्रह्मन्करिष्यामि सदैव हि ॥ संगमं कुरु शक्रेण सांप्रतं मम सद्द्विज ॥ ६३ ॥ ॥ सूत उवाच ॥ ॥ अथ शक्रं समानीय बृहस्पतिरुदारधीः ॥ वृत्रेण सह संधानं चक्रे चैव परस्परम् ॥६४॥ एकारिमित्रतां[1] गत्वा ताबुभौ दैत्यदेवपौ ॥ प्रहृष्टौ गतवन्तौ तौ ततश्चैव निजं गृहम् ॥ ६५ ॥ अथ शक्रच्छलान्वेषी सदा वृत्रस्य वर्तते ॥ न च्छिद्रं लभते क्वापि वीक्षमाणोपि यत्नतः ॥ ६६ ॥ कथंचिदपि सोऽभ्येति तत्सकाशं पुरंदरः ॥ किंचिच्छिद्रं समासाद्य तत्प्रतापेन दह्यते ॥ ६७ ॥ ॥ इंद्र उवाच ॥ ॥ न शक्नोमि च तं दैत्यं वीक्षितुं च कथंचन ॥ तेजसा सर्वतो व्याप्तं तत्कथं सूदयाम्यहम् ॥ ६८ ॥ तस्मात्कंचिदुपायं मे तद्वधार्थं प्रकीर्तय ॥ यथा शक्नोमि तत्सोढुं तेजस्तस्य दुरात्मनः ॥ ६९ ॥ ॥ सूत उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा चिरं ध्यात्वा बृहस्पतिः ॥ ततः प्रोवाच तं शक्रं विनयावनतं स्थितम् ॥ ७० ॥ ॥ बृहस्पतिरुवाच ॥ ॥ तस्य ब्राह्म्यं स्थितं तेजः सम्यग्गात्रे पुरंदर ॥ वीक्षितुं नैव शक्नोषि तेन त्वं त्रिदशाधिप ॥ ७१ ॥ तथा ते कीर्तयिष्यामि तस्योपायं वधोद्भवम् ॥ वधयिष्यसि येनात्र तं त्वं दानवसत्तमम् ॥ ७२ ॥ प्राचीसरस्वतीतीरे पुष्करारण्यमाश्रितः ॥ दधीचिर्नाम विप्रर्षिः शतयोजनमुच्छ्रितः ॥ ७३ ॥ तत्र नित्यं तपः कुर्वंस्तौति नित्यं पितामहम् ॥ स निर्विण्णो मुनिश्रेष्ठः प्राणानां धारणे

१ एकारिमित्रताम्—"एके मुख्यान्यकेवलाः" इत्यमरः। एकारित्वे—मुख्यशत्रुत्वेऽपि—एकमित्रताम्—मुख्यमित्रताम्—अप्रतिममैत्रीम्—इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



हरे ॥ ७४ ॥ चिरंतनो मुनिः स स्याज्जरयातिसमावृतः ॥ तं प्रार्थय द्रुतं गत्वा तस्यास्थीनि गुरुणि च ॥ ७५ ॥ स ते दास्यत्यसंदिग्धं त्यक्त्वा प्राणानतिप्रियान् ॥ तस्यास्थिभिः प्रहरणं वज्राख्यं ते भविष्यति ॥ ७६ ॥ अमोघं ते ततो नूनं त्वं वृत्रं सूदयिष्यसि ॥ तस्य वज्रस्य तत्तेजो ब्रह्मतेजोऽभिबृंहितम् ॥ तेन वृत्रोद्भवं तेजः प्रशमं संप्रयास्यति ॥ ७७ ॥ ॥ सूत उवाच ॥ ॥ तच्छ्रुत्वा सत्वरं शक्रः सर्वैर्देवगणैः सह ॥ जगाम पुष्करारण्ये यत्र प्राची सरस्वती ॥ ७८ ॥ त्रयस्त्रिंशत्समोपेता तीर्थानां कोटिभिर्युता ॥ दधीचेराश्रमं तत्र सोऽविशच्चित्रसंयुतम् ॥ ७९ ॥ क्रीडंते नकुलैः सर्पा यत्र तुष्टिं गता मिथः ॥ मृगाः पंचाननैः सार्धं वृषदंशास्तथाऽऽखुभिः ॥ ८० ॥ उलूकसहिताः काका मिथो द्वेषविवर्जिताः ॥ प्रभावात्तस्य तपसो दधीचेः सुमहात्मनः ॥ ८१ ॥ दधीचिरपि चालोक्य देवाञ्छक्रपुरोगमान् ॥ समायातान्प्रहृष्टात्मा सत्वरं संमुखोऽभ्यगात् ॥ ८२ ॥ ततश्चार्घ्यं समादाय प्रणिपत्य मुहुर्मुहुः ॥ शक्रमभ्यागतं प्राह किं ते कृत्यं करोम्यहम् ॥ ८३ ॥ गृहायातस्य देवेश तच्छीघ्रं मे निवेदय ॥ ८४ ॥ ॥ इंद्र उवाच ॥ ॥ आतिथ्यं कुरु विप्रेंद्र गृहायातस्य सन्मुने ॥ त्वदस्थीनि निजान्याशु मम देह्यविकल्पितम् ॥ ८५ ॥ एतदर्थमहं प्राप्तस्त्वत्सकाशं मुनीश्वर ॥ अस्थिभिस्ते परं कार्यं देवानां सिद्धिमेष्यति ॥ ८६ ॥ ॥ सूत उवाच ॥ ॥ इंद्रस्य तद्वचः श्रुत्वा दधीचिस्तोषसंयुतः ॥ ततः प्राह सहस्राक्षं सर्वैर्देवैः समन्वितम् ॥ ८७ ॥ अहो नास्ति मया तुल्यः सांप्रतं भुवि कश्चन ॥ पुण्यवान्यस्य देवेशः स्वयमर्थी गृहागतः ॥ ८८ ॥ धन्यानि च ममास्थीनि यानि देवेश ते हितम् ॥ करिष्यंति सदा कार्यं रक्षार्थं त्रिदिवौकसाम् ॥ ८९ ॥ एषोऽहं संप्रदास्यामि प्रियान्प्राणान्कृते तव ॥ गृहाण स्वेच्छयाऽस्थीनि स्वकार्यार्थं पुरंदर ॥ ९० ॥ एवमुक्त्वा महर्षिः स ध्यानमाश्रित्य सत्वरम् ॥ ब्रह्मरंध्रेण निःसार्य प्राणमात्मानमत्यजत् ॥ ९१ ॥ तदात्मना परित्यक्तं तस्य गात्रं च तत्क्षणात् ॥ पतितं मेदिनीपृष्ठे व्यसु तद्विजसत्तमाः ॥९२॥ एतस्मिन्नेव काले तु तस्यास्थीनि शतक्रतुः ॥ प्रगृह्य विश्वकर्माणं ततः प्रोवाच सादरम् ॥ ९३ ॥ एतैरस्थिभिः शीघ्रं मे कुरु त्वं वज्रमायुधम् ॥ येन व्यापादयाम्याशु वृत्रं दानवसत्तमम् ॥९४॥ तस्य तद्वचनं श्रुत्वा विश्वकर्मा त्वरान्वितः ॥ यथायुधं तथा चक्रे वज्राख्यं दारुणाकृति ॥ ९५ ॥ षडस्त्रि शतपर्वाख्यं मध्ये क्षामं विभीषणम् ॥ प्रददौ च ततस्तस्मै सहस्राक्षाय धीमते ॥ ९६ ॥ अथ तं स समादाय द्वादशार्कसमप्रभम् ॥ समा

१ हरे—हे इन्द्र—इत्यर्थः । "यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु । शुकाहिकपिभेकेषु हरिर्ना कापिले त्रिषु ॥" इत्यमरः । २ पुण्यः—इति पाठेऽपि—मया—समः पुण्यः—इत्यर्थो बोद्धव्यः । ३ आत्मानम्—शरीरम्—इत्यर्थः । ४ आत्मना—जीवेन—इत्यर्थः । ५ व्यसु—प्राणरहितम्—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धिस्थं चरैर्ज्ञात्वा वृत्रं संध्यार्चने रतम् ॥ ९७ ॥ ततश्च पृष्ठभागं स समाश्रित्य त्रिलोकराट् ॥ चिक्षेप वज्रमुद्दिश्य तद्वधार्थं समुत्सुकः ॥ ९८ ॥ स
हतस्तेन वज्रेण दानवो भस्मसाद्गतः ॥ शक्रोपि हतमज्ञात्वा भयात्तस्याथ दुद्रुवे ॥ ९९ ॥ मनुष्यरहिते देशे विषमे गुल्मसंवृते ॥ लिल्ये शक्रस्तदा
सर्वं मेने वृत्रमयं जगत् ॥ १०० ॥ एतस्मिन्नंतरे देवाः पश्यंतः सर्वतो दिशम् ॥ सिद्धचारणगन्धर्वा आजग्मुश्च शतक्रतुम् ॥ १०१ ॥ ततः कृच्छ्राच्च
तैर्दृष्टः शक्रोऽसौ गहने वने ॥ निलीनो भयसंत्रस्तो गुल्ममध्ये व्यवस्थितः ॥ १०२ ॥ ॥ देवा ऊचुः ॥ ॥ किं त्वं भीतः सहस्राक्ष वृत्रोऽयं
घातितस्त्वया ॥ परिवारेण सर्वेण वीक्षितोऽस्माभिरेव च ॥ १०३ ॥ अस्मादागच्छ गच्छामो गृहं प्रति पुरंदर ॥ कुरु त्रैलोक्यराज्यं त्वं सांप्रतं
हतकण्टकम् ॥ १०४ ॥ तच्छ्रुत्वाऽथ विनिष्क्रांतो गुल्ममध्याच्छतक्रतुः ॥ हृष्टरोमा हतं श्रुत्वा वृत्रं दानवसत्तमम् ॥ १०५ ॥ अथ पश्यंति यावत्तं
देवाः सर्वे शतक्रतुम् ॥ तावत्तेजोविहीनं तद्गात्रं दुर्गंधितायुतम् ॥ १०६ ॥ दृष्ट्वा लोकगुरुर्ब्रह्मा देवान्सर्वानुवाच ह ॥ शक्रोऽयं सांप्रतं व्याप्तः पापया
ब्रह्महत्यया ॥ १०७ ॥ यदनेन हतो वृत्रो ब्रह्मभूतश्छलेन सः ॥ तस्मात्त्याज्यः सुदूरेण नो चेत्पापमवाप्स्यथ ॥ १०८ ॥ ब्रह्मघ्नेन समं स्पर्शः संभा
षोऽथ विनिर्मितः ॥ पापाय जायते पुंसां तस्मात्तं दूरतस्त्यजेत् ॥ १०९ ॥ आस्तां संस्पर्शनं तस्य संभाषो वा विशेषतः ॥ दर्शनं वापि तस्याहुः
सर्वपापप्रदं नृणाम् ॥ ११० ॥ ॥ सूत उवाच ॥ ॥ तच्छ्रुत्वा ब्रह्मणो वाक्यं शक्रो दृष्ट्वाऽऽत्मनस्तनुम् ॥ तेजसा संपरित्यक्तां दुर्गन्धेन समा
वृताम् ॥ १११ ॥ ततः प्रोवाच लोकेशं दीनः प्रणतकन्धरः ॥ तवाहं किंकरो देव त्वयेंद्रत्वे नियोजितः ॥ ११२ ॥ तस्मात्कुरु प्रसादं मे ब्रह्मह
त्याविनाशनम् ॥ प्रायश्चित्तं विभो ब्रूहि येन शुद्धिः प्रजायते ॥ ११३ ॥ ॥ श्रीब्रह्मोवाच ॥ ॥ अष्टषष्टिषु तीर्थेषु त्वं स्नात्वा बलसूदन ॥
आत्मानं हेमजं देहि पापपूरुषसंज्ञितम् ॥ ११४ ॥ मंत्रवत्तं यथोक्तं च ब्राह्मणाय महात्मने ॥ स्नात्वा पुण्यजले तीर्थे ब्रह्मघ्नोऽहमिति ब्रुवन् ॥ ११५ ॥
स्नातमात्रस्य ते हस्ताद्यत्र तत्पतति क्षितौ ॥ तेजः संजायते गात्रे दुर्गंधश्च प्रणश्यति ॥ ११६ ॥ तस्मिंस्तीर्थे त्वया तच्च स्थाप्यं शक्र कपाल
कम् ॥ महेश्वरस्य नाम्ना च पूजनीयं ततः परम् ॥ ११७ ॥ पंचभिर्वक्रमंत्रैश्च ततो देयाऽऽत्मतस्तनूः ॥ हेमोद्भवा द्विजेन्द्राय ततः शुद्धिमवाप्स्यसि
॥ ११८ ॥ शक्रस्तु तद्वचः श्रुत्वा ब्रह्मणोऽव्यक्तजन्मनः ॥ कपालं वृत्रजं गृह्य तीर्थयात्रां ततो गतः ॥ ११९ ॥ अष्टषष्टिषु तीर्थेषु गच्छन्स च
सुरेश्वरः ॥ हाटकेश्वरजे क्षेत्रे समायातः क्रमेण च ॥ १२० ॥ विश्वामित्रह्रदे स्नात्वा यावत्तस्माद्विनिर्गतः ॥ कपालं पतितं तस्मात्स्वयमेव हतां[१]

१ हतात्मनः—वृत्रस्य—इत्यर्थोऽत्र बोद्धव्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्मनः ॥ १२१ ॥ ततस्तं पूजयामास मन्त्रैर्वक्रसमुद्भवैः ॥ सर्वपापहरैः पुण्यैर्यथोक्तैर्ब्रह्मणा पुरा ॥ १२२ ॥ एतस्मिन्नेव काले तु दुर्गन्धो नाशमाप्तवान् ॥ तच्छरीराद्द्विजश्रेष्ठा महत्तेजो व्यजायत ॥ १२३ ॥ एतस्मिन्नन्तरे ब्रह्मा सह देवैः समागतः ॥ ब्रह्महत्याविमुक्तं तं ज्ञात्वा सर्वसुराधिपम् ॥ १२४ ॥ ॥ श्रीब्रह्मोवाच ॥ ॥ ब्रह्महत्याकृतो दोषो गतस्ते सुरसत्तम ॥ शेषपापविशुद्ध्यर्थं स्वर्णदानं प्रयच्छ भोः ॥१२५॥ कपालमेतद्देशेऽत्र यत्त्वया परिपूजितम् ॥ वृत्रस्य पंचभिर्मन्त्रैर्हरवक्रसमुद्भवैः ॥१२६॥ प्रदास्यसि ततो भक्त्या हेमजामात्मनस्तनुम् ॥ विधिना मंत्रयुक्तेन तव पापं प्रयास्यति ॥ यद्यत्पूर्वकृतं कृत्स्नं प्रदाय ब्राह्मणाय भोः ॥ १२७ ॥ एवमुक्तस्ततः शक्रो ब्रह्मणा सुरसंनिधौ ॥ तथेत्युक्त्वा तु तत्कालं पापपिंडं निजं ददौ ॥ १२८ ॥ कृत्वा हेममयं विप्रा ब्राह्मणाय महात्मने ॥ गर्तातीर्थसमुत्थाय वाताख्यायाहिताग्नये ॥ १२९ ॥ एतस्मिन्नंतरे विप्रो गर्हितः सोऽत्र नागरैः ॥ धिग्धिक्पाप वृथा वेदा ये त्वया पारिताः पुरा ॥१३०॥ नास्माभिः सह संपर्कं कदाचित्त्वं करिष्यसि ॥ गृहीतं यत्त्वया दानं पापपिंडसमुद्भवम् ॥ १३१ ॥ ततः प्रोवाच विप्रः स उपमन्युकुलोद्भवः ॥ विवर्णवदनो भूत्वा नाम्ना ख्यातः स वातकः ॥ १३२ ॥ त्वया शक्र प्रदत्तो मे पापपिंडः स्वको यतः ॥ मया प्रतिग्रहस्तेन दाक्षिण्येन कृतस्तव ॥ १३३ ॥ न लोभेन सुरश्रेष्ठ पश्यतस्ते विगर्हितः ॥ अहं च ब्राह्मणैः सर्वैरेतैर्नगरवासिभिः ॥ १३४ ॥ तस्मान्नाहं ग्रहीष्यामि एतं तव प्रतिग्रहम् ॥ १३५ ॥ भूयोऽपि तव दास्यामि न त्वं गृह्णासि चेत्पुनः ॥ ब्रह्मशापं प्रदास्यामि दारुणं च क्षयात्मकम् ॥ १३६ ॥ ॥ इंद्र उवाच ॥ ॥ वेदांगपारगो विप्रो यदि कुर्यात्प्रतिग्रहम् ॥ न स पापेन लिप्येत पद्मपत्रमिवांभसा ॥ १३७ ॥ तस्मात्ते पातकं नास्ति शृणुष्वात्र वचो मम ॥ एतैस्त्वं गर्हितो यस्माद्ब्राह्मणैर्नगरोद्भवैः ॥ १३८ ॥ एतेषां सर्वकृत्येषु प्रधानस्त्वं भविष्यसि ॥ एतेषां पुत्रपौत्रा ये भविष्यंति तथा तव ॥ १३९ ॥ ते सर्वे चाज्ञया तेषां वर्तयिष्यंत्यसंशयम् ॥ युष्मद्वाक्यविहीनं यत्कृत्यं स्वल्पमपि द्विज ॥ १४० ॥ तेषां संपत्स्यते वन्ध्यं यथा भस्महुतं तथा ॥ कपालमोचनंनाम ख्यातमेतद्भविष्यति ॥ १४१ ॥ ये तु संस्मृत्य मनुजाः कपालं मम सद्द्विज ॥ तत्र श्राद्धं करिष्यंति ते नरा मुक्तिसंयुताः ॥ श्राद्धपक्षे विशेषेण प्रयास्यंति परां गतिम् ॥१४२॥ स्थानबाह्यद्विजातीनां कुले दारपरिग्रहम् ॥ कृत्वा त्वद्गोत्रसंभूता ब्राह्मणा मत्प्रसादतः ॥ १४३ ॥ व्यवहार्या भविष्यंति नगरे सर्वकर्मसु ॥ एवमुक्त्वा

१ वक्रसमुद्भवैः मन्त्रैः—"सद्योजातं प्रपद्यामि" इत्यादिभिः पंचभिर्मन्त्रैः—इत्यर्थः। २ पापपिण्डम्—पापपुरुषम्—इत्यर्थः। ३ यतात्मने—इ० पा०। ४ पारिताः—सांगोपांगा अधीताः—इत्यर्थः। ५ याचक—इ० पा०।



CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहस्राक्षस्ततश्चादर्शनं गतः ॥ १४४ ॥ वातोपि[1] तेन वित्तेन प्रतिग्रहकृतेन च ॥ चकार तत्र प्रासादं देवदेवस्य शूलिनः ॥ १४५ ॥ ततः प्रोवाच
शक्रस्तान्ब्राह्मणान्नगरोद्भवान् ॥ कपालमोचने स्नात्वा यो देवं ह्यर्चयिष्यति ॥ १४६ ॥ ब्रह्महत्योद्भवं पापं तस्य नश्यत्यसंशयम् ॥ महापातक
युक्तो वा विपाप्मा संभविष्यति ॥ १४७ ॥ स तथेति प्रतिज्ञाय ब्राह्मणान्नगरोद्भवान् ॥ तत्रैव स्वाश्रमं कृत्वा पूजयामास शंकरम् ॥ १४८ ॥
ततः प्रभृति यत्किंचित्तेषां कृत्यं प्रजायते ॥ तद्वाक्येन प्रकुर्वंति तत्र ये नागरः स्थिताः ॥ १४९ ॥ एतस्मात्कारणाज्जातो मध्यगो द्वितीयस्त्विह ॥
॥ १५० ॥ एतद्वः सर्वमाख्यातमाख्यानं पापनाशनम् ॥ कपालेश्वरदेवस्य शृण्वतां पठतां नृणाम् ॥ १५१ ॥ यथा देवेश्वरस्यात्र[2] पापं नष्टं महा
त्मनः ॥ ब्रह्महत्या यथा नष्टा तस्मिंस्तीर्थे द्विजोत्तमाः ॥ १५२ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे
हाटकेश्वरक्षेत्रमाहात्म्ये वार्तकेश्वरक्षेत्रकपालमोचनेश्वरोत्पत्तिमाहात्म्यवर्णनंनामैकोनसप्तत्युत्तरद्विशततमोऽध्यायः ॥ २६९ ॥ छ ॥ ॥ आनर्त
उवाच ॥ ॥ मूर्खत्वाद्वा प्रमादाद्वा कामाद्वालस्यतोऽपि वा ॥ यो नरः कुरुते पापं प्रायश्चित्तं करोति न ॥ १ ॥ तस्य पापक्षयकरं पुण्यं ब्रूहि
द्विजोत्तम ॥ येन मुक्तिर्भवेत्सद्यो यदि तुष्टोऽसि मे प्रभो ॥ २ ॥ लोभमोहपरो योऽसौ पापपिंडं महामुने ॥ प्रददाति विधिं ब्रूहि येन यच्छाम्यहं
द्रुतम् ॥ ३ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ दद्यात्स्वपिंडं सौ वर्णं पंचविंशत्पलात्मकम् ॥ ४ ॥ विधायापरपक्षे तु स्नापयित्वा विधानतः ॥
मंडपाद्यं च प्राक्कृत्वा स्नात्वा धौतांबरः शुचिः ॥ ५ ॥ तदा स्वरूपं पृथिव्यादि पूजयेत्पापकृन्नरः ॥ तथा स मुच्यते पापात्तत्कृताद्धि न
संशयः ॥ ६ ॥ चतुर्विंशतितत्त्वानि पृथिव्यादीनि यानि च ॥ तेषां नामभिस्तत्पिंडं पूजयेतन्नराधिपः ॥७॥ ॐ पृथिव्यै नमः ॥ ॐ अद्भ्यो नमः॥
ॐ तेजसे नमः ॥ ॐ वायवे नमः ॥ ॐ आकाशाय नमः ॥ ॐ घ्राणाय नमः ॥ ॐ जिह्वायै नमः ॥ ॐ चक्षुषे नमः ॥ ॐ त्वचे
नमः ॥ ॐश्रोत्राय नमः ॥ ॐ गन्धाय नमः ॥ ॐ रसाय नमः ॥ ॐ रूपाय नमः ॥ ॐस्पर्शाय नमः ॥ ॐ शब्दाय नमः ॥
ॐवाचे नमः ॥ ॐपाणिभ्यां नमः ॥ ॐपादाभ्यां नमः ॥ ॐपायवे नमः ॥ ॐउपस्थाय नमः ॥ ॐमनसे नमः ॥ ॐबुद्ध्यै नमः ॥ ॐचित्ताय
नमः ॥ ॐ अहंकाराय नमः ॥ ॐ क्षेत्रात्मने नमः ॥ ॐ परमात्मने नमः ॥ धूपं धूरसिमंत्रेण अग्निर्ज्योतीति दीपकम् ॥ युवा सुवासेति
च ततो वासांसि परिधापयेत् ॥ ८ ॥ ततो ब्राह्मणमानीय वेदवेदांगपारगम् ॥ प्रक्षाल्य चरणौ तस्य वासांसि परिधापयेत ॥ ९ ॥ केयूरैः कंकणै

१ वातः—वाताख्यब्राह्मणः । २ देवेश्वरस्य—इंद्रस्य । ३ वानकेश्वरक्षेत्र—इत्यपि पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



श्चैव अंगुलीयकभूषणैः ॥ १० ॥ भूषयित्वा तनुं तस्य ततो मूर्तिं समानयेत् ॥ मंत्रेणानेन राजेंद्र ब्राह्मणाय निवेदयेत् ॥ ११ ॥ एष आत्मा
मया दत्तस्तव हेममयो द्विज ॥ यत्किंचिद्विहितं पापं पूर्वं भूयात्तवाखिलम् ॥ १२ ॥ ॥ इति दानमंत्रः ॥ ॥ ततस्तु ब्राह्मणो राजन्मंत्रमेतं
समुच्चरेत् ॥ १३ ॥ यत्किंचिद्विहितं पापं त्वया पूर्वं मया हि तत् ॥ गृहीतं मूर्तिरूपं तत्ततस्त्वं पापवर्जितः ॥ इति प्रतिग्रहमंत्रः ॥ १४ ॥ एवं दत्त्वा
विधानेन ततो विप्रं विसर्जयेत् ॥ एवं कृते ततो राजंस्तस्मै दत्त्वाऽथ दक्षिणाम् ॥ १५ ॥ यथा तुष्टिं समभ्येति ततः पापं नयत्यसौ ॥ तस्मि
न्कृते महाराज प्रत्ययस्तत्क्षणाद्भवेत् ॥ १६ ॥ शरीरं लघुतामेति तेजोवृद्धिश्च जायते ॥ स्वप्ने च वीक्षते रात्रौ संतुष्टमनसः स्थितान् ॥ १७ ॥
नरान्स्त्रियः सितैर्वस्त्रैः श्वेतमाल्यानुलेपनैः ॥ श्वेतान्गोवृषभानश्वांस्तीर्थानि विविधानि च ॥ १८ ॥ एतत्ते सर्वमाख्यातं पापपिंडस्य दापनम् ॥ श्रव
णादपि राजेंद्र यस्य पापैः प्रमुच्यते ॥ १९ ॥ अन्यत्रापि महादानं पापपिण्डो हरेन्नृप ॥ २० ॥ एकजन्मकृतं पापं निजकायेन निर्मितम् ॥ कपाले
श्वरदेवस्य सहस्रगुणितं हरेत् ॥ २१ ॥ पूर्ववच्चैव कर्तव्यो वेदिमंडपयोर्विधिः ॥ परं होमः प्रकर्तव्यो गायत्र्या केवलं नृप ॥ २२ ॥ इति श्रीस्कान्दे
महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये कपालेश्वरक्षेत्रमाहात्म्यप्रसंगेन पापपिंडप्रदानविधानवर्णनंनाम
सप्तत्युत्तरद्विशततमोऽध्यायः ॥ २७० ॥ ॥छ॥ ॥ सूत उवाच ॥ ॥ अथान्यदपि तत्रास्ति सुपुण्यं लिंगसप्तकम् ॥ येनार्चितेन दृष्टेन पूजितेन
विशेषतः ॥ १ ॥ दीर्घायुर्जायते मर्त्यः सर्वरोगविवर्जितः ॥ मार्कण्डेश्वर इत्युक्तस्तत्र देवो महेश्वरः ॥२ ॥ इन्द्रद्युम्नेश्वरोऽन्यस्तु सर्वपापहरो हरः ॥
पालेश्वरस्तथा चैव सर्वव्याधिविनाशनः ॥ ३ ॥ ततो घंटशिवः ख्यातो यो घंटेन प्रतिष्ठितः ॥ कलशेश्वरसंज्ञस्तु वानरेश्वरसंयुतः ॥ ४ ॥ ईशान
शिव इत्युक्तस्तत्र क्षेत्रेश्वरेश्वरः ॥ पूजितो मानवैर्भक्त्या कामान्यच्छत्यमानुषान् ॥ ५ ॥ वांछितान्मनसा सर्वान्कलिकालेऽपि संस्थिते ॥ ६ ॥
॥ ॥ ऋषयऊचुः ॥ ॥ कोऽयं मार्कंडसंज्ञस्तु येन लिंगं प्रतिष्ठितम् ॥ इन्द्रद्युम्नो महीपालः कतमो वद सूतज ॥ ७ ॥ तथा पालकनामा च येनायं
स्थापितो हरः ॥ तथा यो घण्टसंज्ञस्तु कस्मिञ्जातः स चान्वये ॥ ८ ॥ कलशाख्यस्तु यः ख्यातो वानरेण समन्वितः ॥ ईशानोप्यखिलं ब्रूहि
परं नः कौतुकं स्थितम् ॥ ९ ॥ यतोऽत्र जायते श्रेयः पुनः पुंसां प्रकीर्तय ॥ यैरेतैः स्थापिता देवाः क्षेत्रेऽस्मिन्मानवोत्तमैः ॥ १० ॥ 
तथा तेषां समाचारं प्रभावं चैव सूतज ॥ दानं वापि यथाकालं मंत्रांश्च विस्तराद्वद ॥ ११ ॥ ॥ सूत उवाच ॥ ॥ अहं वः कीर्तयिष्यामि कथामेतां
पुरातनीम् ॥ कथितां भर्तृयज्ञेन आनर्ताधिपतेः स्वयम् ॥ १२ ॥ श्रुतयापि यया मर्त्यो दीर्घायुर्जायते नरः ॥ नापमृत्युमवाप्नोति कथं चित्तत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावतः ॥ १३ ॥ यो मार्कंड इति ख्यातः प्रथमं परिकीर्तितः ॥ संभूतिस्तस्य संप्रोक्ता युष्माकं पापनाशिनी ॥ १४ ॥ इंद्रद्युम्नं प्रवक्ष्यामि
सांप्रतं मुनिसत्तमाः ॥ यद्वंशो यत्प्रभावश्च सर्वभूपालमानितः ॥ १५ ॥ इंद्रद्युम्नो महीपाल आसीत्पूर्वं द्विजोत्तमाः ॥ ब्राह्मण्यश्च शरण्यश्च साधु
लोकप्रपालकः ॥ यज्वा दानपतिर्दक्षः सर्वभूतहिते रतः ॥ १६ ॥ न दुर्भिक्षं न च व्याधिर्न च चौरकृतं भयम् ॥ तस्मिञ्छासति धर्मज्ञे आसीद्धो
कस्य कस्यचित् ॥ १७ यथैव वर्षतो धारा यथा वा दिवि तारकाः ॥ गंगायां सिकता यद्वत्संख्यया परिवर्जिताः ॥ १८ ॥ तद्वत्तेन कृता यज्ञाः
सर्वे संपूर्णदक्षिणाः ॥ अग्निष्टोमोऽतिरात्रश्च उक्थः षोडशिकास्तथा ॥ १९ ॥ सौत्रामण्याऽथ पशवश्चातुर्मास्या द्विजोत्तमाः ॥ वाजपेयाश्वमेधाश्च
राजसूया विशेषतः ॥ २० ॥ पौण्डरीकास्तथैवान्ये श्रद्धापूनेन चेतसा ॥ २१ ॥ तेन दानानि दत्तानि तीर्थेषु च विशेषतः ॥ मिष्टान्नानि द्विजेंद्राणां
दक्षिणासहितानि च ॥ २२ ॥ न तदस्ति धरापृष्ठे नगरं पत्तनं तथा ॥ तीर्थं वा यत्र नो तस्य विद्यते त्रिदशालयः[1] ॥ २३ ॥ तेन कन्यासह
स्राणि अच्युतान्यर्बुदानि च ॥ ब्राह्मणेभ्यः प्रदत्तानि ब्राह्मणानां[2] धनार्थिनाम् ॥ २४ ॥ दशमीदिवसे तस्य रात्रौ च गजपृष्ठिगः ॥ दुन्दुभिस्ताड्य
मानस्तु बभ्राम सकलं पुरम् ॥ २५ ॥ प्रत्यूषे वैष्णवं भावि पापहारि च वासरम् ॥ उपवासः प्रकर्तव्यो मुक्त्वा वृद्धं च बालकम् ॥ अन्यथा
निग्रहिष्यामि भोजनं यः करिष्यति ॥ २६ ॥ इंद्रद्युम्नः स राजर्षिस्तदा विष्णोः प्रसादतः ॥ तेनैव स्वशरीरेण ब्रह्मलोकं तदा गतः ॥ २७ ॥ तत्र
कल्पसहस्रांते स प्रोक्तो ब्रह्मणा स्वयम् ॥ इंद्रद्युम्न धरां गच्छ न स्थातव्यं त्वयाऽधुना ॥ २८ ॥ ॥ इंद्रद्युम्न[3] उवाच ॥ ॥ कस्माच्च्यावयसे ब्रह्म
न्निजलोकाद्धुतं हि माम् ॥ अपापमपि देवेश तथा मे वद कारणम् ॥ २९ ॥ ॥ श्रीब्रह्मोवाच ॥ ॥ तव कीर्तिसमुच्छेदः संजातोऽद्य धरातले ॥
यावत्कीर्तिर्धरापृष्ठे तावत्स्वर्गे वसेन्नरः ॥ ३० ॥ एतस्मात्कारणाल्लोकाः स्वनामांकानि चक्रिरे ॥ वापीकूपतडागानि देवतायतनानि च ॥ ३१ ॥
तस्माद्गच्छ धरापृष्ठं स्वां कीर्तिं नूतनां कुरु ॥ यदि वांछसि लोकेऽस्मिन्मामके वसतिं चिरम् ॥ ३२ ॥ अथात्मानं स राजेंद्रो यावत्पश्यति तत्क्ष
णात् ॥ तावत्प्राप्तं धरापृष्ठे कांपिल्यनगरं प्रति ॥ ३३ ॥ अथ पप्रच्छ लोकान्स किमेतन्नगरं स्मृतम् ॥ कोऽयं देशः कोऽत्र राजा किं पुरं नगरं च

१ त्रिदशालयः— देवमन्दिरम्—इत्यर्थः । २ ब्राह्मणानां धनार्थिनाम्—कन्यासहस्राणि—विवाहकार्योपयुक्तविपुलद्रव्यदानसाहाय्यपूर्वकं ब्राह्मणेभ्यः प्रदत्तानि सद्रव्येण ब्राह्मणद्वारा ब्राह्मणेभ्यः कन्यादानसहस्राणि कारितानि इत्यर्थः । ३ एतस्येन्द्रद्युम्नस्याख्यानं पूर्वं माहेश्वरखण्डान्तर्गते धर्मारण्यखण्डे वैष्णवखण्डान्तर्गते पुरुषोत्तमक्षेत्रमाहात्म्येऽपि चागतम्। तत्रात्र च किंचित्कथावैचित्र्यमात्रम् । चरित्रांशस्तु समान एव प्रतिभाति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



किम् ॥ ३४ ॥ ते तमूचुः परं चैतत्कांपिल्यमिति विश्रुतम् ॥ आनर्तनामा देशोऽयं राजात्र पृथिवीजयः ॥ ३५ ॥ को भवान्किमिहायातः किं
चित्कार्यं वदस्व नः ॥ ३६ ॥ ॥ इंद्रद्युम्न उवाच ॥ ॥ इंद्रद्युम्नो महीपालः पुरासीद्रोचके पुरे ॥ देशे वैजरुके पूर्वं स देशः क्व च तत्पुरम् ॥
॥ ३७ ॥ ॥ जना ऊचुः ॥ ॥ न वयं तत्पुरं विद्मो न देशं न च भूपतिम् ॥ इन्द्रद्युम्नाभिधानं च यं त्वं पृच्छसि भद्रक ॥ ३८ ॥ ॥ इंद्र
द्युम्न उवाच ॥ ॥ चिरायुरस्ति कोऽप्यत्र यस्तं वेत्ति महीपतिम् ॥ देशं वा तत्पुरं वापि तन्मे वदथ मा चिरम् ॥ ३९ ॥ ॥ जना ऊचुः ॥ ॥
सप्तकल्पस्मरो नाम मार्कंडेयो महामुनिः ॥ श्रूयते नैमिषारण्ये तं गत्वा पृच्छ वेत्स्यसि ॥ ४० ॥ अथासौ सत्वरं गत्वा व्योममार्गेण तं मुनिम् ॥
पप्रच्छ प्रणिपत्योच्चैर्नैमिषारण्यमाश्रितम् ॥ ४१ ॥ इंद्रद्युम्नेति वै भूपस्त्वया दृष्टः श्रुतोऽथ वा ॥ चिरायुस्त्वं श्रुतोऽस्माभिः पृच्छामस्तेन सन्मुने
॥ ४२ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ सप्तकल्पांतरे भूपो न दृष्टो न मया श्रुतः ॥ इंद्रद्युम्नाभिधानोऽत्र तत्र किं नु वदामि ते ॥४३॥ तस्य तद्वचनं
श्रुत्वा निराशः स महीपतिः ॥ वैराग्यं परमं गत्वा मरणे कृतनिश्चयः ॥ ४४ ॥ तेन चानीय दारूणि प्रज्वाल्य च हुताशनम् ॥ प्रवेष्टुकामः स
प्रोक्त इन्द्रद्युम्नो महीपतिः ॥ ४५ ॥ त्वया चात्र न कर्तव्यमहं ते मित्रतां गतः ॥ नाशयिष्यामि ते मृत्युं यद्यपि स्यान्महत्तरम् ॥ ४६ ॥ नीरो
गोऽसि सुभव्योऽसि कस्मान्मृत्युं प्रवांछसि ॥ वद मे कारणं मृत्योः प्रतीकारं करोमि ते ॥ ४७ ॥ ॥ इंद्रद्युम्न उवाच ॥ ॥ चिरायुर्मे भवा
न्प्रोक्तः कांपिल्यपुरवासिभिः ॥ तेनाहं तव पार्श्वेऽत्र समायातो महामुने ॥ ४८ ॥ इंद्रद्युम्नोद्भवां वार्तां त्वं वदिष्यसि सन्मुने ॥ मत्कीर्तिर्न
परिज्ञाता ततो मृत्युं व्रजाम्यहम् ॥ ४९ ॥ ॥ सूत उवाच ॥ ॥ तस्य तं निश्चयं ज्ञात्वा दयावान्स मुनीश्वरः ॥ वृथाश्रमं च तं ज्ञात्वा
दाक्षिण्यादिदमब्रवीत् ॥ ५० ॥ यद्येवं मा विशाग्निं त्वमहं ज्ञास्यामि तं नृपम् ॥ नाडीजंघो बको नाम ममास्ति परमः सुहृत् ॥ ५१ ॥
चिरंतनश्च सोऽस्माकं नूनं ज्ञास्यति तं नृपम् ॥ तस्मादागच्छ गच्छावस्तस्य पार्श्वे हिमाचले ॥ ५२ ॥ साधूनां दर्शनं जातु न वृथा
जायते क्वचित् ॥ ५३ ॥ एवमुक्त्वा ततस्तौ तु प्रस्थितौ मुनिपार्थिवौ ॥ व्योममार्गेण संतुष्टौ बकं प्रति हिमाचले ॥ ५४ ॥ बकोऽपि
तं समालोक्य मार्कण्डेयं समागतम् ॥ संमुखः प्रययौ तुष्टः स्वागतेनाभ्यपूजयत् ॥ ५५ ॥ धन्योऽहं कृतपुण्योऽहं यस्य मे त्वत्समागमः ॥ ॥३०६॥

१ राजके- इ० पा० । २ तेन-मार्कण्डेन । तथा च-स इंद्रद्युम्नो महीपतिः दारूणि आनीय हुताशनं च प्रज्वाल्य तस्मिन्प्रवेष्टुकामः-( यदा जातः-तदा ) तेन-मार्कण्डेयेन ( वक्ष्यमाणवचनम् )
प्रोक्तः इत्यन्वययोजना । ३ मरणम्-इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भोभो ब्रह्मविदां श्रेष्ठ आतिथ्यं ते करोमि किम् ॥ ५६ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ मत्तोपि त्वं चिरायुश्च यतो मित्रं व्यवस्थितः ॥ इन्द्रद्युम्नो महीपालस्त्वया दृष्टः श्रुतोऽथवा ॥ ५७ ॥ एतस्य मम मित्रस्य तेन दृष्टेन कारणम् ॥ अन्यथा जायते मृत्युस्ततोऽहं त्वां समागतः ॥ ५८ ॥ ॥ ॥ बक उवाच ॥ ॥ सप्तद्विगुणितान्कल्पान्स्मराम्यहमसंशयम् ॥ न स्मरामि कथामेव इंद्रद्युम्नसमुद्भवाम् ॥ ५९ ॥ आस्तां हि दर्शनं तावत्सत्यमेतन्मयोदितम् ॥ ६० ॥ ॥ इंद्रद्युम्न उवाच ॥ ॥ तपसः किं प्रभावोऽयं दानस्य नियमस्य च ॥ यदायुरीदृशं जातं बकत्वेऽपि वदस्व नः ॥ ६१ ॥ ॥ बक उवाच ॥ ॥ घृतकंबलमाहात्म्याद्देवदेवस्य शूलिनः ॥ ममायुरीदृशं जातं बकत्वं मुनिशापतः ॥ ६२ ॥ अहमासं पुरा बालो ब्राह्मणस्य निवेशने ॥ चत्कारपुरे रम्ये पाराशर्यस्य धीमतः ॥ ६३ ॥ नाम्ना च विश्वरूपाख्यो नाम्ना ऽन्येन बक स्मृतः ॥ अतीव चपलत्वेन संयुक्तः पितृवल्लभः ॥ ६४ ॥ कस्यचित्त्वथ कालस्य संक्रांतौ मकरस्य भोः ॥ संप्राप्यातीव चापल्याल्लिंगं जागेश्वरं मया ॥ घृतकुम्भे परिक्षितं पूजितं जनकेन यत् ॥ ६५ ॥ अथ रात्र्यां व्यतीतायां पृष्टोऽहं जनकेन च ॥ त्वया पुत्र परिक्षितं नूनं जागेश्वरं क्वचित् ॥ तस्माद्वद प्रयच्छामि तेन ते भक्ष्यमुत्तमम् ॥ ६६ ॥ ततो मयाज्यकुम्भाच्च तस्मादादाय सत्वरम् ॥ भक्ष्यलौल्यात्पितुर्हस्ते विन्यस्तं घृतसंप्लुतम् ॥ ६७ ॥ कस्यचित्त्वथ कालस्य पंचत्वं च समागतः ॥ जातिस्मरस्ततो जातस्तत्प्रभावान्नृपालये ॥ ६८ ॥ आनर्ताधिपतेर्हर्म्ये नाम्ना ख्यातस्त्वहं बकः ॥ चमत्कारपुरे देवो हरः संस्थापितो मया ॥ ६९ ॥ तत्प्रभावेण विप्रेंद्र प्राप्तः पैतामहं पदम् ॥ ७० ॥ ततो यानि धरापृष्ठे सुलिंगानि स्थितानि च ॥ घृतेनच्छादयाम्येव मकरस्थे दिवाकरे ॥ मया यत्स्थापितं लिंगं चमत्कारपुरे शुभम् ॥ ७१ ॥ आराधितं दिवा नक्तं राज्ये संस्थाप्य पुत्रकम् ॥ नियोज्य सर्वतो भृत्यान्धनवस्त्रसमन्वितान् ॥ ७२ ॥ ततः कालेन महता तुष्टो मे भगवाञ्छिवः ॥ मत्समीपं समासाद्य वाक्यमेतदुवाच सः ॥ ७३ ॥ परितुष्टोऽस्मि भद्रं ते तव पार्थिवसत्तम ॥ घृतकंबलदानेन संख्यया रहितेन च ॥ ७४ ॥ तस्माद्वरय भद्रं ते वरं यन्मनसि स्थितम् ॥ अदेयमपि दास्यामि यद्यपि स्यात्सुदुर्लभम् ॥ ७५ ॥ ततो मया हरः प्रोक्तो यदि तुष्टोऽसि मे प्रभो ॥ कुरुष्व मां गणं देव नान्यत्किंचिद्वृणोम्यहम् ॥ ७६ ॥ ॥ श्रीभगवानुवाच ॥ ॥ बकैहि त्वं महाभाग कैलासं पर्वतोत्तमम् ॥ मया सार्धमनेनैव शरीरेण गणो भव ॥ ७७ ॥ अन्योऽपि मर्त्यलोकेत्र यः करिष्यति मानवः ॥ मकरस्थे रवौ मह्यं संक्रांतौ रजनीमुखे ॥ स नूनं

१ करोम्यहम्–इ० पा० । २ तेनहम्–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



मद्गणो भावी सक्रुत्कृत्वाऽथ कंबलम् ॥ ७८ ॥ त्वं पुनर्मामकं लिंगं समं कुर्वन्भविष्यसि ॥ धर्मसेनेति विख्यातो विकृत्या परिवर्जितः ॥ ७९ ॥
एवमुक्त्वा स भगवान्मामादाय ततः परम् ॥ कैलासं पर्वतं गत्वा गणकोटीशतामदात् ॥ ८० ॥ कस्यचित्त्वथ कालस्य भ्रममाणो यदृच्छया ॥
गतोऽहं पर्वतश्रेष्ठं हिमवंतं महागिरिम् ॥ ८१ ॥ यत्रास्ते गालवो नाम सदैव तपसि स्थितः ॥ तस्य भार्या विशालाक्षी सर्वलक्षणलक्षिता ॥
॥ ८२ ॥ सप्तरक्ता त्रिगंभीरा गूढगुल्फा कृशोदरी ॥ तां दृष्ट्वा मन्मथाविष्टः संजातोऽहं मुनीश्वर ॥ ८३ ॥ चिंतितं च मया चित्ते कथमेतां हरा
म्यहम् ॥ तस्माच्छिष्यत्वमासाद्य भक्तिमस्य करोम्यहम् ॥ ८४ ॥ शुश्रूषानिरतो भूत्वा येन प्राप्नोमि भामिनीम् ॥ ८५ ॥ ततो बटुकरूपेण संप्रा
तो गालवो मया ॥ संसारस्य विरक्तोऽहं करिष्यामि महत्तपः ॥ ८६ ॥ दीक्षां यच्छ विभो मह्यं येन शिष्यो भवामि ते ॥ ८७ ॥ आहरिष्याम्यहं
दर्भांस्तथा सुमनसः सदा ॥ समिधश्च सदैवाहं फलानि जलमेव च ॥ ८८ ॥ स मां विनयसंपन्नं ज्ञात्वा ब्राह्मणरूपिणम् ॥ ददौ दीक्षां ततो
मह्यं शास्त्रदृष्टेन कर्मणा ॥ ८९ ॥ अथ दीक्षां समासाद्य तोषयामि दिनेदिने ॥ तं चैव तस्य पत्नीं तां यथोक्तपरिचर्यया ॥ अशुद्धेनापि चित्तेन
छिद्रान्वेषणतत्परः ॥ ९० ॥ अन्यस्मिन्दिवसे प्राप्ते सा स्त्रीधर्मसमन्विता[2] ॥ उटजं दूरतस्त्यक्त्वा रात्रौ सुप्ता मनस्विनी ॥ ९१ ॥ सोऽहं रूपं महत्कृ
त्वा तामादाय तपस्विनीम् ॥ सुखसुप्तां सुविश्रब्धां प्रस्थितो दक्षिणामुखः ॥९२॥ अथासौ संपरित्यक्ता संस्पर्शान्मम निद्रया ॥ चौररूपं परिज्ञाय
मां शिष्यं प्ररुरोद ह ॥ ९३ ॥ साब्रवीच्च स्वभर्तारं गालवं मुनिसत्तमम् ॥ एष शिष्यो दुराचारो हरते मामितः प्रभो ॥ ९४ ॥ तस्माद्रक्ष महाभाग
यावद्दूरं न गच्छति ॥ ९५ ॥ तच्छ्रुत्वा गालवः प्राह तिष्ठतिष्ठेति चासकृत् ॥ पापाचार सुदुष्टात्मन्गतिस्ते स्तंभिता मया ॥ ९६ ॥ तस्य वाक्या
त्ततो मह्यं गतिस्तंभो व्यजायत ॥ यद्वल्लिखित एवाहं प्रतिष्ठामि सुनिश्चलः ॥ ९७ ॥ ततस्तेन च शप्तोऽहं गालवेन महात्मना ॥ वंचितोऽहं त्वया
यस्माद्बको भव सुदुर्मते ॥ ९८ ॥ ततः पश्यामि चात्मानं सहसा बकरूपिणम् ॥ बकत्वेऽपि न मे नष्टा या स्मृतिः पूर्वसंभवा ॥ ९९ ॥ ततः
साऽपि च तत्पत्नी सचैलं स्नानमाश्रिता ॥ मत्स्पर्शाद्दुःखितांगी च शापाय समुपस्थिता ॥१००॥ यस्मात्पाप त्वया स्पृष्टा प्रसुप्ताहं रजस्वला ॥
बकधर्मं समाश्रित्य भर्त्ता मे वंचितस्त्वया ॥ अन्यरूपं समास्थाय तस्मात्सत्यं बको भव ॥ १०१ ॥ एवं शप्तस्ततो द्वाभ्यां ताभ्यां वै दुःखसंयुतः ॥
चरणाभ्यां प्रलग्नस्तु गालवस्य महात्मनः ॥ १०२ ॥ गणोऽहं देवदेवस्य त्रिनेत्रस्य महात्मनः ॥ पालकेति च विख्यातो गणकोटिप्रभुः स्थि

१ रममाणः—इ० पा० । २ स्त्रीधर्मसमन्विता—रजस्वला जाता—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तः ॥ १०३ ॥ सोऽहमत्र समायातः प्रभोः कार्येण केनचित् ॥ तव भार्यां समालोक्य कामदेववशं गतः ॥ १०४ ॥ क्षमापराधं त्वं मह्यमेवं
ज्ञात्वा मुनीश्वर ॥ दुर्विनीतः श्रियं प्राप्य विद्यामैश्वर्यमेव च ॥ १०५ ॥ न तिष्ठति चिरं स्थाने यथाहं मदगर्वितः ॥ शिष्यरूपं समास्थाय ततः
प्राप्तस्तवांतिकम् ॥ १०६ ॥ अस्या हरणहेतोश्च महासत्या मुनीश्वर ॥ तस्मात्कुरु प्रसादं मे दीनस्य प्रणतस्य च ॥ १०७ ॥
अनुग्रहप्रदानेन क्षमा यस्मात्तपस्विनाम् ॥ कोकिलानां स्वरो रूपं नारीरूपं पतिव्रता ॥ विद्या रूपं कुरूपाणां क्षमा रूपं तपस्विनाम् ॥
॥ १०८ ॥ ॥ सूत उवाच ॥ ॥ तस्य तत्[3]कृपणं श्रुत्वा सोपि माहेश्वरो मुनिः ॥ ज्ञात्वा तं बांधवस्थाने दयां कृत्वाऽब्रवीद्वचः ॥ १०९ ॥ सत्य
वाक्तिष्ठते विप्रश्चमत्कारपुरे शुभे ॥ ११० ॥ भर्तृयज्ञ इति ख्यातस्तदा तस्योपदेशतः ॥ बकत्वं यास्यते नूनं मम वाक्यादसंशयम् ॥ १११ ॥
ततः पश्यामि चात्मानं बकत्वेन समाश्रितम् ॥ ११२ ॥ एवं मे दीर्घमायुष्यं संजातं शिवभक्तितः ॥ घृतकम्बलमाहात्म्याद्बकत्वं मुनिशापतः ॥
॥ ११३ ॥ ॥ इंद्रद्युम्न उवाच ॥ ॥ एतदर्थं समानीतस्त्वत्सकाशं विहंगम ॥ इंद्रद्युम्नस्य वार्तार्थं मरणे कृतनिश्चयः ॥ ११४ ॥ सा त्वया नैव
विज्ञाता ममाभाग्यैर्विहंगम ॥ सेवयिष्याम्यहं तस्मात्प्रदीप्तं हव्यवाहनम् ॥ ११५ ॥ प्रतिज्ञातं मया पूर्वमेतन्निश्चित्य चेतसि ॥ इंद्रद्युम्ने ह्यविज्ञाते
संसेव्यः पावको मया ॥ ११६ ॥ तस्माद्देहि ममादेशं मार्कंडेयसमन्वितः ॥ प्रविशामि यथा वह्निं भ्रष्टकीर्तिरहं बक ॥ ११७ ॥ ॥ मार्कंडेय
उवाच ॥ ॥ वेत्सि चान्यं नरं कश्चिद्वयसा चात्मनोऽधिकम् ॥ पृच्छामि येन तं गत्वा कृते ह्यस्य महात्मनः ॥ ११८ ॥ श्रद्धया परया युक्तः
संप्राप्तोऽयं मया सह ॥ तत्कथं त्यजति प्राणान्सहाये मयि संस्थिते ॥ ११९ ॥ अपरं च क्षमं वाक्यं यत्त्वां वच्मि विहंगम ॥ अयं दुःखेन संयुक्तः
साधयिष्यति पावकम् ॥ अहमेनमनुद्धृत्य कस्माद्गच्छामि चाश्रमम् ॥ १२० ॥ ॥ सूत उवाच ॥ ॥ तयोस्तं निश्चयं ज्ञात्वा बकः परमदु
र्मनाः ॥ सुचिरं चिंतयामास कथं स्यादेतयोः सुखम् ॥ १२१ ॥ ततो राजा मुनिश्चैव दारूण्याहृत्य पावकम् ॥ प्रवेष्टुकामौ तौ दृष्ट्वा बको वचनम
ब्रवीत् ॥ १२२ ॥ मम वाक्यं कुरु प्राँज्ञ यदि जीवितुमिच्छसि ॥ ज्ञातः सोऽद्य मया व्यक्तमिन्द्रद्युम्नं नराधिपम् ॥ १२३ ॥ यो ज्ञास्यति मम
ज्येष्ठः सर्वशास्त्रविचक्षणः ॥ तत्त्वमेनं समादाय मरणे कृतनिश्चयम् ॥ १२४ ॥ निश्वसन्तं यथा नागं बाष्पव्याकुललोचनम् ॥ समागच्छ मया
सार्धं कैलासं पर्वतं प्रति ॥ १२५ ॥ यत्रास्ति दयितो मह्यंमुलूकश्चिरजीवभाक् ॥ स नूनं ज्ञास्यते तं हि मा वृथा मरणं कृथाः ॥१२६॥ ततोऽसौ

१ मह्यम्--मम-इत्यर्थः । २ कृपणस्य--इ०पा० । ३ कृपणम्--सुदीनम्--इत्यर्थः । वचनम्--इति शेषः । ४ प्राज्ञ--हे मार्कण्डेय--इत्यर्थः । ५ मह्यम्--मम--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तेन संयुक्तो बकेन सुमहात्मना ॥ मार्कंडेयेन संप्राप्तः कैलासं पर्वतोत्तमम् ॥ १२७ ॥ सोऽपि दृष्ट्वा बकं प्राप्तं मित्रं परमसंमतम् ॥ समागच्छदसौ हृष्टः स्वागतेनाभ्यनन्दयत् ॥ १२८ ॥ अथ तं चैव विश्रान्तं समालिङ्ग्य मुहुर्मुहुः ॥ प्राकारवर्णनामासौ वाक्यमेतदुवाच ह ॥ १२९ ॥ स्वागतं ते द्विजश्रेष्ठ भूप सुस्वागतं च ते ॥ सख्येऽद्य यच्च ते कार्यं वदागमनकारणम् ॥ १३० ॥ कावेतौ पुरुषौ प्राप्तौ त्वया सार्धं ममांतिकम् ॥ दिव्यरूपौ महाभागौ तेजसा परिवारितौ ॥ १३१ ॥ ॥ बक उवाच ॥ ॥ एष मार्कंडसंज्ञोऽत्र प्रसिद्धो भुवनत्रये ॥ महेश्वरप्रसादेन संसिद्धिं परमां गतः ॥ द्वितीयोऽसौ सुहृच्चास्य कश्चिन्नो वेद्मि तत्त्वतः ॥ मार्कंडेन समायातः सुहृदा च ममांतिकम् ॥ १३२ ॥ इन्द्रद्युम्नं प्रष्टुकामो न विज्ञातो मया सखे ॥ ॥ १३३ ॥ ततो वैराग्यमापन्नो वांछमानो हुताशनम् ॥ तद्वार्तार्थं समानीतो मयात्रैव विहंगम ॥ १३४ ॥ यदि जानासि तं भूपमिन्द्रद्युम्नं महामते ॥ तत्त्वं कीर्तय येनासौ मरणाद्विनिवर्तते ॥१३५॥ चिरायुस्त्वं मया ज्ञातो ह्यतः प्राप्तोऽस्मि तेंऽतिकम् ॥ १३६ ॥ ॥ उलूक उवाच ॥ ॥ अष्टाविंशत्प्रमाणेन कल्पा जातस्य मे स्थिताः ॥ न दृष्टो न श्रुतः कश्चिदिंद्रद्युम्नो महीपतिः[1] ॥ १३७ ॥ ॥ इंद्रद्युम्न उवाच ॥ ॥ तव कस्मादुलूकत्वं शीघ्रं तन्मे प्रकीर्तय ॥ एतन्मे कौतुकं भावि यत्ते ह्यायुरनन्तकम् ॥ उलूकत्वं च संजातं रौद्रं लोकविगर्हितम् ॥ १३८ ॥ ॥ ॥ उलूक उवाच ॥ ॥ शृणु तेऽहं प्रवक्ष्यामि दीर्घायुर्मे यथा स्थितम् ॥ महेश्वरप्रसादेन बिल्वपत्रार्चनान्मया ॥ उलूकत्वं मयाप्राप्तं भृगोः शापान्महात्मनः ॥ १३९ ॥ अहमासं पुरा विप्रः सर्वविद्यासु पारगः ॥ चमत्कारपुरे श्रेष्ठे नाम्ना ख्यातस्तु घंटकः ॥ ब्रह्मचारी दमोपेतो हरपूजार्चने रतः ॥ १४० ॥ अखंडितैर्बिल्वपत्रैरग्रजातैस्त्रिपत्रकैः ॥ त्रिकालं पूजितः शंभुर्लक्षमात्रैः सदा मया ॥ १४१ ॥ ततो वर्षसहस्रांते तुष्टो मे भगवान्हरः ॥ प्रोवाच दर्शनं गत्वा मेघगंभीरया गिरा ॥ १४२ ॥ अहं तुष्टोऽस्मि ते वत्स वरं वरय सुव्रत ॥ अखंडितैर्बिल्वपत्रैस्त्रिकाले यत्त्वयार्चितः ॥ १४३ ॥ बिल्वस्य प्रसवाग्रेण त्रिपत्रेण प्रजायते ॥ एकेनापि यथा तुष्टिस्तथान्येषां न कोटिभिः ॥ १४४ ॥ पुष्पाणामपि भद्रं ते सुगंधानामपि ध्रुवम् ॥ सखे मया प्रणम्योच्चैः स प्रोक्तः शशिशेखरः ॥ १४५ ॥ यदि तुष्टोसि मे देव यदि देयो वरो मम ॥ तन्मां कुरु जगन्नाथ जरामरणवर्जितम् ॥ १४६ ॥ स तथेति प्रतिज्ञाय महादेवो महेश्वरः ॥ कैलासं प्रति देवेशः क्षणाच्चादर्शनं गतः ॥ १४७ ॥ ततोहं परितुष्टोथ वरं प्राप्य महेश्वरात् ॥ कृतकृत्यमिवात्मानं चिंतयामि प्रहर्षितः ॥ १४८ ॥ एतस्मिन्नेव काले तु भार्गवो मुनिसत्तमः ॥ कुशलः सर्वशास्त्रेषु वेदवेदांग



१ महिपतिम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पारगः ॥ १४९ ॥ तस्य भार्याऽभवत्साध्वी नाम्ना ख्याता सुदर्शना ॥ प्राणेभ्योऽपि प्रिया तस्य गालवस्य मुनेः सुता ॥ १५० ॥ तस्य कन्या समभवद्रूपेणाप्रतिमा भुवि ॥ सा मया सहसा दृष्टा क्रीडमाना यथेच्छया ॥ १५१ ॥ मध्यक्षामा सुकेशी च बिंबोष्ठी दीर्घलोचना ॥ तामहं वीक्ष यित्वा तु कामदेववशं गतः ॥ १५२ ॥ ततः पृष्टा मया कस्य कन्येयं चारुलोचना ॥ विभक्तसर्वावयवा देवकन्येव राजते ॥ १५३ ॥ सखीभिः कीर्तिता मह्यं भार्गवस्य मुनेः सुता ॥ एषा चाद्यापि कन्यात्वे वर्तते चारुहासिनी ॥ १५४ ॥ ततोऽहं भार्गवं गत्वा विनयेन समन्वितः ॥ ययाचे कन्यकां तां च कृतांजलिपुटः स्थितः ॥१५५॥ सवर्णं मां परिज्ञाय सोऽपि भार्गवनंदनः ॥ दत्तवांस्तां महाभाग विरूपस्यापि कन्यकाम् ॥१५६॥ अथ सा कन्यका ज्ञात्वा पित्रा दत्तास्मि धर्मतः ॥ विरूपाय ततो गत्वा मातरं वाक्यमब्रवीत् ॥ १५७ ॥ सलज्जा साऽतिदुःखार्ता पश्यांब जनके न च ॥ विरूपाय प्रदत्तास्मि नाहं जीवितुमुत्सहे ॥ १५८ ॥ विषं वा भक्षयिष्यामि प्रवेक्ष्यामि हुताशनम् ॥ तस्यास्तद्वचनं श्रुत्वा निषिद्धः स द्विजस्तया ॥ १५९ ॥ कस्मान्नाथ प्रदत्तासौ विरूपाय त्वया विभो ॥ कन्यकेयं सुरूपाढ्या सर्वलक्षणसंयुता ॥ १६० ॥ एतच्छ्रुत्वा तु वचनं भार्गवो मुनिसत्तमः ॥ ततस्तां गर्हयित्वासौ धिङ्नारी पुरुषायते ॥ १६१ ॥ अनेन प्रार्थिता कन्या मया चास्मै प्रदीयते ॥ तत्किं निषेधयसि मां दीयमानां सुतामिमाम् ॥ १६२ ॥ इत्युक्त्वा स प्रसुष्वाप पत्न्याथ कन्यया समम् ॥ १६३ ॥ ततोऽर्द्धरात्रे चागत्य मया सुप्ता च भार्गवी ॥ हृत्वा स्वभवने नीता निशि सुप्ते जने तदा ॥१६४॥ नियुक्ता कामधर्मेण ह्यनिच्छंती बलान्मया ॥ विप्रः प्रातर्जजागार पिता तस्यास्ततः परम् ॥१६५॥ क्वासौ सा दुहिता केन हृता नष्टा मदीयिका ॥ अथासौ वीक्षितुं बाह्ये बभ्राम स्ववनांतिकम् ॥ १६६ ॥ पदसंहतिमार्गेण मुनिभिर्बहुभिर्वृतः ॥ तेन दृष्टाऽथ सा कन्या कृतकौतुकमंगला ॥ १६७ ॥ रुदंती सस्वनं तत्र लज्जमाना ह्यधोमुखी ॥ ततः कोपपरीतात्मा मां प्रोवाच स भार्गवः ॥ ॥१६८॥ निशाचरस्य धर्मेण यस्मादूढा सुता मम ॥ निशाचरो भवानस्तु कर्मणानेन सांप्रतम् ॥१६९॥ ॥ घंटक उवाच ॥ ॥ निर्दोषं मां द्विज श्रेष्ठ कस्मात्त्वं शपसि द्रुतम् ॥ त्वयैषा मे स्वयं दत्ता तेन रात्रौ हृता मया ॥१७०॥ यो दत्वा कन्यकां पूर्वं पश्चाद्यच्छेन्न दुर्मतिः ॥ स याति नरकं घोरं यावदाभूतसंप्लवम् ॥१७१॥ अथासौ चिंतयामास सत्यमेतेन जल्पितम् ॥ पश्चात्तापसमोपेतो वाक्यमेतदुवाच ह ॥१७२॥ सत्यमेतत्त्वया प्रोक्तं न मे वच नमन्यथा ॥ उलूकरूपसंयुक्तो भविष्यसि न संशयः ॥ १७३ ॥ उत्पत्स्यते यदा चात्र भर्तृयज्ञो महामुनिः ॥ तस्योपदेशमासाद्य भूयः प्राप्स्यसि स्वां तनुम् ॥ १७४ ॥ ततः कौशिकरूपं तु पश्याम्यात्मानमेव च ॥ तथापि न स्मृतिर्नष्टा मम या पूर्वसंभवा ॥ १७५ ॥ अथ या तत्सुता चोढा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



मया तस्मिन्गिरौ तदा ॥ सापि मां संनिरीक्ष्याथ तद्रूपं दुःखसंयुता ॥ प्रविष्टा हव्यवाहं सा विधवात्वमनिच्छती ॥ १७६ ॥ एवं मे कौशिकत्वं
हि संजातं तु महाद्युते ॥ भार्गवस्य तु शापेन कन्यार्थे यत्तवोदितम् ॥ १७७ ॥ अखंडबिल्वपत्रेण पूजितो यन्महेश्वरः ॥ चिरायुस्तेन संजातं
सत्यमेतन्मयोदितम् ॥ १७८ ॥ सत्यं कथय यत्कृत्यं गृहायातस्य किं तव ॥ प्रकरोमि महाभाग यद्यपि स्यात्सुदुर्लभम् ॥ १७९ ॥
॥ ॥ इन्द्रद्युम्न उवाच ॥ ॥ इन्द्रद्युम्नस्य ज्ञानाय प्राप्तोऽहं यत्तवांतिकम् ॥ नाडीजंघेन चानीतो मरणे कृतनिश्चयः ॥ १८० ॥ यदि नो
ज्ञास्यति भवांस्तं कीर्त्या च कुलेन च ॥ प्रविशामि ततो नूनं प्रदीप्तं हव्यवाहनम् ॥ १८१ ॥ नो चेत्कीर्तय मे कश्चिदन्यं तु चिरजीविनम् ॥
पृच्छामि तेन तं गत्वा येन वेत्ति न वा च सः ॥ १८२ ॥ ॥ बक उवाच ॥ ॥ युक्तमुक्तमनेनाद्य तत्कुरुष्व वदास्य भोः ॥ यदि जानासि
कंचित्त्वमात्मनश्चिरजीविनम् ॥ १८३ ॥ नो चेदहमपि क्षिप्रं प्रविशामि हुताशनम् ॥ मार्कंडेनापि सहितः सांप्रतं तत्र पश्यतः ॥ १८४ ॥ एवं
ज्ञात्वा महाभाग चिन्तयस्व चिरंतनम् ॥ कंचिद्भूमितलेऽन्यत्र यतस्त्वं चिरजीवधृक् ॥ १८५ ॥ आशया परया प्राप्तस्तवाहं किल मंदिरे ॥
पुमानेष विशेषेण मार्कंडेयः प्रियो मम ॥ १८६ ॥ संत्यत्र पर्वतश्रेष्ठाः शतशोऽथ सहस्रशः ॥ येषु सन्ति महाभागास्तापसाश्चिरजीविनः ॥
नान्यथा जीवितं चास्य कथंचित्संभविष्यति ॥ १८७ ॥ इंद्रद्युम्नस्य राजर्षेर्हितं परमकं भवेत् ॥ तथावयोर्द्वयोश्चापि तस्माच्चिंतय सत्वरम् ॥
॥ १८८ ॥ तस्य तं निश्चयं ज्ञात्वा मरणार्थं महीपतेः ॥ स उलूकः कृपां गत्वा ततो वचनमब्रवीत् ॥ १८९ ॥ यद्येवं तु महाभाग मर्तुकामोऽसि
सांप्रतम् ॥ तदागच्छ मया सार्धं गन्धमादनपर्वतम् ॥ १९० ॥ तत्र संतिष्ठते गृध्रः स च मे परमः सुहृत् ॥ चिरंतनस्तथा सम्यक्स ते ज्ञास्यति
तं नृपम् ॥ कथयिष्यत्यसंदिग्धं मम वाक्यादसंशयम् ॥ १९१ ॥ तस्य तद्वचनं श्रुत्वा मार्कंडेयादिभिस्त्रिभिः ॥ प्रोक्तः सर्वैर्महाभाग मा त्वं
प्रविश पावकम् ॥ १९२ ॥ वयं यास्यामहे सर्वे त्वया सार्धं च तत्र हि ॥ कदाचित्सोऽपि जानाति इंद्रद्युम्नं महीपतिम् ॥ १९३ ॥ तेषां तद्वचनं
श्रुत्वा आशया परया युतः ॥ स राजा सह तैः सर्वैः प्रययौ गंधमादनम् ॥ १९४ ॥ गृध्रराजोऽपि तान्दृष्ट्वा सर्वानेव कृतांजलिः ॥ उलूकं पुरतो
दृष्ट्वा प्रहृष्टः सन्मुखो ययौ ॥ १९५ ॥ ततोऽब्रवीत्प्रहृष्टात्मा स्वागतं ते द्विजोत्तम ॥ चिरकालात्प्रदृष्टोऽसि क एतेऽन्येऽत्र ये स्थिताः ॥ १९६ ॥ 
॥ ॥ उलूक उवाच ॥ ॥ एष मे परमं मित्रं नाडीजंघो बकः स्मृतः ॥ एतस्यापि तु मार्कण्डः संस्थितः परमः सुहृत् ॥ १९७ ॥

१ कृपां गत्वा—चित्ते दयार्द्रः—सन्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असौ त्रैलोक्यविख्यातः सप्तकल्पस्मरो भुवि ॥ एतस्यापि सुहृत्कश्चिन्नैनं जानामि सत्वरम् ॥ १९८ ॥ म्रियमाणो मया ह्येषसमानी तस्तवांतिकम् ॥ अयं जीवति विज्ञात इंद्रद्युम्ने नरेश्वरे ॥ नो चेत्प्रविशति क्षिप्रं प्रदीप्तं हव्यवाहनम् ॥ १९९ ॥ स त्वं जानासि चेद्ब्रूहि इन्द्रद्युम्नं महीपतिम् ॥ चिरंतनो मयापि[1] त्वं तेन प्रष्टुं समागतः ॥ २०० ॥ ॥ गृध्र उवाच ॥ ॥ इन्द्रद्युम्नेति विख्यातं राजानं न स्मराम्यहम् ॥ न दृष्टो न श्रुतश्चापि इन्द्रद्युम्नो महीपतिः ॥ २०१ ॥ तस्य तद्वचनं श्रुत्वा सोऽपि राजा सुदुर्मनाः ॥ मनसा चिन्तयामास मरणे कृतनिश्चयः ॥ २०२ ॥ ततस्तु कौतुकाविष्टस्तं पप्रच्छ द्विजोत्तमम् ॥ कर्मणा केन संप्राप्तमायुष्यं चेदृशं वद ॥ ॥ २०३ ॥ ततः संभावयिष्यामि श्रुत्वा तेऽहं विभावसुम् ॥ २०४ ॥ ॥ गृध्र उवाच ॥ ॥ अहमासं चमत्कारपुरे मर्कटकः किल ॥ उपत्यकायां तत्रैव रक्तशृंगस्य भूभृतः ॥ २०५ ॥ तत्रैवास्ति महच्छंभोर्मंदिरं मंदरोपमम् ॥ चित्रेश्वराभिधानं च सर्वपातकनाशनम् ॥ २०६ ॥ वसंते तत्र संप्राप्ते पौरजानपदैस्तथा ॥ आगत्य चैव सुमहानुत्सवो विहितोऽभवत् ॥ २०७ ॥ लिंगस्य सविधे रम्ये सर्वर्तुफलितद्रुमे ॥ कानने कामिनीलोककांते जनमनोहरे ॥ लिंगमारोपितं चारु तरोरांदोलके मुदा ॥ २०८ ॥ कृत्वा दमनकेनार्चां स्थाप्यांदोले सुयंत्रिते ॥ ययुस्ते स्वगृह पश्चादर्चयित्वा त्रिलोचनम् ॥ २०९ ॥ ततोऽहं रजनीवक्त्रे तां दोलां सुमनोहराम् ॥ कौतुकाविष्टहृदयो दोलयामि मुहुर्मुहुः ॥ २१० ॥ एवं संदोलयानस्य मम प्राप्ता नरास्तदा ॥ कैश्चित्तैस्त्रासितो हत्वा लगुडैः सर्वतोदिशम् ॥ २११ ॥ ततः पंचत्वमापन्नस्तत्रैवायतने द्रुतम् ॥ ततो जातिस्मरो भूत्वा संजातो नृपमंदिरे ॥ २१२ ॥ कोटीश्वरस्य विख्यातो नाम्ना चैव कुशध्वजः ॥ पितृपैतामहं राज्यं मया प्राप्तं ततः क्रमात् ॥ २१३ ॥ कोटीशे समनुप्राप्ते परलोकं स्वकर्मणा ॥ जागेश्वरं महाभागं दोलयामि यथेच्छया ॥ २१४ ॥ शिवसिद्धांतजैर्मंत्रैर्गुरुणा संनिवेदितैः ॥ ततः कालेन महता तुष्टो देवो हरो मम ॥ भवतो वरदश्चास्मि वाक्यमेतदुवाच ह ॥ २१५ ॥ कुशध्वज प्रतुष्टोऽस्मि श्रद्धया परया तव ॥ वरं वृणीष्व भद्रं ते यः सदा मनसि स्थितः ॥ २१६ ॥ ततो मया प्रणम्योच्चैः स प्रोक्तो भगवान्हरः ॥ २१७ ॥ यदि तुष्टोसि मे देव तन्मां कुरु निजं गणम् ॥ त्रैलोक्यराज्यमपि मे नान्यत्[2]संप्रति रोचते ॥ २१८ ॥ एवमुक्तो मया देवो विमाने मां निधा[3]य सः ॥ शिवलोकं महापुण्यं सहसा मां समानयत् ॥ ॥ २१९ ॥ ततः प्रसादतश्चाहं भवान्याश्च हरस्य च ॥ क्रीडामि स्वेच्छया तत्र गणमध्ये व्यवस्थितः ॥ २२० ॥ कस्यचित्त्वथ कालस्य विमानव

१ मयापि—मत्तोऽपि—इत्यर्थः। २ वान्यच्च प्रतिभाति मे—इ० पा०। ३ विधाय—इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



रमाश्रितः ॥ स्वेच्छया भ्रममाणस्तु प्राप्तोऽत्रैव महागिरौ ॥ २२१ ॥ वसंतसमये प्राप्ते प्रवृत्ते दक्षिणानिले ॥ अग्निवेश्यसुता दृष्टा विवस्त्रा जलम
ध्यगा ॥ २२२ ॥ आलिभिर्बहुभिर्युक्ता क्रीडमाना यथेच्छया ॥ मुष्टिग्राह्या तु मध्ये सा बिंबोष्ठी वारिजेक्षणा ॥ २२३ ॥ बिल्वस्तनी शशां
कास्या सर्वलक्षणलक्षिता ॥ ततोऽहं मन्मथाविष्टः समभूवं हि तत्क्षणात् ॥ २२४ ॥ अवतीर्य विमानाग्र्याद्गृहीताथ करे मया ॥ प्रकुर्वाणाथ
करुणं पक्षिणी कुररी यथा ॥ २२५ ॥ ततः कन्या मुनींद्राणां याः स्थितास्तत्र वारिणि ॥ रुदंत्यः संप्रयातास्ता अग्निवेश्यस्य संनिधौ ॥ २२६ ॥
नीयते त्वत्सुता ब्रह्मन्विमानवरमाश्रिता ॥ वैमानिकेन केनापि क्रन्दमाना निरर्गलम् ॥२२७॥ तच्छ्रुत्वा कुपितः सोऽथ व्योममार्गावलोकनः ॥
स्वाश्रमात्संप्रयातः स भर्त्समानो मुहुर्मुहुः॥२२८॥तिष्ठतिष्ठेति च प्रोच्य स्तंभयामास सर्वतः॥ तपसोग्रेण विप्रस्य विमानं मम संस्थितम् ॥२२९॥
अब्रवीच्च ततो मां स कोपेन महताऽन्वितः ॥ यस्मात्पाप त्वया कन्या क्रीडंती विहृताधुना ॥ २३० ॥ अकामा मांसपेशीव यथा गृध्रेण दुर्मते ॥
तस्माद्गृध्रो भवत्वाशु मम वाक्यादसंशयम् ॥२३१॥ एवमुक्तस्ततस्तेन लज्जयाऽहं परिप्लुतः[1] ॥ निवेद्य कन्यकां तस्मै प्रणिपत्य मुहुर्मुहुः ॥ २३२ ॥
ततः प्रोक्तो मया विप्रस्त्वग्निवेश्यो महातपाः ॥ न मया ते सुता ज्ञाता न कोपयितुमर्हसि॥२३३॥गृध्रत्वं मे यथा न स्यात्तथा कुरु मुनीश्वर ॥२३४॥
ततोऽहं तेन च प्रोक्तो न मिथ्या वचनं मम ॥ कथंचिज्जायते तस्माद्गृध्रत्वं प्रभविष्यति ॥ २३५ ॥ आनर्तस्योपदेशेन यदा यास्यसि भोऽधम ॥
भर्तृयज्ञं महाभागमुपदेशकृते तदा ॥ २३६ ॥ तस्माच्च निष्कृतिं प्राप्य गृध्रत्वं ते प्रयास्यति ॥ स मयाऽन्वेषमाणेन न दृष्टो नैव च श्रुतः ॥
निर्विण्णो गृध्रभावेन शापांतो न च मेऽभवत् ॥ २३७ ॥ गृध्र उवाच ॥ ॥ एतत्ते सर्वमाख्यातं गृध्रत्वस्य च कारणम् ॥ आयुष्यं च यथा जातं
मम संख्याविवर्जितम् ॥ २३८ ॥ इन्द्रद्युम्न उवाच ॥ ॥ अनुज्ञां देहि मे शीघ्रं प्रविशामि हुताशनम् ॥ येन वैराग्यमापन्नो न हि जीवितुमुत्सहे ॥
॥ २३९ ॥ एवमुक्तः स तेनाथ चिंतयामास चेतसि ॥ मर्मांतिकं समायात एवं मित्रसमन्वितः ॥ तत्करोमि यथाशक्त्या स्वोपकारं सुदुर्लभम् ॥
॥२४०॥ ततः प्रोवाच तं प्रीत्या दाक्षिण्यं परमं गतः ॥ मा त्वं साधय चाग्निं भोः शृणु तावद्वचो मम ॥२४१॥ अहं ते कीर्तयिष्यामि मत्तो योऽपि
चिरंतनः ॥२४२॥ यो ज्ञास्यति न संदेह इंद्रद्युम्नं महीपतिम् ॥२४२॥ तदागच्छ मया सार्धं तत्समीपं महात्मनः ॥ सहायैः सहितः सर्वैर्मया सार्धं
तथैव च ॥२४३॥ ॥ इंद्रद्युम्न उवाच ॥ ॥ कस्तवाप्यधिकोऽप्यस्ति जीवितव्येन सद्द्विज ॥ एतन्मे कौतुकं[2] भूरि तस्माद्वद महामते ॥ २४४ ॥

१ विप्लुता—इ० पा० । २ भवान्--इति शेषः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृध्र उवाच ॥ अस्ति मंथरकोनाम कमठश्चिरजीवितः ॥ मानसे सरसि ख्यात इन्द्रद्युम्नं स वेत्स्यति ॥ २४५ ॥ तस्य तद्वचनं श्रुत्वा मार्कंडाद्याश्च
ते त्रयः ॥ तमूचुः पार्थिवश्रेष्ठं मरणे कृतनिश्चयम् ॥ २४६ ॥ युक्तमुक्तं महाभाग गृध्रराजेन धीमता ॥ तत्र यास्यामहे सर्वे यत्रासौ कमठः
स्थितः ॥ २४७ ॥ अनिर्वेदः श्रियो मूलं यतः शंसंति पंडिताः ॥ नीतिशास्त्रविदः सर्वे तस्मादागच्छ गम्यताम् ॥ २४८ ॥ ॥ सूत उवाच ॥ ॥
तेषां तद्वचनं श्रुत्वा कृच्छ्रान्निर्वर्त्य पार्थिवः ॥ मरणाद्ब्राह्मणश्रेष्ठा वैराग्यं परमं गतः ॥ २४९ ॥ अथ ते प्रस्थिताः सर्वे गंधमादनपर्वतात् ॥ पंचापि
च समादिश्य मानसं सर उत्तमम् ॥ अथ प्राप्ताः क्रमेणैव गच्छमाना विहायसा ॥ २५० ॥ मानसं तत्सरो रम्यं कूर्मस्तोयाद्विनिर्गतः ॥ निदाघं
सेवमानस्तु संतिष्ठति यदृच्छया ॥ २५१ ॥ स च तांश्चतुरो दृष्ट्वा सुचिरं च निरीक्ष्य तान् ॥ परिज्ञाय ततः सर्वान्प्रनष्टः सलिलं प्रति ॥ २५२ ॥
अथ तं कौशिकः प्राह गच्छमानं पराङ्मुखम् ॥ भोभो मित्राद्य मां दृष्ट्वा संजातोऽसि पराङ्मुखः ॥ २५३ ॥ सुनीचोऽपि गृहं प्राप्तो भवेत्पूज्य
तमः सताम् ॥ २५४ ॥ अथासौ तोयमध्यस्थः शिरोमात्रं बहिर्गतः ॥ प्रत्युवाचाथ तं गृध्रं विनयाद्द्विजसत्तमाः ॥ २५५ ॥ नाहं पराङ्मुखो जात
स्त्वां दृष्ट्वाऽनंतरावुभौ॥ पंचमोऽयं समभ्येति यो युष्माकं महापुमान् ॥ २५६ ॥ भयात्तस्य प्रणष्टोऽहमिंद्रद्युम्नस्य भूपतेः ॥ अनेन तु प्रदग्धा मे
पुरा पृष्ठिर्मखाग्निना ॥ सततं यजमानेन रोचके सत्पुरोत्तमे ॥ २५७ ॥ एतदीयं पुनः स्मृत्वा भयं मे सुमहत्स्थितम् ॥ इंद्रद्युम्नस्य राजर्षेः कीर्ति
संश्रयणं[1] महत् ॥ २५८ ॥ इत्येवमुक्ते वचने कमठेन तदा दिवः ॥ देवदूतः समागच्छच्छासनात्परमेष्ठिनः ॥ २५९ ॥ ॥ देवदूत उवाच ॥ ॥
आगच्छागच्छ राजर्षे सांप्रतं ब्रह्मणोंऽतिकम् ॥ उक्तोऽहं ब्रह्मणा राजन्कीर्तिश्चास्य पृथग्विधा ॥ २६० ॥ यदा प्रकाशतां याति स्वल्पापि जगती
तले ॥ तदाऽऽनेयो द्रुतं राजा मम लोके सुदुर्लभे ॥ २६१ ॥ तस्मादागच्छ गच्छामो विमानारोहणं कुरु ॥ नयामि येन तत्पार्श्वं
ब्रह्मणोऽव्यक्तजन्मनः ॥ २६२ ॥ ॥ इंद्रद्युम्न उवाच ॥ ॥ यद्येते सुहृदो मह्यं बककौशिककच्छपाः ॥ मार्कंडेयेन सहिता आगच्छंति
मया सह ॥ २६३ ॥ आगच्छामि त्वया सार्धं तदहं ब्रह्मणोंऽतिकम् ॥ अन्यथा नागमिष्यामि सत्यमेतन्मयोदितम् ॥ २६४ ॥
॥ ॥ देवदूत उवाच ॥ ॥ एते हरगणाः सर्वे शापभ्रष्टाः क्षितिं गताः ॥ शापांते हरपार्श्वे तु भूयो यास्यंत्यसंशयम् ॥२६५॥ तस्मादागच्छ गच्छामो
मुक्त्वैतान्द्रुतं नृप ॥ न चैषां रोचते स्वर्गो मुक्त्वा देवं महेश्वरम् ॥ २६६ ॥ ॥ इंद्रद्युम्न उवाच ॥ ॥ यद्येवं गच्छ ते भद्रं नाहं गंता त्रिवि

१ कीर्तिसंश्रवणम्—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ष्टपम् ॥ तथातथा यतिष्यामि भविष्यामि यथा गणः ॥ २६७ ॥ तत्रस्थस्य ध्रुवं भावि नित्यं च पतनाद्भयम् ॥ एवमुक्तः स तेनाथ समादाय विमानकम् ॥ २६८ ॥ ब्रह्मलोकं गतो दूतो वैलक्ष्यं परमं गतः ॥ इंद्रद्युम्नोपि प्रपच्छ तं कूर्मं विनयान्वितः ॥ २६९ ॥ आख्याहि कूर्म स्वं कर्म यदीदृक्त्वं चिरंतनः ॥ कर्मणा केन तत्प्राप्तं कूर्मत्वं शंस मे द्रुतम् ॥ २७० ॥ ॥ कूर्म उवाच ॥ ॥ अहमासं पुरा विप्रो बालभावे व्यवस्थितः॥ चमत्कारपुरे रम्ये शांडिल्यो नाम विश्रुतः ॥ २७१ ॥ बालक्रीडासु सर्वासु क्रीडमानो यदृच्छया ॥ पक्केष्टिकमयं शंभोः क्रीडता निर्मितं गृहम् ॥ तत्र जागेश्वरं लिंगं हृत्वाऽथ विनिवेशितम् ॥ २७२ ॥ ततोऽहं भक्तिसंयुक्तः पूजयामि दिनेदिने ॥ क्रीडमानो विना मंत्रैः शिशुभिः परिवारितः ॥ २७३ ॥ कस्यचित्त्वथ कालस्य मरणे समुपस्थिते ॥ जातिस्मरो ह्यहं विप्रो जातो वै वैदिशे पुरे ॥ २७४ ॥ ततो मेऽभ्यधिका जाता भक्तिर्देवं हरं प्रति ॥ कृत्वा भिक्षाटनं नित्यं याचयित्वा धनं बहु ॥ २७५ ॥ कृत्वा प्रासादमात्रं तु लिंगं संस्थापितं मया ॥ पूजयामि ततो भक्त्या देवं पशुपतिं हरम् ॥ २७६ ॥ ब्रह्मविद्यासमोपेतो भिक्षान्नकृतभोजनः ॥ ब्रह्मचर्यसमोपेतस्त्रिकालं च जपञ्छिवम् ॥ २७७ ॥ ततस्तेन प्रभावेन संजातोऽहं भवांतरे ॥ सार्वभौमो महीपालो जातिस्मरणसंयुतः ॥ २७८ ॥ ततः संख्याविहीनाश्च प्रासादाः कारिता मया ॥ त्रिनेत्रस्य महाराज कैलासशिखरोपमाः ॥२७९॥ तथा निरूपिता पूजा बहुपुष्पसमुद्भवा[1] ॥ नान्यत्किंचित्करोम्यत्र धर्मं दानादिकं नृप ॥ २८० ॥ ततः कालेन महता तुष्टो मे शशिशेखरः ॥ ततः प्रोवाच राजर्षे प्रहसञ्छ्लक्ष्णया गिरा ॥ २८१ ॥ जयदत्त प्रतुष्टोऽस्मि तव पार्थिवसत्तम ॥ भक्त्याऽनया द्रुतं ब्रूहि किं ते यच्छामि वांछितम् ॥ २८२ ॥ प्रणिपत्य ततोऽष्टांगं स्तुत्वा चैव पृथग्विधम् ॥ मया प्रोक्तो हरो राजन्कुरु मामजरामरम् ॥ स तथेति प्रतिज्ञाय गतोंऽतर्धानमेव हि ॥ २८३ ॥ अप्रमेयगतिर्देवश्चतुर्दशजगत्पतिः ॥ ततोऽहं तुष्टिसंयुक्तो जरामरणवर्जितः ॥ विचरामि महीपृष्ठे स्वेच्छया शत्रुवर्जितः ॥ २८४ ॥ ततः कालेन महता गतेन नृपसत्तम ॥ बहुकामाग्निसंतप्तः शिवभक्तिविवर्जितः ॥ २८५ ॥ यांयां पश्यामि रूपाढ्यां परनारीं मनोरमाम् ॥ तांतां निरीक्ष्य सुचिरं धर्षयामि ततः परम् ॥ २८६ ॥ धर्मराजभयत्यक्तः पार्थिवत्वं समाश्रितः ॥ २८७ ॥ एतस्मिन्नंतरे राजन्मम पापेन कर्मणा ॥ हाहाकारस्ततो जातः समग्रे धरणीतले ॥ २८८ ॥ एतस्मिन्नंतरे प्राप्तो धर्मराजः शिवांतिकम् ॥ अब्रवीत्प्रणिपत्योच्चैर्दुःखितस्तदनंतरम् ॥ २८९ ॥ त्वया देव महीपालो जयदत्तो महीतले ॥ यो निर्मितः प्रतुष्टेन जरामरणवर्जितः ॥ २९० ॥ स सतीनां सतीत्वं च

१ वक पुष्पसमुद्भवा इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बलान्नाशयते कुधीः ॥ सर्वो भूपभयाल्लोकः सर्वधर्मबहिष्कृतः ॥ २९१ ॥ संजातो विबुधश्रेष्ठ न स्वभावात्कथंचन ॥ तस्यैकमपि मे नास्ति भयं सत्यं ब्रवीमि ते ॥ २९२ ॥ तस्माद्वारय तं शीघ्रं यावद्धर्मो न नश्यति ॥ मर्त्यलोकादशेषेण सतीनां धर्षणेन च ॥ २९३ ॥ एवमुक्तस्ततो देवः कोपेन महतान्वितः ॥ शशाप मां समानीय वेपमानं कृताञ्जलिम् ॥ २९४ ॥ यस्माद्दुष्टसमाचार कृतं कर्म विगर्हितम् ॥ तस्मान्मच्छाप निर्दग्धः कमठो वै भविष्यसि ॥ २९५ ॥ ततो मया सुदीनेन प्रार्थितः परमेश्वरः ॥ शापांतं मे कुरुष्वेश कुरुष्व च दयां मम ॥ २९६ ॥ ततस्तेन पुनः प्रोक्तं कल्पांते षष्टिसंज्ञिते ॥ स्वशरीरं पुनः प्राप्य मद्गणस्त्वं भविष्यसि ॥ २९७ ॥ एतस्मिन्नंतरे कूर्मः संजातोऽहं महीपते ॥ समुद्रसलिलं प्राप्य संस्थितो दुःखितोऽनिशम् ॥ २९८ ॥ कस्यचित्त्वथ कालस्य राजंस्त्वं भूतले स्थितः ॥ यजनार्थं समानीतः समुद्रसलिलस्त्वया ॥२९९॥ स्थापितो भूमिपृष्ठे तु मंत्रैः संस्तंभितस्तथा ॥ ममोपरि ततो यज्ञाः कृताः शतसहस्रशः ॥ ३०० ॥ क्रियमाणैश्च यैर्दग्धा मम पृष्ठिः समंततः ॥ दह्यतोऽपि महाराज तेन यज्ञाग्निना तदा ॥ प्रसादनान्महेशस्य न मे प्राणात्ययोऽभवत् ॥ ३०१ ॥ केवलं जायते दाहो यथा पापं पुरा कृतम् ॥ अनुभूतं च तत्सर्वं हरकोपादसंशयम् ॥ ३०२ ॥ अथ प्राप्ते दिवं चैव त्वयि पार्थिवसत्तम ॥ एकार्णवे तु संजाते जलपूर्णे धरातले ॥ संप्राप्तः प्लवमानस्तु ततोऽहं मानसं सरः ॥ ३०३ ॥ षड्पंचाशत्प्रमाणेन कल्पा मम च संस्थिताः ॥ चतुर्भिरपरैर्मोक्षः कूर्मत्वात्संभविष्यति ॥ ३०४ ॥ एतत्ते सर्वमाख्यातं दीर्घायुष्ट्वस्य कारणम् ॥ हरप्रसादकरणाद्बहुपुष्पार्चनाद्विभोः ॥ ३०५ ॥ कूर्मत्वं च यथा जातं कामदेवस्य कोपतः ॥ स त्वं वद महाभाग गृहायातस्य किं तव ॥ करोमि सांप्रतं कृत्यं शत्रोरपि हृदि स्थितम् ॥ ३०६ ॥ त्वया मे सुचिरं कालं दग्धा पृष्ठिर्मखाग्निना ॥ अद्यापि च प्रपश्यामि तां ज्वलंतीमिव स्थिताम् ॥ ३०७ ॥ एतस्मात्कारणान्नष्टस्त्वां दृष्ट्वाहं महीपते ॥ कस्मात्त्वं न गतः स्वर्गं विमानेऽपि समागते ॥ एतस्मात्कारणाद्धर्मं प्रकुर्वंति नराधिपाः ॥ ३०८ ॥ ॥ इन्द्रद्युम्न उवाच ॥ ॥ स्वर्गस्थाने च लोकानां नित्यं च पतनाद्भयम् ॥ तत्र यास्याम्यहं तत्र यतिष्यामि विमुक्तये ॥ ३०९ ॥ स त्वं करोषि चेत्कृत्यं गृहायातस्य मे मखे ॥ चिरंतनं कथय मे यद्यस्ति तव सौहृदम् ॥ ३१० ॥ ॥ कूर्म उवाच ॥ ॥ लोमशो नाम विप्रर्षिः स मत्तोऽस्ति चिरंतनः ॥ श्रूयते स मया दृष्टो नदीतीरं समाश्रितः ॥३११॥ ॥ इन्द्रद्युम्न उवाच ॥ ॥ तदागच्छत गच्छामो यतः सर्वे द्रुतं स्वयम् ॥ पृच्छामो बहुकालस्य जीवितस्य च कारणम् ॥ ३१२ ॥ अथ ते

१ बक पुष्पार्चनाद्विभोः—इ० पा० । २ एतस्मात्कारणात्—स्वर्गप्राप्तिहेतोः—इत्यर्थः । ३ चिरंतनम्—त्वत्तोऽप्यन्यं चिरायुष्यवंतम्—पुरुषम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सुहिताः पञ्च व्योममार्गेण संस्थिताः ॥ अथ ते ददृशुस्तत्र लोमशं च निराश्रयम् ॥ ३१३ ॥ स्वाध्यायनिरतं दांतं जपहोमपरायणम् ॥ सव्य
हस्ते तृणौघेन छायार्थं विधृतेन च ॥ ३१४ ॥ दधतं चाक्षमालां च दक्षिणेन करेण हि ॥ ते तं दृष्ट्वा महात्मानं कृत्वा तस्य प्रदक्षिणाम् ॥
उपविष्टास्ततः सर्वे स्वागतेनाभिनन्दिताः ॥ ३१५ ॥ पृष्टास्तेन ततश्चैव के यूयं किमिहागताः ॥ विश्रब्धं कथ्यतां मह्यं येन सर्वं करोम्यहम् ॥
॥ ३१६ ॥ ॥ कूर्म उवाच ॥ ॥ मार्कंडो नाम विप्रर्षिः सप्तकल्पस्मरो ह्ययम् ॥ इन्द्रद्युम्नेन चानीतो भूभुजानेन सन्मुने ॥ ३१७ ॥ बक
स्यास्य समीपे तु नाडीजंघस्य धीमतः ॥ चिरायुरिति विज्ञाय आत्मनश्चायुरुत्तमम् ॥ इन्द्रद्युम्नस्य वार्तार्थं द्विगुणायुषमात्मनः ॥ ३१८ ॥ अथ
तेन न विज्ञातो यदा स पृथिवीपतिः ॥ तदा द्वावपि चायातावुलूकस्यास्य संनिधौ ॥ ३१९ ॥ द्विगुणास्तत्प्रमाणेन कल्पाश्चास्य महात्मनः ॥
वर्तंते नैव विज्ञातो नृपो ह्येतेन सद्द्विज ॥ ३२० ॥ ततस्त्रयोऽपि चानीता गृध्रराजस्य चान्तिकम् ॥ ३२१ ॥ षट्पञ्चाशत्प्रमाणेन कल्पाश्चास्य
महात्मनः ॥ वर्तन्ते नैव विज्ञातो नृपो ह्येतेन सद्द्विज ॥ ३२२ ॥ चत्वारोऽपि समानीता एतेनैव ममान्तिकम् ॥ चिरायुषं च मां ज्ञात्वा
मित्रभावेन ते द्विज ॥ ३२३ ॥ मयाप्यसौ परिज्ञातो दूरादेव समागतः ॥ इन्द्रद्युम्नो ध्रुवं ह्येष दग्धा पृष्ठिः पुरा मम ॥ ३२४ ॥
येन यज्ञाग्निना मंत्रैः स्तंभयित्वा क्षितेरधः ॥ ततोऽहं तद्भयाद्भ्रष्टो गृध्रार्दैश्च निवारितः ॥ ३२५ ॥ उपालंभैस्तु बहुभिः प्रणया
ज्जलमाविशत् ॥ मयोक्तोऽथ स भूयोऽपि नाहं तव पराङ्मुखः ॥ ३२६ ॥ इन्द्रद्युम्नेन मे पृष्ठिर्येन दग्धा मखाग्निना ॥ एतस्मि
न्नन्तरे स्वर्गाद्देवदूतो महामनाः ॥ विमानवरमारूढः प्राप्तश्चास्य महात्मनः ॥ ३२७ ॥ कीर्तिलोपाच्च्युतः स्वर्गादयमासीन्महीपतिः ॥
ततो विमानमायातमुक्तमात्रे मया दिवः ॥ ३२८ ॥ अथासौ न गतः स्वर्गं विनाऽस्माभिर्द्विजोत्तम ॥ मार्कंडेयं परित्यज्य तिर्यग्योनिगतै
स्त्रिभिः ॥ ३२९ ॥ पृच्छतोऽस्य मया प्रोक्तमायुष्यं चात्मनः पुनः ॥ षण्णवतिप्रमाणेन कल्पा मे जीवतो गताः ॥ ३३० ॥ पृष्टोऽहं पूर्वमेवात्र
संस्थितस्तव पार्श्वतः ॥ चिरंतनतमो ब्रूहि मया त्वं तु निवेदितः ॥ ३३१ ॥ एतस्मात्कारणात्प्राप्ता वयं सर्वे तवांतिकम् ॥ तस्माद्यत्पृच्छते भूप
एष त्वां तत्प्रकीर्तय ॥ ३३२ ॥ ॥ भर्तृयज्ञ उवाच ॥ ॥ लोमशोऽप्यथ तं प्राह विश्रब्धं पृच्छ पार्थिव ॥ अविश्यं कथयिष्यामि यन्मां त्वं परिपृ ॥३१२॥
च्छसि ॥ ३३३ ॥ ॥ इंद्रद्युम्न उवाच ॥ ॥ कस्मात्त्वं ग्रीष्मकालेऽपि मध्यं प्राप्ते दिवाकरे ॥ निवासार्थं गृहं रम्यं किमर्थं न करिष्यसि ॥ ३३४ ॥

१ उपलक्षितम्—इति शेषः । २ अनेन भूभुजा आनीतः—एतदर्थं स बकस्य समीपमानीतः—इत्यर्थः । ३ सः—गृध्रः—इत्यर्थः । ४ अनेन—इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ लोमश उवाच ॥ ॥ कस्यार्थे क्रियते गेहमनित्यं जीवितं यतः ॥ यदि स्याच्छाश्वतो देहस्तदर्थं क्रियते च तत् ॥ ३३५ ॥ ॥ इन्द्रद्युम्न उवाच ॥ ॥ सर्वेषामेव लोकानां चिरायुः श्रूयते भवान् ॥ तेनाहमपि संप्राप्तो भवद्दर्शनकाम्यया ॥ ३३६ ॥ ॥ लोमश उवाच ॥ ॥ कल्पे कल्पे तु संप्राप्ते रोमकं मम नश्यति ॥ अभावे सर्वरोम्णां च ततो नाशो भविष्यति ॥ ३३७ ॥ पश्य त्वं मच्छरीरेऽस्मिन्प्रकाशं रोमवर्जितम् ॥ न करोमि गृहं तेन कारणेन महामते ॥३३८॥ ॥ इन्द्रद्युम्न उवाच ॥ ॥ किं त्वया विहितं कर्म येनेदृग्जीवितं स्थितम् ॥ किं दानस्य प्रभावोऽयं तपसो नियमस्य वा ॥ ३३९ ॥ ॥ लोमश उवाच ॥ ॥ अहमासं पुरा शूद्रो दरिद्रेण परिप्लुतः ॥ भ्रमामि मेदिनीपृष्ठ उदरस्य कृते सदा ॥३४०॥ कर्मयोगेन महता संप्राप्तो हाटकेश्वरम् ॥ क्षुत्क्षामस्तु पिपासार्तो यत्रैतल्लिंगमुत्तमम् ॥ अवधूतं ततो लिंगं मया दृष्ट्वा स्वयंभु तत् ॥ ३४१ ॥ स्नापितं तोयमादाय शीतमेतत्सुनिर्मलम् ॥ ततस्तु कमलैरेतैर्मया पूजा विनिर्मिता ॥३४२॥ अथ पूजां विनिर्वर्त्य यावन्मार्गं समाश्रितः ॥ क्षुत्क्षामकण्ठस्य ततः प्राणा नष्टास्तदा मम ॥३४३॥ अथाहं ब्राह्मणगृहे जातो जातिस्मरस्ततः ॥ सर्वं स्मरामि भूपाल देवदेवस्य पूजनात् ॥ ३४४ ॥ ततो मूकत्वमापन्नो नैव जल्पामि किंचन ॥ ईशान इति मे नाम पिता चक्रे प्रहर्षितः ॥३४५॥ ईशानेन यतो दत्तः पूर्वमाराधितेन च ॥ वैराग्यं परमं प्राप्तो दृष्ट्वा संसारसंस्थितिम् ॥३४६॥ पिता मे बहुवात्सल्याद्भेषजानि प्रयोजयेत् ॥ वाचार्थं मंत्रवादांश्च तथा चैवोपयाचितम् ॥ ब्राह्मणान्पृच्छते नित्यं दिवारात्रिमतंद्रितः ॥ ३४७ ॥ ततो मे जायते हास्यं निजचित्ते नराधिप ॥ दृष्ट्वा संसारसंसक्तिं पितुर्मातुश्च भूरिशः ॥३४८॥ ततश्च यौवनं प्राप्तः क्रमेण नृपसत्तम ॥ यदा तदा निशि त्यक्त्वा तावुभौ चात्र संगतः ॥ ३४९ ॥ ततो हृष्टमना नित्यं पूजयामि समाहितः ॥ ईशानं परया भक्त्या संस्नाप्य सलिलेन च ॥३५०॥ ब्राह्मणीतीर्थजातेन त्रिकालं नृपसत्तम ॥ शिलोंछवृत्तिमासाद्य प्राणयात्रां समाचरन् ॥ नीवारैर्बदरैः शाकैश्चिर्भटैः फलपत्रकैः ॥ ३५१ ॥ ततो मे भगवान्रुद्रः सर्वदेवेश्वरो हरः ॥ अब्रवीद्दर्शनं गत्वा मेघगम्भीरया गिरा ॥ ३५२ ॥ परितुष्टोऽस्मि ते वत्स वरं वरय सुव्रत ॥ अदेयमपि दास्यामि यद्यपि स्यात्सुदुर्लभम् ॥ ३५३ ॥ ततस्तं प्रणिपत्योच्चैः स्तुत्वा वाक्यैः पृथग्विधैः ॥ मया प्रोक्तं कुरु विभो जरामरणवर्जितम् ॥ ३५४ ॥ ॥ श्रीभगवानुवाच ॥ ॥ अमरत्वं यतो नास्ति मर्त्यलोकेऽत्र कर्हिचित् ॥ मर्यादां कुरु तस्मात्त्वं जीवितस्य स्वकस्य वै ॥ ३५५ ॥ ततो मे[4] भगवानुक्तः कल्पांते समुस्थिते ॥ रोम्ण एकस्य मे नाशो जायतां त्रिदशेश्वर ॥ ३५६ ॥ यदा च सर्वरोम्णां मे

१ स्थिरम्--इ० पा० । २ स्थितम्--इ० पा० । ३ भूमिर--इ० पा० । ४ मे मया इत्यर्थः ।

५३-६०_६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



विनाशः संप्रजायते ॥ तदा मम गणत्वं च जायतां तावकं विभो ॥ ३५७ ॥ एवं भविष्यतीत्युक्तं परं लिंगं सदा मम ॥ स्नाप्यं जलेन चैतेन ब्राह्मणीसंभवेन च ॥ ३५८ ॥ ब्रह्माद्यैः पूजनीयं च त्रिकालं द्विजसत्तम ॥ ममैकवासरं यावत्तव चायुर्भविष्यति ॥ ३५९ ॥ अन्योऽपि यो नरो भक्त्या पूजयिष्यति मामिह ॥ स्नापयिष्यति सद्भक्त्या विपाप्मा स भविष्यति ॥ ३६० ॥ नापमृत्युर्भवेत्तस्य कदाचिद्विजसत्तम ॥ सकृत्संपूजिते ऽप्येवं ब्रह्माद्यैर्मत्कलेवरे ॥ ३६१ ॥ सकृत्पिबति यस्तोयं ब्रह्मतीर्थसमुद्भवम् ॥ सर्वपापविशुद्धात्मा तत्क्षणाज्जायते हि सः ॥ ३६२ ॥ एवमुक्त्वाथ देवेशस्ततश्चादर्शनं गतः ॥ ३६३ ॥ अहं तु संस्थितश्चात्र ततः प्रभृति पार्थिव ॥ पूजयानश्च सद्भक्त्या लिंगमेतत्सदैव हि ॥ ३६४ ॥ एतस्मा त्कारणाज्जातं ममायुरतिविस्तृतम् ॥ शंकरस्य प्रसादेन नान्यदस्तीह कारणम् ॥ ३६५ ॥ ॥ इन्द्रद्युम्न उवाच ॥ ॥ अहमप्यर्चयिष्यामि लिंगमेत त्त्वया सह ॥ नान्यत्र वा गमिष्यामि ममैवं हृदि निश्चयः ॥ ३६६ ॥ ॥ लोमश उवाच ॥ ॥ एवं कुरु महाभाग त्वमवाप्स्यसि वांछितम् ॥ हरभक्तस्य लोकस्य वांछितं नास्ति दुर्लभम् ॥ ३६७ ॥ नाडीजंघो गृहं यातु मार्कंडगृध्रकौशिकाः ॥ कच्छपेन समायुक्तस्त्वं हि तिष्ठ ममा श्रमे ॥ ३६८ ॥ ततः प्रोचुश्च ते सर्वे न वयं तु नरेश्वर ॥ त्वां विना संप्रयास्यामो भूय एव निजालयम् ॥ लिंगमाराधयिष्यामो यदेतद्भवता र्चितम् ॥ ३६९ ॥ एवमुक्त्वा तु ते सर्वे लोमशस्य वराश्रमे ॥ तस्थुः संपूजयामासुस्त्रिकालं लिंगमेव तत् ॥ ३७० ॥ संस्नाप्य ब्राह्मणीतोयैः पद्मा द्यैः पूजयंति च ॥ ३७१ ॥ कस्यचित्त्वथ कालस्य नारदो मुनिसत्तमः ॥ तीर्थयात्राप्रसंगेन संप्राप्तस्तत्र यत्र ते ॥ ३७२ ॥ अथ ते नारदं दृष्ट्वा कृत्वा चैवार्हणक्रियाम् ॥ विश्रांतं च ततो ज्ञात्वा पप्रच्छुर्विनयान्विताः ॥ ३७३ ॥ शापभ्रष्टा वयं सर्वे यतः संवर्तदर्शनात् ॥ बकाद्याश्चैव चत्वारः कूर्मांताश्च महामुने ॥ ३७४ ॥ न स विज्ञायते क्वापि कस्मिन्स्थाने व्यवस्थितः ॥ किंरूपः किंप्रमाणश्च किमाचारः क्व संस्थितः ॥ ३७५ ॥ स त्वं यदि विजानासि यत्र तं संस्थितं मुनिम् ॥ तद्वदस्व महाभाग न किंचित्तेऽस्त्यगोचरम् ॥ ३७६ ॥ ॥ श्रीनारद उवाच ॥ ॥ अहं जानामि तं सम्यक्संवर्तं मुनिसत्तमम् ॥ गुप्ताचारेण तिष्ठंतं नान्यो वेत्ति कथंचनम् ॥ ३७७ ॥ वाराणस्यां स्थितो नित्यं सोऽवधूतो महामुनिः ॥ विवस्त्रो मलदिग्धांगः सदारण्यं समाश्रितः ॥ ३७८ ॥ भिक्षार्थं कुतपे काले समागच्छति तां पुरीम् ॥ पाणिपात्रकृताहारो गृहैः कैश्चित्सदैवै हि ॥ ३७९ ॥ भूयोपि याति सायाह्ने किंचिदेव वनांतरम् ॥ तस्यां पुर्यां तथारूपाः शतशोऽथ सहस्रशः ॥ ३८० ॥ तिष्ठंति तापसश्रेष्ठास्तस्य वक्ष्यामि लक्ष



१ गृहैः कैश्चित्सदैव हि--केषुचिद्गृहेषु पाणिपात्रे भिक्षां गृहीत्वा भुंक्ते--भिक्षापरिग्रहं न करोति--इति तात्पर्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णम् ॥ भवद्भिः स यथा ज्ञेयो मम वाक्यादसंशयम् ॥ ३८१ ॥ वाराणस्याः प्रतोल्यां[1] च स्थापनीयं सुयत्नतः ॥ कुणपं चैव गुप्तं च यथा नो वेत्ति कश्चन ॥ ३८२ ॥ यास्यंति तापसाः सर्वे तमतिक्रम्य भूरिशः ॥ संवर्तो दिव्यदृष्टिस्तु शल्यं नातिक्रमिष्यति ॥ ३८३ ॥ निवर्तनं तु यश्चक्रे भूभागात्कुणपाश्रयात् ॥ स संवर्तः परिज्ञेयः प्रष्टव्यश्च ततः परम् ॥ ३८४ ॥ यदि पृच्छति केनाहं भवतां संनिवेदितः ॥ नारदेन ततो वाच्यं स त्वां जानाति वै सदा ॥ ३८५ ॥ यदि पृच्छति भूयः स नारदः क्व स तिष्ठति ॥ ३८६ ॥ ततो वाच्यो निवेद्य त्वां प्रतिष्टो हव्यवाहनम् ॥ ॥ ३८७ ॥ तच्छ्रुत्वा नारदवचः सर्वे वै लोमशादयः ॥ वाराणसीं पुरीं प्राप्तास्तस्य दर्शनलालसाः ॥ ३८८ ॥ प्रतोल्यां कुणपं स्थाप्य गुप्तं लोकैरलक्षितम् ॥ स्वयं चैव स्थिता दूरं प्रेक्षमाणाः प्रयत्नतः ॥ ३८९ ॥ ततस्तु कुतपे काले संवर्तस्तु समागतः ॥ यादृग्रूपः पुरा प्रोक्तो नारदेन महात्मना ॥ ३९० ॥ स दृष्ट्वा कुणपं तत्र दिव्यदृष्ट्या महामुनिः ॥ निवृत्तः क्षुत्पिपासार्तो नैव शल्यमलंघयत् ॥ ३९१ ॥ अथ ते तं समुद्दिश्य पृष्ठतोऽनुययुस्तदा ॥ तिष्ठतिष्ठेति जल्पंतः प्रसादः क्रियतामिति ॥ ३९२ ॥ सोऽपि निर्भर्त्सयन्नेतान्निवर्तध्वमिति ब्रुवन् ॥ मा गच्छत मत्समीपमिति प्रोच्य पलायितम् ॥ ३९३ ॥ अथ दूरतरं गत्वा स प्रोवाच क्षुधान्वितः ॥ ३९४ ॥ केनादिष्टोऽस्मि युष्माकं स शीघ्रं मे निवेद्यताम् ॥ शापाग्नौ येन तं पापं भस्मसात्प्रकरोम्यहम् ॥ ३९५ ॥ ॥ त ऊचुः ॥ ॥ नारदेन समाख्यातो भवानत्र स्थितो हि नः ॥ कथयित्वा ततो वह्नौ संप्रविष्टः स तत्क्षणात् ॥ ३९६ ॥ ॥ संवर्त उवाच ॥ ॥ अहं तदेव कर्ता च तस्य दुष्टस्य सांप्रतम् ॥ निर्दिष्टो येन युष्माकं गुप्ताचारं समाश्रितः ॥ ३९७ ॥ ॥ त ऊचुः ॥ ॥ भगवन्नारदेनोक्तस्त्वमस्माकं महामुने ॥ चिरादन्वेष्यमाणानां नान्यस्त्वां वेत्ति कश्चन ॥ ३९८ ॥ तावन्निवेद्य चास्माकं प्रविष्टो हव्यवाहनम् ॥ तत्क्षणादेव विप्रेंद्र न विद्मस्तत्र कारणम् ॥ ३९९ ॥ ॥ संवर्त उवाच ॥ ॥ अहमप्यतिसंक्रुद्धः शापात्कर्तुं समुद्यतः ॥४००॥ एतदेवहि तस्माच्च स्वयमेव कृतं च यत् ॥ तस्माद्वदथ मे शीघ्रं कस्माद्यूयं समागताः ॥ ४०१ ॥ चिरं स्थास्यामि नात्राहं भ्रमिष्यामि पुरीं प्रति ॥ प्राणयात्राकृते भिक्षां करिष्यामि स्वयं यतः ॥ ४०२ ॥ विशल्यः क्रियतां मार्गः कुणपं ह्रियतां च यत् ॥ नो चेच्छापं प्रदास्यामि यद्येवं न करिष्यथ ॥ ४०३ ॥ तथाहं नैव वक्तव्यः कस्यचिच्चात्र संस्थितः ॥ अन्वेषयति मां नित्यं मरुत्तः पृथिवीपतिः ॥ ४०४ ॥ यज्ञार्थं नैव तं भूपं याजयिष्ये कथंचन ॥ धिषणेन परित्यक्तो गुरुणा स महीपतिः ॥ ४०५ ॥ गुरुपुत्रं च मां ज्ञात्वा

१ प्रतोल्याम् रथ्यायाम्--इत्यर्थः। 'रथ्या प्रतोली विशिखा'--इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

ततोऽन्वेषयते हि माम् ॥ ४०६ ॥ ॥ त ऊचुः ॥ ॥ शापभ्रष्टा वयं सर्वे चत्वारोऽपि बकादयः ॥ पक्षित्वं चैव संप्राप्ता ब्रह्मशापेन सन्मुने ॥ ॥ ४०७ ॥ महेश्वरगणाश्चैव वयं त्रैलोक्यवंदिताः ॥ तिर्यग्योनिं समानीता वैराग्यं परमं गताः ॥ ४०८ ॥ शापांतस्तु समादिष्टस्तैर्विप्रैः स्त्रीसमुद्भवः ॥ तवोपदेशतस्तेन बकाद्याः शरणं गताः ॥ ४०९ ॥ तस्मात्त्राहि महाभाग पक्षित्वात्सांप्रतं विभो ॥ ४१० ॥ निर्विण्णाश्चिरकालं च पक्षित्वस्य निषेवणात् ॥ एतच्च कारणं नान्यत्तव संगसमुद्भवम् ॥ ४११ ॥ ॥ संवर्त उवाच ॥ ॥ यद्येवं गम्यतां शीघ्रं चमत्कारपुरं प्रति ॥ भर्तृयज्ञः स्थितोऽप्यत्र सर्वसंदेहहारकः ॥ ४१२ ॥ स वै दास्यति सर्वेषामुपदेशं सुशोभनम् ॥ तेन प्राप्स्यथ संदेहं पूर्वीयं च यथास्थितम् ॥ ॥ ४१३ ॥ स पूर्वं याज्ञवल्क्योऽभूत्सर्वशास्त्रार्थपारगः ॥ ततो भवांतरेऽन्यस्मिन्कात्यायन इति स्मृतः ॥ ४१४ ॥ ततो देहांतरं प्राप्य ख्यातो वररुचिर्द्विजः ॥ ततो देहांतरेऽन्यस्मिन्वेश्यापुत्रो बभूव ह ॥ ४१५ ॥ आराधिता ब्रह्मसुता देवी वाग्रूपिणी सदा ॥ न च तुष्टा स्वयं देवी कारणं वीक्ष्य किंचन ॥ ४१६ ॥ ब्राह्मणेन प्रजातस्तु देहांतं प्राप्य किंचन ॥ तस्य वक्त्रं समापन्ना स्वयमेव सरस्वती ॥ ४१७ ॥ पूर्वमाराधिता नित्यं न सा त्यजति कर्हिचित् ॥ तस्याश्चर्यमभूच्चान्यद्यज्ञे वेश्यासुतस्य हि ॥ ४१८ ॥ ब्रह्मसूत्रं समभ्येति स्कंधे निर्याति गच्छति ॥ ४१९ ॥ पूर्वेषामेव लोकानां यज्ञकर्मसु संस्थितान् ॥ स संदेहान्हरत्येव यथा नान्योऽत्र कश्चन ॥ ४२० ॥ ॥ सूत उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा प्रणिपत्य मुहुर्मुहुः ॥ गतास्ते कुणपं यत्र संवर्तेन प्रणोदिताः ॥ ४२१ ॥ तच्चाकृष्य ततः सर्वे चमत्कारपुरं गताः ॥ वास्तुस्थानपदे तीर्थे तं दृष्ट्वा तत्र संस्थितम् ॥ ४२२ ॥ प्रणिपत्य ततः प्रोचुः सर्वे विनयसंस्थिताः ॥ ब्रह्मशापेन निर्दग्धा वयं चत्वार एव हि ॥ ४२३ ॥ पक्षित्वं समनुप्राप्तास्त्रयः कूर्मत्वमन्यकः ॥ य एते च त्रयोऽस्माकं स्थिताः पार्श्वे महत्तराः ॥४२४॥ मार्कंडः कथितो ह्येष इंद्रद्युम्नस्तथा परः ॥ तृतीयो लोमशो नाम विख्यातः सुमहातपाः ॥ ४२५ ॥ जीवितव्यस्य निर्विण्णास्त्रय एव च सांप्रतम् ॥ उपदेशप्रदानेन प्रसादं कर्तुमर्हसि ॥ ४२६ ॥ ॥ सूत उवाच ॥ ॥ तेषां तद्वचनं श्रुत्वा भर्तृयज्ञो महामुनिः ॥ अब्रवीत्सुचिरं ध्यात्वा ज्ञात्वा दिव्येन चक्षुषा ॥ ४२७ ॥ यूयं सप्तैव लिंगानि स्थापयध्वं समागताः ॥ हाटकेश्वरजे क्षेत्रे नाम्ना चैवांतिके विभोः ॥ ४२८ ॥ ततो दानानि सप्तैव तेषामग्रे प्रयच्छत ॥ कुलपर्वतसंज्ञानि सर्वपापहराणि च ॥ ४२९ ॥ ततः प्राप्स्यथ चाभीष्टं वपुर्दिव्यं मनोरमम् ॥ गणत्वं देवदेवस्य त्रिनेत्रस्य महात्मनः ॥ ४३० ॥ ॥ त ऊचुः ॥ ॥ प्रकीर्तय विभो दानं तेषां यच्छामहे यथा ॥ प्रमाणं च विधानं च विस्तरेण महामुने ॥४३१॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ भर्तृयज्ञ उवाच ॥ ॥ देयो हेममयो मेरुः कैलासो रजतोद्भवः ॥ कार्प्पासेन हिमाद्रिस्तु गुडजो गंधमादनः ॥४३२॥ सुवेलस्तु तिलैर्देयो विंध्यः शर्करया तथा ॥ लवणेन तथा शृंगी यथोक्तविधिना ततः ॥ ४३३ ॥ ॥ सूत उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा संस्थाप्य विधिपूर्वकम् ॥ सप्तलिंगानि तैः पश्चात्प्रदत्ताः कुलपर्वताः ॥ ४३४ ॥ इंद्रद्युम्नेश्वरस्याग्रे इंद्रद्युम्नः प्रतापवान् ॥ मेरुं हेममयं कृत्वा भर्तृयज्ञमते स्थितः ॥ ४३५ ॥ मार्कंडेश्वरदेवस्य मार्कंडेन च धीमता ॥ कैलासो राजतो दत्तो भक्तिपूर्वं द्विजोत्तमाः ॥ ४३६ ॥ कार्पासो हिमवान्दत्तः पालकेन द्विजातये ॥ गंधमादनसंज्ञस्तु प्रदत्तो गुडजः पुरः ॥ ४३७ ॥ घंटकेश्वरदेवस्य घंटकेन द्विजोत्तमाः ॥ कच्छपेन तु संदत्तः सुवेलः पर्वतोत्तमः ॥ ४३८ ॥ कच्छपेश्वरदेवस्य पुरस्तिलमयस्तथा ॥ शार्करस्तु तदा शैलः प्रदत्तो भक्तिपूर्वकम् ॥ ४३९ ॥ शैल ईशानसंज्ञेन निजदेवस्य चाऽग्रतः ॥ वानरेश्वर देवस्य पुरतो द्विजसत्तमाः ॥ ४४० ॥ गृध्रेणाथ प्रदत्तस्तु लवणाख्यो महागिरिः॥ शृंगी नाम महाभागः श्रद्धापूतेन चेतसा ॥ ४४१ ॥ तत्राश्चर्यम भूद्विप्रा दत्तमात्रैर्नगोत्तमैः ॥ पक्षित्वं निर्गतं तेषां कूर्मत्वमितरस्य च ॥ ४४२ ॥ एतस्मिन्नेव काले तु सर्वे ते तत्प्रभावतः ॥ दिव्यमाल्यांबरधरा दिव्यगंधानुलेपनाः ॥ संजाता ब्राह्मणश्रेष्ठा ये च तत्संमुखे स्थिताः ॥ ४४३ ॥ विमानानि च सर्वेषां समायातानि तत्क्षणात् ॥ भर्तृयज्ञमनुप्राप्य प्रणिपत्य च तान्द्विजान् ॥ कैलासं पर्वतं प्राप्ता विमानवरमाश्रिताः ॥ ४४४ ॥ एतद्वः सर्वमाख्यातं यथा तल्लिंगसप्तकम् ॥ हाटकेश्वरजे क्षेत्रे संजातं पापनाशनम् ॥४४५॥ अन्योऽपि यः पुनस्तेषां लिंगानां भक्तिसंयुतः॥ कुलपर्वतदानं च कुर्यात्सोऽपि शिवं व्रजेत्॥४४६॥तानि लिंगानि यो मर्त्यः प्रातरुत्थाय वीक्षते ॥ अज्ञानविहितात्पापात्सोऽपि मुक्तिमवाप्नुयात् ॥४४७॥ यश्चैतान्पर्वतान्सप्त क्रमेणात्र प्रयच्छति ॥ द्विजातिभ्यः स्वलिंगानां पुरतस्त्रिदिवं व्रजेत् ॥४४८॥ स्थित्वा कल्पांतरं तत्र संसेव्य च वराप्सराः ॥ दिव्यान्भोगांश्च संसेव्य यदा भूमौ प्रजायते ॥ चक्रवर्तित्वमासाद्य सार्वभौमः प्रजायते ॥ ४४९ ॥ एकेन तु प्रदत्तेन जायते पापसंक्षयः ॥ द्वाभ्यां पुत्राश्च पौत्राश्च वांछितानि फलानि च ॥ ४५० ॥ त्रिभिः संजायते राजा चतुर्भिर्मंडलेश्वरः ॥ भारतस्य च खण्डस्य स्वामी भवति पंचभिः ॥ ४५१ ॥ जंबुद्वीपाधिपः षड्भिश्चक्रवर्ती च सप्तभिः ॥ विधिवत्पर्वतैर्दत्तैरेत दाह पितामहः ॥४५२॥ नरः स्याद्ब्राह्मणश्रेष्ठाः सदा जन्मनिजन्मनि ॥ न दुःखितो दरिद्रो वा व्याधितो वा प्रजायते ॥ ४५३ ॥ सौभाग्यसुखसं युक्तः सुदेहो रत्नवान्भवेत् ॥ सर्वशत्रुविनिर्मुक्तः प्रतापी विजितेन्द्रियः ॥ ४५४ ॥ तस्मात्सर्वप्रयत्नेन भूमिपालैर्विशेषतः ॥ एते च पर्वता देया

१ सुरान्–इ०पा० । २ स्वलिंगानाम्–पूर्वोक्तेंद्रद्युम्नेश्वरादि तत्तल्लिंगानां पुरतो हेममयमेर्वादिपर्वतान्–इत्यर्थः तात्पर्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





उद्दिश्य निजदेवताः ॥ ४९६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये सप्तलिंगोत्पत्तिमाहात्म्यवृत्तान्तवर्णननामैकसप्तत्युत्तरद्विशततमोऽध्यायः ॥ २७१ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ यदेतद्भवता प्रोक्तमीशानस्य महीपतेः॥ ईश्वरेण पुरा दत्तमायुर्यावत्स्ववासरम् ॥ १ ॥ किंप्रमाणं भवेत्तस्य दिवसस्य ब्रवीहि नः ॥ ॥ सूत उवाच ॥ ॥ अहं वः कीर्तयिष्यामि प्रमाणं दिवसस्य तु ॥ २ ॥ माहेश्वरस्य विप्रेन्द्राः श्रूयतां गदतः स्फुटम् ॥ निमेषस्य चतुर्भागस्त्रुटिः स्यात्तद्द्वयं लवः ॥ ३ ॥ लवद्वयं यवः प्रोक्तः काष्ठा ते दश पंच च ॥ त्रिंशत्काष्ठाः कलामाहुः क्षणस्त्रिंशत्कलो मतः ॥ ४ ॥ क्षणैः षष्ट्या पलं प्रोक्तं षष्ट्या तेषां च नाडिका ॥ नाडिकाद्वितयेनैव मुहूर्तं परिकीर्तितम् ॥ ५ ॥ त्रिंशन्मुहूर्त्तमुद्दिष्टमहोरात्रं मनीषिभिः ॥ मासस्त्रिंशदहोरात्रैर्द्वौ द्वौ मासावृतुं विदुः ॥ ६ ॥ ऋतुत्रयं चाप्ययनमयने द्वे तु वत्सरम् ॥ मानुषाणां हि सर्वेषां स एव परिकीर्तितः ॥ ७ ॥ स देवानामहोरात्रं पुराणज्ञाः प्रचक्षते ॥ अयनं चोत्तरं शुक्लं यद्देवानां दिनं च तत् ॥ यद्दक्षिणं तु सा रात्रिः शुभकर्मविगर्हिता ॥ ८ ॥ यथा सुप्तो न गृह्णाति किंचिद्भोगादिकं नरः ॥ तथा देवाश्च यज्ञांशान्न गृह्णन्ति कथंचन ॥ ९ ॥ अनेनैव तु मानेन मानवेन द्विजोत्तमाः ॥ लक्षैः सप्तदशाख्यैस्तु वत्सराणां प्रकीर्तितम् ॥ १० ॥ अष्टाविंशत्सहस्रैस्तु वत्सराणां कृतं युगम् ॥ तस्मिन्कृतेऽभवद्विष्णुर्भगवान्यो जगद्गुरुः ॥ ११ ॥ लोकाः पापविनिर्मुक्ताः शांता दांता जितेन्द्रियाः ॥ दीर्घायुषस्तथा सर्वे सदैव तपसि स्थिताः ॥ १२ ॥ यो यथा जन्म चाप्नोति तथा स म्रियते नरः॥ न पुत्रसंभवो मृत्युर्वीक्ष्यते जनकैः क्वचित् ॥ १३ ॥ कामः क्रोधस्तथा लोभो दंभो मत्सर एव च ॥ न जायते नृणां तत्र युगे तु द्विजसत्तमाः ॥१४॥ ततस्त्रेतायुगं भावि द्वितीयं मुनिसत्तमाः ॥ पादेनैकेन पापं तु रौद्रं धर्मे तदाविशत् ॥ १५ ॥ ततो रक्तत्वमभ्येति भगवान्मधुसूदनः ॥ पापांशेऽपि च संप्राप्ते सस्पर्द्धो जायते जनः ॥ १६ ॥ स्वर्गमार्गकृते सर्वे चक्रुर्यज्ञांस्ततः परम् ॥ अग्निष्टोमादिकांस्तत्र बहुहोमादिकांस्तथा ॥ १७ ॥ देवलोकांस्ततो यांति मूलाद्यावच्चतुर्दश ॥ ब्रह्मलोकस्य पर्यंतं स्वकीयैर्यज्ञकर्मभिः ॥१८॥ किंचित्स्वल्पायुषस्तत्र जायन्ते स्पर्धयाऽन्विताः ॥ परं तत्रापि नो यांति मृत्युं पुत्राः कथं च न ॥ १९ ॥ जनके विद्यमाने च स्वल्पदोषाः प्रकीर्तिताः ॥ कामक्रोधादयो ये च भवंति न भवंति च ॥ २० ॥ एकया वेलया तत्र वापितं सस्यमुत्तमम् ॥ सप्तवारान्प्रगृह्णंति वैश्याः कृषिपरायणाः ॥ २१ ॥ सर्वा घटस्रवा गावो महिष्यश्च चतुर्गुणाः ॥ प्रयच्छंति तथा क्षीरमुष्ट्र्यस्तासां चतुर्गुणम् ॥ २२ ॥ अजाविकास्तथा पादं नार्यः सर्वास्तथैव च ॥ वेदाध्ययनसंपन्नाः प्रतिग्रहविवार्जिताः ॥ शापानुग्रहकृत्येषु समर्थाः संभवंति च ॥ २३ ॥ क्षत्रियाः क्षात्रधर्मेण पालयंति



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वसुधराम् ॥ न तत्र दृश्यते चौरो न च जारः कथंचन ॥ स्वधर्मनिरताः सर्वे वर्णाश्चैव व्यवस्थिताः ॥ २४ ॥ तच्च द्वादशभिर्लक्षैर्वत्सराणां प्रकीर्तितम् ॥ षण्णवत्या सहस्रैस्तु द्वितीयं युगमुत्तमम् ॥२५॥ ततश्च द्वापरं भावि तृतीयं द्विजसत्तमाः ॥ द्वौ पादौ तत्र पापस्य द्वौ च धर्मस्य संस्थितौ भगवान्वासुदेवश्च कपिलस्तत्र जायते ॥ २६ ॥ तच्चाष्टलक्षमानेन वत्सराणां प्रकीर्तितम् ॥ चतुःषष्टिभिरन्यैस्तु सहस्राणां द्विजोत्तमाः ॥ २७ ॥ कामः क्रोधस्तथा लोभो दंभो मत्सर एव च ॥ षडेते तत्र जायंते ईर्ष्या चैव तु सप्तमी ॥२८॥ अथ संसेवितास्तैस्तु मानवाश्च परस्परम् ॥ विरुद्धांश्च प्रकुर्वंति नाप्नुवंति यथा दिवम् ॥ २९ ॥ केचित्तत्रापि जायंते शांता दांता जितेंद्रियाः ॥ न सर्वेऽपि द्विजश्रेष्ठा यतोऽर्द्धं पातकस्य तु ॥ ३० ॥ ततः कलियुगं प्रोक्तं चतुर्थं च सुदारुणम् ॥ एकपादो वृषो यत्र पापं पादैस्त्रिभिः स्थितम् ॥ ३१ ॥ कृष्णत्वं याति देवोऽपि तत्र चैव चतुर्भुजः ॥ एक पादोऽपि धर्मस्य यावत्तावत्प्रवर्तते ॥ ३२ ॥ पश्चान्नाशं समभ्येति यावत्तावच्छनैःशनैः ॥ प्रमाणं तस्य निर्दिष्टं लक्षाश्चत्वार एव हि ॥ ३३ ॥ द्वात्रिंशच्च सहस्राणि युगस्यैवांतिमस्य च ॥ कलिना तत्र संपृष्टा मर्त्याः सर्वे परस्परम् ॥ ३४ ॥ विबुधैस्ते[1] प्रवर्तंते रागद्वेषपरायणाः ॥ यस्ययस्य गृहे वित्तं तथा नार्यो मनोरमाः ॥३५॥ तेनतेन समं मैत्रीं कलौ कुर्वंति मानवाः ॥ विधवानां यतीनां च सर्वेषां च तपस्विनाम् ॥३६॥ लोकद्वयवि नाशः स्याद्यतश्चेतो न शुध्यति ॥ प्रावृट्कालेऽपि संप्राप्ते दुर्भिक्षेण प्रपीडिताः ॥ ३७ ॥ भ्रमंति च कलौ लोका गगनासक्तदृष्टयः ॥ जानाति च पि तनयः पिता चेन्निधनं व्रजेत् ॥ ३८ ॥ ततोहं गृहपो भूयां बांधवो ह्यपि बांधवम् ॥ स्नुषापि वेत्ति चित्तेन यदि श्वश्रूः क्षयं व्रजेत् ॥ ३९ ॥ मम स्याद्गृह ऐश्वर्यं तत्सर्वं नान्यथा व्रजेत् ॥ काव्यैरुपहता वेदाः पुत्रा जामातृकैस्तथा ॥ ४० ॥ शालकैर्बांधवाश्चैव ह्यसतीभिः कुलस्त्रियः ॥ शूद्रास्त पस्विनश्चैव शूद्रा धर्मस्य सूचकाः ॥४१॥ ब्राह्मणानां ततः शूद्रा उपदेशं वदंति च ॥ अल्पोदकास्तथा मेघा अल्पसस्या च मेदिनी ॥ ४२ ॥ अल्प क्षीरास्तथा गावः क्षीरे सर्पिस्तथाऽल्पकम् ॥ सर्वभक्षास्तथा विप्रा नृपा निष्करुणास्ततः ॥ कृष्या लज्जंति वैश्याश्च शूद्रा ब्राह्मणप्रेषकाः ॥ ४३ ॥ हेतुवादरता ये च भंडविद्यापराश्च[2] ये ॥ तेते स्युर्भूमिपालस्य सदाऽभीष्टाः कलौ युगे ॥४४॥ श्वःश्वःपापीयदिवसाः[3] पृथिवी गतयौवना ॥ अतिक्रांत शुभाः कालाः पर्युपस्थितदारुणाः ॥४५॥ यथायथा युगं भावि वृद्धिं यांति स्त्रियो नराः ॥ तथातथा प्रयांति स्म लघुतां जंतुभिः सह ॥४६॥ वर्षे

१ विधुरैः संप्रवर्तंते–इ.पा.। २ भंडविद्यापराः–अश्लीलभाषणपराः। शब्दकल्पद्रुमे–'भण्ड'शब्दव्याख्याने भण्डिप्रतारणे धातोः'भण्ड' शब्दो निष्पन्नः। भण्ड भाँड इति ख्यातः। तस्य विद्या-अश्लीलभाषणेन परप्रतारणम्–तत्पराः–इत्यर्थः। ३ श्वःश्वः पापीयदिवसाः--अद्यापेक्षयाश्वः पापाधिक्यं तदपेक्षया परश्वस्तदधिकं पापाधिक्यमुत्तरोत्तरपापाधिक्यवंतो दिवसाः--इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



द्वादशमे चैव कन्या स्याद्भर्तृसंयुता ॥४७॥ ततः षोडशमे वर्षे नराः पलितयौवनाः ॥ शौचाचारपरित्यक्ता निजकार्यपरास्तथा ॥ ४८ ॥ भविष्यंति
युगस्यांते नराः अंगुष्ठमात्रकाः ॥ गृहं च तेऽथ कुर्वंति बिलैराखुसमुद्भवैः ॥ ४९ ॥ तथा प्रावरणं तेषां कृमिवस्त्रं भविष्यति ॥ एकवर्णा भविष्यंति
वर्णाः सर्वे ततः परः ॥ म्लेछीभूता दुराचारा धर्मकृत्यविदूषकाः ॥५०॥ एवं जाते ततो लोके ब्राह्मणो हारिपिंगलः ॥ कल्किगोत्रसमुत्पन्नस्त्वान्सर्वा
न्सूदयेत्ततः ॥५१॥ पश्चात्कृतयुगं भावि भूयोऽपि द्विजसत्तमाः ॥५२॥ एवं युगसहस्रेण संप्राप्तेन ततः परम् ॥ ब्रह्मणो दिवसं भावि रात्रिश्चैव ततः
परम् ॥ ५३ ॥ ततश्चानेन मानेन षष्ट्या युक्तैस्त्रिभिः शतैः ॥ ब्रह्मणो वत्सरं भावि केशवस्य च तद्दिनम् ॥ ५४ ॥ आत्मीये जीविते ब्रह्मा याव
द्वर्षशतं स्थितः ॥ केशवोऽपि[3] स्वमानेन वर्षाणां जीविते शतम् ॥ ५५ ॥ वर्षेण वासुदेवस्य दिनं माहेश्वरं भवेत् ॥ निजमानेन सोऽप्यत्र याव
द्वर्षशतं स्थितः ॥ ५६ ॥ ततः शक्तिस्वरूपः स्यात्सोऽक्षयी कीर्त्यते यतः ॥ सदाशिवस्य निःश्वासः शैवं वर्षशतं भवेत् ॥ उच्छ्वासस्तु पुनस्तस्य
शक्तिरूपेण संस्थितः ॥ ५७ ॥ ॥ सूत उवाच ॥ ॥ एतद्वः सर्वमाख्यातं शिवशक्तिसमुद्भवम् ॥ यावदायुः प्रमाणं च मानुषाद्यं च यद्भवेत् ॥
॥ ५८ ॥ भवद्भिः शांकरं पृष्टो द्विजा अस्मि दिनं पुरा ॥ मया पुनस्तु सर्वेषां मर्त्यादीनां तु कीर्तितम् ॥ ५९ ॥ इति श्रीस्कांदे महापुराण एका
शीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये युगस्वरूपवर्णनंनाम द्विसप्तत्युत्तरद्विशततमोऽध्यायः ॥ २७२ ॥ ॥ छ ॥
॥ ॥ सूत उवाच ॥ ॥ एतेषां तु सहस्रेण भवेद्ब्राह्मं दिनं द्विजाः ॥ चतुर्दश सहस्राक्षा जायंते तत्र वासरे ॥ १ ॥ सप्तमस्तु सहस्राक्षः सांप्रतं
वर्ततेऽत्र यः ॥ एकसप्ततिसंवर्तचतुर्दशदिने विधेः ॥ २ ॥ युगानां कुरुते राज्यं मनवश्च तथा परे ॥ स्वायंभुवप्रभृतयो यथा शक्रास्तथा स्थिताः ॥
॥ ३ ॥ जायन्तो नाम शक्रोऽयं सांप्रतं वर्तते तु यः ॥ वैवस्वतो मनुश्चैव अष्टाविंशत्प्रमाणकः ॥ ४ ॥ चतुर्युगस्य संजातो गतेस्मिञ्छेषमात्रके ॥
भविष्यति बलिः शक्रो वासुदेवप्रसादतः ॥ ५ ॥ तेन तस्य प्रतिज्ञातं राज्यं चैवाष्टमे मनौ ॥ ६ ॥ एवं सर्वे सुराश्चान्ये त्रयस्त्रिंशत्प्रमाणतः ॥
कोटयः प्रभविष्यंति यथा चैव तथा पुरा ॥ ७ ॥ योऽयं ब्रह्मा स्थितो विप्राः सांप्रतं सृष्टिकारकः ॥ तस्यानेन प्रमाणेन जातं संवत्सराष्टकम् ॥
॥ ८ ॥ षण्मासाश्च दिनार्धं च प्रथमं शुक्लपूर्वकम् ॥ सौरसावनचंद्रार्क्षैर्मानैरेभिश्चतुर्विधैः ॥ ९ ॥ कलौ निर्याति सर्वेषां भूतानां क्षितिमण्डले ॥ पंच



१ द्वाहशमे–द्वादश--मा'मानं'--यस्य तत्--द्वादशमम्–इति विग्रहं केचित्कुर्वंति एवमेव--अग्रे-षोडशमे-इत्यत्रापि । २ जीवति–इति शेषः । ३ जीवति–इत्येव शेषः । ४ तिष्ठति–इति शेषः । ५ मानुषं चैव यद्भवेत्–इ० पा० । ६ अहम्–इति शेषः । * एतेषाम्–युगानाम्–इत्यर्थः । ७ रविमात्रकेइ० पा० । ८ सौरसावनचान्द्रार्कैः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षष्ट्याऽधिकश्चैव दिनानां च शतैस्त्रिभिः ॥ भवेत्संवत्सरं सौरं पञ्चोनैस्तैश्च सावनम् ॥ १० ॥ चांद्र एकादशोनस्तु त्रिंशद्धीन उडूद्भवः ॥ शीता तपौ तथा वृष्टिः सौरमानेन जायते ॥ ११ ॥ वृक्षाणां फलनिष्पत्तिः सस्यानां च तथा परा ॥ अग्निष्टोमादायो यज्ञा वर्तंते ये धरातले ॥ १२ ॥ उत्साहाश्च विवाहाश्च सावनेन भवंति च ॥ कुसीदाद्याश्च ये केचिद्व्यवहाराश्च वृत्तिजाः ॥ १३ ॥ अधिमासप्रयुक्तेन ते स्युश्चांद्रेण निर्मिताः ॥ नाक्षत्रेण तु मानेन सिध्यंते ग्रहचारिकाः[1] ॥ १४ ॥ नान्यत्किंचिद्धरापृष्ठ एतन्मानचतुष्टयात् ॥ एतेन तु प्रमाणेन देवदैत्याश्च मानवाः ॥ १५ ॥ वर्त्तंते ब्राह्मणश्रेष्ठाः श्रुतिरेषा पुरातनी ॥ एतद्युगप्रमाणं तु यः पठेद्भक्तिसंयुतः ॥ १६ ॥ एतेषामेव लिंगानां सप्तानां ब्राह्मणोत्तमाः ॥ नापमृत्यु भयं तस्य कथंचित्संभविष्यति ॥ १७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये युगप्रमाणवर्णनंनाम त्रिसप्तत्युत्तरद्विशततमोऽध्यायः ॥ २७३ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तथान्यदपि तत्रास्ति दुर्वासःस्थापितं पुरा[2] ॥ तल्लिंगं देवदेवस्य त्रिनेत्रस्य महात्मनः ॥ १ ॥ चैत्रमासि नरो यस्तु तमाराधयते द्विजाः ॥ नृत्यगीतप्रवाद्यैश्च त्रिकालं विहितक्षणः ॥ स नूनं तत्प्रसादेन गन्धर्वाधिपतिर्भवेत् ॥ २ ॥ ॥ ऋषय ऊचुः ॥ ॥ दुर्वासा नाम कश्चायं केनायं स्थापितो हरः ॥ कस्मिन्काले महाभाग सर्वं नो विस्तराद्वद ॥ ३ ॥ ॥ सूत उवाच ॥ ॥ आसीत्पुरा निंबशुचो वैदिशे च पुरोत्तमे ॥ ४ ॥ स च पूजयते लिंगं किंचिन्मठपतिः स्थितः ॥ स यत्किंचिदवाप्नोति वस्त्राद्यं च तथा परम् ॥ ५ ॥ माहेश्वरस्य लोकस्य विक्रीणीते ततस्ततः ॥ ततो गृह्णाति नित्यं स हेम मूल्येन तस्य च ॥ ६ ॥ न करोति व्ययं तस्य केवलं संचये रतः ॥ ततः कालेन महता मंजूषा[3]ऽस्य निरर्गला ॥ जाता हेममयी विप्राः कार्पण्यनिरतस्य च ॥ ७ ॥ अथ संस्थाप्य भूमध्ये मंजूषां तां प्रपूरिताम् ॥ करोति व्यवहारं स कक्षां तां नैव मुंचति ॥ ८ ॥ कदाचिदेव पूजायां सोऽपि ब्राह्मणसत्तमाः ॥ विश्वासं नैव निर्याति कस्यचिच्च कथंचन ॥ ९ ॥ कस्यचित्त्वथ कालस्य परवित्तापहारकः ॥ अलक्षद्ब्राह्मणस्तच्च दुःशीलाख्यो व्यचिंतयत् ॥ १० ॥ ततः शिष्यो भविष्यामि विश्वासार्थं दुरात्मनः ॥ सुदीनैः कृपणैर्वाक्यैश्चाटुकारैः पृथग्विधैः ॥ ११ ॥ आलस्यं च दिवानक्तं साधयिष्याम्यसंशयम् ॥ अन्यस्मिन्नहनि प्राप्ते दृष्ट्वा तं मठमध्यगम् ॥ १२ ॥ ततः समीपमगमद्दंडाकारं प्रणम्य च ॥ अब्रवीत्प्रांजलिर्भूत्वा विनयावनतः स्थितः ॥ १३ ॥ भगवंस्ते प्रभावोऽद्य तपसा वै मया श्रुतः ॥ १४ ॥ यदन्यस्तापसो नास्ति ईदृशोऽत्र धरा

१ चाभिचारिकाः—इ० पा० । २ पुरतः—इति शेषः । ३ मंजूषा—द्रव्यस्थापनपेटिका—इत्यर्थः । मात्रा तस्य निरर्गला—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तले ॥ तेनाहं दूरतः प्राप्तो वैराग्येण समन्वितः ॥ १५ ॥ संसारासारतां ज्ञात्वा जन्ममृत्युजरार्तिकाम् ॥ अर्थात्स्वप्नप्रतीकाशं यौवनं च नृणा मिह ॥ १६ ॥ यद्वत्पर्वतसंजाता नदी च क्षणभंगुरा ॥ पुत्राः कलत्राणि च वा ये चान्ये बांधवादयः ॥ १७ ॥ ते सर्वे च परिज्ञेया यथा पाप समागमाः ॥ तत्संसारसमुद्रस्य तारणार्थं ब्रवीहि मे ॥ १८ ॥ उपायं कंचिदद्यैव उपदेशे व्यवस्थितम् ॥ तरामि येन संसारं प्रसादात्तव सुव्रत ॥ १९ ॥ तस्य तद्वचनं श्रुत्वा रोमांचिततनूरुहः ॥ ज्ञात्वा माहेश्वरः कोऽयं चिंतावान्समुपस्थितः ॥ २० ॥ यथा ब्रवीषि धन्योऽसि यस्य ते मतिरीदृशी ॥ तारुण्ये वर्तमानस्य सुकुमारस्य चैव हि ॥ २१ ॥ तारुण्ये वर्तमानो यः शांतः सोऽत्र निगद्यते ॥ धातुषु क्षीयमाणेषु शमः कस्य न जायते ॥ २२ ॥ यद्येवं सुविरक्तिः स्यात्संसारोपरि संस्थिता ॥ समाराधय देवेशं शंकरं शशिशेखरम् ॥ २३ ॥ नान्यथा घोरजाप्येन तीर्यते भवसागरः ॥ मया सम्यक्परिज्ञातमेतच्छास्त्रसमागमात् ॥ २४ ॥ शूद्रो वा यदि वा विप्रो म्लेछो वा पापकृन्नरः ॥ शिवदीक्षासमोपेतः पुष्पमेकं तु यो न्यसेत् ॥ २५ ॥ षडक्षरेण मंत्रेण लिंगस्योपरि भक्तितः ॥ स तां गतिमवाप्नोति यांयां यांतीह यज्विनः ॥ २६ ॥ यो ददाति प्रभक्त्या च शिवदीक्षान्विताय च ॥ वस्त्रोपानहकौपीनं स यज्ञैः किं करिष्यति ॥ २७ ॥ तच्छुत्वा चरणौ तस्य दुःशीलोऽसौ तदाऽऽददे ॥ विन्यस्य स्वशिर स्ताभ्यां ततो वाक्यमुवाच ह ॥ २८ ॥ शिवदीक्षाप्रमाणेन प्रसादं कुरु मे प्रभो ॥ शुश्रूषां येन ते नित्यं प्रकरोमि समाहितः ॥ २९ ॥ ततोऽसौ तापसो विप्राश्चिंतयामास चेतसि ॥ दक्षोऽयं दृश्यते कोऽपि पुमांश्चैव समागतः ॥ ३० ॥ ममास्ति नापरः शिष्यस्तस्मादेनं करोम्यहम् ॥ ततोऽ ब्रवीत्करे गृह्य यद्येवं वत्स मे समम् ॥ समयं कुरु येन त्वां दीक्षयाम्यद्य चैव हि ॥ ३१ ॥ त्वया कुटीरकं कार्यं मठस्यास्य विदूरतः ॥ प्रवेशो नैव कार्यस्तु ममात्रास्तं गते रवौ ॥ ३२ ॥ ॥ दुःशील उवाच ॥ ॥ तवादेशः प्रमाणं मे केवलं तापसोत्तम ॥ किं मठेन करिष्यामि विशेषाद्रा त्रिसंगमे ॥ ३३ ॥ यः शिष्यो गुरुवाक्यं तु न करोति यथोदितम् ॥ तस्य व्रतं च तद्व्यर्थं नरकं च ततः परम् ॥ ३४ ॥ तच्छुत्वा तुष्टिमापन्नः शिवदीक्षां ततो ददौ ॥ तस्मै विनययुक्ताय तदा निंबशुचो मुनिः ॥ ३५ ॥ ततःप्रभृति सोऽतीव तस्य शुश्रूषणे रतः ॥ रंजयामास तच्चित्तं परिचर्यापरायणः ॥ ३६ ॥ मनसा चिन्तयानस्तु तन्मात्रार्थं दिनेदिने ॥ नच्छिद्रं वीक्षते किंचिद्वीक्षमाणोऽपि यत्नतः ॥ ३७ ॥ शैवोऽपि च स कक्ष्यां तां तां मात्रां हेमसंभवाम् ॥ कथंचिन्मोक्षते भूमौ भोज्ये देवार्चनेऽपि न ॥ ३८ ॥

१ घोरसागरः—इ० पा० । २ ताभ्याम्—तयोरुपरि—इत्यर्थः । ३ तन्मात्रार्थम्—तद्द्रव्यार्थम्—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततोऽसौ चिन्तयामास दुःशीलो निजचेतसि ॥ मठे तावत्प्रवेशोऽस्ति नैव रात्रौ कथंचन ॥ ३९ ॥ सूर्यास्तमानवेलायां
यत्प्रयच्छति तत्क्षणात् ॥ परिघं सुदृढं पापस्तत्करोमि च किं पुनः ॥ ४० ॥ मठोऽयं सुशिलाबद्धो नैव खातं प्रजायते ॥ तुंग
त्वान्न प्रवेशः स्यादुपायैर्विविधैः परैः ॥ ४१ ॥ तत्किं विषं प्रयच्छामि शस्त्रैर्व्यापादयामि किम् ॥ दिवापि पशुमारेण पंचत्वं वा नयामि
किम् ॥ ४२ ॥ एवं चिन्तयतस्तस्य प्रावृट्काल उपस्थितः ॥ श्रावणस्यासिते पक्षे कर्कटस्थे दिवाकरे ॥ ४३ ॥ प्राप्तो महेश्वरस्तस्य कोऽपि तत्र
धनी द्रुतम् ॥ तेनोक्तं प्रणिपत्योच्चैः करिष्यामि पवित्रकम् ॥ ४४ ॥ चतुर्दश्यामहं स्वामिन्यद्यादेशो भवेत्तव ॥ यद्यागच्छसि मे ग्रामं प्रसादेन सम
न्वितः ॥ ४५ ॥ ॥ सूत उवाच ॥ ॥ तच्छुत्वा तुष्टिमापन्नस्ततो निंबशुचो मुनिः ॥ तथेति चैवमुक्त्वा तं प्रेषयामास तत्क्षणात् ॥ ४६ ॥ आग
मिष्याम्यहं काले स्वशिष्येण समन्वितः ॥ करिष्यामि परं श्रेयस्तव वत्स न संशयः ॥ ४७ ॥ अथ काले तु संप्राप्ते चिन्तयित्वा प्रभातिकम् ॥
प्रभातसमये प्राप्ते स शैवः प्रस्थितस्तदा ॥ दुःशीलेन समायुक्तः संप्रहृष्टतनूरुहः ॥ ४८ ॥ ततो वै गच्छमानस्य तस्य मार्गे व्यवस्थिता ॥ पुण्या
नदी सुविख्याता मुरला सागरंगमा ॥ ४९ ॥ स तां दृष्ट्वाऽब्रवीद्वाक्यं वत्स शिष्य करोम्यहम् ॥ भवता सह देवार्चां मुरलायां स्थिरो भव ॥ ५० ॥
बाढमित्येव स प्रोक्त्वा संस्थितोऽस्यास्तटे शुभे ॥ सोऽपि निंबशुचस्तस्य रंजितः सर्वदा गुणैः ॥ ५१ ॥ सुशिष्यं तं परिज्ञाय विश्वासं परमं गतः॥
स्थगितां तां समादाय हेममात्रासमुद्भवाम्[2] ॥ ५२ ॥ जागेश्वरसमोपेतां स कन्थां व्याक्षिपत्क्षितौ ॥ पुरीषोत्सर्गकार्येण ततस्तोकांतरं गतः ॥ ५३ ॥
यावच्चादर्शनं प्राप्तो वेतसैः परिवारितः ॥ तावन्मात्रां समादाय दुःशीलः प्रस्थितो द्रुतम् ॥ उत्तरां दिशमाश्रित्य प्रहृष्टेनांतरात्मना ॥ ५४ ॥
अथासौ चागतो यावद्दुःशीलं नैव पश्यति ॥ केवलं दृश्यते कन्था जागेश्वरसमन्विता ॥ ५५ ॥ ततः शीघ्रतरं शौचं किञ्चित्कृत्वा सुदुर्मनाः ॥
विनैवाचमनं प्राप्तः सा कन्था यत्र तिष्ठति ॥ ५६ ॥ यावन्मात्राविहीनां च ततो ज्ञात्वा च तां हृताम् ॥ तेन शिष्येण मूर्च्छाढ्यो निपपात महीतले
॥ ५७ ॥ ततश्च चेतनां प्राप्य कृच्छ्राच्चोत्थाय तत्क्षणात् ॥ शिलायां ताडयामास निजांगानि शिरस्तथा ॥ ५८ ॥ हा हतोऽस्मि
विनष्टोऽस्मि मुष्टस्तेन दुरात्मना ॥ किं करोमि क्व गच्छामि कथं तं वीक्षयाम्यहम् ॥ ५९ ॥ ततस्तु पदवीं वीक्ष्य तस्य तां चलितो ध्रुवम् ॥ वृद्ध
भावात्परिश्रांतो वावृत्य स मठं गतः ॥ ६० ॥ दुःशीलोऽपि समादाय मात्रां स्थानांतरं गतः ॥ ततस्तेन सुवर्णेन व्यवहारान्करोति सः ॥ ६१ ॥

१ अपि—इ० पा० । २ हेममात्रासमुद्भवाम्—सुवर्णमंजूषासमन्विताम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ततो गृहस्थतां प्राप्तः कृतदारपरिग्रहः ॥ वृद्धभावं समापन्नः संतानेन विवर्जितः ॥ ६२ ॥ कस्यचित्त्वथ कालस्य तीर्थयात्रापरायणः ॥ भार्यया 
 सहितो विप्रश्चमत्कारपुरं गतः ॥ ६३ ॥ स्नात्वा तीर्थेषु सर्वेषु देवतायतनेषु च ॥ भ्रममाणेन संदृष्टो दुर्वासानाम सन्मुनिः ॥ ६४ ॥ निजदेवस्य 
सद्भक्त्या नृत्यगीतपरायणः ॥ तं च दृष्ट्वा नमस्कृत्य वाक्यमेतदुवाच सः ॥ ६५ ॥ केनैतत्स्थापितं लिंगं निर्मलं शंकरोद्भवम् ॥ किं त्वं नृत्यसि
गीतं च पुरोऽस्य प्रकरोषि च ॥ मुनीनां युज्यते नैव यदेतत्तव चेष्टितम्॥६६॥ ॥ दुर्वासा उवाच ॥ ॥ मयैतत्स्थापितं लिंगं देवदेवस्य शूलिनः॥
नृत्यगीतप्रियो यस्माद्देवदेवो महेश्वरः ॥ ६७ ॥ नमेऽस्ति विभवः कश्चिद्येन भोगं करोम्यहम् ॥६८॥ एतस्मिन्नंतरे प्राप्तश्चिर्भटिर्नाम योगवित् ॥
तेन पृष्टः स दुर्वासा वेदांतिकमिदं वचः ॥६९॥ असूर्या नाम ते लोका अंधेन तमसा वृताः ॥ तांस्ते प्रेत्याऽभिगच्छंति ये केचात्महनो जनाः ॥
॥ ७० ॥ उपविश्य ततस्तेन तस्य दत्तस्तु निर्णयः ॥ दुःशीलेनापि तत्सर्वं विज्ञातं तस्य संस्तुतम् ॥ ७१ ॥ ततो विशेषतो जाता भक्तिस्तस्य
हरं प्रति ॥ तं प्रणम्य ततश्चोच्चैर्वाक्यमेतदुवाच ह ॥ ७२ ॥ भगवन् ब्राह्मणोऽस्मीति जात्या चैव न कर्मणा ॥ न कस्यचिन्मया दत्तं कदाचिन्नैव
भोजनम् ॥ केवलं देवविप्राणां वंचयित्वा धनं हृतम् ॥ व्यसनेनाभिभूतेन द्यूतवेश्योद्भवेन च ॥ ७४ ॥ तथा च ब्राह्मणेनापि मया शैवो गुरुः
कृतः ॥ वंचितश्च तथानेकैश्चाटुभिर्विहृतं धनम् ॥ ७५ ॥ तस्य सक्तं धनं भूयः साधुमार्गेण चाहृतम् ॥ स चापि च गुरुर्मह्यं परलोकमिहागतः ॥
॥ ७६ ॥ पश्चात्तापेन तेनैव प्रदह्यामि दिवानिशम् ॥ पुरश्चरणदानेन तत्प्रसादं कुरुष्व मे ॥ ७७ ॥ अस्ति मे विपुलं वित्तं न संतानं
मुनीश्वर ॥ तन्मे वद मुने श्रेयस्तद्वित्तस्य यथा भवेत् ॥ इह लोके परे चैव येन सर्वं करोम्यहम् ॥ ७८ ॥ ॥ दुर्वासा उवाच ॥ ॥
कृत्वा पापसहस्राणि पश्चाद्धर्मपरो भवेत् ॥ यः पुमान्सोऽतिकृच्छ्रेण तरेत्संसारसागरम् ॥ ७९ ॥ दिनेनापि गुरुर्योऽसौ त्वया शैवो
विनिर्मितः ॥ अधर्मेणापि संजातः स गुरुस्तेन संशयः ॥ ८० ॥ ब्राह्मणो ब्रह्मचारी स्याद्गृहस्थस्तदनंतरम् ॥ वानप्रस्थो यतिश्चैव तत
श्चैव कुटीचरः ॥ ८१ ॥ बहूदकस्ततो हंसः परमश्च ततो भवेत् ॥ ततश्च मुक्तिमायाति मार्गमेनं समाश्रितः ॥ ८२ ॥ त्वया पुनः कुमार्गेण यद्व्रतं 
ब्राह्मणेन च ॥ शैवमार्गं समास्थाय तन्महापातकं कृतम् ॥ ८३ ॥ ॥ दुःशील उवाच ॥ ॥ सर्वेष्वेव हि वेदेषु रुद्रः संकीर्त्यते प्रभुः ॥ तत्किं
दोषस्त्वया प्रोक्तस्तस्य दीक्षासमुद्भवः ॥ ८४ ॥ ॥ दुर्वासा उवाच ॥ ॥ सत्यमेतत्त्वया ख्यातं वेदे रुद्रः प्रकीर्तितः ॥ बहुधा वासुदेवोऽपि ब्रह्मा
चैव विशेषतः ॥ ८५ ॥ परं विप्रस्य या दीक्षा व्रतबंधसमुद्भवा ॥ गायत्री परमा जाप्ये गुरुर्व्रतपरो हि सः ॥ वैष्णवीं चाथ शैवीं च योऽन्यां दीक्ष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाचरेत् ॥ ८६ ॥ ब्राह्मणो न भवेत्सोऽत्र यद्यपि स्यात्षडंगवित् ॥ अपरं लिंगभेदस्ते संजातः कपटादिषु ॥ ८७ ॥ व्रतत्यागान्न संदेहस्तत्र ते नास्ति किंचन ॥ प्रायश्चित्तं मया सम्यक्स्मृतिमार्गेण चिंतितम् ॥ ८८ ॥ ॥ दुःशील उवाच ॥ ॥ सतां सप्तपदीं मैत्रीं प्रवदंति मनीषिणः ॥ मित्रतां तु पुरस्कृत्य किंचिद्वक्ष्यामि तच्छृणु ॥ ८९ ॥ अस्ति मे विपुलं वित्तं यदि तेन प्रसिद्ध्यति ॥ तद्वदस्व महाभाग येन सर्वं करोम्यहम् ॥ ॥ ९० ॥ ॥ दुर्वासा उवाच ॥ ॥ एक एव ह्युपायोऽस्ति तव पातकनाशने ॥ तं चेत्करोषि मे वाक्याद्विशुद्धः संभविष्यसि ॥ ९१ ॥ तपः कृते प्रशंसंति त्रेतायां ज्ञानमेव च ॥ द्वापरे तीर्थयात्रां च दानमेव कलौ युगे ॥ ९२ ॥ सांप्रतं कलिकालोऽयं वर्तते दारुणाकृतिः ॥ तस्मात्कृष्णाजिनं देहि सर्वपापविशुद्धये ॥ ९३ ॥ तथा च ते घृणाऽप्यस्ति गुरुवित्तसमुद्भवा ॥ तदर्थं कुरु तन्नाम्ना शंकरस्य निवेशनम् ॥ ९४ ॥ येन तस्मादपि त्वं हि आनृण्यं यासि तत्क्षणात् ॥ अन्यत्रापि च तद्वित्तं यत्किंचिच्च प्रपद्यते ॥ ९५ ॥ ब्राह्मणेभ्यो विशिष्टेभ्यो नित्यं देहि समाहितः ॥ तिलपात्रं सदा देहि सहिरण्यं विशेषतः ॥ ९६ ॥ येन ते सकलं पापं देहान्नाशं प्रगच्छति ॥ अपरं चैत्रमासेऽहं सदाऽऽगच्छामि भक्तितः ॥ ९७ ॥ कल्पग्रामात्सुदूराच्च प्रासादेऽत्र स्वयं कृते ॥ पुनर्यामि च तत्रैव व्रतमेतद्धि मे स्थितम् ॥ ९८ ॥ तस्माच्चिंत्यस्त्वयाह्येष प्रासादो यो मया कृतः ॥ चिंतनीयं सदैवेह स्नानादिभिरनेकशः ॥ ९९ ॥ ॥ दुःशील उवाच ॥ ॥ करिष्यामि वचस्तेऽहं यथा वदसि सन्मुने ॥ १०० ॥ ॥ ॥ ॥ दुर्वासा उवाच ॥ ॥ सर्वपापविशुद्ध्यर्थं दत्ते कृष्णाजिने द्विजः ॥ प्रयच्छ तिलपात्राणि गतपापस्य शुद्धये ॥ १०१ ॥ ॥ सूत उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा दत्तं तेन महात्मना ॥ ततः कृष्णाजिनं भक्त्या ब्राह्मणायाहिताग्नये ॥ १०२ ॥ दुर्वाससः समादेशाद्यथोक्तविधिना द्विजाः ॥ यच्छतस्तिलपात्राणि तस्य नित्यं प्रभक्तितः ॥ १०३ ॥ गतपापस्य दीक्षां च ददौ निर्वाणसंभवाम् ॥ तथासौ गतपापस्य दीक्षां दत्त्वा यथाविधि ॥ १०४ ॥ ततः प्रोवाच मधुरं देहि मे गुरुदक्षिणाम् ॥ १०५ ॥ ॥ दुःशील उवाच ॥ ॥ याचस्व त्वं प्रभो शीघ्रं यां ते यच्छामि दक्षिणाम् ॥ तां प्रदास्यामि चेच्छक्तिर्वित्तशाठ्यविवर्जिताम् ॥ १०६ ॥ ॥ दुर्वासा उवाच ॥ ॥ कल्पग्रामं गमिष्यामि सांप्रतं वर्तते कलिः ॥ नाहमत्रागमिष्यामि यावन्नैव कृतं भवेत् ॥ १०७ ॥ अर्धनिष्पादितो ह्येष प्रासादो यो मया कृतः ॥ परिपूर्तिं त्वया नेय एषा मे गुरुदक्षिणा ॥ १०८ ॥ नृत्यगीतादिकं यच्च तथा कार्यं स्वशक्तितः ॥ पुरतोऽस्य बलिर्देयस्तथान्यत्कुसुमादिकम् ॥ १०९ ॥ एवमुक्त्वा गतः सोऽथ कल्पग्रामं मुनीश्वरः ॥ दुःशीलोऽपि तथा चक्रे यत्तेन समुदाहृतम् ॥ ११० ॥ ॥ सूत उवाच ॥ ॥ एवं तस्य प्रभ



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



क्तस्य तत्कार्याणि प्रकुर्वतः ॥ तन्नाम्ना कीर्त्यते सोऽथ दुःशील इति संज्ञितः ॥ १११ ॥ चैत्रमासे च यो नित्यं तं च देवं प्रपश्यति ॥ क्षणं कृत्वा स पापेन वार्षिकेण प्रमुच्यते ॥ ११२ ॥ यः पुनः स्नपनं तस्य सर्वं चैव करोति च ॥ त्रिंशद्वर्षोद्भवं पापं तस्य गात्रात्प्रणश्यति ॥ ११३ ॥ यः पुनर्नृत्यगीताद्यं कुरुते च तदग्रतः ॥ आजन्ममरणात्पापात्सोऽपि मुक्तिमवाप्नुयात् ॥ ११४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये दुर्वासःस्थापितशिवलिंगस्य दुःशीलेश्वरसंज्ञाप्राप्तिकारणवृत्तान्तवर्णनं नाम चतुःसप्तत्युत्तर द्विशततमोऽध्यायः ॥ २७४ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ दुःशीलोऽपि च तत्कृत्वा गुरोर्नाम्ना शिवालयम् ॥ निम्बेश्वर इति ख्यातं दक्षिणां दिशमाश्रितम् ॥ १ ॥ चकार परया भक्त्या तत्पादाब्जमनुस्मरन् ॥ तथा तस्य तु भार्या या नाम्ना शाकंभरी स्मृता ॥ २ ॥ स्वनामांका तत्र दुर्गा तथा संस्थापिता तया ॥ ततस्तु तद्धनं ताभ्यां किंचिच्छेषं व्यवस्थितम् ॥ ३ ॥ पूजार्थं देवताभ्यां च ब्राह्मणेभ्यः समर्पितम् ॥ भिक्षाभुजौ ततो जातौ दम्पती तौ ततः परम् ॥ ४ ॥ कस्यचित्त्वथ कालस्य दुःशीलो निधनं गतः ॥ ५ ॥ शाकंभर्यपि तत्कायं गृहीत्वा हव्यवाहनम् ॥ प्रविष्टा नृपशार्दूल निर्विकल्पेन चेतसा ॥ ६ ॥ ततो विमानमारुह्य वराप्सरःसुसेवितम् ॥ गतौ तौ द्वावपि स्वर्गं संप्रहृष्टतनूरुहौ ॥ ७ ॥ एतद्दुःशीलजं यस्तु पठेदाख्यानमुत्तमम् ॥ स सर्वैर्मुच्यते पापैरज्ञानविहितैर्नृप ॥ ८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये निम्बेश्वरशाकंभर्युत्पत्तिमाहात्म्यवर्णनं नाम पञ्चसप्तत्युत्तरद्विशततमोऽध्यायः ॥ २७५ ॥ ॥ छ ॥ ॥ ॥ सूत उवाच ॥ ॥ तथान्येऽपि वसन्तीह रुद्रा एकादशैव तु ॥ सञ्जाता ब्राह्मणश्रेष्ठा मुनीनां हितकाम्यया ॥ १ ॥ यैर्दृष्टैः पूजितैर्वापि स्तुतैर्वाथ नमस्कृतैः ॥ विपाप्मा जायते मर्त्यः सर्वदोषविवर्जितः ॥ २ ॥ ॥ ऋषय ऊचुः ॥ ॥ एक एव श्रुतो रुद्रो न द्वितीयः कथंचन ॥ गौरी भार्या प्रिया यस्य स्कन्दः पुत्रः प्रकीर्तितः ॥ ३ ॥ तेनैकं विद्महे रुद्रं नान्यमीशं कथंचन ॥ तस्माद्ब्रूहि महाभाग सर्वानेतान्सुविस्तरात् ॥ ४ ॥ ॥ सूत उवाच ॥ ॥ सत्यमेतन्महाभागा यद्भवद्भिरुदाहृतम् ॥ एक एव स्थितो रुद्रो न द्वितीयः कथंचन ॥ ५ ॥ परं यथा च सञ्जाता रुद्रा एकादशात्र भोः ॥ तथाहं कीर्तयिष्यामि शृणुध्वं सुसमाहिताः ॥ ६ ॥ वाराणस्यां पुरा संस्था मुनयः शंसितव्रताः ॥ हाटकेश्वरदेवस्य दर्शनार्थं समुत्सुकाः ॥ ७ ॥ प्रस्थिताः समयं कृत्वा स्पर्धमानाः परस्परम् ॥ अहंपूर्वमहं पूर्वं वीक्षयिष्यामि तं विभुम् ॥ ८ ॥

१ क्षणं कृत्वा—अवकाशं कृत्वा—इत्यर्थः,—क्षणमात्रेण—इति वाऽर्थः। २ सर्वम्—पूजादिकम्—इत्यर्थः।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वेषामग्रतो भूत्वा पाताले हाटकेश्वरम् ॥ यश्चादौ तत्र गत्वा च नेक्षयिष्यति तं हरम् ॥ सर्वेषां श्रमजं पापं तस्यैकस्य
भविष्यति ॥ ९ ॥ एवमुक्त्वा ततः सर्वे वाराणस्यां ततः परम् ॥ प्रस्थिता धावमानाश्च वेगेन महता ततः ॥ १० ॥ एतस्मिन्न
न्तरे देवो हाटकेश्वरसंज्ञितः ॥ ज्ञात्वा तेषामभिप्रायं मिथः स्पर्द्धासमुद्भवम् ॥ आत्मनो दर्शनार्थाय बहुभक्तिपुरस्कृतम् ॥ ११ ॥
लघुना रक्ष्यमाणेन सर्वेषां च महात्मनाम् ॥ नागरंध्रेण निष्क्रम्य पातालाच्चैव तत्क्षणात् ॥ १२ ॥ एकादशप्रकारं स कृत्वा रूपं मनोहरम् ॥
त्रिशूलभृत्त्रिनेत्रं च कपर्देन विभूषितम् ॥ १३ ॥ शशिखंडधरं चैव रुण्डमालाप्रधारकम् ॥ समं चैव स्थितस्तेषां दर्शने शंकरः प्रभुः ॥ १४ ॥
ततस्ते वै समालोक्य पुरस्थं वृषभध्वजम् ॥ जानुभ्यां धरणीं गत्वा स्तुतिं चक्रुस्ततस्ततः ॥ १५ ॥ एको जानाति देवोऽयं मम संदर्शनं गतः ॥
देवदेवो महादेवः प्रथमं भक्तवत्सलः ॥ १६ ॥ अन्यो जानाति मे पूर्वं जातस्ते तापसोत्तमः ॥ स्तुतिं चक्रुश्च विप्रेंद्रा जानुभ्यामवनिं गताः ॥१७॥
॥ ॥ तापसा ऊचुः ॥ ॥ नमो देवाधिदेवाय सर्वदेवमयाय च ॥ नमः शांताय सूक्ष्माय नमश्चांधकभेदिने ॥ १८ ॥ नमोऽस्तु सर्वरुद्रेभ्यो ये
दिवं संश्रिताः सदा ॥ जीवापयंति जगतीं वायुभिश्च पृथग्विधैः ॥ १९ ॥ नमोऽस्तु सर्वरुद्रेभ्यो ये स्थिता वारुणीं दिशम् ॥ रक्षंति सर्वलोकांश्च
पिशाचानां दुरात्मानाम् ॥ २० ॥ नमोऽस्तु सर्वरुद्रेभ्यो दिशमूर्ध्वं समाश्रिताः ॥ रक्षंति सकलांल्लोकान्भूतानां जंभकाद्भयात् ॥ २१ ॥ नमोऽस्तु
सर्वरुद्रेभ्यो येऽध ऊर्ध्वं समाश्रिताः ॥ रक्षंति सकलांल्लोकान्कूष्मांडानां भयात्सदा ॥ २२ ॥ असंख्याताः सहस्राणि ये रुद्रा भूमिमाश्रिताः ॥
नमस्तेभ्योऽपि सर्वेभ्यस्तेषां रक्षंति ये रुजः ॥ २३ ॥ एवं स्तुतास्तु ते रुद्रा एकादशतपस्विभिः ॥ एकादशापि तान्प्रोचुर्भक्तिनम्रांस्तु ताप
सान् ॥ २४ ॥ ॥ रुद्रा ऊचुः ॥ ॥ एकादशप्रकारोऽहं तुष्टो वस्तापसोत्तमाः ॥ बहुभक्त्यतिरेकेण व्रियतां च यथेप्सितम् ॥२५॥ ॥ तापसा
ऊचुः ॥ ॥ यदि तुष्टोसि नो देव यदि यच्छसि वांछितम् ॥ एकादशप्रकारैस्तु सदा स्थेयमिहैव तु ॥ २६ ॥ हाटकेश्वरजे क्षेत्रे सर्वतीर्थमये
शुभे ॥ आराधनं प्रकुर्वाणा वसामो येन वै वयम् ॥ २७ ॥ ॥ श्रीभगवानुवाच ॥ ॥ एकादशप्रकारा या मूर्तयो निर्मिता मया ॥ एताभिरेव
सर्वाभिः स्थास्याम्यत्र सदैव हि ॥ २८ ॥ आद्या तु मम या मूर्तिः सा कैलासं समाश्रिता ॥ संतिष्ठति सदैवात्र कैलासे पर्वतोत्तमे ॥ २९ ॥
एतास्तु मूर्तयोऽस्माकं स्थास्यंत्यत्रैव सर्वदा ॥ सर्वेषामेव लोकानां हिताय द्विजसत्तमाः ॥ ३० ॥ नामभिश्च क्रमेणैव युष्मदीयैः स्वयं द्विजाः ॥
विश्वामित्रह्रदे स्नात्वा एता मूर्तीर्ममात्र वै ॥ पूजयिष्यंति ये मर्त्यास्ते यास्यंति परां गतिम् ॥ ३१ ॥ किं वाचा बहुनोक्तेन भूयोभूयो द्विजो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



त्तमाः ॥ या तासां क्रियते पूजा एकादशगुणा भवेत् ॥ ३२ ॥ एवमुक्त्वा त्रिनेत्रस्तु तत्रैवादर्शनं गतः ॥ तेऽपि तत्राश्रमं कृत्वा श्रद्धया परया युताः ॥ मूर्तीश्च ताः समाराध्य संप्राप्ताः परमं पदम् ॥ ३३ ॥ अन्योऽपि यः पुमांस्ताश्च आराधयति श्रद्धया ॥ स याति परमं स्थानं यत्र देवो महेश्वरः ॥ ३४ ॥ ततः प्रभृति ते जाता रुद्रा एकादशैव तु ॥ संख्यया देवदेवस्य महेश्वरवपुर्धराः ॥ ३५ ॥ तेजोत्तमास्ते संयुक्ता स्त्रिनेत्राः शूलपाणयः ॥ एतद्वः सर्वमाख्यातं यत्पृष्टोऽस्मि द्विजोत्तमाः ॥ ३६ ॥ एकादशप्रकारस्तु यथा जातो महेश्वरः ॥ चैत्रे मासि सिते पक्षे चतुर्दश्यां दिने स्थिते ॥ ३७ ॥ यस्तान्पूजयते भक्त्या स याति परमां गतिम् ॥ अधनो धनमाप्नोति ह्यपुत्रः पुत्रवान्भवेत् ॥ ३८ ॥ सरोगो रोगमुक्तस्तु पराभूतो रिपुक्षयम् ॥ तत्समाराधनादेव कामानंत्यमवाप्नुयात् ॥ ३९ ॥ यः पुनः शिवदीक्षाढ्यो भस्मस्नानपरायणः ॥ तत्समाराधनं कुर्याच्छृणु तस्यापि यत्फलम् ॥ ४० ॥ यदन्यः प्राप्नुयान्मर्त्यस्तत्पूजासंभवं फलम् ॥ षडक्षरेण मंत्रेण पुष्पेणैकेन तत्फलम् ॥ ४१ ॥ शिवदीक्षाधरो यस्तु शतघ्नं लभते फलम् ॥ तस्माच्छतघ्नमाप्नोति शैवात्पाशुपतश्च यः ॥ तस्मात्कालमुखो यश्च महाव्रतधरश्च यः ॥ ४२ ॥ मूर्तीर्यास्ताश्च ये भक्त्या विनताः पूजयंति च ॥ सर्वेषामेव तेषां तु फलं शतगुणं भवेत् ॥ ४३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्य एकादशरुद्रोत्पत्तिवर्णनं नाम षट्सप्तत्युत्तरद्विशततमोऽध्यायः ॥ २७६ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ किं नामानो द्विजास्ते च वाराणस्याः समागताः ॥ एकादशप्रकारोऽसौ येषां रुद्रः प्रभक्तितः ॥ तत्संज्ञाश्च समाचक्ष्व विस्तरेण महामुने ॥ १ ॥ ॥ सूत उवाच ॥ ॥ एकस्तेषां मृगव्याधो विख्यातो भुवनत्रये ॥ द्वितीयः सर्वसंज्ञश्च निंदितश्च तृतीयकः ॥ २ ॥ महायशाश्चतुर्थस्तु कथ्यते मुनिसत्तमाः ॥ अजैकपाद इत्युक्तः पंचमो मुनिसत्तमाः ॥ ३ ॥ अहिर्बुध्न्यस्तथा षष्ठः पिनाकी सप्तमस्तथा ॥ परं तपस्तथान्यस्तु दहनो नवमस्तथा ॥ ४ ॥ ईश्वरो दशमः प्रोक्तः कपाली चांतिमस्तथा ॥ तेषामेतानि नामानि स्थितान्येव हि यानि च ॥ रुद्राणामपि तान्येव विहितानि हरेण तु ॥ ५ ॥ ॥ ऋषय ऊचुः ॥ ॥ कानि दानानि शस्यानि तदर्थं वद नो द्रुतम् ॥ जपश्चैव पुरा प्रोक्तस्त्वया कार्यो यथैव च ॥ ६ ॥ ॥ सूत उवाच ॥ ॥ तदुद्दिश्य प्रदातव्यमेकैकस्य पृथक्पृथक् ॥ प्रत्यक्षाश्च महाभाग दातव्या धेनवः क्रमात् ॥ ७ ॥ मृगव्याधाय प्रत्यक्षा गौर्देया च गुडोद्भवा ॥ कपालिने प्रदातव्या नवनीतसमु

१ शतघ्नम्—शतगुणितम्—इत्यर्थः । २ येषां प्रभक्तितः असौ रुद्रः एकादशप्रकारो जातः—इति योजना । ३ महामते—इ० पा० । ४ अन्यस्तु—अष्टमः—इत्यर्थः । ५ अंतिमः—एकादशः—इत्यर्थः । ६ तथा—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्भवा ॥ ८ ॥ अजपादाय चाज्योत्था अहिर्बुध्न्याय हेमजा ॥ पिनाकिने प्रदातव्या धेनुर्लवणसम्भवा ॥ ९ ॥ परंतपाय विप्रेन्द्रास्तथैव रसस म्भवा ॥ अन्नजा दहनायोक्ता ईश्वराय जलोद्भवा ॥ १० ॥ एता ददाति यो विप्रा एतेषां च महात्मनाम् ॥ चक्रवर्ती भवेन्नूनमेतदाह पितामहः ॥ ॥ ११ ॥ अन्यत्रापि प्रदत्ताश्च किं पुनर्भवसंनिधौ ॥ तस्मात्सर्वप्रयत्नेन एता देयाः प्रयत्नतः ॥ १२ ॥ धेनवो यो न शक्तः स्यादेका देया प्रयत्नतः ॥ सर्वेषामेव रुद्राणां भर्तृयज्ञवचो यथा ॥ १३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये एकादशरुद्रसमीपे दानमाहात्म्यवर्णनं नाम सप्तसप्तत्युत्तरद्विशततमोऽध्यायः ॥ २७७ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ ये चान्ये भास्करा स्तत्र संति ब्राह्मणसत्तमाः ॥ हाटकेश्वरजे क्षेत्रे याज्ञवल्क्यप्रतिष्ठिताः ॥ १ ॥ यस्तान्पूजयते भक्त्या हृदि कृत्वाऽभिवांछितान् ॥ सप्तम्यां चैव सप्तम्यां लभते नात्र संशयः ॥ २ ॥ ॥ ऋषय ऊचुः ॥ ॥ एक एव स्थितः सूर्यो दृश्यते च नभस्तले ॥ तत्कथं द्वादशैते च तत्र क्षेत्रे प्रतिष्ठिताः ॥ कस्मिन्काले तथा कृत्ये किमर्थं सूतनन्दन ॥ ३ ॥ ॥ सूत उवाच ॥ ॥ आसीत्पूर्वं कृतिर्नाम शुनःशेपसमुद्भवः ॥ ॥ ४ ॥ तस्य पुत्रः शुनः पुत्रो बभूव मुनिसत्तमः ॥ चारायणः सुतस्तस्य बभूव मुनिसत्तमः ॥ ५ ॥ कस्यचित्त्वथ कालस्य ब्रह्मा लोक पितामहः ॥ सावित्रीशापनिर्दग्धो ह्यवतीर्णो धरातले ॥ ६ ॥ गायत्री च यदा विप्रास्तेनोढा यज्ञकर्मणि ॥ प्राक्स्थितां च परित्यज्य सर्वदेवसमागमे ॥ कालात्ययो भवेन्नैव सावित्र्यागमने स्थिरे ॥ ७ ॥ ततस्तस्य समादेशाद्गायत्री गोपकन्यका ॥ शक्रेण च समा नीता दिव्यलक्षणलक्षिता ॥ ८ ॥ गोपकन्यां च तां ज्ञात्वा गोश्च वक्त्रेण पद्मजः ॥ प्रवेश्याकर्षयामास गुह्येन च ततः परम् ॥ ९ ॥ ब्राह्म णानां गवां चैव कुलमेकं द्विधा स्थितम् ॥ एकत्र मन्त्रास्तिष्ठंति हविरेकत्र संस्थितम् ॥ १० ॥ तेन तां ब्राह्मणीं कृत्वा पश्चात्तस्याः परिग्रहम् ॥ गृह्यो क्तविधिना चक्रे पुरःस्थोऽपि पितामहः ॥ ११ ॥ पत्नीशालोपविष्टायां ततस्तस्यां द्विजोत्तमाः ॥ सावित्री समनुप्राप्ता देवपत्नीभिरावृता ॥ १२ ॥ ततस्तां सा समालोक्य रशनासमलंकृताम्[2] ॥ दौर्भाग्यदुःखमापन्ना शशाप च विधिं ततः ॥ १३ ॥ ॥ सावित्र्युवाच ॥ ॥ यस्मात्त्वया परि त्यक्ता निर्दोषाहं पितामह ॥ पितामहोऽसि मे नूनमद्यप्रभृति संगमे ॥ १४ ॥ मनुष्याणां भवेत्कृत्यमन्यनारीपरिग्रहः ॥ एतत्त्वया कृतं यस्मान्मा नुषस्त्वं भविष्यसि ॥ १५ ॥ कामार्तश्च विशेषेण मम वाक्यादसंशयम् ॥ १६ ॥ एवमुक्त्वा तु सावित्री त्यक्त्वा तं यज्ञमंडपम् ॥ गिरेः शिखरमारूढा तपश्चक्रे महत्ततः ॥ १७ ॥ पितामहोऽपि तच्छापाच्चारायणनिवेशने ॥ अवतीर्णो धरापृष्ठे कालेन महता ततः ॥ १८ ॥ स यदा यौवनं भेजे

१ तेन—इति शेषः । २ रशनासमलंकृताम्—यज्ञियमौञ्जीपरिवेष्टितकटिम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



मानुषं च पुरा स्थितः ॥ तथातथा च तापेन कामोत्थेन प्रपीड्यते ॥ १९ ॥ ततोऽसौ वीक्षते नारीं कन्यां वाथ तपस्विनीम् ॥ अविकल्पमना
भेजे रूपसौभाग्यगर्वितः ॥ २० ॥ ततस्तं व्यसनार्तं च दृष्ट्वा चारायणो मुनिः ॥ स्वयं निःसारयामास प्रकोपेन निजाश्रमात् ॥ २१ ॥ स च
पित्रा परित्यक्तो भ्रममाणस्ततस्ततः ॥ चमत्कारपुरं प्राप्तः शाकल्यो यत्र तिष्ठति ॥ २२ ॥ नाम्ना ब्राह्मणशार्दूलो नागरो वेदपारगः ॥ वृतः शिष्य
सहस्रेण वेदविद्यां प्रचारयन् ॥ २३ ॥ अथ तं स प्रणम्योच्चैः शिष्यत्वं समुपागतः ॥ वेदाध्ययनसंपन्नो बभूवाथ चिरादपि ॥ २४ ॥ एतस्मिन्नेव
काले तु आनर्ताधिपतिः स्वयम् ॥ आगतस्तिष्ठते यत्र जलशायी हरिः स्वयम् ॥ २५ ॥ चातुर्मास्यव्रतं तेन गृहीतं तत्पुरस्तदा ॥ प्रार्थितस्तु
ततो विप्राः शाकल्यस्तेन भूभुजा ॥ २६ ॥ शांतिकं पौष्टिकं नित्यं त्वया कार्यं ममालये ॥ यावत्तिष्ठाम्यहं चात्र प्रसादः क्रियतामिति ॥ २७ ॥
बाढमित्येव स प्रोक्त्वा दाक्षिण्येन द्विजोत्तमाः ॥ एकैकं प्रेषयामास स्वशिष्यं तस्य मंदिरे ॥ २८ ॥ स शांतिकं विधायाथ दत्त्वाशीः पार्थिवस्य
च ॥ संप्राप्य दक्षिणां तस्मात्पुनरेति च तं द्विजम् ॥ २९ ॥ शाकल्याय च तां दत्त्वा दक्षिणां निजमंदिरे ॥ जगाम नित्यमेवं हि व्यवहारो
व्यवस्थितः ॥ ३० ॥ अन्यस्मिन्नहनि प्राप्ते शाकल्येन विसर्जितः ॥ शांत्यर्थं याज्ञवल्क्यस्तु पार्थिवस्य निवेशनम् ॥ ३१ ॥ तस्य भूपस्य रूपा
ढ्या मंथरास्ति विलासिनी ॥ रात्रौ च कामिता तेन कामाढ्येन सुकामिनी ॥ ३२ ॥ भावैर्वात्स्यायनप्रोक्तैः समालिंगनपूर्वकैः ॥ स तया
विविधैः कृत्तो मयूरपदकादिभिः ॥ शरीरे चाधरे चैव तथा मणिप्रवालकैः ॥ ३३ ॥ संप्राप्तोऽध्ययनार्थाय यावच्छाकल्यसन्निधौ ॥ तावत्संप्रेषि
तस्तेन शांत्यर्थं भूपमंदिरे ॥ ३४ ॥ सोऽपि संप्रेषितस्तेन गत्वा तं पार्थिवालयम् ॥ शांतिकं च ततश्चक्रे यथोक्तविधिना द्विजाः ॥ ३५ ॥ शांति
कस्यावसाने तु प्रगृह्य कलशोदकम् ॥ पंचांगैः कल्पितं रुद्रैः स्वयमेवाभिमंत्रितैः ॥ ३६ ॥ साक्षतं सुमनोयुक्तं समादाय गतस्ततः ॥ संतिष्ठते
नृपो यत्र आनर्तो व्रतसंयुतः ॥ ३७ ॥ द्यामालेखीति मंत्रं स प्रोच्चार्य विधिपूर्वकम् ॥ छंदर्षिसहितं चैव यावत्क्षिपति मस्तके ॥ तावन्निरीक्षितस्तेन
नखलेखाविकर्तितः ॥ ३८ ॥ खंडितेनाधरेणैव ततोऽभूद्दुर्मना नृपः ॥ ३९ ॥ विटप्रायं तु तं दृष्ट्वा मलिनांबरधारिणम् ॥ तं प्रोवाच विहस्योच्चै
देहि विप्राऽक्षताञ्जलम् ॥ ४० ॥ मंदुरायां स्थितं यच्च काष्ठमेतत्प्रदृश्यते ॥ याज्ञवल्क्यस्ततो दृष्ट्वा सकोपस्तमुपाद्रवत् ॥ ४१ ॥ क्षिप्त्वा तत्र ॥३२१॥
जलं विप्राः साक्षतं गृहमागमत् ॥ अगृह्य दक्षिणां तस्य पार्थिवस्य यथास्थितां[1] ॥ ४२ ॥ एतस्मिन्नंतरे तस्य धवकाष्ठस्य सर्वतः ॥
निष्क्रांता विविधाः शाखाः पल्लवैः समलंकृताः ॥ ४३ ॥ तद्दृष्ट्वा विस्मितः सोऽथ आनर्ताधिपतिर्नृपः ॥ पश्चात्तापं परं चक्रे

१ यथास्थिताम्-यथाप्रतिदिनकल्पिताम्-इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धिङ्म्यैवमनुष्ठितम् ॥ ४४ ॥ स नूनं विबुधः कोऽपि विप्ररूपेण संगतः ॥ येनेदृशः प्रभावोऽयं तस्य मंत्रस्य संस्थितः ॥ ४५ ॥ यद्यहं प्रतिगृह्णामि तस्य मन्त्रोदितं जलम् ॥ जरामरणहीनस्तु तद्भवामि न संशयः ॥ ४६ ॥ एवं चिंतयतस्तस्य तद्दिनं विस्मितस्य च ॥ पार्थिवस्य द्विजश्रेष्ठा जातं वर्षशतोपमम् ॥ ४७ ॥ दिवसे तु समाक्रांते कथंचित्तस्य भूपतेः ॥ विभावरी क्षयं याति कथंचिन्नैव शारदी ॥ ४८ ॥ ततः प्रभातसमये समुत्थाय महीपतिः ॥ आह्वयामास शाकल्यं पुरुषैराप्तकारिभिः ॥४९॥ ततः प्रोवाच विनयात्सादरं प्रांजलिः स्थितः ॥ कल्ये शिष्यः समायातो यस्त्वदीयो ममांतिकम् ॥ ५० ॥ शांत्यर्थं प्रेषणीयस्तु सोऽद्यापि च द्विजोत्तम ॥ तस्योपरि परा भक्तिर्मम जाताऽद्य केवलम् ॥ ५१ ॥ स तथेति प्रतिज्ञाय गत्वाऽथ निजमन्दिरम् ॥ प्रोवाच याज्ञवल्क्यं च शांत्यर्थं श्लक्ष्णया गिरा ॥ ५२ ॥ गच्छ वत्स त्वमद्यैव पार्थिवस्य निवेशनम् ॥ शांत्यर्थं तेन भूयोऽपि त्वमेवाशु निमंत्रितः ॥ ५३ ॥ ॥ याज्ञवल्क्य उवाच ॥ ॥ नाहं यास्यामि तद्धर्म्यें शांत्यर्थं द्विजपुंगव ॥ अनादरेण दृष्टोऽहं नाशीर्मे च समाहृता ॥ ५४ ॥ काष्ठोपरि मया दत्ता तस्य वाक्यादसंशयम् ॥ तस्मात्प्रेषय चान्यं त्वं गुरो शिष्यं विचक्षणम् ॥ आनर्तं रंजयेद्यस्तु विवेकेन समन्वितम् ॥ ५५ ॥ ॥ शाकल्य उवाच ॥ ॥ राजाऽऽदेशः सदा कार्यः पुरुषैर्देशवासिभिः ॥ योगक्षेमविधानाय तथा लाभाय केवलम् ॥ ५६ ॥ प्रतिकूलो भवेद्यस्तु पार्थिवानां स मन्दधीः ॥ न तस्य जायते सौख्यं कथंचिद्द्विजसत्तम ॥ ५७ ॥ ये जात्यादि महोत्सेकान्न नरेंद्रानुपासते ॥ तेषामामरणं भिक्षा प्रायश्चित्तं विनिर्मितम् ॥ ५८ ॥ एवं तयोर्विवदतोस्तदा वै गुरुशिष्ययोः ॥ भूयोऽपि तत्र संप्राप्ताः पुरुषाः पार्थिवेरिताः ॥ ५९ ॥ प्रोचुश्च त्वरया युक्ताः शाकल्यं प्रांजलिस्थिताः ॥ शिष्यं तं प्रेषय क्षिप्रं राजा मार्गं प्रतीक्षते ॥ ६० ॥ असकृत्प्रोच्यमानोऽपि यदा गच्छति नैव सः ॥ तदा संप्रेषयामास उद्दालकमथारुणिम् ॥ ६१ ॥ शिष्यं विनयसंपन्नं कृतांजलिपुटं स्थितम् ॥ गच्छ वत्स समादेशात्सांप्रतं नृपमंदिरम् ॥ ६२ ॥ शांतिकर्म विधायाथ स्वाध्यायं च ततः कुरु ॥ ६३ ॥ स तथेति प्रतिज्ञाय गत्वा तं पार्थिवालयम् ॥ चकार शांतिकं कर्म विधिदृष्टेन कर्मणा ॥ ६४ ॥ ततः कलशतोयं स साक्षतं सुमनोन्वितम् ॥ गृहीत्वोपाद्रवत्तत्र यत्र राजा व्यवस्थितः ॥ ॥ ६५ ॥ ॥ राजोवाच ॥ ॥ स्वकीयमन्त्रलिंगेन अभिषेकं तु यच्छ भोः ॥ काष्ठस्यास्य यदग्रे ते प्रोत्थितं तिष्ठते द्विज ॥ ६६ ॥ ततस्तेन शुभं मंत्रं प्रोच्याभीष्टं जलं स्वयम् ॥ अभिषिच्य च तत्काष्ठं ततश्च स्वगृहं ययौ ॥ ६७ ॥ तावद्रूपं च तत्काष्ठं दृष्ट्वाऽऽनर्तो महीपतिः ॥ विषादसहितश्चैव पश्चात्तापसमन्वितः ॥ ६८ ॥ भूयस्तु प्रेषयामास याज्ञवल्क्यकृते तदा ॥ अन्यं दूतं विदग्धं च शाकल्यस्य द्विजाश्र

१ द्विजाश्रयम्–मंदिरंप्रति–इत्यर्थः । 'द्विजाश्रय' शब्दस्यात्र रूढ्या सदनम्–इत्येवार्थो बोध्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

यम् ॥ ६९ ॥ वेदना कायसंस्था मे वर्तते द्विजसत्तम ॥ शांत्यर्थं प्रेषया क्षिप्रं तं शिष्यं पूर्वसंचितम् ॥ ७० ॥ अपमानं कृतं तस्य मया कल्ये द्विजोत्तम ॥ तेन मे सहसा व्याधिराशीर्वादमनिच्छतः ॥ ७१ ॥ तस्मात्प्रेषय मे शीघ्रं येन मे स्वस्थता भवेत् ॥ असकृत्प्रोच्यमानोऽपि यदा नैव स गच्छति ॥ ७२ ॥ याज्ञवल्क्यस्ततः शिष्यमन्यं प्रोवाच सादरम् ॥ ततस्तं मधुकं पैंग्यं प्रेषयामास तद्गृहे ॥ ॥ ७३ ॥ तेनापि विहितं तच्च यथोद्दालकनिर्मितम् ॥ आशीर्वादो नृपोद्देशाद्दत्तः काष्ठस्य तस्य च ॥ ७४ ॥ तद्रूपमपि तत्काष्ठं दृष्ट्वा भूयोऽपि पार्थिवः ॥ अन्यं संप्रेषयामास याज्ञवल्क्यकृते नरम् ॥ ७५ ॥ असकृत्प्रोच्यमानोऽपि याज्ञवल्क्यो व्रजेन्न हि ॥ यदा तदा बहुगुणमन्यं शिष्यं प्रदिष्टवान् ॥ ७६ ॥ प्रचूडं भागवित्तिं च सोऽपि गत्वा यथा पुरा ॥ चकार शांतिकं कर्म यथा ताभ्यां पुरा कृतम् ॥ ७७ ॥ ततः शांत्युदकं तस्मिन्प्राक्षिपच्चैव दारुणि ॥ मंत्रवच्च तथाप्येव तद्रूपं च व्यवस्थितम् ॥ ७८ ॥ ततः स्वयं ययौ राजा शाकल्यस्य निवेशनम् ॥ याज्ञवल्क्यस्य मन्त्रार्थं पश्चात्तापसमन्वितः ॥ ७९ ॥ प्रणम्य स द्विजश्रेष्ठः शाकल्यं च द्विजोत्तमम् ॥ शांत्यर्थं मम हर्म्ये त्वं कल्ये शिष्यं समादिश ॥ येन मे जायते शांतिः शरीरस्य द्विजोत्तम ॥ ८० ॥ ततः प्रोवाच शाकल्यो याज्ञवल्क्यं द्विजोत्तमाः ॥ भूयोऽपि शृण्वतस्तस्य आनर्तस्य महीपतेः ॥ ८१ ॥ याज्ञवल्क्य द्रुतं गच्छ ममादेशान्नृपालयम् ॥ राज्ञोस्य रोगनाशाय शांतिकं कुरु पुत्रक ॥ ॥ ८२ ॥ ॥ याज्ञवल्क्य उवाच ॥ ॥ नाहं तत्र गमिष्यामि गुरो मैवं ब्रवीहि माम् ॥ अपमानः कृतोऽनेन गुरो मम महीभुजा ॥ ८३ ॥ तस्य तद्वचनं श्रुत्वा स कोपं परमं गतः ॥ अब्रवीद्भर्त्समानस्तु याज्ञवल्क्यं ततः परम् ॥ ८४ ॥ एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत् ॥ पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा चानृणी भवेत् ॥ ८५ ॥ यस्मात्त्वं शिष्यतां गत्वा मम वाक्यं करोषि न ॥ तस्मात्त्वां योजयिष्यामि ब्रह्मशापेन सांप्रतम् ॥ ८६ ॥ ॥ याज्ञवल्क्य उवाच ॥ ॥ अन्यायेन हि चेच्छापं गुरो मम प्रदास्यसि ॥ अहमप्येव दास्यामि प्रतिशापं तवाधुना ॥ ८७ ॥ गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ॥ उत्पथे वर्तमानस्य परित्यागो विधीयते ॥ ८८ ॥ तस्मात्त्वं हि मया त्यक्तः सांप्रतं हि न मे गुरुः ॥ अविशेषेण शिष्यार्थं यदादेशं प्रयच्छसि ॥ ८९ ॥ यावंतस्ते स्थिताः शिष्यास्तावद्भिर्दिवसैरहम् ॥ तवादेशं करिष्यामि नो चेद्यास्यामि दूरतः ॥ ९० ॥ ॥ शाकल्य उवाच ॥ ॥ यदि गच्छसि चान्यत्र तत्त्वं विद्यां परित्यज ॥ यां मया पाठितः पाप व्रज पश्चात्कुशिष्य भोः ॥ ९१ ॥ मयाभिमंत्रितं तोयं क्षुरिकामुण्डसंभवम् ॥ पिब तस्याः प्रभावेण शीघ्रमेव त्यजिष्यसि ॥ जठरान्मामकीं विद्यां त्वयाधीता पुरा तु या ॥ ९२ ॥ एवमुक्त्वा स चामंत्र्य मंत्रैराथर्वणैर्जलम् ॥ पानाय प्रददौ तस्मै वांत्यर्थं स द्विजोत्तमः ॥ ९३ ॥ याज्ञवल्क्योऽपि तत्पीत्वा जलं



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेनाभिमंत्रितम् ॥ वांतिं कृत्वा सहान्नेन तद्विद्यां तां परित्यजत्[1] ॥ ९४ ॥ ततो मूढत्वमापन्नो विश्वामित्रह्रदं शुभम् ॥ गत्वा स्नातो विधानेन शुचि भूत्वा समाहितः ॥ ९५ ॥ चकार मूर्तीस्ता भक्त्या रवेर्द्वादशसंख्यया ॥ प्रतिष्ठाप्य ततः सर्वाः पूजयामास भक्तितः ॥ ९६ ॥ धाता मित्रोऽर्यमा शक्रो वरुणः सांब एव च ॥ भगो विवस्वान्पूषा च सविता दशमस्तथा ॥ एकादशस्तथा त्वष्टा विष्णुर्द्वादश उच्यते ॥ ९७ ॥ एवं द्वादशधा सूर्यः स्थापितोऽत्र विपश्चिता ॥ आराधितस्ततो नित्यं गन्धपुष्पानुलेपनैः ॥ ९८ ॥ ततः कालेन महता गत्वा प्रत्यक्षतां रविः ॥ प्रोवाच सुन्दरं प्रीत्या वाक्यमेतन्मुनिं प्रति ॥ ९९ ॥ याज्ञवल्क्य प्रतुष्टोऽहं तव ब्राह्मणसत्तम ॥ इष्टं ददामि ते ब्रूहि यद्यत्संप्रति वांछितम् ॥ १०० ॥ ॥ याज्ञवल्क्य उवाच ॥ ॥ वरं ददासि चेन्मह्यं वेदपाठे नियोजय ॥ मां विभो येन शिष्यत्वं तव गच्छामि सांप्रतम् ॥ १०१ ॥ ॥ आदित्य उवाच ॥ ॥ मया पर्यटनं कार्यं सदैव द्विजसत्तम ॥ मेरोः प्रदक्षिणार्थाय लोकालोककृते द्विज ॥ १०२ ॥ तत्कथं योजयामि त्वां वेदपाठेन स द्विज ॥ १०३ ॥ तस्मात्त्वं लघुतां गत्वा मम मुख्यहयस्य च ॥ श्रवणे तिष्ठ मद्वाक्यात्तेजसा चैव येन मे ॥ १०४ ॥ न दह्यसि महाभाग तत्र स्थोऽध्ययनं कुरु ॥ स तथेति प्रतिज्ञाय प्रविश्यादित्यवाजिनः ॥ १०५ ॥ कर्णेऽपठत्ततो वेदांश्चतुरोऽपि च तन्मुखात् ॥ अंगोपांगसमोपेतान्परिशिष्टसमन्वितान् ॥ १०६ ॥ ततः समाप्ते स प्राह प्रार्थयस्व विभो हि माम् ॥ प्रदास्यामि न सन्देहस्तवाद्य गुरुदक्षिणाम् ॥ १०७ ॥ ॥ आदित्य उवाच ॥ ॥ यानि सूक्तानि ऋग्वेदे मदीयानि द्विजोत्तम ॥ सावनानि यजुर्वेदे सामानि च तृतीयके ॥ १०८ ॥ कल्पोक्तानि चतुर्थे च तानि सर्वाणि भूतले ॥ त्वया प्रचारणीयानि कृत्वा व्याख्यानमुत्तमम् ॥ १०९ ॥ ये द्विजास्तानि सर्वाणि कीर्तयिष्यंति मे पुरः ॥ ते सर्वे पापनिर्मुक्ताः प्रयास्यंति दिवालयम् ॥ ११० ॥ व्याख्यास्यंति पुनर्ये च मम भक्तिपरायणाः ॥ ते यास्यंति द्विजा मुक्तिं सत्यमेतन्मयोदितम् ॥ ॥ १११ ॥ ॥ सूत उवाच ॥ ॥ एवं वेदान्पठित्वा स प्रदत्त्वा गुरुदक्षिणाम् ॥ सूर्यायाभ्यागतो भूयश्चमत्कारपुरं प्रति ॥ ११२ ॥ ततः शाकल्यमभ्येत्य[2] गुरुस्त्वं प्राङ् मम स्थितः ॥ प्रार्थयस्व महाभाग दास्यामि गुरुदक्षिणाम् ॥ ११३ ॥ ज्येष्ठो भ्राता पिता चैव माता चैव गुरुस्तथा ॥ वैरुद्धयेनापि वर्तंते यद्येते द्विजसत्तम ॥ तथापि पूजनीयाश्च पुरुषेण न संशयः ॥ ११४ ॥ सांगोपांगा मयाधीता वेदाश्चत्वार एव च ॥ अधीताश्चैव सर्वेषां तेषामर्थोऽवधारितः ॥ ११५ ॥ तत्त्वं वद महाभाग कां ते यच्छामि दक्षिणाम् ॥ ११६ ॥ ॥ शाकल्य उवाच ॥ ॥ यानि वेदरहस्यानि सूर्येण कथितानि ते ॥ ११७ ॥ यैः स्यात्पापप्रणाशश्च व्याख्यातैः पठितैस्तथा ॥ तानि मे कीर्तय क्षिप्रमेषा मे गुरुदक्षि

१ परित्यजत्—पर्यत्यजत् अडभाव आर्षः । २ उवाच—इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



णा ॥ ११८ ॥ ॥ याज्ञवल्क्य उवाच ॥ ॥ तदागच्छ मया सार्धं यत्र सूर्याः प्रतिष्ठिताः ॥ मया द्वादश तेषां च कीर्तयिष्यामि चाग्रतः ॥११९॥
तच्छ्रुत्वा शिष्यसंयुक्तः शाकल्यस्तैश्च सद्द्विजैः ॥ शिष्यैस्तिष्ठन्ति ये तत्र स्थापितास्तेन भास्कराः ॥ १२० ॥ ततस्तु कीर्तयामास व्याख्यानं
तत्पुरः स्थितः ॥ वेदान्तानां च सर्वेषां यथोक्तं रविणा पुरा ॥ १२१ ॥ अवसाने च तेषां तु चतुश्चरणसंभवैः ॥ ब्राह्मणैर्याज्ञवल्क्यस्तु वेदान्तज्ञैः
प्रतोषितः ॥ १२२ ॥ प्रोक्तस्तव प्रसादेन वेदांतज्ञा वयं स्थिताः ॥ श्रुताध्ययनसंपन्ना याचस्व गुरुदक्षिणाम् ॥ १२३ ॥ ॥ याज्ञवल्क्य
उवाच ॥ ॥ एतेषां भास्कराणां च मदीयानां पुरो द्विजाः ॥ कीर्तयिष्यंति ये विप्रास्तेषां युष्मत्प्रसादतः ॥ भूयास्स्वर्गगतिर्विप्रा एषा मे गुरु
दक्षिणा ॥ १२४ ॥ ये पुनर्भक्तिसंयुक्ताः करिष्यंति विचारणम् ॥ तेषां तुर्यपदं यच्च जरामरणवर्जितम् ॥ १२५ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ भवि
ष्यंति कलौ विप्रा दौस्थ्यभावसमन्विताः ॥ पठने नैव शक्ताश्च व्याख्यानस्य च का कथा ॥ १२६ ॥ तस्मात्सारस्त्वतं ब्रूहि वेदानां द्विजसत्तम ॥
अपि दौस्थ्यसमायुक्ता येन ते कीर्तयंति च ॥ १२७ ॥ ॥ याज्ञवल्क्य उवाच ॥ ॥ रथं युञ्जंति सूक्तं यत्प्रथमं वित्तलक्षणम् ॥ त्रिष्टुभेति
च यत्सूक्तं तथाद्यं ब्राह्मणोत्तमाः ॥ १२८ ॥ चित्रं देवानामिति च तथान्यत्तस्य वल्लभम् ॥ हंसः शुचिषदित्युक्तं ततश्चापि प्रहर्षदम् ॥ १२९ ॥
पावमानं तथा सूक्तं ये पठिष्यंति बह्वृचः ॥ इत्येषामाद्यमेवं तु ते यास्यंति परां गतिम् ॥ १३० ॥ एकविंशतिसामानि आदित्येष्टानि यानि च ॥
सामगाः कीर्तयिष्यंति येऽत्रस्थाः शुचयः स्थिताः ॥ १३१ ॥ निश्चयं तु परं धृत्वा येऽपि स्तोष्यंति भास्करम् ॥ ततस्तेऽपि प्रयास्यंति निर्भिद्य
रविमण्डलम् ॥ १३२ ॥ क्षुरिकासंपुटं चैव सूर्यकल्पं तथैव च ॥ शांतिकल्पसमायुक्तं कीर्तयिष्यंति ये द्विजाः ॥ १३३ ॥ अथर्वपाठकास्तेऽपि
प्रयास्यंति परां गतिम् ॥ मूर्खा अपि समागत्य संप्राप्ते सूर्यवासरे ॥ १३४ ॥ प्रणामं ये करिष्यंति श्रद्धया परया युताः ॥ सप्तरात्रकृतात्पापान्मुक्तिं
प्राप्स्यंति ते द्विजाः ॥ १३५ ॥ ॥ सूत उवाच ॥ ॥ तथेति तैः प्रतिज्ञाते चतुश्चरणसंभवैः ॥ ब्राह्मणैर्याज्ञवल्क्यस्तु विज्ञातो येन केन तु ॥
॥ १३६ ॥ विदेहेन ततः प्राप्तः श्रवणार्थं नराधिपः ॥ वेदांतानां च सर्वेषां रत्नाख्येन महीभुजा ॥ १३७ ॥ तेनापि च परिज्ञाय माहात्म्यं सूर्यसं
भवम् ॥ ततः संस्थापितः सूर्यस्तस्मिन्स्थाने द्विजोत्तमाः ॥ १३८ ॥ तं चापि सूर्यवारेण यः प्रपश्यति मानवः ॥ सप्तरात्रकृतात्पापान्मुच्यते
नात्र संशयः ॥ १३९ ॥ एतद्वः कथितं सर्वं माहात्म्यं सूर्यसंभवम् ॥ यः शृणोति नरो भक्त्या अश्वमेधफलं लभेत् ॥ १४० ॥ संक्रांतौ यत्प्रदा

१ महात्मना–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेन सूर्ये वा श्रवणेन तु ॥ तत्फलं समवाप्नोति श्रुत्वा माहात्म्यमुत्तमम् ॥ १४१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहि
तायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये द्वादशार्कोत्पत्तिरत्नादित्योत्पत्तिमाहात्म्ये याज्ञवल्क्यवृत्तांतवर्णनं नामाष्टसप्तत्युत्तरद्विशततमोऽ
ध्यायः ॥ २७८ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एतत्पुराणमखिलं पुरा स्कन्देन भाषितम् ॥ भृगवे ब्रह्मपुत्राय तस्माल्लेभे तथांगिराः ॥१॥
ततश्च च्यवनः प्राप स ऋचीकस्ततो मुनिः ॥ एवं परंपराप्राप्तं सर्वेषु भुवनेष्वपि ॥२॥ स्कांदं पुराणमेतच्च कुमारेण पुरोद्धृतम् ॥ यः शृणोति सतां
मध्ये नरः पापात्प्रमुच्यते ॥ ३ ॥ इदं पुराणमायुष्यं वर्णानां च सुखावहम् ॥ निर्मितं षण्मुखेनेह नियतं सुमहात्मना ॥ ४ ॥ एवमेतत्पुरा ख्यात
माख्यानं भद्रमस्तु वः ॥ ५ ॥ हाटकेश्वरक्षेत्रस्य माहात्म्यं शृणुते नरः ॥ न तस्य पुण्यसंख्यानं कर्तुं शक्येत केनचित् ॥ ६ ॥ य इदं धर्ममाहात्म्यं
ब्राह्मणाय प्रयच्छति ॥ स्वर्गलोके वसेत्तावद्यावदक्षरसंख्यया ॥७॥ यथा हि वर्षतो धारा यथा वा दिवि तारकाः ॥ गंगायां सिकता यद्वत्तद्वत्संख्या
न विद्यते ॥ ८ ॥ यो नरः शृणुयाद्भक्त्या दिनानि च कियंति वै ॥ सर्वार्थसिद्धो भवति य इमां पठते कथाम् ॥ ९ ॥ पुत्रार्थी लभते पुत्रान्धनार्थी
लभते धनम् ॥ लभते पतिकामा या पतिं कन्या मनोरमम् ॥ १० ॥ समागमं लभंते च बांधवाश्च प्रवासिभिः ॥ स्कांदं पुराणं श्रुत्वा तु पुमान्प्ना
प्नोति वांछितम् ॥ ११ ॥ शृण्वतः पठतश्चैव सर्वकामप्रदं नृणाम् ॥ महीं विजयते राजा शत्रूंश्चाप्यधितिष्ठति ॥ १२ ॥ पुण्यं श्रुत्वा पुराणं वै दीर्घमा
युश्च विंदति ॥ वेदविच्च भवेद्विप्रः क्षत्रियो राज्यमाप्नुयात् ॥ १३ ॥ धनं धान्यं तथा वैश्यः शूद्रः सुखमवाप्नुयात् ॥ यः श्लोकपादं शृणुयाद्विष्णुलोकं
स गच्छति ॥ १४ ॥ श्रुत्वा पुराणमेतद्धि वाचकं यस्तु पूजयेत् ॥ तेन ब्रह्मा च विष्णुश्च रुद्रश्चैव प्रपूजितः ॥ १५ ॥ एकमप्यक्षरं यस्तु गुरुः शिष्ये
निवेदयेत् ॥ पृथिव्या नास्ति तद्द्रव्यं यद्दत्त्वा ह्यनृणी भवेत् ॥१६॥ अतः संपूजनीयस्तु व्यासः शास्त्रोपदेशकः ॥ गोभूहिरण्यवस्त्राद्यैर्भोजनैः सार्व
कामिकैः ॥१७॥ य एवं भक्तियुक्तस्तु श्रुत्वा शास्त्रमनुत्तमम् ॥ पूजयेदुपदेष्टारं स शैवं पदमाप्नुयात् ॥ १८ ॥ पुराणश्रवणादेव अनेकभवसंचितम् ॥
पापं प्रशममायाति सर्वतीर्थफलं लभेत् ॥१९॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये
पुराणश्रवणमाहात्म्यवर्णनंनामैकोनाशीत्युत्तरद्विशततमोऽध्यायः ॥२७९॥ ॥छ॥ ॥ इति श्रीस्कांदे महापुराणे षष्ठं नागरखण्डं समाप्तम् ॥ ६ ॥

१ एतदग्रे एकस्मिन्पुस्तके–"इति श्रीस्कान्दे महापुराणे श्रीहाटकेश्वरक्षेत्रमाहात्म्ये वृद्धनगरमाहात्म्यं संपूर्णम्" इति लिखितमस्ति । इदं वृद्धनगरमेवेदानीं गुर्जरप्रांते–'वढनगर' इति लौकिकभाषायां प्रसिद्धमस्ति । तदेव हाटकेश्वरक्षेत्रस्थं मुख्यं नगरमस्ति ।

इदं पुस्तकं क्षेमराज श्रीकृष्णदासश्रेष्ठिना मुम्बय्यां स्वकीये "श्रीवेङ्कटेश्वर" मुद्रणालये मुद्रयित्वा प्रकाशितम् शके १८३१. संवत् १९६६.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्रीस्कान्दे महापुराणे षष्ठं नागरखण्डं समाप्तम् ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ श्रीस्कान्दे महापुराणे सप्तमं प्रभासखण्डं प्रारभ्यते ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri








Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ श्रीगणेशाय नमः ॥ ॥ अथ प्रभासखण्डं प्रारभ्यते ॥ ॥ तत्रेदं प्रथमं प्रभासक्षेत्रमाहात्म्यम् ॥ ॐ नमः श्रीपरमात्मने परमपुरुषोत्तमाय ॥
ॐ नमो हरिहरहिरण्यगर्भेभ्यो नमो व्यासवाल्मीकिशुकपराशरेभ्यः ॥ ॥ व्यास उवाच ॥ ॥ यश्चाद्यः पुरुषः पुराण इति यः संस्तूयते सर्वतः
सोमेशः सुरसंयुतः क्षितितले यैर्वीक्षितो हीक्षणैः॥ ते तीर्त्वा विततांतरं भवभयं भूत्याऽभिसंभूषिताः स्वर्गं यानवरैः प्रयान्ति सुकृतैर्यज्ञै यथा यज्विनः
॥ १ ॥ प्रसरद्बिन्दुनादाय शुद्धामृतमयात्मने ॥ षड्त्रिंशत्तत्त्वदेहाय नमश्चिन्मात्रमूर्तये ॥ २ ॥ अमृतेनोदरस्थेन म्रियन्ते सर्वदेवताः ॥ कंठस्थित
विषेणापि यो जीवति स पातु वः ॥ ३ ॥ सत्रान्ते सूतमनघं नैमिषेया महर्षयः ॥ पुराणसंहितां पुण्यां पप्रच्छू रोमहर्षणम् ॥ ४ ॥ त्वया सूत महा
बुद्धे भगवान्ब्रह्मवित्तमः ॥ इतिहासपुराणार्थे व्यासः सम्यगुपासितः ॥ ५ ॥ तस्य ते सर्वरोमाणि वचसा हर्षितानि यत् ॥ द्वैपायनस्यानुभावा
त्ततोऽभू रोमहर्षणः ॥ ६ ॥ भवन्तमेव प्रथमं व्याजहार स्वयं प्रभुः ॥ मुनीनां संहितां वक्तुं व्यासः पौराणिकीं कथाम् ॥ ७ ॥ त्वं हि स्वायंभुवे
यज्ञे सुत्याहे वितते हरिः ॥ संभूतः संहितां वक्तुं स्वांशेन पुरुषोत्तमः ॥ ८ ॥ तस्माद्भवन्तं पृच्छामः पुराणे स्कन्दकीर्तिते ॥ प्रभासक्षेत्रमाहात्म्ये
ब्राह्मी यात्रा श्रुता पुरा ॥ ९ ॥ अधुना वैष्णवीं रौद्रीं यात्रां सर्वार्थसंयुताम् ॥ वक्तुमर्हसि चास्माकं पुराणार्थविशारद ॥ १० ॥ मुनीनां वचनं
श्रुत्वा सूतः पौराणिकोत्तमः ॥ प्रणम्य शिरसा प्राह व्यासं सत्यवतीसुतम् ॥ ११ ॥ ॥ रोमहर्षण उवाच ॥ ॥ श्रीवत्सांकं जगद्योनिं हरिमों
काररूपिणम् ॥ अप्रमेयं गुरुं देवं निर्मलं निर्मलाश्रयम् ॥ १२ ॥ हंसं शुचिषदं व्योम व्यापकं सर्वदं शिवम् ॥ उदासीनं निरायासं निष्प्रपञ्चं
निरञ्जनम् ॥ १३ ॥ शून्यं बिंदुस्वरूपं तु ध्येयं ध्यानविवर्जितम् ॥ अस्ति नास्तीति यं प्राहुः सुदूरे चान्तिके च यत् ॥ १४ ॥ मनोग्राह्यं परं धाम
पुरुषाख्यं जगन्मयम् ॥ हृत्पंकजसमासीनं तेजोरूपं निरिन्द्रियम् ॥ १५ ॥ एवंविधं नमस्कृत्य परमात्मानमीश्वरम् ॥ कथां वदिष्ये द्विविधां
द्विशरीरां तथैव तु ॥ १६ ॥ दिव्यभाषासमोपेतां वेदाधिष्ठानसंयुताम् ॥ पञ्चसंधिसमायुक्तां षडलंकारभूषिताम् ॥ १७ ॥ सप्तसाधनसंयुक्तां रसाष्ट
गुणरंजिताम् ॥ गुणैर्नवभिराकीर्णां दशदोषविवर्जिताम् ॥ १८ ॥ विभाषाभूषितां तद्वदेकायत्तां मनोहराम् ॥ पञ्चकारणसंयुक्तां चतुष्करणसम्म

१ क्षेत्रं क्षेत्रवरं समाप्य विमलं प्राभासिकं भासुरम् इति पाठान्तरम्। २ भक्तानामभयप्रदः क्षितितले– इ० पा०। ३ अपि संभूषिताः–इ० पा०। ४ सः शिवः–इत्यर्थः। ५ पप्रच्छुर्लोमहर्षणम्–इ० पा०। ६ पुरा–कस्मिंश्चित्कथाप्रसङ्गे–इत्यर्थः। न तु–पुरा–इत्यनेन–एतस्मात्पूर्वमत्रैव–इति संभवितव्यप्रभासखण्डस्य–अस्मादेवाध्यायादारम्भस्य नारदापुराणोक्तानुक्रमणिकायां दृश्यमानत्वात्। ७ गुरुम्–इ० पा०। ८ च–इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ताम् ॥ १९ ॥ पुनश्च द्विविधां तद्वज्ज्ञानसंदोहदायिनीम् ॥ व्यासेन कथितां पुण्यां शृणुध्वं पापनाशिनीम् ॥ २० ॥ यां श्रुत्वा पापकर्मापि गच्छेद्धि परमां गतिम् ॥ दुःखत्रयविनिर्मुक्तः सर्वातङ्कविवर्जितः ॥ २१ ॥ न नास्तिके कथां पुण्यामिमां ब्रूयात्कदाचन ॥ श्रद्दधानाय शान्ताय कीर्तनीया द्विजातये ॥ २२ ॥ निषेकादिः श्मशानान्तो मन्त्रैर्यस्योदितो विधिः ॥ तस्य शास्त्रेऽधिकारोऽस्ति ज्ञेयो नान्यस्य कस्यचित् ॥ २३ ॥ चतुःपक्षावदातस्य विशुद्धिर्ब्राह्मणस्य च ॥ सद्वृत्तस्याधिकारोऽस्ति शास्त्रेऽस्मिन्वेदसम्मते ॥ २४ ॥ यथा सुराणां प्रवरो देवदेवो महेश्वरः ॥ नदीनां च यथा गंगा वर्णानां ब्राह्मणो यथा ॥ २५ ॥ अक्षराणां तु सर्वेषामोंकारः प्रथमो यथा ॥ पूज्यानां तु यथा माता गुरूणां च यथा पिता ॥ तथैव सर्वशास्त्राणां प्रधानं स्कन्दकीर्तितम् ॥ २६ ॥ पुरा कैलासशिखरे ब्रह्मादीनां च सन्निधौ ॥ स्कान्दं पुराणं कथितं पार्वत्यग्रे पिनाकिना ॥ ॥ २७ ॥ पार्वत्या षण्मुखस्याग्रे तेन नन्दिगणाय वै ॥ नन्दिना तु कुमाराय तेन व्यासाय धीमते ॥ २८ ॥ व्यासेन मे[२] समाख्यातं भवद्भ्योऽहं प्रकीर्तये ॥ २९ ॥ यूयं सद्भावसंयुक्ता यतः सर्वे महर्षयः ॥ तेन मे भाषितुं श्रद्धा भवतां स्कन्दसंहिताम् ॥ ३० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये प्रश्नाध्यायवर्णनं नाम प्रथमोऽध्यायः ॥ १ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ कथाया लक्षणं ब्रूहि गुणदोषान्सविस्तरान् ॥ आर्षेयपौरुषेयाणां काव्यचिह्नपरीक्षणम् ॥ कथं ज्ञेयं महाबुद्धे श्रोतुमिच्छामहे वयम् ॥ १ ॥ ॥ सूत उवाच ॥ ॥ अथ संक्षेपतो वक्ष्ये पुराणानामनुक्रमम् ॥ लक्षणं चैव संख्यां च उक्तभेदांस्तथैव च ॥ २ ॥ पुरा तपश्चचा रोग्रममराणां पितामहः ॥ आविर्भूतास्ततो वेदाः सषडंगपदक्रमाः ॥ ३ ॥ ततः पुराणमखिलं सर्वशास्त्रमयं ध्रुवम् ॥ नित्यशब्दमयं पुण्यं शत कोटिप्रविस्तरम् ॥ ४ ॥ निर्गतं ब्रह्मणो वक्त्राद्ब्राह्मं वैष्णवमेव च ॥ शैवं भागवतं चैव भविष्यं नारदीयकम् ॥ ५ ॥ मार्कण्डेयमथाग्नेयं ब्रह्मवैवर्तमेव च ॥ लैङ्गं तथा च वाराहं स्कान्दं वामनमेव च ॥ ६ ॥ कौर्म्यं मात्स्यं गारुडं च वायवीयमनन्तरम् ॥ अष्टादशं समुद्दिष्टं सर्वपातकनाशनम् ॥ ॥ ७ ॥ एकमेव पुरा ह्यासीद्ब्रह्माण्डं शतकोटिधा ॥ ८ ॥ ततोऽष्टादशधा कृत्वा वेदव्यासो युगेयुगे ॥ प्रख्यापयति लोकेऽस्मिन्साक्षान्नारायणां[३] शजः ॥ ९ ॥ अन्यान्युपपुराणानि मुनिना कथितानि तु ॥ तानि वः कथयिष्यामि संक्षेपादवधार्यताम् ॥ १० ॥ आद्यं सनत्कुमारोक्तं नारसिंह मतः परम् ॥ तृतीयं स्कान्द[४]मुद्दिष्टं कुमारेणानुभाषितम् ॥ ११॥ चतुर्थं शिवधर्माख्यं साक्षान्नन्दीशभाषितम् ॥ दुर्वाससोक्तमाश्चार्य्यं नारदोक्तमतः

१ सर्वान्तकविवर्जितः–इ० पा० । २ तु–इ० पा० । ३ नारायणांशतः–इ० पा० । ४ नान्दम्–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परम् ॥१२॥ कापिलं मानवं चैव तथैवोशनसेरितम् ॥ ब्रह्माण्डं वारुणं चान्यत्कालिकाह्वयमेव च ॥ १३ ॥ माहेश्वरं तथा सांबं सौरं सर्वार्थसंचयम्॥
पराशरोक्तं परमं मारीचं भार्गवाह्वयम् ॥१४॥ एतान्युपपुराणानि कथितानि द्विजोत्तमाः॥१५॥ ॥ ऋषयऊचुः[1] ॥ ॥ पुराणसंख्यामाचक्ष्व सूत विस्त
रशः क्रमात् ॥ दानधर्मर्मशेषज्ञ[2] यथावदनुपूर्वशः ॥ १६ ॥ ॥ सूत उवाच ॥ ॥ इदमेव पुराणेऽस्मिन्पुराणपुरुषस्तदा ॥ यदुक्तवान्स विश्वात्मा मनवे
तन्निबोधत ॥१७॥ पुराणं सर्वशास्त्राणां ब्रह्माण्डं प्रथमं स्मृतम् ॥ अनन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः[3]॥१८॥ पुराणमेकमेवासीत्तस्मिन्कल्पा
न्तरे तथा ॥ त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरम् ॥ १९ ॥ विनिर्दग्धेषु लोकेषु कृष्णेनानन्तरूपिणा ॥ साङ्गांश्च चतुरो वेदान्पुराणन्यायविस्तरम्
॥२०॥मीमांसां धर्मशास्त्रं च परिगृह्यात्मसात्कृतम् ॥ मत्स्यरूपेण च पुनः कल्पादावुदकार्णवे ॥२१॥ अशेषमेव कथितं ब्रह्मणे दिव्यचक्षुषे ॥ ब्रह्मा
जगाद च मुनींस्त्रिकालज्ञानदर्शनः ॥ २२ ॥ प्रवृत्तिः सर्वशास्त्राणां पुराणस्याभवत्ततः ॥ २३ ॥ ततः कालक्रमेणासौ व्यासरूपधरो हरिः ॥ अष्टा
दशपुराणानि संक्षेप्स्यति युगेयुगे ॥ २४ ॥ चतुर्लक्षप्रमाणानि द्वापरेद्वापरे सदा ॥ तदाष्टादशधा कृष्णा भूर्लोकेऽस्मिन्प्रभाषते ॥ २५ ॥ अद्याऽपि
देवलोके तु शतकोटिप्रविस्तरम् ॥ तदर्थोऽत्र चतुर्लक्षः संक्षेपेण निवेशितः ॥ २६ ॥ पुराणानि दशाष्टौ च सांप्रतं तदिहोच्यते ॥ नामतस्तानि
वक्ष्यामि संख्यां च मुनिसत्तमाः ॥ २७ ॥ ब्रह्मणाऽभिहितं पूर्वं यावन्मात्रं मरीचये ॥ ब्राह्मं तद्दशसाहस्रं पुराणं तदिहोच्यते ॥ २८ ॥ लिखित्वा
तच्च यो दद्याज्जलधेनुसमन्वितम् ॥ वैशाख्यां पौर्णमास्यां च ब्रह्मलोके महीयते ॥ २९ ॥ एतदेव यदा पद्ममभूद्धैरण्मयं जगत् ॥ तद्वृत्तांताश्रयांतं
तत्पाद्ममित्युच्यते बुधैः ॥ ३० ॥ पाद्मं तत्पञ्चपञ्चाशत्सहस्राणीह पठ्यते ॥ तत्पुराणं च यो दद्यात्सुवर्णकमलान्वितम् ॥ ज्येष्ठे मासि तिलैर्युक्तं
सोऽश्वमेधफलं लभेत् ॥ ३१ ॥ वाराहकल्पवृत्तान्तमधिकृत्य परात्परः ॥ यत्राह धर्मानखिलांस्तदुक्तं वैष्णवं विदुः ॥३२॥ चरितैरश्चितं विष्णोस्त
द्लोके वैष्णवं विदुः ॥ त्रयोविंशतिसाहस्रं पुराणं तत्प्रकीर्तितम् ॥ ३३ ॥ तदाषाढे च यो दद्याद्घृतधनुसमन्वितम् ॥ पौर्णमास्यां विशुद्धायां स[6] पदं
याति वैष्णवम् ॥ ३४ ॥ श्रुतकल्पप्रसङ्गेन[7] धर्मान्वायुर्यथाब्रवीत्[8] ॥ यत्र तद्वायवीयं स्याद्रुद्रमाहात्म्यसंयुतम् ॥ ३५ ॥ चतुर्विंशतिसाहस्रं नाना
वृत्तान्तसंयुतम् ॥ धर्मार्थकाममोक्षैश्च साधुवृत्तसमन्वितम् ॥ ३६ ॥ श्रावण्यां श्रावणे मासि गुडधेनुसमन्वितम् ॥ यो दद्याद्दधिसंयुक्तं ब्राह्मणाय

१ ब्राह्मणा ऊचुः–इ० पा० । २ दानधर्मविशेषज्ञ–इ० पा० । ३ विनिर्मिताः–इ० पा० । ५ आविष्कृत्यादितस्तु तत्–इ०पा० । ६ संपदं याति वैष्णवीम्–इ०पा० । ७ श्वेतकल्पप्रसङ्गेन–इ०पा०। ८ इहाब्रवीत्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



कुटुम्बिने ॥ शिविलोके स पूतात्मा कल्पमेकं वसेन्नरः ॥ ३७ ॥ पुनः संजायते मर्त्यो ब्राह्मणो वेदवित्तमः ॥ वेदविद्यार्थतत्त्वज्ञो व्याख्यातत्त्वार्थवित्तमः ॥ ३८ ॥ यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः ॥ वृत्रासुरवधोपेतं तद्भागवतमुच्यते ॥ ३९ ॥ सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः तद्वृत्तान्तोद्भवं पुण्यं पुण्योद्वाहसमन्वितम् ॥ ४० ॥ लिखित्वा तच्च यो दद्याद्धेमसिंहसमन्वितम् ॥ पौर्णमास्यां प्रौष्ठपद्यां स याति परमां गतिम् ॥ ॥४१॥ अष्टादशसहस्राणि पुराणं तत्प्रकीर्तितम् ॥४२॥ यत्राह नारदो धर्मान्बृहत्कल्पाश्रयांस्त्विह ॥ पञ्चविंशतसहस्राणि नारदीयं तदुच्यते ॥४३॥ तदिषे पञ्चदश्यां तु यो दद्याद्धेनुसंयुतम् ॥ उत्तमां सिद्धिमाप्नोति इहलोके परत्र च ॥ सर्वान्कामानवाप्नोति नात्र कार्या विचारणा ॥४४॥ यत्राधिकृत्य शकुनीन्धर्माधर्मविचारणम् ॥ पुराणं नवसाहस्रं मार्कण्डेयं तदुच्यते ॥ ४५ ॥ परिलिख्य च यो दद्यात्सौवर्णकरिसंयुतम् ॥ कार्तिक्यां पौण्डरीकस्य यज्ञस्य फलभाग्भवेत् ॥ ४६ ॥ यत्तदीशानकल्पस्य वृत्तान्तमधिकृत्य च ॥ वशिष्ठायाऽग्निना प्रोक्तमाग्नेयं तत्प्रचक्षते ॥ ४७ ॥ लिखित्वा तच्च यो दद्याद्धेमपद्मसमन्वितम् ॥ मार्गशीर्षे विधानेन तिलधेनुयुतं तथा ॥ तच्च षोडशसाहस्रं सर्वक्रतुफलप्रदम् ॥ ४८ ॥ यत्राधिकृत्य माहात्म्यमादित्यस्य चतुर्मुखः ॥ अघोरकल्पवृत्तान्तप्रसंगेन जगत्पतिः ॥ मनवे कथयामास भूतग्रामस्य लक्षणम् ॥ ४९ ॥ चतुर्दशसहस्राणि तथा पञ्चशतानि च ॥ भविष्यचरितप्रायं भविष्यं तदिहोच्यते ॥ ५० ॥ तत्पौषमासि यो दद्यात्पौर्णमास्यां विमत्सरः ॥ गुडकुम्भसमायुक्तमग्निष्टोमफलं लभेत् ॥ ॥ ५१ ॥ रथंतरस्य कल्पस्य वृत्तान्तमधिकृत्य च ॥ सावर्णिना नारदाय कृष्णमाहात्म्यसंयुतम् ॥ प्रोक्तं ब्रह्मवराहस्य चरितं वर्ण्यतेऽत्र च ॥५२॥ तदष्टादशसाहस्रं ब्रह्मवैवर्तमुच्यते ॥ पुराणं ब्रह्मवैवर्तं यो दद्याद्ब्राह्मणोत्तमे ॥ माघमासे पौर्णमास्यां ब्रह्मलोके महीयते ॥ ५३ ॥ यत्राग्निलिङ्गमध्यस्थः प्राह देवो महेश्वरः ॥ धर्मार्थकाममोक्षार्थानाग्नेयमधिकृत्य च ॥ ५४ ॥ कल्पं तल्लैङ्गमित्युक्तं पुराणं ब्रह्मणा स्वयम् ॥ ५५ ॥ तदेकादशसाहस्रं फाल्गुन्यां यः प्रयच्छति ॥ तिलँधेनुसमायुक्तं स याति शिवसात्म्यताम् ॥५६॥ महावराहस्य पुनर्माहात्म्यमधिकृत्य च ॥ विष्णुनाऽभिहितं क्षोण्यै तद्वाराहमिहोच्यते ॥५७॥ मानवस्य प्रसंगेन धन्यस्य मुनिसत्तमाः ॥ चतुर्विंशत्सहस्राणि तत्पुराणमिहोच्यते ॥ ५८ ॥ काञ्चनं गरुडं कृत्वा तिलधेनुसमन्वितम् ॥ पौर्णमास्यामथो दद्याद्ब्राह्मणाय कुटुम्बिने ॥ वाराहस्य प्रसादेन पदमाप्नोति वैष्णवम् ॥ ५९ ॥ यत्र माहेश्वरान्धर्मानधिकृत्य च

१ तपस्विने–इ०पा०। २ लोके तद्भागवतमुच्यते–इ०पा०। ३ परमं पदम्–इ० पा०। ४ पुनरावृत्तिदुर्लभाम्–इ०पा०। ५ तत्र ब्रह्मवराहस्य चरितं वर्ण्यते मुहुः। यत्र व्रतसमायुतम्–इ०पा०। ६ ब्राह्मणोत्तमे–ब्राह्मणोत्तमाय–इत्यर्थः। चतुर्थ्यर्थे सप्तम्यार्षी। ७ सद्यः संपूतदेहोऽसौ–इ०पा०। ४ वाममस्य–इ०पा०।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षण्मुखम् ॥ कल्पे तत्पुरुषे वृत्ते चरितैरुपबृंहितम् ॥६०॥ स्कांदं नाम पुराणं तदेकाशीति निगद्यते ॥ सहस्राणि शतं चैकमिति मर्त्येषु पद्यते ॥६१॥ परिलेख्य च यो दद्याद्धेमशूलसमन्वितम् ॥ शैवं स पदमाप्नोति मकरोपगमे रवेः ॥ ६२ ॥ त्रिविक्रमस्य माहात्म्यमधिकृत्य चतुर्मुखः ॥ त्रिवर्गमभ्यधात्तत्तु वामनं परिकीर्तितम् ॥ ६३ ॥ पुराणं दशसाहस्रं कौर्मकल्पानुगं शिवम् ॥ ६४ ॥ यः शरद्विषुवे दद्याद्धेमवस्त्रसमन्वितम् ॥ क्षौमावृतं युतं धेन्वा स पदं याति वैष्णवम् ॥६५॥ यत्र धर्मार्थकामानां मोक्षस्य च रसातले ॥ माहात्म्यं कथयामास कूर्मरूपी जनार्दनः ॥६६॥ इन्द्रद्युम्नप्रसंगेन ऋषीणां शक्रसन्निधौ ॥ सप्तदशसहस्राणि लक्ष्मीकल्पानुषङ्गिकम् ॥६७॥ यो दद्यादयने कौर्मं हेमकूर्मसमन्वितम् ॥ गोसहस्रप्रदानस्य स फलं प्राप्नुयान्नरः ॥६८॥ श्रुतीनां यत्र कल्पादौ प्रवृत्त्यर्थं जनार्दनः॥ मत्स्यरूपी च मनवे नरसिंहोपवर्णनम् ॥६९॥ अधिकृत्याब्रवीत्सप्तकल्पवृत्तं मुनिव्रताः॥ तन्मात्स्यमिति जानीध्वं सहस्राणि चतुर्दश[1] ॥ ७० ॥ विषुवे हैममत्स्येन धेन्वा क्षौमयुगान्वितम् ॥ यो दद्यात्पृथिवी तेन दत्ता भवति चाखिला ॥ ॥७१॥ यदा वा गरुडे कल्पे विश्वाण्डाद्गरुडोऽभवत् ॥ अधिकृत्याब्रवीत्कृष्णो गारुडं तदिहोच्यते ॥७२॥ तदष्टादश[2] चैकं च सहस्राणीह पठ्यते ॥ स्वर्णहंससमायुक्तं यो दद्यादयने परे ॥ स सिद्धिं लभते मुख्यां शिवलोके च संस्थितिम् ॥ ७३ ॥ ब्रह्मा ब्रह्माण्डमाहात्म्यमधिकृत्याब्रवीत्पुनः ॥ तच्च द्वादशसाहस्रं ब्रह्माण्डं द्विशताधिकम् ॥७४॥ भविष्याणां च कल्पानां श्रूयते यत्र विस्तरः ॥ तद्ब्रह्माण्डं पुराणं तु ब्रह्मणा समुदाहृतम् ॥ ७५ ॥ यो दद्यात्तु व्यतीपात ऊर्णा[3]युगसमन्वितम् ॥ राजसूयसहस्रस्य फलमाप्नोति मानवः ॥ ७६ ॥ हेमधेन्वायुतं तच्च ब्रह्मलोकफलप्रदम् ॥ चतुर्लक्षमिदं प्रोक्तं व्यासेनाद्भुतकर्मणा ॥ ७७ ॥ इदं लोकहितार्थाय संक्षिप्तं द्वापरे द्विजाः ॥ ७८ ॥ इदमद्यापि देवेषु शतकोटिप्रविस्तरम् ॥ उपभेदान्प्रवक्ष्यामि लोके ये संप्रतिष्ठिताः ॥ ७९ ॥ पाद्मे पुराणे यत्प्रोक्तं नारसिंहोपवर्णनम् ॥ तच्चाष्टादशसाहस्रं नारसिंहमिहोच्यते ॥ ८० ॥ नन्दिने यत्र माहात्म्यं कार्तिकेयेन वर्णितम् ॥ लोके नन्दिपुराणं वै ख्यातमेतद्द्विजोत्तमाः ॥ ८१ ॥ यत्र साम्बं पुरस्कृत्य भविष्यति कथानकम् ॥ प्रोच्यते तत्पुनर्लोके सांबमेव मुनिव्रताः ॥ ८२ ॥ एवमादित्यसंज्ञं तु तत्रैव परिपठ्यते ॥ अष्टादशभ्यस्तु पृथक्पुराणं यच्च दृश्यते ॥ विजानीध्वं द्विजश्रेष्ठास्तदेतेभ्यो विनिर्गतम् ॥ ८३ ॥ पञ्चाङ्गानि पुराणस्य चाख्यानमितरत्स्मृतम् ॥ सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ॥ वंशानुवंशचरितं पुराणं पञ्चलक्षणम् ॥ ८४ ॥ ब्रह्मविष्ण्वर्करुद्राणां माहात्म्यं भुवनस्य च ॥ संहारश्च प्रदृश्येत पुराणं पञ्चलक्षणम् ॥ ८५ ॥ धर्मश्चार्थश्च

१ त्रयोदश–इ० पा० । २ तदष्टादश चैकं च–एकोनविंशतिसहस्रम्–इत्यर्थः । ३ पत्रोर्णपदसंयुतम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



कामश्च मोक्षश्च परिकीर्त्यते ॥ सर्वेष्वपि पुराणेषु तद्विरूढे च यत्फलम् ॥ ८६ ॥ सात्विकेषु च कल्पेषु माहात्म्यमधिकं हरेः ॥ राजसेषु च माहात्म्यमधिकं ब्रह्मणो विदुः ॥ ८७ ॥ तद्वदग्ने च माहात्म्यं तामसेषु शिवस्य हि ॥ संकीर्णे च सरस्वत्याः पितॄणां च निगद्यते ॥ ८८ ॥ चतुर्भिर्भगवान्विष्णुर्द्वाभ्यां ब्रह्मा तथा रविः ॥ अष्टादशपुराणेषु शेषेषु भगवाञ्छिवः ॥ ८९ ॥ वेदवन्निश्चलं मन्ये पुराणं वै द्विजोत्तमाः ॥ वेदाः प्रतिष्ठिताः सर्वे पुराणे नात्र संशयः ॥ ९० ॥ बिभेत्यल्पश्रुताद्वेदो मामयं चालयिष्यति ॥ इतिहासपुराणैस्तु निश्चलोऽयं कृतः पुरा ॥ ९१ ॥ यन्न दृष्टं हि वेदेषु न दृष्टं स्मृतिषु द्विजाः ॥ उभयोर्यन्न दृष्टं च तत्पुराणेषु गीयते ॥ ९२ ॥ यो वेद चतुरो वेदान्सांगोपनिषदो द्विजः ॥ पुराणं नैव जानाति न च स स्याद्विचक्षणः ॥ ९३ ॥ अष्टादशपुराणानि कृत्वा सत्यवतीसुतः ॥ भारताख्यानमकरोद्वेदार्थैरुपबृंहितम् ॥ ९४ ॥ लक्षेणैकेन तत्प्रोक्तं द्वापरान्ते महात्मना ॥ वाल्मीकिना च यत्प्रोक्तं रामोपाख्यानमुत्तमम् ॥ ९५ ॥ ब्रह्मणा विहितं यच्च शतकोटिप्रविस्तरम् ॥ आह तन्नारदायैव तेन वाल्मीकये पुनः ॥ ९६ ॥ वाल्मीकिना च लोके तु धर्मकामार्थसाधकम् ॥ ९७ ॥ एवं सपादाः पञ्चैते लक्षाः पुण्याः प्रकीर्तिताः ॥ पुरातनस्य कल्पस्य पुराणे तु विदुर्बुधाः ॥ ९८ ॥ इतिहासपुराणानि भिद्यन्ते कालगौरवात् ॥ स्कान्दं तथा च ब्रह्माण्डं पुराणं लैङ्गमेव च ॥ ९९ ॥ वाराहकल्पे विप्रेन्द्रास्तेषां भेदः प्रवर्तते ॥ अष्टादशप्रकारेण ब्रह्माण्डं भिन्नमेव हि ॥ १०० ॥ अष्टादशपुराणानि तेन जातानि भूतले ॥ लैङ्गमेकादशविधं प्रभिन्नं द्वापरे शुभम् ॥ १०१ ॥ स्कान्दं तु सप्तधा भिन्नं वेदव्यासेन धीमता ॥ एकाशीतिसहस्राणि शतं चैकं तु संख्यया ॥ १०२ ॥ तस्याऽऽद्यो यो विभागस्तु स्कन्दमाहात्म्यसंयुतः ॥ माहेश्वरः समाख्यातो द्वितीयो वैष्णवः स्मृतः ॥ १०३ ॥ तृतीयो ब्रह्मणः प्रोक्तः सृष्टिसंक्षेपसूचकः ॥ काशीमाहात्म्यसंयुक्तश्चतुर्थः परिपठ्यते ॥ १०४ ॥ रेवायाः पञ्चमो भागः सोज्जयिन्याः प्रकीर्तितः ॥ षष्ठः कल्पो नागरश्च तीर्थमाहात्म्यसूचकः ॥ १०५ ॥ सप्तमो यो विभागोऽयं स्मृतः प्राभासिको द्विजाः॥ सर्वे द्वादशसाहस्रा[1] विभागाः संप्रकीर्तिताः[2] ॥ १०६ ॥ अस्मिन्प्राभासिकः सर्वो वर्ण्यते क्षेत्रविस्तरः ॥ तीर्थानां चैव माहात्म्यं माहात्म्यं शंकरस्य च ॥ १०७ ॥ अन्येषां चैव देवानां माहात्म्यं च प्रकीर्त्यते ॥ इति भेदः पुराणानां संक्षेपात्कथितो द्विजाः ॥ १०८ ॥ इममष्टादशानां तु पुराणानामनुक्रमम् ॥ यः पठेद्धव्यकव्येषु स याति भवनं हरेः ॥१०९॥ इदं पवित्रं हि यशोनिधानमिदं पितॄणामपि वल्लभं च ॥ इदं च देवेष्वमृताय[3]

१ द्वादशसाहस्राः–किंचिन्न्यूनाधिकाः द्वादशसाहस्रा–इत्यर्थोऽत्र एकाशीतिसहस्रसंख्यापूरणवशेन–त्रोद्धव्यः । २ साधिकाः स्मृताः–इ० पा० । ३ देवेष्वमृताय–देवानामप्यमृतवत्तृप्तिकारि–इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नित्यमिदं महापातकघ्नञ्च पुसाम् ॥ ११० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभास क्षेत्रमाहात्म्ये ससंख्याकाष्टादशमहापुराणोपपुराणवर्णनपूर्वकपुराणपुस्तकदानफलवर्णनं नाम द्वितीयोऽध्यायः ॥ २ ॥ ॥ छ ॥ ॥ ॥ ॥ ऋषय ऊचुः ॥ ॥ कथितो भवता सर्गः प्रतिसर्गस्तथैव च ॥ वंशानुवंशचरितं पुराणानामनुक्रमः ॥ १ ॥ मन्वन्तरप्रमाणं च ब्रह्मांडस्य च विस्तरः ॥ ज्योतिश्चक्रस्वरूपं च यथावदनुवर्णितम् ॥ श्रोतुमिच्छामहे त्वत्तः सांप्रतं तीर्थविस्तरम् ॥ २ ॥ पृथिव्यां यानि तीर्थानि पापघ्नानि शुभानि च ॥ तानि सूतज कार्त्स्न्येन यथावद्वक्तुमर्हसि ॥ ३ ॥ ॥ सूत उवाच ॥ ॥ इदं पृष्टं पुरा देव्या कैलासशिखरोत्तमे ॥ नानाधातुविचित्रांगे नानारत्नसमन्विते ॥ ४ ॥ नानाद्रुमलताकीर्णे नानापुष्पोपशोभिते ॥ यक्षविद्याधराकीर्णे ह्यप्सरोगणसेविते ॥ ५ ॥ तत्र ब्रह्मा च विष्णुश्च स्कन्दनन्दिगणेश्वराः ॥ चंद्रादित्यौ ग्रहैः सार्धं नक्षत्रध्रुवमण्डलम् ॥ ६ ॥ वायुश्च वरुणश्चैव कुबेरो धनदस्तथा ॥ ईशानश्चाग्निरिंद्रश्च यमो निर्ऋतिरेव च ॥ ७ ॥ सरितः सागराः सर्वे पर्वता उरगास्तथा ॥ ब्राह्म्याद्या[1] मातरश्चैव ऋषयश्च तपोधनाः ॥ ८ ॥ मूर्तिमंति च तीर्थानि क्षेत्राण्यायतनानि च ॥ दानवासुरदैत्याश्च पिशाचा भूतराक्षसाः ॥ ९ ॥ तत्र सिंहासनं दिव्यं शतयोजनविस्तृतम् ॥ सूर्यकोटिसमप्रख्यं[2] मणिमौक्तिकमंडितम् ॥ १० ॥ पद्मनीलोत्पलोपेतं सिद्धकिन्नरसेवितम् ॥ श्वेतातपत्रकोटीभिः प्रच्छादितदिगन्तरम् ॥ ११ ॥ लक्षायुतसहस्रैश्च रुद्रकोटिभिरावृतम् ॥ तन्मध्ये सर्वतोभद्रं सिंहद्वारैः सुतोरणैः ॥ १२ ॥ स्वच्छमौक्तिकसंकाशं प्राकारशिखरावृतम् ॥ नन्दीश्वरमहाकालद्वारपालगणैर्वृतम् ॥ १३ ॥ कलशैर्द्रांकिंकिणीजालमुखरैः सत्यताकैरलंकृतम् ॥ वितानच्छत्रखंडैश्च मुक्तादाम[3]प्रलंबितैः ॥ १४ ॥ घंटाचामरशोभाढ्यैर्दर्पणैश्चोपशोभितम् ॥ शतसिंरविन्यस्तरत्नपल्लवसंयुतैः ॥ १५ ॥ चित्रितं चित्रशास्त्रज्ञै रत्नचूर्णैः समुज्वलैः ॥ स्वस्तिकैः पत्रवल्याद्यै[4]र्लिंगोद्भवलतादिभिः ॥ १६ ॥ शतसिंहासनाकीर्णं वेदिकाभिश्च शोभितम् ॥ आसीनै रुद्रवृन्दैश्च रुद्रकन्याकदम्बकैः ॥ १७ ॥ लक्षपत्रदलाढ्यैश्च श्वेतपद्मैश्च भूषितम् ॥ अप्सरोभिः समाकीर्णं पुष्पप्रकरविस्तृतम् ॥ १८ ॥ धूपितं धूपवर्त्तीभिः कुंकुमोदकसेचितम् ॥ वंशवीणामृदंगैश्च गोमुखैर्मुखवादनैः ॥ १९ ॥ शंखभेरीनिनादेन दुन्दुभिध्वनितेन च ॥ गर्जद्भिर्गणवृन्दैश्च मेघस्वनितनिस्वनैः ॥ २० ॥ गणानां स्तोत्रशब्देन सामवेदरवेण च ॥ प्रेक्षणीयैर्महानादैर्गेयहुङ्कारशोभितम् ॥ २१ ॥ वृषनर्दितशब्देन गजवाजिरवेण च ॥ कांचीनूपुरशब्देन समाकीर्णदिगंतरम् ॥ २२ ॥ सर्वसंपत्करं श्रीमच्छंकरस्यैव मंदिरम् ॥ वंश

१ ब्रह्माण्याद्या मातरश्च–इ० पा० । २ सूर्यकोटिसमप्रख्यम्–सूर्यकोटिसमानदीप्तिकम्–इत्यर्थः । ३ मुक्ताहारप्रलंबितैः–इ० पा० । ४ पद्मवल्याद्यैः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वीणामृदंगैश्च नादितं तत्रतत्र ह ॥ ऋग्वेदो मूर्तिमांश्चैव शंक्रनीलसमद्युतिः ॥ २३ ॥ दिव्यगन्धानुलिप्तांगो दिव्याभरणभूषितः ॥ संस्थितः पूर्वत
स्तस्य दीप्यमानः स्वतेजसा ॥ २४ ॥ उत्तरेण यजुर्वेदः शुद्धस्फटिकसन्निभः ॥ दिव्यकुण्डलधारी च महाकायो महाभुजः ॥ २५ ॥ स्थितः पश्चिम
दिग्भागे सामवेदः सनातनः ॥ रक्तांबरधरः श्रीमान्पद्मरागसमप्रभः ॥२६॥ स्रग्दामधारी चित्रश्च गीतभूषणभूषितः ॥ अथर्वांऽजनवच्छ्यामः स्थितो
दक्षिणतस्तथा ॥ २७ ॥ पिंगाक्षो लोहितग्रीवो हरिकेशो महातनुः ॥ इतिहासषडंगानि पुराणान्यखिलानि च ॥ २८ ॥ वेदोपनिषदश्छन्दो मीमां
सारण्यकं तथा ॥ स्वाहाकारवषट्कारो रहस्यानि तथैव च ॥२९॥ एतैः समन्वितैश्चैव तत्र ब्रह्मा स्वयं स्थितः ॥ शक्तिरूपधरैर्मन्त्रैर्योगैश्वर्यसमन्वितैः
॥ ३० ॥ सहस्रपत्रकमलैरंकितैः सुरपूजितैः ॥ पूजितैर्गणरुद्रैश्च ब्रह्मविष्ण्विंद्रवंदितैः ॥३१॥ चामराक्षेपव्यजनैर्वीजितैश्च समन्ततः ॥ शोभितश्च स
दा श्रीमांश्चंद्रकोटिसमप्रभः ॥ ३२ ॥ ज्ञानामृतसुतृप्तात्मा योगैश्वर्यप्रसादकः ॥ योगींद्रमानसांभोजराजहंसो द्विजोत्तमः ॥ ३३ ॥ अज्ञानतिमिरध्वं
सीषट्त्रिंशत्तत्त्वभूषणः ॥ सर्वसौख्यप्रदाता च तत्रास्ते चंद्रशेखरः ॥३४॥ तस्योत्संगगता देवी तप्तकांचनसप्रभा ॥ पूजितो योगिनीवृन्दैः साधकैः
सुरकिन्नरैः ॥ ३५ ॥ सर्वलक्षणसंपूर्णा सर्वाभरणभूषिता ॥ योगसिद्धिप्रदा नित्यं मोक्षाभ्युदयदायिनीम् ॥ ३६ ॥ सौभाग्यकदलीकन्दमूलबीजं च
पार्वती ॥ देवस्य मुखमालोक्य विस्मिता चारुलोचना ॥ ३७ ॥ आनंदभावं संज्ञाय आनन्दास्राविलेक्षणम् ॥ उवाच देवी मधुरं कृतांजलिपुटा
सती ॥ ३८ ॥ ॥ देव्युवाच ॥ ॥ जन्मकोटिसहस्राणि जन्मकोटिशतानि च ॥ शोधितस्त्वं जगन्नाथ मया प्राणनचिंतया ॥ ३९ ॥ अर्द्धांग
संस्थया वापि त्वदंकध्यानकाम्यया ॥ तथापि ते जगन्नाथ नांतो लब्ध्वो महेश्वर ॥ ४० ॥ अनन्तरूपिणे तुभ्यं देवदेव नमोऽस्तु ते ॥ नमो वेदरह
स्याय नमो वेदैः स्तुताय च ॥ ४१ ॥ श्मशानरतिनित्याय नमो गगनचारिणे ॥ ज्येष्ठसामरहस्याय शतरुद्रप्रियाय च ॥ ४२ ॥ नमो वृषकृतां
काय यजुर्वेदधराय च ॥ ब्रह्मांडकोटिसंलग्नमालिने गगनात्मने ॥ ४३ ॥ मणिचित्रितकण्ठाय नमः सर्वार्थसिद्धये ॥ नमो वेदस्वरूपाय द्विज
सिद्धिप्रियाय च ॥ ४४ ॥ पुंस्त्रीविकाररूपाय नमश्चंद्रार्द्धधारिणे ॥ नमोऽग्नये सहोमाय आदित्यवरुणाय च ॥ ४५ ॥ पृथिव्यै चांतरिक्षाय वायवे
दीक्षिताय च ॥ संयोगाय वियोगाय धात्रे कर्त्रेऽपहारिणे ॥ ४६ ॥ प्रदीप्तशूलहस्ताय ब्रह्मदण्डधराय च ॥ नमः पतीनां पतये महतां पतये नमः ॥
॥ ४७ ॥ नमः कालाग्निरुद्राय सप्तलोकनिवासिने ॥ त्वं गतिः सर्वभूतानां भूतानां पतये नमः ॥ ४८ ॥ नमस्ते भगवन्रुद्र नमस्ते भगवञ्छिव ॥

१ शक्रनीलसमद्युतिः—इन्द्रनीलसमानकान्तिः—इत्यर्थः । व्योमनीलसमद्युतिः—इ०, इन्द्रनीलसमद्युतिः—इ० च पा० । २ सेवितः--इ० पा० । ३ नमोऽत्रये--इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमस्ते परतः श्रेष्ठ नमस्ते परतः पर ॥ ४९ ॥ जिह्वाचापल्यभावेन खेदितोऽसि मया प्रभो ॥ तत्क्षन्तव्यं महेशान ज्ञानदिव्य[1] नमोऽस्तु ते ॥५०॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ममोत्संगस्थिता देवि किं त्वं सास्राविलेक्षणा ॥ अद्यापि किमपूर्णं ते तत्सर्वं करवाण्यहम् ॥ ५१ ॥ वरं ब्रवीहि भद्रं ते स्तवेनानेन सुव्रते ॥ ददामि ते न संदेहः शोकं त्यज महेश्वरि ॥ ५२ ॥ निष्कले सकले देवि स्थूले सूक्ष्मे चराचरे ॥ न तत्पश्यामि देवेशि यत्त्वया रहितं भवेत् ॥ ५३ ॥ अहं ते हृदये गौरि त्वं च मे हृदि संस्थिता ॥ अहं भ्राता च पुत्रश्च बंधुर्भर्ता तथैव च ॥ ५४ ॥ त्वं तु मे भगिनी भार्या दुहिता बांधवी स्नुषा ॥ अहं यज्ञपतिर्यज्वा त्वं च श्रद्धा सदक्षिणा ॥ ५५ ॥ ओंकारोऽहं व षट्कारः सामाहमृग्यजुस्तथा ॥ अह मग्निश्च होता च यजमानस्तथैव च ॥ ५६ ॥ अध्वर्युरहमुद्गाता ब्रह्माहं ब्रह्मवित्तथा ॥ त्वं तु देव्यरणी चैव पत्नी तु परिकीर्त्यसे ॥ ५७ ॥ स्वाहा स्वधा च सुश्रोणि त्वयि सर्वं प्रतिष्ठितम् ॥ अहमिष्टो महायज्ञः पूर्वो यज्ञस्त्वमुच्यसे ॥ ५८ ॥ पुरुषोऽहं वरारोहे प्रकृतिस्त्वं निगद्यसे ॥ अहं विष्णुर्महावीर्यस्त्वं लक्ष्मीर्लोकभाविनी ॥ ५९ ॥ अहमिन्द्रो महातेजाः प्राची त्वं परमेश्वरी ॥ प्रजापतीनां रूपेण सर्वमाहं व्यवस्थितः ॥ ६० ॥ तेषां या नायिकास्तास्त्वं रूपैस्तैस्तैरवस्थिता ॥ दिवसोऽहं महादेवि रजनी त्वं निगद्यसे ॥ ६१ ॥ निमेषोऽहं मुहूर्तश्च त्वं कला सिद्धिरेव च ॥ अहं तेजोऽधिकः सूर्यस्त्वं तु संध्या प्रकीर्त्त्यसे ॥ ६२ ॥ अहं बीजधरः श्रेष्ठस्त्वं तु क्षेत्रं वरानने ॥ अहं वनस्पतिः प्लक्षस्त्वं वनस्पतिरुच्यसे ॥ ॥ ६३ ॥ शेषरूपधरो नित्ये फणामणिविभूषितः ॥ रेवती त्वं विशालाक्षिमदविभ्रमलोचना ॥ ६४ ॥ मोक्षोऽहं सर्वदुःखानां त्वं तु देवि परा गतिः ॥ अपां पतिरहं भद्रे त्वं तु देवि सरिद्वरा ॥ ६५ ॥ वडवाग्निरहं भद्रे त्वं तु दीप्तिः प्रकीर्तिता ॥ प्रजापतिरहं कर्त्ता त्वं प्रजा प्रकृतिस्तथा ॥ ॥ ६६ ॥ नागानामधिपश्चाहं पातालतलवासिनाम् ॥ त्वं नागी नागराजोऽहं सहस्रफणभूषितः ॥ ६७ ॥ निशाकरवरश्चाहं श्रेष्ठा त्वं रजनीकरी ॥ कामोऽहं कामदो देवि त्वं रतिः स्मृतिरेव च ॥ ६८ ॥ दुर्वासाश्चाप्यहं भद्रे त्वं क्षमा समचारिणी ॥ लोभमोहतपश्चाहं[3] त्वं तृष्णा तामसी स्मृता ॥ ६९ ॥ ककुद्मान्वृषभश्चाहं योगमाता तपस्विनी ॥ वायुरप्यहमव्यक्तस्त्वं गतिर्मनर्सूदनी[4] ॥ ७० ॥ अहं मोचयिता लोभे निर्मे मा त्वं यशस्विनि ॥ नयोऽहं सर्वकार्येषु नीतिस्त्वं कमलेक्षणा ॥ ७१ ॥ अहमन्नं च भोक्ता च ओषधी त्वं निगद्यसे ॥ अहमग्निश्च धूमश्च त्व मूष्मा ज्वालमेव च ॥ ७२ ॥ अहं संवर्त्तको मेघस्त्वं च धारा ह्यनेकशः ॥ अहं मुनीनां रूपेण त्वं तत्पत्नी प्रकीर्तिता ॥ ७३ ॥ अहं संसारकर्त्ता

१ ज्ञानदिव्येततोऽसि वा–इ०, ज्ञानदिव्योन्नतोऽपि वा–इ० च पा०। २ भद्रे–इ० पा०। ३ लोभमोहतपश्चाहम्–लोभमोहपूर्वकं यत्तपः–तदहम्–इति योजना। ४ मनसूदनी–मनः सूदनी–इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वै त्वं तु सृष्टिर्वरानने ॥ अहं शुक्रास्थिरोमाणि त्वं मज्जा बलमेव च ॥ ७४ ॥ पर्जन्योऽहं महाभागे त्वं वृष्टिः परमेश्वरि ॥ अहं संवत्सरो देवि त्वमृतुः परिकीर्त्तिता ॥ ७५ ॥ अहं कृतयुगो देवि त्वं तु त्रेता निगद्यसे ॥ युगोऽहं द्वापरः श्रीमांस्त्वं कलिः परमेश्वरि ॥ ७६ ॥ आकाशश्चाप्यहं भद्रे पृथिवी त्वमिहोच्यसे ॥ अहमदृश्यमूर्तिश्च दृश्यमूर्तिस्त्वमुच्यसे ॥ ७७ ॥ वरदोऽहं वरारोहे मंत्रस्त्वमिति चोच्यसे ॥ अहं द्रष्टा च श्रोता च त्वं दृश्या श्रुतिरेव च ॥७८॥ अहं वक्ता रमयिता त्वं वाच्या परमेश्वरि ॥ अहं श्रोता च गाता च त्वं गीतिर्गेयमेव च ॥७९॥ अहं घ्राता च गन्धश्च त्वं तु निघ्राणमेव च ॥ अहं स्पर्शयिता कर्ता स्पर्श्यस्त्वं सृष्टमेव च ॥ ८० ॥ अहं सर्वमिदं भूतं त्वं तु देवि न संशयः ॥ स्रष्टाऽहं तव देवेशि त्वं सृजस्यखिलं जगत् ॥ ८१ ॥ त्वया मया च देवेशि ओतप्रोतमिदं जगत् ॥ एकधा दशधा चैव तथा शतसहस्रधा ॥ ८२ ॥ ऐश्वर्येण तु संयुक्तौ सर्वप्राणिव्यवस्थितौ ॥ अहं त्वं च विशालाक्षि सततं संप्रतिष्ठितौ ॥ ८३ ॥ क्रीडामि क्रीडया देवि त्वया सार्द्धं वरानने ॥ त्वं धृतिर्धारिणी लक्ष्मीः कांता मत्प्रकृतिर्ध्रुवम् ॥ ८४ ॥ रतिः स्मृतिः कामचारी मम चांगनिवासिनी ॥ देवि किं बहुनोक्तेन प्राणेभ्योऽपि गरीयसी ॥ ८५ ॥ वरं वरय देवेशि यत्किंचिन्मनसि स्थितम् ॥ तत्ते ददामि तुष्टोऽहं यद्यपि स्यात्सुदुर्लभम् ॥ ८६ ॥ ॥ देव्युवाच ॥ ॥ धन्याहं कृतपुण्याहं तपः सुचरितं मया ॥ यत्त्वयाऽहं जगन्नाथ हर्षदृष्ट्याऽवलोकिता ॥ ८७ ॥ यदि तुष्टोऽसि मे देव वरं दातुं ममेच्छसि ॥ तन्मे कथय देवेश सांप्रतं तीर्थविस्तरम् ॥ ॥ ८८ ॥ पृथिव्यां यानि तीर्थानि पापघ्नानि शिवानि च ॥ तानि देवेश कार्त्स्न्येन यथावद्वक्तुमर्हसि ॥ ८९ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि तीर्थमाहात्म्यमुत्तमम् ॥ सर्वपापहरं नणां पुण्यं देवर्षिसत्कृतम् ॥ ९० ॥ तीर्थानां दर्शनं श्रेष्ठं स्नानं चैव सुरेश्वरि ॥ श्रवणं च प्रशंसंति सदैव ऋषिसत्तमाः ॥ ९१ ॥ पृथिव्यां नैमिषं तीर्थमंतरिक्षे च पुष्करम् ॥ केदारं च प्रयागं च विपाशां चोर्मिलां तथा ॥ ९२ ॥ कर्णवेणां महादेवीं चंद्रभागां सरस्वती ॥ गंगासागरसंभेदस्तथा वाराणसी शुभा ॥ ९३ ॥ अर्घतीर्थं समाख्यातं गंगाद्वारं तथैव च ॥ हिमस्थानं महातीर्थं तथा मायापुरी शुभा ॥ ९४ ॥ शतभद्रा महाभागा सिन्धुश्चैव महानदी ॥ ऐरावती च कपिला शोणश्चैव महानदः ॥ ९५ ॥ पयोधिः कौशिकी तद्वत्तथा गोदावरी शुभा ॥ देवखातं गया चैव तथा द्वारावती शुभा ॥ ९६ ॥ प्रभासं च महातीर्थं सर्वपातकनाशनम् ॥ ९७ ॥ एवमादीनि तीर्थानि यानि संति महीतले ॥



१ वरदोऽहमहं भद्रे–इ०पा० । २ बहुधा--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तानि दृष्ट्वा तु देवेशि पुनर्जन्म न विन्दते ॥९८॥ तिस्रः कोट्योऽर्धकोटी च तीर्थानामिह भूतले ॥ संजातानि पवित्राणि सर्वपापहराणि[1] च ॥९९॥ गंतव्यानि महादेवि स्वधर्मस्य विवृद्धये ॥ अशक्यानि शिवान्येवं गंतुं चैव सुरेश्वरि ॥ मनसा तानि सर्वाणि गंतव्यानि समाहितैः ॥ १०० ॥ ॥ देव्युवाच ॥ ॥ भगवन्प्राणिनः सर्वे सर्वोपद्रवसंकुलाः ॥ अल्पायुषः सदा बद्धा व्यामोहैर्मंदिरोद्भ[illegible] १ ॥ त्रेतायां द्वापरे चैव किं तु वै दारुणे कलौ ॥ तस्मात्तेषां हितार्थाय तत्तीर्थं त्वं प्रकीर्तय ॥ येन दृष्टेन सर्वेषां तीर्थानां लभ्यते फलम् ॥१०२॥ एवमुक्तस्तु पार्वत्या प्रहस्य परमेश्वरः ॥ उवाच परया प्रीत्या वाचा मधुरया प्रभुः ॥१०३॥ ॥ ईश्वर उवाच ॥ ॥ त्वमेव हि चराः प्राणाः सर्वस्य जगतोरणिः ॥ त्वया विरहितो देवि मुहूर्तमपि नोत्सहे ॥१०४॥ शिवस्य च तथा शक्तेरंतरं नास्ति पार्वति ॥ न तदस्ति महादेवि यन्न जानासि शोभने ॥ १०५ ॥ त्वया विनाऽहं न क्वास्मि न त्वं देवि मया विना ॥ चंद्रचंद्रिकयोर्यद्वदग्नेरुष्णत्वमेव हि ॥ १०६ ॥ तव देवि ममापीह नास्ति चैवांतरं प्रिये ॥ सर्वं चैव सुरेशानि यथावत्कथयाम्यहम् ॥ १०७ ॥ रहस्यानां रहस्यं तु गोपनीयं प्रयत्नतः ॥ नास्तिकाय न दातव्यं न च पापरताय च ॥ १०८ ॥ दातव्यं भक्तियुक्ताय स्वशिष्याय सुताय वा ॥ पूर्वमेव मयाख्यातं सारात्सारतरं प्रिये ॥१०९॥ तीर्थोपनिषदः ख्याता लिंगोपनिषदस्तथा ॥ योगोपनिषदो देवि पूर्वं वै कथितास्तव ॥ ११० ॥ ॥ पार्वत्युवाच ॥ ॥ क्लेशेनापि न सिद्ध्यंति[2] कांक्षमाणाः परं पदम् ॥ योनीर्भ्रमंतो दृश्यंते नरा नास्तिकवृत्तयः ॥ १११ ॥ तीर्थव्रतानि सेवन्ते प्रत्ययो नैव जायते ॥ मोहितं तु जगत्पूर्वं मिथ्याज्ञानेन शंकर ॥ ११२ ॥ किं ते फलं सुरश्रेष्ठ जगद्व्यामोहने कृते ॥ ११३ ॥ सारात्सारतरं नाथ तव प्राणप्रियं हि यत् ॥ तन्मे कथय देवेश प्रियाहं यदि ते प्रभो ॥ ११४ ॥ इत्युक्तः स तया देव्या श्रीकंठः सुरनायकः ॥ प्रहस्योवाच भगवान्गंभीरार्थमिदं वचः ॥ ११५ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणुष्वावहिता भूत्वा पृष्टोऽहं यस्त्वयाऽधुना ॥ निष्फलं तत्प्रवक्ष्यामि वस्तुतत्त्वं यथास्थितम् ॥ ११६ ॥ पूर्वमुक्तानि तीर्थानि यानि ते सुरसुंदरि ॥ तिस्रः कोट्योऽर्द्धकोटी च ब्रह्मांडे सचराचरे ॥११७॥ तेषां च गोपितं तीर्थं[3] प्रभासं चैव सुव्रते ॥११८॥ एवमुक्तं महादेवि प्रभासं क्षेत्रमुत्तमम् ॥ दृष्ट्वा संस्काररहिताः कलौ पापेन मोहिताः ॥ ११९ ॥ उद्वेगं च परं यांति प्रतप्यंति यतस्ततः ॥ आत्मसंभाविता राजसास्तामसाश्चैव पापोपहतचेतसः ॥ परदारपरद्रव्यपरहिंसारता नराः ॥ १२० ॥ तीर्थे मृता न सिध्यंति मूढा मिथ्याज्ञानेन मोहिताः ॥ वर्णाश्रमविरुद्धं तु तीर्थे कुर्वन्ति येऽधमाः ॥ १२१ ॥ तीर्थयात्रां प्रकुर्वंति दंभेन कपटेन च ॥

१ महापापहराणि च--इ० पा० । २ सिध्यंति इ०पा० । ३ तीर्थे प्रभावश्चैव सुव्रत--इ०पा० ।



CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वै त्वं तु सृष्टिर्वरानने ॥ अहं शुक्रास्थिरोमाणि त्वं मज्जा बलमेव च ॥ ७४ ॥ पर्जन्योऽहं महाभागे त्वं वृष्टिः परमेश्वरि ॥ अहं संवत्सरो देवि त्वमृतुः परिकीर्त्तिता ॥ ७५ ॥ अहं कृतयुगो देवि त्वं तु त्रेता निगद्यसे ॥ युगोऽहं द्वापरः श्रीमांस्त्वं कलिः परमेश्वरि ॥ ७६ ॥ आकाशश्चाप्यहं भद्रे पृथिवी त्वमिहोच्यसे ॥ अहमदृश्यमूर्तिश्च दृश्यमूर्तिस्त्वमुच्यसे ॥ ७७ ॥ वरदोऽहं वरारोहे मंत्रस्त्वमिति चोच्यसे ॥ अहं द्रष्टा च श्रोता च त्वं दृश्या श्रुतिरेव च ॥७८॥ अहं वक्ता रमयिता त्वं वाच्या परमेश्वरि ॥ अहं श्रोता च गाता च त्वं गीतिर्गेयमेव च ॥७९॥ अहं घ्राता च गन्धश्च त्वं तु निघ्राणमेव च ॥ अहं स्पर्शयिता कर्ता स्पर्श्यस्त्वं सृष्टमेव च ॥ ८० ॥ अहं सर्वमिदं भूतं त्वं तु देवि न संशयः ॥ स्रष्टाऽहं तव देवेशि त्वं सृजस्यखिलं जगत् ॥ ८१ ॥ त्वया मया च देवेशि ओतप्रोतमिदं जगत् ॥ एकधा दशधा चैव तथा शतसहस्रधा ॥ ८२ ॥ ऐश्वर्येण तु संयुक्तौ सर्वप्राणिव्यवस्थितौ ॥ अहं त्वं च विशालाक्षि सततं संप्रतिष्ठितौ ॥ ८३ ॥ क्रीडामि क्रीडया देवि त्वया सार्द्धं वरानने ॥ त्वं धृतिर्धारिणी लक्ष्मीः कांता मत्प्रकृतिर्ध्रुवम् ॥ ८४ ॥ रतिः स्मृतिः कामचारी मम चांगनिवासिनी ॥ देवि किं बहुनोक्तेन प्राणेभ्योऽपि गरीयसी ॥ ८५ ॥ वरं वरय देवेशि यत्किंचिन्मनसि स्थितम् ॥ तत्ते ददामि तुष्टोऽहं यद्यपि स्यात्सुदुर्लभम् ॥ ८६ ॥ ॥ देव्युवाच ॥ ॥ धन्याहं कृतपुण्याहं तपः सुचरितं मया ॥ यत्त्वयाऽहं जगन्नाथ हर्षदृष्ट्याऽवलोकिता ॥ ८७ ॥ यदि तुष्टोऽसि मे देव वरं दातुं ममेच्छसि ॥ तन्मे कथय देवेश सांप्रतं तीर्थविस्तरम् ॥ ॥ ८८ ॥ पृथिव्यां यानि तीर्थानि पापघ्नानि शिवानि च ॥ तानि देवेश कार्त्स्न्येन यथावद्वक्तुमर्हसि ॥ ८९ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि तीर्थमाहात्म्यमुत्तमम् ॥ सर्वपापहरं नृणां पुण्यं देवर्षिसत्कृतम् ॥ ९० ॥ तीर्थानां दर्शनं श्रेष्ठं स्नानं चैव सुरेश्वरि ॥ श्रवणं च प्रशंसंति सदैव ऋषिसत्तमाः ॥ ९१ ॥ पृथिव्यां नैमिषं[1] तीर्थमंतरिक्षे च पुष्करम्[2] ॥ केदारं[3] च प्रयागं[4] च विपाशां[5] चोर्मिलां[6]तथा ॥ ९२ ॥ कर्णवेणां[7] महादेवीं[8] चंद्रभागां[9] सरस्वती[10] ॥ गंगासागरसंभेदस्[11]तथा वाराणसी[12] शुभा ॥ ९३ ॥ अर्घतीर्थं[13] समाख्यातं गंगाद्वारं[14]तथैव च ॥ हिमस्थानं[15] महातीर्थं तथा मायापुरी[16] शुभा ॥ ९४ ॥ शतभद्रा[17] महाभागा सिन्धुश्चैव[18] महानदी ॥ ऐरावती[19] च कपिला[20] शोणश्चैव[21] महानदः ॥ ९५ ॥ पयोधिः[22] कौशिकी[23] तद्वत्तथा गोदावरी[24] शुभा ॥ देवखातं[25] गया[26] चैव तथा द्वारावती[27] शुभा ॥ ९६ ॥ प्रभासं[28] च महातीर्थं सर्वपातकनाशनम् ॥ ९७ ॥ एवमादीनि तीर्थानि यानि संति महीतले ॥

१ वरदोऽहमहं भद्रे–इ०पा० । २ बहुधा–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तानि दृष्ट्वा तु देवेशि पुनर्जन्म न विन्दते ॥९८॥ तिस्रः कोट्योऽर्धकोटी च तीर्थानामिह भूतले ॥ संजातानि पवित्राणि सर्वपा¹पहराणि च ॥९९॥ गंतव्यानि महादेवि स्वधर्मस्य विवृद्धये ॥ अशक्यानि शिवान्येवं गंतुं चैव सुरेश्वरि ॥ मनसा तानि सर्वाणि गंतव्यानि समाहितैः ॥ १०० ॥ ॥ ॥ देव्युवाच ॥ ॥ भगवन्प्राणिनः सर्वे सर्वोपद्रवसंकुलाः ॥ अल्पायुषः सदा बद्धा व्यामोहैर्मदिरोद्भवैः ॥ १०१ ॥ त्रेतायां द्वापरे चैव किंतु वै दारुणे कलौ ॥ तस्मात्तेषां हितार्थाय तत्तीर्थं त्वं प्रकीर्तय ॥ येन दृष्टेन सर्वेषां तीर्थानां लभ्यते फलम् ॥१०२॥ एवमुक्तस्तु पार्वत्या प्रहस्य परमेश्वरः ॥ उवाच परया प्रीत्या वाचा मधुरया प्रभुः ॥१०३॥ ॥ ईश्वर उवाच ॥ ॥ त्वमेव हि चराः प्राणाः सर्वस्य जगतोरणिः ॥ त्वया विरहितो देवि मुहूर्तमपि नोत्सहे ॥१०४॥ शिवस्य च तथा शक्तेरंतरं नास्ति पार्वति ॥ न तदस्ति महादेवि यन्न जानासि शोभने ॥ १०५ ॥ त्वया विनाऽहं न क्वास्मि न त्वं देवि मया विना ॥ चंद्रचंद्रिकयोर्यद्वदग्नेरुष्णत्वमेव हि ॥ १०६ ॥ तव देवि ममापीह नास्ति चैवांतरं प्रिये ॥ सर्वं चैव सुरेशानि यथावत्कथयाम्यहम् ॥ १०७ ॥ रहस्यानां रहस्यं तु गोपनीयं प्रयत्नतः ॥ नास्तिकाय न दातव्यं न च पापरताय च ॥ १०८ ॥ दातव्यं भक्तियुक्ताय स्वशिष्याय सुताय वा ॥ पूर्वमेव मयाख्यातं सारात्साररतरं प्रिये ॥१०९॥ तीर्थोपनिषदः ख्याता लिंगोपनिषदस्तथा ॥ योगोपनिषदो देवि पूर्वं वै कथितास्तव ॥ ११० ॥ ॥ पार्वत्युवाच ॥ ॥ क्लेशेनापि न सिद्ध्यंति कांक्षमाणाः परं पदम् ॥ योनीर्भ्रमंतो दृश्यंते नरा नास्तिकवृत्तयः॥ ॥ १११ ॥ तीर्थव्रतानि सेवंन्ते प्रत्ययो नैव जायते ॥ मोहितं तु जगत्पूर्वं मिथ्याज्ञानेन शंकर ॥ ११२ ॥ किं ते फलं सुरश्रेष्ठ जगद्व्यामोहने कृते ॥ ११३ ॥ सारात्सारतरं नाथ तव प्राणप्रियं हि यत् ॥ तन्मे कथय देवेश प्रियाहं यदि ते प्रभो ॥ ११४ ॥ इत्युक्तः स तया देव्या श्रीकंठः सुरनायकः ॥ प्रहस्योवाच भगवान्गंभीरार्थमिदं वचः ॥ ११५ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणुष्वावहिता भूत्वा पृष्टोऽहं यस्त्वयाऽधुना ॥ निष्फलं तत्प्रवक्ष्यामि वस्तुतत्त्वं यथास्थितम् ॥ ११६ ॥ पूर्वमुक्तानि तीर्थानि यानि ते सुरसुंदरि ॥ तिस्रः कोट्योऽर्द्धकोटी च ब्रह्मांडे सचराचरे ॥११७॥ तेषां च गोपितं तीर्थं³ प्रभासं चैव सुव्रते ॥११८॥ एवमुक्तं महादेवि प्रभासं क्षेत्रमुत्तमम् ॥ दृष्ट्वा संस्काररहिताः कलौ पापेन मोहिताः ॥ ११९ ॥ राजसास्तामसाश्चैव पापोपहतचेतसः ॥ परदारपरद्रव्यपरहिंसारता नराः ॥ १२० ॥ उद्वेगं च परं यांति प्रतप्यंति यतस्ततः ॥ आत्मसंभाविता मूढा मिथ्याज्ञानेन मोहिताः ॥ वर्णाश्रमविरुद्धं तु तीर्थे कुर्वन्ति येऽधमाः ॥ १२१ ॥ तीर्थयात्रां प्रकुर्वंति दंभेन कपटेन च ॥ तीर्थे मृता न सिध्यंति

१ महापापहराणि च—इ० पा० । २ सिध्यंति इ०पा० । ३ वापि प्रभावश्चैव सुव्रत--इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ते नरा वरवर्णिनि ॥ १२२ ॥ एतदर्थं मया देवि तीर्थानि विविधानि च ॥ लिंगानि चैव सुश्रोणि गोपितानि प्रयत्नतः ॥ न सिद्धिदानि देवे
शि कलौ कल्मषकारिणाम् ॥ १२३ ॥ ये नरास्तु जितक्रोधा जितलोभा जितेंद्रियाः ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चादम्भमत्सराः ॥ १२४ ॥
मद्भावभाविता देवि तीर्थं सेवंति सुव्रताः ॥ तेषां चैव हितार्थाय कथयामि यशस्विनि ॥ १२५ ॥ प्रभासमिति विख्यातं क्षेत्रं त्रैलोक्यवंदितम् ॥
तत्क्षेत्रं नैव जानंति मम मायाविमोहिताः ॥ १२६ ॥ परोहं त्वेकचित्तैश्च बहुजन्मभिरर्चितः ॥ ते विदंति परं क्षेत्रं प्रभासं पापनाशनम् ॥ १२७ ॥
मद्भावभाविता देवि मम व्रतनिषेविणः ॥ तेषां प्राभासिकं क्षेत्रं विदितं नात्र संशयः ॥ १२८ ॥ यमैश्च नियमैर्युक्ता अहंकारविवर्ज्जिताः ॥ तेषामर्थे
वदिष्यामि तव प्रश्नं सुदुर्लभम् ॥ ब्रह्मविष्ण्विन्द्रदेवानां पुराणं कथितं मया ॥ १२९ ॥ सोऽहं देवि वदिष्यामि कर्णं देहि वरानने ॥ पृथिव्यामपि
सर्वेषां तीर्थानां सुरसुंदरि ॥ १३० ॥ एकं मे वल्लभं तत्र प्रभासं क्षेत्रमुत्तमम् ॥ तस्मिंश्चैव महाक्षेत्रे तीर्थैः सोमेन पूजितः ॥ वरांस्तस्मै प्रदायाथ
सदैकांते स्थितो ह्यहम् ॥१३१॥ तेन गुह्यं कृतं स्थानं तत्र देवि प्रकाशितम् ॥ तत्र मे योगयुक्तस्य दिव्यं लिंगं बभूव ह ॥ १३२ ॥ दिव्यतेजस्समा
युक्तं वह्निमेखलमंडितम् ॥ लक्षमात्रस्थितं शांतं दुर्निरीक्ष्यं तु मानवैः ॥ १३३ ॥ इच्छाज्ञानक्रियाख्याश्च तिस्रो वै शक्तयश्च याः ॥ तस्माल्लिंगा
त्समुत्पन्ना जगत्कर्तृत्वहेतवे ॥ १३४ ॥ तस्मिँल्लिंगे लयं याति जगदेतच्चराचरम् ॥ पुनस्तेनैव संभूतं दृश्यते सचराचरम् ॥ १३५ ॥ गुह्यं चैव
तु संभूतं न कश्चिद्वेद तत्परम् ॥ जन्माभ्यासेन तल्लिंगं ज्ञायते भुवि मानवैः ॥ १३६ ॥ क्षेत्रं प्राभासिकं प्रोक्तं क्षेत्रज्ञोऽहं न संशयः ॥
तत्र सोमेशनामाहमस्मिन्क्षेत्रे वरानने ॥ १३७ ॥ ममांशसंभवा ये च अस्मिन्क्षेत्रे समुद्भवाः ॥ तेषां तु विदितं लिंगं पूर्वकल्पे तु
भैरवम् ॥ १३८ ॥ अन्यैरपि युगैर्देवि इदं लिंगं सुदुर्लभम् ॥ घोरे कलियुगे पापे विशेषेण च दुर्लभम् ॥ १३९ ॥ अन्यन्निदर्शनं
तत्र तत्प्रवक्ष्यामि पार्वति ॥ १४० ॥ कलौ युगे महाघोरे हेतुवादरता नराः ॥ वदिष्यंति महापापाः सर्वे पाखण्डसंस्थिताः ॥ १४१ ॥
मिथ्या चैतत्कृतं सर्वं मूर्खैश्चापि प्रकीर्तितम् ॥ क्व क्षेत्रं क्व प्रभावश्च कुत्र वै सन्ति देवताः ॥ १४२ ॥ सर्वं चापि तथालीकं मूढैश्चापि प्रकी
र्तितम् ॥ १४३ ॥ एवं मूर्खा वदिष्यंति प्रहसिष्यन्ति चापरे ॥ नारका नास्तिका लोकाः पापोपहतचेतसः ॥ सिद्धिं नैव प्रयास्यंति संप्राप्ते तु
कलौ युगे ॥ १४४ ॥ तीर्थे चैव मृता ये तु शिवनिन्दापरायणाः ॥ तिर्यग्योनिप्रसूताश्च दृश्यन्ते सर्वयोनिषु ॥ १४५ ॥ एतस्मात्कारणाद्देवि

१ तीर्थम्--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीर्थे चैव सुदुःखिताः ॥ दृश्यन्ते युगमाहात्म्यात्सत्यशौचविवर्जिताः ॥ १४६ ॥ इदं हि कारणं प्रोक्तं क्षेत्राणां चैव गोपने ॥ एतत्ते कथितं सर्वं सिद्धिर्येन सुदुर्लभा ॥ १४७ ॥ युगेयुगे तु तीर्थानि कीर्तितानि सुरेश्वरि ॥ तेषां मे वल्लभं देवि प्रभासं क्षेत्रमेव च ॥ १४८ ॥ इत्येतत्कथितं देवि रहस्यं पापनाशनम् ॥ क्षेत्रबीजं महादेवि किमन्यत्परिपृच्छसि ॥ १४९ ॥ इदं महापातकनाशनं ये श्रोष्यंति वै क्षेत्रमहाप्रभावम् ॥ ते चापि यास्यन्ति मम प्रभावात्त्रिविष्टपं पुण्यजनाधिवासम् ॥ १५० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रभासक्षेत्रमाहात्म्ये देवीप्रश्नवर्णनं नाम तृतीयोऽध्यायः ॥ ३ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एवं मुनीन्द्राः कथिते प्रभावे शंकरेण तु ॥ पुनः पप्रच्छ सा देवी कृतांजलिपुटा सती ॥ १ ॥ ॥ देव्युवाच ॥ ॥ देवदेव जगन्नाथ क्षेत्रतीर्थमय[1] प्रभो ॥ प्रभासक्षेत्रमाहात्म्यं विस्तरात्कथयस्व मे ॥ २ ॥ कथं तुष्यसि मर्त्यानां क्षेत्रे तत्र विचेतसाम् ॥ जप्तं दत्तं हुतं यष्टं तपस्ततं कृतं च यत् ॥ प्रभासे तु महाक्षेत्रे कस्मात्तत्राक्षयं भवेत् ॥ ३ ॥ जात्यंतरसहस्रेषु यत्पापं पूर्वसंचितम् ॥ तत्कथं क्षयमाप्नोति तन्ममाचक्ष्व शंकर ॥ ४ ॥ यदि प्रभासं सर्वेषां तीर्थानां प्रवरं मतम्[2] ॥ किमन्यैर्बहुभिस्तत्र कर्त्तव्यं तीर्थविस्तरैः ॥ ५ ॥ एकं यदि भवेत्तीर्थं मनो निःसंशयं भवेत् ॥ बहुत्वे सति तीर्थानां मनो विचलते नृणाम् ॥ ६ ॥ तस्मात्सर्वं परित्यज्य तीर्थजालं सविस्तरम् ॥ प्रभासस्यैव माहात्म्यं कथयस्व सुरेश्वर ॥ ७ ॥ क्षेत्रप्रमाणं सीमां च क्षेत्रसारं हि यत्प्रभो ॥ वक्तुमर्हसि तत्सर्वं परं कौतूहलं हि मे ॥ ८ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि क्षेत्राणां क्षेत्रमुत्तमम् ॥ सर्वक्षेत्रेषु यत्क्षेत्रं प्रभासं तु प्रियं मम ॥ ९ ॥ प्रभासे तु परा सिद्धिः प्रभासे तु परा गतिः ॥ यत्र संनिहितो नित्यमहं भद्रे निरन्तरम् ॥ १० ॥ तस्य प्रमाणं वक्ष्यामि सर्वसीमासमन्वितम् ॥ क्षेत्रं तु त्रिविधं प्रोक्तं तत्ते वक्ष्याम्यनुक्रमात् ॥ ११ ॥ क्षेत्रं पीठं गर्भगृहं प्रभासस्य प्रकीर्त्यते ॥ यथाक्रमं फलं तस्य कोटिकोटिगुणं स्मृतम् ॥ १२ ॥ क्षेत्रं तु प्रथमं प्रोक्तं तच्च द्वादशयोजनम् ॥ पञ्चयोजनमानेन क्षेत्रपीठं प्रकीर्तितम् ॥ १३ ॥ गर्भगृहं च गव्यूतिः कर्णिका सा मम प्रिया ॥ क्षेत्रसीमां प्रवक्ष्यामि शृणु देवि यथाक्रमम् ॥ १४ ॥ आयामव्यासतश्चैव आदिमध्यान्तसंस्थितम् ॥ पूर्वे तप्तोदकस्वामी पश्चिमे माधवः स्मृतः ॥ १५ ॥ दक्षिणे सागरस्तद्वद्भद्रा नद्युत्तरे मता ॥ एवं सीमासमायुक्तं क्षेत्रं द्वादशयोजनम् ॥ १६ ॥ एतत्प्राभासिकं क्षेत्रं सर्वपातकनाशनम् ॥ तन्मध्ये पीठिका प्रोक्ता पञ्चयोजनविस्तृता ॥ १७ ॥ न्यंकुमन्यपरेणैव वज्रिण्याः पूर्वतस्तथा ॥ माहेश्वर्या दक्षिणतः

१ सर्वतीर्थमय—इ० पा० । २ स्मृतम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



समुद्रोत्तरतस्तथा ॥ १८ ॥ आयामव्यासतश्चैव पञ्चयोजनविस्तरम् ॥ पीठमेतत्समाख्यातमथो गर्भगृहं शृणु ॥ १९ ॥ दक्षिणोत्तरतो यावत्समुद्रा
त्कौरवेश्वरी ॥ पूर्वपश्चिमतो यावद्गोमुखाच्चाश्वमेधिकम् ॥ एतद्गर्भगृहं प्रोक्तं कैलासान्मम वल्लभम् ॥ २० ॥ अत्रान्तरे तु देवेशि यानि तीर्थानि
भूतले ॥ वापीकूपतडागानि देवतायतनानि च ॥२१॥ सरांसि सरितश्चैव पल्वलानि ह्रदास्तथा ॥ तानि मेध्यानि सर्वाणि सर्वपापहराणि च॥२२॥
यत्र तत्र नरः स्नात्वा स्वर्गलोके[1] महीयते ॥ क्षेत्रस्य प्रथमो भागो मेध्यो माहेश्वरः स्मृतः ॥ २३ ॥ द्वितीयो वैष्णवो भागो ब्रह्मभागस्तृतीयकः ॥
तीर्थानां कोटिरेका तु ब्राह्मे भागे व्यवस्थिता ॥ २४ ॥ वैष्णवे कोटिरेका तु तीर्थानां वरवर्णिनि ॥ सार्द्धकोटिस्तु संप्रोक्ता रुद्रभागे च मध्यतः ॥
॥२५॥ एवं देवि समाख्यातं तत्क्षेत्रं हि त्रिदैवतम् ॥ गुह्याद्गुह्यतरं क्षेत्रं मम प्रियतरं शुभे ॥२६॥ तिस्रः कोट्योऽर्द्धकोटिश्च क्षेत्रे प्रोक्ता विभागतः ॥
यात्रा तु त्रिविधा[2] ज्ञेया तां शृणुष्व वरानने ॥ २७ ॥ रौद्री तु प्रथमा यात्रा वैष्णवी च द्वितीयिका ॥ ब्राह्मी तृतीया संख्याता सर्वपातकनाशिनी ॥
॥ २८ ॥ ब्राह्मे विभागे संप्रोक्ता इच्छाशक्तिर्वरानने ॥ क्रिया च वैष्णवे भागे द्वितीये तु प्रकीर्तिता ॥२९॥ रौद्रे भागे तृतीये तु ज्ञानशक्तिर्वरानने ॥
यदि पापो यदि शठो यदि नैष्कृतिको नरः ॥ ३० ॥ निर्मुक्तः सर्वपापेभ्यो मध्यभागे वसेत्तु यः ॥ हिमवंतं परित्यज्य पर्वतं गंधमादनम् ॥ ३१ ॥
कैलासं निषधं चैव मेरुपृष्ठं महाद्युतिम् ॥ रम्यं त्रिशिखरं चैव मानसं[3] च महागिरिम् ॥३२॥ देवोद्यानानि रम्याणि नंदनं वनमेव च ॥ स्वर्गस्थाना
नि रम्याणि तीर्थान्यायतनानि च ॥ तानि सर्वाणि संत्यज्य प्रभासे तु रतिर्मम ॥ ३३ ॥ यस्तत्र वसते देवि संयतात्मा समाहितः ॥ त्रिकाल मपि
भुंजानो वायुभक्षसमो भवेत् ॥ ३४ ॥ विघ्नैरालोड्यमानोऽपि यः प्रभासं न मुंचति ॥ स मुंचति जरां मृत्युं जन्मचक्रमशाश्वतम् ॥ ३५ ॥ जन्मां
तरशतैर्देवि योगो वा यदि लभ्यते ॥ मोक्षस्य च सहस्रेण जन्मनां लभ्यते न च ॥ ३६ ॥ प्रभासे तु महादेवि ये स्थिता कृतनिश्चयाः ॥ एकेन
जन्मना तेषां मोक्षो नैवात्र संशयः ॥ ३७ ॥ प्रभासे तु स्थिता ये वै ब्राह्मणाः संशितव्रताः ॥ मृत्युंजयेन संयुक्तं जपंति शतरुद्रियम् ॥ ३८ ॥
कालाग्निरुद्रसांनिध्ये दक्षिणां दिशमाश्रिताः ॥ ज्ञानं चोत्पद्यते तत्र षण्मासाभ्यंतरेण तु ॥ ३९ ॥ शिवस्तु प्रोच्यते वेदो नामपर्यायवाचकैः ॥
तस्य चात्मस्वरूपं तु शतरुद्रं प्रकीर्तितम् ॥ ४० ॥ कल्पेषु वेदाश्च पुनःपुनरावर्तकाः स्मृताः ॥ मंत्राश्चैव तथा देवि मुक्त्वा तु शतरुद्रियम् ॥ ४१ ॥
ईडयं चैव तु मंत्रेण मामेव हि यजंति ये ॥ प्रभासक्षेत्रमासाद्य ते मुक्ता नात्र संशयः ॥ ४२ ॥ समंत्रोऽमंत्रको वापि यस्तत्र वसते नरः ॥ सोऽपि

१ सर्वलोके–इ० पा० । २ विविधा-इ० पा० । ३ मातलं च इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यां गतिमाप्नोति यज्ञैर्दानैर्न साध्यते ॥ ४३ ॥ अस्मिन्क्षेत्रे स्वयंभूश्च स्थितः साक्षान्महेश्वरः ॥ रुद्राणां कोटयश्चैव प्रभासे संव्यवस्थिताः ॥ ४४ ॥
ध्यायमानास्तथोंकारं स्थिताः सोमेशदक्षिणे ॥४५ ॥ ब्रह्मांडोदरमध्ये तु यानि तीर्थानि सुव्रते ॥ सोमेश्वरं गमिष्यंति वैशाखस्य चतुर्दशी ॥४६॥
मनोबुद्धिरहंकारः कामक्रोधौ तथाऽपरे ॥ एते रक्षंति सततं सोमेशं पापनाशनम् ॥ ४७ ॥ न सा गतिः कुरुक्षेत्रे गंगाद्वारे त्रिपुष्करे ॥ या गतिर्वि
हिता पुंसां प्रभासक्षेत्रवासिनाम् ॥ ४८ ॥ तिर्यग्योनिगताः सत्त्वा ये प्रभासे कृतालयाः ॥ कालेन निधनं प्राप्तास्तेपि यांति परां गतिम् ॥ ४९ ॥
तद्गुह्यं देवदेवस्य तत्तीर्थं तत्तपोवनम्[1] ॥ तत्र ब्रह्मादयो देवा नारायणपुरोगमाः ॥ ५० ॥ योगिनश्च तथा सांख्या भगवंतं सनातनम् ॥ उपासते
प्रभासे तु मद्भक्ता मत्परायणाः ॥ ५१ ॥ अष्टौ मासान्विहारः स्याद्यतीनां संयतात्मनाम् ॥ एके च चतुरो मासानष्टौ वा नियतं वसेत् ॥ ५२ ॥
प्रभासे तु प्रविष्टानां विहारस्तु न विद्यते ॥ अत्र योगश्च मोक्षश्च प्राप्यते दुर्लभो नरैः ॥ ५३ ॥ तस्मात्प्रभासं संत्यज्य नान्यद्गच्छेत्तपोवनम् ॥
प्रभासं ये न सेवंते मूढास्ते तमसा वृताः ॥ ५४ ॥ विण्मूत्ररेतसां मध्ये संभवंति पुनःपुनः ॥ कामः क्रोधस्तथा लोभो दंभः स्तंभोऽथ मत्सरः ॥
॥ ५५ ॥ निद्रा तंद्रा तथाऽऽलस्यं पैशुन्यमिति ते दश ॥ एते रक्षंति सततं सोमेशं तीर्थनायकम् ॥ ५६ ॥ न प्रभासे मृतः कश्चिन्नरकं याति
किल्बिषी ॥ यावज्जीवं नरो यस्तु वसते कृतनिश्चयः ॥५७॥ अग्निहोत्रैश्च संन्यासैराश्रमैश्च सुपालितैः ॥ त्रिदंडैरेकदंडैश्च शैवैः पाशुपतैरपि ॥५८॥
एतैरन्यैश्च यतिभिः प्राप्यते यत्फलं शुभम् ॥ तत्सर्वं लभ्यते देवि श्रीसोमेश्वरयात्रया ॥ ५९ ॥ एको ह्यर्चयते लिंगं तपस्यति तथापरः ॥ तयोर्म
ध्ये तु श्रेष्ठो यः सोमेशं च प्रपूजयेत् ॥६०॥ यत्तद्योगे च सांख्ये च सिद्धांते पंचरात्रिके ॥ अन्यैश्च शास्त्रैर्विज्ञेयं प्रभासे संव्यवस्थितम् ॥६१॥ लिंगे
चैवं स्थितं सर्वं जगदेतच्चराचरम् ॥ तस्माल्लिंगे सदा देवः पूजनीयः प्रयत्नतः ॥ ६२ ॥ ममैव सा परा मूर्तिः श्रीसोमेशाख्यया स्थिता ॥ तेन चैवा
त्मनात्मानमाराधनपरो ह्यहम् ॥ ६३ ॥ अनेकजन्मसाहस्रैर्भ्रममाणस्तु जन्मभिः ॥ कस्तां प्राप्नोति वै मुक्तिं विना सोमेशपूजनात् ॥६४॥ यत्कि
ञ्चिदशुभं कर्म कृतं मानुषबुद्धिना ॥ तत्सर्वं विलयं याति श्रीसोमेश्वरपूजनात् ॥६५॥ अनेकजन्मकोटीभिर्जंतुभिर्यत्कृतं ह्यघम् ॥ तत्सर्वं नाशमाया
ति श्रीसोमेश्वरपूजनात् ॥ ६६ ॥ तीर्थानि यानि लोकेऽस्मिन्सेव्यंते पापमोक्षिभिः ॥ तानि सर्वाणि शुद्ध्यर्थं प्रभासे संविशंति हि ॥६७॥ योऽसौ
कालाग्निरुद्रस्तु प्रोच्यते वेदवादिभिः ॥ सोऽयं भैरवनाम्ना तु प्रभासे संव्यवस्थितः ॥ ६८ ॥ जनानां दुष्कृतं सर्वं क्षेत्रमध्ये व्यवस्थितः ॥ भैरवं

१ तपोवनम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





रूपमास्थाय नाशयामि सुरेश्वरि ॥ ६९ ॥ जगत्सर्वं चरित्वा तु स्थितोऽहं सचराचरम् ॥ तेन भैरवनामाहं प्रभासे संव्यवस्थितः ॥ ७० ॥ अग्नि
ना यत्र ततं तु दिव्याब्दानां चतुर्युगम् ॥ मेघवाहनकल्पे तु तत्र लिंगं बभूव ह ॥७१॥ अग्निमीडेति वेदोक्तप्रभावः सुरसुंदरि ॥ कालाग्निरुद्रनामा च
देवैः सर्वैरुदाहृतम् ॥ ७२ ॥ अग्नीशानेति देवेशि नामत्रितयमुच्यते ॥ कल्पेकल्पे तु नामानि कथितुं नैव शक्यते ॥ असंख्यत्वाच्च कल्पानां
ब्रह्मणां च वरानने ॥ ७३ ॥ एवं चैव रहस्यं च महागोप्यं वरानने ॥ स्नेहान्महत्या भक्त्या च मया ते परिकीर्तितम् ॥७४॥ एकतस्तु जगत्सर्वं कर्म
कांडे प्रतिष्ठितम् ॥ यज्ञदानतपोहोमैः स्वाध्यायैः पितृतर्पणैः ॥७५॥ उपवासैर्व्रतैः कृत्स्नैश्चांद्रायणशतैस्तथा ॥ षड्रात्रैश्च त्रिरात्रैश्च तीर्थादिगमनैः
परैः ॥७६॥ आश्रमैर्विविधाकारैर्यतिभिर्ब्रह्मचारिभिः ॥ वानप्रस्थैर्गृहस्थैश्च वेदकर्मपरायणैः ॥७७॥ अन्यैश्च विविधाकारैर्लोकमार्गस्थितैः शुभैः ॥
न तत्पदं परं देवि शक्यं वीक्षयितुं क्वचित् ॥ ७८ ॥ यावन्न चार्चयेद्देवि सोमेशं लिंगनायकम् ॥ लीलया वापि तैर्द्रष्टुं तत्पदं दुर्लभं परम् ॥ ७९ ॥
पूजितो यैर्जगन्नाथः सोमेशः किल भैरवः ॥ तिर्यग्योनिगता ये तु पशुपक्षिपिपीलिकाः ॥ ८० ॥ अन्तर्ज्जलगता ये तु कृमिकीटपतंगकाः ॥
स्थावरा जंगमाश्चान्ये मनुष्याः पशवः स्त्रियः ॥ ८१ ॥ बाला वृद्धास्तथा षण्ढाः श्वानगर्दभवायसाः ॥ चंडालाः पुष्कसाः शूद्रा म्लेच्छा येऽन्ये
वियोनिजाः ॥ ८२ ॥ मूर्खास्तु पण्डिताश्चापि ये चान्ये कुत्सिता भुवि ॥ ते सर्वे मुक्तिमायांति प्रभासे ये मृताः शुभे ॥ ८३ ॥ कालानलस्य
रुद्रस्य कालराजेन[1] चाग्निना ॥ दग्धास्ते जन्तवः सर्वे प्रभासे ये मृताः शुभे ॥ ८४ ॥ दुर्ल्लभं तु मम क्षेत्रं प्रभासं देवि पापिनाम् ॥ न तत्र लभते
मृत्युं पापात्मा लोकवंदिते ॥ ८५ ॥ मया दक्षिणभागे च विघ्नेशः संप्रतिष्ठितः ॥ उत्तरे दण्डपाणिस्तु क्षेत्रमेतच्च रक्षति ॥ ८६ ॥ तथान्ये गणपाः
सर्वे मदाज्ञावशवर्तिनः ॥ क्षेत्रं रक्षंति देवेशि तेषां नामानि मे शृणु ॥ ८७ ॥ महाबलस्तु चण्डीशो घंटाकर्णस्तु गोमुखः ॥ विनायको महानादः
काकवक्त्रः शुभेक्षणः ॥ एकाक्षो दुन्दुभिश्चंडस्तालजंघस्तथैव च ॥ ८८ ॥ भूमिदंडश्च चंडश्च शंकुकर्णश्च वैधृतिः[2] ॥ तालचण्डो महातेजा विक
टास्यो हयाननः ॥ ८९ ॥ हस्तिवक्त्रः श्वानवक्त्रो बिडालवदनस्तथा ॥ सिंहव्याघ्रमुखाश्चान्ये वीरभद्रादयस्तथा ॥ ९० ॥ विनायकं पुरस्कृत्य देव
देवं कपर्द्दिनम् ॥ एकादश तथा कोट्यो नियुतानि त्रयोदश ॥ ९१ ॥ अर्बुदं च गणानां च प्रभासं क्षेत्रमाश्रिताः ॥ द्वारिद्वारि प्रचंडास्ते शूलमुद्ग
रपाणयः ॥ ९२ ॥ प्रभासक्षेत्रं रक्षंति देवदेवस्य वै गृहम् ॥ न कश्चिद्दुष्टबुद्ध्या तु प्रविशेदिति संस्थितिः ॥ ९३ ॥ शतकोटिगणैश्चापि पूर्वद्वारे तु

१ कालराजस्य वाऽग्निना--इ० पा० । २ वैश्रुतिः--इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संवृतः ॥ अट्टहासो गणो नाम प्रभासं तत्र रक्षति ॥ ९४ ॥ कालाक्षो भीषणश्चंडो वृतोऽष्टादशकोटिभिः ॥ घंटाकर्णगणो नाम दक्षिणं द्वारमाश्रितः ॥९५॥ पश्चिमद्वारमाश्रित्य स्थितवान्विष्टरो गणः ॥ दण्डपाणिः स्थितस्तत्र देवदेवस्य चोत्तरे ॥९६॥ योगक्षेमं वहन्नित्यं प्रभासे भावितात्मनाम् ॥ भीषणाक्षस्तथैशान्यामाग्नेय्यां छागवक्त्रकः ॥ ९७ ॥ नैर्ऋत्यां चंडनादस्तु वायव्यां भैरवाननः ॥ नन्दी चैव महाकालो दण्डपाणिर्विनायकः ॥ ॥ ९८ ॥ एतेङ्गरक्षका मध्ये शतकोटिगणैर्वृताः ॥ एवं रक्षंति बहवो ह्यसंख्येया गणेश्वराः ॥ ९९ ॥ कलिकल्मषसंभूत्या येषां चोपहता मतिः ॥ न तेषां तद्भवेद्रम्यं स्थानमर्धेन्दुमौलिनः ॥ १०० ॥ गंधर्वैः किन्नरैर्यक्षैरप्सरोभिस्तथोरगैः ॥ सिद्धैः संपूज्य देवेशं सोमेशं पापनाशनम् ॥ १०१ ॥ अन्तर्धानं गतैर्नित्यं प्रभासं तु निषेव्यते ॥ सप्तलोकेषु ये सन्ति सिद्धाः पातालवासिनः ॥ प्रदक्षिणं ते कुर्वंति सोमेशं कालभैरवम् ॥ १०२ ॥ पृथिव्यां यानि तीर्थानि पुण्यान्यायतनानि च ॥ लाकुलिं भारभूतिं च आषाढिं दण्डमेव च ॥ १०३ ॥ पुष्करं नैमिषं चैव अमरेशं तथापरम् ॥ भैरवं मध्यमं कालं केदारं कणवीरकम् ॥ १०४ ॥ हरिचंद्रस्तु शैलेशस्तथा वस्त्रांतिकेश्वरः ॥ अट्टहासं महेन्द्रं च श्रीशैलं च गया तथा ॥ १०५ ॥ एतानि सर्वतीर्थानि देवं सोमेश्वरं प्रभुम् ॥ प्रदक्षिणं प्रकुर्वंति तत्र लिंगं स्तुवंति च ॥ १०६ ॥ ब्रह्मा जनार्दनश्चान्ये ये देवा जगति स्थिताः ॥ अग्निलिंगसमीपस्थाः संध्याकाले स्तुवंति च ॥ १०७ ॥ षष्टिकोटिसहस्राणि षष्टिकोटिशतानि च ॥ सर्वे सोमेश्वरं यांति माघकृष्णचतुर्दशीम् ॥ ॥ १०८ ॥ तस्मिन्काले च यो दद्यात्सोमेशे घृतकम्बलम् ॥ १०९ ॥ घृतं रसं तिलान्दुग्धं जलं चंद्राधिवासितम्² ॥ एकत्र कृत्वा काश्मीरमित्ये तद्धृतकंबलम् ॥११०॥ शिवरात्र्यां तु कर्त्तव्यमेतद्गोप्यं मम प्रियम् ॥ एवं कृते च यत्पुण्यं गदितुं तन्न शक्यते ॥ १११ ॥ तत्र दक्षिणभागे तु स्वयं भूतविनायकम् ॥ प्रथमं पूजयेद्देवि यदीच्छेत्सिद्धिमात्मनः ॥११२॥ ऊषराणां च सर्वेषां प्रभासक्षेत्रमुत्तरम् ॥ पीठानां चैव पीठं च क्षेत्राणां क्षेत्रमुत्तमम् ॥ सन्देहानां च सर्वेषामयं संदेह उत्तमः ॥ ११३ ॥ ये केचिद्योगिनः संति शतकोटिप्रविस्तराः ॥ तेषां क्षेत्रे प्रभासे तु रतिर्नान्यत्र कुत्रचित् ॥ ॥ ११४ ॥ लिंगादीशानभागे तु संस्थिता सुरसुन्दरि ॥ ११५ ॥ मया या कथिता तुभ्यमुमा नाम कला शुभा ॥ सा सती प्रोच्यते देवि दक्षस्य दुहिता पुरा ॥ ११६ ॥ दक्षकोपाच्छरीरं तु संत्यज्य परमा कला ॥ हिमवंतगृहे जाता उमानाम्ना च विश्रुता ॥ ११७ ॥ तेन देवि त्वया³ सार्द्धं तत्रस्था वरदाः स्मृताः ॥ नवकोट्यस्तु चामुंडास्तस्मिन्क्षेत्रे स्थिताः स्वयम् ॥ ११८ ॥ चैत्रे मासि सिताष्टम्यां तत्र त्वां यदि पूजयेत् ॥ एक

१ चण्डनायस्तु–इ० पा० । २ चन्द्राधिवासितम्–कर्पूरसुवासितम्–इत्यर्थः । ३ मया–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



विंशतिजन्मानि दारिद्र्यं तस्य नो भवेत् ॥ ११९ ॥ अमा सोमेन संयुक्ता कदाचिद्यदि लभ्यते ॥ तस्यां सोमेश्वरं दृष्ट्वा कोटियज्ञफलं लभेत् ॥
॥ १२० ॥ एतत्क्षेत्रं महागुह्यं सर्वपातकनाशनम् ॥ रुद्राणां कोटयो यत्र एकादश समासते ॥१२१॥ द्वादशात्र दिनेशानां वसवोऽष्टौ समागताः ॥
गन्धर्वयक्षरक्षांसि असंख्याता गणेश्वराः ॥१२२॥ उमापि तत्र पार्श्वस्था सर्वदेवैस्तु संस्तुता ॥ नन्दी च गणनाथो यो देवदेवस्य शूलिनः॥१२३॥
महाकालस्य ये चान्ये गणपाः संति पार्श्वगाः ॥ गंगा च यमुना चैव तथा देवी सरस्वती ॥१२४॥ अन्याश्च सरितः पुण्या नदाश्चैव ह्रदास्तथा ॥
समुद्राः पर्वताः कूपा वनस्पतय एव च ॥ १२५ ॥ स्थावरं जंगमं चैव प्रभासे तु समागतम् ॥ अन्ये चैव गणास्तत्र प्रभासे संव्यवस्थिताः ॥
॥१२६॥ न मया कथिताः सर्वे उद्देशेन क्वचित्क्वचित् ॥ भक्त्यापि रमया युक्तो देवदेवि विनायकम् ॥ तृतीयं पूजयेत्तत्र वांछेत्क्षेत्रफलं यदि॥१२७॥
द्वादशैवं तथा चाष्टौ चत्वारिंशच्च कोटयः ॥ नदीनामग्नितीर्थस्य द्वारे तिष्ठंति भामिनि ॥ १२८ ॥ निर्माल्यलंघनं किंचिदज्ञाताद्यदि वै कृतम् ॥
तत्सर्वं विलयं याति अग्नितीर्थस्य दर्शनात् ॥१२९॥ देवि किं बहुनोक्तेन क्षेत्रमेतन्महाप्रभम् ॥ न ते वर्णयितुं शक्यं कल्पकोटिशतैरपि॥१३०॥
ये चांतरिक्षे भुवि ये च देवास्तीर्थानि वै यानि दिगंतरेषु ॥ क्षेत्रं प्रभासं प्रवरं हि तेषां सोमेश्वरं देवि तथा वरिष्ठम् ॥१३१॥ ये चांडजाश्चोद्भिजाश्चैव
जीवाः सस्वेदजाश्चैव जरायुजाश्च ॥ देवि प्रभासे तु गतासवोऽथ मुक्तिं परं यांति न संशयोऽत्र ॥ १३२ ॥ इति निगदितमेतद्देवदेवस्य चित्रं चरित
मिदमचिंत्यं देवि ते शंकरस्य ॥ कलिकलुषविदारं सर्वलोकोऽपि यायाद्यदि पठति शृणोति स्तौति नित्यं य इत्थम् ॥ १३३ ॥ इति
श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये क्षेत्रप्रमाणवर्णनं नाम चतुर्थोऽध्यायः ॥ ४ ॥ छ ॥
॥ ॥ सूत उवाच ॥ ॥ इत्येवमुक्ते विप्रेंद्रा शंकरेण महात्मना ॥ पुनः पप्रच्छ सा देवी हर्षसंपूर्णमानसा ॥ १ ॥ ॥ देव्युवाच ॥ ॥ देवदेव
जगन्नाथ सर्वप्राणहिताय वै ॥ प्रभासक्षेत्रमाहात्म्यं विस्तराद्वद मे प्रभो ॥ २ ॥ ॥ ईश्वर उवाच ॥ ॥ अन्यद्दृष्टांतरूपं ते कथयामि यश
स्विनि ॥ येन सृष्टं महादेवि क्षेत्रमेतन्मम प्रियम् ॥ ३ ॥ या गतिर्ध्यायतां नित्यं निःसंगानां च योगिनाम् ॥ सैवं संत्यजतां प्राणान्प्रभासे तु परा
गतिः ॥ ४ ॥ अनेककल्पस्थायी च मार्कंडेयो महातपाः ॥ सोऽपि देवं विरूपाक्षं प्रभासे तु सदाऽर्चति ॥५॥ अटित्वा सर्वतीर्थानि प्रभासं नैव
मुंचति ॥ दुर्वासाश्च महातेजा लिंगस्याराधनोद्यतः ॥ न मुंचति क्षणं देवि तत्क्षेत्रं शशिमौलिनः ॥ ६ ॥ भरद्वाजो मरीचिश्च मुनिश्चोद्दालक

१ संयुता–इ० पा०। २ प्रभासेऽत्र समागताः–इ० पा० । ३ देवि–इ० पा०।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्तथा ॥ क्रतुश्चैव व सिष्ठश्च कश्यपो भृगुरेव च ॥ ७ ॥ दक्षश्चैव तु सावर्णिर्यमश्चांगिरसस्तथा ॥ शुको विभांडकश्चैव ऋष्यशृंगोऽथ गोभिलः ॥८॥ गौतमश्च ऋचीकश्च[1] अगस्त्यः शौनको महान् ॥ नारदो जमदग्निश्च विश्वामित्रोऽथ लोमशः ॥ ९ ॥ अन्ये च ऋषयश्चैव दिव्या[2] देवर्षयस्तथा ॥ न मुंचंति महाक्षेत्रं लिंगस्याराधनोद्यताः ॥ १० ॥ अहं तत्रैव तिष्ठामि लिंगाराधनतत्परः ॥ न मुंचामि महाक्षेत्रं सत्यंसत्यं वरानने ॥ ११ ॥ सर्वतीर्थानि देवेशि मया दृष्टानि भूतले ॥ प्रभासेन समं क्षेत्रं नैव दृष्टं कदाचन ॥ १२ ॥ देवि षष्टिसहस्राणि याज्ञवल्क्यपुरस्कृताः ॥ जपं कुर्वंति रुद्राणां चन्द्रभागां व्यवस्थिताः ॥ १३ ॥ चत्वारिंशत्सहस्राणि ऋषीणामूर्द्ध्वरेतसाम् ॥ देविकांतटमाश्रित्य जपंति शतरुद्रियम् ॥ १४ ॥ कोट यश्चैव पंचाशन्मुनीनामूर्द्ध्वरेतसाम् ॥ उमापतिं समासाद्य लिंगं तत्रैव संस्थितम् ॥ १५ ॥ रुद्राणां कोटि जाप्यं तु कृतं तत्रैव तैः पुरा ॥ कोटि स्तत्रैव संसिद्धास्तस्मिल्लिंगे न संशयः ॥१६॥ शतं चैव सहस्राणां देवेशं शशिभूषणम् ॥ पूजयंति महासिद्धा मम क्षेत्रनिषेविणः ॥१७॥ वेदांतेषु च यत्प्रोक्तं फलं चैव महर्षिभिः ॥ तत्फलं सकलं तत्र चंद्रभूषणदर्शनात् ॥ १८ ॥ अग्नितीर्थे ऋषीणां तु कोटिः साग्रा स्थिता शुभे ॥ रुद्रेश्वरे स्मृतं लक्षं कपर्दीशे तथैव च ॥ १९ ॥ रत्नेश्वरे सहस्रं तु ऋषीणामूर्द्ध्वरेतसाम् ॥ अर्कस्थले महापुण्ये कोटिः साग्रा स्थिता शुभे ॥ २० ॥ षष्टिश्चैव सहस्राणि तत्र सिद्धेश्वरे स्थिताः ॥ सप्त चैव सहस्राणि मार्कंडे ये तु संस्थिताः ॥ २१ ॥ सरस्वत्यां ब्रह्मकुण्डेऽसंख्याता मुनयः स्मृताः ॥ दशार्बुदसहस्राणि कोटित्रितयमेव च ॥ २२ ॥ ऋषयस्तत्र तिष्ठंति यत्र प्राची सरस्वती ॥ ब्रह्महत्या गता यत्र शंकरस्य च तत्क्षणात् ॥ २३ ॥ कायः[3] सुवर्णतां प्राप कपालं पतितं करात् ॥ ज्ञात्वैवं शंकिना पूर्वं कृतं तत्र महातपः ॥ २४ ॥ तुष्टः श्रीशंकरो देवो लिंग वासवरेण तु ॥ कोटियज्ञफलं स्नाने[4] प्राच्यां लिंगस्य पूजने ॥ २५ ॥ पिंडे गयाशतगुणममासोमयुते दिने ॥ भूतायां पिंडदस्तत्र कुलकोटिं समुद्धरेत् ॥ २६ ॥ ये चात्र मलनाशाय निमङ्क्ष्यंति च मानवाः ॥ दशगोदानजं पुण्यं तेषामपि भविष्यति ॥२७॥ पादेन वा क्रीडमाना जलं लिप्संति ये नराः ॥ तेषामपि श्राद्धफलं विधिवत्संभविष्यति ॥ तत्र लिंगानि पूज्यानि शूलभेदादिकानि तु ॥ २८ ॥ एवं विकल्प्य लिंगानि अश्वमेधफलानि तु ॥ दर्शनेनापि सर्वेषां स्पर्शाद्धि द्विगुणं फलम् ॥२९॥ एवं तुष्टो जगन्नाथः स्थितः प्राचीवने ध्रुवम् ॥ मनोऽपि ये करिष्यंति स्नानदानेषु का कथा ॥३०॥ तेषां तुष्टो जगन्नाथः शंकरो नीललोहितः ॥ त्रिंशत्कोटिगणस्तत्र प्राचीं रक्षंति सर्वतः ॥३१॥ महापापसमाचारः पापिष्ठो वाऽति

१ देवरात ऋचीकश्च–इ०, देवसात ऋचीकश्च–इ० च पा०। २ देव्यः–इ० पा०। ३ कायः–शंकरस्य देहः–इत्यर्थः । एष सुवर्णतां प्राप–इ०पा०। ४ प्राप्तम्–इ०पा०।

CC-0. In Public Domain. Digitization by eGangotri



किल्विषी ॥ घुणाक्षरमिव प्राणान्प्राच्यां मुक्त्वा शिवं व्रजेत् ॥ ३२ ॥ दधिकंबलदानं तु तत्र देयं द्विजोत्तमे ॥ कथितं पापशमनं सारात्सारतरं ध्रुवम् ॥ ३३ ॥ अधुना संप्रवक्ष्यामि हिरण्यांश्च महोदयम् ॥ दुर्वाससा तपस्ततं तत्र सूर्यः प्रतिष्ठितः ॥ ३४ ॥ कोटिरेका तु तत्रैव ऋषीणामूर्द्ध्वरेतसाम् ॥ चतुर्विंशतितत्त्वानामधिको बलरूपधृक् ॥ ३५ ॥ यत्र तिष्ठति देवेशि भृगुकोटिसमन्वितः ॥ अन्यत्र ब्राह्मणानां तु कोट्या यच्च फलं लभेत् ॥ ३६ ॥ ब्रह्मस्थाने तथैकेन भोजितेन तु तत्फलम् ॥ एवं ज्ञात्वा महादेवि तत्र तिष्ठामि निर्वृतः ॥ ३७ ॥ कोटिभिर्देवऋषिभिर्देवैः सह समावृतः ॥ तीर्थानि तत्र तिष्ठंति अंतर्भूतानि वै कलौ ॥ ३८ ॥ तत्र क्षेत्रे महारम्ये यत्र सोमेश्वरः स्थितः ॥ मम देवि गणौ द्वौ तु विभ्रमः संभ्रमः परः ॥ ३९ ॥ तौ चात्र क्षेत्रसंस्थानां लोकानां भ्रमविभ्रमैः ॥ योजयंति सदा चित्तं विकल्पानैक्यसंकुलम् ॥ ४० ॥ विनायकोपसर्गाश्च दश दोषास्तथा परे ॥ एवं क्षेत्रं तु रक्षंति पापिनां दुष्टचेतसाम् ॥ ४१ ॥ दंडपाणिं तु ये भक्त्या पश्यंतीह नरोत्तमाः ॥ न तेषां जायते विघ्नं तत्र क्षेत्रनिवासिनाम् ॥ ४२ ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वै वर्णसंकराः ॥ अकामा वा सकामा वा प्रभासे ये मृताः शुभे ॥ ४३ ॥ चंद्रार्द्धमौलिनः सर्वे ललाटाक्षा वृषध्वजाः ॥ शिवे मम पुरे दिव्ये जायंते तत्र मानवाः ॥ ४४ ॥ यस्तत्र वसते विप्रः संयतात्मा समाहितः ॥ त्रिकालमपि भुंजानो वायुभक्षसमो भवेत् ॥ ४५ ॥ मेरोः शक्या गुणा वक्तुं द्वीपानां च गुणास्तथा ॥ समुद्राणां च सर्वेषां शक्या वक्तुं गुणाः प्रिये ॥ ४६ ॥ आदिदेवस्य देवेशि महेशस्य महाप्रभोः ॥ शक्या नैव गुणा वक्तुं वर्षाकोटिशतैरपि ॥ ४७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये क्षेत्रस्थर्षिदेवगणवर्णनं नाम पंचमोऽध्यायः ॥ ५ ॥ ॥ देव्युवाच ॥ ॥ अत्यद्भुतं महादेव माहात्म्यं कथितं मम ॥ अपूर्वं देवदेवेश कदाचिन्न श्रुतं मया ॥ १ ॥ ब्रह्मांडे यानि लिंगानि कीर्तितानि त्वया मम ॥ तेषां प्रभावेनाधिक्यं सोमेशे तत्कथं वद ॥ २ ॥ किं प्रभावो महादेव क्षेत्रस्य च सुरेश्वर ॥ तन्मे ब्रूहि सुरेशान याथातथ्यं ममाग्रतः ॥३॥ ॥ ईश्वर उवाच ॥ ॥ अतः परं प्रवक्ष्यामि रहस्यं परमं तव ॥ प्रभासक्षेत्रमाहात्म्यं सोमेशस्य वरानने ॥४॥ तीर्थानां परमं तीर्थं व्रतानां परमं व्रतम् ॥ जाप्यानां परमं जाप्यं ध्यानानां ध्यानमुत्तमम् ॥५॥ योगानां परमो योगो रहस्यं परमं महत् ॥ तत्तेहं संप्रवक्ष्यामि शृणु ह्येकमना प्रिये ॥६॥ सोमेशं परमं स्थानं पंचवक्त्रसमन्वितम् ॥ एतल्लिंगं न मुंचामि सत्यंसत्यं मयोदितम् ॥७॥ यच्च तत्परमं देवि ध्रुवमक्षयमव्ययम् ॥ सोमेशं तद्विजानीहि मा विकल्पमना भव ॥ ८ ॥

१ उद्भ्रमः--संभ्रमः--इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

निर्भयं निर्मलं नित्यं निरपेक्षं निराश्रयम् ॥ निरंजनं निष्प्रपंचं निःसंगं निरुपद्रवम् ॥ ९ ॥ तल्लिंगमिति जानीहि प्रभासे संव्यवस्थितम् ॥ अपव
र्गमविज्ञेयं मनोरम्यमनामयम् ॥ १० ॥ नित्यं च कारणं देवं सवघ्नं सर्वतोमुखम् ॥ शिवं सर्वात्मकं सूक्ष्ममनाद्यं यच्च दैवतम् ॥ ११ ॥ आत्मोपल
ब्धिविज्ञेयं चित्तचिंताविवर्जितम् ॥ गमागमविनिर्मुक्तं बहिरंतश्च केवलम् ॥ १२ ॥ आत्मोपलब्धिविषयं स्तुतिगोचरवर्जितम् ॥ निष्कलं विमला
त्मानं प्रकटं ज्ञानदीपकम् ॥१३॥ तल्लिंगमिति जानीहि प्रभासे सुरसुंदरि ॥ निरावकाशरहितं शब्दं शब्दांतगोचरम् ॥ १४ ॥ निष्कलं विमलं[1] देवं
देवदेवं सुरात्मकम् ॥ हेतुप्रमाणरहितं कल्पनाभाववर्जितम् ॥१५॥ चित्तावलोकविषयं बहिरंतरसंस्थितम् ॥ प्रभासे तं विजानीहि प्रणवं लिंगरूपिण
म् ॥ १६ ॥ अनिष्पंदं महात्मानं निरानंदावलोकनम् ॥ लोकावलोकमार्गस्थं विशुद्धज्ञानकेवलम् ॥ १७ ॥ विद्याविशेषमार्गस्थमनेकाकारसंज्ञितम् ॥
स्वभावभावनाग्राह्यं भावातीतमलक्षणम् ॥१८॥ वाक्प्रपंचादिरहितं निष्प्रपञ्चात्मकं शिवम् ॥ ज्ञानज्ञेयावलोकस्थं हेत्वाभासविवर्जितम् ॥१९॥ अना
हतं शब्दगतं शब्दादिगणसंभवम् ॥ एवं सोमेश्वरं विद्धि प्रभासे लिंगरूपिणम् ॥ २० ॥ शब्दब्रह्मगतं शान्तं स शब्दांतगमास्पदम् ॥ सर्वातिरिक्त
विषयं सर्वध्यानपदे स्थितम् ॥ २१ ॥ अनादिमच्युतं दिव्यं प्रमाणातीत गोचरम् ॥ अधश्चोर्ध्वं गतं नित्यं जीवाख्यं देहसंस्थितम् ॥ २२ ॥ हृदा
दिद्वादशांतस्थं प्राणापानोदयास्तगम् ॥ अग्राह्यमिन्द्रियात्मानं निष्कलंकात्मकं विभुम् ॥२३॥ स्वरादिव्यंजनातीतं वर्णादिपरिवर्जितम् ॥ वाचा
मवाच्यविषयमहंकारार्द्धरूपिणम् ॥२४॥ अप्रतर्क्यमनुच्चार्यं कलनाकालवर्जितम् ॥ निःशब्दं निश्चलं सौम्यं देहातीतं परात्परम् ॥२५॥ भूतावग्र
हरहितं भावाभावविवर्जितम् ॥ अविज्ञेयं परं सूक्ष्मं पञ्चपञ्चादिसंभवम् ॥ २६ ॥ अप्रमेयमनंताख्यमक्षयं कामरूपिणम् ॥ प्रभवं सर्वभूतानां बीजां
कुरसमुद्भवम् ॥ २७ ॥ व्यापकं सर्वकामाख्यमक्षरं परमं महत् ॥ स्थूलसूक्ष्मविभागस्थं व्यक्ताव्यक्तं सनातनम् ॥ २८ ॥ कल्पकल्पान्तरहित
मनादिनिधनं महत् ॥ महाभूतं महाकायं शिवं निर्वाणभैरवम् ॥ २९ ॥ एवं सदाशिवं विद्धि प्रभासे लिंगरूपिणम् ॥ योगक्रिया विनिर्मुक्तं मृत्युं
जयमनादिमत् ॥ ३० ॥ सर्वोपसर्गरहितं सर्वतोव्यापकं शिवम् ॥ अव्यक्तं परतो नित्यं केवलं द्वैतवर्जितम् ॥ ३१ ॥ अनन्यतेजसाक्रांतं प्रभास
क्षेत्रवासिनाम् ॥ भूरिस्वयंप्रभप्रख्यं सर्वतेजोऽधिकं हरम् ॥ ३२ ॥ शरण्यं देवमीशानमोंकारं शिवरूपिणम् ॥ देवदेवं महादेवं पंचवक्रं वृषध्व
जम् ॥ ३३ ॥ निर्मलं मानसातीतं भावग्राह्यमनूपमम् ॥ सदा शांतं विरूपाक्षं शूलहस्तं जटाधरम् ॥ ३४ ॥ हृत्पद्मकोशमध्यस्थं शून्यरूपं

१ देहम्--इ०पा० । २ द्वैधवर्जितम्--इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri



निरञ्जनम् ॥ एवं सदाशिवं विद्धि प्रभासे लिङ्गरूपिणम् ॥ ३५ ॥ योऽसौ परात्परो देवो हंसाख्यः परिकीर्तितः ॥ नादाख्यः सुव्रते देवि सोऽस्मि
न्स्थाने स्थितः स्वयम् ॥ ३६ ॥ एतदादिस्वरूपं च मया योगबलेन तु ॥ विज्ञातं देवि गदितं दिव्यमात्मानमात्मना ॥ ३७ ॥ ऋग्वेदस्थस्तु
पूर्वाह्णे मध्याह्ने यजुषि स्थितः ॥ अपराह्णे तु सामस्थो ह्यथर्वस्थो निशागमे ॥ ३८ ॥ वेदाहमेतं पुरुषं महांतमादित्यवर्णं तमसः परस्तात् ॥ तमेव
विदित्वा न भवेत्तु मृत्युर्नान्यः पंथा विद्यते वै जनानाम् ॥ ३९ ॥ इतीरितस्ते तु महाप्रभावः सोमेशलिंगस्य कृतैकदेशः ॥ वृतं न चाब्दैर्बहुभिः
सहस्रैर्वक्तुं च केनापि मुखैर्न शक्यम् ॥४०॥ ब्राह्मणः क्षत्रियो वैश्यः शूद्रोऽपीदं पठेद्यदि ॥ निर्मुक्तः सर्वपापेभ्यः सर्वान्कामानवाप्नुयात् ॥४१॥ इति
श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये श्रीसोमेश्वरमहिमवर्णनं नाम षष्ठोऽध्यायः॥६॥छ॥
॥ ॥ सूत उवाच ॥ ॥ एवं तत्र तदा देवी श्रुत्वा माहात्म्यमुत्तमम् ॥ हर्षोत्कंठितया वाचा पुनः पप्रच्छ शंकरम् ॥ १ ॥ ॥ देव्युवाच ॥ ॥ देवदेव जग
न्नाथ भक्तानुग्रहकारक ॥ समस्तज्ञानसंपन्न नमस्तेऽस्तु महेश्वर ॥ २ ॥ नमोऽस्तु वै त्रिपुरप्रहर्त्रे महात्मने तारकमर्दनाय ॥ नमोऽस्तु ते क्षीरसमुद्र
दायिने शिशोर्मुनीन्द्रस्य समाहितस्य ॥३॥ नमोऽस्तु ते सर्वजगद्विधात्रे सर्वत्र सर्वात्मक सर्वकर्त्रे ॥ नमो भवायास्तु नमोऽभवाय नमोऽस्तु ते सर्व
गताय नित्यम् ॥ ४ ॥ ॥ ईश्वर उवाच ॥ ॥ किं देवि पृच्छसेऽद्यापि सर्वं ते कथितं मया ॥ संदिग्धमस्ति किंचिच्चेत्पुनः पृच्छस्व भामिनि ॥
॥ ५ ॥ ॥ देव्युवाच ॥ ॥ सोमेश्वरेति यन्नाम कस्मिन्काले बभूव तत् ॥ किं नामाग्रेऽभवल्लिंगं नाम किं भविताऽधुना ॥ ६ ॥ एवं यस्य
प्रभावो वै नोक्तः पूर्वं त्वया विभो ॥ अन्येषां तीर्थदेवानां माहात्म्यं वर्णितं त्वया ॥ न त्वीदृशं तु कथितं श्रीसोमेशस्य यादृशम् ॥ ७ ॥ ॥ ईश्वर
उवाच ॥ ॥ पूर्वमेवाहमेवासं स्पर्शलिंगस्वरूपवान् ॥ न च मां तत्त्वतो वेद जनः कश्चिदिहेश्वरि ॥ ८ ॥ महाकल्पे तु सञ्जाते ब्रह्मणः प्रति
संचरे ॥ नामभावं भवेदन्यद्देवि लिंगे पुनःपुनः ॥ ९ ॥ अतीतं ब्रह्मणां षट्कं सप्तमोऽयं प्रजापतिः ॥ वर्त्तते योऽधुना देवि शतानन्द इति श्रुतः ॥
॥ १० ॥ अस्मिन्ब्रह्मणि देवेशि संजाते ह्यष्टवार्षिके ॥ तदा कालात्समारभ्य सोमेश इति विश्रुतः ॥ ११ ॥ अतीतेषु च देवेशि ब्रह्मसुतलयादनु ॥
बभूवुर्यानि नामानि तानि त्वं शृणु पार्वति ॥ १२ ॥ आद्यो विरंचिनामासीद्यदा ब्रह्मा पितामहः ॥ मृत्युञ्जयस्तदा नाम सोमनाथस्य कीर्तितम् ॥
॥ १३ ॥ द्वितीयोऽभूद्यदा ब्रह्मा पद्मभूरिति विश्रुतः ॥ तदा कालाग्नि रुद्रेति नाम प्रोक्तं शुभेंऽविके ॥ १४ ॥ तृतीयोऽभूद्यदा ब्रह्मा स्वयंभूरिति विश्रु

१ अत्र कस्मिंश्चिदेकस्मिन्पुस्तके—"द्वितीयोऽभूद्यदा ब्रह्मा सुरखर्य इति स्मृतः ॥ कृत्तिवासेति देवस्य नाम प्रोक्तं तदांबिके ॥" इत्ययं पाठो वर्त्तते परं त्वयं श्लोकः पञ्चमब्रह्मवृत्तान्त वर्णने मूल एव बहुषु पुस्तकेषु विद्यतेऽतोऽत्रायं श्लोकः प्रमादलिखितः—इति बोधव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तः ॥ अमृतेशेति देवस्य तदा नाम प्रकीर्तितम् ॥ १५ ॥ चतुर्थोऽभूद्यथा ब्रह्मा परमेष्ठीति विश्रुतः ॥ अनामयेति देवस्य तदा नाम स्मृतं शुभे॥१६॥ पंचमोऽभूद्यदा ब्रह्मा सुरज्येष्ठ इति स्मृतः॥ कृत्तिवासेति देवस्य नाम प्रोक्तं तदाम्बिके॥१७॥ षष्ठश्चाभूद्यदा ब्रह्मा हेमगर्भ इति श्रुतः॥ तदा भैरवनाथेति नाम देवस्य कीर्तितम्॥१८॥ अयं यो वर्त्तते ब्रह्मा शतानंद इति स्मृतः॥सोमनाथेति देवस्य वर्तते नाम सांप्रतम्॥१९॥ अतः परं चतुर्वक्रो ब्रह्मा यो भविता यदा ॥ प्राणनाथेति देवस्य तदा नाम भविष्यति॥२०॥अतीता ये विधातारो भविष्यंति च येऽधुना॥तावत्तद्वर्त्तते नाम यावदन्योष्टवार्षिकः ॥ संध्यासंध्यांशभेदेन विष्णवनंतसनातनाः ॥ २१ ॥ एवं नामानि देवस्य संक्षेपात्कीर्तितानि मे ॥ विस्तरात्कथितुं नैव शक्यंते कालगौरवात् ॥ २२ ॥ ॥ देव्युवाच ॥ ॥ आश्चर्यं देवदेवेश यत्त्वया कथितं प्रभो ॥ पूर्वोक्तानि च नामानि न स्मरंति च मे कथम् ॥२३॥ एतद्विस्तरतो ब्रूहि कारणं च जगत्पते ॥ सर्वभूतहितार्थाय ममानुग्रहकाम्यया ॥ २४ ॥ ॥ ईश्वर उवाच ॥ ॥ कल्पेकल्पे महादेवि अवतारं करोषि यत् ॥ तेन ते स्मरणं नास्ति प्रभावात्प्रकृतेः प्रिये ॥ २५ ॥ तत्त्वावरणमध्ये तु तत्राद्या त्वं प्रतिष्ठिता ॥ साऽवतीर्यांडमध्ये तु मया सार्द्धं वरानने ॥ २६ ॥ अनुग्रहार्थं लोकानां प्रादुर्भूता पुनःपुनः ॥ आद्ये कल्पे जगन्माता जगद्योनिर्द्वितीयके ॥ २७ ॥ तृतीये शांभवीनाम चतुर्थे विश्वरूपिणी ॥ पञ्चमे नंदिनीनाम षष्ठे चैव गणांबिका ॥ २८ ॥ विभूतिः सप्तमे कल्पे सुभूतिश्चाष्टमे तदा ॥ आनन्दा नवमे कल्पे दशमे वामलोचना ॥ २९ ॥ एकादशे वरारोहा द्वादशे च सुमङ्गला ॥ कल्पे त्रयोदशे चैव महामाया ह्युदाहृता ॥ ३० ॥ ततश्चतुर्दशे कल्पेऽनन्तानाम प्रकीर्तिता ॥ भूतमाता पंचदशे षोडशे चोत्तमा स्मृता ॥ ३१ ॥ ततः सप्तदशे कल्पे पितृकल्पे तु विश्रुता ॥ दक्षस्य दुहिता जाता सतीनाम्नी महाप्रभा ॥ ३२ ॥ अपमानात्तु दक्षस्य स्वां तनूमत्यजत्पुनः ॥ उमां कलां तु चन्द्रस्य पुरापूर्य च संस्थिता ॥ ३३ ॥ ततः प्रवृत्ते वाराहे कल्पे त्वं सुरसुन्दरि ॥ पुनर्हिमवताराध्य दुहिता त्वमतः कृता ॥ ३४ ॥ ततो देव्यद्भुतं तप्त्वा तपः परमदुश्चरम् ॥ भर्त्तारं मां पुनः प्राप्य पार्वतीति निगद्यसे ॥ ३५ ॥ कैलासनिलयश्चाहं त्वया सार्द्धं वरानने ॥ क्रीडामि तव देवेशि यावत्कल्पावसानकम् ॥३६॥ इदं चतुर्गुणं प्राप्य द्वापरे विष्णुना सह ॥ महिषस्य वधार्थाय उत्पन्ना कृष्णपिंगला ॥ ३७ ॥ कात्यायनीति दुर्गेति विविधैर्नामपर्ययैः ॥ नवकोटिप्रभेदेन जातासि वसुधातले ॥ ३८ ॥ यानि ते कल्पनामानि पूर्वमुक्तानि सुन्दरि ॥ तानि त्रयोदशाकल्पांदुदक्तात्कथितानि मे ॥ ३९ ॥ अतीतानि भविष्याणि वर्त्तमानानि सुन्दरि ॥ एवं ज्ञेयानि सर्वाणि ब्रह्मकल्पावधि प्रिये ॥ ॥ ४० ॥ ॥ देव्युवाच ॥ ॥ सोमनाथेति यन्नाम त्वया पूर्वमुदाहृतम् ॥ तत्कथं निश्चलं नाम मन्यते त्रिपुरांतक ॥ ४१ ॥ असंख्यत्वाच्च

१ उदक्तात्—ऊर्ध्वम्—चतुर्दश कल्पमारभ्य—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



चंद्राणां जन्मनामप्रभेदतः ॥ मन्वंतरे तु संजाते युगानामेकसप्ततौ ॥ ४२ ॥ चंद्रसूर्यादयो देवाः संह्रियंते पुनःपुनः ॥ सप्तर्षयः सुराः शक्रो मनुस्त
त्सूनवो नृपाः ॥ ४३ ॥ एककालं च सृज्यंते संह्रियंते च पूर्ववत् ॥ एतन्मे संशयं देव यथावद्वक्तुमर्हसि ॥४४॥ ॥ ईश्वर उवाच ॥ ॥ साधु पृष्टं
त्वया देवि रहस्यं पापनाशनम् ॥ यन्न कस्यचि दाख्यातं तत्ते वक्ष्याम्यशेषतः ॥४५॥ अयं यो वर्त्तते ब्रह्मा शतानन्द इति श्रुतः॥ तस्य चैवाष्टमे वर्षे
मनुर्यः प्रथमो भवेत् ॥ ४६ ॥ तस्मिन्मन्वन्तरे देवि यश्चादौ रोहिणीपतिः ॥ समुद्रगर्भात्संजातः सलक्ष्मीकौस्तुभादिभिः ॥ ४७ ॥ तेन चाराधितं
लिंगं कालभैरवनामतः ॥ महता तपसा पूर्वं युगानि च चतुर्द्दशे ॥ ४८ ॥ तस्याद्भुतं तपो दृष्ट्वा तुष्टोऽहं तस्य सुन्दरि ॥ वरं वृणीष्वेति मया स च
प्रोक्तो निशाकरः ॥ ४९ ॥ सहोवाच तदा देवि भक्त्या संस्तुत्य मां शुभे ॥ ५० ॥ ॥ चंद्र उवाच ॥ ॥ यदि प्रसन्नो देवेश वरार्हो यदि वाऽ
प्यहम् ॥ सोमनाथेति ते नाम भूयाद्ब्रह्मावधि प्रभो ॥ ५१ ॥ ये केचिद्भवितारोऽन्ये मन्वन्ते शीतरश्मयः ॥ तेषां भवतु देवेश देवोऽयं कुलदेवता ॥
॥ ५२ ॥ आराधयंतु ते सर्वे क्षेत्रेऽस्मिन्संस्थिता विभो ॥ स्वकीयायुःप्रमाणेन ब्रह्मणः प्रलयादनु ॥ ५३ ॥ सोमनाथेति ते नाम ब्रह्मांडे
सचराचरे ॥ ख्यातिं प्रयातु देवेश तेजोलिंग नमोऽस्तु ते ॥ ५४ ॥ ॥ ईश्वर उवाच ॥ ॥ एवमस्त्वित्यहं प्रोच्य पुनर्लिंगे लयं गतः ॥ एतत्ते
कारणं देवि प्रोक्तं सर्वमशेषतः ॥ ५५ ॥ निःसन्दिग्धं तु संक्षेपात्पुरा पृष्टं यतस्त्वया ॥ उद्देशमात्रं कथितं श्रीसोमेशगुणान्प्रति ॥ समुद्रस्येव
रत्नानामचिन्त्यस्तस्य विस्तरः ॥ ५६ ॥ मोहनं तदभक्तानां भक्तानां बुद्धिवर्द्धनम् ॥ मूढास्ते नैव पश्यंति स्वरूपं मम मोहिताः ॥ ५७ ॥ ॥ देव्यु
वाच ॥ ॥ ईदृशं यस्य माहात्म्यं तेजोलिंगस्य शंकर ॥ कुत्र तिष्ठति तल्लिंगं क्षेत्रे तस्मिन्सुरेश्वर ॥ ५८ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि
प्रयत्नेन श्रुत्वा चैवावधारय ॥ प्रभासं परमं देवि क्षेत्रमेतन्मम प्रियम् ॥ ५९ ॥ देवानामपि संस्थानं तच्च द्वादशयोजनम् ॥ पंचयोजनमानेन
पीठं तत्र प्रकीर्त्तितम् ॥ ६० ॥ तन्मध्ये मद्गृहं देवि तच्च गव्यूतिमात्रकम् ॥ समुद्रस्योत्तरे देवि देविकामुखसंज्ञितम् ॥ ६१ ॥ वज्रिण्याः पूर्वतश्चैव
यावन्न्यंकुमती नदी ॥ चतुष्टयं च विस्तारादायामात्पंचयोजनम् ॥ ६२ ॥ क्षेत्रपीठमिति प्रोक्तमतो गर्भगृहं शृणु ॥ समुद्रात्कौरवी यावद्दक्षि
णोत्तरमानतः ॥ पूर्वपश्चिमतो ज्ञेयं गोमुखादाऽऽश्वमेधकम् ॥ ६३ ॥ एतन्मम गृहं देवि न त्यजामि कदाचन ॥ तस्य मध्ये स्थितं लिंगं यत्र तत्ते
प्रकीर्तितम् ॥ ६४ ॥ वारुणीं दिशमाश्रित्य सागरस्य च सन्निधौ ॥ कृतस्मरस्यापरतो धन्वन्तरशतत्रये ॥ ६५ ॥ लिंगं महाप्रभावं तु स्वयंभूतं

१ वल्लभः–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यवस्थितम् ॥ तत्र संनिहितो देवः शंकरः परमेश्वरः ॥ ६६ ॥ एतस्मिन्नन्तरे देवि सोमेशस्य समीपतः ॥ चतुर्दशे विभागे तु धनुषां च शतद्वयम् ॥
॥ ६७ ॥ समंतान्मंडलाकारा कर्णिका सा मम प्रिया ॥ तस्यां ये प्राणिनः सर्वे मृताः कालेन पार्वति ॥ ६८ ॥ कृमिकीटपतंगाद्या जीवा उत्तम
मध्यमाः ॥ निर्धूतकल्मषाः सर्वे यांति लोकं ममापि ते ॥६९॥ उत्तरं दक्षिणं चापि अयनं न विचारयेत् ॥ सर्वस्तेषां शुभः कालो ये मृताः क्षेत्रम
ध्यतः ॥ ७० ॥ आदिनाथेन शर्वेण सर्वप्राणिहिताय वै ॥ आद्यतत्त्वान्यथानीय क्षेत्रमेतन्महाप्रभम् ॥ प्रभा[1]सितं महादेवि यत्र सिद्ध्यंति मानवाः
॥७१॥ हन्यमानोऽपि यो विद्वान्वसेद्विघ्नशतैरपि ॥ कृतप्रतिज्ञो देवेशि यावज्जीवं सुरेश्वरि ॥ ७२ ॥ स गच्छेत्परमं स्थानं यत्र गत्वा न शोचति॥
तस्य क्षेत्रस्य माहात्म्यात्स्थाणोश्चाद्भुतकर्मणः ॥ ७३ ॥ कृत्वा पापसहस्राणि पश्चात्सन्तापमेति वै ॥ प्रभासे तु वियुज्येत न सोंऽतकपुरीं व्रजेत् ॥
॥ ७४ ॥ ज्ञात्वा कलियुगं घोरं हाहाभूतमचेतनम् ॥ नियुक्तस्तत्र देवेशि रक्षार्थं विघ्ननायकः ॥ ७५ ॥ ये तु ब्राह्मणविद्विष्टाः शिवभक्तिवितंड[2]काः ॥
ब्रह्मघ्नाश्च कृतघ्नाश्च तथा नैष्कृतिकाश्च ये ॥ ७६ ॥ लोकद्विष्टा गुरुद्विष्टास्तीर्थायतनकण्टकाः ॥ सर्वपापरताश्चैव ये चान्ये तु विकुत्सिताः ॥ ७७ ॥
रक्षणार्थं ह वै तेषां नियुक्तो विघ्ननायकः ॥ कालाग्निरुद्रपार्श्वे तु रुद्रतुल्यपराक्रमः ॥ ७८ ॥ क्षेत्रं रक्षति देवेशि पापिष्ठानां नियामकः ॥ म्रियंते
यदि ब्रह्मघ्नास्तथा पातकिनो नराः ॥ ७९ ॥ क्षेत्रे चास्मिन्वरारोहे तेषां देवि गतिं शृणु ॥ दशवर्षसहस्राणि दिव्यानि कमलेक्षणे ॥ ८० ॥ दासी
पुत्राश्च जायन्ते तदंते ब्रह्मराक्षसाः ॥ ततः पापक्षये देवि पुनर्यांति वियोनिताम् ॥८१॥ तस्मात्सर्वप्रयत्नेन पापं तत्र न कारयेत् ॥ अन्यत्राऽऽवर्तितं
पापं क्षेत्रे चास्मिन्विनश्यति ॥ ८२ ॥ अस्मिन्पुनः कृतं पापं पैशाचनरकावहम् ॥ भक्तानुकंपी भगवांस्तिर्यग्योनिगतेष्वपि ॥ ८३ ॥ ददाति
परमं स्थानं न तु ब्रह्मद्विषां प्रिये ॥ ये च ध्यानं समासाद्य युक्तात्मानः समाहिताः ॥ ८४ ॥ संनियम्येन्द्रियग्रामं जपंति शतरुद्रियम् ॥ प्रभासे
तु स्थिता देवि ते कृतार्था न संशयः ॥ ८५ ॥ यदि गच्छेन्नरः कश्चित्प्रभासं क्षेत्रमुत्तमम् ॥ तमुपायं प्रकुर्वीत निर्गच्छेन्न पुनर्यथा ॥ ८६ ॥ एत
द्गोप्यं वरारोहे न देयं यस्य कस्यचित् ॥ गोपनीयमिदं शास्त्रं यथा प्राणाः स्वकाः प्रिये ॥ ८७ ॥ येनेदं विहितं शास्त्रं प्रभासक्षेत्रदीपकम् ॥ स
शिवश्चैव विज्ञेयो मानुषीं प्रकृतिं स्थितः ॥ ८८ ॥ तस्य विग्रहसंस्थोऽहं सदा तिष्ठामि पार्वति ॥ वंदितः पूजितो ध्यातो यथाहं नात्र संश

१ प्रकाशितम्–इ० पा० । २ शिवभक्तिवितंडकाः–शिवभक्तिविषये मात्सर्येण वितण्डावादकर्तारः–इत्यर्थः । वितण्डयते विहन्यते परपक्षोऽनया सा । स्वपक्षस्थापनार्थं परपक्षव्युदासो वितण्डा–इति शब्दार्थ-
कल्पद्रुमे शिवभक्तिविडंबकाः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



यः ॥ ८९ ॥ कलौ च दुर्ल्लभं देवि प्रभासक्षेत्रमुत्तमम् ॥ इदानीं तव स्नेहेन विशेषं कथयामि वै ॥ सत्यंसत्यं पुनः सत्यं त्रिःसत्यं सुरसुन्दरि ॥
॥ ९० ॥ यानि लिंगानि भूर्लोके सोमेशस्तेषु मे प्रियः ॥ अस्मिँल्लिंगे गुणा ये तु ते देवि विदिता मम ॥ ९१ ॥ अहमेव विजानामि नान्यो वेद
कथंचन ॥ अन्येषु चैव लिंगेषु अहं पूज्यः सुरासुरैः ॥ ९२ ॥ लिंगं चेमं पुनर्देवि पूजयामो वयं स्वयम् ॥ ९३ ॥ यस्मिन्काले न वै ब्रह्मा न
भूमिर्न दिवाकरः ॥ सर्वं चैव जगन्नाथ तस्मिन्काले यशस्विनि ॥ ९४ ॥ इमं लिंगं परं चैव ब्रह्मणः प्रलये तदा ॥ भाविनीं वृत्तिमास्थाय इदं
स्थानं तु रक्षति ॥ ९५ ॥ दशकोट्यस्तु लिंगानां गंगाद्वाराद्वरानने ॥ आगत्य तानि मध्याह्ने लिंगेऽस्मिन्यांति संलयम् ॥ ९६ ॥ पृथिव्यां यानि
तीर्थानि गगनस्थानि यानि तु ॥ स्नानार्थमस्य लिंगस्य समागच्छंति सर्वदा ॥ ९७ ॥ धन्यास्तु खलु ते मर्त्याः प्रभासे संव्यवस्थिताः ॥ सोमे
श्वरं ये द्रक्ष्यंति संसारभयमोचनम् ॥ ९८ ॥ देवि सोमेश्वरं लिंगं ये स्मरिष्यंति भाविताः ॥ सर्वपापक्षयस्तेषां भविष्यति न संशयः ॥ ९९ ॥
एतत्स्मृतं प्रियतमं मम देवि नित्यं क्षेत्रं पवित्रमृषिसिद्धगणाभिरम्यम् ॥ अस्मिन्मृताः सकलजीवमृतोऽपि देवि स्वर्गात्परं समुपयांति न
संशयोऽत्र ॥ १०० ॥ यं देवा न विजानंति ब्रह्मविष्णुपुरोगमाः ॥ न सांख्येन न योगेन नैव पाशुपतेन च ॥ १०१ ॥ कैवल्यं निष्कलं यत्त
दस्मिँल्लिंगे तु लभ्यते ॥ तावद्भ्रमंति संसारे देवाद्यास्तु यशस्विनि ॥ १०२ ॥ यावत्सोमेश्वरं देवं न विंदंति त्रिलोचनम् ॥ क्षेत्रं प्रभासमित्युक्तं क्षेत्र
ज्ञोऽहं न संशयः ॥ १०३ ॥ एतं तवोक्तं ननु बोधनाय सोमेश्वरस्यैव महाप्रभावम् ॥ ये वै पठिष्यंति नरा नितांतं यास्यंति ते तत्पदमिंदुमौलेः ॥
॥ १०४ ॥ सोमेश्वरं देववरं मनुष्या ये भक्तिमंतः शरणं प्रपन्नाः ॥ ते घोररूपे च भयावहे च संसारचक्रे न पुनर्भ्रमंति ॥ १०५ ॥ ये दक्षिणा
मूर्त्तिमुपाश्रिताः स्युर्जपंति नित्यं शतरुद्रियं द्विजाः ॥ तेऽस्मिन्भवे नैव पुनर्भवंति संसारपारं परमं गता वै ॥ १०६ ॥ उद्देशमात्रं कथितो
मया ते श्रीसोमनाथस्य कृतैकदेशः ॥ अब्दैरनेकैर्बहुभिर्युगैर्वा[1] न शक्यमेकेन मुखेन वक्तुम् ॥ १०७ ॥ इति श्रीस्कान्दे महापुराण एकाशीति
साहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये श्रीसोमनाथप्रादुर्भाववर्णनंनाम[2] सप्तमोऽध्यायः ॥ ७ ॥ ॥ छ ॥ ॥
॥ ॥ देव्युवाच ॥ ॥ पुनः कथय देवेश माहात्म्यं लोकशंकर ॥ श्रीसोमेश्वरदेवस्य सर्वपातकनाशनम् ॥ ब्रह्मविष्ण्वीशदैवत्यं तथात्र त्रितयं वद ॥
॥ १ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणुष्वैकमना भूत्वा मम गोप्यं पुरातनम् ॥ तस्मिँल्लिंगे च यद्वृत्तमाश्चर्यं परमं महत् ॥ २ ॥ षष्टिकोटि

१ शब्दैः–इ० पा० । २ श्रीसोमनाथदेववर्णनंनाम–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहस्राणि ऋषीणामूर्द्ध्वरेतसाम् ॥ तस्मिँल्लिंगे प्रविष्टानि घृताहुतिरिवानले ॥ ३ ॥ सिद्धिर्वृद्धिस्तथा तुष्टिर्ऋद्धिः पुष्टिस्तु पंचमी ॥ कीर्तिः शांतिस्तथा लक्ष्मीस्तस्मिंल्लिंगे समुत्थिता ॥ ४ ॥ सप्तकोट्यस्तु मंत्राणां सिद्धीनां चैव संभवः ॥ दिव्ययोगरसाश्चान्ये दिव्यौषधिरसायनाः ॥ ५ ॥ गारुडं भूततंत्रं च खेचर्यो व्यंतरीस्तथा ॥ ते सर्वे सह योगेन तस्माल्लिंगात्समुत्थिताः ॥ ६ ॥ अन्याश्चैव तु याः काश्चित्सिद्धयोऽष्टौ प्रकीर्तिताः ॥ ताः सर्वाः सह लिंगेन तस्मात्स्थानात्समुत्थिताः ॥ ७ ॥ अन्यद्देवि प्रवक्ष्यामि अत्र सिद्धिं गतास्तु ये ॥ ममांशसंभवाः प्राप्ता अस्मिँल्लिंगे लयं गताः ॥ ८ ॥ तेषां च विक्रमान्सर्वान्प्रवक्ष्याम्यनुपूर्वशः ॥ पुराक्रमा ग्रहा मुण्डा गुडकाश्च सहेतुकाः ॥ ९ ॥ विमला दंडिकाश्चैव सप्तैते कुत्सिकाः स्मृताः ॥ अस्मिंल्लिंगे पुरा सिद्धा योगात्पाशुपतान्मम ॥ १० ॥ रुद्रो विप्रस्तथा दानश्चंद्रो मन्थोऽवलोककः ॥ सूर्यावलोकेश्चेति गार्गेयाः सप्त कीर्त्तिताः ॥ ११ ॥ सोमेश्वरे च ते सिद्धाः प्रभासे वरवर्णिनि ॥ मूकमन्यः शिवश्चैव प्रकाशः कपिलस्तथा ॥ १२ ॥ सत्कुलः कर्णिकारश्च पौरुषेयाः प्रकीर्त्तिताः ॥ सोमेश्वरे पुरा सिद्धाः प्रभासे पापनाशने ॥ १३ ॥ युगेयुगे पुरा सिद्धास्तस्मिँल्लिंगे प्रिये मम ॥ एते चान्ये च ये विप्रा भविष्यंति कलौ युगे ॥ १४ ॥ तत्र सिद्धिं गमिष्यंति दुर्लभां त्रिदशैरपि ॥ एतत्ते सर्वमाख्यातं तल्लिंगं सिद्धिदं परम् ॥ १५ ॥ दुर्लभं सर्वमर्त्त्यानां प्रभासे तु व्यवस्थितम् ॥ न च कश्चिद्विजानाति अशुभैः कर्मभिर्वृतः ॥ १६ ॥ ग्रहदोषास्तु ये केचिद्भूतदोषास्तथा परे ॥ डाकिनीप्रेतवेताला राक्षसा ग्रहपूतनाः ॥ १७ ॥ पिशाचा यातुधानाश्च मातरो जातहारिकाः ॥ बालग्रहास्तथा चान्ये बुद्धाश्चैव तु ये ग्रहाः ॥ १८ ॥ ज्वरभूतग्रहाश्चान्ये ह्यतिसारभगंदराः ॥ अश्मरी मूत्रकृच्छ्रं च रोगाश्चान्ये सहस्रशः ॥ १९ ॥ दुर्नामकास्तथा चान्ये कुष्ठरोगास्तथा परे ॥ क्षयरोगास्तथा चान्ये वातगुल्मास्तथैव च ॥ अन्ये चैव तु ये केचिद्व्याधयस्तु प्रकीर्त्तिताः ॥ २० ॥ सोमेश्वरं समासाद्य तस्य लिंगस्य दर्शनात् ॥ सर्व एव विनश्यंति वह्नौ क्षिप्तमिवेन्धनम् ॥ २१ ॥ उपसर्गाश्च चान्ये सर्पघोर्णपवृश्चिकाः ॥ सर्वे तत्र विनश्यंति श्रीसोमेश्वरदर्शनात् ॥ २२ ॥ योऽसौ सोमेश्वरो नाम्ना पश्चिमो भैरवः स्मृतः ॥ कालाग्निरुद्रनाथेति पर्यायैर्नामभिः श्रुतः ॥ २३ ॥ तस्मिंस्तिष्ठामि देवेशि भक्तानुग्रहकारकः ॥ सर्वं च दुष्कृतं नृणां भक्षयामि न संशयः ॥ २४ ॥ योऽसौ प्राणः शरीरस्थो देहिनां देहसंचरः ॥ ब्रह्मांडमेतद्यस्यांतरेको यश्चाप्यनेकधा ॥ २५ ॥ वेदाः सर्वेऽपि यं देवं प्रशंसंति महर्षयः ॥ परस्य ब्रह्मणो रूपं यस्य द्वारेण लभ्यते ॥ २६ ॥ सोऽयं देवि महादेवः प्रभासे संव्यवस्थितः ॥ यथा गुप्तं गृहे

१ मेघोर्वलोककः–इ० पा० । २ सूर्यावलोकनाम्रेता–इ० पा० । ३ सुकुलः–इ० पा० । ४ दुर्नामकाः–अर्शांसि–इत्यर्थः । ५ सर्पराक्षसवृश्चिकाः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

रत्नं न कश्चिद्विंदते नरः ॥ २७ ॥ प्रभासे तु स्थितं तद्वद्रत्नभूतं गृहे मम ॥ तच्च लिंगं पुरा कल्पे सप्तपातालभेदकम् ॥ २८ ॥ कथितं कोटि सूर्यस्य प्रलयानलसंनिभम् ॥ तेन कालाग्निरुद्रेति प्रोक्तं सोमेश्वरः पुरा ॥ २९ ॥ इति देवि समासेन कथितं तव पार्वति ॥ सोमेश्वरस्य माहात्म्यं सर्वपातकनाशनम् ॥ ३० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासमाहात्म्ये श्रीसोमेश्वरै श्वर्यवर्णनं नामाष्टमोऽध्यायः ॥ ८ ॥ ॥ छ ॥ ॥ देव्युवाच ॥ ॥ दिव्यं तेजो नमस्यामि यन्मे दृष्टं पुरातने ॥ कालाग्निरुद्रमध्यस्थं प्रभासे शंकरोद्भवम् ॥ १ ॥ यो वेदसंघैर्ऋषिभिः पुराणैर्वेदोक्तयोगैरपि इज्यमानः ॥ तं देवदेवं शरणं व्रजामि सोमेश्वरं पापविनाशहेतुम् ॥ २ ॥ देवदेव जगन्नाथ भक्तानुग्रहकारक ॥ संशयो हृदि मे कश्चित्तं भवाञ्छेत्तुमर्हति ॥ ३ ॥ ॥ ईश्वर उवाच ॥ ॥ कः संशयः समुत्पन्नस्तव देवि यश स्विनि ॥ तन्मे कथय कल्याणि तत्सर्वं कथयाम्यहम् ॥ ४ ॥ ॥ देव्युवाच ॥ ॥ यदि त्वं च महादेवो मुण्डमाला कथं कृता[1] ॥ अनादि निधनो धाता सृष्टिसंहारकारकः ॥ ५ ॥ ततो विहस्य देवेशः शंकरो वाक्यमब्रवीत् ॥ अनेकमुण्डकोटीभिर्या मे माला विराजते ॥ ६ ॥ नारायण सहस्राणां ब्रह्मणामयुतस्य च ॥ कृता शिरःकरोटीभिरनादिनिधना ततः ॥ ७ ॥ अन्यो विष्णुश्च भवति अन्यो ब्रह्मा भवत्यपि ॥ कल्पे कल्पे मया सृष्टः कल्पे विष्णुः प्रजापतिः ॥ ८ ॥ अहमेवंविधो देवि क्षेत्रे प्राभासिके स्थितः ॥ कालाग्निलिंगमूले तु मुंडमालाविभूषितः ॥ ॥ ९ ॥ अक्षसूत्रधरः शान्त आदिमध्यांतवर्जितः ॥ पद्मासनस्थो वरदो हिमकुन्देन्दुसन्निभः ॥ १० ॥ मम वामे स्थितो विष्णुर्दक्षिणे च पिता महः ॥ जठरे चतुरो[2] वेदाः हृदये ब्रह्म शाश्वतम् ॥ ११ ॥ अग्निः सोमश्च सूर्यश्च लोचनेषु व्यवस्थिताः ॥ १२ ॥ एवंविधो महादेवि प्रभासे संव्य वस्थितः ॥ आप्यतत्त्वात्समानीते मा ते भूत्संशयः क्वचित् ॥ १३ ॥ एवमुक्ता तदा देवी हर्षगद्गदया गिरा ॥ तुष्टाव देवदेवेशं भक्त्या परमया युता ॥ १४ ॥ ॥ देव्युवाच ॥ ॥ जय देव महादेव सर्वभावन ईश्वर ॥ नमस्तेऽस्तु सुरेशाय परमेशाय वै नमः ॥ १५ ॥ अनादिसृष्टिकर्त्रे च नमः सर्वगताय च ॥ सर्वस्थाय नमस्तुभ्यं धाम्नां धाम्ने नमोऽस्तु ते ॥ १६ ॥ षडंताय नमस्तुभ्यं द्वादशान्ताय ते नमः ॥ हंसभेद नमस्तुभ्यं नमस्तुभ्यं च मोक्षद ॥ १७ ॥ इति स्तुतस्तदा देव्या प्रचलच्चन्द्रशेखरः ॥ ततस्तुष्टस्तु भगवानिदं वचनमब्रवीत् ॥ १८ ॥ ॥ ईश्वर उवाच ॥ ॥ साधुसाधु महाप्राज्ञे तुष्टोऽहं व्रियतां वरः ॥ १९ ॥ ॥ देव्युवाच ॥ ॥ यदि तुष्टोऽसि देवेश वरार्हा यदि वाप्यहम् ॥ प्रभास



१ कृथा–इ० पा० । २ चतुरः–चत्वारः–इत्यर्थः । आमभाव आर्षः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षेत्रमाहात्म्यं पुनर्विस्तरतो वद ॥ २० ॥ भूतेश भगवान्विष्णुर्दैत्यानामन्तकाग्रणीः ॥ स कस्माद्द्वारकां हित्वा प्रभासक्षेत्रमाश्रितः ॥ २१ ॥ षष्टि तीर्थसहस्राणि षष्टिकोटिशतानि च ॥ द्वारकामध्यसंस्थानि कथं न्यक्कृतवान्हरिः ॥ २२ ॥ अमरैरावृतां पुण्यां पुण्यकृद्भिर्निषेविताम् ॥ एवं तां द्वारकां त्यक्त्वा प्रभासं कथमागतः ॥ २३ ॥ देवमानुषयोर्नेता द्योर्भुवोः प्रभवो हरिः ॥ किमर्थं द्वारकां त्यक्त्वा प्रभासे निधनं गतः ॥ २४ ॥ यश्चक्रं वर्त्तयत्येको मानुषाणां मनोमयम् ॥ प्रभासे स कथं कालं चक्रे चक्रभृतां वरः ॥२५॥ गोपायनं यः कुरुते जगतः सार्वलौकिकम् ॥ स कथं भगवान्विष्णुः प्रभासक्षेत्रमाश्रितः ॥ २६ ॥ योंतकाले जलं पीत्वा कृत्वा तोयमयं वपुः ॥ लोकमेकार्णवं चक्रे दृष्टया दृष्टेन चात्मना ॥ २७ ॥ स कथं पञ्चतां प्राप प्रभासे पार्वतीपते ॥ यः पुराणे पुराणात्मा वाराहं वपुरास्थितः ॥ २८ ॥ उद्धार महीं कृत्स्नां सशैलवनकाननाम् ॥ स कथं त्यक्तवान्गात्रं प्रभासे पापनाशने ॥ २९ ॥ येन सिंहं वपुः कृत्वा हिरण्यकशिपुर्हतः ॥ स कथं देवदेवेशः प्रभासं क्षेत्रमाश्रितः ॥ ३० ॥ सहस्रचरणं देवं सहस्राक्षं महाप्रभम् ॥ सहस्रशिरसं वेदा यमाहुर्वै युगेयुगे ॥ ३१ ॥ तत्याज स कथं देवः प्रभासे स्वं कलेवरम् ॥ नाभ्यरण्यां समुद्भूतं यस्य पैता महं गृहम् ॥ ३२ ॥ एकार्णवगते लोके तत्पंकजमपंकजम् ॥ येनोद्धृतं क्षणेनैव प्रभासस्थः स किं हरिः ॥ ३३ ॥ उत्तरांशे समुद्रस्य क्षीरोदस्या मृतोदधेः ॥ यः शेते शाश्वतं योगमास्थाय परवीरहा ॥ स कथं त्यक्तवान्देहं प्रभासे परमेश्वरः ॥ ३४ ॥ हव्यादान्यः सुरांश्चक्रे कव्यादांश्च पितॄनपि ॥ स कथं देवदेवेशः प्रभासं क्षेत्रमाश्रितः ॥ ३५ ॥ युगानुरूपं यः कृत्वा रूपं लोकहिताय वै ॥ धर्मसुद्धरते देवः स कथं क्षेत्रमाश्रितः ॥३६॥ त्रयो वर्णास्त्रयो लोकास्त्रैविद्यं पाठकास्त्रयः ॥ त्रैकाल्यं त्रीणि कर्माणि त्रयो देवास्त्रयो गुणाः ॥ सृष्टं येन पुरा देवः स कथं क्षेत्रमाश्रितः ॥ ३७ ॥ या गतिर्धर्मयुक्तानामगतिः पापकर्मिणाम् ॥ चातुर्वर्ण्यस्य प्रभवश्चातुर्वर्ण्यस्य रक्षिता ॥ ३८ ॥ चातुर्विद्यस्य यो वेत्ता चातुराश्रम्यसंस्थितः ॥ कस्मात्स द्वारकां हित्वा प्रभासे पंचतां गतः ॥३९॥ दिगंतरं नभो भूमिरापो वायुर्विभावसुः ॥ चंद्रसूर्यद्वयं ज्योतिर्युगेशः क्षणदातनुः ॥४०॥ यः परं श्रूयते ज्योतिर्यः परं श्रूयते तपः ॥ यःपरं परतःप्रोक्तः परं यः परमात्मवान् ॥४१॥ आदित्यादिश्च यो दिव्यो यश्च दैत्यांतको विभुः ॥ स कथं देवकीसूनुः प्रभासे सिद्धिमीयिवान् ॥४२॥ युगांते चांतको यश्च यश्च लोकांतकांतकः ॥ सेतुर्यो लोकसत्तानां मेध्यो यो मेध्यकर्मणाम् ॥ ४३ ॥ वेत्ता यो वेदविदुषां प्रभुर्यः प्रभवात्मनाम् ॥ सोमभूतस्तु भूतानामग्निभूतोऽग्निवर्त्मनाम् ॥ ४४ ॥ मनुष्याणां मनोभूतस्तपोभूतस्तपस्विनाम् ॥ विनयो नयभूतानां तेजस्तेजस्विनाम

१ कालम्–मृत्युम्–इत्यर्थः । २ स देवः–बलराम–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





पि ॥४५॥ विग्रहो विग्रहाणां यो गतिर्गतिमतामपि ॥ स कथं द्वारकां हित्वा प्रभासक्षेत्रमाश्रितः॥४६॥आकाशप्रभवो वायुर्वायुप्राणो हुताशनः॥देवा
हुताशनप्राणाः प्राणोऽग्नेर्मधुसूदनः ॥ स कथं पद्मजप्राणः प्रभासं क्षेत्रमाश्रितः ॥४७॥ ॥ सूत उवाच ॥ ॥ इति प्रोक्तस्तदा देव्या शंकरो लोकशं
करः ॥ उवाच प्रहसन्वाक्यं पार्वतीं द्विजसत्तमाः ॥ ४८ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि प्रभासक्षेत्रविस्तरम् ॥ रहस्यं सर्वपापघ्नं
देवानामपि दुर्लभम् ॥ ४९ ॥ देवि क्षेत्राण्यनेकानि पृथिव्यां संति भामिनि ॥ तीर्थानि कोटिसंख्यानि प्रभावस्तेषु संख्यया ॥ ५० ॥ असंख्येय
प्रभावं हि प्रभासं परिकीर्तितम्॥ब्रह्मतत्त्वं विष्णुतत्त्वं रौद्रतत्त्वं तथैव च॥५१॥तत्र भूयः समायोगो दुर्लभोऽन्येषु पार्वति॥ प्रभासे देवदेवेशि तत्त्वानां
त्रितयं स्थितम् ॥५२॥ चतुर्विंशतितत्त्वेश्च ब्रह्मा लोकपितामहः ॥ बालरूपी च नाम्ना च तत्र स्थाने स्थितः स्वयम् ॥५३॥ पंचविंशतितत्त्वानाम
धिपो देवताग्रणीः ॥ तस्मिन्स्थाने स्थितः साक्षाद्दैत्यानामंतकः शुभे ॥ ५४ ॥ अहं देवि त्वया सार्द्धं षट्त्रिंशत्तत्त्वसंयुतः ॥ निवसामि महाभागे
प्रभासे पापनाशने ॥ ५५ ॥ एवं तत्त्वमयं क्षेत्रं सर्वतीर्थमयं शुभम् ॥ प्रभासमेव जानीहि मा कार्षीः संशयं क्वचित् ॥ ५६ ॥ अपि कीटपतंगा ये
म्रियंते तत्र ये नराः ॥ तेऽपि यांति परं स्थानं नात्र कार्या विचारणा ॥ ५७ ॥ स्त्रियो म्लेच्छाश्च शूद्राश्च पशवः पक्षिणो मृगाः॥ प्रभासे तु मृता
देवि शिवलोकं व्रजंति ते ॥ ५८ ॥ कामक्रोधेन ये बद्धा लोभेन च वशीकृताः ॥ अज्ञानतिमिराक्रांता मायातत्त्वे च संस्थिताः ॥ ५९ ॥ कालपा
शेन ये बद्धास्तृष्णाजालेन मोहिताः ॥ अधर्मनिरता ये च ये च तिष्ठंति पापिनः ॥ ६० ॥ ब्रह्मघ्नाश्च कृतघ्नाश्च ये चान्ये गुरुतल्पगाः ॥ महापात
किनश्चापि ते यान्ति परमां गतिम् ॥ ६१ ॥ मातृहंता नरो यस्तु पितृहंता तथैव च ॥ ते सर्वे मुक्तिमायांति किं पुनः शुभकारिणः ॥ ६२ ॥ इति
ज्ञात्वा महादेवि दैत्यानामंतको हरिः ॥ प्रभासक्षेत्रमासाद्य त्यक्तवान्स्वं कलेवरम् ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां
सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये प्रभासक्षेत्रे श्रीहरिस्थितिप्रश्नवर्णनं नाम नवमोऽध्यायः ॥ ९ ॥ ॥ ईश्वर उवाच ॥ ॥ अन्यच्च कथयि
ष्यामि रहस्यं तव भामिनि ॥ यन्न कस्य चिदाख्यातं तत्ते वच्मि वरानने ॥ १ ॥ पृथ्वीभागे स्थितो ब्रह्मा अपां भागे जनार्दनः ॥ तेजोभागस्थि
तो रुद्रो वायुभागे तथेश्वरः ॥ २ ॥ आकाशभागसंस्थाने स्थितः साक्षात्सदाशिवः ॥ ३ ॥ यस्ययस्यैव यो भागस्तस्मिंस्तीर्थानि यानि वै ॥
तस्यतस्य न संदेहः स स एवेश्वरः स्मृतः ॥ ४ ॥ छागलंडं दुगण्डं च माकोटं मण्डलेश्वरम् ॥ कालिंजरं वनं चैव शंकुकर्णं स्थलेश्वरम् ॥ ५ ॥

१ प्रिये–इ० पाठे संबोधनम्।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शूलेश्वरं च विख्यातं पृथ्वीतत्त्वे च संस्थितम् ॥ हरिश्चन्द्रं च श्रीशैलं जल्पेशोम्रांतिकेश्वरम् ॥ ६ ॥ महाकालं मध्यमं च केदारं भैरवं तथा ॥ पवित्राष्टकमेतद्धि जलसंस्थं वरानने ॥ ७ ॥ अमरेशं प्रभासं च नैमिषं पुष्करं तथा ॥ आषाढिं चैव दण्डिं च भारभूतिं च लांगलम् ॥ ८ ॥ आदिगुह्याष्टकं ह्येतत्तेजस्तत्त्वे तिष्ठितम् ॥ गया चैव कुरुक्षेत्रं तीर्थं कनखलं तथा ॥ ९ ॥ विमलं चाट्टहासं च माहेन्द्रं भीमसंज्ञकम् ॥ गुह्याद्गुह्यतरं ह्येतत्प्रोक्तं वाय्वष्टकं तव ॥ १० ॥ वस्त्रापथं रुद्रकोटिर्ज्येष्ठेश्वरं महालयम् ॥ गोकर्णं रुद्रकर्णं च वर्णाख्यं स्थापसंज्ञकम् ॥ ११ ॥ पवित्राष्टकमेतद्धि आकाशस्थं वरानने ॥ एतानि तत्त्वतीर्थानि सर्वाणि कथितानि वै ॥ १२ ॥ यो यस्मिन्देवता तत्त्वे सा तन्माहात्म्यसूचिका ॥ औदकं च महातत्त्वं विष्णोश्चातिप्रियं प्रिये ॥ १३ ॥ जलशायी स्मृतस्तेन नारायण इति श्रुतिः ॥ आप्यतत्त्वे तु तीर्थानि यानि प्रोक्तानि ते मया ॥ १४ ॥ तानि प्रियाणि देवेशि ध्रुवं नारायणस्य वै ॥ औदकं चैव यत्तत्त्वं तस्मिन्प्राभासिकं स्मृतम् ॥ १५ ॥ तत्र[1] देवो लयं याति हरिर्जन्मनिजन्मनि ॥ स वासुदेवः सूक्ष्मात्मा परात्परतरे स्थितः ॥ १६ ॥ स शिवः परमं व्योम अनादिनिधनो विभुः ॥ तस्मात्परतरं नास्ति सर्वशास्त्रागमेषु च ॥ १७ ॥ सिद्धांतागमवेदांतदर्शनेषु विशेषतः ॥ तेषु चैव न भिन्नस्तु मया सार्द्धं यशस्विनि ॥ १८ ॥ तस्मिन्स्थाने हरिः साक्षात्प्रत्यक्षेण तु संस्थितः ॥ लिंगैश्चतुर्भिः संयुक्तो ज्ञायते न च केनचित् ॥ १९ ॥ मोक्षार्थं नैष्ठिकैर्वर्णैर्व्रतैश्चैव तु यत्फलम् ॥ तत्फलं समवाप्नोति भल्लुकातीर्थदर्शनात् ॥ २० ॥ गोचर्ममात्रं तत्स्थानं समंतात्परिमण्डलम् ॥ न हि कश्चिद्विजानाति विना शास्त्रेण भामिनि ॥ २१ ॥ विषुवं वहते तत्र नृणामद्यापि पार्वति ॥ पंचलिंगानि तत्रैव पंचवक्राणि कानि चित् ॥ २२ ॥ कुक्कुटांडकमानानि महास्थूलानि कानिचित् ॥ सर्पेण वेष्टितान्येव चिह्नितानि त्रिशूलिभिः ॥ २३ ॥ तेषां दर्शनमात्रेण कोटिलिंगार्चनं फलम् ॥ तस्मादिदं महाक्षेत्रं ब्रह्माद्यैः सेव्यते सदा ॥ २४ ॥ तिश्रुमद्भिश्च विप्रेंद्रैः संसिद्धैश्च तपस्विभिः ॥ प्रतिमासं तथाष्टम्यां प्रतिमासं चतुर्दशीम् ॥ २५ ॥ शशिभानूपरागे वा कार्त्तिक्यां तु विशेषतः ॥ प्रभासस्थानि लिंगानि प्रपूज्यन्ते वरानने ॥ २६ ॥ संनिहत्यां कुरुक्षेत्रे सर्वस्तीर्थायुतैः सह ॥ पुष्करं नैमिषं चैव प्रयागं संपृथूदकम् ॥२७॥ षष्टितीर्थसहस्राणि षष्टिकोटिशतानि च ॥ माघ्यांमाघ्यां समेष्यंति सरस्वत्यब्धिसंगमे ॥ २८ ॥ स्मरणात्तस्य तीर्थस्य नामसंकीर्तनादपि ॥ मृत्युकाल[2]संवाद्वापि पापं त्यक्ष्यंति सुव्रते ॥ २९ ॥ आनर्त्तसारं सौम्यं च तथा भुवनभूषणम् ॥ दिव्यं पांचनदं पुण्यमादिगुह्यं महोदयम् ॥ ३० ॥ सिद्ध

१ तत्र देवा लयं यांति हरिर्जन्मनिजन्मनि—इ० पा०  २ मृत्युकालसंभवात्—तस्य तीर्थस्य स्मरणात्—अपि च तस्य तीर्थस्य नामसंकीर्तनात्—च—हे सुव्रते पापं त्यक्ष्यंति—इति योजना ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



रत्नाकरं नाम समुद्रावरणं तथा ॥ धर्माकारं कलाधारं शिवगर्भगृहं तथा ॥३१॥ सर्वदेवनिवेशं च सर्वपातकनाशनम् ॥ अस्य क्षेत्रस्य नामानि कल्पे
कल्पे पृथक्प्रिये ॥ ३२ ॥ आयामादीनि जानीहि गुह्यानि सुरसुन्दरि ॥ आद्ये कल्पे पुरा देवि प्रमोदनमिति स्मृतम् ॥ ३३ ॥ नन्दनं परित
स्तस्य तस्यापि परतः शिवम् ॥ शिवात्परतरं चोग्रं भद्रिकं परतः पुनः ॥ ३४ ॥ समिंधनं परं तस्मात्कामदं च ततः परम् ॥ सिद्धिदं चापि
धर्मज्ञं वैश्वरूपं च मुक्तिदम् ॥ ३५ ॥ तथा श्रीपद्मनाभं तु श्रीवत्सं तु महाप्रभम् ॥ तथा च पापसंहारं सर्वकामप्रदं तथा ॥ ३६ ॥ मोक्षमार्गं वरा
रोहे तथा देवि सुदर्शनम् ॥ धर्मगर्भं तु धर्माणां प्रभासं पापनाशनम् ॥ अतः परं भवन्तीह उत्पलावर्त्तिकानि च ॥ ३७ ॥ क्षेत्रस्य मध्ये यद्देवि
मम गर्भगृहं स्मृतम् ॥ तस्य नामानि ते देवि कथितान्यनुपूर्वशः ॥ ३८ ॥ श्रुत्वा नामान्यशेषाणि क्षेत्रमाहात्म्यमेव च ॥ तेषां तु वांछिता सिद्धि
र्भविष्यति न संशयः ॥ ३९ ॥ एतत्कीर्त्तयमानस्य त्रिकालं तु महोदयम् ॥ संध्याकालांतरं पापमहोरात्रं विनश्यति ॥ ४० ॥ अपि वै दांभिकाश्चैव
ये वसंत्यल्पबुद्धयः ॥ मूढा जीवनिका विप्रास्तेऽपि यांति मृता दिवम् ॥ ४१ ॥ अस्य क्षेत्रस्य मध्ये तु रवियोजनमध्यतः ॥ उपक्षेत्राणि देवेशि
संत्यन्यानि[1] सहस्रशः ॥ ४२ ॥ कानिचित्पद्मरूपाणि यवाकाराणि कानिचित् ॥ षट्कोणानि त्रिकोणानि दण्डाकाराणि कानिचित् ॥ ४३ ॥
चंद्रबिंबार्द्धभेदानि चतुरस्रप्रभेदतः ॥ ब्रह्मादिदैवतानीशे क्षेत्रमध्ये स्थितानि तु ॥ ४४ ॥ कानिचिद्योजनार्द्धानि तदर्धार्धानि कानिचित् ॥ निवर्त्त
नप्रमाणेन दण्डमानेन कानिचित् ॥४५॥ गोचर्ममानमध्यानि कानिचिद्धनुषांतरम् ॥ यज्ञोपवीतमात्राणि प्रभासे संति कोटिशः ॥ ४६ ॥ अंगु
ल्यष्टम भागोऽपि नभोस्ति कमलेक्षणे ॥ न संति यस्मिंस्तीर्थानि दिव्यानि च नभस्तले ॥ ४७ ॥ प्रभासक्षेत्रमासाद्य तिष्ठंति प्रलयादनु ॥
केदारे चैव यल्लिंगं यच्च देवि महालये ॥ ४८ ॥ मध्यमेश्वरसंस्थं च तथा पाशुपतेश्वरम् ॥ शंकुकर्णेश्वरं चैव भद्रेश्वरमथापि च ॥ ४९ ॥ सोमे
श्वरमथैकाग्रं कालेश्वरमजेश्वरम् ॥ भैरवेश्वरमीशानं तथा कायावरोहणम् ॥ ५० ॥ चापटेश्वरकं पुण्यं तथा बदरिकाश्रमम् ॥ रुद्रकोटिर्महाकोटि
स्तथा श्रीपर्वतं शुभम् ॥५१॥ कपाली चैव देवेशः करवीरं तथा पुनः ॥ ओंकारं परमं पुण्यं वशिष्ठाश्रममेव च ॥ यत्र कोटिः स्मृता देवि रुद्राणां
कामरूपिणाम् ॥ ५२ ॥ यानि चान्यानि स्थानानि पुण्यानि मम भूतले ॥ प्रयागं पुरतः कृत्वा प्रभासे निवसंति च ॥ ५३ ॥ उत्तरे रविपुत्री तु
दक्षिणे सागरं स्मृतम् ॥ दक्षिणोत्तरमानोऽयं क्षेत्रस्यास्य प्रकीर्त्तितः ॥ ५४ ॥ रुक्मिण्याः पूर्वतश्चैव तप्ततोयाच्च पश्चिमे ॥ पूर्वपश्चिममानोऽयं प्रभा

१ संत्यद्यापि—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सस्य प्रकीर्त्तितः ॥ ५५ ॥ एतदन्तरमासाद्य तीर्थानि सुरसुन्दरि ॥ पातालादिकटाहांतं तानि तत्र वसंति वै ॥ ५६ ॥ एवं ज्ञात्वा महादेवि सर्वदे
वमयो हरिः ॥ प्रभासक्षेत्रमासाद्य तत्याज स्वं कलेवरम् ॥ ५७ ॥ दिव्यं ममेदं चरितं हि रौद्रं श्रोष्यंति ये पर्वसु वा सदा वा ॥ ते चापि यास्यंति
मम प्रसादात्त्रिविष्टपं पुण्यजनाधिवासम् ॥ ५८ ॥ इति कथितमशेषमेव चित्रं चरितमिदं तव देवि पुण्ययुक्तम् ॥ इतरमपि तवातिवल्लभं यद्वद कथ
यामि महोदयं मुनीनाम् ॥ ५९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये प्रभास
क्षेत्रस्थतीर्थक्षेत्रमाहात्म्यद्वारा प्रभासक्षेत्रस्य सर्वक्षेत्रोत्तमत्ववर्णनंनाम दशमोऽध्यायः ॥१०॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ इति प्रोक्ता तदा देवि
विस्मयोत्फुल्ललोचना ॥ रोमांचकञ्चुका सुभ्रूः पुनः पप्रच्छ भूसुराः ॥१॥ ॥ देव्युवाच ॥ ॥ धन्याऽहं कृतपुण्याऽहं तपः सुचरितं मया ॥ यदेष क्षेत्र
महिमा महादेवान्मया श्रुतः ॥२॥ भगवन्देवदेवेश संसारार्णवतारक ॥ पृष्टं तु यन्मया पूर्वं तत्सर्वं कथितं हर ॥ ३ ॥ पुनश्च देवदेवेश त्वद्वाक्यामृतरं
जिता ॥ न तृप्तिमधिगच्छामि देवदेव महेश्वर ॥ ४ ॥ किंचित्प्रष्टुमनाश्चास्मि प्रभासक्षेत्रविस्तरम् ॥ तन्मे कथय कांमेश[1] दयां कृत्वा जगत्प्रभो ॥
॥ ५ ॥ ॥ ईश्वर उवाच ॥ ॥ पृथिव्या मध्यगर्भस्थं जंबूद्वीपमिति स्मृतम् ॥ तच्च वै नवधा भिन्नं वर्षभेदेन सुन्दरि॥६॥ तस्याद्यं भारतं वर्षं तच्चापि
नवधा स्मृतम् ॥ नवयोजनसाहस्रं दक्षिणोत्तरमानतः ॥ ७ ॥ अशीतिश्च सहस्राणि पूर्वपश्चायतं स्मृतम् ॥ उत्तरे हिमवानस्ति क्षीरोदो दक्षिणे
स्मृतः ॥ ८ ॥ एतस्मिन्नंतरे देवि भारतं क्षेत्रमुत्तमम् ॥ कृतं त्रेता द्वापरं च तिष्यं[2] युगचतुष्टयम् ॥ ९ ॥ अत्रैवैषा युगावस्था चतुर्वर्णश्च वै जनः ॥
चत्वारि त्रीणि च द्वे च तथैवैकं शरच्छतम् ॥ १० ॥ जीवन्त्यत्र नरा देवि कृतत्रेतादिषु क्रमात् ॥ यदेतत्पार्थिवं पद्मं चतुष्पत्रं मयोदितम्[3] ॥ ११ ॥
वर्षाणि भारताद्यानि पत्राण्यस्य चतुर्द्दिशम्॥ भारतं केतुमालं च कुरु भद्राश्वमेव च ॥१२॥ भारतं नाम यद्वर्षं दाक्षिणात्यं मयोदितम्॥ दक्षिणापरतो
यस्य पूर्वेण च महोदधिः ॥ हिमवानुत्तरेणास्य कार्मुकस्य यथा गुणः ॥ १३॥ तदेतद्भारतं वर्षं सर्वबीजं[4] वरानने ॥ तत्कर्मभूमिर्नान्यत्र संप्राप्तिः
पुण्यपापयोः ॥ १४ ॥ देवानामपि देवेशि सदैवैष मनोरथः ॥ अपि मानुष्यमाप्स्यामो भारते प्रत्युत क्षितौ ॥ १५ ॥ भद्राश्वेऽश्वशिरा विष्णुर्भारते
कूर्मसंस्थितः ॥ वराहः केतुमाले च मत्स्यरूपस्तथोत्तरे ॥ १६ ॥ तेषु नक्षत्रविन्यासा[5]द्विषयाः समवस्थिताः ॥ चतुर्ष्वपि महादेवि विग्रहो नव

१ कामेश–कांत–पते–इत्यर्थः । २ तिष्यम्–कलिः–इत्यर्थः । कलिः–इ० पा० । ३ उदितम्–उक्तम्–इत्यर्थः । ईरितम्–इ० पा० । ४ सर्वजीवम्–इ० पा० । ५ तेषु नक्षत्रमासाद्य विषयाः समव
स्थिताः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





पादकः ॥ १७ ॥ भारतो यो महादेवि कूर्मरूपेणसंस्थितः ॥ नक्षत्रग्रहविन्यासं तस्य ते कथयाम्यहम् ॥ १८ ॥ प्राङ्मुखो भगवान्देवो कूर्मरूपी व्यवस्थितः ॥ आक्रम्य भारतं वर्षं नवभेदमिदं प्रिये ॥ १९ ॥ नवधा संस्थितस्यास्य नक्षत्राणि निबोध मे ॥ कृत्तिका रोहिणी सौम्यं तृतीयं कूर्मपृष्ठिगम् ॥ २० ॥ रौद्रं पुनर्वसुः पुष्यं नक्षत्रत्रितयं मुखे ॥ आश्लेषाख्यं तथा पैत्रं फाल्गुनी प्रथमा प्रिये ॥ २१ ॥ नक्षत्रत्रितयं पादमाश्रितं पूर्वदक्षिणम् ॥ फाल्गुनी चोत्तरा हस्तं चित्रा चर्क्षत्रयं स्मृतम् ॥ २२ ॥ कूर्मस्य दक्षिणे कुक्षौ चर्क्षपादं तथाऽपरम् ॥ स्वाती विशाखा मैत्रं च नैर्ऋते त्रितयं स्मृतम् ॥ २३ ॥ ऐंद्रं मूलं तथाषाढा पृष्ठे तु त्रितयं स्मृतम् ॥ आषाढा श्रवणं चैव धनिष्ठा चात्र शब्दिता ॥ २४ ॥ नक्षत्रत्रितयं पादे वायव्ये तु यशस्विनि ॥ वारुणं चैव नक्षत्रं तथा प्रोष्ठपदाद्वयम् ॥ २५ ॥ कूर्मस्य वामकुक्षौ तु त्रितयं संस्थितं प्रिये ॥ रेवती चाश्विदैवत्यं याम्यं चर्क्षमिति त्रयम् ॥ ईशपादे समाख्यातं शुभाशुभफलं शृणु ॥ २६ ॥ यस्यर्क्षस्य पतिर्यो वै ग्रहस्तद्धैन्यतो[1] भयम् ॥ तद्देशस्य महादेवि तथोत्कर्षे शुभागमः ॥ २७ ॥ एष कूर्मो मयाख्यातो भारते भगवानिह ॥ नारायणो ह्यचिंत्यात्मा यत्र सर्वं प्रतिष्ठितम् ॥ २८ ॥ मेषवृषौ हृदो मध्ये मुखे च मिथुनादिकौ[2] ॥ प्राग्दक्षिणे तथा पादे कर्कसिंहौ व्यवस्थितौ ॥ २९ ॥ सिंहकन्यातुलाश्चैव कुक्षौ राशित्रयं स्मृतम् ॥ घटोऽथ वृश्चिकाश्चोभौ पादे दक्षिणपश्चिमे ॥ ३० ॥ पुच्छे तु वृश्चिकश्चैव सधनुश्च व्यवस्थितः ॥ वायव्ये वामपादे च धनुर्ग्राहादिकं त्रयम् ॥ ३१ ॥ कुम्भ मीनौ तथा चास्य उत्तरां कुक्षिमाश्रितौ ॥ मीनमेषौ महादेवि पादे पूर्वोत्तरे स्थितौ ॥ ३२ ॥ कूर्म्मदेशांस्तथर्क्षाणि देशेष्वेतेषु वै प्रिये ॥ राशयश्च तथर्क्षेषु ग्रहा राशिव्यवस्थिताः ॥ ३३ ॥ तस्माद्ग्रहर्क्षपीडासु देशपीडां विनिर्दिशेत् ॥ तत्र स्नानं प्रकुर्वंति दानं होमादिकं तथा ॥ ३४ ॥ स एष वैष्णवः पादो देवि मध्ये ग्रहोऽस्य यः ॥ नारायणाख्योऽचिंत्यात्मा कारणं जगतः प्रभुः ॥ ३५ ॥ भौमशुक्रबुधेंद्वर्कबुधशुक्रमहीसुताः ॥ गुरुमंदासुराचार्या मेषादीनामधीश्वराः ॥ ३६ ॥ एवंविधो महादेवि कूर्मरूपी जनार्द्दनः ॥ तस्य नैर्ऋतपादे तु सौराष्ट्र इति विश्रुतः ॥ ३७ ॥ स चैवं नवधा भिन्नः पुरभेदेन सुंदरि ॥ तस्य यो नवमो भागः सागरस्य च सन्निधौ ॥ ३८ ॥ प्रभास इति विख्यातो मम देवि प्रियः सदा ॥ योजनानां दशद्वे च विस्तीर्णः परिमण्डलम् ॥ ३९ ॥ मध्येस्य पीठिका प्रोक्ता पंचयोजनविस्तृता ॥ तन्मध्ये मद्गृहं देवि तिष्ठत्युदधिसंनिधौ ॥ ॥ ४० ॥ तस्य मध्ये महादेवि लिंगरूपो वसाम्यहम् ॥ ४१ ॥ कृतस्मरात्पश्चिमतो धनुषां च शतत्रये ॥ वसामि तत्र देवेशि त्वया सह



१ हैन्यतः—हीनत्वात्—हीनत्वे सति—इत्यर्थः । २ मिथुनादिकौ—वृषमिथुनौ—इत्यर्थः । प्रकरणात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वरानने ॥ ४२ ॥ तन्मे स्थानं महादेवि कैलासादपि वल्लभम् ॥ गोचर्ममात्रं तत्रापि महागोप्यं वरानने ॥ ४३ ॥ अकथ्यं देवदेवेशि तव स्नेहात्प्रकाशितम् ॥ एतत्प्राभासिकं क्षेत्रं प्रभया दीपितं मम ॥ ४४ ॥ तेन प्रभासमित्युक्तमादिकल्पे वरानने ॥ द्वितीये तु प्रभा लब्धा सर्वैर्देवैः सवासवैः ॥ ४५ ॥ मम प्रभाभा देवेशि तेन प्राभासिकं स्मृतम् ॥ प्रभाववन्तो देवेशि यत्र संति महासुराः ॥ ४६ ॥ अथवा तेन लोकेषु प्रभासमिति कीर्त्यते ॥ प्रथमं भासते देवि सर्वेषां भुवि तेजसाम् ॥ तीर्थानामादितीर्थं यत्प्रभासं तेन कीर्त्तितम् ॥ ॥ ४७ ॥ प्रकृष्टं भानुरथवा भासितो विश्वकर्मणा ॥ यत्र साक्षात्प्रभापातो जातः प्राभासिकं ततः ॥ ४८ ॥ अथवा दक्षसंशप्तेनेन्दुना निष्प्रभेण च ॥ तत्र देवि प्रभा लब्धा तेन प्राभासिकं स्मृतम् ॥ प्रोद्दध्रे भारती देवी द्यौर्वाग्निं वडवानलम् ॥ ४९ ॥ अथवा तेन देवेशि प्रभासमिति कीर्त्यते ॥ प्रकृष्टा भारती ब्राह्मी विप्रोक्ता श्रूयतेऽध्वनि ॥ सदा यत्र महादेवि प्रभासं तेन कीर्तितम् ॥ ५० ॥ प्रोल्लसद्वीचिभिर्भाति सर्वदा सागरः प्रिये ॥ तेन प्रभासनामेति त्रिषु लोकेषु विश्रुतम् ॥ ५१ ॥ प्रत्यक्षं भास्करो यत्र सदा तिष्ठति भामिनि ॥ तेन प्रभासनामेति प्रसिद्धिमगमत्क्षितौ ॥ ५२ ॥ प्रकृष्टं भाविनां सर्वं कामं तत्र ददाम्यहम् ॥ तेन प्रभासनामेति तीर्थं त्रैलोक्यविश्रुतम् ॥ ५३ ॥ कल्पभेदेन नामानि तथैव सुरसुन्दरि ॥ निरुक्तभेदैर्बहुधा भिद्यंते[1] कारणैः प्रिये ॥ प्रभासमिति यन्नाम दातव्यं निश्चलं स्मृतम् ॥ ५४ ॥ अव्यक्तत्वे संस्थितं देवि विष्णोराद्यकलेवरे ॥ इति ते कथितं देवि संक्षेपात्क्षेत्रकारणम् ॥ ५५ ॥ पुनस्ते कथयाम्यद्य यत्पृच्छसि वरानने ॥ तद्ब्रूहि शीघ्रं कल्याणि यत्ते मनसि वर्तते ॥ ५६ ॥ ॥ देव्युवाच ॥ ॥ अस्मिन्कल्पे यथा जातं क्षेत्रं प्राभासिकं हर ॥ तन्मे विस्तरतो ब्रूहि उत्पत्तिं कारणं तथा ॥ ५७ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि यथावत्क्षेत्रकारणम् ॥ यच्छ्रुत्वा मानवो भक्त्या मुच्यते सर्वपातकैः ॥ ५८ ॥ आदिक्षेत्रस्य माहात्म्यं रहस्यं पापनाशनम् ॥ कथयिष्ये वरारोहे तव स्नेहेन भामिनि ॥ ५९ ॥ अस्मिन्कल्पे तु यद्देवि आदावेव वरानने ॥ स्वायंभुवे मनौ तत्र ब्रह्मणः सृजतः पुरा ॥ ६० ॥ दक्षिणाल्लोचनाज्जातः पूर्वं सूर्य इति प्रिये ॥ ततः कालान्तरे तस्य भार्ये द्वे च बभूवतुः ॥ ६१ ॥ तयोस्तु राज्ञी द्यौर्ज्ञेया निक्षुभा[2] पृथिवी स्मृता ॥ सौम्यमासस्य[3] सप्तम्यां द्यौः सूर्येण च युज्यते ॥ ६२ ॥ माघमासे तु सप्तम्यां मह्या सह भवेद्रविः॥

१ विद्यंते—इ० पा० । २ निक्षुधा—इ० पा० । अग्रे च निक्षुधाशब्दस्य निरुक्तिः कृताऽस्ति परं तु निक्षुभाशब्द एव सर्वत्र दृश्यते अतः—'निक्षुभा' एव—निक्षुधाशब्देनाप्युच्यते योगरूढित्वेनेति बोध्यम् । क्षुधक्षुभोः प्रायोऽर्थसामीप्यात् । ३ सौम्यमासस्य—मार्गशीर्षमासस्य—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

भूश्चादित्यश्च भगवान्गच्छते संगमं तदा ॥ ६३ ॥ ऋतुस्नाता मही तत्र गर्भं गृह्णाति भास्करात् ॥ द्यौर्जलं सूयते गर्भं वर्षास्वास्विह भूतले ॥६४॥
ततस्त्रैलोक्यवृत्त्यर्थं मही सस्यानि सूयते ॥ सस्योपयोगात्संहृष्टा जुह्वत्याहुतिभिर्द्विजाः ॥ ६५ ॥ स्वाहाकारस्वधाकारैर्यजंति पितृदेवताः ॥
निःक्षुधः कुरुते यस्माद्भूमौषधिसुधाऽमृतैः ॥ ६६ ॥ मर्त्यान्पितॄंश्च देवांश्च तेन भूर्निक्षुभा स्मृता ॥ यथा राज्ञी च संजाता यस्य चेयं सुता मता ॥
॥ ६७ ॥ अपत्यानि च यान्यस्यास्तानि वक्ष्याम्यशेषतः ॥ मरीचिर्ब्रह्मणः पुत्रो मारीचः कश्यपः स्मृतः ॥ ६८ ॥ तस्माद्धिरण्यकशिपुः
प्रह्लादस्तस्य चात्मजः ॥ प्रह्लादस्य सुतो नाम्ना विरोचन इति स्मृतः ॥ ६९ ॥ विरोचनस्य भगिनी संज्ञाया जननी तु सा ॥ हिरण्यकशि
पोः पौत्री दितेः पुत्रस्य[1] सा स्मृता ॥ ७० ॥ सा विश्वकर्मणः पत्नी प्राह्लादी प्रोच्यते बुधैः ॥ ७१ ॥ अथ नाम्नातिरूपेति मरीचिदुहिता
शुभा ॥ पत्नी ह्यंगिरसः सा तु जननी च बृहस्पतेः ॥ ७२ ॥ बृहस्पतेस्तु भगिनी विश्रुता ब्रह्मवादिनी ॥ प्रभासस्य तु सा पत्नी वसूनामष्ट
मस्य वै ॥ ७३ ॥ प्रसूता विश्वकर्माणं सर्वशिल्पवतां वरम् ॥ स चैव नाम्ना त्वष्टा तु पुनस्त्रिदशवार्द्धकिः ॥ ७४ ॥ देवाचार्यस्य
तस्येयं दुहिता विश्वकर्मणः ॥ सुरेणुरिति विख्याता त्रिषु लोकेषु भामिनी ॥ ७५ ॥ प्रह्लादपुत्री या प्रोक्ता भार्या वष्टुस्तु सा स्मृता ॥
तस्यां स जनयामास पुत्रीस्ता लोकमातरः ॥ ७६ ॥ राज्ञी संज्ञा च द्यौस्त्वष्ट्री प्रभा सैव विभाव्यते ॥ तस्यास्तु वलया छाया निक्षुभा सा
महीयसी ॥ ७७ ॥ सा तु भार्या भगवती मार्तंडस्य महात्मनः ॥ साध्वी पतिव्रता देवी रूपयौवनशालिनी ॥ ७८ ॥ न तु तां नररूपेण भार्यां
भजति वै पुरा ॥ आदित्यस्येह तत्तत्वं महता स्वेन तेजसा ॥ ७९ ॥ गात्रेष्वप्रतिरूपेषु मासिकांतमिवाभवत् ॥ संज्ञा च रविणा दृष्टा निमी
लयति लोचने ॥ यतस्ततः सरोषोऽर्कः संज्ञां वचनमब्रवीत् ॥ ८० ॥ ॥ रविरुवाच ॥ ॥ मयि दृष्टे सदा यस्मात्कुरुषे नेत्रसंक्षयम्[2] ॥ तस्मा
ज्जनिष्यसे मूढे प्रजासंयमनं यमम् ॥ ८१ ॥ ॥ ईश्वर उवाच ॥ ॥ ततः सा चपलां दृष्टिं देवी चक्रे भयाकुला ॥ विलोलितदृशं दृष्ट्वा पुन
राह च तां रविः ॥ ८२ ॥ ॥ रविरुवाच ॥ ॥ यस्माद्विलोलिता दृष्टिर्मयि दृष्टे त्वया पुनः ॥ तस्माद्विलोलां तनयां नदीं त्वं प्रसविष्यसि ॥
॥ ८३ ॥ ॥ ईश्वर उवाच ॥ ॥ ततस्तस्यास्तु संजज्ञे भर्तृशापेन तेन वै ॥ यमश्च यमुना चेयं प्रख्याता सुमहानदी ॥ तृतीयं च सुतं जज्ञे ॥ १९ ॥
श्राद्धदेवं मनुं शुभम् ॥ ८४ ॥ सापि संज्ञा रवेस्तेजो गोलाकारं महाप्रभम् ॥ असहन्ती च सा चित्ते चिन्तयामास वै तदा ॥ ८५ ॥

१ दितेः पुत्रस्य हिरण्यकशिपोः सा पौत्री—इति योजना । २ नेत्रसंक्षयम्—नेत्रनिमीलनम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किं करोमि क्व यास्यामि क्व गतायाश्च निर्वृतिः ॥ भवेन्मम कथं भर्ता कोपमर्कश्च नेष्यति ॥ ८६ ॥ इति संचिन्त्य बहुधा प्रजापतिसुता तदा ॥ बहु मेने महाभागा पितृसंश्रयमेव च ॥ ८७ ॥ ततः पितृगृहं गन्तुं कृतबुद्धिर्यशस्विनी ॥ छायामयीमात्मतनुं प्रत्यंगमिव निर्मिताम् ॥ ८८ ॥ सम्मुखं प्रेक्ष्य तां देवीं स्वां छायां वाक्यमब्रवीत् ॥ ८९ ॥ ॥ संज्ञोवाच ॥ ॥ अहं यास्यामि भद्रं ते स्वकं च भवनं पितुः ॥ निर्विकारं त्वया त्वत्र स्थेयं मच्छासनाच्छुभे ॥ ९० ॥ इमौ च बालकौ मेह्यं कन्या च वरवर्णिनी ॥ संभाव्या नैव चाख्येयमिदं भगवते त्वया ॥ ९१ ॥ पृष्टयापि न वाच्यं ते तथैतद्गमनं मम ॥ तेनास्मि नामसंज्ञेति वाच्यसे तत्प्रतिष्ठया ॥ ९२ ॥ ॥ छायोवाच ॥ ॥ आ केशग्रहणाद्देवि आ शापान्नैव कर्हिचित् ॥ आख्यास्यामि मतं तुभ्यं गम्यतां यत्र वांछितम् ॥ ९३ ॥ ॥ ईश्वर उवाच ॥ ॥ इत्युक्ता सा तदा देवी जगाम भवनं पितुः ॥ ददर्श तत्र त्वष्टारं तपसा धूतकल्मषम् ॥ ९४ ॥ बहुमानाच्च तेनापि पूजिता विश्वकर्मणा ॥ वर्षाणां च सहस्रं तु वसमाना पितुर्गृहे ॥ तस्थौ पितृगृहे सा ॥ किंचित्कालमनिंदिता ॥ ९५ ॥ ततस्तां प्राह चार्वंगीं पिता नातिचिरोषिताम् ॥ स्तुत्वा तु तनयां प्रेम्णा बहुमानपुरःसरम् ॥ ९६ ॥ ॥ विश्वकर्मोवाच ॥ ॥ त्वामेव पश्यतो वत्से दिनानि सुबहून्यपि ॥ मुहूर्तार्द्धसमानि स्युः किं तु धर्मो विलुप्यते ॥ ९७ ॥ बांधवेषु चिरं वासो नारीणां न यशस्करः ॥ मनोरथा बांधवानां नार्या भर्तृगृहे स्थितिः ॥ ९८ ॥ सा त्वं त्रैलोक्यनाथेन भर्त्रा सूर्येण संयुता ॥ पितुर्गृहे चिरं कालं वस्तुं नार्हसि पुत्रिके ॥ ९९ ॥ तत्त्वं भर्तृगृहं गच्छ दृष्टोऽहं पूजितासि मे ॥ पुनरागमनं कार्यं दर्शनाय शुचिस्मिते ॥ १०० ॥ ॥ ईश्वर उवाच ॥ ॥ इत्युक्ता सा तदा पित्रा गच्छगच्छेति सा पुनः ॥ संपूजयित्वा पितरं वडवारूपधारिणी ॥ १०१ ॥ मेरोरुत्तरतस्तत्र वर्षं यद्धनुषाकृति ॥ उत्तराः कुरवो लोके प्रख्याता ये यशस्विनि ॥ १०२ ॥ तत्र तेपे तपः साध्वी निराहाराऽश्वरूपिणी ॥ एतस्मिन्नंतरे देवि तस्याश्छाया विवस्वतः ॥ १०३ ॥ समीपस्था तदा देवी संज्ञाया वाक्यतत्परा ॥ तस्यां च भगवान्सूर्यो द्वितीयायां दिवस्पतिः ॥ १०४ ॥ संज्ञेयमिति मन्वानो रूपौदार्येण मोहितः ॥ तस्यां च जनयामास द्वौ पुत्रौ कन्यकां तथा ॥ १०५ ॥ पूर्वं यस्तु

१ तदा--इ० पा० । २ मह्यम्—मम—इत्यर्थः । ३ तेनास्मि नामसंज्ञेति वाच्यसे तत्प्रतिष्ठया—तेन सूर्येण—अस्मि अहं—यदा संज्ञा इति नाम्ना आह्वयिष्ये—तदा त्वम् अहं संज्ञैव अस्मीति मत्वा वाच्यसे वाच्या भव—मदीयनामप्रतिष्ठयैव त्वया सर्वो व्यवहारः कर्तव्यः । सूर्यं प्रतीयं संज्ञाया भिन्ना काचिदस्तीति किंचिदपि न प्रतिभासितव्यम्—इति निष्कर्षार्थः । ४ मतं तुभ्यम्—तव मतम्—इत्यर्थः । गतां तुभ्यम्—इति पाठान्तरम्—तदा—त्वां गताम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



मनोस्तुल्यः सावर्णिस्तेन सोऽभवत् ॥ यः सूर्यात्प्रथमं जातः पुत्रयोः सुरसुन्दरि ॥ १०६ ॥ द्वितीयो योऽभवच्चान्यः स ग्रहोऽभूच्छनैश्चरः ॥ कन्या
ऽभूत्तपती या तां वव्रे संवरणो नृपः ॥ १०७ ॥ तापीनाम नदी चेयं विंध्यमूलाद्विनिःसृता ॥ नित्यं पुण्यजला स्नाने पश्चिमोदधिगामिनी ॥१०८॥
अन्या चैव तथा भद्रा जाता पुत्री महाप्रभा ॥ संज्ञा तु पार्थिवी छाया आत्मजानां यथाकरोत् ॥ १०९ ॥ स्नेहं न पूर्वजातानां तथा कृतवती सती ॥
लालनाद्युपभोगेषु विशेषमनुवासरम् ॥११०॥ यथा स्वेष्वनुवर्तेत न तथान्येषु भामिनी ॥ मनुस्तु क्षांतवांस्तस्या भविष्यो यो हि पार्वति ॥१११॥
मेरौ तिष्ठति सोऽद्यापि तपः कुर्वन्वरानने ॥ सर्वं तत्क्षांतवान्मातुर्यमस्तस्या न चक्षमे ॥ ११२ ॥ बहुशो याचमानस्तु[1] छायया ऽतीव कोपितः ॥
स[2] वै कोपाच्च बाल्याच्च भाविनोऽर्थस्य वै बलात् ॥ ११३ ॥ ताडनाय ततः कोपात्पादस्तेन समुद्यतः ॥ तथा पुनः क्षांतिमता न तु देहे निपा
तितः ॥ ११४ ॥ पदा संतर्जयामास छायां संज्ञासुतो यमः ॥ ११५ ॥ तं शशाप ततश्छाया क्रुद्धा सा पार्थिवी भृशम् ॥ किंचित्प्रस्फुरमाणोष्ठी
विचलत्पाणिपल्लवा ॥ ११६ ॥ ॥ छायोवाच ॥ ॥ पितुः पत्नीममर्याद यन्मां तर्जयसे पदा ॥ भुवि तस्मादयं पादस्तवाद्यैव पतिष्यति॥ ११७ ॥
॥ ॥ ईश्वर उवाच ॥ ॥ यमस्तु तेन शापेन भृशं पीडितमानसः ॥ मनुना सह धर्मात्मा पित्रे सर्वं न्यवेदयत् ॥ ११८ ॥ ॥ यम उवाच ॥ ॥
तातैतन्महदाश्चर्यं न दृष्टमिह केनचित् ॥ माता वात्सल्यमुत्सृज्य शापं पुत्रे प्रयच्छति ॥११९॥ स्नेहेन तुल्यमस्मासु माताद्य नैव वर्त्तते ॥ विसृज्य
ज्यायसो यस्मात्कनीयःसु बुभूषति ॥ १२० ॥ तस्या मयोद्यतः पादो न तु देहे निपातितः ॥ बाल्याद्वा यदि वा मोहात्तद्भवान्क्षंतुमर्हति ॥१२१॥
शप्तोऽहं तात कोपेन तया सुत इति स्फुटम् ॥ अतो न मह्यं जननी सा भवेद्वदतां वर ॥ १२२ ॥ निर्गुणेष्वपि पुत्रेषु न माता निर्गुणा
भवेत् ॥ पादस्ते पततां पुत्र कथमेतत्तयोदितम् ॥ १२३ ॥ तव प्रसादाच्चरणो न पतेद्भगवन्यथा ॥ मातृशापादयं मेऽद्य तथा चिंतय
गोपते ॥ १२४ ॥ ॥ रविरुवाच ॥ ॥ असंशयं महत्पुत्र भविष्यत्यत्र कारणम् ॥ येन ते ह्याविशत्क्रोधो धर्मज्ञस्य महात्मनः ॥ १२५ ॥
सर्वेषामेव शापानां प्रतिघातोऽपि विद्यते ॥ न तु मात्राभिशप्तानां क्वचिच्छापनिवर्त्तनम् ॥ १२६ ॥ न युक्तमेतन्मिथ्या तु कर्तुं
मातुर्वचस्तव ॥ किंचित्ते संविधास्यामि पुत्रस्नेहादनुग्रहम् ॥ १२७ ॥ कृमयो मांसमादाय प्रयास्यंति महीतलम् ॥ कृतं तस्या वचः
सत्यं त्वं च त्रातो भविष्यसि ॥ १२८ ॥ ॥ ईश्वर उवाच ॥ ॥ आदित्यस्त्वब्रवीच्छायां किमर्थं तनयेषु वै ॥ तुल्येष्वप्यधिकः

१ याचमानः—भोजनादिवस्तु—इति शेषः । २ सः—इत्यस्य—पूर्वेण—'कोपितः' इत्यनेनान्वयः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्नेह एकत्र क्रियते त्वया ॥ १२९ ॥ नूनं न चैषां जननी त्वं संज्ञा क्वापि सा गता ॥ विकलेष्वप्यपत्येषु न माता शापदा भवेत् ॥ १३० ॥
अपि दोषसहस्राणि यदि पुत्रः समाचरेत् ॥ प्राणद्रोहेऽपि निरतो न माता पापमाचरेत् ॥ तस्मात्सत्यं मम ब्रूहि मा शापवशगा भव ॥ १३१ ॥
॥ ॥ ईश्वर उवाच ॥ ॥ तं शप्तुमुद्यतं दृष्ट्वा छायासंज्ञा दिनाधिपम् ॥ भयेन कंपती देवी यथावृत्तं महासती ॥ १३२ ॥ सा चाह तनया
त्वष्टुरहं संज्ञा विभावसो ॥ पत्नी तव त्वया पत्या पतियुक्ता दिवाकर ॥ १३३ ॥ इत्थं विवस्वतः सा तु बहुशः पृच्छतोऽन्यथा ॥ न वाचा भाषते
क्रुद्धः शापं दातुं समुद्यतः ॥ १३४ ॥ शापोद्यतकरं दृष्ट्वा सूर्यं छाया विवस्वतः ॥ कथयामास तत्सर्वं संज्ञायाः सुविचेष्टितम् ॥ १३५ ॥
तच्छ्रुत्वा भगवान्सूर्यो जगाम त्वष्टुरालयम् ॥ ततः संपूजयामास तदा त्रैलोक्यपूजितम् ॥ १३६ ॥ निर्दग्धुकामं रोषेण सान्त्वयामास पार्वति ॥
भास्वंतं निजया दीप्त्या निजगेहमुपागतम् ॥ क्व संज्ञेति च पृच्छन्तं कथयामास विश्वकृत् ॥ १३७ ॥ ॥ विश्वकर्म्मोवाच ॥ ॥ आगतैव
हि मे वेश्म भवता श्रूयतां वचः ॥ विख्यातं तेजसाऽऽढ्यं त इदं रूपं सुदुःसहम् ॥ १३८ ॥ असहन्ती ततः संज्ञा वने चरति वै तपः ॥ द्रक्ष्यसे
तां भवानद्य स्वभार्यां शुभचारिणीम् ॥ १३९ ॥ रूपार्थं चरतेऽरण्यं चरंती सुमहत्तपः ॥ मतं मे ब्रह्मणो वाक्याद्यदि ते देव रोचते ॥ रूपं निर्वर्त्तया
म्यद्य तव कांतं दिवस्पते ॥ १४० ॥ ॥ ईश्वर उवाच ॥ ॥ यतो हि भास्वतो रूपं प्रागासीत्परिमंडलम् ॥ ततस्तथेति तं प्राह त्वष्टारं भगवान्हरिः
॥ १४१ ॥ विश्वकर्मा त्वनुज्ञातः शाकद्वीपे विवस्वता ॥ भूमिमारोप्य तत्तेजः शातनायोपचक्रमे ॥१४२॥ भ्रमताऽशेषजगतामधिभूतेन भास्वता ॥
समुद्रा द्रविणोपेताश्चुक्षुभुश्च समन्ततः ॥ १४३ ॥ भ्रमता खलु देवेशि सचंद्रग्रहतारकम् ॥ अधोगति महाभागे बभूवाक्षिप्तमाकुलम् ॥१४४॥ विक्षि
प्तसलिलाः सर्वे बभूवुश्च तथा नदाः ॥ व्यभिद्यंत तथा शैलाः शीर्णसानुनिबंधनाः ॥ १४५ ॥ ध्रुवाधाराण्यशेषाणि धिष्ण्यानि वरवर्णिनि ॥ भ्राम्य
द्रश्मिनिबद्धानि अधो जग्मुः सहस्रशः ॥ १४६ ॥ व्यशीर्यंत महामेघा घोरारावविराविणः ॥ भास्वद्भ्रमणविभ्रांतभूम्याकाशमहीतलम् ॥ १४७ ॥
जगदाकुलमत्यर्थं तदाऽऽसीद्वरवर्णिनि ॥ त्रैलोक्ये सकले देवि भ्रममाणे महर्षयः॥देवाश्च ब्रह्मणा सार्द्धं भास्वंतमभितु ष्टुवुः॥१४८॥ ॥ देवा ऊचुः॥ ॥
आदिदेवोऽसि देवानां जातमेतत्स्वयं तव ॥ सर्गस्थित्यंतकालेषु त्रिधा भेदेन तिष्ठसि ॥ १४९ ॥ स्वस्ति तेऽस्तु जगन्नाथ घर्मवर्षहिमाकर ॥
इंद्र आगम्य तं देवं लिख्यमानमथास्तवीत् ॥ जय देव जगत्स्वामिञ्जय देव जगत्पते ॥१५०॥ ऋषयश्च ततः सप्त वसिष्ठात्रिपुरोगमाः॥तुष्टुवुर्विविधैः

१ ततः—इति शेषः। २ श्वशुरालयम्—इ० पा०। ३ तेजसाऽऽधिक्यम्—इ० पा०। ४ सुर्षयः—इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





स्तोत्रैः स्वस्ति स्वस्तीति वादिनः ॥ वेदोक्तिभिरथाग्र्याभिर्वालखिल्याश्च तुष्टुवुः ॥ १५१ ॥ ॥ वालखिल्या ऊचुः ॥ ॥ नमस्त ऋक्स्वरूपाय साम
रूपाय ते नमः ॥ यजुःस्वरूपरूपाय साम्नां धामग ते नमः ॥ १५२ ॥ ज्ञानैकरूपदेहाय निर्धूततमसे नमः ॥ शुद्धज्योतिःस्वरूपाय त्रिमूर्तायाम
लात्मने ॥ १५३ ॥ वरिष्ठाय वरेण्याय सर्वस्मै परमात्मने ॥ नमोऽखिलजगद्व्यापिरूपायानंतमूर्त्तये ॥ १५४ ॥ सर्वकारणभूताय निष्ठाय ज्ञान
चेतसाम् ॥ नमः सूर्यस्वरूपाय प्रकाशालक्ष्यरूपिणे ॥ १५५ ॥ भास्कराय नमस्तुभ्यं तथा दिनकृते नमः ॥ सर्वस्मै हेतवे चैव संध्याज्यो
त्स्नाकृते नमः ॥ १५६ ॥ त्वं सर्वमेतद्भगवञ्जगच्च भ्रमता त्वया ॥ भ्रमत्याविश्वमखिलं ब्रह्मांडं सचराचरम् ॥ त्वदंशुभिरिदं सर्वं स्पृष्टं वै
जायते शुचि ॥ १५७ ॥ क्रियते त्वत्करस्पर्शैर्जलादीनां पवित्रता ॥ १५८ ॥ होमदानादिको धर्मो नोपकाराय जायते ॥ तात यावन्न संयोगि
जगदेतत्त्वदंशुभिः ॥ १५९ ॥ ऋचस्ते सकला ह्येतास्तथा यानि यजूंषि च ॥ सकलानि च सामानि निपतंति त्वदंगतः ॥ १६० ॥ ऋङ्मयस्त्वं
जगन्नाथ त्वमेव च यजुर्मयः ॥ यतः साममयश्चैव ततो नाथ त्रयीमयः ॥ १६१ ॥ त्वमेव ब्रह्मणो रूपं परं चापरमेव च ॥ मूर्त्तामूर्त्तं तथा सूक्ष्मं
स्थूलं रूपेण संस्थितः ॥ १६२ ॥ निमेषकाष्ठादिमयः कालरूपक्षणात्मकः ॥ प्रसीद स्वेच्छया रूपं स्वं तेजः शमनं कुरु ॥ त्वं देव जगतां
हेतोर्दुःखं सहसि दुःसहम् ॥ १६३ ॥ त्वं नाथ मोक्षिणां मोक्षो ध्येयस्त्वं ध्यायतां वरः ॥ त्वं गतिः सर्वभूतानां कर्मकांडनिवर्तिनाम् ॥ १६४ ॥
शं प्रजाभ्योऽस्तु देवेश शन्नोऽस्तु जगतांपते ॥ १६५ ॥ त्वं धाता विसृजसि विश्वमेक एव त्वं पाता स्थितिकरणाय संप्रवृत्तः ॥ त्वय्यंते
लयमखिलं प्रयाति चैतत्त्वत्तोन्यो न हि तपनास्ति सर्वदाता ॥ १६६ ॥ त्वं ब्रह्मा हरिहरसंज्ञितस्त्वमिन्द्रो वित्तेशः पितृपितरंबुपः समीरः ॥
सोमोऽग्निर्गगनमहाधरादिरूपः किं न त्वं सकलमनोरथप्रदाता ॥ १६७ ॥ यज्ञैस्त्वामनुदिनमात्मकर्म्मसक्ताः स्तुन्वंतो विविधपदैर्द्विजा यजंति ॥
ध्यायन्तः सविनयचेतसो भवन्तं योगस्थाः परमपदं प्रयांति मर्त्त्याः ॥ १६८ ॥ तपसि पचसि विश्वं पासि भस्मीकरोषि प्रकटयसि मयूखैर्ह्ला
दयस्यंशुगर्भैः[1] ॥ सृजसि कमलजन्मा पालयस्यच्युताख्यः क्षपयसि च युगांते रुद्ररूपस्त्वमेकः ॥ १६९ ॥ ॥ ईश्वर उवाच ॥ ॥ लिखमान
स्ततो भानुं विश्वकर्मा प्रजापतिः ॥ उद्भूतपुलकः स्तोत्रमिदं चक्रे विवस्वतः ॥ १७० ॥ विवस्वते प्रणतजनानुकम्पिने महात्मने समजवसप्तस ॥ २१ ॥
प्तये ॥ सतेजसे कमलकुलालिबंधवे सदा तमःपटलपटावपाटिने ॥ १७१ ॥ पावनातिशयसर्वचक्षुषे नैककामविषयप्रदायिने ॥ भासुरामलमयूख

१ अम्बुगर्भैः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मालिने सर्वभूतहितकारिणे नमः ॥१७२॥ अजाय लोकत्रयभावनाय भूतात्मने गोपतये वृषाय ॥ नमो महाकारुणिकोत्तमाय सूर्याय वस्तुप्रभवालयाय ॥ १७३ ॥ विवस्वते ज्ञानभृतेऽन्तरात्मने जगत्प्रतिष्ठाय जगद्धितैषिणे ॥ स्वयंभुवे निर्मललोकचक्षुषे सुरोत्तमायामिततेजसे नमः ॥ १७४ ॥ क्षणमुदयाचलभालितार्चिः सुरगणगीतिगरिष्ठगीतः ॥ त्वमुत मयूखसहस्रवज्जगति विकासितपद्मनाभः ॥ १७५ ॥ तव तिमिरासवपानमदाद्भवति विलोहितविग्रहता ॥ मिहिरविभासतया सुतरां त्रिभुवनभावनमात्रपरः ॥ १७६ ॥ रथमारुह्य समावयवं रुचिरविकलितदिव्यहयम् ॥ सततमरिबले भगवंश्चरसि जगद्धितबद्धरसः ॥ १७७ ॥ अमृतमयेन रसेन समं विबुधपितनपि तर्प्पयसे ॥ अरिगणसूदन तेन तव प्रणतिमुपेत्य लिखामि वपुः ॥ १७८ ॥ शुभसमवर्णमयं र[1]चितं तव पदपांसुपवित्रतमम् ॥ नतजनवत्सल मां प्रणतं त्रिभुवनपावन पाहि रवे ॥ १७९ ॥ इति सकलजगत्प्रसूतिभूतं त्रिभुवनभावनधामहेतुमेकम् ॥ रविमखिलजगत्प्रदीपभूतं त्रिदशवरं प्रणतोऽस्मि देवदेवम् ॥ १८० ॥ ॥ ईश्वर उवाच ॥ ॥ हाहाहूहूश्च गन्धर्वौ नारदस्तुंबरुस्तथा ॥ उपगातुं समारब्धा गांधर्वकुशला रविम् ॥ १८१ ॥ षड्जमध्यमगांधारग्रामत्रयविशारदाः ॥ मूर्छनाभिश्च तानैश्च सुप्रयोगैः सुखप्रदम् ॥ १८२ ॥ सप्तस्वरविनिर्वृत्तं यतित्रयविभूषितम् ॥ स[2]प्तधातुसमायुक्तं षड्जाति त्रिगुणाश्रयम् ॥ १८३ ॥ चतुर्गीतसमायुक्तं चतुर्वर्णसमुत्थितम् ॥ चतुर्वर्णप्रतीकारं सप्तालंकारभूषितम् ॥ १८४ ॥ त्रिस्थानशुद्धं त्रिलयं सम्यक्कालव्यवस्थितम् ॥ चित्ते चि[3]त्ते च नृत्ये च रसेषु लयसंयुतम् ॥ १८५ ॥ चतुर्विंशद्गुणैर्युक्तं जगुर्गीतं च गायनाः ॥ विश्वाची च घृताची च उर्वश्यथ तिलोत्तमा ॥ १८६ ॥ मेनका सहजन्या च रंभा चाप्सरसां वरा ॥ चतुर्विधपदं तालं त्रिप्रकारं लयंत्रयम् ॥ १८७ ॥ यतित्रयं तथाऽऽतोद्यं नाट्यं चैव चतुर्विधम् ॥ ननृतुर्जगतामीशे लिख्यमाने विभावसौ ॥ १८८ ॥ भावान्भावविशारद्यः कुर्वन्त्यो विधिवद्बहून् ॥ देवदुन्दुभयः शंखाः शतशोऽथ सहस्रशः ॥ १८९ ॥ अनाहता महादेवि नेदिरे घननिस्वनाः ॥ गायद्भिश्चैव गंधर्वैर्नृत्यद्भिश्चाप्सरोगणैः ॥ १९० ॥ अवाद्यंत ततस्तत्र वेणुवीणादिझर्झराः ॥ पणवाः पुष्कराश्चैव मृदंगपटहानकाः ॥ १९१ ॥ तूर्यवादित्रघोषैश्च सर्वं कोलाहलीकृतम् ॥ ततः कृतांजलिपुटा भक्तिनम्रात्ममूर्त्तयः ॥ १९२ ॥ ततः कलकले तस्मिन्सर्वदेवसमागमे ॥ संवत्सरं भ्रमस्थस्य विश्वकर्मा रवेस्ततः ॥ १९३ ॥ तेजसः शातनं चक्रे स्तूयमानस्य दैवतैः ॥ देवं चक्रे समारोप्य भ्रामयामास सूत्रभृ[4]त् ॥१९४॥ मृत्पिंडवत्कुलालस्य संस्पृशन्क्षुरधारया ॥ प[5]तंगस्य स्तवं कुर्वन्विश्वकर्मा दिवस्पतेः॥ १९५ ॥ तेजसः षोडशं भागं

१ व्यथितम्—इ० पा० । २ चतुर्धातुसमायुक्तम्—इ० पा० । ३ वर्ते वित्तेपु नृत्ये च रणेपु लयसंयुतम्—इ० पा० । अस्यार्थो नावगम्यते । ४ सूत्रकृत्—इ० पा० । ५ परं तस्य—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



मण्डलस्थमधारयत् ॥ शातितं तस्य तत्तेजो यावत्पादौ वरानने ॥ १९६ ॥ यत्तस्य ऋङ्मयं तेजस्तत्प्रभासेऽपतत्प्रिये ॥ यजुर्मयेन देवेशि भाविता
द्यौर्महाप्रभोः ॥ १९७ ॥ स्वर्गं साममयेनापि भूर्भुवःस्वरिति स्थितम् ॥ ततस्तैस्तेजसो भागैर्दशभिः पंचभिस्तथा ॥ १९८ ॥ तेन वै निर्मितं चक्रं
विष्णोः शूलं हरस्य च ॥ महाप्रभं महाकायं शिबिका धनदस्य च ॥ १९९ ॥ दण्डः प्रेतपतेः शक्तिर्देवसेनापतेस्तथा ॥ अन्येषां च सुराणां च
अस्त्राण्युक्तानि यानि वै ॥ २०० ॥ यक्षविद्याधराणां च तानि चक्रे स विश्वकृत् ॥ ततः षोडशमं भागं बिभर्त्ति भगवान्रविः ॥ तत्तेजो रविभा
गश्च खस्थो विचरति प्रिये ॥ २०१ ॥ इति शातिततेजाः स श्वशुरेणातिशोभनम् ॥ वपुर्दधार मार्त्तंडः पुष्पबाणमनोरमम्[1] ॥ २०२ ॥ ततः सुरूप
धृग्भानुरुत्तरानगमत्कुरून् ॥ ददृशे तत्र संज्ञां तु वडवारूपधारिणीम् ॥ २०३ ॥ अपापां सर्वभूतानां तपसा नियमेन च ॥ सा च दृष्ट्वा तमायांतं
परपुंसो विशंकया ॥ जगाम संमुखं तस्य अश्वरूपधरस्य च ॥२०४॥ ततश्च नासिकायोगे तयोस्तत्र समेतयोः॥ नासत्यदस्रौ तनयावश्ववक्त्रौ विनि
र्गतौ ॥२०५॥ रेतसोन्ते च रेवन्तः खड्गी छत्री तनुत्रभृत् ॥ पितुर्गृह्योत्तमं सोऽश्वं जातमात्रः पलायत ॥ २०६ ॥ स तस्मिन्सकृदारूढस्तमश्वं नैव
मुंचति ॥ ततोर्केण समादिष्टौ दंडनायकपिंगलौ ॥२०७॥ अश्वं प्रत्यानयध्व मे मा बलाच्छिद्रतोऽस्य[2] तु ॥ पार्श्वस्थौ तिष्ठतस्तस्य[3] अश्वच्छिद्राभि
कांक्षिणौ ॥२०८॥ न च च्छिद्रं लभेते तौ तस्याद्यापि महात्मनः अग्रे गच्छति रेवंते पृष्ठगौ दण्डपिंगलौ ॥२०९॥ उत्तरेभ्यः कुरुभ्यस्तु निर्गतौ
वेगवत्तरौ ॥ दक्षिणं भारतं प्राप्तौ यत्र क्षत्र प्रभासिकम् ॥२१०॥ अत्यर्थं वेगखिन्नौ तौ स च रेवंतकोऽपि हि ॥ प्रस्विन्नगात्रः सोच्छ्वासो रेवंतस्तत्र
संस्थितः ॥२११॥ मुहूर्तेन समाक्रान्तं लक्षयोजनमंडलम् ॥ उत्तराद्दक्षिणं देवि रेवंतेन महात्मना ॥ २१२ ॥ स्विन्नगात्रस्ततो देवि प्रभासे सम
वस्थितः ॥ दण्डपिंगलसंयुक्तो ह्यश्वारूढः स तिष्ठति ॥ २१३ ॥ सावित्र्या नैर्ऋते भागे नातिदूरे व्यवस्थितः ॥ राज्ञीपुत्रो यतो देवि राजा भट्टारक
स्ततः ॥ २१४ ॥ लोके ख्यातिं समायाति राजभट्टारिकेति च ॥ गुह्यभट्टारकत्वे च रेवंतो विनियोजितः ॥ २१५ ॥ एवमभ्येत्याह ततो भगवाँल्लो
कतापनः ॥ त्वमप्यशेषलोकस्य पूज्यो वत्स भविष्यसि ॥ २१६ ॥ अरण्ये च महादावे वैरिदस्युभयेषु च ॥ त्वां स्मरिष्यंति ये मर्त्या मोक्ष्यंते ते
महापदः ॥ २१७ ॥ क्षेममृद्धिं सुखं राज्यमारोग्यं कीर्तिमुन्नतिम् ॥ नराणामतितुष्टस्त्वं पूजितः संप्रदास्यसि ॥ २१८ ॥ अश्विनौ देवभिषजौ कृतौ
पित्रा महात्मना ॥ धर्मदृष्टिर्यमश्चासौ समो मित्रे तथाऽहिते ॥ २१९ ॥ ततो नियोगं तं चास्य चकार तिमिरापहः ॥ यमुनां च नदीं चक्रे

१ पुष्पबाणमनोरमन्—कामदेवसुन्दरम्—इत्यर्थः । २ बलात्—बलात्कारेण मा प्रत्यानयध्वम्—किं तु—अस्य—छिद्रतः—छिद्रं प्रत्यवेक्ष्य—अश्वं प्रत्यानयध्वम्—इति योजना । ३ तिष्ठतः--अतिष्ठताम्--इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कलिन्दान्तरवाहिनीम् ॥ २२० ॥ छायासंज्ञासुतश्चापि सावर्णिस्तु महायशाः ॥ भाव्यः सोनागते काले मनुः सावर्णिकोष्टमः ॥ २२१ ॥ मेरुपृष्ठे तपो घोरमद्यापि चरति प्रभुः ॥ भ्राता शनैश्चरस्तस्य ग्रहोऽभूच्च प्रिये ध्रुवम् ॥ २२२ ॥ एवं तेभ्यो वरान्दत्त्वा रेवंतस्यापि भास्करः ॥ पुनर्नाम निरुक्तं स रेवंतस्याकरोत्प्रभुः ॥२२३॥ एवं गच्छत्यसौ यस्मात्संज्ञायाः शांतिदः सुतः ॥ अश्वानामाधिपत्ये तु भानुना च नियोजितः ॥ २२४ ॥ क्षेमेण गच्छतेऽध्वानं यस्तु पूजयते पथि ॥ सुखप्रसाद्यो मर्त्यानां सदा च वरवर्णिनि ॥ २२५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये राजभट्टारकोत्पत्तिवर्णनंनामैकादशोऽध्यायः ॥ ११ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ या संज्ञा सा स्मृता राज्ञी छाया या सा तु निक्षुभा ॥ राजृ दीप्तौ स्मृतो धातू राजा राजति यः सदा ॥ १ ॥ अधिकं सर्वभूतेभ्यस्तस्माद्राजा स उच्यते ॥ राजपत्नी तु सा यस्मात्तस्माद्राज्ञी प्रकीर्तिता ॥ २ ॥ क्षुभ संचलने धातुर्निश्चला तेन निक्षुभा ॥ भवंति ह्यथवा यस्मात्स्वांगीयाः क्षुद्विवर्जिताः ॥ ३ ॥ छाया तां विशते दिव्या स्मृता सा तेन निक्षुभा ॥ सांप्रतं वर्तते योऽयं मनुर्लोके महामते ॥ ४ ॥ तस्यान्ववाये जातस्तु शंखचक्रगदाधरः ॥ यमस्तु मात्रा संशप्तो हीनपादो धरातले ॥ ५ ॥ प्रभासक्षेत्रमासाद्य चचार विपुलं तपः ॥ वर्षाणामयुतं साग्रं लिंगं पूजितवान्प्रिये ॥ ६ ॥ तुष्टश्चाहं ततस्तस्य वराणां च शतं ददौ ॥ अद्यापि तत्र देवेशि यमेश्वरमिति श्रुतम् ॥ यमद्वितीयायां दृष्ट्वा यमलोकं न पश्यति ॥ ७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये यमेश्वरोत्पत्तिवर्णनंनाम द्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥ ॥ देव्युवाच ॥ ॥ यदा भ्रमिस्थः सविता तक्षितः क्षुरधारया ॥ श्वशुरेण महादेव जामाता प्रीतिपूर्वकम् ॥ १ ॥ तत्तेजः शातितं भूरि प्रभासे यत्पपात वै ॥ तदद्भूतं किं तदा देव प्रभासात्कथयस्व मे ॥ २ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि सूर्यमाहात्म्यमुत्तमम् ॥ यच्छ्रुत्वा मानवो भक्त्या मुच्यते सर्वपातकैः ॥३॥ देहावतारो देवस्य प्रभासेऽर्कस्थलस्य च ॥ पुराणाख्यानमा¹चक्षे तव देवि यशस्विनि ॥ ४ ॥ शा²कद्वीपे महादेवि भ्रमिस्थस्य तदा रवेः ॥ वर्षाणां तु शतं साग्रं तक्ष्यमाणे विभावसौ ॥ ५ ॥ यदाद्यभागजं तेजस्तत्प्रभासेऽपतत्प्रिये ॥ पतितं तत्र तत्तेजः स्थलाकारं व्यजायत ॥ ६ ॥ जांबूनदमयं देवि तत्पूर्वमभवत्क्षितौ ॥ ति³ष्यमाहात्म्ययोगेन शैलीभूतं च सांप्रतम् ॥ ७ ॥ तत्र चार्कमयं रूपं कृत्वा देवो दिवाकरः ॥ उत्पन्नः सर्वभूतानां हिताय धरणीतले ॥ ८ ॥ हिरण्यगर्भनामेति

१ आचक्षे–कथयामि–इत्यर्थः । २ कुशद्वीपे–इ० पा० । ३ तिष्यमाहात्म्ययोगेन–कलिमाहात्म्ययोगेन–इत्यर्थः । तीर्थमाहात्म्ययोगेन–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



कृते सूर्येति कीर्तितम् ॥ त्रेतायां सवितानाम द्वापरे भास्करः स्मृतः ॥ ९ ॥ कलौ चार्कस्थलोनाम त्रिषु लोकेषु कीर्तितः ॥ अवतीर्णमिदं देवि
स्वयमेव प्रतिष्ठितम् ॥ १० ॥ यदा स्वारोचिषो देवि द्वितीयोऽभून्मनुः पुरा ॥ तस्मिन्कालेऽवतीर्णोऽसौ देवस्तत्र दिवाकरः ॥ ११ ॥ भक्तिमुक्ति
प्रदो देवि व्याधिदुःखविनाशकृत् ॥ तस्य तेजोद्रवैर्व्याप्तं रेणुभिः पञ्चयोजनम् ॥ १२ ॥ दक्षिणोत्तरतो देवि पञ्चपूर्वापरेण तु ॥ उत्तरेण
समुद्रस्य यावन्माहेश्वरी नदी ॥ १३ ॥ न्यंकुमत्याश्चापरतो यावदेव कृतस्मरम् ॥ एतद्व्याप्तं महादेवि तत्तेजोरेणुभिः शुभैः ॥ १४ ॥
तस्य सूक्ष्मा प्रभा या तु आदितेजोविनिःसृता ॥ तया व्याप्तं महादेवि यावद्द्वादशयोजनम् ॥ १५ ॥ उत्तरे भास्करसुता दक्षिणे
सरितां पतिः ॥ पूर्वपश्चिमतो देवि रुक्मिणीद्वितयं स्मृतम् ॥ १६ ॥ एतस्मिन्नन्तरे देवि सौरं तेजः प्रसर्प्पितम् ॥ तेन पावित्र्य
मानीतं क्षेत्रं द्वादशयोजनम् ॥ १७ ॥ तस्य मध्यस्य यन्मध्यं तद्गृहं मम सुन्दरि ॥ तेजोमण्डलमध्यस्थं मम स्थानं महेश्वरि ॥ १८ ॥
चक्षुर्मंडलमध्ये तु यथा देवि कनीनिका ॥ पूर्वपश्चिमतो देवि गोमुखादाऽऽश्वमेधिकम् ॥ १९ ॥ दक्षिणोत्तरतो देवि समुद्रात्कौरवेश्वरीम् ॥ एत
स्मिन्नंतरे क्षेत्रे क्षेत्रज्ञोऽहं वरानने ॥ २० ॥ यस्मादर्कस्य तेजोभिर्भासितं मम तद्गृहम् ॥ तस्मात्प्रभासनामेति कल्पेऽस्मिन्प्रथितं प्रिये ॥ २१ ॥
तत्र पश्यति यः सूर्यमर्क्करूपं नरोत्तमः ॥ सर्वपापविनिर्मुक्तः सूर्यलोके महीयते ॥ २२ ॥ स स्नातः सर्वतीर्थेषु तेन चेष्टं महामखैः ॥ सर्वदानानि
दत्तानि पूर्वजास्तेन तोषिताः ॥ २३ ॥ अर्करूपी यतः सूर्यस्तत्र जातो महीतले ॥ तस्मात्त्याज्यः सदा चार्को भोजनेऽत्र न संशयः ॥ २४ ॥
यो दृष्ट्वार्कस्थलं मर्त्यश्चार्कपत्रेषु भुंजति ॥ गोमांसभक्षणं तेन कृतं भवति भामिनि ॥ २५ ॥ भक्षितो भास्करस्तेन स कुष्ठी जायते नरः ॥
तस्मात्सर्वप्रयत्नेन चार्कपत्राणि वर्जयेत् ॥ २६ ॥ यात्रायां प्रथमं देवि दृष्टो येनार्कभास्करः ॥ तं दृष्ट्वा महिषीं दद्याद्ब्राह्मणाय विपश्चिते ॥
॥ २७ ॥ ताम्रवर्णं रक्तवस्त्रं ततस्तुष्यति भास्करः ॥ तस्य चैव तु सांनिध्ये वह्निकोणे व्यवस्थितम् ॥ २८ ॥ नातिदूरे महाभागे सिद्धेश्वरमिति
स्मृतम् ॥ सर्वसिद्धिप्रदं देवि लिंगं त्रैलोक्यपूजितम् ॥ २९ ॥ जैगीषव्येश्वरंनाम पूर्वं कृतयुगेऽभवत् ॥ कलौ सिद्धेश्वरमिति प्रसिद्धिमगमत्प्रिये
॥ ३० ॥ तं दृष्ट्वा मनुजो देवि सर्वसिद्धिमवाप्नुयात् ॥ तत्रैव देवदेवेशि नातिदूरे व्यवस्थितम् ॥ ३१ ॥ सूर्यदक्षिणनैर्ऋत्ये पातालविवरं प्रिये ॥ मंदेहा
राक्षसा यत्र तथा शालकटंकटाः ॥ ३२ ॥ सूर्यस्य तेजसा दग्धाः पातालमगमन्पुरा ॥ कलौ तद्द्वारमेवास्ति न पाताले मतिः प्रिये ॥ ३३ ॥ योगि

१ कथितम्—इ० पा० । २ गुरवः—इ० पा० । ३ अर्कः--अर्कवृक्षस्य पत्रम्--इत्यर्थः । ४ गोमांसभक्षणंनाम—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यस्तत्र रक्षंति ब्राह्म्याद्या मातरस्तथा ॥ माघे कृष्णचतुर्दश्यां रात्रौ मातृगणान्यजेत् ॥ बलिपुष्पोपहारैश्च ततः सिद्धिर्भविष्यति ॥ ३४ ॥ इति हि सकलधर्मभावहेतोर्हरकमलासनविष्णुसंस्तुतस्य ॥ तनुपरिलिखनं निशम्य भानोर्व्रजति दिवाकरलोकमायुषोंऽते ॥३५॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये प्रभासपवित्रनामकरणार्कस्थलोत्पत्तिवर्णनंनाम त्रयोदशोऽध्यायः ॥ ॥ १३ ॥ ॥ छ ॥ ॥ देव्युवाच ॥ ॥ यदेतद्भवता प्रोक्तं माहात्म्यं सूर्यदैवतम् ॥ तन्मे विस्तरतो ब्रूहि देवदेव जगत्पते ॥ १ ॥ कथमर्कस्थलो भूतः प्रभासक्षेत्रभूषणः ॥ पूजनीयो महादेवः सम्यग्यात्राफलेप्सुभिः ॥ २ ॥ के मंत्राः किं विधानं तु केषु पर्वसु पूजयेत् ॥ जैगीषव्येश्वरो भूत्वा ह्यभूत्सिद्धेश्वरः कथम् ॥ तन्मे कथय देवेश विस्तरात्सर्वमेव हि ॥ ३ ॥ पाताले विवरं तत्र योगिन्यस्तत्र किं पुरा ॥ तथा मातृगणश्चैव कथमेतदभूत्पुरा ॥ ४ ॥ एतत्सर्वमशेषेण दयां कृत्वा जगत्पते ॥ ममाचक्ष्व विरूपाक्ष यद्यहं ते प्रिया हर ॥ ५ ॥ ॥ ईश्वर उवाच ॥ ॥ साधु पृष्टं त्वया देवि कथयामि समासतः ॥ सिद्धेश्वरो ह्यभूद्येन जैगीषव्येश्वरो हरः ॥ ६ ॥ पूजाविधानं विस्तीर्यं तन्मे निगदतः शृणु ॥ आसीदस्मिन्कृते देवि सर्वज्ञानविशारदः ॥ ७ ॥ पुत्रः शतकलाकस्य जैगीषव्य इति श्रुतः ॥ प्रभासक्षेत्रमासाद्य स चक्रे दुश्चरं तपः ॥ ८ ॥ अतिष्ठद्वायुभक्षश्च वर्षाणां शतकं किल ॥ अम्बुभक्षः सहस्रं तु शाकाहारोऽयुतं तथा ॥ ९ ॥ चांद्रायणसहस्रं च कृतं सांतपनं पुनः ॥ शोषयित्वा मिताहारो दिग्वासाः समपद्यत ॥ १० ॥ पूर्वं कल्पे स्वयं भूतं महोदयमिति श्रुतम् ॥ स लिंगं देवदेवस्य प्रतिष्ठाप्यार्चयन्नपि ॥ ११ ॥ भस्मशायी भस्मदिग्धो नृत्तगीतैरतोषयत् ॥ जपेन वृषनादैश्च तपसा भावितः शुचिः ॥ १२ ॥ तमेवं तोषयाणं तु भक्त्या परमया युतम् ॥ भगवांश्च तमभ्येत्य इदं वचनमब्रवीत् ॥ १३ ॥ जैगीषव्य महाबुद्धे पश्य मां दिव्यचक्षुषा ॥ तुष्टोऽस्मि [1]वरदश्चाहं ब्रूहि यत्ते मनोगतम् ॥ १४ ॥ स एवमुक्तो देवेन देवं दृष्ट्वा त्रिलोचनम् ॥ प्रणम्य शिरसा पादाविदं वचनमब्रवीत् ॥ १५ ॥ ॥ जैगीषव्य उवाच ॥ ॥ भगवन्देवदेवेश मम तुष्टो यदि प्रभो ॥ ज्ञानयोगं हि मे देहि यः संसारनिकृन्तनम् ॥ १६ ॥ भगवन्नान्यदिच्छामि योगात्परतरं हितम् ॥ त्वयि भक्तिश्च नित्यं मे देव्यां स्कन्दे गणेश्वरे ॥ १७ ॥ न च व्याधिभयं भूयान्न च तेजोऽपमानता ॥ अनुत्सेकं तथा क्षांतिं दमं शममथापि च ॥ १८ ॥ एतान्वरान्महादेव [2]त्वदिच्छामि त्रिलोचन ॥ १९ ॥ ॥ ईश्वर उवाच ॥ ॥ अजरश्चामरश्चैव सर्वशोकविवर्जितः ॥ महायोगी महावीर्यो योगैश्वर्यसमन्वितः ॥ २० ॥ प्रभा

१ अनुद्वेगम्—इ० पा० । २ त्वत्—त्वत्तः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 वाच्चास्य क्षेत्रस्य गुह्यस्य मम शाश्वतम् ॥ योगाष्टगुणमैश्वर्यं प्राप्स्यसे परमं महत् ॥ २१ ॥ भविष्यसि मुनिश्रेष्ठ योगाचार्यः सुविश्रुतः ॥ २२ ॥ 
यश्चेदं त्वत्कृतं लिंगं नियमेनार्चयिष्यति ॥ सर्वपापविनिर्मुक्तो योगं दिव्यमवाप्स्यति ॥ २३ ॥ जैगीषव्यगुहां चेमां प्राप्य योगं करोति यः ॥
स सप्तरात्राद्युक्तात्मा संसारं संतरिष्यति ॥ २४ ॥ मासेन पूर्वजातिं च जन्मातीतं च वेत्स्यति ॥ एकरात्रात्तनुं[1] शुद्धां द्वाभ्यां तारयते पितॄन् ॥
त्रिरात्रेण व्यतीतेन त्वपरान्सप्त तारयेत् ॥ २५ ॥ पुनश्च तव विप्रर्षे अजेयत्वं च योगिभिः ॥ इच्छतो दर्शनं चैव भविष्यति च ते मम ॥ २६ ॥
इति देवो वरान्दत्त्वा तत्रैवांतरधीयत ॥ एतत्कृतयुगे वृत्तं तव देवि प्रभाषितम् ॥ २७ ॥ त्रेतायुगे महादेवि द्वापरेऽपि तथैव च ॥ कलियुगप्रवेशे तु
वालखिल्या महर्षयः ॥ २८ ॥ अस्मिन्प्राभासिके क्षेत्रे सूर्यस्थलसमीपतः ॥ आराधयंतो देवेशं गुहामध्यनिवासिनम् ॥ २९ ॥ अष्टाशीतिसह
स्राणि ऋषयश्चोर्द्ध्वरेतसः ॥ वर्षायुतं तपस्तप्त्वा सिद्धिं जग्मुस्तदात्मिकाम् ॥३०॥ ततः सिद्धेश्वरं लिंगं कलौ ख्यातं वरानने ॥ यदा सोमेन संयुक्ता
कृष्णा शिवचतुर्दशी ॥ तदैव तस्य देवस्य दर्शनं देवि दुर्लभम् ॥ ३१ ॥ ब्रह्मांडं सकलं दत्त्वा यत्पुण्यमुपजायते ॥ तत्पुण्यं लभते देवि सिद्धलिं
गस्य पूजनात् ॥ ३२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये सिद्धेश्वरो
त्पत्तिवर्णनंनाम चतुर्दशोऽध्यायः ॥ १४ ॥ ॥छ॥ ॥ ईश्वर उवाच ॥ ॥ तस्याग्नेये तु देवेशि अरुणेन प्रतिष्ठितम् ॥ धनुषां च त्रये तत्र
सिद्धलिंगसमीपतः ॥१॥ सूर्यसारथिना तत्र लिंगं देवि प्रतिष्ठितम् ॥ कलौ पापहरंनाम दर्शनात्पापनाशनम् ॥ २ ॥ चैत्रमासत्रयोदश्यां शुक्लायां
वरवर्णिनि ॥ पूजयेद्विधिवद्भक्त्या पौंडरीकफलं लभेत् ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे
प्रभासक्षेत्रमाहात्म्ये पापनाशनोत्पत्तिवर्णनंनाम पंचदशोध्यायः ॥ १५ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ पातालविवरस्यापि माहात्म्यं शृणु
सांप्रतम् ॥ पूर्वपृष्टं महादेवि ब्रह्मणा विश्वकर्मणा ॥ १ ॥ तमोभावे समुत्पन्ने जातास्तत्रैव राक्षसाः ॥ सूर्यस्य द्वेषिणः सर्वे ह्यसंख्याता महाबलाः ॥
॥ २ ॥ ते तु दृष्ट्वा महात्मानं समुद्यंतं दिवाकरम् ॥ ते धूम्रप्रमुखाः सर्वे जहसुः सूर्यमंजसा ॥ ३ ॥ अस्माकमंतकः [2]कोऽयं वि[3]द्यते पापकर्मकृत् ॥
इत्यूचुर्विविधा वाचः सूर्यस्याग्रे स्थितास्तदा ॥ ४ ॥ इति श्रुत्वा तदा देवः क्रोधप्रस्फुरिताधरः ॥ राक्षसानां वचश्चैव भक्ष्यमाणो दिवाकरः ॥ ५ ॥ 
ततः क्रोधाभिभूतेन चक्षुषा चावलोकयत् ॥ स क्रूररक्षःक्षयकृत्तिमिरद्विपकेसरी ॥ ६ ॥ महांशुमान्खगः सूर्यस्तद्विनाशमचिंतयत् ॥ अजानन्नं

१ एकरात्राद्गतिं शुद्धाम्--इ० पा० । २ सोऽयम्--इ० पा० । ३ एधते--इ० पां० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततश्छिद्रं राक्षसानां दिवस्पतिः ॥ ७ ॥ स धर्मविच्युतान्दृष्ट्वा पापोपहतचेतसः ॥ एवं संचिंत्य भगवान्दध्यौ ध्यानं प्रभाकरः ॥ ८ ॥ अजानंस्ते जसा ग्रस्तं त्रैलोक्यं रजनीचरैः ॥ ततस्ते भानुना दृष्टाः क्रोधाध्मातेन चक्षुषा ॥ ९ ॥ निपेतुरंबरभ्रष्टाः क्षीणपुण्या इव ग्रहाः ॥ राक्षसैर्वेष्टितो धूम्रो निपतञ्छुशुभेंऽबरात् ॥ १० ॥ अर्द्धपक्कं यथा तालफलं कपिभिरावृतम् ॥ यदृच्छया निपेतुस्ते यंत्रमुक्ता यथोपलाः ॥ ११ ॥ ततो वायु वशाद्भ्रष्टा भित्त्वा भूमिं रसातलम् ॥ जग्मुस्ते क्षेत्रमासाद्य प्रभासं वरवर्णिनि ॥ १२॥ यत्र चार्कस्थलो देवः सर्वसिद्धिप्रदायकः ॥ तत्सान्निध्यस्थितं देवि पातालविवरं महत् ॥ १३ ॥ अन्यानि कोटिशः संति तानि[1] लुप्तानि भामिनि ॥ कृतस्मरात्समारभ्य यावदर्कस्थलो रविः ॥ १४ ॥ देवमा[2] तुर्वरं प्राप्य सिद्धयोऽष्टौ व्यवस्थिताः ॥ एतस्मिन्नंतरे देवि सूर्यक्षेत्रमुदाहृतम् ॥ १५ ॥ सूर्यस्य तेजसो देवि मध्यभागं हि तत्स्मृतम् ॥ सर्वं हेममयं देवि नापुण्यस्तत्र वीक्षते ॥ १६ ॥ विवराणां शतं चैकं स्पर्शा[3]श्चैव तु कोटिशः ॥ तत्र संति महादेवि सिद्धेशस्तु प्ररक्षति ॥ १७ ॥ इदं क्षेत्रं महादेवि प्रियं सूर्यस्य सर्वदा ॥ सूर्यपर्वणि संप्राप्ते कुरुक्षेत्राधिकं प्रिये ॥ १८ ॥ ब्राह्मी चैव हिरण्या च संगमश्च महोदधेः ॥ एतत्त्रिसंगमं देवि कोटितीर्थं[4] फलप्रदम् ॥ १९ ॥ देवमाता च तत्रैव मंकीशस्तत्र तिष्ठति ॥ नागस्थानं नगस्थानं तत्रैव समुदाहृतम् ॥ २० ॥ इति संक्षेपतः प्रोक्तमर्कस्थलम होदयम् ॥ राक्षसानां च संपातादभूच्च विवरं यथा ॥ २१ ॥ अन्यानि तत्र देवेशि लुप्तानि विवराणि वै ॥ एवं तु प्रकटं तत्र दृश्यतेऽद्यापि भामिनि ॥ २२ ॥ श्रीमुखंनाम तद्द्वारं रक्ष्यते मातृभिः प्रिये ॥ वर्षमेकं चतुर्दश्यां नियमाद्यस्तु पूजयेत् ॥ २३ ॥ तत्र मातृगणान्देवि सुनंदाद्यान्विधानतः॥ पशुपुष्पोपहारैश्च धूपदीपैस्तथोत्तमैः ॥ विप्राणां भोजनैर्देवि तस्य सिद्धिर्भविष्यति ॥ २४ ॥ तस्मात्सर्वप्रयत्नेन तत्रार्कस्थलसंनिधौ ॥ पूजये न्मातरः सर्वा यदीच्छेत्सिद्धिमात्मनः ॥ २५ ॥ एतास्तु मातरो देवि सुनंदागणनामतः ॥ ख्यातिं यांति प्रभासे तु क्षेत्रेऽस्मिन्वरवर्णिनि ॥ २६ ॥ एतत्संक्षेपतः प्रोक्तं पातालोत्तरमध्यतः ॥ तच्छ्रुत्वा मुच्यते देवि सर्वापद्भ्यो नरोत्तमः ॥ २७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्येर्कस्थलमाहात्म्ये पातालविवरसुनंदादिमातृगणोत्पत्तिवर्णनंनाम षोडशोऽध्यायः ॥ ॥ १६ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ अथ पूजाविधानं ते कथयामि यशस्विनि ॥ अर्कस्थलस्य देवस्य यथा पूज्यो नरोत्तमैः ॥१॥ सर्वेषामेव देवानामादिरादित्य उच्यते ॥ आदिकर्त्ता त्वसौ यस्मादादित्यस्तेन चोच्यते ॥ २ ॥ नादित्येन विना रात्रिर्न दिवा न च तर्पणम् ॥ न

१ तानि-विवराणि-इत्यर्थः । २ देवमातांतरं प्राप्य–इ० पा० । ३ स्पर्शाः–स्पर्शोपलाः–'परिस' इति ख्याताः । ४ तीर्थेस्मिन्–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



धर्मो वै न चाधर्मो न संतिष्ठेच्चराचरम् ॥ ३ ॥ आदित्यः पालयेत्सर्वमादित्यः सृजते सदा ॥ आदित्यः संहरेत्सर्वं तस्मादेष त्रयीमयः ॥४॥ आरा
धनविधिं तस्य भास्करस्य महात्मनः ॥ कथयामि महादेवि वेदोक्तैर्मंत्रविस्तरैः ॥ तं शृणुष्व वरारोहे सर्वपापप्रणाशनम् ॥ ५ ॥ मूर्त्तिस्थः पूज्यते
येन विधानेन महेश्वरि ॥ द्वादशात्मा यथा सूर्यस्तत्ते वक्ष्याम्यशेषतः ॥ ६ ॥ मुखशुद्धिं च कृत्वाऽऽदौ स्नानं कृत्वा विशेषतः ॥ वस्त्रशुद्धिं देहं
शुद्धिं कृत्वा सूर्यं स्पृशेत्ततः ॥ ७ ॥ दन्तकाष्ठविधानं तु प्रथमं कथयामि ते ॥ मधूके पुत्रलाभः स्यादर्के नेत्रसुखं प्रिये ॥ ८ ॥ वक्तृ त्वं वै बदर्यां
च बृहत्या दुर्जनाञ्जयेत् ॥ ऐश्वर्यं च भवेद्बिल्वे खदिरे च न संशयः ॥ ९ ॥ रोगक्षयः कदम्बे तु अर्थलाभोऽतिमुक्तके ॥ गुरुतां याति सर्वत्र
आटरूषकसंभवैः ॥ १० ॥ जातिप्रधानतां जातावश्वत्थो यच्छते यशः ॥ श्रियं प्राप्नोति निखिलां शिरीषस्य निषेवणात् ॥ ११ ॥ प्रियंगुं सेवं
मानस्य सौभाग्यं परमं भवेत् ॥ अभीप्सितार्थसिद्धिः स्यान्नित्यं प्लक्षनिषेवणात् ॥१२॥ न पाटितं समश्नीयाद्दंतकाष्ठं न सव्रणम् ॥ न चोर्द्ध्वशुष्कं
वक्रं वा नैव च त्वग्विवर्ज्जितम् ॥ १३ ॥ वितस्तिमात्रमश्नीयाद्दीर्घं ह्रस्वं च वर्जयेत् ॥ उदङ्मुखो वा प्राङ्मुखः सुखासीनोऽथ वाग्यतः ॥
॥ १४ ॥ कामं यथेष्टं हृदये कृत्वा समभिमन्त्र्य च ॥ मंत्रेणानेन मतिमानश्नीयाद्दन्तधावनम् ॥ १५ ॥ वरं दत्त्वाऽभिजानासि कामं चैव वन
स्पते ॥ सिद्धिं प्रयच्छ मे नित्यं दन्तकाष्ठ नमोऽस्तु ते ॥ १६ ॥ त्रीन्वारान्परिजप्यैवं भक्षयेद्दंतधावनम् ॥ पश्चात्प्रक्षाल्य तत्काष्ठं शुचौ देशे
विनिक्षिपेत् ॥ १७ ॥ दंतकाष्ठेन देवेशि न जिह्वां परिमार्जयेत् ॥ पृथक्पृथक्तदा कार्यं यदीच्छेद्विपुलं यशः ॥ १८ ॥ अंगुल्या दंतकाष्ठं च
प्रत्यक्षं लवणं च यत् ॥ मृत्तिकाभक्षणं चैव तुल्यं गोमांसभक्षणैः ॥ १९ ॥ मुखे पर्युषिते नित्यं भवत्यप्रयतो द्विजः ॥ तस्माच्छुष्कमथार्द्रं वा भक्ष
येद्दंतधावनम् ॥ २० ॥ वर्जिते दिवसे चैव गंडूषांश्चैव षोडश ॥ ततःपत्रसुगन्धैर्वा मुखशुद्धिं च कारयेत् ॥ २१ ॥ मुखशुद्धिमकृत्वा यो भास्करं
स्पृशति द्विजः ॥ त्रीणि वर्षसहस्राणि स कुष्ठी जायते नरः ॥ २२ ॥ एवं वस्त्रादि संशोध्य ततः स्नानं समाचरेत् ॥ शुचौ मनोरमे स्थाने
संगृह्यास्त्रेण मृत्तिकाम् ॥ २३ ॥ सानुस्वारोकारयुतो हकारः फट्समन्वितः ॥ अनेनास्त्रेण संगृह्य स्नानं तत्र समाचरेत् ॥ २४ ॥ भागत्रयं तु
संशुद्धं तृणपाषाणवर्जितम् ॥ एकमस्त्रेण चालभ्य तथान्यं भास्करेण तु ॥ २५ ॥ अंगैश्चैव तृतीयं तु अभिमंत्र्य सकृत्सकृत् ॥ जप्त्वास्त्रेण क्षिपे ॥ २५ ॥

१ मनःशुद्धिम्--इ०पा० । २ प्रियंगुं कोटिवेर्णीं वै सौभाग्यं परमं भवेत्–इ० पा० । ३ अप्रयतः–अपवित्रः–इत्यर्थः । ४ ततः पत्रैः--इ०पा० । ५ सविसर्गारकारस्य हरेफौ फट्समन्वितः–इत्यशुद्धं पाठांतरं कस्मिंश्चदेकस्मिन्पुस्तकेऽस्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिक्षु निर्विघ्नं तु जलं भवेत् ॥ २६ ॥ सूर्यतीर्थ द्वितीयेन तृतीयेन सकृत्सकृत् ॥ गुंठयित्वा ततः स्नायाद्रवितीर्थेन मानवः ॥ २७ ॥ तूर्यशंख निनादेन ध्यात्वा देवं दिवाकरम् ॥ स्नात्वा राजोपचारेण पुनराचम्य यत्नतः ॥ २८ ॥ स्नानं कृत्वा ततो देवि मंत्रराजेन संयुतम् ॥ हरेफौ बिंदु लक्ष्मीश्च तथाऽन्यो दीर्घया सह ॥ २९ ॥ मात्रया रेफसंयुक्तो हकारो बिंदुना सह ॥ सकारः सविसर्गस्तु मंत्रराजोऽयमुच्यते ॥ ३० ॥ ततस्तु तर्प्पयेन्मंत्रान्सर्वास्तांस्तु कराग्रजैः ॥ तुलनादूर्ध्वतो देवान्सव्येन च मुनींस्तथा ॥ पितॄंश्चैवापसव्येन हृद्बीजेन प्रतर्पयेत् ॥ ३१ ॥ यद्गीतं प्रवरं लोके अक्षराणां मनीषिभिः ॥ एकोनविंशं मात्राया अक्षरं तत्प्रकीर्त्तितम् ॥ ३२ ॥ एवं स्नात्वा विधानेन संध्यां वंदेद्विधानतः ॥ ततो विद्वा न्क्षिपेत्पश्चाद्भास्करायोदकांजलिम् ॥ ३३ ॥ जपेच्च त्र्यक्षरं मंत्र षण्मुखं च यदृच्छया ॥ मंत्रराजेति यः पूर्वं तवाख्यातो मया प्रिये ॥ ३४ ॥ पश्चात्तीर्थेन मंत्रास्तु संहृत्य हृदये न्यसेत् ॥ मंत्रैरात्मानमेकत्र कृत्वा चार्घं प्रदापयेत् ॥ ३५ ॥ रक्तचंदनगंधैस्तु शुचिःस्नातो महीतले ॥ कृत्वा मंडलकं वृत्तमेकचित्तो व्यवस्थितः ॥ ३६ ॥ गृहीत्वा करवीराणि ताम्रे संस्थाप्य भाजने ॥ तिलतंदुलसंयुक्तं कुशगन्धोदकेन तु ॥३७॥ रक्तचंदन धूपेन युक्तमर्घ्योपसाधितम् ॥ कृत्वा शिरसि तत्पात्रं जानुभ्यामवनिं गतः॥ ३८ ॥ मूलमंत्रेण संयुक्तमर्घ्यं दद्याच्च भानवे ॥ मुच्यते सर्वपापैस्तु यो ह्येवं विनिवेदयेत् ॥ ३९ ॥ यद्युगादिसहस्रेण व्यतीपातशतेन च ॥ अयनानां सहस्रेण यत्फलं ज्येष्ठपुष्करे ॥ तत्फलं समवाप्नोति सूर्यायार्घ्य निवेदने ॥ ४० ॥ दीक्षामंत्रविहीनोऽपि भक्त्या संवत्सरेण तु ॥ फलमर्घेण वै देवि लभते नात्र संशयः ॥ ४१ ॥ यः पुनर्दीक्षितो विद्वान्विधिनार्घ्यं निवेदयेत ॥ नासौ संभवते भूमौ प्रलयं याति भास्करे ॥ ४२ ॥ इह जन्मनि सौभाग्यमायुरारोग्यसंपदम् ॥ अचिराल्लभते देवि सभार्यः सुखभाजनम् ॥ ४३ ॥ एवं स्नानविधिः प्रोक्तः सौरः संक्षेपतस्तव ॥ हिताय मानवेन्द्राणां सर्वपापप्रणाशनः ॥ ४४ ॥ अथवा वेदमार्गेण कुर्यात्स्नानं द्विजोत्तमः ॥ यद्येवं मन्त्रविस्तारे ह्यशक्तो दीक्षया विना ॥ ४५ ॥ ॥ ईश्वर उवाच ॥ ॥ अथ पूजाविधानं ते कथयामि यश स्विनि ॥ वेदमार्गेण दिव्येन ब्राह्मणानां हिताय वै ॥ ४६ ॥ एवं संभृतसंभारः पुष्पादिप्रगुणीकृतः ॥ तत आवाहयेद्भानुं स्थापयेत्कर्णिको परि ॥ ४७ ॥ उपस्थानं तु वै कृत्वा मंत्रेणानेन सुव्रते ॥ उदुत्यं जातवेदसमिति मंत्रः संपरिकीर्तितः ॥ ४८ ॥ अग्निं दूतेति मंत्रेण अनेनावाह्य भामिनि ॥ आकृष्णेन रजसा मंत्रेणानेन वाऽर्चयेत् ॥ ४९ ॥ हंसः शुचिषदिति मंत्रेणानेन पूजयेत् ॥ अपत्येतेति मन्त्रेण सूर्यं देवि प्रपूज

१ ॐ ह्रीं हें . सः–इति मंत्रो बोध्यः–मेरुतन्त्रेऽयमेव त्र्यक्षरः सूर्यमंत्रो दृश्यते । २ तुलनादूर्ध्वतः–करपंचांगुल्युद्भवसंनिवेशादग्रभागे–इत्यर्थः । ३ महेश्वरि–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





येत् ॥ ५० ॥ अदृश्रमस्य चैतेन सूर्यं देवि समर्चयेत् ॥ तरणिर्विश्वदर्शेति अनेन सततं जपम् ॥ ५१ ॥ चित्रं देवानामुदेति भद्रां देवीं सदार्चयेत् ॥ विभूतिमर्चयेन्नित्यं येना पावक चक्षसा ॥ ५२ ॥ विद्यामेपिरजस्पृथ्वित्यनेन विमलां सदा ॥ अमोघां पूजयेन्नित्यं मंत्रेणानेन सुव्रते॥ ५३ ॥ सप्त त्वा हरितोऽनेन सिद्धिदां सर्वकर्मसु ॥ विद्युतामर्चयेद्देवं सप्त त्वा हरितेन च ॥ ५४ ॥ नवमीं पूजयेद्देवीं सततं सर्वतोमुखीम् ॥ मन्त्रेणानेन वै देवि उद्वयन्तमितीह वै ॥ ५५ ॥ उद्यन्नद्यमित्रमहः प्रथममक्षरं जपेत् ॥ द्वितीयं पूजयेद्देवि शुकेषु मे हरिमेति वै ॥ ५६ ॥ उदगादयमादित्यो ह्यनेनापि तृतीयकम् ॥ तत्सवितुर्वरेण्येति चतुर्थं परिकीर्तितम् ॥ ५७ ॥ महाहिवो महायेति पञ्चमं परिकीर्तितम् ॥ हिरण्यगर्भः समवर्तत षष्ठं बीजं प्रकीर्तितम् ॥ ५८ ॥ सविता पश्चातात्सविता सप्तमं वरवर्णिनि ॥ एवं बीजानि विन्यस्य आदित्यं स्थापयेच्छुभे ॥ ५९ ॥ आदित्यं स्थापयित्वा तु पश्चादङ्गानि विन्यसेत् ॥ ६० ॥ आग्नेय्यां हृदयं न्यस्य ऐशान्यां तु शिरो न्यसेत् ॥ नैर्ऋत्यां तु शिखां चैव कवचं वायुगोचरे ॥ ६१ ॥ अस्त्रं दिशासु विन्यस्य स्वबीजेन तु कर्णिकाम् ॥ अमोसि प्राणितेनेति अनेन हृदयं यजेत्[1] ॥ ६२ ॥ शिरस्तु पूजयेद्देवि आयुष्यं वर्चसेति वै ॥ गायत्र्या तु शिखां पूज्य नैर्ऋत्यां तु व्यवस्थिताम् ॥ ६३ ॥ जीमूतस्येव भवति प्रत्येकं कवचं यजेत् ॥ धन्वन्नागा धन्वनेति अनेनास्त्रं सदाऽर्चयेत् ॥ ६४ ॥ नेत्रं तु पूजयेद्देवि अश्विना तेजसेति च ॥ बाह्यतः पूर्वतः सोमं दक्षिणेन बुधं तथा ॥ ६५ ॥ पश्चिमेन गुरुं न्यस्य उत्तरेण च भार्गवम् ॥ आग्नेय्यां मङ्गलं न्यस्य नैर्ऋत्यां तु शनैश्चरम् ॥ ६६ ॥ वायव्यां तु न्यसेद्राहुं केतुमीशानगोचरे ॥ आप्यायस्वेति मन्त्रेण देवि सोमं सदार्चयेत् ॥ ६७ ॥ उद्बुध्यध्वं महादेवि बुधं तत्र सदार्चयेत् ॥ बृहस्पतेति मन्त्रेण पूजयेत्सततं गुरुम् ॥ ६८ ॥ शुक्रः शुशुक्वानिति च भार्गवं देवि पूजयेत् ॥ अग्निर्मूर्द्धेति मन्त्रेण सदा मंगलमर्चयेत् ॥ ६९ ॥ शमग्निरितिमन्त्रेण पूजयेद्भास्करात्मजम् ॥ कयानश्चित्रेतिमन्त्रेण देवि राहुं सदाऽर्चयेत् ॥ ७० ॥ केतुं कृण्वेति केतुं वै सततं पूजयेद्बुधः ॥ बाह्यतः पूर्वतः शुक्रं दक्षिणेन यमं तथा ॥ ७१ ॥ ऐशान्यामीश्वरं विंद्यादाग्नेय्यामग्निरुच्यते ॥ नैर्ऋतेति विरूपाक्षं पवनं वायुगोचरे ॥ ७२ ॥ तमुष्टवाम इति वै ह्यनेनेन्द्रमथार्चयेत् ॥ उदीरतामवरेति सदा वैवस्वतं यजेत् ॥ ७३ ॥ तत्त्वायामीति मन्त्रेण वरुणं देवि पूजयेत् ॥ इन्द्रासोमावत इति मन्त्रेण धनदं यजेत् ॥ ७४ ॥ पावकं पूजयेद्देवि अग्निमीळे पुरोहितम् ॥ रक्षोहणं वाजिनेति विरूपाक्षं सदार्चयेत् ॥ ७५ ॥ वायवायाहिमन्त्रेण वायुं देवि सदार्चयेत् ॥ यथाक्रममिमान्देवि

१ यजेत्—पूजयेत्—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वान्वै पूजयेद्बुधः ॥ ७६ ॥ बाह्यतः पूर्वतो देवि इन्द्रादीनां समन्ततः ॥ रक्तवर्णं महातेजं सितपद्मोपरि स्थितम् ॥ ७७ ॥ सर्वलक्षणसंयुक्तं सर्वाभरणभूषितम् ॥ द्विभुजं चैकवक्त्रं च सौम्यपद्मकधृक्करम् ॥ ७८ ॥ वर्त्तुलं तेजबिंबं तु मध्यस्थं रक्तवाससम् ॥ आदित्यस्य त्विदं रूपं सर्वलोकेषु पूजितम् ॥ ध्यात्वा संपूजयेन्नित्यं स्थंडिलं मण्डलाश्रयम् ॥ ७९ ॥ ॥ देव्युवाच ॥ ॥ मण्डलस्थः सुरश्रेष्ठ विधिना येन भास्करः ॥ पूज्यते मानवैर्भक्त्या स विधिः कथितस्त्वया ॥ ८० ॥ पूजयेद्विधिना येन भास्करं पद्मसंभवम् ॥ मूर्त्तिस्थं सर्वगं देवं तन्मे कथय शंकर ॥ ८१ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ साधुसाधु महादेवि साधु पृष्टोऽस्मि सुव्रते ॥ शृणुष्वैकमना देवि मूर्तिथं येन पूजयेत् ॥ ८२ ॥ इषेत्वेति च मन्त्रेण उत्तमांगं सदार्चयेत् ॥ अग्निमीळेति मन्त्रेण पूजयेद्दक्षिणं करम् ॥ ८३ ॥ अग्न आयाहि मन्त्रेण पादौ देवस्य पूजयेत् ॥ आजिघ्रेति च मन्त्रेण पूजयेत्पुष्पमालया ॥ ८४ ॥ योगेयोगेति मन्त्रेण मुक्तपुष्पांजलिं क्षिपेत् ॥ समुद्रागच्छ यत्प्रोक्तमनेन स्नापयेद्रविम् ॥ ८५ ॥ इमं मे गंगेति यत्प्रोक्तमनेनापि च भामिनि ॥ समुद्रज्येति मन्त्रेण क्षालयेद्विधिवद्रविम् ॥ ८६ ॥ सिनीवालीति मन्त्रेण स्नापयेच्छंखवारिणा ॥ यज्ञं यज्ञेति मन्त्रेण कषायैः परिरक्षयेत् ॥ ८७ ॥ स्नापयेत्पयसा देवि आप्यायस्वेति मंत्रतः ॥ दधिक्राव्णेति वै दध्ना स्नापयेद्विधिवद्रविम् ॥ ८८ ॥ इमं मे गंगेति यत्प्रोक्तमनेनापि च भामिनि ॥ समुद्रज्येति मंत्रेण स्नानमौषधिभिः स्मृतम् ॥ ८९ ॥ उद्वर्तयेत्ततो भानुं द्विपदाभिर्वरानने ॥ मानस्तोकेति मंत्रेण युगपत्स्नानमाचरेत् ॥ ९० ॥ विष्णोरराटमन्त्रेण स्नापयेद्गंधवारिणा ॥ सौवर्णेन तु मंत्रेण अर्घ्यं पाद्यं निवेदयेत् ॥ ९१ ॥ इदं विष्णुर्विचक्रमे मंत्रेणार्घ्यं प्रदापयेत् ॥ वेदोसीति च मंत्रेण उपवीतं प्रदापयेत् ॥ ९२ ॥ बृहस्पतेति मंत्रेण दद्याद्वस्त्राणि भानवे ॥ येन श्रियं प्रकुर्वाणः पुष्पमालां प्रपूजयेत् ॥ ९३ ॥ धूरसीति च मंत्रेण धूपं दद्यात्सगुग्गलम् ॥ समिद्धोंजनमंत्रेण अंजनं तु प्रदापयेत् ॥ ९४ ॥ युंजान इति मंत्रेण भानुं रोचनमालभेत् ॥ आरार्त्तिकं च वै कुर्याद्दीर्घायुत्वाय वै पुनः ॥ ९५ ॥ सहस्रशीर्षा पुरुषः सूर्यं शिरसि पूजयेत् ॥ शंभवायेति मंत्रेण रवेर्नेत्रे परामृशेत् ॥ ९६ ॥ विश्वतश्चक्षुरित्येवं भानोर्देहं समालभेत् ॥ श्रीश्च ते लक्ष्मीश्चेति सर्वांगे पूजयेद्रविम् ॥ ९७ ॥ ॥ ईश्वर उवाच ॥ ॥ अथ मेरोर्महादेवि अष्टशृंगस्य सुव्रते ॥ पूजाविधानमंत्रांस्ते कथयामि समासतः ॥९८॥ अष्टशृंगं महादेवि अनेन विधिनाऽर्चयेत् ॥ प्रथमं पूजयेन्मध्ये मंत्रेणानेन सुव्रते ॥ ९९ ॥ महाहिवोमहायेति नानापुष्पकदंबकैः ॥ त्रातारमिंद्रमंत्रेण पूर्वशृंगं सदार्चयेत् ॥ १०० ॥ तमुष्टवामेति मंत्रेण पूजयेत्सुर

१ सदा—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सुन्दरि ॥ अग्निमीळे पुरोहितमाग्नेयं शृंगमर्चयेत् ॥ १०१ ॥ आग्नेय्या चैव गायत्र्या अथवानेन पूजयेत् ॥ यमाय त्वा मखाय त्वा दक्षिणं शृंगमर्च
येत् ॥१०२॥ उदीरतामवरेत्यथवानेन पूजयेत् ॥ आयं गौरिति मंत्रेण नैर्ऋत्यं शृङ्गमर्चयेत्॥१०३॥रक्षोहणं वाजिनं वा पूजयेदसुरांतिकम्॥ इंद्रासो
मा च यो मंत्रो ह्यथवा तेन पूजयेत् ॥ १०४ ॥ अभि त्वा सूर नोन्विति चैशानं शृंगमर्चयेत् ॥ येनेदं भूतमिति वा अथवानेन पूजयेत् ॥ १०५ ॥
नमोस्तु सर्पेभ्य इति मेरुपीठं सदाऽर्चयेत् ॥ हिरण्यगर्भः समवर्त्ततेति पुनर्मध्ये सदार्चयेत् ॥ १०६ ॥ सविता पश्चातादिति वै पूजयेत्पुष्प
मालया ॥ त्रिकालमर्चयेदेवि प्रदद्यादर्घ्यमादरात् ॥१०७॥ माता रुद्राणां दुहिता वसूनां पूर्वाह्णे चैव पूजयेत् ॥ मध्याह्ने पूजयेदेवि तद्विष्णोः परमं
पदम् ॥ १०८ ॥ हंसः शुचिषदिति वा अपराह्णे सदार्चयेत् ॥ एव भानुं ग्रहैः सार्द्धं पूजयेद्वरवर्णिनि ॥ १०९ ॥ ॥ देव्युवाच ॥ ॥ यानि
पुष्पाणि चेष्टानि सदा भास्करपूजने ॥ कानि चोक्तानि देवेश कथयस्व प्रसादतः ॥ ११० ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि पुष्पा
ध्यायमनुत्तमम् ॥ येन चार्कस्थले देवि शीघ्रं तुष्यति पूजितः ॥ १११ ॥ मालतीकुसुमैः पूजा भवेत्सांनिध्यकारिका ॥ मल्लिकायाश्च कुसुमैर्भोग
वान्जायते नरः ॥ ११२ ॥ सौभाग्यं पुंडरीकैस्तु भवत्यर्थश्च शाश्वतः ॥ कदंबपुष्पैर्देवेशि परमैश्वर्यमश्नुते ॥ ११३ ॥ भवत्यक्षयमन्नं च बकुलै
रर्चने रवेः ॥ मंदारपुष्पकैः पूजा सर्वकुष्ठविनाशिनी ॥ ११४ ॥ बिल्वस्य पत्रकुसुमैर्महतीं श्रियमश्नुते ॥ अर्कस्रजा भवत्यर्थः सर्वकामफलप्रदः ॥
॥ ११५ ॥ प्रदद्याद्रूपिणीं कन्यां पूजितो बकुलस्रजा ॥ किंशुकैरर्चितो देवि न पीडयति भास्करः ॥११६॥ अगस्तिकुसुमैस्तद्वदानुकूल्यं प्रयच्छ
ति ॥ करवीरैस्तु देवेशि सूर्यस्यानुचरो भवेत् ॥ ११७ ॥ शतपत्रस्रजा देवि सूर्यसालोक्यतां व्रजेत् ॥ बकपुष्पैर्महादेवि दारिद्र्यं नैव जायते ॥११८॥
ऋतुकुसुमेन गन्धेन समभ्यर्च्य दिवाकरम् ॥ चतुःसमुद्रमर्यादां स भुंक्ते पृथिवीमिमाम् ॥ ११९ ॥ यः सूर्यायतनं भक्त्या गैरिकेणोपलेपयेत् ॥
प्राप्नुयान्महतीं लक्ष्मीं रोगैश्चापि प्रमुच्यते ॥ १२० ॥ अष्टादशेह कुष्ठानि ये चान्ये व्याधयो नृणाम् ॥ प्रलयं यांति ते सर्वे मृदा यद्युपलेपयेत् ॥
॥ १२१ ॥ विलेपनानां सर्वेषां कुंकुमं रक्तचंदनम् ॥ पुष्पाणां करवीराणि प्रशस्तानि वरानने ॥१२२॥ नातः परतरं किंचिद्विवस्वतस्तुष्टिकारकम् ॥
यादृशं कुङ्कुमं जाती शतपत्रं तथाऽगुरुः ॥१२३॥ किं तस्य न भवेल्लोके यश्चैभिश्चार्चयेद्रविम् ॥ उपलिप्यालयं यस्तु कुर्यान्मंडलकं शुभम् ॥१२४॥ ॥ २७ ॥
एकेनास्य भवेदर्थो द्वाभ्यामारोग्यमश्नुते ॥ त्रिभिस्तु सर्वविद्यावांश्चतुर्भिर्भोगवान्भवेत् ॥१२५॥ पंचभिर्विपुलं धान्यं षड्भिरायुर्बलं यशः॥ सप्तमण्ड
लतारी स्यान्मंडलाधिपतिर्नरः ॥ १२६ ॥ घृतदीपप्रदानेन चक्षुष्माञ्जायते नरः ॥ कटुतैलस्य दीपेन स्वं शत्रुं जयते नरः ॥ १२७ ॥ तैलदीपप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दानेन सूर्यलोके महीयते ॥ मधूकतैलदीपेन सौभाग्यं परमं लभेत् ॥ १२८ ॥ पुष्पाणां प्रवरा जाती धूपानां विजयः परः ॥ गन्धानां कुंकुमं श्रेष्ठं लेपानां रक्तचंदनम् ॥ १२९ ॥ दीपदाने घृतं श्रेष्ठं नैवेद्ये मोदकः परम् ॥ एतैस्तुष्यति देवेशः सांनिध्यं चाधिगच्छति ॥ १३० ॥ एवं संपूज्य विधिवत्कृत्वा पितृप्रदक्षिणाम् ॥ प्रणम्य शिरसा देवं तत्र चार्कस्थलं प्रिये ॥ १३१ ॥ सुखासीनस्ततः पश्येद्रवेरभिमुखे स्थितः ॥ एकं सिद्धार्थकं कृत्वा हस्ते पानीयसंयुतम् ॥ १३२ ॥ कामं यथेष्टं हृदये कृत्वार्कस्थलसन्निधौ ॥ पिबेत्सतोयं तद्देवि ह्यस्पृष्टं दशनैः सकृत् ॥ १३३ ॥ एवं कृत्वा नरो देवि कोटियात्राफलं लभेत् ॥ ब्रह्मा विष्णुर्महादेवो ज्वलनो धनदस्तथा ॥ १३४ ॥ भानुमाश्रित्य सर्वे ते मोदन्ते दिवि सुव्रते ॥ तस्माद्भानुसमं देवं नाहं पश्यामि कञ्चन ॥ १३५ ॥ इति कृत्वा महादेवि पुनर्भानोः प्रदक्षिणम् ॥ कुर्यान्मन्त्रेण देवेशि सप्तकृत्वो वरानने ॥ १३६ ॥ तमुष्टवाम इति ऋक्प्रथमा परिकीर्तिता ॥ एतोन्विन्द्रं स्तवामेति द्वितीया परिकीर्तिता ॥ १३७ ॥ इंद्र शुद्धो न आगहि तृतीया परिकीर्तिता ॥ इन्द्रं शुद्धो हि नो रयिं चतुर्थी परिकीर्तिता ॥ १३८ ॥ अस्य वामस्येति शुभे पञ्चमी परिकीर्तिता ॥ त्रिभिष्ट्वं देव इति वै षष्ठी च परिकीर्तिता ॥ १३९ ॥ दश सामानि वै यानि प्रवराणि मनीषिभिः ॥ गीतानि सामगैर्नित्यं सप्तमीं तैस्तु कारयेत् ॥ १४० ॥ तानि ते कथयाम्यद्य दश सामानि सुन्दरि ॥ हुंकारः प्रणवोद्गीथः प्रस्तावश्च चतुष्टयम् ॥ १४१ ॥ पञ्चमं प्रहरो यत्र षष्ठमारण्यकं तथा ॥ निधनं सप्तमं साम्नां सप्तसिद्धिमिति स्मृतम् ॥ १४२ ॥ एतेषां पञ्चविध्यमिति प्रोक्तं ह्रींकारप्रणवेन[1] तु ॥ अष्टमं च तथा साध्यं नवमं वामदेवकम् ॥ १४३ ॥ ज्येष्ठं तु दशमं साम वेधसे प्रियमुत्तमम् ॥ एतेषां देवि साम्नां वै जाप्यं कार्यं विधानतः ॥ १४४ ॥ ज्येष्ठसामपरं चैव द्वितीयं गदतः शृणु ॥ न च श्राव्यं द्वितीयं तु जप्तव्यं मुक्तिमिच्छता ॥ १४५ ॥ तज्जाप्यं परमं प्रोक्तं स्वयं देवेन भानुना ॥ जाप्यस्य विनियोगोऽस्य[2] लक्षणं च निबोध मे ॥ स्तोभसारं श्वासलीनमौकारादि स्मृतं बुधैः ॥ १४६ ॥ यदेभिश्च यजेच्छब्दैरुचितं सामगैर्द्विजैः ॥ जाप्यं ऊँर्भानुश्च तथा धर्मं धर्मः सत्यं ऋतं तथा ॥ धर्मं ये धर्मवद्धर्मे धर्मे वै निधनं गताः ॥ १४७ ॥ जाप्यं चैतत्परं प्रोक्तं स्वयं देवेन भानुना ॥ १४८ ॥ एतद्वै जप्यमानस्तु पुनरावर्तते न तु ॥ सर्वरोगविनिर्मुक्तो मुच्यते ब्रह्महत्यया ॥ १४९ ॥ आज्यदो हाय्यदोहेति[3] ज्येष्ठसाम्नोऽपि लक्षणम् ॥ १५० ॥ इति संपूज्य देवेशं ततः कुर्यात्परां स्तुतिम् ॥ ऋग्भिर्वै पंचभिश्चैव शृणुष्वैकमनास्तु ताः ॥ १५१ ॥

१ हिंकारप्रणवेन तु—इ० पा० । २ विनियोगः, लक्षणं च—उच्यते—इति शेषः । तन्मे निबोध—इति योजना । ३ अयं श्लोकः सामवेदस्थपारिभाषिकसंज्ञासमन्वितोऽतः सुस्पष्टोऽस्यार्थो नावगम्यते—ततोऽयं श्लोकः शोधयितुमप्यशक्यत्वात्—यथाप्रति मूलपाठ एव स्थापितः—निर्मत्सरैः सज्जनैः सति यथावत्प्रामाण्योपलम्भे संशोधनीय इति संप्रार्थ्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



उक्षाणं पृश्निमिति वै प्रथमा परिकीर्तिता ॥ चत्वारि वाक्परीति वै द्वितीया परिकीर्तिता ॥ १५२ ॥ इंद्रं मित्रं तृतीया तु ऋक्चैव परिकीर्तिता ॥ कृष्णं नियानं हि तथा चतुर्थी परिकीर्तिता ॥ १५३ ॥ द्वादशप्रथम इति पंचमी परिकीर्तिता ॥ यो रत्नवाहीत्यनया किरीटं योजयेद्रवेः ॥१५४॥ गतेहनामित्यनया अव्यंगं भास्करं न्यसेत् ॥ अनेन विधिना देवि पूजयेद्विधिवद्रविम् ॥ १५५ ॥ इत्येष ते मया ख्यातः प्रतिमापूजने विधिः ॥ ॥ १५६ ॥ अनेन विधिना यस्तु सततं पूजयेद्रविम् ॥ स प्राप्नोत्यधिकान्कामानिह लोके परत्र च ॥ १५७ ॥ पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम् ॥ कन्यार्थी लभते कन्यां विद्यार्थी वेदविद्भवेत् ॥ १५८ ॥ निष्कामः पूजयेद्यस्तु स मोक्षं याति वै ध्रुवम् ॥ अस्य क्षेत्रस्य माहात्म्याद र्कसूर्यप्रभावतः[1] ॥ १५९ ॥ अन्यत्र ब्राह्मणानां च कोटिना यत्फलं लभेत्॥ अर्कस्थले तथैकेन भोजितेन तु तत्फलम् ॥ १६० ॥ स्नानं दानं जपो होमः सूर्यपर्वणि यत्कृतम् ॥ तत्सर्वं कोटिगुणितं सूर्यकोटिप्रभावतः ॥ १६१ ॥ माघमासे नरो यस्तु सप्तम्यां रविवासरे ॥ कृष्णपक्षे महादेवि जागरं श्रद्धयाऽऽचरेत् ॥ अर्कस्थलसमीपे तु स याति परमां गतिम् ॥ १६२ ॥ गोशतस्य प्रदत्तस्य कुरुक्षेत्रे च यत्फलम् ॥ तत्फलं समवाप्नोति तत्रार्कस्थलदर्शनात् ॥ १६३ ॥ अर्कस्थलः पूजनीयस्तत्र स्थाने निवासिभिः ॥ जपापुष्पैरर्कपुष्पै रोगिभिस्तु विशेषतः ॥ १६४ ॥ न च पत्रोर्णकुसुमैर्न[2] चैवोन्मत्तसंभवैः ॥ न चाम्रातकजैः पुष्पैरर्चनीयो दिवाकरः ॥ १६५ ॥ आम्रातकस्य कुसुमं निर्माल्यमिव दृश्यते ॥ अप्रत्यग्रं बहिर्यस्मात्तस्मात्तत्परिवर्जयेत् ॥ १६६ ॥ नाविज्ञातं प्रदातव्यं न म्लानं न च दूषितम् ॥ न च पर्युषितं माल्यं दातव्यं भूतिमिच्छता ॥ १६७ ॥ देवमुल्लोचयेद्यस्तु तत्क्षणात्पुष्पलोभतः ॥ पुष्पाणि च सुगन्धानि भोजकेनेतराणि[3] च ॥ १६८ ॥ ब्रह्महत्यामवाप्नोति भोजको लोभमोहितः ॥ महारौरवमासाद्य पच्यते शाश्वतीः समाः ॥ १६९ ॥ हन्त ते कीर्त्तयिष्यामि धूपदानविधिं परम् ॥ प्रदानाद्देवदेवस्य येन धूपेन यत्फलम् ॥ १७० ॥ सदार्चने च धूपेन सामीप्यं कुरुते रविः ॥ प्रदद्यात्सकलं कामं यद्यदिच्छति मानवः ॥ १७१ ॥ तथैवागुरुधूपेन निधिं दद्यादभीप्सितम् ॥ आरोग्यार्थी धनार्थी च नित्यदा गुग्गलं दहेत् ॥ १७२ ॥ पिंडातधूपदानेन सदा तुष्यति भानुमान् ॥ आरोग्यं च स्वयं दद्यात्सौख्यं च परमं भवेत् ॥ १७३ ॥ श्रीवासकस्य धूपेन वाणिज्यं सकलं लभेत ॥ रसं सर्जरसं चैव दहतोऽर्थागमो भवेत् ॥ १७४ ॥ देवदारुं च दहतो भवत्यन्नमथाक्षयम् ॥ विलेपनं कुंकुमेन सर्वकामफलप्रदम् ॥ १७५ ॥ इह लोके सुखी भूत्वा अक्षयं स्वर्गमाप्नुयात् ॥ चंदनस्य प्र

१ सूर्यकोटिप्रभावतः—अर्कस्थलप्रभावात्—इत्यर्थः । २ पत्रोर्णकुसुमैः—श्योनाकवृक्षपुष्पैः—इत्यर्थः । ३ भोजकेन—सूर्यस्य पूजकेन—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लेपेन श्रियमायुश्च विंदति ॥ १७६ ॥ रक्तचन्दनलेपेन सर्वं दद्याद्दिवाकरः ॥ अपि रोगशतैर्ग्रस्तः क्षेममारोग्यमाप्नुयात् ॥ १७७ ॥ गतिगंधं च सौभाग्यं परमं विंदते नरः ॥ कस्तूरिकामर्दनकैरैश्वर्यमतुलं लभेत् ॥ १७८ ॥ कर्पूरसंयुतैर्गंधैः क्ष्माधिपाधिपतिर्भवेत् ॥ चतुःसमेन गंधेन सर्वान्कामानवाप्नुयात् ॥ १७९ ॥ एतत्ते कथितं देवि सूर्यमाहात्म्यमुत्तमम् ॥ सविस्तरं मया ख्यातं किमन्यत्परिपृच्छसि ॥१८०॥ ॥ देव्युवाच ॥ ॥ यद्येवं भगवान्सूर्यः सर्वतेजस्विनां वरः ॥ स कथं ग्रस्यते देव सैंहिकेयेन राहुणा ॥ १८१ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि सर्वं पापप्रणाशनम् ॥ कारणं ग्रहणस्यापि भ्रांतेर्विच्छेदकारकम् ॥ १८२ ॥ राहुरादित्यबिंबस्याधस्तात्तिष्ठति भामिनि ॥ अमृतार्थी विमानस्थो यावत्सं स्रवतेऽमृतम् ॥ १८३ ॥ बिंबेनांतरितो देवि आदित्यग्रहणं हि तत् ॥ न कश्चिद्ग्रसितुं शक्त आदित्यो दहति ध्रुवम् ॥ १८४ ॥ ब्रह्मादयस्तमर्चंति स आदिः सर्वनाकिनाम् ॥ आदित्यदेहजाः सर्वे तथान्ये देवदानवाः ॥१८५॥ आदिकर्त्ता स्वयं यस्मादादित्यस्तेन चोच्यते ॥ प्रभासे संस्थितो देवः सर्वपातकनाशनः ॥ १८६ ॥ भुक्तिमुक्तिप्रदो देवो व्याधिदुष्कृतनाशकृत् ॥ तत्र सिद्धाः पुरा देवि लोकपाला महर्षयः ॥ १८७ ॥ सिद्धा विद्याधरा यक्षा गंधर्वा मुनयस्तथा ॥ धनदोऽपि तथा भीष्मो ययातिर्गालवस्तथा ॥ १८८ ॥ सांबश्चैव तथा देवि परां सिद्धिमितो गताः ॥ इदं रहस्यं देवेशि सूर्यमाहात्म्यमुत्तमम् ॥ १८९ ॥ न देयं दुष्टबुद्धीनां पापिनां च विशेषतः ॥ न नास्तिकेऽश्रद्दधाने न क्रूरे वा कथंचन ॥ १९० ॥ इमां कथामनुब्रूयात्तथा नाऽसूयके शिवे ॥ इदं पुत्राय शिष्याय धर्मिणे न्यायवर्तिने ॥ १९१ ॥ कथनीयं महाब्रह्म सूर्यभक्ताय सुव्रते ॥ अर्कस्थलस्य देवस्य माहात्म्यमिदमुत्तमम् ॥ १९२ ॥ यः श्राद्धे श्रावयेद्देवि ब्राह्मणान्संशितव्रतान् ॥ तस्यानंतं भवेद्देवि यद्दानं पुरुषस्य वै ॥ १९३ ॥ यत्रेदं कीर्त्यते पुण्यं संपदस्तत्र वै सदा ॥ यातुधाना न हिंसंति तच्छ्राद्धं भयविह्वलाः ॥ १९४ ॥ पंक्तिपावनतां यांति येऽपि वै पंक्तिदूषकाः ॥ सुतवाञ्जन्मवांश्च स्यात्सर्वकाममनोरमः ॥ १९५ ॥ प्रवासिभिर्बंधुवर्गैः संयुज्येत सदा नरः ॥ नष्टैः संयुज्यते चार्थैरपरैश्चापि चिंतितैः ॥ १९६ ॥ रक्ष्यते योगिनीभिश्च प्रियैश्च न वियुज्यते ॥ उपस्पृश्य शुचिर्भूत्वा शृणुयाद्ब्राह्मणः सदा ॥ सर्वान्कामांश्च लभते नात्र कार्या विचारणा ॥ १९७ ॥ वैश्यः समृद्धिमतुलां क्षत्रियः पृथिवीपतिः ॥ वणिजश्चापि वाणिज्यमखंडं शतसंख्यया ॥ लभेयुः कीर्तनादस्याः सूर्योत्पत्तेर्वरानने ॥ १९८ ॥ शूद्राश्चैवाभिलषितान्कामान्प्राप्स्यंति भामिनि ॥ [1]अपमृत्युभयं घोरं मृत्युतोऽपि महाभयम् ॥ १९९ ॥ नश्यते नात्र संदेहो राजद्वारकृतं च यत् ॥

१ अल्पमृत्युभयम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





सर्वकामसमृद्धात्मा सूर्यलोके महीयते ॥ २०० ॥ इत्येतत्कथितं देवि माहात्म्यं सूर्यदैवतम् ॥ अर्कस्थलप्रसंगेन किमन्यच्छ्रोतुमिच्छसि ॥ ॥ २०१ ॥ स्थानं शाश्वतमोजसां गतिरपां दीपो दिशामक्षयः सिद्धेर्द्वारमपायभेदि जगतां साधारणं लोचनम्॥ हैमं पुष्करमंतरिक्षसरसो दीप्तं दिवः कुण्डलं कालोन्मानविभावनाक्षतलयं बिंबं रवेः पातु वः ॥ २०२॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्येऽर्कस्थलमाहात्म्यार्कस्थलपूजाविधानादिवर्णनंनाम सप्तदशोऽध्यायः ॥ १७ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ इति प्रोक्ता तदा देवी शंकरेण यशस्विनी ॥ पुनः पप्रच्छ विप्रेंद्राः क्षेत्रमाहात्म्यविस्तरम्[1] ॥ १ ॥ ॥ देव्युवाच ॥ ॥ अद्य मे सफलं जन्म सफलं च तपः प्रभो ॥ देवत्वमद्य मे जातं त्वत्प्रसादेन शंकर ॥ २ ॥ अद्याहं कृतकल्याणी ज्ञानदृष्टिः कृता त्वया ॥ अद्य मे भूषितौ कर्णौ क्षेत्र माहात्म्यभूषणौ ॥ ३ ॥ अद्य मे तेजसः पिंडो जातो ज्ञानं हृदि स्थितम् ॥ अद्य मे कुलशीलं च अद्य मे रूपलक्षणम् ॥ ४ ॥ अद्य मे भ्रांति रुच्छिन्ना तीर्थभ्रमणसंभवा ॥ प्रभासे निश्चलं जातं मनो मे मानिनां वर ॥ ५ ॥ आराधितो मया पूर्वं तुष्टो मेऽद्य सुरेश्वरः ॥ वह्निना वेष्टिता साहमे कपादेन संस्थिता ॥ ६ ॥ तत्तपः सफलं त्वद्य जातं मे भक्तवत्सल ॥ प्रभासक्षेत्रमाहात्म्यमद्य मे प्रकटीकृतम् ॥ ७॥ पुनः पृच्छामि देवेश याथा तथ्यं वद प्रभो ॥८॥ अद्यापि संशयो नाथ तीर्थमाहात्म्यसंभवः॥ अन्यत्कौतूहलं देव कथयस्व महेश्वर ॥ ९ ॥ अयं यो वर्त्तते देव चंद्रस्ते शिरसि स्थितः ॥ कस्यायं कथमुत्पन्नः कस्मिन्काले वद प्रभो ॥ १० ॥ ॥ ईश्वर उवाच ॥ ॥ अस्मिन्काले महादेवि वाराह इति विश्रुते ॥ परार्द्धे तु द्विती येऽस्मिन्वर्तमाने तु वेधसः ॥ ११ ॥ द्वितीयमासस्यादौ तु प्रतिपद्या प्रकीर्तिता ॥ वाराहेणोद्धृता तस्यां तथा चादौ धरा प्रिये ॥ तेन वाराहकल्पेति नाम जातं धरातले ॥ १२ ॥ तस्मिन्कल्पे महादेवि गते संध्यांशके प्रिये ॥ प्रथमस्य मनोश्चादौ देवि स्वायंभुवस्य हि ॥ १३ ॥ क्षीरोदे मथ्यमाने तु दैवतैर्दानवैरपि ॥ रत्नानि जज्ञिरे तत्र चतुर्दशमितानि वै ॥ १४ ॥ तेषां मध्ये महातेजाश्चंद्रमास्तत्त्वसंभवः ॥ सोऽयं मया धृतो देवि अद्यापि शिरसि प्रिये ॥ १५ ॥ विषे पीते महादेवि प्रभासस्थस्य मे सदा ॥ भूषणं मुक्तये देवैर्मम चंद्रः कृतः पुरा ॥ १६ ॥ शशिना भूषितो यस्मात्तेनाहं शशिभूषणः ॥ तत्र स्थाने स्थितोऽद्यापि स्वयंभूलिंगमूर्त्तिमान् ॥ १७॥ सर्वसिद्धिप्रदाता च कल्पस्थायी सदा प्रिये[2] ॥ इत्येतत्कथितं देवि किम

१ क्षेत्रमाहात्म्यमुत्तमम्–इ० पा० । २ अस्ति–इति शेषः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यत्परिपृच्छसि ॥ १८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये शिवशिरोभूषण चन्द्रोत्पत्तिवृत्तान्तवर्णनंनामाष्टादशोऽध्यायः ॥ १८ ॥ ॥ छ ॥ ॥ देव्युवाच ॥ ॥ यद्येवं सकलश्चंद्रः कथं न विधृतस्त्वया ॥ अन्तभावे कलानां तत्कारणं कथय प्रभो ॥ १ ॥ ॥ ईश्वर उवाच ॥ ॥ अमा षोडशभेदेन देवि प्रोक्ता महाकला ॥ संस्थिता परमा माया देहिनां देह धारिणी ॥ २ ॥ अमादिपौर्णमास्यंता या एव शशिनः कलाः ॥ तिथयस्ताः समाख्याताः षोडशैव प्रकीर्तिताः ॥ ३ ॥ अमा सूक्ष्मा परा शक्तिः सा त्वं देवि प्रकीर्तिता ॥ प्रलयोत्पत्तियोगेन स्थिताः कालक्रमोदिताः ॥४॥ षोडशैव स्वरा ये तु आद्याः सृष्ट्यंतकाः प्रिये ॥ कालस्यावयवास्ते च विज्ञेयाः कालवेदिभिः ॥ ५ ॥ त्रुटिर्लवो निमेषश्च कला काष्ठा मुहूर्तकम् ॥ रात्र्यहः पक्षमासाश्च अयनं वत्सरं युगम् ॥ ६ ॥ मन्वंतरं तथा कल्पं महाकल्पं च षोडश ॥ कला विसर्जनी या तु जीवमाश्रित्य वर्तते ॥७॥ सा सृजत्यखिलं विश्वं विषुवद्वयसंयुतम्[१] ॥ तथा संवरणी या तु विश्वं संहरते प्रिये ॥ ८ ॥ नेत्रपाताच्चतुर्भागस्त्रुटिकालो निगद्यते ॥ तस्माच्च द्विगुणं विद्धि निमिषं तन्महेश्वरि ॥ ९ ॥ निमिषैस्त्रिंशद्भिः काष्ठा ताभिर्विंशतिभिः कला ॥ विंशतिकलो मुहूर्तः स्याद्दिनं पंचदशैस्तु तैः ॥१०॥ दिनमाना निशा ज्ञेया अहोरात्रं द्वयाद्भवेत् ॥ तैः पंचदशभिः पक्षो द्विपक्षो मास उच्यते ॥११॥ मासैश्चैवायनं षड्भिर्वर्षं स्यादयनद्वये ॥ चत्वारिंशच्च लक्षाणि लक्षाणां त्रितयं पुनः ॥ १२ ॥ विंशतिश्च सहस्राणि ज्ञेयं सौरं चतुर्युगम् ॥ चतुर्युगैकसप्तत्या मन्वंतरमुदाहृतम् ॥१३॥ ऐंद्रमेतद्भवेदायुः समासांतं च कीर्तितम् ॥ चतुर्दशेन्द्रैः प्रलीनैः कल्पं ब्रह्मदिनं भवेत् ॥१४॥ रात्रिश्च तावती चैव चतुर्युगसहस्रिका ॥ अनेन दिनमानेन शताब्दं जीवति प्रिये ॥१५॥ ममैव निमिषार्द्धेन सहस्राणि चतुर्दश ॥ विनश्यंति ततो विष्णोरसंख्याताः पितामहाः ॥१६॥ एवं क्रमेण देवेशि समुत्पन्नमिदं जगत् ॥ शशिसूर्यविभागेन चित्ररूपमनंतकम् ॥१७॥ कला देवि यदाद्यंतमनादिमजमव्ययम् ॥ तदान्वितः शशी तस्यामधोमुखमवस्थितः ॥ १८ ॥ एवं क्षयोदयं ज्ञेयं चंद्रार्काभ्यामवस्थितम्[२] ॥ सृष्टिक्रमं मया प्रोक्तं संहारमधुना शृणु ॥ १९ ॥ महाकल्पं हतं कल्पैः कल्पं मन्वंतरैर्हतम् ॥ मासं पक्षाहतं कृत्वा तं चाहोरात्रिभाजितम् ॥२०॥ अहोरात्रं मुहूर्तेन मुहूर्तं तु कलाहतम् ॥ कलां काष्ठा हतां कृत्वा काष्ठां निमिषभाजिताम् ॥ २१ ॥ निमिषं च लवैर्हत्वा लवं त्रुटिविभाजितम् ॥ तदतीतं प्रशांतं च निर्विकारमलक्षणम् ॥२२॥ तस्य चेयं परा माया कला शिरसि धारिता ॥ सा शक्तिर्देवदेवस्य विश्वाकारा परा प्रिये ॥ मोहयित्वा तु संतानं संसारयति पार्वति ॥२३॥ एवमेतज्जगद्देवि

१ विषुवद्वयसंयुता—इ० पा० । २ चन्द्रार्काभ्याम्—चन्द्रार्कयोः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



उत्पत्तिस्थितिलक्षणम् ॥ यत्रैवोत्पद्यते कृत्स्नं पुनस्तत्रैव लीयते ॥ २४ ॥ सेयं मायामयी शक्तिः शुद्धाशुद्धस्वरूपिणी ॥ चंद्ररूपा स्थिता सा तु
तव देवि प्रकाशयेत् ॥ २५ ॥ ॥ देव्युवाच ॥ ॥ पंचाग्निनोपसन्तप्ता वर्षकोटीरनेकधा ॥ तत्तपः सफलं जातं मेऽ[1]द्य देव जगत्पते ॥ २६ ॥
सृष्टियोगो मया ज्ञातः संहारश्च महेश्वर ॥ चन्द्रोत्पत्तिस्वरूपं च कलामानं तथैव च ॥ २७ ॥ अधुना मम देवेश सन्देहो हृदि संस्थितः ॥ कौतू
हलं परं देव कथयस्व महेश्वर ॥ २८ ॥ अमृतादेव संभूतः सर्वाह्लादकरः शशी ॥ प्रियश्च तव देवेश वल्लभश्चंद्रमास्तथा ॥ २९ ॥ चंद्रे च चदि
इत्येष ल्हादने धातुरिष्यते ॥ शुक्लत्वे चापतत्त्वे च मया त्वेष विभाव्यते ॥३०॥ सर्वौषधीनामधिपः पितॄणां प्रीणनं परम् ॥ तदाश्रयश्च त्वद्भक्तस्त्व
त्सेवातत्परः शशी ॥ ३१ ॥ तथापि सकलंकोऽयं कौतुकं कुरुते मम ॥ देवि ब्रह्मांडसंघट्टमालामंडितशेखरः ॥ ३२ ॥ शीर्षे तव निविष्टस्य कष्टं
चंद्रस्य चेद्यदि ॥ तर्हि नाथ न शोच्या वै संसारे दुःखभागिनः ॥ ३३ ॥ न चास्ति त्रिषु लोकेषु न चैतत्संभविष्यति ॥ यत्र शक्तो भवान्कर्तुं
दुःखस्यास्य च संक्षयम् ॥ ३४ ॥ सर्वेषां वर्तते शंका यथा मम महेश्वर ॥ उत्पन्नं कारणं किं तद्येन सोमस्य लांछनम् ॥ ३५ ॥ किमेतत्कारणं
देव कथयस्व महेश्वर ॥ अमृते संभवो यस्य कथं तस्यापि लांछनम् ॥ ३६ ॥ प्रियश्च तव देवेश लांछनं चापि तिष्ठति ॥ कौतूहलं परं देव
तत्त्वं मे वक्तुमर्हसि ॥ ३७ ॥ एवमुक्तः स पार्वत्या देवदेवो महेश्वरः ॥ उवाच परमप्रीतः प्रेम्णा शैलसुतां प्रभुः ॥ ३८ ॥ ॥ ईश्वर उवाच ॥ ॥
किं ते देवि महाशंकाद्योत्पन्ना वरवर्णिनि ॥ ममोपरि न कर्त्तव्या निरुद्विग्ना भव प्रिये ॥ पितुस्[3]तव प्रभावेन लांछनं शशिनोऽभवत् ॥ ३९ ॥
भावित्वात्कर्मणो देवि दक्षस्याज्ञाव्यतिक्रमात् ॥ समं वर्त्तस्व भार्याभिरुत्युक्तः शशलांछनः ॥ ४० ॥ तद्वाक्यमन्यथा चक्रे ततः शप्तः शशी प्रिये ॥
इदं पृष्टं तु यद्देवि त्वया लांछनकारणम् ॥ ४१ ॥ कल्पेकल्पे पृथग्भावं कारणैरस्ति भामिनि ॥ असंख्यातं च तद्वक्तुं शक्यं नैव मया
प्रिये ॥ ४२ ॥ असंख्येयाश्चन्द्रमसः संभवंति पुनःपुनः ॥ विनश्यंति च देवेशि सर्वमन्वन्तरान्तरम् ॥ ४३ ॥ असंख्याताश्च कल्पाख्या असंख्याताः
पितामहाः ॥ हरयश्चाप्यसंख्याता एक एव महेश्वरः ॥ ४४ ॥ कोटिकोट्ययुतान्यत्र ब्रह्माण्डानि मम प्रिये ॥ जलबुद्बुदवद्देवि संजातानि तु लीलया ॥
॥४५॥ तत्रतत्र चतुर्वक्त्रा ब्रह्माणो हरयो भवाः ॥सृष्टाः प्रधानेन तदा लब्धा शंभोस्तु संनिधिः ॥४६॥ लयं चैव तथान्योन्यमाद्यंतं प्रकरोति च ॥
सर्गसंहारसंस्थानां कर्त्ता देवो महेश्वरः ॥४७॥ सर्गे च रजसा पृक्तः सत्त्वस्थः परिपालने ॥ प्रतिसर्गे तमोयुक्तः सोऽहं देवि त्रिधा स्थितः ॥ ४८ ॥

१ पादादावस्मदो मद्यादेश आर्षः । २ संसारस्य—इ० पा० । ३ पितुः—दक्षस्य—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मान्माहेश्वरो ब्रह्मा ब्रह्मणोऽधिपतिः शिवः ॥ सदाशिवो भवेद्विष्णुर्ब्रह्मा सर्वात्मको ह्यतः ॥ ४९ ॥ स एव भगवान्रुद्रो विष्णुर्विश्व जगत्प्रभुः ॥ अस्मिन्नण्डे त्विमे लोका अन्तर्विश्वमिदं जगत् ॥ ५० ॥ चन्द्रसूर्यग्रहा देवि ब्रह्माण्डेऽस्मिन्मनस्विनि ॥ संख्यातुं नैव शक्यन्ते ये भविष्यंति ये गताः ॥ ५१ ॥ अस्मिन्वाराहकल्पे तु वर्तमाने मनस्विनि ॥ षडतीता महादेवि रोहिणीपतयः पुरा ॥ ५२ ॥ सप्तमोऽयं महादेवि वर्ततेऽमृतसम्भवः ॥ दक्षशापेन यो देवि संक्षीणो दृश्यतेऽधुना ॥ ५३ ॥ अथ द्वितीये संप्राप्ते परार्द्धे चैव वेधसः ॥ तस्य त्रिंशत्तिमे कल्पे पितृ कल्पेतिविश्रुते ॥ ५४ ॥ स्वायंभुवेंऽतरे प्राप्ते तस्यादौ त्वं सती किल ॥ तस्मिन्काले महादेवि योभूद्दक्षः पिता तव ॥ ५५ ॥ प्राणात्प्रजा पतेर्जन्म तस्य दक्षस्य कीर्तितम् ॥ अस्मिन्मन्वन्तरे देवि दक्षः प्राचेतसोऽभवत् ॥ ५६ ॥ अंगुष्ठाद्दक्षिणाद्दक्षो भविष्यत्यधुना प्रिये ॥ युगेयुगे भवन्त्येते सर्वे दक्षादयो द्विजाः ॥ ५७ ॥ पुनश्चैव विनश्यन्ति विद्वांस्तत्र न मुह्यति ॥ तस्यापमानात्त्वं देवि देहं तत्यक्थ वै पुरा ॥ ५८ ॥ तावद्वि युक्तोऽहं देवि त्वया मुक्तोऽभवं पुरा ॥ यावद्वराहकल्पस्य चाक्षुषस्यान्तरं प्रिये ॥ ५९ ॥ एकविंशो मनुश्चायं कल्पे वाराहसंज्ञके ॥ कल्पेकल्पे महा देवि भवेन्नामान्तरं तव ॥ ६० ॥ अस्मिन्कल्पे तु वाराहे हिमवत्तपसार्ज्जिते ॥ संभूता पार्वती देवि चाक्षुषस्यांतरे गते ॥ ६१ ॥ ब्रह्मणो दिनमेकं तु षण्मासेन तवावधिः ॥ त्वं वियुक्ता मया सार्द्धं दक्षकोपेन भामिनि ॥ ६२ ॥ तव क्रोधेन ये शप्ता ऋषयो वै मया पुरा ॥ तेऽपि देवि त्वया सार्द्धं जाता वैवस्वतेंतरे ॥ ६३ ॥ भृगुरंगिरा मरीचिस्तु पुलस्त्यः पुलहः क्रतुः ॥ अत्रिश्चैव वसिष्ठश्च अष्टौ ते ब्रह्मणः सुताः ॥ ६४ ॥ दक्षस्य यज्ञे ते शप्ताः पूर्वं स्वायंभुवेन्तरे ॥ जाता देवि पुनस्ते वै कल्पेस्मिंश्चाक्षुषे गते ॥ ६५ ॥ देवस्य महतो यज्ञे वारुणीं बिभ्रतस्तनुम् ॥ ब्रह्मणो जुह्वतः शुक्र मग्नौ पूर्वं प्रजेप्सया ॥ ६६ ॥ ऋषयो जज्ञिरे पूर्वं सूर्यबिंबसमप्रभाः ॥ पितुस्तव समीपे ते वरणाय तव प्रिये ॥ प्रस्थापिता मया पूर्वं तत्त्वं जानासि सुव्रते ॥ ६७ ॥ अथ किं बहुनोक्तेन वच्मि ते प्रश्नमुत्तमम् ॥ द्वितीये तु परार्द्धेऽस्मिन्वर्त्तमाने च वेधसः ॥ ६८ ॥ श्वेतकल्पात्समारभ्य यावद्वाराहगोचरम् ॥ समतीताश्च ये चन्द्रास्ताञ्छृणुष्व वरानने ॥ ६९ ॥ चतुःशतानि देवेशि षड्विंशत्यधिकानि तु ॥ गतानि शीतरश्मीनां सप्तविंशोऽधुना प्रिये ॥ ७० ॥ वैवस्वतेंऽतरे प्राप्ते यश्चायं वर्ततेऽधुना ॥ त्रेतायुगे तु दशमे दत्तात्रेयपुरःसरः ॥ ७१ ॥ संजातो रोहिणीनाथो योऽधुना वर्त्तते प्रिये ॥ तस्योत्पत्तिप्रसंगेन विष्णोर्मानुषसंभवान् ॥ ७२ ॥ देहावतारान्वक्ष्यामि प्रारंभात्प्रथमान्प्रिये ॥ पञ्चमः पंचदश्यां

१ निरुध्यंते–इ० पा० । २ एकविंशो मनुश्चायम्–एतेन पितृकल्पस्थस्वायंभुवमन्वन्तरमारभ्य वाराहकल्पस्थचाक्षुषमन्वन्तरपर्यंतं गणनयैकविंशत्वं चाक्षुषमन्वन्तरस्य बोद्धव्यम् । ३ जाते–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

स त्रेतायां तु बभूव ह ॥ ७३ ॥ मांधाता चक्रवर्त्तित्वे तस्योतथ्यपुरःसरः ॥ एकोनविंशत्रेतायां सर्वक्षत्रांतकोऽभवत् ॥ ७४ ॥ जामदग्न्य
स्तथा षष्ठो विश्वामित्रपुरःसरः ॥ चतुर्विंशे युगे रामो वसिष्ठेन पुरोधसा ॥ ७५ ॥ सप्तमो रावणस्यार्थे जज्ञे दशरथात्मजः ॥ अष्टमे
द्वापरे विष्णुरष्टाविंशे पराशरात् ॥ ७६ ॥ वेदव्यासस्ततो जज्ञे जातूकर्ण्यपुरःसरः ॥ तत्रैव नवमो विष्णुरदितेः कश्यपात्मजः ॥ ७७ ॥
देवक्यां वसुदेवात्तु ब्रह्मगर्गपुरःसरः ॥ एकविंशतमस्यास्य द्वापरस्यांशसंक्षये ॥ नष्टे धर्मे तदा जज्ञे विष्णुर्वृष्णिकुले स्वयम् ॥ ७८ ॥ कर्तुं
धर्मव्यवस्थानमसुराणां प्रणाशनः ॥ पूर्वजन्मनि विष्णुः स प्रमतिर्नाम वीर्यवान् ॥ ७९ ॥ गोत्रेण वै चंद्रमसः संध्यामिश्रे भविष्यति ॥
कल्किर्विष्णुयशानाम पाराशर्यप्रतापवान् ॥ ८० ॥ दशमो भाव्यसंभूतो याज्ञवल्क्यपुरःसरः ॥ अनुकर्षंश्च वै सेनां हस्त्यश्वरथसंकुलाम् ॥ ८१ ॥
प्रगृहीतायुधैर्विप्रैर्भृशं शतसहस्रशः ॥ निःशेषाञ्छूद्रराज्ञस्तांस्तदा स तु करिष्यति ॥ ८२ ॥ पाखंडान्म्लेच्छजातींश्च दस्यूंश्चैव सहस्रशः ॥ नात्यर्थं
धार्मिका ये च ब्रह्मब्रह्मद्विषः क्वचित् ॥ ८३ ॥ प्रवृत्तचक्रो बलवाञ्छूराणामंतको बली ॥ अदृश्यः सर्वभूतानां पृथिवीं विचरिष्यति ॥ ८४ ॥
मानवस्य तु सोंऽशेन देवस्य भुवि वै प्रभुः ॥ क्षपयित्वा तु तान्सर्वान्भाविनार्थेन नोदितान् ॥ गंगायमुनयोर्मध्ये निष्ठां प्राप्स्यति सानुगः ॥ ८५ ॥
ततो व्यतीते कल्कौ तु सामात्ये सहसैनिके ॥ नृपेष्वपि च नष्टेषु तदात्वप्रहराः प्रजाः ॥ ८६ ॥ रक्षणे विनिवृत्ते च हत्वा चान्योन्यमाहवे ॥
परस्परहतास्ताश्च निराक्रंदाः सुदुःखिताः ॥ ८७ ॥ क्षीणे कलियुगे चास्मिन्दशवर्षसहस्रके[1] ॥ ससंध्यांशे तु निःशेषे कृतं वै प्रतिपत्स्यति ॥ ८८ ॥
यदा चंद्रश्च सूर्यश्च तथा[2] तिष्यबृहस्पती ॥ एकराशौ समेष्यंति प्रपंत्स्यति तदा कृतम् ॥ ८९ ॥ अभिजिन्नाम नक्षत्रं जयंतीनाम शर्वरी ॥ मुहूर्तो
विजयोनाम यत्र जातो जनार्दनः ॥ ९० ॥ ॥ देव्युवाच ॥ ॥ नोक्तं यथावदखिलं भृगुशापविचेष्टितम् ॥ पूर्वावतारान्मे ब्रूहि नोक्तपूर्वान्महेश्वर
॥ ९१ ॥ ॥ ईश्वर उवाच ॥ ॥ यदा तु पृथिवी व्याप्ता दानवैर्बलवत्तरैः ॥ ततः प्रभृति शापेन भृगुर्नैमित्तिकेन ह ॥ ९२ ॥ जज्ञे पुनःपुनर्विष्णुः
कर्तुं धर्मव्यवस्थितिम्[3] ॥ धर्मान्नारायणः साध्यः संभूतश्चाक्षुषेंतरे ॥ ९३ ॥ यज्ञं प्रवर्तयामास स च वैवस्वतेंऽतरे ॥ प्रादुर्भावे तद तस्य ब्रह्मा
चासीत्पुरोहितः ॥ ९४ ॥ चतुर्थ्यां तु युगाख्यायामापन्नेषु[4] सुरेष्विह ॥ संभूतः स समुद्रात्तु हिरण्यकशिपोर्वधे ॥ ९५ ॥ द्वितीयो नरसिंहोऽभूद्रुद्र
स्तस्य पुरःसरः ॥ लोकेषु बलिसंस्थेषु त्रेतायां सप्तमे युगे ॥९६॥ दैत्यैस्त्रैलोक्य आक्रांते तृतीयो वामनोभवत् ॥ संक्षिप्यात्मानमंगेषु बृहस्पतिपुरः



१ दिव्यवर्षसहस्रके–इ० पा० । २ यदा–इ० पा० । ३ कर्मव्यवस्थितिम्–इ० पा० । ४ आपन्नेषु–आपत्प्राप्तेषु-इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सरः ॥ ९७ ॥ त्रेतायुगे तु दशमे दत्तात्रेयो बभूव ह ॥ नष्टे धर्मे चतुर्थांशे मार्कंडेयपुरःसरः ॥ एते दिव्यावतारा वै मानुष्ये कथिताः पुरा ॥ ९८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये श्रीविष्णववतारवर्णनंनामैकोनविंशोऽध्यायः ॥ १९ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ अथ दैत्यावताराणां क्रमो हि कथ्यते पुनः ॥ हिरण्यकशिपू राजा वर्षाणामर्बुदं बभौ ॥ १ ॥ तथा शत सहस्राणि यानि कानि द्विसप्ततिम् ॥ अशीतिं च सहस्राणि त्रैलोक्यस्येश्वरोऽभवत्॥२॥ सौत्येऽहन्यतिरात्रस्य कश्यपस्याश्वमेधिके ॥३॥ उपक्षिप्ता सनं यत्तु होतुरर्थे हिरण्मयम् ॥ निषसाद स गर्तोऽत्र हिरण्यकशिपुस्ततः ॥ ४ ॥ शतवर्षसहस्राणां तपश्चक्रे सुदुश्चरम् ॥ दशवर्षसहस्राणि दित्या गर्भे स्थितः पुरा ॥ ५ ॥ हिरण्यकशिपोर्दैत्यैः श्लोको गीतः पुरातनः ॥ राजा हिरण्यकशिपुर्यांयामाशां निरीक्षते ॥ ६ ॥ तस्यां तस्यां दिशि सुरा नमश्चक्रुः सहर्षिभिः ॥ पर्याये तस्य राजाभूद्बलिर्वर्षार्बुदं पुनः ॥ ७ ॥ षष्टिं चैव सहस्राणि त्रिंशच्च नियुतानि च ॥ बले राज्याधिकारस्तु याव त्कालं बभूव ह ॥ ८ ॥ प्रह्लादो निगृहीतोऽभूत्तावत्कालं तथा सुरैः ॥ इंद्रादयस्ते विख्याता असुराञ्घुरोजसा ॥ ९ ॥ दैत्यसंस्थमिदं सर्वमा सीद्दशयुगं किल ॥ असपत्नं ततः सर्वमष्टादशयुगं पुनः ॥ १० ॥ त्रैलोक्यमिदमव्यग्रं महेंद्रेण तु पालितम् ॥ त्रेतायुगे तु दशमे कार्त्तवीर्यो महाबलः ॥ ११ ॥ पंचाशीतिसहस्राणि वर्षाणां वै नराधिपः ॥ स सप्तरत्नवान्सम्राट् चक्रवर्ती बभूव ह ॥ १२ ॥ द्वीपेषु सप्तसु स वै खड्गी चर्मी शरासनी ॥ रथी राजा सानुचरो योगाच्चौरानपश्यत ॥ १३ ॥ प्रणष्टद्रव्यता यस्य स्मरणान्न भवेन्नृणाम् ॥ चतुर्युगे त्वतिक्रांते मनौ ह्येकादशे प्रभौ ॥ १४ ॥ अर्द्धावशिष्टे तस्मिंस्तु द्वापरे संप्रवर्तिते ॥ मानवस्य नरिष्यंतो ह्यासीत्पुत्रो मदः किल ॥ ॥ १५ ॥ नवमस्तस्य दायादस्तृणबिंदुरिति स्मृतः ॥ त्रेतायुगमुखे राजा तृतीये संबभूव ह ॥ १६ ॥ तस्य कन्या त्विलविला रूपे णाप्रतिमाऽभवत् ॥ पुलस्त्याय स राजर्षिस्तां कन्यां प्रत्यपादयत् ॥ १७ ॥ ऋषिरैलविलो यस्यां विश्रवाः समपद्यत ॥ तस्य पत्न्यश्च तस्रस्तु पौलस्त्यकुलमंडनाः ॥ १८ ॥ बृहस्पतेः शुभा कन्या नाम्ना वै वेदवर्णिनी ॥ पुष्पोत्कटा च बीका च उभे माल्यवतः सुते ॥ १९ ॥ केकसी मालिनः कन्या तस्यां देवि शृणु प्रजाः ॥ ज्येष्ठं वैश्रवणं तस्य सुषुवे वरवर्णिनी ॥ २० ॥ अष्टदं हरिच्छ्मश्रुं शंकुकर्णं विलोहितम् ॥ श्वपादं ह्रस्वबाहुं च पिंगलं शुचिभूषणम् ॥ २१ ॥ त्रिपादं तु महाकायं स्थूलशीर्षं महाहनुम् ॥ एवंविधं सुतं दृष्ट्वा विरूपं रूपतस्तदा ॥ २२ ॥

---

१ किंचित्कालम्—इ० पा० । २ इडविडा—इ० पा० । ३ देववर्णिनी—इ० पा० । ४ च चीका च-इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





तदा दृष्ट्वाब्रवीत्तं तु कुबेरोऽयमिति स्वयम् ॥ कुत्सायां क्वितिशब्दोयं शरीरं बेरमुच्यते ॥ २३ ॥ कुबेरः कुशरीरत्वान्नाम्ना तेन च सोंकितः ॥ तस्य भार्य्याऽभवदृद्धिः पुत्रस्तु नलकूबरः ॥ २४ ॥ कैकस्यजनयत्पुत्रं रावणं राक्षसाधिपम् ॥ शंकुकर्णं दशग्रीवं पिंगलं रक्तमूर्द्धजम् ॥ २५ ॥ [1]वसुपादं विंशद्भुजं महाकायं महाबलम् ॥ कालांजननिभं चैव दंष्ट्रिणं रक्तलोचनम् ॥ २६ ॥ राक्षसेनौजसा युक्तं रूपेण च बलेन च ॥ निसर्गादारुणः क्रूरो रावणाद्रावणः स्मृतः ॥२७॥ हिरण्यकशिपुस्त्वासीत्स राजा पूर्वजन्मनि ॥ चतुर्युगानि राजा तु तथा दश स राक्षसः ॥२८॥ पंच कोटीस्तु वर्षाणां संख्यताः संख्याया प्रिये ॥ नियुतान्येकषष्टिं च संख्यावद्भिरुदाहृतम् ॥ २९ ॥ षष्टिं चैव सहस्राणि वर्षाणां स हि रावणः ॥ देवतानामृषीणां च घोरं कृत्वा प्रजागरम् ॥ ३० ॥ त्रेतायुगे चतुर्विंशे रावणस्तपसः क्षयात् ॥ रामं दाशरथिं प्राप्य सगणः क्षयमेयिवान् ॥ ३१ ॥ योऽसौ देवि दशग्रीवः संबभूवारिमर्दनः ॥ दमघोषस्य राजर्षेः पुत्रो विख्यातपौरुषः ॥३२॥ श्रुतश्रवायां चैद्यस्तु शिशुपालो बभूव ह ॥ रावणं कुंभकर्णं च कन्यां शूर्पणखां तथा ॥३३॥ विभीषणं चतुर्थं च कैकस्यजनयत्सुतान् ॥ मनोहरः प्रहस्तश्च महापार्श्वः खरस्तथा ॥३४॥ पुष्पोत्कटायास्ते पुत्राः कन्या कुम्भीनसी तथा ॥ त्रिशिरा दूषणश्चैव विद्युज्जिह्वश्च राक्षसः॥ कन्यैका श्यामिकानाम बीकायाः प्रसवः स्मृतः॥३५॥इत्येते क्रूरकर्माणः पौलस्त्या राक्षसा नव ॥ विभीषणो विशुद्धात्मा दशमः परिकीर्तितः ॥३६॥ पुलहस्य मृगाः पुत्राः सर्वे व्यालाश्च दंष्ट्रिणः ॥ भूताः पिशाचाः सर्पाश्च शूकरा हस्तिनस्तथा ॥ ॥३७॥ अनपत्यः क्रतुस्त्वस्मिन्स्मृतो वैवस्वतेंतरे ॥ अत्रेः पत्न्यो दशैवासन्सुन्दर्यश्च पतिव्रताः ॥३८॥ भद्राश्वस्य घृताच्यंता जज्ञिरे दश चाप्सराः ॥३९॥ भद्रा शूद्रा च मद्रा च नलदा जलदा तथा ॥ उर्णा पूर्णा च देवेशि या च गोपुच्छला स्मृता ॥४०॥ तथा तामरसानाम दशमी रक्तकोटिका ॥ एतासां च महादेवि ख्यातो भर्त्ता प्रभाकरः ॥ ४१ ॥ स्वर्भानुना हते सूर्ये पतितेस्मिन्दिवो महीम् ॥ तमोऽभिभूते लोकेस्मिन्प्रभा येन प्रवर्त्तिता ॥ ॥ ४२ ॥ स्वस्ति तेस्त्विति चैवोक्तः पतन्निह दिवाकरः ॥ ब्रह्मर्षेर्वचनात्तस्य न पपात यतः प्रभुः ॥ ४३ ॥ ततः प्रभाकरेत्युक्तः प्रभुरेवं महर्षिभिः ॥ भद्रायां जनयामास सोमं पुत्रं यशस्विनम् ॥ ४४ ॥ त्विषिमान्धर्मपुत्रस्तु सोमो देवो वरस्तु सः ॥ शीतरश्मिः समुत्पन्नः कृत्तिकासु निशाचरः॥ ॥४५॥ पिता सोमस्य वै देवि जज्ञेऽत्रिर्भगवानृषिः ॥ तत्रात्रिः सर्वलोकेशं भृत्वा स्वे नयने स्थितः ॥ ४६ ॥ कर्मणा मनसा वाचा शुभान्येव समाचरत् ॥ काष्ठकुड्यशिलाभूत ऊर्द्ध्वबाहुर्महाद्युतिः ॥४७॥ सुदुस्तरं नाम तपस्तेन तप्तं महत्पुरा ॥ त्रीणि वर्षसहस्राणि दिव्यानि सुरसुंदरि ॥ ४८ ॥



१ चतुष्पाद विंशभुजम्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्योर्द्ध्वरेतसस्तत्र स्थितस्यानिमिषस्य ह ॥ सोमत्वं वपुरापेदे महाबुद्धेस्तु वै शुभे ॥ ४९ ॥ ऊर्द्धमाचक्रमे तस्य सोमसंभावितात्मनः ॥ नेत्राभ्यां सोमः सुस्राव दशधा द्योतयन्दिशः ॥ ५० ॥ तद्गर्भं विधिना दृष्टा दिशो दश दधुस्तदा ॥ समेत्य धारयामासुर्न च धर्तुमशक्नुवन् ॥ ॥ ५१ ॥ स ताभ्यः सहसैवेह दिग्भ्यो गर्भश्च शाश्वतः ॥ पपात भावयँल्लोकाञ्छीतांशुः सर्वभावनः ॥ ५२ ॥ यदा न धारणे शक्तास्तस्य गर्भस्य ताः स्त्रियः ॥ ततस्ताभ्यः स शीतांशुर्निपपात वसुंधराम् ॥ ५३ ॥ पतितं सोममालोक्य ब्रह्मा लोकपितामहः॥ रथमारोपयामास लोकानां हितकाम्यया ॥ ५४ ॥ स तदेव मया देवि धर्मार्थं सत्यसंगरः ॥ युक्तो वाजिसहस्रेण सितेन सुरसुंदरि ॥ ५५ ॥ तस्मिन्निपतिते देवि पुत्रेत्रेः परमात्मनि ॥ तुष्टुवुर्ब्रह्मणः पुत्रा मानसाः सप्त ये श्रुताः ॥ ५६ ॥ तथैवांगिरसः सर्वे भृगोश्चैवात्मजास्तथा ॥ ऋग्भिस्तु सामभिश्चैव तथैवांगिरसैरपि[1] ॥ ॥ ५७ ॥ तस्य संस्तूयमानस्य तेजः सोमस्य भास्वतः ॥ आप्यायमानं लोकांस्त्रीन्भासयामास सर्वशः ॥ ५८ ॥ स तेन रथमुख्येन सागरांतां वसुंधराम् ॥ त्रिःसप्तकृत्वोतियशाश्चकाराभिप्रदक्षिणम् ॥ ५९ ॥ तस्य यच्चापि तत्तेजः पृथिवीमन्वपद्यत ॥ ओषध्यस्ताः समुत्पन्नास्ते जसाऽज्वलयन्पुनः ॥ ६० ॥ ताभिर्धिनोत्ययं[2] लोकं प्रजाश्चैव चतुर्विधाः ॥ ओषध्यः फलपाकांताः कणाः सप्तदश स्मृताः ॥ ६१ ॥ व्रीहयश्च यवाश्चैव गोधूमा अणवस्तिलाः ॥ ६२ ॥ प्रियंगुः कोविदारश्च कोरदूषाः सतीनकाः[3] ॥ माषा मुद्गा मसूराश्च निष्पावाः सकुलत्थकाः ॥ ॥ ६३ ॥ आढक्यश्चणकाश्चैव कणाः सप्तदश स्मृताः ॥ इत्येता ओषधीनां च ग्राम्याणां जातयः स्मृताः ॥ ६४ ॥ ओषध्यो यज्ञियाश्चैव ग्राम्यारण्याश्चतुर्दश ॥ व्रीहयश्च यवाश्चैव गोधूमास्त्वणवस्तिलाः ॥ ६५ ॥ प्रियंगुषष्ठा इत्येते सप्तमास्तु कुलत्थकाः ॥ श्यामाकास्त्वथ नीवारा जर्तिलाः सगवेधुकाः ॥ ६६ ॥ ऊरुविन्दा मर्कटकास्तथा वेणुयवाश्च ये ॥ ग्राम्यारण्यास्तथा ह्येता ओषध्यस्तु चतुर्दश ॥ ६७ ॥ तृणगुल्मलतावीरुद्वल्लीगुच्छादि कोटिशः ॥ एतेषामधिपश्चन्द्रो धारयत्यखिलं जगत् ॥ ६८ ॥ ज्योत्स्नाभिर्भगवान्सोमो जगतो हितकाम्यया ॥ ततस्तस्मै ददौ राज्यं ब्रह्मा ब्रह्मविदां वरः ॥ ६९ ॥ बीजौषधीनां विप्राणां मंत्राणां च वरानने ॥ सोऽभिषिक्तो महातेजा राजा राज्ये निशाकरः ॥ ७० ॥ त्रीँल्लोकान्भावयामास स्वभासा भास्वतां वरः ॥ तं सिनी च कुहूश्चैव द्युतिः पुष्टिः प्रभा वसुः ॥ ७१ ॥ कीर्तिर्धृतिश्च लक्ष्मीश्च नव देव्यः सिषेविरे ॥ सप्तविंशतिरिंदोस्तु दाक्षायण्यो महाव्रताः ॥ ७२ ॥ ददौ प्राचेतसो दक्षो नक्षत्राणीति या विदुः ॥ स तत्प्राप्य महद्राज्यं सोमः सोमवतां

१ आंगिरसैः—आथर्वणैर्मन्त्रैरित्यर्थः । २ धिनोति—प्रीणयति —इत्यर्थः । धिवि प्रीणने धातो रूपम् । ताभिर्धारयत्ययं लोकम्—इ० पा० । ३ सवीणकाः—इ०, सचीणकाः—इ० च पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

वरः ॥ ७३ ॥ समाजह्रे राजसूयं सहस्रशतदक्षिणम् ॥ हिरण्यगर्भश्चोद्गाता ब्रह्मा ब्रह्मत्वमेयिवान् ॥ ७४ ॥ सदस्यस्तस्य भगवान्हरिर्नारायणः प्रभुः ॥ सनत्कुमारप्रमुखैराद्यैर्ब्रह्मर्षिभिर्वृतः ॥ ७५ ॥ दक्षिणामददात्सोमस्त्रींल्लोकांस्तु वरानने ॥ तेभ्यो ब्रह्मर्षिमुख्येभ्यः सदस्येभ्यश्च वै शुभे ॥ ॥ ७६ ॥ प्राप्यावभृथमव्यग्रः सर्वदेवर्षिपूजितः ॥ अतिराजति राजेन्द्रो दशधा भावयन्दिशः ॥ ७७ ॥ तेन तत्प्राप दुष्प्राप्यमैश्वर्य्यमकृतात्मभिः ॥ स एवं वर्त्तते चन्द्रश्चात्रेय इति विश्रुतः ॥ ७८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये चन्द्रोत्पत्तिवर्णनंनाम विंशोऽध्यायः ॥ २० ॥ ॥ छ ॥ ॥ देव्युवाच ॥ ॥ श्रुतं सर्वमशेषेण चन्द्रस्योत्पत्तिकारणम् ॥ चिह्नं यथाऽभवत्तस्य सांप्रतं तत्प्रकीर्त्तय ॥ १ ॥ ॥ ईश्वर उवाच ॥ ॥ ब्रह्मणस्तु पुरा देवि दक्षोनाम सुतोऽभवत् ॥ प्रजाः सृजेति उद्दिष्टः पूर्वं दक्षः स्वयंभुवा ॥ २ ॥ षष्टिं दक्षोऽसृजत्कन्या वैरिण्यां वै प्रजापतिः ॥ ददौ स दश धर्माय कश्यपाय त्रयोदश ॥ ३ ॥ सप्तविंशतिं सोमाय चतस्रोऽरिष्टनेमिने ॥ द्वे चैव भृगुपुत्राय द्वे कृशाश्वाय धीमते ॥ ४ ॥ द्वे चैवांगिरसे तद्वत्तासां नामानि विस्तरात् ॥ शृणु त्वं देवि मातॄणां प्रजाविस्तरमादितः ॥ ५ ॥ मरुत्वती वसुर्जामी लंबा भानुररुन्धती ॥ संकल्पा च मुहूर्ता च साध्या विश्वा च भामिनि ॥ ६ ॥ धर्मपत्न्यः समाख्याता दक्षः प्राचेतसो ददौ ॥ अदितिर्दितिर्दनुस्तद्वदरिष्टा सुरसैव च ॥ ७ ॥ सुरभिर्विनता चैव नाम्ना क्रोधवशा त्विला ॥ कद्रूस्त्विषा वसुस्तद्वत्तासां पुत्रान्वदामि वै ॥ ८ ॥ विश्वेदेवास्तु विश्वायाः साध्या साध्यानजीजनत् ॥ मरुत्वत्यां मरुत्वंतो वसोस्तु वसवस्तथा ॥ ९ ॥ भानोस्तु भानवस्तेन मुहूर्त्तायां मुहूर्त्तकाः ॥ लंबायां घोषनामानो नागवीथिस्तु जामिजा ॥ १० ॥ संकल्पायास्तु संकल्पो धर्मपुत्रा दश स्मृताः ॥ आपो ध्रुवश्च सोमश्च धरश्चैवानलोऽनिलः ॥ ११ ॥ प्रत्यूषश्च प्रभासश्च वसवोष्टौ प्रकीर्तिताः ॥ आपस्य पुत्रा वेदंडचः श्रमः शान्तो ध्वनिस्तथा ॥ ॥ १२ ॥ ध्रुवस्य पुत्रो भगवान्कालो लोकप्रकालनः ॥ सोमस्य भगवाञ्छर्वो ध्रुवश्च गृहबोधनः ॥ १३ ॥ हुतहव्यवहश्चैव धरस्य द्रविणः स्मृतः ॥ मनोजवोऽनिलस्यासीदविज्ञातगतिस्तथा ॥ १४ ॥ देवलो भगवान्योगी प्रत्यूषस्याभवन्सुताः ॥ बृहस्पतेस्तु भगिनी भुवना ब्रह्मवादिनी ॥ १५ ॥ प्रभासस्य तु सा भार्या वसूनामष्टमस्य च ॥ विश्वकर्मा सुतस्तस्य शिल्पकर्त्ता प्रजापतिः ॥ १६ ॥ तुषितानां तु साध्यानां नामान्येतानि वच्मि ते ॥ मनोऽनुमन्ता प्राणश्च नरोऽपानश्च वीर्यवान् ॥ १७ ॥ भक्तिर्भयोऽनघश्चैव हंसो नारायणस्तथा ॥ विभुश्चैव



१ लंबायां घोषसामान्याः—इ० पा० । २ भिषिर्भयस्तपश्चैव—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभुश्चैव साध्या द्वादश कीर्तिताः ॥ १८ ॥ कश्यपस्य प्रवक्ष्यामि सन्ततिं त्ररवर्णिनि ॥ अंशो धाता भगस्त्वष्टा मित्रोऽथ वरुणो र्यमा ॥ १९ ॥ विवस्वान्सविता पूषा ह्यंशुमान्विष्णुरेव च ॥ एते सहस्रकिरणा आदित्या द्वादश स्मृताः ॥ २० ॥ अजैकपादहिर्बुध्न्यो विरूपाक्षोऽथ रैवतः ॥ हरश्च बहुरूपश्च त्र्यंबकश्च सुरेश्वरः ॥ २१ ॥ सावित्रश्च जयन्तश्च पिनाकी चापराजितः ॥ एते रुद्राः समाख्याता एकादश गणेश्वराः ॥ २२ ॥ दितिः पुत्रद्वयं लेभे कश्यपाद्बलगर्वितम् ॥ हिरण्यकशिपुं श्रेष्ठं हिरण्याक्षं तथानुजम् ॥ २३ ॥ हिरण्यकशिपोर्दैत्यैः श्लोको गीतः पुरातनैः ॥२४॥ राजा हिरण्यकशिपुर्यांयामाशां निरीक्षते ॥ तस्यांतस्यां दिशि सुरा नमश्चक्रुर्महर्षिभिः ॥ हिरण्यकशिपोः पुत्राश्चत्वारः सुमहाबलाः ॥ २५ ॥ प्रह्लादः पूर्वजस्तेषामनुह्लादस्ततः परः ॥ ह्लादश्चैव ह्रदश्चैव पुत्राश्चैते प्रकीर्तिताः ॥ २६ ॥ उभौ सुन्दोपसुन्दौ तु ह्रदपुत्रौ बभूवतुः ॥ ह्लादस्य पुत्रस्त्वेकोऽभून्मूक इत्यभिविश्रुतः ॥ २७ ॥ मारीचः सुंदपुत्रस्तु ताडकायामजायत ॥ दण्डके निहतः सोऽयं राघवेण बलीयसा ॥ २८ ॥ मूको विनिहतश्चापि कैराते सव्यसाचिना ॥ संह्लादस्य तु दैत्यस्य निवातकवचाः कुले ॥ २९ ॥ तिस्रः कोटयस्तु विख्याता निहताः सव्यसाचिना ॥ गवेष्ठी[1] कालनेमिश्च जंभो वल्कल एव च ॥ ३० ॥ जृंभः षष्ठोनुजस्तेषां स्मृताः प्रह्लादसूनवः ॥ शुंभश्चैव निशुंभश्च गवेष्ठिनः सुतौ स्मृतौ ॥३१॥ धनुकश्चासिलोमा च शुंभपुत्रौ प्रकीर्तितौ ॥ विरोचनस्य पुत्रस्तु बलिरेकः प्रतापवान् ॥ ३२ ॥ हिरण्याक्षसुताः पंच विक्रांताः सुमहाबलाः ॥ अन्धकः शकुनिश्चैव कालनाभस्तथैव च ॥ ३३ ॥ महानाभश्च विक्रांतो भूतसंतापनस्तथा ॥ शतं शतसहस्राणि निहतास्तारकामये ॥ ३४ ॥ इति संक्षेपतः प्रोक्ता कश्यपान्वयसंततिः ॥ यया व्याप्तं जगत्सर्वं सदेवासुरमानुषम् ॥ ३५ ॥ अथ याः कन्यका दत्ताः सप्तविंशतिरिंदवे ॥ तासां मध्ये महादेवि प्रिया तस्य च रोहिणी ॥ ३६ ॥ अथ नक्षत्रनाथस्य तासां मध्येतिवल्लभा ॥ बभूव रोहिणी देवी प्राणेभ्योऽपि गरीयसी ॥ ३७ ॥ सर्वास्ताः संपरित्यज्य रोहिण्या सहितो रहः ॥ रेमे कामपरीतात्मा वनेषूपवनेषु च ॥ रमणीयेषु देशेषु कन्दरेषु गुहासु च ॥ ३८ ॥ अथ ता दुःखसंपन्नाः पत्न्यः शेषा यशस्विनि ॥ जग्मुश्च शरणं दक्षं वचनं चेदमब्रुवन् ॥ ३९ ॥ सोमः सर्वा अतिक्रम्य रोहिण्या सह मोदते ॥ संवत्सरसहस्रं तु क्रीडमानो यथासुखम् ॥ ४० ॥ अवशिष्टास्तु षड्विंशन्मलिना विगतश्रियः ॥ पाणिग्रहणमारभ्य रोहिण्या सह चंद्रमाः ॥ ४१ ॥ संवत्सरसहस्रं तु जानात्येकां स शर्वरीम् ॥ परित्यक्ता वयं तात शशिना दोषवर्जिताः ॥ ४२ ॥ स रेमे सह

१ कचेष्टी--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



रोहिण्या अस्माकमसुखप्रदः ॥ अस्माकं दुःखदग्धानां श्रेयोऽतो मरणं भवेत् ॥ ४३ ॥ तासां तद्वचनं श्रुत्वा दुःखार्तानां प्रजापतिः ॥ ब्रह्मतेजः
समायुक्तः पुत्रीस्नेहेन कर्षितः ॥ जगाम यत्र ऋक्षेशो वचनं चेदमब्रवीत् ॥ ४४ ॥ समं वर्त्तस्व कन्यासु मामकासु निशाकर ॥ अन्यथा दोषभागी
त्वं भविष्यसि न संशयः ॥ ४५ ॥ तस्य तद्वचनं श्रुत्वा लज्जयावनतः स्थितः ॥ बाढमित्येव ऋक्षेंद्रो दक्षस्य पुरतोऽब्रवीत् ॥ ४६ ॥ अद्यप्र
भृति विप्रर्षे समं वर्त्तयितास्म्यहम् ॥ पुत्रीभिस्तव सत्यं वै शपेऽहं शपथेन ते ॥ ४७ ॥ एवं प्रतिज्ञासंयुक्ते निशानाथे तदांबिके ॥ सर्वा रूपेण
संयुक्तास्तस्य कन्या निवेदिताः ॥ ४८ ॥ दक्षः स्वभवनं गत्वा निर्वृतिं परमां गतः ॥ चन्द्रोऽपि पूर्ववद्देवि रोहिण्यां निरतोऽभवत् ॥ ४९ ॥ संप
रित्यज्य ताः सर्वाः कामोपहतमानसः ॥ अथ भूयस्तु ताः सर्वा दक्षं वचनमब्रुवन् ॥ ५० ॥ मलिनास्ताः कृशांग्यश्च दीनाः सर्वा विचेतसः ॥
ततो दृष्ट्वा तथारूपं दक्षो मोहमुपागतः ॥ ५१ ॥ लब्धसंज्ञः पुनः सोऽपि क्रोधोद्भूततनूरुहः ॥ उवाच सर्वाः स्वाः पुत्रीः किमित्थं
मलिनांबराः ॥ किमिदं निष्प्रभाः सर्वाः कथयध्वं ममानघाः ॥ ५२ ॥ असुरान्सानुगांश्चैव ये चान्ये सुरसत्तमाः ॥ अद्य शापह
तान्पुत्र्यः करिष्यामि न संशयः ॥ ५३ ॥ एवमुक्तास्तु दक्षेण सर्वास्ताः समुदैरयन् ॥ ५४ ॥ न चास्माकं निशानाथ ऋतुमात्रमपि
प्रभो ॥ प्रयच्छति पुनस्तेन युष्मत्पार्श्वं समागताः ॥ ५५ ॥ अनादृत्य तु ते वाक्यं रोहिण्यां निरतो रहः ॥ रेमे कामपरीतात्मा
अस्माकं शोकवर्द्धनः ॥ ५६ ॥ तासां तद्वचनं श्रुत्वा दक्षः कोपमुपागतः ॥ गत्वा चंद्रं महादेवि शशाप प्रमुखे स्थितम् ॥ ५७ ॥
अनादृत्य हि मे वाक्यं यस्मात्त्वं रोहिणीरतः ॥ संत्यज्य पुत्रीश्चास्माकं शेषा दोषेण वर्जिताः ॥ तस्माद्यक्ष्मा शरीरं ते ग्रसिष्यति न संशयः ॥
॥ ५८ ॥ एतस्मिन्नेव काले तु यक्ष्मा पर्वतपुत्रिके ॥ दक्षेण तु समादिष्टस्तस्य कायं समाविशत् ॥ ५९ ॥ यक्ष्मणा ग्रस्तकायोऽसौ क्षयं याति
दिनेदिने ॥ ६० ॥ एवं सोमस्तु दक्षेण कृतशापो गतप्रभः ॥ पपात वसुधां देवि निश्चेष्टो रोहिणीयुतः ॥ ६१ ॥ लब्धसंज्ञो मुहूर्तेन रोहिणीं वाक्य
मब्रवीत् ॥ ६२ ॥ देवि कार्यं किमधुना त्वत्पित्रा शापितो ह्यहम् ॥ क्षयकुष्ठेन संयुक्तः किं करोम्यधुना प्रिये ॥ ६३ ॥ एवमुक्ता रोहिणी तु बाष्प
व्याकुललोचना ॥ दक्षशापहतं दृष्ट्वा सोमं वचनमब्रवीत् ॥ ६४ ॥ येन शापस्तु ते दत्तस्तमेव शरणं व्रज ॥ स ते शापाभिभूतस्य नूनं श्रेयो विधा
स्यति ॥ ६५ ॥ लप्स्यसे तत्प्रसादात्त्वं प्रभां पूर्वोचितां शुभाम् ॥ ६६ ॥ रोहिण्या वचनं श्रुत्वा गतो दक्षसमीपतः ॥ चंद्रः प्रोवाच विनयाद्बाष्प
व्याकुललोचनः ॥ ६७ ॥ कुरुष्वानुग्रहं दक्ष प्रसन्नेनांतरात्मना ॥ कोपं त्यज महर्षे त्वं ममोपरि दयां कुरु ॥ ६८ ॥ त्वया क्रोधपरीतेन कारणे



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाप्यकारणे ॥ अनुकंपां च मे कृत्वा कार्यं शापस्य मोक्षणम् ॥ ६९ ॥ विदितं तु महाभाग शप्तोहं येन कर्मणा ॥ कुरुष्वानुग्रहं दक्ष मम दीनस्य याचतः ॥ ७० ॥ एवं विलपमानस्य सोमस्य तु महात्मनः ॥ अनुग्रहे मतिं कृत्वा इदं वचनमब्रवीत् ॥७१॥ ॥ दक्ष उवाच ॥ ॥ मया शापहतः सोम त्रातुं शक्यो न दैवतैः॥ यद्यद्ब्रवीम्यहं सोम तत्तथेति न संशयः ॥ ७२ ॥ आयुः कर्म च वित्तं च विद्या निधनमेव च ॥ पूर्वसृष्टानि यान्येव संभवंति हि तानि वै ॥ ७३ ॥ असुराश्च सुराश्चैव ये चान्ये यक्षराक्षसाः ॥ सर्वेपि शक्ता न त्रातुं वर्जयित्वा महेश्वरम् ॥७४॥ एषां शापो मया दत्तोऽनुग्रहीष्यति शंकरः॥ नान्यस्त्रातुं भवेच्छक्तो विना पशुपतिं भवम् ॥ तत्त्वं शीघ्रतरं गच्छ समाराधय शंकर ॥ ७५ ॥ न शक्तोऽन्यः पुनश्चंद्रः कर्तुं त्वां निर्मलं पुनः॥ वर्जयित्वा महादेवं शितिकंठमुमापतिम् ॥७६॥ दक्षस्य च वचः श्रुत्वा कृतांजलिपुटः स्थितः॥ प्रत्युवाच तदा सोमःप्रहृष्टेनांतरात्मना॥७७॥ भगवन्यदि तुष्टोसि मम भक्तस्य सुव्रत ॥ अनुग्रहे कृता बुद्धिस्तदाचक्ष्व कुतः शिवः ॥ ७८ ॥ कस्मिन्स्थाने मया दक्ष द्रष्टव्योऽसौ महेश्वरः ॥ तत्स्थानानि चरिष्यामि यानि तानि वदस्व मे ॥ ७९ ॥ ॥ दक्ष उवाच ॥ ॥ शृणु सोम प्रयत्नेन श्रुत्वा चैवावधारय ॥ वारुणीं दिशमाश्रित्य सागरानूपसन्निधौ ॥ ८० ॥ कृतस्मरस्यापरतो धन्वंतरशतत्रये ॥ लिंगं महाप्रभावं च स्वयंभूतं व्यवस्थितम् ॥ ८१ ॥ सूर्य्यबिंबसमप्रख्यं सर्पमेखलमंडितम् ॥ कुक्कुटांडकमानं तद्भूमिमध्ये व्यवस्थितम् ॥ ८२ ॥ स्पर्शलिंगं हि तद्विद्धि तद्भक्त्या ज्ञास्यते भवान् ॥ तत्र संनिहितो देवः शंकरः परमेश्वरः ॥ ८३ ॥ गच्छ त्वं तपसोग्रेण आराधय सुरेश्वरम् ॥ ८४ ॥ प्रशस्य देवदेवेशमात्मानं निर्मलं कुरु ॥ यस्याशु वरदानेन प्राप्स्यसे रूपमुत्तमम् ॥ ८५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यांसंहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये सोमेश्वरोत्पत्तिप्रसंगे दक्षेण स्वशापजन्ययक्ष्मरोगार्त्तस्य चंद्रस्य यक्ष्मकुष्ठरोगनिवृत्तये शिवाराधनोपदेशवर्णनंनामैकविंशोऽध्यायः ॥ २१ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ददर्श दक्षेणैवमनुज्ञातः शोचन्कर्म स्वकं तदा ॥ दुःखशोकपरीतात्मा प्रभासं क्षेत्रमागतः ॥ १ ॥ स गत्वा दक्षिणं तीरं सागरस्य समीपतः ॥ ददर्श पर्वतं तत्र कृतस्मरमिति श्रुतम् ॥ २ ॥ यक्षविद्याधराकीर्णं किन्नरैरुपशोभितम् ॥ चंदनागुरुकर्पूरैरशोकैस्तिलकैः शुभैः ॥ ३ ॥ कल्हारैः शतपत्रैश्च पुष्पितैः फलितैः शुभैः ॥ आम्रजम्बूकपित्थैश्च दाडिमैः पनसैस्तथा ॥४॥ निंबुजम्बीरनागैश्च कदलीखंडमंडितैः ॥ क्रमुकैर्नागवल्ल्याद्यैः शालैस्तालैस्तमालकैः ॥ ५ ॥ बीजपूरकखर्जूरैर्द्राक्षामधुरपाटलैः ॥ बिल्वचंपकतिंदुाद्यैः कदंबकंकुभैस्तथा ॥ ६ ॥ धवाशोकशिरीषाद्यैर्नानावृक्षैश्च शोभि

१ कदंबककुजैः--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तम् ॥ कामं कामफलैर्वृक्षैः पुष्पितैः फलितैः शुभैः ॥ ७ ॥ हंसकारंडवाकीर्णं चक्रवाकोपशोभितम् ॥ कोकिलाभिः शुकैश्चैव नानापक्षिनिनादि
तम् ॥ ८ ॥ जातिस्मराः पक्षिणश्च व्याजह्रुर्मानुषीं गिरम् ॥ गंधर्वकिंनरयुगैः सिद्धविद्याधरोरगैः ॥ ९ ॥ क्रीडद्भिर्विविधैर्दिव्यैः शोभितं पर्वतोत्त
मम् ॥ देवगंधर्वनृत्यैश्च वेणुवीणानिनादितम् ॥ १० ॥ वेदध्वनितघोषेण यज्ञहोमाग्निहोत्रजैः ॥ धूमैः समावृतं सर्वमाज्यगंधिभिरुच्छ्रितम् ॥ ११ ॥
शोभितं चर्षिभिर्दिव्यैश्चातुर्विद्यैर्द्विजोत्तमैः ॥ अत्रिश्चैव वसिष्ठश्च पुलस्त्यः पुलहः क्रतुः ॥ १२ ॥ भृगुश्चैव मरीचिश्च भरद्वाजोऽथ कश्यपः ॥
मनुर्यमोऽङ्गिरा विष्णुः शातातपपराशरौ ॥ १३ ॥ आपस्तंबोऽथ संवर्तः कांत्यः कात्यायनो मुनिः ॥ गौतमः शंखलिखितौ तथा
वाचस्पतिर्मुनिः ॥ १४ ॥ जामदग्न्यो याज्ञवल्क्य ऋष्यशृंगो विभांडकः ॥ गार्ग्यशौनकदाल्भ्याश्च व्यास उद्दालकः शुकः ॥ १५ ॥
नारदः पर्वतश्चैव दुर्वासा उग्रतापसः ॥ शाकल्यो गालवश्चैव जाबालिर्मुद्गलस्तथा ॥ १६ ॥ विश्वामित्रः कौशिकश्च जहुर्विश्वावसुस्तथा ॥
धौम्यश्चैव शतानन्दो वैशंपायनजिष्णवः ॥ १७ ॥ शाकटायनवार्द्धिक्यावग्निको बादरायणः ॥ वालखिल्या महात्मानो ये च भूम
ण्डले स्थिताः ॥ १८ ॥ ते सर्वे तत्र तिष्ठंति पर्वते तु कृतस्मरे ॥ तेजस्विनो ब्रह्मपुत्रा ऋषयो धार्मिकाः प्रिये ॥ १९ ॥ ज्वलंतस्तपसा
सर्वे निर्धूमा इव पावकाः ॥ मासोपवासिनः केचित्केचित्पक्षोपवासिनः ॥ २० ॥ त्रैरात्रिकाः सांतपना निराहारास्तथा परे ॥ केचित्पुष्प
फलाहाराः शीणपर्णाशिनस्तथा ॥ २१ ॥ केचिद्गोमयभक्षाश्च जलाहारास्तथा परे ॥ साग्निहोत्राः सुविद्वांसो मोक्षमार्गार्थचिन्तकाः ॥ २२ ॥ इति
हासपुराणादिश्रुतिस्मृतिविशारदाः ॥ एते चान्ये च बहवो मार्कंडेयपुरोगमाः ॥ २३ ॥ प्रभासं क्षेत्रमासाद्य संस्थिताः कृतपर्वते ॥ एवं कृतस्मरस्तत्र
सर्वदेवनिषेवितः ॥ मन्वंतरेस्मिन्यो देवि निर्दग्धो वडवाग्निना ॥ २४ ॥ तं दृष्ट्वा पर्वतं रम्यं दृष्ट्वा चैव महोदधिम् ॥ प्रदक्षिणं ततश्चक्रे सप्तकृत्वो
निशाकरः ॥ गिरेः प्रदक्षिणां कृत्वा गतो यत्र महेश्वरः ॥ २५ ॥ समीपे तु समुद्रस्य स्पर्शलिंगस्वरूपवान् ॥ प्रसादयामास विभुं प्रसन्नेनांतरा
त्मना ॥ २६ ॥ मरणं वेति संध्याय शरणं वा महेश्वरम् ॥ वरं शापाभिघातार्थं मृत्युं वा शंकरान्मम ॥ २७ ॥ इति सोमो मतिं कृत्वा तपसाऽऽ
राधयच्छिवम् ॥ यावद्वर्षसहस्रं तु फलमूलाशनोऽभवत् ॥ २८ ॥ पूर्णे वर्षसहस्रे तु चतुर्थे वरवर्णिनि ॥ तुतोष भगवान्रुद्रो वाक्यं चेदमुवाच ह ॥ ॥ ३५ ॥
॥२९॥ परितुष्टोऽस्मि ते चंद्र वरं वरय सुव्रत ॥ किं ते कामं करोम्यद्य ब्रूहि यत्स्यात्सुदुर्लभम् ॥ ३० ॥ एवं प्रत्यक्षमापन्नं दृष्ट्वा देवं वृषध्वजम् ॥

१ लतामण्डपसंश्रयैः–इ० पा० । २ काव्यः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रणम्य तं यथाभक्त्या स्तुतिं चक्रे निशाकरः ॥ ३१ ॥ ॥ चंद्र उवाच ॥ ॥ ॐ नमो देवदेवाय शिवाय परमात्मने ॥ अप्रमेयस्वरूपाय व्यक्ताव्यक्तस्वरूपिणे ॥ ३२ ॥ त्वं पतिर्योगिनामीश त्वयि सर्वं प्रतिष्ठितम् ॥ त्वं यज्ञस्त्वं वषट्कारस्त्वमोंकारः प्रजापतिः ॥ ३३ ॥ चतुर्विंशत्यधिकं च भुवनानां शतद्वयम् ॥ तस्योपरि परं ज्योतिर्जागर्ति तव केवलम् ॥ ३४ ॥ कल्पांत आदिवाराहमुक्तब्रह्मांडसंस्थितौ ॥ आधारस्तंभभूताय तेजोलिंगाय ते नमः ॥ ३५ ॥ नमोऽनामयनाम्ने ते नमस्ते कृत्तिवाससे ॥ नमो भैरवनाथाय नमः सोमेश्वराय ते ॥ ३६ ॥ इति संज्ञाभिरेताभिः स्तुत्याभिरमृतेश्वरः ॥ भूतैर्भव्यैर्भविष्यैश्च स्तूयसे सुरसत्तमैः ॥ ३७ ॥ आद्यो विरिंचिनामाभूद्ब्रह्मा लोकपितामहः ॥ मृत्युञ्जयेति ते नाम तदाऽभूत्पार्वतीपते ॥ ३८ ॥ द्वितीयोऽभूद्यदा ब्रह्मा पद्मभूरिति विश्रुतः ॥ तदा कालाग्निरुद्रेति तव नाम प्रकीर्तितम् ॥ ३९ ॥ तृतीयोऽभूद्यदा ब्रह्मा स्वयंभूरिति विश्रुतः ॥ अमृतेशेति ते नाम कीर्तितं कीर्तिवर्द्धनम् ॥ ४० ॥ चतुर्थोऽभूद्यदा ब्रह्मा परमेष्ठीति विश्रुतः ॥ अनामयेति देवेश तव नाम स्मृतं तदा ॥ ४१ ॥ पंचमोऽभूद्यदा ब्रह्मा सुरज्येष्ठ इति श्रुतः ॥ कृत्तिवासेति ते नाम बभूव त्रिपुरांतक ॥४२॥ षष्ठश्चाभूद्यदा ब्रह्मा हेमगर्भ इति स्मृतः ॥ तदा भैरवनाथेति तव नाम प्रकीर्तितम् ॥ ४३ ॥ अधुना वर्त्तते योऽसौ शतानंद इति श्रुतः ॥ आदिसोमेन यश्चासौ वामनेत्रोद्भवेन ते ॥ ४४ ॥ प्रतिष्ठार्थं तु लिंगस्य आनीतश्चाष्टवार्षिकः ॥ बालरूपी तदा तेन सोमनाथेति कीर्तितम् ॥ ४५ ॥ तदाप्रभृति सोमानां लक्षाणां द्वितयं गतम् ॥ सहस्रद्वितयं चैव शतं चैव षडुत्तरम् ॥ ४६ ॥ सप्तमोऽहं महादेव आत्रेय इति विश्रुतः ॥ प्राचेतसेन दक्षेण शप्तस्त्वां शरणं गतः ॥ रक्ष मां देवदेवेश क्षयिणं पापरोगिणम् ॥ ४७ ॥ इति संस्तुवतस्तस्य चंद्रस्य करुणाकरः ॥ तुतोष भगवान्रुद्रो वाक्यं चेदमुवाच ह ॥ ४८ ॥ परितुष्टोऽस्मि ते चंद्र वरं वरय सुव्रत ॥ किं ते कामं करोम्यद्य ब्रूहि यत्स्यात्सुदुर्लभम् ॥ ४९ ॥ मम नामानि गुह्यानि मम प्रियतराणि च ॥ पठिष्यंति नरा ये तु दास्ये तेषां मनोगतम् ॥ ५० ॥ अतीता ये चंद्रमसो भविष्यंति च येऽधुना ॥ तेषां पूज्यमिदं लिंगं यावदन्योऽष्टवार्षिकः ॥ ५१ ॥ अतः परं चतुर्वक्त्रो ब्रह्मा यो भविता यदा ॥ प्राणनाथेति देवस्य तदा नाम भविष्यति ॥ ५२ ॥ प्राणास्तु वायवः प्रोक्तास्तदाराधननाम तव ॥ प्राणनाथेति संप्रोक्तं मेऽधुना तद्भविष्यति ॥ ५३ ॥ तस्मादग्नीशनामेति कालरुद्रेत्यनंतरम् ॥ तारकेति ततो नाम भविष्यत्येव कीर्तितम् ॥ ५४ ॥ मृत्युञ्जयेति देवस्य भविता तदनंतरम् ॥ त्र्यंबकेशस्त्रिवतीशेति भुवनेशेत्यनन्तरम् ॥ ५५ ॥ भूतनाथेति घोरेति ब्रह्मेशेत्यथ नामकम् ॥ भविष्यं पृथिवी

१ त्वं पतिस्त्वं गतिर्देव—इ० पा० । २ ब्रह्मा—इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



शेति आदिनाथेत्यनंतरम् ॥ ५६ ॥ कल्पेश्वरेति देवस्य चंद्रनाथेत्यनन्तरम् ॥ नाम देवस्य यद्भावि सांप्रतं ते प्रकाशितम् ॥ ५७ ॥ इत्येवमादि नामानि स्वसंख्यातानि षोडश ॥ गतानि संभविष्यंति कालस्यानंतभावतः ॥ ५८ ॥ एकैकं वर्तते नाम ब्रह्मणः प्रलयावधि ॥ ततोन्यज्जायते नाम यथा नामानुरूपतः ॥ ५९ ॥ अथ किं बहुनोक्तेन रहस्यं ते प्रकाशितम् ॥ वत्स यत्कारणेनेह तपस्तप्तं त्वयाऽखिलम् ॥ तन्मे निःशेषतो ब्रूहि दास्ये तुष्टोऽस्मि ते वरम् ॥ ६० ॥ ॥ चन्द्र उवाच ॥ ॥ अहं शप्तस्तु दक्षेण कस्मिंश्चित्कारणांतरे ॥ यक्ष्मणा च क्षयं नीतस्तस्मात्त्वं त्रातुमर्हसि ॥ ६१ ॥ ॥ शंभुरुवाच ॥ ॥ अधुना भोः समं पश्य सर्वास्ता दक्षकन्यकाः ॥ क्षयस्ते भविता पक्षं पक्षं वृद्धिर्भविष्यति ॥ ६२ ॥ पूर्वोचितां प्रभां सोम प्राप्स्यसे मत्प्रसादतः ॥ प्राचेतसस्य दक्षस्य तपसा हतपाप्मनः ॥ ६३ ॥ तस्यान्यथा वचः कर्तुं शक्यं नान्यैः सुरैरपि ॥ ब्राह्मणाः कुपिता हन्युर्भस्मीकुर्युः स्वतेजसा ॥ ६४ ॥ देवान्कुर्युरदेवांश्च नाशयेयुरिदं जगत् ॥ ब्राह्मणाश्चैव देवाश्च तेज एकं द्विधा कृतम् ॥ ६५ ॥ प्रत्यक्षं ब्राह्मणा देवाः परोक्षं दिवि देवताः ॥ न विना ब्राह्मणा देवैर्न देवा ब्राह्मणैर्विना ॥ ६६ ॥ एकत्र मन्त्रास्तिष्ठन्ति तेज एकत्र तिष्ठति ॥ ब्राह्मणा देवता लोके ब्राह्मणा दिवि देवताः ॥ त्रैलोक्ये ब्राह्मणाः श्रेष्ठा ब्राह्मणा एव कारणम् ॥ ६७ ॥ पितुर्नियुक्ताः पितरो भवंति क्रियासु दैवीषु भवंति देवाः ॥ द्विजोत्तमा हस्तनिषिक्ततोयास्तेनैव देहेन भवंति देवाः ॥ ६८ ॥ षट्कर्मतत्त्वाभिरतेषु नित्यं विप्रेषु वेदार्थकुतूहलेषु ॥ न तेषु भक्त्या प्रविशंति घोरं महाभयं प्रेतभवं कदाचित् ॥ ६९ ॥ यद्ब्राह्मणाः स्तुतंयतमा वदन्ति तद्देवताः कर्मभिराचरंति ॥ तुष्टेषु तुष्टाः सततं भवन्ति प्रत्यक्षदेवेषु परोक्षदेवाः ॥ ७० ॥ यथा रुद्रा यथा देवा मरुतो वसवोऽश्विनौ ॥ ब्रह्मा च सोमसूर्यौ च तथा लोके द्विजोत्तमाः ॥ ७१ ॥ देवाधीनाः प्रजाः सर्वा यज्ञाधीनाश्च देवताः ॥ ते यज्ञा ब्राह्मणाधीनास्तस्माद्देवा द्विजोत्तमाः ॥ ॥ ७२ ॥ ब्राह्मणानर्चयेन्नित्यं ब्राह्मणांस्तर्पयेत्सदा ॥ ब्राह्मणास्तारका लोके ब्राह्मणात्स्वर्गमश्नुते ॥ ७३ ॥ अभेद्यमच्छेद्यमनादिमक्षयं विधिं पुराणं परिपालयन्ति ॥ महामतिस्तानभिपूज्य वै द्विजान्भवेदजेयो दिवि देवराडिव ॥ ७४ ॥ शक्यं हि कवचं भेत्तुं नाराचेन शरेण वा ॥ अपि वज्रसहस्रेण ब्राह्मणाशीः सुदुर्भिदा ॥ ७५ ॥ हुतेन शाम्यते पापं हुतमन्नेन शाम्यति ॥ अन्नं हिरण्यदानेन हिरण्यं ब्राह्मणाशिषा ॥ ७६ ॥

१ द्विजोत्तमा हस्तगतान्नतोयास्तेनैव देहेषु भवन्ति देवाः--इ०पा० । २ देवार्यकुतूहलेषु--इ० पा० । ३ यद्ब्राह्मणा एव वदन्ति नित्यम्--इ० पा० । ४ प्रत्यक्षदेवेषु--ब्राह्मणेषु--इत्यर्थः । ५ प्रतिपालयन्ति--इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

य इच्छेन्नरकं गंतुं सपुत्रपशुबांधवः ॥ देवेष्वधिकृतं कुर्याद्ब्राह्मणेषु च गोषु च ॥ ७७ ॥ ब्राह्मणान्द्वेष्टि यो मोहाद्देवान्गाश्च मखान्यदि ॥ नैव तस्य परो लोको नाऽयं लोको दुरात्मनः ॥ ७८ ॥ अनिन्द्या ब्राह्मणा गावः कांचनं सलिलं स्त्रियः[1]॥ पृथिवी तु षडेतानि यो निन्दति स पातकी ॥७९॥ अग्रं धर्मस्य राजानो मूलं धर्मस्य ब्राह्मणाः ॥ तस्मान्मूलं न हिंसीत मूले ह्यग्रं प्रतिष्ठितम् ॥ ८० ॥ फलं धर्मस्य राजानः पुष्पं धर्मस्य ब्राह्मणाः ॥ तस्मात्पुष्पं न हिंसीत पुष्पात्संजायते फलम् ॥ ८१ ॥ राजा वृक्षो ब्राह्मणास्तस्य मूलं पौराः पर्णं मन्त्रिणस्तस्य शाखाः ॥ तस्माद्राज्ञा ब्राह्मणा रक्षणीया मूले गुप्ते नास्ति वृक्षस्य नाशः ॥ ८२ ॥ आसन्नो हि दहत्यग्निर्दूराद्दहति ब्राह्मणः ॥ प्ररोहत्यग्निना दग्धं ब्रह्मदग्धं न रोहति ॥ ८३ ॥ ब्राह्मणानां च शापेन सर्वभक्षो हुताशनः ॥ समुद्रश्चाप्यपेयस्तु विफलश्च पुरंदरः ॥ ८४ ॥ त्वं चन्द्र राजयक्ष्मी च पृथिव्यामूषराणि च ॥ सूर्याचन्द्रमसोः पातः पुनरुद्धरणं तयोः ॥ ८५ ॥ वनस्पतीनां निर्यासो दानवानां पराजयः ॥ नागानां च वशीकारः क्षत्रस्योत्सादनं तथा ॥ देवोत्पत्तिविपर्यासो लोकानां च विपर्ययः ॥ ८६ ॥ एवमादीनि तेजांसि ब्राह्मणानां महात्मनाम् ॥ तस्माद्विप्रेषु[2] नृपतिः प्रणमेन्नित्यमेव च ॥ ८७ ॥ परामप्यापदं प्राप्तो ब्राह्मणान्न प्रकोपयेत् ॥ ते ह्येनं कुपिता हन्युः सद्यः सबलवाहनम् ॥ ८८ ॥ प्रणीतश्चाप्रणीतश्च यथाग्निर्दैवतं महत् ॥ एवं विद्वानविद्वान्वा ब्राह्मणो दैवतं महत् ॥ ८९ ॥ श्मशानेष्वपि तेजस्वी पावको नैव दुष्यति ॥ हूयमानश्च यज्ञेषु भूय एवाभिवर्द्धते ॥ ९० ॥ एवं यद्यप्यनिष्टेषु वर्त्तते सर्वकर्मसु ॥ सर्वेषां[3] ब्राह्मणः पूज्यो दैवतं परमं महत् ॥ ९१ ॥ क्षत्रस्यातिप्रवृद्धस्य ब्राह्मणानां प्रभावतः ॥ ब्राह्मं हि परमं पूज्यं क्षत्रं हि ब्रह्मसंभवम् ॥ ९२ ॥ अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितम् ॥ तेषां सर्वत्रगं तेजः स्वासु योनिषु शाम्यति ॥ ९३ ॥ यान्समाश्रित्य तिष्ठन्ति देवलोकाश्च सर्वदा ॥ ब्रह्मैव वचनं येषां को हिंस्यात्ताञ्जिजीविषुः ॥ ९४ ॥ म्रियमाणोऽप्याददीत न राजा ब्राह्मणात्करम् ॥ न च क्षुधाऽस्य संसीदेद्ब्राह्मणो विषये वसन् ॥ ९५ ॥ यस्य राज्ञश्च विषये ब्राह्मणः सीदति क्षुधा ॥ तस्य तच्छतधा राष्ट्रमचिरादेव सीदति ॥ ९६ ॥ यद्राजा कुरुते पापं प्रमादाद्यच्च विभ्रमात् ॥ वसन्तो ब्राह्मणा राष्ट्रे श्रोत्रियाः शमयन्ति तत् ॥ ९७ ॥ पूर्वरात्रांतरात्रेषु द्विजैर्यस्य विधीयते[4] ॥ स राजा सह राष्ट्रेण वर्धते ब्रह्मतेजसा ॥ ९८ ॥ ब्राह्मणान्पूजयेन्नित्यं प्रातरुत्थाय भूमिपः ॥ ब्राह्मणानां प्रसादेन दीव्यन्ति दिवि देवताः ॥ ९९ ॥ अथ किं बहुनोक्तेन ब्राह्मणा मामकी तनुः ॥ ये केचित्सागरांतायां पृथिव्यां कीर्तिता द्विजाः ॥ तद्रूपं देवदेवस्य शिवस्य परमात्मनः ॥ १०० ॥ एता

१ श्रियः–ई० पा०। २ तस्माद्विप्रेषु निष्पत्तिः प्राणानां हि महात्मनाम्–इ० पा०। ३ सर्वथा ब्राह्मणः पूज्यः–इ० पा०। ४ विधीयते–अग्निहोत्रादिकं श्रौतं स्मार्तं च कर्म–इति शेषः।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



न्द्विषंति ये मूढा ब्राह्मणान्संशितव्रतान् ॥ ते मां द्विषंति वै नूनं पूजनात्पूजयन्ति माम् ॥ १०१ ॥ न प्रद्वेषस्ततः कार्यो ब्राह्मणेषु विजानता ॥ प्रद्वेषेणाशु नश्यन्ति ब्रह्मशापहता नराः ॥ १०२ ॥ इत्येवं कथितश्चन्द्र ब्राह्मणानां गुणार्णवः ॥ कुरुष्वानन्तरं कार्य्यं यद्ब्रवीम्यहमेव ते ॥ १०३ ॥ शापस्यानुग्रहो दत्तो मया तत्र निशाकर ॥ न चान्यथा वचः कर्त्तुं शक्यं तेषां द्विजन्मनाम् ॥ १०४ ॥ शापानुग्रहदैः सर्वैं र्देवैरपि सवासवैः ॥ तस्माच्चन्द्र त्वया शोको नैव कार्यो विजानता ॥ १०५ ॥ क्षयस्ते भविता पक्षं पक्षं वृद्धिर्भविष्यति ॥ अथा न्यद्वचनं चन्द्र शृणु कार्यं यथा त्वया ॥ १०६ ॥ इदं यत्सागरोपांते तिष्ठते लिंगमुत्तमम् ॥ धरामध्यगतं तच्च देवानां दृष्टिगोच रम् ॥ १०७ ॥ कुक्कुटांडसमप्रख्यं सर्पमेखलमंडितम् ॥ ममाद्यं परमं तेजो न चान्यो वेद कश्चन ॥ १०८ ॥ इतः सागरमध्ये तु धनुषां च शतत्रये ॥ तिष्ठते तत्र लिंगं तु सुगुप्तं लक्षणान्वितम् ॥ १०९ ॥ आदिकल्पे महर्षीणां शापेन पतितं मम ॥ लिंगं सागरमध्ये तु तत्त्वं शीघ्रं समा नय ॥ ११० ॥ स्पर्शाख्यं यत्र मे लिंगं तत्र स्थाने निवेशय ॥ निवेश्य तु प्रयत्नेन सहितो विश्वकर्मणा ॥ १११ ॥ ततो ब्रह्माणमाहूय समेतं तु मुनीश्वरैः ॥ प्रतिष्ठां कारय विभो इष्ट्वा तत्र महामखैः ॥ ११२ ॥ एवमुक्त्वा स भगवांस्तत्रैवांतरधीयत ॥ ततः प्रभां पुनर्लेभे रात्रिनाथो वरानने ॥ ११३ ॥ ततःप्रभृति तत्क्षेत्रं प्रभासमिति विश्रुतम् ॥ निष्प्रभस्य प्रभा दत्ता प्रभासं तेन चोच्यते ॥ ११४ ॥ दक्षस्य तु वृथा शापो न कृतस्तेन लांछनम् ॥ सोमः प्रभासते लोकान्वरं प्राप्य महेश्वरात् ॥ व्यक्तीभूतः स देवेशः सोमस्यैव महात्मनः ॥ ११५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये सोमवरप्रदानवर्णनंनाम द्वाविंशोऽध्यायः॥ ॥ २२ ॥ ॥ ईश्वर उवाच ॥ ॥ ततः शांतमना भूत्वा चंद्रमा विस्मयान्वितः ॥ शंभुभक्त्या परीतात्मा प्रभासक्षेत्रमास्थितः ॥ १ ॥ पूर्वोक्तं यत्तु देवेन स तथा कृतवान्विभुः ॥ गत्वा सागरमध्ये तु गृहीत्वा लिंगमुत्तमम् ॥ २ ॥ विश्वकर्म्माणमाहूय सहितं परिचारकैः ॥ आदिदेश स्वयं सोम स्त्वष्टारं देवशिल्पिनम् ॥ ३ ॥ ॥ चंद्र उवाच ॥ ॥ विश्वकर्मन्निदं लिंगं मम दत्तं तु शंभुना ॥ गृहाण त्वं महाबाहो युक्तस्थाने निवेशय ॥ ४ ॥ ॥ ३७ ॥ रक्षस्व तावद्गन्तास्मि स्वकीयं भवनं विभो ॥ यज्ञार्थमानयिष्यामि यज्ञोपकरणानि च ॥ ५ ॥ ॥ ईश्वर उवाच ॥ ॥ इत्युक्त्वा चं तदा चंद्रश्चंद्र लोकं जगाम ह ॥ गत्वा तत्र महादेवि चंद्रलोकं महाप्रभम् ॥ ६ ॥ कोटियोजनविस्तीर्णं सदामृतमयं शुभम् ॥ तत्राहूय महादेवि प्रतीहारं सुमेध

१ परीतस्तु–इ० पा० । २ प्रातिवारकैः–इ० पा० । ३ हि-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम् ॥ ७ ॥ मंत्रिणं हेमगर्भांगं बृहस्पतिसमं धिया ॥ यज्ञोपस्करसंभारं सर्वमादाय सत्वराः ॥ ८ ॥ प्रभासक्षेत्रं गच्छंतु ममादेशपरायणाः ॥ साग्नि भिर्ब्राह्मणैः सार्द्धं गच्छंतु क्षेत्रमुत्तमम् ॥ ९ ॥ शीघ्रं संपाद्यतां सर्वं यथा यज्ञः प्रवर्तते ॥ सर्वेषामेव विप्राणां चंद्रलोकनिवासिनाम् ॥ १० ॥ पृथ क्पृथग्विमानं तु देयं तेषां महाधनम् ॥ गवां च दशलक्षाणां सवत्सानां पयोमुचाम् ॥ ११ ॥ हेमभारैर्भूषितानां कामधेनूपमत्विषाम् ॥ अश्वानां श्यामकर्णानां सपादं लक्षमेव च ॥ १२ ॥ दंतिनामयुतं चैव घंटाभरणशोभितम् ॥ सहस्राणि च चत्वारि रथानां वातरंहसाम् ॥ १३ ॥ लक्षं तु करभाणां च मणिमाणिक्यसंयुतम् ॥ सैन्यानां कोटिरेका तु चतुरंगबलान्विता ॥ १४ ॥ अग्निशौचानि वस्त्राणि ब्राह्मणार्थं तथैव च ॥ विभू षणानि दिव्यानि ऋत्विगर्थं शुभानि च ॥ १५ ॥ नानाभक्ष्याणि भोज्यानि पानानि विविधानि च ॥ लक्षं कर्मकराणां तु दासीनां लक्षमेव च ॥ ॥ १६ ॥ दारुवंशावधि प्रोक्तं यत्किंचित्स्वं मदाज्ञया ॥ अन्यद्यद्ब्राह्मणा ब्रूयुस्तत्सर्वं तत्र नीयताम् ॥ १७ ॥ देवानां दानवानां च यक्षगंधर्वरक्ष साम् ॥ सप्तद्वीपक्षितीशानां सप्तपातालवासिनाम् ॥ १८ ॥ नानानृपसहस्राणां घोषणा क्रियतां मुहुः ॥ सर्वेषां घोषणा कार्या प्रभासागमनं प्रति ॥ १९ ॥ इत्युक्त्वा मंत्रिणं तत्र चंद्रमास्त्वरयाऽन्वितः ॥ ब्रह्मलोकं स गतवान्यज्ञार्थं ब्रह्मणोंऽतिकम् ॥ २० ॥ सोऽपि चंद्रमसो मंत्री हेमगर्भो महाप्रभः ॥ सोमाज्ञां शिरसा कृत्वा यज्ञसंभारसंभृतः ॥२१॥ प्रभासं क्षेत्रमागत्य यज्ञार्थं यत्नवानभूत् ॥ तथैव चाह्वयांचक्रे भूर्भुवःस्वर्निवासिनः ॥ ॥ २२ ॥ श्रुत्वा तु घोषणां सर्वे शीघ्रं तत्र समाययुः॥ रवियोजनपर्यंतं क्षेत्रमालोक्य तत्र तत् ॥२३॥ ब्राह्मणांश्च समाहूय सोमाध्यक्ष उवाच तान् ॥ यज्ञांगं सर्वमानीतं मया सोमाज्ञया द्विजाः ॥ अनंतरं तु यत्कृत्यं भवद्भिस्तद्विधीयताम् ॥ २४ ॥ इत्युक्ता ब्राह्मणाः सर्वे तपोनिर्धूतकल्मषाः ॥ तत्रैव ददृशुः सर्वे त्वष्टारं देवशिल्पिनम् ॥ २५ ॥ तं दृष्ट्वा तु द्विजाः सर्वे लिंगं दृष्ट्वा समीपतः ॥ कथमेतदिति प्रोचुर्विश्वकर्मन्ब्रवीहि नः ॥ कस्मादत्र स्थितस्त्वं वै शिल्पिकोटिसमन्वितः ॥ २६ ॥ ॥ विश्वकर्म्मोवाच ॥ ॥ अहं सोमनियुक्तस्तु युक्तोऽस्मि लिंगरक्षणे ॥ तदाज्ञापालने यत्नः क्रियतेऽतो मया द्विजाः ॥ २७ ॥ ॥ ईश्वर उवाच ॥ ॥ एवं श्रुत्वा यदा विप्रा ज्ञात्वा सर्वं तु कारणम् ॥ चरिता यज्ञकार्यार्थं ततश्चक्रुरुप क्रमम् ॥ २८ ॥ तत्र योजनपर्यंतं देवानां यजनं शुभम् ॥ तद्देवयजनं कृत्वा पत्नीशालां च चक्रिरे ॥ २९ ॥ हविर्द्धानं सदश्चैव उत्तरा वेदिरेव च ॥ ब्रह्मणः सदनाग्नीध्रीत्येवं स्थानानि चक्रिरे ॥ ३० ॥ तत्र योजनपर्यंतं यज्ञयूपांश्च मंडपान् ॥ विश्वकर्मा चकाराशु कुंडानि

१ विमानं तु–इ० पा० । २ तथैव च–इ० पा० । ३ आसाद्य–इ० पा० । ४ सोमाध्यक्षः–सोममन्त्री–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



विविधानि च ॥ ३१ ॥ सहस्रसंख्यया तत्र कुण्डानां मंडपावधि ॥ तत्र ते ब्राह्मणाः सर्वे प्रतिष्ठायज्ञकोविदाः ॥ ३२ ॥ नानाभरणरत्नैश्च ब्राह्मणाः
समलंकृताः ॥ चक्रुः सर्वे यथान्यायं शास्त्रं दृष्ट्वा पुनःपुनः ॥ ३३ ॥ वृक्षांस्तथौषधीर्दिव्याः समित्पुष्पकुशादिकान् ॥ होमद्रव्यादिकं सर्व
माज्यं प्राज्यं नवं पयः ॥ ३४ ॥ तथान्यदपि यत्किंचिद्यज्ञोपकरणं स्मृतम् ॥ वर्द्धनीकलशाद्यं च सर्वं हेममयं शुभम् ॥ ३५ ॥ चक्रुः सर्वं
यथान्यायं प्रतिष्ठामखमादृताः ॥ तत्र विप्रगणो हृष्टो भक्ष्यभोज्यादितर्पितः ॥ ३६ ॥ वेदध्वनितनिर्घोषैर्दिवं भूमिं च संस्पृशन् ॥ शुशुभे मंड
पस्तत्र पताकाभिरलंकृतः ॥ ३७ ॥ दिव्यसिंहासनोपेतो मुक्तादामपरिष्कृतः ॥ दिव्यचन्दनमालाभिः कल्पपल्लवतोरणैः ॥ ३८ ॥ दिव्यगन्ध
सुगन्धाढ्यैः स्वर्गस्थानमिवाभवत् ॥ चतुर्दशविधस्तत्र भूतग्रामः समागतः ॥ ३९ ॥ स्थावरः सर्पजातिश्च पक्षिजातिस्तथैव च ॥ मृगसंज्ञश्च
तुर्थश्च पश्वाख्यः पञ्चमः स्मृतः ॥ ४० ॥ षष्ठश्च मानुषः प्रोक्तः पैशाचः सप्तमः स्मृतः ॥ अष्टमो राक्षसः प्रोक्तो नवमो यज्ञ एव च ॥ ४१ ॥ गांध
र्वशाक्रसौम्याश्च प्राजापत्यस्तथैव च ॥ ब्राह्मश्चेति समाख्यातश्चतुर्दशविधो गणः ॥ ४२ ॥ विश्वेदेवास्तथा साध्या मरुतो वसवस्तथा ॥ लोक
पालास्तथाष्टौ च नक्षत्राणि ग्रहैः सह ॥ ४३ ॥ ब्रह्माण्डे देवता याश्च ताः सर्वास्तत्र चागताः ॥ दृष्टाः प्रभासके क्षेत्रे प्रारब्धे यज्ञकर्म्मणि ॥ ४४ ॥
घृतक्षीरवहा नद्यो दधिपाय सकर्दमाः॥ पक्वान्नानां फलानां च राशयः पर्वतोपमाः ॥ ४५ ॥ दृश्यन्ते विविधाकारास्तस्मिन्यज्ञमहोत्सवे ॥ जगुस्त
त्रैव गन्धर्वा ननृतुश्चाप्सरोगणाः ॥ ४६ ॥ भक्ष्यभोज्यैश्च विविधैः कामपानादिभिस्तथा ॥ तृप्ता देवाश्च मुनयो भूतग्रामाश्चतुर्दश ॥ ४७ ॥ एवं
संभारसहितं यज्ञांगं सर्वमेव हि ॥ प्रगुणीकृत्य सचिवो मुक्त्वा तत्रैव रक्षकान् ॥ सोमस्याह्वाननार्थं च ब्रह्मलोकं जगाम ह ॥ ४८ ॥ ॥ ईश्वर
उवाच ॥ ॥ स दृष्ट्वा ब्रह्मणः पार्श्वे स्थितं सोमं महाप्रभम् ॥ प्रणम्य दण्डवद्भूमौ सोमं ब्रह्माणमेव च ॥ ४९ ॥ कृतांजलिपुटो भूत्वा उवाच
नतकंधरः ॥ ॥ हेमगर्भ उवाच ॥ ॥ भगवन्भवदादेशाद्यज्ञांगं सर्वमेव हि ॥ ५० ॥ तत्र प्राभासिके क्षेत्रे मया ते प्रगुणीकृतम् ॥ तत्र ब्रह्म
र्षयः सर्वे तथा राजर्षयोऽपरे ॥ ५१ ॥ त्वन्मार्गप्रेक्षकाः सर्वे सन्तिष्ठन्ते समाकुलाः ॥ अनन्तरं तु यत्कृत्यं तद्भवान्कर्त्तुमर्हति ॥ ५२ ॥

१ वर्द्धनीकलशस्य विषये गारुडपुराणे प्रोक्तम्–"प्रतिष्ठा यस्य देवस्य तदाख्यं कलशं न्यसेत् । ऐशान्यां पूजयेद्याम्ये अस्त्रेणैव च वर्द्धनीम् ॥ कलशं वर्द्धिनीं चैव प्रहान्वास्तोष्पतिं तथा ॥ आसने तानि सर्वाणि प्रणवाख्यं जपेद्गुरुः ॥ सूत्रग्रीवं रत्नगर्भं वस्त्रयुग्मेन वेष्टितम् । सर्वौषधिगन्धलिप्तं पूजयेत्कलशं गुरुः॥ देवं तु कलशे पूज्य वर्द्धन्या वस्त्रमुत्तमम् । वर्द्धन्या तु समायुक्तं कलशं भ्रामयेदनु ॥ वर्द्धनीं धारया सिञ्चन्प्रतो धारयेत्ततः । अभ्यर्च्य वर्द्धनीकुंभं स्थण्डिले देवमर्चयेत् ।" इति ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ ईश्वर उवाच ॥ ॥ इत्युक्तस्तु तदा चन्द्रः समुद्रस्य[1] सुतेन वै ॥ प्रहस्योवाच ब्रह्माणं चन्द्रमा लोकसाक्षिणम् ॥ ५३ ॥ भगवन्सर्वदेवेश ममानुग्रहकाम्यया ॥ प्रतिष्ठायज्ञकामस्य ममातिथ्यं कुरु प्रभो ॥ ५४ ॥ अद्य मे सफलं जन्म सफलं च तपः प्रभो ॥ देवत्वमद्य मे ब्रह्मंस्त्वत्प्रसादाद्भविष्यति ॥ ५५ ॥ मया च तपसोग्रेण प्राप्तं लिंगमुमापतेः ॥ तत्प्रतिष्ठाविधिं सर्वं तद्भवान्कर्त्तुमर्हति ॥ ५६ ॥ ॥ ब्रह्मोवाच ॥ ॥ अवश्यं तव कर्त्तास्मि प्रतिष्ठां शंकरात्मिकाम् ॥ त्वदाराधनलिंगे तु सोमेशेऽतिविशेषतः ॥ ५७ ॥ ये केचिद्भवितारो वा अतीता ये निशाकराः ॥ तेषां सोमान्वयानां च सर्वेषामाद्यदैवतम् ॥ ५८ ॥ योऽसौ[2] सोमेश्वरो देव आदौ भैरवनामभृत् ॥ मन्वन्तरान्तरेऽतीते प्रतिष्ठेऽहं पुनःपुनः ॥५९॥ यदा प्राभासिके क्षेत्रे गतोऽहं चाष्टवार्षिकः ॥ आहूतः पूर्वमिन्द्रेण भैरवस्य प्रतिष्ठिते ॥६०॥ तत्प्रभृत्येव मे नाम बालरूपी निगद्यते ॥ अन्येषु सर्वतीर्थेषु वृद्धरूपी वसाम्यहम् ॥६१॥ प्रभासे तु पुनश्चंद्र बाल्यात्प्रभृति संवसे ॥ ब्रह्माण्डे यानि तीर्थानि ब्राह्मणास्तेषु ये स्मृताः ॥६२॥ तेषामाद्यो निशानाथ प्रभासेऽहं व्यवस्थितः ॥ कल्पेकल्पे निशानाथ मम नामांतरं भवेत्॥६३॥स्वयंभूः प्रथमे नाम द्वितीये पद्मभूः स्मृतः॥तृतीये विश्वकर्त्तेति बालरूपी तुरीयके ॥६४॥ एषामेव परीवर्तो नाम्नां भावि पुनःपुनः ॥ परार्द्धद्वयपर्यंतं प्रभासे संस्थितस्य मे ॥६५॥ आदिसोमेन तत्रैव शंभोर्नेत्रोद्भवेन वै ॥ प्रभासे तु तपस्तप्त्वा प्रत्यक्षीकृत ईश्वरः ॥६६॥ ततो ददौ वरं तुष्टः पूर्वचन्द्रस्य शूलधृक् ॥ यस्मादाराधितोऽहं ते सोम भक्त्या चिरन्तनम् ॥६७॥ तस्मात्सोमेशनामैवमस्मिँल्लिंगे भविष्यति ॥ यावद्ब्रह्मा शतानन्दः प्रकृतौ न प्रलीयते ॥ ६८ ॥ ये केचिद्भवितारो वै रात्रिनाथा निशाकराः ॥ ते मदाराधनं चात्र करिष्यंति पुनःपुनः ॥६९॥ इत्युक्त्वा भगवाञ्छंभुस्तत्रैवांतरधीयत ॥ तस्मिन्काले मया सोम आद्यं लिंगं प्रतिष्ठितम् ॥७०॥ तदाप्रभृति सोमानां लक्षाणां द्वितयं गतम् ॥ सहस्रद्वितयं चैव शतं चैकं षडुत्तरम् ॥७१॥ सप्तमस्त्वं महाबाहो वर्त्तसे सोम सांप्रतम् ॥ एतावन्त्येव लिंगानि प्रतिष्ठां प्रापितानि मे ॥ ७२ ॥ एष एवाधुना सोऽहं तदाराधनजं फलम् ॥ प्रतिष्ठातास्मि भद्रं ते सोम कृत्यं ममैव तत् ॥ ७३ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ इत्युक्त्वा भगवान्ब्रह्मा वेदविद्यासमन्वितः ॥ सर्वदेवमयो देवैः सहितस्तीर्थसंयुतः ॥ ७४ ॥ सनत्कुमारप्रमुखैर्योगीन्द्रैर्ऋषिभिः सह ॥ बृहस्पतिं समाहूय पुरस्कृत्य पुरोधसम् ॥ ७५ ॥ हंसयानं समारुह्य कोटिब्रह्मर्षिभिः सह ॥ आगतः सोमराजेन तदा ब्रह्मा जगत्पतिः ॥ ७६ ॥ प्राभासिके महातीर्थे यत्र दारुवनं स्मृतम् ॥ ऋषितोया नदी यत्र महापातकनाशिनी ॥ ७७ ॥ अस्मिंस्तीर्थे प्रभासे

१ समुद्रस्य सुतेन—हेमगर्भेण—इत्यर्थः। २ योऽयम्—इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तु ब्रह्मभागः स उच्यते ॥ त्रिदैवतमिदं क्षेत्रं मया ते कथितं प्रिये ॥ ७८ ॥ तत्रागत्य चतुर्वक्त्रो ब्रह्मभागेऽतिनिर्मले ॥ मुनीनाकारयामास उन्नत स्थानवासिनः ॥ ७९ ॥ आयांतं वेधसं दृष्ट्वा देवर्षिगुरुसंयुतम् ॥ ते सर्वे पूजयामासुः संस्तवैर्वेदसंमितैः ॥ ८० ॥ अथोवाच द्विजान्सर्वान्ब्रह्मा लोकपितामहः ॥ चिरमाराध्य सोमेन सोमेशं पापनाशनम् ॥ ८१ ॥ तस्मिन्प्रसन्ने सोमेन लब्धं लिङ्गमनुत्तमम् ॥ प्रतिष्ठार्थं तु देवस्य आयाता द्विजसत्तमाः ॥ ८२ ॥ यथा मया सदा कार्या प्रतिष्ठा शंकरात्मिका ॥ भवद्भिः परिकार्या सा मम भागसमाश्रयैः ॥ ८३ ॥ यतः कोपेन भवतां लिंगं प्रपतितं भुवि ॥ प्रतिष्ठा तस्य कर्तव्या युष्माभिर्वै न संशयः ॥ ८४ ॥ ॥ ईश्वर उवाच ॥ ॥ गृहीत्वाऽथ मुनीन्सर्वान्ब्रह्मा लोकपिता महः ॥ आनीतः सोमराजेन तदा ब्रह्मा जगत्पतिः ॥ ८५ ॥ प्राभासिके महातीर्थे सावित्र्या सहितः प्रभुः ॥ कारयामास कुण्डानां मण्डपानां शतंशतम् ॥ ८६ ॥ एकैके मण्डपे तत्र चक्रे सप्तदशर्त्विजः ॥ गुरुणा प्रेरितो ब्रह्मा तत्र देवपुरोधसा ॥ ८७ ॥ पार्श्वे स्थितस्तदा ब्रह्मा विधानैर्वेद भाषितैः ॥ दीक्षयामास सोमं तु रोहिण्या सहितं विभुम् ॥ ८८ ॥ पत्नीं च रोहिणीं कृत्वा सर्वलक्षणसंयुताम् ॥ मृगचर्मधरां देवीं क्षौमवस्त्रावगुंठिता म् ॥ ८९ ॥ पत्नीशालां समानीता ऋत्विग्भिर्वेदपारगैः ॥ चंद्रमा दीक्षया युक्त ऋषिगंधर्वसंस्तुतः ॥ ९० ॥ औदुंबरेण दंडेन संवृतो मृगचर्मणा ॥ अतीव तेजसा युक्तः शुशुभे सदसि स्थितः ॥ ९१ ॥ ततो ब्रह्मा महादेवि सर्वलोकपितामहः ॥ ऋत्विजां वरणं चक्रे वेदोक्तविधिना तदा ॥ ९२ ॥ गुरुर्होता वृतस्तत्र वसिष्ठोऽध्वर्युरेव च ॥ तत्रोद्गाता मरीचिस्तु ब्रह्मत्वे नारदः कृतः ॥ ९३ ॥ सनत्कुमारसंयुक्ताः सदस्यास्तत्र वै कृताः ॥ वस्त्रै राभरणैर्युक्ता मुकुटैरंगुलीयकैः ॥ ९४ ॥ भूषिता भूषणौघेन तस्मिन्यज्ञे तदर्त्विजः ॥ चतुर्षु तज्ज्ञाश्चत्वार एवं ते षोडशर्त्विजः ॥ ९५ ॥ प्रस्तोता कश्यपस्तत्र प्रतिहर्ता तु गालवः ॥ सुब्रह्मण्यस्तथा गर्गः सदस्यः पुलहः कृतः ॥ ९६ ॥ होता शुक्रः समाख्यातो नेष्टा क्रथ उदाहृतः ॥ मैत्रा वरुणो दुर्वासा ब्राह्मणाच्छंसी कौशिकः ॥ ९७ ॥ अच्छावाकश्च शाकल्यो ग्रावस्थः क्रतुरेव च ॥ प्रस्थाता प्रतिपूर्वो यः शालंकायन एव च ॥ ॥ ९८ ॥ अग्नीध्रश्च मनुस्तत्र उन्नेता त्वंगिराः कृतः ॥ एवमाद्यान्मण्डपेषु कृत्वा तानृत्विजः प्रभुः ॥ ९९ ॥ अन्येषु मण्डपेष्वेव प्रत्येकमृत्विजः कृताः ॥ मण्डपानां शतेष्वेव कृत्वा कुण्डान्यकल्पयत् ॥ १०० ॥ एकैको मण्डपस्तत्र विंशहस्तप्रमाणतः ॥ अस्त्रेणाशोध्य भूमिं तु पंचगव्येन प्रोक्ष्य च ॥ १०१ ॥ चर्मणा चावगुंठ्यैव आलिख्यास्त्रेण पार्वति ॥ उल्लिख्य प्रोक्षणं कृत्वा खातं कृत्वा विधानतः ॥ १०२ ॥ अष्टौ कुंडानि



१ तान्–इ० पा० । २ एकैके च मखे तत्र–इ० पा० । ३ चतुर्षु–चतुर्दिग्द्वारेषु–इत्यर्थः । ४ क्रतुः–इ० पा० । ५ प्रस्थाता प्रतिपूर्वः–प्रतिप्रस्थाता–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संकल्प्य तथैकमंण्डपे प्रिये ॥ लेपनं मण्डपे कृत्वा वज्राकरणमेव च ॥ १०३ ॥ चतुरस्रकार्मुकं च वर्तुलं कमलाकृति ॥ पूर्वां दिशं समारभ्य कृत्वा तानि प्रयत्नतः ॥ १०४ ॥ चतुःकोणसमायुक्तं पूर्वे कुण्डं निवेश्य तु ॥ भगाकृति तथाऽऽग्नेय्यां दक्षिणे धनुराकृति ॥ ॥ १०५ ॥ नैर्ऋत्ये तु त्रिकोणं वै वर्तुलं पश्चिमेन तु ॥ षट्कोणं चैव वायव्ये पद्माकारं तथोत्तरे ॥ १०६ ॥ ऐशान्यामष्टकोणं तु मध्ये चैकं विधानतः ॥ प्रत्येकं मण्डपं शुभ्रं स्तम्भैः षोडशभिर्युतम् ॥ १०७ ॥ ध्वजैः सतोरणैर्युक्तं चक्रे ब्रह्मा विधानतः ॥ न्यग्रोधं पूर्वतो न्यस्य दक्षे चोदुंबरं तथा ॥ १०८ ॥ अश्वत्थं पश्चिमे चैव पलाशं चोत्तरे क्रमात् ॥ बाहुदंडप्रमाणेन ध्वजांस्तत्र निवेश्य वै ॥ १०९ ॥ ऐन्द्र्यादौ[1] पीतवर्णादिपताकाः परिकल्पिताः ॥ ततो ब्रह्मा ह्यग्निकुंडे चाग्निस्थापनमारभत् ॥ ११० ॥ स्वस्थाने ब्राह्मणांश्चैव जाप्ये चैव न्ययोजयत् ॥ श्रीसूक्तं पावमानं च सदा चैवं[2] च वाजिनम् ॥ १११ ॥ वृषाकपिं तथैन्द्रं च बह्वृचः पूर्वतोऽजपन् ॥ रुद्रान्पुरुषसूक्तं च क्रोकाध्यायं[3](?) च वैक्रियम् ॥११२॥ ब्राह्मणं पैत्र्यमैन्द्रं च जपेरन्यजुषो यमे[4] ॥ देवव्रतं वामदेव्यं ज्येष्ठं साम रथंतरम् ॥ ११३ ॥ भेरुंडानि च सामानि च्छंदोगः पश्चिमेऽजपत् ॥ अथर्वाथर्वशिरसं स्कम्भस्तंभमथर्वणम् ॥ ११४ ॥ नीलरुद्रमथर्वाणमथर्वा चोत्तरेऽजपत् ॥ गर्भाधानादिकं सर्वं ततोऽग्नेरकरोद्विभुः ॥ ११५ ॥ पूर्णाहुतिं ततो दत्त्वा स्नानकर्म तथाऽरभत् ॥ पंचपल्लवसंयुक्तं मृत्तिकाभिः समन्वितम् ॥ ११६ ॥ कषायैः पंचगव्यैश्च पंचामृतफलैस्तथा ॥ तीर्थोदकैः समेतं तु मंत्रैः स्नानमथारभत् ॥ ११७ ॥ नेत्राण्युत्पाद्य देवस्य कृत्वा च तिलकक्रियाम् ॥ पृथिव्यां यानि तीर्थानि पाताले च विशेषतः ॥ ११८ ॥ स्वर्गलोके च यान्येव तत्र तान्याययुस्तदा ॥ एतस्मिन्नन्तरे ब्रह्मा देवानां पश्यतां तदा ॥ ११९ ॥ भूमिं भित्त्वा विवेशाथ तत्र लिंगमपश्यत ॥ स्पर्शाख्यं तं तु संछाद्य मधुना दर्भमूलकैः ॥ १२० ॥ तत्र ब्रह्मशिलां न्यस्य तस्या ऊर्ध्वं महाप्रभम् ॥ लिंगं प्रतिष्ठयामास कृत्वा निश्चलमात्मवान् ॥ १२१ ॥ स्थित्वा च परमे तत्त्वे मंत्रन्यासमथाकरोत् ॥ एवं लिंगं प्रतिष्ठाप्य तत्र ब्रह्मा जगद्गुरुः ॥ पूजयामास विधिना वेदोक्तमंत्रविस्तरैः ॥ १२२ ॥ मन्त्रन्यासे कृते तत्र ब्रह्मणा लोककर्तृणा ॥ तत्र विप्रगणो हृष्टो जयशब्दादिमंगलैः ॥ निर्धूमश्चाभवद्वह्निः सूर्यकोटिसमप्रभः ॥ १२३ ॥ देवदुन्दुभयो नेदुः प्रसन्नाश्च दिगीश्वराः ॥ पुष्पवृष्टिः पपातोच्चैस्तस्मिन्यज्ञमहोत्सवे ॥ १२४ ॥ प्रतिष्ठाप्य ततो लिंगं श्रीसोमेशं पितामहः ॥ दापयामास विप्रेभ्यो भूरिशो यज्ञदक्षिणाम् ॥ १२५ ॥ सनत्कुमारप्रमुखैराद्यैर्ब्रह्मर्षिभिर्वृतः ॥ दक्षिणामददात्सो

१ ऐंद्र्यादौ—पूर्वादिदिक्षु—इत्यर्थः । २ सदा चैष्यं च वर्जितम्—इ० पा० । ३ ग्लैकोध्यायम्—इ० पा० । ४ यमे—दक्षिणस्याम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





मन्त्रीँलोकान्ब्रह्मणे पुरा ॥ १२६ ॥ तेभ्यो ब्रह्मर्षिमुख्येभ्यः सदस्येभ्यस्तथैव च ॥ ददौ हिरण्यं रत्नानि कोटिशो भूरिदक्षिणाः ॥ १२७ ॥ सोभिषिक्तो महातेजाः सर्वैर्ब्रह्मर्षिभिस्ततः ॥ त्रीँल्लोकान्भावयामास स्वभासा भासतां वरः ॥ १२८ ॥ तं सिनी च कुहूश्चैव द्युतिः पुष्टिः प्रभा वसुः॥ कीर्त्तिर्धृतिश्च लक्ष्मीश्च नव देव्यः सिषेविरे ॥ १२९ ॥ प्राप्यावभृथमव्यग्रः कृत्वा माहेश्वरं मखम् ॥ कृतार्थः परिपूर्णश्च संबभूव निशापतिः ॥ १३० ॥ ततस्तस्मै ददौ राज्यं प्राज्यं ब्रह्मा पितामहः ॥ बीजौषधीनां विप्राणामन्नानां च वरानने ॥ १३१ ॥ तस्मिन्यज्ञे समाजग्मुर्ये केचित्पृथिवीश्वराः ॥ तेषां राज्यं धनं भोगान्ददौ स्वर्गं तथाऽक्षयम् ॥ १३२ ॥ ब्राह्मणान्भोजयामास स्वयमेवौषधीपतिः ॥ ददौ सर्वं तदा तेषां प्रभासक्षेत्रवासिनाम् ॥ ॥ १३३ ॥ हिरण्यादीन्यदाच्चैव महादानानि षोडश ॥ यो यदर्थयते तत्र सामान्यः प्राकृतो जनः॥ निजकर्मानुसारेण स लेभे च तदेव हि ॥ १३४॥ एवं समर्थिते यज्ञे सर्वे देवाः सवासवाः ॥ स्थापयित्वा तु लिंगानि जग्मुः सर्वे यथागतम् ॥ १३५ ॥ चन्द्रमास्तु पुनर्देवि ब्रह्मणा सहितो विभुः ॥ लिंगमाराधयामास प्रभासे पापनाशने ॥ १३६ ॥ त्रिकालं पूजयामास धूपमाल्यानुलेपनैः ॥ तं प्रणम्य च देवेशि स्तौति नित्यं निशापतिः ॥ ॥ १३७ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये सोमेश्वरप्रतिष्ठामाहात्म्यवर्णनंनाम त्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ छ ॥ ॥ देव्युवाच ॥ ॥ कस्मिन्काले जगन्नाथ तत्र लिंगं प्रतिष्ठितम् ॥ कथमाराधनं चक्रे कृतार्थो रोहिणीपतिः ॥ १ ॥ ॥ ईश्वर उवाच ॥ ॥ त्रेतायुगे च दशमे मनोर्वैवस्वतस्य हि ॥ संजातो रोहिणीनाथो युक्तो दुर्वाससा प्रिये ॥ २ ॥ तस्मिन्काले तदा तत्र गते वर्षसहस्रके ॥ ततः कृत्वा तपश्चार्यं प्रत्यक्षीकृतशंकरः ॥ ३ ॥ लिंगं प्रतिष्ठयामास ब्रह्मणा लोककर्तृणा ॥ पुनर्वर्षसहस्रं तु पूजयामास शंकरम् ॥ ४ ॥ ततः संपूज्य विधिना निजकार्यार्थसिद्धये ॥ स्तुतिं चक्रे निशानाथः प्रत्यक्षीकृतशंकरः ॥ ५ ॥ ॥ चंद्र उवाच ॥ ॥ नास्ति शर्वसमो देवो नास्ति शर्वसमा गतिः ॥ नास्ति शर्वसमो देवो नास्ति शर्वसमा गतिः ॥ ६ ॥ यं पठंति सदा सांख्या श्चिंतयंति च योगिनः ॥ परं प्रधानं पुरुषं तस्मै ज्ञेयात्मने नमः ॥ ७ ॥ उत्पत्तौ च विनाशे च कारणं यं विदुर्बुधाः ॥ देवासुरमनुष्याणां तस्मै ज्ञानात्म

१ तदा–इ० पा० । २ हिरण्यादिकमव्यग्रं महादानानि कोटिशः–इ० पा० । ३ निशाकरः–इ० पा० । ४ एतदर्धपद्यं पुनरुक्तमिति न भ्रमितव्यम्–किं तु–भक्त्यतिशयद्योतकार्धश्लोकपुनरुद्रोपणम्–"महादेव महादेव महादेव नमोऽस्तु ते ॥ महादेव महादेव महादेव नमोऽस्तु ते ॥" इत्यादिषु भक्त्यतिशयस्मारकोक्तिरुपलब्धेः–इति ध्येयं सुधीभिः । ५ यज्ञात्मने–इ० पा० । ६ सर्वात्मने–इ०, यागात्मने–इ० च पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ने नमः ॥ ८ ॥ यमव्ययमनाद्यंतं यं नित्यं शाश्वतं ध्रुवम् ॥ निष्कलं परमं ब्रह्म तस्मै योगात्मने नमः ॥ ९ ॥ यः पवित्रं पवित्राणा मादिदेवो महेश्वरः ॥ पुनाति दर्शनादेव तस्मै तीर्थात्मने नमः ॥ १० ॥ यतः प्रवर्त्तते सर्वं यस्मिन्सर्वं विलीयते ॥ पालयेद्यो जगत्सर्वं तस्मै सर्वा त्मने नमः ॥ ११ ॥ अग्निष्टोमादिभिर्यज्ञैर्यं यजंति द्विजातयः ॥ संपूर्णदक्षिणैरेव तस्मै यज्ञात्मने नमः ॥ १२ ॥ ॥ ईश्वर उवाच ॥ ॥ एवं स संस्तुते यावद्दिवा रात्रौ निशाकरः ॥ अब्रवीद्भगवान्प्रीतः प्रहसन्निव शंकरः ॥ १३ ॥ ॥ शंकर उवाच ॥ ॥ परितुष्टोऽस्मि ते वत्स स्तोत्रे णानेन शीतगो ॥ वरं वरय भद्रं ते भूयो यत्ते मनोगतम् ॥ १४ ॥ ॥ चंद्र उवाच ॥ ॥ यदि देयो वरोऽस्माकं यदि तुष्टोऽसि मे प्रभो ॥ सांनिध्यं कुरु देवेश लिंगेऽस्मिन्सर्वदा विभो ॥१५॥ ये त्वां पश्यंति चात्रस्थं भक्त्या परमया युताः[1] ॥ तेषां तु परमा सिद्धिस्त्वत्प्रसादात्सुरेश्वर[2] ॥ ॥ १६ ॥ ॥ शंभुरुवाच ॥ ॥ अग्रे[3] तु मम सांनिध्यमस्मिँल्लिंगे महाप्रभो ॥ विशेषतोऽधुना चंद्र तव भक्त्या निरंतरम् ॥ १७ ॥ स्थातव्य मद्यप्रभृति क्षेत्रेऽस्मिन्नुमया सह ॥ यस्मात्त्वया प्रभा लब्धा क्षेत्रेऽस्मिन्मत्प्रसादतः ॥ तस्मात्प्रभासमित्येवं नामास्य प्रभविष्यति ॥ १८ ॥ यस्मा त्प्रतिष्ठितं लिंगं त्वया सोम शुभं मम ॥ सोमनाथेति मे नाम तस्मात्ख्यातिं[5] गमिष्यति ॥ १९ ॥ यन्ममाग्रेतनं नामख्यातं ब्रह्मावसानिकम् ॥ सोमनाथेति च पुनस्तदेव प्रचरिष्यति ॥ द्रक्ष्यंति हि नरा ये मामत्रस्थं भक्तितत्पराः ॥ २० ॥ शृणु तेषां फलं वत्स भविष्यति निशाकर ॥ न तेषां जायते व्याधिर्न दारिद्र्यं न दुर्गतिः ॥ न चेष्टेन वियोगश्च मम चंद्र प्रभावतः ॥ २१ ॥ यात्रां कुर्वंति ये भक्त्या मम दर्शनकांक्षिणः ॥ पदे पदेऽश्वमेधस्य तेषां फलमुदाहृतम् ॥ २२ ॥ किं कृतैर्बहुभिर्यज्ञैरुपवासैर्निशाकर ॥ सकृत्पश्यंति मां येऽत्र ते सर्वे लेभिरे[6] फलम् ॥ २३ ॥ एकमा सोपवासं तु कुरुते भक्तितत्परः ॥ यावद्वर्षसहस्रं तु एकः पश्यति मामिह ॥ २४ ॥ द्वाभ्यामपि फलं तुल्यं नास्ति काचिद्विचारणा ॥ २५ ॥ एको भवेद्ब्रह्मचारी यावज्जीवं निशाकर ॥ सकृत्पश्यति मामत्र समं ताभ्यां[8] फलं स्मृतम् ॥ २६ ॥ एको दानानि सर्वाणि प्रयच्छति द्विजातये ॥ एकः पश्यति मामत्र समं ताभ्यां फलं स्मृतम् ॥ २७ ॥ एको व्रतानि सर्वाणि कुरुते मृगलांछन ॥ अन्यः पश्यति मामत्र समं ताभ्यां फलं स्मृतम् ॥ २८ ॥ एकस्तीर्थानि कुरुते जपजाप्यानि भूरिशः ॥ अन्यः पश्यति मामत्र फलं ताभ्यां समं स्मृतम् ॥ २९ ॥ एको ज्ञानादियोगेन मुमुक्षुर्जायते ध्रुवम् ॥ अन्यः पश्यति मामत्र फलं ताभ्यां समं स्मृतम् ॥ ३० ॥ एकस्तु भृगुपातेन याति मृत्युं निशाकर ॥ अन्यः पश्यति

१ युताः विदुः—इति पूर्वेणच्छेदः। २ अस्तु इति शेषः। ३ अग्रे—पुरा—इत्यर्थः। ४ सिद्धिम्—इ०पा०। ५ यत्—इति शेषः। ६ लेभिरे—लप्स्यंते—इत्यर्थः। ७ द्वाभ्यामपि—द्वयोरपि—इत्यर्थः। ८ ताभ्याम्—तयोः—इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





मामत्र समं ताभ्यां फलं स्मृतम् ॥ ३१ ॥ एकः स्नाति सदा माघं प्रयागे नरसत्तमः ॥ अन्यः पश्यति मामत्र फलं ताभ्यां समं स्मृतम् ॥ ३२ ॥ एकः पिण्डप्रदानं च पितृतीर्थे समाचरेत् ॥ अन्यः पश्यति मामत्र फलं ताभ्यां समं स्मृतम् ॥ ३३ ॥ गोसहस्रप्रदो ह्येको ब्राह्मणे वेदपारगे ॥ एकः पश्यति मामत्र फलं ताभ्यां समं स्मृतम् ॥ ३४ ॥ पञ्चाग्निं साधयेदेको ग्रीष्मकाले सुदारुणे ॥ एकः पश्यति मामत्र फलं ताभ्यां समं स्मृतम् ॥ ३५ ॥ स्नातः सोमग्रहे चन्द्र सोमवारे च भक्तितः ॥ यो मां पश्यति सर्वेषामेतेषां लभते फलम् ॥ ३६ ॥ सरस्वती समुद्रश्च सोमः सोमग्रहस्तथा ॥ दर्शनं सोमनाथस्य सकाराः पञ्च दुर्लभाः ॥ ३७ ॥ नैरंतर्येण षण्मासान्विधिना यः प्रपूजयेत् ॥ पुण्यं तदेव सफलं लभते विषुवार्चनात् ॥ ३८ ॥ एतदेव तु विज्ञेयं ग्रहणे चोत्तरायणे ॥ संक्रांतिदिनच्छिद्रेषु षडशीतिमुखेषु[1] च ॥ ३९ ॥ मासैश्चतुर्भिर्यत्पुण्यं विधिनाऽऽपूज्य शंकरम् ॥ कार्त्तिक्यां स लभेत्पुण्यं चैत्र्यां तद्द्विगुणं स्मृतम् ॥ पुण्यमेतत्तु फाल्गुन्यामाषाढ्यामेवमेव तु ॥ ४० ॥ एको दद्याद्गवां लक्षं दोग्ध्रीणां वेदपारगे ॥ एको ममार्चयेल्लिंगं तस्य पुण्यं ततोऽधिकम् ॥ ४१ ॥ मासेमासे च योऽश्नीयाद्यावज्जीवं सुरेश्वरि ॥ यश्चार्चयेत्सकृल्लिंगं सममेतन्न संशयः ॥ ४२ ॥ तपःशीलगुणोपेते पात्रे वेदस्य पारगे ॥ सुवर्णकोटिं यद्दत्वा तत्फलं कुसुमेन तु ॥ ४३ ॥ अर्कपुष्पेऽपि चैकस्मिञ्छिवाय विनिवेदिते ॥ दश दत्त्वा सुवर्णानि यत्फलं तदवाप्नुयात् ॥ ४४ ॥ अर्कपुष्पसहस्रेभ्यः करवीरं विशिष्यते ॥ करवीरसहस्रेभ्यो द्रोणपुष्पं विशिष्यते ॥ ४५ ॥ द्रोणपुष्पसहस्रेभ्यो ह्यपामार्गं विशिष्यते ॥ अपामार्गसहस्रेभ्यः कुशपुष्पं विशिष्यते ॥ कुशपुष्पसहस्रेभ्यः शमीपुष्पं विशिष्यते ॥ ४६ ॥ शमीपुष्पं बृहत्याश्च कुसुमं तुल्यमुच्यते ॥ करवीरसमा ज्ञेया जातीविजयपाटलाः ॥ ४७ ॥ श्वेतमंदारकुसुमं सितपद्मसमं[2] भवेत् ॥ नागचंपकपुन्नागधत्तूरकुसुमं स्मृतम् ॥ ४८ ॥ केतकीजातिमुक्तं च कन्दयूथीमदन्तिकाः ॥ शिरीषसर्जजंबूककुसुमानि विवर्ज्जयेत् ॥ ४९ ॥ आकुलीकुसुमं पत्रं करंजेन्द्रसमुद्भवम् ॥ विभीतकानि पुष्पाणि कुसुमानि विवर्ज्जयेत् ॥ ५० ॥ कनकानि कदंबानि रात्रौ देयानि शंकरे ॥ देवशेषाणि पुष्पाणि दिवा रात्रौ च मल्लिका ॥ ५१ ॥ प्रहरं तिष्ठते मल्ली करवीरमहर्निशम् ॥ कीटकेशापविद्धानि रात्रौ पर्युषितानि च ॥ ५२ ॥ स्वयं पतितपुष्पाणि त्यजेदुपहतानि च ॥ तुलसी शतपत्रं च गन्धारी दमनस्तथा ॥ ५३ ॥ सर्वासां पत्रजातीनां श्रेष्ठो मरुबकः स्मृतः ॥ एतैः पुष्पविशेषैस्तु पूज्यः सोमेश्वरः सदा ॥ ५४ ॥ यात्रायाः फलमाप्नोति स्वर्गलोके महीयते ॥ एतावदुक्त्वा वचनं



१ षडशीतिमुखेषु—धनुर्मिथुनकन्यामीनसंक्रांतिदिनेषु—इत्यर्थः । तथा चोक्तम्—"षडशीत्याननं चापनृयुक्कन्याझषे भवेत् ।" इति मुहूर्तचिन्तामणौ । २ शतपत्रसमम्—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रैवान्तरधीयत ॥ ५५ ॥ चन्द्रमा यक्ष्मणा मुक्तः स्वस्थाननिरतोऽभवत् ॥ आहूय विश्वकर्माणं प्रासादं पर्यकल्पयत् ॥ शुद्धस्फटिकसंकाशं गोक्षीरधवलोज्ज्वलम् ॥ ५६ ॥ प्रासादं मेरुनामानं हेमप्राकारतोरणम् ॥ चतुर्दशान्ये परितः प्रासादाः परिकल्पिताः ॥ तेषां नामानि वक्ष्यामि प्रत्येकं तानि मे शृणु ॥ ५७ ॥ केसरी सर्वतोभद्रो नदनो नन्दिशालकः ॥ नन्दीशो मन्दरश्चैव श्रीवृक्षो ह्यमृतोद्भवः ॥ ५८ ॥ हिमवान्हेमकूटश्च कैलासः पृथिवीजयः ॥ इन्द्रनीलो महानीलो भूधरो रत्नकूटकः ॥ ५९ ॥ वैडूर्यः पद्मरागश्च वज्रको मुकुटोज्ज्वलः ॥ ऐरावतो राजहंसो गरुडो वृषभस्तथा ॥ ६० ॥ मेरुः प्रासादराजा च देवानामालयो हि सः ॥ आदौ पञ्चाण्डको ज्ञेयः केसरीनामतः स्थितः ॥ ६१ ॥ चतुर्थांशा च तद्वृद्धिर्यावन्मेरुः प्रकीर्तितः ॥ ६२ ॥ एवं पृथक्कारयित्वा प्रासादांश्च चतुर्दश ॥ ब्रह्मादीनां देवतानां समीपस्थानवासिनाम् ॥ ६३ ॥ दश चान्यान्भूधरादीन्वृषभान्तान्वरानने ॥ आदौ कपर्दिनं कृत्वा प्रासादान्पर्यकल्पयत् ॥ ६४ ॥ मेरुः प्रासादराजो वै स तु सोमेश्वरे कृतः ॥ त्रेतायुगे तु दशमे मनोर्वैवस्वतस्य च ॥ ६५ ॥ कारयित्वा मंडपांश्च प्रतिष्ठाप्य यथाविधि ॥ नदानां तु शतं कृत्वा वापीकूप सहस्रकम् ॥ ६६ ॥ गृहाणां तु सहस्राणि दीनानाथाश्रयाणि च ॥ कारयित्वा विधानेन विप्रेभ्यः प्रददौ पृथक् ॥ ६७ ॥ निवेश्य नगरं सोमः श्रीसोमेश्वरसन्निधौ ॥ स्वकर्मणां प्रचारार्थमथाभ्यर्थयत द्विजान् ॥ ६८ ॥ सोमोऽस्मि भवतां राजा प्रसादात्परमे ष्ठिनः ॥ तथापि विनयेनैव भक्त्यां विज्ञापयामि वः ॥ ६९ ॥ धनं हिरण्यरत्नादि धान्यं व्रीहियवादिकम् ॥ गोमहिष्यादिपशवो वस्त्राणि विविधानि च ॥ ॥ ७० ॥ कदलीनालिकेराणि तांबूलीपूगमालिनः ॥ मनोऽभिरामचरमा आरामाः परितः स्थिताः ॥ ७१ ॥ जंबूद्वीपाधिपाः सर्वे भवतामत्रवासिनाम् ॥ आदेशं च करिष्यंति शिरस्याधाय शोभनम् ॥७२॥ द्वीपांतरादागतैश्च कर्पूरागुरुचंदनैः ॥ अन्यैश्च विविधैर्द्रव्यैः संपूर्णा भवतां गृहाः ॥७३॥ पण्यानां शतसंख्यानां व्यवहारनिदर्शिनः ॥ ब्रह्मोत्तराणि तन्वंति वणिजो लाभकांक्षिणः ॥ ७४ ॥ भवत्सु भृत्यभावेन वर्त्तमाना हितैषिणः ॥ ते चान्ये च तथा पौरा नावसीदंति कर्हिचित् ॥ ७५ ॥ एवं संपूर्णविभवैर्भवद्भिः श्रेयसे मम ॥ क्रतुक्रिया वितन्यंतां विधिवद्भूरिदक्षिणाः ॥ ७६ ॥

---

१ नन्दशालकः—इ० पा० । २ चतुर्थांशा च तद्वृद्धिर्यावन्मेरुः प्रकीर्तितः । एतदुच्चत्वापेक्षया चतुर्गुणमुच्चत्वं मेरोः—चतुर्थांशेनास्योच्चत्वम्—इत्यर्थः । एतेनास्य मेर्वपेक्षया चतुर्थांशेनापकृष्टत्वं सूचितम् । ३ भक्तः—इ०पा० । ४ मनोभिरामचरमाः—सुन्दरप्रान्तावृतिभागाः—इत्यर्थः । ५ शिष्याध्यापनशोभिनाम्—इ० पा० । ६ ब्रह्मोत्तराणि—पण्यवस्तुविक्रये जायमानस्य लाभस्य केचिदंशा नियमेन ब्राह्मणेभ्यो ये वणिग्भिर्दीयंते—तानि ब्रह्मोत्तराणि—इत्युच्यंते "धर्मादायभाग" इति लोके प्रसिद्धिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ब्रह्मादीनि च सर्वाणि प्रवर्ततामहर्निशम् ॥ दीनांधकृपणादीनां क्रियतामार्तिनाशनम् ॥ ७७ ॥ अभ्यागतानामौचित्यादातिथ्यं च विधीयताम् ॥
तीर्थयात्राप्रसंगेन समेतानां महात्मनाम् ॥ ७८ ॥ ब्रह्मर्षीणामाश्रमेषु दीयंतामाश्रयाः सदा ॥ मयात्र स्थापितं लिंगं सर्वकालं दृढव्रताः ॥ ७९ ॥
पवित्रैरुपचारैश्च पूजयंतु द्विजोत्तमाः ॥ अष्टौ प्रमाणपुरुषाः पौराणां कार्यदर्शिनः ॥ ८० ॥ व्यवहारानवेक्षध्वं स्मृत्याचारविशारदाः ॥ व्यवस्थां
मत्कृतामेतां भवंतोऽत्र द्विजोत्तमाः ॥ ८१ ॥ धारयंतु महात्मानो दिग्गजा इव मेदिनीम् ॥ एवं प्रभुत्वमास्थाय स्थानेऽस्मिञ्छिवशालिनि ॥८२॥
श्रुतिस्मृतिपुराणोक्तान्धर्मानाचरत द्विजाः ॥ निशम्य सोमस्य वचो विनीतमिति ते द्विजाः ॥ ८३ ॥ उवाच कौशिकस्तेषु गोत्राणां प्रथमो
द्विजः ॥ साधूपदिष्टमस्माकं द्विजराजेन सर्वथा ॥८४॥ सर्वमेतत्करिष्यामः किं तु किंचिन्निशामय ॥ नियोगतः पूजयतां शिवनिर्माल्यसेविनाम् ॥
॥ ८५ ॥ पातित्यं जायतेऽस्माकं श्रुतिस्मृतिविगर्हितम् ॥ श्रुतिस्मृती हि रुद्रस्य यस्मादाज्ञाद्वयं महत् ॥ ८६ ॥ कस्तदुल्लंघयेन्मूढः प्राणैः कंठग
तैरपि ॥ ८७ ॥ अष्टमूर्तेः पुनर्मूर्त्तावग्नौ देवमुखे मखान् ॥ कुर्वाणाः श्रुतिमार्गेण प्रीणयामोऽखिलं जगत् ॥ ८८ ॥ जगद्भगवतो रूपं व्यक्तमेत
त्पुरद्विषः ॥ मिथो विभिन्नमित्येतदभिन्नं पुनरीश्वरात् ॥ ८९ ॥ अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ॥ आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः
प्रजाः ॥ ९० ॥ श्रुतिस्मृतिपुराणादिसदभ्यासप्रसंगिनाम् ॥ तत्तदर्थेषु पुण्यार्थं प्रवृत्ताखिलकर्मणाम् ॥ ९१ ॥ अस्माकमवकाशोऽपि विरलो लिंग
पूजने ॥ रुद्रजाप्यैर्महायज्ञैर्यजानाश्चैवमीश्वरम् ॥ ९२ ॥ यथाक्षणं यथाकालं लिंगं वेदमुपास्महे ॥ यत्तु तेऽभिमतं सोम श्रीसोमेश्वरपूजनम् ॥ तच्च
संपादयिष्यामः सविशेषं महामते ॥ ९३ ॥ येन त्वदीप्सितं सिध्येत्तमुपायं निशामय ॥ गौरीशंकरसंवादं श्रुत्वा भगवतो मुखात् ॥ ९४ ॥
नारदः प्राह नः पूर्वं कथयामस्तमेव ते ॥ ब्रह्मदेवद्विषः पूर्वं शतशो दैत्यदानवाः ॥ तपोभिरुग्रैर्विविधैः शंकरं प्रतिपेदिरे ॥ ९५ ॥ तेषामत्युग्रतपसा
मनन्यासक्तचेतसाम् ॥ प्रसादमीश्वरश्चक्रे कारुण्यामृतसागरः ॥ ९६ ॥ स हि त्रिभुवनस्वामी देवदेवो महेश्वरः ॥ अपेक्षते वरं दातुं भक्तिमेवानपा
यिनीम् ॥ ९७ ॥ ददौ स भुवनैश्वर्य्यप्रायानभिमतान्वरान् ॥ तेषां भक्त्यैव संतुष्टो देवब्रह्मद्विषामपि ॥ ९८ ॥ ब्रह्मणा विष्णुना चापि यस्यांतो
नाधिगम्यते ॥ तस्यातर्क्यप्रभावस्य को नु वेदाशयं प्रभोः ॥ ९९ ॥ दुर्वृत्तेभ्योऽपि दैत्येभ्यस्तपोभिर्वरदायिनम् ॥ पप्रच्छ स्वच्छहृदया पार्वती



१ ब्रह्मादीनि—वेदाध्ययनादीनि । व्रतादीनि च—इ० पा० । २ अग्नेरप्यष्टमूर्तेः शंकरस्याष्टमूर्त्यन्यतममूर्तित्वमस्त्यतस्तस्मिन्नेव श्रुतिमार्गेण मखान्कृत्वा अखिलं जगत्प्रीणयामः । इति योजना । इष्टापूर्ते पुनः कृत्वा—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परमेश्वरम् ॥ १०० ॥ ॥ पार्वत्युवाच ॥ ॥ भगवन्प्रसादं ते प्राप्य धृष्यंतो भुवनत्रयम् ॥ उपद्रवंतींद्रमुखान्देवान्संक्षोभयंति[1] च ॥ १०१ ॥
वरं ददासि किं तेषां तादृशानां दुरात्मनाम् ॥ जगतः स्वस्तये येषां न मनागपि चेष्टितम् ॥ १०२ ॥ त्वया दत्तवरानेतान्दिव्यान्भोगोपभो
गिनः ॥ अवधीर्य तवैश्वर्यं कथं विष्णुर्निहंति च ॥ १०३ ॥ हतानां च पुनस्तेषां का गतिः स्याद्वद प्रभो ॥ १०४ ॥ ॥ ईश्वर उवाच ॥ ॥
सात्त्विका राजसाश्चैव तामसाश्चेति वै त्रिधा ॥ भवंति लोकास्तेष्वेते तमःप्राया दुरासदाः ॥ १०५ ॥ सुरैः सह स्पर्धमानास्तपोभिरपि तामसैः ॥
मां भजंते मुहुर्मोहाज्जगदुत्सादनोद्यताः ॥ १०६ ॥ वरं ददामि यत्तेषां भक्तिस्तत्र तु कारणम् ॥ अहं हि भक्त्या सुग्राह्यो नात्र कार्या विचारणा ॥
॥१०७॥ तपोनुरूपानासाद्य वरांस्ते पापकारिणः ॥ विष्णुना यन्निहन्यंते तच्च देवि निबोध मे॥१०८॥ अहं हरिश्च यद्भिन्नौ गुणभागोऽत्र कारणम् ॥
परमार्थादभिन्नौ च रहस्यं परमं ह्यदः॥१०९॥आराध्याराधकादिश्च भेदः सामान्य एव नौ॥तथा ह्यहमिमां गंगां विष्णोः पादाग्रनिःसृताम्॥११०॥
वहामि शिरसा भक्त्या त्वदीक्षाशंकितोऽपि सन् ॥ अपि विष्णुस्त्रिभुवनं परित्रातुं व्यवस्थया ॥१११॥ मामुपास्य चिरं लेभे चक्रं दुष्टनिबर्हणम् ॥
त्वां च तस्य महामायामप्रमेयात्मनो हरेः ॥ ११२ ॥ आराधयामि तद्भक्त्या त्रिजगज्जन्मकारणम् ॥ शिरस्याधाय चान्यां मे शक्तिरूपां तथा
हरिः ॥११३॥ अजोऽपि जन्मान्यासाद्य लोकरक्षां करोति वै ॥ हंतुं हिरण्यकशिपुं नरसिंहवपुश्च सः ॥११४॥ जगज्जिघांसुः शमितो मया शरभ
रूपिणा ॥ मां च बाणपरित्राणे त्रिशूलोद्यमकारिणम् ॥ ११५ ॥ मानुष्येऽप्यवतारेऽसौ स्तंभयित्वा स लीलया ॥ प्रभावं महिमानं च वर्द्धय
न्मामकं हरिः ॥ वरिवस्यति[2] मां नित्यमंतरात्मापि मे विभुः ॥ ११६ ॥ अथाहं परमात्मानमेनमाद्यंतवर्ज्जितम् ॥ ध्यानयोगैः समाधौ च भाव
यामि निरंतरम् ॥ ११७ ॥ तदेवं नावयोर्भेदो विद्यते पारमार्थिकः ॥ भेदं च तारतम्यं च मूढा एव वितन्वते ॥ ११८ ॥ वैष्णवं रूपमास्थाय
दुर्वृत्तान्हन्मितानहम् ॥ गतिं च तेषामधुना महेश्वरि निशामय ॥ ११९ ॥ मयि भक्त्यवसाने तु हरेः संदर्शनेन च ॥ क्रोधदर्पाभिभूतत्वान्न
मुक्तिं प्राप्नुवंति ते ॥ १२० ॥ आवयोस्तु प्रभावेन ते पुनर्द्धौतकल्मषाः ॥ ब्रह्मर्षीणां कुले जन्म संप्राप्ता मुक्तिहेतुकम् ॥ १२१ ॥ ब्रह्मचारिव्रता
दूर्ध्वं योगं पाशुपतं श्रिताः ॥ प्राचीनकर्मसंस्कारात्ते[3] पुनर्मामुपासते ॥ १२२ ॥ भक्तियोगेन चास्थाय व्रतं पाशुपतादिकम् ॥ श्मशानवासिनो
नग्ना अपरे चैकवाससः ॥ १२३ ॥ भिक्षाभुजो भूतिभृतो मल्लिंगान्यर्च्चयंति ते ॥ तथा मदेकाग्रधियो मद्ध्यानैकदृढव्रताः ॥ १२४ ॥ ये त्वामपि

१ संक्षोभयंति–व्यग्रान्कुर्वन्ति–इत्यर्थः । २ वरिवस्यति–पूजयति–इत्यर्थः । ३ प्राचीनजन्मसंस्कारात्–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



नमस्यंति जगतां मम चेश्वरीम् ॥ देहावसानयोगेन मुक्तिं तेषां ददाम्यहम् ॥ १२५ ॥ सारूप्यसालोक्यमयीं मय्यावेशितचेतसाम् ॥ सायुज्यमु
क्तये नायं योगः पाशुपतो यतः ॥ स्मृत्याचारेण मुनिभिः स सद्भिस्तेन गर्हितः ॥ १२६ ॥ ॥ द्विजा ऊचुः ॥ ॥ तीर्थयात्राप्रसंगेन तानि
होपगतान्द्विजान् ॥ स्वंमानमुपनेष्यामो भक्त्यावर्ज्जितमानसान् ॥ १२७ ॥ शुचिभिक्षान्नकौपीनकमण्डल्वादिसत्कृताः ॥ अनन्यकार्य्याः सत
तमिहागत्य तपस्विनः ॥ १२८ ॥ भवत्प्रदत्तैर्विविधैरुपहारैरतंद्रिताः ॥ तत्त्वतस्तंत्त्वसंख्यास्ते शिवधर्मैकतत्पराः ॥ १२९ ॥ श्रीसोमेश्वरमभ्यर्च्य
तव श्रेयोऽभिवर्द्धकाः ॥ मुक्तिमंते गमिष्यंति देवस्यातिसुदुर्ल्लभाम् ॥ १३० ॥ ततोऽन्येऽथ ततोऽप्यन्ये ततश्चान्ये तपोधनाः ॥ परीक्षितास्तु तेऽस्मा
भिर्भवितारो निशापते ॥ १३१ ॥ ॥ द्विजा ऊचुः ॥ ॥ इत्याह भगवान्देव्या पृष्टः स च त्रिलोचनः ॥ तत्रैव नारदः सर्वं संवादं शिवयो
रिम् ॥ १३२ ॥ श्रुत्वा नः कथयामास कथां गोष्ठीषु पृच्छताम् ॥ तव चास्माभिरधुना सर्वमेतदुदीरितम् ॥ १३३ ॥ एवमुक्तस्तु तैः प्रीतः सोमः
स्वभवनं ययौ ॥ तदाज्ञया च तत्सर्वं यथोक्तं तेऽपि कुर्वते ॥ १३४ ॥ ॥ देव्युवाच ॥ ॥ एवंप्रभावो देवेशः सोमेशः पापनाशनः ॥ केनो
पायेन तुष्येत व्रतेन नियमेन वा ॥ १३५ ॥ ॥ ईश्वर उवाच ॥ ॥ कथयामि स्फुटं धर्म्मं मानुषाणां हिताय वै ॥ स येन तुष्यते देवः शृणु
त्वं सुरसुन्दरि ॥ १३६ ॥ नित्योपवासनक्तानि व्रतानि विविधानि च ॥ तीर्थे दानानि सर्वाणि पात्रे दत्तान्यशेषतः ॥ १३७ ॥
तपश्च तप्तं तेनैव स्नातं तेनैव पुष्करे ॥ केदारे तु जलं तेन गत्वा पीतं तु निश्चितम् ॥ १३८ ॥ तेन दृष्टं वरारोहे ज्योतिर्लिंगं महाप्रभम् ॥
सोमवारव्रतं दिव्यं येन चीर्णं तु संश्रये ॥ १३९ ॥ किमन्यैर्बहुभिर्दानैर्दत्तैः पात्रेषु सुन्दरि ॥ १४० ॥ पूजितं येन भावेन सोमवारदिनाष्ट
कम् ॥ तेन सर्वं कृतं देवि चीर्णं तत्र महाव्रतम् ॥ १४१ ॥ इतिहासमिमं पूर्वं कथयामि तव प्रिये ॥ यथा वृत्तं महादेवि सोमवारव्रतं
प्रति ॥ १४२ ॥ ॥ ईश्वर उवाच ॥ ॥ कैलासस्य महेशानि उत्तरे च व्यवस्थिता ॥ निषधोपरि विस्तीर्णा पुरी नाम स्वयंप्रभा ॥
॥ १४३ ॥ नानारत्नसुशोभाढ्या नानागन्धर्वसंकुला ॥ सर्वावयवसंपूर्णा शक्रस्येवामरावती ॥ १४४ ॥ घंनवाहननामा च गन्धर्वस्तत्र
तिष्ठति ॥ भुंक्ते तत्र महाभोगान्देवैरपि सुदुर्लभान् ॥ १४५ ॥ नवयौवनसंयुक्ता भार्या तस्य मनोहरा ॥ प्रौढवाक्या सुशीला च पीनो ॥ ४३ ॥
न्नतपयोधरा ॥ १४६ ॥ तया सार्द्धं तु सम्भोगान्भुंक्ते गंधर्वनायकः ॥ उत्पन्ना तस्य कालेन पुत्री पुत्राष्टकोपरि ॥ १४७ ॥ सर्वावयवसंपन्ना

१ स्वमानम्–स्वयोग्यताम्–इत्यर्थः । स्थामानम्–इ० पा० । २ तत्त्वसंख्याः–चतुर्विंशतिसंख्याः–इत्यर्थः । ३ सुनिर्मलम्–इ० पा० । ४ घनवाहाख्यगन्धर्वस्तत्र तिष्ठति सर्वदा–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वविज्ञानवेदिनी ॥ गंधर्वसेना विख्याता नाम्ना सा परमेश्वरि ॥ १४८ ॥ कन्यानां तु सहस्रेषु प्रवरा रूपशालिनी ॥ कौतूहलेन सा पित्रा प्रोक्ता क्रीडस्व भामिनि ॥ १४९ ॥ उद्याने रमणीयेऽत्र नानाद्रुमलताकुले ॥ वृक्षैरनेकैः संकीर्णे फलपुष्पसमन्विते ॥ १५० ॥ एवं सा रमते नित्यं कन्यापरिवृता सदा ॥ एवं दृष्ट्वा क्रीडमानां माता भर्त्तारमब्रवीत् ॥ १५१ ॥ जीवितं निष्फलं स्वामिन्मम ते सह बांधवैः ॥ यस्येदृशी गृहे कन्या तिष्ठते भर्तृवर्ज्जिता ॥ १५२ ॥ इत्युक्तः स तु गंधर्वो भार्यां वचनमब्रवीत ॥ अन्वेषयामि भर्त्तारं पुत्र्यर्थे तु मनोहरम् ॥ १५३ ॥ इत्युक्त्वाऽऽह्वाप[1]यामास पुत्रीं तां [2]घनवाहनः ॥ आहूता पितृमातृभ्यां त्वरिताऽऽगत्य सुन्दरि ॥ १५४ ॥ अनुक्रमेण सर्वेषां पतिता पादयोः शुभा ॥ आदेशं देहि मे तात किं नु कार्यं मयाऽऽधुना ॥ १५५ ॥ उक्तं च घनवाहेन हर्षितेन वचस्ततः ॥ हे पुत्रि तव यः कश्चिद्वरः संप्रति रोचते ॥ दिव्यं द्रक्ष्ये त्वत्सदृशं गंधर्वाणां शिरोमणिम् ॥ १५६ ॥ इत्युक्ता क्रोधताम्राक्षी पितरं वाक्यमब्रवीत् ॥ मम रूपस्य कोट्यंशे किं कोप्यस्ति जगत्त्रये ॥ तच्छ्रुत्वा चाद्भुतं वाक्यं पिता माता च मोहितौ ॥ १५७ ॥ सर्वे विषादमापन्ना बांधवाश्च परे जनाः ॥ अशोभनमिदं वाक्यं कन्यया यत्प्रभाषितम् ॥ इत्युक्त्वा तु गताः सर्वे जननीजनबांधवाः ॥ १५८ ॥ सा तत्रैव महोद्याने रमते सखिसंयुता ॥ हिंडोलके समारूढा वसंते मासि भामिनि ॥ ॥ १५९ ॥ तावद्दिव्यविमानस्थः शिखण्डी गणनायकः ॥ गच्छन्खे ददृशे कन्यां रूपौदार्य्यसमाकुलाम् ॥ १६० ॥ गीतवाद्येन नृत्येन रमतीं दुंदुभिस्वनैः ॥ स माध्याह्निकसंध्यायामवतीर्य विमानतः ॥ १६१ ॥ क्रीडमानोऽप्सरोभिस्तु तत्रोद्याने स्थितस्ततः ॥ शुश्राव वाक्यं कन्याया गंधर्वदुहितुस्तदा ॥ १६२ ॥ न कोऽपि सदृशो लोके मम रूपेण दृश्यते ॥ देवो वा दानवो वापि कोट्यंशे मम रूपतः ॥ १६३ ॥ इति वाक्यं ततः श्रुत्वा गणः क्रोधसमन्वितः ॥ शशाप तां सुचार्वंगीं साहंकारां गणेश्वरः ॥ १६४ ॥ ॥ गण उवाच ॥ ॥ मां दृष्ट्वा यद्विशालाक्षि रूपसौभाग्यगर्विता ॥ समाक्षिपसि गंधर्वान्देवाद्यांश्चैव गर्विता ॥ १६५ ॥ तस्मात्ते गर्वसंयुक्ते कुष्ठमंगे भविष्यति ॥ श्रुत्वा शापं ततः कन्या भयभीता तपस्विनी ॥ १६६ ॥ साष्टांगं प्रणिपत्याथानुग्रहार्थमयाचत ॥ भगवन्मम दीनायाः शापस्यानुग्रहं प्रभो ॥ प्रयच्छ त्वं महाभाग नैवं कर्त्री पुनः क्वचित् ॥ १६७ ॥ इत्युक्तस्तव कारुण्याच्छिखण्डी गणनायकः ॥ अनुग्रहं ददौ तस्या गंधर्वदुहितुस्तदा ॥ १६८ ॥ ॥ ॥ शिखण्ड्युवाच ॥ ॥ जातिरूपेण संयुक्तो विद्याहंकारसंपदा ॥ यो येन गर्वितः प्राणी स तं प्राप्य विनश्यति ॥ १६९ ॥ तस्माद्गर्वो नैव

१ आह्वानयामास—इ० पा० । २ मेघवाहनः—इत्यपि पाठान्तरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



कार्यो गर्वस्यैतत्फलं स्मृतम् ॥ शृणुष्वानुग्रहं बाले श्रुत्वा चैवावधारय ॥ १७० ॥ हिमवद्वनमध्यस्थो गोशृंग ऋषिपुंगवः ॥ करिष्यत्युपकारं स एवमुक्त्वा गतः प्रिये ॥ १७१ ॥ तावत्संध्या समायाता तत्क्षणाद्भुवनांतरे ॥ १७२ ॥ ततो गंधर्व्वतनया भग्नोत्साहा नतानना ॥ परित्यज्य वनं रम्यमागता पितुरंतिके ॥ १७३ ॥ कथयामास तत्सर्वं कारणं कुष्ठसंभवम् ॥ तच्छ्रुत्वा शोकसंतप्तौ पितरौ विगतप्रभौ ॥ १७४ ॥ हिमवंतं गिरिं प्राप्तौ त्वरितौ सुतया सह ॥ गोशृंगस्य ऋषेस्तत्र ददृशाते तथाश्रमम् ॥ १७५ ॥ तत्र मध्यस्थितं दृष्ट्वा गोशृंगमृषिपुंगवम् ॥ प्रणम्य दण्डवद्भूमौ स्तुत्वा स्तोत्रैरनेकधा ॥ १७६ ॥ उपविष्टोऽग्रतस्तस्य प्रणिपत्य पुनःपुनः ॥ प्रोवाच वचनं तत्र पूर्ववृत्तं यथाऽभवत् ॥ १७७ ॥ कथिते चैव वृत्तांते पुनः पप्रच्छ कारणम् ॥ पृष्टे तु कारणे तत्र गंधर्वः प्रोक्तवांस्तदा ॥ १७८ ॥ ॥ गंधर्व उवाच ॥ ॥ दुहितुर्मे शरीरं तु व्याधिकुष्ठेन पीडितम् ॥ येनोपशमनं याति तत्त्वं कर्त्तुमिहार्हसि ॥ १७९ ॥ प्रसादं कुरु विप्रर्षे मम दीनस्य सांप्रतम् ॥ यथा कुष्ठं शमं याति मम पुत्र्यास्तु कारणम् ॥ ॥ १८० ॥ ॥ गोशृंग उवाच ॥ ॥ भारते तु महातेजास्तिष्ठत्युदधिसन्निधौ ॥ देवः सोमेश्वरोनाम सर्वदेवनमस्कृतः ॥ १८१ ॥ क्षणं कृत्वा हि संपूज्य एकाहारेण मानवैः ॥ सर्वव्याधिविनाशाय सर्वकार्यार्थसिद्धये ॥ १८२ ॥ सोमवारव्रतेनेशं समाराधय शंकरम् ॥ एवं कृते व्याधिनाशस्तव पुत्र्या भविष्यति ॥ १८३ ॥ ॥ ईश्वर उवाच ॥ ॥ इति तद्वचनं श्रुत्वा महर्षेर्भावितात्मनः ॥ तत्र गंतुं मनश्चक्रे सोमेशाराधनं प्रति ॥ १८४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये श्रीसोमेश्वर वर्णने सोमवारव्रतमाहात्म्यवर्णनंनाम चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ स गन्धर्वस्तदा देवि आरिराधयिषुर्भवम् ॥ सोमवारव्रतंनाम पप्रच्छ मुनिसत्तमम् ॥ १ ॥ ॥ गन्धर्व उवाच ॥ ॥ कथं सोमव्रतं कार्यं विधानं तस्य कीदृशम् ॥ कस्मिन्काले च तत्कार्यं सर्वं विस्तरतो वद ॥ २ ॥ ॥ गोशृंग उवाच ॥ ॥ साधुसाधु महाप्राज्ञ सर्वसत्त्वोपकारकम् ॥ यन्न कस्यचिदाख्यातं तदद्य कथयामि ते ॥ ३ ॥ सर्वरोगहरं दिव्यं सर्वसिद्धिप्रदायकम् ॥ सोमवारव्रतंनाम सर्वकामफलप्रदम् ॥ ४ ॥ सर्वकालिकमादेयं वर्णानां शुभकारकम् ॥ नारीनरैः सदा कार्यं दृष्टादृष्टा फलोदयम् ॥ ५ ॥ ब्रह्मविष्ण्वादिभिर्देवैः कृतमेतन्महाव्रतम् ॥ पुनस्तु सोमराजेन दक्षशापहतेन च ॥ ६ ॥ आरा



१ गन्धर्वैः—इति कर्तात्राध्याहार्यः । २ कारणम्—अत्र—इदम्—इति शेषः । इदं त्वत्समीपं प्रत्यस्माकमागमनकारणम्—इत्यर्थः । ३ क्षणम्—तत्र निवासावधिनियमम्—इत्यर्थः । ४ कथयाम्यहम्—इ० पा० । ५ अभिव्रतेनैव शंभुः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धितोऽनेन शंभुः शंभुध्यानपरेण तु ॥ ततस्तुष्टो महादेवः सोमराजस्य भक्तितः ॥ ७ ॥ तेनोक्तं यदि तुष्टोऽसि प्रतिष्ठास्थो निरंतरम् ॥ ८ ॥ यावचंद्रश्च सूर्यश्च यावत्तिष्ठंति भूधराः ॥ तावन्मे स्थापितं लिंगमुमया सह तिष्ठतु ॥ ९ ॥ स्थापितं तु तदा तेन प्रार्थयित्वा महेश्वरम् ॥ आत्मनाभांकितं कृत्वा ततो रोगैर्व्यमुच्यत ॥ १० ॥ ततः शुद्धशरीरोऽसौ गगनस्थो विराजते ॥ ११ ॥ तदाप्रभृति ये केचित्कुर्वंति भुवि मानवाः ॥ तेऽपि तत्पदमायांति विमलांगाश्च सोमवत् ॥ १२ ॥ अथ किं बहुनोक्तेन विधानं तस्य कीर्त्तये ॥ यस्मिन्कस्मिंश्च मासे वा शुक्ले सोमस्य वासरे ॥ ॥ १३ ॥ दंतकाष्ठं पुरा ब्राह्मे कृत्वा स्नानं समाचरेत् ॥ स्वधर्मविहितं कर्म कृत्वा स्थाने मनोरमे ॥ १४ ॥ सुसमे भूतले शुद्धे न्यस्य कुम्भं सुशोभितम् ॥ चूतपल्लवविन्यस्ते चंदनेन सुचित्रिते ॥ १५ ॥ श्वेतवस्त्रपरीधाने सर्वाभरणभूषिते ॥ आदौ पात्रे तु संन्यस्य आधारसहितं शिवम् ॥ ॥ १६ ॥ अष्टमूर्त्यष्टकं दिक्षु सोमनाथं सशक्तिकम् ॥ उमया सहितं तत्र श्वेतपुष्पैश्च पूजयेत् ॥ १७ ॥ विविधं भक्ष्यभोज्यं च फलं वै बीजपूरकम् ॥ अनेनैव तु मंत्रेण सर्वं तत्रैव कारयेत् ॥ १८ ॥ ॐ नमः पंचवक्राय दशबाहुत्रिनेत्रिणे ॥ श्वेतं वृषभमारूढ श्वेताभरणभूषित ॥ १९ ॥ उमादेहार्द्धसंयुक्त नस्मते सर्वमूर्तये ॥ अनेनैव तु मंत्रेण पूजां होमं च कारयेत् ॥ २० ॥ कृत्वैवं च दिने रात्रौ पश्यंश्चैवं स्वपेन्नरः ॥ दर्भशय्या समारूढो ध्यायन्सोमेश्वरं हरम् ॥ २१ ॥ एवं कृतेऽष्टादशानां कुष्ठानां नाशनं भवेत् ॥ द्वितीये सोमवारे तु करंजं[1] दन्तधावनम् ॥ २२ ॥ देवं संपूजयेत्सूक्ष्मं ज्येष्ठाशक्तिसमन्वितम् ॥ शतपत्रैः पूजयित्वा मधु प्राश्य यथाविधि ॥ २३ ॥ नारंगं तत्र दत्त्वा तु शेषं पूर्ववदाचरेत् ॥ एवं कृते द्वितीये तु गोलक्षफलमाप्नुयात् ॥ २४ ॥ सोमवारे तृतीये तु अपामार्गसमुद्भवम् ॥ दंतकाष्ठादिकं कृत्वा [2]त्रिनेत्रं च प्रपूजयेत् ॥ २५ ॥ फलं च दाडिमं दद्याज्जातीपुष्पैश्च पूजयेत् ॥ रजन्यामं[3]गुरं प्राश्य सिद्धियुक्तं तु पूजयेत् ॥ २६ ॥ चतुर्थे सोमवारे तु काष्ठमौदुम्बरं स्मृतम् ॥ पूजयेत्तत्र गौरीशं सूक्ष्मया सहितं तथा ॥ २७ ॥ नारिकेलफलं दद्याद्दमनेन प्रपूजयेत् ॥ शर्करां प्राशयेद्रात्रौ जागरं चैव कारयेत् ॥ २८ ॥ पञ्चमे सोमवारे तु पूजयेच्च गणाधिपम् ॥ विभूत्या सहितं देवं कुन्दपुष्पैः प्रपूजयेत् ॥ २९ ॥ आश्वत्थं दन्तकाष्ठं च अर्घ्यं वै द्राक्षया तथा ॥ मोचं[4] च प्राशयेद्रात्रावश्वमेधफलं लभेत् ॥ ३० ॥ षष्ठे सोमस्य वारे तु सुरूपंनाम पूजयेत् ॥ कर्पूरं प्राशयेत्तत्र भक्त्या परमया युतः ॥ ३१ ॥ सप्तमे सोमवारे तु दन्तकाष्ठं च मल्लिका ॥ सर्वज्ञं पूजयेत्तत्र दीप्तया सहितं तथा ॥ ३२ ॥ जम्बीरं च फलं दद्याज्जातीपुष्पैश्च पूजयेत् ॥ लवङ्गं प्राशयेत्तत्र तस्यानन्तफलं भवेत् ॥ ३३ ॥

१ एतच्च दन्तकाष्ठं विशिष्यानुक्तत्वाद्यस्य कस्यापि दन्तधावनोचितवृक्षस्येति बोध्यम् । २ एकनेत्रं प्रपूजयेत्–इ० पा० । ३ अंगुरम्–द्राक्षाफलम्–इत्यर्थः । ४ मोचम्–मोचाफलम्–कदलीफलम्–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





अष्टमे सोमवारे तु अमोघायुतमीश्वरम् ॥ कदलीफलकेनार्घ्यं मरुबकेन पूजयेत् ॥ रात्रौ तु प्राशयेद्दुग्धमग्निष्टोमफलं लभेत् ॥ ३४ ॥
गंगास्नाने कृते सम्यक्कोटिधा यत्फलं स्मृतम् ॥ दशहेमसहस्राणां कुरुक्षेत्रे रवेर्ग्रहे ॥ ३५ ॥ ब्राह्मणे वेदविदुषे यद्दत्त्वा फलमाप्नुयात् ॥ तत्पुण्यं
कोटिगुणितमस्मिन्नाचरिते व्रते ॥ ३६ ॥ गजानां तु शते दत्ते लक्षे च रथवाजिनाम् ॥ तत्फलं कोटिगुणितं सोमवारव्रते कृते ॥ ३७ ॥ गुग्गुलोर्धू
पनं कृत्वा कोटिशो यत्फलं लभेत् ॥ तत्पुण्यं तु भवेत्तस्य सोमवारव्रते कृते ॥ ३८ ॥ सर्वैश्वर्यसमायुक्तः शिवतुल्यपराक्रमः ॥ रुद्रलोके वसे
त्तावद्ब्रह्मणः प्रलयावधि ॥ ३९ ॥ संप्राप्ते नवमे वारे कुर्यादुद्यापनं शुभम् ॥ यथा भवति गन्धर्व तथा वक्ष्यामि तेऽधुना ॥ ४० ॥ मंडलं मंडपं
कुण्डं पताकाध्वजशोभितम् ॥ तोरणानि च चत्वारि कुण्डं कृत्वा विधानतः ॥ ४१ ॥ मध्ये वेदिः प्रकर्त्तव्या चतुरस्रा सुशोभना ॥ निष्पाद्य
मंडलं तत्र मध्ये पद्मं प्रकल्पयेत् ॥ ४२ ॥ कलशानष्टदिग्भागे सहिरण्यान्पृथक्पृथक् ॥ स्थापयित्वा तु शक्तिस्ता वामाद्याः पूर्वतः क्रमात् ॥ ४३ ॥
कर्णिकायां तु पद्मस्य श्रीसोमेशं महाप्रभम् ॥ प्रतिमारूपसंपन्नं हेमजं शक्तिसंयुतम् ॥ ४४ ॥ रुक्मशय्यासमारूढं मनोन्मन्या समन्वितम् ॥
हेमपात्रादिके पात्रे मधुना परिपूरिते ॥ ४५ ॥ रुक्मशय्यासमाच्छन्ने तत्रस्थं पूजयेत्क्रमात् ॥ अनंतादिशिखंडयंतैर्नामभिः क्रमशोऽर्च
येत् ॥ ४६ ॥ गन्धस्रग्धूपदीपैश्च नैवेद्यैश्च पृथग्विधैः ॥ वस्त्रालंकारतांबूलच्छत्रचामरदर्प्पणम् ॥ ४७ ॥ दीपघंटावितानं च पर्यंकं च सतू
लिकम् ॥ सोमेश्वरं समुद्दिश्य देयं पौराणिके गुरौ ॥ ४८ ॥ भूषयित्वा तथाऽऽचार्य्यं होमं तत्रैव कारयेत् ॥ बलिकर्मावसाने च रात्रौ
तत्रैव जागृयात् ॥ ४९ ॥ पञ्चगव्यं ततः पीत्वा ध्यायेत्सोमेश्वरं हृदि ॥ प्रभाते तु ततः स्नात्वा ध्यायेत्तं च विधानतः ॥ ५० ॥
ततो भक्त्या च गंधर्व क्षीरखण्डादिनिर्म्मितम् ॥ भक्ष्यभोज्यैरनेकैश्च भोजयेद्ब्राह्मणानथ ॥ ५१ ॥ वस्त्रयुग्मं ततो दत्त्वा गां च दत्त्वा
विसर्जयेत् ॥ ५२ ॥ एवं चीर्णव्रतः सम्यग्लभते पुण्यमक्षयम् ॥ धनधान्यसमृद्धात्मा पुत्रदारसमन्वितः ॥ ५३ ॥ न कुले जायते तस्य
दरिद्रो दुःखितोऽपि वा ॥ अपुत्रो लभते पुत्रान्वन्ध्या पुत्रवती भवेत् ॥ ५४ ॥ काकवंध्या तु या नारी मृतवत्सा च दुर्भगा ॥ कन्याप्रसूश्च या
कार्यमाभिरेतद्विशेषतः ॥ ५५ ॥ एवं कृते विधाने तु देहपाते शिवं व्रजेत् ॥ कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥ भुंक्तेऽसौ विपुलान्भो ॥ ४५ ॥
गान्यावदाभूतसंप्लवम् ॥ ५६ ॥ इति ते कथितं सर्वं सोमवारव्रतं क्रमात् ॥ गच्छ शीघ्रं महाभाग यत्र सोमेश्वरः स्थितः ॥ ५७ ॥ ॥ ईश्वर
उवाच ॥ ॥ इत्युक्तः स च गन्धर्वः पुत्र्या सह वरानने ॥ सर्वोपहारसंयुक्तः प्रभासक्षेत्रमाश्रितः ॥ ५८ ॥ तत्र सोमेश्वरं दृष्ट्वा आनन्दाश्रुपरि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्लुतः ॥ यात्राक्रमेण संपूज्य चक्रे सोमव्रतं क्रमात् ॥ ५९ ॥ पुत्र्या सह महाभागस्तस्य तुष्टो महेश्वरः ॥ सर्वरोगविनाशं च सर्वकामसमृद्धिदम् ॥ ददौ गन्धर्वराज्यं च भक्तिं चैवात्मनस्तथा ॥ ६० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्र माहात्म्ये सोमेश्वरमाहात्म्यवर्णने गन्धर्वकन्यावृत्तान्तवर्णनंनाम पञ्चविंशोऽध्यायः ॥ २५ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ अथ लब्ध वरस्तत्र कृतार्थो भक्तिसंयुतः ॥ स्थापयामास लिंगं स गन्धर्वो घनवाहनः ॥ १ ॥ सोमेशादुत्तरे भागे दंडपाणिसमीपतः ॥ गन्धर्वेश्वरनामानं गान्धर्वफलदायकम् ॥ २ ॥ वरदावारुणे भागे धनुषां पञ्चके स्थितम् ॥ पञ्चम्यां पूजयित्वा च न दुःखी जायते नरः ॥ ३ ॥ इति श्रीस्का न्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये गन्धर्वेश्वरमाहात्म्यवर्णनंनाम षड्विंशतितमो ऽध्यायः ॥ २६ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ अथ तत्रैव देवेशि लिंगं गन्धर्वसेनया ॥ स्थापितं घनवाहस्य पुत्र्या गौरीसमीपतः ॥ १ ॥ धनुषां त्रितये तत्र स्थितं पूर्वविभागतः ॥ विमलेश्वरनामानं सर्वरोगविनाशनम् ॥ २ ॥ पूजयित्वा तृतीयायां दौर्भाग्यैर्मुच्यतेऽङ्गना ॥ सर्वान्का मानवाप्नोति पुत्रपौत्रप्रतिष्ठिता ॥ ३ ॥ इति व्रतं महादेवि त्रेतासंध्यांशके गते ॥ गन्धर्वस्यैवमाख्यातं श्रुतं पातकनाशनम् ॥ ४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये गन्धर्वसेनेश्वरमाहात्म्यवर्णनंनाम सप्तविंशोऽध्यायः ॥ ॥ २७ ॥ ॥ छ ॥ ॥ देव्युवाच ॥ ॥ इत्याश्चर्यमिदं देव त्वत्तः सर्वं मया श्रुतम् ॥ महिमानं महेशस्य विस्तरेण समुद्भवम् ॥ सांप्रतं सोमनाथस्य यथावद्वक्तुमर्हसि ॥ १ ॥ विधिना केन दृश्योसौ यात्रा कार्या कथं नृभिः ॥ कस्मिन्काले महादेव नियमाश्चैव कीदृशाः ॥ २ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ हेमन्ते शिशिरे वापि वसन्ते वाथ भामिनि ॥ यदा च जायते चित्तं वित्तं वा पर्व वा भवेत् ॥ ३ ॥ तदैव यात्रा कर्त्तव्या भावस्तत्रैव कारणम् ॥ कृत्वा तु नियमं कंचित्स्वगृहे वरवर्णिनि ॥ ४ ॥ प्रणम्य मनसा रुद्रं कृत्वा श्राद्धं यथाविधि ॥ स्थानं प्रदक्षिणं कृत्वा वाग्यतः सुसमाहितः ॥ ५ ॥ नियतो नियताहारो गच्छेच्चैव ततः पथि ॥ कामक्रोधौ परित्यज्य लोभमोहौ तथैव च ॥ ६ ॥ ईर्ष्यामत्स रलौल्यं च यात्रा कार्या ततो नृभिः ॥ तीर्थानुगमनं पुण्यं यज्ञेभ्योऽपि विशिष्यते ॥ ७ ॥ अग्निष्टोमादियज्ञैश्च इष्ट्वा विपुलदक्षिणैः ॥ तत्त त्फलमवाप्नोति तीर्थानुगमनेन यत् ॥ ८ ॥ कलेर्युगं महाघोरं प्राप्य पापसमन्वितम् ॥ नान्येनाऽस्मिन्नुपायेन धर्म्मः स्वर्गश्च लभ्यते ॥ विना यात्रां महादेवि सोमेशस्य न संशयः ॥ ९ ॥ ये कुर्वंति नरा यात्रां शुचिश्रद्धासमन्विताः ॥ कलौ युगे कृतार्थास्ते ये त्वन्ये ते निरर्थकाः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



यथा महोदधेस्तुल्यो न चान्योऽस्ति जलाशयः ॥ तथा प्राभासिकात्क्षेत्रात्समं तीर्थं न विद्यते ॥ ११ ॥ अनुपोष्य त्रिरात्राणि तीर्थान्यनभिगम्य च ॥ अदत्त्वा कांचनं गाश्च दरिद्रोनाम जायते ॥ १२ ॥ यान्यगम्यानि तीर्थानि दुर्गाणि विषमाणि च ॥ मनसा तानि गम्यानि सर्वतीर्थंगतीप्सुना ॥ १३ ॥ यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम् ॥ विद्या तपश्च कीर्तिश्च स तीर्थफलमश्नुते ॥ १४ ॥ नियतो नियताहारः स्नानजाप्यपरायणः ॥ व्रतोपवासनिरतः स तीर्थफलमश्नुते ॥ १५ ॥ अक्रोधनश्च देवेशि सत्यशीलो दृढव्रतः ॥ आत्मोपमश्च भूतेषु स तीर्थफलमश्नुते ॥ १६ ॥ कुरुक्षेत्रादितीर्थानि रथगम्यानि यानि तु ॥ तान्येव ब्राह्मणो यायादानदोषो न तेषु वै ॥ १७ ॥ ये साधवो धनोपेतास्तीर्थानां स्मरणे रताः ॥ तीर्थे दानाच्च योगाच्च तेषामभ्यधिकं फलम् ॥ १८ ॥ ये दरिद्रा धनैर्हीनास्तीर्थानुगमने रताः॥ तेषां यज्ञफलावाप्तिर्वि नापि धनसंचयैः ॥१९॥ सर्वेषामेव वर्णानां सर्वाश्रमनिवासिनाम् ॥ तीर्थं तु फलदं ज्ञेयं नात्र कार्या विचारणा ॥ २० ॥ कार्यांतरेण यो गत्वा स्नानं तीर्थे समाचरेत् ॥ न च यात्राफलं तस्य स्नानमात्रं फलं भवेत् ॥ २१ ॥ तीर्थानुगमनं पद्भ्यां तपःपरमिहोच्यते ॥ तदेव कृत्वा यानेन स्नानमात्रफलं लभेत् ॥ २२ ॥ यस्यान्यः कुरुते शक्त्या तीर्थयात्रां तथेश्वरि ॥ स्वकीयद्रव्ययानाभ्यां फलं तस्य चतुर्गुणम् ॥ २३ ॥ तीर्थानुगमनं कृत्वा भिक्षाहारा जितेंद्रियाः ॥ प्राप्नुवंति महादेवि तीर्थे दशगुणं फलम् ॥ २४ ॥ छत्रोपानद्विहीनस्तु भिक्षाशी विजितेंद्रियः ॥ महापातकजैर्घोरैर्विप्रः पापैः प्रमुच्यते ॥ २५ ॥ न भैक्षं परपाकं तु न च भैक्ष्यं प्रतिग्रहम् ॥ सोमपानसमं भैक्ष्यं तस्माद्भैक्षं समाचरेत् ॥ २६ ॥ लोकेऽस्मिन्द्विविधं तीर्थं स्वच्छन्दैर्निर्म्मितं तथा ॥ स्वयंभूतं प्रभासाद्यं निर्मितं दैवतैः कृतम् ॥ २७ ॥ स्वयंभूते महातीर्थे स्वभावे च महत्तरे ॥ तस्मिंस्तीर्थे प्रतिगृह्य कृताः सर्वे प्रतिग्रहाः ॥ २८ ॥ प्रतिग्रहनिवृत्तस्य यात्रादशगुणं फलम् ॥ तेन दत्तानि दानानि यज्ञैर्देवाः सुतर्पिताः ॥ २९ ॥ येन क्षेत्रं समासाद्य निवृत्तिः परमा कृता ॥ वस्तुलौल्याद्धि यः क्षेत्रे प्रतिग्रहरुचिस्तथा ॥ ३० ॥ नैव तस्य परो लोको नायं लोको दुरात्मनः ॥ अथ चेत्प्रतिगृह्णाति ब्राह्मणो वृत्तिदुर्बलः ॥ दशांशमार्जितादद्यादेवं तत्र न हीयते ॥ ३१ ॥ विप्रवेषं समास्थाय शूद्रो भूत्वा प्रतिग्रहम् ॥ तृणकाष्ठसमं वापि प्रतिगृह्य पतत्यधः ॥ ३२ ॥ कुम्भीपाकादिकेष्वेवं महानरककोटिषु ॥ यावदिंद्रसहस्राणि चतुर्दश वरानने ॥३३॥ तस्मान्नैव प्रतिग्राह्यं किमन्यैर्ब्राह्मणैरपि ॥ द्विप्रकारस्य तीर्थस्य कृतस्याप्यकृतस्य च ॥ ३४ ॥ स्वकीयभावसंयुक्तः संपूर्णं फलमश्नुते ॥ लभते षोडशांशं स यः परान्नेन गच्छति ॥ ३५ ॥

१ विना विभवसंचयैः—इ० पा० । २ तीर्थानाम्—इ० पा० । ३ अत एव केचिद्धानिकधार्मिकाः स्वकीयद्रव्यदानेन दीनदरिद्रांस्तीर्थयात्रार्थं प्रेषयन्ति । ४ नियतेन्द्रियः—इ०पा० । ५ स्वच्छन्दैः—स्वेच्छाभिः—इत्यर्थः।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशक्तस्य तथांधस्य पंगोर्यायावरस्य च ॥ विहितं कारणाद्यानमच्छिद्रे ब्राह्मणे कृतः ॥ ३६ ॥ स्नानखादनपानैश्च वोढृभ्यस्तीर्थसेवकः ॥ ददत्स कलमाप्नोति फलं तीर्थसमुद्भवम् ॥ ३७ ॥ न षोडशांशं यत्नेन लब्धार्थंयदि यच्छति ॥ पंचमांशमथो वापि दद्यात्तत्र द्विजातिषु ॥ ३८ ॥ देवतानां गुरूणां च मातापित्रोश्च कामतः ॥ पुण्यदः समवाप्नोति तदेवाष्टगुणं फलम् ॥ ३९ ॥ स्नानं दानं जपो होमः स्वाध्यायो देवतार्चनम् ॥ पुण्यं देयं तु सर्वत्र नापुण्यं दीयते क्वचित् ॥ ४० ॥ पितरं मातरं तीर्थे भ्रातरं सुहृदं गुरुम् ॥ यमुद्दिश्य निमज्जेत द्वादशांशं लभेत सः ॥ ४१ ॥ कुशैस्तु प्रतिमां कृत्वा तीर्थवारिषु मज्जयेत् ॥ यमुद्दिश्य महादेवि अष्टभागं लभेत सः ॥ ४२ ॥ महादानानि ये विप्रा गृह्णन्ति ज्ञानदुर्बलाः ॥ वृक्षास्ते द्विजरूपेण जायंते ब्रह्मराक्षसाः ॥ ४३ ॥ न वेदबलमाश्रित्य प्रतिग्रहरुचिर्भवेत् ॥ अज्ञानाद्वा प्रमादाद्वा दहते कर्म नेतरत् ॥ ४४ ॥ चितिकाष्ठं तु वै स्पृष्ट्वा यज्ञयूपं तथैव च ॥ वेदविक्रयिणं स्पृष्ट्वा स्नानमेव विधीयते ॥ ४५ ॥ आदेशं पठते यस्तु आदेशं तु ददाति यः ॥ द्वावेतौ पापकर्माणौ पातालतलवासिनौ ॥ ४६ ॥ आदेशं पठते यस्तु संजिघृक्षुः प्रतिग्रहम् ॥ तीर्थे चैव विशेषेण ब्रह्मघ्नः सैर्वं नेतरः ॥ स्थितो वै नृपतेर्द्वारि न कुर्याद्वेदविक्रयम् ॥ ४७ ॥ हत्वा गावो वरं मांसं भक्षयीत द्विजाधमः ॥ वरं जीवन्समं मत्स्यैर्न कुर्याद्वेदविक्रयम् ॥ ब्रह्महत्यासमं पापं न भूतं न भविष्यति ॥ ४८ ॥ वरं कुर्याच्च तदेवि न कुर्याद्वेदविक्रयम् ॥ तीर्थे चैव विशेषेण महाक्षेत्रे तथैव च ॥ ४९ ॥ दीयमानं तु वै दानं यस्त्यजेत्तीर्थसेवकः ॥ तीर्थं करोति तीर्थं च स पुनाति च पूर्वजान् ॥ ५० ॥ यदन्यत्र कृतं पापं तीर्थे तद्याति लाघवम् ॥ न तीर्थकृतमन्यत्र क्वचिदेव व्यपोहति ॥ ५१ ॥ तैलपात्रमिवात्मानं यो रक्षेत्तीर्थसेवकः ॥ स तीर्थफलमस्कन्नं विप्रः प्राप्नोति संयतः ॥ ५२ ॥ यस्ययस्यात्ति पक्वान्नमल्पं वा यदि वा बहु ॥ तीर्थगस्तस्य तस्यार्धं स्नातस्य विनियच्छति ॥ ५३ ॥ यो न क्लिष्टोपि भिक्षेत ब्राह्मणस्तीर्थसेवकः ॥ सत्यवादी समाधिस्थः सँ तीर्थस्योपकारकः ॥ ५४ ॥ कृते युगे पुष्कराणि त्रेतायां नैमिषं तथा ॥ द्वापरे तु कुरुक्षेत्रं प्राभासिकं कलौ युगे ॥ ५५ ॥ तिष्ठेद्युगसहस्रं तु पादेनैकेन यः पुमान् ॥ प्रभासयात्रामेको वा समं भवति वा न वा ॥ ५६ ॥ एतत्क्षेत्रं समागत्य मध्य

१ यायावरस्य–प्रतिग्रामैकरात्रवासपूर्वकयात्राकर्मनिरतस्य–इत्यर्थः । २ महादानानि गृह्णंति विना ज्ञानेन दुर्बलाः–इ० पा० । ३ पातालतलवासिनौ–नरकगामिनौ–इत्यर्थः । ४ सैव–सः एव–इति पदच्छेदः । "सोऽचि लोपे चेत्पादपूरणम्" इति सोर्लोपः । ५ परिसंख्याविधिरियम्–तेन–गोमांसभक्षण–मत्स्यजीवन–ब्रह्महत्यासमपापकरणान्यपि निषिद्धान्येवेति बोध्यम्–पञ्चनखभक्षणविधानस्य निषेध एव तात्पर्यात् । ६ तीर्थे तस्योपकारकम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



भागे वरानने ॥ यानानि तु परित्यज्य भाव्यं पादचरैर्नरैः ॥५७॥ लुठित्वा लोठनीं तत्र लुठिता यत्र देवताः ॥ ततो नृत्यन्हसन्गायन्भूत्वा कार्पटिकाकृतिः ॥ गच्छेत्सोमेश्वरं देवं दृष्ट्वा चादौ कपर्दिनम् ॥ ५८ ॥ ईदृशं पुरुषं दृष्ट्वा स्थितं सोमेश्वरोन्मुखम् ॥ नित्यं तुष्यंति पितरो गर्जंति च पितामहाः ॥ ५९ ॥ अस्माकं वंशजो देवं प्रस्थितस्तारणाय नः ॥ गत्वा सोमेश्वरं देवि कुर्याद्वपनमादितः ॥ ६० ॥ तीर्थोपवासः कर्तव्यो यथावद्वै निबोध मे ॥ नास्ति गंगासमं तीर्थं नास्ति क्रतुसमा गतिः ॥६१॥ गायत्रीसदृशं जाप्यं होमो व्याहृतिभिः समः ॥ अंतर्जले तथा नास्ति पापघ्नमघमर्षणात् ॥६२॥ अहिंसासदृशं पुण्यं दानात्संचयनं[1] परम् ॥ तपश्चानशनान्नास्ति तथा तीर्थनिषेवणात् ॥६३॥ तीर्थोपवासाद्देवेशि अधिकं नास्ति किञ्चन ॥ पापानां चोपशमनं सतामीप्सितकारकम् ॥ ६४ ॥ उपवासो विनिर्दिष्टो विशेषाद्देवताश्रये[2] ॥ ब्राह्मणस्य त्वनशनं तपः परमिहोच्यते ॥ ६५ ॥ षष्ठकालाशनं शूद्रे तपः प्रोक्तं परं बुधैः ॥ वर्णसंकरजातानां दिनमेकं प्रकीर्तितम् ॥ ६६ ॥ षष्ठकालात्परं शूद्रस्तपः कुर्याद्यथा क्वचित् ॥ राष्ट्रहानिस्तदा ज्ञेया राज्ञश्चोपद्रवो महान् ॥ ६७ ॥ शूद्रस्तु षष्ठकालाशी यथाशक्त्या तपश्चरेत् ॥ न दर्भानुद्धरेच्छूद्रो न पिबेत्कापिलं पयः ॥ ६८ ॥ मध्यपत्रे न भुञ्जीत ब्रह्मवृक्षस्य भामिनि ॥ नोच्चरेत्प्रणवं मंत्रं पुरोडाशं न भक्षयेत् ॥ ६९ ॥ न शिखां नोपवीतं च नोच्चरेत्संस्कृतां गिरम् ॥ न पठेद्वेदवचनं त्रैरात्रं[3] न हि सेवयेत् ॥ ७० ॥ नमस्कारेण शूद्रस्य क्रियासिद्धिर्भवेद्ध्रुवम् ॥ निषिद्धाचरणं कुर्वन्पितृभिः सह मज्जति ॥ ७१ ॥ येनैकादशसंख्यानि यंत्रितानींद्रियाणि वै ॥ स तीर्थफलमाप्नोति नरोऽन्यः क्लेशभाग्भवेत् ॥ ७२ ॥ यच्च तीर्थे पितृश्राद्धं स्नानं तत्र समाचरेत ॥ हितकारी च भूतेभ्यः सोऽश्नीयात्तीर्थजं फलम् ॥ ७३ ॥ धर्मध्वजी सदा लुब्धः परदाररतो हि यः ॥ करोति तीर्थगमनं स नरः पातकी भवेत् ॥ ७४ ॥ एवं ज्ञात्वा महादेवि यात्रां कुर्याद्यथाविधि ॥ तीर्थोपवासं कृत्वादौ श्रद्धायुक्तो दृढव्रतः ॥ ७५ ॥ भोजनं नैव कुर्वीत यदीच्छेद्धितमात्मनः ॥ परान्नं नैव भुञ्जीत तद्दिने ब्राह्मणः क्वचित् ॥७६॥ हस्त्यश्वरथयानानि भूमिगोकांचनादिकम् ॥ सर्वं तत्परिगृह्णीयाद्भोजनं न समाचरेत् ॥ ७७ ॥ आमाच्छतगुणं पुण्यं भुञ्जतो ददतोऽपि वा ॥ तीर्थोपवासं कुर्वीत तस्मात्तत्र वरानने ॥ ७८ ॥ व्रती च तीर्थयात्री च विधवा च विशेषतः ॥ परान्नभोजने देवि यस्यान्नं तस्य तत्फलम् ॥ ७९ ॥ विधवा नैव या नारी तस्या यात्राविधिं ब्रुवे ॥ कुंकुमं चन्दनं चैव तांबूलं च स्रजस्तथा ॥ ८० ॥ रक्तवस्त्राणि सर्वाणि शय्या प्रास्तरणानि च ॥ अशिष्टैः सह संभाषो द्विवारं भोजनं तथा ॥ ८१ ॥ पुंसां प्रदर्शनं चैव



१ संवसनम्–इ० पा० । २ देवताश्रयः–इ० पा० । ३ त्रैरात्रम्–त्रिरात्रोपोषणम्–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हास्यं तमसि वर्ज्जयेत् ॥ सशब्दोपानहौ चैव नृत्यं गीतं च वर्जयेत् ॥ ८२ ॥ धारणं चैव केशानामंजनं च विलेपनम् ॥ असतीजनसंसर्ग पांडित्यं च परित्यजेत् ॥ ८३ ॥ नित्यं स्नानं च कुर्वीत श्वेतवस्त्राणि धारयेत् ॥ यतिश्च ब्रह्मचारी च विधवा च विशेषतः ॥ ८४ ॥ तांबूलं मधु मांसं च सुरापानसमं विदुः ॥ एतेषां वर्ज्जनाद्देवि सम्यग्यात्राफलं लभेत् ॥ ८५ ॥ ॥ देव्युवाच ॥ ॥ तपांसि कानि कथ्यन्ते क्षेत्रे प्राभासिके नरैः ॥ कानि दानानि दीयन्ते केषु तीर्थेषु वा कथम् ॥ ८६ ॥ ॥ ईश्वर उवाच ॥ ॥ तपः परं कृतयुगे त्रेतायां ज्ञानमिष्यते ॥ द्वापरे यजनं धन्यं दानमेकं कलौ युगे ॥८७॥ तपस्तप्यन्ति मुनयः कृच्छ्रचान्द्रायणादिकम् ॥ गत्वा प्राभासिकं क्षेत्रं लोकाश्चान्ये कृते युगे ॥८८॥ कलौ दानानि दीयन्ते ब्राह्मणेभ्यो यथाविधि ॥ प्रभासं क्षेत्रमासाद्य तपसा प्राप्यते फलम् ॥ ८९ ॥ तुलापुरुषब्रह्माण्डपृथिवीकल्पपादपाः ॥ हिरण्यकामधेनुश्च गजवाजिरथास्तथा ॥ ९० ॥ रत्नधेनुहिरण्याश्वसप्तसागर एव च ॥ महाभूतघटो विश्वचक्रकल्पलताभिधः ॥ ९१ ॥ प्रभासे नृपतिर्दद्यान्महादानानि षोडश ॥ धान्यरत्नगुडस्वर्णतिलकार्पासशर्कराः ॥ ९२ ॥ सर्पिर्लवणरूप्याख्या[1] दशैते पर्वताः स्मृताः ॥ गुडाज्यदधिमध्वंबुसलिलक्षीरशर्कराः ॥ रत्नाख्याश्च स्वरूपेण दशैता धेनवो मताः ॥ ९३ ॥ तेषामेकतमं दानं तीर्थेतीर्थे पृथक्पृथक् ॥ प्रदेयान्येकवारं वा सरस्वत्यब्धिसंगमे ॥ ९४ ॥ सर्वस्वं चातिविदुषे गृहं वा सपरिच्छदम् ॥ बह्वल्पमपि विप्रेभ्यो दातव्यं प्रियमेलके ॥९५॥ यत्र तीर्थे लभे[2]ल्लिंगं तीर्थं च विमलोदकम् ॥ तत्राग्निकार्यं कृत्वादौ विशिष्टं दानमिष्यते ॥९६॥ तर्पणं पितृदेवानां श्राद्धं दानं सदक्षिणम् ॥ तीर्थेतीर्थे च गोदानं नियतः प्रकृतो विधिः ॥ ॥ ९७ ॥ विशिष्टख्यातलिंगेषु वृषदानं विधीयते ॥ स्नानं विलेपनं पूजां देवतानां समाचरेत् ॥ ९८ ॥ जगतीं[3] चार्चयेद्भक्त्या तथा चैवोपलेपयेत् ॥ प्रासादं धवलं सौधं कारयेज्जीर्णमुद्धरेत् ॥ ९९ ॥ पुष्पवाटीं स्नानकूपं निर्मलं कारयेद्व्रती ॥ ब्राह्मणानां भूरिदानं देवपूजाकराय च ॥ १०० ॥ सर्वत्र देवयात्रायां विधिरेष प्रवर्त्तते ॥ तीर्थमभ्युद्धरेज्जीर्णं मार्ज्जयेत्कथ[4]येत्फलम् ॥ १०१ ॥ प्रसिद्धे च महादानं मध्यमे चैव मध्यमम् ॥ गोदानं सर्वतीर्थेषु सुवर्णमथ निष्क्रयः ॥ हिरण्यदानं सर्वेषां दानानामेव निष्कृतिः ॥ १०२ ॥ एवं कृत्वा नरो भक्त्या लभते जन्मनः फलम् ॥ तीर्थेषु दानं वक्ष्यामि येषु यद्दीयते तिथौ ॥ १०३ ॥ प्रभासे प्रतिपद्दानं दातव्यं कांचनं शुभम् ॥ द्वितीयायां तथा वस्त्रं तृतीयायां च मेदिनीम् ॥ ॥ १०४ ॥ चतुर्थ्यां दापयेद्धान्यं पंचम्यां कपिलां तथा ॥ षष्ठ्यामश्वं च सप्तम्यां महिषीं तत्र दापयेत् ॥ १०५ ॥ अष्टम्यां वृषभं दत्त्वा नीलं लक्ष

१ लोहलवणरूप्याख्याः--इ० पा० । २ भवेत्--इ० पा० । ३ जगतीम्--देवमन्दिरभूमिम्--इत्यर्थः । ४ कथयेत्फलम्--नवीनतीर्थनिर्माणस्य फलं तस्य वदेत्--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

णसंयुतम् ॥ नवम्यां तु गृहं दद्याच्चक्रं शंखं गदां तथा ॥ १०६ ॥ दशम्यां सर्वगंधांश्च एकादश्यां च मौक्तिकम् ॥ द्वादश्यां सुव्रतेऽन्नाद्यं प्रवालं विधिवत्तथा ॥ १०७ ॥ स्त्रियो देयास्त्रयोदश्यां भूतायां ज्ञानदो भवेत् ॥ अमावास्यामनुप्राप्य सर्वदानानि दापयेत् ॥ १०८ ॥ एवं दानं प्रदत्त्वा तु दशकृत्वः फलं लभेत् ॥ १०९ ॥ ॥ देव्युवाच ॥ ॥ भक्तिदानविहीना ये प्रभासं क्षेत्रमागताः ॥ स्नानमन्त्रविहीनाश्च वद तेषां तु किं फलम् ॥ ॥ ११० ॥ ॥ ईश्वर उवाच ॥ ॥ सधना निर्द्धना वापि समंत्रा मंत्रवर्जिताः ॥ प्रभासे निधनं प्राप्ताः सर्वे यांति शिवालयम् ॥ १११ ॥ ये मंत्रहीनाः पुरुषा धर्महीनाश्च ये मृताः ॥ तेषामेकं विमानं तु ददामि सुमहत्प्रिये ॥ ११२ ॥ स्नानदानानुरूप्येण प्राप्नुवंति परं पदम् ॥ केचित्स्नानप्रभावेन केचिद्दानेन मानवाः ॥ ११३ ॥ केचिल्लिंगप्रणामेन केचिल्लिंगार्चनेन च ॥ केचिद्ध्यानप्रभावेन केचिद्योगप्रभावतः ॥ ११४ ॥ केचिन्मंत्रस्य जाप्येन केचिच्च तपसा शुभे ॥ तीर्थे संन्यसनैः केचित्केचिद्भक्त्यनुसारतः ॥११५॥ एते चान्ये च बहव उत्तमाधममध्यमाः ॥ सर्वे शिवपुरं यांति विमानैः सूर्यसंनिभैः ॥ ११६ ॥ त्रिशूलांकितहस्ताश्च सर्वे च वृषवाहनाः ॥ दिव्याप्सरोगणाकीर्णाः क्रीडंते मत्प्रभावतः ॥ ११७ ॥ एवं भक्त्यनुसारेण ददामि फलमव्ययम् ॥ अलेपकं प्रभासं तु धर्माधर्मैर्न लिप्यते ॥ ११८ ॥ धर्मं चरंत्यधर्मं वा शिवं यांति न संशयः ॥ ११९ ॥ जन्मप्रभृति यो देवि नरो नेत्रविवर्जितः ॥ मम क्षेत्रे मृतः सोऽपि रुद्रलोके महीयते ॥ १२० ॥ जन्मप्रभृति यो देवि श्रवणाभ्यां विवर्जितः ॥ प्रभासे निधनं प्राप्तः स भवेन्मत्परिग्रहः ॥ १२१ ॥ अथातः संप्रवक्ष्यामि तीर्थानां स्पर्शने विधिम् ॥ मन्त्रेण मंत्रितं तीर्थं भवेत्संनिहितं तथा ॥ ॥ १२२ ॥ प्रथमं चालभेत्तीर्थं प्रणवेन जलं शुचि ॥ अवगाह्य ततः स्नायादध्यात्ममन्त्रयोगतः ॥ १२३ ॥ ओंनमो देवदेवाय शितिकण्ठाय दंडिने ॥ रुद्राय वामहस्ताय चक्रिणे वेधसे नमः ॥ १२४ ॥ सरस्वती च सावित्री वेदमाता विभावरी ॥ संनिधानं कुरुष्वात्र तीर्थे पापप्रणाशिनि ॥ सर्वेषामेव तीर्थानां मंत्र एष उदाहृतः ॥ १२५ ॥ इत्युच्चार्य नमस्कृत्वा स्नानं कुर्याद्यथाविधि ॥ उपवासं ततः कुर्यात्तस्मिन्नहनि सुव्रते ॥ १२६ ॥ सा तिथिर्वर्षमेकं तु उपोष्या भक्तितत्परैः ॥ १२७ ॥ ॥ देव्युवाच ॥ ॥ कस्मिंस्तीर्थे नरैः पूर्वं प्रभासक्षेत्रमागतैः ॥ स्नानं कार्यं महादेवि तन्मे विस्तरतो वद ॥ १२८ ॥ ॥ ईश्वर उवाच ॥ ॥ हंत ते संप्रवक्ष्यामि आद्यं तीर्थं महाप्रभम् ॥ पूर्वं यत्र नरैः स्नानं

१ त्रियो देयाः—दास्यो देयाः—इत्यर्थः,—नृत्यादिकर्त्र्यो वारांगनाः,—वा—देयाः—इत्यर्थः कन्यादानं वा कुर्यात्—इत्यर्थो वा । २ अस्मिन्—इ० पा० । ३ यथा—इ० पा० । ४ देवमाता—इ० पा० । ५ भवेदत्र—इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

क्रियते तच्छृणुष्व मे ॥ १२९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये तीर्थयात्राविधानवर्णनंनामाष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ अग्नितीर्थं ततो गच्छेत्सागरस्य तटे शुभे ॥ यत्राऽसौ वांडवो[1] मुक्तः सरस्वत्या वरानने ॥ १ ॥ दक्षिणे सोमनाथस्य सर्वपापप्रणाशनम् ॥ तीर्थं त्रैलोक्यविख्यातं पद्मकंनाम नामतः ॥ २ ॥ धन्वंतरशते प्रोक्तं सोमेशाज्जलमध्यगम् ॥ कुण्डं पापहरं प्रोक्तं शतहस्तप्रमाणतः ॥ तत्र स्नानं प्रकुर्वीत विगाह्य निधि[2]मंभसाम् ॥ ३ ॥ आदौ कृत्वा तु वपनं सोमेश्वरसमीपतः ॥ शंकरं मनसा ध्यायन्केशांस्तत्र परि[3]त्यजेत् ॥ [4]समुत्तार्य ततः केशान्भूयः स्नानं समाचरेत् ॥ ४ ॥ यत्किंचित्कुरुते पापं मनुष्यो वृत्तिकर्शितः ॥ तदेव पर्वतसुते सर्वं केशेषु तिष्ठति ॥ ५ ॥ तस्मात्सर्वप्रयत्नेन केशांस्तत्र विनिक्षिपेत् ॥ तदेव सोमनाथाग्रे कृत्वा तु द्विगुणं फलम् ॥ ६ ॥ अग्नितीर्थसमीपस्थं कपर्दिद्वारमध्यगम् ॥ तत्रैव द्विगुणं ज्ञेयमन्यत्रैकगुणं स्मृतम् ॥ ७ ॥ क्षुरकर्म न शस्तं स्याद्योषितां तु वरानने ॥ सभर्तृकाणां तत्रैव विधिं तासां शृणुष्व मे ॥ ८ ॥ सर्वान्केशान्समुद्धृत्य च्छेदयेदंगुलद्वयम् ॥ ततो देवान्विधानेन तर्प्पयेत्पितृदेवताः ॥९॥ मुण्डनं चोपवासश्च सर्वतीर्थेष्वयं विधिः ॥ १० ॥ गंगायां भास्करे क्षेत्रे मातापित्रोर्गुरौ मृते ॥ आधाने सोमपाने च वपनं सप्तसु स्मृतम् ॥ ११ ॥ अश्वमेधसहस्राणां सहस्रं यः समाचरेत् ॥ नासौ तत्फलमाप्नोति वपनाद्यच्च लभ्यते ॥ १२ ॥ विना मन्त्रेण यस्तत्र देवि स्नानं समाचरेत् ॥ समाप्नोति क्वचिच्छ्रेयो मुक्त्वैकं पर्ववासरम् ॥ १३ ॥ विना मंत्रं विना पर्व क्षुरकर्म विना नरैः ॥ कुशाग्रेणापि देवेशि न स्प्रष्टव्यो महोदधिः ॥ ॥ १४ ॥ एवं स्नात्वा विधानेन दत्त्वाऽर्घ्यं च महोदधौ ॥ संपूज्य पुष्पगंधैश्च वस्त्रैः पुण्यानुलेपनैः ॥ १५ ॥ हिरण्मयं यथाशक्त्या निक्षिपेत्तत्र कंकणम् ॥ १६ ॥ एवं कृत्वा विधानं तु स्पर्शयेल्लवणोदधिम् ॥ मन्त्रेणानेन देवेशि ततः सांनिध्यतां व्रजेत् ॥ १७ ॥ ॐनमो विष्णुगुप्ताय विष्णुरूपाय ते नमः ॥ सांनिध्ये भव देवेश सागरे लवणाम्भसि ॥ १८ ॥ अग्निश्च रेतो मृडया च देहो रेतोधा विष्णुरमृतस्य नाभिः ॥ एतद्ब्रुवन्पार्वति सत्यवाक्यं ततोऽवगाहेत्तु पतिं नदीनाम् ॥ १९ ॥ ॐनमो रत्नगर्भाय मन्त्रेणानेन भामिनि ॥ कंकणं प्रक्षिपेत्तत्र ततः स्नायाद्यदृच्छया ॥ २० ॥ ततश्च तर्पयेद्देवान्मनुष्यांश्च पितामहान् ॥ तिलमिश्रेण तोयेन सम्यक्छ्रद्धासमन्वितः ॥ २१ ॥ आजन्मशतसाहस्रं यत्पापं कुरुते नरः ॥ सकृत्स्नात्वा व्यपोहेत सागरे लवणाम्भसि ॥ २२ ॥ वृषभस्तत्र दातव्यः प्रवृत्ते क्षुरकर्मणि ॥ आत्मप्रकृतिदानं च पीतवस्त्रं तथैव च ॥ २३ ॥

१ वाडवः—अग्निः--इत्यर्थः । २ विधिमन्त्रतः—इ० पा० । ३ विनिक्षिपेत्—इ० पा० । ४ केशांस्तत्र विनिक्षिप्य--इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



अनेन विधिना तत्र सम्यक्स्नानं समाचरेत् ॥ स्पर्शयेद्वाडवं तेजश्चान्यथा दोषभाग्भवेत् ॥ २४ ॥ वरः शापश्च तस्यायं पुरा दत्तो यथा द्विजैः ॥ ॥ २५ ॥ ॥ देव्युवाच ॥ ॥ कुत्रकुत्र महादेव जलस्नानाद्विशुध्यति ॥ किमर्थं सागरे दोषः प्राप्यते कौतुकं महत् ॥ २६ ॥ यत्र गंगादयः सर्वा नद्यो विश्रांतिमागताः ॥ यत्र विष्णुः स्वयं शेते यत्र लक्ष्मीः स्वयं स्थिता ॥ २७ ॥ किमर्थं वरशापं तु तस्य दत्तं द्विजैः पुरा ॥ सर्वं विस्तरतो ब्रूहि महान्मे संशयोऽत्र वै ॥ २८ ॥ ॥ ईश्वर उवाच ॥ ॥ दीर्घसत्रं पुरा देवि प्रारब्धं सुरसत्तमैः ॥ प्रभासं तीर्थमासाद्य सम्यक्छ्रद्धा समन्वितैः ॥ २९ ॥ ततः सत्रावसाने तु दत्त्वा दानमनेकधा ॥ सर्वस्वं ब्राह्मणेन्द्राणां प्रभासक्षेत्रवासिनाम् ॥ ३० ॥ तावदन्ये द्विजास्तत्र दक्षिणार्थं समागताः ॥ देशीयास्तत्रवास्तव्याः शतशोऽथ सहस्रशः ॥ ३१ ॥ प्रार्थनाभङ्गभीताश्च ततो देवाः सवासवाः ॥ प्रणष्टास्तान्सुरान्दृष्ट्वा ब्राह्मणाश्चानुवव्रजुः ॥ ३२ ॥ खेचरत्वं पुरा देवि ह्यासीदग्र्यभुवां[1] महत् ॥ तेन यांति द्रुतं सर्वे यत्र यत्र सुरा लयाः ॥ ३३ ॥ एवं सर्वत्रगामित्वं तेषां वीक्ष्य दिवौकसः ॥ प्रविष्टाः सागरं भीता ऊचुर्वाक्यं च तं पुनः ॥ ३४ ॥ शरणं ते वयं प्राप्ता ब्राह्मणेभ्यो भयं गताः ॥ नास्ति वित्तं च दानार्थं तस्माद्रक्ष महोदधे ॥ ३५ ॥ एकतः क्रतवः सर्वे समाप्तवरदक्षिणाः ॥ एकतो भय भीतस्य प्राणिनः प्राणरक्षणम् ॥ विशेषतश्च देवानां रक्षणं बहुपुण्यदम् ॥ ३६ ॥ ॥ समुद्र उवाच ॥ ॥ ब्राह्मणेभ्यो न भीः कार्या कथंचित्सुर सत्तमाः ॥ अहं वो रक्षयिष्यामि प्रविशध्वं ममोदरे ॥ ३७ ॥ ततस्ते विबुधाः सर्वे तस्य वाक्येन हर्षिताः ॥ प्रविष्टा गह्वरां कुक्षिं तस्यैव भय वर्जिताः ॥ ३८ ॥ समुद्रोऽपि महत्कृत्वा निजं रूपं च भूरिशः ॥ जलजाञ्जीवसंघातान्धृत्वा तीरसमीपतः ॥ ३९ ॥ ततश्चक्र उपायं स ब्राह्मणानां निपातने ॥ मत्स्यानामामिषं पक्त्वा महान्नेन च गोपितम् ॥ ४० ॥ अथोवाच द्विजान्सर्वान्प्रणिपत्य कृतांजलिः ॥ प्रसादः क्रियतां विप्रा मुहूर्त्तं मम सांप्रतम् ॥ ४१ ॥ आतिथ्यग्रहणादेव दीनस्य प्रणतस्य च ॥ युष्मदर्थं मया सम्यगेतत्पाकं समावृतम् ॥ क्रियतां भोजनं भूयो गंतव्यमनु नाकिनाम् ॥ ४२ ॥ अथ ते ब्राह्मणा मत्वा समुद्रं श्रद्धयान्वितम् ॥ बाढमित्येव तं प्रोच्य बुभुजुः स्वर्णभाजने ॥ ४३ ॥ न व्य जानंत तन्मांसं गुप्तं स्वादु क्षुधार्दिताः ॥ ४४ ॥ ततस्तृप्ताश्च ते विप्रा ब्राह्मणा विगतक्षुधः ॥ आशीर्वादं ददुः सर्वे ब्राह्मणाः शंसित व्रताः ॥ ४५ ॥ भोजनांतो ब्राह्मणानां प्राणांतः क्षत्रजन्मनाम्[2] ॥ आशीविषाणां सर्पाणां कोपो ज्ञेयो मृतावधिः ॥ प्रेरयामास देवान्तै

१ अग्रभुवाम्--ब्राह्मणानाम्--इत्यर्थः । तेषां योगसामर्थ्यादप्रतिहताकाशगमनादिसिद्धिसत्त्वस्य प्रसिद्धेः । २ ततः—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गम्यतामित्युवाच तान् ॥ ४६ ॥ ततो देवाः सगंधर्वा गच्छंतः शीघ्रगा वियत् ॥ गच्छतस्तांस्ततो दृष्ट्वा ब्राह्मणास्तत्र वंदिताः ॥ ४७ ॥ दक्षिणार्थं समुत्पेतुः सुरानुद्दिश्य पृष्ठतः ॥ ४८ ॥ ततः प्रपतिता भूमौ द्विजास्ते सहसा पुनः ॥ अभक्ष्यभक्षणात्ते वै ब्राह्मणा मांसभक्षणात् ॥ ४९ ॥ निष्कृतिं तां परिज्ञाय समुद्रस्य रुषान्विताः ॥ ददुः शापं महादेवि रौद्रं रौद्रवपुर्द्धराः ॥ ५० ॥ यस्मादभक्ष्यं मांसं वै ब्राह्मणानां परं स्मृतम् ॥ त्वयोपहृतमस्माकं सुगुप्तं भक्ष्यसंयुतम् ॥ ५१ ॥ एकतः सर्वमांसानि मत्स्यमांसं तथैकतः ॥ एकतः सर्वपापानि परदारास्तथैकतः ॥ ५२ ॥ एवं वयं विजानन्तो यदि मांसस्य दूषणम् ॥ तथापि वंचिताः सर्वे अपरीक्षितकारिणः ॥ ५३ ॥ यस्मात्पापमते क्रूर त्वया वै वञ्चिता वयम् ॥ मांसस्य भक्षणात्तस्मादपेयस्त्वं भविष्यसि ॥ ५४ ॥ अस्पृश्यस्त्वं द्विजेंद्राणामन्येषां च नृणां भुवि ॥ तवोदकेन ये मर्त्याः करिष्यंति कुबुद्धयः ॥ ५५ ॥ स्नानं ते नरकं घोरं प्रयास्यंति न संशयः ॥ कृतघ्नानां च ये लोका ये लोकाः पापकर्मिणाम् ॥ ५६ ॥ तांस्तवोदकसंस्पर्शाल्लप्स्यंते मानवा भुवि ॥ ५७ ॥ ॥ ईश्वर उवाच ॥ ॥ एवं शप्तः समुद्रस्तैर्ब्राह्मणैर्वरवर्णिनि ॥ ततो वर्षसहस्रं तु ह्यस्पृश्यः संबभूव ह ॥ ५८ ॥ ततस्त्रासाकुलो भूत्वा सर्वांस्तानिदमब्रवीत् ॥ देवकार्यमिदं विप्रा मया कृतमबुद्धिना ॥ ५९ ॥ बुभूषता परं धर्मं शरणागतसंभवम् ॥ कामात्क्रोधाद्भयाल्लोभाद्यस्त्यजेच्छरणागतम् ॥ ६० ॥ सत्याद्वापि स विज्ञेयो महापातककारकः ॥ युष्मद्भीत्या समायाताः स्वर्गिणः शरणं मम ॥ ६१ ॥ ते मया रक्षिताः सम्यग्यथाशक्त्या ह्युपायतः ॥ शोषयिष्येऽहमात्मानं यस्माच्छप्तः प्रकोपतः ॥ ६२ ॥ भवद्भिर्नोत्सहे स्थातुं जनस्पर्शविनाकृतः ॥ एवमुक्त्वा ततो देवि समुद्रः सरितां पतिः ॥ आत्मानं शोषयामास दुःखेन महता स्थितः ॥६३॥ ततो देवगणाः सर्वे स्थलाकारं महार्णवम् ॥ शनैःशनैः प्रपश्यंतो भयेन महताऽन्विताः ॥ ६४ ॥ ऊचुर्गत्वा तु लोकेशं देवदेवं पितामहम् ॥ अस्मत्कृते द्विजैः शप्तः सागरो ब्राह्मणोत्तमैः ॥ ६५ ॥ स शोषयति चात्मानं दुःखेन महतान्वितः ॥ समुद्राज्जलमादाय प्रवर्षंति बलाहकाः ॥ ६६ ॥ ततः संजायते सस्यं सस्याद्यज्ञा भवंति च ॥ यज्ञैः संजायते तृप्तिः सर्वेषां त्रिदिवौकसाम् ॥ ६७ ॥ एवं तस्य विनाशेन नाशोऽस्माकं भविष्यति ॥ तस्मात्त्वं रक्ष तं गत्वा यथा शोषं न गच्छति ॥ ६८ ॥ यथा तुष्यंति विप्रास्ते तथा नीतिर्विधीयताम् ॥ ६९ ॥ देवानां वचनाद्ब्रह्मा गत्वा सागरसन्निधौ ॥ समुद्रार्थे ययाचे तान्ब्राह्मणान्क्षेत्रवासिनः ॥ ७० ॥ ॥ ब्रह्मोवाच ॥ ॥ प्रसादः क्रियतामस्य सागरस्य द्विजोत्तमाः ॥ यथा पवित्रतां याति मद्वा

१ अयं मांसनिषेधविषये वृत्तान्तः सर्वैः सद्धर्मशीलैरवश्यं हृदये निधेयः—मांसभक्षणदुराचारश्च निरसनीयो योऽधर्मतः प्रवृत्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 क्यात्क्रियतां तथा ॥ ७१ ॥ [1]प्रदास्यति स युष्मभ्यं रत्नानि विविधानि च ॥ ७२ ॥ यूयं भविष्यथात्यंतं भूमिदेवा इति क्षितौ ॥ नाम्ना मद्वचना 
 न्नूनं सत्यमेतन्मयोदितम् ॥ ७३ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ नान्यथा कर्तुमिच्छामस्तव वाक्यं जगत्पते ॥ न च मिथ्याऽऽत्मनो वाक्यं प्रमाणं चात्र 
वै भवान् ॥ ७४ ॥ तन्नो वाक्यात्सुरश्रेष्ठ हितं वा यदि वाहितम् ॥ परं स्याज्जगतां श्रेयः सर्वेषां च दिवौकसाम् ॥ तथा कुरु जगन्नाथ अस्माकं
हितकारणम् ॥ ७५ ॥ अथोवाच नदीनाथं ब्रह्मा लोकपितामहः॥ मा शोषय त्वमात्मानं हितं वाक्यं शृणुष्व मे ॥ ७६ ॥ नान्यथा शक्यते कर्त्तुं
द्विजानां वचनं हि [2]तत् ॥ ब्राह्मणाः कुपिता [3]नूनं भस्मीकुर्युः स्वतेजसा ॥ ७७ ॥ देवान्कुर्युरदेवांश्च तस्मात्तान्नैव कोपयेत् ॥ यस्मादेव तव स्पर्श
स्त्रिधा मेध्यो भविष्यति ॥ ७८ ॥ पर्वकाले च संप्राप्ते नदीनां च समागमे ॥ सेतुबंधे तथा सिंधौ तीर्थेष्वन्येषु संयुतः ॥ ७९ ॥ इत्येवमादिसर्वे
षु मध्येऽन्यत्र न कर्मणि ॥ यत्फलं सर्वतीर्थेषु [4]सर्वयज्ञेषु यत्फलम् ॥ तत्फलं तव तोयस्य स्पर्शादेव भविष्यति ॥८०॥ गयाश्राद्धे तु यत्पुण्यं गो
ग्रहे मरणेन च ॥ तत्फलं तव तोयस्य स्पर्शादेव भविष्यति ॥ ८१ ॥ अपेयस्त्वं तथा भावि स्वादमात्रेण केवलम् ॥ गंडूषमपि पीतं च तोयस्या
शुभनाशनम् ॥ ८२ ॥ भविष्यति नृणां लोके तव सौख्यविवर्द्धनम् ॥ पितॄणां तव तोयेन यः करिष्यति तर्पणम् ॥ पूर्वोक्तेन विधानेन तस्य
पुण्यफलं शृणु ॥ ८३ ॥ यावत्त्वं तिष्ठसे लोके यावच्चंद्रार्कतारकाः ॥ [5]तवोदकामृतैस्तृप्तास्तावत्स्थास्यंति पूर्वजाः ॥ ८४ ॥ माघे मासि च यः
स्नायान्नैरंतर्येण भावितः ॥ [6]पौंडरीकफलं तस्य दिवसेदिवसे भवेत् ॥ ८५ ॥ यात्रायामथवान्यत्र पर्वकाले शशिग्रहे ॥ अत्र स्नास्यति यः सम्य
क्सागरे लवणांभसि ॥ अश्वमेधसहस्रस्य फलं प्राप्स्यति मानवः ॥ ८६ ॥ श्रीसोमेशसमुद्रस्य अंतरे ये मृता नराः ॥ पापिनोऽपि गमिष्यंति
स्वर्गं निर्धूतकल्मषाः ॥ ८७ ॥ एवं भविष्यति सदा तव मद्वचनाद्विभो ॥ प्रयच्छस्व द्विजेंद्राणां रत्नानि विविधानि च ॥ ८८ ॥ तेन तुष्टा
वरं भूयः प्रदास्यंति तवेप्सितम् ॥ ८९ ॥ ॥ ईश्वर उवाच ॥ ॥ पितामहवचः श्रुत्वा बाढमित्येव सागरः ॥ ब्राह्मणेभ्यः सुरत्नानि ददौ श्रद्धा
समन्वितः ॥९०॥ ब्राह्मणैर्ब्रह्मणो वाक्यमशेषं समनुष्ठितम् ॥ क्षुरकर्म तथा कृत्वा स्नानं सर्वेऽपि चक्रिरे ॥ ९१ ॥ एवं पवित्रतां प्राप्तस्तीर्थत्वं लव
णोदधिः ॥ तस्य मध्ये महादेवि लिंगानां पंचकोटयः ॥ ९२ ॥ अस्मिन्मन्वंतरे देवि अदृश्याः सागरे कृताः ॥ अग्निकुण्डं च तत्रैव तथान्यत्पञ्चकं 

१ प्रदास्यति सुरत्नानि विविधानि सहस्रशः—इ० पा० । २ क्वचित्—इ० पा० । ३ हन्युः—इ० पा० । ४ सर्वदानेषु यत्फलम्—इ० पा० । ५ क्षारोदकामृतैः—इ० पा० । ६ पौंडरीक यज्ञ फलम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सरः ॥ ९३ ॥ मध्ये तु प्रावृतं सर्वमस्मिन्मन्वंतरे प्रिये ॥ चक्रमैनाकयोर्मध्ये दिशि दक्षिणमुच्यते ॥ ९४ ॥ शातकुम्भमये कुम्भे धनुषायुतविस्तृते ॥ तत्र कुंभस्य मध्यस्थो वडवानलसंज्ञितः ॥ ९५ ॥ सूचीवक्रो महाकायः स जलं पिबते सदा ॥ एतदंतरमासाद्य अग्नितीर्थं प्रचक्षते ॥ ९६ ॥ तस्य मध्ये महासारं वाडवं यत्र वै मुखम् ॥ श्रीसोमेशाद्दक्षिणतो धन्वंतरशतावधि ॥ उत्तरान्मानसात्पूर्वं यावदेव कृतस्मरम् ॥ ९७ ॥ एतद्गोप्यं वरारोहे न देयं यस्य कस्यचित् ॥ ब्रह्मघ्नोपि विशुध्येत श्रुत्वैतन्नात्र संशयः ॥ ९८ ॥ एवं शापो वरो दत्तः सागरस्य यथा द्विजैः ॥ पूर्वं रुष्टैस्ततस्तुष्टैस्तत्सर्वं कथितं मया ॥ ९९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये समुद्रस्यापेयताकारण वर्णनंनामैकोनत्रिंशोऽध्यायः ॥२९॥ ॥छ॥ ॥ देव्युवाच ॥ ॥ स्नात्वा तत्राग्नितीर्थेषु कं देवं पूर्वमर्चयेत् ॥ निर्विघ्ना जायते येन यात्रा नृणां सुरेश्वर ॥ तन्मे यात्राविधानं तु यथावद्वक्तुमर्हसि ॥ १ ॥ ॥ ईश्वर उवाच ॥ ॥ एवं स्नात्वा विधानेन दत्त्वार्घ्यं च महोदधौ ॥ संपूज्य गन्धपुष्पैश्च वस्त्रैः पुष्पावलेपनैः ॥ २ ॥ हिरण्मयं यथाशक्त्या प्रक्षिपेत्तत्र कंकणम् ॥ ततः पितॄंस्तर्पयित्वा गच्छेद्देवं कपर्दिनम् ॥ ३ ॥ पुष्पैर्धूपैस्तथा गन्धैर्वस्त्रैः संपूज्य भक्तितः ॥ गणानां त्वेति मन्त्रेण अर्घ्यं चास्मै निवेदयेत् ॥ ४ ॥ शूद्राणामथ देवेशि मंत्रश्चाष्टाक्षरः स्मृतः ॥ तत्र सोमेश्वरं गच्छेद्देवं पापहरं परम् ॥ ५ ॥ स्नापयित्वा विधानेन जपेच्च शतरुद्रियम् ॥ तथा रुद्रान्सपञ्चांगास्तथान्या रुद्रसंहिताः ॥ ६ ॥ स्नापयेत्पयसा चैव दध्ना घृतयुतेन च ॥ मधुनेक्षुरसेनैव कुंकुमेन विलेपयेत् ॥ ७ ॥ कर्पूरोशीरमिश्रेण मृगनाभियुतेन च ॥ चन्दनेन सुगन्धेन पूज्यं संपूजयेत्ततः ॥ ८ ॥ धूपैर्बहुविधैर्देवं धूपयित्वा यथाविधि ॥ वस्त्रैः संवेष्टयेत्पश्चाद्दद्यान्नैवेद्यमुत्तमम् ॥ ९ ॥ आरार्तिकं ततः कृत्वा नृत्यं कुर्याद्यथेच्छया ॥ अष्टांगं प्रणिपत्यैवं गीतवाद्यादिकं ततः ॥ १० ॥ धर्मश्रवणसंयुक्तं कार्यं प्रेक्षणकं विभोः ॥ ततो दद्याद्द्विजातिभ्यस्तपस्विभ्यश्च शक्तितः ॥ ११ ॥ दीनांधकृपणेभ्यश्च दानं कार्पटिकेषु च ॥ वृषभस्तत्र दातव्यः प्रवृत्ते क्रूरकर्मणि ॥ उपवासं ततः कुर्यात्तस्मिन्नहनि भामिनि ॥ १२ ॥ यस्मिन्नहनि पश्येत देवं सोमेश्वरं नरः ॥ सा तिथिर्वर्षमेकं तु उपोष्या भक्तितत्परैः ॥ १३ ॥ एवं कृत्वा नरो भक्त्या लभते जन्मनः फलम् ॥ तथा च सर्वतीर्थानां सकलं लभते फलम् ॥ ॥१४॥ उद्धरेत्पितृवर्गं च मातृवर्गं च भामिनि ॥ बाल्ये वयसि यत्पापं वार्धक्ये यौवनेऽपि वा ॥ १५ ॥ क्षालयेच्चैव तत्सर्वं दृष्ट्वा सोमेश्वरं नरः ॥ न दुःखितो न दारिद्रो दुर्भगो वा न जायते ॥ १६ ॥ सप्तजन्मान्तरेणैव दृष्टे सोमेश्वरे विभौ ॥ धनधान्यसमायुक्ते स्फीते[1] सञ्जायते कुले ॥ १७ ॥

१ स्फीते—जगत्प्रसिद्धे—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





भक्तिर्भवति भूयोऽपि सोमनाथं प्रति प्रभुम् ॥ क्षीरेण स्नपनं पूर्वं ततो धारासमुद्भवम् ॥ १८ ॥ प्रथमे प्रथमे यामे महास्नानमतः परम् ॥ मध्याह्ने देवदेवस्य ये प्रपश्यन्ति मानवाः ॥ संध्यामारार्तिकं भूयो न जायन्ते च मानुषाः ॥ १९ ॥ मत्वा कलियुगं रौद्रं बहुपापं वरानने ॥ नान्येन तरते दुर्गां कर्मणा दुर्गतिं नरः ॥ २० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्र माहात्म्ये सोमेश्वरमाहात्म्ये सोमेश्वरपूजामाहात्म्यवर्णननाम त्रिंशोध्यायः ॥ ३० ॥ ॥ छ ॥ ॥ देव्युवाच ॥ ॥ सकारपंचकं प्रोक्तं यत्त्वया मम शंकर ॥ कथं तदत्र संवृत्तमेतन्मे संशयं महत् ॥ १ ॥ कथं वात्र समायाता कुतश्चापि सरस्वती ॥ कथं स वाडवो जातः कस्मि न्काले कथं ह्यभूत् ॥ तत्सर्वं विस्तरेणेदं यथावद्वक्तुमर्हसि ॥ २ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि यथा जाता तस्मिन्क्षेत्रे सरस्वती ॥ यतश्चैव समुद्भूता सर्वपापप्रणाशिनी ॥ ३ ॥ हिरण्याँ वज्रिणी न्यंकुः कपिला च सरस्वती ॥ ४ ॥ ऋषिभिः पञ्चभिश्चात्र समाहूता यथा पुरा ॥ वाडवेनाग्निना युक्ता यथा जाता शृणुष्व तत् ॥ ५ ॥ पुरा देवासुरे युद्धे निवृत्ते सोमकारणात् ॥ पितामहस्य वचनात्तारां चन्द्रः समर्पयत् ॥ ६ ॥ ततो याताः सुराः स्वर्गं पश्यन्तोऽधोमुखा महीम् ॥ ददृशुस्ते ततो देवा भूम्यां स्वर्गमिवापरम् ॥ ७ ॥ आश्रमं मुनिमुख्यस्य दधीचेर्लोक विश्रुतम् ॥ सर्वर्तुकुसुमोपेतं पादपैरुपशोभितम् ॥ केतकीकुटजोद्भूतबकुलामोदमोदितम् ॥ ८ ॥ एवंविधं समासाद्य तदाश्रमपदं गुरु ॥ कौतुका द्द्रष्टुमारब्धाः सर्वे देवा मनोरमम् ॥ ९ ॥ ते च तीर्थाश्रमे तस्मिन्यानान्युत्सृज्य संयताः ॥ प्रवृत्तास्तमृषिं द्रष्टुं प्राकृताः पुरुषा यथा ॥ १० ॥ दृष्टवंतः सुराः सर्वे पितामहमिवापरम् ॥ ततस्त ऋषिणा सर्वे पाद्यार्घ्यादिभिरर्चिताः ॥ ११ ॥ यथोक्तमासनं भेजुः सर्वे देवाः सवासवाः ॥ तेषां मध्ये समुत्थाय शक्रः प्रोवाच तं मुनिम् ॥ १२ ॥ आयुधानि विमुच्याग्रे भवान्गृह्णात्विमानि हि ॥ तन्निशम्य वचः प्राह दधीचिः पाकशासनम् ॥ १३ ॥ मुक्तास्त्राणि ममाभ्याशे यूयं यात त्रिविष्टपम् ॥ तं शक्रः प्राह चैतानि कार्यकाले ह्युपस्थिते ॥ १४ ॥ देयानि ते पुनः शत्रूनभिजेष्यामहे रणे ॥ पुनःपुनस्ततः शक्रः संदिश्य मुनिसत्तमम् ॥ १५ ॥ अस्माकमेव देयानि न चान्यस्य त्वया मुने ॥ बाढमित्युदिते शक्रमुक्तवान्मुनिसत्तमः ॥ १६ ॥ दास्यामि ते समस्तानि युद्धकाले विशेषतः ॥ नास्य मिथ्या भवे द्वाक्यमिति मत्वा शचीपतिः ॥ मुक्तास्त्राणि तदभ्याशे पुनः स्वर्गं गतस्तदा ॥ १७ ॥ अस्त्रार्पणं यः प्रयतः प्रयत्नाच्छृणोति राजा भुवि भाविता



१ न ते जायन्ति मानुषाः--इ० पा० । २ केनकेन समायुक्तमेतन्मे संशयो महान्--इ० पा० । ३ हरिणी--इ० पा० । ४ गुरु--महत्--विशालम्--इत्यर्थः । ५ ते--त्वया-इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तात्मा ॥ सोऽभ्येति युद्धे विजयं परं हि सुतांश्च धर्मार्थयशोभिरामाः ॥ १८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये वडवानलोत्पत्तिवृत्तान्ते दधीचिमहर्षये सर्वदेवकृतस्वस्वशस्त्रसमर्पणवर्णनंनामैकत्रिंशोध्यायः॥ ३१ ॥ ॥ ईश्वर उवाच ॥ ॥ ततस्तेषु प्रयातेषु देवदेवेष्वसौ मुनिः ॥ शतवर्षाणि तत्रस्थस्तपसे प्रस्थितो द्विजः ॥ १ ॥ आश्रमादुत्तरात्तस्माद्दिव्यां दिशमथोत्तराम् ॥ सुभद्रापि महाभागा तस्य या परिचारिका ॥ २ ॥ अस्त्रादानेऽसमर्था सा ऋषिं प्रोवाच भामिनी ॥ नाहं नेतुं समर्थास्मि शस्त्राण्यालभ्य पाणिना ॥३॥ जलेन सह तद्वीर्यं पीतवान्स ऋषिस्ततः ॥ आत्मसंस्थानि सर्वाणि दिव्यान्यस्त्राण्यसौ मुनिः ॥ कारयित्वोत्तरामाशां जगाम तपसां निधिः ॥ ४ ॥ गंगाधरं शुक्लतनुं सर्पैराकीर्णविग्रहम् ॥ शिववत्सुखदं पुंसामपश्यत्स हिमाचलम् ॥ ५ ॥ तथाश्रमं ददर्शोच्चैरश्वत्थैः परिपालितम् ॥ चंद्रभागोपकंठस्थं समित्पुष्पकुशान्वितम् ॥ ६ ॥ स तस्मिन्मुनिशार्दूलो ह्यवसन्मुनिभिः सह ॥ सुभद्रया च संयुक्तश्चंद्रश्चंद्रिकया यथा ॥ ७ ॥ एकदा वसतस्तस्य सुभद्रा परिचारिका ॥ स्नानार्थं यातुमारब्धा चतुर्थेऽह्नि रजस्वला ॥ ८ ॥ व्रजन्त्या च तया दृष्टं कौपीनाच्छादनं पुनः ॥ परित्यक्तं विदित्वैवं दैवयोगाद्गृहाण सा ॥ ९ ॥ परिधाय पुनः सा तु कौपीनं रेतसा युतम् ॥ एकांते स्नातुमारब्धा जलाभ्याशे यथासुखम् ॥ १० ॥ ततो देवी यथाकाममकस्माद्वीक्षते हि सा ॥ स्वोदरस्थं समुत्पन्नं गर्भं गुरुभरालसा ॥ ११ ॥ शोचयित्वात्मनात्मानमगर्भाहमिहागता ॥ तत्केन मन्दभागिन्या ममैवं दूषणं कृतम् ॥ १२ ॥ लज्जाभिभूता सा तत्र प्रविश्याश्वत्थवाटिकाम् ॥ तत्र तं सुषुवे गर्भमविज्ञाय कुतो ह्ययम् ॥ १३ ॥ पुनरेव हि सा स्नात्वा अविज्ञायात्मदुष्कृतम् ॥ शापं दातुं समारब्धा गर्भकर्त्तारि दुःसहम् ॥ १४ ॥ ज्ञानाद्वा यदि वाज्ञानाद्येनेयं दूषणा कृता ॥ सोऽद्यैव पंचतां यातु यद्यहं स्यां पतिव्रता ॥ १५ ॥ यद्यहं मनसा वापि कामये नापरं पतिम् ॥ एतेन सत्यवाक्येन यातु जारः स्वयं क्षयम् ॥ ॥ १६ ॥ एवं शप्त्वा तु तं देवी ह्यज्ञात्वा गर्भकारिणम् ॥ पुनर्यातुं समारब्धा तद्दधीचिनिकेतनम् ॥ १७ ॥ तत्र चार्कप्रतीकाशं गर्भमुत्सृज्य सा तदा ॥ प्राप्ता तपोवनं रम्यं यत्रासौ मुनिपुंगवः ॥ १८ ॥ अत्रांतरे सर्वदेवा लोकपाला महाबलाः ॥ अस्त्राणां कारणार्थाय मुनेराश्रममागताः ॥ ॥ १९ ॥ उवाच तं मुनिं शक्रो न्यासो यस्तव सुव्रत ॥ दत्तोऽस्माभिस्तु शस्त्राणां तानि क्षिप्रं प्रयच्छ नः ॥ २० ॥ ऋषिराह पुरा यत्र स्थापितानि ममाश्रमे ॥ तत्रैव तानि तिष्ठंति न चानीतानि वासव ॥ २१ ॥ यत्तु तेषां बलं वीर्यं संग्रामे शत्रुसूदन ॥ तन्मया पीतमखिलं सह तोयेन

१ तपस्तप्तुं स्थितो द्विजः—इ० पा० । २ ततः—इति शेषः । ३ स्नात्वा—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

वासव ॥ २२ ॥ एवं स्थिते मयाऽस्त्राणि यदि देयानि तेऽनघ ॥ ततोस्थीनि प्रयच्छामि तदाकाराणि सुव्रत ॥ २३ ॥ एवमुक्तः सहस्राक्षस्तमाह मुनिसत्तमम् ॥ नान्येषु तद्बलं रौद्रं यत्तु तेषु व्यवस्थितम् ॥ २४ ॥ यस्मात्तेषु विनिक्षिप्य सहस्रांशं स्वतेजसाम् ॥ अस्माकं दत्तवान्रुद्रो रक्षार्थं जगतां शिवः ॥ २५ ॥ तद्वयं तानि सर्वाणि गृहीत्वा च व्यवस्थिताः ॥ लोकस्य रक्षणार्थाय संज्ञेयं तेन लोकपाः ॥ २६ ॥ अमीषामपि शस्त्राणामुत्तमं वज्रमिष्यते ॥ तद्धारणाद्यतोऽस्माकं देवराजत्वमिष्यते ॥ २७ ॥ वज्रादप्युत्तमं चक्रं यत्तद्विष्णुपरिग्रहे ॥ दैत्यदानवसंघानां तदायत्तो जयोऽभवत् ॥ २८ ॥ तस्मात्तानि यथास्माभिः प्राप्यंते मुनिसत्तम ॥ तथा कुरुष्व संचिन्त्य कार्यं कार्यविदां वर ॥ २९ ॥ एवमुक्तो मुनिः प्राह तं शक्रं पुरतः स्थितम् ॥ तत्प्राप्त्यर्थमुपायं तु कथयामि तवापरम् ॥ ३० ॥ यान्येतानि ममास्थीनि यूयं तैस्तानि सर्वशः ॥ निर्मापयध्वं शस्त्राणि तदाकाराणि सर्वशः ॥ ३१ ॥ एतानि तत्समुत्थानि तेषामप्यधिकं बलम् ॥ साधयिष्यति भवतां संग्रामे यन्ममेहितम् ॥ ॥ ३२ ॥ तमुवाच ततः शक्रो दधीचिं तपसो निधिम् ॥ प्राणहारं प्रकर्तुं ते नाहं शक्तो यमिच्छसि ॥ ३३ ॥ न चामृतस्य तेऽस्थीनि ग्रहीतुं शक्तिरस्ति नः ॥ तस्मात्सर्वं समालोच्य यत्कर्तव्यं तदुच्यताम् ॥ ३४ ॥ एवमुक्तो मुनिः प्राह एतदेव कलेवरम् ॥ त्यजामि स्वयमेवाहं देव कार्यार्थसिद्धये ॥ ३५ ॥ अध्रुवं सर्वदुःखानामाश्रयं सुजुगुप्सितम् ॥ यदा ह्येतत्तदा युक्तः परित्यागोऽस्य सांप्रतम् ॥ ३६ ॥ अस्य त्यागेन मे दुःखं संसारोत्थं[1] न जायते ॥ यस्माज्जन्मांतरे जातो मृतोपि हि भवेत्पुनः ॥ ३७ ॥ भार्या भगिनी दुहिता स्वकर्मफलयोजनात् ॥ जाता तेनैव संसारे रतिकार्ये जुगुप्सिता ॥ ३८ ॥ यस्माच्च स्वयमेवैतद्वपुस्त्यजति वै ध्रुवम् ॥ तस्मादस्य परित्यागो वरः कार्योऽचिरात्स्वयम् ॥ ३९ ॥ एवं पुरंदरस्याग्रे संकीर्त्य स महामुनिः ॥ दधीचिः प्राणसंहारं कृतवान्सत्वरं तदा ॥ ४० ॥ गतासुं तं विदित्वैवं विबुधास्तत्कलेवरम् ॥ मांसशोणितनिर्मुक्तं कथं कार्यं व्यचिंतयन् ॥ ४१ ॥ ततस्तदस्थिशुद्ध्यर्थमुवाचेदं सुरेश्वरः ॥ गौरीणां कर्कशा जिह्वा ता एतदुत्खिदंत्विति ॥ ४२ ॥ ततस्तैर्विबुधैर्नंदा यदा लोकेषु संस्थिता ॥ ध्याता तदोपयाता सा सखीभिः परिवारिता ॥ ४३ ॥ नंदा सुभद्रा सुरभिः सुशीला सुमनास्तथा ॥ इति गोमातरः पंच गोलोकाच्च समागताः ॥ ४४ ॥ ऊचुस्तान्विबुधान्सर्वानस्माभिर्यत्प्रयोजनम् ॥ कर्त्तव्यं तत्करिष्यामः कथ्यतां सुविचारितम् ॥ ॥ ४५ ॥ ॥ देवा ऊचुः ॥ ॥ यदेतदृषिणा त्यक्तं स्वयमेव कलेवरम् ॥ एतन्मांसादिनिर्मुक्तं क्रियतामस्थिपंजरम्[2] ॥ ४६ ॥ तं[3] कृत्वा गर्हितं



१ संसारोक्तम्--इ०पा० । २ अस्थिशेषकम्--इ० पा० । ३ कृत्वा तास्तु सुरभयो देवकार्यं सुदारुणम्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्म देवादेशात्सुदारुणम् ॥ पुनः पितामहं द्रष्टुं गतास्ताः सुरसत्तमाः ॥ ४७ ॥ ततस्तु दारुणं कर्म यच्च ताभिरनुष्ठितम् ॥ पितामहस्य तत्सर्वं समाचख्युर्यथातथम् ॥ ४८ ॥ तच्छ्रुत्वा विबुधान्सर्वान्समाहूय पितामहः ॥ सर्वगात्रेष्वस्पृशत सुरभीः शुद्धिकाम्यया ॥ ४९ ॥ तास्तु तैर्विबुधैः स्पृष्टाः सुपूताः समवस्थिताः ॥ मुखमेकं परं तासां न स्पृष्टमशुचि स्मृतम् ॥ ५० ॥ अपवित्रं भवेत्तासां मुखमेकं जुगुप्सितम् ॥ शेषं शरीरं सर्वासां विशिष्टं तु सुरैः कृतम् ॥ ५१ ॥ सरस्वत्या तु ताः प्रोक्ता भवंत्यो ब्रह्मघातिकाः ॥ अन्यथा कारणात्कस्मान्न स्पृष्टममरैर्मुखम् ॥ ५२ ॥ ततस्ताभिस्तु सा प्रोक्ता देवी तत्र सरस्वती ॥ नैतत्ते वचनं युक्तं वक्तुमेवंविधं मुखम् ॥ ५३ ॥ अस्माकमेव हृदयमनेन वचसा त्वया ॥ निर्दग्धं येन तस्मात्त्वमचिराद्दाहमाप्स्यसि ॥ ५४ ॥ शापं दत्त्वा ततस्तस्याः सरस्वत्यास्तु तास्तदा ॥ गोलोकं गतवत्यस्तु सुरभ्यः सुरपूजिताः ॥ ५५ ॥ आहूय विश्वकर्माणं तक्षाणं सुरसत्तमाः ॥ अस्माकं कुरु शस्त्राणि तमाहुर्युद्धकारणात् ॥ ५६ ॥ एतद्वचनमाकर्ण्य तानि पूतैर्नवैर्दृढैः ॥ अस्त्राणि कारयामास दधीचेरस्थिसंचयैः ॥ ५७ ॥ प्रमाणाकारयुक्तानि देवानां तानि संयुगे ॥ अजेयानि यथा चासंस्तथा चासौ विनिर्ममे ॥ ५८ ॥ वज्रमिंद्रस्य शक्तिं च वह्नेर्दंडं यमस्य च ॥ खड्गं तु निर्ऋतेः पाशं सम्यक्चक्रे प्रचेतसः ॥५९॥ वायोर्ध्वजं कुबेरस्य गदां गुर्वीं च निर्ममे ॥ विश्वकर्मा तथा शूलमीशानस्य च निर्ममे ॥ ६० ॥ गृहीत्वैतानि वै देवाः शस्त्राण्यस्त्रबलं तदा ॥ विजेतुं च ततो दैत्यान्दानवांश्च गतास्तदा ॥ ६१ ॥ अत्रांतरे सुभद्रापि दधीचेरौर्ध्वदैहिकम् ॥ कृत्वा तैर्मुनिभिः सार्धमन्वेष्टुं सा गता सुतम् ॥ ६२ ॥ अश्वत्थवाटिकायां च तमपश्यन्मनोरमम् ॥ दृष्ट्वा रोदिति जीवंतं मुक्का बाष्पमथाचिरम् ॥ ६३ ॥ अंबेत्याभाष्य तेनोक्ता मा रोदीस्त्वं यशस्विनि ॥ सर्वं पुराकृतस्यैतत्फलं तव ममापि हि ॥ ६४ ॥ यद्यथा यत्र येनेह कर्म जन्मांतरार्जितम् ॥ तदवश्यं हि भोक्तव्यं त्यज शोकमतोऽखिलम् ॥ ६५ ॥ मत्परित्यागलज्जा च न ते कार्येह सुन्दरि ॥ फलं पुराकृतस्यैतद्भोक्तव्यं तन्मयापि हि ॥ ६६ ॥ मातर्ममोपरि कुरु पुत्रस्नेहं यशस्विनि ॥ बालस्य हि परित्यागान्माता दोषेण लिप्यते ॥ ६७ ॥ बालेनाभिहिता सा तु ध्यात्वा देवं जनार्दनम् ॥ कृतांजलिरुवाचेदं कथ्यतां मे सुनिश्चितम् ॥ ६८ ॥ न विजानाम्यहं तथ्यं कस्यायं वीर्यसंभवः ॥ तस्मात्कथय देवेश मम ते निश्चितं वचः ॥ ६९ ॥ आहोक्ते मातरं कृष्णः सुभद्रां वै जनार्दनः ॥ दधीचेस्तनयश्चायं भर्तुस्ते क्षेत्रसंभवः ॥ ७० ॥ तस्योत्पत्तिं विदित्वैवं सुभद्रा हृष्टमानसा ॥ बालमंके समारोप्य अरोदीदार्तया गिरा ॥ ७१ ॥ आह बालक

१ च–इति शेषः । २ अतः कारणात्–इति शेषः । ३ असौ–विश्वकर्मा–इत्यर्थः । ४ मयैव हि–इ० पा० । ५ दनिया–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





उत्पन्नः शोकस्य वद कारणम् ॥ अथोक्तः स्तन्यरहितं कथं ते जीवितं धृतम् ॥ ७२ ॥ यस्माच्चतुर्विधा सृष्टिर्जीवानां ब्रह्मणा कृता ॥ जरायुजांड
जोद्भिज्जस्वेदजाश्च तथा स्मृताः ॥ ७३ ॥ नरस्त्रीनपुंसकाख्याश्च जातिभेदा जरायुजाः ॥ चतुष्पदाश्च पशवो ग्राम्याश्चारण्यजास्तथा ॥ ७४ ॥
अण्डजाः पक्षिणः सर्वे मीनाः कूर्मसरीसृपाः ॥ स्वेदजा मत्कुणा यूका दंशाश्च मशकास्तथा ॥ ७५ ॥ उद्भिज्जाः स्थावराः प्रोक्तास्तृणगुल्मलता
दयः ॥ अन्येऽप्येवं यथायोगमंतर्भूताः सहस्रशः ॥ ७६ ॥ अण्डजाः पक्षपातेन जीवंति शिशवो भुवि ॥ ऊष्मणा स्वेदजाः सर्वे उद्भिज्जाः सलिलेन
हि ॥ ७७ ॥ समुदायेन भूतानां पञ्चानामुद्भिजं भुवि ॥ जरायुजाश्च स्तन्येन विना जीवितुमक्षमाः ॥ ७८ ॥ विना तेन कथं पुत्र त्वया प्राणा विधा
रिताः ॥ तां तथा जननीं प्राह स च बाष्पाविलेक्षणाम्॥७९॥अश्वत्थफलनिर्यासपानात्प्राणा मया धृताः ॥ गौणं तदा तया तस्य पिप्पलादेति कल्पि
तम् ॥८०॥ नाम तेन जगत्यस्मिन्नित्यं ख्यातं महात्मनः ॥ तत्रस्थैर्मुनिभिस्तस्य कृताः सर्वैर्यथाक्रमम् ॥८१॥ संस्काराः पिप्पलादस्य वेदोक्ता वेद
पारगैः॥षडंगोपांगसंयुक्ता वेदास्तेन [1]समुद्धृताः ॥ तदाश्रमनिवासिभ्यो मुनिभ्यश्च सुपुष्कलाः ॥८२॥ पुनस्तत्र स्थितश्चासौ दृष्ट्वा मुनिकुमारकान्॥
स्वपित्रंकगतान्प्राह जननीं तां शुचिस्मिताम् ॥८३॥ पिता मे कुत्र भद्रं ते सुभद्रे कथय स्फुटम् ॥ तदंकांतस्थितो येन बालक्रीडां करोम्यहम् ॥
॥ ८४ ॥ एवं सा जननी तेन यदा पृष्टा तपस्विनी ॥ तदा रोदितुमारब्धा नोत्तरं किञ्चिदब्रवीत् ॥ ८५ ॥ रुदन्तीं तां समालोक्य क्रुद्धोऽसौ
मुनिदारकः ॥ किमसौ कुत्सितः कश्चिद्येन नाख्यासि तं मम ॥ ८६ ॥ इत्युक्ते सुतमाहैवं विबुधैस्ते पिता हतः ॥ कोपं त्यजस्व भद्रं ते दधीचिः
कथितो मया ॥८७॥ कोपवह्निप्रदीप्तात्मा प्राह तां जननीं पुनः ॥ किमपकृतं सुराणां मत्पित्रा कथयस्व तत् ॥८८॥ ॥ सुभद्रोवाच ॥ ॥ शस्त्राणां
कारणान्मूढैर्हतोऽसौ मुनिपुंगवः ॥ प्रयच्छन्नपि चान्यानि तदाकाराणि सुव्रत ॥ ८९ ॥ श्रुत्वैतद्वचनं सोऽपि मुनिरुग्रतपास्तदा ॥ पिता मे यो
हतो देवैस्तेषां कृत्यां महाबलाम् ॥ ९० ॥ उत्थाप्य पातयिष्यामि मूर्ध्नि प्राणापहारिकाम् ॥ पितामहमहं मुक्त्वा नैव हन्यो भवेद्यदि ॥ ९१ ॥
अन्यान्प्रमथयिष्यामि कृत्याशस्त्रेण संगतान् ॥ शरणं यदि यास्यंति गीर्वाणा मद्भयातुराः ॥ तथापि पातयिष्यामि तेनैव सह संगतान् ॥ ९२ ॥
मत्त्वैवं तमृषिं क्रुद्धं सर्वे ते सुरसत्तमाः ॥ ब्रह्माणं शरणं प्राप्ता भयेन महताऽर्दिताः ॥ ९३ ॥ तांस्तस्य शरणं प्राप्ताञ्ज्ञात्वा देवः कृपान्वितः ॥ 
तत्रैव गत्वा त्वरितं प्राह देवाञ्जनार्दनः ॥ ९४ ॥ भवतां रक्षणोपायश्चिंतितोऽत्र मयाऽधुना ॥ तेन तां मोहयिष्यामि कृत्यां हंतुमुपस्थिताम् ॥९५॥

[1] समुद्धृताः—अधीताः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रांतरे पिप्पलादः पितुर्वैरमनुस्मरन् ॥ हंतुं सुरान्व्यवसितः प्रविवेश हिमाचलम् ॥ ९६ ॥ श्रुत्वा तदप्रियं वाक्यं मातुर्वक्राद्विनिर्गतम् ॥ पिप्पलादः पुनर्यातस्तस्मात्स्थानाद्धिमाचलम् ॥ ९७ ॥ स्वर्गसोपानवत्पुंसां स्थलीभूतमिवांबरम् ॥ शेषस्याभोगसंकाशं प्राप्तोऽसौ तुहिनाचलम् ॥ ९८ ॥ प्रतिज्ञां कुरुते यत्र[1] स्थितः स्थाणुरिवाचलः ॥ हंतारो ये मम पितुस्तान्हनिष्यामि चारणात् ॥ ९९ ॥ कृत्याशस्त्रेण सकलानमरत्वेन गर्वितान्[2] ॥ तस्मिन्स्थितः प्रकुपितः शिवायतनसंसदि ॥ १०० ॥ अत्रस्थः साधयिष्यामि तां कृत्यां चिंतयन्हृदि ॥ कृत्यां वा साधयिष्यामि यास्ये वा यमसादनम् ॥ १०१ ॥ निर्द्वन्द्वो निर्भयो भूत्वा निराहारो ह्यहर्निशम् ॥ सव्येन पाणिना सव्यं निर्मथ्योरुमहं पुनः ॥ १०२ ॥ तस्मादुत्पादयिष्यामि महाकृत्यामिति स्थितः ॥ संवत्सरे तस्य गते ऊरुगात्राद्विनिःसृता ॥ १०३ ॥ वडवा गुरुभारार्त्ता वाडवेनान्विता तदा ॥ ऊरोर्निर्गत्य सा तस्मात्सुषुवे सुमहाबलम् ॥१०४॥ वडवा स्वोदराद्गर्भं ज्वालामालासमाकुलम् ॥ विमुच्य तमृषेस्तस्य पुरो गर्भं समुज्ज्वलम् ॥१०५॥ पुनर्गता क्वापि तदा न ज्ञाता मुनिना हि सा ॥ वडवानलो नरस्तस्याः स गर्भो निःसृतस्तदा ॥१०६॥ कल्पांत इव भूतानां कालाग्निरिव वर्चसा ॥ विद्युत्पुञ्जप्रतीकाशं तं दृष्ट्वा पुरतः स्थितम् ॥ १०७ ॥ स चापि विस्मितोऽत्यंतं किमेतदिति चिंतयन् ॥ ततस्तेन पुरःस्थेन वाडवेन च वह्निना ॥ ॥ १०८ ॥ ऋषिः प्रोक्तः पिप्पलादः साधितोऽहं त्वया बलात् ॥ इदानीं ते मया कार्यं कर्त्तव्यं यत्समाहितम् ॥ १०९ ॥ करिष्यामीह तत्सर्वमसाध्यमपि साध्यताम् ॥ स्वोरुं निर्मथ्य जनितो येन संवत्सरादहम् ॥ तातोरुणा विहीनोऽपि करिष्ये त्वत्समीहितम् ॥ ११० ॥ तच्छ्रुत्वा वचनं तस्य मुनिः कोपसमन्वितः ॥ प्रोवाच विबुधान्सर्वान्मद्दत्तान्भक्षय स्वयम् ॥ १११ ॥ पितुर्वधात्क्रोधकृतावधानं मत्वा सुरा रौद्रमतीव घोरम् ॥ समेत्य सर्वे पुरुषं पुराणं समाश्रितास्ते सहसा सभार्याः ॥ ११२ ॥ स तान्समाश्वास्य सुरान्वरिष्ठं कोपानलं तत्र ययौ प्रहृष्टः ॥ दृष्ट्वा च तं वै रविपुंजकाशमुवाच विष्णुर्वचनं वरिष्ठम् ॥ ११३ ॥ अहं सुरेशान तवैव पार्श्वं विसर्जितो जातभयैश्च देवैः ॥ मत्तः शृणु त्वं वचनं हि पथ्यं यच्चारणानां भवतोऽपि पथ्यम् ॥ ११४ ॥ ज्ञातं बलं ते विबुधैरचिंत्यं विनाशनं चात्मवतां ह्यवश्यम्[3] ॥ एवं स्थिते कुरु वाक्यं सुराणामेकैकमद्धि प्रतिवासरं त्वम् ॥ ११५ ॥ मुख्यानां कोटयस्त्रिंशत्सुराणां बलशालिनाम् ॥ कथं तु भक्षणं तेषां युगपत्त्वं करिष्यसि ॥ ११६ ॥ तस्मादेकैकशस्तेषां कर्त्तव्यं भक्षणं त्वया ॥ नैकेन भवता शक्या विधातुं भक्षणक्रिया ॥ ११७ ॥

१ तत्र—इ० पा० । २ मदेन स्वेन गर्वितान्—इ० पा० । ३ भयनाशनार्थम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तथा च पांडुरोगित्वं हुतभुक्प्राप्तवान्पुरा ॥ अतिभक्षणं न युक्तं तस्मात्कुरु मतिं मम ॥ ११८ ॥ तथा च युगपत्तेषु भक्षितेषु पुनस्त्वया ॥
प्रत्यहं भक्षणोपायश्चिंतितव्यो बुभुक्षया ॥ ११९ ॥ सफलैव प्रतिज्ञा ते नानृतं मुनिभाषितम् ॥ एवं कृतेऽपि ते सर्वं भविष्यति समीहितम् ॥१२०॥
तत्करिष्याम्यहं सर्वमाहैवं स जनार्दनः ॥ एकैकशः स विबुधान्भक्षयिष्यति वाडवः ॥ १२१ ॥ ततः सुराः सुरेशानं तं विष्णुममितौजसम् ॥
प्रणम्याहुर्यथायुक्तं शोभनं भवता कृतम् ॥ १२२ ॥ भूयोऽद्य पुनरेवास्य दोषस्योपशमक्रियाम् ॥ कर्तुं त्वमेव शक्तोऽसि नान्यस्त्राता दिवौक
साम् ॥ १२३ ॥ ततः पीतांबरधरः शंखचक्रगदाधरः ॥ युष्मद्भयं हरिष्यामि तान्सुरानाह माधवः ॥ १२४ ॥ श्रुत्वैतद्विबुधाः सर्वे हर्षेणोत्फुल्ल
लोचनाः ॥ १२५ ॥ ततस्तान्विबुधान्दृष्ट्वा प्रोवाच स तु वाडवः ॥ किमिदानीं मया कार्यं भवतां कथ्यतां हि तत् ॥ १२६ ॥ अत्रान्तरे विश्व
तनुर्महौजा विमोहयंस्तं ज्वलनं स्वबुद्ध्या ॥ प्रोवाच पूर्वं विहिता यदापस्ता भक्षयस्वेति महानुभावः ॥ १२७ ॥ एतद्व्यवसितं विष्णोर्यः शृणोति
समाहितः ॥ सोऽतिचारभयान्मुक्तो ज्ञानं मुक्तिमवाप्नुयात् ॥ १२८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे
प्रथमे प्रभासक्षेत्रमाहात्म्ये वडवानलवंचनवृत्तान्तवर्णनंनाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥ छ ॥ ॥ देव्युवाच ॥ ॥ पितुर्वधामर्षसुजात
मन्युना यद्यत्कृतं कर्म पुरा महर्षिणा ॥ दधीचिपुत्रेण सुरप्रसाधिना सर्वं श्रुतं तद्धि मया समाधिना ॥ १ ॥ पुनःपुनर्नैर्विबुधैः समानं यद्वृत्तमासी
त्किमपि प्रधानम् ॥ कार्यं हि तत्सर्वमनुक्रमेण विज्ञातुमिच्छामि कुतूहलेन ॥ २ ॥ ॥ ईश्वर उवाच ॥ ॥ उक्तो यदासौ विबुधैः समस्तै
रापः पुरा त्वं भुवि भक्षयस्व ॥ यतोऽमराणां प्रथमं हि जाता आपोऽग्रजाः सर्वसुरासुरेभ्यः ॥ ३ ॥ तेनैवमुक्तस्तु महात्मना तदा प्रदर्शयध्वं मम
ता यतः स्थिताः ॥ पीत्वा सुराः सर्वमहं पुरस्तात्कृत्यं करिष्ये सुरभक्षणं हि ॥ ४ ॥ तत्रापि नेतुं यदि मां समर्था यत्रासते वारिचयाः समेताः ॥
अतोऽन्यथा नाहमलीकवादी प्राणे प्रयाते मुनिवाक्यकारी ॥ ५ ॥ आहोक्ते पुंडरीकाक्ष और्व हि वाडवं तदा ॥ त्वां प्रापयिष्ये यत्रापः केन या
नेन वाडव ॥ ६ ॥ ॥ वाडव उवाच ॥ ॥ नाहं हयादिभिर्यानैर्गंतुं तत्र समुत्सहे ॥ कुमारीकरसंपर्कमेकं मुक्त्वा मतं हि मे ॥ ७ ॥ ॥ विष्णु
रुवाच ॥ ॥ एतत्ते सुलभं यानं तां कन्यामानयाम्यहम् ॥ या त्वां नेतुं समर्था स्यादपां स्थानं सुनिश्चितम् ॥ ८ ॥ ॥ ईश्वर उवाच ॥ ॥

१ बभूवुरिति क्रियापदमध्याहार्यम् । २ समाधिना—चित्तैकाग्र्येण—इत्यर्थः । ३ पुनः पुनर्दा इ०, पुनः पुनर्धा—इ० च पा० । ४ विबुधैः समस्तैः सह—विष्णुना—इति शेषः तेनेत्यग्रिमश्लोक उक्तेः । ५ पुरस्तात्—प्रथमम्—इत्यर्थः । ६ उक्ते एवमुक्ते सति पुंडरीकाक्षः आह—इति योजना ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुरभीशापसंतप्ता प्रागुपात्तदशाफला ॥ सरस्वती यानभूता तस्य सा विष्णुना कृता ॥ ९ ॥ ततोऽब्रवीद्विभुर्गंगां पार्श्वतः समुपस्थिताम् ॥ एनं वह्निं महाभागे वेगान्नय महोदधिम् ॥ नान्या शक्ता समानेतुं त्वां विना लोकपावनि ॥ १० ॥ ॥ गङ्गोवाच ॥ ॥ नास्ति मे भगवञ्छक्ति रौर्वं वोढुं जगत्पते ॥ रौद्ररूपी महानेष दहत्येवानलो भृशम् ॥ ११ ॥ ततस्तु यमुनां प्राह सिन्धुं तस्या ह्यनन्तरम् ॥ अन्या नदीश्च विविधाः पृथक्पृथगुदारधीः ॥ १२ ॥ अशक्तास्ताः समानेतुं पृष्टाश्च सुरसत्तमैः ॥ ततः सरस्वतीं प्राह देवदेवो जनार्दनः ॥ त्वमेव व्रज कल्याणि प्रतीच्यां लवणोदधौ ॥ १३ ॥ एवं कृते सुराः सर्वे भविष्यन्ति भयोज्झिताः ॥ अन्यथा वाडवेनैते दह्यंते स्वेन तेजसा ॥ १४ ॥ तस्मात्त्वं रक्ष विबुधाने तस्मात्तुमुलाद्भयात् ॥ मातेव भव सुश्रोणि सुराणामभयप्रदा ॥ १५ ॥ एवमुक्ता हि सा तेन विष्णुना प्रभविष्णुना ॥ आह नाहं स्वतन्त्रास्मि पिता मे ध्रि[1]यते चिरात् ॥ १६ ॥ तस्याहं कारिणी नित्यं कुमारी च धृतव्रता ॥ कालत्रयेप्यस्वतन्त्रा श्रूयते विबुधैः सुता ॥ १७ ॥ पित्रादेशं विना नाहं पदमेकमपि क्वचित् ॥ गच्छामि तस्मात्कोऽप्यन्य उपायश्चिंत्यतां हरे ॥ १८ ॥ तत्स्व[2]रूपं विदित्वैवं समभ्येत्य पितामहम् ॥ तमब्र वीद्वासुदेवो देवकार्यमिदं कुरु ॥ १९ ॥ नान्यथा शक्यते नेतुं वाडवोऽग्निर्महाबलः ॥ अदृष्टदोषां मुक्त्वेमां कुमारीं तनयां तव ॥ २० ॥ तच्छ्रुत्वा विष्णुना प्रोक्तं कुमारीं तनयां तदा ॥ शिरस्याघ्राय सस्नेहमुवाच प्रपितामहः ॥ २१ ॥ याहि देवि सुरान्सर्वान्रक्ष त्वं भयमागतान् ॥ विनिक्षिप त्वं नीत्वैनं वाडवं लवणांभसि ॥ पितुर्वाक्यं हि सा श्रुत्वा प्रोवाच श्रुतिलक्षणा ॥२२॥ ॥ सरस्वत्युवाच ॥ ॥ एषास्मि प्रस्थिता ता[3]त तव वाक्यादसंशयम् ॥ रौद्रोऽयं वाडवो वह्निस्तनुं मे भक्षयिष्यति ॥ २३ ॥ प्राप्तं कलियुगं रौद्रं सांप्रतं पृथिवीतले ॥ लोकः पापसमाचारःस्पर्शयिष्यति मां प्रभो ॥२४॥ ततो दुःखतरं किं स्याद्यत्पापैः सह संगमः॥२५॥ ॥ ब्रह्मोवाच ॥ ॥ यदि पापजनाकीर्णं न वांछसि धरातलम् ॥ पातालतलसंस्था त्वं नय वह्निं महोदधौ ॥ २६ ॥ यदातिश्रमसंयुक्ता वह्निना दह्यसे भृशम् ॥ तदा विभिद्य वसुधां प्रत्यक्षा भव पुत्रिके ॥२७॥ कृत्वा वक्रं विशालाक्षि प्राची भव सुमध्यमे ॥ ततो यास्यंति तीर्थानि त्वां श्रांतां चारुहासिनीम् ॥२८॥ तानि सर्वाणि चागत्य साहाय्यं ते वरानने ॥ करिष्यंति त्रयस्त्रिंशत्कोट्यो वै मम शासनात् ॥ २९ ॥ गच्छ पुत्रि न संतापस्त्वया कार्यः कथंचन ॥ अरिष्टं व्रज पंथानं मा सन्तु परिपंथिनः ॥ ३० ॥ ॥ ईश्वर उवाच ॥ ॥ एवमुक्ता तदा तेन ब्रह्मणाथ सरस्वती ॥ त्यक्त्वा भयं हृष्टमनाः प्रयातुं समुपस्थिता ॥ ३१ ॥ तस्याः प्रयाणसमये शंखदुंदुभिनिः

१ ध्रियते—अवतिष्ठते—इत्यर्थः । धृङ् अवस्थाने इत्यस्य धातो रूपमिदम् । २ तत्स्वरूपम्—तस्याः सरस्वत्या वाक्यस्वरूपम् । ३ देव—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

स्वनैः ॥ मंगलानां च निर्घोषैर्जगदापूरितं शुभैः ॥ ३२ ॥ सितांबरधरा देवी सितचंदनगुंठिता ॥ शारदांबुदसंकाशा तारहारविभूषिता ॥ ३३ ॥ संपूर्णचंद्रवदना पद्मपत्रायतेक्षणा ॥ कीर्तिर्यथा महेंद्रस्य पूरयन्ती दिशो दश ॥ ३४ ॥ स्वतेजसा द्योतयंती सर्वमाभासयज्जगत् ॥ अनुव्रजंती गंगा वै तयोक्ता वरवर्णिनि ॥ ३५ ॥ द्रक्ष्यामि त्वां पुनरहं कुत्र वै वसतीं सखि ॥ एवमुक्ता तया गंगा प्रोवाच स्निग्धया गिरा ॥ ३६ ॥ यदैव वीक्षसे प्राचीदिशि प्राप्स्यसि मां तदा ॥ सुरैः परिवृता सर्वैस्तत्राहं तव सुव्रते ॥ ३७ ॥ दर्शनं संप्रदास्यामि त्यज शोकं शुचिस्मिते ॥ तामा पृच्छ्य ततो गंगां पुनर्दर्शनमस्तु ते ॥ ३८ ॥ गच्छ स्वमालयं भद्रे स्मर्त्तव्याऽहं त्वयाऽनघे ॥ यमुनापि तथा चैवं गायत्री सुमनोरमा ॥ ३९ ॥ सावित्रीसहिताः सर्वाः सख्यः संप्रेषितास्तदा ॥ ततो विसृज्य तां देवी नदी भूत्वा सरस्वती ॥ ४० ॥ हिमवंतं गिरिं प्राप्य प्लक्षात्तत्र विनिर्गता ॥ अवतीर्णा धरापृष्ठे मत्स्यकच्छपसंकुला ॥ ४१ ॥ ग्राहडिंडिमसंपूर्णा तिमिनक्रगणैर्युता ॥ हसंती च महादेवी फेनौघैः सर्वतो दिशम् ॥४२॥ पुण्यतोयवहा देवी स्तूयमाना द्विजातिभिः ॥ वाडवं वह्निमादाय हयवेगेन निःसृता ॥ ४३ ॥ भित्त्वा वेगाद्धरापृष्ठं प्रविष्टाथ महीतलम् ॥ यदा यदाभवच्छ्रांता दह्यते वाडवाग्निना ॥ तदातदा मर्त्यलोके याति प्रत्यक्षतां नदी ॥ ४४ ॥ ततस्तु जायते प्राची संतप्ता वाडवेन तु ॥ ततो वै यानि तीर्थानि कीर्त्तितानि पुरातनैः ॥ ४५ ॥ दिव्यांतरिक्षभौमानि सांनिध्यं यांति भामिनि ॥ ततश्चाश्वासिता तैः सा सरस्वती पुनर्नदी ॥ पातालतलमासाद्य जगाम मकरालयम् ॥ ४६ ॥ खदिरामोदमासाद्य तत्र सा वीक्ष्य सागरम् ॥ गंतुं प्रवृत्ता तं वह्निमादाय सुरसुंदरि ॥४७॥ निरूढभारमात्मानं देवादेशाद्विचिंत्य सा ॥ प्रहृष्टा सुमनास्तस्मात्प्रवृत्ता दक्षिणामुखी ॥ ४८ ॥ एतस्मिन्नेव काले तु ऋषयो वेदपारगाः ॥ चत्वारश्च महादेवि प्रभासं क्षेत्रमाश्रिताः ॥ ४९ ॥ हरिणश्चाथ वज्रश्च न्यंकुः कपिल एव च ॥ तपस्तप्यंति तत्रस्थाः स्वाध्यायासक्तमानसाः ॥ ५० ॥ पृथक्पृथक्समाहूताः स्नानार्थं तैः सरस्वती ॥ सागरः सम्मुखस्तस्याः सहसा सम्मुपस्थितः ॥ ५१ ॥ ततः सा चिन्तयामास कथं मे सुकृतं भवेत् ॥ शापभीता च सा साध्वी पंचस्रोतास्तदाऽभवत् ॥ ५२ ॥ एकैकं तोषयामास तमृषिं वरवर्णिनि ॥ ततोऽस्याः पंच नामानि जातानि पृथिवीतले ॥ ५३ ॥ हरिणी वज्रिणी न्यंकुः कपिला च सरस्वती ॥ पानावगाहनान्नृणां पंचस्रोताः सरस्वती ॥ ५४ ॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः ॥ एषां संयोगजं चान्यन्नराणां पंचमं हि यत् ॥ ५५ ॥ एतत्पंचविधं पुंसां पंचधाऽवस्थिता सती ॥ नाशयेत्पातकं घोरं सखीभिः सहिता नदी ॥ ५६ ॥ 

१ असौ—इ० पा० । २ आगताः—इ० पा० । ३ हिरण्यश्च—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्महत्यां महाघोरां प्रतिलोमा सरस्वती ॥ पानावगाहनान्नृणां नाशयत्यखिलं हि सा ॥ ५७ ॥ प्रमादान्मदिरापानदोषेणोपहतात्मनाम् ॥ तद्व्यपोहाय कपिला द्विजानां वहते नदी ॥ ५८ ॥ उपवासाज्जपाद्धोमात्स्नानात्पानाद्द्विजन्मनाम् ॥ सप्ताहान्नाशयेत्पापं तत्तद्भावेन चेतसा॥५९॥ स्वयं तेऽपि विशुध्यंति यथोक्तविधिकारिणः ॥ न्यंकुं नदीं समासाद्य महतः पातकात्कृतात् ॥ ६० ॥ स्नानोपासनपानेन वज्रिणी गुरुतल्पगम् ॥ नाशयत्यखिलं पुंसां पापं भूरिभयंकरम् ॥ ६१ ॥ संयोगजस्य पापस्य हरणाद्धारिणी स्मृता ॥ नदी पुण्यजलोपेता सप्ताहमवगाहनात् ॥ ६२ ॥ एवमेतानि पापानि सर्वाणि सुरसुंदरि ॥ नदी नाशयते तथ्यं पंचस्रोता सरस्वती ॥ ६३ ॥ ततोऽपश्यत्पुनश्चारुं सा देवी पथि संस्थितम् ॥ पर्वतं सागरस्यांते रोद्धुं मार्गमिव स्थितम् ॥ ६४ ॥ ब्रह्माण्डमानदण्डोऽयं पुरतो गिरिसत्तमः ॥ व्रजन्त्याः सुरकार्येण मम विघ्नकरः स्थितः ॥ ॥ ६५ ॥ उच्चैस्तरं महाशैलमवलोक्य सरस्वती ॥ अथ वेगेन रुद्धेन गिरिणा विस्मिता सती ॥ ६६ ॥ एवं संचिन्तयेद्यावन्मनसा तन्म हाद्भुतम् ॥ तावन्मंगलशब्देन प्रतिबुद्धः कृतस्मरः ॥ ६७ ॥ गिरिशृंगद्वंद्वचरं ददर्श पुरुषं च सा ॥ तामाह देवीं स नगो मार्गो नास्तीह सुव्रते ॥ ६८ ॥ अन्यत्र क्वापि गच्छ त्वं यत्र तेऽभिमतं शुभे ॥ आहैवमुक्ते सा देवी नरं नगशिरःस्थितम् ॥ ६९ ॥ देवादेशात्समायाता न निरोध्या[१] गिरे त्वया ॥ एवमुक्ते गिरिः प्राह तां देवीं सुमनोरमाम् ॥ ७० ॥ पर्वतोऽहं त्वया भद्रे किं न ज्ञातः कृतस्मरः ॥ त्वत्स्पर्शनान्न दोषोस्ति कुमारी त्वं यतोऽनघे ॥ ७१ ॥ अतस्त्वां वरये देवि भार्या मे भव सुव्रते ॥ ७२ ॥ ॥ सरस्वत्युवाच ॥ ॥ पिता मे ध्रियते यस्मात्तेन नाहं स्वयंवरा ॥ तव भार्या भविष्यामि मार्गं यच्छ ममाधुना ॥ ७३ ॥ एवमुक्तो गिरिः प्राह अनिच्छंतीं महाबलात् ॥ उद्वाहयिष्ये त्वां भद्रे कस्त्राता स्ति तवाधुना ॥ ७४ ॥ सा तं मनोभवाक्रान्तं[२] मत्वा दिव्येन चक्षुषा ॥ आह नास्ति मम त्राता त्वामेव शरणं गता ॥ ७५ ॥ त्वयोद्वाह्या यद्य वश्यमहमेवं महाबल ॥ अस्नातां नोद्वह विभो स्नानं कर्तुं च देहि मे ॥ ७६ ॥ तामुवाच ततः शैलः स्वसंपदभिमानवान् ॥ सौख्यदं पश्य सुभगे मयि संपूर्णवैभवम् ॥ ७७ ॥ द्वंद्वानि यत्र गायंति किंनराणां मनोरमम् ॥ श्रूयते च मुनिध्वानं तंत्रीवाद्यमथापरम् ॥ ७८ ॥ तत्र तालास्तमालाश्च पिप्पलाः पनसास्तथा ॥ सदैव फलपुष्पाढ्या दृश्यंते सुमनोरमाः ॥७९॥ कुटजैः कोविदारैश्च कदंबैः कुरबैस्तथा ॥ मत्तालिकुलघुष्टैश्च भूधरो भाति सर्वतः ॥ ८० ॥ हरांगरागवद्भाति[३] क्वचित्कुटजकुड्मलैः ॥ क्वचित्तु कर्णिकारैश्च विष्णोर्वासःसमप्रभः ॥ ८१ ॥ तमालदलसंछन्नः क्वचिद्वैवस्वतद्युतिः॥

१ निषेध्या—इ० पा० । २ मनोभवाक्रान्तम्—कामाकुलम्—इत्यर्थः । ३ हरांगरागवत्—भस्मवत्—शुभ्रप्रभः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





क्वचिद्धातुविलिप्तांगो गणाध्यक्षवपुर्नगः ॥ ८२ ॥ चतुर्मुख इवाभाति हरितालवपुः क्वचित् ॥ क्वचित्सतच्छदैर्विष्णोर्वपुषा भात्ययं गिरिः॥ ८३ ॥
क्वचित्कात्यायनीप्रख्यः प्रियंगुसुसमाकुलः ॥ क्वचित्केसरसंयुक्तैरनलाभो विभात्यसौ ॥ ८४ ॥ वृत्तैः सपुलकैः स्निग्धैः स्त्रीणामिव पयोधरैः ॥
दुष्प्राप्यैरल्पपुण्यानां क्वचिदाभाति बिल्वकैः ॥ ८५ ॥ सिंहैर्व्याघ्रैर्मृगैर्नागैर्वराहैर्वानरैस्तथा ॥ क्वचित्क्वचिदसौ भाति परस्परमनुव्रतैः ॥ ८६ ॥
शूलिकोद्भिन्नमाकाशमिव कुर्वद्भिरुच्चकैः ॥ एवमुक्ते प्रत्युवाच शारदा तं नगोत्तमम् ॥ ८७ ॥ यदि मां त्वं परिणये रुदंतीमेकिकां तथा ॥ गृहाण
वाडवं हस्ते यावत्स्नानं करोम्यहम् ॥ ८८ ॥ एवमुक्ते स जग्राह तं नगेंद्रोऽपवर्जितम् ॥ कृतस्मरस्तत्संस्पर्शात्क्षणाद्भस्मत्वमागतः ॥ ८९ ॥ ततः
प्रभृति ते तस्य पाषाणा मृदुतां गताः ॥ गृहदेवकुलार्थाय गृह्यंते शिल्पिभिः सह ॥ ९० ॥ दग्ध्वा कृतस्मरं देवी पुनरादाय वाडवम् ॥ समुद्रस्य
समीपे सा स्थिता हृष्टतनूरुहा ॥ ९१ ॥ तत्रस्था सा महादेवी तमाह वडवानलम् ॥ पश्य वाडव गर्जन्तं सागरं पुरतः स्थितम् ॥ ९२ ॥ गर्जंतं
सोऽपि तं दृष्ट्वा प्रसर्पंतं च वीचिभिः ॥ तामाह किमिदं भद्रे भीतो मे लवणोदधिः ॥ ९३ ॥ प्रहस्योवाच सा बाला को न भीतस्तवानल ॥
भक्ष्यस्ते विहितो यस्मात्तव देवैर्महाबल ॥ ९४ ॥ स तस्यास्तद्वचः श्रुत्वा संप्रहृष्टस्तु पावकः ॥ दास्यामि ते वरं भद्रे यथेष्टं प्रार्थयस्व नः ॥९५॥
तेनैवमुक्ता सा देवी वाडवेनाग्निना तदा ॥ सस्मार कारणात्मानं विष्णुं कमललोचनम् ॥ ९६ ॥ दृष्टोसावात्महृत्संस्थस्तया देवो जनार्दनः ॥
स्मृतमात्रः सरस्वत्या परस्त्रिभुवनेश्वरः ॥९७॥ मनोदृष्ट्या विलोक्याह सा तमंतःस्थमच्युतम् ॥ वाडवो यच्छति वरमहं तं प्रार्थयामि किम्॥९८॥
ततस्तेन हृदिस्थेन प्रोक्ता देवी सरस्वती ॥ प्रार्थनीयो वरो भद्रे सूचीवक्त्रत्वमादरात् ॥ ९९ ॥ ततस्त्वभिहितो देव्या यदि मे त्वं वरप्रदः ॥ ततः
सूचीमुखो भूत्वा त्वं पिबापो महाबल ॥ १०० ॥ एवमुक्तेन तत्तेन सूचीवेधसमं कृतम् ॥ घटिकापूरणं यद्वत्पपौ तद्वदनं जलम् ॥ १०१ ॥ एवं स
वाडवो वह्निः सुराणां भक्षणोद्यतः ॥ वंचितो विष्णुना याति मेधामाधाय यत्नतः ॥ १०२ ॥ सर्गमेतं नरः पुण्यं वाच्यमानं शृणोति यः ॥ स विष्णु



१ अत्र—वृक्षैः—इति विशेष्यमध्याहार्यम् । २ वनदाभः—इ० पा० । ३ अपवार्जितम्—तया दत्तम्—इत्यर्थः । ४ गृहदेवकुलार्थाय—गृहदेवमन्दिरनिर्माणार्थम्—इत्यर्थः । ५ तत्—मुखम्—इत्यर्थः ।
६ घटिकापूरणं यद्वत्—समयमापकताम्रमयघटिकापात्रस्य पूरणाय यथातिसूक्ष्मं छिद्रं क्रियते तद्वत्तेन वाडवेन कृतमतिसूक्ष्मतमच्छिद्रवन्मुखम्—इत्यर्थः । ७ वदनम्—इह कर्तृपदम् । ८ याति—तत्क्षेत्रम्—इति शेषः ।
९ सर्गम्—अध्यायम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकमासाद्य तेनैव सह मोदते ॥१०३॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये सर
स्वतीवृत्तांतवडवानलवंचनवर्णनंनाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ सरस्वती वरं प्राप्य वरिष्ठं वडवानलात् ॥ पुनस्तं
सागरे क्षेप्तुमुद्यता सा मनस्विनी ॥ १ ॥ देवादेशात्प्रभासस्य पुरतः संस्थिता तदा ॥ समुद्रमाहूय तदा वाडवार्पणकांक्षिणी ॥ २ ॥ त्वमादिः
सर्वदेवानां त्वं प्राणः प्राणिनां सदा ॥ देवादेशाद्गृहाण त्वमागत्यार्णव वाडवम् ॥ ३ ॥ एवं संचिंतितो देव्या यदासावंभसांपतिः ॥ तथा जलात्समु
त्तीर्य समायातो महाद्युतिः ॥ ४ ॥ तं दृष्ट्वा विस्मिता देवी दिव्यं विष्णुमिवापरम् ॥ श्यामं कमलपत्राक्षं सागरं सुमनोरमम् ॥ ५ ॥ विचित्रमा
ल्याभरणं चित्रवस्त्रानुलेपनम् ॥ आपगाभिः सरूपाभिः स्त्रीरूपाभिः समावृतम् ॥ ६ ॥ एवंविधं समालोक्य सा देवी ब्रह्मणः सुता ॥ सरस्वती
जलनिधिमुवाचेदं शुचिस्मिता ॥ ७ ॥ त्वमग्रजः सर्वभवोद्भवानां त्वं जीवितं जन्मवतां नराणाम् ॥ तस्मात्सुराणां कुरु कार्यमिष्टं वह्निं
गृहाण त्वमिहोपनीतम् ॥ ८ ॥ अत्रांतरे सोऽपि विमृश्य सर्वं कार्यं स्वबुद्ध्या किमिहोपपन्नम् ॥ कृत्वाऽनलस्य ग्रहणं मयेदं
कार्यं सुराणां विहितं भवेच्च ॥ ९ ॥ एवं चिंतयतस्तस्य ग्रहणं रुचितं ततः ॥ वाडवाग्नेः समुद्रस्य सुरपीडाकृते यदा ॥ १० ॥
तदा तेन पुरःस्थेन देवी साभिहिता भृशम् ॥ वाडवं संप्रयच्छैनं सुरशत्रुं सरस्वति ॥ ११ ॥ ततस्तया प्रणम्याशु पितामहपुरःसरान् ॥
चारणांश्चारुचित्रांग्या सरस्वत्या दिवि स्थितान् ॥ १२ ॥ पुनश्च करसंस्थोऽसौ वाडवोऽभिहितस्तया ॥ त्वमपो भक्षयस्वेति सुरैरुक्त
इमा इति ॥ १३ ॥ एवमुक्त्वा समुद्रस्य तदा देव्या समर्पितः ॥ वाडवोऽग्निः सरस्वत्या सुरादेशान्महाबलः ॥ १४ ॥ तं समर्प्य ततस्तस्मि
न्नदीभूत्वा सरस्वती ॥ प्रविष्टा सागरं देवी नारदेश्वरमार्गतः ॥ १५ ॥ दैत्यसूदनसांनिध्ये दत्त्वार्घ्यं लवणांभसि ॥ अर्घ्येश्वरं प्रतिष्ठाप्य दैत्यसूदन
पश्चिमे ॥ १६ ॥ ततोऽब्धिं संप्रविष्टा सा पंचस्रोता महानदी ॥ स्वरूपेणैव सा पुण्या पुनः पुण्यतमाऽभवत् ॥ १७ ॥ प्रभासक्षेत्रसंपर्कात्समुद्रस्य
च संगमात् ॥ सागरोऽपि समासाद्य सरस्वत्यास्तु वाडवम् ॥ निर्धनो व[1] धनं प्राप्याचिन्तयत्क्व क्षिपाम्यहम् ॥ १८ ॥ स तेनैव करस्थेन दीप्य
मानेन सागरः ॥ वह्निना शिखरस्थेन भाति मेरुरिवापरः ॥ १९ ॥ तं तथाविधमालोक्य तत्र ये जलचारिणः ॥ यादोगणास्ते मुमुचुर्दाहभीता
महास्वनम् ॥ २० ॥ तं श्रुत्वा भैरवं शब्दमायातो दैत्यसूदनः ॥ आह यादोगणान्सर्वान्मा भैष्ट सुमहाबलाः ॥ २१ ॥ यस्मादनेन प्रथमा आपो

१ निर्धनो व धनं प्राप्य—अत्र इवार्थे वशब्दः । यथा निर्धनो धनं प्राप्य चिन्तयति—अहमेतद्धनं क्व क्षिपामि—स्थापयामि—तथाब्धिस्तं वाडवं प्राप्य अहमेनं क्व क्षिपामि—इत्यचिन्तयत्—इति—पूर्णोपमेयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





भक्ष्या न तत्रगाः ॥ प्राणिनस्तन्न भेतव्यं भवद्भिस्तु ममाज्ञया ॥ २२ ॥ एवमुक्तस्तु कृष्णेन तूष्णींभूता जलेचराः ॥ २३ ॥ तूष्णींभूतेषु सर्वेषु
जलजेषु जलेश्वरम् ॥ प्राहाच्युतः प्रक्षिप त्वमपां मध्ये तु वाडवम् ॥ २४ ॥ अगाधेम्भसि तेनासौ निक्षिप्तो वाडवोऽनलः ॥ वरुणेन पिबन्नास्ते
तज्जलं सुमहाबलः ॥ २५ ॥ तस्योच्छ्वासानिलोद्भूतं तत्तोयं सागराद्बहिः ॥ निर्मर्यादेव युवतिरितश्चेतश्च धावति ॥ २६ ॥ अथ काले गते देवि
शुष्यत्यंबु शनैःशनैः ॥ विदित्वा क्षीयमाणास्ता अपो जलनिधिस्ततः ॥ २७ ॥ आहैवं पुंडरीकाक्षमपः कुरु त्वमक्षयाः ॥ अन्यथा सर्वनाशेन
जलानां मामिहाग्रतः ॥ भक्षयिष्यत्यसौ वह्निर्वाडवो हि जनार्दन ॥ २८ ॥ एतच्छ्रुत्वा वचस्तस्य समुद्रस्य तु भीषणम् ॥ कृतं तदक्षयं[1] तोयमा
त्मनो भयनाशनम् ॥ २९ ॥ ज्ञात्वा सुराः सर्वमिदं विचेष्टितं कृत्यानलस्यास्य निबंधनं तथा ॥ प्रलोभनं तोयपुरःसरा द्विषः[3] पुपूजिरे केशवमत्र
चारिणम् ॥ ३० ॥ एवं सरस्वती प्राप्ता प्रभासं क्षेत्रमुत्तमम् ॥ ब्रह्मलोकान्महादेवि सर्वपापप्रणाशिनी ॥ ३१ ॥ सोमेशाद्दक्षिणाग्नेये सागरस्य समी
पतः ॥ संस्थिता तु महादेवी वडवा[4]नलधारिणी ॥ ३२ ॥ स्नात्वाऽग्नितीर्थे पूर्वं तां पूजयेद्विधिना नरः ॥ दंपत्योर्भोजनं तत्र परिधानं सकञ्चु
कम् ॥ ३३ ॥ दत्त्वा ततो महादेवं पूजयेच्च कपर्दिनम् ॥ इति वृत्तं पुरा देवि चाक्षुषस्यांतरेऽभवत् ॥ ३४ ॥ दधीच्यन्वयजातस्य वाडवस्य महा
त्मनः ॥ अस्मिन्पुनर्महादेवि प्राप्ते वैवस्वतेंऽतरे ॥ और्वस्तु भार्गवे वंशे समुत्पन्नो महाद्विजः ॥ ३५ ॥ संक्षिप्तोऽसौ सरस्वत्या देवमात्रा महाप्रभः॥
तावत्स्थास्यत्यपां गर्भे यावन्मन्वंतरावधिः ॥ ३६ ॥ इति ते कथितं देवि सरस्वत्याः समुद्भवम् ॥ श्रुतं पापहरं नृणां कीर्त्तिदं पुण्यवर्द्धनम् ॥ ३७ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये सरस्वत्यवतारमहिमवर्णनंनाम चतु
स्त्रिंशोऽध्यायः ॥ ३४ ॥ ॥ छ ॥ ॥ देव्युवाच ॥ ॥ भगवन्भार्गवे वंशे यस्त्वौर्वः कथितस्त्वया ॥ वैवस्वतेंऽतरे चास्मिंस्तस्योत्पत्तिं वद[5]
प्रभो ॥ १ ॥ ॥ ईश्वर उवाच ॥ ॥ ब्राह्मणा निहता ये तु क्षत्रियैर्वित्त[6]कारणात् ॥ क्षयं नीतास्तु ते सर्वे सपुत्राश्च सगर्भतः ॥ २ ॥ म्रियमाणेषु
सर्वेषु एका स्त्री समतिष्ठत ॥ तया तुँ रक्षितो गर्भ ऊर्वोर्देशे निधाय च ॥ ३ ॥ अन्यासां चैव नारीणां सर्वासामपि भामिनि ॥ गर्भा निपाति
तास्तैस्तु द्रव्यार्थं क्षत्रियाधमैः ॥ ४ ॥ कालांतरे ततो भित्त्वा कुरुदेशं महाप्रभः ॥ निर्गतोत्तंभितशिरा ज्वलदास्योतिभीषणः ॥ ५ ॥ तदौरं

१ अव्ययम्–इ० पा० । २ निबद्धवञ्चनम्–इ० पा० । ३ द्विपः–शत्रुरूपस्य-वडवानलस्य–इत्यर्थः। ४ वडवारूपधारिणी–इ० पा० । ५ वदस्व मे–इ० पा० । ६ रत्नकारणात्–इ० पा० ।
७ सः–इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदि चाधाय ददाह वसुधातलम् ॥ उत्पाद्य वह्निं तपसा रौद्रमौर्वं जलाशनम् ॥ ६ ॥ तमिन्द्रः प्लावयामास वृष्ट्यौघैर्वरवर्णिनि ॥ न शशाक यदा नेतुं तदा स यतवाक्स्थितः[1] ॥ ७ ॥ ततो देवाः सगंधर्वा ब्रह्माणं शरणं गताः ॥ अभवन्भयसंत्रस्ताः सर्वे प्रांजलयः स्थिताः ॥ ८ ॥ ॥ देवा ऊचुः ॥ ॥ भगवन्भार्गवे वंशे जातः कोऽपि महाद्युतिः ॥ अग्निरूपेण सर्वं स ददाह वसुधातलम् ॥ ९ ॥ कृती यत्नः पुराऽस्माभिस्तद्विनाशाय सत्तम ॥ जलेन वृद्धिमायाति ततो नो भयमागतम् ॥ १० ॥ विनष्टे भूतले देव अग्निष्टोमादिकाः क्रियाः ॥ उच्छिद्यंते ततोऽस्माकं नाशो नूनं भविष्यति ॥ ११ ॥ तस्माद्यत्नं कुरु विभो त्रैलोक्यहितकाम्यया ॥ १२ ॥ ततो ब्रह्मा सुरैः सार्द्धं भार्गवैश्च महर्षिभिः ॥ आगत्य चाब्रवीदौर्वं किमर्थं दहसि क्षितिम् ॥ १३ ॥ विरामः क्रियतां सद्यो ममार्थं च द्विजोत्तम ॥ १४ ॥ ॥ और्व उवाच ॥ ॥ एष एव निवृत्तोऽहं तव वाक्येन सत्तम ॥ एष वह्निर्मयोत्सृष्टः स विभो तव शासनात् ॥ १५ ॥ यथा गच्छेत्समुद्रांतं तथा नीतिर्विधीयताम् ॥ १६ ॥ समाहूय ततो देवीं स्वां सुतां पद्मसंभवः ॥ उवाच पुत्रि गच्छ त्वं गृहीत्वाग्निं महोदधिम् ॥ मद्वाक्यं नान्यथा कार्यं गच्छ शीघ्रं महाप्रभे ॥ १७ ॥ ॥ सरस्वत्युवाच ॥ ॥ एषास्मि प्रस्थिता देव तव वाक्यादसंशयम् ॥ इत्युक्ते साधु साध्वीति ब्रह्मणा समुदाहृता ॥ ॥ १८ ॥ ततोभिमंत्रितं वह्निं क्षिप्त्वा कुंभे हिरण्मये ॥ प्रायच्छत सरस्वत्यै स्वयं ब्रह्मा पितामहः ॥ आशिषो विविधा दत्त्वा प्रोवाचेदं पुनः पुनः ॥ १९ ॥ गच्छ पुत्रि न संतापस्त्वया कार्यः कथंचन ॥ अरिष्टं व्रज पंथानं मा संतु परिपन्थिनः ॥ २० ॥ ॥ ईश्वर उवाच ॥ ॥ एवमुक्ता तदा तेन ब्रह्मणा त्र सरस्वती ॥ हिमवंतं गिरिं प्राप्य पिप्पलादाश्रमात्तदा ॥ २१ ॥ उद्भूता सा तदा देवी अधस्ताद्वृक्षमूलतः ॥ तत्कोटरकुटीकोटिप्रविष्टानां द्विजन्मनाम् ॥ २२ ॥ श्रूयन्ते वेदनिर्घोषा सरसारक्तचेतसाम् ॥ विष्णुरास्ते तत्र देवो देवानां प्रवरो गुरुः ॥ २३ ॥ तस्मात्स्थानात्ततो देवी प्रतीच्यभिमुखं ययौ ॥ अन्तर्द्धानेन सा प्राप्ता केदारं हिममध्यगम् ॥ २४ ॥ तत्संप्राप्य गिरेः शृंगं केदारस्य पुरः स्थिता ॥ तेनाग्निना करस्थेन दह्यमाना सरस्वती ॥ २५ ॥ भूमिं विदार्य तस्याधः प्रविष्टा गजगामिनी ॥ तदंतर्द्धानमार्गेण प्रवृत्ता पश्चिमामुखी ॥ २६ ॥ पापभूमिमतिक्रम्य भूमिं भित्त्वा विनिर्गता ॥ तत्र कूपः समभवन्नाम्ना गन्धर्वसंज्ञितः ॥ २७ ॥ तस्मात्कूपात्पुनर्दृश्या सा बभूव महानदी ॥ मतिः स्मृतिस्तथा प्रज्ञा मेधा बुद्धिर्गिराधरा ॥ २८ ॥ उपासिकाः सरस्वत्याः षडेताः प्रस्थितास्तदा ॥ पुनः प्रवृत्ता सा तस्मादुद्भेदात्पश्चिमामुखी ॥२९॥

१ यतवाक्स्थितः--तूष्णीं स्थितः--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



भूतीश्वरं समायाता सिद्धो यत्र महामुनिः ॥ भूतीश्वरे समीपस्थं तत्र प्राप्ता मनोरमम् ॥३०॥ तस्य दक्षिणदिक्संस्थं रुद्रकोट्युपलक्षितम् ॥ श्रीकंठ देशं विख्यातं गता सर्वौषधीयुतम् ॥ ३१ ॥ तस्मात्पुण्यतमाद्देशाच्छ्रीकण्ठात्सा मनस्विनी ॥ संप्राप्ता वह्निना सार्द्धं कुरुक्षेत्रं सरस्वती ॥ ३२ ॥ पुनस्तस्मात्कुरुक्षेत्राद्विराटनगरस्य सा ॥ समुद्भूता समीपस्था अन्तर्द्धानान्मनोरमा ॥ गोपायनो गिरिर्यत्र तत्र सा पुनरुद्गता ॥ ३३ ॥ गोपायिता केशवेन यत्र ते पाण्डुनन्दनाः ॥ कुर्वंतः स्वानि कर्माणि न कैश्चिदुपलक्षिता ॥ ३४ ॥ तत्र कुंडे स्थिता देवी महापातकनाशिनी ॥ पुनर्गोपायनाद्देवी क्षेत्रं प्राप्तातिशोभनम् ॥ ३५ ॥ खर्जुरीवनमापन्ना नन्दानाम्नीति तत्र सा ॥ सरस्वती पुनस्तस्माद्वनात्खर्जूरसंज्ञितात् ॥ ३६ ॥ मेरुपादं समासाद्य मार्कंडाश्रममागता ॥ यत्र मार्कंडकं तीर्थं मेरुपादे समाश्रितम् ॥ ३७ ॥ सरस्वती पुनस्तस्मादर्बुदारण्यमाश्रिता ॥ गता वटवनं रम्यं मार्कंडेयाश्रमाच्छुभात् ॥३८॥ तपस्तप्तं पुरा यत्र वसिष्ठेन समाश्रितात् ॥ तस्माद्वटवनात्पुण्यादुदुम्बरवनं गता ॥ मेरुपादे च तत्रैव तण्डिर्यत्रा तपत्तपः ॥ ३९ ॥ ऊदुंबरवनात्तस्मात्पुनर्देवी सरस्वती ॥ अन्तर्द्धानेन शिखरमन्यत्प्राप्ता महानदी ॥ ४० ॥ मेरुपादं तु सुमहत्सुरसिद्धनिषेवितम् ॥ भिन्नांजनचयाकारं गोलांगूलमिति स्मृतम् ॥ ४१ ॥ स्थानं मनोरमं तस्मादुद्गता सा सुमध्यमा ॥ वंशस्तंबात्सुविपुला प्रवृत्ता दक्षिणामुखी ॥ ४२ ॥ तत्रोद्भमवटस्तस्यास्तत्समाख्यो व्यवस्थितः ॥ ततः प्रभृति सा देवी सुप्रभं प्रकटा स्थिता ॥ ४३ ॥ अंतर्द्धानं परित्यज्य प्राणिनामनुकम्पया ॥ तस्यास्तटेषु रम्येषु संति तीर्थानि कोटिशः ॥ ४४ ॥ तेषु तीर्थेषु सर्वेषु धर्महेतुः सरस्वती ॥ रुद्रावतारमार्गेऽस्मिन्प्रवरं प्रथमं स्मृतम् ॥ ४५ ॥ तरत्तरंगनामाढचं काकतीर्थं महाप्रभम् ॥ तत्र तीर्थं पुनस्त्वन्यत्तीर्थं धारेश्वरं स्मृतम् ॥ ४६ ॥ धारेश्वरात्पुनश्चान्यद्गंगोद्भेदमिति स्मृतम् ॥ सारस्वतं तथा गांगं यत्रैकं संस्थितं जलम् ॥ तस्मादन्यत्परं तीर्थं पुंडरीकं ततः परम् ॥ ॥ ४७ ॥ मातृतीर्थं महापुण्यं सर्वातंकहरं परम् ॥ मातृतीर्थात्पुनस्तस्मान्नातिदूरे व्यवस्थितम् ॥ ४८ ॥ तीर्थं त्वनरकंनाम नरकार्तिभयापहम् ॥ ततस्तस्मादनरकात्तीर्थमन्यत्पुनः स्थितम् ॥ ४९ ॥ संगमेश्वरनामाढचं प्रसिद्धं तन्महीतले ॥ ततस्तस्मात्पुनश्चान्यत्तीर्थं कोटीश्वराह्वयम् ॥ ५० ॥ ततस्तस्मान्महादेवि शंभुकुण्डेश्वरं स्मृतम् ॥ तीर्थे सरस्वतीतीरे तस्मिन्सिद्धेश्वरं स्मृतम् ॥ ५१ ॥ सिद्धेश्वरात्पुनस्तस्मात्प्रवृत्ता पश्चिमामुखी ॥ पश्चिमं सागरं गंतुं सखीं स्मृत्वा रुरोद सा ॥ ५२ ॥ स्थित्वा पूर्वमुखा देवी हा गंगेति विना त्वया ॥ एकाकिनी



१ मार्कटकम्—इ० पा० । २ गोलातलमिति स्मृतम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मंदभाग्या क्व गमिष्याम्यबांधवा ॥ ५३ ॥ तां विज्ञाय ततो गंगा रुदतीं शोककर्शिताम् ॥ शीघ्रं स्वर्गात्समायाता तीर्थानां कोटिभिः सह ॥ ५४ ॥ ततो दुःखं परित्यज्य तत्र प्राची सरस्वती ॥ सर्वदेवगुणैर्युक्ता एवं तत्र स्थिताऽभवत् ॥ ५५ ॥ तत्र सिद्धवटंनाम[1] तीर्थं पैतामहं स्मृतम् ॥ वटेश्वरस्य पुरतः सर्वपापक्षयंकरम् ॥ ५६ ॥ त्रिकालं यत्र रुद्रस्तु समागत्य व्यवस्थितः ॥ तन्महालयमित्युक्तं स्थानं तस्य महात्मनः ॥ ॥ ५७ ॥ पिंडतारकमित्येतत्प्राचीनं तीर्थमुत्तमम् ॥ कुम्भकुक्षिगिरिस्थं तत्पित्र्ये कर्मणि सिद्धिदम् ॥ ५८ ॥ प्राचीनेश्वरदेवस्य पुरोभूतं प्रतिष्ठितम् ॥ प्राची सरस्वती यत्र तत्र किं मृग्यते परम् ॥ ५९ ॥ निवृत्ते भारते युद्धे तत्र तीर्थे किरीटिना ॥ प्रायश्चित्तं पुरा चीर्णं विष्णुना प्रेरितात्मना ॥ ६० ॥ तेन तस्माद्विनिर्मुक्तः पातकात्पूर्वसंचितात् ॥ नरतीर्थं ततः ख्यातं तत्र पापभयापहम् ॥ ६१ ॥ नरतीर्थादन्यतीर्थं पुंडरीकमिति स्मृतम् ॥ अर्जुनेन सहागत्य यत्र स्नातो हरिः प्रिये ॥ ६२ ॥ प्राचीनेशात्परं तीर्थं वालखिल्येश्वरं महत् ॥ तत्र तस्मान्महातीर्थात्तीर्थमन्यन्महोदयम् ॥ ६३ ॥ गंगासमागमंनाम तीर्थमन्यन्महोदयम् ॥ तत्रा[2]लोक्य पुनर्देवीं दीनास्यां दीनमानसाम् ॥ ६४ ॥ ब्रह्मासृजत्सखीं तस्याः कपिलां विपुलेक्षणाम् ॥ हरिणीं हरिरप्याशु वज्रिणीमपि देवराट् ॥ न्यंकुं विनोदनार्थं च सरस्वत्या ददौ हरः ॥ ६५ ॥ ततः प्र[3]हृष्टा सा देवी देवादेशात्सरस्वती ॥ तस्माद्गन्तुं समारब्धा प्राचीना पापनाशिनी ॥ ६६ ॥ ॥ ईश्वर उवाच ॥ ॥ दक्षिणां दिशमास्थाय पुनः पश्चान्मुखी तदा ॥ सरस्वती महादेवी वडवानलधारिणी ॥ तदुत्तरे तटे तीर्थमेकद्वारमिति स्मृतम् ॥ ६७ ॥ एकद्वारेण यत्सेना स्वर्गं प्राप्ता त[4]तो वरात् ॥ तस्मात्तीर्थात्पुनश्चान्यत्तीर्थं[5] यत्र गुहेश्वरः ॥ ६८ ॥ गुहेन स्थापितः पूर्वं यत्र देवो महेश्वरः ॥ गुहेश्वरान्नातिदूरे वटेश्वरमिति स्मृतम् ॥ ६९ ॥ दिव्यं सरस्वतीतीरे व्यासेनाराधितं पुरा ॥ आमर्दकी नदी यत्र सरस्वत्या सहैकताम् ॥ ७० ॥ संप्राप्ता तन्महातीर्थं फलदं सर्वदेहिनाम् ॥ आमर्दकी संगमं तं नापुण्यो वेद कश्चन ॥ संगमेश्वरनामेति तत्र लिंगं प्रतिष्ठितम् ॥ ७१ ॥ मु[6]ण्डीश्वरेति च तथा प्रसिद्धिमगमत्क्षितौ ॥ मुंडीश्वरसमीपस्थं सरस्वत्यां महोदयम् ॥ ७२ ॥ नाम्ना यत्प्राङ्मुखं तीर्थं सरस्वत्यास्तटे स्थितम् ॥ मांडव्येश्वरनाम्ना वै यत्रेशः संप्रतिष्ठितः ॥ ७३ ॥ पीलु[7]कर्णिकसंज्ञं तु तीर्थमन्यत्पुनस्ततः ॥ सरस्वतीतीरगतमृषिणा सेवितं महत् ॥ ७४ ॥ तस्मादन्यत्सरस्वत्यां तीर्थं द्वारवती स्मृतम् ॥ तीर्थानां

१ शुद्धवटंनाम–इ० पा० । २ तथाऽऽलोक्य–इ० पा० । ३ प्रविष्टा–इ० पा० । ४ ततो वनात्–इ० पा० । ५ तीर्थम्–इ० पा० । ६ मुंडेश्वरेति च तथा–इ० पा० । ७ पीलुत्रणिकसंज्ञं तु–इ० पा० । ८ शुभम–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



प्रवरं देवि यत्र संनिहितो हरिः ॥ ७५ ॥ ततस्तस्य समीपस्थं तीर्थं गोवत्ससंज्ञितम् ॥ यत्रावतीर्य गोवत्सस्वरूपेणांबिकापतिः ॥ ७६ ॥ स्वयं
भूलिंगरूपेण संस्थितस्तेजसां निधिः ॥ गोवत्सान्नैर्ऋते भागे दृश्यते लोहयष्टिका ॥ ७७ ॥ स्वयंभूलिंगरूपेण रुद्रस्तत्र स्वयं स्थितः ॥ एकविंशति
वारस्य भक्त्या पिंडस्य यत्फलम् ॥ ७८ ॥ गंगायां प्राप्यते पुंसां श्राद्धेनैकेन तत्र तत् ॥ ततस्तस्मान्महातीर्थाद्बालक्रीडनकी यथा ॥ ७९ ॥
सखीभिः सहिता तत्र क्रीडताऽसौ यथेच्छया ॥ आनुलोम्यविलोम्येन दक्षिणेनोत्तरेण च ॥ ८० ॥ रुल्लं प्राप्य पुनर्देवी समद्भूता मनोरमा ॥ रुल्लं
नाम पुरं यत्र सृष्टं देवेन शंभुना ॥ ८१ ॥ सह देवैस्तु पार्वत्या धारायंत्रप्रयोगकैः[1] ॥ एकं वर्षसहस्रं तु शंभुना तत्र रुल्लितम्[2] ॥ ८२ ॥ रुल्लं तत्र
ह्रदं नाम सरस्वत्यां महोदयम् ॥ साक्षात्तत्र महादेव आनंदेश्वरसंज्ञितः ॥ ८३ ॥ पश्चिमेन स्थितं तत्र शम्भोरायतनस्य तु ॥ स मेरोर्दक्षिणे
पादे नखस्तु परिकीर्तितः ॥ ८४ ॥ पश्यंति ये नराः सम्यक्तेऽपि पापविवर्जिताः ॥ अश्वमेधसहस्रस्य प्राप्नुवंति फलं ध्रुवम् ॥ ८५ ॥ परतस्तस्य
कूष्मांडमुनेस्तत्राश्रमं महत् ॥ कूष्मांडेश्वरसंज्ञं तु तीर्थं त्रैलोक्यविश्रुतम् ॥ ८६ ॥ कोल्लादेवी स्थिता तत्र सर्वपापभयापहा ॥ अन्तर्द्धानेन तां कोल्लां
संप्राप्ता सा महानदी ॥ ८७ ॥ ततोऽप्यंतर्हिता भूत्वा संप्राप्ता तु मनोरमम् ॥ सानुं मदनसंज्ञं तु क्षेत्रं सिद्धनिषेवितम् ॥ ८८ ॥ ततोऽप्यंतर्हिता
भूत्वा पुनः प्राप्ता हिमाचलम् ॥ खादिरामोदनामानं सर्वर्तुकुसुमोज्ज्वलम् ॥ ८९ ॥ तत्रारुह्य विलोक्याथ ददर्श सुमनोरमम् ॥ क्षारोदं
पश्चिमाशास्थं घनवृंदमिवोन्नतम् ॥ ९० ॥ एवंविधं च तं तत्र सा विलोक्य महाप्रभा ॥ हर्षात्पंचानना भूत्वा देवकार्यार्थमुद्यता ॥ ९१ ॥
हरिणी वज्रिणी न्यंकुः कपिला च सरस्वती ॥ पंचस्रोताः स्थिता तत्र मुनिनोक्ता सरस्वती ॥ ९२ ॥ श्रमापनोदं कुर्वाणा मुनीनां यत्र
संस्थिता ॥ तत्तत्पादकमित्युक्तं तीर्थं तीर्थार्थिनां नृणाम् ॥ सर्वेषां पातकानां च शोधनं तद्वरानने ॥ ९३ ॥ खादिरामोदमासाद्य तत्रस्था
वीक्ष्य सागरम् ॥ गन्तुं प्रवृत्ता तं वह्निमादाय सुरसुन्दरि ॥ ९४ ॥ दग्ध्वा कृतस्मरं देवी पुनरादाय वाडवम् ॥ समुद्रस्य समीपस्था स्थिता हृष्टत
नूरुहा ॥ ९५ ॥ ततः प्रविष्टा सा देवी अगाधे लवणांभसि ॥ वाडवं वह्निमादाय जलमध्ये व्यसर्जयत् ॥ ९६ ॥ ततस्तस्याः पुनः प्रीतः स्वय
मेव हुताशनः ॥ तद्दृष्ट्वा दुष्करं कर्म वचनं चेदमब्रवीत् ॥ ९७ ॥ परितुष्टोऽस्मि ते भद्रे वरं वरय सुव्रते ॥ तत्ते दास्याम्यहं प्रीतो यद्यपि स्यात्सु
दुर्लभम् ॥ ९८ ॥ ॥ ईश्वर उवाच ॥ ॥ प्रगृह्य वलयं हस्तादिदं वचनमब्रवीत् ॥ इदं मे वलयं वह्ने वक्त्रे धार्यं सदा त्वया ॥ ९९ ॥ अनेन

१ धारायंत्रप्रयोगकैः—धारायंत्र 'पिचकारी' इति ख्यातं तस्य प्रयोगकैः—परस्परोपरि सेचनैः—इत्यर्थः । २ रुल्लितम्—क्रीडितम्—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शक्यते यावत्तावत्तोयं समाहर ॥ न त्वया शोषणीयोऽयं समुद्रः सरितां पतिः ॥ १०० ॥ बाढमित्येव चोक्त्वा स प्रविष्टो निधिमंभसाम् ॥ एव मेषा महादेवि प्रभासे तु सरस्वती ॥ गृहीत्वा वाडवं प्राप्ता तुष्ट्यर्थं च मनीषिणाम् ॥ १०१ ॥ सा विश्रांता कुरुक्षेत्रे भद्रावर्ते च भामिनि ॥ पुष्करे श्री[1]कला देवी प्रभासे च महानदी ॥ १०२ ॥ देवमातेति सा तत्र संस्थिता लवणोदधौ ॥ अस्मिन्मन्वंतरे देवि आदौ त्रेतायुगे पुरा॥१०३॥ इति वृत्तं सरस्वत्या वाडवाग्नेस्तथाभवत् ॥ मन्वन्तरे व्यतीतेऽस्मिन्भविताऽन्यस्तु वाडवः ॥ १०४ ॥ ज्वालामुखेति नाम्ना वै रुद्रक्रोधाद्भविष्यति ॥ सरस्वत्यास्तथा नाम ख्यातिं ब्राह्मीति यास्यति ॥ १०५ ॥ सरस्वतीति वै लोके वर्तते नाम सांप्रतम् ॥ अतीतं नाम यत्तस्याः कमंडलुभवेति च ॥ रत्नाकरेति सामुद्रं सत्यं नामांतरं पुरा ॥ १०६ ॥ अस्मिन्मन्वंतरे देवि सागरेति प्रकीर्तितम् ॥ क्षारोदेति भविष्यं तु नाम देवि प्रकीर्तितम् ॥ १०७ ॥ एवं जानाति यः कश्चित्स तीर्थफलमश्नुते ॥ स्वर्गनिःश्रेणिसंभूता प्रभासे तु सरस्वती ॥ १०८ ॥ नापुण्यवद्भिः संप्राप्तुं पुंभिः शक्या महानदी ॥ प्राची सरस्वती देवि सर्व[2]त्रै च सुदुर्लभा ॥ विशेषेण कुरुक्षेत्रे प्रभासे पुष्करे तथा ॥ १०९ ॥ एवंप्रभावा सा देवी वडवानल धारिणी ॥ अग्नितीर्थसमीपस्था स्थिता देवी सरस्वती ॥ ११० ॥ तामादौ पूजयेद्यस्तु स तीर्थफलमश्नुते ॥ सागरं यत्र तत्तीर्थं पापघ्नं पुण्य वर्द्धनम् ॥ १११ ॥ दर्शनादेव तस्यैव महाक्रतुफलं लभेत् ॥ अग्निचि[3]त्कपिला सत्री राजा भिक्षुर्महोदधिः ॥ ११२ ॥ दृष्टमात्राः पुनंत्येते तस्मा त्पश्येद्धि भावितः ॥ अग्नितीर्थे नरः स्नात्वा पावके प्रक्षिपेत्ततः ॥ गुग्गुलं [4]भारसहितं सोग्निलोके महीयते ॥ ११३ ॥ एवं संक्षेपतः प्रोक्तो ह्यग्नि तीर्थमहोदयः ॥ सरस्वत्याश्च माहात्म्यं सर्वपातकनाशनम् ॥११४॥ स्नात्वाग्नितीर्थे विधिवत्कंकणं प्रक्षिपेत्ततः ॥ सुवर्णस्य महादेवि यथावित्तानु सारतः ॥ ११५ ॥ ततः सरस्वतीं पूज्य कपर्दिनमथार्चयेत् ॥ ११६ ॥ ततः केदारनामानं भीमेश्वरमतःपरम् ॥ भैरवेश्वरनामानं चण्डीश्वरमतः परम् ॥ ११७ ॥ ततः सोमेश्वरं देवं पूजयेद्विधिवन्नरः ॥ नवग्रहेश्वरानिष्ट्वा रुद्रैकादशकं तथा ॥ ११८ ॥ ततः संपूजयेद्देवं ब्रह्माणं बालरूपिणम् ॥ एवं रौद्री समाख्याता यात्रा पातकनाशिनी ॥ ११९ ॥ माहात्म्यमखिलं तस्या यो जानाति [5]नरोत्तमः॥ निवसन्क्षेत्रमध्ये तु स तीर्थफलमश्नुते ॥ १२० ॥ एवं कृत्वा ततो गच्छेन्महादेवीं सरस्वतीम् ॥१२१॥ सरस्वतीवाससमा कुतो गुणाः सरस्वतीवाससमा कुतो रतिः॥ सरस्वतीं प्राप्य दिवं

---

१ श्रीस्थले—इ० पा० । २ सर्वत्रैलोक्यदुर्लभा—इ० पा० । ३ अग्निचित्—अग्निहोत्री—इत्यर्थः । ४ भारसहितम्—विंशतितुलापरिमाणम्-भारप्रमाणम्—इत्यर्थः । भारप्रमाणं चाष्टसहस्रतोलकात्मकम्—इति शब्दकल्पद्रुमे प्रोक्तम् । ५ नरः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



गता नराः पुनः स्मरिष्यंति नदीं सरस्वतीम् ॥ १२२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभास
क्षेत्रमाहात्म्ये सरस्वत्यब्धिसमागमाग्नितीर्थमाहात्म्यवर्णनंनाम पञ्चत्रिंशोऽध्यायः॥३५॥छ॥ देव्युवाच ॥ ॥ यदेतद्भवता प्रोक्तं प्राची सर्वत्र दुर्लभा ॥
विशेषेण कुरुक्षेत्रे प्रभासे पुष्करे तथा ॥ १ ॥ कथं प्रभासमासाद्य संस्थिता पापनाशिनी ॥ माहात्म्यमखिलं तस्याः प्राच्याः पातकनाशनम् ॥
कथयस्व महेशान यद्यहं ते प्रिया विभो ॥ २ ॥ ॥ ईश्वर उवाच ॥ ॥ साधु प्रोक्तं त्वया भद्रे प्राची सर्वत्र दुर्लभा ॥ कुरुक्षेत्रे पुष्करे च
तस्मात्प्राभासिकेऽधिका ॥ ३ ॥ प्रभासे तु महादेवी प्राचीं पापप्रणाशिनीम् ॥ नापुण्यो वेद देवेशि कर्मनिर्मूलनक्षमाम् ॥ ४ ॥ ये पिबंति नराः
पुण्यां प्राचीं देवीं सरस्वतीम् ॥ न ते मनुष्या विज्ञेयाः सत्यंसत्यं वरानने ॥ ५ ॥ धन्यास्ते मुनयस्ते च पुण्यास्ते च तपस्विनः ॥ ये च सारस्वतं
तोयं पिबंत्यहरहः सदा ॥ ६ ॥ देवास्ते न मनुष्यास्ते नदीस्तिस्रः पिबंति ये ॥ चंद्रभागां च गंगां च तथा देवीं सरस्वतीम् ॥ ७ ॥ भुक्त्वा वा
यदि वाऽभुक्त्वा दिवा वा यदि वा निशि ॥ न कालनियमस्तत्र यत्र प्राची सरस्वती ॥ ८ ॥ प्राचीं सरस्वतीं ये तु पिबंति सततं मृगाः ॥ तेऽपि
स्वर्गं गमिष्यंति यज्ञैर्द्विजवरा यथा ॥ ९ ॥ सर्वकामप्रपूर्त्यर्थं नृणां तत्क्षेत्रमुत्तमम् ॥ चिंतामणिसमा देवी यत्र प्राची सरस्वती ॥ १० ॥ यथा
कामदुघा गावः सर्वकामफलप्रदाः ॥ तथा स्वर्गापवर्गाभ्यां प्राची देवी सरस्वती ॥ ११ ॥ अष्टाशीतिसहस्राणि मुनीनामूर्ध्वरेतसाम् ॥ यत्र स्थि
तानि संन्यासं[1] तस्मात्किमधिकं स्मृतम् ॥ १२ ॥ यत्र मंकणकः सिद्धः प्राचीने नियतात्मवान् ॥ ब्रह्महत्याव्रतं चीर्णं मया यत्र वरानने ॥ १३ ॥
वृषतीर्थे महापुण्ये प्राचीकूलसमाश्रिते ॥ निवृत्ते भारते युद्धे तस्मिंस्तीर्थे किरीटिना ॥ प्रायश्चित्तं पुरा चीर्णं विष्णुना प्रेरितात्मना ॥१४॥ त्रैलोक्ये
सर्वतीर्थानां तत्तीर्थं प्रवरं स्मृतम् ॥ पापघ्नं पुण्यजननं प्राणिनां पुण्यकीर्त्तिद ॥ १५ ॥ ॥ सूत उवाच ॥ ॥ आहैवमुक्ते सा देवी शंकरं लोक
शंकरम् ॥ प्रायश्चित्तं कथं प्राप्तः पार्थः परपुरंजयः ॥ ज्ञातिक्षयोद्भवं पापं कथं नाशमगात्प्रभो ॥१६॥ एवमुक्तः पुनः प्राह विश्वेशो नीललोहितः ॥
प्रायश्चित्तस्य संप्राप्तः कारणं तद्यथा स्थितम् ॥१७॥ ॥ ईश्वर उवाच ॥ ॥ शृणुष्वावहिता भद्रे कथां पातकनाशिनीम् ॥ यां श्रुत्वा मानवो भक्त्या
पवित्रात्मा प्रजायते ॥१८॥ योऽसौ देवि समाख्यातः किरीटी श्वेतवाहनः॥ स जित्वा कौरवान्सर्वान्संहृत्य हयकुञ्जरान् ॥ १९ ॥ पश्चात्सुयोधनं
हत्वा भीमेन प्रययौ गृहान् ॥ नारायणेन सहितो नरोऽसौ प्रस्थितो रणात्॥ २० ॥ द्रष्टुं धर्मसुतं हृष्टः प्रणतः प्रांजलिः स्थितः॥ स विज्ञाय तदाऽऽ



१ संन्यासम्—क्षेत्रसंन्यासम्—विधाय—इति शेषः । इतःपरमस्मात्तीर्थात्तीर्थांतरं न गमिष्यामः—इति संकल्प्य स्थितानि-इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यान्तौ नरनारायणावुभौ ॥ २१ ॥ राजा युधिष्ठिरः प्राह द्वारस्थान्द्वारपालकान् ॥ भवद्भिरेतावायांतौ निषेध्यौ द्वारसंस्थितौ ॥ २२ ॥ नर नारायणौ क्रूरौ पापपंकानुलेपिनौ ॥ एवमेतदिति प्रोक्तौ तौ तदा द्वारमागतौ ॥ २३ ॥ भवन्तौ नेच्छति द्रष्टुं राजा दुर्नयकारिणौ ॥ तत्रस्थः पृष्टवान्भूयः प्रतीहारं नरः स्वयम् ॥ २४ ॥ आवां किं कारणं राजा नेक्षते वशवर्तिनौ ॥ प्रोवाच प्रणतो राजा ततो द्वाःस्थं पुरःस्थितम् ॥ २५ ॥ नारायणेन सहितं नरं नरकनिर्भयम् ॥ दुर्योधनेन सहिता बांधवास्ते यतो हताः ॥ पितृतुल्याश्च राजानस्तेन वै पापभाजनम् ॥ २६ ॥ एवमुक्ते तु तेनाथ मुखमालोकितं हरेः ॥ तेन प्रोक्तमिदं तथ्यं यत्ते राज्ञा प्रभाषितम् ॥ २७ ॥ एवमुक्ते नरः प्राह पुनरेव जनार्दनम् ॥ कथयस्व कथं पापात्कृष्ण शुद्ध्यामहे वयम् ॥ २८ ॥ तीर्थस्नानेन मे शुद्धिर्यथा स्यात्तद्वद स्फुटम् ॥ तच्च गंगादिकं कृष्ण यथाऽस्याघस्य नाशनम् ॥ २९ ॥ ॥ ॥ कृष्ण उवाच ॥ ॥ मा गयां गच्छ कौंतेय मा गंगां मा च पुष्करम् ॥ तत्र गच्छ कुरुश्रेष्ठ यत्र प्राची सरस्वती ॥ ३० ॥ ब्रह्मघ्नाश्च सुरापाश्च ये चान्ये पापकारिणः ॥ तत्र स्नात्वा विमुच्यंते यत्र प्राची सरस्वती ॥ ३१ ॥ नारायणेन प्रोक्तोऽसौ नरस्तद्वचनाद्द्रुतम् ॥ सहितस्तेन संप्राप्तः प्राचीनं तीर्थमुत्तमम् ॥ ३२ ॥ त्रिरात्रोपोषितः स्नातस्त्रिकालं नियतात्मवान् ॥ तेन तस्माद्विनिर्मुक्तः पातकात्पूर्वसंचितात् ॥ ३३ ॥ विज्ञाय शुद्धमेनं तु राजा धर्मसुतो द्रुतम् ॥ भ्रातृभिः सहितः प्राप्तस्तं द्रष्टुं नरपुंगवम् ॥ ३४ ॥ ततस्तं प्रणतं दृष्ट्वा धर्मपुत्रः पुरःस्थितम् ॥ आलिलिंग प्रहृष्टात्मा पृष्टवांश्चाप्यनामयम् ॥ ३५ ॥ भीमादिभिर्भ्रातृभिश्च तदा गुरुगणैर्वृतः ॥ आलिंगितः प्रहृष्टैस्तु नरो गुणगणैर्वृतः ॥ ३६ ॥ एतद्धि तन्महातीर्थं प्राचीनेति च शब्दितम् ॥ स्नानक्रमेण मर्त्यानामन्येषामपि पावकम् ॥ ३७ ॥ त्रिरात्रोपोषितः स्नातस्तीर्थेऽस्मिन्ब्रह्महाऽपि यः ॥ विमुक्तः पातकात्तस्मान्मोदते दिवि रुद्रवत् ॥ ३८ ॥ प्राचीने देव्यहं नित्यं वसामि सहितस्त्वया ॥ प्रभासे तु महाक्षेत्रे विशेषात्तत्र भामिनि ॥ ॥ ३९ ॥ सरस्वत्युत्तरे तीरे यस्त्यजेदात्मनस्तनुम् ॥ प्राचीने तु वरारोहे न चेहागच्छते पुनः ॥ ४० ॥ आप्लुतो वाजिमेधस्य फलं प्राप्स्यति पुष्कलम् ॥ नियमैश्चोपवासैश्च शोषयेद्देहमात्मनः ॥ ४१ ॥ जलाहारा वायुभक्षाः पर्णाहाराश्च तापसाः ॥ यथा स्थंडिलगा नित्यं ये चान्यनियमाः पृथक् ॥ ४२ ॥ एवं मंक्याश्रमे येषां वसतां मृत्युरागतः ॥ न ते मनुष्या देवास्ते सत्यमेतद्ब्रवीमि ते ॥ ४३ ॥ अस्मिंस्तीर्थे तु यो दद्यात्त्रुटिमात्रं तु कांचनम् ॥ श्रद्धया द्विजमुख्याय मेरुतुल्यं फलं लभेत् ॥ ४४ ॥ अस्मिंस्तीर्थे तु ये श्राद्धं करिष्यंति च मानवाः ॥ एक

१ विज्ञाय शुद्धकामाय--इ० पा०। २ च--इ० पा०।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



विंशत्कुलोपेताः स्वर्गं यास्यंति ते ध्रुवम् ॥ ४५ ॥ पितॄणां वल्लभे तीर्थे पिण्डेनैकेन तर्पिताः ॥ ब्रह्मलोकं गमिष्यंति गयाश्राद्धकृतो यथा ॥
॥ ४६ ॥ कृष्णपक्षे चतुर्दश्यां स्नानं च विहितं सदा ॥ पिण्याकैंगुदकेनापि पिंडं तत्र ददाति यः ॥ पितॄणामक्षया तृप्तिः पितृलोकं
स गच्छति ॥ ४७ ॥ भूयश्चान्नं प्रयच्छंति मोक्षमार्गं व्रजंति ते ॥ ४८ ॥ दधि दद्याद्योऽपि तत्र ब्राह्मणाय मनोरमम् ॥ सोऽग्निलोकं समासाद्य भुंक्ते
भोगान्सुशोभनान् ॥ ४९ ॥ ऊर्णां प्रावरणं योऽपि भक्त्या दद्याद्विजोत्तमे ॥ सोऽपि याति परां सिद्धिं मर्त्यैरन्यैः सुदुर्लभाम् ॥ ५० ॥ ये चात्र
मलनाशाय विशेयुर्मानवा जलम्[1] ॥ गोप्रदानसमं तेषां सुखेन फलमादिशेत् ॥ ५१ ॥ सात्वेन यो नरस्तत्र कश्चित्स्नानं समाचरेत् ॥ सर्वपापविनि
र्मुक्तो ब्रह्मलोके महीयते ॥ ५२ ॥ तर्पणात्पिंडदानाच्च नरकेष्वपि संस्थिताः ॥ स्वर्गं प्रयांति पितरः सुपुत्रेण हि तारिताः ॥ ५३ ॥ प्राचीं सरस्वतीं
प्राप्य याति तीर्थं हिमालयम् ॥ स करस्थं समुत्सृज्य कूर्परेण समालिहेत्[2] ॥ ५४ ॥ यंयं काममभिध्याय तस्मिन्प्राणान्परित्यजेत् ॥ तंतं सकल
माप्नोति तीर्थमाहात्म्ययोगतः ॥ ५५ ॥ अन्यद्देवि पुरा गीतं गांगेयेन युधिष्ठिरे ॥ सत्यमेव हि गंगायां वयं जाता युधिष्ठिर ॥ ५६ ॥ याः काश्चि
त्सरितो लोके तासां पुण्या सरस्वती ॥ ५७ ॥ सरस्वती सर्वनदीषु पुण्या सरस्वती लोकसुखावहा सदा ॥ सरस्वतीं प्राप्य सुदुःखिता नराः सदा
न शोचन्ति परत्र चेह च ॥ ५८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये
प्राचीसरस्वतीमाहात्म्यवर्णनंनाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥ ॥ छ ॥ ॥ देव्युवाच ॥ ॥ किमर्थं कंकणं देव क्षिप्यते लवणांभसि ॥ तस्य
पुण्यं न पूर्वोक्तं यथावद्वक्तुमर्हसि ॥ १ ॥ के मंत्राः किं विधानं तत्कस्मिन्काले महत्फलम् ॥ किं पुराभूच्च तद्वृत्तं भगवन्कंकणाश्रितम् ॥ २ ॥
॥ ॥ ईश्वर उवाच ॥ ॥ आसीत्पुरा महीपालो बृहद्रथ इति श्रुतः[3] ॥ तस्य भार्याऽभवत्साध्वी नाम्ना चेंदुमती प्रिया ॥ ३ ॥ न देवी न च
गन्धर्वी नासुरी न च किंनरी ॥ तादृग्रूपा महादेवि यादृशी सा सुमध्यमा ॥ ४ ॥ शीलरूपगुणोपेता नित्यं सा तु पतिव्रता ॥ सर्वयोषिद्गुणैर्युक्ता
यथा साध्वी ह्यरुन्धती ॥ ५ ॥ प्रधाना स्त्रीसहस्रस्य सौभाग्यमदगर्विता ॥ न विना स तया रेमे मुहूर्त्तमपि पार्थिवः ॥ ६ ॥ एकदा तस्य राजर्षे ॥ ६१ ॥
रर्द्धासनगता सती ॥ यावत्तिष्ठति राजेंद्रमृषिस्तावदुपागतः ॥ कण्वोनाम महातेजास्तपस्वी वेदपारगः ॥ ७ ॥ तमागतमथो दृष्ट्वा सहसोत्थाय
पार्थिवः ॥ पूजां कृत्वा यथान्यायं दत्त्वा चार्घ्यमनुत्तमम् ॥ ८ ॥ सुखासीनं ततो मत्वा विश्रांतं मुनिपुंगवम् ॥ आपृच्छत्कुशलं राजा स सर्वं

१ पुमांसो विविशुर्जलम्--इ० पा० । २ आर्षोऽयं प्रयोगः । ३ स्मृतः--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चान्वमोदयत् ॥ ९ ॥ ततो धर्मकथां चक्रे स ऋषिर्नृपसन्निधौ ॥ १० ॥ ततः कथावसाने सा भार्या तस्य महीपतेः ॥ अब्रवीदमृतं वाक्यं कृतांजलिपुटा सती ॥ ११ ॥ ॥ इन्दुमत्युवाच ॥ ॥ त्वं वेत्सि भगवन्सर्वमतीतानागतं विभो ॥ पृच्छे त्वां कौतुकाविष्टा तस्मात्त्वं क्षंतुमर्हसि ॥ ॥ १२ ॥ अन्यदेहोद्भवं कर्म मम सर्वं प्रकीर्त्तय ॥ ईदृशं मम सौभाग्यं पतिर्देवसुतोपमः ॥ १३ ॥ सौभाग्यं पतिदेवत्वं शीलं त्रैलोक्यविश्रुतम् ॥ किं प्रभावो व्रतस्यैष उताहोपोषितस्य वा ॥ १४ ॥ दानस्य वा मुनिश्रेष्ठ यन्मे सौभाग्यमुत्तमम् ॥ वशो राजा महाबाहुर्मम वाक्यानुगः सदा ॥ ॥ १५ ॥ एतन्मे सर्वमाचक्ष्व परं कौतूहलं हि मे ॥ १६ ॥ ॥ सूत उवाच ॥ ॥ तस्यास्तद्वचनं श्रुत्वा ध्यात्वा च सुचिरं मुनिः ॥ अब्रवीत्प्रहसन्वाक्यं कण्वो वेदविदां वरः ॥ १७ ॥ ॥ कण्व उवाच ॥ ॥ शृणु राज्ञि प्रवक्ष्यामि अन्यदेहोद्भवं तव ॥ न रोषश्च त्वया कार्यो लज्जा वापि सुमध्यमे ॥ १८ ॥ त्वमासीदन्यदेहे तु आभीरी पंचभर्तृका ॥ सौराष्ट्रविषये हीना देवं सोमेश्वरं गता ॥ १९ ॥ ततः स्नातुं प्रविष्टा च सागरे लवणांभसि ॥ हता कल्लोलमालाभिर्विह्वलत्वमुपागता ॥ २० ॥ तव हस्ताच्युतं तत्र हैमं कंकणमेव च ॥ नष्टं समुद्रसलिले पश्चात्तापस्तु ते स्थितः[1] ॥ २१ ॥ अथ कालेन महता पंचत्वं त्वमुपागता ॥ दशार्णाधिपतेर्गेहे ततो जातासि सुन्दरि ॥ २२ ॥ बृहद्रथेन चोढासि कंकणस्य प्रभावतः॥ न व्रतं न तपो दानं त्वया चीर्णं पुरा शुभे ॥ २३ ॥ एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ॥ तच्छ्रुत्वा सा विशालाक्षी त्रपयाऽधोमुखी तथा ॥ आसीत्तूष्णीं तदा देवी श्रुत्वा वाक्यं च तादृशम् ॥ २४ ॥ एवं निवेद्य स मुनी राजपत्नीं वरानने ॥ जगाम भवनं स्वं च आमंत्र्य वसुधाधिपम् ॥ २५ ॥ ज्ञात्वा फलं कंकणस्य मुनेस्तस्य प्रभावतः ॥ गत्वा सोमेश्वरं देवं स्नात्वा च लवणांभसि ॥ २६ ॥ प्राक्षिपत्कंकणं तत्र प्रतिवष महाप्रभे ॥ ततो देवत्वमापन्ना प्रभावात्तस्य भामिनि ॥ २७ ॥ ॥ ईश्वर उवाच ॥ ॥ एष प्रभावः सुमहान्कंकणस्य प्रकीर्तितः ॥ सर्वकामप्रदो देवि सर्वपापप्रणाशनः ॥ २८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये सोमेश्वरमाहात्म्ये कंकणमाहात्म्यवर्णनंनाम सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ ॥ छ ॥ ॥ देव्युवाच ॥ ॥ यदेतद्भवता प्रोक्तं पश्येत्पूर्वं कपर्दिनम् ॥ भगवन्संशयं ह्येनं यथावद्वक्तुमर्हसि ॥ १ ॥ स भृत्यः किल देवेश तव शम्भो महाप्रभः ॥ प्रभोरनन्तरं भृत्य एष धर्मः सनातनः ॥ २ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि यथा पूज्यतमो हि सः ॥ कपर्दी सर्व

१ स्थिता–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



देवानामाद्यो विघ्नेश्वरः प्रभुः ॥ ३ ॥ योऽसावतींद्रियग्राह्यः प्रभासक्षेत्रसंस्थितः ॥ सोमेश्वरो महादेवि लिंगरूपी सदाशिवः ॥ ४ ॥ तस्य वामे स्थितो विष्णुर्वराह इति यः स्मृतः ॥ तस्य दक्षिणभागे तु स्थितो ब्रह्मा प्रजापतिः ॥ कपर्दिरूपमास्थाय सावित्र्याः कोपकारणात् ॥ ५ ॥ कृते हेरंबनामा तु त्रेतायां विघ्नमर्दनः ॥ लंबोदरो द्वापरे तु कपर्दी तु कलौ स्मृतः ॥ ६ ॥ एवं युगेयुगे तस्य अवतारः पृथक्पृथक् ॥ यथाकार्यानुरूपेण जायते च पुनःपुनः ॥ ७ ॥ अष्टाविंशतिमे तत्र देवि प्राप्ते चतुर्युगे ॥ कारणात्मा यथोत्पन्नः कपर्दी तत्र मे शृणु ॥ ८ ॥ पुरा द्वापरसंधौ तु संप्राप्ते च कलौ युगे ॥ स्त्रियो म्लेच्छाश्च शूद्राश्च ये चान्ये पापकारिणः ॥ प्रयांति स्वर्गमेवाशु दृष्ट्वा सोमेश्वरं प्रभुम् ॥ ९ ॥ न यज्ञा न तपो दानं न स्वाध्यायो व्रतं न च ॥ कुर्वंतोपि नरा देवि सर्वे यांति शिवालयम् ॥ १० ॥ तं प्रभावं विदित्वैवं सोमेश्वरसमुद्भवम् ॥ अग्निष्टोमादिकाः सर्वाः क्रिया नष्टाः सुरेश्वरि ॥ ११ ॥ ततो बालाश्च वृद्धाश्च ऋषयो वेदपारगाः ॥ शूद्राः स्त्रियोऽपि तं दृष्ट्वा प्रयांति परमां गतिम् ॥ १२ ॥ नष्टयज्ञोत्सवे काले शून्ये च वसुधातले ॥ ऊर्द्ध्वबाहुभिराक्रांतं परिपूर्णं त्रिविष्टपम् ॥ १३ ॥ ततो देवा महेंद्राद्या दुःखेनैव समन्विताः ॥ परिभूता मनुष्यैस्ते शंकरं शरणं गताः ॥ १४ ॥ ऊचुः प्रांजलयः सर्व इन्द्राद्याः सुरसत्तमाः ॥ व्याप्तोयं मानुषैः स्वर्गः प्रसादात्तव शंकर ॥ १५ ॥ निवासाय प्रभोऽस्माकं स्थानं किंचित्समादिश ॥ अहं श्रेष्ठो ह्यहं श्रेष्ठ इत्येवं ते परस्परम् ॥ जल्पंतः सर्वतो देव पर्यटंति यथेच्छया ॥ १६ ॥ धर्मराजः सुधर्मात्मा तेषां कर्म शुभाशुभम् ॥ स्वयं लिखितमालोक्य तूष्णीमास्ते सुविस्मितः ॥१७॥ येषामथ कृतं सज्जं कुम्भीपाकं सुदारुणम् ॥ रौरवः शाल्मलिर्देव दृष्ट्वा तान्दिवि संस्थितान् ॥ वैलक्ष्यं परमं गत्वा व्यापारं त्यक्तवानसौ ॥ ॥ १८ ॥ ॥ श्रीभगवानुवाच ॥ ॥ प्रतिज्ञातं मया सर्वं भक्त्या तुष्टेन वै सुराः ॥ सोमाय मम सांनिध्यमस्मिन्क्षेत्रे भविष्यति ॥ १९ ॥ न शक्यमन्यथा कर्तुमात्मनो यदुदीरितम् ॥ एवं यास्यंति ते स्वर्गं ये मां द्रक्ष्यंति तत्र वै ॥ २० ॥ भयोद्विग्नास्ततो देवाः पार्वतीं प्रेक्ष्य विश्वतः ॥ ऊचुः प्रांजलयः सर्वे त्वमस्माकं गतिर्भव ॥ २१ ॥ एवमुक्त्वाऽस्तुवन्देवाः स्तोत्रेणानेन सत्तम ॥ जानुभ्यां धरणीं गत्वा शिरस्याधाय चांजलिम् ॥ ॥ २२ ॥ ॥ देवा ऊचुः ॥ ॥ नमस्ते देवदेवेशि नमस्ते विश्वधात्रिके ॥ नमस्ते पद्मपत्राक्षि नमस्ते कांचनद्युते ॥ २३ ॥ नमस्ते संहर्त्रि कर्त्रि नमस्ते शंकरप्रिये ॥ कालरात्रि नमस्तुभ्यं नमस्ते गिरिपुत्रिके ॥२४॥ आर्ये भद्रे विशालाक्षि नमस्ते लोकसुन्दरि ॥ त्वं रतिस्त्वं धृतिस्त्वं श्रीस्त्वं

१ कृते रेवंतनामा तु–इ० पा० । २ ऊर्ध्वबाहुभिः–अतिसंमर्दवशेन स्थातुमनवकाशात्सर्वैः स्वबाहव ऊर्ध्वं कृताः–इत्यत्राभिप्रायः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वाहा त्वं सुधा सती ॥ २५ ॥ त्वं दुर्गा त्वं मतिर्मेधा त्वं सर्वं त्वं वसुन्धरा ॥ त्वया सर्वमिदं व्याप्तं त्रैलोक्यं सचराचरम् ॥ २६ ॥ नदीषु पर्वताग्रेषु सागरेषु गुहासु च ॥ अरण्येषु च चैत्येषु संग्रामेष्वाश्रमेषु च ॥ २७ ॥ त्रैलोक्ये तत्र पश्यामो यत्र त्वं देवि न स्थिता ॥ एतज्ज्ञात्वा विशालाक्षि त्राहि नो महतो भयात् ॥२८॥ ॥ ईश्वर उवाच ॥ ॥ एवमुक्ता तु सा देवी देवैरिंद्रपुरोगमैः ॥ कारुण्यान्निजदेहं त्वं तदा मर्दितवत्यसि ॥ २९ ॥ मर्दयंत्यास्तव तदा संजातं च महन्मलम् ॥ तत्र जज्ञे गजेंद्रास्यश्चतुर्बाहुर्मनोहरः ॥ ३० ॥ ततोऽब्रवीत्सुरान्सर्वान्भवती करुणात्मिका ॥ एष एव मया सृष्टो युष्माकं हितकाम्यया ॥ ३१ ॥ एष विघ्नानि सर्वाणि प्राणिनां संविधास्यति ॥ ३२ ॥ मोहेन महताऽऽविष्टाः कामोपहतबुद्धयः ॥ सोमनाथमपश्यंतो यास्यंति नरकं नराः ॥३३॥ एवं ते[1] वचनं श्रुत्वा सर्वे ते हृष्टमानसाः ॥ स्वस्थानं भेजिरे देवास्त्यक्त्वा मानुषजं भयम् ॥३४॥ अथेभवदनः प्राह त्वां देवि विनयान्वितः ॥ किं करोमि विशालाक्षि आदेशो दीयतां मम ॥ ३५ ॥ ॥ श्रीभगवत्युवाच ॥ ॥ गच्छ प्राभासिकं क्षेत्रं यत्र संनिहितो हरः ॥ तद्रक्ष मानुषाणां च यथा नायाति गोचरम् ॥३६॥ लिंगं तु देवदेवस्य स्थापितं शशिना स्वयम् ॥ भवत्या[2]ऽऽदेशितो नित्यं नृणां विघ्नं करोति यः ॥ ३७ ॥ प्रस्थितं पुरुषं दृष्ट्वा सोमनाथं प्रति प्रभुम् ॥ स करोति महाविघ्नं कपर्दी लोकपूजितः ॥ ३८ ॥ पुत्रदारगृहक्षेत्रधनधान्यसमुद्भवम् ॥ जनयेत्स महामोहं ततः पश्यति नो हरम् ॥ ३९ ॥ अथवा गड्डुगंडादिव्याधिं चैव समुत्सृजेत् ॥ तैर्ग्रस्तः पुरुषो मोहान्न पश्यति ततो हरम् ॥ ४० ॥ तस्मात्सर्वप्रयत्नेन सोमेश्वरपरीप्सया ॥ स नित्यं पूजनीयस्तु स्मर्तव्यस्तु दिवानिशम् ॥ ४१ ॥ स्तोत्रेणानेन देवेशि सर्वविघ्नांतकेन वै ॥ समाराध्य गणाध्यक्षः प्रभासक्षेत्ररक्षकः ॥४२॥ तत्तेऽहं संप्रवक्ष्यामि स्तोत्रं तद्विघ्नमर्दनम्॥ कपर्दिनो महादेवि सावधानावधारय ॥ ॥४३॥ ॐनमो विघ्नराजाय नमस्तेऽस्तु कपर्दिने ॥ नमो महोग्रदंष्ट्राय प्रभासक्षेत्रवासिने ॥४४॥ कपर्दिनं नमस्कृत्य यात्रानिर्विघ्नहेतवे॥ स्तोष्येऽहं विघ्नराजानं सिद्धिबुद्धिप्रियं शुभम् ॥४५॥ महागणपतिं शूरमजितं जयवर्द्धनम् ॥ एकदंतं च द्विदंतं चतुर्दंतं चतुर्भुजम् ॥४६॥ त्र्यक्षं च शूलहस्तं च रक्तनेत्रं वरप्रदम् ॥ अजेयं शंकुकर्णं च प्रचण्डं दंड[3]नायकम् ॥ आयस्कदंडिनं चैव हुतवक्त्रं हुतप्रियम् ॥ ४७॥ अनर्चितो विघ्नकरः सर्वकार्येषु यो नृणाम् ॥ तं नमामि गणाध्यक्षं भीममुग्रमुमासुतम् ॥ ४८ ॥ मदवंतं विरूपाक्षमिभ[4]वक्त्रसमप्रभम् ॥ ध्रुवं च निश्चलं शांतं तं नमामि विनायकम् ॥४९॥ त्वया पूर्वेण वपुषा देवानां कार्यसिद्धये ॥ गजरूपं समास्थाय त्रासिताः सर्वदानवाः ॥ ५० ॥ ऋषीणां देवतानां च नायकत्वं

१ ते–तव–इत्यर्थः । २ भवत्या—त्वया—इत्यर्थः । ३ चंडनायकम्–इ०पा० । ४ भववक्त्रसमप्रभम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



प्रकाशितम् ॥ ५१ ॥ इति स्तुतः सुरैरग्रे पूज्यसे त्वं भवात्मज ॥ त्वामाराध्य गणाध्यक्षमिभवक्त्रसमप्रभम् ॥ ५२ ॥ ध्रुवं च निश्चलं शांतं परीतं वि जयश्रिया ॥ कार्यार्थं रक्तकुसुमै रक्तचंदनवारिभिः ॥ ५३ ॥ रक्तांबरधरो भूत्वा चतुर्थ्यामर्चयेत्तु यः ॥ एककालं द्विकालं वा नियतो नियताशनः ॥ ५४ ॥ राजानं राजपुत्रं वा राजमंत्रिणमेव च ॥ राज्यं वा सर्वविघ्नेशो वशीकुर्यात्सराष्ट्रकम् ॥ ५५ ॥ यत्फलं सर्वतीर्थेषु सर्वयज्ञेषु यत्फलम् ॥ स तत्फलमवाप्नोति स्मृत्वा देवं विनायकम् ॥ ५६ ॥ विषमं न भवेत्तस्य न स गच्छेत्पराभवम् ॥ न च विघ्नं भवेत्तस्य जैनो जातिस्मरो भवेत् ॥ ५७ ॥ य इदं पठति स्तोत्रं षड्भिर्मासैर्वरं लभेत् ॥ संवत्सरेण सिद्धिं च लभते नात्र संशयः ॥ ५८ ॥ प्रसादाद्दर्शनं याति तस्य सोमेश्वरः प्रभुः ॥ कपर्दाकारमुदरं यतोऽस्य समुदाहृतम् ॥ ततोऽस्य नाम जानीहि कपर्दीति महात्मनः ॥ ५९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये कपर्दिविनायकमाहात्म्यवर्णनंनामाष्टात्रिंशोध्यायः ॥ ३८ ॥ ॥ ईश्वर उवाच ॥ ॥ अथ संपूज्य विधिना देवदेवं कपर्दिनम् ॥ ततो गच्छेन्महादेवि लिंगं केदारसंस्थितम् ॥ १ ॥ तस्यैवाग्नेयभागस्थं भीमेश्वरसमीपगम् ॥ स्वयंभूतं महादेवि कल्पलिंगं मम प्रियम् ॥ २ ॥ मया संपूजितं देवि वृद्धिलिंगं महाप्रभम् ॥ निराहारस्तु यस्तत्र करोत्येकं प्रजागरम् ॥ ३ ॥ चतुर्दश्यां विशेषेण तस्य लोकाः सनातनाः ॥ रुद्रेश्वरेति देवस्य त्वासीन्नाम पुरा युगे ॥ ४ ॥ तिष्येऽस्मिंस्तु पुनः प्राप्ते म्लेच्छस्पर्शभयातुरः ॥ अस्मिँल्लिंगे लयं यातः केदारश्चाब्धिसंनिधौ ॥ ५ ॥ तेन केदारनामेति तस्य ख्यातं धरातले ॥ माघे मासि यताहारः स्नात्वा तु लवणोदधौ ॥६॥ पञ्चके तु महाकुंडे मध्येस्य लवणांभसः ॥ रुद्रेशाद्दक्षिणे भागे धनुषां दशके स्थिते ॥ ७ ॥ स्नात्वा विधानतो देवि रुद्रेशं चार्चयिष्यति ॥ सम्यक्केदारयात्रायाः फलं तस्य भविष्यति ॥ ८ ॥ ब्रह्महत्यादिपापानां पूजनान्नाशनं महत् ॥ अथ तस्यैव देवस्य इतिहासं पुरातनम् ॥ ९ ॥ सर्वकामप्रदं नृणां कथ्यते ते सुरप्रिये ॥ आसीद्राजा पुरा देवि शशबिंदुरिति श्रुतः ॥ १० ॥ सार्वभौमो महीपालो विपक्षगणसूदनः ॥ कलिद्वापरयोः संधौ संभूतः पृथिवीपतिः ॥ ११ ॥ तस्य भार्याऽभवत्साध्वी प्राणेभ्योऽपि गरीयसी ॥ न देवी न च गन्धर्वी नासुरी न च पन्नगी ॥ १२ ॥ तादृग्रूपा वरारोहे यथाऽस्य शुभलोचना ॥ तस्य हेममयं पद्मं शतपत्रं मनोरमम् ॥ १३ ॥ खेचरं वेगि नित्यं च तस्य राज्ञो महात्मनः ॥ स तेन पर्यटँल्लोकान्सर्वान्देवि स्वकामतः ॥ १४ ॥ एकदा फाल्गुने मासि शुक्लपक्षे वरानने ॥ चतुर्दश्यां तु संप्राप्तः प्रभासक्षेत्रमुत्तमम् ॥ १५ ॥ अथापश्यद्दृषी

१ उमात्मज–इ०, प्रभात्मज–इ० च पा० । २ भवक्कर्तृसमप्रभम्–इ० पा० । ३ जातो जातिस्मरो भवेत्–इ० पा० । ४ केदारसंस्थितम्–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्सर्वाञ्छ्रीसोमेशपुरःस्थितान् ॥ रात्रौ जागरणार्थाय जपहोमपरायणान् ॥ १६ ॥ स दृष्ट्वा सोमनाथं तु प्रणिपत्य विधानतः ॥ पूजयामास सर्वां स्तान्यथार्हं भक्तिसंयुतः ॥ १७ ॥ ततः केदारमासाद्य संस्नाप्य विधिवत्प्रिये ॥ पूजयित्वा विचित्राभिः पुष्पमालाभिरीश्वरम् ॥ १८ ॥ नैवेद्यै र्विविधैर्वस्त्रैर्भूषणैश्च मनोहरैः ॥ ततोऽत्र कारयामास जागरं सुसमाहितः ॥ १९ ॥ ततस्ते मुनयः सर्वे कुतूहलसमन्विताः ॥ च्यवनो याज्ञवल्क्यश्च शांडिल्यः शाकटायनः ॥ २० ॥ रैभ्योऽथ जैमिनिः क्रौंचो नारदः पर्वतः शिलः ॥ मार्कंडं पुरतः कृत्वा जग्मुस्तस्य समीपतः ॥ २१ ॥ चक्रुः कथाः सुविचित्रा इतिहासानि भूरिशः ॥ कीर्त्तयंतः स्थितास्तत्र पप्रच्छू राजसत्तमम् ॥ २२ ॥ ॥ ऋषय ऊचुः ॥ ॥ कस्मात्सोमेश्वरं देवं परित्यज्य नराधिप ॥ केदारस्य पुरोऽकार्षीर्जागरं तद्ब्रवीहि नः ॥ नूनं वेत्सि फलं चास्य लिंगस्य त्वं महोदयम् ॥ २३ ॥ ॥ ॥ राजोवाच ॥ ॥ शृण्वंतु ब्राह्मणाः सर्वे अन्यदेहोद्भवं मम[1] ॥ पुराऽहं शूद्रजातीय आसं ब्राह्मणपूजकः ॥ २४ ॥ सौराष्ट्रविषये शुभ्रे धनधान्यसमाकुले ॥ अथ कालांतरे तत्र अनावृष्टिरभूद्द्विजाः ॥ २५ ॥ ततोऽहं क्षुधयाविष्टः प्रभासं क्षेत्रमास्थितः ॥ अथापश्यं सरः शुभ्रं हरिणीमूलसंस्थितम् ॥ २६ ॥ तच्च रामसरोनाम पद्मिनीषण्डमंडितम् ॥ क्षीरोदांबुधिसंकाशं दृष्ट्वा स्नातः क्रमान्वितः ॥ २७ ॥ संतर्प्य च पितॄन्देवान्पीत्वा स्वच्छमथोदकम् ॥ ततोऽहं भार्यया प्रोक्तो गृहाणेमान्सरोरुहान् ॥ २८ ॥ एतत्समीपतो रम्यं दृश्यते स्थानमुत्तमम् ॥ विक्रीणीमोऽत्र गत्वा तु येन स्याद्भोजनं विभो ॥ २९ ॥ अथावतीर्य सलिलं गृहीतानि मया द्विजाः ॥ कमलानि सुभू रीणि प्रस्थितश्च पुरं प्रति ॥ ३० ॥ तत्र गत्वा च रथ्यासु चत्वरेषु त्रिकेषु च ॥ प्रफुल्लकमलान्येव क्रेतुं वै मुनिसत्तमाः ॥ ३१ ॥ न कश्चित्प्रति गृह्णाति अस्तं प्राप्तो दिवाकरः ॥ प्रासादं कंचिदासाद्य सुप्तोहं सह भार्यया ॥३२॥ तत्र सुप्तस्य मे बुद्धिः श्रुत्वा गीतध्वनिं तदा ॥ समुत्पन्ना सभा र्यस्य क्षुधार्तस्य विशेषतः ॥ नूनं जागरणं ह्येतत्कस्मिंश्चिद्विबुधालये ॥ ३३ ॥ सरोरुहाणि चादाय व्रजाम्यत्र सुरालये ॥ यदि कश्चित्प्रगृह्णाति प्राणयात्रा ततो भवेत् ॥ ३४ ॥ अथोत्थाय समायातो ह्यत्राहं मुनिपुंगवाः ॥ अपश्यं लिंगमेतत्तु पूजितं कुसुमैः शुभैः ॥ ३५ ॥ रुद्रेश्वराभिधमिदं वृद्धलिंगं स्वयंभुवम् ॥ वेश्यानंगवतीनाम्नी शिवरात्रिपरायणा ॥ ३६ ॥ जागर्त्ति पुरतस्तस्य गीतनृत्योत्सवादिना ॥ ततः कश्चिन्मया दृष्टः किमेतद्रात्रिजागरम् ॥३७॥ केयं स्त्री दृश्यतेऽत्यर्थं गीतनृत्योत्सवे रता ॥ सोऽब्रवीच्छिवधर्मोक्ता शिवरात्रिः सुधर्मदा ॥३८॥ तां चानंगवतीनाम्नी

१ वृत्तम्—इति शेषः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





वेश्येयं धर्मसंयुता ॥ जागर्त्ति परमं श्रेयः शिवरात्रिव्रतं शुभम् ॥ ३९ ॥ शिवरात्रिव्रतं ह्येतद्यः[1] सम्यक्कुरुते नरः ॥ न स दुःखमवाप्नोति न दारि
द्र्यं न बंधनम् ॥ ४० ॥ दुष्टं चारिष्टयोगं वा न रोगं न भयं क्वचित् ॥ सुखसौभाग्यसंपन्नो जायते सत्कुले नरः ॥ ४१ ॥ तेजस्वी च यशस्वी च
सर्वकल्याणभाजनम् ॥ भवेदस्य प्रसादेन एवमाहुर्मनीषिणः ॥ ४२ ॥ ॥ राजोवाच ॥ ॥ अथ मे बुद्धिरुत्पन्ना तद्व्रतं प्रति निश्चला ॥ चिंतितं
मनसा ह्येतन्मया ब्राह्मणसत्तमाः ॥ ४३ ॥ अन्नाभावान्ममोत्पन्न उपवासो बलाद्यतः ॥ तदहं पद्मके तीर्थे स्नात्वा च लवणांभसि ॥ ४४ ॥ एतैः
सरोरुहैर्देवं पूजयामि महेश्वरम् ॥ ततो मया सभार्येण रुद्रेशः संप्रपूजितः ॥ ४५ ॥ पद्मैश्च भक्तियुक्तेन सभार्येण विशेषतः ॥ जाग्रत्स्थितस्तु
देवाग्रे तां रात्रिं सह भार्यया ॥ ४६ ॥ ततः प्रभातसमय उदिते सूर्यमण्डले ॥ सा वेश्या मामुवाचेदं कलधौतपलत्रयम् ॥ ४७ ॥ गृहाण मूल्यं
पद्मानां न गृहीतं मया हि तत् ॥ सात्त्विकं भावमास्थाय सभार्येण द्विजोत्तमाः ॥ ४८ ॥ ततो भिक्षां समाहृत्य प्राणयात्रा मया कृता ॥
कालेन महता प्रातः कालधर्मं मुनीश्वराः ॥ ४९ ॥ इयं मे दयिता साध्वी प्राणेभ्योऽपि गरीयसी ॥ मम देहं समादाय प्रविष्टा हव्यवाहनम् ॥
॥ ५० ॥ तत्प्रभावादहं जातः सर्वभौमो महीपतिः ॥ जातिस्मरः सभार्यस्तु सत्यमेतद्द्विजोत्तमाः ॥ ५१ ॥ एतस्मात्कारणादस्य भक्तिर्लिंगस्य
चोपरि ॥ मम नित्यं सभार्यस्य सत्यमेतद्ब्रवीमि वः ॥ ५२ ॥ मया क्रियाविहीनेन भक्तिबाह्येन सत्तमाः ॥ व्रतमेतत्समाचीर्णं तस्येदं सुमहत्फ
लम् ॥ ५३ ॥ अधुना भक्तियुक्तस्य यथोपकरणान्मम ॥ भविष्ये यत्फलं किंचिन्नो वेद्मि च मुनीश्वराः ॥ येन सोमेशमुत्सृज्य अत्राहं भक्ति
तत्परः ॥ ५४ ॥ ॥ ईश्वर उवाच ॥ ॥ एवं श्रुत्वा तु ते विप्रा विस्मयोत्फुल्ललोचनाः ॥ साधु साध्विति जल्पंतो राजानं संप्रशंसिरे ॥ ५५ ॥
पूजयामासुरनिशं लिंगं तत्र स्वयंभुवम् ॥ ततोऽसौ पार्थिवश्रेष्ठो लिंगस्यास्य प्रसादतः ॥ संसिद्धिं परमां प्राप्तो दुर्लभां त्रिदशैरपि ॥ ५६ ॥ सा
च वेश्या भगवती शिवरात्रिप्रभावतः ॥ तस्य लिंगस्य माहात्म्याद्रंभानामाप्सराऽभवत् ॥ ५७ ॥ तस्मात्सर्वप्रयत्नेन तल्लिंगं पूजयेद्बुधः ॥
धर्मकामार्थमोक्षं च यो वांछत्यखिलप्रदम् ॥ ५८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभास
क्षेत्रमाहात्म्ये केदारेश्वर ( रुद्रेश्वर ) लिङ्गमाहात्म्यवर्णनंनामैकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छे ॥ ६४ ॥
न्महादेवि श्वेतकेतुप्रतिष्ठितम् ॥ लिंगं महाप्रभावं तु भीमेनाराधितं पुरा ॥ १ ॥ केदारेश्वरसांनिध्ये नातिदूरे व्यवस्थितम् ॥ पूजयेत्तद्वि

१ यः कश्चित्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धानेन क्षीरस्नानादिभिः क्रमात् ॥ यात्राफलमभिप्रेप्सुः प्रेत्य स्वर्गफलाय वै ॥ २ ॥ ॥ देव्युवाच ॥ ॥ श्वेतकेतोस्तु यद्देव लिंगं प्रोक्तं त्वया मम ॥ तस्य जातं कथं देव नाम भीमेश्वरेति च ॥ ३ ॥ कथं विनिर्मितं पूर्वं तस्मिन्दृष्टे तु किं फलम् ॥ ४ ॥ ॥ ईश्वर उवाच ॥ ॥ आसीत्त्रेतायुगे पूर्वं राजा स्वायंभुवेंतरे ॥ श्वेतकेतुरिति ख्यातो राजर्षिः सुमहातपाः ॥ ५ ॥ स प्रभासं समागत्य प्रतिष्ठाप्य महेश्वरम् ॥ तपस्तेपे सुविपुलं सागरस्य तटे शुभे ॥ ६ ॥ पंचाग्निसाधको ग्रीष्मे वर्षास्वाकाशगस्तथा ॥ हेमंते जलमध्यस्थो नव वर्षाणि पंच च ॥ ७ ॥ ततश्चतुर्दशे देवि तपसा नियमेन च ॥ तुष्टेनोक्तो मया देवि वरं वरय सुव्रत ॥ ८ ॥ श्वेतकेतुरथोवाच भक्तिं देहि सुनिश्चलाम् ॥ स्थानेऽस्मिन्स्थीयतां देव यदि तुष्टोऽसि मे प्रभो ॥ ९ ॥ एवमस्त्वित्यथोक्त्वाऽहं तस्यांतर्द्धानमागतः ॥ ततः कालांतरेऽतीते श्वेतकेतुर्महाप्रभः ॥ १० ॥ समाराध्य त्विदं लिंगं प्राप्तः स्थानं महोदयम् ॥ ततो जातं नाम तस्य श्वेतकेत्वीश्वरं श्रुतम् ॥ ११ ॥ अग्नितीर्थे महापुण्ये सर्वपातकनाशने ॥ ततः कलियुगे प्राप्ते भ्रातृभिश्च समन्वितः ॥ १२ ॥ तीर्थयात्राप्रसंगेन यदा प्रभासमागतः ॥ भीमसेनो महाबाहुर्वायुपुत्रो ममांशजः ॥ १३ ॥ तल्लिंगं पूजयामास कृत्वा जागेश्वरं निजम् ॥ भेत्वा[1] तीर्थं महापुण्यं सागरस्य समीपतः ॥ १४ ॥ तदा प्रभृति भीमेशं पुनर्नामाऽभवच्छुभम् ॥ दृष्टमात्रेण तेनैव सकृल्लिंगेन भामिनि ॥ १५ ॥ अन्यजन्मकृतान्येव पापानि सुबहून्यपि ॥ नाशमायांति सर्वाणि तथैवामुष्मिकाणि तु ॥ १६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये भीमेश्वरमाहात्म्यवर्णनंनाम चत्वारिंशोऽध्यायः ॥ ४० ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्यैव पूर्वदिग्भागे सरस्वत्या प्रतिष्ठितम् ॥ लिंगं महाप्रभावं तु सोमेशादग्निगोचरे ॥ १ ॥ भैरवेश्वररूपस्तु वाडवः कुम्भसंस्थितः ॥ यत्र देव्या समानीतः सागरस्य समीपतः ॥ २ ॥ विश्रामार्थं क्षणं मुक्त्वा देव्या लिंगं प्रतिष्ठितम् ॥ समभ्यर्च्य विधानेन गृहीत्वा वडवानलम् ॥ समुद्रमध्ये चिक्षेप देवानां हितकाम्यया ॥ ३ ॥ ततो हृष्टतरा देवाः शंखदुन्दुभिनिःस्वनैः ॥ पूरयन्तोऽम्बरं देवीमीडिरे पुष्पवृष्टिभिः ॥ ४ ॥ देवमातेति ते नाम कृत्वोचुस्तां तदा सुराः ॥ कृत्वा तु भैरवं कार्यमसाध्यं देवदानवैः ॥ ५ ॥ प्रतिष्ठितवती चात्र यस्माल्लिंगं महोदयम् ॥ त्वं सर्वसरितां श्रेष्ठा सर्वपातकनाशिनी ॥ तस्माद्भैरवनामेति लिंगं ख्यातिं मगिष्यति ॥ ६ ॥ इत्युक्ता तु तदा देवी भैरवेश्वरनैर्ऋते ॥ सागरस्य स्थिता रम्ये तत्र मूर्त्तिमती सती ॥ ७ ॥ पूजयेत्तां विधानेन

[1] गत्वा—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





तं तथा भैरवेश्वरम् ॥ महानवम्यां यत्नेन कृत्वा स्नानं विधानतः ॥ सरस्वतीं पूजयित्वा वाग्दोषान्मुच्यतेऽखिलात् ॥ ८ ॥ तस्या लिंगं तु संपूज्य संस्नाप्य पयसा पृथक् ॥ अघोरेणैव विधिवत्सम्यग्यात्राफलं लभेत् ॥ ९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये भैरवेश्वरमाहात्म्यवर्णनंनामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि चण्डीशं देवमुत्तमम् ॥ सोमेशादीशदिग्भागे धनुषां सप्तके स्थितम् ॥ १ ॥ दण्डपाणस्तु भवनाद्दक्षिणे नातिदूरगम् ॥ चंड्या प्रतिष्ठितं पूर्वं चण्डेनाराधितं ततः ॥ २ ॥ गणेन मम देवेशि तत्कृत्वा दुष्करं तपः ॥ तेन चण्डेश्वरं लिंगं प्रख्यातं धरणीतले ॥ ३ ॥ स्नापयेत्पयसा पूर्वं दध्ना घृतयुतेन च ॥ मधुनेक्षुरसेनैव कुंकुमेन विलेपयेत् ॥ ४ ॥ कर्पूरोशीरमिश्रेण मृगनाभिरसेन च ॥ चन्दनेन सुगन्धेन पुष्पैः संपूजयेत्ततः ॥ ५ ॥ दग्ध्वा धूपं पुरो देवि ततो देवस्य चागुरुम् ॥ वस्त्रैः संपूजयेत्पश्चादात्मवित्तानुसारतः ॥ ६ ॥ नैवेद्यं परमान्नं च दत्त्वा दीपसमन्वितम् ॥ ततो दद्याद्द्विजातिभ्यो यथाशक्त्या तु दक्षिणाम् ॥ ७ ॥ दक्षिणां दिशमास्थाय यत्किंचित्तत्र दीयते ॥ चण्डीशस्य वरारोहे तत्सर्वं चाक्षयं भवेत् ॥ ८ ॥ यः श्राद्धं कुरुते तत्र चण्डीशस्य तु दक्षिणे ॥ आकल्पं तृप्तिमायांति पितरस्तस्य भामिनि ॥ ९ ॥ अयने चोत्तरे प्राप्ते यः कुर्याद्घृतकम्बलम् ॥ न स भूयोऽत्र संसारे जन्म प्राप्नोति दारुणम् ॥ १० ॥ एवं कृत्वा नरो भक्त्या यात्रां देवस्य शूलिनः ॥ निर्माल्यातिक्रमोद्भूतैरज्ञानाद्भक्षणोद्भवैः ॥ पापैः प्रमुच्यते जंतुस्तथाऽन्यैः कर्मसंभवैः ॥ ११ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये चण्डीशमाहात्म्यवर्णनंनाम द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेद्वरारोहे लिंगं सूर्यप्रतिष्ठितम् ॥ सोमेशात्पश्चिमे भागे धनुषां सप्तके स्थितम् ॥ आदित्येश्वरनामानं सर्वपातकनाशनम् ॥ १ ॥ त्रेतायुगे महादेवि समुद्रेण महात्मना ॥ रत्नैः संपूजितं लिंगं वर्षाणामयुतं प्रिये ॥ २ ॥ तेन रत्नेश्वरंनाम सांप्रतं प्रथितं क्षितौ ॥ पंचामृतेन संस्नाप्य पंचरत्नैः प्रपूजयेत् ॥३॥ ततो राजोपचारेण पूजयेद्विधिवन्नरः ॥ एवं कृते महादेवि मेरुदानफलं लभेत् ॥४॥ सर्वेषां चैव यज्ञानां दानानां नात्र संशयः ॥५॥ तीर्थानां चापि सर्वेषां यच्चान्यत्सुकृतं भुवि ॥ उद्धरेत्पितृवर्गं च मातृवर्गं च मानवः ॥ ६ ॥ बाल्ये वयसि यत्पापं वार्द्धके यौवनेऽपि वा ॥ क्षालयेच्चैव तत्सर्वं दृष्ट्वा रत्नेश्वरं नरः ॥ ७ ॥ धेनुदानं प्रशंसंति तस्मिन्स्थाने महर्षयः ॥ धेनुदस्तारयेन्नूनं दश पूर्वान्दशापरान् ॥ ८ ॥ देवस्य दक्षिणे भागे यो जपेच्छतरुद्रियम् ॥ संपूज्य विधिवल्लिंगं न स भूयः प्रजायते ॥९॥ एवं संक्षेपतः प्रोक्तमादित्येशमहोदयम् ॥ श्रुत्वाऽवधार्य यत्नेन मुच्यते कर्मबं



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धनैः ॥ १० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्य आदित्येश्वरमाहात्म्यवर्णनंनाम त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ आदित्येशं समभ्यर्च्य पुनः सोमेश्वरं व्रजेत् ॥ तं संपूज्य विधानेन पंचांगेन विशेषतः ॥ १ ॥ [1]दृष्ट्वा सोमेश्वरं चैव साष्टांगं प्रणिपत्य च ॥ प्रदक्षिणादिकं कुर्यात्संपश्येच्च पुनःपुनः ॥ २ ॥ सूर्याचन्द्रमसोर्लिंगं त्रिःकृत्वा प्रयतः शुचिः ॥ अग्नीषोमात्मकं कर्म तेन सर्वं कृतं भवेत् ॥ ३ ॥ उमादेवीं ततो गच्छेत्सोमेश्वरसमीपतः ॥ द्वितीयां तु ततो गच्छेद्दैत्यसूदनसन्निधौ ॥ ४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये सोमेश्वरमाहात्म्यवर्णनंनाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि अंगारेश्वरमुत्तमम् ॥ स्थापितं भूमिपुत्रेण सोमेशादीशगोचरे ॥ १ ॥ त्रिपुरं दग्धुकामस्य पुरा मम वरानने ॥ क्रोधादश्रु विनिष्क्रांतं लोचनत्रितयेन तु ॥२॥ तच्च भूमौ निपतितं ततो भूमिसुतोऽभवत् ॥ स प्रभासं ततो गत्वा बाल्यात्प्रभृति शंकरम् ॥ ३ ॥ तपसाऽऽराधयामास बहून्वर्षगणान्प्रिये ॥ तस्य तुष्टो महादेवः सुप्रीतात्मा वरं ददौ ॥ ४ ॥ सोऽब्रवीद्यदि मे देव तुष्टोसि वृषभध्वज ॥ ग्रहत्वं देहि सर्वेश न चान्यं वरमुत्सहे ॥ ५ ॥ स तथेति प्रतिज्ञाय पुनस्तं वाक्यमब्रवीत् ॥ इहागत्य नरो यो मां पूजयिष्यति भक्तितः ॥ ६ ॥ न भविष्यति वै पीडा तावकी तस्य कुत्रचित् ॥ पुष्पाणि रक्तवर्णानि मध्वाज्याक्तानि भूरिशः ॥ ७ ॥ होमयिष्यति यो भक्त्या लक्षमेकं तदग्रतः ॥ पंचोपचारविधिना त्वां तु संपूज्य यत्नतः ॥ ८ ॥ तस्य जन्मावधिर्नैव तव पीडा भविष्यति ॥ तथा विद्रुमदानेन लप्स्यते फलमीप्सितम् ॥ ९ ॥ एवमुक्त्वा स भगवानत्रैवांतरधीयत ॥ भौमोऽपि ग्रहमध्यस्थो विमानेन विराजते ॥१०॥ एवं संक्षेपतः प्रोक्तं भौममाहात्म्यमुत्तमम् ॥ श्रुतं हरति पापानि तथारोग्यं प्रयच्छति ॥ ११ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्येंऽगारेश्वरमाहात्म्यवर्णनंनाम पञ्चचत्वारिंशोध्यायः ॥ ४५ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि तस्यैवोत्तरतः स्थितम् ॥ लिंगं महाप्रभावं तु बुधेश्वरमिति श्रुतम् ॥ १ ॥ धनुषां द्वितये चैव नातिदूरे व्यवस्थितम् ॥ सर्वपापहरं लिंगं दर्शनादेव भामिनि ॥ २ ॥ बुधेन चैव देवेशि तत्र तप्तं महातपः ॥ स्थापितं विमलं लिंगं समाराध्य सदाशिवम् ॥ ३ ॥ वर्षायुतानि

१ स्तुत्वा सोमं स्तवेनैव–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

चत्वारि संपूज्य तु विधानतः ॥ अनन्यचेताः शांतात्मा प्रत्यक्षीकृतवान्भवम् ॥ ४ ॥ ततस्तुष्टमना देवो ग्रहत्वं तस्य तद्ददौ ॥ तं संपूज्य विधानेन सोमपुत्रप्रतिष्ठितम् ॥ सौम्याष्टम्यां विशेषेण राजसूयफलं लभेत् ॥ ५ ॥ न दाभाग्यं कुले तस्य न चैवेष्टवियोजनम् ॥ शत्रुतो न भयं तस्य भवेत्तस्य प्रसादतः ॥ ६ ॥ इति संक्षेपतः प्रोक्तं माहात्म्यं बुधदैवतम् ॥ श्रुत्वाऽभिनंद्य प्रयतः प्राप्नोति परमं पदम् ॥ ७ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये बुधेश्वरमाहात्म्यवर्णनंनाम षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ ॥

॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि देवं गुरुनिषेवितम् ॥ उमायाः पूर्वदिग्भागे सिद्धेशाग्नेयगोचरे ॥ १ ॥ संस्थितं तु महल्लिंगं देवाचार्यप्रतिष्ठितम् ॥ आराध्य परया भक्त्या लिंगं वर्षसहस्रकम् ॥ २ ॥ तोषयामास देवेशं भवं शर्वमुमापतिम् ॥ प्राप्तवानखिलान्कामान्प्राप्यानकृतात्मभिः ॥ ३ ॥ देवानां चैव पूज्यत्वं प्राप्य ज्ञानमथैश्वरम् ॥ ग्रहत्वं च तथा प्राप्य मोदते दिवि सांप्रतम् ॥ ४ ॥ तं दृष्ट्वा मानवो भक्त्या न दुर्गतिमवाप्नुयात् ॥ बृहस्पतिकृतं लिंगं ये पश्यंति नरोत्तमाः ॥ ५ ॥ बृहस्पतिकृता पीडा नैव तेषां हि जायते ॥ तत्र शुक्लचतुर्दश्यां गुरुवारे तथा प्रिये ॥ ॥ ६ ॥ संपूज्य विधिवल्लिंगं सम्यग्राजोपचारतः ॥ अथवा भक्तिभावेन प्राप्नुयात्परमं पदम् ॥ ७ ॥ स्नानं पलसहस्रेण पंचामृतरसेन यः ॥ करोति भक्त्या मर्त्यो वै मुच्यते स ऋणत्रयात् ॥८॥ मातृकात्पैतृकाद्देवि तथा गुरुसमुद्भवात् ॥ सर्वपापविशुद्धात्मा निर्द्वंद्वो मुक्तिमाप्नुयात् ॥ ९ ॥ एवं संक्षेपतः प्रोक्तं माहात्म्यं गुरुदैवतम् ॥ शृणुयाद्यस्तु भावेन तस्य प्रीतो गुरुर्भवेत् ॥ १० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये बृहस्पतीश्वरमाहात्म्यवर्णनंनाम सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥छ॥

॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि लिंगं शुक्रप्रतिष्ठितम् ॥ सर्वपापहरं देवि विभूतीश्वरपश्चिमे ॥१॥ नातिदूरे स्थितं तत्र स्वयं शुक्रेण निर्मितम् ॥ यत्र संजीवनीं प्राप्तो विद्यां रुद्रप्रभावतः ॥२॥ संतप्य तु महाघोरं तपो वर्षसहस्रकम् ॥ संप्रसाद्य विरूपाक्षं योऽवाप ग्रहतां सुधीः ॥३॥ ग्रस्तेन शंभुना येन देवकार्यार्थसिद्धये ॥ तैत्रोदरगतेनैव तपस्ततं सुदुष्करम् ॥ ४ ॥ वर्षाणामयुतं साग्रं तुष्टिं नीतो महेश्वरः ॥ निष्कासितस्ततः शीघ्रं शुक्रमार्गेण शंभुना ॥५॥ ततः शुक्रेति नामाभूद्भार्गवस्य महात्मनः ॥ तदाराधयते लिंगं यः कृत्वा निश्चलं मनः ॥६॥ मृत्युंजयं जपेल्लक्षं स समीहितमाप्नुयात् ॥७॥ तं दृष्ट्वा त्वथवा स्पृष्ट्वा जन्मादिमरणान्तकात् ॥ मुच्यते पातकान्मृत्योः प्रसादात्तस्य भामिनि ॥८॥ मृतसंजीवनाद्यं यदैश्वर्यमणिमा 

१ दुष्प्राप्यान्–इ० पा० । २ वरारोहे–इ० पा० । ३ तत्रोदरगतेनैव–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिकम् ॥ प्राप्नुयान्नात्र संदेहो यस्य भक्तिः सुनिश्चला ॥९॥ पंचामृतेन संस्नाप्य देवं शुक्रप्रतिष्ठितम्॥ सुगन्धपुष्पैः संपूज्य शौक्रीं पीडां स नाप्नुयात्
॥१०॥ इति सर्वं समासेन माहात्म्यं शुक्रदैवतम् ॥ कथितं तव सुश्रोणि श्रुतं पापभयापहम् ॥११॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां
संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये शुक्रेश्वरमाहात्म्यवर्णनंनामाष्टचत्वारिंशोध्यायः ॥ ४८ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥
तस्माच्छुक्रेश्वराद्गच्छेद्देवि लिंगं महाप्रभम् ॥ शनैश्चरैश्वरंनाम महापातकनाशनम् ॥ १ ॥ बुधेश्वरात्पश्चिमतो ह्यजादेव्यग्निगोचरे ॥ तस्या धनुः
पंचकेन नातिदूरे व्यवस्थितम् ॥ २ ॥ कल्पलिंगं महादेवि पूजितं देवदानवैः ॥ छायापुत्रेण संतप्तं तपः परमदुष्करम् ॥ ३ ॥ अनादि
निधनो देवो येन लिंगेऽवतारितः ॥ प्राप्तवान्यो ग्रहेशत्वं भक्त्या शंभोः प्रसादतः ॥ ४ ॥ यस्य दृष्ट्या बिभेति स्म देवासुरगणो महान् ॥ न स
कोऽप्यस्ति वै प्राणी ब्रह्मांडे सचराचरे ॥ ५ ॥ देवो वा दानवो वापि सौरिणा पीडितो न यः ॥ शनिवारेण संपूज्य भक्त्या सौरीश्वरं शिवम् ॥
॥ ६ ॥ शमीपत्रैर्महादेवि तिलमाषगुडौदनैः ॥ संतर्प्य तु विधानेन दद्यात्कृष्णं वृषं द्विजे ॥ ७ ॥ स्तुत्वा स्तोत्रैश्च विविधैः पुराणश्रुतिसंभवैः ॥
अथ वैकेन देवेशः स्तोत्रेण परितोषितः ॥ ८ ॥ राज्ञा दशरथेनैव कृतेन तु बलीयसा ॥ स्तुंत्यः सौरीश्वरो देवः सर्वपीडोपशांतये ॥ ९ ॥ ॥ देव्यु
वाच ॥ ॥ कथं दशरथो राजा चक्रे शानैश्वरीं स्तुतिम् ॥ कथं संतुष्टिमगमत्तस्य देवः शनैश्चरः ॥ १० ॥ ॥ ईश्वर उवाच ॥ ॥ रघुवंशेऽति
विख्यातो राजा दशरथो बली ॥ चक्रवर्ती स विज्ञेयः सप्तद्वीपाधिपः पुरा ॥ ११ ॥ कृत्तिकांते शनिं कृत्वा दैवज्ञैर्ज्ञापितो हि सः ॥ रोहिणीं भेद
यित्वा तु शनिर्यास्यति सांप्रतम् ॥ १२ ॥ उक्तं शकटभेदं तु सुरासुरभयंकरम् ॥ द्वादशाब्दं तु दुर्भिक्षं भविष्यति सुदारुणम् ॥ १३ ॥ एतच्छ्रुत्वा
मुनेर्वाक्यं मंत्रिभिः सहितो नृपः ॥ आकुलं तु जगद्दृष्ट्वा पौरजानपदादिकम् ॥ १४ ॥ वदंति सततं लोका नियमेन समागताः ॥ देशाश्च नगर
ग्रामा भयाक्रांताः समंततः ॥ मुनीन्वसिष्ठप्रमुखान्पप्रच्छ च स्वयं नृपः ॥ १५ ॥ ॥ दशरथ उवाच ॥ ॥ समाधानं किमत्रास्ते ब्रूहि मे द्विज
सत्तम ॥ १६ ॥ ॥ वसिष्ठ उवाच ॥ ॥ प्राजापत्ये च नक्षत्रे तस्मिन्भिन्ने कुतः प्रजाः ॥ अयं योगो ह्यसाध्यस्तु ब्रह्मादींद्रादिभिः सुरैः
॥ १७ ॥ तदा संचिंत्य मनसा साहसं परमं महत् ॥ समादाय धनुर्दिव्यं दिव्यैरस्त्रैः समन्वितम् ॥ १८ ॥ रथमारुह्य वेगेन गतो नक्षत्रमंडलम् ॥
रथं तु कांचनं दिव्यं मणिरत्नविभूषितम् ॥ १९ ॥ ध्वजैश्च चामरैश्छत्रैः किंकिणैरथ शोभितम् ॥ हंसवर्णहयैर्युक्तं महाकेतुसमन्वितम् ॥ २० ॥

१ सर्वपापभयापहम्—इ० पा० । २ स्तुंत्यः—स्तोतव्यः—इत्यर्थः । तेन—इति शेषः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



दीप्यमानो महारत्नैः किरीटमुकुटोज्ज्वलः ॥ बभ्राज स तदाकाशे द्वितीय इव भास्करः ॥ २१ ॥ आकर्णं चापमापूर्य संहारास्त्रं नियोज्य च ॥ कृत्तिकांते शनिं ज्ञात्वा प्रविश्य किल रोहिणीम् ॥ २२ ॥ दृष्ट्वा दशरथोऽस्याग्रे तस्थौ सभ्रुकुटीमुखः ॥ संहारास्त्रं शनिर्दृष्ट्वा सुरासुरविमर्दनम् ॥ २३ ॥ हसित्वा तद्भयात्सौरिरिदं वचनमब्रवीत् ॥ पौरुषं तव राजेंद्र परं रिपुभयंकरम् ॥ २४ ॥ देवासुरमनुष्याश्च सिद्धविद्याधरोरगाः ॥ मया विलोकिताः सर्वे भयं चाशु व्रजंति ते ॥ २५ ॥ तुष्टोहं तव राजेंद्र तपसा पौरुषेण च ॥ वरं ब्रूहि प्रदास्यामि मनसा यदभीप्सितम् ॥ २६ ॥ ॥ दशरथ उवाच ॥ ॥ रोहिणीं भेदयित्वा तु न गंतव्यं त्वया शने ॥ सरितः सागरा यावद्यावच्चंद्रार्कमेदिनी ॥ २७ ॥ याचितं ते मया सौरे नान्य मिच्छामि ते वरम् ॥ एवमुक्तः शनिः प्रादाद्वरं तस्मै तु शाश्वतम् ॥ २८ ॥ प्राप्यैवं तु वरं राजा कृतकृत्योऽभवत्तदा ॥ पुनरेवाब्रवीत्सौरिर्वरं वरय सुव्रत ॥ २९ ॥ प्रार्थयामास हृष्टात्मा वरमेवं शनेस्तदा ॥ न भेत्तव्यं च शकटं त्वया भास्करनंदन ॥ ३० ॥ द्वादशाब्दं तु दुर्भिक्षं न कर्तव्यं कदाचन ॥ कीर्तिरेषा मदीया च त्रैलोक्ये विचरिष्यति ॥ ३१ ॥ ॥ ईश्वर उवाच ॥ ॥ वरद्वयं ततः प्राप्य हृष्टरोमा स पार्थिवः ॥ रथोपरि धनुर्मुक्त्वा भूत्वा चैव कृतांजलिः ॥ ३२ ॥ ध्यात्वा सरस्वतीं देवीं गणनाथं विनायकम् ॥ राजा दशरथः स्तोत्रं सौरेरिदमथाकरोत् ॥ ३३ ॥ ॥ राजोवाच ॥ ॥ नमो नीलमयूखाय नीलोत्पलनिभाय च ॥ नमो निर्मांसदेहाय दीर्घश्मश्रुजटाय च ॥३४॥ नमो विशालनेत्राय शुष्कोदरभयानक ॥ नमः परुषगात्राय स्थूलरोमाय वै नमः ॥ ३५ ॥ नमो नित्यं क्षुधार्त्ताय नित्यतप्ताय[1] वै नमः ॥ नमः कालाग्निरूपाय[2] कृतांतक नमोस्तु ते ॥ ३६ ॥ नमो दीर्घाय शुष्काय कालदृष्टे नमोऽस्तु ते ॥ नमस्ते कोटराक्षाय दुर्निरीक्ष्याय वै नमः ॥३७॥ नमो घोराय रौद्राय भीषणाय करालिने ॥ नमस्ते सर्वभक्षाय वलीमुख नमोऽस्तु ते ॥ ३८ ॥ सूर्यपुत्र नमस्तेऽस्तु भास्करे भयदायक ॥ अधोदृष्टे नमस्तुभ्यं वपुःश्याम नमोऽस्तु ते ॥ ३९ ॥ नमो मन्दगते तुभ्यं निस्त्रिंशाय नमोनमः ॥ नमस्त उग्ररूपाय चण्डतेजाय ते नमः ॥ ४० ॥ तपसा दग्धदेहाय नित्यं योगरताय च ॥ नमस्ते ज्ञाननेत्राय कश्यपात्मजसूनवे ॥ ४१ ॥ तुष्टो ददासि वै राज्यं रुष्टो हरसि तत्क्षणात् ॥ देवासुरमनुष्याश्च पशुपक्षिसरीसृपाः ॥४२॥ त्वया विलोकिताः सौरे दैन्यमाशु व्रजंति च ॥ ब्रह्मा शक्रो यमश्चैव ऋषयः सप्ततारकाः ॥ ४३ ॥ राज्यभ्रष्टाश्च ते सर्वे तव दृष्ट्या विलोकिताः ॥ देशाश्च नगरग्रामा द्वीपाश्चैवाद्रयस्तथा ॥ ४४ ॥ रौद्रदृष्ट्या तु ये दृष्टाः क्षयं गच्छंति तत्क्षणात् ॥ ४५ ॥ प्रसादं कुरु मे सौरे वरार्थेऽहं तवाश्रितः ॥

१ नित्यगुप्ताय—इ० पा० । २ कारणरूपाय—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सौरे क्षमस्वापराधं सर्वभूतहिताय च ॥ ४६ ॥ ॥ ईश्वर उवाच ॥ ॥ एवं स्तुतस्तदा सौरी राज्ञा दशरथेन च ॥ ग्रहराजः शनिर्वाक्यं हृष्टरो
माऽब्रवीदिदम् ॥ ४७ ॥ ॥ शनिरुवाच ॥ ॥ तुष्टोऽहं तव राजेन्द्र स्तवेनानेन सुव्रत ॥ वरं ब्रूहि प्रदास्यामि स्वेच्छया रघुनंदन ॥ ४८ ॥
॥ ॥ दशरथ उवाच ॥ ॥ अद्यप्रभृति पिंगाक्ष पीडा कार्या न कस्यचित् ॥ देवासुरमनुष्याणां पशुपक्षिसरीसृपाम् ॥ ४९ ॥ ॥ शनिरु
वाच ॥ ॥ ग्रहाणां दुर्ग्रहो ज्ञेयो ग्रहपीडां करोम्यहम् ॥ अदेयं प्रार्थितं राजन्किंचिद्युक्तं ददाम्यहम् ॥ ५० ॥ त्वया प्रोक्तं मम स्तोत्रं ये पठि
ष्यंति मानवाः ॥ पुरुषाश्च स्त्रियो वापि मद्भयेनोपपीडिताः ॥ ५१ ॥ देवासुरमनुष्यास्तु सिद्धविद्याधरोरगाः ॥ मृत्युस्थाने स्थितो वापि
जन्मप्रांतगतस्तथा ॥ ५२ ॥ एककालं द्विकालं वा तेषां श्रेयो ददाम्यहम् ॥ पूजयित्वा जपेत्स्तोत्रं भूत्वा चैव कृतांजलिः ॥ ५३ ॥ तस्य पीडां न
चैवाहमिह कुर्यां कदाचन ॥ जन्मस्थाने स्थितो वापि मृत्युस्थाने स्थितोऽपि च ॥ ५४ ॥ जन्मर्क्षे च लग्ने च दशास्वंतर्दशासु च ॥ रक्षामि
सततं तस्य पीडां चान्यग्रहस्य च ॥ ५५ ॥ अनेनैव प्रकारेण पीडामुक्तस्त्वसौ भवेत् ॥ एतत्प्रोक्तं मया दत्तं वरं च रघुनंदन ॥ ५६ ॥ ॥ ईश्वर
उवाच ॥ ॥ वरद्वयं च संप्राप्य राजा दशरथः पुरा ॥ मेने कृतार्थमात्मानं नमस्कृत्य शनैश्चरम् ॥ ५७ ॥ शनिं स्तुत्वाऽभ्यनुज्ञातो रथमारुह्य
वीर्यवान् ॥ स्वस्थानं गतवान्राजा पूज्यमानो दिवौकसैः ॥ ५८ ॥ य इदं प्रातरुत्थाय सौरिवारे पठेन्नरः ॥ सर्वग्रहोद्भवा पीडा न भवेद्भुवि
तस्य तु ॥ ५९ ॥ शनैश्चरं स्मरेद्देवं नित्यं भक्तिसमन्वितः ॥ पूजयित्वा पठेत्स्तोत्रं तस्य तुष्यति भास्करिः ॥ ६० ॥ इति ते कथितं देवि
माहात्म्यं शनिदैवतम् ॥ सर्वपापोपशमनं सर्वकामफलप्रदम् ॥ ६१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे
प्रथमे प्रभासक्षेत्रमाहात्म्ये शनैश्चरेश्वरमाहात्म्यवर्णनंनामैकोनपञ्चाशोऽध्यायः ॥ ४९ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छे
न्महादेवि लिंगं राहुप्रतिष्ठितम् ॥ शनैश्चरेश्वराद्देवि वायव्ये संप्रतिष्ठितम् ॥ १ ॥ अजादेव्याश्चोत्तरतो धनुषां सप्तके स्थितम् ॥ मंगलायाः समी
पस्थं नातिदूरे व्यवस्थितम् ॥ २ ॥ लिंगं महाप्रभावं तु सैंहिकेयप्रतिष्ठितम् ॥ तत्र वर्षसहस्रं तु वैप्रचित्तिस्तपोऽकरोत् ॥ ३ ॥ स्वर्भानुः स महा
वीर्यो वक्रयोधी महासुराः ॥ समाराध्य महादेवं दिव्येन तपसा प्रभुम् ॥ ४ ॥ लिंगेऽवतारयामास जगद्दीपं महेश्वरम् ॥ यश्चैनं पूजयेद्भक्त्या नरः
सम्यक्च पश्यति ॥ तस्य पापं क्षयं याति अपि ब्रह्मवधोद्भवम् ॥ ५ ॥ नांधो न बधिरो मूको न रोगी न च निर्द्धनः ॥ कदाचिज्जायते मर्त्ये
स्तेन दृष्टेन भूतले ॥ ६ ॥ सुखसौभाग्यसंपन्नस्तदा भवति रूपवान् ॥ सर्वकामसमृद्धात्मा मोदते दिवि देववत् ॥ ७ ॥ इति ते कथितं देवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



माहात्म्यं राहुदैवतम् ॥ श्रुत्वा तु मोहनिर्यातो नरो निष्कल्मषो भवेत् ॥ ८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये राह्वीश्वरमाहात्म्यवर्णनंनाम पंचाशोऽध्यायः ॥ ५० ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि केतुलिंगं महाप्रभम् ॥ राह्वीशानादुत्तरे च मंगलायाश्च दक्षिणे ॥ १ ॥ धनुषोंतरमानेन नातिदूरे व्यवस्थितम् ॥ लिंगं महाप्रभावं हि सर्वपातकनाशनम्[1] ॥ २ ॥ केतुर्नाम ग्रहोत्युग्रः शिवसद्भावभावितः ॥ वर्तुलोऽतीव विस्तीर्णो लोचनाभ्यां सुभीषणः ॥ ३ ॥ पलालधूमसंकाशो ग्रहपीडापहारकः ॥ तत्राकरोत्तपश्चोग्रं दिव्याब्दानां शतं प्रिये ॥ ४ ॥ तस्य तुष्टो महादेवो ग्रहत्वं प्रददौ प्रिये[3] ॥ एकादशशतानां च ग्रहाणामाधिपत्यताम् ॥ ५ ॥ तत्रस्थं पूजयेद्भक्त्या केतुलिंगं महाप्रभम् ॥ केतूदये महाघोरे तस्मिन्दृष्टे विशेषतः ॥ ६ ॥ ग्रहपीडासु चोग्रासु पूजयेत्तं विधानतः ॥ पुष्पैर्गंधैस्तथा धूपैर्नैवेद्यैर्विविधैः शुभैः ॥ ७ ॥ तोषयेद्विधिवद्देवं केतुं कल्मषनाशनम् ॥ ८ ॥ इति संक्षेपतः प्रोक्तं केतुलिंगं महोदयम् ॥ ग्रहपीडोपशमनं सर्वपातकनाशनम्[4] ॥ ९ ॥ एतानि नव लिंगानि ग्रहाणां कथितानि ते ॥ यः पश्यति नरो नित्यं तस्य पीडाभयं कुतः ॥ १० ॥ न दौर्भाग्यं कुले तस्य न रोगी नैव दुःखितः ॥ जायते पुत्रवद्देवि तं रक्षंति महाग्रहाः ॥ ११ ॥ इति ते कथितं सम्यक्चतुर्दशायतनं प्रिये ॥ विघ्नेश्वरं समारभ्य यावत्केतुप्रतिष्ठितम् ॥ १२ ॥ नवग्रहेश्वराणां तु माहात्म्यं पापनाशनम् ॥ तथैव पंचलिंगानां श्रुत्वा पापैः प्रमुच्यते ॥ १३ ॥ कपर्दिनं समारभ्य चंडनाथांतकानि च ॥ पंचैव मुद्रालिंगानि नापुण्यो वेद मानवः ॥ १४ ॥ सूर्येश्वरं समारभ्य केतुलिंगांतकानि वै ॥ नवग्रहाणां लिंगानि नान्यो जानाति कश्चन ॥ १५ ॥ चतुर्दशविधा त्वेवं प्रोक्ताऽऽयतनसंगतिः ॥ यश्चैनां वेद भावेन स क्षेत्रफलमश्नुते ॥ १६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये केत्वीश्वरमाहात्म्यवर्णनंनामैकपंचाशोऽध्यायः ॥ ५१ ॥ ॥ छ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ पंचाथ सिद्धलिंगानि[5] कथयामि यशस्विनि ॥ येषां दर्शनतो देवि सिद्धा यात्रा भवेन्नृणाम् ॥ १ ॥ सोमेशादीशदिग्भागे वरारोहेति या स्मृता ॥ तस्याश्च पूर्वदिग्भागे देवं सिद्धेश्वरं परम् ॥ अभिगम्य नरो भक्त्या अणिमादिकमाप्नुयात् ॥ २ ॥ सिद्धैः प्रतिष्ठितं लिंगं दृष्ट्वा भक्त्या तु मानवः ॥ मुच्यते पातकैः सर्वैः सिद्धलोकं स गच्छति ॥ ३ ॥ विघ्नानि नाशमायांति तत्र क्षेत्रनिवासिनाम् ॥ कामः क्रोधो भयं लोभो रागो मत्सर एव



१ माघनियतः–इ० पा० । २ महाभ्यक्षः–इ० पा० । ३ त्रिभुः–इ० पा० । ४ महापातकनाशनम्–इ० पा० । ५ सिद्धिलिंगानि–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च ॥ ४ ॥ ईर्ष्या दंभस्तथाऽऽलस्यं निद्रा मोहस्त्वहंकृतिः ॥ एतानि विघ्नरूपाणि सिद्धेर्विघ्नकराणि तु ॥ ५ ॥ तानि नाशं समायांति तत्र सिद्धेश्वरार्चनात् ॥ एवं ज्ञात्वा तु यत्नेन तत्र यात्रां समाचरेत् ॥ ६ ॥ इत्येवं कथितं देवि सिद्धेश्वरमहोदयम् ॥ सर्वकामप्रदं नृणां श्रुतं पातकनाशनम्[1] ॥ ७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये सिद्धेश्वरमाहात्म्यवर्णनंनाम द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि कपिलेश्वरमुत्तमम् ॥ तस्यैव पूर्वदिग्भागे नातिदूरे व्यवस्थितम् ॥ १ ॥ लिंगं महाप्रभावं तु दर्शनात्पापनाशनम् ॥ कपिलोनाम राजर्षिर्यत्र तप्त्वा महातपः ॥ २ ॥ संप्राप्तः परमां सिद्धिं प्रतिष्ठाप्य महेश्वरम् ॥ देवसांनिध्यमीशानं तस्मिँल्लिंगे सदा हरिः ॥ ३ ॥ शुक्लपक्षे चतुर्दश्यां सर्वलोकहितार्थतः ॥ सप्तकृत्वो महादेवं सोमेशं कपिलेश्वरम् ॥ यः पश्येत्प्रयतो भूत्वा स गोदानफलं लभेत् ॥ ४ ॥ तिलधेनुं च यो दद्यात्तस्मिंस्तीर्थे समाहितः ॥ तिलसंख्यायुगान्येव स स्वर्गे वसति प्रिये ॥ ५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये कपिलेश्वरमाहात्म्यवर्णनं नाम त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि गंधर्वेश्वरमुत्तमम् ॥ दण्डपाणेस्तु भवनादुत्तरे निकटे स्थितम् ॥ १ ॥ यत्र गंधर्वराजो वै घनवाहेति विश्रुतः ॥ तस्य गंधर्वसेनेति ख्याता पुत्री महाप्रभा ॥ २ ॥ शिखंडिना गणेनैव सा शप्ता रूपगर्विता ॥ ततो गोशृंगऋषिणा दत्तस्तस्या अनुग्रहः ॥ ३ ॥ सोमवारव्रतेनैव सोमेशाराधनं प्रति ॥ ततः क्षेत्रं समागत्य तपः कृत्वा सुदुश्चरम् ॥ ॥ ४ ॥ लिंगं प्रतिष्ठयामास तत्र गंधर्वराट् स्वयम् ॥ तथैव पुत्र्या तस्यैव तत्र लिंगं प्रतिष्ठितम् ॥ ५ ॥ अथ तत्रैव देवेशि दंडपाणेःसमीपतः ॥ घनवाहेश्वरंनाम यो लिंगं यत्नतोऽर्चयेत् ॥ ६ ॥ गंधर्वलोकमाप्नोति दृष्ट्वा स प्रयतः शुचिः ॥ इति ते कथितं देवि गांधर्वं लिंगमुत्तमम् ॥ ७ ॥ तृतीयं सर्वपापानां नाशनं पुण्यवर्द्धनम् ॥ अग्नितीर्थे नरः स्नात्वा पूज्य गंधर्वपूजितम् ॥ ८ ॥ अयने चोत्तरे प्राप्ते निर्वाणमधिगच्छति ॥ श्रुत्वाऽभिनंद्य माहात्म्यं मुच्यते महतो भयात् ॥ ९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये गन्धर्वेश्वरमाहात्म्यवर्णनंनाम चतुःपंचाशोऽध्यायः ॥ ५४ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि तत्पूर्वे विमलेश्वरम् ॥ गौर्याः पूर्वसमीपस्थं नातिदूरे व्यवस्थितम् ॥ १ ॥ गुरोर्नैर्ऋत्यदिग्भागे स्थितं पापप्रणाशनम् ॥ अपि कृत्वा महापापं नारी वा पुरुषोऽपि

१ सर्वपातकनाशनम्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





वा ॥ २ ॥ क्षयाभिभूतदेहो वा तं समभ्यर्च्य भक्तितः ॥ सर्वदुःखान्तगो भूत्वा निर्मलं पदमाप्नुयात् ॥ ३ ॥ गधर्वसेना यत्रैव विमलाऽभूत्क्षया न्विता ॥ विमलेश्वरनाम्ना वै तल्लिंगं प्रथितं क्षितौ ॥ ४ ॥ इति ते कथितं सर्वं विमलेश्वरसूचकम् ॥ माहात्म्यं सर्वपापघ्नं तुरीयं भवसुन्दरि ॥ ५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये विमलेश्वरमाहात्म्यवर्णनंनाम पञ्चपञ्चाशो ऽध्यायः ॥ ५५ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ अथ ते पंचमं वच्मि सिद्धलिंगं महाप्रभम् ॥ ब्रह्मणो नैर्ऋते भागे धनुषां षोडशे स्थितम् ॥ १ ॥ राहुलिंगस्य चाभ्याशे लिंगं धनदनिर्मितम् ॥ धनदत्वं च संप्राप्तो यत्र तप्त्वा महत्तपः ॥ २ ॥ संस्थाप्य विधिवत्पूज्य लिंगं वर्षसहस्रकम् ॥ अलकाधिपतिर्जातस्तत्र शंभोः प्रसादतः ॥ ३ ॥ जातिं स्मृत्वा पूर्विकां तु ज्ञात्वा दीपदशाफलम् ॥ शिवरात्रेः प्रभावं तु प्रभासं पुनरागतः ॥ ४ ॥ प्रभावातिशयं ज्ञात्वा स्थापयामास शंकरम् ॥ तत्र प्रत्यक्षतां नीतस्तपसा येन शंकरः ॥ ५ ॥ महा भक्त्या महादेवि तस्मिँल्लिंगेऽवतारितः ॥ तं दृष्ट्वा मानवो भक्त्या पूजयित्वा यथाविधि ॥ ६ ॥ पञ्चोपचारैः सद्भक्त्या गन्धधूपानुले पनैः ॥ तस्यान्वये दरिद्रश्च कदापि न भविष्यति ॥ ७ ॥ ये चैतत्पूजयिष्यंति लिंगं भक्तियुता नराः ॥ अजेयास्ते भविष्यंति शत्रूणां दर्पनाशनाः[1] ॥ ८ ॥ इति ते कथितं सर्वं धनदेशमहोदयम् ॥ श्रुत्वानुमोद्य यत्नेन दरिद्रो नैव जायते ॥ ९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये धनदेश्वरमाहात्म्यवर्णनंनाम षट्पञ्चाशोऽध्यायः ॥ ५६ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ पंचैवं सिद्धलिंगानि कथितानि तव प्रिये ॥ यश्चैनं वेद संकेतं क्षेत्रवासी स उच्यते ॥ १ ॥ अथ शक्तित्रयाणां ते रौद्रीणां वच्मि विस्तरम् ॥ इच्छा क्रियाज्ञानशक्त्यस्तिस्रस्ताः परिकीर्त्तिताः ॥ २ ॥ पुनस्तासां पूजनायानुक्रमं क्रमतः[2] शृणु ॥ चतुर्दश तथा पंच पूर्वमुक्तानि यानि तु ॥ ३ ॥ चत्वारि त्रीणि चैकं वा यथाशक्त्याभिपूज्य च ॥ लिंगानि तानि संपूज्य शक्तीस्तिस्रस्ततोऽर्चयेत् ॥ ४ ॥ सोमेशादीशदिग्भागे[3] वरारोहेति या स्मृता ॥ अमा कला सा सोमस्य उमा पश्चात्प्रकीर्त्तिता ॥५॥ इच्छाशक्तिस्तु सा ज्ञेया प्रभासक्षेत्रसंस्थिता ॥ तत्र देवि हितार्थाय सर्वेषां प्राणिनां भुवि ॥ ६ ॥ तस्या माहात्म्यमखिलं कथयामि तवाधुना ॥ पुरा सोमेन त्यक्ताभिर्भार्याभिस्तु वरानने ॥ ७ ॥ षड्विंशद्भिस्तपस्तप्तं क्षेत्रे प्राभासिके शुभे ॥ गौरी साऽऽराध्यमानाथ दिव्यवर्षगणान्बहून् ॥ ८ ॥ तासां प्रत्यक्षतां प्राप्ता पार्वती परमेश्वरी ॥ उवाच वरदा ब्रूत यद्वो मनसि संस्थि

१ चार्थनाशकाः—इ० पा० । २ क्रमशः—इ० पा० । ३ सोमेशादग्निदिग्भागे—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तम् ॥ ९ ॥ अथ ताश्चाब्रुवन्देवि यदि तुष्टासि पार्वति ॥ सौभाग्यं देहि नो भूरि लावण्यं परमं तथा ॥ १० ॥ त्यक्ताः सर्वा वयं देवि निर्दोषाः स्वामिना शुभे ॥ दौर्भाग्यदोषसंदग्धा दौर्भाग्येण तु पीडिताः ॥ ११ ॥ ॥ गौर्युवाच ॥ ॥ अद्यप्रभृति सर्वा वः समं द्रक्ष्यति रात्रिपः ॥ प्रसादान्मम चार्वंग्यो नैतन्मिथ्या भविष्यति ॥ १२ ॥ वरदा चेति मन्नाम वरदानाद्भविष्यति ॥ इहागत्य तु या नारी पूजयिष्यति मां शुभाम् ॥ १३ ॥ न दौर्भाग्यं कुले तस्याः क्वचित्प्राप्स्यंति योषितः ॥ माघमासे तृतीयायामुपवासपरायणा ॥ १४ ॥ या मां द्रक्ष्यति सुश्रोणी मत्तुल्या सा भविष्यति ॥ दम्पती षोडशैवात्र परिधाप्य[1] प्रयत्नतः ॥ १५ ॥ फलानि भक्ष्यभोज्यं च पक्वान्नानि च षोडश ॥ या प्रदास्यति वै नारी सा तूमैव भविष्यति ॥ १६ ॥ एतद्गौरीव्रतंनाम तृतीयायां तु कारयेत् ॥ अप्रसूता[2] च या नारी या नारी दुर्भगा भवेत् ॥ १७ ॥ पुमानसकृदप्येवं कृत्वा प्राप्स्यत्यभीप्सितम् ॥ एवमुक्त्वा स्थिता तत्र सा देवी चारुलोचना ॥ १८ ॥ पश्यते रात्रिनाथश्च सर्वास्ता रोहिणीं यथा ॥ अन्यापि[3] दुःखसंदग्धा दौर्भाग्येण तु पीडिता ॥ १९ ॥ अपूजयदुमां देवीं सुभगा साऽभवत्ततः ॥ इति संक्षेपतः प्रोक्तं माहात्म्यं शक्तिसंभवम् ॥ २० ॥ सोमेश्वरे वरारोहा नामेति कथितं तव ॥ सर्वपापक्षयकरं सर्वदारिद्र्यनाशनम् ॥ २१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये वरारोहामाहात्म्यवर्णनंनाम सप्तपंचाशोऽध्यायः ॥ ५७ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ अथ द्वितीयां ते वच्मि शक्तिं देवि क्रियात्मिकाम् ॥ प्रभासस्थां महादेवीं देवानां प्रीतिदायिनीम् ॥ १ ॥ सोमेशाद्वायवे भागे षष्टिधन्वंतरे स्थिता ॥ तत्र पीठं महादेवि योगिनीगणवन्दितम् ॥ २ ॥ तस्मिन्स्थाने स्थितं देवि पातालविवरं महत् ॥ तस्मिन्महाप्रभे स्थाने रक्षारूपेण संस्थिताम् ॥ ३ ॥ पातालनिधिनिक्षेपदिव्यौषधिरसायनम् ॥ क्षेत्रमध्ये स्थितं सर्वं तदर्चनरतो लभेत् ॥ ४ ॥ भैरवीति च तद्देव्याः पूर्वं नाम प्रकीर्त्तितम् ॥ अस्मिन्पुनश्चांतरे तु अष्टाविंशे चतुर्युगे ॥ त्रेतायुगमुखे राजा अजापालो बभूव ह ॥ ५ ॥ तेन चागत्य क्षेत्रेस्मिन्पंचवर्षशतानि च ॥ भैरवी पूजिता देवी व्याधिग्रस्तेन भामिनि ॥ ६ ॥ ततः प्रोवाच तं देवी संतुष्टा राजसत्तमम् ॥ अलं क्लेशेन राजर्षे तुष्टाहं तव भक्तितः ॥ ७ ॥ इत्युक्तः स तदा राजा कृताञ्जलिपुटः सुधीः ॥ प्रणम्योवाच तां देवीमानंदास्राविलेक्षणः ॥ ८ ॥ यदि तुष्टासि मे देवि वरार्हो यदिवाप्यहम् ॥ सर्वे रोगाः शरीरान्मे नाशं यांतु बहिः कृताः ॥ ९ ॥ एवमुक्ता तु सा देवी पुनः प्रोवाच तं नृपम् ॥ सर्वमेव महाराज यथोक्तं ते भविष्यति ॥ १० ॥ इत्युक्ते तु तदा देव्या

१ परिधाप्य—तेभ्यो वस्त्राणि दत्त्वा—इत्यर्थः । २ अप्रसूता—वंध्या—इत्यर्थः । ३ अन्या—रोहिणी—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तस्य राज्ञः कलेवरात् ॥ निर्गता व्याधयस्तत्र अजारूपेण वै पृथक् ॥ ११ ॥ सहस्राणां तु पञ्चैव नियतं सार्द्धमेव च ॥ इति वृत्ते महा
देव्या पुनः प्रोक्तो नराधिपः ॥ १२ ॥ राजन्नेतानजारूपान्व्याधीन्पालय कृत्स्नशः ॥ किंकुर्वाणा[1] भविष्यंति तवैवादेशकारिणः ॥ १३ ॥
अजापालेति ते नाम ख्यातं लोके भविष्यति ॥ तव नाम्ना मम नाम अजापालेश्वरीति च ॥ भविष्यति धरापृष्ठे तच्च यावच्चतुर्युगम् ॥
॥ १४ ॥ अष्टम्यां च चतुर्दश्यां योऽत्र मां पूजयिष्यति ॥ तस्याष्टगुणमैश्वर्यं दास्ये तुष्टा न संशयः ॥ १५ ॥ अश्वयुक्छुक्लाष्टम्यांच त्रिः
कृत्वा तु प्रदक्षिणाम् ॥ सोमेशं मध्यतः कृत्वा संस्नाप्याभ्यर्च्य मां पृथक् ॥ तस्य वर्षत्रयं राजन्न भीः शोको भविष्यति ॥ १६ ॥ या तु
वंध्या भवेन्नारी रोगिणी दुर्भगा तथा ॥ तयोक्ता[2] नवमी कार्या ममाग्रे तुष्टिवर्द्धिनी ॥ १७ ॥ ॥ ईश्वर उवाच ॥ ॥ इत्युक्त्वा तु तदा
देवी तत्रैवांतर्हिताऽभवत् ॥ प्रभासक्षेत्रमध्यस्थः स राजातुलविक्रमः ॥ १८ ॥ पालयामास धर्मात्मा तानजान्व्याधिरूपिणः ॥ औषधी
र्विविधाकारास्तेषां याः पुष्टिहेतवः ॥ १९ ॥ तत्र वर्षशतं साग्रं पुष्टिं नीता अजाः पृथक् ॥ महानिधानसंस्थानमजापालेन निर्मितम् ॥ २० ॥
अथ तस्याः प्रसादेन स राजा पृथुविक्रमः ॥ सप्तद्वीपाधिपो जातः सूर्यवंशविभूषणः ॥ २१ ॥ ॥ देव्युवाच ॥ ॥ अत्याश्चर्यमिदं देव अजा
देव्याः समुद्भवम् ॥ पुनश्च श्रोतुमिच्छामि तस्य राज्ञोद्भुतं महत् ॥ २२ ॥ कथं राजा स देवेश सप्तद्वीपां वसुन्धराम् ॥ शशास एक एवासौ कथं ते
व्याधयः कृताः ॥ २३ ॥ ॥ ईश्वर उवाच ॥ ॥ पुरा बभूव राजर्षिर्दिलीप इति विश्रुतः ॥ दीर्घोनाम सुतस्तस्य रघुस्तस्मादजायत ॥ २४ ॥
अजःपुत्रो रघोश्चापि तस्माद्यश्चातिवीर्यवान् ॥ स भैरवीं समाराध्य कृत्वा व्याधीनजागणान् ॥२५॥ पालयामास संहृष्टो ह्यजापालस्ततोऽभवत् ॥
तस्मिन्काले बभूवाथ रावणो राक्षसेश्वरः ॥ २६ ॥ लंकास्थितः सुरगणान्नियुयोज स्वकर्मसु ॥ अखंडमंडलं चन्द्रमातपत्रं चकार ह ॥ २७ ॥
इन्द्रं सेनापतिं चक्रे वायुं पांसुप्रमार्जकम् ॥ वरुणं दूतकर्मस्थं धनदं धनरक्षकम् ॥ २८ ॥ यमं संयमनेऽरीणां युयुजे मन्त्रणे मनुम् ॥ मेघा
श्छर्दंति लिंपंति द्रुमाः पुष्पाणि चिक्षिपुः ॥ २९ ॥ सप्तर्षयः शांतिपरा ब्राह्मणाः शंसिनः प्रियः ॥ नागा यामककक्षायां गन्धर्वा गीततत्पराः ॥
॥३०॥ प्रेक्षणीयेऽप्सरोवृंदं वाद्ये विद्याधरा वृताः ॥ गंगाद्याः सरितः पाने गार्हपत्ये[3] हुताशनः ॥३१॥ विश्वकर्मांगसंस्कारे[4] तेन शिल्पी नियोजितः ॥
तिष्ठंति पार्थिवाः सर्वे पुरः सेवाविधायिनः ॥ ३२ ॥ दृश्यंते भास्वरै रत्नैः प्रस्खलंतो विभूषणैः ॥ तान्दृष्ट्वा रावणः प्राह प्रहस्तं प्रतिहारकम्॥३३॥ 

१ किंकुर्वाणाः—किंकराः—इत्यर्थः । २ उक्ता नवमी—अश्वयुक्छुक्लनवमी—इत्यर्थः । ३ गार्हपत्ये—पाकनिष्पत्तिकर्मणि—इत्यर्थः । ४ अङ्गसंस्कारे—नापितकर्मणि—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सेवां कर्त्तुं मम स्थाने ब्रूहि केऽत्र समागताः ॥ उवाच स प्रणम्याग्रे दण्डपाणिर्निशाचरः ॥ ३४ ॥ एष काकुत्स्थो मांधाता धुन्धुमारो नलोऽर्जुनः ॥ ययातिर्नहुषो भीमो राघवोऽयं विदूरथः ॥ ३५ ॥ एते चान्ये च बहवो राजान इह चागताः ॥ सेवाकरास्तव स्थाने नाजापाल इहागतः ॥ ३६ ॥ रावणः कुपितः प्राह शीघ्रं दूतं विसर्जय ॥ इत्युक्त्वा प्रहितो दूतो धूम्राक्षोनाम राक्षसः॥ ३७ ॥ धूम्राक्ष गच्छ ब्रूहि त्वमजापालं ममाज्ञया ॥ सेवां कर्त्तुं ममागच्छ करं वा यच्छ पार्थिव ॥ ३८ ॥ अथवा चन्द्रहासेन त्वां करिष्ये विकंधरम् ॥ रावणेनैवमुक्तस्तु धूम्राक्षो गरुडो यथा ॥ ॥ ३९ ॥ संप्राप्तस्तां पुरीं रम्यां तत्र[1] राजकुलं गतः ॥ ददर्शायांतमेकं स अजापालमजावृतम् ॥ ४० ॥ मुक्तकेशं मुक्तकच्छं स्वर्णकंबलधारिणम् ॥ यष्टिस्कंधं रेणुवृतं व्याधिभिः परिवारितम् ॥ ४१ ॥ निग्रंतमिव शार्दूलं सर्वोपद्रवनाशनम् ॥ मह्यामालिख्य नामानि विनिघ्नंतं द्विषां गणम् ॥ ४२ ॥ स्नातं भुक्तं निजस्थाने कृतकृत्यं मतुं यथा ॥ दृष्ट्वा हृष्टमनाः प्राह धूम्राक्षो रावणोदितम् ॥ ४३ ॥ अजापालोऽपि साक्षेपं प्रत्युक्त्वा कारणोत्तरम् ॥ प्रेषयामास धूम्राक्षं ततः कृत्यं समादधे ॥ ४४ ॥ ज्वरमाकारयित्वा तु प्रोवाचेदं महीपतिः॥ गच्छ लंकाधिपस्थानमाचर त्वं यथोदितम् ॥ ४५ ॥ नियुक्तस्त्वजपालेन ज्वरो दिवि जगाम ह ॥ गत्वा च कंपयामास रावणं राक्षसेश्वरम् ॥ ४६ ॥ रावणस्तं विदित्वा तु ज्वरं परमदारुणम् ॥ प्रोवाच तिष्ठतु नृपस्तेन मे न प्रयोजनम् ॥ ४७ ॥ ततः स विज्वरो राजा बभूव धनदानुजः ॥ एवं तस्य चरित्राणि संति चान्यानि कोटिशः ॥ ४८ ॥ अजापालस्य देवेशि सूर्यवत्त्विट्किरीटिनः ॥ तेनैषाऽऽराधिता देवी अजापालेन धीमता ॥ सर्वरोगप्रशमनी सर्वोपद्रवनाशिनी ॥ ४९ ॥ पूजयेत्तां विधानेन भोगेप्सुर्यदि मानवः ॥ गंधैर्धूपैरलंकारैर्वस्त्रैरन्यैश्च भक्तितः ॥ ५० ॥ इति ते कथितं सर्वमजादेव्याः समुद्भवम् ॥ सर्वदुःखोपशमनं सर्वपातकनाशनम् ॥ ५१ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्येऽजापालेश्वरीमाहात्म्यवर्णनंनामाष्टपञ्चाशोऽध्यायः ॥ ५८ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ अथ वच्मि तृतीयां ते ज्ञानशक्तिं शिवात्मिकाम् ॥ प्रभासक्षेत्रमध्यस्थां दारिद्र्यौघविनाशिनीम् ॥ १ ॥ अजेति नाम्नीं तां देवीं राज्ञीशाद्दक्षिणे स्थिताम् ॥ मम वक्राद्विनिष्क्रांता षष्ठाद्वै विष्णुपूजितात् ॥ २ ॥ ॥ देव्युवाच ॥ ॥ पंचवक्त्राणि देवेश प्रसिद्धानि तव प्रभो ॥ षष्ठं यद्वदनं देव तस्य किं नाम संस्मृतम् ॥ समुत्पन्ना कथं तस्मादजादेवीति या श्रुता[2] ॥ ३ ॥ ॥ ईश्वर उवाच ॥ ॥ साधु पृष्टं

१ तत्र--इ०पा० । २ स्तुता--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





त्वया देवि यद्गोप्यं स्वसुतेष्वपि ॥ तत्तेऽहं संप्रवक्ष्यामि अप्रसिद्धागमोदितम् ॥ ४ ॥ वक्त्राणि मम देवेशि सप्तासन्पूर्वमेव हि ॥
सद्योजातादिपंचैव षष्ठं स्मृतमजेति च ॥ ५ ॥ सप्तमं पिचुनामेति सप्तैवं वदनानि मे ॥ तेभ्योऽजं ब्रह्मणे दत्तं पिचुवक्त्रं तु विष्णवे ॥ ६ ॥
तस्मादहं महादेवि पंचवक्त्रोऽधुनाऽभवम् ॥ अजस्तु ब्रह्मा सञ्जज्ञे पिचुर्विष्णुरजायत ॥ ७ ॥ अजवक्त्रान्महादेवि अजा जाता महाप्रभा ॥ अन्धा
सुररणे घोरे मम क्रोधेन भामिनि ॥ ८ ॥ खड्गचर्मधरा देवी सुरूपा सिंहवाहिनी ॥ मर्दयन्ती महादैत्यान्देवीकोटिसमन्विता ॥ ९ ॥ तस्या
भयेन ये दैत्या विद्रुता दक्षिणार्णवम् ॥ पृष्ठतोऽनुययौ तान्वै सा देवी सिंहवाहिनी ॥ १० ॥ इतस्ततस्ते धावन्तो मार्यमाणाश्च तद्गणैः ॥ प्रभास
क्षेत्रसंप्राप्ता नश्यमाना महार्णवम् ॥ ११ ॥ केचित्तत्र हता दैत्याः केचित्पातालमाययुः ॥ निःशेषान्निहतान्दृष्ट्वा सा देवी सिंहवाहिनी ॥ १२ ॥
क्षेत्रं पवित्रमाज्ञाय तत्र स्थाने स्थिता शुभा ॥ सोमेशादीशकोणस्था सौरीशादुत्तरे स्थिता ॥ १३ ॥ यस्तां तत्र स्थितां पश्येद्योषिद्वाथ नरोऽपि
वा ॥ स भूयात्सत्त्वसौभाग्यैः सप्तजन्मानि संयुतः ॥१४॥ गीतवाद्यादिकं नृत्यं यस्तत्र कुरुते नरः ॥ तस्यान्वये न दौर्भाग्यं भूयात्तस्याः प्रसादतः॥
॥१५॥ घृतेन दीपकं तत्र या नारी संप्रयच्छति ॥ रक्तवर्त्या महादेवि यावंतस्तत्र तंतवः ॥ तावज्जन्मांतराण्येव सा सौभाग्यमवाप्नुयात् ॥१६॥ यश्चैतत्तु
पठेन्नित्यं तृतीयायां विशेषतः ॥ शृणुयाद्वाऽपि यो भक्त्या स कामानखिलाँल्लभेत् ॥ १७ ॥ इति संक्षेपतः प्रोक्तो रुद्रशक्तित्रयक्रमः ॥ १८ ॥ एताः
शक्तीः पूजयित्वा सोमेशं पूजयेत्ततः ॥ सम्यग्यात्राफलापेक्षी[3] एकां वा वरदामथ ॥ १९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां
सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्येऽजादेवीमाहात्म्यवर्णनंनामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥ ॥ छ ॥ ॥ इति रुद्रशक्तित्रयसंकेतः ॥ ॥
॥ ॥ ईश्वर उवाच ॥ ॥ प्रभासक्षेत्रदूतीनां त्रितयं वरवर्णिनि ॥ अथ ते संप्रवक्ष्यामि शृणु ह्येकमनाः प्रिये ॥ १ ॥ प्रथमा मंगला देवी विशा
लाक्षी द्वितीयिका ॥ तथा चत्वरदेवी तु तृतीया परिकीर्तिता ॥ २ ॥ यथानुक्रमतः पूज्याः शक्तयस्ता वरानने ॥ प्रभासक्षेत्रयात्रायाः फलप्रेप्सु
र्नरो यदि ॥ ३ ॥ ॥ देव्युवाच ॥ ॥ कस्मिन्स्थाने स्थिता देव दूत्यस्ताः क्षेत्ररक्षिकाः ॥ कस्य ताः कथमाराध्याः कथं पूज्या जगत्पते ॥४॥
॥ ॥ ईश्वर उवाच ॥ ॥ ब्राह्मी तु मंगला प्रोक्ता विशालाक्षी तु वैष्णवी ॥ रौद्री शक्तिः समाख्याता देवी सा चत्वरप्रिया ॥ ५ ॥ मंगला प्रथमं
पूज्या अजादेव्युत्तरे स्थिता ॥ राह्वीशाद्दक्षिणे भागे नातिदूरे वरानने ॥ ६ ॥ सोमेश्वरं प्रतिष्ठाप्य प्रारब्धे यज्ञकर्मणि ॥ सोमेन तत्र[4] देवानामागता



१ पितुनामेति–इ० पा० । २ सा स्थिता तत्र भामिनी–इ० पा० । ३ सम्यग्यात्राफलाकांक्षी–इ० पा० । ४ सह–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा दिदृक्षया ॥ ७ ॥ ब्रह्मादीनां च सा यस्मान्मांगल्यं कृतवत्युमे ॥ तस्मात्सा मंगला प्रोक्ता सर्वमांगल्यदायिनी ॥ ८ ॥ तृतीयायां तु या नारी नरो वा पूजयिष्यति ॥ तस्याऽमंगल्यदुःखानि नाशं यास्यंति कृत्स्नशः ॥ ९ ॥ दम्पतीभोजनं तत्र फलदानं सकञ्चुकम् ॥ प्रशस्तं पृषदाज्यस्य प्राशनं पापनाशनम् ॥ १० ॥ इति संक्षेपतः प्रोक्तं महाभाग्यं महोदयम् ॥ मंगलायाश्च माहात्म्यं सर्वपातकनाशनम् ॥ ११ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये मङ्गलामाहात्म्यवर्णनंनाम षष्टितमोऽध्यायः ॥ ६० ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवीं क्षेत्रदूतीं तु वैष्णवीम् ॥ श्रीदैत्यसूदनाद्देवि पूर्वभागे व्यवस्थिताम् ॥ १ ॥ योगेश्वर्यास्तथैशान्यां धनुषां सप्तके स्थिताम् ॥ महादौर्भाग्यदग्धानां स्थितां भेषजरूपिणीम् ॥ २ ॥ चाक्षुषस्यांतरे देवि यदा दैत्या बलोत्कटाः ॥ हन्यमाना विष्णुनाऽथ दक्षिणां दिशमाविशन् ॥ ३ ॥ तत्र वर्षशतं साग्रं दैत्याश्चक्रुर्महाहवम् ॥ विष्णुना सह देवेशि दिव्यास्त्रैश्च पृथग्विधैः ॥ ४ ॥ दुःखवध्यांस्ततो ज्ञात्वा विष्णुः कमललोचनः ॥ सस्मार भैरवीं शक्तिं महामायां महाप्रभाम् ॥ ५ ॥ सा स्मृता क्षणमात्रेण विष्णुना प्रभविष्णुना ॥ तत्रागता महादेवी आनंदस्फुरितेक्षणा ॥ ६ ॥ विशाले तु कृते देव्या लोचने विष्णुदर्शनात् ॥ विशालाक्षी ततो जाता तत्रस्था दैत्यनाशिनी ॥ ७ ॥ अस्मिन्कल्पे समाख्याता ललितोमा वरानने ॥ उमाद्वयं समाख्यातं सोमेशे दैत्यसूदने ॥ ८ ॥ पूर्वं सोमेश्वरे पश्येत्पश्चाच्छ्रीदैत्यसूदने ॥ उमाद्वयं पूजयित्वा तीर्थयात्राफलं लभेत् ॥ ९ ॥ माघे मासि तृतीयायां विधिना योऽर्चयेत्तु ताम् ॥ न संततिविहीनः स्यात्तस्य कोट्यन्वये नरः ॥ १० ॥ यो नित्यमीक्षते तत्र भक्त्या परमया युतः ॥ आरोग्यसुखसौभाग्यसंयुक्तोऽसौ भवेच्चिरम् ॥ ११ ॥ इति संक्षेपतः प्रोक्तं माहात्म्यं ललितोद्भवम् ॥ श्रुतं यत्पापनाशाय जायते धर्मवृद्धये ॥ १२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये ललितोमाविशालाक्षीमाहात्म्यवर्णनंनामैकषष्टितमोऽध्यायः ॥ ६१ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि तृतीयां चत्वरप्रियाम् ॥ ललितापूर्वदिग्भागे दशधन्वंतरे स्थिताम् ॥ १ ॥ क्षेत्रदूतीं महारौद्रीं रुद्रशक्तिं महाप्रभाम् ॥ क्षेत्ररक्षाविधौ तत्र मया मुक्तां तु मध्यतः ॥ २ ॥ कोटिभूतसमायुक्ता महाकाया महाप्रभा ॥ जीर्णे गृहे तथोद्याने प्रासादाट्टालके पथि ॥ ३ ॥ चत्वरेषु च सर्वेषु क्षेत्रमध्यस्थिता सती ॥ रात्रौ पर्यटते देवी भूतानां कोटिभिर्वृता ॥ ४ ॥ महानवम्यां यस्तत्र नारी वाथ नरोऽपि वा ॥ नानापूजोपचारैश्च पूजये

१ सर्वमंगल्यनाशिनी–इ० पा० । २ पृषदाज्यम्–सदध्याज्यम्–इत्यर्थः । ३ उमाम्–इति शेषः । ४ नानापूजोपहारैश्च–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



द्विधिवच्छुभाम् ॥ ८ ॥ तस्य तुष्टाऽखिलान्कामान्सा देवी संप्रदास्यति ॥ दंपत्योर्भोजनं तत्र देयं यात्राफलेप्सुभिः ॥६॥ इति संक्षेपतः प्रोक्तं माहा
त्म्यं पापनाशनम् ॥ क्षेत्रदूत्यास्तृतीयायाः श्रुतमैश्वर्यकारकम् ॥ ७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे
प्रथमे प्रभासक्षेत्रमाहात्म्ये चत्वरादेवीमाहात्म्यवर्णनंनाम द्विषष्टितमोऽध्यायः ॥ ६२ ॥ ॥छ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि भैरवेश्वर
मुत्तमम् ॥ योगेश्वर्या दक्षिणतो नातिदूरे व्यवस्थितम् ॥ १ ॥ सर्वपापप्रशमनं दिव्यैश्वर्यप्रदायकम् ॥ पुरा दैत्यविनाशार्थं यदा देवी कृतोद्यमा ॥
॥ २ ॥ तदा भैरवमाहूय दूतत्वे नियुयोज ह ॥ शिवदूती तदा ख्याता पश्चाद्योगेश्वरीति च ॥ ३ ॥ भैरवो यत्र वै देव्या दूतत्वे विनियोजितः ॥ तेन
लिंगं समाख्यातं भैरवेश्वरनामकम् ॥ ४ ॥ पूजितं देवदैत्यैश्च भैरवेण प्रतिष्ठितम् ॥ यस्तत्पूजयते भक्त्या कार्त्तिक्यां विधिना नरः ॥ निरंतरं वा
षण्मासं सोऽभीष्टं लभते फलम् ॥ ५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये
भैरवेश्वरमाहात्म्यवर्णनंनाम त्रिषष्टितमोऽध्यायः ॥ ६३ ॥ ॥छ॥ ॥ ईश्वर उवाच ॥ ॥ तस्यैव पूर्वदिग्भागे धनुषां पंचके स्थितम् ॥
लक्ष्मीश्वरेति विख्यातं दारिद्र्यौघविनाशनम् ॥ १ ॥ यत्र देव्या समानीता लक्ष्मीर्दैत्यान्निहत्य च ॥ तेन लक्ष्मीश्वरं नाम स्वयं देव्या प्रतिष्ठि
तम् ॥ २ ॥ यस्तं पूजयते भक्त्या श्रीपंचम्यां[3] विधानतः ॥ न वियुक्तो भवेल्लक्ष्म्या यावन्मन्वंतरं प्रिये ॥३॥ इति श्रीस्कांदे महापुराण एकाशीति
साहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये लक्ष्मीश्वरमाहात्म्यवर्णनंनाम चतुःषष्टितमोऽध्यायः ॥ ६४ ॥ ॥छ॥ ॥ ईश्वर
उवाच ॥ ॥ ततो गच्छेन्महादेवि लिंगं वै[4] वाडवेश्वरम् ॥ लक्ष्मीशादुत्तरे भागे विशालाक्ष्याश्च दक्षिणे ॥ १ ॥ स्थितं महाप्रभावं हि वाडवेन
प्रतिष्ठितम् ॥ कृतस्मरो यदा दग्धः पर्वतो वाडवाग्निना ॥ २ ॥ समीकृत्याखिलं स्थानं तेन लिंगं प्रतिष्ठितम् ॥ पूजयेत्तं विधानेन दध्ना संस्नाप्य
शंकरम् ॥ ३ ॥ दधि दद्याच्च वै तत्र ब्राह्मणे वेदपारगे ॥ सोऽग्निलोकमवाप्नोति सम्यग्यात्राफलं लभेत् ॥ ४ ॥ इति श्रीस्कांदे महापुराण एका
शीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये वाडवेश्वरमाहात्म्यवर्णनंनाम पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥ ॥ छ ॥

१ सदा–इ० पा० । २ श्रुतम्–श्रुतं सत्–इत्यर्थः । ३ श्रीपञ्चम्याम्–श्रियाः सरस्वत्याः पञ्चमी–श्रीपञ्चमी । श्रीपञ्चमी–माघशुक्लपञ्चमी–तस्याम्–इत्यर्थः–तदुक्तं संवत्सरकौमुदीधृतब्राह्मपुराणवचनेन–"चतुर्थी वरदा शुक्ला तत्र गौरी सुपूजिता ॥ सौभाग्यमतुलं कुर्यात्पंचम्यां श्रीरपि श्रियम् ॥" इति । सरस्वतीपूजाऽनध्यायश्चात्र गौडाचारः । अत्र श्रीपञ्चम्यामारभ्य प्रतिमासं षडब्दसमाप्यं श्रीपञ्चमीव्रतं कुर्वन्ति पठन्ति च–इति शब्दकल्पद्रुमे–'श्रीपञ्चमी' शब्दव्याख्याने दृश्यते । ४ हि–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महालिंगमर्घ्येश्वरमिति श्रुतम् ॥ उत्तरे तु विशालाक्ष्या नातिदूरे व्यवस्थितम् ॥ १ ॥ लिंगं महाप्रभावं हि सुरगन्धर्वपूजितम् ॥ यदा देवी समायाता वडवानलधारिणी ॥ २ ॥ प्रभासक्षेत्रमासाद्य दृष्ट्वा तत्र महोदधिम् ॥ अर्घ्यं दत्तवती तत्र विधिना तन्महोदधेः ॥ ३ ॥ प्रतिष्ठाप्य महल्लिंगं संपूज्य विधिना ततः ॥ प्रविवेशाथ देवेशि स्नानार्थं च महोदधौ ॥ ४ ॥ यस्मादर्घ्यं पुरा दत्त्वा पश्चादीशः प्रतिष्ठितः ॥ तेनार्घ्येशेति विख्यातं लिंगं पापप्रणाशनम् ॥ ५ ॥ पंचामृतेन संस्नाप्य विधिना यस्तमर्चयेत् ॥ सप्तजन्मानि देवेशि स विद्यामधिगच्छति ॥ सम्यक्छास्त्रप्रवक्ता च सर्वसंदेहवित्तमः ॥ ६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्येऽर्घ्येश्वरमाहात्म्यवर्णनंनाम षट्षष्टितमोऽध्यायः ॥ ६६ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महालिंगं कामेश्वरमिति श्रुतम् ॥ कामेनाराधितं पूर्वं दैत्यसूदनपश्चिमे ॥ १ ॥ धनुषां सप्तके तत्र स्थितं देवि महाप्रभम् ॥ निर्दग्धस्तु यदा कामस्तृतीयेनाग्निना मम ॥ २ ॥ तदा वर्षसहस्रं तु समाराध्य महेश्वरम् ॥ प्रपेदे कामनासर्गं यत्रानंगः पुरा किल ॥ ३ ॥ तेन कामेश्वरंनाम ख्यातं लिंगं धरातले ॥ सर्वपापहरं देवि सर्वकामफलप्रदम् ॥ ४ ॥ त्रयोदश्यां विधानेन शुक्लायां मासि माधवे ॥ संपूज्य तं विधानेन स स्त्रीणां कामवद्भवेत् ॥ ५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये कामेश्वरमाहात्म्यवर्णनंनाम सप्तषष्टितमोऽध्यायः ॥६७॥ ॥छ॥ ॥ ईश्वर उवाच ॥ ॥ इति प्रोक्तानि ते देवि वक्रलिंगानि पंच वै ॥ अथ ते संप्रवक्ष्यामि यत्र गौर्यास्तपोवनम् ॥ स्थानं महाप्रभावं हि सुरसिद्धनिषेवितम् ॥ १ ॥ सोमेशात्पूर्वदिग्भागे षष्टिधन्वंतरे स्थितम् ॥ यत्र देव्यात पस्तप्तं सत्या वै पूर्वजन्मनि ॥ ॥ २ ॥ कृत्वा च प्रणयात्कोपं मया सार्द्धं वरानने ॥ प्रभासक्षेत्रमासाद्य संस्थिता सा तपस्विनी ॥ ३ ॥ ॥ देव्युवाच ॥ ॥ किमर्थं सा परित्यज्य सती त्वां तपसि स्थिता ॥ कस्मिन्स्थाने स्थिता देवी एतन्मे विस्तराद्वद ॥ ४ ॥ ॥ ईश्वर उवाच ॥ ॥ पुराऽऽसीस्त्वं महादेवि श्यामवर्णा मनस्विनी ॥ नामार्थं च मया प्रोक्ता कालीति रहसि स्थिता ॥ ५ ॥ सा श्रुत्वा विस्मयं वाक्यं भृशं रोषपरायणा ॥ अब्रवीत्परुषं वाक्यं भृकुटीकुटिलानना ॥ ६ ॥ यस्मात्कालीत्यहं प्रोक्ता त्वया शंभोऽतिविप्लवात् ॥ तस्माद्यास्यामि गौरीति भविष्यामि च यत्र हि ॥ ७ ॥ एवमुक्त्वा महाभागा सखीगणसमावृता ॥ गत्वा प्रभासक्षेत्रं सा प्रतिष्ठाप्य महेश्वरम् ॥ गौरीश्वरेति विख्यातं पूजयंती विधानतः ॥ ८ ॥ ततो लिंगसमी

१ तृतीयेन अग्निना—तृतीयलोचनगेन अग्निना—इत्यर्थः। २ तत्र—६० पा०।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पस्था एकपादे स्थिता सती ॥ लिंगमाराधयंती सा चकार सुमहत्तपः ॥ ९ ॥ पंचाग्निसाधिका देवी ग्रीष्म जाप्यपरायणा ॥ वर्षास्वाकाशशयना हेमंते सलिलाशया ॥ १० ॥ यथा यथा तपो वृद्धिं याति तस्या महाप्रभा ॥ तथातथा शरीरस्य गौरत्वं प्रतिपद्यते ॥ ११ ॥ कालेन महता गौरी सर्वांगेणाथ साऽभवत् ॥ ततो विहस्य भगवानुवाच शशिशेखरः ॥ १२ ॥ गौरीति च मुहुर्वाक्यमुत्तिष्ठ व्रज मन्दिरम् ॥ वरं वरय कल्याणि यत्ते मनसि वर्त्तते ॥ १३ ॥ ॥ गौर्युवाच ॥ ॥ यो मामत्र स्थितां पश्येन्नारी वा पुरुषोऽथ वा ॥ स भूयात्सुतसौभाग्यैः सप्तजन्मानि संयुतः ॥ ॥ १४ ॥ गीतवाद्यादिकं नृत्यं यः कुर्यात्पुरतो मम ॥ तस्यान्वये न दौर्भाग्यं भूयात्तव प्रसादतः ॥ १५ ॥ मया प्रतिष्ठितं लिंगं पूर्वमभ्यर्च्य मां ततः॥ पूजयिष्यति यो भक्त्या स यास्यति परं पदम् ॥ १६ ॥ गौरीश्वरेति विख्यातं नाम तस्य भवेत्प्रभो ॥ तथेत्यहं प्रतिज्ञाय तत्र स्थाने स्थितो ऽभवम् ॥ १७ ॥ देव्या सह महादेवि प्रहृष्टेनांतरात्मना ॥ अद्यापि अयने प्राप्ते उत्तरे दक्षिणेऽपि वा ॥ १८ ॥ गौरीस्थानं समभ्येति तत्र देव गुणैर्युतः॥ तस्मिन्नहनि यस्तत्र विशिष्टानि फलानि च ॥ संप्रयच्छति विप्रेभ्यस्तस्य पुत्रा भवंति च ॥ १९ ॥ पुत्रहीना तु या नारी नालिकेरं प्रय च्छति ॥ पुत्रं सा लभते शीघ्रं सबलं लक्षणान्वितम् ॥ २० ॥ घृतेन दीपकं तत्र या नारी संप्रयच्छति ॥ रक्तवर्त्या महादेवि यावत्तस्यैव तंतवः ॥ ॥ २१ ॥ तावज्जन्मांतराण्येव सा सौभाग्यमवाप्नुयात् ॥ २२ ॥ या नृत्यं कुरुते तत्र भक्त्या परमया युता ॥ आरोग्यसुखसौभाग्यैः संयुक्ता सा भवे च्चिरम् ॥ २३ ॥ तत्रांते सुमहत्कुंडं तीर्थं स्वच्छोदपूरितम् ॥ यः स्नानमाचरेत्तत्र मुच्यते सर्वपातकैः ॥ २४ ॥ यः श्राद्धं कुरुते तत्र पितॄनुद्दिश्य भक्तितः ॥ स याति परमं स्थानं पितृभिः सह पुण्यभाक् ॥ २५ ॥ तस्मात्सर्वप्रयत्नेन श्राद्धं तत्र समाचरेत् ॥ गीतवाद्यादिभिर्नृत्यै रात्रौ कुर्वीत जागरम् ॥ २६ ॥ दंपत्योः परिधानं च तत्र देयं सदक्षिणम् ॥ यश्चैतत्पठते नित्यं तृतीयायां विशेषतः ॥ पार्वत्याः पुरतो देवि स सौभाग्य मवाप्नुयात् ॥ २७ ॥ शृणुयाद्वाऽपि यो भक्त्या सम्यग्भक्तिपरायणः ॥ सोऽपि सौभाग्यमाप्नोति यावज्जीवं न संशयः ॥ २८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये गौरीतपोवनमाहात्म्यवर्णनंनामाष्टषष्टितमोऽध्यायः ॥ ॥ ६८ ॥ ॥ देव्युवाच ॥ ॥ गौरीश्वरेति विख्यातं यत्त्वया लिंगमुत्तमम् ॥ कुत्र तिष्ठति तल्लिंगं पूजितं यत्फलं लभेत् ॥ १ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि माहात्म्यं पापनाशनम् ॥ गौरीश्वरस्य देवस्य सर्वकामप्रदस्य वै ॥ २ ॥ इदं तपोवनं देवि ख्यातं गौर्या महाप्र



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भम् ॥ धनुषां पंचपंचाशत्समंतात्परिमंडलम् ॥३॥ तत्र मध्ये स्थिता देवी एकपादा तपोन्विता ॥ तस्या[1] उत्तरतो देवि किंचिदीशानसंस्थितम् ॥ ॥ ४ ॥ धनुषां चतुरंते च लिंगं पापभयापहम् ॥ यस्तत्पूजयते भक्त्या लिंगं भक्तियुतो नरः ॥ कृष्णाष्टम्यां विशेषेण स मुक्तः पातकैर्भवेत् ॥ ५ ॥ गोदानं चात्र शंसंति सुवर्णं द्विजपुंगवे ॥ अन्नदानं विशेषेण सर्वपापप्रशांतये ॥ ६ ॥ गोघ्नो वा ब्रह्महा वा॒ऽपि तथा दुष्कृतकर्मकृत् ॥ सर्व पापैः प्रमुच्येत तस्य लिंगस्य दर्शनात् ॥ ७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभास क्षेत्रमाहात्म्ये गौरीश्वरमाहात्म्यवर्णनंनामैकोनसप्ततितमोऽध्यायः ॥ ६९ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि वरुणेश्वरमुत्तमम् ॥ गौरीतपोवनाग्नेय्यां धनुषां विंशतौ स्थितम् ॥ लिंगं महाप्रभावं हि वरुणेन प्रतिष्ठितम् ॥ १ ॥ पूर्वं पीतो यदा देवि समुद्रः कुम्भजन्मना ॥ तदा कोपेन सन्तप्तो वरुणः सरितां पतिः ॥ २ ॥ कामिकं तु समाज्ञाय क्षेत्रं प्राभासिकं तदा ॥ तत्रातपद्देवि तपः स वै परमदुश्चरम् ॥ ३ ॥ प्रति ष्ठाप्य महालिंगं संपूजयति भक्तितः ॥ वर्षाणामयुतं साग्रं पूजितो वृषभध्वजः ॥ ४ ॥ ततः प्रसन्नो देवेशि निजगंगाजलेन तु ॥ पूरयामास तं रिक्तं समुद्रं यादसां पतिम् ॥ ५ ॥ छंदयामास तं लिंगं वरदानैरनेकधा ॥ तत्प्रभृत्येव ते सर्वे समुद्राः परिपूरिताः ॥ ६ ॥ वरुणेश्वरनामेति तल्लिंगं तत्प्रभृत्यभूत् ॥ ७ ॥ को ह्यर्थो बहुभिर्लिंगैर्दृष्टैर्वा सुरसुन्दरि ॥ वरुणेशेन दृष्टेन सर्वतीर्थफलं लभेत् ॥ ८ ॥ अष्टम्यां च चतुर्दश्यां तदग्रे स्नाप येद्यदि ॥ स ब्राह्मणश्चतुर्वेदो जायते नात्र संशयः ॥ ९ ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चान्ये वरानने ॥ मूकांधबधिरा बालाः स्त्रियश्चैव नपुं सकाः ॥ १० ॥ दृष्ट्वा गच्छंति ते देवि स्वर्गं धर्मपरायणाः ॥ स्नानं जाप्यं बलिं होमं पूजां स्तोत्रं च[6] नर्तनम् ॥ तस्मिन्स्थाने तु यः कुर्यात्तत्सर्वं चाक्षय्यं भवेत् ॥ ११ ॥ हैमं पद्मं मौक्तिकं च दानं तत्रैव दापयेत् ॥ सम्यग्यात्राफलापेक्षी स्वर्गापेक्षी तथा नरः ॥ १२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये वरुणेश्वरमाहात्म्यवर्णनंनाम सप्ततितमोऽध्यायः ॥ ॥ ७० ॥ ॥ छ ॥ ॥ ततो गच्छेन्महादेवि लिंगं तत्रैव संस्थितम् ॥ दक्षिणे वरुणेशस्य धनुषां त्रितये स्थितम् ॥१॥ भार्यया वरुणस्यैव उषा नाम्न्या वरानने ॥ कृत्वा तपो महाघोरं भर्तृदुःखपरीतया ॥ २ ॥ स्थापितं तु महल्लिंगं सर्वसिद्धिप्रदायकम् ॥ उषेश्वरेति विख्यातं सर्वसिद्धिप्रपूजि

---

१ तस्मादुत्तरतः–इ०पा० । २ पापी–इ० पा० । ३ कुंभयोनिना–इ० पा० । ४ ततः–इ० पा० । ५ तम्–वरुणम्–इत्यर्थः । ६ स्तोत्रमुदीरणम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तम् ॥३॥ यस्तत्पूजयते भक्त्या लिंगं पापप्रणाशनम् ॥ महापापौघयुक्तोऽपि स गच्छेत्परमां गतिम् ॥४॥ स्त्रीणां सौभाग्यफलदं दुःखदौर्भाग्यना
शनम् ॥ ५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्य उपेश्वरमाहात्म्यवर्णनंनामै
कसप्ततितमोऽध्यायः ॥ ७१ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तत्रैव संस्थितं पश्येद्विघ्नेशं जलवाससम् ॥ सर्वविघ्नविनाशाय सर्वकार्यप्र
सिद्धये ॥ १ ॥ वरुणेन महादेवि तपोनिर्विघ्नहेतवे ॥ पूजितो जलजैर्भक्त्या जलवासास्ततः स्मृतः ॥ २ ॥ चतुर्थ्यां तर्पयेद्भक्त्या गन्धैः पुष्पैः सं
मोदकैः ॥ यथाभक्त्यनुसारेण तस्य तुष्येद्गणाधिपः ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे
प्रभासक्षेत्रमाहात्म्ये जलवासगणपतिमाहात्म्यवर्णनंनाम द्विसप्ततितमोऽध्यायः ॥ ७२ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महा
देवि कुमारेश्वरमुत्तमम् ॥ लिंगं महाप्रभावं हि महापातकनाशनम् ॥ १ ॥ धनुषां त्रिंशता[2] देवि वरुणान्नैर्ऋते स्थितम् ॥ गौरीतपोवनाद्देवि दक्षिण
स्थानसंस्थितम् ॥ २ ॥ षण्मुखेन महादेवि तत्र कृत्वा[4] महत्तपः ॥ प्रतिष्ठितं महालिंगं कुमारेशस्ततोऽभवत् ॥ ३ ॥ यस्तं पूजयते भक्त्या मास
मेकं निरन्तरम् ॥ षण्मासस्यार्चनेनैव यत्पुण्यमुपजायते ॥ ४ ॥ तत्पुण्यं सकलं तस्य कुमारेशार्चनात्सकृत् ॥ लभते दिवसैकेन विधिना यदि
पूजयेत् ॥ ५ ॥ कामं क्रोधं तथा लोभं रागं त्यक्त्वा तु मत्सरम् ॥ ब्रह्मचारी यतिर्भूत्वा सकृदप्येनमर्चयेत् ॥ ६ ॥ एवं संपूजिते देवि सम्यग्यात्रा
फलं लभेत् ॥ ७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये कुमारेश्वरमाहात्म्यवर्णनं
नाम त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि शांकल्येश्वरमुत्तमम् ॥ दैत्यसूदनवायव्ये धनुषां
त्रिंशता स्थितम् ॥ १ ॥ शाकल्येन महादेवि पूजितं सर्वकामदम् ॥ शाकल्योनाम राजर्षिर्यत्र तप्त्वा महत्तपः ॥२॥ समाराध्य महादेवं प्रत्यक्षीकृ
तवान्भवम् ॥ लिंगेऽवतारयामास प्रसन्नं तं महेश्वरम् ॥ ॥ तस्मिन्दृष्टे वरारोहे सप्तजन्मकृतं नृणाम् ॥ पापं प्रणश्यते शीघ्रं तमः सूर्योदये यथा
॥ ४ ॥ तत्राष्टम्यां चतुर्दश्यां स्नापयेत्पयसा शिवम् ॥ पूजयेच्च विधानेन गन्धपुष्पादिभिः क्रमात् ॥ ५ ॥ हिरण्यं तत्र दातव्यं सम्यग्या
त्राफलेप्सुभिः ॥ चत्वारि तस्य नामानि कथ्यमानानि मे शृणु ॥ ६ ॥ आदौ कृतयुगे देवि कीर्तितो भैरवेश्वरः ॥ ततः सावर्णिमनुना ॥ ७४ ॥

१ फलोदकैः--इ० पा० । २ धनुषां त्रिशताद्देवि लिंगं पश्चिमवक्त्रकम्--इ० पा० । ३ गौरीतपोवने देवि--इ० पा० । ४ गत्वा--इ० पा० । ५ यतिः--जितेन्द्रियः--इत्यर्थः । ६ साकल्येश्वरम्--इ० पा० सर्वत्र 'शाकल्य' शब्दे । ७ राजर्षिः--ऋषीणां राजा--इति राजर्षिः । ८ सुप्रसन्नं महेश्वरम्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम्यगाराधितः प्रिये ॥ ७ ॥ सावर्णिकेश्वरं नाम त्रेतायां तस्य संज्ञितम् ॥ ततस्तु द्वापरे देवि गालवेन महात्मना ॥ सम्यगाराधितस्तत्र लिंगरूपी वृषध्वजः ॥ ८ ॥ तृतीयं तस्य देवस्य गालवेश्वरसंज्ञितम् ॥ कलौ युगे तु संप्राप्ते शाकल्योनाम वै मुनिः ॥ ९ ॥ यत्र सिद्धिमनुप्राप्त ऐश्वर्यं चाणिमादिकम् ॥ शाकल्येश्वरनामेति ततः ख्यातं तुरीयकम् ॥ १० ॥ एवं चातुर्युगं नाम तस्य लिंगस्य कीर्तितम् ॥ पापघ्नं पुण्यदं नृणां कीर्त्तितं सर्वकामदम् ॥ ११ ॥ तस्यैव देवदेवस्य क्षेत्रोत्पत्तिं शृणु प्रिये ॥ १२ ॥ अष्टादशधनुर्देवि समंतात्परिमण्डलम् ॥ महापापहरं देवि तत्र क्षेत्रनिवासिनाम्॥ १३ ॥ कृमिकीटपतंगानां तिरश्चामपि मोक्षदम् ॥ यत्र कूपादितोयेषु जलं सारस्वतं स्मृतम् ॥ १४ ॥ यत्र तत्र नरः स्नात्वा स्वर्गलोके महीयते ॥ अश्वमेधसहस्रस्य वाजपेयशतस्य च ॥ १५ ॥ तत्फलं समवाप्नोति तस्य लिंगस्य दर्शनात् ॥ सोमपर्वणि संप्राप्ते यस्तत्र शुचिरात्मवान् ॥ १६ ॥ अघोरं च जपेत्सम्यगाज्यहोमसमन्वितम् ॥ तल्लिंगस्य समीपस्थो यावन्मासावधिः प्रिये ॥ १७ ॥ महापातकयुक्तोऽपि युक्तो वाऽप्युपपातकैः ॥ स सर्वां लभते सिद्धिमुत्तमां वरवर्णिनि ॥ १८ ॥ कामिकं तत्स्मृतं लिंगं सर्वकामफलप्रदम् ॥ अघोरवक्त्रं देवस्य तत्रस्थं भैरवं महत् ॥ १९ ॥ भैरवेश्वरनामेति पूर्वं ख्यातमभूद्भुवि ॥ अस्मिन्युगे तु संप्राप्ते शाकल्येश्वरनामकम् ॥ २० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये शाकल्येश्वरमाहात्म्यवर्णनंनाम चतुःसप्ततितमोऽध्यायः ॥ ॥ ७४ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि लिंगं शाकलकलेश्वरम् ॥ शाकल्येश्वरनैर्ऋत्ये धनुषां षष्टिभिः स्थितम् ॥ ॥ १ ॥ तच्चतुर्युगनामाढ्यं स्मृतं पातकनाशनम् ॥ पूर्वं कामेश्वरंनाम त्रेतायां पुलहेश्वरम् ॥ २ ॥ द्वापरे सिद्धिनाथं तु नारदेशं कलौ स्मृतम् ॥ तथा कलकलेशं च नाम तस्यैव कीर्त्तितम् ॥ ३ ॥ समुद्रे च महापुण्ये यस्मिन्काले सरस्वती ॥ आगता सा महाभागा हृष्टा तुष्टा सरिद्वरा ॥ तस्य तोयस्य शब्देन सागरस्य महात्मनः ॥ ४ ॥ ततो देवाः सगन्धर्वा ऋषयः सिद्धचारणाः ॥ नेदुः कलकलं तत्र तुमुलं लोमहर्षणम् ॥ ॥ ५ ॥ तेन शब्देन महता मम मूर्त्तिः समुत्थिता ॥ कलकलेश्वरनामेति ततो लिंगं प्रकीर्तितम् ॥ ६ ॥ इति ते पूर्ववृत्तांतं कथितं नामकारणम् ॥ सांप्रतं तु यथा जातं पुनः कलकलेश्वरम् ॥ तत्तेऽहं संप्रवक्ष्यामि शृणुष्वैकमनाः प्रिये ॥ ७ ॥ पुरा द्वापरसंधौ च प्रविष्टे तु कलौ युगे ॥ नारदस्तु समागत्य क्षेत्रं प्राभासिकं शुभम् ॥ संचकार तपश्चोग्रं तत्र लिंगसमीपतः ॥ ८ ॥ ततो वर्षशते पूर्णे समाराध्य वृषध्वजम् ॥ गांधर्वं प्राप्य

---

१ सत्कृतम्–इ०पा० ।२ शृणुष्व मे–इ०पा० ।३ शुष्कपातकैः–इ०पा० ।४ पूर्वम्–कृतयुगे–इत्यर्थः।५ तस्य महात्मनः सागरस्य तोयस्य शब्देन सा आगता सरिद्वरा हृष्टा तुष्टा–इति योजना। ६ समागम्य–इ०पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





देवेशि भूषितं सप्तभिः स्वरैः ॥ ९ ॥ ततो हृष्टमना भूत्वा तल्लिंगस्य समीपतः ॥ स चकार महायज्ञं पौंडरीकमिति श्रुतम् ॥ १० ॥ देवदेवस्य तु तुष्ट्यर्थं स सदा भावितात्मवान् ॥ समाहूय ऋषींस्तत्र ब्रह्मलोकात्सहस्रशः ॥ ११ ॥ ततः संभृतसंभारो यज्ञोपकरणान्वितः ॥ कृत्वा कुण्डादिकं सर्वं समारेभे ततः क्रतुम् ॥ १२ ॥ ततः संपूर्णतां प्राप्ते तस्मिन्क्रतौ[1] वरानने ॥ १३ ॥ अथागमंस्ततो विप्रास्तत्र क्षेत्रनिवासिनः ॥ दक्षिणार्थं महादेवि शतशोऽथ सहस्रशः ॥ १४ ॥ ततः स कौतुकाविष्टस्तेषां युद्धार्थमेव हि ॥ प्राक्षिपत्तत्र रत्नानि सुवर्णं च महीतले ॥ १५ ॥ ततस्ते ब्राह्मणाः सर्वे युध्यमानाः परस्परम् ॥ कोलाहलं परं चक्रुर्बहुद्रव्यपरीप्सया[2] ॥ १६ ॥ एके दिगंबरा देवि त्यक्तयज्ञोपवीतिनः ॥ विकचाः केऽपि दृश्यंते त्वन्ये रुधिरविप्लुताः ॥ १७ ॥ अन्ये परस्परं जघ्नुर्मुष्टिभिश्चरणैस्तथा ॥ एवं तत्र तदा क्षिप्तं यद्द्रव्यं नारदेन तु ॥ १८ ॥ अथाभावे तु वित्तस्य ये च विप्रा ह्यकिंचनाः ॥ विद्याविनयसंपन्ना ब्राह्मणैर्जर्जरीकृताः ॥१९॥ ते तमूचुर्भृशं शांताः स्मयमानं[3] मुहुर्मुहुः ॥ कलहार्थं यतो दानं त्वया दत्तमिदं मुने ॥ ॥ २० ॥ विद्यायुक्तान्परित्यज्य विधिं त्यक्त्वा तु याज्ञिकम् ॥ तस्मादस्य मुने नाम ख्यातं कलकलेश्वरम् ॥ २१ ॥ तेन नाम्ना द्विजश्रेष्ठ लिंगमेतद्भविष्यति ॥ एतस्मात्कारणाद्देवि जातं कलकलेश्वरम्[4] ॥ २२ ॥ यस्तं स्नाप्य नरो भक्त्या कुरुते त्रिः प्रदक्षिणम् ॥ स गच्छेद्रुद्रलोकं[5] तु त्वत्प्रसादादसंशयम् ॥ २३ ॥ यस्तं पूजयते भक्त्या गंधपुष्पानुलेपनैः ॥ हेम दत्त्वा द्विजातिभ्यः स गच्छेत्परमं पदम् ॥ २४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये कलकलेश्वरमाहात्म्यवर्णनंनाम पञ्चसप्ततितमोऽध्यायः ॥ ॥ ७५ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्यैव देवदेवस्य समीपस्थं विराजते ॥ लिंगद्वयं महापुण्यं लकुलीशप्रतिष्ठितम् ॥ १ ॥ लकुलेश्वरनामास्ति तस्य लिंगद्वयस्य वै ॥ तद्दृष्ट्वा देवदेवस्य लिंगद्वयमनुत्तमम् ॥ २ ॥ मुच्यते सकलात्पापादाजन्ममरणांतिकात् ॥ तत्र शुक्लचतुर्दश्यां मासि भाद्रपदे प्रिये ॥ ३ ॥ उपवासपरो भूत्वा यः करोति प्रजागरम् ॥ मूर्त्तिमंतं तु संपूज्य लकुलीशं महाप्रभम् ॥ ४ ॥ ततः संपूज्य विधिना तत्र लिंगद्वयं पृथक् ॥ सम्यक्पूजाविधानेन स्तुतिमंत्रैरनुक्रमात् ॥ स याति परमं स्थानं यत्र देवो महेश्वरः ॥ ५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये सोमेश्वरमाहात्म्ये कलकलेश्वरसमीपवर्तिलकुलीशलिंगद्वयमाहात्म्यवर्णनंनाम षट्सप्ततितमोऽध्यायः ॥७६॥ ॥छ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि उत्तंकेश्वरमुत्तमम् ॥ तस्यैव दक्षिणे भागे नाति

१ क्रतुवरोत्तमे–इ० पा० । २ बहुरत्नपरीप्सया–इ० पा० । ३ स्मयमानम्–हसन्तम्–इत्यर्थः । ४ नाम–इति शेषः । ५ इंद्रलोकम्–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दूरे व्यवस्थितम् ॥ स्थापितं च स्वयं भक्त्या उत्तंकेन महात्मना ॥ १ ॥ तद्दृष्ट्वा तु महादेवि स्पृष्ट्वा च सुसमाहितः ॥ संपूज्य विधिवद्भक्त्या मुच्यते सर्वकिल्बिषात् ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्य उत्तंकेश्वरमाहात्म्य वर्णनंनाम सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि देवं वैश्वानरेश्वरम् ॥ तस्यैवाग्नेयकोणस्थं धनुषां पंचके स्थितम् ॥ १ ॥ पापघ्नं सर्वजंतूनां दर्शनात्स्पर्शनादपि ॥ तत्र कश्चिच्छुकः पूर्वं नीडं देवि चकार ह ॥ २ ॥ प्रासादे भार्यया सार्द्धं निवसन्सुचिरं स्थितः ॥ ततस्तौ दंपती नित्यं प्रदक्षिणं प्रचक्रतुः ॥ ३ ॥ कुलायस्य वशादेवि न तु भक्त्या कथंचन ॥ कालेन महता तौ च पंचत्वं समुपस्थितौ ॥ ४ ॥ जातौ तेन प्रभावेन उक्तौ जातिस्मरौ भुवि ॥ लोपामुद्रागस्त्यनामप्रसिद्धिं परमां गतौ ॥ ५ ॥ अथ गाथा पुरी गीता अगस्त्येन महात्मना ॥ स्मरता पूर्वदेहं तु विस्मयेनानुभूतिजा ॥ ६ ॥ कृत्वा प्रदक्षिणं सम्यग्वह्नीशं यः प्रपश्यति ॥ नूनं प्रसिद्धिमाप्नोति इतश्चाहं यथा पुरा ॥ ७ ॥ एवं देवि तवाख्यातं माहात्म्यं वह्निदैवतम् ॥ श्रुतं पापहरं नृणां सर्वकामफलप्रदम् ॥ ८ ॥ घृतेन तं तु संस्नाप्य विधिना वै समर्चयेत् ॥ हेम दद्याच्च विप्रेंद्र सम्यक्छ्रद्धासमन्वितः ॥ ९ ॥ एवं कृत्वा विधानेन सम्यग्यात्राफलं लभेत् ॥ वह्निलोकं तु संप्राप्य मोदते कालमक्षयम् ॥ १० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये वैश्वानरेश्वरमाहात्म्यवर्णनंनामाष्टसप्ततितमोऽध्यायः ॥ ७८ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि लकुलीशं महाप्रभम् ॥ तस्य पश्चिमदिग्भागे धनुषां सप्तके स्थितम् ॥ १ ॥ पापघ्नं सर्वजंतूनां शांतं मूर्तिस्थितं प्रभुम् ॥ समायातं महाक्षेत्रे तत्र कायावरोहणात् ॥ २ ॥ कृत्वा तत्र तपश्चोग्रं दीक्षयित्वात्मशिष्यकान् ॥ कुशकादींश्च चतुर उक्त्वा शास्त्राण्यनेकशः ॥ ३ ॥ न्यायवैशेषिकादीनि ततः सिद्धिं परां गतः॥ एवं ज्ञात्वा तु यः सम्यक्तं समर्चयते नरः ॥ ४ ॥ कार्त्तिक्यां तु विशेषेण अयने चोत्तरेपि वा ॥ विद्यादानं च तत्रैव दद्याद्विप्राय शालिने ॥ ५ ॥ सप्तजन्मानि विप्रस्य धनाढ्यस्य कुले शुभे ॥ जायते मतिमान्धीमाञ्छ्रीमानेवं पुनःपुनः ॥ ६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये लकुलीश्वरमाहात्म्यवर्णनंनामैकोनाशीतितमोऽध्यायः ॥ ७९ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्यैव पूर्वदिग्भागे लिंगं पातकनाशनम् ॥ गौतमेश्वरनामाख्यं दैत्यसूदनपश्चिमे ॥ १ ॥ धनुषां पंचके देवि संस्थितं सर्वकामदम् ॥ शल्येनाराधितं यद्वै मद्रराजेन

१ शालिने—पाठशालागताय सुशीलाय विद्यार्थिने—इत्यर्थः । धीमते—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





भामिनि ॥ २ ॥ ततः कृतं तपश्चोग्रं समाराध्य महेश्वरम् ॥ अन्योऽप्येवं नरो यस्तु तं समाराधयिष्यति ॥ ३ ॥ स प्राप्स्यति परां सिद्धिं यथा
शल्यो महामनाः ॥ चैत्रशुक्लचतुर्दश्यां स्नापयेत्पयसा तु यः ॥ ४ ॥ गंधोदकेन च ततः पूजयेत्कुसुमोत्तमैः ॥ तथैव विधिवद्भक्त्या सोऽश्वमेधफलं
लभेत् ॥ ५ ॥ वाचा कृतं च यत्पापं मनसा कर्मणाऽथ वा ॥ तत्सर्वं नश्यते देवि तस्य लिंगस्य दर्शनात् ॥ ६ ॥ इति श्रीस्कांदे महापुराण एका
शीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये गौतमेश्वरमाहात्म्यवर्णनंनामाशीतितमोऽध्यायः ॥ ८० ॥ ॥ छ ॥
॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि देवेशं दैत्यसूदनम् ॥ पापघ्नं सर्वजंतूनां प्रभासक्षेत्रवासिनाम् ॥ १ ॥ अनादियुगसंस्थानं सर्व
कामप्रदं शुभम्॥ संसारसागरे घोरे स्थितं नौरिव तारणे ॥ २ ॥ अन्ये सर्वेऽपि नश्यंति कल्पांते ब्रह्मणो दिने ॥ एतानि मुक्त्वा देवेशि न्यग्रोधं सप्त
कल्पगम् ॥३॥ कल्पवृक्षं तथाऽगारं वैडर्यं पर्वतोत्तमम् ॥ श्रीदैत्यसूदनं देवं मार्कंडेयं महामुनिम् ॥४॥ अक्षयाश्चाव्ययाश्चैते सप्तकल्पानि सुन्दरि ॥
देवि किं बहुनोक्तेन वर्णितेन पुनःपुनः ॥ ५ ॥ श्रीदैत्यसूदनाद्देवि नान्यास्ति भुवि देवता ॥ यत्राकारं तु तस्यैव क्षेत्रं पातकनाशनम् ॥ ६ ॥ सेवितं
चर्षिभिः सिद्धैर्यक्षविद्याधरोरगैः ॥ तस्य सीमां प्रवक्ष्यामि विष्णुक्षेत्रस्य भामिनि ॥ ७ ॥ पूर्वे यमेश्वरंयावच्छ्रीसोमेशं तु पश्चिमे ॥ उत्तरे तु विशा
लाक्षी दक्षिणे सरितां पतिः ॥ ८ ॥ एतत्क्षेत्रं यत्राकारं वैष्णवं पापनाशनम् ॥९॥ अत्र क्षेत्रे मृता ये तु पापिनोऽपि नरा ध्रुवम् ॥ स्वर्गं गच्छंति ते
सर्वे संतः सुकृतिनो यथा ॥१०॥ अत्र दत्तं हुतं जप्तं तपस्तप्तं कृतं हि यत् ॥ तत्सर्वं चाक्षयं प्रोक्तं सप्तकल्पावधि प्रिये ॥ ११ ॥ तत्रैकमपि यो देवि
ब्राह्मणं भोजयिष्यति ॥ विधिना विष्णुमुद्दिश्य कोटिर्भवति भोजिता ॥ १२ ॥ तत्रोपवासं यः कुर्यान्नरो भक्तिसमन्वितः ॥ एकेनैवोपवासेन
उपवासायुतं फलम् ॥ चक्रतीर्थे नरः स्नात्वा सोपवासो जितेंद्रियः ॥ १३ ॥ द्वादश्यां कार्त्तिके मासि दद्याद्विप्रेषु कांचनम् ॥ विष्णुं संपूज्य
विधिवन्मुच्यते सर्वपातकैः ॥ १४ ॥ ॥ देव्युवाच ॥ ॥ दैत्यसूदननामेति कथं तस्य प्रकीर्तितम् ॥ कस्मिन्काले तु देवेश तन्मे
विस्तरतो वद ॥ १५ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि माहात्म्यं पापनाशनम् ॥ दैत्यसूदनदेवस्य पुरा वृत्तं महोदयम् ॥ १६ ॥
देवि तस्यैव नामानि कल्पेकल्पे भवंति वै ॥ अनादिनिधनान्येव संभवन्ति पुनःपुनः ॥ १७ ॥ पूर्वकल्पे श्रिया वृत्तो वामनस्तु द्वितीयके ॥
वंज्ञांगस्तु तृतीये वै तुरीये कमलाप्रियः ॥ १८ ॥ पंचमे दुःखहर्त्ता च षष्ठे तु पुरुषोत्तमः ॥ श्रीदैत्यसूदनो देवः कल्पे वै सप्तमे स्मृतः ॥ १९ ॥

१ विधिना—इ० पा० । २ यज्ञांगस्तु—इ० । ३ च—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यैव नाम चोत्पत्तिं कथयामि यथार्थतः ॥ २० ॥ पुरा देवासुरे युद्धे दानवैर्देवकंटकैः ॥ निर्जिता देवताः सर्वे जग्मुस्ते शरणं हरिम् ॥ क्षीरोद वासिनं देवमस्तुवन्प्रणताः स्थिताः ॥ २१ ॥ ॥ देवा ऊचुः ॥ ॥ जय देव जगन्नाथ दैत्यासुरविमर्दन ॥ वाराहरूपमास्थाय उद्धृता वसुधा त्वया ॥ २२ ॥ उद्धृता मत्स्यरूपेण वेदा उदधिमध्यतः ॥ कूर्मरूपी तथा भूत्वा क्षीरोदार्णवमंथनम् ॥ २३ ॥ कृत्वा त्वया जगन्नाथ उद्धृता श्रीर्नमोऽस्तु ते ॥ श्रीपतिः श्रीधरो देव आर्त्तानामर्तिनाशनः ॥ २४ ॥ बलिर्वामनरूपेण त्वया बद्धोऽसुरारिणा ॥ हिरण्याक्षो महादैत्यो हिरण्यकशिपुर्हतः ॥ २५ ॥ नारसिंहेन रूपेण अन्तरिक्षे धृतस्त्वया ॥ देवमूल महादेव उद्धृतं भुवनं त्वया ॥ २६ ॥ त्वया विना जगन्नाथ भुवनं निष्प्रभीकृतम् ॥ सूर्येणेव तु विक्रान्तं तमोभिरिव दानवैः ॥ २७ ॥ श्रुत्वा स्तोत्रमिदं देवि विष्णुः कमललोचनः ॥ उवाच देवान्ब्रह्माद्यान्क्षीरोदार्णवबोधितः ॥ २८ ॥ भयं त्यजध्वं वै देवा दानवान्प्रति सर्वथा ॥ अचिरेणैव कालेन घातयिष्यामि दानवान् ॥ २९ ॥ एवमुक्त्वाथ तैः सार्द्धमाजगाम जनार्दनः ॥ दानवान्घातयामास स चक्रेण पृथक्पृथक् ॥ ३० ॥ भयार्त्ता दानवाः सर्वे पलायनपरायणाः ॥ प्रभासं क्षेत्रमासाद्य समुद्राभिमुखा भवन् ॥ ३१ ॥ नश्यमानास्ततो दृष्ट्वा दैत्यान्दैत्यविनाशनम् ॥ संजघ्ने तान्स चक्रेण निःशेषान्सर्वदानवान् ॥ ३२ ॥ हतेषु सर्वदैत्येषु देवब्राह्मणतापसैः ॥ कल्याणमभवत्तत्र जगत्स्वस्थमनाकुलम् ॥ ३३ ॥ तत्प्रभृत्येव देवस्य दैत्यसूदननाम तत् ॥ एतन्माहात्म्यमतुलं कथितं तव सुन्दरि ॥ दैत्यसूदनदेवस्य महाभाग्यं महोदयम् ॥ ३४ ॥ तं दृष्ट्वा न जडो नांधो न दरिद्रो न दुःखितः ॥ जायते सप्त जन्मानि सत्यंसत्यं वरानने ॥ ३५ ॥ श्रवणद्वादशीं पुण्यां रोहिण्यां चाष्टमीं शुभाम् ॥ शयनोत्थापनीं चैव नरः कृत्वा प्रयत्नतः ॥ ३६ ॥ एकैकेनोपवासेन उपवासायुतं फलम् ॥ लभते नात्र सन्देहो दैत्यसूदनसन्निधौ ॥ ३७ ॥ चण्डालः श्वपचो वापि तिर्यग्योनिगतोऽपि वा ॥ प्राणत्यागे कृते तस्मिन्नाच्युतं लोकमाप्नुयात् ॥ ३८ ॥ कार्तिक्यां चैव वैशाख्यां मासमेकमुपोषयेत् ॥ दैत्यसूदनमध्यस्थः सम्यक्छ्रद्धासमन्वितः ॥ ३९ ॥ एकैकेनोपवासेन कोटिकोटि पृथक्पृथक् ॥ लभते तत्फलं सर्वं विष्णुक्षेत्रप्रभावतः ॥ ४० ॥ दीपं ददाति यस्तत्र मासं वा पक्षमेव वा ॥ एकैकदीपदानेन कोटिदीपफलं लभेत् ॥ ४१ ॥ पंचामृतेन संस्नाप्य देवदेवं चतुर्भुजम् ॥ एकादश्यां निराहारः पूजयित्वाऽच्युतो भवेत् ॥ ४२ ॥ चातुर्मास्यं विधानेन दैत्यसूदनसन्निधौ ॥ नियमेन क्षिपेद्यस्तु तस्य तुष्यति केशवः ॥ ४३ ॥ अन्यक्षेत्रेषु यत्कृत्वा चातुर्मास्यानि कोटिशः ॥ तत्फलं

---

१ महादेवि–इ० पा० । २ चक्रेणैवम्–इ० पा० । ३ भवन्–अभवन्–अडभाव आर्षः । ४ देवब्राह्मणतापसैः–सह–जगत्स्वस्थमनाकुलं कल्याणरूपमभवत्–इति योजना बोध्याः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लभते सर्वं दैत्यसूदनदर्शनात् ॥ ४४ ॥ ब्रह्माण्डं सकलं दत्त्वा यत्पुण्यफलमाप्नुयात् ॥ तत्पुण्यं लभते सर्वं दैत्यसूदनदर्शनात् ॥ ४५ ॥ एका
दश्यां तु यस्तत्र कुरुते जागरं नरः ॥ गीतनृत्यैस्तथा वाद्यैः प्रेक्षणीयैस्तथाविधैः ॥ स याति वैष्णवं लोकं यं गत्वा न निवर्त्तते ॥ ४६ ॥ हत्याऽ
युतानीह सुसंचितानि स्तेयानि रुक्मस्य न सन्ति संख्या ॥ निहंति केनापि पुरा कृतानि सर्वाणि भद्रा[1] निशि जागरेण ॥ ४७ ॥ मार्गा न ते
प्रेतपुरी न दूता वनं च तत्खेचरखड्गपत्रम् ॥ स्वप्ने न पश्यंति च ते मनुष्या येषां गता जागरणेन भद्रा ॥ ४८ ॥ कन्यासहस्रं विधिवद्ददाति
रत्नैरलंकृत्य स्वधर्मबुद्ध्या ॥ गवां सहस्रं कुरुजांगले तु तेषां परं जागरणेन विष्णोः ॥ ४९ ॥ कृत्वा चैवोपवासं च योऽश्नाति द्वादशीदिने ॥
नैवेद्यं तुलसीमिश्रं हत्याकोटिविनाशनम् ॥ ५० ॥ इति ते कथितं देवि माहात्म्यं पापनाशनम् ॥ दैत्यसूदनदेवस्य किमन्यत्परिपृच्छसि ॥
॥ ५१ ॥ पीतवस्त्राणि देवस्य गां हिरण्यं च दापयेत् ॥ स्नात्वा चक्रवरे तीर्थे मुच्यते सर्वपातकात् ॥ ५२ ॥ इति श्रीस्कांदे महापुराण एकाशीति
साहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये श्रीदैत्यसूदनमाहात्म्यवर्णनंनामैकाशीतितमोऽध्यायः ॥ ८१ ॥ ॥ छ ॥ ॥ देव्यु
वाच ॥ ॥ चक्रतीर्थमिति किं नाम त्वया प्रोक्तं वृषध्वज ॥ कुत्र तिष्ठति तत्तीर्थं किंप्रभावं वदस्व मे ॥ १ ॥ ॥ ईश्वर उवाच ॥ ॥ पुरा देवा
सुरे युद्धे हत्वा दैत्याञ्जनार्दनः ॥ चक्रं प्रक्षालयामास तत्र वै रक्तरंजितम् ॥ २ ॥ अष्टकोटिसुतीर्थानि तत्रानीय स्वयं हरिः ॥ तीर्थे प्रकल्पयामास
शुद्धिं कृत्वा सुदर्शने ॥ तीर्थस्य चक्रे नामापि चक्रतीर्थमिति श्रुतम् ॥ ३ ॥ अष्टायुतानि तीर्थानामष्टौ कोट्यस्तथैव च ॥ तत्र संति महादेवि चक्रती
र्थे न संशयः ॥ ४ ॥ यस्तत्र कुरुते स्नानमेकचित्तो नरोत्तमः॥ सर्वतीर्थाभिषेकस्य स प्राप्नोत्यखिलं फलम् ॥ ५ ॥ तीर्थानामष्टकोटिस्तु निवसंति
वरानने ॥ एकादश्यां विशेषेण चन्द्रसूर्यग्रहे तथा ॥ ६ ॥ तत्र स्नात्वा महादेवि यज्ञकोटिफलं लभेत् ॥ तस्यैव कल्पनामानि शृणु ते कथयाम्य
हम् ॥ ७ ॥ कोटितीर्थं पूर्वकल्पे श्रीनिधानं द्वितीयके ॥ तृतीये शतधारं च चक्रतीर्थं चतुर्थके ॥ ८ ॥ एवं ते कल्पनामानि ह्यतीतान्यखिलानि
वै ॥ कथितान्येवमन्यानि ज्ञेयानि विबुधैः क्रमात् ॥ ९ ॥ तत्र यद्दीयते दानं तस्य संख्या न विद्यते ॥ अर्द्धक्रोशप्रमाणं हि विष्णुक्षेत्रं प्रकीर्त्तितम्
॥ १० ॥ ब्रह्महत्या नोपसर्पेत्सत्यमेतन्मयोदितम् ॥ मासोपवासी तत्क्षेत्रे अग्निहोत्री यतव्रतः ॥ ११ ॥ स्वाध्यायी यज्ञयाजी च तपश्चांद्रायणा
दिकम् ॥ तिलोदकं पितॄणां च श्राद्धं च विधिपूर्वकम् ॥ १२ ॥ एकरात्रं त्रिरात्रं वा कृच्छ्रं सांतपनं तथा ॥ मासोपवासं तत्रैव

१ भद्रा—द्वादशी—इत्यर्थः । "नन्दा भद्रा जया रिक्ता पूर्णाश्च तिथयः क्रमात् ॥ वारत्रयं समावर्त्य गणयेत्प्रतिपन्मुखाः ॥" इति ज्योतिःशास्त्रोक्तलक्षणं प्रस्तुते द्वादश्या इह बाध्यं प्रकरणात् ।

CC-0. In Public Domain. Digitization by eGangotri

अन्यद्वा पुण्यकर्म तत् ॥ १३ ॥ दैत्यारिक्षेत्रमासाद्य यत्किंचित्कुरुते नरः ॥ अन्यक्षेत्रात्कोटिगुणं पुण्यं भूयान्न संशयः ॥ १४ ॥ सुदर्शने वरे तीर्थे गोदानं तत्र दापयेत् ॥ सम्यग्यात्राफलप्रेप्सुः सर्वपापविशुद्धये ॥ १५ ॥ चंडालः श्वपचो वाऽपि तिर्यग्योनिगतस्तथा ॥ तस्मिंस्तीर्थे मृतः सम्यगाच्युतं लोकमाप्नुयात् ॥ १६ ॥ इति संक्षेपतः प्रोक्तं चक्रतीर्थसमुद्भवम् ॥ माहात्म्यं सर्वपापघ्नं सर्वकामफलप्रदम् ॥ १७ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये दैत्यसूदन माहात्म्यप्रसंगेन चक्रतीर्थोत्पत्तिवृत्तान्तमाहात्म्यवर्णनंनाम द्व्यशीतितमोऽध्यायः ॥ ८२ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्म हादेवि तस्य पूर्वेण संस्थिताम् ॥ योगेश्वरीं महादेवीं योगसिद्धिफलप्रदाम् ॥ १ ॥ तदुत्पत्तिं प्रवक्ष्यामि शृणु श्रद्धासमन्विता ॥ पुरा दानवशार्दूलो महिषाख्यो महाबलः ॥ २ ॥ बभूव प्रवरो देवि सर्वदेवभयंकरः ॥ कामरूपी स लोकांस्त्रीन्वशीकृत्वाऽभवत्सुखी ॥ ३ ॥ कस्मिंश्चिदथ काले तु ब्रह्मणा लोककारिणा ॥ सृष्टा मनोहरा कन्या रूपेणाप्रतिमा दिवि ॥ ४ ॥ अतपत्सा तपो घोरं कन्या रूपवती सती ॥ नारदेन ततो दृष्टा सा कदाचिद्वरानने ॥ ५ ॥ ततः स सहसा देवि विस्मयं परमं गतः ॥ अहो रूपमहो धैर्यमहो कान्तिरहो वयः ॥ ६ ॥ इत्येवं चिन्तयंस्तत्र नारीं वचनमब्रवीत् ॥ कुरुष्वात्मप्रदानं मे न मे दारपरिग्रहः ॥ तवाहं दर्शनादेवि कामबाणेन पीडितः ॥७॥ साऽब्रवीन्न हि मे कार्यं कामधर्मेण सत्तम॥ कौमारं व्रतमासाद्य साधयिष्ये यथेप्सितम् ॥ ८ ॥ न च मन्युस्त्वया कार्यो ह्यस्मिन्नर्थे कथंचन ॥ तस्यास्तद्वचनं श्रुत्वा स मुनिर्नारदः प्रिये ॥ ॥ ९ ॥ समुद्भ्रान्तेऽगमद्दिव्यां पुरीं महिषपालिताम् ॥ अर्चितो हि मुनिस्तेन महिषेण महात्मना ॥ १० ॥ पृष्ट्वा ह्यनामयं देवि दत्त्वा चार्घ्यमनु त्तमम् ॥ सोऽब्रवीत्प्राञ्जलिर्भूत्वा किमागमनकारणम् ॥ ब्रूहि यत्ते व्यवसितं सर्वं कर्त्तास्मि नारद ॥११॥ अथोवाच मुनिस्तत्र महिषं दानवेश्वरम् ॥ कन्यारत्नं समुत्पन्नं जंबूद्वीपे महासुर ॥ १२ ॥ स्वर्गे मर्त्ये च पाताले न दृष्टं न च मे श्रुतम् ॥ तादृग्रूपमहं येन कामबाणवशीकृतः ॥ १३ ॥ स श्रुत्वा वचनं तस्य कामस्योत्पादनं परम् ॥ जगाम यत्र सा साध्वी क्षेत्रे प्राभासिके स्थिता ॥ १४ ॥ तामेव प्रार्थयामास बलेन महता वृतः ॥ भार्या भव त्वं मे भीरु भुंक्ष्व भोगान्मनोरमान् ॥ एतत्तपो महाभागे विरुद्धं यौवनस्य ते ॥ १५ ॥ तस्य तद्वचनं श्रुत्वा जहास वरवर्णिनी ॥ तस्या हसंत्या देवेशि शतशोऽथ सहस्रशः ॥ १६ ॥ निश्वासात्सहसा नार्यः शस्त्रहस्ता भयानकाः ॥ ताभिर्विध्वंसितं सैन्यं महिषस्य दुरात्मनः ॥१७॥

१ विनिर्गताः--इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





तस्मिन्निपात्यमाने तु सैन्ये दानवसत्तमः ॥ क्रोधं कृत्वा ततः शीघ्रं तामेवाभिमुखो ययौ ॥१८॥ विधुन्वन्स हि ते तीक्ष्णशृंगेऽभीक्ष्णं भयानके ॥
तया सार्धं च सुमहत्कृत्वा युद्धं महासुरः ॥१९॥ शृंगाभ्यां जगृहे देवीं सा तस्योपरि संस्थिता ॥ पद्भ्यामाक्रम्य शूलेन निहतो दैत्यपुंगवः ॥२०॥
छिन्ने शिरसि खड्गेन तद्रूपो निःसृतः पुमान् ॥ रौद्रोऽपि स गतः स्वर्गं दैत्यो देव्यस्त्रपातितः ॥२१॥ ततो देवगणाः सर्वे महिषं वीक्ष्य निर्जितम् ॥
महेंद्राद्याः स्तुतिं चक्रुर्देव्यास्तुष्टेन चेतसा॥२२॥॥ देवा ऊचुः॥॥ नमो देवि महाभागे गम्भीरे भीमदर्शने॥ नयस्थिते सुसिद्धांते त्रिनेत्रे विश्वतोमुखि
॥ २३ ॥ विद्याविद्ये जये जाप्ये महिषासुरमर्दिनि ॥ सर्वगे सर्वविद्येशे देवि विश्वस्वरूपिणि ॥२४॥ वीतशोके ध्रुवे देवि पद्मपत्रायतेक्षणे ॥ शुद्धसत्त्वे
व्रतस्थे च चण्डरूपे विभावरि ॥२५॥ ऋद्धिसिद्धिप्रदे देवि कालनृत्ये धृतिप्रिये ॥ शांकरि ब्राह्मणि ब्राह्मि सर्वदेवनमस्कृते ॥२६॥ घंटाहस्ते शूल
हस्ते महामहिषमर्दिनि ॥ उग्ररूपे विरूपाक्षि महामायेऽमृते शिवे ॥ २७ ॥ सर्वगे सर्वदे देवि सर्वसत्त्वमयोद्भवे ॥ विद्यापुराणशल्यानां जननि
भूतधारिणि ॥ २८ ॥ सर्वदेवरहस्यानां सर्वसत्त्ववतां शुभे ॥ त्वमेव शरणं देवि विद्याऽविद्ये श्रियेऽश्रिये ॥ २९ ॥ एवं स्तुता सुरैर्देवि प्रणम्य ऋषि
भिस्तथा ॥ उवाच हसती वाक्यं वृणुध्वं वरमुत्तमम् ॥ ३० ॥ ॥ देवा ऊचुः ॥ ॥ स्तवेनानेन ये देवि स्तुवन्त्यत्र नरोत्तमाः ॥ ते संतु कामैः
संपूर्णा वरवर्षा निरंतरम् ॥ ३१ ॥ अस्मिन्क्षेत्रे त्वया वासो नित्यं कार्यः शुचिस्मिते ॥ ३२ ॥ एवमस्त्विति सा देवी देवानुक्त्वा वरानने ॥
विसृज्य ऋषिसंघांश्च तत्रैव निरताऽभवत् ॥ ३३ ॥ आश्वयुक्छुक्लपक्षस्य नवम्यां यो वरानने ॥ उपवासपरो भूत्वा तां प्रपश्यति भक्तितः ॥ तस्य
पापं क्षयं याति तमः सूर्योदये यथा ॥ ३४ ॥ य एतत्पठति स्तोत्रं प्रातरुत्थाय मानवः ॥ न भीः संपद्यते तस्य यावज्जीवं नरस्य वै ॥ ३५ ॥
आश्वयुक्छुक्लपक्षे या अष्टमी मूलसंयुता ॥ सा महानामिका प्रोक्ता येषां तस्यां गताः शुभे ॥ ३६ ॥ तेषां स्वर्गे ध्रुवं वासो वीरास्तेऽप्सरसां प्रियाः
॥ ३७ ॥ मन्वन्तरेषु सर्वेषु कल्पादिषु सुरेश्वरि ॥ एष एव क्रमः प्रोक्तो विशेषं शृणु सांप्रतम् ॥३८॥ आश्वयुक्छुक्लपक्षे या पंचमी पापनाशिनी ॥
तस्यां संपूजयेद्रात्रौ खड्गमंत्रैर्विभूषितम् ॥ ३९ ॥ मंडपं कारयेत्तत्र नवसप्तकरं तथा ॥ प्रागुदक्प्रवणे देशे पताकाभिरलंकृतम् ॥ योगेश्वर्याः संनि
धाने विधिना कारयेद्द्विजः ॥ ४० ॥ आग्नेय्यां कारयेत्कुण्डं हस्तमात्रं सुशोभनम् ॥ मेखलात्रयसंयुक्तं योन्याऽश्वत्थदलाभया ॥ ४१ ॥ शास्त्रोक्तं
मन्त्रसंयुक्तं होतव्यं पायसं ततः ॥ ततः खड्गं तु संस्नाप्य पंचामृतरसेन वै ॥ पूजयेद्विविधैः पुष्पैर्मंत्रपूर्वं द्विजोत्तमैः ॥ ४२ ॥ अभीर्विशसनं खड्गः

१ प्रागुदक्प्लवने--इ०पा० । २ युतम्--इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राणिभूतो दुरासदः ॥ अगम्यो विजयश्चैव धर्माधारस्तथैव च ॥ इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा ॥ ४३ ॥ नक्षत्रं कृत्तिका तुभ्यं गुरुर्देवो महेश्वरः ॥ हिरण्यं च शरीरं ते धाता देवो जनार्दनः ॥ पिता पितामहो देव स्वेन पालय सर्वदा ॥ ४४ ॥ ॥ इति खड्गमन्त्रः ॥ ॥ एवं संपूज्य विधिना तं खड्गं ब्राह्मणोत्तमैः ॥ भ्रामयेन्नगरे रात्रौ नान्दीघोषपुरःसरम् ॥ ४५ ॥ सर्वसैन्येन संयुक्तस्तत्र ब्राह्मणपुंगवैः ॥ एवं कृत्वा विधानं तु पुनर्योगेश्वरीं नयेत् ॥ उच्चार्य मन्त्रमेवं वै खड्गं तस्यै समर्पयेत् ॥ ४६ ॥ अञ्जनेन समालेख्य चन्दनेन विलेपितम् ॥ बिल्वपत्रकृतां मालां तस्यै देव्यै निवेदयेत् ॥ ४७ ॥दुर्गे दुर्गार्तिहे देवि सर्वदुर्गतिनाशिनि ॥ त्राहि मां सर्वदुर्गेषु दुर्गेऽहं शरणं गतः ॥ ४८ ॥ दत्त्वैवमर्घ्यं देवेशि तत्र खड्गं च जागृयात् ॥ नित्यं संपूज्य विधिना अष्टम्यां यावदेव हि ॥ ४९ ॥ तद्रात्रौ जागरं कृत्वा प्रभाते ह्यरुणोदये ॥ पातयेन्महिषान्मेषानग्रतो गतकंधरान् ॥ ५० ॥ शतमर्धशतं वापि तदर्धार्धं यथेच्छया ॥ सुरासवभृतैः कुंभैस्तर्पयेत्परमेश्वरीम् ॥ ५१ ॥ कापालिकेभ्यस्तद्देयं दासीदासजने तथा ॥ ततोऽपराह्णसमये नवम्यां स्यन्दने स्थिताम् ॥ ५२ ॥ योगेशीं भ्रामयेद्राष्ट्रे स्वयं राजा स्वसैन्ययत्रान् ॥ नदद्भिः शंखपटहैः पठद्भिर्बटुचारणैः ॥ ५३ ॥ भूतेभ्यश्च बलिं दद्यान्मंत्रेणानेन भामिनि ॥ सरक्तं सजलं सान्नं गन्धपुष्पाक्षतैर्युतम् ॥ ५४ ॥ त्रीन्वाराँस्तु त्रिशूलेन दिग्विदिक्षु क्षिपेद्बलिम् ॥ बलिं गृह्णन्त्विमे देवा आदित्या वसवस्तथा ॥ ५५ ॥ मरुतोऽथाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः ॥ सौम्या भवंतु तृप्ताश्च [1]भूताः प्रेताः सुखावहाः ॥ ५६ ॥ य एवं कुर्वते यात्रां ब्राह्मणाः क्षेत्रवासिनः ॥ न तेषां शत्रवो नाग्निर्न चौरा न विनायकाः ॥ विघ्नं कुर्वंति देवेशि योगेश्वर्याः प्रसादतः ॥ ५७ ॥ सुखिनो भोगभोक्तारः [2]सर्वातंकविवर्ज्जिताः ॥ भवन्ति पुरुषा भक्ता योगेश्वर्या निरंतरम् ॥ ५८ ॥ इत्येष ते समाख्यातो योगेश्वर्या महोत्सवः ॥ पठतां शृण्वतां चैव सर्वाशुभविनाशनः ॥ ५९ ॥ शूलाग्रभिन्नमहिषासुरपृष्ठपीठामुत्खातखड्गरुचिरांगदबाहुदंडाम् ॥ अभ्यर्च्य पंचवदनानुगतां नवम्यां दुर्गां सुदुर्गगहनानि तरंति मर्त्याः ॥ ६० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये योगेश्वरीमाहात्म्यवर्णनंनाम त्र्यशीतितमोऽध्यायः ॥ ८३ ॥ ॥ छ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि आदिनारायणं हरिम् ॥ तस्याश्च पूर्वदिग्भागे सर्वपातकनाशनम् ॥ १ ॥ पादुकासनसंयुक्तं सर्वदैत्यांतकारिणम् ॥ आदौ कृतयुगे देवि दैत्योऽभून्मेघवाहनः ॥ २ ॥ महाबलो महाकायो योजनायुतविस्तरः ॥ अजेयः सर्वदेवानां त्रैलो

१ भूतप्रेतमुखा ग्रहाः–इ० पा० । २ भवन्ति कलिवर्जिताः–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



क्षयक्षयकारकः ॥ ब्रह्मणा तस्य तुष्टेन वरो दत्तो वरानने ॥ ३ ॥ यदा पादुकया विष्णुस्त्वां हनिष्यति संयुगे ॥ तदैव मृत्युर्भविता नान्यथा मरणं तव ॥ ४ ॥ इति लब्धवरो दैत्यः संतापयति भूतलम् ॥ युगानां कोटिमेकां तु सदेवासुरमानुषम् ॥ ५ ॥ संतप्य बहुधा देवि दक्षिणोदधिमागतः ॥ तत्र विध्वंसयामास ऋषीणामाश्रमाणि वै ॥ ६ ॥ ततस्त ऋषयः सर्वे विध्वस्ताश्रममण्डलाः ॥ शरणं चैव संप्राप्ता देवदेवं तु केशवम् ॥ अजेयं तं तु संज्ञात्वा तुष्टुवुर्गरुडध्वजम् ॥ ७ ॥ ॥ ऋषय ऊचुः ॥ ॥ नमः परमकल्याणकल्याणायात्मयोगिने ॥ जनार्दनाय देवाय श्रीधराय च वेधसे ॥ ८ ॥ नमः कमलकिंजल्कसुवर्णमुकुटाय च ॥ केशवायातिसूक्ष्माय बृहन्मूर्ते नमोनमः ॥ ९ ॥ महात्मने वरेण्याय नमः पंकजनाभये ॥ नमोऽस्तु मायाहरये[1] हरये हरिवेधसे ॥ १० ॥ हिरण्यगर्भगर्भाय जगतः कारणात्मने ॥ अच्युताय नमो नित्यमनन्ताय नमोनमः ॥ ११ ॥ नमो मायापटच्छन्नजगद्धाम्ने[2] महात्मने ॥ संसारसागरोत्तारज्ञानपोतप्रदायिने ॥ अकुंठमतये धात्रे सर्गस्थित्यंतकर्मणे ॥ १२ ॥ यथाहि वासुदेवेति प्रोक्ते नश्यति पातकम् ॥ तथा विलयमभ्येतु दैत्योऽयं मेघवाहनः ॥ १३ ॥ यथा विष्णुः स्वभक्तेषु पापमाप्नोति संस्थितम् ॥ तथा विनाशमायातु दैत्योऽयं पापकर्मकृत् ॥ १४ ॥ स्मृतमात्रो यथा विष्णुः सर्वं पापं व्यपोहति ॥ तथा प्रणाशमभ्येतु दैत्योऽयं मेघवाहनः ॥ १५ ॥ भवंतु भद्राणि समस्तदोषाः प्रयांतु नाशं जगतोऽखिलस्य ॥ अभेद्यभक्त्या परमेश्वरेशे स्मृते जगद्धातरि वासुदेवे ॥ १६ ॥ ये भूतले ये दिवि येऽन्तरिक्षे रसातले प्राणिगणाश्च केचित् ॥ भवन्तु ते सिद्धियुता नरोत्तमाः स्मृते जगद्धातरि वासुदेवे ॥ १७ ॥ ये प्राणिनः कुत्रचिदत्र संति ब्रह्माण्डमध्ये परतश्च केचित् ॥ तेषां तु सिद्धिः परमास्त्वनिंद्या स्तुते जगद्धातरि वासुदेवे ॥ १८ ॥ ॥ ईश्वर उवाच ॥ ॥ इति स्तुतस्तदा देवि आदिनारायणो हरिः ॥ ज्ञात्वा स भावि कार्यं तत्समारुह्य च पादुकाम् ॥ १९ ॥ बभूव तेषां प्रत्यक्ष ऋषीणां पापनाशनः ॥ उवाच प्रणतान्सर्वान्किं वा कार्यं हृदि स्थितम् ॥ २० ॥ कथ्यतां तत्करिष्यामि युष्मत्स्तोत्रेण तर्पितः ॥ २१ ॥ इत्युक्ता ऋषयः सर्वे कृतांजलिपुटाः स्थिताः ॥ आदिदेवं हरिं प्रोचुः सर्वे नतशिरोधराः ॥ २२ ॥ ॥ ऋषय ऊचुः ॥ ॥ जानासि सर्वं त्वं देव न चास्त्यविदितं तव ॥ इमं दैत्यं महादेव संहरस्व महाबलम् ॥ यथेदं सकलं विश्वं निरातंकं भवेत्प्रभो ॥ २३ ॥ इत्युक्तस्तैस्तदा विष्णुर्दैत्यमाहूय संयुगे ॥ ताडयामास तं दैत्यं हृदि पादुकया शुभे ॥ २४ ॥ स हतः पतितो दैत्यो विगतासुर्महोदधौ ॥ हत्वा दैत्यवरं देवस्तत्र स्थाने स्थितोऽभवत ॥ पादुका



१ मायाहरये--श्रीनृसिंहाय--इत्यर्थः । २ नमो मायापटच्छन्नजगद्धात्रे--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सनसंस्थस्तु तत्राद्यापि वरानने ॥ २५ ॥ यस्तं पूजयते भक्त्या एकादश्यां नरोत्तमः ॥ सोऽश्वमेधफलं प्राप्य मोदते दिवि देववत् ॥ २६ ॥
गोलक्षं ब्राह्मणे दत्त्वा यत्फलं प्राप्नुयान्नरः ॥ तदादिदेवे गोविन्दे दृष्टे भक्त्या फलं लभेत् ॥ २७ ॥ कलौ कृतयुगं तेषां क्लेशस्तेषां सुखाधिकः ॥
आदिनारायणो देवो येषां हृदयसंस्थितः ॥ २८॥ एकादश्यां रविदिने स्नात्वा संनिहिता जले ॥ आदिनारायणं पूज्य मुच्यते भवबन्धनात् ॥२९॥
इति ते कथितं देवि माहात्म्यं विष्णुदैवतम् ॥ श्रुतं पापहरं नृणां दारिद्र्यौघविनाशनम् ॥ ३० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां
संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्य आदिनारायणमाहात्म्यवर्णनंनाम चतुरशीतितमोऽध्यायः ॥ ८४ ॥ छ ॥ ॥ देव्युवाच ॥ ॥
तत्र संनिहिता प्रोक्ता या त्वया वृषभध्वज ॥ कथं देव समायाता कुरुक्षेत्रान्महानदी ॥ किंप्रभावा तु सा प्रोक्ता फलं स्नानादिकेन किम् ॥
॥ १ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि यत्र संनिहिता शुभा ॥ पापघ्नी सर्वजंतूनां दर्शनात्स्पर्शनादपि ॥ २ ॥ आदिनारायणा
द्देवि पश्चिमे धनुषां त्रये ॥ संस्थिता सा महादेवी सरिद्रूपा महानदी ॥ ३ ॥ कथयामि समासेन तदुत्पत्तिं शृणु प्रिये ॥ जरासंधभयाद्देवि विष्णुः
परिजनैः सह ॥ ४ ॥ गृहीत्वा यादवान्सर्वान्बालवृद्धवणिग्जनान् ॥ स शून्यां मथुरां कृत्वा प्रभासं समुपागतः ॥ ५ ॥ समुद्रं प्रार्थयामास स्थानं
संवासहेतवे ॥ एतस्मिन्नेव काले तु देवदेवो दिवाकरः ॥ ६ ॥ संग्रस्तो राहुणा देवि पर्वकाले ह्युपस्थिते ॥ तं दृष्ट्वा यादवाः सर्वे विषादं परमं
गताः ॥ ७ ॥ अप्राप्ताः संनिहित्यायां तानुवाच जनार्दनः ॥ मा विषादं यदुश्रेष्ठा व्रजध्वं मयि संस्थिते ॥ ८ ॥ दृश्यतां मत्प्रभावोऽद्य धर्मा
र्थमिह भूतले ॥ आनयिष्याम्यहं सम्यक्पुण्यं सांनिहितं सरः ॥ ९ ॥ एवमुक्त्वा स भगवान्समाधिस्थो बभूव ह ॥ एवं संध्यायतस्तस्य
विष्णोरमिततेजसः ॥ १० ॥ प्रादुर्भूता ततस्तस्य वारिधाराऽग्रतः शुभा ॥ विभेद्य धरणीपृष्ठं स्नानार्थं चासुरद्विषः ॥ ११ ॥ तत
स्ते यादवाः सर्वे रामसांबपुरोगमाः ॥ चक्रुः स्नानं महादेवि राहुग्रस्ते दिवाकरे ॥ १२ ॥ प्राप्तपुण्याः बभूवुस्ते संनिहित्यासमुद्भ
वम् ॥ कुरुक्षेत्रस्य यात्रायाः प्राप्य सम्यक्फलं हि ते ॥ १३ ॥ एवं तत्समनुप्राप्तं पुण्यं सान्निहितं सरः ॥ तत्र स्नात्वा महादेवि
राहुग्रस्ते दिवाकरे ॥ अग्निष्टोमस्य यज्ञस्य फलं प्राप्नोत्यशेषतः ॥ १४ ॥ यस्तत्र भोजयेद्विप्रं षड्रसं विधिपूर्वकम् ॥ एकेन भोजि
तेनैव कोटिर्भवति भोजिता ॥ १५ ॥ यस्तत्र कारयेद्धोमं संनिहित्यासमीपतः ॥ एकैकाहुतिदानेन कोटिहोमफलं लभेत् ॥ १६ ॥
मन्त्रजाप्यं तु कुरुते तत्र स्थाने स्थितो यदि ॥ एकैकमंत्रजाप्येन कोटिजाप्यफलं लभेत् ॥ १७ ॥ सुवर्णदानं दातव्यं तत्र यात्राफलेप्सुभिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





स्नात्वा संपूजनीयश्च आदिदेवो जनार्दनः ॥ १८ ॥ इति वै कथितं सम्यक्फलं सांनिहितं तव ॥ श्रुतं पापहरं नृणां सम्यक्छ्रद्धावतां प्रिये ॥ १९ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये संनिहित्यामाहात्म्यवर्णनंनाम पंचाशीति
तमोऽध्यायः ॥ ८५ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्यास्तु दक्षिणे भागे स्थितं लिंगं महाप्रभम् ॥ पांडवेश्वरनामाख्यं पंचभिः
स्थापितं क्रमात् ॥ १ ॥ गुप्तचर्यां यदा याताः पांडवा वनवासिनः ॥ तीर्थयात्राप्रसंगेन प्रभासं क्षेत्रमागताः ॥ २ ॥ तस्मिन्काले महादेवि सं
प्राप्ते सोमपर्वणि ॥ स्थापयामासुस्ते सर्वे लिंगं संनिहितातटे ॥ ३ ॥ मार्कण्डप्रमुखान्कृत्वा ऋत्विजो ब्राह्मणोत्तमान् ॥ वेदोक्तैः कार
यामासुरभिषेकं वृषान्ददुः[१] ॥ ४ ॥ ततः प्रसन्ना ऋषयो मार्कंडप्रमुखाः प्रिये ॥ प्रतिष्ठितस्य[२] लिंगस्य पांडवैर्वरवर्णिनि ॥ ५ ॥ ॥ ऋषय ऊचुः ॥ ॥
ये चैतत्पूजयिष्यंति लिंगं पांडवपूजितम् ॥ ते वै पूज्या भविष्यंति देवदानवरक्षसाम् ॥ ६ ॥ अश्वमेधफलं तेषां सम्यक्छ्रद्धार्चनेन वै ॥ भवि
ष्यति न संदेहो ह्यस्मद्वाक्यप्रभावतः ॥ ७ ॥ स्नात्वा संनिहिताकुंडे योऽर्चयेत्पांडवेश्वरम् ॥ माघे मासि समग्रे तु स साक्षात्पुरुषोत्तमः ॥ ८ ॥
दर्शनेनापि तस्यापि पापं याति सहस्रधा ॥ विष्णुरूपो हि स प्रोक्तो नात्र कार्या विचारणा ॥ ९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां
संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये संनिहित्यामाहात्म्ये पांडवेश्वरमाहात्म्यवर्णनंनाम षडशीतितमोऽध्यायः ॥ ८६ ॥ ॥ छ ॥
॥ ॥ ईश्वर उवाच ॥ ॥ एवं कृत्वा नरो यात्रां सम्यक्छ्रद्धासमन्वितः ॥ ततो गच्छेन्महादेवि रुद्रानेकादश क्रमात् ॥ १ ॥ प्रभासक्षेत्रमध्य
स्थान्महापातकनाशनान् ॥ यदेकादशधा पापमर्जितं मनुजैः पृथक् ॥ २ ॥ तदेकादशरुद्राणां पूजनात्क्षयमेष्यति ॥ संक्रांतावयने वापि
चंद्रसूर्यग्रहेऽथवा ॥ ३ ॥ अन्यासु पुण्यतिथिषु सम्यग्भावेन भावितः ॥ पूजयेदानुपूर्व्येण रुद्रैकादशकं क्रमात् ॥ ४ ॥ तेषां नामानि वक्ष्यामि
यान्यतीतानि मे पुरा ॥ आद्ये कृतयुगे तानि शृणु देवि यथार्थतः ॥ ५ ॥ अजैकपादहिर्बुध्न्यो विरूपाक्षोऽथ रैवतः ॥ हरश्च बहुरूपश्च त्र्यंबकश्च
सुरेश्वरः ॥ वृषाकपिश्च शंभुश्च कपर्दी चापराजितः ॥ ६ ॥ आदौ कृतयुगे देवि त्रेतायां द्वापरेऽपि च ॥ कलौ युगे तु संप्राप्ते जातं नामांतरं पुनः ॥ ८० ॥
॥ ७ ॥ एकादशधा रुद्राणां तानि ते वच्मि सांप्रतम् ॥ भूतेशो नीलरुद्रश्च कपाली वृषवाहनः ॥८॥ त्र्यंबको घोरनामा च महाकालोऽथ भैरवः ॥
मृत्युंजयोऽथ कामेशो योगेश इति कीर्तितः ॥ एकादशैते रुद्रास्ते कथिताः क्रमशः प्रिये ॥ ९ ॥ अनादिनिधना देवि भेदभिन्नास्तु ते पृथक् ॥

१ वृषान्—प्रत्येकमेकमेकं वृषम्—इत्यर्थः । २ प्रतिष्ठितस्य--सतः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकादशस्वरूपेण पृथङ्नामप्रभेदतः ॥ १० ॥ ॥ देव्युवाच ॥ ॥ भगवन्विस्तराद्ब्रूहि लिंगैकादशकक्रमम् ॥ स्थानसीमाप्रभेदेन माहात्म्योत्पत्तिकारणैः ॥११ ॥ कथं पूज्यानि तानीश के मंत्राः को विधिः स्मृतः ॥ कस्मिन्पर्वणि काले वा सर्वं विस्तरतो वद ॥ १२ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि रहस्यं पापनाशनम् ॥ सोमनाथादितः कृत्वा सिद्धिनाथादिकारणम् ॥ १३ ॥ यच्छ्रुत्वा मुच्यते जंतुः पातकैः पूर्वसंचितैः ॥ ये चैकादश रुद्रा वै तव प्रोक्ता मया प्रिये ॥ १४ ॥ दश ते वायवः प्रोक्ता आत्मा चैकादशः स्मृतः ॥ तेषां नामानि वक्ष्यामि वायूनां शृणु मे क्रमात् ॥ १५ ॥ प्राणोऽपानः समानश्च ह्युदानो व्यान एव च ॥ नागश्च कूर्मः कृकलो देवदत्तो धनंजयः॥ १६ ॥ आत्मा चेति क्रमाज्ज्ञेया रुद्राधिपतयः क्रमात् ॥ तेषां यात्रां क्रमाद्वक्ष्ये सर्वप्राणिहिताय वै ॥ १७ ॥ रुद्राणामादिदेवोऽसौ पूर्वं सोमेश्वरः प्रिये ॥ भूतेश्वरेति नाम्ना वै पूजयेत्तं विधानतः ॥ १८ ॥ राजोपचारयोगेन श्रद्धापूतेन चेतसा ॥ पंचामृतेन संस्नाप्य सद्योजातेन पूजयेत् ॥ १९ ॥ पुष्पैर्मनोहरैर्भक्त्या ध्यात्वा देवं सदाशिवम् ॥ त्रिभिः प्रदक्षिणीकृत्य साष्टांगं प्रणिपत्य च ॥ २० ॥ रुद्रैकादशयात्रार्थी निर्विघ्नार्थं व्रजेत्ततः ॥ भूतेश्वरेति यन्नाम प्रोक्तं तत्ते ब्रवीम्यहम् ॥ २१ ॥ महदादिविशेषांतं भूतजालं यदीरितम् ॥ पंचविंशतिसंख्याकं तेषामीशो यतः स्मृतः ॥ २२ ॥ तेन भूतेश्वरेत्युक्तं नाम तस्य पुरा किल ॥ पंचविंशतितत्त्वानि ज्ञात्वा मुक्तिमवाप्नुयात् ॥ २३ ॥ भूतेशरुद्रं संपूज्य गच्छेद्वै मुक्तिमव्ययाम् ॥ इति संक्षेपतः प्रोक्तमादिरुद्रस्य कीर्तनम् ॥ कीर्तनीयं द्विजातीनां कीर्तितं पुण्यवर्द्धनम् ॥ २४ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्य एकादशरुद्रमाहात्म्ये भूतेश्वरमाहात्म्यवर्णनंनाम सप्ताशीतितमोऽध्यायः ॥ ८७ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि नीलरुद्रं द्वितीयकम् ॥ भूतेशादुत्तरे भागे धनुषां षोडशे स्थितम् ॥ १ ॥ महालिंगं महादेवि गणगंधर्वपूजितम् ॥ संस्नाप्य तं विधानेन ईशमंत्रेण पूजयेत् ॥ २ ॥ कुमुदोत्पलसंभारैः सम्यक्संभावितात्मवान् ॥ कृत्वा प्रदक्षिणां तस्य नमस्कारेण पूजयेत् ॥ ३ ॥ एवं कृत्वा नरो देवि राजसूयफलं लभेत् ॥ वृषस्तत्रैव दातव्यः सम्यग्यात्राफलेप्सुभिः ॥ ४ ॥ नीलांजननिभो दैत्यो निहतश्चांतकः पुरा ॥ तस्य रोदयिता स्त्रीणां नीलरुद्रस्ततः स्मृतः ॥ ५ ॥ तस्य संक्षेपतः प्रोक्तं माहात्म्यं पापनाशनम् ॥ सम्यक्छ्रद्धान्वितैः प्राप्यं श्राव्यं तद्दर्शनो

१ नरः—इ० पा० । २ कुमुदोत्पलकल्हारैः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



त्सुकैः ॥ ६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्य एकादशरुद्रमाहात्म्ये नील रुद्रमाहात्म्यवर्णनंनामाष्टाशीतितमोऽध्यायः ॥ ८८ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेद्वरारोहे कपालीश्वरमुत्तमम् ॥ रुद्रं तृतीयं पापघ्नं नीलरुद्रस्य पूर्वतः ॥ १ ॥ बुधेश्वरात्पश्चिमतो धनुषां सप्तके स्थितम् ॥ छिन्नं मया पुरा देवि ब्रह्मणः पंचमं शिरः ॥ २ ॥ तत्कपालं करे लग्नं प्रभासक्षेत्रमागतः ॥ ततो वर्षसहस्रं तु संस्थितः क्षेत्रमध्यतः ॥ ३ ॥ कपालधारी दिग्वासाः कपाली तेन च स्मृतः ॥ तन्मया पूजितं लिंगं वर्षाणामयुतं प्रिये ॥ ४ ॥ कपालिरूपमास्थाय कपालीशस्ततः स्मृतः ॥ सर्वपापहरो नणां दर्शनात्स्पर्शनादपि ॥ ५ ॥ मया तत्र नियुक्ता वै रक्षार्थं शूलपाणयः ॥ गणाः सहस्रशो देवि पापिनां दुष्टचेतसाम् ॥ ६ ॥ तस्मात्सर्वप्रयत्नेन सम्यक्छ्रद्धासमन्वितः ॥ पूजयेत्तं महादेवं कपालिनमनामयम् ॥ ७ ॥ हिरण्यं तत्र दातव्यं ब्राह्मणे वेदपारगे ॥ पूजयित्वा विधानेन सम्यक्तत्पुरुषाणुना ॥ ८ ॥ जन्मप्रभृति यत्पापं प्राणिभिः समुपार्जितम् ॥ षडशीतिमुखे दृष्ट्वा तल्लिंगं तु व्यपोहति ॥ ९ ॥ इति संक्षेपतः प्रोक्तं माहात्म्यं पापनाशनम् ॥ कपालिरुद्रदेवस्य तृतीयस्य वरानने ॥ १० ॥ इति श्रीस्कांदे महापुराणः एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्य एकादशरुद्रमाहात्म्ये कपालीश्वरमाहात्म्यवर्णनंनामैकोननवतितमोऽध्यायः ॥ ८९ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि चतुर्थं रुद्रमुत्तमम् ॥ वृषभेश्वरनामानं कल्पलिंगं सुरप्रियम् ॥ १ ॥ बालरूपी महादेवि यत्र ब्रह्मा स्वयं स्थितः ॥ तस्यैव चोत्तरे भागे धनुषां त्रितये स्थितम् ॥ २ ॥ आद्यं महाप्रभावं हि नापुण्यो वेद मानवः ॥ तस्यैव कल्पनामानि सांप्रतं प्रब्रवीमि ते ॥ ३ ॥ पूर्वकल्पे महादेवि ब्रह्मेश्वर इति स्मृतः ॥ ब्रह्मणाराधितः पूर्वं वर्षाणामयुतं प्रिये ॥ ४ ॥ सृष्टिकामेन देवेन ततस्तुष्टो महेश्वरः ॥ चतुर्विधां भूतसृष्टिं ततश्चक्रे पितामहः ॥ ५ ॥ ब्रह्मणस्त्वीशभावेन गतस्तुष्टिं यतो हरः ॥ तेन ब्रह्मेश्वरं नाम तस्मिँल्लिंगे पुराऽभवत् ॥ ६ ॥ ततो द्वितीयकल्पे तु संप्राप्ते वरवर्णिनि ॥ रैवतेश्वरनामेति प्रख्यातं धरणीतले ॥७॥ रैवतोनाम राजाऽभूद्ब्रह्मांडे सचराचरे ॥ जगद्यो निर्जिगायेदं तल्लिंगस्य प्रभावतः ॥ ८ ॥ रैवतेश्वरनामाभूत्तेन लिंगं महाप्रभम् ॥ पुनस्तृतीयकल्पे तु संप्राप्ते वरवर्णिनि ॥ ९ ॥ वृषभेश्वरनामाभूत्तस्य लिंगस्य भामिनि ॥ ममैव वाहनं योऽसौ धर्मोयं वृषरूपधृक् ॥ १० ॥ तेन तत्पूजितं लिंगं

१ महादेवि–इ० पा० । २ आगमम्–इ० पा० । ३ सः–इ० पा० । ४ तत्पुरुषाणुना–"तत्पुरुषाय विद्महे" इत्यनेन मन्त्रेण–इत्यर्थः । तत्पुरुषोऽणुना–इ० पा० । ५ ततः–इ० पा० ।
६ रैवतेश्वरनामाभूत्तस्य लिंगस्यभामिनि–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिव्याब्दानां सहस्रकम् ॥ ततस्तुष्टेन देवेशि नीतः सायुज्यतां वृषः ॥ ११ ॥ तेन तल्लिंगमभवद्वृषभेशेति भूतले ॥ ततश्चतुर्थे संप्राप्ते वाराहे कल्प संज्ञिते ॥ १२ ॥ अष्टाविंशतिमे तत्र त्रेतायुगमुखे तदा ॥ इक्ष्वाकुर्नाम राजाऽभूत्सूर्यवंशविभूषणः ॥ १३ ॥ स [1]लिंगं पूजयामास त्रिकालं भक्तिभावितः ॥ एकाहारो जिताहारो भूमिशायी जि[3]तेंद्रियः ॥ १४ ॥ एवं काले बहुविधे ततस्तुष्टो महेश्वरः ॥ ददौ राज्यं महोदग्रं संततिं पुत्र पौत्रिकीम् ॥ १५ ॥ इक्ष्वाक्वीश्वरनामाभूत्तेनेदं लिंगमुत्तमम् ॥ यस्तं पूजयते भक्त्या देवं वृषभवाहनम् ॥ १६ ॥ सप्तजन्मकृतैः पापैर्मुच्यते नात्र संशयः ॥ त्रिंशद्धनुष्प्रमाणेन तस्य क्षेत्रं चतुर्दिशम् ॥ १७ ॥ स्नानं जाप्यं बलिं होमं पूजां स्तोत्र[4]मुदीरणम् ॥ तस्मिंस्तीर्थे तु यः कुर्यात्तत्सर्वं चाक्षयं भवेत् ॥ १८ ॥ चतुष्कोणांतरा क्षेत्रमेवं मात्राप्रमाणतः ॥ एकरात्रोषितो भूत्वा तस्य लिंगस्य सन्निधौ ॥ १९ ॥ ब्रह्मचर्य्येण जागर्त्ति स पापैः संप्रमुच्यते ॥ होमजाप्यसमाधिस्थो नृत्यगीतादिवादनैः ॥ २० ॥ गोघ्नो वा ब्रह्महा पापी मुच्यते दुष्कृतैर्नरः ॥ यः संप्रीणयते विप्रांस्तत्र भोज्यैः पृथग्विधैः ॥ २१ ॥ एकस्मिन्भोजिते विप्रे कोटिर्भवति भोजिता ॥ भैरवं चैव केदारं पुष्करं [5]द्रुतिजंगमम् ॥ २२ ॥ वाराणसी कुरुक्षेत्रं महा कालं च नैमिषम् ॥ एतत्तीर्थाष्टकं देवि तस्मिँल्लिंगे व्यवस्थितम् ॥ २३ ॥ माघे कृष्णचतुर्दश्यां तत्र यो जागृयान्निशि ॥ संपूज्य विधिना देवं स तीर्थाष्टफलं लभेत् ॥ २४ ॥ ददाति तत्र यः पिण्डं नष्टेन्दौ शिवसंनिधौ ॥ तृप्यन्ति पितरस्तस्य यावद्ब्रह्मदिनान्तकम् ॥ २५ ॥ दधिक्षीर घृतेनैव पंचगव्यकुशोदकैः ॥ कुंकुमागरुकर्पूरैस्तल्लिंगं पूजयेन्निशि ॥ २६ ॥ संमंत्र्याघोरमंत्रेण ध्यात्वा देवं सदाशिवम् ॥ एवं कृत्वा महादेवि मुच्यते पंचपातकैः ॥ २७ ॥ अष्टम्यां च चतुर्दश्यां दध्ना संस्नापयेद्यदि ॥ स ब्राह्मणश्चतुर्वेदो जायते नात्र संशयः ॥ २८ ॥ क्षीरेण स्नापयेद्देवि यदि तं वृषभेश्वरम् ॥ सप्तधेनुसहस्राणां स फलं विंदते महत् ॥ २९ ॥ जन्मांतरेण यत्पापं सां[6]प्रतं यत्कृतं प्रिये ॥ तत्सर्वं नाशमायाति घृतस्नानेन भामिनि ॥ ३० ॥ पंचगव्येन यो देवि स्नापयेद्वृषभेश्वरम् ॥ स दहेत्सर्वपापानि सर्वयज्ञफलं लभेत् ॥ ३१ ॥ तद्दृष्ट्वा ब्रह्महा गोघ्नः स्तेयी च गुरुतल्पगः ॥ शरणागतघाती च मित्रविश्रंभघातकः ॥ ३२ ॥ दुष्टपापसमाचारो मातृहा पितृहा तथा ॥ मुच्यते सर्वपापैस्तु तल्लिंगाराधनोद्यतः ॥ ३३ ॥ कार्तिकं सकलं यस्तु पूजयेद्ब्रह्मणा सह ॥ ब्रह्मेश्वरं महालिंगं स मुक्तः पातकैर्भवेत् ॥ ३४ ॥ तेन दत्तं भवेत्सर्वं गुरवस्तेन तोषिताः ॥ श्राद्धं कृतं गयातीर्थे तेन तप्तं महत्तपः ॥ येन देवाधिदेवोऽसौ पूजितो वृषभेश्वरः ॥ ३५ ॥ इति ते कथितं देवि माहा

१ मया-इति शेषः। २ निराहारः-इ० पा०। ३ जितव्रतः-इ० पा०। ४ उदीरणम्-वेदमंत्रपारायणम्-इत्यर्थः। ५ द्रुतिजंगमम्-इ० पा०। ६ सांप्रतम्-इह जन्मनि-इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

त्म्यं देवपूजितम् ॥ वृषभेश्वरदेवस्य कल्पलिंगस्य भामिनि ॥ ३६ ॥ यः शृणोति महादेवि माहात्म्यं दैवदेवतम् ॥ मूर्खो वा पंडितो वाऽपि स याति परमां गतिम् ॥ ३७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्य एकादशरुद्रमाहात्म्ये वृषवाहनेश्वरमाहाम्यवर्णनंनाम नवतितमोऽध्यायः ॥ ९० ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि त्र्यंबकेश्वरमव्ययम् ॥ तत्पंचमं समाख्यातं रुद्राणामादिदैवतम् ॥ १ ॥ शिखंडीश्वरमाख्यातं पूर्वं त्रेतायुगे प्रिये ॥ तच्चाद्याहं प्रवक्ष्यामि यथा संज्ञायते नरैः ॥२॥ अस्ति सांबपुरं देवि तत्रस्थं परमेश्वरि ॥ तस्यैवोत्तरदिग्भागे स्थानं कापालिकं स्मृतम् ॥ ३ ॥ कपालेश्वरनामा च यत्रेशो लिंगमूर्तिमान् ॥ संस्थितः पापनाशाय दर्शनात्स्पर्शनान्नृणाम् ॥ ४ ॥ तस्मादीशानदिग्भागे धनुषां षोडशांतरे ॥ त्र्यंबकेश्वरनामा च तत्र रुद्रः स्थितः स्वयम् ॥ ॥ ५ ॥ सर्वानुग्रहकर्त्ता च सर्वकामफलप्रदः ॥ पुरा यत्रातपद्देवि तपो घोरं सुदुष्करम् ॥ गुरुर्नामा ऋषिवरो देवदानवदुःसहम् ॥ ६ ॥ कोटीनां त्रितयं येन त्र्यंबको मंत्रनायकः ॥ जप्तो दिव्येन विधिना त्रिकालं पूज्य शंकरम् ॥ ७ ॥ ततः प्रसाद्य देवेशं दिव्यैश्वर्यमवाप सः ॥ चक्रे नाम स्वयं तस्य त्र्यंबकेश्वरमव्ययम् ॥ ८ ॥ जप्त्वा तु त्र्यंबकं मंत्रं यतः सिद्धिमवाप सः ॥ दिव्याष्टगुणमैश्वर्यं तेनासौ त्र्यंबकेश्वरः ॥ ९ ॥ सर्वपातकविध्वंसी दर्शनात्स्पर्शनादपि ॥ यस्त्र्यंबकं जपेद्विप्रस्त्र्यंबकेश्वरसंनिधौ ॥ स प्राप्नोति महासिद्धिं प्रत्यक्षं रुद्र एव सः ॥१०॥ दर्शनादपि तस्याथ पापं याति सहस्रधा ॥ यस्तं पूजयते भक्त्या विधिना भावमास्थितः ॥ वामदेवेन मंत्रेण स मुक्तः पातकैर्भवेत् ॥ ११ ॥ चैत्रशुक्लचतुर्दश्यां तत्र यो जागृयान्निशि ॥ पूजास्तुतिकथाभिश्च स प्राप्नोतीप्सितं फलम् ॥ १२ ॥ धेनुस्तत्रैव दातव्या सम्यग्यात्राफलेप्सुभिः ॥ १३ ॥ इति ते कथितं देवि माहात्म्यं पापनाशनम् ॥ त्र्यंबकेश्वररुद्रस्य नृणां पुण्यफलप्रदम् ॥ १४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्य एकादशरुद्रमाहात्म्ये त्र्यंबकेश्वरमाहात्म्यवर्णनंनामैकनवतितमोऽध्यायः ॥ ९१ ॥ ॥छ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि अघोरेश्वरमुत्तमम् ॥ षष्ठं लिंगं समाख्यातं तद्वक्त्रं भैरवं स्मृतम् ॥ १ ॥ त्र्यंबकेश्वरवायव्ये धनुषां पंचके स्थितम् ॥ सर्वकामप्रदं पुण्यं कलिकल्मषनाशनम् ॥ २ ॥ यस्तं पूजयते भक्त्या स्नानपूजादिभिः क्रमात् ॥ मेरुदानस्य कृत्स्नस्य स लभेन्मनुजः फलम् ॥ ३ ॥ दक्षिणामूर्तिमास्थाय यत्किंचित्तत्र दीयते ॥ अघोरेश्वरदेवस्य तत्सर्वं चाक्षयं भवेत् ॥ ४ ॥ यः श्राद्धं कुरुते तत्र अघोरेश्वरदक्षिणे ॥ आकल्पं

१ अपि दैवतम्--इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृप्तिमायांति पितरस्तस्य तर्पिताः ॥ ५ ॥ किं श्राद्धेन गयातीर्थे वाजिमेधेन किं प्रिये ॥ तत्र श्राद्धेन तत्सर्वं फलमभ्यधिकं लभेत् ॥ ६ ॥ त्रुटिमात्रमपि स्वर्णं यात्रायां यः प्रयच्छति ॥ स सर्वं फलमाप्नोति महादानस्य भूरिशः ॥ ७ ॥ ब्रह्मकूर्चं चरेद्यस्तु सोमाष्टम्यां विधानतः ॥ अघोरेश्वरसांनिध्ये अघोरेणाभिमंत्रितम् ॥ षडब्दस्य महत्तेन प्रायश्चित्तं कृतं भवेत् ॥ ८ ॥ इति संक्षेपतः प्रोक्तमघोरेशमहोदयम् ॥ माहात्म्यं सर्वपापघ्नं श्रुतं सर्वार्थसाधकम् ॥ ९ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्य एकादशरुद्रमाहात्म्येऽघोरेश्वरमाहात्म्यवर्णनंनाम द्विनवतितमोऽध्यायः ॥ ९२ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेद्वरारोहे महाकालेश्वरं हरम् ॥ अघोरेशादुत्तरतः किंचिद्वायव्यसंस्थितम् ॥ १ ॥ धनुषां त्रिंशता देवि श्रुतं पातकनाशनम् ॥ पूर्वं कृतयुगे देवि स्मृतं चित्रांगदेश्वरम् ॥ २ ॥ महाकालेश्वरं देवि कलौ नाम प्रकीर्तितम् ॥ कालरूपी महारुद्रस्तस्मिँल्लिंगे व्यवस्थितः ॥ ३ ॥ चराचरगुरुः साक्षाद्देवदानवदर्पहा ॥ सूर्यरूपेण यत्सर्वं ब्रह्मांडे ग्रसते प्रिये ॥ ४ ॥ स देवः संस्थितो देवि तस्मिँल्लिंगे महाप्रभः ॥ यस्तत्पूजयते भक्त्या कल्ये लिंगं मम प्रियम् ॥ षडक्षरेण मंत्रेण मृत्युं जयति तत्क्षणात् ॥ ५ ॥ कृष्णाष्टम्यां विशेषेण गुग्गुलं घृतसंयुतम् ॥ यो दहेद्विधिवत्तत्र पूजां कृत्वा निशागमे ॥ ६ ॥ अपराधसहस्रं तु क्षमते तस्य भैरवः ॥ धेनुदानं प्रशंसति तस्मिन्स्थाने महर्षयः ॥ ७ ॥ धेनुदस्तारयेन्नूनं दश पूर्वान्दशापरान् ॥ देवस्य दक्षिणे भागे यो जपेच्छतरुद्रियम् ॥ ८ ॥ उद्धरेत्पितृवर्गं च मातृवर्गं च मानवः ॥ बाल्ये वयसि यत्पापं वार्द्धके यौवनेऽपि वा ॥ क्षालयेच्चैव तत्सर्वं दृष्ट्वा कालेश्वरं हरम् ॥ ९ ॥ अयने चोत्तरे प्राप्ते यः कुर्याद्घृतकंबलम् ॥ न स भूयोऽत्र संसारे जन्म प्राप्नोति दारुणम् ॥ १० ॥ न दुःखितो दरिद्रो वा दुर्भगो वा प्रजायते ॥ सप्तजन्मान्तराण्येव महाकालेशदर्शनात् ॥ ११ ॥ धनधान्यसमायुक्ते स्फीते सञ्जायते कुले ॥ भक्तिर्भवति भूयोऽपि महाकालेश्वरार्चने ॥ १२ ॥ इति संक्षेपतः प्रोक्तं महाकालेश्वरं प्रिये ॥ चित्रांगदो गणो देवि तेन चाराधितं पुरा ॥ १३ ॥ दिव्याब्दानां सहस्रं तु महाकालेश्वरं हि तत् ॥ चित्रांगदेश्वरंनाम तेन ख्यातं धरातले ॥ १४ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्य एकादशरुद्रमाहात्म्ये महाकालेश्वरमाहात्म्यवर्णनंनाम त्रिणवतितमोऽध्यायः ॥ ९३ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि भैरवेश्वरमुत्तमम् ॥ तस्यैव वह्निकोणस्थं धनुषां दशके स्थितम् ॥ १ ॥ सर्वकामप्रदं देवि दारिद्र्यौघविनाशनम् ॥

१ महादेवि–इ० पा० । २ स्फीते–अत्युदात्तकीर्तिमति–सत्कुले–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





पूर्वं चण्डेश्वरंनाम ख्यातं कृतयुगे प्रिये ॥ २ ॥ चण्डोनाम गणो देवि तेन चाराधितं पुरा ॥ दिव्याब्दानां सहस्रं तु तेन चण्डेश्वरं स्मृतम् ॥ ३ ॥ तं दृष्ट्वा देवदेवेशं स्पृष्ट्वा च सुसमाहितः ॥ मुच्यते सकलात्पापादाजन्ममरणांतिकात् ॥ ४ ॥ तत्र कृष्णचतुर्दश्यां मासे भाद्रपदे प्रिये ॥ उपवास परो भूत्वा यः करोति प्रजागरम् ॥ स याति परमं स्थानं यत्र देवो महेश्वरः ॥ ५ ॥ वाचिकं मानसं पापं कर्मणा यदुपार्ज्जितम् ॥ तत्सर्वं नाश मायाति तस्य लिंगस्य दर्शनात् ॥ ६ ॥ तिला हिरण्यं वस्त्राणि तत्र देयं मनीषिणे ॥ सर्वकिल्बिषनाशार्थं सम्यग्यात्राफलेप्सुना ॥ ७ ॥ भैरवाकारमास्थाय कल्पान्ते स हरेद्यतः ॥ विश्वं समग्रं देवेशि तेनासौ भैरवः स्मृतः ॥ ८ ॥ अस्मिन्कल्पे महादेवि प्रभासक्षेत्रमास्थितः ॥ बभूव भैरवो रुद्रः कल्पान्ते लिंगमूर्तिमान् ॥ ९ ॥ एवं संक्षेपतः प्रोक्तं माहात्म्यं भैरवेश्वरम् ॥ यच्छ्रुत्वा मुच्यते जन्तुः पातकादतिभैरवात् ॥ १० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्य एकादशरुद्रमाहात्म्ये भैरवेश्वरमाहात्म्य वर्णनंनाम चतुर्णवतितमोऽध्यायः ॥ ९४ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेद्वरारोहे लिंगं मृत्युञ्जयेश्वरम् ॥ तस्यैव वह्नि कोणस्थं धनुषां दशके स्थितम् ॥ १ ॥ पश्चिमे सागरादित्यात्स्थितं धनुश्चतुष्टये ॥ पापघ्नं सर्वजन्तूनां दर्शनात्स्पर्शनादपि ॥ २ ॥ पूर्वे युगे समाख्यातं नाम नन्दीश्वरेति च ॥ यत्र तप्तं तपो घोरं नन्दिनाम्ना गणेन मे ॥ ३ ॥ प्रतिष्ठाप्य महालिंगं नित्यं पूजापरेण च ॥ तत्र जप्तो महामन्त्रो मृत्युञ्जय इति श्रुतः ॥ ४ ॥ कोटीनां नियुतं देवि ततस्तुष्टो महेश्वरः ॥ ददौ गणेशतां तस्य मुक्तिं सामीप्यगां तथा ॥ ५ ॥ मृत्यु ञ्जयेन मन्त्रेण तस्य तुष्टो यतो हरः ॥ तेन मृत्युञ्जयेशेति ख्यातं लिंगं धरातले ॥ ६ ॥ यस्तं पूजयते भक्त्या पश्येद्वा भावितात्मवान् ॥ नाशये त्तस्य पापानि सप्तजन्मार्ज्जितान्यपि ॥ ७ ॥ स्नापयेत्पयसा लिंगं दध्ना घृतयुतेन च ॥ मधुनेक्षुरसेनैव कुंकुमेन विलेपयेत् ॥ ८ ॥ कर्पूरोशीर मिश्रेण मृगनाभिरसेन च ॥ चन्दनेन सुगन्धेन पुष्पैः संपूजयेत्ततः ॥ ९ ॥ दद्याद्धूपं पुरो देवि ततो देवस्य चागुरुम् ॥ वस्त्रैः संपूज्य विविधै रात्मवित्तानुसारतः ॥ १० ॥ नैवेद्यं परमान्नं च दत्त्वा दीपसमन्वितम् ॥ अष्टांगं प्रणिपातं च ततः कार्यं च भक्तितः ॥ ११ ॥ हेमदानं प्रदातव्यं ब्राह्मणे वेदपारगे ॥ १२ ॥ एवं यात्रा भवेत्तस्य शास्त्रोक्ता नात्र संशयः ॥ एवं कृत्वा नरो देवि लभते जन्मनः फलम् ॥ १३ ॥ इति संक्षेपतः



१ चन्द्रोनाम गणो देवि–इ०पा० । २ महादेवि–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राक्त मृत्युञ्जयमहोदयम् ॥ पापघ्नं सर्वजंतूनां सर्वकामफलप्रदम् ॥ १४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्य एकादशरुद्रमाहात्म्ये मृत्युञ्जयमाहात्म्यवर्णनंनाम पञ्चनवतितमोऽध्यायः ॥ ९५ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि कामेश्वरमिति स्मृतम् ॥ तस्यैवोत्तरदिग्भागे धनुषां त्रितये स्थितम् ॥ रतीश्वरमिति ख्यातं त्रेतायां तत्सुरेश्वरि ॥ १ ॥ यस्मिन्दृष्टे मनुष्याणां पूजिते तु वरानने ॥ नश्येच्च सप्तजन्माघं गृहभंगश्च नो भवेत् ॥ २ ॥ ॥ देव्युवाच ॥ ॥ केनायं स्थापितो देव कस्मात्प्रोक्तो रतीश्वरः ॥ दर्शनेनास्य किं श्रेयः सर्वं विस्तरतो वद ॥ ३ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि कथां पापप्रणाशिनीम् ॥ रतिर्नामाभवत्साध्वी कामपत्नी यशस्विनी ॥४॥ दग्धे मनसिजे पूर्वं देवेन त्रिपुरारिणा॥ तदर्थाय तपस्तेपे तस्मिन्देशे रतिः किल ॥५॥ अंगुष्ठाग्रेण तिष्ठन्त्या यावद्युगचतुष्टयम् ॥ आराधितो महादेवः शांतेन मनसा प्रिये ॥ ६ ॥ कस्मिंश्चिदथ काले तु निर्भिद्य धरणीतलम् ॥ तदग्रतः समुत्तस्थौ लिंगं माहेश्वरं प्रिये ॥ ७ ॥ एतस्मिन्नेव काले तु वागुवाचाशरीरिणी ॥ आह्लादयंती सहसा तस्याश्चित्तं वरानने ॥ ८ ॥ यस्मान्माहेश्वरं लिंगं त्वद्भक्त्या सहसोत्थितम् ॥ पूजयेस्तन्महाभागे ततः कांतमवाप्स्यसि ॥९॥ एतच्छ्रुत्वा तु सा साध्वी देवदूतस्य भाषितम्॥ तल्लिंगं पूजयामास स भक्त्या परमया युता ॥ १० ॥ ततः कामः समुत्तस्थौ सुप्तोत्थित इव प्रिये ॥ ततःप्रभृति तल्लिंगं कामेश्वरमिति श्रुतम् ॥ ११ ॥ ततः सा कामदयिता वाक्यमेतदुवाच ह ॥ प्रहृष्टा कामदेवाग्र्या पुरतः पुष्पधन्वनः ॥ १२ ॥ पूजयिष्यंति ये चान्ये लिंगमेतत्समाहिताः ॥ एवं ते वांछितां सिद्धिं भूयो यास्यंति सद्गतिम् ॥ १३ ॥ मनोऽभीष्टं तथा सर्वं यद्यपि स्यात्सुदुर्लभम् ॥ तत्प्राप्स्यंति न संदेहो लिंगस्यास्य प्रसादतः ॥ ॥ १४ ॥ एवमुक्त्वा गता साध्वी रतिः कामेन संयुता ॥ स्वस्थानं पूर्णकामा सा प्रहृष्टेनांतरात्मना ॥ १५ ॥ एवं चैत्रत्रयोदश्यां शुक्लायां यः समर्चति ॥ स कामवद्भवेन्नृणां श्रुतं सौभाग्यदायकम् ॥ १६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्य एकादशरुद्रमाहात्म्ये कामेश्वरमाहात्म्यवर्णनंनाम षण्णवतितमोऽध्यायः ॥ ९६ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि योगेश्वरमिति श्रुतम् ॥ कामेशाद्वायवे भागे धनुषां सप्तके स्थितम् ॥ १ ॥ लिंगं महाप्रभावं हि दर्शनात्पापनाशनम् ॥ पूर्वे युगे तु संख्यातं गणेश्वरमिति श्रुतम् ॥ २ ॥ पुरा मम गणा देवि असंख्याता महाबलाः ॥ क्षेत्रं माहेश्वरं ज्ञात्वा प्रभासं समुपागमन् ॥ ३ ॥ तत्र

१ सप्तजन्मान्तरं पापं गृहभंगो न जायते—इ० पा०। २ एतन्माहात्म्यम्—इति शेषेण—वाक्यपूर्तिर्बोद्धव्या।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





स्थाश्च तपो घोरं तेपुस्ते योगमाश्रिताः ॥ दिव्याब्दानां सहस्रं तु ततस्तुष्टो महेश्वरः ॥ ४ ॥ सालोक्यां च ददौ मुक्तिं तेषां योगबलेन वै ॥ यस्मा
त्षडंगयोगेन तेषां तुष्टो वृषध्वजः ॥ तेन योगेश्वरंनाम लिंगं योगफलप्रदम् ॥ ५ ॥ यस्तमर्चयते भक्त्या सम्यक्पूजाविधानतः ॥ स योगसिद्धि
माप्नोति मोदते दिवि देववत् ॥ ६ ॥ यो दद्यात्कांचनं मेरुं कृत्स्नां चैव वसुन्धराम् ॥ योगेशं पूजयेद्यस्तु स तयोरधिकः स्मृतः ॥ ७ ॥ वृषभ
स्तत्र दातव्यः संपूर्णफलहेतवे ॥ एवमेकादश प्रोक्ता रुद्राः प्राभासमाश्रिताः ॥ नित्यं पूज्याश्च वंद्याश्च क्षेत्रस्य फलमीप्सुभिः ॥ ८ ॥ य एतां चैव
शृणुयाद्रुद्रैकादशसंहिताम् ॥ तस्य क्षेत्रफलं सर्वं प्रभासांतरवासिनः ॥ ९ ॥ यश्चैतान्नैव जानाति रुद्रान्प्राभासमाश्रितान् ॥ स क्षेत्रमध्यसंस्थोऽपि
नास्त्येव स पशुः स्मृतः ॥ १० ॥ एतेषां चैव रुद्राणां सर्वान्वाप्येकमेव वा ॥ सोमेश्वरं पूजयित्वा जपेद्वै शतरुद्रियम् ॥ सर्वेषां लभते पुण्यं
रुद्राणां नात्र संशयः ॥ ११ ॥ इदं रहस्यं संख्यातं माहात्म्यं तव भामिनि ॥ रुद्राणां पापशमनं श्रुतं पुण्यविवर्द्धनम् ॥ १२ ॥ इति श्रीस्कांदे
महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये योगेश्वरमाहात्म्यवर्णनंनाम सप्तनवतितमोऽध्यायः ॥
॥ ९७ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि चंडेश्वरमिति श्रुतम् ॥ सोमेशाद्वायवे भागे धनुषां षष्टिभिः स्थितम् ॥ १ ॥
दिव्यं लिंगं महादेवि सर्वपातकनाशनम् ॥ तत्पूर्वे तु युगे ख्यातं मनोः स्वायंभुवांतरे ॥ २ ॥ त्रेतायुगमुखे देवि पृथिव्या संप्रतिष्ठितम् ॥ पूर्वमन्वं
तरे चास्मिँल्लिङ्गं पृथ्वीश्वरं प्रिये ॥ ३ ॥ पुनश्चंद्रेण तत्प्राप्तं लिंगं चंद्रेश्वरं प्रिये ॥ ब्रह्महत्यादिपापानां नाशनं पुण्यवर्द्धनम् ॥ ४ ॥ तं दृष्ट्वा
मानवो देवि सप्तजन्मसमुद्भवैः ॥ मुच्यते कल्मषैः सर्वैः कृतकृत्यस्तु जायते ॥ ५ ॥ ॥ देव्युवाच ॥ ॥ कथं पृथ्वीश्वरं ख्यातं तल्लिंगं पाप
नाशनम् ॥ कथं पुनः समाख्यातं चन्द्रेश्वरमिति प्रभो ॥ एतद्विस्तरतो ब्रूहि श्रोतुकामाहमादरात्[1] ॥ ६ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि
प्रवक्ष्यामि कथां पापप्रणाशिनीम् ॥ यां श्रुत्वा मुच्यते जंतुस्त्रिविधैः कर्मबन्धनैः ॥ ७ ॥ आसीत्पूर्वं महादेवि दैत्यभारार्दिता मही ॥ साऽधो
व्रजंती सहसा गोरूपा संबभूव ह ॥ ८ ॥ इतस्ततो धावमाना न लेभे निर्वृतिं क्वचित् ॥ ततो वर्षशते पूर्णे भ्रममाणा क्वचित्क्वचित् ॥ ९ ॥ आस
साद महाक्षेत्रं प्रभासमिति विश्रुतम् ॥ देवदानवगंधर्वैः सेवितं पापनाशनम् ॥ १० ॥ तत्र स्थित्वा महाक्षेत्रे कृत्वा मनसि निश्चयम् ॥ लिंगं प्रतिष्ठ ॥ ८४ ॥
यामास भक्त्या परमया युता ॥ ११ ॥ वर्षाणां च शतं साग्रं कृते तपसि दुश्चरे ॥ तुतोष भगवान्रुद्रो धरित्रीं वाक्यमब्रवीत् ॥ १२ ॥ देवि

१ श्रोतुमिच्छामि चादरात्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विश्वंभरे सर्वं तपः सुचरितं त्वया ॥ मा शोकं कुरु कल्याणि भविष्यति तवेप्सितम् ॥ १३ ॥ दैत्या नाशं गमिष्यंति विष्णुना निहता भुवि ॥ भवित्री त्वं महादेवि दैत्यभारविवर्जिता ॥ १४ ॥ इदं त्वया स्थापितं यल्लिंगं परमशोभनम् ॥ धरित्रीनाम्ना विख्यातं लोके ख्यातिं गमिष्यति ॥ ॥ १५ ॥ अत्राहं संस्थितो नित्यं लिंगरूपी महाप्रभुः ॥ स्थास्यामि कल्पेकल्पे वै नृणां पापापहारकः ॥ १६ ॥ मूर्त्यष्टकसमायुक्तो लिंगेऽस्मिन्संस्थितः सदा ॥ नृणां नाशयिता पापं पूर्वजन्मशतार्जितम् ॥ १७ ॥ भाद्रे कृष्णतृतीयायां यश्चैतं पूजयिष्यति ॥ सोऽश्वमेधसहस्रस्य फलमाप्स्यत्यसंशयम् ॥ १८ ॥ सर्वतीर्थाभिषेकस्य सर्वेषां दानकर्मणाम् ॥ भविष्यति फलं तस्य लिंगस्यैवास्य पूजनात् ॥ १९ ॥ धनुषां षोडशं यावत्समंतात्परिमंडलम् ॥ क्षेत्रमस्य समाख्यातं प्राणिनां मुक्तिदायकम् ॥ २० ॥ तस्मिन्मृताः प्राणिनो ये कामतो वाप्यकामतः ॥ कृमिकीटसमा वापि ते यांति परमां गतिम् ॥ २१ ॥ यो दद्यात्काञ्चनं मेरुं कृत्स्नां वाऽपि वसुन्धराम् ॥ यः पूजयति पृथ्वीशं स तयोरधिकः स्मृतः ॥ ॥ २२ ॥ ॥ ईश्वर उवाच ॥ ॥ इति दत्त्वा वरान्देवस्तत्रैवांतरधीयत ॥ पृथिवीश्वरनामाभूत्तत्प्रभृत्येव शंकरः ॥ २३ ॥ पुनरस्मिन्महाकल्पे वाराह इति विश्रुते ॥ कदाचिद्दक्षशापेन क्षीणश्चन्द्रो बभूव ह ॥ २४ ॥ पपात भूतले देवि यक्ष्मणा पीडितः शशी ॥ क्षेत्रं प्रभासमासाद्य तन्महोदधिसंनिधौ ॥ २५ ॥ दृष्ट्वा पृथ्वीश्वरं लिंगं सप्रभावं महाप्रभम् ॥ तत्पूजानिरतो भूत्वा वर्षाणां तु सहस्रकम् ॥ २६ ॥ अतपत्स तपो रौद्रं शीर्णपर्णांबुभक्षकः ॥ यतः समभवद्दीप्त्या सर्वाह्लादकरः शशी ॥ २७ ॥ तल्लिंगस्यैव माहात्म्यात्ततश्चंद्रेश्वरोऽभवत् ॥ तस्य लिंगस्य माहात्म्याच्चंद्रमा गतकल्मषः ॥ २८ ॥ अवाप सिद्धिमत्युग्रां स्पर्शलिंगप्रकाशिनीम् ॥ सोमनाथेति यां प्राहुः प्रसिद्धां लिंगरूपिणीम् ॥ २९ ॥ इति संक्षेपतः प्रोक्तं माहात्म्यं चन्द्रदैवतम् ॥ श्रुतं हरति पापानि तथाऽऽरोग्यं प्रयच्छति ॥ ३० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये मध्ययात्रायां पृथ्वीश्वर ( चंद्रेश्वर ) माहात्म्यवर्णनंनामाष्टनवतितमोध्यायः ॥ ९८ ॥ ॥ छ ॥ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि यत्र चक्रधरः स्थितः ॥ दंडपाणिश्च देवेशि यत्रैकस्थानसंस्थितः ॥ १ ॥ चंद्रेशात्पूर्वदिग्भागे सोमेशादुत्तरे स्थितः ॥ धनुषां पंचसंस्थाने गंधर्वेशात्समीपतः ॥ २ ॥ उमाया नैर्ऋते भागे ब्रह्मदेवर्षिसंस्थितः ॥ तस्योत्पत्तिं प्रवक्ष्यामि सर्वपातकनाशिनीम् ॥ ३ ॥ पौंड्रको वासुदेवस्तु वाराणस्यां पुराऽभवत् ॥ तेन श्रुतं पुराणं तु पठ्यमानं द्विजातिभिः ॥ ४ ॥ कल्पादौ द्वापरांते तु क्षत्रियाणां

१ चंद्रेशम्-इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





निवेशने ॥ अवतारं महाबाहुर्वासुदेवः करिष्यति ॥ ५ ॥ स तु मूढमतिर्मेने अहं विष्णुरिति प्रिये ॥ चिह्नानि धारयामास चक्रादीनि
वरानने ॥ ६ ॥ स दूतं प्रेषयामास द्वारकायां महोदरम्[1] ॥ स गत्वा प्राह विष्णुं वै चक्रादीनि परित्यज ॥ ७ ॥ इत्याह पौंड्रको राजा न चेद्वधमवा
प्स्यसि ॥ ततश्च भगवान्विष्णुः प्राहास्य रुचिरं वचः ॥ ८ ॥ वाच्यः स पौंड्रको राजा त्वया हंत वचो मम ॥ गृहीतचक्र एवाहं काशीमागम्य
ते पुरीम् ॥ ९ ॥ संत्यक्ष्यामि ततश्चक्रं गदां चेमामसंशयम् ॥ तद्ग्राह्यं भवता चक्रमन्यद्वा यत्तवेप्सितम् ॥ १० ॥ इत्युक्तेऽथ गते दूते संस्मृत्याऽभ्या
गतं हरिः ॥ गरुत्मन्तं समारुह्य त्वरितस्तत्पुरं ययौ ॥ ११ ॥ मित्रस्नेहात्ततस्तस्य काशिराजः सहानुगः ॥ सर्वसैन्यपरीवारस्ततः पौंड्रमुपाययौ
॥ १२ ॥ ततो बलेन महता काशिराजबलेन च ॥ पौंड्रको वासुदेवोऽसौ केशवाभिमुखो ययौ ॥ १३ ॥ तं ददर्श हरिर्दूराद्दुर्वारे स्यंदने स्थितम् ॥
चक्रहस्तं गदाशार्ङ्गसंयुतं गरुडध्वजम् ॥ १४ ॥ तं दृष्ट्वा भावगंभीरं जहास गरुडध्वजः ॥ उवाच पौंड्रकं मूढमात्मचिह्नोपलक्षितम् ॥ १५ ॥
पौंड्रकोक्तं त्वया यत्तु दूतवक्रेण मां प्रति ॥ समुत्सृजेति चिह्नानि तच्च सर्वं त्यजाम्यहम् ॥ १६ ॥ चक्रमेतत्समुत्सृष्टं गदेयं च विस
र्जिता ॥ गरुत्मानेष ते गत्वा समारोहतु वै ध्वजम् ॥ १७ ॥ इत्युच्चार्य विमुक्तेन चक्रेणासौ निपातितः ॥ रथश्च गदया भग्नो गजाश्चा
श्वाश्च चूर्णिताः ॥ १८ ॥ ततो हाहाकृते लोके काशिनाथो महाबली ॥ युयुधे वासुदेवेन मित्रदुःखेन दुःखितः ॥ १९ ॥ ततः
शार्ङ्गविनिर्मुक्तैश्छित्त्वा तस्य शरैः शिरः ॥ काशीपुर्यां स चिक्षेप कुर्वँल्लोकस्य विस्मयम् ॥ २० ॥ हत्वा तु पौंड्रकं शौरिः काशिराजं च सानु
गम् ॥ पुनर्द्वारवतीं प्राप्तो मृगयायां गतो यथा ॥ २१ ॥ ततः काशिपतेः पुत्रः पितुर्दुःखेन दुःखितः ॥ शंकरं तोषयामास स च तस्मै वरं
ददौ ॥ २२ ॥ स वव्रे भगवन्कृत्या पितुर्हंतुर्वधाय मे ॥ समुत्तिष्ठतु कृष्णस्य त्वत्प्रसादात्सुरेश्वर ॥ २३ ॥ एवं भविष्यतीत्युक्ते दक्षिणाग्नेस्तु
मध्यतः ॥ महाकृत्या समुत्तस्थौ प्रस्थिता द्वारकां प्रति ॥ २४ ॥ ज्वालामालाकरालां तां यादवा भयविह्वलाः ॥ दृष्ट्वा जनार्दनं सर्वे शर
णार्थमुपागताः ॥ २५ ॥ ततः सुदर्शनं तस्या मुमोच गरुडध्वजः ॥ वधाय सा ततो भग्ना चक्रतेजोऽभिपीडिता ॥ २६ ॥ कृत्यामनुजगामाशु
विष्णोश्चक्रं सुदर्शनम् ॥ कृत्या वाराणसीं प्राप्ता तस्याश्चक्रं तु पृष्ठतः ॥ २७ ॥ ततः सा भयसंत्रस्ता शंकरं शरणं गता ॥ सोमनाथं जगन्नाथं
नान्यः शक्तो हि रक्षितुम् ॥ २८ ॥ ततश्चक्रं वरैर्बाणैस्ताडयामास शंकरः ॥ तच्च द्वारवतीं प्राप्तं शिवसायकमिश्रितम् ॥ २९ ॥ तद्दृष्ट्वा शिव

[1] महौजसम्–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नामांकैस्ताडितं भगवान्हरिः ॥ चक्रं शरैस्ततः क्रुद्धो गृहीत्वा च करेण तत् ॥ जगाम तत्र यत्रास्ते सोमेशः कालभैरवः ॥ ३० ॥ स गत्वा रोष ताम्राक्षश्चक्रोद्यतकरः स्थितः ॥ कृत्यां हंतुं मतिं चक्रे कालभैरवनिर्मिताम् ॥ ३१ ॥ दृष्टो देवैस्ततः सर्वैर्दंडपाणिगणेन च ॥ देवानां प्रेक्षतां तत्र दण्डपाणिर्महागणः ॥ चक्रोद्यतकरं दृष्ट्वा विष्णुं प्राहाब्जलोचनम् ॥ ३२ ॥ ॥ दंडपाणिरुवाच ॥ ॥ मा क्रोधं कुरु देवेश कृत्यां प्रति जगत्प्रभो ॥ ३३ ॥ अमोघं युधि ते चक्रं कृत्या चापि च शांकरी ॥ एवं चक्र विनिर्मुक्ते भवेत्क्रोधो हरे यदि ॥ भविष्यति महद्दुःखं लोकानां संक्षयो हि वा ॥ ३४ ॥ न मोक्तव्यमतश्चक्र शृणु भूयो वचश्च नः ॥ अत्र स्थाने नियुक्तोऽहं शंकरेण पुरा हरे ॥ ३५ ॥ पापिनां रक्षणार्थं वै विघ्नार्थं दुष्टचेतसाम् ॥ तस्मात्त्वं मम सांनिध्ये तिष्ठ चक्रधरो हरे ॥ ३६ ॥ अत्र चक्रधरं देवं पूजयिष्यंति मानवाः ॥ धूपमाल्योपहारैश्च नैवेद्यैर्विविधैरपि ॥ ३७ ॥ ॥ विष्णुरुवाच ॥ ॥ एष एव निवृत्तोहं तव वाक्यांकुशेन वै ॥ अत्र चक्रोद्यतकरः स्थास्ये तव समीपतः ॥ ३८ ॥ एवं हि संस्थितो देवस्तत्र चक्रधरः प्रिये ॥ दंडपाणिश्च भगवान्मम रूपी गणेश्वरः ॥ ३९ ॥ यस्तौ पूजयते भक्त्या दंडपाणिहरी क्रमात् ॥ स पापकंचुकैर्मुक्तो गच्छेच्छिवपुरं नरः ॥ ४० ॥ माघे मासि चतुर्दश्यां कृष्णाष्टम्यां विशेषतः ॥ गंधधूपोपहारैर्यः पूजयेद्दण्डनायकम् ॥ तस्य क्षेत्रे निवसतो न विघ्नं जायते क्वचित् ॥ ४१ ॥ एकादश्यां जिताहारो योऽर्चयेच्चक्रपाणिनम् ॥ स मुक्तः पातकैः सर्वैर्याति विष्णोः सलोकताम् ॥ ४२ ॥ इति संक्षेपतः प्रोक्तं माहात्म्यं चक्रपाणिनः ॥ दण्डपाणिगणस्यापि श्रुतं पापौघनाशनम् ॥ ४३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये मध्ययात्रायां दण्डपाणिचक्रधरमाहात्म्यवर्णनंनामैकोनशततमोऽध्यायः ॥९९॥ ॥ छ ॥ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि तयोरुत्तरसंस्थितम् ॥ तथा वायव्यदिग्भागे ब्रह्मणो बालरूपिणः ॥ १ ॥ सांबादित्यं सुरश्रेष्ठे यः सांबेन प्रतिष्ठितः ॥ स्थानानि त्रीणि देवस्य द्वीपेऽस्मिन्भास्करस्य तु ॥ २ ॥ पूर्वं मित्रवनंनाम तथा मुण्डीरमुच्यते ॥ प्रभासक्षेत्रमास्थाय सांबादित्यस्तृतीयकः ॥ ३ ॥ तस्मिन्क्षेत्रे महादेवि पुरं यत्सांबसंज्ञकम् ॥ द्वितीयं शाश्वतं स्थानं तत्र सूर्यस्य नित्यशः ॥ ४ ॥ प्रीत्या सांबस्य तत्रार्को जनस्यानुग्रहाय च ॥ तत्र द्वादशभागेन मित्रो मैत्रेण चक्षुषा ॥ ५ ॥ अवलोकयञ्जगत्सर्वं श्रेयोर्थं तिष्ठते सदा ॥ प्रयुक्तां विधिवत्पूजां गृह्णाति भगवान्स्वयम् ॥ ६ ॥ ॥ देव्युवाच ॥ ॥ कोऽयं सांबः सुतः कस्य यस्य नाम्ना रवेः पुरम् ॥ यस्य वाऽयं सहस्रांशुर्वरदः पुण्यकर्मणः ॥७॥

१ देवाः—इ०, लोकाः—इ० च पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



॥ ॥ ईश्वर उवाच ॥ ॥ य एते द्वादशादित्या विराजन्ते महाबलाः ॥ तेषां यो विष्णुसंज्ञस्तु सर्वलोकेषु विश्रुतः ॥ ८ ॥ इहासौ वासुदेवत्वमवाप भगवान्विभुः ॥ ९ ॥ तस्य सांबः सुतो जज्ञे जांबवत्यां महाबलः ॥ स तु पित्रा भृशं शप्तः कुष्ठरोगमवाप्तवान् ॥ तेन संस्थापितः सूर्यो निजनाम्ना पुरं कृतम् ॥ १० ॥ ॥ देव्युवाच ॥ ॥ शप्तः कस्मिन्निमित्तेऽसौ पित्रा पुत्रः स्वयं पुनः ॥ नाल्पं स्यात्कारणं देव येनासौ शप्तवान्सुतम् ॥ ११ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणुष्वावहिता भूत्वा तस्य यच्छापकारणम् ॥ दुर्वासानाम भगवान्ममैवांशसमुद्भवः ॥ १२ ॥ अटमानः स भगवांस्त्रींल्लोकान्प्रचचार ह ॥ अथ प्राप्तो द्वारवतीं लोकाः संजज्ञिरे पुरः ॥ १३ ॥ तमागतमृषिं दृष्ट्वा सांबो रूपेण गर्वितः ॥ पिंगाक्षं जटिलं रूक्षं विरूपं कृशं तथा ॥ १४ ॥ अवमानं चकारासौ दर्शनात्स्पर्शनात्तथा ॥ दृष्ट्वा तस्य मुखं मंदो वक्रं चक्रे तथात्मनः ॥ चक्रे यदुकुलश्रेष्ठो गर्वितो यौवनेन तु ॥ १५ ॥ अथ क्रुद्धो महातेजा दुर्वासा ऋषिसत्तमः ॥ सांबं प्रोवाच भगवान्विधुन्वन्मुखमात्मनः ॥ १६ ॥ यस्माद्विरूपं मां दृष्ट्वा आत्मरूपेण गर्वितः ॥ गमने दर्शने मह्यमहंकारः कृतो यतः ॥ तस्मात्त्वं कुष्ठरोगेण न चिरेण ग्रसिष्यसे ॥ १७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये मध्ययात्रायां सांबादित्यमाहात्म्योपक्रमे सांबाय दुर्वाससा शापप्रदानवर्णनंनाम शततमोऽध्यायः ॥ १०० ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ एतस्मिन्नेव काले तु नारदो भगवानृषिः ॥ ब्रह्मणो मानसः पुत्रस्त्रिषु लोकेषु गर्वितः ॥ १ ॥ सर्वलोकचरः सोऽपि युवा देवनमस्कृतः ॥ तथा यदृच्छया चायमटमानः समंततः ॥ २ ॥ वासुदेवं स वै द्रष्टुं नित्यं द्वारवतीं पुरीम् ॥ आयाति ऋषिभिः सार्द्धं क्रोधेन ऋषिसत्तमः ॥ ३ ॥ अथाश्वागच्छतस्तस्य सर्वे यदुकुमारकाः ॥ ये प्रद्युम्नप्रभृतयस्ते च प्रह्वाननाः स्थिताः ॥ ४ ॥ अभावाच्चार्घ्यपाद्यानां पूजां चक्रुः समंततः ॥ सांबस्त्ववश्यभावित्वात्तस्य शापस्य कारणात् ॥ ५ ॥ अवज्ञां कुरुते नित्यं नारदस्य महात्मनः ॥ रतक्रीडासवैर्नित्यं रूपयौवनगर्वितः ॥ ६ ॥ अविनीतं तु तं दृष्ट्वा चिन्तयामास नारदः ॥ अस्याहमविनीतस्य करिष्ये विनयं शुभम् ॥ ७ ॥ एवं स चिन्तयित्वा तु वासुदेवमथाब्रवीत् ॥ इमाः षोडशसाहस्राः स्त्रियो या देवसत्तम ॥ ८ ॥ सर्वास्तासां सदा सांबे भावो देव समाश्रितः ॥ रूपेणाप्रतिमः सांबो लोकेऽस्मिन्सचराचरे ॥ ९ ॥ सदा³ऽर्हंति च तास्तस्य दर्शनं ह्यपि सत्स्त्रियः ॥ श्रुत्वैवं नारदाद्वाक्यं चिन्तयामास केशवः ॥ १० ॥ यदेत



१ पुत्रः—इ० पा० । २ हि—इ० पा० । ३ अर्हंति—सत्कुर्वन्ति—इत्यर्थः । 'अर्ह पूजायाम्' इत्यस्य धातोः—पूजार्थत्वेन सत्कारार्थत्वमप्यर्थादेवास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्नारदेनोक्तं सत्यमत्र तु किं भवेत् ॥ एवं च श्रूयते लोके चापल्यं स्त्रीषु विद्यते ॥ श्लोकाविमौ पुरा गीतौ चित्तज्ञैर्योषितां द्विजैः ॥ ११ ॥ पौंश्च
ल्यादतिचापल्यादज्ञानाच्च स्वभावतः ॥ रक्षिता यत्नतो ह्येता विकुर्वंति हि भर्तृषु ॥ १२ ॥ नैता रूपं परीक्षंते नाऽऽसां वयसि संश्रयः ॥ सुरूपं
वा विरूपं वा पुमानित्येव भुंजते ॥ १३ ॥ ॥ ईश्वर उवाच ॥ ॥ मनसा चिन्तयित्वैवं कृष्णो नारदमब्रवीत् ॥ न ह्यहं श्रद्दधा
म्येतद्यदेतद्भाषितं पुरा ॥ १४ ॥ ब्रुवाणमेवं देवं तु नारदः प्रत्युवाच ह ॥ तथाहं तु करिष्यामि यथा श्रद्धास्यते भवान् ॥ १५ ॥ एवमुक्त्वा ययौ
भूयो नारदस्तु यथागतम् ॥ ततः कतिपयाहस्य द्वारकां पुनरभ्यगात् ॥ १६ ॥ तस्मिन्नहनि देवोऽपि सहांतःपौरकैर्जनैः ॥ अनुभूय जलक्रीडां
पानमासेवते रहः ॥ १७ ॥ रम्ये रैवतकोद्याने नानाद्रुमविभूषिते ॥ सर्वर्तुकुसुमैर्नित्यं वासिते सर्वकामने ॥ १८ ॥ नानाजलजफुल्लाभिर्दीर्घिका
भिरलंकृते ॥ हंससारससंघुष्टे चक्रवाकोपशोभिते ॥ १९ ॥ तस्मिन्स रमते देवः स्त्रीभिः परिवृतस्तंदा[1] ॥ हारनूपुरकेयूररसनाद्यैर्विभूषणैः ॥ २० ॥
भूषितानां वरस्त्रीणां सर्वांगीणां विशेषतः ॥ तत्रस्थः पिबते पानं शुभगन्धान्वितं शुभम् ॥ २१ ॥ एतस्मिन्नंतरे बुद्ध्वा मद्यमत्तास्ततः स्त्रियः ॥
उवाच नारदः सांबमस्मिंस्तिष्ठ कुमारक ॥ २२ ॥ त्वां समाह्वयते देवो न युक्तं स्थातुमत्र ते ॥ तद्वाक्यार्थमबुद्ध्वैव नारदेनाथ नोदितः ॥ २३ ॥
गत्वा तु सत्वरं सांबः प्रणाममकरोत्पितुः ॥ निर्दिष्टमासनं भेजे यथाभावेन विष्णुना ॥ २४ ॥ एतस्मिन्नंतरे तत्र यास्तु वै चाल्पसात्त्विकाः ॥
ता दृष्ट्वा सहसा सांबं सर्वाश्चुक्षुभिरे स्त्रियः ॥ २५ ॥ न स दृष्टः पुरा याभिरंतःपुरनिवासिभिः ॥ मद्यदोषात्ततस्तासां स्मृतिलोपात्तथा बहु ॥ २६ ॥
स्वभावतोऽल्पसत्त्वानां जघनानि विसुस्रुवुः ॥ श्रूयते चाप्ययं श्लोकः पुराणप्रथितः क्षितौ ॥ २७ ॥ ब्रह्मचर्येऽपि वर्त्तंत्या योगिन्या वा प्रमा
दतः ॥ प्रकृष्टं पुरुषं दृष्ट्वा वरांगं क्लिद्यते स्त्रियाः ॥ २७ ॥ लोकेऽपि दृश्यते ह्येतन्मद्यस्याप्यथ सेवनात् ॥ लज्जां मुंचंति निःशंका ह्रीमत्यो ह्यपि
च स्त्रियः ॥ २९ ॥ समांसैर्भोजनैः स्निग्धैः पानैः सीधुसुरासवैः ॥ गंधैर्मनोज्ञैर्वस्त्रैश्च कामः स्त्रीषु विजृंभति ॥ ३० ॥ मद्यं न देयमत्यर्थं पुरुषेण
विपश्चिता ॥ मदोन्मत्ताः स्वभावेन पूर्वं संति यतः स्त्रियः ॥ ३१ ॥ नारदोऽप्यथ तं सांबं प्रेषयित्वा त्वरान्वितः ॥ आजगामाथ तत्रैव सांब
स्यानुपदेन तु ॥ ३२ ॥ आयांतं ताः स्वयं दृष्ट्वा प्रियसौमनसं मुनिम् ॥ सहसवोत्थिताः सर्वा मदोन्मत्ता अपि स्त्रियः ॥ ३३ ॥ तासामथोत्थि
तानां तु वासुदेवस्य पश्यतः ॥ भित्त्वा वासांस्यनर्घाणि पात्रेषु पतितानि तु ॥ ३४ ॥ [3]जंघनेषु विलग्नानि तानि पेतुः पृथक्पृथक् ॥ तद्दृष्ट्वा तु हरिः

---

१ सदा—इ० पा० । २ तम्—इ० पा० । ३ तद्योनौ तु विलग्नानि—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



क्रुद्धस्ताः शशाप ततोऽबलाः ॥ ३५ ॥ यस्माद्गतानि चेतांसि मां मुक्त्वाऽन्यत्र वः स्त्रियः ॥ तस्मात्पतिकृताँल्लोकानायुषोंऽते न यास्यथ ॥
॥ ३६ ॥ पतिलोकात्परिभ्रष्टाः स्वर्गमार्गात्तथैव च ॥ भूत्वा ह्यशरणा भूयो दस्युहस्तं गमिष्यथ ॥ ३७ ॥ शापदोषात्ततस्तस्मात्ताः स्त्रियो गां
गते हरौ ॥ हताः पांचनदैश्चौरैरर्जुनस्य प्रपश्यतः ॥ ३८ ॥ अल्पसत्त्वाश्च याश्चासंस्ता गता दूषणं स्त्रियः ॥ रुक्मिणी सत्यभामा च तथा जांब
वती प्रिये ॥ ३९ ॥ न प्राप्ता दस्युहस्तं ताः स्वेन सत्त्वेन रक्षिताः ॥ शप्त्वैवं ताः स्त्रियः कृष्णः सांबमप्यशपत्पुनः॥४०॥ यस्मादतीव ते कांतं दृष्ट्वा
रूपमिमाः स्त्रियः ॥ क्षुब्धाः सर्वा यतस्तस्मात्कुष्ठरोगमवाप्नुहि ॥ ४१ ॥ तस्य तद्वचनं श्रुत्वा सांबो लज्जासमन्वितः॥ उवाच प्रहसन्वाक्यं स स्मर
न्नृषिसत्तमम् ॥ ४२ ॥ अनिमित्तमहं तात भावदोषविवर्जितः ॥ शप्तो नं[1] मेऽत्र वै क्रुद्धो दुर्वासा नान्यथा वदेत् ॥ ४३ ॥ एवमुक्त्वा ततः सांबः
कृष्णं कमललोचनम् ॥ ततो वैराग्यसंयुक्तश्चिन्ताशोकपरायणः ॥ ४४ ॥ प्रभासक्षेत्रमगमत्सर्वपातकनाशनम् ॥ एवं तत्क्षेत्रमासाद्य तपस्तेपे
सुदारुणम् ॥ ४५ ॥ प्रतिष्ठाप्य सहस्रांशुं देवं पापनिषूदनम् ॥ ततश्चाराधयामास परं नियममाश्रितः ॥ ४६ ॥ त्रिसंध्यं पूजयामास दिव्यगंधानु
लेपनैः ॥ स्तोत्रेणानेन भक्त्या वै स्तौति नित्यं दिनाधिपम् ॥ ४७ ॥ ॥ सांब उवाच ॥ ॥ नमस्त्रैलोक्यदीपाय नमस्ते तिमिरापह ॥
नमः पंकजनाथाय नमः कुमुदशत्रवे ॥ ४८ ॥ नमो जगत्प्रतिष्ठाय जगद्धात्रे नमोऽस्तु ते ॥ देवदेव नमस्यामि सूर्यं त्रैलोक्यदीपकम् ॥ ४९ ॥
आदित्यवर्णो भुवनस्य गोप्ता अपूर्व एष प्रथमः सुराणाम् ॥ हिरण्यगर्भः पुरुषो महात्मा स पच्यते वै तमसः परस्तात् ॥ ५० ॥ इति स्तुत
स्तदा सूर्यः प्रसन्नेनांतरात्मना ॥ उवाच दर्शनं गत्वा सांबं जांबवतीसुतम् ॥ ५१ ॥ सांबसांब महाबाहो शृणु गोविन्दनन्दने ॥ स्तोत्रेणानेन
तुष्टोऽहं वरं ब्रूहि यदीप्सितम्[2] ॥ ५२ ॥ ॥ सांब उवाच ॥ ॥ कृष्णेनाहं[3] सुरश्रेष्ठ शप्तः पापः सुदुर्मतिः ॥ कुष्ठांतं कुरु मे देव यदि तुष्टोऽसि मे
प्रभो ॥ ५३ ॥ ॥ श्रीभानुरुवाच ॥ ॥ भूय एव महाभाग नीरोगस्त्वं भविष्यसि ॥ यादृग्रूपः पुरा ह्यासीर्मम चैव प्रसादतः ॥ ५४ ॥ अद्य
प्रभृति नेक्ष्यास्ता विष्णुभार्याः कथंचन ॥ न तासां दर्शने जातु स्थातव्यं यदुनन्दन ॥ ५५ ॥ तासामीर्ष्यापरीतेन विष्णुना प्रभविष्णुना ॥ कुष्ठं
ते यादवश्रेष्ठ प्रदत्तं हि महात्मना ॥ ५६ ॥ यो मां स्तोत्रेण चानेन समागत्य च स्तोष्यति ॥ न तस्यान्वयसंभूतः कुष्ठी कश्चिद्भविष्यति ॥ ५७ ॥
अथादित्यस्य नामानि सम्यग्जानीहि द्वादश ॥ द्वादशैव तथान्यानि तानि वक्ष्याम्यशेषतः ॥ ५८ ॥ आदित्यः सविता सूर्यो मिहिरोऽर्कः प्रता



१ किं तु-इति शेषः । २ तत्त्वं ब्रूहि यदीप्सितम्-इ० पा० । ३ दुर्वाससा, श्रीकृष्णेन च-इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पनः ॥ मार्त्तंडो भास्करो भानुश्चित्रभानुर्दिवाकरः ॥ ५९ ॥ रविर्द्वादशनामैवं ज्ञेयः सामान्यनामभिः ॥ विष्णुर्धाता भगः पूषा मित्रोंऽशुर्वरुणो ऽर्यमा ॥ ६० ॥ इन्द्रो विवस्वांस्त्वष्टा च पर्जन्यो द्वादशः स्मृतः ॥ इति ते द्वादशादित्याः पृथक्त्वेन प्रकीर्तिताः ॥ ६१ ॥ उत्तिष्ठंति सदा ह्येते मासैर्द्वादशभिः क्रमात् ॥ विष्णुस्तपति वै चैत्रे वैशाखे चार्यमा सदा ॥ ६२ ॥ विवस्वाञ्ज्येष्ठमासे तु आषाढे चांशुमांस्तथा ॥ पर्जन्यः श्रावणे मासि वरुणः प्रौष्ठसंज्ञिके ॥ ६३ ॥ इन्द्रश्चाश्वयुजे मासि धाता तपति कार्तिके ॥ मार्गशीर्षे तथा मित्रः पौषे पूषा दिवाकरः ॥ ६४ ॥ माघे भगस्तु विज्ञेयस्त्वष्टा तपति फाल्गुने ॥ शतैर्द्वादशभिर्विष्णू रश्मीनां दीप्यते सदा ॥ ६५ ॥ दीप्यते गोसहस्रेण शतैश्च त्रिभिरर्यमा ॥ द्विसप्तकै र्विवस्वांस्तु अंशुमान्पञ्चकैस्त्रिभिः ॥ ६६ ॥ विवस्वानिव पर्जन्यो वरुणश्चार्यमा इव ॥ इन्द्रस्तु द्विगुणैः षड्भिर्भात्येकादशभिः शतैः ॥ ६७ ॥ मित्रवच्च भगस्त्वष्टा सहस्रेण शतेन च ॥ उत्तरोपक्रमेऽर्कस्य वर्धन्ते रश्मयः सदा ॥ दक्षिणोपक्रमे भूयो ह्रसन्ते सूर्यरश्मयः ॥ ६८ ॥ एवं द्वादश मूर्तिस्थः प्रभासक्षेत्रमध्यतः ॥ सांबादित्येति विख्यातः स्थास्ये मन्वन्तरान्तरे ॥ ६९ ॥ माघस्य शुक्लपक्षे तु पञ्चम्यां यादवोत्तम ॥ एकभक्तं सदा ख्यातं षष्ठ्यां नक्तमुदाहृतम् ॥ ७० ॥ सप्तम्यामुपवासं तु कृत्वा सांबार्कसंनिधौ ॥ रक्तचन्दनमिश्रैस्तु करवीरैर्महाव्रतः ॥ ७१ ॥ दत्त्वा कुन्दुरकं[1] धूपं पूजयेद्भास्करं बुधः ॥ ब्राह्मणान्दिव्यभोज्येन भोजयित्वाऽपि शक्तितः ॥ ७२ ॥ एवं यः कुरुते सम्यक्सांबादित्यस्य पूजनम् ॥ सम्यक्छ्रद्धासमायुक्तः संप्राप्स्यत्यखिलं फलम् ॥ ७३ ॥ ॥ ईश्वर उवाच ॥ ॥ एवमुक्त्वा सहस्रांशुस्तत्रैवांतरधीयत ॥ सांबोऽपि निर्जरो भूत्वा द्वारकां पुनरागमत् ॥ ७४ ॥ इत्येतत्कथितं देवि सांबादित्यमहोदयम् ॥ श्रुतं हरति पापानि तथाऽऽरोग्यं प्रयच्छति ॥ ७५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये सांबादित्यमाहात्म्यवर्णनंनामैकोत्तरशततमोऽध्यायः॥ १०१ ॥

ततो गच्छेन्महादेवि देवीं कंटकशोधिनीम् ॥ तस्यैवोत्तरदिग्भागे[2] धनुर्द्वितयसंस्थिताम् ॥ १ ॥ महिषघ्नीं महाकायां ब्रह्मदेवर्षिपूजिताम् ॥ पुरा ये कल्मषोपेता दानवा देवकंटकाः ॥ २ ॥ युगेयुगे शोधयेत्तांस्तेन[4] कंटकशोधिनी[3] ॥ आश्वयुक्छुक्लपक्षे तु नवम्यां तामथार्चयेत् ॥ ३ ॥ पशुपुष्पोपहारैश्च दीपधूपैस्तथोत्तमैः ॥ तस्याऽरयो न जायंते यावद्वर्षं वरानने ॥ ४ ॥ यस्तां पश्यति सद्भक्त्यां भूताया नित्यमेव वा ॥ तं पुत्रमिव कल्याणी

१ कन्दुरकम्–इ० पा० । २ तस्यैवोत्तरादिग्भागे–इ० पा० । ३ कंटकशोषिणीम्–इ०पा० । ४ शोषयेत्तान्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संरक्षति न संशयः ॥ ५ ॥ इति संक्षेपतः प्रोक्तं माहात्म्यं पापनाशनम् ॥ देवि कंटकशोधिन्याः श्रुतं रक्षाकरं परम् ॥ ६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये सांबादित्यसमीपवर्तिकंटकशोधिनीमाहात्म्यवर्णनंनामद्व्युत्तरशततमोध्यायः ॥ १०२ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेद्वरारोहे कपालेश्वरमुत्तमम् ॥ तस्या उत्तरदिग्भागे सुरगंधर्वपूजितम् ॥ ॥ १ ॥ पुरा यज्ञे वर्त्तमाने दक्षराजस्य धीमतः ॥ उपविष्टेषु विप्रेषु हूयमाने हुताशने ॥ २ ॥ जालमरूपधरो भूत्वा शंकरस्तत्र चागतः ॥ जीर्णकंथान्वितो देवि मलवान्धूलिधूसरः ॥ ३ ॥ अथ ते ब्राह्मणाः क्रुद्धा दृष्ट्वा तं जालमरूपिणम् ॥ कपालधारिणं सर्वे धिक्छब्दैस्तं जगर्हिरे[3] ॥ ४ ॥ असत्कृतपापपापेति गच्छगच्छ नराधम ॥ यज्ञवेदिर्न चार्हा हि मानुषास्थिधरस्य ते ॥ ५ ॥ अथ प्रहस्य भगवान्यज्ञवेद्यां सुरेश्वरि ॥ क्षिप्त्वा कपालं नष्टोऽसौ न स ज्ञातो मनीषिभिः ॥ ६ ॥ तस्मिन्नष्टे कपालं तत्क्षिप्तं मंडपबाह्यतः ॥ अथान्यत्तत्र संजातं तद्रूपं च वरानने ॥ ७ ॥ क्षिप्तंक्षिप्तं पुनस्तत्र जायते च महीतले ॥ एवं शतसहस्राणि प्रयुतान्यर्बुदानि च ॥ ८ ॥ तत्र क्षिप्तानि जातानि ततस्ते विस्मयान्विताः ॥ अथोचुर्मुनयः सर्वे निर्विण्णाश्चास्य चेष्टितम् ॥ ९ ॥ कोऽन्यो देवान्महादेवाद्गंगाक्षालितशेखरात् ॥ समर्थ ईदृशं कर्त्तुमस्मिन्यज्ञे विशेषतः ॥ १० ॥ ततस्ते विविधैः स्तोत्रैः स्तुवंतो वृषभध्वजम् ॥ होमं चक्रुर्मुहुर्वह्नौ मंत्रैस्तैः शतरुद्रियैः ॥ ११ ॥ ततः प्रत्यक्षतां प्राप्तस्तेषां देवो महेश्वरः ॥ ततस्ते विविधैः स्तोत्रैस्तुष्टुवुः शूलपाणिनम् ॥ वेदोक्तमंत्रैर्विविधैः पुराणोक्तैस्तथैव च ॥ १२ ॥ ॥ ऋषय ऊचुः ॥ ॥ ॐ नमो मूलप्रकृतये अजिताय महात्मने ॥ अनावृताय देवाय निःस्पृहाय नमोनमः ॥ १३ ॥ नम आद्याय बीजाय आर्षेयाय प्रवर्त्तिने ॥ अनंतराय चैकाय अव्यक्ताय नमोनमः ॥ ॥ १४ ॥ नानाविचित्रभुजगांगदभूषणाय सर्वेश्वराय विरजाय नमो वराय ॥ विश्वात्मने परमकारणकारणाय फुल्लारविंदविपुलायतलोचनाय ॥ ॥ १५ ॥ अदृश्यमव्यक्तमनादिमव्ययं यदक्षरं ब्रह्म वदंति सर्वगम् ॥ निशाम्य यं मृत्युमुखात्प्रमुच्यते तमादिदेवं शरणं प्रपद्ये ॥ १६ ॥ एवं स्तुतस्तदा सर्वैर्ऋषिभिर्गतकल्मषैः ॥ ततस्तुष्टो महादेवस्तेषां प्रत्यक्षतां गतः ॥ अब्रवीत्तानृषीन्देवो वृणुध्वं वरमुत्तमम् ॥ १७ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ यदि तुष्टोऽसि नो देव स्थानेऽस्मिन्निरतो भव ॥ असंख्यातानि यस्माच्च कपालानि सुरेश्वर ॥ १८ ॥ पुनः पुनः प्रवृत्तानि व्यपनी



१ महादेवि—इ० पा० । २ मलवान्—मलमलिताङ्गव न्—इत्यर्थः—अत एव कापालिकादीनां लोके—'मलंग' इति संज्ञाशब्दो व्यवाह्रियते । ३ ननार्दिरे—इति पाठे तु उक्तवन्तः—इत्यर्थः—'गर्दनर्द शब्दे' इत्यस्य धातो रूपं तत्स्यात् । ४ च—इ० पा० । ५ नराम्—दृष्ट्वा—इत्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तान्यपि प्रभो ॥ अस्मिन्नसंशयं स्थाने कपालेश्वरनामभृत् ॥ १९ ॥ स्वयं तु लिंगं देवेश तिष्ठन्मन्वंतरांतरम् ॥ कपालेश्वरनाम्ना त्वमस्मिन्स्थाने स्थितिं कुरु ॥ २० ॥ येत्र त्वां पूजयिष्यंति धूपमाल्यानुलेपनैः ॥ तेषां तु परमं स्थानं यद्देवैरपि दुर्लभम् ॥ २१ ॥ बाढमित्येवमुक्त्वाऽसौ स्थित स्तत्र महेश्वरः ॥ पुनः प्रवर्तितो यज्ञो निशानाथस्य भामिनि ॥ २२ ॥ तस्मिन्दृष्टे लभेन्मर्त्यो वाजिमेधफलं प्रिये ॥ मुच्यते पातकैः सर्वैः पूर्व जन्मार्ज्जितैरपि ॥ २३ ॥ इदं माहात्म्यमखिलमभूत्स्वायंभुवांतरे ॥ वैवस्वते पुनश्चान्यद्दक्षयज्ञविनाशकृत् ॥ २४ ॥ कपालीति महेशानो दक्षे णोक्तः पुरा हरः ॥ तेन यज्ञस्य विध्वंसं कपाली तमथाकरोत् ॥ कपालेश्वरनामेति स्थितोस्मिन्मानवान्तरे ॥ २५ ॥ अथास्य नाम देवस्य सूर्य्य सावर्णिकेऽतरे ॥ भविष्यति वरारोहे नाम तत्त्वेश्वरेति च ॥ २६ ॥ इति संक्षेपतः प्रोक्तं माहात्म्यं रुद्रदैवतम् ॥ पापघ्नं सर्वजंतूनां पशुपाशविमोक्ष णम् ॥ २७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये मध्ययात्रायां कपालेश्वरमाहात्म्यवर्णनंनाम त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि कोटी श्वरमनुत्तमम् ॥ तस्मादुत्तरतो देवि कोटीशमिति विश्रुतम् ॥ १ ॥ पापघ्नं सर्वजंतूनां पशुपाशविमोक्षदम् ॥ पुरा पाशुपता देवि कपाले श्वरसंनिधौ ॥ २ ॥ तपः कुर्वंति विपुलं भस्मोद्धूलितविग्रहाः ॥ जटामुकुटसंयुक्ता मुंजमेखलधारिणः ॥ ३ ॥ शांताः सर्वे जितक्रोधा ब्राह्मणाः शिवयोगिनः ॥ तपः कुर्वंति तत्रस्था व्याप्य क्षेत्रं चतुर्दिशम् ॥ ४ ॥ कोटिसंख्या महादेवि मन्त्रजाप्यपरायणाः ॥ सम्यक्सं स्थाप्य ते लिंगं कपालेशसमीपगम् ॥ ५ ॥ ततस्ते पूजयां चक्रुस्तल्लिंगं भक्तिसंयुताः ॥ ततस्तुष्टो महादेवो मुक्तिं तेषां ददौ हरः ॥ ६ ॥ ऋषयः कोटिसंख्यातास्तस्मिन्सिद्धा यतः प्रिये ॥ तेन कोटीश्वरं लिंगं नाम्ना ख्यातं धरातले ॥ ७ ॥ यस्तं पूजयते भक्त्या कोटीश्वरमनामयम् ॥ स कोटिमन्त्रजाप्यस्य फलं प्राप्स्यति मानवः ॥ ८ ॥ हिरण्यं तत्र दातव्यं ब्राह्मणे वेदपारगे ॥ कोटिहोमफलं तस्य सम्यग्यात्राफलं भवेत् ॥ ९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये कोटीश्वरमाहात्म्यवर्णनंनाम चतुरधिक शततमोऽध्यायः ॥ १०४ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ अथान्यत्संप्रवक्ष्यामि रहस्यं स्थानमुत्तमम् ॥ सर्वपापहरं नृणां विस्तरात्कथ यामि ते ॥ १ ॥ प्रधानदेवमाहात्म्यं माहात्म्यं कल्पवासिनाम् ॥ सोमेशो दैत्यहंता च बालरूपी पितामहः ॥ २ ॥ अर्कस्थलस्तथादित्यः प्रभासः

१ पशुपाशविमोक्षदम्—इ० पा० । २ विमलम्—इ० पा० । ३ मुंडमेखलधारिणः—इ० पा० । ४ लभेत्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



शशिभूषणः ॥ एते षट्प्रवरा देवाः क्षेत्रे प्राभासिके स्थिताः ॥ ३ ॥ तेषां दर्शनमात्रेण कृतकृत्यः प्रजायते ॥ मुच्यते पातकैर्घोरैराजन्मजनितैर्ध्रु वम् ॥ ४ ॥ ॥ देव्युवाच ॥ ॥ पूर्वेषामुक्तदेवानां माहात्म्यं कथितं त्वया ॥ प्रभासे बालरूपीति यत्प्रोक्तं तत्कथं वचः ॥ ५ ॥ अन्येषु सर्व स्थानेषु वृद्धरूपी पितामहः ॥ कथं च समनुप्राप्तो माहात्म्यं तस्य किं स्मृतम् ॥ ६ ॥ कथं स पूज्यो देवेश यात्रा कार्या कथं नृभिः ॥ एतद्वि स्तरतो ब्रूहि प्रसन्नो यदि मे प्रभो ॥ ७ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि माहात्म्यं ब्रह्मसम्भवम् ॥ यस्य श्रवणमात्रेण मुच्यते सर्वपातकैः ॥ ८ ॥ नास्ति ब्रह्मसमो देवो नास्ति ब्रह्मसमो गुरुः ॥ नास्ति ब्रह्मसमं ज्ञानं नास्ति ब्रह्मसमं तपः ॥ ९ ॥ तावद्भ्रमंति संसारे दुःख शोकभयप्लुताः ॥ न भवंति सुरज्येष्ठे यावद्भक्ताः पितामहे ॥ १० ॥ समासक्तं यथा चित्तं जन्तोर्विषयगोचरे ॥ यद्येवं ब्रह्मणि न्यस्तं को न मुच्येत बंधनात् ॥ ११ ॥ ॥ देव्युवाच ॥ ॥ एवंमाहात्म्यसंयुक्तो यदि ब्रह्मा जगद्गुरुः ॥ प्राभासिके महातीर्थे कस्मिन्स्थाने तु संस्थितः ॥ ॥ १२ ॥ किमर्थमागतस्तत्र कस्मिन्काले सुरोत्तमः ॥ कथं स पूज्यो विप्रेंद्रैस्तिथौ कस्यां क्रमाद्वद ॥ १३ ॥ ॥ ईश्वर उवाच ॥ ॥ सोम नाथस्य ऐशान्यां सांबादित्याग्निगोचरे ॥ ब्रह्मणः परमं स्थानं ब्रह्मलोक इवापरः ॥ १४ ॥ तिष्ठते कल्पसंस्था ये तत्र कल्पांतवासिनः ॥ तत्र स्थाने स्थितो देवि बालरूपी पितामहः ॥ १५ ॥ जगत्प्रभुर्लोककर्ता सत्त्वमूर्तिर्महाप्रभः ॥ आगतश्चाष्टवर्षस्तु क्षेत्रे प्राभासिके शुभे ॥ १६ ॥ तत्राऽकरोत्तपो घोरं दिव्याब्दानां सहस्रकम् ॥ संस्थाप्य तु महालिंगं सिसृक्षुर्विविधाः प्रजाः ॥ १७ ॥ ततः कालांतरेतीते सोमेन प्रार्थितो विभुः ॥ क्षयरोगविमुक्तेन सम्यक्छ्रद्धान्वितेन वै ॥ १८ ॥ लिंगप्रतिष्ठाहेतोर्वै क्षेत्रे प्राभासिके शुभे ॥ कोटिब्रह्मर्षिभिः सार्द्धं सहितो विश्वकर्मणा ॥ कार यामास विधिवत्प्रतिष्ठां लिंगमुत्तमम् ॥ १९ ॥ प्रतिष्ठाप्य ततो लिंगं सोमनाथं वरानने ॥ दापयामास विप्रेभ्यो भूरिशो यज्ञदक्षिणाम् ॥ २० ॥ एवं प्रतिष्ठितं लिंगं ब्रह्मणा लोककर्तृणा ॥ वर्षाणि चात्र जातानि प्रभासे बालरूपिणः ॥ २१ ॥ चत्वारिंशद्वयं चैव क्षेत्रमध्यनिवासिनः ॥ एवं परार्द्धमगमत्प्रभासक्षेत्रवासिनः ॥ २२ ॥ ॥ देव्युवाच ॥ ॥ ब्रह्मणो दिनमानं तु मासवर्षसहस्रकम् ॥ तत्सर्वं विस्तराद्ब्रूहि यथायुर्ब्रह्मणः स्मृत म् ॥ २३ ॥ ॥ ईश्वर उवाच ॥ ॥ परमायुः स्मृतो ब्रह्मा परार्द्धं तस्य वै गतम् ॥ प्रभासक्षेत्रसंस्थस्य द्वितीयं भवतेऽधुना ॥ २४ ॥ यदा प्राभासिके क्षेत्रे ब्रह्मा लोकपितामहः ॥ आगतश्चाष्टवर्षस्तु बालरूपी तदोच्यते ॥ २५ ॥ अन्येषु सर्वतीर्थेषु वृद्धरूपी पितामहः ॥ मुक्त्वा प्राभासिकं क्षेत्रं सदैव

१ प्रभासं क्षेत्रमाश्रिताः—इ० पा० । २ कथञ्चन—इ० पा० । ३ उत्तमं लिंगं प्रति प्रतिष्ठां कारयामास—उत्तमं लिंगं प्रतिष्ठापयामास—इत्यर्थः । ४ लोककर्तृणा—लोककर्त्रा—आर्षोऽयं प्रयोगः। ५ भवेत—गच्छति।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विबुधप्रिये ॥ २६ ॥ ब्रह्मांडे यानि तीर्थानि ब्रह्माणस्तेषु ये स्मृताः ॥ तेषामाद्यो महातेजाः प्रभासे यो व्यवस्थितः ॥ २७ ॥ कल्पेकल्पे तु नामानि शृणु त्वं तानि वै प्रिये ॥ स्वयंभूः प्रथमे कल्पे द्वितीये पद्मभूः स्थितः ॥ २८ ॥ तृतीये विश्वकर्तेति बालरूपी चतुर्थके ॥ एतानि मुख्यनामानि कथितानि स्वयंभुवः ॥ २९ ॥ नित्यं संस्मरते यस्तु स दीर्घायुर्नरो भवेत् ॥३०॥ चन्द्रसूर्यग्रहाः सर्वे सदेवासुरमानुषाः ॥ त्रैलोक्यं नश्यते सर्वं ब्रह्मरात्रि समागमे ॥३१॥ पुनर्दिने तु संजाते प्रबुद्धः सन्पितामहः ॥ तथा सृष्टिं प्रकुरुते यथापूर्वमभूत्प्रिये ॥ ३२ ॥ दिनमानं प्रवक्ष्यामि ब्रह्मणो लोककर्तॄणः ॥ नेत्रभागाच्चतुर्भागैस्त्रुटिः कालो निगद्यते ॥ ३३ ॥ तस्माच्च द्विगुणं ज्ञेयं निमिषांतं वरानने ॥ निमिषैः पञ्चदशभिः काष्ठा इत्युच्यते बुधैः॥ त्रिंशद्भिश्चैव काष्ठाभिः कला प्रोक्ता मनीषिभिः ॥३४॥ त्रिंशत्कलो मुहूर्तः स्याद्दिनं पंचदशैस्तु तैः॥ दिनमाना निशा ज्ञेया अहोरात्रं तयोर्भवेत् ॥३५॥ तैः पंचदशभिः पक्षः पक्षाभ्यां मास उच्यते ॥ मासैश्चैवायनं षड्भिरब्दं स्यादयनद्वयात् ॥३६॥ चत्वारिंशद्वि लक्षाणि लक्षाणां त्रितयं पुनः ॥ विंशतिश्च सहस्राणि ज्ञेयं सौरं चतुर्युगम् ॥ ३७ ॥ चतुर्युगैकसप्तत्या मन्वंतरमुदाहृतम् ॥ ऐन्द्रमेतद्भवेदायुः समासात्तव कीर्तितम् ॥ ३८ ॥ स्वायंभुवो मनुः पूर्वं मनुः स्वारोचिषस्ततः ॥ औत्तमस्तामसश्चैव रैवतश्चाक्षुषस्ततः ॥ ३९ ॥ वैवस्वतोऽर्कसावर्णिर्ब्रह्मसावर्णिरेव च ॥ धर्मसावर्णिनामा च रौच्यो भूत्यस्तथैव च ॥ ४० ॥ चतुर्दशैते मनवः संख्यातास्ते यथाक्रमम् ॥ भूतान्भविष्यानिंद्रांश्च सर्वान्वक्ष्ये तव क्रमात् ॥ ४१ ॥ विश्वभुक्च विपश्चिच्च सुकीर्तिः शिबिरेव च ॥ विभुर्मनोभुवश्चैव तथौजस्वी बलिर्बली ॥ ४२ ॥ अद्भुतश्च तथा शांती रम्यो देववरो वृषा ॥ ऋतधामा दिवःस्वामी शुचिः शक्राश्चतुर्दश ॥ ४३ ॥ एते सर्वे विनश्यंति ब्रह्मणो दिवसे प्रिये ॥ रात्रिस्तु तावती ज्ञेया कल्पमानमिदं स्मृतम् ॥ ४४ ॥ प्रथमं श्वेतकल्पस्तु द्वितीयो नीललोहितः ॥ वामदेवस्तृतीयस्तु ततो राथंतरोऽपरः ॥ ४५ ॥ रौरवः पंचमः प्रोक्तः षष्ठः प्राण इति स्मृतः ॥ सप्तमोऽथ बृहत्कल्पः कन्दर्पोऽष्टम उच्यते ॥ ४६ ॥ सद्योऽथ नवमः प्रोक्त ईशानो दशमः स्मृतः ॥ ध्यान एकादशः प्रोक्तस्तथा सारस्वतोऽपरः ॥ ४७ ॥ त्रयोदश उदानस्तु गरुडोऽथ चतुर्दशः ॥ कौर्मः पंचदशो ज्ञेयः पौर्णमासी प्रजापतेः ॥ ४८ ॥

---

१ यथासूर्यम्–इ० पा० । २ लोककर्तृगः–लोककर्तुः–आर्षोऽयं प्रयोगः । ३ चतुर्भागे त्रुटिः–इ० पा० । ४ द्विपक्षो मास उच्यते–इ० पा० । ५ तच–इ० पा० । ६ अयमिन्द्रचतुर्दशानानुक्रमश्च–देवीपुराणे काल्यव्यवस्थाध्याये किंचिद्भिन्नत्वेनोक्तो दृश्यते–यथा–" इन्द्रश्च विश्वभुग्ज्ञेयो विपश्चित्तदनन्तरम् । विभुः प्रभुः शिखिश्चैव तथैव च मनोजवः ॥ तेजस्वी सांप्रतश्चेन्द्रो बलिर्भाव्यस्तदनन्तरम् ॥ अद्भुतस्त्रिदिवश्चैव दशमस्त्विन्द्र उच्यते । सुशांतिश्च सुकीर्तिश्च ऋतधामा दिवस्पतिः । इति भूता भविष्याश्च इन्द्रा ज्ञेयाश्चतुर्दश ॥" इति । ७ श्वेतकल्पः–श्वेतवाराहकल्पः–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





षोडशो नारसिंहस्तु समाधिस्तु ततः परः ॥ आग्नेयोऽष्टादशः प्रोक्तः सोमकल्पस्ततोऽपरः ॥ ४९ ॥ भावनो विंशतिः प्रोक्तः सुप्तमालीति चापरः ॥ वैकुण्ठश्चार्चिषो रुद्रो लक्ष्मीकल्पस्तथापरे ॥ ५० ॥ सप्तत्रिंशोऽथ वैराजो गौरीकल्पस्तथांऽऽधकः[1] ॥ माहेश्वरस्तथा प्रोक्तस्त्रिपुरो यत्र घातितः ॥ ५१ ॥ पितृकल्पस्तथांते च या कुहूर्ब्रह्मणः स्मृता ॥ त्रिंशत्कल्पाः समाख्याता ब्रह्मणो मासि वै प्रिये ॥ ५२ ॥ अतीताः कथिताः सर्वे वाराहो वर्त्ततेऽधुना ॥ प्रतिपद्ब्रह्मणो यत्र वाराहेणोद्धृता मही ॥ ५३ ॥ त्रिंशत्कल्पैः स्मृतो मासो वर्षं द्वादशभिस्तु तैः ॥ अनेन वर्षमानेन तदा ब्रह्माऽष्टवार्षिकः ॥ आनीतः सोमराजेन सोमनाथः[2] प्रतिष्ठितः ॥ ५४ ॥ एवं क्षेत्रे निवसतः प्रभासे बालरूपिणः ॥ परार्द्धमेकमगमद्द्वितीयं वर्त्ततेऽधुना ॥ ५५ ॥ एवं महाप्रभावोऽसौ प्रभासक्षेत्रमध्यगः ॥ ब्रह्मा स्वयंभूर्भगवान्बालत्वात्क्षेत्रमाश्रितः ॥ ५६ ॥ स वै पूज्यो नमस्कार्यो वंदनीयो मनीषिभिः ॥ आदौ स एव पूज्यः स्यात्सम्यग्यात्राफलेप्सुभिः ॥ ५७ ॥ यस्तं पूजयते भक्त्या स मां पूजयते ध्रुवम् ॥ यस्तं द्वेष्टि स मां द्वेष्टि योऽस्य पूज्यो ममैव सः ॥ ५८ ॥ ब्रह्मणा पूज्यमानेन अहं विष्णुश्च पूजितः ॥ विष्णुना पूज्यमानेन अहं ब्रह्मा च पूजितः ॥ ५९ ॥ मया पूजितमात्रेण ब्रह्मविष्णू च पूजितौ ॥ सत्त्वं ब्रह्मा रजो विष्णुस्तमोऽहं संप्रकीर्तितः ॥ ६० ॥ वायुर्ब्रह्माऽनलो रुद्रो विष्णुरापः प्रकीर्तितः ॥ रात्रिर्विष्णुरहो रुद्रो या संध्या स पितामहः ॥६१॥ सामवेदो ह्यहं देवि ब्रह्मा ऋग्वेद उच्यते ॥ यजुर्वेदो भवेद्विष्णुः कुलाधारो[3] ह्यथर्वणः ॥ ६२ ॥ ऊष्णकालो ह्यहं देवि वर्षाकालः पितामहः ॥ शीतकालो भवेद्विष्णुरेवं कालत्रयं हि सः ॥ ६३ ॥ दक्षिणाग्निरहं ज्ञेयो गार्हपत्यो हरिः स्मृतः ॥ ब्रह्मा चाहवनीयस्तु एवं सर्वं त्रिदैवतम् ॥ ६४ ॥ अहं लिंगस्वरूपस्थो भगो विष्णुः प्रकीर्तितः ॥ बीजसंस्थो भवेद्ब्रह्मा विष्णुरापः प्रकीर्तितः ॥६५॥ अहमाकाशरूपस्थ एवं तत्त्वमयं प्रभुः ॥ आकाशात्स्रवते यच्च तद्बीजं ब्रह्मसंस्थितम् ॥ स्वरूपं ब्राह्ममाश्रित्य ब्रह्मा बीजप्ररोहकः॥६६॥नाभिमध्ये स्थितो ब्रह्मा विष्णुश्च हृदयांतरे ॥ वक्त्रमध्ये अहं देवि आधारः सर्वदेहिनाम् ॥६७॥ यश्चाहं स स्वयं ब्रह्मा यो ब्रह्मा स हुताशनः ॥ या देवी स स्वयं विष्णुर्यो विष्णुः स च चन्द्रमाः ॥ ६८ ॥ यः कालः स स्वयं ब्रह्मा यो रुद्रः स च भास्करः ॥ एवं शक्तिविशेषेण परं ब्रह्म स्थितं प्रिये ॥ ६९ ॥ ॐ कारस्तत्परं ब्रह्म गायत्री प्रकृतिः परा ॥ उभावेतौ नरो ज्ञात्वा न विच्यवति मुच्यते ॥७०॥ एवं यो वेद देवेशि अद्वैतं परमाक्षरम् ॥ स सर्वं वेद नैवान्यो भेदकर्त्ता



१ गौरीकल्पस्यैव--'आन्धक' कल्पत्वेनाभिधानम्--यतोऽत्रान्धकासुरो मर्दितः--इति बोध्यम् । अग्रिमश्लोके--'त्रिपुरो यत्र घातितः' इत्युक्तिवदत्रापि--'आन्धकः' इति नाम्नैव अन्धकासुरनिर्दलनवृत्तान्तसमुचितत्वं सूचितम् । २ सोमराजे प्रतिष्ठिते--इ० पा० । ३ कलाधारः--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नराधमः ॥ ७१ ॥ एकरूपं परं ब्रह्म कार्यभावात्पृथक्स्थितः ॥ यस्तं द्वेष्टि वरारोहे ब्रह्मद्वेष्टा स उच्यते ॥ ७२ ॥ दक्षिणांगे स्थितो ब्रह्मा वामांगे मम केशवः ॥ यस्तयोर्द्वेषमाधत्ते स द्वेष्टा मम भामिनि ॥ ७३ ॥ एवं ज्ञात्वा वरारोहे ह्यभिन्नेनान्तरात्मना ॥ ब्रह्माणं केशवं रुद्रमेकरूपेण पूजयेत् ॥ ७४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये मध्ययात्रायां ब्रह्ममाहात्म्यवर्णनंनाम पञ्चाधिकशततमोऽध्यायः ॥ १०५ ॥ ॥ छ ॥ ॥ देव्युवाच ॥ ॥ एवमद्वैतभावेन यद्ब्रह्म परिकीर्तितम् ॥ तस्य पूजां[1] विधानं मे कथयस्व यथार्थतः ॥ १ ॥ क्षेत्रे प्राभासिके देव बालरूपी पितामहः ॥ स कथं पूज्यते लोकैः परब्रह्मस्वरूपवान् ॥ २ ॥ के मन्त्राः किं विधानं तद्ब्राह्मणास्तत्र कीदृशाः ॥ तत्र स्थितानां विप्राणां कथं क्षेत्रफलं भवेत् ॥ ३ ॥ कतिप्रकारास्ते विप्रास्तत्र क्षेत्रनिवासिनः ॥ किमाचारा महादेव किंशीलाः किंपरायणाः ॥ ४ ॥ एतद्विस्तरतो ब्रूहि ब्राह्मणानां महोदयम् ॥ ५ ॥ ॥ ईश्वर उवाच ॥ ॥ साधुसाधु महादेवि सम्यक्प्रश्नविशारदे ॥ शृणुष्वैकमना भूत्वा माहात्म्यं विप्रदैवतम् ॥ ६ ॥ यच्छ्रुत्वा मानवो देवि मुच्यते सर्वपातकैः ॥ ये केचित्सागरांतायां पृथिव्यां कीर्तिता द्विजाः ॥ ७ ॥ तद्रूपं मम देवेशि प्रत्यक्षं धरणीतले ॥ प्रत्यक्षं ब्राह्मणा देवाः परोक्षं दिवि देवताः ॥ ८ ॥ ब्राह्मणा मत्प्रिया नित्यं ब्राह्मणा मामकी तनुः ॥ यस्तानर्चयते भक्त्या स मामर्चयते सदा ॥ ९ ॥ यस्तांस्तोषयते भक्त्या स च मां परितोषयेत् ॥ १० ॥ ये ब्राह्मणाः सोऽहमसंशयं प्रिये तेष्वर्चितेष्वर्चितोऽहं भवेयम् ॥ तेष्वेव तुष्टेष्वहमेव तुष्टो वैरं च तैर्यस्य ममापि वैरम् ॥ ११ ॥ यश्चन्दनैः सागरुगन्धमाल्यै रभ्यर्चयेच्छैलमयीं ममार्चाम् ॥ असौ न मामर्चयतेर्चयन्वै विप्रार्चनादर्चित एव चाहम् ॥ १२ ॥ यावंतः पृथिवीमध्ये चीर्णवेदव्रता द्विजाः ॥ अचीर्णव्रतवेदा वा तेऽपि पूज्या द्विजाः प्रिये ॥ १३ ॥ न ब्राह्मणान्परीक्षेत श्राद्धे क्षेत्रनिवासिनः ॥ सुमहान्परिवादोऽस्य ब्राह्मणानां परीक्षणे ॥ १४ ॥ काणाः खञ्जाश्च कुब्जाश्च दरिद्रा व्याधितास्तथा ॥ सर्वे श्राद्धे नियोक्तव्या मिश्रिता वेदपारगैः ॥ १५ ॥ ब्राह्मणा जातितः पूज्या वेदाभ्यासात्ततः परम् ॥ ततोर्थं हव्यकव्येषु न निन्द्या ब्राह्मणाः क्वचित् ॥ १६ ॥ काणान्कुण्टांश्च कुब्जांश्च दरिद्रान्व्याधितानपि ॥ नावमन्येद्द्विजान्प्राज्ञो मम रूपं यतः स्मृतम् ॥ १७ ॥ बहवो हि न जानंति नरा ज्ञानबहिष्कृताः ॥ यथाहं द्विजरूपेण चरामि पृथिवीमिमाम् ॥ १८ ॥ मद्रूपान्घ्नन्ति ये विप्रान्विकर्म कारयंति च ॥ अप्रेषणे प्रेषयंति दासत्वं कारयन्ति च ॥ १९ ॥ मृतांस्तान्करपत्रेण यमदूता महाबलाः ॥ निकृंतंति यथा काष्ठं

१ पूजां विधानेन—इ० पा० । २ तेन सह—इति शेषः । ३ कुण्टाश्च—इ० पा० । ४ धृताः-इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





सूत्रमार्गेण शिल्पिनः ॥ २० ॥ ये चैवाश्लक्ष्णया वाचा तर्ज्जयन्ति नराधमाः ॥ वदंति परुषं क्रोधात्पादेन निहनंति च ॥ २१ ॥ मृतां
स्तान्यमलोका हि निहत्य धरणीतले ॥ क्रूरपादेन चाक्रम्य क्रोधसंरक्तलोचनाः ॥ २२ ॥ अग्निवर्णैश्च संदंशैर्जिह्वामुद्धरते यमः ॥ ये नु विप्रा
न्निरीक्षन्ते पापाः पापेन चक्षुषा ॥ २२ ॥ अब्रह्मण्यास्तु ते बाह्या नित्यं ब्रह्मद्विषो नराः ॥ तेषां घोरा महाकाया वज्रतुंडा भयानकाः ॥ उद्ध
रंति मुहूर्तेन चक्षुः काका यमाज्ञया ॥ २४ ॥ यस्ताडयति विप्रं वै क्षते कुर्याद्धि शोणितम् ॥ अस्थिभंगं च वा कुर्यात्प्राणैर्वापि वियोजयेत् ॥२५॥
ब्रह्मघ्नः स तु विज्ञेयो न तस्मै निष्कृतिः स्मृता ॥ पञ्चाशत्कोटिसंख्येषु नरकेष्वनुपूर्वशः ॥ २६ ॥ स बहूनि सहस्राणि वर्षाणि पच्यते
भृशम् ॥ तस्माद्विप्रो वरारोहे नमस्कार्यो नृभिः सदा ॥ २७ ॥ अन्नपानप्रदानैस्तु पूज्या हि सततं द्विजाः ॥ सर्वेषां चैव दानानां विप्राः सर्वेऽधि
कारिणः ॥ २८ ॥ नान्यः समर्थो देवेशि गृह्णन्यात्यधमां गतिम् ॥ तपसा पावितो देवि ब्राह्मणो धूतकिल्बिषः ॥ २९ ॥ न सीदेत्प्रतिगृह्णानः
पृथिवीमनुसागराम् ॥ नास्ति किंचिन्महादेवि दुष्कृतं ब्राह्मणस्य तु ॥ ३० ॥ यस्तु स्थितः सदाऽध्यात्मे नित्यं सद्भावभावितः ॥ ब्राह्मणो हि
महद्भूतं जन्मना सह जायते ॥ ३१ ॥ लोके लोकेश्वराश्चापि सर्वे ब्राह्मणपूजकाः ॥ ततस्तान्नावमन्येत यदीच्छेज्जीवितं चिरम् ॥ ३२ ॥ ब्राह्मणाः
कुपिता हन्युर्भस्मीकुर्युः स्वतेजसा ॥ लोकानन्यान्सृजेयुश्च लोकपालांस्तथाऽपरान् ॥ ३३ ॥ अपेयः सागरो यैश्च कृतः कोपान्महात्मभिः ॥ येषां
कोपाग्निरद्यापि दंडके नोपशाम्यति ॥३४॥ एते स्वर्गस्य नेतारो देवदेवाः सनातनाः॥ एभिश्चापि कृतः पंथा देवयानः स उच्यते ॥ ३५ ॥ ते पूज्या
स्ते नमस्कार्यास्तेषु सर्वं प्रतिष्ठितम् ॥ ते वै लोकानिमान्सर्वान्पारयंति परस्परम् ॥३६॥ गूढस्वाध्यायतपसो ब्राह्मणाः शंसितव्रताः ॥ विद्यास्नाता
व्रतस्नाता अनपाश्रित्य जीविनः ॥ ३७ ॥ आशीविषा इव क्रुद्धा उपचर्या हि ब्राह्मणाः ॥ तपसा दीप्यमानास्ते दहेयुः सागरानपि ॥ ३८ ॥
ब्राह्मणेषु च तुष्टेषु तुष्यंते सर्वदेवताः ॥ ते गतिः सर्वभूतानामध्यात्मगतिचिन्तकाः ॥ ३९ ॥ आदिमध्यावसानानां ज्ञानानां छिन्नसंशयाः ॥
परापरविशेषज्ञा नेतारः परमां गतिम् ॥ अवध्या ब्राह्मणास्तस्मात्पापेष्वपि रताः सदा ॥ ४० ॥ यश्च सर्वमिदं हन्याद्ब्राह्मणं चापि तत्समम् ॥
सोऽग्निः सोऽर्को महातेजा विषं भवति कोपितः ॥ ४१ ॥ भूतानामग्रभुग्विप्रो वर्णश्रेष्ठः पिता गुरुः ॥ न स्कन्दते न व्यथते न विनश्यति कर्हि
चित् ॥ ४२ ॥ वरिष्ठमग्निहोत्राद्धि ब्राह्मणस्य मुखे हुतम् ॥ विप्राणां वपुराश्रित्य सर्वास्तिष्ठंति देवताः ॥ ४३ ॥ अतः पूज्यास्तु ते विप्रा अला



१ वृहत्तुण्डाः–इ० पा० । २ दण्डकारण्ये–इत्यर्थः । ३ धारयंति–इ० पा० । ४ आशीविषाः–सर्पाः—इत्यर्थः । ५ सर्वम्–इदम्–सकलं जगत्–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भे प्रतिमादयः ॥ ४४ ॥ अविद्यो वा सविद्यो वा ब्राह्मणो मम दैवतम् ॥ प्रणीतश्चाप्रणीतश्च यथाग्निर्दैवतं महत् ॥ ४५ ॥ स्मशानेष्वपि तेजस्वी पावको नैव दुष्यति ॥ हव्यकव्यव्यपेतोऽपि ब्राह्मणो नैव दुष्यति ॥ ४६ ॥ महापातकवर्ज्यं हि पूज्यो विप्रो वरानने ॥ सर्वथा ब्राह्मणाः पूज्याः सर्वथा दैवतं महत् ॥ तस्मात्सर्वप्रयत्नेन रक्षेदापद्गतं द्विजम् ॥ ४७ ॥ एवं विप्रा महादेवि पूज्याः सर्वत्र मानवैः ॥ किं पुनः संजितात्मानो विशेषात्क्षेत्रवासिनः ॥ ४८ ॥ अथ क्षेत्रस्थितानां च चतुराश्रमवासिनाम् ॥ विप्राणां वृत्तितो भेदं प्रवक्ष्याम्यानुपूर्व्यशः ॥ ४९ ॥ क्षेत्रस्य संन्यासविधिं ये जानंति द्विजातयः ॥ वृत्तिभेदं क्रमाच्चैव ते क्षेत्रफलभागिनः ॥ ५० ॥ यथा क्षेत्रे निवसता वर्तितव्यं द्विजातिना ॥ प्राजापत्यादिभेदेन तच्छृणु त्वं वरानने ॥ ५१ ॥ प्राजापत्या महीपालाः कपोता ग्रंथिकास्तथा ॥ कुटिकाश्चाथ वैतालाः पद्महंसा वरानने ॥ ५२ ॥ धृतराष्ट्रा बकाः कंका गोपालाश्चैव भामिनि ॥ त्रुटिका मठराश्चैव गुटिका दंडिकाः परे ॥ ५३ ॥ क्षेत्रस्थानामिमे भेदा वृत्तिं तेषां शृणुष्व च ॥ ५४ ॥ अहिंसा गुरुशुश्रूषा स्वाध्यायः शौचसंयमः ॥ सत्यमस्तेयमेतद्धि प्राजापत्यं व्रतं स्मृतम् ॥ ५५ ॥ क्षयपुष्ट्यर्थविद्वेषकर्मभिः शांतिकादिभिः ॥ पालयंति महीं यस्मान्महीपालास्ततः स्मृताः ॥ ५६ ॥ पतिता ये कणा भूमौ संहरंति कपोतवत् ॥ उद्धृत्याजीवनं येषां कपोतास्ते तु साधकाः ॥ ५७ ॥ गृहं कृत्वा तु सं[2]द्ग्रंथाः सहसैव त्यजंति ये[3] ॥ कुटिकाः साधकास्ते वै शिवाराधनतत्पराः ॥ ५८ ॥ तीर्थासक्ताः सपत्नीका यथालब्धोपजीविनः ॥ महासाहसयुक्तास्ते वैतालाख्यास्तु साधकाः ॥ ५९ ॥ संयताः कामनासक्ता राज्यकामार्थसाधकाः ॥ पद्मास्ते साधकाः ख्याता भिक्षाचर्यारताः सदा ॥ ६० ॥ ज्ञानयोगसमायुक्ता द्वैताचाररताश्च ये ॥ हंसास्ते साधकाः ख्याताः स्वयमुत्पन्नसंविदः ॥ ६१ ॥ ब्रह्मचर्येण सत्त्वेन तथाऽलुब्धतयापि वा ॥ जितं जगद्धारयन्तो धृतराष्ट्रा मतास्तु ये ॥ ६२ ॥ [4]गूढाश्चरंति ये ज्ञानं व्रतं धर्ममथापि वा ॥ स्वार्थैकागतनिष्ठास्तु बकास्ते साधका मताः॥ ॥ ६३ ॥ जलाश्रयं समाश्रित्य स्थिता उत्कृष्टसिद्धये ॥ बिसशृंगाटकाहारास्ते कंकाः साधकाः स्मृताः ॥ ६४ ॥ गोभिः सार्द्धं व्रजंत्यत्र गोष्ठे च निवसंति ये ॥ पंचगव्यरसा ये वै गोपालास्ते तु साधकाः ॥ ६५ ॥ कृच्छ्रचांद्रायणैश्चैव क्षपयंति स्वकं वपुः ॥ त्रुटिमात्राशनास्ते तु त्रुटिकाः साधका मताः ॥ ६६ ॥ कृत्वा कुशमयीं पत्नीं मठे ये गृहमेधिनः ॥ भैक्षवृत्तिरताः शुद्धा मठरास्ते तु साधकाः ॥ ६७ ॥ ग्रासमात्रसमानाभिर्गुटिकाभिरथाष्टभिः ॥ कन्दमूलफलोत्थाभिर्गुटिकास्ते द्विजातयः ॥ ६८ ॥ स्वदेहदण्डनैर्युक्ता रात्रौ वीरासने स्थिताः ॥ दंडिनस्ते समाख्याताः सर्व

१ भटाः—इ०पा० । २ ये तु गृहं कृत्वा निवसंति ते सद्ग्रन्थाः—इति योजना बोद्धव्या । ३ ये साधकाः गृह सहसैव त्यजंति ते साधकाः—कुटिकाः—कुटिकसंज्ञकाः—कुटीमात्रनिवासप्रियत्वात् । ४ भटाः—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



मेतत्तवोदितम् ॥ ६९ ॥ सामान्योऽपि विशेषश्च वृत्तिनो गृहिणोऽपि वा ॥ तेषां भेदो मया ख्याताः सम्यक्क्षेत्रनिवासिनाम् ॥ ७० ॥ एवमादिधर्मयुक्ताः प्रभासक्षेत्रवासिनः ॥ तैः पूज्यो भगवान्देवो बालरूपी पितामहः ॥ ७१ ॥ महापातकिनो ये तु ये तु विप्रैर्बहिष्कृताः ॥ न च ते संस्पृशेयुर्वै ब्रह्माणं बालरूपिणम् ॥ ७२ ॥ ब्रह्मचारी सदा दांतो जितक्रोधो जितेंद्रियः ॥ एवं ते ब्राह्मणाः ख्याताः क्षेत्रमध्यनिवासिनः ॥ ७३ ॥ तैः पूज्यो भगवान्देवो बालरूपी पितामहः ॥ ये वेदाध्ययने युक्तास्तैः प्रपूज्यः पितामहः ॥ ॥ ७४ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये मध्ययात्रायां ब्राह्मणप्रशंसावर्णनंनाम षडुत्तरशततमोऽध्यायः ॥ १०६ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ अथ पूजाविधानं ते कथयामि समासतः ॥ भक्तिभेदान्पृथक्तस्य ब्रह्मणो बालरूपिणः ॥ १ ॥ [1]रथयात्राविधानं तु स्तोत्रमंत्रविधिक्रमम् ॥ त्रिविधा भक्तिरुद्दिष्टा मनोवाक्कायसंभवा ॥ ॥ २ ॥ लौकिकी वैदिकी चापि भवेदाध्यात्मिकी तथा ॥ ध्यानधारणया या तु वेदानां स्मरणेन च ॥ ब्रह्मप्रीतिकरी चैषा मानसी भक्तिरुच्यते ॥ ३ ॥ मंत्रवेदनमस्कारैरग्निश्राद्धविधानकैः ॥ जाप्यैश्चा[2]रण्यकैश्चैव वाचिकी भक्तिरुच्यते ॥ ४ ॥ व्रतोपवासनियमैश्चितेंद्रियनिरोधिभिः ॥ कृच्छ्रसांतपनैश्चान्यैस्तथा चांद्रायणादिभिः ॥ ५ ॥ ब्रह्मोक्तैश्चोपवासैश्च तथान्यैश्च शुभव्रतैः ॥ कायिकी भक्तिराख्याता त्रिविधा तु द्विजन्मनाम् ॥ ६ ॥ गोघृतक्षीरदधिभिर्मध्विक्षुसुकुशोदकैः ॥ गंधमाल्यैश्च विविधैर्वस्तुभिश्चोपपादिभिः ॥ ७ ॥ घृतगुग्गुलधूपैश्च कृष्णागुरुसुगंधिभिः ॥ भूषणै र्हेमरत्नाद्यैश्चित्राभिः स्रग्भिरेव च ॥ ८ ॥ न्यासैः परिसरैः स्तोत्रैः पताकाभिस्तथोत्सवैः ॥ नृत्यवादित्रगीतैश्च सर्ववस्तूपहारकैः ॥ ९ ॥ भक्ष्यभोज्यान्नपानैश्च या पूजा क्रियते नरैः ॥ पितामहं समुद्दिश्य सा भक्तिर्लौकिकी मता ॥ १० ॥ वेदमंत्रहविर्भागैः क्रिया या वैदिकी स्मृता ॥ ११ ॥ दर्शे च पौर्णमास्यां च कर्त्तव्यं चाग्निहोत्रजम् ॥ प्राशनं दक्षिणादानं पुरोडाश इति क्रिया ॥ १२ ॥ इष्टिर्धृतिः सोमपानं याज्ञियं कर्म सर्वशः ॥ ऋग्यजुःसामजाप्यानि संहिताध्ययनानि च ॥ क्रियंते ब्रह्माणमुद्दिश्य सा भक्तिर्वैदिकोच्यते ॥ १३ ॥ प्राणायामपरो नित्यं ध्यानवान्विजितेंद्रियः ॥ भैक्ष्यभक्षी व्रती चापि सर्वप्रत्याहृतेंद्रियः ॥ १४ ॥ धारणं हृदये कृत्वा ध्यायमानः प्रजेश्वरम् ॥ हृत्पद्मकर्णिकासीनं रक्तवर्णं सुलोचनम् ॥१५॥ पश्यन्नुद्द्योतितमुखं ब्रह्माणं सुकटीतटम् ॥ रक्तवर्णं चतुर्बाहुं वरदाभयहस्तकम् ॥ एवं यश्चिंतयेद्देवं ब्रह्मभक्तः स उच्यते ॥ १६ ॥ विधिं च शृणु मे

१ अथ यात्राविधानं च–इ० पा० । २ जाप्यैश्च धारणैश्चैव–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवि यः स्मृतः क्षेत्रवासिनाम् ॥ १७ ॥ निर्ममा निरहंकारा निःसंगा निष्परिग्रहाः ॥ चतुर्वर्गेपि निःस्नेहाः समलोष्ठाश्मकांचनाः ॥१८॥ भूतानां कर्मभिर्नित्यं त्रिविधैरभयप्रदाः ॥ प्राणायामपरा नित्यं परध्यानपरायणाः ॥ १९ ॥ जापिनः शुचयो नित्यं यतिधर्मक्रियापराः ॥ सांख्ययोगविधिज्ञा ये धर्मविच्छिन्नसंशयाः ॥ २० ॥ ब्रह्मपूजारता नित्यं ते विप्राः क्षेत्रवासिनः ॥ तैर्यथा पूजनीयो वै बालरूपी पितामहः ॥ २१ ॥ तथाहं कीर्त्तयिष्यामि शृणुष्वैकमनाः प्रिये ॥ स्नात्वा तु विमले तीर्थे शुक्लांबरधरः शुचिः ॥ पूजोपहारसंयुक्तस्ततो ब्रह्माणमर्चयेत् ॥ २२ ॥ पूर्वं संस्नाप्य विधिना पंचामृतरसोदकैः ॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ॥ २३ ॥ गायत्र्या गृह्य गोमूत्रं गंधद्वारेति गोमयम् ॥ आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि ॥ २४ ॥ तेजोऽसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकम् ॥ आपोहिष्ठेति मंत्रेण पंचगव्येन स्नापयेत् ॥ २५ ॥ कपिलापंचगव्येन कुशवारियुतेन च ॥ स्नापयेन्मंत्रपूतेन ब्रह्मस्नानं हि तत्स्मृतम् ॥ २६ ॥ वर्षकोटिसहस्रैस्तु यत्पापं समुपार्जितम् ॥ सुरज्येष्ठं तु संस्नाप्य दहेत्सर्वं न संशयः ॥ २७ ॥ एवं संस्नाप्य विधिना ब्रह्माणं बालरूपिणम् ॥ कर्पूरागरुतोयेन ततः संस्नापयेद्द्विजः ॥ २८ ॥ एवं कृत्वार्च्चयेद्देवं गायत्रीन्यासयोगतः ॥ मूर्ध्नः पादतलं यावत्प्रणवं विन्यसेद्बुधः ॥ २९ ॥ तकारं विन्यसेन्मूर्ध्नि सकारं मुखमण्डले ॥ विकारं कंठदेशे तु तुकारं चांगसंधिषु ॥ ३० ॥ वकारं हृदि मध्ये तु रेकारं पार्श्वयोर्द्वयोः ॥ णिकारं दक्षिणे कुक्षौ यकारं वामसंज्ञिते ॥ ३१ ॥ भकारं कटिनाभिस्थं गोकारं पार्श्वयोर्द्वयोः[1] ॥ देकारं जानुनोर्न्यस्य वकारं पादपद्मयोः ॥ ३२ ॥ स्यकारमंगुष्ठयोर्न्यस्य धीकारमुरसि न्यसेत् ॥ मकारं जानुमूले तु हिकारं गुह्यमाश्रितम् ॥ ३३ ॥ धिकारं हृदये न्यस्य योकारं चाधरोष्ठके ॥ योकारं च तथैवान्यमुत्तरोष्ठे न्यसेत्सुधीः ॥ ३४ ॥ नकारं नासिकाग्रे तु प्रकारं नेत्रमाश्रितम् ॥ चोकारं च भ्रुवोर्मध्ये दकारं प्राणमाश्रितम् ॥ ३५ ॥ यात्कारं च ललाटांते विन्यसेद्वै सुरेश्वरि ॥ न्यासं कृत्वाऽऽत्मनो देहे देवे कुर्यात्तथा प्रिये ॥ ३६ ॥ सर्वोपहारसंपन्नं कृत्वा सम्यङ्निरीक्षयेत् ॥ कुंकुमागरुकर्पूरचंदनेन विमिश्रितम् ॥ ३७ ॥ गंधतोयैरुपस्कृत्य गायत्र्या प्रणवेन च ॥ प्रोक्षयेत्सर्वद्रव्याणि पश्चादर्चनमारभेत् ॥ ३८ ॥ दिव्यैः पुष्पैः सुगंधैश्च मालतीकमलादिभिः ॥ अशोकैः शतपत्रैश्च बकुलैः पूजयेत्क्रमात् ॥ ३९ ॥ कृष्णागरुसुधूपेन घृतदीपैस्तथोत्तमैः ॥ ततः प्रदापयेत्तत्र नैवेद्यं विविधं क्रमात् ॥ ४० ॥

१ गोकारं जंघयोर्द्वयोः—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



खण्डलड्डुकश्रीवेष्टकांसाराशोकपल्लवैः ॥ स्वस्तिकोल्लिपिकादुग्धातिलवेष्टकिलाटिकाम् ॥ ४१ ॥ फलानि चैव पक्कानि मूलमंत्रेण दापयेत् ॥ ऋग्वेदं च यजुर्वेदं सामवेदं च पूजयेत् ॥ ४२ ॥ ज्ञानं वैराग्यमैश्वर्यं धर्मं संपूजयेद्बुधः ॥ ईशानादिक्रमादेवि दिशासु विदिशासु च ॥ ॥ ४३ ॥ चतुर्दशविद्यास्थानानि ब्रह्मणोऽग्रे प्रपूजयेत् ॥ हृदयानि ततो न्यस्य देवस्य पुरतः क्रमात् ॥ ४४ ॥ आपोहिष्ठेति ऋगियं हृदयं परिकीर्त्तितम् ॥ ऋतं सत्यं शिखा प्रोक्ता उदुत्यं नेत्रमादिशेत् ॥ ४५ ॥ चित्रं देवानामित्येवं सर्वलोकेषु विश्रुतम् ॥ ब्रह्मंस्ते छादयामीति कवचं समुदाहृतम् ॥ ४६ ॥ भूर्भुवः स्वरितीरेश पूजनं परिकीर्त्तितम् ॥ गायत्र्या पूजयेद्देवमोंकारेणाभिमंत्रितम् ॥ ४७ ॥ प्रणवेनापरान्सर्वानृग्वेदादीन्प्रपूजयेत् ॥ गायत्री परमो मंत्रो वेदमाता विभावरी ॥ ४८ ॥ गायत्र्यक्षरतत्त्वैस्तु ब्रह्माणं यस्तु पूजयेत् ॥ उपोष्य पंचदश्यां तु स याति परमं पदम् ॥ ४९ ॥ संसारसागरं घोरमुत्तितीर्षुर्द्विजो यदि ॥ प्रभासे कार्त्तिके मासि ब्रह्माणं पूजयेत्सदा ॥ ५० ॥ यस्य दर्शनमात्रेण अश्वमेधफलं लभेत् ॥ कस्तं न पूजयेद्विद्वान्प्रभासे बालरूपिणम् ॥ ५१ ॥ यस्यैकदिवसप्रांते सदेवासुरमानवाः ॥ विलयं यांति देवेशि कस्तं न प्रतिपूजयेत् ॥ ५२ ॥ पिता यः सर्वदेवानां भूतानां च पितामहः ॥ यस्मादेष स तैः पूज्यो ब्राह्मणैः क्षेत्रवासिभिः ॥ ५३ ॥ रुद्ररूपी विश्वरूपी स एव भुवनेश्वरः ॥ पौर्णमास्यामुपोषित्वा ब्रह्माणं जगतां पतिम् ॥ अर्चयेद्यो विधानेन सोऽश्वमेधफलं लभेत् ॥ ५४ ॥ कार्त्तिके मासि देवस्य रथयात्रा प्रकीर्त्तिता ॥ यां कृत्वा मानवो भक्त्या याति ब्रह्मसलोकताम् ॥ ५५ ॥ कार्त्तिके मासि देवेशि पौर्णमास्यां चतुर्मुखम् ॥ मार्गेण चर्मणा सार्द्धं सावित्र्या च परंतपः ॥ ५६ ॥ भ्रामयेन्नगरं सर्वं नानावाद्यैः समन्वितम् ॥ स्थापयेद्भ्रामयित्वा तु सकलं नगरं नृपः ॥ ५७ ॥ ब्राह्मणान्भोजयित्वाग्रे शांडिलेयं प्रपूज्य च ॥ आरोपयेद्रथे देवं पुण्यवादित्रनिःस्वनैः ॥ ५८ ॥ रथाग्रे शांडिलीपुत्रं पूजयित्वा विधानतः ॥ ब्राह्मणान्वाचयित्वा च कृत्वा पुण्याहमंगलम् ॥ ५९ ॥ देवमारोपयित्वा तु रथे कुर्यात्प्रजागरम् ॥ नानाविधैः प्रेक्षणकैर्ब्रह्मघोषैश्च पुष्कलैः ॥ ६० ॥ नारोढव्यं रथे देवि शूद्रेण शुभमिच्छता ॥ नाधर्मेण विशेषेण मुक्त्वैकं भोजकं प्रिये ॥ ६१ ॥ ब्रह्मणो दक्षिणे पार्श्वे सावित्रीं स्थापयेत्प्रिये ॥ भोजकं वामपार्श्वे तु पुरतः पंकजं न्यसेत् ॥ ६२ ॥ एवं तूर्यनिनादैश्च शंखशब्दैश्च पुष्कलैः ॥ भ्रामयित्वा रथं देवि पुरं सर्वं च दक्षिणम् ॥ स्वस्थाने स्थापयेद्भूयः कृत्वा



१ स्वस्तिका–तण्डुलचूर्णनिर्मितत्रिकोणाकाराधिवासद्रव्यम् "शंकरपाळी" इति महाराष्ट्रभाषायाम्,पिष्टकविकारश्च, सितावरशाकः–इति राजनिर्घण्टुः, रतालिकेति विश्वः॥ २ उल्लिपिका–पक्वान्नविशेषः।३ दुग्धा–शाकविशेषः।४ तिलवेष्टः–तिलनिर्मितपदार्थविशेषः।५ किलाटिका–पक्वान्नविशेषः।६ चतुर्दशविद्यास्थानान्युक्तानि यथा विष्णुपुराणे-"अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः॥ धर्मशास्त्रं पुराणंच विद्या ह्येताश्चतुर्दश॥"इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नीराजनं बुधः ॥ ६३ ॥ य एवं कुरुते यात्रां भक्त्या यश्चापि पश्यति ॥ रथं वाऽऽकर्षयेद्यस्तु स गच्छेद्ब्रह्मणः पदम् ॥ ६४ ॥ यो दीपं धारयेत्तत्र ब्रह्मणो रथपृष्ठगः ॥ पदेपदेऽश्वमेधस्य स फलं विंदते महत् ॥ ६५ ॥ यो न कारयते राजा रथयात्रां तु ब्रह्मणः ॥ स पच्यते महादेवि रौरवे कालमक्षयम् ॥ ६६ ॥ तस्मात्सर्वप्रयत्नेन राष्ट्रस्य क्षेममिच्छता ॥ रथयात्रां विशेषेण स्वयं राजा प्रवर्त्तयेत् ॥ ६७ ॥ प्रतिपद्ब्राह्मणांश्चापि भोजयेद्विधिवत्सुधीः ॥ वासोभिरहतैश्चापि गन्धमाल्यानुलेपनैः ॥ ६८ ॥ कार्त्तिके मास्यमावास्यां यस्तु दीपप्रदीपनम् ॥ शालायां ब्रह्मणः कुर्यात्स गच्छेत्परमं पदम् ॥ ६९ ॥ उत्सवेषु च सर्वेषु सर्वकाले विशेषतः ॥ पूजयेयुरिमं विप्रा ब्रह्माणं जगतां गुरुम् ॥ ७० ॥ यथाकृत्यप्रयोगेण सम्यक्छ्रद्धासमन्विताः ॥ पूज्यो दिव्योपचारेण यथावित्तानुसारतः ॥ ७१ ॥ एवं ते कथितं देवि पूजामाहात्म्यमुत्तमम् ॥ प्रभासक्षेत्रमाहात्म्यं ब्रह्मणो बालरूपिणः ॥ ७२ ॥ तस्याहं कथयिष्यामि नाम्नामष्टोत्तरं शतम् ॥ प्रदत्त्वा च पठित्वा च यज्ञायुतफलं लभेत् ॥ ७३ ॥ गायत्र्या लक्षजाप्येन सम्यग्जप्तेन यत्फलम् ॥ तत्फलं समवाप्नोति स्तोत्रस्यास्य उदीरणात् ॥ ७४ ॥ इदं स्तोत्रवरं दिव्यं रहस्यं पापनाशनम् ॥ न देयं दुष्टबुद्धीनां निन्दकानां तथैव च ॥ ७५ ॥ ब्राह्मणाय प्रदातव्यं श्रोत्रियाय महात्मने ॥ विष्णुना हि पुरा पृष्टं ब्रह्मणः स्तोत्रमुत्तमम् ॥ ७६ ॥ केषुकेषु च स्थानेषु देवदेव पितामह ॥ संचिन्त्यस्तन्ममाचक्ष्व त्वं हि सर्वविदुत्तम ॥ ७७ ॥ ॥ ब्रह्मोवाच ॥ ॥ पुष्करेऽहं सुरश्रेष्ठो गयायां प्रपितामहः ॥ कान्यकुब्जे वेदगर्भो भृगुक्षेत्रे चतुर्मुखः ॥ ७८ ॥ कौबेर्यां सृष्टिकर्ता च नन्दिपुर्यां बृहस्पतिः ॥ प्रभासे बालरूपी च वाराणस्यां सुरप्रियः ॥७९॥ द्वारावत्यां चक्रदेवो वैदिशे भुवनाधिपः ॥ पौंड्रके पुण्डरीकाक्षः पीताक्षो हस्तिनापुरे ॥ ८० ॥ जयंत्यां विजयश्चासौ जयन्तः पुरुषोत्तमे ॥ वाडेषु पद्महस्तोऽहं तमोलिप्ते तमोनुदः ॥ ८१ ॥ आहिच्छत्र्यां जनानंदः काञ्चीपुर्यां जनप्रियः ॥ कर्णाटस्य पुरे ब्रह्मा ऋषिकुण्डे मुनिस्तथा ॥ ८२ ॥ श्रीकण्ठे श्रीनिवासश्च कामरूपे शुभंकरः ॥ उच्छ्रियाणे देवकर्त्ता स्रष्टा जालंधरे तथा ॥ ८३ ॥ मल्लिकाख्ये तथा विष्णुर्महेन्द्रे भार्गवस्तथा ॥ गोनर्दः स्थविराकारे ह्युज्जयिन्यां पितामहः ॥ ८४ ॥ कौशांब्यां तु महादेवो ह्ययोध्यायां तु राघवः ॥ विरंचिश्चित्रकूटे तु वाराहो विन्ध्यपर्वते ॥ ८५ ॥ गंगाद्वारे सुरश्रेष्ठो हिमवन्ते तु शंकरः ॥ देहिकायां स्रुचाहस्तः पद्महस्तस्तथाऽर्बुदे ॥ ८६ ॥ वृन्दावने पद्मनेत्रः कुशहस्तश्च नैमिषे ॥ गोपक्षेत्रे च गोविन्दः सुरेन्द्रो यमुनातटे ॥ ८७ ॥ भागीरथ्यां पद्मतनुर्जनानन्दो जनस्थले ॥ कौंकणे च स मध्वक्षः काम्पिल्ये कनकप्रभः ॥ ८८ ॥ खेटके चान्नदाता च शंभुश्चैव क्रतुस्थले ॥ लंकायां चैव पौलस्त्यः काश्मीरे हंसवाहनः ॥ ८९ ॥ वसिष्ठश्चार्बुदे चैव नारद

१ प्रतिपत्--प्रतिपदि--इत्यर्थः । आर्षत्वेन—छांदसत्वात्--"सुपां सुलुक्सतम्याः" इत्यादिना सतमीविभक्तेर्लुक् । २ पतिम्--इ० पा० । ३ उड्डियाने—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





श्रोत्पलावने ॥ मेधके श्रुतिदाता च प्रयागे यजुषां पतिः ॥ ९० ॥ शिवलिंगे सामवेदो मर्कटे च मधुप्रियः ॥ नारायणश्च गोमन्ते विदर्भायां द्विज
प्रियः ॥ ९१ ॥ अंकुलके ब्रह्मगर्भो ब्रह्मवाहे सुतप्रियः ॥ इन्द्रप्रस्थे दुराधर्षश्चंपायां सुरमर्दनः ॥ ९२ ॥ विरजायां महारूपः सुरूपो राष्ट्रवर्धने ॥
कदंबके जनाध्यक्षो देवाध्यक्षः समस्थले ॥ ९३ ॥ गंगाधरो रुद्रपीठे सुपीठे जलदः स्मृतः ॥ त्र्यंबके त्रिपुरारिश्च श्रीशैले च त्रिलोचनः ॥ ९४ ॥
महादेवः प्लक्षपुरे कपाले वेधनाशनः ॥ शृङ्गवेरपुरे शौरिर्निमिषे चक्रधारकः ॥ ९५ ॥ नन्दिपुर्यां विरूपाक्षो गौतमः प्लक्षपादपे ॥ माल्यवान्हस्ति
नाथे तु द्विजेन्द्रो वाचिके तथा ॥ ९६ ॥ इन्द्रपुर्यां दिवानाथो भूतिकायां पुरंदरः ॥ हंसबाहुश्च चन्द्रायां चंपायां गरुडप्रियः ॥ ९७ ॥
महोदये महायक्षः सुयज्ञः पूतके वने ॥ सिद्धेश्वरे शुक्लवर्णो विभायां पद्मबोधकः ॥ ९८ ॥ देवदारुवने लिंगी उदकेथ उमापतिः ॥ विनायको
मातृस्थाने अलकायां धनाधिपः ॥ ९९ ॥ त्रिकूटे चैव गोविंदः पाताले वासुकिस्तथा ॥ कोविदारे युगाध्यक्षः स्त्रीराज्ये च सुरप्रियः ॥ १०० ॥
पूर्णगिर्यां सुभोगश्च शाल्मल्यां तक्षकस्तथा ॥ अमरे पापहा चैव अंबिकायां सुदर्शनः ॥ १०१ ॥ नरवाप्यां महावीरः कान्तारे दुर्गनाशनः ॥
पद्मवत्यां पद्मगृहो गगने मृगलाञ्छनः ॥ १०२ ॥ अष्टोत्तरं नामशतं यत्रैतत्परिपठ्यते ॥ तत्रैव मम सांनिध्यं त्रिसंध्यं मधुसूदन ॥ १०३ ॥
एतेषामपि यस्त्वेकं पश्येद्वै बालरूपिणम् ॥ सर्वेषां लभते पुण्यं पूर्वोक्तानां च वेधसाम् ॥१०४॥ एतैर्यो नामभिः कृष्ण प्रभासे स्तौति मां सदा ॥
स्थानं मे विजयं लब्ध्वा मोदते शाश्वतीः समाः ॥ १०५ ॥ मानसं वाचिकं चैव कायिकं चैव दुष्कृतम् ॥ तत्सर्वं नाशमायाति मम स्तोत्राऽनु
कीर्तनात् ॥ १०६ ॥ पुष्पोपहारैर्धूपैश्च ब्राह्मणानां च तर्पणैः ॥ ध्यानेन च स्थिरेणाशु प्राप्यते यत्फलं नरैः ॥ तत्फलं समवाप्नोति मम स्तोत्रानु
कीर्तनात् ॥ १०७ ॥ ब्रह्महत्यादिपापानि इह लोके कृतान्यपि ॥ अकामतः कामतो वा तानि नश्यंति तत्क्षणात् ॥ १०८ ॥ इदं स्तोत्रं ममाभीष्टं
शृणुयाद्वा पठेच्च वा ॥ स मुक्तः पातकैः सर्वैः प्राप्नुयान्महदीप्सितम् ॥ १०९ ॥ अन्यद्रहस्यं ते वच्मि शृणु कृष्ण यथार्थतः ॥ ११० ॥ आग्नेयं तु
यदा ऋक्षं कार्तिक्यां भवति क्वचित् ॥ महती सा तिथिर्ज्ञेया प्रभासे मम वल्लभा ॥ १११ ॥ प्राजापत्यं यदा ऋक्षं तिथौ तस्यां भवेद्यदि ॥ सा
महाकार्तिकी पुण्या देवानामपि दुर्लभा ॥ ११२ ॥ मंदे वार्के गुरौ वाऽपि कार्तिकी कृत्तिकायुता ॥ तत्राश्वमेधिकं पुण्यं दृष्ट्वा वै बालरूपिणम् ॥ 
॥ ११३ ॥ विशाखासु यदा सूर्यः कृत्तिकासु च चन्द्रमाः ॥ स योगः पद्मकोनाम प्रभासे दुर्लभो हरे ॥ ११४ ॥ तस्मिन्योगे नरो दृष्ट्वा प्रभासे
बालरूपिणम् ॥ पापकोटियुतो वाऽपि यमलोकं न पश्यति ॥ ११५ ॥ ॥ ईश्वर उवाच ॥ ॥ इत्येवं कथितं स्तोत्रं ब्रह्मणा हरये पुनः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मया तव समाख्यातं माहात्म्यं ब्रह्मदैवतम् ॥ ११६ ॥ सर्वपापहरं नृणां श्रुतं सर्वार्थसाधकम् ॥ भूमिदानं च दातव्यं तत्र यात्राफलेप्सुभिः ॥
॥ ११७ ॥ कमंडलुः श्वेतवस्त्रं महादानानि षोडश ॥ तत्रैव देवि देयानि ब्रह्मणे बालरूपिणे ॥११८॥ महापर्वणि संप्राप्ते कुर्युः पारायणं द्विजाः ॥
सर्वे ते ब्राह्मणा देवि क्षेत्रमध्यनिवासिनः ॥ ११९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभास
क्षेत्रमाहात्म्ये बालरूपिब्रह्मणो माहात्म्यवर्णनंनाम सप्तोत्तरशततमोऽध्यायः ॥ १०७ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि वसूनां
लिंगमुत्तमम् ॥ सोमेशादीशदिग्भागे पञ्चाशद्धनुषान्तरे ॥ १ ॥ स्थितं लिंगं महादेवि चतुर्वक्त्रं सुरप्रियम् ॥ प्रत्यूषेश्वरनामानं महापातकनाशनम् ॥
॥ २ ॥ दर्शनात्तस्य देवस्य सप्तजन्मान्तरोद्भवम् ॥ पापं प्रणाशमायाति सत्यंसत्यं वरानने ॥ ३ ॥ ॥ देव्युवाच ॥ ॥ कोऽसौ प्रत्यूषनामेति
कथं लिंगं प्रतिष्ठितम् ॥ कस्य पुत्रः स विख्यात एतन्मे वद शंकर ॥ ४ ॥ ॥ ईश्वर उवाच ॥ ॥ दक्षो ब्रह्मसुतो देवि प्रजापतिरिति स्मृतः ॥
तस्य कन्याः पुरा षष्टिर्ददौ धर्माय वै दश ॥ ५ ॥ तासां मध्ये महादेवि एका विश्वेति विश्रुता ॥ सा धर्माच्च महादेवि अष्टावजनयत्सुतान् ॥ ६ ॥
आपो ध्रुवश्च सोमश्च धरश्चैवाऽनलोऽनिलः ॥ प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः ॥ ७ ॥ तेषां मध्ये सप्तमोऽसौ प्रत्यूष इति विश्रुतः ॥
स पुत्रकामो देवेशि प्रभासं क्षेत्रमागतः ॥ ८ ॥ स ज्ञात्वा कामिकं क्षेत्रं प्रतिष्ठाप्य महेश्वरम् ॥ तपश्चचार विपुलं दिव्यं वर्षशतं प्रिये ॥ ध्यायन्देवं
महादेवं शान्तस्तद्गतमानसः ॥ ९ ॥ ततस्तुष्टो महादेवस्तस्य भक्त्या निरञ्जनः ॥ ददौ तस्य सुतं देवि देवलं योगिनां वरम् ॥ १० ॥ ततः प्रभृति
देवेशि तल्लिंगस्य प्रभावतः ॥ देवलो भगवान्योगी प्रत्यूषस्याऽभवत्सुतः ॥ ११ ॥ अनेन कारणेनासौ प्रत्यूषेश्वरसंज्ञितः ॥ १२ ॥ यश्चानपत्यः
पुरुषस्तं समाराधयिष्यति ॥ तस्यान्ववाये देवेशि संततिर्न विनश्यति ॥ १३ ॥ यः प्रत्यूषे महादेवि प्रत्यूषेश्वरमुत्तमम् ॥ पूजयिष्यति सद्भक्त्या
सततं नियतात्मवान् ॥ तस्यैष्यति क्षयं पापमपि ब्रह्मवधोद्भवम् ॥ १४ ॥ वृषस्तत्रैव दातव्यः सम्यग्यात्राफलेप्सुभिः ॥ १५ ॥ माघे कृष्णचतु
र्दश्यां जागृयात्तत्र वै निशि ॥ सर्वेषां दानयज्ञानां फलं जागरणाल्लभेत् ॥ १६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां
सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये प्रत्यूषेश्वरमाहात्म्यवर्णनंनामाष्टोत्तरशततमोऽध्यायः ॥ १०८ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥
ततो गच्छेन्महादेवि अनिलेश्वरमुत्तमम् ॥ तस्योत्तरेशानदिक्स्थं धनुषां त्रितये प्रिये ॥ १ ॥ लिंगं महाप्रभावं हि दर्शनात्पापनाशनम् ॥ वसूनां
पञ्चमो योऽसावनिलः परिकीर्तितः ॥ २ ॥ स चाऽऽराध्य महादेवं प्रत्यक्षीकृतवान्भवम् ॥ लिंगं प्रतिष्ठयामास सम्यक्छ्रद्धासमन्वितः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



एवमीशप्रभावेन सुतस्तस्याऽप्यभूद्बली ॥ मनोजवेति विख्यातो ह्यविज्ञातगतिस्तथा ॥ ४ ॥ तं दृष्ट्वा व्याधिना मर्त्यो पीड्यते न कदाचन ॥ नान्धो न बधिरो मूको न रोगी न च निर्धनः ॥ कदाचिज्जायते मर्त्यस्तेन दृष्टेन भूतले ॥ ५ ॥ पुष्पमेकं तु यो दद्यात्तस्य लिंगस्य चोपरि ॥ सुखसौभाग्यसंपन्नः स सदा रूपवान्भवेत् ॥ ६ ॥ इत्येवं कथितं देवि माहात्म्यं पापनाशनम् ॥ श्रुत्वाऽनुमोद्य भावेन सर्वकामैः समृद्ध्यते ॥ ७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्येऽनिलेश्वरमाहात्म्यवर्णनंनाम नवोत्तरशततमोऽध्यायः ॥१०९॥ ॥छ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेद्वरारोहे प्रभासेश्वरमुत्तमम् ॥ गौरीतपोवनाद्देवि पश्चिमे समुदाहृतम् ॥१॥ धनुषां सप्तके देवि नातिदूरे व्यवस्थितम् ॥ स्थापितं तन्महालिंगं वसूनामष्टमेन हि ॥ २ ॥ प्रभासइतिनाम्ना हि शिवपूजारतेन वै ॥ स पुत्रकामो देवेशि प्रभासक्षेत्रमागतः ॥३॥ प्रतिष्ठाप्य महालिङ्गं चचार विपुलं तपः ॥ आग्नेयमिति विख्यातं दिव्याब्दानां शतं प्रिये ॥ ४ ॥ ततस्तस्य महादेवि सम्यक्छ्रद्धान्वितस्य वै ॥ तुतोष भगवान्रुद्रो ददौ यन्मनसीप्सितम् ॥५॥ बृहस्पतेस्तु भगिनी भुवना ब्रह्मवादिनी ॥ प्रभासस्य तु सा भार्या वसूनामष्टमस्य च ॥ ॥६॥ विश्वकर्मा सुतस्तस्याः सृष्टिकर्ता प्रजापतिः॥ देवानां तक्षको विद्वान्मनोर्मातामहः स्मृतः ॥७॥ तक्षकः सूर्यबिंबस्य तेजसः शातनो महान् ॥ एवं तस्याऽभवत्पुत्रो वसूनामष्टमस्य वै ॥ ८ ॥ प्रभासनाम्नो देवेशि तल्लिंगाराधनोद्यतः ॥ इति ते कथितं देवि प्रभासेश्वरसूचकम् ॥ ९ ॥ माहात्म्यं सर्वपापघ्नं सर्वकामप्रदं शुभम् ॥ यस्तं पूजयते भक्त्या सम्यक्छ्रद्धासमन्वितः ॥ १० ॥ भूमिशायी निराहारो जपन्वै शतरुद्रियम् ॥ माघे मासि चतुर्दश्यां स्नात्वा सागरसंगमे ॥ ११ ॥ पंचामृतेन संस्नाप्य पूजयित्वा विधानतः ॥ १२ ॥ य एवं कुरुते देवि सम्यग्यात्रामहोत्सवम् ॥ स मुक्तः पातकैः सर्वैः सर्वकामैः समृद्ध्यते ॥ वृषस्तत्रैव दातव्यः सम्यग्यात्राफलेप्सुभिः ॥ १३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये प्रभासेश्वरमाहात्म्यवर्णनंनाम दशोत्तरशततमोऽध्यायः ॥ ११० ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि पुष्करारण्यमुत्तमम् ॥ तस्मादीशानकोणस्थं धनुषां षष्टिभिः स्थितम् ॥ १ ॥ तत्र कुण्डं महादेवि ह्यष्टपुष्करसंज्ञितम् ॥ सर्वपापहरं देवि दुष्प्राप्यमकृतात्मभिः ॥ २ ॥ तत्र कुण्डसमीपे तु पुरा रामेशधीमता ॥ स्थापितं तन्महालिङ्गं रामेश्वरइतिस्मृतम् ॥ ३ ॥ तस्य पूजनमात्रेण मुच्यते ब्रह्महत्यया ॥ ४ ॥ ॥ श्रीदेव्युवाच ॥ ॥ भगवन्विस्तराद्ब्रूहि रामेश्वरसमुद्भवम् ॥ कथं तत्रागमद्रामः ससीतश्च सलक्ष्मणः ॥ ५ ॥ कथं प्रतिष्ठितं लिङ्गं पुष्करे पापतस्करे ॥ एतद्विस्तरतो ब्रूहि फलं माहात्म्यसंयुतम् ॥ ६ ॥ ॥ ईश्वर उवाच ॥ ॥ चतुर्विंशयुगे



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रामो वसिष्ठेन पुरोधसा ॥ पुरा रावणनाशार्थं जज्ञे दशरथात्मजः ॥ ७ ॥ ततः कालान्तरे देवि ऋषिशापान्महातपाः ॥ ययौ दाशरथी रामः ससीतः सहलक्ष्मणः ॥ ८ ॥ वनवासाय निष्क्रांतो दिव्यैर्ब्रह्मर्षिभिर्वृतः ॥ ततो यात्राप्रसंगेन प्रभासं क्षेत्रमागतः ॥ ९ ॥ तं देशं तु समासाद्य सुश्रांतो निषसाद ह ॥ अस्तं गते ततः सूर्ये पर्णान्यास्तीर्य भूतले ॥ १० ॥ सुष्वापाथ निशाशेषे ददृशे पितरं स्वकम् ॥ स्वप्ने दशरथं देवि सौम्यरूपं महाप्रभम् ॥ ११ ॥ प्रातरुत्थाय तत्सर्वं ब्राह्मणेभ्यो न्यवेदयत् ॥ यथा दशरथः स्वप्ने दृष्टस्तेन महात्मना ॥ १२ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ वृद्धिकामाश्च पितरो वरदास्तव राघव ॥ दर्शनं हि प्रयच्छंति स्वप्नान्ते हि स्ववंशजे ॥ १३ ॥ एतत्तीर्थं महापुण्यं सुगुप्तं शार्ङ्गधन्वनः ॥ पुष्करेति समाख्यातं श्राद्धमत्र प्रदीयताम् ॥ १४ ॥ नूनं दशरथो राजा तीर्थे चास्मिन्समीहते ॥ त्वया दत्तं शुभं पिण्डं ततः स दर्शनं गतः ॥ १५ ॥ ॥ ईश्वर उवाच ॥ ॥ तेषां तद्वचनं श्रुत्वा रामो राजीवलोचनः ॥ निमंत्रयामास तदा श्राद्धार्हान्ब्राह्मणान्छुभान् ॥ १६ ॥ अब्रवील्लक्ष्मणं पार्श्वे स्थितं विनतकंधरम् ॥ फलार्थं व्रज सौमित्रे श्राद्धार्थं त्वरयाऽन्वितः ॥ १७ ॥ स तथेति प्रतिज्ञाय जगाम रघुनंदनः ॥ आनयामास शीघ्रं स फलानि विविधानि च ॥ १८ ॥ बिल्वानि च कपित्थानि तिन्दुकानि च भूरिशः ॥ बदराणि करीराणि करमर्दानि च प्रिये ॥ १९ ॥ चिर्भटानि परूषाणि मातुलिंगानि वै तथा ॥ नालिकेराणि शुभ्राणि इंगुदीसंभवानि च ॥ २० ॥ अथैतानि पपाचाशु सीता जनकनंदिनी ॥ ततस्तु कुतपे काले स्नात्वा वल्कलभृच्छुचिः ॥ २१ ॥ ब्राह्मणानानयामास श्राद्धार्हान्द्विजसत्तमान् ॥ गालवो देवलो रैभ्यो यवक्रीतोऽथ पर्वतः ॥ २२ ॥ भरद्वाजो वसिष्ठश्च जाबालिर्गौतमो भृगुः ॥ एते चान्ये च बहवो ब्राह्मणा वेदपारगाः ॥ २३ ॥ श्राद्धार्थं तस्य संप्राप्ता रामस्याक्लिष्टकर्मणः ॥ एतस्मिन्नेव काले तु रामः सीतामभाषत ॥ २४ ॥ एहि वैदेहि विप्राणां देहि पादावनेजनम् ॥ एतच्छ्रुत्वाऽथ सा सीता प्रविष्टा वृक्षमध्यतः ॥ २५ ॥ गुल्मैराच्छाद्य चात्मानं रामस्यादर्शने स्थिता ॥ मुहुर्मुहुर्यदा रामः सीतासीतामभाषत ॥ २६ ॥ ज्ञात्वा तां लक्ष्मणो नष्टां कोपाविष्टं च राघवम् ॥ स्वयमेव तदा चक्रे ब्राह्मणार्हप्रतिक्रियाम् ॥ २७ ॥ अथ भुक्तेषु विप्रेषु कृत पिंडप्रदानके ॥ आगता जानकी सीता यत्र रामो व्यवस्थितः ॥ २८ ॥ तां दृष्ट्वा परुषैर्वाक्यैर्भर्त्सयामास राघवः ॥ धिग्धिक्पापे द्विजांस्त्यक्त्वा पितृकृत्यमहोदयम् ॥ क्व गताऽसि च मां हित्वा श्राद्धकाले ह्युपस्थिते ॥ २९ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा भयभीता च जानकी ॥ ३० ॥ कृताञ्जलिपुटा भूत्वा वेपमाना ह्यभाषत ॥ मा कोपं कुरु कल्याण मा मां निर्भर्त्सय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

प्रभो ॥ ३१ ॥ शृणु यस्माद्विभोऽन्यत्र गता त्यक्त्वा तवान्तिकम् ॥ दृष्टस्तव पिता मेऽद्य तथा चैव पितामहः ॥ ३२ ॥ तस्य पूर्वतरश्चापि तथा मातामहादयः ॥ अंगेषु ब्राह्मणेन्द्राणामाक्रान्तास्ते पृथक्पृथक् ॥ ३३ ॥ ततो लज्जा समभवत्तत्र मे रघुनन्दन ॥ पित्रा तत्र महाबाहो मनोज्ञानि शुभानि च ॥ ३४ ॥ भक्ष्याणि भक्षितान्येव यानि वै गुणवन्ति च ॥ स कथं सुकषायाणि क्षाराणि कटुकानि च ॥ भक्षयिष्यति राजेन्द्र ततो मे दुःखमाविशत् ॥ ३५ ॥ एतस्मात्कारणान्नष्टा लज्जयाऽहं रघूद्वह ॥ दृष्ट्वा श्वशुरवर्गं स्वं तस्मात्कोपं परित्यज ॥ ३६ ॥ तस्यास्तद्व चनं श्रुत्वा विस्मितो राघवोऽभवत् ॥ विशेषेण ददौ तस्मिञ्छ्राद्धं तीर्थे तु पुष्करे ॥ ३७ ॥ तत्र पुष्करसान्निध्ये दक्षिणे धनुषां त्रये ॥ लिंगं प्रतिष्ठयामास रामेश्वरमिति श्रुतम् ॥ ३८ ॥ यस्तं पूजयते भक्त्या गन्धपुष्पादिभिः क्रमात् ॥ स प्राप्नोति परं स्थानं यत्र देवो जनार्दनः ॥ ३९ ॥ किमत्र बहुनोक्तेन द्वादश्यां यत्प्रदापयेत्[1] ॥ न तत्र परिसंख्यानं त्रिषु लोकेषु विद्यते ॥ ४० ॥ शुक्रांगारकसंयुक्ता चतुर्थी या भवेत्क्वचित् ॥ षष्ठी वात्र वरारोहे तत्र श्राद्धे महत्फलम् ॥ ४१ ॥ यावद्द्वादशवर्षाणि पितरश्चपितामहाः ॥ तर्पिता नान्य मिच्छन्ति पुष्करे स्वकुलोद्भवे ॥ ४२ ॥ तत्र यो वाजिनं दद्यात्सम्यग्भक्तिसमन्वितः ॥ अश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ ४३ ॥ इति ते कथितं सम्यङ्माहात्म्यं पापनाशनम् ॥ रामेश्वरस्य देवस्य पुष्करस्य च भामिनि ॥ ४४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये पुष्करमाहात्म्ये रामेश्वरक्षेत्रमाहात्म्यवर्णनंनामैकादशोत्तरशततमोऽध्यायः ॥ १११ ॥ छ ॥

॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि लक्ष्मणेश्वरमुत्तमम् ॥ रामेशात्पूर्वदिग्भागे धनुस्त्रिंशकसंस्थितम् ॥ १ ॥ स्थापितं लक्ष्मणेनैव तत्र यात्रागतेन वै ॥ महापापहरं देवि तल्लिंगं सुरपूजितम् ॥ २ ॥ यस्तं पूजयते भक्त्या नृत्यगीतादिवादनैः ॥ होमजाप्यैः समाधिस्थः स याति परमां गतिम् ॥ ३ ॥ अन्नोदकं हिरण्यं च तत्र देयं द्विजातये ॥ संपूज्य देवदेवेशं गंधपुष्पादिभिः क्रमात् ॥ ॥ ४ ॥ माघे कृष्णचतुर्दश्यां विशेषस्तत्र पूजने ॥ स्नानं दानं जपस्तत्र भवेदक्षयकारकम् ॥ ५ ॥ इति श्रीस्कांदे महापुराण एकाशीति साहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये रामेश्वरक्षेत्रमाहात्म्ये लक्ष्मणेश्वरमाहात्म्यवर्णनंनाम द्वादशोत्तरशततमोऽध्यायः ॥ ११२ ॥ ॥छ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि जानकीश्वरमुत्तमम् ॥ रामेशान्नैर्ऋते भागे धनुस्त्रिंशकसंस्थितम् ॥ १ ॥

१ प्रदीपयेत्—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पापघ्नं सर्वजंतूनां जानक्याऽऽराधितं पुरा ॥ प्रतिष्ठितं विशेषेण सम्यगाराध्य शंकरम् ॥ २ ॥ पूर्वं तस्यैव लिंगस्य वसिष्ठेशेति नाम वै ॥ तत्पश्चाज्जानकीशेति त्रेतायां प्रथितं क्षितौ ॥ ३ ॥ ततः षष्टिसहस्राणि वालखिल्या महर्षयः ॥ तत्र सिद्धिमनुप्राप्तास्तेन सिद्धेश्वरेति च ॥ ॥ ४ ॥ ख्यातं कलौ महादेवि युगलिंगं महाप्रभम् ॥ तद्दृष्ट्वा मुच्यते पापैर्दुःखदौर्भाग्यसंभवैः ॥ ५ ॥ यस्तं पूजयते भक्त्या नारी वा पुरुषोऽपि वा ॥ संस्नाप्य विधिवद्भक्त्या स मुक्तः पातकैर्भवेत् ॥ ६ ॥ स्नात्वा च पुष्करे तीर्थे यस्तल्लिंगं प्रपूजयेत् ॥ नियतो नियताहारो मासमेकं निरन्तरम् ॥ ७ ॥ दिनेदिने भवेत्तस्य वाजिमेधाधिकं फलम् ॥ माघे मासि तृतीयायां या नारी तं प्रपूजयेत् ॥ तदन्वयेऽपि दौर्भाग्यं दुःखं शोकश्च नो भवेत् ॥ ८ ॥ इति ते कथितं देवि माहात्म्यं पापनाशनम् ॥ श्रुतं हरति पापानि सौभाग्यं संप्रयच्छति ॥ ९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये जानकीश्वरमाहात्म्यवर्णनंनाम त्रयोदशोत्तरशततमोऽध्यायः ॥ ॥ ११३ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि विष्णुं पापप्रणाशनम् ॥ वामनस्वामिनामानं सर्वपातकनाशनम् ॥ १ ॥ पुष्करान्नैर्ऋते भागे धनुर्विंशतिभिः स्मृतम् ॥ यदा बद्धो बलिर्देवि विष्णुना प्रभविष्णुना ॥ २ ॥ तदा तत्र पदं न्यस्तं दक्षिणं विश्वरूपिणा ॥ द्वितीयं मेरुशृंगे तु तृतीयं गगने प्रिये ॥ ३ ॥ यावदूर्ध्वं चोत्क्षिपति तावद्भिन्नं सुदूरतः ॥ पादाग्रेण तु ब्रह्माण्डं निष्क्रान्तं सलिलं ततः ॥ ४ ॥ ततः स्वजानुमात्रेण संप्राप्तं पृथिवीतले ॥ ततो विष्णुपदी गंगा प्रसिद्धिमगमत्क्षितौ ॥ ५ ॥ पूर्वं सा पुष्करे प्राप्ता पुष्करात्सा महानदी ॥ पुष्करं कथ्यते व्योम पुष्करं कथ्यते जलम् ॥ तेन तत्पुष्करं ख्यातं संनिधानं प्रजापतेः ॥ ६ ॥ तत्र स्नानं नरः कृत्वा यः पश्यति हरेः पदम् ॥ स याति परमं स्थानं यत्र देवो हरिः स्वयम् ॥ ७ ॥ तत्र पिंडप्रदानेन तृप्तिः स्यात्कोटिवार्षिकी ॥ पितॄणां च वरारोहे ह्येतदाह हरिः स्वयम् ॥ ८ ॥ अत्र गाथा पुरा गीता वसिष्ठेन महर्षिणा ॥ वामनस्वामिनं दृष्ट्वा तां शृणुष्व समाहिता ॥ ९ ॥ स्नात्वा तु पुष्करे तीर्थे दृष्ट्वा विष्णुपदं ततः ॥ अपि कृत्वा महत्पापं किमतः परितप्यते ॥ १० ॥ यस्तत्रोपानहौ दद्याद्ब्राह्मणाय यतव्रतः ॥ स यानवरमारूढो विष्णुलोके महीयते ॥ ११ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये वामनस्वामिमाहात्म्यवर्णनंनाम चतुर्दशोत्तरशततमोऽध्यायः ॥ ११४ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि पुष्करेश्वरमुत्तमम् ॥ तस्यैव दक्षिणे भागे जानकीश्वरमुत्तमम् ॥ १ ॥ लिंगं महाप्रभावं तु ब्रह्मपुत्रेण पूजितम् ॥ सनत्कुमारमुनिना श्रद्धया हेम



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





पुष्करैः ॥ २ ॥ पूजितं तद्विधानेन तेन तत्पुष्करेश्वरम् ॥ ख्यातं तत्र वरारोहे सर्वपातकनाशनम् ॥ ३ ॥ यस्तं पूजयते भक्त्या गंधपुष्पादिभिः क्रमात् ॥ यात्रा कृता भवेत्तेन पौष्करी नात्र संशयः ॥ ४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये वामनस्वामिमाहात्म्ये पुष्करेश्वरमाहात्म्यवर्णनंनाम पञ्चदशोत्तरशततमोऽध्यायः ॥ ११५ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि देवीं सौभाग्यकारिणीम् ॥ कुण्डेश्वरीति विख्यातां पुष्कराद्वायुगोचरे ॥ १ ॥ धनुषां त्रिंशता देवि भूतनाथाच्च नैर्ऋते ॥ संस्थिता पापदमनी दारिद्र्यौघविनाशिनी ॥ २ ॥ तस्या नैर्ऋतदिग्भागे धनुःपञ्चदशे स्थितम् ॥ शंखोदकंनाम कुण्डं सर्वपातकनाशनम् ॥ ३ ॥ तत्र स्नात्वा तु ये मर्त्या नारी वा शुभवारिणि ॥ पूजयेत्तां महादेवि शंखावर्तेतिविश्रुताम् ॥ ४ ॥ कलौ कुण्डेश्वरीनाम सर्वसौख्यप्रदायिनी ॥ शंखोनाम पुरा देवि विष्णुना निहतः प्रिये ॥ ५ ॥ तस्य देहं समादाय महान्तं शंखरूपिणम् ॥ तीर्थोदकेन संपूर्य प्रभासं क्षेत्रमागतः ॥ ६ ॥ तत्र शंखं तु प्रक्षाल्य कृतं तीर्थं महाप्रभम् ॥ तत्र पूरितवाञ्छङ्खं मेघगम्भीरनिस्वनम् ॥ ७ ॥ तस्य नादेन महता देवी तत्र समागता ॥ पृच्छंती कारणं तत्र तत्कुण्डस्य समीपगा ॥ तेन कुण्डेश्वरी ख्याता कुण्डं शंखोदकं स्मृतम् ॥ ८ ॥ माघे मासि तृतीयायां यस्तां पूजयते नरः ॥ नारी वा भक्तिसंयुक्ता स गौरीपदमाप्नुयात् ॥ ९ ॥ दंपत्योर्भोजनं तत्र देयं यात्राफलेप्सुभिः ॥ कञ्चुकं फलदानं च गौरिणीनां च भोजनम् ॥ १० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये शंखोदककुण्डेश्वरीगौरीमाहात्म्यवर्णनंनाम षोडशोत्तरशततमोऽध्यायः ॥ ११६ ॥ ॥छ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि भूतनाथेश्वरं हरम् ॥ कुण्डेश्वर्या ईशभागे धनुषां विंशकेऽन्तरे ॥ १ ॥ कल्पलिंगं महादेवि ह्यनादिनिधनं स्थितम् ॥ पूर्वं त्रेतायुगे देवि वीरभद्रेश्वरीति च ॥ २ ॥ प्रख्यातं भुवि देवेशि कलौ भूतेश्वरं स्मृतम् ॥ पुरा द्वापरसंधौ च तत्र भूतानि कोटिशः ॥३॥ संसिद्धिं परमां जग्मुस्तल्लिंगस्य प्रभावतः ॥ तेन भूतेश्वरं नाम प्रख्यातं धरणीतले॥ ॥ ४ ॥ तत्र कृष्णचतुर्दश्यां रात्रौ संपूज्य शंकरम् ॥ दक्षिणां दिशमाश्रित्य अघोरं पूजयेत्तु यः ॥ ५ ॥ दृढं जितेन्द्रियो भूत्वा निर्भयो ध्यानसंयुतः ॥ तस्यैव जायते सिद्धिर्या काचिद्भूतले स्थिता ॥ ६ ॥ तिलहेमप्रदानं च पिण्डदानं च तत्र वै ॥ पितॄनुद्दिश्य दद्याद्वै तेषां प्रेतत्वमुक्तये ॥ ॥ ७ ॥ इति निगदितमेतद्भूतनाथेश्वरस्य प्रचुरकलिमलानां नाशनं पुण्यहेतुः ॥ पठति च पुरुषो वा यः शृणोतीह भक्त्या सुरवरमहिमानं



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुच्यते पातकौघैः ॥ ८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये कुंडेश्वरी माहात्म्ये भूतनाथेश्वरमाहात्म्यवर्णनंनाम सप्तदशोत्तरशततमोऽध्यायः ॥ ११७ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि गोप्यादित्यमनुत्तमम् ॥ भूतेशाद्वायवे भागे धनुषां त्रिंशकेन्तरे ॥ १ ॥ बलातिबलदैत्यघ्न्या दक्षिणाग्नेयसंस्थितम् ॥ धनुषां दशके देवि संस्थितं पापनाशनम् ॥ २ ॥ तस्योत्पत्तिं प्रवक्ष्यामि महापापहरां शुभाम् ॥ यां श्रुत्वा मानवो भक्त्या दुःखशोकैः प्रमुच्यते ॥ ३ ॥ पुरा कृष्णो महा तेजा यदा प्रभासमागतः ॥ सहितो यादवैः सर्वैः षट्पञ्चाशतिकोटिभिः ॥ ४ ॥ षोडशैव सहस्राणि गोप्यस्तत्र समागताः ॥ लक्षमेकं तथा षष्टि रेते कृष्णसुताः प्रिये ॥ ५ ॥ तत्र प्राभासिके क्षेत्रे संस्थिताः पापनाशने ॥ यादवस्थलमासाद्य यावद्रैवतको गिरिः ॥ ६ ॥ तत्र द्वादशवर्षाणि संस्थितास्ते महाबलाः ॥ क्षेत्रं पवित्रमादाय शिवलिंगानि ते पृथक् ॥ स्थापयाञ्चक्रिरे सर्वे ह्यंकितानि स्वनामभिः ॥ ७ ॥ एवं समग्रं तत्क्षेत्रं याव द्वादशयोजनम् ॥ ध्वजलिंगांकितं चक्रुः सर्वे यादवपुंगवाः ॥ ८ ॥ हस्तहस्तान्तरे देवि प्रासादाःक्षेत्र मध्यतः ॥ सुवर्णकलशोपेताः पताकाकुलितां वराः ॥ विराजंते तु तत्रस्थाः कीर्तिस्तंभा हरेरिव ॥ ९ ॥ ततो गोप्यो महादेवि आद्या याः षोडश स्मृताः ॥ तासां नामानि ते वक्ष्ये तानि ह्येकमनाः शृणु ॥ १० ॥ लंबिनी चन्द्रिका कान्ता क्रूरा शान्ता महोदया ॥ भीषणी नन्दिनीऽशोका सुपर्णा विमलाऽक्षया ॥ ११ ॥ शुभदा शोभना पुण्या हंसस्यैताः कलाः स्मृताः ॥ हंस एव मतः कृष्णः परमात्मा जनार्दनः ॥ १२ ॥ तस्यैताः शक्तयो देवि षोडशैव प्रकीर्तिताः ॥ चन्द्ररूपी ततः कृष्णः कलारूपास्तु ताः स्मृताः ॥ १३ ॥ संपूर्णमण्डला तासां मालिनी षोडशी कला ॥ प्रतिपत्तिथिमारभ्य विच रत्यासु चन्द्रमाः ॥ १४ ॥ षोडशैव कला यास्ता गोपीरूपा वरानने ॥ एकैकशस्ताः संभिन्नाः सहस्रेण पृथक्पृथक् ॥ १५ ॥ एवं ते कथितं देवि रहस्यं ज्ञानसंभवम् ॥ एवं यो वेद पुरुषः स ज्ञेयो वैष्णवो बुधैः ॥ १६ ॥ अथ ताभिः कृतान्ज्ञात्वा प्रासादान्यादवैः पृथक् ॥ ततो गोप्योऽपि ताः सर्वाः सहस्राणि तु षोडश ॥ कृष्णमाज्ञाप्य भावेन स्थापयांचक्रिरे रविम् ॥ १७ ॥ ऋषिभिर्नार दाद्यैस्तास्तथा क्षेत्रनिवासिभिः ॥ तं प्रतिष्ठापयामासुः प्रतिष्ठाविधिना रविम् ॥ १८ ॥ प्रतिष्ठिते ततः सूर्ये ददुर्दानानि भूरिशः ॥ ततः क्षेत्रनिवासिभ्यो गोभूहेमांबराणि च ॥ १९ ॥ ततस्त ऋषयः सर्वे संतुष्टा हृष्टमानसाः ॥ चक्रुर्नाम रवेस्तत्र गोप्यादित्येति विश्रुतम् ॥ सर्वपाप हरं देवं महासौभाग्यदायकम् ॥ २० ॥ एवं कृते कृतार्थास्ताः संप्राप्यातिमहद्यशः ॥ जग्मुर्यथागतं सर्वा द्वारकां कृष्णसंयुताः ॥ २१ ॥ पुनः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





कालान्तरे देवि शापाद्दुर्वाससः प्रिये ॥ यादवस्थलतां प्राप्ताः प्रभासे पापनाशने ॥ २२ ॥ एवं ते कथितो देवि गोप्यादित्यसमुद्भवः ॥ माहात्म्यं तस्य ते वच्मि पूजावन्दनजं क्रमात् ॥ २३ ॥ अस्मिन्मित्रवने देवि यो गोपीभिः प्रतिष्ठितः ॥ तस्य दर्शनमात्रेण दुःखशोकैः प्रमुच्यते ॥ २४ ॥ सुतप्तेनेह तपसा यज्ञैर्वा बहुदक्षिणैः ॥ तां गतिं ते नरा यान्ति ये गोपीरविमाश्रिताः ॥ २५ ॥ येन सर्वात्मना भावो गोप्यादित्ये निवेशितः ॥ महेश्वरि कृतार्थत्वात्स श्लाघ्यो धन्य एव सः ॥ २६ ॥ अपि नः स कुले धन्यो जायते कुलपावनः ॥ भाग्यवान्भक्तिभावेन येन भानुरुपासितः ॥ २७ ॥ सप्तम्यां पूजयेद्यस्तु माघे मास्युषसि प्रिये ॥ सप्तावरान्सप्त पूर्वान्पितन्सोऽप्युद्धरेन्नरः ॥ २८ ॥ छिनत्ति रोगान्दुश्चेष्टान्दुर्जयाञ्जयति द्विषः ॥ २९ ॥ न सप्तम्यां स्पृशेत्तैलं नीलवस्त्रं न धारयेत् ॥ न चाप्यामलकैः स्नानं न कुर्यात्कलहं क्वचित् ॥ ३० ॥ नीलरक्तेन वस्त्रेण यत्कर्म कुरुते द्विजः ॥ स्नानं दानं जपो होमः स्वाध्यायः पितृतर्पणम् ॥ वृथा तस्य महायज्ञा नीलसूत्रस्य धारणात् ॥ ३१ ॥ नीलीरक्तं यदा वस्त्रं विप्रस्त्वंगेषु धारयेत् ॥ अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ॥ ३२ ॥ रोमकूपे यदा गच्छेद्रसं नीलस्य कस्यचित् ॥ पतितस्तु भवेद्विप्रस्त्रिभिः कृच्छ्रैर्व्यपोहति ॥ ३३ ॥ नीलमध्यं यदा गच्छेत्प्रमादाद्ब्राह्मणः क्वचित् ॥ अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ॥ ३४ ॥ नीलदारु यदा भिद्येद्ब्राह्मणानां शरीरके ॥ शोणितं दृश्यते तत्र द्विजश्चान्द्रायणं चरेत् ॥ ३५ ॥ कुर्यादज्ञानतो यस्तु नीलं वै दन्तधावनम् ॥ कृत्वा कृच्छ्रद्वयं तस्य शुद्धिरुक्ता मनीषिभिः ॥ ३६ ॥ इत्येतत्कथितं देवि गोप्यादित्यमहोदय ॥ पापघ्नं सर्वजन्तूनां श्रुतं सर्वार्थसाधकम् ॥ ॥ ३७ ॥ गवां शतसहस्रैस्तु दत्तैर्यत्कुरुजांगले ॥ पुण्यं भवति देवेशि तद्गोप्यादित्यदर्शने ॥ ३८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये गोप्यादित्यमाहात्म्यवर्णनंनामाष्टादशोत्तरशततमोऽध्यायः ॥ ११८ ॥ ॥ छ ॥

॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि महादेवीं महाप्रभाम् ॥ बलातिबलदैत्यघ्नीं नाम्नेति प्रथितां क्षितौ ॥ १ ॥ अनादिनिधनां देवीं तत्र क्षेत्रे व्यवस्थिताम् ॥ कोटिभूतपरीवारां सर्वदैत्यनिबर्हिणीम् ॥ २ ॥ ॥ देव्युवाच ॥ ॥ बलातिबलदैत्यघ्नी कथमुक्ता त्वया प्रभो ॥ बलातिबलनामानौ कथं दैत्यौ निपातितौ ॥ ३ ॥ कुत्र तिष्ठति सा देवी किंप्रभावा महेश्वर ॥ माहात्म्यमखिलं तस्याः सर्वं विस्तरतो वद ॥ ४ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि कथां पापप्रणाशनीम् ॥ यां श्रुत्वा मानवो भक्त्या



१ तत्पातकम्—इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुच्यते सर्वपातकैः ॥ ५ ॥ आसीद्रक्तासुरोनाम महिषस्य सुतो बली ॥ महाकायो महाबाहुर्हिरण्याक्ष इवापरः ॥ ६ ॥ बलातिबल नामानौ तस्य पुत्रौ बभूवतुः ॥ तौ विजित्य सुरान्सर्वान्देवेन्द्राग्निपुरोगमान् ॥ ७ ॥ त्रैलोक्येऽस्मिन्निरातंकौ चक्रतू राज्यमञ्जसा ॥ तयोः सेना मुखे वीरास्त्रयस्त्रिंशत्प्रकीर्तिताः ॥ ८ ॥ रौद्रात्मानो महायोधाः सहस्राक्षौहिणीमुखाः ॥ सिंहस्कन्धा महाकाया दुरात्मानो महाबलाः ॥ ९ ॥ धूम्राक्षो भीमदंष्ट्रश्च कालवश्यो महाहनुः ॥ ब्रह्मघ्नो यज्ञकोपश्च स्त्रीघ्नः पापनिकेतनः ॥ १० ॥ विद्युन्माली च बन्धूकः शंकुकर्णो विभावसुः ॥ देवांतको विकर्मा च दुर्भिक्षः क्रूर एव च ॥ ११ ॥ हयग्रीवोऽश्वकर्णश्च केतुमान्वृषभो द्विजः ॥ शरभः शलभो व्याघ्रो निकुंभो मणिको बकः ॥ १२ ॥ शूर्पको विक्षरो माली कालो दण्डककेरलः ॥ एते दैत्या महाकायास्तयोः सेनाधिकारिणः ॥ १३ ॥ एवं तैः पृथिवी व्याप्ता पञ्चाशत्कोटि[1] विस्तरा ॥ एवं ज्ञात्वा तदा देवा भयेनोद्विग्नमानसाः ॥ १४ ॥ सर्वैर्देवर्षिभिः सार्धं जग्मुस्ते हिमवद्वनम् ॥ स्तोत्रेणानेन तां देवीं तुष्टुवुः प्रयता स्तदा ॥ १५ ॥ ॥ देवा उचुः ॥ ॥ जयाक्षरे जयाऽनंते जयाऽव्यक्ते निरामये ॥ जय देवि महामाये जय देवर्षिवंदिते ॥ १६ ॥ जय विश्वेश्वरे गंगे जय सर्वार्थसिद्धिदे ॥ जय ब्रह्माणि कौमारि जय नारायणीश्वरि ॥ १७ ॥ जय ब्रह्माणि चामुंडे जयेन्द्राणि महेश्वरि ॥ जय मातर्महालक्ष्मि जय पार्वति सर्वगे ॥ १८ ॥ जय देवि जगत्सृष्टे जयैरावति भारति ॥ जयानंते जय जये जय देवि जलाविले ॥ १९ ॥ जयेशानि शिवे शर्वे जय नित्यं जयार्चिते ॥ मोक्षदे जय सर्वज्ञे जय धर्मार्थकामदे ॥ २० ॥ जय गायत्रि कल्याणि जय सह्ये विभावरि ॥ जय दुर्गे महाकालि शिव दूति जयाऽजये ॥ २१ ॥ जय चण्डे महामुण्डे जय नन्दे शिवप्रिये ॥ जय क्षेमंकरि शिवे जय कल्याणि रेवति ॥ २२ ॥ जयोमे सिद्धिमांगल्ये हरसिद्धे नमोस्तु ते ॥ जयापर्णे जयानन्दे महिषासुरघातिनि ॥ २३ ॥ जय मेधे विशालाक्षि जयानंगे सरस्वति ॥ जयाशेषगुणावासे जयावर्ते सुरान्तके ॥ २४ ॥ जय संकल्पसंसिद्धे जय त्रैलोक्यसुंदरि ॥ जय शुंभनिशुंभघ्ने जय पद्मेऽद्रिसंभवे ॥ २५ ॥ जय कौ शिकि कौमारि जय वारुणि कामदे ॥ नमोनमस्ते शर्वाणि भूयोभूयो जयाम्बिके ॥ २६ ॥ त्राहि नस्त्राहि नो देवि शरण्ये शरणागतान् ॥ २७ ॥ सैवं स्तुता भगवती देवैः सर्वैर्वरानने ॥ आत्मानं दर्शयामास भाभासितदिगन्तरम् ॥ २८ ॥ नमस्कृत्य तु तामूचुः सुरास्ते भयनाशनीम् ॥ बलातिबलनामानौ हत्वा दैत्यौ महाबलौ ॥ तेषां चैव महत्सैन्यं पाह्यतो महतो भयात् ॥ २९ ॥ तेषां तद्वचनं श्रुत्वा दत्त्वा तेभ्योऽभयं ततः ॥

१ पञ्चाशत्कोटिविस्तरा--पञ्चाशत्कोटियोजनायामविस्तीर्णा--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





बभूवाद्भुतरूपा सा त्रिनेत्रा चेन्दुशेखरा ॥३०॥ सिंहारूढा महादेवि नानाशस्त्रास्त्रधारिणी ॥ सुवक्त्रा विंशतिभुजा स्फूर्जद्विद्युच्छतोपमा ॥३१॥ ततो ऽम्बिका निनादोच्चैः साट्टहासं मुहुर्मुहुः ॥ ३२ ॥ तस्या नादेन घोरेण कृत्स्नमापूरितं नभः ॥ प्रकंपिताखिला चोर्वी सरिद्वारिधिमेखला ॥ ३३ ॥ शैलतुंगस्तनी रम्या प्रमदेव भयातुरा ॥ तेऽपि तत्रासुराः प्राप्ताश्चतुरंगबलान्विताः ॥ ३४ ॥ सम्यग्विदितविक्रान्ताः कालान्तकयमोपमाः ॥ रक्षो दानवदैत्याश्च पाताले येऽपि संस्थिताः ॥ ३५ ॥ ते सर्व एव दैत्येन्द्राः कोटिशः समुपागताः ॥ ततोऽभवन्महायुद्धं देव्यास्तत्रासुरैः सह ॥ ३६ ॥ बभूव सर्वब्रह्माण्डे ह्यकाण्डक्षयकारणम् ॥ अक्षौहिणीसहस्राणि त्रयस्त्रिंशत्सुरेश्वरि ॥ ३७ ॥ एकविंशत्सहस्राणि शतान्यष्टौ च सप्ततिः ॥ सानुगानां सयोधानां रथानां वातरंहसाम् ॥ ३८ ॥ हत्वा सा लीलया देवी निन्ये क्षयमनाकुला ॥ ३९ ॥ ततो देव्या हतानां च दानवानां महौजसाम् ॥ गजवाजिरथानां च शरीरैरावृता मही ॥ ४० ॥ कबंधनृत्यसंकुले स्रवद्वसास्थिकर्दमे ॥ रणाजिरे निशाचरास्ततो विचेरुरूर्जिताः ॥ ४१ ॥ शृगाल गृध्रवायसाः परं प्रपातमादधुः ॥ क्वचित्परे निशाचराः प्रपीतशोणितोत्कटाः ॥ प्रतर्प्य चात्मनः पितॄन्समर्चयंस्तथा ऋषीन् ॥ ४२ ॥ गजान्नरांस्तुरंगमान्बभक्षिरे सुनिर्घृणाः ॥ रथोडुपैस्तथा परे तरंति शोणितार्णवम् ॥ ४३ ॥ इति प्रगाढसंगरे सुरारिसंघसंकुले ॥ विराजतेऽम्बिका धनुः शराऽसिशूलधारिणी ॥ ४४ ॥ गजेन्द्रदर्पमर्द्दनी तुरंगयूथपोथिनी ॥ सुरारिसैन्यनाशिनी इतस्ततः प्रपश्यती ॥ ४५ ॥ सिंहाष्टकयुक्ते महाप्रेतके भूधरहंसशुभ्रोज्ज्वलद्भास्वराभे वृषभसमाने मानिनीमथो ते दैत्येन्द्रवीराः पश्यंतः सम्प्रद्भूतरोषास्ततोऽपि जग्मुर्नदन्तो रवन्तो रवं मेघनादाः ॥ ४६ ॥ हाहाकारं विकुर्वाणा हन्यमानास्ततोऽसुराः ॥ केचित्समुद्रं विविशुरद्रीन्केचिच्च दानवाः ॥ ४७ ॥ केचिल्लुञ्चितमूर्धानो जालमा भूत्वा वनेऽवसन् ॥ दयाधर्मं ब्रुवाणाश्च निर्ग्रंथव्रतमास्थिताः ॥ ४८ ॥ केचित्प्राणपरा भीताः पाखण्डाश्रममास्थिताः ॥ हेतुवादपरा मूढा निःशौचा निरपेक्षकाः ॥ ४९ ॥ ते चाद्यापीह दृश्यन्ते लोके क्षपणकाः किल ॥ तथैव भिन्दकाश्चान्ये शिवशास्त्रबहिष्कृताः ॥ ५० ॥ केचित्कौलव्रता ह्यस्मिन्दृश्यन्ते सकलैर्जनैः॥ सुराह्वीमांसभूयिष्ठा विकर्मस्थाश्च लिङ्गिनः ॥ ५१ ॥ प्रायो नैष्कृतिकाः पापा जिह्वोपस्थपरायणाः॥ एवं देव्या हताः सर्वे बलातिबलसंयुताः ॥ ५२ ॥ प्रभासं क्षेत्रमासाद्य संस्थिता सा तदाम्बिका ॥ योगिनीनां चतुःषष्ट्या संयुता पापनाशिनी ॥ बलातिबलनाशीति प्रभासे प्रथिता क्षितौ ॥५३॥ ॥ देव्युवाच ॥ ॥ चतुःषष्टिस्त्वया प्रोक्ता योगिन्यो याः सुरेश्वर ॥ तासां नामानि मे ब्रूहि सर्वपापहराणि च ॥५४॥

१ एतत्तु—गद्यमिवाभाति ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि योगिनीनां महोदयम् ॥ सर्वरक्षाकरं दिव्यं महाभयविनाशनम् ॥ ५५ ॥ आदौ तत्र महाल
क्ष्मीर्नंदा क्षेमंकरी तथा ॥ शिवदूती महाभद्रा भ्रामरी चन्द्रमण्डला ॥ ५६ ॥ रेवती हरसिद्धिश्च दुर्गा विषमलोचना ॥ सहजा कुलजा कुब्जा
मायावी शांभवी क्रिया ॥ ५७ ॥ आद्या सर्वगता शुद्धा भावगम्या मनोतिगा ॥ विद्याविद्या महामाया सुषुम्ना सर्वमंगला ॥ ५८ ॥ ॐकारात्मा
महादेवि वेदार्थजननी शिवा ॥ पुराणान्वीक्षिकी दीक्षा चामुण्डा शंकरप्रिया ॥ ५९ ॥ ब्राह्मी शांतिकरी गौरी ब्रह्मण्या ब्राह्मणप्रिया ॥ भद्रा भग
वती कृष्णा ग्रहनक्षत्रमालिनी ॥ ६० ॥ त्रिपुरा त्वरिता नित्या सांख्या कुंडलिनी ध्रुवा ॥ कल्याणी शोभना नित्या निष्कला परमा कला ॥
॥ ६१ ॥ योगिनी योगसद्भावा योगगम्या गुहाशया ॥ कात्यायनी उमा शर्वा ह्यपर्णेति प्रकीर्तिता ॥ ६२ ॥ चतुःषष्टिर्महादेवि एवं ते परिकी
र्तिताः ॥ स्तोत्रेणानेन दिव्येन भक्त्या यः स्तौति चंडिकाम् ॥ ६३ ॥ तं पुत्रमिव शर्वाणी सर्वापत्स्वभिरक्षति ॥ चतुर्दश्यामथाष्टम्यां नवम्यां च
विशेषतः ॥ ६४ ॥ उपवासैकभक्तेन तथैवायाचितेन च ॥ गृहीतनियमा देवि ये जपंति च चंडिकाम् ॥ ६५ ॥ वर्षार्धं वर्षमेकं वा सिद्धास्ते
तत्त्वचारिणः ॥ आश्वयुक्छुक्लपक्षे च मन्वादिष्वष्टकासु च ॥ ६६ ॥ कृत्वा महोत्सवं देवीं यजेच्छ्रेयोऽभिवृद्धये ॥ पादुके धारयेद्देव्या दुर्गाभक्तो
हिरण्मये ॥ ६७ ॥ प्रमादविघ्नशांत्यर्थं क्षुरिकां च सदा पुमान् ॥ पशुमांसासवैश्चैवमासुरं भावमाश्रिताः ॥ ६८ ॥ ये यजन्त्यम्बिकां ते स्युर्नृत्या
ऐश्वर्यभोगिनः ॥ देवत्वं सात्त्विका यांति सात्त्विकीं भक्तिमास्थिताः ॥ ६९ ॥ एतत्ते कथितं देवि माहात्म्यं पापनाशनम् ॥ बलातिबलनाशिन्या
देव्याः सर्वार्थसाधकम् ॥ प्रभासक्षेत्रसंस्थायाः संक्षेपात्कीर्तिवर्धनम् ॥ ७० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे
प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये बलातिबलदैत्यघ्नीमाहात्म्यवर्णनंनामैकोनविंशत्युत्तरशततमोऽध्यायः ॥ ११९ ॥ ॥ छ ॥ ॥ ईश्वर
उवाच ॥ ॥ ततो गच्छेन्महादेवि गोपीश्वरमनुत्तमम् ॥ बलातिबलदैत्यघ्न्या उत्तरे धनुषां त्रये ॥ १ ॥ संस्थितं पापशमनं गोपीभिः संप्रतिष्ठि
तम् ॥ समाराध्य महादेवं पुत्रहेतोर्महेश्वरम् ॥ सर्वकामप्रदं नृणां पूजितं संततिप्रदम् ॥ २ ॥ चैत्रशुक्लतृतीयायां यस्तं पूजयते नरः ॥ गंध
पुष्पोपहारैश्च स प्राप्नोतीप्सितं फलम् ॥ ३ ॥ एवं संक्षेपतः प्रोक्तं माहात्म्यं पापनाशनम् ॥ गोपीश्वरस्य देवस्य प्रभासक्षेत्रवासिनः ॥ ४ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये बलातिबलदैत्यघ्नीमाहात्म्ये गोपीश्वर
माहात्म्यवर्णनंनाम विंशत्युत्तरशततमोऽध्यायः ॥ १२० ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि रामेश्वरमनुत्तमम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



जामदग्न्येन रामेण स्वयं तत्र प्रतिष्ठितम् ॥ १ ॥ गोपीश्वराच्च वायव्ये धनुषां त्रिंशकेऽन्तरे ॥ स्थितं महाप्रभावं हि लिंगं पातकनाशनम् ॥ २ ॥
यदा रामेण देवेशि जमदग्निसुतेन वै ॥ कृतो मातृवधो घोरः पितुराज्ञानुवर्तिना ॥ ३ ॥ तदा मनसि संतापं कृत्वा निर्वेदमागतः ॥ ततः प्रसन्नतां
यातो जमदग्निर्महातपाः ॥ ४ ॥ ददौ वरं ततस्तुष्टो रेणुकायाश्च जीवितम् ॥ एवं यद्यपि सा तत्र जीविता वरवर्णिनी ॥ ५ ॥ तथापि सघृणो
देवि जामदग्न्यो महाप्रभः ॥ प्रभासं क्षेत्रमासाद्य तपश्चक्रे ततोऽद्भुतम् ॥ ६ ॥ प्रतिष्ठाप्य महादेवं शंकरं लोकशंकरम् ॥ दिव्यं वर्षशतं साग्रं
ततस्तुष्टो महेश्वरः ॥ ७ ॥ ददौ तस्येप्सितं सर्वं स्वयं तत्रैव संस्थितः ॥ ततः कृतार्थतां प्राप्तो जामदग्न्यो महाऋषिः ॥ ८ ॥ त्रिःसप्तकृत्वः
पृथिवीं जित्वा हत्वा च क्षत्रियान् ॥ कृत्वा पंचनदं तत्र कुरुक्षेत्रे महामनाः ॥ ९ ॥ रक्तैः संपूर्णतां नीत्वा क्षत्रियाणां वरानने ॥ आनृण्यं समनु
प्राप्तः पितॄणां यो महाबलः ॥ १० ॥ एवं क्षत्रान्तकं कृत्वा दत्त्वा विप्रेषु मेदिनीम् ॥ कृतार्थतामनुप्राप्तस्त्रैलोक्ये ख्यातपौरुषः ॥ ११ ॥ तेन
तत्स्थापितं लिंगं क्षेत्रे प्राभासिके शुभे ॥ यस्तं पूजयते भक्त्या पापयुक्तोऽपि मानवः ॥ स मुक्तः पातकैः सर्वैर्याति लोकमुमापतेः ॥ १२ ॥
ज्येष्ठकृष्णचतुर्दश्यां जागृयात्तत्र यो नरः ॥ सोऽश्वमेधफलं प्राप्य मोदते दिवि देववत् ॥ १३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां
संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये जामदग्न्येश्वरमाहात्म्यवर्णनंनामैकविंशत्युत्तरशततमोऽध्यायः ॥ १२१ ॥ ॥ छ ॥
॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि लिंगं चित्रांगदेश्वरम् ॥ तस्यैव नैर्ऋते भागे धनुर्विंशतिभिः स्थितम् ॥ १ ॥ चित्रांगदेन देवेशि
गंधर्वपतिना प्रिये ॥ क्षेत्रं पवित्रं ज्ञात्वा वै लिंगं तत्र प्रतिष्ठितम् ॥ कृत्वा तपो महाघोरं समाराध्य महेश्वरम् ॥ २ ॥ अथ यो भावसंयुक्तस्तल्लिंगं
संप्रपूजयेत् ॥ गांधर्वलोकमाप्नोति गन्धर्वैः सह मोदते ॥ ३ ॥ तत्र शुक्लत्रयोदश्यां संस्नाप्य विधिना शिवम् ॥ पूजयेद्विविधैः पुष्पैर्गंधधूपैरनु
क्रमात् ॥ स प्राप्नोत्यखिलं कामं मनसा यद्यदीप्सितम् ॥ ४ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे
प्रथमे प्रभासक्षेत्रमाहात्म्ये चित्रांगदेश्वरमाहात्म्यवर्णनंनाम द्वाविंशत्युत्तरशततमोऽध्यायः ॥ १२२ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥
ततो गच्छेन्महादेवि रावणेश्वरमुत्तमम् ॥ तस्माद्दक्षिणनैर्ऋत्ये धनुषां षोडशे स्थितम् ॥ १ ॥ प्रतिष्ठितं दशास्येन सर्वपातकनाशनम् ॥ पौलस्त्यो ॥१००॥
रावणो देवि राक्षसस्तु सुदारुणः ॥ २ ॥ त्रैलोक्यविजयाकाङ्क्षी पुष्पकेण चचार ह ॥ कस्यचित्त्वथ कालस्य विमानं तस्य पुष्पकम् ॥ ३ ॥
व्रजद्वै व्योममार्गेण निश्चलं सहसाऽभवत् ॥ स्तंभितं पुष्पकं दृष्ट्वा रावणो विस्मयान्वितः ॥ ४ ॥ प्रहस्तं प्रेषयामास किमिदं व्रज मेद्दि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नीम् ॥ अहताऽस्य गतिर्यस्मात्त्रैलोक्ये सचराचरे ॥ ५ ॥ तत्कस्मान्निश्चलं जातं विमानं पुष्पकं मम ॥ अथाऽसौ सत्वरो देवि जगाम वसुधातले ॥ ६ ॥ अपश्यद्देवदेवेशं श्रीसोमेशं महाप्रभम् ॥ स्तूयमानं सुरगणैः शतशोऽथ सहस्रशः ॥ ७ ॥ तं दृष्ट्वा राक्षसेन्द्राय तत्सर्वं विस्तरात्प्रिये ॥ प्रहस्तः कथयामास यद्दृष्टं क्षेत्रमध्यतः ॥ ८ ॥ ॥ प्रहस्त उवाच ॥ ॥ राक्षसेश महाबाहो शिवक्षेत्रं निजं प्रभो ॥ प्रभासेति समाख्यातं गणगन्धर्वसेवितम् ॥ ९ ॥ तत्र सोमेश्वरो देवः स्वयं तिष्ठति शङ्करः ॥ अब्भक्षैर्वायुभक्षैश्च दंतोलूखलिभिस्तथा ॥ ऋषिभिर्वालखिल्यैश्च पूज्यमानः समंततः ॥ १० ॥ प्रभावात्तस्य देवस्य नेदं गच्छति पुष्पकम् ॥ न स प्रालंघ्यते देवो ह्यलंघ्यो यः सुरासुरैः ॥ ११ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा विस्मयोत्फुल्ललोचनः ॥ अवतीर्य धरापृष्ठं सोमेशं समपश्यत ॥ १२ ॥ पूजयामास देवेशि भक्त्या परमया युतः ॥ रत्नैर्बहुविधैर्वस्त्रैर्गन्धपुष्पानुलेपनैः ॥ १३ ॥ अथ पौरजना दृष्ट्वा रावणं राक्षसेश्वरम् ॥ सर्वदिक्षु वरारोहे भयाद्भीताः प्रदुद्रुवुः ॥ १४ ॥ शून्यं समभवत्सर्वं तत्र देवो व्यवस्थितः ॥ एतस्मिन्नेव काले तु वागुवाचाशरीरिणी ॥ १५ ॥ दशग्रीव महाबाहो अयने चोत्तरे तथा ॥ यात्राकाले तु देवस्य सर्वपापप्रणाशने ॥ १६ ॥ दूरतः समनुप्राप्ता भूरिलोका द्विजातयः ॥ राक्षसानां भयाद्भीताः प्रयांति हि दिशो दश ॥ १७ ॥ भयान्मा त्वं राक्षसेन्द्र यात्राविघ्नकरो भव ॥ बाल्ये वयसि यत्पापं वार्द्धक्ये यौवनेऽपि च ॥ तत्सर्वं क्षालयेन्मर्त्यो दृष्ट्वा सोमेश्वरं प्रभुम् ॥ १८ ॥ ततोऽसौ राक्षसेन्द्रस्तु गत्वैकान्ते सुगह्वरे ॥ लिंगं च स्थापयामास भक्त्या परमया युतः ॥ १९ ॥ ततस्तन्निरतो भूत्वा सर्वैस्तै राक्षसेश्वरः ॥ पूजयामास देवेशि उपवासपरायणः ॥ २० ॥ चकार पुरतस्तस्य गीतवाद्येन जागरम् ॥ ततोऽर्धरात्रसमये वागुवाचाशरीरिणी ॥ २१ ॥ दशग्रीव महाबाहो परितुष्टोऽस्मि तेऽनघ ॥ मम प्रसादात्त्रैलोक्यं वशगं ते भविष्यति ॥ अत्र संनिहितो नित्यं स्थास्याम्यहमसंशयम् ॥ ॥ २२ ॥ ये चैतत्पूजयिष्यंति लिंगं भक्तियुता नराः ॥ अजेयास्ते भविष्यंति शत्रूणां राक्षसेश्वर ॥ २३ ॥ यास्यंति परमां सिद्धिं मत्प्रसादादसंशयम् ॥ एवमुक्त्वा वरारोहे विरराम वृषध्वजः ॥ २४ ॥ रावणोऽपि स संतुष्टो भूयोभूयो महेश्वरम् ॥ पूजयित्वा च तल्लिंगं समारुह्य च पुष्पकम् ॥ त्रैलोक्यविजयाकांक्षी इष्टं देशं जगाम ह ॥ २५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये रावणेश्वरमाहात्म्यवर्णनंनाम त्रयोविंशत्युत्तरशततमोऽध्यायः ॥ १२३ ॥ ॥ छ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि गौरीं सौभाग्यदायिनीम् ॥ पश्चिमे रावणेशस्य धनुषां पञ्चके स्थिताम् ॥ १ ॥ यत्रातप्यत्तपो घोरं स्वयं देवी ह्यरुंधती ॥ सौभाग्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



कांक्षमाणा सा गौरीपूजापरायणा ॥ २ ॥ संप्राप्ता परमां सिद्धिं तस्या देव्याः प्रभावतः ॥ तृतीयायां शुक्लपक्षे माघे मासि वरानने ॥ ३ ॥
यस्तां पूजयते भक्त्या स सौभाग्यमवाप्नुयात् ॥ अन्यजन्मनि देवेशि नात्र कार्या विचारणा ॥ ४ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां
संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये सौभाग्येश्वरीमाहात्म्यवर्णनंनाम चतुर्विंशत्युत्तरशततमोऽध्यायः ॥१२४॥ ॥छ॥ ॥ ईश्वर
उवाच ॥ ॥ ततो गच्छेन्महालिंगं महादेवि सुरप्रियम् ॥ रावणेश्वरवायव्ये धनुषां त्रिंशकेऽन्तरे ॥ १ ॥ स्थितं कामप्रदं लिंगं सर्वपातकनाश
नम् ॥ पौलोमीश्वरनामाढ्यं पौलोम्या संप्रतिष्ठितम् ॥ २ ॥ तारकेण यदा ध्वस्तास्त्रिदशाः संगरे स्थिताः ॥ त्रैलोक्यं विहृतं सर्वं स्वयमिन्द्रत्वमा
गतः ॥ ३ ॥ तदा शक्रः सुदुःखार्तो भयोद्विग्नो ननाश वै ॥ तदा तद्भार्यया देवि इन्द्राण्या शोककर्षया ॥ ४ ॥ इन्द्रस्य जयमिच्छन्त्या शंभुरा
राधितस्तया ॥ ततस्तुष्टो महादेवस्तामुवाच शुभेक्षणाम् ॥ ५ ॥ ॥ भगवानुवाच ॥ ॥ उत्पत्स्यति सुतोऽस्माकं षण्मुखस्तु महाबलः ॥ तारकं
दैत्यराजानं स चैनं घातयिष्यति ॥ ६ ॥ गच्छ त्वं विज्वरा भूत्वा शृणु भूयो वचश्च मे ॥ ७ ॥ अत्र स्थितमिदं लिंगं योऽस्माकं पूजयिष्यति ॥
स नूनं मे गणो भूत्वा मत्सकाशमुपेष्यति ॥ ८ ॥ एवमुक्ता गता साध्वी देवराड्यत्र संस्थितः ॥ सर्वदुःखविनिर्मुक्ता सर्वदैत्यभयोज्झिता ॥ ९ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये पौलोमीश्वरमाहात्म्यवर्णनंनाम पञ्चविंशत्यु
त्तरशततमोऽध्यायः ॥ १२५ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि शांडिल्येश्वरमुत्तमम् ॥ ब्रह्मणः पश्चिमे भागे धनुषां
षोडशांतरे ॥ १ ॥ महाप्रभावं लिङ्गं तद्दर्शनात्पापनाशनम् ॥ २ ॥ शांडिल्योनाम ब्रह्मर्षिः सारथिर्ब्रह्मणः स्मृतः ॥ तपस्वी स महातेजा ज्ञान
निष्ठो जितेन्द्रियः ॥ ३ ॥ स प्रभासं समासाद्य तपस्तेपे सुदारुणम् ॥ प्रतिष्ठाप्य महालिंगं सोमेशादुत्तरे स्थितम् ॥ ४ ॥ स स्वयं पूजयामास
दिव्याब्दानां शतं प्रिये ॥ ततोऽभिलषितं प्राप्य कृतकृत्यो बभूव ह ॥ ५ ॥ नन्दीश्वरप्रसादेन अणिमादिगुणैर्युतः ॥ तं दृष्ट्वा तु नरः सद्यो
विपापः संप्रजायते ॥ ६ ॥ बाल्ये वयसि यत्पापं वार्धक्ये यौवनेऽपि वा ॥ अज्ञानाज्ज्ञानतो वाऽपि यः करोति नरः प्रिये ॥ तत्सर्वं
नाशमायाति शांडिल्येश्वरदर्शनात् ॥ ७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभा
सक्षेत्रमाहात्म्ये शाण्डिल्येश्वरमाहात्म्यवर्णनंनाम षड्विंशत्युत्तरशततमोऽध्यायः ॥ १२६ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो
गच्छेन्महादेवि क्षेमेश्वरमनुत्तमम् ॥ तस्मादुत्तरकोणस्थं कपालेशाग्निगोचरे ॥ १ ॥ धनुषां पंचदशके कपालेश्वरतः स्थितम् ॥ लिंगं



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महाप्रभावं हि सर्वपातकनाशनम् ॥ २ ॥ क्षेममूर्तिः पुरा राजा बभूव स महाबलः ॥ तेन तत्र तपस्तप्तं चिरकालं महात्मना ॥ ॥ ३ ॥ ततः संस्थापितं लिंगं भक्त्या भावितचेतसा ॥ तद्दृष्ट्वा क्षेममायाति कार्यं क्षेमेण सिद्ध्यति ॥ ४ ॥ सर्वकामसमृद्धात्मा भूया जन्मनिजन्मनि ॥ एवं क्षेमेश्वरं लिंगं ख्यातं पातकनाशनम् ॥ ५ ॥ सर्वकामप्रदं नृणां श्रुतं सौभाग्यदायकम् ॥ दर्शनेनापि तस्यापि गोश तस्य फलं स्मृतम् ॥ ६ ॥ तस्मात्क्षेत्रफलाकांक्षी नित्यं तल्लिंगमाश्रयेत् ॥ ७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये क्षेमंकरेश्वरमाहात्म्यवर्णनंनाम सप्तविंशत्युत्तरशततमोऽध्यायः ॥ १२७ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ततो गच्छेन्महादेवि सागरादित्यमुत्तमम् ॥ भैरवेशात्पश्चिमतो रुद्रान्मृत्युञ्जयात्तथा ॥ १ ॥ कामेशाद्दक्षिणाग्नेये नातिदूरे व्यवस्थितम् ॥ सर्व रोगप्रशमनं दारिद्र्यौघविघातकम् ॥ प्रतिष्ठितं महादेवि सगरेण महात्मना ॥ २ ॥ षष्टिपुत्रसहस्राणि यः प्रापारातिसूदनः ॥ सूर्यं तत्र समाराध्य स गरः पृथिवीपतिः ॥ ३ ॥ य एष सागरो देवि योजनायतविस्तरः ॥ आयतोऽशीतिसाहस्रं योजनानां प्रकीर्तितः ॥ ४ ॥ अस्मिन्मन्वन्तरे क्षितः[1] सागरैश्च चतुर्दिशम् ॥ तस्येदं कीर्तितं देवि नाम सागरसंज्ञितम् ॥ ५ ॥ यस्याद्यापीह गायन्ति पुराणे प्रथितं यशः ॥ तेनायं स्थापितो देवो भास्करो वारितस्करः ॥ ६ ॥ तं दृष्ट्वा न जडो नान्धो न दारिद्रो न दुःखितः ॥ न चैवेष्टवियोगी स्यान्न रोगी नैव पापकृत् ॥ ७ ॥ माघे मासि महादेवि सिते पक्षे जितेन्द्रियः ॥ षष्ठ्यामुपोषितो भूत्वा रात्रौ तस्याग्रतः स्वपेत् ॥ ८ ॥ विबुद्धस्त्वथ सप्तम्यां भक्त्या भानुं समर्चयेत् ॥ ब्राह्म णान्भोजयेद्भक्त्या वित्तशाठ्यं विवर्जयेत् ॥ ९ ॥ सुतप्तेनेह तपसा यज्ञैर्वा बहुदक्षिणैः ॥ तां गतिं नन्नरा यान्ति यां गताः सूर्यमाश्रिताः ॥ १० ॥ भक्त्या तु पुरुषैः पूजा कृता दूर्वांकुरैरपि ॥ भानुर्ददाति हि फलं सर्वयज्ञैः सुदुर्लभम् ॥ ११ ॥ तस्मात्सर्वप्रयत्नेन सूर्यमेवाभिपूजयेत् ॥ जनका दयो यथा सिद्धिं गता भानुं प्रपूज्य च ॥ १२ ॥ सर्वात्मा सर्वलोकेशो देवदेवः प्रजापतिः ॥ सूर्य एव त्रिलोकस्य मूलं परमदैवतम् ॥ १३ ॥ वसन्ते कपिलः सूर्यो ग्रीष्मे काञ्चनसप्रभः ॥ श्वेतवणश्च वर्षासु पांडुः शरदि भास्करः ॥ १४ ॥ हेमन्ते ताम्रवर्णस्तु शिशिरे लोहितो रविः ॥ एवं वर्णविशेषेण ध्यायेत्सूर्यं यथाक्रमम् ॥ १५ ॥ पूजयित्वा विधानेन यतात्मा संयतेन्द्रियः ॥ पठेन्नामसहस्रं तु सर्वपातकनाशनम् ॥ ॥ १६ ॥ ॥ देव्युवाच ॥ ॥ नाम्नां सहस्रं मे ब्रूहि प्रसादाञ्छंकर प्रभो ॥ तुल्यं नामसहस्रस्य किमप्यन्यत्प्रकीर्तय ॥ १७ ॥

१ क्षितः—उत्खातः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



॥ ॥ ईश्वर उवाच ॥ ॥ अलं नामसहस्रेण पठस्वैवं शुभं स्तवम् ॥ यानि गुह्यानि नामानि पवित्राणि शुभानि च ॥ तानि ते कीर्तयिष्यामि प्रयत्नादवधारय ॥ १८ ॥ विकर्तनो विवस्वांश्च मार्तण्डो भास्करो रविः ॥ लोकप्रकाशकः श्रीमाँल्लोकचक्षुर्ग्रहेश्वरः ॥ १९ ॥ लोकसाक्षी त्रिलोकेशः कर्त्ता हर्त्ता तमिस्रहा ॥ तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः ॥ २० ॥ गभस्तिहस्तो ब्रह्मा च सर्वदेवनमस्कृतः ॥ एकविंशतिरित्येष स्तव इष्टो महात्मनः ॥ २१ ॥ शरीरारोग्यदश्चैव धनवृद्धियशस्करः ॥ स्तवराज इति ख्यातस्त्रिषु लोकेषु विश्रुतः ॥ ॥ २२ ॥ यश्चानेन महादेवि द्वे संध्येऽस्तमनोदये ॥ स्तौत्यर्कं प्रयतो भूत्वा सर्वपापैः प्रमुच्यते ॥ सर्वकामसमृद्धात्मा सूर्यलोकं स गच्छति ॥ २३ ॥ इत्येवं कथितं देवि माहात्म्यं सागरार्कजम् ॥ श्रुतं दुःखौघशमनं महापातकनाशनम् ॥ २४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये सागरादित्यमाहात्म्यवर्णनंनामाष्टाविंशत्युत्तरशततमोऽध्यायः ॥ ॥ १२८ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि अक्षमालेश्वरं परम् ॥ सागरार्कादीशकोणे पंचाशद्धनुषान्तरे ॥ १ ॥ संस्थितं पापशमनं युगलिंगं महाप्रभम् ॥ अक्षमालेश्वरंनाम पुरा तस्य प्रकीर्तितम् ॥ उग्रसेनेश्वरं नाम ख्यातं तस्यैव साम्प्रतम् ॥ २ ॥ ॥ देव्युवाच ॥ ॥ अक्षमालेश्वरं नाम यत्पूर्वं समुदाहृतम् ॥ कथं तदभवद्देव कथयस्व प्रसादतः ॥ ३ ॥ ॥ ईश्वर उवाच ॥ ॥ आसीत्पुरा महादेवि सती चाधमयोनिजा ॥ अक्षमालेति वै नाम्ना सतीधर्मपरायणा ॥ ४ ॥ कदाचित्समनुप्राप्ते दुर्भिक्षे कालपर्ययात् ॥ ऋषयश्च महादेवि क्षुधाक्रान्ता विचेतसः ॥ ५ ॥ सर्वे चान्नं परीप्संतो गताश्चण्डालवेश्मनि ॥ ज्ञात्वान्नसंग्रहं तस्य प्रार्थयाश्चक्रुरन्त्यजम् ॥ ६ ॥ भोभोऽन्त्यज महाबुद्धे रक्षास्मानन्नदानतः ॥ प्राणसंदेहमापन्नान्कृशांगान्क्षुत्प्रपीडितान् ॥ ७ ॥ अहो धन्योऽसि पुण्योऽसि न त्वमन्त्यज उच्यसे ॥ यदस्मिन्प्रलये याते स्थितं धान्यं गृहे तव ॥ ८ ॥ अनावृष्टिहते देशे सस्ये च प्रलयं गते ॥ एकं यो भोजयेद्विप्रं कोटिर्भवति भोजिता ॥ ९ ॥ ॥ अन्त्यज उवाच ॥ ॥ अहो आश्चर्यमतुलं यदेतद्दृश्यतेऽधुना ॥ यदेतन्मद्गृहं प्राप्ता ऋषयश्चान्नकांक्षिणः ॥ १० ॥ शूद्रान्नमपि नादेयं ब्राह्मणैः किमुतान्त्यजात् ॥ ११ ॥ आमं वा यदि वा पक्वं शूद्रान्नं यस्तु भक्षति ॥ स भवेच्छूकरो ग्राम्यस्तस्य वा जायते कुले ॥ १२ ॥ अमृतं ब्राह्मणस्यान्नं क्षत्रियान्नं पयः स्मृतम् ॥ वैश्यान्नमन्नमित्याहुः द्रान्नं शूरुधिरं स्मृतम् ॥ १३ ॥ शूद्रान्नं शूद्रसंपर्कं शूद्रेण च सहासनम् ॥ शूद्रादन्नागमश्चैव ज्वलंतमपि पातयेत् ॥ १४ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अग्निहोत्री तु यो विप्रः शूद्रान्नान्न निवर्तते ॥ एते तस्य प्रणश्यंति आत्मा ब्रह्म त्रयोऽग्नयः ॥ १५ ॥ शूद्रान्नेनोदरस्थेन ब्राह्मणो म्रियते यदि ॥ षण्मासाभ्यन्तरे विप्रः पिशाचः सोऽभिजायते ॥ १६ ॥ शूद्रान्नेन द्विजो यस्तु अग्निहोत्रं जुहोति च ॥ चण्डालो जायते प्रेत्य शूद्राश्चैवेह दैवतः ॥ १७ ॥ यस्तु भुञ्जति शूद्रान्नं मासमेकं निरन्तरम् ॥ इह जन्मनि शूद्रत्वं मृतः शूद्रोऽभिजायते ॥ १८ ॥ राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसम् ॥ आयुः सुवर्णकारान्नं यशश्चर्मावकर्तिनः ॥ १९ ॥ कारुकान्नं प्रजा हन्ति बलं निर्णेजकस्य च ॥ गणान्नं गणिकान्नं च लोकेभ्यः परिकृन्तति ॥ २० ॥ पूयं चिकित्सकस्यान्नं पुंश्चल्याश्चान्नमिन्द्रियम् ॥ विष्ठा वार्धुषिकस्यान्नं शस्त्रविक्रयिणो मलम् ॥ २१ ॥ सहस्रकृत्वस्त्वेतेषामन्ने यद्भक्षिते भवेत् ॥ तदेकवारं भुक्तेन कन्याविक्रयिणो भवेत् ॥ २२ ॥ सहस्रकृत्वस्तस्यैव भुक्तेऽन्ने यत्फलं भवेत् ॥ तदन्त्यजानामन्नेन सकृद्भुक्तेन वै भवेत् ॥ २३ ॥ तत्कथं मम विप्रेन्द्राश्चंडालस्याधमात्मनः ॥ धर्ममेवं विजानन्तो नूनमन्नं जिहीर्षथ ॥ २४ ॥ ॥ ॥ ऋषय ऊचुः ॥ ॥ जीवितात्ययमापन्नो योऽन्नमाद्रियते ततः ॥ आकाश इव पंकेन न स पापेन लिप्यते ॥ २५ ॥ अजीगर्तः सुतं हंतुमुपसर्पन्बुभुक्षितः ॥ न चालिप्यत पापेन क्षुत्प्रतीघातमाचरन् ॥ २६ ॥ भारद्वाजः क्षुधार्तस्तु सपुत्रो विजने वने ॥ बह्वीर्गा उपजग्राह बृहज्योतिर्महामनाः ॥ २७ ॥ क्षुधार्तो गीतमभ्यागाद्विश्वामित्रः श्वजाघनीम् ॥ चण्डालहस्तादादाय धर्माधर्मविचक्षणः ॥ २८ ॥ श्वमांसमिच्छन्नर्तो तु धर्मान्न च्ययते स्म सः ॥ प्राणानां परिरक्षार्थं वामदेवो न लिप्तवान् ॥ २९ ॥ एवं ज्ञात्वा धर्मबुद्धे सांप्रतं मा विचारय ॥ ददस्वान्नं ददस्वान्नमस्माकमिह याचताम् ॥ ३० ॥ ॥ चंडाल उवाच ॥ ॥ यद्येवं भवतां कार्यमिदमंगीकृतं ध्रुवम् ॥ तदियं मत्सुता कन्या भवद्भिः परिगृह्यताम् ॥ ३१ ॥ भवतां योऽग्रणीर्ज्येष्ठः स चेमामुद्वहेद्ध्रुवम् ॥ दास्ये वर्षाशनं पश्चादीप्सितं भवतां द्विजाः ॥ ३२ ॥ ॥ ईश्वर उवाच ॥ ॥ इत्युक्ता ऋषयो देवि लज्जयाऽऽनतकन्धराः ॥ प्रत्यालोच्य यथान्यायं वसिष्ठं समनूद्वहन् ॥ ३३ ॥ वसिष्ठोऽपि समाख्याय आपद्धर्मं महामनाः ॥ कालस्यानन्तरप्रेक्षी प्रोद्वाहाऽन्त्यजाङ्गनाम् ॥ अक्षमालेति वै नाम्नीं प्रसिद्धां भुवनत्रये ॥ ३४ ॥ यदा स्वकीयतेजोभिरर्कबिंबमरुन्धत ॥ अरुंधती तदा जाता देवदानववंदिता ॥ ३५ ॥ यादृशेन तु भर्त्रा स्त्री संयुज्येत यथाविधि ॥ सा तादृगेव भवति समुद्रेणेव निम्नगा ॥ ३६ ॥ अक्षमाला वसिष्ठेन संयुक्ताऽधमयोनिजा ॥ शार्ङ्गीव मन्दपालेन जगाम ह्यर्हणीयताम् ॥ ३७ ॥ एवं कालक्रमेणैव प्रभासं क्षेत्रमागताः ॥ सप्तर्षयो महात्मानो ह्यरुंधत्या सम

१ ब्रह्म—वेदः—इत्यर्थः । २ जिहीर्षथ—ग्रहीतुमिच्छथ—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



न्विताः ॥ ३८ ॥ तीर्थानि प्रेषयामासुः सर्वसिद्धिप्रदानि ताम् ॥ ३९ ॥ एषामन्वेषमाणानां तत्र देवी ह्यरुंधती ॥ अपश्यल्लिंगमेकं तु वृक्षजालांतरे स्थितम् ॥ ४० ॥ तं दृष्ट्वा देवदेवेशमेवं जातिस्मराऽभवत् ॥ पूर्वस्मिञ्जन्मनि मया रजोभावांतरस्थया ॥ ४१ ॥ अज्ञानभावाद्देवेशो नूनं चात्रार्चितः शिवः ॥ तस्मात्कर्मफलं प्राप्तमन्त्यजत्वं द्विजन्मना[1] ॥ ४२ ॥ कस्तेन सदृशो देवः शंभुना भुवनत्रये ॥ राज्यं नियमिनामेवं यो रुष्टोऽपि प्रयच्छति ॥ ४३ ॥ इति संचिंत्य मनसा तत्रैव निरताऽभवत् ॥ पूजयामास तल्लिंगं[2] दिव्याब्दानां शतं प्रिये ॥ ४४ ॥ एवं तस्य प्रभावेन दृश्यते गगनांतरे ॥ अरुंधती सती ह्येषा दृष्टा दुष्कृतनाशिनी ॥ ४५ ॥ अक्षमालेश्वरस्त्वेवं यथावत्कथितस्तव ॥ ततस्तु द्वापरस्यान्ते कलौ संध्यांशके गते ॥ ४६ ॥ अंधासुरसुतश्चासीदुग्रसेन इति श्रुतः ॥ स प्रभासं समासाद्य पुत्रार्थं लिंगमेयिवान् ॥ ४७ ॥ अक्षमालेश्वरंनाम ज्ञात्वा माहात्म्यमद्भुतम् ॥ समाराध्य महादेवं नव वर्षाणि पंच च ॥ संप्राप्तवांस्तदा पुत्रं कंसासुरमिति श्रुतम् ॥ ४८ ॥ तत्कालान्तरमारभ्य उग्रसेनेश्वरोऽभवत् ॥ पापघ्नं सर्वजंतूनां दर्शनात्स्पर्शनादपि ॥ ४९ ॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः ॥ महान्ति पातकान्याहुर्नश्यंति तस्य दर्शनात् ॥ ५० ॥ तत्रैव ऋषिपञ्चम्यां प्राप्ते भाद्रपदे शुभे ॥ अक्षमालेश्वरं पूज्य मुच्यते नारकाद्भयात् ॥ ५१ ॥ गोप्रदानं प्रशंसंति तत्रान्नमुदकं तथा ॥ सर्वपापविनाशाय प्रेत्यानंतसुखाय च ॥ ५२ ॥ इति ते कथितं देवि ह्यक्षमालेश्वरोद्भवम् ॥ माहात्म्यं पापशमनं श्रुतं दुःखनिबर्हणम् ॥ ५३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्य उग्रसेनेश्वरमाहात्म्यवर्णनंनामैकोनत्रिंशदुत्तरशततमोऽध्यायः ॥ १२९ ॥ ॥ छ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि देवं पाशुपतेश्वरम् ॥ उग्रसेनेश्वराद्देवि पूर्वभागे व्यवस्थितम् ॥ १ ॥ गोपादित्यात्तथाग्नेय्यां ध्रुवेशाद्दक्षिणां श्रितम् ॥ सर्वपापहरं देवि पूर्वभागे व्यवस्थितम् ॥ २ ॥ गोपादित्यात्तथा लिंगं दर्शनात्सर्वकामदम् ॥ अस्मिन्युगे समाख्यातं संतोषेश्वरसंज्ञितम् ॥ ३ ॥ संतुष्टो भगवान्यस्मात्तेषां तत्र तपस्विनाम् ॥ तेन संतोषनाम्ना तु प्रख्यातं धरणीतले ॥ ४ ॥ युगलिंगं महादेवि सिद्धिस्थानं महाप्रभम् ॥ स्थानं पाशुपतानां च भेषजं पापरोगिणाम् ॥ ५ ॥ चत्वारो मुनयः सिद्धास्तस्मिँल्लिंगे यशस्विनि ॥ वामदेवस्तु सावर्णिरघोरः कपिलस्तथा ॥ तस्मिँल्लिंगे तु संसिद्धा अनादीशे निरंजने ॥ ६ ॥ तस्य देवस्य सामीप्ये वने श्रीमुखसंज्ञितम् ॥ लक्ष्मीस्थानं महादेवि सिद्धयोगैस्तु सेवितम् ॥ ७ ॥ तत्र पाशुपताः श्रेष्ठा मम लिंगार्चने रताः ॥ तेषां चैव निवासार्थं

१ द्विजन्मना-द्विजया-इत्यर्थः । २ लिंगम्--अत्र विशेष्यम् ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेव्या निर्मितं वनम् ॥ ८ ॥ तस्य मध्ये तु सुश्रोणि लिंगं पूर्वमुखं स्थितम् ॥ तस्मिन्पाशुपताः सिद्धा अघोराद्या महर्षयः ॥ अनेनैव शरीरेण गतास्ते शिवमन्दिरम् ॥ ९ ॥ तत्र प्राभासिके क्षेत्रे सुरसिद्धनिषेविते ॥ रोचते मे सदा वासस्तस्मिन्नायतने शुभे ॥ सर्वेषामेव स्थानानामति रम्यमतिप्रियम् ॥ १० ॥ तत्र पाशुपता देवि मम ध्यानपरायणाः ॥ मम पुत्रास्तु ते सर्वे ब्रह्मचर्येण संयुताः ॥ ११ ॥ दान्ताः शांता जितक्रोधा ब्राह्मणास्ते तपस्विनः ॥ तल्लिंगस्य प्रभावेन सिद्धिं ते परमां गताः ॥ १२ ॥ तस्मात्तं पूजयेन्नित्यं क्षेत्रवासी द्विजोत्तमः ॥ १३ ॥ ॥ देव्युवाच ॥ ॥ भगवन्देवदेवेश संसारार्णवतारक ॥ प्रभासे तु महाक्षेत्रे त्वदीयव्रतचारिणाम् ॥ १४ ॥ स्थानं तेषां महत्पुण्यं योगं पाशुपतं तथा ॥ कथयस्व प्रसादेन लिंगमाहात्म्यमुत्तमम् ॥ १५ ॥ किमादिनाम देवस्य कथं पूज्यो नरोत्तमैः ॥ कथं पाशुपतास्तत्र सदेहाः स्वर्गमागताः ॥१६॥ एतत्कथय देवेश दयां कृत्वा मम प्रभो ॥ १७ ॥ ॥ ईश्वर उवाच ॥ ॥ यस्त्वया पृच्छयते भद्रे योगः पाशुपतो महान् ॥ तेषां चैव प्रभावो यस्तथा लिंगस्य सुव्रते ॥ १८ ॥ अनादीशस्य देवस्य आदिनाम महाप्रभे ॥ तस्मिँल्लिंगे तु ये देवि मदीयव्रतमाश्रिताः ॥ १९ ॥ चिरं नियोगं सुश्रोणि व्रतं पाशुपतं महत् ॥ धारयंति यथोक्तं तु मम विस्मयकारकम् ॥ तेषामनुग्रहार्थाय मम चित्तं प्रधावति ॥ २० ॥ ॥ सूत उवाच ॥ ॥ हरस्य वचनं श्रुत्वा देवी विस्मयमागता ॥ उवाच वचनं विप्राः सर्वलोकपतिं पतिम् ॥ २१ ॥ ममापि कौतुकं देव किमकार्षीत्ततो भवान् ॥ तद्ब्रूहि मे महादेव यद्यहं तव वल्लभा ॥ २२ ॥ तस्यास्तद्वचनं श्रुत्वा महादेवो जगाद ताम् ॥ शृणु देवि प्रवक्ष्यामि मम भक्तविचेष्टितम् ॥ २३ ॥ दृष्ट्वा चैव तपोनिष्ठां तेषामाद्यः सुरेश्वरः ॥ उवाच वचनं देवः प्रणतान्पार्श्वतः स्थितान् ॥ २४ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ गच्छ शीघ्रं नन्दिकेश यत्र ते मम पुत्रकाः ॥ चरंति च व्रतं घोरं मदीयं चातिदुष्करम् ॥ २५ ॥ तत्क्षेत्रस्य प्रभावेन भक्त्या च मम नित्यशः ॥ तेन ते मुनयः सिद्धाः स्वशरीरेण सुव्रताः ॥ २६ ॥ तस्मान्मद्वचनान्नन्दिन्गच्छ प्राभासिकं शुभम् ॥ आमन्त्रय त्वं तान्सर्वान्कैलासं शीघ्रमानय ॥ २७ ॥ इदं पद्मं गृहाण त्वं सनालं कलिकोज्ज्वलम् ॥ लिंगस्य मूर्ध्नि दत्त्वेदं पद्मनालमिहानय ॥ २८ ॥ मुक्तस्तदा स वै नन्दी देवदेवेन शंभुना ॥ कैलासनिलयात्तस्मात्प्रभासं क्षेत्रमागतः ॥ २९ ॥ दृष्ट्वा चैव पुनर्लिङ्गं देवदेवस्य शूलिनः ॥ दृष्ट्वा तांश्चैव योगीन्द्रान्परं विस्मयमागतः ॥ ३० ॥ केचिद्ध्यानरतास्तत्र केचिद्योगं समाश्रिताः ॥ केचिद्व्याख्यां प्रकुर्वन्ति विचारमपि चापरे ॥३१॥ कुर्वन्त्यन्ये लिंगपूजां प्रणामं च तथाऽपरे ॥ प्रदक्षिणं प्रकुर्वन्ति साष्टांगं प्रणमन्ति च ॥ ३२ ॥ केचित्स्तुतिं प्रकुर्वन्ति भावयज्ञैस्तथा परे ॥ केचि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





त्पूजां च कुर्वन्ति अहिंसाकुसुमैः शुभैः ॥ ३३ ॥ भस्मस्नानं प्रकुर्वंति गण्डुकैः स्नापयन्ति च ॥ एवं व्याकुलतां यातं तपस्विगणमण्डलम् ॥ ३४ ॥ तत्तादृशमथालोक्य नन्दी विस्मयमागतः ॥ चिन्तयामास मनसा सर्वं तेषां निरीक्ष्य च ॥ ३५ ॥ आगतोऽहमिमं देशं न कश्चिन्मां निरीक्षते ॥ न केनचिदहं पृष्टोऽभ्यागतः कुत्र कस्य च ॥ ३६ ॥ अहंकारावृताः सर्वे न वदन्ति च मां क्वचित् ॥ एवं मनसि संधाय लिंगपार्श्वमुपागतः ॥ ॥ ३७ ॥ दत्तं लिंगस्य तत्पद्मनालं छित्त्वा तु नन्दिना ॥ अर्चयित्वा तु तन्नन्दी लिंगं पाशुपतेश्वरम् ॥ नालं गृहीत्वा यत्नेन ऋषीन्वचनमब्रवीत् ॥ ३८ ॥ ॥ नन्दिकेश्वर उवाच ॥ ॥ शासनाद्देवदेवस्य भवतां पार्श्वमागतः ॥ आज्ञापयति देवेशस्तपस्विगणमण्डलम् ॥ ३९ ॥ युष्माभिस्तत्र गन्तव्यं यत्र देवः सनातनः ॥ युष्मान्सर्वान्समादाय गमिष्यामि भवालयम् ॥ ४० ॥ उत्तिष्ठताशु गच्छामः कैलासं पर्वतोत्तमम् ॥ तूष्णींभूतास्ततः सर्वे प्रोचुस्ते संज्ञया द्विजाः ॥ गम्यतामग्रतो नन्दिन्पश्चादेष्यामहे वयम् ॥ ४१ ॥ एवमुक्तस्तु मुनिभिर्नन्दी शीघ्रतरं गतः ॥ कथयामास तत्सर्वं कुपितेनान्तरात्मना ॥ ४२ ॥ ॥ नन्दिकेश्वर उवाच ॥ ॥ देव तत्र गतोऽहं वै यत्र ते योगिनः स्थिताः ॥ सन्तोषितो न चैवाहं केनचित्तत्र संस्थितः ॥ ४३ ॥ न मां देव निरीक्षन्ते नालपंति कथंचन ॥ पद्मं तत्र मया देव स्थापितं लिंगमूर्धनि ॥ ४४ ॥ उक्तं देव मया तेषां योगीन्द्राणां महेश्वर ॥ आज्ञता देवदेवेन इहागच्छत मा चिरम् ॥ ४५ ॥ एतच्छ्रुत्वा वचः स्वामिन्सर्वे तत्र महर्षयः ॥ आगमिष्याम इति वै पृष्ठतो गच्छ मा चिरम् ॥ ४६ ॥ इत्युक्ते तैस्तथा देव अहं शीघ्रमिहागतः ॥ नालं चेमं गृहाण त्वं यथेष्टं कुरु मे प्रभो ॥ ४७ ॥ एकं मे संशयं देव च्छेत्तुमर्हसि सांप्रतम् ॥ मया विना महादेव आगमिष्यंति ते कथम् ॥ संशयो मे महादेव कथयस्व महेश्वर ॥ ४८ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु नंदिन्यथाश्चर्यं तेषां वै भावितात्मनाम् ॥ न दृश्यन्त इमे सिद्धा मां मुक्त्वाऽन्यैः सुरैरपि ॥४९॥ मद्भावभावितास्ते वै योगं विंदंति शांकरम् ॥ पश्यैतत्कौतुकं नंदिन्दर्शयामि तवाधुना ॥ ५० ॥ आनीतं यत्त्वया नालं तस्मिन्नाले तु सूक्ष्मवत् ॥ प्रविश्य चागताः सर्वे योगैश्वर्यबलेन च ॥५१॥ एवमुक्तस्तदा नंदी विस्मयोत्फुल्ललोचनः ॥ अपश्यन्नालमध्यस्थान्महर्षीन्परमाणुवत् ॥५२॥ यथार्करश्मिमध्यस्था दृश्यन्ते परमाणवः ॥ एवं तन्नालमध्यस्था दृश्यंत ऋषयः पृथक् ॥ ५३ ॥ एवं दृष्ट्वा तदा नंदी विस्मयोत्फुल्ललोचनः ॥ आश्चर्यं परमं गत्वा किंचिन्नैवाब्रवीत्पुनः ॥ ५४ ॥ एवं तत्कौतुकं दृष्ट्वा देवी वचनमब्रवीत् ॥ किं दृश्यते महादेव हृष्टः कस्मान्महेश्वर ॥५५॥ इत्युक्ते वचने देव्या प्रोवाचेदं महेश्वरः ॥ ॥५६॥ ॥ ईश्वर उवाच ॥ ॥ योगयुक्ता महात्मानो योगे पाशुपते स्थिताः ॥ एते मां च समाराध्य प्रभासक्षेत्रवासिनम् ॥ ईदृशीं सिद्धिमापन्नाः



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वच्छंदगतिचारिणः ॥ ५७ ॥ इत्युक्तवति देवेश ऋषयस्ते महाप्रभाः ॥ पद्मनालाद्विनिःसृत्य सर्वे वै योगमायया ॥ प्रदक्षिणां प्रकुर्वंति देवं देव्या बहिष्कृतम् ॥ ५८ ॥ ॥ देव्युवाच ॥ ॥ किमर्थं मां न पश्यंति दुराचारा इमे द्विजाः ॥ विस्मयोऽयं महादेव कथयस्व प्रसादतः ॥ ५९ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ प्रकृतित्वान्न पश्यंति सिद्धा ह्येते महातपाः ॥ एवमुक्ता तु गिरिजा देवेदेवेन शूलिना ॥ ६० ॥ चुकोप तेषां सुश्रोणी शशाप क्रोधितानना ॥ स्त्रीलौल्येन दुराचारा नाशमेष्यथ गर्विणः ॥ ६१ ॥ राजप्रतिग्रहासक्ता वृत्त्या देवार्चने रताः॥ भविष्यथ कलौ प्राप्ते लिंग द्रव्योपजीविनः ॥ ६२ ॥ वेश्यासक्ताश्च संभ्रांताः सर्वलोकबहिष्कृताः ॥ देवद्रव्यविनाशाय भविष्यथ कलौ युगे ॥ ६३ ॥ इति दत्ते तदा शाप ऋषीणां च महात्मनाम् ॥ गौरीं प्रसादयामासुस्ते च सर्वे सुरेश्वराः ॥ ६४ ॥ देवदेवस्य वचनात्प्रसन्ना साऽभवत्पुनः ॥ नालं देवोऽपि संगृह्य दक्षिणाशां समाक्षिपत् ॥ ६५ ॥ पतितं तच्च वै नालं प्रभासक्षेत्रमध्यतः ॥ तदेव लिंगं संजातं महानालेति विश्रुतम् ॥ ६६ ॥ कलौ युगे च संप्राप्ते तद्भवेश्वरसंज्ञितम् ॥ संस्थितं चोत्तरेशाने तस्मात्पाशुपतेश्वरात् ॥६७ ॥ पुराऽनादीशनामेति पश्चात्पाशुपतेश्वरः ॥ प्रभासे तु महाक्षेत्रे स्थितः पातकनाशनः ॥६८॥ इदं स्थानं परं श्रेष्ठं मम व्रतनिषेवणम् ॥ इदं लिंगं परं ब्रह्म अनादीशेति संज्ञितम् ॥ ६९ ॥ अत्र सिद्धिश्च मुक्तिश्च ब्राह्मणानां न संशयः ॥ अनेनैव शरीरेण षड्भिर्मासैस्तु सिद्ध्यति ॥ ७० ॥ संसारस्य विमोक्षार्थमिदं लिंगं तु दृश्यताम् ॥ दुर्लभं सर्वलोकाना मिदं मोक्षप्रदं परम् ॥ इदं पाशुपतं ज्ञानमस्मिँल्लिंगे प्रतिष्ठितम् ॥ ७१ ॥ यश्चैनं पूजयेद्भक्त्या माघे मासि निरंतरम् ॥ सर्वेषां वै क्रतूनां च दानानां लभते फलम् ॥ ७२ ॥ हिरण्यं तत्र दातव्यं सम्यग्यात्राफलेप्सुभिः ॥ ७३ ॥ इत्येतत्कथितं देवि माहात्म्यं पापनाशनम् ॥ पशुपाशविमोक्षार्थं सम्यक्पाशुपतेश्वरम् ॥ ७४ ॥ चतुर्णामपि वर्णानां पूज्यो ब्राह्मण उच्यते ॥ तस्य चैवाधिकारोऽस्ति चास्मिन्पाशुपतेश्वरे ॥ ७५ ॥ यद्देवतानां प्रथमं पवित्रं विश्वव्रतं पाशुपतं बभूव ॥ अयं पन्था नैष्ठिको वै मयोक्तो येन देवा यांति भुवनानि विश्वा ॥ ७६ ॥ सुरां पीत्वा गुरुदारांश्च गत्वा स्तेयं कृत्वा ब्राह्मणं चापि हत्वा ॥ भस्मच्छन्नो भस्मशय्याशयानो रुद्राध्यायी मुच्यते पातकेभ्यः ॥ ७७ ॥ अग्निरित्यादिना भस्म गृहीत्वांगानि संस्पृशेत् ॥ गृह्णीयात्संयते चाग्नौ भस्म तद्गृहवासिनाम् ॥ ७८ ॥ अग्निरिति भस्म वायुरिति भस्म जलमिति भस्म स्थलमिति भस्म सर्वं ह वा इदं भस्माभवत् ॥ एतानि चक्षूंषि नादीक्षितः संस्पृशेत् ॥ ७९ ॥ ब्राह्मणैश्च समादेयं न तु शूद्रैः कदाचन ॥ नाधिकारोऽस्ति शूद्रस्य व्रते पाशुपते सदा ॥ ८० ॥ ब्राह्मणेष्वधिकारोऽस्ति व्रते पाशुपते शुभे ॥ ब्राह्मणीं तनुमास्थाय संभवामि युगेयुगे ॥ ८१ ॥ चण्डालवेश्मन्यथ वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





श्मशाने राज्ञश्च मार्गेष्वथ वर्त्ममध्ये ॥ करीषमध्ये निःसृता नराधमाः शैवं पदं यांति न संशयोऽत्र ॥ ८२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये पाशुपतेश्वरमाहात्म्यवर्णनंनाम त्रिंशदुत्तरशततमोध्यायः ॥ १३० ॥ ॥ छ ॥ ॥ ॥ श्रीदेव्युवाच ॥ ॥ यदेतद्भवता प्रोक्तं नालेश्वरमिति श्रुतम् ॥ ध्रुवेश्वरेति तल्लिंगं कथं वै संबभूव ह ॥ १ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि ध्रुवेश्वरमहोदयम् ॥ यच्छ्रुत्वा मानवो देवि मुच्यते भवबंधनात् ॥ २ ॥ उत्तानपादनृपतेः पुत्रोऽभूद्ध्रुवसंज्ञितः ॥ महात्मा ज्ञानसंपन्नः सर्वज्ञः प्रियदर्शनः ॥ ३ ॥ स कदाचित्समासाद्य प्रभासं क्षेत्रमुत्तमम् ॥ तताप विपुलं देवि तपः परमदारुणम् ॥ ४ ॥ दिव्यं वर्षसहस्रं तु प्रतिष्ठाप्य महेश्वरम् ॥ संपूजयति सद्भक्त्या स्तौति स्तोत्रैः पृथग्विधैः ॥ ५ ॥ तत्स्तोत्रं ते प्रवक्ष्यामि येनाहं तुष्टिमागतः ॥ ६ ॥ ॥ ध्रुव उवाच ॥ ॥ कैलासतुंगशिखरं प्रविकम्प्यमानं कैलासशृंगसदृशेन दशाननेन ॥ यः पादपद्मपरिपीडनया दधार तं शंकरं शरणदं शरणं व्रजामि ॥ ७ ॥ येनासुराश्चापि दनोश्च पुत्रा विद्याधरोरगगणैश्च वृताः समग्राः ॥ संयोजिता[1] न तु फलं फलमूलभुक्तास्तं शंकरं शरणदं शरणं व्रजामि ॥ ८ ॥ यस्याखिलं जगदिदं वशवर्ति नित्यं योऽष्टाभिरेव तनुभिर्भुवनानि भुंक्ते ॥ यत्कारणं परमकारणकारणानां तं शंकरं शरणदं शरणं व्रजामि ॥९॥ यः सव्यपाणिकमलाग्रनखेन देवस्तत्पंचमं च सहसैव पुरातिरुष्टः ॥ ब्राह्मं शिरस्तरुणपद्मनिभं चकर्त तं शंकरं शरणदं शरणं व्रजामि ॥१०॥ यस्य प्रणम्य चरणौ वरदस्य भक्त्या श्रुत्वा च वाग्भिरमलाभिरतंद्रिताभिः ॥ दीप्तस्तमांसि नुदति स्वकरैर्विवस्वांस्तं शंकरं शरणदं शरणं व्रजामि ॥ ॥ ११ ॥ यः पठेत्स्तवमिदं रुचिरार्थं मानवो ध्रुवकृतं नियतात्मा ॥ विप्रसंसदि सदा शुचिसिद्धः स प्रयाति शिवलोकमनादिम् ॥ १२ ॥ तस्यैवं स्तुवतो देवि तुष्टोऽहं भावितात्मनः ॥ पूर्णे वर्षसहस्रांते ध्रुवस्याह महात्मनः ॥ १३ ॥ पुत्र तुष्टोऽस्मि भद्रं ते जातस्त्वं निर्मलोऽधुना ॥ दिव्यं ददामि ते चक्षुः पश्य मां विगतज्वरः ॥ १४ ॥ यच्च ते मनसा किञ्चित्कांक्षितं फलमुत्तमम् ॥ तत्सर्वं ते प्रदास्यामि ब्रूहि शीघ्रं ममाग्रतः ॥ १५ ॥ ब्राह्म्यं वा वैष्णवं शाक्रं पदमन्यत्सुदुर्लभम् ॥ ददामि नात्र संदेहो भक्त्या संप्रीणितस्तव ॥ १६ ॥ ॥ ध्रुव उवाच ॥ ॥ ब्राह्म्यं वैष्णवं माहेन्द्रं पदमावृत्तिलक्षणम् ॥ विदितं मम तत्सर्वं मनसाऽपि न कामये ॥ १७ ॥ यदि तुष्टोऽसि मे देव भक्तिं देहि सुनिर्मलाम् ॥ अस्मिँल्लिंगे सदा वासं कुरु देव वृषध्वज ॥ १८ ॥ ॥ ईश्वर उवाच ॥ ॥ इति यत्प्रार्थितं सर्वं तद्दत्तं सर्वमेव हि ॥ स्थानं च तस्य तद्ध्रौव्यं तद्विष्णोः परमं पदम् ॥१९॥



१ संयोजिता न तु फलम्—फलाकांक्षाविरहिताः कृताः—सर्वार्थपरिपूर्णतया जीवन्मुक्तदशां प्रापिताः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रावणस्य त्वमावास्यां यस्तल्लिंगं प्रपूजयेत् ॥ आश्वयुक्पौर्णमास्यां वा सोऽश्वमेधफलं लभेत् ॥ २० ॥ अपुत्रो लभते पुत्रं धनार्थी लभते धनम् ॥ रूपवान्सुभगो भोगी सर्वशास्त्रविशारदः ॥ हंसयुक्तविमानेन रुद्रलोके महीयते ॥ २१ ॥ असुरसुरगणानां पूजितस्य ध्रुवस्य कथयति कमनीयां कीर्तिमेतां शृणोति ॥ सकलसुखनिधानं रुद्रलोकं सुशांतः सुरगणदनुनाथैरर्चितं यात्यनंतम् ॥ २२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये ध्रुवेश्वरमाहात्म्यवर्णनंनामैकत्रिंशदुत्तरशततमो ऽध्यायः ॥१३१॥ ॥ छ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि वैष्णवीं शक्तिमुत्तमाम् ॥ सोमेशादीशदिग्भागे नातिदूरे व्यवस्थिताम् ॥ १ ॥ सिद्धलक्ष्मीति विख्याता ह्यत्र पीठाधिदेवता ॥ २ ॥ ब्रह्माण्डे प्रथमं पीठं यत्प्रभासं व्यवस्थितम् ॥ तत्र देवि महापीठे योगिन्यो भूचराः खगाः ॥ भैरवेण समं तास्तु क्रीडन्ते स्वेच्छया प्रिये ॥ ३ ॥ जालंधरं महापीठं कामरूपं तथैव च ॥ श्रीमद्रुद्रनृसिंहं च चतुर्थं पीठमुत्तमम् ॥ ४ ॥ रत्नवीर्यं महापीठं काश्मीरं पीठमेव च ॥ एतानि देवि पीठानि यो वेत्ति स च मन्त्रवित् ॥ ५ ॥ सर्वेषां चैव पीठानामाधारं पीठमुत्तमम् ॥ सौराष्ट्रे तु महादेवि नाम्ना ख्यातं महोदयम् ॥ कामरूपधरं ज्ञानं यत्राद्यापि प्रवर्तते ॥ ६ ॥ तत्र पीठे स्थिता देवी महालक्ष्मीति विश्रुता ॥ सर्वपापप्रशमनी सर्वकार्यशुभप्रदा ॥ ७ ॥ श्रीपञ्चम्यां नरो यस्तु पूजयेत्तां विधानतः ॥ गन्धपुष्पादिभिर्भक्त्या तस्यालक्ष्मीभयं कुतः ॥ ८ ॥ उत्तरां दिशमास्थाय महालक्ष्म्यास्तु सन्निधौ ॥ यो जपेन्मन्त्रराज्ञीं तां सिद्धलक्ष्मीति विश्रुताम् ॥ ९ ॥ लक्षजाप्यविधानेन दीक्षास्नानादिपूर्वकम् ॥ दशांशहोमसंयुक्तं त्रिमधुश्रीफलेसुभिः ॥ १० ॥ एवं प्रत्यक्षतां याति तस्य लक्ष्मीर्न संशयः ॥ ददाति वांछितां सिद्धिमिह लोके परत्र च ॥ ११ ॥ तृतीयायामथाष्टम्यां चतुर्दश्यां विधानतः ॥ यस्तां पूजयते भक्त्या तस्य सिद्धिः करे स्थिता ॥ १२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये सिद्धलक्ष्मीमाहात्म्यवर्णनंनाम द्वात्रिंशदुत्तरशततमोऽध्यायः ॥ १३२ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तत्रैव संस्थिता देवि महाकालीति विश्रुता ॥ अधः स्थिते महापीठे पातालविवरान्विते ॥ १ ॥ सर्वदुःखप्रशमनी सर्वशत्रुक्षयंकरी ॥ पूजनीया विधानेन कृष्णाष्टम्यां महानिशि ॥ गन्धैः पुष्पैस्तथा धूपैः क्रव्यैर्बलिभिरेव च ॥ २ ॥ फलतृतीयां नारी च कुर्याद्वै तत्र भाविता ॥ वर्षमेकं सिते पक्षे देवीं पूज्य विधानतः ॥ फलानि ब्राह्मणे देयान्येव नूनं विधानतः ॥ ३ ॥ एतानि वर्जयेन्नक्ते ह्यन्नानि सुरसुन्दरि ॥ निष्पावा आढकी मुद्गा माषाश्चैव कुलित्थकाः ॥ ४ ॥ मसूरा राजमाषाश्च गोधूमास्त्रिपुटास्तथा ॥ चणका वर्तला वापि मकुष्ठाश्चैवमादयः ॥ ५ ॥ न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

भक्ष्यास्तावत्ते देवि यावद्गौरीव्रतं चरेत् ॥ तस्याः पुण्यफलं वक्ष्ये कथ्यमानं शृणुष्व मे ॥ ६ ॥ धनं धान्यं गृहे तस्या न कदाचित्क्षयं व्रजेत् ॥
दुःखिता दुर्भगा दीना सप्त जन्मानि नो भवेत् ॥ ७ ॥ महाकालीव्रतं प्रोक्तं देव्या माहात्म्यसंयुतम् ॥ कृतं पातकनाशाय सर्वकामसमृद्धये ॥ ८ ॥
एवं देवि समाख्यातं महाकालीमहोदयम् ॥ क्षेत्रपीठं महादेवि मन्त्रसिद्धिप्रदायकम् ॥ ९ ॥ आश्वयुक्छुक्लपक्षे तु नवम्यां तत्र जागृयात् ॥ पीठे
पूजाबलिं दत्त्वा मन्त्रं कामं जपन्निशि ॥ सौम्यचित्तः समाप्नोति वांछितां सिद्धिमुत्तमाम् ॥ १० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां
संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये महाकालीमाहात्म्यवर्णनंनाम त्रयस्त्रिंशदुत्तरशततमोऽध्यायः ॥ १३३ ॥ ॥ छ ॥ ॥
॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि पुष्करावर्तकां नदीम् ॥ ब्रह्मकुंडादुत्तरतो नातिदूरे व्यवस्थिताम् ॥ १ ॥ पुरा यज्ञे वर्तमाने सोमस्य तु
महात्मनः ॥ ब्रह्मा सुरगणैः सार्धं प्रभासं क्षेत्रमागतः ॥२॥ सोमनाथप्रतिष्ठार्थमृक्षराजनिमंत्रितः ॥ प्रतिज्ञातं पुरा तेन ब्रह्मणा लोककारिणा ॥ ३ ॥
यावत्स्थास्याम्यहं मर्त्ये कस्मिंश्चित्कारणांतरे ॥ तावत्संध्यात्रयं वंद्यं नित्यमेव त्रिपुष्करे ॥ ४ ॥ एतस्मिन्नेव काले तु लग्नकाल उपस्थिते ॥
आदिष्टं शोभनं कालं ब्राह्मणैर्दैवचिन्तकैः ॥ ५ ॥ ततस्तं प्रस्थितं ज्ञात्वा पुष्करे तु पितामहम् ॥ संध्यार्थं रात्रिनाथो वै वाक्यमेतदुवाच ह ॥ ६ ॥
दैवज्ञैः कलितः काल एष एव शुभोदयः ॥ यथा कालात्ययो न स्यात्तथा नीतिर्विधीयताम् ॥ ७ ॥ तं ज्ञात्वा सांप्रतं कालं ब्रह्मा लोकपितामहः ॥
मनसा चिन्तयामास पुष्कराणि समाहितः ॥ ८ ॥ तानि वै स्मृतमात्राणि ब्रह्मणा वरवर्णिनि ॥ प्रादुर्भूतानि तत्रैव नद्यास्तीरे सुशोभने ॥ ९ ॥
आवर्तास्तत्र सञ्जाता ज्येष्ठमध्यकनीयसः ॥ अथ नामाकरोत्तस्या ब्रह्मा लोकपितामहः ॥ १० ॥ पुष्करावर्तका नाम्ना अद्यप्रभृति शोभना ॥
नदी प्रयास्यते लोके ख्यातिं मम प्रसादतः ॥ ११ ॥ अत्र स्नात्वा नरो भक्त्या तर्पयिष्यति यः पितॄन् ॥ त्रिपुष्करसमं पुण्यं लप्स्यते स तथे-
प्सितम् ॥ १२ ॥ श्रावणे शुक्लपक्षस्य तृतीयायां नरोत्तमः ॥ यः पितॄंस्तर्पयेत्तत्र तृप्तिः कल्पायुतं भवेत् ॥ १३ ॥ इति श्रीस्कांदे महापुराण एका-
शीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये पुष्करावर्तकानदीमाहात्म्यवर्णनंनाम चतुस्त्रिंशदुत्तरशततमोऽध्यायः ॥
॥ १३४ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तत्रैव संस्थितां पश्येद्देवीं दुःखांतकारिणीम् ॥ शीतलेति पुरा ख्यातां युगे द्वापरसंज्ञिते ॥ कलौ 
पुनः समाख्यातां कलिदुःखान्तकारिणीम् ॥ १ ॥ शीतलं कुरुते देहं बालानां रोगवर्जितम् ॥ पूजिता भक्तिभावेन तेन सा शीतला स्मृता ॥ २ ॥

१ ऋक्षराजः—चन्द्रमाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विस्फोटानां प्रशांत्यर्थं बालानां चैव कारणात् ॥ मानेन मापितान्कृत्वा मसूरांस्तत्र कुट्टयेत् ॥ ३ ॥ शीतलापुरतो दत्त्वा बालाः सन्तु निरामयाः ॥ विस्फोटचर्चिकादीनां वातादीनां शमो भवेत् ॥ ४ ॥ श्राद्धं तत्रैव कुर्वीत ब्राह्मणांस्तत्र भोजयेत् ॥ ५ ॥ कर्पूरं कुसुमं चैव मृगनाभिं सुचन्दनम् ॥ पुष्पाणि च सुगन्धानि नैवेद्यं घृतपायसम् ॥ निवेद्य देव्यै तत्सर्वं दंपत्योः परिधापयेत् ॥६॥ नवम्यां शुक्लपक्षे तु मालां बिल्वमयीं शुभाम् ॥ भक्त्या निवेद्य तां देव्यै सर्वसिद्धिमवाप्नुयात् ॥ ७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये दुःखान्तकारिणीशीतलागौरीमाहात्म्यवर्णनंनाम पञ्चत्रिंशदुत्तरशततमोऽध्यायः ॥१३५॥छ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि लोमशेश्वर मुत्तमम् ॥ दुःखान्तकारिणीपूर्वे धनुषां सप्तके स्थितम् ॥ १ ॥ स्थापितं तत्र देवेशि लोमशेन महर्षिणा ॥ गुहामध्ये महालिंगं तपः कृत्वा सुदुश्चरम् ॥ २ ॥ कोटीनां त्रितयं सार्धमिंद्राद्याः स्वर्भुजः प्रिये ॥ यदा नाशं गमिष्यंति तदा तस्य क्षयो ध्रुवम् ॥ ३ ॥ यावंति देहरोमाणि इन्द्रास्तावन्त एव च ॥ क्रमादिन्द्रे विनष्टे तु तल्लोमपतनं भवेत् ॥ ४ ॥ एवमीशप्रसादेन चिरायुर्लोमशोऽभवत् ॥ ब्रह्माणः षड्विनश्यन्ति समग्रायुषि लोमशे ॥ ५ ॥ य एवं पूजयेद्भक्त्या तल्लिंगं लोमशार्चितम् ॥ सोऽपि दीर्घायुराप्नोति निर्व्याधिर्नीरुजः सुखी ॥ ६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये लोमशेश्वरमाहात्म्यवर्णनंनाम षट्त्रिंशदुत्तरशततमोऽध्यायः ॥ १३६ ॥ ॥ छ ॥ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ तत्रैव संस्थितं पश्येत्क्षेत्रपालमनुत्तमम् ॥ कंकालभैरवंनाम भैरवेण नियोजितम् ॥ तस्य क्षेत्रस्य रक्षार्थं प्राणिनां दुष्टचेतसाम् ॥ १ ॥ श्रावणे शुक्लपञ्चम्यामष्टम्यामाश्विनस्य च ॥ यस्तं पूजयते भक्त्या बलिपुष्पादिभिः क्रमात् ॥ २ ॥ तस्य क्षेत्रे निवसतः पुष्करस्य महात्मनः ॥ निर्विघ्नकारी भवति तथा रक्षति पुत्रवत् ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभास खण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये कंकालभैरवक्षेत्रपालमाहात्म्यवर्णनंनाम सप्तत्रिंशदुत्तरशततमोऽध्यायः ॥ १३७ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्यैव पश्चिमे भागे धनुषां पञ्चके स्थितम् ॥ तृणबिन्द्वीश्वरंनाम तीव्रभक्त्या प्रतिष्ठितम् ॥ १ ॥ कृत्वा महत्तपो देवि तृणबिंदुर्मुनीश्वरः ॥ मासिमासि कुशाग्रेण जलबिंदुं निपीय वै ॥ २ ॥ संवत्सराण्यनेकानि एवमाराध्य चेश्वरम् ॥ संप्राप्त परमां सिद्धिं क्षेत्रे प्राभासिके शुभे ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये तृणबिंद्वीश्वरमाहात्म्य वर्णनंनामाष्टात्रिंशदुत्तरशततमोऽध्यायः ॥ १३८ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि चित्रादित्यमनुत्तमम् ॥ तस्यैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





दक्षिणे भागे ब्रह्मकुण्डसमीपतः ॥ १ ॥ महाप्रभावो देवेशि सर्वदारिद्र्यनाशनः ॥ मित्रोनाम पुरा देवि धर्मात्माऽभूद्धरातले ॥ कायस्थः सर्वभूतानां नित्यं भूतहिते रतः ॥ २ ॥ तस्यापत्यद्वयं जज्ञ ऋतुकालाभिगामिनः ॥ पुत्रः परमतेजस्वी चित्रोनाम वरानने ॥ ३ ॥ तथा चित्राऽभवत्कन्या रूपाढ्या शीलमंडना ॥ ४ ॥ आभ्यां तु जातमात्राभ्यां मित्रः पञ्चत्वमेयिवान् ॥ अथ तस्य वरा भार्या सह तेनाग्निमाविशत ॥ ५ ॥ अथ तौ बालकौ दीनावृषिभिः परिपालितौ ॥ वृद्धिं गतौ महारण्ये बालावेव स्थितौ व्रते ॥ ६ ॥ प्रभासं क्षेत्रमासाद्य तपः परममास्थितौ ॥ प्रतिष्ठाप्य महादेवं भास्करं वारितस्करम् ॥ ७ ॥ पूजयामास धर्मात्मा धूपमाल्यानुलेपनैः ॥ वसिष्ठकथितैश्चैव ह्यष्टषष्टिसमन्वितैः ॥ नामभिः सूर्यदेवेशं तुष्टाव प्राञ्जलिः प्रभुम् ॥ ८ ॥ ॥ चित्र उवाच ॥ ॥ प्रणम्य शिरसा देवं भास्करं गगनाधिपम् ॥ आदिदेवं जगन्नाथं पापघ्नं रोगनाशनम् ॥ ९ ॥ सहस्राक्षं सहस्रांशुं सहस्रकिरणद्युतिम् ॥ १० ॥ तमहं संस्तविष्यामि संपृक्तं गुह्यनामभिः ॥ मुंडीरस्वामिनं प्रातर्गंगासागरसंगमे ॥ कालप्रियं तु मध्याह्ने यमुनातीरमाश्रितम् ॥ ११ ॥ मूलस्थानं चास्तमने चन्द्रभागातटे स्थितम् ॥ यत्र सांबः स्वयं सिद्ध उपवासपरायणः ॥१२॥ वाराणस्यां लोहिताक्षं गोभिलाक्षे बृहन्मुखम् ॥ प्रयागेषु प्रतिष्ठानं वृद्धादित्यं महाद्युतिम् ॥१३॥ कोस्थक्षे द्वादशादित्यं गंगादित्यं चतुर्वटे ॥ नैमिषे चैव गोघ्ने च भद्रं भद्रपुटे स्थितम् ॥१४॥ जयायां विजयादित्यं प्रभासे स्वर्णवेतसम् ॥ कुरुक्षेत्रे च सामंतं त्रिमंत्रं च इलावृते ॥१५॥ महेन्द्रे क्रमणादित्यमृणे सिद्धेश्वरं विदुः ॥ कौशांब्यां पद्मबोधं च ब्रह्मबाहौ दिवाकरम् ॥१६॥ केदारे चण्डकांतिं च नित्ये च तिमिरापहम् ॥ गंगामार्गे शिवद्वारमादित्यं भूप्रदीपने ॥१७॥ हंसं सरस्वतीतीरे विश्वामित्रं पृथूदके ॥ उज्जयिन्यां नरद्वीपं सिद्धायाममलद्युतिम् ॥१८॥ सूर्यं कुन्तीकुमारे च पञ्चनद्यां विभावसुम् ॥ मथुरायां विमलादित्यं संज्ञादित्यं तु संज्ञिके ॥ १९ ॥ श्रीकण्ठे चैव मार्तण्डं दशार्णे दंशकं स्मृतम् ॥ गोधने गोपतिं देवं कर्णं चैव मरुस्थले ॥२०॥ पुष्पं देवपुरे चैव केशवार्कं तु लोहिते ॥ वैदिशे चैव शार्दूलं शोणे वारुणवासिनम् ॥ २१ ॥ वर्धमाने च सांबाख्यं कामरूपे शुभंकरम् ॥ मिहिरं कान्यकुब्जे च मंदारं पुण्यवर्धने ॥ २२ ॥ गन्धारे क्षोभणादित्यं लंकायाममरद्युतिम् ॥ कर्णादित्यं च चंपायां प्रबोधे शुभदर्शिनम् ॥ २३ ॥ द्वारावत्यां तु पार्वत्यं हिमवन्ते हिमापहम् ॥ महातेजं तु लौहित्ये अमलांगे च धूर्जटिम् ॥ २४ ॥ रोहिके तु कुमाराख्यं पद्मायां पद्मसंभवम् ॥ धर्मादित्यं तु लाटायां मर्दके स्थविरं विदुः ॥ २५ ॥ सुखप्रदं तु कौबेर्यां कोसले गोपतिं तथा ॥ कौंकणे तु पद्मदेवं तापनं विन्ध्यपर्वते ॥ २६ ॥ त्वष्टारं चैव काश्मीरे चरित्रे रत्नसंभवम् ॥ पुष्करे हेमगर्भस्थं विद्यात्सूर्यं गभस्तिके ॥ २७ ॥ प्रकाशायां तु मुञ्झालं तीर्थग्रामे प्रभाकरम् ॥ कांपिल्ये



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रिल्लकादित्यं धनके धनवासिनम् ॥२८॥ अनलं नर्मदातीरे सर्वत्र गमनाधिकम् ॥ अष्टषष्टिं तु देवस्य भास्करस्यामितद्युतेः ॥ २९ ॥ प्रातरुत्थाय वै नित्यं शक्तिमाञ्छुचिमान्नरः ॥ यः पठेच्छृणुयाद्वापि सर्वपापैः प्रमुच्यते ॥ ३० ॥ राज्यार्थी लभते राज्यं धनार्थी लभते धनम् ॥ पुत्रार्थी लभते पुत्रान्सौख्यार्थी लभते सुखम् ॥ ३१ ॥ रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ॥ यान्यान्प्रार्थयते कामांस्तांस्तान्प्राप्नोति मानवः ॥३२॥ ॥ ॥ ईश्वर उवाच ॥ ॥ एवं च स्तुवतस्तस्य चित्रस्य विमलात्मनः ॥ ततस्तुष्टः सहस्रांशुः कालेन महता विभुः ॥ ३३ ॥ अब्रवीद्वत्स भद्रं ते वरं वरय सुव्रत ॥ ३४ ॥ सोऽब्रवीद्यदि मे तुष्टो भगवंस्तीक्ष्णदीधितेः ॥ प्रौढत्वं सर्वकार्येषु नय मां ज्ञानितां तथा ॥ ३५ ॥ तत्तथेति प्रतिज्ञातं सूर्येण वरवर्णिनि ॥ ततः सर्वज्ञतां प्राप्तश्चित्रो मित्रकुलोद्भवः ॥३६॥ तं ज्ञात्वा धर्मराजस्तु बुद्ध्या परमया युतम् ॥ चिंतयामास मेधावी लेखकोऽयं भवेद्यदि ॥ ३७ ॥ ततो मे सर्वसिद्धिः स्यान्निर्वृतिश्च परा भवेत् ॥ एवं चिंतयतस्तस्य धर्मराजस्य भामिनि ॥३८॥ अग्नितीर्थे गते चित्रे स्नानार्थं लवणाम्भसि ॥ स तत्र प्रविशन्नेव नीतस्तु यमकिंकरैः ॥३९॥ सशरीरो महादेवि यमादेशपरायणैः ॥ स चित्रगुप्तनामाऽभूद्विश्वचारित्रलेखकः ॥ ४० ॥ चित्रादित्येतिनामाऽभूत्ततो लोके वरानने ॥ ४१ ॥ सप्तम्यां नियताहारो यस्तं पूजयते नरः ॥ सप्त जन्मानि दारिद्र्यं न दुःखं तस्य जायते ॥४२॥ तत्रैव चाश्वो दातव्यः सकोषं खड्गमेव च ॥ हिरण्यं चैव विप्राय एवं यात्राफलं लभेत् ॥४३॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये चित्रादित्यमाहात्म्यवर्णनंनामैकोनचत्वारिंशदुत्तरशततमोऽध्यायः ॥१३९॥छ॥

ततो गच्छेन्महादेवि नदीं चित्रपथां ततः ॥ ब्रह्मकुण्डसमीपस्थां चित्रादित्यस्य मध्यतः ॥ १ ॥ यदा च चित्रः संनीतो यमदूतैः सुरप्रिये ॥ सशरीरो महाप्राज्ञो यमादेशपरायणैः ॥ २ ॥ एवं ज्ञात्वा तु तत्रस्था भगिनी तस्य दुःखिता ॥ चित्रा नदी ततो भूत्वा स्वसा तस्य महात्मनः ॥ ३ ॥ प्रविष्टा सागरे देवि अन्वेषन्ती च बांधवम् ॥ ततश्चित्रपथा नाम तस्याश्चक्रुर्द्विजातयः ॥ ४ ॥ एवं तत्र समुत्पन्ना सा नदी वरवर्णिनि ॥ ५ ॥ तस्यां स्नात्वा नरो यस्तु चित्रादित्यं प्रपश्यति ॥ स याति परमं स्थानं यत्र देवो दिवाकरः ॥ ६ ॥ अस्मिन्कलियुगे देवि अंतर्धानं गता नदी ॥ प्रावृट्काले च दृश्येत दुर्लभं तत्र दर्शनम् ॥ ७ ॥ स्नानं दानं विशेषेण सर्वपातकनाशनम् ॥ ८ ॥ भुक्तो वाप्यथवाऽभुक्तो रात्रौ वा यदि वा दिवा ॥ पर्वकालेऽथवाऽकाले पवित्रोऽप्यथवाऽशुचिः ॥ ९ ॥ यदैव दृश्यते तत्र नदी चित्रपथा प्रिये ॥ प्रमाणं दर्शनं तस्या न कालस्तत्र कारणम् ॥ १० ॥ दृष्ट्वा नदीं महादेवि पितरः स्वर्गसंस्थिताः ॥ गायंति तत्र सामानि नृत्यन्ति च हसंति च ॥ ११ ॥ अस्माकं वंशजः कश्चिच्छ्राद्धमत्र करिष्यति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





यावत्कल्पं तथाऽस्माकं प्रीतिमुत्पादयिष्यति ॥ १२ ॥ एवं ज्ञात्वा नरस्तत्र स्नान श्राद्धं च कारयेत् ॥ सर्वपापविनाशार्थं पितॄणां प्रीतये तथा ॥ ॥ १३ ॥ इत्येतत्कथितं देवि यथा चित्रपथा नदी ॥ प्रभासक्षेत्रमासाद्य संस्थिता पापनाशिनी ॥ १४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये चित्रपथानदीमाहात्म्यवर्णनंनाम चत्वारिंशदुत्तरशततमोऽध्यायः ॥ ॥ १४० ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि कपर्दी यत्र संस्थितः ॥ तस्यैव उत्तरे भागे नातिदूरे व्यवस्थितः ॥ चिंतितार्थप्रदो देवि चिन्तामणिरिवापरः ॥ १ ॥ चतुर्थ्यां तं तु देवेशि अंगारकदिने पुनः ॥ स्नापयित्वा तु संपूज्य नैवेद्यैर्विविधैः शुभैः ॥ सन्तर्प्य विघ्नराजेशं सर्वान्कामानवाप्नुयात् ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये कपर्दिचिन्तामणिमाहात्म्यवर्णनंनामैकचत्वारिंशदुत्तरशततमोऽध्यायः ॥ १४१ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि चित्रेश्वरमनुत्तमम् ॥ धनुषां सप्तके तस्य स्थितमाग्नेयदक्षिणे ॥ १ ॥ लिंगं महाप्रभावं हि सर्वपातकनाशनम् ॥ तत्र चित्रेश्वरं पूज्य नरकान्न भवेद्भयम् ॥ २ ॥ पटस्थितं तस्य पापं चित्रो मार्जयति प्रिये ॥ तस्मात्सर्वप्रयत्नेन चित्रेशं पूजयेत्सदा ॥ यः स्यात्पापयुतो वापि नरकं नैव पश्यति ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये चित्रेश्वरमाहात्म्यवर्णनंनाम द्विचत्वारिंशदुत्तरशततमोऽध्यायः ॥ १४२ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि विचित्रेश्वरमुत्तमम् ॥ तस्यैव पूर्वदिग्भागे किञ्चिदाग्नेयगोचरे ॥ धनुषां दशके तत्र स्थितं पापप्रणाशनम् ॥ १ ॥ विचित्रेण महादेवि लेखकेन यमस्य च ॥ स्थापितं तन्महालिंगं तपः कृत्वा सुदुश्चरम् ॥ २ ॥ तं दृष्ट्वा पूजितं चैव मुक्तः स्यात्सर्वपातकैः ॥ संपूज्य च विधानेन न दुःखी जायते नरः ॥ ३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये विचित्रेश्वरमाहात्म्यवर्णनंनाम त्रिचत्वारिंशदुत्तरशततमोऽध्यायः ॥ १४३ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि तृतीयं पुष्करं महत् ॥ तस्यैव पूर्वदिग्भागे किञ्चिदीशानगोचरे ॥ कनीयः संस्मृतं कुंडं पुष्करंनाम नामतः ॥ १ ॥ यत्र मध्याह्न समये ब्रह्मणा समुपासिता ॥ सन्ध्या त्रैलोक्यजननी प्रतिष्ठार्थं गतेन च ॥ २ ॥ तत्र यः कुरुते स्नानं पौर्णमास्यां समाहितः ॥ सम्यक्कृतं भवेत्तेन स्नानं तत्रादिपुष्करे ॥ ३ ॥ हिरण्यं तत्र दातव्यं सर्वपापापनुत्तये ॥ ४ ॥ इति संक्षेपतः प्रोक्तं माहात्म्यं तव पौष्करम् ॥ श्रुतं पापहरं नॄणां सर्वकाम



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रदं तथा ॥ ५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये पुष्करकुण्डमाहात्म्य वर्णनंनाम चतुश्चत्वारिंशदुत्तरशततमोऽध्यायः ॥ १४४ ॥ ॥ ईश्वर उवाच ॥ ॥ तत्रैव संस्थितं पश्येद्विघ्नेशं पापनाशनम् ॥ गजकुंभोदरं नाम सर्वसिद्धिप्रदायकम् ॥ १ ॥ तत्र कुंडे नरः स्नात्वा चतुर्थ्यां प्रयतात्मवान् ॥ पूजयेद्यस्तु तं भक्त्या विघ्नेशस्तस्य तुष्यति ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये गजकुंभोदरमाहात्म्यवर्णनंनाम पञ्चचत्वारिंशदुत्तरशततमोऽध्यायः ॥ १४५ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि धर्मराजप्रतिष्ठितम् ॥ यमेश्वरं महादेवं तस्यैवोत्तरतः स्थितम् ॥ १ ॥ यदा शप्तो धर्मराजश्छायया वरवर्णिनि ॥ तदा तस्यापतत्पादः स च दुःखान्वितोऽभवत् ॥ २ ॥ ततः प्राभासिके क्षेत्रे तपस्तेपे महातपाः ॥ स्थापयामास लिंगं तु तत्र देवस्य शूलिनः ॥ ३ ॥ तस्य तुष्टो महादेवस्ततः प्रत्यक्षतां गतः ॥ अब्रवीद्धर्मं भद्रं ते वरं वरय चेप्सितम् ॥ ४ ॥ तदाऽब्रवीद्धर्मराजः पादः प्रपतितो मम ॥ प्रसादात्तव देवेश जायतां पुनरेव हि ॥ ५ ॥ एतल्लिंगं सुरश्रेष्ठ यन्मया निर्मितं तव ॥ एतद्ये भक्तिसंयुक्ताः पश्यंति प्राणिनो भुवि ॥ ६ ॥ तेषां तव प्रसादेन भूयात्पापविमोक्षणम् ॥ ७ ॥ एवं भविष्यतीत्युक्त्वा ह्यन्तर्धानं गतो हरः ॥ यमोऽपि लब्धपादस्तु पुनरेव दिवं ययौ ॥ ८ ॥ तस्मिन्दृष्टे सुरश्रेष्ठ यमलोकसमुद्भवम् ॥ न भयं विद्यते नृणामपि दुष्कृतकारिणाम् ॥ ॥ ९ ॥ भ्रातृद्वितीयासंयोगे स्नात्वा पुष्करिणीजले ॥ यमेश्वरसमीपस्थो यमेशमवलोकयेत् ॥ १० ॥ तिलपात्रं प्रदातव्यं दीपं गाः कांचनादिकम् ॥ यमदेवं समुद्दिश्य मुच्यते सर्वपातकैः ॥ ११ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये यमेश्वरमाहात्म्यवर्णनंनाम षट्चत्वारिंशदुत्तरशततमोऽध्यायः ॥ १४६ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि ब्रह्मकुण्डमनुत्तमम् ॥ तस्यैव नैर्ऋते भागे ब्रह्मणा निर्मितं पुरा ॥ १ ॥ यदा तु ऋक्षराजेन सोमनाथः प्रतिष्ठितः ॥ तदा ब्रह्मादयो देवाः सर्वे तत्र समागताः ॥ प्रतिष्ठार्थं हि देवस्य शशांकेन निमन्त्रिताः ॥ २ ॥ अथाऽब्रवीन्निशानाथो ब्रह्माणं विनयान्वितः ॥ ३ ॥ कृतं भवद्भिर्जानाति स्थापनं वै यथा जनः ॥ तथा कुरु सुरश्रेष्ठ चिह्नमात्मसमुद्भवम् ॥ ४ ॥ एवं श्रुत्वा तदा ब्रह्मा ध्यानं कृत्वा तु निश्चलम् ॥ आह्वयत्सर्वतीर्थानि पुष्करादीनि सर्वशः ॥ ५ ॥ स्वर्गे वै यानि तीर्थानि तथैव च रसातले ॥ तपःसामर्थ्ययोगेन ब्रह्मणाऽऽकर्षितानि च ॥ अतस्तस्यैव नाम्ना तु ब्रह्मकुण्डं तु गीयते ॥ ६ ॥ गणानां च सहस्रैस्तु चतुर्दशभिरीक्ष्यते ॥ अतश्चाभक्तियुक्तानां दुष्प्राप्यं



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तीर्थमुत्तमम् ॥ ७ ॥ अथाब्रवीत्सर्वदेवान्ब्रह्मा लोकपितामहः ॥ ८ ॥ अत्र कुण्डे नरः स्नात्वा यः पितॄंस्तर्पयिष्यति ॥ अग्निष्टोमफलं सव लप्स्यते
स च मानवः ॥ तत्प्रसादात्स्वर्गलोके विमानेन चरिष्यति ॥ ९ ॥ गोदानं चाश्वदानं च तथा स्वर्णकमण्डलुम् ॥ दद्याद्विप्राय विदुषे सर्वपापापनु
त्तये ॥ १० ॥ पौर्णमास्यां महादेवि तथा च प्रतिपद्दिने ॥ सर्वपापविनाशार्थं तत्र स्नाति सरस्वती ॥ ११ ॥ सिद्धं रसायनं देवि तत्र वै ह्युदकं
प्रिये ॥ नानावर्णसमायुक्तमुपदेशेन सिद्ध्यति ॥ १२ ॥ दारिद्र्यदुःखरुक्छोकान्मानवः सेवते कथम् ॥ ब्रह्मकुण्डमनुप्राप्य कल्पवृक्षमिवापरम् ॥
॥ १३ ॥ ॥ देव्युवाच ॥ ॥ भगन्विस्तराद्ब्रूहि ब्रह्मकुण्डमहोदयम् ॥ सर्वप्राणिहितार्थाय विस्तराद्वद मे प्रभो ॥ १४ ॥ ब्रह्मकुंडस्य माहात्म्यं
श्रोतुं मे कौतुकं महत् ॥ लोकानां दुःखनाशाय दारिद्र्यक्षयहेतवे ॥ १५ ॥ भगवन्मानुषाः सर्वे दुःखशोकनिपीडिताः ॥ भ्रमंति सकलं जन्म
रसायनविमोहिताः ॥ १६ ॥ तेषां हिताय मे ब्रूहि निर्वाणं रसमुत्तमम् ॥ आदाविह शरीरं तु अक्षय्यं तु यथा भवेत् ॥ १७ ॥ अष्टसिद्धिसमा
युक्तं सर्वविद्यासमन्वितम् ॥ कामरूपं क्रियायुक्तं सर्वव्याधिविवर्जितम् ॥ १८ ॥ ततस्तु परमं देव निर्वाणं येन वै लभेत् ॥ मानवः कृतकृत्यश्च
जायते च यथा प्रभो ॥ १९ ॥ तथा कथय मे देव दयां कृत्वा जगत्प्रभो ॥ निर्वाणपरमं कल्पं सर्वभ्रांतिविवर्जितम् ॥ प्रसिद्धं सुखदं दिव्यं समा
चक्ष्व महेश्वर ॥ २० ॥ ॥ ईश्वर उवाच ॥ ॥ साधुसाधु महादेवि लोकानां हितकारिणि ॥ मर्त्यलोके महादेवि तीथ तीर्थवरं शुभम् ॥
॥ २१ ॥ प्रभासं परमं ख्यातं तच्च द्वादशयोजनम् ॥ तत्र सोमेश्वरो देवस्त्रिषु लोकेषु विश्रुतः ॥ २२ ॥ तस्य पूर्वे समाख्यातः
श्रीकृष्णो दैत्यसूदनः ॥ चण्डिका योगिनी तत्र सखीभिः परिवारिता ॥ २३ ॥ ततः पूर्वे दिशां भागे चतुर्वक्त्रेण निर्मितम् ॥
तीर्थात्तीर्थं वरं दिव्यं सर्वाश्चर्यमयं शुभम् ॥ २४ ॥ सेवितं सर्वदेवैस्तु सिद्धैः साध्यैर्ग्रहैस्तथा ॥ अप्सरोमुनिभिर्दिव्यैर्यक्षैश्च पन्नगैः
सदा ॥ २५ ॥ सिद्ध्यर्थं सर्वकामार्थं दिव्यभोगावहं शुभम् ॥ ब्रह्मकुण्डमिति ख्यातं ब्रह्मणा निर्मितं यतः ॥ २६ ॥ तस्य वायव्यकोणे तु हिर
ण्येशः स्वयं स्थितः ॥ तमाराध्य महादेवं हिरण्येश्वरमुत्तमम् ॥ २७ ॥ महामन्त्रं जपेत्क्षिप्रं दशांशं होमयेत्सुधीः ॥ होमेन सिद्ध्यते मन्त्रः
सत्यं सत्यं वरानने ॥ २८ ॥ तस्योत्तरे तु दिग्भागे किञ्चिदीशानमाश्रितः ॥ चतुर्वक्त्रो महादेवि क्षेत्रपो लिंगरूपधृक् ॥ २९ ॥ तत्स्थानं रक्षते देवि
लिंगरूपेण शंकरः ॥ तमाराध्य प्रयत्नेन ततः कुण्डं समाश्रयेत् ॥ ३० ॥ सर्वैश्वर्यमयं देवि नानावर्णविचित्रितम् ॥ कुण्डस्यास्येशदिग्भागे
भैरवेश्वरमुत्तमम् ॥ ३१ ॥ दुर्गन्धा भासुरा देवि वहते रसरूपिणी ॥ तस्या रसेन संयुक्तं पृथग्वर्णं हि कर्बुरम् ॥ ३२ ॥ मेघवर्णं महादिव्यं राजतं च



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनः शुभम् ॥ कपिलं दुग्धवर्णं च कर्पूराभं सुशोभनम् ॥ ३३ ॥ कदा कस्तूरिकाभासं कुंकुमच्छविकावहम् ॥ सौगन्धं चंदनोपेतं कदाचिद्रौधिरोदकम् ॥ ३४ ॥ एते रसाश्च विविधा दृश्यंते तत्र सर्वदा ॥ यस्य तुष्टो महादेवः सिद्ध्यंते तस्य तत्क्षणात् ॥ ३५ ॥ रजतं क्षिप्यते तत्र सुवर्णमिव जायते ॥ प्रत्यक्षमेव तत्रैव रसायनमनुत्तमम् ॥ ३६ ॥ पश्यंति मानवा देवि कौतुकं तत्क्षणाद्भृशम् ॥ रसं हि परमं दिव्यं तत्रस्थं च कलौ युगे ॥ ३७ ॥ सिद्धं सिद्धरसं पुंसां व्याधीनां क्षयकारकम् ॥ हेमबीजमयं दिव्यं ब्रह्मकुण्डोद्भवं महत् ॥ ३८ ॥ इदानीं ते प्रवक्ष्यामि मनुष्याणां हिताय वै ॥ दारिद्र्यं क्षयमाप्नोति तत्क्षणाच्च यशस्विनि ॥ ३९ ॥ आदावेव प्रकुर्वन्ति ताम्रकुम्भं दृढं शुभम् ॥ तीर्थोदकं क्षिपेत्तत्र पत्रैस्ताम्रस्तथा युतम् ॥ ४० ॥ निक्षिप्य भूमौ तत्कुम्भं ज्वालयेदनलं ततः ॥ चुह्लीरूपेण षण्मासं पाचयेत्तं शनैःशनैः ॥ ४१ ॥ पश्चादुद्धृत्य तं कुम्भं पुनरेव जलं क्षिपेत् ॥ मासमेकं पुनः कुर्यान्मासमेकं पुनर्भृशम् ॥४२॥ ततः सर्वाणि खण्डानि एकीकृत्य प्रयत्नतः ॥ पुनरेवोदकेनैव प्लाव्य चावर्तयेत्पुनः ॥ ॥४३॥ कांचनं जायते तत्र यदि तुष्टो महेश्वरः ॥४४॥ सिद्धिं शरीरजां देवि यदीच्छेन्मानवोत्तमः ॥ स स्नानमादितः कृत्वा संवत्सरत्रयं पुनः ॥ ॥ ४५ ॥ मौनेन नियमेनैव महामंत्रजपान्वितः ॥ पूजयेच्च हिरण्येशं क्षेत्रपालं प्रयत्नतः ॥४६॥ पंचोपचारसंयुक्तं ध्यानधारणसंयुतम् ॥ तीर्थोदकेन पाकं वै पेयं तद्वदुदुम्बरे[1] ॥४७॥ एवं वर्षत्रयेणैव दिव्यदेहः प्रजायते ॥ तेजस्वी बलवान्प्राज्ञः सर्वव्याधिविवर्जितः ॥ ४८ ॥ जीवेद्वर्षशतान्येव त्रीणि दुःखविवर्जितः ॥ वर्षत्रयमविच्छिन्नं यस्तत्र स्नानमाचरेत् ॥४९॥ वागीश्वरीं जपेन्नित्यं पूजाहोमसमन्वितः ॥ तस्य प्रवर्तते वाणी सिद्धिः सारस्वती भवेत् ॥५०॥ संस्कृतं प्राकृतं चैवापभ्रंशं भूतभाषितम् ॥ गांगस्रोतःप्रवाहेण उद्गिरेद्गिरमात्मवान् ॥ अश्रान्तां च वरारोहे ह्यविच्छिन्नां च संततम् ॥५१॥ वदेद्वादिसहस्रैस्तु न श्रमस्तस्य जायते ॥ तीर्थस्यास्य प्रभावेण सर्वशास्त्रविशारदाः ॥ ५२ ॥ पंडिता गर्विताः सर्वे तर्कशास्त्रविशारदाः ॥ आगच्छन्ति समं तात विद्ययोद्धतकन्धराः ॥ न शक्नुवंति ते वक्तुं द्रष्टुं वक्रमपि प्रिये ॥ ५३ ॥ वादिनां च सहस्राणि भनक्त्येवं निरीक्षणात् ॥ ५४ ॥ उद्ग्राहयति शास्त्राणि विबुद्धार्थानि सत्वरम् ॥ विमलं पाञ्चरात्रं च वैष्णवं शैवमेव च ॥ ५५ ॥ इतिहासपुराणं च भूततंत्रं च गारुडम् ॥ भैरवं च महातंत्रं कुलमार्गं द्विधा प्रिये ॥ ५६ ॥ रथप्रवरवेगेन वाणी चास्खलिता भवेत् ॥ नश्यंति वादिनः सर्वे गरुडस्येव पन्नगाः ॥ ५७ ॥ न दारिद्र्यं न रोगश्च न दुःखं मानसं पुनः ॥ राजमान्यो महामानी भवेद्ब्रह्मप्रसादतः ॥ ५८ ॥ उत्साहबलसंयुक्तो देववज्जीवते सुधीः ॥ दाता भोक्ता च

१ उदुंबरे—ताम्रपात्रे—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 वाग्ग्मी च तीर्थस्यास्य प्रसादतः ॥ ५९ ॥ तैलाभ्यक्तस्य यत्तेजो जायते मनुजेषु च ॥ स्नातमात्रे तथा तेजस्तीर्थस्यैव प्रसादतः ॥ ६० ॥ यत्पापं 
कुरुते जंतुः पैशुन्यं च कृतघ्नताम् ॥ मित्रद्रोहे च यत्पापं यत्पापं पारदारिकम् ॥ तत्सर्वं विलयं याति कुंडस्नानरतस्य च ॥ ६१ ॥ मुशलं लङ्घये
द्यस्तु यो गास्त्यजति वै द्विजः ॥ तत्पापं क्षयमाप्नोति ब्रह्मकुण्डस्य दर्शनात् ॥ ६२ ॥ पृथिव्यां यानि तीर्थानि दैवतानि तथा पुनः ॥ पूजि
तानि च सर्वाणि कुण्डस्नानप्रभावतः ॥ ६३ ॥ सप्तजन्मार्जितं पापं दर्शनात्क्षयमाव्रजेत् ॥ ६४ ॥ यत्पापं गुरुगोघ्ने च परस्वहरणेषु च ॥ तत्पापं
क्षयमाप्नोति ब्रह्मकुण्डनिषेवणात् ॥ ६५ ॥ प्रदक्षिणं च यः कुर्यात्स्नात्वा कुण्डस्य नामतः ॥ संख्यया पंचदश वै शृणु तस्यापि यत्फलम् ॥ ६६ ॥
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा ॥ सप्तपातालसहिता तीर्थकोटिभिरावृता ॥ ६७ ॥ आहारमात्रं यो दद्यात्तत्र वेदविदां वरे ॥ लक्षभोज्यं
कृतं तेन तीर्थस्यास्य प्रभावतः ॥ ६८ ॥ ब्रह्मेश्वरं च संपूज्य हिरण्येश्वरमुत्तमम् ॥ क्षेत्रपालं चतुवक्त्रं पूजयेच्चिन्तितं लभेत् ॥ ६९ ॥ एकविंशत्कुलै
र्युक्तः सर्वपापविवर्जितः ॥ ब्रह्मलोकं स वै याति नात्र कार्या विचारणा ॥ ७० ॥ विरंचिकुण्डे स्नात्वा वा यो जपेद्वेदमातरम् ॥ लक्षजाप्यविधानेन
स मुक्तः पातकैर्भवेत् ॥ ७१ ॥ स एव पुण्यकर्त्ता च स एव पुरुषोत्तमः ॥ यात्रा तत्र कृता येन ब्रह्मकुण्डे वरानने ॥ ७२ ॥ अष्टाशीतिसहस्राणि
ऋषीणामूर्ध्वरेतसाम् ॥ ब्रह्मकुण्डं समाश्रित्य ब्रह्मदेवमुपासते ॥ ७३ ॥ तावद्गर्जंति तीर्थानि त्रैलोक्ये सचराचरे ॥ यावद्ब्रह्मेश्वरं तीर्थं न पश्यन्ति
नराः प्रिये ॥ ७४ ॥ ब्रह्मकुण्डे च पानीयं ये पिबन्ति नराः सकृत् ॥ न तेषां संक्रमेत्पापं वाचिकं मानसं तनौ ॥ ७५ ॥ ब्रह्मांडोत्तरमध्ये तु यानि
तीर्थानि संति वै ॥ तेषां पुण्यमवाप्नोति ब्रह्मकुण्डे प्रदक्षिणात् ॥ ७६ ॥ याज्ञवल्क्यो महात्मा च परब्रह्मस्वरूपवान् ॥ सोऽपि कुंडं न मुंचेत निकुं
भस्तु गणस्तथा ॥ ७७ ॥ इति संक्षेपतः प्रोक्तं माहात्म्यं ब्रह्मकुण्डजम् ॥ तव स्नेहेन देवेशि किमन्यत्परिपृच्छसि ॥ ७८ ॥ य इदं शृणुयान्मर्त्यः
सम्यक्छ्रद्धासमन्वितः ॥ स मुक्तः पातकैः सर्वैर्ब्रह्मलो च गच्छति ॥ ७९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे
प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये ब्रह्मकुण्डमाहात्म्यवर्णनंनाम सप्तचत्वारिंशदुत्तरशततमोऽध्यायः ॥ १४७ ॥ ॥ छ ॥ ॥ ईश्वर 
उवाच ॥ ॥ ततो गच्छेन्महादेवि कूपं कुंडलसंभवम् ॥ तस्यैव चोत्तरे भागे ब्रह्मकुण्डसमीपतः ॥ १ ॥ यत्र सिद्धो महादेवि रूपकुंडलहारकः ॥
तत्र स्नात्वा नरो देवि मुच्येत्स्तेयकृतादघात् ॥ २ ॥ सप्त जन्मानि देवेशि न तस्यान्वयसंभवः ॥ चौरः कश्चिद्भवेत्क्रूरस्तत्र स्नानप्रभावतः ॥ ३ ॥
शिवरात्र्यां विशेषेण पिंडदानादिकां क्रियाम् ॥ कुर्याच्छस्त्रहतानां च पापिनां तत्र मुक्तये ॥ ४ ॥ ॥ देव्युवाच ॥ ॥ कथं कुण्डलरूपं तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृथिव्यां ख्यातिमागतम् ॥ एतत्कथय मे देव विस्तराद्वदतां वर ॥ ५ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि महापुण्यां कथां पापप्रणाशनीम् ॥ यां श्रुत्वा मुच्यते पापान्नरो जन्मशतार्जितात् ॥ ६ ॥ प्रभासक्षेत्रमाहात्म्याच्छिवरात्र्यामुपोषितः ॥ आसीत्सुदर्शनो राजा पृथिव्यामेकराट् सुधीः ॥ ७ ॥ धन्यो हि स धनाढ्यश्च प्रजां यत्नैरपालयत् ॥ राज्यं तस्य सुसंपन्नं ब्राह्मणैरुपशोभितम् ॥ समृद्धमृद्धिसंयुक्तं विटतस्करवर्जितम् ॥ ८ ॥ तस्मिञ्जनपदे रम्ये पुरी भगवती शुभा ॥ चातुर्वर्ण्यसमायुक्ता पुरप्राकारमंडिता ॥ ९ ॥ तस्मिन्पुरवरे रम्ये राज्यं निहतकण्टकम् ॥ करोति बान्धवैः सार्द्धमृद्धियुक्तः सुदर्शनः ॥ हिरण्यदत्तस्य सुतो जातो गांधारकन्यया ॥ १० ॥ तस्य भार्या प्रिया साध्वी भर्तृव्रतपरायणा ॥ सुनंदा नामविख्याता काशिराजसुता शुभा ॥ ११ ॥ तया सार्धं हि राजेन्द्रो भोगान्स बुभुजे सदा ॥ भुंजमानस्य भोगान्वै चिरकालो गतस्तदा ॥१२॥ अकरोत्स महायज्ञान्ददौ दानानि भूरिशः ॥ एवं कालो गतस्तस्य भार्यया सह सुव्रते ॥ १३ ॥ कदाचिन्माघमासे तु शिवरात्र्यां वरानने ॥ सस्मार पूर्वजातिं स भार्यामाहूय चाब्रवीत् ॥ १४ ॥ ॥ सुदर्शन उवाच ॥ ॥ शिवरात्रिव्रतं देवि मया कार्यं वरानने ॥ व्रतस्यास्य प्रभावेन प्राप्तं राज्यं मया किल ॥ १५ ॥ ॥ राज्ञ्युवाच ॥ ॥ महान्प्रभावो राजेन्द्र एवमुक्तं त्वया मम ॥ एतन्मे कारणं ब्रूहि आश्चर्यं हृदि वर्तते ॥१६॥ ॥ ॥ राजोवाच ॥ ॥ शृणु तीर्थस्य माहात्म्यं शिवरात्रिमुपोषणात् ॥ तस्मिञ्छिवपुरे रम्ये स्वर्गद्वारे सुशोभने॥१७॥ आदितीर्थे प्रभासे तु कामिके तीर्थ उत्तमे ॥१८॥ ऋद्धियुक्ते पुरे तस्मिन्नित्यं धर्मानुसेविते ॥ शिवरात्र्यां गतो राज्ञि तिथीनामुत्तमा तिथिः ॥१९॥ मानवास्तत्र ये केचित्पुरराष्ट्रनिवासिनः॥ तत्रागता वरारोहे शिवरात्र्यामुपोषितुम् ॥ २० ॥ धननामा वणिक्कश्चित्तत्रैव वसते सदा ॥ धनाढ्यः स तु धर्मात्मा सदा धर्मपरायणः ॥ ॥२१॥ स भार्यासहितस्तत्र शिवरात्रिमुपोषितः ॥ तस्य भार्याऽभवत्साध्वी रूपयौवनसंवृता ॥ २२ ॥ प्रचलन्मेखलाहारा सर्वाभरणभूषिता ॥ स तया भार्यया सार्धं कामक्रोधविवर्जितः ॥२३॥ प्रभासस्याग्रतो भूत्वा स्नातः शुक्लांबरः शुचिः ॥ यथोक्तेन विधानेन भक्त्या निद्राविवर्जितः ॥२४॥ तत्राहं चौररूपेण पापः स्तैन्यं समाश्रितः ॥ सच्छूद्राणां कुले जातो देवब्राह्मणपूजकः ॥ २५ ॥ पूर्वकर्मानुसंयोगाद्धिकर्मणि रतः सदा ॥ तस्यां रात्र्या महं तत्र जनमध्ये तु संस्थितः ॥ २६ ॥ कुण्डलीनः स्थितस्तत्र रंध्रापेक्षी वरानने ॥ वणिजस्तस्य भार्यायाश्छिद्रान्वेषणतत्परः ॥ २७ ॥ सा रात्रिर्जाग्रतस्तस्य गता मे विजने तथा ॥ गीतनृत्यादिनिर्घोषैर्वेदमंगलपाठकैः ॥ २८ ॥ तालशब्दैस्तथा बन्धैः पुस्तकानां च वाचकैः ॥ एवं

१ अहम्–इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



रात्र्यां तु शेषायां यावत्तिष्ठति तत्र वै ॥ २९ ॥ निरोधेन समायुक्ता पीड्यमाना शुचिस्मिता ॥ धनिभार्या निरोधार्ता देवागाराद्बहिर्गता ॥ ३० ॥ तस्याः कर्णौ त्रोटयित्वा पुप्लुवेऽहं जले स्थितः ॥ ततः कोलाहलस्तत्र कृतस्तत्पुरवासिभिः ॥ ३१ ॥ श्रुत्वा कोलाहलं शब्दं कर्णत्रोटनजं तदा ॥ धाविता रक्षकास्तत्र राजशासनकारकाः ॥ ३२ ॥ तैरहं शस्त्रहस्तैश्च उल्काहस्तैः समंततः ॥ निरीक्षितोऽथ न प्राप्तं सुवर्णं मन्मुखे स्थितम् ॥ ॥ ३३ ॥ खड्गेन तीक्ष्णधारेण छित्त्वा शीर्षं तदा मम ॥ उल्काहस्ता निरीक्षन्तो नापश्यन्स्वर्णमण्वपि ॥ ३४ ॥ हित्वा मां ते गताः सर्वे गत्वा राज्ञे न्यवेदयन् ॥ न किञ्चित्तत्र संप्राप्तं हतोऽस्माभिश्च तत्क्षणात् ॥ ३५ ॥ कथयित्वा तु ते सर्वे यथादेशं गताः पुनः ॥ ततो वै बन्धुना तत्र भयभीतेन चेतसा ॥ ३६ ॥ निखातं मम तत्रैव शिरः कायेन संयुतम् ॥ खातं कृत्वा प्रिये तत्र ब्रह्मतीर्थस्य चोत्तरे ॥ ३७ ॥ पिहितोऽहं तु तत्रैव प्रभासे तीर्थ उत्तमे ॥ शिवरात्रिप्रभावेन तज्जातिस्मरतां गतः ॥ ३८ ॥ राज्यं निष्कण्टकं प्राप्तं समृद्धं वरवर्णिनि ॥ एतत्प्रभासमाहात्म्यं शिवरात्रेरुपोषणात् ॥ एतत्फलं मया लब्धं गत्वा तस्मादुपोषये ॥ ३९ ॥ ॥ राज्ञ्युवाच ॥ ॥ गच्छावस्तत्र यत्रैव कपालं पतितं तव ॥ स्फोटिते च कपाले च हिरण्यं दृश्यते यदि ॥ प्रत्ययो मे भवेत्पश्चात्तव वाक्ये न संशयः ॥ ४० ॥ ॥ राजोवाच ॥ ॥ कल्पं हि तिष्ठते चास्थि यावद्भूमिविपर्ययः ॥ उत्तिष्ठ व्रज भद्रं ते प्रभासं क्षेत्रमुत्तमम् ॥ ४१ ॥ तस्य तद्वचनं श्रुत्वा यद्राज्ञा समुदीरितम् ॥ गमनाय मतिं चक्रे शिवरात्र्या उपोषणे ॥ ४२ ॥ ततोऽश्वैर्जवनर्युक्तं रथं हेमविभूषितम् ॥ आस्थाय सह पत्न्या च प्रभासं क्षेत्रमेयिवान् ॥ ४३ ॥ व्रतं कृत्वा प्रभासे तु यथोक्तं वरवर्णिनि ॥ ब्रह्मतीर्थे समागत्य उद्धृत्य सकलं ततः ॥४४॥ हिरण्यं दर्शयामास स्फोटयित्वा शवं स्वयम् ॥ ४५ ॥ ॥ ईश्वर उवाच ॥ ॥ जातसंप्रत्यया भार्या तस्य राज्ञो बभूव ह ॥ जगाम परमं स्थानं यत्र कल्याणमुत्तमम् ॥ ४६ ॥ जनोऽपि विस्मितः सर्वो दृष्ट्वा चित्रं तदद्भुतम् ॥ ॥ ४७ ॥ नदी चित्रपथानाम तत्रोत्पन्ना वरानने ॥ चित्रादित्यस्य पूर्वेण ब्रह्मतीर्थस्य चोत्तरे ॥ ४८ ॥ तस्यां तत्तिष्ठते तत्र सर्वपापप्रणाशनम् ॥ ॥ ४९ ॥ श्रावणे मासि संप्राप्ते तस्मिन्कूपे विधानतः ॥ यः स्नानं कुरुते देवि श्राद्धं तत्र विशेषतः ॥ ५० ॥ चित्रादित्यं तु संपूज्य शिवलोके महीयते ॥ ५१ ॥ एतत्ते कथितं सर्वं शिवरात्र्या महत्फलम् ॥ भुक्तिमुक्तिप्रदं पुण्यं सर्वपापप्रणाशनम् ॥ ५२ ॥ य इदं पठते नित्यं शृणुयाद्वापि



१ तत्—कुण्डलकूपतीर्थम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानवः ॥ सर्वपापविनिर्मुक्तो रुद्रलोके महीयते ॥ ६३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभास क्षेत्रमाहात्म्ये कुण्डलकूपमाहात्म्यवर्णनंनामाष्टाचत्वारिंशदुत्तरशततमोऽध्यायः ॥ १४८ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि भैरवेश्वरमुत्तमम् ॥ ब्रह्मकुण्डस्य ईशाने स्थितं पापप्रणाशनम् ॥ चतुर्वक्त्रं महादेवं संस्थितं तीर्थरक्षणे ॥ १ ॥ तत्र स्नात्वा महाकुण्डे यस्तं पूजयते नरः ॥ पंचोपचारविधिना भक्तियुक्तो यतेन्द्रियः ॥ २ ॥ कुलानि यान्यतीतानि भविष्याणि च यानि वै ॥ तारयेत्स नरो देवि नात्र कार्या विचारणा ॥ ३ ॥ न चात्र संभवस्तस्य विनाशो नैव जायते ॥ विमानैश्चरते नित्यं दिवाकरसमप्रभैः ॥ ४ ॥ स्त्रीसहस्रैर्वृतो नित्यं क्रीडते देववद्दिवि ॥ ५ ॥ एतल्लिंगं महादेवि चतुर्वक्त्रं महाप्रभम् ॥ दृष्ट्वापि तद्विमुच्येत सर्वपापैस्तु मानवः ॥६॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये भैरवेश्वरमाहात्म्यवर्णनंनामैकोनपंचाशदुत्तरशततमोऽध्यायः ॥ १४९ ॥ ॥ छ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो ब्रह्मेश्वरं गच्छेत्तस्य दक्षिणतः स्थितम् ॥ ब्रह्मणा स्थापितं पूर्वं ब्रह्मकुण्डसमीपतः ॥ त्रिषु लोकेषु विख्यातं रक्ष्यमाणं गणैर्मम ॥ १ ॥ तत्र स्नात्वा चतुर्दश्याममावास्यां विशेषतः ॥ श्राद्धं च विधिवत्कृत्वा ब्रह्मेशं पूजयेत्ततः ॥ २ ॥ विप्रेभ्यः कांचनं दद्यात्प्रीतये शंकरस्य च ॥ ३ ॥ एवं कृत्वा नरो देवि लभते जन्मनः फलम् ॥ विपुलां कीर्तिमायाति मोदते ब्रह्मणा प्रिये ॥ ४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये ब्रह्मकुंडमाहात्म्ये ब्रह्मेश्वरमाहात्म्यवर्णनंनाम पंचाशदुत्तरशततमोऽध्यायः ॥ १५० ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्यैव दक्षिणे भागे तृतीयो भैरवः स्थितः ॥ ब्रह्मकुण्डसमीपे तु सावित्र्या संप्रतिष्ठितः ॥ १ ॥ आराध्य तत्र देवेशं देवानां प्रपितामहम् ॥ वायुभक्षा निराहारा तोषयामास शंकरम् ॥ २ ॥ तुष्टः प्राहेश्वरो देवि शंकरस्तां वराननाम् ॥ ३ ॥ योऽस्मिन्कुंडे नरः स्नात्वा मल्लिंगं पूजयिष्यति ॥ पौर्णमास्यां विधानेन गन्धपुष्पादिभिः क्रमात् ॥ ४ ॥ दास्ये तस्य वरा निष्टान्मनसाऽभीप्सितान्छुभान् ॥ ५ ॥ महापातकयुक्तोऽपि मुक्तो भवति पातकैः ॥ सर्वकामसमृद्धात्मा स भूयाद्वृषभध्वजः ॥ ६ ॥ इत्येव मुक्त्वा देवेशि ततोऽन्तर्धानमागतः ॥ सावित्री ब्रह्मलोके तु गता संस्थाप्य शंकरम् ॥ ७ ॥ इति संक्षेपतः प्रोक्तं सावित्रीशमहोदयम् ॥ शृणुयाद्यस्तु मतिमान्स मुक्तः पातकैर्भवेत् ॥ ८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये ब्रह्मकुण्डमाहात्म्ये सावित्रीश्वरभैरवमाहात्म्यवर्णनंनामैकपंचाशदुत्तरशततमोऽध्यायः ॥ १५१ ॥ ॥ छ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



॥ ॥ ईश्वर उवाच ॥ ॥ तृतीयो भैरवः प्रोक्तश्चतुर्थं भैरवं शृणु ॥ ब्रह्मेशात्पश्चिमे भागे धनुषां त्रितये स्थितम् ॥ १ ॥ सर्वपापप्रशमनं सर्व कामप्रदं नृणाम् ॥ नारदेश्वरनामानं स्थापितं नारदेन वै ॥ २ ॥ ब्रह्मलोके स्थितः पूर्वं नारदो भगवानृषिः ॥ तत्र दृष्ट्वा महावीणां दिव्यां तंत्र्ययुतै र्युताम् ॥ ३ ॥ सरस्वत्या विनिर्मुक्तां ब्रह्मलोके महाप्रभाम् ॥ तेनासौ कौतुकाविष्टो वादयामास तां तदा ॥ ४ ॥ तंत्रीभ्यो वाद्यमानाभ्यो ब्राह्मणाः पतिता भुवि ॥ सप्त स्वरास्ते विख्याता मूर्च्छिताः षड्जकादयः ॥ ५ ॥ तान्दृष्ट्वा विस्मयाविष्टो मुक्त्वा वीणां प्रयत्नतः ॥ पप्रच्छ देवं ब्रह्माणं किमिदं कौतुकं विभो ॥ ६ ॥ वाद्यमानासु तन्त्रीषु पतिता ब्राह्मणा भुवि ॥ क एते ब्राह्मणा देव किं मृता इव शेरते ॥ ७ ॥ ॥ ब्रह्मोवाच ॥ ॥ एते स्वरा महाभाग मूर्च्छिताः पतिता भुवि ॥ अज्ञानवादनेनैव पापं जातं तवाधुना ॥ ८ ॥ सप्तब्राह्मणविध्वंसपातकं ते समागतम् ॥ तस्माच्छीघ्रं व्रज मुने प्रभासं क्षेत्रमुत्तमम् ॥ ९ ॥ समाराधय देवेशं सर्वपापविशुद्धये ॥ इत्युक्तो नारदस्तत्र संतप्य च मुहुर्मुहुः ॥ १० ॥ कृत्वा विषादं बहुशः प्रभासं क्षेत्रमागतः ॥ तत्रैव ब्रह्मकुण्डं तु समासाद्य प्रयत्नतः ॥ ११ ॥ भैरवं पूजयामास दिव्याब्दानां शतं प्रिये ॥ ततो निष्कल्मषो भूत्वा गीतज्ञश्चाभवत्तथा ॥ १२ ॥ ततः प्रभृति तल्लिंगं नारदेश्वरभैरवम् ॥ ख्यातं लोके महादेवि सर्वपातकनाशनम् ॥ १३ ॥ अज्ञानाद्वादयेद्यस्तु वीणां चैव तथा स्वरान् ॥ स तत्पातकशुद्ध्यर्थं तत्र गच्छेन्महेश्वरि ॥ १४ ॥ माघे मासि जिताहारस्त्रिकालं योऽर्चयेत्ततः ॥ नारदेशं भैरवं स स्वर्गरामामनोहरः ॥ १५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्र माहात्म्ये ब्रह्मकुण्डमाहात्म्ये नारदेश्वरभैरवमाहात्म्यवर्णनंनामद्विपंचाशदुत्तरशततमोऽध्यायः ॥ १५२ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि हिरण्येश्वरमुत्तमम् ॥ ब्रह्मकुण्डस्य वायव्ये धनुषां द्वितये स्थितम् ॥ १ ॥ सर्वपापप्रशमनं दारिद्र्यौघविनाशनम् ॥ कृतस्मराच्च परतो ह्यग्नितीर्थाच्च पूर्वतः ॥ २ ॥ यमेश्वराच्च नैर्ऋत्ये समुद्रस्योत्तरे तथा ॥ तस्य लिंगस्य प्राग्भागे ब्रह्मा तेपे महत्तपः ॥ आराधयामास तदा देवदेवं त्रिलोचनम् ॥ ३ ॥ ततस्तुष्टो महादेवो ब्रह्मन्ब्रूहि वरो मम ॥ ४ ॥ ॥ ब्रह्मोवाच ॥ ॥ यदि तुष्टोऽसि मे देव याजयामीति मे मतिः ॥ स्थानं च यन्महापुण्यं तन्ममाख्यातुमर्हसि ॥ ५ ॥ ॥ ईश्वर उवाच ॥ ॥ कृतस्मराद्ब्रह्मकुंडं यमेशात्सागरावधि ॥ एतदंतरमासाद्य पापी चापि विमुच्यते ॥ ६ ॥ वहेद्विषुवती तत्र सदा पुण्यात्मनां नृणाम् ॥ यत्र तत्र कुरु विभो मनसा ते यथेप्सितम् ॥ ७ ॥

१ कृतस्मराद्ब्रह्मकुण्डं—यावत्—इति शेषः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्युक्तः स तदा ब्रह्मा प्रारेभे यज्ञमुत्तमम् ॥ ८ ॥ ततो भागार्थिनो देवा इन्द्राद्यास्तत्र चागताः ॥ ऋषयो भागकामास्तु सर्वे तत्र समागताः ॥९॥ ततो यज्ञागतेभ्यः स दक्षिणामददात्पुनः ॥ ततोऽथ दक्षिणा क्षीणा दीयमाना यशस्विनि ॥ १० ॥ ततो ब्रह्मा बहूद्विग्नो दध्यौ वै मनसा तदा ॥ बद्धाञ्जलिपुटो भूत्वा इदं वचनमब्रवीत् ॥ ११ ॥ भगवन्नै विरूपाक्ष क्रतुर्नैव समाप्यते ॥ दक्षिणाहैन्यतो देव न याति परिपूर्णताम् ॥ १२ ॥ दक्षिणासहिताः सर्वे यथा यांति तथा कुरु ॥ पितामहवचः श्रुत्वा कृत्वा ध्यानं तदा मया ॥ १३ ॥ स्मृता सरस्वती देवी देवानां हितकाम्यया ॥ आगता सा महापुण्या उक्ता देवी मया तदा ॥ १४ ॥ पद्मयोनेर्धनं क्षीणं क्रतुर्वै न समाप्यते ॥ तस्मान्मम प्रसादेन भव काञ्चनवाहिनी ॥ १५ ॥ सरस्वत्यास्ततः स्रोत उत्थितं पश्चिमामुखम् ॥ काञ्चनानां तु पद्मानि उच्छ्रितानि सहस्रशः ॥ १६ ॥ काञ्चनेन प्रवाहेण तोयं सारस्वतं शुभम् ॥ दैत्यसूदनमासाद्य अग्नितीर्थावधि प्रिये ॥ पूरयामास पद्मैश्च कोटिशश्च समंततः ॥ १७ ॥ काञ्चनानि तु तान्येव दत्त्वा विप्रेषु दक्षिणाम् ॥ यज्ञं निर्वर्तयामास हृष्टो ब्रह्मा द्विजैः सह ॥ १८ ॥ शेषाणि यानि पद्मानि तानि निःक्षिप्य भूतले ॥ तदूर्ध्वं स्थापयामास लिंगं तु कनकेश्वरम् ॥ १९ ॥ तत्र लिंगं प्रतिष्ठाप्य सर्वदेवनमस्कृतम् ॥ ऋषिभ्यो दक्षिणां प्रादादेकैकस्य यथाक्रमम् ॥ काञ्चनानां च पद्मानां प्रत्येकमयुतं ददौ ॥२०॥ ततः शेषाणि पद्मानि निहितानि धरातले ॥ ब्रह्मकुण्डस्य मध्ये तु नापुण्यो लभते नरः ॥२१॥ तत्कुण्डतोयमद्यापि नानावर्णं प्रदृश्यते ॥ तत्राधः पद्मसंयोगान्नीरं स्वर्णायते क्षणात् ॥ २२ ॥ हिरण्मयानि पद्मानि अधः कृत्वा प्रजापतिः ॥ लिंगमूर्ध्वं प्रतिष्ठाप्य स्वयं पूजितवांस्तदा ॥ हिरण्यकमलैर्दिव्यैर्हिरण्येशस्ततोऽभवत् ॥ २३ ॥ सर्वपापप्रशमनं तथा दारिद्र्यनाशनम् ॥ दृष्ट्वा हिरण्मयेशानं सर्वपापैः प्रमुच्यते ॥ २४ ॥ माघमासे चतुर्दश्यां यस्तल्लिंगं प्रपूजयेत् ॥ पूजितं तेन सकलं ब्रह्माण्डं सचराचरम् ॥ २५ ॥ सर्वदानानि दत्तानि सर्वे देवाश्च तोषिताः ॥ ब्रह्माण्डं तेन दत्तं स्याद्येन तल्लिंगमर्चितम् ॥ २६ ॥ एतन्मया ते कथितं स्नेहेन वरवर्णिनि ॥ न कस्यचिन्मयाऽऽख्यातं महागोप्यं वरानने ॥ २७ ॥ य इदं शृणुयाद्भक्त्या पठेद्वा भक्तिसंयुतः ॥ स गच्छेद्देवलोकं तु मुक्तः सर्वैस्तु पातकैः ॥ २८ ॥ इति ते चातिविख्याताः पवित्राः पञ्च भैरवाः ॥ ब्रह्मकुण्डसमीपस्थाः कथितास्तव सुन्दरि ॥ २९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये ब्रह्मकुण्डमाहात्म्ये हिरण्येश्वरमाहात्म्यवर्णनंनाम त्रिपञ्चाशदुत्तरशततमोऽध्यायः ॥ १५३ ॥ ॥ छ ॥

॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि लिंगं पापविमोचनम् ॥ हिरण्येश्वरवायव्ये धनुषां त्रितये स्थितम् ॥ १ ॥ पापघ्नं सर्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





जंतूनां दर्शनात्स्पर्शनादपि ॥ आद्यं लिंगं महादेवि गायत्र्या संप्रतिष्ठितम् ॥ २ ॥ तल्लिंगं समनुप्राप्य गायत्रीं जपते तु यः ॥ ब्राह्म
णस्तु शुचिर्भूत्वा मुच्यते दुष्प्रतिग्रहात् ॥ ३ ॥ ज्येष्ठस्य पूर्णिमायां तु दंपती यस्तु भोजयेत् ॥ परिधाप्य यथाशक्त्या दौर्भाग्यैर्मुच्यते
नरः ॥ ४ ॥ गंधपुष्पोपहारैश्च पौर्णमास्यां तु योऽर्चयेत् ॥ ब्राह्मण्यं जायते तस्य सप्त जन्मानि सुंदरि ॥ ५ ॥ इत्येवं कथितं देवि माहात्म्यं
पापनाशनम् ॥ ब्रह्मकुण्डप्रसादेन सारात्सारतरं प्रिये ॥ ६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे
प्रभासक्षेत्रमाहात्म्ये ब्रह्मकुण्डमाहात्म्ये गायत्रीश्वरमाहात्म्यवर्णनंनाम चतुःपञ्चाशदुत्तरशततमोऽध्यायः ॥ १५४ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥
ततो गच्छेन्महादेवि रत्नेश्वरमनुत्तमम् ॥ तत्र तप्त्वा तपो देवि विष्णुना प्रभविष्णुना ॥ स्थापितं तत्र तल्लिंगं सर्वकामप्रदं प्रिये ॥ १ ॥ रत्नकुंडे
नरः स्नात्वा यस्तं पूजयते सदा ॥ सर्वोपचारैर्भक्त्या स प्राप्नुयादीप्सितं फलम् ॥ २ ॥ अत्र कृत्वा तपो घोरं कृष्णेनामिततेजसा ॥ प्राप्तं
सुदर्शनं चक्रं सर्वदैत्यान्तकारकम् ॥ ३ ॥ एतत्स्थानं महादेवि सदा प्रियतरं मम ॥ वसामि तत्र देवेशि प्रलयेऽपि न संत्यजे ॥ ४ ॥ स्मृतं
तद्वैष्णवं क्षेत्रं नाम्ना देवि सुदर्शनम् ॥ धन्वंतराणि षट्त्रिंशत्समंतात्परिमण्डलम् ॥ ५ ॥ एतदन्तरमासाद्य ये केचित्प्राणिनोऽधमाः ॥ मृताः
कालवशाद्देवि ते यास्यंति परं पदम् ॥ ६ ॥ कांचनं तत्र गरुडं पीतानि वसनानि च ॥ विष्णुमुद्दिश्य यो दद्यात्स तु यात्राफलं लभेत् ॥ ७ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये रत्नेश्वरमाहात्म्यवर्णनंनाम पंचपंचाशदु
त्तरशततमोऽध्यायः ॥ १५५ ॥ ॥छ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि वैनतेयप्रतिष्ठितम् ॥ रत्नेश्वरादुत्तरतो धनुषां त्रितये
स्थितम् ॥ १ ॥ वैनतेयश्च देवेशि ज्ञात्वा क्षेत्रं तु वैष्णवम् ॥ लिंगं प्रतिष्ठयामास सर्वपापप्रणाशनम् ॥ २ ॥ यस्तं पूजयते भक्त्या पंचम्यां तु
विधानतः ॥ न विषं क्रमते तस्य सप्त जन्मानि सर्पजम् ॥ ३ ॥ पंचामृतेन संस्नाप्य पूजयित्वा विधानतः ॥ प्राप्नुयात्सकलं पुण्यं मोदते दिवि
देववत् ॥ ४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये रत्नेश्वरमाहात्म्ये गरुडे
श्वरमाहात्म्यवर्णनंनाम षट्पंचाशदुत्तरशततमोऽध्यायः ॥ १५६ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि सत्यभामेश्वरं
शुभम् ॥ रत्नेश्वराद्दक्षिणे तु धनुषांतरमास्थितम् ॥ १ ॥ सर्वपापप्रशमनं स्थापितं सत्यभामया ॥ कृष्णस्य कान्तया देवि रूपौदार्यसमेत



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

या ॥ २ ॥ स्नात्वा¹ तद्वैष्णवं स्थानं नृणां पातकनाशनम् ॥ ३ ॥ माघे मासि तृतीयायां नारी वा पुरुषोऽपि वा ॥ यस्तं पूजयते भक्त्या स मुक्तः पातकैर्भवेत् ॥ ४ ॥ दौर्भाग्यदुःखशोकेभ्यस्तथा विघ्नैश्च दुःखितः ॥ मुच्यते नात्र संदेहः सत्यभामान्वितो² भवेत् ॥ ५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये सत्यभामेश्वरमाहात्म्यवर्णनंनाम सप्तपञ्चाशदुत्तरशततमोऽध्यायः ॥ १५७ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि अनंगेश्वरमुत्तमम् ॥ रत्नेश्वरादग्रतःस्थं धनुषान्तरमास्थितम् ॥ १ ॥ स्थापितं कामदेवेन तल्लिंगं विष्णुसूनुना ॥ ज्ञात्वा तद्वैष्णवं स्थानं कलौ पातकनाशनम् ॥ २ ॥ तं दृष्ट्वा पूजयित्वा तु कामदेवसमो भवेत् ॥ स्वर्गविद्याधरीणां च जायते चित्तमोहकः ॥ ३ ॥ तस्यान्वयेऽपि न भवेत्कुरूपो दुर्भगोऽपि वा ॥ ४ ॥ तत्रानंगत्रयोदश्यां व्रतेन वरवर्णिनि ॥ विशेषाराधनं तत्र जन्मसाफल्यकारणम् ॥ ५ ॥ शय्यादानं तु दातव्यं तत्र विप्राय शीलिने ॥ विशेषाद्विष्णुभक्ताय सम्यग्यात्राफलं लभेत् ॥ ६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभास खंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये रत्नेश्वरमाहात्म्येऽनंगेश्वरमाहात्म्यवर्णनंनामाष्टपंचाशदुत्तरशततमोऽध्यायः ॥ १५८ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि रत्नकुण्डमनुत्तमम् ॥ रत्नेशाद्दक्षिणे भागे धनुषां सप्तके स्थितम् ॥ महापापोपशमनं विष्णुना निर्मितं स्वयम् ॥ १ ॥ अष्टकोटीस्तु तीर्थानि भूम्योऽन्तरिक्षगाणि तु ॥ समानीय तु कृष्णेन तत्र क्षिप्तानि भूरिशः ॥ २ ॥ गणानां कोटिरेका तु तत्कुण्डं रक्षति प्रिये ॥ कलौ युगे तु संप्राप्ते दुष्प्राप्यमकृतात्मभिः ॥ ३ ॥ तत्र स्नात्वा महादेवि विधिदृष्टेन कर्मणा ॥ प्राप्नुयादश्वमेधस्य फलं शतगुणोत्तरम् ॥ ४ ॥ एकादश्यां विशेषेण पिंडं तत्र प्रदापयेत् ॥ अक्षय्यां तृप्तिमायांति पितरस्तस्य भामिनि ॥ ५ ॥ कुर्याज्जागरणं तत्र एकादश्यां विधानतः ॥ वाञ्छितं लभते देवि यदि श्रद्धा दृढा भवेत् ॥ ६ ॥ देयानि पीतवस्त्राणि तथा धेनुः पयस्विनी ॥ तत्र विष्णुं समुद्दिश्य सम्यग्यात्राफलाप्तये ॥ ७ ॥ हेमकुण्डं कृते प्रोक्तं त्रेतायां रौप्यनामकम् ॥ द्वापरे चक्रकुंडं तु रत्नकुंडं कलौ स्मृतम् ॥ ८ ॥ पातालवाहिनीगंगास्रोतांसितत्र भूरिशः ॥ समानीतानि हरिणा तत्र तिष्ठंति भामिनि ॥ ९ ॥ तत्र स्नानेन देवेशि सर्वतीर्थाभिषेचनम् ॥ १० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये रत्नेश्वरमाहात्म्यवर्णनंनामैकोनषष्ट्युत्तरशततमोऽध्यायः ॥१५९॥

१ स्नात्वा तद्वैष्णवं स्थानम्–तस्मिन्वैष्णवे स्थाने गत्वा स्नात्वा च–नृणां पातकनाशनं भवति-इत्यर्थयोजना बोद्धव्या। २ सत्यभामान्वितः--सत्यं सत्यभाषित्वम्--भा कान्तिः--मा लक्ष्मीः-ताभिः-अन्वितः-युक्तः--इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि राजभट्टारकं परम् ॥ रैवन्तकं सूर्यपुत्रमश्वारूढं महाबलम् ॥ १ ॥ संस्थितं क्षेत्रमध्ये तु सावित्र्या नैर्ऋते प्रिये ॥ तं दृष्ट्वा मानवो देवि सर्वापद्भ्यो विमुच्यते ॥२॥ रविवारेण सप्तम्यां यस्तं पूजयते नरः ॥ तस्याऽन्वयेऽपि नो देवि दरिद्री जायते नरः॥३॥ तस्मात्सर्वप्रयत्नेन तमेवाराधयेन्मनाक् ॥ निर्विघ्नं क्षेत्रवासार्थं राजा वाऽश्वविवृद्धये ॥ ४ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये रैवंतकराजभट्टारकमाहात्म्यवर्णनंनाम षष्ट्युत्तरशततमोऽध्यायः ॥ १६० ॥छ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि तस्य दक्षिणतः स्थितम् ॥ ईशाने लक्ष्मणेशाच्च धनुषां षोडशे प्रिये ॥१॥ अनन्तेश्वरनामानमनन्तेन प्रतिष्ठितम् ॥ नागराजेन देवेशि ज्ञात्वा क्षेत्रं तु पावनम् ॥ २ ॥ यस्तु तं पूजयेद्देवि पंचम्यां फाल्गुने सिते ॥ पञ्चोपचारविधिना जिताहारो जितेन्द्रियः ॥ ३ ॥ न तं दंशंति फणिनो दश वर्षाणि पंच च ॥ विषं न क्रमते देवि देहे त्वचरमेव वा ॥ ४ ॥ तस्मात्तं पूजयेद्यत्नात्पंचम्यां च विशेषतः ॥ ५ ॥ तत्रानंतव्रतं कार्यं मधुपायससंयुतम् ॥ पायसं मधुसंयुक्तं देयं विप्राय भोजनम् ॥ ६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्येऽनन्तेश्वरमाहात्म्यवर्णनंनामैकषष्ट्युत्तरशततमोऽध्यायः ॥ १६१ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि तस्माद्दक्षिणतः स्थितम् ॥ लक्ष्मणेशाच्च पूर्वस्मिँल्लिंगमष्टकुलेश्वरम् ॥ १ ॥ सर्वपापप्रशमनं महाविषप्रणाशनम् ॥ पूजितं सिद्धगन्धर्वैर्वाञ्छितार्थप्रदायकम् ॥ २ ॥ यस्तं पूजयते मर्त्यः कृष्णाष्टम्यां विधानतः ॥ स मुक्तः पातकैर्घोरैर्नागलोके महीयते ॥ ३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्येऽष्टकुलेश्वरमाहात्म्यवर्णनंनाम द्विषष्ट्युत्तरशततमोऽध्यायः ॥ १६२ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि तस्मात्पूर्वेण संस्थितम् ॥ नासत्येश्वरनामानं महाकल्मषनाशनम् ॥ १ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये नासत्येश्वराश्विनेश्वरमाहात्म्यवर्णनंनाम त्रिषष्ट्युत्तरशततमोऽध्यायः ॥ १६३ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि तस्मात्पूर्वेण संस्थितम् ॥ महापापौघशमनं पूजितं सर्वकामदम् ॥ १ ॥ अश्विनेश्वरनामानं धनुषां पंचके स्थितम् ॥ सर्वरोगप्रशमनं दृष्टं सर्वार्थसाधकम् ॥ २ ॥ ये केचिद्रोगिणो लोके तेषां तद्भेषजं महत् ॥ माघमासे द्वितीयायां दर्शनं तस्य दुर्लभम् ॥ ३ ॥ तस्मात्पश्येच्च तद्भक्त्या यदि श्रेयोऽभिकांक्षितम् ॥ महापापौघशमनं पूजितं सर्वकामदम् ॥ ४ ॥ इति लिङ्गद्वयं देवि सूर्यपुत्रप्रतिष्ठितम् ॥ तस्मिन्नेव दिने पश्येत्संयतात्मा



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नरोत्तमः ॥ ५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्येऽश्विनेश्वरमाहात्म्य वर्णनंनाम चतुःषष्ट्युत्तरशततमोऽध्यायः ॥ १६४ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि सावित्रीं लोकमातरम् ॥ महापापप्रशमनीं सोमेशादीशदिक्स्थिताम् ॥ १ ॥ संयतात्मा नरः पश्येत्तत्र तां नियतात्मवान् ॥ २ ॥ ब्रह्मणा यष्टुकामेन सावित्री सहधर्मिणी ॥ कृता तां बलतो ज्ञात्वा गायत्रीं कोपमाविशत् ॥ ३ ॥ ततः संत्यज्य सा देवी ब्रह्माणं कमलोद्भवम् ॥ सपत्नीरोषसन्तप्ता प्रभासं क्षेत्रमाश्रिता ॥ ४ ॥ तपः करोति विपुलं देवैरपि सुदुःसहम् ॥ तत्र स्थले स्थिता देवी साऽद्यापि प्रियदर्शना ॥ ५ ॥ ॥ श्रीदेव्युवाच ॥ ॥ किमर्थं सा परित्यक्ता सावित्री ब्रह्मणा पुरा ॥ गायत्री च कथं प्राप्ता केन चास्य निवेदिता ॥ ६ ॥ कीदृशीं तां च गायत्रीं लब्धवान्पद्मसंभवः ॥ यस्तां पत्नीं समुत्सृज्य तस्यामेव मनो दधौ ॥ ७ ॥ कस्य सा दुहिता देव किमर्थं च विवाहिता ॥ एतन्मे कौतुकं सर्वं यथावद्वक्तुमर्हसि ॥ ८ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि सावित्र्याश्चरितं महत् ॥ यथा सा ब्रह्मणा त्यक्ता गायत्री च विवाहिता ॥ ९ ॥ पुरा बुद्धिः समुत्पन्ना ब्रह्मणोऽव्यक्तजन्मनः ॥ इति वेदा मया प्रोक्ता यज्ञार्थं नात्र संशयः ॥ १० ॥ यज्ञैः संतर्पिता देवा वृष्टिं दास्यंति भूतले ॥ ततश्चौषधयः सर्वा भविष्यंति धरातले ॥ ११ ॥ तस्मात्संजायते शुक्रं शुक्रात्सृष्टिः प्रवर्तते ॥ सृष्ट्यर्थं सर्वलोकानां ततो यज्ञं करोम्यहम् ॥ १२ ॥ दृष्ट्वा मां यज्ञ आसक्तं ये च विप्रा धरातले ॥ ते यज्ञान्प्रचरिष्यंति शतशोऽथ सहस्रशः ॥ १३ ॥ एवं स निश्चयं कृत्वा यज्ञार्थं सुरसुंदरि ॥ तीर्थं निवेशयामास पुष्करंनाम नामतः ॥ १४ ॥ यज्ञवाटो महांस्तत्र आसीत्तस्य महात्मनः ॥ तत्र देवर्षयः सर्वे देवाः सेन्द्रपुरोगमाः ॥ १५ ॥ समायाता महादेवि यज्ञे पैतामहे तदा ॥ पुण्यास्तेऽपि द्विजश्रेष्ठास्तत्रर्त्विजः प्रजज्ञिरे ॥ १६ ॥ सावित्री लोकजननी पत्नी तस्य महात्मनः ॥ गृहकार्ये समासक्ता दीक्षाकालव्यतिक्रमात् ॥ अध्वर्युणासमाहूता सावित्री वाक्यमब्रवीत् ॥ १७ ॥ ॥ सावित्र्युवाच ॥ ॥ अद्यापि न कृतो वेषो न गृहे गृहमण्डनम् ॥ लक्ष्मीर्नाद्यापि संप्राप्ता न भवानी न जाह्नवी ॥ १८ ॥ न स्वाहा न स्वधा चैव तथा चैवाप्यरुंधती ॥ इन्द्राणी देवपत्न्योऽन्याः कथमेकाकिनी व्रजे ॥ १९ ॥ उक्तः पितामहो गत्वा पुलस्त्येन महात्मना ॥ सावित्री देव नायाति प्रसक्ता गृहकर्मणि ॥ २० ॥ त्वत्पत्नी किमिदं कर्म फलेन संप्रवर्तते ॥ तच्छ्रुत्वा दीक्षितो वाचं शिखी मुंडी मृगाजिनी ॥ २१ ॥ पत्नीकोपेन संतप्तः प्राह देवं पुरंदरम् ॥ २२ ॥ गच्छ मद्वचनाच्छक्र पत्नी

१ सहधर्मिणी--ब्रह्मणा--अन्या--कृता--अन्या--मम सपत्नी विवाहिता--इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



मन्यां कुतश्चन ॥ गृहीत्वा शीघ्रमागच्छ न स्यात्कालात्ययो यथा ॥ २३ ॥ जगाम बलहा तूर्णं वचनात्परमेष्ठिनः ॥ अपश्यमानः कांचित्स्त्रीं या
योग्या हंसवाहने ॥ २४ ॥ अथ शापाद्विभीतेन सहस्राक्षेण धीमता ॥ दृष्टा गोपालकन्यैका रूपयौवनशालिनी ॥ २५ ॥ बिभ्रती तत्र पूर्णं सा कुम्भं
कन्येत्यचोदयत् ॥ तां गृहीत्वा ततः शक्रः समायाद्यत्र दीक्षितः ॥ देवदेवश्चतुर्वक्त्रो विष्णुरुद्रसमन्वितः ॥ २६ ॥ संप्रदानं तु कृतवान्कन्याया मधुसू
दनः ॥२७॥ प्रेरितः शंकरेणैव ब्रह्मा देवर्षिभिस्तथा ॥ परिणीयतां ततो दीक्षां तस्याश्चक्रे यथात्मनः ॥ २८ ॥ ततः प्रवर्तितो यज्ञः सर्वकामसमन्वितः
॥२९॥ अत्रिर्होतार्चिकस्तत्र पुलस्त्योऽध्वर्युरेव च ॥ उद्गाताऽथो मरीचिश्च ब्रह्माहं सुरपुंगवः॥३०॥सनत्कुमारप्रमुखाः सदस्यास्तस्य निर्मिताः॥ वस्त्रै
राभरणैर्युक्ता मुकुटैरंगुलीयकैः ॥ ३१ ॥ भूषिता भूषणोपेता एकैकस्य पृथक्पृथक् ॥ त्रयस्त्रयः पृष्ठतोऽन्ये ते चैवं षोडशर्त्विजः ॥३२॥ प्रोक्ता भवद्भि
र्यज्ञेऽस्मिन्ननुगृह्योऽस्मि सर्वदा ॥ पत्नी ममेयं गायत्री यज्ञेऽस्मिन्ननुगृह्यताम् ॥ ३३ ॥ मृदुवस्त्रधरां साक्षात्क्षौमवस्त्रावगुण्ठिताम् ॥ निष्क्रम्य पत्नीशा
लात ऋत्विग्भिर्वेदपारगैः ॥ ३४ ॥ औदुम्बरेण दण्डेन संवृतो मृगचर्मणा ॥ तया सार्धं प्रविष्टश्च ब्रह्मा तं यज्ञमण्डपम् ॥३५॥ ॥ ईश्वर उवाच ॥ ॥
एतस्मिन्नेव काले तु संप्राप्ता देवयोषितः ॥ संप्राप्ता यत्र सावित्री यज्ञे तस्मिन्निमंत्रिताः ॥ ३६ ॥ भृगोः ख्यात्यां समुत्पन्ना विष्णुपत्नी यशस्वि
नी ॥ आमन्त्रिता सा लक्ष्मीश्च तत्रायाता त्वरान्विता ॥ ३७ ॥ तत्र देवी महाभागा योगनिद्रादिभूषिता ॥ देवी कांतिस्तथा श्रद्धा द्युतिस्तुष्टिस्त
थैव च ॥ ३८ ॥ सती या दक्षतनया उमा या पार्वती शुभा ॥ त्रैलोक्यसुन्दरी देवी स्त्रीणां सौभाग्यदायका ॥३९॥ जया च विजया चैव गौरी चैव
महाधना ॥ मनोजवा वायुपत्नी ऋद्धिश्च धनदप्रिया ॥ ४० ॥ देवकन्यास्तथाऽऽयाता दानव्यो दनुवंशजाः ॥ सप्तर्षीणां तथा पत्न्य ऋषीणां
च तथैव च ॥ ४१ ॥ ध्रुवा मित्रा दुहितरो विद्याधरगणास्तथा ॥ पितरो रक्षसां कन्यास्तथाऽन्या लोकमातरः ॥ ४२ ॥ वधूभिश्चैव मुख्याभिः
सावित्री गन्तुमिच्छति ॥ अदित्याद्यास्तथा देव्यो दक्षकन्याः समागताः ॥ ४३ ॥ ताभिः परिवृता सार्धं ब्रह्माणी कमलालया ॥ काश्चिन्मोदक
मादाय काश्चित्पूपं वरानने ॥ ४४ ॥ फलानि तु समादाय प्रयाता ब्रह्मणोऽन्तिकम् ॥ आढकीश्चैव निष्पावान्राजमाषांस्तथाऽपराः ॥ ४५ ॥ दाडि
मानि विचित्राणि मातुलिंगानि शोभने ॥ करीराणि तथा चान्या गृहीत्वा करमर्दकान् ॥ ४६ ॥ कौसुंभं जीरकं चैव खर्जूरं चापरास्तथा ॥ उतती
श्चापरा गृह्य नालिकेराणि चापराः ॥ ४७ ॥ द्राक्षया पूरितं चाम्रं शृङ्गाराय यथा पुरा ॥ कर्बुराणि विचित्राणि जंबूकानि शुभानि च ॥ ४८ ॥

१ बलहा—इन्द्रः—इत्यर्थः । २ एतत्पूर्वम्—इत्युक्त्वा-इति शेषः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अक्षोडामलकान्गृह्य जंबीराणि तथा पराः ॥ बिल्वानि परिपक्कानि चिर्भटानि वरानने ॥ ४९ ॥ अन्नपानाधिकाराणि बहूनि विविधानि च ॥ शर्करापुत्तलीं चान्या वस्त्रे कौसुम्भके तथा ॥ ५० ॥ एवमादीनि चान्यानि गृह्य पूर्वे वरानने ॥ सावित्र्या सहिताः सर्वाः संप्राप्तास्तु तदा शुभाः ॥ ५१ ॥ सावित्रीमागतां दृष्ट्वा भीतस्तत्र पुरंदरः ॥ अधोमुखः स्थितो ब्रह्मा किमेषा मां वदिष्यति ॥ ५२ ॥ त्रपान्वितौ विष्णुरुद्रौ सर्वे चान्ये द्विजातयः ॥ सभासदस्तथा भीतास्तथैवान्ये दिवौकसः ॥ ५३ ॥ पुत्रपौत्रा भागिनेया मातुला भ्रातरस्तथा ॥ ऋतवो नाम ये देवा देवानामपि देवताः ॥ ५४ ॥ विलक्षास्तु तथा सर्वे सावित्री किं वदिष्यति ॥ ब्रह्मवाक्यानि वाच्यानि किं नु वै गोपकन्यया ॥ ॥ ५५ ॥ मौनीभूतास्तु शृण्वानाः सर्वेषां वदतां गिरः ॥ अध्वर्युणा समाहूता नागता वरवर्णिनी ॥ ५६ ॥ शक्रेणान्या तथाऽऽनीता दत्ता सा विष्णुना स्वयम् ॥ अनुमोदिता च रुद्रेण पित्रा दत्ता स्वयं तथा ॥ ५७ ॥ कथं सा भविता यज्ञः समाप्तिं वा कथं व्रजेत् ॥ एवं चिन्तयतां तेषां प्रविष्टा कमलालया[1] ॥ ५८ ॥ वृतो ब्रह्मा भार्यया स ऋत्विग्भिर्वेदपारगैः ॥ हूयन्ते चाग्नयस्तत्र ब्राह्मणैर्वेदपारगैः ॥ ५९ ॥ पत्नीशाले तथा गोपी रौप्यशृंगा समेखला ॥ क्षौमवस्त्रपरीधाना ध्यायन्ती परमेश्वरम् ॥ ६० ॥ पतिव्रता पतिप्राणा प्राधान्येन निवेशिता ॥ रूपान्विता विशालाक्षी तेजसा भास्करोपमा ॥ ६१ ॥ द्योतयंती सदस्तत्र सूर्यस्येव यथा प्रभा ॥ ज्वलमानस्तथा वह्निर्भ्रमंते चर्त्विजस्तथा ॥ ६२ ॥ पशूनामवदानानि गृह्णंति द्विजसत्तमाः ॥ प्राप्ता भागार्थिनो देवा विलंबसमयोऽभवत् ॥ ६३ ॥ कालहीनं न कर्तव्यं कृतं न फलदं भवेत् ॥ वेदेष्वयमधीकारो दृष्टः सर्वो मनीषिभिः ॥ ६४ ॥ प्रवर्ग्ये क्रियमाणे तु ब्राह्मणैर्वेदपारगैः ॥ क्षीरद्वये हूयमाने मंत्रेणाध्वर्युणा तथा ॥ ६५ ॥ उपहूतोपहूतेन आगतेषु द्विजन्मसु ॥ क्रियमाणे तथा भक्ष्ये दृष्ट्वा देवी क्रुधान्विता ॥ उवाच देवी ब्रह्माणं सदोमध्ये तु मौनिनम् ॥ ६६ ॥ किमेवं बुध्यते देव कृतमेतद्विचेष्टितम् ॥ मां परित्यज्य यः कामात्कृतवानसि किल्बिषम् ॥ ६७ ॥ न तुल्या पादरजसा समा साऽधिशिरः कृता ॥ ६८ ॥ यद्वदंति नराः सर्वे संगताः सदसि स्थिताः ॥ आश्चर्यं च प्रभूणां तु कुरुते यंयमिच्छति ॥ ६९ ॥ भवता रूपलोभेन कृतं कर्म विगर्हितम् ॥ ७० ॥ न पुत्रेषु कृता लज्जा पौत्रेषु च न ते विभो ॥ कामकारकृतं मन्ये ह्येतत्कर्म विगर्हितम् ॥ ७१ ॥ पितामहोऽसि देवानामृषीणां प्रपितामहः ॥ कथं न ते त्रपा जाता आत्मनः पश्यतस्तनुम् ॥ ७२ ॥ लोकमध्ये कृतं हास्यमिह चैव विगर्हितः ॥ यद्येष ते स्थितो भावस्तिष्ठ देव नमोऽस्तु ते ॥७३॥

१ कमलालया—कमलासना—सावित्री—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





अहं कथं सखीनां तु दर्शयिष्यामि वै मुखम् ॥ भर्त्रा मे विहिता पत्नी कथमेतदहं वदे ॥ ७४ ॥ ॥ ब्रह्मोवाच ॥ ॥ ऋत्विग्भिरहमाज्ञतो दीक्षा
कालोऽतिवर्तते ॥ पत्नीं विना न होमोत्र शीघ्रं पत्नीमिहानय ॥ ७५ ॥ शक्रेणैषा समानीता दत्ता चैवाऽथ विष्णुना ॥ गृहीता च मया त्वं हि
क्षमस्वैकं मया कृतम् ॥ न चापराध्यं भूयोऽन्यं करिष्ये तव सुव्रते ॥ ७६ ॥ ॥ ईश्वर उवाच ॥ ॥ एवमुक्ता तदा क्रुद्धा ब्रह्माणं शप्तुमुद्यता॥
यदि मेऽस्ति तपस्ततं गुरवो यदि तोषिताः ॥ ७७ ॥ सर्वब्राह्मणशालासु स्थानेषु विविधेष्वपि ॥ न तु ते ब्राह्मणाः पूजां करिष्यंति कदाचन ॥
॥ ७८ ॥ ऋते वै कार्तिकीमेकां पूजां सांवत्सरीं तव ॥ करिष्यंति द्विजाः सर्वे सत्येनानेन ते शपे ॥ एतद्बुद्ध्वा न कोपोस्तु हतो हन्ति न संशयः ॥
॥ ७९ ॥ ॥ सावित्र्युवाच ॥ ॥ भोभोः शक्र त्वयानीता आभीरी ब्रह्मणोऽन्तिकम् ॥ यस्मादीदृक्कृतं कर्म तस्मात्त्वं लप्स्यसे फलम् ॥८०॥
यदा संग्राममध्ये त्वं स्थाता शक्र भविष्यसि ॥ तदा त्वं शत्रुभिर्बद्धो नीतः परमिकां दशाम् ॥ ८१ ॥ अकिंचनो नष्टसुतः शत्रूणां नगरे स्थितः॥
पराभवं महत्प्राप्य अचिरादेव मोक्ष्यसे ॥ ८२ ॥ शक्रं शप्त्वा तदा देवी विष्णुं चाऽथ वचोब्रवीत् ॥ ८३ ॥ गुरुवाक्येन ते जन्म यदा मर्त्ये भवि
ष्यति ॥ भार्याविरहजं दुःखं तदा त्वं तत्र भोक्ष्यसे ॥ ८४ ॥ हृतां शत्रुगणैः पत्नीं परे पारे महोदधेः ॥ न च त्वं ज्ञायसे सीतां शोकोपहतचेतनः
॥ ८५ ॥ भ्रात्रा सह परां काष्ठामापदं दुःखितस्तथा ॥ पशूनां चैव संयोगश्चिरकालं भविष्यति ॥ ८६ ॥ तथाऽऽह रुद्रं कुपिता यदा दारुवने
स्थितः ॥ तदा ते मुनयः क्रुद्धाः शापं दास्यंति ते हर ॥ ८७ ॥ भोभोः कापालिक क्षुद्र पत्न्योऽस्माकं जिहीर्षसि ॥ तदेतद्दूषितं लिंगं भूमौ रुद्र
पतिष्यति ॥ ८८ ॥ विहीनः पौरुषेण त्वं मुनिशापाच्च पीडितः ॥ गंगातीरे स्थिता पत्नी सा त्वामाश्वासयिष्यति ॥ ८९ ॥ अग्नेत्वं सर्वभक्षोऽसि
पूर्वं पुत्रेण मे कृतः ॥ भ्रूणहा धर्म इत्येष कथं दग्धं दहाम्यहम् ॥ ९० ॥ जातवेदस रुद्रस्त्वां रेतसा प्लावयिष्यति ॥ मेध्येषु च कृतज्वाला ज्वालया
त्वां ज्वलिष्यति ॥ ९१ ॥ ब्राह्मणानृत्विजः सर्वान्सावित्री ह्यशपत्तदा ॥ ९२ ॥ प्रतिग्रहाग्निहोत्राश्च वृथा दारा वृथाश्रमाः ॥ सदा क्षेत्राणि तीर्थानि
लोभादेव गमिष्यथ ॥ ९३ ॥ परान्नेषु सदा तृप्ता अतृप्ताः स्वगृहेषु च ॥ अयाज्ययाजनं कृत्वा कुत्सितस्य प्रतिग्रहम् ॥ ९४ ॥ वृथा धनार्जनं
कृत्वा व्ययश्चैव तथा वृथा ॥ मृतानां तेन प्रेतत्वं भविष्यति न संशयः ॥ ९५ ॥ एवं शक्रं तथा विष्णुं रुद्रं वै पावकं तथा ॥ ब्रह्माणं ब्राह्मणांश्चैव
सर्वांस्तानशपत्तदा ॥ ९६ ॥ शापं दत्त्वा तथा तेषां तदा सावस्थिता स्थिरा ॥ ९७ ॥ लक्ष्मीः प्राह सखीं तां च इन्द्राणी च वरानना ॥ अन्या

१ पत्न्यः—पत्नीः—इत्यर्थः । पूर्वसवर्णदीर्घाभाव आर्षः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देव्यस्तथा प्राहुः साऽऽह स्थास्यामि नात्र वै ॥ तत्र चाहं गमिष्यामि यत्र श्रोष्ये न तु ध्वनिम् ॥ ९८ ॥ ततस्ताः प्रमदाः सर्वाः प्रयाताः स्वं निकेतनम् ॥ सावित्री कुपिता तासां पुनः शापाय चोद्यता ॥ ९९ ॥ यस्मान्मां संपरित्यज्य गतास्ता देवयोषितः ॥ तासामपि तथा शापं प्रदास्ये कुपिता भृशम् ॥ १०० ॥ नैकत्र वासो लक्ष्म्यास्तु भविष्यति कदाचन ॥ रुद्धापि चंचला तावन्मूर्खेषु च वसिष्यसि ॥ १०१ ॥ म्लेच्छेषु पर्वतीयेषु कुत्सिते कुष्ठिते तथा ॥ वाचाटे चावलिप्ते च अभिशस्ते दुरात्मनि ॥ एवंविधे नरे तुभ्यं वसतिः शापकारिता ॥ १०२ ॥ शापं दत्त्वा ततस्तस्यां इन्द्राणीमशपत्तदा ॥ १०३ ॥ त्वष्टुर्वाचा गृहीतेन्द्रे पत्यौ ते दुष्टकारिणि ॥ नहुषाय गते राज्ये दृष्ट्वा त्वां याचयिष्यति ॥ १०४ ॥ अहमिन्द्रः कथं चैषा नोपतिष्ठति चालसा ॥ सर्वान्देवान्हनिष्यामि लप्स्ये नाहं शचीं यदि ॥ १०५ ॥ नष्टा त्वं च तदा शस्ता वने महति दुःखिता ॥ वसिष्यसि दुराचारे शापेन मम गर्विते ॥ १०६ ॥ देवभार्यासु सर्वासु तदा शापमयच्छत ॥ १०७ ॥ न चापत्यकृता प्रीतिः सर्वास्वेव भविष्यति ॥ दह्यमाना दिवारात्रौ वंध्याशब्देन दुःखिताः ॥१०८॥ गौरीमेवं तथा शप्त्वा सा देवी वरवर्णिनी ॥ उच्चै रुरोद सावित्री भर्तृयज्ञाद्बहिः स्थिता ॥ १०९ ॥ रोदमाना तु सा दृष्टा विष्णुना च प्रसादिता ॥ मा रोदीस्त्वं विशालाक्षि एह्यागच्छ सदः शुभे ॥ ११० ॥ प्रविष्टा च शुभे यागे मेखलां क्षौमवाससी ॥ गृहाण दीक्षां ब्रह्माणि पादौ ते प्रणमे शुभे ॥ १११ ॥ एवमुक्ताऽब्रवीदेनं नाहं कुर्यां वचस्तव ॥ तत्राहं च गमिष्यामि यत्र श्रोष्ये न च ध्वनिम् ॥ ११२ ॥ एतावदुक्त्वा व्यरमदुच्चैः स्थाने क्षितौ स्थिता ॥ ११३ ॥ विष्णुस्तदग्रतः स्थित्वा बद्ध्वा च करसंपुटम् ॥ तुष्टाव प्रणतो भूत्वा भक्त्या परमया युतः ॥ ११४ ॥ ॥ विष्णुरुवाच ॥ ॥ नमोऽस्तु ते महादेवि भूर्भुवःस्वस्त्रयीमयि ॥ सावित्रि दुर्गतारिणि त्वं वाणी सप्तधा स्मृता ॥ ११५ ॥ सर्वाणि स्तुतिशास्त्राणि लक्षणानि तथैव च ॥ भविष्या सर्वशास्त्राणां त्वं तु देवि नमोऽस्तु ते ॥ ११६ ॥ श्वेता त्वं श्वेतरूपासि शशांकेन समानना ॥ शशिरश्मिप्रकाशेन हरिणोरसि राजसे ॥ दिव्यकुंडलपूर्णाभ्यां श्रवणाभ्यां विभूषिता ॥ ११७ ॥ त्वं सिद्धिस्त्वं तथा ऋद्धिः कीर्तिः श्रीः संततिर्मतिः ॥ संध्या रात्रि प्रभातस्त्वं कालरात्रिस्त्वमेव च ॥ ११८ ॥ कर्षुकाणां यथा सीता भूतानां धारिणी तथा ॥ एवं स्तुवंतं सावित्री विष्णुं प्रोवाच सुव्रता ॥ ११९ ॥ सम्यक्स्तुता त्वया पुत्र अजेयस्त्वं भविष्यसि ॥ अवतारे सदा वत्स पितृमातृसुवल्लभः ॥ १२० ॥ अनेन स्तवराजेन स्तोष्यते यस्तु मां सदा ॥ सर्वदोषविनिर्मुक्तः परं स्थानं गमिष्यति ॥ १२१ ॥ गच्छ यज्ञं चिरं

१ तस्यै—इन्द्राणीम्—इति पदच्छेदः । २ कर्षुकाणाम्—कृषीवलानाम्—यथा—येन प्रकारेण—सीता—लांगलपद्धतिः—यथा धारिणी—पोषिणी—तथा त्वं भूतानाम्—प्राणिनाम्—धारिणी—पोषिणी—असि—इत्यर्थयोजना बोध्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तस्य समाप्तिं नय पुत्रक ॥ १२२ ॥ कुरुक्षेत्रे प्रयागे च भविष्ये यज्ञकर्मणि ॥ समीपगा स्थिता भर्तुः करिष्ये तव भाषितम् ॥ १२३ ॥ एवमुक्तो गतो विष्णुर्ब्रह्मणः सद उत्तमम् ॥ सावित्री तु समायाता प्रभासे वरवर्णिनि ॥१२४॥ गतायामथ सावित्र्यां गायत्री वाक्यमब्रवीत् ॥१२५॥ शृण्वंतु मुनयो वाक्यं मदीयं भर्तृसन्निधौ ॥ यदहं वच्मि संतुष्टा वरदानाय चोद्यता ॥ १२६ ॥ ब्रह्माणं पूजयिष्यंति नरा भक्तिसमन्विताः ॥ तेषां वस्त्रं धनं धान्यं दाराः सौख्यं सुताश्च वै ॥ १२७ ॥ अविच्छिन्नं तथा सौख्यं गृहं वै पुत्रपौत्रिकम् ॥ भुक्त्वाऽसौ सुचिरं कालं ततो मोक्षं गमिष्यति ॥१२८॥ शक्राहं ते वरं वच्मि संग्रामे शत्रुभिः सह ॥ तदा ब्रह्मा मोचयिता गत्वा शत्रुनिकेतनम् ॥ १२९ ॥ सपुत्रशत्रुनाशात्त्वं लप्स्यसे च परां मुदम् ॥ अकंटकं महद्राज्यं त्रैलोक्ये ते भविष्यति ॥ १३० ॥ मर्त्यलोके यदा विष्णो ह्यवतारं करिष्यसि ॥ भ्रात्रा सह परं दुःखं स्वभार्याहरणं च यत् ॥ १३१ ॥ हत्वा शत्रुं पुनर्भार्यां लप्स्यसे सुरसन्निधौ ॥ गृहीत्वा तां पुनः प्राज्यं राज्यं कृत्वा गमिष्यसि[2] ॥ १३२ ॥ एकादश सहस्राणि[1] कृत्वा राज्यं पुनर्दिवम् ॥ ख्यातिस्ते विपुला लोके चानुरागो भविष्यति ॥ १३३ ॥ गायत्री ब्राह्मणांस्तांश्च सर्वानेवाब्रवीदिदम् ॥ ॥ १३४ ॥ युष्माकं प्रीणनं कृत्वा तृप्तिं यास्यंति देवताः ॥ भवंतो भूमिदेवा वै सर्वे पूज्या भविष्यथ ॥ १३५ ॥ युष्माकं पूजनं कृत्वा दत्त्वा दानान्यनेकशः ॥ प्राणायामेन चैकेन सर्वमेतत्तरिष्यथ ॥ १३६ ॥ प्रभासे तु विशेषेण जप्त्वा मां वेदमातरम् ॥ प्रतिग्रहकृतान्दोषान्न प्राप्स्यध्वं द्विजोत्तमाः ॥ १३७ ॥ पुष्करे चान्नदानेन प्रीताः सर्वे च देवताः ॥ एकस्मिन्भोजिते विप्रे कोटिर्भवति भोजिता ॥ १३८ ॥ ब्रह्महत्यादिपापानि दुरितानि च यानि च ॥ तरिष्यंति नराः सर्वे दत्ते युष्मत्करे धने ॥ १३९ ॥ महीयध्वे तु जाप्येन प्राणायामैस्त्रिभिः कृतैः ॥ ब्रह्महत्यासमं पापं तत्क्षणादेव नश्यति ॥ १४० ॥ दशभिर्जन्मजनितं शतेन तु पुरा कृतम् ॥ त्रियुगं तु सहस्रेण गायत्री हंति किल्बिषम् ॥ १४१ ॥ एवं ज्ञात्वा सदा पूज्या जाप्ये च मम वै कृते ॥ भविष्यध्वं न सन्देहो नात्र कार्या विचारणा ॥ १४२ ॥ ओंकारेण त्रिमात्रेण सार्धेन च विशेषतः ॥ पूज्याः सर्वे न सन्देहो जप्त्वा मां शिरसा सह ॥ १४३ ॥ अष्टाक्षरस्थिता चाहं जगद्व्याप्तं मया त्विदम् ॥ माताऽहं सर्ववेदानां वेदैः सर्वैरलङ्कृता ॥ ॥१४४॥ जप्त्वा मां परमां सिद्धिं पश्यन्ति द्विजसत्तमाः ॥ प्राधान्यं मम जाप्येन सर्वेषां वो भविष्यति ॥ १४५ ॥ गायत्रीसारमात्रोऽपि वरं विप्रः सुयन्त्रितः ॥ नायंत्रितश्चतुर्वेदः सर्वाशी सर्वविक्रयी ॥ १४६ ॥ यस्माद्भवतां सावित्र्या शापो दत्तो सदे[3] त्विह ॥ अत्र दत्तं हुतं चापि सर्वमक्षय ॥११७॥

१ एकादशसहस्राणि–वर्षाणि–इति विशेष्यमध्याहार्यम् । २ यास्यसि–इति शेषः । ३ सदे–सदसि–सकारान्तस्य 'सदस्' शब्दस्य अकारान्तत्वमार्षम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारकम् ॥ दत्तो वरो मया तेन युष्माकं द्विजसत्तमाः ॥ १४७ ॥ अग्निहोत्रपरा विप्रास्त्रिकालं होमदायिनः ॥ स्वर्गं ते तु गमिष्यंति एकविंशतिभिः कुलैः ॥ १४८ ॥ एवं शक्रे च विष्णौ च रुद्रे वै पावके तथा ॥ ब्रह्मणो ब्राह्मणानां च गायत्री सा वरं ददौ ॥ तस्मिन्काले वरं दत्त्वा ब्रह्मणः पार्श्वगाऽभवत् ॥ १४९ ॥ हरिणा तु समाख्यातं लक्ष्म्याः शापस्य कारणम् ॥ युवतीनां च सर्वासां शापस्तासां पृथक्पृथक् ॥ १५० ॥ लक्ष्म्यास्तदा वरं प्रादाद्गायत्री ब्रह्मणः प्रिया ॥ १५१ ॥ अकुत्सिताः सदा पुत्रि तव वासेन शोभने ॥ भविष्यंति न संदेहः सर्वेभ्यः प्रीतिदायकाः ॥ १५२ ॥ ये त्वया वीक्षिताः सर्वे सर्वे वै पुण्यभाजनाः ॥ तेषां जातिः कुलं शीलं धर्मश्चैव वरानने ॥ १५३ ॥ परित्यक्तास्त्वया ये तु ते नरा दुःखभागिनः ॥ सभायां ते न शोभन्ते मन्यन्ते न च पार्थिवैः ॥ १५४ ॥ आशिषश्चैव तेषां तु कुर्वते वै द्विजोत्तमाः ॥ सौजन्यं तेषु कुर्वन्ति नत्ता भ्राता पिता गुरुः ॥ १५५ ॥ बांधवोऽसि न संदेहो न जीवेऽहं त्वया विना ॥ त्वयि दृष्टे प्रसन्ना मे दृष्टिर्भवति शोभना ॥ मनः प्रसीदतेऽत्यर्थं सत्यंसत्यं वदामि ते ॥ १५६ ॥ एवंविधानि वाक्यानि त्वया दृष्ट्या निरीक्षिते ॥ सज्जनास्ते वदिष्यन्ति जनानां प्रीतिदायकाः ॥ १५७ ॥ इन्द्राणि नहुषः प्राप्य स्वर्गं त्वां याचयिष्यति ॥ अदृष्टा तु हतः पापो अगस्त्यवचनाद्भुतम् ॥ १५८ ॥ सर्पत्वं समनुप्राप्य प्रार्थयिष्यति तं मुनिम् ॥ दर्पेणाहं विनष्टोऽस्मि शरणं मे मुने भव ॥ १५९ ॥ वाक्येन तेन तस्यासौ नृपस्य भगवानृषिः ॥ कृत्वा मनसि कारुण्यमिदं वचनमब्रवीत् ॥ १६० ॥ उत्पत्स्यति कुले राजा त्वदीये कुरुनंदन ॥ सार्पं कलेवरं दृष्ट्वा प्रश्नैस्त्वामुद्धरिष्यति ॥ १६१ ॥ सोऽप्यजगरतां त्यक्त्वा पुनः स्वर्गं गमिष्यति ॥ अश्वमेधे कृते भर्त्रा सह यासि पुनर्दिवि ॥ प्राप्स्यसे वरदानेन ममानेन सुलोचने ॥ १६२ ॥ देवपत्न्यस्तदा सर्वास्तुष्टया परिभाषिताः ॥ अपत्यैरपि हीनाः स्युर्नैव दुःखं भविष्यति ॥ १६३ ॥ इति दत्त्वा वरान्देवी गायत्री लोकसंमता ॥ जगामादर्शनं देवी सर्वेषां पश्यतां तदा ॥ १६४ ॥ सावित्री तु तदा देवी प्रभासं क्षेत्रमागता ॥ कृतस्मरस्य शृङ्गे तु श्रीसोमेश्वरपूर्वतः ॥ १६५ ॥ मन्वन्तरे चाक्षुषे च द्वितीये द्वापरे शुभे ॥ तत्र यज्ञः समारब्धो ब्रह्मणा लोककारिणा ॥ १६६ ॥ यज्ञे याता महात्मानो देवाः सप्तर्षयो वराः ॥ स्वायंभुवे तु ये शस्ताः शप्तास्ते चाभवन्पुरा ॥ १६७ ॥ तस्मात्कालात्समारभ्य प्रभासं क्षेत्रमाश्रिताः ॥ १६८ ॥ सावित्री लोकजननी लोकानुग्रहकारिणी ॥ यस्तां पूजयते भक्त्या पक्षमेकं निरंतरम् ॥ ब्रह्मपूजाविधानेन तस्य पुत्रो ध्रुवो भवेत् ॥ १६९ ॥ पाण्डुकूपे नरः स्नात्वा दृष्ट्वा लिंगानि पञ्च वै ॥ पाण्डवैः स्थापितानीह दृष्ट्वा यज्ञफलं लभेत् ॥ १७० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ज्येष्ठस्य पूर्णिमायां तु सावित्रीस्थलसंनिधौ ॥ पठेद्यो ब्रह्मसूक्तानि मुच्यते सर्वपातकैः ॥ १७१ ॥ एतत्ते सर्वविख्यातमाख्यातं कल्मषापहम् ॥ यश्चेदं शृणुयाद्भक्त्या स गच्छेत्परमं पदम् ॥ १७२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये सावित्रीमाहात्म्यवर्णनंनाम पञ्चषष्ट्युत्तरशततमोऽध्यायः ॥ १६५ ॥ ॥ छ ॥ ॥ देव्युवाच ॥ ॥ प्रभासे संस्थिता या तु सावित्री ब्रह्मणः प्रिया ॥ तस्याश्चरित्रं मे ब्रूहि देवदेव जगत्पते ॥ १ ॥ व्रतमाहात्म्यसंयुक्तमितिहाससमन्वितम् ॥ पातिव्रत्यकरं स्त्रीणां महाभाग्यं महोदयम् ॥ २ ॥ ॥ ईश्वर उवाच ॥ ॥ कथयामि महादेवि सावित्र्याश्चरितं महत् ॥ प्रभासक्षेत्रसंस्थायाः स्थलस्थाने महेश्वरि ॥ यथा चीर्णं व्रतकरं सावित्र्या राजकन्यया ॥ ३ ॥ आसीन्मद्रेषु धर्मात्मा सर्वभूतहिते रतः ॥ पार्थिवोऽश्वपतिर्नाम पौरजानपदप्रियः ॥ ४ ॥ क्षमावाननपत्यश्च सत्यवादी जितेन्द्रियः ॥ प्रभासक्षेत्रयात्रायामाजगाम स भूपतिः ॥ यात्रां कुर्वन्विधानेन सावित्रीस्थलमागतः ॥ ५ ॥ स सभार्यो व्रतमिदं तत्र चक्रे नृपः स्वयम् ॥ सावित्रीति प्रसिद्धं यत्सर्वकामफलप्रदम् ॥ ६ ॥ तस्य तुष्टाऽभवद्देवि सावित्री ब्रह्मणः प्रिया ॥ भूर्भुवःस्वरितीत्येषा साक्षान्मूर्तिमती स्थिता ॥ ७ ॥ कमंडलुधरा देवी जगामादर्शनं पुनः ॥ कालेन बहुना जाता दुहिता देवरूपिणी ॥ ८ ॥ सावित्र्या प्रीतया दत्ता सावित्र्याः पूजया तथा ॥ सावित्रीत्येव नामाऽस्याश्चक्रे विप्राज्ञया नृपः॥ ९ ॥ सा विग्रहवतीव श्रीः प्रावर्धत नृपात्मजा ॥ सावित्री सुकुमारांगी यौवनस्था बभूव ह ॥ १० ॥ या सुमध्या पृथुश्रोणी प्रतिमा काञ्चनी यथा ॥ प्राप्तेयं देवकन्या वा दृष्ट्वा तां मेनिरे जनाः ॥ ॥ ११ ॥ सा तु पद्मा विशालाक्षी प्रज्वलतीव तेजसा ॥ चचार सा च सावित्री व्रतं यद्भृगुणोदितम् ॥१२॥ अथोपोष्य शिरःस्नाता देवतामभिगम्य च ॥ हुत्वाग्निं विधिवद्विप्रान्वा[2]चयेद्वरवर्णिनी ॥१३॥ तेभ्यः सुमनसः शे[3]षां प्रतिगृह्य नृपात्मजा ॥ सखीपरिवृताऽभ्येत्य देवी श्रीवत्सु[4]रूपिणी ॥१४॥ साऽभिवाद्य पितुः पादौ शे[5]षां पूर्वं निवेद्य च ॥ कृताञ्जलिर्वरारोहा नृपतेः पार्श्वतः स्थिता ॥ १५ ॥ तां दृष्ट्वा यौवनप्राप्तां स्वां सुतां देवरूपिणीम् ॥ उवाच राजा संमन्त्र्य पुत्र्यर्थं सह मन्त्रिभिः ॥ १६ ॥ पुत्रि प्रदानकालस्ते न हि कश्चि[6]द्वृणोति माम् ॥ विचारयन्न पश्यामि वरं तुल्यमिहात्मनः ॥ ॥१७॥ देवादीनां यथा वा[7]च्यो न भवेयं तथा कुरु ॥ पच्यमानं मया पुत्रि धर्मशास्त्रेषु च श्रुतम् ॥१८॥ पितुर्गेहे तु या कन्या रजः पश्यत्यसंस्कृता ॥

१ सर्वविख्यातम्—सावित्रीचारित्रम्—इति शेषः । २ वाचयेत्--स्वस्ति वाचयेत । ३ तेभ्यः सुमनसः शेषाम्—तेभ्यः—विप्रेभ्यः—सुमनसः शेषाम्—पुष्पप्रसादम्—इत्यर्थः । तुष्टेभ्यो विप्रेभ्य आशीर्वादपूर्वकं पुष्पप्रसादं प्रतिगृह्य—इति यावत् । ४ श्रीवत्सुरूपिणी—लक्ष्मीतुल्यसुस्वरूपा—इत्यर्थः । ५ शेषाम्--विप्रदत्तपुष्पप्रसादम्--इत्यर्थः । ६ वृणोति—याचते—इत्यर्थः । ७ वाच्यः—निन्द्यः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्महत्या पितुस्तस्य सा कन्या वृषली स्मृता ॥ १९ ॥ अतोऽर्थं प्रेषयामि त्वां कुरु पुत्रि स्वयंवरम् ॥ वृद्धैरमात्यैः सहिता शीघ्रं गच्छावधारय ॥ ॥ २० ॥ एवमस्त्विति सावित्री प्रोच्य तस्माद्विनिर्ययौ ॥ तपोवनानि रम्याणि राजर्षीणां जगाम सा ॥ २१ ॥ मान्यानां तत्र वृद्धानां कृत्वा पादाभिवन्दनम् ॥ ततोऽभिगम्य तीर्थानि सर्वाण्येवाश्रमाणि च ॥ २२ ॥ आजगाम पुनर्वेश्म सावित्री सह मंत्रिभिः ॥ तत्रापश्यत देवर्षिं नारदं पुरतः शुचिम् ॥ २३ ॥ आसीनमासने विप्रं प्रणम्य स्मितभाषिणी ॥ कथयामास तत्कार्यं येनारण्यं गता च सा ॥ २४ ॥ ॥ सावित्र्युवाच ॥ ॥ आसीच्छाल्वेषु धर्मात्मा क्षत्रियः पृथिवीपतिः ॥ द्युमत्सेन इति ख्यातो दैवादन्धो बभूव सः ॥ २५ ॥ आर्यस्य बालपुत्रस्य द्युमत्सेनस्य रुक्मिणा ॥ सामन्तेन हृतं राज्यं छिद्रेऽस्मिन्पूर्ववैरिणा ॥ २६ ॥ स बालवत्सया सार्धं भार्यया प्रस्थितो वनम् ॥ २७ ॥ स तस्य च वने वृद्धः पुत्रः परमधार्मिकः ॥ सत्यवागनुरूपो मे भर्तेति मनसेप्सितः ॥ २८ ॥ ॥ नारद उवाच ॥ ॥ अहो बत महत्कष्टं सावित्र्या नृपते कृतम् ॥ बालस्वभावादनया गुणवान्सत्यवाग्वृतः ॥ २९ ॥ सत्यं वदत्यस्य पिता सत्यं माता प्रभाषते ॥ सत्यं वदेति मुनिभिः सत्यवान्नाम वै कृतम् ॥ ३० ॥ नित्यं चाश्वाः प्रियास्तस्य करोत्यश्वांश्च मृन्मयान् ॥ चित्रेऽपि च लिखत्यश्वांश्चित्राश्व इति चोच्यते ॥ ३१ ॥ सत्यवान्रंतिदेवस्य शिष्यो दानगुणैः समः ॥ ब्रह्मण्यः सत्यवादी च शिबिरौशीनरो यथा ॥ ३२ ॥ ययातिरिव चोदारः सोमवत्प्रियदर्शनः ॥ रूपेणान्यतमोऽश्विभ्यां द्युमत्सेनसुतो बली ॥ ३३ ॥ एको दोषोऽस्ति नान्यश्च सोऽद्यप्रभृति सत्यवान् ॥ संवत्सरेण क्षीणायुर्देहत्यागं करिष्यति ॥ ३४ ॥ नारदस्य वचः श्रुत्वा दुहिता प्राह पार्थिवम् ॥ ३५ ॥ ॥ सावित्र्युवाच ॥ ॥ सकृज्जल्पंति राजानः सकृज्जल्पंति ब्राह्मणाः ॥ सकृत्कन्या प्रदीयेत त्रीण्येतानि सकृत्सकृत् ॥ ३६ ॥ दीर्घायुरथवाल्पायुः सगुणो निर्गुणोऽपि वा ॥ सकृद्वृतो मया भर्ता न द्वितीयं वृणोम्यहम् ॥ ॥ ३७ ॥ मनसा निश्चयं कृत्वा ततो वाचाऽभिधीयते ॥ क्रियते कर्मणा पश्चात्प्रमाणं हि मनस्ततः ॥ ३८ ॥ ॥ नारद उवाच ॥ ॥ यद्येतदिष्टं भवतः शीघ्रमेव विधीयताम् ॥ अविघ्नेन तु सावित्र्याः प्रदानं दुहितुस्तव ॥ ३९ ॥ एवमुक्त्वा समुत्पत्य नारदस्त्रिदिवं गतः ॥ राजा च दुहितुः सर्वं वैवाहिकमथाकरोत् ॥ शुभे मुहूर्ते पार्श्वस्थैर्ब्राह्मणैर्वेदपारगैः ॥ ४० ॥ सावित्र्यपि च तं लब्ध्वा भर्तारं मनसेप्सितम् ॥ मुमुदेऽतीव तन्वंगी स्वर्गं प्राप्येव पुण्यकृत् ॥ ४१ ॥ एवं तत्राश्रमे तेषां तदा निवसतां सताम् ॥ कालस्तु पश्यतां किञ्चिदतिचक्राम पार्वति ॥ ४२ ॥ सावित्र्यास्तु तदा नार्यास्तिष्ठन्त्याश्च दिवानिशम् ॥ नारदेन यदुक्तं तद्वाक्यं मनसि वर्तते ॥ ४३ ॥ ततः काले बहुतिथे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



व्यतिक्रान्ते कदाचन ॥ प्राप्तः कालोऽथ मर्तव्यो यत्र सत्यव्रतो नृपः ॥ ४४ ॥ ज्येष्ठमासे सिते पक्षे द्वादश्यां रजनीमुखे ॥ गणयंत्याश्च सावित्र्या नारदोक्तं वचो हृदि ॥ ४५ ॥ चतुर्थेऽहनि मर्तव्यमिति संचिंत्य भामिनी ॥ व्रतं त्रिरात्रमुद्दिश्य दिवारात्रं स्थिताऽऽश्रमे ॥ ४६ ॥ तत स्त्रिरात्रं न्यवसत्स्नात्वा संतर्प्य देवताम् ॥ श्वश्रूश्वशुरयोः पादौ ववंदे चारुहासिनी ॥ ४७ ॥ अथ प्रतस्थे परशुं गृहीत्वा सत्यवान्वनम् ॥ सावित्र्यपि च भर्तारं गच्छंतं पृष्ठतोऽन्वयात् ॥ ४८ ॥ ततो गृहीत्वा तरसा फलपुष्पसमित्कुशान् ॥ अथ शुष्काणि चादाय काष्ठभारमकल्पयत् ॥ ४९ ॥ अथ पाटयतः काष्ठं जाता शिरसि वेदना ॥ काष्ठभारं क्षणात्त्यक्त्वा वटशाखावलंबितः ॥ ५० ॥ सावित्रीं प्राह शिरसो वेदना मां प्रबाधते ॥ तवोत्संगे क्षणं तावत्स्वप्तुमिच्छामि सुन्दरि ॥ ५१ ॥ विश्रमस्व महाबाहो सावित्री प्राह दुःखिता ॥ पश्चादपि गमिष्यामि ह्याश्रमं श्रमनाशनम् ॥ ॥ ५२ ॥ यावदुत्संगगं कृत्वा शिरोस्य तु महीतले ॥ तावद्ददर्श सावित्री पुरुषं कृष्णपिंगलम् ॥ ५३ ॥ किरीटिनं पीतवस्त्रं साक्षात्सूर्यमिवोदितम् ॥ तमुवाचाथ सावित्री प्रणम्य मधुराक्षरम् ॥ ५४ ॥ कस्त्वं देवोऽथवा दैत्यो यो मां धर्षितुमागतः ॥ न चाहं केनचिच्छक्या स्वधर्माद्देव रोधितुम् ॥ ५५ ॥ विद्धि मां पुरुषश्रेष्ठ दीप्तामग्निशिखामिव ॥ ५६ ॥ ॥ यम उवाच ॥ ॥ यमः संयमनश्चास्मि सर्वलोकभयंकरः ॥ ५७ ॥ क्षीणायुरेष ते भर्ता संनिधौ ते पतिव्रते ॥ न शक्यः किंकरैर्नेतुमतोऽहं स्वयमागतः ॥ ५८ ॥ एवमुक्त्वा सत्यव्रतशरीरात्पाशसंयुतः ॥ अंगुष्ठमात्रं पुरुषं निचकर्ष यमो बलात् ॥ ५९ ॥ अथ प्रयातुमारेभे पंथानं पितृसेवितम् ॥ सावित्र्यपि वरारोहा पृष्ठतोऽनुजगाम ह ॥ ६० ॥ पतिव्रतत्वाच्चाश्रांतां तामुवाच यमस्तथा ॥ निवर्त गच्छ सावित्रि मुहूर्तं त्वमिहागता ॥ ६१ ॥ एष मार्गो विशालाक्षि न केनाप्यनुगम्यते ॥ ६२ ॥ ॥ सावित्र्युवाच ॥ ॥ न श्रमो न च मे ग्लानिः कदाचिदपि जायते ॥ भर्तारमनुगच्छन्त्या विशिष्टस्य च संनिधौ ॥ ६३ ॥ सतां सन्तो गतिर्नान्या स्त्रीणां भर्ता सदा गतिः ॥ वेदो वर्णाश्रमाणां च शिष्याणां च गतिर्गुरुः ॥ ६४ ॥ सर्वेषामेव भूतानां स्थानमस्ति महीतले ॥ भर्त्तारमेकमुत्सृज्य स्त्रीणां नान्यः समाश्रयः ॥ ६५ ॥ एवमन्यैः सुमधुरैर्वाक्यैर्धर्मार्थसंहितैः ॥ तुतोष सूर्यतनयः सावित्रीं वाक्यमब्रवीत् ॥ ६६ ॥ ॥ यम उवाच ॥ ॥ तुष्टोऽस्मि तव भद्रं ते वरं वरय भामिनि ॥ सापि वव्रे च राज्यं स्वं विनयावनतानना ॥ ६७ ॥ चक्षुःप्राप्तिं तथा राज्यं श्वशुरस्य महात्मनः ॥ पितुः पुत्रशतं चैव पुत्राणां शतमात्मनः ॥ ६८ ॥ जीवितं च तथा भर्तुर्धर्मसिद्धिं च शाश्वतीम् ॥ धर्मराजो वरं दत्त्वा प्रेषयामास तां ततः ॥ ६९ ॥ अथ भर्तारमासाद्य सावित्री हृष्टमानसा ॥ जगाम स्वाश्रमपदं सह भर्त्रा



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निराकुला ॥ ७० ॥ ज्येष्ठस्य पूर्णिमायां च तया चीर्णं व्रतं त्विदम् ॥ माहात्म्यतोऽस्य नृपतेश्चक्षुःप्राप्तिरभूत्पुरः ॥ ७१ ॥ ततः स्वदेशराज्यं च प्राप निष्कण्टकं नृपः ॥ पितास्याः पुत्रशतकं सा च लेभे सुताञ्छतम् ॥ ७२ ॥ एवं व्रतस्य माहात्म्यं कथितं सकलं मया ॥ ७३ ॥ ॥ ॥ देव्युवाच ॥ ॥ कीदृशं तद्व्रतं देव सावित्र्या चरितं महत् ॥ तस्मिंस्तु ज्येष्ठमासे हि विधानं तस्य कीदृशम् ॥ ७४ ॥ का देवता व्रते तस्मिन्के मन्त्राः किं फलं विभो ॥ विस्तरेण महेश त्वं ब्रूहि धर्मं सनातनम् ॥ ७५ ॥ ॥ ईश्वर उवाच ॥ ॥ श्रूयतां देवदेवेशि सावित्रीव्रतमादरात् ॥ कथयामि यथा चीर्णं तया सत्या महेश्वरि ॥ ७६ ॥ त्रयोदश्यां तु ज्येष्ठस्य दन्तधावनपूर्वकम् ॥ त्रिरात्रं नियमं कुर्यादुपवासस्य भामिनि ॥ ७७ ॥ अशक्तस्तु त्रयोदश्यां नक्तं कुर्याज्जितेन्द्रियः ॥ अयाचितं चतुर्दश्यां ह्युपवासेन पूर्णिमाम् ॥ ७८ ॥ नित्यं स्नात्वा तडागे वा महानद्यां च निर्झरे ॥ पांडुकूपे तु सुश्रोणि सर्वस्नानफलं लभेत् ॥ ७९ ॥ विशेषात्पूर्णिमायां तु स्नानं सर्षपमृज्जलैः ॥ ८० ॥ गृहीत्वा वालुकं पात्रे प्रस्थमात्रे यशस्विनि ॥ अथवा धान्यमादाय यवशालितिलादिकम् ॥ ८१ ॥ ततो वंशमये पात्रे वस्त्रयुग्मेन वेष्टिते ॥ सावित्रीप्रतिमां कृत्वा सर्वावयवशोभिताम् ॥ ८२ ॥ सौवर्णीं मृन्मयीं वापि स्वशक्त्या दारुनिर्मिताम् ॥ रक्तवस्त्रद्वयं दद्यात्सावित्र्या ब्रह्मणः सितम् ॥ ८३ ॥ सावित्रीं ब्रह्मणा सार्धमेवं शक्त्या प्रपूजयेत् ॥ गन्धैः सुगन्धपुष्पैश्च धूपनैवेद्यदीपकैः ॥ ८४ ॥ पूर्णकोशातकैः पक्वैः कूष्माण्डकर्कटीफलैः ॥ नालिकेरैः सखर्जूरैः कपित्थैर्दाडिमैः शुभैः ॥ ८५ ॥ जंबूजंबीरनारिंगैरक्षोटैः पनसैस्तथा ॥ जीरकैः कटुखण्डैश्च गुडेन लवणेन च ॥ ८६ ॥ विरूढैः सप्तधान्यैश्च वंशपात्रप्रकल्पितैः ॥ रंजयेत्पट्टसूत्रैश्च शुभैः कुंकुमकेसरैः ॥ ८७ ॥ अवतारं करोत्येवं सावित्री ब्रह्मणः प्रिया ॥ ८८ ॥ तामर्च्चयीत मन्त्रेण सावित्र्या ब्रह्मणा समम् ॥ इतरेषां पुराणोक्तो मंत्रोऽयं समुदाहृतः ॥ ८९ ॥ ओंकारपूर्वके देवि वीणापुस्तकधारिणि ॥ वेदांबिके नमस्तुभ्यमवैधव्यं प्रयच्छ मे ॥ ९० ॥ एवं संपूज्य विधिवज्जागरं तत्र कारयेत् ॥ गीतवादित्रशब्देन नरनारीकदंबकम् ॥ नृत्यद्भिस्तन्नयेद्रात्रिं नृत्यशास्त्रविशारदैः ॥ ९१ ॥ सावित्र्याख्यानकं चापि वाचयीत द्विजोत्तमान् ॥ यावत्प्रभातसमयं गीतभावरसैः सह ॥ ९२ ॥ विवाहमेवं कृत्वा तु सावित्र्या ब्रह्मणा सह ॥ परिधाप्य सितैर्वस्त्रैर्दंपतीनां तु सप्तकम् ॥ ९३ ॥ गृहदानं प्रदातव्यं सर्वोपस्करसंयुतम् ॥ ब्राह्मणे वेदविदुषे सावित्रीं विनिवेदयेत् ॥ ९४ ॥ अथ सावित्रीकल्पज्ञे सावित्र्याख्यानवाचके ॥ दैवज्ञे ह्युञ्छवृत्तिस्थे दरिद्रे चाग्निहोत्रिणि ॥ ९५ ॥ एवं दत्त्वा विधानेन तस्यां रात्रौ निमन्त्रयेत् ॥ पौर्णमास्यां वटाधस्तादंपतीनां चतुर्दश ॥ ९६ ॥ ततः प्रभातसमये उषःकाल उपस्थिते ॥ भक्ष्यभोज्यादिकं सर्वं सावित्रीस्थलमानयेत् ॥ ९७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पाकं कृत्वा तु शुचिना रक्षां कृत्वा प्रयत्नतः ॥ ब्राह्मणान्गृहिणीयुक्तांस्तत आह्वानयेत्सुधीः ॥ ९८ ॥ सावित्र्याः स्थलके तत्र कृत्वा पादा
भिषेचनम् ॥ सुस्नातान्ब्राह्मणांस्तत्र सभार्यानुपवेशयेत् ॥ ९९ ॥ सावित्र्याः पुरतो देवि दंपत्योर्भोजनं ददेत् ॥ तेनाहं भोजितस्तत्र भवामीह न
संशयः ॥ १०० ॥ द्वितीयं भोजयेद्यस्तु भोजितस्तेन केशवः ॥ लक्ष्म्याः सहायो वरदो वरांस्तस्य प्रयच्छति ॥ १०१ ॥ सावित्र्या सहितो ब्रह्मा
तृतीये भोजितो भवेत् ॥ एकैकं भोजनं तत्र कोटिभोजसमं स्मृतम् ॥ १०२ ॥ अष्टादशप्रकारेण षड्रसीकृतभोजनम् ॥ देव्यास्तत्र महादेवि
सावित्रीस्थलसन्निधौ ॥ १०३ ॥ विधवा न कुले तस्य न वंध्या न च दुर्भगा ॥ न कन्याजननी चापि न च स्याद्भर्तुरप्रिया ॥ अष्टौ दोषास्तु
नारीणां न भवंति कदाचन ॥ १०४ ॥ तस्मात्सर्वप्रयत्नेन सावित्र्यग्रे च भोजनम् ॥ दातव्यं सर्वदा देवि कटुनीलविवर्जितम् ॥ १०५ ॥ न
चाम्लं न च वै क्षारं स्त्रीणां भोज्यं कदाचन ॥ पंचप्रकारं मधुरं हृद्यं सर्वं सुसंस्कृतम् ॥ १०६ ॥ घृतपूर्णापूपकाश्च बहुक्षीरसमन्विताः ॥ पूपका
स्तादृशाः कार्या द्वितीयाऽशोकवर्तिका[1] ॥ १०७ ॥ तृतीया पूपिका कार्या खर्जुरेण समन्विताः ॥ चतुर्थश्चैव संयावो गुडाज्याभ्यां समन्वितः ॥
॥ १०८ ॥ आह्लादकारिणी पुंसां स्त्रीणां चातीव वल्लभा ॥ धनधान्यजनोपेतं नारीनरशताकुलम् ॥ पूपकैस्तु कुलं तस्या जायते नात्र संशयः ॥
॥ १०९ ॥ न ज्वरो न च संतापो दुःखं च न वियोगजम् ॥ अशोकवर्तिदानेन कुलानामेकविंशतिः ॥ ११० ॥ वधूभिश्च सुतैश्चैव दासीदासैर
नन्तकैः ॥ पूरितं च कुलं तस्याः पूरिका या प्रयच्छति ॥ १११ ॥ पुत्रिण्यो वै दुहितरो वधूभिः सहिताः कुले ॥ शिखरिणीप्रदात्रीणां युवतीनां
न संशयः ॥ ११२ ॥ मोदते च कुलं सर्वं सर्वसिद्धिप्रपूरितम् ॥ मोदकानां प्रदानेन एवमाह पितामहः ॥ ११३ ॥ एतच्च गौरिणीनां[2] तु भोजनं
हि विशिष्यते ॥ ११४ ॥ सुभगा पुत्रिणी साध्वी धनऋद्धिसमन्विता ॥ सहस्रभोजिनी देवि भवेज्जन्मनिजन्मनि ॥ ११५ ॥ पानानि चैव
मुख्यानि हृद्यानि मधुराणि च ॥ द्राक्षापानं तु चिंचायाः पानं गुडसमन्वितम् ॥ ११६ ॥ सरसेन तु तोयेन कृतखण्डेन वै शुभम् ॥ सुवासिनीनां
पेयं वै दातव्यं च द्विजन्मनाम् ॥ ११७ ॥ इतरैरितराण्येव वर्णयोग्यानि यानि च ॥ सुरभीणि च पानानि तासु योग्यानि दापयेत् ॥ ११८ ॥
प्रतिपूज्य विधानेन वस्त्रदानैः सकंचुकैः ॥ कुङ्कुमेनानुलिप्तांगाः स्रग्दामभिरलंकृताः ॥ गंधैर्धूपैश्च संपूज्य नालिकेरान्प्रदापयेत् ॥ ११९ ॥ नेत्राणां ॥१२०॥
चाञ्जनं कृत्वा सिन्दूरं चैव मस्तके ॥ पूगीफलानि हृद्यानि वासितानि मृदूनि च ॥ हस्ते दत्त्वा सपात्राणि प्रणिपत्य विसर्जयेत् ॥ १२० ॥ स्वयं च

१ अशोकवर्तिका–फेणिकानाम पक्वान्नविशेषः। २ गौरिणीनाम्–सुवासिनीनाम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भोजयेत्पश्चाद्बंधुभिर्बालकैः सह ॥ १२१ ॥ अथवा नैव संपद्येत्तीर्थे चैव तु भोजनम् ॥ गृहे गत्वा प्रभोक्तव्यं तुष्टा देवी यथा भवेत् ॥ ११२ ॥ एवमेव पितॄणां च आगम्य स्वे च मन्दिरे ॥ पिण्डप्रदानपूर्वं तु श्राद्धं कृत्वा विधानतः ॥ पितरस्तस्य तुष्टा वै भवन्ति ब्रह्मणो दिनम् ॥१२३॥ तीर्थादष्टगुणं पुण्यं स्वगृहे ददतः शुभे ॥ न च पश्यन्ति वै नीचाः श्राद्धं दत्तं द्विजातिभिः ॥ १२४ ॥ एकान्ते तु गृहे गुप्ते पितॄणां श्राद्धमिष्यते ॥ नीचं दृष्ट्वा हतं तत्तु[1] पितॄणां नोपतिष्ठति ॥ १२५ ॥ तस्मात्सर्वप्रयत्नेन श्राद्धं गुप्तं च कारयेत् ॥ पितॄणां तृप्तिदं प्रोक्तं स्वयमेव स्वयंभुवा ॥१२६॥ गौरीभोज्यादिका या तु उत्सर्गात्क्रियते क्रिया ॥ राजसी सा समाख्याता जनानां कीर्तिदायिनी ॥ १२७ ॥ इदं दानं सदा देयमात्मनो हित मिच्छता ॥ श्राद्धे चैव विशेषेण यदीच्छेत्सात्त्विकं फलम् ॥ १२८ ॥ इदमुद्यापनं देवि सावित्र्यास्तु व्रतस्य च ॥ सर्वपातकशुद्ध्यर्थं कार्यं देवि नरैः सदा ॥ अकामतः कामतो वा पापं नश्यति तत्क्षणात् ॥ १२९ ॥ इह लोके तु सौभाग्यं धनं धान्यं वराः स्त्रियः ॥ भवंति विविधास्तेषां यैर्यात्रा तत्र वै कृता ॥ १३० ॥ इदं यात्राविधानं तु भक्त्या यः कुरुते नरः ॥ शृणोति वा स पापैस्तु सर्वैरेव प्रमुच्यते ॥ १३१ ॥ ज्येष्ठस्य पूर्णिमायां तु सावित्रीस्थलके शुभे ॥ प्रदक्षिणा यः कुरुते फलदानैर्यथाविधि ॥ १३२ ॥ अष्टोत्तरशतं वापि तदर्धार्धं तदर्धकम् ॥ यः करोति नरो देवि सृष्ट्वा[2] तत्र प्रदक्षिणाम् ॥ १३३ ॥ अगम्यागमनं यैश्च कृतं ज्ञानाच्च मानवैः ॥ अन्यानि पातकान्येवं नश्यंते नात्र संशयः ॥ १३४ ॥ यैर्गत्वा स्थलके संध्या सावित्र्याः समुपासिता ॥ स्वपत्न्याश्चैव हस्तेन पांडुकूपजलेन च ॥ १३५ ॥ भृंगारकनकेनैव मृन्मयेनाथ भामिनि ॥ आनीय तु जलं पुण्यं संध्योपास्तिं करोति यः ॥ तेन द्वादशवर्षाणि भवेत्संध्या ह्युपासिता ॥ १३६ ॥ अश्वमेधफलं स्नाने दाने दशगुणं तथा ॥ उपवासे त्वनंतं च कथायाः श्रवणे तथा ॥ १३७ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये सावित्रीव्रतविधिपूजनप्रकारोद्यापनादिकथनंनाम षट्षष्ट्युत्तरशततमोऽध्यायः ॥ १६६ ॥ ॥ छ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि तत्रस्थां भूतमातृकाम् ॥ सावित्र्या वारुणे भागे शतधन्वंतरे स्थिताम् ॥ १ ॥ नवकोटिगणैर्युक्तां प्रेतभूतसमाकुलाम् ॥ पूजितां सिद्धगंधर्वैर्देवादिभिरनेकशः ॥ २ ॥ ॥ देव्युवाच ॥ ॥ भूतमातेति संहृष्टा ग्रामेग्रामे पुरेपुरे ॥ गायन्नृत्यन्हसँल्लोकः सर्वतः परिधावति ॥ ३ ॥ उन्मत्तवत्प्रलपते क्षितौ पतति मत्तवत् ॥ क्रुद्धवद्धावति परान्मृतवत्कृष्यते हि सः ॥ ४ ॥ सुख

१ तत्–श्राद्धं तु–हतम्–नष्टम्–इत्यर्थः । २ सृष्ट्वा–फलानि समर्प्य–इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





भंगांश्च कुरुते लोको वातगृहीतवत् ॥ भूतवद्रस्ममूत्रांबुकर्दमानवगाहते ॥ ५ ॥ किमेष शास्त्रनिर्दिष्टो मार्गः किमुत लौकिकः ॥ मुह्यते मे मनो देव तेन त्वं वक्तुमर्हसि ॥ ६ ॥ कथं सा पुरुषैः पूज्या प्रभासक्षेत्रवासिभिः ॥ कस्मात्तत्र गता देवी कस्मिन्काले समागता ॥ कस्मिन्दिने तु मासे तु तस्याः कार्यो महोत्सवः ॥ ७ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि यत्ते किंचिन्मनोगतम् ॥ आस्तिकाः श्रद्दधानाश्च भवन्तीति मतिर्मम ॥ ८ ॥ चाक्षुषस्यान्तरेऽतीते प्राप्ते वैवस्वतेऽन्तरे ॥ दक्षापमानात्संजाता तदा पर्वतपुत्रिका ॥ ९ ॥ द्वापरे तु द्वितीये वै दत्ता त्वं पर्वतेन मे ॥ विवाहे चैव संजाते सर्वदेवमनोरमे ॥ १० ॥ त्वया च सहितः पूर्वं मन्दरे चारुकंदरे ॥ अक्रीडं च मुदा युक्तो दिव्यक्रीडनकैः प्रिये ॥ पीनोन्नतनितंबेन भ्राजमानां कुचोन्नताम् ॥ ११ ॥ सिताब्जवदनां हृष्टां दृष्ट्वाऽहं त्वां महाप्रभाम् ॥ दग्धकामतरोः कन्दकंदलीमिव निःसृताम् ॥ महार्हशयनस्थां त्वां तदा कामितवानहम् ॥ १२ ॥ सुरते तव संजातं दिव्यं वर्षशतं यदा ॥ तदा देवि समुत्थाय निरोधान्निर्गता बहिः ॥ ॥ १३ ॥ तवोदकात्समुत्तस्थौ नार्येका गह्वरोदरा ॥ कृष्णा करालवदना पिंगाक्षी मुक्तमूर्धजा ॥ १४ ॥ कपालमालाभरणा बद्धमुण्डार्धपिंडका ॥ खट्वांगकंकालधरा रुण्डमुंडकरा शिवा ॥ १५ ॥ द्वीपिचर्माम्बरधरा रणत्किंकिणिमेखला ॥ डमड्डमरुकारा च फेत्कारपूरिताम्बरा ॥ १६ ॥ तस्याश्च पार्श्वगा अन्यास्तासां नामानि मे शृणु ॥ सख्यो ब्राह्मणराक्षस्यस्तासां चैव सुदर्शनाः ॥ १७ ॥ दशकोटिप्रभेदेन धरां व्याप्य सुसंस्थिताः ॥ मुख्यास्तत्र चतस्रो वै महाबलपराक्रमाः ॥ १८ ॥ रक्तवर्णा महाजिह्वाऽक्षया वै पापकारिणी ॥ एतासामन्वये जाताः पृथिव्यां ब्रह्मराक्षसाः ॥ १९ ॥ श्लेष्मातकतरौ ह्येते प्रायशः सुकृतालयाः ॥ उत्तालतालचपला नृत्यंति च हसंति च ॥ २० ॥ विज्ञेया इह लोकेऽस्मिन्भूतानां मूलनायकाः ॥ अतिकृष्णा भवन्त्येते व्यंतरान्तरचारिणः ॥ २१ ॥ वृक्षाग्रमात्रमाकाशं ते चरंति न संशयः ॥ ॥ २२ ॥ तथैव मम वीर्यात्तु मद्रूपाभरणः पुमान् ॥ कपालखट्वांगधरो जातश्चर्मविगुण्ठितः ॥ २३ ॥ अनुगम्यमानो बहुभिर्भूतैरपि भयंकरः ॥ सिंहशार्दूलवदनैर्वदनोल्लिखितांबरैः ॥ २४ ॥ एवं देवि तदा जातः क्षुधाक्रान्तो बभाष माम् ॥ अतोऽहं क्षुधितं दृष्ट्वा वरं हीम च दत्तवान् ॥ २५ ॥ युवयोर्हस्तसंस्पर्शान्नक्तमेवास्तु सर्वशः ॥ नक्तं चैव बलीयांसौ दिवा नातिबलावुभौ ॥ पुत्रवद्रक्षतं लोकान्धर्मश्चैवानुपाल्यताम् ॥ ॥ २६ ॥ इत्युक्तौ तौ मया तत्र भूतमातृगणौ प्रिये ॥ एकीभूतौ क्षणेनैव तौ भवानीभवोद्भवौ ॥ २७ ॥ दृष्ट्वा हृष्टमनाश्चाहमवोचं त्वां शुचिस्मिते ॥ २८ ॥ कल्याणि पश्यपश्यैतौ ममांशाच्च समुद्भवौ ॥ बीभत्साद्भुतशृंगारधारिणौ हास्यकारिणौ ॥२९॥ भ्रातृभांडा भूतमाता तथैवोदकसेविता ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संज्ञात्रयं स्मृतं देवि लोके विख्यातपौरुषम् ॥३०॥ पुनः कृतांजलिपुटौ दृष्ट्वा मामूचतुस्तदा ॥ आवयोर्भगवन्कुत्र स्थाने वासो भविष्यति ॥३१॥ इत्युक्तवन्तौ तौ तत्र वरेण च्छन्दितौ मया ॥ अस्ति सौराष्ट्रविषये भारते क्षेत्रमुत्तमम् ॥३२॥ प्रभासेति समाख्यातं तत्र क्षेमं मम प्रियम् ॥ कूर्मस्य नैर्ऋते भागे स्थितं वै दक्षिणे परे॥३३॥ स्वाती विशाखा मैत्रं च यत्र ऋक्षत्रयं स्मृतम्॥तस्मिन्स्थाने सदा स्थेयं यावन्मन्वन्तरावधि॥३४॥अन्यदा जीविकं वच्मि तव भूतप्रिये सदा ॥ ३५ ॥ यत्र कण्टकिनो वृक्षा यत्र निष्पाववल्लरी ॥ भार्या पुनर्भूर्वल्मीकस्तास्ते वसतयश्चिरम् ॥ ३६ ॥ यस्मिन्गृहे नराः पञ्च स्त्रीत्रयं तावतीश्च गाः ॥ अन्धकारेंधनाग्निश्च तद्गृहे वसतिस्तव ॥ ३७ ॥ भूतैः प्रेतैः पिशाचैश्च यत्स्थानं समधिष्ठितम् ॥ एकाविचाष्टबालेयं[1] त्रिगवं पञ्चमाहिषम् ॥ षडश्वं सप्तमातंगं तद्गृहे वसतिस्तव ॥ ३८ ॥ उद्दालकान्नपिटकं तद्वत्स्थाल्यादिभाजनम् ॥ यत्र तत्रैव क्षिप्तं च तव तच्च प्रतिश्रयम् ॥ ३९ ॥ मुशलोलूखले स्त्रीणामास्या तद्वदुदुंबरे[2] ॥ भाषणं कटुकं चैव तत्र देवि स्थितिस्तव ॥ ४० ॥ खाद्यन्ते यत्र धान्यानि पक्वापक्वानि वेश्मनि ॥ तद्वच्छाखाश्च तत्र त्वं भूतैः सह चरिष्यसि ॥ ४१ ॥ स्थालीपिधाने यत्राग्निं ददते विकला नराः ॥ गृहे तत्र दुरिष्टानामशेषाणां समाश्रयः ॥ ४२ ॥ मानुष्यास्थि गृहे यत्र अहोरात्रे व्यवस्थितम् ॥ तत्रायं भूतनिवहो यथेष्टं विचरिष्यति ॥ ४३ ॥ सर्वस्मादधिकं ये न प्रवदन्ति पिनाकिनम् ॥ साधारणं वदंत्येनं तत्र भूतैः समाविश ॥ ४४ ॥ कन्या[3] च यत्र वै वल्ली रोहीनाम जटी गृहे ॥ अगस्त्य पादपो वापि बंधुजीवो गृहेषु वै ॥ ४५ ॥ करवीरो विशेषेण नंद्यावर्तस्तथैव च ॥ मल्लिका वा गृहे येषां भूतयोग्यं गृहं हि तत् ॥ ४६ ॥ तालं तमालं भल्लातं तिंतिणीखंडमेव वा ॥ बकुलं कदलीखंडं कदंबः खदिरोऽपि वा ॥४७॥ न्यग्रोधो हि गृहे येषामश्वत्थं चूत एव वा ॥ उदुंबरश्च पनसः सर्वभूतप्रियं हि तत् ॥४८॥ यत्र काकगृहं वै स्यादारामे वा गृहेऽपि वा ॥ भिक्षुबिंबं च वै यत्र गृहे दक्षिणके तथा ॥४९॥ बिंबमूर्ध्वं च यत्रस्थं तत्र भूतनिवेशनम् ॥५०॥ लिंगार्चनं न यत्रैव यत्र नास्ति जपादिकम् ॥ यत्र भक्तिविहीना वै भूतानां तान्गृहान्वदेत् ॥५१॥ मलिनास्यास्तु ये मर्त्या मलिनांबरधारिणः ॥ मलदंता गृहस्था ये गृहं तेषां समाविश ॥५२॥ अगम्यनिरता ये तु मैथुने व्यभिचारतः ॥ संध्यायां मैथुनं यांति गृहं तेषां समाविश ॥ ॥ ५३ ॥ बहुना किं प्रलापेन नित्यकर्मबहिष्कृताः ॥ रुद्रभक्तिविहीना ये गृहं तेषां समाविश ॥ ५४ ॥ अदत्त्वा भुंजते योऽन्नं बंधुभ्योऽन्नं तथोदकम् ॥ सपिण्डान्सोदकांश्चैव तत्कालात्तान्नरान्भज ॥ ५५ ॥ यत्र भार्या च भर्ता च परस्परविरोधिनौ ॥ सह भूतैर्गृहं तस्य विश त्वं भयवर्जि

---

१ बालेयः—गर्दभः । २ उदुंबरे—द्वारकाष्ठे—'उंबरठा' इति महाराष्ट्रभाषायां ख्याते । ३ कन्या वल्ली—'कोरफड' इति ख्याता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ता ॥ ५६ ॥ वासुदेवे रतिर्नास्ति यत्र नास्ति सदा हरिः ॥ जपहोमादिकं नास्ति भस्म नास्ति गृहे नृणाम् ॥ ५७ ॥ पर्वस्वप्यर्चनं नास्ति चतुर्दश्यां विशेषतः ॥ ५८ ॥ कृष्णाष्टम्यां च ये मर्त्याः संध्यायां भस्मवर्जिताः ॥ पंचदश्यां महादेवं न यजंति च यत्र वै ॥५९॥ पौरजानपदैर्यत्र प्राक्प्रसिद्धा महोत्सवाः ॥ क्रियंते पूर्ववन्नैव तद्गृहं वसतिस्तव ॥ ६० ॥ वेदघोषो न यत्रास्ति गुरुपूजादिकं न च ॥ पितृकर्मविहीनं च तद्भूतस्य गृहं स्मृतम् ॥ ॥ ६१ ॥ रात्रौरात्रौ गृहे यस्मिन्कलहो जायते मिथः ॥ बालानां प्रेक्षमाणानां यत्र वृद्धश्च पूर्वतः ॥ भक्षयेत्तत्र वै हृष्टा भूतैः सह समाविश ॥६२॥ कस्मिन्मासे दिने चापि भवित्री लोकपूजिता ॥ इत्युक्तोऽहं तया देवि तामवोचं पुनः प्रिये ॥६३॥ अमा या माधवे मासि तस्मिन्या च चतुर्दशी ॥ तस्यां महोत्सवस्तत्र भविता ते चिरंतनः॥६४॥याः स्त्रियस्तां च यक्ष्यंति[1] तस्मिन्काले महोत्सवे ॥ बलिभिः पुष्पधूपैश्च मा तासां त्वं गृहे विश ॥६५॥ नारायण हृषीकेश पुण्डरीकाक्ष माधव ॥ अच्युतानंत गोविंद वासुदेव जनार्दन ॥ ६६ ॥ नृसिंह वामनाचिंत्य केशवेति च ये जनाः ॥ रुद्र रुद्रेति रुद्रेति शिवाय च नमोनमः ॥ ६७ ॥ वक्ष्यंति सततं हृष्टास्तेषां धनगृहादिषु ॥ आरामे चैव गोष्ठे च मा विशेथाः कथंचन ॥ ६८ ॥ देशाचाराञ्ज्ञातिधर्माञ्जपं होमं च मंगलम् ॥ दैवतेज्यां विधानेन शौचं कुर्वंति ये जनाः ॥ लोकापवादभीता ये पुमांसस्तेषु मा विश ॥६९॥ ॥ देव्युवाच ॥ ॥ कदा पूजा प्रकर्तव्या भूतमातुः सुखार्थिभिः ॥ पुरुषैर्देवदेवेश एतन्मे वक्तुमर्हसि ॥ ७० ॥ ॥ ईश्वर उवाच ॥ ॥ सर्वत्रैषा भगवती बालानां हितकारिणी ॥ नामभेदैः कालभेदैः क्रियाभेदैश्च पूज्यते ॥७१॥ प्रतिपत्प्रभृति वैशाखे यावच्चतुर्दशीतिथिः ॥ तावत्पूजा प्रकर्तव्या प्रेरणीप्रेक्षणीयकैः ॥ ७२ ॥ भग्नामपि गतां चैनां जरत्तरुतले स्थिताम् ॥ सेचयिष्यंति ये भक्त्या जलसंपूर्णगंडुकैः ॥ ७३ ॥ ग्रीवासूत्रकसिन्दूरैः पुष्पैर्धूपैस्तथार्चयेत् ॥ तत्र सिद्धवटः पूज्यः शाखां चास्य विनिक्षिपेत् ॥ ७४ ॥ पूजितां तां नरैर्यत्नादवलोक्य शुभेप्सुभिः ॥ भोजयेत्क्षिप्रासंयावकृशरापूपपायसैः ॥७५॥ एवं विधिं यः कुरुते पुरुषो भक्तिभावतः ॥ स पुत्रपशुवृद्धिं च शरीरारोग्यमाप्नुयात् ॥७६॥ न शाकिन्यो गृहे तस्य न पिशाचा न राक्षसाः ॥ पीडां कुर्वन्ति शिशवो यान्ति वृद्धिमनामयाम् ॥ ७७ ॥ अथ देवि प्रवक्ष्यामि प्रतिपत्प्रभृति क्रमात् ॥ यथोत्सवो नरैः कार्यः प्रेरणीप्रेक्षणीयकैः ॥७८॥ विकर्मफलनिर्देशैः पाखंडानां विटंबनैः ॥ प्रदर्श्यंते हास्यपरैर्नरैरद्भुतचेष्टितैः ॥ ७९ ॥ पञ्चम्यां तु विशेषेण रात्रौ कोलाहलः शुभे ॥ जागरं तत्र कुर्वीत देवीं पूज्य प्रयत्नतः ॥ ८० ॥ विश्वस्य धनलोभेन स्वाध्यायी निहतः पतिः ॥ आरोप्यमाणं शूलाग्रमेनं पश्यत भो जनाः ॥ ८१ ॥ दृष्टो

[1] यक्ष्यन्ति—पूजयिष्यन्ति ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवद्भिर्दुष्टः स परदारावमर्शकः ॥ छित्त्वा हस्तौ च खड्गेन खरारूढस्तु गच्छति ॥ ८२ ॥ शीर्णश्चैवासिपत्रेण अस्याभरणभूषितः ॥ सुखासन
समारूढः सुकृती यात्यसौ सुखम् ॥ ८३ ॥ हे जनाः किं न पश्यध्वं स्वामिद्रोहकरं परम् ॥ करपत्रैर्विदार्यंतमुच्छलच्छोणितान्तरम् ॥ ८४ ॥
चौरः किलायं संप्राप्तः सर्वोद्वेगकरः परः ॥ दंडप्रहाराभिहतो नीयते दंडपाशकैः ॥ ८५ ॥ प्रेक्षकैश्चेष्टितः शश्वदारटन्विविधैः स्वरैः ॥ संयम्य नीयते
हन्तुं लज्जितोऽधोमुखो जनाः ॥ ८६ ॥ सितकेशं सितश्मश्रुं सितांबरधरध्वजम् ॥ विटंकाद्यैश्च चेटीभिर्हन्यमानं न पश्यथि ॥८७॥ गृहान्निष्काम्य
मां रंडां गृहं नीत्वाऽकरोद्रतिम् ॥ कस्मादसौ न कुरुते मूढो भरणपोषणम् ॥ ८८ ॥ भैरवाभरणो नेता सदा घूर्णितलोचनः ॥ प्रवृत्ततंद्रवन्मूढो
वध्यश्चासावितस्ततः ॥८९॥ निर्वेदेकोऽस्य हृदये धनक्षेत्रादिसंभवः ॥ गृहीतं यदनेनाद्य बालेनापि महाव्रतम् ॥ रक्ताक्षं काककृष्णांगं सत्वरं किं न
पश्यथि ॥ ९० ॥ तरुकोटरगान्बद्धा अन्याञ्छृंखलया तथा ॥ शरौघैः काष्ठकैश्चैव बहुभिः शकलीकृतान् ॥ ९१ ॥ विमुक्तहक्काहुंकारा
न्सुप्रहारान्निरीक्षत ॥ ९२ ॥ इमां कृष्णार्धवदनां ग्रहीष्यसि दुरात्मिकाम् ॥ विमुक्तकेशां नृत्यन्तीं पश्यध्वं योगिनीमिव ॥ ९३ ॥ गम्भीर
नूपुरध्वानप्रवृद्धोद्धततांडवा ॥ उन्मत्तनेत्रचरणा यात्येषा डिम्भमण्डली ॥ ९४ ॥ कटीतटस्थपिटिकोल्लसत्कंबलधारिणी ॥ अटते नटती ह्युर्वीं
परितश्च गृहाद्गृहम् ॥ ९५ ॥ इत्येवमादिभिर्नित्यं प्रेरणीप्रेक्षणीयकैः ॥ प्रेरयेत्तान्महानित्थं पुत्रभ्रातृसुहृद्वृतः ॥ ९६ ॥ एकादश्यां नवम्यां वा दीपं
प्रज्वाल्य कुण्डकम् ॥ मुखबिंबानि तत्रैव लेपदारुकृतानि वै ॥ ९७ ॥ विचित्राणि महार्हाणि रौद्रशान्तानि कारयेत् ॥ मातणां चण्डिकादीनां
राक्षसानां तथैव च ॥ ९८ ॥ भूतप्रेतपिशाचानां शाकिनीनां तथैव च ॥ मुखानि कारयेत्तत्र हावभावकृतानि च ॥ ९९ ॥ रक्षिभिर्बहुभिर्गुप्तं तिर्य
ग्ध्वनिपुरःसरम् ॥ अमावास्यां महादेवि क्षिपेत्पूजाक्रमैर्नरः ॥ १०० ॥ ततः प्रदोषसमये यत्र देवी जनैर्वृता ॥ तत्र गच्छेन्महारावैः फेत्कारा
कुलकीर्तनैः ॥ १०१ ॥ वीरचर्याविधानेन नगरे भ्रामयेन्निशि ॥ वीरचर्या स कथितो दीपः सर्वार्थसाधकः ॥ १०२ ॥ नित्यं निष्क्रामयेद्दीपं याव
त्पञ्चदशी तिथिः ॥ पञ्चदश्यां प्रकुर्वीत भूतमातुर्महोत्सवम् ॥ तस्य गृहेश्वरं यावद्गृहे विघ्नं न जायते ॥ १०३ ॥ अथ कालान्तरेऽतीते भूतमातुः
शरीरतः ॥ जाताः प्रस्वेदबिन्दुभ्यः पिशाचाः पञ्चकोटयः ॥ १०४ ॥ सर्वे ते क्रूरवदना जिह्वाज्वालाकृशोदराः ॥ पाणिपात्राः पिशाचास्ते
निसृष्टबलिभोजनाः ॥ १०५ ॥ धमनीसंतताः शुष्काः श्मश्रुलाश्चर्मवाससः ॥ उलूखलैराभरणैः शूर्पच्छत्रासनांबराः ॥ १०६ ॥ नक्तं ज्वलि
तकेशाढ्या अंगारानुद्गिरंति वै ॥ अंगारकाः पिशाचास्ते मातृमार्गानुसारिणः ॥ १०७ ॥ आकर्णदारितास्याश्च लंबभ्रूस्थूलनासिकाः ॥ बला

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



व्यास्ते पिशाचा वै सूतिकागृहवासिनः ॥ १०८ ॥ पृष्ठतः पाणिपादाश्च पृष्ठगा वातरंहसा ॥ विषादनाः पिशाचास्ते संग्रामे पिशिताशनाः ॥
॥ १०९ ॥ एवंविधान्पिशाचांस्तु दृष्ट्वा दीनानुकम्पया ॥ तेभ्योऽहमवदं किञ्चित्कारुण्यादल्पचेतसाम् ॥ ११० ॥ अन्तर्धानं प्रजादेहे
कामरूपित्वमेव च ॥ उभयोः संध्ययोश्चारं स्थानान्याजीवितं तथा ॥ १११ ॥ गृहाणि यानि नग्नानि शून्यान्यायतनानि च ॥
विध्वस्तानि च यानि स्यू रचनारोषितानि च ॥ ११२ ॥ राजमार्गोपरथ्याश्च चत्वराणि त्रिकाणि च ॥ द्वाराण्यट्टालकांश्चैव निर्गमान्संक्रमांस्तथा ॥
॥ ११३ ॥ पथो नदीश्च तीर्थानि चैत्यवृक्षान्महापथान् ॥ स्थानानि तु पिशाचानां निवासायाददां प्रिये ॥ ११४ ॥ अधार्मिका जनास्तेषामा
जीवो विहितः पुरा ॥ वर्णाश्रमाचारहीनाः कारुशिल्पिजनास्तथा ॥ ११५ ॥ अनुतापाश्च साधूनां चौरा विश्वासघातिनः ॥ एतैरन्यैश्च बहुभिरन्या
योपार्जितैर्धनैः ॥ ११६ ॥ आरभ्यते क्रिया यास्तु पिशाचास्तत्र देवताः ॥ मधुमासदिने दध्ना तिलचूर्णसुरासवैः ॥ ११७ ॥ पूपैर्हारिद्रकृशरै
स्तिलैरिक्षुगुडौदनैः ॥ कृष्णानि चैव वासांसि धूम्राः सुमनसस्तथा ॥ ११८ ॥ सर्वभूतपिशाचानां कृता देवी मया शुभा ॥ एवंविधा भूतमाता
सर्वभूतगणैर्वृता ॥ ११९ ॥ प्रभासे संस्थिता देवी समुद्राद्दुत्तरेण तु ॥ य एतां वेद वै देव्या उत्पत्तिं पापनाशिनीम् ॥ १२० ॥ कुत्सिता संतति
स्तस्य न भवेच्च कदाचन ॥ भूतप्रेतपिशाचानां न दोषैः परिभूयते ॥ १२१ ॥ सर्वपापविनिर्मुक्तः सर्वसौभाग्यसंयुतः ॥ सर्वान्कामानवाप्नोति
नारीहृदयनंदनः ॥ १२२ ॥ ये मानयंति निजहासकलैर्विलासैः संसेवया अभयदां भवभूतमाताम् ॥ ते भ्रातृभृत्यसुतबंधुजनैर्युताश्च सर्वोपसर्ग
रहिताः सुखिनो भवन्ति ॥ १२३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये भूत
मातृकामाहात्म्यवर्णनंनाम सप्तषष्ट्युत्तरशततमोऽध्यायः ॥ १६७ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि देवीं शालकटं
कटाम् ॥ सावित्र्या दक्षिणे भागे रैवतात्पूर्वतः स्थिताम् ॥ १ ॥ महापापोपशमनीं सर्वदुःखविनाशनीम् ॥ पूजितां सर्वगन्धर्वैः स्फुरद्दंष्ट्रोग्रभीष
णाम् ॥ २ ॥ महाप्रचण्डदैत्यघ्नीं पौलस्त्येन प्रतिष्ठिताम् ॥ महिषघ्नीं महाकायां क्षेत्रे प्राभासिके स्थिताम् ॥ ३ ॥ माघे मासे चतुर्दश्यां यस्ता
माराधयेन्नरः ॥ स भवेत्पशुमान्धीमाल्लँक्ष्मीवान्पुत्रवान्सुधीः ॥ ४ ॥ यस्तां पशुप्रदानेन सन्तर्पयति भक्तितः ॥ बलिपूजोपहारैश्च स स्याच्छत्रु
विवर्जितः ॥ ५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये शालकटंकटा
माहात्म्यवर्णनंनामाष्टषष्ट्युत्तरशततमोऽध्यायः ॥ १६८ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि लिंगं वैवस्वतेश्वरम् ॥





Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देव्या दक्षिणदिग्भागे धनुस्त्रिंशकसंस्थितम् ॥ १ ॥ वैवस्वतेन मनुना स्थापितं सर्वकामदम् ॥ तत्समीपे देवखातं तिष्ठते तु महाद्भुतम् ॥ २ ॥ स्नात्वा तत्र वरारोहे यस्तं पूजयते नरः ॥ पञ्चोपचारैर्विधिना भक्तिप्रह्वो जितेन्द्रियः ॥ जपेदघोरविधिना स्तोत्रं सिद्धिं स चाप्नुयात ॥ ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये वैवस्वतेश्वरमाहात्म्य वर्णनंनामैकोनसप्तत्युत्तरशततमोऽध्यायः ॥ १६९ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि तत्र मातृगणान्सुधीः ॥ तत्रैव बलदेवीं च नातिदूरे व्यवस्थिताम् ॥ १ ॥ श्रावण्यां श्रावणे मासि यस्तां पूजयते नरः ॥ पायसैर्मधुना वापि दिव्यपुष्पोपहारकैः ॥ ॥ २ ॥ तस्य वर्षं महादेवि सुखं गच्छेत्सुपूजितम् ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये मातृगणबलदेवीमाहात्म्यवर्णनंनाम सप्तत्युत्तरशततमोध्यायः ॥ १७० ॥ ॥ छ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि देवीमेकल्लवीरिकाम् ॥ एकल्लवीरायाम्ये तु नातिदूरे व्यवस्थिताम् ॥ १ ॥ पूर्वं दशरथो योऽसौ सूर्यवंशविभूषणः ॥ प्रभासं क्षेत्रमासाद्य तपश्चक्रे सुदुश्चरम् ॥ २ ॥ लिंगं तत्र प्रतिष्ठाप्य तोषयामास शांकरम् ॥ स देवं प्रार्थयामास पुत्रं चैवामितौजसम् ॥ ॥ ३ ॥ ददौ तस्य तदा पुत्रं देवं त्रैलोक्यपूजितम् ॥ रामेति नाम यस्यासीत्त्रैलोक्ये प्रथितं यशः ॥ ४ ॥ यस्याद्यापीह गायन्ति भूर्भुवःस्वर्नि वासिनः ॥ देवदैत्यासुराः सर्वे वाल्मीक्याद्या महर्षयः ॥ ५ ॥ तल्लिंगस्य प्रभावेन प्राप्तं राज्ञा महद्यशः ॥ कार्तिक्यां कार्तिके मासि विधिना यस्त मर्चयेत् ॥ दीपपूजोपहारेण यशस्वी सोऽपि जायते ॥ ६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये दशरथेश्वरमाहात्म्यवर्णनंनामैकसप्तत्युत्तरशततमोऽध्यायः ॥ १७१ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महा देवि लिंगं तद्भरतेश्वरम् ॥ तस्मादुत्तरकोणस्थं नातिदूरे व्यवस्थितम् ॥ १ ॥ भरतोनाम राजाऽभूदाग्नीध्रः प्रथितः क्षितौ ॥ यस्येदं भारतं वर्षं नाम्ना लोकेषु गीयते ॥ २ ॥ स च चक्रे तपो घोरं क्षेत्रेऽस्मिन्पार्वति प्रिये ॥ दिव्यं वर्षसहस्रं तु प्रतिष्ठाप्य महेश्वरम् ॥ ३ ॥ पुत्रकामो नरश्रेष्ठः पूजयामास शंकरम् ॥ ततस्तुष्टः स भगवान्वरं दातुं समुत्सुकः ॥ ४ ॥ अष्टौ पुत्रान्ददौ तस्मै कन्यां चैकां यशस्विनीम् ॥ स तु प्राप्याभिलषितं कृतकृत्यो नराधिपः ॥ ५ ॥ भारतं नवधा कृत्वा पुत्रेभ्यः प्रददौ पृथक् ॥ तेषां नामांकितान्येव ततो द्वीपानि जज्ञिरे ॥ ६ ॥ इन्द्रद्वीपः कसेरुश्च ताम्रवर्णो गभस्तिमान् ॥ नागद्वीपस्तथा सौम्यो गान्धर्वस्त्वथ चारुणः ॥ ७ ॥ अयं तु नवमो द्वीपः कुमार्या संज्ञितः प्रिये ॥ अष्टौ द्वीपाः समु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



द्रेण प्लाविताश्च तथा परे ॥ ८ ॥ ग्रामादिदेशसंयुक्ताः स्थिताः सागरमध्यगाः ॥ एक एव स्थितस्तेषां कुमार्याख्यस्तु सांप्रतम् ॥ ९ ॥ बिंदुसरः प्रभृत्येव सागरादक्षिणोत्तरम् ॥ योजनानां सहस्रं तु एकं विस्तीर्ण एव तु ॥ १० ॥ योजनानां सहस्राणि नव दैर्घ्यं प्रकीर्तितम् ॥ तस्यैतज्जृम्भितं देवि भरतस्य महात्मनः ॥ ११ ॥ षट्पञ्चाशदश्वमेधान्गंगामनु चकार यः॥ यस्त्रिंशद्यमुनाप्रान्ते भरतो लोकपूजितः ॥ १२ ॥ स चेश्वरप्रसादेन मोदते दिवि देववत् ॥ १३ ॥ यस्तत्प्रतिष्ठितं लिंगं भारतं पूजयिष्यति ॥ स सर्वयज्ञदानानां फलं प्रापयिता ध्रुवम् ॥ १४ ॥ कार्त्तिक्यां कृत्तिका योगे यस्तं पश्यति मानवः ॥ न स पश्यति स्वप्नेऽपि नरकं घोरदारुणम् ॥ १५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये भरतेश्वरमाहात्म्यवर्णनंनाम द्विसप्तत्युत्तरशततमोऽध्यायः ॥ १७२ ॥ ॥ छ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि लिंगानां च चतुष्टयम् ॥ एकस्थानस्थितानां तु सावित्र्यास्तत्र पश्चिमे ॥ १ ॥ लिंगानां द्वितयं पूर्वे पश्चिमे सम्मुखद्वयम् ॥ कुशकेश्वरनामेति लिंगं वै प्रथमं स्मृतम् ॥ २ ॥ गर्गेश्वरं द्वितीयं तु तृतीयं पुष्करेश्वरम् ॥ मैत्रेये श्वरनामेति चतुर्थं समुदाहृतम् ॥ ३ ॥ एतानि यस्तु लिंगानि पश्येद्भक्त्या जितेन्द्रियः ॥ स मुक्तः पातकैः सर्वैर्गच्छेच्छिवपुरं महत् ॥ ॥ ४ ॥ शुक्लपक्षे चतुर्दश्यां वैशाखे तु विशेषतः ॥ स्नानं कृत्वा प्रयत्नेन ब्राह्मणांस्तत्र भोजयेत् ॥ ५ ॥ तेभ्यो दद्याद्यथाशक्त्या काञ्चनं वसनानि च ॥ एवं कृते भवेद्यात्रा परिपूर्णा सुरेश्वरि ॥ ६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये कुशकादिलिंगचतुष्टयमाहात्म्यवर्णनंनाम त्रिसप्तत्युत्तरशततमोऽध्यायः ॥ १७३ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि कुन्तीश्वरमनुत्तमम् ॥ सावित्र्याः पूर्वभागस्थं खातमध्ये व्यवस्थितम् ॥ १ ॥ कुन्त्या प्रतिष्ठितं देवि क्षेत्रे प्राभासिके प्रिये ॥ पाण्डवास्तु यदा पूर्वं प्रभासक्षेत्रमागताः ॥ २ ॥ तीर्थयात्राप्रसंगेन कुन्त्या चैव समन्विताः ॥ तस्मिन्काले महादेवि ज्ञात्वा क्षेत्रमनुत्तमम् ॥ ३ ॥ कुन्त्या प्रतिष्ठितं लिंगं सर्वपापभयापहम् ॥ कार्तिक्यां तु विशेषेण यस्तं पूजयते नरः ॥ स सर्वकामतृप्तात्मा रुद्र लोके महीयते ॥ ४ ॥ वाचिकं मानसं पापं कर्मणा यदुपार्जितम् ॥ तत्सर्वं नश्यते देवि तस्य लिंगस्य दर्शनात् ॥ ५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये कुन्तीश्वरमाहात्म्यवर्णनंनाम चतुःसप्तत्युत्तरशततमोऽध्यायः ॥ ॥ १७४ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि पुण्यमर्कस्थलं शुभम् ॥ तस्मादाग्नेयकोणस्थं सर्वपातकनाशनम् ॥ १ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तं दृष्ट्वा मानुषो देवि न शोच्यः संप्रजायते ॥ सप्त जन्मानि देवेशि दारिद्र्यं नैव जायते ॥ २ ॥ कुष्ठानि नाशमायांति तं दृष्ट्वा दशधा प्रिये ॥
गोशतस्य प्रदत्तस्य कुरुक्षेत्रेषु यत्फलम् ॥ ३ ॥ तत्फलं समवाप्नोति दृष्ट्वा चार्कस्थलं रविम् ॥ स्नात्वा त्रिसंगमे तीर्थे सप्तैव रविवासरान् ॥४॥ ब्राह्म
णान्भोजयित्वा तु महिषीं तत्र दापयेत् ॥ दिव्यं वर्षसहस्रं तु स्वर्गलोके महीयते ॥ ५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां
सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्येऽर्कस्थलमाहात्म्यवर्णनंनाम पञ्चसप्तत्युत्तरशततमोऽध्यायः ॥ १७५ ॥ ॥ छ ॥ ॥
॥ ॥ ईश्वर उवाच ॥ ॥ ॥ ततो गच्छेन्महादेवि सिद्धेश्वरमिति स्मृतम् ॥ अर्कस्थलात्तथाऽऽग्नेय्यां नातिदूरे व्यवस्थितम् ॥ १ ॥ अष्टादश
सहस्राणि ऋषीणामूर्ध्वरेतसाम् ॥ तस्मिँल्लिंगे तु सिद्धानि सिद्धेश्वरमतः स्मृतम् ॥ २ ॥ स्नात्वाऽर्चयेन्नरो भक्त्या सोपवासो जितेन्द्रियः ॥ संपूज्य
विधिवद्देवं दद्याद्विप्रेषु दक्षिणाम् ॥ सर्वकामसमृद्धस्तु स याति परमं पदम् ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां
सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये सिद्धेश्वरमाहात्म्यवर्णनंनाम षट्सप्तत्युत्तरशततमोऽध्यायः ॥ १७६ ॥ ॥ छ ॥ ॥ ईश्वर
उवाच ॥ ॥ तस्यैव पूर्वदिग्भागे लकुलीशस्तु मूर्तिमान् ॥ स्वयं तिष्ठति देवेशि कृत्वा घोरं तपः पुरा ॥ १ ॥ संस्थितः पापशमने तत्र
स्थाने स्थलोपरि ॥ कार्तिक्यां कृत्तिकायोगे यस्तं पूजयते नरः ॥ २ ॥ स पूज्यते महादेवि सर्वैरपि सुरासुरैः ॥ ३ ॥ इति श्रीस्कान्दे
महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये लकुलीशमाहात्म्यवर्णनंनाम सप्तसप्तत्युत्तरशततमो
ऽध्यायः ॥ १७७ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि तस्माद्दक्षिणतः स्थितम् ॥ भार्गवेश्वरनामानं
सर्वपापप्रणाशनम् ॥ १ ॥ यस्तं पूजयते देवि दिव्यपुष्पोपहारकैः ॥ स भवेत्कृतकृत्यस्तु सर्वकामैः समृद्धिमान् ॥ २ ॥ इति श्रीस्कांदे महा
पुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये भार्गवेश्वरमाहात्म्यवर्णनंनामाष्टसप्तत्युत्तरशततमोऽध्यायः ॥
॥ १७८ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि लिंगं पापप्रणाशनम् ॥ सिद्धेशाद्दक्षिणे कोणे धनुषां त्रितये स्थितम् ॥
माण्डव्येश्वरनामानं महापातकनाशनम् ॥ १ ॥ माघे मासे चतुर्दश्यां पूजां जागरणं तथा ॥ कुर्याद्योऽतीन्द्रियो मर्त्यो न स मर्त्ये पुनर्व्रजेत् ॥ २ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये माण्डव्येश्वरमाहात्म्यवर्णनंनामैकोना
शीत्युत्तरशततमोऽध्यायः ॥ १७९ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तत्रैव संस्थितं पश्येत्पुष्पदन्तेश्वरं शुभम् ॥ पुष्पदन्तेश्वरोनाम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





गणेशः शंकरस्य तु ॥१॥ तेन तप्तं तपो घोरं तत्र लिंगं प्रतिष्ठितम् ॥ २ ॥ तं दृष्ट्वा मुच्यते जंतुर्जन्मसंसारबन्धनात् ॥ प्राप्नुयादीप्सितान्कामानिह लोके परत्र च ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये पुष्पदन्तेश्वरमाहात्म्यवर्णनंनामाशीत्युत्तरशततमोऽध्यायः ॥ १८० ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि क्षेत्रपेश्वरमुत्तमम् ॥ सिद्धेश्वरसमीपस्थं पूर्वस्मिन्नातिदूरतः ॥ १ ॥ तं दृष्ट्वा शुक्लपञ्चम्यां न च नागैः स दश्यते ॥ २ ॥ पूजयेत्तं विधानेन गन्धपुष्पादिभिः क्रमात् ॥ भोजयेद्ब्राह्मणाञ्छक्त्या भक्ष्यभोज्यैरनेकशः ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये क्षेत्रपालेश्वरमाहात्म्यवर्णनंनामैकाशीत्युत्तरशततमोऽध्यायः ॥ १८१ ॥ ॥ छ ॥ ॥ ततो मातृगणान्पश्येद्वसुनन्दादिनामतः ॥ अर्कस्थलसमीपस्थान्दक्षिणे नातिदूरतः ॥ १ ॥ आश्वयुक्छुक्लपक्षे तु नवम्यां नियतात्मवान् ॥ यस्ताः पूजयते मातॄर्विधिना भावितात्मवान् ॥ २ ॥ स समृद्धिमवाप्नोति दुरापामकृतात्मभिः ॥ तत्रैव संस्थितं पश्येच्छ्रीमुखं विवरप्रियम् ॥ ३ ॥ तस्मिन्नेव दिने पूज्यं सिद्धिकामैर्नरैः सदा ॥ एतत्पूर्वं मयाख्यातं तव विस्तरतः प्रिये ॥ ४ ॥ तस्मिन्नेव दिने पूज्यं तीर्थयात्राप्रसंगतः ॥ ५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये वसुनन्दामातृगणश्रीमुखविवरमाहात्म्यवर्णनंनाम द्व्यशीत्युत्तरशततमोऽध्यायः ॥ ॥ १८२ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि मिश्रतीर्थमनुत्तमम् ॥ त्रिसंगमेति विख्यातं सौरं तीर्थमनुत्तमम् ॥ १ ॥ सरस्वती हिरण्या च समुद्रश्चैव भामिनि ॥ त्रयाणां संगमो यत्र दुष्प्राप्यो दैवतैरपि ॥ २ ॥ सर्वेषां तत्र तीर्थानां प्रधानं तीर्थमुत्तमम् ॥ सूर्यपर्वणि संप्राप्ते कुरुक्षेत्राद्विशिष्यते ॥ ३ ॥ स्नानं दानं जपस्तत्र सर्वं कोटिगुणं भवेत् ॥ ४ ॥ मंकीश्वरान्महादेवि यावल्लिंगं कृतस्मरम् ॥ एतस्मिन्नन्तरे देवि तीर्थानां दशकोटयः ॥ ५ ॥ कृमिकीटपतंगाश्च श्वपचा वा नराधमाः ॥ सोऽपि स्वर्गमवाप्नोति किं पुनर्भावितात्मवान् ॥ ६ ॥ तत्रपीतानि वस्त्राणि काञ्चनं सुरभिस्तथा ॥ ब्राह्मणाय प्रदातव्या सम्यग्यात्राफलेप्सुभिः ॥ ७ ॥ कृष्णपक्षे चतुर्दश्यां स्नात्वा यस्तर्पयेत्पितॄन् ॥ तर्पिताः पितरस्तेन यावच्चन्द्रार्कतारकम् ॥ ८ ॥ एतत्त्रिसंगमं देवि महापातकनाशनम् ॥ दुर्लभं त्रिषु लोकेषु वैशाख्यां तु विशेषतः ॥ ९ ॥ वृषोत्सर्गो विशेषेण तत्र कार्यो नरोत्तमैः ॥ सर्वपापविनाशाय पितॄणां प्रीतये प्रिये ॥ १० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये त्रिसंगममाहात्म्यवर्णनंनाम त्र्यशीत्युत्तरशततमोऽध्यायः ॥ १८३ ॥ ॥छ॥ ॥ ईश्वर उवाच ॥ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततो गच्छेन्महादेवि मंकीश्वरमनुत्तमम् ॥ त्रिसंगमसमीपस्थं सर्वपातकनाशनम् ॥ १ ॥ मंकीनाम ऋषिः पूर्वमासीत्स तपतां वरः ॥ स च ज्ञात्वा महाक्षेत्रं प्रभासं शंकरप्रियम् ॥ २ ॥ अतपद्वै तपो घोरं कन्दमूलफलाशनः ॥ वर्षाणामयुतं साग्रं प्रतिष्ठाप्य महेश्वरम् ॥ ३ ॥ ततस्तुष्टो महादेवो ददौ प्रीतो वरं तदा ॥ स वव्रे यदि तुष्टोऽसि अस्मिन्स्थाने स्थितो भव ॥ ४ ॥ मन्नामांकितलिंगस्तु वस कल्पायुतायुतम् ॥ एवमस्त्वित्त्यथे त्युक्त्वा तत्रैवान्तरधीयत ॥ ५ ॥ तदाप्रभृति तल्लिंगं मंकीश्वरमिति श्रुतम् ॥ माघे मासे त्रयोदश्यां चतुर्दश्यामथापि वा ॥ ६ ॥ पूज्याः पंचोपचारेण प्राप्नुयादीप्सितं फलम् ॥ गोदानं तत्र वै देयं सम्यग्यात्राफलेप्सुभिः ॥ ७ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये मंकीश्वरमाहात्म्यवर्णनंनाम चतुरशीत्युत्तरशततमोऽध्यायः ॥ १८४ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि देवमातरमव्ययाम् ॥ मंकीशान्नैर्ऋते भागे गौरीरूपसमाश्रिताम् ॥ देवमाता सरस्वत्या नाम लोकेषु गीयते ॥ १ ॥ पादुकासनसंस्था च तत्र देवी सरस्वती ॥ गौरीरूपेण सा तत्र वडवाश्रितविग्रहा ॥ २ ॥ मातृवद्रक्षिता देवा वडवानलभीतितः ॥ देवमातेति लोकेऽस्मिंस्ततः सा विबुधैः कृता ॥ ३ ॥ माघे मासे तृतीयायां यस्तामर्चयते नरः ॥ नारी वा संयता साध्वी सर्वान्कामानवाप्नुयात् ॥ ४ ॥ दंपती भोजयेद्यस्तु पायसैः शर्करादिभिः ॥ गौरीसहस्रभोज्यस्य दत्तस्य फलमाप्नुयात् ॥ ५ ॥ सुवर्णपादुका देया तत्र विप्राय शीलिने ॥ ६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये देवमातृगौरीमाहात्म्यवर्णनंनाम पंचाशीत्युत्तरशततमोऽध्यायः ॥ १८५ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि नागस्थानमनुत्तमम् ॥ मंकीशात्पश्चिमे भागे संगमत्रितयं गतम् ॥ १ ॥ पापघ्नं सर्वजंतूनां पातालविवरं महत् ॥ २ ॥ बलभद्रः पुरा देवि श्रुत्वा कृष्णस्य पंचताम् ॥ भल्लतीर्थे तु भल्लेन ततः प्रभासमागतः ॥ ३ ॥ क्षेत्रं महाप्रभावं हि ज्ञात्वा सर्वार्थसिद्धिदम् ॥ यादवानां क्षयं कृत्वा ततो वैराग्यमेयिवान् ॥ ॥ ४ ॥ शेषनागेशरूपेण निष्क्रम्य च शरीरतः ॥ गच्छन्गच्छंस्तदा प्राप्य तीर्थं त्रैसंगमं परम् ॥ ५ ॥ पातालस्य तदा दृष्ट्वा द्वारं विवररूपकम् ॥ प्रविष्टोऽथ जगामाशु यत्रानंतः स्वयं स्थितः ॥ ६ ॥ यतो नागस्वरूपेण स्थानेऽस्मिंश्च समाविशत् ॥ तत्प्रभृत्येव देवेशि नागस्थानमिति श्रुतम् ॥ ७ ॥ नागरादित्यपूर्वेण यत्र कायो विसर्जितः ॥ तदद्यापि प्रसिद्धं वै शेषस्थानमिति श्रुतम् ॥ ८ ॥ अतः स्नात्वा

१ तया—इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





महादेवि तत्र तीर्थे त्रिसंगमे ॥ नागस्थान समभ्यर्च्य पञ्चम्यामकृताशनः ॥९॥ श्राद्धं कृत्वा यथाशक्त्या दत्त्वा विप्राय दक्षिणाम् ॥ विमुक्तः सर्वदुः
खेभ्यो रुद्रलोकं स गच्छति ॥ १० ॥ पायसं मधुसंमिश्रं भक्ष्यभोज्यैः समन्वितम् ॥ शेषनागं समुद्दिश्य विप्रं यस्तत्र भोजयेत् ॥ कोटिभोज्यं
कृतं तेन जायते नात्र संशयः ॥ ११ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये नाग
स्थानमाहात्म्यवर्णनंनाम षडशीत्युत्तरशततमोऽध्यायः ॥ १८६ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि सर्वकामफलप्रदम् ॥
प्रभासपंचकं पुण्यमाद्यं तत्र व्यवस्थितम् ॥ १ ॥ तस्यैव पश्चिमे भागे प्रभास इति चोच्यते ॥ वृद्धप्रभासश्च ततो दक्षिणे नातिदूरतः ॥ २ ॥ जल
प्रभासश्च ततो दक्षिणेन वरानने ॥ कृतस्मरप्रभासश्च श्मशानं यत्र भैरवम् ॥ ३ ॥ एवं पंचप्रभासान्यः पश्येद्भक्त्या समन्वितः ॥ स याति परमं
स्थानं जरामरणवर्जितम् ॥ ४ ॥ न निवर्तति यत्प्राप्य दुष्प्राप्यं त्रिदशैरपि ॥ प्रभासं प्रथमं तीर्थं त्रिषु लोकेषु विश्रुतम् ॥ ५ ॥ देवानामपि
दुष्प्राप्यं महापातकनाशनम् ॥ प्रभासे त्वेकरात्रेण अमावास्यां कृतोदकः ॥ ६ ॥ मुच्यते पातकैः सर्वैः शिवलोकं स गच्छति ॥ सप्तजन्मकृतं
पापं गंगासागरसंगमे ॥ ७ ॥ जन्मनां च सहस्रेण यत्पापं कुरुते नरः ॥ स्नानादेवास्य नश्येत सागरे लवणांभसि ॥ ८ ॥ चतुर्दश्याममावास्यां
पञ्चदश्यां विशेषतः ॥ अहोरात्रोषितो भूत्वा ब्राह्मणान्भोज्य शक्तितः ॥ ९ ॥ दत्त्वा गां कांचनं तेभ्यः शिवः प्रीतो भवत्विति ॥ एवं कृत्वा नरो
देवि कुलानां तारयेच्छतम् ॥ १० ॥ ॥ देव्युवाच ॥ ॥ प्रभासपंचकं ह्येतद्यत्त्वया परिकीर्तितम् ॥ कथमत्र समुद्भूतमेतन्मे कौतुकं महत् ॥ ११ ॥
एक एव श्रुतोऽस्माभिः प्रभासस्तीर्थवासितः ॥ प्रभासाः पंच देवेश यत्त्वया परिकीर्तिताः ॥ १२ ॥ एतन्मे संशयं सर्वं यथावद्वक्तुमर्हसि ॥
॥ १३ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि कथां पापप्रणाशनीम् ॥ यां श्रुत्वा मानवो भक्त्या प्राप्नोति परमां गतिम् ॥ १४ ॥
पुरा महेश्वरो देवश्चचार वसुधामिमाम् ॥ दिव्यरूपधरः कान्तो दिग्वासाः स यदृच्छया ॥ १५ ॥ एवं च रममाणस्तु ऋषीणामाश्रमं
महत् ॥ जगाम कौतुकाविष्टो भिक्षार्थं दारुके वने ॥ १६ ॥ भ्रममाणस्य तस्याथ दृष्ट्वा रूपमनुत्तमम् ॥ ता नार्यः कामसंतप्ता
बभूवुर्व्यथितेन्द्रियाः ॥ १७ ॥ सानुरागास्ततः सर्वा अनुगच्छंति तं सदा ॥ समालिंगंति ताः काश्चित्काश्च वीक्षंति रागतः ॥ १८ ॥
प्रार्थयंति तथा चान्याः परित्यज्य गृहान्स्वकान् ॥ १९ ॥ एवं तासां स्वरूपं ते दृष्ट्वा सर्वे महर्षयः ॥ कोपेन महता युक्ताः शेपुस्तं वृषभध्वजम् ॥
॥ २० ॥ यस्मात्त्वं नग्नतामेत्य आश्रमेऽस्मिन्समागतः ॥ मोहयानः स्त्रियोऽस्माकं लज्जां नैवं करोषि च ॥ तस्मात्ते पतताल्लिंगं सद्य एव



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृषध्वज ॥ २१ ॥ ततस्तत्पतितं लिंगं तत्क्षणाच्छंकरस्य च ॥ तस्मिन्प्रपतिते भूमौ प्राकंपत वसुंधरा ॥ २२ ॥ क्षुभिताः सागराः सर्वे मर्यादां विजहुस्तदा ॥ शीर्णानि गिरिशृंगाणि त्रस्ताः सर्वे दिवौकसः ॥ २३ ॥ ततो देवाः सगन्धर्वाः समहोरगकिन्नराः ॥ ऊचुः पितामहं गत्वा किमेतत्कारणं विभो ॥ २४ ॥ सागराः क्षुभिता येन प्लावयंति वसुंधराम् ॥ शीर्यंते गिरिशृङ्गाणि कंपते च वसुंधरा ॥ २५ ॥ चिह्नानि लोकनाशाय दृश्यन्ते दारुणानि च ॥ तेषां तद्वचनं श्रुत्वा ब्रह्मलोके पितामहः ॥ २६ ॥ ध्यात्वा तु सुचिरं कालं वाक्यमेतदुवाच ह ॥ शिवलिंगं निपतितं पृथिव्यां सुरसत्तमाः ॥ २७ ॥ शापेन ऋषिमुख्यानां भार्गवाणां महात्मनाम् ॥ तस्मिन्निपतिते भूमौ त्रैलोक्यं सचराचरम् ॥ २८ ॥ एतदवस्थतां प्राप्तं तस्मात्तत्रैव गम्यताम् ॥ विष्णुना सह गीर्वाणास्तथा नीतिर्विधीयताम् ॥ २९ ॥ ततः क्षीरोदधिं जग्मुर्ब्रह्माद्यास्त्रिदिवौकसः ॥ यत्र शेते चतुर्बाहुर्योगनिद्रां च संगतः ॥ ३० ॥ तस्मै सर्वं समाचख्युस्तेनैव सहितास्ततः ॥ जग्मुर्यत्र महादेवो लिंगेन रहितो विभुः ॥ ३१ ॥ ऊचुः समाहिताः सर्वे प्रणिपत्य दिवौकसः ॥३२॥ लिंगमुत्क्षिप्यतामेतद्यत्क्षितौ पतितं विभो ॥ एते महार्णवाः सर्वे प्लावयंति वसुंधराम् ॥३३॥ ॥ भगवानुवाच ॥ ॥ ऋषिभिः पातितं ह्येतन्मम लिंगं सुरेश्वराः ॥ न तु शक्यो मया कर्तुं बाधस्तेषां महात्मनाम् ॥३४॥ शापो हि भार्गवेन्द्राणामतो मे श्रूयतां वचः ॥ पूजयध्वं सुराः सर्वे ब्रह्मविष्णुपुरस्सराः ॥३५॥ लिंगमेतत्ततः सर्वे सर्वं लिप्सथ सत्तमाः ॥ प्रकृतिं सागराः सर्वे यास्यंति गिरयस्तथा ॥ ३६ ॥ एतत्पुण्यतमे क्षेत्रे धृत्वा सर्वे समाहिताः ॥ अथोद्धृत्य सुराः सर्वे प्रभासं क्षेत्रमागताः ॥३७॥ तत्रैव निदधुः सर्वे ततः पूजां प्रचक्रिरे ॥ ब्रह्मणा पूजितं लिंगं विष्णुना प्रभविष्णुना ॥ ३८ ॥ शक्रेणाथ कुबेरेण यमेन वरुणेन च ॥ ऊचुश्चैव ततो देवा लिंगं संपूज्य भक्तितः ॥ ३९ ॥ अद्यप्रभृति रुद्रस्य लिंगं संपूज्य भक्तितः ॥ भविष्यामो न संदेहस्तथा पितृगणाश्च ये ॥ ४० ॥ य एनं पूजयिष्यंति भक्तियुक्ताश्च मानवाः ॥ यास्यंति ते सुरावासं सशरीरा नरोत्तमाः ॥ ४१ ॥ अत्रैव प्रथमं लिंगं यतोस्माऽभिः प्रतिष्ठितम् ॥ प्रभासंनाम चास्यापि प्रभासेति भविष्यति ॥ ४२ ॥ एवमुक्त्वा गताः सर्वे त्रिदिवं सुरसत्तमाः ॥ तं दृष्ट्वा त्रिदिवं यान्ति भूयांसः प्राणिनो भुवि ॥ ४३ ॥ ततस्त्रिविष्टपं व्याप्तं बहुभिः प्राणिभिः प्रिये ॥ तद्दृष्ट्वा त्रिदिवं व्याप्तं सहस्राक्षः सुदुःखितः ॥ ४४ ॥ ज्ञात्वा लिंगप्रभावं तु ततश्चागत्य भूतलम् ॥ वज्रेणाच्छादयामास समंतात्स वरानने ॥ ४५ ॥ ततः प्रभृति नो देवि स्वर्गं गच्छंति मानवाः ॥ इति संक्षेपतः प्रोक्तः प्रभासस्य महोदयः ॥ सर्वपापोपशमनः सर्वकामफल



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





प्रदः ॥४६॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये प्रभासपञ्चकमाहात्म्यवर्णनंनाम सप्ताशीत्युत्तरशततमोऽध्यायः ॥ १८७ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि तत्र स्थाने तु संस्थितम् ॥ रुद्रेश्वेतिनामानं स्वयंभूतं धरातले ॥ १ ॥ आदिप्रभासात्पुरतो धनुषां त्रितये स्थितम् ॥ रुद्रेण ध्यानमास्थाय स्वं तेजस्तत्र योजितम् ॥ २ ॥ ततो रुद्रेश्वरंनाम सर्वपातकनाशनम् ॥ तं दृष्ट्वा पूजयित्वा च सर्वान्कामानवाप्नुयात् ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये रुद्रेश्वरमाहात्म्यवर्णनंनामाष्टाशीत्युत्तरशततमोऽध्यायः ॥ १८८ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्यैव पश्चिमे भागे नातिदूरे व्यवस्थितम् ॥ चण्डिका कर्ममोटी च योगिनी कोटिसंयुता ॥ पीठत्रयं महादेवि आद्यं त्रैलोक्यवन्दितम् ॥ १ ॥ नवम्यां तत्र संपूज्य देवीपीठं च योगिनीम् ॥ स सर्वान्प्राप्नुयात्कामान्भवेत्स्वर्गांगनाप्रियः ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये कर्ममोटीमाहात्म्यवर्णनंनामैकोननवत्युत्तरशततमोऽध्यायः ॥ १८९ ॥ ॥ छ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि तत्र मुक्तिप्रदं हरिम् ॥ प्रभासान्नैर्ऋते भागे नातिदूरे व्यवस्थितम् ॥ १ ॥ एकादश्यां जिताहारो यस्तं देवि प्रपूजयेत् ॥ माघेमासे विशेषेण सोऽग्निष्टोमफलं लभेत् ॥ २ ॥ यस्तत्रानशनं कुर्याद्व्रतं चान्द्रायणादिकम् ॥ सोऽन्यतीर्थात्कोटिगुणं प्राप्नुयात्फलमीप्सितम् ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये मोक्षस्वामिमाहात्म्यवर्णनंनाम नवत्युत्तरशततमोऽध्यायः ॥ १९० ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि अजीगर्तेश्वरं हरम् ॥ चन्द्रवापीसमीपस्थं कर्ममोटीसमीपतः ॥ १ ॥ तस्यां स्नात्वा महादेवि यस्तल्लिंगं प्रपूजयेत् ॥ स मुक्तः पातकैर्घोरैर्गच्छेच्छिवपदं महत् ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्येऽजीगर्तेश्वरमाहात्म्यवर्णनंनामैकनवत्युत्तरशततमोऽध्यायः ॥ १९१ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि विश्वकर्मप्रतिष्ठितम् ॥ लिंगं महाप्रभावं हि मोक्षस्वामिन उत्तरे ॥ १ ॥ धनुषां पंचके देवि स्थितं पातकनाशनम् ॥ २ ॥ तं दृष्ट्वा मानवः सम्यग्यात्राफलमवाप्नुयात् ॥ वाचिकं मानसं पापं दर्शनात्तस्य नश्यति ॥ ३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये विश्वकर्मेश्वरमाहात्म्यवर्णनंनाम द्विनवत्युत्तरशततमोऽध्यायः ॥ १९२ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततो गच्छेन्महादेवि यमेश्वरमनुत्तमम् ॥ तस्यैव नैर्ऋते भागे नातिदूरे व्यवस्थितम् ॥ १ ॥ दर्शनात्पापशमनं सर्वकामफलप्रदम् ॥ ॥ २ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये यमेश्वरमाहात्म्यवर्णनं नाम त्रिणवत्युत्तरशततमोऽध्यायः ॥ १९३ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि लिंगं देवैः प्रतिष्ठितम् ॥ ज्ञात्वा प्रभावं क्षेत्रस्य सर्वपातकनाशनम् ॥ १ ॥ तत्र कृत्वा तपश्चोग्रं लिंगं देवैः प्रतिष्ठितम् ॥ तं दृष्ट्वा मानवो देवि कृतकृत्यः प्रजायते ॥ २ ॥ गोदानं तत्र देयं तु ब्राह्मणे वेदपारगे ॥ सम्यक्च लभते देवि यात्रायाः फलमूर्जितम् ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्येऽमरेश्वरमाहात्म्यवर्णनंनाम चतुर्णवत्युत्तरशततमोऽध्यायः ॥ १९४ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो वृद्धप्रभासं तु गच्छेच्च नियतात्मवान् ॥ आदिप्रभासाद्दक्षिणतो नातिदूरे व्यवस्थितम् ॥ १ ॥ चतुर्मुखं महालिंगं दर्शनात्पापनाशनम् ॥ २ ॥ ॥ श्रीदेव्युवाच ॥ ॥ कथं वृद्धप्रभासं तु नाम तस्याभवत्प्रभो ॥ तस्मिन्दृष्टे फलं किं स्यात्स्तुते संपूजिते तथा ॥ ३ ॥ एतत्कथय मे देव संक्षेपान्नातिविस्तरात् ॥ ४ ॥ ॥ ईश्वर उवाच ॥ ॥ आदौ स्वायंभुवे देवि पूर्वमन्वन्तरे पुरा ॥ त्रेतायुगे चतुर्थे तु प्रभासे क्षेत्र उत्तमे ॥ ५ ॥ तस्मिन्काले महादेवि पूर्वमन्वंतरे पुरा ॥ त्रेतायुगे चतुर्थे तु ऋषयस्तत्र संगताः ॥ ६ ॥ दर्शनार्थं प्रभासस्य उत्तरापथगामिनः ॥ तं दृष्ट्वाऽऽच्छादितं देवं वज्रेण तु महेश्वरि ॥ ७ ॥ विषादं परमं जग्मुर्वाक्यं चेदमथाब्रुवन् ॥ अदृष्ट्वा शांकरं लिंगं न यास्यामो वयं गृहम् ॥ ८ ॥ स्वर्गार्थिनो वयं प्राप्ता महदध्वानमेव हि ॥ तस्मादत्रैव तिष्ठामो यावल्लिंगस्य दर्शनम् ॥ ९ ॥ एवं ते निश्चयं कृत्वा परस्मिंस्तपसि स्थिताः ॥ वर्षास्वाकाशगा भूत्वा हेमंते सलिलाश्रयाः ॥ १० ॥ पञ्चाग्निसाधना ग्रीष्मे नियता ब्रह्मचारिणः ॥ बहून्वर्षगणान्विप्रा जराग्रस्तास्तदाऽभवन् ॥ ११ ॥ एवं वृद्धत्वमापन्ना यदा ते वरवर्णिनि ॥ छन्द्यमाना वरैस्ते तु शंकरेण महात्मना ॥ १२ ॥ लिंगस्य दर्शनं मुक्त्वा न तेऽन्यं वव्रिरे वरम् ॥ १३ ॥ तेषां तु निश्चयं ज्ञात्वा सर्वेषां वृषभध्वजः ॥ अनुकम्पापरो भूत्वा स्वलिंगं तानदर्शयत् ॥ १४ ॥ एतस्मिन्नेव काले तु भित्त्वा चैव वसुन्धराम् ॥ उत्थितं सहसा लिंगं तदेव वरवर्णिनि ॥ १५ ॥ ऋषयस्ते च तं दृष्ट्वा सर्वे च त्रिदिवं गताः ॥ अथ तेषु प्रयातेषु शक्रस्तप्तमना ह्यभूत् ॥ १६ ॥ तमपि

१ छन्द्यमानाः—लोभ्यमानाः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





च्छादयामास वज्रेण शतपर्वणा ॥ १७ ॥ वृद्धभावे यतस्तेषामृषीणां दर्शनं गतः ॥ अतो वृद्धप्रभासं तत्कीर्त्यते वसुधातले ॥ १८ ॥
तस्मिन्दृष्टे वरारोहे अद्यापि लभते फलम् ॥ राजसूयाश्वमेधानां नरो भक्तिसमन्वितः ॥ १९ ॥ एवं तत्र समुत्पन्नं प्रभासं वृद्धसंज्ञकम् ॥ तत्रोक्षा
ब्राह्मणे देयः सम्यग्यात्राफलेप्सुभिः ॥ २० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमा
हात्म्ये वृद्धप्रभासमाहात्म्यवर्णनंनाम पञ्चनवत्युत्तरशततमोऽध्यायः ॥ १९५ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि प्रभासं
जलसंस्थितम् ॥ वृद्धप्रभासाद्दक्षिणतो नातिदूरे व्यवस्थितम् ॥ १ ॥ तस्यैव देवि देवस्य शृणु माहात्म्यमुत्तमम् ॥ २ ॥ जामदग्न्येन रामेण यदा
क्षत्रवधः कृतः ॥ तदाऽस्य परमा जाता घृणा मनसि भामिनि ॥ ३ ॥ ततस्त्वाराधयामास महादेवं सुरेश्वरम् ॥ उग्रं तपः समास्थाय बहून्वर्ष
गणान्प्रिये ॥ ४ ॥ ततस्तुष्टो महादेवस्तस्य प्रत्यक्षतां गतः ॥ अब्रवीद्वरदस्तेऽहं वरं वरय सुव्रत ॥ ५ ॥ ॥ राम उवाच ॥ ॥ यदि तुष्टोऽसि
मे देव यदि देयो वरो मम ॥ दर्शयस्व स्वकं लिंगं यत्ते वज्रेण छादितम् ॥ ६ ॥ घृणा मे महती जाता हत्वेमान्क्षत्रियान्बहून् ॥ दर्शनात्तव लिंगस्य
येन मे नश्यते घृणा ॥ ७ ॥ तथा मे पातकं सर्वं प्रसादात्तव शंकर ॥ ८ ॥ ॥ शंकर उवाच ॥ ॥ मम लिंगं सहस्राक्ष उत्थितं तु पुनःपुनः ॥
वज्रेणाच्छादयत्येव भयेन महता वृतः ॥ ९ ॥ न तेऽहं दर्शनं यास्ये लिंगरूपी कदाचन ॥ १० ॥ यन्मां वदसि घृणया वृतोऽहं पातकेन तु ॥
तत्तेऽहं नाशयिष्यामि स्पर्शनात्तु द्विजोत्तम ॥ ११ ॥ अस्मिञ्जलाश्रये पुण्ये जलमध्ये महामते ॥ उत्थास्यति महालिंगं तस्य त्वं दर्शनं कुरु ॥
॥ १२ ॥ गमिष्यति घृणा सर्वा निष्पापस्त्वं भविष्यसि ॥ उक्त्वैवमुदतिष्ठच्च जलमध्याद्वरानने ॥ १३ ॥ जलप्रभासनामास्य ततो जातं
धरातले ॥ तस्यालं स्पर्शनाद्देवि शिवलोकं व्रजेन्नरः ॥ १४ ॥ एकं भोजयते योऽत्र ब्राह्मणं शंसितव्रतम् ॥ भोजितोऽहं भवेत्तेन सपत्नीको न
संशयः ॥ १५ ॥ एषा जलप्रभासस्य संभूतिस्ते मयोदिता ॥ श्रुता पापोपशमनी सर्वकामफलप्रदा ॥ १६ ॥ इति श्रीस्कांदे महापुराण एकाशीति
साहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये जलप्रभासमाहात्म्यवर्णनंनाम षण्णवत्युत्तरशततमोऽध्यायः ॥ १९६ ॥ ॥छ॥ ॥१२८॥
॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि जमदग्नीश्वरं शिवम् ॥ वृद्धप्रभाससामीप्ये नातिदूरे व्यवस्थितम् ॥ १ ॥ सर्वपापोपश
मनं स्थापितं जमदग्निना ॥ तं दृष्ट्वा मानवो देवि मुच्यते च ऋणत्रयात् ॥ २ ॥ स्नात्वा निधानवाप्यां च संपूज्य प्राप्नुयाद्धनम् ॥
निधानं पांडवैर्लब्धं तत्र स्थाने पुरा प्रिये ॥ ३ ॥ निधानेनैव सा ख्याता वापी त्रैलोक्यवंदिता ॥ ४ ॥ तस्यां स्नात्वा महादेवि दुर्भगा सुभगा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवेत् ॥ लभते वाञ्छितान्कामानिति प्रोक्तं मया तव ॥ ९ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये जमदग्नीश्वरमाहात्म्यवर्णनंनाम सप्तनवत्युत्तरशततमोऽध्यायः ॥ १९७ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि महाप्रभासमुत्तमम् ॥ जलप्रभासतो याम्ये यममार्गविघातकम् ॥ १ ॥ शृणु तस्यैव माहात्म्यं यथा जातं धरातले ॥ ॥ २ ॥ पूर्वं त्रेतायुगे देवि स्पर्शलिंगं तु तत्स्मृतम् ॥ दिव्यं तेजोमयं नृणां स्पर्शनान्मुक्तिदायकम् ॥ ३ ॥ अथ काले च कस्मिंश्चि द्वज्रिणाच्छादितं प्रिये ॥ इन्द्रेणागत्य वसुधां भयाक्रांतेन सुन्दरि ॥ ४ ॥ उष्मा तदुद्भवो देवि निर्गच्छन्नवरोधितः ॥ दशकोटिप्रविस्तीर्णं ज्वालाग्रं लिंगरूपधृक् ॥ ५ ॥ प्रभासक्षेत्रमास्थाय भित्त्वाऽऽविर्भावमास्थितम् ॥ वज्रेण रुंधिते देवि भित्त्वा चैव वसुंधराम् ॥ ६ ॥ धूमसंघैः समेतं तु व्यापयामास तज्जगत् ॥ ततस्त्रैलोक्यमखिलं ज्वालाभिर्व्याकुलीकृतम् ॥ ७ ॥ ततः सुरगणाः सर्वे ऋषयो वेदपारगाः ॥ अस्तुवन्विविधैः सूक्तैर्वेदोक्तैः शशिशेखरम् ॥ ८ ॥ संहरस्व सुरश्रेष्ठ तेजः स्वं दहनात्मकम् ॥ त्रैलोक्यं व्याकुलीभूतमेवं सर्वं चराचरम् ॥ न याव त्प्रलयं याति तावद्रक्ष सुरेश्वर ॥ ९ ॥ ॥ ईश्वर उवाच ॥ ॥ एवमाभाषमाणेषु त्रिदिवेषु सुरेश्वरि ॥ तत्तेजः पञ्चधाविष्टं व्याप्याशेषं जगत्त्रयम् ॥ ॥ १० ॥ पञ्चप्रभासरूपेण भित्त्वा तत्र वसुन्धराम् ॥ येन मार्गेण निष्क्रान्तं तन्मार्गे च महन्महः ॥ ११ ॥ तत्र तैः स्थापितं द्वारं सुप्रदेशेऽश्मजं प्रिये ॥ पिहितेऽथ च रंध्रेऽस्मिन्धूमो नाशमुपेयिवान् ॥ १२ ॥ स्वस्थाश्चैवाभवँल्लोकास्तेजस्तत्रैव संस्थितम् ॥ एवं मया प्रेरितास्ते लिंगं तत्र समा दधुः ॥ १३ ॥ तन्महस्तत्र देवेशि विश्राममकरोत्तदा ॥ ततो महाप्रभासेति कीर्त्यते देवदानवैः ॥ १४ ॥ यस्तं पूजयते भक्त्या लिंगं पुष्पैः पृथ ग्विधैः ॥ स याति परमं स्थानं जरामरणवर्जितम् ॥ १५ ॥ दृष्टेन तेन देवेशि मुच्यते पातकैर्नरः ॥ लभते वाञ्छितान्कामान्मनसा चेप्सिता न्प्रिये ॥ १६ ॥ हिरण्यं तत्र दातव्यं ब्राह्मणे शंसितव्रते ॥ गोदानं विधिवत्तत्र देयं चैव द्विजन्मने ॥ १७ ॥ एवं कृत्वा महादेवि लभते जन्मनः फलम् ॥ राजसूयाश्वमेधानां प्राप्नुयात्फलमूर्जितम् ॥ १८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये पञ्चमप्रभासक्षेत्रमाहात्म्यवर्णनंनामाष्टानवत्युत्तरशततमोऽध्यायः ॥ १९८ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि तस्य दक्षिणतः स्थितम् ॥ सरस्वत्यास्तटे रम्ये देवं तत्र कृतस्मरम् ॥ १ ॥ स्वयंभूतं महादेवि सर्वपापप्रणाशन म् ॥ तस्योत्पत्तिं प्रवक्ष्यामि यथा जातं महीतले ॥ २ ॥ पुरा कामो मया दग्धो यदा तत्र वरानने ॥ तदा रतिः समागम्य विल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



लाप सुदुःखिता ॥ ३ ॥ तां तु शोकातुरां दृष्ट्वा तत्राहं करुणान्वितः ॥ अवोचं मा रुदिष्वेति तत्र भर्ता पुनः शुभे ॥ समुत्थास्यति
कालेन मत्प्रसादान्न संशयः ॥ ४ ॥ ॥ देव्युवाच ॥ ॥ किमर्थं स पुरा दग्धः कामदेवस्त्वया विभो ॥ कथमाप पुनर्जन्म
विस्तरात्कथयस्व मे ॥ ५ ॥ ॥ ईश्वर उवाच ॥ ॥ दक्षः प्रजापतिः पूर्वं बभूव त्वत्पिता प्रिये ॥ शतं सुतानां जज्ञेऽस्य गौरीणां
दीर्घचक्षुषाम् ॥ ६ ॥ ददौ त्वां प्रथमं मह्यं सतीनामेति कीर्तिताम् ॥ ददौ दश च धर्माय श्रद्धा मेधा धृतिः क्षमा ॥ ७ ॥ अनसूया
शुचिर्लज्जा स्मृतिः शक्तिः श्रुतिस्तथा ॥ द्वे भार्ये कामदेवाय रतिः प्रीतिस्तथैव च ॥ ८ ॥ एकां स्वाहां ददौ वह्नेः पितॄणां च ततः स्व
धाम् ॥ सप्तविंशच्छशाङ्काय अश्विन्याद्याः प्रकीर्तिताः ॥ ९ ॥ तवापि विदिता देवि रेवत्यन्तास्तथा जने ॥ कश्यपाय ददौ देवि स तु कन्या
स्त्रयोदश ॥ १० ॥ अदितिश्च दितिश्चैव विनता कद्रुरेव च ॥ सिंहिका सुप्रभा चैव उलूकी या वरानने ॥ ११ ॥ अनुविद्धा सिता चैव ईर्ष्या
हिंसा तथा परा ॥ माया निष्कृतिसंयुक्ता दक्षः[1] पूर्वं महामतिः ॥ १२ ॥ गौरी च सुप्रभा चैव वार्त्ता साध्वी सुमालिका ॥ वरुणाय ददौ पञ्च
तदाऽसौ पर्वतात्मजे ॥ १३ ॥ भद्रा च मदिरा चैव विद्या धन्या धना शुभा ॥ ददौ पञ्च कुबेराय पत्न्यर्थं पर्वतात्मजे ॥ १४ ॥ जया च विजया
चैव मधुस्पन्दा इरावती ॥ सुप्रिया जनका कान्ता सुभद्रा धार्मिका शुभा ॥ १५ ॥ रुद्राणां प्रददौ कन्या दशानां धर्मवित्तदा ॥ प्रभावती सुभद्रा
च विमला निर्मलाऽनृता ॥ १६ ॥ तीव्रा दक्षारुणा विद्या धारपाला च वर्चसा ॥ आदित्यानां ददौ दक्षः कन्याद्वादशकं प्रिये ॥ १७ ॥ योग
निद्राभिभूतस्य संसर्पा सरमा गुहा ॥ माला चंपा तथा ज्योत्स्ना स विश्वेभ्यश्च एव च ॥ १८ ॥ अश्विभ्यां द्वे तथा कन्ये सुवेषा भूषणा शुभा ॥
एका कन्या तथा वायोर्दत्ता एताः प्रकीर्तिताः ॥ १९ ॥ सावित्रीं ब्रह्मणे प्रादाल्लक्ष्मीं विष्णोर्महात्मनः ॥ कस्यचित्त्वथ कालस्य स ईजे दक्षिणा
वता ॥ २० ॥ यज्ञेन पर्वतसुते हिमवन्ते महागिरौ ॥ यज्ञवाटो ह्यभूत्तस्य सर्वकामसमृद्धिमान् ॥ २१ ॥ तस्मिन्यज्ञे समायाता आदित्या वसव
स्तथा ॥ विश्वेदेवाश्च मरुतो लोकपालाश्च सर्वशः ॥ २२ ॥ ब्रह्मा विष्णुः सहस्राक्षो वारुणो यम एव च ॥ धनदश्च कुमारश्च तथा नद्यश्चसागराः ॥
॥ २३ ॥ वाप्यः कूपास्तथा चैव तडागाः पल्वलानि च ॥ सुपर्णश्चाथ ये नागाः सर्वे मूर्ता व्यवस्थिताः ॥ २४ ॥ दानवाप्सरसश्चैव यक्षाः किन्नरगु ॥१२९॥
ह्यकाः ॥ सानुगास्ते सभार्याश्च वेदवेदांगपारगाः ॥ २५ ॥ महर्षयो महाभागास्तथा देवर्षयश्च ये ॥ ते भार्यासहितास्तत्र वसंति च वरानने ॥२६॥

१ आर्षं रूपमिदम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कपालमालाभरणश्चिताभस्म बिभर्ति यः ॥ अपवित्रतया शंभुर्नाहूतस्तु तथाविधः ॥ २७ ॥ यतस्ततः समायाताः कैलासे पर्वतोत्तमे ॥ अश्विन्याद्या भगिन्यस्तास्त्वां प्रतीदं वचोऽब्रुवन् ॥ २८ ॥ किं तुष्टेव च कल्याणि तिष्ठसि त्वं सुमध्यमे ॥ वयं च प्रस्थिताः सर्वाः पितुर्यज्ञे सभर्तृकाः॥२९॥ वयमाकारितास्तेन सुताः सर्वा यशस्विनि ॥ न त्वामाहूतवान्दक्षस्त्रपते शंकराद्यतः॥३०॥तासां वचनमाकर्ण्य सती प्राह क्रुधान्विता॥ हा धिग्दक्ष दुराचार किं वदिष्ये महेश्वरम् ॥३१॥ कथं संदर्शये वक्रमित्युक्त्वाऽऽत्मानमात्मना ॥ विससर्ज तपोयोगात्तस्माराान्यत्र किञ्चन ॥३२॥ अथ दृष्ट्वा महादेवः सतीं प्राणैर्विना स्थिताम्॥अवमानात्तथाऽऽत्मानं त्यक्त्वा मत्वा कपालिनम् ॥३३॥ गणान्संप्रेषयामास यज्ञविध्वंसनाय च ॥ ते गताश्च गणा रौद्राः शतशोऽथ सहस्रशः ॥ ३४ ॥ विकृता विकृताकारा असंख्याता महाबलाः ॥ रुद्रेण प्रेरितान्दृष्ट्वा वीरभद्रपुरोगमान् ॥३५॥ ततो देवगणाः सर्वे वसवः सह भास्करैः ॥ विश्वेदेवाश्च साध्याश्च धनुर्हस्ता महाबलाः ॥ ३६ ॥ युद्धाय च विनिष्क्रान्ता मुञ्चन्तः सायकाञ्छितान् ॥ ते समेत्य ततोऽन्योन्यं प्रमथा विबुधैः सह ॥ ३७ ॥ मुमुचुः शरवर्षाणि वारिधारां यथा घनाः ॥ तेषां हस्ती गणेनाथ शूलेन हृदि भेदितः ॥ ३८ ॥ स तु तेन प्रहारेण विसंज्ञो निषसाद ह ॥ अथ मुष्ट्या हतः कुम्भे नाग ऐरावणस्तदा ॥ ३९ ॥ सहसा स हतस्तेन वारणो भैरवान्नवान् ॥ विनदञ्जवमास्थाय यज्ञवाटमुपाद्रवत् ॥ ४० ॥ विश्वेदेवा निरुच्छ्वासाः कृता रौद्रैर्महाशरैः ॥ चकर्ष स धनुष्येण वसुमान्बलवत्तरः ॥ ॥ ४१ ॥ निस्तेजसस्तदादित्याः कृतास्तेन रणाजिरे ॥ एतस्मिन्नन्तरे देवाः कृतास्तेन पराङ्मुखाः ॥ ४२ ॥ ततस्ते शरणं जग्मुर्विष्णुं तत्र च संस्थितम् ॥ ततः कोपसमाविष्टो विष्णुर्देवान्सवासवान् ॥ ४३ ॥ दृष्ट्वा विद्रावितान्सर्वान्मुमोचाशु सुदर्शनम् ॥ तमापतन्तं वेगेन विष्णोश्चक्रं सुदर्शनम् ॥ ४४ ॥ प्रसार्य वक्रं सहसा उदरस्थं चकार ह ॥ तस्मिंश्चक्रे तदा ग्रस्ते अमोघे पर्वतात्मजे ॥ ४५ ॥ चुकोप भगवान्विष्णुः शार्ङ्गहस्तोऽभ्यधावत ॥ स हत्वा दशभिस्तीक्ष्णैर्नंदिं भृङ्गिं शतेन च ॥ ४६ ॥ महाकालं सहस्रेण ह्ययुतेन गणाधिपम् ॥ बाणानामयुतैर्भित्त्वा वीरभद्रमुपाद्रवत् ॥ ४७ ॥ तं हत्वा गदया विष्णुर्विह्वलं रुधिरोक्षितम् ॥ गृहीत्वा पादयोर्भूमौ निजघानातिरोषितः ॥ ४८ ॥ हन्यमानस्य तस्याथ भूमौ चक्रं सुदर्शनम् ॥ रुधिरोद्गारसंयुक्तं प्रहारमकरोत्र तु ॥४९॥ रुद्रलब्धवरो देवि वीरभद्रो गणेश्वरः ॥ यत्र पञ्चत्वमापन्नो गदया पीडितोऽपि सः ॥ ५० ॥ पतितं वीक्ष्य तं सर्वे विष्णुतेजोबलार्दिताः ॥ विद्रुताः सर्वतो याता यत्र देवो महेश्वरः ॥ ५१ ॥ तस्मै सर्वं तथा वृत्तं समाचख्युः पराभवम् ॥ विक्रमं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वीरभद्रस्य ततः क्रुद्धो महेश्वरः ॥ ५२ ॥ प्रगृह्य सहसा शूलं प्रस्थितः स्वगणैः सह ॥ यज्ञवाटं तु दक्षस्य पराभवभवं ततः ॥ विक्रमन्वीरभद्रेण यत्र विष्णुः स्वयं स्थितः ॥५३॥ तमायान्तं समालोक्य कोपयुक्तं महेश्वरम् ॥ संग्रामे सोऽजयं मत्वा तत्रैवान्तरधीयत ॥५४॥ मरुद्भिः सार्धमिन्द्रोऽपि वसुभिः सह किन्नरैः ॥ शिवः क्रोधपरीतात्मा ततश्चादर्शनं गतः ॥५५॥ केवलं ब्राह्मणास्तत्र स्थिताः सदसि भामिनि ॥ ते दृष्ट्वा शंकरं प्राप्तं कोपसंरक्तलोचनम् ॥ ५६ ॥ होमं चक्रुस्ततो भीता रुद्रमंत्रैः समंततः ॥ अन्ये त्राससमायुक्ताः पलायंते दिशो दश ॥ ५७ ॥ अथागत्य महादेवो दृष्ट्वा तान्ब्राह्मणोत्तमान् ॥ अपश्यमानो विबुधांस्तत्र यज्ञं जघान सः ॥ ५८ ॥ स च मृगवपुर्भूत्वा प्रणष्टः शिवभीतितः ॥ पृष्ठतस्तु धनुष्पाणिर्जगाम भगवाञ्छिवः ॥ अद्यापि दृश्यते व्योम्नि तारारूपो महेश्वरि ॥ ५९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये दक्षयज्ञविध्वंसनोनाम नवनवत्युत्तरशततमोऽध्यायः ॥ १९९ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ एवं विध्वंसिते यज्ञे गतास्ते ब्राह्मणा गृहम् ॥ अप्राप्तकामना देवि ये चान्ये तत्र वै गताः ॥ १ ॥ हरोऽपि विगतामर्षः कैलासं पर्वतं गतः ॥ २ ॥ एतस्मिन्नेव काले तु तारकोनाम दानवः ॥ उत्पन्नः स महाबाहुर्देवानां बलदर्पहा ॥ ३ ॥ तेन इन्द्रादिकान्सर्वान्सुराञ्जित्वा महाहवे ॥ स्वर्गः स्वैर्व्यापितो देवि ब्रह्मलोकं ततो गताः ॥ ऊचुः सुरा दुःखयुक्ता ब्रह्माणं पर्वतात्मजे ॥ ४ ॥ तारकेण सुरश्रेष्ठ स्वर्गान्निर्वासिता वयम् ॥ स्वयमिन्द्रः समभवद्वसवोऽन्ये तथा कृताः ॥ ५ ॥ रुद्राः साध्यास्तथा विश्वे अश्विनौ मरुतस्तथा ॥ आदित्याश्च वधोपायं तस्माद्वद पितामह ॥ ६ ॥ ॥ ब्रह्मोवाच ॥ ॥ अवध्यः स तु सर्वेषां देवानामिति मे मतिः ॥ ऋते तु शांकरं तेजो नान्येन विनिपात्यते ॥ तस्माद्गच्छत भद्रं वो देवदेवं महेश्वरम् ॥ ७ ॥ तस्य भार्या मृता पूर्वं जाता हिमवतो गृहे ॥ तस्यां च जायते पुत्रः स हनिष्यति तारकम् ॥ तस्मात्प्रसादयध्वं वै तदर्थं शूलपाणिनम् ॥ ८ ॥ ततो देवैः समादिष्टः कामदेवो वरानने ॥ मृतभार्यं हरं गत्वा ततः पीडय सायकैः ॥ ९ ॥ येनासौ कामसंतप्तो भार्यार्थं यत्नवान्भवेत् ॥ अयं गच्छतु ते भ्राता वसंतश्च मनोहरः ॥ १० ॥ स तथेति प्रतिज्ञाय कैलासं पर्वतं गतः ॥ ततो दृष्ट्वा महादेवः कामदेवं धृतायुधम् ॥ ११ ॥ वसन्तसहितं देवि रुद्रोऽन्धकनिषूदनः ॥ गंगाद्वारमनुप्राप्य अपश्यद्यावदग्रतः ॥ १२ ॥ दत्तायुधं कामदेवं दुद्रुवे स भयात्पुनः ॥ ततो वाराणसीं गत्वा नैमिषं पुष्करं तथा ॥ १३ ॥ श्रीकंठं रुद्रकोटिं च कुरुक्षेत्रं गयां तथा ॥ ज्वालामार्ग



१ सः–विष्णुः–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रयागं च विशालां[1]मर्बुदं शुभम् ॥ १४ ॥ बहून्वर्षगणानेवं भ्रमन्स धरणीतले ॥ कामदेवभयाद्देवि देवदेवो महेश्वरः ॥ १५ ॥ अवे क्षत तदा कामं विस्फार्य नयनं तदा ॥ तृतीयं देवदेवेशि देवदेवस्त्रिलोचनः ॥ १६ ॥ तस्य तं वीक्षमाणस्य संजाताः पावकार्चिषः ॥ ताभिः स धनुषा युक्तो भस्मसात्समपद्यत ॥ १७ ॥ तं दग्ध्वा भगवाञ्छंभुर्गत्वा रोषस्य निर्णयम् ॥ निवासमकरोत्तत्र क्षेत्रे प्राभासिके शुभे ॥ १८ ॥ तस्मिन्दग्धे तदा कामे रतिः शोकपरायणा ॥ विललाप सुदुःखार्ता पतिभक्तिपरायणा ॥ १९ ॥ हा नाथनाथ भोः स्वामिन्किं जहासि पतिव्रताम् ॥ पतिव्रतां पतिप्राणां कस्मान्मां त्यजसि प्रभो ॥ २० ॥ एवं विलपतीं तां तु वागुवाचाशरीरिणी ॥ मा त्वं रुद विशालाक्षि पुनरेव पतिस्तव ॥ २१ ॥ प्रसादाद्देवदेवस्य उच्छ्वास्यति शिवस्य तु ॥ एतां वाचं रतिः श्रुत्वा ततः स्वस्था बभूव ह ॥ २२ ॥ ततो देवाः शिवं नत्वा प्रार्थयामासुरीश्वरि ॥ कलत्रसंग्रहं देव कुरु कार्यार्थसंग्रहे ॥ २३ ॥ एष कामस्त्वया दग्धः क्रोधेन महता स्वयम् ॥ विना तेन विभो नष्टा सृष्टिर्वै धरणीतले ॥ २४ ॥ ॥ भगवानुवाच ॥ ॥ एष कामो मया दग्धः क्रोधेन सुरसत्तमाः ॥ तस्मादनंग एवैष प्रजासु प्रचरिष्यति ॥ तद्वीर्यस्तत्प्रभावश्च विना देहं भविष्यति ॥ २५ ॥ ॥ देवा ऊचुः ॥ ॥ भगवन्कुरु पूर्वं त्वं संस्मरस्व रतीश्वरम् ॥ हिताय सर्वलोकानां यथा नः प्रत्ययो भवेत् ॥ २६ ॥ ततः स स्मृतवान्कामं स्वयं देवो महेश्वरः ॥ ततस्तच्छाश्वतं लिंगं समुत्तस्थौ महीतले ॥ २७ ॥ ते[2]नोढा शैलजा तेन शंकरेण महात्मना ॥ २८ ॥ जातः स्कन्दः सुरश्रेष्ठस्तारको येन सूदितः ॥ पतिते कृतस्मरः पुनस्तत्र अनंगो बलवांस्तथा ॥ तेनोढा शैलजा तेन शंकरेण महात्मना ॥ २८ ॥ जातः स्कन्दः सुरश्रेष्ठस्तारको येन सूदितः ॥ पतिते नैव लिंगेन यस्माच्चैव कृतस्मरः ॥ २९ ॥ तस्मात्कृतस्मरो लोके कीर्त्यते स महीतले ॥ तं दृष्ट्वा न जडो नांधो नासुखी न च दुर्भगः ॥ जायते तु कदा मर्त्यो न दरिद्रो न रोगवान् ॥ ३० ॥ एवं ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ॥ दग्धो यथा स्मरः पूर्वं पुनर्वीर्यान्वितः स्थितः ॥ ३१ ॥ ॥ ईश्वर उवाच ॥ ॥ तत्रैव संस्थितं कुण्डं दक्षिणेन कृतस्मरात् ॥ कामकुंडेति वै नाम यत्रोद्भूतः पुनः स्मरः ॥ ३२ ॥ अनंगरूपी देऽप्यत्र स्नानाद्वै रूपवान्भवेत् ॥ इक्षवस्तत्र वै देयाः सुवर्णं गास्तथैव च ॥ वस्त्राणि चैव विधिवद्ब्राह्मणे वेदपारगे ॥३३॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये कामकुण्डमाहात्म्यवर्णनंनाम द्विशततमोऽध्यायः ॥ २०० ॥ ॥ छ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्मिन्स्थाने महादेवि स्मशानं कालभैरवम् ॥ ब्रह्मकुण्डं वरारोहे यावद्देवः कृतस्मरः॥१॥तत्र ये प्राणिनो दग्धा मृताः काल

१ विशाखाम्–इ० पा० । २ तेन–कामेन–कारणेन–कामवशात्–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



विपर्ययात् ॥ ते सर्वे मुक्तिमायांति महापातकिनोऽपि वा ॥२॥ कृतस्मरान्महादेवि यावन्मंकीश्वरः स्थितः ॥ महास्मशानं तद्देवि अपुनर्भवदायकम् ॥३॥ तस्मिन्स्थाने वहेद्यत्र[1] विषुवं प्राणिनां प्रिये ॥ तत्रोषरं स्मृतं क्षेत्रं तन्मे प्रियतरं सदा ॥४॥ कल्पांतेऽपि न मुंचामि अविमुक्तात्प्रियं मम ॥ ५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये कालभैरवस्मशानमाहात्म्यवर्णनं नामैकोत्तरद्विशततमोऽध्यायः ॥ २०१ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि रामेश्वरमनुत्तमम् ॥ मंकीशाद्दक्षिणे भाग आग्नेये तु कृतस्मरात् ॥ पूर्वतस्तु सरस्वत्या बलभद्रप्रतिष्ठितम् ॥ १ ॥ यत्र मुक्तोऽभवद्देवि रामो ब्रह्मवधात्[2]किल ॥ पातकात्प्रतिलोमां तामगाहत सरस्वतीम् ॥ २ ॥ ॥ देव्युवाच ॥ ॥ कथं स पातकान्मुक्तः कथं पापमभूत्पुरा ॥ कथं तत्स्थापितं लिंगं किंप्रभावं वदस्व मे ॥ ३ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि कथां पापप्रणाशिनीम् ॥ यां श्रुत्वा मानवो देवि मुक्तः संसारसागरात् ॥ सर्वान्कामान्स लभते सततं मनसि प्रियान् ॥ ४ ॥ रामः पूर्वं परां प्रीतिं कृत्वा कृष्णस्य लांगली ॥ चिन्तयामास बहुधा किं कृतं सुकृतं भवेत् ॥ ५ ॥ कृष्णेन हि विना नाहं यास्ये दुर्योधनान्तिकम् ॥ पाण्डवान्वा समाश्रित्य कथं दुर्योधनं नृपम् ॥ ६ ॥ जामातरं तथा शिष्यं घातयिष्ये नरेश्वरम् ॥ तस्मान्न पार्थं यास्यामि नापि दुर्योधनं नृपम् ॥ ७ ॥ तीर्थेष्वाप्लावयिष्यामि तावदात्मानमात्मना ॥ कुरूणां पाण्डवानां च यावदंताय कल्पते[3] ॥ ॥ ८ ॥ इत्यादिश्य हृषीकेशं पार्थदुर्योधनावपि ॥ जगाम द्वारकां शौरिः स्वसैन्यैश्च परीवृतः ॥ ९ ॥ गत्वा द्वारावतीं रामो हृष्टतुष्टजनाकुलाम् ॥ स्वैरन्तःपुरगैः सार्धं पपौ पानं हलायुधः ॥ १० ॥ पीतपानो जगामाथ रैवतोद्यानमृद्धिमत् ॥ हस्ते गृहीत्वा स गदां रेवत्यादिभिरन्वितः ॥ ११ ॥ स्त्रीकदंबकमध्यस्थो ययौ मत्तवदास्खलन् ॥ ददर्श[4] च वनं वीरो रमणीयमनुत्तमम् ॥ १२ ॥ सर्वत्र तरुपुष्पाढ्यं शाखामृगगणाकुलम् ॥ पुष्प पद्मवनोपेतं सपल्वलमहावनम् ॥ १३ ॥ स शृण्वन्प्रीतिजनकान्वन्यान्मदकलाञ्छुभान् ॥ श्रोत्ररम्यान्सुमधुराञ्छब्दान्खगमुखेरितान् ॥ १४ ॥ सर्वतः फलरत्नाढ्यान्सर्वतः कुसुमोज्ज्वलान् ॥ अपश्यत्पादपांश्चैव विहंगैरनुमोदितान् ॥ १५ ॥ आम्रानाम्रातकान्भव्यान्नालिकेरान्सतिंदुकान् ॥ आबल्वलांस्तथा पीतान्दाडिमान्बीजपूरकान् ॥ १६ ॥ पनसाल्लँकुचान्मोचांस्तापांश्चापि मनोहरान् ॥ पालेवतान्कुसंकुल्लान्नलिनानथ

१ वहेद्यत्र विषुवं प्राणिनां प्रिये--एतेन--तन्महास्मशानपरीक्षा प्रोच्यते—यस्मिन्स्थाने—स्थितानां प्राणिनां--विषुवं वहेत्--नासापुटद्वयात्—समानतया श्वासोच्छ्वासनिर्गमनं भवति-अर्थात्—सुषुम्नासमुद्भवो भवति—तन्महास्मशानमपुनर्भवदायकम्—इत्यर्थो बोध्यः । २ ब्रह्मवधात्—सूतवधात्—इत्यर्थः । ३ कलहः--इति, संग्रामः--इति वा शेषः । ४ ददर्शेति पूर्वश्लोकेन संबंधः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेतसान् ॥ १७ ॥ भल्लातकानामलकींस्तिन्दुकांश्च महाफलान् ॥ इंगुदान्करमर्दांश्च हरीतकबिभीतकान् ॥ १८ ॥ एतानन्यांश्च स तरू
न्ददर्श यदुनन्दनः ॥ तथैवाशोकपुन्नागकेतकीबकुलांस्तथा ॥ १९ ॥ चंपकान्सप्तपर्णांश्च कर्णिकारान्सुमालतीः ॥ पारिजातान्कोविदारा
न्मन्दारेन्दीवरांस्तथा ॥ २० ॥ पाटलान्पुष्पितान्रम्भान्देवदारुद्रुमांस्तथा ॥ शालांस्तालांश्च स्तमालांनिचुलान्वञ्जुलांस्तथा ॥ २१ ॥ चकोरैः
शतपत्रैश्च भृंगराजैः समावृतान् ॥ कोकिलैः कलविंकैश्च हारीतैर्जीवजीवकैः ॥ २२ ॥ प्रियपुत्रैश्चातकैश्च शुकैरन्यैर्विहंगमैः ॥ श्रोत्ररम्यं सुमधुरं कूज
द्भिश्चाप्यधिष्ठितैः ॥ २३ ॥ सरांसि च सपद्मानि मनोज्ञसलिलानि च ॥ कुमुदैः पुण्डरीकैश्च तथा रोचनकोत्पलैः ॥ २४ ॥ कह्लारैः कमलैश्चापि
चर्चितानि समंततः ॥ कदंबैश्चक्रवाकैश्च तथैव जलकुक्कुटैः ॥ २५ ॥ कारण्डवैः प्लवैर्हंसैः कूर्मैर्मंडुभिरेव च ॥ एतैरन्यैश्च कीर्णानि तथान्यैर्जलवा
सिभिः ॥ २६ ॥ क्रमेण संचरन्रामः प्रेक्षमाणो मनोरमम् ॥ जगामानुगतः स्त्रीभिर्लतागृहमनुत्तमम् ॥ २७ ॥ स ददर्श द्विजांस्तत्र वेदवेदांगपार
गान् ॥ कौशिकान्भार्गवांश्चैव भारद्वाजांश्च गौतमान् ॥ २८ ॥ विविधेषु च संभूतान्वंशेषु द्विजसत्तमान् ॥ कथाश्रवणसोत्कण्ठानुपविष्टान्महा
त्मनः ॥ २९ ॥ कृष्णाजिनोत्तरीयेषु कूर्चेषु च बृसीषु च ॥ सूतं च तेषां मध्यस्थं कथयानं कथाः शुभाः ॥ ३० ॥ पौराणिकाः सुरर्षीणामा
द्यानां चरितक्रियाः ॥ दृष्ट्वा रामं द्विजाः सर्वे मधुपानारुणेक्षणम् ॥ ३१ ॥ मत्तोऽयमिति मन्वानाः समुत्तस्थुस्त्वरान्विताः ॥ पूजयन्तो हलधरं
तमृते सूतवंशजम् ॥ ३२ ॥ ततः क्रोधसमाविष्टो हली सूतं महाबलः ॥ निजघान विवृत्ताक्षः क्षोभिताशेषदानवः ॥ ३३ ॥ अन्वासिते पदं ब्राह्म्यं[1]
तस्मिन्सूते निपातिते ॥ निष्क्रान्तास्ते द्विजाः सर्वे वनात्कृष्णाजिनांबराः ॥ ३४ ॥ अवधूतं तथात्मानं मन्यमानो हलायुधः ॥ चिन्तयामास
सुमहन्मया पापमिदं कृतम् ॥ ३५ ॥ ब्रह्मासनगतो ह्येष यः सूतो विनिपातितः॥ तथा ह्येते द्विजाः सर्वे मामवेक्ष्य विनिर्गताः ॥ ३६ ॥ शरीरस्य
च मे गन्धो लोहस्येवासुखावहः ॥ आत्मानं चावगच्छामि ब्रह्मघ्नमिति कुत्सितम् ॥ ३७ ॥ धिङ्ममार्थं तथा मद्यं महिमानमकीर्तिदम् ॥ येना
विष्टेन सुमहन्मया पापमिदं कृतम् ॥ ३८ ॥ स्मृत्युक्तं तु करिष्यामि प्रायश्चित्तं यथाविधि ॥ उक्तमस्त्येव मनुना प्रायश्चित्तादिकं क्रमात् ॥ ३९ ॥
जपः प्रच्छन्नपापानां मनसस्ताप एव च ॥ भूतात्मनस्तपोविद्ये[2] बुद्धेर्ज्ञानं विशोधनम् ॥ ४० ॥ क्षेत्रेश्वरस्य विज्ञानाद्विशुद्धिः परमा मता ॥ शरी
रस्य विशुद्धिस्तु प्रायश्चित्तैः पृथग्विधैः ॥ ४१ ॥ ततोऽद्यतः करिष्यामि व्रतं द्वादशवार्षिकम् ॥ स्वकर्मख्यापनं कुर्वन्प्रायश्चित्तमनुत्तमम् ॥ ४२ ॥

१ ब्राह्म्यं पदमन्वासिते—पौराणिकासनं हि ब्राह्म्यं पदं तस्मिन्नन्वासिते—अध्यासिते—इत्यर्थः । २ भूतात्मनः—शरीरस्य—तपोविद्ये - कृच्छ्रचान्द्रायणादितपः—विद्या—मन्त्रजपानुष्ठानं च—विशोधनम्—प्रायश्चित्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



इयं विशुद्धिरज्ञानाद्धत्वा चाकामतो द्विजम् ॥ कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते ॥ ४३ ॥ यः कामतो महापापं नरः कुर्यात्कथंचन ॥ न
तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते ॥ ४४ ॥ अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः ॥ कामकारकृतेऽप्याहुरेके श्रुतिनिदर्शनात् ॥ ४५ ॥
विधिः प्राथमिकस्तस्माद्द्वितीये द्विगुणं चरेत् ॥ तृतीये त्रिगुणं प्रोक्तं चतुर्थे नास्ति निष्कृतिः ॥ ४६ ॥ औषधं स्नेहमाहारं ददद्गोब्राह्मणादिषु ॥
दीयमाने विपत्तिः स्यान्न स पापेन लिप्यते ॥ ४७ ॥ अकारणं तु यः कश्चिद्द्विजः प्राणान्परित्यजेत् ॥ तस्यैव तत्र दोषः स्यान्न तु योऽस्मै
ददाति तंत्[1] ॥ ४८ ॥ परिष्कृतो यदा विप्रो हत्वाऽऽत्मानं मृतो यदि ॥ निर्गुणः सहसा क्रोधाद्गृहक्षेत्रादिकारणात् ॥ ४९ ॥ त्रिवार्षिकं व्रतं कुर्या
त्प्रतिलोमां सरस्वतीम् ॥ गच्छेद्वापि विशुद्ध्यर्थं तत्पापस्येति निश्चितम् ॥ ५० ॥ उद्दिश्य कुपितो हत्वा तोषितं वासयेत्पुनः ॥ तस्मिन्मृते न
दोषोऽस्ति द्वयोरुच्छ्रावणे कृते ॥ ५१ ॥ षण्ढं तु ब्राह्मणं हत्वा शूद्रहत्याव्रतं चरेत् ॥ बहूनामेककार्याणां सर्वेषां शस्त्रधारिणाम् ॥ ५२ ॥ यद्येको
घातयेत्तत्र सर्वे ते घातकाः स्मृताः ॥ प्रायश्चित्ते व्यवसिते यदि कर्ता विपद्यते ॥ ५३ ॥ एनस्तत्प्राप्नुयादेनमिह लोके परत्र च ॥ तदहं किं करो
म्येष क्व गच्छामि दुरात्मवान् ॥ ५४ ॥ धिङ्मां च पापचरितं महादुष्कृतकर्मिणम् ॥ ५५ ॥ ॥ ईश्वर उवाच ॥ ॥ इत्येवं विलपन्यावच्छोका
कुलितमानसः ॥ तावदाकाशसंभूता वागुवाचाशरीरिणी ॥ ५६ ॥ भोभो राम न संतापस्त्वया कार्यः कथंचन ॥ गच्छ प्राभासिकं क्षेत्रं यत्र देवी
सरस्वती ॥ ५७ ॥ पञ्चस्रोताः स्थिता तत्र पञ्चपातकनाशनी ॥ नदीनां प्रवरा सा तु ब्रह्मभूता सरस्वती ॥ ५८ ॥ एकतः सर्वतीर्थानि ब्रह्माण्डे
सचराचरे ॥ गंगादीनि नरश्रेष्ठ तेषां पुण्या सरस्वती ॥ ५९ ॥ तावद्गर्जंति पापानि ब्रह्महत्यादिकानि च ॥ यावन्न दृश्यते देवी प्रभासस्था सर
स्वती ॥ ६० ॥ तस्मात्तत्रैव गच्छ त्वं यत्र देवी सरस्वती ॥ नान्यैस्तीर्थैः सहस्रैस्त्वं कर्तुं शक्यो विकल्मषः ॥ ६१ ॥ तन्मा कार्षीर्विलंबं त्वं
गच्छ तीरं महोदधेः ॥ प्राभासिके महादेवीं प्रतिलोमां विगाहय ॥ ६२ ॥ तत्रैवाराधय विभुं लिंगरूपिणमीश्वरम् ॥ प्रतिष्ठाप्य महापापाच्छारी
रात्त्वं विमोक्ष्यसि ॥ ६३ ॥ इति श्रुत्वा वचो रामः परमानंदपूरितः ॥ प्रभासक्षेत्रगमने मतिं चक्रे महामनाः ॥ ६४ ॥ ततः स्वसैन्यसंयुक्तो
द्रव्योपस्करसंयुतः ॥ आजगाम महाक्षेत्रं प्रभासमिति विश्रुतम् ॥ ६५ ॥ दृष्ट्वा मनोरमं तीर्थं सरस्वत्यब्धिसंगमे ॥ चकार हृदि संकल्पं प्रति
लोमावगाहने ॥ ६६ ॥ आहूय ब्राह्मणांस्तत्र प्रभासक्षेत्रवासिनः ॥ सम्यग्यात्राविधानेन यात्रां तत्राकरोद्विभुः ॥ ६७ ॥ यानि प्राभासिके क्षेत्रे

१ तत—औषधाद्यम्--इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीर्थानि विविधानि तु ॥ रवियोजनसंस्थानि तेषु यात्रां चकार सः ॥ ६८ ॥ प्रत्येकं च ददौ तेषु दानानि विविधानि तु ॥ तथाऽधः स्थाप यामास सरस्वत्यब्धिसंगमे ॥ ६९ ॥ पूर्वभागे महालिंगं कृत्वा यज्ञविधिक्रियाम् ॥ एवं कृते महादेवि विमुक्तः पातकैरभूत् ॥ ७० ॥ निर्मलांगस्ततो देवि दिनानि दश संस्थितः ॥ ततस्तां चैव स स्नात्वा प्रतिलोमां क्रमाद्ययौ ॥ प्लक्षावहरणं यावत्समुद्राच्च हिमाह्वयम् ॥ ॥ ७१ ॥ एवं मुक्तः स पापौघै रामोऽभूत्प्रथितः प्रिये ॥ तस्य लिंगस्य माहात्म्यात्सरस्वत्याः प्रसादतः ॥ ७२ ॥ यस्तत्पूजयते देवि लिंगं पापभयापहम् ॥ रामेश्वरेति कथितं सोऽपि मुच्येत पातकात् ॥ ७३ ॥ अष्टम्यां च विशेषेण ब्रह्मकूर्चविधानतः ॥ यस्तत्र कुरुते देवि सोऽश्वमेधफलं लभेत् ॥ ७४ ॥ स्नात्वा तत्र वरारोहे सरस्वत्यब्धिसंगमे ॥ रामेश्वरेतिनामानं ततः संपूज्य शंकरम् ॥ गोदानं तत्र देयं तु सम्यग्यात्राफलेप्सुभिः ॥ ७५ ॥ इत्येवं कथितं देवि रामेश्वरमहोदयम् ॥ यच्छ्रुत्वा मानवः सम्य क्छ्रद्धावान्प्राप्नुयाद्दिवम् ॥ ७६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये रामेश्वरक्षेत्रमाहात्म्यवर्णनंनाम द्व्युत्तरद्विशततमोऽध्यायः ॥ २०२ ॥ ॥ छ ॥ ॥ईश्वर उवाच॥ ॥ ततो गच्छेन्महादेवि मंकीश्वर महालयम् ॥ रामेशादुत्तरे भागे देवमातुः समीपगम् ॥ १ ॥ अर्कस्थलात्ततो याम्ये पूर्वतश्च कृतस्मरात् ॥ लिंगं महाप्रभावं तु मंकिना स्थापितं पुरा ॥ २ ॥ तं दृष्ट्वा मानवः सम्यगश्वमेधफलं लभेत् ॥ ३ ॥ ॥ देव्युवाच ॥ ॥ कोऽसौ मंकिर्महादेव कथं लिंगं प्रतिष्ठितम् ॥ किं प्रभावं च तल्लिंगमेतन्मे वद विस्तरात् ॥ ४ ॥ ॥ ईश्वर उवाच ॥ ॥ मंकिर्नामाभवत्पूर्वं कुब्जकायो द्विजोत्तमः ॥ प्रभासं क्षेत्रमासाद्य तप स्तेपे महत्तमम् ॥ ५ ॥ प्रतिष्ठाप्य महादेवं शिवभक्तिपरायणः ॥ न तुतोष हरस्तस्य बहुवर्षगणार्चितः ॥ ६ ॥ तस्यैवं तप्यमानस्य सिद्धिं प्राप्ता ह्यनेकशः ॥ तत्राराध्य महादेवं स्वर्गलोकमितो गताः ॥ ७ ॥ ततो दुःखं समभवन्मंकेस्तत्र वरानने ॥ कस्मान्मे भगवांस्तुष्टिं न गच्छति महेश्वरः ॥ ८ ॥ ततस्तीव्ररतिं चक्रे कृत्वा तीव्रनिवर्तनम्[१] ॥ एवं वृद्धत्वमापन्नो जपध्यानपरायणः ॥ ९ ॥ तस्य तुष्टो महादेवो वयसोऽन्ते वरं ददौ ॥ परि तुष्टोऽस्मि ते मंके ब्रूहि किं करवाणि ते ॥ १० ॥ ॥ मंकिरुवाच ॥ ॥ किं वरेण सुरश्रेष्ठ मम वृद्धस्य सांप्रतम् ॥ किञ्चिन्मे परमं दुःखं स्थित स्यात्र परं प्रभो ॥ ११ ॥ ॥ शिव उवाच ॥ ॥ शृणु यत्कारणं तत्र तेषां तव तपस्विनाम् ॥ व्रतचर्याप्तये विप्राः पूजयन्त्यधिकं हि ते ॥१२॥

१ तीव्रनिवर्तनम्—यदि भगवान्प्रसदितर्ह्येव तपसो निवर्तिष्ये नान्यथेति तीव्रतरनिर्बन्धम्—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ते पुष्पाणि समानीय नानावर्णानि सर्वशः ॥ वृक्षाणामतिगंधीनि न तेषां हर्षकारणम् ॥ १३ ॥ त्वं पुनः कुब्जरूपश्च यज्ञपूजापरायणः ॥
न च प्राप्नोषि वृक्षाणां शाखाग्राण्यतियत्नवान् ॥ १४ ॥ एकेनापि प्रदत्तेन पुष्पेण द्विजसत्तम ॥ भक्त्या शिरसि लिंगस्य लभ्यते याज्ञिकं
फलम् ॥ १५ ॥ लिंगस्य दक्षिणे ब्रह्मा स्वयमेव व्यवस्थितः ॥ वामे च भगवान्विष्णुर्मध्येहं वै प्रतिष्ठितः ॥ १६ ॥ त्रयोऽपि पूजितास्तेन येन
लिंगं प्रपूजितम् ॥ १७ ॥ बिल्वपत्रं शमीपत्रं करवीरं च मालतीम् ॥ उन्मत्तकं चम्पकं च सद्यः प्रीतिकरं भवेत् ॥ १८ ॥ चंपकाशोक
कह्लारैः करवीरैस्तथा मम ॥ पूजेष्टा द्विजशार्दूल ये चान्ये बहुगंधिनः ॥ एतैर्हि पूजितो नित्यं शीघ्रं तुष्टिं प्रयाम्यहम् ॥ १९ ॥
॥ ॥ ब्राह्मण उवाच ॥ ॥ यदि तुष्टोऽसि मे देव यदि देयो वरो मम ॥ इहागत्य नरः स्नात्वा यो जलेनापि सिञ्चति ॥ २० ॥
लिंगमेतद्धि सर्वासां पूजानां फलमाप्नुयात् ॥ अद्यप्रभृति ये वृक्षा दैविकाः पार्थिवाश्च ये ॥ तेषां सान्निध्यमत्रास्तु प्रसादात्तव शंकर
॥ २१ ॥ ॥ भगवानुवाच ॥ ॥ सलिलेनापि यः पूजामस्मिँल्लिंगे विधास्यति ॥ तस्य पूजाफलं सर्वं भविष्यति द्विजोत्तम ॥
॥ २२ ॥ वृक्षाणामत्र सान्निध्यं सर्वेषां च भविष्यति ॥ अद्यप्रभृति नाम्नैतन्नागस्थानं भविष्यति ॥ २३ ॥ यतस्तु सर्वनागानां सांनिध्य
मत्र संस्थितम् ॥ त्वमपि द्विजशार्दूल प्रयास्यसि ममान्तिकम् ॥ २४ ॥ एवमुक्त्वा तु भगवांस्तत्रैवान्तरधीयत ॥ मंकिस्तु देहमुत्सृज्य
शिवलोकं ततो गतः ॥ २५ ॥ इत्येवं कथितं देवि मंकीशोद्भवमुत्तमम् ॥ श्रुतं हरति पापानि सम्यक्छ्रद्धासमन्वितैः ॥ २६ ॥ इति श्रीस्कान्दे
महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये मंकीश्वरमाहात्म्यवर्णनंनाम त्र्युत्तरद्विशततमोऽध्यायः ॥
॥ २०३ ॥ ॥ छ ॥ ॥ देव्युवाच ॥ ॥ भगवन्देवदेवेश संसारार्णवतारक ॥ सरस्वत्याश्च माहात्म्यं विस्तरात्कथयस्व मे ॥ १ ॥
यात्रागतानां देवेशि पुरुषाणां जितात्मनाम् ॥ मुखद्वारे तु किं पुण्यं स्नानदाने च शंकर ॥ २ ॥ अवगाहनेन चान्यत्र फलं किंस्वित्प्रजायते ॥
श्राद्धस्य किं विधानं तु के मंत्रास्तत्र के द्विजाः ॥ ३ ॥ किं ग्राह्यं किञ्च भोक्तव्यं ब्राह्मणैः श्राद्धकर्मणि ॥ कानि दानानि देयानि नृभिर्यात्रा
फलेप्सुभिः ॥ ४ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि दानश्राद्धविधिक्रमम् ॥ सरस्वत्याश्च माहात्म्यं कीर्त्यमानं निबोध मे ॥ ५ ॥
पुण्यं सारस्वतं तोयं यत्र तत्रावगाह्यते ॥ सागरेण तु संमिश्रं देवानामपि दुर्लभम् ॥ ६ ॥ सरस्वती सर्वनदीषु पुण्या सरस्वती लोकसुखावगाहा ॥
सरस्वतीं प्राप्य न दुःखिता नराः सदा न शोचंति परत्र चेह वा ॥ ७ ॥ पुण्यं सारस्वतं तोयं पुण्यकृल्लभते नरः ॥ दुर्लभं त्रिषु लोकेषु वैशाख्या



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सोमपर्वणि ॥ ८ ॥ अमा सोमेन संयुक्ता यदि तत्रैव लभ्यते ॥ तत्र किं क्रियते देवि पर्वकोटिशतैरपि ॥ ९ ॥ चान्द्रायणानि कृच्छ्राणि महासांतपनानि च ॥ प्रायश्चित्तानि दीयन्ते यत्र नास्ति सरस्वती ॥१०॥ यावदस्थि शरीरस्य तिष्ठेत्सारस्वते जले ॥ तावद्वर्षसहस्राणि विष्णुलोके वसेन्नरः ॥ जात्यन्धैस्ते समा ज्ञेया मृतैः पंगुभिरेव च ॥ ११ ॥ समर्था ये न पश्यन्ति प्रभासस्थां सरस्वतीम् ॥ ते देशास्तानि तीर्थानि आश्रमास्ते च पर्वताः ॥ १२ ॥ येषां सरस्वती देवी मध्ये याति सरिद्वरा ॥ त्रैलोक्यपावनीं पुण्यां संश्रिता ये सरस्वतीम् ॥ संसारकर्दमामोदमाजिघ्रन्ति न ते पुनः ॥ १३ ॥ शब्दविद्येव विस्तीर्णा मतेव जगतः प्रिया ॥ सतां मतिरिव स्वच्छा रमणीया सरस्वती ॥ १४ ॥ त्रैलोक्यशोभितां देवीं दिव्यतोयां सुनिर्मलाम् ॥ स नीचो यः पुमानेतां न वन्देत सरस्वतीम् ॥ १५ ॥ स्वर्गनिश्रेणिसंभूता प्रभासे तु सरस्वती ॥ नापुण्यवद्भिः संप्राप्तुं पुंभिः शक्या महानदी ॥ १६ ॥ चन्द्रभागा च गंगा च तथा यत्र सरस्वती ॥ देवास्ते न मनुष्यास्ते तिस्रो नद्यः पिबन्ति ये ॥१७॥ सत्यमेव मया देवि जाह्नवी शिरसा धृता ॥ याः काश्चित्सरितो लोके तासां पुण्या सरस्वती ॥ १८ ॥ दर्शनेन सरस्वत्या राजसूयो न राजते ॥ गंडूषश्चाश्वमेधाद्वै सर्वक्रतुवरं पयः ॥१९॥ भस्मास्थिचर्मतोयानि नखकेशादिकानि च ॥ वातैरपि धुतान्येव तथा सारस्वते जले ॥२०॥ वहन्ति येषां कालेन ते न कालवशा नराः ॥ देवि किं बहुनोक्तेन वर्णितेन पुनःपुनः॥ सरस्वत्याः परं तीर्थं न भूतं न भविष्यति ॥२१॥ तत्रैव दुर्लभं स्नानं यत्र सागरसंगमः ॥ तत्र स्नानेन दानेन कोटियज्ञफलं लभेत् ॥२२॥ यत्र सारस्वतं तोयं सागरोर्मिसमाकुलम् ॥ तत्र स्नास्यंति ये मर्त्या भाग्यवन्तो युगेयुगे ॥२३॥ ते धन्यास्ते नमस्कार्यास्तेषां स्फीततरं यशः ॥ येषां कलेवरं नृणां सिक्तं सारस्वतैर्जलैः ॥ २४ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये सरस्वतीसंगममाहात्म्यवर्णनंनाम चतुरुत्तरद्विशततमोऽध्यायः ॥ २०४ ॥ छ ॥ ॥ देव्युवाच ॥ ॥ भगन्देवदेवेश संसारार्णवतारक ॥ ब्रूहि श्राद्धविधिं पुण्यं विस्तराज्जगतांपते ॥ १ ॥ कस्मिन्वासरभागे तु श्राद्धकृच्छ्राद्धमाचरेत् ॥ अस्मिन्सरस्वतीतीर्थे प्रभासक्षेत्र उत्तमे ॥ २ ॥ कस्मिंस्तीर्थे कृतं श्राद्धं बहुपुण्यफलं भवेत् ॥ एतत्सर्वं महादेव यथावद्वक्तुमर्हसि ॥ ३ ॥ ॥ ईश्वर उवाच ॥ ॥ प्रातःकाले मुहूर्तांस्त्रीन्संगवस्तावदेव तु ॥ मध्याह्नस्त्रिमुहूर्तः स्यादपराह्णस्ततः परम् ॥ ४ ॥ सायाह्नस्त्रिमुहूर्तः स्याच्छ्राद्धं तत्र न कारयेत् ॥ राक्षसीनाम सा वेला गर्हिता सर्वकर्मसु ॥ ५ ॥ अह्नो मुहूर्ता विख्याता दश पंच च सर्वदा ॥ तत्राष्टमो मुहूर्तो यः स कालः कुतपः स्मृतः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



मध्याह्ने सर्वदा यस्मान्मन्दीभवति भास्करः ॥ तस्मादनंतफलदस्तदारम्भो भविष्यति ॥ ७ ॥ मध्याह्नः खड्गपात्रं तु तथान्ये कालकम्बलाः ॥
रूप्यं दर्भास्तिला गावो दौहित्रश्चाष्टमः स्मृतः ॥ ८ ॥ पापं कुत्सितमित्याहुस्तस्य सन्तापकारिणः ॥ अष्ट चैवं मतास्तस्मात्कुतपा इति विश्रुताः
॥ ९ ॥ ऊर्ध्वं मुहूर्तात्कुतपाद्यन्मुहूर्तचतुष्टयम् ॥ मुहूर्तपञ्चकं चैव स्वधाभवनमिष्यते ॥ १० ॥ विष्णोर्देहसमुद्भूताः कुशाः कृष्णास्तिलास्तथा ॥
श्राद्धस्य रक्षणार्थाय एतत्प्राहुर्दिवौकसः ॥ ११ ॥ तिलोदकाञ्जलिर्देयो जलस्थैस्तीर्थवासिभिः ॥ सदर्भहस्तेनैकेन श्राद्धसेवनमिष्यते ॥ १२ ॥
त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः ॥ त्रीणि चात्र प्रशंसंति शुद्धिमक्रोधमत्वराम् ॥ १३ ॥ दौहित्रं खड्गमित्युक्तं ललाटे शृङ्गमस्ति
यत् ॥ तस्य शृंगस्य यत्पात्रं तद्दौहित्रमिति स्मृतम् ॥ १४ ॥ क्षीरिणी वापि चित्रा गौस्तत्क्षीराद्यद्घृतं भवेत् ॥ तद्दौहित्रमिति प्रोक्तं दैवे पित्र्ये च
कर्मणि ॥ १५ ॥ दर्भाग्रं दैवमित्युक्तं समूलाग्रं तु पैतृकम् ॥ तत्रावलंबिनो ये तु कुशास्ते कुतपाः स्मृताः ॥ १६ ॥ शरीरद्रव्यदाराभूमनोमंत्रद्वि
जन्मनाम् ॥ शुद्धिः सप्तसु विज्ञेया श्राद्धकाले विशेषतः॥१७॥सप्तधा द्रव्यशुद्धिस्तु सोत्तमा मध्यमाऽधमा ॥१८॥ श्रुतं शौर्यं तपः कन्या शिष्याद्यं
चान्वयागतम् ॥ धनं सप्तविधं शुक्लमुपायोऽप्यस्य तादृशः ॥ १९ ॥ कुत्सितं कृषिवाणिज्यं शुक्लं शिल्पानुवृत्तिभिः ॥ कृतोपकारादाप्तं च शंबलं
समुदाहृतम् ॥ २० ॥ उत्कोचतश्च यत्प्राप्तं यत्प्राप्तं चैव साहसात् ॥ व्याजेनोपार्जितं यच्च तत्कृष्णं समुदाहृतम् ॥ २१ ॥ अन्यायोपार्जितैर्द्रव्यै
र्यच्छ्राद्धं क्रियते नरैः ॥ तृप्यंति तेन चण्डालाः पुष्कसाद्यासु योनिषु ॥ २२ ॥ अन्नप्रकिरणं यत्तु मनुष्यैः क्रियते भुवि ॥ तेन तृप्तिमुपायांति ये
पिशाचत्वमागताः ॥ २३ ॥ यत्पयः स्नानवस्त्रोत्थं भूमौ पतति पुत्रक ॥ तेन ये तरुतां प्राप्तास्तेषां तृप्तिः प्रजायते ॥ २४ ॥ यास्तु गंधांबुकणिकाः
पतंति धरणीतले ॥ ताभिराप्यायनं तेषां ये देवत्वमुपागताः ॥ २५ ॥ उद्धृतेष्वपि पिण्डेषु याश्चान्नकणिका भुवि ॥ ताभिराप्यायनं तेषां तिर्यक्त्वं
च कुले गताः ॥२६॥ ये चादग्धाः कुले बालाः स्त्रियो याश्चाप्यसंस्कृताः ॥ विपन्नास्ते तु विकिरसंमार्जनसुलालसाः ॥२७॥ भुक्त्वा वा भ्रमते यच्च
जलं यच्चाह्नि सेवते ॥ ब्राह्मणानां तथान्नेन तेन तृप्तिं प्रयांति ते ॥ २८ ॥ पिशाचत्वमनुप्राप्ताः कृमिकीटत्वमेव ये ॥ अथ कालान्प्रवक्ष्यामि कथ्यमा ॥१३४॥
नान्निबोध मे ॥ २९ ॥ श्राद्धं कार्यममावास्यां मासिमासींदुसंक्षये ॥ तथाष्टकासु विप्राप्तौ[1] सूर्येन्दुग्रहणे तथा ॥ ३० ॥ अयने विषुवे युग्मे सामान्ये
चार्कसंक्रमे ॥ अमावास्याष्टकायां च कृष्णपक्षे विशेषतः ॥ ३१ ॥ आर्द्रामघारोहिणीषु द्रव्यब्राह्मणसंगमे ॥ गजच्छायाव्यतीपाते विष्टिवैधृतिवा

१ विप्राप्तौ–शुद्धविद्वद्ब्राह्मणस्य संप्राप्तौ–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सरे ॥ ३२ ॥ वैशाखस्य तृतीयायां नवम्यां कार्त्तिकस्य च ॥ पंचदश्यां तु माघस्य नभस्ये च त्रयोदशी ॥ ३३ ॥ युगादयः स्मृता एता दत्तस्याक्षयकारिकाः ॥ ३४ ॥ यस्य मन्वन्तरस्यादौ रथारूढो दिवाकरः ॥ माघमासस्य सप्तम्यां सा तु स्याद्रथसप्तमी ॥ ३५ ॥ वैशाखस्य तृतीयायां कृष्णायां फाल्गुनस्य च ॥ पंचमी चैत्रमासस्य तस्यैवान्त्या तथापरा ॥ ३६ ॥ शुक्लत्रयोदशी माघे कार्त्तिकस्य च सप्तमी ॥ कार्त्तिकी फाल्गुनी चैत्री ज्यैष्ठी पञ्चदशीति च ॥ मन्वन्तराः स्मृता ह्येता दत्तस्याक्षयकारिकाः ॥ ३७ ॥ श्रावणस्याष्टमी कृष्णा तथाषाढी च पूर्णिमा ॥ कार्त्तिकी फाल्गुनी चैत्री ज्यैष्ठी पञ्चदशी तिथिः ॥ ३८ ॥ मन्वादयः स्मृताश्चैता दत्तस्याक्षयकारिकाः ॥ [1]नवमी मार्गशीर्षस्य सप्तैताः संस्मराम्यहम् ॥ ३९ ॥ कल्पनामादयो देवि दत्तस्याक्षयकारिकाः ॥ तथा मन्वन्तरस्यादौ द्वादशैव[2] वरानने ॥ ४० ॥ नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं सपिण्डकम् ॥ पार्वणं चातिविज्ञानं गोष्ठं शुद्ध्यर्थमुत्तमम् ॥ ४१ ॥ कर्मांगं नवमं प्रोक्तं दैवकं दशमं स्मृतम् ॥ एकादशं क्षयाहं तु पुष्ट्यर्थे द्वादशं स्मृतम् ॥ ४२ ॥ सर्वेषामेव श्राद्धानां श्रेष्ठं सांवत्सरं स्मृतम् ॥ अहन्यहनि यच्छ्राद्धं नित्यं तत्परिकीर्तितम् ॥ ४३ ॥ वैश्वदेवविहीनं तु अशक्तावुदकेन तु ॥ एकोद्दिष्टं तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते ॥ ४४ ॥ कामेन विहितं काम्यमभिप्रेतार्थसिद्धये ॥ वृद्धौ यत्क्रियते श्राद्धं वृद्धिश्राद्धं तदुच्यते ॥ ४५ ॥ ये समाना इति द्वाभ्यामेतच्छ्राद्धं सपिण्डनम् ॥ अमावास्यां तु यच्छ्राद्धं तत्पार्वणमुदाहृतम् ॥ ४६ ॥ गोष्ठ्यां यत्क्रियते श्राद्धं तद्गोष्ठीश्राद्धमुच्यते ॥ क्रियते पापशुद्ध्यर्थं शुद्धिश्राद्धं तदुच्यते ॥ ४७ ॥ निषेककाले सोमे च सीमन्तोन्नयने तथा ॥ तथा पुंसवने चैव श्राद्धं कर्मांगमेव च ॥ ४८ ॥ देवमुद्दिश्य क्रियते यत्तदैवकमुच्यते ॥ गच्छेद्देशान्तरं यस्तु श्राद्धं कार्यं तु सर्पिषा ॥ ४९ ॥ पुष्ट्यर्थमेतद्विज्ञेयं क्षयाहं द्वादशं स्मृतम् ॥ मृतेऽहनि पितुर्यस्तु न कुर्याच्छ्राद्धमादरात् ॥ ५० ॥ मातुश्चैव वरारोहे वत्सरान्ते मृतेऽहनि ॥ नाहं तस्य महादेवि पूजां गृह्णामि नो हरिः ॥ ५१ ॥ मृताहर्यो न जानाति मानवो यदि वा क्वचित् ॥ तेन कार्यममावास्यां श्राद्धं माघेऽथ मार्गके ॥ ५२ ॥ अथ विप्रान्प्रवक्ष्यामि श्राद्धे ये केचन क्षमाः ॥ विशिष्टः श्रोत्रियो योगी वेदविद्यासमन्वितः ॥ ५३ ॥ त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णः षडंगवित् ॥ दौहित्रकस्तु जामाता स्वस्रीयः श्वशुरस्तथा ॥ ५४ ॥ पञ्चाग्निकर्मनिष्ठश्च तपोनिष्ठश्च मातुलः ॥ पितृमातृपरश्चैव शिष्यसंबंधिबांधवः ॥ ५५ ॥ वेदार्थवित्प्रवक्ता च ब्रह्मचारी सहस्रदः ॥ संबंधिनं तथा संतं दौहित्रं दुहितुः

१ तथाच–इति शेषः। २ द्वादश–श्राद्धानि–इति शेषः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पतिम् ॥ ५६ ॥ भागिनेयं विशेषेण तथा बन्धुगणानपि ॥ नातिक्रमेन्नरस्त्वेतान्मूर्खानपि वरानने ॥ ५७ ॥ न ब्राह्मणान्परीक्षेत देवकर्मण्युपस्थिते ॥ पैत्रकर्मणि संप्राप्ते परीक्षेत प्रयत्नतः ॥ ५८ ॥ ये स्तेनाः पतिताः क्लीबा ये च नास्तिकवृत्तयः ॥ तान्हव्यकव्ययोर्विप्राननर्हान्मनुरब्रवीत् ॥ ५९ ॥ जटिलं चानधीयानं दुर्बलं कितवं तथा ॥ याजयंति च ये शूद्रांस्तांश्च श्राद्धे न पूजयेत् ॥ ६० ॥ चिकित्सकान्देवलकान्मांसविक्रयिणस्तथा ॥ विपणैः परिजीवंतो वर्ज्याः स्युर्हव्यकव्ययोः ॥ ६१ ॥ प्रेष्यो ग्राम्यश्च राज्ञश्च कुनखी श्यावदंतकः ॥ प्रतिरोद्धा गुरोश्चैव त्यक्ताग्निर्वार्धुषिस्तथा ॥ ६२ ॥ यक्ष्मी च पशुपालश्च परिवेत्ता निराकृतिः ॥ ब्रह्मध्रुक्परिवित्तिश्च गणाभ्यन्तर एव च ॥ ६३ ॥ कुशीलश्चैव काणश्च वृषलीपतिरेव च ॥ पौनर्भवश्च कानीनः कितवो मद्यपस्तथा ॥ ६४ ॥ पापरोग्यभिशस्तश्च दांभिको रसविक्रयी ॥ धनुःशराणां कर्त्ता च यश्च स्याद्दिधिषूपतिः ॥ ६५ ॥ मित्रध्रुड्दूतवृत्तिश्च पुत्राचार्यस्तथैव च ॥ भ्रमरी मण्डपाली च चित्रांगः पिशुनस्तथा ॥ ६६ ॥ उन्मत्तोंऽधश्च बधिरो वेदनिन्दक एव च ॥ हयगोऽश्वोष्ट्रदमको नक्षत्रैर्यश्च जीवति ॥ ६७ ॥ पक्षिणां पोषको यश्च युद्धाचार्यस्तथैव च ॥ स्रोतःसंभेदको यश्च वेश्यानां पोषणे रतः ॥ ६८ ॥ गृहसंवेशको दूतः कृष्यारोपक एव च ॥ आखेटी श्येनजीवी च कन्यादूषक एव च ॥ ६९ ॥ हिंस्रो वृषलपुत्रश्च गणानां चैव याजकः ॥ आचारहीनः क्लीबश्च नित्ययाजनकस्तथा ॥ ७० ॥ कृषिजीवी श्लीपदी च सद्भिर्निन्दित एव च ॥ औरभ्रिको माहिषिकः परपूर्वापतिस्तथा ॥ प्रेतनिर्यातकाश्चैव[1] वर्जनीयाः प्रयत्नतः ॥ ७१ ॥ एतान्वै गर्हिताचारानपांक्तेयान्द्विजाधमान् ॥ द्विजानां सति लाभे तू भयत्रैव विवर्जयेत् ॥ ७२ ॥ वीक्षांधो वैकतः काणः कुष्ठी च वृषलीपतिः ॥ पापरोगी सहस्रस्य दातुर्नाशयते फलम् ॥ ७३ ॥ यावद्भिः संस्पृशत्यङ्गैर्ब्राह्मणाञ्छूद्रयाजकः ॥ तावतां न भवेत्प्रेत्य दातुर्वा तस्य पैत्रिकम् ॥ ७४ ॥ आदौ माहिषकं दृष्ट्वा मध्ये च वृषलीपतिम् ॥ अन्ते वार्धुषिकं दृष्ट्वा निराशाः पितरो गताः ॥ ७५ ॥ महिषी प्रोच्यते भार्या सा वैधव्येऽभिचारिणी ॥ तस्यां यः क्षपते दोषां स वै माहिषिकः स्मृतः ॥ ७६ ॥ वृषलीत्युच्यते शूद्री तस्या यश्च पतिर्भवेत् ॥ तदोष्ठलालासंसर्गात्पतितो वृषलीपतिः ॥ ॥ ७७ ॥ स्वं[2] वृषं तु परित्यक्त्वा परेण तु वृषायते ॥ वृषली सा तु विज्ञेया न शूद्री वृषली भवेत् ॥ ७८ ॥ चण्डाली बंधकी वेश्या रजःस्था या च कन्यका ॥ कुटिला च स्वगोत्रा च वृषल्यः सप्त कीर्तिताः ॥ ७९ ॥ पितुर्गेहे तु या कन्या रजः पश्यत्यसंस्कृता ॥ पतिताः

१ प्रेतनिर्यातकाः—द्रव्यं भृतित्वेन गृहीत्वा प्रेतोद्धरणकर्तारः—ते श्राद्धे वर्जनीयाः—धर्मार्थं विप्रप्रेतनिर्यातका विप्रास्तु श्राद्धार्हा एव । २ एतेन ब्राह्मणीक्षत्रियावैश्यानामपि व्यभिचारदोषेण वृषलीत्वं प्रोक्तम् ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पितरस्तस्याः कन्या सा वृषली भवेत् ॥ ८० ॥ यस्तु तां वरयेत्कन्यां ब्राह्मणो ज्ञानपूर्वतः ॥ अश्राद्धेयमपांक्तेयं तं विद्याद्वृषलीपतिम् ॥ ८१ ॥ गौरी कन्या प्रधाना वै मध्यमा कन्यका मता ॥ रोहिणी तत्समा ज्ञेया अधमा च रजस्वला ॥ ८२ ॥ अप्राप्ते रजसि गौरी प्राप्ते रजसि रोहिणी ॥ अव्यंजनकृता कन्या कुचहीना तु नग्निका ॥ ८३ ॥ सप्तवर्षा भवेद्गौरी नववर्षा तु नग्निका ॥ दशवर्षा भवेत्कन्या ह्यत ऊर्ध्वं रजस्वला ॥ ८४ ॥ व्यंजनैर्हन्ति वै पुत्रान्कुलं हन्यात्पयोधरा ॥ गतिमिष्टां तथा लोकान्हंति सा रजसा पितुः ॥ ८५ ॥ य उद्वहेद्रजोयुक्तां स ज्ञेयो वृषलीपतिः ॥ ८६ ॥ यत्[1]करोत्येकरात्रेण वृषलीसेवनाद्द्विजः ॥ तद्भैक्ष्यभुग्जपन्नित्यं त्रिभिर्वर्षैर्व्यपोहति ॥ ८७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये श्राद्धकल्पे श्राद्धानर्हब्राह्मणपरीक्षणकथनंनाम पञ्चोत्तरद्विशततमोऽध्यायः ॥ २०५ ॥ ॥ छ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ अथ श्राद्धविधिं वक्ष्ये पार्वणस्य विधानतः ॥ यथाक्रमं महादेवि शृणुष्वैकमनाः प्रिये ॥ १ ॥ कृत्वापसव्यं पूर्वेद्युः पितृपूर्व निमंत्रयेत् ॥ भवद्भिः पितृकार्यं नः संपाद्यं च प्रसीदथ ॥ २ ॥ सवर्णान्प्रेषयेदाप्तान्द्विजानामुपमन्त्रणे ॥ ३ ॥ अभोज्यं ब्राह्मणस्यान्नं क्षत्रियाद्यैर्निमन्त्रितैः ॥ तथैव ब्राह्मणस्यान्नं ब्राह्मणेन निमन्त्रितौः ॥ ४ ॥ ब्राह्मणान्नं ददेच्छूद्रः शूद्रान्नं ब्राह्मणो ददेत् ॥ उभावेतावभोज्यान्नौ भुक्त्वा चान्द्रायणं चरेत् ॥ ५ ॥ उप[2]निक्षेपधर्मेण शूद्रान्नं यः पचेद्द्विजः ॥ अभोज्यं तद्भवेदन्नं स च विप्रः पतेदधः ॥ ६ ॥ शूद्रान्नं शूद्रसंपर्कः शूद्रेण च सहासनम् ॥ शूद्राज्ज्ञानागमश्चैव ज्वलंतमपि पातयेत् ॥ ७ ॥ शूद्रान्नोपहता विप्रा विह्वला रतिलालसाः ॥ कुपिताः किं करिष्यंति निर्विषा इव पन्नगाः ॥८॥ नग्नः स्यान्मलवद्वासा नग्नः कौपीनवस्त्रधृक् ॥ द्विकच्छोऽनुत्तरीयश्च विकच्छोऽवस्त्र एव च ॥९॥ नग्नः काषायवस्त्रः स्यान्नग्नश्चार्धपटः स्मृतः ॥ अच्छिन्नाग्रं तु यद्वस्त्रं मृदा प्रक्षालितं तु यत् ॥ १० ॥ अहतं धातुरक्तं वा तत्पवित्रमिति स्थितम् ॥ अग्रतो वसते मूर्खो दूरे चास्य गुणान्वितः ॥ ११ ॥ गुणान्विते च दातव्यं नास्ति मूर्खे व्यतिक्रमः ॥ यस्त्वासन्नमतिक्रम्य ब्राह्मणं पतिताद्दते ॥ दूरस्थं पूजयेन्मूढो गुणाढ्यं नरकं व्रजेत् ॥ १२ ॥ वेदविद्याव्रतस्नाते श्रोत्रिये गृहमागते ॥ क्रीडन्त्योषधयः सर्वा यास्यामः परमां गतिम् ॥ १३ ॥ संध्ययोरुभयोर्जाप्ये भोजने दंतधावने ॥ पितृकार्ये च दैवे च तथा मूत्रपुरीषयोः ॥ १४ ॥ गुरूणां संनिधौ दाने योगे चैव

---

१ यत्—पातकम्—इत्यर्थः । २ उपनिक्षेपधर्मेण—शूद्रस्य गृहे शुचिब्राह्मणस्य स्वयंपाकस्थाने समागत्य शूद्रेणान्नसामग्री यदि निक्षिप्यते स उपनिक्षेपधर्मः । एतेनेदं सूचितम्—यदि शूद्रगृहे पाको ब्राह्मणैः क्रियेत—तर्हि मध्यस्थब्राह्मणहस्तेनैव सामग्री देया ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



विशेषतः ॥ एतेषु मौनमातिष्ठन्स्वर्गं प्राप्नोति मानवः ॥ १५ ॥ यदि वाग्यमलोपः स्याज्जपादिषु कथंचन ॥ व्याहरेद्वैष्णवं मंत्रं स्मरेद्वा विष्णु मव्ययम् ॥ १६ ॥ दाने स्नाने जपे होमे भोजने देवतार्चने ॥ देवानामृजवो दर्भाः पितॄणां द्विगुणास्तथा ॥ १७ ॥ उदङ्मुखस्तु देवानां पितॄणां दक्षिणामुखः ॥ अग्निना भस्मना वापि यवेनाप्युदकेन वा ॥ द्वारसंक्रमणेनापि पंक्तिदोषो न विद्यते ॥ १८ ॥ इष्टश्राद्धे क्रतुर्दक्षो वृद्धौ सत्यवसू स्मृतौ ॥ नैमित्तिके कालकामौ काम्ये चाध्वविरोचनौ ॥ १९ ॥ पुरूरवा आर्द्रवश्च पार्वणे समुदाहृतौ ॥ पुष्टिं प्रजां च न्यग्रोधे बुद्धिं प्रज्ञां धृतिं स्मृतिम् ॥ २० ॥ रक्षोघ्नं च यशस्यं च काश्मीर्यं पात्रमुच्यते ॥ सौभाग्यमुत्तमं लोके मधूके समुदाहृतम् ॥ २१ ॥ फाल्गुनपात्रे तु कुर्वाणः सर्वका मानवाप्नुयात् ॥ परां द्युतिमथार्के तु प्राकाश्यं च विशेषतः ॥ २२ ॥ बिल्वे लक्ष्मीं तपो मेधां नित्यमायुष्यमेव च ॥ क्षेत्रारामतडागेषु सर्वपात्रेषु चैव हि ॥ २३ ॥ वर्षत्यजस्रं पर्जन्ये वेणुपात्रेषु कुर्वतः ॥ एतेषां लभ्यते पुण्यं सुवर्णै रजतैस्तथा ॥ २४ ॥ पलाशफलन्यग्रोधप्लक्षाश्वत्थविकंकताः ॥ औदुम्बरस्तथा बिल्वं चंदनं यज्ञियाश्च ये ॥ २५ ॥ सरलो देवदारुश्च शालाश्च खदिरास्तथा ॥ समिदर्थं प्रशस्ताः स्युरेते वृक्षा विशेषतः ॥ २६ ॥ श्लेष्मातको नक्तमालः कपित्थः शाल्मली तथा ॥ निंबो बिभीतकश्चैव श्राद्धकर्मणि गर्हिताः ॥२७॥ अनिष्टशब्दां संकीर्णां रूक्षां जन्तुमतीमपि ॥ प्रतिगंधां तु तां भूमिं श्राद्धकर्मणि गर्हयेत् ॥२८॥ त्रैशंकवं त्यजेद्देशं सर्वं द्वादशयोजनम् ॥ उत्तरेण महानद्या दक्षिणेन च केवलम् ॥ २९ ॥ देशस्त्रैशं कवोनाम वर्जितः श्राद्धकर्मणि ॥ कारस्काराः कलिंगाश्च सिंधोरुत्तरमेव च ॥ प्रणष्टाश्रमधर्माश्च वर्ज्या देशाः प्रयत्नतः ॥३०॥ ब्राह्मणं तु कृतं प्रोक्तं त्रेता तु क्षत्रियं स्मृतम् ॥ वैश्यं द्वापरमित्याहुः शूद्रं कलियुगं स्मृतम् ॥३१॥ कृते तु पितरः पूज्यास्त्रेतायां च सुरास्तथा ॥ मुनयो द्वापरे नित्यं पाखं डाश्च कलौ युगे ॥३२॥ शुक्लपक्षस्य पूर्वाह्णे श्राद्धं कुर्याद्विचक्षणः ॥ कृष्णपक्षेऽपराह्णे तु रौहिणं न विलंघयेत् ॥३३॥ रत्निमात्रप्रमाणं च पितृतीर्थं तु संस्कृतम् ॥ उपमूले तथा लूनाः प्रस्तरार्थे कुशोत्तमाः॥३४॥ तथा श्यामाकनीवारा दूर्वाश्च समुदाहृताः ॥ पूर्वं कीर्तिमतां श्रेष्ठो बहुकेशः प्रजापतिः ॥३५॥ तस्य केशा निपतिता भूमौ काशत्वमागताः ॥ तस्मान्मेध्याः सदा काशाः श्राद्धकर्मणि पूजिताः ॥३६॥ पिण्डनिर्वपणं तेषु कर्तव्यं भूति मिच्छता ॥ उष्णमन्नं द्विजातिभ्यः श्रद्धया विनिवेशयेत् ॥ ३७॥ अन्यत्र फलपुष्पेभ्यः पानकेभ्यश्च पण्डितः ॥ हस्ते दत्त्वा तु वै स्नेहाल्लवणं व्यञ्ज नानि च ॥ ३८ ॥ आयसेन च पात्रेण तद्वै रक्षांसि भुञ्जते ॥ द्विजपात्रेषु दत्त्वान्नं तूष्णीं संकल्पमाचरेत् ॥ ३९ ॥ दर्व्यादिस्थेन नो तेषांसंबन्धो

१ फाल्गुनपात्रे--अर्जुनवृक्षपत्रपात्रे-इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृश्यते यतः ॥ यश्च शूकरवद्भुंक्ते यश्च पाणितले द्विजः ॥ न तदश्नंति पितरो यः सवाचं[1] समश्नुते ॥ ४० ॥ द्विहायनस्य वत्सस्य विशंत्यास्यं यथा
सुखम् ॥ तथा कुर्यात्प्रमाणेन पिण्डान्व्यासेन भाषितम् ॥ ४१ ॥ न स्त्री प्रचालयेत्तानि ज्ञानहीनो न चाव्रतः ॥ स्वयं पुत्रोऽथवा यस्य वाञ्छेदभ्यु
दयं परम् ॥ ४२ ॥ भाजनेषु च तिष्ठत्सु स्वस्ति कुर्वन्ति ये द्विजाः ॥ तदन्नमसुरैर्भुक्तं निराशाः पितरो गताः ॥ ४३ ॥ अप्स्वेकं प्लावयेत्पिण्ड
मेकं पत्न्यै निवेदयेत् ॥ एकं वै जुहुयादग्नावेषा तु त्रिविधा गतिः ॥ ४४ ॥ छन्दोगं भोजयेच्छ्राद्धे वैश्वदेवे च बह्वृचम् ॥ पुष्टिकर्मण्यथाध्वर्युं[2]
शान्तिकर्मण्यथर्वणम् ॥ ४५ ॥ द्वौ देवेऽथर्वणौ विप्रौ प्राङ्मुखौ च निवेशयेत् ॥ पित्र्ये ह्युदङ्मुखान्कुर्याद्बह्वृचाध्वर्युसामगान् ॥ ४६ ॥ जात्यश्च
सर्वा दातव्या मल्लिका श्वेतयूथिका ॥ जलोद्भवानि सर्वाणि कुसुमानि च चम्पकम् ॥ ४७ ॥ मधूकं रामठं चैव कर्पूरं मरिचं गुडम् ॥ श्राद्धकर्मणि
शस्तानि सैंधवं त्रपुसं तथा ॥ ४८ ॥ ब्राह्मणः कम्बलो गावः सूर्योऽग्निरतिथिश्च वै ॥ तिला दर्भाश्च कालश्च नवैते कुतपाः स्मृताः ॥ ४९ ॥ आप
द्यनग्नौ तीर्थे च चंद्रसूर्यग्रहे तथा ॥ नाचरेत्संग्रहे चैव तथैवास्तमुपागते ॥ ५० ॥ संशुद्धा स्याच्चतुर्थेऽह्नि स्नाता नारी रजस्वला ॥ दैवे कर्मणि
पित्र्ये च पञ्चमेऽहनि शुद्ध्यति ॥ ५१ ॥ द्रव्याभावे द्विजाभावे प्रवासे पुत्रजन्मनि ॥ आमश्राद्धं प्रकुर्वीत यस्य भार्या रजस्वला ॥ ५२ ॥
सर्पविप्रहतानां च दंष्ट्रिशृंगिसरीसृपैः ॥ आत्मनस्त्यागिनां चैव श्राद्धमेषां न कारयेत् ॥ ५३ ॥ चण्डालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि ॥
दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मणाम् ॥ ५४ ॥ सर्वैरनुमतं कृत्वा ज्येष्ठेनैव च यत्कृतम् ॥ द्रव्येण च विभक्तेन सर्वैरेव कृतं भवेत् ॥
॥ ५५ ॥ अमावास्यां पितृश्राद्धे मंथनं यस्तु कारयेत् ॥ तत्तक्रं मदिरातुल्यं घृतं गोमांसवत्स्मृतम् ॥ ५६ ॥ भुंजंति क्रमशः पूर्वे तथा पिंडाशिषो
ऽपि च ॥ निमंत्रितो द्विजः श्राद्धे न शयीत स्त्रिया सह ॥ ५७ ॥ श्राद्धभुक्प्रातरुत्थाय प्रकुर्याद्दन्तधावनम् ॥ श्राद्धकर्ता न कुर्वीत दन्तानां
धावनं बुधः ॥ ५८ ॥ वर्षेवर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेऽहनि ॥ मलमासे न कर्तव्यं व्यासस्य वचनं यथा ॥ ५९ ॥ गर्भे वार्धुषिके[3] प्रेते भृत्ये
मासानुमासिके ॥ आब्दिके च तथा श्राद्धे नाधिमासो विधीयते ॥ ६० ॥ विवाहादौ स्मृतः सौरो यज्ञादौ सावनः स्मृतः ॥ आब्दिके पितृकार्ये
तु चान्द्रो मासः प्रशस्यते ॥ ६१ ॥ यस्मिन्राशौ गते सूर्ये विपत्तिः स्याद्द्विजन्मनः ॥ तद्राशावेव कर्तव्यं पितृकार्यं मृतेऽहनि ॥ ६२ ॥ वषट्कारश्च
होमश्च पर्व चाग्रायणं तथा ॥ मलमासेऽपि कर्तव्यं काम्या इष्टीर्विवर्जयेत् ॥ ६३ ॥ अग्न्याधेयं प्रतिष्ठां च यज्ञदानव्रतानि च ॥ वेदव्रतवृषो

---

१ सवाचम्—सभाषणम्—इत्यर्थः । एतेन श्राद्धे भोजनमध्येऽन्यकथासंभाषणं वर्जयेत्—इति श्राद्धधर्मः प्रोक्तः । २ अध्वर्युम्—यजुर्वेदिनम्—इत्यर्थः । ३ वार्धुषिके—ऋणदानग्रहणव्यवहारे—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





त्सर्गचूडाकरणमेखलाः ॥ ६४ ॥ मांगल्यमभिषेकं च मलमासे विवर्जयेत् ॥ नित्यनैमित्तिके कुर्यात्प्रयतः सन्मलिम्लुचे ॥ तीर्थे स्नानं गज
च्छायां प्रेतश्राद्धं तथैव च ॥ ६५ ॥ रसा यत्र प्रशस्यन्ते भोक्तारो बंधुगोत्रिणः ॥ राजवार्तादिसंक्रंदो रक्षःश्राद्धस्य लक्षणम् ॥ ६६ ॥ श्राद्धं कृत्वा
परश्राद्धे यस्तु भुंक्ते च विह्वलः ॥ पतंति पितरस्तस्य लुप्तपिण्डोदकक्रियाः ॥६७॥ तैलमुद्वर्तनं स्नानं दन्तधावनमेव च ॥ कृत्तरोमनखेभ्यश्च दद्या
द्दत्वा परेऽहनि ॥ ६८ ॥ निमन्त्रिता यथान्यायं हव्ये कव्ये द्विजोत्तमाः ॥ कथंचिदप्यतिक्रामेत्पापः शूकरतां व्रजेत् ॥ ६९ ॥ दैवे च पितृ
श्राद्धे चाप्याशौचं जायते यदा ॥ आशौचान्तेऽथवा तत्र तेभ्यः श्राद्धं प्रदीयते ॥ ७० ॥ अथ श्राद्धावसाने तु आशिषस्तत्र दापयेत् ॥ दीर्घा
नागास्तथा नद्यो विष्णोस्त्रीणि पदानि च ॥ एवमेषां प्रमाणेन दीर्घमायुरवाप्नुयाम् ॥ ७१ ॥ अपां मध्ये स्थिता देवाः सर्वमप्सु प्रतिष्ठितम् ॥
ब्राह्मणस्य करे न्यस्ताः शिवा आपो भवन्तु नः ॥ ७२ ॥ लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे ॥ लक्ष्मीर्वस तु वासे मे सौमनस्यं ददातु
मे ॥ ७३ ॥ अक्षतं चाऽस्तु मे पुण्यं शांतिः पुष्टिर्धृतिश्च मे ॥ यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम ॥ ७४ ॥ दक्षिणायां तु सर्वत्र बहुदेयं
तथास्तु नः ॥ एवमस्त्विति तैर्वाच्यं मूर्ध्ना ग्राह्यं च तेन तत् ॥ ७५ ॥ पिंडमग्नौ सदा देयाद्भोगार्थी सततं नरः ॥ प्रजार्थं पत्न्यै वै दद्यान्मध्यमं
मंत्रपूर्वकम् ॥ ७६ ॥ उत्तमां द्युतिमन्विच्छन्गोषु नित्यं प्रदापयेत् ॥ आज्ञामिच्छेद्यशः कीर्तिमप्सु नित्यं प्रवेशयेत् ॥ ७७ ॥ प्रार्थयन्दीर्घ
मायुश्च वायसेभ्यः प्रदापयेत् ॥ कुमारलोकमन्विच्छन्कुक्कुटेभ्यः प्रदापयेत् ॥ ७८ ॥ आकाशे प्रक्षिपेद्वापि स्थितो वा दक्षिणामुखः ॥
पितॄणां स्थानमाकाशं दक्षिणा चैव दिक्तथा ॥ ७९ ॥ नक्तं तु वर्जयेच्छ्राद्धं राहोरन्यत्र दर्शनात् ॥ सर्वस्वेनापि कर्तव्यं क्षिप्रं वै राहुदर्श
नात् ॥ ८० ॥ उपरागे न कुर्याद्यः पंके गौरिव सीदति ॥ कुर्वाणस्तु तरेत्पापं सा च नौरिव सागरे ॥ ८१ ॥ कृष्णमाषास्तिलाश्चैव श्रेष्ठाः
स्युर्यवशालयः ॥ महायवा व्रीहियवास्तथैव च मसूरिकाः ॥ ८२ ॥ कृष्णाः श्वेताश्च वा ग्राह्याः श्राद्धकर्मणि सर्वदा ॥ बिल्वामलकमृद्वीकं पनसा
म्रातदाडिमम् ॥ ८३ ॥ भव्यं पारापतं चैव खर्जूरं करमर्दकम् ॥ सकोरका बदर्यश्च तालकंदं तथा बिसम् ॥ ८४ ॥ तमालासनकंदं च मावेष्ठं शत
कंदली ॥ कालेयं कालशाकं च मुद्गान्नं च सुवर्चलम् ॥८५॥ मांसं क्षीरं दधि शाकं व्योषं वेत्रांकुरस्तथा ॥ कट्फलं वज्रकं द्राक्षां लकुचं मोचमेव च ॥
॥ ८६ ॥ प्रियामलकदुर्ग्रीवं तिंदुकं मधुसाह्वयम् ॥ वैकंकतं नालिकेरं शृङ्गाटकपरूषकम् ॥ ८७ ॥ पिप्पली मरिचं चैव पटोली बृहतीफलम् ॥
आरामस्य तु सीमाऽन्तः संभवं सर्वमेव तु ॥८८॥ एवमादीनि चान्यानि पुष्पाणि श्राद्धकर्मणि॥मसूराः शतपुष्प्याश्च कुसुमं श्रीनिकेतनम् ॥८९॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्या स्वातियवा नित्यं तथा वृष्ययवासकौ ॥ वंशा करीरा सुरसा मार्जिता भूतृणानि च ॥ ९० ॥ वर्जनीयानि वक्ष्यामि श्राद्धकर्मणि नित्यशः ॥ लशुनं गृंजनं चैव पलांडुं पिण्डमूलकम् ॥ मोगरं चात्र वैदेहं दीर्घमूलकमेव च ॥ ९१ ॥ दिवसस्याष्टमे भागे मन्दीभूते दिवाकरे ॥ आसुरं तद्भवेच्छ्राद्धं पितृणां नोपतिष्ठते ॥ ९२ ॥ चतुर्थे प्रहरे प्राप्ते यः श्राद्धं कुरुते नरः ॥ वृथा श्राद्धमवाप्नोति दाता च नरकं व्रजेत् ॥ ९३ ॥ लेखाप्रभृत्यथादित्ये मुहूर्तास्त्रय एव च ॥ प्रातस्तस्योत्तरं कालं भगमाहुर्विपश्चितः ॥ ९४ ॥ संगवस्त्रिमुहूर्तोऽयं मध्याह्नस्तु समन्ततः ॥ ततश्च त्रिमुहूर्ताश्च अपराह्णो विधीयते ॥ ९५ ॥ पञ्चमोऽथ दिनांशो यः स सायाह्न इति स्मृतः ॥ ९६ ॥ ॥ तथा च श्रुतिः ॥ ॥ यदैवादित्योऽथ वसन्तो यदा संगविकोऽथ ग्रीष्मो यदा वा माध्यंदिनोऽथ वर्षा यदपराह्णोऽथ शरत् ॥ यदेवास्तमेत्यथ हेमन्त इति ॥ ९७ ॥ प्रारभ्य कुतपे श्राद्धे कुर्यादारोहणं बुधः ॥ विधिज्ञो विधिमास्थाय रौहिणं न तु लंघयेत् ॥ ९८ ॥ अष्टमो यो मुहूर्तश्च कुतपः स निगद्यते ॥ नवमो रौहिणः प्रोक्त इति श्राद्धविदो विदुः ॥ ९९ ॥ एकोद्दिष्टं तु मध्याह्ने प्रातर्वै जातकर्मणि ॥ पित्र्यार्थं निर्वपेत्पाकं वैश्वदेवार्थमेव च ॥ १०० ॥ वैश्वदेवे न पित्र्यार्थं न पित्र्यं वैश्वदेविके ॥ कृत्वा श्राद्धं महादेवि ब्राह्मणांश्च विसर्ज्य च ॥ १०१ ॥ वैश्वदेवादिकं कर्म ततः कुर्याद्वरानने ॥ बहुहव्येन्धने चाग्नौ सुसमिद्धे विशेषतः ॥ १०२ ॥ विधूमे लेलिहाने च कुर्यात्कर्म प्रसिद्धये ॥ अप्रबुद्धे सधूमे च जुहुयाद्यो हुताशने ॥ १०३ ॥ यजमानो भवेदन्धः कुपुत्र इति निश्चितम् ॥ दुर्गन्धश्चैव कृष्णश्च नीलश्चैव विशेषतः ॥ १०४ ॥ भूमिं विगाहते यत्र तत्र विद्यात्पराभवम् ॥ अर्चिष्मान्पिगलशिखः सर्पिःकांचनसप्रभः ॥ १०५ ॥ स्निग्धः प्रदक्षिणश्चैव वह्निः स्यात्कार्यसिद्धये ॥ अंजनाभ्यंजनं गंधान्मन्त्रप्रणयनं तथा ॥ १०६ ॥ काशैः पुनर्भवेत्कार्यं हयमेधफलं लभेत् ॥ अष्टजातिकपुष्पं च अञ्जनं नित्यमेव हि ॥ १०७ ॥ कृष्णेभ्यश्च तिलेभ्यश्च तैलं यत्नात्सुरक्षितम् ॥ चन्दनागरुणी चोभे तमालोशीरपद्मकम् ॥ १०८ ॥ धूपश्च गोग्गुलः श्रेष्ठस्तौरुष्को धूप एव च ॥ शुक्लाः सुमनसः श्रेष्ठास्तथा पद्मोत्पलानि च ॥ १०९ ॥ गन्धवन्त्युपपन्नानि यानि चान्यानि कृत्स्नशः ॥ निशिगंधा जपा भिण्डिरूपकः सकुरंटकः ॥ ११० ॥ पुष्पाणि वर्जनीयानि श्राद्धकर्मणि नित्यशः ॥ सौवर्णं राजतं ताम्रं पितृणां पात्रमुच्यते ॥ १११ ॥ रजतस्य तथा किञ्चिद्दर्शनं पुण्यदायकम् ॥ कृष्णाजिनस्य सान्निध्यं दर्शनं दानमेव च ॥ ११२ ॥ रक्षोघ्नं चैव वर्चस्यं पशून्पुत्रांश्च तारयेत् ॥ अथ मन्त्रं प्रवक्ष्यामि

१ अथ—इति शेषः । २ मोगरम्—मूलकम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



अमृतं ब्रह्मनिर्मितम् ॥ ११३ ॥ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ॥ नमः स्वाहायै स्वधायै नित्यमेव नमोनमः ॥ ११४ ॥ आद्यावसाने
श्राद्धस्य त्रिरावर्तमिमं जपन् ॥ अश्वमेधफलं ह्येतद्विप्रैः संज्ञाय पूजितम् ॥११५॥ पिण्डनिर्वपणे वापि जपेदेनं समाहितः ॥ पितरः क्षिप्रमायान्ति
राक्षसाः प्रद्रवन्ति च ॥ ११६ ॥ सप्तार्चिषं प्रवक्ष्यामि सर्वकामशुभप्रदम् ॥ ११७ ॥ अमूर्तानां च मूर्तानां पितॄणां दीप्ततेजसाम् ॥ नमस्यामि
सदा तेषां ध्यायिनां दिव्यचक्षुषाम् ॥ ११८ ॥ इन्द्रादीनां च नेतारो दक्षमारीचयस्तथा ॥ तान्नमस्यामि सर्वान्वै पितॄंश्चैवौषधीस्तथा ॥ ११९ ॥
नक्षत्राणां ग्रहाणां च वाय्वग्न्योश्च पितॄनपि ॥ द्यावापृथिव्योश्च सदा नमस्यामि कृताञ्जलिः ॥ १२० ॥ नमः पितृभ्यः सप्तभ्यो नमो लोकेषु
सप्तसु ॥ स्वयंभुवे नमस्यामो ब्रह्मणे योगचक्षुषे ॥१२१॥ एतत्त्वदुक्तं सप्तर्षिब्रह्मर्षिगणसेवितम् ॥ पवित्रं परमं ह्येतच्छ्रीमद्रक्षोविनाशनम् ॥१२२॥
अनेन विधिना युक्तस्त्रीन्वारांस्तु जपेन्नरः ॥ भक्त्या परमया युक्तः श्रद्दधानो जितेन्द्रियः ॥१२३॥ सप्तार्चिषं जपेद्यस्तु नित्यमेव समाहितः ॥ स तु
सप्तसमुद्रायाः पृथिव्या एकराड्भवेत् ॥१२४॥ श्राद्धकल्पं पठेद्यो वै स भवेत्पंक्तिपावनः ॥ अष्टादशानां विद्यानां स च वै पारगः स्मृतः ॥ १२५ ॥
पूजां पुष्टिं स्मृतिं मेधां राज्यमारोग्यमेव च ॥ प्रीता नित्यं प्रयच्छन्ति मानुषाणां पितामहाः ॥ १२६ ॥ एवं प्रभासक्षेत्रे स सरस्वत्यब्धिसंगमे ॥
कुर्याच्छ्राद्धं विधानेन प्रभासे चैव भामिनि ॥ १२७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभास
क्षेत्रमाहात्म्ये सरस्वत्यब्धिसंगमे श्राद्धकल्पे श्राद्धविधिवर्णनंनाम षडुत्तरद्विशततमोऽध्यायः ॥ २०६ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥
अतः परं प्रवक्ष्यामि श्राद्धदानान्यनुक्रमात् ॥ तारणाय च भूतानां सरस्वत्यब्धिसंगमे ॥ १ ॥ लोके श्रेष्ठतमं सर्वं ह्यात्मनश्चापि यत्प्रिय
म् ॥ सर्वं पितॄणां दातव्यं तदेवाक्षय्यमिच्छताम् ॥ २ ॥ जांबूनदमयं दिव्यं विमानं सूर्यसन्निभम् ॥ दिव्याप्सरोभिः संकीर्णमन्नदो लभ
तेऽक्षयम् ॥ ३ ॥ आच्छादनं तु यो दद्यादहतं श्राद्धकर्मणि ॥ आयुः प्रकाशमैश्वर्यं रूपं तु लभते च सः ॥ ४ ॥ कमण्डलुं च यो दद्या
द्ब्राह्मणे वेदपारगे ॥ मधुक्षीरस्रवा धेनुर्दातारमनुगच्छति ॥ ५ ॥ यः श्राद्धे अभयं दद्यात्प्राणिनां जीवितैषिणाम् ॥ अश्वदानसहस्रेण रथदानशतेन
च ॥ दन्तिनां च सहस्रेण अभयं च विशिष्यते ॥ ६ ॥ यानि रत्नानि मेदिन्यां वाहनानि स्त्रियस्तथा ॥ क्षिप्रं प्राप्नोति तत्सर्वं पितृभक्तस्तु ॥१३८॥
मानवः ॥ ७ ॥ पितरः सर्वलोकेषु तिथिकालेषु देवताः ॥ सर्वे पुरुषमायांति निपानमिव धेनवः ॥ ८ ॥ मा स्म ते प्रतिगच्छेयुः पर्वकाले ह्यपू
जिताः ॥ मोघास्तेषां भवन्त्याशाः परत्रेह च मा क्वचित् ॥ ९ ॥ सरस्वत्यास्तु सान्निध्ये यस्त्वेकं भोजयेद्द्विजम् ॥ कोटिभोज्यफलं तस्य जायते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नात्र संशयः ॥ १० ॥ अमावास्यां नरो यस्तु परान्नमुपभुञ्जते ॥ तस्य मासकृतं पुण्यमन्नदातुः प्रजायते ॥ ११ ॥ षण्मासमयने भुंक्ते त्रीन्मासान्विषुवे स्मृतम् ॥ वर्षैर्द्वादशभिश्चैव यत्पुण्यं समुपार्जितम् ॥ तत्सर्वं विलयं याति भुक्त्वा सूर्येन्दुसंप्लवे ॥ १२ ॥ साग्रं मासं रवेः क्रान्तावाद्यश्राद्धे त्रिवत्सरम् ॥ मासिकेऽप्यथ वर्षस्य षण्मासे त्वर्धवत्सरम् ॥ १३ ॥ तथा संचयनश्राद्धे जातिजन्मकृतं नृणाम् ॥ मृत शय्याप्रतिग्राही वेदस्यैव च विक्रयी ॥ ब्रह्मस्वहारी च नरस्तस्य शुद्धिर्न विद्यते ॥ १४ ॥ तडागानां सहस्रेण ह्यश्वमेधशतेन च ॥ गवां कोटि प्रदानेन भूमिहर्ता न शुद्ध्यति ॥ १५ ॥ सुवर्णमाषं गामेकां भूमेरप्यर्धमंगुलम् ॥ हरन्नरकमाप्नोति यावदाभूतसंप्लवम् ॥ १६ ॥ ब्रह्महत्या सुरापानं दरिद्रस्य तु यद्धनम् ॥ गुरोः पत्नी हिरण्यं च स्वर्गस्थमपि पातयेत् ॥ १७ ॥ सहस्रसंमिता धेनुरनड्वान्दश धेनवः ॥ दशानड्वुत्समं यानं दशयानसमो हयः ॥ १८ ॥ दशहयसमा कन्या भूमिदानं ततोऽधिकम् ॥ तस्मात्सर्वप्रयत्नेन विक्रयं नैव कारयेत् ॥ १९ ॥ विशेषतो महा क्षेत्रे सर्वपातकनाशने ॥ चितिकाष्ठं च वै स्पृष्ट्वा यज्ञयूपांस्तथैव च ॥ वेदविक्रयकर्तारं स्पृष्ट्वा स्नानं विधीयते ॥ २० ॥ आदेशं पठते यस्तु आदेशं च ददाति यः ॥ द्वावेतौ पापकर्माणौ पातालतलवासिनौ ॥ २१ ॥ आदेशं पठते यस्तु राजद्वारे तु मानवः ॥ सोऽपि देवि भवेद्वृक्ष ऊषरे कंटका वृतः ॥ स्थितो वै नृपतिद्वारि यः कुर्याद्वेदविक्रयम् ॥२२॥ ब्रह्महत्यासमं पापं न भूतं न भविष्यति ॥ वरं कुर्वन्ध्रुवं देवि न कुर्याद्वेदविक्रयम् ॥२३॥ हत्वा गाश्च वरं मांसं भक्षयीत द्विजाधमः ॥ वरं जीवेत्समं म्लेच्छैर्न कुर्याद्वेदविक्रयम् ॥ २४ ॥ प्रत्यक्षोक्तिः प्रत्ययश्च प्रश्नपूर्वः प्रतिग्रहः ॥ याज नाऽध्यापने वादः षड्विधो वेदविक्रयः ॥ २५ ॥ वेदाक्षराणि यावन्ति नियुंक्ते स्वार्थकारणात् ॥ तावतीर्भ्रूणहत्या वै प्राप्नुयाद्वेदविक्रयी ॥ २६ ॥ वेदानुयोगाद्यो दद्याद्ब्राह्मणाय प्रतिग्रहम् ॥ स पूर्वं नरकं याति ब्राह्मणस्तदनन्तरम् ॥ २७ ॥ वैश्वदेवेन हीना ये हीनाश्चातिथ्यतोऽपि ये ॥ कर्मणा सर्ववृषला वेदयुक्ता ह्यपि द्विजाः ॥ २८ ॥ येषामध्ययनं नास्ति ये च केचिदनग्नयः ॥ कुलं वाऽश्रोत्रियं येषां ते सर्वे शूद्रजातयः ॥ २९ ॥ मृतेऽ हनि पितुर्यस्तु न कुर्याच्छ्राद्धमादरात् ॥ मातुश्चैव वरारोहे स द्विजः शूद्रसंनिभः ॥ ३० ॥ मृतके यस्तु भुञ्जीत गृहीतशशिभास्करे ॥ गजच्छा यासु यः कश्चित्तं च शूद्रवदाचरेत् ॥ ३१ ॥ ब्रह्मचारिणि यज्ञे च यतौ शिल्पिनि दीक्षिते ॥ यज्ञे विवाहे सत्रे च सूतकं न कदाचन ॥ ३२ ॥ गोर क्षकान्वणिजकांस्तथा कारुकुशीलवान् ॥ स्पृश्यान्वार्धुषिकांश्चैव विप्राञ्छूद्रवदाचरेत् ॥ ३३ ॥ ब्राह्मणः पतनीयेषु वर्तमानो विकर्मसु ॥

१ परिसंख्याविधिरयम्—ब्रह्महत्या गोवधश्च न कर्तव्यौ—वेदविक्रयोऽपि न कर्तव्यः । २ गृहीतशशिभास्कर—सूर्यचन्द्रग्रहणयोः—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



दाम्भिको दुष्कृतप्रायः स च शूद्रसमः स्मृतः ॥ ३४ ॥ अस्नाताशी मलं भुंक्ते अजापी पूयशोणितम् ॥ अहुत्वा तु कृमीन्भुंक्ते
अदत्त्वा विषभोजनम् ॥ ३५ ॥ परान्नेन तु भुक्तेन मिथुनं योऽधिगच्छति ॥ यस्यान्नं तस्य ते पुत्रा अन्नाच्छुक्रं प्रवर्तते ॥ ३६ ॥
राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसम् ॥ आयुः सुवर्णकारान्नं यशश्चर्मावकर्तिनः ॥ ३७ ॥ कारुकान्नं प्रजा हन्ति बलं निर्णे
जकस्य च ॥ गणान्नं गणिकान्नं च लोकेभ्यः[1] परिकृन्तति ॥ ३८ ॥ पूयं चिकित्सकस्यान्नं पुंश्चल्यास्त्वन्नमिन्द्रियम् ॥ विष्ठा वार्धुषि
कस्यान्नं शस्त्रविक्रयिणो मलम् ॥ ३९ ॥ गायत्रीसारमात्रोऽपि वरं विप्रः सुयन्त्रितः ॥ नायंत्रितश्चतुर्वेदी सर्वाशी सर्वविक्रयी ॥ ४० ॥
सद्यः पतति मांसेन लाक्षया लवणेन च ॥ त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयात् ॥ ४१ ॥ रसा रसैर्नियंतव्या न त्वेव लवणं रसैः ॥ कृतान्नं
च कृतान्नेन तिला धान्येन तत्समाः ॥ ४२ ॥ भोजनाभ्यञ्जनाद्दानाद्यदन्यत्कुरुते तिलैः ॥ कृमिभूतः स विष्ठायां पितृभिः सह मज्जति ॥ ४३ ॥
अपूपश्च हिरण्यं च गामश्वं पृथिवीं तिलान् ॥ अविद्वान्प्रतिगृह्णाति भस्मीभवति काष्ठवत् ॥४४॥ हिरण्यमायू रत्नं[2] च भूर्गौश्चाकर्षतस्तनुम् ॥ अश्व
श्चक्षुस्त्वचं वासो घृतं तेजस्तिलाः प्रजाः ॥ ४५ ॥ अग्निहोत्री तपस्वी च क्षणवान्[3]क्रियते यदि ॥ अग्निहोत्रं तपश्चैव सर्वं तद्धनिनो धनम् ॥ ४६ ॥
सोमविक्रयणे विष्ठा भेषजे पूयशोणितम् ॥ नष्टं देवलके दानं ह्यप्रतिष्ठं च वार्धुके[4] ॥ ४७ ॥ देवार्चनपरो विप्रो वित्तार्थी भुवनत्रये ॥ असौ देव
लकोनाम हव्यकव्येषु गर्हितः ॥ ४८ ॥ भ्रातुर्मृतस्यभार्यायां यो गच्छेत्कामपूर्वकम् ॥ धर्मेणापि नियुक्तायां स ज्ञेयो दिधिषूपतिः ॥ ४९ ॥ दारा
ग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते ॥ परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः ॥ ५० ॥ योनरोऽन्यस्य वासांसि कूपोद्यानगृहाणि च ॥ अद
त्तान्युपयुंजानः स तत्पापतुरीयभाक् ॥ ५१ ॥ आमन्त्रितस्तु यः श्राद्धे वृषल्या सह मोदते ॥ दातुर्यद्दुष्कृतं किञ्चित्तत्सर्वं प्रतिपद्यते ॥ ५२ ॥
ऋतामृताभ्यां जीवेत मृतेन प्रमृतेन वा ॥ सत्यानृताभ्यां जीवेत न श्ववृत्त्या कथंचन ॥ ५३ ॥ भक्ष्यं नित्यमृतं ज्ञेयममृतं स्यादयाचितम् ॥ मृतं
तु वृद्धयाजीवित्वं प्रमृतं कर्षणं स्मृतम् ॥ ५४ ॥ सत्यानृतं च वाणिज्यं तेन चैवोपजीव्यते ॥ सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत् ॥ ५५ ॥ ॥१३९॥
विप्रयोनिं समासाद्य संकरं परिवर्जयेत् ॥ मानुष्यं दुर्लभं लोके ब्राह्मण्यमधिकं ततः ॥ ५६ ॥ एकशय्यासनं पक्तिर्भाण्डपक्वान्नमिश्रणम् ॥ याज

१ लोकेभ्यः स्वर्गादिलोकेभ्यः—इत्यर्थः । २ हिरण्यं रत्नं च--आयुः---आकर्षतः--इति योजना । ३ क्षणवान्--धनान्नादिसामग्रीसाहाय्यप्रदानेन---अग्निहोत्रे तपश्चर्यायां च प्रवृत्तिमान्—इत्यर्थः ।
४ वार्धुके---वृद्धयार्जीवे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाध्यापनं योनिस्तथा च सह भोजनम् ॥ नवधा संकरः प्रोक्तो न कर्तव्योऽधमैः सह ॥ ५७ ॥ अजीवन्कर्मणा स्वेन विप्रः क्षात्त्रं समाश्रयेत् ॥ वैश्यकर्माऽथवा कुर्याद्वार्षलं परिवर्जयेत् ॥ ५८ ॥ कुसीदं कृषिवाणिज्यं प्रकुर्वीत स्वयं कृतम् ॥ आपत्काले स्वयं कुर्वन्नैनेन स्पृश्यते द्विजः ॥ ॥५९॥ लब्धलाभः पितॄन्देवान्ब्राह्मणांश्चैव तर्पयेत् ॥ ते तृप्तास्तस्य तत्पापं शमयंति न संशयः ॥६०॥ जलगोशकटारामयाञ्चावृद्धिवणिक्क्रियाः ॥ अनूपं पर्वतो राजा दुर्भिक्षे जीविकाः स्मृताः ॥ ६१ ॥ असतोऽपि समादाय साधुभ्यो यः प्रयच्छति ॥ धनं स्वामिनमात्मानं संतारयति दुस्तरात् ॥ ६२ ॥ शूद्रे समगुणं दानं वैश्ये तद्द्विगुणं स्मृतम् ॥ श्रोत्रिये तच्च साहस्रमनन्तं चाग्निहोत्रिके ॥ ६३ ॥ ब्राह्मणातिक्रमो नास्ति नाचरेद्यो व्यवस्थितिम् ॥ ज्वलंतमग्निमुत्सृज्य न हि भस्मनि हूयते ॥ ६४ ॥ विद्यातपोभ्यां हीनेन नैव ग्राह्यः प्रतिग्रहः ॥ गृह्णन्प्रदातारमधो नयत्यात्मानमेव च ॥ ६५ ॥ तस्माच्छ्रोत्रिय एवार्हो गुणवाञ्छीलवाञ्छुचिः ॥ अव्यंगस्तत्र निर्दोषः पात्राणां परमं स्मृतम् ॥ ६६ ॥ कपालस्थं यथा तोयं श्वदृतौ च यथा पयः ॥ दूषितं स्थानदोषेण वृत्तहीने तथा श्रुतम् ॥ ६७ ॥ दत्तं पात्रमतिक्रम्य यदपात्रे प्रतिग्रहः ॥ तद्दत्तं गामतिक्रम्य गर्दभस्य गवाह्निकम् ॥ ६८ ॥ वृत्तं तस्मात्तु संरक्षेद्वित्तमेति गतं पुनः ॥ अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ॥ ६९ ॥ प्रथमं तु गुरौ दानं दत्त्वा श्रेष्ठमनुक्रमात् ॥ ततोऽन्येषां तु विप्राणां दद्यात्पात्रानुरूपतः ॥ ७० ॥ गुरौ च दत्तं यद्दानं दत्तं पात्रेषु मानवैः ॥ निष्फलं तद्भवेत्प्रेत्य यात्युताधोगतिं प्रति ॥ ७१ ॥ अवमानं गुरोः कृत्वा कोपयित्वा तु दुर्मतिः ॥ गुर्वमानहतो मूढो न शांतिमधिगच्छति ॥ ७२ ॥ गुरोरभावे तत्पुत्रं तद्भार्यां तत्सुतं विना ॥ पुत्रं प्रपौत्रं दौहित्रं ह्यन्यं वा तत्कुलोद्भवम् ॥ ७३ ॥ पंचयोजनमध्ये तु श्रूयते स्वगुरुर्यदा ॥ तदा नातिक्रमेद्दानं दद्यात्पात्रेषु मानवः ॥ ७४ ॥ यतिश्चेत्प्रार्थयेल्लोभादीयमानं प्रतिग्रहम् ॥ न तस्य देयं विद्वद्भिर्न लोभः शस्यते यतेः ॥ ७५ ॥ धनं प्राप्य यतिर्लोके मौनं ज्ञानं च नाभ्यसेत् ॥ उपभोगं तु दानेन जीवितं ब्रह्मचर्यया ॥ ७६ ॥ कुले जन्म च दीक्षाभिर्येगतास्ते नरोत्तमाः ॥ सौभाग्यमाप्नुयाल्लोके नूनं रसविवर्जनात् ॥ ७७ ॥ आयुष्मत्यः प्रजाः सर्वा भवन्त्यामिषवर्जनात् ॥ ७८ ॥ चीरवल्कलधृक्त्यक्तत्रा वस्त्राण्याभरणानि च ॥ नागाधिपत्यं प्राप्नोति उपवासेन मानवः ॥ ७९ ॥ क्रीडते सत्यवाक्येन स्वर्गे वै दैवतैः सह ॥ अहिंसया तथाऽऽरोग्यं दानात्कीर्तिमनुक्रमात् ॥ ८० ॥ द्विजशुश्रूषया राज्यं द्विजत्वं चातिपुष्कलम् ॥ दिव्यरूपमवाप्नोति देवशुश्रूषया नरः ॥ ८१ ॥ अन्नदाना

१ वार्षलम्—शूद्रकर्म—सेवाख्यम्—इत्यर्थः । २ स्वामिनम्—तद्धनस्वामिनम्—असन्तम्—अपि—इत्यर्थः । ३ व्यवस्थितिम्—समीपस्थं पूर्वमभ्यर्च्यानन्तरं दूरस्थार्चनमित्येवंरूपां व्यवस्थाम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



द्भवेत्तृप्तिः सर्वकामैरनुत्तमैः ॥ दीपस्य तु प्रदानेन चक्षुष्माञ्जायते नरः ॥ ८२ ॥ तुष्टिर्भवेत्सर्वकालं प्रदानाद्गन्धमाल्ययोः ॥ लवणस्य तु दातार स्तिलानां सर्पिषस्तथा ॥ तेजस्विनोऽपि जायन्ते भोगिनश्चिरजीविनः ॥ ८३ ॥ सुचित्रवस्त्राभरणोपधानं दद्यान्नरो यः शयनं द्विजाय ॥ रूपा न्वितां पक्ष्मवतीं मनोज्ञां भार्यामरालोपचितां लभेत्सः ॥ ८४ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये श्राद्धकल्पे पात्रापात्रविचारवर्णनंनाम सप्तोत्तरद्विशततमोऽध्यायः ॥ २०७ ॥ ॥ छ ॥ ॥ देव्युवाच ॥ ॥ इदं देय मिदं देयमिति प्रोक्तं तु यच्छ्रुतौ ॥ दानादानविशेषांस्तु श्रोतुमिच्छामि तत्त्वतः ॥ १ ॥ कानि दानानि शस्तानि कस्मै देयानि कान्यपि ॥ कालं देशं च पात्रं च सर्वमाचक्ष्व मे विभो ॥ २ ॥ ॥ ईश्वर उवाच ॥ ॥ वृथा जन्मानि चत्वारि वृथा दानानि षोडश ॥ सुजन्मानि च चत्वारि महादानानि षोडश ॥ ३ ॥ ॥ देव्युवाच ॥ ॥ एतद्विस्तरतो ब्रूहि देवदेव जगत्पते ॥ ४ ॥ ॥ ईश्वर उवाच ॥ ॥ वृथा जन्मानि चत्वारि यानि तानि निबोध मे ॥ कुपुत्राणां वृथा जन्म ये च धर्मबहिष्कृताः ॥ प्रवासं ये च गच्छंति परदाररताः सदा ॥ ५ ॥ परपाकं च येऽश्नंति पर दाररताश्च ये ॥ अप्रत्याख्यं वृथा दानं सदोषं च तथा प्रिये ॥ ६ ॥ आरूढपतिते चैव अन्यायोपार्जितं धनम् ॥ वृथा ब्रह्महने दानं पतिते तस्करे तथा ॥ ७ ॥ गुरोश्चाप्रीतिजनने कृतघ्ने ग्रामयाजके ॥ ब्रह्मबन्धौ च यद्दत्तं यद्दत्तं वृषलीपतौ ॥ ८ ॥ वेदविक्रयिणे चैव यस्य चोपपतिर्गृहे ॥ स्त्रीनि र्जिते च यद्दत्तं वृथा दानानि षोडश ॥ ९ ॥ सुजन्म च सुपुत्राणां ये च धर्मे रता नराः ॥ प्रवासं न च गच्छंति परदारपराङ्मुखाः ॥ १० ॥ गावः सुवर्णं रजतं रत्नानि च सरस्वती ॥ तिलाः कन्या गजोश्वश्च शय्या वस्त्रं तथा मही ॥ ११ ॥ धान्यं पयश्च च्छत्रं च गृहं चोपस्करान्वितम् ॥ एतान्येव महादेवि महादानानि षोडश ॥ १२ ॥ गर्वावृतस्तु यो दद्याद्भयात्क्रोधात्तथैव च ॥ भुंक्ते दानफलं तद्धि गर्भस्थो नात्र संशयः ॥ १३ ॥ बालत्वेऽपि च सोऽश्नाति यद्दत्तं दंभकारणात् ॥ मन्युना मंतुना चैव तथैवार्थस्य कारणात् ॥ १४ ॥ देशे काले च पात्रे च शुद्धेन मनसा तथा ॥ न्यायार्जितं च यो दद्याद्यौवने स तदश्नुते ॥ १५ ॥ अन्यायेनार्जितं द्रव्यमपात्रे प्रतिपादितम् ॥ क्लिष्टं च विधिहीनं च वृद्धभावे तदश्नुते ॥ १६ ॥ तस्माद्देशे च काले च सुपात्रे विधिना नरः ॥ शुभार्जितं प्रयुञ्जीत श्रद्धया शाठ्यवर्जितः ॥ १७ ॥ स्वाध्यायाढ्यं योगवंतं प्रशांतं पुराणज्ञं पापभीरुं वदान्यम् ॥ स्त्रीषु क्षान्तं धार्मिकं गोशरण्यं व्रतैः क्रान्तं तादृशं पात्रमाहुः ॥ १८ ॥

१ इतीच्छञ्छ्रुतिनोदनात्—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्यं दमस्तपः शौचं सन्तोषोऽनैर्ष्यमार्जवम् ॥ ज्ञानं शमो दया दानमेतत्पात्रस्य लक्षणम् ॥ १९ ॥ एवंविधे तु यत्पात्रे गामेकां तु प्रयच्छति ॥ समानवत्सां कपिलां धेनुं सर्वगुणान्विताम् ॥ २० ॥ रौप्यपादां स्वर्णशृङ्गीं रुद्रलोके महीयते ॥ एकां गां दशगुर्दद्या द्रोशती च तथा दश ॥ २१ ॥ शतं सहस्रगुर्दद्यात्सर्वे समफलाः स्मृताः ॥ सुशीला सोम[1]संपन्ना तरुणी च पयस्विनी ॥ सवत्सा न्यायलब्धा च प्रदेया ब्राह्मणाय गौः ॥ २२ ॥ वंध्या सरोगा हीनांगी दुष्टा वृद्धा मृतप्रजा ॥ अन्यायलब्धा दूरस्था नेदृशीं गां प्रदापयेत् ॥ २३ ॥ यो हीदृशीं गां ददाति देवोद्देशेन मानवः ॥ प्रत्युताधोगतिं याति क्लिश्यते च महेश्वरि ॥ २४ ॥ रुष्टा क्लिष्टा दुर्बला व्याधिता च न दातव्या या च मूल्यैर्दत्तैः ॥ क्लेशो विप्रेभ्यो यया जायते वै तस्या दातुश्चाफलाः सर्वलोकाः ॥ २५ ॥ अतिथये प्रशान्ताय सीदते चाहिताग्नये ॥ श्रोत्रियाय तथैकापि दत्ता बहुगुणा भवेत् ॥ २६ ॥ गां विक्रीणाति चेद्देवि ब्राह्मणो ज्ञानदुर्बलः ॥ नासौ प्रशस्यते पात्रं ब्राह्मणो नैव स स्मृतः ॥ २७ ॥ बहुभ्यो न प्रदेयानि गौर्गृहं शयनं स्त्रियः ॥ विभक्ता दक्षिणा ह्येषा दातारं नोपतिष्ठति ॥ २८ ॥ प्रासादा यत्र सौवर्णाः शय्या रत्नोज्वलास्तथा ॥ वराश्चाप्सरसो यत्र तत्र गच्छंति गोप्रदाः ॥ २९ ॥ नास्ति भूमिसमं दानं नास्ति गंगासमा सरित् ॥ नास्ति सत्यात्परो धर्मो नान्यो देवो महेश्वरात् ॥ ॥ ३० ॥ उच्चैः पाषाणयुक्ता च न समा नैव चोषरा ॥ न नदीकूलविकटा भूमिर्देया कदाचन ॥ ३१ ॥ षष्टिवर्षसहस्राणि स्वर्गे वसति भूमिदः ॥ आ[2]च्छेत्ता चानु[3]मंता च ता[4]न्येव नरकं व्रजेत् ॥ ३२ ॥ कुरुते पुरुषः पापं यत्किञ्चिद्वृत्तिकर्शितः ॥ अपि गोचर्ममात्रेण भूमिदानेन शुद्ध्यति ॥ ३३ ॥ छत्रं शय्यासनं शंखो गजाश्वाश्चामराः स्त्रियः ॥ भूमिश्चैषां प्रदानस्य शिवलोकः फलं स्मृतम् ॥ ३४ ॥ आदित्येऽहनि संक्रांतौ ग्रहणे चन्द्रसूर्ययोः ॥ पारणैश्चैव गोदाने नोपोष्यः पौत्रवान्गृही ॥ ३५ ॥ इन्दुक्षये तु संक्रान्त्यामेकादश्यां श[5]ते कृते ॥ उपवासं न कुर्वीत यदीच्छेत्संततिं ध्रुवम् ॥ ३६ ॥ यथा शुक्ला तथा कृष्णा न विशेषोऽस्ति कश्चन ॥ तथापि वर्धते धर्मः शुक्लायामेव सर्वदा ॥ ३७ ॥ दशम्येकादशीविद्धा द्वादशी च क्षयं गता ॥ नक्तं तत्र प्रकुर्वीत नोपवासो विधीयते ॥ ३८ ॥ उपोष्यैकादशीं यस्तु त्रयोदश्यां तु पारणम् ॥ करोति तस्य नश्येत्तु द्वादश द्वादशीफलम् ॥ ३९ ॥ उपवासे तथा श्राद्धे न खादेद्दन्तधावनम् ॥ दन्तानां काष्ठसंगाच्च हन्ति सप्तकुलानि वै ॥ ४० ॥ दर्शं च पौर्णमासं च

१ सोमसंपन्ना—तृणादिसर्वभक्ष्यभक्षणोचितमुखस्वादः सोमः तद्वती—इत्यर्थः । २ आच्छेत्ता—दत्ताया भुवः पुनः प्रतिहरणकर्त्ता—इत्यर्थः ।३ अनुमन्ता—प्रतिहरणकरणे बुद्धिदायकः—इत्यर्थः । ४ तान्येव—षष्टिवर्षसहस्राणि इत्यर्थः । ५ शतैकादश्युपोषणोत्तरं पौत्रवता गृहस्थाश्रमिणोपोषणं न कार्यमित्युच्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





पितुः सांवत्सरं दिनम् ॥ पूर्वविद्धमकुर्वाणो नरकं प्रतिपद्यते ॥ ४१ ॥ हानिश्च संततेः प्रोक्ता दौर्भाग्यं समवाप्नुयात् ॥ द्रव्याभावेथ श्राद्धस्य विधिं वक्ष्यामि तत्त्वतः ॥ ४२ ॥ एकेनापि हि विप्रेण षट्पिण्डं श्राद्धमाचरेत् ॥ षडर्घ्यान्पारयेत्तत्र तेभ्य[1]ो दद्याद्यथाविधि ॥ ४३ ॥ पिता भुंक्ते द्विजकरे मुखे भुंक्ते पितामहः ॥ प्रपितामहस्तालुस्थः कण्ठे मातामहः स्मृतः ॥ ४४ ॥ प्रमातामहस्तु हृदये वृद्धो[2] नाभौ तु संस्थितः ॥ अलाभे ब्राह्मणस्यैव कुशः कार्यो द्विजः प्रिये ॥ इदं सर्वपुराणेभ्यः सारमुद्धृत्य चोच्यते ॥ ४५ ॥ न चैतन्नास्तिके देयं पिशुने वेदनिन्दके ॥ प्रातःप्रातरिदं श्राव्यं पूजयित्वा महेश्वरम् ॥ ४६ ॥ कुलीनं सर्वशास्त्रज्ञं यथा देवं महेश्वरम् ॥ अस्य धर्मस्य वक्तारं छत्रं दद्यात्प्रपूजयेत् ॥ ४७ ॥ अपूज्याद्वाचकाद्यस्तु श्लोकमेकं शृणोति च ॥ नासौ पुण्यमवाप्नोति शास्त्रचौरः स्मृतो हि सः ॥ ४८ ॥ तस्मात्सर्वप्रयत्नेन पूजयेद्वाचकं बुधः ॥ अन्यथा निष्फलं तस्य पुस्तकश्रवणं भवेत् ॥ ४९ ॥ यस्यैव तिष्ठते गेहे शास्त्रमेतत्सुदुर्लभम् ॥ तस्य देवि गृहे तीर्थैः सह तिष्ठेच्छिवः स्वयम् ॥ ५० ॥ बहुनात्र किमुक्तेन भवेन्मोक्षस्य भाजनम् ॥ न चैतत्पिशुने देयं नास्तिके दंभसंयुते ॥ ५१ ॥ इदं शान्ताय दान्ताय देयं शैवद्विजन्मने ॥ ५२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये श्राद्धकल्पे दानपात्रब्राह्मणमाहात्म्यवर्णनंनामाष्टोत्तरद्विशततमोऽध्यायः ॥ २०८ ॥ छ ॥

॥ ईश्वर उवाच ॥

॥ ततो गच्छेन्महादेवि मार्कण्डेयेशमुत्तमम् ॥ तस्मादुत्तरदिग्भागे मार्कण्डेन प्रतिष्ठितम् ॥ १ ॥ सावित्र्याः पूर्वभागे तु नातिदूरे व्यवस्थितम् ॥ महर्षिरभवत्पूर्वं मार्कण्डेय इति श्रुतः ॥ २ ॥ अजरश्चामरश्चैव प्रसादात्पद्मयोनिनः ॥ स गत्वा तत्र विप्रेन्द्रो देवदेवस्य शूलिनः ॥ लिंगं तु स्थापयामास ज्ञात्वा तत्क्षेत्रमुत्तमम् ॥ ३ ॥ स तं पूज्य विधानेन स्थित्वा दक्षिणतो मुनिः ॥ पद्मासनधरो भूत्वा ध्यानावस्थस्तदाऽभवत् ॥ ४ ॥ तस्य ध्यानरतस्यैव प्रयुतान्यर्बुदानि च ॥ युगानां समतीतानि न जानाति मुनीश्वरः ॥ ५ ॥ अथ लोपं समापन्नः प्रासादः शांकरः स्थितः ॥ कालेन महता देवि पांसुभिर्मारुतोद्भवैः ॥ ६ ॥ कस्यचित्त्वथ कालस्य प्रबुद्धो मुनिसत्तमः ॥ अपश्यत्पांसुभिर्व्याप्तं तत्सर्वं शिवमन्दिरम् ॥ ७ ॥ ततः कृच्छ्रात्स निष्क्रान्तः खनित्वा मुनिपुंगवः ॥ अकरोत्सुमहाद्वारं पूजार्थं तस्य भामिनि ॥ ८ ॥ प्रविश्य तत्र यो भक्त्या पूजयेद्वृषभध्वजम् ॥ स याति परमं स्थानं यत्र देवो महेश्वरः ॥ ९ ॥

॥ देव्युवाच ॥

॥ अमरत्वं कथं प्राप्तो मार्कण्डो मुनिसत्तमः ॥ अभवत्कौतुकं ह्येतत्तस्मात्त्वं वक्तुमर्हसि ॥ १० ॥

१ तेभ्यः—पित्रादिभ्यः षड्भ्यः—इत्यर्थः । २ वृद्धः—वृद्धप्रमातामहः—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अमरत्वं यतो नास्ति प्राणिनां भुवि शंकर ॥ देवानामपि कल्पांते स कथं न मृतो मुनिः ॥ ११ ॥ ॥ ईश्वर उवाच ॥ ॥ अथातस्त्वां प्रव
क्ष्यामि यथासावमरोऽभवत् ॥ आसीन्मुनिः पुरा कल्पे मृकण्ड इति विश्रुतः ॥ १२ ॥ भृगोः पुत्रो महाभागः सभार्यस्तपसि स्थितः ॥ तस्य
पुत्रस्तदा जातो वसतस्तु वनांतरे ॥ १३ ॥ स पाञ्चवार्षिको भूत्वा बाल एव गुणान्वितः ॥ कस्यचित्त्वथ कालस्य ज्ञानी तत्र समागतः ॥१४॥
तेन दृष्टस्तदा बालः प्रांगणे विचरन्प्रिये ॥ स्पृत्वाऽहसच्चिरं कालं भाव्यर्थं प्रति नोदितः ॥ १५ ॥ तस्य पित्रा स दृष्टस्तु सामुद्रज्ञो विदुत्तमः ॥
हास्यस्य कारणं पृष्टो विस्मयान्वितचेतसा ॥ १६ ॥ कस्मान्मे सुतमालोक्य स्मितं विप्र कृतं त्वया ॥ तत्र मे कारणं ब्रह्मन्यथावद्वक्तुमर्हसि ॥
॥ १७ ॥ इति तस्य वचः श्रुत्वा ज्ञानी विप्रो वचोऽब्रवीत् ॥ १८ ॥ अयं पुत्रस्तव मुने सर्वलक्षणसंयुतः ॥ अद्यप्रभृति षण्मासमध्ये मृत्युमवा
प्स्यति ॥ १९ ॥ यदि जीवेत्पुनरयं चिरायुर्वै भविष्यति ॥ अतो मया कृतं हास्यं विचित्रा कर्मणो गतिः ॥ २० ॥ एतच्छ्रुत्वा वचो रौद्रं
ज्ञानिना समुदाहृतम् ॥ व्रतोपनयनं चक्रे बालकस्य पिता तदा ॥ २१ ॥ आह चैनमृषिः पुत्रं दृष्ट्वा ब्राह्मणमागतम् ॥ अभिवाद्यास्त्रयो वर्णास्ततः
श्रेयो ह्यवाप्स्यसि ॥ २२ ॥ एवमुक्तः स वै विप्रः करोत्येवाभिवादनम् ॥ न वर्णावरजं वेत्ति बालभावाद्वरानने ॥ २३ ॥ पंचमासा ह्यतिक्रान्ता
दिवसाः पञ्चविंशतिः ॥ एतस्मिन्नेव काले तु प्राप्ताः सप्तर्षयोऽमलाः ॥ २४ ॥ तीर्थयात्राप्रसंगेन तेन मार्गेण भामिनि ॥ कालेन तेन सर्वेऽथ
यथावदभिवादनैः ॥ आयुष्मान्भव तैरुक्तः स बालो दण्डवल्कली ॥ २५ ॥ उक्त्वा ते तु पुनर्बालं वीक्ष्य वै क्षीणजीवितम् ॥ दिनानि पंच ते
ह्यायुर्ज्ञात्वा भीतास्ततोऽनृतात् ॥ २६ ॥ ब्रह्मचारिणमादाय गतास्ते ब्रह्मणोऽन्तिके ॥ प्रतिमुच्याग्रतो बालं प्रणेमुस्ते पितामहम् ॥ २७ ॥ ततस्ते
नापि बालेन ब्रह्मा चैवाभिवादितः ॥ चिरायुर्ब्रह्मणा बालः प्रोक्तोऽसावृषिसन्निधौ ॥ २८ ॥ ततस्ते मुनयः प्रीताः श्रुत्वा वाक्यं पितामहात् ॥
पितामहस्तु तान्दृष्ट्वा ऋषीन्प्रोवाच विस्मितान् ॥ केन कार्येण वाऽऽयाताः केन बालो निवेदितः ॥२९॥ ॥ ऋषय ऊचुः ॥ ॥ भृगोः पुत्रो
मृकण्डस्तु क्षीणायुस्तस्य बालकः ॥ अकालेन पिता ज्ञात्वा बबंधास्य च मेखलाम् ॥ ३० ॥ यज्ञोपवीतं च ततस्तेन विप्रेण बोधितः ॥ यं
कञ्चिद्द्रक्ष्यसे लोके भ्रमन्तं भूतले द्विजम् ॥ ३१ ॥ तस्याभिवादनं कार्यं नित्यमेव च पुत्रक ॥ ततो वयमनेनैव दृष्टा बालेन सत्तम ॥
॥ ३२ ॥ तीर्थयात्राप्रसंगेन दैवयोगात्पितामह ॥ चिरायुरेष वै प्रोक्तो ह्यमीभिश्चाभिवादितैः ॥ ३३ ॥ त्वत्सकाशं समानीतस्त्वया
चैवमुदाहृतः ॥ कथं वागनृता देव ह्यस्माकं भवता सह ॥ ३४ ॥ उवाच बालमुद्दिश्य प्रहसन्पद्मसंभवः ॥ मत्समानायुषो बालो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मार्कण्डेयो भविष्यति ॥ ३५ ॥ कल्पस्यादौ तथा चान्ते सहायो मे भविष्यति ॥ ततस्तु मुनयः प्रीता गृहीत्वा मुनिदारकम् ॥ तस्मिन्नेव प्रदेशे तु मुमुचु[1]श्चेष्टितं यतः ॥ ३६ ॥ तीर्थयात्रां गता विप्रा मार्कण्डेयो गृहं ययौ ॥ गत्वा गृहमथोवाच मृकण्डं मुनिसत्तमम् ॥ ३७ ॥ ब्रह्मलोकमहं नीतो मुनिभिस्तात सप्तभिः ॥ उक्तोऽयं ब्रह्मणा कल्पस्यादौ चान्ते च मे सखा ॥ ३८ ॥ भविष्यति न संदेहो मत्समायुश्च बालकः ॥ ततस्तैः पुनरानीतो मुक्तश्चैवाश्रमं प्रति ॥ ३९ ॥ मत्कृते हि द्विजश्रेष्ठ यातु ते मनसो ज्वरः ॥ मार्कण्डेयवचः श्रुत्वा मृकण्डो मुनिसत्तमः ॥ जगाम परमं हर्षं क्षणमेकं [2]सुदुःसहम् ॥ ४० ॥ ततो धैर्यं समास्थाय वाक्यमेतदुवाच ह ॥ ४१ ॥ अद्य मे सफलं जन्म जीवितं च सुजीवितम् ॥ यत्त्वया मे सुपुत्रेण दृष्टो लोकपितामहः ॥ ४२ ॥ वाजपेयसहस्रेण राजसूयशतेन च ॥ यं न पश्यन्ति विद्वांसः स त्वया लीलया सुत ॥ ४३ ॥ दृष्टश्चिरायुरप्येवं कृतस्तेनाब्जयोनिना ॥ दिवारात्रमहं तात तव दुःखेन दुःखितः ॥ न निद्रामनुगच्छामि तन्मे दुःखं गतं महत् ॥ ४४ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये मार्कण्डेयेश्वरमाहात्म्यवर्णनंनाम नवोत्तरद्विशततमोऽध्यायः ॥ ॥ २०९॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि पुलस्त्येश्वरमुत्तमम् ॥ मार्कण्डेयोत्तरे भागे धनुषां पञ्चके स्थितम् ॥ १ ॥ तं दृष्ट्वा मानवो देवि पूजयित्वा विधानतः ॥ सप्तजन्मार्जितात्पापान्मुच्यते नात्र संशयः ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये पुलस्त्येश्वरमाहात्म्यवर्णनंनाम दशोत्तरद्विशततमोऽध्यायः ॥ २१० ॥ ॥ छ ॥ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ पुलस्त्येश्वरात्ततो देवि नैर्ऋते धनुषाष्टके ॥ पुलहेश्वरनामानं तं च भक्त्या प्रपूजयेत् ॥ १ ॥ हिरण्यदानं दत्त्वा वै सम्यग्यात्राफलं लभेत् ॥ २ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये पुलहेश्वरमाहात्म्यवर्णनंनामैकादशोत्तरद्विशततमोऽध्यायः ॥ २११ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ पुलहेश्वरात्ततो देवि नैर्ऋते धनुषाष्टके ॥ क्रत्वीश्वरेतिनामानं महाक्रतुफलप्रदम् ॥१॥ तं दृष्ट्वा मानवो देवि पौं[3]डरीकफलं लभेत् ॥ सप्तजन्मनि दारिद्र्यं न दुःखं तत्र जायते ॥२॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये क्रत्वीश्वरमाहात्म्यवर्णनंनाम द्वादशोत्तरद्विशततमोऽध्यायः ॥ २१२ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ क्रत्वीशात्पूर्वदिग्भागे धनुःषोडशकान्तरे ॥ कश्यपेश्वरनामा[4]नं महापातकना

१ चेष्टितं यतः—यत्र स्थाने स्थित्वा बालकाशीःप्रदानादि कृतं तस्मिन्प्रदेशे—इत्यर्थः । २ सुदुःसहम्—हर्षोन्मादमिव दुर्निवारम्—इत्यर्थः ।३ पौण्डरीकफलम्—पौण्डरीकयज्ञफलम्—इत्यर्थः । ४ गच्छेत्—इति शेषः ।

CC-0. In Public Domain. Digitization by eGangotri

शनम् ॥ १ ॥ तं दृष्ट्वा मानवो देवि धनवान्पुत्रवान्भवेत् ॥ सर्वपातकयुक्तोऽपि मुच्यते नात्र संशयः ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये कश्यपेश्वरमाहात्म्यवर्णनंनाम त्रयोदशोत्तरद्विशततमोऽध्यायः ॥ २१३ ॥ ॥छ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ धनुषामष्टभिस्तस्मादीशाने कश्यपेश्वरात् ॥ कौशकेश्वरनामानं महापातकनाशनम् ॥ १ ॥ वसिष्ठतनयान्हत्वा तत्र कौशिकसत्तमः ॥ स्थापयामास तल्लिंगं मुक्तपापस्ततोऽभवत् ॥ २ ॥ तं दृष्ट्वा पूजयित्वा तु लभते वाञ्छितं फलम् ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये कौशिकेश्वरमाहात्म्यवर्णनंनाम चतुर्दशोत्तरद्विशततमोऽध्यायः ॥ ॥ २१४ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि कुमारेश्वरमुत्तमम् ॥ मार्कंण्डेश्वरतो देवि दक्षिणे नातिदूरतः ॥ धनुर्विंशतिभिस्तत्र स्थितं स्वामिप्रतिष्ठितम् ॥ १ ॥ ततः कृत्वा तपो घोरं कार्त्तिकेयेन भामिनि ॥ परदारापहारोत्थपापानां नाशहेतवे ॥ २ ॥ लिंगं स्थापितवांस्तत्र स मुक्तः किल्बिषात्ततः ॥ वैराग्याद्यौवनं त्यक्त्वा कौमारं पुनराददे ॥ ३ ॥ पितॄन्हत्वा सुमाली च तमाराधितवान्पुरा ॥ सोऽपि मुक्तोऽभवद्देवि पापात्पितृवधोद्भवात् ॥ ४ ॥ कुमारेश्वरनामैतत्पूजितं वै सुरासुरैः ॥ तस्याग्रतः कुमारस्य कूपस्तिष्ठति भामिनि ॥ ५ ॥ तत्र स्नात्वा पूजयेद्यः शूलिनं स्वामिपूजितम् ॥ स मुक्तः पातकैः सर्वैर्गच्छेत्स्वामिपुरं महत् ॥ ६ ॥ शातकौंभमयं यस्तु ताम्रचूडं द्विजातये ॥ दद्यात्स्वामिनमुद्दिश्य स तु यात्राफलं लभेत् ॥ ७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये कुमारेश्वरमाहात्म्यवर्णनंनाम पञ्चदशोत्तरद्विशततमोऽध्यायः ॥ २१५ ॥ ॥ छ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ मार्कण्डेश्वरतो देवि उत्तरे लिंगमुत्तमम् ॥ धनुषां पञ्चदशभिर्गौतमेश्वरनामकम् ॥ १ ॥ गुरुं हत्वा पुरा देवि गौतमः पापदुःखितः ॥ तत्र लिंगं प्रतिष्ठाप्य तस्मात्पापाद्व्यमुच्यत ॥ २ ॥ यस्तत्र कपिलां दद्यात्स्नात्वा नद्यां विधानतः ॥ संपूज्य विधिवल्लिंगं मुच्यते पञ्चपातकैः ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये गौतमेश्वरमाहात्म्यवर्णनंनाम षोडशोत्तरद्विशततमोऽध्यायः ॥ २१६ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ गौतमेश्वरतो देवि पश्चिमे नातिदूरतः ॥ धनुःषोडशभिर्देवि देवराजेश्वरः स्थितः ॥ १ ॥ लिंगं स स्थापयामास ततः पापैर्व्यमुच्यत ॥ यस्तं समाहितमनाः पूजयिष्यति मानवः ॥ स च मानवसंभूतात्पातकात्संप्रमोक्ष्यति ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये देवराजेश्वरमाहात्म्यवर्णनंनाम सप्तदशोत्तरद्विशततमोऽध्यायः ॥ २१७ ॥ ॥छ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



॥ ॥ ईश्वर उवाच ॥ ॥ तत्रैव मानवं लिंगं मनुना संप्रतिष्ठितम् ॥ पूर्वं हत्वा सुतं देवि मनुः पापसमन्वितः ॥ १ ॥ क्षेत्रं पापहरं ज्ञात्वा तत्र
प्रातिष्ठदीश्वरम् ॥ मुक्तश्चैवाभवत्पापात्तस्मात्पुत्रवधोद्भवात् ॥२॥ पूजयेन्मानवो यस्तु स मुक्तः पातकैर्भवेत् ॥ ३ ॥ इति श्रीस्कान्दे महापुराण एका
शीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये मानवेश्वरमाहात्म्यवर्णनंनामाष्टादशोत्तरद्विशततमोऽध्यायः ॥२१८॥ ॥छ॥
॥ ॥ ईश्वर उवाच ॥ ॥ तस्मादाग्नेयकोणे तु मार्कंडेयसमीपगम् ॥ गुहालिंगं महादेवि नीलकण्ठेति विश्रुतम् ॥ १ ॥ विष्णुना पूजितं पूर्वं सर्व
पातकनाशनम् ॥ २ ॥ तत्र यः पूजयेद्भक्त्या तल्लिंगं पापमोचनम् ॥ स पुत्रपशुमान्धीमान्मोदते पृथिवीतले ॥ ३ ॥ एवं तत्र महादेवि मार्कण्डेये
शसन्निधौ ॥ ऋषीणामाश्रमा येऽत्र दृश्यन्तेऽद्यापि भामिनि ॥ ४ ॥ अष्टाशीतिसहस्राणि ऋषीणामूर्ध्वरेतसाम् ॥ तत्र स्थितानि देवेशि मार्कण्डे
याश्रमांतिके ॥ ५ ॥ ऋषीणां च गुहास्तत्र सर्वा लिंगसमन्विताः ॥ दृश्यन्ते पुण्यतपसां तदाश्रमनिवासिनाम् ॥ ६ ॥ तत्र यः स्थापयेल्लिंगं मार्कं
डेशसमीपगम् ॥ कुलानां शतमुद्धृत्य मोदते दिवि देववत् ॥ ७ ॥ सर्वे शिवमया लोकाः शिवे सर्वं प्रतिष्ठितम् ॥ तस्माच्छिवं यजेद्विद्वान्य इच्छे
च्छ्रियमात्मनः ॥ ८ ॥ शिवभक्तो न यो राजा भक्तोऽन्येषु सुरेषु च ॥ स्वपतिं युवती त्यक्त्वा रमतेऽन्येषु वै यथा ॥ ९ ॥ ब्रह्मादयः सुराः सर्वे
राजानश्च महर्द्धिकाः ॥ मानवा मुनयश्चैव सर्वे लिंगं यजंति च ॥ १० ॥ स्वनामकृतचिह्नानि लिंगानींद्रादिभिः क्रमात् ॥ स्थापितानि यथा
स्थाने मानवैरपि भूरिशः ॥ ११ ॥ स्थापनाद्ब्रह्महत्यां च भ्रूणहत्यां तथैव च ॥ महापापानि चान्यानि निस्तीर्णाः शिवतेजसा ॥ १२ ॥ वृत्रं हत्वा
पुरा शक्रो माहेन्द्रं स्थाप्य शंकरम् ॥ लिंगं च मुक्तपापौघस्ततोऽसौ त्रिदिवं गतः ॥ १३ ॥ स्थापयित्वा शिवं सूर्यो गंगासागरसंगमे ॥ निरामयोऽ
भूत्सोमश्च प्रभासे पश्चिमोदधेः ॥ १४ ॥ काश्यां चैव तथादित्यः सह्ये गरुडकाश्यपौ ॥ प्रतिष्ठां परमां प्राप्तौ प्रतिष्ठाप्य जगत्पतिम् ॥ १५ ॥
ख्यातदोषा ह्यहिल्याऽपि भर्तृशप्ताऽभवत्तदा ॥ स्थाप्येशानं पुनः स्त्रीत्वं लेभे पुत्रांस्तथोत्तमान् ॥ १६ ॥ पश्यंत्यद्यापि याः स्नात्वा तत्राहिल्येश्वरं
स्त्रियः ॥ पुरुषाश्चापि तद्दोषैर्मुच्यन्ते नात्र संशयः ॥ १७ ॥ स्थापयित्वेश्वरं श्वेतशैले बलिविरोचनौ ॥ उभावपि हि संजातावमरौ बलिनां वरौ ॥ ॥१४३॥
॥ १८ ॥ रामेण रावणं हत्वा ससैन्यं त्रिदशेश्वरम् ॥ स्थापितो विधिवद्भक्त्या तीरे नदनदीपतेः ॥ १९ ॥ स्वायंभुवर्षिदेवादिलिंगहीना न भूः
क्वचित् ॥ व्यापारान्सकलांस्त्यक्त्वा पूजयध्वं शिवं सदा ॥ निकटा इव दृश्यंते कृतांतनगरोपगाः ॥ २० ॥ देवि किं बहुनोक्तेन वर्णितेन पुनः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनः ॥ प्रभासक्षेत्रसारं तु मार्कण्डेयाश्रमं प्रति ॥ २१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये मार्कण्डेयेश्वरमाहात्म्यवर्णनंनामैकोनविंशत्युत्तरद्विशततमोऽध्यायः ॥ २१९ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि देवं त्रैलोक्यपूजितम् ॥ वृषध्वजेश्वरंनाम स्थितं दक्षिणतस्तथा ॥ १ ॥ यत्तदक्षरमव्यक्तं परं यस्मान्न विद्यते ॥ योगगम्यमनाद्यंतं वृषभध्वजसंमितम् ॥ २ ॥ सर्वाश्चर्यमयं देवि बुद्धिग्राह्यं निरामयम् ॥ विश्वतःपाणिपादं च विश्वतोऽक्षिशिरोमुखम् ॥ ३ ॥ तं च देवं चिरं स्थाणुं वृषभध्वजसंज्ञितम् ॥ पृथुर्मरुच्च भरतः शशबिन्दुर्गयः शिबिः ॥ ४ ॥ रामोंऽबरीषो मांधाता दिलीपोऽथ भगीरथः ॥ सुहोत्रो रंतिदेवश्च ययातिः सगरस्तथा ॥ ५ ॥ षोडशैते नृपा धन्याः प्रभासं क्षेत्रमाश्रिताः ॥ वृषध्वजेशमाराध्य यज्ञैरिष्ट्वा दिवं गताः ॥ ६ ॥ सत्यं वच्मि हितं वच्मि सारं वच्मि पुनःपुनः ॥ असारे दग्धसंसारे सारं तत्र शिवार्चनम् ॥ ७ ॥ पुनर्जन्म पुनर्मृत्युः पुनः क्लेशः पुनर्जरा ॥ अहरहर्घटीन्यायो[१] न कदाचिदपीदृशः ॥ ८ ॥ तदा श्वेतस्य संसारग्रन्थेरत्यन्तदुर्भिदः ॥ परं निर्मूलविच्छेदि क्रियतां तद्भवार्चनम् ॥ ९ ॥ तस्य चिन्तामणिर्गेहे तस्य कल्पद्रुमः कुले ॥ कुबेरः किंकरस्तस्य भक्तिर्यस्य शिवे स्थिता ॥ १० ॥ सेयं लक्ष्मीः पुरा पुंसां सेयं भक्तिः समीहिता ॥ सेयं श्रेयस्करी मूर्तिर्भक्तिर्या वृषभध्वजे ॥ ११ ॥ पुष्पैः पंचभिरप्यत्र पूजयित्वा महेश्वरम् ॥ दशानामश्वमेधानां फलं प्राप्नोति मानवः ॥ १२ ॥ वृषभस्तत्र दातव्यो वृषभध्वजसंनिधौ ॥ सर्वपातकनाशार्थं सम्यग्यात्राफलेप्सुभिः ॥ १३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये वृषभध्वजेश्वरमाहात्म्यवर्णनंनाम विंशत्युत्तरद्विशततमोऽध्यायः ॥ २२० ॥ ॥छ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि देवं च ऋणमोचनम् ॥ तस्मिन्दृष्टे ऋणं न स्यान्मातापितृसमुद्भवम् ॥ १ ॥ पितरस्तु पुरा सर्वे दिव्यक्षेत्रं समागताः ॥ प्रभासे तपसा युक्ताः स्थिता वर्षगणान्बहून् ॥ २ ॥ अग्निष्वात्ता बर्हिषदः सोमपा आज्यपास्तथा ॥ लिंगं संस्थापयामासुः सर्वे भक्तिपरायणाः ॥ ३ ॥ ततः कालेन महता तुष्टस्तेषां महेश्वरः ॥ ततः प्रत्यक्षतां गत्वा वाक्यमेतदुवाच ह ॥ ४ ॥ परितुष्टोऽस्मि भद्रं वो ब्रूत यन्मनसेप्सितम् ॥५॥ ॥ पितर ऊचुः ॥ ॥ अस्माकं दीयतां वृत्तिर्जगत्यस्मिन्स्वयं कृते ॥ देवानां च ऋषीणां च मानुषाणां महीतले ॥ ६ ॥ भवानेव परो लोके सर्वेषां पद्मसंभव ॥ आगत्य वर्णाश्चत्वार इह ये श्रद्धयान्विताः ॥ ७ ॥ पैतृकात्तु ऋणान्मुक्ता भवंतु गतकल्मषाः ॥ व्यन्तरत्वं सुरश्रेष्ठ येषां वै पितरो गताः ॥ ८ ॥ सर्प्पेवह्नि

---

१ घटीन्यायः—वापीप्रभृतिजलाशयोपरिस्थघटीयन्त्रन्यायः--पुनःपुनरावर्तनम्--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



विषैर्वा ये नाशं नीताः पितामहाः ॥ अपुत्रा वा सपुत्रा वा सपिण्डीकरणं विना ॥ ९ ॥ ::न कृतानि पुरा येषामेकोद्दिष्टानि षोडश ॥ तथा नैव
वृषोत्सर्गो गोहताश्चाथ चान्त्यजैः ॥ १० ॥ अथापरे ये च मृताः शौचेन तु विनाकृताः ॥ ते चात्र तर्पिताः सर्वे प्रयान्तु परमां गतिम् ॥ ११ ॥
॥ ॥ श्रीभगवानुवाच ॥ ॥ स्नात्वा तु सलिले पुण्ये पितॄणां चैव तर्पणम् ॥ ये करिष्यंति मनुजाः पितृभक्तिपरायणाः ॥ १२ ॥ अहं त्वप्रद
स्तेषां तारयिष्यामि तत्क्षणात् ॥ पितॄन्सर्वान्न संदेहो यदि पापशतैर्वृताः ॥ १३ ॥ अस्मिंस्तीर्थे नरः स्नात्वा यो लिंगं पूजयिष्यति ॥ युष्माभिः
स्थापितं लिंगं स मुक्तः पैतृकादृणात् ॥ १४ ॥ यस्माद्दृणात्प्रमुच्येत अस्य लिंगस्य दर्शनात् ॥ तस्मान्मया कृतं नाम ह्येतस्य ऋणमोचनम् ॥
॥ १५ ॥ ॥ ईश्वर उवाच ॥ ॥ हिरण्यं मस्तके दत्त्वा यः स्नाति ऋणमोचने ॥ आत्मा वै तारितस्तेन दत्तं भवति गोशतम् ॥ १६ ॥ एव
मुक्त्वा स भगवांस्तत्रैवान्तरधीयत ॥ तस्मात्सर्वप्रयत्नेन तत्र श्राद्धं समाचरेत् ॥ पूजयेत्तन्महादेवि पितृलिंगं सुरप्रियम् ॥ १७ ॥ इति श्रीस्कांदे
महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्य ऋणमोचनमाहात्म्यवर्णनंनामैकविंशत्युत्तरद्विशततमो
ऽध्यायः ॥ २२१ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तत्रैव संस्थितं लिंगं रुक्मवत्या प्रतिष्ठितम् ॥ सर्वपापोपशमनं सर्वकामफलप्रदम् ॥ १ ॥
तत्र स्नात्वा महातीर्थे लिंगं संप्लाव्य यत्नतः ॥ विप्रेभ्यो दापयेद्वित्तं मुच्यते सर्वपातकैः ॥ २ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां
संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये रुक्मवतीश्वरमाहात्म्यवर्णनंनाम द्वाविंशत्युत्तरद्विशततमोऽध्यायः ॥ २२२ ॥ ॥ छ ॥
॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि लिंगं त्रैलोक्यपूजितम् ॥ गात्रोत्सर्गमिति ख्यातं तस्य दक्षिणतः स्थितम् ॥ १ ॥ यत्र गात्रं परित्यक्तं
बलभद्रेण धीमता ॥ अन्यैश्चैव महाभागैर्यादवैस्तत्र संयुगे ॥ २ ॥ यत्र ते यादवाः क्षीणा ब्रह्मशापबलाहिना ॥ एतत्पुरुषोत्तमं क्षेत्रं समन्ताद्धनुषां
शतम् ॥ ३ ॥ यत्र साक्षात्स्वयं देवि तिष्ठते पुरुषोत्तमः ॥ तदेव वैष्णवं क्षेत्रं कलौ पातकनाशनम् ॥ ४ ॥ रहस्यं परमं देवि तीर्थानां प्रवरं हि तत् ॥
पूर्वं कृतयुगे देवि प्रेततीर्थं च संस्मृतम् ॥ कलौ युगे तु संप्राप्ते गात्रोत्सर्गमिति त्वभूत् ॥ ५ ॥ ऋणमोचनपार्श्वे तु मध्ये तु पापमोचनात् ॥ एतन्म
ध्यं समाश्रित्य मृतः पापैर्विमुच्यते ॥ ६ ॥ तस्य किं वर्ण्यते देवि यत्रानन्तफलं महत् ॥ अश्वमेधसहस्रस्य फलं स्नात्वा ह्यवाप्यते ॥ ७ ॥ यत्राश्वत्थं
समासाद्य समाधिन्यस्तमानसः ॥ मुमोच दुस्त्यजान्प्राणान्ब्रह्मद्वारेण केशवः ॥ ८ ॥ तत्र नारायणं साक्षाद्धलभद्रं च रुक्मिणीम् ॥ पूजयित्वा

१ गात्रोच्छेदमिवाभवत्—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विधानेन मुच्यते पातकत्रयात् ॥ ९ ॥ तत्र स्नात्वा नरो भक्त्या यः संतर्पयते पितॄन् ॥ प्रेतत्वात्पितरो मुक्ता भवन्ति श्राद्धदायिनः ॥ १० ॥ गोघ्नः सुरापो दुर्मेधा ब्रह्महा गुरुतल्पगः ॥ तत्र स्नात्वा नरः सद्यो विपापः संप्रपद्यते ॥ ११ ॥ बाल्ये वयसि यत्पापं वार्द्धके यौवनेऽपि वा ॥ अज्ञानाज्ज्ञानतो वापि यः करोति नरः प्रिये ॥ तत्र स्नात्वा प्रमुच्येत तीर्थे गात्रप्रमोचने ॥ १२ ॥ तत्र पिण्डप्रदानेन पितॄणां जायते परा ॥ तृप्तिर्वर्षशतं यावदेतदाह पुरा हरिः ॥ १३ ॥ यः पुनश्चान्नदानं तु तत्र कुर्यात्समाहितः ॥ तस्यान्वयेऽपि देवेशि न प्रेतो जायते नरः ॥ १४ ॥ ॥ श्रीदेव्युवाच ॥ ॥ प्रेततीर्थमिति प्रोक्तं पश्चाद्गात्रविमोचनम् ॥ वद मे देवदेवेश प्रेततीर्थस्य कारणम् ॥ १५ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि प्रेततीर्थस्य कारणम् ॥ यच्छ्रुत्वा मानवो भक्त्या मुक्तः स्यात्सर्वकिल्बिषैः ॥ १६ ॥ पुराऽऽसीद्गौतमोनाम महर्षिः शंसितव्रतः ॥ भृगुकल्पात्समायातः क्षेत्रे प्राभासिके शुभे ॥ १७ ॥ अयने चोत्तरे पुण्ये श्रीसोमेशदिदृक्षया ॥ दृष्ट्वा सोमेश्वरं देवं स्नात्वा तीर्थेषु कृत्स्नशः ॥ १८ ॥ स गच्छंस्तीर्थयात्रायां गात्रोत्सर्गं[1] ततो गतः ॥ १९ ॥ अथासौ ब्राह्मणो देवि यावत्सीमामुपागतः ॥ तावद्विष्णुप्रियं तत्र ददृशे वैष्णवं वनम् ॥ २० ॥ पुरुषोत्तमनामाढ्यं क्षेत्रं च धनुषां शतम् ॥ तस्मिन्क्षेत्रे स चापश्यत्पंच प्रेतान्सुदारुणान् ॥ २१ ॥ महावृक्षसमारूढान्महाकायान्महोत्कटान् ॥ ऊर्ध्वकेशाञ्छंकुकर्णान्स्नायुनद्धकलेवरान् ॥ २२ ॥ विमांसरुधिरान्नग्नानथ कृष्णकलेवरान् ॥ दृष्ट्वाऽसौ भयसंत्रस्तो विनष्टोऽस्मीत्यचिन्तयत् ॥ २३ ॥ ध्यात्वाऽऽह सुचिरं कालं धैर्यमास्थाय यत्नतः ॥ के यूयं विकृताकारा दृष्टाः पूर्वं मया पुरा ॥ २४ ॥ न कदाचिद्यथा यूयं किमर्थं क्षेत्रमध्यतः ॥ धावमानाः सुदुःखार्ता एतन्मे कौतुकं महत् ॥ २५ ॥ ॥ प्रेता ऊचुः ॥ ॥ वयं प्रेता महाभाग दूरादिह समागताः ॥ श्रुत्वा तीर्थवरं पुण्यं प्रवेशं न लभामहे ॥ २६ ॥ गणैरंतर्धानगतैः प्रहारैर्जर्जरीकृताः ॥ लेखको रोहकश्चैव सूचकः शीघ्रगस्तथा ॥ २७ ॥ अहं पर्युषितोनाम पञ्चमः पापकृत्तमः ॥ २८ ॥ ॥ गौतम उवाच ॥ ॥ प्रेतयोनौ प्रवृत्तानां केन नामानि कृत्स्नशः ॥ युष्माकं निर्मितान्येवमेतन्मे कौतुकं महत् ॥ २९ ॥ ॥ प्रेता ऊचुः ॥ ॥ याचमानस्य विप्रस्य लिखत्येष धरातले ॥ नोत्तरं पठते किञ्चित्तेनासौ लेखकः स्मृतः ॥ ३० ॥ द्वितीयो ब्राह्मणभयात्प्रासादमधिरोहति ॥ ततोऽसौ रोहकाख्योऽभूच्छृणु विप्र तृतीयकम् ॥ ३१ ॥ सूचिता बहवोऽनेन ब्राह्मणा वित्तसंयुताः ॥ राज्ञे पापेन तेनासौ सूचको भुवि विश्रुतः ॥ ३२ ॥ ब्राह्मणैः प्रार्थ्यमानस्तु शीघ्रं धावति नित्यशः ॥

१ गात्रोच्छेदम्-इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



न कदाचिद्ददाति स्म तेनासौ शीघ्रगः स्मृतः ॥ ३३ ॥ मया कदन्नं दत्तं च पर्युषितं ब्राह्मणोत्तमे ॥ ब्राह्मणेभ्यः सदा दानं मिष्टा
न्नेन तु पोषणम् ॥ तस्मात्पर्युषितोनाम संजातोऽहं धरातले ॥ ३४ ॥ ॥ गौतम उवाच ॥ ॥ न विना भोजनेनैव वर्तन्ते प्राणिनो भुवि ॥
किमाहारा भवन्तो वै वदध्वं मम कौतुकात् ॥ ३५ ॥ ॥ प्रेता ऊचुः ॥ ॥ प्राप्ते भोजनकाले तु यत्र युद्धं प्रवर्तते ॥ तस्यान्नस्य रसं सर्वं
भुंजामो द्विजसत्तम ॥ ३६ ॥ नानुलिप्ते धरापृष्ठे यत्र भुंजन्ति मानवाः ॥ भ्रष्टशौचा द्विजश्रेष्ठ तदस्माकं तु भोजनम् ॥ ३७ ॥ अप्रक्षालितपादस्तु
यो भुंक्ते दक्षिणामुखः ॥ यो वेष्टितशिरा भुंक्ते प्रेता भुंजन्ति नित्यशः ॥ ३८ ॥ श्राद्धं संपश्यते श्वा चेन्नारी चैव रजस्वला ॥ अन्त्यजः शूकर
श्वान्नं तदस्माकं तु भोजनम् ॥ ३९ ॥ त्यक्त्वा क्रमागतं विप्रं पूजितं प्रपितामहैः ॥ यो दानं ददतेऽन्यस्मै तस्मै चाऽतुष्टचेतसा ॥ ४० ॥ तस्य
दानस्य यत्पुण्यं तदस्माकं प्रजायते ॥ यस्मिन्गृहे सदोच्छिष्टं सदा च कलहो भवेत् ॥ वैश्वदेवविहीने तु तत्र भुंजामहे वयम् ॥ ४१ ॥ ॥ गौतम
उवाच ॥ ॥ युष्माकं कीदृशे गेहे प्रवेशो न च विद्यते ॥ सत्यं वदत माऽसत्यं सत्यं साधुषु संगतम् ॥ ४२ ॥ ॥ प्रेता ऊचुः ॥ ॥ वैश्व
देवोद्भवा यत्र धूमवर्तिः प्रदृश्यते ॥ तस्मिन्गेहे न चास्माकं प्रवेशो विद्यते द्विज ॥ ४३ ॥ यस्मिन्गृहे प्रभाते तु क्रियते चोपलेपनम् ॥ विद्यते वेद
निर्घोषस्तत्रास्माकं न किंचन ॥ ४४ ॥ ॥ गौतम उवाच ॥ ॥ केन कर्मविपाकेन प्रेतत्वं व्रजते नरः ॥ एतन्मे विस्तरेणैव यथावद्वक्तु
मर्हथ ॥ ४५ ॥ ॥ प्रेता ऊचुः ॥ ॥ मृषाऽपहारिणो ये च ये चोच्छिष्टा व्रजन्ति च ॥ गोब्राह्मणहताश्चैव प्रेतत्वं ते व्रजन्ति हि ॥ ४६ ॥ पैशु
न्यनिरता ये च कूटसाक्ष्यरता नराः ॥ न्यायपक्षे न वर्तंते मृताः प्रेता भवंति ते ॥ ४७ ॥ श्लेष्ममूत्रपुरीषाणि ये क्षिपन्ति सरोवरे ॥ प्रेतत्वं ते
समासाद्य विचरंति च मानवाः ॥४८॥ दीयमानं तु विप्राणां गोषु विप्रातुरेषु च ॥ मा देहीति प्रजल्पन्तस्ते च प्रेता भवंति च ॥ ४९ ॥ शूद्रान्नेनोदर
स्थेन यदि विप्रो म्रियेत वै ॥ प्रेतत्वं यात्यसौ नूनं यद्यपि स्यात्षडंगवित् ॥ ५० ॥ यस्त्रीन्हले बलीवर्दान्वाहयेन्मदसंयुतः ॥ अमावास्यां विशेषेण
स प्रेतो जायते नरः ॥ ५१ ॥ नास्तिको निंदकः क्षुद्रो नित्यनैमित्त्यवर्जितः ॥ ब्राह्मणान्द्वेष्टि यो नूनं स प्रेतो जायते नरः ॥ ५२ ॥ विश्वासघात ॥१४५॥
को यस्तु ब्रह्महा स्त्रीवधे रतः ॥ गोघ्नो गुरुघ्नः पितृहा स प्रेतो जायते नरः॥५३॥ यस्य नैव प्रदत्तानि एकोद्दिष्टानि षोडश ॥ मृतस्य न वृषोत्सर्गः
स प्रेतो जायते नरः ॥ ५४ ॥ एतद्धि सर्वमाख्यातं यत्पृष्टाः स्म द्विजोत्तम ॥ भूयो ब्रूहि द्विजश्रेष्ठ यश्चास्ति तव संशयः ॥ ५५ ॥ ॥ गौतम
उवाच ॥ ॥ येन कर्मविपाकेन न प्रेतो जायते नरः ॥ तन्मे वदत निःशेषं कौतुकं मेऽत्र विद्यते ॥ ५६ ॥ ॥ प्रेता ऊचुः ॥ ॥ तीर्थयात्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रतो यस्तु देवार्चनपरायणः ॥ ब्राह्मणेषु सदा भक्तो न प्रेतो जायते नरः ॥ ५७ ॥ नित्यं शृणोति शास्त्राणि नित्यं सेवति पंडितान् ॥ वृद्धांस्तु पृच्छते नित्यं न स प्रेतो विजायते ॥ ५८ ॥ एतस्मात्कारणात्प्राप्ता वयं सर्वे सुदूरतः ॥ शक्नुमो प्रवेष्टुं च पुण्येऽस्मिन्क्षेत्र उत्तमे ॥ ५९ ॥ निर्विण्णाः प्रेतरूपेण तस्मात्त्वं द्विजसत्तम ॥ गतिर्भव महाभाग सर्वेषां नः प्रयत्नतः ॥ ६० ॥ ॥ गौतम उवाच ॥ ॥ कथं वो जायते मोक्षो वदध्वं कृत्स्नशो मम ॥ कृपयाविष्टचित्तोऽहं यतिष्ये नात्र संशयः ॥६१॥ ॥ प्रेता ऊचुः ॥ ॥ प्रभूतकालमस्माकं प्रेतत्वे तिष्ठतां विभो ॥ न त्वभ्येति पुमान्कश्चिदस्माकं यो गतिर्भवेत् ॥ ६२ ॥ तस्मात्त्वं देहि नः श्राद्धं गत्वा क्षेत्रं तु वैष्णवम् ॥ नामगोत्राणि चादाय मोक्षं यास्यामहे ततः ॥ ६३ ॥ ॥ ईश्वर उवाच ॥ ॥ ततोऽसौ ब्राह्मणो गत्वा दयाविष्टो हरेर्गृहम् ॥ श्राद्धं च प्रददौ तेषामेकैकस्य पृथक्पृथक् ॥ ६४ ॥ यस्ययस्य यदा श्राद्धं करोति द्विजसत्तमः ॥ स रात्रौ स्वप्न एत्यैनं दर्शने वाक्यमब्रवीत् ॥ ६५ ॥ प्रसादात्तव विप्रेन्द्र मुक्तोऽहं प्रेतयोनितः ॥ स्वस्ति तेऽस्तु गमिष्यामि विमानं मे ह्युपस्थितम् ॥ ६६ ॥ एवं संतारितास्तेन चत्वारस्ते द्विजोत्तमाः ॥ ६७ ॥ अथासौ ब्राह्मणश्रेष्ठः संप्राप्ते पञ्चमे दिने ॥ प्रददौ विधि पूर्वं तु श्राद्धं पर्युषितस्य च ॥ ६८ ॥ अथापश्यत स्वप्नान्ते प्राप्तं पर्युषितं नरम् ॥ दीनवाक्यं परिक्लिष्टं निःश्वसन्तं मुहुर्मुहुः ॥ ६९ ॥ ॥ पर्युषित उवाच ॥ ॥ न मे जाता गतिर्विप्र मंदभाग्यस्य पापिनः ॥ मया हृतं तडागार्थं यद्वित्तं प्रगुणीकृतम् ॥ ७० ॥ ॥ गौतम उवाच ॥ ॥ कथं ते जायते मोक्षो वद शीघ्रमशेषतः ॥ करिष्ये नात्र संदेहो यद्यपि स्यात्सुदुर्लभम् ॥ ७१ ॥ ॥ पर्युषित उवाच ॥ ॥ अयने चोत्तरे प्राप्ते गत्वा तीर्थं हरिप्रियम् ॥ श्राद्धं त्वं देहि मे नूनं ततो गतिर्भविष्यति ॥ ७२ ॥ ॥ ईश्वर उवाच ॥ ॥ एवमुक्तः स विप्रेन्द्रस्तेन प्रेतेन वै मुनिः ॥ अयने चोत्तरे प्राप्ते गत्वा तीर्थं हरिप्रियम् ॥ प्रददौ विधिवच्छ्राद्धं ततः पर्युषिताय च ॥ ७३ ॥ ततः पर्युषितो रात्रौ स्वप्नान्ते वाक्यमब्रवीत् ॥ प्रसन्नवदनो भूत्वा दिव्यमाल्यवपुर्धरः ॥ ७४ ॥ ॥ पर्युषित उवाच ॥ ॥ मुक्तोऽहं त्वत्प्रसादेन प्रेतभावाद्द्विजोत्तम ॥ स्वस्ति तेऽस्तु गमिष्यामि विमानं मे ह्युपस्थितम् ॥ ७५ ॥ देवत्वं च मया प्राप्तं समर्थोऽहं द्विजोत्तम ॥ वरं ददामि ते विप्र गृहाण त्वं वरं शुभम् ॥ ७६ ॥ ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते तथा ॥ निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः ॥ ७७ ॥ ॥ गौतम उवाच ॥ ॥ यदि देयो वरोऽस्माकं समर्थोऽसि वरप्रद ॥ यत्र स्थाने मया दृष्टाः प्रेता यूयं सुदुःखिताः ॥ तत्राहं चाश्रमं कृत्वा करिष्ये चोत्तमं तपः ॥ ७८ ॥ निर्गतास्मि गृहं भूयो स्नात्वा तीर्थमिदं महत् ॥ तत्र यो मानवो भक्त्या पितॄनुद्दिश्य भक्तितः ॥ ७९ ॥ विधिवद्दास्यति श्राद्धं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





स्नात्वा संतर्प्य देवताः ॥ युष्मत्प्रसादतस्तस्य ह्यन्वयेऽपि कदाचन ॥ मा भूयात्प्रेतभावो हि अपि पापान्वितस्य भोः ॥ ८० ॥ ॥ पर्युषित उवाच ॥ ॥ गच्छ त्वं चाश्रमं तत्र कुरु ब्राह्मणसत्तम ॥ गमिष्यसि परां सिद्धिं लोके ख्यातिं गमिष्यसि ॥ ८१ ॥ तत्र ये मानवा भक्त्या श्राद्धं दास्यंति सत्तमाः ॥ पितॄणां ते विमानस्था यास्यंति त्रिदिवालयम् ॥ ८२ ॥ न तेषां वंशजः कश्चित्प्रेतत्वं च गमिष्यति ॥ प्राहुः सप्तपदीं मैत्रीं पंडिताः स्थिरबुद्धयः ॥ ८३ ॥ मित्रतां तु पुरस्कृत्य किं तद्वक्ष्यामि तच्छृणु ॥ तवाश्रमपदं पुण्यं भविष्यति महीतले ॥ ८४ ॥ सर्वपापप्रशमनं सर्वदुःखविनाशनम् ॥ मन्नाम्ना ख्यातिमायातु प्रेततीर्थमिति प्रभो ॥ ८५ ॥ ॥ ईश्वर उवाच ॥ ॥ तं तथेति प्रतिज्ञाय गतस्तत्र द्विजोत्तमः ॥ यथा वेदोक्तमार्गेण सर्वं कृत्यं चकार सः ॥ ८६ ॥ सोऽपि स्वर्गमनुप्राप्तो हृष्टः पर्युषितः प्रिये ॥ एतत्सर्वं पुरावृत्तं स्थानेऽस्मिन्गात्रमोचने ॥ ८७ ॥ यः शृणोति नरः सम्यक्सर्वपापैः स मुच्यते ॥ शयनोत्थापने योगे यः पश्येत्पुरुषोत्तमम् ॥ गात्रोत्सर्गे तु गत्वाऽसौ यज्ञायुतफलं लभेत् ॥ ८८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये पुरुषोत्तमतीर्थप्रेततीर्थमाहात्म्यवर्णनंनाम त्रयोविंशत्युत्तरद्विशततमोऽध्यायः ॥ २२३ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि लिंगमिंद्रप्रतिष्ठितम् ॥ पापमोचननामाढ्यं दक्षिणे पुरुषोत्तमात् ॥ १ ॥ वृत्रं हत्वा पुरा शक्रो ब्रह्महत्यासमन्वितः ॥ अब्रवीत्स ऋषीन्दिव्यान्कथमेषा गमिष्यति ॥ २ ॥ ब्रह्महत्या हि दुष्प्रेक्ष्या विवर्णजननी मम ॥ दुर्गंधचारिणी चैव सर्वतेजोविनाशिनी ॥ ३ ॥ अथोचुस्तं सुरगणा नारदाद्या महर्षयः ॥ प्रभासं गच्छ देवेश क्षेत्रं पापहरं हि तव ॥ ४ ॥ तत्राराध्य महादेवं मोक्ष्यसे ब्रह्महत्यया ॥ स तथेति प्रतिज्ञाय गतस्तत्र वरानने ॥ ५ ॥ लिंगं संस्थापयामास देवदेवस्य शूलिनः ॥ तस्य पूजारतो नित्यं धूपगंधानुलेपनैः ॥ ६ ॥ ततोऽस्य गात्रदौर्गंध्यं नाशमाश्वभ्यगच्छत ॥ विवर्णत्वं गतं सर्वं वपुश्चाभूत्तथोत्तमम् ॥ ७ ॥ अथ हृष्टमना भूत्वा वाक्यमेतदुवाच ह ॥ तत्रागत्य नरो भक्त्या यश्चैनं पूजयिष्यति ॥ ८ ॥ ब्रह्महत्यादिकं पापं नाशं तस्य प्रयास्यति ॥ एवमुक्त्वा सहस्राक्षः प्रहृष्टस्त्रिदिवं ययौ ॥ ९ ॥ ब्रह्महत्याविनिर्मुक्तः पूज्यमानो दिवौकसैः ॥ गोदानं तत्र दातव्यं ब्राह्मणे वेदपारगे ॥ ब्रह्महत्यापनोदार्थं तत्र श्राद्धं समाचरेत् ॥ १० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्य इन्द्रेश्वरमाहात्म्यवर्णनंनाम चतुर्विंशत्युत्तरद्विशततमोऽध्यायः ॥ २२४ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि देवं चाऽनरकेश्वरम् ॥ तस्मादुत्तरदिग्भागे सर्वपातकनाशनम् ॥ तन्माहात्म्यं प्रवक्ष्यामि शृणु ह्येकमनाः प्रिये ॥ १ ॥ मथुरानाम विख्याता नगरी धरणीतले ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र विप्रोऽभवत्पूर्वं देवशर्मेति विश्रुतः ॥ अगस्त्यगोत्रो विद्वान्वै स तु दारिद्र्यपीडितः ॥ २ ॥ अथापरोऽभवत्तत्र तादृग्रूपवयोऽन्वितः ॥ तन्नाम
गोत्रो देवेशि ब्राह्मणो वेदपारगः ॥ ३ ॥ अथ प्राह यमो दूतं रौद्रमूर्धशिरोरुहम् ॥ गच्छ भो मथुरां शीघ्रं देवशर्माणमानय ॥ ४ ॥ अथागत्य ततो
दूतो गृहीत्वा तत्र वै गतः ॥ तं दृष्ट्वाऽथ यमो नत्वा प्राह दूतं क्रुधान्वितः ॥ ५ ॥ नायमानेतुमादिष्टो देवशर्मा मया तव ॥ अन्योस्ति देवशर्मा यस्त
मानय गतायुषम् ॥ एनं विप्रं च दीर्घायुं नय तत्राविलंबितम् ॥ ६ ॥ ॥ ईश्वर उवाच ॥ ॥ अथाब्रवीद्ब्राह्मणो वै नाहं यास्ये गृहं विभो ॥
दारिद्र्येणातिनिर्विण्णो यावज्जीवं सुरेश्वर ॥ इहैव क्षपयिष्यामि शेषमायुस्तवांतिके ॥ ७ ॥ ॥ यम उवाच ॥ ॥ अकाले नात्र
चायाति कश्चिद्ब्राह्मणसत्तम ॥ मुहूर्तमपि नो जीवेत्पूर्णकालेन वै भुवि ॥ ८ ॥ अत एव हि मे नाम धर्मराजेति विश्रुतम् ॥ ९ ॥
न मे सुहृन्न मे द्वेष्यः कश्चिदस्ति धरातले ॥ विद्धः शरशतेनापि नाऽकाले म्रियते यतः ॥ १० ॥ कुशाग्रेणापि विद्धः सन्काले
पूर्णे न जीवति ॥ तस्माद्गच्छ द्विजश्रेष्ठ यावद्गात्रं न दह्यते ॥ ११ ॥ अथाब्रवीद्ब्राह्मणोऽसौ यदि प्रेषयसे प्रभो ॥ प्रश्नमेकं मया
पृष्टो यथावद्वक्तुमर्हसि ॥ १२ ॥ न वृथा जायते देव साधूनां दर्शनं क्वचित् ॥ युष्माकं च विशेषेण तस्मादेतद्ब्रवीम्यहम् ॥ १३ ॥
एते ये नरका रौद्रा दृश्यन्ते च सुदारुणाः ॥ कर्मणा केन कं गच्छेन्मानवो नरकं यम ॥ १४ ॥ कतिसंख्याः स्युरेते च नरकाः किंप्रमाणतः ॥ एत
त्सर्वं सुरश्रेष्ठ यथावद्वक्तुमर्हसि ॥ १५ ॥ ॥ यम उवाच ॥ ॥ शृणु देव प्रवक्ष्यामि यावन्तो नरकाः स्थिताः ॥ कर्मणा येन गच्छेत मानवो
द्विजसत्तम ॥ एकविंशत्समाख्याता नरका मम मन्दिरे ॥ १६ ॥ यानेतान्प्रेक्षसे विप्र यंत्र मध्ये व्यवस्थितान् ॥ पीड्यमानान्किंकरैर्मे कृतघ्नान्पा
पसंयुतान् ॥ १७ ॥ लोहास्यवायसा येषां नेत्रोद्धारं प्रकुर्वते ॥ एतैर्निरीक्षितान्येव कलत्राणि दुरात्मभिः ॥ १८ ॥ परेषां द्विजशार्दूल सरागैः पापि
भिः सदा ॥ कुम्भीपाकगतानेतानथ पश्यसि पापिनः ॥ १९ ॥ कूटसाक्ष्यरता ह्येते कटुवाङ्गिरतास्तथा ॥ एते लोहमयान्स्तम्भान्संतप्तान्पावकप्र
भान् ॥ २० ॥ आलिंगंति दुरात्मानः परदाररतास्तु ये ॥ एते वैतरणीमध्ये पूयशोणितसंकुले ॥ २१ ॥ ये तिष्ठंति द्विजश्रेष्ठ सर्वे विश्वासघातकाः ॥
असिपत्रवने घोरे भिद्यन्ते ये तु खण्डशः ॥ ते नष्टाः स्वामिनं त्यक्त्वा संग्रामे समुपस्थिते ॥ २२ ॥ अंगारराशीन्वै दीप्तान्ये गाहन्ते नराधमाः ॥
स्वामिद्रोहरता ह्येते तथा हेतुप्रवादकाः ॥ २३ ॥ लोहशंकुभिराकीर्णमाक्रमन्ति नराधमाः ॥ क्रन्दमाना द्विजश्रेष्ठ उपानद्दानवर्जिताः ॥ २४ ॥
अधोमुखा निबद्धा ये वृक्षाग्रे पावकोपरि ॥ ब्रह्महत्यान्विताः सर्व एते चैव नराधमाः ॥ २५ ॥ मशकैर्मत्कुणैः काकैर्ये भक्ष्यंते विहंगमैः ॥ व्रत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



भंगरता ह्येते व्रतिनां चैव हिंसकाः ॥ २६ ॥ कुठारकण्ठिता ह्येते भूयः संति तथाविधाः ॥ गोहन्तारो दुरात्मानो देवब्राह्मणनिंदकाः ॥ २७ ॥
ये भक्ष्यंते शृगालैश्च वृकैर्लोहमयैर्मुखैः ॥ परस्वानां च हर्तारः परस्त्रीणां च हर्तृकाः ॥ आत्ममांसानि ये पापा भक्षयंति बुभुक्षिताः ॥
॥ २८ ॥ न दत्तमन्नमेतैस्तु कदाचिद्वै द्विजोत्तम ॥ रुधिरं ये पिबंत्येते वसापूयपरिप्लुतम् ॥ ब्राह्मणानां विनाशाय गवामेते सदा स्थिताः ॥
॥ २९ ॥ कूटशाल्मलिबद्धाश्च तीक्ष्णकण्टकपीडिताः ॥ छिद्रान्वेषणसंयुक्ताः परेषां नित्यसंस्थिताः ॥ ३० ॥ क्रकचेन तु छिद्यन्ते य इमे
द्विजसत्तम ॥ अभक्ष्यनिरता ह्येते स्वधर्मस्य विदूषकाः ॥ ३१ ॥ कन्याविक्रयकर्त्तारः कन्यानां जीवभंजकाः[1] ॥ पुरीषमध्यगा[2] ह्येते
पच्यंते मम किंकरैः ॥ ३२ ॥ संदंशैर्दारुणैर्जिह्वा येषामुत्पाट्यते मुहुः ॥ वाग्लोपनिरता ह्येते मृषावादपरायणाः ॥ ३३ ॥ ये शीतेन प्रबाध्यंते वेप
माना मुहुर्मुहुः ॥ देवस्वानां च हर्तारो ब्राह्मणानां विशेषतः ॥ ३४ ॥ तेषां शिरसि निक्षिप्तो भूरिभारो द्विजोत्तम ॥ अतोऽमी ब्राह्मणश्रेष्ठ पूत्का
रयन्ति भैरवम् ॥ ३५ ॥ ॥ यम उवाच ॥ ॥ एवमेतत्समाख्यातं तव सर्वं द्विजोत्तम ॥ नरकाणां स्वरूपं तु कर्मणां वै यथाक्रमम् ॥ ३६ ॥
गच्छ शीघ्रं महाभाग यावत्कायो न दह्यते ॥ ३७ ॥ ॥ ब्राह्मण उवाच ॥ ॥ कथय त्वं सुरश्रेष्ठ मम सर्वं समाहितः ॥ न गच्छेत्कर्मणा येन
नरकं मानवः क्वचित् ॥ ३८ ॥ सतां सप्तपदं मैत्रमित्याहुर्बुद्धिकोविदाः ॥ मित्रतां च पुरस्कृत्य समासाद्वक्तुमर्हसि ॥ ३९ ॥ ॥ यम उवाच ॥ ॥
प्रभासं क्षेत्रमासाद्यानरकेश्वरमुत्तमम् ॥ यः पश्यति नरो भक्त्या नरकं स न पश्यति ॥ ४० ॥ स्थापितं यन्मया लिंगं शिवभक्त्या युतेन च ॥ एत
द्गुह्यं मया प्रोक्तं तव प्रीत्यै द्विजोत्तम ॥ ४१ ॥ गोपनीयं प्रयत्नेन मम वाक्यादसंशयम् ॥ एवमुक्तस्तदा विप्रः स्वयमेवावनिं ययौ ॥ ४२ ॥
लब्ध्वा कलेवरं सोऽथ विस्मयं परमं गतः ॥ तत्स्मृत्वा वचनं सर्वं धर्मराजस्य धीमतः ॥ ४३ ॥ गत्वा तत्र स नित्यं वै पूजयामास तं प्रभुम् ॥
यावज्जीवं वरारोहे ततः सिद्धिं परां गतः ॥ ४४ ॥ तस्मात्सर्वप्रयत्नेन भक्त्या तमवलोकयन् ॥ अपि पातकयुक्तोऽपि न याति नरके नरः ॥ ४५ ॥
आश्वयुक्कृष्णपक्षे तु चतुर्दश्यां विधानतः ॥ यस्तत्र कुरुते श्राद्धं सोऽश्वमेधफलं लभेत् ॥ ४६ ॥ कृष्णाजिनं तत्र देयं ब्राह्मणे वेदपारगे ॥ याव
त्तिलानां संख्यानं तावत्स्वर्गे महीयते ॥ ४७ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्र
माहात्म्ये ऽनरकेश्वरमाहात्म्यवर्णनंनाम पञ्चविंशत्युत्तरद्विशततमोऽध्यायः ॥ २२५ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्यैव पूर्वभागे



१ कन्यानां चैव भंजकाः—इ०, कन्यानां गुदभञ्जकाः—इ० च पा० । २ कारीषमध्यगाः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तु नैर्ऋते पापमोचनात् ॥ मेघेश्वरेति विख्यातं सर्वपातकनाशनम् ॥ १ ॥ अनावृष्टिभये जाते शांतिं तत्रैव कारयेत् ॥ वारुणीं विप्रमुख्यैस्तु भावये दुदकैर्महीम् ॥ २ ॥ मेघैः प्रतिष्ठितं लिंगं यत्र नित्यं प्रपूज्यते ॥ अनावृष्टिभयं किंचिन्न च तत्र प्रजायते ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये मेघेश्वरमाहात्म्यवर्णनंनाम षड्विंशत्युत्तरद्विशततमोऽध्यायः ॥ २२६ ॥ छ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि बलभद्रप्रतिष्ठितम् ॥ लिंगं महापापहरं गात्रोत्सर्गात्तदुत्तरे ॥ १ ॥ महालिंगं महादेवि महासिद्धिफलप्रदम् ॥ बलभद्रेण विधिना स्थापितं पापशुद्धये ॥ २ ॥ यस्तं पूजयते भक्त्या गन्धपुष्पादिभिः क्रमात् ॥ तृतीयारेवतीयोगे स योगेशपदं लभेत् ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये बलभद्रेश्वरमाहात्म्यवर्णनंनाम सप्तविंशत्युत्तरद्विशततमोऽध्यायः ॥ २२७ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि मातृस्थानमनुत्तमम् ॥ भैरवेशेति विख्यातं सर्वभयविनाशनम् ॥ १ ॥ चतुर्दश्यां विधानेन कृष्णपक्षे यतात्मवान् ॥ पूजयेद्गन्धपुष्पैश्च बलिदानैस्तथोत्तमैः ॥ २ ॥ तं पुत्रमिव योगिन्यो रक्षंति भुवि मातरः ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये भैरवेश्वरमातृगणमाहात्म्यवर्णनंनामाष्टाविंशत्युत्तरद्विशततमोऽध्यायः ॥ २२८ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि गंगां त्रिपथगामिनीम् ॥ अनरकेशतो देवि ऐशान्यां दिशि संस्थिताम् ॥ १ ॥ स्वयंभूतां धरामध्यादानीतां विष्णुना पुरा ॥ यादशानां तु मुक्त्यर्थं सर्वपापोपशान्तये ॥ २ ॥ यस्तत्र कुरुते स्नानं कथंचित्पुण्यसंचयात् ॥ श्राद्धं चैव विधानेन न स शोचेत्कृताकृते ॥ ३ ॥ ब्रह्माण्डं सकलं दत्त्वा यत्पुण्यफलमाप्नुयात् ॥ तत्पुण्यं प्राप्नुयाद्देवि कार्तिक्यां जाह्नवीजले ॥ ४ ॥ कलौ युगे तु संप्राप्ते दुर्लभं तत्र दर्शनम् ॥ किं पुनः स्नानदानं तु प्रभासे जाह्नवीजले ॥ ५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये गंगामाहात्म्यवर्णनंनामैकोनत्रिंशदुत्तरद्विशततमोऽध्यायः ॥ २२९ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि देवं गणपतिप्रियम् ॥ तत्रैव संस्थितं सम्यङ्मया तत्र नियोजितः ॥ १ ॥ गङ्गाया दक्षिणे देवि क्षेत्ररक्षणतत्परः ॥ माघे कृष्णचतुर्दश्यां यस्तं पूजयते

१ योगेशफलम्–इ० पा० । २ सर्वभयविनाशनम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





नरः ॥ २ ॥ दिव्यमोदकनैवेद्यैः पुष्पधूपादिभिः क्रमात् ॥ न तस्य जायते विघ्नं यावत्क्षेत्रे वसत्यसौ ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये गणपतिमाहात्म्यवर्णनंनाम त्रिंशदुत्तरद्विशततमोऽध्यायः ॥ २३० ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि यत्र जांबवती नदी ॥ पुरा जांबवतीनाम विष्णोर्या महिषी प्रिया ॥ अपृच्छदर्जुनं साध्वी वद वार्तां कुरूद्वह ॥ १ ॥ तस्यास्तद्वचनं श्रुत्वा अर्जुनो निश्वसन्मुहुः ॥ बाष्पगद्गदया वाचा इदं वचनमब्रवीत् ॥ २ ॥ परित्यक्ता वयं भद्रे यादवैः सुमहात्मभिः ॥ बलदेवस्य वीरस्य सात्यकेश्च महात्मनः ॥ ३ ॥ अन्येषां यदुवीराणां पापकर्मातिनिर्घृणः ॥ जिजीविषुरिह प्राप्तो वासुदेवनिराकृतः ॥ ४ ॥ सा श्रुत्वा भर्तृनिधनमर्जुनाच्च महासती ॥ गंगातीरे समुत्पाद्य पावकं पावकप्रभा ॥ समुत्सृज्य महाकायं नदीभूत्वा विनिर्ययौ ॥ ५ ॥ सा गृहीत्वा सती भर्तुर्भस्म सर्वं चितेस्तथा ॥ प्रविष्टा सागरं देवि तदा जांबवती शुभा ॥६॥ या नारी तत्र देवेशि भक्त्या स्नानं समाचरेत् ॥ तदन्वयेपि काचित्स्त्री न वैधव्यमवाप्नुयात् ॥ ७ ॥ तस्मात्सर्वप्रयत्नेन तत्र स्नानं समाचरेत् ॥ नरो वा यदि वा नारी प्राप्नोति परमां गतिम् ॥ ८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये जांबवतीनदीमाहात्म्यवर्णनंनामैकत्रिंशदुत्तरद्विशततमोऽध्यायः ॥ २३१ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि कूपं त्रैलोक्यपूजितम् ॥ पश्चिमे तस्य तीर्थस्य पांडवानां महात्मनाम् ॥ १ ॥ यदाऽरण्यमनुप्राप्ताः पांडवाः पृथिवीतले ॥ भ्रममाणा महादेवि प्रभासं क्षेत्रमागताः ॥ २ ॥ ततस्ते न्यवसंस्तत्र किंचित्कालं समाहिताः ॥ गत्वा क्षेत्रं महापुण्यं ततः कृष्णाऽब्रवीदिदम् ॥ ३ ॥ ब्राह्मणानां सहस्राणि भुंजते भवतां गृहे ॥ दूरे जलाश्रयश्चैव न तावं तश्च किंकराः ॥ ४ ॥ तस्माज्जलाश्रयः कार्य आश्रमस्य समीपतः ॥ यत्र स्नानं करिष्यामि युष्माकं संप्रसादतः ॥ ५ ॥ ततस्तु पांडवाः सर्वे सहितास्ते वरानने ॥ अखनंस्तत्र ते कूपं द्रौपदीवाक्यप्रेरिताः ॥ ६ ॥ अथाजगाम तत्रैव भगवान्देवकीसुतः ॥ श्रुत्वा समागतान्पार्थान्द्वारावत्याः सबांधवः ॥ ७ ॥ प्रद्युम्नेन च सांबेन गदेन निषधेन च ॥ युयुधानेन रामेण चारुदेष्णेन धीमता ॥ ८ ॥ अन्यैः परिवृतः शूरैर्यादवैर्युद्धदुर्मदैः ॥ ते समेत्य यथान्यायं समस्ता यदुपुंगवाः ॥ ९ ॥ ततः कथावसाने च कस्मिंश्चित्कारणांतरे ॥ वासुदेवः पांडुसुतमिदं वचनमब्रवीत् ॥ ॥ १० ॥ युधिष्ठिर महाबाहो किं ते कामं करोम्यहम् ॥ राज्यं धान्यं धनं चापि अथवा रिपुनाशनम् ॥ ११ ॥ ॥ युधिष्ठिर उवाच ॥ ॥



१ कुरुद्विप–इ० पा० । २ कृष्णा–द्रौपदी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शक्तस्त्वं यादवश्रेष्ठ सर्वकर्मस्वसंशयः ॥ प्रतिज्ञातं त्वया पूर्वं वर्षैर्द्वादशभिः प्रियम् ॥ १२ ॥ तन्नास्ति त्रिषु लोकेषु यन्न सिद्ध्यति भूतले ॥ त्वयि तुष्टे जगन्नाथ सर्वदेवनमस्कृते ॥ १३ ॥ अवश्यं यदि तुष्टोऽसि मम सर्वजगत्पते ॥ अत्र सांनिध्यमागच्छ कूपे नित्यं जनार्दन ॥ १४ ॥ अत्रागत्य नरो यस्तु भक्त्या स्नानं समाचरेत् ॥ स यातु वैष्णवं स्थानं प्रसादात्तव केशव ॥ १५ ॥ ॥ ईश्वर उवाच ॥ ॥ एवं भविष्यतीत्युक्त्वा तदाऽमंत्र्य युधिष्ठिरम् ॥ प्रययौ द्वारकां कृष्णः सर्वलोकनमस्कृतः ॥ १६ ॥ तस्मिञ्छ्राद्धं नरः कृत्वा वाजिमेधफलं लभेत् ॥ प्रसादाद्देवदेवस्य विष्णोरमिततेजसः ॥ १७ ॥ तदर्धं तर्पणेनैव स्नानात्पादमवाप्नुयात् ॥ तस्मात्सर्वप्रयत्नेन तत्र श्राद्धं समाचरेत् ॥ १८ ॥ ज्येष्ठस्य पौर्णमास्यां यः स्नानं श्राद्धं करिष्यति ॥ सावित्रीं चैव संपूज्य स यास्यति परमं पदम् ॥ १९ ॥ गोदानं तत्र देयं तु सम्यग्यात्रा[1]फलेप्सुभिः ॥२०॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये पांडवकूपमाहात्म्यवर्णनंनाम द्वात्रिंशदुत्तरद्विशततमोऽध्यायः ॥ ॥ २३२ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तत्रैव पूजयेद्देवि पंच लिंगानि भावितः ॥ प्रतिष्ठितानि देवेशि पांडवैश्च महात्मभिः ॥ १ ॥ यस्तान्पूजयते भक्त्या स मुक्तः पातकैर्भवेत् ॥ २ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये पांडवेश्वरमाहात्म्यवर्णनंनाम त्रयस्त्रिंशदुत्तरद्विशततमोऽध्यायः ॥ २३३ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि तीर्थं त्रैलोक्यविश्रुतम् ॥ दशाश्वमेधिकंनाम महापातकनाशनम् ॥ १ ॥ वाजिमेधैः पुरा चेष्टं दशभिस्तत्र भामिनि ॥ भरतेन समागत्य मत्वा क्षेत्रमनुत्तमम् ॥ २ ॥ तत्र तृप्तः सहस्राक्षः सोमनाथेन भामिनि ॥ कृपणाः खानपानैश्च दक्षिणाभिर्द्विजातयः ॥ ३ ॥ अथोचुस्त्रिदशाः सर्वे सुप्रीता भरतं नृपम् ॥ तुष्टास्तव महाबाहो यज्ञैः संतर्पिता वयम् ॥ वरं वृणीष्व राजेंद्र यत्ते मनसि वर्तते ॥ ४ ॥ ॥ राजोवाच ॥ ॥ अत्रागत्य नरो भक्त्या यः स्नानं कुरुते नरः ॥ दशानामश्वमेधानां स प्राप्नोतु फलं शुभम् ॥ ५ ॥ ॥ देवा ऊचुः ॥ ॥ दशानामश्वमेधानां श्रद्धया फलमाप्स्यति ॥ दशाश्वमेधिकंनाम तीर्थमेतन्महीतले ॥ ख्यातिं यास्यति राजेंद्र नात्र कार्या विचारणा ॥ ६ ॥ ॥ ईश्वर उवाच ॥ ॥ ततः प्रभृति तत्तीर्थं प्रख्यातं धरणीतले ॥ दशाश्वमेधिकं[2]मिति सर्वपापप्रणाशनम् ॥ ७ ॥ ऐंद्रवारुणमाश्रित्य गोमुखादाऽऽश्वमेधिकम् ॥ अत्रांतरे महादेवि शिवक्षेत्रं विदुर्बुधाः ॥ ८ ॥ सर्वपापहरं दिव्यं स्वर्गसोपानसंनिभम् ॥ सपादकोटितीर्थानां स्थानं तत्परि

१ सम्यग्यात्राफलं लभेत्—इ० पा० । २ दशाश्वमेधिकं पुण्यम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



कीर्त्तितम् ॥ ९ ॥ प्राणत्यागे कृते तत्र शिवलोके च मोदते ॥ तिर्यग्योनिगताः पापाः कीटपक्षिमृगादयः ॥ १० ॥ तेऽपि यांति परं स्थानं यत्र देवो महेश्वरः ॥ तिलोदकप्रदानेन मातृकाः पैतृकास्तथा ॥ ११ ॥ पितरस्तस्य तृप्यंति यावदाभूतसंप्लवम् ॥ तत्रेष्टा ब्रह्मणा पूर्वमसंख्याता मखोत्तमाः ॥ १२ ॥ शक्रश्च देवराजत्वं तत्रेष्ट्वा समवाप्तवान् ॥ कार्त्तवीर्येण तत्रैव कृतं यज्ञशतं पुरा ॥ १३ ॥ एवं तत्प्रवरं स्थानं क्षेत्रगर्भांतिकं प्रिये ॥ मृतानां तत्र जंतूनामपुनर्भवदायकम् ॥ १४ ॥ वृषोत्सर्गं तु यस्तत्र कुर्याद्वै भावितात्मवान् ॥ यावंति वृषरोमाणि तावत्स्वर्गे महीयते ॥ १५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये दशाश्वमेधमाहात्म्यवर्णनंनाम चतुस्त्रिंशदुत्तरद्विशततमोऽध्यायः ॥ २३४ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तत्रैव संस्थितं पश्येल्लिंगत्रयमनुत्तमम् ॥ शतमेधं सहस्रमेधं कोटिमेधमिति क्रमात् ॥ १ ॥ दक्षिणे शतमेधं तु शतयज्ञफलप्रदम् ॥ कार्तवीर्येण तत्रैव कृतं यज्ञशतं पुरा ॥ २ ॥ प्रतिष्ठाप्य महालिंगं सर्वपातकनाशनम् ॥ मध्यभागेऽत्र यल्लिंगं कोटिमेधेति विश्रुतम् ॥ ३ ॥ तत्रेष्टा ब्रह्मणा पूर्वं कोटिसंख्या मखोत्तमाः ॥ संस्थाप्य तु महादेवं शंकरं लोकशंकरम् ॥ ४ ॥ तस्य उत्तरभागस्थं सहस्रक्रतुसंज्ञकम् ॥ शक्रश्च देवराजोऽपि सहस्रं यष्टवान्क्रतून् ॥ ५ ॥ प्रतिष्ठाप्य महालिंगं देवानामादिदैवतम् ॥ गंधपुष्पादिविधिना पंचामृतरसोदकैः ॥ ६ ॥ स प्राप्नुयात्फलं देवि लिंगनामोद्भवं क्रमात् ॥ गोदानं तत्र देयं तु सम्यग्यात्राफलेप्सुभिः ॥७॥ दशलक्षाणि तीर्थानां तत्र तिष्ठंति भामिनि ॥ लिंगत्रयं तथा मध्ये सर्वपातकनाशनम् ॥ ॥ ८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये दशाश्वमेधमाहात्म्ये शतमेधादिलिंगत्रयमाहात्म्यवर्णनंनाम पञ्चत्रिंशदुत्तरद्विशततमोऽध्यायः ॥ २३५ ॥ ॥ छ ॥ ॥ ततो गच्छेन्महादेवि दुर्वासादित्यमुत्तमम् ॥ यत्र दुर्वाससा तप्तं तपो वर्षसहस्रकम् ॥ निराहारो जिताहारः सूर्याराधनतत्परः ॥ १ ॥ एवं कालेन महता दिव्यतेजा जनाधिपः[1] ॥ प्रत्यक्षं दर्शनं गत्वा प्राह सूर्यो महामुनिम् ॥ २ ॥ ॥ सूर्य उवाच ॥ ॥ मा ब्रह्मन्साहसं कार्षीर्वरं वरय सुव्रत ॥ अप्राप्यमपि[2] दास्यामि यत्ते मनसि वर्तते ॥ ३ ॥ ॥ ॥ दुर्वासा उवाच ॥ ॥ प्रसन्नो यदि मे देव वरार्हो यदि चाऽप्यहम् ॥ अत्र स्थाने त्वया स्थेयं यावत्तिष्ठति मेदिनी ॥ ४ ॥ दुर्वासादित्यनामाऽत्र लोके ख्यातिं च गच्छतु ॥ मया प्रतिष्ठिता या तु प्रतिमा तव सुन्दरी ॥ ५ ॥ तस्यां सांनिध्यमेवास्तु तव देव जगत्पते ॥ सांनिध्यं कुरुतां

१ जनाधिपः—सकलजनपालकः—इति, जनलोकाधिपः—इति वाऽर्थः । २ असाध्यम्--इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चात्र यमुना दुहिता तव ॥ त्वत्सुतस्तु महातेजा धर्मराजो महाबलः ॥ ६ ॥ ॥ सूर्य उवाच ॥ ॥ एतत्सर्वं मुनिश्रेष्ठ त्वयोक्तं संभविष्यति ॥
तीर्थानां कोटिरन्या च गंगादीनां महामुने ॥ ७ ॥ आगमिष्यति ते स्थानं निश्चितं वचनान्मम ॥ अत्र स्थाने मया ब्रह्मन्स्थातव्यं सह दैवतैः ॥
॥ ८ ॥ आदित्यानां प्रभावैस्तु ब्रह्मांडोदरवासिनाम् ॥ तेषां माहात्म्यसंयुक्तः स्थास्ये चात्र महामुने ॥ ९ ॥ सवितॄणां सहस्रेण दृष्टेनैव तु यत्फल
म् ॥ तत्फलं कोटिगुणितं दुर्वासादित्यदर्शनात् ॥१०॥ लप्स्यंते प्राणिनः सर्वे यज्ञकोटिफलं तथा ॥ एवमुक्त्वा तदा सूर्यः सस्मार तनयां निजाम् ॥
तथा च धर्मराजानं सर्वप्राणिनियामकम् ॥ ११ ॥ स्मृतमात्रा तत्र भित्त्वा पातालतलमुद्ययौ ॥ सा नदीरूपिणी देवी तीर्थकोटिसमन्विता ॥१२॥
यमश्च तत्र भगवान्कालदंडधरस्तदा ॥ ऊचतुः प्रणयोपेतौ सूर्यं भुवनसाक्षिणम् ॥ १३ ॥ ॥ यम उवाच ॥ ॥ आज्ञापयतु मां देवो यमुनां
च जगत्प्रभुः ॥ कार्यं यद्भाविनोऽर्थस्य तत्करिष्ये न संशयः ॥१४॥ ॥ सूत उवाच ॥ ॥ अत्र क्षेत्रे स्वरूपेण स्थातव्यं वचनान्मम ॥ पापिनां
प्राणिनां चात्र रक्षा कार्या प्रयत्नतः ॥ १५ ॥ सूर्यभक्ताः सदा रक्ष्या ब्राह्मणा गृहमेधिनः ॥ त्वं चापि यमुने चात्र कोटितीर्थेन संयुता ॥ १६ ॥
वस त्वं भव सुप्रीता स्थाने दुर्वाससोद्भवे ॥ इत्येवमुक्त्वा देवेशस्तत्र दुर्वाससोंऽतिके ॥१७॥ पश्यतां सर्वदेवानामंतर्द्धानमगात्प्रभुः ॥ दुर्वासास्तु तदा
दृष्टो यावत्पश्यति स्वाश्रमम् ॥१८॥ तावत्पातालमार्गेण यमुना प्रादुराभवत् ॥ यमश्च भगवांस्तत्र दृष्टः क्षेत्रपरूपधृक् ॥१९॥ ॥ ईश्वर उवाच ॥ ॥
इत्थं समभवत्तत्र यमुनोद्भेदमुत्तमम्[1] ॥ कुण्डमादित्यतो याम्ये दुंदुभिस्तत्र पूर्वतः ॥ २० ॥ क्षेत्रपालो महादेवि यतो दुंदुभिनिःस्वनः ॥ तत्र स्नात्वा
महाकुण्डे यः संतर्पयते पितॄन् ॥ २१ ॥ दश वर्षाणि पञ्चैव तृप्तिं यांति पितामहः ॥ पिंडदानेन दत्तेन पितॄणां तुष्टिमावहेत् ॥ नरके तु स्थितानां
च मुक्तिर्भूयान्न संशयः ॥२२॥ माघे मासि सिते पक्षे सप्तम्यां संयतात्मवान् ॥ दुर्वासार्कं च संपूज्य मुच्यते ब्रह्महत्यया ॥ २३ ॥ स्नात्वा तु यमुना
कुण्डे माधवे मासि मानवः ॥ पूजयेद्भक्तिभावेन रविं गगनभूषणम् ॥ २४ ॥ पठेत्सहस्रं नाम्नां तु दुर्वासादित्यसंनिधौ ॥ षण्मासान्मुच्यते जंतु
र्यद्यपि ब्रह्महा नरः ॥ २५ ॥ सर्वमंगलमांगल्यं सर्वपापप्रणाशनम् ॥ दुर्वासादित्यनामानं सूर्यं को नु न पूजयेत् ॥ २६ ॥ न तदस्ति भयं किंचि
द्यदनेन न शाम्यति ॥ दर्शनेनापि सूर्यस्य तत्र दुर्वाससः प्रिये ॥ २७ ॥ संपद्यंते तथा कामाः सर्व एव यथेप्सिताः ॥ वंध्यानां पुत्रफलदं भीतानां
भयनाशनम् ॥ २८ ॥ भूतिप्रदं दरिद्राणां कुष्ठिनां परमौषधम् ॥ बालानां चैव सर्वेषां ग्रहरक्षोनिवारणम् ॥ महापापोपशमनं दुर्वासादित्यदर्श

१ यमुनोद्भवम्--इ० पा० । २ माधवे मानवः सदा--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



नम् ॥ २९ ॥ हेमाश्वस्तत्र दातव्यः सूर्यमुद्दिश्य भामिनि ॥ ब्राह्मणे वेदसंयुक्ते तेन दत्ता मही भवेत् ॥ ३० ॥ यस्तत्र पूजयेद्देवं क्षेत्रपालं च दुन्दुभिम् ॥ स पुत्रपशुमान्धीमाञ्छ्रीमान्भवति मानवः ॥ ३१ ॥ न भयं जायते तस्य त्रिविधं[1] वरवर्णिनि ॥ अर्धगव्यूतिमात्रं तु तत्र क्षेत्रं रवेः स्मृतम् ॥ ३२ ॥ न तत्र प्रविशेज्जन्तुः सूर्यभक्तिविवर्जितः ॥ इत्येतत्कथितं देवि माहात्म्यं सूर्यदैवतम् ॥ ३३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये दुर्वासादित्यमाहात्म्यवर्णनंनाम षट्त्रिंशदुत्तरद्विशततमोऽध्यायः ॥ ॥ २३६ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि यादवस्थलमुत्तमम् ॥ यादवा यत्र नष्टा वै षट्[5]पंचाशच्च कोटयः ॥ १ ॥ यत्र वज्रेश्वरो देवो वज्रेणाराधितः सदा ॥ यत्राभूद्दिव्यदृष्टीनामृषीणामाश्रमं कुलम् ॥ २ ॥ ॥ देव्युवाच ॥ ॥ कथं विनष्टा भगवन्नन्धका वृष्णिभिः सह ॥ पश्यतो वासुदेवस्य भोजाश्चैव महारथाः ॥ ३ ॥ केन शप्तास्तु ते वीरा नष्टा वृष्ण्यन्धकादयः ॥ भोजाश्चैव महादेव विस्तरेण वदस्व मे ॥ ४ ॥ ॥ ईश्वर उवाच ॥ ॥ षट्त्रिंशे च कलौ वर्षे संप्राप्तेऽन्धकवृष्णयः ॥ अन्योन्यं मुशलैस्ते हि निजघ्नुः कालनोदिताः ॥ ५ ॥ विश्वामित्रं च कण्वं च नारदं च यशस्विनम् ॥ सारणप्रमुखान्भोजान्ददृशुर्द्वारकां गतान् ॥ ६ ॥ ते वै सांबं समानिन्युर्भूषयित्वा स्त्रियं यथा ॥ अब्रुवन्नुपसंगम्य देवदंडनिपीडिताः ॥ ७ ॥ इयं स्त्री पुत्रकामस्य बभ्रोरमिततेजसः ॥ ऋषयः साधु जानीत किमियं जनयिष्यति ॥ ८ ॥ इत्युक्तास्ते तदा देवि विप्रलंभप्रधर्षिताः ॥ प्रत्यब्रुवंस्तान्मुनयस्तच्छृणुष्व यथातथम् ॥ ९ ॥ ॥ ऋषय ऊचुः ॥ ॥ वृष्ण्यन्धकविनाशाय मुशलं घोरमायसम् ॥ वासुदेवस्य दायादः सांबोऽयं जनयिष्यति ॥ १० ॥ येन यूयं सुदुर्वृत्ता नृशंसा जातमन्यवः ॥ उच्छेत्तारः कुलं सर्वमृते रामाज्जनार्दनात् ॥ ११ ॥ त्यक्त्वा यास्यति वः श्रीमांत्यक्त्वा भूमिं[2] हलायुधः ॥ जरां[3] कृष्णं महाभागं शयानं तु निर्वर्त्स्यति[4] ॥ १२ ॥ इत्यब्रुवंस्ततो देवि प्रलब्धास्ते दुरात्मभिः ॥ मुनयः क्रोधरक्ताक्षाः समीक्ष्याऽथ परस्परम् ॥ १३ ॥ तथोक्त्वा मुनयस्ते तु ततः केशवमभ्ययुः ॥ अथावदत्तदा वृष्णीञ्छ्रुत्वैवं मधुसूदनः ॥ १४ ॥ अभिज्ञो मतिमांस्तस्य भवितव्यं तथेति तत् ॥ एवमुक्त्वा हृषीकेशः प्रविवेश पुनर्गृहान् ॥ १५ ॥ कृतांतमन्यथाकर्तुं नैच्छत्स जगतः प्रभुः ॥ श्वोभूते स ततः सांबो मुसलं तदसूत वै ॥ १६ ॥ येन वृष्ण्यन्धककुले पुरुषा भस्मसात्कृताः ॥ वृष्ण्यन्धकविनाशाय किंकर[6]

१ त्रिविधम्—आध्यात्मिकाधिदैविकाधिभौतिकतापत्रयरूपं भयम्--इत्यर्थः । २ देहम्--इ० पा० । ३ जरा--जरानामको व्याधः । ४ निर्वर्त्स्यति--विद्धं करिष्यति--इत्यर्थः । ५ च--इ० पा० ।
६ किंकरप्रतिमम्--यमकिंकरसंनिभम्--इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिमं महत् ॥ १७ ॥ असूत शापजं घोरं तच्च राज्ञे न्यवेदयत् ॥ विषण्णोऽथ ततो राजा सूक्ष्मं चूर्णमकारयत् ॥ १८ ॥ प्राक्षिपत्सागरे तत्र पुरुषो राजशासितः ॥ अथोवाच स्वनगरे वचनादाहुकस्य हि ॥ १९ ॥ जनार्दनस्य रामस्य बभ्रोश्चैव महात्मनः ॥ अद्यप्रभृति सर्वेषां वृष्ण्यन्धकगृहेष्विह ॥ सुरासवो न कर्त्तव्यः सर्वैर्विषयवासिभिः ॥ २० ॥ यश्च वो विदितं कुर्यादेवं कश्चित्कचिन्नरः ॥ स जीवञ्छूलमारोहेत्स्वयं कृत्वा सबांधवः ॥ २१ ॥ ततो राजभयात्सर्वे नियमं तत्र चक्रिरे ॥ नराः शासनमाज्ञाय रामस्याक्लिष्टकर्मणः ॥ २२ ॥ एवं प्रयतमानानां वृष्णीनामन्धकैः सह ॥ कालो गृहाणि सर्वाणि परिचक्राम नित्यशः ॥ २३ ॥ करालो विकटो मुंडः पुरुषः कृष्णपिंगलः ॥ सम्मार्जनीमहाकेतुर्जपापुष्पावतंसकः ॥ २४ ॥ कृकलासवाहनश्च रत्तिकाकर्णभूषणः ॥ गृहाण्यवेक्ष्य वृष्णीनां नादृश्यत पुनः क्वचित् ॥ २५ ॥ तस्य चासन्महेष्वासाः शरैः शतसहस्रशः ॥ न चाशक्यत वेद्धुं स सर्वभूताप्ययं सदा ॥ २६ ॥ उत्पेदिरे महावाता दारुणा हि दिने दिने ॥ वृष्ण्यन्धकविनाशाय बहवो लोमहर्षणाः ॥ २७ ॥ विवृद्धच मूषिका रथ्यावितुन्नमणिकास्तथा ॥ केशान्ददंशुः सुप्तानां नृणां युवतयो निशि ॥ २८ ॥ चीचीकूचीत्यवाशंत सारिका वृष्णिवेश्मसु ॥ नोपशाम्यति शब्दश्च स दिवारात्रमेव वा ॥ २९ ॥ अन्वकुर्वन्नुलूकाश्च वायसान्वृष्णिवेश्मसु ॥ अजाः शिवानां च रुतमन्वकुर्वत भामिनि ॥ ३० ॥ पांडुरा रक्तपादाश्च विहगाः कालप्रेरिताः ॥ वृष्ण्यन्धकगृहेष्वेवं कपोता व्यचरंस्तदा ॥ ३१ ॥ व्यजायंत खरा गोषु करभाश्वाश्वतरीषु च ॥ शुनीष्वपि बिडालाश्च मूषका नकुलीषु च ॥ ३२ ॥ तापत्रयांत पापानि कुर्वंतो वृष्णयस्तथा ॥ अद्विषन्ब्राह्मणांश्चापि पितृन्देवांस्तथैव च ॥३३॥ गुरूंश्चाप्यवमन्यंते न तु रामजनार्दनौ ॥ भार्याः पतीन्व्युच्चरंति पत्नीश्च पुरुषास्तथा ॥ ३४ ॥ विभावसुः प्रज्वलितो वामं विपरिवर्त्तते ॥ नीललोहितमांजिष्ठा विसृजंश्चार्चिषः पृथक् ॥ ३५ ॥ उदयास्तमने नित्यं पर्यस्तः स्याद्दिवाकरः ॥ व्यदृश्यत सकृत्पुंभिः कबन्धैः परिवारितः ॥ ३६ ॥ महानसेषु सिद्धांते संस्कृतेऽन्ने तु भामिनि ॥ उत्तार्यमाणे कृमयो दृश्यंते च वरानने ॥ ३७ ॥ पुण्याहे वाच्यमाने च पठत्सु च महात्मसु ॥ अभिधावंति श्रूयंते न चादृश्यत कश्चन ॥ ३८ ॥ परस्परस्य नक्षत्रं हन्यमानं पुनःपुनः ॥ ग्रहैरपश्यन्सर्वेस्ते नात्मनस्तु कथञ्चन ॥ ३९ ॥ न हुतं पाचयत्यग्निर्वृष्ण्यंधकपुरस्कृतम् ॥ समंतात्प्रत्यवाशंत रासभा दारुणस्वनाः ॥ ४० ॥ एवं पश्यन्हृषीकेशः संप्राप्तान्कालपर्ययान् ॥ त्रयोदशीं ह्यमावास्यां तां दृष्ट्वा प्राब्रवीदिदम् ॥ ४१ ॥ त्रयोदशी पंच

१ ज्ञात्वा–इ० पा० । २ रत्तिकाकर्णभूषणः--गुञ्जानिर्मितकर्णभूषणः–इत्यर्थः । रीतिकाकर्णभूषणः--इ० पा० । ३ विभावसुः--अग्निहोत्राग्निः--इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



दशी कृतेयं राहुणा पुनः ॥ तदा च भारते युद्धे प्राप्ता चाद्य क्षयाय नः ॥ ४२ ॥ धिग्धिगित्येव कालं तं परिचिंत्य जनार्दनः ॥ मेने प्राप्तं स षट्
त्रिंशं वर्षं केशिनिषूदनः ॥ पुत्रशोकाभिसंतप्ता गांधारी यदुवाच ह ॥ ४३ ॥ एवं पश्यन्हृषीकेशस्तदिदं समुपस्थितम् ॥ इदं च समनुप्राप्तमब्रवीद्य
युधिष्ठिरः ॥ ४४ ॥ पुरा व्यूढेष्वनीकेषु दृष्ट्वोत्पातान्सुदारुणान् ॥ पुण्यग्रन्थस्य श्रवणाच्छांतिहोमाद्विशोधनात् ॥४५॥ पूततीर्थाभिषेकाच्च नान्य
च्छ्रेयो भवेदिति ॥ इत्युक्त्वा वासुदेवस्तच्चिकीर्षन्सत्यमेव च ॥ आज्ञापयामास तदा तीर्थयात्रामरिंदमः ॥ ४६ ॥ अघोषयंत पुरुषास्तत्र केशवशास
नात् ॥ तीर्थयात्रा प्रभासे वै कार्येति वरवर्णिनि ॥ ४७ ॥ अथारिष्टानि वक्ष्यामि पुरीं द्वारवतीं प्रति ॥ काली स्त्री पांडुरैर्दंतैः प्रविश्य नगरीं निशि
॥ ४८ ॥ स्त्रियः स्वप्नेषु मुष्णन्ती द्वारकां प्रति धावति ॥ अग्निहोत्रनिकेतं च सुमेध्येषु च वेश्मसु ॥ ४९ ॥ वृष्ण्यंधकांश्च खादंती स्वप्ने दृष्टा भया
नका ॥ कुर्वंती भीषणं नादं कुर्कुटश्वानसंयुता ॥ ५० ॥ तथा सहस्रशो रौद्राश्चतुर्बाहव एव च ॥ स्त्रीणां गर्भेष्वजायंत राक्षसा गुह्यकास्तथा ॥
॥ ५१ ॥ अलंकाराश्च च्छत्राणि ध्वजाश्च कवचानि च ॥ ह्रियमाणानि दृश्यंते रक्षोभिस्तु भयानकैः ॥ ५२ ॥ यच्चाग्निदत्तं कृष्णस्य वज्रनाभमय
स्मयम् ॥ दिवमाचक्रमे चक्रं वृष्णीनां पश्यतां तदा ॥ ५३ ॥ युक्तं रथं दिव्यमादित्यवर्णं भयावहं पश्यंतो दारुकस्य ॥ ते सागरस्योपरिष्टाद्वर्त
मानान्मनोजवांश्चतुरो वाजिमुख्यान् ॥ ५४ ॥ तालः सुपर्णश्च महाध्वजौ तौ सुपूजितौ रामजनार्दनाभ्याम् ॥ उच्चैर्जगुः स्वप्सरसो दिवानिशं वाचं
चोचुर्गम्यतां तीर्थयात्राम् ॥ ५५ ॥ ततो जिगमिषंतस्ते वृष्ण्यंधकमहारथाः ॥ सांतःपुरास्तीर्थयात्रामीहंते स्म नरर्षभाः ॥५६॥ ततो मांसपरा हृष्टाः
पेयं वेश्मसु वृष्णयः ॥ बहु नानाविधं चक्रुर्मांसानि विविधानि च ॥ ५७ ॥ तथा सीधुषु बद्धेषु निर्ययुर्नगराद्बहिः ॥ यानैरश्वैर्गजैश्चैव श्रीमंतस्ति
ग्मतेजसः ॥ ५८ ॥ ततः प्रभासे न्यवसन्यथोद्देशं यथागृहम् ॥ प्रभूतभक्ष्यपेयास्ते सदारा यादवास्तदा ॥ ५९ ॥ निविष्टांस्तान्निशम्याथ समुद्रांते
स योगवित् ॥ जगामामंत्र्य तान्वीरानुद्धवोर्थविशारदः ॥ ६० ॥ प्रस्थितं तं महात्मानमभिवाद्य कृतांजलिम् ॥ जानन्विनाशं भोजानां नैच्छद्वार
यितुं हरिः ॥ ६१ ॥ ततः कालपरीतास्ते वृष्ण्यंधकमहारथाः ॥ अपश्यन्नुद्धवं यांतं तेजसाऽऽदीप्य रोदसी ॥ ६२ ॥ ब्राह्मणार्थेषु यत्कृतमन्नं तेषां ॥१५१॥
वरानने ॥ तद्वाहनेभ्यः प्रददुः सुरागंधरसान्वितम् ॥६३॥ ततस्तूर्यशताकीर्णं नटनर्त्तकसंकुलम् ॥ प्रावर्त्तत महापानं प्रभासे तिग्मतेजसाम् ॥ ६४ ॥
कृष्णस्य संनिधौ रामः सहितः कृतवर्मणा ॥ अपिबद्युयुधानश्च गदो बभ्रुस्तथैव च ॥६५॥ ततः परिषदो मध्ये युयुधानो मदोत्कटः ॥ अब्रवीत्कृत

१ स्वयमेव च--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्माणमवहस्यावमन्य च ॥ ६६ ॥ कः क्षत्रियो मन्यमानः सुप्तान्हन्यान्मृतानिव ॥ न तन्मृष्यत[1] हार्दिक्यस्त्वया तत्साधु यत्कृतम् ॥ ६७ ॥
इत्युक्ते युयुधानेन पूजयामास तद्वचः ॥ प्रद्युम्नो रथिनां श्रेष्ठो हार्दिक्यमथ भर्त्सयन् ॥ ६८ ॥ ततः पुनरपि क्रुद्धः कृतवर्मा तमब्रवीत् ॥ निर्दिश
न्निव सावज्ञं तदा सव्येन पाणिना ॥ ६९ ॥ भूरिश्रवाश्छिन्नबाहुर्युद्धे प्रायोगतस्त्वया ॥ व्याधेनेव नृशंसेन कथं वैरेण घातितः ॥ ७० ॥ इति तस्य
वचः श्रुत्वा केशवः परवीरहा ॥ तिर्यक्सरोषया दृष्ट्या वीक्षांचक्रे समः पुमान् ॥ ७१ ॥ मणिं स्यमंतकं चैव यः स सत्राजितोऽभवत् ॥ स कथं
स्मारयामास सात्यकिर्मधुसूदनम् ॥ ७२ ॥ तच्छ्रुत्वा केशवस्यांकमगमद्रुदती सती ॥ सत्यभामा प्रक्षुभिता कोपयन्ती जनार्दनम् ॥ ७३ ॥ तत
उत्थाय स क्रोधात्सात्यकिर्वाक्यमब्रवीत् ॥ पंचानां द्रौपदेयानां धृष्टद्युम्नशिखंडिनः ॥ ७४ ॥ एष गच्छामि पदवीं सत्ये तव पथे सदा ॥ सौप्तिके
निहता ये च सुप्तास्तेन दुरात्मना ॥ ७५ ॥ द्रोणपुत्रसहायेन पापेन कृतवर्मणा ॥ समाप्तं चायुरस्याद्य यशश्चापि सुमध्यमे ॥ ७६ ॥ इतीदमुक्त्वा
खड्गेन केशवस्य समीपतः ॥ अभिहत्य शिरः क्रुद्धश्चिच्छेद कृतवर्मणः ॥ ७७ ॥ तथान्यानपि निघ्नंतं युयुधानं समंततः ॥ अन्वधावद्धृषीकेशो
विनिवारयिषुस्तथा ॥ ७८ ॥ एकीभूतास्ततस्तस्य कालपर्यायप्रेरिताः ॥ भोजांधका महाराजं शैनेयं[2] पर्यवारयन् ॥ ७९ ॥ तान्दृष्ट्वाऽऽपततस्तूर्णम
भिक्रुद्धाञ्जनार्दनः ॥ न चुक्रोध महातेजा जानन्कालस्य पर्ययम् ॥ ८० ॥ ते च पानमदाविष्टाश्चोदिताश्चैव मन्युना ॥ युयुधानमथाजघ्नुरुच्छिष्टै
र्भोजनैस्तथा ॥ ८१ ॥ हन्यमाने तु शैनेये क्रुद्धो रुक्मिणिनंदनः ॥ तदंतरमथाधावन्मोक्षयिष्यञ्छिनेः सुतम् ॥ ८२ ॥ स भोजैः सह संयुक्तः
सात्यकिश्चांधकैः सह ॥ बहुत्वात्तु हतौ वीरावुभौ कृष्णस्य पश्यतः ॥ ८३ ॥ हतं दृष्ट्वा तु शैनेयं पुत्रं च यदुनंदनः ॥ एरकाणां तदा मुष्टिं कोपाज्ज
ग्राह केशवः ॥ ८४ ॥ तदभून्मुशलं घोरं वज्रकल्पमयस्मयम् ॥ जघान तेन कृष्णोपि ये तस्य प्रमुखे स्थिताः ॥ ८५ ॥ ततोऽधकाश्च भोजाश्च
शिनयो वृष्णयस्तदा ॥ न्यघ्नन्नन्योन्यमाक्रन्दैर्मुशलैः कालप्रेरिताः ॥ ८६ ॥ यश्चैकामेरकां[3] कश्चिज्जग्राह रुषितो नरः ॥ वज्रभूता च सा देवि व्यदृ
श्यत तदा प्रिये ॥ ८७ ॥ तृणं च मुशलीभूतमण्वपि तत्र दृश्यते ॥ ब्रह्मदंडकृतं सर्वमिति तद्विद्धि भामिनि ॥ ८८ ॥ आविध्याविध्य देवेशि प्रह
रंति स्म सायकान् ॥ तद्वज्रभूतं मुशलमपश्यंत तदा दृढम् ॥ ८९ ॥ अवधीत्पितरं पुत्रः पिता पुत्रं च भामिनि ॥ मत्तास्ते पर्यटंति स्म योधमानाः
परस्परम् ॥ ९० ॥ पतंगा इव चाग्नौ तु न्यपतन्यदुपुंगवाः ॥ नासीत्पलायने बुद्धिर्वध्यमानस्य कस्यचित् ॥ ९१ ॥ तं तु पश्यन्महाबाहुर्जानन्का

१ मृष्यत--अमृष्यत--अडभाव आर्षः । २ सौनेयम्--इ० पा० । ३ एरकाम्--जलतीरोद्भवकुशसमतृणविशेषम्--इत्यर्थः । "लव्हाळें" इति महाराष्ट्राः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

लस्य पर्ययम् ॥ मुशलं समवष्टभ्य तस्थौ स मधुसूदनः ॥ ९२ ॥ सांबं च निहतं दृष्ट्वा चारुदेष्णं च माधवः ॥ प्रद्युम्नमनिरुद्धं च ततश्चुक्रोध भामिनि ॥ ९३ ॥ यादवान्क्ष्माशयानांश्च भृशं कोपसमन्वितः ॥ स निःशेषं तदा चक्रे शार्ङ्गचक्रगदाधरः ॥ ९४ ॥ एवं तत्र महादेवि अभवद्यादवस्थलम् ॥ गव्यूतिमात्रं तद्देवि यादवानां चिताः स्मृताः ॥ ९५ ॥ तेषां किलास्थिनिचयैः स्थलरूपं बभूव तत् ॥ भस्मपुंजनिभाकारं तेनाभूद्यादवस्थलम् ॥ ९६ ॥ दिव्यरत्नसमायुक्तं मणिमाणिक्यपूरितम् ॥ यादवानां किरीटैश्च दिव्यगन्धैः सुपूरितम् ॥ ९७ ॥ तेषां रक्षानिमित्तं हि गंगा गणपतिस्तथा ॥ यादवानां तु सर्वेषां जीवितो वज्र एव हि ॥ ९८ ॥ वयसोंते ततः सोऽपि प्रभासं क्षेत्रमागतः ॥ निषिच्य स्वसुतं राज्ये नाम्ना ख्यातं महद्बलम् ॥ ९९ ॥ तेनापि स्थापितं लिंगं यादवेन्द्रेण धीमता ॥ वज्रेश्वरमिति ख्यातं तत्स्थितं यादवस्थले ॥१००॥ तत्रैव सुचिरं कालं तपस्तप्तं सुपुष्कलम् ॥ नारदस्योपदेशेन प्रभासे पापनाशने ॥ १०१ ॥ प्राप्तवान्परमां सिद्धिं स राजा यादवोत्तमः ॥ तत्रैव यो नरः सम्यक्स्नात्वा जांबवतीजले ॥ १०२ ॥ वज्रेश्वरं तु संपूज्य ब्राह्मणांस्तत्र भोजयेत् ॥ यादवस्थलसामीप्ये गोसहस्रफलं लभेत् ॥ १०३ ॥ [1]षट्कोणं तत्र दातव्यमंगुल्या यादवस्थले ॥ यात्राफलमवाप्नोति सम्यक्छ्रद्धासमन्वितः ॥ १०४ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये यादवस्थलोत्पत्तौ वज्रेश्वरमाहात्म्यवर्णनंनाम सप्तत्रिंशदुत्तरद्विशततमोऽध्यायः ॥ २३७ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि हिरण्यां पापनाशिनीम् ॥ सर्वकामप्रदां पुण्यां दारिद्र्यस्यांतकारिणीम् ॥ १ ॥ तत्र स्नात्वा विधानेन कृत्वा पिंडोदकक्रियाम् ॥ प्राप्नुयादक्षयाँल्लोकान्पितॄनुद्धृत्य पापतः ॥२॥ एकं यो भोजयेत्तत्र ब्राह्मणं शंसितव्रतम् ॥ तेनायुतसहस्रं हि भोजितं स्याद्द्विजन्मनाम् ॥ ३ ॥ तत्र हेमरथा देयो ब्राह्मणे वेदपारगे ॥ विधिना शिवमुद्दिश्य यात्रायुतफलं लभेत् ॥ ४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये हिरण्यानदीमाहात्म्यवर्णनंनामाष्टात्रिंशदुत्तरद्विशततमोऽध्यायः ॥ २३८ ॥ ॥ छ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि हिरण्यापार्श्वतः स्थितम् ॥ प्रत्युक्तं नागरादित्यं सर्वव्याधिविनाशनम् ॥ १ ॥ पुरा सत्राजिता राज्ञा द्वारवत्यां गतेन तु ॥ आराधितो भास्करोऽभूद्यादवेन महात्मना ॥ २ ॥ महाव्रतमुपास्थाय निम्नपुत्रेण धीमता ॥ तस्य तुष्टस्तदा

१ षट्कोणं तत्र दातव्यमेकादशसमन्वितम्--इ०, षट्कोणं तत्र दातव्यष्टापदसमन्वितम्--इ० च पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भानुः स्यमन्तकमणिं ददौ ॥३॥ स मणिः सवते नित्यं भारानष्टौ दिनेदिने ॥ सुवर्णस्य सुशुद्धस्य भक्त्या व्रततपोयुतः ॥ ४ ॥ भूयोऽपि भानुना प्रोक्तो वरं ब्रूहि वरानने ॥ स चाह देवदेवेशं भास्करं वारितस्करम् ॥ ५ ॥ यदि तुष्टोऽसि मे देव वरदानं करोषि च ॥ अत्रैव चाश्रमे पुण्ये नित्यं संनिहितो भव ॥ ६ ॥ एवं भविष्यतीत्युक्त्वा सूर्यः सत्राजितं नृपम् ॥ अभिनंद्य वरं तस्य तत्रैवादर्शनं गतः ॥ ७ ॥ तेनापि निघ्नपुत्रेण देवदेवस्य भास्वतः ॥ स्थापिता प्रतिमा शुभ्रा तत्रैव वरवर्णिनि ॥ ८ ॥ शंखदुंदुभिनिर्घोषैर्ब्रह्मघोषैश्च पुष्कलैः ॥ ततस्तु नागरान्सर्वान्समाहूय द्विजोत्तमान् ॥ अब्रवीत्प्रणतो भूत्वा दत्त्वा वृत्तिमनुत्तमाम् ॥९॥ युष्मत्पादप्रसादेन सूर्यस्यानुग्रहेण वै ॥ साधयित्वा तपश्चोग्रं स्थापिता प्रतिमा मया ॥१०॥ इंद्रलोकादिहानीता जित्वा शक्रं सुरारिणा ॥ दशाननस्य पुत्रेण लंकायां स्थापिता पुरा ॥११॥ तं निहत्य तु रामेण लक्ष्मणानुगतेन वै ॥ अयोध्यायां समानीता सौमित्रिजयलक्षिका॥१२॥मित्रावरुणपुत्राय वसिष्ठाय समर्पिता॥तेनापि मम तुष्टेन द्वारकायां निवेदिता॥१३॥ मयापि स्थापिता चात्र ज्ञात्वा क्षेत्रमनुत्तमम् ॥ किमत्र बहुनोक्तेन भवद्भिः सर्वथैव हि ॥१४॥ परिपाल्या प्रयत्नेन यावच्चंद्रार्कतारकम्॥ तस्माद्युष्माकमादिष्टा प्रतिमेयं मया शुभा ॥ १५ ॥ नागराणां तु विप्राणां सोमेशपुरवासिनाम् ॥ तस्मान्नाम मया दत्तं नागरादित्यमेव हि ॥ १६ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ सर्वमेव करिष्यामो देवस्य परिपालनम् ॥ यावन्मही च चंद्रार्कौ यावत्तिष्ठति सागरः ॥ तावत्ते ह्यक्षया कीर्तिः स्थाने चास्मिन्भविष्यति॥१७॥एवमुक्त्वा तु ते सर्वे नागरा द्विजपुंगवाः ॥ राजापि तुष्टः प्रययौ तदा द्वारवतीं पुरीम् ॥१८॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि तस्मिन्दृष्टे तु यत्फलम् ॥ गोशतस्य प्रयागेषु सम्यग्दत्तस्य यत्फलम् ॥ तत्फलं समवाप्नोति नागरार्कस्य दर्शनात्॥१९॥ दारिद्र्यदुःखशोकार्त्तेः कोन्योस्ति हरणक्षमः॥ प्रभासे पावने क्षेत्रे मुक्त्वा नागरभास्करम् ॥ २० ॥ बंधकुष्ठादिकं दुःखं ये भजंत्यल्पबुद्धयः ॥ तत्र ते नैव जानंति वैद्यं नागरभास्करम् ॥ २१ ॥ स्नात्वा हिरण्यातोयेन यस्तं पूजयते नरः ॥ कल्पकोटिसहस्राणि सूर्यलोके महीयते ॥२२॥ शुक्लपक्षे तु सप्तम्यां यदा संक्रमते रविः ॥ महाजया तदा ख्याता सप्तमी भास्करप्रिया ॥ २३ ॥ स्नानं दानं जपो होमः पितृदेवाभिपूजनम् ॥ सर्वं कोटिगुणं प्रोक्तं भास्करस्य वचो यथा ॥ २४ ॥ एकं यो भोजयेत्तत्र ब्राह्मणं सूर्यसंनिधौ ॥ कोटिभोज्यं कृतं तेन इत्याह भगवान्हरिः ॥ २५ ॥ एतन्मया ते कथितं पुरा नोक्तं वरानने ॥ यः शृणोति नरो भक्त्या स गच्छेद्भास्करं पदम् ॥ २६ ॥ सूर्यस्य देवि नामानि रहस्यानि शृणुष्व मे ॥ अलं नामसहस्रेण पठस्वैनं शुभं स्तवम् ॥ २७ ॥ विकर्तनो विव

१ सवते—सूते—इत्यर्थः । आर्षमिदम् । २ पुराणोक्तम्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

स्वांश्च मार्त्तंडो भास्करो रविः ॥ लोकप्रकाशकः श्रीमाँल्लोकचक्षुर्ग्रहेश्वरः ॥ २८ ॥ लोकसाक्षी त्रिलोकेशः कर्त्ता हर्त्ता तमिस्रहा ॥ तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः ॥ २९ ॥ गभस्तिहस्तो ब्रह्मा च सर्वदेवनमस्कृतः ॥ एकविंशक इत्येष नागरार्कस्तवः स्मृतः ॥ ३० ॥ स्तवराज इति ख्यातः शरीरारोग्यवृद्धिदः ॥ ३१ ॥ य एतेन महादेवि द्वे संध्येऽस्तमनोदये ॥ नागरार्कं तु संस्तौति स लभेद्वांछितं फलम् ॥ ३२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये नागरार्कमाहात्म्यवर्णनंनामैकोनचत्वारिंशदुत्तरद्विशततमोऽध्यायः ॥ २३९ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि बलभद्रं सुरेश्वरम् ॥ सुभद्रां च तथा कृष्णं सर्वपातकनाशनम् ॥ १ ॥ पूर्वं कल्पे महादेवि देहमत्रात्यजद्धरिः ॥ अस्मिन्कल्पेपिच पुनर्गात्रोत्सर्गमिति[1] स्मृतम् ॥ २ ॥ तत्र ये पूजयिष्यंति नागरादित्यसंनिधौ ॥ बलभद्रं सुभद्रां च कृष्णं ते स्वर्गगामिनः[2] ॥३॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये बलभद्रसुभद्राकृष्णमाहात्म्यवर्णनंनाम चत्वारिंशदुत्तरद्विशततमोऽध्यायः ॥ २४० ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तत्रैव संस्थितं पश्येद्बलभद्रकलेवरम् ॥ शेषरूपेण यत्रासौ प्रात्यजत्स्वं कलेवरम् ॥ १ ॥ गतस्त्रैसंगमे तीर्थे तत्र पातालवर्त्मना ॥ अस्मिन्मित्रवने देवि गव्यूतिद्वयविस्तृते ॥ २ ॥ कलेवरं स्थितं देवि लिंगाकारं महाप्रभम् ॥ रेवत्या सहितं तत्र शेषनामेतिविश्रुतम् ॥३॥ यत्र सिद्धः पुरा देवि जरानामा तु कौलिकः ॥ विष्णुहंता भल्लतीर्थे सोऽस्मिन्स्थाने लयं गतः ॥ ४ ॥ तत्प्रभृत्येव सकले शेष इत्यभिविश्रुतः ॥ चैत्रे शुक्लत्रयोदश्यां यस्तं पूजयते नरः ॥ स पुत्रपौत्रपशुमान्वर्षं क्षेमेण गच्छति ॥५॥ मसूरिकादिरोगेभ्यः शिशूनां न भयं भवेत् ॥ विस्फोटकादिरोगेभ्यो न भयं जायते क्वचित् ॥६॥ अस्मिन्क्षेत्रे महासिद्धे सिद्धयज्ञस्तु यः स्मृतः ॥ वर्णानां सांतरालानां सर्वेषां चातिवल्लभः ॥७॥ पशुपुष्पोपहारैश्च बलिदानैः पृथग्विधैः ॥ संतुष्टिं शीघ्रमायाति शेषोऽशेषाघनाशनः ॥ ८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये शेषमाहात्म्यवर्णनंनामैकचत्वारिंशदुत्तरद्विशततमोऽध्यायः ॥ २४१ ॥ ॥छ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि यत्र देवी कुमारिका ॥ तस्यैव पूर्वदिग्भागे स्थिता रक्षार्थमेव हि ॥ १ ॥ पुरा रथंतरे कल्पे रुरुर्नाम महासुरः ॥ उत्पन्नः स महाकायः सर्वलोकभयावहः ॥ २ ॥ तेन देवाः सगन्धर्वास्त्रासितास्त्रिदशालयात् ॥ तस्य भीत्या ततः सर्वे ब्रह्मलोकमधिस्थिताः ॥ ३ ॥ तथा भूमितले विप्रान्यज्वनोऽथ तपस्विनः ॥ निजघान स दुष्टात्मा ये चान्ये

१ गोत्रोच्छेदम्—इ० पा० । २ स्वर्गवासिनः--इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्म्मचारिणः ॥ ४ ॥ निःस्वाध्यायवषट्कारं तदाऽऽसीद्धरणीतलम् ॥ नष्टयज्ञोत्सवं सर्वं रुरोर्भयनिपीडितम् ॥ ५ ॥ ततः प्रव्यथिता देवास्तथा सर्वे
महर्षयः ॥ समेत्यामंत्रयन्मंत्रं वधार्थं तस्य दुर्मतेः ॥ ६ ॥ ततः कायोद्भवः स्वेदः सर्वेषां समजायत ॥ तेषां चिंतयतां देवि निरोधाज्जगृहुश्च तम् ॥
॥७॥ तत्र कन्या समुत्पन्ना दिव्या कमललोचना ॥ व्यापयंती दिशः सर्वाः सर्वेषां पुरतः स्थिता ॥८॥ सर्वान्देवांस्ततः प्राह किमर्थं निर्मितास्म्य
हम् ॥ तद्वः कार्यं करिष्यामि श्रुत्वा तस्यास्तदा गिरम् ॥ ९ ॥ आचख्युः संकटं तस्यास्ते देवा रुरुचेष्टितम् ॥ श्रुत्वा जहास सा देवी देवानां कार्य
सिद्धये ॥ १० ॥ तस्या हसंत्या निश्चेरुर्वरांगाः कन्यकाः पुनः ॥ पाशांकुशधराः सर्वाः पीनश्रोणिपयोधराः ॥ ११ ॥ फेत्काराराववमात्रेण त्रास
यंत्यश्चराचरम् ॥ अन्वगात्सा रुरुर्यत्र ताभिः सार्द्धं यशस्विनी ॥ १२ ॥ अथाभूत्तुमुलं तासां युद्धं घोरं तु तैः सह ॥ शस्त्रास्त्रैर्विविधैर्घोरैः शत्रुपक्ष
क्षयंकरैः ॥ १३ ॥ ताभिस्तदनुगाः सर्वे प्रहारैर्जर्जरीकृताः॥ पराङ्मुखाः क्षणेनैव जाताः केचिन्निपातिताः ॥ १४ ॥ ततो हतं बलं दृष्ट्वा रुरुर्मायाम
थाऽसृजत् ॥ तामसींनाम देवेशि तयामुह्यत नैव सा ॥ १५ ॥ तमोभूते ततस्तत्र देवी दैत्यं तदा रुरुम् ॥ शक्त्या बिभेद हृदये ततो मूर्छां जगाम ह
॥ १६ ॥ मुहूर्त्ताल्लब्धसंज्ञोऽथ ज्ञात्वा तस्याः पराक्रमम् ॥ पलायनकृतोत्साहः समुद्राभिमुखो ययौ ॥ १७ ॥ साऽपि देवी जगामाथ पृष्ठतोऽस्य
दुरात्मनः ॥ स्तूयमाना सुरगणैः किंनरैः समहोरगैः ॥ १८ ॥ ततः प्रविश्य जलधिं तं दृष्ट्वा दानवं रुषा ॥ खड्गाग्रेण शिरश्छित्त्वा चर्ममुण्डधरा
ततः ॥ १९ ॥ निश्चक्राम पुनस्तस्मात्प्रभासं क्षेत्रमागता ॥ कन्या सैन्येन संयुक्ता बहुरूपेण भास्वता ॥ २० ॥ देवैः सुविस्मितैर्दृष्टा चर्ममुण्डधरा
वरा ॥ ततो देवाः स्तुतिं चक्रुः कृतांजलिपुटाः स्थिताः ॥ २१ ॥ ॥ देवा ऊचुः ॥ ॥ जय त्वं देवि चामुंडे जय भूतापहारिणि ॥ जय सर्वगते
देवि कालरात्रि नमोऽस्तु ते ॥ २२ ॥ भीमरूपे शिवे विद्ये महामाये महोदये ॥ महाभागे जये जृम्भे भीमाक्षि भीमदर्शने ॥ २३ ॥ महामाये
विचित्रांगि गेयनृत्यप्रिये शुभे ॥ विकरालि महाकालि कालिके कालरूपिणि ॥ २४ ॥ प्रासहस्ते[1] दण्डहस्ते भीमहस्ते भयानने ॥ चामुण्डे ज्वल
मानास्ये तीक्ष्णदंष्ट्रे महाबले ॥ शवयानस्थिते देवि प्रेतसंघनिषेविते ॥ २५ ॥ एवं स्तुता तदा देवी सर्वैः शक्रपुरोगमैः ॥ प्रहृष्टवदना भूत्वा
वाक्यमेतदुवाच ह ॥ २६ ॥ वरं वृणुध्वं भद्रं वो नित्यं यन्मनसि स्थितम् ॥ अहं दास्यामि तत्सर्वं यद्यपि स्यात्सुदुर्लभम् ॥ २७ ॥ ॥ देवा
ऊचुः ॥ ॥ कृतकृत्यास्त्वया भद्रे दानवस्य निपूदनात् ॥ २८ ॥ स्तोत्रेणानेन यो देवि त्वां वै स्तौति वरानने ॥ तस्य त्वं वरदा देवि भव

१ पाशहस्ते–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

सर्वगता सती ॥ २९ ॥ यश्चेदं शृणुयाद्भक्त्या तव देवि समुद्भवम् ॥ सर्वपापविनिर्मुक्तः स प्राप्नोतु परां गतिम् ॥ ३० ॥ अस्मिन्क्षेत्रे त्वया देवि स्थितिः कार्या सदा शुभे ॥ ३१ ॥ अत्र त्वां पूजयेद्यस्तु शुक्लपक्षे समाहितः ॥ नवम्यामाश्विने मासि तस्य कार्यं सदा शुभम् ॥ ३२ ॥ ॥ ॥ ईश्वरउवाच ॥ ॥ एवमुक्ता महादेवी तत्रैव निरताऽभवत् ॥ देवास्त्रिविष्टपं जग्मुः प्रहृष्टा हतशत्रवः ॥३३॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये कुमारीमाहात्म्यवर्णनंनाम द्विचत्वारिंशदुत्तरद्विशततमोऽध्यायः ॥२४२॥ ॥छ॥ ॥ ॥ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि क्षेत्रपालं महाप्रभम् ॥ ईशाने संस्थितं देवं मंत्रमालाविभूषितम् ॥ १ ॥ हिरण्यातटमाश्रित्य रक्षार्थं समुपस्थितम् ॥ तत्रैव हीरकं क्षेत्रं तस्मिन्रक्षां करोति सः ॥ २ ॥ कृष्णपक्षे त्रयोदश्यां तत्र तं पूजयेन्नरः ॥ गंधपुष्पोपहारैश्च तथा बलिनिवेदनैः ॥ ३ ॥ एवं संपूजितो देवः सर्वकामप्रदो भवेत् ॥ ४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये मंत्रावलिक्षेत्रपालमाहात्म्यवर्णनंनाम त्रिचत्वारिंशदुत्तरद्विशततमोऽध्यायः ॥ २४३ ॥ ॥छ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि विचित्रेश्वरमुत्तमम्[1] ॥ हिरण्यातीरनिलयं महापातकनाशनम् ॥ १ ॥ विचित्रेण महादेवि लेखकेन यमस्य च ॥ तपः कृत्वा महारौद्रं लिंगं तत्र प्रतिष्ठितम् ॥ २ ॥ तं दृष्ट्वा मानवो देवि यमलोकं न पश्यति ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये विचित्रेश्वरमाहात्म्यवर्णनंनाम चतुश्चत्वारिंशदुत्तरद्विशततमोऽध्यायः ॥ २४४ ॥ ॥ छ ॥ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि तत्रैवोपरिसंस्थितम् ॥ सरस्वत्यास्तटे देवि पर्णादित्यस्य पश्चिमे ॥ १ ॥ तत्रास्ते सुमहल्लिंगं स्थापितं ब्रह्मणा पुरा ॥ ब्रह्मेश्वरेति विख्यातं सर्वपातकनाशनम् ॥ २ ॥ तत्र स्नात्वा द्वितीयायां सोपवासो जितेंद्रियः ॥ अर्चयेद्देवदेवेशं नाम्ना ब्रह्मेश्वरं शुभम् ॥ तर्पयेच्च पितॄञ्छ्राद्धे यदीच्छेच्छाश्वतं पदम् ॥ ३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये ब्रह्मेश्वरमाहात्म्यवर्णनंनाम पञ्चचत्वारिंशदुत्तरद्विशततमोऽध्यायः ॥ २४५ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि पिंगलीं[2] पापनाशिनीम् ॥ ऋषितीर्थात्पश्चिमतो नदीं सागरगामिनीम् ॥ १ ॥ तस्याः संदर्शनाद्देवि रूपवाञ्जायते नरः ॥ पुरा महर्षयः प्राप्ताः सोमेश्वरदिदृक्षया ॥ २ ॥ प्रभासं क्षेत्रमासाद्य नदीतीरे व्यवस्थिताः ॥ दाक्षिणात्या महादेवि कृष्णवर्णा विरूपकाः ॥ ३ ॥ तत्रा

१ चित्रेश्वरमनुत्तमम्–इ० पा० । २ पिंगलां पापनाशिनीम्–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रमवरे स्नात्वा पश्यन्तो रूपमात्मनः ॥ कामेन सदृशं सर्वे विस्मयं परमं गताः ॥ ४ ॥ ततस्ते सहिताः सर्वे विस्मयोत्फुल्ललोचनाः ॥ अत्र स्नाता
वयं सर्वे यतः पिंगत्वमागताः ॥ अतः प्रभृति नामास्यास्ततः पिंगा भविष्यति ॥ ५ ॥ येत्र स्नानं करिष्यन्ति भक्त्या परमया युताः ॥ न तेषाम
न्वये कश्चिद्भविष्यति कुरूपवान् ॥ ६ ॥ दर्शनात्पितृमेधस्य लप्स्यते मानवः फलम् ॥ स्नानेन द्विगुणं पुण्यं तर्पणेन चतुर्गुणम् ॥ ७ ॥ असंख्यातं
फलं तस्य योऽत्र श्राद्धं करिष्यति ॥ एवमुक्त्वा ततः सर्व ऋषयो वरवर्णिनि ॥ ८ ॥ व्यभजंस्तन्नदीतीरं सर्वे ते मुनिसत्तमाः ॥ यज्ञोपवीतमात्राणि[1]
चक्रुस्तीर्थानि सर्वतः ॥ ९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये पिंगा
नदीमाहात्म्यवर्णनंनाम षट्चत्वारिंशदुत्तरद्विशततमोऽध्यायः ॥ २४६ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तत्रैव संस्थितं पश्येत्सूर्यं पाप
प्रणाशनम् ॥ तथा च पिंगलां देवीं पार्वतीरूपधारिणीम् ॥ १ ॥ तृतीयायां विशेषेण ह्युपवासं करोति यः ॥ सर्वान्कामानवाप्नोति धनवान्पुत्र
वान्भवेत् ॥ २ ॥ तत्रैव संस्थितं पश्येच्छुक्रेश्वरमिति श्रुतम् ॥ तं दृष्ट्वा मानवो देवि मुक्तः स्यात्सर्वपातकैः ॥ ३ ॥ इति श्रीस्कान्दे महापुराण
एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये पिंगलादित्यपिंगादेवीशुक्रेश्वरमाहात्म्यवर्णनंनाम सप्तचत्वारिंश
दुत्तरद्विशततमोऽध्यायः ॥ २४७ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि पूर्वोक्तं ब्रह्मपूजितम् ॥ सरस्वत्यास्तटे संस्थं पर्णा
दित्यस्य पश्चिमे ॥ १ ॥ तस्योत्पत्तिं प्रवक्ष्यामि शृणुष्वैकमनाः प्रिये ॥ सृजतो ब्रह्मणः पूर्वं भूतग्रामं चतुर्विधम् ॥ २ ॥ उत्पन्नाद्भुतरूपाढ्या नारी
कमललोचना ॥ कंबुग्रीवा सुकेशांता बिंबोष्ठी तनुमध्यमा ॥ ३ ॥ गंभीरनाभिः सुश्रोणी पीनश्रोणिपयोधरा ॥ पूर्णचन्द्रमुखी सा तु गूढगुल्फा
सितानना ॥ ४ ॥ न देवी न च गन्धर्वी नासुरी न च पन्नगी ॥ यादृग्रूपा वरारोहा तादृशी सा व्यजायत ॥ ५ ॥ तां दृष्ट्वा रूपसंपन्नां ब्रह्मा काम
वशोऽभवत् ॥ अथ[2] तां प्रार्थयामास रत्यर्थं वरवर्णिनि ॥ ६ ॥ अथ प्रार्थयतस्तस्य न्यपतत्पंचमं शिरः ॥ खररूपं महादेवि तेन पापेन तत्क्ष
णात् ॥ ७ ॥ ततो ज्ञात्वा महत्पापं दुहितुः कामसंभवम् ॥ घृणया परया युक्तः प्रभासं क्षेत्रमागतः ॥ ८ ॥ न कायस्य यतः शुद्धिर्विना तीर्थाव
गाहनात् ॥ स स्नातः सलिले पुण्ये सरस्वत्या वरानने ॥ ९ ॥ लिंगं संस्थापयामास देवदेवस्य शूलिनः ॥ ततो विकल्मषो भूत्वा जगाम स्वगृहं

१ यज्ञोपवीतमात्राणि—यज्ञोपवीततन्तुपरिमाणपरिमितानि—इत्यर्थः । २ अथैनाम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





पुनः ॥ १० ॥ स्नात्वा सारस्वते तोये यस्तल्लिंगं प्रपश्यति ॥ सर्वपापविनिर्मुक्तो ब्रह्मलोके महीयते ॥ ११ ॥ चैत्रे शुक्लचतुर्दश्यां यस्तं पश्यति मानवः ॥ स याति परमं स्थानं यत्र देवो महेश्वरः ॥ १२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये ब्रह्मेश्वरमाहात्म्यवर्णनंनामाष्टचत्वारिंशदुत्तरद्विशततमोऽध्यायः ॥ २४८ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि देवं वै संगमेश्वरम् ॥ गोलक्षमिति विख्यातं सर्वपातकनाशनम् ॥ १ ॥ तस्यैव पश्चिमे भागे सर्वकामफलप्रदम् ॥ ऋषिरुद्दालकोनाम पुरा ह्यासीन्महातपाः ॥ २ ॥ स पुरा संगमं प्राप्य सर्वपापप्रणाशनम् ॥ सरस्वत्याश्च पिंगायास्तपस्तेपे सुरेश्वरि ॥ ३ ॥ ततस्तपस्यतस्तस्य तपो रौद्रं महात्मनः ॥ पुरतो ह्युत्थितं लिंगं भक्त्या शुक्लस्य सुन्दरि ॥ ४ ॥ एतस्मिन्नेव काले तु वागुवाचाशरीरिणी ॥ उद्दालक महाबाहो शृणुष्वैतद्वचो मम ॥ ५ ॥ अद्यप्रभृति वासोऽत्र मम नित्यं भविष्यति ॥ यस्मादत्र समुत्पन्नं संगमे लिंगमुत्तमम् ॥ संगमेश्वरमित्येव नाम चास्य भविष्यति ॥ ६ ॥ येत्र स्नानं नराः कृत्वा संगमे लोकविश्रुते ॥ संगमेश्वरमीक्षन्ते ते यांति परमां गतिम् ॥ ७ ॥ ॥ ईश्वर उवाच ॥ ॥ ततस्तं पूजयामास दिवारात्रमतंद्रितः ॥ ततो देहावसानेऽसौ गतो यत्र महेश्वरः ॥ ८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये संगमेश्वरमाहात्म्यवर्णनंनामैकोनपञ्चाशदुत्तरद्विशततमोऽध्यायः ॥ २४९ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि लिंगं त्रैलोक्यविश्रुतम् ॥ गंगेश्वरेति विख्यातं संगमेश्वरपश्चिमे ॥ १ ॥ यदा गंगा समाहूता विष्णुना प्रभविष्णुना ॥ अन्तकालेऽभिषेकार्थं स्वकायस्य वरानने ॥ २ ॥ ततो दृष्ट्वा तु तत्क्षेत्रं पुण्यं ह्युषिनिषेवितम् ॥ सर्वत्र व्यापितं लिंगैराश्रमैश्च तपस्विनाम् ॥ ३ ॥ ततो गंगा सरिच्छ्रेष्ठा पूर्वसागरगामिनी ॥ स्थापयामास तल्लिंगं शिवभक्तिपरायणा ॥ ४ ॥ तं दृष्ट्वा तु वरारोहे गंगास्नानफलं लभेत् ॥ अश्वमेधसहस्रस्य फलं प्राप्नोति मानवः ॥ २५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये गंगेश्वरमाहात्म्यवर्णनंनाम पञ्चाशदुत्तरद्विशततमोऽध्यायः ॥ २५० ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि शंकरादित्यमुत्तमम् ॥ गंगेश्वरस्य पूर्वेण शंकरेण प्रतिष्ठितम् ॥ १ ॥ षष्ठ्यां चैव तु शुक्लायामेनं यः पूजयिष्यति ॥ गमिष्यति परं स्थानं यत्र देवो दिवाकरः ॥ २ ॥ रक्तचंदनमिश्रैश्च रक्तपुष्पैः समाहितः ॥ ताम्रपात्रे समाधाय योऽर्घ्यं दास्यति मानवः ॥ स यास्यति



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परां सिद्धिं न च याति दरिद्रताम् ॥ ३ ॥ तस्मात्सर्वप्रयत्नेन तस्मिन्क्षेत्रे वरानने ॥ पूजयेच्छंकरादित्यं सर्वकामफलप्रदम् ॥ ४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये शंकरादित्यमाहात्म्यवर्णनंनामैकपञ्चाशदुत्तरद्विशततमोऽध्यायः ॥ २५१ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि लिंगं त्रैलोक्यविश्रुतम् ॥ तत्र शंकरनाथेति प्रसिद्धं पापनाशनम् ॥ ॥ १ ॥ स्थापितं भानुना देवि कृत्वा तत्र महत्तपः ॥ तमर्चयित्वा देवेशं सोपवासो महेश्वरम् ॥ २ ॥ ब्राह्मणान्भोजयेत्तत्र श्राद्धं कुर्याज्जितेन्द्रियः ॥ शक्त्या हिरण्यं वासांसि विप्रे दद्यात्समाहितः ॥ स याति परमं स्थानं नात्र कार्या विचारणा ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये शङ्करनाथमाहात्म्यवर्णनंनाम द्विपञ्चाशदुत्तरद्विशततमोऽध्यायः ॥ २५२ ॥ ॥ छ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि गुफेश्वरमनुत्तमम् ॥ हिरण्या उत्तरे भागे सर्वपातकनाशनम् ॥ तं दृष्ट्वा मानवो देवि कोटिहत्यां व्यपोहति ॥ १ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये गुफेश्वरमाहात्म्यवर्णनंनाम त्रिपञ्चाशदुत्तरद्विशततमोऽध्यायः ॥ २५३ ॥ ॥छ॥ ॥ ईश्वर उवाच ॥ ॥ तत्रैव संस्थितं पश्येत्सर्वपातकनाशनम् ॥ घण्टेश्वरमिति ख्यातं देवदानववन्दितम् ॥ पूजितं ह्यृषिभिः सिद्धैर्वांछितार्थफलप्रदम् ॥ १ ॥ वारे सोमस्य चाष्टम्यां यस्तं पूजयते नरः ॥ स लभेद्वांछितान्कामान्मुक्तः स्यात्पातकेन हि ॥ २ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये घंटेश्वरमाहात्म्यवर्णनंनाम चतुष्पञ्चाशदुत्तरद्विशततमोऽध्यायः ॥ २५४ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि तीर्थं त्रैलोक्यविश्रुतम् ॥ तस्यैव पश्चिमे भाग ऋषीणां पुण्यकर्मणाम् ॥ १ ॥ तस्मिंस्त्रिनेत्रा मत्स्याश्च दृश्यंतेऽद्यापि भामिनि ॥ अंगिरा गौतमोऽगस्त्यः सुमतिः सुसखिस्तथा ॥ २ ॥ विश्वामित्रः स्थूलशिराः संवर्त्तः प्रतिमर्दनः ॥ रैभ्यो बृहस्पतिश्चैव च्यवनः कश्यपो भृगुः ॥ ३ ॥ दुर्वासा जामदग्न्यश्च मार्कंडेयोऽथ गालवः ॥ उशनाऽथ भरद्वाजो यवक्रीतस्त्रितस्तथा ॥ ४ ॥ स्थूलाक्षः सकलाक्षश्च कण्वो मेधातिथिः कुशः[1] ॥ नारदः पर्वतश्चैव वसिष्ठोऽरुंधती तथा ॥ ५ ॥ काण्वोऽथ गौतमो धौम्यः शतानन्दोऽकृतव्रणः ॥ जमदग्निस्तथा रामो बकश्चेत्येवमादयः ॥ कृष्णद्वैपायनश्चैव पुत्रशिष्यैः समन्वितः ॥ ६ ॥ एतत्क्षेत्रं समासाद्य प्रभासं मुनिसत्तमाः ॥ तपस्तेपुर्महात्मानो विविधं परमाद्भुतम् ॥ ७ ॥ एवं ते नियतात्मानो दमयुक्तास्तपस्विनः ॥ समाधिना जिगीषन्ते

१ कृशः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ब्रह्मलोकं सनातनम् ॥ ८ ॥ अथाभवदनावृष्टिः कदाचिन्महती प्रिये ॥ कृच्छ्रं प्राप्तो ह्यभूत्तत्र सर्वलोकः क्षुधार्दितः ॥ ९ ॥ ततो निरन्ने लोकेऽस्मि
न्नात्मानं ते परीप्सवः ॥ मृतं कुमारमादाय कृच्छ्रं प्राप्तास्तदाऽपचन् ॥ १० ॥ अथोपरिचरस्तत्र क्लिश्यमानान्हि तानृषीन् ॥ दृष्ट्वा राजा वृषादर्भिः
प्रोवाचेदं वचस्तदा ॥ ११ ॥ ॥ राजोवाच ॥ ॥ प्रतिग्रहो ब्राह्मणानां दृष्टा वृत्तिरनिंदिता ॥ तस्मात्प्रतिग्रहं मत्तो गृह्णीध्वं मुनिपुंगवाः ॥
॥ १२ ॥ मुद्गान्माषांश्च व्रीहींश्च तथा रत्नानि कांचनम् ॥ युष्माकं संप्रदास्यामि यच्चान्यदपि दुर्लभम् ॥ निवर्त्तध्वमतः सर्वे ह्येतस्मात्पातकात्प
रम् ॥ १३ ॥ ॥ ऋषय ऊचुः ॥ ॥ तज्जानंतः कथं राजन्गृह्णीमस्ते प्रतिग्रहम् ॥ १४ ॥ दशसूनासमश्चक्री दशचक्रिसमो ध्वजी ॥ दशध्वजि
समा वेश्या दशवेश्यासमो नृपः ॥ १५ ॥ यो राज्ञां प्रतिगृह्णाति ब्राह्मणो लोभमोहितः ॥ तामिस्रादिषु घोरेषु नरकेषु स पच्यते ॥ १६ ॥ तद्गच्छ
कुशलं तेऽस्तु सह दानेन पार्थिव ॥ अन्येषां दीयतामेतदित्युक्त्वा ते वनं ययुः ॥ १७ ॥ अथ राज्ञः समादेशात्तत्र गत्वा च मंत्रिणः ॥ ऊदुम्बराणि
व्यकिरन्हेमगर्भाणि भूतले ॥१८॥ अथ तानि व्यचिन्वंश्च ऋषयो वरवर्णिनि ॥ गुरूणीति विदित्वा तु न ग्राह्याण्यंगिराऽब्रवीत् ॥ १९ ॥ ॥ अत्रि
रुवाच ॥ ॥ नास्महेनास्महे मूढ वयमज्ञानबुद्धयः ॥ हैमानीमानि जानीमः प्रतिबुद्धाः स्म जाग्रतः ॥२०॥ ॥ वसिष्ठ उवाच ॥ ॥ धर्मार्थं संचयो
यस्य द्रव्याणां स न शस्यते ॥ तपःसंचयनं मन्ये वसिष्ठो धनसंचयम् ॥ २१ ॥ त्यजध्वं संचयान्सर्वाञ्ज्ञातीनां समुपद्रवान् ॥ न हि संचयवान्क
श्चिद्दृश्यते निरुपद्रवः ॥ २२ ॥ यथायथा न गृह्णाति ब्राह्मणोऽसत्प्रतिग्रहम् ॥ तथातथाऽनिशं चास्य ब्रह्मतेजस्तु वर्धते ॥ २३ ॥ अकिंचनत्वं राज्यं
च तुलया समतोलयम् ॥ अकिंचनत्वमधिकं राज्यादपि न संशयः ॥ २४ ॥ ॥ कश्यप उवाच ॥ ॥ अनर्थो ब्राह्मणस्यैष यदर्थनिचयो महान् ॥
अर्थैश्वर्यविमूढोऽपि श्रेयसो भ्रश्यते द्विजः ॥ २५ ॥ अर्थसंपद्विमोहाय बहुशोकाय चैव हि ॥ तस्मादर्थमनर्थाख्यं श्रेयोऽर्थी दूरतस्त्यजेत् ॥ २६ ॥
यस्य धर्मार्थमप्यर्थास्तस्यापि न हि दृश्यते ॥ प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरम् ॥२७॥ ॥ भरद्वाज उवाच ॥ ॥ जीर्यंति जीर्यतः केशा दंता
जीर्यंति जीर्यतः ॥ चक्षुःश्रोत्रे च जीर्यंते तृष्णैका न तु जीर्यते ॥ २८ ॥ सूची सूत्र तथा वस्त्रे समानयति सूचिका ॥ तद्वत्संसारसूत्रस्य तृष्णा सूची



१ इयं कथा पूर्वं नागरखण्डेऽप्येताद्दश्यैवानुपूर्व्या वर्णितास्ति । सा च हाटकेश्वरक्षेत्रस्थऋष्याश्रमतीर्थमाहात्म्यरूपेणोक्ता—अत्र च प्रभासक्षेत्रस्थऋषितीर्थमाहात्म्यरूपेणोच्यते । तत्रापि त ऋषयः प्रभासक्षेत्रादागता—इति वर्णितमस्ति । तेषामृषीणां प्रभासक्षेत्र इदमृषितीर्थमिति तन्माहात्म्यं तत्रापीति यथोदिततदानुपूर्वीकत्वमेतस्याः—किंचिन्मात्रो—भेदश्च पाठक्रमस्य—इति बोध्यो विवेकार्थः । २ तस्यापि हि न दृश्यते—तेनापि न ज्ञायते—इत्यर्थः । ३ समानयति—यथा सूची--सूत्रेणोभयोर्वस्त्रयोरेकत्र संयोगं करोति—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विधीयते ॥ २९ ॥ यथा शृंगं रुरोः काये वर्द्धमाने हि वर्द्धते ॥ अनंतपारा दुर्वारा तृष्णा दुःखप्रदा सदा ॥ अधर्मबहुला चैव तस्मात्तां परिवर्जयेत्॥ ॥ ३० ॥ ॥ गौतम उवाच ॥ ॥ संतुष्टः को न शक्नोति फलैश्चापि हि वर्त्तितुम् ॥ सर्वोऽपींद्रियलोभेन संकटान्यभिगाहते ॥३१॥ सर्वत्र संपदस्तस्य संतुष्टं यस्य मानसम् ॥ उपानद्गूढपादस्य ननु चर्मावृतेव भूः ॥ ३२ ॥ संतोषामृततृप्तानां यत्सुखं शांतचेतसाम् ॥ कुतस्तद्धनलुब्धानां सुखं चाशांतचेतसाम् ॥३३॥ ॥ विश्वामित्र उवाच ॥ ॥ कामं कामयमानस्य यदि कामः स सिद्ध्यति ॥ तथैनमपरः कामो भूयो विध्यति बाणवत् ॥३४॥ न जातु कामः कामानामुपभोगेन शाम्यति ॥ हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥ ३५ ॥ कामानभिलषन्लोभान्न नरः सुखमेधते॥ समालभ्य तरुच्छायां भवनं वाञ्छो नरः ॥३६॥ चतुःसागरसंयुक्तां यो भुंक्ते पृथिवीमिमाम् ॥ एकस्तु वनवासी च स कृतार्थो न पार्थिवः ॥३७॥ ॥ ॥ जमदग्निरुवाच ॥ ॥ प्रतिग्रहसमर्थो यस्तपो वर्द्धयते महान् ॥ न करोति तपस्तस्य जायते च सहस्रधा ॥ ३८ ॥ प्रतिग्रहसमर्थानां निवृत्तानां प्रतिग्रहात् ॥ य एव ददतां लोकास्त एवाप्रतिगृह्णताम् ॥ ३९ ॥ ॥ अरुंधत्युवाच ॥ ॥ बिसतंतुर्यथा नित्यं समंतान्नालसंस्थितः ॥ तृष्णा चैव मनाद्यंता तथा देहाश्रिता सदा ॥ ४० ॥ या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः ॥ योऽसौ प्राणांतिको रोगस्तां तृष्णां त्यजतः सुखम् ॥ ॥ ४१ ॥ ॥ चंडोवाच ॥ ॥ उग्रात्प्रतिग्रहाद्यस्माद्बिभ्यत्येते महेश्वराः ॥ बलीयांसो दुर्बलवत्तथा चैव बिभेम्यहम् ॥ ४२ ॥ ॥ पँशुमुख उवाच ॥ ॥ यदाचरंति विद्वांसः सदा धर्मपरायणाः ॥ तदेव विदुषा कार्यमात्मनो हितमिच्छता ॥ ४३ ॥ ॥ ईश्वर उवाच ॥ ॥ इत्युक्त्वा हेमगर्भाणि त्यक्त्वा तानि फलानि च ॥ ऋषयो जग्मुरन्यत्र सर्व एव दृढव्रताः ॥ ४४ ॥ ततस्ते विचरंतो वै ददृशुः सुमहत्सरः ॥ पद्मिनीभिः समाकीर्णं सर्वतो वरवर्णिनि ॥ ४५ ॥ तस्मिन्देशे तदा प्राप्तः परिव्राजः शुनोमुखः ॥ तेनैव सहितास्तत्र स्नाताः सर्वे महर्षयः ॥ ४६ ॥ तत्रावतारं कृत्वा तैर्गृहीतानि बिसानि तु ॥ निक्षिप्य सरसस्तीरे चक्रुः पुण्यां जलक्रियाम् ॥ ४७ ॥ अथोत्तीर्य जलात्तस्मात्ते समेत्य परस्परम् ॥ बिसानि तान्यपश्यंत इदं वचनमब्रुवन् ॥ ४८ ॥ ॥ ऋषयऊचुः ॥ ॥ केन क्षुधाभितप्तानामस्माकं पापकर्मणा ॥ बिसानि तानि सर्वाणि हृतानि च मुनीश्वराः ॥ ॥ ४९ ॥ ते शंकमानास्त्वन्योन्यं पर्यपृच्छन्द्विजोत्तमाः ॥ चक्रुस्ते शपथान्सर्वे यथान्यायं च भामिनि ॥ ५० ॥ ॥ कश्यप उवाच ॥ ॥ सर्व

१ तु–इ० पा० । २ कृष्णवर्त्मा–अग्निः–इत्यर्थः । ३ मोहात्–इ० पा० । ४ चतुःसागरपर्यंताम्–इ० पा० । ५ न करोति–प्रतिग्रहम्–इति शेषः । ६ चंडानाम्नी–तेषामृषीणां दासी—इति नागरखंडे ह्युक्तम् । ७ अय पशुमुख –तेषामृषीणां दास आसीत्—इति हि नागरखण्डे प्रोक्तम् । ८ सर्वापुण्यः—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



भक्षः स भवतु न्यासलोपं करोतु सः ॥ कूटसाक्षित्वमभ्येतु बिसस्तैन्यं करोति यः ॥ ५१ ॥ ॥ वसिष्ठ उवाच ॥ ॥ अनृतौ मैथुनं यातु पर नारीं विशेषतः ॥ अतिथिः स्यात्तथान्योन्यं बिसस्तैन्यं करोति यः ॥ ५२ ॥ ॥ भरद्वाज उवाच ॥ ॥ नृशंसो वै स भवतु समृद्ध्या चाप्यहंकृतः ॥ मत्सरी पिशुनश्चैव बिसस्तैन्यं करोति यः ॥ ५३ ॥ ॥ विश्वामित्र उवाच ॥ ॥ नित्यं कामरतः सोस्तु दिवा सेवतु मैथुनम् ॥ नीचकर्मरतश्चैव बिसस्तैन्यं करोति यः ॥ ५४ ॥ ॥ जमदग्निरुवाच ॥ ॥ कन्यां यच्छतु वृद्धाय स भूयाद्वृषलीपतिः ॥ अस्तु वार्द्धुषिको नित्यं बिसस्तैन्यं करोति यः ॥ ५५ ॥ ॥ गौतम उवाच ॥ ॥ स गृह्णात्वविकादानं करोतु हयविक्रयम् ॥ प्रकरोतु गुरोर्निंदां बिसस्तैन्यं करोति यः ॥ ५६ ॥ ॥ अत्रिरुवाच ॥ ॥ मातरं पितरं नित्यं दुर्मतिः सोऽवमन्यताम् ॥ शूद्रं पृच्छतु धर्मार्थं बिसस्तैन्यं करोति यः ॥ ५७ ॥ ॥ अरुन्धत्युवाच ॥ ॥ करोतु पत्युः पूर्वं सा भोजनं शयनं तथा ॥ नारी दुष्टसमाचारा बिसस्तैन्यं करोति या ॥ ५८ ॥ ॥ चण्डो वाच ॥ ॥ स्वामिनः प्रतिकूलास्तु धर्मद्वेषं करोतु च ॥ साधुद्वेषपरा चैव बिसस्तैन्यं करोति या ॥५९॥ ॥ पशुमुख उवाच ॥ ॥ परस्य प्रेष्यतां यातु सदा जन्मनिजन्मनि ॥ सर्वधर्मक्रियाहीनो बिसस्तैन्यं करोति यः॥६०॥ ॥ शुनोमुख उवाच ॥ ॥ वेदान्स पठतु न्यायाद्गृहस्थः स्यात्प्रियातिथिः ॥ सत्यं वदतु चाजस्रं बिसस्तैन्यं करोति यः ॥६१॥ ॥ ऋषय ऊचुः ॥ ॥ इष्टमेतद्द्विजातीनां यस्त्वया शपथः कृतः ॥ त्वया कृतं बिसस्तैन्यं सर्वेषां नः शुनोमुख ॥६२॥ ॥ शुनोमुख उवाच ॥ ॥ मया हृतानि सर्वेषां बिसानीमानि वै द्विजाः ॥ धर्मं वै श्रोतुकामेन जानीध्वं मां पुरंदरम् ॥६३॥ अलोभादक्षया लोका जिता वै मुनिसत्तमाः ॥ प्रार्थयध्वं वरं शुभ्रं सर्वमेव ह्यसंशयम् ॥६४॥ ॥ ऋषय ऊचुः ॥ ॥ इहागत्य नरो यस्तु त्रिरात्रोपोषितः शुचिः ॥ कृत्वा स्नानं पितॄंस्तर्प्य श्राद्धं कुर्यात्समाहितः ॥६५॥ सर्वतीर्थोद्भवं तस्य पुण्यं भूयात्पुरंदर ॥ नाधोगतिमवाप्नोति विबुधैस्सह मोदताम् ॥ तथेत्युक्त्वा ततः शक्रस्तत्रैवान्तर्हितोऽभवत् ॥६६॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्य ऋषितीर्थमाहात्म्यवर्णनं नाम पञ्चपञ्चाशदुत्तरद्विशततमोऽध्यायः ॥२५५॥छ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि नंदादित्यं[2] समाहितः ॥ नंदेन स्थापितं पूर्वं तत्रैवामितबुद्धिना ॥१॥ नंदो राजा पुरा ह्यासीत्सर्वलोकसुखप्रदः ॥ न दुर्भिक्षं न च व्याधिनाकाले मरणं नृणाम् ॥ २ ॥ तस्मिञ्छासति धर्मज्ञे न चावृष्टिकृतं भयम् ॥ कस्यचित्त्वथ कालस्य पूर्वकर्मानुसारतः॥ ३ ॥ कुष्ठेन महता व्याप्तो वैराग्यं परमं गतः॥ तेन रोगाभिभूतेन देवदेवो दिवाकरः॥

१ परस्परकृतातिथ्यः—इ० पा० । २ मंदादित्यम्—इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिष्ठितो नदीतीरे स च रोगाद्विमोचितः ॥ ४ ॥ ॥ देव्युवाच ॥ ॥ किमसौ रोगवान्राजा सार्वभौमो महीपतिः ॥ तस्य धर्मरतस्यापि कस्माद्रोग
समुद्भवः ॥ ५ ॥ ॥ ईश्वर उवाच ॥ ॥ एष धर्मसदाचारो नंदो राजा प्रतापवान् ॥ व्यचरत्सर्वलोकान्स विमानवरमास्थितः ॥ ६ ॥ विमानं
तस्य तुष्टेन दत्तं वै विष्णुना स्वयम् ॥ कामगं वरवर्णेन बर्हिणेन विनादितम् ॥ ७ ॥ स कदाचिन्नृपश्रेष्ठो विचरंस्तत्र संस्थितः ॥ गतवान्मानसं
दिव्यं सरो देवगणान्वितम् ॥ ८ ॥ तत्रापश्यद्बृहत्पद्मं सरोमध्यगतं सितम् ॥ तत्र चांगुष्ठमात्रं तु स्थितं पुरुषसत्तमम् ॥ ९ ॥ रक्तवासोभिराच्छन्नं
द्विभुजं तिग्मतेजसम् ॥ तं दृष्ट्वा सारथिं प्राह पद्ममेतत्समाहर ॥१०॥ इदं तु शिरसा बिभ्रत्सर्वलोकस्य सन्निधौ ॥ श्लाघनीयो भविष्यामि तस्मादा
हर मा चिरम् ॥ ११ ॥ एवमुक्तस्ततस्तेन सारथिः प्रविवेश ह ॥ ग्रहीतुमुपचक्राम तत्पद्मं वरवर्णिनि ॥ स्पृष्टमात्रे तदा पद्मे हुंकारः समपद्यत ॥१२॥
राजा च तत्क्षणात्तेन शब्देन समजायत ॥ कुष्ठी विगतवर्णश्च बलवीर्यविवर्जितः ॥ १३ ॥ तथागतमथात्मानं दृष्ट्वा स पुरुषर्षभः ॥ तस्थौ तत्रैव
शोकार्तः किमेतदिति चिंतयन् ॥ १४ ॥ तस्य चिंतयतो धीमानाजगाम महातपाः ॥ वसिष्ठो ब्रह्मपुत्रस्तु स तं पप्रच्छ पार्थिवः ॥ १५ ॥ एष मे
भगवञ्जातो देहस्यास्य विपर्ययः ॥ कुष्ठरोगाभिभूतात्मा नाहं जीवितुमुत्सहे ॥ १६ ॥ उपायं ब्रूहि मे ब्रह्मन्व्याधितस्य चिकित्सितम् ॥ उताहो व्रत
मन्यद्वा दानं यज्ञमथापि वा ॥ १७ ॥ ॥ वसिष्ठ उवाच ॥ ॥ एतद्ब्रह्मोद्भवंनाम पद्मं त्रैलोक्यविश्रुतम् ॥ दृष्टमात्रेण चानेन दृष्टाः स्युः सर्व
देवताः ॥ १८ ॥ एतद्धि दृश्यते धन्यैः पद्मं कैः क्वापि पार्थिव ॥ एतस्मिन्दृष्टमात्रे तु यो जलं विशते नरः ॥ १९ ॥ सर्वपापविनिर्मुक्तः पदं निर्वाण
माप्नुयात् ॥ एष दृष्ट्वा तु ते सूतो हर्तुं तोये प्रविष्टवान् ॥ २० ॥ तव वाक्येन राजेंद्र मृतोऽसौ रोगवान्भवेत् ॥ ब्रह्मपुत्रोऽप्यहं तेन पश्यामि परमे
श्वरम् ॥ २१ ॥ अहन्यहनि चागच्छंस्त्वं पुनर्दृष्टवानसि ॥ वांछंति देवता नित्यममुं हृदि मनोरथम् ॥ २२ ॥ मानसे ब्रह्मपद्मं तु दृष्ट्वा स्नात्वा कदा
वयम् ॥ प्राप्स्यामः परमं ब्रह्म यद्गत्वा न पुनर्भवेत् ॥ २३ ॥ इदं च कारणं भूयो द्वितीयं शृणु पार्थिव ॥ कुष्ठस्य यत्त्वया प्राप्तं हर्तुकामेन पंकजम् ॥
॥ २४ ॥ प्रद्योतनस्तु गर्भेऽस्मिन्स्वयमेव व्यवस्थितः ॥ तवैषा बुद्धिरभवद्दृष्ट्वेदं वरपंकजम् ॥ २५ ॥ धारयामि शिरस्येनं लोकमध्ये विभूष
णम् ॥ इदं चिन्तयतः पापमेवं देवेन दर्शितम् ॥ २६ ॥ ततः सर्वप्रयत्नेन तमाराधय भास्करम् ॥ प्रसादाद्देवदेवस्य मोक्ष्यसे नात्र संशयः ॥२७॥
प्रभासं गच्छ राजेंद्र तीर्थं त्रैलोक्यविश्रुतम् ॥ तत्र सिद्धिर्भवेच्छीघ्रमार्त्तानां प्राणिनां भुवि ॥ २८ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा

१ समपद्यत—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





वसिष्ठस्य महात्मनः ॥ प्रभासं क्षेत्रमासाद्य माहेश्वर्यास्तटे शुभे ॥ २९ ॥ नंदादित्यं प्रतिष्ठाप्य गंधधूपानुलेपनैः ॥ पूजयामास तं देवि पुष्पैरुच्चा
वचैस्तथा ॥ ३० ॥ तस्य तुष्टो दिवानाथो वरदोऽहमथाब्रवीत् ॥ ३१ ॥ ॥ नन्द उवाच ॥ ॥ कुष्ठेन महता व्याप्तं पश्य मां सुरसत्तम ॥
यथाऽयं नाशमायाति तथा कुरु दिवाकर ॥ ३२ ॥ सान्निध्यं कुरु देवेश स्थानेऽस्मिन्नित्यदा विभो ॥ ३३ ॥ ॥ सूर्य उवाच ॥ ॥ नीरोगस्त्वं
महाराज सद्य एव भविष्यसि ॥ अत्र ये मां समागत्य द्रक्ष्यंति च नरा भुवि ॥ ३४ ॥ सप्तम्यां सूर्यवारेण यास्यंति परमां गतिम् ॥ अत्र मे सूर्य
वारेण सांनिध्यं सप्तमीदिने ॥ भविष्यति न संदेहो गमिष्ये त्वं सुखी भव ॥ ३५ ॥ एवमुक्त्वा सहस्रांशुस्तत्रैवांतरधीयत ॥ ३६ ॥ नीरोगत्वमवा
प्यासौ कृत्वा राज्यमनुत्तमम् ॥ जगाम परमं स्थानं यत्र देवो दिवाकरः ॥ तस्मिंस्तीर्थे नरः स्नात्वा कृत्वा श्राद्धं प्रयत्नतः ॥ ३७ ॥ नंदादित्यं
पुनर्दृष्ट्वा न पुनर्मर्त्त्यतां व्रजेत् ॥ प्रदद्यात्कपिलां तत्र ब्राह्मणे वेदपारगे ॥ ३८ ॥ अहोरात्रोषितो भूत्वा घृतधेनुमथापि वा ॥ न तस्य गुणितुं शक्या
संख्या पुण्यस्य केनचित् ॥ ३९ ॥ इत्येवं देवदेवस्य माहात्म्यं दीप्तदीधितेः ॥ कथितं तव सुश्रोणि सर्वपापप्रणाशनम् ॥ ४० ॥ इति श्रीस्कांदे
महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये नन्दादित्यमाहात्म्यवर्णनंनाम षट्पञ्चाशदुत्तरद्विशततमो
ऽध्यायः ॥२५६॥ ॥छ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि त्रितकूपमिति स्मृतम् ॥ नंदादित्यस्य पूर्वेण योजनत्रितयेन तु ॥ १ ॥ पुरा
बभूव राजेंद्रः सौराष्ट्रविषये सुधीः ॥ आत्रेय इति विख्यातो वेदवेदांगपारगः ॥२॥ तस्य पुत्रत्रयं जज्ञ ऋतुकालाभिगामिनः ॥ एकतश्च द्वितश्चैव त्रित
श्चैवेति भामिनि ॥३॥ त्रितस्तेषां कनिष्ठोऽभूद्वेदवेदांगपारगः ॥ सर्वैरेव गुणैर्युक्तो मूर्खौ ज्येष्ठौ बभूवतुः ॥ ४ ॥ कस्यचित्त्वथ कालस्य आत्रेयो द्विज
सत्तमः ॥ तपः कृत्वा तु विपुलं कालधर्ममुपेयिवान् ॥ ५ ॥ ततस्तेषां त्रितो राजा बभूव गुणवत्तरः ॥ धुरमाकर्षयामास पुत्रोऽयं तस्य या पुरा ॥६॥
तस्य बुद्धिः समुत्पन्ना कथं यज्ञं करोम्यहम् ॥ सन्निमंत्र्य द्विजश्रेष्ठान्यज्ञकर्मस्वधिष्ठितान् ॥ ७ ॥ इन्द्रादींश्च सुरान्सर्वानावाह्य विधिपूर्वकम् ॥
दक्षिणार्थं द्विजेन्द्राणां प्रभासं स जगाम ह ॥ गृहीत्वा भ्रातरौ ज्येष्ठौ गवार्थं प्रस्थितो द्विजः ॥ ८ ॥ यस्य यस्य गृहे याति स त्रितो वेदपारगः ॥
तत्र तत्र वरां पूजां लेभे गाश्चैव पुष्कलाः ॥ ९ ॥ एवं स गोधनं प्राप्य भ्रातृभ्यां सहितस्तदा ॥ गृहाय प्रस्थितो देवि निर्वृतिं परमां गतः ॥ १० ॥
त्रितस्ताभ्यां पुरो याति पृष्ठतो भ्रातरौ च तौ ॥ गोधनं चालयंतस्ते प्रभासं क्षेत्रमागताः ॥ ११ ॥ अथ तद्गोधनं दृष्ट्वा भूरि दानार्थमाहृतम् ॥



१ परम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्रातृभ्र्यां[1] त्रितये[2] चेति पापा मतिरजायत ॥ १२ ॥ परस्परमूचतुस्तौ भ्रातरौ दुष्टचेतसौ ॥ त्रितो यज्ञेषु कुशलो वेदेषु कुशलस्तथा ॥ १३ ॥ मान्यः
पूज्यश्च सर्वत्र आवां मूर्खौ निरर्थकौ ॥ एतद्धि गोधनं सर्वं त्रितो दास्यति सन्मखे ॥ १४ ॥ अस्माकं पितृपर्यातो[3] यदाप्तं तत्समं भवेत् ॥ तस्मा
दत्रैव युक्तोऽस्य वधो वै त्रितयज्विनः ॥ १५ ॥ एवं तौ निश्चयं कृत्वा प्रस्थितौ भ्रातरावुभौ ॥ त्रितस्तु पुरतो याति निर्विकल्प ऋजुः सुधीः ॥१६॥
अनु तत्र समुत्तस्थौ व्याघ्रो रौद्रतराकृतिः ॥ व्यादितास्यो रवं देवि व्यनदद्भैरवं ततः ॥ १७ ॥ तस्य शब्देन ता गावो नष्टा जग्मुर्दिशो दश ॥
अन्धकूपो महांस्तत्र प्रदेशे दारुणोऽभवत् ॥ १८ ॥ एकतो दारुणो व्याघ्रः कूपोऽन्यत्र सुदारुणः ॥ दृष्ट्वा ते भ्रातरः सर्वे भयोद्विग्नाः प्रदुद्रुवुः ॥ १९ ॥
अथ ते विषमं प्राप्य तटं कूपस्य भामिनि ॥ स्थिता यावद्गतो व्याघ्रस्ततो गंतुं मनो दधुः ॥ २० ॥ अथ ताभ्यां त्रितो देवि भ्रातृभ्यां नृपसत्तमः ॥
प्रक्षितो दारुणे कूपे जीर्णे तोयविवर्जिते ॥ २१ ॥ ततस्तद्गोधनं गृह्य प्रस्थितौ हृष्टमानसौ ॥ त्रितस्तु पतितस्तत्र कूपे जलविवर्जिते ॥ २२ ॥
चिन्तयामास मेधावी नाहं शोचामि जीवितुम् ॥ मयाहूता द्विजश्रेष्ठा यज्ञार्थं वेदपारगाः ॥ इन्द्राद्याश्च सुराः सर्वे स क्रतुः स्यान्न मे त्वतः ॥ २३ ॥
स एवं चिन्तयामास वेदवेदांगपारगः ॥ मानसं यज्ञमारभ्य तत्रैव वरवर्णिनि ॥ २४ ॥ स्वयमेव स सूक्तानि प्रोक्त्वाप्रोक्त्वा द्विजोत्तमः ॥ कृतवा
न्वालुकाहोमं तेन तुष्टाश्च देवताः ॥ २५ ॥ श्रद्धां तस्य विदित्वा तां भूयस्तृप्तास्तु देवताः ॥ आगत्य ब्राह्मणं प्रोचुः कूपमध्ये व्यवस्थितम् ॥
॥ २६ ॥ ॥ देवा ऊचुः ॥ ॥ भोभो विप्र त्वया नूनं सर्वे संतर्पिता वयम् ॥ मानसेन तु यज्ञेन तस्माद्ब्रूहि मनोगतम् ॥ २७ ॥ ॥ ब्राह्मण
उवाच ॥ ॥ यदि देवाः प्रसन्ना मे कूपान्निष्क्रमणे त्वहम् ॥ यष्टा स्वं मंदिरं गत्वा देवयज्ञं करोम्यहम् ॥ २८ ॥ ॥ ईश्वर उवाच ॥ ॥ अथ
देवैः समादिष्टा तस्मिकूपे सरस्वती ॥ निर्गत्य वसुधां भित्त्वा पूरयामास वारिणा ॥ २९ ॥ अथ निष्क्रम्य विप्रोऽसौ यातः स्वभवनं प्रति ॥ ततः
प्रभृति देवेशि त्रितकूपः स उच्यते ॥ ३० ॥ स्नात्वा तत्र शुचिर्भूत्वा त्वथ संतर्पयेत्पितॄन् ॥ अश्वमेधमवाप्नोति सर्वपापविवर्जितः ॥ ३१ ॥ तिल
दानं तु देवेशि तत्र शस्तं सकाञ्चनम् ॥ पितॄणां वल्लभं तीर्थं नित्यं चैव तु भामिनि ॥ ३२ ॥ अग्निष्वात्ता बर्हिषद आयंतुन इति स्मृताः ॥
ये दिव्याः पितरो देवि तेषां सांनिध्यमत्र हि ॥ ३३ ॥ दर्शनादपि तीर्थस्य तस्य वै सुरसत्तमे ॥ मुच्यन्ते प्राणिनः पापादाजन्ममरणांतिकात् ॥
॥ ३४ ॥ तस्मात्सर्वप्रयत्नेन तत्र स्नानं समाचरेत् ॥ प्रभासं क्षेत्रमासाद्य यदीच्छेच्छ्रेय आत्मनः ॥ ३५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसा
हस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये त्रितकूपमाहात्म्यवर्णनंनाम सप्तपञ्चाशदुत्तरद्विशततमोऽध्यायः ॥ २५७ ॥ ॥ छ ॥

१ भ्रातृभ्यां--भ्रात्रोः--एकतद्वितयोः--इत्यर्थः । २ त्रितये--तृतीये--त्रिते--इत्यर्थः । ३ पितृपर्यातः पितृपारंपर्यतः--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि शशापानमिति स्मृतम् ॥ तस्यैव दक्षिणे तीर्थं सर्वपापप्रणाशनम् ॥ १ ॥ यस्मिन्स्नात्वा नरः सम्यङ्नापमृत्युभयं लभेत् ॥ शृणु यस्मात्तदुत्पत्तिं वदतो मम वल्लभे ॥ २ ॥ मथित्वा सागरं देवा गृहीत्वाऽमृतमुत्तमम् ॥ सत्वरास्तत्र ते गत्वा पपुश्चैव यथेप्सया ॥ ३ ॥ पिबतां तत्र पीयूषं देवानां वरवर्णिनि ॥ बिंदवः पतिता भूमौ शतशोथ सहस्रशः ॥ ४ ॥ एतस्मिन्नेव काले तु शशकस्तत्र चागतः ॥ प्रविष्टः सलिले तत्र तृषार्तो वरवर्णिनि ॥ ५ ॥ अमरत्वमनुप्राप्तो वर्द्धते सलिलालये ॥ तं दृष्ट्वा त्रिदशाः सर्वे स्पर्द्धमाना मुहुर्मुहुः ॥ ज्ञात्वामृतान्वितं तोयं मंत्रं चक्रुर्भयान्विताः ॥ ६ ॥ अमृतं पतितं भूमौ भक्षयिष्यंति मानवाः ॥ ततोऽमर्त्या भविष्यंति नात्र कार्या विचारणा ॥ ७ ॥ तिर्यग्योन्यां समुत्पन्नः कृपणः शशको ह्ययम् ॥ अस्माभिः स्पर्द्धते तस्मात्ततो भयमुपस्थितम् ॥ ८ ॥ अथ प्राप्तो निशानाथो व्याधिना स परिप्लुतः ॥ अब्रवीत्त्रिदशान्सर्वानमृतं मे प्रयच्छत ॥ ९ ॥ कृच्छ्रेण महता प्राप्तो नाहं शक्तो विसर्पितुम् ॥ अथोचुस्त्रिदशाः सर्वे सर्वमस्माभिर्भक्षितम् ॥ १० ॥ विस्मृतस्त्वं निशानाथ चिरात्कस्मादिहागतः ॥ कुरुष्व वचनं चंद्र अस्माकं तिमिरापह ॥ ॥ ११ ॥ अस्मिञ्जलेऽमृतं भूरि पतितं पिबतां हि नः ॥ तत्पिबस्व निशानाथ सर्वमेतज्जलाशयम् ॥ १२ ॥ अर्द्धं निपतितं चात्र सत्यमेतन्निशामय ॥ तेषां तद्वचनं श्रुत्वा शीतरश्मिस्त्वरान्वितः ॥ १३ ॥ तृषार्तो वाऽपिबत्तोयं शशकेन समन्वितम् ॥ अस्थिशेषं तु तत्तस्य कायं पीयूषभक्षणात् ॥ १४ ॥ तत्क्षणात्पुष्टिमगमत्कांत्या परमया युतः ॥ धातुषु क्षीयमाणेषु पुष्टो हि सुधया हि सः ॥ १५ ॥ स चापि शशकस्तस्य न मृतो जठरं गतः ॥ अद्यापि दृश्यते तत्र देहे पीयूषभक्षणात् ॥१६॥ तत्क्षणात्पुष्टिमगमत्कांत्या परमया युतः ॥ अब्रुवन्खन्यतामेतद्यथा भूयो जलं भवेत् ॥ ॥ १७ ॥ अस्माकं संगमादेतच्छुष्कं श्वभ्रं जलाशयम् ॥ तद्युक्तं च कृतं कर्म नैतत्साधुविचेष्टितम् ॥ १८ ॥ ततोऽखनंश्च ते सर्वे यावत्तोयविनिर्गमः ॥ अथाब्रुवंस्ततः सर्वे हर्षेण महतान्विताः ॥ १९ ॥ यस्माच्छशेन संयुक्तं पीतमेतज्जलाशयम् ॥ चंद्रेण हि शशापानं तस्मादेतद्भविष्यति ॥ ॥ २० ॥ अत्रागत्य नरः स्नानं यः करिष्यति भक्तितः ॥ स यास्यति परं स्थानं यत्र देवो महेश्वरः ॥ २१ ॥ अत्रान्नं संप्रदास्यंति ब्राह्मणेभ्यः समाहिताः ॥ सर्वयज्ञफलं तेषां भविष्यति न संशयः ॥ २२ ॥ अस्मिन्दृष्टे सुराः सर्वे दृष्टाः स्युः सर्वदेवताः ॥ एवमुक्त्वा सुराः सर्वे जग्मुश्चैव सुरालयम् ॥ २३ ॥ अथ कालेन महता प्राप्ता तत्र सरस्वती ॥ वडवाग्निं समादाय तयानुप्लावितं पुनः ॥२४॥ ततो मेध्यतरं जातं तीर्थं च वरवर्णिनि ॥

१ तृषार्तो व--तृषार्त इव--इत्यर्थः । इवार्थे 'व' शब्दः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मात्सर्वप्रयत्नेन तत्र स्नानं समाचरेत् ॥ २५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमा
हात्म्ये शशापानमाहात्म्यवर्णनंनामाष्टापञ्चाशदुत्तरद्विशततमोऽध्यायः ॥ २५८ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि पर्णा
दित्यं सुरेश्वरम् ॥ प्राचीसरस्वतीकूले तटे चोत्तरतः स्थितम् ॥ १ ॥ पुरा त्रेतायुगे देवि पर्णादोनाम वै द्विजः ॥ प्रभासं क्षेत्रमासाद्य तपस्तेपे
सुदारुणम् ॥ आराधयामास रविं भक्त्या परमया युतः ॥ २ ॥ तर्पयित्वा ततः सूर्यं धूपमाल्यविलेपनैः ॥ वेदोक्तैः स्तवनैः सूक्तैर्दिवारात्रं समाहितः
॥ ३ ॥ एवं च ध्यायतस्तस्य कालेन महता ततः ॥ तुतोष भगवान्सूर्यो वाक्यमेतदुवाच ह ॥ ४ ॥ परितुष्टोऽस्मि विप्रेन्द्र तपसानेन सुव्रत ॥ वरं
वरय भद्रं ते नित्यं यन्मनसेप्सितम् ॥ ५ ॥ ॥ ब्राह्मण उवाच ॥ ॥ एष एव वरः कामो यत्तुष्टो[१] भगवान्स्वयम् ॥ दर्शनं तव देवेश स्वप्नेष्वपि
च दुर्लभम् ॥ ६ ॥ अवश्यं यदि दातव्यो वरो मम दिवाकर ॥ अत्र संनिहतो देव सदा त्वं भव भास्कर ॥ ७ ॥ तव प्रसादात्ते यांतु तव लोकं दिवा
कर ॥ एवं भविष्यतीत्युक्त्वा ह्यन्तर्धानं गतो रविः ॥ ८ ॥ पर्णादोऽपि स्थितस्तत्र तस्याराधनतत्परः ॥ तत्र भाद्रपदे मासे षष्ठ्यां स्नानं समाच
रेत् ॥ पर्णादित्यं ततः पश्येन्न स दुःखमवाप्नुयात् ॥ ९ ॥ गोशतस्य प्रयागे तु सम्यग्दत्तस्य यत्फलम् ॥ तत्फलं लभते मर्त्यः पर्णादित्यस्य दर्श
नात् ॥ १० ॥ ये सेवंते महाकुष्ठं पांगुल्यं च विचर्चिकाः ॥ पर्णादित्यं न[२] जानंति नूनं ते मंदबुद्धयः ॥ ११ ॥ इति श्रीस्कान्दे महपुराण एकाशी
तिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये पर्णादित्यमाहात्म्यवर्णनंनामैकोनषष्ट्युत्तरद्विशततमोऽध्यायः ॥२५९॥ ॥ छ ॥
॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि देवं सिद्धेश्वरं परम् ॥ तस्यैव पश्चिमे भागे सिद्धैः संस्थापितं पुरा ॥ १ ॥ सिद्धानाम सुराः पूर्वं
तत्रागत्य वरानने ॥ लिंगं संस्थापयामासुः सिद्ध्यर्थं सर्ववस्तुषु ॥ २ ॥ ततस्तुष्टो महादेवि तेषां दृष्ट्वा तपो महत् ॥ अणिमादिकमैश्वर्यं तेषां सर्वं
ददौ शिवः ॥ ३ ॥ अब्रवीदत्र मे नित्यं सांनिध्यं च भविष्यति ॥ ४ ॥ चैत्रे शुक्लचतुर्दश्यां योऽत्र मां पूजयिष्यति ॥ स यास्यति परं स्थानं प्रसा
दान्मम पुण्यकृत् ॥ ५ ॥ एवमुक्त्वाऽथ भगवाञ्जगामादर्शनं ततः ॥ सिद्धाश्चैव तदाऽऽगत्य पूजयंति महेश्वरम् ॥ ६ ॥ यस्तमाराधयेद्भक्त्या संसिद्धिं
लभतेऽद्भुताम् ॥ ईप्सितां च सुरश्रेष्ठे तस्मात्तं पूजयेत्सदा ॥ ७ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे
प्रभासक्षेत्रमाहात्म्ये सिद्धेश्वरमाहात्म्यवर्णनंनाम षष्ट्युत्तरद्विशततमोऽध्यायः ॥ २६० ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्म

१ यदि तुष्टो भवान्स्वयम्--इ० पा० । २ न जानंति—एतेन पर्णादित्यस्य दर्शनमात्रेणैव महाकुष्ठपांगुल्यविचर्चिकादयो रोगा विनश्यन्त्येव—इति प्रत्यक्षफलदं तन्माहात्म्यं सूचितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



हादेवि यत्र न्यंकुमती नदी ॥ मर्यादार्थं समानीता क्षेत्रशांत्यै च शंभुना ॥ १ ॥ तस्यैव दक्षिणे भागे सर्वपापप्रणाशिनी ॥ तस्यां स्नात्वा च वै सम्यग्यः श्राद्धं कुरुते नरः ॥ स पितॄंस्तारयेत्सर्वान्नरकान्नात्र संशयः ॥ २ ॥ वैशाखे शुक्लपक्षे तु तृतीयायां च भामिनि ॥ स्नात्वा तु तर्पयेद्भक्त्या तिलदर्भजलैः प्रिये ॥ श्राद्धं कृतं भवेत्तेन गंगायां नात्र संशयः ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये न्यंकुमतीमाहात्म्यवर्णनंनामैकषष्ट्युत्तरद्विशततमोऽध्यायः ॥ २६१ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि वराहं तत्र संस्थितम् ॥ गोष्पदाद्दक्षिणे भागे स्थितं पापप्रणाशनम् ॥ १ ॥ एकादश्यां सिते पक्षे यस्तं पूजयते नरः ॥ स मुक्तः पातकैः सर्वैर्गच्छेद्विष्णुपदं महत् ॥ २ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये वराहस्वामिमाहात्म्यवर्णनंनाम द्विषष्ट्युत्तरद्विशततमोऽध्यायः ॥ २६२ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि च्छायालिंगमिति स्मृतम् ॥ उत्तरे न्यंकुमत्याश्च बह्वाश्चर्यं महत्फलम् ॥ १ ॥ तं दृष्ट्वा मानवो देवि मुच्यते पंचपातकैः ॥ सार्द्धद्वादशहस्तं तु योजनत्रितयेन तु ॥ न पश्यंति महादेवि पापिष्ठा ये तु मानवाः ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये छायालिंगमाहात्म्यवर्णनंनाम त्रिषष्ट्युत्तरद्विशततमोऽध्यायः ॥ २६३ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तत्रैव संस्थिता देवि गुफा[1] पातकनाशिनी ॥ ऋषीणां संस्थितिर्यत्र सिद्धानां पुण्यचेतसाम् ॥ १ ॥ तत्र गत्वा महादेवि गुफां यः पश्यते नरः ॥ स मुक्तः सर्वपापेभ्यश्चांद्रायणफलं लभेत् ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये नंदिनीगुफामाहात्म्यवर्णनंनाम चतुःषष्ट्युत्तरद्विशततमोऽध्यायः ॥ २६४ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि ऐशान्यां दिशि संस्थिताम् ॥ देवीं कनकनंदाख्यां सर्वकामफलप्रदाम् ॥ १ ॥ तत्र शुक्लतृतीयायां चैत्रे मासि विधानतः ॥ यात्रां कुर्याच्च मतिमान्सर्वकाममवाप्नुयात् ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये कनकनंदामाहात्म्यवर्णनंनाम पंचषष्ट्युत्तरद्विशततमोऽध्यायः ॥ ॥ २६५ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि कुम्भीश्वरमनुत्तमम्[2] ॥ शरभस्थानतः पूर्वे नातिदूरे व्यवस्थितम् ॥ तं



१ गुफा—नंदिनीगुफा-इत्यर्थः—तस्या गुफाया—नंदिनी—इति नाम—समासितदण्डकतोऽवबुध्यते । २ कुन्तीश्वरम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्ट्वा मानवो देवि मुच्यते सर्वपातकैः ॥१॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये कुंभीश्वरमाहात्म्यवर्णनंनाम षट्षष्ट्युत्तरद्विशततमोऽध्यायः ॥ २६६ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि स्थानं गंगापथेति च ॥ यत्र गंगा महास्रोता गंगेश्वरः शिवस्तथा ॥ १ ॥ समुद्रगामिनी देवि सा गंगा पापनाशिनी ॥ उत्तानेति भुवि ख्याता नदी त्रैलोक्यभूषणा ॥ २ ॥ तत्र स्नात्वा महादेवि गंगेशं यस्तु पूजयेत् ॥ मुक्तः स्यात्पातकैर्घोरैरश्वमेधायुतं लभेत् ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्येगङ्गापथगंगेश्वरमाहात्म्यवर्णनंनाम सप्तषष्ट्युत्तरद्विशततमोऽध्यायः ॥ २६७ ॥छ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि चमसोद्भेदमुत्तमम् ॥ यत्र ब्रह्माऽकरोत्सत्रं वर्षाणामयुतं प्रिये ॥ १ ॥ चमसैः पीतवन्तस्ते सोमं देवा महर्षयः ॥ चमसोद्भेदनामेति तेन ख्यातं धरातले ॥ २ ॥ तत्र स्नात्वा सरस्वत्यां पिंडदानं ददाति यः ॥ गयाकोटिगुणं पुण्यं वैशाख्यां प्राप्नुयान्नरः ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये चमसोद्भेदमाहात्म्यवर्णनंनामाष्टषष्ट्युत्तरद्विशततमोऽध्यायः ॥ २६८ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि विदुरस्याश्रमं महत् ॥ यत्राकरोत्तपो रौद्रं विदुरो धर्ममूर्त्तिमान् ॥ १ ॥ प्रतिष्ठाप्य महादेवं लिंगं त्रिभुवनेश्वरम् ॥ तं दृष्ट्वा मानवो देवि सर्वान्कामानवाप्नुयात् ॥ २ ॥ विदुराट्टालकंनाम गणगंधर्वसेवितम् ॥ द्वादशस्थानकं स्थानं नाल्पपुण्येन लभ्यते ॥ ३ ॥ नावर्षणं भवेत्तत्र कदाचिदपि पार्वति ॥ लिंगानि तत्र दिव्यानि पश्येत्पापोपशांतये ॥ ४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये विदुराश्रममाहात्म्यवर्णनंनामैकोनसप्तत्युत्तरद्विशततमोऽध्यायः ॥२६९॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि यत्र प्राची सरस्वती ॥ तत्र स्थाने स्थितं लिंगं मंकीश्वरमिति श्रुतम् ॥ १ ॥ तस्योत्पत्तिं प्रवक्ष्यामि सर्वपातकनाशिनीम् ॥ शृणु देवि महाभागे ह्याश्चर्यं यदभूत्पुरा ॥ २ ॥ ऋषिर्मंकणकोनाम स तेपे परमं तपः ॥ प्राचीमेत्य यताहारो नित्यं स्वाध्यायतत्परः ॥ ३ ॥ बहुवर्षसहस्राणि तस्यातीतानि भामिनि ॥ कस्यचित्त्वथ कालस्य विद्धादस्य वरानने ॥ ४ ॥ कराच्छाकरसो जातः कुशाग्रेणेति नः श्रुतम् ॥ स तं दृष्ट्वा महाश्चर्यं विस्मयं परमं गतः ॥ ५ ॥ मेने सिद्धिं परां प्राप्तो हर्षान्नृत्यमथाकरोत् ॥ तस्मिन्संनृत्यमाने च जगत्स्थावरजंगमम् ॥ ६ ॥ अनर्त्तत वरारोहे प्रभावात्तस्य वै मुनेः ॥ ततो देवा

१ कुन्तीश्वरमाहात्म्यवर्णनंनाम—इ० पा० । २ सुमहत्तपः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



महेंद्राद्या ब्रह्मविष्णुपुरस्सराः ॥ ऊचुस्त्रिपुरहंतारं नायं नृत्येत्तथा कुरु ॥ ७ ॥ चलिताः पर्वताः स्थानात्क्षुभितो मकरालयः ॥ धरणी खण्डशो देव वृक्षाश्च निधनं गताः ॥ ८ ॥ उत्पथाश्च महानद्यो ग्रहा उन्मार्गसंस्थिताः ॥ त्रैलोक्यं व्याकुलीभूतं यावत्प्राप्नोति संक्षयम् ॥९॥ तावन्निवारयस्वैनं नान्यः शक्तो निवारणे ॥ १० ॥ स तथेति प्रतिज्ञाय गत्वा तस्य समीपतः ॥ द्विजरूपं समास्थाय तमृषिं वाक्यमब्रवीत ॥ ११ ॥ को हर्षविषयः कस्मात्त्वयैतन्नृत्यते द्विज ॥ तस्मात्कार्यं वदाशु त्वं परं कौतूहलं हि नः ॥ १२ ॥ ॥ ऋषिरुवाच ॥ ॥ किं न पश्यसि मे ब्रह्मन्कराच्छाकरसं च्युतम्॥ अत एव हि मे नृत्यं सिद्धोऽहं नात्र संशयः ॥ १३ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा भगवांस्त्रिपुरांतकः ॥ अंगुष्ठं ताडयामास अंगुल्यग्रेण[1] भामिनि ॥ १४ ॥ ततो विनिर्गतं भस्म तत्क्षणाद्धिमपांडुरम् ॥ अथाब्रवीत्प्रहस्यैनं भगवान्भूतभावनः ॥ १५ ॥ पश्य मेंऽगुष्ठतो ब्रह्मन्भूरि भस्म विनिर्गतम् ॥ न नृत्येऽहं न मे हर्षस्तथापि मुनिसत्तम ॥ १६ ॥ तद्दृष्ट्वा सुमहाश्चर्यं विस्मयं परमं गतः ॥ अब्रवीत्प्रांजलिर्भूत्वा हर्षगद्गदया गिरा ॥ १७ ॥ नान्यं देवमहं मन्ये त्वां मुक्त्वा वृषभध्वजम् ॥ नान्यस्य विद्यते शक्तिरीदृशी धरणीतले ॥ १८ ॥ ॥ ॥ भगवानुवाच ॥ ॥ ज्ञातोऽस्मि मुनिशार्दूल त्वया वेदविदां वर ॥ वरं वरय भद्रं ते नित्यं यन्मनसेप्सितम् ॥ १९ ॥ ॥ ऋषिरुवाच ॥ ॥ प्रसादाद्देवदेवस्य नृत्येन महता विभो ॥ यथा न स्यात्तपोहानिस्तथा नीतिर्विधीयताम् ॥२०॥ ॥ शंभुरुवाच ॥ ॥ तपस्ते वर्द्धतां विप्र मत्प्रसादात्सहस्रधा ॥ प्राचीमन्विह वत्स्यामि त्वया सार्द्धमहं सदा ॥ २१ ॥ सरस्वती महापुण्या क्षेत्रे चास्मिन्विशेषतः ॥ सरस्वत्युत्तरे तीरे यस्त्यजेदात्मनस्तनुम् ॥ २२ ॥ प्राचीने ह्यृषिशार्दूल न चेहागच्छते पुनः ॥ आप्लुतो[2] वाजिमेधस्य फलं प्राप्नोति पुष्कलम् ॥ २३ ॥ नियमैश्चोपवासैश्च शोषयन्देहमात्मनः॥ जलाहारा वायुभक्षाः पर्णाहाराश्च तापसाः ॥ तथा च स्थंडिलशया ये चान्ये नियताः पृथक् ॥२४॥ ये स्नानमाचरिष्यंति तीर्थेऽस्मिन्नियमान्विताः ॥ ते यांति परमां सिद्धिं ब्रह्मणः परमं पदम् ॥ २५ ॥ अस्मिंस्तीर्थे तु यो दानं त्रुटिमात्रं च कांचनम् ॥ ददाति द्विजमुख्याय मेरुतुल्यं भवेत्फलम् ॥२६॥ अस्मिंस्तीर्थे तु ये श्राद्धं करिष्यंतीह मानवाः॥ एकविंशत्कुलोपेताः स्वर्गं यास्यंति ते ध्रुवम् ॥२७॥ पितॄणां वल्लभं तीर्थं पिंडेनैकेन तर्पिताः ॥ ब्रह्मलोकं गमिष्यंति सुपुत्रेणेह तारिताः ॥ २८ ॥ भूयश्चान्नं प्रयच्छंति मोक्षमार्गं व्रजंति ते ॥ २९ ॥ अत्र ये शुभकर्माणः प्रभासस्थां सरस्वतीम् ॥ पश्यंति तेपि यास्यंति स्वर्गलोकं द्विजोत्तमाः ॥३०॥ ये पुनस्तत्र भावेन नराः स्नानपरायणाः ॥ ब्रह्मलोकं समा

१ अंगुष्ठाग्रेण—इ० पा० । २ आप्लुतः—स्नातः सन्--इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साद्य ते रमिष्यंति सर्वदा ॥ ३१ ॥ दधि प्रदद्याद्योऽपीह ब्राह्मणाय मनोरमम् ॥ सोऽप्यग्निलोकमासाद्य भुंक्ते भोगान्सुशोभनान् ॥ ३२ ॥ ऊर्णाप्रावरणं योऽपि भक्त्या दद्याद्द्विजोत्तमे ॥ सोऽपि याति परां सिद्धिं मर्त्यैरन्यैः सुदुर्लभाम् ॥ ३३ ॥ ये चात्र मलनाशाय विशेषुर्मानवा जलम् ॥ गोप्रदानफलं तेषां सुखेन फलमादिशेत् ॥ ३४ ॥ भावेन हि नरः कश्चित्तत्र स्नानं समाचरेत् ॥ सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ॥ ३५ ॥ तर्पणात्पिंडदानाच्च नरकेष्वपि संस्थिताः ॥ स्वर्गं प्रयांति पितरः सुपुत्रेणेह तारिताः ॥ ३६ ॥ ते लभंतेऽक्षयाँल्लोका न्ब्रह्मविष्ण्वीशशब्दितान् ॥ भूयस्त्वन्नं प्रयच्छन्ति मोक्षमार्गं लभंति ते ॥ ३७ ॥ स्वर्गनिश्रेणिसंभूता प्रभासे तु सरस्वती ॥ नापुण्य वद्भिः संप्राप्तुं पुंभिः शक्या महानदी ॥ ३८ ॥ प्राची सरस्वती चैव अन्यत्रैव तु दुर्लभा ॥ विशेषेण कुरुक्षेत्रे प्रभासे पुष्करे तथा ॥ ३९ ॥ प्राचीं सरस्वतीं प्राप्य योन्यत्तीर्थं हि मार्गते ॥ स करस्थं समुत्सृज्य कूर्परेण समाचरेत् ॥ ४० ॥ कृष्णपक्षे चतुर्दश्यां स्नानं च विहितं सदा ॥ पिण्याकेंगुदकेनापि पिंडं तत्र ददाति यः ॥ पितॄणामक्षयं भूयात्पितृलोकं स गच्छति ॥ ४१ ॥ सरस्वतीवाससमा कुतो रतिः सरस्वतीवाससमाः कुतो गुणाः ॥ सरस्वतीं प्राप्य गता दिवं नराः पुनः स्मरिष्यंति नदीं सरस्वतीम् ॥ ४२ ॥ ॥ ईश्वर उवाच ॥ ॥ उक्त्वैवं भगवान्देवस्तत्रैवांतरधीयत ॥ सांनिध्यमकरोत्तत्र ततःप्रभृति शंकरः ॥ ४३ ॥ अत्र गाथा पुरा गीता विष्णुना प्रभविष्णुना ॥ स्नेहार्द्रेण च चित्तेन धर्मपुत्रं प्रति प्रिये ॥ ४४ ॥ मां गंगां व्रज कौंतेय मा प्रयागं च पुष्करम् ॥ तत्र गच्छ कुरुश्रेष्ठ यत्र प्राची सरस्वती ॥ ४५ ॥ एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ॥ माहात्म्यं च सरस्वत्या भूयः किं श्रोतुमिच्छसि ॥ ४६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये प्राचीसरस्वतीमंकीश्वरमाहात्म्यवर्णनंनाम सप्तत्युत्तरद्विशततमोऽध्यायः ॥ २७० ॥ ॥ छ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्यैव संनिकृष्टे तु लिंगं ज्वालेश्वरं स्मृतम् ॥ शरः पाशुपतो यत्र ज्वलन्वै त्रिपुरारिणा ॥ १ ॥ पातितो यत्प्रदेशे तु तेन ज्वालेश्वरः स्मृतः ॥ तं दृष्ट्वा मानवो देवि मुच्यते सर्वपातकैः ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये ज्वालेश्वरमाहात्म्यवर्णनंनामैकसप्तत्युत्तरद्विशततमोऽध्यायः ॥ २७१ ॥ ॥ ईश्वर उवाच ॥ ॥ तत्रैव संस्थितं पश्येत्प्राची देव्यास्तु संनिधौ ॥ लिंगत्रयं समाख्यातं त्रिपुराणां महात्मनाम् ॥ १ ॥ विद्युन्माली तारकाख्यः कपोलाख्यस्तथैव च ॥ तैश्च प्रतिष्ठितं लिंगं दृष्ट्वा

१ ब्रह्मलोकम्—इ० पा० । २ समाश्रयेत्—इ० पा० । ३ रविः—इ० पा० । ४ धर्मपुत्रम्—युधिष्ठिरम्—इत्यर्थः । ५ मा गयाम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

पापैः प्रमुच्यते ॥२॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये त्रिपुरलिंगत्रयमाहात्म्य वर्णनंनाम द्विसप्तत्युत्तरद्विशततमोऽध्यायः ॥२७२॥ ॥छ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि शंडतीर्थमनुत्तमम् ॥ सर्वपापोपशमनं सर्वकामफलप्रदम् ॥ १ ॥ तस्योत्पत्तिं प्रवक्ष्यामि शृणुष्वैकमनाः प्रिये ॥ पुरा पंचशिरा आसीद्ब्रह्मा लोकपितामहः ॥ २ ॥ शिरस्तस्य मया छिन्नं कस्मिंश्चित्कारणांतरे ॥ तत्र गंधवती जाता ब्रह्मणः सा च शोणितैः ॥ ३ ॥ तत्रोद्गता महातालास्तेन तालवनं स्मृतम् ॥ अथ करतले लग्नं कपालं ब्रह्मणो मम ॥ ४ ॥ शरीरं कृष्णतां यातं मम चैव वृषस्य च ॥ अथ तीर्थान्यनेकानि गतोहं पापशंकया ॥ ५ ॥ न क्वचिद्व्रजते पापं ततः प्रभासमागतः ॥ क्षेत्रे तत्र मया दृष्टा प्राची देवी सरस्वती ॥ ६ ॥ तत्र मे वृषभः स्नातुं प्रविष्टो जलमध्यतः ॥ तत्क्षणाच्छ्वेततां प्राप्तो मुक्तोहमपि हत्यया ॥ ७ ॥ करमध्ये च मे लग्नं कपालं पतितं तदा ॥ कपालमोचनश्चासौ लिंगरूपी स्थितोऽभवत् ॥ ८ ॥ तत्रापि यो ददेच्छ्राद्धं प्राचीदेव्यास्तु संनिधौ ॥ मातृकं पैतृकं चैव तृप्तं कुलशतं तथा ॥ ९ ॥ भवेच्च तस्य तृप्तिस्तु यावत्कल्पास्तु सप्ततिः ॥ मास आश्वयुजे देवि कृष्णपक्षे चतुर्दशी ॥ तत्र दद्यात्तु यः श्राद्धं दक्षिणामूर्तिमाश्रितः ॥ १० ॥ यथावित्तोपचारेण सुपात्रे च यथाविधि ॥ यावद्युगसहस्रं तु तृप्ताः स्युस्ते पितामहाः ॥ ११ ॥ अन्नसुवर्णदानं च दधिकंबलमेव च ॥ तत्र देयं विधानेन सर्वपापोपशुद्धये ॥ १२ ॥ कृष्णरूपी वृषो देवि यदा श्वेतत्वमागतः ॥ शंडतीर्थमितिख्यातं तेन त्रैलोक्यपूजितम् ॥ १३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभास खण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये शंडतीर्थमाहात्म्यवर्णनंनाम त्रिसप्तत्युत्तरद्विशततमोऽध्यायः ॥ २७३ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि सूर्यप्राचीं महाप्रभाम् ॥ सर्वपापोपशमनीं सर्वकामफलप्रदाम् ॥ १ ॥ तत्र स्नात्वा महादेवि मुच्यते पञ्चपातकैः ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये सूर्यप्राचीमाहात्म्यवर्णनंनाम चतुःसप्तत्युत्तरद्विशततमोऽध्यायः ॥ २७४ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि देवं चैव त्रिलोचनम् ॥ ऋषितीर्थसमीपे तु सर्वपातकनाशनम् ॥ न्यङ्कुमत्युत्तरे कूल ऋषिभिः पूजितं पुरा ॥ १ ॥ त्रिनेत्रा मत्स्यका यत्र जलं स्फटिकसन्निभम् ॥ तत्र स्नात्वा नरो देवि मुच्यते ब्रह्महत्यया ॥ २ ॥ कृष्णपक्षे चतुर्दश्यां मासे भाद्रपदे तथा ॥ उपवासं तु कुर्वीत रात्रौ जागरणं तथा ॥ ३ ॥ प्रातः श्राद्धं प्रकुर्वीत विधि



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वत्पूजयेच्छिवम् ॥ रुद्रलोके वसेद्देवि वर्षाणामयुतत्रयम् ॥ ४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये त्रिनेत्रेश्वरमाहात्म्यवर्णनंनाम पञ्चसप्तत्युत्तरद्विशततमोऽध्यायः ॥ २७५ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छे न्महादेवि ऋषितीर्थस्य सन्निधौ ॥ कामिकं हि परं क्षेत्रं देविकानाम नामतः ॥ १ ॥ महासिद्धिवनं तत्र ऋषिसिद्धसमावृतम् ॥ नानाद्रुमलता कीर्णं पर्वतैरुपशोभितम् ॥ २ ॥ चंपकैर्बकुलैर्दिव्यैरशोकैः स्तबकैः परैः ॥ पुन्नागैः किंकिरातैश्च सुगन्धैर्नागकेसरैः ॥ ३ ॥ मल्लिकोत्पलपुष्पैश्च पाटलापारिजातकैः ॥ चूतचंपकपित्थैश्च श्रीफलैः पनसैस्तथा ॥ ४ ॥ खर्जूरैर्बदरैश्चान्यैर्मातुलिंगैः सदाडिमैः ॥ जंबीरैश्चैव दिव्यैश्च नारंगैरुप शोभितम् ॥ ५ ॥ शिखिभिः कोकिलाभिश्च गीयमानं तु षट्पदैः ॥ मृगैर्ऋक्षैर्वराहैश्च सिंहैर्व्याघ्रैस्तथा परैः ॥ ६ ॥ श्वापदैर्विविधाकारैः कन्दरै र्गह्वरैस्तथा ॥ सुरासुरगणैः सिद्धैर्यक्षगन्धर्वपन्नगैः ॥ ७ ॥ अप्सरोरगनागैश्च बहुभिस्तु समाकुलम् ॥ केचित्स्तुवंति ईशं तु केचिन्नृत्यंति चाग्रतः ॥ ८ ॥ पुष्पैर्वृष्टिं तु मुञ्चंति मुखवाद्यानि चापरे ॥ हसंति चापरे हृष्टा गर्जंति च तथा परे ॥ ९ ॥ ऊर्द्ध्वबाहवस्तथा चान्ये अन्ये ध्यायंति तद्गताः ॥ तस्मिन्स्थाने महादेवि देविकायास्तटे शुभे ॥ १० ॥ उमापतीश्वरो नाम तत्राहं संस्थितः सदा ॥ युगेयुगे सदा पूर्णे कल्पे मन्वन्तरे तथा ॥ ११ ॥ न त्यजामि सदा देवि देविकायास्तटं शुभम् ॥ दुर्लभं सर्वलोकेऽस्मिन्पवित्रं सुप्रियं हि मे ॥ १२ ॥ त्वया सह स्थितश्चाहं तस्मि न्स्थाने वरानने ॥ उमया युक्तदेहत्वात्तेन ख्यात उमापतिः ॥ १३ ॥ पुष्यमासे त्वमावस्यां दद्याच्छ्राद्धं समाहितः ॥ न पश्यामि क्षयं तस्य तस्मि न्दत्तस्य पार्वति ॥ १४ ॥ ब्रह्महत्यासहस्रं तु तस्य दर्शनतो व्रजेत् ॥ गोभूहिरण्यवासांसि तत्र दद्याद्विचक्षणः ॥ १५ ॥ स एकः परमः पुत्रो यो गत्वा तत्र सुन्दरि ॥ ददेच्छ्राद्धं पितृणां च तस्यांतो नैव विद्यते ॥ १६ ॥ देवैः सर्वैः समाहूता स्नानार्थं सा सरिद्वरा ॥ देविकेति समाख्याता तेन सा पापनाशिनी ॥ १७ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये देविकाया मुमापतिमाहात्म्यवर्णनंनाम षट्सप्तत्युत्तरद्विशततमोऽध्यायः ॥ २७६ ॥ ॥ छ ॥ ॥ तत्रैव संस्थितं पश्येद्भूधरंनाम नामतः ॥ उद्धृत्य पृथिवीं यस्माद्दंष्ट्राग्रेण दधार सः ॥ १ ॥ भूधरस्तेन चाख्यातो देविकातटसंस्थितः ॥ वेदपादो यूपदंष्ट्रः क्रतुदन्तः स्रुचीमुखः ॥ २ ॥ अग्निजिह्वो दर्भरोमा ब्रह्मशीर्षो महातपाः ॥ अहोरात्रेक्षणपरो वेदांगश्रुतिभूषणः ॥ ३ ॥ आज्यनासः स्रुवतुंडः सामघोषस्वनो महान् ॥ प्राग्वंशकायो द्युतिमा न्नानादीक्षाविराजितः ॥ ४ ॥ दक्षिणाहृदयो योगी महासत्रशयो महान् ॥ उपाकर्मोष्ठरुचकः प्रवर्ग्यावर्तभूषणः ॥ ५ ॥ नानाच्छन्दोगतिपथो



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ब्रह्मोक्तक्रमविक्रमः ॥ भूत्वा यज्ञवराहोऽसौ तत्र स्थाने स्थितोऽभवत् ॥ ६ ॥ पुष्यमासे ह्यमावास्यामेकादश्यामथापि वा ॥ प्राप्ते प्रावृषि काले च
ज्ञात्वा कन्यागतं रविम् ॥ ७ ॥ पायसं गुडसंयुक्तं हविष्यं च गुडप्लुतम् ॥ नमो वः पितरो रसाय अन्नाद्यमभिमंत्रयेत् ॥ ८ ॥ तेजोऽसि शुक्र
मित्याज्यं दधिक्राव्णेन वै दधि ॥ क्षीरमाज्याय मन्त्रेण व्यञ्जनानि च यानि तु ॥ ९ ॥ भक्ष्यभोज्यानि सर्वाणि महानिन्द्रेण दापयेत् ॥ संवत्स
रोनियो मंत्रं जप्त्वा तेनोदकं द्विजः ॥ १० ॥ एवं संभोज्य वै विप्रान्पिण्डदानं तु दापयेत् ॥ इत्यनेन विधानेन यस्तत्र श्राद्धकृद्भवेत् ॥११॥ तस्य
तृप्तास्तु पितरो यावदिंद्राश्चतुर्दश ॥ गयाश्राद्धं विनापीह गयाश्राद्धफलं लभेत्॥१२॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे
प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये देविकामाहात्म्ये भूधरयज्ञवराहमाहात्म्यवर्णनंनाम सप्तसप्तत्युत्तरद्विशततमोऽध्यायः ॥२७७॥॥ईश्वर उवाच॥॥
ततो गच्छेन्महादेवि शूलस्थानमिति श्रुतम् ॥ देविकायास्तटे रम्ये भास्करं वारितस्करम् ॥ १ ॥ यत्रातपत्तपो घोरं वाल्मीकिर्मुनिपुंगवः ॥ वाल्मी
किनामा विप्रर्षिर्यत्र सिद्धो महामुनिः ॥ २ ॥ यत्र सप्तर्षयो मुष्टास्[1]तेनैव मुनिना प्रिये ॥ तस्यैव पश्चिमे भागे मरीचिप्रमुखा द्विजाः ॥ ३ ॥ ॥ देव्यु
वाच ॥ ॥ कथं तु सिद्धो वाल्मीकिः कथं चौर्येऽकरोन्मनः ॥ कथं सप्तर्षयो मुष्टा एतन्मे वद शंकर ॥ ४ ॥ ॥ ईश्वर उवाच ॥ ॥ आसी
त्पूर्वं द्विजो देवि नाम्ना ख्यातः शमीमुखः ॥ गार्हस्थ्ये वर्तमानस्य तस्य पुत्रो व्यजायत ॥ वैशाख इति नाम्नाऽसौ रौद्रकर्मा व्यजायत ॥ ५ ॥
मुक्त्वैकां गुरुशुश्रूषां नान्यत्किंचिदसौ द्विजः ॥ अकरोच्छोभनं कर्म दिवाप्रभृति नित्यशः ॥ ६ ॥ अथ कालेन महता पितरौ तस्य तौ प्रिये ॥
वार्द्धक्यभावमापन्नौ भर्तव्यौ तस्य विह्वलौ ॥ ७ ॥ स नित्यं पदवीं गत्वा मुष्ट्वा लोकान्स्वशक्तितः ॥ द्रव्यमादाय पितरौ भार्यां चापि पुपोष
च ॥ ८ ॥ कस्यचित्त्वथ कालस्य तेन मार्गेण गच्छतः ॥ सप्तर्षींश्च तदापश्यत्तीर्थयात्रापरायणान् ॥ ९ ॥ तान्दृष्ट्वा यष्टिमुद्यम्य भर्त्सयन्प
रुषाक्षरैः ॥ वाक्यैरुवाच तान्सर्वांस्तिष्ठध्वमिति भूरिशः ॥ १० ॥ अथ ते मुनयः शांताः समलोष्टाश्मकांचनाः ॥ समाः शत्रौ च मित्रे च
रोषरागविवर्जिताः ॥ ११ ॥ अस्माकं दर्शनं चास्य संभाष्यमृषिभिः सह ॥ संजातं निष्फलं मा स्यादित्युवाचांगिरा वचः ॥ १२ ॥ 
॥ ॥ अंगिरा उवाच ॥ ॥ भोभोस्तस्कर मे वाक्यं शृणुष्वावहितः क्षणात् ॥ आत्मनस्तु हितार्थाय सत्यं चैव वदाम्यहम् ॥ तव कः पोष्यव
र्गोऽस्ति तच्च सर्वं वदस्व मे ॥ १३ ॥ ॥ तस्कर उवाच ॥ ॥ स्यातां मे पितरौ वृद्धौ भार्यैकाऽपत्यवर्ज्जिता ॥ एका दासी ह्यहं षष्ठो नान्यदस्त्य

१ मुष्टाः—लुंटिताः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धिकं मुने ॥ १४ ॥ ॥ अंगिरा उवाच ॥ ॥ गत्वा पृच्छस्व तान्सर्वान्पुष्टान्पापार्जितैर्धनैः॥ अहं करोमि पापानि सर्वे यूयं तु भक्षकाः ॥१५॥ तत्पापं भविता कस्य कथयंत्विति मे लघु ॥ तथैव गत्वा पप्रच्छ पितरौ तावथोचतुः ॥१६॥ ॥ मातापितरावूचतुः ॥ ॥ एकः पापानि कुरुते फलं भुंक्ते महाजनः ॥ भोक्तारो विप्रमुच्यंते कर्ता दोषेण लिप्यते ॥१७॥ यः करोत्यशुभं कर्म कुटुंबार्थं तु मंदधीः ॥ आत्मा न वल्लभस्तस्य नूनं पुंसः सुपापिनः ॥ १८ ॥ ॥ ईश्वर उवाच ॥ ॥ तयोः स वचनं श्रुत्वा पुनर्भीतमनास्तदा ॥ तयोस्तु संनतिं कृत्वा पितरौ पुनरब्रवीत् ॥ १९ ॥ युवाभ्यां हितंमेवाहं यत्करोम्यशुभं क्वचित् ॥ तस्यांशं भुज्यते किंचिद्युवाभ्यां वा न वोच्यताम् ॥२०॥ ॥ पितरावूचतुः ॥ ॥ पूर्वे वयसि पुत्र त्वमावाभ्यां पाल्य एव हि ॥ उत्तरे तु वयं पाल्याः सम्यक्पुत्र त्वया पुनः ॥ २१ ॥ इतरेतरधर्मोऽयं निर्दिष्टः पद्मयोनिना ॥ आवाभ्यां यत्कृतं कर्म युष्मदर्थं शुभाशुभम् ॥ भोक्ष्यामो वयमेवेह तत्सर्वं नात्र संशयः ॥ २२ ॥ अथ त्वमपि यद्वत्स प्रकरोषि शुभाशुभम् ॥ भोक्ष्यसे सकलं तद्वत्स्वयं नान्यः परत्र च ॥२३॥ अवश्यं स्वयमश्नाति कृतं कर्म शुभाशुभम् ॥ तस्मान्नरेण कर्तव्यं शुभं कर्म विपश्चिता ॥ २४ ॥ चौर्यं वाथ कृषिं वाथ कुसीदं वाथ पुत्रक ॥ वाणिज्यमथवा प्रेष्यं कृत्वाऽस्माकं च भोजनम् ॥ अहर्निशं त्वया देयं न दोषोऽस्मा सुपुत्रक ॥ २५ ॥ ताभ्यां तद्वचनं श्रुत्वा ततो भार्यामभाषत ॥ तदेव वाक्यं साऽवोचद्यत्प्रोक्तं गुरुभिः पुरा ॥ ततो वैराग्यमापन्नो वैशाखो मुनिसत्तमः ॥ २६ ॥ गर्हयन्नेवमात्मानं भूयोभूयः सुदुःखितः ॥ धिङ्मां दुष्कृतकर्माणं पापकर्मरतं सदा ॥ २७ ॥ विवेकेन परित्यक्तं सत्संगेन विवर्जितम् ॥ यः करोति नरः पापं न सेवयति पंडितान् ॥ न चात्मा वल्लभस्तस्य एतन्मे वर्तते हृदि ॥ २८ ॥ एवं विकल्पहृदयो गत्वा स ऋषिसन्निधौ ॥ उवाच श्लक्ष्णया वाचा गम्यतामिति सादरम् ॥ ॥ २९ ॥ वृसी प्रगृह्यतामेषा तथैव च कमण्डलुः ॥ वल्कलानि च चीराणि मृगचर्माण्यशेषतः ॥ ३० ॥ क्षम्यतामपराधो मे दीनस्य कृपणस्य च ॥ सत्संगेन वियुक्तस्य मूर्खस्य मुनिसत्तमाः ॥ ३१ ॥ अद्यप्रभृति निवृत्तः कर्मणोऽस्याहमेव च ॥ रौद्रस्य सुनृशंसस्य साधुभिर्गर्हितस्य च ॥ तस्मात्कथयतास्माकं निवृत्तिं चास्य कर्मणः ॥ ३२ ॥ येन युष्मत्प्रसादेन पापान्मोक्षमहं व्रजे ॥ उपवासोऽथ मन्त्रो वा नियमो वाथ संयमः ॥ ३३ ॥ ॥ ॥ ऋषय ऊचुः ॥ ॥ साधु पृष्टं त्वया वत्स तत्त्वमेकमनाः शृणु ॥ संगृह्य कीर्तयिष्यामस्त्वयाऽऽख्येयं न कस्यचित् ॥ ३४ ॥ तेन जप्तेन पापात्मन्मोक्षं प्राप्स्यसि निश्चितम् ॥ झाटघोटस्त्वया कीर्त्यो मन्त्रोऽयं चतुरक्षरः ॥ ३५ ॥ सर्वपापहरो नृणां स्वर्गमोक्षफलप्रदः ॥ स तदैवं हि तैः

१ हितमेव--हितार्थमेव--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



प्रोक्तो वैशाखो मुनिपुंगवैः ॥ तस्थौ जाप्यपरो नित्यं गतास्ते मुनिपुंगवाः ॥ ३६ ॥ तस्यैवं जपतो देवि देविकायास्तटे शुभे ॥ अनिशं गुरु
भक्तस्य समाधिः समपद्यत ॥ ३७ ॥ क्षुत्पिपासा तदा नष्टा शुद्धिमायात्कलेवरम् ॥ ३८ ॥ मंत्रे तीर्थे द्विजे देवे दैवज्ञे भेषजे गुरौ ॥ यादृशी भाव
ना यस्य सिद्धिर्भवति[1] तादृशी ॥ ३९ ॥ निर्मलोऽयं स्वभावेन परमात्मा यथा हितः ॥ उपाधिसंगमासाद्य विकारं स्फटिको यथा ॥ ४० ॥ यथा
च भ्रमरी वंध्या लब्ध्वा जीवमणुं क्वचित् ॥ स्वस्थाने स्थाप्य तं ध्यायेद्भ्रमरी ध्यानसंयुता ॥ ४१ ॥ स तु तद्ध्यानसंवृद्धो जीवो भवति तादृशः ॥
अन्ययोन्युद्भवो वापि तथा निदर्शनं सताम् ॥४२॥ आदिष्टो गुरुणा यश्च विकल्पं यदि गच्छति ॥ नासौ सिद्धिमवाप्नोति मंदभाग्यो यथा निधिम्॥
॥ ४३ ॥ एवं वर्षसहस्राणि समतीतानि भूरिशः ॥ तस्य जाप्यपरस्यैव अमृतत्वं गतस्य च ॥ ४४ ॥ ततः कालक्रमेणैव वल्मीकेन स वेष्टितः ॥
येनासौ सर्वतो व्याप्तो न च तं स बुबोध वै ॥ ४५ ॥ कस्यचित्त्वथ कालस्य मुनयस्ते समागताः ॥ तं प्रदेशं तु संप्रेक्ष्य सहाय्यमितरेतरम् ॥ ऊचुः
परस्परं सर्वे दत्त्वा चैव करैः करम् ॥४६॥ ॥ ऋषय ऊचुः ॥ ॥ अत्रासौ तस्करः प्राप्तो वैशाखो दारुणाकृतिः ॥ येन सर्वे वयं मुष्टा अस्मि
न्स्थाने समागताः ॥ ४७ ॥ एवं संजल्पमानास्ते शुश्रुवुः शब्दमुत्तमम् ॥ वल्मीकमध्यतो व्यक्तं ततस्ते कौतुकान्विताः ॥ ४८ ॥ अखनंस्तत्र
वल्मीकं कुशीभिः[2] पर्वतोपमम् ॥ ४९ ॥ अथ ते ददृशुस्तत्र विशाखं मुनिसत्तमाः ॥ जपंतमसकृन्मंत्रं तमेव चतुरक्षरम् ॥ ५० ॥ तं समाधिगतं
ज्ञात्वा भेषजैर्योग[3]संमतैः ॥ ममर्दुः सर्वतो विप्रास्तत्र सुप्ततनौ भृशम् ॥ ५१ ॥ ततोऽब्रवीदृषीन्सर्वान्स्वमर्थं गृह्यतां द्विजाः ॥ युष्मदीयं गृहीतं यत्पा
पेनाकृतबुद्धिना ॥ ५२ ॥ गम्यतां तीर्थयात्रायां सर्वे मुक्ता मया द्विजाः ॥ वाच्यौ मे पितरौ गत्वा तथा भार्या द्विजोत्तमाः ॥ ५३ ॥ सर्व
संगपरित्यक्तो विशाखः समपद्यत ॥ दर्शनं कांक्षते नैव भवद्भिस्तु यथा पुरा ॥ ५४ ॥ ॥ ऋषय ऊचुः ॥ ॥ बहुवर्षाण्यतीतानि तवात्र
वसतो मुने ॥ सर्वे ते निधनं प्राप्ता ये चान्ये ते कुटुंबिनः ॥ ५५ ॥ वयं चिरात्समायाताः स्थानेऽस्मिन्मुनिसत्तमाः ॥ स त्वं सिद्धिमनुप्राप्तो
मंत्रादस्मादसंशयम् ॥ ५६ ॥ यस्मात्त्वं मंत्रमेकाग्रो ध्यायन्वल्मीकमाश्रितः ॥ तस्माद्वाल्मीकिनामा त्वं भविष्यसि महीतले ॥ ५७ ॥ स्व
च्छंदा भारती देवी जिह्वाग्रे ते भविष्यति ॥ कृत्वा रामायणं काव्यं ततो मोक्षं गमिष्यसि ॥ ५८ ॥ ॥ विशाख उवाच ॥ ॥ गृह्यतां द्विज



१ सिद्धिस्तस्यैव तादृशी—इ०पा० । २ कुशीभिः—अयोविकारदंडैः—'कुसा—पहार' इति महाराष्ट्रभाषाप्रसिद्धैः । "जानपदकुण्डगोण:०" इत्यादिसूत्रेण—'कुश'शब्दात्—अयोविकारार्थे ङीष् 'कुशी—अयो विकारश्चेत्' इत्युक्तं सिद्धांतकौमुद्याम् । ३ योगसत्कृतैः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शार्दूलाः प्रसन्ना गुरुदक्षिणाम् ॥ येनाहमनृणो भूत्वा करोमि सुमहत्तपः ॥ ५९ ॥ ॥ ऋषय ऊचुः ॥ ॥ एषा नो दक्षिणा विप्र यस्त्वं सिद्धि
मुपागतः ॥ सर्वकामसमृद्धात्मा कृतकृत्या वयं मुने ॥ ६० ॥ वरं वरय भूयस्त्वं यस्ते मनसि वर्तते ॥ ६१ ॥ ॥ वाल्मीकिरुवाच ॥ ॥ भवंतो
यदि तुष्टा मे यदि देयो वरो मम ॥ कथ्यतां तर्हि मे शीघ्रं को देवो ह्यत्र संस्थितः ॥ देविकायास्तटे रम्ये सर्वकामफलप्रदः ॥ ६२ ॥ ॥ ऋषय
ऊचुः ॥ ॥ शृणुष्वैकमना विप्र यो देवश्चात्र संस्थितः ॥ पश्य निंबमिमं विप्र बहुशाखाप्रविस्तरम् ॥ ६३ ॥ अस्य मूले स्थितः सूर्य्यः कल्पादौ
ब्रह्मणोंऽशजः ॥ तमाराधय यत्तेसावस्य स्थानस्य देवता ॥ ६४ ॥ सूर्यक्षेत्रं समाख्यातमिदं गव्यूतिमात्रकम् ॥ अत्र स्थाने स्थिता
येपि तेषां स्वर्गो ध्रुवं भवेत् ॥ ६५ ॥ अद्यप्रभृति विप्रेन्द्र मूलस्थानमिति श्रुतम् ॥ स्थानं सूर्यस्य विप्रेन्द्र कार्या चात्र त्वया स्थितिः ॥
॥ ६६ ॥ अद्यप्रभृति विप्रेंद्र तीर्थमेतन्महीतले ॥ गमिष्यति परां ख्यातिं देविकातटमाश्रितम् ॥ ६७ ॥ वयं तुष्टा यतो विप्र मूलस्थाने
पुरा स्थिताः ॥ मूलस्थानेति वै नाम लोके ख्यातिं गमिष्यति ॥ ६८ ॥ अत्र ये मानवा भक्त्या स्नानं सूर्यस्य संगमे ॥ उत्तरे तु करि
ष्यंति ते यास्यंति त्रिविष्टपम् ॥ ६९ ॥ तर्पणं तिलमिश्रेण जलेन द्विजसत्तमाः ॥ गयाश्राद्धसमा तुष्टिः पितॄणां च भविष्यति ॥ ७० ॥
अत्र ये मानवा भक्त्या श्राद्धं दास्यंति सत्तमाः ॥ शाकमूलफलैर्वापि सम्यक्छ्र[1]द्धासमन्विताः ॥ ७१ ॥ तेषां यास्यंति पितरो मोक्षं नैवात्र
संशयः ॥ ७२ ॥ अपि कीटपतंगा ये पक्षिणः पशवो मृगाः ॥ तृषार्ता जलसंस्पर्शाद्यास्यंति परमां गतिम् ॥ ७३ ॥ वयमेव सदात्रस्थाः
श्रावणे मासि सत्तम ॥ पौर्णमास्यां भविष्यामस्तव स्नेहादसंशयम् ॥ ७४ ॥ तस्मिन्नहनि यस्तोयैः पितॄन्संतर्पयिष्यति ॥ तस्याष्टादशकुष्ठानि
क्षयं यास्यंति तत्क्षणात् ॥ ७५ ॥ कपालोदुम्बराख्यैंद्रमण्डलाख्यविचर्चिकाः ॥ ऋ[2]ष्यचर्मैककिटिभसिध्मालसविपादिकाः ॥ ७६ ॥ दद्रूसिता
रुचिस्फोटं पुण्डरीकं सकाकणम् ॥ पामा चर्मदलं चेति कुष्ठान्यष्टादशैव तु ॥ ७७ ॥ गमिष्यंति न संदेह इत्युक्त्वांतर्दधुश्च ते ॥ ऋषिः सिषेवे च
रविं चक्रे रामायणं ततः ॥ ७८ ॥ तस्मात्पश्येच्च तं देवं सर्वयज्ञफलप्रदम् ॥ शृणुयाच्च कथां चैनां सर्वपातकनाशिनीम् ॥ ७९ ॥ इति श्रीस्कान्दे
महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये देविकामाहात्म्यमूलस्थानमाहात्म्यवर्णनंनामाष्टसप्तत्युत्तर
द्विशततमोऽध्यायः ॥२७८॥ ॥छ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि च्यवनार्कमनुत्तमम् ॥ हिरण्यापूर्वभागस्थं च्यवनेन प्रतिष्ठितम् ॥ १ ॥

१ अन्नैर्वापि तथैव च–इ० पा० । २ हस्तिचर्म–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वकामप्रदं नृणां पूजितं विधिवन्नरैः ॥ सप्तम्यां च विधानेन यः स्तोष्यति रविं नरः ॥ २ ॥ अष्टोत्तरशतैर्नाम्नां सम्यक्छ्रद्धासमन्वितः ॥
शृणु तानि महादेवि शुचिर्भूत्वा समाहितः ॥ ३ ॥ क्षणं[1] त्वं कुरु देवेशि सर्वं वक्ष्याम्यशेषतः ॥ धौम्येन तु यथा पूर्वं पार्थाय सुमहात्मने ॥ ४ ॥
नामाष्टशतमाख्यातं तच्छृणुष्व महामते ॥ सूर्योऽर्यमा भगस्त्वष्टा पूषाऽर्कः सविता रविः ॥ ५ ॥ गभस्तिमानजः कालो मृत्युर्धाता प्रभाकरः ॥
पृथिव्यापश्च तेजश्च खं वायुश्च परायणः ॥ ६ ॥ सोमो बृहस्पतिः शुक्रो बुधोऽङ्गारक एव च ॥ इन्द्रो विवस्वान्दीप्तांशुः शुचिः सौरिः शनैश्चरः ॥
॥ ७ ॥ ब्रह्मा रुद्रश्च विष्णुश्च स्कन्दो वैश्रवणो यमः ॥ वैद्युतो जाठरश्चाग्निरिंधनस्तेजसां पतिः ॥ ८ ॥ धर्मध्वजो वेदकर्त्ता वेदांगो वेदवाहनः ॥
कृतं त्रेता द्वापरश्च कलिः सर्वामराश्रयः ॥ ९ ॥ कलाकाष्ठामुहूर्त्ताश्च पक्षा मासा अहर्निशाः ॥ संवत्सरकरोऽश्वत्थः कालचक्रो विभावसुः ॥ १० ॥
पुरुषः शाश्वतो योगी व्यक्ताव्यक्तः सनातनः ॥ लोकाध्यक्षः प्रजाध्यक्षो विश्वकर्मा तमोनुदः ॥११॥ वरुणः सागरोंशुश्च जीवन्तो जीवनोऽरिहा ॥
भूताश्रयो भूतपतिः सर्वभूतनिषेवितः ॥ १२ ॥ स्रष्टा संवर्त्तको वह्निः सर्वस्यादिकरोऽमलः ॥ अनंतः कपिलो भानुः कामदः सर्वतोमुखः ॥ १३ ॥
जयो विषादो वरदः सर्वधातुनिषेवितः ॥ समः सुवर्णो[2] भूतादिः शीघ्रगः प्राणधारकः ॥ १४ ॥ धन्वंतरिर्धूमकेतुरादिदेवोऽदितेः सुतः ॥ द्वादशा
त्माऽरविंदाक्षः पिता माता पितामहः ॥१५॥ स्वर्गद्वारं प्रजाद्वारं मोक्षद्वारं त्रिविष्टपम् ॥ देहकर्त्ता प्रशांतात्मा विश्वात्मा विश्वतोमुखः ॥ चराचरात्मा
सूक्ष्मात्मा मैत्रेण वपुषाऽन्वितः ॥ १६ ॥ एतद्वै कीर्तनीयस्य सूर्यस्यामिततेजसः ॥ नाम्नामष्टोत्तरशतं प्रोक्तं शक्रेण धीमता ॥ १७ ॥ शक्राच्च नारदः
प्राप्तो धौम्यस्तु तदनन्तरम् ॥ धौम्याद्युधिष्ठिरः प्राप्य सर्वान्कामानवाप्तवान् ॥ १८ ॥ एतानि कीर्तनीयस्य सूर्यस्यामिततेजसः ॥ नामानि यः
पठेन्नित्यं सर्वान्कामानवाप्नुयात् ॥ १९ ॥ सुरपितृमनुजयक्षसेवितमसुरनिशाचरसिद्धवंदितम् ॥ वरकनकहुताशनप्रभं त्वमपि नमं हिताय भास्क
रम् ॥ २० ॥ सूर्योदये यस्तु समाहितः पठेत्स पुत्रलाभं धनरत्नसंचयान् ॥ लभेत जातिस्मरतां सदा नरः स्मृतिं च मेधां च स विंदते पुमान् ॥
॥ २१ ॥ इमं स्तवं देववरस्य यो नरः प्रकीर्त्तयेच्छुद्धमनाः समाहितः ॥ स मुच्यते शोकदवाग्निसागराल्लभेत कामान्मनसा यथेप्सितान् ॥ २२ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये च्यवनादित्यमाहात्म्यसूर्याष्टोत्तरशतनाम
माहात्म्यवर्णनंनामैकोनाशीत्युत्तरद्विशततमोऽध्यायः ॥ २७९ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि च्यवनेश्वरमुत्तमम् ॥

१ क्षणम्—अवधानावकाशम्—इत्यर्थः । २ सुपर्णः—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रैव संस्थितं लिंगं सर्वपातकनाशनम् ॥ १ ॥ यत्र शर्यातिना दत्ता सुकन्या सा महर्षये ॥ यत्र संस्तंभितं सैन्यमानाहार्त्त[1]मथाकरोत् ॥ २ ॥ एष शर्यातियज्ञस्य देशो देवि प्रकाशते ॥ प्रभासक्षेत्रमध्ये तु साक्षात्पातकनाशनः ॥ ३ ॥ साक्षात्तत्राभजत्सोममश्विभ्यां सह कौशिकः ॥ चुकोप भार्गवश्चैव महेन्द्राय महातपाः ॥ ४ ॥ संस्तंभयामास च तं वासवं च्यवनः प्रभुः ॥ सुकन्यां चापि भार्यां स राजपुत्रीमवाप्तवान् ॥ ५ ॥ ॥ ॥ देव्युवाच ॥ ॥ कथं विष्टंभितस्तेन भगवान्पाकशासनः ॥ किमर्थं भार्गवश्चापि कोपं चक्रे महातपाः ॥ ६ ॥ नासत्यौ च कथं ब्रह्मन्कृतवान्सोमपायिनौ ॥ तत्सर्वं च यथावृत्तमाख्यातु भगवान्[2]मम ॥ ७ ॥ ॥ ईश्वर उवाच ॥ ॥ भृगोर्महर्षेः पुत्रोऽभूच्च्यवनोनाम नामतः ॥ स प्रभासं समासाद्य तपस्तेपे महामुनिः ॥ ८ ॥ स्थाणुभूतो महातेजा वीरस्थाने[3] च भामिनि ॥ अतिष्ठत्सुचिरं कालमेकदेशे वरानने ॥ ९ ॥ स वल्मीकोऽभवत्तत्र लताभिरभिसंवृतः ॥ कालेन महता देवि समाकीर्णः पिपीलकैः ॥ १० ॥ स तथा संवृतो धीमान्मृत्पिंड इव सर्वतः ॥ तप्यतेस्म तपो घोरं वल्मीकेन समावृतः ॥ ११ ॥ अथास्य यातकालस्य शर्यातिर्नाम पार्थिवः ॥ तीर्थयात्राप्रसंगेन श्रीसोमेशदिदृक्षया ॥ आजगाम महाक्षेत्रं प्रभासं पापनाशनम् ॥ १२ ॥ तस्य स्त्रीणां सहस्राणि चत्वार्यासन्परिग्रहाः ॥ एकैव तु सुता शुभ्रा सुकन्यानाम नामतः ॥ ॥ १३ ॥ सा सखीभिः परिवृता सर्वाभरणभूषिता ॥ चंक्रम्यमाणा वल्मीकं भार्गवस्य समासदत् ॥ १४ ॥ सा चैव सुदती तत्र पश्यमाना मनोरमान् ॥ वनस्पतीन्विचिन्वंती विजहार सखीवृता ॥ १५ ॥ रूपेण वयसा चैव सुरापानमदेन च ॥ बभंज वनवृक्षाणां शाखाः परमपुष्पिताः ॥ १६ ॥ तां सखीरहितामेकामेकवस्त्रामलंकृताम् ॥ ददर्श भार्गवो धीमांश्चरंतीमिव विद्युतम् ॥ १७ ॥ तां पश्यमानो विजने स रेमे परमद्युतिः ॥ क्षामकण्ठश्च ब्रह्मर्षिस्तपोबलसमन्वितः ॥ १८ ॥ तामभाषत कल्याणीं सा चास्य न शृणोति वै ॥ ततः सुकन्या वल्मीके दृष्ट्वा भार्गवचक्षुषी ॥ १९ ॥ कौतूहलात्कण्टकेन बुद्धिमोहबलात्कृता ॥ किन्नु खल्विदमित्युक्त्वा निर्बिभेदास्य लोचने ॥ २० ॥ अक्रुध्यत्स तया विद्धे नेत्रे परममन्युमान् ॥ ततः शर्यातिसैन्यस्य शकृन्मूत्रे समावृणोत् ॥ २१ ॥ ततो रुद्धे शकृन्मूत्रे सैन्यमानाहदुःखितम्[4] ॥ तथागतमभिप्रेक्ष्य पर्यपृच्छत पार्थिवः ॥ २२ ॥ तपोनित्यस्य वृद्धस्य रोषणस्य विशेषतः ॥ केनापकृतमद्येह भार्गवस्य महात्मनः ॥ ज्ञातं वा यदि वाऽज्ञातं तदिदं ब्रूत मा चिरम् ॥ २३ ॥ तत्रोचुः सैनिकाः सर्वे न विद्मोऽपकृतं वयम् ॥ सर्वोपायैर्यथाकामं भवान्समधिगच्छतु ॥ २४ ॥ ततः स पृथिवीपालः साम्ना

१ आनाहार्तम्--मलमूत्रावष्टम्भात्--जठराध्मानरोगार्तम्--इत्यर्थः । २ भगवान्--भवान् । ३ वीरस्थाने--वीरासने--इत्यर्थः । ४ आनाहदुःखितम्--आध्मानपीडितम्--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



चोग्रेण च स्वयम् ॥ पर्यपृच्छत्सुहृद्वर्गं प्रत्यजानन्न चैव ते ॥ २५ ॥ आनाहार्त्तं ततो दृष्ट्वा तत्सैन्यं संमुखोदितम् ॥ पितरं दुःखितं चापि सुकन्यैव मथाब्रवीत् ॥ २६ ॥ मया तातेह वल्मीके दृष्टं सर्वमभिज्वलत् ॥ उद्द्योतवदविज्ञानात्तन्मया विद्धमन्तिकात् ॥ २७ ॥ एतच्छ्रुत्वा तु शर्याति र्वल्मीकं क्षिप्रमभ्यगात् ॥ तत्रापश्यत्तपोवृद्धं वयोवृद्धं च भार्गवम् ॥ २८ ॥ अथावदत्स्वसैन्यार्थं प्रांजलिः स महीपतिः ॥ अज्ञानाद्बालया यत्ते कृतं तत्क्षंतुमर्हसि ॥ २९ ॥ ततोऽब्रवीन्महीपालं च्यवनो भार्गवस्तदा ॥ रूपौदार्यसमायुक्तां लोभमोहसमावृताम् ॥ ३० ॥ तामेव प्रतिगृह्याहं राजन्दुहितरं तव ॥ क्षमिष्यामि महीपाल सत्यमेतद्ब्रवीमि ते ॥ ३१ ॥ ॥ ईश्वर उवाच ॥ ॥ ऋषेर्वचनमाज्ञाय शर्यातिरविचारयन् ॥ ददौ दुहितरं तस्मै च्यवनाय महात्मने ॥ ३२ ॥ प्रतिगृह्य च तां कन्यां भगवान्प्रससाद ह ॥ प्राप्ते प्रसादे राजा तु ससैन्यः पुरमाव्रजत् ॥ ३३ ॥ सुकन्यापि पतिं लब्ध्वा तपस्विनमनिन्दितम् ॥ नित्यं पर्यचरत्प्रीत्या तपसा नियमेन च ॥ ३४ ॥ अग्नीनामतिथीनां च शुश्रूषुरनसूयया ॥ समाराधयत क्षिप्रं च्यवनं सा शुभानना ॥ ३५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये च्यवनेश्वरमाहात्म्यवर्णनंनामाशीत्युत्तरद्विशततमोऽध्यायः ॥ २८० ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ कस्यचित्त्वथ कालस्य त्रिदशावश्विनौ प्रिये ॥ कृताभिषेकां विवृतां[1] सुकन्यां तामपश्यताम् ॥ १ ॥ तां दृष्ट्वा दर्शनीयांगीं देवराजसुतामिव ॥ ऊचतुः समभिद्रुत्य नासत्यावश्विनावथ ॥ २ ॥ कस्य त्वमसि वामोरु किं वनेऽस्मिंश्चिकीर्षसि ॥ इच्छावस्त्वां च विज्ञातुं तत्त्वमाख्याहि शोभने ॥ ३ ॥ ततः सुकन्या संवीता[2] तावुवाच सुरोत्तमौ ॥ शर्यातितनयां वित्तं[3] भार्यां च च्यवनस्य माम् ॥ ४ ॥ ततोऽश्विनौ प्रहस्यैनामब्रूतां पुनरेव तु ॥ कथं त्वं च विदित्वा तु पित्रा दत्ताऽऽगता वने ॥ ५ ॥ भ्राजसे गगनोद्देशे विद्युत्सौदामनी यथा ॥ न देवेष्वपि तुल्यां हि तव पश्याव भामिनि ॥ ६ ॥ सर्वाभरणसंपन्ना परमांबरधारिणी ॥ मामैवमनवद्यांगि त्यजैनमविवेकिनम् ॥ ७ ॥ कस्मादेवंविधा भूत्वा जराजर्जरितं भुवि ॥ त्वमुपास्से हि कल्याणि कामभाववहिष्कृतम् ॥ ८ ॥ असमर्थं परित्राणे पोषणे वा शुचिस्मिते ॥ सा त्वं च्यवनमुत्सृज्य वरयस्वैकमावयोः ॥ ९ ॥ पत्यर्थं देवगर्भाभे मा वृथा यौवनं कृथाः ॥ एवमुक्ता सुकन्या सा सुरौ ताविदमब्रवीत् ॥ १० ॥ रताऽहं च्यवने पत्यौ न चैवं परिशंकतम् ॥



१ विवृताम्–स्नानसमये प्रावरणापसरणेन दृश्यमानाच्छादनीयांगम्–इत्यर्थः । २ संवीता–कृतवस्त्रप्रावरणा–इत्यर्थः । ३ वित्तम्–जानीतम्–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तावन्नूतां पुनश्चैतामावां देवभिषग्वरौ ॥ ११ ॥ युवानं रूपसंपन्नं करिष्यावः पतिं तव ॥ ततस्तस्यावयोश्चैव पतिमेकतमं वृणु ॥ १२ ॥ एतेन समयेनावां शमं नय सुमध्यमे ॥ सा तयोर्वचनाद्देवि उपसंगम्य भार्गवम् ॥ उवाच वाक्यं यत्ताभ्यामुक्तं भृगुसुतं प्रति ॥ १३ ॥ तद्वाक्यं च्यवनो भार्यामुवाचाद्रियतामिति ॥ इत्युक्ता च्यवनेनाथ सुकन्या तावुवाच वै ॥ १४ ॥ एवं देवौ भवद्भ्यां यत्प्रोक्तं तत्क्रियतां लघु ॥ इत्युक्तौ भिषजौ तत्र तया चैव सुकन्यया ॥ ऊचतू राजपुत्रीं तां पतिस्तव विशत्वपः ॥ १५ ॥ ततोऽपश्च्यवनः शीघ्रं रूपार्थी प्रविवेश ह ॥ अश्विनावपि तद्देवि ततः प्राविशतां जलम् ॥ १६ ॥ ततो मुहूर्त्तादुत्तीर्णाः सर्वे ते सरसस्ततः ॥ दिव्यरूपधराः सर्वे युवानो मृष्टकुण्डलाः ॥ १७ ॥ दिव्यवेषधराश्चैव मनसः प्रीतिवर्द्धनाः ॥ तेऽब्रुवन्सहिताः सर्वे वृणीष्वान्यतमं शुभे ॥ १८ ॥ अस्माकमीप्सितं भद्रे यतस्त्वं वरवर्णिनी ॥ यत्र वाप्यभिकामासि तं वृणीष्व सुशोभने ॥ १९ ॥ सा समीक्ष्य तु तान्सर्वांस्तुल्यरूपधरान्स्थितान् ॥ निश्चित्य मनसा बुद्ध्या देवि वव्रे पतिं स्वकम् ॥ २० ॥ लब्ध्वा तु च्यवनो भार्यां वयोरूपमवस्थितः ॥ हृष्टोऽब्रवीन्महातेजास्तौ नासत्याविदं वचः ॥ २१ ॥ यदहं रूपसंपन्नो वयसा च समन्वितः ॥ कृतो भवद्भ्यां वृद्धः सन्भार्यां च प्राप्तवान्निजाम् ॥ तद्भूतं वै विधास्यामि भवतोर्यदभीप्सितम् ॥ २२ ॥ ॥ अश्विनावूचतुः ॥ ॥ आवां तु देवभिषजौ न च शक्रः करोति नौ ॥ सोमपानार्हतां तस्मात्कुरु नौ सोमपायिनौ ॥ २३ ॥ ॥ च्यवन उवाच ॥ ॥ अहं वां यज्ञभागार्हौ करिष्ये सोमपायिनौ ॥ २४ ॥ ॥ ईश्वर उवाच ॥ ॥ ततस्तौ हृष्टमनसौ नासत्यौ दिवि जग्मतुः ॥ च्यवनोऽपि सुकन्या च सुराविव विजह्रतुः ॥ २५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये च्यवनेश्वरमाहात्म्यवर्णनंनामैकाशीत्युत्तरद्विशततमोऽध्यायः ॥ २८१ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततः श्रुत्वा च शर्यातिर्वलभीस्थानसंस्थितः ॥ वयस्थं च्यवनं श्रुत्वा आनन्दोद्गतमानसः ॥ १ ॥ प्रहृष्टः सेनया सार्द्धं स प्रायाद्भार्गवाश्रमम् ॥ च्यवनं च सुकन्यां च दृष्ट्वा देवसुतामिव ॥ २ ॥ गतो महीपः शर्यातिः कृत्स्नानंदमहोदधिः ॥ ऋषिणा सत्कृतस्तेन सभार्यः पृथिवीपतिः ॥ तत्रोपविष्टः कल्याणीः कथाश्चक्रे महामनाः ॥ ३ ॥ अथैनं भार्गवो देवि ह्युवाच परिसांत्वयन् ॥ याजयिष्यामि राजंस्त्वां संभारानुपकल्पय ॥ ४ ॥ ततः परमसंहृष्टः शर्यातिः पृथिवीपतिः ॥ च्यवनस्य महादेवि तद्वाक्यं प्रत्यपूजयत् ॥ ५ ॥ प्रशस्तेऽहनि याज्ञीये सर्वकामसमृद्धिमत् ॥ कारयामास शर्यातिर्यज्ञायतनमुत्तमम् ॥ ६ ॥ तत्रैव च्यवनो देवि याजयामास भार्गवम् ॥ अद्भुतानि च तत्रासन्यानि तानि महेश्वरि ॥ ७ ॥ अगृह्णाच्च्यवनः सोममश्विनो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



देवयोस्तदा ॥ तमिन्द्रो वारयामास मा गृहाण तयोर्ग्रहम्[1] ॥ ८ ॥ ॥ इन्द्र उवाच ॥ ॥ उभावेतौ न सोमार्हौ नासत्याविति मे मतिः ॥ भिष
जौ देवतानां हि कर्मणा तेन गर्हितौ ॥ ९ ॥ ॥ च्यवन उवाच ॥ ॥ माऽवमंस्था महात्मानौ रूपद्रविणवर्चसौ ॥ यौ चक्रतुश्च मामद्य वृंदा
रकमिवाजरम् ॥ १० ॥ समत्वेनान्यदेवानां कथं वै नेक्षते भवान् ॥ अश्विनावपि देवेन्द्र देवौ विद्धि परंतप ॥ ११ ॥ ॥ इन्द्र उवाच ॥ ॥
चिकित्सकौ कर्मकरौ कामरूपसमन्वितौ ॥ लोके चरंतौ मर्त्यानां कथं सोममिहार्हतः ॥ १२ ॥ ॥ ईश्वर उवाच ॥ ॥ एतदेव यदा वाक्य
माम्रेडयति वासवः[2] ॥ अनादृत्य ततः शक्रं ग्रहं जग्राह भार्गवः ॥ १३ ॥ ग्रहीष्यंतं ततः सोममश्विनोः सत्तमं तदा ॥ समीक्ष्य बलभिद्देव इदं
वचनमब्रवीत् ॥ १४ ॥ आ[3]भ्यामर्थाय सोमं त्वं ग्रहीष्यसि यदि स्वयम् ॥ वज्रं ते प्रहरिष्यामि घोररूपमनुत्तमम् ॥ १५ ॥ एवमुक्तः स्वयमिन्द्र
मभिवीक्ष्य स भार्गवः ॥ जग्राह विधिवत्सोममश्विभ्यामुत्तमं ग्रहम्[4] ॥ १६ ॥ ततोऽस्मै प्राहरत्कोपाद्वज्रमिंद्रः शचीपतिः ॥ तस्य प्रहरतो
बाहुं स्तंभयामास भार्गवः ॥ १७ ॥ स्तंभयित्वाथ च्यवनो जुहुवे मन्त्रतोऽनलम् ॥ कृत्यार्थी सुमहातेजा देवं हिंसितुमुद्यतः ॥ १८ ॥ तत्र
कृत्योद्भवो यज्ञे मुनेस्तस्य तपोबलात् ॥ मदोनाम महावीर्यो महाकायो महासुरः ॥ १९ ॥ शरीरं यस्य निर्देष्टुमशक्यं च सुरासुरैः ॥ तस्य प्रमाणं
वपुषा न तुल्यमिह विद्यते ॥ २० ॥ तस्यास्यं चाभवेद्घोरं दंष्ट्रादुर्दर्शनं महत् ॥ हनुरेकः स्थितस्तस्य भूमावेको दिवं गतः ॥ २१ ॥ चतस्रश्चापि
ता दंष्ट्रा योजनानां शतंशतम् ॥ इतरे त्वस्य दशना बभूवुर्दशयोजनाः ॥ २२ ॥ प्राकारसदृशाकारा मूलाग्रसमदर्शनाः ॥ नाम्ना पर्वतसंकाशा
श्चायुतायुतयोजनाः ॥ २३ ॥ नेत्रे रविशशिप्रख्ये भ्रुवावंतकसन्निभे ॥ लेलिहज्जिह्वया वक्रं विद्युच्चलितलोलया ॥ व्यात्ताननो घोरदृष्टिर्ग्रसन्निव
जगद्बलात् ॥ २४ ॥ स भक्षयिष्यन्संक्रुद्धः शतक्रतुमुपाद्रवत् ॥ महता घोरनादेन लोकाञ्छब्देन छादयन् ॥ २५ ॥ इति श्रीस्कांदे महापुराण
एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये च्यवनेश्वरमाहात्म्ये च्यवनेन नासत्ययज्ञभागप्रतिरोधकवज्र
मोचनोद्यतशक्रनाशाय कृत्योद्भवमदनामकमहाऽसुरोत्पादनवृत्तान्तवर्णनंनाम द्व्यशीत्युत्तरद्विशततमोऽध्यायः ॥ २८२ ॥ ॥ छ ॥ ॥
॥ ॥ ईश्वर उवाच ॥ ॥ तं दृष्ट्वा घोरवदनं मदं देवः शतक्रतुः ॥ आयांतं भक्षयिष्यन्तं व्यात्ताननमिवान्तकम् ॥ १ ॥ भया ॥१६७॥
त्स्तंभितरूपेण लेलिहानं मुहुर्मुहुः ॥ प्रणतोऽब्रवीन्महादेवि च्यवनं भयपीडितः ॥ २ ॥ सोमार्हावश्विनावेतावद्यप्रभृति भार्गव ॥

१ ग्रहम्–यज्ञियहविर्भागम्–इत्यर्थः । गृहम्–इ० पा० । २ आम्रेडयति–द्विस्त्रिरुच्चारयति–इत्यर्थः । ३ आभ्यामर्थाय–एतयोरर्थे–इत्यर्थः । ४ गृहम–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भविष्यतः सर्वमेतद्वचः सत्यं ब्रवीमि ते ॥ ३ ॥ मा ते मिथ्या समारम्भो भवत्वथ तपोधन ॥ जानामि चाहं विप्रर्षे न मिथ्या त्वं करिष्यसि ॥ ४ ॥ सोमार्हावश्विनावेतौ यथैवाद्य त्वया कृतौ ॥ भूय एव तु ते वीर्यं प्रकाशेदिति भार्गव ॥ ५ ॥ सुकन्यायाः पितुश्चास्य लोके कीर्तिर्भवेदिति ॥ अतो मयैतद्विहितं तद्वीर्यस्य प्रकाशनम् ॥ तस्मात्प्रसादं कुरु मे भवत्वेतद्यथेच्छसि ॥ ६ ॥ एवमुक्तस्य शक्रेण च्यवनस्य महात्मनः ॥ मन्युर्व्युपारमच्छीघ्रं मानश्चैव सुरेशितुः ॥ ७ ॥ मदं च व्यभजद्देवि पाने स्त्रीषु च वीर्यवान् ॥ अक्षेषु मृगयायां च पूर्वं सृष्टं पुनःपुनः ॥ तथा मदं विनिक्षिप्य शक्रं संतर्प्य चेंदुना ॥ ८ ॥ अश्विभ्यां सहितान्सर्वान्याजयित्वा च तं नृपम् ॥ विख्याप्य वीर्यं सर्वेषु लोकेषु वरवर्णिनि ॥ ९ ॥ सुकन्यया महारण्ये क्षेत्रेऽस्मिन्विजहार सः ॥ तस्यैतद्देवि संयुक्तं च्यवनेश्वरनामभृत् ॥ १० ॥ लिंगं महापापहरं च्यवनेन प्रतिष्ठितम् ॥ पूजयेत्तं विधानेन सोऽश्वमेधफलं लभेत् ॥११॥ तस्माच्चन्द्रमसस्तीर्थमृषयः पर्युपासते ॥ वैखानसाख्या ऋषयो वालखिल्यास्तथैव च ॥ १२ ॥ अत्राश्विने मासि नरः पौर्णमास्यां विशेषतः ॥ श्राद्धं कुर्याद्विधानेन ब्राह्मणान्भोजयेत्पृथक् ॥ कोटितीर्थफलं तस्य भवेन्नैऽवात्र संशयः ॥ १३ ॥ य इमां शृणुयाद्देवि कथां पातकनाशिनीम् ॥ समस्तजन्मसंभूतात्पापान्मुक्तो भवेन्नरः ॥ १४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये च्यवनेश्वरमाहात्म्यवर्णनंनाम त्र्यशीत्युत्तरद्विशततमोऽध्यायः ॥२८३॥छ ॥

॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि सुकन्यासर उत्तमम् ॥ यत्राश्विनौ निमग्नौ तौ च्यवनेन सहांबिके ॥ समानरूपो ह्यभवच्च्यवनो यत्र सोऽश्विना ॥ १ ॥ यत्र प्राप्तवती कामं सुकन्या वरवर्णिनी ॥ सरःस्नानप्रभावेन तेन कन्यासरः स्मृतम् ॥ तत्र स्नाता शुभा नारी तृतीयायां विशेषतः ॥ २ ॥ सप्तजन्मसहस्राणि गृहभंगं न चाप्नुयात् ॥ दरिद्रो विकलो दीनो नांधस्तस्या भवेत्पतिः ॥ ३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये च्यवनेश्वरमाहात्म्ये सुकन्यासरोमाहात्म्यवर्णनंनाम चतुरशीत्युत्तरद्विशततमोऽध्यायः ॥ २८४ ॥ ॥ छ ॥

॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि पुनर्न्यंकुमतीं नदीम् ॥ तत्र कृत्वा गयाश्राद्धं गोष्पदे तीर्थ उत्तमे ॥ १ ॥ ततः पश्येद्वराहं तु तस्माद्धरिगृहं व्रजेत् ॥ तत्र मातॄस्तु संपूज्य स्नात्वा सागरसंगमे ॥ २ ॥ न्यंकुमत्यर्णवोपेते ततः पूर्वमनुव्रजेत् ॥ अगस्तेराश्रमं दिव्यं क्षुधाहरमिति स्मृतम् ॥ ३ ॥ यत्रेल्वलं च वातापिं संहृत्य भगवान्मुनिः ॥ मुक्त्वाऽऽपद्भ्यो ब्राह्मणांश्च तेभ्यः स्थानं

१ मानश्चैवं पुरंदरम्--इ० पा० । २ पापे--इ० पा० । ३ इंदुना--सोमेन--सोमरसेन इत्यर्थः । ४ एवं चन्द्रमसः--इ० पा० । ५ अश्विना--अश्विनीकुमाराभ्याम्--इत्यर्थः । एकवचनप्रयोग आर्षः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ततो ददौ ॥ ४ ॥ अगस्त्याश्रममेतद्धि अगस्तिप्रियमुत्तमम् ॥ न्यंकुमत्यास्तटे रम्ये सर्वपातकनाशने ॥ ५ ॥ ॥ देव्युवाच ॥ ॥ अगस्तिनेह वातापिः किमर्थमुपशामितः ॥ अत्र वै किंप्रभावश्च स दैत्यो ब्राह्मणांतकः ॥ किमर्थं चोद्गतो मन्युरगस्तेस्तु महात्मनः ॥६॥ ॥ ईश्वर उवाच ॥ ॥ इल्वलोनाम दैत्येन्द्र आसीद्वै वरवर्णिनि ॥ मणिमत्यां पुरा पुर्यां वातापिस्तस्य चानुजः ॥ ७ ॥ स ब्राह्मणं तपोयुक्तमुवाच दितिनंदनः ॥ पुत्र मे भगवन्नेकमिंद्रतुल्यं प्रयच्छतु ॥८॥ तस्मिन्स ब्राह्मणो नैच्छत्पुत्रं दातुं तथाविधम् ॥ चुक्रोध दितिजस्तस्य ब्राह्मणस्य ततो भृशम् ॥ ९ ॥ प्रभास क्षेत्रमासाद्य स दैत्यः पापबुद्धिमान् ॥ मेषरूपी च वातापिः कामरूपोऽभवत्क्षणात् ॥ १० ॥ संस्कृत्य भोजयेत्तत्र विप्रान्स च जिघांसति ॥ समा ह्वयति तं वाचा गतं चैव ततः क्षयम्[1] ॥ ११ ॥ स पुनर्देहमास्थाय जीवन्स्म प्रत्यदृश्यत ॥ ततो वातापिरपि तं छागं कृत्वा सुसंस्कृतम् ॥ ब्राह्मणं भोजयित्वा तु पुनरेव समाह्वयत ॥ १२ ॥ स तस्य पार्श्वं निर्भिद्य ब्राह्मणस्य महात्मनः ॥ वातापिः प्रहसंस्तत्र निश्चक्राम द्विजोदरात् ॥ १३ ॥ एवं स ब्राह्मणान्देवि भोजयित्वा पुनःपुनः ॥ विनिर्भिद्योदरं तेषामेवं हंति द्विजान्बहून् ॥१४॥ ततो वै ब्राह्मणाः सर्वे भयभीताः प्रदुद्रुवुः ॥ अगस्ते राश्रमं जग्मुः कथयामासुरग्रतः ॥ १५ ॥ भगवञ्छृणु नो वाक्यमस्माकं तु भयावहम् ॥ निमंत्रिताः स्म सर्वे वै[2] इल्वलेन वयं प्रभो ॥ १६ ॥ अस्माकं मृत्युरूपं तद्भोजनं नास्ति संशयः ॥ तदस्मान्रक्ष भगवन्विषण्णान्गतचेतसः ॥ १७ ॥ ततः प्रभासमासाद्य यत्र तौ दैत्यपुंगवौ ॥ ब्रह्मघ्नौ पापनिरतौ ददर्श स महामुनिः ॥ १८ ॥ वातापिं संस्कृतं दृष्ट्वा मेषरूपं महासुरम् ॥ उवाच देहि मे भोज्यं बुभुक्षा मम वर्तते ॥ १९ ॥ इत्युक्तौ स्वागतं तत्र चक्राते मुनये तदा ॥ भगवन्भोजनं तुभ्यं दास्येऽहं बहुविस्तरम् ॥ कियन्मानस्तवाहारस्तावन्मानं पचाम्यहम् ॥ २० ॥ ॥ अगस्त्य उवाच ॥ ॥ अन्नं पचस्व दैत्येन्द्र किंचित्तृप्तिर्भविष्यति ॥ एवमस्त्विति दैत्येन्द्रः पक्वमाह महामुने ॥२१॥ आस्यतामासनमिदं भुज्यतां स्वेच्छया मुने ॥ इत्युक्तोऽघोरमंत्रं स जपन्कल्पांतकारकम् ॥ धुर्यासनमथासाद्य निषसाद महामुनिः ॥ २२ ॥ तं पर्यवेषदैत्येंद्र[3] इल्वलः प्रहसन्निव ॥ शतह स्तप्रमाणेन राशिमन्नस्य सोऽकरोत् ॥ २३ ॥ ततो हृष्टमनाऽगस्त्यः प्राग्रसत्कवलद्वयम् ॥ रूपं कृत्वा महत्तद्वद्यद्वत्सागरशोषणे ॥ २४ ॥ समस्त मेव तद्भोज्यं वातापिं बुभुजे ततः ॥ भुक्तवत्यसुरो ह्वानमकरोत्तस्य इल्वलः ॥ २५ ॥ ततोऽसौ दत्तवानन्नमगस्त्यस्य महात्मनः ॥ भस्मीचकार सर्वं स तदन्नं च सदानवम् ॥२६॥ इल्वलं क्रोधमुद्दृष्ट्या तु भस्मीचक्रे महामुनिः ॥ ततो हाहारवं कृत्वा सर्वे दैत्या ननंशिरे ॥ २७ ॥ ततोऽगस्त्यो ॥१६८॥

१ क्षयम्—गृहम्—इत्यर्थः । २ वै—इल्वलेन—इति पदच्छेदः । ३ आर्षोऽयं सन्धिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महातेजा आहूय द्विजपुंगवान् ॥ तत्स्थानं च ददौ तेभ्यो दैत्यानां द्रव्यपूरितम् ॥ २८ ॥ क्षुधा हृता ततो देवि तत्रागस्त्यस्य दानवैः ॥ तेन क्षुधा हरंनाम स्थानमासीद्विजन्मनाम् ॥ २९ ॥ तस्य पश्चिमभागे तु नातिदूरे व्यवस्थितम् ॥ गंगेश्वरमिति ख्यातं गंगया यत्प्रतिष्ठितम् ॥ ३० ॥ वातापिभक्षणे पूर्वमगस्त्येन महात्मना ॥ दैत्यसंभक्षणोत्पन्नसर्वपातकशुद्धये ॥ समाहूता महादेवि गंगा पातकनाशिनी ॥ ३१ ॥ ततो देवि समायाता गंगा पातकनाशिनी ॥ शुद्धिं चकार तस्यर्षेस्तत्र स्थाने स्थिताऽभवत् ॥३२॥ अगस्त्यस्याऽऽश्रमे रम्ये नृणां पापभयापहे ॥ तत्र गंगेश्वरं दृष्ट्वा अभक्ष्योद्भवपातकात् ॥ मुच्यते नात्र संदेहः स्नानदानजपादिना ॥ ३३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये न्यंकुमतीमाहात्म्येऽगस्त्याश्रमगंगेश्वरमाहात्म्यवर्णनंनाम पञ्चाशीत्युत्तरद्विशततमोऽध्यायः ॥ २८५ ॥ ॥छ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि बालार्कं पापनाशनम् ॥ अगस्त्याश्रमतो देवि उत्तरे नातिदूरतः ॥ १ ॥ बाल एव तु यत्रार्कस्तपस्तेपे पुरा प्रिये ॥ तेन बालार्क इत्येतन्नाम ख्यातं धरातले ॥ २ ॥ तं दृष्ट्वा रविवारेण न कुष्ठी जायते नरः ॥ बालानां रोगजा पीडा न संभूयात्कदाचन ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये बालार्कमाहात्म्यवर्णनंनाम षडशीत्युत्तरद्विशततमोऽध्यायः ॥ २८६ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि अजापालेश्वरीं शुभाम् ॥ अगस्त्यस्थानपूर्वेण नातिदूरे व्यवस्थिताम् ॥ १ ॥ रघुवंशसमुद्भूतो ह्यजापालो नृपोत्तमः ॥ स तत्र देवीमाराध्य पापरोगवशंकरीम् ॥ २ ॥ अजारूपांश्च रोगान्वै चारयामास भूमिपः ॥ तत्र तां स्थापयामास स्वनाम्ना पापनाशिनीम् ॥ ॥ ३ ॥ यस्तां पूजयते भक्त्या तृतीयायां विधानतः ॥ बलं बुद्धिं यशो विद्यां सौभाग्यं प्राप्नुयान्नरः ॥ ४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्येऽजापालेश्वरीमाहात्म्यवर्णनंनाम सप्ताशीत्युत्तरद्विशततमोऽध्यायः ॥ २८७ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि बालादित्यमिति श्रुतम् ॥ अगस्त्यस्थानतः पूर्वे गव्यूतिद्वितयेन तु ॥ १ ॥ स्थानं सपा[1]टिकानाम तस्य दक्षिणतः स्थितम् ॥ गव्यूतिमात्रं देवेशि बालार्क इति विश्रुतम् ॥ २ ॥ यत्र चाराधिता विद्या विश्वामित्रेण धीमता ॥ संस्थाप्य लिंगत्रितयं प्रतिष्ठाप्य तथा रविम् ॥ ३ ॥ विद्यायाः साधनं चक्रे सिद्धिं सूर्यादवाप्तवान् ॥ बालादित्येति तेनासौ ततः ख्यातिमगात्प्रभुः ॥ ४ ॥

१ स्थानं सरोगदीनाम–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तं दृष्ट्वा मानवो देवि भास्करं पापतस्करम् ॥ न दारिद्र्यमवाप्नोति यावज्जीवति मानवः ॥ ५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये बालार्कमाहात्म्यवर्णनंनामाष्टाशीत्युत्तरद्विशततमोऽध्यायः ॥ २८८ ॥ ॥ छ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्यैव दक्षिणे देवि तस्माद्धन्वंतिमात्रतः ॥ पातालगामिनी गंगा संस्थिता पापनाशिनी ॥ १ ॥ विश्वामित्रेण चाहूता स्नानार्थं वरवर्णिनि ॥ तत्र स्नात्वा महादेवि मुच्यते सर्वपातकैः ॥ २ ॥ तत्र गंगेश्वरं दृष्ट्वा विश्वामित्रेश्वरं तथा ॥ बालेश्वरं च संप्रेक्ष्य सर्वान्कामान वाप्नुयात् ॥ ३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये बालार्कमाहात्म्ये पाताल गंगेश्वरविश्वामित्रेश्वरबालेश्वराभिधलिंगत्रयमाहात्म्यवर्णनंनामैकोननवत्युत्तरद्विशततमोऽध्यायः ॥ २८९ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छे न्महादेवि कुबेरस्थानमुत्तमम् ॥ यत्र सिद्धः पुरा देवि कुबेरो धनदोऽभवत् ॥ १ ॥ ब्राह्मणश्चौररूपेण तत्र स्थानेऽवसत्पुरा ॥ स च मे भक्तियोगेन पुरा वै धनदः कृतः॥ २ ॥ ॥ देव्युवाच ॥ ॥ कथं स ब्राह्मणो भूत्वा चौररूपो नराधमः ॥ तन्मे कथय देवेश धनदः स यथाऽभवत् ॥ ३ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्मिन्नर्थे महादेवि यद्वृत्तं चौत्तमेऽतरे[1] ॥ कथयिष्यामि तत्सर्वं शिवमाहात्म्यसूचकम् ॥ ४ ॥ कश्चिदासीद्द्विजो देवि देवशर्मेति विश्रुतः ॥ प्रभासक्षेत्रनिलयो न्यंकुमत्यास्तटेऽवसत् ॥ ५ ॥ पुत्रक्षेत्रकलत्रादिव्यापारैकरतः सदा ॥ विहायाथ स गार्हस्थ्यं धनार्थं लोभ मोहितः ॥ प्रचचार महीमेतां सग्रामनगरांतराम् ॥ ६ ॥ भार्या तस्य विलोलाक्षी तस्य गेहाद्विनिर्गता ॥ स्वच्छंदचारिणी नित्यं नित्यं चानंगमो हिता ॥ ७ ॥ तस्यां कदाचित्पुत्रस्तु शूद्राज्जातो विधेर्वशात् ॥ दुष्टात्माऽतीव निर्मुक्तो[2] नाम्ना दुःसह इत्यतः ॥ ८ ॥ सोऽथ कालेन महता नामकर्मप्र वर्तितः[3] ॥ व्यसनोपहतः पापस्त्यक्तो बन्धुजनैस्तथा ॥ ९ ॥ पूजोपकरणं द्रव्यं स कस्मिंश्चिच्छिवालये ॥ बहु दोषामुखे[4] दृष्ट्वा हर्तुकामोऽविशत्ततः॥ ॥ १० ॥ यावद्दीपो गतप्रायो वर्त्तिच्छेदोऽभवत्किल ॥ तावत्तेन दशा दत्ता द्रव्यान्वेषणकारणात् ॥ ११ ॥ प्रबुद्धश्चोत्थितस्तत्र देवपूजाकरो नरः ॥ कोऽयं कोयमिति प्रोच्चैर्व्याहरत्परिघायुधः ॥१२॥ स च प्राणभयान्नष्टः शूद्रजश्चापि मूढधीः ॥ विनिन्दन्नात्मनो जन्म कर्म चापि सुदुःखितः॥१३॥ ॥१६९॥ गीतवाद्यरतस्तत्र वेश्यासु निरतो भृशम् ॥ प्रजो पुरपालैर्हतोऽवन्यां मृतः कालादभूच्च सः ॥ गंधारविषये राजा ख्यातो नाम्ना सुदुर्मुखः ॥ १४ ॥

१ औत्तमेऽन्तरे--औत्तममन्वंतरे--इत्यर्थः । २ अतीव निर्मुक्तः--अतीवोच्छृंखलः--इत्यर्थः । अतीव निर्मूकः--इ० पा० । ३ नामकर्मप्रवर्तितः--निजनामवत्--दुःसह इति नामवत्--यत्कर्म--दुःसहं कर्म--तस्मिन्दुःसहे कर्मणि प्रवर्तितः--प्रवृत्तः--इत्यर्थः । ४ दोषामुखे--प्रदोषसमये--इत्यर्थः । ५ तमः--इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

पद्रवकृन्मूर्खः सर्वधर्मबहिष्कृतः ॥ १५ ॥ किन्त्वर्चयन्सदैवासौ लिंगं राज्यक्रमागतम् ॥ पुष्पस्रग्धूपनैवेद्यगंधादिभिरमन्त्रवत् ॥ १६ ॥ मुख्येषु
च सदा काले देवतायतनेषु च ॥ दद्यात्स बहुलान्दीपान्वर्तिभिश्च समुज्ज्वलान् ॥ १७ ॥ कदाचिन्मृगयासक्तो बभ्राम स च वीर्यवान् ॥ प्रभास
क्षेत्रमागत्य पूर्वसंस्कारभावितः ॥ १८ ॥ परैरभिहतो युद्धे न्यंकुमत्यास्तटे शुभे ॥ शिवपूजाविधानेन विध्वस्ताशेषपातकः ॥ १९ ॥ ततो विश्र
वसश्चासौ पुत्रोऽभूद्भुवि विश्रुतः ॥ यः स एव महातेजाः सर्वयज्ञाधिपो बली ॥ २० ॥ कुबेर इति धर्मात्मा श्रुतशीलसमन्वितः ॥ लिंगं प्रतिष्ठया
मास न्यंकुमत्याश्च पूर्वतः ॥ २१ ॥ कौबेरात्पश्चिमे भागे सोमनाथेति विश्रुतम् ॥ संपूज्य च यथेशानं न्यंकुमत्यास्तटे शुभे ॥ स्तोत्रेणानेन
चास्तौषीद्भक्त्या तं सर्वकामदम् ॥ २२ ॥ मूर्तिः क्वापि महेश्वरस्य महती यज्ञस्य मूलोदया तुम्बी तुंगफलावती च शतशो ब्रह्माण्डकोटिस्तथा ॥
यन्मानं न पितामहो न च हरिर्ब्रह्माण्डमध्यस्थितो जानात्यन्यसुरेषु का च गणना सा संततं वोऽवतात् ॥ २३ ॥ नमाम्यहं देवमजं पुराणमु
पेन्द्रमिन्द्रावरराजजुष्टम् ॥ शशांकसूर्याग्निसमाननेत्रं वृषेन्द्रचिह्नं प्रलयादिहेतुम् ॥ २४ ॥ सर्वेश्वरैकत्रिबलैकबन्धुं योगाधिगम्यं जगतोऽधिवा
सम् ॥ तं विस्मयाधारमनंतशक्तिं ज्ञानोद्भवं धैर्यगुणाधिकं च ॥ २५ ॥ पिनाकपाशांकुशशूलहस्तं कपर्दिनं मेघसमानघोषम् ॥ सकालकण्ठं स्फ
टिकावभासं नमामि शंभुं भुवनैकनाथम् ॥ २६ ॥ कपालिनं मालिनमादिदेवं जटाधरं भीमभुजंगहारम् ॥ प्रभासितारं च सहस्रमूर्तिं सहस्रशीर्षं
पुरुषं विशिष्टम् ॥ २७ ॥ यदक्षरं निर्गुणमप्रमेयं सज्योतिरेकं प्रवदंति संतः ॥ दूरंगमं वेद्यमनिंद्यवन्द्यं सर्वेषु हृत्स्थं परमं पवित्रम् ॥ २८ ॥
तेजोनिभं बालमृगांकमौलिं नमामि रुद्रं स्फुरदुग्रवक्त्रम् ॥ कालेन्धनं कामदमस्तसंगं धर्मासनस्थं प्रकृतिद्वयस्थम् ॥ २९ ॥ अतीन्द्रियं विश्व
भुजं जितारिं गुणत्रयातीतमजं निरीहम् ॥ तमोमयं वेदमयं चिदंशं प्रजापतीशं पुरुहूतमिन्द्रम् ॥ अनागतैकध्वनिरूपमाद्यं ध्यायंति यं
योगविदो यतीन्द्राः ॥ ३० ॥ संसारपाशच्छिदुरं विमुक्तः पुनः पुनस्त्वां प्रणमामि देवम् ॥ ३१ ॥ निरूपमास्यं च बलप्रभावं न च स्वभावं
परमस्य पुंसः ॥ विज्ञायते विष्णुपितामहाद्यैस्तं वामदेवं प्रणमाम्यचिंत्यम् ॥ ३२ ॥ शिवं समाराध्य तमुग्रमूर्त्तिं पपौ समुद्रं भगवानगस्त्यः ॥
लेभे दिलीपोऽप्यखिलांश्च कामांस्तं विश्वयोनिं शरणं प्रपद्ये ॥ ३३ ॥ देवेन्द्रवन्द्योद्धर मामनाथं शम्भो कृपाकारुणिकः किल त्वम् ॥ दुःखा
र्णवे मग्नमुमेश दीनं समुद्धर त्वं भव शंकरोऽसि ॥ ३४ ॥ संपूजयन्तो दिवि देवसंघा ब्रह्मेन्द्ररुद्रा विहरंति कामम् ॥ तं स्तौमि नौमीह जपामि
शर्वं वन्देऽभिवंद्यं शरणं प्रपन्नः ॥ ३५ ॥ स्तुत्वैवमीशं विरराम यावत्तावत्स रुद्रोऽर्कसहस्रतेजाः ॥ ददौ च तस्मै वरदोऽधकारिर्वरत्रयं वैश्रवणाय देवः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





सख्यं च दिक्पालपदं चतुर्थं धनाधिपत्यं च दिवौकसां च ॥ ३६ ॥ यस्मादत्र त्वया सम्यङ्न्यंकुमत्यास्तटे शुभे ॥ आराधितोऽहं विधिवत्कृत्वा मूर्त्तिं महीमयीम् ॥ ३७ ॥ तस्मात्तवैव नाम्ना तत्स्थानं ख्यातं भविष्यति ॥ कुबेरनगरेत्येवं मम प्रीतिप्रदायकम् ॥ ३८ ॥ त्वया प्रतिष्ठितं लिंगम स्मात्स्थानाच्च पश्चिमे ॥ उमानाथस्य विधिवत्सोमनाथेति तत्स्मृतम् ॥ ३९ ॥ श्रीपंचम्यां विधानेन यस्तच्च पूजयिष्यति ॥ सप्तपुरुषावधिर्यावत्तस्य लक्ष्मीर्भविष्यति ॥ ४० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये न्यंकुमतीमाहात्म्ये कुबेरनगरोत्पत्तिकुबेरस्थापितसोमनाथमाहात्म्यवर्णनंनाम नवत्युत्तरद्विशततमोऽध्यायः ॥२९०॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्मादुत्तरभागे तु स्थानात्कौबेरसंज्ञकात् ॥ भद्रकाली महादेवि वांछितार्थप्रदायिनी ॥ १ ॥ दक्षयज्ञस्य विध्वंसे वीरभद्रसमन्विता ॥ भद्रकाली महादेवी दक्षयज्ञविनाशिनी ॥ २ ॥ चैत्रे मासि तृतीयायां देवीं तां यस्तु पूजयेत् ॥ नवकोट्यस्तु चामुण्डा भविष्यंति सुपूजिताः ॥ सौभाग्यं विजयं चैव तस्य लक्ष्मीर्भविष्यति ॥ ३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये न्यंकुमतीमाहात्म्ये भद्रकालीमाहात्म्यवर्णनंनामैकनवत्युत्तरद्विशततमोऽध्यायः ॥ २९१ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्मादुत्तरभागे तु स्थानात्कौरवसंज्ञकात् ॥ भद्रकाली महादेवि तपः कृत्वा सुदुस्तरम् ॥ १ ॥ रविं संस्थापयामास भक्त्या परमया युता ॥ रविवारेण सप्तम्यां रक्तपुष्पानुलेपनैः ॥ २ ॥ यस्तं पूजयते भक्त्या कोटियज्ञफलं लभेत् ॥ मुच्यते वातपित्तोत्थै रोगैरन्यैश्च पुष्कलैः ॥ ३ ॥ अश्वस्तत्रैव दातव्यः सम्यग्यात्राफलेप्सुभिः ॥ ४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये न्यंकुमतीमाहात्म्ये भद्रकालीबालार्कमाहात्म्यवर्णनंनाम द्विनवत्युत्तरद्विशततमोऽध्यायः ॥ २९२ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्माद्वैश्रवणस्थानान्नैर्ऋत्यां वरवर्णिनि ॥ स्वयं स्थितः कुबेरस्तु सर्वदारिद्र्यनाशनः ॥ १ ॥ मकरादिनिधानैस्तु अष्टाभिः परिभूषितः ॥ पञ्चम्यां पूजयेद्भक्त्या गन्धपुष्पानुलेपनैः ॥ निधानप्राप्तिरतुला निर्विघ्ना तस्य जायते ॥ २ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये न्यंकुमतीमाहात्म्ये कुबेरस्थानोत्पत्तौ कुबेरमाहात्म्यवर्णनंनाम त्रिनवत्युत्तरद्विशततमोऽध्यायः ॥ २९३ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि कौबेरात्पूर्वसंस्थितम् ॥ गव्यूतिपंचके देवि पुष्करंनाम नामतः ॥ यत्र सिद्धो महादेवि कैवर्तो मत्स्यघातकः ॥ १ ॥ ॥ देव्युवाच ॥ ॥ सविस्तरं मम ब्रूहि कथं स सिद्धिमाप वै ॥ कथयस्व प्रसादेन देवदेव महेश्वर ॥ २ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ ईश्वर उवाच ॥ ॥ शृणु त्वं यत्पुरावृत्तं देवि स्वारोचिषेंतरे ॥ आसीत्कश्चिद्दुराचारः कैवर्तो मत्स्यघातकः ॥ ३ ॥ स कदाचिच्चर न्पापः पुष्करे तु जगाम वै ॥ ददर्श शांकरं वेश्म लतापादपसंकुलम् ॥ ४ ॥ स माघमासे शीतार्त्तः क्लिन्नजालसमन्वितः[1] ॥ प्रासाद मारुरोहार्त्तः सूर्यतापजिघृक्षया ॥ ५ ॥ ततः स क्लिन्नजालं तच्छोषणाय रवेः करैः ॥ प्रासादध्वजदंडाग्रे संप्रसारितवांस्तदा ॥ ६ ॥ ततः प्रासादतो देवि जाड्यात्संपतितः क्रमात् ॥ स मृतः सहसा देवि तस्मिन्क्षेत्रे शिवस्य च ॥ ७ ॥ जालं तस्य प्रभूतेन जीर्णं कालेन यत्तदा ॥ ध्वजा बद्धा यतो जालैः प्रासादे सा शुभेऽभवत् ॥ ८ ॥ ततोऽसौ ध्वजमाहात्म्याज्जातोऽवन्यां नराधिपः ॥ ऋतध्वजेति विख्यातः सौराष्ट्रविषये सुधीः ॥ स हि स्फूर्जद्ध्वजाग्रेण रथेन पर्यटन्महीम् ॥ ९ ॥ कामभोगाभिभूतात्मा राज्यं चक्रे प्रतापवान् ॥ ततोऽसौ भवने शंभोर्ददौ शोभासमन्विताम् ॥ ध्वजां शुभ्रां विचित्रां च नान्यत्किंचिदपि प्रभुः[2] ॥ १० ॥ ततो जातिस्मरो राजा प्रभासक्षेत्रमागतः ॥ ददर्श तत्रायतनं ध्वजाजालसमन्वितम् ॥ ११ ॥ अजोगन्धस्य देवस्य पूर्वमाराधितस्य च ॥ प्रासादं कारयामास शिवोपकरणानि च ॥ १२ ॥ नित्यं पूजयते भक्त्या तल्लिंगं पापनाशनम् ॥ दशवर्षसहस्राणि राज्यं चक्रे महामनाः ॥ १३ ॥ तल्लिंगस्य प्रभावेन ततः कालाद्दिवं गतः ॥ तस्मात्तत्र प्रयत्नेन गत्वा लिंगं प्रपूजयेत् ॥ १४ ॥ स्नात्वा पश्चिमतः कुण्डे पुष्करे पापतस्करे ॥ यत्र ब्रह्माऽयजत्पूर्वं यज्ञैर्विपुलदक्षिणैः ॥ १५ ॥ समाहूय च तीर्थानि पुष्करां[3]स्तत्र भामिनि ॥ तस्मिन्कुण्डे तु विन्यस्य अजो गन्धसमीपतः ॥ प्रतिष्ठाप्य महालिंगमजोगन्धेति नामतः ॥ १६ ॥ त्रिपुष्करे महादेवि कुण्डे पातकनाशने ॥ सौवर्णं कमलं तत्र दद्याद्ब्राह्मणपुंगवे ॥ १७ ॥ देवं संपूज्य विधिवद्गन्धपुष्पाक्षतादिभिः ॥ मुच्यते पातकैः सर्वैः सप्तजन्मार्ज्जितैरपि ॥ १८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये पुष्कर माहात्म्येऽजोगन्धेश्वरमाहात्म्यवर्णनंनाम चतुर्णवत्युत्तरद्विशततमोऽध्यायः ॥ २९४ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्मादीशान दिग्भागे इन्द्रस्थानमनुत्तमम् ॥ गव्यूतिपञ्चमात्रेण यत्र चन्द्रसरः प्रिये ॥ १ ॥ तस्मादुत्तरदिग्भागे नातिदूरे व्यवस्थितम् ॥ यत्र चन्द्रोदकं देवि जरादारिद्र्यनाशनम् ॥ २ ॥ चन्द्रानुवृद्ध्या तद्वृद्धिः क्षयस्तत्संक्षये भवेत् ॥ तस्मिन्पापयुगेऽप्येवं कदाचित्संप्रदृश्यते ॥ ३ ॥ तत्र स्नात्वा महादेवि यदि पापसहस्रकम् ॥ कृतं सोऽत्र समायाति नात्रं कार्या विचारणा ॥ ४ ॥ तत्राहिल्याप्रसंगोत्थमहापातकभीरुणा ॥ गौतमोद्भवशापेन विलक्ष्यी

१ क्लिन्नजालसमन्वितः--आर्द्रजालसहितः—इत्यर्थः । २ प्रभुः—समर्थः सन्नपि—इत्यर्थः । ३ पुष्करादीनि—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

कृतचेतसा ॥ ५ ॥ इन्द्रेण च पुरा देवि इष्टं विपुलदक्षिणैः ॥ तत्र वर्षसहस्राणि संस्थाप्य शिवमीश्वरम् ॥ इन्द्रेश्वरेति नाम्ना वै सर्वपातक नाशनम् ॥ ६ ॥ चन्द्रतीर्थे नरः स्नात्वा संतर्प्य पितृदेवताः ॥ इन्द्रेश्वरं च संपूज्य मुच्यते नात्र संशयः ॥ ७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये चन्द्रोदकतीर्थमाहात्म्य इन्द्रेश्वरमाहात्म्यवर्णनंनाम पञ्चनवत्युत्तर द्विशततमोऽध्यायः ॥ २९५ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्मादाग्नेयदिग्भागे गव्यूतिसप्तकेन च ॥ स्थानं देवकुलंनाम देवानां यत्र संगमः ॥ १ ॥ ऋषीणां यत्र सिद्धानां पुरा लिंगे निपातिते ॥ यस्माज्जातो महादेवि तस्माद्देवकुलं स्मृतम् ॥ २ ॥ तस्य पश्चिमदिग्भाग ऋषितोया महानदी ॥ ऋषीणां वल्लभा देवि सर्वपातकनाशिनी ॥ ३ ॥ तत्र स्नात्वा नरः सम्यक्पितॄणां निर्वपेन्नरः ॥ सप्तवर्षायुतान्येव पितॄणां तृप्तिमावहेत् ॥ ४ ॥ सुवर्णं तत्र देयं तु अजिनं कंबलं तथा ॥ आषाढे त्वमावास्यायां यत्किञ्चिद्दीयते ध्रुवम् ॥ ५ ॥ वर्द्धते षोडशगुणं याव दायाति पूर्णिमा ॥ ६ ॥ सुवर्णं तत्र देयं तु अजिनं कंबलं तथा ॥ मुच्यते पातकैः सर्वैः सप्तजन्मकृतैरपि ॥ ७ ॥ इति श्रीस्कान्दे महापुराण एका शीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्य ऋषितोयानदीमाहात्म्यवर्णनंनाम षण्णवत्युत्तरद्विशततमोऽध्यायः ॥२९६॥ ॥ ॥ देव्युवाच ॥ ॥ देवदेव जगन्नाथ संसारार्णवतारक ॥ सविस्तरं तु मे ब्रूहि ऋषितोयामहोदयम् ॥ १ ॥ ऋषितोयेति तन्नाम कथं ख्यातं धरातले ॥ कथं सा पुनरायाता देवदारुवने शुभे ॥ २ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि सावधाना वचो मम ॥ माहात्म्यमृषितो यायाः सर्वपातकनाशनम् ॥ ३ ॥ देवदारुवने पुण्य ऋषयस्तपसा युताः ॥ निवसंति वरारोहे शतशोथ सहस्रशः ॥ ४ ॥ तेषां निवसतां तत्र बहुकालो गतः प्रिये ॥ पुत्रपौत्रैः प्रवृद्धास्ते दारुकं व्याप्य संस्थिताः ॥ ५ ॥ ते सर्वे चिंतयामासुः समेत्य च परस्परम् ॥ सरस्वती महापुण्या शिरस्याधाय वाडवम् ॥ ६ ॥ प्रभासं चिरकालेन क्षेत्रं चैव गमिष्यति ॥ वापीकूपतडागादि मुक्त्वा सागरगामिनीम् ॥ ७ ॥ नाह्लादं कुरुते चेतः स्नानदानजपेषु च ॥ ब्रह्माणं प्रार्थयिष्यामो गत्वा ब्रह्मनिकेतनम् ॥ ८ ॥ ॥ ईश्वर उवाच ॥ ॥ एवं निमन्त्र्य ते सर्वे ऋषयस्तपसोज्ज्वलाः ॥ गतास्ते ब्रह्मलोकं तु द्रष्टुं देवं पितामहम् ॥ तुष्टुवुर्विविधैः स्तोत्रैर्ब्रह्माणं कमलोद्भवम् ॥ ९ ॥ ॥ ऋषय ऊचुः ॥ ॥ नमः प्रणवरूपाय विश्व कर्त्रे नमोनमः ॥ तथा विश्वस्य रक्षित्रे नमोऽस्तु परमात्मने ॥ १० ॥ तथा तस्यैव संहर्त्रे नमो ब्रह्मस्वरूपिणे ॥ पितामह नमस्तुभ्यं सुरज्येष्ठ

१ पितॄणां च तृप्तिर्भवेत्—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमोऽस्तु ते ॥ ११ ॥ चतुर्वक्र नमस्तुभ्यं पद्मयोने नमोऽस्तु ते ॥ विरंचये नमस्तुभ्यं विधये वेधसे नमः ॥ १२ ॥ चिदानन्द[१]नमस्तुभ्यं हिरण्य
गर्भ ते नमः ॥ हंसवाहन ते नित्यं पद्मासन नमोऽस्तु ते ॥ १३ ॥ एवं संस्तुवतां तेषामृषीणामूर्ध्वरेतसाम् ॥ उवाच परमप्रीतो ब्रह्मा लोक
पितामहः ॥ १४ ॥ स्वागतं वै द्विजश्रेष्ठा युष्माकं कृतवानहम् ॥ स्तोत्रेणानेन दिव्येन वृणुध्वं वरमुत्तमम् ॥ १५ ॥ ॥ ऋषय ऊचुः ॥ ॥
अभिषेकाय नो देव नदी पापप्रणाशिनी ॥ विलोक्यंते सुरश्रेष्ठ देहि नो वरमुत्तमम् ॥ १६ ॥ ॥ ईश्वर उवाच ॥ ॥ इत्युक्तस्तैस्तदा ब्रह्मा
मुनिभिस्तपसोज्वलैः ॥ वीक्षांचक्रे तदा सर्वा मूर्तिमत्यश्च निम्नगाः ॥ १७ ॥ गङ्गा च यमुना चैव तथा देवी सरस्वती ॥ चन्द्रभागा च रेवा च
शरयूर्गंडकी[२] तथा ॥ १८ ॥ तापी चैव वरारोहे तथा गोदावरी नदी ॥ कावेरी चन्द्रपुत्री च शिप्रा चर्मण्वती तथा ॥ १९ ॥ सिन्धुश्च वेदिका
चैव नदाः सर्वे वरानने ॥ मूर्तिमत्यः स्थिताः सर्वाः पवित्राः पापनाशिनीः ॥ २० ॥ दृष्ट्वा पितामहः सर्वा गत्वरा धरणीं प्रति ॥ देवदारुवने रम्ये
प्रभासे क्षेत्र उत्तमे ॥ कमण्डलौ कृता दृष्टिर्विविशुस्ताः कमण्डलुम् ॥ २१ ॥ ॥ ब्रह्मोवाच ॥ ॥ धृताः सर्वा महापुण्या नद्यो ब्रह्मकमण्डलौ ॥
प्रविष्टाः पृथिवीं यांतु ऋषीणामनुकम्पया ॥ २२ ॥ प्रहिणोमि यद्येकां च ह्यन्या रुष्यंति मे द्विजाः ॥ तस्मात्सर्वाः प्रमोक्ष्यामि कमण्डलुकृता
लयाः ॥ २३ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो ब्रह्मा मुमोचाऽथ तत्रस्थाश्च महापगाः ॥ मुक्त्वा ब्रह्मा मुनीन्सर्वान्प्रोवाचेदं पुनःपुनः ॥ २४ ॥
ऋषिभिः प्रार्थ्यमानेन नद्यो मुक्ता मया यतः ॥ तोयरूपा महावेगा अभिषेकाय सत्वराः ॥ २५ ॥ ऋषितोयेति नाम्ना सा भविष्यति धरातले ॥
ऋषीणां वल्लभा देवी सर्वपातकनाशिनी ॥ २६ ॥ ॥ ईश्वर उवाच ॥ ॥ एवं देवि समायाता देवदारुवने नदी ॥ ऋषितोयेति विख्याता पवित्रा
च वरानने ॥ २७ ॥ तूर्यदुंदुभिनिर्घोषैर्वेदमङ्गलनिःस्वनैः ॥ समुद्रं प्रापिता देवी ऋषिभिर्वेदपारगैः ॥ २८ ॥ सर्वत्र सुलभा देवी त्रिषु स्थानेषु
दुर्लभा ॥ महोदये महातीर्थे मूलचंडीशसन्निधौ ॥ २९ ॥ समुद्रेण समेता तु यत्र सा पूर्ववाहिनी ॥ यत्रर्षितोया लभ्येत तत्र किं मृग्यते परम् ॥ ३० ॥
मनुष्यास्ते सदा धन्यास्तत्तोयं तु पिबंति ये ॥ अस्थीनि यत्र लीयंते षण्मासाभ्यन्तरेण तु ॥ ३१ ॥ प्रातःकाले वहेद्गंगा सायं च यमुना तथा
॥ ३२ ॥ नदीसहस्रसंयुक्ता मध्याह्ने तु सरस्वती ॥ अपराह्णे वहेद्रेवा सायाह्ने सूर्यपुत्रिका ॥ ३३ ॥ एवं जानन्नरो यस्तु तत्र स्नानं विचक्ष
णः ॥ आचरेद्विधिना श्राद्धं स तस्याः फलभाग्भवेत् ॥ ३४ ॥ एवं संक्षेपतः प्रोक्तमृषितोयामहोदयम् ॥ सर्वपापहरं नृणां सर्वकामफल

१ अस्माभिः—इति शेषः । २ गण्डकी तथा—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



प्रदम् ॥ ३५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्य ऋषितोयामाहात्म्यवर्णनंनाम
सप्तनवत्युत्तरद्विशततमोऽध्यायः ॥ २९७ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ऋषितोयापश्चिमे तु तत्र गव्यूतिमात्रतः ॥ संगालेश्वरनामास्ति सर्वपात
कनाशनः ॥ १ ॥ गुप्तस्तत्र प्रयागश्च देवो वै माधवस्तथा ॥ जाह्नवी यमुना चैव देवी तत्र सरस्वती ॥ २ ॥ अन्यानि तत्र तीर्थानि बहूनि च वरा
नने ॥ स्नात्वा दृष्ट्वा पूजयित्वा मुक्तः स्यात्सर्वकिल्बिषैः ॥ ३ ॥ ॥ पार्वत्युवाच ॥ ॥ कथय त्वं महेशान सर्वदेवनमस्कृत ॥ तीर्थराजः प्रयागस्तु
कथं विष्णुः सनातनः ॥ ४ ॥ कथं गंगा च यमुना तथा देवी सरस्वती ॥ अन्यान्यपि बहून्येव तीर्थानि वृषभध्वज ॥ ५ ॥ समायातानि तत्रैव
संगालेश्वरसंनिधौ ॥ संगालेशेति किं नाम ह्येतन्मे वद कौतुकम् ॥ ६ ॥ ॥ ईश्वर उवाच ॥ ॥ पुरा वै लिंगपतने सर्वदेवसमागमे ॥ सार्धत्रितयको
टीनि पुण्यानि सुरसुन्दरि ॥ ७ ॥ तीर्थानि तीर्थराजोऽयं प्रयागः समुपस्थितः ॥ आत्मानं गोपयामास तीर्थकोटिभिरावृतम् ॥ ८ ॥ ततस्तत्र
समायाता ब्रह्मविष्णुपुरोगमाः ॥ विबुधास्तीर्थराजं तं ददृशुर्दिव्यचक्षुषा ॥ ९ ॥ तीर्थकोटिभिराकीर्णं पवित्रं पापनाशनम् ॥ लिंगस्य पतनं श्रुत्वा
महादुःखेन संवृताः ॥ १० ॥ स्थिताः सर्वे तदा देवि ब्रह्माद्याः सुरसत्तमाः ॥ ११ ॥ एतस्मिन्नेव काले तु देवो रुद्रः सनातनः ॥ निरानंदः समा
यातो वाक्यमेतदुवाच ह ॥ १२ ॥ शृणुध्वं वचनं देवा ब्रह्मविष्णुपुरोगमाः ॥ ऋषिशापान्निपतितं मम लिंगमनुत्तमम् ॥ तस्माल्लिंगं पूजयत सर्व
कामार्थसिद्धये ॥ १३ ॥ एवमुक्त्वा महादेवो देशे तस्मिन्स्थितः प्रिये ॥ ब्राह्मं च वैष्णवं रौद्रं तत्र कुण्डत्रयं स्मृतम् ॥ १४ ॥ चतुर्थं त्रिसंगमाख्यं
नदीनां यत्र संगमः ॥ गंगायाश्च सरस्वत्याः सूर्यपुत्र्यास्तथैव च ॥ १५ ॥ कोटिरेका च तीर्थानां ब्रह्मकुण्डे व्यवस्थिता ॥ तथा च वैष्णवे कुण्डे
कोटिरेका प्रकीर्तिता ॥ १६ ॥ सार्धकोटिस्तु संप्रोक्ता शिवकुण्डे प्रकीर्तिता ॥ पश्चिमे ब्रह्मकुण्डं च पूर्वे वै वैष्णवं स्मृतम् ॥ १७ ॥ मध्यभागे
स्थितं यच्च रुद्रकुण्डं प्रकीर्तितम् ॥ कुण्डमध्याद्विनिर्गत्य यत्र गंगा वरानने ॥ १८ ॥ सूर्यपुत्र्या समेता च तत्त्रिसंगम उच्यते ॥ अनयोरंतरे सूक्ष्मे
तत्र गुप्ता सरस्वती ॥ १९ ॥ एषु सन्निहितो नित्यं प्रयागस्तीर्थनायकः ॥ अत्रागत्य नरो यस्तु माघमासे वरानने ॥ २० ॥ स्नायात्प्रभातसमये
मकरस्थे रवौ प्रिये ॥ किञ्चिदभ्युदिते सूर्ये शृणु तस्य च यत्फलम् ॥ २१ ॥ आद्येनैकेन स्नानेन पापं यन्मनसा कृतम् ॥ व्यपोहति नरः सम्य ॥१७२॥
कछ्रद्धायुक्तो जितेन्द्रियः ॥ २२ ॥ वाचिकं तु द्वितीयेन कायिकं तु तृतीयकात् ॥ संसर्गजं चतुर्थेन रहस्यं पञ्चमेन तु ॥ २३ ॥ उपपातकानि षष्ठेन
स्नानेनैव व्यपोहति ॥ २४ ॥ अभिषेकेण कुण्डानां सप्तकृत्वो वरानने ॥ महांति चैव पापानि क्षाल्यंते पुरुषैः सदा ॥२५॥ यः स्नाति सकलं मासं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रयागे गुप्तसंज्ञके ॥ ब्रह्मादिभिर्न तद्वक्तुं शक्यते कल्पकोटिभिः ॥ २६ ॥ यानि कानि च तीर्थानि प्रभासे संति भामिनि ॥ तेभ्योऽतिवल्लभं तीर्थं सर्वपापप्रणाशनम् ॥ २७ ॥ एषां संरक्षणार्थाय मया[1] वै तत्र मातरः ॥ पूजनीयाः प्रयत्नेन नैवेद्यैर्विविधैः शुभैः ॥ २८ ॥ कृष्णपक्षे चतुर्दश्यां श्रद्धायुक्तेन चेतसा ॥ तासामनुचरा देवि भूतप्रेताश्च कोटिशः ॥ २९ ॥ तेषां भयविनाशाय ता मातॄश्च प्रपूजयेत् ॥ अस्मिंस्तीर्थे नरः स्नात्वा ब्रह्महत्यां व्यपोहति ॥३०॥ यः कश्चित्कुरुते श्राद्धं पितॄनुद्दिश्य भक्तितः ॥ उद्धरेच्च पितुर्वर्गं मातुर्वर्गं नरोत्तमः ॥३१॥ वृषभस्तत्र दातव्यः सम्यग्यात्राफलेप्सुभिः ॥ एवं यः कुरुते यात्रां तस्य फलमनन्तकम् ॥ ३२ ॥ एवं गुप्तप्रयागस्य माहात्म्यं कथितं तव ॥ श्रुत्वाभिनन्द्य पुरुषः प्राप्नुयाच्छंकरालयम् ॥ ३३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये गुप्तप्रयागमाहात्म्यवर्णनंनामाष्टनवत्युत्तरद्विशततमोऽध्यायः ॥ २९८ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्यैव दक्षिणे भागे नातिदूरे व्यवस्थितम् ॥ शंखचक्रगदाधारी माधवस्तत्र संस्थितः ॥ १ ॥ एकादश्यां सिते पक्षे सोपवासो जितेन्द्रियः ॥ यस्तं पूजयते भक्त्या गंधपुष्पानुलेपनैः ॥ स याति परमं स्थानमपुनर्भवदायकम् ॥ २ ॥ अत्र गाथा पुरा गीता ब्रह्मणा लोककर्तृणा[2] ॥ विष्णुकुण्डे नरः स्नात्वा यो वै माधवमर्चयेत् ॥ स यास्यति परं स्थानं यत्र देवो हरिः स्वयम् ॥ ३ ॥ एतत्ते सर्वमाख्यातं माहात्म्यं विष्णुदैवतम् ॥ सर्वकामप्रदं नृणां सर्वपातकनाशनम् ॥ ४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये माधवमाहात्म्यवर्णनंनाम नवनवत्युत्तरद्विशततमोऽध्यायः ॥ २९९ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्यैवोत्तरदिग्भागे किञ्चिद्वायव्यसंस्थितम् ॥ संगालेश्वरनामास्ति सर्वपातकनाशनम् ॥ १ ॥ तत्र ब्रह्मा च विष्णुश्च लिंगस्याराधनोद्यतौ ॥ शक्रश्चैव महातेजा लिंगं पूजितवान्प्रिये ॥ २ ॥ वरुणो धनदश्चैव धर्मराजोऽथ पावकः ॥ आदित्यैर्वसुभिश्चैव लोकपालैः समंततः ॥ ३ ॥ आराधितं महालिंगं संगालेश्वरनामभृत् ॥ पूजयित्वा तु ते सर्वे दृष्ट्वा माहात्म्यमुत्तमम् ॥ ४ ॥ ऊचुश्च सहसा देवि परमानंदसंयुताः ॥ देवानां निवहैर्यस्मात्समागत्य प्रतिष्ठितम् ॥ संगालेश्वरनामास्य भविष्यति धरातले ॥ ५ ॥ संगालेश्वरनामानं पूजयिष्यंति मानवाः ॥ न तेषामन्वये कश्चिन्निर्धनः संभविष्यति ॥ ६ ॥ गोसहस्रस्य दत्तस्य कुरुक्षेत्रे च यत्फलम् ॥ तत्फलं समवाप्नोति संगालेश्वरदर्शनात् ॥ ७ ॥ अमावास्यां च संप्राप्य स्नानं कृत्वा विधानतः ॥

१ मया-सह-इत्यर्थः । २ आर्षम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



यः करोति नरः श्राद्धं पितॄणां रोषवर्जितः ॥ पितरस्तस्य तृप्यंति यावदाभूतसंप्लवम् ॥ ८ ॥ अर्धक्रोशं च तत्क्षेत्रं समंतात्परिमण्डलम् ॥
सर्वकामप्रदं नृणां सर्वपातकनाशनम् ॥ ९ ॥ अस्मिन्क्षेत्रे महादेवि जीवा उत्तममध्यमाः ॥ कालेन निधनं प्राप्तास्तेऽपि यांति परां गतिम् ॥१०॥
गृहीत्वानशनं ये तु प्राणांस्त्यक्ष्यंति मानवाः ॥ निश्चयं ते महादेवि लीयंते परमेश्वरे ॥११॥ गवा हता द्विजहता ये च वै दंष्ट्रिभिर्हताः॥ आत्मनो
घातका ये तु सर्पदष्टाश्च ये मृताः ॥ १२ ॥ शय्यायां विगतप्राणा ये च शौचविवर्जिताः ॥ अस्मिंस्तीर्थे महापुण्ये अपुनर्भवदायके ॥ १३ ॥ दत्तैः
षोडशभिः श्राद्धैर्वृषोत्सर्गे कृते पुनः ॥ विधिवद्भोजितैर्विप्रैर्भवेन्मुक्तिर्न संशयः ॥ १४ ॥ एवमुक्त्वा सुराः सर्वे गतवंतस्त्रिविष्टपम् ॥ १५ ॥ संगाले
श्वरमाहात्म्यं संक्षेपात्कथितं तव ॥ श्रुतं हरति पापानि दुःखशोकांस्तथैव च ॥ १६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां
सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये संगालेश्वरमाहात्म्यवर्णनंनाम त्रिशततमोऽध्यायः ॥ ३०० ॥ ॥छ॥ ॥ ईश्वर उवाच ॥ ॥ ततो
गच्छेन्महादेवि सिद्धेश्वरमनुत्तमम् ॥ तस्यैव पूर्वदिग्भागे नातिदूरे व्यवस्थितम् ॥ १ ॥ यदा देवैः समेत्याशु शिवलिंगं प्रतिष्ठितम् ॥ संगालेश्वर
नामाढ्यं सर्वपापहरं शुभम् ॥ २ ॥ तदा सिद्धगणाः सर्वे समाराध्य वृषध्वजम् ॥ स्थापयांचक्रिरे लिंगं सर्वसिद्धिप्रदायकम् ॥ ३ ॥ तत्सिद्धेश्वर
नामाढ्यं महापातकनाशनम् ॥ तुष्टुवुर्विविधैः स्तोत्रैस्तदा सिद्धगणाः शिवम् ॥ ४ ॥ ततस्तुष्टो महादेवो याच्यतां वरमुत्तमम् ॥ नमस्कृत्य ततः
सर्वे प्रोचुश्च शशिशेखरम् ॥ ५ ॥ इहागत्य नरो यस्तु स्नात्वा च विधिपूर्वकम् ॥ अर्चयेत्सिद्धनाथं च जपेच्च शतरुद्रियम् ॥ ६ ॥ अघोरं वा जपे
न्मन्त्रं गायत्र्यं च महेश्वरम्[2] ॥ षण्मासाभ्यन्तरेणैव जपेच्च मुनिसत्तमाः ॥ अणिमादिगुणैश्वर्यं संसिद्धिं प्राप्नुयाद्ध्रुवम् ॥ ७ ॥ ॥ ईश्वर उवाच ॥ ॥
एवं भविष्यतीत्युक्त्वा ह्यंतर्धानं गतो हरः ॥ सिद्धेश्वरं तु संपूज्य ह्यघोरं च जपेन्नरः ॥ ८ ॥ आश्वयुक्कृष्णपक्षे तु चतुर्दश्यां महानिशि ॥ धैर्यमा
लंब्य निर्भीकः स सिद्धिं प्राप्नुयान्नरः ॥ ९ ॥ इत्येतत्कथितं देवि माहात्म्यं पापनाशनम् ॥ सिद्धेश्वरस्य देवस्य सर्वकामफलप्रदम् ॥ १० ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये सिद्धेश्वरमाहात्म्यवर्णनंनामैकोत्तरत्रिशत
तमोऽध्यायः ॥ ३०१ ॥ ॥छ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि गंधर्वेश्वरमुत्तमम् ॥ तस्यैवोत्तरदिग्भागे धनुषां पंचके स्थितम् ॥१॥

१ तेषाम्–इति शेषः । २ महेश्वरम्--त्र्यम्बकमन्त्रम्--इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तं दृष्ट्वा च महादेवि रूपवाञ्जायते नरः ॥ गंधर्वैः स्थापितं लिंगं स्नात्वा संपूजयेत्सकृत् ॥ सर्वान्कामानवाप्नोति रक्तकण्ठश्च जायते ॥ २ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये गंधर्वेश्वरमाहात्म्यवर्णनंनाम द्व्युत्तरत्रिशत
तमोऽध्यायः ॥ ३०२ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि उत्तरे देवमुत्तमम् ॥ यस्तमाराधयेद्देवं महापातकनाशनम् ॥
॥ १ ॥ तस्यैव पश्चिमे भागे धनुषां त्रितये स्थितम् ॥ शेषादिप्रमुखैर्नागैर्महता तपसा युतैः ॥ समाराध्य महादेवं स्थापितं लिंगमुत्तमम् ॥ २ ॥
यस्तमाराधयेद्देवं सर्पैराराधितं पुरा ॥ न विषं क्रमते देहे तस्य जन्मावधि प्रिये ॥ ३ ॥ सर्पास्तस्य प्रसीदन्ति न कुर्वंति[1] कदाचन ॥ तस्मात्सर्व
प्रयत्नेन तल्लिंगं पूजयेन्नरः ॥ ४ ॥ तत्र लिंगान्यनेकानि ऋषिभिः स्थापितानि तु ॥ गंगातीरे महापुण्ये पश्चिमे वरवर्णिनि ॥ ५ ॥ तानि दृष्ट्वा
पूजयित्वा सर्वपापैः प्रमुच्यते ॥ अश्वमेधसहस्रस्य फलं प्राप्नोति मानवः ॥ ६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे
प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये संगालेश्वरमाहात्म्य उत्तरेश्वरमाहात्म्यवर्णनंनाम त्र्युत्तरत्रिशततमोऽध्यायः ॥ ३०३ ॥ ॥ छ ॥ ॥ ईश्वर
उवाच ॥ ॥ ततो गच्छेन्महादेवि गंगां त्रिपथगामिनीम् ॥ संगालेशादथैशान्यां धनुषां सप्तके स्थिताम् ॥ १ ॥ तस्यां त्रिनेत्रा मत्स्याः स्युर्नित्य
मांभसिकाः प्रिये ॥ कलौ युगेऽपि दृश्यंते सत्यंसत्यं मयोदितम् ॥ २ ॥ तस्यां स्नात्वा महादेवि मुच्यते पञ्चपातकैः ॥ ३ ॥ ॥ सूत उवाच ॥ ॥
तस्य तद्वचनं श्रुत्वा विस्मिता गिरिजा सती ॥ उवाच तं द्विजश्रेष्ठाः प्रचलच्चंद्रशेखरम् ॥४॥ ॥ पार्वत्युवाच ॥ ॥ कथं तत्र समायाता गंगा त्रिप
थगामिनी ॥ कथं त्रिनेत्राः संजाता मत्स्या आंभसिकाः शिव ॥ ५ ॥ एतद्विस्तरतो ब्रूहि यद्यहं ते प्रिया विभो ॥ ६ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु
देवि प्रवक्ष्यामि यदि पृच्छसि मां शुभे ॥ आस्तिकाः श्रद्दधानाश्च भवंतीति मतिर्मम ॥ ७ ॥ यदा शप्तो महादेवो ह्यज्ञानतिमिरावृतैः ॥ ऋषिभिः
कोपयुक्तैश्च कस्मिंश्चित्कारणांतरे ॥ ८ ॥ तदा ते मुनयः सर्वे शप्तं ज्ञात्वा महेश्वरम् ॥ निरानंदं जगत्सर्वं दृष्ट्वा चात्मानमेव च ॥ ९ ॥
आराध्य परमेशानं दधतं गजरूपकम् ॥ उन्नतं स्थानमानीय सानंदं चक्रिरे द्विजाः ॥ १० ॥ ततः प्रभृति सर्वे ते शिवद्रोहकरं परम् ॥
आत्मानं मेनिरे नित्यं प्रसन्नेऽपि महेश्वरे ॥ ११ ॥ महोदयान्महातीर्थं सर्वं आगतय सत्वरम् ॥ तपस्तेपुर्महाघोरं संगालेश्वरस
न्निधौ ॥ १२ ॥ संगालेश्वरनामानं सर्वे पूज्य यथाविधि ॥ भृगुरत्रिस्तथा मंकिः कश्यपः कण्व एव च ॥ १३ ॥ गौतमः कौशि

१ कुर्वंति--दशन्ति--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





कश्चैव कुशिकश्च महातपाः ॥ शूकरोऽथ भरद्वाजो भार्गविश्च महातपाः ॥ १४ ॥ जातूकर्ण्यो वसिष्ठश्च सावर्णिश्च पराशरः ॥ शांडिल्यश्च
पुलस्त्यश्च वत्सश्चैव महातपाः ॥ १५ ॥ एते चान्ये च बहवो ह्यसंख्याता महर्षयः ॥ १६ ॥ संगालेश्वरमासाद्य प्रभासे पापनाशने ॥ तपः
कुर्वंति सततं प्रतिष्ठाप्य महेश्वरम् ॥ १७ ॥ ततः कालेन महता ते सर्वे मुनिपुंगवाः ॥ ध्यानात्त्रिलोचनस्यैव अदृष्टे तु महेश्वरे ॥ १८ ॥ त्रिनेत्रत्व
मनुप्राप्तास्तपोनिष्ठास्तपोधनाः ॥ परस्परं वीक्षमाणास्त्रिनेत्रस्याभिशंकया ॥ १९ ॥ स्तुवंति विविधैः स्तोत्रैर्मन्यमाना महेश्वरम् ॥ ज्ञात्वा ध्यानेन
देवस्य त्रिनेत्रत्वमुपागताः ॥ २० ॥ चक्रुरुग्रं तपस्ते तु पूजां देवस्य शूलिनः ॥ तेषु वै तप्यमानेषु कृपाविष्टो महेश्वरः ॥ २१ ॥ उवाच तान्मुनी
न्सर्वाञ्छृणुध्वं वरमुत्तमम् ॥ प्रसन्नोऽहं मुनिश्रेष्ठास्तपसा पूजयापि च ॥ २२ ॥ ॥ ऋषय ऊचुः ॥ ॥ यदि प्रसन्नो देवेश वरं नो दातुमर्हसि ॥
गंगामानय वेगेन ह्यभिषेकाय नो हर ॥ २३ ॥ तस्यां कृताभिषेकास्तु तव द्रोहकरा वयम् ॥ अज्ञानभावात्पूतत्वं यास्यामः पृथिवीतले ॥ २४ ॥
॥ ॥ ईश्वर उवाच ॥ ॥ यूयं पवित्रकरणाः पावनानां च पावनाः ॥ गंगां चैवानयिष्यामि युष्माकं चित्ततुष्टये ॥ २५ ॥ पावित्र्याद्भवतां
जातं त्रैनेत्र्यं मुनिसत्तमाः ॥ एवमुक्त्वा ततः शंभुर्ध्यानस्तिमितलोचनः ॥ सस्मार क्षणमात्रेण गंगां मीनकुलावृताम् ॥ २६ ॥ स्मृतमात्रा तदा देवी
गंगा त्रिपथगामिनी ॥ भित्वा भूमितलं प्राप्ता तत्र मीनकुलावृता ॥ २७ ॥ ऋषिभिश्च यदा दृष्टा गंगा मीनयुता शुभा ॥ दृष्टमात्रास्तु ते मत्स्या
स्त्रिनेत्रत्वमुपागताः ॥ २८ ॥ ॥ ईश्वर उवाच ॥ ॥ युष्माकं दर्शनाद्विप्रास्त्रिनेत्रत्वमुपागताः ॥ एतन्निदर्शनं सर्वलोकानां च प्रदर्शनम् ॥ २९ ॥
॥ ॥ ऋषय ऊचुः ॥ ॥ अस्मिन्कुंडे महादेव मत्स्यानां संततिः सदा ॥ त्रिनेत्रा त्वत्प्रसादेन भूयात्सर्वा युगेयुगे ॥ ३० ॥ अस्मिन्कुंडे समा
गत्य नरः स्नानं करोति यः ॥ ददाति हेम विप्राय गाश्च वस्त्रं तथा तिलान् ॥ ३१ ॥ अमावास्यां विशेषेण त्रिनेत्रः स प्रजायताम् ॥ एवं भविष्य
तीत्युक्त्वा ह्यन्तर्धानं गतो हरः ॥ ३२ ॥ ब्राह्मणास्तुष्टिसंयुक्ता गताः सर्वे महोदयम् ॥ ३३ ॥ एतत्ते कथितं देवि गंगामाहात्म्यमुत्तमम् ॥ श्रुतं
पापप्रशमनं सर्वकामफलप्रदम् ॥ ३४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये
संगालेश्वरसमीपवर्तिगंगामाहात्म्यवर्णनंनाम चतुरुत्तरत्रिशततमोऽध्यायः ॥ ३०४ ॥ ७ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि तस्याः पूर्वेण
संस्थितम् ॥ नारदादित्यनामानं जरादारिद्र्यनाशनम् ॥ १ ॥ पश्चिमे मूलचंडीशाद्धनुषां च शतत्रये ॥ आराध्य नारदो देवि भास्करं वारितस्क
रम् ॥ जरानिर्मुक्तदेहस्तु तत्क्षणात्समपद्यत ॥ २ ॥ ॥ देव्युवाच ॥ ॥ कथं जरामनुप्राप्तो नारदो मुनिपुंगवः ॥ कथमाराधितः सूर्य एतन्मे



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वद शंकर ॥ ३ ॥ ॥ ईश्वर उवाच ॥ ॥ यदा द्वारवतीं प्राप्तो नारदो मुनिपुंगवः ॥ सर्वे दृष्टास्तदा तेन विष्णोः पुत्रा महाबलाः ॥ ४ ॥ तद्वाजकुलमध्ये तु क्रीडमानाः परस्परम् ॥ आयांतं नारदं दृष्ट्वा सर्वे विनयसंयुताः ॥ ५ ॥ नमश्चक्रुर्यथान्यायं विना सांबं त्वरान्विताः ॥ अविनीतं तु तं दृष्ट्वा कथयामास नारदः ॥ ६ ॥ शरीरमदमत्तोऽसि यस्मात्सांब हरेः सुत ॥ अचिरेणैव कालेन शापं प्राप्स्यसि दारुणम् ॥ ७ ॥ ॥ सांब उवाच ॥ ॥ नमस्कारेण किं कार्यमृषीणां च जितात्मनाम् ॥ आशीर्वादेन तेषां च तपोहानिः प्रजायते ॥ ८ ॥ मुनीनां यः स्वभावो हि त्वयि लेशो न नारद ॥ विद्यते ब्रह्मणः पुत्र उच्यते किमतः परम् ॥ ९ ॥ न कलत्रं न ते पुत्रा न च पौत्रप्रपौत्रकाः ॥ न गृहं नैव च द्वारं न हि गावो न वत्सकाः ॥ १० ॥ ब्रह्मणो मानसः पुत्रो ब्रह्मचर्ये व्यवस्थितः ॥ अयुक्तं कुरुते नित्यं कस्मात्प्रकृतिरीदृशी ॥ ११ ॥ युद्धं विना न ते सौख्यं सौख्यं न कलहं विना ॥ यादृशस्तादृशो वापि वाग्वादोऽपि सदा प्रियः ॥ १२ ॥ स्नानं संध्या जपो होमस्तर्पणं पितृदेवयोः ॥ नारदः कुरुते चान्यदन्यत्कुर्वंति ब्राह्मणाः ॥ १३ ॥ कौमारेण तु गर्विष्ठो यस्मान्मां शापयिष्यसि ॥ तस्मात्त्वमपि विप्रर्षे जरायुक्तो भविष्यसि ॥ १४ ॥ एवं शप्तस्तदा देवि नारदो मुनिपुंगवः ॥ एकान्ते निर्मले स्थाने कंटकास्थिविवर्जिते ॥ १५ ॥ कृष्णाजिनपरिच्छिन्ने ह्युपविष्टो वरासने ॥ ऋषितोयातटे रम्ये प्रतिष्ठाप्य महामुनिः ॥ १६ ॥ सूर्यस्य प्रतिमां रम्यां सर्वदारिद्र्यनाशिनीम् ॥ तुष्टाव विविधैः स्तोत्रैरादित्यं तिमिरापहम् ॥ १७ ॥ नमस्त ऋक्स्वरूपाय साम्नां धामग ते नमः ॥ ज्ञानैकरूपदेहाय निर्धूततमसे नमः ॥ १८ ॥ शुद्धज्योतिःस्वरूपाय निर्मूर्तायामलात्मने ॥ वरिष्ठाय वरेण्याय सर्वस्मै परमात्मने ॥ १९ ॥ नमोऽखिलजगद्व्यापिस्वरूपानंदमूर्तये ॥ सर्वकारणभूताय निष्ठायै ज्ञानचेतसाम् ॥ २० ॥ नमः सर्वस्वरूपाय प्रकाशालक्ष्यरूपिणे ॥ भास्कराय नमस्तुभ्यं तथा दिनकृते नमः ॥ २१ ॥ ॥ ईश्वर उवाच ॥ ॥ एवं संस्तुवतस्तस्य पुरतस्तस्य चेतसा ॥ प्रादुर्बभूव देवेशि जगच्चक्षुः सनातनः ॥ उवाच परमं प्रीतो नारदं मुनिपुंगवम् ॥ २२ ॥ ॥ सूर्य उवाच ॥ ॥ वरं वरय विप्रर्षे यस्ते मनसि वर्तते ॥ तुष्टोऽहं तव दास्यामि यद्यपि स्यात्सुदुर्लभम् ॥ २३ ॥ ॥ नारद उवाच ॥ ॥ कुमारवयसा युक्तो जरायुक्तकलेवरः ॥ प्रसादात्स्यां हि ते देव यदि तुष्टो दिवाकर ॥ २४ ॥ सप्तम्यां रविवारेण यस्त्वां पश्यति मानवः ॥ तस्य रोगभयं माऽस्तु प्रसादात्तिमिरापह ॥ २५ ॥ ॥ ईश्वर उवाच ॥ ॥ एवं भविष्यतीत्युक्त्वा ह्यन्तर्धानं गतो रविः ॥ इत्येतत्कथितं देवि



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





माहात्म्यं सकलं तव ॥ नारदादित्यदेवस्य सर्वपातकनाशनम् ॥ २६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभास
खण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये नारदादित्यमाहात्म्यवर्णनंनाम पञ्चोत्तरत्रिशततमोऽध्यायः ॥ ३०५ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो
गच्छेन्महादेवि सांबादित्यमनुत्तमम् ॥ तस्मादुत्तरभागे तु सर्वपातकनाशनम् ॥ १ ॥ यत्र सांबस्तपस्तप्त्वा ह्याराध्य च दिवाकरम् ॥ प्राप्तवा
न्सुन्दरं देहं सहस्रांशुप्रसादतः ॥ २ ॥ यदा रोषेण संशप्तः पित्रा जांबवतीसुतः ॥ आराधयामास तदा विष्णुं कमललोचनम् ॥ ३ ॥ अनुग्रहार्थं
शापस्य सांबो जांबवतीसुतः ॥ प्रसन्नवदनो भूत्वा विष्णुः प्रोवाच तं प्रति ॥ ४ ॥ गच्छ प्राभासिके क्षेत्रे ब्रह्मभागमनुत्तमम् ॥ ऋषितोयातटे रम्ये
ब्राह्मणैरुपशोभिते ॥ ५ ॥ तत्राऽहं सूर्यरूपेण वरं दास्यामि पुत्रक ॥ इत्युक्तः स तदा सांबो विष्णुना प्रभविष्णुना ॥ ६ ॥ गतः प्राभासिके क्षेत्रे रम्ये
शिवपुरे शिवे ॥ तत्राराध्य परं देवं भास्करं वारितस्करम् ॥ ७ ॥ प्रसादयामास तदा स्तुत्वा स्तोत्रैरनेकधा ॥ ८ ॥ प्रत्युवाच रविः सांबं प्रसन्नस्ते
स्तवेन वै ॥ शीघ्रं गच्छ नरश्रेष्ठ ऋषितोयातटे शुभे ॥ ९ ॥ इत्युक्तः स तदाऽऽगत्य ऋषितोयातटं शुभम् ॥ नारदो यत्र ब्रह्मर्षिस्तपस्तप्यति चैव
हि ॥ १० ॥ तत्र गत्वा हरेः सूनुरुन्नतस्थानवासिनः ॥ आसन्ये ब्राह्मणास्तान्स इदं वचनमब्रवीत् ॥ ११ ॥ ॥ सांब उवाच ॥ ॥ एष वै
ब्रह्मणो भागः प्रभासे क्षेत्र उत्तमे ॥ अत्र वै ब्राह्मणा ये तु ते वै श्रेष्ठाः स्मृता भुवि ॥ १२ ॥ भवतां वचनाद्विप्राः सूर्यमाराधयाम्यहम् ॥ मम वै
पूर्वमादिष्टं स्थानमेतच्च विष्णुना ॥ १३ ॥ ॥ विप्रा ऊचुः ॥ ॥ सिद्धिस्ते भविता सांब आराधय दिवाकरम् ॥ इत्युक्तः स तदा विप्रैः प्रवि
ष्टोऽथ प्रभाकरम् ॥ १४ ॥ नित्यमाराधयामास सांबो जांबवतीसुतः ॥ तपोनिष्ठं च तं दृष्ट्वा विष्णुः कारुणिको महान् ॥ १५ ॥ इदं वै चिन्त
यामास पुत्रवात्सल्यसंयुतः ॥ यथैश्वर्यप्रदो रुद्रो यथा विष्णुश्च मुक्तिदः ॥ १६ ॥ यज्ञैरिष्टो हि देवेन्द्रो यथा स्वर्गप्रदः स्मृतः ॥ शुद्धिकर्तृ यथा
तोयं मृत्तिकाभस्मसंयुतम् ॥ दहनात्मा यथा वह्निर्विघ्नहर्त्ता गणेश्वरः ॥ १७ ॥ स्वच्छंदभारतीदाने यथा ब्रह्मसुता नृणाम् ॥ तथाऽऽरोग्यप्रदाता च
नान्यो देवो दिवाकरात् ॥ १८ ॥ अनेकधाऽऽराधितोऽपि स देवो भास्करः शुचिः ॥ न ददाति वरं यत्तु तन्मे शापस्य कारणात् ॥ १९ ॥ 
एवं संचिन्त्य भगवान्विष्णुः कमललोचनः ॥ सूर्यरूपं समाश्रित्य तस्य तुष्टो जनार्दनः ॥ २० ॥ योऽपरनारायणाख्यस्तस्यैव सन्निधौ
स्थितः ॥ प्रत्यक्षः स ततो विष्णुः सूर्यरूपी दिवाकरः ॥ उवाच परमप्रीतो वरदः पुण्यकर्मणाम् ॥ २१ ॥ अलं क्लेशेन ते सांब किमर्थं तप्यसे
तपः ॥ प्रसन्नोऽहं हरेः सूनो वरं वरय सुव्रत ॥ २२ ॥ ॥ सांब उवाच ॥ ॥ निर्मलस्त्वत्प्रसादेन कुष्ठमुक्तकलेवरः ॥ भवानि[1] देवदेवेश प्रत्य

१ भवानि--प्रार्थनायां लोट् उत्तमपुरुषैकवचनम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षाऽम्बरभूषण ॥ अस्मिन्स्थाने स्थितो रम्ये नित्यं सन्निहितो भव ॥ २३ ॥ ॥ सूर्य उवाच ॥ ॥ अधुना निर्मलो देहस्तव सांब भविष्यति ॥ इहागत्य नरो यस्तु सप्तम्यां रविवासरे ॥ उपवासपरो भूत्वा रात्रौ जागरणे स्थितः ॥ २४ ॥ अष्टादशानि कुष्ठानि पापरोगास्तथैव च ॥ कदाचिन्न भविष्यन्ति कुले तस्य महात्मनः ॥ २५ ॥ कृत्वा स्नानं नरो यस्तु भक्तियुक्तो जितेन्द्रियः ॥ पूजयेद्रविवारेण सांबादित्यं महाप्रभम् ॥ स रोगहीनो धनवान्पुत्रवाञ्जायते नरः ॥ २६ ॥ तस्यैव पूर्वदिग्भागे किञ्चिदीशानमाश्रितम् ॥ कुंडं पापहरं पुण्यं स्वच्छोदपरिपूरितम् ॥ २७ ॥ तत्र स्नात्वा च विधिवत्कुर्याच्छ्राद्धं विचक्षणः ॥ भोजयेद्ब्राह्मणान्यस्तु सांबादित्यं प्रपूजयेत् ॥ २८ ॥ सर्वकामसमृद्धात्मा सूर्यलोके महीयते ॥ २९॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये सांबादित्यमाहात्म्यवर्णनंनाम षडुत्तरद्विशततमोध्यायः ॥ ३०६ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ सांबादित्याच्च पूर्वेण किञ्चिदाग्नेयसंस्थितः ॥ अपरनारायणोनाम यस्मान्नास्ति परो भुवि ॥ १ ॥ स तु सांबस्य देवेशि सूर्यो विष्णुस्वरूपवान् ॥ अपरां मूर्तिमास्थाय विष्णुरूपो वरं ददौ ॥ २ ॥ तेनापरेति नाम्ना वै ख्यातो विष्णुः पुराऽभवत् ॥ फाल्गुनामलपक्षे तु एकादश्यां विधानतः ॥ ३ ॥ पूजयेत्पुण्डरीकाक्षं तत्र सूर्यस्वरूपिणम्[1] ॥ मुक्तो भवति पापेभ्यः सर्वकामैः समृध्यते ॥ ४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्येऽपरनारायणमाहात्म्यवर्णनंनाम सप्तोत्तरत्रिशततमोऽध्यायः ॥ ३०७ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्मान्नारायणात्पूर्वे किंचिदीशानसंस्थितम् ॥ मूलचण्डीशनाम्ना तु विख्यातं भुवनत्रये ॥ १ ॥ यत्र लिंगं पुराऽस्माकं पातितं त्वृषिभिः प्रिये ॥ क्रोधरक्तेक्षणैर्देवि मूलचण्डीशत गतम् ॥ २ ॥ आद्यं लिंगोद्भवं देवि ऋषिकोपान्निपातितम् ॥ ये केचिदृषयस्तत्र देवदारुवने स्थिताः ॥ ३ ॥ कालांतरे महादेवि अहं तत्र समागतः ॥ तेषां जिज्ञासया देवि ततस्ते रोषिता भवन्[2] ॥ शप्तस्ततोऽहं देवेशि चक्रुर्मे लिंगपातनम् ॥ ४ ॥ ॥ ॥ देव्युवाच ॥ ॥ रोषोपहतसद्भावाः कथमेते द्विजातयः ॥ संजाता एतदाख्याहि परं कौतूहलं मम ॥ ५ ॥ ॥ ईश्वर उवाच ॥ ॥ डिंडि[3]रूपः पुरा देवि भूत्वाऽहं दारुके वने ॥ ऋषीणामाश्रमे पुण्ये नग्नो भिक्षाचरोऽभवम् ॥ भिक्षंतमाश्रमे दृष्ट्वा ताः सर्वा ऋषियोषितः ॥ ६ ॥ कामस्य वशमापन्नाः प्रियमुत्सृज्य सर्वतः ॥ तमूर्ध्वलिंगमालोक्य जटामुकुटधारिणम् ॥ ७ ॥ भिक्षंतं भस्मदिग्धांगं झ[4]षकेतुमिवापरम् ॥ विक्षोभिताश्च नः

---

१ विष्णुस्वरूपिणम्---इ० पा० । २ भवन्—अभवन्—अडभावः—सन्धिर्वाऽऽर्षः । ३ झिंडिरूपः—इ०, झिंटिरूपः—इ० च पा० । ४ झषकेतुमिव—कामदेवमिव—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

सर्वे दारा एतेन डिंडिना ॥ ८ ॥ तस्माच्छापं च दास्याम ऋषयस्ते तदाऽब्रुवन् ॥ ततः शापोदकं गृह्य संध्यात्वाऽथ तपोधनाः ॥ ९ ॥ अस्य लिंगमधो यातु दृश्यते यत्सदोन्नतम् ॥ इत्युक्ते पतितं लिंगं तत्र देवकुले मम ॥ १० ॥ मूलचण्डीशनाम्ना तु विख्यातं भुवनत्रये ॥ तल्लिंगं पतितं दृष्ट्वा कोपोपहतचेतसः ॥ पुनर्हंतुं समारब्धा डिंडिनं ते तपोधनाः ॥ ११ ॥ वृसिकापाणयः केचित्कमंडलुधराः परे ॥ गृहीत्वा पादुकाश्चान्ये तस्य धावंति पृष्ठतः ॥ १२ ॥ डिंडिश्चांतर्हितो भूत्वा त्वामुवाच सुमध्यमाम् ॥ रोषोपहतचेतस्कान्पश्यैतांस्त्वं तपोधनान् ॥ १३ ॥ एतस्मात्कारणाद्देवि तव वाक्यान्मयाऽनघे ॥ न कृतोऽनुग्रहस्तेषां सरोषाणां तपस्विनाम् ॥ १४ ॥ अत्रांतरे ते मुनयो ह्यपश्यंतो हि डिंडिनम्[1] ॥ निरानंदं गताः सर्वे द्रष्टुं देवं पितामहम् ॥ १५ ॥ तं दृष्ट्वा विबुधेशानं विरिंचिं विगतज्वरम् ॥ प्रणम्य शिरसा सर्वे ऋषयः प्राहुरंजसा ॥ १६ ॥ भगवन्डिंडिरूपेण कश्चिदस्ति तपोधनः ॥ विध्वंसनाय दाराणां प्रविष्टः किल भिक्षितुम् ॥ १७ ॥ शप्तोऽस्माभिस्तु दुर्वृत्तस्तस्य लिंगं निपातितम् ॥ तस्मिन्निपतितेऽस्माकं तथैव पतितानि च ॥ १८ ॥ गतोऽसौ कारणात्तस्मात्तल्लिंगे पतिते वयम् ॥ निरानंदाः स्थिताः सर्व आचक्ष्वैतद्धि कारणम् ॥१९॥ ॥ ॥ ब्रह्मोवाच ॥ ॥ अशोभनमिदं कार्यं युष्माभिर्यत्कृतं महत् ॥ रुद्रस्यातिसुरूपस्य सेर्ष्या ये हन्तुमुद्यताः ॥२०॥ आसुरीं दानवीं दैवीं यक्षिणीं किंनरीं तथा ॥ विद्याधरीं च गन्धर्वीं नागकन्यां मनोरमाम् ॥ एता वरस्त्रियस्त्यक्त्वा युष्मदीयासु तास्वपि ॥ २१ ॥ आह्लादं कुरुते सर्वे नैव जानीत भो द्विजाः ॥ त्रैलोक्यनायकां सर्वां रूपातिशयसंयुताम् ॥ २२ ॥ तां त्यक्त्वा मुनिपत्नीनामाह्लादं कुरुते कथम् ॥ तया रुद्रो हि विज्ञप्त ऋषीणां कुर्वन्नुग्रहम् ॥ २३ ॥ तेन वाक्येन पार्वत्या जिज्ञासार्थं कृतं मनः ॥ चतुर्दशविधस्यापि भूतग्रामस्य यः प्रभुः ॥ २४ ॥ स शप्तो डिंडिरूपस्तु भवद्भिः करणेश्वरः[2] ॥ तच्छापाच्छप्तमेवैतत्समस्तं तद्गुणास्पदम्[3] ॥ देवतिर्यङ्मनुष्याणां निरानंदमिति स्थितम् ॥ २५ ॥ शापेनानेन भवतां महादोषः प्रजायते ॥ आराध्यं नान्यथा लिंगमुन्नतिं यात्यधोगतम् ॥ २६ ॥ एवमुक्तेऽथ देवेन विप्रा ऊचुः पितामहम् ॥ द्रष्टव्यः कुत्र सोऽस्माभिः कथयस्व यथास्थितम् ॥ २७ ॥ ॥ ब्रह्मोवाच ॥ ॥ आस्ते गजस्वरूपेण कुबेराश्रमसंस्थितः ॥ तत्र गत्वा तमासाद्य तोषयध्वं पिनाकिनम् ॥ ॥ २८ ॥ एतच्छ्रुत्वा वचस्तस्य सर्वे ते हृष्टमानसाः ॥ गंतुं प्रवृत्ताः सहसा कोटिसंख्यास्तपोधनाः ॥ २९ ॥ चिंतयंतः शुभं देशं द्रष्टुं तं गजरूपिणम् ॥ रुद्रं पितामहाख्यातं कुबेराश्रमवासिनम् ॥ ३० ॥ क्षुत्क्षामकंठांस्तृषितान्गौरी मत्वा तपोधनान् ॥ आदाय गोरसं तेषां कारुण्यात्सा पुरः 

१ डिंडिनम्–इ०, दंडिनम्–इ०, च पा० । २ करणेश्वरः--इंद्रियस्वामी–हृषीकेश्वरः---इत्यर्थः । करुणेश्वरः–इ० पा० । ३ जगत्स्वरूपेण--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थिता ॥ ३१ ॥ असितां कुटिलां स्निग्धामायतां भुजगीमिव ॥ वेणीं शिरसि बिभ्राणा गौरी गोरससंयुता ॥ ३२ ॥ सा तानाह मुनीन्सर्वान्यन्म या पर्वताद्धृतम् ॥ कपित्थफलसंगंधं गोरसं त्वमृतोपमम् ॥३३॥ तयैवमुक्ता विप्रास्तु आहुस्तां विपुलेक्षणाम् ॥ स्नात्वा च सर्वे पास्यामो गोरसं तु त्वयाहृतम् ॥ ३४ ॥ ततः श्रुत्वा तथा देव्या स्नानार्थं तीर्थमुत्तमम् ॥ ततोदकेन संपूर्णं कृतं कुण्डं मनोरमम् ॥ ३५ ॥ तत्र ते संप्लुताः सर्वे विमुक्ता विपुलाच्छ्रमात् ॥ कृतांऽऽह्ना[1] गोरसस्यैव पानार्थं समुपस्थिताः[3] ॥३६॥ पत्रैर्दिवाकरतरो[2]र्विधाय पुटकाञ्छुभान् ॥ उपविश्य क्रमात्सर्वे ते पिबंति स्म गोरसम ॥ ३७ ॥ गोरसेन तदा तेषाममृतेनेव पूरितान् ॥ बुभुक्षितानां पुटकान्मुनीनां तृप्तिकारणात् ॥३८॥ पुनः पूरयते गौरी पीत्वा ते तृप्तिमागताः ॥ क्षुत्तृषाश्रमनिर्मुक्ताः पुनर्जाता इव स्थिताः ॥३९॥ स्वस्थचित्तैस्ततो ज्ञात्वा नेयं गोपालिसंज्ञिका ॥ अनुग्रहार्थमस्माकं गौरीयं समुपागता ॥४०॥ प्रणम्य शिरसा सर्वे तामूचुस्ते सुमध्यमाम् ॥ उमे कथय कुत्रस्थं द्रक्ष्यामोरुद्रमेकदा ॥ ४१ ॥ तथोक्तास्ते महात्मानस्तं पश्यत महागजम् ॥ गजतां च समासाद्य संचरंतं महाबलम् ॥ ४२ ॥ भवद्भिर्निजभक्त्यायं संग्राह्यो हि यथासुखम् ॥ ते तद्वचनमासाद्य समेत्यैकत्र च द्विजाः ॥ ॥ ४३ ॥ पवित्रास्तं गजं द्रष्टुं भावितेनांतरात्मना ॥ यत्रैकत्र स्थिता विप्रास्तत्र तीर्थं महोदयम् ॥ संगमेश्वरसंज्ञं तु पूर्वं सर्वत्र विश्रुतम् ॥ ४४ ॥ ततस्तस्मात्प्रवृत्तास्ते द्रष्टुकामा महागजम् ॥ कुंडिकाः संपरित्यज्य संनह्यात्मानमात्मना ॥४५॥ यत्र ताः कुंडिकास्त्यक्तास्तत्तीर्थं कुण्डिकाह्वयम् ॥ सर्वपापहरं पुंसां दृष्टाऽदृष्टफलप्रदम् ॥ ४६ ॥ कुबेरस्याश्रमं प्राप्य ततस्ते मुनिसत्तमाः[5] ॥ नालिकेरवनीसंस्थं ददृशुस्तं द्विपं तदा ॥ ४७ ॥ करे ग्रहीतुमारब्धाः स्वकरैर्हृष्टमानसाः ॥ गजस्तान्करसंलग्नान्विचिक्षेप तपोधनान् ॥ ४८ ॥ कांश्चिदंगसमालग्नान्समंताद्भयवर्जितान् ॥ एवं स तैः पुनः सर्वैर्मशकैरिव चेष्टितम् ॥ ४९ ॥ क्रीडां करोति विविधां वनसंस्थो हरद्विपः ॥ तद्रूपं संपरित्यज्य रुद्रो रौद्रगजात्मकम् ॥ ५० ॥ पुनरन्यच्चकारासौ डिंडिरूपं मनोरमम् ॥ जयशब्दप्रघोषेण वेदमङ्गलगीतकैः ॥ ५१ ॥ उन्नामितं पुनस्तेन यत्र लिंगं महोदयम् ॥ तदुन्नतमिति प्रोक्तं स्थानं स्थानवतां वरम् ॥ ५२ ॥ गजरूपधरस्तत्र स्थितः स्थाने महाबलः ॥ गणनाथस्वरूपेण ह्युन्नतो जगति स्थितः ॥ ५३ ॥ डिंडिरूपधरो भूत्वा रुद्रः प्राह तपोधनान् ॥ यन्मया भवतां कार्यं कर्तव्यं तदिहोच्यताम् ॥ ५४ ॥ एवमुक्तस्तु तैरुक्तः सर्वज्ञानक्रियापरैः ॥ सानन्दाः प्राणिनः संतु त्वत्प्रसादात्पुरा यथा ॥ ५५ ॥ क्षंतव्यं देवदेवेश कृतं यन्मूढमानसैः ॥ त्वत्प्रसादात्सुरेशान तत्त्वं सानुग्रहो भव ॥ ५६ ॥ एव

१ कृताह्नाः—कृतसंध्यातर्पणाद्याह्निककर्माणः—इत्यर्थः । २ दिवाकरतरोः—अर्कवृक्षस्य—इत्यर्थः । ३ समुपस्थिता—इ० पा० । ४ सांनिकायम्—इ० पा० । ५ मुनिपुंगवाः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



मस्त्विति तेनोक्तास्ते सर्वे विगतज्वराः ॥ तल्लिंगानुकृतिं लिंगमीजिरे मुनयस्तथा ॥ चक्रुस्ते मुनयः सर्वे स्तुतिं विगतमत्सराः ॥ ५७ ॥
क्षमस्व देवदेवेश कुर्वस्माकमनुग्रहम् ॥ अस्मिँल्लिंगे लयं गच्छ मूलचण्डीशसंज्ञके ॥ त्रिकालं देवदेवेश ग्राह्या ह्यत्र कला त्वया ॥ ५८ ॥
॥ ॥ ईश्वर उवाच ॥ ॥ चण्डी तु प्रोच्यते देवी तस्या ईशस्त्वहं स्मृतः ॥ तस्य मूलं स्मृतं लिंगं तदत्र पतितं यतः ॥ ५९ ॥ तस्मात्तन्मूल
चण्डीश इति ख्यातिं गमिष्यति ॥ वापीकूपतडागानां शतैस्तु विपुलैरपि ॥ ६० ॥ कृतैर्यज्जायते पुण्यं तत्पुण्यं लिंगदर्शनात् ॥ ब्रह्माण्डं सकलं
दत्त्वा यत्पुण्यफलमाप्नुयात् ॥ ६१ ॥ तत्पुण्यं लभते देवि मूलचण्डीशदर्शनात् ॥ तत्र दानानि देयानि षोडशैव नरोत्तमैः ॥ ६२ ॥ एवं तद्व
विता सर्वं यन्मयोक्तं द्विजोत्तमाः ॥ यात दारुवनं विप्राः सर्वे यूयं तपोधनाः ॥ मया सर्वे समादिष्टा यात दारुवनं द्विजाः ॥ ६३ ॥ ततस्तु संप्राप्य
महद्वचो मम सर्वे प्रहृष्टा मुनयो महोदयम् ॥ गत्वा च तद्दारुवनं महेश्वरि पुनश्च चेरुः सुतपस्तपोधनाः ॥ ६४ ॥ एतस्मात्कारणाद्देवि मूलचण्डी
शसंज्ञितम् ॥ लिंगं पापहरं नृणामर्द्धचन्द्रेण भूषितम् ॥ ६५ ॥ दोहनी दुग्धदानेन मुनीनां तृषितात्मनाम् ॥ श्रमापहारं यद्देवि त्वया कृत
मनुत्तमम् ॥ तत्तप्तोदकनाम्ना वा अभूत्कुण्डं धरातले ॥ ६६ ॥ ऋषितोयाजले स्नात्वा चण्डीशं यः प्रपूजयेत् ॥ स प्रचण्डो भवेद्भूमौ भुवना
नामधीश्वरः ॥ ६७ ॥ एतत्संक्षेपतो देवि माहात्म्यं कीर्तितं तव ॥ मूलचण्डीशदेवस्य श्रुतं पातकनाशनम् ॥ ६८ ॥ इति श्रीस्कांदे महापुराण
एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये तप्तोदककुण्डोत्पत्तौ मूलचण्डीशोत्पत्तिमाहात्म्यवर्णनंनामाष्टोत्तर
त्रिशततमोऽध्यायः ॥ ३०८ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि विनायकमनुत्तमम् ॥ चतुर्मुखेति विख्यातं चण्डी
शादुत्तरे स्थितम् ॥ १ ॥ किञ्चिदीशानदिग्भागे धनुषां च चतुष्टये ॥ तं प्रयत्नाच्च संपूज्य सर्वविघ्नैः प्रमुच्यते ॥ २ ॥ गन्धपुष्पा
दिभिस्तत्र भक्ष्यैर्भोज्यैः समोदकैः ॥ चतुर्मुखं चतुर्थ्यां तु संपूज्य सिद्धिभाग्भवेत् ॥ ३ ॥ इति श्रीस्कांदे महपुराण एकाशीति
साहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये चतुर्मुखविनायक माहात्म्यवर्णनंनाम नवोत्तरत्रिशततमोऽध्यायः ॥ ॥१७७॥
॥ ३०९ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्माद्वायव्यदिग्भागे धनुषां द्वितये स्थितम् ॥ कलंबेश्वरनामानं सर्वपातकनाशनम् ॥
॥ १ ॥ तं दृष्ट्वा पूजयित्वा च मुक्तः स्यात्सर्वकिल्बिषैः ॥ सोमवारे त्वमावास्या तत्रैव बहुपुण्यदा ॥ विप्राणां भोजनं देयं तत्र पुण्य

१ वरानने—इ० पा० । २ गच्छेत्—इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलेप्सुभिः ॥ २ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये कलंबेश्वरमाहात्म्य वर्णननाम दशोत्तरत्रिशततमोऽध्यायः ॥ ३१० ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि गोपालस्वामिनं हरिम् ॥ चण्डीशात्पूर्वदिग्भागे धनुषां विंशतौ स्थितम् ॥ १ ॥ सर्वपापोपशमनं दारिद्र्यौघविनाशनम् ॥ तं दृष्ट्वा पूजयित्वा च माघे मासि विशेषतः ॥ पूजाजागरणं कृत्वा तत्र गच्छेत्परं पदम् ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये गोपाल स्वामिहरिमाहात्म्यवर्णननामैकादशोत्तरत्रिशततमोऽध्यायः ॥ ३११ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्मादुत्तरदिग्भागे धनुषामष्टभिः प्रिये ॥ बकुलस्वामिनं सूर्यं तं पश्येद्दुःखनाशनम् ॥ १ ॥ रविवारेण सप्तम्यां कुर्याज्जागरणं नरः ॥ सर्वान्कामानवाप्नोति सूर्यलोके महीयते ॥ ॥ २ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये बकुलस्वामिमाहात्म्यवर्णननाम द्वादशोत्तरत्रिशततमोऽध्यायः ॥ ३१२ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्माद्वायव्यदिग्भागे धनुःषोडशभिः स्थितः ॥ उत्तरार्कश्च नाम्ना वै सद्यः प्रत्ययकारकः ॥ मुच्यते सर्वरोगैस्तु कृत्वा वै निंबसप्तमीम् ॥ १ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्य उत्तरार्कमाहात्म्यवर्णननाम त्रयोदशोत्तरत्रिशततमोऽध्यायः ॥ ३१३ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ अथ देवकुलाग्नेय्यां गव्यूत्या तत्र संस्थितम् ॥ समुद्रस्य तटे रम्यमृषितीर्थमनुत्तमम् ॥ १ ॥ पाषाणाकृतयस्तत्र ऋषयोऽद्यापि संस्थिताः ॥ दृश्यंते मानुषे देवि सर्वपातकनाशनाः ॥ २ ॥ तत्र ज्येष्ठे त्वमावास्यां प्राप्यते नाधमैर्नरैः ॥ पिंडदानं विशेषेण स्नानं श्रद्धासमन्वितैः ॥ ३ ॥ ऋषितोयासंगमे तु स्नानं श्राद्धं सुदुर्लभम् ॥ गोप्रदानं प्रशंसंति तत्र ते मुनिपुंगवाः ॥ भोजनं ब्राह्मणानां तु यथाशक्त्या प्रदापयेत् ॥४॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये मूलचंडीशमाहात्म्य ऋषितीर्थसंगममाहात्म्यवर्णननाम चतुर्दशोत्तरत्रिशततमोऽध्यायः ॥ ३१४ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि मरुदार्यां महाप्रभाम् ॥ तस्मात्पश्चिमदिग्भागे क्रोशार्द्धेन व्यवस्थिताम् ॥ १ ॥ मरुद्भिः पूजितां देवीं सर्वकामफलप्रदाम् ॥ महानवम्यां यत्नेन सप्तम्यां पूजयेन्नरः ॥ गंधपुष्पादिविधिना सर्वकाम

१ निम्बपत्रकैः–इ०, निम्नपत्रकैः–इ० च पा० । २ अश्वदानं प्रशंसंति–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





प्रसिद्धये ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये मरुदार्यादेवीमाहात्म्य वर्णनंनाम पंचदशोत्तरत्रिशततमोऽध्यायः ॥ ३१५ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ अथ देवकुलात्पूर्वे पंचगव्यूतिमात्रतः ॥ शंबरस्थान मध्ये तु क्षेमादित्येतिविश्रुतः ॥ १ ॥ तं दृष्ट्वा मानवो देवि भवेत्क्षेमार्थसिद्धिभाक् ॥ सप्तम्यां रविवारेण पूजितः सर्वकामदः ॥ २ ॥ इति देवकुलस्थाने कथिता तीर्थसंस्थितिः ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्र माहात्म्ये क्षेमादित्यमाहात्म्यवर्णनंनाम षोडशोत्तरत्रिशततमोऽध्यायः ॥ ३१६ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि देवीं कंटकशोषिणीम् ॥ उत्तरेण देवकुलाद्दक्षिणेनोन्नतात्स्थितात् ॥ १ ॥ तस्योत्पत्तिं प्रवक्ष्यामि शृणु ह्येकमनाः प्रिये ॥ उन्नताद्द क्षिणे भागे यजंते द्विजसत्तमाः ॥ २ ॥ भृगुरत्रिर्मरीचिश्च भरद्वाजोऽथ कश्यपः ॥ कण्वो मंकिश्च सावर्णिर्जातूकर्ण्यस्तथैव च ॥ ३ ॥ वत्सश्चैव वसिष्ठश्च पुलस्त्यः पुलहः क्रतुः ॥ मनुर्यमोंऽगिरा विष्णुः शातातपपराशरौ ॥ ४ ॥ शांडिल्यः कौशिकश्चैव गौतमो गार्ग्य एव च ॥ दाल्भ्यश्च शौनकश्चैव शाकल्यो गालवस्तथा ॥ ५ ॥ जाबालिर्मुद्गलश्चैव ऋष्यशृंगो विभांडकः ॥ विश्वामित्रः शतानंदो जह्नुर्विश्वावसुस्तथा ॥ ६ ॥ एते चान्ये च मुनयो यजंते विविधैर्मखैः ॥ यज्ञवाटं च निर्माय ऋषितोयातटे शुभे ॥ ७ ॥ देवगन्धर्वनृत्यैश्च वेणुवीणानिनादितम् ॥ वेदध्वनि तघोषेण यज्ञहोमाग्निहोत्रजैः ॥ ८ ॥ धूपैः समावृतं सर्वमाज्यगंधिभिरर्चितम् ॥ शोभितं मुनिभिर्दिव्यैश्चातुर्वेद्यैर्द्विजोत्तमैः ॥ ९ ॥ एवंविधं प्रदेशं तु दृष्ट्वा दैत्या महाबलाः ॥ समुद्रमध्यादायाता यज्ञविध्वंसहेतवे ॥ १० ॥ मायाविनो महाकायाः श्यामवर्णा महोदराः ॥ लंबभ्रूश्मश्रुनासाग्रा रक्ताक्षा रक्तमूर्धजाः ॥ ११ ॥ यज्ञं समागताः सर्वे दैत्याश्चैव वरानने ॥ तान्दृष्ट्वा मुनयः सर्वे रौद्ररूपान्भयंकरान् ॥ १२ ॥ केचिन्निपतिता भूमौ तथान्ये ऽग्नौ स्रुचीकराः ॥ पत्नीशालां समाविष्टा हविर्धानं तथा परे ॥ १३ ॥ ऋत्विजस्तु सदोमध्ये स्थिता वाचंयमास्तथा ॥ १४ ॥ एवं देवि यदा वृत्तं मुनीनां च महात्मनाम् ॥ तदाध्वर्युर्महातेजा धैर्यमालम्ब्य सादरः ॥ १५ ॥ अग्निहोत्रं हविष्यं च हविर्विन्यस्य मन्त्रवित् ॥ सुसमिद्धं जुहा वाग्निं रक्षसां नाशहेतवे ॥ १६ ॥ हुते हविषि देवेशि तत्क्षणादेव चोत्थिता ॥ शक्तिः शक्तित्रिशूलाढ्या चर्महस्ता महोज्वला ॥ १७ ॥ तया ते निहता दैत्या यज्ञविध्वंसकारिणः ॥ ततस्तां विविधैः स्तोत्रैर्मुनयस्तुष्टुवुस्तदा ॥ १८ ॥ प्रसन्ना भूयसी देवी तानृषीन्प्रत्युवाच ह ॥ वरं वृणुध्वं मुनयो दास्यामि वरमुत्तमम् ॥ १९ ॥ ॥ ऋषय ऊचुः ॥ ॥ कृतं वै सकलं कार्यं यज्ञा नो रक्षितास्त्वया ॥ यदि देयो वरोऽस्माकं त्वया



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चासुरमर्दिनि ॥ २० ॥ अस्मिन्स्थाने सदा तिष्ठ मुनीनां हितकाम्यया ॥ कंटकाः शोषिता दैत्यास्तेन कंटकशोषिणी ॥ अद्यप्रभृति नामास्तु तेन देवि सदा त्विह ॥ २१ ॥ ॥ ईश्वर उवाच ॥ ॥ एवं भविष्यतीत्युक्त्वा सा देव्यन्तर्हिता तदा ॥ अष्टम्यां वा नवम्यां वा पूजयिष्यति मानवः ॥ २२ ॥ राक्षसेभ्यः पिशाचेभ्यो भयं तस्य न जायते ॥ प्राप्नुयात्परमां सिद्धिं मानवो नात्र संशयः ॥ २३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये कंटकशोषणीमाहात्म्यवर्णनंनाम सप्तदशोत्तरत्रिशततमोऽध्यायः ॥३१७॥ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्याश्च पूर्वदिग्भागे नातिदूरे व्यवस्थितम् ॥ लिंगं महाप्रभावं हि सर्वपातकनाशनम् ॥ १ ॥ ब्रह्मेश्वरेति नामाढ्यं ब्राह्मणैश्च प्रतिष्ठितम् ॥ ऋषितोयाजले स्नात्वा तल्लिंगं यः प्रपूजयेत् ॥ स भवेद्वेदविद्विप्रो जाड्यभावविवर्जितः ॥ २ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये ब्रह्मेश्वरमाहात्म्यवर्णनंनामाष्टादशोत्तरत्रिशततमोऽध्यायः ॥ ३१८ ॥ ॥छ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि ह्युन्नतस्थानमुत्तमम् ॥ तस्यैवोत्तरदिग्भाग ऋषितोयातटे शुभे ॥ १ ॥ एतत्स्थानं महादेवि विप्रेभ्यः प्राददां बलात् ॥ सर्वसीमासमायुक्तं चंडीगणसुरक्षितम् ॥ २ ॥ ॥ देव्युवाच ॥ ॥ कथमुन्नतनामास्य बभूव सुरसत्तम ॥ कथं त्वया बलाद्दत्तं कियत्सीमासमन्वितम् ॥ ३ ॥ एतत्सर्वं ममाचक्ष्व संक्षेपान्नातिविस्तरात् ॥ ४ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि कथां पापप्रणाशिनीम् ॥ यां श्रुत्वा मानवो देवि मुच्यते सर्वपातकैः ॥ ५ ॥ एतत्सर्वं पुरा प्रोक्तं स्थानसंकेतकारणम् ॥ तृतीये ब्रह्मणः कुंडे सृष्टिसंक्षेपसूचके ॥ ६ ॥ तथापि ते प्रवक्ष्यामि संक्षेपाच्छृणु पार्वति ॥ ७ ॥ उन्नामितं पुनस्तत्र यत्र लिंगं महोदये ॥ तदुन्नतमिति प्रोक्तं स्थानं स्थानवतां वरम् ॥ ८ ॥ अथवा चोन्नतं द्वारं पूर्वं प्राभासिकस्य वै ॥ तदुन्नतमिति प्रोक्तं स्थानं स्थानवतां वरम् ॥ ९ ॥ विद्यया तपसा चैव यत्रोत्कृष्टा महर्षयः ॥ तदुन्नतमिति प्रोक्तं स्थानं स्थानवतां वरम् ॥ १० ॥ यदा देवकुले विप्रा मूलचंडीशसंज्ञकम् ॥ प्रसाद्य च महादेवं पुनः प्राप्ता महोदयम् ॥ ११ ॥ षष्टिवर्षसहस्राणि तपस्तेपुर्महर्षयः ॥ ध्यायमाना महेशानमनादिनिधनं परम् ॥ १२ ॥ तेषु वै तप्यमानेषु कोटिसंख्येषु पार्वति ॥ ऋषितोयातटे रम्ये पवित्रे पापनाशने ॥ भिक्षुर्भूत्वा गतश्चाहं पुनस्तत्रैव भामिनि ॥ १३ ॥ त्रिकालदर्शिभिस्तत्र दोषरागविवर्जितैः ॥ तपस्विभिस्तदा सर्वैर्लक्षितोऽहं वरानने ॥ १४ ॥ दृष्टमात्रस्तदा विप्रैर्विरराम महेश्वरः ॥ क यासि विदितो देव इत्युक्त्वानुययुर्द्विजाः ॥ १५ ॥ यावदायांति मुनय ईशेशेति प्रभाषकाः ॥ धावमानाः स्वतपसा द्योतयन्तो दिशो दश ॥ १६ ॥ लिंगमेव प्रप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





श्यंति न पश्यंति महेश्वरम् ॥ १७ ॥ येये च ददृशुर्लिंगं मूलचण्डीशसंज्ञकम् ॥ तदा च मुनयः सर्वे सदेहाः स्वर्गमाययुः ॥ १८ ॥ यदा त्रिविष्टपं व्याप्तं दृष्टं वै शतयज्वना ॥ आयांति च तथैवान्ये मुनयस्तपसोज्ज्वलाः ॥ १९ ॥ एतदंतरमासाद्य समागत्य महीतले ॥ लिंगमाच्छादयामास वज्रेणैव शतक्रतुः ॥ २० ॥ अष्टादशसहस्राणि मुनीनामूर्ध्वरेतसाम् ॥ स्थितानि न तु पश्यंति लिंगमेतदनुत्तमम् ॥ २१ ॥ शक्रस्तु सहसा दृष्टो वज्रेणैव समन्वितः ॥ यावद्ददंति शापं ते तावन्नष्टः पुरंदरः ॥ २२ ॥ दृष्ट्वा तान्कोपसंयुक्तान्भगवांस्त्रिपुरांतकः ॥ उवाच सांत्वयन्देवो वाचा मधुरया मुनीन् ॥ २३ ॥ कथं खिन्ना द्विजश्रेष्ठाः सदा शांतिपरायणाः ॥ प्रसन्नवदना भूत्वा श्रूयतां वचनं मम ॥ २४ ॥ भवद्भिर्ज्ञानसंयुक्तैः स्वर्गः किं मन्यते बहु ॥ यत्रैके वसवः प्रोक्ता आदित्याश्च तथा परे ॥ २५ ॥ रुद्रसंज्ञास्तथा चैके ह्यश्विनावपि चापरौ ॥ एतेषामधिपः कश्चिदेक इन्द्रः प्रकीर्तितः ॥ २६ ॥ स्वपुण्यसंख्यया प्राप्ते यस्माद्विभ्रश्यते नरैः ॥ एवं दुःखसमायुक्तः स्वर्गो नैवेष्यते बुधैः ॥ २७ ॥ एतस्मात्कारणाद्विप्राः कुरुध्वं वचनं मम ॥ गृह्णीध्वं नगरं रम्यं निवासाय महाप्रभम् ॥ २८ ॥ हूयंतामग्निहोत्राणि देवताः सर्वदा द्विजाः ॥ इज्यंतां विविधैर्यागैः क्रियतां पितृपूजनम् ॥ २९ ॥ आतिथ्यं क्रियतां नित्यं वेदाभ्यासस्तथैव हि ॥ ३० ॥ एवं हि कुर्वतां नित्यं विना ज्ञानस्य संचयैः ॥ प्रसादान्मम विप्रेन्द्राः प्रांते मुक्तिर्भविष्यति ॥ ३१ ॥ ॥ ऋषय ऊचुः ॥ ॥ असमर्थाः परित्राणे जिताहारास्तपोन्विताः ॥ नगरेणेह किं कुर्मस्तव भक्तिमभीप्सवः ॥ ॥ ३२ ॥ ॥ ईश्वर उवाच ॥ ॥ भविष्यति सदा भक्तिर्युष्माकं परमेश्वरे ॥ गृह्णीध्वं नगरं रम्यं कुरुध्वं वचनं मम ॥ ३३ ॥ इत्युक्त्वा भगवान्देव ईषन्मीलितलोचनः ॥ सस्मार विश्वकर्माणं सर्वशिल्पवतां वरम् ॥ ३४ ॥ स्मृतमात्रो विश्वकर्मा प्रांजलिश्चाग्रतः स्थितः ॥ आज्ञापयतु मां देवो वचनं करवाणि ते ॥ ३५ ॥ ॥ ईश्वर उवाच ॥ ॥ नगरं क्रियतां त्वष्टर्विप्रार्थं सुंदरं शुभम् ॥ ३६ ॥ इत्युक्तो विश्वकर्मा स भूमिं वीक्ष्य समंततः ॥ उवाच प्रणतो भूत्वा शंकरं लोकशंकरम् ॥ ३७ ॥ परीक्षिता मया भूमिर्न युक्तं नगरं त्विह ॥ अत्र देवकुलं साक्षाल्लिंगस्य पतनं तथा ॥ ३८ ॥ यतिभिश्चात्र वस्तव्यं न युक्तं गृहमेधिनाम् ॥ ३९ ॥ त्रिरात्रं पंचरात्रं वा सप्तरात्रं महेश्वर ॥ पक्षं मासमृतुं वापि ह्ययनं यावदेव च ॥ पुत्रदारयुतैस्तीर्थे वस्तव्यं गृहमेधिभिः ॥ ४० ॥ वसत्यूर्ध्वं तु षण्मासाद्यदा तीर्थे गृहाधिपः ॥ अवज्ञा जायते तस्य मनश्चापल्यभावतः ॥ तदा धर्माद्विनश्यंति सकला गृहमेधिनः ॥ ४१ ॥ इत्युक्तः स तदा देवस्तेन वै विश्वकर्मणा ॥ पुनः प्रोवाच तं तस्य प्रशस्य वचनं शिवः ॥ ४२ ॥ रोचते मे न वासोऽत्र विप्राणां गृहमेधिनाम् ॥ यत्र चोन्नामितं लिंगमृषितोयातटे शुभे ॥ तत्र निर्मापय त्वष्टर्नगरं शिल्पिनां वर ॥ ४३ ॥ तस्य



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्वचनं श्रुत्वा विश्वकर्मा त्वरान्वितः ॥ गत्वा चकार नगरं शिल्पिकोटिभिरावृतः ॥ ४४ ॥ उन्नतंनाम यल्लोके विख्यातं सुरसुन्दरि ॥ ततो हृष्ट
मना भूत्वा विलोक्य नगरं शिवः ॥ आहूय ब्राह्मणान्सर्वानुवाचानतकन्धरः ॥ ४५ ॥ इदं स्थानं वरं रम्यं निर्मितं विश्वकर्मणा ॥ ग्रामाणां च
सहस्रैस्तु प्रोक्तं सर्वासु दिक्षु च ॥ ४६ ॥ नगरात्सर्वतः पुण्यो देशो नग्रहरः स्मृतः ॥ अष्टयोजनविस्तीर्ण आयामव्यासतस्तथा ॥ ४७ ॥ नग्नो भूत्वा
हरो यत्र देशे भ्रांतो यदृच्छया ॥ तं नग्नहरमित्याहुर्देशं पुण्यतमं जनाः ॥ ४८ ॥ पूर्वे तु शांकरी चाऽऽर्या पश्चिमे न्यंकुमत्यपि ॥ उत्तरे कनकनंदा
दक्षिणे सागरावधिः ॥ एतदंतरमासाद्य देशो नग्नहरः स्मृतः ॥ ४९ ॥ अष्टयोजनमानेन आयामव्यासतस्तथा ॥ प्रोक्तोऽयं सकलो देश उन्नतेन
समं मया ॥ ५० ॥ गृह्यतां नगरश्रेष्ठं प्रसीदध्वं द्विजोत्तमाः ॥ अत्र भुक्तिश्च मुक्तिश्च भविष्यति न संशयः ॥ ५१ ॥ इत्युक्तास्ते तदा सर्वे विप्रा
ऊचुर्महेश्वरम् ॥ ५२ ॥ ॥ विप्रा ऊचुः ॥ ॥ ईश्वराज्ञा वृथा कर्तुं न शक्या परमात्मनः ॥ तपोऽग्निहोत्रनिष्ठानां वेदाध्ययनशालिनाम् ॥५३॥
अस्माकं रक्षिता कोऽस्ति कलिकाले च दारुणे ॥ को दाताऽऽरोग्यदः कश्च को वै मुक्तिं प्रदास्यति ॥ ५४ ॥ ॥ ईश्वर उवाच ॥ ॥ महाकाल
स्वरूपेण स्थित्वा तीर्थे महोदये ॥ नाशयिष्यामि शत्रून्वः सम्यगाराधितो ह्यहम् ॥ ५५ ॥ उन्नतो विघ्नराजस्तु विघ्नच्छेत्ता भविष्यति ॥ गण
नाथस्वरूपोऽयं धनदो निधीनां पतिः ॥ ५६ ॥ युष्मभ्यं दास्यति द्रव्यं सम्यगाराधितोऽपि सः ॥ आरोग्यदायको नित्यं दुर्गादित्यो भवि
ष्यति ॥ ५७ ॥ महोदयं महानन्ददायकं वो भविष्यति ॥ सम्यगाराधितो ब्रह्मा सर्वकार्येषु सर्वदा ॥ सर्वान्कामांश्च मुक्तिं च युष्मभ्यं
संप्रदास्यति ॥ ५८ ॥ ॥ विप्रा ऊचुः ॥ ॥ यदि तीर्थानि तिष्ठंति सर्वाणि सुरसत्तम ॥ संगालेश्वरतीर्थे च तथा देवकुले शिवे ॥
॥ ५९ ॥ कलावपि महारौद्रे ह्यस्माकं पावनाय वै ॥ स्थातव्यं तर्हि गृह्णीमो नान्यथा च महेश्वर ॥ ६० ॥ स तथेति प्रतिज्ञाय ददौ
तेभ्यः पुरं वरम् ॥ सप्तभौमैः शशांकाभैः प्रासादैः परिभूषितम् ॥ नानाग्रामसमायुक्तं सर्वतः सीमयान्वितम् ॥ ६१ ॥ ॥ सूत उवाच ॥ ॥
एवं तेभ्यो हि नगरं दत्त्वा देवो महेश्वरः ॥ ददर्श विश्वकर्माणं प्राञ्जलिं पुरतः स्थितम् ॥ ६२ ॥ ॥ विश्वकर्मोवाच ॥ ॥ विलोक्यतां महादेव
नगरं नगरोपमम् ॥ सौवर्णस्थलमारुह्य निर्मितं त्वत्प्रसादतः ॥ ६३ ॥ विश्वकर्मवचः श्रुत्वा भगवांस्त्रिपुरान्तकः ॥ समारुरोह स्थलकं सह सर्वैर्मह
र्षिभिः ॥ ६४ ॥ नगरं विलोकयामास रम्यं प्राकारमण्डितम् ॥ ऋषयस्तुष्टुवुः सर्वे तत्रस्थं त्रिपुरान्तकम् ॥ तानुवाच महादेवो वृणुध्वं वरमुत्त
मम् ॥ ६५ ॥ ॥ ऋषय ऊचुः ॥ ॥ यदि तुष्टो महादेव स्थलकेश्वरनामभृत् ॥ अवलोकयंश्च नगरं सदा तिष्ठ स्थले हर ॥ ६६ ॥ इत्युक्तस्तै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





स्तदा देवः स्थलकेऽस्मिन्सदा स्थितः ॥ कृते रत्नमयं देवि त्रेतायां च हिरण्मयम् ॥ ६७ ॥ रौप्यं च द्वापरे प्रोक्तं स्थलमश्ममयं कलौ ॥ एवं तत्र स्थितो देवः स्थलकेश्वरनामतः ॥ ६८ ॥ सदा पूज्यो महादेव उन्नतस्थानवासिभिः ॥ माघे मासि चतुर्दश्यां विशेषस्तत्र जागरे ॥ ६९ ॥ इत्येतत्कथितं देवि ह्युन्नतस्य महोदयम् ॥ श्रुतं पापहरं नृणां सर्वकामफलप्रदम् ॥ ७० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्य उन्नतस्थानमाहात्म्यवर्णनंनामैकोनविंशत्युत्तरत्रिशततमोऽध्यायः ॥ ३१९ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्माच्च पूर्वदिग्भागे किञ्चिदाग्नेयसंस्थितम् ॥ लिंगद्वयं महापुण्यं विश्वकर्मप्रतिष्ठितम् ॥ १ ॥ यदा वै नगरं कर्तुं त्वष्टा तत्र समागतः ॥ प्रतिष्ठाप्य महादेवं नगरं कृतवांस्ततः ॥ २ ॥ कृत्वा च नगरं रम्यं लिंगस्यास्य प्रभावतः ॥ पुनः प्रतिष्ठितं लिंगं तेन वै विश्वकर्मणा ॥ ३ ॥ कर्मादौ कर्मणश्चान्ते यात्रोद्वाहगृहादिके ॥ लिंगद्वयं पूजयित्वा सिद्धिमाप्नोति तत्क्षणात् ॥ ४ ॥ तस्मात्सर्वप्रयत्नेन गंधामृतरसोदकैः ॥ नैवेद्यैर्विविधैर्देवि लिंगयुग्मं प्रपूजयेत ॥ ५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्य उन्नतस्थानमाहात्म्ये लिंगद्वयमाहात्म्यवर्णनंनाम विंशोत्तरत्रिशततमोऽध्यायः ॥ ३२० ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ अथ ते कीर्तयिष्यामि रहस्यं स्थानमुत्तमम् ॥ सर्वपापहरं नृणामुन्नतस्थानवासिनाम् ॥ १ ॥ श्रेष्ठदेवस्य माहात्म्यं ब्रह्मणोऽव्यक्तजन्मनः ॥ उन्नतस्थानसंस्थस्य देवस्य बालरूपिणः ॥ यस्य दर्शनमात्रेण सर्वपापैः प्रमुच्यते ॥ २ ॥ ॥ देव्युवाच ॥ बालरूपीति यत्प्रोक्तमुन्नतं तत्कथं वद ॥ स्थानेष्वन्येषु सर्वत्र वृद्धरूपी पितामहः ॥ ३ ॥ कस्मिन्स्थाने स्थितस्तत्र किमर्थं तत्र वा गतः ॥ कथं स पूज्यो विप्रेन्द्रैस्तिथौ कस्यां क्रमाद्वद ॥ ४ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ऋषितोयापश्चिमे तु ऐशान्यां स्थलकेश्वरात् ॥ ब्रह्मणः परमं स्थानं ब्रह्मलोक इवापरः ॥ ५ ॥ ब्रह्मा विष्णुश्च रुद्रश्च पूज्याः प्राभासिके सदा ॥ ब्रह्मभागे स्थितो ब्रह्मा ऋषितोयातटे शुभे ॥ ६ ॥ रुद्रभागेऽग्नितीर्थे च पूज्यो रुद्रः सनातनः ॥ गिरौ रैवतके रम्ये पूज्यो दामोदरो हरिः ॥ ७ ॥ सोमेन प्रार्थितो देवो बालरूपी पितामहः ॥ आगतश्चाष्टवर्षस्तु ह्युन्नते स्थान उत्तमे ॥ ८ ॥ दृष्ट्वा ब्रह्मा द्विजाञ्छ्रेष्ठांस्तत्र स्थाने स्थितो विभुः ॥ ९ ॥ नास्ति ब्रह्मसमो देवो नास्ति ब्रह्मसमो गुरुः ॥ नास्ति ब्रह्मसमं ज्ञानं नास्ति ब्रह्मसमं तपः ॥ १० ॥ तावद्भ्रमंति संसारे दुःखशोकभयाप्लुताः ॥ न भवंति सुरज्येष्ठे यावद्भक्ताः पितामहे ॥ ११ ॥ समासक्तं यथा चित्तं जंतोर्विषयगोचरे ॥ यद्येवं ब्रह्मणि न्यस्तं को न मुच्येत बंधनात् ॥ १२ ॥ परमायुः स्मृतो ब्रह्मा परार्धं तस्य वै गतम् ॥ उन्नतस्थानसंस्थस्य द्वितीयं भविताऽधुना ॥ १३ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदासावुन्नते स्थाने ब्रह्मलोकात्पितामहः ॥ आगतश्चाष्टवर्षस्तु बालरूपी तदोच्यते ॥ १४ ॥ स्थानेष्वन्येषु विप्राणां वृद्धरूपी पितामहः ॥ युक्तं तदुन्नतस्थानं सदा च ब्रह्मणः प्रियम् ॥ १५ ॥ स्नात्वा च विधिवत्पूर्वं ब्रह्मकुंडे नरोत्तम ॥ पूजयेत्पुष्पधूपाद्यैर्ब्रह्माणं बालरूपिणम् ॥ १६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्य उन्नतस्थाने ब्रह्ममाहात्म्यवर्णनंनामैकविंशत्युत्तरत्रिशततमोध्यायः ॥ ३२१ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि तस्य दक्षिणसंस्थितम् ॥ दुर्गादित्येतिनामानं सर्वपापप्रणाशनम् ॥ १ ॥ यदा दुःखमनुप्राप्ता दुर्गा दुःखविनाशिनी ॥ सूर्यमाराधयामास तदा दुःखविलुत्तये ॥ २ ॥ ततः कालेन बहुना तस्यास्तुष्टो दिवाकरः ॥ उवाच मधुरं वाक्यं दुर्गां देवो महाप्रभाम् ॥ वरं वरय देवेशि तपसा तुष्टवानहम् ॥ ३ ॥ ॥ दुर्गोवाच ॥ ॥ यदि तुष्टो दिवानाथ दुःखसंघं विनाशय ॥ ४ ॥ ॥ सूर्य उवाच ॥ ॥ अचिरेणैव कालेन भगवांस्त्रिपुरांतकः ॥ संप्राप्स्यत्युत्तमं लिंगमुन्नते स्थान उत्तमे ॥ ५ ॥ दुर्गादित्येति मे नाम इह देवि भविष्यति ॥ एवमुक्त्वा महादेवि तत्रैवान्तर्दधे रविः ॥ सप्तम्यां रविवारेण दुर्गादित्यं प्रपूजयेत् ॥ ६ ॥ तस्य दुःखानि सर्वाणि कुष्ठानि विविधानि च ॥ विलयं यांति देवेशि दुर्गादित्यप्रपूजनात् ॥ ७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये दुर्गादित्यमाहात्म्यवर्णनंनाम द्वाविंशत्युत्तरत्रिशततमोऽध्यायः ॥ ३२२ ॥ छ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततः पश्येन्महादेवि तस्य दक्षिणतः स्थितम् ॥ क्षेमेश्वरेति विख्यातमृषितोयातटे स्थितम् ॥ १ ॥ भूतीश्वरेतिनामास्य पूर्वं च परिकीर्तितम् ॥ क्षेमेशेति कलौ देवि तस्य नाम प्रकीर्तितम् ॥२॥ तं दृष्ट्वा पूजयित्वा च मुक्तः स्यात्सर्वकिल्बिषैः ॥३॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये क्षेमेश्वरमाहात्म्यवर्णनंनाम त्रयोविंशत्युत्तरत्रिशततमोऽध्यायः ॥ ३२३ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्मादुत्तरदिग्भागे किंचिद्वायव्यमाश्रितम् ॥ विनायकं प्रपश्येच्च सर्वसिद्धिप्रदायकम् ॥ १ ॥ योऽसौ देवि मया ख्यातः सखा मे धनदः पुरा ॥ गणनाथस्वरूपेण निर्धनानां परिपालकः ॥ लोकानां सिद्धिदानार्थमस्मिन्स्थाने स्थितः प्रिये ॥ २ ॥ चतुर्थ्यां भौमवारेण भक्ष्यभोज्यैः समोदकैः ॥ पूजयेद्विधिवद्देवि तस्य सिद्धिर्भवेद्ध्रुवम् ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये गणनाथमाहात्म्यवर्णनंनाम चतुर्विंशत्युत्तरत्रिशततमोऽध्यायः ॥ ३२४ ॥ ॥ छ ॥ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि विनायकमनुत्तमम् ॥ ऋषितोयातटे रम्ये सर्वविघ्ननिवारणम् ॥ १ ॥ योऽसौ देवगणाध्यक्षः



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



साक्षाच्च त्रिपुरान्तकः ॥ गजरूपं समाश्रित्य ह्युन्नते जगति स्थितः ॥ प्राभासिके महाक्षेत्रे गणानां कोटिभिर्वृतः ॥ २ ॥ तस्मात्सर्वप्रयत्नेन यात्रा निर्विघ्नहेतवे ॥ आराध्यो गणनाथश्च पुष्पधूपादिभिः सदा ॥ ३ ॥ चतुर्थ्यां च चतुर्थ्यां च सर्वैर्नगरवासिभिः ॥ तस्मिन्महोत्सवः कार्यो राष्ट्रक्षेमार्थ सिद्धये ॥ ४ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्य उन्नतस्वामिमाहात्म्यवर्णनं नाम पंचविंशत्युत्तरत्रिशततमोऽध्यायः ॥ ३२५ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि तस्यैवोत्तरतः स्थितम् ॥ महाकालेश्वरं देवं सर्वरक्षाकरं परम् ॥ १ ॥ अधिष्ठाता पुरस्यास्य भैरवो रुद्ररूपधृक् ॥ दर्शे च पूर्णिमायां च महापूजां प्रकारयेत् ॥ २ ॥ महोदये नरः स्नात्वा महाकालं प्रपश्यति ॥ धनाढ्यो जायते लोके सप्तजन्मसहस्रकम् ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये महाकालमाहात्म्यवर्णनंनाम षड्विंशत्युत्तरत्रिशततमोऽध्यायः ॥ ३२६ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो महोदयं गच्छेत्तस्मादीशानसंस्थितम् ॥ १ ॥ विधिना तत्र यः स्नाति तर्पयेत्पितृदेवताः ॥ प्रतिग्रहकृताद्दोषान्न भयं तस्य विद्यते ॥ २ ॥ महोदयं महानन्ददायकं च द्विजन्मनाम् ॥ प्रतिग्रहप्रसक्तानां विषयासक्तचेतसाम् ॥ तेषामपि ददेन्मुक्तिं तेन ख्यातं महोदयम् ॥ ३ ॥ तस्य वै रक्षणार्थाय महाकालस्य चोत्तरे ॥ नियुक्ताश्च महादेवि मातरस्तत्र संस्थिताः ॥ तस्मिन्स्नात्वा नरः पूर्वं मातॄस्ताश्च प्रपूजयेत् ॥ ४ ॥ एवं देवि मयाख्यातं महोदयमहोदयम् ॥ सर्वपापहरं नृणामभिषेकाच्च मुक्तिदम् ॥ ५ ॥ अर्धक्रोशे च तत्तीर्थं समंतात्परिमंडलम् ॥ एतन्मध्यं महासारं सदैव मुनिवल्लभम् ॥ ६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये महोदयमाहात्म्यवर्णनंनाम सप्तविंशत्युत्तरत्रिशततमोऽध्यायः ॥ ३२७ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्माद्वायव्यदिग्भागे स्थितं पापप्रणाशनम् ॥ संगमेश्वरनामाढ्य मृषयो यत्र संगताः ॥ १ ॥ तस्यैव पूर्वदिग्भागे कुण्डिका पापनाशिनी ॥ वडवानलसंयुक्ता यत्रायाता सरस्वती ॥ २ ॥ कुंडिकायां नरः स्नात्वा संगमेश्वरमर्चयेत् ॥ तस्य जन्मसहस्राणि लक्ष्म्याः पुत्रैः प्रियैः सह ॥ असंगमं महादेवि न कदाचित्प्रजायते ॥ ३ ॥ मुच्यते पातकैः सर्वैराजन्ममरणांतिकैः ॥४॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये संगमेश्वरमाहात्म्यवर्णनं नामाष्टाविंशत्युत्तरत्रिशततमोऽध्यायः ॥ ३२८ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ अथोत्तरे देवकुलात्तत्र गव्यूतिमात्रतः ॥ उत्तमस्थानमिति च प्रख्यातं धरणीतले ॥ १ ॥ तस्योत्तरे तु दिग्भागे धनुर्द्वादशकांतरे ॥ उन्नतो विघ्नराजस्तु सर्वप्रत्यूहनाशनः ॥ २ ॥ चतुर्थ्यां पूजितः सम्यक्सु



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गंधैः फलमोदकैः ॥ ददाति वांछितान्कामांस्त्रैलोक्ये विजयी भवेत् ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभास खण्डे प्रथमे प्रभासक्षेत्रमाहात्म्य उन्नतविनायकमाहात्म्यवर्णनंनामैकोनत्रिंशदुत्तरत्रिशततमोऽध्यायः ॥ ३२९ ॥ ॥छ॥ ॥ ईश्वर उवाच ॥ ॥ तस्मात्तदुन्नतस्थानादुत्तरे योजनत्रयात् ॥ तत्र तप्तोदकस्वामी तलो यत्र हतः पुरा ॥ १ ॥ दैत्यानामधिपो देवि विष्णुना प्रभविष्णुना ॥ कृत्वा वर्षशतं युद्धं तलस्वामी ततोऽभवत् ॥ २ ॥ तप्तकुण्डे नरः स्नात्वा तलस्वामिनमर्चयेत् ॥ कृत्वा पिंडप्रदानं तु कोटियात्राफलं लभेत् ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये तलस्वामिमाहात्म्यवर्णनंनाम त्रिंशदुत्तरत्रिशततमोऽध्यायः ॥ ३३० ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि कालमेघेति विश्रुतम् ॥ तस्मात्तं पूर्वदिग्भागे क्षेत्रपं लिंगरूपिणम् ॥ १ ॥ अष्टम्यां वा चतुर्दश्यां पूज्योऽसौ बलिभिर्नरैः ॥ वांछितार्थप्रदः सम्यक्स कलौ कल्पपादपः ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये कालमेघमाहात्म्यवर्णनंनामैकत्रिंशदुत्तरत्रिशततमोऽध्यायः ॥ ३३१ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्माद्दक्षिणदिग्भागे धनुषां पंचभिः प्रिये ॥ तत्र तप्तोदकुंडानि संत्यद्यापि वरानने ॥ १ ॥ कुण्डतः पूर्वदिग्भागे धनुषां पञ्चविंशतौ ॥ रुक्मिणी संस्थिता देवी सर्वपातकनाशिनी ॥ २ ॥ स्नात्वा तप्तोदके कुण्डे कोटिहत्याविनाशने ॥ ततः संपूजयेद्देवीं रुक्मिणीं रुक्मदायिनीम् ॥ सप्त जन्मानि नारीणां गृहभंगो न जायते ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये रुक्मिणीमाहात्म्यवर्णनंनाम द्वात्रिंशदुत्तरत्रिशततमोऽध्यायः ॥ ३३२ ॥ ॥छ॥ ॥ ईश्वर उवाच ॥ ॥ बलभद्राच्च पूर्वेण स्थिता चासीत्सरिद्वरा ॥ दुर्वासेश्वरनामेति बललिंगं प्रतिष्ठितम् ॥ १ ॥ सर्वपापप्रशमनं दृष्टं सर्वसुखावहम् ॥ स्नात्वा चास्य त्वमावास्यां[1] पिंडदानं ददाति यः ॥ २ ॥ कल्पकोटिशतं साग्रं पितॄणां तृप्तिमावहेत् ॥ दुर्वासेश्वरनामानं तत्र पूज्य विधानतः ॥ ३ ॥ कोटियज्ञफलं प्राप्य सर्वान्कामानवाप्नुयात् ॥ तत्र लिंगान्यनेकानि ऋषिभिः स्थापितानि तु ॥ ४ ॥ दृष्ट्वा स्पृष्ट्वा पूजयित्वा मुक्तः स्यात्सर्वकिल्बिषैः ॥ इत्येतत्कथितं देवि क्षेत्राद्यं तं यथाक्रमम् ॥ ५ ॥ भद्रायाः पश्चिमात्पूर्वं यथानुक्रममादितः ॥ श्रुतं पापोपशमनं कोटियज्ञफलप्रदम् ॥ ६ ॥ अथ क्षेत्रस्य परिधिस्थानं मधुमतीति च ॥ तस्मान्नैर्ऋत्यदिग्भागे स्थानं खंडघटेति च ॥ ७ ॥ तत्र पिंगेश्वरो देवः समुद्रतटसन्निधौ ॥ कूपानां सप्तकं तत्र पितॄणां यत्र

१ अमावास्याम्—अमावास्यायाम्—इत्यर्थः । "अमावास्या त्वमावस्या अमावासी त्वमावसी" इति कोशः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पाणयः ॥ दृश्यंतेऽद्यापि देवेशि यत्र पर्वणिपर्वणि ॥ ८ ॥ तत्र श्राद्धं नरः कृत्वा गयाकोटिगुणं फलम् ॥ लभते नाऽत्र सन्देहः सोमामा[1] यदि जायते ॥ ९ ॥ तत्रैव नातिदूरे तु भद्रायाः संगमः स्मृतः ॥ पश्चिमात्संगमात्पूर्वः संगमः समुदाहृतः ॥ १० ॥ यत्पुण्यं लभते देवि पूर्वं पश्चिमसंगमे ॥ गंगासागरयोस्तत्र तद्भद्रासंगमे लभेत् ॥ ११ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये तप्तोदकस्वामिमाहात्म्ये मधुमत्यां पिंगेश्वरभद्रामाहात्म्यवर्णनंनाम त्रयस्त्रिंशदुत्तरत्रिशततमोऽध्यायः ॥ ३३३ ॥

॥ ॥ ईश्वर उवाच ॥ ॥ भगवन्देवदेवेश संसारार्णवतारक ॥ पृच्छामि त्वामहं भक्त्या किञ्चित्कौतूहलात्पुनः ॥ १ ॥ यत्त्वया कथितं देव तलस्वामिमहोदयम् ॥ किं तत्र कारणं देव तलो येन निपातितः ॥ २ ॥ कोऽसौ तलः समाख्यातः किंवीर्यः किंपरायणः ॥ कस्मात्स्थानात्समुत्पन्नः कथं जातश्च मे वद ॥ ३ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि रहस्यं पापनाशनम् ॥ यन्न कस्यचिदाख्यातं तत्ते वक्ष्याम्यशेषतः ॥ ४ ॥ देवा अपि न जानंति तलस्योत्पत्तिकारणम् ॥ पूर्वं कृतयुगे देवि गोविन्देति प्रकीर्तितः ॥ ५ ॥ त्रेतायां वामनः स्वामी स्तुतिस्वामी तृतीयके ॥ कलौ युगे महादेवि तलस्वामी प्रकीर्तितः ॥ ६ ॥ तथा तप्तोदकस्वामी तस्य नामांतरं प्रिये ॥ अधुना संप्रवक्ष्यामि तलोत्पत्तिं तव प्रिये ॥ ७ ॥ आसीन्महेन्द्रनामा[2] च दानवो रौद्ररूपधृक् ॥ कोटिवर्षाणि तेनैव तपस्तप्तं पुरा प्रिये ॥ ८ ॥ स तपोबलमाविष्टो जिग्ये देवान्सवासवान् ॥ जित्वा देवांस्ततः सर्वांस्ततः काले समागतः ॥ ९ ॥ युद्धं स प्रार्थयामास मया सार्द्धं सुभीषणम् ॥ ततोऽभवन्महायुद्धं ब्रह्माण्डक्षयकारकम् ॥ १० ॥ ततः कोपान्महायुद्धे मम देहाद्वरानने ॥ ज्वाला तत्र समुत्पन्ना तन्मध्ये स तलोऽभवत् ॥ ११ ॥ तेन दृष्टो महेन्द्रोऽसौ गर्जन्गिरिगुहाश्रयः ॥ १२ ॥ कथं गर्जसि हे मूढ युद्धं कुरु मया सह ॥ इत्युक्ते तत्र देवेशि तेन युद्धमवर्त्तत ॥ १३ ॥ तत्र प्रवर्त्तिते युद्धे तलमाहेन्द्रयोस्तयोः ॥ १४ ॥ रुद्रवीर्यस्य युक्तेन तलेनोदारकर्मणा ॥ मल्लयुद्धेन बलिना महेन्द्रो विनिपातितः ॥ १५ ॥ ततस्तं पतितं दृष्ट्वा विस्मयं स तलो गतः ॥ गतप्राणं तदा ज्ञात्वा हर्षान्नृत्यमथाकरोत् ॥ १६ ॥ तस्मिन्संनृत्यमाने तु सर्वं स्थावरजंगमम् ॥ चकंपे तु वरारोहे प्रभावात्तस्य वीर्यतः ॥ १७ ॥ ततो भारभराक्रान्ता धरणी[3] तलपीडिता ॥ अतीवभयसंत्रस्ताः सदेवासुरमानुषाः ॥ १८ ॥ क्षुभिता गिरयः सर्वे विद्रुताश्च महार्णवाः ॥ तरवो निधनं जग्मुर्नद्यो वाहांश्च तत्यजुः ॥ १९ ॥ गतप्रभावाः सूर्याद्या ज्योतींषि न विरेजिरे ॥ त्रैलोक्यं व्याकुलीभूतं

१ सोमामा—सोमवत्यमावास्या—इत्यर्थः । २ माहेन्द्रनामा—इ० पा० । ३ पृथिवी—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तलनृत्यप्रभावतः ॥ २० ॥ ततो देवगणाः सर्वे शरणं रुद्रमाययुः ॥ वृत्तं यथावत्कथितं ततो रुद्र उवाच तान् ॥२१॥ अवध्यो मे तलो देवाः पुत्रत्वे हि प्रतिष्ठितः ॥ एवमुक्त्वा हृषीकेशं प्रभासक्षेत्रवासिनम् ॥ २२ ॥ स्तुतिस्वामीतिनामानं स्थितं दुर्वाससः पुरः ॥ प्रभासक्षेत्रसामीप्ये पूर्वभागे प्रतिष्ठितम् ॥ २३ ॥ तप्तोदकुंडसामीप्ये तत्र गच्छत भोः सुराः ॥ कल्पेकल्पे तु तेनैव विध्यतेऽसौ हि दानवः ॥ २४ ॥ एवमुक्ते तदा देवाः प्रभासं क्षेत्रमागताः ॥ तत्र ते विबुधा जग्मुर्यत्र तप्तोदकाधिपः ॥ २५ ॥ दृष्ट्वा नारायणं तत्र देवाः श्रद्धासमन्विताः ॥ तुष्टुवुः परया भक्त्या देव देवं जनार्दनम् ॥ २६ ॥ वैकुंठ त्राहि नो देवांस्तलेनोच्चाटिता वयम् ॥ महेन्द्रक्रोधसंभूतरुद्रतेजोद्भवेन वै ॥ २७ ॥ अस्माभी रुद्रसामीप्ये कार्यं सर्वं निवेदितम् ॥ ततः प्रस्थापिताः सर्वे रुद्रेण परमेष्ठिना ॥ तव पार्श्वे महादेव नस्त्वं देव गतिर्भव ॥ २८ ॥ इति श्रुत्वा वचस्तेषां देवदेवो जनार्दनः ॥ दानवस्य वधार्थाय देवानां रक्षणाय च ॥ चक्रे यत्नं महाबाहुः प्रभासक्षेत्रवल्लभः ॥ २९ ॥ समाहूय तदा दैत्यं प्रभासक्षेत्रमध्यतः ॥ युद्धं चक्रे ततो देवि विश्वप्रलयकारकम् ॥ ३० ॥ ततस्तु देवाः सर्वे च स्वसैन्यपरिवारिताः ॥ चक्रुर्युद्धं च दैत्येन सुमहल्लोमहर्षणम्[2] ॥ ३१ ॥ ततः पर्वतसंकाशं दृष्ट्वा दैत्यं महाबलम् ॥ उवाच चपलापांगो गरुडकृतवाहनः ॥ ३२ ॥ अहो दैत्य महाबाहो मल्लयुद्धं ददस्व मे ॥ त्वद्बाहुयुगलं दृष्ट्वा न युद्धे वांछितं मम ॥ ३३ ॥ नारायणवचः श्रुत्वा करमुद्यम्य दानवः ॥ अभ्यधावत्तदा दैत्यः कालान्तकसमप्रभः ॥ ३४ ॥ ततः प्रवर्तितं युद्धमन्योन्यं जयकांक्षिणोः ॥ जंघाभ्यां पादबन्धेन बाहुभ्यां बाहुबंधनम् ॥ ३५ ॥ कंठेन बन्धयन्कंठमुदरेणोदरं तथा ॥ एतस्मिन्नन्तरे देवाः सभयाः संबभूविरे ॥ ३६ ॥ [3]ततः पीडासमाक्रांतो विष्णुः संस्मरते हरम् ॥ तत्क्षणादागतो रुद्रः किं करोमि महाबलः[4] ॥ ३७ ॥ ॥ ॥ विष्णुरुवाच ॥ ॥ श्रांतोऽहं देवदेवेश मल्लयुद्धेन शंकर ॥ तप्तोदकं कुरुष्वेह श्रमनाशाय सांप्रतम् ॥ ३८ ॥ ततस्तलं हनिष्यामि क्षणमात्रेण भैरवम् ॥ ३९ ॥ ॥ ईश्वर उवाच ॥ ॥ आदौ कृतयुगे कृष्ण उमया यत्कृतं पुरा ॥ ऋषीणां श्रमनाशार्थं तप्तोदं तत्र निर्मितम् ॥ ४० ॥ तद्दैत्यपापमाहात्म्यात्पुनः शीतलतां गतम् ॥ पुनस्तदुष्णतां नीतं ततः कल्पांतसंस्थितौ ॥ ४१ ॥ एवमुक्त्वा तदा देवं वीक्षांचक्रे महेश्वरः ॥ तृतीयलोचनेनैव ज्वालामालोपशोभिना ॥ ४२ ॥ तेन ज्वालासमूहेन व्याप्तं कुण्डं चतुर्दिशम् ॥ तप्तोदकुण्डमभवत्तेन ख्यातं धरातले ॥ ४३ ॥ ततो नारायणेनेह क्षालितं गात्रमुत्तमम् ॥ क्षालनात्तस्य देवस्य श्रमो नाशमुपागमत् ॥ ४४ ॥ ततस्तुष्टमना देवस्तीर्थानां दशकोटिकाः ॥ स स्मृत्वा

१ तत्त्वम्–इ० पा० । २ तुमुलम्–इ० पा० । ३ तलपीडासमाक्रान्तः–इ० पा० । ४ महाबलः–एषः–तलदानवः–इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तत्र विधिवत्क्षिप्त्वा स्नात्वा वरानने ॥ ४५ ॥ ततश्चक्रे महायुद्धं तलेनातिभयंकरम् ॥ जघान स तलं दैत्यं मुष्टिघातेन मस्तके ॥ ४६ ॥ तस्मिन्प्रवृत्ते तुमुले तु युद्धे चकंपिरे भूमिसमेतलोकाः ॥ वित्रस्तदेवा न दिशो विरेजुर्महांधकारावृतमूर्छितं जगत् ॥ ४७ ॥ नष्टाश्च सिद्धा जगतोऽस्य शांतिं करोतु वै पापविनाशनो हरिः ॥ त्राहीति देवेशि महर्षिसंघा भूतानि भीतानि तथा वदन्ति ॥४८॥ ततो वै मल्लयुद्धेन पातितो भुवि दानवः॥ कंठमाक्रम्य पादेन खड्गेन परिपीडितः ॥ ४९ ॥ हास्यं चकार दैत्योऽथ विष्णुनाऽऽक्रांतकंधरः ॥ तमाह पुण्डरीकाक्ष किमेतद्धास्यकारणम् ॥५०॥ वृद्धौ हर्षमवाप्नोति क्षये भवति दुःखितः ॥ इत्येषा लौकिकी गाथा तत्ते दैत्य विपर्ययः ॥५१॥ इत्युक्तस्तु तदा दैत्यः प्रत्युवाच जनार्दनम् ॥ अग्निष्टोमादिभिर्यज्ञैर्वेदाभ्यासैरनेकधा ॥ ५२ ॥ नित्योपवासनियमैः स्नानदानैर्जपादिभिः ॥ निर्मलैर्योगयुक्तैश्च प्राप्यते यत्परं पदम् ॥ ५३ ॥ तन्मया दुष्टभावेन प्राप्तं विष्णोः परं पदम् ॥ इत्युक्ते भगवान्विष्णुर्वरदानपरोऽभवत् ॥ ५४ ॥ उवाच परमं वाक्यं तलं दैत्याधिनायकम् ॥ वरं वरय दैत्येंद्र यत्ते मनसि संस्थितम् ॥ ५५ ॥ इति विष्णोर्वचः श्रुत्वा प्रार्थयामास दानवः ॥ ममाख्या वर्त्तते[1] लोके तथा कुरु महीधर[2] ॥ ५६ ॥ मार्गमासे तु शुक्लायामेकादश्यां समाहितः ॥ यस्त्वां पश्यति भावेन तस्य पापं विनश्यतु[3] ॥ ५७ ॥ एवं भविष्यतीत्युक्त्वा देवो हर्षमुपागतः ॥ नानादुंदुभयो नेदुः पुष्पवर्षं पपात च ॥ ५८ ॥ विष्णोर्मूर्ध्नि महाभागे लोकाः स्वस्था बभूविरे ॥ ततो देवगणाः सर्वे नृत्यंति च मुदान्विताः ॥ वदंति हर्षसंयुक्ता नारायणपरायणाः ॥ ५९ ॥ एतत्तीर्थं महातीर्थं सर्वपापप्रणाशनम् ॥ श्रमापनोदनं विष्णोर्ब्रह्महत्यादिशोधनम् ॥६०॥ स्थितो नारायणस्तत्र भैरवस्तत्र शंकरः ॥ क्षेत्रपालस्वरूपेण कालमेघेति विश्रुतः ॥ ६१ ॥ तस्य यात्राविधिं वक्ष्ये गत्वा तत्र शुचिर्नरः ॥ स्मरेद्विष्णुं महादेवि तलस्वामीति यः श्रुतः ॥ ६२ ॥ स्तुयाद्विष्णुं महादेवि इदं विष्णुरृचा प्रिये ॥ सहस्रशीर्षामंत्रेण तर्प्पणादि प्रकारयेत् ॥ ६३ ॥ एवं स्नात्वा विधानेन दत्त्वा चार्घ्यं जनार्दने ॥ संपूज्य गंधपुष्पैश्च वस्त्रैः पुष्पानुलेपनैः ॥ ६४ ॥ मधुनेक्षुरसेनैव कुंकुमेन विलेपयेत् ॥ कर्पूरोशीरमिश्रेण मृगनाभियुतेन च ॥ ६५ ॥ वस्त्रैः संवेष्टयेत्पश्चाद्दद्यान्नैवेद्यमुत्तमम् ॥ धर्मश्रवणसंयुक्तं कार्यं जागरणं ततः ॥ ६६ ॥ वृषभस्तत्र दातव्यः सुवर्णं वस्त्रयुग्मकम् ॥ विप्राय वेदयुक्ताय श्रोत्रियाय प्रदापयेत् ॥ ६७ ॥ उपवासं ततः कुर्यात्तस्मिन्नहनि भामिनि ॥ रुक्मिणीं च प्रपश्येत नमस्कृत्य जनार्दनम् ॥ ६८ ॥ एवं कृत्वा नरो भक्त्या लभते जन्मजं[4] फलम् ॥ सर्वेषामेव यज्ञानां दानानां लभते फलम् ॥ ६९ ॥ तथा च सर्वतीर्थानां व्रतानां लभते फलम् ॥



---

१ वर्त्तते–इ० पा० । २ महीधर–वराहरूपेण–धरोद्धारक हे महाविष्णो–इत्यर्थः । ३ व्यपोहतु–इ० पा० । ४ जन्मनः फलम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उद्धरेत्तु पितुर्वर्गं मातृवर्गं तथैव च ॥ ७० ॥ जन्मप्रभृतिपापानां कृतानां नाशनं भवेत् ॥ न दुःखं च न दारिद्र्यं दुर्भगत्वं न जायते ॥ ७१ ॥ सप्त जन्मांतरंयावत्तलस्वामिप्रदर्शनात् ॥ सुवर्णानां सहस्रेण ब्राह्मणे वेदपारगे ॥ दत्तेन यत्फलं देवि तत्कुण्डे स्नानतो लभेत् ॥ ७२ ॥ एवं तलस्वामिचरित्रमुत्तमं श्रुतं पुरा सिद्धमहर्षिसंघैः ॥ श्रुत्वा प्रभावं तलदेवसन्निधौ प्राप्नोति सर्वं मनसा यदीप्सितम् ॥ ७३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये तलस्वामिमाहात्म्यवर्णनंनाम चतुस्त्रिंशदुत्तरद्विशततमोऽध्यायः ॥ २३४ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततः पश्चिमतो गच्छेन्न्यंकुमत्यास्तटे शुभे ॥ दक्षिणां दिशमाश्रित्य स्थितं तीर्थं महाप्रभम् ॥ १ ॥ शंखावर्त्तमितिख्यातं यत्र चित्रांकिता शिला ॥ स्वयंभूता महादेवि रक्तगर्भा सुशोभना ॥ २ ॥ छिन्ने त्वद्यापि तत्रैव सुरक्तं संप्रदृश्यते ॥ विष्णुक्षेत्रं हि तत्प्रोक्तं शंखो यत्र हतः पुरा ॥ ३ ॥ वेदापहारी देवेशि विष्णुना प्रभविष्णुना ॥ कृतं शंखोदकं तीर्थं शंखाकारं तु दृश्यते ॥ ४ ॥ तत्र स्नात्वा नरो देवि मुच्यते ब्रह्महत्यया ॥ सप्त जन्मानि विप्रत्वं शूद्रस्यापि प्रजायते ॥ ५ ॥ पूर्वं तत्रैव गत्वा च ततो रुद्रगयां व्रजेत् ॥ गोदानं तत्र देयं तु सम्यग्यात्राफलेप्सुभिः ॥ ६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये शंखावर्त्ततीर्थमाहात्म्यवर्णनंनाम पञ्चत्रिंशदुत्तरत्रिशततमोऽध्यायः ॥ २३५ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि गोष्पदं[1] तीर्थमुत्तमम् ॥ यत्र श्राद्धं नरः कृत्वा गयासप्तगुणं फलम् ॥ लभते नात्र संदेहो यदि श्रद्धा दृढा भवेत् ॥ १ ॥ यत्र श्राद्धं पृथुः कृत्वा पितरं पापयोनितः ॥ उद्दधार महादेवि वेनंनाम महाप्रभुम् ॥ ॥ २ ॥ ॥ देव्युवाच ॥ ॥ कस्मिन्स्थाने स्थितं तीर्थमुत्पत्तिस्तस्य कीदृशी ॥ कथं स वेनराजो वा[2] उद्धृतः पापयोनितः ॥ ३ ॥ गयासप्तगुणं पुण्यं कथं तत्र प्रजायते ॥ श्राद्धस्य किं विधानं तु के मंत्रास्तत्र के द्विजाः ॥ एतन्मे कौतुकं देव यथावद्वक्तुमर्हसि ॥ ४ ॥ ॥ ईश्वर उवाच ॥ ॥ इदं रहस्यं देवेशि यत्त्वया परिपृच्छितम् ॥ अप्रकाश्यमिदं तीर्थमस्मिन्पापयुगे प्रिये ॥ ५ ॥ तथापि संप्रवक्ष्यामि तव स्नेहात्सुरेश्वरि ॥ न पापिने इदं ब्रूयान्नैव तर्करताय वै ॥ ६ ॥ न नास्तिकाय देवेशि न सुवर्णेतराय च ॥ अस्ति देवि महासिद्धा पुण्या न्यंकुमती नदी ॥ ७ ॥ मर्यादार्थं मया[3]ऽऽनीता क्षेत्रस्यास्य महेश्वरि ॥ संस्थिता पापशमनी पर्णादित्याच्च दक्षिणे ॥ ८ ॥ नारायणगृहात्सौम्ये नातिदूरे व्यवस्थिता ॥ तस्या

१ मोक्षदं तीर्थमुत्तमम्—इ० पा० । २ वै-उद्धृतः—इति पदच्छेदः । ३ समानीता—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





मध्ये महादेवि तीर्थं त्रैलोक्यविश्रुतम् ॥ ९ ॥ गोष्पदंनाम विख्यातं कोटिपापहरं नृणाम् ॥ गोष्पदस्य समीपे तु नातिदूरे व्यवस्थितः ॥ १० ॥
अनन्तोनाम नागेन्द्रः स्वयंभूतो धरातले ॥ तस्य तीर्थस्य रक्षार्थं विष्णुना सन्नियोजितः ॥ ११ ॥ कांक्षंति पितरः पुत्रान्नरकादतिभीरवः ॥
गंता यो गोष्पदे पुत्रः स नस्त्राता भविष्यति ॥ गोष्पदे च सुतं दृष्ट्वा पितणामुत्सवो भवेत् ॥ १२ ॥ पद्भ्यामपि जलं स्पृष्ट्वा अस्मभ्यं किं न
दास्यति ॥ अपि स्यात्स कुलेऽस्माकं यो नो दद्याज्जलांजलिम् ॥ प्रभासक्षेत्रमासाद्य गोष्पदे तीर्थ उत्तमे ॥ १३ ॥ अपि स्यात्स कुलेऽस्माकं
खड्गमांसेन यः सकृत् ॥ श्राद्धं कुर्यात्प्रयत्नेन कालशाकेन वा पुनः ॥ १४ ॥ अपि स्यात्स कुलेऽस्माकं गोष्पदे दत्तदीपकः ॥ आकल्प
कालिका दीप्तिस्तेनाऽस्माकं भविष्यति ॥ १५ ॥ गोष्पदे चान्नदाता यः पितरस्तेन पुत्रिणः ॥ दिनमेकमपि स्थित्वा पुनात्यासप्तमं कुलम् ॥
॥ १६ ॥ पिण्डं दद्याच्च पित्रादेरात्मनोऽपि स्वयं नरः ॥ पिण्याकेंगुदकेनापि तेन मुच्येद्वरानने ॥ १७ ॥ ब्रह्मज्ञानेन किं योगैर्गोग्रहे मरणेन
किम् ॥ किं कुरुक्षेत्रवासेन गोष्पदे यदि गच्छति ॥ १८ ॥ सकृत्तीर्थाभिगमनं सकृत्पिण्डप्रपातनम् ॥ दुर्लभं किं पुनर्नित्यमस्मिंस्तीर्थे व्यव
स्थितम् ॥ १९ ॥ अर्द्धकोशं तु तत्तीर्थं तदर्द्धार्द्धं तु दुर्लभम् ॥ तन्मध्ये श्राद्धकृत्पुण्यं गयासप्तगुणं लभेत् ॥ २० ॥ श्राद्धकृद्गोष्पदे यस्तु
पितॄणामनृणो हि सः ॥ पदमध्ये विशेषेण कुलानां शतमुद्धरेत् ॥ २१ ॥ गृहाच्चलितमात्रस्य गोष्पदे गमनं प्रति ॥ स्वर्गारोहणसोपानं
पितॄणां तु पदेपदे ॥ २२ ॥ पायसेनैव मधुना सक्तुना पिष्टकेन च ॥ चरुणा तंदुलाद्यैर्वा पिंडदानं विधीयते ॥ २३ ॥ गोप्रचारे तु यः पिण्डा
न्छमीपत्रप्रमाणतः ॥ कन्दमूलफलाद्यैर्वा दत्त्वा स्वर्गं नयेत्पितॄन् ॥ २४ ॥ गोष्पदे पिण्डदानेन यत्फलं लभते नरः ॥ न तच्छक्यं मया
वक्तुं कल्पकोटिशतैरपि ॥ २५ ॥ अथातः संप्रवक्ष्यामि सम्यग्यात्राविधिं शुभम् ॥ यात्राविधानं च तथा सम्यक्छ्रद्धान्विता शृणु ॥
॥ २६ ॥ यदि तीर्थं नरो गच्छेद्गयाश्राद्धफलेप्सया ॥ तथाविधविधानेन यात्रां कुर्याद्विचक्षणः ॥ २७ ॥ ब्रह्मचारी शुचिर्भूत्वा हस्तपादेषु
संयतः ॥ श्रद्धावानास्तिको भावी गच्छेत्तीर्थं ततः सुधीः ॥ २८ ॥ न नास्तिकस्य संसर्गं तस्मिंस्तीर्थे नरश्चरेत् ॥ सर्वोपस्करसंयुक्तः श्राद्धार्ह ॥१८४॥
द्रव्यसंयुतः ॥ गच्छेत्तीर्थं साधुसंगी गयां मनसि मानयन् ॥ २९ ॥ एवं यस्तु द्विजो गच्छेत्प्रतिग्रहविवर्जितः ॥ पदेपदेऽश्वमेधस्य फलं प्राप्नोत्य
संशयम् ॥ ३० ॥ तत्र स्नात्वा न्यंकुमत्यां सिद्धये पितृमुक्तये ॥ स्नात्वाऽथ तर्प्पणं कुर्याद्देवादीनां यथाविधि ॥ ३१ ॥ ब्रह्मादिस्तंबपर्यंता देवर्षि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनुमानवाः ॥ तृप्यन्तु पितरः सर्वे मातृमातामहादयः ॥ ३२ ॥ एवं संतर्प्य विधिना कृत्वा होमादिकं नरः ॥ श्राद्धं सपिण्डकं कुर्यात्स्वतंत्रोक्तविधानतः[1] ॥ ३३ ॥ आमन्त्र्य ब्राह्मणांस्तत्र शास्त्रज्ञान्दोषवर्जितान् ॥ एवं[2] कृतोपचारस्तु इमं मन्त्रमुदीरयेत् ॥ ३४ ॥ कव्यवाडनलः सोमो यमश्चैवार्यमा तथा ॥ अग्निष्वात्ता बर्हिषदः सोमपाः पितृदेवताः ॥ आगच्छन्तु महाभागा युष्माभी रक्षितास्त्विह ॥ ३५ ॥ मदीयाः पितरो ये च कुले जाताः सनाभयः ॥ तेषां पिण्डप्रदाताऽहमागतोऽस्मिन्पितामहाः ॥ ३६ ॥ एवमुक्त्वा महादेवि इमं मन्त्रमुदीरयेत् ॥ ३७ ॥ पिता पितामहश्चैव तथैव प्रपितामहः ॥ माता पितामही चैव तथैव प्रपितामही ॥ ३८ ॥ मातामहः प्रमाता च तथा वृद्धप्रमातृकः ॥ तेषां पिंडो मया दत्तो ह्यक्षय्यमुपतिष्ठताम् ॥ ३९ ॥ ॐ नमो भानवे भर्त्रेऽब्जभौमसोमरूपिणे ॥ एवं नत्वाऽर्चयित्वा तु इमां स्तुतिमथो पठेत् ॥ ४० ॥ तत्र गोष्पदसामीप्ये चरुणा सुश्रृतेन च ॥ पितॄणामनाथानां च मंत्रैः[3] पिंडांश्च निर्वपेत् ॥ ४१ ॥ अस्मत्कुले मृता ये च गतिर्येषां न विद्यते ॥ रौरवे चांधतामिस्रे कालसूत्रे च ये गताः ॥ तेषामुद्धरणार्थाय इमं पिंडं ददाम्यहम् ॥ ॥ ४२ ॥ अनेकयातनासंस्थाः प्रेतलोकेषु ये गताः ॥ तेषामुद्धरणार्थाय इमं पिंडं ददाम्यहम् ॥ ४३ ॥ पशुयोनिगता ये च ये च कीटसरीसृपाः ॥ अथवा वृक्षयोनिस्थास्तेभ्यः पिंडं ददाम्यहम् ॥४४॥ असंख्या यातनासंस्था ये नीता यमशासकैः॥ तेषामुद्धरणार्थाय इमं पिंडं ददाम्यहम् ॥ ४५ ॥ येऽबांधवा बांधवा ये येऽन्यजन्मनि बांधवाः ॥ ते सर्वे तृप्तिमायांतु पिंडेनानेन सर्वदा ॥ ४६ ॥ ये केचित्प्रेतरूपेण वर्त्तंते पितरो मम ॥ ते सर्वे तृप्तिमायांतु पिंडेनानेन सर्वदा ॥ ४७ ॥ दिव्यांतरिक्षभूमिस्थपितरो बांधवादयः ॥ मृताश्चासंस्कृता ये च तेषां पिंडोऽस्तु मुक्तये ॥ ॥ ४८ ॥ पितृवंशे मृता ये च मातृवंशे तथैव च ॥ गुरुश्वशुरबंधूनां ये चान्ये बांधवा मृताः ॥ ४९ ॥ ये मे कुले लुप्तपिंडाः पुत्रदारविवर्जिताः ॥ क्रियालोपगता ये च जात्यंधाः पंगवस्तथा ॥ ५० ॥ विरूपा आमगर्भा येऽज्ञाता ज्ञाताःकुले मम ॥ तेषां पिंडो मया दत्तो ह्यक्षय्यमुपतिष्ठताम्॥ ॥५१॥ प्रेतत्वात्पितरो मुक्ता भवंतु मम शाश्वतम् ॥ यत्किंचिन्मधुसंमिश्रं गोक्षीरं घृतपायसम् ॥५२॥ अक्षय्यमुपतिष्ठेत्त्वत्त्वस्मिंस्तीर्थे तु गोष्पदे॥ स्वाध्यायं श्रावयेत्तत्र पुराणान्यखिलान्यपि ॥ ५३ ॥ ब्रह्मविष्ण्वर्करुद्राणां स्तवानि विविधानि च ॥ ऐंद्राणि सोमसूक्तानि पावमानीश्च शक्तितः ॥ ॥ ५४ ॥ बृहद्रथंतरं तद्वज्ज्येष्ठसाम सरौरवम्॥तथैव शांतिकाध्यायं मधुब्राह्मणमेव च ॥५५॥ मंडलं ब्राह्मणं तत्र प्रीतकारि च यत्पुनः ॥ विप्राणामा

---

१ स्वतंत्रोक्तविधानतः—स्वशाखोक्तविधानतः--स्वगृह्योक्तविधानतः--इत्यर्थः । २ एवं कृत्वा नरो यस्तु अथ मंत्रमुदीरयेत्—इ० पा० । ३ मंत्रैः—वक्ष्यमाणमंत्रैः--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

त्मनश्चैव तत्सर्वं समुदीरयेत् ॥५६॥ एवं न्यंकुमतीमध्ये गोष्पदे तीर्थ उत्तमे ॥ दत्त्वा पिंडांश्च विधिवत्पुनर्मंत्रमिमं पठेत् ॥ ५७ ॥ साक्षिणः संतु मे देवा ब्रह्माद्या ऋषिपुंगवाः ॥ मयेदं तीर्थमासाद्य पितॄणां निष्कृतिः कृता ॥५८॥ आगतोऽस्मि इदं तीर्थं पितृकार्ये सुरोत्तमाः ॥ भवंतु साक्षिणः सर्वे मुक्तश्चाहमृणत्रयात् ॥ ५९ ॥ एवं प्रदक्षिणीकृत्य गोष्पदं तीर्थमुत्तमम् ॥ विप्रेभ्यो दक्षिणां दत्त्वा नद्यां पिंडान्विसर्जयेत् ॥ ६० ॥ गोदानं तत्र देयं तु तद्वत्कृष्णाजिनं प्रिये ॥ अष्टकासु च वृद्धौ च गयायां मृतवासरे ॥ ६१ ॥ अत्र मातुः पृथक्छ्राद्धमन्यत्र पतिना सह ॥ वृद्धिश्राद्धे तु मात्रादि गयायां पितृपूर्वकम् ॥ ६२ ॥ गयावदत्रैव पुनः श्राद्धं कार्यं नरोत्तमैः ॥ तस्माद्धतगया प्रोक्ता इयं सा विष्णुना स्वयम् ॥ ६३ ॥ गंधदानेन गंधाप्तिः सौभाग्यं पुष्पदानतः ॥ धूपदानेन राज्याप्तिर्दीप्तिर्दीपप्रदानतः ॥ ६४ ॥ ध्वज[१]दानात्पापहानिर्यात्राकृद्ब्रह्मलोकभाक् ॥ श्राद्धपिंड[२]प्रदो लोके विष्णुर्नेष्यति वै पितॄन् ॥ ६५ ॥ एकं यो भोजयेत्तत्र ब्राह्मणं शंसितव्रतम् ॥ गोप्रचारे महातीर्थे कोटिर्भवति भोजिता ॥ ६६ ॥ इति संक्षेपतः प्रोक्तस्तत्र श्राद्धविधिस्तव ॥ अथ ते कथयिष्यामि इतिहासं पुरातनम् ॥ ६७ ॥ वेनस्य राज्ञश्चरितं पृथोश्चैव महात्मनः ॥ यथा तत्राभवन्मुक्तिस्तस्य चांडालयोनितः ॥ तत्सर्वं शृणु देवेशि सम्यक्छ्रद्धासमान्विता ॥ ६८ ॥ पिशुनाय न पापाय नाशिष्यायाहिताय च ॥ कथनीयमिदं पुण्यं नाव्रताय कथंचन ॥ ६९ ॥ स्वर्ग्यं यशस्यमायुष्यं धन्यं वेदेन[३] संमितम् ॥ रहस्यमृषिभिः प्रोक्तं शृणुयाद्योऽनसूयकः ॥ ७० ॥ यश्चैनं श्रावयेन्मर्त्यः पृथोर्वैन्यस्य संभवम् ॥ ब्राह्मणेभ्यो नमस्कृत्वा न स शोचेत्कृता[४]ऽकृते ॥७१॥ गोप्ता धर्मस्य राजाऽसौ बभौ चात्रिसमप्रभः ॥ अत्रिवंशसमुत्पन्नो ह्यंगो नाम प्रजापतिः ॥ ७२ ॥ तस्य पुत्रोऽभवेद्वेनो नात्यर्थं धार्मिकस्तथा ॥ जातो मृत्युसुतायां वै सुनीथायां प्रजापतिः॥ ७३ ॥ स मातामहदोषेण तेन कालात्मकाननः ॥ स धर्मं पृष्ठतः कृत्वा पापबुद्धिरजायत ॥ ७४ ॥ स्थितिमुत्थापयामास धर्मोपेतां सनातनीम् ॥ वेदशास्त्राण्यतिक्रम्य ह्यधर्मनिरतोऽभवत् ॥ ७५ ॥ निःस्वाध्यायवषट्कारः प्रजास्तस्मिन्प्रशासति ॥ डिंडिमं घोषयामास स राजा विषये स्वके ॥ ७६ ॥ न दातव्यं न यष्टव्यं मयि राज्यं प्रशासति ॥ आसीत्प्रतिज्ञा क्रूरेयं विनाशे प्रत्युपस्थिते ॥ ७७ ॥ अहमीड्यश्च पूज्यश्च सर्वयज्ञैर्द्विजोत्तमैः ॥ मयि यज्ञा विधातव्या मयि होतव्यमित्यपि ॥७८॥ तमतिक्रांतमर्यादं प्रजापीडनतत्परम् ॥ ऊचुर्महर्षयः क्रुद्धा मरीचिप्रमुखास्तदा ॥७९॥ माऽधर्मं वेन कार्षीस्त्वं



१ यवदानात्—इ०पा० । २ श्राद्धपिंडप्रदः—श्राद्धपिंडप्रदस्य—पितॄन्—लोके—वैकुण्ठलोके विष्णुः—नेष्यति—इति योजना । ३ वेदेन संमितम्—वेदतुल्यम्—इत्यर्थः । ४ कृताकृते—शुभे कर्मणि—प्रमादवशेन साध्वननुष्ठिते—अशुभे कर्मणि च प्रमादवशेन संवृत्ते च—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नैष धर्मः सनातनः ॥ अत्रेर्वंशे प्रसूतोऽसि प्रजापतिरसंशयम् ॥ ८० ॥ पालयिष्ये प्रजाश्चेति [1]पूर्वं ते समयः कृतः ॥ तांस्तथावादिनः सर्वान्ब्रह्मर्षीन
ब्रवीत्तदा ॥ ८१ ॥ वेनः प्रहस्य दुर्बुद्धिरिदं वचनकोविदः ॥ स्रष्टा धर्मस्य कश्चान्यः श्रोतव्यं कस्य वा मया ॥ ८२ ॥ वीर्यश्रुततपःसत्यैर्मयान्यः
कः समो भुवि ॥ मदात्मानो न नूनं मां यूयं जानीथ तत्त्वतः ॥ ८३ ॥ प्रभवं सर्वलोकानां धर्माणां च विशेषतः॥ इत्थं देहेन पृथिवीं भावेन यज
नेन च ॥ ८४ ॥ सृजेयं च ग्रसेयं च नात्र कार्या विचारणा ॥ यदा न शक्यते स्तंभान्मत्तश्चैव विमोहितः ॥ ८५ ॥ अनुनेतुं नृपो वेनस्तत्र क्रुद्धा
महर्षयः ॥ आथर्वणेन मंत्रेण हत्वा तं ते महाबलम् ॥ ८६ ॥ ततोऽस्य वामबाहुं ते ममंथुर्भृशकोपिताः ॥ तस्माच्च मथ्यमानाद्वै जज्ञे पूर्वमिति
श्रुतिः ॥ ८७ ॥ ह्रस्वोऽतिमात्रः पुरुषः कृष्णश्चापि तदा प्रिये ॥ स भीतः प्राञ्जलिश्चैव तस्थिवान्संमुखे प्रिये ॥ ८८ ॥ तमार्त्तं विह्वलं दृष्ट्वा
निषीदेत्यब्रुवन्किल ॥ निषादो वंशकर्त्ता वै तेनाभूत्पृथुविक्रमः ॥ ८९ ॥ धीवरानसृजच्चापि वेनपापसमुद्भवान् ॥ ये चान्ये विन्ध्यनिलयास्तथा
वैतुंबराः खसाः ॥ ९० ॥ अधर्मे रुचयश्चापि [2]वर्द्धिता वेनपापजाः ॥ पुनर्महर्षयस्तेथ पाणिं वेनस्य दक्षिणम् ॥९१॥ अरणीमिव संरब्धा ममंथुर्जात
मन्यवः ॥ पृथुस्तस्मात्समुत्पन्नः कराज्ज्वलनसंनिभः ॥ ९२ ॥ पृथोः करतलाच्चापि यस्माज्जातस्ततः पृथुः ॥ दीप्यमानश्च वपुषा साक्षादग्निरिव
ज्वलन् ॥ ९३ ॥ धनुराजगवं गृह्य शरांश्चाशीविषोपमान् ॥ खड्गं च रक्षन्रक्षार्थं कवचं च महाप्रभम् ॥ ९४ ॥ तस्मिञ्जातेऽथ भूतानि संप्रहृष्टानि
सर्वशः ॥ संबभूवुर्महादेवि वेनश्च त्रिदिवं गतः ॥ ९५ ॥ ततो नद्यः समुद्राश्च रत्नान्यादाय सर्वशः ॥ अभिषेकाय ते सर्वे राजानमुपतस्थिरे ॥
॥ ९६ ॥ पितामहश्च भगवानृषिभिश्च सहामरैः ॥ स्थावराणि च भूतानि जंगमानि च सर्वशः ॥ ९७ ॥ समागम्य तदा वैन्यमभ्यषिंचन्नराधि
पम् ॥ सोऽभिषिक्तो महातेजा देवैरंगिरसादिभिः ॥ ९८ ॥ अधिराज्ये महाभागः पृथुर्वैन्यः प्रतापवान् ॥ पित्रा न रंजिताश्चास्य प्रजा वैन्येन
रंजिताः ॥ ९९ ॥ ततो राजेति नामास्य अनुरागादजायत ॥ आपः स्तस्तंभिरे चास्य समुद्रमभियास्यतः ॥ १०० ॥ पर्वताश्चापि शीर्यंते ध्वज
संगोऽपि नाऽभवत् ॥ अकृष्टपच्या पृथिवी सिध्यंत्यन्नानि चिंतया ॥ सर्वकामदुघा गावः पुटकेपुटके मधु ॥ १०१ ॥ तस्मिन्नेव तदा काले पुन
र्जज्ञेऽथ मागधः ॥ सामगेषु च गायत्सु स्रुग्भांडाद्वैश्वदेविकात् ॥ १०२ ॥ सामगेषु समुत्पन्नस्तस्मान्मगध उच्यते ॥ ऐंद्रेण हविषा चापि हविः पृक्तं
बृहस्पतिः ॥ १०३ ॥ यदा जुहाव चेंद्राय ततस्ततो व्यजायत ॥ प्रमादस्तत्र संजज्ञे प्रायश्चित्तं च कर्मसु ॥ १०४ ॥ शेषहव्येन यत्पृक्तमभिभूतं

१ पूर्वं ते समयः कृतः—पूर्वं—राज्याभिषेकसमये--समयः—प्रतिज्ञा कृता—इत्यर्थः । २ तेन--इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



गुरोर्हविः ॥ अधरोत्तरस्वारेण जज्ञे तद्वर्णवैकृतम् ॥१०५॥ यज्ञस्तस्यां समभवद्ब्राह्मण्यां क्षत्रयोनितः ॥ ततः पूर्वेण साधर्म्यात्तुल्यधर्माः प्रकीर्त्तिताः॥ ॥ १०६ ॥ मध्यमो ह्येष तत्त्वस्य धर्मः क्षत्रोपजीवनम् ॥ रथनागाश्वचरितं जघन्यं च चिकित्सितम् ॥ १०७ ॥ पृथोः कथार्थं तौ तत्र समाहूतौ महर्षिभिः ॥ तावूचुरृत्विजः सर्वे स्तूयतामिति पार्थिवः ॥ १०८ ॥ कर्मभिश्चानुरूपो हि यतोयं पृथिवीपतिः ॥ तानूचतुस्तदा सर्वानृषींश्च सूतमागधौ ॥ १०९ ॥ आवां देवानृषींश्चैव प्रीणयाव स्वकर्मभिः ॥ न चास्य विद्वो वै कर्म न तथा लक्षणं यशः ॥ ११० ॥ स्तोत्रं येनास्य संकुर्वो राज्ञस्तेजस्विनो द्विजाः ॥ ऋषिभिस्तौ नियुक्तौ तु भविष्यैः स्तूयतामिति ॥१११॥ यानि कर्माणि कृतवान्पृथुः पश्चान्महाबलः ॥ तानि गीतानि बद्धानि स्तुवद्भिः सूतमागधैः ॥ ११२ ॥ ततः श्रुतार्थः सुप्रीतः पृथुः प्रादात्प्रजेश्वरः ॥ अनूपदेशं सूताय मागधान्मागधाय च ॥ ११३ ॥ तदादि पृथिवीपालाः स्तूयन्ते सूतमागधैः ॥ आशीर्वादैः प्रशंस्यंते सूतमागधबंदिभिः ॥ ११४ ॥ तं दृष्ट्वा परमं प्रीताः प्रजा ऊचुर्महर्षयः ॥ एष वो वृत्तिदो वैन्यो विहितोऽथ नराधिपः ॥ ११५ ॥ ततो वैन्यं महाभागं प्रजाः समभिदुद्रुवुः ॥ त्वं नो वृत्तिविधातेति महर्षिवचनात्तथा ॥ ॥ ११६ ॥ सोऽभीहितः प्रजाभिस्तु प्रजाहितचिकीर्षया ॥ धनुर्गृहीत्वा बाणांश्च वसुधामार्दयद्बली ॥ ११७ ॥ ततो वैन्यभयत्रस्ता गौर्भूत्वा प्राद्रवन्मही ॥ तां धेनुं पृथुरादाय द्रवन्तीमन्वधावत ॥ ११८ ॥ सा लोकान्ब्रह्मलोकादीन्गत्वा वैन्यभयात्तदा ॥ ददर्श चाग्रतो वैन्यं कार्मुकोद्यतपाणिनम् ॥ ११९ ॥ ज्वलद्भिर्विशिखैस्तीक्ष्णैर्दीप्ततेजःसमन्वितैः ॥ महायोगं महात्मानं दुर्द्धर्षममरैरपि ॥ १२० ॥ अलभंती तु सा त्राणं वैन्यमेवाभ्यपद्यत ॥ कृतांजलिपुटा देवी पूज्या लोकैस्त्रिभिस्सदा ॥१२१॥ उवाच चैनं नाधर्म्यं स्त्रीवधं परिपश्यसि ॥ कथं धारयिता चासि प्रजा राजन्मया विना ॥ १२२ ॥ मयि लोकाः स्थिता राजन्मयेदं धार्यते जगत् ॥ मदृते तु विनश्येयुः प्रजाः पार्थिव विद्धि तत् ॥ १२३ ॥ स मां नार्हसि हंतुं वै श्रेयश्चेत्त्वं चिकीर्षसि ॥ प्रजानां पृथिवीपाल शृणुष्वेदं वचो मम ॥१२४॥ उपायतः समारब्धाः सर्वे सिध्यंत्युपक्रमाः ॥ हत्वा मां त्वं न शक्तो वै प्रजाः पालयितुं नृप ॥ १२५ ॥ अनुकूला भविष्यामि त्यज कोपं महाद्युते ॥ अवध्याश्च स्त्रियः प्राहुस्तिर्यग्योनिगता अपि ॥ ॥१२६॥ एकस्मिन्निधनं प्राप्ते पापिष्ठे क्रूरकर्मणि ॥ बहूनां भवति क्षेमस्तत्र पुण्यप्रदो वधः ॥ सत्येवं पृथिवीपाल धर्म्मं मा त्यक्तुमर्हसि ॥१२७॥ एवंविधं तु तद्वाक्यं श्रुत्वा राजा महाबलः ॥ क्रोधं निगृह्य धर्मात्मा वसुधामिदमब्रवीत ॥ १२८ ॥ एकस्यार्थे च यो हन्यादात्मनो वा परस्य



१ अधरोत्तरस्वारेण—उदात्तानुदात्तस्वरयोर्व्यस्तसमुच्चारणेन—इत्यर्थः । २ अनभूर्ता—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वा ॥ एकं वापि बहून्वापि कामतश्चास्ति पातकम् ॥ १२९ ॥ यस्मिंस्तु निधनं प्राप्ता एधन्ते बहवः सुखम् ॥ तस्मिन्हते च भूयो हि पातकं नास्ति तस्य वै ॥ १३० ॥ सोऽहं प्रजानिमित्तं त्वां हनिष्यामि वसुन्धरे ॥ यदि मे वचनं नाद्य करिष्यसि जगद्धितम् ॥ १३१ ॥ त्वां निहत्याद्य बाणेन मच्छासनपराङ्मुखीम् ॥ आत्मानं पृथुकृत्वेह प्रजा धारयितास्म्यहम् ॥१३२॥ सा त्वं वचनमास्थाय मम धर्मभृतां वरे ॥ सञ्जीवय प्रजा नित्यं शक्ता ह्यसि न संशयः ॥ १३३ ॥ दुहितृत्वं हि मे गच्छ एवमेतन्महच्छरम् ॥ नियच्छे त्वद्वधार्थं च प्रयुक्तं घोरदर्शनम् ॥ प्रत्युवाच ततो वैन्यमेवमुक्ता महासती ॥ १३४ ॥ सर्वमेतदहं राजन्विधास्यामि न संशयः ॥ वत्सं तु मम संयुंक्ष्व[1] क्षरेयं येन वत्सला ॥ १३५ ॥ समां च कुरु सर्वत्र मां त्वं सर्वभृतां वर ॥ यथा विस्यन्दमानाहं क्षीरं सर्वत्र भावये ॥१३६॥ ॥ ईश्वर उवाच ॥ ॥ तत उत्सारयामास शिलाजालानि सर्वशः ॥ धनुष्कोट्या ततो वैन्यस्तेन शैला विवर्द्धिताः ॥१३७॥ मन्वंतरेष्वतीतेषु चैवमासीद्वसुन्धरा ॥ स्वभावेनाभवत्तस्याः समानि विषमाणि च ॥१३८॥ न हि पूर्वनिसर्गे वै विषमं पृथिवीतलम् ॥ प्रविभागः पुराणां च ग्रामाणां चाथ विद्यते ॥ १३९ ॥ न सस्यानि न गोरक्षं न कृषिर्न वणिक्पथः ॥ १४० ॥ चाक्षुषस्यांतरे पूर्वमासीदेतत्पुरा किल ॥ वैवस्वतेऽन्तरे चास्मिन्सर्वस्यैतस्य संभवः ॥ समत्वं यत्रयत्रासीद्भूमेः कस्मिंश्चिदेव हि॥१४१॥ तत्रतत्र प्रजास्ता वै निवसन्ति स्म सर्वदा ॥ आहारः फलमूलं तु प्रजानामभवत्किल ॥ १४२ ॥ कृच्छ्रेणैव तदा तासामित्येवमनुशुश्रुम ॥ वैन्यात्प्रभृति लोकेऽस्मिन्सर्वस्यैतस्य संभवः ॥१४३॥ संकल्पयित्वा वत्सं तु चाक्षुषं मनुमीश्वरम् ॥ पृथुर्दुदोह सस्यानि स्वहस्ते पृथिवीं ततः ॥१४४॥ सस्यानि तेन दुग्धा वै वैन्येनेयं वसुन्धरा ॥ मनुं वै चाक्षुषं कृत्वा वत्सं पात्रे च भूमये[2] ॥ १४५ ॥ तेनान्नेन तदा ता वै वर्त्तयन्ते सदा प्रजाः ॥ ऋषिभिः श्रूयते चापि पुनर्दुग्धा वसुन्धरा ॥१४६॥ वत्सः सोमस्ततस्तेषां दोग्धा चापि बृहस्पतिः ॥ पात्रमासन्हि च्छन्दांसि गायत्र्यादीनि सर्वशः ॥ १४७ ॥ क्षीरमासीत्तदा तेषां तपो ब्रह्म च शाश्वतम् ॥ पुनस्ततो देवगणैः पुरंदरपुरोगमैः ॥ १४८ ॥ सौवर्णं पात्रमादाय दुग्धेयं श्रूयते[3] मही ॥ वत्सस्तु मघवा चासीद्दोग्धा च सविताऽभवत् ॥ १४९ ॥ क्षीरमूर्जामधु प्रोक्तं वर्तते तेन देवताः ॥ पितृभिः श्रूयते चापि पुनर्दुग्धा वसुन्धरा ॥ १५० ॥ राजतं पात्रमादाय स्वधा त्वक्षय्यतृप्तये ॥ वैवस्वतो यमस्त्वासीत्तेषां वत्सः प्रतापवान् ॥ १५१ ॥ अंतकश्चाभवद्दोग्धा पितॄणां भगवान्प्रभुः ॥ असुरैः श्रूयते चापि पुनर्दुग्धा वसुन्धरा ॥ १५२ ॥ आयसं पात्रमादाय बलमाधाय सर्वशः ॥ विरोचनस्तु प्राह्लादिस्तेषां वत्सः प्रताप

१ संयुङ्क्ष्व--संयोजय--इत्यर्थः । २ मृन्मये--इ० पा० । ३ स्रवत--इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





वान् ॥ १५३ ॥ ऋत्विग्द्विमूर्द्धा दैत्यानां दोग्धा तु दितिनन्दनः ॥ मायाक्षीरं दुदोहासौ दैत्यानां तृप्तिकारकम् ॥ १५४ ॥ तेनैते मायया ऽद्यापि
सर्वे मायाविदोऽसुराः ॥ वर्त्तयंति महावीर्यास्तदेतेषां परं बलम् ॥ १५५ ॥ नागैश्च श्रूयते दुग्धा वत्सं कृत्वा तु तक्षकम् ॥ अलाबुपात्रमादाय विषं
क्षीरं तदा महत् ॥ १५६ ॥ तेषां वै वासुकिर्दोग्धा काद्रवेयो महायशाः ॥ नागानां वै महादेवि सर्पाणां चैव सर्वशः ॥१५७॥ तेन वै वर्त्तयन्त्युग्रा
महाकाया विषोल्बणाः ॥ तदाहारास्तदाचारास्तद्वीर्यास्तदपाश्रयाः ॥ १५८ ॥ आमपात्रे पुनर्दुग्धा त्वंतर्द्धानमियं मही ॥ वत्सं वैश्रवणं कृत्वा
यक्षपुण्यजनैस्तथा ॥ १५९ ॥ दोग्धा रजतनागस्तु चिन्तामणिचरस्तु यः ॥ यक्षाधिपो महातेजा वशी ज्ञानी महातपाः ॥ १६० ॥ तेन ते वर्त्तयं
तीति यक्षा वसुभिरूर्जितैः ॥ राक्षसैश्च पिशाचैश्च पुनर्दुग्धा वसुन्धरा ॥ १६१ ॥ ब्रह्मोपेन्द्रस्तु दोग्धा वै तेषामासीत्कुबेरतः ॥ वत्सः सुमाली
बलवान्क्षीरं रुधिरमेव च ॥१६२॥ कपालपात्रे निर्दुग्धा त्वंतर्द्धानं तु राक्षसैः ॥ तेन क्षीरेण रक्षांसि वर्त्तयन्तीह सर्वशः ॥१६३॥ पद्मपत्रेषु वै दुग्धा
गंधर्वाप्सरसां गणैः ॥ वत्सं चैत्ररथं कृत्वा शुचिगन्धान्मही तदा ॥ १६४ ॥ तेषां वत्सो रुचिस्त्वासीद्दोग्धा पुत्रो मुनेः शुभः ॥ शैलैस्तु श्रूयते देवि
पुनर्दुग्धा वसुंधरा ॥ १६५ ॥ तदौषधीर्मूर्तिमती रत्नानि विविधानि च ॥ वत्सस्तु हिमवांस्तेषां दोग्धा मेरुर्महागिरिः ॥ १६६ ॥ पात्रं शिलामयं
ह्यासीत्तेन शैलाः प्रतिष्ठिताः ॥ श्रूयते वृक्षवीरुद्भिः पुनर्दुग्धा वसुन्धरा ॥ १६७ ॥ पालाशं पात्रमादाय च्छिन्नदग्धप्ररोहणम् ॥ दोग्धा तु पुष्पितः
शालः प्लक्षो वत्सो यशस्विनि ॥ सर्वकामदुघा दोग्धा पृथिवी भूतभाविनी ॥ १६८ ॥ सैषा धात्री विधात्री च धरणी च वसुन्धरा ॥ दुग्धा
हितार्थं लोकानां पृथुना इति नः श्रुतम् ॥ १६९ ॥ चराचरस्य लोकस्य प्रतिष्ठा योनिरेव च ॥ आसीदियं समुद्रांता मेदिनीति परिश्रुता॥१७०॥
मधुकैटभयोः पूर्वं मेदोमांसपरिप्लुता ॥ वसुन्धारयते यस्माद्वसुधा तेन कीर्तिता ॥ १७१ ॥ ततोऽभ्युपगमाद्राज्ञः पृथोर्वैन्यस्य धीमतः ॥ दुहितृत्व
मनुप्राप्ता पृथिवीत्युच्यते ततः ॥ १७२ ॥ प्रथिता प्रविभक्ता च शोभिता च वसुन्धरा ॥ दुग्धा हि[1] यत्नतो राज्ञा पत्तनाकरमालिनी ॥ १७३ ॥
एवंप्रभावो राजासीद्वैन्यः स नृपसत्तमः ॥ ततः स रंजयामास धर्मेण पृथिवीं तदा ॥ १७४ ॥ ततो राजेतिशब्दोऽथ पृथिव्यां रंजनादभूत् ॥ ॥१८७॥
स राज्यं प्राप्य वैन्यस्तु चिंतयामास पार्थिवः ॥ १७५ ॥ पिता मम ह्यधर्मिष्ठो यज्ञाद्युच्छित्तिकारकः ॥ कस्मिन्स्थाने गतश्चासौ ज्ञेयं स्थानं
कथं मया ॥ १७६ ॥ कथं तस्य क्रिया कार्या हतस्य ब्राह्मणैः किल ॥ कथं गतिर्भवेत्तस्य यज्ञदानक्रियाबलात् ॥ १७७ ॥ इत्येवं चिंतया

१ हिरवती–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नस्य नारदोभ्याजगाम ह ॥ तस्यैवमासनं दत्त्वा प्रणिपत्य च पृष्टवान् ॥ १७८ ॥ भगवन्सर्वलोकस्य जानासि त्वं शुभाशुभम् ॥ पिता मम दुराचारो देवब्राह्मणनिंदकः ॥ १७९ ॥ स्वकर्मणा हतो विप्रैः परलोकमवाप्तवान् ॥ कस्मिंस्थाने गतस्तातः श्वभ्रं[1] वा स्वर्गमेव च ॥ १८० ॥ ततोऽब्रवीन्नारदस्तु ज्ञात्वा दिव्येन चक्षुषा ॥ शृणु राजन्महाबाहो यत्र तिष्ठति ते पिता ॥ १८१ ॥ अत्र[2] देशो मरुर्नाम जलवृक्षविवर्जितः ॥ तत्र देशे महारौद्रे जनकस्ते नरोत्तम ॥ १८२ ॥ म्लेच्छमध्ये समुत्पन्नो यक्ष्मी कुष्ठसमन्वितः ॥ उच्छिष्टभोजी म्लेच्छानां कृमिभिः संयुतो व्रणैः ॥ ॥ १८३ ॥ तच्छ्रुत्वा वचनं तस्य नारदस्य महात्मनः ॥ हाहाकारं ततः कृत्वा मूर्छितो निपपात ह ॥१८४ ॥ चिंतयामास दुःखार्तः कथं कार्यं मया भवेत् ॥ इत्येवं चिंतयानस्य मतिर्जाता महात्मनः ॥ पुत्रः स कथ्यते लोके पितरं त्रायते तु यः ॥ १८५ ॥ स कथं तु मया तातः पापान्मुक्तो भविष्यति ॥ एवं संचिंत्य स ततो नारदं पर्यपृच्छत ॥ १८६ ॥ भगवन्कथितं सर्वं पितुर्मम विचेष्टितम् ॥ केन तस्य भवेन्मुक्तिः कर्मणा द्विज सत्तम ॥ व्रतैर्दानैस्तपोभिर्वा तीर्थानां यात्रया वद ॥ १८७ ॥ ॥ नारद उवाच ॥ ॥ गच्छ राजन्प्रधानानि तीर्थानि मनुजेश्वर ॥ पितरं तेषु चानीय तस्माद्राजन्मरुस्थलात् ॥ १८८ ॥ यत्र देवाः सप्रभावास्तीर्थानि विमलानि च ॥ तत्र गच्छ महाराज तीर्थयात्रां कुरु प्रभो ॥ १८९ ॥ एवं ह्यवितथं विद्धि मोक्षस्ते भविता पितुः ॥ तच्छ्रुत्वा वचनं राजा नारदस्य महात्मनः ॥ सचिवे भारमाधाय स्वराजस्य जगाम ह ॥ १९० ॥ स गत्वा मरुभूमिं तु म्लेच्छमध्ये ददर्श ह ॥ कुष्ठरोगेण महता क्षयेण च समावृत्तम् ॥ १९१ ॥ गव्यूतिमात्रं तत्रैव शून्यं मानुषवर्जितम् ॥ एवं दृष्ट्वा स राजा तु संततो वाक्यमब्रवीत् ॥ १९२ ॥ हे म्लेच्छ रोगिपुरुषं स्वगृहं च नयाम्यहम् ॥ तत्राहमेनं निरुजं[3] करोमि यदि मन्यथ ॥ १९३ ॥ ज्ञात्वेति सर्वे ते म्लेच्छाः पुरुषं तं दयापरम् ॥ ऊचुः प्रणतसर्वांगाः शीघ्रं नय जगत्पते ॥ अस्मद्भाग्यवशान्नाथ त्वमेवात्र समागतः ॥ १९४ ॥ दुर्गंधोपहता लोकास्त्वया नाथ सुखीकृताः ॥ तत आनाय्य पुरुषाञ्छिबिकावाहनोचितान् ॥ १९५ ॥ ततः श्रुत्वा तु वचनं तस्य राज्ञो दयावहम् ॥ प्रापुस्तीर्थान्यनेकानि केदारादीनि कोटिशः ॥ १९६ ॥ यत्रयत्र स गच्छेत वैन्यो वेनेन संयुतः ॥ तत्र तत्रैव तीर्थानामाक्रंदः श्रूयते महान् ॥ ॥ १९७ ॥ हा दैव रिपुरायाति अस्माकं नाशहेतवे ॥ अधुना क्व गमिष्याम इति चिंता पुनःपुनः॥१९८॥ दर्शनेनापि तस्यैव हाहाकारं विधाय वै॥ पलायंते च तीर्थानि देवा नश्यंति तत्क्षणात् ॥१९९॥ एवं वर्षत्रयं राजा तीर्थयात्रां चकार वै ॥ न तस्य मुक्तिर्ददृशे ततः शोकमगात्परम् ॥२००॥

१ श्वभ्रम्—गर्भरूपं नरकम्—इत्यर्थः। २ अत्र—भूतले—इत्यर्थः। ३ निरुजम्—नीरुजम्—रोगराहितम्—इत्यर्थः। दीर्घाभाव आर्षः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ततस्तु प्रेरिता भृत्याः कुरुक्षेत्रे महाप्रभे ॥ यदि वापि पुनस्तत्र पापमुक्तिर्भवेत्ततः ॥ २०१ ॥ गृहीत्वा शिबिकां स्कन्धे कुरुक्षेत्रे गताः प्रिये ॥ तत्र नीत्वा स्थाणुतीर्थमवतार्य च ते गताः ॥ २०२ ॥ ततः स राजा मध्याह्ने चिकीर्षुः स्नानमादरात् ॥ तस्यैव तु पितुस्तत्र तथा दानानि षोडश ॥ २०३ ॥ ब्राह्मणेभ्यस्तथा दित्सुः श्रद्धावान्भावतत्परः ॥ ततो वायुश्चांतरिक्ष इदं वचनमब्रवीत् ॥ २०४ ॥ मा तात साहसं कुर्यास्तीर्थं रक्ष प्रयत्नतः ॥ अयं पापेन[1] घोरेण समंतात्परिवेष्टितः ॥ २०५ ॥ वेदनिन्दासमाचारो ब्रह्महत्याशतैर्युतः ॥ सोऽयं पापो दुराचारस्तीर्थं नाशं नयिष्यति ॥ २०६ ॥ मा तीर्थं नाशय विभो महदेनो भविष्यति ॥ एतद्वायोर्वचः श्रुत्वा दुःखेन महतार्दितः ॥ उवाच शोकसंतप्तः पितुर्दुःखेन दुःखितः ॥ २०७ ॥ हा दैवेति च चुक्रोश ऊर्द्ध्वबाहुः पुनःपुनः ॥ एष घोरेण पापेन अतीव परिवेष्टितः ॥ २०८ ॥ यदनेनापि तीर्थेन शुद्धः कर्त्तुं न शक्यते ॥ प्रायश्चित्तं करिष्येऽहं पितुरर्थे न संशयः ॥ २०९ ॥ एवं तस्य वचः श्रुत्वा दयां कृत्वा महीयसीम् ॥ अन्तरिक्षभवां वाचं खेचराः पुनरब्रुवन् ॥ २१० ॥ भोभो राजन्नृपश्रेष्ठ त्यक्त्वा शोकं वचः शृणु ॥ येन ते जनकस्यास्य भवेत्पापक्षयो महान् ॥ २११ ॥ अस्ति क्षेत्रं महासिद्धं प्रभासमिति विश्रुतम् ॥ सर्वपापप्रशमनं महापातकनाशनम् ॥ २१२ ॥ ब्रह्मतत्त्वं हरितत्त्वं रुद्रतत्त्वं तृतीयकम् ॥ तस्मिन्नेव महाक्षेत्रे प्रभासे शंकरप्रिये ॥ २१३ ॥ शाक्तेयं यदि वा चांद्रं सौरं सारस्वतं तथा ॥ आग्नेयं वारुणं चापि स्मृतं क्षेत्रमनुत्तमम् ॥ २१४ ॥ ब्रह्माण्डे यानि तीर्थानि पुरा क्षेत्राणि यानि तु ॥ प्रभासमागमिष्यन्ति संप्राप्ते तु कलौ युगे ॥ २१५ ॥ अष्टौ कोटिसहस्राणि अष्टौ कोटिशतानि च ॥ क्षेत्रं रक्षंति तत्रस्थाः प्रभासं शांकरा गणाः ॥ २१६ ॥ इयं सरस्वती पुण्या सर्वत्रैव हि विद्यते ॥ पञ्चस्रोताः प्रभासे तु दुष्प्राप्या त्रिदशैरपि ॥ २१७ ॥ तस्या यत्पञ्चमं स्रोतन्यंकुमत्यास्तटानि च ॥ तस्य मध्ये स्थितं तीर्थं गोष्पदेति च विश्रुतम् ॥ २१८ ॥ तत्र प्रेतशिला मध्ये प्रेतानां मुक्तिदायिका ॥ यत्र प्रेताः पुरा मुक्ता अष्टाविंशतिकोटयः ॥ २१९ ॥ पापिनां मुक्तिदं तीर्थमाद्या रुद्रगया स्मृता ॥ तदस्मिन्गोष्पदंनाम कलौ ख्यातं धरातले ॥ २२० ॥ यदा क्षीरोदमथनान्निःसृता लोकमातरः ॥ तदा देवैः समेतास्तु आगतास्तीर्थसन्निधौ ॥ २२१ ॥ पदं तत्र निमग्नं च नन्दायाश्च शिलातले ॥ शिलां खुरांकितां दृष्ट्वा जानुदेशांकितां तथा ॥ २२२ ॥ विस्मिताः सर्वदेवा वै पप्रच्छुर्गां च नन्दिनीम् ॥ किमेतद्दृश्यते देवि पदं प्रेतशिलातले ॥ कथं तु खेदः सञ्जातश्चास्माकं स्खलनं कथम् ॥ २२३ ॥ ॥ नन्दिन्युवाच ॥ ॥ इदं मम पदं देवाः

१ शापेन—इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

शिलासंस्थं विराजते ॥ गगनांगणभूमिस्थं चन्द्रबिंबमिवापरम् ॥ २२४ ॥ अद्यप्रभृति भो देवास्त्रैलोक्ये सचराचरे ॥ गोष्पदंनाम विख्यातं लोके ख्यातिं गमिष्यति ॥ २२५ ॥ अत्रागत्य नरो यस्तु स्नानं श्राद्धं करिष्यति ॥ गयासप्तगुणं तस्य फलं देवा भविष्यति ॥ २२६ ॥ न वारो न च नक्षत्रं न कालस्तत्र कारणम् ॥ यदैव दृश्यते तीर्थं तदा पर्वसहस्रकम् ॥ २२७ ॥ अथवा पर्वकांक्षा चेत्तानि मे शृणु पार्वति ॥ अयने विषुवे युग्मे सामान्ये चार्कसंक्रमे ॥ २२८ ॥ अमावास्याष्टकायां च कृष्णपक्षे विशेषतः ॥ आर्द्रामघारोहिणीषु द्रव्यब्राह्मणसंगमे ॥ २२९ ॥ गजच्छाया व्यतीपाते वैधृते धृतचामरे ॥ वैशाखस्य तृतीयायां नवम्यां कार्तिकस्य तु ॥ २३० ॥ पञ्चदश्यां च माघस्य नभस्ये च त्रयोदशीम् ॥ युगादयः स्मृता ह्येतास्तस्मिन्काले च वा पुनः ॥ २३१ ॥ मन्वन्तरादौ कार्यं च तत्र श्राद्धं विजानता ॥ आश्वयुक्छुक्लनवमी द्वादशी कार्तिके तथा ॥२३२॥ तृतीया चैत्रमासस्य तथा भाद्रपदस्य च ॥ फाल्गुनस्य त्वमावास्या पौषस्यैकादशी तथा ॥ २३३ ॥ आषाढस्यापि दशमी माघमासस्य सप्तमी ॥ श्रावणस्याष्टमी कृष्णा तथाऽऽषाढी च पूर्णिमा ॥ २३४ ॥ कार्तिकी फाल्गुनी चैव ज्येष्ठी पञ्चदशी तथा ॥ मन्वन्तरादयश्चैता दत्तस्या क्षयकारिकाः ॥ २३५ ॥ वैशाखस्य तृतीया यां कृष्णा यां फाल्गुनस्य च ॥ पञ्चमी चैत्रमासस्य तस्यैवांत्या तथा परा ॥ २३६ ॥ शुक्ला त्रयोदशी माघे कार्तिकस्य तु सप्तमी ॥ नवमी मार्गशीर्षस्य सप्तैताः कल्पकादिमाः ॥ २३७ ॥ कल्पतृप्तिर्भवेच्छ्राद्धे कल्पादौ तु कृते पुरा ॥ इत्येव मुक्त्वा सा नन्दा देवानां प्रति नन्दिनी ॥ अन्तर्द्धानं जगामाशु दीपो वातहतो यथा ॥२३८॥ इतीदं कौतुकं दृष्ट्वा सर्वे देवाः सवासवाः ॥ ब्रह्मर्षयो देवर्षयः श्लोकं पौराणिकं जगुः ॥ २३९ ॥ अहो तीर्थस्य माहात्म्यं नन्दायास्तपसो बलम् ॥ सकृच्छ्राद्धेन दत्तेन गयासप्तगुणं फलम् ॥ २४० ॥ एवमुक्त्वा ततो देवाश्चक्रुः श्राद्धादिकां क्रियाम् ॥ यथोक्तं फलमापुस्ते नन्दिन्या पूर्वभाषितम् ॥ २४१ ॥ इत्थं त्वमपि राजेन्द्र गच्छ शीघ्रं हि गोष्पदम् ॥ तत्र श्राद्धादिकं कृत्वा लप्स्यसे फलमीप्सितम् ॥ २४२ ॥ अयं ते जनको राजन्पापिनां प्रवरः स्मृतः ॥ नान्यैस्तीर्थशतैः शक्यः प्रोद्धर्तुं गोष्पदं विना ॥ २४३ ॥ तस्माद्व्रज महाराज मा कार्षीस्त्वं विलंबनम् ॥ एवं श्रुत्वा तदा राजा प्रभासं क्षेत्रमागतः ॥२४४॥ तत्र स्थानस्थितान्विप्रांस्तीर्थमाहात्म्यकोविदान् ॥ अग्रेकृत्य महाराजो ययौ न्यंकुमतीं नदीम् ॥ २४५ ॥ ते राज्ञो दर्शितं तीर्थं पदं प्रेतशिलास्थितम् ॥ तद्दृष्ट्वा विमलं तीर्थं विस्मयोत्फुल्ललोचनः ॥ चक्रे कुण्डानि वेदीश्च मण्डपान्यज्ञसिद्धये ॥ २४६ ॥ ततो यज्ञः समारब्धो विधिवद्भूरिदक्षिणः ॥ प्रत्यक्षं पितरस्तस्य बभूवुर्ज्वलनप्रभाः ॥ २४७ ॥ ततः श्रद्धां समास्थाय श्राद्धैर्यज्ञैर्महोदयम् ॥ ते चाब्रुवन्वचस्तुष्टाः पितरो राजसत्तमम् ॥ २४८ ॥ धन्योऽसि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





राजन्पुण्योऽसि वयं धन्यतरास्त्वया ॥ यदत्र तीर्थे श्राद्धेन उद्धृता भवता वयम् ॥ २४९ ॥ एवमुक्त्वा ततः सर्वे वेनेन पितरः सह ॥ विमानवरसं
स्थाश्च जग्मुस्ते त्रिदिवालयम् ॥ २५० ॥ गच्छन्नुवाच वेनस्तं राजानं पृथुवक्षसम् ॥ राजञ्जन्मानि चत्वारि अभूवं चान्यजन्मनि ॥ २५१ ॥
कुष्ठी पापो दुराचारश्चांडालोच्छिष्टभुक्तथा ॥ सोऽहं पापविनिर्मुक्तो गच्छामि त्रिदिवालयम् ॥ २५२ ॥ तद्गच्छ त्वं महाभाग राज्यं भुंक्ष्व चिराय
च ॥ कृतं ते सकलं कार्यं पुत्रेण क्रियते च यत् ॥ २५३ ॥ एवं श्रुत्वा तदा राजा मुमुदे ज्ञातिसंयुतः ॥ ब्राह्मणान्हर्षयामास दानैर्भूकांचनादिभिः
॥ २५४ ॥ न तदस्ति जगत्यस्मिंस्तत्र यन्न ददौ नृपः ॥ दृष्ट्वा प्रभावं तीर्थस्य प्रत्यक्षं पितृदर्शनम् ॥२५५॥ एवं राजा स कृत्वा तु स्वकीयं स्थान
माययौ ॥ भुक्त्वा भूमिं तु सकलां प्रेत्य स्वर्गं समाप्तवान् ॥ २५६ ॥ एवंप्रभावं तत्क्षेत्रं प्रभासं पापनाशनम् ॥ यस्मिन्नायांति तीर्थानि देवास्तिष्ठंति
कोटिशः ॥ २५७ ॥ प्रभासं क्षेत्रमासाद्य योन्यत्तीर्थं हि मार्गते ॥ स करस्थं समुत्सृज्य कूर्परेण समालिहेत् ॥ २५८ ॥ अब्रुवन्पितरश्चैनां गाथां
पौराणिकीं प्रिये ॥ गयां गंतुं न शक्नोति यदि पुत्रः कथंचन ॥ तदा यत्नेन गंतव्यं गोष्पदं तीर्थमुत्तमम् ॥ २५९ ॥ कन्दैर्मूलैः फलैर्वापि पिण्याकैं
गुदकेन वा ॥ अपि नः स कुले भूयाद्योऽत्र श्राद्धं प्रदास्यति ॥ २६० ॥ तत्र स्नात्वा प्रयत्नेन ब्राह्मणान्वेदवित्तमान् ॥ आमंत्र्य विधिवच्छ्राद्धे
भोजयित्वा प्रयत्नतः ॥ पिंडदानं तु कर्त्तव्यं पितॄणां तृप्तिमिच्छताम् ॥२६१॥ न तिथिर्न च नक्षत्रं पर्व मासादिकं न हि ॥ सर्वदा तत्र गंतव्यं श्रद्धा
युक्तेन चेतसा ॥ २६२ ॥ न कालनियमस्तत्र प्रमाणं दर्शनं यतः ॥ तत्राक्षयतृतीयायां दुर्लभं गमनं प्रिये ॥ २६३ ॥ कार्त्तिक्यां माघसप्तम्यां
पञ्चके वाऽथ पर्वणि ॥२६४॥ हिरण्यदानं गोदानं वस्त्रं रूप्यं घृतं तिलाः ॥ दातव्यास्तत्र युक्तेन पितॄणां तृप्तिमिच्छता ॥ २६५ ॥ एवं ते कथितं
देवि तीर्थगुह्यं महोदयम् ॥ न कथ्यं दुष्टबुद्धीनां पापिनां क्रूरचेतसाम् ॥२६६॥ श्रद्धायुक्ताय दातव्यं पितृभक्तिरताय च ॥ श्राद्धकाले विशेषेण पठे
द्भक्त्या पुराणवित् ॥ २६७ ॥ पितॄणां जायते तृप्तिस्तेन द्वादशवार्षिकी ॥ श्रोतव्यं प्रयतैर्नित्यं नरैर्नरकभीरुभिः ॥ पठितव्यं सदा भक्त्या विप्राणां
भुंजतां पुरः ॥ २६८ ॥ पानीयमप्यत्र तिलैर्विमिश्रं दद्यात्पितृभ्यः प्रयतो मनुष्यः ॥ श्राद्धं कृतं तेन समासहस्रं रहस्यमेतत्पितरो वदंति ॥२६९॥ 
इदं रहस्यं यशसो निधानमिदं पितॄणामतिवल्लभं च ॥ इदं च वेदेष्वमृताय नित्यमिदं महापापहरं च पुंसाम् ॥ २७० ॥ इति श्रीस्कांदे महापुराण
एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये न्यंकुमतीनदीमाहात्म्ये गोष्पदतीर्थमाहात्म्यवर्णनंनाम षट्त्रिंशदुत्तर

१ महाराज-इ० पा० । २ स्तुतिं तु-इ०पा० । ३:क्रूरकर्मणाम्-इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिशततमोऽध्यायः ॥ ३३६ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि नारायणगृहं परम् ॥ गोष्पदाद्दक्षिणे भागे सागरस्य तटे शुभे ॥ १ ॥ न्यंकुमत्याः समीपे तु सर्वपातकनाशने ॥ तत्र कल्पांतरस्थायी स्वयं तिष्ठति केशवः ॥ २ ॥ पितॄणामुद्धरणार्थाय ह्यस्मिन्रौद्रे कलौ युगे ॥ यदा दैत्यविनाशं स कुरुते भगवान्हरिः ॥ ३ ॥ विश्रामार्थं तदा तत्र गृहे तिष्ठति नित्यशः ॥ नारायणगृहं तेन विख्यातं जगतीतले ॥ ४ ॥ कृते जनार्दनोनाम त्रेतायां मधुसूदनः ॥ द्वापरे पुण्डरीकाक्षः कलौ नारायणः स्मृतः ॥ ५ ॥ एवं चतुर्युगे प्राप्ते पुनःपुनररिन्दम ॥ कृत्वा धर्मव्य वस्थानं तत्स्थानं प्रतिपद्यते ॥ ६ ॥ एकादश्यां निराहारो यस्तं देवं प्रपश्यति ॥ स पश्यति ध्रुवं स्थाने प्रेत्यानन्तं हरेः पदम् ॥ ७ ॥ तेन पीतानि वस्त्राणि देयानि द्विजपुंगवे ॥ स्नानं श्राद्धं च कर्तव्यं सम्यग्यात्राफलेप्सुभिः ॥ ८ ॥ इति ते कथितं महाप्रभावं हरिसंकेतनिकेतनोद्भवम् ॥ शृणुते वा प्रयतस्तु यः सुधीः पठते वा लभते स सद्गतिम् ॥ ९ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये न्यंकुमतीमाहात्म्ये नारायणगृहमाहात्म्यवर्णनंनाम सप्तत्रिंशदुत्तरत्रिशततमोऽध्यायः ॥ ३३७ ॥ ॥ छ ॥ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि देविकातटसंस्थितम् ॥ जालेश्वरेति विख्यातं सुरासुरनमस्कृतम् ॥ १ ॥ मन्वन्तरे चाक्षुषे च सम्प्राप्ते द्वापरे युगे ॥ नाम्ना जालेश्वरं लिंगं देविकातटसंस्थितम् ॥ २ ॥ पूज्यते नागकन्याभिर्न तत्पश्यंति मानवाः ॥ महा तेजोमणिमयं चंद्रबिंबसमप्रभम् ॥ स्मरणात्तस्य देवस्य ब्रह्महत्या प्रणश्यति ॥ ३ ॥ ॥ देव्युवाच ॥ ॥ कथं जालेश्वरंनाम कस्मिन्काले बभूव तत् ॥ ४ ॥ साधुभिः सह संवासात्के गुणाः परिकीर्त्तिताः ॥ के लोकाः कानि पुण्यानि तत्सर्वं शंस मे प्रभो ॥ ५ ॥ ॥ ईश्वर उवाच ॥ ॥ अत्रैवोदाहरंतीममितिहासं पुरातनम् ॥ नाभागस्य च संवादमापस्तंबतपोनिधेः ॥ ६ ॥ महर्षिरात्मवान्पूर्वमापस्तंबो द्विजाग्रणीः ॥ उपावसन्सदा[1] रम्भो बभूव भगवांस्तदा ॥ ७ ॥ नित्यं क्रोधं च लोभं च मोहं द्रोहं विसृज्य सः ॥ देविकासरितो मध्ये विवेश सलिलाशये ॥ ८ ॥ क्षेत्रे प्राभासिके रम्ये सम्यग्ज्ञात्वा शिवप्रिये ॥ तत्रास्य वसतः कालः समतीतो महांस्तदा ॥ ९ ॥ परेण ध्यानयोगेन स्थाणुभूतस्य तिष्ठतः ॥ ततः कदाचिदागत्य तं देशं मत्स्यजीविनः ॥ १० ॥ प्रसार्य सुमहज्जालं सर्वे चाकर्षयन्बलात् ॥ अथ तं च महामत्स्यं निषादा बलदर्पिताः ॥ ११ ॥ तस्मादुत्तारयामासुः सलिलाद्ब्रह्मनंदनम् ॥ तं दृष्ट्वा तपसा दीप्तं कैवर्त्ता भयविह्वलाः ॥ शिरोभिः प्रणिपत्योच्चैरिदं वचनमब्रुवन् ॥ १२ ॥ ॥ निषादा

१ सदारंभः—सत्कर्मारम्भकः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





ऊचुः ॥ ॥ अज्ञानात्कृतपापानामस्माकं क्षन्तुमर्हसि ॥ किं वा कार्यं प्रियं तेऽद्य तदाज्ञापय सुव्रत ॥ १३ ॥ स मुनिस्तन्महद्दृष्ट्वा मत्स्यानां कदनं कृतम् ॥ कृपया परयाविष्टो दाशान्प्रोवाच दुःखितः ॥ १४ ॥ केन मे स्यादुपायो हि सर्वे स्वार्थे बत स्थिताः ॥ ज्ञानिनामपि यच्चेतः केवलात्महिते रतम् ॥ १५ ॥ ज्ञानिनोऽपि यदा स्वार्थमाश्रित्य ध्यानमास्थिताः ॥ दुःखार्त्तानीह सत्त्वानि क्व यास्यंति सुखं ततः ॥ १६ ॥ योऽभिवांछति भोक्तुं वै दुःखान्येकांततो जनः ॥ पापात्पापतरं तं हि प्रवदंति मुमुक्षवः ॥ १७ ॥ को नु मे स्यादुपायो हि येनाहं दुःखितात्मवान् ॥ अंतः प्रविष्टः सत्त्वानां भवेयं सर्वदुःखभुक् ॥ १८ ॥ यन्ममास्ति शुभं किंचित्तदेनानुपगच्छतु ॥ यत्कृतं दुष्कृतं तैश्च तदशेषमुपेतु माम् ॥ १९ ॥ दृष्ट्वांधान्कृपणान्व्यंगाननाथान्रोगिणस्तथा ॥ दया न जायते यस्य स रक्ष इति मे मतिः ॥ २० ॥ प्राणसंशयमापन्नान्प्राणिनो भयविह्वलान् ॥ यो न रक्षति शक्तोपि स तत्पापं समश्नुते ॥ २१ ॥ आहुर्जनानामार्त्तानां सुखं यदुपजायते ॥ तस्य स्वर्गोऽपवर्गो वा कलां नार्हति षोडशीम् ॥ ॥ २२ ॥ तस्मान्नैतानहं दीनांस्त्यक्त्वा मीनान्सुदुःखितान् ॥ पदमात्रं तु यास्यामि किं पुनस्त्रिदशालयम् ॥ २३ ॥ ॥ ईश्वर उवाच ॥ ॥ निशम्यैतदृषेर्वाक्यं दाशास्ते जातसंभ्रमाः ॥ यथावृत्तं तु तत्सर्वं नाभागाय न्यवेदयन् ॥ २४ ॥ नाभागोऽपि ततः श्रुत्वा तं द्रष्टुं ब्रह्मनन्दनम् ॥ त्वरितः प्रययौ तत्र सामात्यः सपुरोहितः ॥ २५ ॥ स सम्यक्पूजयित्वा तं देवकल्पं मुनिं नृपः ॥ प्रोवाच भगवन्ब्रूहि किं करोमि तवाज्ञया ॥२६॥ ॥ ॥ आपस्तंब उवाच ॥ ॥ श्रमेण महताविष्टाः कैवर्त्ता दुःखजीविनः ॥ मम मूल्यं प्रयच्छेति यद्योग्यं मन्यसे नृप ॥ २७ ॥ ॥ नाभाग उवाच ॥ ॥ सहस्राणां शतं मूल्यं निषादेभ्यो ददाम्यहम् ॥ निग्रहाख्यस्य भगवन्यथाह ब्रह्मनंदनः ॥ २८ ॥ ॥ आपस्तंब उवाच ॥ ॥ नाहं शतसहस्रैश्च नियम्यः पार्थिव त्वया ॥ सदृशं दीयतां मूल्यममात्यैः सह चिंतय ॥ २९ ॥ ॥ नाभाग उवाच ॥ ॥ कोटिः प्रदीयतां मूल्यं निषादेभ्यो द्विजोत्तम ॥ यद्येतदपि ते मूल्यं ततो भूयः प्रदीयते ॥ ३० ॥ ॥ आपस्तंब उवाच ॥ ॥ नाहं मूल्यं च मे कोटिरधिकं वापि पार्थिव ॥ सदृशं दीयतां मूल्यं ब्राह्मणैः सह चिंतय ॥ ३१ ॥ ॥ नाभाग उवाच ॥ ॥ अर्द्धराज्यं समस्तं वा निषादेभ्यः प्रदीयताम् ॥ एत न्मूल्यमहं मन्ये किं वाऽन्यन्मन्यसे द्विज ॥ ३२ ॥ ॥ आपस्तंब उवाच ॥ ॥ अर्धराज्यं समस्तं वा नाहमर्हामि पार्थिव ॥ सदृशं दीयतां मूल्यमृषिभिः सह चिंतय ॥ ३३ ॥ महर्षेस्तद्वचः श्रुत्वा नाभागः स विषादवान् ॥ चिन्तयामास दुःखार्तः सामात्यः सपुरोहितः ॥ ३४ ॥ ततः



१ दाशान्--कैवर्तान्--इत्यर्थः । २ शक्तः सन्--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कश्चिदृषिस्तत्र लोमशस्तु महातपाः ॥ नाभागमब्रवीन्मा भैस्तोषयिष्यामि तं मुनिम् ॥ ३५ ॥ ॥ नाभाग उवाच ॥ ॥ ब्रूहि मूल्यं महाभाग मुनेरस्य महात्मनः ॥ परित्रायस्व मामस्मात्सज्ञातिकुलबांधवम् ॥ ३६ ॥ निर्दहेद्भगवान्क्रुद्धस्त्रैलोक्यं सचराचरम् ॥ किं पुनर्मानुषं हीनमत्यंतविषयात्मकम् ॥ ३७ ॥ ॥ लोमश उवाच ॥ ॥ त्वमीड्यो हि महाराज जगत्पूज्यो द्विजोत्तमः ॥ गावश्च दिव्यास्तस्माद्गौर्मूल्यमस्मै प्रदीयताम् ॥ ३८ ॥ तच्छ्रुत्वा वचनं राजा सामात्यः सपुरोहितः ॥ हर्षेण महताविष्टः प्रोवाचेदं वचो मुनिम् ॥ ३९ ॥ उत्तिष्ठोत्तिष्ठ भगवन्क्रीत एव न संशयः ॥ एतद्योग्यतमं मूल्यं भवतो मुनिसत्तम ॥ ४० ॥ ॥ आपस्तंब उवाच ॥ ॥ उत्तिष्ठाम्येष सुप्रीतः सम्यक्क्रीतोऽस्मि पार्थिव ॥ गोभ्यो मूल्यं न पश्यामि पवित्रं परमं भुवि ॥ ४१ ॥ गावः प्रदक्षिणीकार्याः पूजनीयाश्च नित्यशः ॥ मंगलायतनं देव्यः सृष्टा ह्येताः स्वयंभुवा ॥ ॥ ४२ ॥ अग्न्यगाराणि विप्राणां देवतायतनानि च ॥ यद्गोमयेन शुद्ध्यंति किंभूतमधिकं ततः ॥४३॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिस्तथैव च ॥ गवां पंच पवित्राणि पुनंति सकलं जगत् ॥४४॥ गावो ममाग्रतो नित्यं गावः पृष्ठत एव च ॥ गावो मे हृदये चैव गवां मध्ये वसाम्यहम् ॥४५॥ एवं जपन्नरो मंत्रं त्रिसंध्यं नियतः शुचिः ॥ मुच्यते सर्वपापेभ्यः स्वर्गलोकं च गच्छति ॥ ४६ ॥ तृणाहारपरा गावः कर्त्तव्या भक्तितोऽन्वहम् ॥ अकृत्वा स्वयमाहारं कुर्वन्प्राप्नोति दुर्गतिम् ॥ ४७ ॥ तेनाग्नयो हुताः सम्यक्पितरश्चापि तर्पिताः ॥ देवाश्च पूजितास्तेन यो ददाति गवाह्निकम् ॥४८॥ मन्त्रः ॥ सौरभेयी जगत्पूज्या देवी विष्णुपदे स्थिता ॥ सर्वमेव मया दत्तं प्रतीच्छतु सुतोषिता ॥४९॥ रक्षणाद्बालपुत्राणां गवां कण्डूयनात्तथा ॥ क्षीणार्तरक्षणाच्चैव नरः स्वर्गे महीयते ॥ ५० ॥ आदिर्गावो हि मर्त्यस्य मध्ये चांते प्रकीर्तिताः ॥ रक्षंति तास्तु देवानां क्षीराज्यममृतं सदा ॥ ५१ ॥ तस्माद्गावः प्रदातव्याः पूजनीयाश्च नित्यशः ॥ स्वर्गस्य संगमा ह्येताः सोपानमिव निर्मिताः ॥ ५२ ॥ एतच्छ्रुत्वा निषादास्ते गवां माहात्म्यमुत्तमम् ॥ प्रणिपत्य महात्मानमापस्तंबमथाब्रुवन् ॥ ५३ ॥ ॥ निषादा ऊचुः ॥ ॥ संभाषो दर्शनं स्पर्शः कीर्तनं स्मरणं तथा ॥ पावनानि किलैतानि साधूनामिति च श्रुतम् ॥ ५४ ॥ संभाषो दर्शनं चैव सहास्माभिः कृतं त्वया ॥ कुरुष्वानुग्रहं तस्माद्गौरेषा प्रतिगृह्यताम् ॥ ५५ ॥ ॥ आपस्तंब उवाच ॥ ॥ एतां वः प्रतिगृह्णामि गां यूयं मुक्तकिल्बिषाः ॥ निषादा गच्छत स्वर्गं सह मत्स्यैर्जलोद्भृतैः ॥५६॥ प्राणिनां प्रीतिमुत्पाद्य निन्दिते नापि कर्मणा ॥ नरकं यदि पश्यामि वत्स्यामि स्वर्ग एव तत् ॥ ५७ ॥ यन्मया सुकृतं किञ्चिन्मनोवाक्कायकर्मभिः ॥ कृतं स्यात्तेन दुःखार्ताः सर्वे

१ हे महाराज—त्वं हि ईड्यः—द्विजोत्तमः—तु—जगत्पूज्यः—च गावः—हि दिव्याः—तस्मात्—अस्मै—गौः—एव—मूल्यं प्रदीयताम्—इति—योजना ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



यांतु शुभां गतिम् ॥ ५८ ॥ ततस्तस्य प्रसादेन महर्षेर्भावितात्मनः ॥ निषादास्तेन वाक्येन सह मत्स्यैर्दिवं गताः ॥ ५९ ॥ तान्दृष्ट्वा व्रजतः
स्वर्गं समत्स्यान्मत्स्यजीविनः ॥ सामात्यभृत्यो नृपतिर्विस्मयादिदमब्रवीत ॥ ६० ॥ सेव्याः श्रेयोऽर्थिभिः सन्तः पुण्यतीर्थे जलोपमाः ॥ क्षणो
पासनमप्यत्र न येषां निष्फलं भवेत् ॥ ६१ ॥ सद्भिः सह सदासीत सद्भिः कुर्वीत सत्कथाम् ॥ सतां व्रतेन वर्तेत नासद्भिः किञ्चिदाचरेत् ॥ ६२ ॥
सतां समागमादेते समत्स्या मत्स्यजीविनः ॥ त्रिविष्टपमनुप्राप्ता नराः पुण्यकृतो यथा ॥ ६३ ॥ आपस्तंबो मुनिस्तत्र लोमशश्च महामनाः ॥
वरैस्तं विविधैरिष्टैश्छंदयामासतुर्नृपम् ॥ ६४ ॥ ततः स वरयामास धर्मबुद्धिं सुदुर्लभाम् ॥ तथेति चोक्त्वा तौ प्रीत्या तं नृपं वै शशंसतुः ॥ ६५ ॥
अहो धन्योऽसि राजेन्द्र यत्ते धर्मपरा मतिः ॥ धर्मः सुदुर्लभः पुंसां विशेषेण महीक्षिताम् ॥ ६६ ॥ यदि राजा मदाविष्टः स्वधर्मं न परि
त्यजेत ॥ ततो जगति कस्तस्मात्पुमानभ्यधिको भवेत् ॥ ६७ ॥ ध्रुवं जन्म सदा राज्ञां मोहश्चापि सदा ध्रुवः ॥ मोहाद्ध्रुवश्च[1] नरको राज्यं
निन्दन्त्यतो बुधाः ॥ ६८ ॥ राज्यं हि बहु मन्यंते नरा विषयलोलुपाः ॥ मनीषिणस्तु पश्यन्ति तदेव नरकोपमम् ॥ ६९ ॥ तस्माल्लोकद्वयध्वंसी
न कर्त्तव्यो मदस्त्वया ॥ यदीच्छसि महाराज शाश्वतीं गतिमात्मनः ॥ ७० ॥ ॥ ईश्वर उवाच ॥ ॥ इत्युक्त्वा तौ महात्मानौ जग्मतुः स्वं स्व
माश्रमम् ॥ नाभागोऽपि वरं लब्ध्वा प्रहृष्टः प्राविशत्पुरम् ॥ ७१ ॥ एतत्ते कथितं देवि प्रभावं देविकोद्भवम् ॥ ऋषिणा स्थापितश्चापि भवो जाले
श्वरस्तदा ॥ ७२ ॥ जाले निपतितो यस्माद्दाशानामृषिसत्तमः ॥ जालेश्वरेति नामासौ विख्यातः पृथिवीतले ॥ ७३ ॥ तत्र स्नात्वा महादेवि
जालेश्वरसमर्चनात् ॥ आपस्तंबश्च नाभागो निषादा मत्स्यजीविनः ॥ ७४ ॥ मत्स्यैः सह गताः स्वर्गं देविकायाः प्रभावतः ॥ चैत्रस्यैव तु मासस्य
शुक्लपक्षे त्रयोदशीम् ॥ ७५ ॥ दद्यात्पिण्डं पितृभ्यो यस्तस्यांतो नैव विद्यते ॥ गोदानं तत्र देयं तु ब्राह्मणे वेदपारगे ॥ श्रोतव्यं चैव माहात्म्यं
द्रष्टव्यो जालकेश्वरः ॥ ७६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये देविका
नदीमाहात्म्ये जालेश्वरमाहात्म्यवर्णनंनामाष्टात्रिंशदुत्तरत्रिशततमोऽध्यायः ॥ ३३८ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि ॥१९१॥
कूपं त्रैलोक्यविश्रुतम् ॥ देविकायास्तटे रम्ये हुंकारेणैव पूर्यते ॥ १ ॥ ततोऽधस्तात्पुनर्याति सलिलं तत्र भामिनि ॥ तण्डीनाम[2] पुरा प्रोक्तो देवि

१ इत्येतत्–इ० पा० । २ चंडीनाम–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कातटमास्थितः ॥ २ ॥ तपस्तेपे महादेवि शिवभक्तिपरायणः ॥ तस्यैवं तप्यमानस्य तस्मिन्देशे वरानने ॥ ३ ॥ आजगाम मृगो वृद्धस्तं देशमन्धहृत्प्रिये ॥ स पपात महागर्ते अगाधे जलवर्ज्जिते ॥ ४ ॥ तं दृष्ट्वा कृपयाविष्टः स मुनिर्मौनमास्थितः ॥ हुंकारं कुरुते तत्र भूयोभूयश्च भामिनि ॥ ५ ॥ अथ हुंकारशब्देन तस्य गर्तः प्रपूरितः ॥ ततो मृगो विनिष्क्रांतः कृच्छ्रेण सलिलात्प्रिये ॥ ६ ॥ मानुषं रूपमाश्रित्य तमृषिं पर्यपृच्छत ॥ विस्मयं परमं गत्वा काम्यदं कर्मणः फलम् ॥ ७ ॥ मृगत्वे पतितश्चात्र नरो भूत्वा विनिर्गतः ॥ सोऽब्रवीत्तस्य माहात्म्यं सलिलस्य द्विजोत्तमः ॥ ८ ॥ अतोऽहं नरतां प्राप्तो नान्यदस्तीह कारणम् ॥ ततस्तत्सलिलं भूयः प्रविष्टं धरणीतले ॥ ९ ॥ ततो हुंकृतवान्भूयः स ऋषिः कौतुकान्वितः ॥ आपूरितः पुनः कूपः सलिलेन पुरा यथा ॥ १० ॥ ततः स कृतवान्स्नानं तथा च पितृतर्पणम् ॥ मत्वा तीर्थवरं तत्र ततः प्राप्तः परां गतिम् ॥ ११ ॥ अद्यापि हुंकृते तस्मिन्सलिलौघः प्रवर्तते ॥ तत्र गत्वा नरो भक्त्या अपि पापरतोऽपि यः ॥ १२ ॥ न मानुष्यं पुनर्जन्म प्राप्नोति जगतीतले ॥ तत्र स्नात्वा शुचिर्भूत्वा यः श्राद्धं कुरुते नरः ॥ १३ ॥ मुच्यते सर्वपापेभ्यः पितृलोके महीयते ॥ कुलानि तारयेत्सप्त अतीताऽनागतानि च ॥ १४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये देविकामाहात्म्ये हुंकारकूपमाहात्म्यवर्णनंनामैकोनचत्वारिंशदुत्तरत्रिशततमोऽध्यायः ॥ ॥ ३३९ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि तत्र स्थाने तु संस्थितम् ॥ चण्डीश्वरं महालिंगं सर्वपातकनाशनम् ॥ १ ॥ तत्र शुक्लचतुर्दश्यां कार्तिके मासि भामिनि ॥ उपवासपरो भूत्वा यः करोति प्रजागरम् ॥ स याति परमं स्थानं यत्र देवो महेश्वरः ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये देविकामाहात्म्ये चण्डीश्वरमाहात्म्यवर्णनं नाम चत्वारिंशदुत्तरत्रिशततमोऽध्यायः ॥ ३४० ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ आशापूरं ततो गच्छेद्विघ्नराजमकल्मषम् ॥ शशिभूषण वायव्ये संस्थितं विघ्ननाशनम् ॥ आशां पूरयते यस्मात्तेनाशापूरकः स्मृतः ॥ १ ॥ यत्र रामेण देवेशि सीतया लक्ष्मणेन च ॥ समाराध्य च विघ्नेशं प्राप्तं काममभीप्सितम् ॥ २ ॥ यत्र चंद्रमसा देवि समाराध्य गणाधिपम् ॥ लब्धं तद्वांछितं पूर्वं सर्वकुष्ठविनाशनम् ॥ ३ ॥ चतुर्थ्यां शुक्लपक्षे च मासि भाद्रपदे तथा ॥ तत्र संपूज्य देवेशं मोदकैर्भोजयेद्द्विजान् ॥ ४ ॥ वांछितां लभते सिद्धिं विघ्नराजप्रसादतः ॥ क्षेत्रस्यास्य महादेवि रक्षार्थं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





तु मया पुरा ॥ ५ ॥ ततो नियुक्तो देवेशि यायिनां विघ्ननाशनः ॥ ६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभास
खण्डे प्रथमे प्रभासक्षेत्रमाहात्म्य आशापुरविघ्नराजमाहात्म्यवर्णनंनामैकचत्वारिंशदुत्तरत्रिशततमोऽध्यायः ॥ ३४१ ॥ ॥छ॥ ॥ ईश्वर उवाच ॥ ॥
तस्य दक्षिणनैर्ऋत्ये नातिदूरे व्यवस्थितम् ॥ लिंगं पापहरं देवि स्वयं सोमप्रतिष्ठितम् ॥ १ ॥ तत्रैवामृतकुण्डं तु कलाकुण्डं तु तत्स्मृतम् ॥
तत्र स्नात्वा तु चंद्रेशं यो नरः पूजयिष्यति ॥ २ ॥ स तु वर्षसहस्रस्य तपःफलमवाप्स्यति ॥ तत्रैव संस्थितं देवि तडागं चंद्रनिर्मितम् ॥ ३ ॥
धनुःषोडशविस्तारं चंद्रेशात्पूर्वपश्चिमे ॥ तत्पूर्वं ते समाख्यातं मुक्तिदानादिपूर्वकम् ॥ ४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां
सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्य आशापुरमाहात्म्ये चंद्रेश्वरकलाकुण्डतीर्थमाहात्म्यवर्णनंनाम द्विचत्वारिंशदुत्तरत्रिशततमोऽध्यायः ॥
॥ ३४२ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि कपिलेश्वरमुत्तमम् ॥ शशिभूषणपूर्वेण कोटितीर्थाच्च पश्चिमे ॥ १ ॥ जर
द्गवेशाद्दक्षिणे समुद्रोत्तरतस्तथा ॥ एतद्वै कापिलं क्षेत्रं नापुण्यैः प्राप्यते नरैः ॥ २ ॥ कपिलेन पुरा देवि यत्र तप्तं तपो महत् ॥ वर्षाणामयुतं
साग्रं प्रतिष्ठाप्य महेश्वरम् ॥ ३ ॥ समाहूता तत्र देवी कपिलधारा महानदी ॥ समुद्रमध्ये साऽद्यापि पुण्यवद्भिः प्रदृश्यते ॥ ४ ॥ तत्र स्नात्वा महा
देवि कपिलाषष्ठ्यां विशेषतः ॥ कपिलां दापयेत्तत्र गोकोटिफलभाग्भवेत् ॥ ५ ॥ सर्वेषां चैव पापानां प्रायश्चित्तमिदं स्मृतम् ॥ कपिलेश्वरं तु
संपूज्य कन्याकोटिफलं लभेत् ॥ ६ ॥ ॥ देव्युवाच ॥ ॥ आश्चर्यं मम देवेश कपिलषष्ठ्या महेश्वर ॥ विधानं श्रोतुमिच्छामि दानमन्त्रादि
पूर्वकम् ॥ ७ ॥ ॥ ईश्वर उवाच ॥ ॥ जन्मजीवितमध्ये तु यद्येका लभ्यते नरैः ॥ संयोगयुक्ता सा षष्ठी तत्किं देवि ब्रवीम्यहम् ॥ ८ ॥ प्रौष्ठ
पद्यसिते पक्षे षष्ठ्यामंगारको यदि ॥ व्यतीपातश्च रोहिण्यां सा षष्ठी कपिला स्मृता ॥९॥ तत्र क्षेत्रे नरः स्नात्वा अथवार्कस्थले शुभे ॥ मृदा शुक्ल
तिलैश्चैव कपिलासंगमे शुभे ॥ १० ॥ कृतस्नानजपः पश्चात्सूर्यायार्घ्यं निवेदयेत् ॥ रक्तचंदनतोयेन करवीरयुतेन च ॥ कृत्वार्घपात्रं शिरसि मंत्रे
णानेन दापयेत् ॥ ११ ॥ नमस्त्रैलोक्यनाथाय उद्भासितजगत्त्रय ॥ वेदरश्मे नमस्तुभ्यं गृहाणार्घ्यं नमोऽस्तु ते ॥ १२ ॥ सूर्यं प्रदक्षिणीकृत्य
संपूज्य कपिलेश्वरम् ॥ उपलिप्ते शुभे देशे पुष्पाक्षतविभूषिते ॥ १३ ॥ स्थापयेदव्रणं कुम्भं चन्दनोदकपूरितम् ॥ पंचरत्नसमायुक्तं दूर्वापुष्पाक्षता
न्वितम् ॥ १४ ॥ रक्तवस्त्रयुगच्छन्नं ताम्रपात्रेण संयुतम् ॥ रथो रुक्मफलस्यैव एकचित्रविचित्रितः ॥ १५ ॥ सौवर्णपलसंयुक्तां मूर्तिं सूर्यस्य कार

१ यायिनाम्—यात्रिणाम्—इत्यर्थः । 'पापिनाम्'—इति पाठस्तु—लेखकप्रमादकृतः । २ समे देशे—इ० च पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येत् ॥ कुंभस्योपरि संस्थाप्य गंधपुष्पैः समर्चयेत् ॥ १६ ॥ कपिलेश्वरसान्निध्ये मण्डपे होमसंस्कृते ॥ आदित्यं पूजयेद्देवं नामभिः स्वैर्यथोदितैः ॥ ॥ १७ ॥ आदित्य भास्कर रवे भानो स्वयं दिवाकर ॥ प्रभाकर नमस्तुभ्यं संसारान्मां समुद्धर ॥ १८ ॥ भुक्तिमुक्तिप्रदो यस्मात्तस्माच्छांतिं प्रयच्छ नः ॥१९॥ ॥ प्रार्थनामन्त्रः ॥ ॥ नमो नमस्ते वरद ऋक्सामयजुषां पते ॥ नमोऽस्तु विश्वरूपाय विश्वधाम्ने नमोऽस्तु ते ॥२०॥ अमृतं देवि ते क्षीरं पवित्रमिह पुष्टिदम् ॥ त्वत्प्रसादात्प्रमुच्यंते मनुजाः सर्वपातकैः ॥ २१ ॥ ब्रह्मणोत्पादिते देवि वह्निकुण्डान्महाप्रभे ॥ नमस्ते कपिले पुण्ये सर्वदेवनमस्कृते ॥२२॥ सर्वदेवमये देवि सर्वतीर्थमये शुभे ॥ दातारं पूजयानं मां ब्रह्मलोकं नय स्वयम् ॥ २३ ॥ ॥ पूजामंत्रः ॥ ॥ एवं संपूज्य कपिलां कुम्भस्थं च दिवाकरम् ॥ ब्राह्मणे[1] वेदविदुष उभयं प्रतिपादयेत् ॥२४॥ व्यासाय सूर्यभक्ताय मंत्रेणानेन दापयेत् ॥२५॥ दिव्यमूर्त्तिर्जगच्चक्षु र्द्वादशात्मा दिवाकरः ॥ कपिलासहितो देवो मम मुक्तिं प्रयच्छतु ॥ २६ ॥ यस्मात्त्वं कपिले पुण्या सर्वलोकस्य पावनी ॥ प्रदत्ता सह सूर्येण मम मुक्तिप्रदा भव ॥ २७ ॥ पलेन दक्षिणा कार्या तदर्धार्धेन वा पुनः ॥ शक्तितो दक्षिणायुक्तां[3] तां धेनुं प्रतिपादयेत् ॥ २८ ॥ योऽनेन विधिना कुर्या त्षष्ठीं कपिलसंज्ञिताम् ॥ सोऽश्वमेधसहस्रस्य फलं प्राप्नोति मानवः ॥ २९ ॥ यत्फलं सर्वतीर्थेषु सर्वदानेषु यत्फलम् ॥ तत्फलं सर्वमाप्नोति[4] यः षष्ठीं कपिलां चरेत् ॥ ३० ॥ कपिलाकोटिसहस्राणि कपिलाकोटिशतानि च ॥ सूर्यपर्वणि यद्दत्त्वा तत्फलं कोटिशो भवेत् ॥ ३१ ॥ कोटिगोरोम संख्यानि वर्षाणि वरवर्णिनि ॥ तावत्स वसते स्वर्गे यः षष्ठीं कपिलां चरेत् ॥ ३२ ॥ ज्ञानतोऽज्ञानतो वापि यत्पापं पूर्वसंचितम् ॥ तत्सर्वं नाशमा याति इत्याह कपिलो मुनिः ॥३३॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये कपि लधाराकपिलेश्वरमाहात्म्ये कपिलाषष्ठीव्रतविधानमाहात्म्यवर्णनंनाम त्रिचत्वारिंशदुत्तरद्विशततमोऽध्यायः ॥ २४३ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि लिंगं पापप्रणाशनम् ॥ कपिलेश्वरस्यैशान्यामुत्तरेण व्यवस्थितम् ॥ १ ॥ जरद्गवेश्वरंनाम जरद्गवप्रतिष्ठितम् ॥ ब्रह्महत्यादि पापानां नाशनं नात्र संशयः ॥ २ ॥ तत्रैव संस्थिता देवि देवी अंशुमती नदी ॥ तत्र स्नात्वा विधानेन पिंडदानं तु दापयेत् ॥ ३ ॥ वर्षकोटिशतं साग्रं पितॄणां तृप्तिमावहेत् ॥ वृषभस्तत्र दातव्यो ब्राह्मणे वेदपारगे ॥ ४ ॥ ततस्तु[5] पूजयेद्देवं गन्धपुष्पैर्जरद्गवम् ॥ पञ्चामृतरसेनैव तथा गुग्गु लुधूपनैः ॥ ५ ॥ स्तुतिदण्डनमस्कारैः प्रदक्षिणै[6]रहर्निशम् ॥ ब्राह्मणान्भोजयेत्तत्र भक्ष्यभोज्यैः पृथग्विधैः ॥ एकेन भोजितेनैव कोटिर्भवति

१ देवेश–इ० पा० । २ ब्राह्मणे–ब्राह्मणाय–इत्यर्थः । चतुर्थ्यर्थे सप्तमी । ३ शक्तितो दक्षिणां दत्त्वा—इ० पा० । ४ समवाप्नोति–इ० पा० । ५ तत्रस्थम्–इ० पा० । ६ प्रेक्षणीयैः–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



भोजिता ॥ ६ ॥ कृते सिद्धोदकंनाम तत्तीर्थं परिकीर्त्तितम् ॥ जरद्गवेश्वरं तीर्थं कलौ तु परिकीर्त्यते ॥ ७ ॥ इति श्रीस्कांदे महापुराण एकाशीति साहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्येऽशुमतीमाहात्म्ये जरद्गवेश्वरमाहात्म्यवर्णनंनाम चतुश्चत्वारिंशदुत्तरत्रिशततमोऽध्यायः ॥ ३४४ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि लिंगं वै हाटकेश्वरम् ॥ जरद्गवात्पूर्वभागे धनुषां षष्टिभिस्त्रिभिः ॥ १ ॥ नाम्ना नलेश्वरं देवि स्थापितं तु नलेन वै ॥ दमयन्तीयुतेनैव ज्ञात्वा क्षेत्रं तदुत्तमम् ॥ २ ॥ तं दृष्ट्वा मानवो देवि पूजयित्वा विधानतः ॥ कलिभिर्मुच्यते जंतुर्द्यूते च विजयी भवेत् ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये नलेश्वरमाहात्म्यवर्णनंनाम पञ्चचत्वारिंशदुत्तरत्रिशततमोऽध्यायः ॥ ३४५ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्मादाग्नेयदिग्भागे स्थितः कर्कोटको रविः ॥ पूर्वकल्पे महादेवि स्मृतः कर्कोटकान्वितः ॥ १ ॥ तस्य दर्शनमात्रेण प्रीताः स्युः सर्वदेवताः ॥ सप्तम्यां रविवारेण धूपगंधानुलेपनैः ॥ पूजयेद्यो विधानेन मुच्यते सर्वकिल्बिषैः ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये कर्कोटकार्कमाहात्म्यवर्णनंनाम षट्चत्वारिंशदुत्तरत्रिशततमोऽध्यायः ॥ ३४६ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि लिंगं वै हाटकेश्वरम् ॥ नलेश्वरात्पूर्वभागे शतधन्वंतरद्वये ॥ १ ॥ अगस्त्याश्रवनंनाम तत्र स्थाने तु संस्थितम् ॥ चिंतामणेस्तु पूर्वेण ईशाने त्रिशतंधनुः ॥ तत्र पूर्वं तपस्तप्तमगस्त्येन महात्मना ॥ २ ॥ ॥ देव्युवाच ॥ ॥ कस्मिन्काले महादेव सर्वं विस्तरतो वद ॥ ३ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ पुरा दैत्यगणा रौद्रा बभूवुर्वरवर्णिनि ॥ कालकेया इति ख्यातास्त्रैलोक्योच्छेदकारकाः ॥ ४ ॥ अथ ते निहताः सर्वे विष्णुना प्रभविष्णुना ॥ दैत्यसूदननाम्ना तु प्रभासक्षेत्रवासिना ॥ ५ ॥ कृत्वा व्याघ्रस्य रूपं तु नाम्ना चक्रमुखीति च ॥ हता वै तेन रूपेण ततोऽभूद्दैत्यसूदनः ॥ ६ ॥ हतशेषाः समुद्रांते प्रविष्टा भयविह्वलाः ॥ ततस्ते मंत्रयामासुः पीडयंते देवताः कथम् ॥७॥ हन्यंतां धर्मिणो येऽत्र विद्यंते धरणीतले ॥ तपःस्वाध्यायनिरता यज्ञदानरताश्च ये ॥ ८ ॥ अथ ते समयं कृत्वा रात्रौ निष्क्रम्य सागरात् ॥ निर्जघ्नुस्तापसांस्तत्र यज्ञदानरतान्प्रिये ॥ ९ ॥ प्रभासे तु महादेवि तत्र द्वादशयोजने ॥ वसिष्ठस्याश्रमे तत्र महर्षीणां महात्मनाम् ॥ १० ॥ भक्षितानि सहस्राणि पंच सप्त च तापसान् ॥ शतानि पंच रैभ्यस्य विश्वामित्रस्य षोडश ॥ ११ ॥ च्यवनस्य च सप्तैव जाबालेर्द्विशतं मुनेः ॥ वालखिल्याश्रमे पुण्ये षट्छतानि दुरा



१ कृते जिह्वोदकंनाम—इ० पा०। २ त्रिशतंधनुः—त्रिशतधनुःपरिमितप्रदेशे--इत्यर्थः । त्रिंशतं धनुः—इ०, द्विशतं धनुः—इ० च पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्मभिः ॥ १२ ॥ यत्र क्वचिद्भवेद्यज्ञस्तत्र गत्वा निशागमे ॥ यज्ञदानसमायुक्तानृत्विजो भक्षयंति च ॥ १३ ॥ ततो भयाकुलाः सर्वे बभूवुर्जगती
तले ॥ न च कश्चिद्विजानाति दैत्यानां तु विचेष्टितम् ॥ १४ ॥ रात्रौ स्वपंति मुनयः सुखशय्यागताश्च ते ॥ प्रभाते त्वध्वरे तेषामस्थिसंघाश्च केव
लम् ॥ १५ ॥ ततो धर्मक्रियास्त्यक्ता भूतले सर्वमानवैः ॥ निःस्वाध्यायवषट्कारं भूतलं समपद्यत ॥ १६ ॥ अथान्ये तापसा रात्रौ संयुताश्च धृता
युधाः ॥ अथोच्छेदं गते धर्मे पीडितास्त्रिदिवौकसः ॥ १७ ॥ किमेतदिति जल्पंतो ब्रह्माणं शरणं गताः ॥ भगवंस्तापसाः सर्वे तथा ये ज्ञानशीलि
नः ॥ १८ ॥ भक्ष्यंते केनचिद्रात्रौ मृत्युमेव[1] प्रयान्ति च ॥ नष्टधर्मक्रियाः सर्वे भूतले प्रपितामह ॥ १९ ॥ यो धर्ममाचरेदह्नि स रात्रौ मृत्युमेति
च ॥ न स्वाध्यायवषट्कारं समस्ते भूतले विभो ॥ २० ॥ धर्माभावाद्भयं सर्वे संदेहं परमं गताः ॥ तेषां तद्वचनं श्रुत्वा ध्यात्वा देवः पितामहः ॥
अब्रवीत्त्रिदशान्सर्वान्सन्देहं परमं गतान् ॥ २१ ॥ कालेया इति विख्याता दानवा रौद्रकारिणः ॥ ते समुद्रं समासाद्य तापसान्भक्षयंति च ॥ २२ ॥
युष्माकं च विनाशाय ते न शक्या निषूदितुम् ॥ यतध्वमेषां नाशाय नो चेन्नाशो भविष्यति ॥ २३ ॥ व्रजध्वं भूतले शीघ्रमगस्त्यो यत्र तिष्ठति॥
व्रतचर्यारतो नित्यं[2] प्रभासे क्षेत्र उत्तमे ॥ २४ ॥ स शक्तः सागरं पातुं मित्रावरुणसंभवः ॥ प्रसाद्यश्च स युष्माभिः समुद्रं पिब सत्तम ॥ २५ ॥
ततस्तथा[3] कृते तेन ते सर्वे दानवाधमाः ॥ वध्या युष्माकं भविष्यंति एवं च त्रिदिवेश्वराः ॥ २६ ॥ ॥ ईश्वर उवाच ॥ ॥ एवमुक्ताः सुराः सर्वे
ब्रह्मणा लोककारिणा ॥ प्रभासं क्षेत्रमासाद्य अगस्त्यं शरणं गताः ॥ २७ ॥ ॥ देवा ऊचुः ॥ ॥ रक्षरक्ष द्विजश्रेष्ठ त्रैलोक्यं संशयं गतम् ॥
कालकेयैः प्रतिध्वस्तं समुद्रं समुपाश्रितैः ॥ २८ ॥ तं शोषय द्विजश्रेष्ठ हितार्थं त्रिदिवौकसाम् ॥ नान्यः शक्तः पुमान्कश्चित्कर्तुमीदृक्क्रियां विभो
॥ २९ ॥ ॥ ईश्वर उवाच ॥ ॥ एवमुक्तः सुरगणैरगस्त्यो मुनिपुङ्गवः ॥ जगाम त्रिदशैः सार्धं समुद्रं प्रति हर्षितः ॥ ३० ॥ गीयमानस्तु गंधर्वैः
स्तूयमानस्तु किन्नरैः ॥ श्लाघ्यमानस्तु विबुधैर्वाक्यमेतदुवाच ह ॥ ३१ ॥ एष त्रैलोक्यरक्षार्थं शोषयामि महार्णवम् ॥ द्रक्ष्यध्वं कौतुकं देवाः समी
नमकरैर्महत् ॥ ३२ ॥ एवमुक्त्वा द्विजश्रेष्ठो ह्यगस्त्यो भगवान्मुनिः ॥ गंडूषमकरोत्सर्वं सागरं सरितांपतिम् ॥ ३३ ॥ पीते तत्र महासिन्धावगस्त्ये
न महात्मना ॥ दानवा भयसंत्रस्ता इतश्चेतश्च बभ्रमुः ॥ ३४ ॥ वध्यमानाः सुरैस्तत्र शस्त्रैः सुनिशितैस्तथा ॥ कांतारमन्ये गच्छंतः पलायनपरा
यणाः ॥ ३५ ॥ हतभूयेषु दैत्येषु विदार्य धरणीतलम् ॥ पातालं विविशुस्तूर्णं रुधिरेण परिप्लुताः ॥ ३६ ॥ अथोचुस्त्रिदशा हृष्टा अगस्त्यं मुनि[4]

१ न तज्जानीमहे वयम्–इ० पा० । २ भूत्वा–इ०पा० । ३ तथा कृते तेन–अगस्त्येन–तथा कृते–समुद्रे पीते सति–इत्यर्थः । ४ मुनिपुंगवम्–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सत्तमम् ॥ सिद्धं नो वांछितं सर्वं पूर्यतां सागरः पुनः ॥ ३७ ॥ ॥ अगस्त्य उवाच ॥ ॥ जीर्णं तोयं मया देवास्तथैवामेध्यतां गतम् ॥ उत्पत्स्य
ति रघूणां हि कुले नृपतिसत्तमः ॥ ३८ ॥ भगीरथेति विख्यातः सर्वशस्त्रभृतां वरः ॥ स ज्ञातिकारणादेव गंगां तत्रानयिष्यति ॥ ३९ ॥ ब्रह्मलोका
त्सरिच्छ्रेष्ठां तया पूर्णो भविष्यति॥ एवमुक्त्वा सुरैः सार्द्धं स्वस्थानं चागमन्मुनिः ॥ ४० ॥ ततः स्वमाश्रमं प्राप्तं देवा वाक्यमथाब्रुवन् ॥ अनेन
कर्मणा ब्रह्मन्परितुष्टा वयं मुने ॥ ४१ ॥ किं कुर्मो ब्रूहि तेऽभीष्टं यद्यपि स्यात्सुदुर्लभम् ॥ ४२ ॥ ॥ अगस्त्य उवाच ॥ ॥ यावद्ब्रह्मसहस्राणि
पंचविंशतिकोटयः ॥ वैमानिको भविष्यामि दक्षिणांबरमूर्द्धनि ॥ ४३ ॥ अत्रागत्य नरो यस्तु ममाश्रमपदे शुभे ॥ हाटकेश्वरसांनिध्ये प्रभा
सक्षेत्र उत्तमे ॥ ४४ ॥ स्नानमाचरते सम्यक्स यातु परमां गतिम् ॥ पातालादवतीर्णं तं लिंगरूपं महेश्वरम् ॥ ४५ ॥ मया तपः प्रभावेन स्थापितं
यः प्रपूजयेत् ॥ दिनेदिने भवेत्तस्य गोशतस्य फलं ध्रुवम् ॥ ४६ ॥ लोपामुद्रासहायं मां यो मर्त्यः संप्रपूजयेत् ॥ अर्घ्यं दद्याद्विधानेन काश पुष्पैः
समाहितः ॥ ४७ ॥ प्राप्ते शरदि काले च स यातु परमां गतिम् ॥ लोपामुद्रासहायं मां हाटकेश्वरसंयुतम् ॥ ४८ ॥ अयने चोत्तरे पूज्य गोलक्ष
फलमाप्नुयात् ॥ यः श्राद्धं कुरुते चात्र अयने चोत्तरे द्विजः॥ भूयात्तस्य फलं कृत्स्नं गयाश्राद्धस्य सत्तमाः ॥ ४९ ॥ ॥ ईश्वर उवाच ॥ ॥ बाढमित्ये
व ते चोक्त्वा सर्वे देवाः सवासवाः॥ स्वस्थानं तु गताः सर्वे संहृष्टमनसस्तदा ॥५०॥ तस्मात्सर्वप्रयत्नेन प्राप्ते शरदि मानवः॥अगस्त्यस्याश्रमे गत्वा
हाटकेशं प्रपूजयेत् ॥ ५१ ॥ अगस्त्येश्वरनामानं कल्पलिंगं सुरप्रियम् ॥ यश्चैतच्छृणुयाद्भक्त्या ऋषेस्तस्य विचेष्टितम् ॥ अहोरात्रकृतात्पापात्तत्क्षणा
देव मुच्यते ॥ ५२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये हाटकेश्वरमाहात्म्य
वर्णनंनाम षट्चत्वारिंशदुत्तरत्रिशततमोऽध्यायः ॥ ३४६ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि पश्चिमे नारदेश्व
रीम् ॥ नारदेश्वरसांनिध्ये सर्वदौर्भाग्यनाशनीम् ॥ १ ॥ या नारी पूजयेद्देवीं तृतीयायां समाहिता ॥ तदन्वये न दौर्भाग्ययुक्ता नारी
भविष्यति ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये नारदेश्वरीमाहा
त्म्यवर्णनंनाम सप्तचत्वारिंशदुत्तरत्रिशततमोऽध्यायः ॥ ३४७ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि देवीं मंत्रविभूषणा
म् ॥ भीमेश्वरस्य सान्निध्ये सोमेनाराधितां पुरा ॥ १ ॥ श्रावणे मासि विधिना या नारी तां प्रपूजयेत् ॥ तृतीयायां शुक्लपक्षे सा दुःखै



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुच्यतेऽखिलैः ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये मन्त्रविभूषणागौरीमाहात्म्यवर्णनंनामाष्टाचत्वारिंशदुत्तरत्रिशततमोऽध्यायः ॥ ३४८ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि विघ्नेशं दुर्गकूटकम्¹ ॥ भल्लतीर्थस्य पूर्वेण योगिनीचक्रदक्षिणे ॥ १ ॥ आराधितोऽसौ भीमेन सर्वकामप्रदोऽभवत् ॥ फाल्गुनस्य चतुर्थ्यां तु शुक्लपक्षे विधानतः ॥ ॥ २ ॥ यस्तं पूजयते देवं गन्धपुष्पैः समोदकैः ॥ निर्विघ्नं जायते तस्य वर्षमेकं न संशयः ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये दुर्गकूटगणपतिमाहात्म्यवर्णनंनामैकोनपञ्चाशदुत्तरत्रिशततमोऽध्यायः ॥ ३४९ ॥ छ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि तस्माद्वै कौरवेश्वरीम् ॥ यस्य नाम्ना कुरुक्षेत्रं तेन² साराधिता पुरा ॥ १ ॥ आराधिताऽसौ भीमेन कृत्वा क्षेत्रस्य रक्षणम् ॥ महानवम्यां यत्नेन यस्तां पूजयते नरः ॥ तं पुत्रमिव कल्याणी रक्षते नात्र संशयः ॥ २ ॥ भोजनं तत्र दातव्यं दंपतीनां न संशयः ॥ दिव्यैर्भक्ष्यैः सुमिष्टान्नैः सा तुष्यति ततः स्तुता ॥ ३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये कौरवेश्वरीमाहात्म्यवर्णनंनाम पञ्चाशदुत्तरत्रिशततमोऽध्यायः ॥ ३५० ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि सुपर्णेलां च भैरवीम् ॥ दुर्गकूटाद्दक्षिणतो धनुःपंचशतांतरे ॥ १ ॥ सुपर्णेन पुरा देवि पातालादमृतं हृतम् ॥ गृहीत्वा तत्र मुक्तं तु नागानां पश्यतां किल ॥ २ ॥ ततो देव्या तदा दृष्ट्वा रक्षितं नागपार्श्वतः ॥ ततः सुपर्णेलेत्येवं ख्याता सा वसुधातले ॥ ३ ॥ इला तु कथ्यते भूमिः सुपर्णेन प्रतिष्ठिता ॥ ततः सुपर्णेलेत्येवं नाम्ना पातकनाशिनी ॥ ४ ॥ सुपर्णकुण्डे तत्रैव स्नात्वा तां पूजयेन्नरः ॥ विप्रेभ्यो भोजनं दद्यान्नापद्रिर्म्रियते नरः ॥ जीववत्सा भवेन्नारी आत्मजैश्चाप्यलंकृता ॥ ५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये सुपर्णेलामाहात्म्यवर्णनंनामैकपञ्चाशदुत्तरत्रिशततमोऽध्यायः ॥३५१॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि भल्लतीर्थमनुत्तमम् ॥ तस्याश्च पश्चिमे भागे यत्र विष्णुश्चतुर्भुजः ॥ १ ॥ यत्र त्यक्तं शरीरं तु विष्णुना प्रभविष्णुना ॥ तस्मिन्मित्रवने रम्ये योजनार्द्धार्द्धविस्तृते ॥ २ ॥ युगेयुगे महादेवि कल्पमन्वंतरादिषु ॥ तत्रैव संस्थितिर्विष्णोर्नान्यत्र च रतिर्भवेत् ॥ ३ ॥ क्षेत्राणामादिक्षेत्रं तु वैष्णवं तद्विदुर्बुधाः ॥ तिस्रः कोटयोर्द्धकोटिश्च तीर्थानां प्रवराणि च ॥ ४ ॥ दिवि भुव्यंतरिक्षे च तानि तत्रैव भामिनि ॥ तत्र मूर्तिमती गंगा स्वय

१ धर्मकूटकम्—इ० पा० । २ तेन—कुरुणा—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



मेव व्यवस्थिता ॥ ५ ॥ विष्णोः संप्लवनार्थाय प्राणिनां च हिताय वै ॥ गंगा गया कुरुक्षेत्रं नैमिषं पुष्कराणि च ॥ ६ ॥ पुरीं द्वारवतीं त्यक्त्वा
अत्रैव वसते हरिः ॥ तस्यौर्ध्वदैहिकं देवि प्रकरोमि युगेयुगे ॥ ७ ॥ नभस्ये द्वादशीयोगे तत्र गत्वा स्वयं प्रिये ॥ करोमि तद्विधानेन तत्र ब्राह्मणपुं
गवैः ॥ ८ ॥ तत्र दत्त्वा तु दानानि विधिवद्वेदपारगे ॥ तत्रैव द्वादशीयोगे स्नात्वा चैव विधानतः ॥ ९ ॥ सन्तर्प्य च पितॄन्भक्त्या मुच्यते सर्वपा
तकैः ॥ तत्र विष्णुं तु संपूज्य कृत्वा जागरणं निशि ॥ १० ॥ दीपादिदानं कृत्वा तु कृतकृत्योऽभिजायते ॥ ११ ॥ अथ तस्य प्रवक्ष्यामि पुरावृत्त
महं प्रिये ॥ संहृत्य यादवान्सर्वान्वासुदेवः प्रतापवान् ॥ १२ ॥ दुर्वाससाऽनुलिप्तेन पायसेन पदस्तले ॥ वज्रांगभूतदेहस्तु सर्वव्यापी जनार्द्दनः ॥
॥ १३ ॥ गत्वा तीरं समुद्रस्य समाधिस्थो बभूव ह ॥ सर्वस्रोतांसि संयम्य निवेश्यात्मानमात्मनि ॥ १४ ॥ एतस्मिन्नंतरे प्राप्तो बाणहस्तो जरा
भिधः ॥ दाशपुत्रोऽतिकृष्णांगो मत्स्यघाती च पापकृत् ॥ १५ ॥ तेन दृष्टस्ततो दूरान्निषादात्मसमुद्भवः ॥ विष्णोः पदं मृगं मत्वा शरं तस्य
मुमोच ह ॥ १६ ॥ ततोऽसौ पश्यते यावद्गत्वा तस्य च संनिधौ ॥ चतुर्बाहुं महाकायं शंखचक्रगदाधरम् ॥ १७ ॥ पुरुषं नीलमेघाभं पुंडरीकनिभे
क्षणम् ॥ तं दृष्ट्वा भयभीतस्तु वेपमानः कृतांजलिः ॥ अब्रवीन्न मया ज्ञातस्त्वं विभो दिव्यरूपधृक् ॥ १८ ॥ अज्ञानात्त्वं मया विद्धस्त्वत्पदाग्रे
सुरोत्तम ॥ क्षन्तुमर्हसि मे नाथ न त्वं क्रोद्धुमिहार्हसि ॥ १९ ॥ ॥ विष्णुरुवाच ॥ ॥ शापस्यांतोद्य मे भद्र शरपातात्कृतस्त्वया ॥ तस्मात्त्वं
मत्प्रसादेन स्वर्गं गच्छ महाद्युते ॥ २० ॥ ये चान्ये मामिहागत्य द्रक्ष्यंति हि नरोत्तमाः ॥ ते यास्यंति परं स्थानं यत्राहं नित्यसंस्थितः ॥ २१ ॥
भल्लेनाहं यतो विद्धस्त्वया पादतले शुभे ॥ भल्लतीर्थमिति ख्यातं ततो ह्येतद्भविष्यति ॥ २२ ॥ हरिक्षेत्रमिति प्रोक्तं पूर्वं स्वायंभुवेऽन्तरे ॥ २३ ॥
॥ ॥ ईश्वर उवाच ॥ ॥ इत्युक्त्वांतर्दधे विष्णुर्लुब्धकोऽपि दिवं गतः ॥ येऽत्र स्नानं करिष्यंति भक्त्या परमया युताः ॥ विष्णुलोकं गमिष्यंति
प्रीत्या ते मत्प्रसादतः ॥ २४ ॥ येऽत्र श्राद्धं करिष्यंति पितृभक्तिपरायणाः ॥ तृप्तिं तेषां गमिष्यंति पितरश्चैव तर्पिताः ॥ २५ ॥ तस्मात्सर्वप्रयत्नेन
प्राप्य तत्क्षेत्रमुत्तमम् ॥ दृश्यो[2] देवश्चतुर्बाहुः स्नात्वा तीर्थे तु भल्लके ॥ २६ ॥ मद्भक्तिबलदर्पिष्ठा मत्प्रियं न नमंति ये ॥ वासुदेवं न ते ज्ञेया मद्भक्ताः
पापिनो हि ते ॥ २७ ॥ मद्भक्तोऽपि हि यो भूत्वा भुंक्त एकादशीदिने ॥ मल्लिंगस्यार्चनं कार्यं न तेन पापबुद्धिना ॥२८॥ या तिथिर्दयिता विष्णोः
सा तिथिर्मम वल्लभा ॥ न तां चोपोषयेद्यस्तु स पापिष्ठतराधिकः ॥ २९ ॥ तद्वत्स द्वादशीयोगे भल्लतीर्थस्य संनिधौ ॥ यस्तु मां पूजयेद्भक्त्या



१ भवेन्नरः—इ० पा० । २ दृश्यः—द्रष्टव्यः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नारी वाऽपि नरोऽपि वा ॥ तस्य जन्मसहस्राणि गृहभंगो न जायते ॥३०॥ इत्येतत्कथितं देवि माहात्म्यं पापनाशनम् ॥ भल्लतीर्थस्य विष्णोस्तु सर्व पातकनाशनम् ॥३१॥ तत्र विष्णोस्तु सांनिध्ये वायव्ये कुम्भमुत्तमम् ॥ भल्लतीर्थं तु विख्यातं यत्र भल्लहतो हरिः ॥३२॥ तत्र देयानि वासांसि पदं गावो विधानतः ॥ देयानि विप्रमुख्येभ्यः सम्यग्यात्राफलेप्सुभिः ॥३३॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये भल्लतीर्थमाहात्म्यवर्णनंनाम द्विपञ्चाशदुत्तरत्रिशततमोऽध्यायः ॥३५२॥ ॥छ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि कर्दमालमनुत्तमम् ॥ तीर्थं त्रैलोक्यविख्यातं सर्वपातकनाशनम् ॥ १ ॥ तस्मिन्नेकार्णवे घोरे नष्टे स्थावरजंगमे ॥ चन्द्रार्कतपने नष्टे ज्योतिषि प्रलयं गते ॥ २ ॥ रसातलगतामुर्वीं दृष्ट्वा देवो जनार्दनः ॥ वाराहं रूपमास्थाय दंष्ट्राग्रेण वरानने ॥ उत्क्षिप्य धरणीं मूर्ध्नां स्वस्थाने संन्यवेशयत् ॥ ३ ॥ उद्धृत्य भगवान्विष्णुर्वाक्यमेतदुवाच ह ॥ ४ ॥ अत्र स्थाने स्थितेनैव मया त्वं देवि चोद्धृता ॥ ममात्र नियतं वासः सदैवायं भविष्यति ॥ ५ ॥ ये पितॄंस्तर्पयिष्यंति कर्दमाले वरानने ॥ आकल्पं तर्पितास्तेन भविष्यंति न संशयः ॥ ६ ॥ तत्र श्राद्धं करिष्यंति शाकैर्मूलफलेन वा ॥ भविष्यति कृतं श्राद्धं सर्वतीर्थेषु वै शुभे ॥ ७ ॥ अत्र तीर्थे नरः स्नात्वा यो मां पश्यति मानवः ॥ अपि कीटपतंगा ये निधनं यांति मानवाः ॥ ते मृतास्त्रि दिवं यान्ति सुकृतेन यथा द्विजाः ॥ ८ ॥ ततो द्वीपेषु जायन्ते धनाढ्याश्चोत्तमे कुले ॥ दंष्ट्राभेदेन यत्तोयं निर्गतं ते शरीरतः ॥ ९ ॥ तत्र स्नात्वा नरो देवि तिर्यग्योनौ न जायते ॥ १० ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि यथावृत्तमाश्चर्यं तत्र वै पुरा ॥ मृगयूथं सुसन्त्रस्तं लुब्धकैः परिपी डितम् ॥ प्रविष्टं कर्दमाले तु सद्यो मानुषतां गतम् ॥ ११ ॥ अथ ते लुब्धका दृष्ट्वा विस्मयोत्फुल्ललोचनाः ॥ अपृच्छंत च संभ्रांतास्तान्मर्त्यान्वरव र्णिनि ॥ १२ ॥ मृगयूथमनुप्राप्तं केन मार्गेण निर्गतम् ॥ अथोचुस्ते वयं प्राप्ता मानुषं मृगरूपिणः ॥ १३ ॥ एतत्तीर्थप्रभावोऽयं न विद्मो ह्यात्म कारणम् ॥ ततस्ते लुब्धकास्त्यक्त्वा धनूंषि सशराणि च ॥ तत्र स्नात्वा महाभागे मुक्ताश्च सर्वपातकैः ॥ १४ ॥ ॥ पार्वत्युवाच ॥ ॥ भगव न्विस्तरं ब्रूहि कर्दमालमहोदयम् ॥ उत्पत्तिं च विधानं च क्षेत्रसीमादिकं क्रमात् ॥ १५ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि रहस्यं तु कर्द मालसमुद्भवम् ॥ गूढं ब्रह्मर्षिसर्वस्वं न देयं कस्यचित्त्वया ॥ १६ ॥ पूर्वमेकार्णवे घोरे नष्टे स्थावरजंगमे ॥ चन्द्रार्कपवने नष्टे ज्योतिषि प्रलयं गते ॥ १७ ॥ एकार्णवं जगदिदं ब्रह्मापश्यदशेषतः ॥ तस्मिन्वसुमती मग्नां पातालतलमागता ॥ १८ ॥ ततो यज्ञवराहोऽसौ कृत्वा यज्ञमयं

१ यस्यकस्यचित्—इ० पा० । २ देवी मग्ना पातालमागता—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वपुः ॥ उद्दधार महीं कृत्स्नां दंष्ट्राग्रेण वरानने ॥ १९ ॥ वेदपादो यूपदंष्ट्रः क्रतुदंतः स्रुचीमुखः ॥ अग्निजिह्वो दर्भरोमा ब्रह्मशीर्षा महातपाः ॥ २० ॥
अहोरात्रेक्षणपरो वेदांगश्रुतिभूषणः ॥ आज्यनासः स्रुवतुंडः सामघोषस्वनो महान् ॥ २१ ॥ प्राग्वंशकायो द्युतिमान्मात्रादीक्षाभिरावृतः ॥ दक्षिणा
हृदयो योगी महासत्रमहो महान् ॥ २२ ॥ उपाकर्मोष्ठरुचकः प्रवर्ग्यावर्तभूषणः ॥ नानाच्छन्दोगतिपथो ब्रह्मोक्तक्रमविक्रमः ॥ २३ ॥ भूत्वा
यज्ञवराहोऽसावुद्दधार महीं ततः ॥ तस्योद्धृतवतः पृथ्वीं दंष्ट्राग्रं निर्गतं बहिः ॥ २४ ॥ तस्मिन्प्राभासिके क्षेत्रे कर्दमेन विलेपितम् ॥ तद्दंष्ट्राग्रं यतो
देवि कर्दमालं ततः स्मृतम् ॥ २५ ॥ दण्डोद्भेदं महाकुण्डं यत्र दंष्ट्रा सुसंस्थिता ॥ तद्दंष्ट्रयोद्धृतं तोयं कोटिगंगाभिषेकवत् ॥ २६ ॥ तत्र गव्यूति
मात्रं तु विष्णुक्षेत्रं सनातनम् ॥ देशांतरं गता ये च दण्डोद्भेदे म्रियंति वै ॥ यावत्कल्पसहस्राणि विष्णुलोकं व्रजंति ते ॥२७॥ यस्तु पश्येन्महादेवि
कर्दमाले तु सूकरम् ॥ कोटिहिंसा[2]युतो वापि स प्राप्स्यति परां गतिम् ॥ २८ ॥ दशजन्मकृतं पापं नश्येत्तद्दर्शनात्प्रिये ॥ जन्मान्तरसहस्रेषु
यत्कृतं पापसंचयम् ॥ २९ ॥ कर्दमाले तु वाराहं दृष्ट्वा तन्नाशमेष्यति ॥ हेमकोटिसहस्राणि गवां कोटिशतानि च ॥ ३० ॥ दत्त्वा यल्लभते
पुण्यं सकृद्वाराहदर्शनात् ॥ कलौ युगे महारौद्रे प्राणिनां च भयावहे ॥ नान्यत्र जायते मुक्तिर्मुक्त्वा क्षेत्रं तु सौकरम् ॥ ३१ ॥ एतत्सारतरं देवि
प्रोक्तमुद्देशतस्तव ॥ कर्दमालस्य माहात्म्यं सर्वपातकना[3]शनम् ॥ ३२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभास
खण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये कर्दमालमाहात्म्यवर्णनंनाम त्रिपञ्चाशदुत्तरत्रिशततमोऽध्यायः ॥ ३५३ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥
ततो गच्छेन्महादेवि देवं गुप्ते[4]श्वरं प्रिये ॥ तत्र पश्चिमवायव्ये यत्र सोमोऽकरोत्तपः ॥ १ ॥ गुप्तो भूत्वा कुष्ठरोगाल्लज्जयाधोमुखः स्थितः ॥ दिव्यं
वर्षसहस्रं तु प्रभासक्षेत्र उत्तमे ॥ २ ॥ ततः प्रत्यक्षतां यातः सर्वदेवपतिः शिवः ॥ तुष्टो बभूव चंद्रस्य क्षयनाशं तथाऽकरोत् ॥ ३ ॥ क्षयरोगविनि
र्मुक्तस्ततोऽभून्मृगलांछनः ॥ प्रतिष्ठाप्य महालिंगं सुरासुरनमस्कृतम् ॥ ४ ॥ गुप्तस्तेपे तपो यस्मात्तस्माद्गुप्तेश्वरः स्मृतः ॥ सर्वकुष्ठहरो देवो
दर्शनात्स्पर्शनादपि ॥ ५ ॥ सोमवारे विशेषेण यस्तल्लिंगं प्रपूजयेत् ॥ तस्यान्वयेऽपि देवेशि कुष्ठी कश्चिन्न जायते ॥ ६ ॥ इति श्रीस्कान्दे महा
पुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये गुप्तेश्वरमाहात्म्यवर्णनंनाम चतुष्पञ्चाशदुत्तरत्रिशततमो
ऽध्यायः ॥ ३५४ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि देवं बहुसुवर्णकम् ॥ हिरण्यापूर्वदिग्भागे स्थाने बहुसुवर्णके ॥ १ ॥

१ सुस्राव सलिलं पृथ्वी–इ० पा० । २ कोटिहत्यायुतो वापि–इ० पा० । ३ सर्वतीर्थाधिकं पुनः–इ० पा० । ४ गुप्तं सोमेश्वरं प्रिय–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्मपुत्रेण यत्रैव कृतो यज्ञः सुदुष्करः ॥ नाम्ना बहुसुवर्णेति स्थाप्य लिंगं महाप्रभम् ॥ २ ॥ सर्वक्रतूनां फलदं नाम्ना सर्वेश्वरं विदुः ॥ तत्रैव संस्थितं लिंगं पूर्णं सारस्वतैर्जलैः ॥ ३ ॥ स्नात्वा तत्र वरारोहे पिण्डदानं ददाति यः ॥ कुलकोटिं समुद्धृत्य रुद्रलोके महीयते ॥ ४ ॥ यस्तं पूजयते भक्त्या गन्धपुष्पैर्विधानतः ॥ कोटिपूजाफलं तस्य तथेत्याह सदाशिवः ॥ ५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये बहुसुवर्णेश्वरमाहात्म्यवर्णनंनाम पञ्चपञ्चाशदुत्तरत्रिशततमोऽध्यायः ॥ ३५५ ॥ ॥ छ ॥ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि शृंगेश्वरमनुत्तमम् ॥ शुकस्थानस्य सान्निध्ये सर्वपातकनाशनम् ॥ १ ॥ स्नात्वा तत्रैव विधिवच्छृंगेशं पूजयेन्नरः ॥ मुक्तः स्यात्पातकैः सर्वैर्ऋष्यशृंगो यथा पुरा ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये शृंगेश्वरमाहात्म्यवर्णनंनाम षट्पञ्चाशदुत्तरत्रिशततमोऽध्यायः ॥ ३५६ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ तस्मादीशानदिग्भागे तत्कोटिनगरं स्मृतम् ॥ तस्य दक्षिणदिग्भागे स्थितं योजनमात्रकम् ॥ कोटीश्वरं महालिंगं कोटियज्ञफलप्रदम् ॥ १ ॥ स्नात्वा तत्र विधानेन यस्तल्लिंगं प्रपूजयेत् ॥ स मुक्तः पातकैः सर्वैः कोटियज्ञफलं लभेत् ॥ २ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये कोटीश्वरमाहात्म्यवर्णनंनाम सप्तपंचाशदुत्तरत्रिशततमोऽध्यायः ॥ ३५७ ॥ ॥ छ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि तीर्थं नारायणाभिधम् ॥ तस्यैवेशानदिग्भागे वापी शांडिल्यकीर्तिता[2] ॥ १ ॥ स्नात्वा तत्रैव विधिवच्छांडिल्यं यः प्रपूजयेत् ॥ ऋषिपंचम्यां विधिना नारी चैव पतिव्रता ॥ स्पृष्टास्पृष्टा विमुच्येत रजोदोषभयाद्ध्रुवम् ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये नारायणतीर्थमाहात्म्यवर्णनंनामाष्टापंचाशदुत्तरत्रिशततमोऽध्यायः ॥ ३५८ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि स्थानं शृंगसरोऽभिधम् ॥ १ ॥ शृंगारेश्वरनामा च तत्र देवः प्रतिष्ठितः ॥ शृङ्गारं विधिवच्चक्रे यत्र गोपीयुतो हरिः ॥ २ ॥ शृङ्गारेश्वरनामा च तेन पापौघनाशनः ॥ पूजयेद्यो विधानेन तत्र स्थाने स्थितं भवम् ॥ दारिद्र्यदुःखसंयुक्तो न स भूयाद्भवे क्वचित् ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये शृंगारेश्वरमाहात्म्यवर्णनंनामैकोनषष्ट्युत्तरत्रिशततमोऽध्यायः ॥ ३५९ ॥ ॥छ॥

१ गन्धधूपैः–इ० पा० । २ शांडिल्यकीर्तिता–शांडिल्यनाम्ना विख्याता–शांडिल्यतीर्थनाम्ना प्रसिद्धा–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि हिरण्यातटसंस्थितम् ॥ घटिकास्थानमिति च यत्र सिद्धः पुरा ऋषिः ॥ १ ॥
नांड्यैकया मृकण्डस्तु ध्यानयोगाद्वरानने ॥ तत्रैव स्थापितं लिंगं मार्कंडेश्वरनामतः ॥ सर्वपापोपशमनं दर्शनात्पूजनादपि ॥ २ ॥ इति
श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये मार्कंडेश्वरमाहात्म्यवर्णनंनाम षष्ट्युत्तर
त्रिशततमोऽध्यायः ॥ ३६० ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि मण्डूकेश्वरमित्यपि ॥ मांडूक्यायननाम्ना वै
लिंगं तत्र प्रतिष्ठितम् ॥ १ ॥ तत्र कोटिह्रदो देवि तथा कोटीश्वरः शिवः ॥ तत्र मातृगणश्चैव स्थितः कामफलप्रदः ॥ २ ॥ स्नात्वा कोटि
ह्रदे तीर्थे तल्लिंगं यः प्रपूजयेत् ॥ मातॄस्तत्रैव संपूज्य दुःखशोकाद्विमुच्यते ॥ ३ ॥ तस्मात्पूर्वेण देवेशि योजनैकेन निर्मलम् ॥ त्रितकूपेति
विख्यातं सर्वपातकनाशनम् ॥ सर्वेषां देवि तीर्थानां यत्तत्रैव व्यवस्थितिः ॥ ४ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां
सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये कोटिह्रदमण्डूकेश्वरमाहात्म्यवर्णनंनामैकषष्ट्युत्तरत्रिशततमोऽध्यायः ॥ ३६१ ॥ ॥ छ ॥ ॥ ईश्वर
उवाच ॥ ॥ ततो गच्छेन्महादेवि गोष्पदस्योत्तरे स्थितम् ॥ गव्यूतिद्वितयेनैव वलाय इति विश्रुतम् ॥ १ ॥ तत्रैकादशरुद्राणां स्थानलिंगान्यपि
प्रिये ॥ अजैकपादहिर्बुध्न्यः संतीत्यादीनि नामतः ॥ पूजयेत्तानि विधिवन्मुच्यते सर्वपातकैः ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां
संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्य एकादशरुद्रलिंगमाहात्म्यवर्णनंनाम द्विषष्ट्युत्तरत्रिशततमोऽध्यायः ॥ ३६२ ॥ ॥ छ ॥
॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि हिरण्यातटसंस्थितम् ॥ स्थानं तुण्डपुरंनाम यत्रासौ घर्घरो ह्रदः ॥ १ ॥ तत्र कन्देश्वरो देवो यत्र
बद्धा जटा मया ॥ तत्र स्नात्वा नरः सम्यक्तं देवं यः प्रपूजयेत् ॥ स मुक्तः पातकैर्घोरैः प्राप्नुयाच्छासनं[3] शुभम् ॥ २ ॥ इति श्रीस्कान्दे महापुराण
एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे प्रथमे प्रभासक्षेत्रमाहात्म्ये हिरण्यातुण्डपुरघर्घरह्रदकन्देश्वरमाहात्म्यवर्णनंनाम त्रिषष्ट्युत्तरत्रिशतत
मोऽध्यायः ॥३६३॥ ॥छ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि संवर्तेश्वरमुत्तमम् ॥ इन्द्रेश्वरात्पश्चिमतः पूर्वतश्चार्कभास्करात् ॥ १ ॥
तं दृष्ट्वा तु महादेवं स्नात्वा पुष्करिणीजले ॥ दशानामश्वमेधानां फलमाप्नोति मानवः ॥ २ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहि
तायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये संवर्तेश्वरमाहात्म्यवर्णनंनाम चतुष्षष्ट्युत्तरत्रिशततमोऽध्यायः ॥ ३६४ ॥ ॥ छ ॥ ॥

१ नाड्या--घटिकया--इत्यर्थः। २ निर्मितम्—इ० पा०। ३ शिवशासनम्—इ० पा०।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ईश्वर उवाच॥ ॥ ततो गच्छेन्महादेवि हिरण्यायाश्च उत्तरे॥ सिद्धिस्थानानि दिव्यानि यत्र सिद्धा महर्षयः॥ १॥ तत्र लिंगान्यनेकानि
शक्यंते कथितुं न हि॥ साग्रं शतं पुनस्तत्र लिंगानां प्रवरं स्मृतम्॥२॥ वज्रिण्यास्तु तटे देवि लिंगान्येकोनविंशतिः॥ न्यंकुमत्यास्तटे देवि सहस्रं
द्विशताधिकम्॥ ३॥ प्राधान्येन वरारोहे पूर्वे स्वायंभुवेऽन्तरे॥ कपिलायास्तटे देवि लिंगानां षष्टिरुत्तमा॥ ४॥ सरस्वत्यां पुनस्तत्र लिंगसंख्या न
विद्यते॥ एवं पंचमुखा देवि लिंगमाला विभूषिता॥ ५॥ प्रभासे कथिता देवि पंचस्रोताः सरस्वती॥ यस्याः प्रवाहैः संभिन्नं क्षेत्रं द्वादशयोजनम्॥
॥ ६॥ तत्र वापीषु कूपेषु यत्र तत्रोद्भवं जलम्॥ सारस्वतं तु तज्ज्ञेयं ते धन्या ये पिबंति तत्॥ ७॥ यत्र तत्र नरः स्नात्वा सम्यक्छ्रद्धासमन्वितः॥
सारस्वतस्नानफलं लभते नात्र संशयः॥ ८॥ यत्प्रोक्तं स्पर्शलिंगं तु श्रीसोमेशेति विश्रुतम्॥ प्रभासक्षेत्रलिंगानां कला तस्यैव शांकरी॥ ९॥
यद्वा तद्वा पूजयित्वा लिंगं क्षेत्रस्य मध्यगम्॥ श्रीसोमेशमिति ज्ञात्वा सोमेशः पूजितो भवेत्॥१०॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां
संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये प्रकीर्णस्थानलिंगमाहात्म्यवर्णनंनाम पंचषष्ट्युत्तरत्रिशततमोऽध्यायः॥ ३६५॥ ॥ छ॥

इति श्रीस्कान्दे महापुराणे सप्तमे प्रभासखंण्डे प्रथमं प्रभासक्षेत्र माहात्म्यं सम्पूर्णम्॥ (७-१)॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥इति श्रीस्कांदे महापुराणे सप्तमे प्रभासखंडे प्रथमं प्रभासक्षेत्रमाहात्म्यं संपूर्णम्॥(७-१)॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ श्रीस्कांदे महापुराणे सप्तमे प्रभासखंडे द्वितीयं वस्त्रापथक्षेत्रमाहात्म्यं प्रारभ्यते॥(७-२)॥

३४-ख० ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ ॥ अथ श्रीस्कांदे महापुराणे सप्तमे प्रभासखण्डे द्वितीयं श्रीवस्त्रापथक्षेत्रमाहात्म्यं प्रारभ्यते ॥
॥ ॥ ईश्वर उवाच ॥ ॥ अथ ते संप्रवक्ष्यामि क्षेत्रगर्भं महोदयम् ॥ तद्वस्त्रापथमाहात्म्यं यत्र रैवतको गिरिः ॥ १ ॥ दामोदरं रैवतके भवं
वस्त्रापथे तथा ॥ एतद्रैवतकं क्षेत्रं वस्त्रापथमिति स्मृतम् ॥ २ ॥ सुवर्णरेखा यत्रस्था नदी पातकनाशनी ॥ यत्र साक्षात्स्थितः कृष्णो दामोदर इति
स्मृतः ॥ ३ ॥ यत्र स्थितं मृगीकुण्डं महापातकनाशनम् ॥ सकृच्छ्राद्धे कृते यत्र कल्पकोटिसहस्रकम् ॥ पितॄणां जायते तृप्तिरपुनर्भवकांक्षिणी
॥ ४ ॥ ॥ देव्युवाच ॥ ॥ भगवन्विस्तराद्ब्रूहि दामोदरमहोदयम् ॥ क्षेत्रगर्भस्य माहात्म्यं कर्णिकारूपसंस्थितम् ॥ ५ ॥ ॥ ईश्वर उवाच ॥ ॥
शृणु देवि प्रवक्ष्यामि दामोदरहरिं प्रति ॥ इतिहासं पुरा ख्यातमृषिभिः कल्पवासिभिः ॥ ६ ॥ गंगातीरे शुभे रम्ये पुण्ये जनपदाकुले ॥ ऋषिभिः
सेविते नित्यं स्वर्गमार्गप्रदे ध्रुवम् ॥ ७ ॥ तत्र ज्ञानविदो विप्रा यजंति विविधैर्मखैः ॥ ऋषयः सांख्ययोगेन दानेनैवेतरे जनाः ॥ ८ ॥ ब्राह्मणाः
क्षत्रिया वैश्याः शूद्राः स्वर्गमभीप्सवः ॥ सेवंते तज्जलं दिव्यं देवानामपि दुर्लभम् ॥ ९ ॥ तत्र राजा गजोनाम बली सर्वजनाधिपः ॥ गंगाजलाभिषे
कार्थं त्यक्त्वा राज्यं जगाम ह ॥ १० ॥ भार्या तस्य सती साध्वी पुत्रिणी रूपसंयुता ॥ साऽप्ययात्सह तेनैव भर्त्रा वै भर्तृवत्सला ॥ ११ ॥ संगता
नाम नाम्ना च दक्षा दाक्षायणी यथा ॥ एवं निवसतोस्तत्र वर्षाणामयुतं गतम् ॥ १२ ॥ आजगाम ऋषिस्तत्र भद्रोनाम महायशाः ॥ सहितो बहु
भिर्विप्रै[1]र्जपहोमपरायणैः[2] ॥ १३ ॥ त्यक्त्वा संसारमार्गं तु स्वर्गमार्गजिगीषवः ॥ गंगानिषेवणं कृत्वा स्फोटयित्वाऽऽत्मजं[3] मलम् ॥ १४ ॥ जलं
दत्त्वा तु भूतेभ्यः पूजयित्वा जनार्दनम् ॥ यावद्यांति नदीतीर ऋषयो भद्रकादयः ॥ तावत्पश्यंति राजानं गजं वरगजोपमम् ॥१५॥ तेनैव दृष्टा मुन
यो राज्ञा निहतकल्मषाः ॥ सप्तर्षयो यथा स्वर्गे सुरराजेन धीमता ॥१६॥ तमृषिं स च संप्रेक्ष्य पदानि दश पंच च ॥ आगच्छन्त्वत्र पूजार्हा भवंतो
मम मन्दिरम् ॥ १७ ॥ पश्यंतु संगतां सर्वे मम भार्यां यशस्विनीम् ॥ तस्याः पूजां समादाय यो मार्गो मनसि स्थितः ॥ १८ ॥ तं गच्छध्वं महा
भागाः पुण्याः पुण्यमभीप्सवः ॥ एवमुक्तास्तु ते राज्ञा ऋषयः कौतुकान्विताः ॥ आजग्मुर्मंदिरं शुभ्रं पुरंदरपुरोपमम् ॥ १९ ॥ आसनानि विचि
त्राणि दत्त्वा तेषां मनस्विनी ॥ संगता राजराजेन सार्द्धमग्रे व्यवस्थिता ॥२०॥ कृत्वा करपुटं राजा ऋषीणां पुण्यकर्मणाम् ॥ बभाषे वचनं राजा
भद्रो भद्रं सुसंगतम् ॥ २१ ॥ वसुधा वसुसंपूर्णा मंडिता नगरी पुरी ॥ पर्वतैश्च समुद्रैश्च सरिद्भिश्च सरोवरैः ॥ २२ ॥ ग्रामैश्चतुष्पथैर्घोरैर्गोकुलै

१ विष्णुः—इ० पा० । २ यमहोमपरायणैः—इ०पा० । ३ अंगज मलम्—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

राकुलीकृता ॥ नररत्नैरश्वरत्नैर्गजरत्नैस्तु संकुला ॥ २३ ॥ दुस्त्यजा भोगभोक्तॄणां परं ज्ञानमजानताम् ॥ संसारेऽत्र महाघोरे पुनरावृत्ति कारिणि ॥ २४ ॥ पतंति पुरुषा भद्र पत्राणीव पुनःपुनः ॥ कृतेन येन विप्रेंद्र स्वर्गं प्राप्नोति निर्मलम् ॥ दानेन तपसा चैव तत्त्वमा चक्ष्व सुव्रत ॥ २५ ॥ ॥ भद्र उवाच ॥ ॥ तीर्थानि तोयपूर्णानि देवाः पाषाणमृन्मयाः ॥ आत्मस्थं ये न पश्यंति ते न पश्यंति तत्परम् ॥ २६ ॥ संति तीर्थान्यनेकानि पुण्यान्यायतनानि च ॥ पुण्यतोयाः पवित्राश्च सरितः सागरास्तथा ॥ बहुपुण्यप्रदा पृथ्वी स्थानेस्थाने पदेपदे ॥ २७ ॥ यद्यस्ति तव राजेंद्र ज्ञानं ज्ञानवतां वर ॥ विष्णुं जिष्णुं हृषीकेशं शंखिनं गदिनं तथा ॥ २८ ॥ चतुर्भुजं महाबाहुं प्रभासे दैत्यसूदनम् ॥ वाराहं वामनं चैव नारसिंहं बलार्जुनम् ॥ २९ ॥ रामं रामं च रामं च पुरुषोत्तममेव च ॥ पुंडरीकेक्षणं चैव गदापाणिं तथैव च ॥ ३० ॥ राघवं शक्रदमनं गोविंदं बहुपुण्यदम् ॥ जयं च भूधरं चैव देवदेवं जनार्दनम् ॥ ३१ ॥ सुरोत्तमं श्रीधरं च हरिं योगीश्वरं तथा ॥ कपिलेशं भूतनाथं श्वेतद्वीपपतिं हरिम् ॥ ३२ ॥ बदर्याश्रमवासौ च नरनारायणौ तथा ॥ पद्मनाभं सुनाभं च हयग्रीवं विशां पते ॥ ३३ ॥ द्विजनाथं धरानाथं खड्गपाणिं तथैव च ॥ दामोदरं जलावासं सर्वपापहरं हरिम् ॥३४॥ एतान्येव हि स्थानानि देवदेवस्य चक्रिणः ॥ गच्छते यत्र तत्रैव मुच्यते सर्वपातकैः ॥ ३५ ॥ गंगा च यमुना चैव तथा देवी सरस्वती ॥ दृषद्वती गोमती च तापी कावेरिणी तथा ॥ ३६ ॥ नर्मदा शर्मदा चैव नदी गोदावरी तथा ॥ शतद्रुश्च तथा विंध्या पयोष्णी वरदा तथा ॥ ३७ ॥ चर्मण्वती च सरयूर्गंडकी चंडपापहा ॥ चंद्रभागा विपाशा च शोणश्चैव पुनःपुनः ॥ ३८ ॥ एताश्चान्याश्च बहवो हिमवत्प्रभवाः शुभाः ॥ तासु स्नातो नरः स्वर्गं याति पातकवर्जितः ॥ ३९ ॥ वनानि नंदनादीनि पर्वता मंदरादयः ॥ नामोच्चारेण येषां हि पापं याति रसातले ॥४० ॥ ॥ गज उवाच ॥ ॥ भद्रं हि भाषितं भद्र आख्या नममृतोपमम् ॥ पृच्छामि सर्वधर्मज्ञ त्वामहं किंचिदेव हि ॥ ४१ ॥ यस्मिन्मासे दिने यस्मिंस्तीर्थे यस्मिन्क्रमान्नरैः ॥ अक्षयं सेव्यते स्वर्गस्तन्म माचक्ष्व सुव्रत ॥ ४२ ॥ स्नानं दानं जपो होमः स्वाध्यायो देवतार्चनम् ॥ अक्षयो येन वै स्वर्गस्तन्मे गदितुमर्हसि ॥ ४३ ॥ ॥ भद्र उवाच ॥ ॥ श्रूयतां राजशार्दूल कथां कथयतो मम ॥ यां श्रुत्वा मुच्यते पापान्नरो नरवरोत्तम ॥ ४४ ॥ ऋषीणां कथितं पूर्वं नारदेन महात्मना ॥ ४५ ॥ एवं पृष्टश्च तैः सर्वैर्नारदो मुनिसत्तमः ॥ कथयामास संहृष्टो मेघदुंदुभिनिस्वनैः ॥ ४६ ॥ रम्ये हिमवतः पृष्ठे समवाये मया श्रुतम् ॥ तदहं तव वक्ष्यामि 

१ बलार्जुनम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रोतुकाम नरर्षभ ॥ ४७ ॥ तीर्थान्येव हि सर्वाणि पुनरावर्त्तकानि तु ॥ अक्षयाल्लँभते लोकांस्तत्तीर्थं कथयामि ते ॥ ४८ ॥ मार्गशीर्षे कान्यकुब्ज उषित्वा राजसत्तम ॥ न शोचति नरो नारी स्वर्गं याति परावरम् ॥४९॥ पौषस्य पौर्णमासी या यदि सा क्रियतेऽर्बुदे ॥ वर्षाणामर्बुदं स्वर्गे मोदते पितृभिः सह ॥५०॥ माघ्यां यदि गयाश्राद्धं पितॄणां यच्छते नरः ॥ त्रयाणामपि देवानां चतुर्थः स प्रजायते ॥५१॥ फाल्गुन्यां हिमवत्पृष्ठे वसन्नेकां निशां नरः ॥ स याति परमं स्थानं यत्र देवो जनार्दनः ॥ ५२ ॥ चैत्र्यां श्राद्धं प्रभासे तु ये कुर्वंति मनीषिणः ॥ न ते मर्त्या भवन्तीह कुलजैः सह सत्तमाः ॥ ५३ ॥ चतुर्भुजे तु वैशाख्यां ये कुर्वंति जलप्रिये ॥ तथावंत्यां नरः कश्चित्स याति परमां गतिम् ॥ ५४ ॥ ज्यैष्ठ्यां ज्येष्ठर्क्ष युक्तायां श्राद्धं च त्रितकूपके ॥ कुर्युर्युगानि ते त्रीणि वसंति नाकसद्मनि ॥ ५५ ॥ यो ब्रजेशवने[1] नद्यां दिनानि नव पंच च ॥ तिष्ठते च नरः स्वर्गं वैकुण्ठमभिगच्छति ॥ ५६ ॥ श्रावणस्य तु मासस्य पूर्णायां पूर्वसागरे ॥ स्नानं दानं जपं श्राद्धं नरः कुर्वन्न शोचति ॥ ५७ ॥ तथा भाद्रपदे क्षेत्रे प्रभासे शशिभूषणम् ॥ पूजयित्वा नरो लिंगं देवलिंगी भवेत्ततः ॥ ५८ ॥ आश्विने चंद्रभागायां श्राद्धं स्नानं करोति यः ॥ स्थानं युगसहस्राणां कृतं तेन त्रिविष्टपे ॥ ५९ ॥ अष्टाक्षरैश्चतुर्बाहुं ध्यायंति मुनिसत्तमाः ॥ बहुनाऽत्र किमुक्तेन गजाहं प्रवदामि ते ॥ ६० ॥ दामोदरसमं तीर्थं न भूतं न भविष्यति ॥ मासानां कार्त्तिकः श्रेष्ठः कार्त्तिके भीष्मपंचकम् ॥ ६१ ॥ तत्रापि द्वादशी श्रेष्ठा राजन्दामोदरे जले ॥ किमन्यैर्बहुभिस्तीर्थैः किं क्षेत्रैः किं महावनैः ॥ दामोदरे नरः स्नात्वा सर्वपापैः प्रमुच्यते ॥ ६२ ॥ ॥ गज उवाच ॥ ॥ भद्र भद्रं त्वया प्रोक्तं रसायनमिवापरम् ॥ भूयोऽहं श्रोतुमिच्छामि तीर्थस्यास्य महाफलम् ॥ ६३ ॥ के देशाः किं प्रमाणं तु का नदी के च पर्वताः ॥ जना वसंति के तत्र ऋषयः के तपस्विनः ॥ ६४ ॥ ॥ भद्र उवाच ॥ ॥ पृथिवी वसुसंपूर्णा सागरेण तु वेष्टिता ॥ मंडिता नगरैर्ग्रामैः पुरैः परपुरंजय ॥ ६५ ॥ वाराणसी प्रभासं च संगमं सितकृष्णयोः[2] ॥ एवं साराणि तीर्थानि यस्मान्[3]मृत्युहराणि च ॥ ६६ ॥ दामोदरेति ये नूनं स्मरंतो यत्र तत्र हि ॥ ते वसंति हरेर्गेहं न सरंति कदाचन ॥ ६७ ॥ सोमनाथस्य सान्निध्य उदयन्तो[4] गिरिर्महान् ॥ तस्य पश्चिमभागे तु रैवतक इति स्मृतः ॥ ६८ ॥ वाहिनी वहते तत्र नदी कांचनशेखरात्[5] ॥ धातवस्तत्र ते रक्ताः श्वेता नीलास्तथाऽसिताः ॥ ६९ ॥ पाषाणाः कुञ्जराकाराश्चान्ये सैरिभसन्निभाः[6] ॥

१ ब्रजेशवने नद्याम्—वृंदावनपरिसरवाहिन्यां यमुनायाम्—इत्यर्थः । २ सितकृष्णयोः—गंगायमुनयोः—इत्यर्थः । ३ तस्मात्—इ० पा० । ४ ऊर्जयन्तः—इ०पा० । ५ काचित्तु शेखरात्—इ०पा० । ६ सैरिभसंनिभाः—महिषाकाराः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चणकाकृतयश्चान्ये अन्ये गोक्षुरकप्रभाः ॥ ७० ॥ वृक्षा वल्ल्यश्च गुल्माश्च संतानाः संत्यनेकशः ॥ सर्वं तत्कांचनमयं मूलं पुष्पं फलं दलम् ॥ ७१ ॥ न हि पश्यति पापात्मा मुक्तः पापेन पश्यति ॥ सेव्यते स गिरिर्नित्यं धातुवादपरैर्नरैः ॥ ७२ ॥ ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैः शूद्रानुगैर्बहिः ॥ पक्षिणस्तत्र बहवः शिवाशिवगिरस्तदा ॥ ७३ ॥ हंससारसचक्राह्वाः शुककोकिलबर्हिणः ॥ मृगाश्च वानरेन्द्राश्च हंसा व्याघ्रा स्तथैव च ॥ ७४ ॥ तत्तीर्थस्य प्रभावेन न दुष्टान्याचरंति ते ॥ कालेन मृत्युमायांति पशुपक्षिसरीसृपाः ॥ ७५ ॥ सर्वे विमानमारूढा गच्छन्ति हरिमन्दिरम् ॥ वायुना पातितं यत्र पत्रपुष्पफलादिकम् ॥ ७६ ॥ तस्या नद्या जलं स्पृष्ट्वा सर्वं वै मुक्तिमाप्नुते ॥ सा नदी पृथिवीं भित्त्वा पाताला दागता नृप ॥ ७७ ॥ पूर्वं पन्नगराजस्तु तेन मार्गेण चागतः ॥ स्नातुं दामोदरे तीर्थे जन्ममृत्युप्रघातिनि ॥ ७८ ॥ स्वर्गादागत्य चन्द्रोऽपि यष्टुं यज्ञं सुपुष्कलम् ॥ यक्ष्मरोगाद्विनिर्मुक्तो गतः स्वर्गं निरामयः ॥ ७९ ॥ बलिना चैव दानानि दत्तान्यागत्य कार्तिके ॥ हरिश्चन्द्रेण विधिना नलेन नहुषेण च ॥ ८० ॥ नाभागेनांबरीषाद्यैः कृतं कर्म सुदुष्करम् ॥ दत्त्वा दानान्यनेकानि गजा गावो हया रथाः ॥ ८१ ॥ अनडुत्कांचनं भूमिं रत्नानि विविधानि च ॥ छत्राणि विप्रमुख्येभ्यो यानानि चैव वाससी ॥ ८२ ॥ अन्नानि रसमिश्राणि दत्त्वा दामोदराग्रतः ॥ गतास्ते विष्णु भुवनं नागच्छंति महीतले ॥ ८३ ॥ पत्रं पुष्पं फलं तोयं तस्मिंस्तीर्थे ददाति यः ॥ द्विजानां भक्तिसंयुक्तः स याति जलशायिनम् ॥ ८४ ॥ प्रसृतिं चापि यो दद्यान्मुष्टिं वाथ क्षुधार्थिने ॥ विमानवरमारूढः स सोमं प्रति गच्छति ॥ ८५ ॥ दामोदराग्रतः कृत्वा पर्वतानन्नसंभवान् ॥ पूजि तान्फलपुष्पैश्च दीपं दद्यात्सवर्त्तिकम् ॥ ८६ ॥ अवाप्य दुष्करं स्थानं कुलानां तारयेच्छतम् ॥ चतुरंगुलमात्रेपि दत्ते दामोदराग्रतः ॥ ८७ ॥ दाने युगसहस्राणि स्वर्गलोके महीयते ॥ मा गच्छ हिमवत्पृष्ठं मलयं मा च मन्दरम् ॥ ८८ ॥ गच्छ रैवतकं शैलं यत्र दामोदरः स्थितः ॥ कृत्वा मासोपवासं तु द्विजो दामोदराग्रतः ॥ ८९ ॥ न निवर्तति कालेन दामोदरपुरं व्रजेत् ॥ करोत्यनशनं यश्च नरो नार्यथवा पुनः ॥ सर्वे लोकानतिक्रम्य स हरेर्गेहं[2]माप्नुयात् ॥ ९० ॥ विघ्नानि तत्र तिष्ठन्ति नित्यं पञ्चशतानि च ॥ धर्मविध्वंसकर्तॄणि नरस्तत्र न गच्छति ॥ ९१ ॥ प्रद्युम्नबलशैनेयगदाचक्रादिभिः सदा ॥ शतलक्षप्रमाणैस्तु सेव्यते स गिरिर्महान् ॥ ९२ ॥ क्रीडंति नार्यस्तेषां हि नित्यं दामोदराग्रतः ॥ सुचन्द्रवदना गौर्यः श्यामाश्चैव सुमध्यमाः ॥ ९३ ॥ नितंबिन्यः सुकेशाश्च शुभ्राः स्वायतलोचनाः ॥ सुगंडा ललिताश्चैव सुकक्षाः सुपयोध

१ ऊर्ध्व यत्नास्पदं गत्वा—इ० च पा० । २ हरेर्देहम्—इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राः ॥ ९४ ॥ शोभमानाः सुजंघाश्च सुपादाः सुन्दरांगुलीः ॥ राजपुत्र्यो गिरौ तस्मिन्हसंति च रमंति च ॥ ९५ ॥ कौसुंभं पादयुगले कुंकुमं पीतकंचुकम् ॥ ब्राह्मणीभ्यो ददन्तीह स्पर्द्धमानाः पृथक्पृथक् ॥ ९६ ॥ भक्ष्यं भोज्यं च पेयं च लेह्यं चोष्यं च पिच्छिलम् ॥ तांबूलं पुष्पसंयुक्तं कार्तिके हरिवासरे ॥ ९७ ॥ दृष्ट्वा तु रेवतीकुंडं प्रदद्यात्फलमुत्तमम् ॥ पुत्रिणी ऋद्धिसंपन्ना सुभगा जायते सती ॥ ९८ ॥ एवं कृत्वा तु सा रात्रिर्नीयते निद्रया विना ॥ वेदघोषैः सुपुण्यैस्तु भारताख्यानवाचनैः ॥ ९९ ॥ हुंकृतैस्तलशब्दैश्च तालशब्दैः पुनःपुनः ॥ देशभाषाविभाषिण्यो रामामण्डलमध्यतः ॥ हास्यनृत्यसमायुक्ता राजन्दामोदराग्रतः ॥ १०० ॥ पञ्चपाषाणकं हर्म्यं यः करोति शिवालयम् ॥ पंचवर्षसहस्राणि स्वर्गलोके महीयते ॥ १०१ ॥ दशपाषाणसंयुक्तं कृत्वा दामोदराग्रतः ॥ दशवर्षसहस्राणि स्वर्गे हल्लति मल्लति ॥ १०२ ॥ शतपाषाणकं हर्म्यं यः करोति महन्नृप ॥ मन्दिरं सुन्दरं शुभ्रं स याति हरिमन्दिरम् ॥ १०३ ॥ कृत्वा साहस्रिकं चैत्यं बहुरूपसमन्वितम् ॥ सर्वाँल्लोकानतिक्रम्य परं ब्रह्माधिगच्छति ॥ १०४ ॥ पंचवर्णध्वजं दद्याद्दामोदरगृहोपरि ॥ तंतुप्रमाणवर्षाणि दिव्यानि स दिवं व्रजेत् ॥ १०५ ॥ तस्य गव्यूतिमात्रेण क्षेत्रं वस्त्रापथं शुभम् ॥ यद्दृष्ट्वा सर्वपापानि विलीयन्ते बहूनि च ॥ १०६ ॥ राजंस्तत्पदमायाति यद्गत्वा न निवर्त्तते ॥ पूजयित्वा भवं देवं भवसंभवनाशनम् ॥ १०७ ॥ नरो नारी नृपश्रेष्ठ शिवलोके महीयते ॥ तच्छ्रुत्वा वचनं तस्य भद्रस्य च सुभाषितम् ॥ १०८ ॥ आगतः कार्तिकीं कर्त्तुं देवे दामोदरे ततः ॥ ऋग्यजुःसामसंयुक्तैर्ब्राह्मणैर्ब्रह्मवित्तमैः ॥ १०९ ॥ क्षत्रियैः क्षत्रधर्मज्ञैर्वैश्यैर्दानपरायणैः ॥ सह शूद्रैः समायातस्तस्मिंस्तीर्थे गजो नृपः ॥ ११० ॥ दत्त्वा दानान्यनेकानि हुत्वा हविर्हुताशने ॥ अग्निष्टोमादिकान्यज्ञान्हयमेधादिकान्बहून् ॥ चकार विधिवद्राजा गजस्तत्र समाहितः ॥ १११ ॥ ततश्च न्यवसत्तत्र तपः कर्तुं सहर्षिभिः ॥ ऊर्द्ध्वपादाः स्थिता विप्राः पीत्वा धूममधोमुखाः ॥ शुष्कपत्राशनाश्चान्ये अन्ये वै फलभोजनाः ॥ ११२ ॥ मूलानि चान्ये भक्षंति अन्ये वार्यशना द्विजाः ॥ आलोकंति स्त्रमन्ये च तथान्ये जलशायिनः ॥ ११३ ॥ पञ्चाग्निसाधकाश्चान्ये शिलाचूर्णस्य भक्षकाः ॥ जपंति चान्ये संशुद्धा गायत्रीं वेदमातरम् ॥ सावित्रीं मनसा चान्ये देवीमन्ये सरस्वतीम् ॥ ११४ ॥ सूक्तानि हि पवित्राणि ब्रह्मणा निर्मितानि च ॥ अन्येऽवसंस्तदा तत्र द्वादशाक्षरचिन्तकाः ॥ ११५ ॥ आलोक्य सर्वशास्त्राणि विचार्य च पुनःपुनः ॥ इदमेव सुनिष्पन्नं ध्येयो नारायणः सदा ॥ ११६ ॥ आराधितः सुदुष्पारे भवे भगवतो विना ॥

१ हल्लति मल्लति—क्रीडति—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तथा नान्यो महादेवात्पतन्तं योऽभिरक्षति ॥ ११७ ॥ गतागता निवर्तंते चंद्रसूर्यादयो ग्रहाः ॥ अद्यापि न निवर्तंते द्वादशाक्षरचिंतकाः ॥ ११८ ॥ येऽक्षरा ऋषयश्चान्ये देवलोकजिगीषवः ॥ प्राप्नुवंति ततः स्थानं दग्धबीजं च तत्तथा ॥ ११९ ॥ सकृदुच्चरितं येन हरिरित्यक्षरद्वयम् ॥ बद्धः परिकरस्तेन मोक्षाय गमनं प्रति ॥ १२० ॥ एकभक्तं तथा नक्तमयाच्यमुषितं तथा ॥ एवमादीनि चान्यानि कृत्वा दामोदराग्रतः ॥ कृतकृत्या भवंतीह यावदाभूतसंप्लवम् ॥ १२१ ॥ स राजा ऋषिभिः सार्द्धं यावत्तिष्ठति तत्र वै ॥ विमानानां सहस्राणि तावत्तत्रागतानि च ॥ १२२ ॥ गंधर्वाप्सरसस्तत्र सिद्धचारणकिन्नराः ॥ सर्वे विमानमारूढाः शतशोऽथ सहस्रशः ॥ १२३॥ सर्वैर्जनपदैः सार्द्धं स राजा भार्यया सह ॥ गतो विमानमारूढो यत्तत्पदमनामयम् ॥ १२४ ॥ य इदं पठते नित्यं शृणुयाद्वाऽपि मानवः ॥ सर्वपापविनिर्मुक्तः परं ब्रह्माधिगच्छति ॥ १२५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे द्वितीये वस्त्रापथक्षेत्रमाहात्म्ये दामोदरमाहात्म्यवर्णनंनाम प्रथमोऽध्यायः ॥ १ ॥ ॥ छ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि क्षेत्रं वस्त्रापथं पुनः ॥ यत्प्रभासस्य सर्वस्वं क्षेत्रं नाभिः प्रियं मम ॥ १ ॥ यत्र साक्षाद्भवो देवः सृष्टिसंहारकारकः ॥ पृथिव्यां स त्वधिष्ठाता तत्त्वानामादिमः प्रभुः ॥ २ ॥ स स्वयंभूः स्थितस्तत्र प्रभासे भूतिदो भवः ॥ भवतीदं जगद्यस्मात्तस्माद्भव इति स्मृतः ॥ ३ ॥ यः सकृत्कुरुते यात्रां क्षेत्रे वस्त्रापथे पुनः ॥ विगाह्य तत्र तीर्थानि कृतकृत्यः स जायते ॥ ४ ॥ अथ दृष्ट्वा भवं देवं सकृत्पूज्य विधानतः ॥ केदारयात्राफलभाक्स भवेन्मनुजोत्तमः[3] ॥ ५ ॥ चैत्रे मासि भवं दृष्ट्वा न पुनर्जायते भुवि ॥ वैशाख्यामथवा सम्यग्भवं दृष्ट्वा विमुच्यते ॥ ६ ॥ वाराणस्यां कुरुक्षेत्रे नर्मदायां तु यत्फलम् ॥ तत्फलं निमिषार्द्धेन भवं दृष्ट्वा दिनेदिने ॥ ७ ॥ दुर्लभस्तत्र वासस्तु दुर्लभं भवदर्शनम् ॥ प्रेतत्वं नैव तस्यास्ति न याम्या नारकी व्यथा ॥ ८ ॥ येषां भवालये प्राणा गता वै वरवर्णिनि ॥ धन्यानामपि धन्यास्ते देवानामपि देवताः ॥ ९ ॥ वस्त्रापथे मतिर्येषां भवे येषां मतिः स्थिरा ॥ गोदानं तत्र शंसंति ब्राह्मणानां च भोजनम् ॥ पिंडदानं च तत्रैव कल्पांतं तृप्तिमावहेत् ॥ १० ॥ इति संक्षेपतः प्रोक्तं माहात्म्यं ते भवोद्भवम् ॥ श्रुतं पापोपशमनं यज्ञायुतफलप्रदम् ॥ ११ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे द्वितीये वस्त्रापथक्षेत्रमाहात्म्ये वस्त्रापथक्षेत्रस्थभवमाहात्म्यवर्णनंनाम द्वितीयोऽध्यायः ॥ २ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ अथ वस्त्रापथे क्षेत्रे संति तीर्थानि कोटिशः ॥ तथापि सारं ते वच्मि सर्वतीर्थमहोदयम् ॥ १ ॥ दामोदरे नदी प्रोक्ता स्वर्णरेखेति

१ अक्षराः—न क्षरन्तीत्यक्षराः ब्रह्मचारिणः--इत्यर्थः । २ उषितम्—उपोषणम्--इत्यर्थः । ३ मनुजाधिपः—इ० पा० । ४ दातव्यम्--इ० पा० । ५ आचरेत्—इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

या स्मृता ॥ ब्रह्मकुण्डं च तत्रैव तथा ब्रह्मेश्वरः स्मृतः ॥ २ ॥ कालमेघश्च संप्रोक्तो भवो दामोदरः स्मृतः ॥ गव्यूतिद्वितयेनैव कालिका तत्र कीर्तिता ॥ ३ ॥ इन्द्रेश्वरश्च तत्रैव रैवतः पर्वतस्तथा ॥ उज्जयंतश्च तत्रैव देवः कुम्भीश्वरः स्मृतः ॥ ४ ॥ भीमेश्वरश्च तत्रैव ततः क्षेत्रं महाप्रभम् ॥ तैलसारणिकंनाम त्रेतायां हैममारकम् ॥ ५ ॥ पंचगव्यूतिमात्रं तु तत्क्षेत्रं संप्रकीर्तितम् ॥ मृगीकुण्डं च तत्रैव सर्वपातकनाशनम् ॥ ६ ॥ एतद्वस्त्रापथं क्षेत्रं रत्नधात्वोस्तथाऽऽकरम् ॥ कथितं तव देवेशि पुनः संक्षेपतो मया ॥ ७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे द्वितीये वस्त्रापथक्षेत्रमाहात्म्ये प्रवरतीर्थानुकीर्तनंनाम तृतीयोऽध्यायः ॥ ३ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि दुन्नाविल्लेति विश्रुतम् ॥ योजनस्यांतरे देवि पश्चिमे मंगलस्थितेः ॥ १ ॥ दुन्नको यत्र भीमेन भुक्त्वा त्यक्तः पुरा प्रिये ॥ तत्रैव विवरं दिव्यं महापातालमार्गदम् ॥ २ ॥ तस्य कल्पः पुरा प्रोक्तः पातालोत्तरसंग्रहे ॥ तत्र लिंगान्यनेकानि सिद्धस्थानानि षोडश ॥ ३ ॥ सुवर्णस्याकरः पूर्वं तत्स्थानमभवत्प्रिये ॥ तस्मिन्स्थाने नरैर्देवि गन्तव्यं भूतिलिप्सया ॥ ४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे द्वितीये वस्त्रापथक्षेत्रमाहात्म्ये दुन्नाविल्लहृद्गिरिस्थानमाहात्म्यवर्णनंनाम चतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततो गच्छेन्महादेवि गंगलात्पश्चिमे स्थितम् ॥ गंगास्रोतस्तथा लिंगं सुरार्कं च विशेषतः ॥ १ ॥ तान्गच्छेद्विधिवद्देवि यदि यात्राफलेप्सुता ॥ स्नात्वा पिण्डप्रदानं च कुर्यात्तत्र यथार्थतः ॥ ब्राह्मणेभ्यस्तथा देयमन्नं भूरि सदक्षिणम् ॥ २ ॥ इति ते कथितं मया प्रिये कलिपापौघविनाशनं शुभम् ॥ निखिलं तीर्थमहोदयोदयं पठितं सद्भिर्निहंति पापसंहतिम् ॥ ३ ॥ इदं न देयं दुर्बुद्धेः सुतरां पापनाशनम् ॥ श्रोतव्यं विधिना तद्वद्भविष्योक्तविधानतः ॥ ४ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमे प्रभासक्षेत्रमाहात्म्ये गंगेश्वरमाहात्म्यवर्णनंनाम पंचमोऽध्यायः ॥ ५ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ अधुना संप्रवक्ष्यामि मंगलात्पश्चिमे व्रजेत् ॥ तत्र सिद्धेश्वरं पश्येत्सर्वसिद्धिप्रदायकम् ॥ १ ॥ तत्रैव चक्रतीर्थं तु तीर्थकोटिफलप्रदम् ॥ लोकेश्वरं स्वयंभूतं पूर्वमिंद्रेश्वरेति च ॥ २ ॥ दृष्ट्वा तं विधिवद्देवि ततो यक्षवनं व्रजेत् ॥ मंगलात्पश्चिमे भागे यत्र देवी स्वयं स्थिता ॥ ३ ॥ यक्षेश्वरी महाभागा वांछितार्थप्रदायिनी ॥ तां संपूज्य विधानेन ततो वस्त्रापथं पुनः ॥ ४ ॥ गिरिं रैवतकं गत्वा कुर्याद्यात्रां विधानतः ॥

३ कुन्तीश्वरः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



मृगीकुंडादितीर्थानि संति तत्रैव कोटिशः ॥ ५ ॥ यद्भुक्तिशिखरे देवि सीमालिंगं हि तत्स्मृतम् ॥ दशकोटिस्तु तीर्थानि तत्र संति वरान
ने ॥ ६ ॥ यत्र वै यादवाः सिद्धाः कलौ ये बुद्धिरूपिणः ॥ शतं सहस्रार्बुदं च लिंगं तत्रैव तिष्ठति ॥ ७ ॥ गजेंद्रस्य पदं तत्र तत्रैव रसकूपिकाः ॥
सप्त कुण्डानि तत्रैव रैवते पर्वतोत्तमे ॥ ८ ॥ अंबिका च स्थिता देवी प्रद्युम्नः सांब एव च ॥ लिंगाकारे पर्वते तु तत्र तीर्थानि कोटिशः ॥ ९ ॥
मृगीकुंडं च तत्रैव कालमेघस्तथैव च ॥ क्षेत्रपालस्वरूपेण महोदधिः स्वयं स्थितः ॥ दामोदरश्च तत्रैव भवो ब्रह्मांडनायकः ॥ १० ॥
॥ ॥ पार्वत्युवाच ॥ ॥ श्रुतानि तव तीर्थानि देवेश वदतस्तव ॥ गंगा सरस्वती पुण्या यमुना च महानदी ॥ ११ ॥ गोदावरी गोमती च नदी
तापी च नर्मदा ॥ सरयूः स्वर्णरेखा च तमसा पापनाशिनी ॥ १२ ॥ नद्यः समुद्रसंयोगाः सर्वाः पुण्याः श्रुता मया ॥ मोक्षारण्यानि दिव्यानि
दिव्यक्षेत्राणि यानि च ॥ १३ ॥ नगर्यो मुक्तिदायिन्यस्ताः श्रुतास्त्वत्प्रसादतः ॥ ब्रह्मविष्णुशिवादीनां सूर्येंदुवरुणस्य च ॥ १४ ॥ देवताना
मृषीणां च संति स्थानान्यनेकशः ॥ परं देव त्वया पुण्यं प्रभासं कथितं मम ॥ १५ ॥ तस्माद्यच्चाधिकं प्रोक्तं क्षेत्रं वस्त्रापथं त्वया ॥ शृण्वंत्या
च मया पूर्वं न पृष्टं कारणं तदा ॥ १६ ॥ इदानीं च श्रुतं सर्वं स्वस्थाहं कारणं वद ॥ प्रभावं प्रथमं ब्रूहि क्षेत्रस्य च [1]भवस्य च ॥ १७ ॥ कस्मिन्देशे
च तत्तीर्थं शिवः केनात्र संस्थितः ॥ [2]स्वयंभूर्भगवान्रुद्रः कथं तत्र स्थितः स्वयम् ॥ प्रभो मे महदाश्चर्यं वर्त्तते तद्वदाधुना ॥ १८ ॥ ॥ ईश्वर
उवाच ॥ ॥ वस्त्रापथस्य क्षेत्रस्य प्रभावं प्रथमं शृणु ॥ पश्चाद्भवस्य माहात्म्यं शृणु त्वं च वरानने ॥ १९ ॥ कान्यकुब्जे महाक्षेत्रे राजा भोजेति
विश्रुतः ॥ पुरा पुण्ययुगे धर्म्यैः प्रजा धर्मेण शासति ॥ २० ॥ विशालाक्षो दीर्घबाहुर्विद्वान्वाग्मी प्रियंवदः ॥ सर्वलक्षणसंपूर्णो बह्वाश्चर्यविलोककः
॥ २१ ॥ वनात्कदाचिदभ्येत्य वनपालोऽब्रवीदिदम् ॥ आश्चर्यं भ्रमता देव वने दृष्टं मयाधुना ॥ २२ ॥ गिरौ विषमभूभागे बहुवृक्षसमाकुले ॥
मृगयूथगता नारी मया दृष्टा मृगानना ॥ २३ ॥ मृगवत्प्लवते बाला सदा तत्रैव दृश्यते ॥ इति श्रुत्वा वचो राजा तुष्टस्तस्मै धनं ददौ ॥ २४ ॥
चतुरं तुरगं दिव्यं वाससी स्वर्णभूषणम् ॥ इदानीमेव यास्यामि सेनाध्यक्ष त्वया सह ॥२५॥ अश्वानां दशसाहस्रं वागुराणां त्वनेकधा ॥ पत्तयो यांतु
सर्वत्र वेष्टयंतु गिरिं वरम् ॥२६॥ न हंतव्यो मृगः कश्चिद्रक्षणीया हि सा मृगी ॥ स्त्रीवेषधारिणी नारी मृगी भवति भूतले ॥२७॥ क्व यास्यति वराकी
सा मद्बलैः परिपीडिता ॥ शस्त्रास्त्रवर्जितं सैन्यं वनपालपदानुगम् ॥२८॥ अहोरात्रेण संप्राप्तं बहुव्याधजनाग्रतः ॥ अश्वाधिरूढो बलवान्भोजराजो

१ जलस्य च—इ०पा० । २ स्वयं तु भगवान्रुद्रः—इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ययौ स्वयम् ॥ २९ ॥ निःशब्दपदसञ्चारः संज्ञासंकेतभाषकः ॥ गिरिं संवेष्टयामास वागुराभिः स्वयं नृपः ॥ ३० ॥ वनपालेन सहितो मृगयूथं ददर्श सः ॥ सा मृगी मृगमध्यस्था नारीदेहा मुखे मृगी ॥ मृगवच्चेष्टते बाला धावते च मृगैः सह ॥ ३१ ॥ अश्वगंधा न्समाघ्राय सन्त्रस्ता मृगयूथपाः ॥ क्षुब्धा भ्रान्ताः क्षणे तस्मिन्सर्वे यांति दिशो दश ॥ ३२ ॥ मृगवक्रा तु या नारी मृगैः कति पयैः सह ॥ प्लवमाना निपतिता वागुरायां विचेतना ॥ ३३ ॥ बलाध्यक्षेण विधृता मृगैः सह शनैर्नृपः ॥ ददर्श महदाश्चर्यं भोज राजो जनैर्वृतः ॥ ३४ ॥ ततः कोलाहलो जातः परमानंदिनिस्वनः ॥ मृगैः सह समानिन्ये कान्यकुब्जं मृगीं नृपः ॥ ३५ ॥ दिव्यवस्त्रसमा च्छन्ना दिव्याभरणभूषिता ॥ नरयानस्थिता नारी प्रविवेश मृगैर्वृता ॥ ३६ ॥ वादित्रैर्ब्रह्मघोषैश्च नीयते नृपमंदिरम् ॥ जनैर्जानपदैर्मार्गे दृश्यते नृपमन्दिरे ॥ ३७ ॥ नीयमाना नागरैश्च महदाश्चर्यभाषकैः ॥ पुण्ये मुहूर्ते संप्राप्ते सा मृगी नृपमन्दिरम् ॥ ३८ ॥ प्रतीहारेण राजेन्द्र वचसा वारितो जनः ॥ गतः सेनापतिः सैन्यं गृहीत्वा स्वनिकेतनम् ॥ ३९ ॥ राजापि स्वगृहं प्राप्य स्नात्वा संपूज्य देवताः ॥ तां मृगीं स्नापया मास दिव्यगन्धानुलेपनाम् ॥ ४० ॥ कुंकुमेन विलिप्तांगीं दिव्यवस्त्रावगुंठिताम् ॥ यथोचितं यथास्थानं दिव्याभरणभूषिताम् ॥ ४१ ॥ एकांते निर्जने राजा बभाषे चारुलोचनाम् ॥ का त्वं कस्य सुता केन कारणेन मृगैः सह ॥ ४२ ॥ स्त्रीणां शरीरं ते कस्मान्मृगीणां वदनं कुतः ॥ इति सर्वं समाचक्ष्व परं कौतूहलं हि मे ॥ ४३ ॥ एवं सा प्रोच्यमानापि न बभाषे कथंचन ॥ मूकवन्न विजानाति न च भुंक्ते सुलोचना ॥ ४४ ॥ न भुंक्ते पृथिवीपालो न राज्यं बहु मन्यते ॥ न दारैर्विद्यते कार्यं नाश्वैर्न च गजै रथैः ॥ ४५ ॥ तदेव राज्यं ते दारास्ते गजास्तद्धनं बहु ॥ प्रमदामदसंरक्तं यत्र संक्रीडते मनः ॥ ४६ ॥ आहूयाह प्रतीहारं तया संमोहितो नृपः ॥ पुरोधसं गुरुं विप्रानाचार्यांञ्छीघ्रमानय ॥ ४७ ॥ दैवज्ञानथ मन्त्रज्ञान्भिषजस्तांत्रिकांस्तथा ॥ इति सन्नोदितो राज्ञा प्रतीहारो ययौ स्वयम् ॥ ४८ ॥ आजगाम स वेगेन समानीय द्विजो त्तमान् ॥ राज्ञे विज्ञापयामास देव विप्राः समागताः ॥ ४९ ॥ प्रवेशय गुरुं द्वाःस्थं संप्राप्तान्मद्धिते रतान् ॥ इति सन्नोदितो राज्ञा तथा चक्रे स बुद्धिमान् ॥ ५० ॥ अभ्युत्थाय नृपः पूर्वं नमस्कृत्य प्रपूज्य च ॥ आसनेषूपविष्टांस्तान्बभाषे कार्यतत्परः ॥ ५१ ॥ इदमाश्चर्यमेवैकं कथं शक्यं निवेदितुम् ॥ जानीत हि स्वयं सर्वे लोकतः शास्त्रतोऽपि वा ॥ ५२ ॥ कथमेषा समुत्पन्ना कस्येदं कर्मणः फलम् ॥ अस्यां केन प्रकारेण वचनं

१ च—इति शेपः । २ यत्नतः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

मानुषं भवेत् ॥ ५३ ॥ स्वयं मनुष्यवदना कथमेषा भविष्यति ॥ सावधानैर्द्विजैर्भूयः सर्वं संचिन्त्य चोच्यताम् ॥ ५४ ॥ ॥ विप्रा ऊचुः ॥ ॥ देवं सारस्वतोनाम कुरुक्षेत्रे द्विजोत्तमः ॥ ऊर्द्ध्वरेताः सरस्वत्यां तपस्तेपे जितेन्द्रियः ॥ ५५ ॥ कथयिष्यति सर्वं ते तेनादिष्टा मृगी स्वयम् ॥ इति श्रुत्वा वचो राजा ययौ सारस्वतं द्विजम् ॥ ५६ ॥ सरस्वतीजले स्नातं प्रभाते ध्यानतत्परम् ॥ दृष्ट्वा प्रदक्षिणीकृत्य साष्टांगं तं प्रणम्य च ॥ उपविष्टो नृपो भूमौ प्रांजलिः सञ्जितेन्द्रियः ॥ ५७ ॥ मनुष्यपदसंचारं श्रुत्वा ज्ञात्वा च कारणम् ॥ सारस्वतो बभाषेऽथ तं नृपं भक्तितत्परम् ॥ ५८ ॥ ॥ सारस्वत उवाच ॥ ॥ भोजराज शुभं तेस्तु ज्ञातं तत्कारणं मया ॥ मृगानना त्वया नारी समानीता वनात्किल ॥ ५९ ॥ महदाश्चर्यमेवैतत्तत्र चेतसि वर्त्तते ॥ आदिष्टा तु मया बाला सर्वं ते कथयिष्यति ॥ ६० ॥ जानाम्यहं महाराज चरित्रं जन्म यादृशम् ॥ आश्चर्यं संभवेल्लोके कथ्यमानं तया स्वयम् ॥ ६१ ॥ इत्यादिश्य गतो वेगाद्रथेनादित्यवर्चसा ॥ अहोरात्रद्वयेनैव संप्राप्तो नृपमन्दिरम् ॥ ६२ ॥ प्रविश्य च मृगीं दृष्ट्वा यत्रास्ते मृगलोचना ॥ तया सारस्वतो ज्ञातो धर्मज्ञः सर्वविद्द्विजः ॥ ६३ ॥ ॥ मृग्युवाच ॥ ॥ एष सर्वं हि जानाति कारणं यच्च यादृशम् ॥ वर्त्तमानं भविष्यं च भूतं यद्भुवनत्रये ॥ ६४ ॥ एतेन मरणं ज्ञातं मदीयं पूर्वजन्मनि ॥ वस्त्रापथे महाक्षेत्रे तपस्ततं भवालये ॥ ६५ ॥ विधूय कलुषं सर्वं ज्ञानमुत्पाद्य यत्नतः ॥ जरामरणनिर्मुक्तः प्रत्यक्षं दृष्टवान्भवम् ॥ ६६ ॥ अस्य तुष्टो भवो देवो ज्ञातं तीर्थस्य कारणम् ॥ आदिष्टया मया वाच्यं भवेज्जन्मनि कारणम् ॥ ६७ ॥ इति चिन्तापरा यावत्तावद्विप्रः समागतः ॥ तस्मै प्रणामपरमा मूर्च्छिता निपपात सा ॥ ६८ ॥ अथ सारस्वतो ज्ञानाज्ज्ञातवान्कारणं च तत् ॥ आनयन्तु द्विजा वेगात्कलशं तोयसंभृतम् ॥ ॥ ६९ ॥ सर्वौषधीः पल्लवांश्च दूर्वाः पुष्पाणि चाक्षतान् ॥ धूपं च चंदनं चैव गोमयं मधुसर्पिषी ॥ ७० ॥ इत्यादिष्टैर्द्विजैर्वेगात्समानीतं नृपाज्ञया ॥ उपलिप्य च भूभागं स्वस्तिकं संनिवेश्य च ॥ ७१ ॥ तत्राग्निकार्यं कृत्वाऽथ वेदान्कुंभे निधाय सः ॥ इन्द्रं तस्मिंश्च विन्यस्य दिक्पालांश्च यथाक्रमम् ॥ हुत्वाग्निं स चरुं कृत्वा ग्रहपूजामकारयत् ॥ ७२ ॥ तोयं सुवर्णपात्रस्थं कृत्वा कुंभान्स्वयं गुरुः ॥ अभिषेकं ततश्चक्रे मुहूर्ते सार्वकामिके ॥ ७३ ॥ अभिषिक्ता तु सा तेन पूता स्नानार्थवारिणा ॥ जाता सचेतना बाला सर्वं पश्यति चक्षुषा ॥ ७४ ॥ शृणोति सर्वं जानाति चरित्रं पूर्वजन्मनः ॥ बदरीफलमात्रं तु पुरोडाशं ददौ गुरुः ॥ ७५ ॥ तयोपभुक्तं यत्नेन ततश्चक्रे स मार्जनम् ॥



१ देव—हे राजन्—'राजा भट्टारको देवः'—इति कोशः । २ ततः--इ० पा० । ३ अनेन—इ० पा० । ४ महादेव--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानुषे वचने कर्णे ददौ ज्ञानं गुरुस्ततः ॥ ७६ ॥ गुरवे दक्षिणां दत्त्वा ततः सा च मृगानना ॥ भोजराजाय सर्वं च चरित्रं पूर्वजन्मनः ॥ ॥ ७७ ॥ वक्तुं प्रचक्रमे बाल्याद्यद्वृत्तं पूर्वजन्मनि ॥ नमस्कृत्य गुरुं पूर्वं ब्राह्मणान्क्षत्रियांस्तथा ॥ ७८ ॥ ॥ मृग्युवाच ॥ ॥ न विषाद स्त्वया कार्यो राजञ्छ्रुत्वा मयोदितम् ॥ इतस्त्वं सप्तमे स्थाने[1] कलिंगाधिपतेः सुतः ॥ ७९ ॥ मृते पितरि बालस्त्वं स्वभिषिक्तः स्वमं त्रिभिः ॥ अहं हि वंगराजस्य संजाता दुहिता किल ॥ ८० ॥ परिणीता त्वया देव पित्रा दत्ता स्वयं नृप ॥ त्वयाऽहं पट्टमहिषी कृता योषिद्वरा यतः ॥ ८१ ॥ युवा जातः क्रमेणैव हिंस्रः क्रूरो बभूव ह ॥ न वेदशास्त्रकुशलो दयाधर्मविवर्जितः ॥ ८२ ॥ लुब्धो मानी महाक्रोधी सत्याचार बहिष्कृतः ॥ न देवं[2] न गुरुं विप्रान्नो जानाति दुराशयः ॥ ८३[3] ॥ विरक्ता हि प्रजास्तस्य ब्राह्मणोच्छेदकारकः ॥ समासन्नैर्नृपैस्तस्य देशः सर्वो विलुंपितः ॥ सैन्यं सर्वं समादाय युद्धायोपजगाम सः ॥ ८४ ॥ सहैवाहं गता देव युद्धं जातं नृपैः सह ॥ हारितं सैनिकैस्तस्य गता नष्टा दिशो दश ॥ ८५ ॥ त्यक्त्वा धर्मं निजं राजा पलायनपरोऽभवत् ॥ गच्छमानस्तु नृपतिः शत्रुभिः परिपीडितः ॥ ८६ ॥ तत्रास्मिवादी दुष्टात्मा हतो लोकविरोधकः ॥ देहं तस्य गृहीत्वाग्नौ प्रविष्टाहं नृपोत्तम ॥ ८७ ॥ मृतस्यैवं गतिर्नास्ति नरके स विपच्यते ॥ मृतं कांतं समादाय भार्याग्नौ प्रविशेद्यदि ॥ ८८ ॥ सा तारयति पापिष्ठं यावदाभूतसंप्लवम् ॥ इह पापक्षयं कृत्वा पश्चात्स्वर्गे महीयते ॥ ८९ ॥ अतस्त्वं[4] ब्राह्मणो जातो देशे मालवके नृप ॥ तस्यैव तत्र भार्याहं संभूता ब्राह्मणी नृप ॥ ९० ॥ धनधान्यसमृद्धोऽभूत्तथा जीवधनाधिकः ॥ मृतः पिता मृता माता स च भ्रातृविवर्जितः ॥ ९१ ॥ धनधान्यसमृद्धोऽपि लुब्धो भ्रमति भूतले ॥ अतीव कोपनो विप्रो वेदपाठविव र्जितः ॥ ९२ ॥ स्नानसंध्यादिहीनश्च मायावी याचते जनम् ॥ भक्तिं करोमि परमां स च क्रुध्यति मां प्रति ॥ ९३ ॥ संतानं तस्य वै नास्ति धनरक्षापरो हि सः ॥ न ददाति न चाश्नाति न जुहोति स रक्षति ॥ ९४ ॥ न तर्पणं तिलैर्विप्रो विदधात्यतिलो भतः ॥ कार्त्तिकेऽपि च संप्राप्ते विष्णुपूजाविवर्जितः ॥ ९५ ॥ दीपं ददाति नो विप्रो मासमेकं निरन्तरम् ॥ न भुंक्ते शाकपत्रं स एकाहारो निरंतरम् ॥ ९६ ॥ मासे नभस्ये संप्राप्ते[5] प्राप्ते कृष्णे नृपोत्तम ॥ न करोति गृहे श्राद्धं स्नानतर्पणवर्जितः ॥ ९७ ॥ न जानाति दिनं पित्र्यं पक्षमेकं निरन्तरम् ॥ अन्यत्र भुंक्ते विप्रोऽसौ क्षयाहेऽपि समागते ॥ ९८ ॥ मकरस्थेऽपि संक्रांतौ कृशरान्नं ददाति न ॥ तिलान्सुवर्णं तारं वा वस्त्रं

१ सप्तमे स्थाने—सप्तमे जन्मनि—इत्यर्थः। २ न वेदम्—इ० पा०। ३ यतः—इति शेषः। ४ अतः—मत्तद्गमनपुण्यवशात्—इत्यर्थः। ५ संप्राप्ता—इ० पा०।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वा फलमेव च ॥ शाकपत्रं स पुष्पं वा न ददाति तथेंधनम् ॥ ९९ ॥ गवां गवाह्निकं नैव कथं मुक्तिर्भविष्यति ॥ न याति विष्णुशरणं संप्राप्ते
दक्षिणायने ॥ १०० ॥ धेनुं ददाति नो विप्रो ग्रहणे चंद्रसूर्ययोः ॥ १०१ ॥ एकापि दत्ता सुपयस्विनी सा सवस्त्रघंटाभरणोपपन्ना ॥ वत्सेन
युक्ता हि ददाति दात्रे मुक्तिं कुलस्यास्य करोति वृद्धिम् ॥ १०२ ॥ यावंति रोमाणि भवंति तस्यास्तावंति वर्षाणि महीयते सः ॥ ब्रह्मालये सिद्ध
गणैर्वृतोऽसौ संतिष्ठते सूर्यसमानतेजाः ॥ १०३ ॥ देवालयं नो विदधाति वापीं कूपं तडागं न करोति कुण्डम् ॥ पुण्यं विवाहं सुजनोपकारं नासौ
सतां वा द्विजमंदिरं च ॥ १०४ ॥ धनं सदा भूमिगतं करोति धम न जानाति कुलस्य चासौ ॥ अहं हि तस्यानुगता भवामि कथं हि कांतं परिवं
चयामि ॥ १०५ ॥ एवं हि वर्त्तमानः स कालधर्ममुपेयिवान् ॥ धनलोभान्मया देव मरणं परिवर्जितम् ॥१०६॥ पश्यन्त्या गोत्रिभिः सर्वं गृहीतं
धनसंचयम् ॥ कालेन महता देव मृताऽहं द्विजमंदिरे ॥ १०७ ॥ श्वेतसर्पः समभवद्देशे तस्मिन्नरोत्तम ॥ तत्रैवाहं ब्राह्मणस्य संजाता तनया नृप
॥ १०८ ॥ वर्षेऽष्टमे तु संप्राप्ते परिणीता द्विजन्मना ॥ तस्मिन्नेव गृहे सर्पो मदीये वसते नृप ॥ १०९ ॥ भार्या ममेति संदष्टो रात्रौ भर्त्ता महा
हिना ॥ मृतोऽपि ब्राह्मणैः सर्पो लगुडैर्विनिपातितः ॥ ११० ॥ वैधव्यं मम दत्त्वा तु द्विजसर्पौ मृतावुभौ ॥ पित्रा मात्रा महाशोकं कृत्वा मे मुण्डितं
शिरः ॥ १११ ॥ वसाना श्वेतवस्त्रं च विष्णुभक्तिपरायणा ॥ मासोपवासनिरता यानि तीर्थान्यनेकशः ॥ ११२ ॥ सर्पस्तु मकरो जातो
गोदावर्यां शिवालये ॥ देवं भीमेश्वरं द्रष्टुं गताऽहं स्वजनैः सह ॥ ११३ ॥ यावत्स्नातुं प्रविष्टाऽहं वृता सर्वजनैर्नृप ॥ मकरेण तदा दृष्टा
भार्येयं मम वल्लभा ॥ गृहीता मकरेणाहं नेतुमंतर्जले नृप ॥ ११४ ॥ हाहाकारः समभवज्जनः क्षुब्धः समंततः ॥ कुंताघातेन केनासौ
मकरस्तु निपातितः ॥ ११५ ॥ झषवक्त्र स्थिता चाहं मृता कृष्टा जनैर्बहिः ॥ अग्निं दत्त्वा जले क्षिप्त्वा भस्म लोका गृहान्गताः ॥ ११६ ॥
स्त्रीवधाल्लुब्धको जातो झषस्तीर्थप्रभावतः ॥ मानुषीं योनिमापन्नस्तस्मिन्नेव महावने ॥११७॥ अग्नेर्जलाच्च सर्पाच्च गजात्सिंहाद्वृषादपि ॥ झषाद्वि
स्फोटकान्मृत्युर्येषां ते नरके गताः ॥ ११८ ॥ आत्महा भ्रूणहा स्त्रीहा ब्रह्मघ्नः कूटसाक्ष्यदः ॥ कन्याविक्रयकर्ता च मिथ्या व्रतधरस्तु यः ॥
॥ ११९ ॥ विक्रीणाति क्रतुं यस्तु मद्यपः स्याद्द्विजस्तु यः ॥ राजद्रोही स्वर्णचौरो ब्रह्मवृत्तिविलोपकः ॥ १२० ॥ गोघ्नस्तु निक्षेपहरो ग्रामसी
माहरस्तु यः ॥ सर्वे ते नरकं यांति या च स्त्री पतिवंचका ॥ १२१ ॥ झषमृत्युप्रभावेन जाता क्रौंची वने नृप ॥ गोदावरीवने व्याधो भ्रमते मृग

१ विष्णुशरणम्–विष्णुमन्दिरम्–इत्यर्थः । २ क्षयं न जानाति–इ० पा० । ३ केन–केनापि–इत्यर्थः । ४ झषवक्त्रस्थिता–मकरमुखगता–इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मार्गकः ॥ १२२ ॥ वने क्रौंचः सकामो मां मुदा कामयितुमुद्यतः ॥ दृष्टाहं भ्रमता तेन व्याधेनाकृष्य कार्मुकम् ॥ १२३ ॥ हतः क्रौंचो मृतो राज
न्नष्टा स्थानादहं ततः ॥ गोदावरीवने तस्मिन्नेवंरूपं ददर्श तम् ॥ १२४ ॥ ऋषिर्व्याधं शशापाथ दृष्ट्वा कर्म विगर्हितम् ॥ कामधर्ममकुर्वाणं प्रिया
संभाषतत्परम् ॥ क्रौंचं त्वमवधीर्यस्मात्तस्मात्सिंहो भविष्यसि ॥ १२५ ॥ ऋषिस्तेन विनीतेन स्थित्वा सन्तोषितो नृप ॥ ऋषिर्वदति तस्याग्रे
न मे मिथ्या वचो भवेत् ॥ १२६ ॥ सिंहस्थस्य प्रसादं ते करिष्ये मुक्तिहेतवे ॥ सुराष्ट्रदेशे भविता सिंहो रैवतके गिरौ ॥ १२७ ॥ वस्त्रापथे महा
क्षेत्रे मुक्तिस्ते विहिता ध्रुवा ॥ इत्युक्त्वा स ऋषिर्देवं गतो भीमेश्वरं प्रति ॥ दुर्वचःश्रवणाद्व्याधः क्रमात्पंचत्वमाययौ ॥ १२८ ॥ क्रौंची क्रौंचवि
योगेन गता सा च वनांतरे ॥ मृता दैववशाज्जाता मृगी रैवतके गिरौ ॥ १२९ ॥ मृगयूथगता नित्यं मोदते मदविह्वला ॥ व्याधः सिंहः समभव
द्गिरेस्तस्य महावने ॥ १३० ॥ कामार्ता भ्रमता दृष्टा मृगी सिंहेन यत्नतः ॥ तत्र संभ्रमते नित्यं सिंहश्चापि मृगी वने ॥ १३१ ॥ सिंहोऽपि दैव
योगेन ममेयमिति मन्यते ॥ परं हिंस्रस्वभावेन तामादातुं प्रचक्रमे ॥ १३२ ॥ चलत्वं मृगजातीनां विहितं वेधसा स्वयम् ॥ पुनर्गता मृगीयूथं
क्रीडते चारुलोचना ॥ १३३ ॥ भवस्य पश्चिमे भागे तत्र रैवतके गिरौ ॥ अनुयातः शनैः सोऽथ मृगेन्द्रो मृगयूथपः ॥ उत्पपात ततः सिंहो मृग
संवस्य[2] मूर्द्धनि ॥ १३४ ॥ सिंहस्य न मृगैः कार्यं हरिणीं प्रति पश्यतः ॥ यत्र सा हरिणी याति ययौ सिंहस्तथैव ताम् ॥ १३५ ॥ यदा वेगं
मृगी चक्रे सिंहः क्रुद्धस्तदा वने ॥ सिंहोऽपि वेगवाञ्जातो मृगीवेगाधिकोऽभवत् ॥ १३६ ॥ यदा सिंहेन संक्रांता ददौ झम्पां[3] मृगी तु सा ॥ भव
स्याग्रे नदीतोये पतिता जलमूर्द्धनि ॥ १३७ ॥ लंबते तु शरीरं मे वेणौ प्रोतं शिरो मम ॥ सिंहः सहैव पतितो मृतः पयसि मध्यतः ॥ १३८ ॥
स्वर्णरेषाजले देवं[1] विशीर्णं मम तद्वपुः ॥ न तु वक्रं निपतितं त्वक्सारशिरसि[5] स्थितम् ॥ १३९ ॥ एतच्चारित्रं यत्सर्वं दृष्टं सारस्वतेन वै ॥ तत्ती
र्थस्य प्रभावेन सिंहस्त्वं[6] समजायथाः ॥ १४० ॥ इदं हि सप्तमं जन्म सर्वपापक्षयोदयम् ॥ कान्यकुब्जे महादेशे राजा भोजेतिविश्रुतः ॥ १४१ ॥
अहं हि हरिणीगर्भे जाता मानुषरूपिणी ॥ जातं वक्रं मृगीणां मे यस्मान्न पतितं जले ॥ १४२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां
संहितायां सप्तमे प्रभासखंडे द्वितीये वस्त्रापथक्षेत्रमाहात्म्ये भवमाहात्म्ये मृगाननाभोजवृत्तान्तवर्णने सारस्वतमहर्षिसंस्कृतपुरोडाशप्राशनसमुप
लब्धस्पष्टवाक्प्रसरमृगाननाकथितोभयप्राक्सप्तजन्मवृत्तान्तवर्णनंनाम षष्ठोऽध्यायः ॥ ६ ॥ ॥ छ ॥ ॥ राजोवाच ॥ ॥ कथं त्वं

१ देव—हे नृप—इत्यर्थः । २ मृगसिंहस्य——इ०पा० । ३ झंपाम्—उड्डानपूर्वकं गात्रविक्षेपम्—इत्यर्थः । ४ तत्र—इ०पा० । ५ त्वक्सारशिरसि--वेणुस्तम्भाग्रे--इत्यर्थः । ६ सिंहस्त्वं समजायथाः--यः सिंहः सः त्वं--राजा—समजायथाः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



हरिणीरूपे जाता मानुषरूपिणी ॥ केन संवर्धिता बाल्ये कथं ते रूपमीदृशम् ॥ १ ॥ ॥ मृग्युवाच ॥ ॥ शृणु देव प्रवक्ष्यामि यद्वृत्तं
कन्यके वने ॥ ऋषिरुद्दालकोनाम गंगांकूले महातपाः ॥ २ ॥ प्रभाते मूत्रमुत्स्रष्टुं गतो देव वनांतरे ॥ मूत्रांते पतितो भूमौ वीर्यबिंदुर्द्विज
न्मनः ॥ ३ ॥ यावत्स चलितो विप्रः शौचं कृत्वा प्रयत्नतः ॥ तावन्मृगी समायाता दृष्ट्वा पुष्पवनांतरात् ॥ ४ ॥ चापल्याद्भक्षितं वीर्यं दृष्टं ब्रह्म
र्षिणा स्वयम् ॥ यस्मादश्नाति मे वीर्यं तस्माद्गर्भो भविष्यति ॥ ५ ॥ ममरूपा तववक्त्रा नारी गर्भे भविष्यति ॥ वर्द्धयिष्यंति देव्यस्तां
रसैर्दिव्यैः सुतां तव ॥ ६ ॥ केनापि दैवयोगेन ज्ञानं तस्या भविष्यति ॥ एवमुद्दालकादेव संजाताहं मृगानना ॥ प्रविश्याग्नौ मृता पूर्वं त्वया
सार्द्धं नराधिप ॥ ७ ॥ तस्माज्जातं सतीत्वं मे सप्तजन्मनि वै प्रभो ॥ यत्त्वया कुर्वता राज्यं पापं वै समुपार्जितम् ॥ ८ ॥ क्षत्रधर्मं परित्यज्य
पलायनपरो मृतः ॥ तदेनो हि मया दग्धं चिताग्नौ नृपसत्तम ॥ ९ ॥ पतिं गृहीत्वा या नारी मृतमग्नौ विशेद्यदि ॥ सा तारयति भर्तारमात्मानं
च कुलद्वयम् ॥ १० ॥ गोग्रहे देशभंगे च संग्रामे सम्मुखे मृतः ॥ स सूर्यमण्डलं भित्त्वा ब्रह्मलोके महीयते ॥११॥ अनाशकं यो विदधाति मर्त्यो
दिनेदिने यज्ञसहस्रपुण्यम् ॥ स याति यानेन गणान्वितेन विधूय पापानि सुरैः स पूज्यते ॥१२॥ गंगाजले प्रयागे वा केदारे पुष्करे च ये ॥ वस्त्रा
पथे प्रभासे च मृतास्ते स्वर्गगामिनः ॥ १३ ॥ द्वारावत्यां कुरुक्षेत्रे योगाभ्यासेन ये मृताः ॥ हरिरित्यक्षरं मृत्यौ येषां ते स्वर्गगामिनः ॥ १४ ॥
पूजयित्वा हरिं ये तु भूमौ दर्भतिलैः सह ॥ तिलांश्च पञ्चलोहं च दत्त्वा ये तु पयस्विनीम् ॥ १५ ॥ ये मृता राजशार्दूल ते नराः स्वर्ग
गामिनः ॥ उत्पाद्य पुत्रान्संस्थाप्य पितृपैतामहे पदे ॥ १६ ॥ निर्मला निष्कलंका ये ते मृताः स्वर्गगामिनः ॥ व्रतोपवासनिरताः सत्याचारपरा
यणाः ॥ अहिंसानिरताः शांतास्ते नराः स्वर्गगामिनः ॥ १७ ॥ सापवादो रणं त्यक्त्वा मृतो यस्मान्नराधिप ॥ सप्तयोनिषु ते जन्म तस्माज्जातं
मया सह ॥ १८ ॥ त्वां विना मे पतिर्मा भून्मरणे याचितं मया ॥ तदांतरिक्षे राजेन्द्र वाग्उवाचाशरीरिणी ॥ आदौ पापफलं भुक्त्वा पश्चा
त्स्वर्गं गमिष्यसि ॥ १९ ॥ यदि वस्त्रापथे गत्वा शिरः कश्चिद्विमुंचति ॥ स्वर्णरेखाजले राजन्मानुषं स्यान्मुखं मम ॥ २० ॥ अहं मानुष
वक्त्राऽस्मि पापच्छायाऽऽवृतं मुखम् ॥ दृश्यते मृगवक्त्राभं तस्माच्छीघ्रं विमुंचय ॥ २१ ॥ इति श्रुत्वा वचो राजा सारस्वतमुदैक्षत ॥ जनो
विहस्य सानन्दं सर्वं सत्यं मृगीवचः ॥ २२ ॥ इत्युक्त्वाऽऽह द्विजेन्द्रः स एवं कुरु नृपोत्तम ॥ एवं राज्ञा समादिष्टः प्रतीहारो ययौ वनम् ॥ २३ ॥

१ गंगातीरे—इ० पा०।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वस्त्रापथे महातीर्थे भवं द्रष्टुं त्वरान्वितः ॥ त्वक्सारजालिर्महती स्वर्णरेखाजलोपरि ॥ २४ ॥ वर्त्तते तच्छिरो यत्र वंशप्रोतं महावने ॥ सारस्वतस्य शिष्येण कुशलेन निवेदितम् ॥ २५ ॥ तीर्थं वस्त्रापथं गत्वा भवस्याग्रे महानदी ॥ जाले तत्र शिरो दृष्टं तच्च तोये विमोचितम् ॥ २६ ॥ स्नात्वा संपूज्य तीर्थेशं प्रतीहारः समभ्यगात् ॥ शिष्येण सहितो वेगाद्रथेनादित्यवर्चसा ॥ २७ ॥ यदागतः प्रतीहारस्तदा सारस्वतेन सा ॥ वृता चान्द्रायणेनैव मासमेकं निरन्तरम् ॥ २८ ॥ संपूर्णे तु व्रते तस्या दिव्यं वक्त्रं सुलोचनम् ॥ सुशोभनं दीर्घकेशं दीर्घकर्णं शुभद्विजम् ॥ २९ ॥ कम्बुग्रीवं पद्मगंधं सर्वलक्षणसंयुतम् ॥ व्रतांते मूर्च्छिता बाला गतज्ञाना बभूव सा ॥ ३० ॥ न देवी न च गंधर्वी नासुरी न च किंनरी ॥ यादृशी सा तदा जाता तीर्थभावेन सुन्दरी ॥ ३१ ॥ परिणीता तु सा तेन भोजराजेन सुन्दरी ॥ मृगीमुखीति विख्याता देवी सा भुवनेश्वरी ॥ ३२ ॥ न जानाति पुनः किंचिद्यद्वृत्तं राजमन्दिरे ॥ कृता सा पट्टमहिषी भोजराजेन धीमता ॥ ३३ ॥ ॥ ईश्वर उवाच ॥ ॥ देशानां प्रवरो देशो गिरीणां प्रवरो गिरिः ॥ क्षेत्राणामुत्तमं क्षेत्रं वनानामुत्तमं वनम् ॥ ३४ ॥ गंगा सरस्वती तापी स्वर्णरेखाजले स्थिता ॥ ब्रह्मा विष्णुश्च सूर्यश्च सर्व इन्द्रादयः सुराः ॥ ३५ ॥ नागा यक्षाश्च गन्धर्वा अस्मिन्क्षेत्रे व्यवस्थिताः ॥ ब्रह्मांडं निर्मितं येन त्रैलोक्यं सचराचरम् ॥ ३६ ॥ देवा ब्रह्मादयो जाताः स भवोऽत्र व्यवस्थितः ॥ शिवो भवेतिविख्यातः स्वयं देवस्त्रिलोचनः ॥ ३७ ॥ वेवेति स्कन्दरचनाद्भवानी चात्र संस्थिता ॥ अतो यन्नाधिकं प्रोक्तं तीर्थं देवि मया तव ॥ ३८ ॥ तस्मिञ्जले स्नानपरो नरो यदि संध्यां विधायानु करोति तर्पणम् ॥ श्राद्धं पितॄणां च ददाति दक्षिणां भवोद्भवं पश्यति मुच्यते भवात् ॥ ३९ ॥ अथ यदि भवपूजां दिव्यपुष्पैः करोति तदनु शिवशिवेति स्तोत्रपाठं च गीतम् ॥ सुरवरगणवृन्दैः स्तूयमानो विमानैः सुरवरशिवरूपो मानवो याति नाकम् ॥ ४० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे द्वितीये वस्त्रापथक्षेत्रमाहात्म्ये स्वर्णरेखायां मृगाननायाः पूर्वजन्ममृगमुखप्रक्षेपणेन दिव्यमुखत्वप्राप्त्युत्तरं भोजनृपतिपरिणयवृत्तान्तपूर्वकं स्वर्णरेखामाहात्म्यवर्णनंनाम सप्तमोऽध्यायः ॥ ७ ॥ ॥ छ ॥ ॥ भोजराज उवाच ॥ ॥ प्रभो सारस्वत मया श्रुतं माहात्म्यमुत्तमम् ॥ वस्त्रापथस्य क्षेत्रस्य गिरे रैवतकस्य च ॥ १ ॥ विशेषेण स्वर्णरेखाभवस्य च जलस्य च ॥ इदानीं श्रोतुमिच्छामि तीर्थोत्पत्तिं वदस्व मे ॥ २ ॥ ब्रह्मविष्णुशिवादीनां मध्ये कोऽयं व्यवस्थितः ॥ केयं नदी स्वर्णरेखा सर्वपातकनाशिनी ॥ ३ ॥ कस्माद्ब्रह्मादयो देवा अस्मिंस्तीर्थे

१ परमः–इ० पा० । २ सर्वे रुद्रादयः–इ० । ३ पुमान्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

समागताः ॥ कथं नारायणो देवः स्वयमेव समागतः ॥ ४ ॥ हेमालयं परित्यज्य भवानी गिरिमूर्द्धनि ॥ संस्थिता स्कन्दमादाय देवैरिन्द्रादिभिः सह ॥ ५ ॥ ॥ सारस्वत उवाच ॥ ॥ शृणु सर्वं महाराज कथयिष्ये सविस्तरम् ॥ येन वै कथ्यमानेन सर्वपापक्षयो भवेत् ॥ ६ ॥ पुरा ब्रह्मदिनस्यांते जगदेतच्चराचरम् ॥ संहृत्य भगवान्रुद्रो ब्रह्मविष्णुपुरस्कृतः ॥ ७ ॥ तां च ते सकलां रात्रिमेकमूर्त्तिभवास्त्रयः ॥ तिष्ठन्ति रात्रिपर्यन्ते पुनर्भिन्ना भवंति ते ॥ ८ ॥ ब्रह्मविष्णुशिवा देवा रजःसत्त्वतमोमयाः ॥ सृष्टिं करोति भगवान्ब्रह्मा पालयते हरिः ॥ ९ ॥ सर्वं संहरते रुद्रो जगत्कालप्रमाणतः ॥ तेनादौ भगवान्सृष्टो दक्षोनाम प्रजापतिः ॥ १० ॥ सर्वं संक्षेपतः कृत्वा ब्रह्माण्डं सचराचरम् ॥ भिन्ना देवास्त्रयो जाताः सत्यलोकव्यवस्थिताः ॥ ११ ॥ त्रयो भुवं समासाद्य कौतुकाविष्टचेतसः ॥ कैलासं ते गिरिवरं समारूढाः सुरैर्वृताः ॥ १२ ॥ अहं ज्येष्ठो अहं ज्येष्ठो वादोऽभूद्ब्रह्मरुद्रयोः ॥ तदा क्रुद्धो महादेवो ब्रह्माणं हन्तुमुद्यतः ॥ १३ ॥ विष्णुना वारितो ब्रह्मा न ते वादस्तु युज्यते ॥ तत्त्वं नाहं यदा नेदं ब्रह्मांडं सचराचरम् ॥ १४ ॥ एक एव तदा देवो जले शेते महेश्वरः ॥ जागर्ति च यदा देवः स्वेच्छया कौतुकात्ततः ॥ १५ ॥ अनेन त्वं कृतः पूर्वमहं पश्चात्त्वया कृतः ॥ ब्रह्मांडं कूर्मरूपेण धृतमस्य प्रसादतः ॥ १६ ॥ अनुप्रविष्टा ब्रह्मांडं प्रसादाच्छंकरस्य च ॥ सृष्टिस्त्वया कृता सर्वा मयि रक्षा व्यवस्थिता ॥ १७ ॥ उदासीनवदासीनः संसारात्सारमीक्षते ॥ एक एव शिवो देवः सर्वव्यापी महेश्वरः ॥ १८ ॥ पितामहत्वं संजातं प्रसादाच्छंकरस्य ते ॥ प्रसादयामास हरं श्रुत्वा ब्रह्मा वचो हरेः ॥ १९ ॥ अनादिनिधनो देवो बहुशीर्षो महाभुजः ॥ इत्यादिवेदवचनैस्ततस्तुष्टो महेश्वरः ॥ प्राह ब्रह्मन्वरं यत्ते वृणीष्व मनसि स्थितम् ॥ २० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे द्वितीये वस्त्रापथक्षेत्रमाहात्म्ये ब्रह्मरुद्रविवादे विष्णुवचनेन ब्रह्मकृतरुद्रप्रसादनवर्णनंनामाष्टमोऽध्यायः ॥ ८ ॥

॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ यदि सृष्टं मया सर्वं त्रैलोक्यं सचराचरम् ॥ तदा मूर्तिमिमां त्यक्त्वा भवः सृष्टो मयाऽधुना ॥ १ ॥ पितामहमहत्त्वं स्यात्तथा शीघ्रं विधीयताम् ॥ ब्रह्मणो वचनं श्रुत्वा विष्णुना स प्रमोदितः ॥ २ ॥ महदाश्चर्यजनके संप्राप्तो गिरिमूर्द्धनि ॥ न विचारस्त्वयाकार्यः कर्त्तव्यं ब्रह्मभाषितम् ॥ ३ ॥ तथेत्युक्त्वा शिवो देवस्तत्रैवांतरधीयत ॥ ब्रह्मा ययौ मेरुशृंगं मनसः शिरसि स्थितम् ॥ ४ ॥ तपस्तेपे प्रजानाथो वेदोच्चारणतत्परः[1] ॥ अथर्ववेदोच्चरणं यावच्चक्रे पितामहः ॥ ५ ॥ मुखाद्रुद्रः समभवद्रौद्ररूपो भवापहः ॥ अर्द्धनारीनरवपुर्दुष्प्रेक्ष्योऽतिभयंकरः ॥ ६ ॥

१ वेदोद्धरणतत्परः–इ० पा० ।



CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विभजात्मानमित्युक्त्वा ब्रह्मा चांतर्दधे भयात् ॥ तथोक्तोसौ द्विधा स्त्रीत्वं पुरुषत्वं तथाऽकरोत् ॥ ७ ॥ बिभेद पुरुषत्वं च दशधा चैकधा पुनः ॥ एकादशैते कथिता रुद्रास्त्रिभुवनेश्वराः ॥ ८ ॥ कृत्वा नामानि सर्वेषां देवकार्ये नियोजिताः ॥ विभज्य पुनरीशानी स्वात्मानं शंकराद्विभोः ॥ ९ ॥ महादेवनियोगेन पितामहमुपस्थिता ॥ तामाह भगवान्ब्रह्मा दक्षस्य दुहिता भव ॥ १० ॥ सापि तस्य नियोगेन प्रादुरासीत्प्रजापतेः ॥ नियोगाद्ब्रह्मणो दक्षो ददौ रुद्राय तां सतीम् ॥११॥ दाक्षीं रुद्रोऽपि जग्राह स्वकीयामेव शूलभृत् ॥ अथ ब्रह्मा बभाषे तं सृष्टिं कुरु सतीपते ॥१२॥ ॥ ॥ रुद्र उवाच ॥ ॥ सृष्टिर्मया न कर्त्तव्या कर्त्तव्या भवता स्वयम् ॥ पालनं विष्णुना कार्यं संहर्ताऽहं व्यवस्थितः ॥१३॥ स्थाणुवत्संस्थितो यस्मात्तस्मात्स्थाणुर्भवाम्यहम् ॥१४॥ रजोरूपाः सत्त्वरूपास्तमोरूपाश्च ये नराः ॥ सर्वे ते भवता कार्या गुणत्रयविभागतः॥१५॥ यदा ते तामसैः कार्यं तदा रौद्रो भव स्वयम् ॥ यदा ते राजसैः कार्यं तदा त्वं राजसो भव॥सात्त्विकैस्ते यदा कार्यं तदा त्वं सात्त्विको भव ॥१६॥ ॥ ईश्वर उवाच ॥ ॥ इत्या ज्ञाप्य च ब्रह्माणं स्वयं सृष्ट्यादिकर्मसु ॥ गृहीत्वा तां सतीं रुद्रः कैलासमधितिष्ठति ॥ १७ ॥ दक्षः कालेन महता हरस्यालयमाययौ ॥ १८॥ अथ रुद्रः समुत्थाय कृतवान्गौरवं बहु ॥ ततो यथोचितां पूजां न दक्षो बहु मन्यते ॥१९॥ तदा वै तमसाविष्टः सोऽधिकं ब्राह्मणः शुभः॥ पूजामनर्घ्यामन्विच्छञ्ज गाम कुपितो गृहम् ॥ २० ॥ कदाचित्तां गृहं प्राप्तां सतीं दक्षः सुदुर्मनाः ॥ भर्त्रा सह विनिंद्यैनां भर्त्सयामास वै रुषा ॥२१॥ पंचवक्त्रो दशभुजोमुखे नेत्रत्रयान्वितः॥ कपर्दी खंडचंद्रोसौ तथासौ नीललोहितः॥२२॥कपाली शूलहस्तोऽसौ गजचर्मावगुंठितः ॥ नास्य माता न च पिता न भ्राता न च बान्धवः ॥२३॥ सर्पास्थिमंडितग्रीवस्त्यक्त्वा हेमविभूषणम् ॥ भिक्षया भोजनं यस्य कथमन्नं प्रदास्यति ॥ २४ ॥ कदाचित्पूर्वतो याति गच्छन्याति स पश्चिमे ॥ दक्षिणस्यां वृषो याति स्वयं याति स चोत्तरे ॥ २५ ॥ तिर्यगूर्ध्वमधो याति नैव याति न तिष्ठति ॥ इति चित्रं चरित्रं ते भर्त्तुर्नान्यस्य दृश्यते ॥ २६ ॥ निर्गुणः स गुणातीतो निःस्नेहो मूकवत्स्थितः ॥ सर्वज्ञः सर्वगः सर्वः पच्यते भुवनत्रये ॥ २७ ॥ कस्यचिन्नैव जानाति न शृणोति न पश्यति ॥ दैत्यानां दानवानां च राक्षसानां ददाति यः ॥२८॥ न चास्य च पिता कश्चिन्न च भ्रातास्ति कश्चन ॥ एक एव वृषारूढो नग्नो भ्रमति भूतले ॥२९॥ न गृहं न धनं गोत्रमनादिनिधनोव्ययः ॥ स्थिरबुद्धिर्न चैवासौ क्रीडते भुवनत्रये ॥३०॥ कदाचित्सत्यलोकेसौ पातालमधितिष्ठति ॥ गिरिसानुषु शेते[1]ऽसावशिवोपि शिवः स्मृतः ॥ ३१ ॥ श्रीखंडादीनि संत्यज्य सदा भस्मावगुंठितः॥सर्वदेति वचः सत्यं

१ शैलेऽसौ–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



किमन्यत्स प्रदास्यति ॥ ३२ ॥ धिक्त्वां जामातरं धिक्तं ययोः स्नेहः परस्परम् ॥ तस्य त्वं वल्लभा भार्या स च प्राणाधिकस्तव ॥ ३३ ॥ न च
पित्रास्ति ते कार्यं न मात्रा न सखीषु च ॥ केवलं भर्तृभक्ता त्वं तस्माद्गच्छ गृहान्मम ॥३४॥ अन्ये जामातरः सर्वे [1]भर्त्तुस्तव पिनाकिनः ॥ त्वम
द्यैवाशु चास्माकं गृहाद्गच्छ वरं प्रति ॥ ३५ ॥ तस्य तद्वाक्यमाकर्ण्य सा देवी शंकरप्रिया ॥ विनिंद्य पितरं दक्षं ध्यात्वा देवं महेश्वरम् ॥ ३६ ॥ श्वेतव
स्त्रा जले स्नात्वा ददाहात्मानमात्मना ॥ याचितस्तु शिवो भर्त्ता पुनर्जन्मांतरे तया ॥३७॥ पिता मे हिमवानस्तु मेनागर्भे भवाम्यहम् ॥ अत्रांतरे
हिमवता तपसा तोषितो हरः ॥ प्रत्यक्षं दर्शनं दत्त्वा हिमवंतं वचोऽब्रवीत् ॥ ३८ ॥ एषा दत्ता सुता तुभ्यं परिणेष्यामि तामहम् ॥ देवानां
कार्य्यसिद्ध्यर्थं गिरिराजो भविष्यसि ॥ ३९ ॥ आत्ममूर्त्तौ प्रविष्टां तां ज्ञात्वा देवो महेश्वरः ॥ शशाप दक्षं कुपितः समागत्याथ तद्गृहम् ॥ ४० ॥
त्यक्त्वा देहमिमं ब्राह्म्यं क्षत्रियाणां कुले भव ॥ स्वायंभुवत्वं संत्यज्य दक्ष प्राचेतसो भव ॥ ४१ ॥ स्वस्यां सुतायामूढायां पुत्रमुत्पादयिष्यसि ॥
एवं शप्त्वा महादेवो ययौ कैलासपर्वतम् ॥ ४२ ॥ स्वायंभुवोऽपि कालेन दक्षः प्राचेतसोऽभवत् ॥ भवानीं स सुतां लब्ध्वा गिरिस्तुष्टो हिमा
लयः ॥ ४३ ॥ मेनापि तां सुतां लब्ध्वा धन्यं मेने गृहाश्रमम् ॥ तां दृष्ट्वा जायमानां च स्वेच्छयैव वराननाम् ॥ ४४ ॥ मेना हिमवतः पत्नी प्राहेदं
पर्वतेश्वरम् ॥ पश्य बालामिमां राजन्राजीवसदृशाननाम् ॥ ४५ ॥ हिताय सर्वभूतानां जातां च तपसा शुभाम् ॥ सोऽपि दृष्ट्वा महादेवीं तरुणा
दित्यसन्निभाम् ॥ ४६ ॥ कपर्दिनीं चतुर्वक्त्रां त्रिनेत्रामतिलालसाम् ॥ अष्टहस्तां विशालाक्षीं चंद्रावयवभूषणाम् ॥ ४७ ॥ प्रणम्य शिरसा भूमौ
तेजसा तु सुविह्वलः ॥ भीतः कृतांजलिः स्तब्धः प्रोवाच परमेश्वरीम् ॥ ४८ ॥ ॥ हिमवानुवाच ॥ ॥ का त्वं देवि विशालाक्षि शंस मे संशयो
महान् ॥ ४९ ॥ ॥ देव्युवाच ॥ ॥ मां विद्धि परमां शक्तिं महेश्वरसमाश्रयाम् ॥ अनन्यामव्ययामेकां यां पश्यंति मुमुक्षवः ॥ ५० ॥ दिव्यं
ददामि ते चक्षुः पश्य मे रूपमैश्वरम् ॥ एतावदुक्त्वा विज्ञानं दत्त्वा हिमवते स्वयम् ॥ ५१ ॥ सूर्यकोटिप्रतीकाशं तेजोबिंबं निराकुलम् ॥ ज्वाला
मालासहस्राढ्यं कालानलशतोपमम् ॥ ५२ ॥ दंष्ट्राकरालमुद्धर्षं जटामंडलमंडितम् ॥ प्रशांतं सौम्यवदनमनंताश्चर्यसंयुतम् ॥ ५३ ॥ चंद्रावयवल
क्ष्माणं चंद्रकोटिसमप्रभम् ॥ किरीटिनं गदाहस्तं नूपुरैरुपशोभितम् ॥ ५४ ॥ दिव्यमाल्यांबरधरं दिव्यगंधानुलेपनम् ॥ शंखचक्रधरं काम्यं त्रिनेत्रं

[1] भर्तुस्तव पिनाकिनः—तव भर्तुः—पिनाकिनः—अपेक्षया—उत्तमाः सन्ति—तेनैकेन जामात्रा—असताऽपि—किं मम—जामातृसौख्ये किं न्यूनं स्यात्—अतः—नाह तं जामातरं त्वां च—दृष्ट्वा प्रीतोऽस्मिं—तस्मात्त्वं—मम गृहान्निर्गच्छ—गच्छ—इति वचनतात्पर्यम् ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत्तिवाससम् ॥ ५५ ॥ अंडस्थं चांडबाह्यस्थं बाह्यमभ्यंतरं परम् ॥ सर्वश[1]क्तिमयं शुभ्रं सर्वालंकारसंयुतम् ॥५६॥ ब्रह्मेन्द्रोपेन्द्रयोगीन्द्रैर्वन्द्यमान पदांबुजम् ॥ सर्वतःपाणिपादांतं सर्वतोऽक्षिशिरोमुखम् ॥ ५७ ॥ सर्वमावृत्य तिष्ठंतं ददर्श परमेश्वरम् ॥ दृष्ट्वा नन्दीश्वरं देवं देव्या महेश्वरं परम् ॥ ॥ ५८ ॥ भयेन च समाविष्टः स राजा हृष्टमानसः ॥ आत्मन्याधाय चात्मानमोंकारं समनुस्मरन् ॥ ५९ ॥ नां[2]म्नामष्टसहस्रेण स्तुत्वाऽसौ हिम वान्गिरिः ॥ ६० ॥ भूयः प्रणम्य भूतात्मा प्रोवाचेदं कृतांजलिः ॥ यदेतदैश्वरं रूपं जातं ते परमेश्वरि ॥ ६१ ॥ भीतोऽस्मि सांप्रतं दृष्ट्वा तत्त्वमन्य त्प्रदर्शय ॥ एवमुक्ता च सा देवी तेन शैलेन पार्वती ॥ ६२ ॥ संहृत्य दर्शयामास स्वरूपमपरं परम् ॥ नीलोत्पलदलप्रख्यं नीलोत्पलसुगंधिकम् ॥ ॥६३॥ द्विनेत्रं द्विभुजं सौम्यं नीलालकविभूषितम् ॥ रक्तपादांबुजतलं सुरक्तकरपल्लवम् ॥६४॥ श्रीमद्विशालसद्वृत्तं ललाटतिलकोज्ज्वलम् ॥ भूषितं चारुसर्वांगं भूषणैरतिकोमलम्[3] ॥६५॥ दधानं चोरसा मालां विशालां हेमनिर्मिताम् ॥ ईषत्स्मितं सुबिंबोष्ठं नूपुरारावशोभितम् ॥ ६६ ॥ प्रसन्नवदनं दिव्यं चारुभ्रूमहिमास्पदम् ॥ तदीदृशं समालोक्य स्वरूपं शैलसत्तमः ॥ भयं संत्यज्य हृष्टात्मा बभाषे परमेश्वरीम् ॥ ६७ ॥ ॥ हिमवानुवाच ॥ ॥ अद्य मे सफलं जन्म अद्य मे सफलाः क्रियाः ॥ यन्मे साक्षात्त्वमव्यक्ता प्रसन्ना दृष्टिगोचरा ॥ इदानीं किं मया कार्यं तन्मे ब्रूहि महेश्वरि ॥६८॥ ॥ ॥ महेश्वर्युवाच ॥ ॥ शिवपूजा त्वया कार्या ध्यानेन तपसा सदा ॥ अहं तस्मै प्रदातव्या केनचित्कारणेन वै ॥ ६९ ॥ यादृशस्तु त्वया दृष्टो ध्येयो वै तादृशस्त्वया ॥ एक एव शिवो देवः सर्वाधारो धराधरः ॥७०॥ ॥ सारस्वत उवाच ॥ ॥ तपश्च कृतवान्रुद्रः समागम्य हिमाचलम् ॥ तस्यो मा परमां भक्तिं चकार शिवसंनिधौ ॥७१॥ देवकार्येण केनापि देवो वै ज्ञापितः प्रभुः ॥ उपयेमे हरो देवीमुमां त्रिभुवनेश्वरीम् ॥ ७२ ॥ स शप्तः शंभुना पूर्वं दक्षः प्राचेतसो नृपः॥वि[4]निंद्य पूर्ववैरेण गंगाद्वारेऽयजद्धरिम् ॥७३॥ देवाश्च यज्ञभागार्थमाहूता विष्णुना स्वयम् ॥ सहैव मुनिभिः सर्वैरा गता मुनिपुंगवाः ॥ ७४ ॥ दृष्ट्वा देवकुलं कृत्स्नं शंकरेण विनाऽऽगतम् ॥ दधीचोनाम विप्रर्षिः प्राचेतसमथाब्रवीत् ॥ ७५ ॥ ॥ दधीचिरु वाच ॥ ॥ ब्रह्माद्यास्तु पिशाचांता यस्याज्ञानुविधायिनः ॥ स हि वः सांप्रतं रुद्रो विधिना किं न पूज्यते ॥ ७६ ॥ ॥ दक्ष उवाच ॥ ॥ सर्वे ष्वेव हि यज्ञेषु न भागः परिकल्पितः ॥ न मंत्रा भार्यया सार्द्धं शंकरस्येति नेष्यते ॥ ७७ ॥ विहस्य दक्षं कुपितो वचः प्राह महामुनिः ॥ शृण्व

१ सर्वशास्त्रमयम्—इ० पा० । २ अतः पूर्वं देवीसहस्रनामस्तोत्रस्य पाठोऽपेक्षितः—परं स सहस्रनामस्तोत्रपाठः कस्मिन्नपि पुस्तकेऽत्र स्थले नास्ति । ३ अतिपेशलम्—इ० पा० । ४ विनिंद्य—रुद्रं विनिंद्य—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तां सर्वदेवानां सर्वज्ञानमयः स्वयम् ॥७८॥ यतः प्रवृत्तिर्विश्वात्मा यश्चासौ भुवनेश्वरः ॥ न त्वं पूजयसे रुद्रं देवैः संपूज्यते हरः ॥७९॥ ॥ दक्ष
उवाच ॥ ॥ अस्थिमालाधरो नग्नः संहर्ता तामसो हरः ॥ विषकंठः शूलहस्तः कपाली नागवेष्टितः ॥ ८० ॥ ईश्वरो हि जगत्स्रष्टा प्रभुर्योऽसौ
सनातनः ॥ सत्त्वात्मकोऽसौ भगवानिज्यते सर्वकर्मसु ॥ ८१ ॥ ॥ दधीचिरुवाच ॥ ॥ किं त्वया भगवानेष सहस्रांशुर्न दृश्यते ॥ सर्वलो
कैकसंहर्ता कालात्मा परमेश्वरः ॥ ८२ ॥ एष रुद्रो महादेवः कपर्दी चाग्रणीर्हरः ॥ आदित्यो भगवान्सूर्यो नीलग्रीवो विलोहितः ॥ ८३ ॥
॥ ॥ दक्ष उवाच ॥ ॥ य एते द्वादशादित्या आगता यज्ञभागिनः ॥ सर्वे सूर्या इति ज्ञेया न ह्यन्यो विद्यते रविः ॥ ८४ ॥ एवमुक्ते तु मुनयः
समायाता दिदृक्षवः ॥ बाढमित्यब्रुवन्दक्षं तस्य साहाय्यकारिणः ॥ ८५ ॥ तपसाविष्टमनसो न पश्यंति वृषध्वजम् ॥ सहस्रशोऽथ शतशो बहु
शोऽथ य एव हि ॥ ८६ ॥ देवाश्च सर्वे भागार्थमागता वासवादयः ॥ नापश्यन्देवमीशानमृते नारायणं हरिम् ॥ ८७ ॥ रुद्रं क्रोधपरं दृष्ट्वा ब्रह्मा
ब्रह्मासनं ययौ[1] ॥ अन्तर्हिते भगवति दक्षो नारायणं हरिम् ॥ ८८ ॥ रक्षकं जगतां देवं जगाम शरणं स्वयम् ॥ प्रवर्तयामास च तं यज्ञं दक्षोऽथ
निर्भयः ॥ ८९ ॥ रक्षको भगवान्विष्णुः शरणागतरक्षकः ॥ पुनः प्राहाध्वरे दक्षं दधीचो भगवान्नृप[2] ॥ ९० ॥ निर्भयः[3] शृणु दक्ष त्वं यज्ञभंगो भवि
ष्यति ॥ अपूज्यपूजनाद्दक्ष पूज्यस्य च विवर्जनात् ॥ ९१ ॥ नरः पापमवाप्नोति महद्वै नात्र संशयः ॥ असतां प्रग्रहो[4] यत्र सतां चैव विमानता ॥
॥ ९२ ॥ दण्डो देवकृतस्तत्र सद्यः पतति दारुणः ॥ एवमुक्त्वा स विप्रर्षिः शशापेश्वरविद्विषः ॥ ९३ ॥ यस्माद्बहिष्कृतो देवो भवद्भिः परमेश्वरः ॥
भविष्यध्वं त्रयीबाह्याः सर्वेऽपीश्वरविद्विषः ॥ ९४ ॥ मिथ्याचारीतिसमाचारा मिथ्याज्ञानप्रभाषिणः[5] ॥ प्राप्ते कलियुगे घोरे कलिजैः किल पीडिताः
॥ ९५ ॥ कृत्वा तपोबलं घोरं गच्छध्वं नरकं पुनः ॥ भविष्यति हृषीकेशः स्वामी वोऽपि पराङ्मुखः ॥ ९६ ॥ ॥ सारस्वत उवाच ॥ ॥ एव
मुक्त्वा स ब्रह्मर्षिर्विरराम तपोनिधिः ॥ जगाम मनसा रुद्रमशेषाध्वरनाशनम् ॥ ९७ ॥ एतस्मिन्नंतरे देवी महादेवं महेश्वरम् ॥ गत्वा विज्ञापयामास
ज्ञात्वा दक्षमखं शिवा ॥ ९८ ॥ ॥ देव्युवाच ॥ ॥ दक्षो यज्ञेन यजते पिता मे पूर्वजन्मनि ॥ तेन त्वं दूषितः पूर्वमहं चातीव दुःखिता ॥ विना
शयस्व तं यज्ञं वरमेनं वृणोम्यहम् ॥ ९९ ॥ ॥ सारस्वत उवाच ॥ ॥ एवं विज्ञापितो देव्या देवदेवो महेश्वरः ॥ ससर्ज सहसा रुद्रं दक्षयज्ञजि ॥२०९॥
घांसया ॥ १०० ॥ सहस्रशिरसं क्रूरं सहस्राक्षं महाभुजम् ॥ सहस्रपाणिं दुर्द्धर्षं युगांतानलसन्निभम् ॥ १०१ ॥ दंष्ट्राकरालं दुष्प्रेक्ष्यं शंखचक्र

१ ययौ—स्वं सत्यलोकम्—इति शेषः । २ नृप—हे भोजराज—इति सारस्वतस्य ब्राह्मणस्योक्तिः । ३ निर्भयः—सन्—प्राह—इत्यर्थः । ४ प्रग्रहः—सत्कारः—इत्यर्थः । ५ मिथ्याशास्त्रप्रभाषिणः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धरं प्रभुम् ॥ दण्डहस्तं महानादं शार्ङ्गिणं भूतिभूषणम् ॥ १०२ ॥ वीरभद्र इति ख्यातं देवदेवसमन्वितम् ॥ स जातमात्रो देवेशमुपतस्थे कृतांजलिः ॥ १०३ ॥ तमाह दक्षस्य मखं विनाशय शमस्तु ते ॥ विनिन्द्य मां स यजते गंगाद्वारे गणेश्वर ॥ १०४ ॥ ततो बंधप्रमुक्तेन सिंहेनेव च लीलया ॥ वीरभद्रेण दक्षस्य नाशार्थं रोम चोद्धुतम्[1] ॥ १०५ ॥ रोम्णा सहस्रशो रुद्रा निसृष्टास्तेन धीमता ॥ रोमजा इति विख्यातास्तत्र साहाय्यकारिणः ॥ १०६ ॥ शूलशक्तिगदाहस्ता दण्डोपलकरास्तथा ॥ कालाग्निरुद्रसंकाशा नादयन्तो दिशो दश ॥१०७॥ सर्वे वृषसमारूढाः सभार्याश्चातिभीषणाः ॥ समाश्रित्य गणश्रेष्ठं ययुर्दक्षमखं प्रति ॥ १०८ ॥ देवांगनासहस्राढ्यमप्सरोगीतिनादितम् ॥ वीणावेणुनिनादाढ्यं वेदवादाभिनादितम् ॥ १०९ ॥ दृष्ट्वा दक्षं समासीनं देवैर्ब्रह्मर्षिभिः[2] सह ॥ उवाच स वृषारूढो दक्षं वीरः स्मयन्निव ॥ ११० ॥ वयं ह्यनुचराः सर्वे शर्वस्यामिततेजसः ॥ भागार्थलिप्सया प्राप्ता भागान्यच्छ त्वमीप्सितान् ॥ १११ ॥ भागो भवद्भ्यो देयस्तु नास्मभ्यमिति कथ्यताम् ॥ ततो वयं विनिश्चित्य करिष्यामो यथोचितम् ॥ ११२ ॥ एवमुक्ता गणेशेन प्रजापतिपुरःसराः ॥ ११३ ॥ ॥ देवा ऊचुः ॥ ॥ प्रमाणं नो विजानीथ भागं मंत्रा इति ध्रुवम् ॥ ११४ ॥ ॥ मंत्रा ऊचुः ॥ ॥ सुरा यूयं तमोभूतास्तमोपहतचेतसः ॥ ये नाध्वरस्य राजानं पूजयेयुर्महेश्वरम् ॥ ११५ ॥ ईश्वरः सर्वभूतानां सर्वदेवतनुर्हरः ॥ ॥ गण उवाच ॥ ॥ पूज्यते सर्वयज्ञेषु कथं दक्षो न पूजयेत्॥११६॥मंत्राः प्रमाणं न कृता युष्माभिर्बलगर्वितैः ॥ यस्मादसह्यं तस्मान्नो नाशयाम्यद्य गर्वितम् ॥११७॥ इत्युक्त्वा यज्ञशालां तां देवोऽहन्गणपुंगवः ॥ गणेश्वराश्च संक्रुद्धा यूपानुत्पाट्य चिक्षिपुः॥११८॥ प्रस्तोतारं सहोतारमध्वर्युं च गणेश्वरः ॥ गृहीत्वा भीषणाः सर्वे गंगास्रोतसि चिक्षिपुः ॥११९॥ वीरभद्रोऽपि दीप्तात्मा वज्रयुक्तं करं हरेः[3]॥व्यष्टंभयददीनात्मा तथान्येषां दिवौकसाम् ॥ १२० ॥ भगनेत्रे तथोत्पाट्य कराग्रेणैव लीलया ॥ निहत्य मुष्टिना दंडैः सप्ताश्वं च न्यपातयत् ॥ १२१ ॥ तथा चंद्रमसं देवं पादांगुष्ठेन लीलया ॥ घर्षयामास बलवान्स्मयमानो गणेश्वरः ॥ १२२ ॥ वह्नेर्हस्तद्वयं छित्त्वा जिह्वामुत्पाट्य लीलया ॥ जघान मूर्ध्नि पादेन मुनीनपि मुनीश्वरान् ॥ १२३ ॥ तथा विष्णुं सगरुडं समायातं महाबलः ॥ विव्याध निशितैर्बाणैः स्तंभयित्वा सुदर्शनम् ॥ १२४ ॥ ततः सहस्रशो भद्रः ससर्ज गरुडान्बहून् ॥ वैनतेयादभ्यधिकान्गरुडं ते प्रदुद्रुवुः ॥ १२५ ॥ तान्दृष्ट्वा गरुडो धीमान्पलायदनपरोऽभवत् ॥ ततस्थितो माधवो वेगाद्यथा गौः सिंहपीडिता ॥ १२६ ॥ अंतर्हिते वैनतेये विष्णौ च पद्मसंभवः ॥ आगत्य वारयामास वीरभद्रं शिवप्रि

१ उद्धुतम्—उत्कम्पितम्—इत्यर्थः । २ महर्षिभिः—इ० पा० । ३ हरेः—इन्द्रस्य ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



यम् ॥ १२७ ॥ प्रसादयामास स तं गौरवात्परमेष्ठिनः ॥ तेऽदृश्यं नैव जानंति रुद्रं तत्रागतं सुराः ॥ १२८ ॥ स देवो विष्णुना ज्ञातो ब्रह्मणा च दधीचिना ॥ तुष्टाव भगवान्ब्रह्मा दक्षो विष्णुर्दिवौकसः॥ १२९ ॥ विशेषात्पार्वतीं देवीमीश्वरार्द्धशरीरिणीम् ॥ स्तोत्रैर्नानाविधैर्दक्षः प्रणम्य च कृताञ्जलिः ॥ १३० ॥ ततो भगवती प्राह प्रहसंती महेश्वरम् ॥ त्वमेव जगतः स्रष्टा संहर्ता चैव रक्षकः ॥ १३१ ॥ अनुग्राह्यो भगवता दक्षश्चापि दिवौकसः ॥ ततः प्रहस्य भगवान्कपर्दी नीललोहितः ॥ उवाच प्रणतान्देवान्दक्षं प्राचेतसं हरः ॥१३२॥ गच्छध्वं देवताः सर्वाः प्रसन्नो भवतामहम् ॥ संपूज्यः सर्वयज्ञेषु प्रथमं देवकमणि ॥ १३३ ॥ त्वं चापि शृणु मे दक्ष वचनं सर्वरक्षणम् ॥ त्यक्त्वा लोकेषणामेनां मद्भक्तो भव यत्नतः ॥ १३४ ॥ भविष्यसि गणेशानः कल्पांतेऽनुग्रहान्मम ॥ तावत्तिष्ठ ममादेशात्स्वाधिकारेषु निर्वृतः ॥ इत्युक्त्वाऽदर्शनं प्राप्तो दक्षस्यामिततेजसः ॥ १३५ ॥ दधीचिना शिवो दृष्टो विज्ञतः शापमोचने ॥ कथं शापं मया दत्तं तरिष्यंति तवाज्ञया ॥ १३६ ॥ ॥ शिव उवाच ॥ ॥ भविष्यंति त्रयीबाह्याः संप्राप्ते तु कलौ युगे ॥ पठिष्यंति च ये वेदांस्ते विप्राः स्वर्गगामिनः ॥ १३७ ॥ आगमा विष्णुरचिताः पठ्यन्ते ये द्विजातिभिः ॥ तेपि स्वर्गं प्रयास्यंति मत्प्रसादान्न संशयः ॥ १३८ ॥ कलिकालप्रभावेन येषां पाठो न विद्यते ॥ गृहस्थधर्माचरणं कर्तव्यं मम पूजनम् ॥ १३९ ॥ अवश्यं च मया कार्यं तेषां पापविमोचनम् ॥ भिक्षां भ्रमामि मध्याह्ने अतीते भस्मगुंठितः ॥ १४० ॥ जटाजूटधरः शांतो भिक्षापात्रकरो द्विजः ॥ यो ददाति च मे भिक्षां स्वर्गं याति स मानवः ॥ १४१ ॥ उपानहौ वा च्छत्रं वा कौपीनं वा कमंडलुम् ॥ यो ददाति तपस्विभ्यो नरो मुक्तः स पातकैः ॥ दधीचेः स वरान्दत्त्वा बभाषे सह विष्णुना ॥ १४२ ॥ ॥ रुद्र उवाच ॥ ॥ यस्ते मित्रं स मे मित्रं यस्ते रिपुः स मे रिपुः ॥ यस्त्वां पूजयते विष्णो स मां पूजयते ध्रुवम् ॥ १४३ ॥ यः स्तौति त्वां स मां स्तौति प्रियो यस्ते स मे प्रियः ॥ अहं यत्र च तत्र त्वं नास्ति भेदः परस्परम् ॥ १४४ ॥ ॥ कृष्ण उवाच ॥ ॥ एवमेतत्परं देव वक्तव्यं यत्तथैव तत् ॥ अर्द्धनारीनरवपुर्यदा दृष्टो मया पुरा ॥ १४५ ॥ नेयं नारी मया दृष्टा दृष्टं रूपं किलात्मनः ॥ शंखचक्रगदाहस्तं वनमालाविभूषितम् ॥ १४६ ॥ श्रीवत्सांकं पीतवस्त्रं कौस्तुभेन विराजितम् ॥ द्वितीयार्द्धं मया दृष्टं शूलहस्तं त्रिलोचनम् ॥ १४७ ॥ चंद्रावयवसंयुक्तं जटाजूटकपालिनम् ॥ एकीभावं प्रपन्नोऽहं यथा पूर्वं तथाऽधुना ॥ नं मां गौरी प्रपश्येत प्रपश्यामि तथैव च ॥ १४८ ॥ ॥ ईश्वर उवाच ॥ ॥ आवयोरंतरं नास्ति चैकरूपावुभावपि ॥ यो जानाति स जानाति

१ स तम्-सः—वीरभद्रः—तम्—परमेष्ठिनमेव । २ भाविष्यासि गणशेस्त्वम्--इ० पा० । ३ नेमां गौरीं प्रपश्यामि प्रपश्यामि तथैव च—इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्यलोकं स गच्छति ॥ १४९ ॥ इत्युक्त्वा स ययौ तत्र कैलासं पर्वतोत्तमम् ॥ कृष्णोपि मंदरं प्राप्तो देवकार्येण केनचित् ॥ १५० ॥ अत्रांतरे दैत्यराजो महादेवप्रसादतः ॥ हिरण्यनेत्रतनयो[1] बाधतेसौ जगत्त्रयम् ॥ १५१ ॥ अमरत्वं हराल्लब्ध्वा कामांधो नैव पश्यति ॥ हरांगधारिणीं देवीं दिव्यरूपां सुलोचनाम् ॥१५२॥ ममेति स च जानाति याचते च हरं प्रति॥ हरोऽपि कार्यव्यसनस्त्यक्त्वा कैलासपर्वतम् ॥१५३॥ मंदरं समनुप्राप्तो देवं द्रष्टुं जनार्दनम् ॥ परस्परं समालोच्यामुंचद्देवीं स मंदरे ॥ १५४ ॥ नारायणगृहे देवी स्थिता देवीगणैर्वृता ॥ अत्रांतरे गौतमस्तु गोवधान्म लिनीकृतः ॥ १५५ ॥ पवित्रीकरणायास्य भिक्षुरूपधरो हरः ॥ गौतमस्य गृहं प्राप्तो मंदरं चांधको गतः ॥१५६॥ ययाचे पार्वतीं दुष्टो युद्धं चक्रे स विष्णुना[2] ॥ हारितं तु गणैः सर्वैर्देवीं दैत्यो न पश्यति ॥१५७॥ स्त्रीरूपधारी कृष्णोऽसौ गौरीं रक्षति मंदिरे ॥ गौरीणां तु शतं चक्रे हरिस्तत्र स माय या ॥ १५८ ॥ विष्णोर्देहसमुद्भूता दिव्यरूपा वरस्त्रियः ॥ अन्धको नैव जानाति कैषा गौरी नु पार्वती ॥ १५९ ॥ विलंबस्तत्र संजातो मोहितो विष्णुमायया ॥ तावच्छिवः समायातः कृत्वा गौतमपावनम् ॥ १६० ॥ भिक्षामात्रेण चान्नेन गौतमो निर्मलीकृतः ॥ सोंधकेन तदा युद्धं चक्रे रुद्रोऽपि कोपितः ॥ १६१ ॥ अमरोऽसौ हराज्जातः शूले प्रोतः सुदारुणे ॥ शूलस्थस्तु स्तुतिं चक्रे तस्य तुष्टो महेश्वरः ॥ १६२ ॥ गणेशत्वं ददौ तस्मै यावदाभूतसंप्लवम्[3] ॥ स्वसरूपामुमादेवीं कृष्णस्तस्मै ददौ स्वयम् ॥ १६३ ॥ गौरीरूपाः स्त्रियश्चान्या धरित्र्यां तास्तु प्रेषिताः ॥ कृत्वा नामानि सर्वासां लोके पूज्या भविष्यथ ॥ १६४ ॥ एता ये पूजयिष्यंति पूजयिष्यन्ति ते शिवाम् ॥ शिवां ये पूजयिष्यंति तेऽर्चयन्ते हरं हरिम् ॥१६५॥ उमां समादाय ययौ हरो गिरिं वृषं समारुह्य सुरासुरार्चितः ॥ हरिस्तु रेमे रमया सहांधके हते च देवाः सुरराजमाययुः ॥१६६॥ ब्रह्मेशनारायणपुण्यचेतसां शृण्वन्ति चित्रं चरितं महात्मनाम् ॥ मुच्यंति पापैः कलिकालसंभवैर्यास्यंति नाकं गणवृन्दवंदिताः॥ १६७ ॥ एवं काले वर्त्तमाने हरः कैलासपर्वते ॥ रक्षोदानवदैत्यैस्तु गृह्यतेऽसौ वरान्बहून्[4] ॥ १६८ ॥ ब्रह्मदत्तवरो रौद्रस्तारकाख्यो महासुरः ॥ तेन सर्वं जगद्व्याप्तं तस्य नष्टा सुरा रणे ॥ १६९ ॥ महादेवसुतेनाजौ हंतव्योऽसौ ससर्ज तम् ॥ कार्तिकेयमुमापुत्रं रुद्रवीर्यसमुद्भवम् ॥ १७० ॥ देवैरिन्द्रादिभिः सर्वैः सेनाध्यक्ष्येभिषेचितः ॥ तेनापि दैवयोगेन तारकाख्यो निपातितः ॥ १७१ ॥ कैलासशिखरासीनो देवदेवो जगद्गुरुः ॥ उमया

१ हिरण्यनेत्रतनयः-हिरण्याक्षसुतः। २ विष्णुम् इ० पा०। ३ यावदाभूतसंप्लवम्-इ० पा०। ४ गृह्यतेऽसौ वरान्बहून्-रक्षोदानवदैत्यैः-अस्मात्-बहवः वरा गृह्यन्ते--अयं च तेभ्यो बहून्वरान्ददाति-इत्यर्थः।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सह संतुष्टो नन्दिभद्रादिभिर्वृतः ॥ १७२ ॥ स्कन्देन गजवक्रेण धनाध्यक्षेण संयुतः ॥ अथ हासपरं देवं शनैः प्रोवाच तं शिवा ॥ १७३ ॥ केन देव प्रकारेण तोषं यास्यसि शंकर ॥ मर्त्यानां केन दानेन तपसा नियमेन वा ॥ १७४ ॥ केन वा कर्मणा देव केन मन्त्रेण वा पुनः ॥ स्नानेन केन देवेश केन धूपेन तुष्यसि ॥ १७५ ॥ पुष्पेण केन मे नाथ केन पत्रेण शंकर ॥ कया संतुष्यसे स्तुत्या साहसेन च केन वै ॥ १७६ ॥ नैवेद्येन च केन त्वं केन होमेन तुष्यसि ॥ केन कष्टेन वा देव केनार्घेण मम प्रभो ॥ १७७ ॥ षोडशैते मया प्रश्नाः पृष्टा मे निर्णयं वद ॥ १७८ ॥ ॥ शंकर उवाच ॥ ॥ साधु पृष्टं त्वया देवि कथयिष्ये मम प्रियम् ॥ शिवपूजाप्रकारोऽयं क्रियते वचसा गुरोः ॥ १७९ ॥ अभयं सर्वजंतूनां दानं देवि मम प्रियम् ॥ सत्यं तपः समाख्यातं परदारविवर्जनम् ॥ १८० ॥ प्रियो मे नियमो देवि कर्म तल्लोकरञ्जनम् ॥ मयोंनमः शिवायेति मन्त्रोऽयमुररीकृतः ॥ १८१ ॥ सर्वपापविनिर्मुक्तो मम देवि स वल्लभः ॥ पापत्यागो भवेत्स्नानं धूपो मे गौग्गुलः प्रियः ॥ ॥ १८२ ॥ धत्तूरकस्य पुष्पं मे बिल्वपत्रं मम प्रियम् ॥ स्तुतिः शिवशिवायेति साहसं रणकर्मणि ॥ १८३ ॥ न बिभेति नरो यस्तु तस्याग्रे संभवाम्यहम् ॥ हंतकारो गवां यस्तु नैवेद्यं मम वल्लभम् ॥ १८४ ॥ पूर्णाहुत्या परा प्रीतिर्जायते मम सुन्दरि ॥ शुश्रूषा वल्लभं कष्टं यतीनां च तपस्विनाम् ॥ १८५ ॥ सूर्योदये महादेवि मध्याह्नेऽस्तमने तथा ॥ अर्घो यो दीयते सूर्ये वल्लभोऽसौ मम प्रिये ॥ १८६ ॥ किं दानैः किं तपोभिर्वा किं यज्ञैर्भाववर्जितैः ॥ दया सत्यं घृणाऽस्तेयं दंभपैशुन्यवर्जितम् ॥ भक्त्या यद्दीयते स्तोकं देवि तद्वल्लभं मम ॥ १८७ ॥ एवं यावत्कथयति प्रश्नान्सूक्ष्मान्यथोदितान् ॥ तावद्ब्रह्मादिभिर्देवैर्विष्णुस्तत्र ययौ स्वयम् ॥ १८८ ॥ ॥ विष्णुरुवाच ॥ ॥ नाहं पालयितुं शक्तस्त्वं ददासि वरान्बहून् ॥ दैत्यानां दानवादीनां राक्षसानां महेश्वर ॥ १८९ ॥ विकृतिं यांति पश्चात्ते कष्टं वध्या भवंति मे ॥ पत्रेण पुष्पमात्रेण ॐकारेण शिवेन च ॥ मुक्तिं याति नरो देव भवभक्तिं करोतु कः ॥ १९० ॥ इन्द्रादयोऽपि ये देवा यज्ञैराप्याययंति ते ॥ न यजंति द्विजा यज्ञान्भिक्षादानेन तुष्यसि ॥ १९१ ॥ ॥ रुद्र उवाच ॥ ॥ इन्द्रादिभिर्न मे कार्यं ब्रह्मा मे किं करिष्यति ॥ येन केन प्रकारेण प्रजाः पाल्यास्त्वयाऽधुना ॥ १९२ ॥ मदीया प्रकृतिस्त्वेषा तां कथं त्यक्तुमुत्सहे ॥ त्वयाहं ब्रह्मणा देवैर्वरकर्मणि योजितः ॥ १९३ ॥ इदानीमेव किं नष्टं मुक्त्वा देवीं तवाग्रतः ॥ भूत्वा मूर्तिं परित्यज्य एकाकी विचराम्यहम् ॥ १९४ ॥ इत्युक्त्वा स शिवो देवस्तत्रैवांतरधीयत ॥ गते तस्मिञ्छिवे तत्र संक्षोभः



१ सेनाध्यक्षेण—इ० पा० । २ वचनाद्गुरोः--इ०पा० । ३ सर्वभूतानाम्—इ० पा० । ४ शिवेन च शिवाय--इत्युच्चारणमात्रेण च--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुमहानभूत् ॥ १९५ ॥ उमा प्रोवाच चेन्द्रादीन्ब्रह्मविष्णुगणांस्तथा ॥ इदानीं किं मया कार्यं भवद्भिः शिववर्जितैः ॥ १९६ ॥ अत्रान्तरे च ये चान्ये देवास्तत्र समागताः ॥ ऋषयश्चैव सिद्धाश्च तथा नारदपर्वतौ ॥ १९७ ॥ गंगासरस्वतीनद्यो नागा यक्षाः समागताः ॥ ब्रह्मादिभिः समालोच्य कथमेतद्भविष्यति ॥ १९८ ॥ ॥ विष्णुरुवाच ॥ ॥ सहैव गम्यतां तत्र यत्र देवो गतः शिवः ॥ स्वल्पायासेन ते यान्तु नराः स्वर्गं शिवाज्ञया ॥ १९९ ॥ सत्यलोके नरा यान्तु देवा यान्तु धरातलम् ॥ रक्षोदानवदैत्यानां वरान्यच्छतु शंकरः ॥ २०० ॥ तेषां बाधा मया कार्या ये च स्युर्धर्मलोपकाः ॥ दृष्टे शिवे मया कार्या व्यवस्था स्वर्गगामिनाम् ॥ ॥ २०१ ॥ त्रयीधर्मं परित्यज्य येऽन्यं धर्ममुपासते ॥ ते नरा नरकं यांतु यावदाभूतसंप्लवम् ॥ २०२ ॥ यदाऽदृश्यः शिवो जातः प्रविवेश गिरेर्वनम् ॥ गिरीणां मध्यमास्थाय त्यक्त्वा दिव्ये स वाससी ॥ २०३ ॥ गजाजिनं परित्यज्य त्यक्त्वा मूर्त्तिं महेश्वरः ॥ भित्त्वा भूमितलं देवः स्थाणुरूपो बभूव सः ॥ २०४ ॥ यस्मात्स्वयंभूर्भवति भवंस्तस्मात्स्वयं हरः ॥ अत्रांतरे सुराः[1] सर्वे न पश्यंति महेश्वरम् ॥ ज्ञानातीतं कलातीतं दिव्यध्यानबहिः स्थितम् ॥ २०५ ॥ यदा देवा व्याकुलाः संपतंति रविर्वायुरंबरं तोयमुर्वी ॥ निजे स्थाने वर्त्तमाना उमायाः शशंसुर्वै देवदेवं सुराणाम् ॥ २०६ ॥ स्वर्गे धरित्र्यां चरितं तलेषु देवेषु मर्त्येषु सरीसृपेषु ॥ स्थूलेषु सूक्ष्मेषु यथा तथैव सत्यं हि वाच्यं पदमस्मदीयम् ॥ २०७ ॥ ततो देवाः प्रचलिताः कृत्वा गौरीं पुरस्सरम् ॥ नंदिभद्रादयः सर्वे देवा इंद्रादयस्तथा ॥ २०८ ॥ स्कन्देन सहिता देवी सिंहारूढा ययौ स्वयम् ॥ अधिरुह्य गरुत्मंतं ययौ विष्णुः सनातनः ॥ २०९ ॥ हंसाधिरूढो भगवान्ब्रह्मा याति स पृष्ठतः ॥ ऐरावतं समारुह्य देवराजोऽगमत्स्वयम् ॥ ॥ २१० ॥ गंगा सरस्वती देवी यमुना च महानदी ॥ देवताश्च गताः सर्वे नागा यक्षाः सकिंनराः ॥ २११ ॥ गताः संक्षेपतः सर्वे यत्र देवो महेश्वरः ॥ अधिरुह्य गिरेः शृंगमंबा देवी व्यवस्थिता ॥ २१२ ॥ विष्णुर्मुक्त्वा गरुत्मंतं स्थितो रैवतके गिरौ ॥ स्तुतिं चक्रे तदा देवी जगुर्गीतं सुसंयताः ॥ २१३ ॥ ऐरावतपदाक्रांतो न चचाल स पर्वतः ॥ भित्त्वा भूमितलं तत्र नागराजः समागतः ॥ २१४ ॥ गंगाद्याः सरितः सर्वास्तेन रंध्रेण चागताः ॥ ब्रह्मा विष्णुर्यदा देवाः स्तुतिं चक्रुः समंततः ॥ २१५ ॥ ददर्श रूपं भगवान्भवो देवस्तदा हरः ॥ २१६ ॥ ततो हृष्टाः सुराः सर्वे अंबा हृष्टा गणाश्च ते ॥ गम्यतां देव कैलासं देव्येति संप्रमोदितः ॥ २१७ ॥ ॥ ईश्वर उवाच ॥ ॥ यदि [3]हृष्टाः सुराः सर्वे गंगाद्याः

१ गुहाः—इ० पा० । २ स्तुतिं चक्रुस्तदा देवीम्—इ० पा० । ३ तुष्टाः—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





सरितस्तथा ॥ गिरौ रैवतके विष्णुरंबा चात्रैव तिष्ठतु ॥२१८॥ सरस्वती च यमुना रेवा चास्मिन्व्यवस्थिताः ॥ स्वर्णरूपं जलं यस्मात्स्वर्णरेखेति
सा नदी ॥ २१९ ॥ वस्त्रापथमिदं क्षेत्रं भवो देवोऽत्र तिष्ठतु ॥ तीर्थमेतन्मया प्रोक्तं भुक्तिमुक्तिप्रदायकम् ॥ अत्र स्नातो नरो नारी मुच्यते सर्व
पातकैः ॥२२०॥ इति प्रोच्य शिवो देवः कलां न्यस्य भवे तदा ॥ पश्यतां सर्वदेवानां ययौ कैलासपर्वतम् ॥ २२१ ॥ अंबेति स्कन्दवदनात्कलां
न्यस्य गिरौ तदा ॥ देवेन सहिता देवी वृषारूढा ययौ स्वयम् ॥ २२२ ॥ नारायणो रैवतके गिरौ रम्ये स्थितः स्वयम् ॥ कल्पादौ च युगादौ
च स्थितो विष्णुः सदा गिरौ ॥ २२३ ॥ बहुरात्रस्थितो देवः कृत्वा दैत्यनिबर्हणम् ॥ रेमे रैवतके देवो यावदाभूतसंप्लवम् ॥ २२४ ॥ नारसिंहेन
रूपेण हिरण्यकशिपुर्हतः ॥ हत्वा तदा गतस्तत्र नारसिंहं मुमोच ह ॥ २२५ ॥ महावराहरूपेण हिरण्याक्षो निपातितः ॥ तदेव मुक्त्वा देवेशः
स्थितो रैवतके गिरौ ॥ २२६ ॥ स पृथुं पार्थिवं कृत्वा देवकार्येण वै नृप ॥ गिरौ रैवतके देव उवास सुरपूजितः ॥ २२७ ॥ अत्रागत्य पृथुः पूर्वं
चक्रे देवप्रपूजनम् ॥ [1]जपमाला तदा कण्ठे पृथुना संनिवेशिता ॥ दामोदरेति देवेशनाम चक्रे पृथुः स्वयम् ॥ २२८ ॥ वस्त्रापथे देववरो भवः
स्थितो दामोदरो रैवतके व्यवस्थितः ॥ अंबेतिदेवी गिरिमूर्ध्नि संस्थिता देवाश्च सर्वे परितः प्रतिष्ठिताः ॥ २२९ ॥ क्षेत्राधिपास्तीर्थवरस्य रक्षका
देवेन मुक्ता भवसंनिधानतः ॥ पश्यंति ये देववरं भवाभिधं मुच्यंति ते यांति दिवं नरा भुवः ॥ २३० ॥ वस्त्रापथस्य क्षेत्रस्य भवस्य च मया
तव ॥ उत्पत्तिः कथिता राजन्किमन्यच्छ्रोतुमिच्छसि ॥ २३१ ॥ शृणोति पठते यश्च कथां चेमां समंततः ॥ सर्वपापविनिर्मुक्तः स्वर्गलोके
महीयते ॥ २३२ ॥ ब्रह्मघ्नश्च सुरापश्च भ्रूणहा गुरुतल्पगः ॥ स्वर्णरेखाजले स्नातो मुच्यते सर्वपातकैः ॥ २३३ ॥ ये च कीटपतंगाद्याः स्वर्णरेखा
जले मृताः ॥ सर्वपातकनिर्मुक्तास्ते प्रयांति सुरालयम् ॥ १३४ ॥ स्वर्णरेखाजले स्नात्वा संध्यां श्राद्धं करोति यः ॥ वस्त्रापथे भवं पूज्य ब्रह्मलोकं
स गच्छति ॥ २३५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे वस्त्रापथक्षेत्रमाहात्म्ये भवोत्पत्तिवृत्तांत
वर्णनंनाम नवमोऽध्यायः ॥ ९ ॥ ॥ छ ॥ ॥ पार्वत्युवाच ॥ ॥ अहो तीर्थस्य माहात्म्यं गिरे रैवतकस्य च ॥ भवस्य देवदेवस्य
तथा वस्त्रापथस्य च ॥ १ ॥ गंगा सरस्वती चैव गोमती नर्मदा नदी ॥ स्वर्णरेखाजले सर्वास्तथा ब्रह्मा सवासवः ॥ २ ॥ ब्रह्मेन्द्र
विष्णुमुख्यानां देवानां शंकरस्य च ॥ वासो विरचितस्तत्र यावद्ब्रह्मदिनं भवेत् ॥ ३ ॥ क्षेत्रतीर्थप्रभावं च प्रसादात्तव शंकर ॥ श्रुतं



१ जयमाला—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सविस्तरं सर्वमिदं त्वदुदितं मया ॥ ४ ॥ महेश्वर प्रभो ब्रूहि किं चकार जनेश्वरः ॥ भोजराजो मृगीं प्राप्य स च सारस्वतो मुनिः ॥ ५ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ तासु सर्वासु नारीषु रूपौदार्यगुणाधिका ॥ नित्यं प्रमुदिता शांता नित्यं मंगलकारिका ॥ ६ ॥ माता स्वसा सखी पुत्री स्त्रीषु संबन्धवर्धिनी ॥ पिता भ्राता गुरुः पुत्रः पुरुषेषु तथा कृतः ॥ ७ ॥ एवं गुणवतीं भार्यां प्राप्य हृष्टो जनेश्वरः ॥ सारस्वतं मुनिं स्तुत्वा राजा वचनमब्रवीत् ॥ ८ ॥ ॥ राजोवाच ॥ ॥ ब्रह्मा विष्णुर्हरः सूर्य इन्द्रोऽग्निर्मरुतां गणः ॥ ब्रह्मचर्येण तपसा त्वया सन्तोषिताः प्रभो ॥ ९ ॥ दैवतं परमं मे त्वं पिता माता गुरुः प्रभुः ॥ येन जन्मांतरं सर्वं प्रत्यक्षं कथितं मम ॥ १० ॥ सुराष्ट्रदेशो विख्यातो गिरी रैवतको महान् ॥ भवः स्वयंभूर्भगवान्क्षेत्रे वस्त्रापथे श्रुतः ॥ ११ ॥ उज्जयंतगिरेर्मूर्ध्नि गौरीस्कन्दगणेश्वराः ॥ भावयंतो भवं सर्वे संस्थिता ब्रह्मवासरम् ॥ १२ ॥ वामनो नगरं स्थाप्य शिवं सिद्धेश्वरं प्रति ॥ जित्वा दैत्यं बलिं बद्धा स्वयं रैवतके स्थितः ॥ १३ ॥ इत्येतत्सर्वमाश्चर्यं जीवद्भिर्यदि दृश्यते ॥ तीर्थयात्राविधानेन भवो वस्त्रापथे हरिः ॥ १४ ॥ त्यक्त्वा राज्यं प्रियान्पुत्रान्पत्त्यश्वरथकुञ्जरान् ॥ पुत्रं राज्ये प्रतिष्ठाप्य गन्तव्यं निश्चितं मया ॥ १५ ॥ त्वत्प्रसादाच्छ्रुतं सर्वं गम्यते यदि दृश्यते ॥ तीर्थयात्राविधानेन भवो वस्त्रापथे हरिः ॥ १६ ॥ सूर्यलोकं सोमलोकमिंद्रलोकं हरेः पुरम् ॥ ब्रह्मलोकमतिक्रम्य यास्येऽहं शिवमंदिरम् ॥ १७ ॥ श्रुत्वा हि वाक्यं विविधं नरेन्द्रात्प्रहृष्टरोमा स मुनिर्बभूव ॥ जिज्ञासमानो हि नृपस्य सर्वं निवारयामास मुनिर्नरेन्द्रम् ॥ १८ ॥ ॥ सारस्वत उवाच ॥ ॥ गृहेऽपि देवा हरविष्णुमुख्या जलानि दर्भा नृपते तिलाश्च ॥ अनेकदेशांतरदर्शनार्थं मनो निवार्यं नृपते त्वयेति ॥ १९ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे द्वितीये वस्त्रापथक्षेत्रमाहात्म्ये वस्त्रापथक्षेत्रयात्रोत्सुकस्य भोजभूपस्य सारस्वतमुनिकृतोपदेशवर्णनंनाम दशमोऽध्यायः ॥ १० ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ सारस्वतस्य विप्रस्य श्रुत्वा भोजनृपो वचः ॥ विवर्णवदनो भूत्वा प्रगृह्यांघ्री वचोऽब्रवीत् ॥ १ ॥ मुने नैवं त्वया वाच्यं गंतव्यं निश्चितं मया ॥ नराणां पुण्यदा यात्रा कथयस्व कथं भवेत् ॥ २ ॥ किं ग्राह्यं किं च मोक्तव्यं किं देयं किं न दीयते ॥ तीर्थोपवासः स्नानं च संध्यास्नानविधिक्रमः ॥ पूजा निद्रा जपो रात्रौ सर्वं संक्षेपतो वद ॥ ३ ॥ ॥ सारस्वत उवाच ॥ ॥ सुराष्ट्रदेशे गन्तव्यं गिरौ रैवतके यदि ॥ नृप यात्राविधि वक्ष्ये त्वमेकाग्रमनाः शृणु ॥ ॥ ४ ॥ बृहस्पतिबलं गृह्य सूर्यं संतर्प्य चोत्तमम् ॥ वामतः पृष्ठतः सर्वं वृत्वा संशोध्य वासरम् ॥ ५ ॥ चंद्रलग्नं ग्रहाज्ज्ञात्वा बलिष्ठाज्जन्मराशितः॥

१ सदा मंगलकारिका—इ० पा०। २ पुत्रे राज्यं प्रतिष्ठाप्य—इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



शकुनं च शुभं लब्ध्वा प्रस्थातव्यं नृपैर्नृप ॥ ६ ॥ तीर्थे सदैव गंतव्यं सर्वे मासाश्च शोभनाः ॥ तिथयश्चोत्तमाः सर्वाः स्नानदानार्चनादिषु ॥ ७ ॥ अष्टम्यां च चतुर्दश्यां मासांते पूर्णिमादिने ॥ संक्रांतौ ग्रहणे काला एते प्रोक्ता भवार्चने ॥८॥ कैलासं पर्वतं त्यक्त्वा देवीं देवांश्च संगतान् ॥ वैशाखे पंचदश्यां तु भूमिं भित्त्वा भवोऽभवत् ॥ ९ ॥ तस्मिन्नेव दिने देवी स्वर्णरेखा नदी तलात् ॥ पंथानं वासुकिं प्राप्य सर्वपापप्रणाशनी ॥ १० ॥ ऐरावतपदाक्रांत उज्जयन्तो महागिरिः ॥ सुस्राव तोयं बहुधा गजपादोद्भवं शुचि ॥ ११ ॥ देवा ब्रह्मादयः सर्वे गंगाद्याः सरितस्तथा ॥ वस्त्रापथे महाक्षेत्रे भवभावेन संगताः ॥ १२ ॥ वस्त्रापथस्य क्षेत्रस्य प्रमाणं शृणु भूपते ॥ हरस्य त्यजतो भूमौ पतितं वस्त्रभूषणम् ॥ १३ ॥ तावन्मात्रं स्मृतं क्षेत्रं देवैर्वस्त्रापथं कृतम् ॥ उत्तरेण नदी भद्रा पूर्वस्यां योजनद्वयम् ॥ १४ ॥ दक्षिणेन बलेः स्थानमुज्जयन्तो नदीमनु ॥ अपरस्यां परं नद्योः संगमं वामनात्पुरात् ॥ १५ ॥ एतद्वस्त्रापथं क्षेत्रं भुक्तिमुक्तिप्रदायकम् ॥ क्षेत्रस्य विस्तरो ज्ञेयो योजनानां चतुष्टयम् ॥ १६ ॥ वैशाखपंचदश्यां तु भवो भावेन भूपते ॥ पूज्यते शिवलोके[1] तु स्थीयते ब्रह्मवासरम् ॥ १७ ॥ अतो वसंते संप्राप्ते प्रयाणं कुरु भूपते ॥ निगृह्य नियमान्भूत्वा शुचिः स्नातो जितेन्द्रियः ॥ १८ ॥ गजवाजिरथांस्त्यक्त्वा पदाभ्यां याति यो नरः ॥ पुष्पकेण विमानेन स याति शिवमंदिरम् ॥ १९ ॥ एकभक्तेन नक्तेन तथैवायाचितेन च ॥ भिक्षाहारेण तोयेन फलाहारेण वा यदि ॥ २० ॥ उपवासेन कृच्छ्रेण शाकाहारेण याति यः ॥ स याति सुन्दरीवृन्दैर्वीज्यमानो गणैर्दिवि ॥ २१ ॥ मलस्नानं विना मार्गे पादाभ्यंगविवर्जितः ॥ मलै[2]धारी क्षीणतनुर्यष्टिहस्तो जितेन्द्रियः ॥ २२ ॥ शीतातपजलक्लिष्टः शिवस्मरणतत्परः ॥ यदि याति नरो याति स भित्त्वा सूर्यमंडलम् ॥ २३ ॥ नरकस्थानपि पितॄन्मातृतः पितृतो नृप ॥ अक्षयं सप्त सप्तैव नयेदेवं शिवालये ॥ २४ ॥ लुण्ठन्भूमौ यदा याति मृगचर्मावगुंठितः ॥ दण्डप्रमाणभूमेर्वा संख्यां कुर्वन्नरो यदि ॥ २५ ॥ अरण्ये निर्जले स्थाने जलांतःपरिपीडितः ॥ शरण्यं शंकरं कृत्वा मनो निश्चलमात्मनः ॥ २६ ॥ सप्तद्वीपवतीं पृथ्वीं समुद्रवसनां नृप ॥ स लब्ध्वा बहुभिर्यज्ञैर्यज्ञे दत्त्वा च मेदिनीम् ॥ २७ ॥ सप्त[3]भौमविमानस्थो दिव्यदेहो हराकृतिः ॥ निरीक्ष्य मेदिनीं मंदं कृतमंगलमण्डनम् ॥ २८ ॥ मृगनेत्राभुजस्पर्शलग्नपीनपयोधरः ॥ गीतवाद्यविनोदेन सत्यलोकं व्रजेन्नरः ॥ २९ ॥ विधाय भुजवेगं वा पादौ बद्ध्वा शनैः शनैः ॥ मौनेन मानुषो मायां त्यक्त्वा याति शिवालये ॥ ३० ॥ ब्रह्मघ्नो वा सुरापो वा स्तेयी वा गुरुतल्पगः ॥ कृतघ्नो मुच्यते पापैर्मृतो

१ शिवलोकेषु—इ० पा० । २ मौनधारी—इ० पा० । ३ सप्तभौमविमानस्थः—उत्तरोत्तरसप्तभूमिकायुक्तविमानस्थः—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुक्तिमवाप्नुयात् ॥ ३१ ॥ मातरं पितरं देशं भ्रातरं स्वजनबांधवान् ॥ ग्रामं भूमिं गृहं त्यक्त्वा कृत्वा चेंद्रियसंयमम् ॥ ३२ ॥ गृहीत्वा शिवसंस्कारं नरो भ्राम्यति भूतले ॥ द्रष्टुं तीर्थान्यनेकानि पुण्यान्यायतनानि च ॥ ३३ ॥ कस्मिंस्तीर्थे शुभे स्थाने छित्त्वा संसारबन्धनम् ॥ अभयां दक्षिणां दत्त्वा शिवशिवेति भाषकः ॥ ३४ ॥ एकांते निर्जने स्थाने शिवस्मरणतत्परः ॥ यदि तिष्ठति तं यान्ति नमस्कर्तुं नराधिप ॥ ३५ ॥ आयांति देवताः सर्वे चिह्नं तस्य निरीक्षितुम् ॥ विमानवृन्दैर्नेतव्यः कदासौ पुरुषोत्तमः ॥ ३६ ॥ यदा तु पञ्चत्वमुपैति काले कलेवरं स्कन्धकृतं नरैश्च ॥ निरीक्ष्यमाणः सुरसुन्दरीभिः स नीयमानो मदविह्वलाभिः ॥ ३७ ॥ सुरेन्द्रसूर्याग्निधनेशरुद्रैः संपूज्यमानः शिवरूपधारी ॥ सुरादिलोकान्प्रविमुच्य वेगाच्छिवालये तिष्ठति रुद्रभक्तः ॥ ३८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे द्वितीये वस्त्रापथक्षेत्रमाहात्म्ये वस्त्रापथयात्राविधानवर्णनंनामैकादशोऽध्यायः ॥ ११ ॥ ॥ छ ॥ ॥ सारस्वत उवाच ॥ ॥ गंगोदकं मधुघृते कुंकुमागुरुचंदनम् ॥ गुग्गुलं बिल्वपत्राणि बकपुष्पं च यो वहेत् ॥ १ ॥ पदचारी शुचितनुर्भारं स्कन्धे निधाय च ॥ तीर्थे स्नात्वा शिवं विष्णुं ब्रह्माणं शंकरं प्रियम् ॥ २ ॥ दृष्ट्वा निवेदयेद्यस्तु स मुक्तः सर्वबन्धनैः ॥ स नरो गणतां याति यावदाभूतसंप्लवम् ॥ ३ ॥ कलत्रमित्रपुत्रैर्वा भ्रातृभिः स्वजनैर्नरैः ॥ सहितो वा नरैर्याति तीर्थे देवं विचिंत्य च ॥ ४ ॥ देवमूर्तिं शुभां कृत्वा रथस्थां सुप्रतिष्ठिताम् ॥ चन्दनागुरुकर्पूरैरर्चितां कुंकुमेन च ॥ ५ ॥ पूजयन्विविधैः पुष्पैर्धूपदीपादिकैर्नृप ॥ गीतनृत्यैः सवादित्रैर्हास्यलास्यैरनेकधा ॥ ६ ॥ धरित्रीं कांचनं गाश्च जलान्नवसनानि च ॥ तृणेन्धने प्रियां वाणीं यच्छन्याति नरो यदि ॥ ७ ॥ देवांगनाकरग्राहगृहीतो नन्दनं वनम् ॥ प्राप्य भुंक्ते शुभान्[1]भोगान्यावदाचन्द्रतारकम् ॥ ८ ॥ तीर्थे संचरितः पुरुषो रोगैः प्राणान्विमुञ्चति ॥ अदृष्ट्वा दैवतं तीर्थे दृष्टतीर्थफलं लभेत् ॥ ९ ॥ संसारदोषान्विविधान्विचिन्त्य स्त्रीपुत्रमित्रेष्वपि [2]बंधमुक्तः ॥ विज्ञाय बद्धं पुरुषं प्रधानैः स सर्वतीर्थानि करोति देहम् ॥ १० ॥ आजन्मजन्मान्तरसंचितानि दग्ध्वा स पापानि नरो नरेन्द्र ॥ तेजोमयं सर्वगतं पुराणं भवोद्भवं पश्यति मुच्यते सः ॥ ११ ॥ तीर्थे विप्रवचो ग्राह्यं स्नात्वा [3]संध्यार्चनादिकम् ॥ दर्भास्तिला हविष्यान्नं प्रयोगाः श्रद्धया कृताः ॥ १२ ॥ अगस्त्यं भृङ्गराजं च पुष्पं शतदलं शुभम् ॥ कर्पूरागुरुश्रीखंडं कुंकुमं तुलसीदलम् ॥ १३ ॥ बिल्वप्रमाणपिंडेषु दीपोद्योतितभूमिषु ॥ तांबूल

१ लोकान्--इ० पा० । २ मुक्तबंधः--इ० पा० । ३ इत आरभ्य--यावत्--अनंतं प्रजायते--इत्यंतं विभक्तिनियमो नास्ति--केवलमर्थानुसंधानेन वाक्यार्थो बोद्धव्यः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



फलनैवेद्यं तिलदर्भोदकेन च ॥ १४ ॥ तीर्थे संकल्पितं मर्त्यैस्तदनंतं प्रजायते ॥ अयने विषुवे चैव संक्रांतौ ग्रहणेषु च ॥ १५ ॥ मासांतेऽपर
पक्षे तु क्षयाहे पितृमातृके ॥ गजच्छायायां[1] त्रयोदश्यां द्रव्ये प्राप्ते द्विजोत्तमः ॥ १६ ॥ गृहे श्राद्धं प्रकुर्वीत पितॄणामृणमुक्तये ॥ गृहाच्छतगुणं नद्यां
या नदी याति सागरम् ॥ १७ ॥ प्रभासे पुष्करे राजन्गंगायां पिंडतारके ॥ प्रयागे नृप गोमत्यां भवदामोदराग्रतः ॥ १८ ॥ नर्मदादिषु तीर्थेषु
कुर्याच्छ्राद्धं नरो यदि ॥ सर्वपापविनिर्मुक्तः पितरो यांति सद्गतिम् ॥ १९ ॥ संतानमुत्तमं लब्ध्वा भुक्त्वा भोगाननुत्तमान् ॥ दिव्यं विमानमारुह्य
प्रान्ते याति सुरालयम् ॥ २० ॥ जातकर्मादियज्ञेषु विवाहे यज्ञकर्मणि ॥ देवप्रतिष्ठाप्रारंभे वृद्धिश्राद्धं प्रकल्पयेत् ॥ २१ ॥ तृप्यन्ति[2] देवताः सर्वा
स्तृप्यंति पितरो नृणाम् ॥ वृद्धिश्राद्धकृतो गेहे जायते सर्वमंगलम् ॥ २२ ॥ कामः क्रोधश्च लोभश्च मोहो मद्यमदादयः ॥ माया मात्सर्यपैशुन्य
मविवेको विचारणा ॥ २३ ॥ अहंकारो यदृच्छा च चापल्यं लौल्यता नृप ॥ अत्यायासोऽप्यनायासः प्रमादो द्रोहसाहसम् ॥ २४ ॥ आलस्यं
दीर्घसूत्रत्वं परदारोपसेवनम् ॥ अल्पाहारो निराहारः शोकश्चौर्यं नृपोत्तम ॥ २५ ॥ एतान्दोषान्गृहे नित्यं वर्जयन्यदि वर्त्तते ॥
स नरो मण्डनं भूमेर्देशस्य नगरस्य च ॥ २६ ॥ श्रीमान्विद्वान्कुलीनोऽसौ स एव पुरुषोत्तमः ॥ सर्वतीर्थाभिषेकश्च नित्यं तस्य
प्रजायते ॥ २७ ॥ तदा तीर्थफलं सम्यक्त्यक्तदोषस्य जायते ॥ स्नानं सन्ध्या जपो होमः पितृदेवर्षितर्पणम् ॥ श्राद्धं देवस्य पूजा
च त्यक्तदोषस्य जायते ॥ २८ ॥ प्रयागे वा कुरुक्षेत्रे सरस्वत्यां च सागरे ॥ गयायां वा रुद्रपदे नरनारायणाश्रमे ॥ २९ ॥
प्रभासे पुष्करे कृष्णे गोमत्यां पिंडतारके ॥ वस्त्रापथे गिरौ पुण्ये[3] तथा दामोदरे नृप ॥ ३० ॥ भीमेश्वरे नर्मदायां स्कांदे रामेश्वरादिषु ॥
उज्जयिन्यां महाकाले वाराणस्यां च भूर्भुवः ॥ ३१ ॥ कालिंद्यां मथुरायां च सकृद्याति नरो यदि ॥ सदोषो मुच्यते दोषैर्ब्रह्महत्यादिभिः कृतैः ॥
॥ ३२ ॥ अपि कीटः पतंगो वा पक्षी वा सूकरोऽपि वा ॥ खरोष्ट्रकुंजरा वाजिमृगसिंहसरीसृपाः ॥ ३३ ॥ ज्ञानतोऽज्ञानतो राजंस्तेषु स्था
नेषु ये मृताः ॥ सर्वे ते पुण्यकर्माणः स्वर्गं भुक्त्वा सुखं बहु ॥ ३४ ॥ चतुर्वर्णेषु सर्वे ते जायंते कर्मबंधनात् ॥ कर्मबंधं विहायाशु मुक्तिं यांति नराः
पुनः ॥ ३५ ॥ मोदंते तीर्थमरणात्स्वर्गभोगावसानतः ॥ संप्राप्य भारते खंडे कर्मभूमिं महोदयम् ॥ ३६ ॥ अनेकाश्चर्यसंयुक्तं बहुपर्वतमंडितम् ॥
गंगाद्याः सरितः सर्वाः समुद्रैः सह संगताः ॥ ३७ ॥ पदेपदे निधानानि संति तीर्थान्यनेकशः ॥ येषां स्मरणमात्रेण सर्वपापक्षयो भवेत् ॥ ३८ ॥

१ गजच्छायाम्-गजच्छायायाम्-इत्यर्थः। २ हृष्यन्ति–इ० पा०। ३ रम्ये–इ०पा०।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पातालमार्गा बहवः स्वर्गमार्गश्च दृश्यते ॥ गगने दृश्यते सूर्यो हृदये दृश्यते हरः ॥ ३९ ॥ ध्यानेन ज्ञानयोगेन तपसा वचसा गुरोः ॥ सत्येन[1] साहसेनैव दृश्यते भुवनत्रयम् ॥ ४० ॥ वेदस्मृतिपुराणैश्च ये न पश्यंति भूतलम् ॥ पातालं स्वर्गलोकं च वंचितास्ते नरा इह ॥ ४१ ॥ ये विरज्यंति न स्त्रीषु कामासक्ता विचेतसः ॥ देहोन्यथा वरस्त्रीणामन्यथा तैश्च चिंतितम् ॥ ४२ ॥ जन्मभूमिषु ते रक्ता जन्यंते जंतवः पुनः ॥ मुक्तिमार्गात्पुनर्भ्रष्टा जायंते पशुयोनिषु ॥ ४३ ॥ धनानि संप्राप्य वराटिकां ये द्विजातिमुख्याय विधाय पूजाम् ॥ यच्छंति नो निर्मलचेतना ये नराधमा दैवहता मृतास्ते ॥ ४४ ॥ देहं सुपुष्टं विजरं च यौवनं लब्ध्वा न गंगादिषु यांति ये नराः ॥ माता पिता नो न सुतो न बांधवो भार्या स्वसा नो दुहिता न विद्यते ॥ ४५ ॥ एकस्तु यो याति कथं न क्लिश्यते मूर्खो न जानाति भवं महेश्वरम् ॥ स्नात्वा न पश्यंति हरं महेश्वरं दैवेन ते वै मुषिता नराधमाः ॥ ४६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे द्वितीये वस्त्रापथक्षेत्रमाहात्म्ये यात्राविधिवर्णनंनाम द्वादशोऽध्यायः ॥ १२ ॥ ॥छ॥ ॥ सारस्वत उवाच ॥ ॥ छित्त्वा शुभाशुभं कर्म मुक्तिमिच्छेच्छिवां ततः ॥ इदं न शक्यते कर्त्तुं शुभं कार्यं तदा नरैः ॥ १ ॥ उत्थायोत्थाय स्नातव्यं पूज्यौ हरिहरौ स्वयम् ॥ सत्यं वाच्यं[2] हितं कार्यं दानं देयं स्वशक्तितः ॥ २ ॥ परापवादभीरुत्वं परदारान्विवर्जयेत् ॥ सुवर्णभूमिहरणब्रह्मदेवस्ववर्जनम् ॥ ३ ॥ ब्राह्मणस्त्रीनरेंद्राणां बालवृद्धतपस्विनाम् ॥ पितृमातृगुरूणां च नाप्रियं मनसा वदेत् ॥ ४ ॥ देशकालपरिज्ञानं पात्रापात्रविवेचनम् ॥ छाया नृणां न वक्तव्या तक्राग्नींधनकांजिकम् ॥५॥ औषधं शाकमर्थिभ्यो दातव्यं गृहमेधिभिः ॥ एकादशीपंचदशीचतुर्दश्यष्टमीषु च ॥ ६ ॥ अमावास्याव्यतीपातसंक्रांतिग्रहणेषु च ॥ वैधृते पितृमात्रोश्च क्षयाहदिवसेषु च ॥ ७ ॥ युगादिमन्वादिदिने गृहे कार्यो महोत्सवः ॥ तीर्थे वा गमनं कार्यं गृहाच्छतगुणं यतः ॥ ८ ॥ इंद्रियाणां जयः कार्यो मद्यं द्यूतं विवर्जयेत् ॥ विवादं गमनं युद्धं गृही यत्नेन वर्जयेत् ॥ ९ ॥ स्नानं दानं जपो होमो देवपूजा द्विजार्चनम् ॥ अक्षयं जायते सर्वं विधिवच्चेद्भवेत्कृतम् ॥ १० ॥ एकापि गौः प्रदातव्या वस्त्रालंकारभूषणा ॥ दोग्ध्री सवत्सा तरुणी द्विजमुख्याय कल्पिता ॥ ११ ॥ संप्राप्य भारतं खंडं मानुषं जन्म चोत्तमम् ॥ धन्यो ददाति यो धेनुं स नरः सूर्यमण्डलम् ॥ भित्त्वा याति विमानेन गम्यमानो गवादिभिः ॥१२॥ सप्त जन्मानि पापानि कृत्वा पापीह चाधमः ॥ एको ददाति यो धेनुं मुच्यते सर्वपातकैः ॥ १३ ॥ यदा स नीयते बद्धो यममार्गेण किंकरैः ॥ तदा नंदा समागत्य स्वं पुत्रमित्र पश्यति ॥ १४ ॥

---

१ सत्त्वेन-इ०पा० । २ वाच्यम्--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri




विजित्य हुंकृतेनैव तान्दूतान्दूरतः स्थितान् ॥ गोप्रदं तं समादाय प्रयाति शिवमन्दिरम् ॥१५॥ वृषो धर्म इति प्रोक्तो येन मुक्तः स मुच्यते ॥ गोषु मध्ये पितॄन्सर्वान्हरमुद्दिश्य वा हरिम् ॥१६॥ सूर्यब्रह्मपुरे वासो जायते ब्रह्मवासरे ॥ दृढं ककुद्मिनं संतं युवानं भारसाधनम् ॥१७॥ हलक्षमं बलीवर्दं दत्त्वा विप्राय पर्वसु ॥ तमारुह्य नरो याति गोलोकं शिवसंनिधौ ॥ १८ ॥ अश्वं सास्तरणं दत्त्वा खलीनेन च संयुतम् ॥ अश्वराजबलात्स्वर्गे मोदते ब्राह्मवासरम् ॥ १९ ॥ गजदानाद्गजेंद्रेण नीयते नंदनं वनम् ॥ पृथिव्यां सागरांतायामेष राजा भविष्यति ॥२०॥ गृहं सोपस्करं दत्त्वा विप्राय गृहमेधिने ॥ लभते नंदने दिव्यं विमानं सार्वकामिकम् ॥ २१ ॥ द्रव्यं पृथिव्यां परमं सुवर्णं हृष्यंति देवा यदि दीयते ततः ॥ सूर्योऽपि तस्मै रुचिरं विमानं ददाति तावद्भ्रमतेऽत्र यावत् ॥२२॥ रौप्यं पितॄणामतिवल्लभं तद्दत्त्वा नरो निर्मलतामुपैति ॥ सोमस्य लोकं लभते स तावद्ध्रुवे निबद्धा ऋषयो हि यावत् ॥ २३ ॥ श्रीखंडकर्पूरसमाकुलानि तांबूलरत्नादिफलानि दत्त्वा ॥ पुष्पाणि वस्त्राणि सुखेन याति साकं शशांकं दिवि देववृंदैः ॥ ॥ २४ ॥ तक्रोदकतैलघृतदुग्धेक्षुरसमधूनि यो दद्यात् ॥ खर्जूरखंडद्राक्षावातामांजीरकैः साकम् ॥ २५ ॥ दर्भाक्षतमृद्गोमयदूर्वायज्ञोपवीतानि ॥ तिलचर्मसूर्यपिटकं दत्त्वा ख्यातश्चिरं स्वर्गे ॥ २६ ॥ आत्माहाराच्चतुर्भागं सिद्धान्नाद्यदि दीयते ॥ हन्तकारः स तं दत्त्वा ध्रुवं याति ध्रुवालये ॥ ॥ २७ ॥ आत्माहारप्रमाणेन प्रत्यहं गोषु दीयते ॥ गवाह्निकं तासु दत्त्वा नरो याति सुरालयम् ॥ २८ ॥ कंडनीपेषणीचुल्लीमार्जनीभिश्च यत्कृतम् ॥ पापं गृही क्षालयति ददद्भिक्षां दिनं प्रति ॥ २९ ॥ ग्रासमात्रा भवेद्भिक्षा सा नित्यं यत्र दीयते ॥ तद्गृहं गृहमन्यच्च स्मशानमिव दृश्यते ॥ ३० ॥ कुम्भान्सोदकसिद्धान्नांश्छत्रोपानत्कमंडलुम् ॥ अंगुलीयकवासांसि दत्त्वा याति नरो दिवि ॥ ३१ ॥ श्रांतस्य यानं तृषितस्य पानमन्नं क्षुधार्त्तस्य नरो नरेन्द्र ॥ दत्त्वा विमानेन सुरांगनाभिः संस्तूयमानस्त्रिदिवं स याति ॥ ३२ ॥ भोजनं सततं देयं यथाशक्त्या घृतप्लुतम् ॥ तन्मया हि यतः प्राणा अतः पुष्यंति प्राणिनः ॥ ३३ ॥ क्षुत्पीडा महती लोके ह्यन्नं तद्भेषजं स्मृतम् ॥ तेन सा शांतिमायाति ततोऽन्नं देयमुत्तमम् ॥ ३४ ॥ अन्नं वस्त्रं फलं तोयं तक्रं शाकं घृतं मधु ॥ पत्रं पुष्पं तथोपानत्कंथां यष्टिं कमंडलुम् ॥ ३५ ॥ छत्रपात्रे व्रतं विद्या अक्षमाला सुरार्चनम् ॥ कन्या कुशोपवीतानि बीजौषधगृहाणि च ॥ ३६ ॥ सस्यं क्षेत्रं यज्ञपात्रं योगपट्टं च पादुके ॥ कृष्णाजिनं बुद्धिदानं धर्मादेशकथानकम् ॥ ३७ ॥ अथैतत्संततं देयं तेन श्रेयो महद्भवेत् ॥ सर्वपापक्षयं कृत्वा दाता याति शिवालयम् ॥ ३८ ॥ श्राद्धे गृहस्था भोक्तव्याः कुलीना वेदपारगाः ॥ अक्रोधनाः स्नानशीलाः स्वदेशाचारतत्पराः ॥ ३९ ॥ आमंत्र्य पूर्वदिवसे निरीहा अपि ये द्विजाः ॥ अलो



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लुपा व्याधिहीना न तु ये ग्रामयाजिनः ॥ ४० ॥ तेषां पुरः प्रदातव्यं पिंडदानं विधानतः ॥ श्राद्धं श्रद्धाविहीनेन कृतमप्यकृतं भवेत् ॥ ४१ ॥ तस्माच्छ्रद्धान्वितैः श्राद्धं कर्त्तव्यं क्रोधवर्जितैः ॥ वानप्रस्थो ब्रह्मचारी पथिकस्तीर्थसेवकः ॥ ४२ ॥ अतिथिर्वैश्वदेवांते स पूज्यः श्राद्धकर्मणि ॥ सर्वदा यतयः पूज्याः स्वशक्त्या गृहमेधिभिः ॥ ४३ ॥ यात्रांविधिमथो वक्ष्ये सेतिहासं नृपोत्तम ॥ ४४ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे द्वितीये वस्त्रापथक्षेत्रमाहात्म्ये तीर्थयात्राविधिवर्णने श्राद्धदानादिमाहात्म्यवर्णनंनाम त्रयोदशोऽध्यायः ॥ ॥ १३ ॥ ॥ छ ॥ ॥ सारस्वत उवाच ॥ ॥ वस्त्रापथे महाक्षेत्रे नगरे वामने पुरा ॥ पुत्रशोकाभिसंतप्तो वसिष्ठो भगवानृषिः ॥ १ ॥ आजगाम तपस्तप्तुं स्वर्णरेखानदीतटे ॥ ईशानकोणे नगरात्स्वर्णरेखानदीजले ॥ २ ॥ स्नात्वा ध्यात्वा शिवं देवं मनसाऽचिन्तयद्यदा ॥ तदा रुद्रः समायातस्त्रिनेत्रो वृषभध्वजः ॥ महर्षे तव तुष्टोऽहं किं करोमि वदस्व तत् ॥ ३ ॥ ॥ वसिष्ठ उवाच ॥ ॥ यदि तुष्टो महादेव वरो देयो ममाधुना ॥ तदाऽत्र भवता स्थेयं यावदाचंद्रतारकम् ॥ ४ ॥ अत्र स्नानं करिष्यंति ये नराः पापकर्मिणः ॥ तेषां पापक्षयो देव कर्तव्यो भवता सदा ॥ ५ ॥ नरा ये पापकर्माणः पूजयंति त्रिलोचनम् ॥ तान्नरान्नय देवेश विमानैः शिवमंदिरम् ॥ ६ ॥ ॥ सारस्वत उवाच ॥ ॥ तथेत्युक्त्वा हरो देवस्तत्रैवांतरधीयत ॥ हिरण्यकशिपुं हत्वा नरसिंहो महाबलः ॥ त्रैलोक्यमिंद्राय ददौ कालरुद्रं स्वयं ययौ ॥ ७ ॥ तदन्वये बलिर्जातः स चातीव बलाधिकः ॥ एकातपत्रां पृथिवीं बलिश्चक्रे बलाधिकः ॥ अकृष्टपच्या सुजला धरित्री सस्यशालिनी ॥ ८ ॥ गन्धवंति च पुष्पाणि रसवंति फलानि च ॥ आस्कन्धफलिनो वृक्षाः पुटके पुटके मधु ॥ ९ ॥ चतुर्वेदा द्विजाः सर्वे क्षत्रिया युद्धकोविदाः ॥ गोषु सेवापरा वैश्याः शूद्राः शुश्रूषणे रताः ॥ ॥ १० ॥ सदाचारा जनपदा ईतिव्याधिविवर्जिताः ॥ हृष्टपुष्टजनाः सर्वे सदानंदाः सदोद्यताः ॥ ११ ॥ कुंकुमागुरुलिप्तांगाः सुवेषाः साधुमंडिताः ॥ दारिद्र्यदुःखमरणैर्विमुक्ताश्चिरजीविनः ॥ १२ ॥ दीपोद्द्योतितभूभागा रात्रावपि यथा दिने ॥ विचरंति तथा मर्त्या देवा देवालये यथा ॥ ॥ १३ ॥ पृथिव्यां स्वर्गरूपायां राज्यं चक्रेऽसुरो बलिः ॥ नित्यं विवाहवादित्रैर्नादितं भूपमंदिरम् ॥ १४ ॥ धरित्रीं बुभुजे दैत्यो देवराजो यथा दिवि ॥ देवेन्द्रो बलिना नित्यं यज्ञैः संतोषितस्तदा ॥ १५ ॥ देवानां दानवानां च नास्ति युद्धं परस्परम् ॥ एक एव महीपालो युद्धं नास्ति

१ अत्र--तदेतदुक्तं श्रुत्वा नृपः पप्रच्छ तं पुनः--इति पुस्तकान्तरे पाठो दृश्यते, परं तस्य पूर्वापरवाक्यपर्यालोचनयाऽसांगत्यमिवाभाति। २ आधिव्याधिविवर्जिताः--इ० पा०। ३ हृष्टतुष्टाः--इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



धरातले ॥ १६ ॥ सपत्नककलिर्नाम नास्ति युद्धं हरेर्[1]गजैः ॥ न सर्प्पनकुलैर्नित्यं न बिडालैश्च मूषकैः ॥ १७ ॥ मैत्रीभावं गतं सर्वं जगत्स्थावर
जंगमम् ॥ त्रैलोक्यभ्रमणं कृत्वा नारदो नंदने वने ॥ १८ ॥ गतो न पश्यते युद्धं त्रैलोक्ये सचराचरे ॥ तावत्तस्योदरे पीडा महती
समजायत ॥ १९ ॥ न मे स्नानादिना कार्यं तर्प्पणैः किं प्रयोजनम् ॥ जपहोमादिना सर्वमन्यथा मम चेष्टितम् ॥ २० ॥ तत्स्नानं यत्र युध्यन्ते
गजा दंतविघट्टनैः ॥ सा संध्या यत्र निहतैः कबन्धैर्भूर्विभूषिता ॥ २१ ॥ कुंतघातविनिर्भिन्नगजकुम्भोद्भवासृजा ॥ तृप्यंति यत्र क्रव्यादास्तर्पणं
तन्मम प्रियम् ॥ २२ ॥ गजशीर्षैरगम्यास्ते निहताः क्षत्रिया रणे ॥ स होमो यत्र हूयंते गजाश्च नरपुंगवाः ॥ २३ ॥ शब्दाग्नौ नारदस्यायं होमस्त्रै
लोक्यविश्रुतः ॥ छिन्नपादशिरोहस्तैरंतरांत्रविलंबितैः ॥ २४ ॥ यदर्च्यते भूमितलं तन्मे नित्यं सुरार्चनम् ॥ किं देवैर्दिवि मे कार्यं किं मनुष्यैर्धरा
तले ॥ २५ ॥ पन्नगैः किं तु पाताले न युध्यन्ते परस्परम् ॥ तथा करिष्ये देवेन्द्रादुपेन्द्राच्च धरातले ॥ २६ ॥ रसातलं बलिर्यातु सत्यमस्तु वचो
मम ॥ जीवितेनापि राज्येन यदा दामोदरं हरिम् ॥ २७ ॥ तोषयिष्यति यत्नेन तदेन्द्रोऽसौ भविष्यति ॥ देवेन्द्रो वृत्रहा भूत्वा भ्रष्टराज्यो भवि
ष्यति ॥ २८ ॥ यदा वस्त्रापथे गत्वा भवं भावेन पूजयेत् ॥ सुराधिपस्तदा भूयो ब्रह्महत्याविवर्जितः ॥ २९ ॥ अनेन [2]मन्त्रजाप्येन स शांतोदरवे
दनः ॥ नारदो देवराजस्य समीपं सहसा ययौ ॥ ३० ॥ सिंहासनं समारुह्य नन्दने संस्थितो [3]हरिः ॥ आस्ते परिवृतो देवैर्देवराजो महाबलः ॥
॥ ३१ ॥ निरीक्षमाणो नृत्यन्तीं रंभां तां सुरसुन्दरीम् ॥ आयांतं ददृशे देवो नारदं विस्मयान्वितः ॥ ३२ ॥ अहो विरुद्धो भगवान्नारदो मयि
दृश्यते ॥ नृत्यते किं न वा नृत्ये गीयते किं न गीयते ॥ ३३ ॥ वाद्यते तालमानैः किं यावच्चिंतापरो हरिः ॥ ऋषिः समागतस्तावज्जलाभ्युक्षणत
त्परः ॥ ३४ ॥ सिंहासनं परित्यज्य समुत्थायाग्रतः स्थितः ॥ स्वागतेनाभिवाद्याथ बभाषे नारदं हरिः ॥ ३५ ॥ महर्षे स्वागतं तेऽद्य कुतो वाऽऽग
म्यते त्वया ॥ स्नाने संध्यार्चने होमे कुशलं तव विद्यते ॥ ३६ ॥ इति प्रोक्तो विहस्याथ बभाषे नारदो हरिम् ॥ यद्येतज्जायते मह्यं किमन्येन प्रयो
जनम् ॥ ३७ ॥ प्रेक्षणीकस्य ते स्थानं नाहं पश्यामि स्वर्पते ॥ यावद्राज्यं बलेस्तावत्त्वया मे न[4] प्रयोजनम् ॥ ३८ ॥ आदित्याद्या ग्रहाः सर्वे काल
मानेन योजिताः ॥ आहुत्या प्लाविता मेघा वर्षंति हृषिता भुवि ॥ ३९ ॥ रोगादिमरणं नास्ति यमो धर्मेण पीडितः ॥ ४० ॥ एकातपत्रां पृथिवीं बुभुजे
स नराधिपः ॥ त्रैलोक्यनाथेति महानृपेति संग्रामविद्याकुशलेति नित्यम् ॥ त्रैलोक्यलक्ष्मीकुचकामुकेति संस्तूयते चारणबंदिवृन्दैः ॥ ४१ ॥ ब्रह्मेति

१ हरेः—सिंहस्य । २ अनेन मंत्रजाप्येन—एतेन—युद्धोद्भवविचिंतनरूपमंत्रस्य चित्ते पुनःपुनश्चिन्तनरूपेण जाप्येन—इत्यर्थः । ३ हारिः--इंद्रः । ४ त्वया नास्ति—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृष्णेति हरेति धूमाविंद्रेति सूर्येति धनाधिपेति ॥ देवारिनाथेति सुराधिपेति जेगीयते चारणबंदिवृन्दैः ॥ ४२ ॥ युद्धं विना दैत्यगणा हसंति मत्ताः प्रमत्ताः करिणो नदंति ॥ रथाधिरूढाः पुरुषा भ्रमंति सेनाधिपा स्त्रीषु गृहे रमंति॥४३॥ यज्ञाग्निधूमेन नभो विराजते सुवर्णरूपा पृथिवी विराजते ॥ शून्यं तु वेदैर्भुवनं च शोभते धिष्ण्यं बलेर्दैत्यगणैश्च शोभते ॥ ४४ ॥ बलिर्न जानाति सुराधिपं त्वां सुराश्च सर्वे बलियज्ञभोजिनः ॥ त्वमेव तेऽरिं हृदि चिंतय स्वयं युक्तं तवेदं कथितं मयेति ॥ ४५ ॥ रंभा न राजते रंगे मेनका त्वां न मन्यते ॥ तिलोत्तमापि मनुते बलिराजं सुरेश्वरम् ॥ ४६ ॥ उर्वशी चैव तं याति सुकेशा सह भाषते ॥ मञ्जुघोषा मुखं वक्रं कृत्वा त्वां न निरीक्षते ॥ ४७ ॥ पुलोमा पुलकोद्भेदं न करोति बलिं विना ॥ पौलोमीपुरतो गत्वा बलिं स्तौति च मंथरा ॥ ४८ ॥ नारदः पर्वतश्चैव हाहा हूहूश्च तुंबुरुः ॥ बलिराज्यं प्रशंसंति रुद्रस्याग्रे मया श्रुतम् ॥ ॥ ४९ ॥ आज्याहुतीभिः सन्तुष्टा ऋषयो ब्रह्मसद्मनि ॥ ब्रह्मणोऽग्रे प्रशंसंति तदेवं कथितं मया ॥ ५० ॥ बृहस्पतिर्यदाचष्टे न तद्वाच्यं मया तव ॥ इंद्राणी बलिनं मत्वा बलिं चित्रेषु पश्यति ॥ ५१ ॥ अनेन वाक्येन सुराधिपस्तु चचाल कोपावरितस्तदानीम् ॥ गजेति वज्रेति जगाद सूतं समानयासिं कवचं रथं च ॥ ५२ ॥ रथेन सूर्यो मरुतो गजेन वृषेण रुद्रो महिषेण सौरिः ॥ वाद्यंतु[1] वाद्यानि रणाय मेऽद्य चण्डी गणेशास्त्वरिताः प्रयांतु ॥ ५३ ॥ दृष्ट्वा सुरेन्द्रं संक्रुद्धं बृहस्पतिरुदारधीः ॥ ऋषिमध्ये गतो विद्वान्बभाषे समयोचितम् ॥ ५४ ॥ सामाद्या नीतयः प्रोक्ताश्चतस्रो मनुना पुरा ॥ सामसाध्येषु कार्येषु दण्डस्तेन न पात्यताम् ॥ ५५ ॥ अतो ह्युपेन्द्रमाहूय मंत्रयन्तु सुरोत्तमाः ॥ तदधीनं जगत्सर्वं त्रैलोक्यं सचराचरम् ॥ ५६ ॥ विनष्टेषु च कार्येषु तस्य वाच्यं शुभाशुभम् ॥ स एव प्रथमं गच्छेत्पृथिव्यां स्वार्थसिद्धये ॥ ५७ ॥ तथेति देवैर्विज्ञतस्तथा चक्रे सुरेश्वरः ॥ मन्दरेऽथ गिरौ विष्णुः सत्यलोकात्समागतः ॥ ५८ ॥ ऋषयस्तत्र ते यांतु समानेतुं जनार्दनम् ॥ इत्युक्तो नारदः स्वर्गात्स्नातुं प्रातः स मन्दरे ॥ ५९ ॥ गौतमोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ कश्यपः ॥ जमदग्निर्वसिष्ठश्च संप्राप्ता हरिमन्दिरे ॥ ६० ॥ गिरौ गंगाजले स्नानं संध्यां चक्रे स नारदः ॥ यावदास्ते तदा दृष्टा वालखिल्या महर्षयः ॥ ६१ ॥ विनयेनाभिवाद्याथ कथयामास नारदः ॥ ऋषयो मन्दरे प्राप्ता विष्णुं नेतुं सुरालये ॥ ६२ ॥ ऋषयो दर्शनं कर्त्तुं भवतामपि युज्यते ॥ तदेतद्वचनं श्रुत्वा हर्षितास्ते महर्षयः ॥ ६३ ॥ अंगुष्ठपर्वमात्रां स्तान्वामनान्हरिमन्दिरे ॥ गतान्गंगाजले स्नातुं वालखिल्यान्पुरो हरिः[2] ॥ ६४ ॥ जहास वामनान्सर्वान्भाविकार्यबलात्ततः ॥ ब्रह्मपुत्रा वालखि

१ वाद्यंतु—वादयन्तु—इत्यर्थः । २ हरिः—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ल्याः सर्वे ते शंसितव्रताः ॥ ६५ ॥ लज्जान्विताः क्रोधपरा उच्चैरूचुः परस्परम् ॥ केनापि देवकार्येण वामनोऽयं भविष्यति ॥ ६६ ॥ ऋषिभिर्वि
ष्णुना सर्वे प्रतिबोध्य प्रसादिताः ॥ भाग्यमोक्षः कदा विष्णोर्भविष्यति तदुच्यताम् ॥६७॥ प्रभासादधिकं क्षेत्रं यदा वस्त्रापथं भवेत् ॥ भविष्यति
तदा वृद्धिर्ध्रुवमण्डलव्यापिनी ॥ तथा वस्त्रापथं क्षेत्रं भविष्यति यवाधिकम् ॥ ६८ ॥ दृष्ट्वा सोमेश्वरं देवं दोषमुक्तो भविष्यति ॥ असाध्यसा
धनी शक्तिर्भविष्यति स्थिरा तव ॥ ६९ ॥ वस्त्रापथे सोमनाथं यः पश्यति स पश्यति ॥ इन्द्रोपेन्द्रौ समालिंग्याथासीनौ तौ वरासने ॥ ७० ॥
॥ ॥ विष्णुरुवाच ॥ ॥ किं ते कार्यं देवराज तदवश्यं करोम्यहम् ॥ ७१ ॥ ॥ इन्द्र उवाच ॥ ॥ हिरण्यकशिपोर्वंशे बलिर्दैत्यो महा
बलः ॥ तेनेदं सकलं व्याप्तं देवा यज्ञभुजः कृताः ॥ ७२ ॥ देवलोके भूमिलोको गतः सर्वोऽपि केशव ॥ यावन्नो विकृतिं याति पूर्ववैमरनुस्मरन् ॥
भ्रष्टराज्यो बलिस्तावत्पातालमधितिष्ठतु ॥ ७३ ॥ सूर्यसोमान्वये कश्चिद्राजा भवतु भूतले ॥ ७४ ॥ ॥ सारस्वत उवाच ॥ ॥ इत्येतद्वचनं
श्रुत्वा स्वयं संचिन्त्य चेतसा ॥ तथा करिष्ये तं प्रोच्य मुनीन्प्राह जनार्दनः ॥ ७५ ॥ ऋषयस्तत्र गच्छंतु कारयन्तु महामखम् ॥ अहं तत्रा
गमिष्यामि साधयिष्यामि तं बलिम् ॥ ७६ ॥ इत्युक्ता मुनयः सर्वे गतास्ते यज्ञमण्डपे ॥ द्वादशाहो महायज्ञः प्रारब्धः सर्वदक्षिणः ॥ ७७ ॥
सुराष्ट्रदेशं विख्यातं क्षेत्रं वस्त्रापथं नृप ॥ तस्य दक्षिणदिग्भागे बलेः सिद्धं महापुरम् ॥ ७८ ॥ क्षेत्राद्बहिः समारब्धो यज्ञः सर्वस्वदक्षिणः ॥ शुक्रेणा
मन्त्रिताः सर्वे मुनयो यज्ञकर्मणि ॥ अतिहृष्टो बलिर्यज्ञे ददौ दानान्यनेकधा ॥ ७९ ॥ स्वर्णपात्रेषु सर्वेषु दीयते भोजनं बहु ॥ अतिथिर्ब्राह्मणो
विद्वान्सर्वस्वेनापि पूज्यते ॥ दानाद्यज्ञो भवेत्पूर्णो दानहीनो वृथा भवेत् ॥ ८० ॥ एतस्मिन्नेव काले तु विष्णुर्वामनतां गतः ॥ मध्यदेशे
चतुर्वेदो ब्राह्मणस्तीर्थयात्रिकः ॥ महोदरो ह्रस्वभुजः खञ्जपादो महाशिराः ॥ ८१ ॥ महाहनुः स्थूलजंघः स्थूलग्रीवोऽतिलंपटः ॥ श्वेतवस्त्रो बद्ध
शिखश्छत्रोपानत्कमण्डलूंन्[1] ॥ ८२ ॥ द्रष्टुं तीर्थान्यनेकानि बभ्राम स महीतले ॥ सुराष्ट्रदेशे संप्राप्तः क्षेत्रे वस्त्रापथे द्विजः ॥ ८३ ॥ स्वर्णरेखा
नदीतीरे चिंतयामास वामनः ॥ प्रथमं किं भवं दृष्ट्वा यामि सोमेश्वरं शिवम् ॥ ८४ ॥ अथ सोमेश्वरं पूज्य पश्चाद्यास्यामि मन्दरम् ॥ इति चिन्ता
परो भूत्वा कृत्यं सञ्चिन्त्य चेतसा ॥ अत्र स्थितः सोमनाथं पूजयिष्यामि निश्चितम् ॥ ८५ ॥ वस्त्रापथे महाक्षेत्रे भवं सोमेश्वरं यथा ॥ पूजयंति
जना नित्यं तथा कार्यं मया ध्रुवम् ॥ ८६ ॥ देशानामुत्तमो देशो गिरीणामुत्तमो गिरिः ॥ क्षेत्राणामुत्तमं क्षेत्रं नदीनामुत्तमा सरित् ॥ ८७ ॥ ॥२१७॥

१ बिभ्रत्–इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिव्यं वनं वनानां तु देवानामुत्तमो भवः ॥ यदा सोमेश्वरो देवो भूमिं भित्त्वा भविष्यति ॥ ८८ ॥ तदाम्रमण्डले दिव्यं क्षेत्रमेतद्यवाधिकम् ॥ चैत्र
शुक्लचतुर्दश्यामग्निसाधनतत्परः ॥ ८९ ॥ ऊर्ध्वबाहुः सूर्यकाले भवं तावत्स पश्यति ॥ मध्यंदिनं परं याते दिननाथे विलंबिते ॥ ९० ॥ अग्नि
तापांगसंतप्तस्तावत्पश्यति शंकरम् ॥ सोमनाथं शिवं शांतं सर्वदेवनमस्कृतम् ॥ अर्घ्येण पुष्पमिश्रेण जलमिश्रेण भामिनि ॥ ९१ ॥
॥ ॥ सारस्वत उवाच ॥ ॥ भूमिं भित्त्वाथ देवेशः स्वयं सोमेश्वरः स्थितः ॥ लिंगरूपो महादेवो यावदाब्रह्मवासरम् ॥ ९२ ॥ ॥ सोमेश्वर
उवाच ॥ ॥ सिद्धस्त्वं मत्प्रसादेन कार्यं सिद्धं भविष्यति ॥ इत्युक्तो वामनो देवं प्रत्युवाच महेश्वरम् ॥ ९३ ॥ ॥ वामन उवाच ॥ ॥
यदि तुष्टो महादेव यदि देयो वरो मम ॥ तदाऽत्र लिंगे स्थातव्यमस्तु दिव्यं पुरो मम ॥ ९४ ॥ यस्तु स्वायंभुवं लिंगं वामने नगरे
मम ॥ पूजयिष्यति ब्रह्मघ्नो गोघ्नो वा बालघातकः ॥ ९५ ॥ गुरुद्रोही स्वर्णचोरो मुच्यते सर्वपातकैः ॥ निर्दोषः पूजयेद्यस्तु
सकृत्सोमेश्वरं हरम् ॥ ९६ ॥ मृतो विमानमारुह्य दिव्यस्त्रीपरिवेष्टितः ॥ संस्तूयमानो दिक्पालैर्यातु स्वर्गे शिवालये ॥ ९७ ॥ ब्रह्मलोक
मतिक्रम्य रुद्रलोके स [1]गच्छतु ॥ तथेत्युक्त्वा सोमनाथस्तत्रैवान्तरधीयत ॥ ९८ ॥ प्रकाश्य वामनो लिंगं सोमनाथं स्वयंभुवम् ॥
प्राप्तज्ञानो [2]लब्धवृद्धिर्ययौ द्रष्टुं भवं हरम् ॥ ९९ ॥ गंगाद्याः सरितः सर्वाः स्वर्णरेखाजले स्थिताः ॥ एतां सोमेश्वरोत्पत्तिं ये शृण्वंति
नराः स्त्रियः ॥ सर्वपापक्षयस्तेषां जायते नात्र संशयः ॥१००॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे द्वितीये
वस्त्रापथक्षेत्रमाहात्म्ये सोमेश्वरोत्पत्तिवर्णनंनाम चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ छ ॥ ॥ सारस्वत उवाच ॥ ॥ अथासौ वामनो विप्रो
लब्धज्ञानो भवार्चने ॥ जगाम तद्वनं रम्यं गिरे रैवतकस्य यत् ॥ १ ॥ यत्र वृक्षा बहुविधा दीर्घशाखाः फलान्विताः ॥ व[illegible]दुम्बरबिल्वाश्च
सर्जार्जुनकदंबकाः ॥ २ ॥ पलाशाश्वत्थनिंबाश्च धवाटीवारुणीद्रुमाः ॥ शमीकंकोललिंबांश्च बीजपूरी च दाडिमः ॥३॥ बदरी निंबकः पूगः कदली
शल्लकी शिवा ॥ तालहिंतालशिरसा बीजकावंशखादिराः ॥४॥ अजगासनगागुच्छा इगुदीकोरवेंगुदाः ॥ [3]ब्रह्मवृक्षाः कुरुबकाः करंजाः पुत्रजीविनः॥
॥ ५ ॥ अंकोल्लाः पारिभद्राश्च कलंबाः पनसास्तथा ॥ उज्वलाश्च हरिद्राश्च गंगडीवायवा द्रुमाः ॥ ६ ॥ तेमुण्डकाः शिरीषाश्च खर्जूरीकरवंदिकाः॥
सेवाली शाल्मली शाला मधूकाश्च विभीतकाः ॥७॥ हरीतक्यः कटाहाश्च कर्यष्टा आटरूषकाः ॥ विकच्छत्रः कपित्थाश्च रोहिणीवेत्रकद्रुमाः ॥८॥

१ तिष्ठतु—इ० पा० । २ लब्धबुद्धिः—इ० पा० । ३ धर्मवृक्षाः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



मदनफलानिर्गुण्डीपाटलानंदिपादपाः ॥ लवंगैलालवल्यश्च सन्ताना अगरुद्रुमाः ॥ ९ ॥ श्रीखण्डकर्पूरनगाः कल्पवृक्षा नगोत्तमाः ॥ वामनेन तदा दृष्टाश्छायावृक्षाः सुरार्चिताः ॥ १० ॥ उदयास्तमने येषां छाया न प्रतिहन्यते ॥ तेषां दर्शनमात्रेण सर्वपापक्षयो भवेत् ॥ ११ ॥ ये जनाः पुण्यकर्माणस्तेषां ते दृष्टिगोचराः ॥ एतान्पश्यन्ययौ वृक्षांस्ततो रैवतकं गिरिम् ॥ १२ ॥ यावन्निरीक्षते तुंगं शिखरं तस्य मूर्द्धनि ॥ आश्चर्यं ददृशे विप्रो महल्लोकभयंकरम् ॥ १३ ॥ धूमज्वलनमध्यस्थान्पुरुषान्पंच पश्यति ॥ कृष्णांगान्खेचरान्रौद्रान्कृष्णागुरुविभूषितान् ॥ १४ ॥ सारमेयसमारूढान्करिहस्तान्समेखलान् ॥ खड्गखेटकहस्तांश्च डमरूड्डामरस्वनान् ॥१५॥ सघर्घरीकचरणन्यासनादितपर्वतान् ॥ फेत्कारभासुराकारान्काशकुञ्चितमूर्द्धजान् ॥ १६ ॥ नरमांसवसासारकवलव्यग्रतालुकान् ॥ जनगंधसमाघ्रानभवतीव्रविलोचनान् ॥ १७ ॥ पञ्चाग्निसाधनाव्यात्तदिव्यचक्षुःप्रभावतः ॥ देवान्पश्यति विप्रेन्द्रो ज्ञातकार्यपरंपरः ॥ १८ ॥ एते क्षेत्राधिपाः पञ्च महादेवेन निर्मिताः ॥ महाबला रैवतके निवसंति गिरौ सदा ॥ ॥ १९ ॥ स्वेच्छाचारान्नरान्मर्त्त्यान्[१]वारयंति नगे तथा ॥ हरिं हरं नदीं देवीं न पश्यंति गिरिं यथा ॥ २० ॥ दृष्ट्वा ज्ञात्वा स्तुतिं चक्रे ध्यात्वा देवं महेश्वरम् ॥ जयंति दुष्टदैत्येंद्रयुद्धध्यानांकितं वपुः ॥ बिभ्रति भ्रातरो ये ते पंचेंद्रसमविक्रमाः ॥ २१ ॥ रुद्रवक्त्रोद्भवा दक्षा दक्षाध्वरविनाशकाः ॥ स्वावलीढाहुतीनष्टभीतवाडवनंदिताः ॥२२ ॥ कुङ्कुमागरुकर्पूरलिप्तांगाः सुविभूषिताः ॥ मदिरामोदमत्तांगनृत्यगीतकराः सुराः ॥२३॥ ब्रह्मांडभ्रमणश्रांतस्वगंधत्रस्तसंचराः ॥ मनोजवाः कामगमाः क्षेत्रपाला जयंति ते ॥ २४ ॥ इत्यादिवचनात्तुष्टा द्विजस्याग्रे स्वयं स्थिताः ॥ एकपादोऽस्म्यहं चैको द्वितीयो गिरिदारुणः ॥ २५ ॥ तृतीयो मेघनादस्तु सिंहनादश्चतुर्थकः ॥ पंचमः कालमेघोऽहं कुर्मः किं ते वदस्व तत् ॥ २६ ॥ ॥ ॥ ॥ द्विज उवाच ॥ ॥ यदि तुष्टा भवंतो मे यदि देयो वरो ध्रुवम् ॥ अहो आप्रलयं यावत्स्थातव्यं मत्प्रतिष्ठितैः ॥ २७ ॥ एकपादो गिरितटे प्रहर्षात्प्रथमं स्थितः ॥ वसतौ वसता तेन गिरौ च गिरिदारुणः ॥ २८ ॥ प्रतिष्ठितः प्रसाद्याथ वरदोऽसौ स्वयं स्थितः ॥ उज्जयंतगिरेर्मूर्ध्नि मेघनादः स्वयं ययौ ॥ २९ ॥ भवानीशंकरं रम्यं सिंहनादस्तथाविशत् ॥ स्वयं वस्त्रापथेनैव भवस्याग्रे निरूपितः ॥ ३० ॥ स्वर्णरेखानदीतीरे कालमेघो महाबलः ॥ सर्वलोकोपकारार्थं तीर्थं संस्थापितं पुरा ॥ ३१ ॥ वामनेन स्वयं गत्वा क्षेत्रपालास्तु पूजिताः ॥ पुरा युगादौ राजेंद्र सर्वे देवाः समागताः ॥ ३२ ॥ सुराष्ट्रदेशे संप्राप्ताः पुण्ये रैवतके गिरौ ॥ रक्षार्थं सर्वलोकानां वधार्थं देववैरिणाम् ॥ ३३ ॥ विष्णोः कण्ठे तदा मुक्ता



१ नरा यथा–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जयमाला सुरोत्तमैः ॥ दामोदरेति विख्यातं दत्तं नामोत्तमं हरेः ॥ ३४ ॥ तत्रादौ कार्तिके शुक्के वासरे विष्णुवल्लभे ॥ उपोष्य सहितै देवैस्तत्तीर्थं विष्णुना कृतम् ॥ ३५ ॥ सर्वतीर्थमयी पुण्या स्वर्णरेखानदी स्थिता ॥ भुक्तिमुक्तिप्रदं पुण्यं विष्णुलोकप्रदायकम् ॥ ३६ ॥ क्षालनं सर्वपापानां रोगदारिद्र्यनाशनम् ॥ दामोदरं रैवतके परमानंददायकम् ॥ ३७ ॥ ये पश्यंति विमानैस्ते नीयंते विष्णुमंदिरे ॥ न गृहे कार्तिकः कार्यो विशेषाद्भीष्मपंचकम् ॥ ३८ ॥ पंचकाद्द्वादशी श्रेष्ठा कार्या दामोदरे जले ॥ प्रातःस्नानं प्रकर्त्तव्यं संप्राप्ते कार्तिके जनैः ॥ ३९ ॥ मासोपवासः कर्त्तव्यो यतिभिर्ब्रह्मचारिभिः ॥ सतीभिर्विधवाभिश्च मुक्तिस्थानमभीप्सुभिः ॥ ४० ॥ एकभक्तेन नक्तेन तथैवायाचितेन च ॥ उपवासेन कृच्छ्रेण शाकाहारेण वा पुनः ॥ ४१ ॥ संसेव्यः कार्त्तिके विष्णुर्दीपदानपरैर्नरैः ॥ ब्रह्मचर्यपरैर्मासो नीयते यदि मानवैः ॥ ४२ ॥ तदा विष्णुपुरे वासः क्रियते विष्णुना सह ॥ पञ्चोपवासाः कर्त्तव्याः संप्राप्ते भीष्मपंचके ॥ ४३ ॥ एकादशीं समारभ्य पंचमी पूर्णिमादिनम् ॥ तदेतत्पंचकं प्रोक्तं सर्व पापहरं नृणाम् ॥ ४४ ॥ सर्वेषामपि मासानां पञ्चकात्कार्तिकादपि ॥ एकादशी कार्तिकस्य पुण्या दामोदरे कृता ॥ ४५ ॥ मिष्टान्नं कार्तिके देयं हविष्यं सघृतप्लुतम् ॥ सुवर्णं रजतं वस्त्रं तोयमन्नं फलानि च ॥ ४६ ॥ मासांते विविधं देयं गौस्तिलाः कुसुमानि च ॥ सर्वदानेषु यत्पुण्यं सर्व तीर्थेषु यत्फलम् ॥ ४७ ॥ अश्वमेधादिभिर्यज्ञैर्गयायां पिंडदस्य यत् ॥ तत्फलं जायते नृणां दृष्टे दामोदरे नृप ॥ ४८ ॥ एकादश्यां कृतस्नानो देव पूजापरो भवेत् ॥ स्नाप्य पञ्चामृतेनैव ततस्तीर्थोदकेन च ॥ ४९ ॥ कुंकुमागरुश्रीखंडकर्पूरोदकमिश्रितैः ॥ पूजयित्वा ततः पुष्पैः शतपत्रैः सुगं धिभिः ॥ ५० ॥ मालतीकुसुमैः शुभ्रैर्बहुभिस्तुलसीदलैः ॥ वस्त्रं यज्ञोपवीतं च दत्त्वा धूपं प्रधूपयेत् ॥५१॥ दीपं दद्याद्घृतेनैव तैलेनापि घृतं विना॥ नैवेद्यं विविधं देयं फलं तांबूलमेव च ॥ ५२ ॥ प्रासादपूजा कर्त्तव्या ध्वजदानादिना नृप ॥ गौः सवत्सा ततो देया संसारार्णवतारिणी ॥ ५३ ॥ ततः प्रदक्षिणां कृत्वा गीतवादित्रनिस्वनैः ॥ वेदपाठपुराणैश्च व्याख्यादिव्यकथादिभिः ॥ ५४ ॥ देवाग्रे जागरः कार्यो दीपो देयोऽतिभूमिषु ॥ सप्तधान्यमयाः सप्त पर्वता दीपसंयुताः ॥ ५५ ॥ फलतांबूलपक्वान्नपूरिताः परिकल्पिताः ॥ विद्वद्भिः श्रोत्रियैः श्रांतैर्ब्राह्मणैर्गृहमेधिभिः ॥ ५६ ॥ स्त्रीभिश्च नरशार्दूल श्रोतव्या वैष्णवी कथा ॥ एवं जागरणं कार्यं रागक्रोधविवर्जितैः ॥ ५७ ॥ कृत्वा जागरणं रात्रावुदिते सूर्यमंडले ॥ पूर्वां संध्यां ततः स्नात्वा कृत्वा मध्याह्नमाचरेत् ॥५८॥ देवान्पितॄन्मनुष्यांश्च संतर्प्य विधिपूर्वकम्॥कृत्वा श्राद्धं पितॄणां तु दद्याद्दानं स्वशक्तितः ॥५९॥

१ अभून्नामोत्तमं हरेः—इ० पा० । २ ब्रह्मपुरे—इ० पा० । ३ व्याख्यादिव्यकथानकैः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



देवं दामोदरं पूज्य पुष्पधूपादिना पुनः ॥ नरसिंहं सुरं पूज्य वैनतेयं च पूजयेत् ॥ ६० ॥ कृत्वा जागरणं रात्रावुत्थाप्य मधुसूदनम् ॥ द्वादशीमुक्तिमासाद्य कार्यं पारणकं नरैः ॥ ६१ ॥ ब्राह्मणान्भोजयित्वा च सहितः पुत्रबांधवैः ॥ विकलांधकृपणानां देयमन्नं स्वशक्तितः ॥ ६२ ॥ दामोदरे रैवतके स्वर्णरेखानदीजले ॥ एवं यः कुरुते यात्रां तस्य पुण्यफलं शृणु ॥ ६३ ॥ ब्रह्मघ्नश्च सुरापश्च ग्रामसीमाविलोपकः ॥ राजद्रोही गुरुद्रोही मिथ्याव्रतधरश्च यः ॥ ६४ ॥ कूटसाक्ष्यप्रदो यश्च यश्च न्यासापहारकः ॥ बालस्त्रीघातको विप्रः संध्यास्नानविवर्जितः ॥ ६५ ॥ देवब्रह्मस्वहर्त्ता च वेदविक्रयकारकः ॥ कन्याविक्रयकर्त्ता च देवब्राह्मणनिंदकः ॥६६॥ विश्वासघातको विप्रः शूद्रान्नादोऽथ लुब्धकः ॥ नायकः परदाराणां स्वयंदत्तापहारकः ॥ ६७ ॥ पर्वमैथुनसेवी च तथा वै सेतुभेदकः ॥ परिणीतामृतुस्नातां स्वयं यो नाभिगच्छति ॥ ६८ ॥ ब्राह्मणी विधवा बाला न भवेच्छुतधारिणी ॥ महापातकिनश्चैते तथान्ये बहवो नृप ॥ ६९ ॥ स्वर्णरेखाजले स्नात्वा दृष्ट्वा दामोदरं हरिम् ॥ रात्रौ जागरणं कृत्वा मुच्यते सर्वपातकैः ॥ ७० ॥ न तु ये पापकर्माणः समायाताः प्रजागरे ॥ संसारसागरे तीर्थे गच्छंति न हरेः पुरम् ॥ ७१ ॥ यथा यथा याति नरः प्रजागरे तथातथा विष्णुपुरे विचिंत्यते ॥ वासः सुरैर्वैष्णवलोकहेतवे मृदंगगीतध्वनिनादिते गृहे ॥ ७२ ॥ गदासिशंखारिधराश्चतुर्भुजा दैतेयदर्पापहरूपधारिणः ॥ प्रगीयमानाः सुरसुंदरीभिस्ते यांति खं खेचरगात्रसंगाः ॥ ७३ ॥ वाराहकल्पे प्रथमं युगादौ दामोदरो रैवतके प्रसिद्धः ॥ सैषा नदी या सरितां वरिष्ठा सोऽयं हरिर्यो भुवनस्य कर्त्ता ॥ ७४ ॥ इदं पुराणं पठते शृणोति नरो विमानैर्मधुसूदनालये ॥ देवांगनादत्तभुजश्चतुर्भुजः स नीयते देवगणैरभिष्टुतः ॥ ७५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे द्वितीये वस्त्रापथक्षेत्रमाहात्म्ये सारस्वतप्रोक्ततीर्थयात्राविधाने श्रीदामोदरमाहात्म्यवर्णनंनाम पंचदशोऽध्यायः ॥१५॥ ॥ छ॥ ॥ राजोवाच[1] ॥ अथासौ वामनो विप्रः प्रविष्टो गहने वने ॥ एकाकी किं चकाराथ कौतुकं तद्वदस्व मे ॥ १ ॥ ॥ सारस्वत उवाच[2] ॥ ॥ अथासौ वामनो विप्रो गत्वा रैवतके गिरौ ॥ स्वर्णरेखानदीतोये स्नात्वाऽथ विधिपूर्वकम् ॥ २ ॥ सुगंधपुष्पधूपाद्यैर्देवं संपूज्य भक्तितः ॥ तस्थौ तदग्रतो राजन्नेकाकी निर्जने वने ॥३ ॥ सर्वसत्त्वसमायुक्ते सरीसृपसमाकुले॥अनेकस्वरसंघुष्टे मयूरध्वनिनादिते ॥ ४ ॥ कोकिलारावरम्ये च वनकुक्कुटघोषिते ॥ खद्योतद्योतिते तस्मिन्वल्लीमुखविधूनिते ॥५॥ क्वचिद्वंशाग्निना शांते क्वचित्पुष्पितपादपे ॥ गगनासक्तविटपे सूर्यतापविवर्जिते ॥६॥ लुब्धकावात

१ पार्वत्युवाच—इ० पा० । २ ईश्वर उवाच—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संत्रस्तभ्रांतसूकरशंबरे ॥ संहृष्टक्षत्रियव्रातस्थानदानविचक्षणे ॥ ७॥ अनेकाश्चर्यसंपन्नं सस्मार मनसा हरिम् ॥ तं भीतमिव विज्ञाय नरसिंहः समा
ययौ ॥ ८ ॥ रक्षार्थं तस्य विप्रस्य बभाषे पुरतः स्थितः ॥ न भेतव्यं त्वया विप्र वद ते किं करोम्यहम् ॥ ९ ॥ ॥ विप्र उवाच ॥ ॥ यदि
तुष्टो वरो देयो नरसिंह त्वया मम ॥ सदात्र रक्षा कर्त्तव्या सर्वेषां तीर्थवासिनाम् ॥१० ॥ देवस्याग्रे सदा स्थेयं यावदिंद्राश्चतुर्दश ॥ एवमस्त्विति
तं प्रोच्य तथा चक्रे हरिस्तदा ॥ ११ ॥ अतो दामोदरस्याग्रे नरसिंहः स पूज्यते ॥ वनं सौम्यं कृतं तेन तीर्थरक्षां करोति सः ॥ १२ ॥ भूतप्रेता
दिसंवासो वने तस्मिन्न जायते ॥ नरसिंहप्रभावेन नष्टं सिंहादिजं भयम् ॥ १३ ॥ कार्त्तिके वासरे विष्णोर्द्वादश्यां पारणे कृते ॥ दामोदरं नम
स्कृत्य भवं द्रष्टुं ततो ययौ ॥ १४ ॥ चतुर्दश्यां कृतस्नानो भवं संपूज्य भावतः ॥ भवभावभवं पापं भस्मीभूतं भवार्चनात् ॥ १५॥ स क्षीणपापनि
चयो जातो देवस्य दर्शनात् ॥ भवस्याग्रे स्थितं शांतं तथा वस्त्रापथस्य च ॥ १६ ॥ कालमेघं समभ्यर्च्य ततो वस्त्रापथं ययौ ॥ देवं संपूज्य
मंत्रैः स वेदोक्तैर्विधिपूर्वकम् ॥ १७ ॥ धूपदीपादिनैवेद्यैः सर्वं चक्रे स वामनः ॥ प्रदक्षिणाशतं कृत्वा भवस्याग्रे व्यवस्थितः ॥ १८ ॥ यावन्निरी
क्षते सर्वं तावत्पश्यति पर्वतम् ॥ उज्जयंतं गिरिवरं मैनाकस्य सहोदरम् ॥ १९ ॥ सुराष्ट्रदेशे विख्यातं युगादौ प्रथमं स्थितम् ॥ भूधरं भूधरैर्युक्तं
शिलापादपमंडितम् ॥ २० ॥ तं दृष्ट्वा चिंतयामास सूक्ष्मान्धर्मान्स वामनः ॥ अल्पायासान्सुबहुलान्पुत्रलक्ष्मीप्रदायकान् ॥ २१ ॥ अवश्यं क्रिय
माणेषु स्वधर्म उपजायते ॥ दृष्ट्वा नदीं सागरगां स्नात्वा पापैः प्रमुच्यते ॥ २२ ॥ गां स्पृष्ट्वा ब्राह्मणं नत्वा संपूज्य गुरुदेवताः ॥ तपस्विनं यतिं शांतं
श्रोत्रियं ब्रह्मचारिणम् ॥ २३ ॥ पितरं मातरं भगिनीं तत्पतिं दुहितां पतिम्[1] ॥ भागिनेयमथ दौहित्रं मित्रसंबंधिबांधवान् ॥ संभोज्य पातकैः
सर्वैर्मुच्यंते गृहमेधिनः ॥ २४ ॥ राजा गजाश्वनकुलं सतीवृषमहीधराः ॥ आदर्शक्षीरवृक्षाश्च सततान्नप्रदास्तु ते ॥ २५ ॥ दृष्टमात्राः पुनन्त्येते ये
नित्यं सत्यवादिनः ॥ वेदधर्मकथां श्रुत्वा भुक्तिमुक्तिप्रदां नरान् ॥२६॥स्मृत्वा हरिहरौ गंगां कृत्वा तीरेण मार्जनम् ॥ गत्वा जागरणे विष्णोर्दत्त्वा
दानं च शक्तितः ॥ २७॥ तांबूलं कुसुमं दीपं नैवेद्यं तुलसीदलम् ॥ गीतं नृत्यं च वाद्यं च विधाय सुरमंदिरे ॥ २८ ॥ एते सूक्ष्माः स्मृता धर्माः
क्रियमाणा महोदयाः ॥ अतो गिरीन्द्रं पश्यामि सर्वदेवालयं शुभम् ॥२९ ॥ तेषां करतले स्वर्गः शिखरं यांति ये नराः ॥ ३०॥ इति ज्ञात्वा समा
रूढो वामनो गिरिमूर्द्धनि ॥ ऐरावतपदाक्रांत्या यत्र तोयं विनिःसृतम् ॥३१॥ ततः शिखरमारूढां भवानीं स्कन्दमातरम् ॥ द्रष्टुं स वामनो याति

१ दुहितां पतिम्—दुहितां—दुहितरम्—पतिम्—तत्पतिं च—इति वोध्यम् । आर्ष रूपम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



शिखरे गगनाश्रिते ॥ ३२ ॥ यथायथा गिरिवरे समारोहंति मानवाः ॥ तथातथा विमुच्यंते पातकैः सर्वदेहिनः ॥ ३३ ॥ इति कृत्वा मतिं विप्रो जगाम गिरिमूर्द्धनि ॥ भवभक्तो भवानीं स ददर्श स्कन्दमातरम् ॥३४॥ अंबेति भाषते स्कंदस्ततोऽन्ये सर्वदेवताः ॥ पृथिव्यां मानवाः सर्वे पाताले सर्वपन्नगाः ॥ ३५ ॥ अतो ह्यंबेति विख्याता पूज्यते गिरिमूर्द्धनि ॥ संपूज्य विविधैर्मुख्यैः फलैर्नानाविधैर्द्विजः ॥ ३६ ॥ गगनासक्तशिखरे संस्थितः कौतुकान्वितः ॥ एकाकी शिखरे तस्मिन्नूर्द्ध्वबाहुर्व्यवस्थितः ॥३७॥ निरीक्ष्य मेदिनीं सर्वां सपर्वतससागराम्॥ आद्यं सनातनं देवं भास्करं त्रिगुणात्मकम् ॥३८॥ सर्वतेजोमयं सर्वदेवं देवैर्नमस्कृतम् ॥ भ्रममाणं निराधारं कालमानप्रयोजकम् ॥३९॥ यावत्पश्यति तं विप्रस्तावत्पश्यति शंकरम् ॥ दिगंबरं भवं देवं समंतादश्मगुंठितम् ॥ ४० ॥ बुद्धरूपाकृतिं देवं सर्वज्ञं गुणभूषितम् ॥ कृशांगं जटिलं सौम्यं व्योममार्गे स्वयं स्थितम् ॥ ४१ ॥ ॥ ॥ श्रीशिव उवाच ॥ ॥ शृणु वामन तुष्टोऽहं दास्ये ते विविधान्वरान् ॥ त्रैलोक्यव्यापिनी वृद्धिर्भविष्यति न संशयः ॥ ४२ ॥ प्रतिभास्यंति ते वेदा गीतनृत्यादिकं च यत् ॥ असाध्यसाधनी शक्तिर्भविष्यति तव स्थिरा ॥ परं वस्त्रापथे गत्वा कुरु तीर्थावलोकनम् ॥ ४३ ॥ ॥ वामन उवाच ॥ ॥ वस्त्रापथे महादेव यानि तीर्थानि तानि मे ॥ वद देव विशेषेण यद्यस्ति करुणा मयि ॥४४॥ ॥ रुद्र उवाच ॥ ॥ वस्त्रापथस्य वायव्ये कोणे दिव्यं सरोवरम् ॥ तस्य पश्चिमदिग्भागे जालिर्गहनपल्लवा ॥ ४५ ॥ बिल्ववृक्षमयी मध्ये लिंगं तत्रास्ति मृन्मयम् ॥ यत्रासौ लुब्धकः सिद्धो गतो मम पुरे पुरा ॥ ४६ ॥ तस्य दर्शनमात्रेण ब्रह्महत्या विनश्यति ॥ इंद्रो वै वृत्रहा यस्मिन्विमुक्तो ब्रह्महत्यया ॥ ४७ ॥ तस्मादुत्तरदिग्भागे धनदेन प्रतिष्ठितम् ॥ लिंगं त्रैलोक्यविख्यातं तत्र देवी त्रिशूलिनी ॥ ४८ ॥ यस्या दर्शनमात्रेण पुत्रोऽस्य नलकूबरः॥ पाशानुषक्तहस्तोऽभूद्देवं चक्रे त्रिशूलिनम् ॥ ४९ ॥ भवस्य नैर्ऋते कोणे गणो हेरंबसंज्ञितः ॥ यमेन कुर्वता लिंगं प्रथमं च प्रतिष्ठितः ॥ ५० ॥ विचित्रं तस्य माहात्म्यं चित्रगुप्तोऽतिविस्मितः ॥ दृष्ट्वा समागतो द्रष्टुं देवं तं मृन्मयं पुरा ॥ ५१ ॥ तेनापि निर्मितं लिंगं तस्मिन्क्षेत्रे द्विजोत्तम ॥ चित्रगुप्तेश्वरंनाम विख्यातं भुवनत्रये ॥ ५२ ॥ पश्चिमेन चकारोच्चैः प्रजापतिरुदारधीः ॥ केदाराख्यं तदा लिंगं गिरौ रैवतके स्थितम् ॥ प्रजापतिः स्वयं तस्थौ तत्र पर्वतसानुनि ॥ ५३ ॥ ॥ रुद्र उवाच ॥ ॥ इंद्रेश्वरस्य माहात्म्यं कथयिष्ये शृणुष्व तत् ॥ ईशानकोणे विख्यातं भवस्य विदितं मम ॥ ५४ ॥ ॥ वामन उवाच ॥ ॥ कस्मादिंद्रः समायातः कथं चक्रे हरं हरिः॥ कथां सविस्तरामेतां कथयस्व मम प्रभो ॥ ५५ ॥ ॥ रुद्र उवाच ॥ ॥ लुब्धकस्तु

१ व्यवस्थितम्—इ०पा० । २ देवम्—इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरा सिद्धः शिवरात्रिप्रजागरात् ॥ शिवलोके तदा प्राप्तं विमानं गणसंयुतम् ॥ ५६ ॥ सर्वत्रगं सुरुचिरं दिव्यस्त्रीगीतनादितम् ॥ तदारुह्य समा यातो द्रष्टुं तां नगरीं हरेः ॥ ५७ ॥ यस्यां युद्धं समभवद्गणानां यमकिंकरैः ॥ आगच्छमानं तं ज्ञात्वा देवराजेन चिंतितम् ॥ ५८ ॥ पूज्योऽयं हरवत्सर्वैश्चित्रगुप्तयमादिभिः ॥ इंद्रो गजं समारुह्य महिषेण यमो यतः ॥ ५९ ॥ विधाय लेखनीं कर्णे चित्रगुप्तो यमाज्ञया ॥ ततो दूता गणाः सर्वे ये नीता धरणीतलात् ॥ ६० ॥ निजापराधसंतप्ता गतास्ते दक्षिणामुखम् ॥ आथित्यपूजा कर्तव्या लुब्धके गृहमागते ॥ ६१ ॥ अपूजिते गते ह्यस्मिन्हरो मां शपयिष्यति ॥ तस्मात्पूजां करिष्यामि यथा तुष्यति शंकरः ॥ ६२ ॥ देवं द्रष्टुं समायातं ददर्शादूरतः स्थितम् ॥ विमानस्थं हरा कारं सूर्यकोटिसमप्रभम् ॥ ६३ ॥ संस्तूयमानं चरितैः शिवरात्रेः शिवस्य च ॥ माघे मासे चतुर्दश्यां कृष्णायां जागरे कृते ॥६४॥ तदेवं जायते सर्वं सुरेश्वर धरातले ॥ एवं देवांगना काचिदाचक्षंती पुरंदरम् ॥ निवार्य हस्तमुद्यम्य गजेंद्रं चारुलोचना ॥ ६५ ॥ किं दानैर्बहुभिर्दत्तैर्व्रतैः किं किं सुरार्चनैः ॥ किं योगैः किं तपोभिश्च ब्रह्मचर्य्यैः सुरेश्वर ॥ ६६ ॥ गयायां पिंडदानेन प्रयागमरणेन किम् ॥ सोमेश्वरे सरस्वत्यां सोमपर्वणि किं गतैः ॥ ६७ ॥ कुरुक्षेत्रगतैः किं स्याद्राहुग्रस्ते दिवाकरे ॥ तुलासुवर्णदानेन वेदपाठेन किं भवेत् ॥६८॥ सर्वपापक्षयो येन वृषोत्सर्गेण तेन किम् ॥ गोदानं किं करोत्येवं जलदानं तथैव च ॥ ६९ ॥ अयने विषुवे चैव संक्रांतौ कीदृशं फलम् ॥ माघमासे चतुर्दश्यां यादृशं जागरे कृते ॥ ७० ॥ यमः संभाषते वाण्या महिषोपरि संस्थितः ॥ पश्य रुद्रस्य माहात्म्यं चित्रगुप्त विचारय ॥ ७१ ॥ अयं स लुब्धको येन हरः संपूजितः पुरा ॥ सुराष्ट्रदेशे विख्यातं तीर्थं वस्त्रापथं शृणु ॥ ७२ ॥ उज्जयंतो गिरिस्तत्र तथा रैवतको गिरिः ॥ महती वर्तते जालिस्तयोर्मध्ये मया श्रुतम् ॥ ७३ ॥ मृन्मयं वर्तते लिंगं रात्रौ चानेन पूजितः ॥ रात्रौ जागरणं कर्त्तुं येन कार्येण चागतः ॥ ७४ ॥ तदस्माभिः कथं वाच्यं स्वयं जानंति ते सुराः ॥ वरांगना वरं द्रष्टुं वरयंति परस्परम् ॥ इंद्रावासात्समायाता नंदने वेगवत्तराः ॥ ७५ ॥ विरंचिना रायणशंकरत्विषा देहेन चागच्छति कोऽपि पूरुषः ॥ पुरीं सुरेशाधिपतेर्निरीक्षितुं भर्त्ता ममायं तव चास्ति किं पतिः ॥ ७६ ॥ मृदंगवीणा पटहस्वरस्तुतैः प्रबोधिताभिः सुरराजमन्दिरे ॥ देवो हरोऽयं न नरो हराकृतिर्दृष्टोंगनाभिस्तव किं किमावयोः ॥ ७७ ॥ गायंति काश्चिद्विहसंति काश्चिन्नृत्यंति काश्चित्प्रपठंति काश्चित् ॥ वदन्ति काश्चिज्जयशब्दसंयुतैर्वाक्यैरनेकैर्गुरुसन्निधाने ॥ ७८ ॥ काचिच्छिवं स्तौति शिवां तथान्या

१ संत्रस्ताः—इ०पा०। २ यज्ञैः—इ०पा०। ३ सर्वे-इ०पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पृच्छत्यथान्या किम्नु बिल्वपत्रात् ॥ किं वोपवासेन फलं तवेदं निद्राक्षयेणाथ फलं तवैतत् ॥ ७९ ॥ तासां नानाविधा वाचः श्रूयन्ते नन्दने वने ॥ ब्रह्मलोकादिका वार्त्ताः कृत्वा च तदनन्तरम् ॥ ८० ॥ देवेन्द्रो लुब्धकं भूयो बभाषे कौतुकान्वितः॥ कस्मिन्देशे गिरौ जालिलिंगं यत्रास्ति दर्शय ॥ ८१ ॥ ॥ लुब्धक उवाच ॥ ॥ सुराष्ट्रदेशे विख्यातो यस्मिन्देशो सरस्वती ॥ वाडवं शिरसा धृत्वा प्रविष्टा लवणोदधौ ॥ ८२ ॥ यत्र सा गोमती याति यत्रास्ते गन्धमादनः ॥ उज्जयंतो गिरिवरो यत्र रैवतको गिरिः ॥ ८३ ॥ तत्र वस्त्रापथं क्षेत्रं भवस्तत्र[1] व्यवस्थितः ॥ तत्रास्ते मृन्मयं लिंगं जालिमध्ये सुरोत्तम ॥ ८४ ॥ ॥ इन्द्र उवाच ॥ ॥ सहितैस्तत्र गंतव्यं पूजयिष्ये भवं स्वयम् ॥ जालिमध्ये तथा लिंगं दर्शयस्व च लुब्धक ॥ ८५ ॥ परदारादिकं पापं दैत्यानां तु विकृंतने ॥ वधे वृत्रस्य संजातं तत्सर्वं क्षालयाम्यहम् ॥ ८६ ॥ इत्युक्त्वा सहिताः सर्वे संप्राप्ता गिरिमूर्द्धनि॥ वाहनानि च ते त्यक्त्वा प्रस्थिताः पादचारिणः ॥ ८७ ॥ उज्जयन्तगिरेर्मूर्ध्नि गजराजः समागतः ॥ तदाग्रचरणं तस्य ददौ मूर्धनि कारणात् ॥ ८८ ॥ तेनाक्रान्तो गिरिवरस्तोयं सुस्राव निर्मलम् ॥ गजपादोद्भवं वारि भविष्यति सदा स्थिरम् ॥ ८९ ॥ इति प्रोक्तं सुरेन्द्रेण लोकानां हितकाम्यया ॥ सर्वे समागतास्तत्र यत्र जालिर्व्यवस्थिता ॥ ९० ॥ संपूज्य विविधैः पुष्पैर्माघमासे चतुर्दशी ॥ तस्यां जागरणं कृत्वा सञ्जातो निर्मलो हरिः ॥ ९१ ॥ वस्त्रापथे भवं पूज्य हरिं रैवतके गिरौ ॥ इन्द्रेश्वरं प्रतिष्ठाप्य संप्राप्तः स्वनिकेतनम् ॥ ९२ ॥ लुब्धकोऽपि विमानेन संप्राप्तो हरिमन्दिरे ॥ इत्युक्त्वा स भवो देवस्तत्रैवांतरधीयत ॥ ९३ ॥ वामनोपि ततश्चक्रे तत्र तीर्थावगाहनम्[2] ॥ यादृग्रूपः शिवो दृष्टः सूर्यबिंबे दिगंबरः ॥ ९४ ॥ पद्मासनस्थितः सौम्यस्तथा तं तत्र संस्मरन् ॥ प्रतिष्ठाप्य महामूर्त्तिं पूजयामास वासरम् ॥ ९५ ॥ मनोऽभीष्टार्थसिद्ध्यर्थं ततः सिद्धिमवाप्तवान् ॥ नेमिनाथशिवेत्येवं नाम चक्रे स वामनः ॥ ९६॥ भवस्य पश्चिमे भागे प्रत्यासन्ने धरातले ॥ वामनो वसतिं चक्रे तीर्थे वस्त्रापथे तदा ॥ ९७ ॥ अतो यवाधिकं प्रोक्तं तीर्थं देवैः सवासवैः ॥ इंद्रेण कुर्वता देवं समागत्य भवाग्रतः ॥ ९८ ॥ यवाधिकं प्रभासात्तु तीर्थमेतद्भवाज्ञया ॥ अन्येषां षड्गुणं तीर्थं भविष्यति शिवाज्ञया ॥ ९९ ॥ इत्येतत्कथितं सर्वं किमन्यत्परिपृच्छसि ॥ १०० ॥ ॥ राजोवाच ॥ ॥ शिवरात्रिप्रभावोयमतुलः[3] परिकीर्त्तितः ॥ अजानता कृता तेन लुब्धकेन पुरा श्रुतम् ॥ १०१ ॥ इदानीं वद कर्त्तव्या कथमन्यैर्जनैर्विभो ॥ किं ग्राह्यं किं नु मोक्तव्यं शिवरात्र्यां वदस्व मे ॥ १०२ ॥ ॥ सारस्वत उवाच ॥ ॥ संप्राप्य मानुषं जन्म ज्ञात्वा देवं

१ भवदेवः—इ० पा० । २ नवतीर्थावलोकनम्--इ० पा० । ३ अमलः--इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

महेश्वरम् ॥ शिवरात्रिः सदा कार्या भुक्तिमुक्तिप्रदायिनी ॥ १०३ ॥ ईदृशं जायते पुण्यमेकया कृतया नृप ॥ ये कुर्वंति सदा मर्त्यास्तेषां पुण्य मनंतकम् ॥ १०४ ॥ द्वादशाब्दं व्रतमिदं कर्त्तव्यं प्रतिवत्सरम् ॥ जीवित चंचलं नणां यदि कतु न शक्यते ॥ १०५ ॥ तदा द्वादशभिर्मासैर्व्रत मेतत्समाप्यते ॥ माघमासे चतुर्दश्यां प्रारम्भः क्रियते नृप ॥ १०६ ॥ प्रतिमासं ततः कार्यं पौषांते तु समाप्यते ॥ विघ्नश्चेज्जायते मध्ये कथं चिद्दैवयोगतः ॥ १०७ ॥ न भवेद्व्रतभंगस्तु पुनः कार्यमनन्तरम् ॥ द्वादशैव प्रकर्तव्याः कृत्वा संख्यां विशेषतः ॥ १०८ ॥ कृतं न नश्यते लोके शुभं वा यदि वाऽशुभम् ॥ कृष्णायां तु चतुर्दश्यां कृतपूर्वाह्निकक्रियः ॥ १०९ ॥ उपवासनियमो ग्राह्यो नद्यां स्नानं विधीयते ॥ तदभावे तडा गादौ कार्यं स्नानं स्वशक्तितः ॥ ११० ॥ तैलाभ्यंगो न कर्त्तव्यो न कार्यं गमनं क्वचित् ॥ तीर्थसेवा प्रकर्त्तव्या तस्मिंश्चागमनं शुभम् ॥ १११ ॥ शिवरात्रिः सदा कार्या लिंगे स्वायंभुवे नरैः ॥ तदभावे महापुण्ये लिंगे वर्षशताधिके ॥ ११२ ॥ गिरौ वने समुद्रांते नद्यां यच्च शिवालये ॥ तद्वै[१] स्वायंभुवं लिंगं स्वयं तत्रैव संस्थितम् ॥ ११३ ॥ वालुलिंगादिकं[२] लिंगं पूजितं फलदं स्मृतम् ॥ दिवा संपूज्य यत्नेन पुष्पधूपा दिना नरः ॥ ११४ ॥ वर्जयेन्मदिरां द्यूतं नारीं नखनिकृन्तनम् ॥ ब्रह्मचर्यपरैः शांतैः कर्त्तव्यं समुपोषणम् ॥ ११५ ॥ रात्रौ देवा ग्रतो गत्वा कर्त्तव्याः सप्त पर्वताः ॥ पक्वान्नफलतांबूलपुष्पधूपादिचर्चिताः ॥ ११६ ॥ घृतेन दीपः कर्त्तव्यः पापनाशनहेतवे ॥ यतो दीपस्य माहात्म्यं विज्ञेयं मुक्तिदायकम् ॥ ११७ ॥ दीपः सदैव कर्त्तव्यो गृहे देवालये नरैः ॥ दिवा निशि च संध्यायां दीपः कार्यः स्वशक्तितः ॥ ११८ ॥ किञ्चिदुद्द्योतमात्रेण देवास्तुष्यंति भूतले ॥ पितॄणां प्रथमं दीपः कर्त्तव्यः श्राद्धकर्मणि ॥ ११९ ॥ रात्रौ जागरणं कार्यं यथा निद्रा न जा यते ॥ शिवरात्रिप्रभावोऽयं श्रोतव्यः शिवसंनिधौ ॥ १२० ॥ शिवस्य चरितं रात्रौ श्रोतव्यं बहुविस्तरम् ॥ गीतं नृत्यं तथा वाद्यं कर्तव्यं शिवसंनिधौ ॥ १२१ ॥ एवं सा नीयते रात्रिर्मुख्यं जागरणं यतः ॥ रात्रौ देयानि दानानि शक्त्या वै तत्र जागरे[३] ॥ १२२ ॥ पुनः स्नात्वा प्रभाते तु कर्त्तव्यं शिवपूजनम् ॥ पूजनीयाश्च यतयो भोजनाच्छादनादिभिः ॥ १२३ ॥ तपस्विनां प्रदातव्यं भोजनं गृहमेधिभिः ॥ द्वादशाष्टौ च चत्वारो भोक्तव्या एक एव वा ॥ १२४ ॥ एकोऽपि ब्रह्मचारी यो ब्रह्मविच्छिवपूजकः ॥ सहस्राणां समो भक्त्या गृहे संभोजितो भवेत् ॥ १२५ ॥ अक्षारालवणं पत्रे भोक्तव्यं वाग्यतैः स्वयम् ॥ पुत्रमित्रकलत्राणां दातव्यं भोजनं पुरः ॥ १२६ ॥ अनेन विधिना कार्या शिवरात्रिः शिवव्रतैः ॥

१ देवः—इति शेषः । २ बालुलिंगादिकम्—इ० पा० । ३ सदा नरैः—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



द्वादशैता यदा पूर्णास्तिलपात्राणि वै तदा ॥ १२७ ॥ द्वादशैव प्रदेयानि गुरुब्राह्मणज्ञातिषु ॥ व्रतांते गौः प्रदातव्या कृष्णा वत्सयुता दृढा ॥१२८॥ सवस्त्राभरणा देया घंटाभरणभूषिता ॥ अंगुलीयकवासांसि च्छत्रोपानत्कमण्डलु ॥ १२९ ॥ गुरवे दक्षिणा देया ब्राह्मणेभ्यः स्वशक्तितः ॥ एवं कृत्वा ततो देयं तपस्विभ्योऽथ भोजनम् ॥ मिष्टान्नं विविधं दत्त्वा क्षमाप्य च विसर्जयेत् ॥ १३० ॥ एवं यः कुरुते सत्यं तस्य पापं न विद्यते ॥ संतानमुत्तमं लब्ध्वा भुक्त्वा भोगाननुत्तमान् ॥ १३१ ॥ दिव्यं विमानमारूढो दिव्यस्त्रीपरिवेष्टितः ॥ गीतवादित्रनिर्घोषैर्नीयते शिवमन्दिरे॥ १३२॥ तदेतत्कथितं पुण्यं शिवरात्रिव्रतं मया ॥ कृतेन येन लोकानां सर्वपापक्षयो भवत् ॥ १३३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे द्वितीये वस्त्रापथक्षेत्रमाहात्म्ये शिवरात्रिमाहात्म्यवर्णनंनाम षोडशोऽध्यायः ॥ १६ ॥ छ ॥ ॥ राजोवाच ॥ ॥ विचित्रमिदमाख्यानं त्वत्प्रसादाच्छ्रुतं मया ॥ दृष्ट्वा नारायणं शक्रं नारदो मंदरे गिरौ ॥ १ ॥ किं चकार मुनींद्रोऽथ तन्मे विस्तरतो मुने ॥ वद संसारसरणोद्भूतमायाप्रपीडितम् ॥ कथामृतजलौघेन वितृषं कुरु मां प्रभो ॥ २ ॥ ॥ सारस्वत उवाच ॥ ॥ अथासौ नारदो देवं ज्ञात्वा शप्तं द्विजन्मना ॥ भृगुणा च तथा पूर्वं नान्यथैतद्भविष्यति ॥ ३ ॥ भविष्यं यद्भवंदेव वर्तमानं विचिंत्यताम् ॥ अयं च वामनो भूत्वा विष्णुर्यास्यति तां पुरीम् ॥ ४ ॥ निग्रहं स बलेः पश्चात्करिष्यति मम प्रियम् ॥ युद्धं विना कथं स्थेयं वर्तमानं महोल्बणम् ॥ ५ ॥ देवदानवयुद्धानि दैत्यगन्धर्वरक्षसाम् ॥ निवारितानि सर्वाणि सरीसृपपतत्रिणाम् ॥ ६ ॥ सापत्नजः कलिर्नास्ति मम भाग्यपरिक्षये ॥ देवेन्द्रो गुरुणा पूर्वं वारितः किं करोम्यहम् ॥ ७ ॥ माननीयो गुरुर्मेऽयमतस्तं न शपाम्यहम् ॥ युद्धार्थं तु ततो यत्नो न सिध्यति करोमि किम् ॥ ८ ॥ केनापि दैवयोगेन पुरुषार्थो न सिध्यति ॥ तथापि यत्नः कर्त्तव्यः पुरुषार्थे विपश्चिता ॥ दैवं पुरुषकारेण विनापि फलति क्वचित् ॥ ९ ॥ यदुक्तं तद्वचो व्यर्थं यतः सिद्धिः प्रयततः ॥ बलिं गत्वा भणिष्यामि यथा युद्धं करिष्यति ॥ १० ॥ न श्रोष्यति स चेद्वाक्यं निश्चितं तं शपाम्यहम् ॥ इत्युक्त्वा स ययौ वेगान्नारदो बलिमंदिरे ॥ निमेषांतरमात्रेण शिष्याभ्यां गगने स्थितः ॥ ११ ॥ प्रासादे शैलसंकाशे सप्तभौमे महोज्ज्वले ॥ तस्योपरि सभा दिव्या निर्मिता विश्वकर्मणा ॥ १२ ॥ तस्यां सिंहासनं दिव्यं तत्रासीनो बलिर्नृप ॥ दैत्यैः परिवृतः सर्वैः प्रौढिहास्यकथापरैः ॥ १३ ॥ ऋषिभिर्ब्राह्मणैः शांतैस्तथैवोशनसा स्वयम् ॥ पुत्रमित्रकलत्रैश्च संवृतो दिव्यमन्दिरे ॥ १४ ॥ देवांगनाकरग्राहगृहीतैर्दिव्यचामरैः ॥ संवीज्यमानो दैत्येन्द्रः स्तूयमानः सचारणैः ॥ १५ ॥ यावदास्ते मदोन्मत्ता मन्त्रयंति परस्परम् ॥ दैत्यदानवमुख्या ये ते सर्वे युद्धकांक्षिणः ॥ १६ ॥ उत्थायोत्थाय भाषंते प्रगल्भंते



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुरैः सह ॥ अस्मदीयमिदं सर्वं त्रैलोक्यं सांप्रतं गतम् ॥ १७ ॥ शुक्रबुद्ध्या विना युद्धं प्राप्स्यते किं महोदयः ॥ दैत्येन्द्रो देवराजेन स्नेहं च कुरुते यदि ॥ १८ ॥ ऐरावणं सदा मत्तं कथं नो याचते बलिः ॥ चतुरं तुरगं कस्मान्नार्पयति दिवाकरः ॥ १९ ॥ यावन्नाक्रम्यते लुब्धो धनाध्यक्षो रणाजिरे ॥ तावन्नार्पयते वित्तं यदा तत्संचितं सुरैः ॥ २० ॥ न दर्शयति रत्नानि जलराशी रसातलात् ॥ यावन्न मन्दरं क्षिप्त्वा विमथ्नीमो वयं च तम् ॥ २१ ॥ यथामृतकलाश्चन्द्राद्धुज्यन्ते क्रमशः सुरैः ॥ एवं भागं बलेः कस्मान्न ददाति जलात्मकः[1] ॥ २२ ॥ स्वर्धुनी शीतलो वातः पद्मकिंजल्कवासितः ॥ स्वर्गे वाति शनैर्यद्वत्तथा न बलिमंदिरे ॥ २३ ॥ इन्द्रचापोद्यता[2] मेघा जलं मुंचंति भूतले ॥ बलिखड्गोद्धुताः स्वर्गं पुनस्ते यांति भूतलात् ॥२४॥ अस्मदीये धरापृष्ठे यमो मारयते जनम् ॥ नैवं स्वर्गे न पाताले पश्याहो कार्यकारणम् ॥२५॥ आयुर्वृत्तिं सुतान्सौख्यमस्माकं लिखति स्वयम् ॥ ललाटे चित्रगुप्तोऽसौ न देवानां तु तत्समम् ॥२६॥ वर्षाशीतातपाः काला वर्तंते भुवि सांप्रतम् ॥ न स्वर्गे नैव पाताले भीता भूमौ भ्रमंति हि ॥ २७ ॥ एकवीर्योद्भवा यूयं स्वस्त्रीया देवदानवाः ॥ भूमौ स्थिता वयं कस्माद्देवाः केनोपरि कृताः ॥ ॥२८॥ समुद्रे मथ्यमाने तु दैत्येन्द्रो वंचितः सुरैः ॥ एकतः सर्वदेवाश्च बलिश्चैवैकतः स्थितः ॥२९॥ उत्पन्नेषु च रत्नेषु भाग्यं वै यस्य यादृशम् ॥ गजाश्वकल्पवृक्षाद्याश्चंद्रगोगणदंतिनः ॥३०॥ गृहीत्वा ह्यमृतं देवैर्वयं पाने[3] नियोजिताः ॥ एतया घूर्णिता यूयं न जानीथातिगर्विताः ॥ ३१ ॥ पीतावशेषं पीयूषं सत्यलोके धृतं सुरैः ॥ अहोतिकुटिला देवाः कस्माच्छेषं न दीयते ॥ ३२ ॥ सुरामृतमिति ज्ञात्वा पीयूषाद्वंचिता वयम् ॥ तिलतैलमेव मिष्टं यैर्न दृष्टं घृतं क्वचित् ॥ ३३ ॥ विष्णोर्वक्रचरित्राणां संख्या कर्तुं न शक्यते ॥ तथापि कथ्यते तुष्टैर्दृष्टैस्तैर्यदनुष्ठितम् ॥३४॥ गौरांगी सुन्दरी सुभ्रूः पीनोन्नतपयोधरा ॥ सुकेशा चंद्रवदना कर्णासक्तविलोचना॥३५॥ वलित्रयांकिता मध्ये बाला मुष्ट्यापि गृह्यते ॥ स्थलारविंदचरणा लतेव भुजभूषिता ॥ ३६ ॥ सा सर्वाभरणोपेता सर्वलक्षणसंयुता ॥ त्रैलोक्यमोहिनी देवी संजाताऽमृतमन्थने ॥ ३७ ॥ अमृतादुत्थिता पूर्वं यस्य सा तस्य तद्भवम् ॥ त्रैलोक्यं वशगं तस्य यस्य सा चारुलोचना ॥ ३८ ॥ तया संमोहिताः सर्वे देवदानवराक्षसाः ॥ विमुच्य मन्थनं सर्वे तां ग्रहीतुं समुद्यताः ॥ ३९ ॥ एका स्त्री बहवो देवा दानवा दैत्यराक्षसाः ॥ विवादः सुमहाञ्जातः कथमत्र भविष्यति ॥ ४० ॥ आगत्य विष्णुना सर्वे भुजे धृत्वा निवारिताः ॥ अस्यार्थे[4] किमहो वादः क्रियते भोः परस्परम् ॥ ४१ ॥ अमृतार्थे समारम्भो महिलार्थे विनश्यति ॥ संकेतं प्रथमं कृत्वा विष्णुना

१ जलात्मकः—चन्द्रः । डलयोः सावर्ण्यात्—जडात्मकः—मूर्खः—इत्यर्थः । २ इन्द्रेणोत्पादिता मेघाः—इ० पा० । ३ पाने—सुरापाने । ४ अस्य—स्त्रीरत्नस्य—अर्थे—कृते—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



चुंबिता पुनः ॥ ४२ ॥ दिव्यरूपधरः स्रग्वी वनमालाविभूषितः ॥ कौस्तुभोद्द्योतिततनुः शंखचक्रगदाधरः ॥४३॥ तस्या हस्ते शुभां मालां दत्त्वा विष्णुः पुरः स्थितः ॥ उद्धृत्य बाहुं सर्वेषां बभाषे वचनं हरिः ॥ ४४ ॥ कुर्वंतु कुण्डलं सर्वे तिष्ठन्तु स्वयमासने ॥ विलोक्य स्वेच्छया लक्ष्मीर्वर मालां प्रयच्छतु ॥ ४५ ॥ स्वयंवरविभेदं यः करिष्यत्यतिलंपटः ॥ स वध्यः सहितैः सर्वैः परस्त्रीलुब्धको यथा ॥ ४६ ॥ परदारकृतं पापं स्त्रीवध्या तस्य जायताम् ॥ अन्योऽपि यः करोत्येवमेवमस्तु तदुच्यताम् ॥४७॥ साधारणं हरिं ज्ञात्वा तथेत्युक्त्वा तथाकृतम् ॥ देवदानवदैत्यानां गंधर्वोरग रक्षसाम् ॥ मध्ये योऽभिमतो भर्ता स ते सत्यं भवेदिति ॥४८ ॥ तेनासौ मोहिता पूर्वं दृष्टिदानेन कर्षिता ॥ आद्यं संमोहनं स्त्रीणां चक्रे दृष्टिनिरीक्षणम् ॥४९॥ एवमेवेति तत्कर्णे हस्तं दत्त्वा यदुच्यते ॥ दधाति हृदि यं नारी कामबाणप्रपीडिता ॥ ५० ॥ तमेव वरयेदत्र कश्चिन्नास्त्येव संशयः ॥ संजाते कलहे पूर्वं हरिणा तं निवर्तितुम् ॥ ५१ ॥ यदा गृहीता सर्वैः सा हरिं नैव विमुंचति ॥ त्वमेव भर्ता साऽऽचष्टे मुंच मां व्रज दूरतः ॥ ५२ ॥ मुक्त्वा दूरं ततो विष्णुः प्रविष्टः सुरमण्डले ॥ तदा सर्वे च मांमुक्त्वा यथास्थानं स्वयं गताः ॥५३॥ आचष्ट विजया पूर्वं सर्वान्देवान्यथाक्रमम् ॥ सा च निरीक्षते पश्चात्तं विचार्य विमुञ्चति ॥ ५४ ॥ उदासीनः शिवः शांतो गौरीकांतस्त्रिलोचनः ॥ नान्यां निरीक्षते नित्यं ध्यानासक्तस्त्रिलोचनः ॥ ५५ ॥ पितामहोयमित्युक्तं यदा सख्या तदा तया ॥ नमस्कृत्य गतं दूरे कृत्वा मौनं न पश्यति ॥ ५६ ॥ आदित्यं पद्मकं मुञ्च दहनं दहनात्मकम् ॥ वाति वातो गता दूरे वरुणो मे पिता यतः ॥ ५७ ॥ पौलोमीवदनासक्तो देवेन्द्रो मे न रोचते ॥ ५८ ॥ वधबंधकृतच्छेदभेददण्डविकर्षणम् ॥ कुर्वन्न कुरुते सौम्यं रूपं वैवस्वतो यमः ॥ ५९ ॥ देवदानवगंधर्वदैत्यपन्नगराक्षसान् ॥ ६० ॥ दृष्ट्वात्युग्रांस्ततो याति दृष्टोऽसौ पुरुषोत्तमः ॥ कर्णांतलोचनभ्रांतवक्रं दृष्ट्यावलोक्य तम् ॥ ६१ ॥ सौभाग्यातिशयाक्रांतं रम्यं काममनोहरम् ॥ संजातपुलकोद्भेदस्वेदवारिकणांकितम् ॥ ॥ ६२ ॥ देवदानवदैत्येन्द्रक्रोधदृष्टिनिरीक्षितम् ॥ रम्यं रामा वरं चक्रे ददौ मालां ततः स्वयम् ॥६३॥ दैत्याः परस्परं प्रोचुः प्रेक्ष्य तत्सुरचेष्टितम् ॥ विभागं पश्य देवानां स्वर्गे सर्वे स्वयं गताः ॥ ६४ ॥ पातालस्य तले यूयं मानवा धरणीतले ॥ देवास्त्रिभुवने यांतु नःवयं स्वर्गगामिनः ॥ ॥ ६५ ॥ मानवाः क्षत्रिया राज्यं कुर्वंतु पृथिवीतले ॥ पातालं तु परित्यज्य धात्री यदि तु रक्ष्यते ॥ ६६ ॥ दैत्यदानवजैः कैश्चिद्राक्षसैस्तत्र शोभनम् ॥ अथ किं बहुनोक्तेन राजा त्रिभुवने बलिः ॥ ६७ ॥ संविभज्याथ रत्नानि समं राज्यं विधीयताम् ॥ यावदेवं प्रग

१ चिंतिता पुनः–इ० पा० । २ माम्–लक्ष्मीम् ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लभंते तावत्पश्यंति नारदम् ॥ ६८ ॥ गगनात्समुपायांतं द्वितीयमिव भास्करम् ॥ ब्रह्मदंडकरासक्तयुद्धपुस्तकधारिणम् ॥ ६९ ॥ कृष्णाजिनधरं शांतं छत्रवीणाकमण्डलून् ॥ मौंजीगुणत्रयासक्तग्रंथिप्रवरमेखलम् ॥ ७० ॥ ब्रह्मरूपधरं शांतं दिव्यरुद्राक्षभूषितम् ॥ गतकल्पकृतग्रंथिसूत्रमालावलंबितम् ॥ ७१ ॥ विरंचिहरसंवादो जन्माहंकारगर्वितः ॥ संक्रुद्धैः क्रियते कोऽद्य चिंतातत्परमानसम् ॥ ॥ ७२ ॥ आयांतं नारदं दृष्ट्वा विस्मिताः समुपस्थिताः ॥ प्रभो प्रसादः क्रियतामागंतव्यं गृहे मम ॥ ७३ ॥ धन्योऽहं कृतपुण्योऽहं यस्य मे त्वं गृहागतः ॥ इत्युक्तो बलिना विप्रो विवेशासुरमंदिरे ॥ आसनं पाद्यमर्घ्यं च दत्त्वा संपूजितो द्विजः ॥ ७४ ॥ प्रविश्य सहिताः सर्वे संविष्टा दैत्यदानवाः ॥ शुक्रेण सहितो दैत्यो बभाषे नारदं बलिः ॥ ७५ ॥ इदं राज्यमिमे दारा इमे पुत्रा अहं बलिः ॥ ब्रूहि येनात्र ते कार्यं दानं मे प्रथमं व्रतम् ॥ ७६ ॥ ॥ नारद उवाच ॥ ॥ भक्त्या तुष्यंति ये विप्रास्ते विप्रा भूमिदेवताः ॥ न तु ये पूजिताः शक्त्या पुनर्याचंति तेऽधमाः॥ ॥ ७७ ॥ त्वयाऽहं पूजितो हृष्टो न वित्तैर्मे प्रयोजनम् ॥ हृष्टोऽहं तव राज्येन यज्ञैर्दानैर्व्रतैस्तथा ॥ ७८ ॥ देवैः कृतं विप्रियं ते किंचित्पश्याम्यहं बले ॥ त्वया संपूज्यमानोऽपि देवराजो न तुष्यति ॥ ७९ ॥ न क्षमंति सुराः सर्वे तव राज्यं धरातले ॥ स्वर्गे मे तापको जातो देवानां तव विग्रहे ॥ ॥ ८० ॥ संनह्य प्रथमं याति यः सैन्यं शत्रुभूमिषु ॥ स क्षत्रियो विजयते तस्य राज्यं च वर्धते ॥८१॥ उच्छेदस्तव राज्यस्य भविष्यति श्रुतं मया ॥ एवं ज्ञात्वा यथायुक्तं तच्छीघ्रं तु विधीयताम् ॥ ८२ ॥ ॥ बलिरुवाच ॥ ॥ यैर्गुणैः[1] कुरुते राज्यं राजा तान्वद मे विभो ॥ दानं पात्रे प्रदातव्यं मया त्वमपि तं[2] वद ॥ ८३ ॥ ॥ नारद उवाच ॥ ॥ षड्विंशद्गुणसंपन्नो राजा राज्यं करोति च ॥ स राज्यफलमाप्नोति शृणु तत्कथयाम्यहम् ॥ ८४ ॥ चरेद्धर्मानकटुको मुंचेत्स्नेहमनास्तिके ॥ अनृशंसश्चरेदर्थं चरेत्काममनुद्धतः ॥८५॥ प्रियं ब्रूयादकृपणः शूरः स्यादविकत्थनः ॥ दाता चाऽऽयामवर्जः स्यात्प्रगल्भः स्यादनिष्ठुरः ॥ ८६ ॥ संदधीत न चानार्यान्विगृह्णीयान्न बंधुभिः ॥ नानाप्तैश्चारयेच्चारान्कुर्यात्कार्यमपीडयन् ॥८७॥ अर्थान्ब्रूयान्न चापत्सु गुणान्ब्रूयान्न चात्मनः ॥ आदद्यान्न च साधुभ्यो नासत्पुरुषमाश्रयेत् ॥ ८८ ॥ नापरीक्ष्य नयेद्दण्डं न च मंत्रं प्रकाशयेत् ॥ विसृजेन्न च लुब्धेभ्यो विश्वसेन्नापकारिषु ॥ ८९ ॥ आप्तैः सुगुप्तदारः स्याद्रक्ष्यश्चान्यो घृणी[4] नृपः ॥ स्त्रियं सेवेत नात्यर्थं मृष्टं भुंजीत नाऽहितम् ॥ ९० ॥ अस्तेयः पूजयेन्मान्यान्गुरुं सेवेदमायया ॥ अर्च्यो देवो न दम्भेन श्रियमिच्छेदकुत्सिताम् ॥ ९१ ॥ सेवेत प्रणयं कृत्वा दक्षः

१ विप्राणम्—इति शेषः । २ इति—इति शेषः । ३ तम्—पात्रभूतं पुरुषम्—इत्यर्थः । ४ घृणी—दयावान्—अन्यो नृपः—रक्ष्यः—तस्य परसंकटे साहाय्यं देयत्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





स्यादथ कालवित् ॥ सांत्ववाक्यं सदा वाच्यमनुगृह्णन्न चाक्षिपेत् ॥ ९२ ॥ प्रहरेन्न च विप्राय हत्वा शत्रून्न शेषयेत् ॥ क्रोधं कुर्यान्न चाकस्मान्मृदुः
स्यान्नापकारिषु ॥ ९३ ॥ एवं राज्ये चिरं स्थेयं यदि श्रेय इहेच्छसि ॥ तपःस्वाध्यायदानानि तीर्थयात्राऽऽश्रमाणि च ॥ ९४ ॥ योगेनात्मप्रबो
धस्य कलां नार्हंति षोडशीम् ॥ त्वया संसारवैराग्यं कर्त्तव्यं विप्रपूजनम् ॥९५॥ यष्टव्यं विविधैर्यज्ञैर्ध्येयो नारायणो हरिः ॥ प्रसंगेन समायातो
यास्ये रैवतके गिरौ ॥ ९६ ॥ तत्रास्ते भगवान्विष्णुर्नदी त्रैलोक्यपावनी ॥ तत्रास्ते च शिवावृक्षो बहुपुष्पफलान्वितः ॥ तत्र गत्वा करिष्यामि व्रतं
तद्विष्णुवल्लभम् ॥ ९७ ॥ ॥ बलिरुवाच ॥ ॥ कोऽयं रैवतकोनाम व्रतं किं विष्णुवल्लभम् ॥ शिवावृक्षास्तु के प्रोक्तास्तत्कथं कथयस्व मे ॥ ९८ ॥
॥ ॥ नारद उवाच ॥ ॥ पुरा युगादौ दैत्येन्द्र सपक्षाः पर्वताः कृताः ॥ संचिंत्य ब्रह्मणा पश्चादचलास्ते कृताः पुनः ॥ ९९ ॥ उत्पतंति महा
काया निपतंति यदृच्छया ॥ मेरुमंदरकैलासा वचसा संस्थिताः स्थिराः ॥ १०० ॥ वारिता न स्थिता ये तु त इंद्रेण स्थिरीकृताः ॥ मेरोर्दक्षिण
शृंगे तु कुमुदेति स पर्वतः ॥ १०१ ॥ दिव्यः सपक्षः सौवर्णो दिव्यवृक्षैः समावृतः ॥ तस्योपरि पुरी दिव्या वैष्णवी विष्णुना कृता ॥ १०२ ॥
तस्या मध्ये गृहं दिव्यं यस्मिँल्लक्ष्मीः सदा स्थिता ॥ मेरोः शृंगे पुरी रम्या गृहं तत्र मनोरमम् ॥ १०३ ॥ तत्रास्ते स भवो देवो भवानी
यत्र संस्थिता ॥ सभा माहेश्वरी रम्या सौवर्णी रत्नमंडिता ॥ १०४ ॥ तत्रास्ते भगवान्विष्णुर्देवैर्ब्रह्मादिभिर्वृतः ॥ तस्यां विष्णुः सदा
याति देवं द्रष्टुं महेश्वरम् ॥ १०५ ॥ सौवर्णैः कुमुदैर्यस्मादसौ सर्वत्र मंडितः ॥ कुमुदेति कृतं नाम देवैस्तत्र समागतैः ॥ १०६ ॥ एकदा
भगवान्रुद्रो गिरौ तस्मिन्समागतः ॥ द्रष्टुं तच्छिखरे रम्ये तां पुरीं विष्णुपालिताम् ॥ १०७ ॥ गृहागतं हरं दृष्ट्वा हरिणा स तु पूजितः ॥
लक्ष्म्या संपूजिता गौरी हर्षिता तत्र संस्थिता ॥ १०८ ॥ एकासनोपविष्टौ तौ मंत्रयंतौ परस्परम् ॥ हरेण कारणं ज्ञात्वा तत्सर्वं कथितं
हरेः ॥ १०९ ॥ त्वयेयं नगरी कार्या मंदरे पर्वतोत्तमे ॥ प्रष्टव्यः कारणं नाहमवश्यं तद्भविष्यति ॥ ११० ॥ हर एव विजानाति कारणं
कतमोऽपि न ॥ एवं तथेति तौ प्रोक्ता संस्थितौ पर्वतोऽपि सः ॥ १११ ॥ तं दृष्ट्वा संगतं रुद्रं कुमुदः स्वयमाययौ ॥ धन्योऽहं कृतपुण्योऽहं यस्य
मे गृहमागतौ ॥ ११२ ॥ द्वाभ्यामुक्तो गिरिवरो ददाव किं वरं तव ॥ इत्युक्तः पर्वतस्ताभ्यां वरं वव्रे स मूढधीः ॥ ११३ ॥ भविष्यत्कार्यहेतुत्वाद्भवि
ष्यति न तद्वृथा ॥ यत्राहं तत्र वस्तव्यं भवद्भ्यामस्तु मे वरः ॥ ११४ ॥ मत्सन्निधौ समागत्य स्थातव्यं ब्रह्मवासरम् ॥ तथेत्युक्त्वा सपत्नीकौ
गतौ हरिहरावुभौ ॥ ११५ ॥ पञ्चमो यो मनुः पूर्वं रैवतोनाम विश्रुतः ॥ तस्योत्पत्तौ तु यद्वृत्तं कुमुदाग्रे शृणुष्व तत् ॥ ११६ ॥ ऋषिरासी



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्महाभाग ऋतवागिति विश्रुतः ॥ तस्यापुत्रस्य पुत्रोऽभूद्रेवत्यन्ते महात्मनः ॥ ११७ ॥ स तस्य विधिवच्चक्रे जातकर्मादिकाः क्रियाः ॥ तथोपनयनाद्याश्च स चाशीलोऽभवन्नृप ॥ ११८ ॥ यतः प्रभृति जातोऽसौ ततः प्रभृत्यसावृषिः ॥ दीर्घरोगपरामर्शमवापातीव दुर्द्धरम् ॥ ११९ ॥ माता चास्य परामार्तिं कुष्ठरोगाभिपीडिता ॥ जगाम चिन्तां स ऋषिः किमेतदिति दुःखितः ॥ १२० ॥ मूर्खस्तु मंदधीः पुत्रो दुःखं जनयते पितुः ॥ अमार्गगो विशेषेण दुःखाद्दुःखतरं हि तत् ॥ १२१ ॥ अपुत्रता मनुष्याणां श्रेयसे न कुपुत्रता ॥ सुहृदां नोपकाराय पितॄणां नापि तृप्तये ॥ १२२ ॥ सुपुत्रो हृदयेऽभ्येति मातापित्रोर्दिनेदिने ॥ पित्रोर्दुःखाय धिग्जन्म तस्य दुष्कृतकर्मणः ॥ १२३ ॥ धन्यास्ते तनया ये स्युः सर्वलोकाभिसंमताः ॥ परोपकारिणः शांताः साधुकर्मण्यनुव्रताः ॥ १२४ ॥ अनिर्वृतं निरानंदं दुःखशोकपरिप्लुतम् ॥ नरकाय न स्वर्गाय कुपुत्रत्वं हि जन्मिनः ॥ १२५ ॥ करोति सुहृदां दैन्यमहितानां तथा मुदम् ॥ अकाले तु जरां पित्रोः कुपुत्रः कुरुते किल ॥ १२६ ॥ ॥ नारद उवाच ॥ एवं सोऽत्यन्तदुष्टस्य पुत्रस्य चरितैर्मुनिः ॥ दह्यमानमनोवृत्तिर्वृद्धगर्गमपृच्छत ॥ १२७ ॥ ॥ ऋतवागुवाच ॥ ॥ सुव्रतेन पुरा वेदा अधीता विधिना मया ॥ समाप्य विद्या विधवत्कृतो दारपरिग्रहः ॥ १२८ ॥ सदारेण हि याः कार्याः श्रौतस्मार्त्तादिकाः क्रियाः ॥ ताः कृताश्च विधानेन कामं समनुरुध्य च ॥ १२९ ॥ पुत्रार्थं जनितश्चायं पुंनाम्नो विच्युतौ मुने ॥ सोऽयं किमात्मदोषेण मातुर्दोषेण किं मम ॥ अस्मद्दुःखावहो जातो दौःशील्याद्वद कोविद ॥ १३० ॥ ॥ गर्ग उवाच ॥ ॥ रेवत्यन्ते मुनिश्रेष्ठ जातोऽयं तनयस्तव ॥ तेन दुःखाय ते दुष्टे काले यस्मादजायत ॥ १३१ ॥ तवापचारो नैवास्य मातुर्नापि कुलस्य च ॥ अन्यद्दौःशील्यहेतुत्वं रेवत्यंत उपागतम् ॥ १३२ ॥ रेवती अश्विनोर्मध्यमाश्लेषामघयोस्तथा ॥ ज्येष्ठामूलर्क्षयोः प्रोक्तं गंडांतं तु भयावहम् ॥ १३३ ॥ गंडत्रये तु ये जाता नरनारीतुरंगमाः ॥ तिष्ठंति न चिरं गेहे तिष्ठन्तोऽपि भयंकराः ॥ एवमुक्तोऽथ गर्गेण चुक्रोधातीव कोपनः ॥ १३४ ॥ ॥ ऋतवागुवाच ॥ ॥ यस्मान्ममैकपुत्रस्य रेवत्यन्ते समुद्भवः ॥ १३५ ॥ रेवती किं न जानाति मां विप्रः शापयिष्यति ॥ जाज्वल्यमाना गगनात्तस्मात्पततु रेवती ॥ १३६ ॥ ॥ ॥ नारद उवाच ॥ ॥ तेनैवं व्याहृते वाक्ये रेवत्यृक्षं पपात ह ॥ पश्यतः सर्वलोकस्य विस्मयाविष्टचेतसः ॥ १३७ ॥ ईश्वरेच्छाप्रभावेन पतिता गिरिमूर्द्धनि ॥ रेवत्यृक्षं निपतितं कुमुदाद्रौ समन्ततः ॥ १३८ ॥ सुराष्ट्रदेशे सं[1] प्राप्तः पतितो भूतले शुभे ॥ हिमाचलस्य पुत्रो य उज्जयंतो

१ सः—कुमुदाद्रिः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



गिरिर्महान् ॥ १३९ ॥ कुमुदेन समं मैत्री कृता पूर्वं परस्परम् ॥ यत्र त्वं स्थास्यसे स्थाता तत्राहमपि निश्चितम् ॥ १४० ॥ इति कृत्वा गृहीत्वाथ गंगावारि सयामुनम् ॥ सारस्वतं तथा पुण्यं सिंचितुं तं समागतः ॥ १४१ ॥ आहूतसंप्लुतं यावत्संस्थितौ तौ परस्परम् ॥ कुमुदाद्रिश्च तत्पाता त्ख्यातो रैवतकोऽभवत् ॥ १४२ ॥ अतीव रम्यः सर्वस्यां पृथिव्यां पृथिवीपते ॥ कुमुदाद्रिश्च सौवर्णो रेवतीच्यवनात्पुनः ॥ १४३ ॥ पंकजाभः स बाह्येन जातो वर्णेन भूपते ॥ मेरुवर्णः स मध्ये तु सौवर्णः पर्वतोत्तमः ॥ १४४ ॥ ततः सञ्जनयामास कन्यां रैवतको गिरिः ॥ रेवतीकांति संभूतां रेवतीसदृशाननाम् ॥ १४५ ॥ प्रमुंचोनाम[1] राजर्षिस्तेन दृष्टा वरांगना ॥ पितृवंद्रेवतीनाम कृतं तस्या नृपोत्तम ॥ १४६ ॥ रेवतीति च विख्याता सा सर्वत्र वरांगना ॥ सर्वतेजोमयं स्थानं सर्वतीर्थजलाश्रयम् ॥ १४७ ॥ गंगाजलप्रवाहैश्च संयुक्तं यामुनैस्तथा ॥ स्थितं सारस्वतं तोयं तत्र गर्तेषु तत्त्रयम् ॥ १४८ ॥ विख्यातं रेवतीकुंडं यत्र जाता च रेवती ॥ स्मरणाद्दर्शनात्स्नानात्सर्वपापक्षयो भवेत् ॥ १४९ ॥ सा बाला वर्द्धिता तेन प्रमुंचेन महात्मना ॥ यौवनं तु तया प्राप्तं तस्मिन्रैवतके गिरौ ॥ १५० ॥ तां तु यौवनसम्पन्नां दृष्ट्वाऽथ प्रमुचो मुनिः ॥ एकांते चिन्तयामास कोऽस्या भर्ता भविष्यति ॥ १५१ ॥ हूत्वाहूत्वा स पप्रच्छ गुरुं वह्निं द्विजोत्तमः ॥ प्रसादं कुरु मे ब्रूहि कोऽस्या भर्ता भविष्यति ॥ १५२ ॥ अन्योऽस्याः सदृशः कोऽपि वंशे नास्ति करोमि किम् ॥ वह्निकुण्डात्समुत्थाय प्रोक्तवान्हव्यवाहनः ॥ १५३ ॥ शृणु मे वचनं विप्र योऽस्या भर्ता भविष्यति ॥ प्रियव्रतान्वयभवो महाबलपराक्रमः ॥ १५४ ॥ पुत्रो विक्रमशीलस्य कालिंदीजठरोद्भवः ॥ दुर्दमोनाम भविता भर्ता ह्यस्या महीपतिः ॥ १५५ ॥ अत्रांतरे समायातो दुर्दमः स महीपतिः ॥ गिरौ मृगवधाकांक्षी मुनिं गेहे न पश्यति ॥ प्रियेऽयि तातः क गत एहि सत्यं ब्रवीहि मे ॥ १५६ ॥ ॥ नारद उवाच ॥ ॥ अग्निशालास्थितेनैव तच्छ्रुतं वचनं प्रियम् ॥ प्रियेत्यामन्त्रणं कोऽयं करोति मम वेश्मनि ॥ ॥ १५७ ॥ स ददर्श महात्मानं राजानं दुर्दमं मुनिः ॥ जहर्ष दुर्दमं दृष्ट्वा मुनिः प्राह स गौतमम् ॥ १५८ ॥ शिष्यं विनयसम्पन्नमर्घ्यं पाद्यं समानय ॥ एकं तावदयं भूपश्चिरकालादुपागतः ॥ १५९ ॥ जामाता सांप्रतं राजा योग्यास्य च सुता मम ॥ ततः स चिंतयामास राजा जामातृ कारणम् ॥ १६० ॥ मौनेन विधिना राजा जगृहेऽर्घ्यं द्विजाज्ञया ॥ तमासनगतं विप्रो गृहीतार्घ्यं महामुनिः ॥ १६१ ॥ प्रस्तुतं प्राह राजेन्द्रं नृपते कुशलं पुरे ॥ कोशे बले च मित्रे च भृत्यामात्यप्रजासु च ॥ तथात्मनि महाबाहो यत्र सर्वं प्रतिष्ठितम् ॥ १६२ ॥ पत्नी च ते कुश

[1] प्रम्लोचोनाम—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लिनी याऽत्र स्थाने हि तिष्ठति ॥ अन्यासां कुशलं ब्रूहि याः संति तव मंदिरे ॥ १६३ ॥ ॥ राजोवाच ॥ ॥ त्वत्प्रसादादकुशलं नास्ति राज्ये क्वचिन्मम ॥ जातकौतूहलोऽस्म्यस्मि[1] मम भार्याऽत्र का मुने ॥ १६४ ॥ ॥ प्रमुंच उवाच ॥ ॥ रेवती ते वरा भार्या किं न वेत्सि नृपोत्तम ॥ त्रैलोक्यसुन्दरी या तु कथं सा विस्मृता तव ॥ १६५ ॥ ॥ राजोवाच ॥ ॥ सुभद्रां शांतपापां च कावेरीतनयां तथा ॥ सुरात्मजानुजातां च कदंबां च वरप्रजाम् ॥ १६६ ॥ विपाठां नंदिनीं चैव वेद्मि भार्यां गृहे मम ॥ तिष्ठन्ति नैव जानामि भार्या मे रेवती कुतः ॥ १६७ ॥ ॥ ऋषिरुवाच ॥ ॥ प्रियेति सांप्रतं प्रोक्ता रेवती सा प्रिया तव ॥ तदन्यथा न भविता वचनं नृपसत्तम ॥ १६८ ॥ ॥ राजोवाच ॥ ॥ नास्ति भावकृतो दोषः क्षम्यतां तद्वचो मम ॥ विनिर्गतं वचो वक्त्रान्नाहं जाने द्विजोत्तम ॥ १६९ ॥ ॥ ऋषिरुवाच ॥ ॥ नास्ति भावकृतो दोषः परिवेद्मि कुरुष्व तत् ॥ वह्निना कथितस्त्वं मे जामाताद्य भविष्यसि ॥ १७० ॥ इत्यादिवचनै राजा भार्यां मेने स रेवतीम् ॥ ऋषिस्तथोद्यतः कर्तुं विवाहं विधिपूर्वकम् ॥ उवाच कन्या पितरं किञ्चिन्मे श्रूयतां पितः ॥ १७१ ॥ यदि मे पतिना तात विवाहं कर्तुमिच्छसि ॥ रेवत्यृक्षं विवाहं मे तत्करोतु प्रसादतः ॥ १७२ ॥ ॥ ऋषिरुवाच ॥ ॥ रेवत्यृक्षं न वै भद्रे चन्द्रयोगे दिवि स्थितम् ॥ ऋक्षाण्यन्यान्यपि संति सुभ्रूवैवाहकानि च ॥ १७३ ॥ ॥ ॥ कन्योवाच ॥ ॥ तात तेन विना कालो विकलः प्रतिभाति मे ॥ विवाहो विकले तात मद्विधायाः कथं भवेत् ॥ १७४ ॥ ॥ प्रमुञ्च उवाच ॥ ॥ ऋतवागिति विख्यातस्तपस्वी रेवतीं प्रति ॥ चकार कोपं क्रुद्धेन तेनर्क्षं तन्निपातितम् ॥ १७५ ॥ मया चास्मै प्रतिज्ञाता भार्येति विदितं तत्र ॥ न चेच्छसि विवाहं त्वं संकटं नः समागतम् ॥ १७६ ॥ ॥ कन्योवाच ॥ ॥ ऋतवागेव स मुनिः किमेतत्तप्तवान्स्वयम् ॥ न त्वया मम तातेन ब्रह्मबन्धोः सुताऽस्मि किम् ॥ १७७ ॥ ॥ ऋषिरुवाच ॥ ॥ ब्रह्मबन्धोः सुता न त्वं तपस्वी नास्ति मेऽधिकः ॥ सुता त्वं च मया देया नान्यत्कर्तुं समुत्सहे ॥ १७८ ॥ ॥ कन्योवाच ॥ ॥ तपस्वी यदि मे तातस्तत्किमृक्षमिदं दिवि ॥ समारोप्य विवाहो मे कस्मान्न क्रियते पुनः ॥ १७९ ॥ ॥ ऋषिरुवाच ॥ ॥ एवं भवतु भद्रं ते भद्रे प्रीतिमती भव ॥ आरोपयामीन्दुमार्गे रेवत्यृक्षं कृते तव ॥ १८० ॥ ततस्तपःप्रभावेन रेवत्यृक्षं महामुनिः ॥ यथा पूर्वं तथा चक्रे सोमयोगि[2] द्विजोत्तमः ॥ विवाहं दुहितुः कृत्वा जामातरमुवाच

१ अस्मि—अहम्--अस्मि--वर्ते--इत्यर्थः । अस्मीत्यहमर्थकं विभक्तिप्रतिरूपकमव्ययम् । २ सोमयोगि--चंद्रयुक्तम्--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ह ॥ १८१ ॥ औद्वाहिकं ते भूपाल कथ्यतां किं ददाम्यहम् ॥ दुष्प्रापमपि दास्यामि विद्यते मे महत्तपः ॥ १८२ ॥ ॥ राजोवाच ॥ ॥ मनोः स्वायंभुवस्याहमुत्पन्नः संततौ मुने ॥ मन्वंतराधिपं पुत्रं त्वत्प्रसादाद्वृणोम्यहम् ॥ १८३ ॥ ॥ ऋषिरुवाच ॥ ॥ भविष्यति महीपालो महाबलपराक्रमः ॥ रेवती रेवतीकुण्डे स्नात्वा पुत्रं जनिष्यति ॥ १८४ ॥ एवं कृत्वा गतो राजा सा च पुत्रमजीजनत् ॥ रैवतेति कृतं नाम बभूव स मनुर्नृपः ॥१८५॥ अमुना च तदा प्रोक्तमस्मिन्रैवतके गिरौ ॥ स्त्रियः स्नानं करिष्यंति तासां पुत्रा महाबलाः ॥ दीर्घायुषो भविष्यंति दुःखदारिद्र्य वर्जिताः ॥ १८६ ॥ ॥ नारद उवाच ॥ ॥ इत्युक्ते पर्वतो राजन्दीर्घो भूत्वा पपात सः ॥ एतौ तौ संस्मृतौ देवौ सभार्यौ हरिशंकरौ ॥ १८७ ॥ स्मृतमात्रौ तदाऽऽयातौ तेन बद्धौ पुरा यतः ॥ यत्राहं तत्र स्थातव्यं भवद्भ्यामिति निश्चितम् ॥१८८॥ अतो विष्णुहरौ देवौ स्थितौ तौ पर्वतोत्तमे ॥ गिरौ रैवतके रम्ये स्वर्णरेखानदीजले ॥ आराधयद्धरिं देवं रेवती तां च सोऽब्रवीत् ॥ १८९ ॥ भवताच्चंद्रयोगस्ते गगने ब्राह्मणाज्ञया ॥ अन्य द्वृणीष्व तुष्टोऽहं वरं मनसि यत्स्थितम् ॥ १९० ॥ ॥ रेवत्युवाच ॥ ॥ गिरौ रैवतके देव स्थातव्यं भवता सदा ॥ मया स्नानं कृतं यत्र तत्र स्नास्यंति ये जनाः ॥ १९१ ॥ तेषां विष्णुपुरे वासो भवत्विति वृतं मया ॥ एवमस्तु तदा प्रोच्य गिरौ रैवतके स्थितः ॥ दामोदरश्चतुर्बाहुः स्वयं रुद्रोऽपि संस्थितः ॥ १९२ ॥ गंगाद्याः सरितः सर्वाः संस्थिता विष्णुना सह ॥ क्षीरोदे मथ्यमाने तु यदा वृक्षः समुत्थितः ॥ १९३ ॥ आमर्दे देवदैत्यानां तेन सामर्दकी स्मृता ॥ अस्मिन्वृक्षे स्थिता लक्ष्मीः सदा पितृगृहे नृप ॥ १९४ ॥ शिवालक्ष्मीः स्मृतो वृक्षः सेव्यते सुरसत्तमैः ॥ देवैर्ब्रह्मादिभिः सर्वैर्वृक्षोऽसौ वैष्णवः स्मृतः ॥ १९५ ॥ सर्वैः संचिंत्य मुक्तोऽसौ गिरौ रैवतके पुरा ॥ अस्य वृक्षस्य यात्रां ये करिष्यंति हरेर्दिने ॥ १९६ ॥ फाल्गुने च सिते पक्ष एकादश्यां नृपोत्तम ॥ तेषां पुत्राश्च पौत्राश्च भविष्यंति गुणाधिकाः ॥ प्रांते विष्णुपुरे[२]वासो जायते नात्र संशयः ॥१९७॥ ॥ बलिरुवाच ॥ ॥ कथमेतद्व्रतं कार्यं वैष्णवं विष्णुवल्लभम् ॥ रात्रौ जागरणं कार्यं विधिना केन तद्वद ॥ १९८ ॥ ॥ नारद उवाच ॥ ॥ फाल्गुनस्य सिते पक्ष एकादश्यामुपोषितः ॥ स्नात्वा नद्यां तडागे वा वाप्यां कूपे गृहेऽपि वा ॥ १९९ ॥ गत्वा गिरौ वने वाऽपि यत्र सा प्राप्यते शिवा ॥ पूज्या पुष्पैः शुभै रात्रौ कार्यं जागरणं नरैः ॥ २०० ॥ अष्टाधिकशतैः कार्या फलैस्तस्याः प्रदक्षिणा ॥ प्रदक्षिणीकृत्य नगं भोक्तव्यं तु फलं नरैः ॥२०१॥ करकं जलपूर्णं तु कर्त्तव्यं पात्रसंयुतम् ॥ हविष्यान्नं तु कर्त्तव्यं दीपः कार्यो विधानतः ॥ २०२ ॥ एवं जागरणं

१ औद्वाहिकम्–विवाहे जामात्रे देयं प्राभृतकम्–"आंदण" इति महाराष्ट्रभाषाप्रसिद्धम्-इत्यर्थः । २ महोदयः–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कार्यं कथाश्रवणतत्परैः ॥ मुच्यंते देहिनः पापैः कलिजैः कायसंभवैः ॥ २०३ ॥ देहांते ते नराः सर्वे पूज्यंते हरिमंदिरे ॥ २०४ ॥ ॥ सारस्वत उवाच ॥ ॥ इत्युक्त्वा नारदो दैत्यं ययौ रैवतकं गिरिम् ॥ दैत्येन्द्रो मंत्रयामास किं कार्यं सांप्रतं मया ॥ २०५ ॥ न रोचते सुरैः सार्द्धं विग्रहो मे सुरोत्तमाः ॥ २०६ ॥ ॥ मंत्रिण ऊचुः ॥ ॥ नास्ति क्षमा भृशं तेषां क्षत्रियाणां गृहे सताम् ॥ अशक्तमपि मंस्यंते स्वयमायांति ते यतः ॥ तस्मात्स्वयं प्रयास्यामो देवेन्द्रं सहिता वयम् ॥ २०७ ॥ इति श्रुत्वा ददौ ढक्कां प्रथमं सुरविग्रहे ॥ गृहीत्वा वाहिनीं दैत्याः प्रस्थिता मेरुपर्वते ॥ २०८ ॥ यत्र सा नगरी रम्या देवराजस्य पूर्वतः ॥ आगच्छमानां तां ज्ञात्वा वाहिनीं मेरुपर्वते ॥ २०९ ॥ देवराजसमादेशाच्चलिता देववाहिनी ॥ सुमेरोः पूर्वदिग्भागे युद्धमासीत्परस्परम् ॥ २१० ॥ देवसैन्यं यदा सर्वं दैत्यसैन्येन संयुतम् ॥ महाप्रलयसादृश्यं युद्धं वृत्तं तदा तयोः ॥ ॥ २११ ॥ ऐरावणं समारुह्य देवराजः समागतः ॥ रथमारुह्य दैत्येन्द्रो युद्धायान्ये समागताः ॥ २१२ ॥ देवा यज्ञभुजो यस्मात्तस्मान्न युद्धकांक्षिणः ॥ ऐरावणो बलिं दृष्ट्वा न चचालाग्रतो मृधे ॥ २१३ ॥ संग्रामे विमुखो याति दिग्गजैः परिवेष्टितः ॥ अध्वरे बाहुना येन संकल्पं कृतवान्बलिः ॥ २१४ ॥ तेन वै स सुरान्सर्वान्वारयामास संयुगे ॥ वारिता विमुखा यांति देवराजः करोतु किम् ॥ २१५ ॥ कुलिशं न कुरुते कर्म भुजमुक्तं न गच्छति ॥२१६॥ एवं वहूनि युद्धानि निवृत्तानि तदा तयोः ॥ न हंतुं शक्यंते युद्धे देवैर्दैत्या महाबलाः ॥ २१७ ॥ बलाकांक्षाः स्थिता देवा गुरुणा ते प्रबोधिताः॥ अमरा देवताः सर्व इति शुक्रेण वारिताः ॥ २१८ ॥ अवतारं हरेर्ज्ञात्वा पञ्चमं वामनं स्थितम् ॥ अतिहृष्टोऽमरावत्यां राज्यं चक्रे सुरेश्वरः ॥ २१९ ॥ ननर्त्त युद्धे दैत्येन्द्रः स्वगृहे यजते सुरान् ॥ पातालाभिसृता दैत्या राज्यं कुर्वंति मानवाः ॥ २२० ॥ तदा देवगणाः सर्वे मन्त्रयन्ति सुरैः सह ॥ दैत्यो लोकद्वयं शास्ति स्वर्गं शास्ति सुरेश्वरः ॥ २२१ ॥ क्षंतव्यं तावदेवास्य वामनो रैवतं गिरिम् ॥ यावद्याति सुरैः कार्यं मौनं दैत्यजितैरपि ॥ २२२ ॥ यदाप्रभृति सञ्जातो वामनो धरणीतले ॥ तदाप्रभृति दैत्यानां दुर्निमित्तानि जज्ञिरे ॥ २२३ ॥ शिवा प्रविश्य नगरे रौति सा विस्वरं निशि ॥ भ्रमन्ति नगरे काका दिवारात्रं विराविणः ॥ २२४ ॥ सर्प्पाः सर्प्पंति गेहेषु कृष्णा रौद्रा विषोल्बणाः ॥ कंका गृध्रा बका भ्रांता भ्रमन्ति नगरोपरि ॥ २२५ ॥ जायन्ते विमुखा गर्भाः स्त्रीषु गोषु मृगीषु वा ॥ घृतं दुग्धं च नैवास्ति तिले तैलं न विद्यते ॥ २२६ ॥ जने जानपदो नित्यं युध्यते च परस्परम् ॥ काली करालवदना दीर्घकेशी विलोचना ॥ २२७ ॥ अज्ञाता रुदती याति नगरे सा गृहं प्रति ॥ कोऽयं न ज्ञायते कस्मात्तपस्वी भस्मगुंठितः ॥ २२८ ॥ यतिर्मौनव्रती नग्नः पुरो याति गृहेगृहे ॥ डमरूड्डामरुं पश्चाद्धुंकारं विदधाति च ॥२२९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





अकाले कुपिता मेघा जलं मुञ्चंति पुष्कलम् ॥ करकैः पूरिता गर्भा गर्जंति गिरयो बहु ॥ २३० ॥ समजायत भूकंपो दिग्दाहश्चाप्यजायत ॥ मिलित्वा श्वगणः सर्वो मुखमुच्चैर्विधाय च ॥ २३१ ॥ रौति रात्रौ पुरे नित्यं घूकः शब्दं विशब्दते ॥ बलिराज्यक्षयो जातो दिवि केतूदयो निशि॥ ॥ २३२ ॥ आदित्यमण्डले वेधः कीलकैर्दृश्यते कृतः ॥ कबन्धसंकुले व्योम्नि चन्द्रमा न प्रकाशते ॥ २३३ ॥ स जातो रोहिणीवेधो यो जातो युगव्यत्यये ॥ नक्षत्राणि दिवा लोकैर्गण्यन्ते गुणवत्तरैः ॥ २३४ ॥ बीजानां व्यत्ययो जज्ञे भूमिस्त्रीगोमृगीषु च ॥ अश्वा ह्रेषंति सहसा मदं कुर्वंति नो गजाः ॥ २३५ ॥ मन्त्रिणां मंत्रितो मन्त्रो भिद्यते राज्यसंक्षये ॥ घृताहुत्या हुतो वह्निर्ज्वलति न तदा द्विजैः ॥ २३६ ॥ प्रचण्डः पावनो वाति वात्यया घूर्णितद्रुमः ॥ ध्वजा ज्वलन्ति चैत्येषु नभो भवति धूसरम् ॥ २३७ ॥ एते चान्ये च बहव उत्पाता बलिनो गृहे ॥ संजाता वामने जाते नारदागमनादनु ॥ २३८ ॥ अन्यच्च[1] जायते रौद्रं यद्दिवा[2] स्वप्नदर्शनम् ॥ संनह्यंते यदा दैत्याः पतिता निपतंति च ॥ २३९ ॥ निमित्तानि स सैन्यस्य दृष्ट्वैवं न प्रवर्त्तते ॥ सदा संतिष्ठते गेहे राज्यं च कुरुते बलिः ॥ २४० ॥ शरीरे न सुखं तस्य गात्रभंगः शिरोव्यथा ॥ ज्वरितो न सुखं शेते न भुंक्ते न पिबत्यसौ ॥ न भुक्तं जीर्यते लोकः सर्वोपि व्याकुलीकृतः ॥२४१॥ विपरीतं जगद्दृष्ट्वा बलिर्व्याकुलमानसः ॥ मन्त्रयामास किमिदं ब्राह्मणैः सह दुःखितः ॥ २४२ ॥ शुक्रं गुरुं समानीय सभायां संनिवेश्य च ॥ पप्रच्छ कुशलं दैत्यो भक्त्या परमया युतः ॥ विपरीतमिदं सर्वं वर्त्तते तद्वदस्व मे ॥ २४३ ॥ नारदेन यदुक्तं मे गुरो सत्यं भविष्यति ॥ उत्पातशांतिकं ब्रूहि ब्राह्मणैः सहितो मम ॥ २४४ ॥ ॥ शुक्र उवाच ॥ ॥ उत्पातशांतये कार्यो यज्ञः सर्वस्वदक्षिणः ॥ ब्राह्मणैः क्षत्रियैः सार्द्धं द्वादशाब्दो विधीयताम् ॥ २४५ ॥ ऋषयो ब्राह्मणा ये च मुनयो ब्रह्मचारिणः ॥ आगच्छन्तु महायज्ञे ये च दूरेऽपि संस्थिताः ॥ २४६ ॥ नगरात्पूर्वदिग्भागे कर्त्तव्यो यज्ञमण्डपः ॥ यस्य यस्याभिरुचितं देयं दानं त्वया नृप ॥ तथा करिष्य इत्युक्त्वा यज्ञार्थं तत्परोभवत् ॥ २४७ ॥ आनाय्य ब्राह्मणान्सर्वान्कुशलान्यज्ञकर्मणि ॥ गृहीता यज्ञदीक्षा तैर्यज्ञे वै सर्व दक्षिणे ॥ २४८ ॥ ब्राह्मणाय मया देयं सर्वस्वमिह याचिते ॥ शरीरपुत्रमित्राणि दारान्दास्यामि याचितः ॥ २४९ ॥ दातव्यं सततं दानं ब्राह्मणेभ्यो मयाध्वरे ॥ वारितेनापि न स्थेयं दातव्यं निश्चितं मया ॥ याचितश्चेन्न दास्यामि तदा व्यर्थो ममाऽध्वरः ॥२५०॥ विधाय मण्डपं दिव्यं बहुयोज नविस्तरम् ॥ तत्र दानानि दीयन्ते भोजनाच्छादनानि च ॥२५१॥ सतर्षयः समायाता गगनाद्धरणीतले ॥ दिग्भ्यः समागताः सर्वे ब्राह्मणाः संति

१ अन्यत्र–इ० पा० । २ यदि–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ये भुवि ॥ २९२ ॥ क्षत्रियाश्च समायाता विगृह्य विविधं वसु ॥ निवेदयन्ति ते राज्ञे प्रारब्धे यज्ञकर्मणि ॥ २९३ ॥ आसमुद्रात्समायाता नटनर्त्त कयाचकाः ॥ गीतवादित्रनिर्घोषो वेदध्वनिविमिश्रितः ॥ २९४ ॥ त्रैलोक्यं बधिरीचक्रे देहिदेहीति याचितम् ॥ मा देहीति वचो नास्ति स्तोकं देहीति चैव न ॥ २९५ ॥ यद्यद्यो याचते वस्तु तत्तस्मै तत्र दीयते ॥ ब्राह्मणो हि न सोऽप्यस्ति योहि तं बहु याचते ॥ २९६ ॥ भोजनाच्छादनार्थं च न गृह्णंति द्विजातयः ॥ सुवर्णरत्नरौप्याणि तथाश्वरथकुंजरान् ॥२९७॥ गृहगोभूमिग्रामांश्च न गृह्णंति द्विजातयः ॥ बलिराज्येन संतुष्टाः किं कुर्वंति धनेन ते ॥ २९८ ॥ एवं प्रवर्तते यज्ञो महान्सर्वस्वदक्षिणः ॥ २९९ ॥ नृत्यंति गायंति पठंति चान्ये स्तुवंति यज्ञं बहुदानयुक्तम् ॥ ब्रह्मेन्द्र रुद्रग्रहसूर्यचंद्राः प्रसादिता आहुतिभिश्च मन्त्रैः ॥ २६० ॥ बलिं प्रशंसंति[1] गुरुं तथान्ये होतारमेके परिवारमेके ॥ प्रजापतेर्नापि सुराधिपस्य समाप्यते चेदथ यास्यति ध्रुवम्॥ प्रदाय राज्यं द्विजपुंगवेभ्यः सपुत्रमित्रैः सहितो रसातलम् ॥२६१॥ इतीति वाचः प्रवदंति वाडवाः शृण्वंति दैत्याः किमिदं वदंति ॥ बलेः पुरःस्थाः कथयंति संगता बलिः प्रहृष्टः प्रददाति याचितम् ॥ २६२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे द्वितीये वस्त्रापथक्षेत्रमाहात्म्ये बलियज्ञप्रभाववर्णनंनाम सप्तदशोऽध्यायः ॥ १७ ॥ ॥ राजोवाच ॥ ॥ वस्त्रापथे महाक्षेत्रे सम्प्राप्तो वामनो यदा ॥ तदाप्रभृति किं चक्रे तन्मे विस्तरतो वद ॥ १ ॥ ॥ सारस्वत उवाच ॥ ॥ वामनो वसतिं चक्रे भवस्याग्रे नृपोत्तम ॥ स्वर्णरेखाजले स्नात्वा भवं सम्पूज्य भावतः ॥ २ ॥ एकांते निर्मले स्थाने कण्टकास्थिविवर्जिते ॥ कृष्णाजिनपरिच्छन्न उपविष्टो वरासने ॥ ३ ॥ कृत्वा पद्मासनं धीरो निश्चलोऽभूद्द्विजोत्तमः ॥ विधाय कन्धराबंधमृजुनासावलोककः ॥ ४ ॥ गृहक्षेत्रकलत्राणां चिंतां मुक्त्वा धनस्य च ॥ मायां च वैष्णवीं त्यक्त्वा कृतमौनो जितेन्द्रियः ॥ ५ ॥ निराहारो जितक्रोधो मुक्तसंसारबंधनः ॥ भुजौ पद्मासने कृत्वा किञ्चिन्मीलितलोचनः ॥ मनोतिचंचलं ज्ञात्वा स्थिरं चक्रे हृदि द्विजः ॥ ६ ॥ क्रमेणाभ्यासयोगेन भिन्नांश्चक्रे स चैकतः ॥ प्राणापानव्यानोदानसमानाख्यांश्च मारुतान् ॥ ७ ॥ एवं तं[2] हृदये कृत्वा गृहीत्वा सर्वसन्धिषु ॥ आनीय ब्रह्मणः स्थाने दृढं ब्रह्मण्ययोजयत् ॥ ८ ॥ गृहीत्वा पवनं बाह्यं यदा पूरयते तनुम् ॥ तदा स पूरको ज्ञेयो रेचकं तु वदाम्यहम् ॥ ९ ॥ यदा चाभ्यन्तरो वायुर्बाह्ये याति क्रमान्नृप ॥ तदा स रेचको ज्ञेयः स्तम्भनात्कुम्भको भवेत् ॥ १० ॥ पञ्चविंशतितत्त्वानि यदा जानंति योगिनः ॥ मुच्यन्ते पातकैः सर्वैः सप्तजन्मकृतैरपि ॥ ११ ॥ ॥ राजोवाच ॥ ॥

१ प्रशंसंति—यतः—इति पदद्वयमत्राध्याहर्तव्यम् । २ तम्—वायुम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





कानि तत्त्वानि को देही किं ज्ञेयं योगिनां वद ॥ उत्पन्नज्ञानसद्भावो योगयुक्तः कथं भवेत् ॥ १२ ॥ ॥ ईश्वर उवाच ॥ ॥ प्रकृतिश्च ततो बुद्धिरहंकारस्ततोऽभवत् ॥ तन्मात्रपंचकं तस्मादेषा प्रकृतिरष्टधा ॥ १३ ॥ बुद्धीन्द्रियाणि पञ्चैव पञ्च कर्मेंद्रियाणि च ॥ एकादशं मनो विद्धि महाभूतानि पंच च ॥ १४ ॥ गणः षोडशकः सांख्ये विस्तरेण प्रकीर्तितः ॥ चतुर्विंशतितत्त्वानि पुरुषः पंचविंशकः ॥ १५ ॥ देहीति प्रोच्यते देहे स चात्मानं च पश्यति ॥ विंदन्ति परमात्मानं षष्ठं[1] तं विंशतेः परम् ॥ १६ ॥ आसनादिप्रकारा ये ते ज्ञेयाः प्रथमं सदा ॥ यदा दीपशिखाप्रायं ज्योतिः पश्यंति ते हृदि ॥ १७ ॥ उत्पन्नज्ञानसद्भावा भण्यास्ते योगिनो बुधैः ॥ पूर्वं जरां जरयति रोगा नश्यति दूरतः ॥ १८ ॥ सर्वपापचये क्षीणे पश्चान्मृत्युं स विंदति ॥ मृतो लोके नरो नास्ति योगी जानाति चेत्स्वयम् ॥ १९ ॥ तदा द्वाराणि संरुद्ध्य दश प्राणान्स मुञ्चति ॥ पुण्यपापक्षयं कृत्वा प्राणा गच्छंति योगिनाम् ॥ अणिमादिगुणैश्वर्यं प्राप्नुवंति शिवालये ॥ २० ॥ अनेन ध्यानयोगेन भवं पश्यति मानवः ॥ मनसा चिंतितं सर्वं सम्प्राप्तं भवदर्शनात् ॥ २१ ॥ एवमास्ते यदा विप्रो वामनो भवसन्निधौ ॥ गगनादवतीर्णं तं तदा पश्यति नारदम् ॥२२॥ ॥ वामन उवाच ॥ ॥ महर्षे कुशलं तेऽद्य कस्मादागम्यते त्वया ॥ प्रणमामि महर्षे त्वां ब्रह्मेव त्वं जगत्त्रये ॥ २३ ॥ ॥ नारद उवाच ॥ ॥ स्वर्गलोकादहं प्राप्तः कुशलं किं ब्रवीमि ते ॥ २४ ॥ यातायातैर्दिनेशस्य पूर्यते ब्रह्मणो दिनम् ॥ दिनांते जायते रात्री रात्रौ नश्यंति देवताः ॥ २५ ॥ का कथा मृत्युलोकस्य ये म्रियंते दिनेदिने ॥ नभो धूमाकुलं जातं देवा बलिगृहे गताः ॥ २६ ॥ सप्तर्षयो गतास्तत्र ब्राह्मणा ब्रह्मचारिणः ॥ हाहाहूहूस्तुंबरुश्च गतौ नारदपर्वतौ ॥ २७ ॥ अप्सरोगणगन्धर्वाः संप्राप्ता बलिमंदिरे ॥ उत्पातशांतिको यज्ञः क्रियते बलिना स्वयम् ॥ २८ ॥ तत्रैव गन्तुमिच्छामि द्रष्टुं यज्ञं बलेर्गृहे ॥ सहस्रमेकं यज्ञानामेकोनं विदधे बलिः ॥ २९ ॥ दैत्यानां भुवनं सर्वं संपूर्णेऽस्मिन्भविष्यति ॥ असावतिशयः कोऽपि प्रारब्धो यज्ञकर्म्मणि ॥ द्विजातिभ्यो मया देयं येन यद्याच्यते स्वयम् ॥ ३० ॥ वारितेनापि मे देयं सत्यमस्तु वचो मम ॥ आत्मानमपि दारांश्च राज्यं पुत्रान्प्रियान्मम ॥ ३१ ॥ प्रार्थितश्चेन्न दास्यामि व्यर्थो भवतु मेऽध्वरः ॥ अनेन वचसा जाता महती मे शिरोव्यथा ॥ प्रतिज्ञाय कथं यज्ञः संपूर्णोऽयं भविष्यति ॥ ३२ ॥ भंगोपायं न पश्यामि भ्रमामि भुवनत्रये ॥ विध्वंसकारिणं ज्ञात्वा भवंतं पर्युपस्थितः ॥ ३३ ॥ यथा न पूर्यते यज्ञस्तथेदानीं विधीयताम् ॥ ३४ ॥ ॥ वामन उवाच ॥ ॥ महर्षे शृणु मे वाक्यं

१ षष्ठं तं विंशतेः परम्--विंशतेः परं षष्ठम्--षड्विंशम्--इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

का शक्तिर्मम विद्यते ॥ कोऽहं कस्मात्करिष्यामि यज्ञे देवाः समागताः ॥ ३५ ॥ ऋषयो ब्राह्मणाः सर्वे कथं व्यर्थो भविष्यति ॥ अपरं शृणु मे वाक्यं ब्रह्मर्षे ब्रह्मणस्पते ॥ ३६ ॥ न कलत्रं न ते पुत्राः कस्मात्प्रकृतिरीदृशी ॥ युद्धं विना न ते सौख्यं न सौख्यं कलहं विना ॥ ३७ ॥ यादृशस्तादृशो वाऽपि वाग्वादोऽपि सदा प्रियः ॥ स्नानं संध्या जपो होमस्तर्पणं पितृदेवयोः ॥ ३८ ॥ नारदः कुरुते चान्यदन्यत्कुर्वंति ब्राह्मणाः ॥ ममापि कौतुकं जातं महर्षे वद सत्वरम् ॥ ३९ ॥ ॥ नारद उवाच ॥ ॥ पाद्मकल्पे व्यतिक्रांते रात्र्यंते शृणु वामन ॥ ब्रह्माण्डं वारिणा व्याप्तमन्यत्किंचिन्न विद्यते ॥ ४० ॥ अप्सु शेते देवदेवः स च नारायणः स्मृतः ॥ स ब्रह्मा स शिवो नास्ति भेदस्तेषां परस्परम् ॥ ४१ ॥ यदा भवंति ते भिन्नास्तदा देवत्रयं च ते ॥ कर्तुं वाराहकल्पं तु भिन्ना जातास्त्रयस्तदा ॥ ४२ ॥ ब्रह्मविष्णुहरा देवा रजःसत्त्वतमोमयाः ॥ सृष्टिं ब्रह्मा करोत्येवं तां च पाल्यते हरिः ॥४३॥ हरः संहरते सर्वं त्रैलोक्यं सचराचरम् ॥ एवं प्रवर्त्य देवेश उपविष्टा वरासने ॥ कैलासशिखरे रम्ये मंत्रयंति परस्परम् ॥४४॥ त्रयाणां को वरो देवः को ज्येष्ठः को गुणाधिकः॥ चतुर्थो नास्ति यो वेत्ति[1] सहसा[2] ते त्रयः स्थिताः॥४५॥तेभ्यः समुत्थितं ज्योतिरेकीभूतं तदं बरे॥ कालमानेन युक्तं तद्भ्राम्यते रविमंडलम् ॥४६॥ अहं ज्येष्ठो ह्यहं ज्येष्ठो वादोऽभूद्धरब्रह्मणोः ॥ द्वयोर्विवदतोः क्रोधात्संजातोऽहं मुखात्प्रभो ॥ ४७ ॥ कथं देव न जानासि यदुक्तं ब्रह्मणा तदा ॥ दशावतारास्ते रंतुं[3] मत्स्यकूर्मादयः पुरा ॥ ४८ ॥ रुद्रेण वारिता गत्वा कलहो वो न युज्यते ॥ तथैव कृतवान्विष्णुरवतारान्दशैव तान् ॥ ४९ ॥ कल्पादौ ब्रह्मणो वक्त्रात्संजातोऽहं द्विजोत्तम ॥ कलहाज्जन्म मे यस्मात्तस्मान्मे कलहः प्रियः ॥ ५० ॥ कल्पादौ सृजता पूर्वं चिन्वितं ब्रह्मणा स्वयम् ॥ वेदान्तिना कथं सृष्टिः कर्त्तव्याऽद्यो हरे मया ॥ ५१ ॥ नष्टान्वेदान्न जानामि क्व वेदास्ते गता इति ॥ पृथ्वीमपि न जानामि किं स्थाने किमधो गता ॥ ५२ ॥ गंतुं न विद्यते शक्तिर्जलमध्ये ममाधुना ॥ अवतारैस्त्वया कार्यं दशभिः सृष्टिरक्षणम् ॥ ५३ ॥ जले जलेचरो मत्स्यो महानद्यां भविष्यसि ॥ आदाय वेदान्वेगेन मम त्वं दातुमर्हसि ॥ ५४ ॥ तथा च कृतवान्देवो मत्स्यरूपं जले महत् ॥ वेदान्समानयामास ददौ च ब्रह्मणे पुरा ॥ कूर्मरूपं पुनः कृत्वा मंदरं धारयिष्यसि ॥ ५५ ॥ इत्युक्तो ब्रह्मणा विष्णुर्लक्ष्मीस्त्वां वरयिष्यति ॥ पुरा चित्रं चरित्रं ते मथने दृष्टवानहम् ॥५६॥ यदा रसातलं प्राप्ता पृथिवी नैव दृश्यते ॥ ब्रह्मांडार्थे स्थानकृते तत्र सा नैव दृश्यते ॥ ॥ ५७॥ वाराहं क्रियतां रूपं ब्रह्मणा प्रेरितः स्वयम् ॥ महावराहरूपं स कृत्वा भूमेरधो गतः ॥ ५८ ॥ उद्धृत्य च तदा विष्णुर्दंष्ट्राग्रेण वसुंधराम् ॥

१ यो वेत्ति—अस्माकं मध्ये को ज्येष्ठत्वादिगुणवानिति—इत्यर्थसंबंधो बोद्धव्यः । २ इत्युक्त्वा—इति शेषः । ३ रंतुम्—क्रीडितुम्—पुरा—परस्परं व्यवदन्त—इति शेषः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



स निनाय यथास्थानं मुस्तां व धरणीतलात् ॥ ५९ ॥ अवतारं तृतीयं वै हरस्यापि मनोहरम् ॥ येन सा पृथिवी पृथ्वी पर्वतैः सहिता धृता ॥६०॥ चतुर्थं नरसिंहं वै कथयामि सुदारुणम् ॥ आदित्या अदितेः पुत्रा दितेः पुत्रौ महाबलौ ॥ ६१ ॥ हिरण्यकशिपुर्दैत्यो हिरण्याक्षो महाबलः ॥ स्वर्गे देवाः स्थिताः सर्वे पाताले दैत्यदानवाः ॥ ६२ ॥ हिरण्यकशिपुश्चक्रे दैत्यो राज्यं रसातले ॥ मनुपुत्रा धरापृष्ठे स्थापिता देवदानवैः ॥ ६३ ॥ व्यवस्थां तामतिक्रम्य हिरण्यकशिपुर्द्विज ॥ राज्यं चक्रे धरापृष्ठे सुरेन्द्रं स विजित्य च ॥ ६४ ॥ सप्तद्वीपवतीं पृथ्वीं गृहीत्वा साऽमरावतीम्॥ ग्रहीतुकामो बुभुजे पुत्रपौत्रैः कृतादरः ॥ ६५ ॥ प्रह्लादप्रमुखान्पुत्रान्स पीडयति मंदधीः ॥ पुत्रेषु पाठ्यमानेषु प्रह्लादोऽपि पपाठ तत् ॥ ६६ ॥ येन वै पठ्यमानेन जायते तस्य वेदना ॥ भुवनद्वयराज्येन दैत्यो देवान्न मन्यते ॥ ६७ ॥ तपसा तोषितो ब्रह्मा ददौ तस्मै वरं प्रभुः ॥ अमरत्वं स देवेभ्यो मनुष्येभ्यः सुरोत्तम ॥ ६८ ॥ कस्मादपि न मे भूयान्मरणं यदि चेद्भवेत् ॥ किंचित्सिंहो नरः किंचिद्यो भवेद्धरणीधरः ॥ ६९ ॥ तस्मात्करुहैर्भिन्नो मरिष्ये न धरातले ॥ एवं भविष्यतीत्युक्त्वा गतो ब्रह्मा च विस्मयम् ॥ ७० ॥ कालेन गच्छता तस्य संजातो विग्रहो महान् ॥ देवाः किं मे करिष्यंति विष्णुना किं प्रयोजनम् ॥ ७१ ॥ यष्टव्योऽहं सदा यज्ञै रुद्रः किं मे करिष्यति ॥ एवं हि वर्त्तमानस्य प्रह्लादः स्तौति तं हरिम् ॥ ॥ ७२ ॥ येनास्य जायते मृत्युस्तमेव स्मरते हरिम् ॥ यदासौ वार्यमाणोऽपि विरौति च हरिं हरिम् ॥ ७३ ॥ चतुर्भुजं शंखगदासिधारिणं पीतांबरं कौस्तुभलाञ्छितं सदा ॥ स्मरामि विष्णुं जगदेकनायकं ददाति मुक्तिं स्मृतमात्र एव यः ॥ ७४ ॥ अनेन वचसा क्षुब्धो दैत्यो दैत्यान्दिदेश ह ॥ मारयध्वं तु तं दुष्टं गज सर्पजलाग्नितः ॥ ७५ ॥ ॥ प्रह्लाद उवाच ॥ ॥ गजेपि विष्णुर्भुजगेऽपि विष्णुर्जलेऽपि विष्णुर्ज्वलनेऽपि विष्णुः ॥ त्वयि स्थितो दैत्य मयि स्थितश्च विष्णुं विना दैत्यगणोऽ[1]पि नास्ति ॥ ७६ ॥ यदा स मार्यमाणोऽपि मृत्युं प्राप्नोति न क्वचित् ॥ हिरण्यकशिपोर्वक्षो दह्यते क्रोधवह्निना ॥ तदा शिक्षयितुं पुत्रं मुखाग्रे संनिवेश्य च ॥ ७७ ॥ वचोभिः कठिनैः पुत्रं स्वयं हन्तुं समुद्यतः ॥ धिक्त्वां नारायणं स्तौषि ममारिं स्तौषि चेत्पुनः॥७८॥ पुष्पलावं[2] लविष्यामि शिरस्तेऽहं वरासिना ॥ अहं विष्णुरहं ब्रह्मा रुद्र इन्द्रो वरं वद॥७९॥ आत्मीयं पितरं मुक्त्वा कमन्यं स्तौषि बालक ॥ ८० ॥ यदा न पठते बालः स्तौति नो पितरं स्वकम् ॥ दण्डेनाहत्य गुरुणा प्रह्लादः प्रेरितः पुनः॥ वदैकं वचनं शिष्य देहि मे गुरुदक्षिणाम् ॥ ८१ ॥ यथा मे तुष्यते स्वामी ददाति विपुलं धनम् ॥ ८२ ॥ ॥ प्रह्लाद उवाच ॥ ॥ प्रहरस्व प्रथमं

१ दैत्यगणः किमस्ति—इ० पा० । २ पुष्पलावं लविष्यामि—पुष्पवच्छेत्स्यामि—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मां करिष्ये वचनं गुरो ॥ स्तौमि विष्णुमहं येन त्रैलोक्यं सचराचरम् ॥ ८३ ॥ कृतं संवर्द्धितं शांतं स मे विष्णुः प्रसीदतु ॥ ब्रह्मा विष्णुर्हरो विष्णु रिन्द्रो वायुर्यमोऽनलः ॥८४॥ प्रकृत्यादीनि तत्त्वानि पुरुषं पंचविंशकम् ॥ पितृदेहे गुरोर्देहे मम देहेऽपि संस्थितः ॥ ८५ ॥ एवं जानन्कथं स्तौमि म्रियमाणं नराधमम् ॥ ८६ ॥ ॥ गुरुरुवाच ॥ ॥ नरेषु कोऽधमः शिष्य जन्मादिमरणेऽधम ॥ कथं न पितरं स्तौषि म्रियमाणो हरिं हरिम् ॥ ॥ ८७ ॥ ॥ प्रह्लाद उवाच ॥ ॥ भोजने शयने याने ज्वरे निष्ठीवने रणे ॥ हरिरित्यक्षरं नास्ति मरणेऽसौ नराधमः ॥ ८८ ॥ भये राज कुले युद्धे व्याधौ स्त्रीसंगमे वने ॥ अशक्तौ वाऽथ संन्यासे मरणे भूमिसंस्थिताः ॥ स्मरंति मातरं मूर्खाः पितरं च नराधमाः ॥८९॥ माता नास्ति पिता नास्ति नास्ति मे स्वजनो जनः ॥ हरिं विना न कोऽप्यस्ति यद्युक्तं तद्विधीयताम् ॥ ९० ॥ इत्यादिवचनैः क्रुद्धो हन्तुं दैत्यः समुत्थितः॥ तदा माता समागत्य पुत्रस्य पुरतः स्थिता ॥९१॥ भ्रातरः स्वजनो भगिनी भाषते मा हरिं वद ॥ अहं माता स्वसा चेयं भ्रातरः स्वजनो जनः ॥ यथा संमिलितैर्वत्स स्थीयते बहुवासरम् ॥ ९२ ॥ ॥ प्रह्लाद उवाच ॥ ॥ माता मे का स्वसा मे का भ्रातरः के पिता च कः ॥ स्वजनं शृणु मे मातः सहितैः स्थीयते सदा ॥ ९३ ॥ यस्याः पीतं मया मूत्रं पुरीषमुदरे बहु ॥ सा माता नरकोऽस्माकमग्रे वक्तुं न शक्यते ॥ ९४ ॥ निर्मितो न द्वितीयस्तु निर्मितो विश्वकर्मणा ॥ त्वादृशस्तु पुमान्कश्चिद्यस्य नो हृदये हरिः ॥ ९५ ॥ दशमासं ध्रुवं मन्ये मूत्रं पास्यति तर्पितः ॥ भ्रातरो भ्रातरः सत्यं गर्भेऽपि स्युः कथं यदि ॥ ९६ ॥ युध्यतस्तान्कथं माता वराकी वारयिष्यति ॥ स्वजनो दृश्यते वृद्धः परेषु पण्डितायते ॥ ९७ ॥ कुटुंबं भण्यते कस्माद्यश्च नायाति याति च ॥ बंधनं च कुटुम्बस्य जायते नरकाय नः ॥ ९८ ॥ माता मे विद्यते चान्या पितान्यो भ्रातरश्च ये॥ स्वसा स्वजनसम्बन्धं ज्ञात्वा मुक्तिमवाप्नुयात् ॥ ९९ ॥ माता प्रकृतिरस्माकं[1] स्वसा बुद्धिर्निगद्यते ॥ अहंकारस्ततो जातो योऽहमित्यनुमीयते ॥ ॥ १०० ॥ तन्मात्राः सोदराः पञ्च ये गच्छन्ति सहैव मे ॥ एषा प्रकृतिरस्माकं विकारः स्वजनो मम ॥ १०१ ॥ एतेषां वाहको यस्तु पुरुषः पञ्च विंशकः ॥ स मे पिता शरीरेऽस्मिन्परमात्मा हरिः स्थितः ॥ १०२ ॥ यद्यसौ चिन्त्यन्ते चित्ते दृश्यते हृदये हरिः ॥ अणिमादिगुणैश्वर्यं पदं तस्यैव जायते ॥ १०३ ॥ भवता सम्मतं राज्यं तन्मे नित्यं तृणैः समम् ॥ यत्र नो पूज्यते विष्णुर्ब्रह्मा रुद्रोऽनिलोऽनलः ॥ १०४ ॥ प्रत्यक्षो दृश्यते यस्तु निरालम्बो भ्रमत्यसौ ॥ स एव भगवान्विष्णुर्य एते गगने स्थिताः ॥ १०५ ॥ ध्रुवे बद्धा ग्रहाः सर्वे य एतेऽप्युडवः स्थिताः ॥ ते सर्वे विष्णुव

१ माता प्रकृतिरेवेयम्—इ० पा० । २ स मे विष्णुर्गतिर्ध्रुवम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



चषा न पतंति धरातले ॥ १०६ ॥ काले विनाशः सर्वेषां तेनैव विहितः स्वयम् ॥ इति संचिंत्य मे नास्ति भवद्भ्यो मरणाद्भयम् ॥ १०७ ॥ इति
तद्वचनस्यांते पदा हत्वा पिताऽब्रवीत् ॥ कुत्राऽसौ हन्मि तं पूर्वं पश्चात्त्वां हरिभाषिणम् ॥ १०८ ॥ ॥ प्रह्लाद उवाच ॥ ॥ पृथिव्यादीनि
भूतानि तान्येव भगवान्हरिः ॥ स्थले जले किं बहुना सर्वं विष्णुमयं जगत् ॥ १०९ ॥ तृणे काष्ठे गृहे क्षेत्रे द्रव्ये देहे स्थितो हरिः ॥
ज्ञायते ज्ञानयोगेन दृश्यते किं नु चक्षुषा[1] ॥ ११० ॥ ब्रह्मालये याति रसातले वा धरातलेऽसौ भ्रमति क्षणेन ॥ आघ्राति
गन्धं विदधाति सर्वं शृणोति जानाति स चात्र विष्णुः ॥ १११ ॥ इत्युक्तः सहजां मायां त्यक्त्वा सिंहासनोत्थितः ॥ दृढं परिकरं
बद्ध्वा खड्गं चाकृष्य चोज्ज्वलम् ॥ ११२ ॥ हत्वा तं फलकाग्रेण बभाषे दुस्सहं वचः ॥ इदानीं स्मर रे विष्णुं नो चेज्ज्वलितकु
ण्डलम् ॥ पतिष्यति शिरो भूमौ फलं पक्वं यथा नगात् ॥ ११३ ॥ नो चेद्दर्शय तं विष्णुमस्मात्स्तंभाद्विनिर्गतम् ॥ प्रह्लादस्तु भयं त्यक्त्वा चक्रे
पद्मासनं भुवि ॥ ११४ ॥ विधाय कंधरां नेतुमुच्चैः श्वासं निरुध्य च ॥ हृदि ध्यात्वा हरिं देवं मरणायोन्मुखः स्थितः ॥ ११५ ॥ प्रभो मया तदा
दृष्टमाश्चर्यं गगनाद्भुवि ॥ पुष्पमाला स्थिता कण्ठे प्रह्लादस्य स्वयं गता ॥ ११६ ॥ गगनं व्याप्यमानं च किंकिमेवं कृतं जनैः ॥ झटिति त्रुटयति
स्तम्भाच्छब्देन क्षुभितो जनः ॥ ११७ ॥ धरणी याति पातालं द्यौर्वा भूमिं समेष्यति ॥ पतिष्यति शिरो भूमौ खड्गघाताहतं नु किम् ॥ ११८ ॥
तावत्स्तंभाद्विनिष्क्रान्तः सिंहनादो भयंकरः ॥ भूमौ निपतिताः सर्वे दैत्याः शब्देन मूर्च्छिताः ॥ ११९ ॥ हिरण्यकशिपोर्हस्तात्खड्गचर्म पपात
च ॥ न स जानाति किं किं किमेतदिति पुनःपुनः ॥ १२० ॥ उत्थितो वीक्षते यावत्तावत्पश्यति तं हरिम् ॥ अधो नरं स्थितं सिंहमुपरिष्टाद्विभी
षणम् ॥ १२१ ॥ दंष्ट्रा करालवदनं लेलिहानमिवांबरम् ॥ जाज्वल्यमानवपुषं पुच्छाच्छोटितमस्तकम् ॥ १२२ ॥ महाकण्ठकृतारावं सशब्द
मिव तोयदम् ॥ समुच्छ्वसितकेशांतं दुर्निरीक्ष्यं सुरासुरैः ॥ १२३ ॥ नरसिंहमथो दृष्ट्वा निपपात पुनः क्षितौ ॥ विगृह्य[2] केशपाशे तं भ्रामयामास
चांबरम् ॥ १२४ ॥ भ्रामयित्वा शतगुणं पृथिव्यां समपोथयत् ॥ न ममार स दैत्येन्द्रो[3] ब्रह्मणो वरकारणात् ॥ १२५ ॥ गगनस्थैस्तदा देवै
रुच्चैः संस्मारितो हरिः ॥ दैत्यं जानुनि चानीय वक्षो दृष्टो निरीक्ष्य च ॥ १२६ ॥ जयजयेति यक्षाणां सुराणां सोऽवधारयत् ॥ शब्दं कर्णे भुजौ
सज्जौ कृत्वा तौ पद्मलांछितौ ॥ १२७ ॥ बिभेद वक्षो दैत्यस्य वज्रघातकिणांकितम् ॥ नखैः कुन्दसुमप्रख्यैरस्थिसंघातकार्शितम् ॥ १२८ ॥ भिन्ने व



१ चक्षुषा—चर्मचक्षुषा—इत्यर्थः । २ विगृह्य—इ० पा० । ३ यदा दैत्यः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वक्षसि दैत्येन्द्रो ममार च पपात च ॥ तदा सहर्षमभवत्त्रैलोक्यं सचराचरम् ॥ १२९ ॥ मर्मापि तृप्तिः सञ्जाता प्रसादात्तव केशव ॥ यदा पुरत्रये दग्धे प्रसादाच्छंकरस्य च ॥ १३० ॥ हिरण्याक्षे पुनर्जाता सा काले विनिपातिते ॥ इदानीं नास्ति मे तृप्तिः कुत्र यामि करोमि किम् ॥ २३१ ॥ पृथिव्यां क्षत्रियाः सन्ति न युध्यंते परस्परम् ॥ देवानां दानवैः सार्द्धं नास्ति युद्धं कथं प्रभो ॥१३२॥ इदानीं बलिना व्याप्तं त्रैलोक्यं सचराचरम् ॥ पञ्चमो योऽवतारस्ते न जाने किं करिष्यति ॥ बलिनिग्रहकालोऽयं तद्दर्शय जनार्दन ॥ १३३ ॥ ॥ सारस्वत उवाच ॥ ॥ तदेतत्सकलं श्रुत्वा बभाषे वामनो मुनिम् ॥ १३४ ॥ ॥ वामन उवाच ॥ ॥ शृणु नारद यद्वृत्तं हिरण्यकशिपौ हते ॥ दैत्यराजः कृतो राजा प्रह्लादोऽतीव वैष्णवः ॥ १३५ ॥ तेन राज्यं धरापृष्ठे कृतं संवत्सरान्बहून् ॥ तस्यापि कुर्वतो राज्यं विग्रहो हि सुरैः समम् ॥ १३६ ॥ नो पश्याम्यपि दैत्यानां पूर्ववैरमनुस्मरन् ॥ उत्पाद्य पुत्रान्स बहून्राज्यं चक्रे स पुष्कलम् ॥१३७॥ विरोचनाद्बलिर्जातो बाल एव यदाऽभवत् ॥ एकान्ते स हरिं ज्ञात्वा तदा योगेन केनचित् ॥ १३८ ॥ मुक्त्वा राज्यं प्रियान्पुत्रान्गतोऽसौ गिरिसानुषु ॥ कल्पान्तस्थायिनं देहं तस्य चक्रे जनार्दनः ॥ १३९ ॥ दैत्यानां दानवानां च बहूनां राज्यकारणे ॥ विवादोतीव संजातः को नो राजा भवेदिति ॥ १४० ॥ ॥ नारद उवाच ॥ ॥ हिरण्याक्षस्य ये पुत्राः पौत्राश्च बलवत्तराः ॥ विरोचनप्रभृतयः सन्ति ये बलवत्तराः ॥ १४१ ॥ वृषपर्वापि बलवान्राज्यार्थे समुपस्थितः ॥ इन्द्रवित्तेशवरुणा वायुः सूर्योऽनलो यमः ॥ १४२ ॥ दैत्येन सदृशा न स्युर्बलरूपक्षमादिभिः ॥ औदार्यादिगुणैः कृत्वा सन्तत्या चासुराधिकः ॥ १४३ ॥ शुक्रेणा चार्यमाणास्ते युद्ध्यंते च परस्परम् ॥ अमृताहरणे दौष्ट्यं यदा दैत्याः स्मरन्ति तत् ॥१४४॥ पीतावशेषममृतं कस्माद्यच्छंति देवताः ॥ नास्माक मिति संनह्य युध्यन्ते च परस्परम् ॥ १४५ ॥ कदाचिदपि नो युद्धं विश्रांतिमुपगच्छति ॥ एककार्योद्यता यस्माद्बहवो दैत्यदानवाः ॥ १४६ ॥ पीत्वाऽमृतं सुरा जाता अमरास्ते जयन्ति च ॥ देवदानवदैत्यानां गन्धर्वोरगरक्षसाम् ॥ विष्णुर्बलाधिको युद्धे तदेतत्कारणं वद ॥ १४७ ॥ ॥ ॥ वामन उवाच ॥ ॥ अनादिनिधनः कर्त्ता पाता हर्त्ता जनार्दनः ॥ एकोऽयं स शिवो देवः स चायं ब्रह्मसंज्ञितः ॥ एकस्य तु यदा कार्यं जायते भुवने नृप ॥ १४८ ॥ तस्य देहं समाश्रित्य मृत्युकार्यं कुर्वंति ते ॥ ब्रह्मांडं सकलं विष्णोः करेदं वरदो यतः ॥ तस्माद्बलाधिको विष्णुर्न तथान्योऽस्ति कश्चन ॥ १४९ ॥ पालनायोद्यतो विष्णुः किमन्यैश्चर्मचक्षुभिः ॥ इन्द्राद्याश्च सुराः सर्वे विष्णोर्व्यापारकारिणः ॥ १५० ॥ सृष्टि

१ ममापि--इति नारदवाक्यमेतत् । २ करस्थम्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

कृत्वा ततो ब्रह्मा कैलासे संस्थितो हरः ॥ न शक्यते सुरैर्विष्णुर्भ्राम्यन्ते भुवनत्रये ॥ १५१ ॥ जगत्यस्मिन्यदा कश्चिद्वैपरीत्येन वर्तते ॥ तस्योच्छेदं समागत्य करोत्येव जनार्दनः ॥ १५२ ॥ त्वमेजय महाबाहो न मनो नारदाऽदयम् ॥ सर्वपापहरां दिव्यां तां कथां कथया म्यहम् ॥ १५३ ॥ पुरा विवदतां तेषां दैत्यानां राज्यहेतवे ॥ प्रह्लादेन समागत्य व्यवस्था विहिता स्वयम् ॥ १५४ ॥ सर्वलक्षणसंपन्नो दीर्घायुर्बलवत्तरः ॥ यज्ञशीलः सदानंदो बहुपुत्रोतिदुर्जयः ॥ १५५ ॥ न युध्यते सुरैः साकं विष्णुं यो वेत्ति दुर्जयम् ॥ संग्रामे मरणं नास्ति यस्य यः सर्वदक्षिणः ॥ १५६ ॥ आत्मनो वचनं व्यर्थं न करोति कथंचन ॥ सर्वेषां पुत्रपौत्राणां मध्ये यो राजते श्रिया ॥ १५७ ॥ अभिषिक्तस्तु शुक्रेण स वो राजा भवेदिति ॥ गुरुप्रमाणमित्युक्त्वा ययौ यत्रागतः पुनः ॥ १५८ ॥ तथा च कृतवंतस्ते सहिता दैत्यदानवाः ॥ विरोचनप्रभृतयः पुत्राः पौत्राः स्वयं गताः ॥ १५९ ॥ प्रत्येकं वीक्षिताः सर्वे गुरुणा ज्ञानपूर्वकम् ॥ प्रह्लादेन गुणाः प्रोक्ता न ते संति विरोचने ॥१६०॥ अन्येषामपि दैत्यानां वृषपर्वापि नेदृशः ॥ यथा निरीक्षिताः पुत्रा बलिप्रभृतयो मुने ॥ सर्वान्संवीक्ष्य शुक्रेण बलौ दृष्टा गुणास्तथा ॥ १६१ ॥ बलिदेहेऽधिकान्दृष्ट्वा दैत्येभ्यो विनिवेदिताः ॥ बलिर्गुणाधिको दैत्याः कथं कार्यं भवेन्मया ॥ १६२ ॥ केनापि दैवयोगेन बलिरिंद्रो भविष्यति ॥ यादृशस्तु पिता लोके तादृशस्तु सुतो भवेत् ॥ १६३ ॥ पौत्रश्च निश्चितं तादृग्भवतीति न चेत्सुतः ॥ प्रह्लादस्तु महायोगी वैष्णवो विष्णुवल्लभः ॥ १६४ ॥ तस्माद्विरोचने केचिद्धिरण्यकशिपोर्गुणाः ॥ ज्येष्ठो विरोचनो राज्ये यदि चेत्क्रियतेऽसुराः ॥ नरसिंहः समागत्य निश्चितं मारयिष्यति ॥ १६५ ॥ मुक्तं विरोचनेनापि राज्यं मरणभीरुणा ॥ प्रह्लादस्य गुणाः सर्वे बलिदेहे व्यवस्थिताः ॥ १६६ ॥ एवं ते समयं कृत्वा बलिं राज्येऽभ्यषिंचयन् ॥ यः प्रह्लादः स वै विष्णुर्यो विष्णुः स बलिः स्वयम् ॥ १६७ ॥ अतो मित्रीकृतो देवैर्विग्रहैस्तु विवर्जितः ॥ एकीभावं कृतं सर्वं बलिराज्ये सुरासुरैः ॥ १६८ ॥ तस्यापि भाषितं श्रुत्वा देवेंद्रो मम मंदिरे ॥ समागता वालखिल्याः शतोहं वामनः कृतः ॥ १६९ ॥ प्रसाद्य ते मया प्रोक्ताः शापमुक्तिप्रदा मम ॥ भविष्यंतीति तैरुक्तं बलिनिग्रहणादनु ॥ १७० ॥ तवापि कौतुकं युद्धे बलिर्यज्ञं करोति च ॥ देवानां निग्रहो नास्ति सर्वे यज्ञे समागताः ॥ १७१ ॥ स मां यजति यज्ञेन वधं तस्य करोतु कः ॥ अहं च वामनो जातो नारदः कौतुकान्वितः ॥ १७२ ॥ विपरीतमिदं सर्वं वर्त्तते मम चेतसि ॥ तथाऽपि क्रमयोगेन सर्वं भव्यं करोम्यहम् ॥ १७३ ॥ ॥ नारद उवाच ॥ ॥ प्रसादं कुरु देवेश युद्धार्थं कौतुकं

१ न एजय—मा कंपय—चञ्चलं मा कुरु—इत्यर्थः। २ अदयम्—निष्ठुरम्—इत्यर्थः। ३ व्यवस्था विहिता स्वयम्—एतस्य व्यवस्थाविधानस्य स वो राजा भविष्यति—इत्यंतेन सह संबंधः। ४ भविष्याति—इ० पा०।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ममं ॥ एकेन ब्राह्मणेनाजौ हन्यंते क्षत्रिया यदा ॥ पित्रा प्रोक्तं च मे पूर्वं तदा युद्धं भविष्यति॥१७४॥ ब्राह्मणोसि भवाञ्ज्ञातः कदा युद्धं करिष्यसि ॥ विहस्य वामनो ब्रूते सत्यं तव भविष्यति ॥१७५॥ जमदग्निसुतो भूत्वा गुरुं कृत्वा महेश्वरम् ॥ कार्त्तवीर्यं वधिष्यामि बहुभिः क्षत्रियैः सह ॥१७६॥ समंतपंचके पंच करिष्ये रुधिरह्रदान् ॥ तत्राहं तर्पयिष्यामि पितॄनथ पितामहान् ॥ १७७ ॥ पुण्यक्षेत्रं करिष्यामि भवांस्तत्रागमिष्यति ॥ परं च कौतुकं युद्धे भविष्यति तव प्रियम् ॥ १७८ ॥ ब्राह्मणेभ्यो ग्रहीष्यंति यदा कुं क्षत्रियाः पुनः ॥ तदैव तान्हनिष्यामि पुनर्दास्यामि मेदिनीम् ॥ १७९ ॥ त्रिसप्तवारं दास्यामि जित्वाजित्वा वसुंधराम् ॥ शस्त्रन्यासं करिष्यामि निर्विण्णो युद्धकर्मणि ॥ विहरिष्यामि रम्येषु वनेषु गिरिसानुषु ॥ १८० ॥ लंकायां रावणो राज्यं करिष्यति महाबलः ॥ त्रैलोक्यकंटकं नाम यदासौ धारयिष्यति ॥ १८१ ॥ तदा दाशरथी रामः कौसल्यानंदवर्द्धनः ॥ भविष्ये भ्रातृभिः सार्द्धं गमिष्ये यज्ञमंडपे ॥ १८२ ॥ ताडकां ताडयित्वाहं सुबाहुं यज्ञमंदिरे ॥ नीत्वा यज्ञाद्गमिष्यामि सीतायास्तु स्वयंवरे ॥ १८३ ॥ परिणेष्यामि तां सीतां भंक्त्वा माहेश्वरं धनुः ॥ त्यक्त्वा राज्यं गमिष्यामि वने वर्षांश्चतुर्दश ॥ १८४ ॥ सीताहरणजं दुःखं प्रथमं मे भविष्यति ॥ नासाकर्णविहीनां तां करिष्ये राक्षसीं वने ॥ १८५ ॥ चतुर्दशसहस्राणि त्रिशिरःखरदूषणान् ॥ हत्वा हनिष्ये मारीचं राक्षसं मृगरूपिणम् ॥१८६॥ हृतदारो गमिष्यामि दग्ध्वा गृध्रं जटायुषम् ॥ सुग्रीवेण समं मैत्रीं कृत्वा हत्वाऽथ वालिनम् ॥ १८७ ॥ समुद्रं बंधयिष्यामि नलप्रमुखवानरैः ॥ लंकां संवेष्टयिष्यामि मारयिष्यामि राक्षसान् ॥ १८८ ॥ कुम्भकर्णं निहत्याजौ मेघनादं ततो रणे ॥ निहत्य रावणं रक्षः पश्यतां सर्वरक्षसाम् ॥ १८९ ॥ विभीषणाय दास्यामि लंकां देवविनिर्मिताम् ॥ अयोध्यां पुनरागत्य कृत्वा राज्यमकंटकम् ॥१९०॥ कालदुर्वाससोश्चित्रचरित्रेणामरावतीम् ॥ यास्येहं भ्रातृभिः सार्द्धं राज्यं पुत्रे निवेद्य च ॥१९१॥ द्वापरे समनुप्राप्ते क्षत्रियैर्बहुभिर्मही॥भाराक्रांता न शक्नोति पातालं गंतुमुद्यता ॥१९२॥ मथुरायां तदा कर्त्ता कंसो राज्यं महासुरः ॥ शिशुपालजरासंधौ कालनेमिर्महासुरः ॥ १९३ ॥ पौंड्रको वासुदेवश्च बाणो राजा महासुरः ॥ गजवाजितुरंगाढ्या वध्यंते मे तदा मुने ॥ १९४ ॥ कलौ स्वल्पोदका मेघा अल्पदुग्धाश्च धेनवः ॥ दुग्धे घृतं न चैवास्ति नास्ति सत्यं जनेषु च ॥ १९५ ॥ चोरैरुपहता लोका व्याधिभिः परिपीडिताः ॥ त्रातारं नाभिगच्छंति युद्धावस्थां गता अपि ॥ १९६ ॥ क्षुद्राः पश्चिमवाहिन्यो नद्यः शुष्यंति कार्त्तिके ॥ एकादशीव्रतं नास्ति कृष्णा या च चतुर्दशी ॥१९७॥

१ महत्–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



न जानाति जनः कश्चिद्विक्रांतमपि स्वे गृहे ॥ दरिद्रोपहतं सर्वं संध्यास्नानविवर्जितम् ॥ भविष्यति कलौ सर्वं न तत्पूर्वयुगत्रये ॥ १९८ ॥ पितरं मातरं पुत्रस्त्यक्त्वा भार्यां निषेवते ॥ न गुरुः स्वजनः कश्चित्कोऽपि कं नानुसेवते ॥ १९९ ॥ यथायथा कलिर्व्याप्तिं करोति धरणीतले ॥ तथातथा जनः[1] सर्व एकाकारो भविष्यति ॥ २०० ॥ म्लेच्छैरुपहतं सर्वं संध्यास्नानविवर्जितम् ॥ कलिकारित्यभिविख्यातो भविष्ये ब्राह्मणो ह्यहम् ॥२०१॥ म्लेच्छानां छेदनं कृत्वा याज्ञवल्क्यपुरोहितः ॥ बहुस्वर्णेन यज्ञेन यक्ष्ये निष्कृतिकारणात् ॥ २०२ ॥ भविष्यंत्यवतारा मे युद्धं तेषु भविष्यति ॥ इदानीं बलिना युद्धं करिष्यंति न देवताः ॥ २०३ ॥ स मां यजति दैत्येन्द्रो न मे वध्यो बलिर्भवेत् ॥ सर्वस्वदाननियमं करोति स महाध्वरे ॥ ॥ २०४ ॥ ॥ सारस्वत उवाच ॥ ॥ इत्युक्त्वा नारदं देवो विसृज्य तमथाभ्यगात् ॥ द्रष्टुं बलिकृतं यज्ञं देवकार्यप्रसिद्धये ॥ २०५ ॥ वामनो नगरं गत्वा वीक्षमाणो गृहाद्गृहम् ॥ ब्राह्मणानां गृहं गत्वा भोजनं स तु याचते ॥ २०६ ॥ नित्यं स्नानपरो विप्रो वेदाध्ययनतत्परः ॥ वामनो लभते भिक्षां भोजनं द्विजमंदिरे ॥ २०७ ॥ चतुष्पथेषु रम्येषु देवतायतनेषु च ॥ आस्ते परिवृतो लोकैश्चालयन्विपुलां कटिम् ॥ २०८ ॥ शिरो विधूनते स्थूलं स्थूलस्कन्धो महाहनुः ॥ नृत्यते तालमानेन गायत्यतिमनोहरम् ॥ २०९ ॥ वेदानधीते चतुरो वामनो द्विजसंसदि ॥ दैत्यानां तनयाः सर्वे ब्राह्मणानां तथैव च ॥ २१० ॥ वामनं पर्युपासंते दिवारात्रं मनोरमम् ॥ अथ तैः सकलैर्नीतो वामनो यज्ञमंडपे ॥ २११ ॥ निश्चितं मठिकास्थानं याचितव्यो बलिस्त्वया ॥ तदास्माकं महच्छ्रेयो देशस्य नगरस्य च ॥ २१२ ॥ विज्ञप्तो वामनः सर्वैर्दैत्यद्विजकुमारकैः ॥ त्वया वामन वस्तव्यं दैत्येंद्रनगरे सदा ॥ २१३ ॥ ॥ सारस्वत उवाच ॥ ॥ प्रविवेश तथेत्युक्त्वा वामनो यज्ञमंडपे ॥ ततः कोलाहलो जातो द्वाःस्थैर्द्वारि कृतो महान् ॥ २१४ ॥ ब्राह्मणैर्बहुभिः सार्द्धं वेदानुच्चारयन्स्थितः ॥ ततो वेदध्वनिर्जातो महान्वै यज्ञमंडपे ॥ २१५ ॥ प्रविष्टौ प्रथमं दैत्यौ दैत्याय विनिवेदितः ॥ द्रष्टुं समागतो देव ब्राह्मणो वामनोऽध्वरे ॥ २१६ ॥ भवंतं कौतुकात्तावद्द्वारदेशे समाविशत् ॥ एक एव यथायाति वामनस्तव सन्निधौ ॥ २१७ ॥ निरीहो वामनो देव यावत्तत्रैव किंचन ॥ वेदानां तु ध्वनिं कृत्वा चतुर्णामेकवक्त्रतः ॥ २१८ ॥ बलिर्हृष्टोऽब्रवीद्वाक्यं द्वाःस्थमेनं प्रवेशय ॥ पूजयिष्यामि विप्रेंद्रं दास्ये चास्य यदीप्सितम् ॥२१९॥ स्मरामि स्मृतिवाक्यानि यानि प्राहुर्गुरुर्मम ॥ किंचिद्वेदमयं पात्रं किंचित्पात्रं तपोमयम् ॥ २२० ॥ आगमिष्यति यत्पात्रं तत्पात्रं तारयिष्यति ॥ यज्ञे प्रवर्त्तमाने तु दातव्या दक्षिणा मया ॥२२१॥ वामनो



१ जगत्सर्वमेकरूपं भविष्यति—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न विचार्यस्तु सत्यमस्तु वचो मम ॥ इति श्रुत्वा गुरुः शुक्रो वारयामास तं बलिम् ॥२२२॥ ॥ शुक्र उवाच ॥ ॥ द्वारि पूज्या द्विजाः सर्वे दीनांध कृपणादयः ॥ बधिरा वामनाः कुब्जा रोगिणो ये तु निष्ठुराः ॥२२३॥ सुवर्णरजतैर्वस्त्रैर्वामनो द्वारि पूज्यताम् ॥ चतुर्णां तु वृथा जन्म वृथा दानानि षोडश ॥ २२४ ॥ अपुत्राणां वृथा जन्म ये च धर्मबहिष्कृताः ॥ परपाकं च येश्नंति परदाररताश्च ये ॥२२५॥ अन्यायेनार्जितं वित्तं न देयं श्रेय इच्छता ॥ व्यर्थमब्राह्मणे दानमारूढपतिते तथा ॥२२६॥ संध्याहीने द्विजे नष्टे पतिते तस्करे तथा ॥ गुरोश्चाप्रीतिजनके पितृमातृपराङ्मुखे ॥ ॥ २२७ ॥ ब्रह्मबन्धौ च यद्दत्तं यद्दत्तं वृषलीपतौ ॥ वेदविक्रयके चैव कृतघ्ने ग्रामयाजके ॥ २२८ ॥ स्त्रीनिर्जिते च यद्दत्तं व्यालग्राहे तथैव च ॥ परिवारेषु यद्दत्तं वृथा दानानि षोडश ॥ २२९ ॥ ॥ सारस्वत उवाच ॥ ॥ अत्रांतरे बलिर्ब्रूते नैवं वाच्यं[१] त्वया गुरो ॥ वेदानधीते यः कश्चित्स मे विष्णुः समागतः ॥ २३० ॥ न विलंबस्तु कर्त्तव्यः श्रोत्रिये गृहमागते ॥ अभ्युत्थानेन वचसा पादप्रक्षालनेन च ॥ २३१ ॥ यथा शक्त्या प्रदातव्यं भोजनं गृहमेधिना ॥ अपूजितो यदा याति वामनो मंडपाद्बहिः ॥ २३२ ॥ तदायं व्यर्थतां याति यज्ञः सर्वस्वदक्षिणः ॥ अत्रांतरे समानीतो वामनो बलिसंनिधौ ॥ २३३ ॥ आयांतं ददृशे दैत्यो वामनं विष्णुरूपिणम् ॥ जाज्वल्यमानं वपुषा पिंगलं सूर्यसंनिभम् ॥२३४॥ उत्थायाभिमुखः प्रायान्नमस्कृत्याग्रतः स्थितः ॥ धन्योऽहं यस्य मे यज्ञे प्राप्तो विष्णुसमो द्विजः ॥ २३५ ॥ वेदिमध्ये समानीतो ददौ तस्यासनं बलिः ॥ पाद्यमाचमनीयं च दत्त्वार्घ्यं विष्टरं बलिः ॥ श्रीखंडगंधपुष्पाद्यैः पूजयित्वाग्रतः स्थितः ॥ २३६ ॥ मधुपर्कं च गां तस्मै सत्वरं स निवेद्य च ॥ आघ्राते मधुपर्के च वामनेन ततः परम् ॥ २३७ ॥ स्वागतं बलिना प्रोक्तं स्वस्तीत्युक्तं द्विजन्मना ॥ अहमर्थी समायातो दीयतां वद किं विभो ॥ २३८ ॥ मेदिनीं देहि मे दैत्य कियन्मात्रां द्विजोत्तम ॥ वासार्थं मम दैत्येन्द्र दीयतां मे क्रमत्रयम् ॥ २३९ ॥ विधाय मठिकां दिव्यां शिष्यानध्यापयाम्यहम् ॥ दत्तं क्रमत्रयं तुभ्यं गृहीतं वामनोऽब्रवीत् ॥ २४० ॥ मा देहीत्यवदच्छुक्रो विष्णुरेष सनातनः ॥ हृष्टो ब्रूते बलिः शुक्रं पात्रं स्यात्किमतः परम् ॥ २४१ ॥ सव्यं कृत्वा बलिर्दर्भान्साक्षतान्दक्षिणे करे ॥ प्रयोगं न गुरुश्चक्रे न मुंचति जलं करे ॥ २४२ ॥ विस्मिता ऋषयः सर्वे होतारो ये सभासदः ॥ ब्राह्मणा बटवो दैत्या भार्यापुत्राश्च बांधवाः ॥ २४३ ॥ दत्तं गृहीतमित्युक्ते कस्मात्तोयं न मुञ्चति ॥ वामनाय करे तोयं विवेकाय प्रदीयते ॥ २४४ ॥ यदानं वचसा दत्तं कर्मणा नोपपाद्यते ॥ विधाय नरके पूये

१ वाच्यताम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



यजमानं न निष्कृतिः ॥ २४५ ॥ उशना प्राह दैत्येन्द्र वामनो हरिरित्ययम् ॥ केनापि दैवयोगेन त्वां द्रष्टुं समुपागतः ॥ २४६ ॥ अप्रियं वा प्रिय
वापि न जाने किं करिष्यति ॥ बभाषे भार्गवं यष्टा श्रूयतां वचनं गुरो ॥ २४७ ॥ प्रोच्यते दानकालेषु यजमानैर्द्विजैरपि ॥ अहमिन्द्रो द्विजो
विष्णुर्द्रव्यमादित्यदेवता ॥ तत्कथं न मया देयं विष्णवे प्रीयतामिति ॥ २४८ ॥ इत्युक्त्वा स ददौ तोयं वामनाय करे बलिः ॥ ततः किमिदमि
त्युक्त्वा संस्थितो मण्डपाद्बहिः ॥२४९॥ मध्येऽपि वामनो विप्रो बलिमात्रो बभूव सः ॥ दत्तहस्तोऽसुरेन्द्रेण ग्रहीतुं तु पदत्रयम् ॥ २५० ॥ यजमा
नद्विजौ हृष्टौ दृष्टौ यज्ञे सुरादिभिः ॥ ववृधे वामनोतीव कृत्वा रूपं चतुर्भुजम् ॥२५१॥ ना[1]रदोऽपि समायातो बभाषे किं कृतं बले ॥ शिष्याभ्यां
सहितो हृष्टो नरीनर्ति पुरः स्थितः ॥ २५२ ॥ गृहाण दक्षिणां देव सभार्यो भाषते बलिः ॥ अद्य किं न मया प्राप्तं यद्गृह्णाति जनार्दनः ॥
॥ २५३ ॥ सार्द्धक्रमक्षयं कृत्वा धरणीं याचते त्रयम् ॥ यदस्ति तेन कर्तव्यः सन्तोषो मधुसूदन ॥ २५४ ॥ वर्द्धमानं हरिं दृष्ट्वा ब्राह्मणा ऋषयः
सुराः ॥ तुष्टुवुर्गगने यांतं भगवंतं जनार्दनम् ॥ २५५ ॥ ॥ देवर्षय ऊचुः ॥ ॥ जय देव जयानन्त जय विष्णो जयाऽच्युत ॥ जय मत्स्य नम
स्तुभ्यं जय कूर्म धराधर ॥ २५६ ॥ वराहाय नमस्तुभ्यं नरसिंह नमोनमः ॥ जामदग्न्य नमस्तुभ्यं जय राम सलक्ष्मण ॥ २५७ ॥ जय कृष्ण
जगन्नाथ जय देवकिनन्दन ॥ नमामि बुद्धं कृष्णं च कल्किनं प्रणमाम्यहम् ॥२५८॥ ॥ सारस्वत उवाच ॥ ॥ नरीनर्ति तथा स्तौति नारदो
गगनं गतः ॥ योगिनः सनकाद्या ये स्तुवंति च जनार्दनम् ॥ २५९ ॥ अ[2]न्तरिक्षे गते कृष्णे वर्द्धमाने बलेः पुरः ॥ ऊर्ध्ववक्त्राः स्थिताः सर्वे निरी
क्षन्ते दिवाकरम् ॥ २६० ॥ दृष्टच्छत्राकृतिस्तावत्पश्चादूर्ध्वं गतो हरिः ॥ चूडामणिरिवाभाति भास्करो हरिमस्तके ॥ २६१ ॥ दैत्यैर्निरीक्षितः
सम्यग्ललाटे तिलकायते ॥ हरिः संवर्द्धते यावत्कर्णेऽसौ कुण्डलायते ॥२६२॥ वर्द्धमानस्य च हरेर्हृदये कौस्तुभायते ॥ इंद्राद्या देवता रुद्रा वसवो
गगने स्थिताः ॥ २६३ ॥ ऊर्ध्वं पुनर्यत्र हरिर्न तत्र गगनं मतम् ॥ वनमाला तदा कण्ठे वासवेन नि[3]वेशिता ॥ २६४ ॥ पृथिवी कम्पते सर्वा
दिविस्थं सूर्यमण्डलम् ॥ किं भविष्यति दैत्यास्ते भीताः पश्यंति भास्करम् ॥ २६५ ॥ नाभौ पद्मायते सूर्यः कटौ च रशनायते ॥ एवं संवर्द्धितो
विष्णुर्जगृहे च पदद्वयम् ॥ २६६ ॥ स्थानं नास्ति तृतीयस्य ब्रह्मांडं सकलं कृतम् ॥ [4]अहर्दण्डो जगत्स्रष्टा ब्रह्मदंडायते तदा ॥ २६७ ॥ देवदानव
गंधर्वमनुष्योरगपन्नगैः ॥ पूज्यते चरणो विष्णोः स्तूयते चानुमीयते ॥ २६८ ॥ धर्मात्मा यतदण्डो हि गंधर्वैर्गीयते मुहुः ॥ ज्योतिश्चक्राक्षदंडः किं

१ कविस्तत्र समायातः--इ० पा० । २ गगनार्धं गते कृष्णे--इ० पा० । ३ निवेदिता--इ० पा० । ४ अन्हि दण्डो जगद्योनिः--इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हरिणा निर्मितः स्वयम् ॥ २६९ ॥ जित्वेदं भुवनं गंगा ध्वजदंडोऽमरैः कृतः ॥ त्रिविक्रमांघ्रिदण्डोऽयं कीर्तिदंडायते ध्रुवम् ॥ २७० ॥ वेगेनाक्षिप्य हरिणा नीतो ब्रह्मांडमस्तके ॥ पादस्तन्मस्तकं भित्त्वा बहिर्यास्यति वेगतः ॥ २७१ ॥ तावद्ब्रह्मांडवेगोऽयं विराडिति हि संज्ञितः ॥ स सर्वं बीजरूपो हि परमात्मेति गद्यते ॥ २७२ ॥ तेनेदं सकलं जातं पादस्याग्रे व्यवस्थितम् ॥ ब्रह्मांडभेदनं कृत्वा न गन्तव्यं बहिस्त्वया ॥ २७३ ॥ तेनैव सह ब्रह्मांडे पफाल चरणो हरेः ॥ ब्रह्मांडं जर्जरं जातं पादसंकोचनादपि ॥ २७४ ॥ भिन्ने तस्मिन्समायातं ब्राह्मं तोयं जगत्त्रये ॥ विष्णुपादोद्भवा गंगा मस्तकान्निःसृता तदा ॥ २७५ ॥ त्रैलोक्यप्लाविनी देवी या रुद्रेण स्वयं धृता ॥ स्वर्धुनी पूज्यते स्वर्गे गंगेति गां गता सती ॥ २७६ ॥ पाताले सा यदा प्राप्ता ख्याता त्रिपथगैव सा ॥ यस्याः स्मरणमात्रेण सर्वपापक्षयो भवेत् ॥ १७७ ॥ दर्शनादश्वमेधस्य संपूर्णस्य फलं लभेत् ॥ स्नानमात्रेण नश्येत सप्तजन्मकृतं त्वघम् ॥२७८॥ स्नात्वा संपूजयेद्यस्तु देवौ हरिहरौ नरः ॥ इन्द्रलोकमतिक्रम्य विष्णुलोके महीयते ॥ २७९ ॥ विष्णुपादोदकं पीत्वा ज्ञात्वा तत्त्वानि संयमी ॥ उपोष्य दिवसं विष्णोर्मुक्तिं गच्छति देहवान् ॥ २८० ॥ शुद्धस्वभावसत्त्वस्था विरक्ता जन्मभूमिषु ॥ संसा[3]रबंधनं छित्त्वा यांति ते परमां गतिम् ॥ २८१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे द्वितीये वस्त्रापथक्षेत्रमाहात्म्ये बलिनिग्रहवृत्तांतवर्णनंनामाष्टादशोऽध्यायः ॥ १८ ॥ ॥ राजोवाच ॥ ॥ गृहीत्वा दक्षिणां दैत्यान्महाविष्णुर्जनार्दनः ॥ चकार किं ममाचक्ष्व परं कौतूहलं हि मे ॥ १ ॥ ॥ सारस्वत उवाच ॥ ॥ एवं स्तुतः सुरैर्देवो गृहीत्वा मेदिनीं हरिः ॥ बलिं निर्वासयामास संपूर्णे यज्ञकर्मणि ॥ यज्ञांते दक्षिणां लब्ध्वा संपूर्णोऽभूदथाध्वरः ॥ २ ॥ भगवानप्यसंपूर्णे तृतीये तु क्रमे विभुः ॥ समभ्येत्य बलिं प्राह ईषत्प्रस्फुरिताधरः ॥ ३ ॥ ऋणे भवति दैत्येन्द्र बंधनं घोरदर्शनम् ॥ त्वं पूरय पदं तन्मे नोचेद्बन्धं प्रतीच्छ भोः ॥ ४ ॥ तन्मुरारिवचः श्रुत्वा पुरो भूत्वा बलेः सुतः ॥ बाणो वामनमाचष्टे तदा तं विश्वरूपिणम् ॥ ५ ॥ कृत्वा महीमल्पतरां वपुः कृत्वा तु वामनम् ॥ पदत्रयं याचयित्वा विश्वरूपमगाः कथम् ॥ ६ ॥ यदि तृतीयं क्रमणं याचसे जगदीश्वर ॥ पुनर्वामनतां याहि बलिर्दास्यति [2]तत्पदम् ॥ ७ ॥ यादृग्विधाय बलिना वामनायोदकं कृतम् ॥ तत्तादृशाय दातव्यमथ किं विश्वरूपिणे ॥ ८ ॥ भवत्कृतमिदं विश्वं विश्वस्मिन्वर्तते बलिः ॥ छद्मना नैव गृह्णन्ति साधवो ये महेश्वर ॥ ९ ॥ जगदेतज्जगन्नाथ तावकं यदि मन्यसे ॥ ज्ञात्वा बलिममर्यादं भवद्भक्तिपराङ्मुखम् ॥ १० ॥ कंठपाशेन निष्कास्य केन वै वार्यते भवान् ॥ गोपाल

१ ब्राह्मं तोयम्-इ० पा० । २ मुदा-इ० पा० । ३ संसाराद्विरता दिव्याः-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





मन्यं कुरुते रक्षणाय च गोपतिः ॥ सुतृणं चारयन्पूर्वो गोपः किं कुरुते तदा ॥ ११ ॥ इत्येवमुक्ते तेनाथ वचने बलिसूनुना ॥ प्रोवाच भगवान्वा
क्यमादिकर्ता जनार्दनः ॥१२॥ यान्युक्तानि वचांसीत्थं त्वया बालेन सांप्रतम् ॥ तेषां त्वं हेतुसंयुक्तं शृणु प्रत्युत्तरं मम ॥ १३ ॥ पूर्वमुक्तस्तव पिता
मया बाण पदत्रयम् ॥ देहि मह्यं प्रमाणेन तदेतत्समनुष्ठितम् ॥ १४ ॥ किं न वेत्ति प्रमाणं मे बलिस्तव पिता सुत ॥ बलेरपि हितार्थाय कृतमेतत्प
दत्रयम् ॥ १५ ॥ तस्माद्यन्मम बालेय त्वत्पित्राऽम्बु करे महत् ॥ दत्तं तेनास्य सुतले कल्पं यावद्वसिष्यति ॥ १६ ॥ गते मन्वन्तरे बाण श्राद्धदेव
स्य साम्प्रतम् ॥ सावर्णिके त्वागते च बलिरिन्द्रो भविष्यति ॥ १७ ॥ इति प्रोक्ता बलिसुतं बाणं देवस्त्रिविक्रमः ॥ प्रोवाच बलिमभ्येत्य वचनं
मधुराक्षरम् ॥ १८ ॥ ॥ श्रीभगवानुवाच ॥ ॥ अपूर्णदक्षिणे यागे गच्छ राजन्महातलम् ॥ सुतलंनाम पातालं वस तत्र निरामयः ॥ १९ ॥
॥ बलिरुवाच ॥ ॥ सुतलस्थस्य मे नाथ कथं चरणयोस्तव ॥ दर्शनं पूजनं भोगो निवसामि यथासुखम् ॥ २० ॥ ॥ श्रीभगवानुवाच ॥ ॥
दैत्येन्द्र हृदये नित्यं तावके निवसाम्यहम् ॥ अतस्ते दर्शनं प्राप्तः पुनः स्थास्ये तवान्तिकम् ॥ २१ ॥ तथान्यमुत्सवं पुण्यं वृत्ते शक्रमहोत्सवे ॥
दीपप्रतिपन्नामाऽसौ तत्र भावी महोत्सवः ॥ २२ ॥ तत्र त्वां नरशार्दूला हृष्टाः पुष्टाः स्वलंकृताः ॥ पुष्पदीपप्रदानेन अर्चयिष्यंति यत्नतः ॥
॥ २३ ॥ तत्रोत्सवः पुण्यतमो भविष्यति धरातले ॥ तव नामांकितो दैत्य तेन त्वं वत्सरं सुखी ॥ २४ ॥ भविष्यसि नरा ये तु दृढभक्तिसहा
न्विताः ॥ त्वामर्चयन्ति विधिवत्तेऽपि स्युः सुखभागिनः ॥ २५ ॥ यथैव राज्यं भवतस्तु सांप्रतं तथैव सा भाव्यथ कौमुदीति ॥ इत्येवमुक्त्वा मधुम
दितीश्वरं निवासयित्वा सुतलं सभार्यकम् ॥ २६ ॥ उर्वीं समादाय जगाम तूर्णं स शक्रसद्मामरसंघजुष्टम् ॥ दत्त्वा मघोने मधुजित्त्रिविष्टपं कृत्वा तु
देवान्मखभागभोगिनः ॥ २७ ॥ अन्तर्दधे विश्वपतिर्महेशः संपश्यतां वै वसुधाधिपानाम् ॥ २८ ॥ गृहीत्वेति बले राज्यं मनुपुत्रे नियोजितम् ॥
द्वीपांतरे च ते दैत्याः प्रेषिताश्चाज्ञया स्वयम् ॥२९॥ पातालनिलया ये तु ते तत्रैव निवेशिताः ॥ देवानां परमो हर्षः संजातो बलिनिग्रहे ॥३०॥
निवासाय पुनश्चक्रे वामनो वामनो मनः ॥ तत्र क्षेत्रे स्वनगरे वामनः स न्युवास ह ॥ ३१ ॥ ॥ सारस्वत उवाच ॥ ॥ प्रादुर्भावस्ते कथितो
नरेन्द्र पुण्यः शुचिर्वामनस्याघहारी ॥ स्मृते यस्मिन्संश्रुते कीर्तिते च पापं यायात्संक्षयं पुण्यमेति ॥ ३२ ॥ ॥ ईश्वर उवाच ॥ ॥ इति सार
स्वतवचः श्रुत्वा भोजः स भूपतिः ॥ नमस्कृत्य मुनिश्रेष्ठं पूजयामास भक्तितः ॥ ३३ ॥ ततो यथोक्तविधिना स भोजो नृपसत्तमः ॥ वस्त्रापथक्षेत्र
यात्रां परिवारजनैः सह ॥ कृत्वा कृतार्थतां प्राप्तो जगामान्ते परं पदम् ॥ ३४ ॥ एतन्मया पुण्यतमं प्रभासक्षेत्रे च वस्त्रापथमीरितं ते ॥ श्रुत्वा



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पठित्वा परया समेतो भक्त्या तु विष्णोः पदमभ्युपैति ॥ ३५ ॥ यथा पापानि धूयंते गंगावारिविगाहनात् ॥ तथा पुराणश्रवणाद्दुरितानां विनाशनम् ॥ ३६ ॥ इदं रहस्यं परमं तवोक्तं न वाच्यमेतद्धरिभक्तिवर्जिते ॥ द्विजस्य निन्दानिरतेऽतिपापे गुरावभक्ते कृतपापबुद्धौ ॥ ३७ ॥ इदं पठेद्यो नियतं मनुष्यः कृतभावनः ॥ तस्य भक्तिः शिवे कृष्णे निश्चला जायते ध्रुवम् ॥ ३८ ॥ तद्भक्त्या सकलानर्थान्प्राप्नोति पुरुषोत्तमः ॥ पुराणवाचिने दद्याद्गोभूस्वर्णविभूषणम् ॥३९॥ वित्तशाठ्यं न कर्तव्यं कुर्वन्दारिद्र्यमाप्नुयात् ॥ त्रिःकृत्वा प्रपठञ्छृण्वन्सर्वान्कामानवाप्नुयात् ॥४०॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे द्वितीये वस्त्रापथक्षेत्रमाहात्म्ये बलये वामनकृतवरप्रदानवृत्तान्तवर्णनपूर्वकं वस्त्रापथक्षेत्रयात्रामाहात्म्यसारस्वतभोजसंवादसमाप्तिपुरःसरवस्त्रापथक्षेत्रमाहात्म्यसमाप्तिवर्णनंनामैकोनविंशतितमोऽध्यायः ॥ १९ ॥ ॥

## इति श्रीस्कान्दे महापुराणे सप्तमे प्रभासखण्डे द्वितीयं वस्त्रापथक्षेत्रमाहात्म्यं सम्पूर्णम् ॥ (७-२) ॥

इदं पुस्तकं क्षेमराजश्रीकृष्णदासश्रेष्ठिना मुम्बय्यां स्वकीये "श्रीवेंकटेश्वर" स्टीम्-मुद्रणालये मुद्रयित्वा प्रकाशितम्। शके १८३१ संवत् १९६६



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति श्रीस्कांदे महापुराणे सप्तमे प्रभासखंडे द्वितीयं वस्त्रापथक्षेत्रमाहात्म्यं संपूर्णम्(७-२)॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ श्रीस्कांदे महापुराणे सप्तमे प्रभासखंडे तृतीयमर्बुदखण्डं प्रारभ्यते ॥ ( ७-३ ) ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ श्रीगणेशाय नमः ॥ अथ तृतीयमर्बुदखण्डं प्रारभ्यते ॥ ॥ व्यास उवाच ॥ ॥ ॐनमोनंताय सूक्ष्माय ज्ञानगम्याय वेधसे ॥ शुद्धाय विश्वरूपाय देवदेवाय शंभवे ॥ १ ॥ ॥ ऋषय ऊचुः ॥ ॥ कथितो वंशविस्तारो भवता सोमसूर्ययोः ॥ मन्वंतराणि सर्वाणि सृष्टिश्चैव पृथग्विधा ॥ २ ॥ अधुना श्रोतुमिच्छा मस्तीर्थमाहात्म्यमुत्तमम् ॥ कानि तीर्थानि पुण्यानि भूतलेऽस्मिन्महामते ॥ ३ ॥ ॥ सूत उवाच ॥ ॥ नानातीर्थानि लोकेऽस्मिन्येषां संख्या न विद्यते ॥ तिस्रः कोट्योऽर्द्धकोटिश्च तेषां संख्या कृता पुरा ॥ ४ ॥ क्षेत्राणि सरितश्चैव पर्वताश्च नदास्तथा ॥ ऋषीणां तपसो वीर्यान्माहात्म्यं परमं गताः ॥ ५ ॥ तेषां मध्येऽर्बुदोनाम सर्वपापहरोऽनघः ॥ अस्पृष्टः कलिदोषेण वसिष्ठस्य प्रभावतः ॥ ६ ॥ पुनंति सर्वतीर्थानि स्नानदानादिकैर्यथा ॥ अर्बुदो दर्शनादेव सर्वपापहरो नृणाम् ॥ ७ ॥ ॥ ऋषय ऊचुः ॥ ॥ किं प्रमाणोऽर्बुदो नाम कस्मिन्देशे व्यवस्थितः ॥ कथं वासिष्ठमाहात्म्यात्प्रथितो धरणीतले ॥ ८ ॥ कानि तीर्थानि मुख्यानि ह्यर्बुदे संति पर्वते ॥ सर्वं विस्तरतो ब्रूहि परं कौतूहलं हि नः ॥ ९ ॥ ॥ सूत उवाच ॥ ॥ अहं च संप्रवक्ष्यामि कथां पापप्रणाशिनीम् ॥ अर्बुदस्य द्विजश्रेष्ठा,माहात्म्यं च यथा श्रुतम् ॥ १० ॥ वसिष्ठोनाम देवर्षिः पितामहसमुद्भवः ॥ स पूर्वं भूतलं प्राप्तस्तपस्तेपे सुदारुणम् ॥ ११ ॥ नियतो नियताहारः सर्वभूतहिते रतः ॥ वर्षास्वाकाशवासी च हेमंते सलिलाशयः ॥ १२ ॥ पंचाग्निसाधको ग्रीष्मे जपहोमपरायणः ॥ केनचित्त्वथ कालेन तस्य धेनुः पयस्विनी ॥ नंदिनीति सुविख्याता सा वै कामदुघा शुभा ॥ १३ ॥ सा कदाचिद्धरापृष्ठे भ्रममाणा तृणाशया ॥ पतिता दारुणे श्वभ्रे अगाधे तिमिरावृते ॥ १४ ॥ एतस्मिन्नेव काले तु भगवांस्तीक्ष्णदीधितिः ॥ अस्तं गतो न संप्राप्ता नंदिनी मुनिसत्तमाः ॥ १५ ॥ तस्याः क्षीरेण नित्यं स सायं प्रातर्द्विजो मुनिः ॥ करोति होममग्नौ हि सुसमिद्धे जितव्रतः ॥ १६ ॥ अथ चिंतापरो विप्रः प्रायश्चित्तभयाद्ध्रुवम् ॥ वीक्षांचक्रे वने तस्मिन्समेषु विषमेषु च ॥ १७ ॥ स तच्छ्वभ्रमथासाद्य भूंभारावमथाशृणोत् ॥ तां प्रोवाच मुनिश्रेष्ठः कथं त्वं पतिता शुभे ॥ १८ ॥ अहं होमस्य चोद्वेगान्निःसृतस्त्वामवेक्षितुम् ॥ साऽब्रवीद्भक्षमाणाहं विप्रर्षे तृणवांछया ॥ १९ ॥ पतितात्र विभो त्राहि कृच्छ्रादस्मात्सुदुःसहात् ॥ तस्यास्तद्वचनं श्रुत्वा स मुनिर्ध्यानमास्थितः ॥ २० ॥ सरस्वतीं समादध्यौ नदीं त्रैलोक्यपावनीम् ॥ सा ध्याता मनसा तेन मुनिना तत्र तत्क्षणात् ॥ २१ ॥ श्वभ्रं तत्पूरयामास समंताद्विमलैर्जलैः ॥ परिपूर्णे ततः श्वभ्रे निष्क्रांता नंदिनी तदा ॥ २२ ॥ संहृष्टा मुनिना सार्द्धं ययावाश्रमसम्मुखम् ॥ २३ ॥ स

१ होमस्य चोद्वेगात्--होमविलंबजन्यात्--उद्वेगात्-इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

दृष्ट्वा श्वभ्रमध्यं तं गंभीरं च महामुनिः ॥ चिंतयामास मेधावी श्वभ्रस्यैव प्रपूरणे ॥ २४ ॥ तस्य चिंतयतो विप्रा बुद्धिरेषोदपद्यत ॥ आनीय पर्वतं मुक्त्वा श्वभ्रमेतत्प्रपूर्यते ॥ तस्माद्गच्छाम्यहं शीघ्रं हिमवन्तं नगोत्तमम् ॥ २५ ॥ स एव पर्वतं चात्र प्रेषयिष्यति भूधरः ॥ येन स्यात्परिपूर्णं च श्वभ्रमेतन्महात्मना ॥ २६ ॥ ततो जगाम स मुनिर्हिमवन्तं नगोत्तमम् ॥ दृष्ट्वा वसिष्ठमायांतं हिमवान्हृष्टमानसः ॥ अर्घ्यपाद्यादिसंस्कारैः संपूज्य इदमब्रवीत् ॥ २७ ॥ स्वागतं ते मुनिश्रेष्ठ सफलं मेऽद्य जीवितम् ॥ यद्भवान्मे गृहे प्राप्तः पूज्यः सर्वदिवौकसाम् ॥ २८ ॥ ब्रूहि कार्यं मुनिश्रेष्ठ अपि जीवितमात्मनः ॥ नूनं तुभ्यं प्रदास्यामि नियोगो दीयतां मम ॥२९॥ ॥वसिष्ठ उवाच॥ ॥ ममाश्रमस्य सांनिध्ये श्वभ्रमस्ति सुदारुणम् ॥ अगाधं नन्दिनी तत्र पतिता धेनुरुत्तमा ॥ ३० ॥ यत्नादाकर्षिता तस्माद्भूयः पतनजाद्भयात् ॥ तवांतिकमनुप्राप्तो नान्यो योग्यो महीपतिः ॥ ३१ ॥ तस्मात्कश्चिन्नगश्रेष्ठं तत्र प्रेषय भूधरम् ॥ येन तत्पूर्यते श्वभ्रं भृशं प्रेषय तादृशम् ॥ ३२ ॥ ॥ हिमवानुवाच ॥ ॥ किंप्रमाणं मुने श्वभ्रं विस्तारायामतो वद ॥ तत्प्रमाणं नगं कंचित्प्रेषयामि विचिंत्य च ॥ ३३ ॥ ॥ वसिष्ठ उवाच ॥ ॥ द्विसहस्रं तु दैर्घ्येण विस्तरेण त्रिसहस्रकम् ॥ न संख्या विद्यतेऽधस्तात्तस्य पर्वतसत्तम ॥ ३४ ॥ ॥ हिमवानुवाच ॥ ॥ कथं तेन प्रमाणेन सञ्जातो विवरो महान् ॥ अभूत्कौतूहलं तेन सर्वं विस्तरतो वद ॥ ३५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखण्डे वसिष्ठाश्रमसमीपवर्तिविवरवृत्तान्तोपक्रमवर्णनंनाम प्रथमोऽध्यायः ॥ १ ॥ ॥ छ ॥ ॥ वसिष्ठ उवाच ॥ ॥ आसीत्पूर्वं मुनिर्नाम्ना गौतमश्च महातपाः ॥ अहिल्या दयिता तस्य धर्मपत्नी यशस्विनी ॥ १ ॥ शिष्यानध्यापयामास स मुनिः शतशस्तदा ॥ श्रुताध्ययनसंपन्नान्विससर्ज ततो गृहान् ॥ २ ॥ तस्थान्योऽपि च यः शिष्यो गुरुभक्तिपरायणः ॥ उत्तंकोनाम मेधावी न्यवसत्तस्य मन्दिरे ॥ ३ ॥ न तं विसर्जयामास जरयापि परिप्लुतम् ॥ उत्तंकोऽपि सुशिष्यत्वान्नो वेत्ति पलितं शिरः ॥ ४ ॥ जातकार्यसमायुक्तो विद्यापारंगतोऽपि सः ॥ केनचित्त्वथ कालेन काष्ठार्थं स बहिर्ययौ ॥ ५ ॥ प्रभूतानि समादाय आश्रमं परमं गतः ॥ अथासौ न्यक्षिपत्तत्र भूतले काष्ठसंचयम् ॥ ६ ॥ काष्ठलग्नां तदा श्वेतां जटामेकां ददर्श सः ॥ स दृष्ट्वा दुःखमापन्नः कृपणं पर्यचिन्तयत् ॥७॥ धिग्धिङ्मे जीवितं नष्टं कुतः कार्यरतस्य च ॥ कलत्रसंग्रहं नैव मया कृतमबुद्धिना ॥ ८ ॥ भविष्यति कुलच्छेदः शैथिल्यान्मम दुर्मतेः ॥ गुरुपत्न्या च संदृष्ट उत्तंको दुःखितस्तदा ॥ ९ ॥ तस्य दुःखं तया क्षिप्रं गौतमाय निवेदितम् ॥ गौतमेन तथेत्युक्त्वा मृदुवाण्या स भाषितः ॥ १० ॥ वत्स गच्छ गृहं त्वं च अग्निहोत्रादिकाः क्रियाः ॥ 

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पालयस्व विधानेन पत्न्या सह न संशयः ॥ ११ ॥ इत्युक्तो गुरुणा सोऽपि प्रत्युवाच गुरुं प्रति ॥ दक्षिणां प्रार्थय स्वामिन्नहं दास्याम्यसंशयम् ॥ १२ ॥ ॥ गौतम उवाच ॥ ॥ सेवा कृता त्वया वत्स महती मम सर्वदा ॥ तेनैव परिपूर्णत्वं जातं मे नात्र संशयः ॥ १३ ॥ ॥ ॥ उत्तंक उवाच ॥ ॥ किंचिद्ग्राह्यं त्वया स्वामिन्सन्तोषो जायते मम ॥ त्वत्प्रसादान्मुनिश्रेष्ठ विद्यापारंगतोऽस्म्यहम् ॥ १४ ॥ ॥ गौतम उवाच ॥ ॥ न ग्राह्यं च मया पुत्र सन्तुष्टः सेवयास्म्यहम् ॥ नेच्छाम्यहं धनं त्वत्तः सुखं गच्छ गृहं प्रति ॥ १५ ॥ इत्युक्तो गुरुणा सोऽपि मातरं[1] चाभ्यभाषत ॥ किंचिद्ग्राह्यं मया मातः सन्तोषो दीयतां मम ॥ १६ ॥ ॥ गुरुपत्न्युवाच ॥ ॥ सौदासं गच्छ पुत्र त्वं ममाज्ञां कुरु सत्वरम् ॥ मदयन्ती प्रिया तस्य धर्मपत्नी यशस्विनी ॥ १७ ॥ कुण्डलेऽथानय क्षिप्रं मदयंत्याश्च पुत्रक ॥ नो चेच्छापं प्रदास्यामि पञ्चमेऽह्नि न आगतः ॥ १८ ॥ इत्युक्तो गुरुपत्न्या स प्रस्थितः सत्वरं तदा ॥ सौदासस्य गृहं प्राप व्याघ्रास्यं तं च दृष्टवान् ॥ १९ ॥ दृष्ट्वा प्राह तदा विप्रं भक्षणार्थमुपस्थितम् ॥ भक्षयिष्यामि वै विप्र त्वामहं नात्र संशयः ॥ २० ॥ ॥ उत्तंक उवाच ॥ ॥ अवश्यं भक्षय त्वं मामेकं शृणु नराधिप ॥ देहि मे कुण्डले तात दत्त्वाऽहं गुरवे पुनः ॥ आगमिष्यामि भक्षस्व मां त्वं कार्यविवर्जितम् ॥ २१ ॥ ॥ सौदास उवाच ॥ ॥ गच्छ त्वं मन्दिरे दुर्गे यत्राऽऽस्ते दयिता मम ॥ तां त्वमासाद्य यत्नेन जीवितव्यभयाद्द्विज ॥ २२ ॥ याच्यतां मम वाक्येन सा ते दास्यति कुण्डले ॥ त्वया च नान्यथा कार्यं यत्सत्यं द्विजसत्तम ॥ २३ ॥ ॥ वसिष्ठ उवाच ॥ ॥ मदयन्त्याः समीपं तु गत्वोवाच द्विजोत्तमः ॥ देहि मे कुण्डले देवि सौदासस्त्वां समादिशत् ॥२४॥ ॥ मदयंत्युवाच ॥ ॥ सन्देहोऽद्यापि मे विप्र कुण्डले द्विजसत्तम ॥ अभिज्ञानं त्वमानीय नृपस्य द्विज दर्शय ॥ २५ ॥ स गत्वा त्वरितं भूपमभिज्ञानमयाचत ॥ २६ ॥ ॥ सौदास उवाच ॥ ॥ यैर्विना सुगतिर्नास्ति दुर्गतिं ये नयंति वै ॥ गत्वैवं ब्रूहि तां साध्वीं मम वाक्यं द्विजोत्तम ॥ प्रदास्यति ततो नूनं कुण्डले रत्नमंडिते ॥ २७ ॥ ॥ वसिष्ठ उवाच ॥ ॥ प्रत्यभिज्ञानमादाय गत्वा तस्यै न्यवेदयत् ॥ २८ ॥ ततोऽसौ प्रददौ तस्मै गृह्ण मे कुण्डले द्विज ॥ उवाच यत्नमास्थाय नीयतां द्विजसत्तम ॥ २९ ॥ एते च वांछते नित्यं तक्षको द्विज कुण्डले ॥ स तथेति समादाय विस्मयोत्फुल्ललोचनः ॥ कौतुकात्पुनरागत्य राजानं वाक्यमब्रवीत्॥३०॥अभिज्ञानान्मया भूप सम्प्राप्ते दीप्तकुण्डले ॥ वाक्यार्थस्तु न विज्ञातस्ततोऽहं पुनरागतः ॥३१॥ कौतुकाद्वद मे राजन्स्वकार्ये च यथास्थितम् ॥ कैर्विना सुगतिर्नास्ति

[1] मातरम्—गुरुपत्नीम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

दुर्गतिं के नयंति च ॥ ३२ ॥ ॥ सौदास उवाच ॥ ॥ आराधिता द्विजा विप्र भवंति सुगतिप्रदाः ॥ असन्तुष्टा दुर्गतिदाः सद्यो मम यथा पुरा ॥ ३३ ॥ एतावान्मम शापोऽयं वसिष्ठस्य महात्मनः ॥ तेनोक्तं त्वां यदा कश्चित्प्रश्नं विख्यापयिष्यति ॥ ३४ ॥ तदा दोषविनिर्मुक्तो भविष्यसि न संशयः ॥ त्वत्प्रसादाद्विनिर्मुक्तो ह्यहं शापाद्द्विजोत्तम ॥ सात्त्विकं धाम चापन्नो गच्छ विप्र नमोऽस्तु ते ॥ ३५ ॥ ॥ वसिष्ठ उवाच ॥ ॥ उत्तंकस्तेन निर्मुक्तः सत्वरं पथमाश्रितः ॥ गच्छंश्चातिक्षुधाविष्टोऽपश्यद्बिल्वफलानि सः ॥ ३६ ॥ ततः कृष्णाजिने बद्ध्वा कुण्डले न्यस्य भूतले ॥ आरुरोह फलाकांक्षी स मुनिः क्षुधयाऽन्वितः ॥ ३७ ॥ एतस्मिन्नेव काले तु तक्षकः पन्नगोत्तमः ॥ गृहीत्वा कुण्डले तूर्णमगमद्दक्षिणामुखः ॥ ३८ ॥ अथोत्तंकः फलाहारी अवतीर्य धरातले ॥ सर्वतोऽन्वेषयामास वेगेन महता वृतः ॥ ३९ ॥ स दृष्ट्वा सम्मुखं प्राप्तं समीपं पन्नगोत्तमः ॥ प्रविवेश बिलं रौद्रमन्धकारेण संवृतम् ॥ ४० ॥ उत्तंकोऽपि बिलं प्राप्तः प्रविश्य तमसा वृतम् ॥ दण्डकाष्ठं समादाय कुपितो ह्यखनत्तदा ॥ ४१ ॥ तं तथा दुःखितं दृष्ट्वा सक्लेशं गुरुकार्यतः ॥ वज्रमारोपयामास दण्डांते पाकशासनः ॥४२॥ ततो विदारयामास स शीघ्रं धरणीतलम् ॥ प्रविष्टश्चैव पातालं कुण्डलार्थं परिभ्रमन् ॥४३॥ सोऽपश्यद्वाजिनं तत्र सर्वश्वेतं गुणान्वितम् ॥ तेनोक्तः स्पृश मे गुह्यं ततः कार्यं भविष्यति ॥४४॥ स चकार तथा शीघ्रं ततो धूमो व्यजायत ॥ पातालं तेन सर्वत्र व्याप्तं भूधर वह्निना ॥ ४५ ॥ ततश्च व्याकुलाः सर्वे पन्नगाः समुपाद्रवन् ॥ तक्षकं पुरतः कृत्वा संप्राप्ताः कुण्डलान्विताः ॥ उत्तंकाय ततो दत्त्वा प्रणिपत्य ययुर्गृहम् ॥ ४६ ॥ ॥ वसिष्ठ उवाच ॥ ॥ अथाश्वस्तमुवाचेदमहमग्निर्द्विजोत्तम ॥ यस्त्वयाऽऽराधितः पूर्वमुपाध्यायनिदेशतः ॥ ४७ ॥ ज्ञात्वा त्वां दुःखितं प्राप्तमिह प्राप्तः कृपापरः ॥ सर्वथा त्वं च मे पृष्ठं भगवन्छीघ्रमारुह ॥ ४८ ॥ नयामि तत्र यत्रास्ते गुरुः सर्वगुणालयः ॥ आरूढस्तस्य पृष्ठे स प्रतस्थे ह्याश्रमं प्रति ॥ ४९ ॥ तत्क्षणात्समनुप्राप्तो गौतमस्य निवेशनम् ॥ एतस्मिन्नेव काले तु अहिल्या कृतमंडना ॥५०॥ स्नाता चाभ्येत्य भर्तारं साध्वी वाक्यमुवाच ह ॥ उत्तंकोऽद्य न संप्राप्तः शापं दास्याम्यहं ध्रुवम् ॥ ५१ ॥ शिथिलो गुरुकृत्येषु स यदालक्षितो मया ॥ तस्या वाक्यावसाने तु उत्तंकः पर्यदृश्यत ॥ ५२ ॥ प्रसन्नवदनो हृष्टः कुण्डलाभ्यां समन्वितः ॥ प्रणिपत्य स तां भक्त्या कुण्डले संन्यवेदयत् ॥ ५३ ॥ सा दृष्ट्वा तत्क्षणात्साध्वी कर्णाभ्यां संन्यवेशयत् ॥ स्वगृहाय ततस्तूर्णमुत्तंकं विससर्ज ह ॥ ५४ ॥ ॥ वसिष्ठ उवाच ॥ ॥ एवं स विवरो जातस्तक्षकोत्तंककारणात् ॥ यथा मे चिंत्यते नित्यं धेन्वर्थं श्वभ्रपू



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रणे ॥ ९५ ॥ तस्मात्त्वं पूरय क्षिप्रं नान्यः शक्तोऽत्र कर्मणि ॥ शीघ्रं कुरु नगश्रेष्ठ मम कार्यमसंशयम् ॥ ९६ ॥ इति श्रीस्कांदे महापुराण एका
शीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखंडे विवरोत्पत्तिवृत्तांते गौतमशिष्योत्तंकचरित्रवर्णनंनाम द्वितीयोऽध्यायः ॥ २ ॥ छ ॥
॥ ॥ सूत उवाच ॥ ॥ श्रुत्वा हिमाचलो वाक्यं वसिष्ठस्य महात्मनः॥ चिन्तयामास तत्कार्यं विवरस्य प्रपूरणे॥१॥चिरं विचार्य तमृषिमिदमाह नगो
त्तमः॥ क उपायो नगानां वै तत्र गंतुं वदस्व मे ॥२॥ पक्षच्छेदस्तु शक्रेण सर्वेषां च पुरा कृतः॥ तस्मादस्य मुनिश्रेष्ठ कार्यस्य पश्य निश्चयम् ॥३॥
॥ ॥ वसिष्ठ उवाच ॥ ॥ अस्त्युपायो नगानां तु तत्र नेतुं महानग ॥ तवायं तनयस्तत्र विख्यातो नंदिवर्द्धनः ॥४॥ तस्यार्बुद इति ख्यातो वयस्यः
परमं प्रियः ॥ नागः प्राणभृतां श्रेष्ठः खेचरोऽपि च वीर्यवान् ॥५॥ स वा ऊर्ध्वगतिः[1] क्षिप्रं क्षणान्नेष्यत्यसंशयः ॥ लीलया सर्वकृत्येषु तं विदित्वाऽह
मागतः ॥६॥ आदेशो दीयतामस्य दुःखं कर्तुं च नार्हसि ॥ अवश्यं यदि भक्तोऽसि तत्र प्रेषय सत्वरम्॥७॥ ॥ सूत उवाच ॥ ॥ वसिष्ठस्य वचःश्रुत्वा
हिमवान्पुत्रवत्सलः ॥ दुःखेन महताऽऽविष्टश्चिंतयामास भूधरः ॥८॥ मैनाकस्तनयोऽस्माकं प्रविष्टः सागरे भयात् ॥ ज्येष्ठं तु सर्वथा चाथ वसिष्ठो
नेतुमागतः ॥ किं कृत्यमधुनाऽस्माकं कथं श्रेयो भविष्यति ॥ ९ ॥ इतः शापभयं तीव्रमितो दुःखं च पुत्रजम् ॥ वरं पुत्रवियोगोऽस्तु न शापो
द्विजसंभवः ॥ १० ॥ स एवं निश्चयं कृत्वा नंदिवर्धनमुक्तवान् ॥ गच्छ त्वं पुत्र मे वाक्याद्वसिष्ठस्याश्रमं प्रति ॥ ११ ॥ तत्रास्ति विवरो रौद्रस्तं
प्रपूरय सत्वरम् ॥ अर्बुदं नागमादाय मित्रं प्राणभृतां वरम् ॥ १२ ॥ ॥ नंदिवर्द्धन उवाच ॥ ॥ पापीयान्स विभो देशः फलमूलैर्विवर्जितः ॥
पालाशैः खादिरैराढ्यो धवैः शाल्मलिभिस्तथा ॥ १३ ॥ मुनिष्ठुरैर्नृपशुभिर्म्लेच्छैश्च विविधैरपि ॥ नद्यो वहंति नो तत्र दुष्टा लोकाश्च वासिनः ॥
नार्होऽहं पर्वतश्रेष्ठ तत्र गंतुं कथंचन ॥ १४ ॥ अथोवाच वसिष्ठस्तं संत्रस्तं नंदिवर्द्धनम् ॥ मा भीः कार्या त्वया तत्र देशे दौष्ट्यात्कथंचन ॥ १५ ॥
तव मूर्ध्नि सदा वासो मम तत्र भविष्यति ॥ तीर्थानि सरितो देवाः पुण्यान्यायतनानि च ॥ १६ ॥ वृक्षाश्च विविधाकाराः पत्रपुष्पफलान्विताः ॥
सदा तत्र भविष्यंति मृगाश्च विहगाः शुभाः ॥ १७ ॥ अहमेवानयिष्यामि तवार्थे च महेश्वरम् ॥ तदा स्थास्यंति वै तत्र सर्वे देवाः सवासवाः ॥
॥ १८ ॥ ॥ सूत उवाच ॥ ॥ वसिष्ठस्य वचः श्रुत्वा संहृष्टो नंदिवर्द्धनः ॥ अर्बुदं नागमासाद्य वाक्यमेतदुवाच ह ॥ १९ ॥ तत्र यावोऽद्य
भद्रं ते वयस्य विनयान्वित ॥ एतत्कार्यमहं मन्ये सांप्रतं[2] द्विजसंभवम् ॥ २० ॥ ॥ अर्बुद उवाच ॥ ॥ अहं तत्रागमिष्यामि स्नेहात्ते पर्वता

१ स वा ऊर्ध्वगतिः--सः--वै--ऊर्ध्वगतिः--इति पदच्छेदः । २ सांप्रतम्--योग्यम्--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



त्मज ॥ तत्रैव च वसिष्यामि त्वया सार्द्धमसंशयम् ॥ २१ ॥ किं त्वहं प्रणयाद्भ्रातर्वक्ष्यामि यद्वचः शृणु ॥ प्रणयान्नान्यथा कार्यं यद्यहं तव संमतः ॥ २२ ॥ मन्नाम्ना ख्यातिमायातु नान्यत्किंचिद्वृणोम्यहम् ॥ ततः सोऽपि प्रतिज्ञाय आरूढस्तस्य चोपरि ॥ प्रणम्य पितरौ चैव प्रतस्थे मुनिना सह ॥ २३ ॥ दिव्यैर्वृक्षैः शुभैः पूर्णैर्नदीनिर्झरसंकुलैः ॥ मधुरैर्विहगैर्युक्तो मृगैः सौम्यैः समन्वितः ॥ २४ ॥ मुक्तोऽर्बुदेन तत्रैव विवरे मुनिवाक्यतः ॥ समस्तस्तत्रानासाग्रं गतः पर्वतसत्तमः ॥ २५ ॥ विमुक्तो विवरे तस्मिन्नर्बुदेन महात्मना ॥ परिपूर्णे महारौद्रे संतुष्टो मुनिपुंगवः ॥ २६ ॥ ब्रवीच्चार्बुदं नागं वरं वरय सुव्रत ॥ परितुष्टोऽस्मि ते भद्र कर्मणानेन पन्नग ॥ २७ ॥ ॥ अर्बुद उवाच ॥ ॥ एष एव वरोऽस्माकं यत्त्वं तुष्टो महामुने ॥ अवश्यं यदि दातव्यं तच्छृणुष्व द्विजोत्तम ॥ २८ ॥ यच्चैतच्छिखरे ह्यस्मिन्निर्झरं निर्मलोदकम् ॥ नागतीर्थमिति ख्यातिं भूतले यातु सर्वतः ॥ २९ ॥ अत्रैवाहं वसिष्यामि मित्रस्नेहात्सदा मुने ॥ तत्र स्नात्वा दिवं यातु मानवस्त्वत्प्रसादतः ॥ ३० ॥ अपि वंध्या च या नारी स्नानमात्रं समाचरेत् ॥ सा स्यात्पुत्रवती विप्र सुखसौभाग्यसंयुता ॥ ३१ ॥ ॥ वसिष्ठ उवाच ॥ ॥ या वंध्यास्मिञ्जले पूर्णे स्नानमात्रं करिष्यति ॥ सापि पुत्रमवाप्नोति सर्वलक्षणलक्षितम् ॥ ३२ ॥ नभसः शुक्लपंचम्यां फलैः पूजां करोति च ॥ अपि वर्षशता नारी सा भविष्यति पुत्रिणी ॥ ३३ ॥ येऽत्र स्नानं करिष्यंति ह्यस्मिंस्तीर्थे च भक्तितः ॥ यास्यंति ते परं स्थानं जरामरणवर्जितम् ॥ ३४ ॥ श्राद्धं चात्र करिष्यंति पंचम्यां ये समाहिताः ॥ मासे नभसि तीर्थस्य फलं तेषां भविष्यति ॥ ३५ ॥ ॥ सूत उवाच ॥ ॥ एवं दत्त्वा वरं तस्य वसिष्ठो भगवान्मुनिः ॥ नंदिवर्द्धनमभ्येत्य वाक्यमेतदुवाच ह ॥ ३६ ॥ वरं च व्रियतां वत्स परितुष्टोऽस्मि तेऽनघ ॥ विनयात्सौहृदात्सर्वं दास्यामि यत्सुदुर्लभम् ॥ ३७ ॥ ॥ नंदिवर्द्धन उवाच ॥ ॥ तवास्तु वचनं सत्यं पूर्वोक्तं मुनिसत्तम ॥ सांनिध्यं जायतामत्र अवश्यं तव सर्वदा ॥ ३८ ॥ यथाहमर्बुदेत्येवं ख्यातिं गच्छामि भूतले ॥ प्रसादाच्चैव ते भूयादेतन्मे मनसि स्थितम् ॥ ३९ ॥ ॥ सूत उवाच ॥ ॥ एवमस्त्विति तं प्रोच्य वसिष्ठो भगवान्मुनिः ॥ चक्रे स्वमाश्रमं तत्र तस्य वाक्येन नोदितः ॥ ४० ॥ पनसैश्चंपकैराम्रैः प्रियंगुबिल्वदाडिमैः ॥ नानापक्षिसमायुक्तो देवगन्धर्वसेवितः ॥ ४१ ॥ तस्थौ तत्र मुनिश्रेष्ठो ह्यरुंधत्या समन्वितः ॥ गोमतीमानयामास तपसा मुनिसत्तमः ॥ ४२ ॥ यस्यां स्नात्वा दिवं यांति अतिपापकृतो नराः ॥ माघमासे विशेषेण मकरस्थे दिवाकरे ॥ ४३ ॥ येत्र स्नानं करिष्यंति ते यास्यंति परां गतिम् ॥४४॥ माघमासे

१ प्रियंगुभिः सद्राक्षकैः–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशेषेण तिलदानं करोति यः ॥ तिलसंख्यानि वर्षाणि स्वर्गे तिष्ठति मानवः ॥ ४५ ॥ बहुना किमिहोक्तेन स्नानमात्रं समाचरेत् ॥ ४६ ॥ वसिष्ठस्य मुखं दृष्ट्वा पुनर्जन्म न विद्यते ॥ अरुंधती पूंजनीया पूजनीया विशेषतः ॥ ४७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखण्डे वसिष्ठाज्ञया नन्दिवर्धनपर्वतेन विवरपूरणवर्णनंनाम तृतीयोऽध्यायः ॥ ३ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ स कृत्वा स्वाश्रमं तत्र वसिष्ठो भगवान्मुनिः ॥ तत्र शंभोर्निवासाय तपस्तेपे सुदारुणम् ॥ १ ॥ स बभूव मुनिः सम्यक्फलाहारसमन्वितः ॥ शीर्णपर्णाशनः पश्चाद्द्वे शते समपद्यत ॥ २ ॥ जलाहारः पञ्चशतवर्षाणि स बभूव ह ॥ वर्षाणां वायुभक्षोऽभूत्ततो दशशतानि च ॥ ३ ॥ पञ्चाग्निसाधको ग्रीष्मे हेमन्ते सलिलाशयः ॥ वर्षास्वाकाशवासी च सहस्रं च ततोऽभवत् ॥ ४ ॥ ततस्तुष्टो महादेवस्तस्यर्षेः सुमहात्मनः ॥ भित्त्वा तं पर्वतं सद्यस्तत्पुरो लिंगमुत्थितम् ॥ तं दृष्ट्वा विस्मयाविष्टो मुनिः स्तोत्रमुदैरयत् ॥ ५ ॥ नमः शिवाय शुद्धाय सर्वगायाऽमृताय च ॥ कपर्दिने नमस्तुभ्यं नमस्तस्मै त्रिमूर्त्तये ॥ ६ ॥ नमः स्थूलाय सूक्ष्माय व्यापकाय महात्मने ॥ निषंगिणे नमस्तुभ्यं त्रिनेत्राय नमोनमः ॥ ७ ॥ नमश्चन्द्रकलाधार नमो दिग्वसनाय च ॥ पिनाकपाणये तुभ्यमष्टमूर्ते नमोनमः ॥ ८ ॥ नमस्ते ज्ञानरूपाय ज्ञानगम्याय ते नमः ॥ नमस्ते ज्ञानदेहाय सर्वज्ञानमयाय च ॥ ९ ॥ काशीपते नमस्तुभ्यं गिरिशाय नमोनमः ॥ जगत्कारणरूपाय महादेवाय ते नमः ॥ १० ॥ गौरीकान्त नमस्तुभ्यं नमस्तुभ्यं शिवात्मने ॥ ब्रह्मविष्णुस्वरूपाय त्रिनेत्राय नमोनमः ॥ ११ ॥ विश्वरूपाय शुद्धाय नमस्तुभ्यं महात्मने ॥ नमो विश्वस्वरूपाय सर्वदेवमयाय च ॥ १२ ॥ ॥ सूत उवाच ॥ ॥ एतस्मिन्नेव काले तु वागुवाचाशरीरिणी ॥ परितुष्टोऽस्मि ते भद्रं वरं वरय सुव्रत ॥ १३ ॥ इत्युक्त्वा पर्वतं भित्त्वा तत्पुरो लिंगमुत्थितम् ॥ १४ ॥ ॥ वसिष्ठ उवाच ॥ ॥ लिंगेऽस्मिंस्तव सांनिध्यं सदा भवतु शंकर ॥ मया पूर्वं प्रतिज्ञातं नगस्येह महात्मने ॥ सत्यं कुरु वचो मे त्वं यदि तुष्टोऽसि शंकर ॥ १५ ॥ ॥ श्रीभगवानुवाच ॥ ॥ अद्यप्रभृति लिंगेऽस्मिन्सांनिध्यं मे भविष्यति ॥ त्वद्वाक्याद्ब्राह्मणश्रेष्ठ सर्वं सत्यं भविष्यति ॥ १६ ॥ स्तोत्रेणानेन यो मर्त्यो मां स्तविष्यति भक्तितः ॥ कृष्णपक्षे चतुर्दश्यामाश्विने मुनिसत्तम ॥ १७ ॥ मत्प्रियार्थं तु शक्रेण प्रेषिता मुनिसत्तम ॥ मन्दाकिनीति विख्याता नदी त्रैलोक्यपाविनी ॥ १८ ॥ देवस्योत्तरदिग्भागे कुंडं तिष्ठति नित्यशः ॥ तस्यां स्नात्वा मुनिश्रेष्ठ लिंगं मे पश्यते तु यः ॥ स याति परमं स्थानं जरामरणवर्जितम् ॥ १९ ॥

१ पूजनीया—पूज्या—अरुंधती—विशेषेण—पूजनीया—पूजितव्या—इति योजना ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



अचलं भेदयित्वा तु यस्मान्मे लिंगमुद्गतम् ॥ अचलेश्वरनाम्नैव लोके ख्यातिं गमिष्यति ॥ २० ॥ अस्य लिंगस्य माहात्म्यान्न कदाचिच्चलिष्यति ॥ सर्वथा म इदं लिंगं प्रलयान्ते न चाल्यते ॥ २१ ॥ ॥ सूत उवाच ॥ ॥ एतावदुक्त्वा वचनं विरराम महेश्वरः ॥ वसिष्ठोऽपि सुहृष्टात्मा गौतमाद्या मुनीश्वराः ॥ २२ ॥ शक्रादयस्ततो देवास्तीर्थान्यायतनानि च ॥ आनयामास ब्रह्मर्षिस्तपसा पर्वतोत्तमे ॥ २३ ॥ ततस्तुष्टः सुरश्रेष्ठस्तत्र वासमथाकरोत् ॥ २४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखंडेऽचलेश्वरोत्पत्तिवर्णनंनाम चतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ अर्बुदस्य च माहात्म्यं विस्तरेण वदस्व नः ॥ कौतुकं सूत नो जातं कथयस्व यथा शुभम् ॥ १ ॥ ॥ सूत उवाच ॥ ॥ पुरासीच्च ऋषिश्रेष्ठः पुलस्त्यो भगवान्मुनिः ॥ ययातेश्च गृहे यातस्तं नत्वा चाब्रवीन्नृपः॥ २ ॥ ॥ ययातिरुवाच ॥ ॥ स्वागतं ते मुनिश्रेष्ठ सफलं मेऽद्य जीवितम् ॥ कथयस्व प्रसादेन कथामर्बुदसंभवाम् ॥ ३ ॥ अर्बुदाख्यो नगो नाम विख्यातो यो धरातले ॥ तस्य यात्राक्रमं ब्रूहि तत्फलं द्विजसत्तम ॥ ४ ॥ सर्वं विस्तरतो ब्रूहि तीर्थयात्रापरायण ॥ तस्माद्वद मुनिश्रेष्ठ येन यात्रां करोम्यहम् ॥ ५ ॥ ॥ पुलस्त्य उवाच ॥ ॥ बहुधर्ममयो राजन्नर्बुदः पर्वतोत्तमः ॥ अशक्तो विस्तराद्वक्तुमपि वर्षशतैरपि ॥ ६ ॥ संक्षेपादेव वक्ष्यामि तीर्थमुख्यानि ते तथा ॥ नागतीर्थं तु तत्राद्यं सर्वकामप्रदं नृणाम् ॥ ७ ॥ नारीणां च विशेषेण पुत्रसौभाग्यदायकम् ॥ शृणु राजन्पुरावृत्तं यतोऽस्याश्चर्यमुत्तमम् ॥ ८ ॥ गौतमी ब्राह्मणी नाम्ना सती साध्वी पतिव्रता ॥ बालवैधव्यसंप्राप्ता तीर्थयात्रापरायणा ॥ ९ ॥ अर्बुदं सा च संप्राप्ता नागतीर्थं विवेश ह ॥ तस्मिञ्जले निमग्ना सा स्नातुमभ्यागयौ पुरा ॥ १० ॥ नायका पुत्रसंयुक्ता तत्तीर्थं समुपागता ॥ शुश्रूषां सा ततस्तस्याश्चक्रे नानाविधां नृप ॥ ११ ॥ सर्वोपकरणैर्दर्भैः सुमनोभिः पृथग्विधैः ॥ अथ सा चिंतयामास गौतमी पुत्रदुःखिता ॥ १२ ॥ धन्योऽयं तनयो ह्यस्याः शुश्रूषां कुरुते सदा ॥ पुत्रयुक्ता त्वियं धन्या धिगहं पुत्रवर्जिता ॥ १३ ॥ अहं भर्त्रा वियुक्ता च पुत्रहीना सुदुःखिता ॥ अथ सा निर्गता तस्मात्सलिलान्नृपसत्तम ॥१४॥ विनाऽपि भर्तृसंयोगात्सद्यो गर्भवती ह्यभूत् ॥ सा गर्भलक्षणैर्युक्ता सुजनव्रीडयाऽन्विता ॥ १५ ॥ चकार मरणे बुद्धिं ज्वालयामास पावकम् ॥ एतस्मिन्नेव काले तु वागुवाचाशरीरिणी ॥ १६ ॥ ॥ वागुवाच ॥ ॥ नो त्वं गौतमि चित्याग्नौ प्रवेशं कर्तुमर्हसि ॥ दोषो नास्ति तवात्रार्थे तीर्थस्यास्य प्रभावतः ॥ १७ ॥ यो यद्वांछति चित्ते च जलमध्ये स्थितो नरः ॥ चिन्तितं च तदाप्नोति नारी वा नात्र संशयः ॥ १८ ॥ त्वया तस्याः सुतं दृष्ट्वा पुत्रवांछा कृता हृदि ॥ तत्र गर्भगतो नूनं पुत्रः पुत्रि भविष्यति ॥ १९ ॥ तस्माद्विरम भद्रं ते निर्दो



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षासि पतिव्रते ॥ विरराम ततः साध्वी गौतमी मरणान्नृप ॥ २० ॥ श्रुत्वाऽऽकाशगतां वाणीं देवदूतेन भाषिताम् ॥ दृष्ट्वा पतिं विना गर्भं वाक्यमेतदुवाच ह ॥ २१ ॥ अहो तीर्थप्रभावोऽयमपूर्वः प्रतिभाति मे ॥ यत्र संजायते गर्भः स्त्रीणां शुक्ररजोविना ॥ २२ ॥ नाहं कुत्रापि यास्यामि मुक्त्वेदं तीर्थमुत्तमम् ॥ एवमुक्त्वा ततः साध्वी तत्रैव न्यवसत्सदा ॥२३॥ पुत्रं वै जनयामास सर्वलक्षणलक्षितम् ॥ तत्र पार्थिवशार्दूल कृष्णपक्षेऽश्विनस्य[1] च ॥२४॥ यः पुनः कुरुते श्राद्धं तस्य वंशो न नश्यति ॥ न प्रेतो जायते राजन्वंशे तस्य कदाचन ॥२५॥ यः पुमान्कामरहितः स्नानं तत्र समाचरेत् ॥ श्राद्धं च पार्थिवश्रेष्ठ तस्य लोकाः सनातनाः ॥२६॥ या स्त्री पुष्पफलान्येव तीर्थे चास्मिन्विसर्जयेत् ॥ सा स्यात्पुत्रवती धन्या सौभाग्यं च प्रपद्यते ॥ २७ ॥ निष्कामा स्वर्गमाप्नोति दुष्प्राप्यं त्रिदशैरपि ॥ तस्मात्सर्वप्रयत्नेन यात्रां तस्य समाचरेत् ॥ २८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखण्डे नागतीर्थमाहात्म्यवर्णनंनाम पंचमोऽध्यायः ॥ ५ ॥ ॥ छ ॥ ॥

॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो गच्छेन्नृपश्रेष्ठ वसिष्ठं तपसां निधिम् ॥ यं दृष्ट्वा मानवः सम्यक्कृतार्थत्वमवाप्नुयात् ॥ १ ॥ तत्रास्ति जलसम्पूर्णं कुण्डं पापहरं नृणाम् ॥ तस्मिन्कुण्डे नृपश्रेष्ठ वसिष्ठेन महात्मना ॥ २ ॥ गोमती च समानीता तपसा नृपसत्तम ॥ तत्र स्नातो नरः सम्यक्पातकैर्विप्रमुच्यते ॥३॥ ऋषिधान्येन यस्तत्र श्राद्धं नृप समाचरेत् ॥ स पितॄंस्तारयेत्सर्वान्पक्षयोरुभयोरपि ॥४॥ अत्र गाथा पुरा गीता नारदेन महात्मना ॥ स्नात्वा पुण्योदके तत्र दृष्ट्वा तं मुनिसत्तमम् ॥ ५ ॥ किं गयाश्राद्धदानेन किमन्यैर्मखविस्तरैः ॥ वसिष्ठस्याश्रमं प्राप्य यः श्राद्धं कुरुते नरः ॥ स पितॄंस्तारयेत्सर्वानात्मना नृपसत्तम ॥ ६ ॥ तत्रैवारुंधती साध्वी वसिष्ठस्य समीपतः ॥ पूजनीया विशेषेण सर्वकामप्रदा नृणाम् ॥ ७ ॥ बाल्ये वयसि यत्पापं वार्द्धके यौवनेऽपि वा ॥ वसिष्ठदर्शनात्सद्यो नराणां याति संक्षयम् ॥८॥ दीपं प्रयच्छते यस्तु वसिष्ठाग्रे समाहितः ॥ सुखसौभाग्यसंयुक्तस्तेजस्वी जायते नरः ॥ ९ ॥ उपवासपरो यस्तु तत्रैकां रजनीं नयेत् ॥ स याति परमं स्थानं यत्र सप्तर्षयोऽमलाः ॥ १० ॥ त्रिरात्रिं कुरुते यस्तु वसिष्ठाग्रे समाहितः ॥ स याति च महर्लोकं जरामरणवर्जितः ॥ ११ ॥ यस्तु मासोपवासं च वसिष्ठाग्रे करोति च ॥ सोऽपि मुक्तिमवाप्नोति न याति स भवार्णवम् ॥ १२ ॥ श्रावणस्य सिते पक्षे पौर्णमास्यां समाहितः ॥ ऋषिं तर्पयते यस्तु ब्रह्मलोकं स गच्छति ॥ १३ ॥ वसिष्ठस्याग्रतो यस्तु गायत्र्यष्टशतं जपेत् ॥ आजन्ममरणात्पापात्सद्यो मुच्येत मानवः ॥ १४ ॥ वामदेवं[2] यजेत्तत्र यदि श्रद्धासमन्वितः ॥ अग्निष्टोमफलं

१ अश्विनस्य--आश्विनस्य--आदिवृद्ध्यभाव आर्षः । २ वामदेव्यं जपेत्साम यदि श्रद्धासमन्वितः--इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



राजन्सद्यः प्राप्नोति मानवः ॥ १५ ॥ तस्मात्सर्वप्रयत्नेन द्रष्टव्योऽसौ महामुनिः ॥ शुचिभिः श्रद्धया युक्तास्ते यास्यंति परं पदम् ॥ १६ ॥ तस्मा
त्सर्वात्मना राजन्वामदेवं च पूजयेत् ॥ १७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखंडे वसि
ष्ठाश्रममाहात्म्यवर्णनंनाम षष्ठोऽध्यायः ॥ ६ ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो गच्छेन्नृपश्रेष्ठ सुपुण्यमचलेश्वरम् ॥ यं दृष्ट्वा सिद्धि
माप्नोति नरः श्रद्धासमन्वितः ॥ १ ॥ तत्र कृष्णचतुर्दश्यां यः श्राद्धं कुरुते नरः ॥ आश्विने फाल्गुने वापि स याति परमां गतिम् ॥ २ ॥
यस्तु पूजयते भक्त्या दक्षिणां दिशमास्थितः ॥ पुष्पैः पत्रैः फलैश्चैव सोऽश्वमेधफलं लभेत् ॥ ३ ॥ पंचामृतेन यस्तत्र तर्पणं कुरु
ते नरः ॥ सोऽपि देवस्य सांनिध्यं शिवलोकमवाप्नुयात् ॥ ४ ॥ प्रदक्षिणांते यस्तस्य प्रणामं कुरुते नरः ॥ नश्यंति सर्वपापानि प्रदक्षिणपदेपदे
॥ ५ ॥ तत्राश्चर्यमभूत्पूर्वं तत्त्वं शृणु महामते ॥ मया पूर्वं श्रुतं स्वर्गे नारदाच्छक्रसन्निधौ ॥ ६ ॥ तत्र पूर्वं शुको नीडं वृक्षे चैवाकरोद्द्विजः ॥
गतागतेन नीडस्य कुरुते तं प्रदक्षिणाम् ॥ ७ ॥ न च भक्त्या महाराज पक्षियोनिसमुद्भवः ॥ अथासौ मृत्युमापन्नः कालेन महता शुकः ॥ ८ ॥
संजातः पार्थिवे वंशे राजा वेणुरिति स्मृतः ॥ जातिस्मरो महाराज सर्वशत्रुनिकृन्तनः ॥ ९ ॥ स तं स्मृत्वा प्रभावं हि प्रदक्षिणासमुद्भवम् ॥
अचलेश्वरमासाद्य प्रदक्षिणामथाकरोत् ॥ १० ॥ नक्तं दिनं महाराज नान्यत्किंचित्करोति सः ॥ न तथा तपसे यत्नो न नैवेद्ये कथंचन ॥ ११ ॥
न पुष्पे धूपदाने च प्रदक्षिणापरः सदा ॥ केनचित्त्वथ कालेन मुनयोऽत्र समागताः ॥ १२ ॥ नारदः शौनकश्चैव हारीतो देवलस्तथा ॥ गालवः
कपिलो नंदः सुहोत्रः कश्यपो नृपः ॥ १३ ॥ एते चान्ये च बहवो देवव्रतपरायणाः ॥ केचित्स्नानं कारयंति तस्य लिंगस्य भक्तितः ॥ १४ ॥
अन्ये च विविधां पूजां जपमन्ये समाहिताः ॥ एके नृत्यंति राजेंद्र गायंति च तथा परे ॥ १५ ॥ बलिमन्ये प्रयच्छंति स्तुतिं कुर्वंति चापरे ॥
अथाश्चर्यं परं दृष्ट्वा प्रदक्षिणापरं नृपम् ॥ १६ ॥ परं कौतुकमापन्ना वाक्यमेतदथाब्रुवन् ॥ प्रदक्षिणासमुद्भूतं कारणं ज्ञातुमिच्छवः ॥ १७ ॥
॥ ॥ ऋषय ऊचुः ॥ ॥ कस्मात्त्वं पार्थिवश्रेष्ठ प्रदक्षिणापरः सदा ॥ देवस्यास्य विशेषेण सत्यं नो वक्तुमर्हसि ॥ १८ ॥ न ददासि जलं लिंगे प्रभूतं
सुमनोहरम् ॥ पुष्पधूपादिकं वाथ स्तोत्राणि विविधानि च ॥ १९ ॥ समर्थोऽसि तथान्येषां दानानां त्वं महीपते ॥ एतन्नः कौतुकं सर्वं यथावद्वक्तु
मर्हसि ॥ २० ॥ ॥ वेणुरुवाच ॥ ॥ यदहं संप्रवक्ष्यामि श्रूयतां द्विजसत्तमाः ॥ पूर्वदेहांतरे वृत्तं सर्वं सत्यं विशेषतः ॥ २१ ॥ प्रासादेऽस्मि

१ द्विजः—पक्षी—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्पुरा पक्षी शुकोऽहं स्थितवांस्तदा ॥ कृतवांश्च तदा देवं प्रदक्षिणामहर्निशम् ॥२२॥ कृपयाऽस्य प्रभावाच्च जातो जातिस्मरस्त्वहम् ॥ अधुना परया भक्त्या यत्करोमि प्रदक्षिणाम् ॥ २३ ॥ न जाने किं फलं मेऽद्य देवस्यास्य प्रसादतः ॥ एतस्मात्कारणाच्चाहं नान्यत्किंचित्करोमि भोः ॥ २४ ॥ ॥ ॥ पुलस्त्य उवाच ॥ ॥ वेणुवाक्यं ततः श्रुत्वा मुनयः शंसितव्रताः ॥ विस्मयोत्फुल्लनयनाः साधुसाध्विति चाब्रुवन् ॥ २५ ॥ ततः प्रदक्षिण पराः सर्वे तत्र महर्षयः ॥ बभूवुर्मुनयः सर्वे श्रद्धया परया युताः ॥ २६ ॥ सोऽपि राजा महाभागो वेणुः शंभोः प्रसादतः ॥ शाश्वतं स्थानमापन्नो दुर्लभं त्रिदशैरपि ॥ २७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखंडेऽचलेश्वरप्रभाववर्णनंनाम सप्तमोऽध्यायः ॥ ७ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो गच्छेन्नृपश्रेष्ठ भद्रकर्णं महाह्रदम् ॥ त्रिनेत्राभाः शिला यत्र दृश्यंतेऽद्यापि भूरिशः ॥१॥ तस्यैव पश्चिमे भागे लिंगमस्ति पिनाकिनः ॥ यं दृष्ट्वा मानवस्तत्र त्रिनेत्रसदृशो भवेत् ॥ २ ॥ भद्रकर्णगणोनाम पुरासीच्छिववल्लभः ॥ तेनात्र स्थापितं लिंगं ह्रदश्चैव विनिर्मितः ॥ ३ ॥ केनचित्त्वथ कालेन संग्रामे दानवैः सह ॥ युयुधे पुरतः शंभोर्नानागणसमन्वितः ॥ ४ ॥ नष्टे स्कंदे हते सैन्ये वीरभद्रे पराजिते ॥ गतास्ते भयसंत्रस्ता महाकाले विनिर्जिते ॥ ५ ॥ बलवांन्नमुचिर्नाम दानवो बलवत्तरः ॥ खड्गचर्मधरः शीघ्रं महेश्वरमुपाद्रवत् ॥ ६ ॥ भद्रकर्णस्तु तं दृष्ट्वा दानवं तदनंतरम् ॥ पतंतं संमुखस्तस्य तिष्ठतिष्ठेति चाब्रवीत् ॥ ७ ॥ छित्त्वाऽसिमसिना तस्य चर्म चापि महाबलः ॥ स्तनयोरंतरे दैत्यं कोपाविष्टोऽहनन्नृप ॥ ८ ॥ अथासौ निहतस्तेन प्रविश्य विपुलं तमः ॥ निपपात महीपृष्ठे वायुभग्न इव द्रुमः ॥ ९ ॥ वधं प्राप्त स्तु दैत्योऽसौ नत्वा हरमसौ स्थितः ॥ सत्ये स्थितं च तं दृष्ट्वा ततस्तुष्टो महेश्वरः ॥ १० ॥ ॥ श्रीभगवानुवाच ॥ ॥ तव वीर्येण संतुष्टो धर्मेण च विशेषतः ॥ वरं वरय भद्रं ते नित्यं यो हृदये स्थितः ॥ ११ ॥ ॥ भद्रकर्ण उवाच ॥ ॥ यन्मया स्थापितं लिंगमर्बुदे सुरसत्तम ॥ अत्रास्तु तव सांनिध्यं ह्रदेऽस्मिंश्च स्थिरो भव ॥ १२ ॥ ॥ श्रीभगवानुवाच ॥ ॥ माघमासे चतुर्दश्यां कृष्णपक्षे सदा मम ॥ सांनिध्यं च विशेषेण ह्रदे लिंगे भविष्यति ॥ १३ ॥ भद्रकर्णह्रदे स्नात्वा त्रिनेत्रं यः समाहितः ॥ द्रक्ष्यते स तु मे स्थानं शाश्वतं यास्यति ध्रुवम् ॥ १४ ॥ तस्मात्सर्वप्र यत्नेन स्नानं तत्र समाचरेत् ॥ पूजयित्वा च तल्लिंगं शिवलोकं स गच्छति ॥ १५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे तृतीयेऽर्बुदखंडे भद्रकर्णह्रदत्रिनेत्रमाहात्म्यवर्णनंनामाष्टमोऽध्यायः ॥ ८ ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो

१ बलवान्–ससैन्यः–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



गच्छेन्नृपश्रेष्ठ तीर्थं त्रैलोक्यविश्रुतम् ॥ केदारमिति विख्यातं सर्वपापहरं नृणाम् ॥ १ ॥ यत्र मन्दाकिनी पुण्या सरस्वत्या समागता ॥
तत्र स्नातो नरो राजन्मुच्यते सर्वकिल्बिषैः ॥ २ ॥ शृणु राजन्यथावृत्तमितिहासं पुरातनम् ॥ ऋषिभिर्बहुधा गीतमर्बुदे पर्वतोत्तमे ॥ ३ ॥ अज
पालो नृपश्रेष्ठः सूर्यवंशसमुद्भवः ॥ सप्तद्वीपवतीं पृथ्वीं स पाति नात्र संशयः ॥ ४ ॥ न हस्तिनो न पादाता न चाश्वास्तस्य भूपतेः ॥ न रथाश्च महा
राज न कोशाश्च तथाविधाः ॥ ५ ॥ न गृह्णाति करं राजन्प्रजाभ्योथाधिकं नृप ॥ राज्यं स ईदृशं चक्रे सर्वलोकहिते रतः ॥६॥ जातापराधो भूपृष्ठे
जायते चेत्कथंचन ॥ तं गत्वा निग्रहं तस्य चक्रुः शस्त्राणि तत्क्षणात् ॥ ७ ॥ एवमस्य नरेन्द्रस्य वर्त्तमानस्य भूतले ॥ सुखेन रमते लोको राज्ये
निहतकंटके ॥ ८ ॥ कामं वर्षति पर्जन्यः सस्यानि रसवंति च ॥ गावः प्रभूतदुग्धाश्च विद्यमाने नराधिपे ॥ ९ ॥ केनचित्त्वथ कालेन वसिष्ठो
भगवान्मुनिः ॥ तीर्थयात्राप्रसंगेन तस्य गेहमुपागतः ॥ १० ॥ तं दृष्ट्वा पूजयामास शास्त्रदृष्टेन वर्त्मना ॥ प्रत्युत्थानाभिवादाभ्यामर्घ्यपाद्यादिभि
स्तथा ॥ ११ ॥ एवं संपूजितस्तेन भक्त्या परमया नृप ॥ सुखोपविष्टो विश्रांतो वसिष्ठो मुनिसत्तमः ॥ राजर्षीणां कथाश्चक्रे देवर्षीणां तथैव च ॥
॥ १२ ॥ ततः कथावसाने तु कस्मिंश्चिन्नृपसत्तम ॥ पप्रच्छ विनयोपेतस्तं मुनिं शंसितव्रतम् ॥ १३ ॥ ॥ अजपाल उवाच ॥ ॥ अतीता
नागतं विप्र वर्त्तमानं तथैव च ॥ त्वं वेत्सि सकलं ब्रह्मंस्तपश्चर्याप्रभावतः ॥ १४ ॥ कौतुकं हृदि मे जातं वर्त्तते मुनिपुंगव ॥ प्रसादः क्रियतां
मह्यं कथयस्व प्रसादतः ॥ १५ ॥ ॥ वसिष्ठ उवाच ॥ ॥ ब्रूहि पार्थिवशार्दूल यत्ते मनसि वर्त्तते ॥ कथयिष्यामि तत्सर्वं यद्यपि स्यात्सु
दुर्लभम् ॥ १६ ॥ ॥ राजोवाच ॥ ॥ केन कर्मविपाकेन ममैतद्राज्यमुत्तमम् ॥ निष्कण्टकं सदा क्षेमं सर्वकामसमन्वितम् ॥ १७ ॥ न दीनो
न च दुःखार्त्तो व्याधिग्रस्तो न कोऽपि च ॥ विद्यते मम राज्ये च न दरिद्रो महामुने ॥ १८ ॥ नारीयं मम साध्वी च प्राणेभ्योऽपि गरी
यसी ॥ मच्चित्ता मद्गतप्राणा नित्यं मम हिते रता ॥ अनया चिंतितं ब्रह्मन्सर्वं विस्तरतो वद ॥ १९ ॥ किं दानस्य प्रभावेन व्रतयागस्य वा मुने ॥
तपसो वा मुनिश्रेष्ठ व्रतस्य नियमस्य च ॥ २० ॥ जन्मान्तरकृतं पुण्यं परं कौतूहलं हि मे ॥ कथयस्व प्रसादेन विस्तरेण द्विजोत्तम ॥ २१ ॥
॥ ॥ वसिष्ठ उवाच ॥ ॥ शृणु सर्वं महीपाल विस्तरेण च कथ्यते ॥ न च मन्युस्त्वया कार्यो न च व्रीडा महामते ॥ २२ ॥ अन्यदेहांतरे
राजञ्छूद्रजातिसमुद्भवः ॥ शूद्रजातिरियं साध्वी तत्र पत्नी ह्यभूत्पुरा ॥ २३ ॥ केनचित्त्वथ कालेन दुर्भिक्षे समुपस्थिते ॥ अन्नक्षयान्महाराज सर्व
लोकः क्षुधार्दितः ॥ २४ ॥ ततस्त्वं भार्यया सार्द्धमन्यदेशांतरे गतः ॥ समारुह्य च कृच्छ्रेण कस्मिंश्चिद्गिरिनिर्झरे ॥ २५ ॥ त्वया दृष्टं मनोहारि



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुभं पंकजकाननम् ॥ तत्र स्नात्वा पयः पीत्वा पितृदेवाः प्रतर्पिताः ॥ २६ ॥ मनसा चिंतितं ह्येतत्पद्मान्यादाय करोम्यहम् ॥ विक्रयं येन चाहारो भवेन्मम च सर्वथा ॥ २७ ॥ ततः पद्मानि भूरीणि गृहीत्वा भार्यया सह ॥ गतो यत्र जनो भूरि गतः पार्थिवसत्तम ॥ २८ ॥ न केऽपि प्रति गृह्णंति लोका दुर्भिक्षपीडिताः ॥ भ्रमितस्त्वं च सर्वत्र श्रांतो वैराग्यमागतः ॥ २९ ॥ ततो दिनावसाने तु गुहामेकां समाश्रितः ॥ भूमौ पद्मानि निक्षिप्य क्षुधाविष्टः प्रसुप्तवान् ॥ ३० ॥ एतस्मिन्नेव काले तु कर्णयोस्ते समागतः ॥ पठतां द्विजमुख्यानां ध्वनिर्वेदपुराणयोः ॥ ३१ ॥ तं श्रुत्वा सहसोत्थाय ज्ञात्वा जागरणं ततः ॥ पद्मान्यादाय तत्रैव सभार्यः शिवमंदिरे ॥ ३२ ॥ तत्र नागवती वेश्या शिवरात्रिपरायणा ॥ केदारे परया भक्त्या करोति निशि जागरम् ॥ ३३ ॥ तस्याः पार्श्वे स्थिता दासी त्वया पृष्टा नरेश्वर ॥ देवस्य पुरतो बाले किमर्थं रात्रिजागरम् ॥ ३४ ॥ तयोक्तं शिवरात्र्यां वै वेश्येयं वरवर्णिनी ॥ कुरुते नागवतीनाम रात्रौ भक्त्या च जागरम् ॥ ३५ ॥ यः श्रद्धाभक्तिसंयुक्तः कुरुते रात्रिजागरम् ॥ पूजयित्वा महादेवं स याति परमं पदम् ॥ ३६ ॥ कृत्वोपवासं पद्मैर्यः पूजयेत्र्यंबकं नरः ॥ स याति रुद्रसालोक्यं सेव्यमानोऽप्सरोगणैः ॥ ३७ ॥ सकामो लभते कामान्देवैरपि सुदुर्लभान् ॥ स त्वं पद्मानि मे देहि कांचनं च पलत्रयम् ॥ एतेषां मूल्यमादाय प्राणाधारं समाचर ॥ ३८ ॥ ततस्त्वं भार्यया चोक्तो गृह्यमाणे च कांचने ॥ न ग्राह्यं मूल्यमेतेषां त्वया नाथ कथंचन ॥ ३९ ॥ उपवासो बलाज्जातो ह्यन्नाभावाद्द्वयोरपि ॥ पद्मैरेभिर्हरः पूज्यो द्वाभ्यामेवाद्य निश्चयम् ॥४०॥ इदं त्वयाऽद्य कर्त्तव्यं त्याज्यमस्यास्तु कांचनम् ॥ भार्याया वचनं श्रुत्वा तैः पद्मैः पूजितः शिवः ॥४१॥ श्रद्धया च सभार्येण जागरं च शिवाग्रतः ॥ कृतं त्वया महाराज भार्यया शिवमंदिरे ॥४२॥ पुराणश्रवणं जातं तव पार्थिवसत्तम ॥ शिवरात्र्यां महाराज पद्मैस्तु पूजितः शिवः ॥४३॥ केदारस्याग्रतो भक्त्या रात्रौ जागरणं तथा ॥ कृतं त्वया महाराज एकाग्रेण च चेतसा ॥४४॥ ततः प्रभाते संजाते भिक्षां कृत्वा च पारणा ॥ कृता त्वया महाराज शिवाग्रे सह भार्यया ॥४५॥ ततः कालांतरेणैव कालधर्मं गतो भवान् ॥ भार्येयं च त्वया सार्धं संप्रविष्टा हुताशनम् ॥४६॥ ततो जाता महाराज दशार्णाधिपतेः सुता ॥ वैदेहे नगरे राजा जातस्त्वं पार्थिवोत्तम ॥ ४७ ॥ अजपालइतिख्यातो नाम्ना च धरणीतले ॥ सर्वेषां प्राणिनां त्वं च वल्लभो नृपसत्तम ॥ ४८ ॥ एतस्मात्कारणाज्जाता भार्येयं प्राणसंमता ॥ भूयोऽपि तव संजाता यन्मां त्वं परिपृच्छसि ॥४९॥ तस्य देवस्य माहात्म्यात्केदारस्य महीपतेः ॥ राज्यं ते सुखदं नृणां तथा निहतकण्टकम् ॥ ५० ॥ प्राप्तं त्वया महाराज केदारस्य प्रसादतः ॥ येन त्वं सैन्यहीनोऽपि पृथिवीं परिरक्षसि ॥ ५१ ॥ ॥ पुलस्त्य उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा स राजा विस्मयान्वितः ॥ गमनाय मतिं चक्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





केदारं प्रति भूमिपः ॥ ५२ ॥ स गत्वा पर्वते रम्ये पूजयित्वा च तं विभुम् ॥ शिवरात्रिपरः सम्यग्वर्षेवर्षे बभूव ह ॥ ५३ ॥ पुत्रं राज्ये च संस्थाप्य ततोऽर्बुदमथागमत् ॥ प्राप्तो मुक्तिं ततो भूयः सभार्यस्तत्प्रभावतः ॥ ५४ ॥ एतत्ते सर्वमाख्यातं केदारस्य महीपते ॥ माहात्म्यं शुभदं नॄणां सर्व पापप्रणाशनम् ॥ ५५ ॥ माघफाल्गुनयोर्मध्ये कृष्णपक्षे चतुर्दशी ॥ शिवरात्रिरिति ख्याता भूतलेऽस्मिन्महामते ॥ ५६ ॥ तस्यां तु सर्वथा राज न्यात्रां तस्य समाचरेत् ॥ केदारस्य महाराज प्रकुर्यात्पूजनं नृप ॥ ५७ ॥ माघकृष्णचतुर्दश्यां यः कुर्यात्तत्र जागरम् ॥ कृतोपवासो नृपते शिव लोकं स गच्छति ॥ ५८ ॥ स्नात्वा गंगासरस्वत्योः संगमे सर्वकामदे ॥ ये प्रपश्यन्ति केदारं ते यास्यंति परां गतिम् ॥ ५९ ॥ कुण्डे केदारसंज्ञे यः प्रपिबेद्विमलं जलम् ॥ सप्त पूर्वान्सप्त परान्पूर्वजांस्तारयेत्तु सः ॥ ६० ॥ यश्चैतच्छृणुयान्नित्यं भक्त्या परमया नृप ॥ सोऽपि पापैर्विमुच्येत केदारस्य प्रभावतः ॥ ६१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखण्डे केदारमाहात्म्यवर्णनं नाम नवमोऽध्यायः ॥ ९ ॥ ॥ छ ॥ ॥ ययातिरुवाच ॥ ॥ केदारं श्रूयते ब्रह्मन्पर्वते च हिमाचले ॥ गंगा तस्माद्विनिष्क्रान्ता प्रविष्टा पूर्वसागरम् ॥ १ ॥ तथा सरस्वती देवी चूतवृक्षाद्विनिर्गता ॥ पश्चिमं सागरं प्राप्ता गृहीत्वा वडवानलम् ॥ २ ॥ कथमत्र समायातः केदारश्चात्र कौतुकम् ॥ सर्वं विस्तरतो ब्रूहि विचित्रं मम भूसुर ॥ ३ ॥ ॥ पुलस्त्य उवाच ॥ ॥ सत्यमेतन्महाराज यन्नोऽत्र परिपृच्छसि ॥ शृणुष्वा वहितो भूत्वा यथा जातं श्रुतं तु वै ॥ ४ ॥ गंगाद्यानि च तीर्थानि केदाराद्या दिवौकसः ॥ मया सह पुरा देवाः शक्राद्या नृपसत्तमाः ॥ ५ ॥ ब्रह्माणं प्रति राजेन्द्र गताः सर्वे महर्षयः॥ सर्वे तत्र कथाश्चक्रुर्धर्म्या नाना पृथक्पृथक् ॥ ६ ॥ समुदाये च देवानां सर्वतीर्थानि पार्थिव ॥ क्षेत्राण्युप स्थितान्येव वनान्युपवनानि च ॥ ७ ॥ ततः कथाप्रसंगेन इन्द्रः प्राह चतुर्मुखम् ॥ कौतुकेन समायुक्तः पप्रच्छ नृपसत्तम ॥ ८ ॥ ॥ ॥ इन्द्र उवाच ॥ ॥ भगवन्पुण्यमाहात्म्यं श्रोतुमिच्छामि सांप्रतम् ॥ प्रमाणं चैव सर्वेषां कृतादीनां पृथग्विधम् ॥ ९ ॥ ॥ ब्रह्मोवाच ॥ ॥ लक्षं सप्तदश प्रोक्तं युगमानं सुराधिप ॥ अष्टाविंशतिभिः सार्द्धं सहस्रैः कृतमुच्यते ॥ १० ॥ लक्षद्वादशभिः प्रोक्तं युगं त्रेताभिसंज्ञितम् ॥ षण्ण वत्यधिकैश्चैव सहस्रैः परिमाणितम् ॥ ११ ॥ लक्षाण्यष्टौ चतुःषष्टिसहस्रैः परिकीर्तितम् ॥ ततो वै द्वापरं नाम युगं देवप्रकीर्तितम् ॥ १२ ॥ लक्षैश्च तुर्भिर्विख्यातो द्वात्रिंशद्भिः कलिस्तथा ॥ सहस्रैश्च सुरश्रेष्ठ युगमानमितीरितम् ॥ १३ ॥ चतुष्पदः कृते धर्मः शुक्लवर्णो जनार्दनः ॥ न दुर्भिक्षं

१ लक्षं सप्तदश प्रोक्तम्—सप्तदशलक्षं प्रोक्तम्—इत्यर्थः । आर्षौ पदव्यत्ययप्रयोगौ ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न च व्याधिस्तस्मिन्भवति वै क्वचित् ॥ १४ ॥ क्रियते च तदा धर्मो नाकाले मरणं नृणाम् ॥ लांगलेन विना सस्यं भूरिक्षीराश्च धेनवः ॥ १५ ॥ कामः क्रोधो भयं लोभो मत्सरश्चाभ्यसूयता ॥ तस्मिन्युगे सहस्राक्ष न भवंति कदाचन ॥ १६ ॥ ततस्त्रेतायुगे जातस्त्रिपादो धर्म एव च ॥ चिरायुषो नरास्तस्मिन्रक्तवर्णो जनार्दनः ॥ १७ ॥ तस्मिन्यज्ञाः प्रवर्त्तंते प्राणिनामिष्टदायिनः ॥ न कामादिप्रवृत्तिश्च तस्मिन्संजायते नृणाम् ॥ १८ ॥ तपसा ब्रह्मचर्येण स्नानैर्दानैः पृथग्विधैः ॥ तथा यज्ञैर्जपैर्होमैस्तत्र वृत्तिर्भवेन्नृणाम् ॥ १९ ॥ ततस्तु द्वापरं नाम तृतीयं युग मुच्यते ॥ द्विपदो धर्मः सञ्जातः पीतवर्णो जनार्दनः ॥ २० ॥ फलाकांक्षाप्रवृत्तानि जपयज्ञतपांसि च ॥ सत्यानृतान्वितो लोको द्वापरे सुर सत्तम ॥ २१ ॥ तत्रान्योन्यं महीपाला युयुधुर्वसुधातले ॥ सुपूताश्च दिवं यांति यज्ञैरिष्ट्वा जनार्दनम् ॥ २२ ॥ ततः कलियुगं घोरं चतुर्थं तु प्रव र्त्तते ॥ एकपादो भवेद्धर्मः संत्रस्तो नित्यपूजने ॥ २३ ॥ कृष्णवर्णो भवेद्विष्णुः पापाधिक्यं प्रवर्तते ॥ माया च मत्सरश्चैव कामः क्रोधस्तथा भयम् ॥ २४ ॥ अर्थलुब्धास्तथा भूपा लोभमोहशतान्विताः ॥ अल्पायुषो नरास्तत्र अल्पसस्या च मेदिनी ॥ २५ ॥ अल्पक्षीरा स्तथा गावः सत्यहीना द्विजातयः ॥ तत्र मायावि नोलोका जैह्वचौपस्थ्यपरायणाः ॥ २६ ॥ सत्यहीनास्तथा पापा भविष्यंति कलौ युगे ॥ तत्र षोडशमे वर्षे नराः पलितकुन्तलाः ॥ २७ ॥ नार्यो द्वादशमे वर्षे भविष्यंति सुगर्भिताः ॥ भविष्यति क्रमाद्वर्णसंकरश्च सुराधिप ॥ २८ ॥ एकाकारा भविष्यंति सर्ववर्णाश्रमाश्च वै ॥ नाशं यास्यंति यज्ञाश्च कुलधर्मः सनातनः ॥ २९ ॥ व्यर्थानि तत्र तीर्थानि म्लेच्छस्पृष्टानि सर्वशः ॥ भविष्यंति सुरश्रेष्ठ प्रभावरहितानि च ॥ ३० ॥ एतच्छ्रुत्वा ततो वाक्यं ब्रह्मणोऽव्यक्तजन्मनः ॥ तत्र स्थितानि तीर्थानि ब्रह्माणमिदमब्रुवन् ॥ ॥ ३१ ॥ ॥ तीर्थान्यूचुः ॥ ॥ कथं वयं भविष्यामः संप्राप्ते दारुणे कलौ ॥ स्थानं नो ब्रूहि देवेश स्थातव्यं च सदैव हि ॥ ३२ ॥ ॥ ब्रह्मो वाच ॥ ॥ अर्बुदः पर्वतश्रेष्ठः कलिस्तत्र न विद्यते ॥ अतस्तत्र च गंतव्यं तीर्थैरायतनैः सह ॥ ३३ ॥ अपि कृत्वा महत्पापमर्बुदं प्रेक्षते तु यः ॥ कलिदोषविनिर्मुक्तः स यास्यति परां गतिम् ॥३४॥ ॥ पुलस्त्य उवाच ॥ ॥ एवमुक्त्वा चतुर्वक्त्रो ब्रह्मलोकं गतो नृप ॥ ततः सर्वाणि तीर्थानि गतानि च कलौ युगे ॥ ३५ ॥ भूमावर्बुदशैलेन्द्रे संस्थितानि कलेर्भयात् ॥ गंगा सरस्वती चैव यमुना पुष्कराणि च ॥ ३६ ॥ कुरुक्षेत्रं प्रभासं च ब्रह्मावर्तं तथैव च॥ त्रिस्रःकोटयोऽर्द्धकोटिश्च यानि तीर्थानि भूतले ॥ ३७ ॥ तेषां वासश्च सञ्जातः पर्वतेऽर्बुदसंज्ञिके ॥ एवं तत्र समापन्ना गंगा चैव सरस्वती ॥ ३८ ॥ तत्र शांता नराः सम्यक्परं निर्वाणमाप्नुयुः ॥ श्राद्धं कृत्वा महाराज स्वर्गे यांति च पूर्वजाः ॥ ३९ ॥ शृणु तत्राभवत्पूर्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



यदाश्चर्यं महामते ॥ ऋषिर्मंकणकोनाम सरस्वत्यास्तटे स्थितः ॥ ४० ॥ तपस्तेपे सुधर्मात्मा कामक्रोधविवर्जितः ॥ तस्यैवं वर्तमानस्य क्षुतमा सीत्कदाचन ॥ ४१ ॥ पित्तं प्रपतितं तत्र तच्च रक्तमयं बभौ ॥ तद्दृष्ट्वाऽतीव हृष्टः स मंकणर्षिर्बभूव ह ॥ ४२ ॥ सिद्धोऽहमिति विज्ञाय ततो नृत्यं चकार सः ॥ तस्यैवं वर्तमानस्य जगत्स्थावरजंगमम् ॥ ४३ ॥ तत्र संक्षोभमापन्नं सागरा अपि चुक्षुभुः ॥ गृहकृत्यानि संत्यज्य सर्वे विस्मयमा गताः ॥ ४४ ॥ तस्यैवं नृत्यमानस्य सर्वे लोका नृपोत्तम ॥ ननृतुः पार्थिवश्रेष्ठ प्रभावात्तस्य सन्मुनेः ॥ ४५ ॥ ततो देवगणाः सर्वे गत्वा कामं निषूदनम् ॥ यथाऽयं नृत्यते नैव तथा कुरु महेश्वर ॥४६॥ अथ ब्राह्मणरूपेण शंभुनोक्तो द्विजोत्तमः ॥ त्वया ब्रह्मंस्तपस्तप्तमधुना नृत्यते कथम् ॥ ॥ ४७ ॥ ॥ मंकण उवाच ॥ ॥ किं न पश्यसि हे ब्रह्मन्रक्तं पित्तं च मे स्थितम् ॥ संजातं सिद्धिमापन्नो रक्तं पित्तं यतो मम ॥ ४८ ॥ एत स्मात्कारणाद्धर्षाद्द्विज नृत्यं करोम्यहम् ॥ एवमुक्तस्ततस्तेन देवदेवो महेश्वरः ॥ ४९ ॥ तर्जन्या ताडयामास स्वांगुष्ठं नृपसत्तम ॥ ततोंगुष्ठाद्विनि ष्क्रांतं भस्म वै बिसपांडुरम् ॥ ५० ॥ ततो मंकणकं प्राह पश्य विप्र करान्मम ॥ शुभ्रं भस्म विनिष्क्रांतं पश्य मे द्विज कौतुकम् ॥ ५१ ॥ ॥ ॥ पुलस्त्य उवाच ॥ ॥ तद्दृष्ट्वा विस्मितो विप्रो ज्ञात्वा तं वृषभध्वजम् ॥ जानुभ्यामवनिं गत्वा वाक्यमेतदुवाच ह ॥५२॥ ॥ मंकण उवाच ॥ ॥ नूनं भवान्महादेवः साक्षाद्दृष्टः प्रसीद मे ॥ निश्चितं त्वं मया ज्ञात एतन्मे हृदि वर्तते ॥ ५३ ॥ नान्यस्यायं प्रभावश्च त्वया यो मे प्रदर्शितः ॥ मां समुद्धर देवेश कृपां कृत्वा महेश्वर ॥ ५४ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ सम्यग्ज्ञातोऽस्मि विप्रेन्द्र त्वयाऽहं नात्र संशयः ॥ वरं वरय भद्रं ते नृत्याधिक्यं यतः कृतम् ॥ ५५ ॥ ॥ मंकण उवाच ॥ ॥ येऽत्र स्नानं प्रकुर्वंति सरस्वत्यां समाहिताः ॥ त्वत्प्रसादात्फलं तेषां राजसूयाश्वमेधयोः ॥ ५६ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ येऽत्र स्नानं करिष्यंति सरस्वत्यां समाहिताः ॥ ते यास्यंति परं स्थानं जरामरणवर्जितम् ॥ ५७ ॥ अत्र गंगासरस्वत्योः संगमे लोकविश्रुते ॥ श्राद्धं कुर्युर्द्विजश्रेष्ठ ते यास्यंति परां गतिम् ॥ ५८ ॥ सुवर्णं येऽत्र दास्यंति यथाशक्त्या द्विजोत्तमे ॥ सर्वं पापविनिर्मुक्तास्ते यास्यन्ति परां गतिम् ॥ ५९ ॥ इत्युक्त्वांतर्दधे राजन्देवदेवो महेश्वरः ॥ ६० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखण्डेऽर्बुदाचले कलियुगप्रभावात्सर्वतीर्थागमनवर्णनंनाम दशमोऽध्यायः ॥ १० ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो गच्छेन्नृपश्रेष्ठ देवं कोटीश्वरं परम् ॥ यं दृष्ट्वा मानवः सम्यक्परां सिद्धिमवाप्नुयात् ॥ १ ॥ शृणु तत्राभवत्पूर्वं

१ प्राह्वः—इति शेषः ।





Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदाश्चर्यं महीपते ॥ दक्षिणस्या मुनिवराः कोटिसंख्याप्रमाणतः ॥ २ ॥ अन्योऽन्यं स्पर्धया सर्वे हेलयाऽर्बुदमागताः ॥ अहं पूर्वमहं पूर्वं प्रपश्याम्यचलेश्वरम् ॥ ३ ॥ आगमिष्यति यः पश्चाद्ब्राह्मणः श्वा भविष्यति ॥ पापीयान्भक्तिरहितः श्रद्धाहीनो भविष्यति ॥ ४ ॥ इत्येवं स्पर्धमानास्ते हेलयाऽर्बुदमागताः ॥ ततः सर्वे यतात्मानः सम्यग्व्रतपरायणाः ॥ ५ ॥ शांतास्तपस्विनः सर्वे वेदविद्याविशारदाः ॥ तेषामीहितमाज्ञाय सम्यक्कामनिषूदनः ॥ ६ ॥ कृपया परयाविष्टो भक्तिभावान्महेश्वरः ॥ कोटिं कृत्वाऽऽत्मलिंगानां तस्मिन्स्थाने व्यवस्थितः ॥ ७ ॥ एकस्मिन्नेव काले तु सर्वैर्दृष्टो महेश्वरः ॥ मुनिभिश्च नृपश्रेष्ठ कोटिसंख्यैः पृथक्पृथक् ॥ ८ ॥ अथ ते मुनयः सर्वे समं दृष्ट्वा महेश्वरम् ॥ विस्मयोत्फुल्लनयनाः साधुसाध्विति चाब्रुवन् ॥ ९ ॥ भक्तियुक्ता द्विजाः सर्वेऽस्तुवंस्ते वैदिकैः स्तवैः ॥ तेषां तुष्टस्ततः शंभुर्वाक्यमेतदुवाच ह ॥ १० ॥ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ तुष्टोऽहं मुनयः सर्वे श्रद्धया परया हि वः ॥ वरं वै व्रियतां शीघ्रं सर्वैश्चैव पृथक्पृथक् ॥११॥ ॥ ऋषय ऊचुः ॥ ॥ एष एव वरोऽस्माकं सर्वेषां हृदि वर्त्तितः ॥ युगपद्दर्शनादेव जायतां फलमुत्तमम् ॥ १२ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ न वृथा दर्शनं मे स्याद्विशेषाद्ब्राह्मणस्य च ॥ दर्शनं ये करिष्यंति तेषां च तीर्थजं फलम् ॥ १३ ॥ ॥ मुनय ऊचुः ॥ ॥ अवश्यं यदि दातव्यो वरोऽस्माकं महेश्वर ॥ एकं कोटिमयं लिंगं क्रियतां वृषभध्वज ॥ १४ ॥ यस्मिन्दृष्टे फलं नृणां जायते [1]कोटिलिंगजम् ॥ एवमेष वरोऽस्माकं दीयतां वृषभध्वज ॥ ॥ १५ ॥ ॥ पुलस्त्य उवाच ॥ ॥ एवं संप्रार्थमानानां मुनीनां भावितात्मनाम् ॥ निर्भिद्य पर्वतश्रेष्ठं सहसा लिंगमुद्गतम् ॥ १६ ॥ एतस्मिन्नेव काले तु वागुवाचाशरीरिणी ॥ कृपया परया सर्वांस्तान्नृपीन्वसुधाधिप ॥ १७ ॥ ॥ वागुवाच ॥ ॥ कोटीश्वराख्यं मे लिंगं लोके ख्यातिं गमिष्यति ॥ माघकृष्णचतुर्दश्यां यश्चैनं पूजयिष्यति ॥ १८ ॥ सर्वं कोटिगुणं तस्य फलं विप्रा भविष्यति ॥ दाक्षिणात्यो नरो यस्तु श्राद्धमत्र करिष्यति ॥ १९ ॥ फलं कोटिगुणं तस्य गयाश्राद्धसमं भवेत् ॥ तस्माद्विशेषतः पूज्यं मम लिंगं च मानवैः ॥ २० ॥ ॥ पुलस्त्य उवाच ॥ ॥ एवमुक्त्वा तु सा वाणी विरराम महीपते ॥ ततस्ते मुनयः सर्वे गंधधूपानुलेपनैः ॥ २१ ॥ तल्लिंगं पूजयामासुः श्रद्धया परया नृप ॥ पूजयित्वा गताः सिद्धिं सर्वे लिंगप्रसादतः ॥ २२ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखण्डे कोटीश्वरमाहात्म्यवर्णनंनामैकादशोऽध्यायः ॥ ११ ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो गच्छेन्नृपश्रेष्ठ रूपतीर्थमनुत्तमम् ॥ सर्वपापहरं नृणां

१ कोटिलिंगजम्--कोटिलिंगदर्शनजम्--इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



रूपसौभाग्यदायकम् ॥ १ ॥ तत्र पूर्वं वपुर्नाम्ना लोके ख्याता वराप्सराः ॥ सिद्धिं गता महाराज यथा पूर्वं निगद्यते ॥ २ ॥ पुराऽऽसीत्काचिदा भीरी विरूपा विकृतानना ॥ लम्बोदरी च कुग्रीवा स्थूलदंतशिरोरुहा ॥ ३ ॥ एकदा फलमादातुं भ्रममाणाऽर्बुदाचले ॥ माघशुक्लतृतीयायां पतिता गिरिनिर्झरे ॥ ४ ॥ दिव्यमाल्यांबरधरा दिव्यैरंगैः समन्विता ॥ पद्मनेत्रा सुकेशांता सर्वलक्षणलक्षिता ॥ ५ ॥ सा संजाता महाराज तीर्थ स्यास्य प्रभावतः ॥ एतस्मिन्नेव काले तु शक्रस्तत्र समागतः ॥ ६ ॥ क्रीडार्थं पर्वतश्रेष्ठे तां ददर्श शुभेक्षणाम् ॥ ततः कामशरैर्विद्धस्तामुवाच सुम ध्यमाम् ॥ ७ ॥ ॥ इन्द्र उवाच ॥ ॥ का त्वं वद वरारोहे किमर्थं त्वमिहागता ॥ देवी वा नागकन्या वा सिद्धा विद्याधरी तु वा ॥ ८ ॥ मनो मेऽपहृतं सुभ्रूस्त्वया च पद्मनेत्रया ॥ शक्रोऽहं सर्वदेवेशो भज मां चारुहासिनि ॥ ९ ॥ ॥ नार्युवाच ॥ ॥ आभीरी त्रिदशाधीश तथाहं बहु भर्तृका ॥ फलार्थं तु समायाता पतिता गिरिनिर्झरे ॥ १० ॥ स्नात्वा रूपमिदं प्राप्ता सुरूपं च शुभं मया ॥ दुर्लभस्त्वं हि देवानां किं पुनर्मर्त्य जन्मनाम् ॥ ११ ॥ वशगास्ते सुराः सर्वे मयि किं क्रियते स्पृहा ॥ भज मां त्रिदशाधीश यथाकामं सुराधिप ॥ १२ ॥ ॥ पुलस्त्य उवाच ॥ ॥ एवमुक्तस्तया शक्रः कामयामास तां तदा ॥ निवृत्तमदनो भूत्वा तामुवाच सुमध्यमाम् ॥ १३ ॥ ॥ इन्द्र उवाच ॥ ॥ वरं वरय कल्याणि यत्ते मनसि वर्त्तते ॥ विनयात्तव तुष्टोऽहं दास्यामि वरमुत्तमम् ॥ १४ ॥ ॥ नार्युवाच ॥ ॥ माघशुक्लतृतीयायां नरो वा वनिता तथा ॥ स्नानं यः कुरुते भक्त्या प्रीताः स्युः सर्वदेवताः ॥ १५ ॥ सुरूपं जायतां तेषां [१]दुर्लभं त्रिदशैरपि ॥ मां नय त्वं सहस्राक्ष सुरावासं सुराधिप ॥१६॥ ॥ पुलस्त्य उवाच ॥ ॥ एवमस्त्विति तामुक्त्वा गृहीत्वा तां सुराधिपः ॥ विमाने च तया सार्द्धं जगाम त्रिदिवं प्रति ॥ १७ ॥ वपुः प्राप्तं तया यस्मात्तस्मात्पा र्थिवसत्तम ॥ नाम्ना वपुरिति ख्याता सा बभूव वराप्सराः ॥ १८ ॥ माघशुक्लतृतीयायां देवास्तस्मिञ्जलाशये ॥ स्नानं सर्वे प्रकुर्वंति प्रभाते भक्तिसं युताः ॥१९॥ तत्रान्या देवकन्याश्च सिद्धयक्षांगनास्तथा ॥ यस्तत्र कुरुते स्नानं तस्मिन्काले नराधिप ॥२०॥ रूपं च लभते तादृग्यादृग्लब्धं तया पुरा ॥ सर्वे तत्र भविष्यंति सिद्धविद्याधरोरगाः ॥ २१ ॥ तस्यैव पूर्वदिग्भागे बिलमस्ति सुशोभनम् ॥ यत्रागत्य प्रकुर्वंति स्नानं पातालकन्यकाः ॥ ॥२२॥ तत्र स्नात्वा गृहीत्वापो बिले तस्मिन्व्रजंति ताः ॥ तत्र वैनायके पीठे महत्पाषाणजं जलम् ॥२३॥ तेनोदकेन संयुक्तः सिद्धो भवति मानवः ॥ गृहीत्वा तज्जलं यस्तु यत्र यत्राभिगच्छति ॥ २४ ॥ स्वर्गे वा भूतले वापि न केनापि प्रधृष्यते ॥ तत्रास्ति विवरद्वारे तिलकोनाम पादपः ॥ २५ ॥

१ महत्पाषाणजं जलम्--महत्पाषाणस्य अधस्तात्प्रस्रुतं जलम्--इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्य पुष्पैः फलैश्चैव सर्वं कार्यं प्रसिद्ध्यति ॥ भक्षणाद्धारणाद्वापि सिद्धो भवति मानवः ॥ २६ ॥ तस्मिन्बिले तु पाषाणाः समन्ताच्छंखसन्निभाः ॥ तेनो दकेन संस्पृष्टा भवंति च हिरण्मयाः ॥ २७ ॥ वन्ध्या नारी जलं तत्र या पिबेत्तिलकान्वितम् ॥ अपि वर्षशताब्दा च सद्यो गर्भवती भवेत् ॥ ॥ २८ ॥ व्याधिग्रस्तोऽपि यो मर्त्यः स्नानं तत्र समाचरेत् ॥ नीरोगो जायते सद्यो ग्रहग्रस्तो विमुच्यते ॥ २९ ॥ भूतप्रेतपिशाचानां दोषः सद्यः प्रणश्यति ॥ तेनोदकेन संस्पृष्टे सर्वं नश्यति दुष्कृतम् ॥ ३० ॥ अपि कीटपतंगा ये पिशाचाः पक्षिणो मृगाः ॥ तेनोदकेन ये स्पृष्टाः सद्यो यास्यंति सद्गतिम् ॥ ३१ ॥ ॥ ययातिरुवाच ॥ ॥ अत्यद्भुतमिदं ब्रह्मन्माहात्म्यं भवता मम ॥ कथितं रूपतीर्थस्य न भूतं न भविष्यति ॥ ॥ ३२ ॥ किमत्र कारणं ब्रह्मन्सर्वेभ्योऽप्यधिकं स्मृतम् ॥ सर्वं विस्तरतो ब्रूहि परं कौतूहलं हि मे ॥ ३३ ॥ ॥ पुलस्त्य उवाच ॥ ॥ तत्र पूर्वं तपस्तप्तमदित्या नृपसत्तम ॥ इन्द्रे राज्यपरिभ्रष्टे बलौ त्रैलोक्यनायके ॥ अवतीर्णश्चतुर्बाहुरदित्यां नृपसत्तम ॥ ३४ ॥ तस्मिञ्जाते महाविष्णा वदित्या चासुरान्तके ॥ गुप्तया विवरद्वारे भयाद्दानवसंभवात् ॥ ३५ ॥ जातमात्रो हरिस्तस्मिन्स्थापितो निर्झरे तया ॥ तस्मात्पवित्रतां प्राप्तं तीर्थं नृणामभीष्टदम् ॥ ३६ ॥ न चान्यत्कारणं राजन्सत्यमेतन्मयोदितम् ॥ माघशुक्लतृतीयायां तत्र जातस्त्रिविक्रमः ॥ ३७ ॥ तिलकः सर्ववृक्षाग्र्यः पुत्रवत्परिपालितः ॥ अदित्या सेवितो नित्यं स्वहस्तेन जलैः शुभैः ॥ ३८ ॥ एतत्ते सर्वमाख्यातं तीर्थमाहात्म्यमुत्तमम् ॥ तस्मात्सर्वप्रयत्नेन स्नानं तत्र समाचरेत् ॥ सर्वकामप्रदं नृणामिह लोके परत्र च ॥ ३९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखण्डे रूपतीर्थमाहात्म्यवर्णनंनाम द्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो गच्छेन्नृप श्रेष्ठ तीर्थं त्रैलोक्यविश्रुतम् ॥ अंबरीषस्य राजर्षेरैशान्यां पापनाशनम्[1] ॥ १ ॥ यत्र स्वयं हृषीकेशः काले च कलिसंज्ञके ॥ तस्य वाक्याद्धतस्तीर्थे स्वयं हि परितिष्ठति ॥ २ ॥ पुरासीत्पृथिवीपालो ह्यंबरीषो युगे कृते ॥ हरिमाराधयामास तपस्तेपे सुदुष्करम् ॥ ३ ॥ तस्मिंस्तीर्थे स राजेन्द्रो मितभक्षो जितेन्द्रियः ॥ सहस्रमेकं वर्षाणां तत आसीत्फलाशनः ॥ ४ ॥ सहस्रे द्वे ततो राजञ्छीर्णपर्णाशनोऽभवत् ॥ सहस्रे द्वे ततो भूयो जलाहारो बभूव ह ॥ ५ ॥ सहस्रत्रितयं राजन्वायुभक्षो बभूव ह ॥ चिन्तयन्पुंडरीकाक्षं मानसे श्रद्धयान्वितः ॥ ६ ॥ दश वर्षसहस्रान्ते ततश्च नृपसत्तम ॥ तुतोष भगवान्विष्णुस्तस्यासौ दर्शनं ददौ ॥ ७ ॥ कृत्वा देवपते रूपमारुह्यैरावतं गजम् ॥ अब्रवीद्वरदोऽस्मीति अंबरीषं

१ राजर्षेरासनं पापनाशनम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

नराधिपम् ॥ ८ ॥ ॥ इंद्र उवाच ॥ ॥ वरं वरय भद्रं ते राजन्यन्मनसीप्सितम् ॥ त्वां दृष्ट्वा भक्तिसंयुक्तमागतोऽहमसंशयम् ॥ ९ ॥
॥ ॥ अंबरीष उवाच ॥ ॥ मुक्तिं दातुमशक्तोसि त्वं च वृत्रनिषूदन ॥ तव प्रसादाद्देवेश त्रैलोक्यं मम वर्त्तते ॥ स्वागतं गच्छ देवेश
न वरो रोचते मम ॥ १० ॥ सर्वथा दास्यते मह्यं वरं तुष्टश्चतुर्भुजः ॥ तदाहं प्रतिगृह्णामि गच्छ देव नमोस्तु ते ॥ ११ ॥ ॥ इन्द्र उवाच ॥ ॥
वरं वरय राजर्षे यत्ते मनसि वर्त्तते ॥ ब्रह्मविष्णुत्रिनेत्राणामहमीशो नृपोत्तम ॥ १२ ॥ अन्येषां चैव देवानां त्रैलोक्यस्याप्यहं विभुः ॥ वरं वरय
तस्मात्त्वं प्रसादान्मे सुदुर्लभम् ॥ १३ ॥ प्रसन्ने मयि राजेन्द्र प्रसन्नाः सर्वदेवताः ॥ कुरु मे वचनं राजन्गृह्यतां वरमुत्तमम् ॥ १४ ॥ ॥ अंबरीष
उवाच ॥ ॥ राजा त्वं सर्वदेवानां त्रैलोक्यस्य तथेश्वरः ॥ सप्तद्वीपवती राजा अहं वृत्रनिषूदन ॥ १५ ॥ हृषीकेशस्य सद्भक्तं विद्धि मां तात
निश्चयम् ॥ आगतश्च हृषीकेशो वरं दास्यत्यसंशयम् ॥ १६ ॥ ॥ इन्द्र उवाच ॥ ॥ ददतो मम भूपाल न गृह्णासि वरं यदि ॥ वज्रं त्वां
प्रेरयिष्यामि वधाय कृतनिश्चयः ॥ १७ ॥ एवमुक्त्वा सहस्राक्षः सृक्किणी परिलेलिहन् ॥ कुलिशं भ्रामयामास गृहीत्वा दक्षिणे करे ॥ १८ ॥ तस्यैवं
भ्राम्यमाणस्य महोत्पाता बभूविरे ॥ ततः पर्वतशृंगाणि विशीर्णानि समंततः ॥ १९ ॥ आवृतं गगनं मेघैर्विधुन्वानैर्महीं तदा ॥ न किंचिद्दृश्यते
तत्र सर्वं संतमसावृतम् ॥ २० ॥ एतस्मिन्नेव काले तु स राजा हरिवत्सलः ॥ निमील्य लोचने स्वीये समाधिस्थो बभूव ह ॥ २१ ॥ ततस्तुष्टो जग
न्नाथः साक्षात्प्रत्यक्षतां गतः ॥ ऐरावतः स गरुडस्तत्क्षणात्समजायत ॥ २२ ॥ तमुवाच हृषीकेशो मेघगंभीरया गिरा ॥ ध्यानस्थितं नृपश्रेष्ठं शंख
चक्रगदाधरः ॥ २३ ॥ ॥ श्रीभगवानुवाच ॥ ॥ परितुष्टोऽस्मि ते वत्सानन्यभक्त जनेश्वर ॥ वरं वरय भद्रं ते यद्यपि स्यात्सुदुर्लभम् ॥ २४ ॥
॥ ॥ अंबरीष उवाच ॥ ॥ यदि प्रसन्नो भगवन्यदि देयो वरो मम ॥ संसाराब्धेस्तारणाय वरदो भव मे हरे ॥ २५ ॥ ॥ पुलस्त्य उवाच ॥ ॥
अथाह भगवान्विष्णुरंबरीषं जनाधिपम् ॥ ज्ञानयोगं सुविस्तीर्णं संसारक्षयकारणम् ॥ २६ ॥ यस्मिञ्ज्ञाते नरः सद्यः संसारान्मुच्यते नृप ॥
श्रुत्वा स नृपतिः सम्यक्प्रणम्योवाच केशवम् ॥ २७ ॥ ॥ अंबरीष उवाच ॥ ॥ भगवन्यस्त्वया प्रोक्तो योगोऽयं मम विस्तरात् ॥ दुर्ज्ञेयः स नृणां
देव विशेषाच्च कलौ युगे ॥ २८ ॥ अपि चेत्सुप्रसन्नोऽसि क्रियायोगं ब्रवीहि मे ॥ लोकानां तारणार्थाय शंखचक्रगदाधर ॥ २९ ॥ ॥ पुलस्त्य
उवाच ॥ ॥ ततस्तस्मै नरेन्द्राय क्रियायोगं जनार्दनः ॥ यथायोग्यं नृपश्रेष्ठ कथयामास केशवः ॥ ३० ॥ तं श्रुत्वा तुष्टहृदयोंऽबरीषो वाक्यम



१ नित्यम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रवीत् ॥ ३१ ॥ ॥ अंबरीष उवाच ॥ ॥ यदि तुष्टोऽसि भगवन्रूपेणानेन माधव ॥ ममाश्रमे त्वं देवेश सदा सन्निहितो भव ॥ ३२ ॥ यतस्त्व त्प्रतिमामेकामर्चयामि विधानतः ॥ पूजयिष्यंति लोकास्त्वां शंखचक्रगदाधरम् ॥ ३३ ॥ ॥ पुलस्त्य उवाच ॥ ॥ तथोक्तो माधवेनासौ चकार हरिमंदिरम् ॥ प्रतिमां पूजयामास गन्धपुष्पानुलेपनैः ॥ ३४ ॥ ततः कालेन महता भगवान्विष्णुमंदिरे ॥ तेनैव वपुषा प्राप्तः सपुत्रः सहबांधवः ॥ ३५ ॥ अद्यापि भगवान्विष्णुः सत्यवाक्येन भूपतेः ॥ सदा संनिहितो विष्णुस्तस्मिन्नवसरे कलौ ॥ ३६ ॥ तदारभ्य महाराज क्रियायोगो धरातले ॥ प्रवृत्तः प्रतिमाकारः काले च कलिसंज्ञके ॥ ३७ ॥ यस्तं पूजयते भक्त्या हृषीकेशे नृपार्बुदे ॥ स याति विष्णुसालोक्यं प्रसादाच्च हरेर्नृप ॥ ३८ ॥ एकादश्यां महाराज जागरं यः सदा नृप ॥ करिष्यति निराहारो हृषीकेशाग्रतः स्थितः ॥ स यास्यति परं स्थानं दुर्लभं त्रिदशैरपि ॥ ॥ ३९ ॥ यत्पुण्यं कपिलादाने कार्तिक्यां ज्येष्ठपुष्करे ॥ तत्फलं लभते मर्त्यो हृषीकेशस्य दर्शनात् ॥ ४० ॥ शुक्ले वा-यदि वा कृष्णे संप्राप्ते हरिवासरे ॥ यः पश्यति हृषीकेशमश्वमेधफलं लभेत् ॥ ४१ ॥ तस्मात्सर्वप्रयत्नेन पूजयेत्तु विधानतः ॥ यस्तत्र चतुरो मासान्सम्यग्व्रतपरायणः ॥ अभ्यर्चयेद्धृषीकेशं न स भूयोऽभिजायते ॥ ४२ ॥ एकः सर्वाणि तीर्थानि करोति नृपसत्तम ॥ पश्यत्यन्यो हृषीकेशं चातुर्मास्यं समाहितः ॥ ॥ ४३ ॥ एको दानानि सर्वाणि ब्राह्मणेभ्यः प्रयच्छति ॥ पश्यत्यन्यो हृषीकेशं चातुर्मास्यं समाहितः ॥ ४४ ॥ एकः कन्यासहस्रं तु प्रदद्याच्च यथाविधि ॥ पश्यत्यन्यो हृषीकेशं चातुर्मास्यं समाहितः ॥ ४५ ॥ सूर्यग्रहे कुरुक्षेत्रे दद्याद्दानमनुत्तमम् ॥ पश्यत्यन्यो हृषीकेशं चातुर्मास्यं समाहितः ॥ ४६ ॥ अग्निष्टोमादिभिर्यज्ञैर्यजत्येकः सदक्षिणैः॥ पश्यत्यन्यो हृषीकेशं चातुर्मास्यं समाहितः ॥ ४७ ॥ एको हिमालयं गत्वा त्यजति स्वकलेवरम् ॥ पश्यत्यन्यो हृषीकेशं चातुर्मास्यं समाहितः ॥४८॥ एकस्तु भृगुपातेन त्यजेद्देहं सुतीर्थके ॥ पश्यत्यन्यो हृषीकेशं चातुर्मास्यं समाहितः ॥ ४९ ॥ एकः प्रायोपवेशेन प्राणांस्त्यजति मानवः ॥ पश्यत्यन्यो हृषीकेशं चातुर्मास्यं समाहितः ॥ ५० ॥ ब्रह्मज्ञानं वदत्येकः श्रुत्वा ज्ञानविशारदः ॥ पश्यत्त्यन्यो हृषीकेशं चातुर्मास्यं समाहितः ॥ ५१ ॥ गयाश्राद्धं करोत्येकः पितृपक्षे नृपोत्तम ॥ पश्यत्यन्यो हृषीकेशं चातुर्मास्यं समाहितः ॥ ५२ ॥ चांद्रायणसहस्रं च करोत्येकः समाहितः ॥ पश्यत्यन्यो हृषीकेशं चातुर्मास्यं समाहितः ॥ ५३ ॥ व्रतं तपः सहस्राब्दमेकः सम्यक्चरेन्नरः ॥ पश्यत्यन्यो हृषीकेशं चातुर्मास्यं समाहितः ॥ ५४ ॥ एकस्तु चतुरो वेदान्सम्यक्पठति ब्राह्मणः ॥ पश्यत्यन्यो हृषीकेशं चातुर्मास्यं

१ एकः–इति शेषः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



समाहितः ॥ ५५ ॥ बहुना किमिहोक्तेन शृणु संक्षेपतो नृप ॥ एकतस्तु भवेत्सर्वमेकतो हरिदर्शनम् ॥ ५६ ॥ तस्मात्सर्वप्रयत्नेन स्थातव्यं हरिसंनिधौ ॥ अम्बरीषस्य राजर्षेः स्थानके पापनाशने ॥ ५७ ॥ एकतस्तु हृषीकेश एकतः कर्णिकेश्वरः ॥ तयोर्मर्त्त्या मृता ये च मानवा नृपसत्तम ॥ ५८ ॥ अपि कृत्वा महत्पापं गच्छंति हरिसन्निधौ ॥ हृषीकेशं समालोक्य सद्यो मुक्तिमवाप्नुयात् ॥ ५९ ॥ पुष्पमेकं हृषीकेशे यश्चारोपयते नृप ॥ सुखसौभाग्यसंयुक्त इह लोके परत्र च ॥ ६० ॥ हृषीकेशस्य यो भक्त्या करिष्यत्यनुलेपनम् ॥ स यास्यति परं स्थानं जरामरणवर्जितम् ॥ ६१ ॥ संमार्जनं च तस्याग्रे यः करोति समाहितः ॥ यावत्यो रेणवस्तत्र तावद्वर्षशतानि सः ॥ मोदते विष्णुलोकस्थो नात्र कार्या विचारणा ॥ ६२ ॥ कार्तिके शुक्लपक्षे च एकादश्यां नृपोत्तम ॥ दीपमारोपयेद्यश्च हृषीकेशाग्रतो नृप ॥ ६३ ॥ यथायथा प्रकाशेत पापं जन्मांतरार्जितम् ॥ तथातथा व्रजेन्नाशं तस्य कायादशेषतः ॥ ६४ ॥ पंचामृतेन यः पूजां हृषीकेशे करिष्यति ॥ दध्ना क्षीरेण वा यस्तु न स भूयोऽभिजायते ॥ ६५ ॥ तस्मात्सर्वप्रयत्नेन हृषीकेशं समर्चयेत् ॥ संसारबंधतो राजन्मुक्तिमाप्नोति मानवः ॥ ६६ ॥ हृषीकेशे विशेषेण कर्त्तव्यं पूजनं सदा ॥ ६७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे तृतीयेऽर्बुदखण्डे हृषीकेशमाहात्म्यवर्णनंनाम त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ छ ॥

॥ पुलस्त्य उवाच ॥ ॥ ततो गच्छेन्नृपश्रेष्ठ देवं सिद्धेश्वरं परम् ॥ सिद्धिदं प्राणिनां सम्यक्सिद्धेन स्थापितं पुरा ॥ १ ॥ तत्र विश्वावसुर्नाम सिद्धस्तेपे महातपः ॥ बहुवर्षाणि संस्थाप्य शिवं भक्तिपरायणः ॥ २ ॥ जितक्रोधो जितमदो जितसर्वेंद्रियक्रियः ॥ तावद्वर्षसहस्रांते भगवान्वृषभध्वजः ॥ तुतोष नृपतेस्तस्य स्वयं दर्शनमाययौ ॥ ३ ॥ अब्रवीत्तं महादेवो वरदोस्मीति पार्थिव ॥ ४ ॥ ॥ श्रीभगवानुवाच ॥ ॥ वरं वरय भद्रं ते यत्ते मनसि वर्त्तते ॥ दास्यामि ते प्रसन्नोऽहं यद्यपि स्यात्सुदुर्ल्लभम् ॥ ५ ॥ ॥ ॥ विश्वावसुरुवाच ॥ ॥ एतल्लिंगं सुरश्रेष्ठ ध्यात्वा मनसि निश्चयम् ॥ सर्वान्कामानवाप्नोतु प्रसादात्तव शंकर ॥ ६ ॥ ॥ पुलस्त्य उवाच ॥ ॥ एवमस्त्विति स प्रोच्य तत्रैवांतरधीयत ॥ सिद्धेश्वरं ततो गत्वा सिद्धिं याति सहस्रशः ॥ ७ ॥ प्रभावात्तस्य लिंगस्य कामानिष्टानवाप्नुयुः ॥ ततो धर्मक्रियाः सर्वा गता नाशं धरातले ॥ ८ ॥ न कश्चिद्यजते यज्ञैर्न दानानि प्रयच्छति ॥ सिद्धेश्वरप्रसादेन सिद्धिं यांति नरा भुवि ॥ ९ ॥ उच्छिन्नेषु च यज्ञेषु दानेषु नृपसत्तम ॥ इन्द्राद्यास्त्रिदशाः सर्वे परं दुःखमुपागताः ॥ १० ॥ ज्ञात्वा यज्ञविघातं च तद्विघाताय वासवः ॥ वज्रेणाच्छाद

१ सर्वे लोकाः—इति शेषः । सर्वे लोकाः इष्टान् कामान्—अवाप्नुयुः--अवाप्तवंतः—इत्यर्थः । २ तद्विघाताय—यज्ञविघातविघाताय—यज्ञप्रवृत्तये--इत्यर्थः । ३ तल्लिंगम्--इति शेषः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यामास यथा सिद्धिर्न जायते ॥ ११ ॥ तथापि संनिधौ तस्य सिद्धेशस्य नृपोत्तम ॥ कर्मणो जायते सिद्धिः पातकस्य परिक्षयः ॥ १२ ॥ यस्तु माघचतुर्दश्यां सोमवारे नृपोत्तम ॥ शुक्लायां वाथ कृष्णायां स्पृष्ट्वा सिद्धो भवेन्नरः ॥ १३ ॥ अद्यापि जायते सिद्धिः सत्यमेतन्मयोदितम् ॥ तस्मात्सिद्धेश्वरं गत्वा नत्वा यास्यति सद्गतिम् ॥ १४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखंडे सिद्धेश्वरमाहात्म्यवर्णनंनाम चतुर्दशोऽध्यायः ॥ १४ ॥छ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततः शुक्रेश्वरं गच्छेच्छुक्रेण स्थापितं पुरा ॥ यं दृष्ट्वा मानवः सद्यः सर्वपापैः प्रमुच्यते ॥ १ ॥ दृष्ट्वा दैत्यान्पुरा देवैर्निर्जितान्नृपसत्तम ॥ चिन्तयामास मेधावी भार्गवस्तान्प्रति द्विजः ॥ २ ॥ कथं दैत्याः सुराञ्जित्वा प्राप्स्यंति च महायशः ॥ आराध्य शंकरं सिद्धिं गच्छामि मनसेप्सिताम् ॥ ३ ॥ एवं स निश्चयं कृत्वा गतोऽर्बुदमथाचलम् ॥ भूमे विंवरमासाद्य तपस्तेपे सुदारुणम् ॥ ४ ॥ शिवलिंगं प्रतिष्ठाप्य धूपगंधानुलेपनैः ॥ अनिशं पूजयामास श्रद्धया परयान्वितः ॥ ५ ॥ ततो वर्षसहस्रांते तुतोष भगवाञ्छिवः ॥ तस्य संदर्शनं दत्त्वा वाक्यमेतदुवाच ह ॥ ६ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ परितुष्टोऽस्मि ते विप्र भक्त्या तव द्विजोत्तम ॥ वरं वरय भद्रं ते यद्यपि स्यात्सुदुर्लभम् ॥ ७ ॥ ॥ शुक्र उवाच ॥ ॥ यदि तुष्टो महादेव विद्यां देहि महेश्वर ॥ यया जीवंति संप्राप्ता मृत्युं संख्येऽपि जंतवः ॥ ८ ॥ ॥ पुलस्त्य उवाच ॥ ॥ प्रदाय वै शिवस्तस्मै तां विद्यां नृपसत्तम ॥ अब्रवीच्च पुनः शुक्रं वरमन्यं वृणीष्व मे ॥ ९ ॥ ॥ शुक्र उवाच ॥ ॥ एतत्कार्त्तिकमासस्य शुक्लाष्टम्यां तु यः स्पृशेत् ॥ ततो लिंगं पूजयेच्च यः पुमाञ्छ्रद्धयान्वितः॥ १० ॥ अल्पमृत्युभयं तस्य मा भूत्तव प्रसादतः ॥ इष्टान्कामानवाप्नोतु इह लोके परत्र च ॥ ११ ॥ ॥ पुलस्त्य उवाच ॥ ॥ एवमस्त्विति स प्रोच्य तत्रैवांतरधीयत ॥ शुक्रोपि दानवान्संख्ये हतान्देवैरनेकशः ॥१२॥ विद्यायाश्च प्रभावेन जीवयामास तान्मुनिः ॥ तस्याग्रे[1]ऽस्मिन्महाकुण्डं निर्मलं पापनाशनम् ॥ १३ ॥ तत्र स्नातो नरः सम्यक्पातकैश्च प्रमुच्यते ॥ तत्र श्राद्धेन राजेंद्र तुष्टा यांति पितामहाः ॥ १४ ॥ तर्पिताः सलिलेनैव किं पुनः पिंडदानतः ॥ तस्मात्सर्वप्रयत्नेन स्नानं तत्र समाचरेत् ॥ १५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखण्डे शुक्रेश्वरमाहात्म्यवर्णनंनाम पंचदशोऽध्यायः ॥ १५ ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो गच्छेन्नृपश्रेष्ठ तीर्थं पापप्रणाशनम् ॥ मणिकर्णिकसंज्ञं तु सर्वलोकेषु विश्रुतम् ॥ १ ॥ यत्र सिद्धिं गता राजन्वालखिल्या महर्षयः ॥ तैस्तत्र निर्मितं कुण्डं सुरम्यं गिरि

१ तस्याग्रे--शुक्रेश्वरस्य पुरतः--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



गह्वरे ॥ २ ॥ तेषां तत्रोपविष्टानां मुनीनां भावितात्मनाम् ॥ महाश्चर्यमभूत्तत्र तत्त्वं शृणु नराधिप ॥ ३ ॥ किरातवनिता काचिन्नाम्ना च मणिकर्णिका ॥ अतिकृष्णा विरूपाक्षी कराला भीषणाकृतिः ॥ ४ ॥ तृषार्त्ता तत्र संप्राप्ता मध्यंदिनगते रवौ ॥ ग्रस्ते च राहुणा सूर्ये प्रविष्टा सलिले तु सा ॥ ५ ॥ एतस्मिन्नेव काले तु दिव्यरूपवपुर्धरा ॥ मुनीनां पश्यतां चैव विनिष्क्रांता सुमध्यमा ॥ ६ ॥ अथ तस्याः पतिः प्राप्तस्तदन्वेषणतत्परः ॥ पप्रच्छ तां वरारोहां पत्न्या दुःखेन दुःखितः ॥ ७ ॥ मम भार्यात्र संप्राप्ता यदि दृष्टा सुमध्यमे ॥ शीघ्रं वद वरारोहे बालकोऽयं तदुद्भवः ॥ ८ ॥ तृषार्त्तश्च क्षुधाविष्टो रुदते च मुहुर्मुहुः ॥ दृष्टा चेत्कथ्यतां सुभ्रूर्विनाऽयं तां मरिष्यति ॥ ९ ॥ ॥ रुरुवाच ॥ ॥ साऽहं ते दयिता कान्त तीर्थस्यास्य प्रभावतः ॥ दिव्यरूपमिदं प्राप्ता देवैरपि सुदुर्लभम् ॥ १० ॥ त्वं चापि सलिले ह्यस्मिन्कुरु स्नानं त्वरान्वितः ॥ प्राप्स्यसि त्वं परं रूपं यथा प्राप्तं मयाऽनघ ॥ ११ ॥ अथासौ सह पुत्रेण प्रविष्टस्तत्र निर्झरे ॥ विमुक्ते भास्करे राजन्विरूपश्चाभवत्पुनः ॥ १२ ॥ दुःखेन मृत्युमापन्नस्तस्मिन्नेव जलाशये ॥ अथ सा भर्तृशोकाच्च मरणे कृतनिश्चया ॥ १३ ॥ चितिं कृत्वा समं तेन ज्वालयामास पावकम् ॥ अथ ते मुनयो दृष्ट्वा तथाशीलां शुभांगनाम् ॥ १४ ॥ कृपया परयाविष्टास्तामूचुर्विस्मयान्विताः ॥ सर्वे तस्याश्च संदृष्ट्वा साहसं च नृपोत्तम ॥ १५ ॥ ॥ ऋषय ऊचुः ॥ ॥ दिव्यरूपं त्वया प्राप्तं देवैरपि सुदुर्लभम् ॥ कस्मादेनं सुपाप्मानमनुगच्छसि भामिनि ॥ १६ ॥ ॥ रुरुवाच ॥ ॥ पतिव्रताहं विप्रेन्द्राः सदा भर्तृपरायणा ॥ किं रूपेण करिष्यामि विना पत्या निजेन च ॥ १७ ॥ विरूपो वा सुरूपो वा दरिद्रो वा धनाधिपः ॥ स्त्रीणामेकः पतिर्भर्त्ता गतिर्नान्या जगत्त्रये ॥ १८ ॥ बालकोऽयं मुनिश्रेष्ठा भवच्छरणमागतः ॥ अहं कान्तेन संयुक्ता प्रविशामि हुताशनम् ॥ १९ ॥ ॥ पुलस्त्य उवाच ॥ ॥ अथ ते मुनयः सर्वे ज्ञात्वा तस्याः सुनिश्चयम् ॥ कृपया परयाविष्टाः संवीक्ष्य च परस्परम् ॥ २० ॥ ततो जीवापयामासुस्तत्पतिं ते मुनीश्वराः ॥ सद्रूपेण समायुक्तं दिव्यलक्षणलक्षितम् ॥ २१ ॥ एतस्मिन्नेव काले तु विमानं मनसेप्सितम् ॥ देवकन्यासमाकीर्णं सद्यस्तत्र समागतम् ॥ २२ ॥ अथ तौ दंपती तेषां मुनीनां भावितात्मनाम् ॥ पुरतः प्रणिपत्याथ प्रस्थितौ त्रिदिवं प्रति ॥ २३ ॥ अथ तैर्मुनिभिः प्रोक्ता सा नारी मणिकर्णिका ॥ वरं वरय कल्याणि सर्वे तुष्टा वयं तव ॥ २४ ॥ पतिव्रतत्वेन तुष्टाः सत्येन च विशेषतः ॥ नास्माकं दर्शनं व्यर्थं जायते च कथंचन ॥ २५ ॥ ॥ मणिकर्णिकोवाच ॥ ॥ यदि मां मुनयस्तुष्टाः प्रयच्छथ वरं मुदा ॥ यदत्रास्ति महालिंगं मन्नाम्ना तद्भविष्यति ॥ २६ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदेव ममाभीष्टं नान्यदस्ति प्रयोजनम् ॥ सर्वेषां च प्रसादेन स्वर्गं गच्छामि सांप्रतम् ॥ २७ ॥ ॥ ऋषय ऊचुः ॥ ॥ एवं भवतु ते ख्याति स्तीर्थलिंगे वरानने ॥ तव नामान्वितं जातं तीर्थं वै मणिकर्णिका ॥ २८ ॥ ॥ पुलस्त्य उवाच ॥ ॥ भर्त्रा सह दिवं प्राप्ता पुत्रेणैव समन्विता ॥ वालखिल्यास्तपोनिष्ठा विशेषात्तत्र संस्थिताः ॥ २९ ॥ तत्र सूर्यग्रहे प्राप्ते स्नानदानादिकाः क्रियाः ॥ यः करोति फलं तस्य कुरुक्षेत्र समं भवेत् ॥ ३० ॥ यंयं काममभिध्याय स्नानं तत्र करोति यः ॥ तंतं प्राप्नोति राजेन्द्र सम्यग्ध्यानसमन्वितः ॥ ३१ ॥ तस्मात्सर्वप्रयत्नेन स्नानं तत्र समाचरेत् ॥ तीर्थे दानं यथाशक्त्या देवर्षिपितृतर्पणम् ॥ ३२ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे तृतीयेऽर्बुदखण्डे मणिकर्णिकेश्वरमाहात्म्यवर्णनंनाम षोडशोऽध्यायः ॥ १६ ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ पंगुतीर्थं ततो गच्छेत्सर्वपातकनाशनम् ॥ यत्र पूर्वं तपस्तप्तं पंगुना ब्राह्मणेन च ॥ १ ॥ पंगुनामा द्विजः पूर्वं च्यवनस्यान्वयेऽभवत् ॥ अशक्तश्चलितुं भूमौ पंगुभावान्नृपोत्तम ॥ २ ॥ गृहकृत्यनियुक्तोऽसावेकदा बान्धवैर्नृप ॥ पंगुर्गंतुं न शक्तोऽसौ परं दुःखमवाप्तवान् ॥ ३ ॥ अथासौ तैः परित्यक्तो गत्वार्बुदमथाचलम् ॥ एकं सरः समासाद्य तपस्तेपे सुदारुणम् ॥ ४ ॥ लिंगं संस्थाप्य तत्रैव पूजयामास तं विभुम् ॥ गन्धपुष्पादिनैवेद्यैः सम्यक्छ्रद्धासमन्वितः ॥ ५ ॥ शिवभक्तिपरो जातो वायुभक्षो बभूव ह ॥ जपहोमरतो नित्यं पंगुनामा द्विजोत्तमः ॥ ६ ॥ ततस्तुष्टो महादेवो ब्राह्मणं नृपसत्तम ॥ पंगुं प्रति महाराज वाक्यमेतदुवाच ह ॥ ७ ॥ ॥ ईश्वर उवाच ॥ ॥ पंगो तुष्टो महादेवो वरं वरय सुव्रत ॥ तव दास्याम्यहं सर्वं यद्यपि स्यात्सुदुर्लभम् ॥ ८ ॥ ॥ पंगुरुवाच ॥ ॥ नाम्ना मे ख्यातिमायातु तीर्थमेतत्सुरेश्वर ॥ पंगुभावोऽत्र मे यातु प्रसादात्तव शंकर ॥ ९ ॥ तवास्तु सततं चात्र सांनिध्यं सह भार्यया ॥ एवमुक्तः स तेनाथ विप्रं प्रति वचोऽब्रवीत् ॥ १० ॥ ॥ ईश्वर उवाच ॥ ॥ नाम्ना तव द्विजश्रेष्ठ तीर्थमेतद्भविष्यति ॥ ख्यातिं तपःप्रभावेन तीर्थं यास्यति सत्तम ॥ ११ ॥ चैत्रशुक्लचतुर्दश्यां सांनिध्यं मे भवेत्तथा ॥ १२ ॥ ॥ ॥ पुलस्त्य उवाच ॥ ॥ स्नानमात्रेण विप्रोऽसौ दिव्यरूपमवाप हः ॥ तत्र तस्थौ महादेवो गौर्या सह महेश्वरः ॥ १३ ॥ तस्मिन्दिने नृपश्रेष्ठ स्नानं तत्र समाचरेत् ॥ स पंगुत्वाद्विनिर्मुक्तो दिव्यरूपमवाप्नुयात् ॥ १४ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखण्डे पंगुतीर्थमाहात्म्यवर्णनंनाम सप्तदशोऽध्यायः ॥ १७ ॥ ॥ छ ॥ ॥

१ अहम्—इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो गच्छेन्नृपश्रेष्ठ यमतीर्थमनुत्तमम् ॥ मोचकं नरकेभ्यश्च प्राणिनां पापनाशनम् ॥ १ ॥ पुरा चित्रां
गदोनाम राजा परमलोभवान् ॥ न तेन सुकृतं किंचित्कृतं पार्थिवसत्तम ॥ २ ॥ अतीव निष्ठुरो दुष्टो देवब्राह्मणपीडकः ॥ परदारहरो
नित्यं परवित्तहरस्तथा ॥ ३ ॥ सत्यशौचविहीनस्तु मायामत्सरसंयुतः ॥ स कदाचिन्मृगयासक्त आरूढोऽर्बुदपर्वते ॥ ४ ॥ अटनात्स परिश्रांतः
क्षुत्पिपासासमाकुलः ॥ तेन तत्र ह्रदः प्राप्तः स्वच्छोदकप्रपूरितः ॥ ५ ॥ पद्मिनीभिः समाकीर्णो ग्राहनक्रझषाकुलः ॥ नानापक्षिसमायुक्तो मनो
हारी सुविस्तरः ॥ ६ ॥ तृषार्त्तः संप्रविष्टः स तस्मिन्नेव जलाशये ॥ ग्राहेण तत्क्षणाद्धृत्वा भक्षितो नृपसत्तम ॥ ७ ॥ तस्यार्थे नरका रौद्रा निर्मिताश्च
यमेन च ॥ यमदूतैस्ततः क्षिप्तः स नीत्वा पापकृत्तमः ॥ ८ ॥ तस्य स्पर्शेन ते सर्वे नरकस्थाः सुखं गताः ॥ ते दूता धर्मराजाय वृत्तांतं नरको
द्भवम् ॥ आचख्युर्विस्मयाविष्टा नरकस्थानां सुखोद्भवम् ॥ ९ ॥ तदा वैवस्वतः प्राह भूमावस्त्यर्बुदाचलः ॥ तत्र मेऽतिप्रियं तीर्थं यत्र तप्तं मया तपः
॥ १० ॥ तत्रासौ मृत्युमापन्नो भात्यदस्त्विह कारणम् ॥ तैरुक्तं सत्यमेतद्धि मृतोऽसावर्बुदाचले ॥ ग्राहेण स धृतस्तत्र मृत्युं प्राप्तो नृपाधमः ॥११॥
॥ ॥ यम उवाच ॥ ॥ मुच्यतामाशु तेनायं नानेयाश्चापरे जनाः ॥ ये मृता मम तीर्थे वै सर्वपातकनाशने ॥ १२ ॥ ततस्तैः किंकरैर्मुक्तो
यमवाक्यान्नृपोत्तम ॥ त्रिविष्टपं मुदा प्राप्तः सेव्यमानोऽप्सरोगणैः ॥ १३ ॥ यस्तु भक्तिसमायुक्तः स्नानं तत्र समाचरेत् ॥ स याति परमं स्थानं
जरामरणवर्जितम् ॥ १४ ॥ तस्मात्सर्वप्रयत्नेन स्नानं तत्र समाचरेत् ॥ चैत्रशुक्लत्रयोदश्यां यत्र सिद्धिं गतो यमः ॥ १५ ॥ तस्मिन्नेव नरः सम्य
क्छ्राद्धकृत्यं समाचरेत् ॥ आकल्पं पितरस्तस्य स्वर्गे तिष्ठंति पार्थिव ॥१६॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभास
खंडे तृतीयेऽर्बुदखण्डे यमतीर्थमाहात्म्यवर्णनंनामाष्टादशोऽध्यायः ॥ १८ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो गच्छेन्नृपश्रेष्ठ तीर्थं पापप्रणाशनम् ॥
वाराहस्य हरेरिष्टं सदा वाससुखप्रदम् ॥ १ ॥ वाराहेणावतारेण पृथ्वी तत्र समुद्धृता ॥ हरिणोक्ता स्थिरा तिष्ठ न भेतव्यं कदाचन ॥ २ ॥ अहं चेतो
गमिष्यामि वैकुण्ठे च पुनः शुभे ॥ वरं वरय कल्याणि यद्यदिष्टं सुदुर्लभम् ॥ ३ ॥ ॥ पृथिव्युवाच ॥ ॥ यदि देयो वरो मह्यं शंखचक्रगदाधर ॥
अनेन वपुषा तिष्ठ ह्यस्मिंस्तीर्थे सदा हरे ॥ ४ ॥ ॥ हरिरुवाच ॥ ॥ अनेन वपुषा देवि पर्वतेऽर्बुदसंज्ञके ॥ अहं स्थास्यामि ते वाक्यात्सदा लोक
हिते रतः ॥ ५ ॥ ममाग्रे यो ह्रदः पुण्यः सुनिर्मलजलान्वितः ॥ माघमासे सिते पक्ष एकादश्यां समाहितः ॥ ६ ॥ तत्र स्नात्वा नरो भक्त्या मुच्यते
ब्रह्महत्यया ॥ तत्र श्राद्धं करिष्यंति मनुष्याः श्रद्धयान्विताः ॥ ७ ॥ पितॄणां जायते तृप्तिर्यावदाभूतसंप्लवम् ॥ तस्मात्सर्वप्रयत्नेन स्नानं तत्र समा



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चरेत् ॥ ८ ॥ ॥ पुलस्त्य उवाच ॥ ॥ इत्युक्त्वांतर्दधे राजन्गोविंदो गरुडध्वजः ॥ तस्मिन्दिने नृपश्रेष्ठ स्नात्वा व्रतं समाचरेत् ॥९॥ तर्पणं पिंड
दानं च यः कुर्याद्भक्तितत्परः ॥ स याति विष्णुसालोक्यं पूर्वजैः सह पार्थिव ॥ १० ॥ तत्र दानं प्रशंसंति गत्वा ब्राह्मणसत्तमे ॥ अस्मिंस्तीर्थे
नृपश्रेष्ठ गोदानं च करोति यः ॥ ११ ॥ रोमसंख्यानि वर्षाणि स्वर्गे तिष्ठति मानवः ॥ तस्मात्सर्वात्मना राजन्गोदानं च समाचरेत् ॥ १२ ॥
एकादश्यां विशेषेण कर्त्तव्यं स्नानमुत्तमम् ॥ दानं कुर्याद्यथाशक्त्या स याति परमां गतिम् ॥ १३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाह
स्त्र्यां संहितायां सप्तमे प्रभासखंडे तृतीयेऽर्बुदखंडे वाराहतीर्थमाहात्म्यवर्णनंनामैकोनविंशोध्यायः ॥ १९ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो
गच्छेत चंद्रेशं प्रभासं नृपसत्तम ॥ प्रभा तत्र पुरा प्राप्ता चंद्रेण सुमहात्मना ॥ १ ॥ दक्षस्य कन्यका राजन्सप्तविंशतिसंख्यया ॥ ऊढाश्चंद्रेण
ताः सर्वा अश्विनीप्रमुखाः पुरा ॥ २ ॥ तासां मध्ये च रोहिण्या सह रेमे स नित्यदा ॥ त्यक्ताः सर्वाश्च चंद्रेण दक्षकन्याः सुदुःखिताः ॥ गत्वा
स्वपितरं नत्वा प्राहुरस्राविलेक्षणाः ॥ ३ ॥ वयं त्यक्ताः प्रजानाथ निर्दोषाः पतिना ततः ॥ शरणं त्वामनुप्राप्ता दुःखेन महताऽन्विताः ॥ ४ ॥ गति
र्भव[1] सुरश्रेष्ठ सर्वेषां त्वं हितं कुरु ॥ अस्माकमुपदिश्यैनं चंद्रं च रोहिणीरतम् ॥ ५ ॥ ॥ पुलस्त्य उवाच ॥ ॥ स तासां वचनं श्रुत्वा गतो
यत्र निशाकरः ॥ अब्रवीच्च समं पश्य सर्वासु तनयासु मे ॥ ६ ॥ अथ व्रीडासमायुक्तश्चंद्रस्तं प्रत्यभाषत ॥ तव वाक्यं करिष्यामि दक्ष गच्छ नमो
स्तु ते ॥ ७ ॥ गते दक्षे ततो भूयश्चंद्रमा रोहिणीरतः ॥ त्यक्त्वा च कन्यकाः सर्वाः प्रजापतिसमुद्भवाः ॥ ८ ॥ अथ गत्वा पुनः सर्वा दक्षमूचुः
सुदुःखिताः ॥ न कृतं तव वाक्यं वै चंद्रेणैव दुरात्मना ॥ ९ ॥ दौर्भाग्यदुःखसंतप्ता मरिष्याम न संशयः ॥ अनेन जीवितेनापि मरणं निश्चयं
भवेत् ॥ १० ॥ ॥ पुलस्त्य उवाच ॥ ॥ अथ रोषसमायुक्तो दक्षो गत्वाऽब्रवीद्विधुम् ॥ मम वाक्यं त्वया चंद्र यस्मात्पाप कृतं न हि
॥ ११ ॥ क्षयमेष्यसि तस्मात्त्वं यक्ष्मणा नास्ति संशयः॥ एवं दत्त्वा ततः शापं गतो दक्षः स्वमालयम् ॥ १२ ॥ यक्ष्मणा व्यापितश्चंद्रः क्षयं याति
दिनेदिने ॥ क्षीणो द्युतिविहीनस्तु चिंतयामास चंद्रमाः ॥ १३ ॥ किं कर्त्तव्यं मया तत्र ह्यस्मिञ्छापे सुदारुणे ॥ अथ किं पूजयिष्यामि सर्वकाम
प्रदं शिवम् ॥ १४ ॥ स एवं निश्चयं कृत्वा गतोर्बुदमथाचलम् ॥ तपस्तेपे जितक्रोधो जपहोमपरायणः ॥ १५ ॥ तस्मै तुष्टो महादेवो वर्षाणाम
युते गते ॥ अब्रवीद्वरदोऽस्मीति ततोऽस्मै दर्शनं ददौ ॥ १६ ॥ ॥ ईश्वर उवाच ॥ ॥ वरं वरय भद्रं ते यत्ते मनसि वर्तते ॥ तत्र दास्याम्यहं

१ अथ किम्—बहुना विचारेण अलम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



चंद्र यद्यपि स्यात्सुदुर्लभम् ॥ १७ ॥ ॥ चंद्र उवाच ॥ ॥ व्याधिक्षयं सुरश्रेष्ठ कुरु मे त्रिपुरांतक ॥ यक्ष्मणा व्यापितो देहो ममायं च जगत्पते ॥ १८ ॥ ॥ ईश्वर उवाच ॥ ॥ दक्षशापेन ते चंद्र यक्ष्मा काये व्यवस्थितः ॥ न शक्तो ह्यन्यथा कर्तुं शापस्तस्य महात्मनः ॥१९॥ तस्मात्त्वं तस्य ताः सर्वाः कन्यका मम वाक्यतः ॥ निशाकर समं पश्य तव व्याधिर्गमिष्यति ॥ २० ॥ कृष्णे क्षयश्च ते चंद्र शुक्ले वृद्धिर्भविष्यति ॥ वरं वरय भद्रं ते अन्यमिष्टं सुदुर्लभम् ॥ २१ ॥ ॥ चंद्र उवाच ॥ ॥ चंद्रग्रहे नरो योऽत्र सोमवारे च शंकर ॥ भक्त्या स्नानं करोत्येव स यातु परमां गतिम् ॥ २२ ॥ पिण्डदानेन देवेश स्वर्गं गच्छंतु पूर्वजाः ॥ प्रसादात्तव देवेश तीर्थं भवतु मुक्तिदम् ॥ २३ ॥ ॥ ईश्वर उवाच ॥ ॥ भविष्यंति नरो[1]ऽत्रैव विपाप्मानो निशाकर ॥ यस्मात्प्रभा त्वया प्राप्ता तीर्थेऽस्मिन्विमलोदके ॥ २४ ॥ प्रभासतीर्थं विख्यातं तस्मादेतद्भविष्यति॥ यत्र सोमग्रहे प्राप्ते सोमवारे विशेषतः ॥ २५ ॥ करिष्यंति नराः स्नानं ते यास्यंति परां गतिम् ॥ येऽत्र श्राद्धं करिष्यंति पिंडदानं तथा नराः ॥ ॥ २६ ॥ गयाश्राद्धसमं पुण्यं तेषां चंद्र भविष्यति ॥ तथा दानं प्रकर्तव्यं सोम लोकैर्ग्रहे तव ॥ २७ ॥ ॥ पुलस्त्य उवाच ॥ ॥ एवमुक्त्वा विरूपाक्षस्तत्रैवांतरधीयत ॥ चन्द्रोऽपि बुभुजे सर्वाः पत्नीश्च दक्षसंभवाः ॥ २८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखण्डे चंद्रप्रभासतीर्थमाहात्म्यवर्णनंनाम त्रिंशोऽध्यायः ॥ २० ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो गच्छेन्नृप श्रेष्ठ पिण्डोदकमनुत्तमम् ॥ तीर्थं यत्र तपस्तप्तं पिण्डोदकद्विजातिना[2] ॥ १ ॥ पुरा पिण्डोदकोनाम ब्राह्मणोऽभून्महामते ॥ मन्दप्रज्ञोऽल्पमेधावी सोपा[3]ध्यायेन पाठितः ॥ २ ॥ अशक्तोऽध्ययनं कर्तुं जाड्यभावान्महीपते ॥ स वैराग्यं परं गत्वा संप्राप्तो गिरिगह्वरे ॥ ३ ॥ एतस्मिन्नेव काले तु तत्रैव च सरस्वती ॥ वीणाविनोदसंयुक्ता विविक्ते तमुपस्थिता ॥ ४ ॥ तं दृष्ट्वा ब्राह्मणं खिन्नं वैराग्येण समन्वितम् ॥ कृपाविष्टा महा[4]देवी वाक्यमेतदुवाच ह ॥ ५ ॥ ॥ सरस्वत्युवाच ॥ ॥ कस्मात्त्वं खिद्यसे विप्र विरक्त इव भाससे ॥ कस्मान्न हृष्यसि हृदा कस्मादत्र त्वमागतः ॥ वद शीघ्रं महाभाग तवांतिके वसाम्यहम् ॥ ६ ॥ ॥ पिण्डोदक उवाच ॥ ॥ अहं वैराग्यमापन्न उपाध्यायतिरस्कृतः ॥ ज्ञानहीनो महाभागे मृत्युं वांछामि सांप्रतम् ॥ ७ ॥ न मे सरस्वती देवी जिह्वाग्रे परिवर्तते ॥ कारणं नान्यदस्तीह मृत्योर्मम वरानने ॥ ८ ॥ दृष्टोऽकस्मात्त्वया चाहं ततो यास्यामि चान्यतः ॥ मरणं हि मम श्रेयो मूकभावान्न जीवितम् ॥ ९ ॥ ॥ सरस्वत्युवाच ॥ · ॥ अहं सरस्वती देवी सदास्मिन्नरपर्वते ॥ निशा

१ नरः—नृशब्दस्य प्रथमाबहुवचनमिदम् । २ पिंडोदकद्विजातिना—पिण्डोदकाख्येन—ब्राह्मणेन—इत्यर्थः । ३ सोपाध्यायेन—सः—उपाध्यायेन—इति पदच्छेदः। संधिरार्षः । ४ समुत्पत्य—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुखे त्रयोदश्यां करोमि वसतिं द्विज ॥ तस्मात्त्वं प्रार्थय वरं यदभीष्टं सुदुर्लभम् ॥ १० ॥ ॥ पिण्डोदक उवाच ॥ ॥ प्रसादात्तव वै वाणि सर्व ज्ञत्वं ममेप्सितम् ॥ एतत्तीर्थं तु मन्नाम्ना ख्यातिं यातु शुचिस्मिते ॥ ११ ॥ ॥ सरस्वत्युवाच ॥ ॥ अद्यप्रभृति सर्वज्ञो ह्यत्र लोके भविष्यसि ॥ नाम्ना तव तथा तीर्थमेतत्ख्यातिं प्रयास्यति ॥१२॥ निशामुखे त्रयोदश्यां योऽत्र स्नानं करिष्यति ॥ भविष्यति स सर्वज्ञो यद्यपि स्यात्सुमन्दधीः ॥ १३ ॥ अत्र मे सततं वासो भविष्यति द्विजोत्तम ॥ यस्मात्तस्मात्सदा स्नानं कर्तव्यं सुसमाहितैः ॥ १४ ॥ एवमुक्त्वा ततो देवी तत्रैवांतरधीयत ॥ पिण्डोदको हि सर्वज्ञो भूत्वाथ स्वगृहं ययौ ॥ व्यस्मापयज्जनान्सर्वांस्तत्तीर्थस्य समाश्रयात् ॥ १५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखण्डे पिण्डोदकतीर्थमाहात्म्यवर्णनंनामैकविंशोऽध्यायः ॥ २१ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो गच्छेन्नृपश्रेष्ठ श्रीमातां[1] देववंदिताम् ॥ सर्वकामप्रदां नृणामिह लोके परत्र च ॥१॥ या च सर्वमयी शक्तिर्यया व्याप्तमिदं जगत् ॥ सा तस्मिन्पर्वते साक्षात्स्वयं वासमरोचयत् ॥२॥ पुरा देवयुगे राजा कलिंगोनाम दानवः ॥ जरामरणहीनोसौ देवानां च भयंकरः॥३॥ तेन सर्वमिदं व्याप्तं त्रैलोक्यं सचराचरम् ॥ बलप्रभावतः स्वर्गो जितस्तेन सुराधिपः ॥ ब्रह्मलोकमनुप्राप्तो देवैः सर्वैः समन्वितः ॥४॥ तेन दैत्येन सर्वेऽपि त्रासिताः सुरमानवाः ॥ कलिंगोनाम दैत्यः स स्वयमिन्द्रो बभूव ह ॥ ५ ॥ वसवो मरुतः साध्या विश्वेदेवाः सुरर्षयः ॥ तेन सर्वे कृता दैत्या यथायोग्यं नराधिप ॥ ६ ॥ यज्ञभागान्स्वयं सर्वे बुभुजुस्ते च दानवाः ॥ तपोऽर्थे च ततो देवा गताः सर्वेऽर्बुदाचलम् ॥ ७ ॥ अद्यापि देवताखातं त्रैलोक्ये ख्यातिमागतम् ॥ तत्र व्रतपराः सर्वे पत्रमूलफलाशिनः ॥ ८ ॥ अव्यक्ताः परमत्रासाद्ध्यायंतस्ते च संस्थिताः ॥ पंचाग्निसाधकाः केचित्तत्र व्रतपरायणाः ॥ ९ ॥ एकाहारा निराहारा वायुभक्षास्तथा परे ॥ अन्ये मासोपवासाश्च चान्द्रायणपरायणाः ॥ १० ॥ कृच्छ्रसांतपने निष्ठा महापाराकिणः परे ॥ अंबुभक्षा वायुभक्षाः फेनपाश्चोष्मपाः परे ॥ ११ ॥ जपहोमपराश्चान्ये ध्यानासक्तास्तथा परे ॥ बलिनैवेद्यदानैश्च गंधधूपैर्नराधिप ॥ १२ ॥ पूजयंतः परां शक्तिं देवीं स्वकार्यहेतवे ॥ एवं तेषां व्रतस्थानां तपसा भावितात्मनाम् ॥ विमुक्तिरभवद्राजन्सर्वेषां कर्मबन्धनात् ॥ १३ ॥ ततः पूर्णे सहस्रांते वर्षाणां नृपसत्तम ॥ देवी प्रत्यक्षतां प्राप्ता कन्यकारूपधारिणी ॥ १४ ॥ पूर्वं जाता महाराज धूममूर्तिर्भयावहा ॥ ततो ज्वाला ततः कन्या शुक्लवासोऽनुलेपना ॥ दृष्ट्वा तां तुष्टुवुर्देवाः कृतांजलिपुटास्ततः ॥ १५ ॥ ॥ देवा ऊचुः ॥ ॥ नमोऽस्तु सर्वगे देवि नमस्ते सर्वपूजिते ॥ नमस्ते

१ श्रीमाताम्—ऋदन्तस्यावन्तत्वमार्षम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



कामगेऽचिन्त्ये नमस्ते त्रिदशाश्रये ॥ १६ ॥ नमस्ते परमादेवि ब्रह्मयोने नमोनमः ॥ अर्धमात्रेक्षरे चैव तस्यार्धार्धे नमोनमः ॥ १७ ॥ नमस्ते
पद्मपत्राक्षि विश्वमातर्नमोनमः ॥ नमस्ते वरदे देवि रजःसत्त्वतमोमयि ॥ १८ ॥ स्वस्वरूपस्थिते देवि त्वं च संसारलक्षणम् ॥ त्वं बुद्धिस्त्वं धृतिः
क्षांतिस्त्वं स्वाहा त्वं स्वधा क्षमा ॥ १९ ॥ त्वं वृद्धिस्त्वं गतिः कर्त्री शची लक्ष्मीश्च पार्वती ॥ सावित्री त्वं च गायत्री अजेया पापनाशिनी ॥ २० ॥
यच्चान्यदत्र देवेशि त्रैलोक्येऽस्तीतिसंज्ञितम् ॥ तद्रूपं तावकं देवि पर्वतेषु च संस्थितम् ॥ २१ ॥ वह्निना च यथा काष्ठं तंतुना च यथा पटः ॥
तथा त्वया जगद्व्याप्तं गुप्ता त्वं सर्वतः स्थिता ॥ २२ ॥ ॥ पुलस्त्य उवाच ॥ ॥ एवं स्तुता जगन्माता तानुवाच सुरोत्तमान् ॥ वरो मे
याच्यतां शीघ्रमभीष्टः सुरसत्तमाः ॥ २३ ॥ किमत्र गुप्तभावेन तिष्ठथ श्वभ्रमध्यगाः ॥ मद्भक्तानां भयं नास्ति त्रैलोक्येपि चराचरे ॥ २४ ॥
॥ ॥ देवा ऊचुः ॥ ॥ कलिंगेन वयं देवि निरस्ताः संगरे मुहुः ॥ तेन व्याप्तमिदं सर्वं त्रैलोक्यं सचराचरम् ॥ २५ ॥ यज्ञभागो हृतोऽस्माकं
दैत्यानां स प्रकल्पितः ॥ तेन स्वर्गः समाक्रान्तः सुराः सर्वे निराकृताः ॥ २६ ॥ हत्वा दैत्यान्यथा भूयः शक्रः स्वपदमाप्नुयात् ॥ तथा कुरु
महाभागे वर एषोऽस्मदीप्सितः ॥ २७ ॥ ॥ देव्युवाच ॥ ॥ यथा यूयं मया सृष्टास्तथैवायं महासुरः ॥ विशेषो नास्ति मे कश्चिदुभयोः
सुरसत्तमाः ॥ २८ ॥ तस्मात्तान्वारयिष्यामि शक्राद्यांस्त्रिदिवात्पुनः ॥ एवमुक्त्वा वरारोहा प्रेषयामास पार्थिव ॥ २९ ॥ दूतं कलिंगदैत्याय त्यज
त्वं त्रिदिवं द्रुतम् ॥ स गत्वा बाष्कलिं[1] दैत्यं सामपूर्वं वचोऽब्रवीत् ॥ ३० ॥ ॥ दूत उवाच ॥ ॥ या सा सर्वगता देवी शक्तिरूपा शुचि
स्मिता ॥ श्रीमाता जगतां माता देवैराराधिता परा ॥ तेषां तुष्टा च देवी त्वामिदं वचनमब्रवीत् ॥ ३१ ॥ स्वस्थानं गच्छ शीघ्रं त्वं शक्रो यातु
त्रिविष्टपम् ॥ मद्वाक्याद्दानवश्रेष्ठ देवत्वं न भवेत्तव ॥ ३२ ॥ ॥ पुलस्त्य उवाच ॥ ॥ स दूतवचनं श्रुत्वा दानवो मदगर्वितः ॥ ३४ ॥
अहं लोकेश्वरो मत्वा सगर्वमिदमब्रवीत् ॥ ३३ ॥ ॥ बाष्कलिरुवाच ॥ ॥ का श्रीमातेति के देवा नास्मात्स्वर्गं त्यजाम्यहम् ॥ न तां
जानामि तांश्चैव गत्वा ब्रूहि ममाज्ञया ॥ ३४ ॥ न भवद्वचस्त्वहं स्वर्गं प्रयच्छामि कथंचन ॥ दूतोऽवध्यो भवेद्राज्ञामपि वैरे सुदारुणे ॥ एतस्मा
त्कारणादूत न त्वां प्राणैर्वियोजये ॥ ३५ ॥ श्रीमातां यदि मे दूत दर्शयिष्यसि चेत्ततः ॥ अभीष्टान्संप्रदास्यामि सत्यमेव ब्रवीम्यहम् ॥ ३६ ॥
अहं त्वया समं तत्र यास्ये यत्र स्थिता च सा ॥ निग्रहं च करिष्यामि वाक्यं मे सत्यकारणम् ॥ ३७ ॥ ॥ पुलस्त्य उवाच ॥ ॥ एवमुक्त्वा

१ अयं वाष्कलिरेव—कलिंगापरनामा वोद्धव्यः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मदोन्मत्तो दूतेन च स दानवः ॥ अर्बुदं प्रययौ तूर्णं रोषेण महता वृतः ॥ ३८ ॥ दृष्ट्वा बाष्कलिमायांतं देवाः शक्रपुरोगमाः ॥ वार्यमाणास्तदा देव्या पलायनपरायणाः ॥ ३९ ॥ भयेन महताविष्टा दिशो भेजुः समंततः ॥ अथासौ बाष्कलिः प्राप्तः सैन्येन महता वृतः ॥ ४० ॥ श्रीमाता तिष्ठते यत्र पर्वतेर्बुदसंज्ञके ॥ दूतं च प्रेषयामास तमुवाच नराधिपः ॥ ४१ ॥ ॥ बाष्कलिरुवाच ॥ ॥ गच्छ दूतवर ब्रूहि श्रीमातां चारुहासिनीम् ॥ भार्या मे भव सुश्रोणि अहं ते वशगः सदा ॥ ४२ ॥ भविष्यति हि मे राज्यं सर्वं वशगतं तव ॥ अन्यथा धर्षयिष्यामि सर्वैः सार्द्धं सुरोत्तमैः ॥४३॥ किमिंद्रेणाल्पवीर्येण किमन्यैश्च वरानने ॥ सहस्राक्षो न मे तुल्यो न मे तुल्याः सुरासुराः ॥ ४४ ॥ ॥ पुलस्त्य उवाच ॥ ॥ एतच्छ्रुत्वा ततो गत्वा स दूतः संन्यवेदयत् ॥ तस्य सर्वं यथावाक्यं तेनोक्तं च महीपते ॥४५॥ ततः श्रुत्वा स्मितं कृत्वा चिंतयामास भामिनी ॥ जरामरणहीनोयं दैत्येन्द्रः शंभुना कृतः ॥ ४६ ॥ कथमस्य मया कार्यो निग्रहो देवताकृते ॥ पुनश्चिंतयते यावत्सा देवी दानवं प्रति ॥ तावत्तत्रागतः शीघ्रं स कामेन परिप्लुतः ॥ ४७ ॥ अथ दृष्टिनिपातेन सा देवी दानवाधिपम् ॥ व्यलोकयत्ततस्तस्या निश्चयः संबभूव ह ॥ ४८ ॥ ततो जहास सा देवी शनकैर्नृपसत्तम ॥ मुखात्तस्यास्ततः सैन्यं निष्क्रांतमतिभीषणम् ॥ ४९ ॥ हस्तिनो हयवर्याश्च पादाताश्च पृथग्विधाः ॥ रथसाहस्रमारूढा योधाश्चापि सहस्रशः ॥ ५० ॥ तैः सैन्यं दानवेशस्य सर्वं शस्त्रैर्निपातितम् ॥ पश्यतस्तस्य दैत्यस्य निश्चलस्यासुरस्य च ॥ ५१ ॥ हते सैन्यबले तस्मिन्निंद्राद्यास्त्रिदिवौकसः ॥ तामूचुर्वचनं देवि दानवं हन्तुमर्हसि ॥ नास्मिञ्जीवति नो राज्यं स्वर्गे देवि भविष्यति ॥ ५२ ॥ ॥ पुलस्त्य उवाच ॥ ॥ श्रुत्वा तद्वचनं तेषां ज्ञात्वा तं मृत्युवर्जितम् ॥ पर्वतस्य महाशृंगं दत्त्वा तस्योपरि स्वयम् ॥ ५३ ॥ निविष्टा सा जगन्माता श्रीमाता कामरूपिणी ॥ हिताय जगतां राजन्नद्यापि वरपर्वते ॥ तत्रैव वसते साक्षान्नृणां कामप्रदायिनी ॥ ५४ ॥ एतस्मिन्नेव काले तु सर्वे देवाः सवासवाः ॥ तुष्टुवुस्तां महाशक्तिं भयहंत्रीं प्रहर्षिताः ॥ ५५ ॥ प्रसन्नाऽभूत्ततो देवी तेषां तत्र नराधिप ॥ स्वंस्वं स्थानं सुराः सर्वे परियांतु गतव्यथाः ॥ गत्वा स्थानं स्वकं सर्वे परिपांतु गतव्यथाः ॥ ५६ ॥ वरं वरय देवेन्द्र ब्रूहि यत्ते मनोगतम् ॥ तत्सर्वं संप्रदास्यामि तुष्टाहं भक्तितस्तव ॥ ५७ ॥ ॥ ॥ इन्द्र उवाच ॥ ॥ यदि तुष्टासि मे देवि शाश्वते भक्तिवत्सले ॥ अत्रैव स्थीयतां तावत्स्वर्गे यावदहं विभुः ॥ ५८ ॥ प्रशास्मि राज्यं देवेशि शाश्वते भक्तवत्सले ॥ अजरश्चामरश्चैव यतो दैत्यः सुरेश्वरि ॥ ५९ ॥ हरेण निर्मितः पूर्वं येन तिष्ठति निश्चलः ॥ प्रसादात्तव लोकाश्च त्रयः संतु निरामयाः ॥६०॥ अत्र त्वां पूजयिष्यामो वयं सर्वे समेत्य च ॥ चैत्रशुक्लचतुर्दश्यां दृष्ट्वा त्वां यांतु सद्गतिम् ॥ ६१ ॥ ॥ पुलस्त्य उवाच ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



एवमुक्त्वा सहस्राक्षः सर्वदेवैः समन्वितः ॥ हृष्टस्त्रिविष्टपं प्राप्तो देव्यास्तस्याः प्रभावतः ॥ ६२ ॥ सापि तत्र स्थिता देवी देवानां हितकाम्यया ॥
॥ ६३ ॥ यस्तां पश्यति चैत्रस्य चतुर्दश्यां सिते नृप ॥ स याति परमं स्थानं जरामरणवर्जितम् ॥ ६४ ॥ किं व्रतैर्नियमैर्वापि दानैर्दत्तैर्नरा
धिप ॥ सर्वे तद्दर्शनस्यापि कलां नार्हंति षोडशीम् ॥ ६५ ॥ तत्रैव पादुके दिव्ये तया न्यस्ते नराधिप ॥ यस्ते पश्यति भूयोऽसौ संसारं न हि
पश्यति ॥ सर्वान्कामानवाप्नोति इह लोके परत्र च ॥ ६६ ॥ ॥ ययातिरुवाच ॥ ॥ कस्मिन्काले द्विजश्रेष्ठ देव्या मुक्तेऽत्र पादुके ॥ कस्माच्च
कारणाद्ब्रूहि सर्वं विस्तरतो मम ॥ ६७ ॥ ॥ पुलस्त्य उवाच ॥ ॥ तां देवीं मानवाः सर्वे संवीक्ष्य नृपसत्तम ॥ प्राप्नुवंति परां सिद्धिं द्विविधां[1]
धर्मकारिणः ॥ ६८ ॥ एतस्मिन्नेव काले तु यज्ञदानादिकाः क्रियाः ॥ प्रणष्टा भूतले राजंस्तीर्थयात्राव्रतोद्भवाः ॥ ६९ ॥ शून्यास्ते नरकाः सर्वे
संबभूवुर्यमस्य ये ॥ यज्ञभागविहीनाश्च देवाः कष्टमुपागताः ॥ ७० ॥ अथ सर्वे नृपश्रेष्ठ देवास्तत्र समागताः ॥ ऊचुर्गत्वार्बुदं तत्र श्रीमातां परमे
श्वरीम् ॥ ७१ ॥ ॥ देवा ऊचुः ॥ ॥ अग्निष्टोमादिकाः सर्वाः क्रिया नष्टाः सुरेश्वरि ॥ मर्त्यलोके वयं तेन कर्मणातीव पीडिताः ॥ ७२ ॥
दृष्ट्वा त्वां देवि पाप्मानः[2] सिद्धिं यांति सपूर्वजाः ॥ तस्माद्यथा वयं पुष्टिं व्रजामस्ते प्रसादतः ॥ ७३ ॥ न निष्क्रामति दैत्यश्च बाष्कलिस्त्वं तथा
कुरु ॥ ७४ ॥ ॥ पुलस्त्य उवाच ॥ ॥ तेषां तद्वचनं श्रुत्वा संचिंत्य सुचिरं तदा ॥ मुक्त्वा स्वे पादुके तत्र कृत्वा चाश्मसमुद्भवे ॥ देवानुवाच
राजेंद्र सर्वानर्त्तिमुपागतान् ॥ ७५ ॥ ॥ श्रीदेव्युवाच ॥ ॥ युष्मद्वाक्येन त्यक्तो हि मयाऽयं पर्वतोत्तमः ॥ विन्यस्ते पादुके तस्य रक्षार्थं
बाष्कलेः सुराः ॥ ७६ ॥ मत्पादुकाभराक्रांतो न स दैत्यः सुरोत्तमाः ॥ स्थानात्प्रचलितुं शक्तः स्तंभितः स्याद्यथा मया ॥ ७७ ॥ एत
च्छास्त्रं मया कृत्स्नं पादुकार्थं विनिर्मितम् ॥ अध्यात्मकं हितार्थाय प्राणिनां पृथिवीतले ॥ ७८ ॥ शास्त्रमार्गेण चानेन भक्त्या यः पादुके
मम ॥ पूजयिष्यति सिद्धिः स्यात्तस्य मद्दर्शनोद्भवा ॥ ७९ ॥ चैत्रशुक्लचतुर्दश्यामहमत्रार्बुदे सदा ॥ अहोरात्रं वसिष्यामि सुगुप्ता गिरिगह्वरे ॥
॥ ८० ॥ पर्वतोऽयं ममाभीष्टो न च त्यक्तुं मनो दधे ॥ तथापि संपरित्यक्तो युष्माकं हितकाम्यया ॥ ८१ ॥ ॥ पुलस्त्य उवाच ॥ ॥ एव
मुक्त्वा तु सा देवी समंताद्देवकिंनरैः ॥ स्तूयमाना ययौ स्वर्गं मुक्त्वा ते पादुके शुभे ॥ ८२ ॥ अद्यापि सिद्धिमायांति योगिनो ध्यानतत्पराः ॥ तन्नि

१ द्विविधाम्–ऐहिकीम्–आमुष्मिकीं च–इत्यर्थः । २ पाप्मानः–पापिनः–इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रास्तद्गतप्राणा यथा देव्याः प्रदर्शनात् ॥ ८३ ॥ एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ॥ श्रीमातासंभवं पुण्यं पादुकाभ्यां च भूमिप ॥८४॥
यस्त्वेतत्पठते भक्त्या श्लाघते वाऽथ यो नरः ॥ सर्वपापैर्महाराज मुच्यते ज्ञानतत्परः ॥ ८५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहि
तायां सप्तमे प्रभासखंडे तृतीयेऽर्बुदखंडे श्रीमातामाहात्म्यवर्णनंनाम द्वाविंशोऽध्यायः ॥ २२ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो गच्छेन्नृपश्रेष्ठ
शुक्लतीर्थमनुत्तमम् ॥ यत्ख्यातिमगमत्पूर्वं सकाशाद्दाशवर्गतः ॥ १ ॥ पुराऽऽसीद्द्रजको नाम्ना शमिलाक्षो महीपते ॥ नीलीमध्ये तु वस्त्राणि प्रक्षि
प्तानि महीपते ॥ २ ॥ अथासौ भयमापन्नो ज्ञात्वा वस्त्रविडंबनम् ॥ देशांतरं प्रस्थितोऽसौ स्वकुटुम्बसमावृतः ॥ ३ ॥ अथ तस्य सुता राजन्दाश
कन्यासखी शुभा ॥ दुःखेन महताविष्टा दाश्यंतिकमुपाद्रवत् ॥ ४ ॥ तस्यै निवेदयामास भयं वस्त्रसमुद्भवम् ॥ विदेशचलनं चैव बाष्पगद्गदया गिरा
॥ ५ ॥ दाशकन्यापि दुःखेन तस्या दुःखसमन्विता ॥ अब्रवीद्बाष्पसंक्लिन्नां निश्वसंती मुहुर्मुहुः ॥ ६ ॥ ॥ दाशकन्योवाच ॥ ॥ अस्त्यु
पायो महानत्र विदितो मम शोभने ॥ ध्रुवं तेन कृतेनैव निर्भयं ते च ते पितुः ॥ ७ ॥ अत्रास्ति निर्झरं सुभ्रूरर्बुदे वरवर्णिनि ॥ तत्र मे भ्रातरश्चैव
तथान्ये मत्स्यजीविनः ॥ ८ ॥ यच्चान्यदपि तत्रैव क्षिप्यते सलिले शुभे ॥ तत्सर्वं शुक्लतामेति पश्य मे वपुरीदृशम् ॥ ९ ॥ सर्वेषामेव दाशानां
तस्य तोयस्य मज्जनात् ॥ तानि वस्त्राणि तत्रैव तातस्तव सुमध्यमे ॥ जले प्रक्षालयेत्क्षिप्रं प्रयास्यंति सुशुक्लताम् ॥ १० ॥ त्वयाऽत्र न भयं कार्यं
गत्वा तातं निवारय ॥ प्रस्थितं परदेशाय नात्र कार्या विचारणा ॥ ११ ॥ ॥ पुलस्त्य उवाच ॥ ॥ सा तस्या वचनं श्रुत्वा गत्वा सर्वं न्यवेद
यत् ॥ जनकाय सुता तूर्णं ततोऽसौ तुष्टिमाप्तवान् ॥ १२ ॥ प्रातरुत्थाय तूर्णं स निर्झरं तमुपाद्रवत् ॥ क्षिप्तमात्राणि राजेंद्र तानि वस्त्राणि तेन वै ॥
॥ १३ ॥ तस्मिंस्तोयेतिशुक्लत्वं गतानि बहुलं ततः ॥ कांतिमापुश्च परमां तथा दृष्टांबराणि च ॥ १४ ॥ अथासौ विस्मयाविष्टस्तानि चादाय
सत्वरः ॥ राज्ञे निवेदयामास वृत्तांतं च तदुद्भवम् ॥ १५ ॥ ततो विस्मयमापन्नः स राजा तत्र निर्झरे ॥ अन्यानि नीलीरक्तानि वस्त्राणि चाक्षिप
ज्जले ॥ १६ ॥ सर्वाणि शुक्लतां यांति विशिष्टानि भवंति च ॥ ज्ञात्वा ततः परं तीर्थं स्नानं चक्रे यथाविधि ॥ १७ ॥ त्यक्त्वा राज्यं स तत्रैव
तपस्तेपे महीपतिः ॥ ततः सिद्धिं परां प्राप्तस्तीर्थस्यास्य प्रभावतः ॥ १८ ॥ एकादश्यां नरस्तत्र यः श्राद्धं कुरुते नृप ॥ स कुलानि समुद्धृत्य दश

१ तेन—क्षालिता—इति पदद्वयमध्याहार्यम् । २ दाश्यंतिकम्—दाश्याः—दाशकन्यायाः—अंतिकम्—समीपम्—इत्यर्थः । ३ बाष्पसंदिग्धा—इ० पा० । ४ बहुलं—ततः—पूर्वस्मादधिकाम्—इति समुदितार्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





याति दिवं ततः ॥ स्नानेनैव विपापत्वं तत्क्षणादेव जायते ॥ १९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे
तृतीयेऽर्बुदखंडे शुक्लतीर्थमाहात्म्यवर्णननाम त्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो गच्छेन्नृपश्रेष्ठ गुहामध्यनिवासिनी ॥
देवी कात्यायनी यत्र शुंभदानवनाशिनी ॥ १ ॥ शुंभोनाम महादैत्यः पुराऽऽसीत्पृथिवीतले ॥ तेन सर्वं जगद्व्याप्तं जित्वा देवान्रणाजिरे ॥ २ ॥
स शंकरवराद्दैत्यो देवदानवरक्षसाम् ॥ अवध्यो योषितं मुक्त्वा सर्वेषां प्राणिनां भुवि ॥ ३ ॥ ततो देवगणाः सर्वे गत्वाऽर्बुदमथाचलम् ॥ तपस्तेपुर्व
धार्थाय शुंभस्य जगतीपते ॥ देवीमाराधयामासुर्व्यक्तरूपां सुरेश्वरीम् ॥ ४ ॥ अथ तेषां प्रसन्ना सा दृष्टिगोचरमागता ॥ अब्रवीद्वरदास्मीति ब्रूत
किं करवाणि च ॥ ५ ॥ ॥ देवा ऊचुः ॥ ॥ सर्वं नोऽपहृतं देवि शुंभेन सुदुरात्मना ॥ तं निषूदय कल्याणि सोवध्योन्यैः सदा रणे ॥ ६ ॥ त्वया
संरक्षिता देवि पुरा बाष्कलितो वयम् ॥ ७ ॥ नान्याऽस्माकं गतिर्मातस्त्वां मुक्त्वा चारुहासिनीम् ॥ ॥ पुलस्त्य उवाच ॥ ॥ एवमुक्ता सुरै
र्देवी गत्वा शुंभनिकेतनम् ॥ आजुहाव रणे क्रुद्धा भर्त्सयित्वा मुहुर्मुहुः ॥ ८ ॥ स तया याचिते युद्धे ज्ञात्वा तां योषितं नृप ॥ अवज्ञाय ततो दैत्यः
प्रेषयामास दानवान् ॥ ९ ॥ जीवग्राहेण दुष्टेयं गृह्यतां परुषस्वना ॥ क्रियतां दारुणो दंडो मम वाक्यान्न संशयः ॥ १० ॥ अथ तस्य समादेशाद्दा
नवास्तां ततो द्रुतम् ॥ गत्वा निर्भर्त्सयामासुर्वेष्टयित्वा दिशो दश ॥ ११ ॥ ततोऽवलोकनाद्दैत्यास्तया ते भस्मसात्कृताः ॥ ततः शुंभः प्रकुपितः
स्वयमेव समाययौ ॥१२॥ अब्रवीत्तिष्ठतिष्ठेति खड्गमुद्यम्य भीषणः ॥ सोऽपि देव्या महाराज तथा चैवावलोकितः ॥१३॥ अभवद्भस्मसात्सद्यः पतंग
इव पावकम् ॥ हते तस्मिंस्ततो दैत्याः शेषाः पार्थिवसत्तम ॥ भित्त्वा रसातलं जग्मुः पातालं भयसंयुताः ॥१४॥ ततो देवगणाः सर्वे तुष्टुवुस्तां सुरेश्व
रीम् ॥ अब्रुवंश्च वरं ब्रूहि यत्ते मनसि वर्त्तते ॥१५॥ ॥ देव्युवाच ॥ ॥ तत्रैव पर्वते स्थास्ये ह्यर्बुदेऽहं सुरोत्तमाः ॥ अभीष्टः पर्वतोऽस्माकं स सदाऽर्बुदसं
ज्ञितः ॥१६॥ ॥ देवा ऊचुः ॥ ॥ तत्रस्थां त्वां समालोक्य मर्त्त्या यांति त्रिविष्टपम् ॥ विना यज्ञैस्तथा दानैः स्वर्गः संकीर्णतां गतः ॥ नान्यत्कारणम
स्तीह निषेधस्य सुरेश्वरि ॥१७॥ ॥ देव्युवाच ॥ ॥ तत्राहं विजने रम्ये गुहामध्ये सुरेश्वराः ॥ स्थास्यामि विरलाः केचिद्यास्यंति प्राणिनो मम ॥
दृष्टिगोचरमार्गे हि गत्वा तं पर्वतं प्रति ॥१८॥ ॥ देवा ऊचुः ॥ ॥ यद्येवं देवि तेऽभीष्टमेवं कुरु शुचिस्मिते ॥ वयं त्वां तत्र द्रक्ष्यामः शुक्लाष्टम्यां
सदा शुचेः ॥ १९ ॥ ॥ पुलस्त्य उवाच ॥ ॥ एवमुक्ताः सुरा देव्या प्रहृष्टास्त्रिदिवं ययुः ॥ सापि देवी गिरौ तत्र गत्वा चैवार्बुदे नृप ॥ २० ॥
गुहामध्यं समासाद्य नित्यं जगद्धिताय वै ॥ विविक्ते न्यवसत्प्रीता दुर्लभा सुरमानवैः ॥ २१ ॥ यस्तां पश्यति राजेन्द्र शुक्लाष्टम्यां समाहितः ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभीष्टं स सदाप्नोति यद्यपि स्यात्सुदुर्ल्लभम् ॥२२॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखण्डे कात्यायनीमाहात्म्यवर्णनंनाम चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥छ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततः पिंडारकं गच्छेत्तीर्थं पापहरं नृप ॥ यत्र पूर्वं तपस्ततं मंकिना ब्राह्मणेन च ॥ सिद्धिं गतस्तथा राजंस्तीर्थस्यास्य प्रभावतः ॥ १ ॥ पुरा मंकिरभूद्विप्रो नाममात्रेण भूपते ॥ मूर्खो ब्राह्मणकृत्या नामनभिज्ञः सुमन्दधीः ॥ २ ॥ अथासौ पर्वते रम्ये लोकानां नृपसत्तम ॥ महिषी रक्षयामास ततः पिंडारकर्मणि ॥३॥ कस्यचित्त्वथ कालस्य तेन वित्तमुपार्जितम् ॥ दूरात्कृच्छ्रेण च स्तोकं जगृहे गोयुगं ततः ॥ ४ ॥ ततस्तद्दमयामास गोयुगं नृपसत्तम ॥ अथ दैववशाद्राजन्दमितं तस्य गोयुगम् ॥ ५ ॥ निबद्धमुष्ट्रमासाद्य ग्रीवादेशे बलात्स्थितम् ॥ अथोष्ट्रस्त्वरया राजन्नुत्थितस्त्रासतत्परः ॥६॥ गोयुगेन हि ग्रीवायां लम्बमानेन भूपते ॥ तद्दृष्ट्वा सुमहाश्चर्यं विनाशं गोयुगस्य तु ॥ ७ ॥ मंकिर्वैराग्यमापन्नस्त्यक्त्वा ग्रामं वनं ययौ ॥ स गत्वा निर्झरं कश्चिदर्बुदे नृपसत्तम ॥८॥ त्रिकालं कुरुते स्नानं गायत्रीजपमुत्तमम् ॥ तेनासौ गतपापोऽभूद्दिव्यदर्शी च भूमिप ॥९॥ एतस्मिन्नेव काले तु तेन मार्गेण शंकरः ॥ सह गौर्या विनिष्क्रांतः क्रीडार्थं रम्यपर्वते ॥१०॥ स दृष्टः सहसा तेन पिंडारेण महात्मना ॥ प्रणाममकरोद्राजंस्ततस्तं शंकरोऽब्रवीत् ॥ ११ ॥ न वृथा दर्शनं मे स्याद्वरो मे गृह्यतां द्विज ॥ यदभीष्टं महाराज यद्यपि स्यात्सुदुर्ल्लभम् ॥ १२ ॥ ॥ पिंडारक उवाच ॥ ॥ गणोऽहं तव देवेश भवानि त्रिपुरांतक ॥ यथा तथा कुरु विभो नान्यन्मे हृदि वर्तते ॥ १३ ॥ एतत्पिण्डारकं तीर्थं मम नाम्ना प्रसिध्यतु ॥ १४ ॥ ॥ भगवानुवाच ॥ ॥ भविष्यसि गणोऽस्माकं देहांते त्वं द्विजोत्तम ॥ एतत्पिंडारकंनाम तीर्थमत्र भविष्यति ॥ १५ ॥ अहमत्र महाष्टम्यां निवेक्ष्यामि महामते ॥ ये च स्नानं करिष्यंति संप्राप्ते चाष्टमीदिने ॥ ते यास्यंति परं स्थानं यत्राहं नित्यसंस्थितः ॥ १६ ॥ ॥ पुलस्त्य उवाच ॥ ॥ एवमुक्त्वा महादेवस्तत्रैवांतरधीयत ॥ मंकिः पिंडारकस्तत्र तपस्तेपे दिवानिशम् ॥ १७ ॥ ततः कालेन महता त्यक्त्वा देहं दिवं गतः ॥ यत्रास्ते भगवान्रुद्रो गणस्तत्र बभूव ह ॥ १८ ॥ तस्मात्सर्वप्रयत्नेन स्नानं मन्त्रेण चाचरेत् ॥१९॥ राजेन्द्र महिषीदानमथाष्टम्यां विशेषतः ॥ य इच्छति सदाऽभीष्टमिह लोके परत्र च ॥२०॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखण्डे पिंडारकतीर्थमाहात्म्यवर्णनंनाम पंचविंशोऽध्यायः ॥ २५ ॥ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो गच्छेन्नृपश्रेष्ठ तीर्थं त्रैलोक्यविश्रुतम् ॥ तस्मिन्कनखलंनाम पर्वते पापनाशने ॥ १ ॥ शृणु तत्राऽभवत्पूर्वं यदा

१ निबद्धम्–एकरज्जावुभयतो निबद्धम्–इत्यर्थः–गोयुगस्य विशेषणमेतत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

श्चर्यं महीपते ॥ पार्थिवः सुमतिर्नाम संप्राप्तोऽर्बुदपर्वते ॥२॥ सूर्यग्रहे महीपाल तीर्थ कनखलं गतः ॥ तेन विप्रार्थमानीतं सुवर्णं जात्यमेव हि ॥३॥
प्रभूतं पतितं तोये प्रमादात्तस्य भूपतेः ॥ न लब्धं तेन भूपाल अन्वेषणपरेण च ॥ ४ ॥ ततः स्नात्वा गृहं प्राप्तः पश्चात्तापसमन्वितः ॥ ततः कालेन
महता स भूयस्तत्र चागतः ॥ ५ ॥ स्नानार्थं भास्करे ग्रस्ते तं च देशमपश्यत ॥ चिंतयामास मेधावी ह्यस्मिन्देशे तदा मम ॥ ६ ॥
सुवर्णं पतितं हस्तान्न च लब्धं कथंचन ॥ ७ ॥ ॥ पुलस्त्य उवाच ॥ ॥ एवं चिंतयतस्तस्य वाग्उवाचाशरीरिणी ॥ नात्र नाशोऽस्ति
राजेन्द्र इह लोके परत्र च ॥ ८ ॥ अत्र कोटिगुणं जातं सुवर्णं यत्पुरातनम् ॥ पश्चात्तापस्त्वया भूरि कृतो यद्द्रव्यनाशने ॥ ९ ॥ तस्मात्संख्या
च संजाता तथैवाकल्पितस्य च ॥ येऽत्र श्रद्धासमायुक्ताः सुवर्णैर्नृपसत्तम ॥ यत्नाच्छ्राद्धं करिष्यंति सुवर्णं च विशेषतः ॥ १० ॥ ब्राह्मणेभ्यः प्रदा
स्यंति संख्या तस्य न विद्यते ॥ अत्रान्वेषय देशे त्वं प्राप्स्यसे नाऽत्र संशयः ॥ ११ ॥ स श्रुत्वा भारतीं तत्र ह्याकाशादुत्थितां नृप ॥ अन्वेषमा
णोऽस्मिन्देशे सुवर्णं तच्च लब्धवान् ॥ १२ ॥ शुभ्रं कोटिगुणं प्राज्यं ततस्तुष्टिं समागतः ॥ ज्ञात्वा तीर्थप्रभावं तं ब्राह्मणेभ्यः सहस्रशः ॥ प्रददौ च
दयायुक्त उद्दिश्य पितृदेवताः ॥ १३ ॥ ततस्तस्य प्रभावेण स दानस्य महीपतिः ॥ संजातो धनदोनाम यक्षो नानाधनप्रदः ॥ १४ ॥ तत्र यः
कुरुते श्राद्धं ग्रहे सूर्यस्य भूमिप ॥ आकल्पं पितरस्तस्य तृप्तिं यांति सुतर्पिताः ॥ १५ ॥ स्नानेन ऋषयो देवास्तुष्टिं यांति महोरगाः ॥ नाशः
संजायते सद्यः पापस्य पृथिवीपते ॥ १६ ॥ तस्मात्सर्वप्रयत्नेन स्नानं तत्र समाचरेत् ॥ यथाशक्त्या तथा दानं श्राद्धं च नृपसत्तम ॥ १७ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखंडे कनखलतीर्थमाहात्म्यवर्णनंनाम षड्विंशोऽध्यायः ॥
॥ २६ ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो गच्छेन्नृपश्रेष्ठ चक्रतीर्थमनुत्तमम् ॥ यत्र चक्रं पुरा मुक्तं विष्णुना प्रभविष्णुना ॥ १ ॥
निहत्य दानवान्संख्ये कृत्वा स्नानं सुनिर्झरे ॥ विष्णुः प्राक्षालयत्तोयं तेन तन्मेध्यतां गतम् ॥ २ ॥ तत्र श्राद्धं तु यः कुर्याच्छयने बोधने हरेः ॥
आकल्पं पितरस्तस्य तृप्तिं यांति नराधिप ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखण्डे
चक्रतीर्थप्रभाववर्णनंनाम सप्तविंशोऽध्यायः ॥ २७ ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो गच्छेन्नृपश्रेष्ठ सुपुण्यं मानुषं ह्रदम् ॥ यत्र
स्नातो नरः सम्यङ्मनुष्यो जायते सदा ॥ १ ॥ न तिर्यक्त्वमवाप्नोति कृत्वाऽपि बहुपातकम् ॥ तत्राश्चर्यमभूत्पूर्वं यत्तच्छृणु नराधिप ॥ २ ॥ मृगयूथ
मनुप्राप्तं व्याधव्याप्तं समन्ततः ॥ ते मृगा भयसन्त्रस्ताः प्रविष्टा जलमध्यतः ॥ ३ ॥ सद्यो मनुष्यतां प्राप्ताः पूर्वजातिस्मरास्तथा ॥ एतस्मिन्नेव



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काले तु व्याधास्ते समुपागताः ॥ ४ ॥ चापबाणधराः सर्वे यथा वै यमकिंकराः ॥ पप्रच्छुश्च मृगान्भूप मानुषत्वमुपागतान् ॥ ५ ॥ मृगयूथमनु प्राप्तमस्मिन्स्थाने जलाश्रये ॥ केन मार्गेण तद्यातं वदध्वं सत्वरं हि नः ॥ वयं सर्वे परिश्रांताः क्षुत्तृड्भ्यां च विशेषतः ॥ ६ ॥ ॥ मनुष्या ऊचुः ॥ ॥ वयं ते हरिणाः सर्वे मानुष्यं भावमाश्रिताः ॥ तीर्थस्यास्य प्रभावेण सत्यमेतदसंशयम् ॥ ७ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततस्ते शबराः सर्वे त्यक्त्वा चापानि पार्थिव ॥ कृत्वा स्नानं जले तस्मिन्सद्यः सिद्धिं गता नृप ॥ ८ ॥ ततः शक्रस्तु तद्दृष्ट्वा तीर्थं पापहरं नृप ॥ पूरयामास सर्वत्र पांसुभिर्नृपसत्तम ॥ ९ ॥ अद्यापि मनुजास्तत्र बुधाष्टम्यां नराधिप ॥ स्नानं ये प्रकरिष्यंति तिर्यक्त्वं न व्रजंति ते ॥ १० ॥ पितृमेधफलं कृत्स्नं श्राद्धदानादवाप्नुयुः ॥ ११ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखंडे मनुष्यतीर्थप्रभाव वर्णनंनामाष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ छ ॥ ॥ पौलस्त्य उवाच ॥ ॥ ततो गच्छेन्नृपश्रेष्ठ कपिलातीर्थमुत्तमम् ॥ यत्र स्नातो नरः सम्य ङ्मुच्यते सर्वकिल्बिषैः ॥ १ ॥ पुराऽभून्नृपतिर्नाम सुप्रभः परवीरहा ॥ नित्यं च मृगयाशीलो मृगाणामहिते रतः ॥ २ ॥ न तथा स्त्रीषु नो भोगे नाश्वयाने न वारणे ॥ तस्याभूदनुरागश्च यथा मृगविमर्दने ॥ ३ ॥ स कदाचिन्नृपश्रेष्ठ मृगासक्तोऽर्बुदं गतः ॥ अपश्यत्सानुदेशे च मृगीं शिशुसमावृ ताम् ॥ ४ ॥ स्तनं धयन्तीं सुस्निग्धां शिशोः क्षीरानुरागिणः ॥ सा तेन विद्धा बाणेन सहसा नतपर्वणा ॥ ५ ॥ अथ सा पार्थिवं दृष्ट्वा प्रगृहीतशरा सनम् ॥ द्वितीयं योजयानं च मृगी बाणं सुनिर्मलम् ॥ ६ ॥ ततः सा कोपसन्तप्ता भूपालं प्रत्यभाषत ॥ नायं धर्मः स्मृतः क्षात्रो यस्त्वयाद्य निषेवितः ॥ ७ ॥ शयानो मैथुनासक्तः स्तनपो व्याधिपीडितः ॥ न हंतव्यो मृगो राजन्मृगी च शिशुना वृता ॥ ८ ॥ तदद्य मरणं जातं मम सर्वं नृपाधम ॥ तव बाणं समासाद्य पुत्रस्य च मया विना ॥ ९ ॥ यस्मादहमधर्मेण हता भूमिपते त्वया ॥ तस्मादत्रैव सानौ त्वं रौद्रव्याघ्रो भविष्य सि ॥ १० ॥ ॥ पुलस्त्य उवाच ॥ ॥ तच्छ्रुत्वा सुमहत्पापं स नृपो भयसंकुलम् ॥ तां वै प्रसादयामास प्राणशेषां तदा मृगीम् ॥ ११ ॥ अविवे कान्मया भद्रे हता त्वं निर्घृणेन च ॥ कुरु शापविमोक्षं त्वं तस्माद्दीनस्य सन्मृगि ॥ १२ ॥ ॥ मृग्युवाच ॥ ॥ यदा तु कपिलांनाम द्रक्ष्यसे त्वं पयस्विनीम् ॥ धेनुं तया समालापात्प्रकृतिं यास्यसे पुनः ॥ १३ ॥ एवमुक्त्वा मृगी राजाग्रतः प्राणैर्व्ययुज्यत ॥ पीडिता शरघा तेन पुत्रस्नेहाद्विशेषतः ॥ १४ ॥ अथाऽसौ पार्थिवः सद्यो रौद्रास्यः समजायत ॥ व्याघ्रो दंष्ट्राकरालश्च तीक्ष्णदन्तनखस्तथा ॥ भक्ष

१ सम्प्राप्ताः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





यामास तां सेनामात्मीयां क्रोधमूर्च्छितः ॥ १५ ॥ ततस्ते सैनिका राजन्हतशेषाः सुदुःखिताः ॥ स्वगृहाणि ययुस्तत्र यथा वृत्तं जने पुरे ॥ १६ ॥ निवेदयन्तो वृत्तांतं चत्वरेषु त्रिकेषु च ॥ यथा वै व्याघ्रतां प्राप्तः स राजाऽर्बुदपर्वते ॥ १७ ॥ तच्छ्रुत्वा वचनं तस्य पुत्रं भूरिपराक्रमम् ॥ राज्येऽभिषेचयामासुर्नाम्ना ख्यातं महौजसम् ॥ १८ ॥ कस्यचित्त्वथ कालस्य तस्मिन्सानौ नृपोत्तम ॥ तृषार्तं गोकुलं प्राप्तं गोपगोपीसमाकुलम् ॥ १९ ॥ तत्रैका गौः परिभ्रष्टा स्वयूथात्तृणतृष्णया ॥ कपिलेति च विख्याता स्वयूथस्याग्रगामिनी ॥ ॥ २० ॥ अच्छिन्नाग्रतृणं या तु सदा भक्षयते नृप ॥ अथ सा गह्वरं प्राप्ता गिरेः शून्यं भयंकरम् ॥ २१ ॥ तत्राससाद तां व्याघ्रो दंष्ट्रोत्कटमुखावहः ॥ सा तं दृष्टवती पापं त्रासमाप मृगीव हि ॥ २२ ॥ स्मरंती गोकुले बद्धं स्वसुतं क्षीरपायिनम् ॥ दुःखेन रुदतीं तां स दृष्ट्वोवाच मृगाधिपः ॥ २३ ॥ ॥ व्याघ्र उवाच ॥ ॥ किं वृथा रुद्यते धेनो मां प्राप्य न हि जीवितम् ॥ विद्यते कस्यचिन्मूर्खे स्मरेष्टां देवतां ततः ॥ २४ ॥ ॥ ॥ कपिलोवाच ॥ ॥ स्वजीवितभयाद्व्याघ्र न रोदिमि कथंचन ॥ पुत्रो मे बालको गोष्ठ्यां क्षीरपायी प्रतीक्षते ॥ २५ ॥ नाद्यापि स तृणान्यत्ति तेनाहं शोकविक्लबा ॥ [1]रोद्मि व्याघ्र सुतस्नेहात्सत्येनात्मानमालभे ॥ २६ ॥ पाययित्वा सुतं बालं दृष्ट्वा पृष्ट्वा जनं स्वकम् ॥ पुनः प्रत्यागमिष्यामि यदि त्वं मन्यसे विभो ॥ २७ ॥ ॥ व्याघ्र उवाच ॥ ॥ गत्वा स्वसुतसांनिध्यं दृष्ट्वात्मीयं च गोकुलम् ॥ पुनरागमनं यत्ते न च तच्छ्रद्दधाम्यहम् ॥ २८ ॥ भयान्मां भाषसे चैवं नास्ति प्राणसमं भयम् ॥ तस्मात्प्राणभयान्न त्वमागमिष्यसि धेनुके ॥ २९ ॥ ॥ कपिलोवाच ॥ ॥ शपथैरागमिष्यामि सत्यमेतच्छृणुष्व मे ॥ प्रत्ययो यदि ते भूयान्मां मुञ्च त्वं मृगाधिप ॥ ३० ॥ ॥ व्याघ्र उवाच ॥ ॥ ब्रूहि तान्छपथान्भद्रे समागच्छसि यैः पुनः॥ ततोऽहं प्रत्ययं गत्वा मोचयिष्यामि वा न वा ॥ ३१ ॥ ॥ कपिलोवाच ॥ ॥ वेदाध्ययनसंपन्नं ब्राह्मणं वंचयेत्तु यः ॥ तेन पापेन लिप्यामि यद्यहं नाग[2]मे पुनः ॥ ३२ ॥ गुरुद्रोहरतानां च यत्पापं जायते नृणाम् ॥ तेन पापेन लिप्यामि यद्यहं नागमे पुनः ॥ ३३ ॥ यत्पापं ब्राह्मणं हत्वा गां च हत्वा प्रजायते ॥ तेन पापेन लिप्यामि यद्यहं नागमे पुनः ॥ ३४ ॥ मित्रद्रोहे च यत्पापं यत्पापं गुरुवंचके ॥ तेन पापेन लिप्यामि यद्यहं नागमे पुनः ॥ ३५ ॥ यो गां स्पृशति पादेन ब्राह्मणं पावकं तथा ॥ तेन पापेन लिप्यामि यद्यहं नागमे पुनः ॥ ३६ ॥ कूपारामतडागानां यो भंगं कुरुते नरः ॥ तेन पापेन लिप्यामि यद्यहं नागमे पुनः ॥ ३७ ॥ कृतघ्नस्य च यत्पापं सूचकस्य च

१ रोद्मि—आर्षं रूपम्—रोदिमि—इत्यर्थः । २ आगमे—आर्षं रूपमिदं सर्वत्र—आगमिष्यामि—इत्यर्थकम्—इति बोध्यम् ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्भवेत् ॥ तेन पापेन लिप्यामि यद्यहं नागमे पुनः ॥ ३८ ॥ मद्यमांसरतानां च यत्पापं जायते नृणाम् ॥ तेन पापेन लिप्यामि यद्यहं नागमे पुनः ॥ ३९ ॥ राजपैशुन्यकर्तॄणां यत्पापं जायते नृणाम् ॥ तेन पापेन लिप्यामि यद्यहं नागमे पुनः ॥ ४० ॥ वेदविक्रयकर्तॄणां यत्पापं संप्रजायते ॥ तेन पापेन लिप्यामि यद्यहं नागमे पुनः ॥ ४१ ॥ दीयमानं द्विजातीनां निवारयति योऽल्पधीः ॥ तेन पापेन लिप्यामि यद्यहं नागमे पुनः ॥ ४२ ॥ विश्वस्तघातकानां च यत्पापं समुदाहृतम् ॥ तेन पापेन लिप्यामि यद्यहं नागमे पुनः ॥ ४३ ॥ द्विजद्वेषरतानां हि यत्पापं जायते नृणाम् ॥ तेन पापेन लिप्यामि यद्यहं नागमे पुनः ॥ ४४ ॥ परवादरतानां च पापं यच्च दुरात्मनाम् ॥ तेन पापेन लिप्यामि यद्यहं नागमे पुनः ॥ ४५ ॥ रात्रौ ये पापकर्माणो भक्षंति दधिसक्तुकान् ॥ तेन पापेन लिप्यामि यद्यहं नागमे पुनः ॥ ४६ ॥ वृंताकं मूलकं श्वेतं रक्तं येऽश्नंति गृंजनम् ॥ तेन पापेन लिप्यामि यद्यहं नागमे पुनः ॥ ४७ ॥ ॥ पुलस्त्य उवाच ॥ ॥ स तस्याः शपथाञ्छ्रुत्वा विस्मयोत्फुल्ललोचनः ॥ प्रत्ययं च तदा गत्वा व्याघ्रो वाक्यमथाब्रवीत् ॥ ४८ ॥ ॥ व्याघ्र उवाच ॥ ॥ गच्छ त्वं गोकुले भद्रे पुनरागमनं कुरु ॥ न चैतदवगंतव्यं यदयं वञ्चितो मया ॥ ४९ ॥ कपिले गच्छ पश्य त्वं तनयं सुतवत्सले ॥ पाययित्वा स्तनं पूर्णमवघ्राय च मूर्धनि ॥ ५० ॥ मातरं भ्रातरं दृष्ट्वा सखीः स्वजनबांधवान् ॥ सत्यमेवाग्रतः कृत्वा नान्यथा कर्तुमर्हसि ॥ ५१ ॥ ॥ पुलस्त्य उवाच ॥ ॥ साऽनुज्ञाता मृगेन्द्रेण कपिला पुत्रवत्सला ॥ अश्रुपूर्णमुखी दीना प्रस्थिता गोकुलं प्रति ॥ ५२ ॥ वेपमाना भयोद्विग्ना शोकसागरमध्यगा ॥ करिणीव हि रौद्रेण हरिणा[१] सा बलीयसा ॥ ततः स्वगोकुलं प्राप्ता रंभमाणा मुहुर्मुहुः ॥ ५३ ॥ तस्याः शब्दं ततः श्रुत्वा ज्ञात्वा वत्सः स्वमातरम् ॥ सम्मुखः प्रययौ तूर्णमूर्द्ध्वपुच्छः प्रहर्षितः ॥ ५४ ॥ अकालागमनं तस्या रौद्रं भंभारवं तथा ॥ दृष्ट्वा श्रुत्वा च वत्सोऽसौ शंकितः परिपृच्छति ॥ ५५ ॥ ॥ वत्स उवाच ॥ ॥ न ते पश्यामि सौम्यत्वं दुर्मना इव लक्ष्यसे ॥ किमर्थमन्यवेलायां समायाता वदस्व मे ॥ ५६ ॥ ॥ कपिलोवाच ॥ ॥ पिब पुत्र स्तनं पश्चात्कारणं चापि मे शृणु ॥ आगताऽहं तव स्नेहात्कुरु तृप्तिं यथेप्सिताम् ॥ ५७ ॥ अपश्चिम[२]मिदं पुत्र दुर्लभं मातृदर्शनम् ॥ मयाऽद्य पुत्र गंतव्यं शपथैरागता यतः ॥ ५८ ॥ व्याघ्रस्य कामरूपस्य दातव्यं जीवितं मया ॥ तेनाहं शपथैर्मुक्ता कारणात्तव पुत्रक ॥ ५९ ॥ मयाऽद्य तत्र गंतव्यं मृगराजसमीपतः ॥ बद्धा च शपथैः पुत्र दास्यामि च कलेवरम् ॥ ६० ॥ ॥ वत्स उवाच ॥ ॥ अहं तत्र गमिष्यामि यत्र त्वं गंतुमिच्छसि ॥ श्लाघ्यं हि मरणं मेऽद्य त्वया

१ हरिणा—सिंहेन । ध्वनिना—इ० पा० । २ अपश्चिमम्—सर्वान्तिमम्—इत्यर्थः । नेतः परं ते मातृदर्शनं भवेत्—इति भावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सह न संशयः ॥६१॥ एकाकिनाऽपि मर्त्तव्यं यस्मान्मया त्वया विना ॥ यदि मां सहितं तत्र त्वया व्याघ्रो वधिष्यति ॥६२॥ या गतिर्मातृभक्तानां ध्रुवं सा मे भविष्यति ॥ तस्मादवश्यं यास्यामि त्वया सह न संशयः ॥ ६३ ॥ अथवाऽत्रैव तिष्ठ त्वं शपथाः संतु मे तव ॥ तव स्थाने प्रयास्यामि मातस्त्वं यदि मन्यसे ॥ ६४ ॥ जनन्या विप्रयुक्तस्य जीवितं न हि मे प्रियम् ॥ नास्ति मातृसमः कश्चिद्बालानां क्षीरजीविनाम् ॥ ६५ ॥ नास्ति मातृसमो नाथो नास्ति मातृसमा गतिः ॥ ये मातृनिरताः पुत्रास्ते यांति परमां गतिम् ॥ ६६ ॥ ॥ कपिलोवाच ॥ ॥ ममैव विहितो मृत्युर्न ते पुत्रक सांप्रतम् ॥ न चायमन्यभूतानां मृत्युः स्यादन्यमृत्युतः ॥ ६७ ॥ अपश्चिममिदं[1] पुत्र मातुः सन्देशमुत्तमम् ॥ शृणुष्वावहितो भूत्वा परिणाम सुखावहम् ॥ ६८ ॥ वने चर सदा वत्स अप्रमादपरो भव ॥ प्रमादात्सर्वभूतानि विनश्यंति न संशयः ॥ ६९ ॥ न च लोभेन चर्त्तव्यं विषमस्थं तृणं क्वचित् ॥ लोभाद्विनाशो जंतूनामिह लोके परत्र च ॥ ७० ॥ समुद्रमटवीं युद्धं विशंते लोभमोहिताः ॥ लोभाद्धि कार्यमत्युग्रं कुर्वंति त्याज्य एव सः[2] ॥ ७१ ॥ लोभात्प्रमादादाश्वासात्पुरुषो बाध्यते त्रिभिः ॥ तस्माल्लोभो न कर्त्तव्यो न प्रमादो न विश्वसेत् ॥ ७२ ॥ आत्मा च सततं पुत्र रक्षितव्यः प्रयत्नतः ॥ सर्वेभ्यः श्वापदेभ्यश्च म्लेच्छेभ्यस्तस्करादितः ॥७३॥ तिर्यग्भ्यः पापयोनिभ्यः सदा विचरता वने ॥ न च शोक स्त्वया कार्यः सर्वेषां मरणं ध्रुवम् ॥ ७४ ॥ अस्माकं प्रतिवाचं च शृणु शोकविनाशिनीम् ॥ यथा हि पथिकः कश्चिच्छायार्थी वृक्षमास्थितः ॥ विश्रान्तश्च पुनर्याति तद्वद्भूतसमागमः ॥ ७५ ॥ ॥ पुलस्त्य उवाच ॥ ॥ एवं संभाष्य तं वत्समवघ्राय च मूर्द्धनि ॥ स्वमातरं सखीवर्गं ततो द्रष्टुं समागता ॥ ७६ ॥ अब्रवीच्च ततो वाक्यं पुत्रशोकेन दुःखिता ॥ अंबाः शृणुत मे वाक्यमपश्चिममिदं स्फुटम् ॥ ७७ ॥ अनाथमबलं दीनं फेनपं मम पुत्रकम् ॥ मातृशोकाभिसंतप्तं सर्वास्तं पालयिष्यथ ॥ ७८ ॥ भाविनीनामयं पुत्रः सांप्रतं च विशेषतः ॥ स्नपनीयः पायितव्यः पोष्यः पाल्यः स्वपुत्रवत् ॥ ७९ ॥ चरंतं विषमे स्थाने चरंतं परगोकुले ॥ अकार्येषु प्रवर्तंतं हे सख्यो वारयिष्यथ ॥ ८० ॥ क्षमध्वं च महा भागा यास्येऽहं सत्यसंश्रयात् ॥ यत्राऽसौ तिष्ठते व्याघ्रो मुक्ताऽहं येन सांप्रतम् ॥ ८१ ॥ सर्वास्ता वचनं श्रुत्वा तस्याः शोकसमन्विताः ॥ विषादं परमं गत्वा वाक्यमूचुः सुदुःखिताः ॥ ८२ ॥ कपिले नैव गंतव्यं न ते दोषो भविष्यति ॥ प्राणात्यये न दोषोऽस्ति संपराये च दारुणे ॥ ८३ ॥ अत्र गाथा पुरा गीता मुनिभिर्धर्मवादिभिः ॥ प्राणात्यये समुत्पन्ने शपथे नास्ति पातकम् ॥ ८४ ॥ ॥ कपिलोवाच ॥ ॥ प्राणिनां प्राण

१ अपश्चिमम्–सर्वान्तिमम्–इत्यर्थः । नेतः परं त्वं मातृसंदेशं श्रोष्यसि–इति भावः । २ सः–लोभः–इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रक्षार्थं वदाम्येवानृतं वचः ॥ नात्मार्थमुपयुञ्जामि स्वल्पमप्यनृतं क्वचित् ॥ ८५ ॥ अश्वमेधसहस्रं तु सत्यं च तुलया धृतम् ॥ अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ॥ ८६ ॥ तस्मान्नानृतमात्मानं करिष्ये जीविताशया ॥ आज्ञापयंतु मामार्या यास्ये यत्र मृगाधिपः ॥ ८७ ॥ ॥ वयस्या ऊचुः ॥ ॥ कपिले त्वं नमस्कार्या सर्वैरपि सुरासुरैः ॥ यत्त्वं परमसत्येन प्राणांस्त्यजसि दुस्त्यजान् ॥ ८८ ॥ अवश्यं न च ते भावी मृत्युः सत्यात्कथंचन ॥ प्रमाणं यदि सत्यं हि व्रज पंथाः शिवोऽस्तु ते ॥ ८९ ॥ ॥ पुलस्त्य उवाच ॥ ॥ एवमुक्ता च कपिला गता यत्र मृगाधिपः ॥ अथासौ कपिलां दृष्ट्वा विस्मयोत्फुल्ललोचनः ॥ अब्रवीत्प्रश्रितं वाक्यं हर्षगद्गदया गिरा ॥ ९० ॥ ॥ व्याघ्र उवाच ॥ ॥ स्वागतं तव कल्याणि कपिले सत्यवादिनि ॥ न हि सत्यवतां किंचिदशुभं विद्यते क्वचित् ॥ ९१ ॥ त्वयोक्तं कपिले पूर्वं शपथैरागमाय च ॥ तेन मे कौतुकं जातं याताऽऽगच्छेत्पुनः कथम् ॥ ९२ ॥ तस्माद्गच्छ मया मुक्ता यत्राऽसौ तनयस्तव ॥ तिष्ठते गोकुले बद्धः क्षीरपायी सुदुःखितः ॥९३॥ ॥ ॥ पुलस्त्य उवाच ॥ ॥ एतस्मिन्नेव काले तु स राजा प्रकृतिं गतः ॥ मृगीशापेन निर्मुक्तो दिव्यरूपवपुर्धरः ॥ ततोऽब्रवीत्प्रहृष्टात्मा कपिलां सत्यवादिनीम् ॥ ९४ ॥ ॥ राजोवाच ॥ ॥ प्रसादात्तव मुक्तोऽहं शापादस्मात्सुदारुणात् ॥ किं ते प्रियं करोम्यद्य धेनुके ब्रूहि सत्वरम् ॥ ९५ ॥ ॥ कपिलोवाच ॥ ॥ कृतकृत्याऽस्मि राजेन्द्र यत्त्वं मुक्तोऽसि किल्बिषात् ॥ पिपासा बाधतेत्यर्थं सांप्रतं जलमानयम् ॥ ९६ ॥ नैवानृतं विजानीहि सत्यमेतन्मयोदितम् ॥ ९७ ॥ ॥ पुलस्त्य उवाच ॥ ॥ अथासौ पार्थिवो हस्ते चापमादाय सत्वरम् ॥ सज्यं कृत्वा शरं गृह्य जघान धरणीतलम् ॥ ९८ ॥ ततः सलिलमुत्तस्थौ निर्मलं शीतलं शुभम् ॥ तत्र सा कपिला स्नात्वा वितृषा समपद्यत ॥ ९९ ॥ एतस्मिन्नन्तरे धर्मः स्वयं तत्र समागतः ॥ अब्रवीत्कपिलां हृष्टो वरं वरय शोभने ॥ १०० ॥ तव सत्येन तुष्टोऽहं नास्ति ते सदृशी क्वचित् ॥ त्रैलोक्ये सकले धेनुर्न भविष्यति वै शुभे ॥ १०१ ॥ ॥ कपिलोवाच ॥ ॥ प्रसादात्तव गच्छेय सह राज्ञा सगोकुला ॥ सुप्रभेण पदं दिव्यं जरामरणवर्जितम् ॥ १०२ ॥ मन्नाम्ना ख्यातिमायातु पुण्यमेतज्जलाशयम् ॥ सर्वपापहरं नृणां सर्वकामप्रदं तथा ॥ १०३ ॥ ॥ धर्म उवाच ॥ ॥ येऽत्र स्नानं करिष्यंति सुपुण्ये सलिले शुभे ॥ चतुर्दश्यां विशेषेण ते यास्यंति परां गतिम् ॥ १०४ ॥ तव नाम्ना सुपुण्यं हि तीर्थमेतद्भविष्यति ॥ दर्शमुद्दिश्य मर्त्यस्तु प्राप्स्यते गोसहस्रकम् ॥ स्नानाल्लक्षगुणं दानात्पुण्यं चैव तथाऽक्षयम् ॥ १०५ ॥ येऽत्र श्राद्धं करिष्यंति मानवाः सुसमाहिताः॥

१ परमसत्त्वेन—इ० पा० । २ सुप्रभेण—सुप्रभाख्येन वत्सेन सहिता—इत्यर्थः, सुप्रभेण शोभनप्रभया सहिता—इत्यर्थो वा बोध्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





सर्वदानफलं तेषां भुक्तिमुक्ती महात्मनाम् ॥ १०६ ॥ अपि कीटपतंगा ये तृषार्त्ताः सलिले शुभे ॥ मज्जयिष्यति यास्यंति तेऽपि स्थानं दिवौक
साम् ॥ १०७ ॥ किं पुनर्भक्तिसंयुक्ता मानवाः सत्यवादिनः ॥ मनस्विनो महाभागाः श्रद्धावंतो विचक्षणाः ॥ १०८ ॥ ॥ पुलस्त्य उवाच ॥ ॥
एतस्मिन्नेव काले तु विमानानि सहस्रशः ॥ समायातानि राजेंद्र कपिलायाः प्रभावतः ॥ १०९ ॥ तान्यारुह्याथ कपिला गोपगोकुलसंकुला ॥
सुप्रभेण समायुक्ता तत्पदं परमं गता ॥ ११० ॥ तस्मात्सर्वप्रयत्नेन तत्र स्नानं समाचरेत् ॥ श्राद्धं चैवात्मनः शक्त्या दानं पार्थिवसत्तम ॥
॥ १११ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे तृतीयेऽर्बुदखंडे कपिलातीर्थमाहात्म्यवर्णनंनामैकोनात्रंशोऽ
ध्यायः ॥ २९ ॥ ॥ पुलस्त्य उवाच ॥ ॥ अग्नितीर्थं ततो गच्छेत्पावनं परमं नृणाम् ॥ तत्र वह्निः पुरा नष्टो लब्धश्च त्रिदशैरपि ॥ १ ॥
॥ ॥ ययातिरुवाच ॥ ॥ किमर्थं भगवन्वह्निः पुरा नष्टो द्विजोत्तम ॥ कथं तत्रैव लब्धस्तु कौतुकं मे महामुने ॥ २ ॥ ॥ पुलस्त्य उवाच ॥ ॥
पुरा वृष्टिनिरोधोऽभूद्यावद्द्वादशवत्सरान् ॥ संशयं परमं प्राप्तः सर्वो लोकः क्षुधार्दितः ॥ ३ ॥ प्रायो मृतो मृतप्रायः शेषोऽभूद्धरणीतले ॥ नष्टा
अरण्यजा ग्राम्याः पशवः पक्षिणो मृगाः ॥ ४ ॥ एवं कृच्छ्रमनुप्राप्ते मर्त्यलोके नराधिपः ॥ विश्वामित्रो मुनिवरः संदेहं परमं गतः ॥ ५ ॥ अन्नौ
षधिरसाभावादस्थिशेषो व्यजायत ॥ अन्यस्मिन्दिवसे प्राप्तः क्षुत्क्षामः पर्यटन्दिशः ॥ ६ ॥ चंडालनिलयं प्राप्तः क्षुत्तृषापीडितो भृशम् ॥ तत्रा
पश्यन्मृतं श्वानं शुष्कं पार्थिवसत्तम ॥ ७ ॥ तमादाय गृहं प्राप्तः प्रक्षाल्य सलिलेन तु ॥ क्षुत्क्षामः पाचयामास ततस्तं पावकेऽजुहोत् ॥ ८ ॥
अभक्ष्यभक्षणं ज्ञात्वा हव्यवाहस्ततो नृप ॥ शक्रस्योपरि मन्युं स्वं चक्रेऽतीव महीपते ॥ ९ ॥ नष्टौषधिरसे लोके युक्तमेतद्धि सांप्रतम् ॥ यादृगातं
हविस्तादृगग्निभक्षो विशिष्यते ॥ १० ॥ नाभक्ष्यं भक्षयिष्यामि त्यजिष्ये क्षितिमंडलम् ॥ येन शक्रादयो देवा यांति कष्टतरां दशाम् ॥ ११ ॥
एवं संचिंत्य मनसा सकोपो हव्यवाहनः ॥ प्रणष्टः सकलं हित्वा मर्त्यलोकं चराचरम् ॥ १२ ॥ प्रणष्टे सहसा वह्नावग्निष्टोमादिकाः क्रियाः ॥
प्रणष्टास्तु जनाः सर्वे विशेषात्संशयं गताः ॥ १३ ॥ ततो देवगणाः सर्वे संदेहं परमं गताः ॥ यज्ञभागविहीनत्वान्मंत्रं चक्रुस्ततो मिथः ॥ १४ ॥
त्यक्तस्तु वह्निना मर्त्यस्ततो नाशं गता नराः ॥ शेषनाशाद्वयं सर्वे विनंक्ष्यामो न संशयः ॥ १५ ॥ तस्मादन्वेष्यतां वह्निर्यत्र तिष्ठति सांप्रतम् ॥
यथा चरति मर्त्ये च तथा नीतिर्विधीयताम् ॥ १६ ॥ ॥ पुलस्त्य उवाच ॥ ॥ एवं ते निश्चयं कृत्वा सर्वे देवाः सवासवाः ॥ अन्वैषयंस्तथाग्निं ते
समंतात्क्षितिमंडले ॥ १७ ॥ ततस्ते पुरतो दृष्ट्वा शुकं श्रांता दिवौकसः ॥ पप्रच्छुः श्रद्धया वह्निर्यदि दृष्टः प्रकथ्यताम् ॥१८॥ ॥ शुक उवाच ॥ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योऽयं वंशो महानग्ने प्रदग्धो वह्निसंगतः ॥ प्रणष्टो हव्यवाहोत्र मया दृष्टो महाद्युतिः ॥ १९ ॥ शुकेनावेदितो वह्निः शप्त्वा तं मन्युना वृतः ॥ गद्गदा भावि[1] ते वाणी प्रोक्त्वेदं प्रस्थितो द्रुतम् ॥ २० ॥ प्रविवेश शमीगर्भमश्वत्थं तरुसत्तमम् ॥ तत्रस्थो द्विपराज्ञा[2] स कथितो विबुधान्प्रति ॥ २१ ॥ स तं प्रोवाच ते जिह्वा विपरीता भविष्यति ॥ ततो जलाशयं गत्वा पर्वतेऽर्बुदसंज्ञके ॥ २२ ॥ प्रविष्टो भगवान्वह्निर्यथा देवैर्न लक्ष्यते ॥ तत्रोत्थेन दर्दुरेण तेषां प्रोक्तो हुताशनः ॥ २३ ॥ अत्राऽसौ तिष्ठते वह्निर्निर्झरे पर्वतस्य च ॥ दग्धाश्च जलजाः सर्वे सुतप्तेनैव वारिणा ॥ ॥ २४ ॥ कृच्छ्रादहं विनिष्क्रांतस्तस्मान्मृत्युमुखात्सुराः ॥ तच्छ्रुत्वा यत्नमास्थाय प्रविष्टो हव्यवाहनः ॥ २५ ॥ भविष्यसि विजिह्वस्त्वं शप्त्वा तं दर्दुरं नृपः ॥ २६ ॥ ततो देवगणाः सर्वे निष्क्रांताः सलिलाश्रयात् ॥ संवेष्ट्य तुष्टुवुः सर्वे स्तवैर्वेदोद्भवैर्नृप ॥ २७ ॥ ॥ देवा ऊचुः ॥ ॥ त्वमग्ने सर्वभूतानामंतश्चरसि पावक ॥ त्वया हीनं जगत्सर्वं नाशं यास्यति सत्वरम् ॥ २८ ॥ त्वं मुखं सर्वदेवानां त्वयि लोकाः प्रतिष्ठिताः ॥ भूलोके च त्वया त्यक्ते वयं सर्वे सवासवाः ॥ विनाशमेव यास्यामस्तस्मात्त्वं त्रातुमर्हसि ॥ २९ ॥ त्वं ब्रह्मा त्वं महादेवस्त्वं विष्णुस्त्वं दिवाकरः ॥ त्वं चंद्रस्त्वं च धनदो मरुत्त्वं च सुरेश्वरः ॥३०॥ इंद्राद्या विबुधाः सर्वे त्वदायत्ता हुताशन ॥ किमर्थं भगवन्मर्त्यं त्यक्त्वा त्वमत्र संस्थितः ॥ किमर्थं भगवन्नस्माननागांस्त्यक्तुमिच्छसि[3] ॥ ३१ ॥ ॥ पुलस्त्य उवाच ॥ ॥ वेष्टितो भगवान्वह्निर्देवैः स्तुतिपरायणैः ॥ तस्यैव निर्झरस्याथ तटस्थो वाक्यमब्रवीत् ॥ ३२ ॥ ॥ वह्निरुवाच ॥ ॥ अभक्ष्यभक्षणे शक्रो मामिच्छति नियोजितुम् ॥ तेनैव न करोत्येष वृष्टिं मर्त्ये सुरेश्वरः ॥ ३३ ॥ अतोऽहं भूतलं त्यक्त्वा प्रविष्टो निर्झरे त्विह ॥ प्रणष्टान्नरसे लोके न चाहं स्थातुमुत्सहे ॥ ३४ ॥ ॥ शक्र उवाच ॥ ॥ शृणु यस्मान्मया रोधः कृतो वृष्टेर्हुताशन ॥ देवापिर्नाम धर्मज्ञः क्षत्रियाणां यशस्करः ॥ ३५ ॥ प्रतीपस्तत्सुतः साधुः सर्वशीलवतां वरः ॥ देवापौ च गते स्वर्गं ज्येष्ठभ्रातरमग्रजम् ॥ संत्यक्त्वा जगृहे राज्यं शंतनुस्तत्सुतोऽवरः ॥ ३६ ॥ एतस्मात्कारणाद्राज्ये तस्य वृष्टिर्निराकृता ॥ तवादेशात्करिष्यामि निवर्तस्व हुताशन ॥ ३७ ॥ ॥ पुलस्त्य उवाच ॥ ॥ एवमुक्त्वा सहस्राक्षः पुष्करावर्तकान्घनान् ॥ द्रुतमाज्ञापयामास वृष्ट्यर्थं जगतीतले ॥ ३८ ॥ अथ शक्रसमादिष्टा विद्युत्वन्तो बलाहकाः ॥ गम्भीरराविणः सर्वं भूतलं प्रचुरैर्जलैः ॥ पूरयामासुरत्युग्रा द्युतिमन्तो महीपते ॥ ३९ ॥ ततोऽगमत्परां तुष्टिं भगवान्हव्यवाहनः ॥ रोचयामास भूपृष्ठे वसतिं देवकारणात् ॥ ४० ॥ ॥ देवा ऊचुः ॥ ॥ तवाऽऽदेशात्कृता

१ भावि—भविष्यति—इत्यर्थः । २ द्विपराज्ञा—गजेन्द्रेण—इत्यर्थः । ३ अनागान्—अनागसः—निरपराधिनः—इत्यर्थः । अदन्तत्वमार्षम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वृष्टिरन्यत्कार्यं हुताशन ॥ यत्ते प्रियं तदस्माकं सुशीघ्रं हि निवेदय ॥ ४१ ॥ ॥ अग्निरुवाच ॥ ॥ एतज्जलाशयं पुण्यं मन्नाम्ना तीर्थमुत्तमम् ॥ ख्यातिं यातु धरापृष्ठे युष्माकं हि प्रसादतः ॥ ४२ ॥ ॥ देवा ऊचुः ॥ ॥ अग्नितीर्थमिदं लोके प्रख्यातिं संप्रयास्यति ॥ अत्र स्नातो नरः सम्यगग्निलोकं प्रयास्यति ॥ ४३ ॥ यस्तिलान्दास्यति नरस्तीर्थेऽस्मिन्सुसमाहितः ॥ अग्निष्टोमस्य यज्ञस्य फलं तस्य भविष्यति ॥४४॥ ॥ पुलस्त्य उवाच ॥ ॥ एवमुक्त्वा सुराः सर्वे स्वंस्वं स्थानं ययुस्ततः ॥ वह्निश्च भगवान्राजन्यथापूर्वमवर्तत ॥ ४५ ॥ यश्चैतत्पठते नित्यं प्रातरुत्थाय चोत्तमम् ॥ अग्नितीर्थस्य माहात्म्यं मुच्यते सर्वपातकैः ॥ ४६ ॥ अहोरात्रकृतात्पापात्स शृण्वन्नपि मुच्यते ॥ ४७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे तृतीयेऽर्बुदखण्डेऽग्नितीर्थमाहात्म्यवर्णनंनाम त्रिंशोऽध्यायः ॥ ३० ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ रक्तानुबन्धं वै गच्छेत्तीर्थं त्रैलोक्यविश्रुतम् ॥ यत्र स्नातो नरः सम्यङ्मुच्यते ब्रह्महत्यया ॥ १ ॥ पुराऽऽसीत्पार्थिवोनाम इंद्रसेनो महीपतिः ॥ तस्याऽऽसीत्सुप्रिया भार्या सुनन्दानाम भामिनी ॥ पतिव्रता पतिप्राणा सदा पत्युः प्रिये स्थिता ॥ २ ॥ कस्यचित्त्वथ कालस्य स राजा सपरिग्रहः ॥ परदेशं गतो हंतुं शत्रुसंघं दुरासदम् ॥ ३ ॥ तं निहत्य धनं भूरि गृहीत्वा प्रस्थितो गृहम् ॥ ततोऽग्रे प्रेषयामास स दूतं कृत्रिमं नृप ॥ ४ ॥ सुनन्दां ब्रूहि गत्वा त्वमिन्द्रसेनो हतो रणे ॥ तदाकारस्ततो लक्ष्यः पातिव्रत्ये ममाज्ञया ॥ ५ ॥ यदि सा निश्चयं गच्छेन्मरणं प्रति भामिनी ॥ तदा रक्ष्या प्रयत्नेन वाच्यं हास्यं ममोद्भवम् ॥ ६ ॥ एवमुक्तो गतो[1] दूतस्तत्क्षणान्नृपसत्तम ॥ तस्यै निवेदयामास यदुक्तं तेन भूभुजा ॥ ७ ॥ अथ तस्य वचः श्रुत्वा सुनंदा चारुहासिनी ॥ गतप्राणा नृपश्रेष्ठ पतिप्राणा महासती ॥ ८ ॥ यस्मिन्काले मृता सा तु सुनन्दा शीलमंडना ॥ तस्मिन्काले नृपः सोऽपि तत्पापेन समाश्रितः ॥ ९ ॥ अथापश्यद्द्वितीयां स च्छायां गात्रस्य चोपरि ॥ तथा गुरुतरं कार्यं सालस्यं समपद्यत ॥ १० ॥ तेजोहीनं सुदुर्गंधि विवर्णं नृपसत्तम ॥ अथ प्राप्तो गृहं राजा श्रुत्वा भार्यासमुद्भवम् ॥ ११ ॥ विनाशं दुःखशोकार्तः करुणं पर्यदेवयत् ॥ स ज्ञात्वा पापमात्मानं स्त्रीहत्यासुविदूषितम् ॥ १२ ॥ ब्राह्मणानां समादेशात्तथा यात्रापरोऽभवत् ॥ कृत्वौर्द्ध्वदेहिकं तस्या लघुमात्रपरिग्रहः ॥ वाराणस्यां गतः पूर्वं तत्र दानं ददौ बहु ॥१३॥ कपालमोचने तीर्थे सर्वपापप्रणाशने ॥ त्रिनेत्रो यत्र निर्मुक्तः पुरा वै ब्रह्महत्यया ॥१४॥ तस्य च्छाया द्वितीया सा न नष्टा तत्र भूपते ॥ ततः कनखलं प्राप्तः सुपुण्यं शुद्धिदं नृणाम् ॥ १५ ॥ तथैव पुष्करारण्यं तस्मादमरकण्टकम् ॥

१ अभूत्—इति शेषः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुरुक्षेत्रं ततो राजन्प्राप्तोऽसौ नृपसत्तमः ॥ १६ ॥ प्रभासं सोमतीर्थं च ततस्तु कृमिजांगले ॥ एकहंसं ततो राजन्पुण्यपारिप्लवं ततः ॥ १७ ॥
रुद्रकोटिं विरूपाक्षं ततः पंचनदं नृप ॥ एवमादीनि तीर्थानि पुण्यान्यायतनानि च ॥ परिभ्रमन्महीपाल परिश्रांतो नराधिपः ॥ १८ ॥
ततो वर्षसहस्रांते संप्राप्तोऽर्बुदपर्वते ॥ तत्रापश्यन्नरपतिस्तीर्थान्यायतनानि च ॥ १९ ॥ तपस्विसंघान्विविधान्ब्राह्मणान्वेदपारगान् ॥ ददौ
दानानि बहुशो ब्राह्मणेभ्यो यदृच्छया ॥ २० ॥ प्राप्तो रक्तानुबंधं च तीर्थं तत्रैव पर्वते ॥ तत्र स्नातो विनिष्क्रांतो यावत्पश्यति भूमिपः ॥ २१ ॥
तावन्न दृश्यते च्छाया द्वितीया स्त्रीवधोद्भवा ॥ लघुत्वं सर्वगात्राणि संप्राप्तानि महीपतेः ॥ २२ ॥ विगन्धता प्रणष्टा च तेजोवृद्धिःपराभवत् ॥
ततो हृष्टमना भूत्वा दत्त्वा दानानि भूरिशः ॥ स्तूयमानश्चतुर्दिक्षु बंदिभिः प्रस्थितो गृहम् ॥ २३ ॥ ततो रक्तानुबंधस्य सीमातिक्रमणं नृप ॥
यावत्करोति राजेन्द्र तावदस्य पुनस्तथा ॥२४॥ सा च्छाया दृश्यते देहे द्वितीया नृपसत्तम ॥ स एव गन्धो गात्रेषु तेजोहानिश्च सा नृप ॥ २५ ॥
ततो दुःखाभिसंतप्तो गतस्तत्रैव तत्क्षणात् ॥ रक्तबंधमनुप्राप्तो विपाप्मा सोऽभवत्पुनः ॥ २६ ॥ स ज्ञात्वा तीर्थमाहात्म्यं परं पार्थिवसत्तमः ॥
तत्र दारूणि चाहृत्य चितां कृत्वा ततो नृप ॥ दानं दत्त्वा द्विजाग्रेभ्यः प्रविष्टो हव्यवाहनम् ॥ २७ ॥ ततो विमानमारुह्य परित्यज्य कलेवरम् ॥
दिव्यमाल्यांबरधरः शिवलोकमुपागमत् ॥ २८ ॥ शिवलोकमनुप्राप्ते तस्मिन्पार्थिवसत्तमे ॥ देवर्षयस्तदा वाक्यमिदमाहुः सुविस्मयात् ॥ २९ ॥
तीर्थेभ्यस्तु परं तीर्थमिदं वै पावनं परम् ॥ इन्द्रसेनो ह्यतः पापात्तीर्थसंगाद्व्यमुच्यत ॥ ३० ॥ ततः प्रभृति तत्तीर्थं ख्यातं च धरणीतले ॥ रक्तानां
प्राणिनां यस्मादनुबन्धं करोति यत् ॥ ३१ ॥ रक्तानुबन्धमित्येव तस्मात्तत्कीर्त्यते क्षितौ ॥ तत्र सन्तर्प्य वै देवान्यः श्राद्धं कुरुते नृप ॥ ३२ ॥
तत्र संक्रमणे भानोर्यः स्नानं कुरुते नरः ॥ श्रद्धया परया युक्तो मुच्यते ब्रह्महत्यया ॥ ३३ ॥ पितृक्षेत्रे गयायां च श्राद्धं यः कुरुते नरः ॥ गयाश्राद्ध
समं प्राहुः फलं तस्य महर्षयः ॥ ३४ ॥ चन्द्रसूर्योपरागे वा गोदानं नृपसत्तम ॥ यः करोति नरस्तत्र स कुलां[1]सप्त तारयेत् ॥ ३५ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखंडे रक्तानुबन्धमाहात्म्यवर्णनंनामैकत्रिंशोऽध्यायः ॥
॥ ३१ ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ महाविनायकं गच्छेत्ततः पार्थिवसत्तम ॥ यस्मिन्दृष्टे नृणां सद्यो निर्विघ्नत्वं प्रजायते ॥ १ ॥
॥ ॥ ययातिरुवाच ॥ ॥ कथं महत्त्वमगमत्पूर्वं तत्र विनायकः ॥ कस्मिन्काले द्विजश्रेष्ठ सर्वं विस्तरतो वद ॥ २ ॥ ॥ पुलस्त्य

१ कुलान्—कुलोद्भवान्—पुरुषान्—सप्त—सप्त पूर्वान्—सप्त—अपरान्—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



उवाच ॥ ॥ पुरोद्वर्त्तनजं लेपं गृहीत्वा नृप पार्वती ॥ विनोदार्थं चकाराथ बालकं सुकुमारकम् ॥ ३ ॥ लेपाभावाच्छिरोहीनं शेषांगाव
यवं नृप ॥ यथोक्तं निर्मयित्वा तं स्कन्दं वाक्यमथाब्रवीत् ॥ ४ ॥ लेपमानय भद्रं ते शिरोऽर्थं स्कन्द सत्वरम् ॥ येनायं पुत्रको मे स्याद्भ्राता
ते परदुर्जयः ॥ ५ ॥ ततो गौरीसमादेशाल्लेपालब्धौ नृपोत्तम ॥ मत्तं गजवरं दृष्ट्वा शिरस्तस्य समानयत् ॥ ६ ॥ तस्मिन्नियोजयामास गात्रे
लेपसमुद्भवे ॥ महद्धीदं शिरो भावि पुत्र कस्मात्त्वयाऽऽहृतम् ॥ ७ ॥ ब्रुवंत्याश्चापि पार्वत्या मा मेति च मुहुर्मुहुः ॥ न्यस्ते शिरसि तद्गात्रे दैवयोगा
न्नराधिप ॥ ८ ॥ विशेषान्नायकत्वं च गात्रेभ्यः समजायत ॥ बालकप्रतिमं कान्तं सर्वलक्षणलक्षितम् ॥ ९ ॥ त्रिगंभीरं चतुर्हस्तं सप्तरक्तं मही
पते ॥ षडुन्नतं पञ्चदीर्घं पञ्चसूक्ष्मं सुसुन्दरम् ॥ १० ॥ त्रिविस्तीर्णं महाराज दृष्ट्वा गौरी सुविस्मिता ॥ सजीवं कारयामास स्वशक्त्या शक्ति
रूपिणी ॥ ११ ॥ स सजीवः कृतो देव्या समुत्तस्थौ च तत्क्षणात् ॥ आदेशं याचयामास विनयानतकन्धरः ॥ १२ ॥ तं दृष्ट्वा चाद्भुताकारं
प्रोक्ता पुत्रं मुहुर्मुहुः ॥ शंभोः सकाशमनयत्प्रहृष्टेनान्तरात्मना ॥ १३ ॥ ततोऽब्रवीत्सुतं देव ममैव गात्रलेपजम् ॥ देहि देव वरानित्थं महत्त्वं येन
गच्छति ॥ १४ ॥ ॥ श्रीभगवानुवाच ॥ ॥ शरीरस्थं शिरो मुख्यं यस्मात्पर्वतनन्दिनि ॥ महत्त्विदं शिरः प्रोक्तं त्वया स्कन्देन योजि
तम् ॥ १५ ॥ विशेषान्नायकत्वं च गात्रे चास्य यतः स्थितम् ॥ महाविनायको ह्येष तस्मान्नाम्ना भविष्यति ॥ १६ ॥ गणानां चैव सर्वेषामाधि
पत्यं नगात्मजे ॥ अस्य दत्तं मया यस्माद्भविष्यति गणाधिपः ॥ १७ ॥ सर्वकार्येषु ये मर्त्त्याः पूर्वमेनं गणाधिपम् ॥ स्मरिष्यंति न वै तेषां कार्य
हानिर्भविष्यति ॥ १८ ॥ ततोऽस्य प्रददौ स्कन्दः प्रक्रीडार्थं कुठारकम् ॥ तदेव चायुधं तस्य सुप्रियं हि सदाऽभवत् ॥ १९ ॥ ततो
गौरी ददौ भोज्यपात्रं मोदकपूरितम् ॥ पुत्रस्नेहात्स तत्प्राप्य लास्यमेवं तदाऽकरोत् ॥ २० ॥ तस्य भक्ष्यस्य गन्धेन निष्क्रान्तो मूषको
बिलात् ॥ भक्षणाच्चामरो जातस्तस्य वाह्यो व्यजायत ॥ २१ ॥ ॥ पुलस्त्य उवाच ॥ ॥ महाविनायको ह्येवं तत्र जातो मही
पते ॥ तस्मिन्दृष्टे च यत्पुण्यं तत्त्वमेकमनाः शृणु ॥ २२ ॥ बाल्ये वयसि यत्पापं वार्द्धके यौवनेऽपि यत् ॥ करोति मानवो राजं
स्तस्मात्पापात्प्रमुच्यते ॥ २३ ॥ माघमासे सिते पक्षे चतुर्थ्यां समुपोषितः ॥ यस्तं पश्यति वाग्ग्मी स सर्वज्ञश्च प्रजायते ॥ तस्याग्रे ॥२५९॥
सुमहत्कुण्डं स्वच्छोदकसुपूरितम् ॥ २४ ॥ तत्र स्नात्वा नरो भक्त्या यः पश्यति विनायकम् ॥ तस्यान्वयेऽपि सर्वज्ञा जायन्ते मानवा नृप ॥२५॥
गणानां त्वेति मंत्रेण कृत्वा वै त्रिः प्रदक्षिणम् ॥ यस्तं पश्यति राजेन्द्र दुरितं न स पश्यति ॥ २६ ॥ तस्मात्सर्वप्रयत्नेन तं प्रपश्येद्विनायकम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

य इच्छेत्सकलान्कामानिह लोके परत्र च ॥ २७ ॥ गृहस्थोऽपि च यो भक्त्या स्मरेत्कार्य उपस्थिते ॥ अविघ्नं तस्य तत्सर्वं संसिद्धिमुपगच्छति ॥ २८ ॥ प्रातरुत्थाय यो मर्त्यः स्मरेदेवं विनायकम् ॥ तस्य तद्दिनजातानि सिद्धिं कृत्यानि यांति हि ॥ २९ ॥ विवाहे कलहे युद्धे प्रस्थाने कृषिकर्मणि ॥ प्रवेशे च स्मरेद्यस्तु भक्तिपूर्वं विनायकम् ॥ तस्य तद्वांछितं सर्वं प्रसादात्तस्य सिद्ध्यति ॥ ३० ॥ महाविनायकीं शांतिं यः करोति समाहितः ॥ न तं प्रेता ग्रहा रोगाः पीडयंति विनायका[1]: ॥३१॥ ॥ ययातिरुवाच ॥ ॥ महावैनायिकीं शांतिं वद मे मुनिसत्तम ॥ के मंत्राः किं विधानं च परं कौतूहलं हि मे ॥ ३२ ॥ ॥ पुलस्त्य उवाच ॥ ॥ शुक्लपक्षे शुभे वारे नक्षत्रे दोषवर्जिते ॥ श्रेष्ठचंद्रबले शांतिं गणेशस्य समाचरेत् ॥ ३३ ॥ पूर्वोत्तरे समे देशे कृत्वा वेदिं च मंडपम् ॥ मध्ये चाष्टदलं पद्मं गृह्य सूत्रं प्रयोजयेत् ॥३४॥ इन्द्रादिलोकपालांश्च दिक्षु सर्वासु भूपते ॥ गणेशपूर्विकाश्चापि मातरश्च विशेषतः ॥ ३५ ॥ गंधपुष्पोपहारैश्च यथोक्तैर्बलिविस्तरैः ॥ श्वेतवस्त्रयुगच्छन्नं कलशं जलपूरितम् ॥ ३६ ॥ तस्यैव पूर्वदिग्भागे सहिरण्यं फलान्वितम् ॥ ३७ ॥ गणानां त्वेति मंत्रेण सहस्रं चाष्टसंयुतम् ॥ जपेत्तत्र तथा चाङ्गान्पंचांगान्नृपसत्तम ॥ ३८ ॥ विनायकं समुद्दिश्य पुरः कुण्डे करात्मके ॥ चतुरस्रे योनियुते मेखलाभिर्विभूषिते ॥ ३९ ॥ मधुदूर्वाक्षतैर्होमैर्ग्रहहोमादनंतरम् ॥ गणानां त्वेति मंत्रेण दशसाहस्त्रिकस्तथा ॥ ४० ॥ कार्यो वै पार्थिवश्रेष्ठ कार्यश्चोदङ्मुखैर्द्विजैः ॥ चतुर्भिश्चतुरै राजन्पीतवस्त्रानुलेपनैः ॥ ४१ ॥ पीतांबरधरैश्चैव धृतहेमांगुलीयकैः ॥ ततो होमावसाने तु यजमानं नृपोत्तम ॥ ४२ ॥ मृगचर्मोपरिस्थं च मंत्रैरेभिर्विधानतः ॥ स्नापयेत्प्राङ्मुखं शांतं शुक्लवस्त्रावगुंठितम् ॥ ४३ ॥ इमं मे गंगे यमुने पंचनद्यः सुपुष्करे ॥ श्रीसूक्तसहितं विष्णोः पावमानं वृषाकपिम् ॥ ४४ ॥ सम्यगुच्चार्य विघ्नानां ततो नाशं प्रपद्यते ॥ ग्रहाः सौम्यत्वमायांति भूता नश्यंति तत्क्षणात् ॥४५॥ आधयो व्याधयो रौद्रा दुष्टरोगा ज्वरादयः ॥ प्रणश्यंति द्रुतं सर्वे तथोत्पाताः सुदारुणाः ॥ ४६ ॥ एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ॥ विनायकस्य माहात्म्यं महत्त्वं शांतिकं तथा ॥४७॥ यश्च कीर्त्तयते सम्यक्चतुर्थ्यां सुसमाहितः ॥ शृणोति वा नृपश्रेष्ठ तस्याऽविघ्नं सदा भवेत् ॥ ४८ ॥ यंयं काममभिध्यायन्यजेच्चेदं समाहितः ॥ तत्तदाप्नोति नूनं च गणनाथप्रसादतः ॥ ४९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखण्डे विनायकमाहात्म्यवर्णनं नाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततः पार्थेश्वरं गच्छेदेवं पातकनाशनम् ॥ यं दृष्ट्वा मानवः सम्यङ्मुच्यते

[1] विनायकाः—पिशाचादिभूतगणविशेषाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

सर्वपातकैः ॥ १ ॥ पार्थानाम्न्यभवत्साध्वी देवलस्य प्रिया सती ॥ तया पूर्वं तपस्तप्तं तत्र स्थाने महीपते ॥ २ ॥ सा पूर्वमभवद्वंध्या ऋषिपत्नी यश
स्विनी ॥ वैराग्यं परमं गत्वा ततश्चैवार्बुदं गता ॥ ३ ॥ वायुभक्षा निराहारा समचित्ताऽऽसने स्थिता ॥ ततो वर्षसहस्रांते भक्त्या तस्या महीपते ॥
॥ ४ ॥ उद्भिद्य धरणीपृष्ठं सहसा लिंगमुत्थितम् ॥ एतस्मिन्नेव काले तु वागुवाचाशरीरिणी ॥ ५ ॥ पूजयैतन्महाभागे शिवलिंगं सुपावनम् ॥
त्वद्भक्त्या धरणीपृष्ठान्निःसृतं कामदं महत् ॥ ६ ॥ यो यं काममभिध्यायन्पूजयिष्यति मानवः ॥ अन्योपि तदभिप्रेतं प्राप्स्यते नात्र संशयः ॥
॥ ७ ॥ पार्थेश्वराख्यमेतद्धि लोके ख्यातिं गमिष्यति ॥ एवमुक्त्वा ततो वाणी विरराम महीपते ॥८॥ ततः सा विस्मयाविष्टा पूजयामास तत्तदा ॥
ततः पुत्रशतं प्राप्तं दिव्यं वंशधरं तथा ॥ ९ ॥ ततः प्रभृति तल्लिंगं विख्यातं धरणीतले ॥ तत्रास्ति निर्मलं तोयं गिरिगह्वरनिःसृतम् ॥ १० ॥ तत्र
स्नात्वा नरः सम्यग्यस्तं पश्यति भावतः ॥ न स पश्यति संसारे दुःखं संतानसंभवम् ॥ ११ ॥ शुक्लपक्षे चतुर्दश्यां जागरं तस्य चाग्रतः ॥
यः करोति निराहारः स पुत्रं लभते ध्रुवम् ॥ १२ ॥ पिंडनिर्वापणं तत्र यः करोति समाहितः ॥ तस्य पुत्रत्वमायांति पितरस्तत्प्रसादतः ॥
॥ १३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखंडे पार्थेश्वरमाहात्म्यवर्णनंनाम त्रयस्त्रिंशोऽ
ध्यायः ॥ ३३ ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ कृष्णतीर्थं ततो गच्छेत्कृष्णस्य दयितं सदा ॥ यत्र सन्निहितो नित्यं स्वयं विष्णुर्म
हीपते ॥ १ ॥ ॥ ययातिरुवाच ॥ ॥ कृष्णतीर्थं कथं तत्र जातं ब्राह्मणसत्तम ॥ कस्मिन्काले मुने ब्रूहि सर्वं विस्तरतो मम ॥
॥ २ ॥ ॥ पुलस्त्य उवाच ॥ ॥ तस्मिन्नेकार्णवे घोरे नष्टे स्थावरजंगमे ॥ चंद्रार्कपवने नष्टे ज्योतिषि प्रलयं गते ॥ ३ ॥
ततो युगसहस्रांते विबुद्धः कमलासनः ॥ एकाकी चिंतयामास कथं सृष्टिर्भवेदिति ॥ ४ ॥ भ्रमंश्चापि चतुर्वक्त्रो यावत्पश्यति दूरतः ॥
चतुर्भुजं विशालाक्षं पुरुषं पुरतः स्थितम् ॥ ५ ॥ तं चोवाच चतुर्वक्त्रः कस्त्वं केन विनिर्मितः ॥ किमर्थमिह संप्राप्तः सर्वं विस्तरतो
वद ॥ ६ ॥ तमुवाचाथ गोविंदः प्रहसञ्छ्लक्ष्णया गिरा ॥ ७ ॥ अहमाद्यः पुमानेको मया सृष्टो भवानपि ॥ स्रष्टुमिच्छामि भूयोऽपि भूतग्रामं
चतुर्विधम् ॥ ८ ॥ ॥ पुलस्त्य उवाच ॥ ॥ तस्य तद्वचनं श्रुत्वा क्रुद्धो देवः पितामहः ॥ अब्रवीत्परुषं वाक्यं भर्त्सयंश्च पुनःपुनः ॥ ९ ॥
सृष्टस्त्वं हि मया मूढ प्रथमोऽहमसंशयम् ॥ त्वादृशानां सहस्राणि करिष्येऽहमसंशयम् ॥ १० ॥ एवं विवदमानौ तौ मिथो राजन्महाद्युती ॥ 

१ पुरुषम्–महाविष्णुम्–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्पर्धया रोषताम्राक्षौ युयुधाते परस्परम् ॥ ११ ॥ मुष्टिभिर्बाहुभिश्चैव नखैर्दंतैर्विकर्षणैः ॥ एवं वर्षसहस्रं तु तयोर्युद्धमवर्त्तत ॥ १२ ॥ ततो वर्षसहस्रांते तयोर्मध्ये नृपोत्तम ॥ प्रादुर्भूतं महालिंगं दिव्यं तेजोमयं शुभम् ॥ १३ ॥ एतस्मिन्नेव काले तु वागुवाचाशरीरिणी ॥ युद्धाद्ब्रह्मन्निवर्तस्व त्वं च विष्णो ममाज्ञया ॥ १४ ॥ एतन्माहेश्वरं लिंगं योऽस्य चांते गमिष्यति ॥ स ज्येष्ठः स विभुः कर्त्ता युवयोर्नात्र संशयः ॥ १५ ॥ अधोभागं व्रजत्वेक एकश्चोर्द्ध्वं ममाज्ञया ॥ तच्छ्रुत्वा सत्वरो ब्रह्मा व्योममार्गं समाश्रितः ॥ १६ ॥ विदार्य वसुधां कृष्णोऽप्यधस्तात्सत्वरं गतः ॥ स भित्त्व सप्तपातालानधो यावत्प्रयाति च ॥ तावत्कालाग्निरुद्रस्तु दृष्टस्तेन महात्मना ॥ १७ ॥ गंतुमिच्छंस्ततोऽधस्ताद्यावद्वेगं करोति सः ॥ तावत्तस्यार्चिभिर्दग्धः कृष्णत्वं समपद्यत ॥ १८ ॥ ततो मूर्छाभिसंततो दह्यमानोऽद्भुताग्निना ॥ निवर्त्य सहसा विष्णुर्वैलक्ष्यं परमं गतः ॥ १९ ॥ तच्चालिंगं समासाद्य भक्त्या पूजा कृता ततः ॥ वेदोक्तैः परमैः सूक्ष्मैः स्तुतिं चक्रे महीपते ॥ २० ॥ ब्रह्माऽपि व्योममार्गेण गतो हंसविमानतः ॥ दिव्यं वर्षसहस्रं तु तस्यांतं नाभ्यपद्यत ॥ २१ ॥ ततो वर्षसहस्रांते केतकीं सोऽप्यपश्यत ॥ आयांतीं व्योममार्गेण तया पृष्टश्चतुर्मुखः ॥ २२ ॥ क त्वया गम्यते ब्रह्मन्निरालंबे महापथि ॥ शून्ये तत्त्वं समाचक्ष्व परं कौतूहलं हि मे ॥ २३ ॥ ॥ ब्रह्मोवाच ॥ ॥ मम स्पर्धा समुत्पन्ना विष्णुना सह शोभने ॥ लिंगस्यास्य हि पर्यंतं यो लभिष्यति चावयोः ॥ २४ ॥ स ज्यायानितरो हीनो ह्येतदुक्तं पिनाकिना ॥ प्रस्थितोऽहं ततश्चोर्द्ध्वमधोमार्गं गतो हरिः ॥ २५ ॥ लब्ध्वा लिंगस्य पर्यंतं यास्यामि क्षितिमंडले ॥ तस्य तद्वचनं श्रुत्वा तत्पुष्पमभ्यभाषत ॥ २६ ॥ व्यर्थश्रमोऽसि लोकेश नांतो लिंगस्य विद्यते ॥ चतुर्युगसहस्राणां कोटिरेका पितामह ॥ २७ ॥ लिंगमूर्ध्नः पतंत्या मे कालो जातो महाद्युते ॥ तथापि क्षितिपृष्ठं तु न प्राप्तास्मि कथंचन ॥ २८ ॥ यावत्कालेन हंसस्ते योजनं संप्रगच्छति ॥ तावत्कालेन गच्छामि योजनानामहं शतम् ॥ २९ ॥ तस्मान्निवर्तनं युक्तं मम वाक्येन ते विभो ॥ दर्शयित्वा च मां विष्णोर्ज्येष्ठत्वं व्रज सांप्रतम् ॥ ३० ॥ ततो हृष्टमना भूत्वा गृहीत्वा तां चतुर्मुखः ॥ पुनर्वर्षसहस्रांते भूमिपृष्ठमुपागतः ॥ दर्शयामास तां विष्णोरेषा लिंगस्य मूर्धतः ॥ ३१ ॥ मयाऽऽनीता शुभा माला लब्धश्चांतं चतुर्भुज ॥ त्वया लब्धो न चासत्यं वद मे पुरुषोत्तम ॥ ३२ ॥ ॥ विष्णुरुवाच ॥ ॥ अनंतस्याप्रमेयस्य देवदेवस्य शूलिनः ॥ नाहं शक्तः परं पारं गंतुं ब्रह्मन्कथंचन ॥ ३३ ॥ यदि त्वयाऽस्य पर्यंतो लब्धो ब्रह्मन्कथंचन ॥ तत्ते तुष्टिं गतो नूनं देवदेवो महेश्वरः ॥ ३४ ॥ नान्यथा चास्य पर्यंतो दृश्यते केन

१ त्वया लब्धः—लब्धः किम्—इति काकुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



चित्क्वचित् ॥ तस्माज्ज्येष्ठो भवाञ्छ्रेष्ठः कनिष्ठोऽहमसंशयम् ॥ ३५ ॥ ॥ पुलस्त्य उवाच ॥ ॥ एतस्मिन्नेव काले तु भगवान्वृषभध्वजः ॥ कोपं चक्रे महाराज ब्रह्माणं प्रति तत्क्षणात् ॥ ३६ ॥ अथाह दर्शनं गत्वा धिग्धिग्व्यर्थप्रजल्पक ॥ मिथ्या प्रजल्पमानेन किमिदं साहसं कृतम् ॥ ॥ ३७ ॥ यस्मात्त्वया मृषा प्रोक्तं मम पर्यंतदर्शनम् ॥ तस्मात्त्वं सर्ववर्णानां पूजार्हो न भविष्यसि ॥ ३८ ॥ ये च त्वां पूजयिष्यंति मानवा मोह संयुताः ॥ ते कृच्छ्रं परमं प्राप्य नाशं यास्यंति कृत्स्नशः ॥ ३९ ॥ केतक्या च तथा प्रोक्तं यस्मात्तस्मात्सुदुष्टया ॥ अस्या हि स्पर्शनाल्लोकः श्वपाकत्वं प्रयास्यति ॥ ४० ॥ एवं शापौ तयोर्दत्त्वा देवः प्रोवाच केशवम् ॥ प्रसन्नवदनो भूत्वा तदा तुष्टो महेश्वरः ॥ ४१ ॥ ॥ भगवानुवाच ॥ ॥ वासुदेव महाबाहो तुष्टस्तेऽहं महामते ॥ सत्यसंभाषणादेव वरं वरय सुव्रत ॥४२॥ ॥ श्रीवासुदेव उवाच॥ ॥एष एव वरः श्लाघ्यो यत्त्वं तुष्टो महेश्वरः ॥ न चापुण्यवतां देव त्वं तुष्टिमधिगच्छसि ॥ अवश्यं यदि मे देयो वरो देवेश्वर त्वया ॥४३॥ लिंगमेतदनंताख्यं लघुतां नय मा चिरम् ॥ येन सृष्टि र्भवेल्लोके व्याप्तं विश्वमनेन तु ॥ ४४ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततः संक्षिप्य तल्लिंगं लघु कृत्वा महेश्वरः ॥ अब्रवीत्केशवं भूयः शृणु वाक्यमिदं हरे ॥ ४५ ॥ एतन्मेध्यतमे देशे लिंगं स्थापय मे हरे ॥ पूजय त्वं विधानेन परं श्रेयः प्रपत्स्यसे ॥ ४६ ॥ मम तेजोविनिर्दग्धः कृष्णत्वं हि यतो गतः ॥ कृष्ण एव ततो नाम लोके ख्यातिं गमिष्यति ॥ ४७ ॥ कृष्णकृष्णेति ते नाम प्रातरुत्थाय मानवः ॥ कीर्तयिष्यति यो भक्त्या स याति परमां गतिम् ॥४८॥ ॥ पुलस्त्य उवाच ॥ ॥ एवमुक्त्वा तमीशानस्तत्रैवांतरधीयत ॥ वासुदेवोऽपि तल्लिंगं गृहीत्वाऽर्बुदपर्वते ॥ निर्झरे स्थापयामास सुपुण्ये विमलोदके ॥ ४९ ॥ कृष्णतीर्थं ततो जातं नाम्ना हि धरणीतले ॥ शृणु पार्थिवशार्दूल तत्र स्नातस्य यत्फलम् ॥ ५० ॥ स्नात्वा कृष्णह्रदे पुण्ये तल्लिंगं पश्यते तु यः ॥ सर्वतीर्थोद्भवं श्रेयः स मर्त्यो लभतेऽखिलम् ॥ ५१ ॥ तथा च सर्वदानानां निष्कामः प्राप्नुयात्फलम् ॥ सकामोऽपि फलं चेष्टं यद्यपि स्यात्सुदुर्लभम् ॥ ५२ ॥ तस्मात्सर्वप्रयत्नेन स्नानं तत्र समाचरेत् ॥ य इच्छेच्छाश्वतं श्रेयो नात्र कार्या विचारणा ॥ ५३ ॥ एकादश्यां महाराज निराहारो जितेन्द्रियः ॥ यस्तत्र जागरं कृत्वा लिंगस्याग्रे सुभक्तितः ॥ ५४ ॥ प्रभाते कुरुते श्राद्धं यस्तु श्रद्धासमन्वितः ॥ पितॄन्संतारयेत्सर्वान्पूर्वजैः सह धर्मवित् ॥ ५५ ॥ तिलान्कृष्णान्नरस्तत्र ब्राह्मणेभ्यो ददाति यः ॥ ब्रह्महत्यादिभिः पापैः स मर्त्यो मुच्यते ध्रुवम् ॥ ॥ ५६ ॥ दर्शनादेव राजेन्द्र कृष्णतीर्थस्य मानवः ॥ मुच्यते सर्वपापेभ्यो नात्र कार्या विचारणा ॥ ५७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखण्डे कृष्णतीर्थमाहात्म्यवर्णनंनाम चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततो गच्छेन्नृपश्रेष्ठ तीर्थं पापप्रणाशनम् ॥ मामुद्गदमिति ख्यात तस्मिन्पर्वतरोधसि ॥ १ ॥ तत्र स्नातो नरः सम्यक्छ्रद्धावान्सुसमाहितः ॥ मुच्यते पातकैर्घोरैः पूर्वजन्मकृतैरपि ॥ २ ॥ तस्य पश्चिमदिग्भागे लिंगमस्ति महीपते ॥ सर्वकामप्रदं नृणां स्थापितं मुद्गलेन तु ॥ ३ ॥ स्नात्वा मामुद्गदे पुण्ये यस्तल्लिंगं च पश्यति ॥ शुक्लपक्षे चतुर्दश्यां फाल्गुने मासि मानवः ॥ स प्राप्नोति परं श्रेयः सर्वतीर्थेषु दुर्लभम् ॥ ४ ॥ यस्तत्र कुरुते श्राद्धं दक्षिणां मूर्तिमाश्रितः ॥ पितरस्तस्य तृप्यंति यावदाभूतसंप्लवम् ॥ ५ ॥ तत्र दानं प्रशंसंति नीवाराणां महर्षयः ॥ शाकमूलादिभिः श्राद्धं पितॄणां तुष्टिदं नृप ॥ ६ ॥ ॥ ययातिरुवाच ॥ ॥ मामुद्गदमिति विभो कथं नामाऽभवत्पुरा ॥ मुद्गलस्याश्रमं ब्रूहि मम सर्वं विधानतः ॥ ७ ॥ ॥ ॥ पुलस्त्य उवाच ॥ ॥ तत्रस्थस्य पुरा राजन्मुद्गलस्य महात्मनः ॥ विमानं वरमादाय देवदूतः समागतः ॥ ८ ॥ सोऽब्रवीद्देवराज्ञाहं प्रेषितो मुनिसत्तम ॥ तवार्थायाऽऽरुहैनं त्वं विमानं गम्यतां दिवि ॥ ९ ॥ ॥ मुद्गल उवाच ॥ ॥ स्वर्गस्य ये गुणा दूत ये च दोषाः प्रकीर्तिताः ॥ तान्मे वद करिष्येऽहं श्रुत्वा वै यत्क्षमं भवेत् ॥ १० ॥ ब्रूहि तान्सकलान्दूत त्वागमिष्याम्यहं ततः ॥ ११ ॥ ॥ देवदूत उवाच ॥ ॥ अलमेतेन दर्पेण क्रियतां शक्रजल्पितम् ॥ पुण्यैः स्वकैर्द्विजश्रेष्ठ समागच्छेरिदं ततः ॥ १२ ॥ ॥ मुद्गल उवाच ॥ ॥ अश्रुतैस्तैर्न गच्छेऽहमेतन्मे हृदि निश्चितम् ॥ करिष्येऽहं तपो भूरि पूजयिष्ये महेश्वरम् ॥ १३ ॥ ॥ दूत उवाच ॥ ॥ न शक्तः स्वर्गगुणान्वक्तुमपि वर्षशतैरपि ॥ संक्षेपात्कथयिष्यामि यदि ते निश्चयः परः ॥ १४ ॥ नंदनादीनि रम्याणि तत्र देववनानि च ॥ अनन्यसदृशा भोगाः सदा तृप्तिर्द्विजोत्तम ॥ १५ ॥ बुभुक्षा नैव तृष्णा च निद्रालस्ये न च प्रभो ॥ रंभाद्यप्सरसो मुख्या गंधर्वास्तुंबरादयः ॥ रमयंति नरं तत्र गीतैर्नृत्यैरनेकशः ॥ १६ ॥ एवं च वसते तत्र जनः स्वर्गे तपोधन ॥ यावत्पुण्यक्षयस्तावत्पश्चात्पातमवाप्नुयात् ॥ १७ ॥ एक एव मुने दोषः स्वर्लोके प्रतिभाति मे ॥ स एव पतनाख्यस्तु स्वर्गिणां च भयावहः ॥ १८ ॥ न पुण्यं लभते तत्र कर्तुं विप्र कथंचन ॥ कर्मभूमिरियं ब्रह्मन्भोगभूमिस्तु सा स्मृता ॥ १९ ॥ यदत्र क्रियते कर्म शुभं तत्रोपभुज्यते ॥ तथा दृष्ट्वा विमानस्थान्भूरिधर्मादिसंयुतान् ॥ २० ॥ बहुतेजोन्वितान्स्वर्गे ह्यल्पपुण्यो द्विजोत्तम ॥ पश्चात्तापजदुःखेन स्वर्गस्थो दुःखितः सदा ॥ २१ ॥ न मया सुकृतं भूरि कृतं मर्त्ये कथंचन ॥ २२ ॥ तथा च पतमानांश्च दृष्ट्वा चान्यान्सहस्रशः ॥ आत्मनश्च महद्दुःखं जायते च तदद्भुतम् ॥ २३ ॥ एतत्ते सर्वमाख्यातं गुणदोषसमुद्भवम् ॥ स्वर्गसंचेष्टितं ब्रह्मन्कुरुष्व यदभीप्सितम् ॥ २४ ॥ ॥ मुद्गल उवाच ॥ ॥ पतनस्य भयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



यत्र पुण्यहानिर्न वर्द्धनम् ॥ तेन स्वर्गेण मे दूत नैव कार्यं कथंचन ॥ २५ ॥ वाच्यस्त्वया ममादेशाद्देवराजः स्फुटं वचः ॥ क्षम्यतामपराधो मे न स्वर्गाय स्पृहा मम ॥ २६ ॥ तत्कर्माऽहं करिष्यामि येन नो पतनाद्भयम् ॥ साधयिष्यामि ताँल्लोकान्ये सदा पातवर्जिताः ॥ २७ ॥ ॥ ॥ पुलस्त्य उवाच ॥ ॥ एवमुक्त्वा नृपश्रेष्ठ मुद्गलः स्वर्गनिःस्पृहः ॥ स्थितस्तत्रैव निरतः शिवध्यानपरायणः ॥ २८ ॥ श्रुत्वा दूतोऽपि शक्रस्य तस्य वाक्यं स विस्तरम् ॥ कथयामास शक्रस्य तं भूयः सोऽभ्यभाषत ॥ २९ ॥ देवदूताप्रमाणं च विमानं हि त्वया कृतम् ॥ न कृतं केनचित्पूर्वं न करिष्यति कश्चन ॥ ३० ॥ तस्मात्तत्र द्रुतं गत्वा बलादानय तं मुनिम् ॥ आनयस्वान्यथा शापं तव दास्याम्यसंशयम् ॥ ३१ ॥ ॥ ॥ पुलस्त्य उवाच ॥ ॥ शक्रस्य वचनं श्रुत्वा देवदूतो भयान्वितः ॥ प्रस्थितः सत्वरं तत्र मुद्गलो यत्र तिष्ठति ॥ ३२ ॥ मुद्गलोऽपि विमानस्थं पुनर्दृष्ट्वा समागतम् ॥ माग्रुह्रदे प्रविश्याथ वारयामास तं तदा ॥ ३३ ॥ स तस्य वचनेनैव स्तंभितो लिखितो यथा ॥ चलितुं नैव शक्नोति प्रभावात्तस्य सन्मुनेः ॥ ३४ ॥ चिरकालगतं ज्ञात्वा दूतं तु त्रिदशाधिपः ॥ स्वयं तत्राययौ कोपादारुह्यैरावणं गजम् ॥ ३५ ॥ अथ दृष्ट्वा तदा दूतं स्तंभितं मुद्गलेन तु ॥ वधार्थं तूद्यतस्तस्य स वज्रं भ्रामयंस्तदा ॥ ३६ ॥ एतस्मिन्नेव काले तु उत्पातास्तत्र दारुणाः ॥ अपसव्यं मृगाश्चक्रुः पशवः पक्षिणश्च ये ॥ तान्दृष्ट्वा चिन्तयामास मुद्गलो विस्मयान्वितः ॥ ३७ ॥ अथ दृष्ट्वांबरगतं वज्रोद्यतकरं हरिम् ॥ स्तंभयामास तं सद्यो दृष्टिपातेन मुद्गलः ॥ ३८ ॥ तत्र शक्रः स्तुतिं चक्रे भग्नोत्साहो नृपोत्तम ॥ मुञ्च मां ब्राह्मणश्रेष्ठ यास्यामि त्रिदशालयम् ॥ ३९ ॥ स्वर्गे वा यदि वा मर्त्ये तिष्ठ त्वं स्वेच्छया द्विज ॥ मया कृतः समुद्योगो हितार्थं ते मुने ह्ययम् ॥ ४० ॥ वरं वरय भद्रं ते नित्यं यो मनसि स्थितः ॥ तं ते सर्वं प्रदास्यामि यद्यपि स्यात्सुदुर्लभम् ॥ ४१ ॥ ॥ मुद्गल उवाच ॥ ॥ एष एव वरः श्लाघ्यो यत्त्वं दृष्टः सुरेश्वर ॥ दर्शनं ते सहस्राक्ष स्वप्नेष्वपि सुदुर्लभम् ॥ ४२ ॥ अवश्यं यदि मे देयो वरो वृत्रनिषूदन ॥ त्वत्प्रसादेन मे मोक्षो जायतां शीघ्रमेव हि ॥ ४३ ॥ मा मु ह्रदं समागत्य दूतः प्रोक्तो मया यतः ॥ ततो माग्रुह्रदमिति ख्यातिं यातु धरातले ॥ ४४ ॥ तीर्थमेतत्सहस्राक्ष सर्वपापप्रणाशनम् ॥ अत्र स्नात्वा दिवं यांतु त्वत्प्रसादात्सुरेश्वर ॥ ४५ ॥ पिण्डदानात्परां प्रीतिं लभंतां पितरोऽत्र हि ॥ ४६ ॥ ॥ इन्द्र उवाच ॥ ॥ माग्रुह्रदमिति ख्यातं तीर्थमेतद्भविष्यति ॥ वरिष्ठं नात्र सन्देहो मत्प्रसादाद्द्विजोत्तम ॥ ४७ ॥ अत्र ये फाल्गुने मासि पौर्णमास्यां समाहिताः ॥

१ वर्द्धनम्—पुण्यवर्द्धनम्—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करिष्यंति पुनः स्नानं ते यास्यंति परां गतिम् ॥ ४८ ॥ पिण्डदानाद्भयातुल्यं लप्स्यंते फलमुत्तमम् ॥ पुण्यदानफलं चात्र संख्याहीनं द्विजोत्तम ॥ ४९ ॥ ॥ पुलस्त्य उवाच ॥ ॥ एवमुक्त्वा ययौ स्वर्गं दूतमादाय वज्रभृत् ॥ मुद्गलोऽपि परं ब्रह्म चिंतयन्ह्यनिशं ततः ॥ ५० ॥ शुक्लध्यानपरो भूत्वा मोक्षं प्राप्तस्ततोऽक्षयम् ॥ ५१ ॥ अत्र गाथा पुरा गीता नारदेन महात्मना ॥ बहुविप्रसमवाये पर्वतेस्मिन्महीपते ॥ ५२ ॥ मामुह्रदेनरः स्नात्वा दृष्ट्वा तं मुद्गलेश्वरम् ॥ इह भुक्त्वाऽखिलान्कामानन्ते मुक्तिमवाप्स्यति ॥ एतस्मात्कारणाद्राजन्मामुह्रदमिति स्मृतम् ॥ ५३ ॥ तत्तीर्थं सर्वतीर्थानां प्रवरं लोकविश्रुतम् ॥ तस्मात्सर्वप्रयत्नेन स्नानं तत्र समाचरेत् ॥ ५४ ॥ मोक्षकामो विशेषेण य इच्छेत्परमं पदम् ॥ चण्डिकाश्रममासाद्य किं पुनः परितप्यते ॥ ५५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे प्रथमेऽर्बुदखण्डे मामुह्रदोत्पत्तिवर्णनंनाम पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥ ॥ छ ॥ ॥ ययातिरुवाच ॥ ॥ चंडिकाया द्विजश्रेष्ठ कथं तत्राश्रमोऽभवत् ॥ कस्मिन्काले फलं तेन किं दृष्टेन भवेन्नृणाम् ॥ १ ॥ ॥ पुलस्त्य उवाच ॥ ॥ शृणु राजन्प्रवक्ष्यामि कथां पापप्रणाशिनीम् ॥ यां श्रुत्वा मानवः सम्यक्सर्वपापैः प्रमुच्यते ॥ २ ॥ पुरा देवयुगे राजन्महिषोनाम दानवः ॥ पितामहवराद्दृप्तः सर्वदेवभयंकरः ॥ ३ ॥ तेन शक्रादयो देवा जिताः संख्ये सहस्रशः ॥ भयात्तस्य दिवं हित्वा गतास्ते वै यथादिशम् ॥ ४ ॥ त्रैलोक्यं स वशे कृत्वा स्वयमिन्द्रो बभूव ह ॥ ५ ॥ आदित्या वसवो रुद्रा नासत्यौ मरुतां गणाः ॥ कृतास्तेन तथा दैत्या यथार्हं बलवत्तराः ॥ ६ ॥ वह्निर्भयं समापन्नस्त्यक्त्वा देवगणांस्तदा ॥ दानवेभ्यो हविर्भागं देवेभ्यो न प्रयच्छति ॥ ७ ॥ उद्द्योतं कुरुते सूर्यो यादृक्तस्याभिसंमतः ॥ यज्ञभागं विनाऽप्येषं भयात्पार्थिवसत्तम ॥ ८ ॥ लोकपालास्तथा सर्वे तस्य कर्म प्रचक्रिरे ॥ दासवत्पार्थिवश्रेष्ठ यज्ञभागं विनाकृताः ॥ ॥ ९ ॥ कस्यचित्त्वथ कालस्य सर्वे देवाः समेत्य तु ॥ पप्रच्छुर्विनयोपेता विप्रश्रेष्ठं बृहस्पतिम् ॥ १० ॥ भगवन्किं वयं कुर्मः कुत्र यामो निराश्रयाः ॥ तस्माद्ब्रूहि क्षयोपायं महिषस्य दुरात्मनः ॥ ११ ॥ एवमुक्तो गुरुर्दैवैर्ध्यात्वा कालं चिरं नृप ॥ ततस्तांस्त्रिदशान्प्राह जीवयन्निव भूपतेः ॥ १२ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ ब्रह्मलब्धवरो दैत्यः पौरुषे च व्यवस्थितः ॥ अवध्यः सर्वदेवानां मुक्त्वैकां योषितं सुराः ॥ व्रजध्वं सहितास्तस्मादर्बुदं पर्वतोत्तमम् ॥ १३ ॥ तपोऽर्थं तत्र संसिद्धिर्जायतामचिराद्धि वः ॥ शक्तिरूपां परां देवीं चंडिकां कामरूपिणीम् ॥ १४ ॥

१ जातः—इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



आराधयध्वमेकांते यया व्याप्तमिदं जगत् ॥ सा तुष्टा वै वधार्थं तु महिषस्य दुरात्मनः ॥ १५ ॥ करिष्यति समुद्योगमवतारसमुद्भवम् ॥ तस्या हस्तेन सोऽवश्यं वधं प्राप्स्यति दुर्मतिः ॥ १६ ॥ अहं वः कीर्तयिष्यामि शक्तियं मंत्रमुत्तमम् ॥ पूजाविधानसंयुक्तं भुक्तिमुक्तिप्रदं शुभम् ॥ १७ ॥ ॥ ॥ पुलस्त्य उवाच ॥ ॥ एवमुक्ताः सुराः सर्वे हर्षेण महतान्विताः ॥ तेनैव सहिता राजन्गताः पर्वतमर्बुदम् ॥ १८ ॥ तत्र स्नाताञ्छुची न्सर्वान्दीक्षयामास गीष्पतिः ॥ शक्तियैः परमैर्मंत्रैः सद्यःसिद्धिकरैर्नृप ॥ १९ ॥ साधयामत्रयं तत्र परिवारसमन्विताः ॥ बलिपूजोपहारैश्च गंध माल्यानुलेपनैः ॥ २० ॥ मंत्रेण विविधेनैव चारुस्तोत्रेण भक्तितः ॥ प्रार्थयंतस्तथा नित्यं दीपज्योतिः समाहिताः ॥ २१ ॥ निर्ममा निरहंकारा गुरुभक्तिपरायणाः ॥ अंगन्याससमायुक्ताः समदर्शित्वमागताः ॥२२॥ एवं संतिष्ठमानानां तेषां पार्थिवसत्तम ॥ सप्त मासा व्यतिक्रांतास्ततस्तुष्टा सुरेश्वरी ॥ २३ ॥ दीपज्योतिःसमावेशात्तेषां गात्रेषु पार्थिव ॥ मंत्रेण परिपूतानां परं तेजो व्यवर्धत ॥ २४ ॥ द्वादशार्कप्रभा जाताः षण्मासाभ्यं तरेण ते ॥ अथ तांस्तेजसा युक्ताञ्ज्ञात्वा जीवो महीपते ॥ २५ ॥ मंडलं रचयामास सर्वसिद्धिप्रदायकम् ॥ उपवेश्य ततः सर्वान्समस्तांस्त्रिदशाल यान् ॥ २६ ॥ तेषां शरीरगं तेजः शक्तियैर्मंत्रसत्तमैः ॥ आकृष्य न्यसयामास मंडले तत्र पार्थिव ॥ २७ ॥ ततस्तेजोमयी कन्या तत्र जाता स्वरू पिणी ॥ शक्तिरूपा महाकाया दिव्यलक्षणलक्षिता ॥ २८ ॥ इंद्रस्तस्यै ददौ वज्रं स्वपाशं च जलेश्वरः ॥ शक्तिं च भगवानग्निः सिंहयानं धना धिपः ॥ २९ ॥ अन्ये चैव गणाः सर्वे निजशस्त्राणि हर्षिताः ॥ तस्यै ददुर्नृपश्रेष्ठ स्तुतिं चक्रुः समाहिताः ॥ ३० ॥ ॥ देवा ऊचुः ॥ ॥ नमस्ते देवदेवेशि नमस्ते कांचनप्रभे ॥ नमस्ते पद्मपत्राक्षि नमस्ते जगदम्बिके ॥ ३१ ॥ नमस्ते विश्वरूपे च नमस्ते विश्वसंस्तुते ॥ त्वं मतिस्त्वं धृतिः कांतिस्त्वं सुधा त्वं विभावरी ॥ ३२ ॥ क्षमा ऋद्धिः प्रभा स्वाहा सावित्री कमला सती ॥ त्वं गौरी त्वं महामाया चामुण्डा त्वं सरस्वती ॥ ३३ ॥ भैरवी भीषणाकारा चंडमुंडासिधारिणी ॥ भूतप्रिया महाकाया घटाली विक्रमोत्कटा ॥ ३४ ॥ मद्यमांसप्रिया नित्यं भक्तत्राणपरायणा ॥ त्वया व्याप्तमिदं सर्वं त्रैलोक्यं सचराचरम् ॥ ३५ ॥ ॥ पुलस्त्य उवाच ॥ ॥ एवं स्तुता सुरैः सर्वैस्ततो देवी प्रहर्षिता ॥ तानब्रवीद्वरं सर्वा गृह्णंतु मम देवताः ॥ ३६ ॥ ॥ देवा ऊचुः ॥ ॥ दानवो महिषोनाम पितामहवरान्वितः ॥ अवध्यः सर्वभूतानां देवानां च तथा कृतः ॥ ३७ ॥ मुक्त्वैकां योषितं देवि तस्मात्त्वं विनिपातय ॥ ३८ ॥ ॥ देव्युवाच ॥ ॥ गच्छध्वं त्रिदशाः सर्वे स्वानि स्थानानि निर्वृताः ॥ ३९ ॥ अहं तं सूद यिष्यामि समये पर्युपस्थिते ॥ एवमुक्ता गताः सर्वे देवाः स्थानानि हर्षिताः ॥ ४० ॥ देवी तत्रैव संहृष्टा स्थिता पर्वतरोधसि ॥ कस्यचित्त्वथ काल



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्य नारदो भगवान्मुनिः ॥ ४१ ॥ तत्र देवीं च संदृष्ट्वा तीर्थयात्रापरायणः ॥ त्रिविष्टपमनुप्राप्तो महिषो यत्र तिष्ठति ॥ ४२ ॥ तत्र दृष्ट्वा मुनिं प्राप्तं प्रणम्य महिषासुरः ॥ विनयेन समायुक्तो ह्यभ्युत्थानमथाकरोत् ॥४३॥ ततस्तं पूजयामास मधुपर्कार्घविष्टरैः ॥ सुखासीनं सुविश्रांतं ज्ञात्वा वाक्य मुवाच ह ॥ ४४ ॥ कुतो भवानितः प्राप्तः किमर्थं मुनिसत्तम ॥ अमी पुत्रास्तथा राज्यं कलत्राणि धनानि च ॥ ४५ ॥ अहं भृत्यसमायुक्तः किम नेन द्विजोत्तम ॥ सर्वं तेऽहं प्रदास्यामि ब्रूहि येन प्रयोजनम् ॥ ४६ ॥ ॥ नारद उवाच ॥ ॥ अभिनंदामि ते सर्वमेतत्त्वय्युपपद्यते ॥ निःस्पृहा हि वयं नित्यं मुनिधर्मं समाश्रिताः ॥ ४७ ॥ कौतूहलादिह प्राप्तश्चिरात्ते दर्शनं गतः ॥ मर्त्यलोकात्समायातो यास्यामि ब्रह्मणः पदम् ॥ ४८ ॥ ॥ महिषा सुर उवाच ॥ ॥ क्वचिद्दृष्टं त्वया किञ्चिदाश्चर्यं भूतले मुने ॥ दैवं वा मानुषं चापि दानवा लंभितां विभो ॥ ४९ ॥ ॥ नारद उवाच ॥ ॥ अत्याश्चर्यं मया दृष्टं दानवेन्द्र धरातले ॥ यन्न दृष्टं क्वचित्पूर्वं त्रैलोक्ये सचराचरे ॥ ५० ॥ अस्त्यर्बुद इति ख्यातः पर्वतो धरणीतले ॥ सर्वर्तुपु ष्पितैर्वृक्षैः शोभितः स्वर्गसन्निभः ॥ ५१ ॥ बकुलैश्चंपकैश्चाम्रैरशोकैः कर्णिकारकैः ॥ शालैस्तालैश्च खर्जूरैर्वटैर्भल्लातकैर्धवैः ॥ ५२ ॥ सरलैः पनसै र्वृक्षैस्तिंदुकैः करवीरकैः ॥ मंदारैः पारिजातैश्च मलयैश्चंदनैस्तथा ॥ ५३ ॥ पुष्पजातिविशेषैश्च सुगंधैरप्यनेककैः ॥ खाद्यैः सर्वैस्तथा लेह्यैश्चोष्यैः फलवरैर्वृतः ॥ ५४ ॥ न स वृक्षो न सा वल्ली नौषधी सा धरातले ॥ न तत्र याऽसुरज्येष्ठ पर्वते वीक्षिता मया ॥ ५५ ॥ पक्षिणो मधुरारावाश्च कोरशिखिचातकाः ॥ कोकिला धार्तराष्ट्राश्च भ्रमराः श्वेतपत्रकाः ॥ ५६ ॥ येषां शब्दं समाकर्ण्य मुनयोऽपि समाहिताः ॥ क्षोभं यांति त्रिकालज्ञाः कंदर्पशरपीडिताः ॥ ५७ ॥ निर्झराणि सुरम्याणि नद्यश्च विमलोदकाः ॥ पद्मिनीखंडसंयुक्ता ह्रदाः शतसहस्रशः ॥ ५८ ॥ पद्मपत्रविशालाक्षा मध्यक्षामाः शुचिस्मिताः ॥ विवेकिनो नरास्तत्र शास्त्रव्रतसमन्विताः ॥ ५९ ॥ किं चात्र बहुनोक्तेन यत्किंचित्तत्र पर्वते ॥ स्वेदजांडजसंज्ञेया उद्भिज्जाश्च जरायुजाः ॥ सर्वलोकोत्तरास्तत्र दृश्यंते पर्वतोत्तमे ॥ ६० ॥ दशयोजनविस्तारो द्वाभ्यां संहितपर्वतः ॥ उच्चैः पंच च स श्रीमान्मर्त्ये स्वर्गो व्यजायत ॥ ६१ ॥ तत्राऽहं कौतुकाविष्ट इतश्चेतश्च वीक्षयन् ॥ सर्वाश्चर्यमयीं नारीमपश्यं लोकसुंदरीम् ॥ ६२ ॥ न देवी नापि गंधर्वी नासुरी न च मानुषी ॥ तादृग्रूपा मया दृष्टा न श्रुता च वरांगना ॥ ६३ ॥ रतिः प्रीतिरुमा लक्ष्मीः सावित्री च सरस्वती ॥ तस्या रूपस्य लेशेन नैतास्तुल्याः स्त्रियोऽखिलाः ॥ ६४ ॥ अहं दृष्ट्वा तथारूपां नारीं कामेन पीडितः ॥ तदा दानवशार्दूल वैक्लव्यं परमं गतः ॥ ६५ ॥ ततो धैर्यम

१ लम्भिताः—मिलिताः किमु—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वष्टभ्य मया मनसि चिंतितम् ॥ न करिष्ये समालापं तया सह च कर्हिचित् ॥ ६६ ॥ यस्या दर्शनमात्रेण कामो मे हृदि वर्द्धितः ॥ तस्याः
संभाषणेनैव किं भविष्यति मे पुनः ॥ ६७ ॥ चिरकालं तपस्तप्तं ब्रह्मचर्येण वै मया ॥ नाशं यास्यति तत्सर्वं विषयैर्निर्जितस्य च ॥ तस्माद्गच्छा
मि चान्यत्र यावन्न विकृतिर्भवेत् ॥ ६८ ॥ नारीनाम तपोविघ्नं पूर्वं सृष्टं स्वयंभुवा ॥ अर्गला स्वर्गमार्गस्य सोपानं नरकस्य च ॥ ६९ ॥ ताव
द्धैर्यं तपः सत्यं तावत्स्थैर्यं कुलत्रपा ॥ यावत्पश्यति नो नारीमेकांते च विशेषतः ॥ ७० ॥ एतत्संचिंत्य बहुधा निमील्य नयने ततः ॥ अप्र
जल्प्य वरारोहां तामहं चात्र संस्थितः ॥ ७१ ॥ ॥ पुलस्त्य उवाच ॥ ॥ नारदस्य वचः श्रुत्वा महिषः कामपीडितः ॥ श्रवणादपि[1] राजेंद्र
पुनः पप्रच्छ तं मुनिम् ॥ ७२ ॥ ॥ महिषासुर उवाच ॥ ॥ काऽसौ ब्राह्मणशार्दूल तादृग्रूपा वरांगना ॥ यस्याः संदर्शनादेव भवानेवं स्मरा
न्वितः ॥ ७३ ॥ देवी वा मानुषी वापि यक्षिणी पन्नगी मुने ॥ कुमारी वा सकांता वा ब्रूहि सर्वं सविस्तरम् ॥ ७४ ॥ ॥ नारद उवाच ॥ ॥
न सा पृष्टा मया किंचिन्न जानामि तदन्वयम् ॥ एतन्मे वर्तते चित्ते सा कुमारी यशस्विनी ॥ ७५ ॥ अक्षमालाधरा बाला कमंडलुसमन्विता ॥
तपस्तेपे गिरौ तत्र हेतुना केनचिच्छुभा ॥ ७६ ॥ सोऽहं यास्यामि दैत्येश ब्रह्मलोकं सनातनम् ॥ नोत्सहे तत्कथां कर्तुं कामबाणभयातुरः ॥
॥ ७७ ॥ एवमुक्त्वा ततो राजन्ब्रह्मलोकं गतो मुनिः ॥ महिषोऽपि स्मराविष्टश्चरं तस्याः[2] समादिशत् ॥ ७८ ॥ गत्वा भवान्द्रुतं तत्र दृष्ट्वा तां च
वरांगनाम् ॥ किमर्थं सा तपस्तेपे को वै तस्याः परिग्रहः ॥ ७९ ॥ अथाऽसौ महिषादेशाद्दूतो गत्वार्बुदाचलम् ॥ दृष्ट्वा तां पद्मगर्भाभां ज्ञात्वा सर्वं[3]
विचेष्टितम् ॥ ८० ॥ तस्मै निवेदयामास महिषाय सविस्मयः ॥ दृष्टा दैत्यवर स्त्री च सर्वलक्षणलक्षिता ॥ ८१ ॥ देवतेजोभवा कन्या साऽद्यापि
वरवर्णिनी ॥ त्वद्वधार्थं तपस्तेपे कौमारव्रतमाश्रिता ॥ ८२ ॥ एवं तत्र भवंती स्म पृष्टाः सर्वे तपस्विनः ॥ सत्यमेतन्महाभाग कुरुष्व
यदनंतरम् ॥ ८३ ॥ तस्या रूपं वयः कांतिर्वर्णितुं नैव शक्यते ॥ नालापं कुरुते बाला सा केनापि समं विभो ॥ ८४ ॥ ॥ पुलस्त्य उवा
च ॥ ॥ तच्छ्रुत्वा महिषो वाक्यं भूयः कामनिपीडितः ॥ दूतं संप्रेषयामास दानवं च विचक्षणम् ॥ ८५ ॥ विचक्षण द्रुतं गत्वा मदर्थे तां तपस्वि
नीम् ॥ सामभेदप्रदानेन दंडेनापि समानय ॥ ८६ ॥ अथाऽसौ प्रययौ शीघ्रं प्रणिपत्य विचक्षणः ॥ अर्बुदे पर्वतश्रेष्ठे यत्र सा परमेश्वरी ॥ प्रणम्य
विनयोपेतो वाक्यमेतदुवाच ताम्॥८७॥महिषोनाम विख्यातस्त्रैलोक्याधिपतिर्बली॥दनुवंशसमुद्भूतः कामरूपसमन्वितः॥८८॥स त्वां वांछति कल्या
णि धर्मपत्नीं स्वधर्मतः ॥ तस्माद्वरय भद्रं ते सर्वकामप्रदं पतिम् ॥ ८९ ॥ यदि स्यात्तव कांतोऽसौ त्वं च तस्य तथा प्रिया ॥ तत्कृतार्थं द्वयोरेव

१ श्रवणादपि—केवलं श्रवणादेव—कामपीडितः—इति संबन्धः । २ तस्याः—तस्या देव्याः समीपे—चरम्—दूतम्—समादिशत्—प्रैषयत्—इति योजना । ३ इत्यादि सर्वं विज्ञायागच्छ--इत्यध्याहृत्यार्थो बोद्धव्यः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यौवनं नात्र संशयः ॥ ९० ॥ एवमुक्ता ततस्तेन देवी वचनमब्रवीत् ॥ किञ्चित्कोपसमायुक्ता मुहुः प्रस्फुरिताधरा ॥ ९१ ॥ ॥ देव्युवाच ॥ ॥ अवध्यः सर्वथा दूतः सर्वत्र परिकीर्तितः ॥ अवस्थासु ततो न त्वं सहसा भस्मसात्कृतः ॥९२॥ गत्वा ब्रूहि दुराचारं महिषं दानवाधमम् ॥ नाहं शक्या त्वया पाप लब्धुं नान्येन केनचित् ॥ ९३ ॥ वधार्थं ते समुद्योग एष सर्वो मया कृतः ॥ तस्यास्तद्वचनं श्रुत्वा महिषं स पुनर्ययौ ॥ ९४ ॥ भयेन महता विष्टस्तस्या रूपेण विस्मितः ॥ सर्वं निवेदयामास महिषाय विचेष्टितम् ॥ तस्याश्चैव तथाऽऽलापानस्पृहत्वं च कृत्स्नशः ॥ ९५ ॥ तच्छ्रुत्वा महिषो राजन्कामबाणप्रपीडितः ॥ सेनापतिं समाहूय वाक्यमेतदुवाच ह ॥९६॥ अर्बुदे पर्वते सेनां कल्पयस्व सुदुर्धराम् ॥ हस्त्यश्वक लिपतां भीमां रथपत्तिसमाकुलाम् ॥ ९७ ॥ ततोऽसौ कल्पयामास चतुरंगां वरूथिनीम् ॥ पताकाच्छत्रशबलां वादित्रारावभूषिताम् ॥ ९८ ॥ ततो द्विपाश्च संनद्धा दृश्यंतेऽधिष्ठिता भटैः ॥ इतश्चेतश्च धावन्तः सपक्षाः पर्वता इव ॥ ९९ ॥ अश्वाश्चैवाप्यकल्माषा वायुवेगाः सुवर्चसः ॥ अंगत्रा णसमायुक्ताः शतशोऽथ सहस्रशः ॥ १०० ॥ विमानप्रतिमाकारा रथास्तेन प्रकल्पिताः ॥ किंकिणीजालसद्घंटापताकाभिरलंकृताः ॥ १०१ ॥ पत्तयश्च महाकाया महेष्वासा महाबलाः ॥ असिचर्मधराश्चान्ये प्रासपट्टिशपाणयः ॥ १०२ ॥ लक्षमेकं मतंगानां रथानां त्रिगुणं ततः ॥ अश्वा दशगुणा राजन्नसंख्याताः पदातयः ॥ १०३ ॥ ततश्चार्बुदमासाद्य वेष्टयित्वा स दूरतः ॥ संमितैः सचिवैः सार्धं तदंतिकमुपाद्रवत् ॥ १०४ ॥ ध्यानस्थां वीक्ष्य तां देवीं कन्दर्प्पशरपीडितः ॥ ततोऽब्रवीत्स तां वाक्यं विनयेन समन्वितः ॥ १०५ ॥ श्रुत्वा तवेदृशं रूपमहं प्राप्तो वरानने ॥ गांधर्वेण विवाहेन तस्माद्वरय मां द्रुतम् ॥ १०६ ॥ षष्टिभार्यासहस्राणि मम संति शुचिस्मिते ॥ कृत्वा मां दर्पितं कांतं तासां त्वं स्वामिनी भव ॥ ॥ १०७ ॥ अनर्हं ते तपो बाले भुंक्ष्व भोगान्यथेप्सितान् ॥ त्रैलोक्यस्वामिनी भूत्वा मया सार्धमहर्निशम् ॥१०८॥ एवमुक्ताऽपि सा तेन नोत्तरं प्रत्यभाषत ॥ ततः कामसमाविष्टस्तदंतिकमुपाययौ ॥१०९॥ ततस्तं लोलुपं दृष्ट्वा सा देवी कोपसंयुता ॥ अस्मरद्वाहनं सिंहं समायातः स साऽऽरुहत् ॥ ११० ॥ अब्रवीत्परुषं वाक्यं गच्छगच्छेति चासकृत् ॥ नो चेत्त्वां च वधिष्यामि स्थानेऽस्मिन्दानवाधम ॥ १११ ॥ अथाऽसौ सचिवैः सार्द्धं समंतात्पर्यवेष्टयत् ॥ प्रग्रहार्थं तु तां देवीं कामबाणप्रपीडितः ॥ ११२ ॥ ततो जहास सा देवी सशब्दं परमेश्वरी ॥ तस्मादहर्निशं सार्द्धं निष्क्रांताः पुरुषा घनाः ॥ ११३ ॥ सुसन्नद्धाः सशस्त्राश्च रोषेण महताऽन्विताः ॥ ततस्तानब्रवीद्देवी पापोऽयं वध्यतामिति ॥ ११४ ॥ ततस्ते सहिताः सर्वे महिषं समुपाद्रवन् ॥ तिष्ठतिष्ठेति जल्पन्तो मुंचन्तोऽस्त्राणि भूरिशः ॥ ११५ ॥ ततः समभवद्युद्धं गणानां दानवैः सह ॥ ततस्ते



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





सचिवाः सर्वे वैवस्वतगृहं गताः ॥ ११६ ॥ अथाऽसौ महिषो रुष्टः सचिवैर्विनिपातितैः ॥ स्वसैन्यमानयामास तस्मिन्पर्वतरोधसि ॥ ११७ ॥
रथप्रवरमारुह्य सारथिं समभाषत ॥ नय मां सारथे तूर्णं यत्र साऽऽस्ते व्यवस्थिता ॥ ११८ ॥ हत्वैनामद्य यास्यामि पारं रोषस्य दुस्तरम् ॥ एव
मुक्तस्ततो राजन्प्रेरयामास सारथिः ॥ ११९ ॥ रथं तेनैव मार्गेण यत्र सा तिष्ठते ध्रुवम् ॥ एतस्मिन्नेव काले तु तत्रोत्पाताः सुदारुणाः ॥ १२० ॥
बहवस्तेन मार्गेण येनासौ प्रस्थितो नृप ॥ सम्मुखः प्रववौ वातो रूक्षः कर्करसंयुतः ॥ १२१ ॥ पपात महती चोल्का निहत्य रविमंडलम् ॥ अप
सव्यं मृगाश्चक्रुस्तस्य मार्गे नृपोत्तम ॥ १२२ ॥ उपविष्टास्तथा वांता बहुमूत्रं प्रसुस्रुवुः ॥ रथध्वजे समाविष्टो गृध्रः शब्दमथाकरोत् ॥ १२३ ॥
स तान्सर्वाननादृत्य महोत्पातान्सुदारुणान् ॥ प्रययौ सम्मुखस्तस्या देव्याः कोपपरायणः ॥ १२४ ॥ विमुंचंश्च शरान्नादांस्तिष्ठतिष्ठेति
च ब्रुवन् ॥ न कश्चिद्दृश्यते तत्र तेषां मध्ये नृपोत्तम ॥ १२५ ॥ महिषं रोषसंयुक्तं यो वारयति संगरे ॥ तेन हत्वा गणगणान्कृतं रुधिरकर्दमम् ॥
॥ १२६ ॥ ततो देवी समासाद्य प्रोक्ता गर्वेण पार्थिव ॥ न त्वया संगरो भीरु नूनं कर्तुं ममोचितः ॥ १२७ ॥ न च बालिशि मे वीर्यं न सौभाग्यं
न वा धनम् ॥ न करोषि हि तेन त्वं मम वाक्यं कथञ्चन ॥ १२८ ॥ नूनं तत्त्वेन जानामि अवलिप्तासि भामिनि ॥ कुरुष्वाद्यापि मे वाक्यं भार्या
भव मम प्रिया ॥ १२९ ॥ स्त्रियं त्वां नोत्सहे हंतुं पौरुषे च व्यवस्थितः ॥ असकृन्निर्जितः संख्ये मया शक्रः सुरैः सह ॥ १३० ॥ त्रैलोक्ये नास्ति
मत्तुल्यः पुमान्कश्चिच्च बालिशि ॥ एवमुक्ता ततो देवी कोपेन महताऽन्विता ॥ १३१ ॥ प्रगृह्य सशरं चापं वाक्यमेतदुवाच ह ॥ नालापो युज्यते पाप
कर्तुं सह मम त्वया ॥ १३२ ॥ कुमार्याः कामयुक्तेन तथापि शृणु मे वचः ॥ न त्वया निर्जितः शक्रः स्ववीर्येण रणाजिरे ॥ १३३ ॥ पितामह
वरं देवा मन्यंते दानवाधम ॥ गौरवात्तस्य तेन त्वमात्मानं मन्यसेऽधिकम् ॥ १३४ ॥ मुक्त्वैकां कामिनीं पाप त्वं कृतः पद्मयोनिना ॥ अवध्यः
सर्वसत्त्वानां पुंसां जातो धरातले ॥ १३५ ॥ पितामहवरः सोऽत्र जयशीलोऽसि दानव ॥ यदि ते पौरुषं चास्ति तच्छीघ्रं संप्रदर्शय ॥ १३६ ॥
एषा त्वामिषुभिस्तीक्ष्णैर्नयामि यमसादनम् ॥ एवमुक्त्वा ततो देवी शरानष्टौ मुमोच ह ॥ १३७ ॥ चतुर्भिश्चतुरो वाहाननयद्यमसादनम् ॥ सारथे
श्च शिरः कायाच्छरेणकेन चाक्षिपत् ॥ १३८ ॥ ध्वजं चिच्छेद चैकेन ततोऽन्येन हृदि क्षतः ॥ स गात्रविद्धो व्यथितो ध्वजयष्टिं समाश्रितः ॥
॥ १३९ ॥ मूर्छया सहितो राजन्किंचित्कालमधोमुखः ॥ ततः सचेतनो भूत्वा मुमोच निशिताञ्छरान् ॥ १४० ॥ देवी सखीसमायुक्ता सर्वदेशे
ष्वताडयत् ॥ ततः क्षुरप्रबाणेन धनुस्तस्य द्विधाऽकरोत् ॥ १४१ ॥ छिन्नधन्वा ततो दैत्यश्चर्मखड्गसमन्वितः ॥ विद्राव्य सहसा देवीं तिष्ठतिष्ठेति



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चाब्रवीत् ॥ १४२ ॥ तस्य चापततस्तूर्णं खड्गं द्वाभ्यां ह्यकृन्तयत् ॥ शराभ्यामर्धबाणेन प्रहस्य प्रासमेव च ॥ १४३ ॥ विशस्त्रो विरथो राजन्स तदा दानवाधमः ॥ ततोऽस्मरच्छरान्भूप शस्त्राणि विविधानि च ॥ १४४ ॥ ब्रह्मास्त्रं मनसि ध्यायंस्तूर्णं तस्यै मुमोच सः ॥ मुक्तेनास्त्रेण तस्मिंस्तु धूमवर्तिर्व्यजायत ॥ १४५ ॥ एतस्मिन्नेव काले तु सब्रह्मास्ते दिवौकसः ॥ परं भयमनुप्राप्ता दृष्ट्वा तस्य पराक्रमम् ॥ १४६ ॥ ततो देवी क्षणं ध्यात्वा तदस्त्रं पार्थिवोत्तम ॥ ब्रह्मास्त्रेणाहनत्तूर्णं ततो व्यर्थं व्यजायत ॥ १४७ ॥ ब्रह्मास्त्रे विफले जाते ह्याग्नेयं दानवोत्तमः ॥ प्रेषयामास तां क्रुद्धो ह्यहनद्वारुणेन सा ॥ १४८ ॥ एवं नानाप्रकाराणि तेन मुक्तानि सा तदा ॥ अस्त्राणि विफलान्येव चक्रे देवी सहस्रशः ॥ १४९ ॥ एवं निःशेषितास्त्रोऽसौ दानवो बलवत्तरः ॥ चकार परमां मायां दिव्यैरस्त्रैः सुरेश्वरी ॥ १५० ॥ व्यक्षिपच्च महाकायं महिषं पर्वताकृतिम् ॥ दीर्घतीक्ष्णविषाणाभ्यां युक्तमंजनसंनिभम् ॥ १५१ ॥ सिंहस्कंधं च सा देवी ततस्तमध्यरोहत ॥ खड्गेन तीक्ष्णेन शिरो देवी तस्य न्यकृंतत ॥ १५२ ॥ शूलेन भेदयामास पृष्ठदेशे सुरेश्वरी ॥ ततः कलेवरात्तस्मान्निश्चक्राम महान्पुमान् ॥ १५३ ॥ चर्मखड्गधरो रौद्रस्तिष्ठतिष्ठेति चाब्रवीत् ॥ तमप्येवं गृहीत्वा तत्केशपाशे सुरेश्वरी ॥ १५४ ॥ निस्त्रिंशेनाहनत्प्रोच्चैः स च प्राणैर्व्ययुज्यत ॥ दानवः पार्थिवश्रेष्ठ पार्श्वे सिंहविदारिते ॥ १५५ ॥ ततो जघान भूयोऽपि दानवान्सा रुषान्विता ॥ हतशेषाश्च ये दैत्या निर्भिद्य धरणीतलम् ॥ १५६ ॥ प्रविष्टा भयसंत्रस्ताः पातालं जीवितैषिणः ॥ ततो देवगणाः सर्वे वसवो मरुतोऽश्विनौ ॥१५७॥ विश्वेदेवास्तथा साध्या रुद्रा गुह्यककिन्नराः ॥ आदित्याः शक्रसंयुक्ताः समेत्य परमेश्वरीम् ॥ १५८ ॥ समंताद्दिव्यपुष्पैश्च तां देवीं समवाकिरन् ॥ स्तुवंतो विविधैः स्तोत्रैर्नमंतो भक्तितत्पराः ॥ १५९ ॥ युक्तं कृतं महेशानि यद्धतः पापकृत्तमः ॥ त्रैलोक्यं सकलं ध्वस्तं पापेनानेन सुंदरि ॥ १६० ॥ त्वया दत्तं पुना राज्यं वासवस्य त्रिविष्टपे ॥ तस्माद्वरय भद्रं ते वरं यन्मनसीप्सितम् ॥ सर्वे देवाः प्रसन्नास्ते प्रदास्यंति न संशयः ॥ १६१ ॥ ॥ देव्युवाच ॥ ॥ यदि देवाः प्रसन्ना मे यदि देयो वरो मम ॥ आश्रमोऽत्रैव मे पुण्यो जायतां ख्यातिसंयुतः ॥ १६२ ॥ अस्मिंश्चाहं सदा देवाः स्थास्यामि वरपर्वते ॥ १६३ ॥ ॥ ब्रह्मोवाच ॥ ॥ रूपेणानेन देवेशि ये त्वां द्रक्ष्यंति मानवाः ॥ आश्रमेऽत्र महापुण्ये ते यास्यंति परां गतिम् ॥१६४॥ ब्रह्मज्ञानसमायुक्तास्ते भविष्यंति मानवाः ॥ १६५ ॥ यस्माच्चंडं कृतं कर्म त्वया दानवसूदनात् ॥ तस्मात्त्वं चंडिकानाम लोके ख्यातिं गमिष्यसि ॥ १६६ ॥ तव नाम्ना तथा ख्यात आश्रमोऽयं भविष्यति ॥१६७॥ येऽत्र कृष्ण

१ सब्रह्माः—ब्रह्मणा सहिताः—इत्यर्थः । आर्षोऽसमासांतः । २ चण्डम्—प्रचण्डम्—अतिमहत्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



चतुर्दश्यामाश्विने मासि शोभने ॥ पिंडदानं करिष्यंति स्नानं कृत्वा समाहिताः ॥ १६८ ॥ गयाश्राद्धफलं कृत्स्नं तेषां देवि भविष्यति ॥ त्वद्दर्शना
त्तथा मुक्तिः पातकस्य भविष्यति ॥ १६९ ॥ ॥ कृष्ण उवाच ॥ ॥ एकरात्रिं भविष्यंति येऽत्र श्रद्धासमन्विताः ॥ उपवासपरास्तेषां पापं यास्यति
संक्षयम् ॥ १७० ॥ पुत्रहीनश्च यो मर्त्यो नारी वापि समाहिता ॥ तन्मनाः पिंडदानं वै तथा स्नानं करिष्यति ॥ अपुत्रो लभते शीघ्रं सुपुत्रं नात्र
संशयः ॥ १७१ ॥ ॥ इन्द्र उवाच ॥ ॥ भ्रष्टराज्यो नृपो योऽत्र स्नानं दानं करिष्यति ॥ सर्वशत्रुक्षयस्तस्य राज्यावाप्तिर्भविष्यति ॥ १७२ ॥
॥ ॥ अग्निरुवाच ॥ ॥ अत्रागत्य शुचिः श्राद्धं यः करिष्यति मानवः ॥ आत्मवित्तानुसारेण तस्य यज्ञफलं भवेत् ॥१७३॥ ॥ यम उवाच ॥ ॥ अत्र
स्नात्वा तिलान्यस्तु ब्राह्मणेभ्यः प्रदास्यति ॥ अल्पमृत्युभयं तस्य न कदाचिद्भविष्यति ॥१७४॥ ॥ राक्षसा ऊचुः ॥ ॥ पिंडदानं नरा येऽत्र करिष्यं
ति तवाऽऽश्रमे ॥ प्रेतोत्थं न भयं तस्य देवि क्वापि भविष्यति ॥१७५॥ ॥ वरुण उवाच ॥ ॥ स्नानार्थं ब्राह्मणेंद्राणां योऽत्र तोयं प्रदास्यति ॥ विम
लस्तु सदा भावि इह लोके परत्र च ॥ १७६ ॥ ॥ वायुरुवाच ॥ ॥ विलेपनानि शुभ्राणि सुगंधानि विशेषतः ॥ योत्र दास्यति विप्रेभ्यो नीरोगः
स भविष्यति ॥ १७७ ॥ ॥ धनद उवाच ॥ ॥ योऽत्र वित्तं यथाशक्त्या ब्राह्मणेभ्यः प्रदास्यति ॥ न भविष्यति लोके स वित्तहीनः कथंचन ॥
॥ १७८ ॥ ॥ ईश्वर उवाच ॥ ॥ योऽत्र व्रतपरो भूत्वा चातुर्मास्यं वसिष्यति ॥ इह लोके परे चैव तस्य भावि सदा सुखम् ॥ १७९ ॥
॥ ॥ वसव ऊचुः ॥ ॥ त्रिरात्रं यो नरः सम्यगुपवासं करिष्यति ॥ आजन्ममरणात्पापान्मुक्तः स च भविष्यति ॥१८०॥ ॥ आदित्य उवाच ॥ ॥
अत्राश्रमपदे पुण्ये ये नरा भक्तिसंयुताः ॥ छत्रोपानत्प्रदातारस्तेषां लोकाः सनातनाः ॥ १८१ ॥ ॥ अश्विनावूचतुः ॥ ॥ मिष्टान्नं श्रद्धयो
पेतो ब्राह्मणाय प्रदास्यति ॥ योऽत्र तस्य परा प्रीतिर्भविष्यत्यविनाशिनी ॥ १८२ ॥ ॥ तीर्थान्यूचुः ॥ ॥ अद्यप्रभृति सर्वेषां तीर्थानामिह
संस्थितिः ॥ भविष्यति विशेषेण ह्याश्रमे लोकविश्रुते ॥१८३॥ कृष्णपक्षे चतुर्दश्यामाश्विने मासि भक्तितः ॥ उपवासपरो भूत्वा योऽत्र स्नानं करि
ष्यति ॥ सर्वेषामेव तीर्थानां स फलं हि लभिष्यति ॥ १८४ ॥ ॥ गंधर्वा ऊचुः ॥ ॥ गीतवाद्यानि यश्चात्र प्रकरिष्यति मानवः ॥ सप्तजन्मां
तराण्येव रूपवान्स भविष्यति ॥ १८५ ॥ ॥ ऋषय ऊचुः ॥ ॥ आश्रमेऽस्मिंस्त्रिरात्रं य उपवासं करिष्यति ॥ चांद्रायणसहस्रस्य फलं तस्य
भविष्यति ॥ १८६ ॥ ॥ पुलस्त्य उवाच ॥ ॥ एवं सर्वे वरान्दत्त्वा देव्यै देवा नृपोत्तम ॥ तदाज्ञया दिवं जग्मुर्देवी तत्रैव संस्थिता ॥ १८७ ॥
अथ मर्त्या दिवं जग्मुर्दृष्ट्वा देवीं तदाश्रमे ॥ अनायासेन संपूर्णस्ततो मर्त्यैस्त्रिविष्टपः ॥ १८८ ॥ अग्निष्टोमादिकाः सर्वाः क्रिया नष्टा धरातले ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्मक्रियास्तथा चान्या मुक्त्वा देव्याः प्रपूजनम् ॥ १८९ ॥ ततो भीतः सहस्राक्षः संमंत्र्य गुरुणा सह ॥ आह्वयामास वेगेन कामं क्रोधं भयं मदम् ॥ १९० ॥ व्यामोहं गृहपुत्रोत्थं तृष्णामायासमन्वितम् ॥ गत्वा यूयं द्रुतं मर्त्ये स्थातुकामान्नरान्स्त्रियः ॥१९१॥ चंडिकायतने पुण्ये सेवध्वं हि ममाज्ञया ॥ विशेषेणाश्विने मासि कृष्णपक्षेऽन्त्यवासरे ॥ १९२ ॥ एवमुक्तास्ततः सर्वे कामाद्यास्ते द्रुतं ययुः ॥ मर्त्यलोके महाराज रक्षां चक्रुश्च सर्वशः ॥ १९३ ॥ एवं ज्ञात्वा द्रुतं गच्छ तत्र पार्थिवसत्तम ॥ यदीच्छसि परं श्रेय इह लोके परत्र च ॥ १९४ ॥ यो याति चंडिकां द्रष्टुमर्बुदं प्रति पार्थिव ॥ नृत्यंति पितरस्तस्य गर्जंति च पितामहाः ॥ १९५ ॥ तारयिष्यति नः सर्वान्स पुत्रो य इहाश्रमे ॥ चंडिकायाः प्रगत्वाऽथ कुर्या च्छ्राद्धं समाहितः ॥ १९६ ॥ एकया लभ्यते राज्यं स्वर्गश्चैव द्वितीयया ॥ तृतीयया भवेन्मोक्षो यात्रया तत्र पार्थिव ॥ १९७ ॥ तस्मात्सर्वप्रयत्नेन यात्रां तत्र समाचरेत् ॥ अर्बुदे पर्वतश्रेष्ठे सर्वतीर्थमये शुभे ॥ १९८ ॥ तत्र श्लोकः पुरा गीतो नारदेन महर्षिणा ॥ स्नात्वा तत्राश्रमे पुण्ये बहुविप्र समागमे ॥ ११९ ॥ पुनंत्येवान्यतीर्थानि स्नानदानैरसंशयम् ॥ अर्बुदालोकनादेव विपाप्मा तत्र जायते ॥ २०० ॥ यः शृणोति सदाख्यानमेत च्छ्रद्धासमन्वितः ॥ स प्राप्नोति नरश्रेष्ठ कामान्मनसि वांछितान् ॥ २०१ ॥ यस्यैतत्तिष्ठते गेहे लिखितं पुस्तकं नृप ॥ तस्यापि वांछिताः कामाः संपद्यंते दिनेदिने ॥ २०२ ॥ पठति श्रद्धयोपेतो यो वा भूमिपते नरः ॥ सोऽपि यात्राफलं राजल्लँभते पुरुषोत्तमः ॥ २०३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखण्डे चंडिकाश्रमोत्पत्तिमाहात्म्यवर्णनंनाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥

॥ ॥ पुलस्त्य उवाच ॥ ॥ नागह्रदं ततो गच्छेत्तीर्थं पापप्रणाशनम् ॥ यत्र नागैस्तपस्तप्तं रम्ये पर्वतरोधसि ॥ १ ॥ कद्रूशापं पुरा श्रुत्वा नागाः सर्वे भयातुराः ॥ पप्रच्छुर्नागराजानं शेषं प्रणतकन्धराः ॥ २ ॥ मातृशापेन संतप्ता वयं पन्नगसत्तम ॥ किं कुर्मः क्व च गच्छामः शापमोक्षो भवेत्कथम् ॥ ३ ॥ ॥ शेष उवाच ॥ ॥ प्रसादिता मया माता शापमुक्तिकृते पुरा ॥ तयोक्तं ये तपोयुक्ता धर्मात्मानः सुसं यताः ॥ ४ ॥ न दहिष्यति तान्वह्निर्यज्ञे पारिक्षितस्य हि ॥ तस्माद्गत्वार्बुदंनाम पर्वतं धरणीतले ॥ ५ ॥ तत्र यूयं तपोयुक्ता भवध्वं सुसमा हिताः ॥ यत्रास्ते सा स्वयं देवी चंडिका कामरूपिणी ॥ ६ ॥ यस्याः संकीर्त्तनेनापि नश्यंति विपदो ध्रुवम् ॥ आराधयध्वमनिशं तां देवीं मम वाक्यतः ॥ ७ ॥ तस्याः प्रसादतः सर्वे भविष्यथ गतज्वराः ॥ एतमेवात्र पश्यामि ह्युपायं नागसत्तमाः ॥ दैवो वा मानुषो वाऽपि नान्यो

१ चण्डिकायतने—चण्डिकाश्रमे—इत्यर्थः । २ एतत्—चण्डिकाश्रमोपाख्यानोपेतार्बुदखण्डपुस्तकम्—इत्यर्थः । ३ अन्यः—उपायः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

वो मुक्तिकारकः ॥ ८ ॥ ॥ पुलस्त्य उवाच ॥ ॥ एवमुक्तास्ततो नागा नागराजेन पार्थिव ॥ प्रणम्य तं ततो जग्मुरर्बुदं पर्वतं प्रति ॥ ९ ॥ ते भित्त्वा धरणीपृष्ठं पर्वते तदनन्तरम् ॥ निजग्मुर्बिलमार्गेण कृत्वा श्वभ्रं सुविस्तरम् ॥ १० ॥ ततो धृतव्रताः सर्वे देवीभक्तिपरायणाः ॥ वसंति भक्तिसंयुक्ताश्चण्डिकाराधनाय ते ॥ ११ ॥ तस्थुस्तत्र सदा होमं कुर्वन्तो जाप्यमुत्तमम् ॥ एकाहारा निराहारा वायुभक्षास्तथा परे ॥ १२ ॥ दन्तोलूखलिनः केचिदश्मकुट्टास्तथा परे ॥ पञ्चाग्निसाधकाश्चान्ये सद्यः[1] प्रक्षालकास्तथा ॥ १३ ॥ गीतं वाद्यं तथा चक्रुरन्ये देवाः पुरस्तदा ॥ अनन्यश्रद्धयोपेतांस्तान्दृष्ट्वा पन्नगोत्तमान् ॥ १४ ॥ ततो देवी सुसन्तुष्टा वाक्यमेतदुवाच ह ॥ १५ ॥ ॥ ॥ देव्युवाच ॥ ॥ परितुष्टास्मि वो वत्साः किमर्थं तप्यते तपः ॥ वरयध्वं वरं मत्तो यः स्थितो भवतां हृदि ॥ १६ ॥ ॥ नागा ऊचुः ॥ ॥ मातृशापेन संतप्ता वयं देवि निराश्रयाः ॥ नागराजसमादेशाच्छरणं त्वां समागताः ॥ १७ ॥ सा त्वं रक्ष भयात्तस्माच्छापवह्निसमुद्भवात् ॥ वयं मात्रा पुरा शप्ताः कस्मिंश्चित्कारणान्तरे ॥ पारिक्षितस्य यज्ञे वः पावको भक्षयिष्यति ॥ १८ ॥ ॥ देव्युवाच ॥ ॥ यावत्तस्य भवेद्यज्ञस्तावद्यूयं ममान्तिके ॥ संतिष्ठत विना भीत्या भोगान्भुङ्ध्वं सुपुष्कलान् ॥ १९ ॥ समाप्ते च क्रतौ भूयो गंतारः स्वं निकेतनम् ॥ युष्माभिर्भेदितं यस्मादेतत्पर्वतकन्दरम् ॥ २० ॥ नागह्रदं तु तत्तीर्थमेतद्भावि धरातले ॥ अत्र यः श्रावणे मासि पञ्चम्यां भक्तितत्परः ॥ २१ ॥ करिष्यति नरः स्नानं तस्य नाहिकृतं भयम् ॥ भविष्यति पुनः श्राद्धात्पितॄन्संतारयिष्यति ॥ २२ ॥ ये भोगा भूतले ख्याता ये दिव्या ये च मानुषाः ॥ तान्सर्वान्स नरो नित्यं लभिष्यति न संशयः ॥ २३ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो हृष्टा बभूवुस्ते मुक्त्वा तद्दारुणं भयम् ॥ देव्याः शरणमापन्नास्तस्थुस्तत्र नगोत्तमे ॥ २४ ॥ ततः कालेन महता सत्रे पारिक्षितस्य च ॥ निर्वृत्ते ते तदा जग्मुः सुनिर्वृत्ता रसातलम् ॥ २५ ॥ देव्या चैवाभ्यनुज्ञाताः प्रणिपत्य मुहुर्मुहुः ॥ कृच्छ्रात्पार्थिवशार्दूल तद्भक्त्या निश्चलीकृताः ॥ २६ ॥ अद्यापि कृष्णपंचम्यां श्रावणे मासि पार्थिव ॥ सान्निध्यं तत्र कुर्वंति देवीदर्शनलालसाः ॥ २७ ॥ तस्मात्सर्वप्रयत्नेन श्राद्धं तत्र समाचरेत् ॥ स्नानं च पार्थिवश्रेष्ठ य इच्छेच्छ्रेय आत्मनः ॥ २८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखण्डे नागोद्भवतीर्थमाहात्म्यवर्णनंनाम सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ कुंडं तु शिवलिंगाख्यं ततो गच्छेन्महीपते ॥ यत्र सा जाह्नवी गुप्ता



१ सद्यः प्रक्षालकाः—लब्धे धने शीघ्रमेव धार्मिके कर्मणि तद्विनियोगकर्तारः--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिष्ठते भूपसत्तम ॥ १ ॥ तस्यां स्नातो नरः सम्यक्सर्वतीर्थफलं लभेत् ॥ मुच्यते पातकात्कृत्स्नादाजन्ममरणांतिकात् ॥ २ ॥ ॥ ययातिरुवाच ॥ ॥ किमर्थं तत्र सा गुप्ता जाह्नवी तिष्ठते विभो ॥ कस्मिन्काले समायाता परं कौतूहलं हि मे ॥ ३ ॥ ॥ पुलस्त्य उवाच ॥ ॥ यदा प्रसादितो देवैर्भगवान्वृषभध्वजः ॥ अर्बुदेऽस्मिन्सदा स्थेयमचलेन त्वया विभो ॥ ४ ॥ तत्र संस्थापिते लिंगे स्वयं देवेन शंभुना ॥ यत्पातितं पुरा लिंगं वालखिल्यैर्महर्षिभिः ॥ ५ ॥ अतिकोपसमायुक्तैः कस्मिंश्चित्कारणांतरे ॥ तदा देवेन प्रतिज्ञातं सर्वेषां त्रिदिवौकसाम् ॥ ६ ॥ अचले तु मयाऽत्रैव स्थातव्यं नात्र संशयः ॥ ततः कालेन महता वसतस्तस्य तत्र च ॥ ७ ॥ अचलेश्वररूपस्य गंगा चित्ते व्यजायत ॥ कथं नित्यं तया सार्द्धं भविष्यति समागमः ॥ ८ ॥ अथ जानाति नो गौरी मानिनी परमेश्वरी ॥ तस्यैवं चिन्तयानस्य बहुशो नृपसत्तम ॥ ९ ॥ उपायं सुमहद्ध्यात्वा जाह्नवीसंगसंभवम् ॥ तेनादिष्टा गणाः सर्वे नंदिभृङ्गिपुरःसराः ॥ १० ॥ अभिप्रायोऽस्ति मे कश्चिज्जलाश्रयव्रतोद्भवः ॥ क्रियतामुत्तमं कुण्डमस्मिन्पर्वतरोधसि ॥ ११ ॥ तत्राहं जलमध्यस्थः स्थास्यामि जलतत्परः ॥ तच्छुत्वा त्वरितं चक्रुर्गणाः कुण्डमनेकशः ॥ १२ ॥ स्वच्छोदकसमाकीर्णं सुतीर्थं सुसुखावहम् ॥ ततो गौरीमनुज्ञाप्य जाह्नवीसंगलालसः ॥ १३ ॥ व्रतव्याजेन देवेशो विवेश तदनन्तरम् ॥ चिन्तयामास तत्रस्थो गंगां त्रैलोक्यपाविनीम् ॥ १४ ॥ सा ध्याता तत्क्षणात्तत्र शिवेन सह संगता ॥ एवं स भगवांस्तत्र जाह्नवीं भजते सदा ॥ १५ ॥ व्रतव्याजेन राजेन्द्र न तु गौरी व्यजानत ॥ कस्यचित्त्वथ कालस्य नारदो भगवान्मुनिः ॥ कैवल्यज्ञानसंपन्नस्तत्रायातः परिभ्रमन्[1] ॥ १६ ॥ स तु दृष्ट्वा महादेवं जलस्थं व्रतधारिणम् ॥ कामजैरिंगितैर्युक्तं तत्राऽसौ विस्मयान्वितः ॥ १७ ॥ वक्त्रनेत्रविकारोऽयं किमस्य व्रतधारिणः ॥ ईदृक्कामसमायुक्तस्ततो ध्यानस्थितो मुनि ॥ १८ ॥ अथाऽपश्यद्ध्यानदृष्ट्या गंगासक्तं महेश्वरम् ॥ गौर्या भयेन सव्याजं ततो विस्मयमागतः ॥ १९ ॥ तदा स कथयामास सर्वं हरविचेष्टितम् ॥ २० ॥ ततो देवी त्वरायुक्ता ययौ यत्र महेश्वरः ॥ आताम्रनयना रोषाद्वेपमाना मुहुर्मुहुः ॥ २१ ॥ तां दृष्ट्वा कोपसंयुक्तां समायातां महेश्वरीम् ॥ उवाच जाह्नवी भीता ज्ञात्वा दिव्येन चक्षुषा ॥ २२ ॥ आवयोः संगमे देवी नारदेन निवेदिता ॥ सेयं रुष्टा समायाति कुरुष्व यदनन्तरम् ॥ २३ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ कर्त्तव्यं जाह्नवि श्रेयः पुरो गत्वा नगात्मजाम् ॥ अत्यर्थं मानिनी ह्येषा साम्ना च वशवर्तिनी ॥ २४ ॥ तत्क्षणाज्जायते साध्वी तस्मात्सामपरा भव ॥ नो चेच्छापं मया

१ श्रोतुम्–इति शेषः । २ नाहं मन्ये समागमः–इ० पा० । तस्यार्थो नावगम्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सार्धं तत्र दास्यत्यसंशयम् ॥ २५ ॥ एवमुक्ता च रुद्रेण जाह्नवी नृपसत्तम ॥ कुण्डान्निर्गत्य सा गंगा सम्मुखं प्रययौ तदा ॥ २६ ॥ प्रत्युद्ययौ सलज्जा च कृतांजलिपुरःसरा ॥ प्रणम्य शिरसा चेयं ततः प्राह स्वलंकृता ॥ २७ ॥ पुराऽहं तव कांतेन निपतन्ती नभस्तलात् ॥ धृता देवि तवा प्येतद्विदितं नृपतेः कृते ॥ २८ ॥ भगीरथाभिधानस्य ततः स्नेहो व्यवर्धत ॥ आवयोस्तव भीत्या च नाभूत्क्वापि समागमः ॥ २९ ॥ अधुना तव वाक्येन जानेऽहं न सुरेश्वरि ॥ समाहूताऽस्मि रुद्रेण किं वा स्वच्छन्दतः शुभे ॥ ३० ॥ त्रैलोक्यस्य प्रभुरयं तन्निष्क्रम्य कथञ्चन ॥ तस्मादत्रैव संप्राप्ता सत्यमेतन्मयोदितम् ॥ ३१ ॥ ॥ पुलस्त्य उवाच ॥ ॥ तस्यास्तद्वचनं श्रुत्वा ततो देवी प्रहर्षिता ॥ प्रोवाच मधुरं वाक्यं सत्यमेतत्त्व योदितम् ॥ ३२ ॥ तस्माद्वरय भद्रं ते वरं मत्तो यथेप्सितम् ॥ मुक्त्वैकं पतिधर्म्मंत्वे मम कांतं महेश्वरम् ॥ ३३ ॥ ॥ गंगोवाच ॥ ॥ अपि दौ र्भाग्ययुक्ताऽहं भार्या जाताऽस्मि शूलिनः ॥ तस्मादेकं दिनं देहि क्रीडनार्थमनेन तु ॥ ३४ ॥ चैत्रशुक्लत्रयोदश्यामहोरात्रं सुरेश्वरि ॥ शिवकुंडं तथास्त्वेतन्मया यस्मात्समावृतम् ॥ ३५ ॥ शिवगंगाभिधानं च तस्मात्कुण्डं धरातले ॥ ख्यातिं यातु प्रसादेन तव पर्वतनंदिनि ॥ ३६ ॥ ॥ पुल स्त्य उवाच ॥ ॥ एवमस्त्विति सा देवी प्रोच्य गंगां महानदीम् ॥ ततो विसर्जयामास तामालिंग्य मुहुर्मुहुः ॥ ३७ ॥ गतायामथ गंगायामधोवक्त्रं सुलज्जितम् ॥ पाणौ गृह्य ययौ रुद्रं भ्रममाणा गृहं प्रति ॥३८॥ एवमेतत्पुरावृत्तं तस्मिन्कुण्डे नराधिप ॥ तस्मात्सर्वप्रयत्नेन चतुर्दश्यां समाहितः ॥ ३९ ॥ शुक्लायां चैत्रमासे तु स्नानं तत्र समाचरेत् ॥ सांनिध्याद्देवदेवस्य गंगायाश्च नृपोत्तम ॥ ४० ॥ यत्र संक्षयमायाति सर्वं तत्राशुभं कृतम् ॥ तत्र यो वृषभं दद्याद्ब्राह्मणाय नृपोत्तम ॥ तद्रोमसंख्यया स्वर्गे स पुमान्वसति ध्रुवम् ॥४१॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखंडे शिवगंगाकुण्डोत्पत्तिमाहात्म्यवर्णनंनामाष्टात्रिंशोऽध्यायः ॥ ३८ ॥ ॥छ॥ ॥ ययातिरुवाच ॥ ॥ यत्त्वया कीर्तितं ब्रह्मन्पूर्वं देवैः प्रसादितः ॥ लिंगं संस्थापयामास स्थिररूपो महेश्वरः ॥ १ ॥ कस्मात्तत्पातितं लिंगं वालखिल्यैर्महात्मभिः ॥ कस्मात्तत्रा चलो जातो देवदेवो महेश्वरः ॥ २ ॥ एतन्मे कौतुकं सर्वं यथावद्वक्तुमर्हसि ॥ तस्मिन्दृष्टे च किं पुण्यं नराणां तत्र जायते ॥ ३ ॥ ॥ पुलस्त्य उवाच ॥ ॥ महेश्वरस्य माहात्म्यं शृणु पार्थिवसत्तम ॥ अत्र ते कीर्तयिष्यामि पूर्ववृत्तं कथांतरम् ॥ ४ ॥ यदा पञ्चत्वमापन्ना सती सत्यपराक्रमा ॥ अपमानेन दक्षस्य यज्ञे न च निमंत्रिता ॥ ५ ॥ तदा कामो द्रुतं गृह्य पुष्पचापं तमभ्यगात् ॥ कन्दर्प्पं सहसा दृष्ट्वा सन्धितेषुं सुदुर्जयम् ॥ ६ ॥ आपतन्तं भयात्तस्य प्रणष्टस्त्रिपुरांतकः ॥ स तदा भ्रममाणश्च इतश्चेतश्च पार्थिव ॥ ७ ॥ वालखिल्याश्रमं प्राप्तः पुण्यं सद्वृक्षशोभितम् ॥ स तत्र



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भगवांस्तेषां दारैर्दृष्टः सुरूपवान् ॥ ८ ॥ दिग्वासाः सुप्रियालापस्ततस्ताः काममोहिताः ॥ त्यक्त्वा पुत्रगृहाद्यं च सर्वास्तत्पृष्ठसंस्थिताः ॥ बभूवुश्चा
निशं राजन्मां भजस्वेति चाब्रुवन् ॥ ९ ॥ चक्रुरालिंगनं काश्चिच्चुम्बनं च तथापराः ॥ अन्यास्तस्य हि लिंगं तत्स्पृशंति च मुहुर्मुहुः ॥ १० ॥
स चापि भगवाञ्छम्भुर्निष्कामः परमेश्वरः ॥ जगद्व्याप्तिं समाश्रित्य सर्वप्राणिषु वर्तते ॥ ११ ॥ स चापि भगवाञ्छंभुस्तासां सरति प्राङ्मुखः ॥
भ्रांतस्तत्राश्रमे तेषां दारान्कामेन पीडयन् ॥ १२ ॥ अथ ते मुनयो दृष्ट्वा विकृतिं दारसंभवाम् ॥ अजानन्तो महादेवं रुष्टास्तस्य महात्मनः ॥
॥ १३ ॥ ददुः शापं सुसंतप्ताः कलत्रार्थे परंतप ॥ पततांपततां लिङ्गमेतत्ते पापकृत्तम ॥ १४ ॥ विडम्बयसि नो दारानजस्रं चास्य दर्शनात् ॥
ततश्चैवापतल्लिंगं तत्क्षणात्तत्पुरद्विषः ॥ १५ ॥ ब्रह्मवाक्येन राजर्षे चकम्पे वसुधा ततः ॥ शीर्णानि गिरिशृंगाणि चुक्षुभुर्मकरालयाः ॥
॥ १६ ॥ ततो देवगणाः सर्वे भयत्रस्ता नराधिप ॥ अकाले प्रलयं मत्वा त्रैलोक्ये पर्यवस्थितम् ॥ १७ ॥ ततः पितामहं जग्मु
स्तस्मै सर्वं न्यवेदयन् ॥ प्रलयस्येव चिह्नानि दृश्यन्ते परमेश्वर ॥ १८ ॥ किं निमित्तं सुरश्रेष्ठ न जानीमो वयं प्रभो ॥ तेषां तद्व
चनं श्रुत्वा चिरं ध्यात्वा पितामहः ॥ १९ ॥ अब्रवीत्पातितं लिंगं वालखिल्यैः पिनाकिनः ॥ तेनैते दारुणोत्पाताः संजाता भय
सूचकाः ॥ २० ॥ तस्मान्मया समायुक्ताः सर्वे तत्र दिवौकसः ॥ व्रजंतु येन तल्लिंगं स्थाने संस्थापयेच्छिवः ॥२१॥ यावन्नो जायते लोके प्रलयोऽ
कालसंभवः ॥ एवं संमंत्र्य ते सर्वे ततोऽर्बुदमुपाययुः ॥ २२ ॥ वालखिल्याश्रमे यत्र तल्लिंगं निपपात ह ॥ तुष्टुवुर्विविधैः सूक्तैर्वेदोक्तैर्विनया
न्विताः ॥ २३ ॥ ॥ देवा ऊचुः ॥ ॥ नमस्ते देवदेवेश भक्तानां चाभयंकर ॥ नमस्ते सर्ववासाय सर्वयज्ञमयाय च ॥ २४ ॥ सर्वेश्वराय
देवाय परमज्योतिषे नमः ॥ नमः स्थूलाय सूक्ष्माय ज्ञानगम्याय वेधसे ॥ २५ ॥ त्र्यंबकाय च भीमाय पिनाकवरपाणये ॥ त्वयि सर्वमिदं
प्रोतं सूत्रे मणिगणा इव ॥ २६ ॥ संसारे विबुधश्रेष्ठ जगत्स्थावरजंगमम् ॥ न तदस्ति त्रिलोकेऽस्मिन्सुसूक्ष्ममपि शंकर ॥ यत्त्वया न प्रभो व्याप्तं
सृष्टिसंहारकारणात् ॥ २७ ॥ पृथिव्यादीनि भूतानि त्वया सृष्टानि कामतः ॥ यास्यंति तानि भूयोऽपि तव काये जगत्पते ॥ २८ ॥ प्रसीद भगवं
स्तस्माल्लिंगमेतत्सुरेश्वर ॥ स्थाने स्थापय भद्रं ते यावन्न स्यात्प्रजाक्षयः ॥ २९ ॥ ॥ श्रीभगवानुवाच ॥ ॥ निर्विकारस्य मल्लिंगं वालखिल्यैः
प्रपातितम् ॥ कथं भूयः प्रगृह्णामि यावच्छुद्धिर्न जायते ॥ ३० ॥ शक्तोऽहं वालखिल्यानां निग्रहं कर्त्तुमञ्जसा ॥ किन्तु मे ब्राह्मणा मान्याः
पूज्याश्च सुरसत्तमाः ॥ ३१ ॥ अचलं लिंगमेतद्धि नोद्धर्त्तुं शक्यते विभो ॥ एक एवात्र निर्दिष्ट उपायो नापरः स्मृतः ॥ ३२ ॥ यदि मे त्वं पुरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



लिंगं पूजयेथाः पितामह ॥ ततो देवगणाः सर्वे ततो विप्रास्ततोऽपरे ॥ ३३ ॥ ततो वै शांतिमागच्छेज्जगत्स्थावरजंगमम् ॥ ३४ ॥ ॥ पुलस्त्य उवाच ॥ ॥ एवमुक्तः स भगवाञ्छंकरेण नृपोत्तम ॥ ततस्तं पूजयामास ब्रह्मा पूर्वं सुभक्तितः ॥ ३५ ॥ ब्रह्मणोऽनन्तरं विष्णुस्ततः शक्रस्ततोऽपरे ॥ वालखिल्यादयो विप्रा मन्त्रैश्च शतरुद्रियैः ॥ ३६ ॥ ततस्ते दारुणोत्पाता उपशांताश्च तत्क्षणात् ॥ अभवत्सुमुखो लोको वृत्तो[1] गन्धवहो मृदुः ॥ ३७ ॥ अथोवाच महादेवः सर्वांस्तांस्त्रिदशालयान् ॥ वृणुध्वं सुवरं सर्वे मत्तो यन्मनसीप्सितम् ॥ ३८ ॥ ॥ देवा ऊचुः ॥ ॥ तव लिंगस्य संस्पर्शादपि पापकृतो नराः ॥ स्वर्गं यास्यंति देवेश नाशं यास्यति किल्बिषम् ॥ व्रतदानानि सर्वाणि तीर्थयात्रायुतानि च ॥ ३९ ॥ तस्माद्वज्रेण देवेन्द्रस्तवैतल्लिंगमुत्तमम् ॥ छादयिष्यति सर्वत्र यदि त्वं मन्यसे प्रभो ॥ ४० ॥ ॥ श्रीभगवानुवाच ॥ ॥ अभिप्रायो ममाप्येष वर्त्तते हृदि पद्मज ॥ एवं करोतु देवेन्द्रः सर्वधर्मविवृद्धये ॥ ४१ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततः संछादयामास वज्रेण त्रिदशाधिपः ॥ तल्लिंगं सर्वमर्त्यानां यथाऽदृश्यं व्यजायत ॥ ४२ ॥ अद्यापि वज्रसंस्पर्शात्तत्सान्निध्यं गतो नरः ॥ आजन्ममरणात्पापान्मुच्यते नात्र संशयः ॥ ॥ ४३ ॥ माहात्म्यं कीर्तितं यस्मात्तल्लिंगे शंकरेण तु ॥ वज्रेणाच्छादितं चैव शक्रेणैव धरातले ॥ ४४ ॥ ततःप्रभृति लिंगस्य मर्त्ये पूजा व्यजायत ॥ पुरासीच्छंकरः[2] पूज्यो यथान्ये त्रिदशालयाः ॥ ४५ ॥ एवमेतत्पुरावृत्तमर्बुदे पर्वतोत्तमे ॥ लिंगस्य पतनात्पूजां यन्मां त्वं परिपृच्छसि ॥ ४६ ॥ फाल्गुनान्तचतुर्दश्यां नैवेद्यं नूतनैर्यवैः ॥ यो ददात्यचलेशाय स भूयो नेह जायते ॥ ४७ ॥ ब्राह्मणान्भोजयेद्यस्तु भक्त्या तस्मिन्नवैर्यवैः ॥ यवसंख्याप्रमाणानि युगानि दिवि मोदते ॥ ४८ ॥ तत्र दानं प्रशंसन्ति सक्तूनां मुनिसत्तमाः ॥ नूतनानां महाराज यतः प्रोक्तं पुरारिणा ॥ ४९ ॥ किं दानैर्विविधैर्दत्तैः किं यज्ञैश्च सुविस्तरैः ॥ किं तीर्थैर्विविधैर्होमैस्तपोभिः किं च कष्टदैः ॥ ५० ॥ फाल्गुनान्तचतुर्दश्यां सुमहेश्वरसन्निधौ ॥ धर्माण्येतानि[3] सर्वाणि कलां नार्हंति षोडशीम् ॥ ५१ ॥ शृणु राजन्पुरा वृत्तं तत्राश्चर्यं यदुत्तमम् ॥ कश्चित्पापसमाचारः कुष्ठी क्षामतनुर्नरः ॥ ५२ ॥ भिक्षार्थमागतस्तत्र लोकैरन्यैः समन्वितः ॥ तेन भिक्षार्जितं तत्र सक्तूनां कुडवं नृप ॥ ५३ ॥ ततो रोगपरिक्लेशाद्भोजनं न चकार सः ॥ दाघार्दितो[4] जले तस्मिन्स्नातो भक्तिविवर्जितः ॥ सक्तून्कृत्वोपधाने तान्स च सुप्तो निशागमे ॥ ५४ ॥ ततो निद्राभिभूतस्य सारमेयो



१ वृत्तो गन्धवहो मृदुः—गन्धवहः वायुः मृदुः सुस्पृश्यः वृत्तः जातः । २ शंकरः—मूर्त्तिमान्—महादेवः—इत्यर्थः । ३ धर्माणि—धर्माः—धर्मशब्दस्य नपुंसकत्वमार्षम्—"तानि धर्माणि प्रथमानि" इति श्रुतौ तथा दर्शनात् । ४ दाघार्दितः—उष्णपीडितः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जहार च ॥ भक्षयामास युक्तोऽन्यैः सारमेयैर्बुभुक्षितः ॥ ५५ ॥ अथासौ विस्मयाद्राजन्पंचत्वं समुपस्थितः ॥ ततो जातिस्मरो जातो विदर्भाधिपतेर्गृहे ॥ ५६ ॥ भीमोनाम नृपश्रेष्ठ दमयन्तीपिता हि यः ॥ तं प्रभावं हि विज्ञाय सक्तूनां तत्र पर्वते ॥ ५७ ॥ फाल्गुनांतचतुर्दश्यां वर्षे वर्षे जगाम सः ॥ कृत्वा चैवोपवासं तु रात्रौ जागरणं तथा ॥ ५८ ॥ अचलेश्वरसान्निध्ये ददौ सक्तूंस्ततो बहून् ॥ सहिरण्यान्द्विजेन्द्राणां पशुपक्षिमृगेषु च ॥ ५९ ॥ अथ ते मुनयः सर्वे गालवप्रमुखा नृप ॥ पप्रच्छुः कौतुकाविष्टाः सक्तुदानकृते नृपम् ॥ ६० ॥ ॥ ऋषय ऊचुः ॥ ॥ हस्त्यश्वरथदानानां शक्तिरस्ति तवाद्भुता ॥ कस्मात्सक्तून्प्रमुक्त्वा त्वं नान्यद्दातुमिहेच्छसि ॥ ६१ ॥ ॥ पुलस्त्य उवाच ॥ ॥ अथाऽसौ कथयामास पूर्वमेतत्समुद्भवम् ॥ सक्तुदानस्य माहात्म्यं मुनीनां भावितात्मनाम् ॥ ६२ ॥ पूर्वं भक्त्या विहीनस्य शुना वै सक्तवो हृताः ॥ तत्प्रभावादियं प्राप्तिर्मम जाता द्विजोत्तमाः ॥ ६३ ॥ सांप्रतं भक्तिदत्तानां किं स्याज्जानामि नो फलम् ॥ एतस्मात्कारणाद्दानं सक्तूनां प्रकरोम्यहम् ॥ तीर्थेऽस्मिन्भक्तिसंयुक्तः सत्येनात्मानमालभे ॥ ६४ ॥ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततस्ते मुनयो हृष्टाः साधुसाध्विति चाब्रुवन् ॥ चक्रुश्चैवात्मशक्त्या ते सक्तूनां दानमुत्तमम् ॥ ६५ ॥ एष प्रभावो राजर्षे सक्तुदानस्य कीर्त्तितः ॥ महेश्वरस्य माहात्म्यं सत्यं चापि प्रकीर्त्तितम् ॥ ६६ ॥ यश्चैतच्छृणुयाद्भक्त्या कथ्यमानं द्विजाननात् ॥ अहोरात्रकृतात्पापान्मुच्यते नात्र संशयः ॥ ६७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखंडे शिवलिंगमहेश्वरमाहात्म्यवर्णनपुरःसरसक्तुदानमाहात्म्यवर्णनंनामैकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततः कामेश्वरं गच्छेत्तत्र कामप्रतिष्ठितम् ॥ यस्मिन्दृष्टे सदा मर्त्यः सुरूपः सुप्रभो भवेत् ॥ १ ॥ ॥ ययातिरुवाच ॥ ॥ त्वया प्रोक्तं पुरा शंभुः कामबाणभयात्किल ॥ वालखिल्याश्रमं प्राप्तो यत्र लिंगं पपात ह ॥ २ ॥ स कथं पूजितस्तेन शंभुर्मे कौतुकं महत् ॥ वद सर्वं द्विजश्रेष्ठ कामेश्वरनिवेशनम् ॥ ३ ॥ ॥ पुलस्त्य उवाच ॥ ॥ मुक्तलिंगेऽपि देवेशे न स्मरस्तं मुमोच ह ॥ दर्शयन्नात्मनो बाणं तस्यासौ पृष्ठतः स्थितः ॥ ४ ॥ ततो वाराणसीं प्राप्तस्तद्भयात्त्रिपुरांतकः ॥ तत्राऽपि च तथा दृष्ट्वा धृतचापं मनोभवम् ॥५॥ ततः प्रयागमापन्नः केदारं च ततः परम् ॥ नैमिषं भद्रकर्णं च जंबूमार्गे त्रिपुष्करम् ॥६॥ गोकर्णं च प्रभासं च पुण्यं च कृमिजांगलम् ॥ गंगाद्वारं गयाशीर्षं कालाभीष्टं वटेश्वरम् ॥७॥ किं वा तेन बहूक्तेन तीर्थान्यायतनानि च ॥ असंख्यानि गतो देवः कामं च ददृशे तथा ॥ ८ ॥ यत्रयत्र महादेवस्तद्भयान्नृप गच्छति ॥ तत्रतत्र पुनः कामं प्रपश्यति धृता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



युधम् ॥ ९ ॥ कस्यचित्त्वथ कालस्य पुनः प्राप्तोऽर्बुदं प्रति ॥ तत्रापश्यत्तथा काममाकर्णाकर्षितायुधम् ॥ आकुंचितैकपादं च स्थिरदृष्टिं नृपो
त्तम ॥ १० ॥ अथाऽसौ भगवाञ्छांतः प्रियादुःखसमन्वितः ॥ क्रोधं चक्रे विशेषेण दृष्ट्वा तं पुरतः स्थितम् ॥ ११ ॥ तस्य कोपाभिभूतस्य तृती
यान्नयनान्नृप ॥ निश्चक्राम महाज्वाला ययाऽसौ भस्मसात्कृतः ॥ १२ ॥ सचापः सशरो राजंस्तस्मिन्पर्वतरोधसि ॥ शंकरो रोषपर्यंतं गत्वा
सौख्यमवाप्तवान् ॥ १३ ॥ कैलासं पर्वतश्रेष्ठं जगाम सुरपूजितः ॥ दग्धे मनोभवे भार्या रतिरस्य पतिव्रता ॥ व्यलपत्करुणं दीना पतिशोकपरि
प्लुता ॥ १४ ॥ ततो दारूणि चाहृत्य चितिं कृत्वा नराधिप ॥ आरुरोहाग्निसंदीप्तां चितिं सा पतिदुःखिता ॥ तावदाकाशगां वाणीं शुश्राव च
यशस्विनी ॥ १५ ॥ ॥ वागुवाच ॥ ॥ मा पुत्रि साहसं कार्षीस्तपसा तिष्ठ सुन्दरि ॥ भूयः प्राप्स्यसि भर्त्तारं कामं तुष्टेन शंभुना ॥ १६ ॥
सा श्रुत्वा तां तदा वाणीं समुत्तस्थौ सुमध्यमा ॥ देवमाराधयामास दिवानक्तमतंद्रिता ॥ व्रतैर्दानैर्जपैर्होमैरुपवासैस्तथा परैः ॥ १७ ॥ ततो वर्ष
सहस्रांते तुष्टस्तस्या महेश्वरः ॥ अब्रवीद्वद कल्याणि वरं यन्मनसि स्थितम् ॥ १८ ॥ ॥ रतिरुवाच ॥ ॥ यदि तुष्टोऽसि मे देव भगवँल्लोक
भावनः ॥ अक्षतांगः पुनः कामः कांतो मे जायतां पतिः ॥ १९ ॥ एवमुक्ते तया वाक्ये तत्क्षणात्समुपस्थितः ॥ यथा सुप्तो महाराज तद्वद्रूपः स
हर्षित ॥ २० ॥ इक्षुयष्टिमयं चापं पुष्पबाणसमन्वितम् ॥ भृंगश्रेणिमय्या मौर्व्या शोभितं सुमनोहरम् ॥ २१ ॥ ततो रतिसमायुक्तः प्रणिपत्य
महेश्वरम् ॥ अनुज्ञातस्तु तेनैव स्वव्यापारेऽभ्यवर्त्तत ॥ २२ ॥ स दृष्ट्वा शिवमाहात्म्यं श्रद्धां कृत्वा नृपोत्तम ॥ शिवं संस्थापयामास पर्वतेऽर्बुदसं
ज्ञिते ॥ २३ ॥ यस्मिन्दृष्टे महाराज नारी वा यदि वा नरः ॥ सप्तजन्मांतराण्येव न दौर्भाग्यमवाप्नुयात् ॥ २४ ॥ एवमेतन्मया ख्यातं यन्मां त्वं
परिपृच्छसि ॥ कामेश्वरस्य माहात्म्यं कामदाहं[1] सविस्तरम् ॥ २५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे
तृतीयेऽर्बुदखंडे कामेश्वरमाहात्म्यवर्णनंनाम चत्वारिंशोऽध्यायः ॥ ४० ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो गच्छेन्नृपश्रेष्ठ मार्कंडे
यस्य चाश्रमम् ॥ यत्र पूर्वं तपस्तप्तं मार्कंडेन महात्मना ॥ १ ॥ मृकण्डो ब्राह्मणोनाम पुराऽऽसीच्छंसितव्रतः ॥ अन्ते वयसि संजातस्तस्य
पुत्रोऽतिसुन्दरः ॥ २ ॥ सर्वलक्षणसंपूर्णः शांतः सूर्यसमप्रभः ॥ कस्यचित्त्वथ कालस्य तस्याश्रमपदे नृप ॥ ३ ॥ आगतो ब्राह्मणो ज्ञानी
कश्चित्सामुद्रविच्छुभः ॥ ततोऽसौ क्रीडमानस्तु बालकः पंचवार्षिकः ॥ ४ ॥ आनासाग्रशिखाग्राभ्यां चिरं चैवावलोकितः ॥ ततोऽहसत्स सहसा
तं मृकण्डो ह्यलक्षयत् ॥ ५ ॥ अथाऽब्रवीच्चिरं दृष्टस्त्वया पुत्रो मम द्विज ॥ ततो हसितवान्भूयः किमिदं कारणं वद ॥ ६ ॥ असकृत्स मृकण्डे

१ कामदाहम्--कामदहनवृत्तान्तसमन्वितम्--इत्यर्थः । कामदाहम्---वासनानिरसनपूर्वकमुक्तिप्रदम्---इत्यर्थो वा ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न यावत्पृष्टो द्विजोत्तमः ॥ उपरोधवशात्तस्मै यथार्थं संन्यवेदयत् ॥ ७ ॥ अस्य बालस्य चिह्नानि यानि काये द्विजोत्तम ॥ अजरश्चामरश्चैव तै र्भवेत्पुरुषः किल ॥ ८ ॥ षण्मासेनास्य बालस्य नूनं मृत्युर्भविष्यति ॥ एतस्मात्कारणाद्धास्यं मयाऽकारि द्विजोत्तम ॥ अनृतं नोक्तपूर्वं मे वैरिष्व पि कदाचन ॥ ९ ॥ ॥ पुलस्त्य उवाच ॥ ॥ एवमुक्त्वा तु स ज्ञानी उषित्वा तत्र शर्वरीम् ॥ मृकंडेनाभ्यनुज्ञात इष्टं देशं जगाम ह ॥ १० ॥ मृकंडोपि सुतं ज्ञात्वा ततः क्षीणायुषं नृप ॥ पंचवार्षिकमप्यार्त्तश्चकारोपनयान्वितम् ॥ ११ ॥ श्रुताध्ययनसंपन्नं यंयं पश्यसि चाग्रतः ॥ तस्याभिवादनं कार्यं त्वया पुत्रक नित्यशः ॥ १२ ॥ ततश्चक्रे ब्रह्मचारी पितुर्वाक्यं विशेषतः ॥ १३ ॥ बालं वृद्धं युवानं च यंयं पश्यति चक्षुषा ॥ नमस्करोति तं सर्वं ब्राह्मणं विनयान्वितः ॥ १४ ॥ कस्यचित्त्वथ कालस्य तस्याश्रमसमीपतः ॥ सप्तर्षयः समायातास्तीर्थयात्रापरायणाः ॥ १५ ॥ अथ तान्सत्वरं गत्वा वंदयामास पार्थिव ॥ बालः स विनयोपेतः सर्वांश्चैव यथाक्रमम् ॥ १६ ॥ दीर्घायुर्भव तैरुक्तः स बालस्तुष्टितत्परैः ॥ आस्थिताश्च यथाभीष्टं देशं बालं विसर्ज्य तम् ॥ १७ ॥ तेषां मध्येंऽगिरानाम दिव्यज्ञानसमन्वितः ॥ तेनावलोकितो बालः सूक्ष्मदृष्ट्या परंतप ॥ १८ ॥ अथ तानब्रवीत्सर्वान्मुनीन्किंचित्सविस्मयः ॥ दीर्घायुर्न च बालोऽयं युष्माभिः संप्रकीर्त्तितः ॥ १९ ॥ गमिष्यति कुमारोऽयं निधनं पंचमे दिने ॥ तन्न युक्तं हि नो वाक्यमसत्यं द्विजसत्तमाः ॥ २० ॥ यथाऽयं चिरजीवी स्यात्तथा नीतिर्विधीयताम् ॥ अथ ते मुनयो भीता मिथ्या वाक्यस्य पार्थिव ॥ २१ ॥ बालकं तं समादाय ब्रह्मलोकं गतास्तदा ॥ तत्र दृष्ट्वा चतुर्वक्त्रं नमश्चक्रुर्मुनीश्वराः ॥ २२ ॥ तेषामनंतरं तेन बालके नाभिवादितः ॥ दीर्घायुर्भव तेनाऽपि ब्रह्मणोक्तः स बालकः ॥ २३ ॥ ततः सप्तर्षयो हृष्टाः स्वचित्ते नृपसत्तम ॥ सुखासीनान्स विश्रांतानब्रवी न्मुनिपुंगवान् ॥ २४ ॥ ॥ ब्रह्मोवाच ॥ ॥ परिपृच्छत किं कार्यं कुतो यूयमिहागताः ॥ २५ ॥ ॥ ऋषय ऊचुः ॥ ॥ तीर्थयात्राप्रसंगेन भ्रममाणा महीतलम् ॥ अर्बुदं पर्वतंनाम तस्य तीर्थेषु वै गताः ॥ २६ ॥ अथागत्य द्रुतं दूराद्बालेनानेन वंदिताः ॥ दीर्घायुर्भव संदिष्टस्ततश्चाय मनेकधा ॥ पंचमे दिवसेऽस्यापि मृत्युर्देव भविष्यति ॥ २७ ॥ यथा वयं त्वया सार्द्धमसत्या न चतुर्मुख ॥ भवामोऽस्य कृते देव तथा किंचिद्वि धीयताम् ॥ २८ ॥ अथ ब्रह्मा प्रहृष्टात्मा दृष्ट्वा तं मुनिदारकम् ॥ मत्प्रसादादयं बालो भावी कल्पायुरब्रवीत् ॥ २९ ॥ ततस्ते मुनयो हृष्टास्तमा दाय गृहं प्रति ॥ प्रस्थिता ब्रह्मलोकात्तु नमस्कृत्वा चतुर्मुखम् ॥ ३० ॥ अथ तस्य पिता तत्र मृकंडो मुनिसत्तमः ॥ ततो भार्यासमायुक्तो विल

१ ततः—तस्मिन्मार्कण्डेये पितरमपृष्ट्वैवाऽकस्मात्सदेह एव सप्तर्षिभिः सह ब्रह्मलोकं गते सति—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





लाप सुदुःखितः ॥ ३१ ॥ हा पुत्रपुत्र करुणं रुदित्वा धर्मवत्सलः ॥ अनामंत्र्य च मां कस्माद्दीर्घं पंथानमाश्रितः ॥३२॥ अकृत्वापि क्रियाः कार्याः कथं मृत्युवशं गतः ॥ सोऽहं त्वया विना पुत्र न जीवामि कथंचन ॥ ३३ ॥ एवं विलपतस्तस्य बहुधा नृपसत्तम ॥ बालश्चाभ्यागतस्तत्र यत्र देशे पुरा स्थितः ॥ ३४ ॥ अथासौ प्रययौ बालः प्रहृष्टेनांतरात्मना ॥ तं दृष्ट्वा पथि तातश्च संप्रहृष्टो बभूव ह ॥ ३५ ॥ पप्रच्छांकं समारोप्य चिरागमन कारणम् ॥ ततः स कथयामास सर्वं मुनिविचेष्टितम् ॥ दर्शनं ब्रह्मलोकस्य पद्मयोनेर्वरं तथा ॥ ३६ ॥ ॥ बालक उवाच ॥ ॥ अजरश्चामरश्चाहं कृतस्तात स्वयंभुवा ॥ तस्मात्त्यज त्वं मदर्थे ते व्येत्वसौ मानसो ज्वरः ॥३७॥ सोऽहमाराधयिष्यामि तथैव चतुराननम् ॥ कृत्वाऽऽश्रमपदं रम्यमर्बुदे पर्वतोत्तमे ॥ ३८ ॥ अमृतस्राविं तद्वाक्यं श्रुत्वा पुत्रस्य स द्विजः ॥ मृकंडो हर्षसंयुक्तो वाचमित्यब्रवीच्च तम् ॥ ३९ ॥ मार्कंडोऽपि द्रुतं गत्वा रम्य मर्बुदपर्वतम् ॥ तपस्तेपे सुविस्तीर्णं ध्यायन्देवं पितामहम् ॥ ४० ॥ तस्याश्रमपदे पुण्ये श्रावणे मासि पार्थिव ॥ पौर्णमास्यां विशेषेण यः कुर्यात्पितृ तर्पणम् ॥ पितृमेधफलं तस्य सकलं स्यादसंशयम् ॥४१॥ ऋषियोगेन यस्तत्र तर्पयेद्ब्राह्मणोत्तमान् ॥ ब्रह्मलोके चिरं वासस्तस्य संजायते नृप ॥ ॥ ४२ ॥ यः स्नानं कुरुते तत्र सम्यक्छ्रद्धासमन्वितः ॥ नाल्पमृत्युभयं तस्य कुले क्वापि प्रजायते ॥ ४३ ॥ इति श्रीस्कान्दे महापुराण एकाशीति साहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखण्डे मार्कंडेयाश्रमपदोत्पत्तिवर्णनंनामैकचत्वारिंशोऽध्यायः ॥४१॥ ॥छ॥ ॥ पुलस्त्य उवाच ॥ ततो गच्छेन्नृपश्रेष्ठ लिंगं पापहरं परम् ॥ उद्दालकेन मुनिना स्थापितं लोकविश्रुतम् ॥ १ ॥ तस्मिन्स्पृष्टेऽथ वा दृष्टे पूजिते च विशेषतः ॥ सर्वरोग विनिर्मुक्तो गार्हस्थ्यं प्राप्नुयान्नरः ॥ २ ॥ सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥३॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे तृतीयेऽर्बुदखण्ड उद्दालकेश्वरमाहात्म्यवर्णनंनाम द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो गच्छेन्नृपश्रेष्ठ सिद्धलिंगं सुसिद्धिदम् ॥ सिद्धैस्तु स्थापितं लिंगं सर्वपातकनाशनम् ॥ १ ॥ तत्रास्ति शोभनं कुण्डं सुनिर्मलजलान्वितम् ॥ तत्र स्नातो नरः सम्यङ्मुच्यते ब्रह्महत्यया ॥ २ ॥ यंयं काममभिध्यायंस्तत्र स्नाति नरो नृप ॥ अवश्यं तमवाप्नोति निष्ठांते[1]च परां गतिम् ॥ ३ ॥ इति श्रीस्कांदे महापुराण एका शीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखण्डे सिद्धेश्वरमहिमवर्णनंनाम त्रयश्चत्वारिंशोऽध्यायः ॥४३॥ ॥छ॥ ॥ पुलस्त्य उवाच ॥ ततो गच्छेन्नृपश्रेष्ठ गजतीर्थमनुत्तमम्[2] ॥ यत्र पूर्वं तपस्तप्तं दिग्गजैर्भावितात्मभिः ॥ १ ॥ भूभारधरणैश्चान्यैरैरावणमुखैर्नृप ॥ तत्र स्नातो नरः सम्य



१ निष्ठान्ते—मरणान्ते—इत्यर्थः । २ हस्तिनीह्रदमुत्तमम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्गजदानफलं लभेत् ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे तृतीयेऽर्बुदखण्डे गजतीर्थप्रभाववर्णनंनाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ देवखातं ततो गच्छेत्सुपुण्यं तीर्थमुत्तमम् ॥ यत्ख्यातिर्विबुधैः सर्वैः स्वयमेव व्यधीयत ॥ १ ॥ तत्र यः कुरुते श्राद्धममावास्यां विशेषतः ॥ कन्यागते रवौ राजन्स लभेत्परमं पदम् ॥ पितॄन्स तारयत्येव प्राप्तानपि सुदुर्गतिम् ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखण्डे श्रीदेवखातोत्पत्तिमाहात्म्यवर्णनंनाम पंचचत्वारिंशोऽध्यायः ॥ ४५ ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो व्यासेश्वरं गच्छेद्व्यासेन स्थापितं हि यत् ॥ तं दृष्ट्वा जायते मर्त्यो मेधावी मतिमाञ्छुचिः ॥ सप्तजन्मांतराण्येव व्यासस्य वचनं यथा ॥ १ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखण्डे व्यासतीर्थमाहात्म्यवर्णनंनाम षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो गच्छेन्नृपश्रेष्ठ सुपूर्णं गौतमाश्रमम् ॥ यत्र पूर्वं तपस्तप्तं गौतमेन महात्मना ॥ १ ॥ पुराऽऽसीद्गौतमोनाम मुनिः परमधार्मिकः ॥ स भक्त्याऽऽराधयामास देवदेवं महेश्वरम् ॥ २ ॥ भक्त्याऽऽराधयमानस्य निर्भिद्य धरणीतलम् ॥ समुत्तस्थौ महल्लिंगं परं माहेश्वरं नृप ॥ ३ ॥ एतस्मिन्नेव काले तु वाग्गुवाचाशरीरिणी ॥ पूजयैतन्महल्लिंगं त्वद्भक्त्या समुपस्थितम्॥ वरं वरय भद्रं ते यत्ते मनसि वर्तते ॥४॥ ॥ गौतम उवाच ॥ ॥ अत्राश्रमपदे देव त्वया शम्भो जगत्पते ॥ सदा कार्यं हि सान्निध्यं यदि तुष्टो मम प्रभो ॥ ५ ॥ यस्त्वां पश्यति सद्भक्त्या ब्रह्मलोकं स गच्छतु ॥ ६ ॥ ॥ आकाशवाण्युवाच ॥ ॥ माघमासे चतुर्दश्यां योऽत्र मां वीक्षयिष्यति ॥ कृष्णायां ब्राह्मणश्रेष्ठ स यास्यति परां गतिम् ॥७॥ एवमुक्त्वा ततो वाणी विरराम महीपते ॥ तत्रास्ति कुण्डमपरं पवित्रं जलपूरितम् ॥ तत्र स्नातो नरः सद्यः कुलं तारयतेऽखिलम् ॥ ८ ॥ यस्तत्र कुरुते श्राद्धं विशेषादिन्दुसंक्षये ॥ गयाश्राद्धफलं तस्य सकलं जायते ध्रुवम् ॥ ९ ॥ तत्र दानं प्रशंसंति तिलानां मुनिपुंगवाः ॥ तिलसंख्यानि वर्षाणि दानात्स्वर्गे वसेन्नृप ॥ १० ॥ अर्बुदे गौतमी यात्रा सिंहस्थे च बृहस्पतौ ॥ अमायां सोमवारेण द्विषङ्गोदावरीफलम् ॥ ११ ॥ षष्टिवर्षसहस्राणि भागीरथ्यवगाहने ॥ सकृद्गोदावरीस्नानात्सिंहस्थे च बृहस्पतौ ॥ १२ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखण्डे गौतमाश्रमतीर्थमाहात्म्यवर्णनंनाम सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ कुलसंतारणं गच्छेत्तत्र तीर्थमनुत्तमम् ॥ यत्र स्नातो नरः सम्यक्कुलं तारयतेऽखिलम् ॥ १ ॥ दश पूर्वान्भविष्यांश्च तथात्मानं नृपोत्तम ॥ उद्धरेच्छ्रद्धया युक्तस्तत्र दानेन मानवः ॥ २ ॥ आसीदप्रस्तुतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



नाम राजा पूर्वं स पापकृत् ॥ नापि दानं तथा ज्ञानं न ध्यानं न च सत्क्रिया ॥ ३ ॥ तस्मिञ्छासति लोकानां नासीत्सौख्यं कदाचन ॥ परदार
रुचिर्नित्यं महादण्डपरश्च सः ॥ ४ ॥ न्यायतोऽन्यायतो वापि करोति धनसंग्रहम् ॥ स घातयति लोकांश्च निर्दोषान्पापकृत्तमः ॥ ५ ॥ ततो
वार्धक्यमापन्नस्तथापि न शमं गतः ॥ कस्यचित्त्वथ कालस्य पितृभिः प्रतिबोधितः ॥ तं प्रसुप्तं समासाद्य नारकेयैः सुदुःखितैः ॥ ६ ॥ ॥ पितर
ऊचुः ॥ ॥ वयं शुद्धसमाचारा नित्यं धर्मपरायणाः ॥ दानयज्ञतपःशीलाः स्वदारनिरतास्तथा ॥ ७ ॥ स्वकर्मभिः कुलांगार दिवं प्राप्ता यथा
र्हतः ॥ कुपुत्रं त्वां समासाद्य नरकं समुपस्थिताः ॥ तस्मादुद्धर नः सर्वान्कृत्वा किंचिच्छुभार्चनम् ॥ ८ ॥ कर्मभिस्तव पापात्म
न्वयं नरकमाश्रिताः ॥ नरकं दश यास्यंति भविष्याश्च तथा भवान् ॥ ९ ॥ एवमुक्त्वा च ते सर्वे पितरस्तु सुदुःखिताः ॥ याताश्च
नरकं भूयः प्रबुद्धः सोऽपि पार्थिवः ॥ १० ॥ ततो दुःखमनुप्राप्तः पितृवाक्यानि संस्मरन् ॥ रुरोद प्रातरुत्थाय तं भार्या प्रत्यभाषत
॥ ११ ॥ ॥ इन्दुमत्युवाच ॥ ॥ किमर्थं राजशार्दूल त्वं रोदिषि महास्वनम् ॥ कथं ते कुशलं राज्ये शरीरे वा पुरेऽथवा ॥ १२ ॥
॥ ॥ राजोवाच ॥ ॥ मया दृष्टोऽद्य स्वप्नांते पिता ह्यथ पितामहः ॥ अपश्यं दुःखितान्देवि ताभ्यामथाग्रजान्पितॄन् ॥ १३ ॥ उपा
लब्धोऽस्मि तैः सर्वैस्तव कर्मभिरीदृशैः ॥ दारुणे नरके प्राप्ता अधर्मादिविचेष्टितैः ॥ १४ ॥ अथान्ये दश यास्यन्ति भविष्याश्च भवानपि ॥ तस्मा
त्कृत्वा शुभं कर्म दुर्गतेश्चोद्धरस्व नः ॥ १५ ॥ एवमुक्तः प्रबुद्धोऽहं पितृभिर्वरवर्णिनि ॥ तेनाहं दुःखमापन्नस्तद्वाक्यं हृदि संस्मरन् ॥ १६ ॥
॥ ॥ इन्दुमत्युवाच ॥ ॥ सत्यमेतन्महाराज यदुक्तोऽसि पितामहैः ॥ न त्वया सुकृतं कर्म संस्मरेऽहं कृतं पुरा ॥ १७ ॥ यथा सुपुत्रमासाद्य
तरंति पितरो नृप ॥ कुपुत्रेण तथा यांति नरकं नात्र संशयः ॥ १८ ॥ स त्वमाहूय विप्रेंद्रान्धर्मशास्त्रविचक्षणान् ॥ पृष्ट्वा तान्कुरु यच्छ्रेयः पितॄणा
मात्मना सह ॥ १९ ॥ आनयामास राजाऽसौ ततो विप्राननेकशः ॥ वेदवेदांगतत्त्वज्ञान्धर्मशास्त्रविचक्षणान् ॥ उवाच विनयोपेतो भार्यया सहि
तो हितान् ॥ २० ॥ ॥ राजोवाच ॥ ॥ कर्मणा केन पितरो निरयस्था द्विजोत्तमाः ॥ स्वर्गं यांति सुपुत्रेण तारिताः प्रोच्यतां स्फुटम् ॥
॥ २१ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ पितृमेधेन राजेंद्र कृतेन विधिपूर्वकम् ॥ निरयस्था दिवं यांति यद्यपि स्युः सुपापिनः ॥ २२ ॥ ॥ राजो
वाच ॥ ॥ दीक्षयंतु द्विजाः सर्वे तदर्थं मां धृतव्रतम् ॥ यत्किंचिदत्र कर्त्तव्यं प्रोच्यतामखिलं हि तत् ॥ २३ ॥ तथोक्तास्ते नृपेंद्रेण ब्राह्मणाः

१ उपालब्धोऽस्मि—निर्भर्त्सितोऽस्मि—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्यवादिनः ॥ समग्राः पार्थिवं प्रोचुर्यदुक्तं यज्ञकर्मणि ॥ २४ ॥ दीक्षा ग्राह्या नृपश्रेष्ठ पुरश्चरणमादितः ॥ कृत्वा कायविशुद्ध्यर्थं ततः श्रेयस्करी भवेत् ॥ २५ ॥ स त्वं पापसमाचारो बाल्यात्प्रभृति पार्थिव ॥ असंख्यं पातकं तस्मात्तीर्थयात्रां समाचर ॥ २६ ॥ सर्वतीर्थाभिषिक्तस्त्वं यदा स्या नृपसत्तम ॥ प्रायश्चित्तेन योग्यः स्यास्ततो यज्ञस्य नान्यथा ॥ २७ ॥ प्रभासादीनि तीर्थानि यानि संति धरातले ॥ गंतव्यं तेषु सर्वेषु स्नानं कुरु समाहितः ॥ २८ ॥ मनसा गच्छ दुर्गाणि दद्दानमनुत्तमम् ॥ नश्येत्तेनाशुभं किंचिदपि ब्रह्मवधोद्भवम् ॥ यन्न याति नृणां राजंस्तीर्थस्नाना दिना भुवि ॥ २९ ॥ ॥ पुलस्त्य उवाच ॥ ॥ विप्राणां वचनं श्रुत्वा स राजा श्रद्धयाऽन्वितः ॥ तीर्थयात्रापरो भूत्वा परिबभ्राम मेदिनीम् ॥ ॥ ३० ॥ नियतो नियताहारो दद्दानानि भूरिशः ॥ राज्ये पुत्रं प्रतिष्ठाप्य वसुं सत्यपराक्रमम् ॥ ३१ ॥ कस्यचित्त्वथ कालस्य तीर्थयात्रानुषं गतः ॥ यातोऽसौ नृपतिश्चैव ह्यर्बुदे निर्मलोदकम् ॥ ३२ ॥ स स्नानमकरोत्तत्र श्रद्धापूतेन चेतसा ॥ स्नातमात्रस्य तस्याथ तस्मिन्नेव जलाशये ॥ ॥ ३३ ॥ विमुक्ताः पितरो रौद्रान्नरकात्सुप्रहर्षिताः ॥ ततो दिव्यविमानस्था दिव्यमाल्यांबरान्विताः ॥ ३४ ॥ तमूचुस्तारिताः सर्वे वयं पुत्र त्वयाऽधुना ॥ तीर्थस्यास्य प्रभावेण भविष्याश्च तथा दश ॥ ३५ ॥ आत्मा च पार्थिवश्रेष्ठ स्नानाच्च जलतर्पणात् ॥ यस्मात्कुलं त्वया पुत्र तीर्थेऽस्मिंस्तारितं ततः ॥ ३६ ॥ कुलसंतारणंनाम तीर्थमेतद्भविष्यति ॥ तस्मात्त्वमपि राजेंद्र सहाऽस्माभिर्दिवं प्रति ॥ आगच्छानेन देहेन तीर्थस्यास्य प्रभावतः ॥ ३७ ॥ ॥ पुलस्त्य उवाच ॥ ॥ एवमुक्तः स राजेंद्रो दिव्यकांतिवपुस्तदा ॥ तं विमानमथारुह्य गतः स्वर्गं च तैः सह ॥ ३८ ॥ एष प्रभावो राजर्षे कुलसंतारणस्य च ॥ मया ते वर्णितः सम्यग्भूयः किं परिपृच्छसि ॥ ३९ ॥ ॥ ययातिरुवाच ॥ ॥ स किंप्रभावो राजा स तथा पापसमन्वितः ॥ स्वदेहेन गतः स्वर्गमेतन्मे कौतुकं महत् ॥ ४० ॥ ॥ पुलस्त्य उवाच ॥ ॥ राकासोमव्यतीपात समकाले नृपोत्तम ॥ स स्नातो यत्र भूपालस्तन्महच्छ्रेयसे परम् ॥ ४१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभास खण्डे तृतीयेऽर्बुदखंडे कुलसंतारणतीर्थमाहात्म्यवर्णनंनामाष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ ॥ पुलस्त्य उवाच ॥ ॥ रामतीर्थं ततो गच्छे त्पुण्यमृषिनिषेवितम् ॥ तत्र स्नातस्य मर्त्यस्य जायते पापसंक्षयः ॥ १ ॥ पितॄणां च परा तुष्टिर्यावदाभूतसंप्लवम् ॥ पुरासीद्भार्गवो रामः सर्वशस्त्र भृतां वरः ॥ २ ॥ तेन पूर्वं तपस्तप्तं शत्रूणामिच्छता क्षयम् ॥ ततः पाशुपतं नाम तस्यास्त्रं परमं ददौ ॥ ३ ॥ तपस्तुष्टो महादेवो गते वर्षशत

१ तथा पापसमन्वितः सः राजा स्वदेहेन स्वर्गं गतः-सः-किंप्रभावः-कस्य प्रभावः-अस्ति-इति एतन्मे महत् कौतुकम्-अस्ति-इति योजना ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

त्रये ॥ अब्रवीद्वरदोऽस्मीति स वव्रे शत्रुसंक्षयम् ॥ ४ ॥ ततः पाशुपतंनाम तस्यास्त्रं परमं ददौ ॥ स्मरणेनापि शत्रूणां यस्य संजायते क्षयः ॥ ५ ॥
अब्रवीद्वचनं चापि प्रहस्य वृषभध्वजः ॥ जामदग्न्य महाबाहो शृणु मे परमं वचः ॥ ६ ॥ अस्त्रेणानेन युक्तस्त्वमजेयः सर्वदेहिनाम् ॥ भविष्यसि
न संदेहो मत्प्रसादाद्भृगूद्वह ॥ ७ ॥ एतज्जलाशयं पुण्यं त्रैलोक्ये सचराचरे ॥ रामतीर्थमिति ख्यातं मत्प्रसादाद्भविष्यति ॥ ८ ॥ येऽत्र श्राद्धं करि
ष्यंति पौर्णमास्यां समाहिताः ॥ संप्राप्ते कार्त्तिके मासि कृत्तिकायोगसंयुते ॥ ९ ॥ पितृमेधफलं तेषामशेषं च भविष्यति ॥ तथा शत्रुक्षयो राज
न्वासः स्वर्गेषु चाक्षयः ॥ १० ॥ ॥ पुलस्त्य उवाच ॥ ॥ एवमुक्त्वा महादेवस्ततश्चादर्शनं गतः ॥ रामोऽप्यसूदयत्क्षत्रं पितृदुःखेन दुःखि
तः ॥ ११ ॥ त्रिःसप्त तर्पयामास पितॄंस्तत्र प्रहर्षितः ॥ जमदग्नौ मृते तेन प्रतिज्ञातं महात्मना ॥ १२ ॥ दृष्ट्वा मातुः क्षतान्यंगे त्रिःसप्त
मनुजाधिप ॥ शस्त्रजातानि विप्राणां समाजे समुपस्थिते ॥ १३ ॥ पिता मे निहतो यस्मात्क्षत्रियैस्तापसो द्विजः ॥ अयुध्यमान एवाथ
तस्मात्कृत्वा त्रिसप्त वै ॥ १४ ॥ क्षत्रहीनामहं पृथ्वीं प्रदास्ये सलिलं पितुः ॥ तत्सर्वं तस्य संजातं तीर्थमाहात्म्यतो नृप ॥ १५ ॥ तस्मात्सर्वं
प्रयत्नेन श्राद्धं तत्र समाचरेत् ॥ क्षत्रियश्च विशेषेण य इच्छेच्छत्रुसंक्षयम् ॥ १६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां
सप्तमे प्रभासखंडे तृतीयेऽर्बुदखंडे रामतीर्थमाहात्म्यवर्णनंनामैकोनपंचाशत्तमोऽध्यायः ॥ ४९ ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ कोटि
तीर्थं ततो गच्छेत्सर्वपातकनाशनम् ॥ तीर्थानां यत्र संजाता कोटिः पार्थिव हेलया ॥१॥ यदा स्यात्कलिकालस्तु रौद्रो राजन्महीतले ॥ म्लेच्छ
भूता जनाः सर्वे तत्स्पर्शात्तीर्थविप्लवः ॥ २ ॥ तिस्रः कोट्योऽर्धकोटिश्च तीर्थानां भूमिवासिनाम् ॥ तेषां कोटिस्ततोऽवात्सीत्पर्वतेऽर्बुदसंज्ञके ॥ ३ ॥
पुष्करे च तथा कोटिः कुरुक्षेत्रे च पार्थिव ॥ वाराणस्यामर्धकोटिः स्तुता देवैः सवासवैः ॥ राजन्नेतानि रक्षंति सर्वे देवाः सवासवाः ॥ ४ ॥ यदा
यदा भयार्त्तानि म्लेच्छस्पर्शात्समंततः ॥ स्थानेष्वेतेषु तिष्ठंति तीर्थान्युक्तेषु सत्वरम् ॥ ५ ॥ कोटितीर्थानि त्रीण्येवं तत्र जातानि भूतले ॥ अर्ध
कोटिसमेतानि सर्वपापहराणि च ॥ ६ ॥ तस्मात्सर्वप्रयत्नेन स्नानं तत्र समाचरेत् ॥ कृष्णपक्षे त्रयोदश्यां नभस्ये च विशेषतः ॥ ७ ॥ तत्र
स्नानादिकं सर्वं जपहोमादिकं च यत् ॥ सर्वं कोटिगुणं राजंस्तत्प्रसादादसंशयम् ॥ ८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां 
सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखण्डे कोटितीर्थप्रभाववर्णनंनाम पंचाशत्तमोऽध्यायः ॥ ५० ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो गच्छे
न्नृपश्रेष्ठ चंद्रोद्भेदमनुत्तमम् ॥ तीर्थं पापहरं नृणां निशानाथेन निर्मितम् ॥ १ ॥ प्रतिज्ञातं यदा राजन्ग्रहणे चंद्रसूर्ययोः ॥ राहुणा कृतवैरेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छिन्ने शिरसि विष्णुना ॥ २ ॥ तदा भयान्वितश्चन्द्रो मत्वा दैत्यं दुरासदम् ॥ पीयूषभक्षणोद्युक्तं ततश्चार्बुदमभ्यगात् ॥ ३ ॥ तत्र भित्त्वा गिरेः शृंगे कृत्वा विवरमुत्तमम् ॥ प्रविष्टस्तस्य मध्ये तु तपस्तेपे सुदुश्चरम् ॥ ४ ॥ ततः कालेन महता तुष्टस्तस्य महेश्वरः ॥ अब्रवीद्वृणु भद्रं ते वरं यत्ते हृदि स्थितम् ॥ ५ ॥ ॥ चंद्र उवाच ॥ ॥ प्रतिज्ञातं सुरश्रेष्ठ राहुणा ग्रहणं मम ॥ बलवानेष दुर्धर्षः प्रकृत्या सिंहिकासुतः ॥ ६ ॥ सांप्रतं भक्षितं तेन पीयूषं सुरसत्तम ॥ अहं मध्ये धृतश्चापि राहुणाऽसौ दुरासदः ॥ ७ ॥ पीयमानेऽमृते देव देवैः पूर्वं पराजितैः ॥ दैवतं रूपमास्थाय दानवोऽसौ समागतः ॥ ८ ॥ अपिबच्चामृतं राहुस्तेनास्य मृत्युवर्जितम् ॥ अमृतं चाक्षयं जातं शिरो देवभयप्रदम् ॥ ९ ॥ ततो देवैः कृतं साम ग्रहमध्ये प्रतिष्ठितः ॥ प्रतिज्ञाते ग्रहे[1]ऽस्माकं ततो मे भयमाविशत् ॥ १० ॥ भयात्तस्य सुरश्रेष्ठ भित्त्वा शृंगं गिरेरिदम् ॥ कृतं श्वभ्रमगाधं च तपोऽर्थं सुरसत्तम ॥ तस्मादत्र प्रसादं मे कुरु कामनिषूदन ॥ ११ ॥ ॥ भगवानुवाच ॥ ॥ अवध्यः सर्वदेवानामजेयः स महाबलः ॥ करिष्यति ग्रहं[2] नूनं राहुः कोपपरायणः ॥ परं तव निशानाथ करिष्येऽहं प्रतिक्रियाम् ॥ १२ ॥ ग्रहणे तव संप्राप्ते स्नानदानादिकाः क्रियाः ॥ करिष्यंति जना लोके सम्यक्छ्रेयःसमन्विताः ॥ १३ ॥ ताभिस्तव न संतापः स्वल्पोऽप्येवं भविष्यति ॥ अक्षयं सुकृतं तेषां कृतं कर्म भविष्यति ॥ १४ ॥ ग्रहणे तव संजाते मम वाक्यादसंशयम् ॥ एतद्भिन्नं त्वया यस्मात्तपोऽर्थं शिखरं गिरेः ॥ चन्द्रोद्भेदमिति ख्यातं तीर्थं लोके भविष्यति ॥ १५ ॥ ग्रहणे तव संप्राप्ते योऽत्र स्नानं करिष्यति ॥ न तस्य पुनरेवात्र जन्म लोके भविष्यति ॥ १६ ॥ यो वा सोमदिने स्नानं दर्शनं तत्र चाचरेत् ॥ तव लोके ध्रुवं वासस्तस्य चंद्र भविष्यति ॥ १७ ॥ एवमुक्त्वा स भगवांस्ततश्चांतर्दधे हरः ॥ चन्द्रोऽपि प्रययौ हृष्टः स्वस्थानं नृपसत्तम ॥ १८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखण्डे चन्द्रोद्भेदतीर्थमाहात्म्यवर्णनंनामैकपंचाशत्तमोऽध्यायः ॥ ॥ ५१ ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो गच्छेन्नृपश्रेष्ठ ईशानीशिखरं महत् ॥ यत्र गौर्या तपस्तप्तं सुपुण्यं लोकविश्रुतम् ॥ १ ॥ यस्य संदर्शनेनापि नरः पापात्प्रमुच्यते ॥ लभते चातिसौभाग्यं सप्तजन्मांतराणि च ॥ २ ॥ ॥ ययातिरुवाच ॥ ॥ कस्मिन्काले तपस्तप्तं देव्या तत्र मुनीश्वर ॥ किमर्थं च महत्त्वेतत्कौतुकं वक्तुमर्हसि ॥ ३ ॥ ॥ पुलस्त्य उवाच ॥ ॥ शृणु राजन्कथां दिव्यामद्भुतां लोकविश्रुताम् ॥ यस्याः संश्रवणादेव मुच्यते सर्वपातकैः ॥ ४ ॥ पुरा गौर्या समासक्तं[3] ज्ञात्वा देवाः सवासवाः ॥ मंत्रं चक्रुर्भयाविष्टा

१ ग्रहे—ग्रहणे—इत्यर्थः । २ ग्रहम्—ग्रहणम्—इत्यर्थः । ३ समासक्तम्—रतासक्तम्—इत्यर्थः । शिवम्—इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





एकांते समुपाश्रिताः ॥ ५ ॥ वीर्यं यदि त्रिनेत्रस्य क्षेत्रे गौर्याः पतिष्यति ॥ अस्माकं पतनं नूनं जगतश्च भविष्यति ॥ ६ ॥ संततेस्तु विनाशाय ततो गच्छामहे वयम् ॥ ७ ॥ एवं संमंत्र्य देवास्ते कैलासं पर्वतं गताः ॥ ततस्तु नंदिना सर्वे निषिद्धाः समयं विना ॥ ८ ॥ ॥ नंद्युवाच ॥ ॥ एकांते भगवान्रुद्रः सह गौर्या व्यवस्थितः ॥ तस्माद्देवगणाः सर्वे गच्छध्वं निलयं स्वकम् ॥ ९ ॥ अथ देवगणाः सर्वे वञ्चयित्वा च तं गणम् ॥ प्रेषयंस्तत्र वायुं च गुप्तमूचुर्वचस्त्विदम् ॥ १० ॥ गत्वा वायो भवं ब्रूहि न कार्या संततिस्त्वया ॥ एवं देवगणा देव प्रार्थयंति भयातुराः ॥ ११ ॥ ततो वायुर्द्रुतं गत्वा स्थितो यत्र महेश्वरः ॥ उच्चैर्जगाद तद्वाक्यं यदुक्तं त्रिदशालयैः ॥ १२ ॥ ततस्तु भगवाञ्छर्वो व्रीडया परया युतः ॥ गौरीं त्यक्त्वा समुत्तस्थौ बाढमित्येव चाब्रवीत् ॥ १३ ॥ ततो गौरी सुदुःखार्त्ता शशाप त्रिदशालयान् ॥ १४ ॥ ॥ गौर्युवाच ॥ ॥ यस्मादहं कृता देवैः पुत्रहीना समागतैः ॥ तस्मा त्तेऽपि भविष्यन्ति सन्तानेन विवर्ज्जिताः ॥ १५ ॥ यस्माद्वायो समायातः स्थानेऽस्मिञ्जनवर्ज्जिते ॥ तस्मात्कायविनिर्मुक्तस्त्वं भविष्यसि सर्वदा ॥ १६ ॥ एवमुक्त्वा ततो दीर्घं भर्तुः कोपपरायणा ॥ त्यक्त्वा पार्श्वं गता राजन्नर्बुदं नगसत्तमम् ॥ १७ ॥ सुतार्थं सा तपस्तेपे यतवाक्कायमानसा ॥ ततो वर्षसहस्रान्ते देवदेवो महेश्वरः ॥ १८ ॥ इन्द्राद्यैर्विबुधैः सार्द्धं तदंतिकमुपागमत् ॥ अथ शक्रो विनीतात्मा देवीं तां प्रत्यभाषत ॥ १९ ॥ एष देवः शिवः प्राप्तस्तव पार्श्वं स्वलज्जया ॥ नायाति तत्प्रसादोऽस्य क्रियता महती भव ॥ २० ॥ ॥ देव्युवाच ॥ ॥ त्यक्ताऽहं तव वाक्येन पतिना समयान्विता ॥ पुत्रं लब्ध्वा प्रयास्यामि तस्य पार्श्वे सुरेश्वर ॥ २१ ॥ तस्यास्तं निश्चयं ज्ञात्वा स्वयं देवः समाययौ ॥ अब्रवीत्प्रहसन्वाक्यं प्रसादः क्रियतामिति ॥ २२ ॥ दृष्टिदानेन देवेशि भाषणेन वरानने ॥ मया देवहितं कार्यं सर्वावस्थासु पार्वति ॥ २३ ॥ अकाले तेन मुक्ताऽसि निवृत्तिः सुरते कृता ॥ पुत्रार्थं ते समारंभो यतश्चासीत्सुरेश्वरि ॥ २४ ॥ तस्मात्ते भविता पुत्रो निजदेहसमुद्भवः ॥ मत्प्रसादादसंदिग्धं चतुर्थे दिवसे प्रिये ॥ २५ ॥ निजांगमलमादाय यादृग्रूपं सुरेश्वरि ॥ करिष्यसि न सन्देहस्तादृगेव भविष्यति ॥ २६ ॥ सद्यो देवगणानां च दैत्यानां च विशेषतः ॥ तथा वै सर्वमर्त्यानां सिद्धिदो बहुरूपधृक् ॥ २७ ॥ एवमुक्त्वा त्रिनेत्रेण परितुष्टा सुरेश्वरी ॥ आलापं पतिना चक्रे सार्द्धं हर्षसमन्विता ॥ २८ ॥ चतुर्थे दिवसे प्राप्ते ततः स्नात्वा शिवा नृप ॥ तदोद्वर्त्तनजं लेपं गृहीत्वा कौतुकात्किल ॥ चतुर्भुजं चकाराऽथ हरवाक्याद्विनायकम् ॥ २९ ॥ ततः सजीवतां प्राप्य हरवाक्येन तं तदा ॥ विशेषेण

४ समयं विना–प्रवेशेऽवकाशाभावात्–इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महाराज नायकोऽसौ कृतः क्षितौ ॥ सर्वेषां चैव मर्त्यानां ततः ख्यातो बभूव ह ॥ ३० ॥ विनायक इति श्रीमान्पूज्यस्त्रैलोक्यवासिनाम् ॥ सर्वेषां देवमुख्यानां बभूव हि विनायकः ॥ ३१ ॥ ततो देवगणाः सर्वे देवीप्रियहिते रताः ॥ तस्मै ददुर्वरान्दिव्यान्प्रोचुर्देवीं च पार्थिव ॥ ३२ ॥ ॥ ॥ देवा ऊचुः ॥ ॥ तवायं तनयो देवि सर्वेषां नः पुरःसरः ॥ प्रथमं पूजिते चास्मिन्पूजा ग्राह्या ततः सुरैः ॥ ३३ ॥ एतच्छृंगं गिरे रम्यं तव संसेवनाच्छुभे ॥ सर्वपापहरं नृणां दर्शनाच्च भविष्यति ॥ ३४ ॥ येऽत्र स्नानं करिष्यन्ति सुपुण्ये सलिलाश्रये ॥ ते यास्यंति परं स्थानं जरामरणवर्जितम् ॥ ३५ ॥ माघमासे तृतीयायां शुक्लायां ये समाहिताः ॥ सप्तजन्मांतराण्येव भविष्यन्ति सुखान्विताः ॥ ३६ ॥ एवमुक्त्वा सुराः सर्वे स्वस्थानं तु ततो गताः ॥ देवोऽपि सहितो देव्या कैलासं पर्वतं गतः ॥ ३७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे तृतीयेऽर्बुदखण्ड ईशानीशिखरमाहात्म्यवर्णनंनाम द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो गच्छेद्ब्रह्मपदं तीर्थं त्रैलोक्यविश्रुतम् ॥ यत्र पूर्वं पदं न्यस्तं ब्रह्मणा लोककारिणा ॥ १ ॥ पुरा ब्रह्मादयो देवास्तत्र सर्वे समाहिताः ॥ अर्बुदे पर्वते रम्य ऋषयश्च सुनिर्मलाः ॥ २ ॥ अचलेश्वरयात्रायां सुभक्त्या भाविता नृप ॥ अथ ते मुनयः सर्वे प्रोचुर्देवं पितामहम् ॥ ३ ॥ ॥ ऋषय ऊचुः ॥ ॥ प्रभूतनियमैर्होमैर्व्रतस्नानैश्च नित्यशः ॥ उपवासैश्च निर्विण्णा[१] वयं सर्वे पितामह ॥ ४ ॥ तस्मात्सदुपदेशं त्वं किंचिद्दातुमिहार्हसि ॥ तरामो येन देवेश दुर्गं संसारसागरम् ॥ ५ ॥ अयाचितोपचारैश्च जपहोमैः सुदुष्करैः ॥ मन्त्रैर्व्रतैस्तथा दानैः स्वर्गप्राप्तिं वदस्व नः ॥ ६ ॥ तेषां तद्वचनं श्रुत्वा तदा देवः कृपान्वितः ॥ चिंतयामास सुचिरमिह किंचित्प्रहस्य च ॥७॥ ततः स्वकं पदं त्यक्त्वा रम्ये पर्वतरोधसि ॥ अथोवाच मुनीन्सर्वान्ब्रह्मा संश्लक्ष्णया गिरा ॥ ८ ॥ ॥ ब्रह्मोवाच ॥ ॥ एतन्महापदं रम्यं सर्वपातकनाशनम् ॥ स्पृशंतु ऋषयः सर्वे ततो यास्यथ सद्गतिम् ॥ ॥९॥ विना स्नानेन दानेन व्रतहोमजपादिभिः॥ हितार्थं सर्वलोकानां मया न्यस्तं पदं शुभम्॥१०॥अस्मिन्पदे मया न्यस्ते यांति लोकाः सहस्रशः॥ स्पृशंतु ऋषयः सर्वे देवाश्चापि पदं मम ॥ ११ ॥ एकैवात्र प्रकर्त्तव्या श्रद्धा वाऽव्यभिचारिणी ॥ यश्च श्रद्धान्वितः सम्यक्पदमेतन्मुनीश्वराः ॥ १२ ॥ पूजयिष्यति संप्राप्ते कार्तिके पूर्णिमादिने ॥ तोयैः फलैश्च विविधैर्गंधमाल्यानुलेपनैः ॥ १३ ॥ ब्राह्मणान्भोजयित्वा तु मिष्टान्नेन स्वशक्तितः ॥ स यास्यति न सन्देहो मम लोकं सुदुर्लभम् ॥ १४ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो मुनिगणाः सर्वे सम्यक्छ्रद्धासमन्विताः ॥ पूजयित्वा पदं

१ निर्वाणाः–ङ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तत्र ब्रह्मलोकं समागताः ॥ १५ ॥ तस्मात्सर्वप्रयत्नेन पदं पूज्यं नरोत्तम ॥ पितामहपदं सम्यक्छ्रद्धया स्वर्गदायकम् ॥ १६ ॥ अन्यत्कौतूहलं राज न्महद्दृष्टं महाद्भुतम् ॥ पदस्य तस्य यच्छ्रुत्वा जायते विस्मयो महान् ॥ १७ ॥ आयामविस्तरेणाऽपि प्राप्ते कृतयुगे नृप ॥ न संख्या जायते राज न्शुक्लवर्णस्य मानवैः ॥ १८ ॥ ततस्त्रेतायुगे प्राप्ते रक्तवर्णं प्रदृश्यते ॥ सुव्यक्तं संख्यया युक्तं सर्वलोकनमस्कृतम् ॥ १९ ॥ द्वापरे कपिलं तच्च लघु मात्रं प्रदृश्यते ॥ कलौ कृष्णं सुसूक्ष्मं च रम्ये पर्वतरोधसि ॥ २० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे तृतीयेऽर्बुदखंडे ब्रह्मपदोत्पत्तिमाहात्म्यवर्णनंनाम त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततस्त्रिपुष्करं गच्छेद भीष्टं पद्मजस्य च ॥ ब्रह्मणा तत्समानीतं पर्वतेऽर्बुदसंज्ञके ॥ १ ॥ वसिष्ठस्य पुरा सत्रे वर्त्तमाने नराधिप ॥ तस्मिन्नगे समायाता ब्रह्माद्याश्च सुरो त्तमाः ॥ २ ॥ प्रतिज्ञातं महाराज ब्रह्मणाऽव्यक्तजन्मना ॥ यावत्स्थास्ये नृलोकेऽस्मिंस्तावत्सन्ध्यां त्रिपुष्करे ॥ वंदयिष्यामि संप्राप्ते संध्याकाले समाहितः ॥ ३ ॥ एतस्मिन्नेव काले तु प्रस्थितः पुष्करं प्रति ॥ संध्यार्थं पद्मजो यावद्वसिष्ठस्तावदब्रवीत् ॥ ४ ॥ ॥ वसिष्ठ उवाच ॥ ॥ कर्मकालश्च सम्प्राप्तो यज्ञेऽस्मिन्सुरसत्तम ॥ स विना न त्वया देव सिद्धिं यास्यति कर्हिचित् ॥ ५ ॥ तस्मादानय चात्रैव पद्मयोने त्रिपु ष्करम् ॥ संध्योपास्तिं ततः कृत्वा तत्र भूयः सुरेश्वर ॥ ब्रह्मत्वं कुरु देवेश सत्रे चास्मिन्दयानिधे ॥ ६ ॥ एवमुक्तो वसिष्ठेन ब्रह्मा लोक पितामहः ॥ ध्यात्वा तत्रानयामास ज्येष्ठमध्यकनिष्ठिकम् ॥ पुष्करत्रितयं चागात्सुपुण्ये सलिलाशये ॥ ७ ॥ ततःप्रभृति संजातमर्बुदेऽ स्मिंस्त्रिपुष्करम् ॥ ८ ॥ तत्र यः कार्तिके मासि पौर्णमास्यां समाहितः ॥ स्नानं करोति दानं च तस्य लोकाः सनातनाः ॥ ९ ॥ तस्य चोत्तरदिग्भागे सावित्रीकुण्डमुत्तमम् ॥ स्नानदानादिकं कुर्वन्यत्र याति शुभां गतिम् ॥ १० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहि तायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखंडे त्रिपुष्करमाहात्म्यवर्णनंनाम चतुष्पंचाशत्तमोऽध्यायः ॥ ५४ ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो गच्छेन्नृपश्रेष्ठ पुण्यं रुद्रह्रदं शुभम् ॥ यत्र स्नातो नरो भक्त्या गणाधीशत्वमाप्नुयात ॥ १ ॥ पुरा हत्वांऽधकं दैत्यं सगणो वृषभध्वजः ॥ ततः स्नातो ह्रदं कृत्वा ततो रुद्रह्रदोऽभवत् ॥ २ ॥ चतुर्दश्यां महाराज यस्तत्र कुरुते नरः ॥ स्नानं तस्य भवेत्पुण्यं सर्वतीर्थसमुद्भवम् ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखण्डे रुद्रह्रदमाहात्म्यवर्णनंनाम पञ्चपञ्चाशत्तमोऽध्यायः ॥ ॥ ५५ ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो गच्छेन्नृपश्रेष्ठ गुहेश्वरमनुत्तमम् ॥ गुहामध्ये गतं लिंगं सिद्धैः संपूजितं पुरा ॥ १ ॥ यंयं





Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काममभिध्याय संपूजयति मानवः ॥ तंतं स लभते राजन्निष्कामो मोक्षमाप्नुयात् ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे तृतीयेऽर्बुदखण्डे गुहेश्वरमाहात्म्यवर्णनंनाम षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥ ॥ पुलस्त्य उवाच ॥ ॥ अवियुक्तवनं गच्छे त्ततः पार्थिवसत्तम ॥ यस्मिन्दृष्टे नरोभीष्टैर्न वियुज्येत कर्हिचित् ॥१॥ तत्र पूर्वं शची राजन्प्रविष्टा दुःखसंयुता ॥ नहुषेण हृते राज्ये देवेन्द्रस्य महा त्मनः ॥ २ ॥ तत्प्रभावात्पुनः प्राप्तो वियुक्तोऽपि शतक्रतुः ॥ ततस्तस्य वरो दत्तो वनस्य हि तया नृप ॥ ३ ॥ नरो वा यदि वा नारी वियुक्ताऽत्र वने शुभे ॥ प्रियैर्निवास एकस्मिन्रात्रिमेकां वसिष्यति ॥ ४ ॥ स तेन लभते संगं भूय एव यथा[१] मया ॥ प्रियैः स लभते वासमेकरात्रं वसन्नृप ॥ ५ ॥ फलदानं प्रशंसंति तत्र ब्राह्मणसत्तमाः ॥ वंध्यानां च विशेषेण यतः पुत्रफलं लभेत् ॥ ६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे तृतीयेऽर्बुदखण्डेऽवियुक्तक्षेत्रमाहात्म्यवर्णनंनाम सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ उमामाहेश्वरं गच्छेत्ततो राजन्सुपुण्यदम् ॥ स्थापितं भक्तियुक्तेन धुन्धुमारेण यत्पुरा ॥ १ ॥ दांपत्यं पूजयेद्भक्त्या यस्तत्र मनुजाधिप ॥ सप्त जन्मां तराण्येव न स दौर्भाग्यमाप्नुयात् ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखण्ड उमामाहेश्वरतीर्थमाहात्म्यवर्णनंनामाष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥ ततो महौजसं गच्छेत्तीर्थं पातकनाश नम् ॥ यस्मिन्स्नातो नरो राजंस्तेजसा युज्यते ध्रुवम् ॥ ब्रह्महत्याग्निना शक्रः पुरा दैन्यं परं गतः ॥ १ ॥ निःश्रीकस्तेजसा हीनो दुर्गन्धेन समन्वितः ॥ परित्यक्तः सुरैः सर्वैर्विषादं परमं गतः ॥ २ ॥ ततः पप्रच्छ देवेन्द्रो द्विजश्रेष्ठं बृहस्पतिम् ॥ भगवंस्तेजसो वृद्धिः कथं स्यान्मे यथा पुरा ॥ ३ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ तीर्थयात्रां सुरश्रेष्ठ कुरुष्व धरणीतले ॥ तीर्थं विना ध्रुवं वृद्धिस्तेजसो न भविष्यति ॥४॥ ततस्तीर्थान्यनेकानि भ्रांत्वा शक्रो नराधिप ॥ क्रमेणैवार्बुदं प्राप्तस्तत्र दृष्ट्वा जलाशयम् ॥ स्नानं चक्रे ततः श्रान्तो महौजाः प्रत्यपद्यत ॥ ५ ॥ दुर्गन्धेन विनिर्मुक्तस्ततो देवैः समावृतः ॥ उवाच प्रहसन्वाक्यं शृणुध्वं सर्वदेवताः ॥ ६ ॥ येऽत्र स्नानं करिष्यन्ति प्राप्ते शक्रोच्छ्रये सदा ॥ आश्विने शुक्लपक्षांते ते यास्यंति परां गतिम् ॥ सुश्रीकाश्च भविष्यंति सदा जन्मनिजन्मनि ॥ ७ ॥ इति श्रीस्कांदे महापुराण एकाशीति साहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखंडे महौजसतीर्थप्रभाववर्णनंनामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥ ॥ छ ॥ ॥ पुलस्त्य उवाच ॥ ॥

१ प्रियेण संगो लब्धः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ततो गच्छेन्नृपश्रेष्ठ जंबूतीर्थमनुत्तमम् ॥ तत्र स्नातो नरः सम्यगिष्टं फलमवाप्नुयात् ॥ जंबूद्वीपसमुत्थानां तीर्थानां नृपसत्तम ॥ १ ॥ आसीत्पुरा निमिर्नाम क्षत्रियः सूर्यवंशजः ॥ वयसः[1] परिणामे स पर्वतं चार्बुदं गतः ॥ २ ॥ प्रायोपवेशनं कृत्वा स्थितस्तत्र समाहितः ॥ अथाजग्मुर्मुनिगणास्तस्य पार्श्वे सहस्रशः ॥ ३ ॥ चक्रुर्धर्मकथां पुण्यां राजर्षीणां महात्मनाम् ॥ देवर्षीणां पुराणानां तथान्येषां महात्मनाम् ॥ ४ ॥ ततः कश्चित्कथांते च लोमशोनाम सन्मुनिः ॥ कीर्त्तयामास माहात्म्यं सर्वतीर्थसमुद्भवम् ॥ ५ ॥ तच्छ्रुत्वा पार्थिवो राजन्निमिः परमदुर्मनाः ॥ बभूव न कृतं पूर्वं यतस्तीर्थावगाहनम् ॥ ६ ॥ ततः प्रोवाच तं विप्रमस्त्युपायो द्विजोत्तम ॥ कश्चिद्येन च सर्वेषां तीर्थानां लभ्यते फलम् ॥ ७ ॥ ॥ ॥ लोमश उवाच ॥ ॥ दया मे नृप सञ्जाता त्वां दृष्ट्वा दुःखितं भृशम् ॥ तीर्थयात्राकृते यस्मात्करिष्येऽहं तव प्रियम् ॥ ८ ॥ अत्रैव चानयिष्यामि जंबूद्वीपोद्भवानि च ॥ सर्वतीर्थानि राजेन्द्र मन्त्रशक्त्या न संशयः ॥ ९ ॥ स्नानं कुरु महाराज ह्येकीभूतेषु तत्र च ॥ अस्मिञ्जलाशये पुण्ये सत्यमेतद्ब्रवीम्यहम् ॥ १० ॥ एवमुक्त्वा स विप्रर्षिर्ध्यानं चक्रे समाहितः ॥ ततस्तीर्थानि सर्वाणि तत्रायातानि तत्क्षणात् ॥ ११ ॥ प्रत्ययार्थं च राजर्षे जंबूवृक्षो व्यजायत ॥ तत्र स्नानं नृपश्चक्रे सर्वतीर्थमये ध्रुवे ॥ १२ ॥ सदेहश्च गतः स्वर्गे तीर्थस्नानादनन्तरम् ॥ ततः प्रभृति तत्तीर्थं जंबूतीर्थमनुस्मृतम् ॥ १३ ॥ कन्यागते रवौ तत्र यः श्राद्धं कुरुते नरः ॥ गयाशीर्षसमं तस्य पुण्यमाहुर्महर्षयः ॥ १४ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे तृतीयेऽर्बुदखण्डे जंबूतीर्थप्रभाववर्णनंनाम षष्टितमोऽध्यायः ॥ ६० ॥ ॥ छ ॥

॥ ॥ पुलस्त्य उवाच ॥ ॥ गंगाधरं ततो गच्छेत्सुपुण्यं विमलोदकम् ॥ येन गंगा धृता राजन्निपतन्ती नभस्तलात् ॥ १ ॥ आहूता देवदेवेन ह्यचलेश्वररूपिणा ॥ हरेण रभसा राजन्यत्पुरा कथितं तव ॥ २ ॥ तत्र यः कुरुते स्नानमष्टम्यां च समाहितः ॥ स गच्छेत्परमं स्थानं देवैरपि सुदुर्लभम् ॥ ३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखण्डे गंगाधरतीर्थमाहात्म्यवर्णनंनामैकषष्टितमोऽध्यायः ॥ ६१ ॥ ॥ छ ॥

॥ पुलस्त्य उवाच ॥ ॥ ततः केटेश्वरं[2] गच्छेल्लिंगं गौरीविनिर्मितम् ॥ तथा गंगेश्वरं चान्यद्गङ्गया निर्मितं स्वयम् ॥ १ ॥ पुरा समभवद्युद्धमुमायाः सह गंगया ॥ सौभाग्यं प्रति राजेन्द्र ततो गौरीत्यभाषत ॥ २ ॥ यया संपूजितः शंभुः शीघ्रं यास्यति दर्शनम् ॥ सा सौभाग्यवती नूनमावयोः संभविष्यति ॥ ३ ॥ एवमुक्ता ततो गंगा सत्वरैत्यात्र पर्वते ॥ लिंगमन्वेषयामास

१ वयसः परिणामे—वार्द्धक्यदशायाम्—इत्यर्थः । २ कंटेश्वरम्—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चिरकालादवाप सा ॥ ४ ॥ दृष्ट्वा गौर्याथ कटकं[1] पर्वतस्य मनोहरम् ॥ लिंगाकारं महाराजपू जयामास सा तदा ॥ ५ ॥ सम्यक्छ्रद्धासमोपेता ततस्तुष्टो महेश्वरः ॥ प्रददौ दर्शनं तस्या वरदोऽस्मीति चाब्रवीत् ॥ ६ ॥ ॥ गौर्युवाच ॥ ॥ सापत्न्यजेर्ष्यया देव मया लिंगं प्रकल्पितम् ॥ तस्मात्कटेश्वराख्या च लोके चास्य भविष्यति ॥ ७ ॥ या नारी पतिना मुक्ता सपत्नीदुःखदुःखिता ॥ अस्य संदर्शनादेव सा भविष्यति विज्वरा ॥ सुतसौभाग्यसंपन्ना भर्तृप्राणसमा तथा ॥ ८ ॥ गंगयाराधितो देव एवमेव वरं ददौ ॥ तस्माल्लिंगद्वयं तच्च द्रष्टव्यं मनुजाधिप ॥ ९ ॥ विशेषतश्च नारीभिः सपत्नीदोषहानिदम् ॥ सुखसौभाग्यदं नित्यं तथाऽभीष्टप्रदं नृणाम् ॥ १० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखंडे कटेश्वरगंगेश्वरमाहात्म्यवर्णनंनाम द्विषष्टितमोऽध्यायः ॥ ६२ ॥ ॥छ॥ ॥ पुलस्त्य उवाच ॥ ॥ एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ॥ अर्बुदस्य महाराज माहात्म्यं हि समासतः ॥ १ ॥ विस्तरेण च संख्या स्यादपि वर्षशतैरपि ॥ असंख्यानीह तीर्थानि पुण्यान्यायतनानि च ॥ पदेपदे गृहाण्येव निर्मितानि महर्षिभिः ॥ २ ॥ न तत्तीर्थं न सा सिद्धिर्न स वृक्षो महीपते ॥ न सा नदी न देवेशो यस्य तत्रास्ति न स्थितिः ॥ ३ ॥ ये वसंति महाराज सुरम्येऽर्बुदपर्वते ॥ नूनं ते पुण्यकर्माणो न वसंति त्रिविष्टपे ॥ ४ ॥ किं तस्य जीवितेनार्थः किं धनैः किं जपैर्नृप ॥ यो न पश्यति मन्दात्मा समन्तादर्बुदाचलम् ॥ ५ ॥ अपि कीटपतंगा ये पशवः पक्षिणो मृगाः ॥ स्वेदजाश्चाण्डजाश्चापि ह्युद्भिज्जाश्च जरायुजाः ॥ ६ ॥ तस्मिन्मृता महाराज निष्कामाः कामतोऽपि वा ॥ ते यान्ति शिवसायुज्यं जरामरणवर्जितम् ॥ ७ ॥ यश्चैतच्छृणुयान्नित्यं पुराणं श्रद्धयान्वितः ॥ अर्बुदस्य महाराज स यात्राफलमश्नुते ॥ ८ ॥ तस्मात्सर्वप्रयत्नेन यात्रां तत्र समाचरेत् ॥ य इच्छेदात्मनः सिद्धिमिह लोके परत्र च ॥ ९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे तृतीयेऽर्बुदखंडेऽर्बुदखण्डमाहात्म्यफलश्रुतिवर्णनंनाम त्रिषष्टितमोऽध्यायः ॥ ६३ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

## इति श्रीस्कान्दे महापुराणे सप्तमे प्रभासखण्डे तृतीयमर्बुदखण्डं सम्पूर्णम् ॥ (७–३) ॥

१ कटकम्—अद्रिनितंबम् ।

इदं पुस्तकं क्षेमराजश्रीकृष्णदासश्रेष्ठिना मुम्बय्यां स्वकीये "श्रीवेंकटेश्वर" स्टीम्–मुद्रणालये मुद्रयित्वा प्रकाशितम्। शके १८३१ संवत् १९६६



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्रीस्कांदे महापुराणे सप्तमे प्रभासखंडे तृतीयमर्बुदखण्डं संपूर्णम् ॥ (७-३) ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ श्रीस्कांदे महापुराणे सप्तमे प्रभासखण्डे चतुर्थं द्वारकामाहात्म्यं प्रारभ्यते॥(७-४)॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ श्रीगणेशाय नमः ॥ ॥ अथ स्कांदे महापुराणे सप्तमे प्रभासखण्डे चतुर्थं द्वारकामाहात्म्यम् ॥ ॥ शौनक उवाच ॥ ॥ कथं सूत युगे ह्यस्मि न्रौद्रे वैकलिसंज्ञके ॥ बहुपाखंडसंकीर्णे प्राप्स्यामो मधुसूदनम् ॥ १ ॥ युगत्रये व्यतिक्रान्ते धर्माचारपरे सदा ॥ प्राप्ते कलियुगे घोरे क्व विष्णुर्भग वानिति ॥ २ ॥ ॥ सूत उवाच ॥ ॥ दिवं याते महाराजे रामे दशरथात्मजे ॥ दुष्टराजन्यभारेण पीडिते धरणीतले ॥ ३ ॥ देवानां कार्यसिद्ध्यर्थं भूभारहरणाय च ॥ वसुदेवगृहे साक्षादाविर्भूते जनार्दने ॥ ४ ॥ नंदव्रजं गते देवे पूतनाशोषणे सति ॥ घातिते च तृणावर्ते शकटे परिवर्तिते ॥ ॥ ५ ॥ दमिते कालिये नागे प्रलंबे च निषूदिते ॥ धृते गोवर्धने शैले परित्राते च गोकुले ॥ ६ ॥ सुरभ्या चाभिषिक्ते तु इन्द्रे च विमदीकृते ॥ रासक्रीडारते देवे दारिते केशिदानवे ॥ ७ ॥ अक्रूरवचनाद्देवे मथुरायां गते हरौ ॥ हते कुवलयापीडे मल्लराजे च घातिते ॥ ८ ॥ पश्यतां देव दैत्यानां भोजराजे निपातिते ॥ यदुपुर्यामभिषिक्त उग्रसेने नराधिपे ॥ ९ ॥ जरासंधबले रौद्रे यवने च हते क्षितौ ॥ राजसूये क्रतुवरे चैद्ये चैव निपातिते ॥ १० ॥ निवृत्ते भारते युद्धे भारे च क्षपिते भुवः ॥ यात्राव्याजसमानीते प्रभासं यादवे कुले ॥ ११ ॥ मद्यपानप्रसक्ते तु परस्परवधो द्यते ॥ कलहेनातिरौद्रेण विनष्टे यादवे कुले ॥ १२ ॥ गात्रं संत्यज्य चात्रैव गतेऽनंते धरातलात् ॥ अश्वत्थमूलमाश्रित्य समासीने जनार्दने ॥ ॥ १३ ॥ व्याधप्रहारभिन्नांगे परित्यक्ते कलेवरे ॥ स्वधामसंस्थिते देवे पार्थे च पुनरागते ॥ १४ ॥ यदुपुर्यां प्लावितायां सागरेण समंततः ॥ शक्रप्रस्थं ततो गत्वा कारयित्वा हरेर्गृहम् ॥ १५ ॥ द्वापरे च व्यतिक्रांते धर्माधर्मविमिश्रिते ॥ संप्राप्ते च महारौद्रे युगे वै कलिसंज्ञिते ॥ १६ ॥ क्षीयमाणे च सद्धर्मे विधर्मे प्रबले तथा ॥ नष्टधर्मक्रियायोगे वेदवादबहिष्कृते ॥ एकपादे स्थिते धर्म्मे वर्णाश्रमविवर्जिते ॥ १७ ॥ अस्मिन्युगे विलुलिते ह्यृषयो वनचारिणः ॥ समेत्यामंत्रयन्सर्वे गर्गच्यवनभार्गवाः ॥ १८ ॥ असितो देवलो धौम्यः क्रतुरुद्दालकस्तथा ॥ एते चान्ये च बहवः परस्परमथाब्रुवन् ॥ १९ ॥ पश्यध्वं मुनयः सर्वे कलिव्याप्तं दिगंतरम् ॥ समंतात्परिधावद्भिर्दस्युभिर्बाध्यते प्रजा ॥ २० ॥ अधर्मपरमैः पुंभिः सत्यार्जवनिराकृतैः ॥ कथं स भगवान्विष्णुः संप्राप्यो मुनिसत्तमाः ॥ २१ ॥ को वा भवाब्धौ पततस्तारयिष्यति संगतान् ॥ न कलौ संभवस्तस्य त्रियुगो मधुसूदनः ॥ तं विना पुंडरीकाक्षं कथं स्याम कलौ युगे ॥ २२ ॥ तेषां चिंतयतामेवं दुःखितानां तपस्विनाम् ॥ उवाच वचनं तत्र ऋषिरुद्दालकस्तदा ॥ २३ ॥ ॥ उद्दालक उवाच ॥ ॥ यावन्न कलिदोषेण लिप्यामो मुनिसत्तमाः ॥ अपापा ब्रह्मसदनं गच्छामः

१ प्रदग्धे–इ०पा० । २ अस्मिन्–वर्णाश्रमविवर्जिते युगे–एकपादे स्थिते धर्मे विलुलिते–पङ्गौ–सति–वनचारिणः सर्वे गर्गादयः ऋषयः–समेत्य अमन्त्रयन्–इति वाक्यसंदर्भयोजना बोद्धव्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



परिसंगताः ॥ २४ ॥ पृच्छामो लोकधातारं स्थितं विष्णुं कलौ युगे ॥ यदि विष्णुः कलौ न स्याद्रुद्रेण ब्रह्मणा सह ॥ २५ ॥ तं विना पुंडरी
काक्षं त्यक्ष्यामः स्वं कलेवरम् ॥ विना भगवता लोके कः स्थास्यति कलौ युगे ॥ २६ ॥ तच्छ्रुत्वा वचनं तस्य ऋषयः संशितव्रताः ॥ साधुसा
ध्विति ते चोक्त्वा प्रस्थिता ब्रह्मणोंऽतिकम् ॥ २७ ॥ कथयन्तः कथां विष्णोः स्वरूपमनुवर्णनम् ॥ तापसाः प्रययुः सर्वे संहृष्टा ब्रह्मणोंऽतिकम् ॥
॥२८॥ ददृशुस्ते तदा देवमासीनं परमासने ॥ पितामहं भूतगणैर्मूर्तामूर्तैर्वृतं तथा ॥ २९ ॥ दृष्ट्वा चतुर्मुखं देवं दंडवत्प्रणताः क्षितौ ॥ प्रणम्य देवदेवं
तु स्तोत्रेण तुष्टुवुस्तदा ॥ ३० ॥ ॥ ऋषय ऊचुः ॥ ॥ नमस्ते पद्मसंभूत चतुर्वक्त्राक्षयाव्यय ॥ नमस्ते सृष्टिकर्त्रे तु पितामह नमोऽस्तु ते ॥३१॥
एवं स्तुतः सन्मुनिभिः सुप्रीतः कमलोद्भवः ॥ पाद्यार्घ्येणाभिवन्द्यैतान्पप्रच्छ मुनिपुंगवान् ॥ ३२ ॥ ॥ ब्रह्मोवाच ॥ ॥ किमागमनकृत्यं वो
ब्रूत तत्त्वेन पुत्रकाः ॥ कुशलं वो महाभागाः पुत्रशिष्याग्निबन्धुषु ॥ ३३ ॥ ॥ ऋषय ऊचुः ॥ ॥ भवत्प्रसादात्सकलं प्राप्तं नस्तपसः फलम् ॥
यद्भवंतं प्रपश्यामः सर्वदेवगुरुं प्रभुम् ॥ ३४ ॥ शृण्वेतत्कारणं शंभो एते प्राप्तास्तवांतिकम् ॥ युगत्रये व्यतिक्रांते कृतादिद्वापरांतके ॥ ३५ ॥
प्राप्ते कलियुगे घोरे क्व विष्णुः पृथिवीतले ॥ यं दृष्ट्वा परमां मुक्तिं यास्यामो मुक्तबन्धनाः ॥ ३६ ॥ ॥ ब्रह्मोवाच ॥ ॥ मत्स्यकूर्मादिरूपैश्च
भगवाञ्ज्ञायते मया ॥ विष्णोः पारमिकां मूर्तिं न जानामि द्विजोत्तमाः ॥ ३७ ॥ ॥ ऋषय ऊचुः ॥ ॥ यदि त्वं न विजानासि तात विष्णो
रवस्थितिम् ॥ गत्वा प्रयागं तत्रैव संत्यक्ष्यामः कलेवरम् ॥ ३८ ॥ ॥ ब्रह्मोवाच ॥ ॥ मा विषादं व्रजध्वं हि उपदेक्ष्यामि वो हितम् ॥ इतो
व्रजध्वं पातालं यत्रास्ते दैत्यसत्तमः ॥ ३९ ॥ तं गत्वा परिपृच्छध्वं प्रह्लादं दैत्यसत्तमम् ॥ स ज्ञास्यति हरेः स्थानं याथातथ्येन भो द्विजाः ॥४०॥
तच्छ्रुत्वा वचनं तस्य ब्रह्मणः परमात्मनः ॥ प्रणिपत्य च देवेशं प्रस्थितास्ते तपोधनाः ॥ ४१ ॥ जग्मुः संहृष्टमनसः स्तुवन्तो दैत्यसत्तमम् ॥
धन्यः स दैत्यराजोऽयं यो जानाति जनार्दनम् ॥ ४२ ॥ इति संचिंतयानास्ते प्राप्ता वै सुतलं द्विजाः ॥४३॥ गत्वा ते तस्य नगरं विविशुर्भवनोत्त
मम् ॥ दूरादेव स तान्दृष्ट्वा बलिर्वैरोचनिस्तदा ॥ प्रत्युत्थायार्हयाञ्चक्रे प्रह्लादेन समन्वितः ॥ ४४ ॥ मधुपर्कं च गां चैव दत्त्वा चार्घ्यं तथैव च ॥
उवाच प्रांजलिर्भूत्वा प्रहृष्टेनांतरात्मना ॥ ४५ ॥ स्वागतं वो महाभागाः सुव्युष्टा रजनी मम ॥ भवतो यत्प्रपश्यामि ब्रूत किं कर
वाणि च ॥ ४६ ॥ एवं हि दैत्यराजेन सत्कृतास्ते द्विजोत्तमाः ॥ ऊचुः प्रहृष्टमनसो दानवेन्द्रसुतं तदा ॥ ४७ ॥ ॥ ऋषय

१ परिसंगताः—इदानीमेकत्र मिलिताः—इत्यर्थः । तावत्—इति शेषः । २ शंभो—सुखजनक—प्रभो—इत्यर्थः । ३ प्रहृष्टमनसः—इ० पा० । ४ प्राप्ता वै धरणीतलं—इ० पा० । ५ संहृष्टमनसः—इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऊचुः ॥ ॥ कार्यार्थिनस्तु संप्राप्ताः प्रह्लाद हरिवल्लभ ॥ तदस्माकं महाबाहो [1]भवांस्त्राता भवार्णवात् ॥ ४८ ॥ कथं दैत्य युगे ह्यस्मि न्रौद्रे वै कलिसंज्ञके ॥ भविष्यामो विना विष्णुं भीतानामभयप्रदम् ॥ ४९ ॥ [2]अस्मिन्युगे ह्यधर्मेण जितो धर्मः सनातनः ॥ अनृ तेन जितं सत्यं विप्राश्च वृषलैर्जिताः ॥ ५० ॥ विटैर्जिता वेदमार्गाः स्त्रीभिश्च पुरुषा जिताः ॥ ब्राह्मणाश्चापि [3]वध्यन्ते म्लेच्छ राजन्यरूपिभिः ॥ ५१ ॥ अस्मिन्विलुलितप्राये वर्णाश्रमविवर्जिते ॥ अविलुप्ते वेदमार्गे क्व विष्णुर्भगवानिति ॥ ५२ ॥ विना ज्ञानाद्विना ध्याना द्विना चेंद्रियनिग्रहात् ॥ प्राप्यते भगवान्यत्र तद्ब्रूह्यं कथयस्व नः ॥५३॥ दैत्यराज त्वमस्माकं सुहृन्मार्गप्रदर्शकः ॥ कथयस्व महाभाग[5]यत्र तिष्ठति केशवः ॥ ५४ ॥ एवं स द्विजमुख्यैश्च संपृष्टो दैत्यसत्तमः ॥ प्रणम्य ब्राह्मणान्सर्वान्भक्त्या संहृष्टमानसः ॥ ५५ ॥ स नमस्कृत्य देवेभ्यो ब्रह्मणे परमात्मने ॥ [4]भगवद्भक्तियुक्तः सन्व्याहर्त्तुमुपचक्रमे ॥ ५६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे चतुर्थेद्वार कामाहात्म्ये कलिभीतमहर्षिभिर्ब्रह्मवचनात्प्रह्लादसंनिधौ कलियुगे भगवत्स्थितिविषयेप्रश्नकरणवर्णनंनाम प्रथमोऽध्यायः ॥ १ ॥ छ ॥ ॥ प्रह्लाद उवाच ॥ ॥ सर्वेषामपि भूतानां दैत्यदानवरक्षसाम् ॥ भवन्तो वै पूज्यतमा देवादीनां तथैव च ॥१॥ अनुज्ञया तु युष्माकं प्रसादात्केशवस्य हि ॥ [6]अधिष्ठानं भगवतः कथयामि निबोधत ॥ २ ॥ पश्चिमस्य समुद्रस्य तीरमाश्रित्य तिष्ठति ॥ कुशस्थलीति या पूर्वं कुशेन स्थापिता पुरी ॥ ३ ॥ वहते गोमती यत्र सागरेण समंततः ॥ द्वारावतीति सा विप्रा आ[7]नर्त्तेषु प्रकीर्त्तिता ॥ ४ ॥ तस्यां वसति विश्वात्मा [8]सर्वकामप्रदो हरिः ॥ कला षोडशसंयुक्तो मूर्तिद्वादशकान्वितः॥ ५ ॥ तदेव परमं धाम तदेव परमं पदम् ॥ द्वारका सा च वै धन्या यत्राऽऽस्ते मधुसूदनः ॥ ६ ॥ यत्र कृष्णश्चतु र्बाहुः शंखचक्रगदाधरः ॥ नरा मुक्तिं प्रयास्यंति तत्र गत्वा कलौ युगे ॥ ७ ॥ तच्छ्रुत्वा वचनं तस्य प्रह्लादस्य महात्मनः ॥ विस्मयाविष्टमनसस्त मूचुर्मुनिसत्तमाः ॥ ८ ॥ ॥ ऋषय ऊचुः ॥ ॥ क्षयं यदुकुले याते भारे चोपहृते भुवः ॥ प्रभासे यादवश्रेष्ठः स्वस्थानमगमद्धरिः ॥ ९ ॥ द्वारा वत्यां प्लावितायां समंतात्सागरेण हि ॥ कथं स भगवांस्तत्र कलौ दैत्य प्रकीर्त्यते ॥ १० ॥ कथयस्व सुरश्रेष्ठ कथं विष्णुर्महीतले ॥ स्थितश्चानर्त्त विषय एतद्विस्तरतो वद[9] ॥११॥ ॥ प्रह्लाद उवाच ॥ ॥ उग्रसेने नरपतौ प्रशासति वसुन्धराम् ॥ कृष्णो यदुपुरीमेतां शोभयामास सर्वतः ॥१२॥

१ त्राता त्वं च भवार्णवात्–इ० पा० । २ यस्मिन्–इ० पा० । ३ पीड्यंते–इ० पा० । ४ भगवद्भक्तिसंयुक्तः–इ० पा० । ५ एव–इ० पा० । ६ अवस्थानम्–इ० पा० । ७ शरच्छुभा–इ० पा० । ८ भुक्तिमुक्तिप्रदो हरिः–इ० पा० । ९ पुस्तकान्तरे तु एतदग्रे–बलिरुवाच ॥ कथयस्व ममाप्येतत्कथं विष्णुर्महीतले–इति पाठान्तरं दृश्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



रममाणे रमानाथे रामाभिरमणे हरौ ॥ एकदा तु समासीने सभायां यदुसत्तमे ॥ १३ ॥ कथाभिः क्रियमाणाभिर्विचित्राभिरनेकधा ॥ उद्धवः कथयामास प्रचारं[1] यदुनंदनम् ॥ १४ ॥ यात्रायामनुसंप्राप्तं दुर्वाससमकल्मषम् ॥ स्थितं तं गोमतीतीरे चक्रतीर्थसमीपतः ॥ १५ ॥ तच्छ्रुत्वा सहसोत्थाय भगवान्रुक्मिणीगृहम् ॥ जगाम हृष्टमनसा विश्वशक्तिरधोक्षजः ॥ १६ ॥ आगत्योवाच वैदर्भीं संप्राप्तमृषिसत्तमम् ॥ तपोनिर्धूतपाप्माऽयमत्रिपुत्रो महातपाः ॥ १७ ॥ आतिथ्येनार्चितो विप्रो दास्यते च महोदयम् ॥ गृहिणी न गृहे यस्य सत्पात्रागमनं वृथा ॥ १८ ॥ तस्य देवा न गृह्णंति पितरश्च तथोदकम् ॥ तदागच्छस्व गच्छामो निमंत्रयितुमत्रिजम् ॥ १९ ॥ तथेत्युक्त्वा तु सा देवी रथमारुरुहे सती ॥ रथमारुह्य देवेशो रुक्मिण्या सहितो हरिः ॥ जगाम तत्र यत्रास्ते दुर्वासा मुनिसत्तमः ॥ २० ॥ दृष्ट्वा ज्वलंतं तपसा कूले नदनदीपतेः ॥ कापालिकस्य पुरतः सुस्नातं वरसीकरैः[2] ॥ २१ ॥ प्रणम्य भगवान्भक्त्या पप्रच्छाऽनामयं ततः ॥ पश्चाद्विदर्भतनया रुक्मिणी प्रणनाम तम् ॥ २२ ॥ दुर्वासाश्चापि तौ दृष्ट्वा दर्शनार्थमुपागतौ ॥ पप्रच्छ कुशलं तत्र स्वागतेनाभिनंद्य च ॥२३॥ ॥ दुर्वासा उवाच ॥ ॥ कुशलं कृष्ण सर्वत्र कुत्र वासस्तवाऽधुना ॥ कति दारा धनापत्यमेतद्विस्तरतो वद ॥ २४ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ समुद्रेण प्रदत्ता मे भूमिर्द्वादशयोजना ॥ तस्यां निवसतो ब्रह्मन्पुरी हेममयी[3] मम ॥ २५ ॥ प्रासादास्तत्र सौवर्णा नवलक्षाणि संख्यया ॥ तस्यां वसामि संहृष्टस्त्वत्प्रसादात्सुनिर्भयः ॥ २६ ॥ तच्छ्रुत्वा वचनं तस्य विस्मयाविष्टमानसः ॥ प्रत्युवाच स दुर्वासाः प्रहस्य मधुसूदनम् ॥२७॥ वसंति तावका ये च तेषां संख्या वदस्व भोः ॥ यावत्यश्च महिष्यस्ते पुत्राः परिजनास्तथा ॥२८॥ ॥ श्रीकृष्ण उवाच ॥ ॥ ब्रह्मन्षोडशसाहस्रं भार्य्याश्चाष्टाधिका मम ॥ तासां मध्येऽभीष्टतमा विदर्भाधिपतेः सुता ॥ ॥ २९ ॥ एकैकस्या दश सुताः कन्या चैका तथा मुने ॥ षट्पंचाशद्यदूनां तु कोट्यः परिजनो मम ॥ ३० ॥ शेषाः प्रकृतयो ब्रह्मंस्तेषां संख्या न विद्यते ॥ तच्छ्रुत्वा चिंतयामास किमेतदिति विस्मितः ॥ ३१ ॥ अहो ह्यनंतवीर्य्यस्य मायामाश्रित्य तिष्ठतः ॥ अनंता सर्वकर्तृत्वे प्रवृत्तिर्दृश्यतामियम्॥३२॥ ॥ दुर्वासा उवाच ॥ ॥ स्वागतं ते महाबाहो ब्रूहि किं करवाणि ते ॥ दर्शनेन त्वदीयेन प्रीतिमेति च मे मनः॥३३॥ ॥ श्रीकृष्ण उवाच॥ ॥ यदि प्रसन्नो भगवंस्तदागच्छस्व मे गृहम् ॥ शिरसा धार्य्य पादांबु प्रयास्यामि पवित्रताम् ॥३४॥ ॥ दुर्वासा उवाच ॥ ॥ अक्षमासारसर्वस्वं[4] किं मां नयसि माधव ॥ नय मां यदि मद्वाक्यं करोषि सह भार्यया ॥३५॥ ॥ प्रह्लाद उवाच ॥ ॥ एवमस्त्विति चोक्त्वा स प्रस्थितः स्वरथेन हि ॥ तं दृष्ट्वा

१ प्रचारम्—राष्ट्रे जायमानां लोकवार्ताम्—इत्यर्थः । प्रवरं धातृनंदनम्—इ० पा० । २ वरसीकरैः—स्वच्छजलैः—इत्यर्थः । ३ श्रेष्ठतमा—इ० पा० । ४ अक्षमासारसर्वस्वम्—असहनैकस्वभावम्—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रस्थितं विष्णुं प्रहस्योवाच भर्त्सयन् ॥ ३६ ॥ ॥ दुर्वासा उवाच ॥ ॥ दुर्वाससं न जानासि मुञ्चेमान्हयसत्तमान् ॥ त्वं च भार्या तथा चेयं
वहतं स्वरथेन माम् ॥ ३७ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ भगवन्यथा प्रब्रवीषि विप्र कर्त्तास्मि तत्तथा ॥ त्वया कृपालुना ब्रह्मन्पारितोऽहं सबां
धवः ॥ ३८ ॥ ॥ प्रह्लाद उवाच ॥ ॥ तौ तथा ऋषिवर्य्योऽसौ युक्तां देवीं रथे स्वके ॥ तथैव पुण्डरीकाक्षं याहि याहीत्यभाषत ॥ ३९ ॥ तं
दृष्ट्वा देवताः सर्वा वहमानं रथं हरिम् ॥ साधुसाध्विति भाषंत ऊचुः सर्वे परस्परम् ॥ ४० ॥ अहो ब्रह्मण्यदेवस्य परां भक्तिं प्रपश्यत ॥
स्कन्धे कृत्वा धुरं यो हि वहते भार्य्यया सह ॥ ४१ ॥ विकीर्यमाणः कुसुमैः सुरसंघैर्जनार्दनः ॥ जगाम स रथं गृह्य सभार्यो द्वारकां प्रति ॥
॥ ४२ ॥ उह्यमाने रथे तस्मिन्रुक्मिणी तृषिताऽभवत् ॥ उवाच कृष्णं वैदर्भी श्रमव्याकुललोचना ॥ ४३ ॥ श्रान्ता भारपरिक्लिष्टा वहती कोपनं
द्विजम् ॥ पाययित्वोदकं कान्त नय मां मन्दिरं स्वकम् ॥ ४४ ॥ तच्छ्रुत्वा वचनं तस्याः पादाक्रान्त्या धरातलात् ॥ आनयामास भगवान्गंगां
त्रिपथगां शुभाम् ॥ ४५ ॥ तद्दृष्ट्वा निर्मलं शीतं सुगंधं पावनं तथा ॥ पपौ पिपासिता देवी रुक्मिणी जाह्नवीजलम् ॥ ४६ ॥ पीतं तया जलं दृष्ट्वा
चुकोप ऋषिसत्तमः ॥ जज्वाल ज्वलनप्रख्यः शशाप परमेश्वरीम् ॥ ४७ ॥ ॥ दुर्वासा उवाच ॥ ॥ मामपृष्ट्वा जलं यस्मात्पीतवत्यसि रुक्मि
णि ॥ तस्मात्पानरता नित्यं भविष्यसि न संशयः ॥ ४८ ॥ अवियुक्ता रथाद्यस्मान्मामपृष्ट्वा जलं त्वया ॥ पीतं तस्माच्च कृष्णेन वियुक्ता त्वं
भविष्यसि ॥ ४९ ॥ ॥ प्रह्लाद उवाच ॥ ॥ एतावदुक्त्वा वचनं क्रोधसंरक्तलोचनः ॥ परित्यज्य रथं विप्रो भूमावेवावतिष्ठति ॥ ५० ॥
एवं शप्ता तदा देवी रुरोदातीव विह्वला ॥ उवाच कृष्णं करुणं कथं स्थास्ये त्वया विना ॥ ५१ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ आयास्ये प्रत्यहं
देवि द्विकालं भवनं तव ॥ यो मां पश्यति चात्रस्थं स त्वामेव प्रपश्यति ॥ ५२ ॥ मां हि दृष्ट्वा नरो यस्तु त्वां न पश्यति भक्तितः ॥ अर्द्धं यात्रा
फलं तस्य भविष्यति न संशयः ॥ ५३ ॥ आश्वास्य च प्रियामेवं ब्राह्मणं यदुनन्दनः ॥ ततः प्रसादयामास दुर्वाससमकल्मषम् ॥ ५४ ॥ बाह्यो
पवनमध्ये तु पूजयामास तं तथा ॥ अवनिज्य स्वयं पादौ विप्रपादावनेजनम् ॥ धारयामास शिरसा जगतः पावनो हरिः ॥ ५५ ॥ दत्त्वार्घ्यं गां
च विप्राय मधुपर्कं स भक्तितः ॥ विधिवद्भोजयामास षड्रसेन द्विजोत्तमम् ॥ ५६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे
प्रभासखण्डे चतुर्थे द्वारकामाहात्म्ये दुर्वासोद्वारकानयनदुर्वासोदत्तरुक्मिणीशापवृत्तान्तवर्णनंनाम द्वितीयोऽध्यायः ॥२॥ ॥छ॥ ॥ ऋषय ऊचुः ॥ ॥

१ दुर्वासाः—इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



अहो ब्रह्मण्यदेवस्य कृष्णस्यामिततेजसः ॥ महिमा यदयं नैव मृषा चक्रे मुनेर्वचः ॥ १ ॥ तेन चक्रे न रोषं स सेतुपालो जनार्दनः ॥ भृगोर्य
श्चरणाघातं दधार हृदि लाञ्छनम् ॥ २ ॥ सा तु देवी कथं तेन प्रेयसा विप्रयोजिता ॥ एकाकिनी स्थिता तत्र कथ्यतामसुरेश्वर ॥ ३ ॥ उत्क
ण्ठिता अति वयं श्रोतुं द्वारवतीं मुदा ॥ इदमादौ बुभुत्सामश्चित्तखेदापनुत्तये ॥ ४ ॥ ॥ प्रह्लाद उवाच ॥ ॥ श्रूयतामृषयः सर्वे गदतो मम
विस्तरात् ॥ यथा शापोद्भवं दुःखं मुमोच हरिवल्लभा ॥५॥ अथ दुर्वाससः शापमवाप्यारुन्तुदं तदा ॥ यादवेन्द्रस्य गृहिणी सहसा पर्यदेवयत् ॥६॥
॥ ॥ रुक्मिण्युवाच ॥ ॥ कल्याणी बत वाणीयं लौकिकी संविभाव्यते ॥ कूपके चैव सिन्धौ च प्रमाणान्नाधिकं जलम् ॥ ७ ॥ या साहं भूरि
भाग्या वै प्राप्य नाथं जगत्पतिम् ॥ इयमेकाकिनी जाता पौलस्त्याद्देवहेलनात् ॥ ८ ॥ क्व मंगलालयः श्रीमाननवद्यगुणो हरिः ॥ अल्पपुण्या
सुसंबाधा कामिनी क्वातिचञ्चला ॥ ९ ॥ तथापि घटयामास धाता वंचनकोविदः ॥ विधानमशुभाया मे वियोगविषमव्ययम् ॥ १० ॥ अन्यथा
वर्णगुरवः स्नातास्त्वैविद्यवर्त्मनि ॥ कथं नु शप्तुमर्हन्ति स्वयं खिन्नामनागसम् ॥ ११ ॥ विदधे वज्रमयं तु किं न्विदं हृदयं मेऽतिकठोरमेव हि ॥
शतधा न विदीर्यते यतो विरहे दुर्विषहे मधुद्विषः ॥ १२ ॥ अधिकृत्य सुदुश्चरं तपः प्रतिलब्धः प्रथमं मयात्मजः ॥ तनयेन विनाकृताऽप्यहं न
मृता पंचसु वासरेष्विह ॥ १३ ॥ उपलभ्य सुदारुणामिमामपि पीडामवितास्म्यहं तदा ॥ यदिदं विधुनोति कल्मषं खलु तन्मां समुपेत्य लक्षवृ
द्धिम् ॥ १४ ॥ इति साऽतिविलप्य दुःखितार्था कुररीतुल्यतया शुशोच वेगात् ॥ विरहेण विघूर्णिताशया द्विजशापापहता मुमूर्च्छ सद्यः ॥ १५ ॥
अथ दुर्वाससा शप्ता रुक्मिणी कृष्णवल्लभा ॥ मूर्च्छनामाप तत्रैव ह्याजगाम पयोनिधिः ॥ १६ ॥ सुधाशीकरगर्भेण पद्मकिंजल्कवायुना ॥ न्यवी
जयदिमां देवीं रुक्मिणीं कृष्णवल्लभाम् ॥ १७ ॥ एतस्मिन्नन्तरे तत्र व्योममार्गेण नारदः ॥ गायन्गुणान्भगवतो वीणापाणिः समागतः ॥ १८ ॥
स दृष्ट्वा सिंधुनाऽऽश्वास्यमानां विश्वस्य मातरम् ॥ अवतीर्य श्रुतकथो बोधयामास नारदः ॥ १९ ॥ ॥ नारद उवाच ॥ ॥ मा खेदं देव
देवेशि देवि त्वदधिपे पतौ ॥ दूरीकृते विप्रशापात्कुरु कल्याणि धीरताम् ॥ २० ॥ त्वं हि साक्षाद्भगवती कृष्णश्च पुरुषोत्तमः ॥ अवतीर्णो
धराभारमपनेतुं यदृच्छया ॥ २१ ॥ देवो ह्यसौ परं ब्रह्म सदाऽनिर्विण्णमानसः ॥ मायाशक्तिस्त्वमेतस्य सर्गस्थित्यन्तकारिणः ॥ २२ ॥ संहृत्य
निखिलं शेते ययाऽसौ कलया स्वराट् ॥ तदापि न वियुज्येत त्वया विश्वपतिः प्रभुः ॥ २३ ॥ अवियुक्तस्त्वया नित्यं देवदेवो जगत्पतिः ॥

१ बुभुत्सामः—बोद्धुमिच्छामः । २ वर्णगुरवः—ब्राह्मणाः—"वर्णानां ब्राह्मणो गुरुः" इत्युक्तेः । ३ लक्षवृद्धिम्—लक्षगुणां वृद्धिम्—इत्यर्थः । ४ पयोनिधिः—समुद्रः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लीलावतारेष्वेतस्य सर्वेषु त्वं सहायिनी ॥ २४ ॥ योगं वियोगं च तथा न यात्येष त्वयाऽनघे ॥ विडंबयति भूतानामुपकाराय चेश्वरः ॥ २५ ॥ आराधनीयाः सततं भूदेवा भूतिमीप्सता ॥ प्रकोपनीया नैवैते तत्त्वज्ञा हि तपस्विनः ॥ २६ ॥ इत्येवं शिक्षयँल्लोकं वियोगं तेऽनुमन्यते ॥ मुनिशापाद्धरिः साक्षाद्गूढः कपटमानुषः ॥ २७ ॥ अपि स्मरसि कल्याणि जातो रघुकुले स्वयम् ॥ लोकानुग्रहमन्विच्छन्भूभारहरणोत्सुकः ॥ २८ ॥ तं हरिं जगतामीशं रुक्मिणि त्वं न वेत्सि किम् ॥ प्राणेभ्योऽपि गरीयांसमयं देवः स एव हि ॥ २९ ॥ येनेदं पूरितं विश्वं बहिरन्तश्च सुव्रते ॥ असंगस्य विभोः संगः कथं स्यादिति मन्मतिः ॥ ३० ॥ तया त्वया नियुक्तोऽसाविति प्रत्येमि सर्वशः ॥ तद्विमुञ्चाऽऽधिमत्यर्थमात्मानमनुसंस्मर ॥ प्रसीद मातः संधेहि धीरतां स्वमनीषया ॥ ३१ ॥ इति ब्रुवति देवर्षाववसाने नदीपतिः ॥ प्रोवाच वचनं तस्यै वाचा मृदुसुवर्णया ॥ ३२ ॥

॥ ॥ समुद्र उवाच ॥ ॥ यदाह देवि देवर्षिर्नत्वा त्वां सत्यमेव तत् ॥ गीयसे त्वं हि वेदेषु नित्यं विष्णोः सहायिनी ॥ ३३ ॥ परः पुमानेष निरस्तविग्रहो गूढोऽधिपस्ते विदधाति भूयः ॥ विश्वं व्यवस्थापयति स्वरोचिषा त्वया सहायेन बिभर्ति मूर्तिम् ॥ ३४ ॥ तदेष परिखेदस्ते न मनागपि युज्यते ॥ वक्षःस्थलस्था भवती नित्यं श्रीवत्सलक्ष्मणः ॥ ३५ ॥ इयं भागीरथी देवी मदादेशादुपागता ॥ विनोदयिष्यत्यनिशं त्वां हि देवि शरीरिणी ॥ ३६ ॥ एतस्याः स्यान्मृदु स्वादु पयः पूरोपशोभितम् ॥ प्रदेशोऽयमशेषोऽपि भविता त्वत्सुखप्रदः ॥ ३७ ॥ नानाद्रुमलताकीर्णं निकुंजैरुपशोभितम् ॥ मातंगैश्च समाजुष्टं मंजुगुंजन्मधुव्रतम् ॥ ३८ ॥ नवपल्लवभङ्गीभिः कुसुमस्तबकैः शुभैः ॥ फलैरमृतकल्पैश्च मंजरीराजिभिस्तथा ॥ ३९ ॥ नंदनस्य श्रिया जुष्टं मनोनयननन्दनम् ॥ वनं रम्यतरं चात्र ह्यचिरेण भविष्यति ॥ ४० ॥ त्वया संबोधनीयाः स्म वयं मातः सदैव हि ॥ अगम्यरूपा विद्या त्वमस्माभिर्बोध्यसे कथम् ॥ ४१ ॥ तदावामनुजानीहि प्रसीद परमेश्वरि ॥ नमस्ते विश्वजननि भूयोऽपि च नमोनमः ॥ ४२ ॥ ॥ प्रह्लाद उवाच ॥ ॥ एवमुक्त्वा जगद्धात्रीं जग्मतुस्तौ यथागतम् ॥ आजगाम च तत्रैव देवी भागीरथी स्वयम् ॥ ४३ ॥ वनं समभवत्तत्र दिव्यभूरुहसेवितम् ॥ सेऽयं समस्तलोकानां फलपुष्पसमृद्धिमत् ॥ ४४ ॥ प्रसादेन च भूतानां गंगाऽशेषाघहारिणी ॥ भूषयामास तं देशं सा च विष्णुपदी सरित् ॥ ४५ ॥ देवी च मुनिवाक्येन गंगायाश्च विनोदनात् ॥ सौन्दर्यात्तस्य देशस्य किञ्चित्स्वास्थ्यमवाप ह ॥ ४६ ॥ अथ विष्णुपदीं देवीं श्रुत्वा सागरसंगताम् ॥ इतस्ततः समाजग्मुः श्रद्दधानाः पयस्वि

१ आधिम्--मानसीं चिन्ताम् । २ आवाम्--नौ--समुद्रनारदौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



नीम् ॥४७॥ द्वारकावासिनश्चैव जनाः काननशोभया ॥ हृष्टचित्ताः समाजग्मुरनिशं रुक्मिणीवनम् ॥४८॥ श्रुत्वा तदखिलं सर्वं दुर्वासाः शांभवी
कला ॥ चुकोप स्मयमानश्च भूय एतदभाषत ॥ ४९ ॥ ॥ दुर्वासा उवाच ॥ ॥ कः प्रभुस्त्रिषु लोकेषु मह्यं[1] वचनमन्यथा ॥ विधातुमपि [2]
नामाद्यो लोकपितामहः ॥ ५० ॥ किं न जानाति लोकोऽयं मयि रोषकषायिते ॥ शक्रं प्रति त्रिभुवनं भ्रष्टश्रीकमभूत्तदा ॥ ५१ ॥ मम शापमवि
ज्ञाय नन्दनप्रतिमे वने ॥ कथं सा रुक्मिणी तत्र रमते जनसेविते ॥ ५२ ॥ तदेते तरवः सर्वे संत्वभोज्यफला नृणाम् ॥ विभ्रष्टसर्वसौभाग्याः कुसु
मस्तबकोज्झिताः ॥ ५३ ॥ इयं तु शापनिर्दग्धा हरचूडामणिः सरित् ॥ वार्यस्याः स्यादपेयं तु नैवेह स्थातुमर्हति ॥५४॥ ॥ प्रह्लाद उवाच ॥ ॥
तदा सर्वमभूत्तत्र यद्यदाह च वै मुनिः ॥ वाचि वीर्यं हि विप्राणां निर्मितं विष्णुना स्वयम् ॥ ५५ ॥ सा तु देवी तथा वृत्तमवेक्ष्य भृशदुःखि
ता ॥ मेने दुरत्ययं दैवमापतत्तत्पुनःपुनः ॥ ५६ ॥ ततस्तु सा विनिश्चित्य मरणं दुःखभेषजम् ॥ उत्तरीयांबरेणैव बहिः किंचित्प्रबद्धय तु ॥
॥५७॥ अथावबुध्य तत्सर्वं सर्वभूतगुहाशयः ॥ तां ज्ञात्वा सत्वरं चाऽऽगात्सुपर्णेन दयानिधिः ॥ ५८ ॥ ददर्श तादृशीं देवीं कण्ठपाशकरां विभुः ॥
अधस्तात्तरुशाखायां निमीलितविलोचनाम् ॥ ५९ ॥ विभ्रष्टभूषणगणां कृशदेहवल्लीं म्लानाननांबुजरुचं मरणे प्रसक्ताम् ॥ मेने स विग्रहवतीं
करुणां कृपालुस्तां सौख्यदां गुणवतीं प्रणतार्तिहन्त्रीम् ॥ ६० ॥ संश्रुत्य साऽपि पतगाधिपते रवं वै प्रोन्मील्य नेत्रकमलेऽथ ददर्श कृष्णम् ॥
सामन्यत त्रिकविवर्तितलोचनाब्जं प्राप्तं तमिष्टसुहृदं निजजीवनाथम् ॥ ६१ ॥ सा रोमहर्षविवशा त्रपया परीता कोपानुरागकलुषा कृतविप्र
लापा ॥ संवर्द्धितद्विगुणशोकभरा च देवी नानारसं बत दृशोर्विषयं प्रपेदे ॥ ६२ ॥ तस्याः ससाध्वसविसर्गचिकीर्षितायाः पाशं व्यपोह्य करचारु
सरोरुहेण ॥ आदाय पाणिममृतोपमया च वाचा संजीवयन्निदमुदारमुदा[3]जहार ॥ ६३ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ किमेतत्साहसं भीरु चिकी
र्षस्यविचारितम् ॥ ननु देवि ममाचक्ष्व किं नु ते खेदकारणम् ॥ ६४ ॥ त्वं विद्याऽहं परो बोधस्त्वं माया चेश्वरस्त्वहम् ॥ त्वं च बुद्धिरहं जीवो
वियोगः कथमावयोः ॥ ६५ ॥ त्वया विमोहितात्मानो भ्राम्यन्त्यजभवादयः ॥ सा कथं क्षुभ्यसि त्वं तु किं स्वधाम न बुध्यसे ॥ ६६ ॥ त्वया
हि बद्धा ऋषयस्ते चरन्तीह कर्मभिः ॥ तां त्वां कथमृषिः शप्तुं शक्नुयाद्वरवर्णिनि ॥ ६७ ॥ शिक्षार्थं[4] त्विह लोकानामेवं मे देवि चेष्टितम् ॥ मन्मा
यया समाविष्टः कुरुते विवशः पुमान् ॥ पश्य कोपपरीतात्मा यः स शान्तो मुनीश्वरः ॥ ६८ ॥ ॥ प्रह्लाद उवाच ॥ ॥ सोऽभ्येत्य भक्तिन



१ मह्यम्–मम । २ हरिः–इति विशेष्यमध्याहार्यम् । ३ हरिः–इति कर्ताऽध्याहर्तव्यः । ४ शिक्षार्थम्–उपदेशार्थम्–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्रोऽथ दुर्वासा मुनिसत्तमः ॥ विचार्य मनसा सव पश्चात्तापानुपाश्रयत् ॥ ६९ ॥ किं मया कृतमित्युक्त्वा तत्समीपमुपागमत् ॥ अपतद्विलुठन्भूमौ दण्डवच्चाश्रुसंप्लुतः ॥ ७० ॥ पितरौ जगतो देवौ क्षामयामास दीनवत् ॥ तुष्टाव सूक्तवाक्यैस्तु रहस्यैर्भक्तिसंयुतः ॥ ७१ ॥ आह चेदं जगन्नाथं यदि मय्यस्त्यनुग्रहः ॥ तदा पुरेव संयोगो देव देव्या विधीयताम् ॥ ७२ ॥ अथ प्रहस्य गोविन्दस्तमाह मुनिसत्तमम् ॥ न हि ते वचनं जातु मृषा भवितुमर्हति ॥ ७३ ॥ मयैवं विहितः सेतुः कथमुच्छेद्यतां द्विज ॥ सद्भिराचरितः सेतुः सिद्धो लोकस्य पालकः ॥ ७४ ॥ दिनेदिने द्विकालं च आयास्ये मुनिसत्तम ॥ विनोदयिष्ये तां[1] तां[2] तु मुनिकन्यां च काम्यया ॥ ७५ ॥ तुष्यामि साधनैर्नान्यैर्मत्कथाकथनैरपि ॥ यथा संपूज्य मामत्र मम प्रीतिर्भविष्यति ॥ ७६ ॥ यदा च मयि कुण्ठमधिरूढे महामुने ॥ प्रवेक्ष्यति तदा तेजो मम सर्वं त्रिविक्रमे[3] ॥ ७७ ॥ रुक्मिणीयं च मन्मूर्तेः संयोगं पुनरेष्यति ॥ इयं भागीरथी चापि सागरेण समा गुणैः ॥ त्यक्त्वा ह्यशेषदुःखानि सुखं चैव गमिष्यति ॥ ७८ ॥ अनुग्रहं विधायैवमृषिणा सह केशवः ॥ विवेश स्वपुरीं तत्र विधायोपांतिकं मुनिम् ॥ ७९ ॥ सापि देवी च संबुध्य तदा तस्य विचेष्टितम् ॥ अनुग्रहाद्भगवतो बभूव विगत ज्वरा ॥ ८० ॥ यतश्च मुक्ता दुःखेन तत्र देवी हरिप्रिया ॥ ततो भागीरथी सा तु गदिता दुःखमोचिनी ॥ ८१ ॥ अमावास्यां पौर्णमास्यां यस्तस्याः संगमे शुभे ॥ स्नायादशेषदुःखात्तु स नरः परिमुच्यते ॥ ८२ ॥ अष्टम्यां च चतुर्दश्यां नवम्यां चावलोकिता ॥ नराणां रुक्मिणी देवी सर्वान्कामा न्प्रयच्छति ॥ ८३ ॥ इत्येतत्कथितं देव्या ऋषयो दुःखमोचनम् ॥ अनुग्रहश्च देवस्य किं भूयः श्रोतुमिच्छथ ॥ ८४ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे चतुर्थे द्वारकामाहात्म्ये रुक्मिणीदुःखमोचनवर्णनंनाम तृतीयोऽध्यायः ॥३॥ ॥छ॥ ॥ श्रीप्रह्लाद उवाच ॥ ॥ एवं संपूजितस्तेन हरिणा ब्राह्मणोत्तमः ॥ उवाच परि[4]सन्तुष्टो वरं ब्रूहीति केशवम् ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ यदि तुष्टोऽसि भगवन्यदि देयो वरो मम ॥ स्थातव्यमत्र भवता न त्यक्तव्यं कदाचन ॥ २ ॥ ॥ दुर्वासा उवाच ॥ ॥ यदि तिष्ठाम्यहं कृष्ण तथा त्वमपि केशव ॥ तिष्ठस्व षोडशकलो नित्यं मद्वचनेन हि ॥ ३ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ येऽत्र पश्यंति भक्त्या त्वां मां चापि द्विजसत्तम ॥ किं दास्यसि फलं तेषां भाविनां[5] भगवन्वद ॥ ४ ॥ ॥ दुर्वासा उवाच ॥ ॥ यः स्नात्वा संगमे कृष्ण गोमत्याः सागरस्य च ॥ त्वां मां समर्चति नरः सर्वपापैः स मुच्यते ॥ ५ ॥ तथान्यच्छृणु कृष्णात्र स्नात्वा दास्यति यद्धनम् ॥ मम दत्तस्य देवेश प्राप्नुयात्षोडशोत्तरम् ॥ ६ ॥ ॥ श्रीकृष्ण

१ ताम्—रुक्मिणीम् । २ तां मुनिकन्यां च—वसिष्ठकन्यां तां गोमतीं च—इत्यर्थः । ३ त्रिविक्रमे—त्रिविक्रममूर्तौ—इत्यर्थः । ४ परितुष्टात्मा—इ० पा० । ५ भाविनाम्—भक्तिमताम्—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



उवाच ॥ ॥ यो नरः पूजयित्वा त्वां पूजयिष्यति मामिह ॥ तस्य मुक्तिं प्रदास्यामि या सुरैरपि दुर्लभा ॥ ७ ॥ ॥ प्रह्लाद उवाच ॥ ॥ पर स्परं वरौ दत्त्वा कृष्णदुर्वाससौ मुदा ॥ ततः प्रभृति विप्रेन्द्रास्तस्मिन्स्थाने ह्यतिष्ठताम् ॥ वरदानमिति प्रोक्तं तत्तीर्थं सर्वकामदम् ॥ ८ ॥ वरदाने नरः स्नातो गोसहस्रफलं लभेत् ॥ विष्णुदुर्वाससोर्यत्र वरदानमभूत्पुरा ॥ ९ ॥ तदाप्रभृति विप्रेन्द्रास्तिष्ठते द्वारकां हरिः ॥ दुर्वाससा गिरा बद्धो न जहाति कदाचन ॥ १० ॥ यत्र त्रैविक्रमी मूर्तिर्विहते यत्र गोमती ॥ नरा मुक्तिं प्रयास्यंति चक्रतीर्थेन संगताः ॥ ११ ॥ कलेवरं परित्यक्तं प्रभासे हरिणा यदा ॥ कलाभिः सहितं तेजस्तस्यां मूर्तौ निवेशितम् ॥ १२ ॥ तस्मात्कलियुगे विप्रा नान्यत्र प्राप्यते हरिः ॥ यदि कार्य्यं हि कृष्णेन तत्र गच्छत मा चिरम् ॥ १३ ॥ ॥ ऋषय ऊचुः ॥ ॥ साधु भागवतश्रेष्ठ साधु मार्गप्रद र्शक ॥ यत्त्वया हि परिज्ञातं तन्न जानाति कश्चन ॥ १४ ॥ किं फलं गमने तस्यां किं फलं कृष्णदर्शने ॥ कानि तीर्थानि तत्रैव के देवास्तद्वदस्व नः ॥ १५ ॥ कस्मिन्मासे तिथौ कस्यां कस्मिन्पर्वणि मानवैः ॥ गन्तव्यं कानि देयानि दानानि दनुजर्षभ ॥ १६ ॥ ॥ सूत उवाच ॥ ॥ इति पृष्टस्तदा तैस्तु महाभागवतोऽसुरः ॥ कथयामास विप्रेभ्यो भगवद्भक्तिसंयुतः ॥ १७ ॥ ॥ प्रह्लाद उवाच ॥ ॥ भो भूमिदेवाः शृणुत परं गुह्यं सनातनम् ॥ यत्कस्यचिन्न चाख्यातं तद्वदामि सुविस्तरात् ॥ १८ ॥ यदा मतिं च कुरुते द्वारकागमनं प्रति ॥ तदा नरकनिर्मुक्ता गायन्ति पितरो दिवि ॥ १९ ॥ यावत्पदानि कृष्णस्य मार्गे गच्छति मानवः ॥ पदेपदेऽश्वमेधस्य यज्ञस्य लभते फलम् ॥ २० ॥ यात्रार्थं देव देवस्य यः प्रेरयति चापरान् ॥ मानवान्नात्र सन्देहो लभते वैष्णवं पदम् ॥ २१ ॥ द्वारकां गच्छमानस्य यो ददाति प्रतिश्रयम्[1] ॥ तथैव मधुरां वाचं नन्दते क्रीडते हि सः ॥ २२ ॥ अध्वनि श्रांतदेहस्य[2] वाहनं यः प्रयच्छति ॥ हंसयुक्तेन स नरो विमानेन दिवं व्रजेत् ॥ २३ ॥ यात्रायां गच्छमानस्य मध्याह्ने क्षुधितस्य च ॥ अन्नं ददाति यो भक्त्या शृणु तस्यापि यद्भवेत् ॥ २४ ॥ गयाश्राद्धेन यत्पुण्यं लभते मानवो भुवि ॥ अन्नदानेन तत्पुण्यं पितॄणां तृप्तिरक्षया ॥ २५ ॥ उपानहौ तु यो दद्याद्द्वारकां प्रति गच्छताम् ॥ कृष्णप्रसादात्स नरो गजस्कन्धेन गच्छति ॥ ॥ २६ ॥ विघ्नमाचरते यस्तु द्वारकां प्रति गच्छताम् ॥ नरके मज्जते मूढः कल्पमात्रं तु रौरवे ॥ २७ ॥ मार्गस्थितस्य यो धन्यः प्रयच्छति कमण्डलुम् ॥ प्रपादानसहस्रस्य फलमाप्नोति मानवः ॥ २८ ॥ यात्रायां गच्छमानस्य पादाभ्यंगं ददाति यः ॥ पादप्रक्षालनं चैव सर्वान्कामान

१ प्रतिश्रयम्—निवासार्थं स्थानम्—इत्यर्थः । २ पान्थस्य—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाप्नुयात् ॥ २९ ॥ गाथां शृणोति यो विष्णोर्गीतं च गायतः पथि ॥ दानं ददाति विप्रेन्द्रास्तस्माद्धन्यतरो न हि ॥ ३० ॥ कैलासशिखरावासं श्वेताभ्रमिव निर्मलम् ॥ प्रासादं कृष्णदेवस्य यः पश्यति नरोत्तमः ॥ ३१ ॥ दूराद्धेममयं दृष्ट्वा कलशं ध्वजसंयुतम् ॥ वाहनं संपरित्यज्य लुठते धरणीं गतः ॥ ३२ ॥ पञ्चसूनाकृतं पापं तथाऽधमकृतं च यत् ॥ कृमिकीटपतंगाश्च निहताः पथि गच्छता ॥ ३३ ॥ परान्नं परपानीयमस्पृश्य स्पर्शसंगमम् ॥ तत्सर्वं नाशमाप्नोति भगवत्केतुदर्शनात् ॥ ३४ ॥ पठेन्नामसहस्रं तु स्तवराजमथापि वा ॥ गजेन्द्रमोक्षणं चैव पथि गच्छञ्छनैः शनैः ॥ ३५ ॥ गायमानो भगवतः प्रादुर्भावाननेकधा ॥ नृत्यद्भिर्हर्षसंयुक्तैर्हृष्यमाणः पुनःपुनः ॥ स्वयं नृत्यन्हर्षयुक्तो भक्तो गच्छेद्धरेः पुरम् ॥ ३६ ॥ विष्णोः क्रीडाकरं स्थानं भुक्तिमुक्तिप्रदायकम् ॥ यस्मिन्दृष्टे कलौ नृणां मुक्तिरेवोपजायते ॥ ३७ ॥ ॥ प्रह्लाद उवाच ॥ ॥ पूर्वं हि देवराजेन बृहस्पतिरुदारधीः ॥ प्रणम्य परया भक्त्या पृष्टश्च स महामतिः ॥ ३८ ॥ ॥ इन्द्र उवाच ॥ ॥ द्वारकायाश्च माहात्म्यं कथयस्व प्रसादतः ॥ चतुर्युगं यथाभागैर्धर्मवृद्धिं जनो लभेत् ॥ ३९ ॥ एतच्छ्रुत्वा महेन्द्रस्य वचनं मुनिसत्तमाः ॥ बृहस्पतिरुवाचैनं महेन्द्रं देवसंवृतम् ॥ ४० ॥ ॥ बृहस्पतिरुवाच ॥ ॥ कृतं त्रेता द्वापरं च कलिश्च सुरसत्तम ॥ चतुर्युगमिदं प्रोक्तं तत्त्वतो मुनिसत्तमैः ॥ ४१ ॥ कृते धर्मश्चतुष्पादो वेदादिफलमेव च ॥ तीर्थं दानं तपो विद्या ध्यानमायुररोगता ॥ ४२ ॥ पादहीनं सर्वमेतद्युगं त्रेताभिधं प्रभो ॥ पादद्वयं द्वापरे तु सर्वस्यैतस्य वासव ॥ ४३ ॥ पादेनैकेन तत्सर्वं विभागे प्रथमे कलौ ॥ ऊर्ध्वं विनाशः सर्वस्य भविष्यति न संशयः ॥ ४४ ॥ मन्त्रास्तीर्थानि यज्ञाश्च तपो दैवादिकं तथा ॥ प्रगच्छंति समुच्छेदं वेदाः शास्त्राणि चैव हि ॥४५॥ म्लेच्छप्रायाश्च भूपाला भविष्यन्त्यमराधिप ॥ लोकः करिष्यते निन्दां साधूनां व्रतचारिणाम् ॥ ४६ ॥ ॥ प्रह्लाद उवाच ॥ ॥ श्रुत्वा बृहस्पतेर्वाक्यमेतत्तीर्थस्य भो द्विजाः ॥ प्रकंपिताः सुराः सर्वे म्लेच्छसंसर्गजाद्भयात् ॥ ४७ ॥ बृहस्पतिं सुरगुरुं पप्रच्छुर्विनयान्विताः ॥ म्लेच्छसंसर्गजो दोषो गंगयापि न पूयते ॥ ४८ ॥ कथयस्व प्रसादेन स्थानं कलिविवर्जितम् ॥ यत्र गत्वा निवत्स्यामो यास्यामो निर्वृतिं पराम् ॥ ४९ ॥ येन दुःखविनिर्मुक्ता भविष्यामो गतव्यथाः ॥ कृपया सुमुखो भूत्वा ब्रूहि तीर्थं हिताय नः ॥ ५० ॥ ॥ प्रह्लाद उवाच ॥ ॥ एतच्छ्रुत्वा सुरेन्द्रस्य वाक्यमंगिरसां वरः ॥ चिरं ध्यात्वा जगादेदं वाक्यं देवपुरोहितः ॥ ॥ ५१ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ पञ्चक्रोशप्रमाणं हि तीर्थं तीर्थवरोत्तमम् ॥ द्वारकानाम विख्यातं कलिदोषविवर्जितम् ॥५२॥ विष्णुना निर्मितं स्थानं लोकस्य गतिदायकम् ॥ मुक्तिदं कलिकाले तु ज्ञानहीनजनस्य च ॥ ५३ ॥ ऊषरं कर्मणां क्षेत्रं पुण्यं पापविनाशनम् ॥ न प्ररोहंति पापानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





पुनर्नष्टानि तत्र वै ॥ ५४ ॥ तिस्रः कोट्योऽर्धकोटी च तीर्थानीह महीतले ॥ ५५ ॥ एवं तीर्थयुता तत्र द्वारका मुक्तिदायका ॥ सेवनीया प्रय
त्नेन प्राप्य मानुष्यमुत्तमम् ॥५६॥ ॥ प्रह्लाद उवाच ॥ ॥ बृहस्पतेर्वचः श्रुत्वा शतक्रतुरथाऽब्रवीत् ॥ वाचस्पते मम ब्रूहि द्वारवत्या महोदयम् ॥
गमने किं फलं प्रोक्तं कृष्णदेवस्य दर्शने ॥ ५७ ॥ अन्यानि तत्र तीर्थानि मुख्यानि वद मे गुरो ॥ यथाभिषेके गोमत्याः फलं यदपि संगमे ॥५८॥
॥ ॥ बृहस्पतिरुवाच ॥ ॥ श्रूयतां तात वक्ष्यामि माहात्म्यं द्वारकोद्भवम् ॥ मनुष्यरूपो भगवान्यत्र क्रीडति केशवः ॥५९॥ नारायणः स ईशानो
ध्येयश्चादौ जगन्मयः ॥ स एव देवतामुख्यः पुरीं द्वारवतीं स्थितः ॥ ६० ॥ एकैकस्मिन्पदे दत्ते पुरीं द्वारवतीं प्रति ॥ पुण्यं क्रतुसहस्रेण कलौ
भवति देहिनाम् ॥६१॥ कलौ कृष्णपुरीं रम्यां ये गच्छंति नरोत्तमाः ॥ कुलकोटिशतैर्युक्तास्ते गच्छन्ति हरेः पदम् ॥६२॥ ये ध्यायंति मनोवृत्त्या
गमनं द्वारकां प्रति ॥ तेषां विलीयते पापं पूर्वजन्मायुतैः कृतम् ॥ ६३ ॥ कृष्णस्य दर्शने बुद्धिर्जायते यस्य देहिनः ॥ वक्त्रावलोकनात्तस्य पापं
याति सहस्रधा ॥ ६४ ॥ ये गता द्वारकायां च ये मृताः कृष्णसन्निधौ ॥ न तेषां पुनरावृत्तिर्यावदाभूतसंप्लवम् ॥६५॥ सुलभा मथुरा काशी ह्यवन्ती
च तथा सुराः ॥ अयोध्या सुलभा लोके दुर्लभा द्वारका कलौ ॥ ६६ ॥ गत्वा कृष्णपुरीं रम्यां षण्मासात्कृष्णसंनिधौ ॥ जीवन्मुक्तास्तु ते ज्ञेयाः
सत्यमेतत्सुरोत्तम ॥ ६७ ॥ कृष्णक्रीडाकरं स्थानं वाञ्छन्ति मनसा प्रिये ॥ तेषां हृदि स्थितं पापं क्षालयेत्प्रेतनायकः ॥ ६८ ॥ अत्युग्राण्यपि
पापानि तावत्तिष्ठन्ति विग्रहे ॥ यावन्न गच्छति नरः कलौ द्वारवतीं प्रति ॥ ६९ ॥ पुण्यसंख्या च तीर्थानां ब्रह्मणा विहिता पुरा ॥ दानाध्ययन
संज्ञानां मुक्त्वा द्वारवतीं कलौ ॥ ७० ॥ चक्रतीर्थे तु यो गच्छेत्प्रसंगेनापि मानवः ॥ कुलैकविंशतियुतः स गच्छेत्परमं पदम् ॥ ७१ ॥ लोभेनाऽ
प्यपराधेन दम्भेन कपटेन वा ॥ चक्रतीर्थं च यो गच्छेन्न पुनर्विशते भवम् ॥ ७२ ॥ प्रयागे ह्यस्थिपातेन यत्फलं परिकीर्तितम् ॥ तदेव शतसाहस्रं
चक्रतीर्थास्थिपातनात् ॥ ७३ ॥ पृथिव्यां चैव तत्तीर्थं परमं परिकीर्तितम् ॥ चक्रतीर्थमिति ख्यातं ब्रह्महत्याविनाशनम् ॥ ७४ ॥ येये कुले भवि
ष्यंति तत्पूर्वं मानवाः क्षितौ ॥ सर्वे विष्णुपुरं यांति चक्रतीर्थास्थिपातनात् ॥ ७५ ॥ किं जातैर्बहुभिः पुत्रैर्गणनापूरकात्मकैः ॥ वरमेको भवेत्पुत्र
श्चक्रतीर्थं तु यो व्रजेत् ॥ ७६ ॥ तपसा किं प्रतप्तेन दानेनाध्ययनेन किम् ॥ सर्वावस्थोऽपि मुच्येत गतः कृष्णपुरीं यदि ॥ ७७ ॥ कलिकाल
कृतैर्दोषैरत्युग्रैरपि मानवः ॥ कलौ कृष्णमुखं दृष्ट्वा लिप्यते न कदाचन ॥ ७८ ॥ दानं चाध्ययनं शौचं कारणं न हि पुत्रक ॥ हीनवर्णोऽपि
पापात्मा गतः कृष्णपुरीं यदि ॥ ७९ ॥ वाराणस्यां कुरुक्षेत्रे नर्मदायां च यत्फलम् ॥ तत्फलं निमिषार्धेन द्वारवत्यां दिनेदिने ॥ ८० ॥ धन्या



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नामपि धन्यास्ते देवानामपि देवताः ॥ कृष्णोपरि मतिर्येषां हीयते न कदाचन ॥ ८१ ॥ श्रवणद्वादशीयोगे गोमत्युदधिसंगमे ॥ स्नात्वा कृष्ण मुखं दृष्ट्वा लिप्यते नैव स क्वचित् ॥ ८२ ॥ यस्य कस्यापि मासस्य द्वादशीं प्राप्य मानवः ॥ कृष्णक्रीडापुरीं दृष्ट्वा मुक्तः संसारगह्वरात् ॥ ८३ ॥ येषां कृष्णालये[1] प्राणा गताः सुरपते कलौ ॥ स्वर्गान्न तेषामावृत्तिः कल्पकोटिशतैरपि ॥ ८४ ॥ विज्ञेया मानुषा वत्स गर्भस्थास्ते महीतले ॥ द्वारवत्यां न यैर्देवो दृष्टः कंसनिषूदनः ॥ ८५ ॥ दुर्लभो द्वारकावासो दुर्लभं कृष्णदर्शनम् ॥ दुर्लभं गोमतीस्नानं दुर्लभो रुक्मिणीपतिः ॥ ८६ ॥ तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते ॥ द्वापरे तु परो यज्ञः कलौ केशवकीर्तनम् ॥ ८७ ॥ हेमभारसहस्रैस्तु दत्तैर्यत्फलमाप्यते ॥ दृष्ट्वा तत्कोटि गुणितं हरेः सर्वप्रदं मुखम् ॥ ८८ ॥ द्वारकायां च यद्दत्तं शंखोद्धारे तथैव च ॥ पिंडारके महातीर्थे दत्तं चैवाक्षयं भवेत् ॥ ८९ ॥ गोमहिष्यादि यद्दत्तं सुवर्णवसनानि च ॥ वृषो भूमिग्रहो रूप्यं कन्यादानं तथैव च ॥ ९० ॥ यच्चान्यदपि देवेन्द्र त्रिषु स्थानेषु यच्छति ॥ तन्मुक्तिकारकं प्रोक्तं पितॄणामात्मनस्तथा ॥ ९१ ॥ ऊषरं हि यतो लोके क्षेत्रमेतत्प्रकीर्तितम् ॥ अतो मुक्तिकरं सर्वं दानं चोक्तं महर्षिभिः ॥ ९२ ॥ यत्किंचित्कुरुते तत्र दानं क्रीडावगाहनम् ॥ तदनन्तफलं प्राह भगवान्मधुसूदनः ॥ ९३ ॥ प्रेतत्वं नैव तस्यास्ति न याम्या नारकी व्यथा ॥ येन द्वारवतीं गत्वा कृतं कृष्णाऽवलोकनम् ॥ ९४ ॥ वारिमात्रेण गोमत्यां पिण्डदाने कृते कलौ ॥ पितॄणां जायते तृप्तिर्यावदाभूतसंप्लवम् ॥ ९५ ॥ नित्यं कृष्णपुरीं रम्यां ये स्मरन्ति गृहस्थिताः ॥ नमस्याः सर्वलोकानां देवानां च सुरोत्तम ॥ ९६ ॥ ब्रह्मज्ञानं गयाश्राद्धं मरणं गोग्रहेषु च ॥ वासः पुंसां द्वार कायां मुक्तिरेषा चतुर्विधा ॥ ९७ ॥ ब्रह्मज्ञानेन मुच्यन्ते प्रयागे मरणेन वा ॥ अथवा स्नानमात्रेण गोमत्यां कृष्णसंनिधौ ॥ ९८ ॥ कृतार्थः कृत पुण्योऽहं ब्रवीत्येवं महोदधिः ॥ पवित्रितं च मद्गात्रं गोमतीवारिसंप्लुवात् ॥ ९९ ॥ अत्युग्राण्यपि पापानि तावत्तिष्ठंति विग्रहे ॥ यावत्स्नानं न गोमत्यां वारिणा पापहारिणा ॥ १०० ॥ चक्रतीर्थे नरः स्नात्वा गोमत्यां रुक्मिणीह्रदे ॥ दृष्ट्वा कृष्णमुखं रम्यं कुलानां तारयेच्छतम् ॥ १०१ ॥ कृष्णं च ये द्वारवतीं मनुष्याः स्मरंति नित्यं हरिभक्तियुक्ताः ॥ विधूतपापाः किल संभवांते गच्छंति[3] लोकं परमं मुरारेः ॥ १०२ ॥ अधौतपादः प्रथमं नमस्कुर्याद्रणेश्वरम् ॥ सर्वविघ्नविनाशश्च जायते नात्र संशयः ॥ १०३ ॥ नीलोत्पलदलश्यामं कृष्णं देवकिनन्दनम् ॥ दण्ड वत्प्रणमेत्प्रीत्या प्रणमेदग्रजं पुनः ॥ १०४ ॥ बाल्ये च यत्कृतं पापं कौमारे यौवने तथा ॥ दर्शनात्कृष्णदेवस्य तन्नश्येन्नात्र संशयः ॥ १०५ ॥

१ कृष्णालये--द्वारकायाम्--इत्यर्थः । २ कुरुक्षेत्रे--इ० पा० । ३ ते--इति शेषः । यच्छब्देन सह संबंधात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वाण्याऽथ मनसा यच्च कर्मणा समुपार्जितम् ॥ पापं जन्मसहस्रेण तन्नश्येन्नात्र संशयः ॥ १०६ ॥ हेमभारसहस्रैस्तु दत्तैर्यत्फलमाप्यते ॥ तत्फलं कोटिगुणितं कृष्णवक्त्रा[1]वलोकनात् ॥ १०७ ॥ नमस्कृत्य च देवेशं पुण्डरीकाक्षमच्युतम् ॥ दुर्वाससं महेशानं द्वारकापरिरक्षकम् ॥१०८॥ प्रणम्य परया भक्त्या वैनतेयसमन्वितम् ॥ द्वारमागत्य च पुनः स्वर्गद्वारोपमं शुभम् ॥ १०९ ॥ विश्रम्य च मुहूर्त्तार्द्धं सुहृद्भिर्बान्धवैर्वृतः ॥ तत्राश्रितान्समाहूय ब्राह्मणान्मन्त्रकोविदान् ॥ पूजां[2]द्रव्यं समानीय ततस्तीर्थं व्रजेद्बुधः ॥ ११० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे चतुर्थे द्वारकामाहात्म्ये द्वारकायात्राविधिवर्णनंनाम चतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॥ प्रह्लाद उवाच ॥ ॥ ततो गच्छेद्द्विजश्रेष्ठा गोमतीं कृष्णं[3]संश्रयाम् ॥ यस्या दर्शनमात्रेण मुच्यते सर्वपातकैः ॥ सर्वपापविनिर्मुक्तः कृष्णसायुज्यमाप्नुयात् ॥ १ ॥ दुरितौघक्षयकरममंगल्यविनाशनम् ॥ सर्वकामप्रदं नॄं[4]णां प्रणमेद्गोमतीजलम् ॥ २ ॥ महापापक्षयकरमगतीनां गतिप्रदम् ॥ पूर्वपुण्यवशात्प्राप्तं प्रणमेद्गोमतीजलम् ॥ ३ ॥ ॥ ऋषय ऊचुः ॥ ॥ दैत्येन्द्र संशयोऽस्माकं तं त्वं छेत्तुं[5]मिहार्हसि ॥ इयं का गोमती तत्र केनानीता महामते ॥ ४ ॥ केन कार्यवशेनेह संप्राप्ता वरुणालयम् ॥ सर्वं भागवतश्रेष्ठ ह्येतद्विस्तरतो वद ॥ ५ ॥ ॥ प्रह्लाद उवाच ॥ ॥ एकार्णवे पुरा भूते नष्टे स्थावरजंगमे ॥ तदा ब्रह्मा समभवद्विष्णोर्नाभिसरोरुहात् ॥ ६ ॥ आदिष्टः प्रभुणा ब्रह्मा सृजस्व विविधाः प्रजाः ॥ इति धाता समादिष्टो हरिणा सृष्टिकारणे ॥ ७ ॥ उक्त्वा बाढमिति ब्रह्मा ततः सृष्टौ मनो दधे ॥ ससर्ज मानसात्सद्यः सनकाद्यान्कुमारकान् ॥ उवाच वचनं ब्रह्मा प्रजाः सृजत पुत्रकाः ॥ ८ ॥ ब्रह्मणो वचनं श्रुत्वा ते कृतांजलयोऽब्रुवन् ॥ भगवन्भगवद्रूपं द्रष्टुकामा वयं प्रभो ॥ ९ ॥ न बन्धमनुवर्त्तामः सृष्टिरूपं दुरासदम् ॥ इत्युक्त्वा ते ययुः सर्वे सनकाद्याः कुमारकाः ॥ १० ॥ पश्चिमां दिशमास्थाय तीरे नदनदीपतेः ॥ तेजोमयं[6]स्य रूपस्य द्रष्टुकामा महात्मनः ॥ तस्मिन्मा[7]नसमाधाय तेपिरे परमं तपः ॥ ११ ॥ बहुवर्षसहस्रैस्तु प्रसन्ने धरणीधरे ॥ भित्त्वा जलं समुत्तस्थौ तेजोरूपं दुरासदम् ॥ ॥ १२ ॥ अनेकदैत्यदमनं बहु[8]यंत्रविदारणम् ॥ सूर्यकोटिप्रभाभासं सहस्रारं सुदर्शनम् ॥ १३ ॥ तं दृष्ट्वा विस्मिताः सर्वे ब्रह्मपुत्राः परस्परम् ॥

१ दृष्ट्वा कृष्णमुख कलौ–इ० पा० । २ हव्यद्रव्यं समानीय तन्मुखे जुहुयान्मुदा–इ० पा० । ३ कृष्णसन्निधौ–इ० पा० । ४ पुंसाम्–इ० पा० । ५ छे मर्हस्यशेषतः–इ० पा० । ६ तेजोमयस्य रूपस्य द्रष्टुकामा महात्मनः–महात्मनः परमेश्वरस्य–तेजोमयं–रूपं द्रष्टुकामाः–इत्यर्थसांगत्यम् । ७ मनः समाधाय–इ०पा० । ८ वहुमन्त्रनिवारणम्–इ०पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वीक्षमाणा भगवतः परमायुधमुत्तमम् ॥ १४ ॥ तान्विलोक्य तथाभूतान्वाग्उवाचाशरीरिणी ॥ भो ब्रह्मपुत्रा भगवाञ्छीघ्रमाविर्भविष्यति ॥ १५ ॥ अर्हणार्थं भगवतः शीघ्रमर्घ्यं प्रकल्प्यताम् ॥ आयुधं लोकनाथस्य द्विजाः शीघ्रं प्रसाद्यताम् ॥ १६ ॥ तच्छ्रुत्वाऽऽकाशवचनं तुष्टुवुस्ते सुदर्शनम् ॥ ॥१७॥ ॥ ऋषय ऊचुः ॥ ॥ ज्योतिर्मय नमस्तेऽस्तु नमस्ते हरिवल्लभ ॥ सुदर्शन नमस्तेऽस्तु सहस्राराऽक्षराऽव्यय ॥१८॥ नमस्ते सूर्यरूपाय ब्रह्मरूपाय ते नमः ॥ अमोघाय नमस्तुभ्यं रथांगाय नमोनमः ॥ १९ ॥ एवं ते पूजयामासुः सुमनोभिस्तथाऽक्षतैः ॥ २० ॥ स्तवैर्नानाविधैः स्तुत्वा प्रणेमुर्हरिवल्लभम् ॥ तत्प्रसाद्य सुनाभं तु प्रभुसंदर्शनोत्सुकाः ॥ २० ॥ अस्मरन्मनसा देवं ब्रह्माणं पितरं स्वकम् ॥ तेषां तु चिंतितं ज्ञात्वा ब्रह्मा गंगामथाब्रवीत् ॥ २१ ॥ याहि शीघ्रं सरिच्छ्रेष्ठे पृथिव्यां हरिकारणात् ॥ गां गता त्वं महाभागे ततो बहुमताऽसि मे ॥ २२ ॥ उर्व्यां ते गोमती नाम सुप्रसिद्धं भविष्यति ॥ २३ ॥ वसिष्ठस्यानुगा भूत्वा याहि शीघ्रं धरातलम् ॥ तातं पुत्रीवानुयाता वसिष्ठतनया भव ॥ २४ ॥ बाढमित्येव सा देवी प्रस्थिता वरुणालयम् ॥ वसिष्ठस्त्वग्रतो याति तं गंगा पृष्ठतोऽन्वगात् ॥ २५ ॥ तां दृष्ट्वा मनुजाः सर्वे वसिष्ठेन समन्विताम् ॥ नमश्चक्रुर्महाभागां गच्छंतीं पश्चिमार्णवम् ॥ २६ ॥ आविर्बभूव तत्रैव यत्र ते मुनयः स्थिताः ॥ द्रष्टुकामा हरे रूपं श्रिया जुष्टं चतुर्भुजम् ॥ २७ ॥ दृष्ट्वा वसिष्ठमनुगामायान्तीं सुरपावनीम् ॥ अवाकिरन्महाभागां सुमनोभिश्च सर्वशः ॥ २८ ॥ दिव्यैर्माल्यैः सुगन्धैश्च गन्धधूपैस्तथाऽक्षतैः ॥ संपूज्य हृष्टमनसः साधुसाध्विति चाब्रुवन् ॥ २९ ॥ वसिष्ठं तेऽग्रगं दृष्ट्वा ह्युदतिष्ठंस्ततो द्विजाः ॥ अर्घ्यादिसत्क्रियां कृत्वा प्रहृष्टा इदमब्रुवन् ॥ ॥ ३० ॥ यस्मात्त्वया समानीता ह्यस्मिँल्लोके सरिद्वरा ॥ तस्मात्तव सुतेत्येवं ख्यातिं लोके गमिष्यति ॥ ३१ ॥ गोः स्वर्गादागता यस्मादिदं स्थानं मती मता ॥ तस्माद्धि गोमतीनाम ख्यातिं लोके गमिष्यति ॥ ३२ ॥ अस्या दर्शनमात्रेण मुक्तिं यास्यंति मानवाः ॥ किं पुनः स्नानदानादि कृत्वा यांति हरेः पदम् ॥ ३३ ॥ तामेव चार्घ्यं दत्त्वा ते योगींद्रा ईडिरे हरिम् ॥ परं पुरुषसूक्तेन पुरुषं शेषशायिनम् ॥ ३४ ॥ इति संस्तुवतां तेषां हरिराविर्बभूव ह ॥ पीतकौशेयवसनो वनमालाविभूषितः ॥ दिव्यमाल्यानुलिप्तांगो दिव्याभरणभूषितः ॥ ३५ ॥ शेषासनगतं देवं दिव्यानेकोद्यतायुधम् ॥ ज्वलत्किरीटमुकुटं स्फुरन्मकरकुंडलम् ॥ ३६ ॥ भक्ताभयप्रदं शांतं श्रीवत्सांकं महाभुजम् ॥ सदा प्रसन्नवदनं घन

१ तान्विस्मितांस्तदोवाच दिव्या वागशरीरिणी—इ० पा। २ शीघ्रमेव समेष्यति—इ० पा। ३ वह्निरूपाय—इ० पा०। ४ धर्मद्रवां ब्रवीत्—इ० पा०। ५ याहियाहि सरिच्छ्रेष्ठे—इ० पा०। ६ पिता पुत्रीति च यथा—इ० गच्छ शीघ्रं महाभागे—इ० च पा०। ७ रमेशम्—इ० पा०। ८ दिव्यमालाविभूषितः—इ० पा०। ९ कांतम्—इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



श्यामं चतुर्भुजम् ॥ ३७ ॥ पादसंवाहनासक्तलक्ष्म्या जुष्टं मनोहरम् ॥ तं दृष्ट्वा मुनयः सर्वे हर्षोत्कर्षसमन्विताः ॥ विष्णुं ते विष्णुसूक्तैश्च तुष्टुवु
र्वेदसंभवैः ॥ ३८ ॥ एवं संस्तुवतां तेषां विष्णुर्दीनानुकंपकः ॥ उवाच सुप्रसन्नेन मनसा द्विजसत्तमान् ॥ ३९ ॥ ॥ श्रीभगवानुवाच ॥ ॥
भोभोः कुमारास्तुष्टोऽहं प्रदास्यामि यथेप्सितम् ॥ भविष्यथ ज्ञानयुता अस्पृष्टा मम मायया ॥ ४० ॥ यस्मान्मोक्षार्थिभिर्विप्रा जलेनाहं प्रसा
दितः ॥ तस्मादिदं परं तीर्थं सर्वकामप्रदं परम् ॥ ४१ ॥ अनुग्रहाय भवतां यत्र चक्रं सुदर्शनम् ॥ निःसृतं प्रथमं विप्रा जलं भित्त्वा ममाग्रतः ॥
॥ ४२ ॥ चक्रतीर्थमिति ख्यातं तस्मादेतद्भविष्यति ॥ ममापि नियतं वासो भविष्यति महार्णवे ॥ ४३ ॥ येऽत्र स्नानं प्रकुर्वंति प्रसंगेनापि
मानवाः ॥ चक्रतीर्थे द्विजश्रेष्ठास्तेषां मुक्तिः करे स्थिता ॥ ४४ ॥ भवंतोऽपि सदा ह्यत्र तिष्ठध्वं च द्विजर्षभाः ॥ वायुभूतांतरिक्षस्थाः सर्वकामस्य
दायकाः ॥ ४५ ॥ ॥ प्रह्लाद उवाच ॥ ॥ तच्छ्रुत्वा हृष्टमनसः कृत्वार्घ्यं सुरपावनीम् ॥ अवनिज्य हरेः पादौ मूर्ध्नाऽपश्चाप्यधारयन् ॥
॥ ४६ ॥ प्रक्षाल्य सा हरेः पादौ प्रविष्टा वरुणालयम् ॥ तस्मिन्महापापहरा गोमती सागरं गता ॥ ४७ ॥ वरं दत्त्वा ततो विष्णुस्तत्रैवान्तर
धीयत ॥ सनकाद्या ब्रह्मसुतास्तस्थुस्तत्र समाहिताः ॥ ४८ ॥ एवं सा गोमती तत्र संजाता सागरंगमा ॥ सर्वपापहरा प्रोक्ता पूर्वगंगेति या श्रुता ॥
॥ ४९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे चतुर्थे द्वारकामाहात्म्ये सनत्कुमारतपोबलेन भगवत्प्रादुर्भाव
वृत्तान्तवर्णनेपुरःसरगोमत्युत्पत्तिमाहात्म्यवर्णनंनाम पञ्चमोऽध्यायः ॥ ५ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ साधुसाधु महाभाग प्रह्लादा
सुरसत्तम ॥ येन नः कलिमध्ये तु दर्शितो भगवान्हरिः ॥ १ ॥ त्वन्मुखक्षीरसिंधूत्था कथेयममृतोपमा ॥ कर्णाभ्यां पिबतां तृप्तिर्मुनीनां न प्रजा
यते ॥ कथयस्व महाबाहो तीर्थयात्रां सुविस्तराम् ॥ २ ॥ अस्माभिस्तत्र गंतव्यं वहते यत्र गोमती ॥ तिष्ठते यत्र भगवांश्चक्रतीर्थावलोककः ॥
॥ ३ ॥ भवाब्धौ पतितांस्तात उद्धरस्व भवार्णवात् ॥ तीर्थयात्राविधानं च कथयस्व महामते ॥ ४ ॥ ॥ प्रह्लाद उवाच ॥ ॥ गत्वा तु
गोमतीतीरे प्रणमेद्दंडवच्च ताम् ॥ प्रक्षाल्य पाणिपादौ च कृत्वा च करयोः कुशान् ॥ ५ ॥ गृहीत्वा तु फलं शुभ्रमक्षतैश्च समन्वितम् ॥ प्राङ्मुखः
प्रयतो भूत्वा दद्यादर्घ्यं विधानतः ॥ ६ ॥ ब्रह्मलोकात्समायाते वसिष्ठतनये शुभे ॥ सर्वपापविशुद्ध्यर्थं ददाम्यर्घ्यं तु गोमति ॥ ७ ॥ वसिष्ठतनये



१ ज्ञानपूताः–इ० पा० । २ वायुभूतान्तरिक्षस्थाः–वायुभूताश्च ते ऽन्तरिक्षस्थाश्च–इति समासः । वायुभूताः सन्तोऽन्तरिक्षस्थाः–इत्यर्थः । ३ तस्मिन्–तस्मिन्स्थाने–इत्यर्थः । ४ विश्रुता–इ० पा० । ५ कृष्णपूजाविधानं च–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवि सुरवंद्ये यशस्विनि ॥ त्रैलोक्यवंदिते देवि पापं मे हर गोमति ॥ ८ ॥ इत्युच्चार्य्य द्विजश्रेष्ठा मृदमा[1]लभ्य पाणिना ॥ विष्णुं संस्मृत्य मनसा मंत्र
मेतमुदीरयेत् ॥ ९ ॥ अश्वक्रांते रथक्रांते विष्णुक्रांते वसुंधरे ॥ उद्धृताऽसि वराहेण कृष्णेन शतबाहुना ॥ १० ॥ मृत्तिके हर मे पापं यन्मया पूर्वसं
चितम् ॥ त्वया हतेन पापेन पूतः संवत्सरं भवेत् ॥११॥ इत्येवं मृदमालिप्य स्नानं कुर्य्याद्यथाविधि ॥ आपो अस्मानिति स्नात्वा शृणुध्वं यत्फलं
लभेत् ॥ १२ ॥ कुरुक्षेत्रे च यत्पुण्यं राहुग्रस्ते दिवाकरे ॥ स्नानमात्रेण तत्पुण्यं गोमत्यां कृष्णसन्निधौ ॥ १३ ॥ भक्त्या स्नात्वा तु तत्रैवं
कुर्यात्कर्म यथोदितम् ॥ देवान्पितॄन्मनुष्यांश्च तर्पयेद्भावसंयुतः ॥ १४ ॥ ये च रौरवसंस्था हि ये च कीटत्वमागताः ॥ गोमतीनीरदानेन मुक्तिं
यांति न संशयः ॥ १५ ॥ विनाप्यक्षतदर्भैर्वा विना भा[3]वनया तथा ॥ वारिमात्रेण गोमत्यां गयाश्राद्धफलं लभेत् ॥ १६ ॥ ततश्च विप्रानाहूय
वेदज्ञांस्तीर[4]संश्रयान् ॥ विश्वेदेवादि संपूज्य पितॄणां श्राद्धमाचरेत् ॥ १७ ॥ श्रद्धया परया युक्तः श्राद्धं कृत्वा विधानतः ॥ दक्षिणां च ततो
दद्यात्सुवर्णं रजतं तथा ॥ १८ ॥ सुवर्णशृंगसहितां राजतखुरभूषिताम् ॥ रत्नपुच्छां वस्त्रयुतां ताम्रपृष्ठां सवत्सकाम् ॥ १९ ॥ दद्याद्विप्रं समभ्यर्च्य
वस्त्रालंकारभूषणैः ॥ सप्तधान्ययुतां दद्याद्विष्णुर्मे प्रीयतामिति ॥ २० ॥ आसीमांतं विसृज्यैतान्ब्राह्मणान्नियतेंद्रियः ॥ दीनांधकृपणेभ्यश्च दानं
दद्यात्स्वशक्तितः ॥ २१ ॥ गोमती गोमयस्नानं गोदानं गोपिचन्दनम् ॥ दर्शनं गोपिनाथस्य गकाराः पंच दुर्लभाः ॥ २२ ॥ तस्माच्चैव प्रकर्तव्यं
गोदानं गोमतीतटे ॥ एवं कृत्वा द्विजश्रेष्ठाः कृतकृत्यो भवेन्नरः ॥ २३ ॥ ये गता नरकं घोरं ये च प्रेतत्वमागताः ॥ पूर्वकर्मविपाकेन स्थाव
रत्वं गताश्च ये ॥ २४ ॥ पितृपक्षे च ये केचिन्मातृपक्षे कुलोद्भवाः ॥ सर्वे ते मुक्तिमायांति गोमत्या दर्शनात्कलौ ॥ २५ ॥ कृतं श्राद्धं नरैर्यैस्तु
गोमत्यां भूसुरोत्तमाः ॥ हयमेधस्य यज्ञस्य फलमायांत्यसंशयम् ॥ २६ ॥ गंगास्नानेन यत्पुण्यं प्रयागे परिकीर्त्तितम् ॥ तत्पुण्यं समवाप्नोति
गोमत्यां श्राद्धकृन्नरः ॥ २७ ॥ विष्णुलोकं हि गच्छंति पितरस्त[5]त्कुलोद्भवाः ॥ अनेकजन्मसाहस्रं पापं याति न संशयः ॥ २८ ॥ वा[6]चा च
यत्कृतं पापं कर्मणा मनसा तथा ॥ तत्सर्वं विलयं याति गोमतीदर्शनेन हि ॥ २९ ॥ यो नरः कार्त्तिके स्नानं गोमत्यां कुरुते द्विजाः ॥ प्रसन्नो
भगवांस्तस्य लक्ष्म्या सह न संशयः ॥ ३० ॥ प्रत्यहं हु[7]तभोक्तारं तर्पयेत्सुसमाहितः ॥ प्रत्यहं षड्रसं देयं भोजनं च द्विजातये ॥ ३१ ॥ पूजये

१ आलिप्य—इ० पा० । २ परया—इ० पा० । ३ वासनया—इ० पा० । ४ तीर्थसंश्रयात्—इ० पा० । ५ त्रिकुलोद्भवाः—इ०पा० । ६ ज्ञाताज्ञातं च यत्पापं कर्मणा मनसा गिरा—इ० पा० ।
७ हुतभोक्तारं तर्पयेत्—अग्निम्—अग्निहोत्रवैश्वदेवादिना होमेन तृप्तं कुर्यात्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





त्कृष्णदेवं च प्रत्यहं भक्तितत्परः ॥ येन केनापि विप्रेन्द्राः स्थातव्यं नियमेन तु ॥३२॥ ब्राह्मणानुज्ञया तत्र गृह्णीयान्नियमान्नरः ॥ संपूर्णे कार्त्तिके मासि संप्राप्ते बोधवासरे ॥ ३३ ॥ पंचामृतेन देवेशं स्नापयेत्तीर्थवारिणा ॥ श्रीखण्डं कुंकुमोन्मिश्रं मृगनाभिसमन्वितम् ॥ विलेपयेच्च देवेशं भक्त्या दामोदरं हरिम् ॥ ३४ ॥ कुसुमैर्वारिसंभूतैस्तुलस्या करवीरकैः ॥ तद्देशसंभवैः पुष्पैः पूजयेद्गरुडध्वजम् ॥ ३५ ॥ नैवेद्यं रुचिरं दद्याद्विष्णुर्मे प्रीयतामिति ॥ गीतवाद्यादिनृत्येन तथा पुस्तकवाचनैः ॥ ३६ ॥ रात्रौ जागरणं कार्य्यं स्तोत्रैर्नानाविधैरपि[1] ॥ आहूय ब्राह्मणान्भक्त्या भोजयेच्च स्वशक्तितः ॥ ३७ ॥ ततो रथस्थितं देवं पूजयेद्गरुडध्वजम् ॥ कार्त्तिकांते च विप्रेंद्रा गोमत्युदधिसंगमे ॥ ३८ ॥ स्नात्वा पितॄंश्च संतर्प्य पूजयेच्च जनार्दनम् ॥ सुवस्त्रैर्भूषणैश्चापि समभ्यर्च्य रमापतिम् ॥ अनुज्ञया तु विप्राणां व्रतं संपूर्णतां नयेत[2] ॥ ३९ ॥ एवं यः स्नाति विप्रेन्द्राः कार्त्तिके[3] कृष्णसन्निधौ ॥ सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥४०॥ माघस्नानं नरो भक्त्या गोमत्यां कुरुते तु यः ॥ वैनतेयोदये[4] नित्यं संतुष्टः सह भार्यया ॥ ४१ ॥ तिला[5] हिरण्यसहिता देया ब्राह्मणसत्तमे ॥ मोदका गुडसंमिश्राः प्रत्यहं दक्षिणान्विताः ॥ ४२ ॥ तिलैराज्याप्लुतैर्होमः कर्त्तव्यः प्रत्यहं नरैः ॥ होमार्थं सेवयेद्वह्निं न शीतार्थं कदाचन ॥४३॥ गोमत्यां स्नाति यो भक्त्या माघं माधववल्लभम् ॥ समाप्तौ रक्तवस्त्राणि कंचुकोष्णीषमेवच ॥ ४४ ॥ दद्यादुपानहौ भक्त्या कुंकुमं च विशेषतः ॥ कम्बलं तैलपक्वं च विष्णुर्मे प्रीयतामिति ॥ ४५ ॥ स्वामिकार्य्यमृतानां च संग्रामे शस्त्रसंकुले[6] ॥ गवार्थे ब्राह्मणार्थे च मृतानां या गतिः स्मृता ॥ ४६ ॥ माघस्नाने च सा प्रोक्ता गोमत्यां नात्र संशयः ॥ सर्वदानफलं तस्य सर्वतीर्थफलं तथा ॥ ४७ ॥ माघस्नानान्नरो याति विष्णुलोकं सनातनम् ॥ सर्वान्कामानवाप्नोति समभ्यर्च्य जनार्दनम् ॥ ४८ ॥ माघं यः क्षपते सर्वं गोमत्युदधिसंगमे ॥ ब्राह्मणानुज्ञया विप्राः सर्वं संपूर्णतां व्रजेत् ॥ ४९ ॥ पापिनोऽपि द्विजश्रेष्ठा ये स्नाता गोमतीजले ॥ यज्विनां च गतिं यांति प्रसादाच्चक्रपाणिनः ॥ ५० ॥ ब्रह्मरुद्रपदादूर्ध्वं यत्पदं चक्रपाणिनः ॥ स्नानमात्रेण गोमत्यां तत्प्रोक्तं कृष्णसंनिधौ[7] ॥ ५१ ॥ मित्रद्रोहे च यत्पापं यत्पापं गुरुघातिनि ॥ तत्पापं समवाप्नोति यात्राभंगं[8] करोति यः ॥५२॥ ब्रह्मस्वहारिणः पापास्तथा देवस्वहारिणः ॥ स्नानमात्रेण शुद्ध्यंति गोमत्यां नात्र संशयः ॥ ५३ ॥ भीताऽभयप्रदानेन यत्पुण्यं लभते नरः ॥ तत्पुण्यं समवाप्नोति गोमत्यां स्नानमात्रतः ॥ ५४ ॥ भीताभय

१ स्तोत्रैरपि समर्चयेत्–इ० पा० । २ व्रजेत्––इ० पा० । ३ कार्तिक्याम्––इ० पा० । ४ वैनतेयोदये—अरुणोदयवेलायाम्––इत्यर्थः । ५ तेन इति शेषः । ६ रिपुसंकुले–इ० पा० । ७ कृष्णदर्शने–इ० पा० । ८ यात्राविघ्नम्–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रदानेन पुत्रानिष्टान्न संशयः ॥ धनकामस्तु विपुलं लभते धनमूर्जितम् ॥ ५५ ॥ प्राप्नुयादीप्सितान्कामान्गोमतीनीरसंगमे ॥ कृतकृत्यो भवेद्विप्रा ऋणान्मुच्येत पैतृकात् ॥ ५६ ॥ मनसा वचसा चैव कर्मणा यदुपार्जितम् ॥ तत्सर्वं नश्यते पापं गोमतीनीरसंगमात् ॥ ५७ ॥ पीतांबरधरो भूत्वा तथा गरुडवाहनः ॥ वनमाली चतुर्बाहुर्दिव्यगन्धानुलेपनः ॥ याति विष्णवालयं विप्रा अपुनर्भवलक्षणम् ॥ ५८ ॥ [1]गोमतीस्नानमात्रेण मानवो नात्र संशयः ॥ सर्वपापविनिर्मुक्तो याति विष्णुं सनातनम् ॥ ५९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे चतुर्थे द्वारकामाहात्म्ये गोमत्युदधिसंगमे स्नानदानादिमाहात्म्यवर्णनंनाम षष्ठोऽध्यायः ॥ ६ ॥ ॥ छ ॥ ॥ श्रीप्रह्लाद उवाच ॥ ॥ ततो गच्छेद्द्विजश्रेष्ठा रथांगाख्यं महोदधिम् ॥ चक्रांका यत्र पाषाणा दृश्यंते मुक्तिदायकाः ॥ १ ॥ यैः पूज्यते जगन्नाथः प्रत्यहं भावसंयुतैः ॥ सदा नेत्रैरनिमिषैर्वीक्ष्यते च जनार्दनः ॥ २ ॥ यच्च साक्षाद्भगवता दृष्टं कृष्णेन दृष्टितः ॥ तत्तीर्थं सर्वपापघ्नं चक्राख्यं परमं हरेः ॥ ३ ॥ यस्य प्रसिद्धिः परमा त्रैलोक्ये सचराचरे ॥ प्रयागादधिकं यच्च मुक्तिदं ह्यस्ति पावनम् ॥ ४ ॥ सुरैरपि प्रपूज्यंते यत्रांगानि शरीरिणाम् ॥ अंकितानि च चक्रेण षण्मासान्नात्र संशयः ॥ ५ ॥ यद्दृष्ट्वा मुच्यते पापात्प्रसंगेनापि मानवः ॥ तत्तीर्थं सर्वतीर्थानां पावनं प्रवरं स्मृतम् ॥ ॥ ६ ॥ तत्र गत्वा द्विजश्रेष्ठाः प्रक्षाल्य चरणौ मुदा ॥ करौ चास्यं चैव पुनः प्रणमेद्दंडवत्पुनः ॥ ७ ॥ प्रणिपत्य गृहीत्वार्घ्यं पंचरत्नसमन्वितम् ॥ सपुष्पाक्षतगंधैश्च फलहेमसुचंदनैः ॥ ८ ॥ संपन्नमर्घ्यमादाय मंत्रमेतमुदीरयेत् ॥ प्रत्यङ्मुखः सुनियतः संमुखो वा महोदधेः ॥९॥ ॐ नमो विष्णुरूपाय विष्णुचक्राय ते नमः ॥ गृहाणार्घ्यं मया दत्तं सर्वकामप्रदो भव ॥ १० ॥ अग्निश्च तेजो मृडया च रुद्रो रेतोधा विष्णुरमृतस्य नाभिः ॥ एतद्ब्रुवन्वाडवाः सत्यवाक्यं ततोऽवगाहेत पतिं नदीनाम् ॥११॥ मृदमालभ्य सजलां विप्रा देवकरच्युताम् ॥ धारयित्वा तु शिरसा स्नानं कुर्य्याद्यथाविधि ॥ १२ ॥ तर्पयेच्च पितॄन्देवान्मनुष्यांश्च यथाक्रमम् ॥ तर्पयित्वा हविर्द्रव्यं प्रोक्षयित्वा च भक्तितः ॥ १३ ॥ अश्वमेधसहस्रेण सम्यगिष्टेन यत्फलम् ॥ स्नानमात्रेण तत्प्रोक्तं चक्रतीर्थे द्विजोत्तमाः ॥ १४ ॥ प्रयागे यत्फलं प्रोक्तं माघ्यां माधवपूजने ॥ स्नानमात्रेण तत्प्रोक्तं चक्रतीर्थे द्विजोत्तमाः[2] ॥ १५ ॥ कारयेच्च ततः श्राद्धं पितॄणां श्रद्धयान्वितः ॥ विश्वेदेवान्सुवर्णेन राजतेन तथा पितॄन् ॥ १६ ॥ संतर्प्य भोजनेनैव वस्त्रालंकारभूषणैः ॥ दीनान्धकृपणेभ्यश्च दानं देयं स्वशक्तितः ॥ १७ ॥ चक्रतीर्थे तीर्थवरे विशेषाद्द्विजसत्तमाः ॥ [3]रत्नदानं प्रकुर्वीत प्रीणनार्थं

१ गोमतीनाममात्रेण—इ० पा० । २ न संशयः—इ० पा० । ३ रथदानम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





जगत्पतेः ॥ १८ ॥ गंन्त्रीमनडुहा युक्तां सर्वास्तरणसंयुताम् ॥ सोपस्करां च दद्याद्वै विष्णुर्मे प्रीयतामिति ॥ १९ ॥ सुविनीतं शीलयुतं तथा सोपस्करं हयम् ॥ भूषयित्वा च विप्राय दद्याद्दक्षिणया सह ॥ २० ॥ एवं कृते द्विजश्रेष्ठाः कृतकृत्यो भवेन्नरः ॥ मुक्तिं प्रयांति तस्यैव पितरस्त्रि कुलोद्भवाः ॥ २१ ॥ प्रेतयोनिं गता ये च ये च कीटत्वमागताः ॥ पच्यंते नरके ये च महारौरवसंज्ञके ॥ २२ ॥ ते सर्वे तृप्तिमायांति चक्रतीर्थं प्रभावतः ॥ श्राद्धे कृते द्विजश्रेष्ठा गयाश्राद्धफलं लभेत् ॥ २३ ॥ या गतिर्मातृभक्तानां यज्वनां या गतिः स्मृता ॥ चक्रतीर्थे द्विजश्रेष्ठाः स्नात्वा तां लभते नरः ॥ २४ ॥ श्राद्धं प्रशस्तं विप्रेंद्राः संप्राप्ते चंद्रसंक्षये ॥ सूर्यग्रहे विशेषेण कुरुक्षेत्रफलं स्मृतम् ॥ श्राद्धे स्नाने तथा दाने पितॄणां तर्पणे तथा ॥ २५ ॥ प्रशस्तं चक्रतीर्थं च नात्र कार्य्या विचारणा ॥ २६ ॥ सर्वदा पावनं विप्राश्चक्रतीर्थं न संशयः ॥ यस्तु श्राद्धं प्रकुर्वीत यात्राया मागतो नरः ॥ २७ ॥ चक्रतीर्थे द्विजश्रेष्ठाः संपूज्य मधुसूदनम् ॥ पूजितेषु द्विजेंद्रेषु विष्णुसांनिध्यमाप्नुयात् ॥ २८ ॥ वाचा कृतं कर्मकृतं मनसा समुपार्जितम् ॥ स्नानमात्रेण तत्पापं नश्यते नात्र संशयः ॥ २९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यांसंहितायां सप्तमे प्रभास खण्डे चतुर्थे द्वारकामाहात्म्ये गोमत्युदधिसंगमतीरस्थचक्रतीर्थमाहात्म्यवर्णनंनाम सप्तमोऽध्यायः ॥ ७ ॥ ॥ छ ॥ ॥ प्रह्लाद उवाच ॥ ॥ मा गच्छध्वं सुरनदीं कालिंदीं मा सरस्वतीम् ॥ गंच्छध्वं च द्विजश्रेष्ठा गोमत्युदधिसंगमे ॥ १ ॥ प्राप्यंते हेलया यत्र सर्वे कामा न संशयः ॥ गोमतीजलकल्लोलैः क्रीडते यत्र सागरः ॥ २ ॥ पापघ्नं गोमतीतीरं प्राप्यते पुंण्यवन्नरैः ॥ सागरेण च संमिश्रं महापातकनाशनम् ॥ ३ ॥ गोमती संगता यत्र सागरेण द्विजोत्तमाः ॥ मुक्तिद्वारं तु तत्प्रोक्तं कलिकाले न संशयः ॥ ४ ॥ यत्पुण्यं लभते तूर्णं गंगासागरसंगमे ॥ तत्पुण्यं समवाप्नोति गोमत्युदधिसंगमे ॥ ५ ॥ नमस्कृत्य च तोयेशं गोमतीं च सरिद्वराम् ॥ अर्घ्यं दद्याद्विधानेन कृत्वा च करयोः कुशान् ॥ ॥ ६ ॥ मंत्रेणानेन विप्रेंद्रा दद्यादर्घ्यं विधानतः ॥ ब्राह्मणैः सह संगत्य सदा तत्तीर्थवासिभिः ॥ ७ ॥ भक्त्या चार्घ्यं प्रदास्यामि देवाय परमा त्मने ॥ त्राहि मां पापिनं घोरं नमस्ते सुररूपिणे ॥ ८ ॥ तीर्थराज नमस्तुभ्यं रत्नाकर महार्णव ॥ गोमत्या संह गोविंद गृहाणार्घ्यं नमोऽस्तु ते ॥ ॥ ९ ॥ दंत्त्वा चार्घ्यं शिखां बद्ध्वा संस्मृत्य जलशायिनम् ॥ कुर्याच्च प्राङ्मुखः स्नानं ततः प्रत्यङ्मुखस्तथा ॥ १० ॥ स्नात्वा च परया भक्त्या



१ गन्त्रीम्—शकटिकाम्—इत्यर्थः । २ यात शीघ्रम्—इ० पा० । ३ यत्रतत्र च—इ० पा० । ४ त्राहि मां नरकाद्घोरान्नमस्ते त्वंसुरूपिणे—इ० पा० । ५ सहितो देव—इ० पा० । ६ दत्त्वा चार्घ्यं शिखां बद्ध्वा—इत्यनेन—तीर्थे—अर्घ्यदानवेलायां शिखाग्रंथिं विस्रस्य तीर्थाय अर्घ्यं दद्यात्—इति विधिः सूचितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पितॄन्संतर्पयेत्ततः ॥ विश्वेदेवादि संपूज्य पितॄणां श्राद्धमाचरेत् ॥ ११ ॥ यथोक्तां दक्षिणां दद्याद्विष्णुर्मे प्रीयतामिति ॥ विशेषतः प्रदातव्यं सुवर्णं विप्रसत्तमाः ॥ १२ ॥ दंपत्योर्वाससी चैव कंचुकोष्णीषमेव च ॥ लक्ष्म्या सह जगन्नाथो विष्णुर्मे प्रीयतामिति ॥ १३ ॥ महादानानि सर्वाणि गोमत्युदधिसंगमे ॥ सप्तद्वीपपतिर्भूत्वा विष्णुलोके महीयते ॥ १४ ॥ यस्तुलापुरुषं दद्याद्गोमत्युदधिसंगमे ॥ सप्तद्वीपपतिर्भूत्वा विष्णुलोके महीयते ॥ १५ ॥ आत्मानं तोलयेद्यस्तु स्वर्णेन रजतेन वा ॥ वस्त्रैर्वा कुंकुमैर्वापि फलैर्वापि तथा रसैः ॥ १६ ॥ भुक्त्वा भोगान्सुविपुलांस्तथा कामान्मनोहरान् ॥ संपूज्यमानस्त्रिदशैर्याति विष्ण्वालयं नरः ॥ १७ ॥ हिरण्यरूप्यदानं च ह्यश्वं धेनुं तथैव च ॥ गोमतीसंगमे दत्त्वा सर्वान्कामानवाप्नुयात् ॥ १८ ॥ भूमिदानं च यो दद्याद्गोमत्युदधिसंगमे ॥ स्नात्वा शुचिर्हरिं स्मृत्वा तस्माद्धन्यतरो न हि ॥ १९ ॥ कन्यादानं च यः कुर्याद्विद्यादानमथापि वा ॥गोमत्याः संगमे स्नात्वा याति ब्रह्मपदं नरः ॥ २० ॥ यो दद्यात्स्वर्णधेनुं च घृतधेनुं समाहितः ॥ ब्रह्माण्डदानमपि वा तस्य पुण्यमनंतकम् ॥ २१ ॥ तथा लवणधेनुं च जलधेनुमथापि वा ॥ दत्त्वा याति परं स्थानं गोमत्युदधिसंगमे ॥ २२ ॥ युगादिषु च सर्वेषु गोमत्युदधिसंगमे ॥ स्नात्वा संतर्प्य च पितॄनक्षयं लोकमाप्नुयात् ॥ २३ ॥ आषाढ्यां च तथा माघ्यां कार्तिक्यां संगमे नरः ॥ पितॄणां तर्पणं स्नानं श्राद्धं पावकपूजनम् ॥ कुर्याच्चैव तथा दानं यदीच्छेदक्षयं पदम् ॥ २४ ॥ पितॄणां चाक्षया तृप्तिर्गयाश्राद्धेन वै यथा ॥ तद्वच्छ्राद्धान्महाभाग गोमत्युदधिसंगमे ॥ २५ ॥ कुर्य्यात्स्नानं तथा दानं पितॄणां तर्पणं तथा ॥ पञ्चकासु द्विजश्रेष्ठास्तथा चैवाष्टकासु च ॥ २६ ॥ वैधृतौ च व्यतीपाते छायायां कुंजरस्य च ॥ षष्ठ्यां च कपिलाख्यायां तथा हि[3] द्वादशीषु च ॥ २७ ॥ गोमत्यां संगमे स्नात्वा दद्याद्दानं विशेषतः ॥ निर्मलं स्थानमाप्नोति यत्र गत्वा न शोचति ॥ २८ ॥ श्राद्धपक्षे त्वमावास्यां गोमत्युदधिसंगमे ॥ हेलया प्राप्यते पुण्यं दत्त्वा पिण्डं गयासमम् ॥ २९ ॥ तस्मात्सर्वप्रयत्नेन त्वमावास्यां द्विजोत्तमाः ॥ श्राद्धं हि पितृपक्षांते कार्य्यं गोमतिसंगमे ॥ ३० ॥ यद्यप्यश्रोत्रियं श्राद्धं यद्यप्युपहतं भवेत् ॥ पक्षश्राद्धकृतं पुण्यं दिनेनैकेन लभ्यते ॥ ३१ ॥ श्रद्धाहीनं मन्त्रहीनं पात्रहीनमथापि वा ॥ द्रव्यहीनं कालहीनं मनसः स्वास्थ्यवर्जितम् ॥ ३२ ॥ श्राद्धपक्षे ह्यमायां तु गोमत्युदधिसंगमे ॥ परिपूर्णं भवेत्सर्वं पितणां तृप्तिरक्षया ॥ ३३ ॥ गोमती कमला चैव चंद्रभागा तथैव च ॥ तिस्रस्तु संगता नद्यः प्रविष्टा वरुणालयम् ॥ ३४ ॥ गयायां पिंडदानेन प्रयागे ह्यस्थिपातने ॥ तत्पुण्यं समवाप्नोति पक्षांते श्राद्धकृन्नरः ॥ ३५ ॥ यदीच्छेत्सर्वतीर्थेषु

१ कुसुमैः—इ० पा० । २ पावकपूजनम्—यज्ञम्—इत्यर्थः । ३ तथा च द्वादशीदिने—इ० पा० । ४ प्रभासे—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



हेलया त्वभिषेचनम् ॥ स्नानं कुर्वीत भक्त्या वै गोमत्युदधिसंगमे ॥ ३६ ॥ पक्षेपक्षे समग्रा तु पितृपूजा कृता च यैः ॥ सम्पूर्णा जायते तेषां गोमत्युदधिसंगमे ॥ ३७ ॥ श्राद्धे कृते त्वमावस्यां पितृपक्षे च वै द्विजाः ॥ अपुत्रा चैव या नारी काकवंध्या च या भवेत् ॥ ३८ ॥ मृतपुत्रा तथा विप्राः संगमे स्नानमाचरेत् ॥ दोषैः प्रमुच्यते सर्वैर्गोमत्युदधिसंगमे ॥ स्नात्वा सुखमवाप्नोति प्रजां च चिरजीविनीम् ॥ ३९ ॥ यानि कानि च दानानि पृथिव्यां सम्भवंति हि ॥ तानि सर्वाणि देयानि गोमत्युदधिसंगमे ॥ ४० ॥ सर्वदैव च विप्रेन्द्रा विशेषात्सर्वपर्वसु ॥ स्नानं कुर्वीत नियतो गोमत्युदधिसंगमे ॥ ४१ ॥ दर्शनादेव पापस्य क्षयो भवति भो द्विजाः ॥ प्रणामे मनसस्तुष्टिर्मुक्तिश्चैवावगाहने ॥ ४२ ॥ श्राद्धे कृते पितृणां तु तृप्तिर्भवति शाश्वती ॥ दाने मनोरथावाप्तिर्जायते नात्र संशयः ॥ ४३ ॥ कृतकृत्यास्तु ते धन्या यैः कृतं पितृतर्पणम् ॥ श्राद्धं च ऋषिशार्दूला गोमत्युदधिसंगमे ॥ ४४ ॥ पितृपक्षे च ये केचिन्मातृपक्षे तथैव च ॥ तथा श्वशुरपक्षे च ये चान्ये मित्रबांधवाः ॥ ४५ ॥ स्थावरत्वं गता ये च पुद्गलत्वं च ये गताः ॥ पिशाचत्वं गता ये च ये च प्रेतत्वमागताः ॥ ४६ ॥ तिर्य्यग्योनिगता ये च ये च कीटत्वमागताः ॥ स्नानमात्रेण ते सर्वे मुक्तिं यांति न संशयः ॥ ४७ ॥ किं पुनः श्राद्धदानादि गोमतीसंगमे तथा ॥ कृत्वा मुक्तिमवाप्नोति मानवो नात्र संशयः ॥ ४८ ॥ श्रवणद्वादशीयोगे, गोमत्युदधिसंगमे ॥ स्नात्वा मुक्तिमवाप्नोति यत्र गत्वा न शोचति ॥ ४९ ॥ सन्त्यज्य सर्वतीर्थानि गोमत्युदधिसंगमे ॥ स्नानं कृत्वा तथा श्राद्धं कृतकृत्यो भवेन्नरः ॥ परं लोकमवाप्नोति ह्यर्चयित्वा तु वामनम् ॥ ५० ॥ सम्यक्स्नात्वा नरो यस्तु पूजयेद्गरुडध्वजम् ॥ पीतांबरधरो भूत्वा दिव्याभरणभूषितः ॥ ५१ ॥ वीक्ष्यमाणः सुरस्त्रीभिर्नागारिकृतकेतनः ॥ चतुर्भुजधरो भूत्वा वनमालाविभूषितः ॥ संस्तूयमानो मुनिभिर्याति विष्णवालयं नरः ॥ ५२ ॥ गोमतीसंगमे स्नात्वा कृतकृत्यो भवेन्नरः ॥ यत्र दैत्यवधं कृत्वा विष्णुना प्रभविष्णुना ॥ ५३ ॥ चक्रं प्रक्षालितं पूर्वं कृष्णेन स्वयमेव हि ॥ तेनैव चक्रतीर्थं हि ख्यातं लोकत्रये द्विजाः ॥ ५४ ॥ भवंति यत्र पाषाणाश्चक्रांका मुक्तिदायकाः ॥ यैः पूजितैर्जगन्नाथः कृष्णः सांनिध्यमाव्रजेत् ॥ ५५ ॥ तत्रैव यदि लभ्येत चक्रैर्द्वादशभिः सह ॥ ५६ ॥ द्वादशात्मा स विज्ञेयो मोक्षदः सर्वदेहिनाम् ॥ एकचक्रांकितो यस्तु द्वारवत्यां सुशोभनः ॥ ५७ ॥ सुदर्शनाभिधानोऽसौ मोक्षैकफलदो हि सः ॥ लक्ष्मीनारायणो द्वाभ्यां भुक्तिमुक्तिफलप्रदः ॥ ५८ ॥ त्रिभिस्त्रिविक्रमश्चैव त्रिवर्गफलदायकः ॥ श्रीप्रदो रिपुहन्ता च चतुर्भिः संयुतः स हि ॥ ५९ ॥ पञ्चभिर्वासुदेवस्तु जन्ममृत्युभयापहः ॥ प्रद्युम्नः षड्भिरेवासौ

१ विष्णुपुरं नरः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लक्ष्मीं कांतिं ददाति यः ॥ ६० ॥ सप्तभिर्बलभद्रश्च चक्रगोऽत्र प्रकीर्तितः ॥ लाञ्छितश्चाष्टभिर्भक्तिं ददाति पुरुषोत्तमः ॥ ६१ ॥ सर्वं दद्यान्नव व्यूहो दुर्लभो यः सुरैरपि ॥ दशावतारो दशभी राज्यदो नात्र संशयः ॥ ६२ ॥ एकादशभिरैश्वर्यं चक्रगः संप्रयच्छति ॥ निर्वाणं द्वादशात्मा च द्वादशभिर्ददाति च ॥ ६३ ॥ अत ऊर्ध्वं महाभागाः सौख्यमोक्षप्रदायकाः ॥ यतोऽत्र ते च पाषाणाः कृष्णचक्रेण चित्रिताः ॥ ६४ ॥ तेषां स्पर्शनमात्रेण मुच्यते सर्वकिल्बिषैः ॥ चक्रतीर्थे नरः स्नात्वा कृष्णचक्रेण चिह्नितः ॥ ६५ ॥ पूजयित्वा चक्रधरं हरिं ध्यायेत्सनातनम् ॥ नापुत्रो नाधनो रोगी न स संजायते नरः ॥ ६६ ॥ ब्रह्महत्यादिकं पापं मनोवाक्कायकर्मजम् ॥ तत्सर्वं विलयं याति सकृच्चक्रांकदर्शनात् ॥ ६७ ॥ म्लेच्छदेशे शुभे वापि चक्रांको दृश्यते यदि ॥ तत्र चैव हरिक्षेत्रं मुक्तिदं नात्र संशयः ॥ ६८ ॥ मृत्युकालेऽपि सम्प्राप्ते यदि ध्यायेद्धरिं नरः ॥ चक्रांकं धारयेदंगे स याति परमं पदम् ॥६९॥ हृदयस्थे च चक्रांके पूतो भवति तत्क्षणात् ॥ नोपसर्पंति तं भीता दूताः[1] कृष्णायुधं तदा ॥ वैष्णवं लोकमाप्नोति नात्र कार्या विचारणा ॥७०॥ अपि पापसमाचारः किं पुनर्धार्मिकः शुचिः ॥ गोमतीसंगमे स्नात्वा चक्रतीर्थे तथैव च ॥ मुच्यते पातकैर्घोरैर्मानवो नात्र संशयः ॥७१॥ राजसाः सत्त्वमायांति विष्णुधर्मं सनातनम् ॥ क्षेत्रस्य तस्य माहात्म्यात्सत्यमेतत्प्रकीर्त्तितम् ॥ ७२ ॥ तामसं राजसं चापि यत्किञ्चिद्विष्णुपूजने ॥ तच्च सत्त्वत्वमायाति निम्नगा च यथार्णवे ॥ ७३ ॥ दुर्लभा द्वारका विप्र दुर्लभं गोमतीजलम् ॥ दुर्लभं जागरो रात्रौ दुर्लभं कृष्णदर्शनम् ॥ ७४ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे चतुर्थे द्वारकामाहात्म्ये गोमत्युदधिसंगमस्नानादिमाहात्म्यपूर्वकचक्रतीर्थमाहात्म्यवर्णनंनामाष्टमोऽध्यायः ॥ ८ ॥ छ ॥ ॥ प्रह्लाद उवाच ॥ ॥ ततो गच्छेद्द्विजश्रेष्ठाः सप्तकुण्डान्सुविस्तृतान्[2] ॥ सर्वपापप्रशमनान्नृद्धिवुद्धिविवर्द्धनान् ॥१॥ आराधितः स च यदा हरिराविर्बभूव ह ॥ संस्तूयमानो मुनिभिर्लक्ष्म्या सह जगत्पतिः ॥ २ ॥ अर्हणं च तदा चक्रुर्हरये सुरगङ्गया ॥ वामपार्श्वे स्थितां पद्मामभिषेक्तुं समुद्यताम् ॥ ३ ॥ सनकाद्या ब्रह्मसुताः सप्तैते मनसा द्विजाः ॥ पृथक्पृथग्ध्रदान्कृत्वा सिषिचुः सागरोद्भवाम् ॥ ४ ॥ ततो लक्ष्मीह्रदाः प्रोक्ता[3] देव्या नाम्नैव संज्ञिताः ॥ प्राप्ते तु द्वापरस्यांते रुक्मिणीसंश्रयेण तु ॥ ५ ॥ रुक्मिणीह्रदमित्येवं कलौ ख्यातिं[4] गताः पुनः ॥ भृगुणा सेवितं यस्माद्भृगुतीर्थमिति स्मृतम् ॥ ६ ॥ तस्मिन्गत्वा महाभागाः प्रक्षाल्य चरणौ मृदा ॥ आचम्य च कुशान्गृह्य प्राङ्मुखो नियतः शुचिः ॥ ७ ॥ संपूर्णं चार्घ्यमादाय फलपुष्पाक्षतादिभिः ॥ रजतं च शिरे[5] कृत्वा मन्त्रमेतमुदी

१ दूताः—यमदूताः । २ सुविस्तरान्—इ० पा० । ३ जाताः—इ० पा० । ४ ख्यातं भविष्यति—इ० पा० । ५ शिरे—शिरसि—उपरि—इत्यर्थः । करसंपुट आदाय—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





रयेत् ॥ ८ ॥ भक्त्या चार्घ्यं प्रदास्यामि ह्रदे रुक्मिणिसंज्ञिते ॥ सर्वपापविनाशाय रुक्मिण्याः प्रीणनाय च ॥ ९ ॥ स्नानं कुर्यात्ततो विप्राः कृत्वा शिरसि तारकम् ॥ देवान्मनुष्यान्सन्तर्प्य पितॄनथ विशेषतः ॥ १० ॥ श्राद्धं ततः प्रकुर्वीत विप्रानाहूय भक्तितः ॥ दक्षिणां च ततो दद्याद्रजतं रुक्ममेव च ॥ ११ ॥ विशेषतः प्रदेयानि फलानि रसवन्ति च ॥ दम्पत्योर्भोजनं दद्यान्मिष्टान्नेन द्विजोत्तमाः ॥१२॥ विप्रपत्न्यस्तु संपूज्याः स्त्रियश्चान्याः स्वशक्तितः ॥ कञ्चुकैः रक्तवस्त्रैश्च रुक्मिणी प्रीयतामिति ॥ १३ ॥ एवं कृते द्विजश्रेष्ठाः कृतकृत्यो भवेन्नरः ॥ सर्वान्कामानवाप्नोति विष्णुलोकं स गच्छति ॥ १४ ॥ वसते च सदा गेहे लक्ष्मीस्तस्य न संशयः ॥ आरोग्यं मनसस्तुष्टिर्न चोद्वेगः कदाचन ॥ १५ ॥ पितॄणामक्षया तृप्तिः प्रजा भवति निश्चला ॥ हीनसत्त्वो नैव भवेद्दीर्घायुश्च भवेन्नरः ॥ १६ ॥ आढ्यो भवति सर्वत्र यः स्नातो रुक्मिणीह्रदे ॥ न लक्ष्म्या मुच्यते विप्रा नालक्ष्म्या म्रियते नरः ॥ १७ ॥ न वैरं कलहस्तस्य यः स्नातो रुक्मिणीह्रदे ॥ गमनागमनं न स्यात्संसारभ्रमणं तथा ॥ १८ ॥ दुःखशोकौ कुतस्तस्य यः स्नातो रुक्मिणीह्रदे ॥ सर्वपापविनिर्मुक्तो महाभयविवर्जितः ॥ १९ ॥ सर्वान्कामानिह प्राप्य याति विष्णुपदं नरः ॥ २० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे चतुर्थे द्वारकामाहात्म्ये रुक्मिणीह्रदमाहात्म्यवर्णनंनाम नवमोऽध्यायः ॥ ९ ॥ ॥ छ ॥ ॥ प्रह्लाद उवाच ॥ ॥ ततो गच्छेद्द्विजश्रेष्ठास्तीर्थं पापप्रणाशनम् ॥ कृकलासमिति ख्यातं नृगतीर्थमनुत्तमम् ॥ १ ॥ नृगो यत्र महीपालः कृकलासवपुर्द्धरः ॥ कृष्णेन सह संगत्य संप्राप परमां गतिम् ॥ २ ॥ ॥ ॥ ऋषय ऊचुः ॥ ॥ नृगोनाम नृपः कोऽयं कथं कृष्णेन संगतः ॥ कर्मणा कृकलासत्वं केन तद्वद विस्तरात् ॥ ३ ॥ ॥ प्रह्लाद उवाच ॥ ॥ नृगोनाम नृपो विप्राः सार्वभौमो बलान्वितः ॥ बुद्धिमान्धृतिमान्दक्षः श्रीमान्सर्वगुणान्वितः ॥ ४ ॥ अनेकशतसाहस्रा भूमिपा अपि तद्वशाः ॥ हस्त्यश्वरथसंघैश्च पत्तिभिर्बहुभिर्वृतः ॥ ५ ॥ सैन्यं च तस्य नृपतेः कोशं चैवाक्षयं तथा ॥ स नित्यं गुरुभक्तश्च देवताराधने रतः ॥ ६ ॥ महादानानि विप्रेन्द्रा ददात्यनुदिनं नृपः ॥ शश्वत्स गोसहस्रं तु ददाति नृपसत्तमः ॥ ७ ॥ प्रक्षाल्य चरणौ भक्त्या ह्युपविश्यासने शुभे ॥ परिधाप्य शुभे क्षौमे सुगन्धेनोपलिप्य च ॥ ८ ॥ संपूज्य पुष्पमालाभिर्धूपेन च सुगन्धिना ॥ ददौ दक्षिणया सार्द्धं प्रतिविप्राय गां तदा ॥ तांबूलसहितां भक्त्या विष्णुर्मे प्रीयतामिति ॥ ९ ॥ एवं प्रददतस्तस्य यजतश्च तथा मखैः ॥ ययौ कालो द्विजश्रेष्ठा भोगांश्चैवानुभुञ्जतः ॥ १० ॥ एकदा तु

१ तारकम्—रजतखण्डम्—इत्यर्थः । २ परमं सुखमाप्नोति—इ० पा० । ३ न भवेत्परयाचकः—इ० पा० । ४ सर्वकामसमायुक्तः—इ० पा० । ५ बलाधिकः—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विजश्रेष्ठं जैमिनिं संशितव्रतम् ॥ श्रद्धया तं च नृपतिः प्रतिग्रहपराङ्मुखम् ॥ उवाच वाक्यं नृपतिः कृतांजलिपुटः स्थितः ॥ ११ ॥ मामुद्धर महाभाग कृपां कुरु तपोनिधे[1] ॥ गृहाण गां मया दत्तां दयां कृत्वा ममोपरि ॥ १२ ॥ तच्छ्रुत्वा वचनं तस्य अनिच्छन्नपि गौरवात् ॥ नृपस्य चाब्रवीद्विप्र एवमस्त्विति लज्जितः ॥ १३ ॥ अवनिज्य ततः पादौ शिरसाधारयज्जलम् ॥ सुवर्णशृंगसहितां रौप्यखुरविभूषिताम् ॥ १४ ॥ रत्नपुच्छां कांस्यदोहां सितवस्त्रावगुंठिताम् ॥ समभ्यर्च्य च विप्रेन्द्रं ददौ दक्षिणयान्विताम् ॥ १५ ॥ आसीमान्तमनुव्रज्य हृष्टो राजा बभूव ह ॥ तरुणीं हंसवर्णां च हंसीनामेति विश्रुताम् ॥ १६ ॥ गां गृह्य स्वगृहं प्राप्तो दाम्ना बद्धां सवत्सकाम् ॥ स तस्यै यवसं चार्द्रं ददौ ब्राह्मणसत्तमः ॥ १७ ॥ सुतृप्तां यवसेनैव मध्याह्ने तृषितां तदा ॥ गृहीत्वा निर्ययौ विप्रो दामबद्धां जलाशयम् ॥ १८ ॥ मार्गे गजाश्वसंबाधे त्रस्ता सा उष्ट्रदर्शनात् ॥ हस्तादाच्छिद्य[2] सा धेनुर्ब्राह्मणस्य ययौ तदा ॥ १९ ॥ विचिन्वन्सकलामुर्वीं नापश्यत्तां द्विजर्षभः ॥ सा ययौ विद्रुता धेनुस्तन्महद्राजगोधनम् ॥ ॥ २० ॥ द्वितीयेऽह्नि पुनर्विप्रमाहूय[3] नृपसत्तमः ॥ संपूज्य विधिवद्भक्त्या वस्त्रालंकारभूषणैः ॥ २१ ॥ विधिवद्गां ददौ तां च स नृपः सोमशर्मणे ॥ गृहीत्वा राजभवनान्निर्ययौ गां द्विजर्षभः ॥ २२ ॥ आशंसमानो राजानं धर्मज्ञमिति कोविदम् ॥ स च विप्रो[4] विचिन्वानः सर्वतो गां सुदुःखितः ॥ ॥ २३ ॥ ददर्श पथि गच्छन्तीं पृष्ठतः सोमशर्मणः ॥ दृष्ट्वा तां गां च स मुनिर्जैमिनिस्तमभाषत ॥ २४ ॥ मम गां चापि हृत्वा त्वं नयसे दस्युवत्कथम् ॥ स तस्य वचनं श्रुत्वा विस्मयं दस्युकीर्त्तनात् ॥ २५ ॥ राजतो हि मया लब्धां गां नयामि स्वमन्दिरम् ॥ गोहर्त्तेति च मां कस्माद्ब्रवीषि द्विजसत्तम[5] ॥ २६ ॥ ॥ ब्राह्मण उवाच ॥ ॥ मयापि राजतो लब्धा ममेयं गौर्न संशयः ॥ कथं नयसि विप्र त्वं मयि जीवति मन्दिरम् ॥ २७ ॥ सोऽब्रवीदद्य मे लब्धा कथं मां वदसे मृषा ॥ सोऽब्रवीद्ध्यो[6] मया लब्धा बलान्नेतुं त्वमिच्छसि ॥ २८ ॥ ममेयमिति संक्रुद्धः सोमशर्माऽब्रवीद्वचः ॥ प्रज्वलत्क्रोधरक्ताक्षो ममेयमिति सोऽपरः ॥ २९ ॥ विवदंतौ तथा विप्रौ राजद्वारमुपागतौ ॥ कुर्वाणौ कलहं घोरं त्यक्तुकामौ स्वजीवितम् ॥ ३० ॥ संक्रुद्धौ ब्राह्मणौ दृष्ट्वा शपन्तौ तौ परस्परम् ॥ राज्ञे निवेदयामास द्वास्थं प्रणयपूर्वकम् ॥ ३१ ॥ अवज्ञाय तदा विप्रौ विवदन्तौ रुषान्वितौ ॥ कामव्याकुलचेतस्को न बहिर्निःसृतो नृपः ॥ ३२ ॥ एवं विवदमानौ तौ त्रिरात्रं समुपस्थितौ ॥ अवज्ञातौ नृपेणाथ

१ कृपानिधे–इ० पा० । २ आच्छिद्य–निर्गत्य–इत्यर्थः । आकृष्य–इ० पा० । ३ विप्रम्–अन्यं विप्रम्–सोमशर्माणम्–इत्यर्थः । ४ स च विप्रः–जैमिनिः–इत्यर्थः । ५ त्वं द्विजर्षभ–इ० पा० ।
६ ह्यः–गतेऽह्नि–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



राजानं प्रति च क्रुधा ॥ ३३ ॥ ऊचतुः कुपितौ वाक्यं सामर्षौ नृपतिं प्रति ॥ अवमन्यसे नौ यस्मात्त्वं न निर्गच्छसि मन्दिरात् ॥ ३४ ॥
शास्ता भवान्प्रजानां हि न न्यायेन नियोक्ष्यति ॥ भविष्यति भवांस्तस्मात्कृकलासो न संशयः ॥ ३५ ॥ एवं शप्त्वा तदा विप्रावन्यस्मै
गां प्रदाय तौ ॥ क्षुधितौ खेदसंयुक्तौ स्वगृहं गन्तुमुद्यतौ ॥३६॥ प्रस्थितौ तौ नृगो द्वार आगत्य समुपस्थितः ॥ दंडवत्प्रणिपत्याऽऽशु कृतांजलिर
भाषत ॥ ३७ ॥ अमोघवचना यूयं तत्तथा न तदन्यथा ॥ ममोपरि कृपां कृत्वा शापांत उपदिश्यताम् ॥ ३८ ॥ तस्य तद्व
चनं श्रुत्वा ऊचतुर्वचनं नृपम् ॥ द्वापरस्य युगस्यान्ते भगवान्देवकीसुतः ॥ ३९ ॥ वसुदेवगृहे राजन्हरिराविर्भविष्यति ॥ तस्य संस्पर्श
नादेव शापमुक्तिर्भविष्यति ॥ ४० ॥ इत्युक्त्वा तौ तदा विप्रौ प्रयातौ स्वनिवेशनम् ॥ राजा बहुविधान्भोगान्भुक्त्वा दत्त्वा च भूरिशः ॥
॥ ४१ ॥ इष्ट्वा च विविधैर्यज्ञैः कालधर्ममुपेयिवान् ॥ ततः स गतवान्विप्रा धर्मराजनिवेशनम् ॥ ४२ ॥ सत्कृत्योक्तो यमेनाथ
स्वागतेन नृपोत्तमः ॥ प्रथमं सुकृतं राजन्नथवा दुष्कृतं त्वया ॥ भोक्तव्यमिति मे ब्रूहि तत्ते संपाद्यते मया ॥ ४३ ॥ ॥ नृग उवाच ॥ ॥
यद्यस्ति दुष्कृतं किंचित्प्रथमं प्रतिपादय ॥ अनुज्ञातो यमेनैवं कृकलासो भवेति वै ॥ ततो वर्षसहस्राणि कृकलासत्वमाप्तवान् ॥ ४४ ॥
एकस्मिन्दिवसे विप्राः सर्वे यदुकुमारकाः ॥ वनं जग्मुर्मृगान्हन्तुं सर्वे कृष्णसमन्विताः ॥ ४५ ॥ तृषार्दिताश्च मध्याह्ने विचिन्वंतो जलं ह्रदे ॥
सत्वं च सुमहत्तत्र कृकलासं च संस्थितम् ॥ ४६ ॥ चक्रुश्चोद्धरणे तस्य यत्नं यदुकुमारकाः ॥ आकृष्यमाणः स तदा गुरुत्वान्न चचाल ह ॥ ४७ ॥
यदा न शेकुस्ते सर्व आचख्युः कृष्णरामयोः ॥ ददर्श तं तदा कृष्णो नृगं मत्वा हसन्निव ॥ ४८ ॥ चिक्षेप वामहस्तेन लीलयैव जगत्पतिः ॥
स संस्पृष्टो भगवता विमुक्तः शापबंधनात् ॥४९॥ त्यक्त्वा कलेवरं राजा दिव्यमाल्यानुलेपनः ॥ कृतांजलिरुवाचेदं भक्त्या परमया युतः ॥ ५० ॥
नमस्ते जगदाधार सर्गस्थित्यंतकारिणे ॥ सहस्रशिरसे तुभ्यं ब्रह्मणेऽनंतशक्तये ॥ ५१ ॥ एवं संस्तुवतः प्राह भगवान्देवकीसुतः ॥ ददामि ते वरं
तुष्टो यत्ते मनसि वर्त्तते ॥ ५२ ॥ याहि पुण्यकृतांल्लोकान्दर्शनात्स्पर्शनाच्च मे ॥ एवमुक्तः स देवेन संप्रहृष्टतनूरुहः ॥ ५३ ॥ उवाच यदि तुष्टोऽसि
यदि देयो वरो मम ॥ गर्त्तेयं मम नाम्ना तु ख्यातिं गच्छतु केशव ॥ ५४ ॥ यः स्नात्वा परया भक्त्या पितॄन्संतर्पयिष्यति ॥ त्वत्प्रसादेन गोविंद

१ सोमशर्मेत्युवाच ह--इ० पा० । २ ययतुः--इ० पा० । ३ श्रेष्ठांश्च--इ० पा० । ४ ततोगाद्धर्मराजस्य दिव्यं भवनमुत्तमम्--इ० पा० । ५ प्रद्युम्नाद्याः सहस्रशः--इ० पा० । ६ स्मयन्निव-इ० पा० । ७ च सः--इ० पा० । ८ युक्तमान्--इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्णुलोकं स गच्छतु ॥ ५५ ॥ एवमुक्त्वा स भगवान्पुनर्द्वारावतीमगात् ॥ ५६ ॥ स च राजा विमानेन दिव्यमाल्यानुलेपनः ॥ जगाम भवनं विष्णोर्विबुधैरनुसंस्तुतः ॥ ५७ ॥ ॥ प्रह्लाद उवाच ॥ ॥ तदाप्रभृति विप्रेंद्राः स कूपो नृगसंज्ञया ॥ वरदानाच्च कृष्णस्य पावनः सर्वदेहिनाम् ॥ ॥ ५८ ॥ तत्र गत्वा द्विजश्रेष्ठा ह्यर्घ्यं दद्याद्यथाविधि ॥ फलपुष्पाक्षतैर्युक्तं चंदनेन च भूसुराः ॥ ५९ ॥ नमस्ते विश्वरूपाय विष्णवे परमात्मने ॥ अर्घ्यं गृहाण देवेश कूपेऽस्मिन्नृगसंज्ञके ॥ ६० ॥ ततः स्नायाद्द्विजश्रेष्ठा मृदमालिप्य पाणिना ॥ संतर्पयेत्पितॄन्देवान्मनुष्यांश्च यथाक्रमात् ॥ ॥ ६१ ॥ ततः श्राद्धं प्रकुर्वीत पितॄणां श्रद्धयान्वितः ॥ विप्रेभ्यो भोजनं दद्याद्दक्षिणां च स्वशक्तितः ॥ ६२ ॥ विशेषतः प्रदातव्या सवत्सा गौः स्वलंकृता ॥ शय्यां सोपस्करां दद्याद्विष्णुर्मे प्रीयतामिति ॥ ६३ ॥ दीनांधकृपणानां च सदा तत्तीरवासिनाम् ॥ दद्याद्दानं स्वशक्त्या च वित्तशाठ्यविवर्जितः ॥६४॥ स्नानमात्रेण विप्रेन्द्रा लभेद्गोदानजं फलम्॥पितॄणां श्राद्धदानेन वियोनिं न च गच्छति ॥६५॥कृकलासे कृतं श्राद्धं येनैव तर्पणं तथा ॥ स गच्छेद्विष्णुलोकं तु पितृभिः सहितो नरः ॥ ६६ ॥ तथा मनोरथावाप्तिर्यात्रा च सफला भवेत् ॥ सर्वतीर्थफलावाप्तिं लभते नात्र संशयः ॥ ६७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे चतुर्थे द्वारकामाहात्म्ये कृकलासापरनामकनृगतीर्थमाहात्म्यवर्णनंनाम दशमोऽध्यायः ॥ १० ॥ ॥ छ ॥ ॥ प्रह्लाद उवाच ॥ ॥ ततो गच्छेद्द्विजश्रेष्ठास्तीर्थं विष्णुपदोद्भवम् ॥ यस्य दर्शनमात्रेण गंगास्नानफलं लभेत् ॥ १ ॥ यस्योत्पत्तिर्मया पूर्वं कथिता द्विजसत्तमाः ॥ यस्य संस्मरणादेव कीर्तनात्पापनाशनम् ॥ २ ॥ हरिणा या समानीता रुक्मिण्यर्थे महात्मना ॥ यस्या गण्डूषमात्रेण हयमेधफलं लभेत् ॥ ३ ॥ विष्णोः पादप्रसूता या वैष्णवीति च विश्रुता ॥ तत्र गत्वा महाभाग गृहीत्वाऽर्घ्यं विधानतः ॥ ४ ॥ नमस्ये त्वां भगवति विष्णुपादतलोद्भवे ॥ गृहाणार्घ्यमिदं देवि गंगे त्वं हरिणा सह ॥ ५ ॥ इत्युच्चार्य द्विजश्रेष्ठा मृदमालभ्य पाणिना ॥ प्राङ्मुखः संयतो भूत्वा स्नानं कुर्यादतन्द्रितः ॥ ६ ॥ देवान्पितॄन्मनुष्यांश्च तर्पितव्यं तिलाक्षतैः ॥ उपहृत्योपहारांश्च ह्याहूय ब्राह्मणांस्ततः ॥ ७ ॥ श्रद्धया परया युक्तः श्राद्धं कुर्याद्विचक्षणः ॥ यथोक्तां दक्षिणां दद्यात्सुवर्णं रजतं तथा ॥ ८ ॥ दीनान्धकृपणानाञ्च दानं देयं स्वशक्तितः ॥ विशेषतः प्रदातव्यं सुवर्णं द्विजसत्तमाः ॥ ९ ॥ उपानहौ ततो देये जलकुम्भं द्विजातये ॥ दध्योदनं सलवणं शाकजीरकसंयुतम् ॥ १० ॥ रक्तवस्त्रैः कंचुकीभी रुक्मिणीं परिधापयेत् ॥ विप्रपत्नीश्च विप्रांश्च विष्णुर्मेप्रीयतामिति ॥ ११ ॥ एवं कृते द्विज

१ एवं भविष्यतीत्युक्त्वा तत्रैवान्तरधीयत--इ०पा० । २ विबुधैरपि पूजितः--इ०पा० । ३ विधानतः--इ०पा० । ४ आलभ्य--इ०पा० । ५ पितॄनुद्दिश्य भक्तितः--इ०पा० । ६ सदा तीर्थोपसेविनाम्--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

श्रेष्ठाः कृतकृत्यो भवेन्नरः ॥ पितॄणामक्षया तृप्तिर्गयाश्राद्धेन वै यथा ॥ १२ ॥ वैष्णवं लोकमायान्ति पितरस्त्रिकुलोद्भवाः ॥ जीवते स श्रिया युक्तः पुत्रपौत्रसमन्वितः ॥ १३ ॥ प्रीतः सदा भवेत्तस्य रुक्मिण्या सह केशवः ॥ यच्छते वाञ्छितान्सर्वानैहिकामुष्मिकान्प्रभुः ॥ १४ ॥ एतन्माहात्म्यमतुलं विष्णुपादोद्भवं तथा ॥ यः शृणोति हरौ भक्त्या सर्वपापैः स मुच्यते ॥ १५ ॥ श्रुत्वाऽध्यायमिमं पुण्यं सर्वपापैः प्रमुच्यते ॥ १६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे चतुर्थे द्वारकामाहात्म्ये विष्णुपदतीर्थमाहात्म्यवर्णनंनामैकादशोऽध्यायः॥ ॥ ११ ॥ ॥ छ ॥

॥ प्रह्लाद उवाच ॥ ॥ ततो गच्छेद्विजश्रेष्ठा गोप्रचारमतः परम् ॥ यत्र स्नात्वा नरो भक्त्या लभेद्गोदानजं फलम् ॥ १ ॥ यत्र[1] स्नातो जगन्नाथो नभस्ये दैवतैर्वृतः ॥ कटि[2]दानं च तत्प्रोक्तं द्वादश्यां द्विजसत्तमाः ॥ २ ॥ ॥ ऋषय ऊचुः ॥ ॥ कथं तु तत्र दैत्येन्द्राऽभवद्वै गोप्रचारकम् ॥ तीर्थं कथय तत्त्वेन यत्र[3] स्नातो जनार्दनः ॥ ३ ॥ ॥ प्रह्लाद उवाच ॥ ॥ हते कंसे भोजराजे कृष्णेनामिततेजसा ॥ उग्रसेने चाभिषिक्ते मधुपुर्यां महात्मना ॥ ४ ॥ उद्धवं प्रेषयामास गोकुले गोकुलप्रियः ॥ सुहृदां प्रियकामार्थं गोपगोपीजनस्य च ॥ ५ ॥ नमस्कृत्य च गोविंदं प्रययौ नंदगोकुलम् ॥ स तत्सदृशवेषेण वस्त्रालंकारभूषणैः ॥ ६ ॥ तं दृष्ट्वा दिवसस्यांते गोविंदानुचरं प्रियम् ॥ उद्धवं पूजयामास वस्त्रालंकारभूषणैः ॥ ७ ॥ तं भुक्तवं तं विश्रांतं यशोदा पुत्रवत्सला ॥ आनंदबाष्पपूर्णाक्षी पप्रच्छानामयं हरेः ॥ ८ ॥ कच्चिद्धि स्तः सुखं पुत्रौ रामकृष्णौ यदूत्तमौ ॥ कच्चित्स्मरति गोविंदो वयस्यान्गोपबालकान् ॥ ९ ॥ कच्चिदेष्यति गोविंदो गोकुलं[4] मथुरेश्वरः ॥ तारयिष्यति पुत्रोऽसौ गोकुलं वृजिनार्णवात् ॥ १० ॥ इत्युक्त्वा बाष्पपूर्णाक्षौ यशोदा नंद एव च ॥ दीर्घं रुरुदतुर्दीनौ पुत्रस्नेहवशंगतौ ॥ ११ ॥ उद्धवस्तौ ततो दृष्ट्वा प्राणसंशयमागतौ ॥ मधुरैः कृष्णसंदेशैः स्नेहयुक्तैरजीवयत्[5] ॥ १२ ॥ नमस्करोति भवतीं भवंतं च सहाग्रजः ॥ अनामयं पृष्टवांश्च तौ च क्षेमेण तिष्ठतः ॥ १३ ॥ क्षिप्रमेष्यति दाशार्हो रामेण सहितो विभुः ॥ अत्रागत्य जगन्नाथो विधास्यति च वो हितम् ॥ १४ ॥ इत्येवं कृष्णसंदेशैः समाश्वास्योद्धवस्तदा ॥ सुखं सुष्वाप शयने नन्दाद्यैरभिनंदितः ॥ १५ ॥ गोप्यस्तदा रथं दृष्ट्वा द्वारे नंदस्य विस्मिताः ॥ कोऽयं कोऽयमिति प्राहुः कृष्णागमनशंकया ॥ १६ ॥ गोपालराजस्य गृहे रथेनादित्यवर्चसा ॥ समागतो महाबाहुः कृष्णवेषानुगस्तथा[6] ॥ १७ ॥ परस्परं समागम्य सर्वास्ता व्रजयोषितः ॥ विविक्ते कृष्णदूतं तं पप्रच्छुः शोककर्षिताः ॥ १८ ॥ ॥ श्रीगोप्य

१ यत्र स्नाति जगन्नाथो वृतो नभासि दैवतैः–इ० पा० । २ कटिदानं च तत्प्रोक्तम्–इ० पा० । ३ यत्रायाति–इ० पा० ।४ गोष्ठं स मथुरेश्वरः–इ०पा० । ५ अरंजयत्–इ०पा० । ६ सदा–इ० पा० ।



CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऊचुः ॥ ॥ कस्मात्त्वमिह संप्राप्तः किं ते कार्य्यमिहाद्य वै ॥ दस्युरूपप्रतिच्छन्नो ह्यस्मान्संहर्तुमिच्छसि ॥ १९ ॥ पूर्वमेव हतं तेन कृष्णेन हृद यादिकम् ॥ पाययित्वाऽधरविषं योषिद्व्रातं पलायितः ॥ २० ॥ इत्येवमुक्त्वा ता गोप्यो मुमुहुः शोकविह्वलाः ॥ ईक्षंत्यः कृष्णदासं तं निपेतुर्धर णीतले ॥ २१ ॥ उद्धवस्तं जनं दृष्ट्वा कृष्णस्नेहहृताशयम् ॥ आश्वासयामास तदा वाक्यैः श्रोत्रसुखावहैः ॥ २२ ॥ ॥ उद्धव उवाच ॥ ॥ भग वानपि दाशार्हः कन्दर्प्पशरपीडितः ॥ न भुंक्ते न स्वपिति च चिन्तयन्वस्त्वहर्निशम् ॥ २३ ॥ तच्छ्रुत्वा वचनं तस्य ललिता क्रोधमूर्छिता ॥ उद्धवं ताम्रनयना प्रोवाच रुदती तदा ॥ २४ ॥ ॥ ललितोवाच ॥ ॥ असत्यो भिन्नमर्य्यादः क्रूरः क्रूरजनप्रियः ॥ त्वं मा कृथा नः पुरतः कथां तस्याऽकृतात्मनः ॥ २५ ॥ धिग्धिक्पापसमाचारो धिग्धिग्वै निष्ठुराशयः ॥ हित्वा यः स्त्रीजनं मूढो गतो द्वारवतीं हरिः ॥ २६ ॥ ॥ ॥ श्यामलोवाच ॥ ॥ किं तस्य मन्दभाग्यस्य अल्पपुण्यस्य दुर्मतेः ॥ मा कुरुध्वं कथाः साध्व्यः कथां कथयताऽपराम् ॥ २७ ॥ ॥ ॥ धन्योवाच ॥ ॥ केनायं हि समानीतो दूतो दुष्टजनस्य च ॥ यातु तेन पथा पापः पुनर्नायाति येन च ॥ २८ ॥ ॥ विशाखोवाच ॥ ॥ न शीलं न कुलं यस्य नास्ति पापकृतं भयम् ॥ तस्य स्त्रीहनने साध्व्यो ज्ञायते जन्म कर्म च ॥ हीनस्य पुरुषार्थेन तेन संगो निरर्थकः ॥ २९ ॥ ॥ ॥ राधोवाच ॥ ॥ भूतानां घातने यस्य नास्ति पापकृतं भयम् ॥ तस्य स्त्रीहनने साध्व्यः शंका कापि न विद्यते ॥ ३० ॥ ॥ शैब्योवाच ॥ ॥ सत्यं ब्रूहि महाभाग किं करोति यदूत्तमः ॥ संगतो नागरस्त्रीभिरस्माकं किं कथां स्मरेत् ॥ ३१ ॥ ॥ पद्मोवाच ॥ ॥ कदोद्धव महाभाग नागरीजनवल्लभः ॥ समेष्यतीह दाशार्हः पद्मपत्रायतेक्षणः ॥ ३२ ॥ ॥ भद्रोवाच ॥ ॥ हा कृष्ण हा गोपवर हा गोपीजनवल्लभ ॥ समुद्धर महा बाहो गोपीः संसारसागरात् ॥ ३३ ॥ ॥ प्रह्लाद उवाच ॥ ॥ इति ता विविधैर्वाक्यैर्विलपंत्यो व्रजस्त्रियः ॥ रुरुदुः सुस्वरं देव्यः स्मरंत्यः कृष्ण चेष्टितम् ॥ ३४ ॥ तासां तद्रुदितं श्रुत्वा भक्तिस्नेहसमन्वितः ॥ विस्मयं परमं गत्वा साधुसाध्विति चाब्रवीत् ॥ ३५ ॥ ॥ उद्धव उवाच ॥ ॥ यं न ब्रह्मा न च हरो न देवा न महर्षयः ॥ स्वभावमनुगच्छंति सर्वा धन्या व्रजस्त्रियः ॥ ३६ ॥ सर्वासां सफलं जन्म जीवितं यौवनं धनम् ॥ यासां भवेद्भगवति भक्तिरव्यभिचारिणी ॥ ३७ ॥ ॥ गोप्य ऊचुः ॥ ॥ साधु दर्शय गोविंदं साधु दर्शय वल्लभम् ॥ नयास्मान्साधु तत्रैव यत्र तिष्ठति सोऽच्युतः ॥ ३८ ॥ ॥ प्रह्लाद उवाच ॥ ॥ तासां तद्भाषितं श्रुत्वा तथा विलपितं बहु ॥ बाढमित्येव ता ऊच उद्धवः स्नेहविह्वलाः ॥ ३९ ॥

१ कथं गतः–इ० पा० । २ ज्ञातिर्वा–इ० पा० । ३ प्रेम्णा–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



उद्धवेन समं सर्वास्ततस्ता व्रजयोषितः ॥ अनुजग्मुर्मुदा युक्ताः कृष्णदर्शनलालसाः ॥ ४० ॥ गायन्त्यः प्रियगीतानि तद्बालचरितानि च ॥ जग्मुः सहैव शनकैरुद्धवेन व्रजांगनाः ॥ ४१ ॥ यदुपुर्यां ततो दृष्ट्वा उद्यानविपिनावलीः[1] ॥ अद्य देवं प्रपश्यामः कृष्णाख्यं नंदनंदनम् ॥ ॥ ४२ ॥ द्वारवत्यां तु गमनाद्ध्यानाल्लक्ष्मीपतेस्तदा ॥ अशेषकल्मषान्मुक्ता विध्वस्ताखिलबन्धनाः ॥ ४३ ॥ संप्राप्तास्तास्ततः सर्वास्तीरे मयसरस्य[2] च ॥ प्रणिपत्योद्धवः प्राह गोपिकाः कृष्णदेवताः ॥ ४४ ॥ स्थीयतां मातरश्चात्रात्रैवेष्यति महाभुजः[3] ॥ कृष्णः कमलपत्राक्षो विधास्यति च[4] वो हितम् ॥ ४५ ॥ ॥ गोप्य ऊचुः ॥ ॥ कस्योद्धव इदं चात्र[5] सरः सारसशोभितम् ॥ संपूर्णं पंकजैश्चित्रैः कल्हारकुमुदोत्पलैः ॥ ४६ ॥ ॥ ॥ उद्धव उवाच ॥ ॥ मयोनाम महादैत्यो मायावी लोकविश्रुतः ॥ कृतं तेन सरः शुभ्रं तस्य नाम्ना च विश्रुतम् ॥ ४७ ॥ ॥ श्रीगोप्य ऊचुः ॥ ॥ शीघ्रमानय गोविंदं साधु दर्शय चाच्युतम् ॥ नयनानंदजननं तापत्रयविनाशनम् ॥ ४८ ॥ तच्छ्रुत्वा वचनं तासां गोपिकानां तदोद्धवः ॥ दूतैः समानयामास श्रीकृष्णं शीघ्रयायिभिः ॥ ४९ ॥ आयांतं शीघ्रयानेन दृष्ट्वा देवकिनंदनम् ॥ भ्राजमानं सुवपुषा वनमालाविभूषितम् ॥ ॥ ५० ॥ ज्वलत्किरीटमुकुटं स्फुरन्मकरकुण्डलम् ॥ श्रीवत्सांकं महाबाहुं पीतकौशेयवाससम् ॥ ५१ ॥ आतपत्रैर्वृतं[6] मूर्ध्नि संवृतं[7] वृष्णिपुंगवैः ॥ संस्तुतं बंदिमुख्यैश्च गीतवादित्रनिस्वनैः ॥ ५२ ॥ पौरजानपदैर्लोकैर्वैष्णवैः सर्वतो वृतम् ॥ पश्यन्तं हंसमिथुनैः सरः सारसशोभितम् ॥ ५३ ॥ तं दृष्ट्वाऽच्युतमायांतं लोककांतं मनोहरम् ॥ प्रियं प्रियाश्चिराद्दृष्ट्वा मुमुहुस्ता व्रजांगनाः ॥ ५४ ॥ चिराय संज्ञां संप्राप्य विलेपुश्च सुदुःखिताः ॥ हा नाथ कांत हा कृष्ण हा व्रजेश मनोहर ॥ ५५ ॥ संवर्धितोऽसि यैर्बाल्ये क्रीडितो वत्सपालकैः ॥ तेऽपि त्वया परित्यक्ताः कथं दुष्टोऽसि निर्घृणः ॥ ५६ ॥ न ते धर्मो न सौहार्दं न सत्यं सख्यमेव च ॥ पितृमातृपरित्यागी कथं यास्यसि सद्गतिम् ॥ ५७ ॥ स्वामिन्भक्तपरित्यागः सर्वशास्त्रेषु गर्हितः ॥ त्यजताऽस्मान्वने वीर धर्मो नावेक्षितस्त्वया[8] ॥ ५८ ॥ ॥ प्रह्लाद उवाच ॥ ॥ श्रुत्वा तासां विलपितं गोपीनां नंदनंदनः ॥ अनन्यशरणाः सर्वा भावज्ञो भगवान्विभुः[9] ॥ सांत्वयामास वचनैर्व्रजेशस्ता व्रजांगनाः ॥ ५९ ॥ अध्यात्मशिक्षया गोपीः प्रभुस्ता अन्वशिक्षयत् ॥ ६० ॥ ॥ श्रीभगवानुवाच ॥ ॥ भवतीनां वियोगो मे न हि[10] सर्वात्मना क्वचित् ॥ वसामि हृदये शश्वद्भूतानामविशेषतः ॥६१॥



१ उद्यानविपिनावलीः—उद्यानवनपंक्तीः—इत्यर्थः । २ मयसरस्य—मयासुरनिर्मितस्य सरसः तीरे—मयसरस्य—सकारान्तस्य—अकारान्तत्वमार्षम् । ३ जनार्दनः—इ० पा० । ४ स—इ० पा० । ५ चारु—इ०पा० । ६ आतपत्रसहस्रैस्तु—इ० पा० । ७ संवृतं तथा—इ० पा० । ८ तत्त्वं नावेक्षितं त्वया—इ० पा० । ९ पुष्करेक्षणः—इ० पा० । १० कदाचिदपि नैव हि—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहं सर्वस्य प्रभवो मत्तो देवाः सवासवाः ॥ आदित्या वसवो रुद्राः साध्या विश्वे मरुद्गणाः ॥ ६२ ॥ ब्रह्मा रुद्रश्च विष्णुश्च सनकाद्या[1] मह
र्षयः ॥ इंद्रियाणि मनो बुद्धिस्तथा सत्त्वं रजस्तमः ॥ ६३ ॥ कामः क्रोधश्च लोभश्च मोहोऽहंकार एव च ॥ एतत्सर्वमशेषेण मत्तो गोप्यः
प्रवर्त्तते ॥ ६४ ॥ एतज्ज्ञात्वा महाभागा मा स्म कुध्वं मनः शुचि[2] ॥ सर्वभूतेषु मां नित्यं भावयध्वमकल्मषाः[3]॥ ६५ ॥ ॥ प्रह्लाद उवाच ॥ ॥
ताः कृष्णवचनं श्रुत्वा गोप्यो विध्वस्तबन्धनाः ॥ विमुक्तसंशयक्लेशा दर्शनानन्दसंप्लुताः॥ ऊचुश्च गोपवध्वस्ताः कृष्णं[4] निर्मलमानसाः ॥ ६६ ॥
॥ ॥ गोप्य ऊचुः ॥ ॥ अद्य नः सफलं जन्म अद्य नः सफला दृशः ॥ यत्त्वां पश्याम गोविन्द नागरीजनवल्लभम् ॥ ६७ ॥ पुण्यहीना
न पश्यंति कृष्णाख्यं पुरुषं परम् ॥ वाक्यैर्हेत्वर्थसंयुक्तैर्यदि संबोधिता वयम् ॥ तथापि माया हृदयान्नापैति मधुसूदन ॥ ६८ ॥ ॥ श्रीकृष्ण
उवाच ॥ ॥ दर्शनात्स्पर्शनाच्चास्य विमुक्ताऽशेषबन्धनाः ॥ स्नात्वा च सकलान्कामानवाप्स्यथ व्रजांगनाः ॥ ६९ ॥ ॥ गोप्य ऊचुः ॥ ॥
अद्भुतो हि प्रभावस्ते सरसोऽस्य उदाहृतः ॥ विधिं ब्रूहि जगन्नाथ विस्तराद्वृष्णिनन्दन ॥ ७० ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ भवतीनां
मया सार्द्धं सञ्जातमत्र दर्शनम् ॥ तस्मान्मया सदा ह्यत्र स्नातव्यं नियमेन हि ॥ ७१ ॥ यः स्नात्वा परया भक्त्या पितॄन्सन्तर्पयिष्यति ॥ श्राव
णस्य सिते पक्षे द्वादश्यां नियतः शुचिः ॥ ७२ ॥ दत्त्वा दानं स्वशक्त्या च मामुद्दिश्य तथा पितॄन् ॥ लभते वैष्णवं लोकं पितृभिः परि
वारितः ॥ ७३ ॥ मयतीर्थं समासाद्य कृत्वा च करयोः कुशान् ॥ फलमेकं गृहीत्वा तु मन्त्रेणार्घ्यं प्रदापयेत् ॥ ७४ ॥ गृहान्धकूपे पतितं माया
पाशशतैर्वृतम् ॥ मामुद्धर महीनाथ गृहाणार्घ्यं नमोऽस्तु ते ॥ ७५ ॥ ॥ अर्घ्यमन्त्रः ॥ ॥ स्नात्वा यः परया भक्त्या पितॄन्संतर्प्य भावतः ॥
कुर्याच्छ्राद्धं च परया पितृभक्त्या समन्वितः ॥ ७६ ॥ दक्षिणां च ततो दद्याद्रजतं रुक्ममेव च ॥ विशेषतः प्रदातव्यं पायसं च सशर्करम् ॥ ७७ ॥
नवनीतं घृतं छत्रं कंबलाजिनमेव च ॥ भवतीभिः समं यस्मात्संजातं मम दर्शनम् ॥ आगंतव्यं मया तस्मात्सदा ह्यस्मिञ्जलाशये ॥ ७८ ॥
योऽत्र स्नानं प्रकुरुते मयस्य सरसि प्रियाः ॥ गंगास्नानफलं तस्य विष्णुलोकस्तथाऽक्षयः ॥ ७९ ॥ मुक्तिं प्रयांति तस्यैव पितरस्त्रिकुलोद्भवाः ॥
पुत्रपौत्रसमायुक्तो धनधान्यसमन्वितः ॥ यावज्जीवं सुखं भुक्त्वा चान्ते हरिपुरं व्रजेत् ॥ ८० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहि
तायां सप्तमे प्रभासखण्डे चतुर्थे द्वारकामाहात्म्ये मयनिर्मितसरोमाहात्म्यवर्णनंनाम द्वादशोऽध्यायः ॥१२॥ छ ॥ ॥ श्रीप्रह्लाद उवाच ॥ ॥

१ शक्तिराद्या–इ०पा० । २ शुचि–शोके–इत्यर्थः । ३ चिन्तयध्वम्–इ०पा० । ४ कृष्णदर्शननिर्मलाः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



इति कृष्णवचः श्रुत्वा गोप्यः संहृष्टमानसाः ॥ तस्मिन्मयसरे स्नात्वा विमुक्ताऽशेषबन्धनाः ॥ १ ॥ कृष्णदर्शनसंजातपरमानन्दसंप्लुताः ॥ ऊचुश्च वचनं गोप्यो मधुरं माधवं प्रति ॥ २ ॥ ॥ गोप्य ऊचुः ॥ ॥ धन्यः स दैत्यप्रवरो मयो येन कृतं सरः ॥ यस्मिंस्त्वं देवतैः सार्द्धं समेष्यसि जगत्पते ॥ ३ ॥ यदि तुष्टोऽसि भगवन्ननुग्राह्या वयं यदि ॥ अस्माकमपि वार्ष्णेय कारयस्व सरोत्तमम् ॥ ४ ॥ कीर्त्तनान्मृत्युलोके ऽस्मिंस्तव संदर्शनेन हि ॥ अहर्निशं तव ध्यानाद्यास्यामः परमां गतिम् ॥ ५ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ करिष्ये वः प्रियं साध्व्यो यूयं मम परिग्रहाः ॥ अनुग्राह्या मया नित्यं भक्तिग्राह्योऽस्मि सर्वदा ॥ ६ ॥ ॥ प्रह्लाद उवाच ॥ ॥ इत्युक्त्वा भगवान्कृ[1]ष्णो गोपीनां हित काम्यया ॥ सरसः सन्निधौ तस्य सरस्त्वन्यच्चकार ह ॥ ७ ॥ तदगाधं स्वच्छजलं नलिनीदलशोभितम् ॥ हंससारसयुग्मैश्च चक्रवाकैश्च शोभि तम् ॥ ८ ॥ कुमुदोत्पलकह्लारपद्मिनीखण्डमण्डितम् ॥ सेवितं द्विजमुख्यैश्च सिद्धविद्याधरैस्तथा ॥ ९ ॥ सेवितं यदुनारीभिस्तथा यदुकुमारकैः ॥ दिवारात्रौ सुसंपूर्णं सर्वैर्जानपदैर्जनैः ॥ १० ॥ तं दृष्ट्वा जलकल्लोलैः सुसंपूर्णं जलाशयम् ॥ हर्षाद्गोपीजनं कृष्णः प्रोवाच वचनं तदा ॥ ११ ॥ पश्यध्वं गोपिकाः शुभ्रं सरः सरः[2]समीपतः ॥ स्वच्छमिष्टजलापूर्णं सज्जनानां यथा मनः ॥ १२ ॥ कारणाद्भवतीनां च यस्मात्कृतमिदं सरः ॥ भवतीनां तथा नाम्ना ख्यातमेतद्भविष्यति ॥ १३ ॥ गोर्वाचावाचकः शब्दो भवतीभिर्मया सह ॥ गोप्रचारेति वै नाम्ना[3] ख्यातिं लोके गमिष्यति ॥ १४ ॥ युष्माकं प्रियकामार्थं यस्मात्कृतमिदं सरः ॥ तस्माद्गोपीसर इति ख्यातिं लोके गमिष्यति ॥ १५ ॥ ॥ गोप्य ऊचुः ॥ ॥ अनुग्राह्या यदि वयमस्मन्नाम्ना कृतं सरः ॥ अन्यत्किमपि वार्ष्णेय प्रार्थयामो [4]वदस्व नः ॥ १६ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ प्रार्थ्यतां यद भिप्रेतं यद्वो मनसि वर्तते ॥ भक्त्या समागता यूयं नास्त्यदेयं ततो मया ॥ १७ ॥ ॥ गोप्य ऊचुः ॥ ॥ यदि तुष्टोऽसि भगवन्यदि देयो वरो हि नः ॥ तस्मात्त्वया सदा कृष्ण नरयानेन माधव ॥ १८ ॥ अत्रा[5]गत्य नभस्येऽस्मिन्स्नातव्यं नियमेन हि ॥ यत्र त्वं तत्र देवाश्च यज्ञास्तीर्थानि केशव ॥ १९ ॥ यत्र त्वं तत्र दानानि व्रतानि नियमाश्च[6] ये ॥ ओंकारश्च वषट्कारः स्वाहाकारः स्वधा तथा ॥ २० ॥

१ शौरिः–इ० पा० । २ सरःसमीपतः–मयसरःसमीपे–इत्यर्थः । मयसमपितः–इ० पा० । ३ नाम लोके ख्यातं भविष्यति–इ० पा० । ४ वदस्व नः–नः अस्मान्–वदस्व आज्ञापय–इत्यर्थः । वदस्व तत्–इ० पा० । ५ आगत्य च नभस्य तु–इ० पा० । ६ तथा–इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूर्भुवःस्वर्महर्ल्लोको जनः सत्यं तपस्तथा ॥ त्वन्मयं हि जगत्सव सदेवासुरमानुषम् ॥ २१ ॥ तस्मात्त्वयि जगन्नाथे ह्यत्र स्नाते जनार्दने ॥ स्नातमत्र त्रिभुवनं भविष्यति न संशयः ॥ २२ ॥ त्रैलोक्यपावनी गंगा तव पादजलं हि तत् ॥ लक्ष्मीर्वक्षःस्थलस्थाने मुखे देवी सरस्वती ॥ २३ ॥ सर्वभूतमयश्चात्र ततस्त्वं जगदीश्वर ॥ यद्ददासि मनुष्याणां भविष्यांणां[1] कलौ युगे ॥ तद्ददस्व महाबाहो कृपां कृत्वा जगत्पते ॥ २४ ॥ यात्रा यामागतानां च अथ षण्मासवासिनाम् ॥ सदैवात्र स्थितानां च यत्फलं तद्ददस्व नः ॥ २५ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ यत्फलं हि मनुष्याणां स्नातानां गोपिकासरे ॥ तच्छृणुध्वमसंदिग्धं प्रसन्ने मयि गोपिकाः ॥ २६ ॥ सोपस्करां सवत्सां च वस्त्रालंकारभूषिताम् ॥ यथोक्तदक्षिणोपेतां ब्राह्मणाय कुटुंबिने ॥ २७ ॥ सदाचाराय शुद्धाय दरिद्रायानुकारिणे[2] ॥ गां दत्त्वा फलमाप्नोति स्नानमात्रेण तत्फलम् ॥ २८ ॥ यावत्पदानि मनुजः कृष्णेन सह गच्छति ॥ कुलानि देव्यस्तावंति वसंति हरिमन्दिरे ॥ २९ ॥ कृष्णेन सह गच्छन्ति गीतवादित्रनिस्वनैः ॥ स्तुवन्तो विविधैः स्तोत्रैर्गोविंदं गोपिकासरे ॥ ३० ॥ न मातुर्जठरे तेषां यातना जायते नृणाम् ॥ सर्वान्कामानवाप्यांते वैष्णवं लोकमाप्नुयुः ॥ ३१ ॥ अर्घ्यं दत्त्वा विधानेन स्नानं कुर्याद्विचक्षणः ॥ मंत्रेणानेन वै साध्व्यः श्रद्धया परया युतः ॥ ३२ ॥ नमस्ते गोपरूपाय विष्णवे परमात्मने ॥ गोप्रचारे जगन्नाथ गृहाणार्घ्यं नमोऽस्तु ते ॥ ३३ ॥ अर्घ्यं दत्त्वा विधानेन मृदमालिंप्य[3] पाणिना ॥ स्नायाच्छ्रद्धासमायुक्तस्तर्पयेत्पितृदेवताः ॥ ३४ ॥ श्राद्धं कुर्य्यात्ततो भक्त्या एकचित्तः समाहितः ॥ यथोक्तं दक्षिणां दद्याद्रजतं रुक्ममेव च ॥ ३५ ॥ विशेषतः प्रदातव्यं तांबूलं कज्जलं[4] तथा ॥ दुकूलानि च देयानि तथा कौसुंभकानि च ॥ ३६ ॥ दंपत्योर्वाससी चैव भूषणानि स्वशक्तितः ॥ गावो देया द्विजातिभ्यो वृषभाश्च धुरंधराः ॥ दीनांधकृपणानां च दानं देयं स्वशक्तितः ॥ ३७ ॥ एवं कृत्वा नरः सम्यगुत्तमां गतिमाप्नुयात् ॥ प्रयांति परमं लोकं पितरस्त्रिकुलोद्भवाः ॥ ३८ ॥ लभते पुत्रकामस्तु पुत्रानिष्टान्मनोरमान् ॥ ३९ ॥ यंयं कामयते कामं स्वर्गमोक्षादिकं नरः ॥ तत्सर्वं समवाप्नोति यः स्नाति गोपिकासरे ॥ ४० ॥ यावल्लोका भविष्यंति तावत्स्थास्यति वै सरः ॥ यावत्सरो यशस्तावद्भवतीनां भविष्यति ॥ ४१ ॥ यावत्कीर्तिर्मनुष्येषु तावत्स्वर्गे महीयते ॥ विमुक्ताः सकलात्पापाद्यास्यंति परमां गतिम् ॥ ४२ ॥ तत्पुण्यं गोपीसर इदं जलैः पूर्णं सदैव हि ॥ अवगाह्यं मया गोप्यो नभस्ये नियमेन हि ॥ ४३ ॥ भवत्यः पतिभावेन ब्रह्मभावेन वा पुनः ॥ चिंतयंत्यः परं मां हि परां गतिमवाप्स्यथ ॥ ४४ ॥ ॥ प्रह्लाद उवाच ॥ ॥ अनुज्ञाता भगवता ततस्ता

१ भाविनां हि—इ० पा० । २ अनुकारिणे–अनुष्ठानकारिणे—इत्यर्थः । ३ आलिप्य—इ० पा० । ४ चन्दनम्—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





गोपकन्यकाः ॥ नमस्कृत्य च गोविंदं ययुः सर्वा यथागताः ॥ ४५ ॥ भगवानपि गोविंद उद्धवेन समन्वितः ॥ विसृज्य गोपिकाः कृष्णः स्वकं मंदि
रमाविशत् ॥ ४६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे चतुर्थे द्वारकामाहात्म्ये गोपीसरस्तीर्थमाहात्म्य
वर्णननाम त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ श्रीप्रह्लाद उवाच ॥ ॥ संत्यनेकानि तीर्थानि बह्वाश्चर्यकराणि च ॥ प्राप्ते कलियुगे घोरे तानि
पुप्लुविरेर्णवे ॥ १ ॥ उद्देशतो मया विप्राः कीर्त्यमाना निबोधत ॥ संक्षेपतो विप्रवरा यथा तेषां च याः क्रियाः ॥ २ ॥ संहृत्य च भुवो भारं साधू
न्संस्थाप्य सत्पथे ॥ द्वारवत्यामगात्कृष्णो वृष्णिसंघैः समावृतः ॥ ३ ॥ दर्शनार्थं तदा ब्रह्मा दैवतैः परिवारितः ॥ वरुणो यमवित्तेशौ सूर्य्याचन्द्र
मसौ तथा ॥ ४ ॥ आगत्य सह कृष्णेन कार्यं संसाध्य चात्मनः ॥ वेधाश्चक्रे तदा तीर्थं स्वनाम्ना कीर्तितं भुवि ॥ ५ ॥ ब्रह्मकुण्डमिति ख्यातं
सर्वपापहरं शुभम् ॥ तत्तीरे स्थापयामास सहस्रकिरणं प्रभुम् ॥ ६ ॥ मूलं सुराणां हि किल ब्रह्मा लोकपितामहः ॥ तेन संस्थापितं यस्मान्मूल
स्थानमिति स्मृतम् ॥ ७ ॥ ब्रह्मतीर्थं तु तद्दृष्ट्वा चन्द्रश्चक्रे ततः सरः ॥ तडागं चन्द्रनाम्ना वै सर्वपापप्रणाशनम् ॥ ८ ॥ तं दृष्ट्वा तेजसा युक्तं
संहृष्टाः सुरसत्तमाः ॥ ऊचुस्ते लोकस्रष्टारं शृणुष्व वचनं हि नः ॥ ९ ॥ योऽत्र स्नानं प्रकुरुते पितॄन्संतर्पयिष्यति ॥ पूजयिष्यति देवेशं मूलस्थानं
सुरर्षभ ॥ १० ॥ सर्वपापविनिर्मुक्तो धनधान्यसमन्वितः ॥ सप्तम्यां माघमासस्य शुक्लपक्षे द्विजर्षभाः ॥ योऽत्र स्नानं प्रकुरुते मानवो भक्तिसं
युतः ॥ ११ ॥ मूलस्थानं च देवेशं संस्नाप्य प्रविलेपयेत् ॥ पूजयिष्यति वस्त्राद्यैः स्वशक्त्या भूषणैस्तथा ॥ १२ ॥ पुष्पधूपादिभिश्चैव नैवेद्येन
च मानवः ॥ सर्वान्कामानवाप्नोति ब्रह्मलोकं स गच्छति ॥ १३ ॥ सावित्रीं च ततो दृष्ट्वा ब्रह्मणा स्थापितां च वै ॥ कृत्वा चायतनं दिव्यं
स्वां मूर्तिं सन्निवेश्य च ॥ नाम चक्रे तदा देव्याः स्वयं तस्याः पितामहः ॥ १४ ॥ यः पश्यति स्वयं भक्त्या कृष्णं दृष्ट्वा जगत्पतिम् ॥
सावित्रीं स सुखी भूत्वा सर्वान्कामानवाप्नुयात् ॥ १५ ॥ आयुरारोग्यमैश्वर्य्यं पुत्रसन्तानमेव च ॥ न दौर्भाग्यं भवेत्तस्य न दारिद्र्यं न
मूर्खता ॥ न च व्याधिभयं तस्य यः पश्यति विधिं नरः ॥ १६ ॥ गत्वा संस्नापयेद्देवीं कुंकुमेन कुसुंभकैः ॥ संछाद्य वस्त्रैः संपूज्य पुष्पैर्नानाविधै
स्तथा ॥ १७ ॥ नैवेद्यफलतांबूलग्रीवासूत्रकदीपकैः ॥ संपूज्य परया भक्त्या यात्रां च सफलां लभेत् ॥ १८ ॥ न वैधव्यं न दौर्भाग्यं न वंध्या न
मृतप्रजा ॥ विधिर्दृष्टो नरैर्यैस्तु कुले तेषां प्रजायते ॥ १९ ॥ तस्मात्सर्वप्रयत्नेन विधिं पश्येत्सुभावतः ॥ परितुष्टो भवेत्कृष्णो यात्रा च सफला

१ स्वधाम परमं ययौ—इ० पा० । २ बह्वाश्चर्यान्वितानि च—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवेत् ॥ २० ॥ ॥ प्रह्लाद उवाच ॥ ॥ ब्रह्मणा स्थापितं दृष्ट्वा सरः परमशोभनम् ॥ इन्द्रश्चक्रे महाभागः सरः परमशोभनम् ॥ २१ ॥ स्थापयामास देवेशो लिंगमप्रतिमौजसम् ॥ तस्मिन्स्नात्वा च लभते यस्मादिन्द्रपदं नरः ॥ २२ ॥ तस्मादिन्द्रपदंनाम सुप्रसिद्धं धरातले ॥ इन्द्रेण स्थापितं लिंगं यस्माद्भावनया सह ॥ प्रसिद्धमिंद्रनाम्ना वा इन्द्रेश्वरमिति स्मृतम् ॥२३॥ यस्य प्रसिद्धिरतुला वृद्धिर्लिंगमिति द्विजाः॥ यस्य दर्शनमात्रेण मुच्यते सर्वपातकैः ॥ २४ ॥ पितॄणामक्षया तृप्तिर्जायते द्विजसत्तमाः ॥ अष्टम्यां च चतुर्दश्यां स्नात्वा चेन्द्रपदे नरः ॥ २५ ॥ इन्द्रेश्वरं च संपूज्य याति मुक्तिपदं नरः ॥ विशेषतस्तु संपूज्यो मकरस्थे दिवाकरे ॥ २६ ॥ उत्तरायणसंक्रांतौ लिंगपूरणकेन हि ॥ शिवरात्रौ विशेषेण संपूज्य उमया सह ॥ रात्रौ जागरणं कृत्वा परमं लोकमाप्नुयात् ॥ २७ ॥ ॥ प्रह्लाद उवाच ॥ ॥ ब्रह्मतीर्थं च तद्दृष्ट्वा तथा शक्रसरोभवम् ॥ दर्शयन्विष्णुना सार्द्धमेकरूपत्वमाप्नुयात् ॥ २८ ॥ सरश्चकार देवेशो भगवान्पार्वतीपतिः ॥ सुमृष्टनिर्मलजलं नलिनीदलशोभितम् ॥ २९ ॥ उत्पलैः सर्वतश्छन्नं सरः सारसशोभितम् ॥ तदगाधजलं दृष्ट्वा स्वयमेव पिनाकधृक् ॥ सब्रह्मविष्णुना सार्द्धं स्नातस्तत्र वृषध्वजः ॥ ३० ॥ ते देवास्तत्सरो दृष्ट्वा ब्रह्मविष्णुसुराऽसुराः ॥ ऊचुः सर्वे सुसंहृष्टा वीक्षंतः पार्वतीपतिम् ॥ ३१ ॥ यस्मात्कृतमिदं देवा ईश्वरेण महत्सरः ॥ महादेवसरोनाम सुप्रसिद्धं भविष्यति ॥ ३२ ॥ योऽत्र स्नानं प्रकुरुते पितॄणां तर्पणं तथा ॥ श्राद्धं पितॄणां भक्त्या च स गच्छेत्परमां गतिम् ॥ ३३ ॥ सुप्रसन्ना भविष्यन्ति सर्वे देवा न संशयः ॥ दर्शनात्पापनिर्मुक्तो महादेवसरस्य च ॥ ३४ ॥ महेशस्य च तद्दृष्ट्वा सरः परमशोभनम् ॥ चकार पार्वती तत्र सरश्चाप्रतिमं तथा ॥ ३५ ॥ गौरीसर इति ख्यातं सर्वपापप्रणाशनम् ॥ तत्र स्नात्वा नरो भक्त्या न दुर्गतिमवाप्नुयात् ॥ ३६ ॥ न दौर्भाग्यं स्त्रियश्चैव न वैधव्यं[2] कदाचन ॥ स्नात्वा गौरीतीर्थवरे[3] सर्वान्कामानवाप्नुयात् ॥३७॥ वरुणश्च ततो दृष्ट्वा पुण्यान्यायतनानि च ॥ चकार च सरो दिव्यं विष्णुभक्तिसमन्वितः ॥ ३८ ॥ नाम्ना वरुणपदं[4] तच्च पापक्षयकरं भुवि ॥ नभस्ये पौर्णमास्यां च संतर्प्य पितृदेवताः ॥ ३९ ॥ श्राद्धं कृत्वा विधानेन पितॄणां श्रद्धयान्वितः ॥ उत्तमं लोकमाप्नोति यत्र गत्वा न शोचति ॥ ४० ॥ प्रदद्यादुदकुम्भांश्च दध्योदनसमन्वितान् ॥ गाश्च वासांसि रत्नानि विष्णुर्मे प्रीयतामिति ॥ ४१ ॥ सरो दृष्ट्वा जलेशस्य सरश्चक्रे धनेश्वरः ॥ यक्षाधिपसरोनाम सुप्रसिद्धं धरातले ॥ ४२ ॥ तथा तत्र नरो भक्त्या संपूज्य पितृदेवताः ॥ सर्वान्कामानवाप्नोति दद्याद्वस्त्रं द्विजातये ॥ ४३ ॥ ॥ प्रह्लाद उवाच ॥ ॥ विष्णुं वरप्रदं श्रुत्वा भ्रातॄणां

१ ब्रह्मण्यायतनं तदा—इ० पा० । २ नाप्रजात्वं कदाचन-इ०पा० । ३ गौरीसरे पुण्ये—इ० पा० । ४ नाम्ना च वारुणं तच्च—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ब्रह्मनंदनाः ॥ मंदाकिनी वसिष्ठेन समानीता धरातले ॥ ४४ ॥ अम्बरीषादयः सर्वे आजग्मुः कृष्णपालिताम् ॥ द्वारवत्यां च ते दृष्ट्वा गोमतीं सागरं गमाम् ॥ ४५ ॥ तीर्थानि देवतानां च पुण्यान्यायतनानि च ॥ तीर्थं पंचनदं चक्रुः प्रजानां पतयस्तथा ॥ ४६ ॥ पंच नद्यः समाहूतास्तत्राऽऽजग्मुः सुरान्विताः ॥ मरीचये गोमती च लक्ष्मणा चात्रये तथा ॥ ४७ ॥ चंद्रभागा चांगिरसे पुलहाय कुशावती ॥ पावनार्थं जांबवती जगाम क्रतवे तथा ॥ ४८ ॥ तासु स्नात्वा महाभागा ब्रह्मपुत्रा यशस्विनः ॥ नाम तस्य तदा चक्रुः पंचनद्यश्च तापसाः ॥४९॥ तस्मात्पंचनदं तीर्थं सर्वपापप्रणाशनम् ॥ स्नातव्यं तत्र मनुजैः स्वर्गमोक्षार्थिभिस्तदा ॥ ५० ॥ तत्र गत्वा सुनियतो गृहीत्वार्घ्यं फलेन हि ॥ मंत्रेणानेन वै विप्रा दद्यादर्घ्यं विधानतः ॥ ५१ ॥ ब्रह्मपुत्रैः समानीताः पंचैताः सरितां वराः ॥ गृह्णंत्वर्घ्यमिमं देव्यः सर्वपापप्रशांतये ॥५२॥ ॥ इत्यर्घ्यमन्त्रः ॥ ॥ स्नानं कृत्वा विधानेन पितॄन्संतर्प्पयेन्नरः ॥ श्राद्धं कुर्य्याद्विधानेन श्रद्धया परया युतः ॥५३॥ पंचरत्नं ततो देयं सप्तधान्यं द्विजातये ॥ दीनांधकृपणानां च दानं दद्यात्स्वशक्तितः ॥ ५४ ॥ सर्वान्कामानवाप्नोति विष्णुलोकं स गच्छति ॥ पुत्रपौत्रसमायुक्तः परं सुखमवाप्नुयात् ॥ ५५ ॥ प्रेतयोनिं गता ये चँ ये च कीटत्वमागताः ॥ सर्वे ते मुक्तिमायांति पितरस्त्रिकुलोद्भवाः ॥ ५६ ॥ श्रुत्वाऽध्यायमिमं पुण्यं शिवलोके च मोदते ॥ सर्वपापविनिर्मुक्तः स याति परमं पदम् ॥ ५७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे चतुर्थे द्वारकामाहात्म्ये पञ्चनदतीर्थमाहात्म्यवर्णनंनाम चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ छ ॥ ॥ प्रह्लाद उवाच ॥ ॥ श्रुत्वा तमागतं देवं ब्रह्माणं पितरं स्वकम् ॥ सनकाद्या नमस्कर्त्तुं जग्मुः सर्वे पितामहम् ॥१॥ तं दृष्ट्वा लोककर्त्तारं दण्डवत्प्रणताः क्षितौ ॥ ततो दृष्ट्वा स तनयान्संगृह्य परिषस्वजे ॥२॥ पृष्टश्चानामयं तैस्तु पृष्ट्वा तान्समुवाच ह ॥ आराधितो यैर्भगवान्धन्या यूयं वयं तथा ॥ ३ ॥ संसिद्धिं परमां याता भगवद्दर्शनेन हि ॥ न ज्ञातं पुत्रकाः सम्यगज्ञानाद्बालबुद्धिभिः ॥ ४ ॥ येनार्चितो महादेवस्तस्य तुष्यति केशवः ॥ अनर्चिते नीलकण्ठे न गृह्णात्यर्चनं हरिः ॥ तस्मात्सर्वप्रयत्नेन पूज्यतां नीललोहितः ॥५॥ येन संपूर्णतां याति कृष्णपूजा कृता सदा ॥ तच्छ्रुत्वा वचनं तस्य ब्रह्मपुत्रा ययुस्तदा ॥६॥ देवागारांग्रतो गत्वा योगसिद्धा महर्षयः ॥ लिंगं संस्थापयामासुः शिवभक्तिपुरस्कृताः ॥ ७ ॥ संस्थाप्य शिवलिंगं ते स्नानार्थं मुनिसत्तमाः ॥ कूपं चक्रुस्ततः सर्व ऋषयः



१ ब्रह्मनन्दनाः—हे ब्राह्मणाः--इत्यर्थः । २ सर्वपापहरं शुभम—इ० पा० । ३ तिर्यञ्चीं योनिमागताः—इ०पा० । ४ पतिताः—इ० पा० । ५ चिरात्--इ०पा० । ६ देवगोष्ठाग्रतः—इ०, देवगालाग्रतः—इ० च पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संशितव्रताः ॥ ८ ॥ दृष्ट्वा तममृतप्रख्यं जलपूर्णं सुनिर्मलम् ॥ संहृष्टा ऋषयः सर्वे साधुसाध्विति चाब्रुवन् ॥ ९ ॥ स्थापितं शिवलिंगं च दृष्ट्वा लोकपितामहः ॥ उवाच वचनं ब्रह्मा प्रीतः पुत्रांस्तदा द्विजाः ॥ १० ॥ ॥ ब्रह्मोवाच ॥ ॥ भवद्भिर्योगसंसिद्धैर्यस्मात्संस्थापितः शिवः ॥ तस्मात्सिद्धेश्वर इति ख्यातिं लोके गमिष्यति ॥ ११ ॥ समीपे शितिकण्ठस्य कूपोयमृषिभिः कृतः ॥ ऋषितीर्थमिति ख्यातं तस्माल्लोके भविष्यति ॥ १२ ॥ विना श्राद्धेन विप्रेन्द्रा दानेन पितृतर्पणात् ॥ भक्तितः स्नानमात्रेण पितृभिः सह मुच्यते ॥ १३ ॥ असत्यवादिनो ये च परनिन्दापरायणाः ॥ स्नानमात्रेण शुध्यन्ति ऋषितीर्थे न संशयः ॥ १४ ॥ स्नानं प्रशस्तं विषुवे मन्वादिषु तथैव च ॥ तथा कृतयुगाद्यायां माघस्य द्विजसत्तमाः ॥ १५ ॥ शिवरात्रौ वसेद्यस्तु लिंगे सिद्धेशसंज्ञिते ॥ स्नात्वा ऋषिकृते तीर्थे किं तस्यान्येन वै द्विजाः ॥ गत्वा तत्र महाभागा गृहीत्वा फलमुत्तमम् ॥ १६ ॥ अर्घ्यं दत्त्वा विधानेन कृत्वा च करयोः कुशान् ॥ गृह्णंत्वर्घ्यमिमं देवा योगसिद्धा महर्षयः ॥ १७ ॥ ऋषितीर्थे च पापघ्ने सिद्धेश्वरसमन्विते ॥ दत्त्वार्घ्यं मृदमालभ्य स्नानं कुर्यात्समाहितः ॥१८॥ तर्पयेच्च पितॄन्देवान्मनुष्यांश्च यथाक्रमम् ॥ ततः श्राद्धं प्रकुर्वीत पितॄणां श्रद्धयाऽन्वितः ॥ १९ ॥ तथा च दक्षिणां दद्याद्वित्तशाठ्यविवर्जितः ॥ विशेषतः प्रदेयानि फलानि रसवंति च ॥ २० ॥ दद्याच्छ्यामाकनीवारान्विद्रुमं चाजिनानि च ॥ सप्तधान्यानि शालींश्च सक्तूंश्च गुडसंयुतान् ॥ २१ ॥ गंधमाल्यानि तांबूलं वस्त्राणि च तथा पयः ॥ एवं कृत्वा समग्रं च कृतकृत्यो भवेन्नरः ॥ २२ ॥ पूजयित्वा महादेवं सिद्धेश्वरमुमापतिम् ॥ सफलं जन्म मर्त्यस्य जीवितं च सुजीवितम् ॥ २३ ॥ यः स्नात्वा ऋषितीर्थे तु पश्येत्सिद्धेश्वरं शिवम् ॥ पितरस्तस्य तुष्यन्ति तुष्यन्ति च पितामहाः ॥ २४ ॥ अपुत्राः पुत्रिणः स्युस्ते पुत्रिणश्चापि पौत्रिणः ॥ निर्धना धनवंतश्च सिद्धेश्वररता नराः ॥ २५ ॥ दुष्कृतं याति विलयं सुकृतं च विवर्द्धते ॥ भवेन्मनोरथावाप्तिः प्रणते सिद्धनायके ॥ २६ ॥ ऋषितीर्थे नरः स्नात्वा दृष्ट्वा सिद्धेश्वरं हरम् ॥ सर्वान्कामानवाप्नोति नात्र कार्या विचारणा ॥ २७ ॥ शिवरात्र्यां विशेषेण सिद्धेशः संप्रपूजितः ॥ यंयं कामयते कामं तं ददाति न संशयः ॥ चिन्तामणिसमः स्वामी ह्यथवा चाक्षयो निधिः ॥२८॥ श्रुत्वाध्यायमिमं पुण्यं सर्वाघहरणं परम् ॥ प्रयाति परमं स्थानं मानवः श्रद्धयान्वितः ॥ २९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे चतुर्थे द्वारकामाहात्म्य ऋषितीर्थसिद्धेश्वरमाहात्म्यवर्णनंनाम पञ्चदशोऽध्यायः ॥ १५ ॥ ॥ छ ॥ ॥ प्रह्लाद उवाच ॥ ॥ ततो गच्छेद्द्विजश्रेष्ठा गदा

१ तदमृतं गर्तम्–इ० पा० । २ नाम चास्य भविष्यति–इ० पा० । ३ यथाविधि–इ० पा० । ४ हृष्यंति–इ० पा० । ५ सिद्धेश्वरनता नराः–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





तीर्थमनुत्तमम् ॥ यत्र स्नात्वा नरो भक्त्या लभेद्भूदानजं फलम् ॥ १ ॥ तर्पयेत्पितृदेवांश्च ऋषींश्चैव यथाक्रमम् ॥ श्राद्धं च कारयेत्तत्र पितॄणां तृप्ति हेतवे ॥ २ ॥ गदातीर्थे तु देवेशं विष्णुं वाराहरूपिणम् ॥ समभ्यर्च्य नरो भक्त्या विष्णुलोके महीयते ॥ ३ ॥ नागतीर्थं ततो गच्छेत्सरः परमशो भनम् ॥ यत्र स्नात्वा नरः सम्यङ्नागलोकमवाप्नुयात् ॥ ४ ॥ भद्रतीर्थं ततो गच्छेत्सरस्त्रिभुवनार्चितम् ॥ स्नानमात्रेण लभते तिलधेनुफलं नरः ॥ ॥ ५ ॥ चित्रातीर्थं ततो गच्छेत्सरः परमशोभनम् ॥ स्नानमात्रेण लभते घृतधेनुफलं नरः ॥ ६ ॥ यदा द्वारावती विप्रा प्लाविता सागरेण हि ॥ पुण्यानि बहुतीर्थानि च्छन्नानि जलपांसुभिः ॥ ७ ॥ दृश्यानि कतिचित्संति ह्यदृश्यान्यपराणि च ॥ तानि सर्वाणि विप्रेन्द्राः कथयिष्यामि सर्वतः ॥ ८ ॥ चंद्रभागां ततो गच्छेत्सर्वपापप्रणाशिनीम् ॥ यत्र स्नात्वा नरो भक्त्या वाजपेयफलं लभेत् ॥ ९ ॥ देवी चंद्रार्चिता यत्र यशोदा नंदनंदिनी ॥ कौमारिका शक्तिहस्ता खड्गखेटकधारिणी ॥ १०॥ केश्यादिदैत्यदलिनी स्वसा वै रामकृष्णयोः ॥ यस्या दर्शनमात्रेण सर्वान्कामा नवाप्नुयात् ॥ ११ ॥ ततो गच्छेत विप्रेन्द्रास्तीर्थं महिषसंज्ञकम् ॥ यस्य दर्शनमात्रेण मुच्यते सर्वपातकैः ॥ १२ ॥ मुक्तिद्वारं ततो गच्छेत्तीर्थं पाप प्रणाशनम् ॥ १३ ॥ वसिष्ठेन समानीता मुनिना यत्र गोमती ॥ स्नातो भवति गंगायां यत्र स्नात्वा कलौ युगे ॥ १४ ॥ गोमती निःसृता यस्मा त्प्रविष्टा वरुणालयम् ॥ तत्र स्नात्वा नरो भक्त्या अश्वमेधफलं लभेत् ॥ १५ ॥ भृगुणा हि तपस्तप्तं स्थापिता यत्र चांबिका ॥ भृग्वर्चिता ततो देवी प्रसिद्धा श्रूयते क्षितौ ॥ १६ ॥ संसिद्धिं परमां याति यस्याः संस्मरणान्नरः ॥ शिवलिंगान्यनेकानि यत्र सन्ति महीतले ॥१७॥ ततो गच्छेत विप्रेन्द्राः कालिन्दीसर उत्तमम् ॥ कालिन्दी सूर्यतनया सरश्चक्रे त्वनुत्तमम् ॥ १८ ॥ तत्र स्नात्वा नरो भक्त्या न दुर्गतिमवाप्नुयात् ॥ सांबतीर्थं ततो गच्छेत्सर्वपापप्रणाशनम् ॥ १९ ॥ कृत्वा श्राद्धं च विधिवल्लभेद्गोदानजं फलम् ॥ २० ॥ गच्छेच्च शांकरं तीर्थं ततस्त्रैलोक्यपावनम् ॥ यत्र स्नात्वा नरो भक्त्या लभेद्बहुसुवर्णकम् ॥ २१ ॥ ततो नागसरो गच्छेत्तीर्थं पापप्रणाशनम् ॥ पितॄन्सन्तर्प्य विधिवन्नागलोकमवाप्नुयात् ॥ २२ ॥ लक्ष्मीं नदीं ततो गच्छेद्गच्छन्तीं सागरं प्रति ॥ यस्या दर्शनमात्रेण मुच्यते सर्वपातकैः ॥ २३ ॥ श्राद्धे कृते तु विप्रेन्द्राः पितरो मुक्तिमाप्नुयुः ॥ दाने मनोरथावाप्तिर्जायते नात्र संशयः ॥ २४ ॥ कंबुसरस्ततो गच्छेत्तीर्थं पापप्रणाशनम् ॥ तर्पणे च कृते श्राद्धे ह्यग्निष्टोमफलं लभेत् ॥ २५ ॥ कुशतीर्थं ततो गच्छेत्स्नात्वा सन्तर्पयेत्पितॄन् ॥ दानं दत्त्वा यथाशक्त्या निर्मलं लोकमाप्नुयात् ॥ २६ ॥ द्युम्नतीर्थं च तत्रैव सर्वपापप्रणाशनम् ॥



१ नरः सम्यगग्निष्टोमफलं लभेत्–इ० पा० । २ जलपांसुभिः–जलैः, पांसुभिश्च–इति विवेकः । ३ कथयामि समासतः–इ० पा० । ४ भवेद्बहुसुवर्णदः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत्वा श्राद्धं च तत्रैव वाजिमेधफलं लभेत् ॥ २७ ॥ कुशतीर्थं ततो गच्छेत्पितॄणां तृप्तिरक्षया ॥ यत्र श्राद्धात्तर्पणाच्च जायते नात्र संशयः ॥ ॥ २८ ॥ जालतीर्थं ततो गच्छेत्सर्वपापहरं शुभम् ॥ दुर्वाससा यत्र शप्ताः कोपाद्यदुकुमारकाः ॥ २९ ॥ देवो जालेश्वरस्तत्र सं बभूव उमापतिः ॥ जालेश्वरं नरो दृष्ट्वा सद्यः पापात्प्रमुच्यते ॥ ३० ॥ संपूज्य देवं भक्त्या च शिवलोकमवाप्नुयात् ॥ ३१ ॥ चक्रस्वामिसुतीर्थं च ततो गच्छेद्धि मानवः ॥ कृत्वा स्नानं पितॄंस्तर्प्य विष्णुलोकमवाप्नुयात् ॥ ३२ ॥ जरत्कारुकृतं तीर्थं सर्वपाप प्रणाशनम् ॥ स्नात्वा तत्र द्विजश्रेष्ठा न दुर्गतिमवाप्नुयात् ॥ ३३ ॥ ततो गच्छेद्द्विजश्रेष्ठास्तीर्थं खञ्जनकाभिधम् ॥ आसीत्खञ्जनको नाम दैत्यश्चातिबलान्वितः ॥ ३४ ॥ ततः खञ्जनकं तीर्थं तस्य नाम्नेति विश्रुतम् ॥ तत्र स्नात्वा नरो याति सोमलोकं न संशयः ॥ ३५ ॥ सन्ति तीर्थान्यनेकानि सुगुप्तानि द्विजोत्तमाः ॥ तानि गच्छेत्तु विप्रेन्द्राः सर्वपापापनुत्तये ॥ ३६ ॥ ततो गच्छेद्द्विजश्रेष्ठास्तीर्थमानकदुन्दुभेः ॥ शूरतीर्थं परमकं गदतीर्थमतः परम् ॥ ३७ ॥ गावल्गणस्य तीर्थं च अक्रूरस्य महात्मनः ॥ बलदेवस्य तीर्थं तु उग्रसेनस्य चापरम् ॥ ३८ ॥ अर्जुनस्य च तीर्थं तु सुभद्रातीर्थमेव च ॥ देवकीतीर्थमाद्यं तु रोहिणीतीर्थमेव च ॥ ३९ ॥ उद्धवस्य च तीर्थं तु सारंगाख्यं तथैव च ॥ सत्य भामाकृतं तीर्थं भद्रातीर्थमतः परम् ॥ ४० ॥ जामदग्न्यस्य तीर्थं तु रामस्य च महात्मनः ॥ भासतीर्थं च तत्रैव शुकतीर्थमतः परम् ॥ ४१ ॥ कर्दमस्य च तीर्थं तु कपिलस्य महात्मनः ॥ सोमतीर्थं च तत्रैव रोहिणीतीर्थमेव च ॥ ४२ ॥ एतान्यन्यानि संक्षेपान्मया वः कथितानि च ॥ सर्वपापहराणीह मोक्षदानि न संशयः ॥ ४३ ॥ प्रच्छन्नानि द्विजवरास्तीर्थानि कलिसंक्रमे ॥ प्लावितानि समुद्रेण पांसुनाऽप्युदकेन च ॥ ४४ ॥ एतन्मया वः कथितं संक्षेपात्तीर्थविस्तरम् ॥ आत्मप्रज्ञानुमानेन किमन्यच्छ्रोतुमिच्छथ ॥ ४५ ॥ शृणुयात्परया भक्त्या तीर्थयात्रामिमां द्विजाः ॥ सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥ ४६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे चतुर्थे द्वारका माहात्म्ये तीर्थवृन्दमाहात्म्यवर्णनंनाम षोडशोऽध्यायः ॥ १६ ॥ ॥ छ ॥ ॥ प्रह्लाद उवाच ॥ ॥ कृत्वाऽभिषेकं तीर्थेषु यथावद्दत्त दक्षिणः ॥ पूजयेच्च ततो देवं कृष्णाख्यं पुरुषं परम् ॥ १ ॥ ॥ ऋषय ऊचुः ॥ ॥ पूजाविधिं तु कृष्णस्य श्रोतुकामाः समासतः ॥ कथया

१ जरत्कारुकृतं तत्र तीर्थं त्रैलोक्यविश्रुतम्–इ० पा०। २ भक्त्या धनधान्यमवाप्नुयात्–इ० पा०। ३ सर्वपापप्रणाशनम्–इ० पा०। ४ उच्छिन्नानि–इ० पा०। ५ स याति परमं स्थानं सर्वान्कामानभीप्सितान्–इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ऽऽचरणोपेतं यथावद्दैत्यसत्तम ॥ २ ॥ द्वारपालाश्च के तत्र कः पूर्वं कश्च पृष्ठतः ॥ पुरीयं सर्वतो दैत्य तिष्ठते केन पालिता ॥ ३ ॥ आनुपूर्व्या त्समासेन पूजनीया यथाविधि ॥ कथयस्व विधिज्ञोऽसि कृष्णैकचरणप्रियः ॥ ४ ॥ ॥ श्रीप्रह्लाद उवाच ॥ ॥ श्रूयतां पूजनं विप्राः श्रुतपूर्वं विधानतः ॥ कलौ कृष्णस्य विप्रेन्द्रा यथावदनुपूर्वशः ॥ ५ ॥ पूर्वद्वारस्थितान्देवाञ्छृणुध्वं सुसमाहिताः ॥ जयंतः प्रथमं पूज्यः सर्वपापहरः शुभः ॥ ६ ॥ स्थापितो देवराजेन पूजार्थं केशवस्य हि ॥ तस्यैवानुचरान्वक्ष्ये तान्निबोधत सत्तमाः ॥ ७ ॥ वज्रनाभः सुनाभश्च वज्रबाहुर्महाहनुः ॥ वज्रदंष्ट्रो वज्रधारी वज्रहा वज्रलोचनः ॥ ८ ॥ श्वेतमूर्धा श्वेतमाली जयन्तानुचराश्च ते ॥ एते शस्त्रोद्यतकरा रक्षन्ते तमहर्निशम् ॥ ९ ॥ पूर्वद्वारे सुसंनद्धा जयन्तोद्देशकारिणः ॥ पूर्वद्वारे च रक्षार्थं नरनाथो विनायकः ॥ १० ॥ तरुणार्कश्च वै सूर्यो देव्यो वै सहमातरः ॥ ईश्वरश्चापि दुर्वासा नागराजस्तु तक्षकः ॥ ११ ॥ सेनानीः कार्तिकेयश्च राक्षसश्च महाहनुः ॥ तत्र दीर्घनखोनाम दानवः सुप्रतिष्ठितः ॥ १२ ॥ विश्वावसुश्च गन्धर्वो मेनका च वराप्सराः ॥ सनत्कुमारसहितो वसिष्ठो भगवानृषिः ॥ १३ ॥ एते पूज्याः पूर्वतस्तु न्यग्रोधश्च महाद्रुमः ॥ पूर्वद्वारस्थिता ह्येत आग्नेयाञ्छृणुताथ मे ॥ १४ ॥ ज्वालामुखोऽथ रक्ताक्षः स्मशाननिलयः क्रथः ॥ मांसादो रुधिराहारः कृष्णः कृष्णजटाधरः ॥ १५ ॥ त्रासनो भञ्जनश्चैव ह्याग्न्येय्यां दिशि संस्थिताः ॥ दिशं रक्षंति संनद्धा दक्षिणां शृणुताथ मे ॥ १६ ॥ दण्डपाणिर्महानादः पाशहस्तः सुलोचनः ॥ अनिवर्त्यक्रमश्चैव तथा दुंदुभिनिस्वनः ॥ १७ ॥ खरस्वनो घर्घरवाक्तथा मौनप्रियः सदा ॥ मल्लिकाक्षश्च एतेषां प्रणतो द्वारपालकः ॥ १८ ॥ दक्षिणद्वाररक्षार्थं दुन्दुभिश्च विनायकः ॥ महिषार्कश्च वै सूर्यो भूषणश्च तथेश्वरः ॥ १९ ॥ चण्डिका च तथा देवी ह्यूर्द्ध्वबाहुश्च राक्षसः ॥ पद्माक्षः क्षेत्रपालश्च नागश्चाश्वतरस्तथा ॥ २० ॥ चित्रांगदश्च गन्धर्व उर्वशी च वराप्सराः ॥ यो राजा सर्ववृक्षाणां शालश्चापि महाद्रुमः ॥ २१ ॥ सनातन ऋषिश्रेष्ठो ह्यगस्त्यश्च महातपाः ॥ एते याम्यदिशि द्वारं रक्षन्ति सुसमाहिताः ॥ २२ ॥ गीतकृन्नर्तको नग्नः कंबली दहनप्रियः ॥ हसनो नेत्रभंगश्च भ्रूविकारो विजृंभकः ॥ २३ ॥ मुशली प्रभुरेतेषां संनद्धो वर्तते द्विजाः ॥ रक्षन्ति नैर्ऋतीमाशां पश्चिमां शृणुतापरान् ॥ २४ ॥ स्वस्तिकः शंखमूर्द्धा च नीलवासाः शुभाननः ॥ पाशहस्तः शूलहस्त एकपादेकलोचनः ॥ २५ ॥ पश्चिमायां दिशि तथा पुष्पदन्तो विनायकः ॥ ॥२९८॥

१ सेवार्थम्–इ०पा० । २ पुलोमस्य सुतासुतः–इ० पा० । ३ सत मातरः–इ०पा० । ४ बालवः–इ०पा० । ५ क्रतः–इ०पा० । ६ दुर्दर्शश्च विनायकः–इ०पा० । ७ रुदनप्रियः–इ०पा० । ८ मुशली सूर्य एतेषां नतो देष्टा तथा प्रभुः–इ० पा० । ९ पद्मवासाश्च–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उद्भवार्कश्च वै सूर्यः शिवः सत्राजितेश्वरः ॥ २६ ॥ तुंबरुर्नाम गन्धर्वो घृताची च वराप्सराः ॥ महोदरश्च नागेन्द्रो राक्षसश्च घटोत्कचः ॥ २७ ॥ दैत्यः पञ्चजनोनाम ऋषिः कश्यप एव च ॥ देवी कपालिनीनाम अश्वत्थस्तु महाद्रुमः ॥ २८ ॥ कपिलः क्षेत्रपालश्च प्रतीचीं पांति वै दिशम् ॥ नमस्कार्यास्तथा पूज्या वायव्यां शृणुतापरान् ॥ २९ ॥ भंजनो भैरवश्चैव कालिकोऽथ घटोदरः ॥ झंझकामर्दनः पिंगो रुरुः सर्वभुजोत्रणी ॥३०॥ सुपार्श्वः प्रभुरेतेषां संनद्धः पालयन्दिशम् ॥ उदीच्यां दिशि विप्रेन्द्राः श्यामलश्च गणाधिपः ॥ ३१ ॥ मन्वन्तको विरूपाक्षो गोलकः श्वेत संप्लुतः ॥ उन्मत्तः प्रभुरेतेषामुदीच्यां पालयन्दिशम् ॥ ३२ ॥ मूलस्थानश्च वै सूर्य्य इन्द्रेशश्च महेश्वरः ॥ देवी कण्ठेश्वरीनाम क्षेत्रपालश्च खञ्जनः ॥ ३३ ॥ वासुकिर्नागराजश्च कूर्मपृष्ठश्च दानवः ॥ सनकश्च ऋषिश्रेष्ठो गोलको राक्षसस्तथा ॥ ३४ ॥ नारदोनाम गन्धर्वो रंभा चैव वराप्सराः ॥ एते पूज्याः प्रयत्नेन प्लक्षोनाम महाद्रुमः ॥ ३५ ॥ यक्षेशः सवितानाम श्यामः पूज्यः प्रयत्नतः ॥ ऐशान्यां दिशि विप्रेन्द्राः स्थिता ये तान्वदाम्यहम् ॥ ३६ ॥ दुर्धरो भैरवारावः किंकिणीको महाबलः ॥ करालो विकटो मूलो बलिभुक्तो बलिप्रियः ॥ ३७ ॥ एतेषां क्षेत्रपालानां सर्व्वेषां च द्विजोत्तमाः ॥ नेता प्रभुश्च स्वामी च जयन्तः पालकस्तथा ॥ ३८ ॥ निगृह्णात्यनुगृह्णाति रक्षिता पुरवासिनाम् ॥ जयन्तादेशमादाय ते दुष्टान्घातयन्ति च ॥ ३९ ॥ नागस्थलस्थितः स्वामी जयन्तः पालकः सदा ॥ नागराजैः परिवृतः पूजनीयः प्रयत्नतः ॥ ४० ॥ मांसप्रियमुखाश्चैत ऐशानीं पांति वै दिशम् ॥ सहस्रशीर्षको देवः शेषो नागस्थलस्थितः ॥ अनन्तो वासुकिश्चैव तक्षकः पद्म एव च ॥ ४१ ॥ शंखः कंबलकश्चैव नागश्चाश्वतरस्तथा ॥ मुक्तकः कालियश्चैव जनकोऽथापराजितः ॥ ४२ ॥ कर्कोटकमुखा नागास्ते च सन्ति सहस्रशः ॥ ते पूज्या गंधपुष्पैश्च बलिभिर्धूपदीपकैः ॥४३॥ पायसेन च मांसेन ह्यन्नाद्यैः सुरया तथा ॥ ततः संपूज्य देवेशं जयंतं रक्षिणां वरम् ॥ ४४ ॥ गंधपुष्पोपहारैश्च धूपवस्त्रादिभूषणैः॥ततो गच्छेद्द्विजश्रेष्ठाः कृष्णं देवकिनन्दनम् ॥ संपूज्यः प्रथमं तत्र गणेशो रुक्मिसंज्ञकः॥४५॥ ॥ ऋषय ऊचुः ॥ ॥ कथं[1] स रुक्मिदैत्येन्द्रो यो दुष्टो गणतां गतः ॥ साक्षाद्भगवतो द्वारि प्रत्यहं पूज्यते नरैः ॥ ४६ ॥ ॥ श्रीप्रह्लाद उवाच ॥ ॥ कृष्णाय रुक्मिणीं दातुं यदा[2] भीष्मक उद्यतः ॥ तद्द्वेषात्क्रोधसंयुक्तो रुक्मी चैद्यममन्यत ॥४७॥ यदा जहार भगवान्रुक्मिणीमंबिकालयात् ॥ सर्वान्विद्राव्य वै भूपाञ्जरासन्धमुखान्रणे ॥४८॥ तदा रुक्मी महाबाहुर्भीष्मकस्य सुतो बली ॥ नाहत्वा[3] विनिवर्त्तिष्ये तमहं यादवं रणे ॥४९॥ प्रतिज्ञां सर्वभूपानां शृण्वतां कृत

१ क एप रुक्मी दैत्येन्द्रो यो विष्णोर्गणतां गतः—इ०पा० । २ यदा राजा कृतक्षणः—इ० पा० । ३ हत्वा निवर्तयिष्यामि तमहं यादवं रणे—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वान्द्विजाः॥ एवमुक्त्वा स सन्नद्धो युद्धाय परिधावितः॥९०॥ अक्षौहिण्या दलेनैवायुद्ध्यत्कृष्णेन भो द्विजाः ॥ स युध्यमानः कृष्णेन वध्यमानो हतौ
जसः ॥९१॥ बद्धो भगवता तत्र कृत्वा वैरूप्यमेव च ॥ रामेण बंधनान्मुक्तो मरणाय मतिं दधौ ॥९२॥ रुक्मिणी भ्रातरं दृष्ट्वा मरणे कृतनिश्चयम् ॥
उवाच कृष्णं वैदर्भी भ्रातरं ह्यानयस्व मे ॥९३॥ ततस्तत्प्रियकामार्थमनुमान्य जनार्दनः॥ चकार पार्षदां मध्ये प्रवरं विघ्ननाशनम् ॥९४॥ एतस्मा
त्कारणाद्विप्राः प्रथमं पूज्यते सदा ॥ गंधधूपाक्षतैर्वस्त्रैर्मोदकैस्तं प्रतर्पयेत् ॥९५॥ तस्मिंस्तुष्टे जगन्नाथस्तुष्टो भवति नान्यथा ॥९६॥ इति श्रीस्कांदे
महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे चतुर्थे द्वारकामाहात्म्ये भगवत्परिचारकवर्गकथनपूर्वकरुक्मिगर्वपरिहारवृत्तान्तवर्णनं
नाम सप्तदशोऽध्यायः॥ १७ ॥ ॥छ॥ ॥श्रीप्रह्लाद उवाच ॥ ॥ पूजयेद्गणनाथं तं रुक्मिणं रुक्मभूषितम् ॥ दुर्वाससं च कृष्णं च
बलभद्रं च भक्तितः ॥ १ ॥ यजत्येको महायज्ञैः संपूर्णवरदक्षिणैः ॥ एकः पश्यति देवेशं कृष्णं तुल्यफलौ हि तौ ॥ २ ॥ वापीकूपतडागानि करो
त्येकः समाहितः ॥ एकः पश्यति देवेशं कृष्णं तुल्यफलौ हि तौ ॥ ३ ॥ गोभूतिलहिरण्यादि ददात्येको दिनेदिने ॥ एकः पश्यति देवेशं कृष्णं
तुल्यफलौ हि तौ ॥ ४ ॥ प्राणायामादिसंयुक्तो जपध्यानपरायणः ॥ एकः पश्यति देवेशं कृष्णं तुल्यफलौ हि तौ ॥ ५ ॥ जाह्नव्यादिषु तीर्थेषु
सुस्नात्वैकः समाहितः ॥ एकः पश्यति देवेशं कृष्णं तुल्यफलौ हि तौ ॥६॥ त्रिभिर्विक्रमणैर्येन विक्रांतं भुवनत्रयम् ॥ त्रिविक्रमं च तं दृष्ट्वा मुच्यते
पातकत्रयात् ॥ ७ ॥ ॥ ऋषय ऊचुः ॥ ॥ कथं त्रैविक्रमी मूर्त्तिरागतेयं धरातले ॥ कलान्यासाच्च कृष्णत्वं कदेयं प्राप्तवत्यथ ॥ ८ ॥ दैत्य
संशयमस्माकं छेत्तुमर्हस्यशेषतः ॥ दुर्वाससश्च कृष्णस्य संभवः कथ्यतामिति ॥ ९ ॥ ॥ प्रह्लाद उवाच ॥ ॥ तच्छ्रूयतां द्विजश्रेष्ठा यथा मूर्त्तिस्त्रि
विक्रमी ॥ दुर्वाससा समायुक्ता संभूता धरणीतले ॥ १० ॥ पूर्वं कृतयुगस्यांते बलिना च पुरंदरः ॥ निर्जित्य भ्रंशितः स्थानात्तदर्थं मधुसूदनः ॥
॥ ११ ॥ कश्यपाद्वामनो जज्ञे ततोऽभूच्च त्रिविक्रमः ॥ त्रिभिः क्रमैर्मितांल्लोकानाक्रम्य मधुहा हरिः ॥ १२ ॥ बलिं चकार भगवान्पातालतलवासि
नम् ॥ भक्त्या त्वनन्यया कृष्णो दैत्येन परितोषितः ॥ १३ ॥ स्वयं चैवाऽवसत्तत्र भक्त्या क्रीतो हरिस्तदा ॥ अनुग्रहाय भगवान्द्वारपालो बभूव
ह ॥१४॥ दुर्वासाश्चापि भगवानात्रेयो मुनिसत्तमः॥ अटंस्तीर्थानि मोक्षार्थं मुक्तिक्षेत्रमचिंतयत् ॥१५॥ एवं चिंतयमानः स ज्ञानदृष्ट्या महामुनिः॥



१ भग्नमानः—इ० पा० । २ त्रिभिः पदक्रमैर्येन—इ०पा० । ३ दुःखसागरात्—इ० पा० । ४ निर्जितश्चालितः स्थानात्—इ० पा० । ५ त्रिभिः क्रमैरिमाँल्लोकान्—इ०पा० । ६ पूजया—इ०पा० ७ भक्त्या क्रीतोपसेवकः—इ० पा० । ८ अटन्पूर्वं च मोक्षार्थम्—इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोमत्या संगमो यत्र चक्रतीर्थेन भो द्विजाः ॥ १६ ॥ तन्मुक्तिक्षेत्रमाज्ञाय गमनाय मतिं दधे ॥ सोतीत्य नगरग्रामानुद्यानानि वनानि च ॥ १७ ॥
आनर्त्तविषयं प्राप्य दैत्यभूमिं विवेश ह ॥ निःस्वाध्यायवषट्कारां वेदध्वनिविवर्ज्जिताम् ॥१८॥ कुशेन दैत्यराजेन सेवितां पालितां तथा ॥ बहुम्लेच्छ
समाकीर्णामधर्मोपार्जकैर्जनैः ॥ १९ ॥ प्रत्यासन्नामिति ज्ञात्वा चक्रतीर्थमगाद्द्विजः ॥ स्नात्वा च संगमे पुण्ये मोक्ष्येऽहं च कृताह्निकः ॥ २० ॥
इति कृत्वा स नियमं ययौ शीघ्रं मुनिस्तदा ॥ स्नात्वा शीघ्रं प्रयास्यामि दैत्यभूमिं विहाय च॥२१॥इत्येवं चिंतयन्मार्गे शीघ्रमेव जगाम सः॥ दृष्ट्वा
च संगमं पुण्यं गोमत्या सागरस्य च ॥ २२ ॥ निधाय वाससी तत्र मृदमालभ्य गोमयम् ॥ शिखां च बद्ध्वा करयोः कृत्वा च नियतः कुशान् ॥
॥ २३ ॥ यावत्स्नाति च विप्रोऽसौ दृष्टो दैत्यैर्दुरात्मभिः ॥ ब्रुवंतः कोऽयमित्येवं हन्यतांहन्यतामिति ॥२४॥ अस्माभिः पालिते देशे कः स्नाति
मनुजाधमः ॥ ब्रुवंत इति जघ्नुस्ते जानुभिर्मुष्टिभिस्तथा ॥ २५ ॥ ब्राह्मणोऽहं न हंतव्यः श्रुत्वा चाऽतीव पीडितः ॥ तं दृष्ट्वा हन्यमानं तु ब्राह्मणं
तैर्दुरात्मभिः ॥ २६ ॥ निवारयामास च तान्रुरुर्नाम महासुरः ॥ जगृहुस्तस्य वस्त्राणि कुशांस्ते चिक्षिपुर्जले ॥ २७ ॥ चकर्षुश्चरणौ गृह्य शपंतो
दुष्टचेतसः ॥ पदे गृहीत्वा तमृषिं नीत्वा सीम्नि व्यसर्जयन् ॥ २८ ॥ तं तदा मूर्छितप्रायं दृष्ट्वोचुः कुपिताश्च ते ॥ अत्रागतो यदि पुनर्हनि
ष्यामो न संशयः ॥ आनर्त्तविषयांस्तान्वै दृष्ट्वा तत्र जलाशयम् ॥ २९ ॥[1] प्राणसंशयमापन्नस्ततश्चिंतापरोऽभवत् ॥ शप्स्येहं यदि दैतेयां
स्तपसः किं व्ययेन मे ॥ ३० ॥ अथवा नियमभ्रष्टस्त्यक्ष्ये चेदं कलेवरम् ॥ [2]मम पक्षं च कः कुर्य्यात्को मे दास्यति जीवितम् ॥ ३१ ॥ चक्रतीर्थे
च कः स्नानं कारयिष्यति मामिह ॥ को वा दैत्यगणानेताञ्छक्तो जेतुं महामृधे ॥ तं विना पुण्डरीकाक्षं भक्तानामभयप्रदम् ॥ ३२ ॥
ब्रह्मादीनां च नेतारं शरणागतवत्सलम् ॥ चक्रहस्तं विना मेद्य कोन्यः श[3]र्म्मप्रदो भवेत् ॥ ३३ ॥ इति ध्यात्वा च सुचिरं ज्ञात्वा पातालवासि
नम् ॥ आत्रेयो विष्णुशरणं जगाम धरणीतलम् ॥ ३४ ॥ उपवासैः कृशो दीनो भूतलं प्रविवेश ह ॥ स दैत्यराजभवनं गन्धर्वाप्सरसावृतम् ॥
॥ ३५ ॥ शोभितं सुरमुख्येन विष्णुना प्रभविष्णुना ॥ दुर्वासाः प्रविवेशाथ प्रहृष्टेनांतरात्मना ॥ ३६ ॥ दुर्वाससमथायांतं दृष्ट्वा दैत्यपतिस्तदा ॥
प्रत्युत्थायार्हयांचक्रे स्वासने संन्यवेशयत् ॥३७॥ मधुपर्कं च गां चैव दत्त्वार्घ्यं पार्श्वतः स्थितः ॥ [4]प्रोवाच प्रणतो ब्रह्मन्कथमत्रागतो भवान् ॥३८॥
सुखोपविष्टः स ऋषिस्तत्रापश्यत्त्रिविक्रमम् ॥ दैत्येन्द्रद्वारदेशे तु तिष्ठन्तमकुतोभयम् ॥ ३९ ॥ तं दृष्ट्वा देवदेवेशं श्रीवत्सांकं चतुर्भुजम् ॥ [5]रुरोद

१ चैव तान–इ० पा० । २ सुखं च मम कः कुर्यात्–इ०पा०। ३ शरणदो भवेत्–इ० पा० ।४ पप्रच्छ प्रणतः प्रहृस्तत्रागमनकारणम्–इ०पा० ।५ रुदन्नृषिवरः सोऽथ त्राहि त्राहीत्यभाषत–इ०पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



स ऋषिश्रेष्ठस्त्राहित्राहीत्युवाच च ॥ ४० ॥ संसारभयभीतानां दुःखितानां जनार्दन ॥ शत्रुभिः परिभूतानां शरणं भव केशव[1] ॥ ४१ ॥ मम दुःखभितप्तस्य शत्रुभिः कर्षितस्य च ॥ पराभूतस्य दीनस्य क्षुधया पीडितस्य च ॥ ४२ ॥ अपूर्णनियमस्याऽर्थे[2] क्लेशितस्य च दानवैः ॥ ब्रह्मण्यदेव विप्रस्य शरणं भव केशव ॥ ४३ ॥ इत्युक्त्वा दर्शयामास शरीरं दैत्यताडितम् ॥ तद्ब्राह्मणावमानं च दृष्ट्वा चुक्रोध वामनः ॥ ४४ ॥ केनापमानितो ब्रह्मन्नियमः केन खण्डितः ॥ कथयस्व महाभाग धर्मपाले मयि स्थिते ॥ ४५ ॥ ॥ दुर्वासा उवाच ॥ ॥ मुक्तितीर्थमहं ज्ञात्वा ज्ञानेन मधुसूदन ॥ चक्रतीर्थं गतः स्नातुं यात्रा[3]यां हर्षसंयुतः ॥ ४६ ॥ अकृतस्नान एवा[4]ऽहं दृष्टो दैत्यैर्दुरासदैः ॥ गले गृहीतः कृष्णाहं मुष्टिभिस्ताडितस्तथा ॥ ४७ ॥ बलाद्गृहीत्वा वासांसि कुशांश्चैवाक्षतैः सह ॥ जले क्षिप्त्वा चरणयोर्गृहीत्वा मां समाकृषन् ॥ ४८ ॥ सीमांते मां तु प्रक्षिप्य प्रोचुस्ते दानवाधमाः ॥ हनिष्यामो यदि पुनरागंता[5]सि न संशयः ॥ ४९ ॥ स्नातोऽहं चक्रतीर्थे तु करिष्ये भोजनं विभो ॥ तस्मात्स्नापय गोविंद नियमं सफलं कुरु ॥ ५० ॥ तव प्रसादात्स्नात्वाऽहं भुक्त्वा च प्रीतमानसः ॥ प्रतिज्ञां सफलां कृत्वा विचरिष्ये महीमिमाम् ॥ ५१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे चतुर्थे द्वारकामाहात्म्ये चक्रतीर्थमाहात्म्ये राक्षसकृतदुर्वासःपराभववृत्तान्तवर्णनं नामाष्टादशोऽध्यायः ॥ १८ ॥ ॥ छ ॥ ॥ प्रह्लाद उवाच ॥ ॥ तच्छ्रुत्वा देवदेवेशश्चिंतयित्वा पुनःपुनः ॥ उवाच वचनं तत्र दुर्वाससमकल्मषम् ॥ १ ॥ ॥ श्रीभगवानुवाच ॥ ॥ पराधीनोऽस्मि विप्रेन्द्र भक्त्या क्रीतोऽस्मि नान्यथा ॥ बलेरादेशकारी च दैत्येन्द्रवशगो ह्यहम्॥ २ ॥ तस्मात्प्रार्थय विप्रेन्द्र दैत्यं वैरोचनिं बलिम् ॥ अस्यादेशात्करिष्यामि यदभीष्टं तवाधुना ॥ ३ ॥ तच्छ्रुत्वा वचनं विप्रो बलिं प्रोवाच सत्वरम् ॥ यज्वनां त्वं वरिष्ठश्च दातॄणां त्वं मतोऽधिकः ॥ ४ ॥ पारावारः कृपायाश्च दयां कुरु ममोपरि ॥ प्रेषयस्व महाभाग देवं दैत्यविनिग्रहे ॥ ५ ॥ संपूर्णनियमः स्नातस्त्वत्प्रसादाद्भवाम्यहम् ॥ तच्छ्रुत्वा वचनं दैत्यो नातिहृष्टमनास्तदा ॥ दुर्वाससमुवाचेदं नैतदेवं भविष्यति ॥ ६ ॥ अन्यत्प्रार्थय विप्रेन्द्र यत्ते मनसि वर्त्तते ॥ तद्दास्यामि न सन्देहो यद्यपि स्यात्सुदुर्लभम् ॥ ७ ॥ आत्मानमपि दास्यामि नाहं त्यक्ष्ये हरिं द्विज ॥ बहुभिः सुकृतैः प्राप्तं कथं त्यक्ष्यामि केशवम् ॥ ८ ॥ ॥ दुर्वासा उवाच ॥ ॥ नातिलुब्धं हि मां विद्धि किमन्यत्प्रार्थयाम्यहम् ॥ रक्ष मे जीवितं दैत्य प्रेषयस्व जनार्दनम् ॥ ९ ॥ ॥ बलिरुवाच ॥ ॥ जानासि त्वं यथा विप्र हिरण्याक्षं निपातितम् ॥ भूत्वा यज्ञवराहस्तु दधारोर्वीं बला



१ शरणं शरणार्थिनाम्–इ० पा० । २ अत्र–इ० पा० । ३ गोमत्याम्–इ० पा० । ४ एकोऽहम्–इ० पा० । ५ आगतोऽत्र–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्दिवि ॥ १० ॥ यथा च दैत्यप्रवरमवध्यं दैत्यदानवैः ॥ हतवान्हिरण्यकशिपुं नृसिंहः सर्वगः प्रभुः ॥ ११ ॥ तथैव वृत्रं नमुचिं रक्षो लंकेश
संज्ञकम् ॥ जघान मायया विष्णुः सुरार्थं सुरसत्तमः ॥ १२ ॥ प्रथमं वामनो भूत्वा ह्ययाचत पदत्रयम् ॥ पुनस्त्रिविक्रमो भूत्वा भुवनानि जहार
मे[1] ॥ १३ ॥ मया पुण्यवशाद्विष्णुर्यदि प्राप्तः कथञ्चन ॥ नाहं त्यक्ष्ये जगन्नाथं मायावामनकं प्रभुम्[2] ॥ १४ ॥ ॥ दुर्वासा उवाच ॥ ॥ नाहं
भोक्ष्ये विना स्नानं गोमत्युदधिसंगमे ॥ यदि न प्रेष्यसि[3] हरिं ततस्त्यक्ष्ये कलेवरम् ॥ १५ ॥ ॥ बलिरुवाच ॥ ॥ यद्भाव्यं तद्भवतु ते यज्ञा
नासि तथा कुरु ॥ ब्रह्मरुद्रेन्द्रनमितं नाहं त्यक्ष्ये पदद्वयम् ॥ १६ ॥ तदा विवदमानौ तौ दृष्ट्वा स जगदीश्वरः ॥ ब्रह्मण्यदेवः कृपया ब्राह्मणं
तमुवाच ह ॥ १७ ॥ स्वस्थो भव द्विजश्रेष्ठ स्नापयिष्ये न संशयः ॥ हत्वा दैत्यगणान्सर्वान्गोमत्युदधिसंगमे ॥ १८ ॥ ॥ प्रह्लाद उवाच ॥ ॥
श्रुत्वा भगवतो वाक्यं ब्राह्मणं[4] प्रति दैत्यराट् ॥ दृढं जग्राह चरणौ पतित्वा पादयोस्तदा ॥ १९ ॥ ततः समृद्धिमगमत्पादौ दत्त्वा
बलेः प्रभुः ॥ शंखचक्रगदापाणिर्विष्णुर्दुर्वाससाऽन्वितः ॥ २० ॥ प्रस्थितौ तौ तदा दृष्ट्वा दुर्वाससजनार्दनौ ॥ अनन्तः पुरुषो
ऽगच्छन्मुशली च हलायुधः ॥ २१ ॥ मुशली चाग्रतोऽगच्छत्ततो विष्णुस्त्रिविक्रमः ॥ तयोरन्वगमद्विप्रा दुर्वासा भूतला
द्बहिः[5] ॥ २२ ॥ भित्त्वा रसातलं सर्वे समुत्तस्थुस्त्वरान्विताः ॥ आविर्बभूवुस्तत्रैव गोमत्युदधिसंगमे ॥ २३ ॥ सन्नद्धौ दृढ
धन्वानौ संकर्षणजनार्दनौ ॥ ऊचतुस्तौ तदा विप्रं कुरु स्नानं यदृच्छया ॥ २४ ॥ तयोस्तु वचनं श्रुत्वा स्नानं चक्रे त्वरान्वितः ॥
स्नात्वा चावश्यकं कर्म कर्तुमारभत द्विजः ॥ २५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे चतुर्थे
द्वारकामाहात्म्ये चक्रतीर्थे कृष्णबलरामदुर्वाससससमागमपूर्वकं दुर्वाससः स्नानाद्याह्निकविधिविधानवर्णनंनामैकोनविंशतितमोऽध्यायः ॥
॥ १९ ॥ ॥ छ ॥ ॥ प्रह्लाद उवाच ॥ ॥ ब्रह्मघोषध्वनिं श्रुत्वा दानवो दुर्मुखस्तदा ॥ क्रोधसंरक्तनयनो दुर्वाससमथाब्रवीत् ॥ १ ॥
हन्यमानस्त्वमस्माभिर्यदि मुक्तोसि वै द्विज ॥ कस्मात्पुनः समायातो मरणाय च दुष्टधीः ॥ २ ॥ इत्युक्त्वा मुष्टिना हन्तुं प्राद्रवद्दानवाधमः ॥

१ यः—इ० पा० । २ बटुम्—इ० पा० । ३ प्रेष्यसि—प्रेषयिष्यसि—इत्यर्थः । आर्ष रूपम् । ४ ब्राह्मणस्य प्रतिश्रुतम्—इ०, ब्राह्मणस्य स दैत्यराट्—इ० च पा० । ५ बहिर्याताः—इ० पा० ।
६ एतस्मादग्रे—"श्रुत्वाऽध्यायमिमं पुण्यं स याति परमां गतिम् । कामी कामानवाप्नोति विष्णुलोके प्रमोदते ॥" इत्येकः श्लोकः कतिपयपुस्तकेष्वधिको दृश्यते परं प्रक्रान्तस्य कथानकस्यापूर्णत्वादत्रानावश्यकोऽयं श्लोक इत्यतो मूले न प्रवेशित इति बोद्धव्यं सुधीभिः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्राह प्रधावमानं तं दुर्वासा मुनिसत्तमः ॥ ३ ॥ स्पर्शं मा कुरु पापिष्ठ ब्राह्मणं मां कृताह्निकम् ॥ तं दृष्ट्वा दानवं विष्णुर्ब्राह्मणं हन्तुमुद्यतम् ॥ ४ ॥
त[1]स्य क्रुद्धो जगन्नाथो दुर्वाससः कृते तदा ॥ चक्रेण क्षुरधारेण शिरश्चिच्छेद लीलया ॥ ५ ॥ ॥ प्रह्लाद उवाच ॥ ॥ दुर्मुखं निहतं दृष्ट्वा दानवो
दुःसहस्तदा ॥ आक्रोशदुच्चैर्दितिजाञ्छीघ्रमागम्यतामिति ॥६॥ श्रुत्वा दैत्यगणाः सर्वे दुर्मुखं निहतं तदा ॥ दुर्वाससं पुनस्तत्र परित्रातं च विष्णुना
॥ ७ ॥ कूर्मपृष्ठो गोलकश्च क्रोधनो वेददूषकः ॥ यज्ञघ्नो यज्ञ[3]हंता च धर्मान्तकस्तपस्विहा ॥ ८ ॥ एते चान्ये च बहवो विविधायुधपाणयः ॥
क्रोधसंरक्तनयनाः शपन्तो ब्राह्मणं तथा ॥ ९ ॥ परिक्षिप्य तदात्रेयं विष्णुं संकर्षणं तथा ॥ तोमरैर्भिन्दिपालैश्च मुशलैश्च भुशुंडिभिः ॥ १० ॥
अस्त्रैर्नानाविधैश्चापि युयुधुः क्रोधमूर्छिताः ॥ दानवैः संवृतो विष्णुः समन्ताद्घोरदर्शनैः ॥ ११ ॥ संकर्षणश्च शुशुभे चंद्रादित्यौ घनैरिव ॥ गृहीत्वा
धनुषी दिव्ये शीघ्रं संयोज्य चाशुगान् ॥ १२ ॥ तान्मार्गणगणैर्दैत्याञ्जघ्नतुस्तौ महामृधे ॥ ते हन्यमानाः समरे विष्णुना विद्रुता दिशः ॥ १३ ॥
दानवान्विद्रुतान्दृष्ट्वा विष्णुना निहतान्परान् ॥ गोलकः कूर्मपृष्ठश्च मानं कृत्वा न्यवर्तताम् ॥ १४ ॥ संकर्षणं गोलकश्च ह्याजघान त्रिभिः शरैः ॥
अनन्तं व्यथितं दृष्ट्वा गोलकः क्रोधमूर्छितः ॥१५ ॥ उत्पत्य तरसा मूर्ध्नि दुर्वाससमताडयत् ॥ स मुष्टिघाताभिहतश्चुक्रोश पतितः क्षितौ ॥१६॥
संकर्षणस्तु पतितं दृष्ट्वा मूर्ध्नि प्रताडितम् ॥ दृष्ट्वा चुकोप भगवांस्तिष्ठतिष्ठेति चाब्रवीत् ॥ संगृह्य मुशलं वीरो जघान समरे रिपुम् ॥ १७ ॥ मुशले
नाहतो मूर्ध्नि गोलको विकलेन्द्रियः ॥ [4]संभिन्नमस्तकश्चैव पपात च ममार च ॥ १८ ॥ गोलकं पतितं दृष्ट्वा क्रन्दंतं ब्राह्मणं तथा ॥ कूर्मपृष्ठं च
भगवान्विष्णुर्हन्तुं मनो दधे ॥ नाराचेन सुतीक्ष्णेन जघान हृदये रिपुम् ॥ १९ ॥ स विष्णुबाणाभिहतस्[6]त्यक्तशस्त्रः पलायितः ॥ तस्मिन्प्रभिन्नेऽति
बले गते वै कूर्मपृष्ठके ॥ अभज्यत बलं सर्वं विद्रुत च दिशो दश ॥ २० ॥ तत्प्रभग्नं बलं सर्व निहतं गोलकं तथा ॥ द्वारस्थः कथयामास दैत्य
राज्ञे कुशाय सः ॥ २१ ॥ गोलकं निहतं श्रुत्वा दैत्यानन्यांश्च दैत्यराट् ॥ योधानाज्ञापयामास सन्नद्धाँन्स्वबलस्य च ॥ २२ ॥ आज्ञां कुशस्य ते
लब्ध्वा दैत्याः पंचजनादयः ॥ युद्धायाभि मुखाः सर्वे रथैर्नागैश्च निर्ययुः ॥ २३ ॥ अनीकं दशसाहस्रं कूर्मपृष्ठस्य निर्ययौ ॥ अयुते द्वे रथानां तु
नागानामयुतं तथा ॥ २४ ॥ दशायुतानि चाश्वानामुष्ट्राणां च तथैव च ॥ बकश्च निर्ययौ दैत्यो बहुसैन्यसमन्वितः ॥ २५ ॥ तथा दीर्घनखो

१ प्रहस्य भगवान्विष्णुस्तस्य चापततस्तदा–इ० पा० । २ च निपातितम्–इ० पा० । ३ यतिहन्ता च–इ० पा० । ४ स विभिन्नास्थिमस्तिष्कः–इ० पा० । ५ समरे–इ० पा० ।
६ त्यजञ्छस्त्रं पलायितः–इ० पा० । ७ स्वबलस्य–स्वसैन्यस्य–स्वतन्त्रतया निजरक्षकस्य सैन्यस्य संनद्धान्योधानाज्ञापयामास–इत्यर्थयोजना ।



CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दैत्यः स्वेनानीकेन संवृतः ॥ मंत्रिपुत्रो महामायो दैत्यराजकुशस्य वै ॥ निर्ययौ विघसो दैत्यः प्रघसश्च महाबलः ॥ २६ ॥ ऊर्द्ध्वबाहुर्वक्रशिराः
कञ्चुकश्च शिवोलुकैः ॥ ब्रह्मघ्नो यज्ञहा दैत्यो राहुर्बर्बरकस्तथा ॥ २७ ॥ सुनामा वसुनामा च मंत्रिणौ बुद्धिसत्तमौ ॥ सेनापतिश्चोग्रदंष्ट्रस्तस्य
भ्राता महाहनुः ॥ २८ ॥ एते चान्ये च बहवो दैत्याः क्रोधसमन्विताः ॥ महता रथघोषेण निर्ययुर्युद्धकांक्षिणः ॥ २९ ॥ स्नात्वा शुक्लांबरधरः
शुक्लमालाविभूषितः ॥ कुशः शंभुं महादेवं भवानीपतिमव्ययम् ॥ आर्चयमास भूतेशं परमेण समाधिना ॥ ३० ॥ पंचामृतेन संस्नाप्य तथा गन्धैर्वि
लिप्य च ॥ अर्चयामास दैत्येन्द्रो ह्यनेककुसुमोत्करैः ॥ ३१ ॥ गीतवादित्रशब्दैश्च तथा मंगलवाचकैः ॥ पूजयित्वा महादेवं ब्राह्मणान्स्वस्ति
वाच्य च ॥ ३२ ॥ भूषयित्वा भूषणैश्च मणिवज्रविभूषणैः ॥ मुकुटेनार्कवर्णेन ज्वलद्भास्कररोचिषा ॥ ३३ ॥ भ्राजमानो दैत्यराजो हारेणाऽतीव शो
भितः ॥ संनह्य च महाबाहुः सारथिं समुदैक्षत ॥ ३४ ॥ सुनामानं वसुं चैव मंत्रिणौ वाक्यमब्रवीत् ॥ कश्चायमसुरान्हंति किमर्थं ज्ञायतामिति ॥
॥ ३५ ॥ तस्य तद्वचनं श्रुत्वा रुरुर्वचनमब्रवीत् ॥ गतेह्नि ब्राह्मणः स्नातुं गोमत्याः संगमे किल ॥ ३६ ॥ आगतः प्रतिषिद्धः सन्दैत्यैस्तत्र मही
पते ॥ तेन विष्णुः समानीतः संकर्षणसमन्वितः ॥ ३७ ॥ सोऽस्मान्हंति महाराज ब्रह्मण्यो जगदीश्वरः ॥ तेन ते बहवो दैत्या हताः केचित्पला
यिताः ॥ ३८ ॥ ॥ सुनामोवाच ॥ ॥ स्नात्वा गच्छतु विप्रोऽसौ वासुदेवसमन्वितः ॥ राजन्वृथा विग्रहेण किं कार्यं कथयस्व नः ॥ ३९ ॥ तस्य
तद्वचनं श्रुत्वा कुशः क्रोधसमन्वितः ॥ कथं गोलकहंतारं न हनिष्यामि केशवम् ॥४०॥ एतावदुक्त्वा स क्रुद्धो ययौ दैत्यपतिस्तदा ॥ ततो वादित्र
शब्दैश्च भेरीशब्दैः समन्वितः ॥ ४१ ॥ ददर्श तत्र देवेशं सहस्रशिरसं प्रभुम् ॥ तथा विष्णुं चक्रपाणिं दुर्वाससमकल्मषम् ॥ ४२ ॥ ईश्वरांशं च
तं दृष्ट्वा न हन्तव्योऽयमीश्वरः ॥ विष्णुमुद्दिश्य तान्सर्वान्प्रेरयामास दानवान् ॥ ४३ ॥ नागैः पर्वतसंकाशै रथैर्जलदसंन्निभैः ॥ अश्वैर्महाजवैश्चैव
परिवव्रुः समंततः ॥ ४४ ॥ ततो युद्धं समभवद्देवयोर्दानवैः सह ॥ आच्छादितौ तौ ददृशुर्दैत्यैर्देवगणास्तदा ॥ ४५ ॥ ततो गृहीत्वा मुशलं हलं
च बलवान्हली ॥ जघान दैत्यप्रवरान्कालानलयमोपमान् ॥ ४६ ॥ ते हन्यमाना दैतेया बलेन बलशालिना ॥ सर्वतो विद्रुता भग्नाः कुशमेव
ययुस्तदा ॥ ४७ ॥ बकश्च यज्ञकोपश्च ब्रह्मघ्नो वेददूषकः ॥ महामखघ्नो जंभश्च राहुर्वक्रशिरास्तथा ॥४८॥ एते चान्ये च बहवः प्रवरा दानवोत्तमाः ॥

१ शवोत्सुकैः—इ० पा० । २ द्योतमानः—इ० पा० । ३ कश्चायं समरे हंति किमर्थं कः समाहितः—इ० पा० । ४ जलदनिस्वनैः—इ० पा० । ५ यज्ञकेतुश्च—इ०पा० । ६ महासुखः
खञ्जनकः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



क्रोधसंरक्तनयना बिभिदुस्ते जनार्दनम् ॥ ४९ ॥ ततः क्रोधसमायुक्तौ संकर्षणजनार्दनौ ॥ चक्रलांगलघातेन जघ्नतुर्दानवोत्तमान् ॥ ५० ॥
चक्रेण च शिरः कायाच्चिच्छेदाशु बकस्य वै ॥ चूर्णयामास मुशली यज्ञहंतारमेव च ॥ ५१ ॥ राहुं जघान चक्रेण तथान्यान्मुशलेन च ॥ ते
हता हन्यमानाश्च भग्ना जग्मुर्दिशो दश ॥५२॥ कुशः स्वां वाहिनीं दृष्ट्वा विद्रुतां निहतां तथा ॥ क्रोधसंरक्तनयनः प्राह याहीति सारथिम् ॥५३॥
स तयोरंतिकं गत्वा नाम विश्राव्य चात्मनः ॥ उवाच कस्त्वं दैतेयान्मम हंसि गदाधर ॥ ५४ ॥ ॥ श्रीवासुदेव उवाच ॥ ॥ यस्माद्वि
मुक्तिदं पुण्यं गोमत्युदधिसंगमम् ॥ रुद्धं दुरात्मभिः पापैस्तस्मात्ते निहता मया ॥ ५५ ॥ ॥ कुश उवाच ॥ ॥ मां न जानासि चात्रस्थं
कथं जीवन्प्रयास्यसि ॥ युध्यस्व त्वं स्थिरो भूत्वा ततस्त्यक्ष्यसि जीवितम् ॥ ५६ ॥ इत्युक्त्वा पंचविंशत्या ताडयामास केशवम् ॥ अनंतं चाष्टभि
र्बाणैर्हत्वाऽऽत्रेयं निरीक्ष्य तम् ॥ ईश्वरांशं च तं दृष्ट्वा प्राह याहीति मा चिरम् ॥ ५७ ॥ स बाणैर्भिन्नसर्वांगः शार्ङ्गं हि धनुषां वरम् ॥ विकृष्य घात
यामास चतुर्भिश्चतुरो हयान् ॥ ५८ ॥ सारथेस्तु शिरः कायादर्द्धचंद्रेण पत्रिणा ॥ चिच्छेद धनुरेकेन ध्वजमेकेन चिच्छिदे ॥ ५९ ॥ स च्छिन्नधन्वा
विरथो हताश्वो हतसारथिः ॥ प्रगृह्य च महाखड्गमुवाच वचनं तदा ॥ ६० ॥ यदि त्वां पातयिष्यामि कीर्तिर्मे ह्यतुला भवेत् ॥ पातितोऽहं त्वया
वीर यास्यामि परमां गतिम् ॥ ६१ ॥ तिष्ठतिष्ठ हरे स्थाने शरणं मे सदाशिवः ॥ धावंतमतिसंक्रुद्धं खड्गहस्तं निरीक्ष्य तम् ॥ चक्रेण शितधारेण
शिरश्चिच्छेद लीलया ॥ ६२ ॥ तं छिन्नशिरसं भूमौ पतितं वीक्ष्य दानवम् ॥ अथोवाह रथेनाजौ दैत्यः खंजनकस्तथा ॥ ६३ ॥ अपयाते कुशे
दैत्ये विष्णुः संकर्षणस्तदा ॥ दुर्वाससा च सहितः संन्यवर्त्तत हर्षितः ॥ ६४ ॥ शिवालये तु पतितं कुशं निक्षिप्य दानवः ॥ स्नानगन्धार्चनैर्धूपै
र्गीतवाद्यैरतोषयत् ॥ ६५ ॥ अवाप जीवितं सद्यः प्रसादाच्छंकरस्य च ॥ उत्थितः स तदा दैत्यो ब्रुवञ्छिवशिवेति च ॥ ६६ ॥ तं पुनर्जीवितं
दृष्ट्वा दैत्यं दैत्यगणस्तदा ॥ उवाच सुमना वाक्यं वर्द्धस्व सुचिरं विभो ॥६७॥ स्नापयित्वा यदि पुनर्ब्राह्मणं विनिवर्त्तते ॥ यथेष्टं गच्छतु तदा किं
वृथा विग्रहेण ते ॥ ६८ ॥ तस्य तद्वचनं श्रुत्वा कुशो वचनमब्रवीत् ॥ गच्छ प्रेषय तौ शीघ्रं विप्रत्राणकराबुभौ ॥ ६९ ॥ स च राज्ञा समादिष्ट
सुमना मुनिसत्तमाः ॥ उवाच विष्णुमानम्य नमस्कृत्य हलायुधम् ॥ ७० ॥ कुशेन प्रेषितश्चास्मि समीपे ते जनार्दन ॥ किं तवापकृतं नाथ
येन दैत्याञ्जिघांससि ॥ ७१ ॥ दुर्वाससं स्नापयित्वा गच्छ मुक्तोऽसि मानद ॥ अमरत्वं महादेवात्प्राप्तं विद्धि कुशेन हि ॥ ७२ ॥ ॥

१ यतिहंतारम्–इ० पा० । २ सः–वासुदेवः । ३ अतिसंरब्धम्–इ० पा० । ४ खड्गेन–इ० पा० । ५ पापौ–इ० पा० । ६ आगत्य–इ० पा० ।





Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ श्रीविष्णुरुवाच ॥ ॥ मुक्तितीर्थमिदं रुद्धं भवद्भिः पापकर्मभिः ॥ तस्माद्धनिष्ये सर्वांश्च दानवान्नात्र संशयः ॥७३॥ दुर्वाससश्च ये दर्भास्तिला
श्चैवाक्षतैः सह ॥ पुनस्तानानयध्वं हि क्षिप्ता ये वरुणालये ॥ ७४ ॥ सवाहनपरीवाराः [1]सज्ञातिकुलबांधवाः ॥ पुण्यतीर्थमिदं हित्वा[2] प्रविशध्वं धरा
तले ॥ ७५ ॥ सुमनास्तद्वचः श्रुत्वा क्रोधसंरक्तलोचनः ॥ युध्यध्वमिति तं चोक्त्वा नैतदेवं भविष्यति ॥ ७६ ॥ कुशाय कथयामास यदुक्तं
शार्ङ्गधन्विना ॥ क्रुद्धस्तद्वचनं श्रुत्वा मंत्रिणा समुदीरितम् ॥ ७७ ॥ रथमारुह्य वेगेन ययौ योद्धुमरिंदमः ॥ संस्मृत्य मनसा देवं पिना[3]किं वृष
भध्वजम् ॥ ७८ ॥ ततः प्रववृते युद्धं सुमहल्लोमहर्षणम् ॥ अन्येषां दानवानां च केशवस्य कुशस्य च ॥ ७९ ॥ यज्ञघ्नो गदया गुर्व्या संकर्षणमता
डयत् ॥ संकर्षणहतः शीर्ष्णि मुसलेन पपात ह ॥ ८० ॥ कन्चुकं च जघानाशु चक्रेण भगवान्हरिः ॥ उल्मुकश्चाथ निहतो ब्रह्मघ्नश्च निपातितः ॥
॥ ८१ ॥ एते चान्ये च बहवो घातिताः केशवेन हि ॥ दानवान्पतितान्दृष्ट्वा कुशः परमकोपितः ॥८२॥ जघान युधि संरब्धः परमास्त्रेण केशवम् ॥
भगवान्क्रोधसंयुक्तश्चक्रेण चाहरच्छिरः ॥ ८३ ॥ तं छिन्नशिरसं भूमौ पातितं वीक्ष्य केशवः ॥ चिच्छेद बाहू पादौ च खड्गेन तिलशस्तथा ॥८४॥
खंडशो घातितं दृष्ट्वा केशवेन कुशं तदा ॥ संगृह्य ते पुनर्दैत्या निन्युः सर्वे शिवालयम् ॥ ८५ ॥ प्रसादाच्छूलिनः सद्यो जीवितं प्राप्य दानवः ॥
उत्थितः सहसा क्रुद्धः क्व विष्णुरिति चाब्रवीत् ॥ ८६ ॥ गदामुद्यम्य संक्रुद्धो योद्धुमागाज्जनार्दनम् ॥ तमुद्यतगदं दृष्ट्वा निहतं जीवितं पुनः ॥
॥ ८७ ॥ दुर्वाससमथोवाच किमिदं न म्रियेत यत् ॥ मयाऽसकृच्छिरश्छिन्नं खंडशस्तिलशः कृतम् ॥ ८८ ॥ जीवत्ययं पुनः कस्मात्कारणं कथ
यस्व नः ॥ इत्युक्तश्चिंतयामास ध्यानेन ऋषिसत्तमः ॥ ८९ ॥ ज्ञात्वा तत्कारणं सर्वमुवाच मधुसूदनम् ॥ महादेवेन तुष्टेन कुशोऽयममरः कृतः ॥
॥ ९० ॥ खंडशश्च कृतश्चापि न च प्राणैर्वियुज्यते ॥ ततः स[8] विस्मयाविष्टो हंतव्योऽयं मया कथम् ॥ ९१ ॥ उपायं च करिष्यामि येनायं न भवे
दिति ॥ ततः स जीवितं प्राप्य प्रसादाच्छंकरस्य च ॥ चर्मखड्गमथादाय तिष्ठतिष्ठेति चाब्रवीत् ॥ ९२ ॥ तमायांतं ततो दृष्ट्वा कुशं शिवपरिग्र
हम् ॥ जघान गदया गुर्व्या गदाहस्तं तदा[9] कुशम् ॥ ९३ ॥ स भिन्नमूर्द्धा न्यपतत्केशवेनाभिताडितः ॥ [11]भूमौ निपतितं वेगात्परिगृह्य कुशं हरिः ॥
॥ ९४ ॥ गर्ते निक्षिप्य तद्देहं पूरयामास वै पुनः ॥ लिंगं संस्थापयामास तस्योपरि जनार्दनः ॥ ९५ ॥ स लब्धसंज्ञो दनुजः शिवलिंगमपश्यत ॥

१ सपुत्रज्ञातिवान्धवाः—इ० पा० । २ त्यक्त्वा—इ० पा० । ३ पिनाकिम्—पिनाकिनम्—इत्यर्थः । आर्षम् । ४ ततः प्रावर्तत रणम्—इ० पा० ।५ निहतान्—इ० पा० । ६ शतशो घातितम्—इ० पा० । ७ कथयामास—इ० पा० । ८ सः—विष्णुः । ९ तमायांतं पुनः—इ० पा० । १० महाबलम्—इ० पा० । ११ तं भूमौ पातितं वेगात्—इ० पा० )

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



आत्मोपरि स्थितं तच्च तदा चिन्तापरोऽभवत् ॥ ९६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे चतुर्थे द्वारकामाहात्म्ये चक्रतीर्थे राक्षसकुशविष्णुयुद्धे कुशराक्षसोपरि विष्णुना शिवलिंगस्थापनवर्णनंनाम विंशतितमोऽध्यायः ॥ २० ॥ ॥ छ ॥ ॥ ॥ ॥ श्रीप्रह्लाद उवाच ॥ ॥ शिवलिंगमलंघ्यं हि बुद्धिपूर्वं हतो ह्यहम् ॥ उवाच कृष्णं दनुजश्छलितोऽहं त्वयाऽनघ ॥ १ ॥ ॥ श्रीविष्णुरुवाच ॥ ॥ परितुष्टोस्मि ते दैत्य शौर्येण शिवसंश्रयात् ॥ वरं वरय भद्रं ते यदिच्छसि महामते ॥ २ ॥ ॥ कुश उवाच ॥ ॥ यथा पूज्यो महादेवो मम त्वं च तथा हरे ॥ एक एव द्विधा मूर्तिस्तस्मात्त्वां वरयाम्यहम् ॥ ३ ॥ शिवलिंगं त्वया नाथ स्थापितं यन्ममोपरि ॥ मम नाम्ना भवतु च कुशेश्वर इतिं स्मृतम् ॥४॥ अनुग्राह्यो यद्यहं ते मम कीर्तिर्भवत्वियम् ॥ एवं भविष्यतीत्युक्तस्तत्रैवावस्थितोऽसुरः ॥ ५ ॥ ततोऽन्यदानवान्सर्वान्प्रेषयामास माधवः ॥ रसातलं गताः केचित्केचिद्विष्णुं समागताः ॥ ६ ॥ अनंतः संस्थितस्तत्र विष्णुश्च तदनंतरम् ॥ ज्ञात्वा विमुक्तिदं तीर्थं दुर्वासा मुनिपुंगवः ॥ ७ ॥ गोमत्यां चक्रतीर्थे च भगवांश्च त्रिविक्रमः ॥ तेन तन्मुक्तिदं मत्वा दुर्वासास्तत्र संस्थितः ॥ ८ ॥ एवं त्रिविक्रमः स्वामी तदाप्रभृति संस्थितः ॥ कलौ पुनः कलान्यासात्कृष्णत्वमगमत्प्रभुः ॥ ९ ॥ ॥ प्रह्लाद उवाच ॥ ॥ पूजाविधिं हरेर्विप्राः शृणुध्वं सुसमाहिताः ॥ विशेषात्फलदः प्रोक्तः पूजितो मधुमाधवे ॥ १० ॥ मधुसूदनीं नरो यस्तु द्वारवत्यां करोति च ॥ पूजयेत्कृष्णदेवं च स्नापयित्वा विलिप्य च ॥ ११ ॥ गन्धैश्च वाससाऽऽच्छाद्य धूपैर्दीपैरनेकधा ॥ नैवेद्यैर्भूषणैश्चैव तांबूलेन फलेन च ॥ १२ ॥ आरार्तिकेन संपूज्य दण्डवत्प्रणिपत्य च ॥ घृतेन दीपकं दत्त्वा रात्रौ जागरणं तथा ॥ कुर्याच्च गीतवादित्रैस्तथा पुस्तकवाचकैः ॥ १३ ॥ कृत्वा चैवं विधिं भक्त्या सर्वान्कामानवाप्नुयात् ॥ १४ ॥ तथा नभसि सम्पूज्य पवित्रारोपणेन च ॥ पितॄणां चाक्षया तृप्तिः सफलाः स्युर्मनोरथाः ॥ १५ ॥ प्रबोधवासरे प्राप्ते कार्तिके द्विजसत्तमाः ॥ संपूज्य कृष्णं देवेशं परां गतिमवाप्नुयात् ॥ १६ ॥ तथा नभस्ये संपूज्य पवित्रारोपणेन च ॥ सर्वान्कामानवाप्नोति विष्णुलोकं च गच्छति ॥ १७ ॥ युगादिषु च संपूज्य ह्ययने दक्षिणोत्तरे ॥ आषाढज्येष्ठमाघेषु पौषादिद्वादशीषु च ॥ १८ ॥ कलौ कृष्णं पूजयित्वा गोमत्युदधिसंगमे ॥ विमलं लोकमाप्नोति यत्र गत्वा न शोचति ॥ १९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे चतुर्थे द्वारकामाहात्म्ये गोमतीतीरस्थक्षेत्रस्थभगवत्पूजामाहात्म्यवर्णनंनामैकविंशतितमोऽध्यायः ॥ २१ ॥ ॥ श्रीप्रह्लाद उवाच ॥ ॥ शृणुध्वं

१ मुनिसत्तमः–इ० पा० । २ भक्त्या–इ० पा० । ३ केषुचित्पुस्तकेषु–इति श्रीत्यादिसमाप्तिदण्डकं नास्ति ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विजशार्दूला यथावत्कथयामि वः ॥ स्नापयित्वा जगन्नाथं तथा गंधैर्विलिप्य च ॥ पूजयित्वा तुलस्या तु भूषयित्वा च भूषणैः ॥ १ ॥ नैवेद्येन च
सन्तर्प्य तथा नीराजनादिभिः ॥ दुर्वाससं तथा पूज्य पुण्डरीकाक्षमेव च ॥२॥ अनंतं वैनतेयादीन्भक्त्या सम्पूज्य मानवः ॥ दद्याद्दानं स्वशक्त्या
च वित्तशाठ्यविवर्जितः ॥ ३ ॥ दीनांधकृपणांस्तत्र तर्पयेच्च समाश्रितान् ॥ ४ ॥ रुक्मिणीं च ततो गच्छेद्विदर्भतनयां नरः ॥ उपहृत्योपहारांश्च
बलिभिर्गंधदीपकैः ॥ ५ ॥ पीडयंति ग्रहास्तावद्व्याधयोऽभिभवंति च ॥ भक्त्या न पश्यति नरो यावत्कृष्णप्रियां कलौ ॥ ६ ॥ उपसर्गभयं ताव
दुःखं च भूतसंभवम् ॥ भक्त्या न पश्यति नरो यावत्कृष्णप्रियां कलौ ॥ ७ ॥ भवेद्दरिद्री दुःखी च तावद्वै परयाचकः ॥ भक्त्या न पश्यति नरो
यावत्कृष्णप्रियां कलौ ॥ ८ ॥ तावन्मृतप्रजा नारी दुर्भाग्या दुःखसंयुता ॥ भक्त्या न पश्यति यदा नारी कृष्णप्रियां तथा ॥ ९ ॥ तावच्छत्रुभयं
पुंसां गृहभंगं च मूर्खता ॥ भक्त्या न पश्यति नरो यावत्कृष्णप्रियां कलौ॥१०॥संपूज्य कृष्णं विधिवद्रुक्मिणीं पूजयेत्ततः ॥ स्नापयेद्दधिदुग्धाभ्यां
मधुशर्करया तथा ॥ ११ ॥ घृतेन विविधैर्गन्धैस्तथैवेक्षुरसेन च ॥ तीर्थोदकेन संस्नाप्य सर्वान्कामानवाप्नुयात् ॥ १२ ॥ एवं यः स्नापये
देवीं रुक्मिणीं कृष्णवल्लभाम् ॥ न तस्य दुर्लभं किंचिदिह लोके परत्र च ॥ १३ ॥ श्रीखण्डकुंकुमेनैव तथा मृगमदेन च ॥ विलेपयेद
पुत्रस्तु स पुत्रं लभते ध्रुवम् ॥ १४ ॥ सदा स भोगी भवति रूपवाञ्जनपूजितः ॥ पूजयेन्मालतीपुष्पैः शतपत्रैः सुगन्धिभिः ॥
॥ १५ ॥ करवीरैर्मल्लिकाभिश्चम्पकैस्तु विशेषतः ॥ कमलैर्वारिसंभूतैः केतकीभिश्च पाटलैः ॥ १६ ॥ धूपेनागुरुणा चैव पूजयेद्गुग्गु
लेन च ॥ वस्त्रैः सुकोमलैः शुभ्रैर्नानादेशसमुद्भवैः ॥ १७ ॥ भक्त्या संछाद्य वैदर्भीं रुक्मिणीं कृष्णवल्लभाम् ॥ भूषणैर्भूषयेद्देवीं मणिरत्न
समन्वितैः ॥ १८ ॥ तस्मिन्कुले नाऽसुखः स्यान्नाऽधर्मो नाऽधनस्तथा ॥ नाऽपुत्रो न विकर्मस्थः कितवो नीचसेवकः ॥ १९ ॥ यैः पूजिता
जगन्माता रुक्मिणी मानवैः कलौ ॥ नैवेद्यैर्भक्ष्यभोज्याद्यैर्देवी मे प्रीयतामिति ॥ तांबूलं च सकर्पूरं भावेन विनिवेदयेत् ॥ २० ॥ गृहीत्वा
च फलं शुभ्रं ह्यक्षतैश्च समन्वितम् ॥ मन्त्रेणानेन वै विप्रा ह्यर्घ्यं दद्याद्विधानतः ॥ २१ ॥ कृष्णप्रिये नमस्तुभ्यं विदर्भाधिपनंदिनि ॥ सर्वकाम
प्रदे देवि गृहाणार्घ्यं नमोऽस्तु ते ॥ २२ ॥ आरार्तिकं ततः कुर्याज्ज्वलन्तं भावनान्वितः ॥ नीराजनं प्रकर्तव्यं कर्पूरेण विशेषतः ॥ २३ ॥ शंखे

१ गणेशं वैनतेयादीन्–इ० पा० । २ शाकिनीभूतसम्प्लवम्–इ० पा० । ३ ततो गच्छेच्च रुक्मिणमि–इ० पा० । ४ विलेपयेदपुत्रत्वं निर्धनत्वं न पश्यति--इ० पा० । ५ करवीरैः श्वेतरक्तैस्तु
लस्या राजचंपकैः--इ० पा०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



कृत्वा तु पानीयं भ्रामयेद्भावसंयुतः ॥ भ्रामयित्वा च शिरसा धारणीयं विशुद्धये ॥ २४ ॥ दण्डवत्प्रणमेद्भूमौ नमः कृष्णप्रियेति च ॥ विप्रपत्नीश्च विप्रांश्च पूजयेच्छक्तितो द्विजाः॥ २५ ॥ ग्रीवासूत्रकसिन्दूरैर्वासोभिः कन्चुकैस्तथा ॥ सुगन्धकुसुमैरर्च्य कुंकुमेन विलिप्य च ॥ २६ ॥ कौसुंभकैः कज्जलेन तांबूलेन च तोषयेत् ॥ भक्ष्यैर्भोज्यैर्मोदकैश्च इक्षुभिर्मधुसर्पिभिः ॥ २७ ॥ प्रीतो भवति देवेशो रुक्मिण्या सह केशवः ॥ विशेषतः फलानीह दातव्यानि द्विजोत्तमाः ॥ २८ ॥ उन्मत्तकं ततो देवं द्वारपालं प्रपूजयेत् ॥ स्नापयित्वा सुगन्धेन कुंकुमेन विलिप्य च ॥ २९ ॥ धूपेन धूपयित्वा तु पुष्पाद्यैः संप्रपूजयेत् ॥ नैवेद्यैर्भक्ष्यभोज्यैश्च मांसेन सुरया तथा ॥ ३० ॥ प्रभूतबलिभिश्चैव पिष्टेन विविधेन च ॥ योगिनीनां चतुःषष्टिं तस्मिन्पीठे प्रपूजयेत् ॥ ३१ ॥ अर्चयेद्वरसिद्धिं च क्षेत्रपालं च सर्वशः ॥ विरूपस्वामिनीं तत्र तथा वै सप्तमातरः ॥ ३२ ॥ अष्टमूर्तीः कृष्णपत्नीः पीठे तस्मिन्प्रपूजयेत् ॥ रुक्मिणीं सत्यभामां च शुभां जांबवतीं तथा ॥ ३३ ॥ मित्रविन्दां च कालिन्दीं भद्रां नाग्नजितीं तथा ॥ अष्टमीं लक्ष्मणां तत्र पूजयेत्कृष्णवल्लभाः ॥ ३४ ॥ एताः[1] संपूज्य विधिवत्संतर्प्य दधिपायसैः ॥ गीतवादित्रघोषेण दीपैर्जागरणेन च ॥ ३५ ॥ पुत्रपौत्रसमायुक्तो धनधान्यसमन्वितः ॥ सर्वान्कामानवाप्नोति तस्य विष्णुः प्रसीदति ॥ ३६ ॥ किं तस्य बहुदानैस्तु किं व्रतैर्नियमैस्तथा ॥ येन दृष्टा जगन्माता रुक्मिणी कृष्णवल्लभा ॥ ३७ ॥ किं यज्ञैर्बहुभिस्तस्य संपूर्णवरदक्षिणैः ॥ येन दृष्टा जगन्माता रुक्मिणी कृष्णवल्लभा ॥ ३८ ॥ तेन दत्तं हुतं तेन जप्तं तेन सनातनम् ॥ येन दृष्टा जगन्माता रुक्मिणी कृष्णवल्लभा ॥३९॥ हेलया तेन संप्राप्ताः सिद्धयोऽष्टौ न संशयः ॥ गत्वा द्वारवतीं येन दृष्टा केशववल्लभा ॥ ४० ॥ सफलं जीवितं तस्य सफलाश्च मनोरथाः ॥ कलौ कृष्णपुरीं गत्वा दृष्ट्वा माधववल्लभाम् ॥ ४१ ॥ देवराज्येन किं तस्य तथा मुक्तिपदेन च ॥ न दृष्टा चेज्जगन्माता रुक्मिणी कृष्णवल्लभा ॥ ४२ ॥ तस्मात्सर्वप्रयत्नेन रुक्मिणी कृष्णवल्लभा ॥ सदाऽर्चनीया मनुजैर्द्रष्टव्या सर्वकामदा॥४३॥ विशेषतः पूजनीया नवरात्रे सदाश्विने ॥ नवम्यां तु नरैर्यैस्तु पूजिता हरिवल्लभा॥४४॥स्नानगन्धादिवस्त्रैस्तु प्रभूतबलिभिस्तथा ॥ गीतवादित्रघोषेण दीपजागरणेन च ॥ तोषिता भीष्मकसुता सर्वान्कामान्प्रयच्छति ॥ ४५ ॥ तथा दीपोत्सवदिने चतुर्दश्यां समाहितः ॥ पूजयित्वा यथाशास्त्रमीप्सितं लभते फलम् ॥ ४६ ॥ माघमासे सिताष्टम्यां कन्दर्पजननी तु यैः ॥ पूजिता गन्धपुष्पाद्यैरुपहारैरनेकशः ॥ सफलं जीवितं तेषां सफलाश्च मनोरथाः ॥ ४७ ॥ द्वादश्यां चैत्रमासे तु कृष्णेन सह रुक्मिणीम् ॥ ये पश्यंति नरा

१ इमाः--इति शेषः । २ यात्रा हि सफला भवेत्--इ० पा० । ३ पुष्कलम्--इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवीं रुक्मिणीं मधुमाधवे ॥ कृष्णेन सह गच्छन्तीं धन्यास्ते मानवा भुवि ॥४८॥ पुत्रपौत्रसमायुक्ता धनधान्यसमन्विताः॥ जीविते व्याधिनिर्मुक्ताः
पदं गच्छन्त्यनामयम् ॥ ४९ ॥ ज्येष्ठाष्टम्यां नरैर्यैस्तु पूजिता कृष्णवल्लभा ॥ तेषां मनोरथावाप्तिर्जायते नात्र संशयः ॥ ५० ॥ तथा भाद्रपदे
मासि मातुः पूजा कृता तु यैः ॥ सर्वपापविनिर्मुक्ता यांति विष्णुपदे नराः ॥ ५१ ॥ कार्त्तिके मासि द्वादश्यां रुक्मिणीं कृष्णसंयुताम् ॥ ये पश्यंति
नरास्तेषां न भयं विद्यते क्वचित् ॥ ५२ ॥ यस्त्वेकत्र स्थितां पश्येद्रुक्मिणीं कृष्णसंयुताम् ॥ सफलं जीवितं तस्य ह्यक्षया पुत्रसंततिः ॥ अक्षयं
धनधान्यं च कदा नैव दरिद्रता ॥ ५३ ॥ य एवं रुक्मिणीं पश्येत्पूजयेत्कृष्णवल्लभाम् ॥ सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥ ५४ ॥
यः स्नायात्सर्वतीर्थेषु दानं शक्त्या ददाति यः ॥ तस्य पुण्यफलं चैव लोके यज्जायते द्विजाः ॥ कथितं तदशेषेण कलौ कृष्णस्य
संस्थितौ ॥ ५५ ॥ द्वारावतीं विना विप्रा मुक्तिर्न प्राप्यते कलौ ॥ पुराणसंहितामेतां कृतवान्बलिबन्धनः ॥ ददौ स तु प्रसादेन पूर्वं मह्यं
द्विजोत्तमाः ॥ ५६ ॥ इहार्थे च पुरा प्रोक्त इतिहासो द्विजोत्तमाः ॥ प्रद्युम्नेन सुसंवादे मार्कण्डेन महात्मना ॥ ५७ ॥ इति श्रीस्कान्दे महापुराण
एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे चतुर्थे द्वारकामाहात्म्ये रुक्मिणीपूजनमाहात्म्यवर्णनंनाम द्वाविंशतितमोऽध्यायः ॥ २२ ॥ छ ॥
॥ ॥ मार्कंडेय उवाच ॥ ॥ द्वारकायाश्च माहात्म्यमिदंद्युम्न निबोध मे[1] ॥ कलौ निवसते यत्र क्लेशहा रुक्मिणीपतिः ॥ १ ॥ कलौ कृष्णस्य
माहात्म्यं ये शृण्वंति पठंति च ॥ न तेषां जायते वासो यमलोके युगाष्टकम् ॥ २ ॥ नित्यं कृष्णकथा यस्य प्राणादपि गरीयसी ॥ न तस्य
दुर्लभं किंचिदिह लोके परं नृप ॥ ३ ॥ मन्वंतरसहस्रैस्तु काशीवासेन यत्फलम् ॥ तत्फलं द्वारकावासे वसतां पंचभिर्दिनैः ॥ ४ ॥ कलौ निव
सते यस्तु श्वपचो द्वारकां यदि ॥ यतीनां गतिमाप्नोति प्राह ह्येवं प्रजापतिः ॥५॥ द्वारकां गंतुकामं[2] यः प्रत्यहं कुरुते नरः ॥ फलमाप्नोति मनुजः
कुरुक्षेत्रसमुद्भवम् ॥ ६ ॥ सोमग्रहे च यत्प्रोक्तं यत्फलं सोमनायके ॥ दृष्ट्वा तत्फलमाप्नोति द्वारवत्यां जनार्दनम् ॥ ७ ॥ पुष्करे कार्त्तिकीं कृत्वा
यत्फलं वर्षकोटिभिः ॥ तत्फलं द्वारकावासे दिनेनैकेन जायते ॥ ८ ॥ द्वारकायां दिनैकेन[3] दृष्टे देवकिनंदने ॥ फलं कोटिगुणं ज्ञेयमत्र लक्षशतो
द्भवम् ॥ ९ ॥ कलौ निवसतां भूप धन्यास्तेषां मनोरथाः ॥ कृष्णस्य दर्शने नित्यं द्वारकागमने मतिः[4] ॥ १० ॥ एकामपि द्वादशीं तु यः करोति
नृपोत्तम ॥ कृष्णस्य सन्निधौ भूप द्वारकायाः फलं शृणु ॥ ११ ॥ धन्यास्ते कृतकृत्यास्ते ते जना लोकपावनाः ॥ दृष्टं कृष्णमुखं यैस्तु पापकोट्य

१ नः--इ० पा० । २ गंतुकामम्--गन्तुमिच्छाम्--इत्यर्थः । ३ दिनैकेन--एकेन दिनेन-इत्यर्थः ।४ येषाम्--इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





युतापहम् ॥ १२ ॥ यत्फलं व्रतसंयुक्तैर्वासरैः कृष्णसंयुतैः ॥ यज्ञैर्दानैर्बृहद्भिश्च द्वारकायां तथैकया ॥ १३ ॥ क्षीरस्नानं प्रकुर्वंति ये नराः कृष्ण
मूर्धनि ॥ शताश्वमेधजं पुण्यं बिंदुना बिंदुना स्मृतम् ॥ १४ ॥ दधि क्षीराद्दशगुणं घृतं दध्नो दशोत्तरम् ॥ घृताद्दशगुणं क्षौद्रं क्षौद्राद्दशगुणोत्तरम् ॥
॥ १५ ॥ पुष्पोदकं च रत्नोदं वर्द्धनं च दशोत्तरम् ॥ मंत्रोदकं च गंधोदं तथैव नृपसत्तम ॥ १६ ॥ इक्षो रसेन स्नपनं शतवाजिमखैः समम् ॥
तथैव तीर्थनीरं स फलं यच्छति भूमिप ॥१७॥ कृष्णं स्नानार्द्रगात्रं च वस्त्रेण परिमार्जति ॥ तस्य लक्षार्जितस्यापि भवेत्पापस्य मार्जनम् ॥१८॥
स्नापयित्वा जगन्नाथं पुष्पमालावरोहणम् ॥ कुरुते प्रतिपुष्पं तु स्वर्णनिष्कायुतं फलम् ॥ १९ ॥ स्नानकाले तु देवस्य शंखादीनां तु वादनम् ॥
कुरुते ब्रह्मलोके तु वसते ब्रह्मवासरम् ॥ २० ॥ स्नानकाले स कृष्णस्य पठेन्नामसहस्रकम् ॥ प्रत्यक्षरं लभेत्श्रेष्ठं कपिलागोशतोद्भवम् ॥ २१ ॥
फलमेतन्महीपाल गीतायाः परिकीर्त्तितम् ॥ गजेंद्रमोक्षणेनैवं स्तवराजेन कीर्त्तितम् ॥ २२ ॥ स्तवैर्ऋषिकृतैरन्यैः पठितैश्च नराधिप ॥ तोषमाप्नो
ति देवेशः सर्वान्कामान्प्रयच्छति ॥ २३ ॥ किं पुनर्वेदपाठं तु स्नानकाले करोति यः ॥ तस्य यल्लभते पुण्यं न ज्ञातं नरनायक ॥ २४ ॥ स्नान
काले च संप्राप्ते कृष्णस्याग्रे तु नर्तनम् ॥ गीतं चैव पुनस्तत्र स्तवनं वदनेन हि ॥२५ ॥ स्नानकाले तु कृष्णस्य जयशब्दं करोति यः ॥ करताल
समायुक्तं गीतनृत्यं करोति च ॥२६॥ तत्र चेष्टां प्रकुर्वाणो हसते जल्पतेऽपि वा ॥ मुक्तं तेन परं मातुर्योनियंत्रस्य निर्गमम् ॥ २७ ॥ नोत्तानशायी
भवति मातुरंके नरेश्वर ॥ गुणान्पठति कृष्णस्य यः काले स्नानकर्मणः ॥ २८ ॥ चंदनागुरुमिश्रेण कुंकुमेन सुगंधिना ॥ विलेपयति यः कृष्णं
कर्पूरमृगनाभिना ॥ कल्पं तु भवने विष्णोर्वसते पितृभिः सह ॥२९॥ प्रत्येकं चंदनादीनामिंद्रद्युम्न न चान्यथा ॥ नानादेशसमुद्भूतैः सुवस्त्रैश्च सुको
मलैः ॥ ३० ॥ धूपयित्वा सुगंधैश्च यो धूपयति मानवः ॥ मन्वंतराणि वसते तत्संख्यानि हरेर्गृहे ॥३१॥ स्वशक्त्या देवदेवेशं भूषणैर्भूषयंति च ॥
हेमजैरतुलैः शुभ्रैर्मणिजैश्च सुशोभनैः ॥ ३२ ॥ तेषां फलं महाराज रुद्राश्च वासवादयः ॥ ३३ ॥ जानंति मुनयो नैव वर्जयित्वा तु माधवम् ॥
येऽर्चयंति जगन्नाथं कृष्णं कलिमलापहम् ॥ केतकीतुलसीपत्रैः पुष्पैर्मालतिसंभवैः ॥ ३४ ॥ तद्देशसंभवैश्चान्यैर्भूरिभिः कुसुमैर्नृप ॥ एकैकं नृप
शार्दूल राजसूयसमं स्मृतम् ॥ ३५ ॥ ये कुर्वंति नराः पूजां स्वशक्त्या रुक्मिणीपतेः ॥ क्रीडंति विष्णुलोके ते मन्वंतरशतं नराः ॥ ३६ ॥ यः ॥३०५॥
पुनस्तुलसीपत्रैः कोमलमंजरीयुतैः ॥ पूजयेच्छ्रद्धया यस्तु कृष्णं देवकिनंदनम् ॥ ३७ ॥ या गतिर्योगयुक्तानां या गतिर्योगशालिनाम् ॥ या गति

१ एकया—द्वादश्या—इत्यर्थः । २ वन्दनेन हि—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुर्वतां जागरं विष्णोर्नृत्यतां गायतां फलम् ॥३९॥
दानशीलानां या गतिस्तीर्थसेविनाम् ॥ ३८ ॥ या गतिर्मातृभक्तानां द्वादशीं वेधवर्जिताम् ॥ तुलसीमालया कृष्णः पूजितो रुक्मिणी
वैष्णवानां तु भक्तानां यत्फलं वेदवादिनाम् ॥ पठतां वैष्णवं शास्त्रं वैष्णवानां तु यच्छताम् ॥ ४० ॥ द्वारकायां समुत्पन्ना विशेषेण
पतिः ॥ फलमेतन्महीपाल यच्छते नात्र संशयः ॥ ४१ ॥ यथा लक्ष्मीः प्रिया विष्णोस्तुलसी च ततोऽधिका ॥ योऽर्चयेत्केतकीपत्रैः कृष्णं
फलाधिका ॥ ४२ ॥ यत्र तत्र स्थितो विष्णुस्तुलसीदलमालया ॥ पूजितो द्वारकातुल्यं पुण्यं स यच्छते कलौ ॥ ४३ ॥ यत्फलं दुर्लभं
कलिमलापहम् ॥ पत्रेपत्रेऽश्वमेधस्य फलं यच्छति भूभुज ॥४४॥ योऽर्चयेन्मालतीपुष्पैः कृष्णं त्रिभुवनेश्वरम् ॥ तेनात्तं नास्ति संदेहो कृष्णं धूपयंति
हरेः ॥ ४५ ॥ ऋतुकालोद्भवैः पुष्पैर्योऽर्चयेद्रुक्मिणीपतिम् ॥ सर्वान्कामानवाप्नोति दुर्लभान्देवमानुषैः ॥ ४६ ॥ कृष्णेनागुरुणा पदं भूयः सदा
कलौ युगे ॥ सकर्पूरेण राजेन्द्र कृष्णतुल्या भवंति ते ॥ ४७ ॥ साज्येन गुग्गुलेनापि सुगंधेन जनार्दनम् ॥ धूपयित्वा नरो याति द्वारे कृष्णस्य यो नित्यं
शिवम् ॥ ४८ ॥ यो ददाति महीपाल कृष्णस्याग्रे तु दीपकम् ॥ पातकं तु समुत्सृज्य ज्योतीरूपं लभेत्पदम् ॥ ४९ ॥ कल्पांतं तत्पितॄणां हि
दीपमालां करोति हि ॥ सप्तद्वीपवतीराज्यं द्वीपेद्वीपे फलं लभेत् ॥ ५० ॥ नैवेद्यानि मनोज्ञानि कृष्णाय विनिवेदयेत् ॥ तांबूलं तु सक
तृप्तिर्भवति शाश्वती ॥ ५१ ॥ फलानि यच्छते यो वै सुहृद्यानि नरेश्वर ॥ जायंते तस्य कल्पांतं सफलास्तु मनोरथाः ॥ ५२ ॥ कल्पांते न जलापेक्षां
पूरं सपूगं नरनायक ॥ कृष्णाय यच्छते यो वै पदं तस्याग्निदैवतम् ॥ ५३ ॥ सनीरं कर्पुरोपेतं कुंभं कृष्णाग्रतो न्यसेत् ॥ तत्कुले नास्ति पापिष्ठो न च
कुर्वंति च पितामहाः ॥५४॥ व्यजनेनाथ वस्त्रेण सुभक्त्या मातरिश्वना ॥ देवदेवस्य राजेन्द्र कुरुते घर्मवारणम् ॥५५॥ सपुष्पकविमानैस्तु क्रीडते कोटि
लोके यमस्य च ॥ वायुलोकान्महीपाल न पुनर्विद्यते गतिः ॥५६॥ कृष्णवेश्मनि यः कुर्य्यात्सधूपं पुष्पमंडपम् ॥ कदलीस्तंभशोभितम् ॥
भिर्दिवि ॥५७॥ चलच्चामरवातेन कृष्णं यस्तोषयेन्नरः ॥ तस्योत्तमांगं देवेशश्चुंबते स्वमुखेन हि ॥५८॥ यः कुर्यात्कृष्णभवनं ॥ ६० ॥
स वसत्यर्कलोके तु यावद्वसति मेदिनी ॥ ५९ ॥ धूपं चंदनमालां तु कुरुते कृष्णसद्मनि ॥ देवकन्यायुतैर्लक्षैः सेव्यते सुरनायकैः ॥ देवदेव
ध्वजमारोपयेद्यस्तु प्रासादोपरि भक्तितः ॥ तस्य ब्रह्मपदे वासः क्रीडते ब्रह्मणा सह ॥ ६१ ॥ प्रांगणं वर्णकोपेतं स्वस्तिकैश्च समन्वितैः ॥ चित्रकर्म
स्य कुरुते क्रीडते भुवनत्रये ॥६२॥ यो दद्यान्मण्डपे पुष्पप्रकरं रुक्मिणीपतेः ॥ देवोद्यानेषु सर्वेषु क्रीडते नरनायकैः ॥६३॥ प्रासादे देवदेवस्य

१ मातरिश्वना—व्यजनवायुना—इत्यर्थः । २ चुंबते स्वमुखेन हि—एतेन--तस्मिन्कृष्णः स्वपुत्रवत्प्रीतिं कुर्यात्--इति सूचितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





करोति यः॥वसते रुद्रलोके तु यावत्तिष्ठंति सागराः॥६४॥दद्याच्चन्द्रमयं यस्तु कृष्णोपरि नरेश्वर॥वसते द्वारकां यावत्सोमलोके स तिष्ठति ॥६५॥
छत्रं बहुशलाकं तु किंकिणीवस्त्रगुण्ठितम् ॥ दिव्यरत्नैश्च संयुक्तं हेमदण्डसमन्वितम् ॥ ६६ ॥ समर्पयति कृष्णाय च्छत्रं लक्षार्बुदैर्वृतम् ॥ अमरैः
सहितः सर्वैः क्रीडते पितृभिः सह ॥ ६७ ॥ दद्यान्नरविमानं तु कृष्णाय नरनायक ॥ सत्कृतो धनदेनैव वसते ब्रह्मवासरम् ॥ ६८ ॥ कृत्वा पूजा
दिकं भूप ज्वलंतं कृष्णमूर्द्धनि ॥ आरार्तिकं प्रकुर्वाणो मोदते कृष्णसन्निधौ ॥ ६९ ॥ दीप्तिमंतं सकर्पूरं करोत्यारार्तिकं नृप ॥ कृष्णस्य वसते
लोके सप्तकल्पानि मानवः ॥ ७० ॥ धृत्वा शंखोदकं यस्तु भ्रामयेत्केशवोपरि ॥ संनिधौ वसते विष्णोः कल्पांतं क्षीरसागरे ॥ ७१ ॥ एवं कृत्वा
तु कृष्णस्य यः करोति प्रदक्षिणाम् ॥ पठन्नामसहस्रं तु स्तवमन्यं पठन्नृप ॥ सप्तद्वीपवतीपुण्यं लभते तु पदेपदे ॥ ७२ ॥ कुर्य्याद्दण्डनमस्कार
मश्वमेधायुतैः समम् ॥ कृष्णं संतोषयेद्यस्तु सुगीतैर्मधुरैः स्वरैः ॥ सामवेदफलं तस्य जायते नात्र संशयः ॥ ७३ ॥ यो नृत्यति प्रहृष्टात्मा भावैर्बहु
सुभक्तितः ॥ स निर्दहति पापानि मन्वंतरकृतान्यपि ॥ ७४ ॥ यः कृष्णाग्रे महाभक्त्या कुर्य्यात्पुस्तकवाचनम् ॥ प्रत्यक्षरं लभेत्पुण्यं कपिलाश
तदानजम् ॥ ७५ ॥ ऋग्यजुःसामभिर्वाग्भिः कृष्णं संतोषयंति ये ॥ कल्पांतं ब्रह्मलोके तु ते वसंति द्विजोत्तमाः ॥ ७६ ॥ योगशास्त्राणि वेदांता
न्पुराणं कृष्णसन्निधौ ॥ पठंति रविबिंबं ते भित्त्वा यांति हरेर्लयम् ॥ ७७ ॥ गीता नामसहस्रं तु स्तवराजो ह्यनुस्मृतिः ॥ गजेन्द्रमोक्षणं चैव कृष्ण
स्यातीव वल्लभम् ॥ ७८ ॥ श्रीमद्भागवतं यस्तु पठते कृष्णसन्निधौ ॥ कुलकोटिशतैर्युक्तः क्रीडते योगिभिः सदा ॥ ७९ ॥ यः पठेद्रामचरितं भारतं
व्यासभाषितम् ॥ पुराणानि महीपाल प्राप्तो मुक्तिं न संशयः ॥८०॥ द्वादशीवासरे प्राप्त एवं कुर्वंति ये नराः ॥ गीताद्यैः शतसाहस्रं पुण्यं यच्छति
केशवः ॥ ८१॥ जागरे कोटिगुणितं पुण्यं भवति भूमिप ॥ वसतां द्वारकावासात्प्रत्यहं लभते फलम् ॥८२॥ गोमतीनीरपूतानां कृष्णवक्त्रावलोकि
नाम् ॥ दर्शनात्पातकं तेषां याति वर्षशतार्जितम् ॥८३॥ धन्यास्ते मानुषे लोके गोमत्युदधिवारिणा ॥ तर्पयंति पितॄन्देवान्गत्वा द्वारवतीं कलौ ॥
॥८४॥ गंगाद्वारे प्रयागे च गंगायां कुरुजांगले ॥ प्रभासे शुक्रतीर्थे च श्रीस्थले पुष्करेऽपि च ॥८५॥ स्नानेन पिंडदानेन पितॄणां तर्पणे कृते ॥
तृप्तिर्भवति भूपाल तथा गोमतिदर्शनात् ॥८६॥ योजनैर्बहुभिस्तिष्ठन्गोमतीति च यो वदेत् ॥ चांद्रायणसहस्रस्य फलमाप्नोति यत्नतः ॥ ८७ ॥
धन्या द्वारवती लोके वहते यत्र गोमती ॥ स्वयं तु तिष्ठते यत्र नित्यं रुक्मिणिवल्लभः ॥८८॥ न स्नाता गोमतीतीरे कलौ पापेन मोहिताः ॥ भवि

१ चन्द्रमयम्–वितानम्–इत्यर्थः । २ आरार्तिकम्—दीपनीराजनम्–इत्यर्थः । ३ सप्तद्वीपवतीपुण्यम्–सप्तद्वीपवतीपृथ्वीदामजं पुण्यम्–इत्यर्थः । ४ सः–इति शेषः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्यति कथं तेषां पापबंधस्य संक्षयः ॥ ८९ ॥ निर्मिता स्वर्गनिःश्रेणी कलौ कृष्णेन गोमती ॥ मनसः प्रीतिजननी जंतूनां नरसत्तम ॥ ९० ॥ नद्दृश्यं स्वर्गसोपानं दृश्यते गोमतीसमम् ॥ सुखदं पापिनां पुंसां स्नानमात्रेण मोक्षदम् ॥ ९१ ॥ गोमतीनीरसंयुक्तो यत्र गर्जति सागरः ॥ तत्र गच्छेन्नरव्याघ्र कृष्णस्तिष्ठति यत्र वै ॥ ९२ ॥ यत्र चक्रांकितशिला गोमत्युदधिनिःसृताः ॥ यच्छंति पूजिता मोक्षं तां पुरीं को न सेवते ॥ ९३ ॥ यत्र चक्रांकिता मृत्स्ना तिष्ठते निर्मला नृप ॥ कलौ पापविनाशार्थं तां पुरीं को न सेवते ॥ ९४ ॥ अप्रदृश्या पुरा लोके दैत्यदानवरक्षसाम् ॥ शरण्या देवतादीनां पुरीं तां को न सेवते ॥ ९५ ॥ त्यजते यां कलौ नैव कृष्णो देवकिनन्दनः ॥ कर्मणा मनसा वाचा तां पुरीं को न सेवते ॥ ९६ ॥ ॥ मार्कंडेय उवाच ॥ ॥ शृणु राजन्प्रवक्ष्यामि कथां पापप्रणाशिनीम् ॥ यां श्रुत्वा मुच्यते नूनं दुःखसंसारबंधनात् ॥ ९७ ॥ अवन्तीविषये पूर्वं ब्राह्मणो वेदपारगः ॥ चंद्रशर्मेति विख्यातः शिवभक्तः सदा नृप ॥ ९८ ॥ मनसा कर्मणा वाचा नान्यं ध्याति सदाशिवात् ॥ शैवाद्व्रताद्व्रतं नान्यत्करोति च नराधिप ॥ ९९ ॥ नोपवासं हरिदिने कुरुते न व्रतं हरेः ॥ विना चतुर्दशीं राजन्नान्यदेवसमुद्भवम् ॥ १०० ॥ यत्रयत्र शिवक्षेत्रं यत्र तीर्थं तु शांकरम् ॥ तत्र गच्छति राजेन्द्र वैष्णवं नैव गच्छति ॥ १०१ ॥ प्रतिवर्षं तु कुरुते सोमनाथस्य दर्शनम् ॥ न जहाति विशेषेण सोमपर्व नरेश्वर ॥ १०२ ॥ एवं प्रकुर्वतस्तस्य वर्षाणि नवसप्ततिः ॥ गतानि किल राजेन्द्र शिवभक्तिं प्रकुर्वतः ॥ १०३ ॥ कदाचित्सोमपर्वण्यागते सोमोपनायकम् ॥ नानादेशान्महीपाल ह्यसंख्याताश्च मानवाः ॥ ॥ १०४ ॥ गताः कृष्णपुरीं सर्वे दृष्ट्वा सोमेश्वरं प्रभुम् ॥ आहूतस्तैश्चंद्रशर्मा न गतो द्वारकां पुरीम् ॥ १०५ ॥ शिवक्षेत्रात्परं तीर्थं नाहं मन्ये जगत्त्रये ॥ नान्यदेवो मया ज्ञात ईश्वराद्देवनायकात् ॥ १०६ ॥ विनाऽन्ये चंद्रशर्माणं गतास्ते द्वारकां पुरीम् ॥ १०७ ॥ अन्यस्मिन्दिवसे राजन्गच्छतः स्वगृहं प्रति ॥ चक्रुस्ते दर्शनं स्वप्ने चंद्रशर्मपितामहाः ॥ १०८ ॥ प्रेतभूता महाकायाः क्षुत्क्षामाश्चैव भीषणाः ॥ दृष्ट्वा स्वप्नं महारौद्रं भीतोऽसौ च प्रकंपितः ॥ १०९ ॥ ॥ चन्द्रशर्मोवाच ॥ ॥ के यूयं विकृताकारा जंतूनां च भयानकाः ॥ पृथ्वीसमुद्भवा जीवा न दृष्टा न श्रुता मया ॥ ११० ॥ ॥ प्रेता ऊचुः ॥ ॥ मा भयं कुरु विप्रेंद्र तव पूर्वपितामहाः ॥ आगतास्त्वत्समीपे तु महादुःखेन पीडिताः ॥ १११ ॥ ॥ चन्द्रशर्मोवाच ॥ ॥ इष्टं दत्तं तपस्तप्तं भवद्भिर्मत्पितामहैः ॥ प्रेतत्वे कारणं यत्स्याद्भवतां विस्मयो मम ॥११२॥ ॥ प्रेता ऊचुः ॥ ॥ शृणु पुत्र प्रवक्ष्यामः प्रेतयोनेस्तु कारणम् ॥ वासरं वासुदेवस्य सदा विद्धं कृतं पुरा ॥ ११३ ॥ प्रेतत्वं तेन संप्राप्तमस्माभिः शृणु पुत्रक ॥ विशेषेण कृतं रात्रौ



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





विद्धं जागरणं हरेः ॥ ११४ ॥ पतनं नरके घोरे भविष्यति न संशयः ॥ त्वया सह न संदेहो यावदाभूतसंप्लवम् ॥ ११५ ॥ चन्द्रशर्मोवाच ॥ ॥ हरिभक्तिविहीनानां द्वादशीव्रतवर्जिनाम् ॥ नाशं न याति प्रेतत्वं पूजितैः शंकरादिभिः ॥११६॥ न वा सन्तोषितो देवो भक्त्या त्रिपुरनाशनः ॥ प्रदास्यति गतिं नूनं प्रेतत्वं न गमिष्यति ॥ ११७ ॥ ॥ प्रेता ऊचुः ॥ ॥ प्रायश्चित्तं विना पुत्र द्वादशीवेधसंभवम् ॥ आपन्न गच्छते नूनं प्रेतत्वं नैव गच्छति ॥ ११८ ॥ प्रायश्चित्ती सदा पुत्र पूजयानोऽपि शंकरम् ॥ विना केशवपूजाभिः पापं भजति गोवधम् ॥ ११९ ॥ प्रथमं केशवः पूज्यः पश्चाद्देवो महेश्वरः ॥ पूजनीयाश्च भक्त्या वै याश्चान्याः संति देवताः ॥ १२० ॥ मूलाच्छाखाः प्रशाखाश्च भवंति बहुशस्ततः ॥ वासुदेवात्समुद्भूतं जगदेतच्चराचरम् ॥ १२१ ॥ तस्मान्मूलं परित्यज्य शाखां नैवार्चयेद्बुधः ॥ विशेषेण जगन्नाथं त्रैलोक्याधिपतिं हरिम् ॥ १२२ ॥ तद्दिने ये प्रकुर्वंति सम्यग्वेधेन शोभितम् ॥ सशल्यं तन्न संदेहः प्रेतत्वं याति तेन च ॥ १२३ ॥ हव्यं देवा न गृह्णन्ति कव्यं च पितरस्तथा ॥ पूजां गृह्णाति नो सूर्य्यस्तथा चैव पितामहाः ॥ १२४ ॥ प्रेतास्ते ये प्रकुर्वंति सशल्यं वासरं हरेः ॥ पौर्णमासीद्वये प्राप्ते राका साग्निविवर्जिता ॥ १२५ ॥ विशेषेण तु वैशाखी श्राद्धादीनां प्रशस्यते ॥ वैशाखे तु तृतीयां वै पूर्वविद्धां करोति यः ॥ १२६ ॥ हव्यं देवा न गृह्णंति कव्यं चैव पितामहाः[1] ॥ यत्र देवा न गृह्णंति कथं तत्र पितामहाः ॥ तस्मात्कार्य्या तृतीया च पूर्वविद्धा बुधैर्नरैः ॥ १२७ ॥ कुर्वते यदि मोहाद्वा प्रेतत्वं शाश्वतं ततः ॥ नापयाति कृतैः पुण्यैर्बहुशस्तीर्थसेवनैः ॥ १२८ ॥ दशमीं पौर्णमासीं च पित्रोः सांवत्सरं दिनम् ॥ पूर्वविद्धं प्रकुर्वाणो नरकं प्रतिपद्यते ॥ १२९ ॥ दर्शश्च पौर्णमासी च साग्निकैः पूर्वसंयुता ॥ नाग्निहीनैस्तु कर्त्तव्या पुनराह प्रजापतिः ॥१३०॥ क्षयाहे तु पुनः प्रोक्ता स्वकालव्यापिनी तिथिः ॥ श्राद्धं तत्र प्रकर्तव्यं ह्रासवृद्धी न कारणम् ॥ १३१ ॥ तत्रोक्तं मनुना पुत्र वेदांतैर्भाष्यकारिभिः ॥ तत्प्रमाणं प्रकर्तव्यं प्रेतत्वं भवतोऽन्यथा ॥ ॥ १३२ ॥ एतैः प्रकारैः प्रेतत्वं प्राणिनां जायते भुवि ॥ निरीक्ष्य धर्मशास्त्राणि कार्य्यं विहितमात्मनः ॥ १३३ ॥ प्रणम्य सोमनाथं तु यात्रां कृत्वा न गच्छति ॥ कृष्णस्य दर्शनार्थाय तस्य किं जायते फलम् ॥ १३४ ॥ कथ्यते परमा मूर्तिर्हरिरीश्वरसंस्थिता ॥ विभेदो नात्र कर्तव्यो यथा शंभुस्तथा हरिः ॥ १३५ ॥ कृष्णस्य सोमनाथस्य नांतरं दृश्यते क्वचित् ॥ यात्रा श्रीसोमनाथस्य संपूर्णा कृष्णदर्शनात् ॥ १३६ ॥ तस्मादुभयतः पुत्र गन्तव्यं नात्र संशयः ॥ दृष्ट्वा सोमेश्वरं देवं गंतव्यं द्वारकां प्रति ॥ १३७ ॥ प्रभासे



१ 'कलाहीने साऽनुमतिः पूर्णे राका निशाकरे ।' इत्युक्तलक्षणा राका द्वितीयदिनपौर्णमासी साग्नेरग्निहोत्रिणो विवर्जिता--तस्य प्रतिपदि पौर्णमासयागसाधनत्वेन पूर्वपौर्णमास्यां एवेष्टत्वात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सोमनाथस्य लिंगमध्ये व्यवस्थितः ॥ स्वयं तिष्ठति पुण्यात्मा भोगं गृह्णाति केशवः ॥ १३८ ॥ दृष्ट्वा सोमेश्वरं देवं द्वारकां न नरो गतः ॥
पतनं नरके घोरे पितॄणां च भविष्यति ॥ १३९ ॥ विशेषेण त्वया वत्स न कृतं द्वादशीव्रतम् ॥ व्रतं कृतं यदस्माभिस्तत्कृतं वेधसंयुतम् ॥ निर्गमं
यमलोकाद्धि तदस्माकं न दृश्यते ॥ १४० ॥ ॥ चन्द्रशर्मोवाच ॥ ॥ यदि तात मयाऽज्ञानान्न कृतं द्वादशीव्रतम् ॥ कस्मात्कृतं सशल्यं तु
भवद्भिर्द्वादशीव्रतम् ॥ १४१ ॥ ॥ प्रेता ऊचुः ॥ ॥ कुविप्रैस्तु कुदैवज्ञैः शुक्रमायाविमोहितैः ॥ पा[1]रुष्यताहेतुकैश्च प्रेतयोनिमिमां गताः ॥
॥ १४२ ॥ दत्तं तप्तं हुतं जप्तमस्माकं विफलं गतम् ॥ संप्राप्ता प्रेतयोनिस्तु सशल्याद्द्वादशीव्रतात् ॥ १४३ ॥ सशल्यं ये प्रकुर्वंति वासरं केशव
प्रियम् ॥ तेषां पितामहाः स्वर्गात्प्रेतत्वं यांति पुत्रक ॥ १४४ ॥ ॥ चन्द्रशर्मोवाच ॥ ॥ प्रेतत्वं नाशमायाति कथमेतत्पितामहाः ॥ कर्मणा
केन तत्सर्वं यच्चाहं प्रकरोमि तत् ॥ १४५ ॥ ॥ प्रेता ऊचुः ॥ ॥ मा गयां मा प्रयागं च पुष्करे कुरुजांगले ॥ अयोध्यायामवंत्यां वा मथुरायां
न चार्बुदे ॥ १४६ ॥ न चान्यत्तीर्थलक्षं तु वर्जयित्वा तु गोमतीम् ॥ गंगा सरस्वती चैव नर्मदा नैव पुष्करम् ॥ १४७ ॥ यादृशं गोमतीतीरे
कलौ प्रेतत्वनाशनम् ॥ गोमतीनीरदानेन कृष्णवक्त्रविलोकनात् ॥ १४८ ॥ विलयं यांति पापानि जन्मकोटिकृतान्यपि ॥ वृथा संन्यासिनां
पुण्यं वृथा च वनवासिनाम् ॥ १४९ ॥ सशल्यं वासरं विष्णोः कुर्वंति यदि पुत्रक ॥ तस्माद्गच्छ मुखं पश्य पूर्णचन्द्रसमं मुखम् ॥ १५० ॥
कृष्णस्य द्वारकां गत्वा यथास्माकं गतिर्भवेत् ॥ विफलं तव संजाता न कृतं यदुपार्ज्जितम् ॥ १५१ ॥ तद्व्यर्थं सकलं जातं विना केशव
पूजनात् ॥ विना केशवपूजायाः शंकरो यस्त्वयार्चितः ॥ तत्पुण्यं विफलं जातं प्रेतयोनिं गमिष्यसि ॥ १५२ ॥ संपूर्णं तव पुण्यं च द्वारका
कृष्णदर्शनात् ॥ भविष्यति न सन्देहो गोमत्युदधिसन्निधौ ॥ १५३ ॥ दृष्ट्वा सोमेश्वरं देवं कृष्णं यदि न पश्यति ॥ यात्राफलं न चाप्नोति वदत्येवं
स्वयं शिवः ॥ १५४ ॥ दृष्टोऽहं तैर्न सन्देहो यैः कृतं कृष्णदर्शनम् ॥ एका मूर्तिर्न सन्देहो मम कृष्णस्य नांतरम् ॥ १५५ ॥ दृष्ट्वा मां द्वारकां
गत्वा कर्त्तव्यं कृष्णदर्शनम् ॥ दृष्ट्वा कृष्णं तु मां पश्येद्यास्यत्येव महाफलम् ॥ १५६ ॥ कृष्णदर्शनपूतात्मा यो मां पश्यति मानवः ॥ न तस्य
पुनरावृत्तिर्मम लोकाच्च वैष्णवात् ॥ १५७ ॥ इत्याह देवदेवेशः स्वयं सोमपतिः पुरा ॥ विप्राणां श्रुतमस्माभिर्वदतां पुष्करे सताम् ॥ १५८ ॥
तस्माद्गच्छ प्रयाणार्थं कुरु कृष्णस्य दर्शनम् ॥ अन्यथा यास्यसे योनिं पैशाचीं पापदायिनीम् ॥ १५९ ॥ कृतापराधोऽपि यदा कुरुते कृष्ण

१ कारुपिताहेतुकैश्च-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



दर्शनम् ॥ मुच्यते नाऽत्र संदेहः पापाज्जन्मकृतादपि ॥ १६० ॥ पूजिते देवदेवेशे कृष्णे देवकिनन्दने ॥ पूजिता देवताः सर्वा ब्रह्मरुद्रमुखा
दिकाः ॥ १६१ ॥ विना कृष्णस्य पूजां च रुद्राद्यास्त्रिदिवौकसः ॥ पूजिता नैव कुर्वंति तुष्टिं पुत्र पितामहाः ॥ १६२ ॥ तस्माद्द्वारवतीं गत्वा
कृष्णस्य दर्शनं कुरु ॥ प्रेतयोनेर्विनिर्मुक्ता यास्यामः परमां गतिम् ॥ १६३ ॥ गोमतीनीरधौतानि यस्यांगानि कलौ युगे ॥ मुनिभिर्योनिगमनं
तस्य दृष्टं न पुत्रक ॥ १६४ ॥ ताडिताः पादयुग्मेन गोमतीनीरवीचयः ॥ अगतीनां प्रकुर्वंति गतिं वै ब्रह्मवादिनाम् ॥ १६५ ॥ यः पुनः कुरुते
श्राद्धं गोमत्युदधिसंगमे ॥ पितॄणां जायते तृप्तिर्यावदाभूतसंप्लवम् ॥ १६६ ॥ ससागरधरायां च सर्वतीर्थेषु यत्फलम् ॥ दिनेनैकेन तत्पुण्यं
द्वारकाकृष्णसन्निधौ ॥ १६७ ॥ यत्फलं त्रिदशैर्दृष्टं सर्वतीर्थसमुद्भवम् ॥ तत्फलं लभते सर्वं द्वारकायां दिनेदिने ॥ १६८ ॥ तीर्थकोटिसहस्रैस्तु
कृतैः श्राद्धैश्च यत्फलम् ॥ पितॄणां तत्फलं प्रोक्तं गोमतीतिलतर्पणात् ॥ १६९ ॥ यतीनां भोजनं यस्तु यच्छते कृष्णमन्दिरे ॥
सिक्थेसिक्थे भवेत्तृप्तिः पितॄणां युगसंख्यया ॥ १७० ॥ कौपीनाच्छादनं छत्रं पादुके च कमण्डलुम् ॥ दत्त्वा संन्यासिनां याति सप्त
कल्पानि तत्फलम् ॥ १७१ ॥ धन्यास्ते मानवाः पुत्र वसन्ति श्वपचादयः ॥ द्वारकायां गतिं यांति वसतां तत्र योगिनाम् ॥
॥ १७२ ॥ त्रिकालं ये प्रपश्यंति वदनं प्रत्यहं हरेः ॥ न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥ १७३ ॥ या नारी विधवा भूत्वा कुरुते द्वारकाश्र
यम् ॥ कुलायुतसहस्रं तु नयते परमं पदम् ॥ १७४ ॥ पुत्रेणापीह किं कार्यं न गतो द्वारकां यदि ॥ नारी पुत्रशताच्छ्रेष्ठा गत्वा कृष्णपुरीं वसेत् ॥
॥ १७५ ॥ कृष्णं कृष्णपुरीं गत्वा योऽर्चयेत्तुलसीदलैः ॥ प्राप्तं जन्मफलं तेन तारिताः प्रपितामहाः ॥ १७६ ॥ तुलसीदलमालां तु कृष्णो
त्तीर्णां तु यो वहेत् ॥ पत्रेपत्रेऽश्वमेधानां दशानां लभते फलम् ॥ १७७ ॥ तुलसीकाष्ठसंभूतां यो मालां वहते नरः ॥ फलं यच्छति दैत्यारिः प्रत्यहं
द्वारकोद्भवम् ॥ १७८ ॥ निवेद्य विष्णवे मालां तुलसीकाष्ठसंभवाम् ॥ वहते यो नरो भक्त्या तस्य नैवास्ति पातकम् ॥ सदा प्रीतमनास्तस्य
कृष्णो देवकिनंदनः ॥ १७९ ॥ तुलसीकाष्ठसंभूतं शिरोबाह्वादिभूषणम् ॥ जायते यस्य मर्त्यस्य तस्य देहे सदा हरिः ॥ १८० ॥ तुलसीमालया
यस्तु भूषितः कर्म चाऽऽचरेत् ॥ पितॄणां देवतानां च कृतं कोटिगुणं कलौ ॥ १८१ ॥ तुलसीकाष्ठमालां तु प्रेतराजस्य दूतकाः ॥ दृष्ट्वा दूरेण नश्यंति ॥३०८॥
वातोद्धूता यथाऽलयः ॥ १८२ ॥ जायते तद्गृहे नैव पापसंक्रमणं कुतः ॥ श्रुतं पुराणमस्माभिः कथितं ब्रह्मवादिभिः ॥ १८३ ॥ तस्मान्माला

१ या–इति शेषः । २ अलयः–भ्रमराः । ३ कुतः–कुतोऽपि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वया धार्य्या तुलसीकाष्ठसंभवा ॥ हरते नात्र संदेह ऐहिकामुष्मिकं त्वघम् ॥ १८४ ॥ तुलसीमालया यस्तु भूषितो भ्रमते यदि ॥ दुःस्वप्नं दुर्नि
मित्तं च न भयं शात्रवं क्वचित् ॥ १८५ ॥ कृत्वा वै तीर्थसंन्यासं यतयो विधवाः स्त्रियः ॥ जीवन्मुक्ताः कलौ ज्ञेयाः कुलकोटिसमन्विताः ॥
॥ १८६ ॥ धारयंति न ये मालां हैतुकाः पापमोहिताः ॥ नरकान्न निवर्त्तंते दग्धाः कोपाग्निना हरेः ॥ १८७ ॥ उन्मीलिनी वंजुलिनी त्रिस्पृशा
पक्षवर्द्धिनी ॥ त्वया पुत्र प्रकर्त्तव्या जयंती विजया जया ॥ १८८ ॥ पापघ्नी चाष्टमी प्रोक्ता कृष्णस्यातीव वल्लभा ॥ कृता कलौ युगे पुत्र द्वारका
मोक्षदायिनी ॥ १८९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे चतुर्थे द्वारकामाहात्म्ये द्वारकागमनमाहात्म्य
तुलसीधारणमाहात्म्यवर्णनंनाम त्रयोविंशतितमोऽध्यायः ॥ २३ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ पितॄणां प्रेतरूपाणां कृत्वा वाक्यं
महीपते ॥ चंद्रशर्मा द्विजश्रेष्ठो द्वारकां समुपागतः ॥ १ ॥ रुक्मिणीसहितः कृष्णो यत्र तिष्ठति चान्वहम् ॥ यत्र तिष्ठंति तीर्थानि तत्र यातो
द्विजोत्तमः ॥ २ ॥ यत्र तिष्ठंति यज्ञाश्च यत्र तिष्ठंति देवताः ॥ यत्र तिष्ठंति ऋषयो मुनयो योगवित्तमाः ॥ ३ ॥ या पुरी सिद्धगंधर्वैः सेव्यते
किंनरैर्नरैः ॥ अप्सरोगणयक्षैश्च द्वारका सर्वकामदा ॥ ४ ॥ स्वर्गारोहणनिश्रेणी वहते यत्र गोमती ॥ सा पुरी मोक्षदा नृणां दृष्टा विप्रवरेणहि ॥५॥
यस्याः सीमां प्रविष्टस्य ब्रह्महत्यादिपातकम् ॥ नश्यते दर्शनादेव तां पुरीं को न सेवते ॥ ६ ॥ गत्वा कृष्णपुरीं दृष्ट्वा गोमतीं चैव सागरम् ॥
मन्ये कृतार्थमात्मानं जीवितं यौवनं धनम् ॥ ७ ॥ दृष्ट्वा कृष्णपुरीं रम्यां कृष्णस्य मुखपंकजम् ॥ धन्योऽहं कृत्यकृत्योऽहं सभाग्योऽहं धरातले ॥
॥ ८ ॥ दृष्ट्वा कृष्णमुखं रम्यं रुक्मिणीं द्वारकां पुरीम् ॥ तीर्थकोटिसहस्रैस्तु सेवितैः किं प्रयोजनम् ॥९॥ पुण्यैर्लक्षसहस्रैस्तु प्राप्ता द्वारवती शुभा ॥
शुक्ला वैशाखमासे तु संप्राप्ता मधुसूदनी ॥ १० ॥ द्वादशी त्रिस्पृशानाम पापकोटिशतापहा ॥ धन्याः सर्वे मनुष्यास्ते वैशाखे मधुसूदनी ॥११॥
संप्राप्ता त्रिस्पृशा यैस्तु बुधवारेण संयुता ॥ न यज्ञैस्तु न वेदैस्तु न तीर्थैः कोटिसेवितैः ॥ प्राप्यते तत्फलं नैव द्वारकायां यथा नृणाम् ॥ १२ ॥
एवमुक्त्वा द्विजश्रेष्ठो गोमतीतीरमाश्रितः ॥ उपस्पृश्य यथान्यायं शास्त्रदृष्टेन कर्मणा ॥ १३ ॥ कृत्वा स्नानं यथोक्तं तु संतर्प्य पितृदेवताः ॥ चक्र
तीर्थात्समादाय शैलांश्चक्रांकितान्छुभान् ॥ पूजिताः पुरुषसूक्तेन यथोक्तविधिना नृप ॥ १४ ॥ शिवपूजा कृता पश्चात्संस्मृत्य पितृभाषितम् ॥
दत्त्वा पिंडोदकं सम्यक्पितॄणां विधिपूर्वकम् ॥१५॥ विलेपनं च वस्त्राणि पुष्पाणि धूपदीपकौ ॥ नैवेद्यानि मनोज्ञानि कंदमूलफलानि च ॥ १६ ॥
तांबूलं च सकर्पूरं कृत्वा नीराजनादिकम् ॥ प्रदक्षिणां नमस्कारं स्तुतिपूर्वं पुनःपुनः ॥ १७ ॥ क्षमापयित्वा देवेशं चक्रे जागरणं ततः ॥ यामत्रये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



व्यतीते तु चंद्रशर्मा ह्युवाच ह ॥ १८ ॥ आतुरस्य च दीनस्य शृणु कृष्ण वचो मम ॥ संसारभयसंत्रस्तं मां त्वमुद्धर केशव ॥१९॥ त्वत्पादांबुज भक्तानां न दुःखं पापिनामपि ॥ किं पुनः पापहीनानां द्वादशीसेविनां नृणाम् ॥२०॥ दशमीवेधजं पापं कथितं मम पूर्वजैः ॥ दुष्कृतं नाशमायातु त्वत्प्रसादाज्जनार्दन ॥ २१ ॥ सविद्धं त्वद्दिनं कृष्ण यत्कृतं जागरं हरे ॥ तत्पापं विलयं यातु यथा लवणमंभसि ॥ २२ ॥ सविद्धं वासरं यस्मा त्कृतं मम पितामहैः ॥ प्रेतत्वं तेन संप्राप्तं महादुःखप्रसाधकम् ॥ २३ ॥ यथा प्रेतत्वनिर्मुक्ता मम पूर्वपितामहाः ॥ मुक्तिं प्रयांति देवेश तथा कुरु जगत्पते ॥ २४ ॥ पुनरेव यदुश्रेष्ठ प्रसादं कर्त्तुमर्हसि ॥ अविद्यामोहितेनापि न कृतं तव पूजनम् ॥ २५ ॥ मया पापेन देवेश शिवभक्तिः समाश्रिता ॥ तव भक्तिः कृता नैव न कृतं तव वासरम् ॥ २६ ॥ न दृष्टा द्वारका कृष्ण न स्नातो गोमतीजले ॥ न दृष्टं पादपद्मं च त्वदीयं मोक्षदा यकम् ॥ २७ ॥ न कृता द्वारकायात्रा दृष्ट्वा सोमेश्वरं प्रभुम् ॥ विफलं सुकृतं जातं यन्मया समुपार्जितम् ॥ २८ ॥ मत्पूर्वजैस्तु कथितं सर्वमेव सुरेश्वर ॥ तत्पुण्यं मा वृथा यातु प्रसादात्तव केशव ॥ २९ ॥ दृष्टं तु तव वक्त्रं च दुर्लभं भुवनत्रये ॥ तन्नास्ति देवकीपुत्र पुराणेषु श्रुतं मया ॥३०॥ सापराधास्तु ये केचिच्छिशुपालादयः स्मृताः ॥ त्वत्करेण हताः कोपान्मुक्तिं प्राप्ता महीवराः ॥ ३१ ॥ अद्यप्रभृति कर्त्तव्यं पूजनं प्रत्यहं च तव॥ पलार्द्धेनापि विद्धं स्याद्वोक्तव्यं वासरे तव ॥ ३२ ॥ त्वत्प्रिया च मया कार्य्या द्वादशी व्रतसंयुता ॥ भक्तिर्भागवतानां च कार्य्या प्राणैर्द्धनैरपि ॥ ॥ ३३ ॥ नित्यं नामसहस्रं तु पठनीयं तव प्रियम् ॥ पूजा तु तुलसीपत्रैर्मया कार्या सदैव हि ॥ ३४ ॥ तुलसीकाष्ठसंभूता माला धार्य्या सदा मया ॥ नृत्यं गीतं च कर्त्तव्यं संप्राप्ते जागरे तव ॥ ३५ ॥ द्वारकायां प्रकर्त्तव्यं प्रत्यहं गमनं मया ॥ त्वत्कथाश्रवणार्थं च नित्यं पुस्तकवाच नम् ॥ ३६ ॥ नित्यं पादोदकं मूर्ध्ना मया धार्य्यं सुभक्तितः ॥ नैवेद्यभक्षणं चैव करिष्यामि सुभक्तितः ॥ ३७ ॥ निर्माल्यं शिरसा धार्य्यं त्वदीयं सादरं मया ॥ तव दत्त्वा यदिष्टं तु भक्षणीयं सदा मया ॥ ३८ ॥ तथातथा प्रकर्त्तव्यं येन तुष्टिर्भवेत्तव ॥ तथ्यमेतन्मया कृष्ण तवाग्रे परिकीर्ति तम् ॥ ३९ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ साधुसाधु महाभाग चन्द्रशर्मन्द्विजोत्तम ॥ आगमिष्यंति मल्लोके त्वया सह पितामहाः ॥ ४० ॥ पश्य प्रेतत्वनिर्मुक्ता मत्प्रसादाद्द्विजोत्तम ॥ आकाशे गरुडारूढास्तव पूर्वपितामहाः ॥ ४१ ॥ ॥ पितामहा ऊचुः ॥ ॥ त्वत्प्रसादाद्वयं पुत्र मुक्तिं प्राप्ता न संशयः ॥ प्रेतयोनेर्विनिर्मुक्ताः कृष्णवक्त्रावलोकनात् ॥ ४२ ॥ धन्यास्ते मानुषे लोके पुत्रपौत्रप्रपौत्रकाः ॥ दृष्ट्वा श्रीसोमनाथं तु कृष्णं पश्यंति द्वारकाम् ॥ ४३ ॥ धन्या च विधवा नारी कृष्णयात्रां करोति या ॥ उद्धरिष्यति लोकेऽस्मिन्कुलानां निरयाच्छतम् ॥ ४४ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वपचोऽपि करोत्येवं यात्रां च हरिशांकरीम् ॥ स याति परमां मुक्तिं पितृभिः परिवारितः ॥ ४५ ॥ यः पुनस्तीर्थसंन्यासं कृत्वा तिष्ठति तत्र वै ॥ विष्णुलोकान्निवृत्तिर्न कल्पकोटिशतैरपि ॥ ४६ ॥ वंचितास्ते न सन्देहो दृष्ट्वा सोमेश्वरं प्रभुम् ॥ दृष्टं कृष्णमुखं नैव न स्नाता गोमतीजले ॥ ४७ ॥ किं जलैर्बहुभिः पुण्यैस्तीर्थकोटिसमुद्भवैः ॥ दृष्ट्वा सोमेश्वरं यस्तु द्वारकां नैव गच्छति ॥ धिक्कुर्वंति च तं पापं पितरो दिवि संस्थिताः ॥ ४८ ॥ दृष्ट्वा सोमेश्वरं देवं कृष्णं दृष्ट्वा पुनः शिवम् ॥ सौर्पर्णे कथितं पुण्यं यात्राशतसमुद्भवम् ॥ ४९ ॥ दृष्ट्वा सोमेश्वरं देवं कृष्णं नैव प्रपश्यति ॥ मोहा द्व्यर्थं गतं तस्य सर्वं संसारकर्म वै ॥ ५० ॥ आगत्य यः प्रभासे च कृष्णं पश्यति वै नरः ॥ प्रभासायुतसंख्यं तु फलमाप्नोति यत्नतः ॥ ५१ ॥ यस्मात्सर्वाणि तीर्थानि सर्वे देवास्तथा मखाः ॥ द्वारकायां समायांति त्रिकालं कृष्णसंनिधौ ॥ ५२ ॥ तीर्थैर्नानाविधैः पुत्र तत्स्थानैः किं प्रयोजनम् ॥ फलं समस्ततीर्थानां दृष्ट्वा द्वारवतीं लभेत् ॥ ५३ ॥ हते कंसे जरासन्धे नरके च निपातिते ॥ उत्तारिते भुवो भारे कृष्णो देवकिनंदनः ॥ चक्रे द्वारवतीं रम्यां सन्निधौ सागरस्य च ॥ ५४ ॥ स्थितः प्रीतमनाः कृष्णो लप्स्यते कामिनीसुखम् ॥ ५५ ॥ ब्रह्माग्निवायुसूर्याश्च वासवाद्या दिवौकसः ॥ मर्त्या विप्राश्च राजानः पातालात्पन्नगेश्वराः ॥ ५६ ॥ नद्यो नदाश्च शैलाश्च वनान्युपवनानि च ॥ पुरग्रामा ह्यरण्यानि सागराश्च सरांसि च ॥ ५७ ॥ यक्षाश्चासुरगंधर्वाः सिद्धा विद्याधरास्तथा ॥ रम्भाद्यप्सरसश्चैव प्रह्लादाद्या दितेः सुताः ॥ रक्षाँ विभीषणाद्याश्च धनदो यक्षनायकः ॥ ५८ ॥ ऋषयो मुनयः सिद्धाः सनकाद्याश्च योगिनः ॥ ग्रहा ऋक्षाणि योगाश्च ध्रुवः परमवैष्णवः ॥ ५९ ॥ यत्किंचित्त्रिषु लोकेषु तिष्ठते स्थाणुजंगमम् ॥ श्रीकृष्णसन्निधौ नित्यं प्रत्यहं तिष्ठते सदा ॥ ६० ॥ न त्यजंति पुरीं पुण्यां द्वारकां कृष्णसेविताम् ॥ सा त्वया सेविता पुत्र सांप्रतं कृष्णदर्शनात् ॥ पिशाचयोनिनिर्मुक्ता यास्यामः परमां गतिम् ॥ ६१ ॥ द्वादशीवेधजं पापं द्वारकायाः प्रभावतः ॥ नष्टं पुत्र न सन्देहः संप्राप्ताः परमं पदम् ॥ ६२ ॥ द्वादशीवेधसम्भूतं यत्त्वया पापमर्जितम् ॥ कृष्णस्य दर्शनात्क्षीणं न जह्यं द्वादशीव्रतम् ॥ ६३ ॥ रक्षणीयं प्रयत्नेन वेधो दशमिसंम्भवः ॥ नो चेत्पुत्र न संदेहः प्रेतयोनिमवाप्स्यसि ॥ ६४ ॥ त्रैलोक्यसंभवं पापं तेषां भवति भूतले ॥ सशल्यं ये प्रकुर्वंति वासरं कृष्णसंज्ञकम् ॥ ६५ ॥ प्रायश्चित्तं न तस्यास्ति सशल्यं वासरं हरेः ॥

१ तस्य--इति शेषः । २ यैः--इति शेषः । ३ ये--इति शेषः । ४ सौपर्णे--गारुडमहापुराणे--इत्यर्थः । ५ तत्स्थानैः--तत्तत्तीर्थनियतावस्थितिप्रयागामरकण्टकादिप्रदेशैः--इत्यर्थः । ६ दितेःसुताः--दितेर्वंशजाः-दैत्याः--इत्यर्थः । ७ रक्षाः--राक्षसाः--इत्यर्थः । पुंस्त्वमकारांतत्वं चार्षम् । ८ न जह्यम्--न त्याज्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ये कुर्वंति न ते यांति मन्वंतरशतैर्दिवम् ॥ ६६ ॥ प्रेतत्वं दुःसहं पुत्र दुःसहा यमयातना ॥ तस्मात्पुत्र न कर्त्तव्यं सशल्यं द्वादशीव्रतम् ॥ ६७ ॥
कारयंति हि ये त्वज्ञाः कूटयुक्ताश्च हेतुकाः ॥ प्रेतयोनिं प्रयास्यंति पितृभिः सह सर्वतः ॥ ६८ ॥ द्वादशी दशमीविद्धा संतानप्रविनाशिनी ॥ ध्वं
सिनी पूर्वपुण्यानां कृष्णभक्तिविनाशिनी ॥६९॥ स्वस्ति तेऽस्तु गमिष्यामः प्रसादाद्रुक्मिणीपतेः ॥ प्राप्तं विष्णुपदं पुत्र अपुनर्भवसंज्ञकम् ॥७०॥
॥ ॥ श्रीकृष्ण उवाच ॥ ॥ चंद्रशर्मन्प्रसन्नोऽहं तव भक्त्या द्विजोत्तम ॥ शैवभावप्रपन्नोऽपि यस्त्वं जातोऽसि वैष्णवः ॥ ७१ ॥ नवसप्ततिवर्षाणि
न कृतं वासरं मम ॥ संपूर्णं मत्प्रसादेन तव जातं न संशयः ॥७२॥ एकेनैवोपवासेन त्रिस्पृशासंभवेन हि ॥ द्वारकायाः प्रसादेन मद्दृष्ट्यालोकनेन
हि ॥ ७३ ॥ अविद्यामोहितेनैव शिवभक्त्या समार्चनम् ॥ न कृतं मत्प्रसादेन कृतं चैव भविष्यति ॥ ७४ ॥ वैशाखे यैरहं दृष्टो द्वारकायां द्विजो
त्तम ॥ त्रिस्पृशावासरे चैव वंजुलीवासरे तथा ॥ ७५ ॥ उन्मीलिनीदिने प्राप्ते प्राप्ते वा पक्षवर्द्धिनी ॥ नैतेषां चापराधोऽस्ति यद्यपि ब्रह्मघातकाः
॥ ७६ ॥ जन्मप्रभृति पुण्यस्य प्रकृतस्यापि भूसुर ॥ मत्पुरीदर्शनेनापि फलभागी भवेन्नरः ॥ ७७ ॥ दृष्ट्वा समस्ततीर्थानि प्रभासादीनि भूतले ॥
मत्पुरीदर्शनेनैव पृष्ट्वाऽपीह भवेत्फलम् ॥ ७८ ॥ माहात्म्यं द्वारकायास्तु मद्दिने यत्र तत्र वा ॥ पठेन्मम पुरीं पुण्यां लभते मत्प्रसादतः ॥ ७९ ॥
मत्पुरीं वसतां पुण्यं त्रिकालं मम दर्शनात् ॥ तत्फलं समवाप्नोति यस्त्विदं पठते कलौ ॥ ८० ॥ कलौ काशी च मथुरा ह्यवंती च द्विजोत्तम ॥
अयोध्या च तथा माया कांची चैव च मत्पुरी ॥ ८१ ॥ शालिग्रामभवं चैव बदरी च तथोत्तमा ॥ कुरुक्षेत्रं भृगुक्षेत्रं पुष्करं शुभसंज्ञकम् ॥८२॥
प्रयागं च प्रभासं च क्षेत्रं वै हाटकेश्वरम् ॥ गंगाद्वारं शौकरं च गंगासागरसंगमम् ॥ ८३ ॥ नैमिषं दण्डकारण्यं तथा वृन्दावनं द्विज ॥ सैंधवं
चार्बुदाख्यं च सर्वाण्यायतनानि च ॥ ८४ ॥ वनानि मागधादीनि पुष्कराणि द्विजोत्तम ॥ शैलराजादयः शैला हिमाद्रिप्रमुखा हि ये ॥ ८५ ॥
गंगादयश्च सरितो भूतले संति यानि वै ॥ तीर्थानि त्रिषु कालेषु समानि द्वारकापुरः ॥ ८६ ॥ कलिना कलितं सर्वं वर्जयित्वा तु मत्पुरीम् ॥
विप्र वर्षशते प्राप्ते मत्पुर्यां मम दर्शने ॥ ८७ ॥ तव मृत्युर्महीदेव मत्प्रसादाद्भविष्यति ॥ त्रिस्पृशावासरे प्राप्ते वैशाखे शुक्लपक्षतः ॥ ८८ ॥ संगमे
बुधवारस्य दिवा भूमौ ममाग्रतः ॥ दशमं द्वारमासाद्य तव प्राणस्य निर्गमम् ॥ भविष्यति न संदेहो मत्प्रसादेन भूसुर ॥ ८९ ॥ स्वस्थानं गच्छ
विप्रेंद्र सर्वान्कामानवाप्स्यसि ॥ मद्भक्तानां युगांतेऽपि विनाशो नोपपद्यते ॥ ९० ॥ मद्भक्तिं वहतां पुंसामिह लोके परेऽपि वा ॥ नाशुभं विद्यते

१ पक्षवर्द्धिनी–पक्षवर्द्धिनीदिने–इत्यर्थः । २ पृष्ट्वा–मत्पुरीविषयिकां वार्तां पृष्ट्वा–इत्यर्थः । ३ त्रिषु कालेषु–कृतादिषु त्रिषु युगेषु–इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचित्कुलकोटिं न[1]येद्दिवम् ॥ ९१ ॥ ॥ मार्कण्डेय उवाच ॥ ॥ ततो वर्षशते प्राप्ते गत्वा द्वारवतीं पुरीम् ॥ प्राणान्कृष्णोपदेशेन त्यक्त्वा मोक्षं जगाम ह ॥ ९२ ॥ इन्द्रद्युम्न तदाख्यातं माहात्म्यं द्वारकाभवम् ॥ पुनरेव प्रवक्ष्यामि यत्ते मनसि वर्त्तते ॥ ९३ ॥ शृण्वतां पठतां चैव माहात्म्यं द्वारकाभवम् ॥ सर्वं फलमवाप्नोति कृष्णेन कथितं च यत् ॥ ९४ ॥ विस्तारयंति लोकेऽस्मिँल्लिखितं यस्य वेश्मनि ॥ प्रत्यक्षं द्वारकापुण्यं प्राप्यते कृष्णसंभवम् ॥ ९५॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे चतुर्थे द्वारकाखण्डे चन्द्रशर्मोपाख्याने चन्द्रशर्मणो द्वारकागमनपूर्वककृष्णदत्तवरग्रहणादिद्वारकानगरीश्रैष्ठ्यंचमाहात्म्यवर्णनंनाम चतुर्विंशतितमोऽध्यायः ॥ २४ ॥ ॥ छ ॥ ॥ इंद्रद्युम्न[2] उवाच ॥ ॥ कथयस्व मुनिश्रेष्ठ किंचित्कौतूहलं मम ॥ पुण्यं पवित्रं पापघ्नं तीर्थं तु वद विस्तरात् ॥ १ ॥ ॥ मार्कण्डेय उवाच ॥ ॥ मथुरा द्वारकाऽयोध्या कलिकाले पुरीत्रयम् ॥ धर्मार्थकामदं भूप मोक्षदं हरिवल्लभम् ॥ २ ॥ मथुरायां तु कालिंदी गोमती कृष्णसन्निधौ ॥ अयोध्यायां तु सरयूर्मुक्तिदा सेविता सदा ॥ ३ ॥ द्वारवत्यामयोध्यायां कृष्णं रामं शुभप्रदम् ॥ मथुरायां हरिं विष्णुं स्मृत्वा[3] मुक्तिमवाप्नुयात् ॥ ४ ॥ धन्या सा मथुरा लोके यत्र जातो हरिः स्वयम् ॥ द्वारका सफला लोके क्रीडितं यत्र विष्णुना ॥ ५ ॥ धन्यानामपि सा पूज्या अयोध्या सर्वकामदा ॥ या स्वयं रामदेवेन पालिता धर्मबुद्धिना ॥ ६ ॥ यद्ददाति फलं काशी सेविता कल्पसंख्यया ॥ कलौ ददाति मथुरा वासरेणापि तत्फलम् ॥ ७ ॥ मन्वंतरसहस्रे तु प्रयागे यत्फलं भवेत् ॥ निमिषार्द्धेन वसतां द्वारकायां तु तत्फलम् ॥ ८ ॥ प्रभासे च कुरुक्षेत्रे यत्फलं वत्सरैः शतैः ॥ वसतां निमिषार्द्धेन ह्ययोध्यायां च तद्भवेत् ॥ ९ ॥ अयोध्याधिपतिं रामं मथुरायां तु केशवम् ॥ द्वारकावासिनं कृ[4]ष्णं कीर्तनं चापि दुर्लभम् ॥ १० ॥ मथुराकीर्तनेनापि श्रवणाद्द्वारकापुरः ॥ अयोध्यादर्शनेनापि त्रिशुद्धं च पदं व्रजेत् ॥ ११ ॥ कृष्णं स्वयंभुवं देवं द्वारका त्रिदिवोपमा ॥ श्रुता चाप्यथवा दृष्टा कुरुते जन्मसंक्षयम् ॥ १२ ॥ श्रुताभिलिखिता दृष्टा ह्ययोध्या मथुरापुरी ॥ पापं हरति कल्पोत्थं द्वारका च तृतीयका ॥ १३ ॥ कृष्णं विष्णुं हरिं देवं विश्रांतं च कलौ स्मृतम् ॥ द्वादश्यां जागरे रात्रावश्वमेधायुतं फलम् ॥ १४ ॥ बालक्रीडनकं स्थानं ये स्मरंति दिनेदिने ॥ स्वर्णशैलपदं नृणां जायते राजसत्तम ॥ १५ ॥ धन्यास्ते मानवा लोके कलिकाले नरोत्तम ॥ प्लवनं सिंधुतोयेन गोमत्यां यैर्नरैः कृतम् ॥ १६ ॥ पश्चिमाशां नरः स्नात्वा कृत्वा वै करसंपुटम् ॥ द्वारकां ये स्मरिष्यंति तेषां

१ नयेत्—मद्भक्तः—इति शेषः । २ मान्धातोवाच—इ० पा० । ३ श्रुत्वा—इ० पा० । ४ उद्दिश्य—इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



कोटिगुणं फलम् ॥ १७॥ मनसा चिन्तयेद्यो वै कलौ द्वारवतीं पुरीम् ॥ कपिलाऽयुतपुण्यं च लभते हेलया नरः ॥ १८ ॥ गंगासागरजं पुण्यं गंगाद्वारभवं तथा ॥ कलौ द्वारवतीं गत्वा प्राप्नोति मनुजाधिप ॥ १९ ॥ सप्तकल्पस्मरो भूप मार्कण्डेयः स्मराम्यहम् ॥ समाना वाऽधिका वापि द्वारवत्या न कापि पूः ॥२०॥ दुर्वाससा समो धन्यो नास्ति नाप्यधिको नृप ॥ भाषाबंधं येन कृत्वा द्वारकायां धृतो हरिः ॥ २१ ॥ मा काशीं मा कुरुक्षेत्रं प्रभासं मा च पुष्करम् ॥ द्वारकां गच्छ राजर्षे पश्य कृष्णमुखं शुभम् ॥ २२ ॥ अश्वमेधसहस्रं तु राजसूयशतं कलौ ॥ पदेपदे च लभते द्वारकां याति यो नरः ॥ २३ ॥ सफलं जीवितं तेषां कलौ नृपवरोत्तम ॥ येषां न स्खलितं चित्तं द्वारकां प्रति गच्छताम् ॥ २४ ॥ माता च पुत्रिणी तेन पिता चैवं पितामहाः ॥ पिंडदानं कृतं येन गोमत्यां कृष्णसन्निधौ ॥ २५ ॥ गोपीचन्दनमुद्रां तु कृत्वा भ्रमति भूतले ॥ सोऽपि देशो भवेत्पूतः किं पुनर्यत्र संस्थितम् ॥ २६ ॥ द्वारकायां समुद्भूतां तुलसीं कृष्णसेविताम् ॥ नित्यं बिभर्ति शिरसा स भवेत्त्रिदशाधिपः॥ २७ ॥ दैत्यारेर्भगवत्तिथिश्च विजया नीरं च गंगोद्भवं नित्यं काशिपुरी तथैव तुलसी धात्रीफलं वल्लभम्॥२८॥शास्त्रं भागवतं तथा च दयितं रामायणं द्वारका पुण्यं मालतिसम्भवं सुदयितं गीतं कृतं जागरम् ॥ २९ ॥ गृहे यस्य सदा तिष्ठेद्गोपीचन्दनमृत्तिका ॥ द्वारका तिष्ठते तत्र कृष्णेन सहिता कलौ ॥ ३० ॥ कृतघ्नो वाऽथ गोघ्नोऽपि हैतुकः कृत्स्नपापकृत् ॥ गोपीचन्दनसंपर्कात्पूतो भवति तत्क्षणात् ॥ ३१ ॥ गोपीचन्दनखंडं तु यो ददातीह वैष्णवे ॥ कुलमेकोत्तरं तेन शतं तारितमेव वा ॥ ३२ ॥ द्वारकासम्भवा भूप तुलसी यस्य मंदिरे ॥ तस्य वैवस्वतो नित्यं बिभेति सह किंकरैः ॥ ॥ ३३ ॥ द्वारकासंभवा मृत्स्ना तुलसी कृष्णकीर्तनम् ॥ क्रतुकोटिशतं पुण्यं कथितं व्याससूनुना ॥ ३४ ॥ आलोड्य सर्वशास्त्राणि पुराणानि पुनःपुनः ॥ मया दृष्टा महीपाल न द्वारकासमा पुरी ॥ ३५ ॥ द्वारकागमनं येन कृतं कृष्णस्य कीर्तनम् ॥ स्नातं तीर्थसहस्रैस्तु तेनेष्टं क्रतुकोटिभिः ॥३६॥ इंद्रियाणां तु दमनं किं करिष्यति देहिनाम् ॥ सांख्यमध्ययनं चापि द्वारकां गच्छते न चेत् ॥३७॥ पशवस्ते न सन्देहो गर्दभेन समा जनाः ॥ दृष्टं कृष्णमुखं यैर्न गत्वा द्वारवतीं पुरीम् ॥ ३८ ॥ कृतकृत्यास्तु ते धन्या द्वादश्यां जागरे हरेः ॥ कृत्वा जागरणं भक्त्या नृत्यमाना मुहुर्मुहुः ॥३९॥ कृष्णालयं तु यो गत्वा गोमत्यां पिंडपातनम् ॥ करोति शक्त्या दानं च मुक्तास्तस्य पितामहाः ॥४०॥ प्रेतत्वं च पिशाचत्वं न भवेत्तस्य देहिनः ॥ जन्मजन्मनि राजेंद्र यो गतो द्वारकां पुरीम् ॥ ४१ ॥ अनशनेन यत्पुण्यं प्रयागे त्यजतस्तनुम् ॥ द्वादश्यां निमि

१ चैव—सत्पुत्रवन्तः—इत्यार्थिकोऽर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षार्द्धेन तत्फलं कृष्णसन्निधौ ॥ ४२ ॥ सूर्य्यग्रहे गवां कोटिं दत्त्वा यत्फलमाप्नुयात् ॥ तत्फलं कलिकाले तु द्वारवत्यां दिनेदिने ॥ ४३ ॥ कोटिभारं सुवर्णस्य ग्रहणे चंद्रसूर्ययोः ॥ दत्त्वा यत्फलमाप्नोति तत्फलं कृष्णदर्शने ॥ ४४ ॥ दोलासंस्थं च ये कृष्णं पश्यंति मधुमाधवे ॥ तेषां पुत्राश्च पौत्राश्च मातामहपितामहाः ॥ ४५ ॥ श्वशुराद्याः सभृत्याश्च पशवश्च नरोत्तम ॥ क्रीडंति विष्णुना सार्द्धं यावदाभूतसंप्लवम् ॥ ४६ ॥ या काचिद्द्वादशी भूप जायते कृष्णसन्निधौ ॥ पश्यामि नांतरं किञ्चित्कलिकाले विशेषतः ॥ ४७ ॥ कृष्णस्य सन्निधौ नित्यं वासरा द्वादशीसमाः ॥ युगादिभिः समाः सर्वे नित्यं कृष्णस्य सन्निधौ॥४८॥कलौ द्वारवती सेव्या ज्ञात्वा पुण्यं विशेषतः ॥ षट्पुर्यश्चैव सुलभा दुर्लभा द्वारका कलौ॥४९॥ स्मरणात्कीर्तनाद्यस्माद्भुक्तिमुक्ती सदा नृणाम् ॥ दुर्वाससा तु ऋषिणा रक्षिता तिष्ठते पुरी॥५०॥कलौ न शक्यते गंतुं विना कृष्णप्रसादतः ॥ कृष्णस्य दर्शनं कर्तुं यान्ति रुद्रादयःसुराः॥५१॥त्रिकालं जगतीनाथ[1] रुक्मिणीदर्शनाय च ॥ सफला भारती तस्य कृष्णकृष्णेति या वदेत्॥५२॥द्वारकायायिनं दृष्ट्वा गायंति दिवि संस्थिताः ॥नरकात्पितरो मुक्ताः प्रचलंति हसंति च ॥५३॥ गोप्यं यत्पातकं पुंसां गोमती तद्व्यपोहति ॥ स्मरणात्कीर्त्तनाद्वापि किं पुनः प्लवने कृते ॥ ५४ ॥ रुक्मिणीसहितं देवं शंखोद्धारे च शंखिनम् ॥ पिंडारके चतुर्बाहुं दृष्ट्वाऽन्यैः किं करिष्यति ॥५५॥ रुक्मिणी देवकीपुत्रश्चक्रतीर्थं च गोमती ॥ गोपीनां चंदनं लोके तुलसी दुर्लभा कलौ ॥ ५६ ॥ दुर्लभास्ते सुता ज्ञेया धरणीपापनाशकाः ॥ गयां गत्वा तु ये पिंडं द्वारकां कृष्णदर्शनम् ॥ करिष्यंति कलौ प्राप्ते वंजुलीसमुपोषणम् ॥ ५७ ॥ समं पुण्यफलं तेषां वंजुली द्वारका समा ॥ येन न्यूना नाधिकाऽपि कथितं विष्णुना स्वयम् ॥ ५८ ॥ वंजुली चाधिका[2] राजञ्छृणु वक्ष्यामि कारणम् ॥ द्वादश्यामुपवासेन द्वादश्यां पारणेन तु ॥ प्राप्यते हेलया चैव तद्विष्णोः परमं पदम् ॥ ५९ ॥ गृहेषु वसतां तीर्थं गृहेषु वसतां तपः ॥ गृहेषु वसतां मोक्षो वंजुलीसमुपोषणात् ॥ ६० ॥ वंजुली द्वारका गंगा गया गोविंदकीर्त्तनम् ॥ गोमती गोकुलं गीता दुर्लभं गोपिचन्दनम् ॥ ६१ ॥ एतच्छृणोति यो भक्त्या कृत्वा मनसि केशवम् ॥ अश्वमेधसहस्रस्य फलमाप्नोति मानवः ॥ ६२ ॥ श्रोष्यंति जागरे ये वै माहात्म्यं केशवस्य च ॥ सर्वपापविनिर्मुक्ताः पदं यास्यंति वैष्णवम् ॥ ॥ ६३ ॥ पठिष्यंति नरा नित्यं ये वै श्रोष्यंति भक्तितः ॥ तुलापुरुषदानस्य फलं ते प्राप्नुवंति हि॥६४॥कृष्णजागरणे दानं यच्चाल्पमपि दीयते ॥

१ जगतीनाथ–भूपते–इत्यर्थः । २ अत्रार्थे–इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





सर्वं कोटिगुणं ज्ञेयमित्याहुः कवयो नृप ॥ ६५ ॥ मानकूटं तुलाकूटं कन्याहयगवां क्रयात् ॥ तत्सर्वं विलयं याति द्वादश्यां जागरे कृते ॥ ६६ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे चतुर्थे द्वारकामाहात्म्ये वंजुलीद्वारकागंगागयागोविन्दगोमतीगोकुल
गीतागोपीचन्दनमाहात्म्यवर्णनंनाम पञ्चविंशतितमोऽध्यायः ॥ २५ ॥ ॥ छ ॥ ॥ श्रीमार्कण्डेय उवाच ॥ ॥ प्रह्लादं सर्वधर्मज्ञं वेदशास्त्रा
र्थपारगम् ॥ वैष्णवागमतत्त्वज्ञं भगवद्भक्तितत्परम् ॥ १ ॥ सुखासीनं महाप्राज्ञमृषयो द्रष्टुमागताः ॥ सर्वशास्त्रार्थतत्त्वज्ञाः स्वधर्मप्रतिपालकाः ॥
॥ २ ॥ ॥ ऋषय ऊचुः ॥ ॥ विना ज्ञानाद्विना ध्यानाद्विना चेन्द्रियनिग्रहात् ॥ अनायासेन येनैतत्प्राप्यते परमं पदम् ॥ ३ ॥ संक्षेपा
त्कथय स्नेहाद्दृष्टादृष्टफलोदयम् ॥ धर्मान्मनुजशार्दूल ब्रूहि सर्वानशेषतः ॥ ४ ॥ इत्युक्तोऽसौ महाभागो नारायणपरायणः ॥ कथयामास संक्षे
पात्सर्वलोकहितोद्यतः ॥ ५ ॥ ॥ श्रीप्रह्लाद उवाच ॥ ॥ श्रूयतामभिधास्यामि गुह्याद्गुह्यतरं महत् ॥ यस्य संश्रवणादेव सर्वपापक्षयो भवेत् ॥
॥ ६ ॥ अष्टादशपुराणानां सारात्सारतरं च यत् ॥ तदहं कथयिष्यामि भुक्तिमुक्तिफलप्रदम् ॥ ७ ॥ सुखासीनं महादेवं जगतः कारणं परम् ॥
पप्रच्छ षण्मुखो भक्त्या सर्वलोकहितोद्यतः ॥ ८ ॥ ॥ स्कन्द उवाच ॥ ॥ भगवन्सर्वलोकानां दुःखसंसारभेषजम् ॥ कथयस्व प्रसादेन सुखो
पायं विमुक्तये ॥ ९ ॥ ॥ ईश्वर उवाच ॥ ॥ चतुर्विधं तु यत्पापं कोटिजन्मार्जितं कलौ ॥ जागरे वैष्णवं शास्त्रं वाचयित्वा व्यपोहति ॥१०॥
वैष्णवस्य तु शास्त्रस्य यो वक्ता जागरे हरेः ॥ मद्भक्तं तं विजानीयाद्विपन्नस्त्वन्यथा भवेत् ॥ ११ ॥ हरिजागरणं कार्यं मद्भक्तेन विजानता ॥
अन्यथा पापिनो ज्ञेया ये द्विषन्ति जनार्दनम् ॥ १२ ॥ जागरं ये च कुर्वंति गायंति हरिवासरे ॥ अग्निष्टोमफलं तेषां निमिषार्द्धेन षण्मुख॥१३॥
जागरे पश्यतां विष्णोर्मुखं रात्रौ मुहुर्मुहुः ॥ येषां हृष्यंति रोमाणि रात्रौ जागरणे हरेः ॥ कुलानि दिवि तावंति वसंति हरिसन्निधौ ॥ १४ ॥
यमस्य पथि निर्मुक्ता जनाः पापशतैर्वृताः॥ गीतशास्त्रविनोदेन द्वादशीजागरान्विताः ॥ १५ ॥ सुप्रभाता निशा तेषां धन्याः सुकृतिनो नराः ॥
प्राणात्ययेन मुह्यंति यैः कृतं जागरं हरेः ॥१६॥ पुत्रिणस्ते नरा लोके धनिनः ख्यातपौरुषाः ॥ येषां वंशोद्भवाः पुत्राः कुर्वंति हरिजागरम् ॥१७॥
इष्टं मखैः कृतं दानं दत्तं पिंडं गयाशिरे ॥ स्नातं नित्यं प्रयागे तु यैः कृतं जागरं हरेः ॥ १८ ॥ दयिता विष्णुभक्ताश्च नित्यं मम षडानन ॥ कुर्वंति
वासरं विष्णोर्यस्माज्जागरणं हितम् ॥१९॥ श्रुत्वा हर्षं न चाप्नोति जागरं न करोति यः ॥ प्रकटीकरोति तन्नूनं जनन्या[1] दुर्विचेष्टितम् ॥ २० ॥



१ जनन्या दुर्विचेष्टितम्--आत्मनो जारजातत्वम्--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संप्राप्य वासरं विष्णोर्न येषां जागरो हरेः ॥ व्यर्थं गतं च तत्पुण्यं तेषां वर्षशतोद्भवम् ॥ २१ ॥ पुत्रो वा पुत्रपुत्रो वा दौहित्रो दुहिताऽपि वा ॥ करिष्यति कुलेऽस्माकं कलौ जागरणं हरेः ॥ २२ ॥ पा[1]त्यमानाः प्रजल्पंति पितरो यमकिंकरैः ॥ मुक्तिर्भविष्यत्यस्माकं नरकाज्जागरे कृते ॥ २३ ॥ नान्यथा जायतेऽस्माकं मुक्तिर्यज्ञशतैरपि ॥ विना जागरणेनैव नरलोकात्कथंचन ॥ तस्माज्जागरणं कार्यं पितॄणां हितमिच्छता ॥ २४ ॥ भक्तिर्भागवतानां च गोविंदस्यापि कीर्तनम् ॥ न देहग्रहणं तस्मात्पुनर्लोके भविष्यति ॥ २५ ॥ जागरं कुरुते यश्च संगमे विजयादिने ॥ पुनर्देहप्रजननं दग्धं तेनाऽऽत्मना स्वयम् ॥ २६ ॥ त्रिस्पृशा वासरं येन कृतं जागरणान्वितम् ॥ केशवस्य शरीरे तु स लीनो नात्र संशयः ॥ २७ ॥ उन्मीलिनी कृता येन रात्रौ जागरणान्विता ॥ प्रभवंति न पापानि स्थूलसूक्ष्माणि तस्य तु ॥ २८ ॥ सतालवाद्यसंयुक्तं संगीतं जागरं हरेः ॥ यः कारयति देवस्य द्वादश्यां दानसंयुतम् ॥ २९ ॥ तस्य पुण्यं प्रवक्ष्यामि महाभागवतस्य हि ॥ तिलप्रस्थसहस्रं तु सहिरण्यं द्विजातये ॥ दत्त्वा यत्फलमाप्नोति ह्ययने रविसंक्रमे ॥ ३० ॥ हेमभारशतं नित्यं सवत्सं कपिलायुतम् ॥ प्रेक्षणीयप्रदानेन तत्फलं प्राप्नुयात्कलौ ॥ ३१ ॥ यः पुनर्वासरे पुत्र दिव्यैर्ऋषिकृतैः स्तवैः ॥ तोषयेत्पद्मनाभं वै वैदिकैर्विष्णुसामभिः ॥ ३२ ॥ ऋग्यजुःसामसम्भूतैर्वैष्णवैश्चैव पुत्रक ॥ संस्कृतैः प्राकृतैः स्तोत्रैरन्यैश्च विविधैस्तथा ॥ ३३ ॥ प्रीतिं करोति देवेशो द्वादश्यां जागरे स्थितः ॥ शृणु पुण्यं समासेन यद्गीतं ब्रह्मणा मम ॥ ३४ ॥ त्रिःसप्तकृत्वो धरणीं त्रिगुणीकृत्य षण्मुख[2] ॥ दत्त्वा यत्फलमाप्नोति तत्फलं प्राप्नुयान्न[3]रः ॥ ३५ ॥ गवां शतसहस्रेण सवत्सेनापि यत्फलम् ॥ तत्फलं प्राप्नुयान्मर्त्यः स्तोत्रैर्यस्तोषयेद्धरिम् ॥ ३६ ॥ वैदिकी दशगुणा प्रीतिर्यामेनैकेन जागरे ॥ एवं फलानुसारेण कार्य्यं जागरणं हरेः ॥ ३७ ॥ यः पुनः पठते रात्रौ गीतां नामसहस्रकम् ॥ द्वादश्यां पुरतो विष्णोर्वैष्णवानां समीपतः ॥ ३८ ॥ पुण्यं भागवतं स्कांदपुराणं दयितं हरेः ॥ माधुरं बालचरितं गोपीनां चरितं तथा ॥ ३९ ॥ एतान्पठति रात्रौ यः पूजयित्वा तु केशवम् ॥ न वेद्म्यहं फलं वत्स यदि ज्ञास्यति केशवः ॥ ४० ॥ दीपं प्रज्वालयेद्रात्रौ यः स्तवैर्हरिजागरे ॥ न चास्तं गच्छते तस्य पुण्यं कल्पशतैरपि ॥ ४१ ॥ मंजरीसहितैः पत्रैस्तुलसीसम्भवैर्हरिम् ॥ जागरे पूजयेद्भक्त्या नास्ति तस्य पुनर्भवः ॥ ४२ ॥ स्नानं विलेपनं पूजा धूपं दीपं च संस्तवम् ॥ नैवेद्यं च सतांबूलं जागरे दत्तमक्षयम् ॥ ४३ ॥ ध्यातुमिच्छति षड्वक्त्र यो मां भक्तिपरायणः ॥ स करोतु महाभक्त्या द्वादश्यां जागरं हरेः ॥ ४४ ॥ वासरे वासुदेवस्य सर्वे देवाः सवासवाः ॥ देहमाश्रित्य तिष्ठंति ये

१ यात्यमानाः—इति पाठे यातनां प्रति याप्यमाना—इत्यर्थः । २ षण्मुख—इ० पा० । ३ ततः—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





प्रकुर्वंति जागरम् ॥ ४५ ॥ जागरे वासुदेवस्य महाभारतकीर्तनम् ॥ ये कुर्वंति गतिं यांति योगिनां ते न संशयः ॥ ४६ ॥ चरितं रामदेवस्य ये वधं रावणस्य च ॥ पठंति जागरे विष्णोस्ते यांति परमां गतिम् ॥ ४७ ॥ अधीत्य चतुरो वेदान्कृत्वा चैवार्चनं हरेः ॥ स्नात्वा च सर्वतीर्थेषु जागरे तत्फलं हरेः ॥ ४८ ॥ रथानामयुतैर्यत्तु सहस्रैर्वरवारणैः ॥ लक्षेणाश्ववराणां तु तत्फलं जागरे हरेः ॥ ४९ ॥ धान्यशैलसहस्रैस्तु तुलापुरुषकोटिभिः ॥ यत्फलं मुनिभिः प्रोक्तं तत्फलं जागरे हरेः ॥ ५० ॥ कन्याकोटिप्रदानं च स्वर्णभारशतं तथा ॥ दत्तं रत्नायुतशतं यैः कृतो जागरो हरेः ॥ ५१ ॥ अष्टादशपुराणैस्तु पठितैर्यत्फलं भवेत्[1] ॥ तत्फलं शतसाहस्रं कृते जागरणे हरेः ॥ ५२ ॥ मन्वादि पठतां शास्त्रं यत्फलं हि द्विजन्मनाम् ॥ अधिकं फलमाप्नोति कुर्वाणो जागरं हरेः ॥ ५३ ॥ दुर्भिक्षे चान्नदातॄणां पुंसां भवति यत्फलम् ॥ संन्यासिनां सहस्रैस्तु यत्फलं भोजितैः कलौ ॥ फलं तत्समवाप्नोति कुर्वतां जागरं हरेः ॥ ५४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे चतुर्थे द्वारकामाहात्म्ये द्वादशीजागरणमाहात्म्यवर्णनंनाम षड्विंशतितमोऽध्यायः ॥ २६ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ स्थित्वा द्वादशिजागरे[2] क्रतुसमे दुःखापहे पुण्यदे रम्यं भागवतं शृणोति पुरुषः कृत्वा हरेः पूजनम् ॥ पुण्यं वाजिमखस्य[3] कोटिगुणितं संप्राप्य भक्तोत्तमश्छित्त्वा पाशसमूहपक्षनिचयं प्राप्नोति कृष्णालयम् ॥ १ ॥ हत्यापापसमूहकोटिनिचयैर्गुर्वंगनाकोटिभिःस्तेयैर्लक्षगुणैर्गुरोर्वधकरैः संवेष्टितो यद्यपि ॥ श्रुत्वा भागवतं छिनत्ति सकलं कृत्वा हरेर्जागरं मुक्तिं याति नरेन्द्र निर्मलवपुर्भित्त्वा रवेर्मंडलम् ॥ २ ॥ एकादशी द्वादशिसंप्रविष्टा कृता नभस्ये श्रवणेन युक्ता ॥ विशेषतः सोमसुतेन संगमे करोति मुक्तिं प्रपितामहानाम् ॥ ३ ॥ यद्दीयते द्वादशिवासरे शुभे विष्णुं समुद्दिश्य तथा पितॄणाम् ॥ पर्य्याप्तमिष्टैः क्रतुतीर्थदानैर्भक्त्या प्रदत्तं खलु मेरुतुल्यम् ॥ ४ ॥ महानदीं प्राप्य दिनं च विष्णोस्तोयांजलिं यस्तु पितॄन्ददाति ॥ श्राद्धं कृतं तेन समाः सहस्रं यच्छन्ति कामान्पितरः सुतृप्ताः ॥५॥ शरणागतानां परिपालनेन ह्यन्नप्रदानेन शृणुष्व पुत्र ॥ ऋणप्रदाने द्विजदेवतानां तद्वै फलं जागरणेन विष्णोः ॥ ६ ॥ यः स्वर्णधेनुं मधुनीरधेनुं कृष्णाजिनं रौप्यसुवर्णमेरु ॥ ब्रह्मांडदानं प्रददाति याति स वै फलं जागरणेन विष्णोः ॥ ७ ॥ सत्येन शौचेन दमेन यत्फलं क्षमादयादानबलेन षण्मुख ॥ दशाश्वमेधैर्बहुदक्षिणैश्च तेषां फलं जागरणेन विष्णोः ॥ ८ ॥ स्नानेन यत्प्राप्य नदीं वरिष्ठां यत्पिंडदानेन पितुर्गयायाम् ॥ यद्धेमदानात्कुरुजांगले च तत्स्यात्फलं जागरणेन विष्णोः ॥ ९ ॥ हत्यायुतानां यदि संचितानि

१ भवेत्—इति शेषः । २ "अपि माषं मषं कुर्याच्छन्दोभंगं न कारयेत् ।" इत्यभियुक्तोक्तानुसारेण—'द्वादशिजागरे' इत्यत्र च्छन्दोऽनुरोधाद्ध्रस्वत्वम् । ३ वाजिमखस्य—अश्वमेधस्य—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तेयानि रुक्मस्य तथामितानि ॥ निहंत्यनेकानि पुराकृतानि श्रीजागरे ये प्रपठंति गीतम् ॥ १० ॥ मार्गं न ते सौरपुरस्य दूतान्वनांतरं षण्मुख किंचिदन्यत् ॥ स्वप्ने न पश्यंति च ते मनुष्या येषां गता जागरणेन निद्रा ॥ ११ ॥ काषायवस्त्रैश्च जटाभरैश्च पूर्ताग्निहोत्रैः किमु चान्य मन्त्रैः ॥ धर्मार्थकामवरमोक्षकरीं च भद्रामेकां भजस्व कलिकालविनाशिनीं च ॥ १२ ॥ इत्युक्तपूर्वं किल नारदेन श्रेयोर्थबुद्ध्या विनतासुताय ॥ कृष्णात्परं नान्यदिहास्ति दैवं व्रतं तदह्नः परमं न किंचित् ॥ १३ ॥ भोभोः सुराः शृणुत नारद इत्यवोचद्भोभोः खगेन्द्रऋषिसिद्धमुनीन्द्रसंघाः ॥ उत्क्षिप्य बाहुमथ भक्तजनेन चोक्तं नैकादशीव्रतसमं व्रतमस्ति किंचित् ॥ १४ ॥ पक्षीन्द्र पापपुरुषा न हरिं भजंति तद्भक्तिशास्त्रनिरता न कलौ भवंति ॥ कुर्वंति मूढमनसो दशमीविमिश्रामेकादशीं शुभदिनं च परित्यजंति ॥ १५ ॥ आर्त्तः सदा चैव सदा च रोगी पापी सदा चैव सदा च दुःखी ॥ सदा कुलघ्नोऽथ सदा च नारकी विद्धं मुरारेर्दिनमाश्रयेत्तु यः ॥ १६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे चतुर्थे द्वारकामाहात्म्ये द्वादशीजागरणस्य सर्वतोवरेण्यत्ववर्णनंनाम सप्तविंशतितमोऽध्यायः ॥ २७ ॥ ॥ छ ॥ ॥ मार्कंडेय उवाच ॥ ॥ कृत्वा जागरणं विष्णोर्यथान्यायं नरेश्वर ॥ पितॄन्यच्छति पुण्यं च ततः किं कुरुते यमः ॥ १ ॥ भुक्तो वा यदि वाऽभुक्तः स्वच्छो वाऽस्वच्छ एव वा ॥ विमुक्तिः कथिता तत्र हरिजागरणान्नृणाम् ॥२॥ अस्नातो वा नरः स्नातो जागरे समुपस्थिते ॥ सर्वतीर्थाप्लुतो ज्ञेयस्तं दृष्ट्वा दिवमाव्रजेत् ॥ ३ ॥ श्वपचा जागरं कृत्वा पदं निर्वाणमागताः ॥ किं पुनर्वर्णसंभूताः[१] सदाचारपरास्तथा ॥ ४ ॥ युवतीनादमाकर्ण्य यथा निद्रा न जायते ॥ जागरे चैवमेव स्यात्तत्कथानां च कीर्तने ॥ ५ ॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः ॥ उत्कल्लनं मनःपापं शोधयेद्विष्णु जागरः ॥ ६ ॥ विमुक्तिः कामुकस्योक्ता किं पुनर्वीक्षतां हरिम् ॥ ७ ॥ वाचिकं मानसं पापं करणैर्यदुपार्जितम् ॥ अन्यैर्निमिषमात्रेण व्यपोहति न संशयः ॥ ८ ॥ गोष्ठ्यां समागता ये तु तेषां पापं कुतः स्मृतम् ॥ मातृपूजा गयाश्राद्धं सुतीर्थगमनं तथा ॥ जागरस्य नृणां राजन्समानि कवयो विदुः ॥ ९ ॥ जननीपूजनं भूप ह्यश्वमेधायुतैः समम् ॥ पूर्णं वर्षशतं भूप कुशाग्रेणोद्धृतं जलम् ॥ १० ॥ पिबन्पात्रे द्विजः सम्यक्तीर्थे पुष्करसंज्ञिते ॥ जागरस्यैव चैतानि कलां नार्हंति षोडशीम् ॥ ११ ॥ कृत्वा कांचनसंपूर्णां वसुधां वसुधाधिप ॥ दत्त्वा यत्फलमाप्नोति तत्फलं हरिजागरे ॥ १२ ॥ निकृंतनं कर्मणश्च ह्यात्मना दुष्कृतं कृतम् ॥ व्यपोहति न संदेहो येन जागरणं कृतम् ॥ १३ ॥ संक्षेपतः प्रवक्ष्यामि पुनरेव

१ वर्णसंभूताः—चातुर्वर्ण्योत्पन्नाः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

महीपते ॥ जागरे पद्मनाभस्य यत्फलं कवयो विदुः ॥ १४ ॥ रवेर्बिंबमिदं भित्त्वा स योगी हरिजागरे ॥ प्रयाति परमं स्थानं योगिगम्यं निरंजनम् ॥ सांख्ययोगैः सुदुःखेन प्राप्यते यत्पदं हरेः ॥ १५ ॥ नद्यो नदा यथा यांति सागरे संस्थितिं क्रमात् ॥ एवं जागरणात्सर्वे तत्पदे यांति संस्थितिम् ॥ १६ ॥ मेरुमंदरमानानि कृत्वा पापानि वा नरः ॥ हरिजागरणे तानि व्यपोहति न संशयः ॥ १७ ॥ राज्यं स्वर्गं तथा मोक्षं यच्चान्यदीप्सितं नृणाम् ॥ ददाति भगवान्कृष्णः स्वगीतैर्जागरे स्थितः ॥ १८ ॥ जागरेणैव पापानां श्वपचानां महीपते ॥ तत्पदं कविभिः प्रोक्तं किं पुनस्तु द्विजन्मनाम् ॥ १९ ॥ जपध्यानविहीनस्य गायकस्यापि भूपते ॥ कर्मभ्रष्टस्य च प्रोक्तो मोक्षस्तु हरिजागरे ॥ २० ॥ तन्नास्ति त्रिषु लोकेषु पुण्यं पुण्यवतां नृणाम् ॥ यत्तु साधयते भूप जागरे संव्यवस्थितः ॥ २१ ॥ त्वया पुनरिदं कार्य्यं स्मर्त्तव्यो गरुडध्वजः ॥ एकादश्यां न भोक्तव्यं कर्तव्यं जागरं सदा ॥ २२ ॥ जागरे वर्त्तमानस्य श्वपचस्य गतिर्भवेत् ॥ किं पुनर्वर्णजातीनां वैष्णवानां महीपते ॥ २३ ॥ ये तु जागरणे निद्रां न यांति नृपपुंगव ॥ न तेषां जननी याति खेदं गर्भावधारणात् ॥ २४ ॥ तस्माज्जागरणं कार्य्यं मातुर्जठरवर्जिभिः ॥ भीतैर्मोक्षपरैर्मर्त्यैः सुखचेष्टाबहिष्कृतैः ॥ २५ ॥ यस्तु जागरणं रात्रौ कुर्याद्भक्तिसमन्वितः ॥ निमिषेनिमिषे राजन्नश्वमेधफलं लभेत् ॥ २६ ॥ शयनोत्थापनाभ्यां च समं पुण्यमुदाहृतम् ॥ विशेषो नास्ति भूपाल विष्णुना कथितं पुरा ॥ २७ ॥ ब्राह्मणाः क्षत्रिया वैश्याः स्थिताः शूद्राश्च जागरे ॥ पक्षिणः कृमिकीटाश्च ह्यनेके चैव जंतवः ॥ ते गताः परमं स्थानं योगिगम्यं निरंजनम् ॥ २८ ॥ यानि कानि च पापानि ब्रह्महत्यासमानि च ॥ कृष्णजागरणे तानि क्षयं यांति न संशयः ॥ २९ ॥ एकतः क्रतवः सर्वे सर्वतीर्थसमन्विताः ॥ एकतो देवदेवस्य जागरः कृष्णवल्लभः ॥ न समं ह्यधिकः प्रोक्तः कविभिः कृष्णजागरः ॥ ३० ॥ सूर्यशक्रादयो देवा ब्रह्मरुद्रादयो गणाः ॥ नित्यमेव समायांति जागरे कृष्णवल्लभे ॥ ३१ ॥ गंगा सरस्वती रेवा यमुना च शतह्रदा॥ चंद्रभागा वितस्ता च नद्यः सर्वाश्च तत्र वै ॥३२॥ सरांसि च ह्रदाश्चैव समुद्राः कृत्स्नशो नृप ॥ एकादश्यां नृपश्रेष्ठ गच्छंति हरिजागरे ॥ ३३ ॥ स्पृहणीयास्तु देवेभ्यो ये नराः कृष्णजागरे ॥ नृत्यं गीतं प्रकुर्वन्ति वीणावाद्यं तथैव च ॥ ३४ ॥ भक्त्या वाऽप्यथवाऽभक्त्या शुचिर्वाप्यथवाऽशुचिः ॥ कृत्वा जागरणं विष्णोर्मुच्यते पापकोटिभिः ॥ ३५ ॥ पादयोः पांसुकणिका यावत्तिष्ठंति भूतले ॥ तावद्वर्षसहस्राणि जागरी वसते दिवि ॥ ३६ ॥ तस्माद्गृहं प्रगन्तव्यं जागरे माधवस्य च ॥ कलौ मलविनाशाय द्वादशद्वादशीषु च ॥ ३७ ॥ सुबहून्यपि पापानि कृत्वा जागरणं हरेः ॥ निर्दहेन्मेरुतुल्यानि युगकोटिशतान्यपि ॥ ३८ ॥ उन्मीलिनी महीपाल यैः कृता प्रीतिसंयुतैः ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कलौ जागरणोपेता फलं वक्ष्यामि तच्छृणु ॥ ३९ ॥ स्थितौ युगसहस्रं तु पादेनैकेन भूतले ॥ काश्यां च जाह्नवीतीरे तत्फलं लभते नरः ॥४०॥ भवेद्युगसहस्रं च विनाऽऽहारेण यत्फलम् ॥ उन्मीलिनीं समासाद्य फलं जागरणे हरेः ॥ ४१ ॥ दुष्प्राप्यं वैष्णवं स्थानं मखकोटिशतैः कृतैः ॥ हेलया प्राप्यते नूनं द्वादश्यां जागरे कृते ॥ ४२ ॥ न कुर्वंति व्रतं विष्णोर्जागरेण समन्वितम् ॥ परस्वं पारदार्यं च पापं तान्प्रति गच्छति ॥४३॥ एकेनैवोपवासेन भावहीनास्तु मानवाः ॥ निर्दग्धाऽखिलपापास्ते प्रयांति स्वर्गकाननम् ॥ ४४ ॥ यत्र भागवतं शास्त्रं यत्र जागरणं हरेः ॥ शालिग्रामशिला यत्र तत्र गच्छेद्धरिः स्वयम् ॥ ४५ ॥ न पुर्य्यः पावनाः सप्त कलौ वेदवचो नहि ॥ यादृशं वासरं विष्णोः पावनं जागरान्वितम् ॥ ४६ ॥ संप्राप्ते वासरे विष्णोर्ये न कुर्वंति जागरम् ॥ मज्जंति नरके घोरे नरा नार्य्यो न संशयः ॥ ४७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे चतुर्थे द्वारकामाहात्म्ये द्वादशीजागरणमाहात्म्यवर्णनंनामाष्टाविंशतितमोऽध्यायः ॥ २८ ॥ ॥ छ ॥ ॥ ॥ ॥ प्रह्लाद उवाच ॥ ॥ अथान्यच्च प्रवक्ष्यामि गुह्याद्गुह्यतरं महत् ॥ द्वारकायाः परं पुण्यं माहात्म्यं ह्युत्तमोत्तमम् ॥ १ ॥ इतिहासं पुरावृत्तं वर्णयिष्ये मनोहरम् ॥ तीर्थक्षेत्रादिदेवानामृषीणां संशयापहम् ॥२॥ सौभाग्यमतुलं दृष्ट्वा सिंहराशिगते गुरौ ॥ गोदावर्य्यां द्विजश्रेष्ठा नारदो भगवत्प्रियः ॥ ३ ॥ गौतमस्याऽभितो दृष्ट्वा त्रैलोक्यसंभवानि वै ॥ तीर्थानि सरितः सर्वा विस्मयं परमं गतः ॥ ४ ॥ तत्र काशी कुरुक्षेत्रमयोध्या मथुरापुरी ॥ माया कांची ह्यवंती च अरण्यान्याश्रमैः सह ॥ ५ ॥ हरिक्षेत्रं गया मिश्रक्षेत्रं च पुरुषोत्तमम् ॥ प्रभासादीनि पुण्यानि मुक्तिक्षेत्राण्यशेषतः ॥ ६ ॥ जाह्नवी यमुना रेवा तत्र पुण्या सरस्वती ॥ सरयूर्गंडकी तापी पयोष्णी सरितां वरा ॥ ७ ॥ कृष्णा भीमरथी पुण्या कावेर्य्याद्याः सरिद्वराः ॥ स्वर्गे मर्त्ये च पाताले वर्त्तमानाः सतीर्थकाः ॥ ८ ॥ स्थिता गोदावरीतीरे सिंहराशिं गते गुरौ ॥ तथा च पुष्करादीनि सप्तसिंधुसरांसि च ॥ ९ ॥ मेर्वादिपर्वताः पुण्या दर्शनात्पापनाशनाः ॥ तीर्थराजः प्रयागश्च सर्वतीर्थसमन्वितः ॥ १० ॥ वेदोपवेदाः शास्त्राणि पुराणानि च सर्वशः ॥ सिद्धा मुनिगणाः सर्वे देवर्षिपितृदेवताः ॥ ११ ॥ चंद्रादित्यौ सुरगणाः सिंहस्थे च बृहस्पतौ ॥ स्थिता गोदावरीतीरे वर्षमेकं प्रहर्षिताः ॥ १२ ॥ यानि कानि च पुण्यानि तीर्थक्षेत्राणि संति वै ॥ त्रैलोक्ये तानि सर्वाणि गौतम्यां वीक्ष्य विस्मिताः ॥ १३ ॥ देवर्षिर्नारदस्तत्र मुनिभिर्मुदितोऽवसत् ॥ सिंहस्थांते च सर्वाणि स्वस्थानगमनाय वै ॥१४॥ आमंत्र्य गौतमीं देवीं स्थितानि पुरतस्ततः ॥ सर्वेषां शृण्वतां विप्रा

१ अभिमता--इति पाठान्तरे--गोदावरी--इति विशेष्यमध्याहरणीयमिति बोध्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





गौतमी खिन्नमानसा ॥ तता दुर्जनसंसर्गान्नारदं दुःखिताऽब्रवीत् ॥ १५ ॥ ॥ गौतम्युवाच ॥ ॥ पश्यैतानि सुतीर्थानि गंगाद्याः सरितोऽमलाः ॥
सागरा गिरयः पुण्या गयात्रितयमेव च ॥१६॥ क्षेत्राणि मोक्षदान्यंग त्रैलोक्यजानि नारद ॥ देवाश्च पितरः सिद्धा ऋषयो मानवादयः ॥१७॥ तीर्थं
राजः प्रयागश्च सर्वतीर्थसमन्वितः ॥ एतेषामेव सर्वेषां मत्संसर्गान्महामुने ॥ विशुद्धानां प्रकाशेन राजते भुवनत्रयम् ॥१८॥ प्रयांति तानि सर्वाणि
स्वंस्वं स्थानं प्रति प्रभो ॥ अधुनाऽहं परिश्रांता दह्यमाना त्वहर्निशम् ॥१९॥ दुर्जनानां सुसंपर्काद्भृशं पापात्मनां प्रभो ॥ सौभाग्यमधुना प्राप्तं सत्सं
सर्गेण नारद ॥२०॥ प्रयांत्येतानि सर्वाणि स्वस्थानं मुदितानि च ॥२१॥ एतानि मत्प्रसादेन पुण्यानि कथितानि च ॥ कथय श्रमशांत्यर्थं दुःखि
ता किं करोम्यहम् ॥२२॥ ॥ प्रह्लाद उवाच ॥ ॥ गोदावर्य्या वचः श्रुत्वा भगवान्नारदो द्विजाः ॥ क्षणं ध्यात्वा तु दुःखार्त्तः प्राह संशयमानसः ॥२३॥
॥ ॥ नारद उवाच ॥ ॥ अहो अत्यद्भुतं ह्येतद्गौतम्या व्यसनं महत् ॥ पश्यन्त्वसंशयं देवास्तीर्थक्षेत्रसरिद्वराः॥२४॥ सत्पुण्यनिचयो यस्यां युष्माकं
समभूद्ध्रुवम् ॥ तस्याः पापाग्निशमनं कथं स्यादिति चिन्त्यताम् ॥ २५ ॥ ॥ श्रीप्रह्लाद उवाच ॥ ॥ तदा चिन्तयतां तेषां सर्वेषां भावितात्मनाम् ॥
गौतमो भगवांस्तत्र समायातो मुनीश्वराः ॥ २६ ॥ दृष्ट्वा तमृषयो देवा यथोचितमपूजयन् ॥ जाह्नवी यमुना पुण्या नर्मदा च सरस्वती ॥ २७ ॥
अन्याश्च सर्वाः सरितस्त्रैलोक्यमनुवर्तिताः ॥ वाराणसीकुरुक्षेत्रप्रमुखान्याश्रमैः सह ॥ युगपत्तानि सर्वाणि संपूज्य मुनिमब्रुवन्॥२८॥त्वत्प्रसादेन वै
त्राताः सम्यक्छुद्धा महामुने ॥ यदानीता त्वया गंगा गौतमी भूतलं प्रति ॥२९॥ कृतार्था मानवाः सर्वे सर्वपापविवर्जिताः ॥ किं तु दुर्जनसंपर्कात्सं
तप्ता गौतमी भृशम् ॥३०॥ कथं पापैर्विनिर्मुक्ता परमानन्दसंप्लुता ॥ सुप्रभा जायते देवी तद्गौतम विचिन्त्यताम् ॥ ३१ ॥ ॥ प्रह्लाद उवाच ॥ ॥
एवमुक्तो मुनिस्तैस्तु चिन्ताकुलितमानसः ॥ नारदस्य मुखं वीक्ष्य प्रहसन्गौतमोऽब्रवीत् ॥ ३२ ॥ ॥ गौतम उवाच ॥ ॥ सर्वेषां क्षेत्रतीर्थानां
महाशुभविनाशिनी ॥ गौतमीयं महाभागा अस्यास्तापः क्व शाम्यति ॥३३॥ नास्ति लोकत्रये तीर्थं स्नातुं सिंहगते गुरौ ॥ यद्वै नायाति गौतम्यां
क्षेत्रं चापि विशुद्धये ॥ काशीप्रयागमुख्यानि राजंते यत्प्रसादतः ॥ ३४ ॥ वदंतु मुनयः सर्वे क्षेत्रतीर्थसमाश्रिताः ॥ शुद्धं विचार्य्य यत्कार्य्यं
मयाऽस्मिन्ज्ञातसंकटे ॥ ३५ ॥ ॥ प्रह्लाद उवाच ॥ ॥ इत्युक्ता मुनयः सर्वे नोचुः किञ्चिद्विमोहिताः ॥ तत्रोपायमविज्ञाय गौतमीं गौतमोऽ
ब्रवीत् ॥ ३६ ॥ ॥ गौतम उवाच ॥ ॥ आनीतासि मया देवि तपसाऽऽराध्य शंकरम्॥वदिष्यति स चोपायमित्युक्त्वाऽचिन्तयत्तदा ॥३७॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गौतमः श्रद्धया भक्त्या गंगामौलिमखंडधीः ॥ तदाऽभून्महदाश्चर्यं शृण्वंतु ऋषयोऽमलाः ॥ ३८ ॥ ध्यायमाने महादेवे गौतमेन महात्मना ॥ अकस्माद्भवद्वाणी हर्षयन्ती जगत्रयम् ॥ ३९ ॥ नादयन्ती दिशः सर्वा आब्रह्मभुवनं द्विजाः ॥ अरूपलक्षणाकारा विषादशमनी शुभा ॥ ॥ ४० ॥ ॥ दिव्यवाण्युवाच ॥ ॥ अहो बत महाश्चर्य्यं सर्वेषां सुखदे शुभे ॥ प्रसंगेऽत्र महाक्षेत्रे मग्ना दुःखार्णवे बुधाः ॥ ४१ ॥ अहो हे गौत माचार्य्य ऋषयो नारदादयः ॥ शृण्वंतु तीर्थक्षेत्राणि कृपया संवदाम्यहम् ॥ ४२ ॥ पश्चिमस्य समुद्रस्य तीरमाश्रित्य वर्तते ॥ अस्माच्च दिशि वायव्यां द्वारकाक्षेत्रमुत्तमम् ॥ ४३ ॥ यत्राऽऽस्ते गोमती पुण्या सागरेण समन्विता ॥ पश्चिमाभिमुखो यत्र महाविष्णुः सदा स्थितः ॥ ४४ ॥ अनेकपापराशीनामुग्राणामपि सर्वदा ॥ दाहस्थानं समाख्यातमिन्धनानां यथाऽनलः ॥ ४५ ॥ देवविश्वद्रुहो यत्र दग्ध्वा पातकमद्भुतम् ॥ लोक त्रयवधाज्जातं विराजंतेऽर्कवत्सदा ॥ ४६ ॥ तद्गम्यतां महाभागा गोमतीमघदाहकाम् ॥ गोदावरीं पुरस्कृत्य क्षेत्रतीर्थसमन्विताम् ॥ ४७ ॥ प्राप्य द्वारवतीं पुण्यां मत्प्रसादाद्द्विजोत्तमाः ॥ प्रभावाद्द्वारकायाश्च सत्यमाविर्भविष्यति ॥ ४८ ॥ ॥ प्रह्लाद उवाच ॥ ॥ इत्युक्ते सति ते सर्वे हर्ष निर्भरमानसाः ॥ श्रुत्वा सर्वोत्तमं क्षेत्रं जगर्जुर्हरिनामभिः ॥ ४९ ॥ जितं भो जितमस्माभिर्धन्या धन्यतमा वयम् ॥ दैवादपगतो मोहो ज्ञातं तीर्थो त्तमोत्तमम् ॥ ५० ॥ तदा सर्वाणि तीर्थानि क्षेत्रारण्याश्रमैः सह ॥ वाराणसीप्रयागादिसरांसि सिन्धवो नगाः ॥ ५१ ॥ गया च देवखातानि पितरो देवमानवाः ॥ श्रुत्वा प्रमुदिता वाचं प्रोचुर्जयजयेति च ॥ ५२ ॥ अहो सर्वोत्तमं क्षेत्रं सर्वेषां नोऽघनाशनम् ॥ राजानं तीर्थराजानं द्वारकां शिरसा नमः ॥ ५३ ॥ ॥ श्रीप्रह्लाद उवाच ॥ ॥ श्रुत्वा सर्वोत्तमं क्षेत्रं तीर्थं सर्वोत्तमोत्तमम् ॥ देवोत्तमोत्तमं देवं श्रीकृष्णं क्लेशनाशनम् ॥५४॥ उत्कण्ठा ह्यभवत्तेषां तीर्थादीनां ह्यनुत्तमा ॥ प्रोचुरन्योन्यतो वाचं सर्वाणि युगपत्तदा ॥ ५५ ॥ ॥ ऋषितीर्थदेवा ऊचुः ॥ ॥ कदा द्रक्ष्यामहे पुण्यां द्वारकां कृष्णपालिताम् ॥ श्रीकृष्णदेवमूर्तिं च कृष्णवक्त्रं सुशोभितम् ॥ ५६ ॥ कदा नु गोमतीस्नानमस्माकं तु भविष्यति ॥ चक्रतीर्थे कदा स्नात्वा कृष्णदेवस्य मंदिरम् ॥ द्रक्ष्यामः सुमहापुण्यं मुक्तिद्वारमपावृतम् ॥ ५७ ॥ दुर्ल्लभो द्वारकावासो दुर्ल्लभं कृष्णदर्शनम् ॥ दुर्ल्लभं गोमती स्नानं रुक्मिणीदर्शनं द्विजाः ॥ ५८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे चतुर्थे द्वारकामाहात्म्ये गौत मीतीरस्थसमस्ततीर्थक्षेत्रादीनां देववाण्या द्वारकाप्रभावं श्रुत्वा द्वारकागमनोत्सुकतापूर्वकगोमतीवर्णनंनामैकोनत्रिंशत्तमोऽध्यायः ॥ २९ ॥ ॥ छ ॥

१ गंगामौलिम्–शंकरम्–इत्यर्थः । २ ब्राह्मी–इति पाठे वाणी–इत्येवार्थः । ३ विमानेन–इ० पा० । ४ पर्वते–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



॥ ॥ श्रीप्रह्लाद उवाच ॥ ॥ तदा तेषां सुतीर्थानां क्षेत्राणामभवन्मुदः ॥ गन्तुं द्वारवतीं पुण्यां सर्वेषामपि सर्वशः ॥ १ ॥ द्वार
कागमने दृष्ट्वा तथां नारदगौतमौ ॥ महोत्सवो महांस्तत्र भविष्यति मनोहरः ॥ २ ॥ तीर्थानां कृष्णयात्रायां गन्तव्यमित्यवो
चतुः ॥ अथ ते ह्यृषयो देवाः सर्वतीर्थसमन्विताः ॥ ३ ॥ गौतमीं तु पुरस्कृत्य ययुर्द्वारवतीं मुदा ॥ तदा सर्वाणि तीर्थानि क्षेत्रारण्यानि
कृत्स्नशः ॥ द्वारकागमनं चक्रुः सानन्दा ऋषयः सुराः ॥ ४ ॥ श्रद्धयाऽपरया भक्त्या कृष्णदर्शनलालसाः॥ वीणानिनादतत्त्वज्ञं नारदं पथि तेऽ
ब्रुवन् ॥ ५ ॥ ॥ ऋषय ऊचुः ॥ ॥ राशयः पुण्यपुञ्जानां कृता वै तपसां तथा ॥ यज्ञदानव्रतानां च तीर्थानां महतां भुवि ॥ ६ ॥ संप्राप्तस्त
त्प्रसादोऽयं यद्द्रक्ष्यामः कुशस्थलीम् ॥ पृच्छामहेऽधुना त्वां वै योगिनां परमं गुरुम् ॥ ७ ॥ द्वारकायास्तु यात्रायां को विधिः संप्रकीर्तितः ॥ निय
मः कोऽत्र कर्त्तव्यो वर्जनीयं च किं मुने ॥ ८ ॥ श्रोतव्यं कीर्तितव्यं च स्मर्तव्यं किं च वै पथि ॥ उत्सवाश्चात्र के प्रोक्ता द्वारकायाश्च तत्पथि॥ ९॥
एकैकश्च महाभाग भक्तानन्दविवर्द्धनम् ॥ एतत्सर्वं महाभाग कृपया संप्रकीर्त्यताम् ॥ १० ॥ ॥ श्रीनारद उवाच ॥ ॥ कृताभ्यंगस्तु पूर्वेद्युः
संपूज्य श्रद्धया हरिम् ॥ भोजयेद्वैष्णवान्विप्रान्स्वशक्त्या संप्रहर्षितः ॥ ११ ॥ अनुज्ञातो महाविष्णोः प्रसादमुपयुज्य वै ॥ शयीत भुवि सुप्रीतो
द्वारकां कृष्णमानसः ॥ १२ ॥ श्वोभूते तु शुचिः स्नातः संपूज्य जगदीश्वरम् ॥ प्रदक्षिणं नमस्कृत्य महाविष्णोरनुज्ञया ॥ संपृष्ट्वा कुलवृद्धांश्च
ब्राह्मणान्वैष्णवान्प्रियान् ॥ १३ ॥ ततस्तु तदनुज्ञातो गीतवादित्रसंस्तवैः ॥ यात्रारंभं प्रकुर्वीत द्वारकायां प्रहर्षितः ॥ १४ ॥ द्वारकां गच्छमानस्तु
शान्तो दांतः शुचिः सदा ॥ ब्रह्मचर्य्यमधः शय्यां कुर्वीत नियतेन्द्रियः ॥ १५ ॥ सहस्रनामपठनं पुराणपठनं तथा ॥ कर्त्तव्यं सक्रुपं चित्तं सतां
शुश्रूषणं तथा ॥ १६ ॥ अन्नदानादिकं सर्वं विभवे सति मानवः ॥ अपि स्वल्पं स्वशक्त्या वै कृतं कोटिगुणं भवेत् ॥ १७ ॥ पथि कृष्णस्य यो
भक्त्या ग्रासमेकं प्रयच्छति ॥ द्वीपांता तेन दत्ता भूः पुण्यस्यान्तो न विद्यते ॥ १८ ॥ किं पुनर्द्वारकाक्षेत्रे कृष्णस्य च समीपतः ॥ कलावेकै
कसिक्थे च राजसूयायुतं फलम् ॥ १९ ॥ गयाश्राद्धसहस्राणि कृतानि शतसंख्यया ॥ अन्नदानं कृतं यैस्तु द्वारकापथि मानवैः ॥ २० ॥ औषधं
चान्नपानीयं पादुके कंबलं तथा ॥ वासांस्युपानहौ चैव वित्तं च विभवे सति ॥ वर्जयेत्संकरं विद्वान्वृथालापांस्तथैव च ॥ २१ ॥ परनिन्दां च

२ तथा दृष्ट्वा—तादृशं समस्ततीर्थक्षेत्रादीनां द्वारकागमन औत्सुक्यम्—दृष्ट्वा—इत्यर्थः। २ वित्तं वर्जयेत्—इत्यनेन—स्वयं तत्परिगणनाव्ययादि चिंतां वर्जयेत्—इत्यर्थः व्यावहारिकदृष्ट्या कार्पण्यं तत्र नाचरेत्—इति तात्पर्यं सूचितम्। ३ संकरम्—अशुचिभिः—सह—संपर्कम्—इत्यर्थः।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पैशुन्यं परस्य परिवञ्चनम् ॥ परान्नं परपाकं च सति वित्ते त्यजेद्बुधः ॥ २२ ॥ न दोषो हीनवित्तस्य तात्रन्मात्रपरिग्रहे ॥ श्रोतव्या सत्कथा विष्णोर्नामसंकीर्त्तनामृतम् ॥ २३ ॥ द्वारकापथि गच्छद्भिरन्योन्यं भक्तिवर्द्धनम् ॥ जप्तव्यं वैदिकं जाप्यं स्तोत्रमागमिकं तथा ॥ २४ ॥ यात्रायां यत्फलं प्रोक्तं श्रीकृष्णस्य च वै कलौ ॥ न शक्यते मया वक्तुं वदनैर्युगसंख्यया ॥ २५ ॥ इत्येतत्कथितं सर्वं यत्पृष्टं तु द्विजोत्तमाः ॥ यतध्वं तत्प्रयत्नेन विष्णुप्राप्तौ च सत्वरम् ॥ २६ ॥ ॥ श्रीप्रह्लाद उवाच ॥ ॥ एवं ते नारदेनोक्ता मुनयो हृष्टमानसाः ॥ चक्रुस्ते सहिताः सर्वे कृष्णदेवस्य तत्पथि ॥ २७ ॥ केचिच्छृण्वन्ति ता विष्णोः सत्कथा लोकविश्रुताः ॥ यासां संश्रवणादेव भगवान्विशते हृदि ॥ २८ ॥ कीर्त्यमानानि नामानि महापुण्यप्रदानि वै ॥ पावनानि सदा लोके कलौ विप्रा विशेषतः ॥ २९ ॥ पुराणसंहिता दिव्या मुनिभिः परिकीर्त्तिताः ॥ प्रकाशयंति या विष्णोर्महिमानं सुमंगलम् ॥ ३० ॥ सद्गुणाः कर्मवीर्याणि कृतानि विष्णुना पुरा ॥ लीलावताररूपैस्तु शृण्वन्ति परया मुदा ॥ ॥३१॥ अपरे वासुदेवस्य चरितानि सुमंगलाः ॥ वदंति परया भक्त्या सानन्दाः साश्रुलोचनाः ॥ ३२ ॥ अन्ये स्मरंति देवेशमनादिनिधनं विभुम् ॥ केचिज्जपंति मुनयः स्तोत्राणि परया मुदा ॥ ३३ ॥ केचित्तु शतनामानि जपन्ति मुनयः पथि ॥ अन्ये सहस्रनामानि लक्षनाम तथाऽपरे ॥ ३४ ॥ केचिल्लौकिकगीतानि हरिनामानि हर्षिताः ॥ उत्सवैश्च व्रजंत्यन्ये पताकादिविभूषिताः ॥ ३५ ॥ गीतवादित्रघोषेण करतालस्वनेन च ॥ नास्ति धन्यतमस्तस्मात्त्रिषु लोकेषु कश्चन ॥ ३६ ॥ दर्शनं यस्य संजातं वैष्णवानामनुत्तमम् ॥ तथैव जाह्नवी पुण्या यमुना च सरस्वती ॥ ॥ ३७ ॥ रेवाद्याः सरितः सर्वाः प्रचक्रुर्गीतनर्त्तनम् ॥ प्रयागादीनि तीर्थानि सागराः पर्वतोत्तमाः ॥ ३८ ॥ वाराणसी कुरुक्षेत्रं पुण्यान्यन्यानि कृत्स्नशः ॥ त्रैलोक्ये यानि तीर्थानि क्षेत्राणि देवनायकाः ॥ चक्रुर्गीतं च नृत्यं च द्वारकायाश्च सत्पथि ॥ ३९ ॥ एकैकस्मिन्पदे दत्ते द्वारकापथि गच्छताम् ॥ पुण्यं क्रतुसहस्राणां तत्पादरजसंख्यया ॥ ४० ॥ अथ ते मुनयः सर्वे तीर्थक्षेत्रादिसंयुताः ॥ श्रीमत्कृष्णालयं दूराद्दद्दशुर्नारदादयः ॥ ४१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे चतुर्थे द्वारकामाहात्म्ये द्वारकां प्रति गोदावर्यादितीर्थक्षेत्रदेवमहर्षिगमनोत्सवयात्रावर्णनंनाम त्रिंशत्तमोऽध्यायः ॥ ३० ॥ ॥ छ ॥ ॥ प्रह्लाद उवाच ॥ ॥ दिव्यस्वप्रभया ध्वांतं भूतानां नाशयन्सदा ॥

१ अकारान्तत्वमपि सकारान्तस्य क्वचित्। २ अत्र–विष्ण्वालयः–प्रति विशेष्यं प्रकरणादध्याहर्तव्यम्। राजते गिरिराडिव—इत्यत्र विष्ण्वालयस्यैव कर्तृत्वेन समन्वयौचित्यात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



जनयन्परमानंदं भक्तानां च भयापहः ॥ १ ॥ पताकाभिर्ध्वजस्थाभिर्द्वारकाजयवर्द्धनः ॥ दिव्यपुण्यप्रकाशेन राजते गिरिराडिव ॥ २ ॥ दृष्ट्वाऽऽ
लयं तदा विष्णोस्तदायुधविभूषितम् ॥ विहाय पादुके च्छत्रं दण्डवत्पतिता भुवि ॥ ३ ॥ भूमिसंलुठनं तेषां तीर्थानामद्भुतं महत् ॥ अभवद्विप्र
शार्दूलाः क्षेत्रादीनां च सर्वशः ॥ ४ ॥ वाराणसी कुरुक्षेत्रं प्रयागो जाह्नवी तथा ॥ यमुना नर्मदा पुण्या पुण्या प्राची सरस्वती ॥ ५ ॥ गोदावरी
महापुण्या गया तिस्रस्तु मंगलाः ॥ शालिग्रामं महाक्षेत्रं पुण्या चक्रनदी शुभा ॥ ६ ॥ पयोष्णी तपती कृष्णा कावेर्य्याद्याः सुपुण्यदाः ॥ पुष्करा
दीनि तीर्थानि सागराः पर्वतोत्तमाः ॥ ७ ॥ अयोध्या मथुरा माया अवंत्याद्याश्च मुक्तिदाः ॥ श्रीरंगाख्यमनंतं च प्रभासं च विशेषतः ॥ ८ ॥
पुरुषोत्तमं महाक्षेत्रमरण्यान्यादयः शुभाः ॥ त्रैलोक्ये वर्त्तमानानि सर्वतीर्थानि सर्वशः ॥ ९ ॥ दृष्ट्वा कृष्णालयं पुण्यं मुहुर्मुहुः प्रहर्षिताः ॥ जय
शब्दैर्नमःशब्दैर्गर्जंतो हरिनामभिः ॥ १० ॥ आनंदाश्रूणि मुंचंतः प्रेम्णा गद्गदया गिरा ॥ स्तुवंति मुनयः सर्वे तीर्थादीनि च सर्वशः ॥ ११ ॥
अथ संस्तुवतां तेषामन्योन्यं मुदितात्मनाम् ॥ वीक्ष्य वक्त्राणि सर्वेषां महर्षिर्नारदोऽब्रवीत् ॥ १२ ॥ ॥ श्रीनारद उवाच ॥ ॥ राशयः पुण्य
पुंजानां कृता युष्माभिरुत्तमाः ॥ तज्जन्मनां सहस्रैस्तु यद्दृष्टं कृष्णमंदिरम् ॥ १३ ॥ दर्शनं कृष्णदेवस्य द्वारकागमने मतिः ॥ दृढभक्तिर्महा
विष्णोर्नाल्पस्य तपसः फलम् ॥ १४ ॥ धन्या वै पूर्वजास्तेषां वंशजाः कृष्णदर्शनं ॥ सोत्सवा द्वारकां यांति पश्यंति च हरिप्रियाम् ॥ १५ ॥
धन्येयं गौतमी गंगा गौतमोऽयं महातपाः ॥ यत्प्रसादेन सर्वेषां कल्याणं समुपस्थितम् ॥ १६ ॥ यज्ञाध्ययनदानानां तपोव्रतसमाधिनाम्[१] ॥
संप्राप्तं फलमस्माभिर्युष्माभिः सर्वतीर्थकाः ॥ १७ ॥ यूयं सर्वाणि तीर्थानि क्षेत्राणि चैव कृत्स्नशः ॥ कृष्णाज्ञया सर्वकालं तिष्ठध्वं सर्वदैवतैः ॥
॥ १८ ॥ वसंति येऽत्र ते धन्या एकाहमपि पावनाः ॥ पश्यंतु सुमहाभागा गोदावर्य्यत्र जाह्नवी ॥ १९ ॥ इयं च शोभते पुण्या द्वारका कृष्ण
वल्लभा ॥ प्रपश्यंतु महाभागास्तथा वाराणसीं शुभाम् ॥ २० ॥ क्षेत्राणि कुरुमुख्यानि पश्यंतु द्वारकां प्रभोः ॥ तादृशी मथुरा काशी मायाऽयोध्या
च राजते ॥ २१ ॥ अवन्ती न च कांची च क्षेत्रं च पुरुषोत्तमम् ॥ सूर्योपरागकालेऽपि कुरुक्षेत्रं न राजते ॥ २२ ॥ ईदृशं न गयातीर्थं यादृगेत
त्प्रकाशते ॥ २३ ॥ ग्रहनक्षत्रताराणां यथा सूर्य्यो विराजते ॥ सक्षेत्रतीर्थराजानां द्वारकार्को विराजते ॥ २४ ॥ ॥ प्रह्लाद उवाच ॥ ॥ ॥३१७॥
निशम्य नारदेनोक्तं प्रहृष्टाश्च तथा द्विजाः ॥ क्षेत्राणि सर्वतीर्थानि पुरस्कृत्य च गौतमम् ॥ २५ ॥ विहाय गौतमीं तत्र प्रययुर्ह्यग्रतोऽग्रतः[२] ॥ प्रहृष्टा

१ "नामि" इति दीर्घे प्राप्ते तदभाव आर्षः। २ तथा—इत्यर्थादाक्षिप्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गौतमी तत्र प्रणम्य त्वरिता ययौ ॥ २६ ॥ गीतवाद्यैश्च नृत्यैश्च पताकाभिः समंततः ॥ प्ययुः स्तोत्रपाठैश्च सर्वे ते द्वारकाश्रये ॥ २७ ॥ स ती
र्थान्यग्रतः कृत्वा मध्ये कृत्वा तु शोभनम् ॥ प्रयागं तीर्थराजं च प्रहृष्टं क्षेत्रदर्शनात् ॥ २८ ॥ ततः पश्चात्सरित्स्नानं चकार ऋषिसत्तमः ॥
जाह्नवी गौतमी रेवा यमुना प्राक्सरस्वती[1] ॥ २९ ॥ सरयूर्गंडकी तापी पयोष्णी यमुना तथा ॥ कृष्णा भीमरथी गंगा कावेरी चाघनाशिनी ॥
॥ ३० ॥ मंदाकिनी महापुण्या पुण्या भोगवती नदी ॥ व्रजंति युगपत्सर्वाः पश्यंत्यो द्वारकां पुरीम् ॥ ३१ ॥ ततस्ते सागराः सप्त स्वैःस्वैस्तीर्थैः
समन्विताः ॥ ततः पश्चादरण्यान्याश्रमैः पुण्यैर्युतानि च ॥ ३२ ॥ ततस्तु पर्वता रम्या मेर्वाद्यास्तु सुशोभनाः ॥ नृत्यंतो गायमानाश्च स्तवाद्यैस्तु
महर्षिभिः ॥ ३३ ॥ ततश्च ऋषयो देवाः समंताद्धृष्टमानसाः ॥ गायंतो नृत्यमानाश्च गर्जंतो हरिनामभिः ॥ ३४ ॥ वादित्रनिनदैरुच्चैर्जयशब्दैः
प्रहर्षिताः ॥ प्राप्तास्ते गोमतीतीरं सर्वयज्ञसमन्विताः ॥ ववंदिरे महापुण्याः सर्वे ते हृष्टमानसाः ॥ ३५ ॥ ॥ श्रीनारद उवाच ॥ ॥
हेभागीरथि हे रेवे यमुने शृणु गौतमि ॥ श्रेष्ठा श्रीगोमतीदेवी विख्याता भुवनत्रये ॥ ३६ ॥ यस्याः सकृज्जलस्नानं स्पर्द्धते ब्रह्मविद्यया ॥
तेन वै गोमती सेयं सर्वतीर्थोत्तमोत्तमा ॥ ब्रह्मज्ञानेन मुच्यंते प्रयागमरणेन वा ॥ स्नानमात्रेण गोमत्यां मुच्यते पूर्वजैः सह ॥ ३७ ॥
॥ ॥ प्रह्लाद उवाच ॥ ॥ निशम्य तानि तीर्थानि माहात्म्यं महदद्भुतम् ॥ गोमत्याः श्रद्धया स्नात्वा उत्सवैरग्रतो ययुः ॥ ३८ ॥ ततः क्षेत्राणि
तीर्थानि सरितः सागरादयः ॥ ददृशुर्द्वारकां रम्यामागता द्वारमण्डपे ॥ ३९ ॥ स्थितां सिंहासने दिव्ये मणिकांचनभूषिते ॥ सुन्दरां शुक्ल
वर्णां च रुद्रादित्यसमप्रभाम् ॥ ४० ॥ दिव्यवस्त्रां सुगंधाढ्यां रत्नाभरणभूषिताम् ॥ किरीटकुण्डलैर्दिव्यैः शोभितां कंकणादिभिः ॥ ४१ ॥
वरदाभयहस्तां च शंखचक्रगदायुधाम् ॥ श्वेतातपत्रशोभाढ्यां चामरव्यजनादिभिः ॥ ४२ ॥ संस्तवैः स्तूयमानां च गीतवाद्यादिहर्षिताम् ॥ महासिं
हासनस्थां तु दृष्ट्वा द्वारवतीं पुरीम् ॥ प्रणेमुर्युगपत्सर्वे सर्वाणि च सुभक्तितः ॥ ४३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां
सप्तमे प्रभासखण्डे चतुर्थे द्वारकामाहात्म्ये मूर्तिमतीद्वारवतीदर्शनवर्णनंनामैकत्रिंशत्तमोऽध्यायः ॥ ३१ ॥ ॥ छ ॥ ॥ प्रह्लाद उवाच ॥ नारद
स्त्वग्रतो गत्वा प्रणम्याथ हरिप्रियाम् ॥ उवाच ललितां वाचं हर्षयन्द्वारकां पुरीम् ॥ १ ॥ ॥ श्रीनारद उवाच ॥ ॥ पश्यपश्य महाभागे सर्वे
प्राप्ताः सुशोभने ॥ तीर्थक्षेत्राणि देवाश्च ऋषयश्चैव कृत्स्नशः ॥ २ ॥ पश्येमं पुरतः प्राप्तं प्रयागं तीर्थकैः सह ॥ द्वारके तत्र पादाब्जे लुण्ठते श्रद्धया

१ प्राक्सरस्वती–प्राची सरस्वती–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



द्भुतम् ॥ ३ ॥ इदं तु पुष्करं तीर्थं नमति श्रद्धया शुभे ॥ इयं तु गौतमी पुण्या सर्वतीर्थसमाश्रया ॥ ४ ॥ सिंहस्थे च गुरौ भद्रे संप्राप्ता सौभगं महत् ॥ किन्तु दुर्जनसंसर्गाद्दग्धा पापाग्निना भृशम् ॥ ५ ॥ तत्रोपायमभिज्ञाय ऋषीणां शृण्वतां तदा ॥ श्रुत्वा कर्णे महच्छब्दं[1] संप्राप्तेयं तवांतिकम् ॥ ६ ॥ नमस्करोति देवि त्वां द्वारके गौतमी शुभा ॥ पश्यपश्य महापुण्या इयं भागीरथी शुभा ॥ ७ ॥ नमस्करोति ते पादौ संहृष्टा च पुनःपुनः ॥ पश्येमां नर्मदां रम्यां प्रणतां तव पादयोः ॥ ८ ॥ यमुना चन्द्रभागेयमियं प्राचीसरस्वती ॥ सरयूर्गंडकी प्राप्ता गोमती[2] पूर्ववाहिनी ॥ ॥ ९ ॥ शोणः सिन्धुनदी चैता अन्याश्च सरितां वराः ॥ कृष्णा भीमरथी पुण्या कावेर्याद्याः सरिद्वराः ॥ १० ॥ सीता चक्षुर्नदी भद्रा नमंत्येताः पदांबुजम् ॥ द्वारके ता महापुण्याः सप्तद्वीपोद्भवाः पराः॥११॥मन्दाकिनी महापुण्या भोगवत्यादिसंयुता॥ पश्याश्चर्यमिदं भद्रे वाराणसी विमुक्तिदा ॥१२॥ भक्त्या ते च पदांभोजं शिरस्याधाय वर्तते ॥ कुरुक्षेत्रं महापुण्यं नमति त्वामहर्निशम् ॥१३॥ द्वारके मथुरां पश्य प्रणतां तव पादयोः ॥ अयोध्याऽवंतिकामायास्ता नमंति पदांबुजम् ॥ १४ ॥ कांची गया विशाला च विरजा लुठति क्षितौ ॥ शालिग्रामं महाक्षेत्रं पतितं तव पादयोः॥ विराजते प्रभासं च क्षेत्रं च पुरुषोत्तमम् ॥ १५ ॥ भार्गवादीनि चान्यानि सर्वक्षेत्राणि सुन्दरि ॥ द्वारके प्रणमंति त्वां भक्त्योत्थाय पुनःपुनः ॥ ॥ १६ ॥ पश्येमान्सागरान्सप्त पतितस्तांव पादयोः ॥ पश्यारण्यानि सर्वाणि नैमिषं प्रणतं पुरः ॥ १७ ॥ धनुष्कं च दशारण्यं दंडकारण्यमर्बुदम्॥ नारायणाश्रमं पश्य द्वारके प्रणतं तथा ॥ १८ ॥ अयं मेरुश्च कैलासो मन्दराद्याः सहस्रशः ॥ हिमाद्रिर्विंध्यशैलश्च श्रीशैलाद्याः प्रहर्षिताः ॥ एते ह्यृषिगणाः सर्वे नमंतिस्म पुनःपुनः ॥ १९ ॥ गंगाद्याः सागराः शैला नृत्यंति पुरतस्तव ॥ ऋषिदेवगणाः सर्वे सर्वे गर्जंति नामभिः ॥ २० ॥ ॥ ॥ श्रीप्रह्लाद उवाच ॥ ॥ इत्येवं वदतस्तस्य द्वारका हृष्टमानसा ॥ नृत्यतो मुदितान्वीक्ष्य सर्वान्प्रेम्णाभिनंद्य च ॥ उवाच ललितां वाचं गौतमीं स्पृश्य पाणिना ॥ २१ ॥ भागीरथीप्रयागादीन्क्षेत्रादीनथ सर्वशः ॥ द्वारका मधुरालापैः सर्वानानंदयत्तदा ॥ २२ ॥ अथाश्चर्य्यमभूत्तत्र सर्वानंदविवर्द्धनम् ॥ अथ तावत्तदाऽऽकाशे गीतवाद्यजयस्वनाः ॥ २३ ॥ गर्जनानि सुपुण्यानि हरिशब्दैः पृथक्पृथक् ॥ अपश्यन्वै तदा सर्वे ब्रह्माद्या देवनायकाः ॥ २४ ॥ महेशः स्वगणैः सार्द्धं भवान्या समदृश्यत ॥ इन्द्रस्तु त्रिदशैः सार्द्धं यक्षगन्धर्वकिन्नरैः ॥ २५ ॥ मरुद्भिर्लोकपालैश्चा नृत्यमानाः प्रहर्षिताः ॥ सिद्धविद्याधराः सर्वे वस्वादित्याश्च सग्रहाः ॥ २६ ॥ भृग्वाद्याः सनकाद्याश्च नृत्यमानाः प्रहर्षिताः ॥ ब्रह्माणं च नम



१ महच्छब्दम्–दिव्यवागुद्भवं शब्दम्–इत्यर्थः । २ इयमन्या पूर्ववाहिनी गोमती नदी बोध्या । अतो नात्र शंकावकाशः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्कृत्य सप्तस्वर्गस्थिताः सुराः ॥ २७ ॥ ऊचुस्ते द्वारकां दृष्ट्वा ब्रह्मेशानादयस्तदा ॥ हर्षविह्वलितात्मानो वीक्ष्याऽन्योन्यं च विस्मिताः ॥ २८ ॥
॥ ॥ देवा ऊचुः ॥ ॥ सेयं वै द्वारका देवी वहते यत्र गोमती ॥ यत्राऽऽस्ते भगवान्कृष्णः सेयं पुण्या विराजते ॥ २९ ॥ सर्व
क्षेत्रोत्तमा या च सर्वतीर्थोत्तमोत्तमा ॥ स्वर्गादप्यधिका भूमौ द्वारकेयं प्रकाशते ॥ ३० ॥ एतद्वै चक्रतीर्थं च यच्छिला चक्र
चिह्निता ॥ मुक्तिदा पापिनां लोके म्लेच्छदेशेऽपि पूजिता ॥ ३१ ॥ ॥ प्रह्लाद उवाच ॥ ॥ ब्रह्मादीनागतान्दृष्ट्वा विस्मिता नार
दादयः ॥ क्षेत्राणि तीर्थमुख्यानि विस्मितानि सरिद्वराः ॥ प्रणेमुर्युगपत्सर्वे सर्वाः सर्वाणि सर्वशः ॥ ३२ ॥ ब्रह्मादीनां च तीर्थानां
दृष्ट्वा यात्रां मनोहराम् ॥ द्वारकां प्रति विप्रेन्द्रा विस्मिता द्वारकौकसः ॥ ३३ ॥ दृष्ट्वा देवगणाः सर्वे द्वारकां प्रति मंदिरे ॥ गीतवाद्या
दिनिर्घोषैर्नृत्यमानाः प्रहर्षिताः ॥ ३४ ॥ वदन्तो जयशब्दांश्च सेयं कृष्णप्रियेति च ॥ दृष्ट्वा ब्रह्ममहेशानौ द्वारकां प्रीतमानसौ ॥ ३५ ॥ त्यक्त्वा
च वाहने श्रेष्ठे दण्डवत्पतितौ भुवि ॥ ऊचतुश्च तदा देवौ द्वारकां प्रति हर्षितौ ॥ ३६ ॥ श्रेष्ठा त्वमम्ब सर्वेभ्योऽस्मदादिभ्योऽपि सर्वतः ॥ यतस्त्वां
न त्यजेत्साक्षाद्भगवान्विष्णुरव्ययः ॥ ३७ ॥ अतो दर्शय देवेशं कृष्णं कंसविनाशनम् ॥ यद्दर्शनान्महासिद्धिः सर्वेषां च भविष्यति ॥ ३८ ॥
॥ ॥ प्रह्लाद उवाच ॥ ॥ इत्युक्ता प्रययौ देवी तीर्थक्षेत्रादिसंयुता ॥ ब्रह्मेशानौ पुरस्कृत्य हृष्टौ दृष्ट्वा महोत्सवान् ॥ ३९ ॥ गीतवाद्यपताकैश्च
दिव्योपायनपाणिभिः ॥ प्राप्योवाच ततो देवान्द्वारका हर्षविह्वला ॥ ४० ॥ पश्यतांपश्यतां देवाः सोऽयं वै द्वारकेश्वरः ॥ प्राप्य संदर्शनं यस्य
मुक्तानां यत्फलं भवेत् ॥ न विद्यते सहस्रेषु ब्रह्मांडेषु च यत्फलम् ॥ ४१ ॥ ततो देवगणाः सर्वे क्षेत्रतीर्थादिसंयुताः ॥ पश्चिमाभिमुखं दृष्ट्वा कृष्णं
क्लेशविनाशनम् ॥ प्रणेमुर्युगपत्सर्वे प्रहृष्टाः समुपागताः ॥ ४२ ॥ गीतवाद्यप्रघोषैश्च नृत्यमानाः समंततः ॥ जयशब्दं नमःशब्दं गर्जंतो हरिनाम
भिः ॥ ४३ ॥ ब्रह्मा भवो भवानी च सेन्द्रा देवगणा भुवि ॥ दृष्ट्वा कृष्णं प्रणेमुस्ते भक्त्योत्थाय पुनःपुनः॥ ४४ ॥ प्रयागादीनि तीर्थानि गंगाद्याः
सरितोऽमलाः ॥ ऋषयो देवगंधर्वाः शुकाद्याः सनकादयः ॥ वीक्ष्य वक्त्रं महाविष्णोः प्रणेमुश्च मुहुर्मुहुः ॥ ४५ ॥ कृष्णकृष्णेति कृष्णेति जय
कृष्णेति वादिनः ॥ स्नात्वा तु गोमतीनीरे तीरे चैव महोदधेः ॥ कमलासनः संहृष्टः श्रीमत्कृष्णमपूजयत् ॥ ४६ ॥ स्वर्धेनुपयसा स्नाप्य दिव्यैश्चा
मृतपंचकैः ॥ भवश्चाथ भवानी च पूजयामास भक्तितः ॥ ४७ ॥ इन्द्रो देवगणाः सर्वे योगिनः सनकादयः ॥ ऋषयो नारदाद्याश्च गंगाद्याश्च सरि
द्वराः ॥ ४८ ॥ अमूल्याभरणैर्भक्त्या महारत्नविनिर्मितैः ॥ दिव्यैर्माल्यैरनेकैश्च नन्दनादिसमुद्भवैः ॥ ४९ ॥ प्रियया श्रीतुलस्या वै श्रीमत्कृष्णमपूज



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



यन् ॥ धूपैर्नीराजनैर्दिव्यैः कर्पूरैश्च पृथक्पृथक् ॥ ५० ॥ नैवेद्यैर्विविधैः पुष्पैर्दिव्यैः कर्पूरवासितैः ॥ सकर्पूरैश्च तांबूलैः प्रियैश्चोपायनैस्तथा ॥५१॥
महामांगलिकैः सर्वैः सुदिव्यैर्मंगलाऽऽर्तिकैः ॥ संपूज्यैवं महाविष्णुं कृष्णं क्लेशविनाशनम् ॥ प्रहृष्टा ननृतुः सर्वे गीतवाद्यप्रहर्षिताः ॥ ५२ ॥ पुरतः
कृष्णदेवस्य ह्यप्सरोभिः समन्विताः ॥ ब्रह्मा च ब्रह्मपुत्राश्च ततः सेन्द्रा मरुद्गणाः ॥ ५३ ॥ ब्रह्मादीन्नृत्यतः प्रेक्ष्य भगवान्कमलेक्षणः ॥ वा[1]रया
मास हस्तेन प्रीतः प्राह सुरान्विभुः॥ ५४ ॥ ॥ श्रीभगवानुवाच ॥ ॥ भोभो ब्रह्मन्महेशान हे भवानि महेश्वरि ॥ क्षेत्राणि सर्वतीर्थानि नारदः
सनकादयः ॥ प्रीतोऽहं भवतां सम्यक्सर्वान्कामानवाप्स्यथ ॥ ५५ ॥ ॥ प्रह्लाद उवाच ॥ ॥ तदाभिलषिताँल्लब्ध्वास वांन्कामवरानथ ॥
भक्त्या परमया श्रीमत्कृष्णं प्रोचुः प्रहर्षिताः ॥ ५६ ॥ ॥ देवा ऊचुः ॥ ॥ प्राप्तः कामवरोऽस्माभिः सर्वतः कृपया विभो ॥ सप्रेमा त्वत्पदां
भोजे भ[2]क्तिर्भव्याऽनपायिनी ॥ ५७ ॥ ॥ प्रह्लाद उवाच ॥ ॥ तथैव पूजयामासु रुक्मिणीं कृष्णवल्लभाम् ॥ अथ ब्रह्ममहेशानौ सर्वेषां शृण्व
तामिदम् ॥ ५८ ॥ श्रद्धया परया युक्तौ द्वारकां प्रत्यवोचतुः ॥ त्वं देवि सर्वतीर्थानां क्षेत्राणामुत्तमोत्तमा ॥ ५९ ॥ पर्वतानां यथा मेरुः सिन्धूनां
सागरो यथा ॥ प्राणो यथा शरीराणामिन्द्रियाणां तु वै मनः ॥ ६० ॥ तेजस्विनां यथा वह्निस्तत्त्वानां चै[3]त्त्य ईज्यते ॥ यथा ग्रहर्क्षताराणां सोमो
वै ज्योतिषां ध्रुवम् ॥ एषां प्रकाशपुंजानां यथा सूर्य्यः प्रकाशते ॥ ६१ ॥ यथा नः सर्वदेवानां महाविष्णुरयं महान् ॥ तथैव सर्वतीर्थानां पूज्येयं
द्वारका शुभा ॥ ६२ ॥ ॥ प्रह्लाद उवाच ॥ ॥ इत्युक्त्वा सर्वदेवानां क्षेत्रादीनां च सत्तमाः ॥ आधिपत्ये सुरे[4]शानौ द्वारकामभिषेचतुः ॥ ६३ ॥
ब्रह्मेशानौ तथा देवाः प्रजेशा ऋषयोऽमलाः ॥ तीर्थानां क्षेत्रराजानां महाराजत्वकारणम्॥६४॥ चक्रुर्महाभिषेकं तु द्वारकायाः प्रहर्षिताः॥ वादयन्तो
विचित्राणि वादित्राणि महोत्सवे ॥ ६५ ॥ दिव्यैः पञ्चामृतैस्तोयैः सर्वतीर्थसमुद्भवैः ॥ पुण्यैश्चाकाशगंगाया दिग्गजानां करोद्धृतैः ॥ ६६ ॥ अथ
वासांसि दिव्यानि दत्त्वा चाऽऽचमनं तथा ॥ चर्चितां चन्दनैर्दिव्यैर्दिव्याभरणभूषिताम् ॥ ६७ ॥ पूजां च चक्रिरे पुष्पैश्चंदनादिसमुद्भवैः ॥ तदा
जाता महादिव्याः पुरुषाः पार्षदा हरेः ॥ ६८ ॥ विष्वक्सेनसुनंदाद्या द्योतयन्तो दिशो दश ॥ जयशब्दं नमःशब्दं वदंतः पुष्पवर्षिणः ॥ ६९ ॥ ॥३१९॥
गीतवादित्रघोषेण नृत्यमानाः प्रहर्षिताः ॥ किरीटकुण्डलैर्हारैर्वैजयंत्या विभूषिताः ॥ ७० ॥ श्यामाश्चतुर्भुजाः पीतवस्त्रमाल्यैर्विभूषिताः ॥ स्वप्रभा

१ वारयामास—स्वदर्शनसंजातसमौत्सुक्यप्रवर्तितनृत्यादिप्रसक्ति स्वभाषणश्रवणोन्मुख्याय—हस्तेन हस्तसंज्ञया—वारयामास—निवारयामास-इत्यर्थः । २ अस्तु—इति क्रियापदमध्याहार्यम् । ३ चैत्त्यः—चित्तप्रतिबिम्बितः पञ्चविंशः—आत्मा—इत्यर्थः । ४ सुरेशानौ--ब्रह्मेशानौ—इत्यस्य विशेषणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दीप्यमानौ ते दृष्ट्वा ब्रह्ममहेश्वरौ ॥ ७१ ॥ नारदं सनकादींश्च महाभागवतानृषीन् ॥ तेऽपि तानपि संहृष्टाः प्रहर्षागतसंभ्रमाः ॥७२॥ ववंदिरे ततो
ऽन्योऽन्यं हृष्टा आलिंगनादिभिः ॥ ऋषयोऽन्ये च देवाश्च प्रणेमुर्विष्णुपार्षदान् ॥ ७३ ॥ अथ ते समुपागम्य द्वारकां विष्णुपार्षदाः ॥ नत्वाऽथ
द्वारकानाथं द्वारकां वै तथैव च ॥ ७४ ॥ संपूज्य श्रद्धया भक्त्या निःश्रेयसवनोद्भवैः[1] ॥ कुसुमैर्विविधैर्दिव्यैस्तुलस्या तद्वनोत्थया ॥ ७५ ॥ तदु
त्पन्नैः फलैर्दिव्यैर्धूपैर्नीराजनैः प्रभुम् ॥ विविधैश्चान्नतांबूलैर्दत्त्वा कृष्णमतोषयन् ॥ ७६ ॥ क्षेत्रतीर्थादिराजानां महाराजस्त्वमीश्वरि ॥ इति सर्वे
वदन्तस्तु द्वारकां च ववंदिरे ॥ ७७ ॥ एतस्मिन्नंतरे विप्रा देवदुन्दुभिनिस्वनाः ॥ अश्रूयंत महाशब्दा अभूवन्पुष्पवृष्टयः ॥७८॥ अथाऽऽसीन्महदा
श्चर्यं शृण्वन्तु ऋषिसत्तमाः ॥ कुरुक्षेत्रं प्रयागं च सव्यदक्षिणपार्श्वयोः ॥ ७९ ॥ स्थित्वा जगृहतुर्दिव्ये श्वेतच्छत्रे मनोहरे ॥ द्वारकायस्तथा
शुभ्रे चामरव्यजने शुभे ॥ ८० ॥ अयोध्या मथुरा माया वाराणसी जयस्वनैः ॥ स्तुवंत्यन्यास्तथान्यानि सर्वक्षेत्राणि सर्वशः ॥ ८१ ॥ तीर्थानि
सरितः सर्वा द्वारकाया मुखांबुजम् ॥ पश्यंतः परमानंदं लेभिरे देवमानवाः ॥ ८२ ॥ आहुश्च पार्षदा विष्णोर्धन्यान्येतानि सर्वशः ॥ दृष्ट्वा तु
द्वारकां पुण्यां सर्वलोकैकमण्डनाम् ॥ ८३ ॥ वेदयज्ञतपोजाप्यैः सम्यगाराधितो हरिः ॥ प्रसीदेद्यस्य तस्य स्या द्वारकागमने मतिः ॥ ८४ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे चतुर्थे द्वारकामाहात्म्ये विष्णुपार्षदवर्णितद्वारकामाहात्म्यवर्णनंनाम
द्वात्रिंशत्तमोऽध्यायः ॥ ३२ ॥ ॥ श्रीप्रह्लाद उवाच ॥ ॥ श्रुत्वा ब्रह्ममहेशानौ यदुक्तं विष्णुपार्षदैः ॥ द्वारकायास्तु माहात्म्यं तद्वर्णयितुमूचतुः॥
॥ १ ॥ ॥ श्रीब्रह्मेशानावूचतुः ॥ ॥ भोभोः क्षेत्राणि तीर्थानि सरांसि सागरादयः ॥ प्रयागादीनि तीर्थानि काश्याद्या मुक्तिदायकाः ॥ २ ॥
भवतां तीर्थराजानां महाराजस्त्वियं शुभा ॥ द्वारका सेवनीया वै स्थीयतां स्वेच्छया बहिः ॥ ३ ॥ ॥ श्रीप्रह्लाद उवाच ॥ ॥ महेशवचनं
श्रुत्वा सर्वेषामुत्सवोऽभवत् ॥ प्रदक्षिणां ततः कृत्वा द्वारकां प्रणिपत्य च ॥ आवासं चक्रिरे तत्र क्षेत्रतीर्थानि हर्षतः ॥ ४ ॥ भागीरथी प्रयागं च
यमुना च सरस्वती ॥ सरयूर्गंडकी पुण्या गोमती पूर्ववाहिनी ॥ ५ ॥ अन्याश्च सरितः सर्वाः सिन्धुशोणौ नदौ तथा ॥ पंचाशत्कोटिभिस्तीर्थैर्द
ग्भागे ह्युत्तरे स्थिताः ॥ लंपटाः कृष्णसेवायां पश्यंतो द्वारकां मुहुः ॥ ६ ॥ मन्दाकिनी तथा पुण्या नदी भागीरथी च या ॥ महानदी नर्मदा च
शिप्रा प्राची सरस्वती ॥ ७ ॥ चक्षुर्भद्रा तथा सीता नद्योऽन्याः पापनाशिनीः ॥ वर्तंते पूर्वदिग्भागे तीर्थैश्च षष्टिकोटिभिः ॥ ८ ॥ पयोष्णी

१ निःश्रेयसवनोद्भवैः—वैकुण्ठोद्यानसंभवैः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 

तपती पुण्या विदर्भा च पयस्विनी ॥ गोदावरी महापुण्या भीमा कृष्णानदी तथा ॥ ९ ॥ कावेरीप्रमुखाः पुण्या अन्याश्चैवाघनाशिनीः ॥ स्वती
र्थसहिता भक्त्या नवनवतिकोटिभिः ॥ १० ॥ स्थिता दक्षिणदिग्भागे द्वारकासेवनोत्सुकाः ॥ क्रीडंति गोमतीनीरे तीरे च कृष्णसन्निधौ ॥११॥
सप्तद्वीपेषु याः संति तथाऽन्या वै सरिद्वराः ॥ सागराश्च तथा सप्त पश्चिमायां दिशि स्थिताः ॥१२॥ क्रीडंति चक्रतीर्थे वै तीर्थैश्च शतकोटिभिः॥
पश्यंति च मुहुः कृष्णं पश्चिमाभिमुखं सदा ॥ १३ ॥ विदिशासु च सर्वासु तीर्थसंख्या न विद्यते ॥ पुष्करादीनि तीर्थानि विशाला विरजा गया
॥ १४ ॥ शतैककोटिभिस्तीर्थैर्गोमत्युदधिसंगमे ॥ वर्त्तंते कृष्णसेवायां सोत्सवानि द्विजोत्तमाः ॥ १५ ॥ वाराणसी पूरैशान्यामवन्ती पूर्वदि
क्स्थिता ॥ आग्नेय्यां दिशि कांती[१] च दक्षिणे मथुरा स्थिता ॥ १६ ॥ नैर्ऋत्यां च तथा माया अयोध्या पश्चिमे स्थिता ॥ वायव्यां तु कुरुक्षेत्रं हरि
क्षेत्रं तथोत्तरे ॥ १७ ॥ शिवक्षेत्रं च ऐशान्यामैंद्र्यां च पुरुषोत्तमः ॥ आग्नेय्यां च भृगुक्षेत्रं प्रभासं दक्षिणाश्रितम् ॥ १८ ॥ श्रीरंगं
नैर्ऋते भागे लोहदंडं तु पश्चिमे ॥ नारसिंहानि वायव्ये कोकामुख्यं तथोत्तरे ॥ १९ ॥ कामाख्यारेणुकादीनि शाक्तेयानि च सर्वशः ॥
क्षेत्रराजानि सर्वाणि यथास्थाने वसंति हि ॥ २० ॥ उत्तरे चैव सौराणि गाणपत्यानि कृत्स्नशः ॥ क्षेत्राण्युत्तरतः संति रुक्मिण्याः
सन्निधौ द्विजाः ॥ २१ ॥ धेनुकं नैमिषारण्यं दंडकं सैंधवं तथा ॥ दशारण्यमर्बुदं च नरनारायणाश्रमम् ॥ २२ ॥ यथादिशं
वसंति स्म द्वारकायाः समन्ततः ॥ मेर्वाद्याः पर्वताः सौम्ये द्वारकासेवनोत्सुकाः ॥ २३ ॥ कैलासाद्याश्च ऐशान्यामैन्द्र्यां हिमवदा
दयः ॥ श्रीशैलाद्याश्च आग्नेय्यां सिंहाद्र्याद्या यमे तथा ॥ २४ ॥ नैर्ऋत्यां वाममार्गाद्या महेन्द्रऋषभादयः ॥ अन्ये च पुण्यशैलाश्च सलोकालोक
मानसाः ॥ द्वारकां परितः संति पर्य्युपासंति प्रत्यहम् ॥ २५ ॥ एवं ब्रह्मादयो देवा ऋषयः सनकादयः ॥ क्षेत्रतीर्थादिभिर्युक्ता अन्यैः
पुण्यतमैस्तथा ॥ २६ ॥ श्रद्धया परया भक्त्या कन्याराशिस्थिते गुरौ ॥ आयांति द्वारकां द्रष्टुं ब्राह्म्याद्याश्च प्रहर्षिताः॥ २७ ॥ इति श्रीस्कान्दे महा
पुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे चतुर्थे द्वारकामाहात्म्ये द्वारकामाहात्म्यवर्णनपूर्वकं द्वारकायां सर्वतीर्थक्षेत्रादिकृतनिवास
वर्णनंनाम त्रयस्त्रिंशत्तमोऽध्यायः ॥ ३३ ॥ ॥ छ ॥ ॥ श्रीप्रह्लाद उवाच ॥ ॥ एवमद्भुतमाहात्म्यं द्वारकायां मुनीश्वराः ॥ सर्वेषां क्षेत्र
तीर्थानां महापापविदारकम् ॥ १ ॥ वर्णानामाश्रमाणां च पतितानां विशेषतः ॥ महापापहरं प्रोक्तं महापुण्यविवर्द्धनम् ॥ २ ॥ अत्युग्रपापरा

१ कांती—कांची—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शीनां दाहस्थानं यथा स्मृतम् ॥ द्वारकागमनं विप्राः किं पुनर्द्वारकास्थितिः ॥ ३ ॥ विशेषेण तु विप्रेन्द्राः कन्याराशिस्थिते गुरौ ॥ ब्रह्मा दयोऽपि दृश्यंते यत्र तीर्थैश्च संयुताः ॥ ४ ॥ प्रतिवर्षं प्रकुर्वंति द्वारकागमनं नराः ॥ तेषां पादरजः स्पृष्ट्वा दिवं यांति च पापिनः ॥ ५ ॥ गोमती नीरपूतानां कृष्णवक्त्रावलोकिनाम् ॥ दर्शनात्पातकं तेषां याति जन्मशतार्जितम् ॥ ६ ॥ इतिहासेन पूर्वोक्तं श्रूयतां मुनिपुङ्गवाः ॥ दिलीपवसिष्ठ संवादे परमाश्चर्य्यवर्द्धनम् ॥ ७ ॥ काश्यां तु वज्रलेपो[1] हि क्षेत्र[2] एकत्र नश्यति ॥ यात्तुर्दर्शनतः श्रुत्वा दिलीपो वाक्यमब्रवीत् ॥ ८ ॥ ॥ दिलीप उवाच ॥ ॥ वज्रलेपश्च काश्यां तु घोरो यत्र विनश्यति ॥ कृत्स्नशोऽथ महापुण्यं प्राप्यं यत्र तदस्ति किम् ॥ ९ ॥ न प्ररोहंति पापानि यस्मिन्क्षेत्रे द्विजोत्तम ॥ तत्क्षेत्रं कथ्यतां पुण्यं यत्र पापं प्रणश्यति ॥१०॥ ॥ वसिष्ठ उवाच ॥ ॥ आसीत्काश्यां पुरा कश्चित्त्रिदण्डी मोक्षधर्मवित् ॥ जपन्दशाश्वमेधे तु गायत्रीं च समाहितः ॥ ११ ॥ तत्र काचित्समायाता युवती गजगामिनी ॥ तीरे संस्थाप्य वासांसि गंगायाः श्रमशान्तये ॥ प्रविष्टा च जले नग्ना जलक्रीडां चकार ह ॥ १२ ॥ नग्नां तां क्रीडतीं वीक्ष्य यतिर्मदनपूरितः ॥ दैवाद्विभ्रंशितो मार्गात्सहसा च विमोहितः ॥ १३ ॥ मनसा कामयामास साऽपि तं तरुणं यतिम् ॥ तयोश्च संगतिस्तत्र संजाता पापकर्मणोः ॥ १४ ॥ तय विमोहितः सद्यस्तामेवानुससार सः ॥ तत्प्रीत्यै चार्जयामास धनमन्यायतस्तदा ॥ १५ ॥ वाराणस्यां हि न त्यक्तश्चंडालस्य प्रतिग्रहः ॥ स्नानहीनः सदा पापी रात्रौ चौर्य्येण वर्त्तते ॥१६॥ कस्मिंश्चित्समये पापी मांसार्थी तु वनं गतः ॥ ददर्श प्रमदां तत्र मातंगीं मदिरेक्षणाम् ॥ १७ ॥ तस्याः प्रथमतारुण्यं दृष्ट्वा गर्वेण पाप्मना ॥ वनेऽथ निर्जने तत्र मातंगीसंगमेयिवान् ॥ १८ ॥ तया सहान्नपानादि कृतवान्पापमोहितः ॥ अश्नाति सुरया पंकं[3] गोमांसं पापलंपटः ॥ १९ ॥ तद्गृहे निधनं प्राप्तः पापात्मा सर्वभक्षकः ॥ वाराणसीप्रभावेन न प्राप्तो नरकं तदा ॥ २० ॥ किं तु तत्र कृतं पापं वज्रलेपं सुदारुणम् ॥ शूद्रीसंपर्कपापेन जातोऽसौ क्रूरयोनिषु ॥ २१ ॥ वृको व्याघ्रोरगः श्वानः शृगालः सूकरोऽभवत् ॥ दुरंतां यातनां प्राप्तः शमलेशं न विन्दति ॥ २२ ॥ एवं जन्मसहस्रैस्तु न तस्य पापकर्मणः ॥ मातंग्या संगजं पापं व्यनश्यत युगायुतैः ॥ २३ ॥ ततोऽसौ सप्तमे जातः शशकश्चैव जन्मनि ॥

१ "अन्यक्षेत्रे कृतं पापं पुण्यक्षेत्रे विनश्यति । पुण्यक्षेत्रे कृतं पापं वज्रलेपो भविष्यति ॥" इत्युक्तेः पुण्यक्षेत्रे क्रियमाणस्य पापस्य 'वज्रलेप' इति सञ्ज्ञा । २ क्षेत्र एकत्र—एकस्मिन्नेव क्षेत्रे—इत्यर्थः । ३ पंकम्—कुक्कुटाद्यण्डान्तर्गतमार्द्रसारम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ततोऽसौ राक्षसो जातः पापात्मा सर्वभक्षकः ॥ २४ ॥ प्राणिनो भक्षयन्सर्वान्संप्राप्तो विंध्यपर्वते ॥ अस्मादनन्तरं भाव्यं कृकलासत्वमद्भुतम् ॥ ॥ २५ ॥ शूद्रीसंगजपापेन भाव्यं च कृमियोनिना ॥ मातंगीसंगमे प्रोक्तं फलं ह्यतिजुगुप्सितम् ॥ २६ ॥ युगायुतं सहस्रैस्तु भोक्ष्यमाणं सुदारुणम् ॥ अत्याश्चर्य्यमभूत्तत्र दिलीप श्रूयतां महत् ॥ २७ ॥ आलोकितं च विंध्याद्रौ सर्वेषां विस्मयास्पदम् ॥ दृष्ट्वा द्वारावतीं कश्चित्कृष्णवक्त्रं सुशोभनम् ॥ २८ ॥ गोमतीनीरपूतस्तु विंध्यं प्राप्तः स पांथिकः ॥ मात्रां कृष्णप्रसादस्य स्कन्धे कृत्वा प्रहर्षितः ॥ २९ ॥ प्रयास्यन्स्वगृहं तत्र ददर्श पथि राक्षसम् ॥ द्रुतं च क्रूरकर्माणं दृष्ट्वा भक्षितुमागतम् ॥ ३० ॥ तस्य दर्शनमात्रेण वज्रलेपः सुदारुणः ॥ वाराणसीसमुद्भूतो भस्मसाद भवत्क्षणात् ॥ ३१ ॥ जन्मकोटिशतेनापि यो न शक्यो व्यपोहितुम् ॥ तत्पापपर्वतान्मुक्तः कृष्णपांथिकदर्शनात् ॥ ३२ ॥ दग्धेऽथ क्रूरभावे तु घनमुक्तो यथा शशी ॥ रेजे पुण्यप्रकाशेन कृष्णपांथिकदर्शनात् ॥ ३३ ॥ ततोऽभिमुखमभ्येत्य द्वारकापथिकं मुदा ॥ ननाम श्रद्धया भूमौ तद्दर्शनमहोत्सवः ॥ ३४ ॥ नत्वाऽथ विस्मितः प्राह अहोऽद्य तव दर्शनात् ॥ गतो घोरतमो भावः प्राप्ता संसिद्धिरुत्तमा ॥ ३५ ॥ कस्मात्त्वमागतो भद्र प्रभावः कीदृशस्तव ॥ वज्रलेपस्तु काश्यां वै दग्धस्ते दर्शनादनु ॥ ३६ ॥ ॥ वसिष्ठ उवाच ॥ ॥ इत्येवं राक्षसेनोक्तं श्रुत्वा कृष्णस्य पांथिकः ॥ विस्मयं परमापन्नः प्राह तं हर्षमानसः ॥ ३७ ॥ ॥ पांथिक उवाच ॥ ॥ श्रीमद्द्वारवतीं दृष्ट्वा ह्यागतोऽस्म्यत्र राक्षस ॥ वज्रलेपहरोऽस्माकं प्रभावः कृष्णदर्शनात् ॥ ३८ ॥ गोमत्यां यः सकृत्स्नात्वा पश्येत्कृष्णमुखांबुजम् ॥ सर्वानुद्धरते पापादपि त्रैलोक्यदाहकात् ॥ ३९ ॥ ॥ वसिष्ठ उवाच ॥ ॥ इत्युक्तो राक्षसो हृष्टः शुद्धात्मा भक्तिसंयुतः ॥ नत्वा प्रदक्षिणं कृत्वा संप्राप्तो द्वारकां तदा ॥ ४० ॥ गोमत्यां स तनुं त्यक्त्वा प्राप्तोऽसौ वैष्णवं पदम् ॥ स्तूयमानः सुरेशानैर्गंधर्वैः पुष्पवृष्टिभिः ॥ ४१ ॥ इत्थं महा प्रभावो हि द्वारकायाः प्रकीर्त्तितः ॥ न प्ररोहंति पापानि यस्याः पांथिकदर्शनात् ॥ द्वारकायां तु किं वाच्यं न प्ररोहति पातकम् ॥ ४२ ॥ इत्येतत्कथितं राजन्यत्पृष्टोऽहं त्वयाऽनघ ॥ सर्वक्षेत्रोत्तमं क्षेत्रं वज्रलेपविनाशनम् ॥ ४३ ॥ ॥ श्रीप्रह्लाद उवाच ॥ ॥ वसिष्ठेनोदितं श्रुत्वा दिलीपो हृष्टमानसः ॥ द्वारकां क्षेत्रराजं तं ज्ञात्वा च विस्मयं ययौ ॥ ४४ ॥ ययौ द्वारवतीं हृष्टो देवदेवस्य सादरम् ॥ कृष्णं दृष्ट्वा परां सिद्धिं संप्राप्तो देवमं ॥३२१॥

१ हर्षमानसः—हर्षो मानसे यस्य सः—हर्षमानसः—हृष्टमनाः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिरे ॥ ४९ ॥ ॥ ७ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे चतुर्थे द्वारकामाहात्म्ये द्वारकापान्थदर्शन मात्रतः काश्यां कृतस्य पापवज्रलेपस्य विनाशने यतिवृत्तान्तवर्णनपूर्वकं दिलीपकृतद्वारकायात्रावर्णनंनाम चतुस्त्रिंशत्तमोऽध्यायः ॥ ३४ ॥ ॥

॥ प्रह्लाद उवाच ॥ ॥ अहो क्षेत्रस्य माहात्म्यं समंताद्दशयोजनम् ॥ दिविष्ठा यत्र पश्यंति सर्वानेव चतुर्भुजान् ॥ १ ॥ अहो क्षेत्रस्य माहात्म्यं दृष्ट्वा नित्यं चतुर्भुजान् ॥ द्वारकावासिनः सर्वान्नमस्यंति दिवौकसः ॥ २ ॥ अहो क्षेत्रस्य माहात्म्यं सर्वशास्त्रेषु विश्रुतम् ॥ अहो क्षेत्रस्य माहात्म्यं शृण्वंतु ऋषयोऽमलाः ॥ ३ ॥ मुक्तिं नेच्छंति यत्रस्थाः कृष्णसेवोत्सुकाः सदा ॥ यत्रत्याश्चैव पाषाणा यत्र क्वापि विमुक्तिदाः ॥ ४ ॥ अपि कीट पतंगाद्याः पशवोऽथ सरीसृपाः ॥ विमुक्ताः पापिनः सर्वे द्वारकायाः प्रसादतः ॥ किं पुनर्मानवा नित्यं द्वारकायां वसंति ये ॥ ५ ॥ या गतिः सर्वजंतूनां द्वारकापुरवासिनाम् ॥ सा गतिर्दुर्लभा नूनं मुनीनामूर्द्ध्वरेतसाम् ॥ ६ ॥ सर्वेषु क्षेत्रतीर्थेषु वसतां वर्षकोटिभिः ॥ तत्फलं निमिषार्द्धेन द्वारकायां दिनेदिने ॥ ७ ॥ द्वारकायां स्थिताः सर्वे नरा नार्य्यश्चतुर्भुजाः ॥ द्वारकावासिनः सर्वान्यः पश्येत्कलुषापहान् ॥ सत्यंसत्यं द्विजश्रेष्ठाः कृष्णस्यातिप्रियो भवेद् ॥ ८ ॥ द्वारकावासिनो ये वै निंदंति पुरुषाधमाः ॥ कृष्णस्नेहविहीनास्ते पतंति दुःखसागरे ॥ ९ ॥ जयंतेन[1] भृशं त्रस्ताः शूलाग्रारोपिताश्चिरम् ॥ कर्षितास्ताडितास्ते वै मूर्च्छिताः पुनरुत्थिताः ॥ १० ॥ त्राहित्राहि जयंत त्वं वदंतो हि भयातुराः ॥ स्मरंतः पूर्वपापं ते जयंतेन प्रताडिताः ॥११॥ ॥ जयंत उवाच ॥ ॥ किं कृतं मंदभाग्यैर्वो यत्पापं च सुदारुणम् ॥ सर्वं पुण्यफलं लब्ध्वा द्वारकावासमुत्तमम्॥१२॥ द्वारकावासिनां निंदा महापापाधिका ध्रुवम् ॥ न निवर्तेत तत्पापं सा ज्ञेया परमेश्वरी ॥ १३ ॥ अतः कृष्णाज्ञया सर्वान्पापिनो दंडयाम्यहम् ॥ वैष्णवानां च निंदायाः फलं भुक्त्वा सुदारुणम् ॥ १४ ॥ ततस्तु द्वारकायां च पुण्यं जन्म भविष्यति ॥ कृष्णं प्रतोष्य संसिद्धिर्भविष्यति सुदुर्ल्लभा ॥ १५ ॥ तस्मात्तद्भुज्यतां पापं जातं वैष्णवनिंदनात् ॥ तत्रत्यानां प्रभुर्नैव यम ईष्टे महेश्वरः ॥ १६ ॥ ॥ श्रीप्रह्लाद उवाच ॥ ॥ तस्माद्द्वारवतीं गत्वा संसेव्यो देवनायकः ॥ १७ ॥ गोमतीतीरमाश्रित्य द्वारकायां प्रयच्छति ॥ यत्तु किंचिद्धनं विप्राः श्रूयतां तत्फलोदयम् ॥ १८ ॥ हेम भारसहस्रैस्तु रविवारे रविग्रहे ॥ कुरुक्षेत्रे यदाप्नोति गजाश्वरथदानतः ॥ १९ ॥ सहस्रगुणितं तस्मात्सत्यंसत्यं मयोदितम् ॥ हेममाषार्द्धमानेन द्वारकादानयोगतः ॥ २० ॥ पत्राणां चैव पुष्पाणां नैवेद्यसिक्थसंख्यया ॥ कृष्णदेवस्य पूजायामनंतं भवति द्विजाः ॥ २१ ॥ अन्नदानं तु यः

[1] जयंतेन–तत्रत्यक्षेत्रपालेन ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



कुर्य्याद्द्वारकायां तु तत्फलम् ॥ नैव शक्नोम्यहं वक्तुं ब्रह्मा शेषमहेश्वरौ ॥ २२ ॥ ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वाऽप्यथ वांऽत्यजः ॥ नारी वा द्वारकायां वै भक्त्या वासं करोति वै ॥ २३ ॥ कुलकोटिं समुद्धृत्य विष्णुलोके महीयते ॥ सत्यंसत्यं द्विजश्रेष्ठा नानृतं मम भाषितम् ॥ २४ ॥ द्वारकावासिनं दृष्ट्वा स्पृष्ट्वा चैव विशेषतः ॥ महापापविनिर्मुक्ताः स्वर्गलोके वसंति ते ॥ २५ ॥ पांसुवो द्वारकाया वै वायुना समुदीरिताः ॥ पापिनां मुक्तिदाः प्रोक्ताः किं पुनर्द्वारकाभुवि ॥ २६ ॥ ॥ श्रीप्रह्लाद उवाच ॥ ॥ श्रूयतां द्विजशार्दूला महामोहविनाशनम् ॥ द्वारकायाश्च माहात्म्यं गोमतीकृष्णसन्निधौ ॥ २७ ॥ कुशावर्त्तात्समारभ्य यावद्वै सागरावधि ॥ यस्यां तिथौ समायाति सिंहे देवपुरोहितः[1] ॥ २८ ॥ तस्यां हि गोमतीस्नानं द्विषड्गोदावरीफलम् ॥ अवगाहिता प्रयत्नेन सिंहांते गौतमी सकृत् ॥ २९ ॥ गोदावर्य्यां भवेत्पुण्यं वसतो वर्षसंख्यया ॥ तत्फलं समवाप्नोति गोमतीसेवनाद्द्विजाः ॥ ३० ॥ गोमत्यां श्रद्धया स्नानं पूर्णे सिंहस्थिते गुरौ ॥ सहस्रगुणितं तत्स्याद्द्वारवत्यां दिनेदिने ॥ ३१ ॥ गच्छगच्छ महाभाग द्वारकामिति य । वदेत् ॥ तस्यावलोकनादेव मुच्यते सर्वपातकैः ॥ ३२ ॥ द्वारकेति च यो ब्रूयाद्द्वारकाभिमुखो नरः ॥ कृपया कृष्णदेवस्य मुक्तिभागी भवेद्ध्रुवम् । ३३ ॥ द्वारकां गोमतीं पुण्यां रुक्मिणीं कृष्णमेव च ॥ स्मरंति येऽन्वहं भक्त्या द्वारकाफलभागिनः ॥ ३४ ॥ सहस्रयोजनस्थानां येषां स्यादिति मानसम् ॥ द्वारवत्यां गमिष्यामो द्रक्ष्यामो द्वारकेश्वरम् ॥ ३५ ॥ सर्वपापैः प्रमुच्यंते धन्यास्ते लोकपावनाः ॥ किं वाच्यं द्वारकायात्रां ये प्रकुर्वंति मानवाः ॥ किं पुनर्द्वारकानाथं कृष्णं पश्यंति ये नराः ॥ ३६ ॥ मित्रध्रुग्ब्रह्महा गोघ्नः परदारापहारकः ॥ मातृहा पितृहा चैव ब्रह्मस्वापहरस्तथा ॥ ३७ ॥ एते चान्ये च पापिष्ठा महापापयुताश्च ये ॥ सर्वपापैः प्रमुच्यंते कृष्णदेवस्य दर्शनात् ॥ ३८ ॥ किं वेदैः श्रद्धया हीनैर्व्याख्यानैरपि कृत्स्नशः ॥ हेमभारसहस्रैः किं कुरुक्षेत्रे रविग्रहे ॥ ३९ ॥ गजाश्वरथदानैः किं किं मंदिरप्रतिष्ठया ॥ तेषां पूजादिना सम्यगिष्टापूर्तादिभिश्च किम् ॥ ४० ॥ राजसूयाश्वमेधाद्यैः सर्वयज्ञैश्च किं भवेत् ॥ सेवनैः क्षेत्रतीर्थानां तपोभिर्विविधैस्तु किम् ॥ ४१ ॥ किं मोक्षसाधनैः क्लेशैर्ध्यानयोगसमाधिभिः ॥ द्वारकेश्वरकृष्णस्य दर्शनं यस्य जायते ॥ ४२ ॥ माहात्म्यं द्वारकायास्तु अथवा यः शृणोति च ॥ विशेषेण तु वैशाख्यां जयंत्याश्चैव जागरे ॥ ४३ ॥ माघ्यां च फाल्गुने चैत्रे ज्येष्ठे चैव विशेषतः ॥ अद्यापि द्वारका पुण्या कलावपि विशेषतः ॥ ४४ ॥ यस्यां सत्रं प्रपां कृत्वा प्रासादं मंचमेव च ॥ यतीनां शरणं[2] कृत्वा तीरे मंडपमेव च ॥ ४५ ॥ वापीकूपतडागानां जीर्णोद्धारमथापि वा ॥ मूर्तिं विष्णोः

१ देवपुरोहितः—गुरुः । २ यतीनां शरणम्—संन्यासिनां मठम्—इत्यर्थः।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिष्ठाप्य दत्त्वा वा भोगसाधनम् ॥ ४६ ॥ श्रूयतां तत्फलं विप्राः सर्वोत्कृष्टं वदाम्यहम् ॥ संप्राप्य वांछितान्कामान्कृष्णानुग्रहभाजनम् ॥ ४७ ॥ तेजोमयेषु लोकेषु भुक्त्वा भोगाननुक्रमात् ॥ प्राप्नोति विष्णुलोकं वै नरो देवनमस्कृतम् ॥ ४८ ॥ स्थापयेद्द्वारकायां वै मूर्तिं दारुशिलामयीम् ॥ त्रैलोक्यं स्थापितं तेन विष्णोः सायुज्यतामियात्॥४९॥ प्ररोहो[1] नास्ति पापस्य पुण्यस्य वृद्धिरुत्तमा ॥ द्वारकायां कथं जातं वैलक्षण्यमिदं प्रभो ॥ क्षेत्रेभ्यः सर्वतीर्थेभ्य आश्चर्यं कथयंति ते[2] ॥ ५० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे चतुर्थे द्वारकामाहात्म्ये द्वारकानाममाहात्म्यवर्णनंनाम पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ प्रह्लादस्य वचः श्रुत्वा स्थितस्तत्र सभास्थले ॥ पप्रच्छात्युत्सुकमना बलिस्तत्क्षेत्रवैभवम् ॥१॥ प्रह्लादस्तद्वचः श्रुत्वा भक्तिभावपुरस्कृतम् ॥ अभिनन्द्य च तं प्रेम्णा प्रवक्तुमुपचक्रमे ॥२॥ ॥ प्रह्लाद उवाच ॥ ॥ एकैकस्मिन्पदे दत्ते पुरीं द्वारवतीं प्रति ॥ पुण्यं क्रतुसहस्राणां फलं भवति देहिनाम् ॥३॥ येऽपीच्छंति मनोवृत्त्या गमनं द्वारकां प्रति ॥ तेषां प्रलीयते पापं पूर्वजन्मायुतार्जितम् ॥४॥ अत्युग्राण्यपि पापानि तावत्तिष्ठंति विग्रहे ॥ यावन्न गच्छते जंतुः कलौ द्वारवतीं प्रति ॥५॥ लोभेनाऽप्युपरोधेन[3] दंभेन कपटेन वा ॥ चक्रतीर्थे तु यो गच्छेन्न पुनर्विशते भुवि ॥६॥ हीनवर्णोऽपि पापात्मा मृतः कृष्णपुरीं प्रति ॥ कलिकालकृतैर्दोषैरत्युग्रैरपि मानवः ॥ भक्त्या कृष्णमुखं दृष्ट्वा न लिप्यति कदाचन ॥७॥ तावद्विराजते काशी ह्यवंती मथुरा पुरी ॥ यावन्न पश्यते जंतुः पुरीं कृष्णेन पालिताम् ॥ ८ ॥ येषां कृष्णालये प्राणा गता दानवनायक ॥ न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥ ९ ॥ दुर्लभो द्वारकावासो दुर्लभं कृष्णदर्शनम् ॥ दुर्लभं गोमतीस्नानं रुक्मिणीदर्शनं कलौ ॥ १० ॥ नित्यं कृष्णपुरीं रम्यां ये स्मरंति गृहे स्थिताः ॥ न तेषां पातकं किंचिद्देहमाश्रित्य तिष्ठति ॥ ११ ॥ केशवार्चा गृहे यस्य न तिष्ठति महीपते ॥ तस्यान्नं न च भोक्तव्यमभक्ष्येण समं स्मृतम् ॥ १२ ॥ नोष्णत्वं द्विजराजे वै न शीतत्वं हुताशने ॥ वैष्णवानां न पापत्वमेकादश्युपवासिनाम् ॥ १३ ॥ नास्तिनास्ति महाभागाः कलिकालसमं युगम् ॥ स्मरणात्कीर्तनाद्विष्णोः प्राप्यते पदमव्ययम् ॥ १४ ॥ सत्यभामापतिर्यत्र यत्र पुण्या च गोमती ॥ नरा मुक्तिं प्रयास्यंति तत्र स्नात्वा कलौ युगे ॥ १५ ॥ माधवे शुक्लपक्षे तु त्रिस्पृशां द्वादशीं यदि ॥ लभते द्वारकायां तु नास्ति धन्यतरस्ततः ॥ १६ ॥ त्रिस्पृशां द्वादशीं प्राप्य गत्वा कृष्णपुरीं नरः ॥ यः करोति हरेर्भक्त्या सोऽश्वमेधफलं लभेत् ॥ १७ ॥ नंदायां तु जयायां वै भद्रा चैव भवेद्यदि ॥ उपवासार्चने गीते दुर्लभा कृष्णसन्निधौ ॥१८॥

१ प्ररोहः—अंकुरोत्पत्तिः—इत्यर्थः । २ ते—द्वारकावासिनः—इत्यर्थः । ३ उपरोधेन—परवशतया—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



उदयैकादशी स्वल्पा अंते चैव त्रयोदशी ॥ संपूर्णा द्वादशी मध्ये त्रिस्पृशा च हरेः प्रिया ॥ १९ ॥ एकेन चोपवासेन उपवासाऽयुतं फलम् ॥
जागरे शतसाहस्रं नृत्ये कोटिगुणं कलौ ॥ २० ॥ तत्फलं लभते मर्त्यो द्वारकायां दिनेदिने ॥ गृहेषु वसतामेतत्किं पुनः कृष्णसंनिधौ ॥
॥ २१ ॥ वाङ्मनःकायजैर्दोषैर्हता ये पापबुद्धयः ॥ द्वारवत्यां विमुच्यंते दृष्ट्वा कृष्णमुखं शुभम् ॥ २२ ॥ दैत्येश्वर नराः श्लाघ्या द्वारवत्यां
गताश्च ये ॥ २३ ॥ दुर्लभानीह तीर्थानि दुर्लभाः पर्वतोत्तमाः ॥ दुर्लभा वैष्णवा लोके द्वारकावसतिः कलौ ॥ २४ ॥ गवां कोटिसहस्राणि रत्नको
टिशतानि च ॥ दत्त्वा यत्फलमाप्नोति तत्फलं कृष्णसन्निधौ ॥ २५ ॥ यस्याः सीमां प्रविष्टस्य ब्रह्महत्यादिपातकम् ॥ नश्यते दर्शनादेव तां पुरीं
को न सेवते ॥ २६ ॥ चक्रांकिता शिला यत्र गोमत्युदधिसंगमे ॥ यच्छति पूजिता मोक्षं तां पुरीं को न सेवते ॥ २७ ॥ सिंहस्थे च गुरौ विप्रा
गोदावर्यां तु यत्फलम् ॥ तत्फलं स्नानमात्रेण गोमत्यां कृष्णसन्निधौ ॥ २८ ॥ द्वारकाऽवस्थितं तोयं षण्मासं पिबते नरः ॥ तस्य चक्रांकितो
देहो भवते नात्र संशयः ॥ २९ ॥ मन्वन्तरसहस्राणि काशीवासेन यत्फलम् ॥ तत्फलं द्वारकायां च वसतः पंचभिर्दिनैः ॥ ३० ॥ तावन्मृतप्रजा
नारी दुर्भगा दैत्यपुंगव ॥ यावन्न पश्यते भक्त्या कलौ कृष्णप्रियां पुरीम् ॥ ३१ ॥ रुक्मिणीं सत्यभामां च देवीं जांबवतीं तथा ॥ मित्रविंदां च
कालिंदीं भद्रां नाग्नजितीं तथा ॥ ३२ ॥ संपूज्य लक्ष्मणां तत्र वैष्णवीः कृष्णवल्लभाः ॥ एताः संपूज्य विधिवच्छ्रेष्ठपुत्रश्च लभ्यते ॥ ३३ ॥ ताव
द्भवभयं पुंसां गृहभंगश्च मूर्खता ॥ यावन्न पश्यते भक्त्या कलौ कृष्णपुरीं नरः ॥ ३४ ॥ न सर्वत्र महापुण्यं संगमे सरितांपतेः ॥ जाह्नवीसंगमा
न्मुक्तिर्गोमतीनीरसंगमात् ॥ संपर्के गोमतीनीरपूतोऽहं कृष्णसन्निधौ ॥ ३५ ॥ गोमतीनीरसंपृक्तं ये मां पश्यंति मानवाः ॥ न तेषां पुनरावृत्तिरि
त्याह सरितां पतिः ॥ ३६ ॥ द्वारकां गच्छमानस्य विपत्तिश्च[१] भवेद्यदि ॥ न तस्य पुनरावृत्तिः कल्पकोटिशतैरपि ॥ ३७ ॥ इति श्रीस्कांदे महापु
राण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे चतुर्थे द्वारकामाहात्म्ये द्वारकादर्शनगोमतीसरित्स्नानविधिमाहात्म्यवर्णनंनाम षट्त्रिंशोऽ
ध्यायः ॥ ३६॥ ॥ छ ॥ ॥ श्रीप्रह्लाद उवाच ॥ ॥ कृष्णकृष्णेति कृष्णेति श्वपचो जागरन्निशि ॥ जपेदपि कलौ नित्यं कृष्णरूपी भवेद्धि
सः ॥ १ ॥ कृष्णकृष्णेति कृष्णेति कलौ वदत्यहर्निशम् ॥ नित्यं यज्ञायुतं पुण्यं तीर्थकोटिसमुद्भवम् ॥ २ ॥ संपूर्णैकादशी भूत्वा द्वादश्यां वर्द्धते
यदि ॥ उन्मीलिनीति विख्याता तिथीनामुत्तमा तिथिः ॥३॥ वंजुलीवासरे ये वै रात्रौ कुर्वंति जागरम् ॥ यज्ञायुतायुतं पुण्यं मुहूर्तार्द्धेन जायते ॥४॥

१ विपत्तिः—मरणम्—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संपूर्णा द्वादशी भूत्वा वर्द्धते चापरे दिने ॥ त्रयोदश्यां मुनिश्रेष्ठा वंजुली दुर्लभा कलौ ॥ ५ ॥ उन्मीलिनीमनुप्राप्य ये प्रकुर्वंति जागरम्[1] ॥ निमिषार्द्धेन तत्पुण्यं गवां कोटिफलप्रदम् ॥ ६ ॥ संपूर्णैकादशी भूत्वा प्रत्यऽहं वर्द्धते यदि ॥ दर्शश्च पौर्णमासी च पक्षवृद्धिस्तथोच्यते ॥७॥ पक्षवृद्धिकरीं प्राप्य ये प्रकुर्वंति जागरम् ॥ निमिषार्द्धार्द्धमात्रेण गवां कोटिफलप्रदम् ॥ ८ ॥ ॥ श्रीप्रह्लाद उवाच ॥ ॥ चक्रतीर्थे नरः स्नात्वा मुच्यते सर्वकिल्बिषैः ॥ स याति परमं स्थानं दाहप्रलयवर्जितम् ॥ ९ ॥ चक्रं प्रक्षालितं यत्र कृष्णेन स्वयमेव हि ॥ तेन वै चक्रतीर्थं हि पुण्यं च परमं हरेः ॥ भवंति तत्र पाषाणाश्चक्रांका मुक्तिदायकाः ॥ १० ॥ तत्रैव यदि लभ्यंते चक्रैर्द्वादशभिः सह ॥ द्वादशात्मा स विज्ञेयो मोक्षदः परिकीर्तितः ॥ ॥ ११ ॥ एकचक्रेण पाषाणो द्वारवत्यां सुशोभनः ॥ सुदर्शनाभिधेयोसौ मोक्षैकफलदायकः ॥१२॥ लक्ष्मीनारायणौ द्वौ तौ भुक्तिमुक्तिफलप्रदौ ॥ त्रिभिश्चैवाच्युतं देवं सदेन्द्रपददायकम् ॥ १३ ॥ भूतिदो विघ्नहंता च चतुश्चक्रो जनार्दनः ॥ पञ्चभिर्वासुदेवस्तु जन्ममृत्युभयापहः ॥ १४ ॥ प्रद्युम्नः षड्भिरेवासौ लक्ष्मीं कांतिं ददाति च ॥ सप्तभिर्बलदेवस्तु गोत्रकीर्तिविवर्द्धनः ॥ १५ ॥ वांछितं चाष्टभिर्भक्त्या ददाति पुरुषोत्तमः ॥ सर्वं दद्यान्नवव्यूहो दुर्लभो यः सुरोत्तमैः ॥ १६ ॥ राज्यप्रदो दशभिस्तु दशावतार एव च ॥ एकादशभिरैश्वर्य्यमनिरुद्धः प्रयच्छति ॥ १७ ॥ निर्वाणं द्वादशात्मा तु चक्रैर्द्वादशभिः स्मृतम् ॥ अत ऊर्ध्वमनंतोऽसौ सौख्यमोक्षप्रदायकः ॥ १८ ॥ ये केचित्तत्र पाषाणाः कृष्णचक्रेण मुद्रिताः ॥ तेषां स्पर्शनमात्रेण मुच्यते सर्वकिल्बिषैः ॥ १९ ॥ ब्रह्महत्यादिकं पापं मनोवाक्कायकर्मजम् ॥ तत्सर्वं विलयं याति चक्रांकितप्रपूजनात् ॥ २० ॥ म्लेच्छदेशे शुभे वाऽपि चक्रांको यत्र तिष्ठति ॥ योजनानि दश द्वे च मम क्षेत्रं च सुन्दरि ॥ २१ ॥ मृत्युकाले च संप्राप्ते हृदये यस्तु धारयेत् ॥ चक्रांकं पापदलनं स याति परमां गतिम् ॥ २२ ॥ गोमतीसंगमे स्नात्वा भृगुतीर्थे तथैव च ॥ न मातुर्वसते कुक्षौ यद्यपि स्यात्स पातकी ॥ ॥ २३ ॥ तामसं राजसं वापि यत्कृतं विष्णुपूजनम् ॥ तत्सात्त्विकत्वमभ्येति निम्नगांभो यथार्णवे ॥ २४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे चतुर्थे द्वारकामाहात्म्ये द्वारकाक्षेत्रस्थसुदर्शनप्रमुखानन्तान्तचक्रचिह्नांकितपाषाणमाहात्म्यवर्णनपूर्वकतत्पूजनफलादिकथनंनाम सप्तत्रिंशत्तमोऽध्यायः ॥३७॥ ॥ छ ॥ ॥ श्रीप्रह्लाद उवाच ॥ ॥ द्वारकायाश्च माहात्म्यं शृणु पौत्र मयोदितम् ॥ शृण्वतो गदतश्चापि मुक्तिः कृष्णाद्भवेद्ध्रुवम् ॥ १ ॥ पुत्रेण लोकाञ्जयति पौत्रेणानन्त्यमश्नुते ॥ अथ पुत्रस्य पौत्रेण नाकमेवाधिरोहति ॥ २ ॥ यस्य

१ ये कुर्वंति प्रजागरम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पुत्रः शुचिर्दक्षः पूर्वे वयसि धार्मिकः ॥ विष्णुभक्तिं च कुरुते तं पुत्रं कवयो विदुः ॥ ३ ॥ हेमशृंगं रौप्यखुरं सवत्सं कांस्यदोहनम् ॥ सवस्त्रं
कपिलानां तु सहस्रं च दिनेदिने ॥ ४ ॥ दत्त्वा यत्फलमाप्नोति ब्राह्मणे वेदपारगे ॥ तत्फलं स्नानमात्रेण गोमत्यां मधुभिद्दिने ॥ ५ ॥ यस्तत्र
भोजयेद्विप्रं द्वारकायां च संस्थितम् ॥ सुभिक्षे भो द्विजश्रेष्ठाः फलं लक्षगुणं भवेत् ॥६॥ फलं लक्षगुणं प्रोक्तं दुर्भिक्षे कृष्णसन्निधौ ॥ एवं धर्मानुपा ण
दद्याद्भिक्षां तु भिक्षुके ॥ ७ ॥ अपि नः स कुले कश्चिद्भविष्यति नरोत्तमः ॥ यो यतीनां कलौ प्राप्ते पितॄनुद्दिश्य दास्यति ॥ ८ ॥ द्वारकायां विशे
षेण सत्कृत्य कृष्णसन्निधौ ॥ अन्नदानं यतीनां तु कौपीनाच्छादनानि च ॥ ९ ॥ नात्मनः क्रतुभिः स्विष्टैर्नास्ति तीर्थैः प्रयोजनम् ॥ यत्र वा
तत्र वा कार्य्यं यतीनां प्रीणनं सदा ॥ १० ॥ श्वपचाद्योऽपि ते धन्या ये गता द्वारकां पुरीम् ॥ प्राप्य भागवतान्ये वै पितॄनुद्दिश्य पुत्रकाः ॥
॥ ११ ॥ भक्त्या संपूजयिष्यंति वस्त्रैर्दानैश्च भूरिभिः ॥ १२ ॥ गयापिंडेन नास्माकं तृप्तिर्भवति तादृशी ॥ यादृशी विष्णुभक्तानां सत्कारेणोप
जायते ॥ १३ ॥ वैशाखे ये करिष्यंति द्वादशीं कृष्णसन्निधौ ॥ कृष्णं संपूजयन्तश्च रात्रौ कुर्वंति जागरम् ॥१४॥ माहात्म्यं पठनीयं तु द्वारकासंभवं
शुभम् ॥ कृष्णस्य बालचरितं बालकृष्णादिदर्शनम् ॥ १५ ॥ क्रीडनं गोकुलस्यैव क्रीडा गोपीजनस्य च ॥ कृष्णावतारकर्माणि श्रोतव्यानि
पुनःपुनः ॥ १६ ॥ रुक्मशृंगीं रौप्यखुरीं मुक्तालांगूलभूषिताम् ॥ सवत्सां ब्राह्मणे दत्त्वा होमार्थं चाहिताग्नये ॥ १७ ॥ निमिषस्पर्शनांशेन फलं
कृष्णस्य जागरे ॥ यत्किंचित्कुरुते पापं कोटिजन्मसु मानवः ॥ कृष्णस्य जागरे रात्रौ दहते नात्र संशयः ॥ १८ ॥ पठेद्भागवतं रात्रौ पुराणं
दयितं हरेः ॥ यावत्सूर्य्यकृताऽऽलोको यावच्चन्द्रकृता निशा ॥ १९ ॥ यावत्ससागरा पृथ्वी यावच्च कुलपर्वताः ॥ तावत्कालं वसेत्स्वर्गे नान्यथा
मम भाषितम् ॥ २० ॥ आस्फोटयंति पितरः प्रहर्षंति पितामहाः ॥ एवं तं स्वसुतं दृष्ट्वा शृण्वानं कृष्णसंभवम् ॥ २१ ॥ द्वारकायाश्च माहात्म्यं
यत्र नो जागरे पठेत् ॥ तन्म्लेच्छसदृशं स्थानमपवित्रं परित्यजेत् ॥ २२ ॥ शालिग्रामशिला नैव यत्र भागवता न हि ॥ त्यजेत्तीर्थं महापुण्यं
पुण्यमायतनं त्यजेत् ॥ २३ ॥ त्यजेद्ब्रह्मं तथाऽरण्यं यत्र न द्वादशीव्रतम् ॥ २४ ॥ सुदेशोऽपि भवेन्निंद्यो यत्र नो वैष्णवा व्रतम् ॥ कुदेशोऽपि
भवेत्पुण्यो यत्र भागवताः कलौ ॥ २५ ॥ संकीर्णयोनयः पूता ये भक्ता मधुसूदने ॥ म्लेच्छतुल्याः कुलीनास्ते ये न भक्ता जनार्दने ॥ २६ ॥
रथारूढं प्रकुर्वंति ये कृष्णं मधुमाधवे ॥ मुक्तिं प्रयांति ते सर्वे कुलकोटिसमन्विताः ॥ २७ ॥ देवकीनन्दनस्यार्थे रथं कारापयन्ति ये ॥ कल्पांतं
विष्णुलोके ते वसन्ति पितृभिः सह ॥ २८ ॥ द्वारकायास्तु माहात्म्यं श्रावयेद्यः कलौ नृणाम् ॥ भावमुत्पादयेद्यो वै लभेत्क्रतुशतं फलम् ॥ २९ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यो नार्चयति पापिष्ठो देवमन्यत्र गच्छति ॥ कोटिजन्मार्जितं पुण्यं हरते रुक्मिणीपतिः ॥ ३० ॥ शंखोद्धारसमुद्भूतां नित्यं देहे बिभर्त्ति हि ॥ मृत्तिकां दैत्यराजेन्द्र शृणु वक्ष्यामि यत्फलम् ॥ ३१ ॥ यो ददाति यतीनां च वैष्णवानां प्रयच्छति ॥ स्वर्णभारशतं पुण्डूं नित्यं प्राप्नोति मानवः ॥ ३२ ॥ गृहे यस्य सदा तिष्ठेच्छंखोद्धारस्य मृत्तिका ॥ नित्य क्रियाकृतंपुण्यं लभेत्कोटिगुणं बले ॥ ३३ ॥ यस्य पुण्ड्रं ललाटे तु गोपीचन्दनसंज्ञकम् ॥ न जहाति गृहं तस्य लक्ष्मीः कृष्णप्रिया द्विजाः ॥ ३४ ॥ न ग्रहो बाधते तस्य नोरगो न च राक्षसः ॥ पिशाचा न च कुष्मांडा न च प्रेता न जंभकाः ॥ ३५ ॥ नाग्निचौरभयं तस्य दरीणां चैव बन्धनम् ॥ विद्युदुल्काभयं चैव न चोत्पातसमुद्भवम् ॥ ३६ ॥ नारिष्टं नापशकुनं दुर्निमित्तादिकं च यत् ॥ सत्कृते विष्णुभक्ते च शालिग्रामशिलार्चने ॥ ३७ ॥ पीते पादोदके विप्रा नैवेद्य स्यापि भक्षणे ॥ तुलसीसन्निधौ विष्णोर्विलयावसरे कृते ॥ ३८ ॥ पुरा देवेन कथितं शृणु पात्र वदाम्यहम् ॥ प्रिया भागवता येषां तेषां दासोऽस्म्यहं सदा ॥ ३९ ॥ विहाय मथुरां काशीमवन्तीं सर्वपापहाम् ॥ मायां कांचीमयोध्यां च संप्राप्ते च कलौ युगे ॥ ॥ ४० ॥ वसाम्यहं द्वारकायां सर्वसेनासमावृतः ॥ तीर्थव्रतैर्यज्ञदानै रुद्राद्यैर्मुनिचारणैः ॥ ४१ ॥ श्रद्धात्यागेन[१] भक्त्या वा यस्तोषयितुमिच्छति ॥ गत्वा द्वारवतीं रम्यां द्रष्टव्योऽहं कलौ युगे ॥ ४२ ॥ त्रैलोक्ये यानि तीर्थानि मया शुद्धानि भूरिशः ॥ विन्यस्तानि च गोमत्यां चक्रतीर्थेऽतिपावने ॥ ४३ ॥ दिनेनैकेन गोमत्यां चक्रतीर्थे कलौ युगे ॥ त्रैलोक्यसंभवैस्तीर्थैः स्नातो भवति मानवः ॥ ४४ ॥ कोटिपापविनिर्मुक्तो मत्समं वसते नरः ॥ मम लोके न संदेहः कुलकोटिसमन्वितः ॥ ४५ ॥ नापराधकृतैः पापैर्लिप्तः स्यादुत्कटैः कृतैः ॥ शतजन्मायुतानीह लक्ष्मीर्न च्यवते गृहात् ॥ ४६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे चतुर्थे द्वारकामाहात्म्ये गोमतीतीरगतद्वारकाचक्रतीर्थयोर्जागरादिमाहात्म्यवर्णनंनामाष्टात्रिंशत्तमोऽध्यायः ॥ ३८ ॥ ॥ छ ॥ ॥ श्रीप्रह्लाद उवाच ॥ ॥ जया च विजया चैव जयंती पापनाशिनी ॥ उन्मीलिनी वंजुली च त्रिस्पृशा पक्षवर्द्धिनी ॥ १ ॥ पुण्यं सर्वपुराणानां ते लभंते दिनेदिने ॥ पक्वान्नं ये प्रकुर्वंति हविर्द्धान्यसमुद्भवम् ॥ २ ॥ जागरे पद्मनाभस्य घृतेनैव सुपाचितम् ॥ वर्तिद्वयसमायुक्तं दीपं घृतसमन्वितम् ॥ ३ ॥

१ श्रद्धात्यागेन—श्रद्धापूर्वकदानेन—इत्यर्थः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



यः कुर्य्याज्जागरे विष्णोः शालिग्रामशिलाग्रतः ॥ शालग्रामशिलाग्रे तु ये प्रकुर्वंति जागरम् ॥ ४ ॥ कुर्वंति नृत्यवाद्ये च लोकानां रंजनाय च ॥
संछादयंति कुसुमैः शालिग्रामशिलां च ये ॥ ५ ॥ चक्रांकितां विशेषेण प्रतिमां वैष्णवीं द्विजाः ॥ चंदनं च सकर्पूरं कृष्णागुरुसमन्वितम् ॥ ६ ॥
युक्तं मृगमदेनापि यः करोति विलेपनम् ॥ द्वादश्यां देवदेवस्य रात्रौ जागरणे सदा ॥ ७ ॥ तस्य पुण्यं प्रवक्ष्यामि संक्षेपेण च वोऽग्रतः ॥ तत्फलं
कोटितीर्थे तु उज्जयिन्यां महालये ॥ ८ ॥ वाराणस्यां कुरुक्षेत्रे मथुरायां त्रिपुष्करे ॥ अयोध्यायां प्रयागे च तीर्थे सागरसंगमे ॥ ९ ॥ सर्वपुण्येषु
तीर्थेषु देवतायतनेषु च ॥ कृतैर्यज्ञायुतैस्तत्र व्रतदानैश्च पुष्कलैः ॥ १० ॥ वेदैरधीतैर्यत्पुण्यं पुराणैश्चावगाहितैः ॥ तपोभिश्चरितैः पुण्यं सम्यगाश्रम
पालनैः ॥ ११ ॥ यत्फलं मुनिभिः प्रोक्तं वेदव्यासेन पुत्रक ॥ तत्फलं जागरे विष्णोः पक्षयोः शुक्लकृष्णयोः ॥ १२ ॥ हैमवत्यै पुरा प्रोक्तं कैलासे
शूलपाणिना ॥ नारदाय पुरा प्रोक्तं ब्रह्मणा मत्समीपतः ॥ १३ ॥ अरुणेन वज्रहस्ताय कथितं पृच्छते पुरा ॥ द्वादशीजागरस्योक्तं फलं विप्रा
मया च वः॥ तत्कुरुध्वं द्विजा यूयं जागरं विष्णुवासरे ॥ १४ ॥ ॥ सूत उवाच ॥ ॥ इत्युक्त्वा ब्राह्मणान्प्राह बलिं पौत्रं स्वकं ततः ॥ त्वमपि
श्रद्धया पौत्र कुरु जागरणं हरेः ॥ १५ ॥ द्वारका मनसा ध्याता पापं वर्षशतान्वितम् ॥ कीर्तनाच्छतजन्मोत्थं दहते नात्र संशयः ॥ १६ ॥ पापं
जन्मसहस्रोत्थं पदमात्रेण गच्छताम् ॥ द्वारका हरते नूनं मुक्तिः कृष्णस्य दर्शनात् ॥ १७ ॥ न शक्नोति यदा गंतुं द्वारकां चैव मानवः ॥ माहात्म्यं
पठनीयं तु द्वारकासंभवं गृहे ॥ १८ ॥ दातव्यं वैष्णवानां तु श्रोतव्यं भक्तिभावतः ॥ द्वादश्यां च विशेषेण पठनीयं तु जागरे ॥ १९ ॥ द्वारका
संभवं पुण्यं स संप्राप्नोति मानवः ॥ प्रसादाद्वासुदेवस्य सत्यंसत्यं च भाषितम् ॥ २० ॥ गृहे संतिष्ठते नित्यं मथुरा द्वारका तथा ॥ अवंती च तथा
माया प्रयागं कुरुजांगलम् ॥ २१ ॥ त्रिपुष्करं नैमिषं च गंगाद्वारं च सौकरम् ॥ चंद्रेशं चैव केदारं तथा रुद्रमहालयम् ॥ २२ ॥ वस्त्रापथं महादेवं
महाकालं तथैव च ॥ भूतेश्वरं भस्मगात्रं सोमनाथमुमापतिम् ॥ २३ ॥ कोटिलिंगं त्रिनेत्रं च देवं भृगुवनेचरम् ॥ दीपेश्वरं महानादं देवं चैवाचले
श्वरम् ॥ २४ ॥ ब्रह्मादयः सुरगणा गृहे तिष्ठंति सर्वदा ॥ पितरो नागगंधर्वा मुनयः सिद्धचारणाः ॥ २५ ॥ तीर्थानि यानि कानि स्युरश्वमेधादयो
मखाः ॥ कृष्णजन्माष्टमीं पौत्र यः करोति विशेषतः ॥ २६ ॥ यथा भागवतं शास्त्रं तथा भागवतो नरः ॥ उभयोरंतरं नास्ति हरहर्योस्तथैव च
॥ २७ ॥ नीलीक्षेत्रं तु यो याति मूलकं भक्षयेत्तु यः ॥ नैवास्ति नरकोद्धारं कल्पकोटिशतैरपि ॥ २८ ॥ नीलीकर्म तु यः कुर्य्याद्ब्राह्मणो लोभमो

१ वले-इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हितः ॥ नाप्नोति सुकृतं किंचित्कुर्य्याद्वा रसविक्रयम् ॥ २९ ॥ प्रसीदति न विश्वात्मा वैष्णवे चापमानिते ॥ अश्वत्थं छेदयेद्यो वै एकैकस्मिंश्च
पर्वणि ॥ ३० ॥ मन्वंतराणि तावंति रौरवे वसतिर्भवेत् ॥ अरिष्टकाष्ठैर्दैत्येंद्र कार्य्यं यः कुरुते क्वचित् ॥ न पूजामर्घदानं च तस्य गृह्णाति भास्करः
॥ ३१ ॥ छेदापकस्य चार्के तु च्छेदकस्य च दैत्यज ॥ शतं जन्मानि दारिद्र्यं जायते च सरोगता ॥ ३२ ॥ रोपयेत्पालयेद्यो वै सूर्य्यवृक्षं नरो
त्तमः ॥ सप्तकल्पं वसेत्सोऽत्र समीपे भास्करस्य हि ॥ ३३ ॥ रोपितैर्देववृक्षैस्तु यत्फलं लक्षकोटिभिः ॥ न्यग्रोधवृक्षेणैकेन रोपितेन फलं हि
तत् ॥ ३४ ॥ धात्रीद्रुमेऽप्येवमेव फलं भवति रोपिते ॥ तुलसीरोपणे चैव अधिकं चापि सुव्रत ॥ अमरत्वं च ते यांति नात्र कार्य्या
विचारणा ॥ ३५ ॥ द्वारकां कलिकाले तु प्रातरुत्थाय कीर्तयेत् ॥ स सर्वपापनिर्मुक्तः स्वर्गं याति न संशयः ॥ ३६ ॥ रोहिणीसहिता ये
न द्वादशी समुपोषिता ॥ महापातकसंयुक्तः कल्पांते नाकमाप्नुयात् ॥ ३७ ॥ वासरः को विना सूर्य्यं विना सोमेन का निशा ॥ विना वृक्षेण
को ग्रामो द्वादशी किं व्रतं विना ॥ ३८ ॥ गृहं च नरकं तस्य यमदण्डं द्वितीयकम् ॥ न यत्र पठते नित्यं विष्णोर्नामसहस्रकम् ॥ ३९ ॥ नरकं
च भवेत्तस्य द्वितीयं यमशासनम् ॥ नैव भागवतं यत्र पुराणं गीयते कलौ ॥ अन्धकूपेषु क्षिप्यंते ज्वलितेषु हुताशने ॥ ४० ॥ द्विषंति ये भागवतं
न कुर्वंति दिनं हरेः ॥ यमदूतैश्च नीयन्ते तथा भूमौ भवंति ते ॥ ४१ ॥ वाच्यमानं न शृण्वंति हरेश्चरितमुत्तमम् ॥ करपत्रैश्च पीडयंते सुतीव्रैर्यम
शासनात् ॥ ४२ ॥ निन्दां कुर्वंति ये पापा वैष्णवानां महात्मनाम् ॥ तेषां निरयपातस्तु यावदाभूतसंप्लवम् ॥ ४३ ॥ गोकोटितीर्थादधिकं स्नानं
तत्राधिकं भवेत् ॥ ये पश्यंति महापुण्यां गोपीचंदनमृत्तिकाम् ॥ गंगास्नानफलं तेषां जायते नात्र संशयः ॥ ४४ ॥ वैष्णवानां प्रयच्छंति गोपीचं
दनमृत्तिकाम् ॥ येषां ललाटे तिलकं गोपीचंदनसंभवम् ॥ ४५ ॥ गोपीचंदनपुंड्रेण द्वादश्यां जागरे कृते ॥ विष्णोर्नामसहस्रस्य पाठेन मुक्तिमाप्नु
यात् ॥ ४६ ॥ ये नित्यं प्रातरुत्थाय वैष्णवानां तु कीर्तनम् ॥ गोमतीस्मरणं कुर्युः कृष्णतुल्या न संशयः ॥ ४७ ॥ ये नित्यं प्रातरुत्थाय द्वारकेति
वदंति च ॥ तीर्थकोटिभवं पुण्यं लभंते च दिनेदिने ॥ ४८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे
चतुर्थे द्वारकामाहात्म्ये द्वादशीव्रतादिमाहात्म्यवर्णनंनामैकोनत्रिंशत्तमोऽध्यायः ॥ २९ ॥ ॥ छ ॥ ॥ श्रीप्रह्लाद उवाच ॥ ॥ स्वनामांकित
पत्रैस्तु श्रीपतिं योऽर्चयेत वै ॥ सप्तलोकाननुप्राप्य सप्तद्वीपाधिपो भवेत् ॥ १ ॥ मांकान्तवृक्षपत्रैस्तु योऽर्चयेत सदा हरिम् ॥ पुण्यं भवति तस्येह

१ यः—इति शेषः । २ स्वनामांकितपत्रैः—कृष्णनामांकितपत्रैः—कृष्णतुलसीपत्रैः—इत्यर्थः । ३ माकान्तवृक्षपत्रैः—बिल्ववृक्षपत्रैः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





वाजिमेधायुतं कलौ ॥ २ ॥ लक्ष्मीं सरस्वतीं देवीं सावित्रीं चंडिकां तथा ॥ पूजयित्वा दिवं याति पत्रैः श्रीवृक्षसंभवैः ॥ ३ ॥ तुलस्या अधिकं प्रोक्तं दलं श्रीवृक्षसंभवम् ॥ तस्मान्नित्यं प्रयत्नेन पूजनीयः सदाऽच्युतः ॥ ४ ॥ द्वादश्यां रविवारेण श्रीवृक्षमर्चयन्ति ये ॥ ब्रह्महत्यादिकैः पापैर्न लिप्यंते कृतैरपि ॥ ५ ॥ यथा करिपदेऽन्यानि प्रविशंति पदानि च ॥ तथा सर्वाणि पुण्यानि प्रविष्टानि हरेर्दिने ॥ ६ ॥ अध्रुवेणैव देहेन प्रतिक्षणविनाशिना ॥ कथं नोपासते जंतुर्द्वादशीं जागरान्विताम् ॥ ७ ॥ अतीतान्पुरुषान्सप्त भविष्यांश्च चतुर्दश ॥ नरकात्तारयेत्सर्वाँल्लोकान्कृष्णेति कीर्तनात् ॥ न ते जीवंति लोकेऽस्मिन्यत्रतत्र स्थिता नराः ॥ ८ ॥ द्वारकायां च संप्राप्तास्त्रिषु लोकेषु वंदिताः ॥ द्वारकायां प्रकुर्वंति यतीनां भोजनं स्थितिम् ॥ ग्रासेग्रासे मखशतं ते लभंते फलं नराः ॥९ ॥ यतीनां ये प्रयच्छंति कौपीनाच्छादनादिकम् ॥ वसतां द्वारकामध्ये यथाशक्त्या तु भोजनम् ॥ शृणु पुण्यं प्रवक्ष्यामि समासेन हि दैत्यज ॥ १० ॥ कोटिभिर्वेदविद्विर्गयायां पितृवत्सलैः ॥ भोजितैर्यत्समाप्नोति तत्फलं दैत्यनायक ॥ ११ ॥ एकस्मिन्भोजिते पौत्र भिक्षुके फलमीदृशम् ॥ दातव्यं भिक्षुके चान्नं कुर्याद्वै चात्मविक्रयम् ॥ १२ ॥ धन्यास्ते यतयः सर्वे ये वसंति कलौ युगे ॥ कृष्णमाश्रित्य दैत्येन्द्र द्वारकायां दिनेदिने ॥ १३ ॥ प्राणिनो ये मृताः केचिद्द्वारकां कृष्णसन्निधौ ॥ पापिनस्तत्पदं यांति भित्त्वा सूर्यस्य मंडलम् ॥ १४ ॥ द्वारकाचक्रतीर्थे ये निवसंति नरोत्तमाः ॥ तेषां निवारिताः सर्वे यमेन यमकिंकराः ॥ १५ ॥ स्नात्वा पश्यंति गोमत्यां कृष्णं कलिमलापहम् ॥ न तेषां विषये यूयं न चास्मद्विषये तु ते ॥ १६ ॥ अपि कीटः पतंगो वा वृक्षा वा ये तदाश्रिताः ॥ यांति ते कृष्णसदनं संसारे न पुनर्हि ते ॥ १७ ॥ किं पुनर्द्विजवर्य्याश्च क्षत्रियाश्च विशेषतः ॥ त्रिवर्णपूजासंयुक्ताः शूद्रास्तत्र निवासिनः ॥ १८ ॥ गीतां पठंति कृष्णाग्रे कार्तिकं सकलं द्विजाः ॥ एकभक्तेन नक्तेन तथैवायाचितेन च ॥ १९ ॥ त्रिरात्रेणापि कृच्छ्रेण तथा चान्द्रायणेन च ॥ यावकैस्तप्तकृच्छ्रैर्वा पक्षमाससमुपोषणैः ॥ २० ॥ क्षपयंति च ये मासं कार्तिकं व्रतचारिणः ॥ स्नात्वा वै गोमतीनीरे तथा वै रुक्मिणीह्रदे ॥ २१ ॥ शंखचक्रगदाहस्ताः कृष्णरूपा भवंति ते ॥ उपोष्यैकादशीं शुद्धां दशमीसंगवर्जिताम् ॥ २२ ॥ श्राद्धं कुर्वंति द्वादश्यां चक्रतीर्थे च निर्मले ॥ ब्राह्मणान्भोजयित्वा च मधुपायससर्पिषा ॥ २३ ॥ संतर्प्य विधिवद्भक्त्या शक्त्या दत्त्वा तु दक्षिणाम् ॥ गोभूहिरण्यवासांसि तांबूलं च फलानि च ॥ २४ ॥ उपानहौ च्छत्रसुमं जलपूर्णा घटास्तथा ॥ पक्वान्नसंयुताः शुभ्राः सफला दक्षिणान्विताः ॥ २५ ॥ एवं यः कुरुते सम्यक्कृष्णमुद्दिश्य कार्तिके ॥ मार्कंडेय



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समा प्रीतिः पितॄणां जायते ध्रुवम् ॥ २६ ॥ कृष्णस्य त्रिदशैः सार्द्धं तुष्टिर्भवति चाक्षया ॥ २७ ॥ ये कार्तिके पुण्यतमा मनुष्यास्तिष्ठंति मासं व्रतदानयुक्ताः ॥ रथांगतीर्थे कृतपूतगात्रास्ते यांति पुण्यं पदमव्ययं च ॥ २८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभास खण्डे चतुर्थे द्वारकामाहात्म्ये कार्तिके चक्रतीर्थस्नानदानश्राद्धादिमाहात्म्यवर्णनंनाम चत्वारिंशत्तमोऽध्यायः ॥ ४० ॥ छ ॥ ॥ श्रीप्रह्लाद उवाच ॥ ॥ धन्यास्तु नरलोकास्ते गोमत्यां तु कृतोदकाः ॥ पूजयिष्यंति ये कृष्णं केतकीतुलसीदलैः ॥ १ ॥ न तेषां संभवोऽस्तीह घोरसंसारगह्वरे ॥ तेषां मृत्युः पुनर्नास्ति ह्यमरत्वं हि ते गताः ॥ २ ॥ अन्यत्र वै यतीनां तु कोटीनां यत्फलं भवेत् ॥ द्वारकायां तु चैकेन भोजितेन ततोऽधिकम् ॥ ३ ॥ अतीतं वर्त्तमानं च भविष्यच्च पातकम् ॥ निर्द्दहेन्नास्ति संदेहो द्वारका मनसा स्मृता ॥ ४ ॥ ज्ञात्वा कलियुगे घोरे हाहाभूतमचेतनम् ॥ द्वारकां ये न मुञ्चंति कृतार्थास्ते नरोत्तमाः ॥ ५ ॥ मृतानां यत्र जंतूनां श्वेतद्वीपे स्थितिः सदा ॥ ६ ॥ अग्निष्वात्ता बर्हिषद आज्यपाः सोमपाश्च ये ॥ एकविंशतिः पितृगणा द्वारकायां वसंति ते ॥ ७ ॥ पुष्करादीनि तीर्थानि गंगाद्याः सरितस्तथा ॥ कुरुक्षेत्रादिक्षेत्राणि काश्यादीन्यूषराणि च ॥ ८ ॥ गयादिपितृतीर्थानि प्रभासाद्यानि यानि च ॥ स्थानानि यानि पुण्यानि ग्रामाश्च निवसंति वै ॥ ९ ॥ काश्यादिपुर्यो या नित्यं निवसंति कलौ युगे ॥ नित्यं कृष्णस्य सदने पापिनां मुक्तिदे सदा ॥ १० ॥ वैशाखशुक्लद्वादश्यां प्रबोधिन्यां शेषतः ॥ वैशाख्यां दैत्यशार्दूल कल्पादिषु युगादिषु ॥ ११ ॥ चंद्रसूर्योपरागेषु मन्वादिषु न संशयः ॥ व्यतीपातेषु संक्रांतौ वैधृतौ दैत्यनायक ॥ १२ ॥ तिलोदकं च यद्दत्तं तत्स्थले पितृभक्तितः ॥ तत्सर्वमक्षयं प्रोक्तं गोमत्यां स्नानपूर्वकम् ॥ १३ ॥ येऽत्र श्राद्धं प्रकुर्वंति पिंडदानपुरःसरम् ॥ तेषामत्राक्षया तृप्तिः पितॄणामुपजायते ॥ १४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे चतुथ द्वारकामाहात्म्ये गोमतीस्नानकृष्णपूजनयतिभोजनदानश्राद्धादिसत्फलवर्णनंनामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥ ॥ छ ॥ ॥ प्रह्लाद उवाच ॥ ॥ वृषोत्सर्गं करिष्यंति वैशाख्यां चैव कार्तिके ॥ द्वारकायां पिशाचत्वं मुक्त्वा यांति पितामहाः ॥ १ ॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः ॥ एवंविधानि पापानि कृत्वा चैव गुरूण्यपि ॥ २ ॥ स्नानमात्रेण गोमत्यां श्रीकृष्णस्य च दर्शनात् ॥ विलयं यांति दैत्येन्द्र कल्पकोटिकृतान्यपि ॥ ३ ॥ रुक्मिणीं ये प्रपश्यंति भक्तियुक्ताः कलौ नराः ॥ पुरीं प्रदक्षिणां कृत्वा जप्त्वा नामसहस्रकम् ॥ ४ ॥ प्रदक्षिणीकृतं सर्वं ब्रह्मांडं नात्र संशयः ॥ महादानैस्तु चान्यत्र यत्फलं परिकीर्तितम् ॥ द्वारकायां तु रुक्मिण्यां दृष्टायां जायते तदा ॥ ५ ॥ द्वादशीवासरे प्राप्ते माहात्म्यं द्वारकाभवम् ॥ पठते संनिधौ विष्णोः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



शृणु वक्ष्यामि तत्फलम् ॥ ६ ॥ सर्वेषु चैव लोकेषु कामचारी विराजते ॥ पद्मवर्णेन यानेन किंकिणीजालमालिना ॥ ७ ॥ दिव्यश्वेताश्वयुक्तेन कामगेन यथासुखम् ॥ आभूतसंप्लवं यावत्क्रीडतेऽप्सरसां गणैः ॥ ८ ॥ कृतकृत्यश्च भवति कल्पकोटिसमन्वितः ॥ यथा निर्मथनादग्निः सर्वकाष्ठेषु दृश्यते ॥ तथा च दृश्यते धर्मो द्वादशीसेवनान्नरे ॥९॥ अतः परं प्रवक्ष्यामि पितृभिः परिकीर्तितम् ॥ अपि स्यात्स कुलेऽस्माकं गोमत्यां श्रद्धया नरः ॥ स्नात्वा संपूज्य कृष्णं च श्राद्धं कुर्यात्सपिण्डकम् ॥ १० ॥ अपि स्यात्स कुलेऽस्माकं गोमत्युदधिसंगमे ॥ स्नात्वा पश्यति यः कृष्णमस्माकं तारणाय वै ॥ ११ ॥ अपि स्यात्स कुलेऽस्माकं यः श्रुत्वा ब्राह्मणाननात् ॥ द्वारकामाहात्म्यमिदं पूजयिष्यति भक्तितः ॥ १२ ॥ भविष्यति कुलेऽस्माकं यो गच्छेद्द्वारकां पुरीम् ॥ संप्राप्य द्वादशीं शुद्धां यः करिष्यति जागरम् ॥ १३ ॥ भविष्यति कुलेऽस्माकं पुत्रो वा दुहिता तथा ॥ स्तुवन्नामसहस्रं तु कृष्णस्याग्रे पठिष्यति ॥ १४ ॥ अपि स्यात्स कुलेऽस्माकं भविष्यति धृतव्रतः ॥ गोपीचन्दनदानेन यस्तोषयति वैष्णवान् ॥ ॥ १५ ॥ अपि स्यात्स कुलेऽस्माकं वैष्णवानां तु सन्निधौ ॥ द्वारकायाश्च माहात्म्यं पठिष्यति जितेन्द्रियः ॥ १६ ॥ भविष्यति कुलेऽस्माकं माहात्म्यं द्वारकाभवम् ॥ लिखित्वा कृष्णतुष्ट्यर्थं स्वगृहे धारयिष्यति ॥ १७ ॥ स्वर्णदानं च गोदानं भूमिदानं तथैव च ॥ यावज्जीवं भवेद्दत्तं येनेदं धारितं कलौ ॥ १८ ॥ तप्तकृच्छ्रं महाकृच्छ्रं मासोपोषणमेव च ॥ यावज्जीवं कृतं तेन येनेदं श्रावितं कलौ ॥ १९ ॥ प्रायश्चित्तानि चीर्णानि पापानां नाशनाय वै ॥ द्वारकायाश्च माहात्म्यं येन विस्तारितं कलौ ॥ २० ॥ तावत्तिष्ठंति पुरुषे ब्रह्महत्यादिकानि च ॥ यावन्न लिखते जंतुर्माहात्म्यं द्वारकाभवम् ॥ २१ ॥ दानैः सर्वैश्च किं तस्य सर्वतीर्थावगाहनैः ॥ द्वारकायाश्च माहात्म्यं येनेदं लिखितं गृहे ॥ २२ ॥ सर्वदुःखप्रशमनं सर्वकार्य्यप्रसाधनम् ॥ चतुर्वर्गप्रदं नित्यं हरिभक्तिविवर्द्धनम् ॥ २३ ॥ न चाधिर्भवते नूनं याम्यं तस्य भयं नहि ॥ माहात्म्यं पठते यत्र द्वारकायाः समुद्भवम् ॥ २४ ॥ लिखितं तिष्ठते यस्य गृहे तत्तीर्थमेव च ॥ बलाच्छृणुष्व माहात्म्यं द्वारकायाः समुद्भवम् ॥ २५ ॥ विधिमन्त्रक्रियाहीनां पूजां गृह्णाति केशवः ॥ माहात्म्यं तिष्ठते नित्यं लिखितं यस्य वेश्मनि ॥ न तस्यागःसहस्रैस्तु कृतैर्लिप्यति मानवः ॥ २६ ॥ यः पठेच्छृणुते वापि माहात्म्यं द्वारकाभवम् ॥ न भवेद्भूतवैकल्यं धर्मवैकल्यमेव च ॥ २७ ॥ यः स्मरेत्प्रातरुत्थाय माहात्म्यं द्वारकाभवम् ॥ द्वादशीनां च सर्वासां यच्चोक्तं लभते फलम् ॥ २८ ॥ त्रिदशैः पूज्यते नित्यं वन्द्यते सिद्धचारणैः ॥ माहात्म्यं पठते यो वै द्वारकायाः समु

१ कुले—इ० पा० । २ नित्यम्—इ० पा० ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रवम् ॥ २९ ॥ द्वारका वसते यत्र तत्र विष्णुः सनातनः ॥ तत्र तीर्थानि सर्वाणि सर्वे देवाः सवासवाः ॥ यज्ञा वेदाश्च ऋषयस्त्रैलोक्यं सचरा
चरम् ॥ ३० ॥ शक्तो हि द्वारकां गंतुं मानवो न हि पुत्रक ॥ कृष्णदर्शनजं पुण्यं माहात्म्यं पठतो भवेत् ॥ ३१ ॥ सत्यं शौचं श्रुतं वित्तं
सुशीलं च क्षमाऽऽर्जवम् ॥ सर्वं च निष्फलं तस्य माहात्म्यं न शृणोति यः ॥ ३२ ॥ षण्मासे च भवेत्पुत्रो लक्ष्मीश्चैव विवर्द्धते ॥ तस्य यः शृणुते
भक्त्या माहात्म्यं द्वारकाभवम् ॥ ३३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखंडे चतुर्थे द्वारकामाहात्म्ये
द्वारकाक्षेत्रे वृषोत्सर्गादिक्रियाकरणद्वारकामाहात्म्यश्रवणादिफलवर्णनंनाम द्विचत्वारिंशत्तमोऽध्यायः ॥ ४२ ॥ ॥ छ ॥ ॥ प्रह्लाद उवाच ॥ ॥
सावित्रीं च भवानीं च दुर्गां चैव सरस्वतीम् ॥ योऽर्चयेत्तुलसीपत्रैः सर्वकामसमन्वितः ॥ १ ॥ गृहीत्वा तुलसीपत्रं भक्त्या विष्णुं समर्चयेत् ॥
अर्चितं तेन सकलं सदेवासुरमानुषम् ॥ २ ॥ चतुर्दश्यां महेशानं पौर्णमास्यां पितामहम् ॥ येऽर्चयन्ति च सप्तम्यां तुलस्या च गणाधिपम् ॥ ३ ॥
शंखोदकं तीर्थवराद्वरिष्ठं पादोदकं तीर्थवराद्वरिष्ठम् ॥ नैवेद्यशेषं क्रतुकोटितुल्यं निर्माल्यशेषं व्रतदानतुल्यम् ॥ ४ ॥ मुकुन्दाशनशेषं तु यो
भुनक्ति दिनेदिने ॥ सिक्थेसिक्थे भवेत्पुण्यं चान्द्रायणशताधिकम् ॥ ५ ॥ नैवेद्यशेषं तुलसीविमिश्रं विशेषतः पादजलेन विष्णोः ॥ योऽश्नाति
नित्यं पुरुषो मुरारेः प्राप्नोति यज्ञायुतकोटिपुण्यम् ॥ ६ ॥ यः श्राद्धकाले हरिभुक्तशेषं ददाति भक्त्या पितृदेवतानाम् ॥ तेनैव पिंडात्सुतिलैर्विमि
श्रादाकल्पकोटिं पितरः सुतृप्ताः ॥ ७ ॥ स्नानार्चनक्रियाकाले घंटावाद्यं करोति यः ॥ पुरतो वासुदेवस्य गवां कोटिफलं लभेत् ॥ ८ ॥ सर्ववाद्य
मयी घंटा केशवस्य सदा प्रिया ॥ वादनाल्लभते पुण्यं यज्ञकोटिफलं नरः ॥ ९ ॥ वादित्राणामभावे तु पूजाकाले च सर्वदा ॥ घंटावाद्यं
नरैः कार्य्यं सर्ववाद्यमयी यतः ॥ १० ॥ तुलसीकाष्ठसंभूतं चन्दनं यच्छते हरेः ॥ निर्दहेत्पातकं सर्वं पूर्वजन्मशतार्जितम् ॥ ११ ॥ ददाति पितृ
पिंडेषु तुलसीकाष्ठचन्दनम् ॥ पितॄणां जायते तृप्तिर्गयाश्राद्धेन वै तथा ॥ १२ ॥ सर्वेषामेव देवानां तुलसीकाष्ठचन्दनम् ॥ पितॄणां च विशेषेण
सदाऽभीष्टं हरेः कलौ ॥ १३ ॥ हरेर्भागवता भूत्वा तुलसीकाष्ठचन्दनम् ॥ नार्पयंति सदा विष्णोर्न ते भागवताः कलौ ॥ १४ ॥ शरीरं दह्यते
यस्य तुलसीकाष्ठवह्निना ॥ नीयमानो यमेनापि विष्णुलोकं स गच्छति ॥ १५ ॥ यद्येकं तुलसीकाष्ठं मध्ये काष्ठस्य यस्य हि ॥ दाहकाले
भवेन्मुक्तः पापकोटिशतायुतैः ॥ १६ ॥ दह्यमानं नरं दृष्ट्वा तुलसीकाष्ठवह्निना ॥ जन्मकोटिसहस्रैस्तु तोषितस्तैर्जनार्दनः ॥ १७ ॥ दह्य
मानं नरं सर्वे तुलसीकाष्ठवह्निना ॥ विमानस्थाः सुरगणाः क्षिपंति कुसुमांजलीन् ॥ १८ ॥ नृत्यंत्योऽप्सरसो हृष्टा गीतं गायन्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सुस्वरम् ॥ ज्वलते यत्र दैत्येन्द्र तुलसीकाष्ठपावकः ॥ १९ ॥ कुरुते वीक्षणं विष्णुः सन्तुष्टः सह शंभुना ॥ २० ॥ गृहीत्वा तं करे शौरिः पुरुषं स्वयमग्रतः ॥ मार्जते तस्य पापानि पश्यतां त्रिदिवौकसाम् ॥ महोत्सवं च कृत्वा तु जयशब्दपुरःसरम् ॥ २१ ॥ ॥ सूत उवाच ॥ ॥ प्रह्लादेनोदितं श्रुत्वा माहात्म्यं द्वारकाभवम् ॥ प्रहृष्टा ऋषयः सर्वे तथा दैत्येश्वरो बलिः ॥ २२ ॥ ततः सर्वेऽभिनन्द्यैनं प्रह्लादं दैत्यपुङ्गवम् ॥ उद्युक्ता द्वारकां गत्वा द्रष्टुं कृष्णमुखाम्बुजम् ॥ २३ ॥ ततस्ते बलिना सार्धं मुनयः संशितव्रताः ॥ आगत्य द्वारकां स्नात्वा गोमत्यां विधिपूर्वकम् ॥ २४ ॥ कृष्णं दृष्ट्वा समभ्यर्च्य कृत्वा यात्रां यथाविधि ॥ दत्त्वा दानानि बहुशः कृतकृत्यास्ततोऽभवन् ॥ २५ ॥ जग्मुः स्वीयानि स्थानानि बलिः पातालमाययौ ॥ प्रह्लादं च प्रणम्याशु मेने स्वस्य कृतार्थताम् ॥ २६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमे प्रभासखण्डे चतुर्थे द्वारकामाहात्म्ये द्वारकामाहात्म्यश्रवणादिफलश्रुतिवर्णनपुरःसरतुलसीपत्रकाष्ठमहिमवर्णनपूर्वकं प्रह्लादद्विजसंवादसमाप्त्यनंतरं बलिना सह द्विजकृतद्वारकायात्राविधिवर्णनंनाम त्रिचत्वारिंशत्तमोऽध्यायः ॥ ४३ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एतत्पुराणमखिलं पुरा स्कन्देन भाषितम् ॥ भृगवे ब्रह्मपुत्राय तस्माल्लेभे तथांऽगिराः ॥ १ ॥ ततश्च च्यवनः प्राप ऋचीकश्च ततो मुनिः ॥ एवं परंपरा प्राप्तं सर्वेषु भुवनेष्वपि ॥ २ ॥ स्कान्दं पुराणमेतच्च कुमारेण पुरोद्धृतम् ॥ यः शृणोति सतां मध्ये नरः पापाद्विमुच्यते ॥ ३ ॥ इदं पुराणमायुष्यं चतुर्वर्णसुखप्रदम् ॥ निर्मितं षण्मुखेनेह नियतं सुमहात्मना ॥ ४ ॥ एवमेतत्समाख्यातमाख्यानं भद्रमस्तु वः ॥ ५ ॥ मण्डितं सप्तभिः खण्डैः स्कान्दं यः शृणुयान्नरः ॥ न तस्य पुण्यसंख्यानं कर्तुं शक्येत केनचित् ॥ ६ ॥ य इदं [1]धर्ममाहात्म्यं ब्राह्मणाय प्रयच्छति ॥ स्वर्गलोके वसेत्तावद्यावदक्षरसंख्यया ॥ ७ ॥ यथा हि वर्षतो धारा यथा वा दिवि तारकाः ॥ गंगायां सिकता यद्वत्तद्वत्संख्या न विद्यते ॥ ८ ॥ यो नरः शृणुयाद्भक्त्या दिनानि च कियन्ति वै ॥ सर्वार्थसिद्धो भवति य एतत्पठते नरः ॥ ९ ॥ पुत्रार्थी लभते पुत्रान्धनार्थी लभते धनम् ॥ लभते पतिकामा या पतिं कन्या मनोरमम् ॥ १० ॥ समागमं लभन्ते च बान्धवाश्च प्रवासिभिः ॥ स्कान्दं पुराणं श्रुत्वा तु पुमानाप्नोति वाञ्छितम् ॥ ११ ॥ शृण्वतः पठतश्चैव सर्वकामप्रदं नृणाम् ॥ १२ ॥ पुण्यं श्रुत्वा पुराणं वै दीर्घमायुश्च विन्दति ॥ महीं विजयते राजा शत्रूंश्चाप्यधितिष्ठति ॥ १३ ॥ वेदविच्च भवेद्विप्रः क्षत्रियो राज्यमाप्नुयात् ॥ धनं धान्यं तथा वैश्यः शूद्रः सुखमवाप्नुयात् ॥ १४ ॥ अध्यायमेकं शृणुयाच्छ्लोकं श्लोकार्धमेव वा ॥ यः श्लोक

१ धर्ममाहात्म्यम्—धर्ममाहात्म्योपनिबद्धं स्कान्दमहापुराणपुस्तकम् । एतेन स्कान्दमहापुराणपुस्तकदानस्य महन्माहात्म्यं सूचितम् ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पादं शृणुयाद्विष्णुलोकं स गच्छति ॥ १९ ॥ श्रुत्वा पुराणमेतद्धि वाचक यस्तु पूजयेत् ॥ तेन ब्रह्मा च विष्णुश्च रुद्रश्चैव प्रपूजितः ॥ १६ ॥ एकम
प्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत् ॥ पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा ह्यनृणी भवेत् ॥ १७ ॥ अतः संपूजनीयस्तु व्यासः शास्त्रोपदेशकः ॥ गोभू
हिरण्यवस्त्राद्यैर्भोजनैः सार्वकामिकैः ॥ १८ ॥ य एवं भक्तियुक्तस्तु श्रुत्वा शास्त्रमनुत्तमम् ॥ पूजयेदुपदेष्टारं स शैवं पदमाप्नुयात् ॥ १९ ॥ पुराणश्र
वणादेव अनेकभवसंचितम् ॥ पापं प्रशममायाति सर्वतीर्थफलं लभेत् ॥ २० ॥ अमृतेनोदरस्थेन म्रियन्ते सर्वदेवताः ॥ कण्ठस्थितविषेणापि यो
जीवति स पातु वः ॥ २१ ॥ ॥ व्यास उवाच ॥ ॥ इत्युक्त्वोपरते सूते शौनकादिमहर्षयः ॥ संपूज्य विधिवत्सूतं प्रशस्याथाभ्यनन्दयन् ॥
॥ २२ ॥ ऋषय ऊचुः ॥ ॥ कथितो भवता सर्गः प्रतिसर्गस्तथैव च ॥ वंशानुवंशचरितं पुराणानामनुक्रमः ॥ २३ ॥ मन्वन्तरप्रमाणं च ब्रह्मा
ण्डस्य च विस्तरः ॥ ज्योतिश्चक्रस्वरूपं च यथावदनुवर्णितम् ॥ २४ ॥ धन्याः स्म कृतकृत्याः स्म वयं तव मुखाम्बुजात् ॥ स्कान्दं महापुराणं हि
श्रुत्वा सूतातिहर्षिताः ॥ २५ ॥ वयं महर्षयो विप्राः प्रदद्मोऽद्य तवाऽऽशिषः ॥ व्यासशिष्य महाप्राज्ञ चिरं जीव सुखी भव ॥ २६ ॥ इति दत्त्वाऽऽ
शिषस्तस्मै दत्त्वा वासोविभूषणम् ॥ विसृज्य लोमशं सूतं यज्ञकर्माण्यथाचरन् ॥ २७ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां
सप्तमे प्रभासखण्डे चतुर्थे द्वारकामाहात्म्ये स्कान्दमहापुराणश्रवणपठनपुस्तकप्रदानपौराणिकव्यासपूजनमाहात्म्यवर्णनपूर्वकं समस्तस्कान्दमहा
पुराणग्रन्थसमाप्त्युपसंहारसूतसत्कारवृत्तान्तवर्णनंनाम चतुश्चत्वारिंशत्तमोऽध्यायः ॥ ४४ ॥ ॥ छ ॥ ॥ श्रीः ॥ ॥ छ ॥ ॥

## इति श्रीस्कान्दे महापुराणे सप्तमे प्रभासखण्डे चतुर्थं द्वारकामाहात्म्यं सम्पूर्णम् ॥ (७-४) ॥

### ॥ इति श्रीस्कान्दे महापुराणे सप्तमं प्रभासखण्डं सम्पूर्णम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्रीस्कांदे महापुराणे सप्तमे प्रभासखण्डे चतुर्थं द्वारकामाहात्म्यं संपूर्णम् ॥ ( ७-४ ) ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना
स्वकीये "श्रीवेङ्कटेश्वर" ( स्टीम् ) मुद्रणालये मुद्रितम् ।
संवत् १९६६, शके १८३१.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्रीस्कान्दे महापुराणे सप्तमं प्रभासखण्डं समाप्तम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu